CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ श्रीस्कान्दमहापुराणस्थविषयानुक्रमणिका प्रारभ्यते ।

अथ श्रीस्कान्दे महापुराणे प्रथममाहेश्वरखण्डस्थविषयानुक्रमणिका. १

अथ माहेश्वरखण्डे प्रथमं केदारखण्डम् ॥ (१-१) ॥

अध्यायाः	विषयाः	प०	पृ०
१	मङ्गलाचरणम्, अथ स्कान्दमहापुराणोपक्रमः, तत्र नैमिषारण्ये शौनकादिमहर्षिदर्शनार्थं व्यासशिष्यस्य लोमशसूतमहर्षेरागमनम्, शौनकादिमहर्षिभिर्लोमशं प्रति श्रीशिवमाहात्म्यश्रवणेच्छया प्रश्नकरणम्, अथ लोमशमहर्षिणा पुराणोपक्रमपूर्वकं शिवपरममहिमोपक्रमवर्णनम्, तत्रादौ—दक्षयज्ञविध्वंसवृत्तान्तवर्णनम्, तत्र दक्षेण शिवनिंदाकरणपूर्वकं शिवाय शिवगणेभ्यश्च शापप्रदानम्, शिवशिवकिंकरशापमसहमानेन नन्दिना दक्षादिब्राह्मणेभ्यः शापप्रदानम्. अथ शङ्करेण नन्दिनः सान्त्वनम्, दक्षस्य शङ्करनिन्दनेनाऽशान्तिवर्णनम्.	१	१
२	दक्षेण कनखलक्षेत्रे यज्ञकर्मप्रारम्भकरणम्, तत्र यज्ञे वसिष्ठादिमहर्षीणां विष्णुब्रह्मेन्द्रप्रभृतीनां देवतानां चागमनम्, तत्र शंकरमनागतं दृष्ट्वा दधीचिमहर्षिणा दक्षं प्रति शंकरानयनार्थमुपदेशकरणम्, दक्षेण शङ्करानादरप्रदर्शनम्, दधीचिना शंकरानादरणाऽन्यायेन यज्ञविनाशमाश्राव्य यज्ञवाटान्निर्गमनम्, दक्षेण देवयजनारम्भकरणम्, अथ गन्धमादनपर्वते विमानस्थया दाक्षायण्या सत्या स्वपितुर्दक्षस्य यज्ञसमारंभे स्वपत्नीभिः सह गच्छतश्चन्द्रस्य मुखेन यज्ञवृत्तांतं समाकर्ण्य शिवसमीपं समेत्य स्वपितृमंदिरं प्रति स्वस्या जिगमिषासमुत्कण्ठाप्रदर्शनम्, शिवेन क्रियमाणेऽप्युपदेशे सत्याऽत्याग्रहेण स्वस्या गमनार्थं शिवसकाशादाज्ञाप्रार्थनम्, पित्राऽवमानितायाः सत्याः पुनरनागमनं शिवेन निर्धार्य नन्द्यादिभिः सह तस्याः प्रेषणम्, दक्षयज्ञं प्रति सतीदेव्या गमनवर्णनम्.	१	२
३	सतीदेव्या पितृसमीपं गत्वा भृग्वादिसंनिधौ शङ्करानाह्वानकारणे पृष्टे दक्षेण शिवनिन्दाकरणम्, शिवनिन्दामात्मापमानं चाऽसहमानया सत्या हुताशने प्रवेशकरणम्, तामनुसमागतानां द्व्ययुतगणानां शस्त्रप्रहारैः स्वांगविच्छेदेन नाशः, लोकपालादीनामृषीणां च भयेन स्तब्धीभावः, शंकरेण नारदमुखात्तं वृत्तान्तं श्रुत्वाऽतिकोपेन पर्वतशिखरोपरि निजजटास्फोटनम्, ततो वीरभद्रकालीभूतकोटिप्रादुर्भावः, रुद्रनिःश्वासतः शतसंख्याकज्वरत्रयोदशसंख्याकसंनिपातोत्पत्तिः, ततः शंकराज्ञया वीरभद्रादीनां दक्षयज्ञवाटं प्रत्यागमनम्, तामायांतीं रुद्रसेनां दृष्ट्वा यज्ञवाटास्थितानां भयात्पलायने शक्रादीनां युद्धार्थं संनहनम्, दक्षेण सर्वदेवप्रार्थनाकरणम्, विष्णुना दक्षनिर्भर्त्सनाकरणम्, कर्मफलदातृत्वेन शिवमहिमवर्णनं च.	३	१
४	वीरभद्रादिभिः सहेन्द्रादिदेवानां युद्धम्, जयचिन्तान्वितेन्द्रपृष्टबृहस्पतिकृतेन्द्रादिनिर्भर्त्सना, वीरभद्रस्य लोकपालपराजयपूर्वकं यज्ञवाटमध्य आगमनम्, ततो विष्ण्वादिदेवैः सह वीरभद्रादीनां द्वंद्वयुद्धारम्भः, शिवगणानां पराजयमदृष्ट्वा विष्णोः स्वधामगमनम्.	४	२
५	विष्णोः स्वधामगमनानन्तरं वीरभद्रादिगणैः सर्वदेवान्विजित्य भृग्वादिमहर्षिविडंवनपूर्वकं दक्षशिरश्छित्त्वा यज्ञाग्निकुण्डे होमकरणम्, सर्वेषां देवर्षिपितृयक्षराक्षसादीनां भीत्या पलायनम्, पुत्रशोकपीडितस्य ब्रह्मणः शंकरं प्रसादयितुं कैलासं प्रति गमनम्, ब्रह्मकृता शिवस्तुतिः, स्तुतिप्रसन्नेन शंकरेण सर्वदेवैः सह दक्षयज्ञमण्डपं प्रत्यागत्य दक्षकवन्धोपरि कूर्चयुक्तच्छागपशुशिरःसंयोजनपूर्वकं दक्षस्य संजीवनम्, दक्षकृता शिवस्तुतिः, स्तुतिप्रसन्नेन शिवेन दक्षायोपदेशकरणम्, शिवब्रह्मादीनां स्वस्वलोकगमनम्, लोमशेन सूतेन शिवोपासनाशिवव्रतविधिमाहात्म्यवर्णनम्,		

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अध्यायाः	विषयाः	प०	पृ०
	शिवभक्तिमाहात्म्यप्रसंगेनेन्द्रद्युम्नसुतस्येन्द्रसेनस्येतिहासवर्णनम्, तत्राऽतिपापिष्ठस्य तस्य यमदूतैर्यमलोकं नीतस्यापि–'आहर प्रहरस्व' इत्यादिशब्दमिषेण पापकर्मस्वपि 'हर' नामोच्चारणप्रभावाद्यमेन सत्कारकरणम, ततःशिवदूतैर्विमानमारोप्य तस्य शिवलोकं प्रति नयनम्, हरनामोच्चारणमहिम्नेन्द्रसेनस्य चण्डनामकगणत्वप्राप्तिवर्णनम्, शिवनाम–भस्म–रुद्राक्ष–त्रिपुंड्रमाहात्म्यम्, शिवपूजनमाहात्म्यम्, तत्प्रसंगेन नन्दिवैश्यकिरातयोरितिहासवर्णनम्, तत्र नन्दिवैश्येन रत्नैराराधिते शिवे किरातेन मुखधृतजलगण्डूषसमर्पणादिरूपभक्तिकरणम्, तद्भक्तिसंतुष्टेन शिवेन किरातस्य किरातप्रार्थनया नंदिवैश्यस्य च महाकालनामकशिवद्वारपालत्वप्रदानम, शिवभक्तिमाहात्म्यम्·	६	१
६	शौनकादिभिः शंकरस्य मूर्तिं विहाय लिंगपूजाप्रवृत्तिविषयके प्रश्ने कृते सति लोमशेन सूतेन–लिंगपूजाप्रवृत्तिवृत्तान्तनिरूपणम्. तत्र दारुवने शंकरस्य नग्नतया भिक्षार्थमटमानस्य दिगंबरं सुन्दरं स्वरूपं निरीक्ष्य मोहितानां समस्तमुनिपत्नीनां शंकरपृष्ठतोऽनुगमनम्, तासां तमनुगमनेन स्वाश्रमाच्छून्यान्निरीक्ष्य कुपितानां तेषामृषीणां शापेन शिवस्य लिंगपतनम्, पतितेन तेन लिंगेन चराचरसमस्तब्रह्मांडं व्याप्यैकरूपेणावस्थानम्, तद्दृष्ट्वा चकितैः सुरादिभिर्विष्णुब्रह्मणोः प्रार्थना, देवप्रार्थनया लिंगपर्यंतशोधनाय पाताले विष्णोर्गमनम्, स्वर्गे च ब्रह्मणो गमनम्, ब्रह्मणो मेरुपृष्ठे सुरभीदर्शनम्, केतकीदर्शनं च, ब्रह्मप्रार्थनया सुरभीकेतकीभ्यां 'ब्रह्मणा लिंगमस्तकं दृष्टम्'इति मृषा साक्ष्यप्रदानप्रतिज्ञानानन्तरं ब्रह्मणः प्रत्यावृत्य पुनः पूर्वस्थानं प्रत्यागमनम्, देवाग्रे च सुरभीकेतकीभ्यां मृषासाक्ष्यप्रदानपूर्वकं 'मया लिङ्गमस्तकं दृष्टम्, इति मिथ्याप्रौढिवादकथनम्, भृग्वादिभिश्च तदनुमोदनम्, विष्णुना च पातालात्प्रत्यावृत्य सर्वदेवाग्रे 'मया लिङ्गान्तो न दृष्टः' इति सत्यभाषणकथनम्, सुरभीकेतक्योर्मृषोक्तिमाकर्ण्य कुपितेन भगवता–आकाशवाण्या–अपवित्रमुखत्वेन सुरभ्याः, शिवपूजानर्हत्वेन केतक्याः, अपूज्यत्वेन ब्रह्मणः, क्लेशादिभागित्वेन तदनुमोदकानां भृग्वादिब्राह्मणानां च शापप्रदानम्, एवमाकाशवाण्या शप्तानां ब्रह्मादीनां लिङ्गं प्रति शरणगमनम्.	१०	१
७	ब्रह्मदेवर्षिकृता शिवस्तुतिः, ब्रह्मादिकृतस्तुतिसन्तुष्टेन शिवेन ब्रह्मादीन्प्रति विष्णुप्रार्थनार्थमाज्ञाकरणम्, ब्रह्मादिभिर्विष्णुस्तवनम्, तत आकाशवाण्या विष्णोः पिण्डीभावेन शिवलिङ्गधारणम्, ततः शिवप्रियेण वीरभद्रेण ब्रह्मादिभिः सह शिवलिङ्गपूजनम्, ततः शंकरस्यानेकैर्देवादिभिरनेकेषु स्थलेषु नानानामकलिङ्गस्थापनम्, तत्रतत्र लिंगार्चनार्थं वीरभद्रांशस्थापनं वीरभद्रादारभ्य लिंगपूजकगुरुपरंपरोत्पत्तिः, नन्दिनो लिंगमहिमप्रशंसकप्रथमाचार्यत्वम्, स्कन्दस्य च लिंगपूजकाचार्यत्वम्, ततश्च लिंगपूजकगुरुपरंपराप्रवृत्तिः, शिवभक्तिमाहात्म्यम्, तत्र पतंग्याः कीटपक्षिण्याः शिवमन्दिरमार्जनपुण्यवशेन काशिराजसुतात्वप्राप्तिवृत्तान्तवर्णनम्, उद्दालकमहर्षेः काशिराजसुतया सुन्दर्याख्यया सह संवादः	११	२
८	शिवभक्तिमाहात्म्यप्रसंगेन–तस्करस्य शिवशिरोऽधिरुह्य घण्टां हरतः शिवलोकप्राप्तिवृत्तान्तः, सर्वजगतः शिवशक्तिमयत्ववर्णनम्, तत्र नराणां लिंगयुक्तत्वम्, स्त्रीणां च पिण्डीभूतत्वम्, शिवविष्ण्वोरभेदवर्णनम्, ब्रह्मादिकृतमणिमयादिलिंगपूजावर्णनम्, प्रह्लादबलिबाणासुरादिदैत्यानां शिवलिंगपूजापरत्ववर्णनम्, शिवार्चनप्रभावाधिगतदुःसहप्रतापरावणनिर्जितैः सुरैर्नन्दिवाक्याच्छिवलिंगाराधने समुद्योगः तत्र प्रसंगेन देवपृष्टेन नन्दिना स्वस्य वानराननत्वकारणवर्णनम्, तत्र रावणशापतो नन्दिनो वानराननत्वप्राप्तिः, नन्दिना च 'वानरैः समेतस्य कस्यापि हस्तेन ते मृत्युर्भविष्यति' इति रावणाय शापदानम्. ततो नन्दिप्रभृतिभिः सर्वैर्देवैर्वैकुंठं गत्वा लिंगस्य पीठिकाभवनाय विष्णोः प्रार्थना, भगवता विष्णुना रावणहननायावतारग्रहणे देवानामाश्वासनम्, विष्णोराज्ञया सर्वदेवानां वानरेष्वंशावतारवर्णनम्, रामावतारः, रामेण रावणहननम्, रावणस्य शिवसायुज्यप्राप्तिः, शिवलिंगार्चनमहिमवर्णनम्.	१३	१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अध्यायाः	विषयाः	प०	पृ०
९	बहस्पतेरपमानेन शक्रस्य राज्यभंगः, वलिपराजितेन शक्रेण ब्रह्मादिभिः सह विष्णुलोकं गत्वा विष्णोः प्रार्थनाकरणम्, विष्णोरुपदेशेन शक्रादीनां वलेः शरणगमनम्, शरणागतस्य शक्रस्य नारदवाक्येन वलिना संमानकरणम्, रत्नलिप्सार्थं बलिना पृष्टेन शक्रेण समुद्रमन्थनोद्योगप्रशंसनम्, ततः समुद्रमन्थनाय मन्दराचलं प्रति देवदानवानां गमनम्, महता प्रयासेन विष्णुसाहाय्येन मन्दराचलमानीय वासुकिं मन्थनरज्जुं विधाय देवदानवैः समुद्रमन्थनारम्भणम्, मथ्यमानात्समुद्राद्धालाहलसमुद्भवः, नारदेन संकटेऽस्मिञ्छिवः स्मर्तव्य इत्युक्तेऽपि तद्वचनमनाकर्ण्य देवेषु स्वार्थलिप्सया समुद्रमन्थन एव प्रवृत्तेषु प्रवृद्धेन हालाहलेन वैकुण्ठपर्यन्ताष्टावरणसर्वब्रह्माण्डदहनवर्णनम्.	१५	२
१०	विषाग्निव्याप्तहरिब्रह्मादिविज्ञप्तहेरंबप्रार्थनया सन्तुष्टात्सदाशिवाज्जगत्कारणयोनिरूप पराशक्तिप्रादुर्भावः, तत्र प्रसंगतः शौनकादिपृष्टेन लोमशाख्यसूतेन हेरंबोत्पत्तिवृत्तान्त वर्णनम्, तत्र पराशक्तेः सकाशाद्धेरम्बोत्पत्तिवृत्तान्तः, ज्ञानवता तेन गणेशेन शक्तियुक्तश्रीशिवस्तुतिकरणम्, हेरंबस्तुतिप्रसन्नेन लिंगरूपेण कालकूटग्रसनम्, ततः समस्तदेवैर्दैत्यैश्च लिंगस्तुतिकरणम्, तत्स्तुतिप्रसन्नस्य शिवस्याविर्भवनम्, शिवेन हालाहलभक्षणोत्तरं सर्वकार्यारम्भे गणेशपूजनं कर्त्तव्यमित्युपदेशकरणम्.	१७	२
११	शिवप्रोक्तगणेशपूजाविधिवर्णनम्, शिवान्तर्धानानन्तरं सर्वदेवैः समुद्रमन्थनम्, ततश्चन्द्रोत्पत्तिः, चन्द्रस्य समुद्रादुत्पत्तेः कारणवर्णने गर्गप्रोक्तमुहूर्त्तवृत्तान्तः, मथ्यमानात्समुद्रात्कामधेन्वादिरत्नोत्पत्तिः, लक्ष्मीप्रादुर्भावः, लक्ष्मीकृतविष्णुवरणवृत्तान्तवर्णनम्.	१९	२
१२	अमृतार्थं पुनः समुद्रमंथने सामृतकलशधन्वन्तरिप्रादुर्भावः, धन्वंतरिहस्ताद्वृषपर्वणा दैत्येनामृतकलशहरणपूर्वकं सकलदैत्यैः सह पातालगमनम्, सुरप्रार्थनया विष्णुना मोहिनीरूपेण दैत्यान्वंचयित्वा देवान्प्रत्यमृतपायनम्, देवपङ्क्त्युपविष्टस्य चन्द्रसूर्याभ्यां सूचितस्य राहोः शिरश्छेदकरणम्, अमृतपाने वञ्चितानां दैत्यानां प्रकोपवर्णनम्.	२१	१
१३	देवदैत्यतुमुलद्वन्द्वयुद्धवर्णनम्, तस्मिन्युद्धे शङ्करेण स्वशिरसि राहुमुण्डमालावेष्टनम्, तत्प्रसंगेन शिवभक्तिभस्मत्रिपुंड्ररुद्राक्षधारणादिशिवधर्ममहिमवर्णनम्, देवदैत्यसंग्रामे कालनेमिना देवानां पराजये कृते देवैर्विष्णुस्तवनम्, कालनेमिना सह युद्धार्थं विष्णुप्रादुर्भावः	२२	२
१४	कालनेमिं हत्वा विष्णोरन्तर्धानम्, ततः शक्रेणान्यायेन भीतपतितदैत्यहनन आरब्धे नारदेन तन्निवारणम्, ततः सुरसेनासमेतस्येन्द्रस्यामरावतीं प्रति गमनपूर्वकं विजयाभिषेकवर्णनम्, अवशिष्टानां पराजितानां दैत्यानां शुक्राचार्यं प्रति गमनम्, शुक्रेण दैत्यानां विजयसिद्ध्यर्थं तपःकरणम्.	२५	१
१५	अपमानितस्य बृहस्पतेरसांनिध्ये विश्वकर्मसुतस्य विश्वरूपस्य शक्रपौरोहित्यम्, विश्वरूपेण कृतां दैत्यानां हविर्दानरूपां देववञ्चनामवेक्ष्य शक्रेण वज्रेण विश्वरूपशिरश्छेदकरणम्, तद्वधोद्भूतब्रह्महत्ययोपद्रुतस्य शक्रस्याप्सु निमज्जनम्, ततः सर्वलोकपालैर्गुरोः समीपमभ्येत्य शक्रकृतब्रह्महत्यादिवृत्तान्तनिवेदनम्, ततो नारदोक्त्येन्द्रस्थाने नहुषस्य स्थापनविषये मन्त्रणम्, इन्द्रस्थाने नहुषस्थापनं श्रुत्वा शच्याः शोकेनान्तःपुरं प्रति गमनम्, नहुषस्येन्द्रपदाधिरोहणाय सर्वदेवानुमोदनम्, नहुषस्येन्द्रपदाभिषेकः, नहुषेणेन्द्राणीविषये कामेच्छया बृहस्पतेरिन्द्राणीसंनिधौ प्रेषणम्, इन्द्राण्याऽवाह्यवाहनेनागमनार्थं नहुषाय संदेशप्रेषणम्, नहुषेण शिविकावाहनार्थमगस्त्यादिब्राह्मणयोजनम्, ततः कुपितेनागस्त्येन नहुषस्याजगरो भवेति शापप्रदानम्, ततोऽजगरत्वप्राप्त्या नहुषस्य स्वर्गात्पतनोत्तरं ययातेरिन्द्रत्वे स्थापनम्, तस्य च स्वपुण्य कीर्तनेन पुण्यक्षयादधः पतनम्, ततः सर्वेषां सुराणां चिन्ताप्राप्तिः...	२६	१
१६	इन्द्रानयनार्थं शच्या बृहस्पत्यादीन्प्रत्याज्ञाकरणं बृहस्पतेः स्वावहेलनाच्छापप्रदानं च, शचीशापभीत्या भीतस्य बृहस्पतेः शक्रानयनार्थं सरस्तीरं प्रति गमनम्, इन्द्रस्याह्वाने क्रियमाणे सरस्तीरस्थया ब्रह्महत्यया देवान्प्रति निजावासप्रार्थनायां कृतायां सत्यां तस्याश्चतुर्विभागान्पृथिवीवृक्षजलनारीषु वरप्रदानपूर्वकं निक्षिप्य निष्पापमिन्द्रममरावत्यामा-		

CC-0. In Public Domain. Digitization by eGangotri

अध्यायाः	विषयाः	प०	पृ०
	नीयेन्द्रपदेऽभिषेचनम्, ततो विश्वरूपवधकुपितेन त्वष्ट्रा तपसा ब्रह्माणं सन्तोष्य ततो देवभयावहपुत्रप्रार्थनम्, ततो ब्रह्मवरात्तस्य वृत्रनामकपुत्रप्राप्तिः, तेन वृत्रासुरेण संजा· तहर्षाणां दैत्यानां पातालाद्भूतलं प्रत्यागमनम्, तद्दृष्ट्वा देवानां भयप्राप्तिः परस्परं मन्त्रकरणं च, ब्रह्मण आज्ञया देवैर्दधीचाश्रमं प्रति गत्वा शस्त्रार्थं दधीचिं प्रति तदस्थिप्रार्थनम्, देवैरस्थिकृतेऽभ्यर्थितेन दधीचिना योगेन स्वदेहविसर्जनम्...	२८	१
१७	सुरभ्या कामधेन्वा स्वजिह्वया दधीच्यस्थ्नां लेहनेन निर्मांसकरणम्, देवैस्तदस्थिभिर्वज्राद्यायुधनिर्मापणम्, सुवर्चाख्यया दधीचिपत्न्या देवानामप्रजस्त्वशापप्रदानम्, सुवर्चया स्वपुत्रं पिप्पलादमश्वत्थसंनिधौ संस्थितय आज्ञाप्य पत्या सह समाधिनानुगमनम्, देवासुरसंग्रामारम्भः, वृत्रासुरसंग्रामारम्भः, वृत्रासुरहननाय बृहस्पत्याज्ञयेन्द्रेण शनिप्रदोषव्रतकरणेन शिवाराधनम्, शनिप्रदोषव्रतविधानम्, वृत्रासुरस्य पूर्वजन्मनि चित्ररथस्य गंधर्वस्य देवीशापेनासुरत्वप्राप्तिवृत्तान्तवर्णनम्, शनिप्रदोषव्रतोद्यापनविधानम्, शनिप्रदोषव्रतप्रभावेनेन्द्रस्य पराक्रमप्राप्त्यनंतरं दैत्यैः सह संग्रामकरणम्, रणात्पलायितानां दैत्यानां वृत्रासुरेण युद्धधर्मवर्णनम्, देवदानवानां तुमुलयुद्धवर्णनम्, वृत्रकृतप्रहारेणेन्द्रस्य मूर्छया पतनम्, ततो लब्धसंज्ञस्येन्द्रस्य ब्रह्माज्ञया वृत्रहननाय शिवाराधनरूपतपःकरणम्, शिवोक्त्या वृत्रमजय्यं मत्वा शक्रेण सहस्रवत्सरपर्यंतं वृत्रेण सह मैत्रीं कृत्वा वृत्रसमीपे तद्धननाय निवासकरणम्, वृत्रस्य गर्वः, वज्रपाणिना नर्मदातट ॐकारेश्वरस्य प्रदोषव्रतेन सम्पूजनम्, वृत्रस्य तु प्रदोषसमये शिवपूजां विस्मृत्य निद्राकरणेन तपोहान्या निःश्रीकत्वप्राप्त्या मनोरथभंगः, ततो वृत्रेन्द्रयुद्धे वृत्रेणेन्द्रग्रसनम्, ब्रह्मप्रार्थनया संतुष्टेन भगवताऽऽकाशवाण्या ब्रह्माणं प्रति प्रदोषव्रते शक्रस्य पीठिकालंघनकरणदोषकरणाद्दैत्यकृतग्रासरूपापत्प्राप्तिकथनम्, तत्प्रसंगेन त्रैकालिकलिंगपूजाविधिवर्णनम्, ततः शंकराज्ञया देवैर्यथाशास्त्रं लिंगपूजाकरणम्, तत्प्रभावेनेंद्रस्य वृत्रकुक्षिं भित्त्वा वहिर्निर्गमनम्, वृत्रासुरशरीरस्य च पतनवर्णनम्, गंगायमुनयोर्मध्येऽन्तर्वेद्यां शरीरपतनम्, मालवे च शिरःपतनम्, सर्वैर्देवैः षण्मासपर्यंतं वृत्राशिरःकृन्तनम्, इन्द्रस्य जयप्राप्तिः, ततो दैत्यनिवेदितवृत्रवधवृत्तान्तेन वलिना शुक्राज्ञया यज्ञे क्रियमाणे तस्माद्रथप्राप्तिः, तं रथमारुह्य दैत्यसेनासमन्वितस्य वलेः सुरविजयार्थं स्वर्गलोकं प्रति गमनम्, तदागमनं श्रुत्वा शक्रस्य लज्जाप्राप्तिः.	३०	१
१८	वलेः स्वर्ग आगमनं दृष्ट्वा बृहस्पतिप्रेरणयेन्द्रादिसर्वदेवानां मयूरादिपक्षिरूपाणि विधाय स्वर्गान्निर्गत्य कश्यपाश्रमं प्रत्येत्य निजमातरमदितिं प्रति निजदुःखनिवेदनम्, देवरक्षार्थमदित्या प्रार्थितेन कश्यपेनादित्यै श्रवणद्वादशीव्रतेन विष्णूपासनवर्णनम्, अदित्या तद्व्रताचरणेन विष्णुप्रादुर्भावः, अदित्या देवरक्षार्थं स्तुतेन भगवता वलिदमनार्थं निजगदाचक्राभ्यामाज्ञापिताभ्यां तस्य दमने स्वस्यासामर्थ्ये कथिते चिंताकरणम्. देवेन्द्रासने शुक्रकृताभिषेकेण वलिना ब्राह्मणेभ्यः समग्रेन्द्रसम्पत्तिप्रदानवर्णनम्, तत्प्रसंगेन–इन्द्रासनस्थितस्य यस्य कस्यापीन्द्रस्य दानाभावात्पुण्यसमाप्त्यनन्तरमिन्द्रकृमित्वप्राप्तिवर्णनम्, वलेः पूर्वजन्मवृत्तान्तवर्णने कस्यचित्कितवस्य गणिकार्थमुपनीतं पुष्पतांवूलादिकं प्रस्खलेन भूमौ पतितं वीक्ष्य "शिवार्पणमस्तु" इति बुद्ध्या निश्चयेन सर्वपापनिवृत्तिः, ततो मरणोत्तरं यमोक्त्या सार्धत्रिघटिकापर्यंतं तस्य शतक्रतुपदप्राप्तौ तेन तस्मिन्नवसरेऽगस्त्यादिमहर्षिभ्य ऐरावतादिदानवर्णनम्, सार्धघटिकात्रितयोत्तरं पूर्वपुरंदरस्य स्वस्थाने स्थित्वा शचीनिर्भर्त्सनादनन्तरं शचीकृततन्निर्भर्त्सनपूर्वककितवेन्द्रप्रशंसनम्, पूर्वेन्द्रस्य लज्जाप्राप्तिः, कितवप्रदत्तैरावतादिकं निजधनं समवेक्ष्य यमं प्रति गत्वेन्द्रेण कितवनिर्भर्त्सनम्, तदा यमादिष्टेन चित्रगुप्तेन शिवोद्देशेन कृतस्य दानस्य महिम्ना कितवस्य नरकानर्हत्ववर्णनम्, तच्छ्रुत्वा लज्जितस्य शक्रस्य स्वर्गगमनम्, तस्य कितवस्य प्रह्लादात्मजविरोचनपत्न्याः सुरुच्याख्याया गर्भे प्रवेशः, इन्द्रेण विप्ररूपेण विरोचनं बलितातं प्रत्यभ्येत्य शिरोयाचनम्, विरोचनस्य कपटकृतविप्रवेषाय शक्राय स्वशिर उत्कृत्य प्रदानवर्णनम्, विरोचनाख्यस्य पितुर्मरणोत्तरं सुरुच्याः सकाशाद्बलेर्जन्म, सुरुच्याः प्रसूत्य-		

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अध्यायाः	विषयाः	प०	पृ०
	नन्तरं पतिलोकं प्रति गमनम्, भार्गवेण वलेः पितुर्विरोचनस्य राज्यासनेऽभिषेचनम्, अथेन्द्रादीनां वलिपराजितानां निर्गमनोत्तरं वलेः स्वर्गेऽधिष्टानार्थं सर्वेषामाज्ञापनम्, ततः शुक्रवचनेन स्वर्गे स्थातुमनर्हतां विचार्य बलेः सर्वदैत्यैः सह शुक्रेण च सह वसुधातले नर्मदातीरे गुरुकुल्यतीर्थं प्रत्यागत्याश्वमेधादिवहुयज्ञकरणवर्णनम्—तस्मिन्नेव बलेर्यज्ञसमयेऽदितिकृतव्रतसंतुष्टस्य भगवतो वटुरूपेणावतरणम्, ततस्तस्योपनयनादिविधेरनन्तरं वलेर्यज्ञवाटं प्रति गमनम्, वलिकृतवामनवटुसत्कारवर्णनम्, वामनवटुभगवता वलिं प्रति तदाग्रहेण त्रिपाद्भूमियाचनम्, वालिना तस्मै भूमिदानप्रतिज्ञायां कृतायां तद्गुरुणा शुक्रेण तस्य वटोर्विष्णुत्ववर्णनपूर्वकं भूमिदाननिषेधकरणम्.	३६	२
१९	बटवे भूमिदानाय वलेराग्रहं दृष्ट्वा शुक्रेण वलये शापप्रदानम्, वलिना संकल्पपूर्वकं भूमिदाने दत्ते मायावटोर्भगवतो वृद्धिवर्णनम्, पदद्वयेन चराचरब्रह्माण्डव्यापनम्, तृतीयपादपरिमितभूप्रदानार्थं वामनेन वलिं प्रति गरुडप्रेषणम्, ततो वलिपत्न्या विंध्यावल्याः प्रह्लादेन सह वामनभगवत्समीपं प्रत्यागमनम्, ततस्तया स्वस्या निजपुत्रस्य निजपत्युश्चेति त्रिषु शिरःसु वामनरूपेण पदत्रयनिधानप्रार्थनम्, तेन विज्ञापनेन संतुष्टेन भगवता वलेः सुतलं प्रति गमनार्थमाज्ञापनम्, वलिप्रार्थनया विष्णोः पाताले वलिसंनिधाववस्थानम्, एवं पूर्वजन्मनि कितवस्य वलित्वप्राप्तिरूपशिवभक्तिमहिमप्रभाववर्णनम्.	४०	२
२०	शंभोर्लिंगरूपत्वप्राप्तिवर्णने सुरतारकासुरसंग्रामवृत्तान्तवर्णनम्, तत्र पराजयं प्राप्य ब्रह्मसमीपे गतान्देवान्प्रति नभोवाण्या तारकासुरवधाय शिवात्मजस्यैवावश्यकत्ववर्णनपूर्वकं पत्न्या वियुक्तस्य शिवस्य दारपरिग्रहार्थं यत्नकरणायाज्ञापनम्, देवैर्नभोवाणीश्रवणानन्तरं हिमालयं प्रति गत्वा कन्योत्पादनार्थं प्रार्थनाकरणम्, हिमवता निजभार्यायै मेनायै कन्योत्पादनार्थं देवप्रार्थनाकीर्तनम्, मेनया कन्याजनने मातापित्रोर्दुःखकीर्तनम्, ततः परोपकारार्थप्रवृत्तेरावश्यकत्वं मन्यमानेन हिमवता बोधि-		

अध्यायाः	विषयाः	प०	पृ०
	तया मेनया हिमवतः सकाशाज्जठरे जगदम्वाविभूतिधारणम्, जगदम्बाविर्भाववर्णनम्.	४२	१
२१	पार्वत्या सह हिमवतो महेशान्तिकं प्रति दर्शनार्थमागमनम्, शिवेन गौर्याःस्वसेवानुमोदनम्, गौरीकृता शिवपरिचर्या, अत्रान्तरे देवेन्द्रप्रहितमदनेन शंकरे बाणवेधकरणम्, मदनवाणविद्धस्य शंकरस्य पार्वतीं दृष्ट्वा मदनातुरत्वदशावर्णनम्, ततः शंकरेण विवेकेन मनसो मोहकारणं विचार्यात्मानं वेद्धुकाम्यया:सज्जधनुषं मदनं विलोक्य क्रोधवशेन तार्तीयिकलोचनाग्निना मदनस्य भस्मसात्करणम्, समस्तदेवैर्मदनसंजीवनार्थं शिवप्रार्थनाकरणम्, ततः शिवस्यान्तर्धानम्, दग्धं मदनं विलोक्य मदनपत्न्या रत्या विलापकरणम्, गिरिजाया रतिकृतं मदनसंजीवनप्रतिज्ञापूर्वकमाश्वासनम्, ततो रत्या मदनदहनस्थान एव तपश्चर्यारम्भः तत्रान्तरे नारदस्य रति समीपमागत्य संभाषणे रतिकृता नारदनिर्भर्त्सना, नारदेन शंवरासुरं प्रति गत्वा रतिहरणार्थमाज्ञाकरणम्, शंबरासुरेण बलात्कारेण रत्याः स्वगृहं प्रत्यानयनपूर्वकं महानसाध्यक्षतायां नियोजनम्, अथ पार्वत्या शिवप्राप्त्युद्देशेन तपश्चर्याकरणम्, तत्तपस्तप्तब्रह्मादिसुरवराणां विष्णुना सह शिवपाणिग्रहणार्थं मन्त्रकरणम्. ...	४३	२
२२	ब्रह्मादिदेवानां समुद्रस्य परे पारे योगपीठे समाधिस्थं शंकरं प्रत्यागमनम्, ब्रह्मादिकृता महादेवस्तुतिः सुरस्तुतिप्रसन्नेन शंकरेण पार्वतीकरिष्यमाणमदनसञ्जीवनावधिवर्णनम्, देवान्प्रति कामत्यागोपदेशः, ततः शिवस्य समाधिस्थितौ नन्दिकृतसर्वदेवविसर्जनम्, शिवस्य स्वरूपानन्दसमाधिस्थितिः, ततो गिरिजाप्रबलतपःप्रभावाच्छिवस्य समाधेश्चलनम्, गिरिजातपःस्थानं प्रति बटुरूपेण शिवस्यागमनम्, गिरिजाचित्तपरीक्षार्थं बटुरूपिणा शिवनिन्दाकरणम्, तदसहमानया गिरजया सखीद्वारा वटोर्विसर्जने कृते शिवस्यान्तर्धानपूर्वकं स्वस्वरूपेण प्रकटनम्, शिवपार्वतीसंभाषणम्, पार्वत्या स्वोद्वाहार्थं शिवप्रार्थना, ततः पार्वत्यै वरप्रदानपूर्वकं शिवस्य स्व-		

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अध्यायाः	विषयाः	प०	पृ०
	लोकं प्रति गमनम्, ततो हिमालयेन पार्वत्यास्तपःसिद्ध्यनन्तरं ब्रह्मादिदेवैः सह महता समारंभेण स्वगृहं प्रत्यानयनम्.	४७	१
२३	शिवेन हिमालयं प्रति स्वस्मै पार्वतीप्रदानार्थं माध्यस्थ्यकरणाय सप्तर्षिप्रेषणम्, सप्तर्षिहिमालयसंवादः, सप्तर्षिकृतविवाहनिश्चयानन्तरं शिवं प्रत्यागत्य विवाहनिश्चयनिवेदनम्, महादेवेन विष्ण्वादिदेवनिमन्त्रणार्थं नारदप्रेषणम्, विष्ण्वादीनां शिवसमीपं प्रत्यागमनपूर्वकं शिवस्य महता समारंभेण ग्रहपूजनादिविधिपूर्वकं विवाहार्थं सर्वैः सुरगणैः सह शैलराजपुरं प्रति गमनम्...	५०	१
२४	हिमालयेन स्वसुताया विवाहार्थं गर्गाचार्यपुरोहितं पुरस्कृत्य विश्वकर्मद्वाराऽपूर्वमण्डपनिर्मापणादिवर्णनम्, नारदाद्विश्वकर्मकृतविवाहमण्डपे चातुर्येण सर्वदेवप्रतिकृतिचित्रविन्यासं श्रुत्वा सर्वेषां देवानां शंकाप्राप्तिः, ततश्च हिमवता शिवस्य स्वनगरं प्रत्यानयनम्, सर्वेषां च शिवादिसुराणां विविधभव्यस्थानेषु निवासः	५१	२
२५	सर्वेषां सुराणां पृथक्पृथक्प्रशस्तस्थानेषु निवासानन्तरं मेनायाःशिवं नीराज्य तत्सौन्दर्यं दृष्ट्वा सन्तोषः, ततः पार्वत्या वैवाहिकवस्त्रपरिधानपूर्वकं हस्ते वरवरणार्थं हारं धृत्वा परमेश्वरं ध्यात्वा तत्प्रतीक्षार्थमवस्थानम्, पाणिग्रहणार्थं विवाहमण्डपं प्रति गर्गोक्तमुहूर्ते महता समारम्भेण शिवस्यानयनम्, शिवपार्वत्योर्विवाहमंगलम्, लक्ष्मीसावित्र्यरुन्धत्यादिपुण्यसुवासिनीभिः शिवपार्वतीनीराजनम्, ततो मेनया सहितेन हिमालयेन कन्यादानसंकल्पकरणे शिवस्य नामगोत्रोच्चारविषयजिज्ञासाप्रसंगे नारदेन शिवपरमैश्वर्यवर्णनम्	५३	२
२६	हिमालयेन कन्यादानकरणम्, शिवपार्वतीकृतगृह्याग्निहोमप्रसङ्गे पार्वतीचरणनखेन्दुदर्शनस्खलितब्रह्मरेतसः षष्टिसहस्रवालखिल्योत्पत्तिवृत्तान्तः, ततो हिमवत्कृतवरपक्षीयसमस्तसुरसत्कारपूर्वकविवाहमङ्गलोत्सववर्णनम्...	५५	१
२७	ततश्च वरपक्षीयेण विष्णुना वधूपक्षीयाणां सह्याचलविन्ध्याचलादिविविधपर्वतानां यथायोग्यसत्कारकरणम्, ततश्च वरयात्रासमारम्भः, वरयात्रायां सर्वपर्वतैः शिवार्चनम्, अथ सर्वेषां देवानां स्वस्वस्थानं प्रति गमनम्, ततश्च शिवपार्वत्योर्गन्धमादनपर्वते रमणम्, ततश्चैकान्ते शिवपार्वत्योः सुरतसमारम्भारम्भः, अत्यद्भुततत्सुरतसंजातवित्रासैर्ब्रह्मादिभिः सुरैरेकान्ते तत्समीपं प्रत्यग्नेः प्रेषणम्, भिक्षुकव्याजेन सुरतसमये समागतेनाग्निना पार्वतीशापेन शिवस्य रेतो भक्षयित्वा देवानां समीपं प्रत्यागमनम्, अग्निमुखोद्भवरेतसा सर्वेषां देवानां सगर्भत्ववर्णनम्, ततः सर्वदेवानां विष्णुं प्रति शरणगमनम्, विष्णुप्रेरणया सर्वदेवैः शिवप्रार्थनम्, ततः सन्तुष्टस्य शिवस्याज्ञया सर्वदेवैर्मुखतो रेतश्छर्दनम्, सर्वदेवच्छर्दितरेतसः सुवर्णमयपुञ्जत्ववर्णनम्, ततः शिवेनाग्नये योनौ रेतःसेचनाज्ञाकरणम, अथाग्नेः समुज्ज्वलितस्य समीपेंऽगतापार्थं समागतानां षट्कृत्तिकाख्यानां षडृषिपत्नीनां शरीरेषु निजज्वालाद्वारा रेतः परमाणुप्रवेशनेन नीरेतस्त्वप्राप्तिपूर्वकं विश्रान्तिः, ताभिः,कृत्तिकाभिर्व्यभिचारशंकया तप्यमानाभिर्हिमवतो गिरेः पृष्ठे गंगायां तस्य रेतसो युगपदेव विसर्जनम्, तद्रेतसः सकाशात्तत्क्षण एव षण्मुखबालकोत्पत्तिः, तस्य बालकस्य जन्मसमय एवाकस्माद्गिरिजायाः स्तनप्रस्रवः, तदानीमेव नारदेन शिवं प्रत्यागत्य कुमारजन्मवृत्तान्तकथनम्, तस्य कुमारस्य दर्शनार्थं सर्वसुरैः सह शिवपार्वत्योः कुमारसमीपं प्रत्यागमनम्, कुमाराभ्युदयोत्सवसमारम्भः, शिवपार्वत्योर्हर्षप्राप्तिः	५६	२
२८	ततस्तारकासुरविजयार्थं कुमारं पुरस्कृत्य शिवाज्ञया सर्वदेवानां निर्गमनम्, तस्मिन्समये नभोवाण्या देवानां विजयाभिशंसनम्, एतस्मिन्नेवान्तरे समागताया मृत्युकन्यायाः सेनाख्यायाः कुमारेण ब्रह्मवाक्याद्वरणम्, ततः कुमारस्य सेनापतित्वप्राप्तिवर्णनम्, तस्मिन्नेव समये समागतानां गंगागौरीकृत्तिकानां स्कन्दमातृत्वमभिलपन्तीनां स्कन्देन मातृगणत्वेन स्थापनम्, ततः कुमारस्य सर्वदेवैः सह तारकासुरं प्रत्यभियानम्, ततश्च देवदैत्यसेनासंनाहः.	५८	२
२९	देवासुराणां संग्रामे सर्वदेवपराजये विष्णुकृतया प्रशंसया कुमारस्य तारकासुरेण सह संग्रामार्थं पुरतोऽवस्थितौ तारकासुरेण निजप्रौढिप्रशंसाकरणम्.... ...	६०	१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अध्यायाः	विषयाः	प०	पृ०
३०	स्वप्रौढिं वल्गमानस्य तस्येन्द्रादिभिःसह तुमुलसंग्रामे देवानां पराजयं दृष्ट्वा कार्त्तिकेयस्वामिनस्तारकासुरेण सह द्वन्द्वयुद्धवर्णनम्, कुमारस्य युद्धं दृष्ट्वा खिन्नानां युद्धावलोकनार्थं समागतानां हिमालयादीनां कुमारेण सान्त्वनम्, ततः कुमारेण तारकशिरश्छेदकरणम्, ततस्तारकवधेन कुमारस्य जयप्राप्तिपूर्वकं सर्वदेवकृतकुमारविजयोत्सववर्णनम्.	६१	२
३१	कुमारस्वामिमाहात्म्यवर्णनम्, तत्र कुमारदर्शनमात्रेण पापिनामपि पवित्रतां दृष्ट्वा यमलोकस्य वैयर्थ्यं मन्यमानेन यमेन ब्रह्मविष्ण्वादिदेवान्पुरस्कृत्य शिवं प्रत्यागत्य शिवं स्तुत्वा कुमारदर्शनमाहात्म्यतोखिलपापिजनानां स्वर्गप्राप्तौ निजाधिकारवैयर्थ्यनिवेदनम्, ततः शंकरेण संसारनिवृत्त्यै विशुद्धभावनाप्राप्त्यर्थं शुद्धधर्मस्वरूपोपदेशकरणम्, शंकरकृतोपदेशेन यमस्य विशुद्धात्मताप्राप्तिवर्णनम्, अथ कुमारस्य सर्वगिरिभिः स्तुतिकरणम, कुमारेण गिरिभ्यः शिवलिंगरूपत्ववरप्रदानम्, नन्दिना शिवलिंगपूजनविषये प्रश्ने कृते सति कुमारेण नानाविधरत्नलिंगनार्मदेश्वरलिंगपूजामाहात्म्यकथनम्.	६२	२
३२	शिवाराधनमाहात्म्यप्रसंगेन श्वेताख्यभूपतेश्चरित्रवर्णनम्, तत्राजन्मतः शिवभक्तिपरायणस्य श्वेतभूपस्यान्तकाले ध्यानावस्थितस्य संहरणेऽशक्नुवतां यमादीनां पश्यतां सतां कालेन खड्गेन हंतुं कृतमुद्योगं दृष्ट्वा परमात्मना शिवेन स्वभक्तरक्षणार्थं तृतीयलोचनाग्निना कालस्य भस्मीकरणम्, अथ समाधेर्व्युत्थितेन श्वेतभूपेन पुरतो दह्यमानं कालं दृष्ट्वा व्यग्रीभूय रुद्रस्तुतिकरणम्, रुद्रेण तस्मै हंतुकामः कालो मया दग्ध–इति कालदहनकारणकथनम्, ततः श्वेतभूपप्रार्थनया महेश्वरेण कालसंजीवनम्, कालकृता भगवत्स्तुतिः, ततः कालेन परोपकारपरायणस्य श्वेतभूपस्य प्रशंसाकरणम्, अथ कालेन यमादिभिः सह शिवं प्रणम्य श्वेतभूपं च संस्तुत्य स्वालयं प्रत्यागत्य त्रिपुण्ड्रजटाभस्मरुद्राक्षधारणादिरूपशिवधर्ममाहात्म्यवर्णनपूर्वकं निजदूतानां शिवदूता यमलोके नानेया–इत्याज्ञाकरणम्, श्वेतभूपस्य शिवसायुज्यवर्णनम्, शिवधर्मविषये किरातवृत्तान्तप्रस्तावः–	६४	२
३३	चण्डनामकस्य कस्यचित्किरातस्य कदाचिन्माघकृष्णचतुर्दश्यां महाशिवरात्र्यां मृगयार्थं विचरतो यावद्दिनं मृगादिवध्यजीवाऽप्राप्तौ रात्रौ बिल्ववृक्षोपरि स्थित्वाऽज्ञानतोऽनायासेन बिल्वपत्रच्छेदनेन वृक्षाऽधःस्थितस्य शिवस्य पूजनम्, गंडूषजलेन शिवस्नपनं च भक्ष्यालाभादनायासेनोपोषणं च–तस्य भोजनाभावात्तद्भार्याया अपि तत्प्रतीक्षणनोपोषणं च, अथापरेद्युर्नदीतीरे तद्भार्ययाऽन्ने समानीय स्थापितेऽकस्माच्छुनाऽऽगत्य भक्षिते सति किरातस्यान्नदानं संजातमिति मत्वा महान्संतोषः, तेनाज्ञानसंजातशिवरात्रिव्रतमहिम्ना किरातस्य शिवलोकप्रापणाय शिवगणैर्विमानानयनम्–शिवगणैः सह किरातस्य शिवलोकं प्रति गमनम्–शिवरात्रिव्रतोत्पत्तिवर्णनम्–शिवरात्रिव्रतमाहात्म्यप्रसंगेन विधवाब्राह्मणीपुत्रस्य श्वपचादुत्पन्नस्य शिवरात्रिव्रतप्रभावाज्जन्मान्तरे शिवाद्वीरभद्राख्यया जन्मप्राप्तिवृत्तान्तवर्णनम्–शिवरात्रिव्रतेन भरतादिमहीपतीनां सिद्धत्वप्राप्तिवर्णनम्.	६६	२
३४	अथ कदाचित्कैलासपर्वते निजमन्दिरे सुखासीनयोः शिवपार्वत्योर्द्यूते प्रवृत्ते पार्वत्या सर्वस्वपणे जिते सति पार्वतीहारितसर्वस्वस्य शिवस्य कैलासं विहाय तपोवनगमनवर्णनम.	६९	१
३५	अथ शिवनिर्गमनोत्तरं विरहातुरायाः पार्वत्याः शबरीरूपं धृत्वैकान्ते समाधिस्थस्य शिवस्य समीपं प्रति गमनम्, तया दृष्टमात्रस्य शिवस्य समाधितो व्युत्थानम, शिवेन दृष्टमात्रायाः पार्वत्या अन्तर्धाने शिवस्य विरहावस्थापन्नत्वम्, अथ शिवेन शबरीं प्रति स्ववरणप्रार्थना, ततः शबर्या कामवशंगतं शिवं प्रति स्वप्राप्तये स्वपितुः समीपे प्रार्थनार्थं गंधमादनपर्वते पितुः समीपं प्रत्यानयनम, शिवेन हिमालयं प्रति कन्याप्रार्थनम्, अत्रांतरे तत्र नारदेनागत्य शिवं प्रति प्रबोधकरणम्, अथ शिवस्य		

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अध्यायाः | विषयाः | प० | पृ०

पार्वतीकृतां निजवञ्चनां निरीक्ष्य रोपेण वनांतरं पुनः प्रस्थातुकामस्य हिमालयादिगिरिभिर्गिरिजां पुरस्कृत्य प्रार्थनायां कृतायां रोपशांतेरनंतरं गंधमादनपर्वते दिव्यसिंहासनोपर्यगिरोमहार्पिद्वाराभिषेकवर्णनम्, एवं केदारनाथमाहात्म्यप्रसंगेन समस्तशिवधर्मप्रशंसावर्णनम्. ... ... ७२ १.

इति माहेश्वरखण्डे प्रथमं केदारखण्डम् ॥ (१–१) ॥

अथ माहेश्वरखण्डे द्वितीयं कौमारिकाखण्डम् ॥ (१–२) ॥

१ सूतशौनकसंवादे दक्षिणार्णवतीरस्थतीर्थमाहात्म्यवर्णनोपक्रमे पञ्चाप्सरस्तीर्थमाहात्म्यवृत्तान्तवर्णनेऽर्जुनतीर्थयात्रावृत्तान्तः, तत्रार्जुनस्य दक्षिणसमुद्रतीरस्थतीर्थस्नानार्थं प्रवृत्तस्य पञ्चसु तीर्थेषु तत्रत्यैस्तपस्विभिः स्नानार्थं तत्रत्यग्राहभीत्या निवारणम्, अर्जुनस्य धर्मबुद्धिं दृष्ट्वा तापसैरर्जुनाय दीर्घायुष्ट्ववरप्रदानम्, ततोऽर्जुने सौभद्रतीर्थमभ्येत्य स्नानार्थमवतीर्य स्नानं कर्तुं प्रवृत्ते ग्राहेण ग्रहणम्, अर्जुनेन बलेन ग्राहोद्धरणे ग्राहस्य नारीरूपता, तया नार्या स्वस्याश्चतसृभिः सखीभिः सह रत्यर्थं प्रार्थितस्य ब्राह्मणस्य शापेन ग्राहत्वप्राप्तिवृत्तान्तवर्णनम्, नारदोक्त्या च पञ्चसु तीर्थेषु ग्राहत्वेनावस्थितिवर्णनम्, ततोऽर्जुनेनान्येषु चतुर्षु तीर्थेषु प्रविश्य स्नात्वा तत्रत्यग्राहोद्धरण पूर्वकं सर्वासामप्सरसां समुद्धारवर्णनम्, अर्जुनस्य तीर्थसंरोधकारणजिज्ञासया शंकाप्राप्तावप्सरोभिर्नारदं प्रत्येतद्विषये प्रष्टव्यमित्युक्त्वा स्वर्गं प्रति गमनम्. ... ७५ २

२ अर्जुनस्य नारदेन सह समागमः, नारदमुखात्पाण्डवकुशलवृत्तान्तश्रवणोत्तरमर्जुनेन तीर्थमाहात्म्यजिज्ञासया नारदं प्रति प्रश्नकरणम्, अथ नारदेन ब्रह्मलोकवृत्तान्तवर्णनप्रस्तावपूर्वकं सुश्रवःप्रोक्तकात्यायनसारस्वतसंवादवर्णनम् तत्र सारस्वतमहर्षिणा कात्यायनमहर्षये धर्मतत्त्वकथनम्, ततश्च दानमाहात्म्यवर्णनम्, दानमाहात्म्यश्रवणोत्तरं दानार्थमुत्सुकमानसस्य स्वस्यार्थान्नारदस्य दानदानार्थं द्रव्योपार्जनाय नानादेशपर्यटनवृत्तान्तः. ७७ १

३ पृथिवीं पर्यटतो नारदस्य नर्मदातीरे भृगोराश्रमं प्रत्यागमनम्, भृगवे नारदेन स्वोद्देशकथनोत्तरं भृगुणा नारदाय दानार्हपवित्रस्थानकथनोद्देशेन महीसागरसंगमस्थस्तम्भतीर्थमाहात्म्यवर्णनम्. तत्र तीर्थतीरस्थितप्रांशुदेवशर्मब्राह्मणस्य वृत्तान्तः, महीसागरसंगमे स्वपितृभ्यो दर्शश्राद्धदानार्थं तत्तीर्थतीरस्थितसुभद्रब्राह्मणाय निजपुण्यचतुर्थांशप्रदानम्. भृगुप्रोक्तमहीसागरसंगमस्थस्तंभतीर्थमाहात्म्यं श्रुत्वा नारदस्य महीसागरसंगमे स्थानकरणार्थं चिन्ताकरणम्. ७९ २

४ नारदेन महीसागरसंगमे स्थानस्थापनार्थं द्रव्यस्यापेक्षितत्वाच्छुद्धन्यायेन द्रव्यार्जनविषयकचिन्ताप्राप्तौ मुनीनां मुखतो धर्मवर्मनृपतिं प्रति गत्वा धर्मवर्मनृपतिश्रुताकाशवाणीकथित 'द्विहेतु षडधिष्ठानम्' इत्याद्येकश्लोकार्थव्याख्याकरणेन नृपं सन्तोष्य तस्य स्वोद्दिष्टदानधर्मकार्यसाधनाय साहाय्यसंपादनम्. ८१ १

५ ततो नारदस्य दानपात्रशुद्धब्राह्मणलाभार्थं सर्वत्र संशोध्य पश्चात्कलापग्रामं प्रति ब्राह्मणवेषेण गमनम्, तत्र गत्वा ब्राह्मणपरीक्षणार्थं श्लोकरूपेण प्रश्नकरणम्, तेषां ब्राह्मणानां मध्येऽष्टवर्षीयेण बालकेनैव नारदकृतातिगहनप्रश्नानां यथार्थोत्तरदानम्. ८४ १

६ ततो नारदेन स्वरूपेण प्रकटीभूय महीसागरसंगममहातीर्थे ब्राह्मणानामाजीविकाप्रदानपूर्वकं संस्थापनाय संप्रार्थ्य दण्डाग्र आरोप्यांनयनवर्णनम्, तत्प्रसंगेन कलापग्राममार्गवर्णनम्, नारदेन विप्रपादप्रक्षालनसमये समागतस्यातिथेः कपिलमहर्षेः प्रार्थनया तस्मा आनीतब्राह्मणमध्यतोऽष्टसहस्रब्राह्मणसमर्पणम्, मधुपर्कार्हणसमये हारीतब्राह्मणेन प्रथमतः प्रक्षालनार्थं वामपादे पुरतः कृते सति नारदेन सर्वेषां ब्राह्मणानां 'यूयं मूर्खा भविष्यथ' इति शापप्रदानम्, तैर्ब्राह्मणैरपि नारदाय तथाविधस्यैव शापस्य प्रदानम्, पुरतो वामपादस्य करणे कारणवर्णनम्, ततो नारदस्य २

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अध्यायाः विषयाः प० पृ०

पश्चात्तापेन चिरकारिब्राह्मणवृत्तान्तस्मरणम्, तत्र मेधातिथिगौतमसुतस्य चिरकारिणः
पित्राज्ञया व्यभिचारिण्या मातुर्हननाय गमने विचारवशेन विलंबकरणम्, एत-
स्मिन्नन्तरे ब्राह्मणरूपेणागतस्य शक्रस्योपदेशेन गौतमस्य पश्चात्तापः, वधार्थं मातृ-
समीपं गच्छतश्चिरकारिणः पृष्ठतो गौतमस्य गमनम्, पितरं दृष्ट्वा चिरकारिणा
शस्त्रं भूमौ निक्षिप्य पितुः प्रार्थनाकरणम्, गौतमेन पित्रा चिरकारिणश्चिरकारित्व-
प्रशंसापूर्वकमाशीःप्रदानं गृहं प्रति भार्यायाः पुत्रस्य चानयनम्, नारदेन ब्राह्म-
णानां प्रदत्तस्य शापस्य कलावुदयो भविष्यतीति शापकालपरिवर्तनम्, ततः सर्वेषां
ब्राह्मणानां महीसागरसंगमे कांचनगोगृहधनादिप्रदानपूर्वकं स्वयं विश्वकर्मद्वारा ... ८७ १
निर्मापिते महीनगरे स्थापनवर्णनम्. ... .

७ अर्जुनेन विस्तारपूर्वकं महीसागरसंगममाहात्म्यश्रवणेच्छया नारदप्रार्थनम्, नारदेन
सविस्तरमहीसागरमाहात्म्यवर्णनार्थमुपक्रमणम्, तत्रेन्द्रद्युम्नभूपतिवृत्तान्तारम्भः, ब्रह्म-
लोकं गतस्येन्द्रद्युम्नस्य बहुकालं तत्र निवासानन्तरं ब्रह्मणा चिरकालाद्भूमौ कीर्तेः
पुनर्व्यक्तीकरणार्थमिन्द्रद्युम्नस्य भूलोकं प्रति प्रेषणम्, भूलोकं प्रत्यागतेनेन्द्रद्युम्नेन भूलो-
कस्थितेभ्योऽपेक्षया दीर्घजीविनो मार्कण्डेयस्य समीपं गत्वा निजवार्ताविज्ञानविषये
प्रश्नकरणम्, तेन तद्वार्ताऽनभिज्ञानकथन इन्द्रद्युम्नस्याग्निप्रवेशोद्योगः, ततो मार्कण्डे-
येन ततोऽपि दीर्घायुषो नाडीजंघवकस्य समीपे तन्नयनम्, तेनापीन्द्रद्युम्नवार्ताऽनभि-
ज्ञानकथनम्, ततश्चेन्द्रद्युम्नपृष्टेन नाडीजंघवकेन निजदीर्घायुष्ककारणवर्णनाय निज- ... ९० १
पूर्वोदन्तकथनम्. ....

८ ततो निराशस्येन्द्रद्युम्नस्य वार्ताविज्ञानार्थं नाडीजंघेनात्मनोऽपि दीर्घायुषस्य प्राका-
रकर्णनामकस्योलूकस्य समीपं प्रति मार्कण्डेयेन्द्रद्युम्नयोर्नयनम्, तेन प्राकारकर्णो-
लूकेनापीन्द्रद्युम्नवार्तानभिज्ञानकथनोत्तरमिन्द्रद्युम्नप्रश्ने निजदीर्घायुष्ट्वकारणकथनम्, ... ९२ २
तत्प्रसंगेन बिल्वदलमाहात्म्यवर्णनम्.... ... ...

अध्यायाः विषयाः प० पृ०

९ प्राकारकर्णोलूकेन निजवार्तानभिज्ञानादुदासीनस्येन्द्रद्युम्नस्य कृते नाडीजङ्घेनेन्द्रद्युम्न-
वार्ताविज्ञानस्यावश्यकताप्रदर्शने प्राकारकर्णोलूकेनात्मनोऽपि दीर्घायुषो गन्धमादन-
स्थस्य गृध्रस्य समीपं प्रतीन्द्रद्युम्नमार्कण्डेयनाडीजङ्घवकानां नयनम्, तेन गृध्रेणापी- ... ९३ २
न्द्रद्युम्नवार्ताऽनभिज्ञानवर्णनपूर्वकं निजदीर्घायुष्ककारणवृत्तान्तकथनम्.

१० गन्धमादनस्थगृध्रेण निजवार्तानभिज्ञानादुदासीनस्येन्द्रद्युम्नस्याग्निप्रवेशोद्योगं दृष्ट्वा
प्राकारकर्णप्रार्थनया गृध्रेणात्मनोऽपि दीर्घायुषो मानससरोनिवासिनः कूर्मस्य समीपं
प्रतीन्द्रद्युम्नमार्कण्डेयनाडीजङ्घप्राकारकर्णानां नयनम्, तत्र सरस्तीरे समागतानां
तेषां मध्य इन्द्रद्युम्नं नृपं दृष्ट्वा कूर्मस्य तानसत्कृत्यैव जलमध्ये प्रवेशः, ततो गृध्रेण
तस्मै जलप्रवेशकारणपृच्छायां तेन कूर्मेणेन्द्रद्युम्नस्य पुराकृतयज्ञवृत्तान्तवर्णनसमय
इन्द्रद्युम्नस्य कीर्त्युद्धारे सतीन्द्रद्युम्नोपरि देवैः पुष्पवृष्टिकरणपूर्वकं विमानमानीय देव-
दूतेनेन्द्रद्युम्नाय ब्रह्मलोकं प्रति गमनायेन्द्रद्युम्नप्रार्थनाकरणम्, इन्द्रद्युम्नेन ब्रह्मलोकं ९५ १
प्रति गन्तुमनिच्छां प्रदर्श्य कूर्मं प्रति तस्यैव दीर्घायुष्ककारणजिज्ञासया प्रश्नकरणम्.

११ कूर्मेण निजपूर्वजन्मवृत्तान्तकथनपूर्वकमिन्द्रद्युम्नादीनामातिथ्यकरणानन्तरं तेषामि-
न्द्रद्युम्नादीनां षण्णामपि कूर्मतोऽपि दीर्घायुषो लोमशमहर्षेः समीपं प्रत्युपदेशग्रहणाय ९६ १
गमनम्. ... ...

१२ लोमशमहर्षिणा सहेन्द्रद्युम्नादीनां समागमोत्तरमतिदीर्घायुषोऽपि लोमशमहर्षेरा-
श्रमकरणाभावकारणपृच्छायां लोमशेन संसारस्थितिवर्णनपूर्वकमात्मनो दीर्घायुष्क- ... ९७ १
कारणकथनम्–तत्र शिवलिंगपूजनमाहात्म्यवर्णनम्. ... ...

१३ लोमशवचःश्रवणानन्तरमिन्द्रद्युम्नादीनां सर्वेषां शिवभक्त्येकनिष्ठया शिवदीक्षाग्रह-
णार्थं लोमशप्रार्थनम्, लोमशमहर्षिणा सर्वेषां तेषां शिवदीक्षाप्रदानपूर्वकशिवलिङ्ग-
पूजोपदेशकरणम्–ततस्तेषां मार्कण्डेयादीनां क्रियायोगारम्भपूर्वकं तपश्चर्याकरणम्,
तपस्यतां तेषां समीपं प्रति नारदागमनम्, नारदं प्रति शापभ्रष्टानां नाडीजङ्घादीनां
स्वमुक्त्यर्थमुपायजिज्ञासया प्रश्नकरणम्, नारदेन तेभ्यो वाराणसीस्थसंवर्तमहर्षि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अध्यायाः विषयाः प० पृ०

दर्शनार्थं गन्तव्यमित्युपदेशकरणम्, वाराणस्यां संवर्तपरीक्षणार्थमुपायकथनम्, नाडीजंघादिभिर्वाराणसीं गत्वा नारदोक्तोपायेन संवर्तं परिज्ञाय तेन सह समागमकरणम्, संवर्तेन नाडीजङ्घादिभ्यः शापतो विमुक्त्यर्थं महीसागरसंगमे गमनार्थमनुज्ञाकरणम्, तत्प्रसंगेन महीनद्युत्पत्तिवृत्तान्तकथनम्, महीसागरसंगमे याज्ञवल्क्यस्य स्थितिकारणतया संजातस्य नकुलावमानवृत्तान्तस्य वर्णनम्, महीसागरसंगमतीर्थसविस्तरमाहात्म्यवर्णनम्.संवर्तसकाशान्महीसागरसंगममाहात्म्यं श्रुत्वा बकोलूकगृध्रकूर्मेन्द्रद्युम्नानां पञ्चानामपि महीसागरसंगमं समभ्येत्य शिवलिङ्गस्थापनेन शिवसारूप्यमुक्तिवर्णनम्, लोमशमार्कण्डेययोश्च जीवन्मुक्तिवर्णनम्, तत्र चेन्द्रद्युम्नस्थापितेन्द्रद्युम्नेश्वरलिङ्गमाहात्म्यवर्णनम्. महीसागरसंगमशतरुद्रियादिलिंगमाहात्म्यवर्णनं च ९८ २

१४ अथ कुमारनाथमाहात्म्यवर्णनम्—तत्प्रसंगेन कुमारचारितवर्णनोपक्रमः, तत्र दक्षकन्यायां दित्याख्यायां वज्रांगनामकसुतोत्पत्तिः, वज्रांगेण मातुराज्ञया स्वर्गं गत्वा देवेंद्रं पदेनाकृष्य मातुः समीप आनयनम्, ततो ब्रह्मकश्यपयोः प्रार्थनया वज्रांगेण वासवस्य मोचनम्, ततो ब्रह्माज्ञया वज्रांगस्य तपसि प्रवृत्तिः, वज्रांगे तपसि प्रवृत्ते तत्परिचर्यैकनिष्ठाया वरांगीनाम्न्या वज्रांगपत्न्याः शक्रेण विविधविभीषिकादर्शनपूर्वकमतिविडम्बनम्—ततो ब्रह्मणः सकाशाद्वरं प्राप्य तपसः संनिवृत्तेन वज्रांगेण स्वपत्न्या वरांग्याख्याया वित्रासकारणजिज्ञासया प्रश्नकरणम्. १०३

१५ वरांग्याः शक्रकृतां विडम्बनां निरीक्ष्य तपःप्रभावेणाऽऽसुरभावनिवृत्तस्यापि वज्रांगस्य प्रियायाः प्रियकरणार्थं महेन्द्रप्रतीकारार्थं च भूयोऽपि तपश्चर्याकरणम्, ततस्तत्तपस्तुष्टेन ब्रह्मणा वज्रांगस्य देवदर्पदलनपुत्रप्राप्तिरूपवरं प्रदाय तपसो निवर्तनम्, ततो वज्रांगाद्वरांग्यां तारकासुरस्योत्पत्तिः, सर्वदैत्यैस्तारकासुरस्य दैत्यराज्याभिषेकः, ततस्तारकासुरस्य देवनिर्जिगीषया पारियात्रपर्वतकन्दरां गत्वा तपःकरणम्, तत्तपस्तुष्टेन ब्रह्मणा सप्तवासरं बालकं विनाऽन्यैः सर्वैरवध्यत्वरूपवरप्रदानम्, ब्रह्मवरोर्जितस्य तारकासुरस्य निजराज्येऽवस्थानम्. १०५ १

१६ तारकासुरस्य मन्त्रिभिःसह संमंत्र्य सेनासंनाहपूर्वकं समस्तसुरविजयार्थं स्वर्गं प्रत्यभियानम्, ततो बृहस्पत्यनुमतेन देवेन्द्रेण समस्तसुरसेनासंनाहकरणम्, तारकासुरदेवेंद्रयुद्धोपक्रमः. १०६ २

१७ संग्रामारम्भे तारकसैन्यदेवसैन्ययोर्मध्ये यमग्रसनयोस्तुमुलयुद्धवर्णनम्, तत्र युद्धे यमस्य पराजयवर्णनम्. १०८ १

१८ धनाधिपजंभयोर्युद्धे धनाधिपेन जंभवधे कृते कुजम्भेन सह धनाधिपस्य युद्धे धनाधिपपराजयः, ततः कुजंभनिर्ऋत्योर्युद्धे निर्ऋतेः पराजये वरुणेन पाशेन कुजंभभुजद्वयबन्धनम्, ततो महिषासुरे निर्ऋतिवरुणयोर्ग्रासार्थमुद्युक्ते चन्द्रेण शीतरश्मिप्रसारेणातिहिमतः सर्वेषां दैत्यानामतिव्याकुलीकरणवर्णनम्, ततः कालनेमिना पावकार्चिःप्रसारणेन कृतां शीतनिवृत्तिं निरीक्ष्य सूर्येण शंबरास्त्रेण बाणमनुसंधायेन्द्रजालेन देवदानवयो रूपविपर्ययकरणम्, तेन च मोहमापन्नेन कालनेमिना देवबुद्ध्याऽसंख्यातदैत्यानामेव हननम्. १०९ १

१९ ततो निमिनाम्ना कालनेमिसुतेन कालनेमेः सूर्यकृतमायातः प्रबोधनम्, ततः प्रबुद्धेन कालनेमिना सर्वास्त्रनिवारणाय ब्रह्मास्त्रमोचनम्, भास्करेण महेन्द्रजालमास्थाय निजतनुं भीषणां विधायात्युष्णतापकिरणप्रसारेण सर्वदैत्यसैन्यव्याकुलीकरणम्, कालनेमिना कालमेघस्वरूपं विधाय वृष्टिकरणपूर्वकं शस्त्रवृष्ट्याऽश्व्यादिसर्वदेवसैन्यपराभवकरणम्, ततः सर्वदेवानां प्रार्थनां श्रुत्वा भगवता महाविष्णुना क्षीरसागरात्पर्यंकादुत्थाय गरुडमारुह्य रणस्थलं प्रत्यागत्य कालनेमिना सह युद्धं कृत्वा कालनेमिपराजयकरणम्. १११ १

२० समस्तदैत्यैर्विष्णुना सह तुमुलयुद्धे विष्णुनाऽसंख्यातदैत्यविध्वंसे कृते जम्भासुरेण पराजयं प्राप्य संग्रामांगणतः पराङ्मुखीभूय पलायनम् ११२ २

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अध्यायाः	विषयाः	प०	पृ०
२१	अथ पलायितस्य विष्णोरिन्द्रकृतस्तुत्या स्थिरीभवनम्, विष्णोराज्ञया जम्भासुरहननार्थमिन्द्रस्य संनाहपूर्वकं जम्भासुरेण सह तुमुलयुद्धवर्णनम्, तस्मिन्युद्धे जम्भासुरस्य वधः,जम्भासुरवधोत्तरं देवसैन्यत्रस्तानां कान्दिशीकानां समस्तदैत्यानां तारकासुरान्तिकं प्रत्यागमनम्, ततस्तारकासुरेण सर्वदैत्यैः सह युद्धभूमिं समासाद्य महता पराक्रमेण सर्वदेवसैन्यविध्वंसकरणम्, तद्वीर्यमालोक्य विष्णुना सर्वदेवान्पलायनार्थमाज्ञाप्य स्वयमन्तर्धानम्, तारकासुरस्य विजयलब्धिपूर्वकं महीसागरसंगमतीरवर्तिस्तंभपुरे (खम्बायतनाम्नि) राज्यसिंहासनोपरि महता समारम्भेणारोहणम्, सिंहासनाधिरूढं तारकासुरं प्रति त्रैलोक्यलक्ष्म्या आगमनपूर्वकं प्रवेशनम्, नारायणेनेंद्रादिदेवानां मर्करूपेण तारकासुरं प्रत्यानयनपूर्वकं तारकासुरतोऽभयप्रदापनम्, ततश्च तस्मादभयं प्राप्येंद्रादीनां विष्णोराज्ञया ब्रह्माणं प्रति गमनम्, तारकासुरेणेंद्रादिदेवानां स्थानेष्वात्मादिदैत्यानामधिकारकरणम्.	११४	२
२२	इन्द्रादिदेवैर्ब्रह्माणं प्रति गत्वा स्तुतिपूर्वकमात्मनो दुःखनिवेदनम्, ब्रह्मणा हिमालयगृहे जगदंबाऽवतरिष्यतीति देवान्प्रत्याश्वासनम्, ततो देवहितार्थं रात्रिदेवीस्तुतिकरणपूर्वकं हिमालयभार्यायां जगदम्बामहादेवीप्रवेशात्पूर्वं प्रवेशाय प्रार्थनाकरणम्, ब्रह्मणः प्रार्थनेन विभावर्या मेनानेत्रयोरावेशनम्, ततो मेनायाः सकाशाज्जगदम्बायाः प्रादुर्भावः, जगदम्बाजन्मकालिकोत्सववर्णनम्....	१२१	१
२३	शक्रवाक्येन हिमालयं प्रति नारदेनागत्य पार्वतीसामुद्रिकलक्षणेषु वचनभंग्या यथार्थमुक्तेषु चिन्तातुरयोर्हिमालयमेनयोश्चातुर्येण सर्वदेवेश्वरमहादेववरप्राप्तिकथनेन पुनः संतोषजननायाश्वासनम्....	१२२	२
२४	पार्वत्याः सदैवोत्तानपाणितया सर्वप्राणिनामभयप्रदत्वलक्षणवर्णनम्, शिवसेवार्थं पार्वत्या नियोजनाय हिमवत उपदेशकरणम्, ततो नारदेन हिमालयात्सकाशादिन्द्रं प्रत्यागत्य सकलवृत्तांतनिवेदनपूर्वकं हरस्य विवाहेन देव्या सह संयोजनार्थमाज्ञाकरणम्, शक्रेण शंकरमोहनाय मदनायाज्ञाकरणम्, पार्वतीपरिचरणवेलायां मदनेन शंकरे बाणवेधकरणम्, ततो मदनातुरेण हरेण मदनं दृष्ट्वा तृतीयनेत्राग्निना मदनदहनम्, ततो रतिप्रार्थनया शंकरेण मदनस्यानंगरूपेण संजीवनम्.	१२३	२
२५	पुनर्हिमाद्रिं प्रत्यागतस्य नारदस्योपदेशेन शिवप्राप्तये पार्वत्यास्तपःकरणवृत्तांतवर्णनम्, शिवेन तपःस्थितायाः पार्वत्या निकटे विप्ररूपेणागत्य निजनिष्ठापरीक्षणम्, ततः सुप्रसन्नेन शिवेन निजरूपप्रकटनपूर्वकं पार्वत्या आश्वासनम्, ततः पार्वत्याः स्वयंवरवैवाहिकोत्सवार्थं सर्वदेवानां निमंत्रणम्, तत्र श्रीशंकरस्य बालरूपं विधायागमनम्, तत्र समागतानां तारकादीनां दैत्यानां शिवेन हुंकारमात्रेण स्वस्वस्थानं प्रति समुत्सारणम्, सर्वेषां ब्रह्मादिदेवानां विवाहस्थलं प्रत्यागमनम्, ततः पार्वत्या सर्वदेवानां प्रत्यक्षं श्रीशंकरचरणयोर्वरणमालासमर्पणम्.	१२५	१
२६	ततो ब्रह्मादिदेवानां समनुमोदनपुरःसरं यथाशास्त्रविधानोक्तपद्धत्या हरपार्वत्योः सविस्तरविवाहमंगलोत्सववर्णनम्.	१२७	२
२७	विवाहोत्तरं शिवस्य पार्वत्या सह मंदराचलोद्याने भव्यसुंदरमंदिरे गत्वा रमणम्–तस्मिन्नवसरे तारकासुरत्रस्तैर्देवैः स्तुतिकरणोत्तरं पार्वत्या निजांगमलतो गणपतिं निर्माय देवानां साहाय्यार्थं गणपतिप्रदानम्, गणपतिना देवहितार्थं दैत्यानां शश्वद्विघ्नकरणम्, ततो वीरकाख्यस्य गणस्य पार्वत्या पुत्रीकरणवृत्तांतवर्णनम्, ततः शिवपार्वत्योः परस्परं नर्मोक्तिवशेन शिवेन पार्वत्याः कालीनाम्नाऽऽह्वाने कृते कुपितायाः पार्वत्याः शिवं प्रति मर्मस्पृङ्मर्मोक्तिभिर्निर्भर्त्सनम्	१२९	२
२८	ततः पार्वत्या मंदिरान्निर्गम्य गमनावसरे शिवसमीपेऽन्यस्याः स्त्रियाः प्रवेशनिरोधार्थं वीरकनामकं गणं प्रत्याज्ञाकरणम्, गणपतिं समादाय हिमवन्तं प्रति तपोऽर्थं गमनम्.	१३०	२
२९	ततः पार्वत्या निजमातृसख्याः कुसुमामोदिन्याः स्वस्यै शिवसमीपे व्रजन्त्या अन्यस्याः स्त्रियाः प्रवेशवार्तानिवेदनायाज्ञापनम्–ततस्तपश्चर्यारम्भकरणम्, एतस्मिन्नंतरे शिवसमीपं प्रति पार्वतीरूपेणाडिनामकदैत्यस्यागमनम्, शिवेन मैथुनप्रवृत्तो तामा-		

CC-0. In Public Domain. Digitization by eGangotri

अध्यायाः	विषयाः	प०	पृ०
	सुरीं मायां विज्ञाय निजमेढ्रमध्ये रौद्रास्त्रमाधाय मैथुनेन तद्वधकरणम्, अथ तत्क्षणाद्वायुना पार्वतीकर्णे शिवसमीपेऽन्यस्त्रीप्रवेशवार्तासमुदीरणम्, तच्छ्रुत्वा पार्वत्या वीरकगणाय शापप्रदानम्. ततस्तन्मुखात्क्रोधस्यः सिंहरूपेण बहिर्निर्गमनम्, तपः कुर्वन्त्याः पार्वत्याः समीपे ब्रह्मण आगमनम्, ब्रह्मणा देव्यै वरप्रदानम्, ततः पार्वतीदेव्याः शरीरान्नीलवर्णाया देव्या निर्गमनम्, तस्याः कौशिकीतिनामकरणम्, ततः पार्वत्याः पूर्वगौरत्वप्राप्तिः, अथ पार्वत्याः शिवसमीपं प्रति गमनम्, तत्र द्वारिस्थितेन वीरकगणेन गौर्या अन्तःप्रवेशार्थं निषेधकरणम्, वीरकवचनं श्रुत्वा पार्वत्याः पूर्वं वृथास्मै मया शापो दत्त इति पश्चात्तापः, ततः पार्वत्या वीरकाय निजवृत्तकथनपूर्वकं शिलादपुत्रनन्दित्वप्राप्तिरूपवरप्रदानम्. देव्याः शिवसमीपं प्रत्येत्य शिवेन सह प्रेमकरणम्, ततः शिवपार्वत्योः सुरतसमारम्भः, तत्र देवप्रेरणया पारावतरूपेणागतस्याग्नेर्मुखे महादेवेन वीर्यभक्षणार्थं प्रेरणम्, ईशाज्ञयाऽग्निनेशरेतोभक्षणम्, तत ऋषिपत्नीः कामयमानं स्वपतिमग्निं निरीक्ष्य षडृषिपत्नीनां षट्कृत्तिकानां रूपेण स्वाहयाऽग्निपत्न्याऽग्नेः सकाशात्कामधर्मेण षड्वारक्रमेण वीर्यं गृहीत्वा शरस्तम्बे निक्षेपणम्–ऋषिपत्नीसंभोगभ्रांत्या शोकसंतप्तस्याग्नेराकाशवाण्या सान्त्वनम्–ततोऽग्निना श्वेतपर्वतोपरि शरस्तंबमध्यस्थे कुण्डे दिव्यप्रभतनयनिरीक्षणम्–षडृषिपत्नीनां षण्णां चरितम्, अथ विश्वामित्रेण कुमारसमीपमागत्याष्टोत्तरशतनामभिः कुमारस्तुतिकरणम्–विश्वामित्रमहर्षिणा स्कन्दकुमारस्य जातकर्मादिकर्मकरणपुरःसरं पौरोहित्यकर्मकरणम्–अग्निना कुमारायाऽवलोकनपूर्वकं पुत्रेत्युक्त्यनंतरं शक्त्यस्त्रप्रदानम्–ततः कुमारस्य देवेन्द्रादिभिर्दर्शनम्–ततः शिवपार्वत्योः कुमारं प्रत्यागम्य कुमारं प्रति पुत्रस्नेहकरणम्, ततः कुमारेण सर्वेषां मनोरथप्रपूरणेन प्रियकरणम्.	१३२	१
३०	तारकासुरं हंतुं कुमारस्य समस्तदेवैर्महीसागरसंगमे देवसैनाधिपत्येऽभिषेकवर्णनम्.	१३६	१
३१	कुमारस्वामिना तारकासुरहननाय प्रतिज्ञाकरणम्, तारकासुरपुरं प्रति सर्वदेवसैनिकैः सह गत्वा कुमारेण युद्धार्थं तारकासुरं प्रति नारदस्य प्रेषणम, तस्मिन्नवसरे तारकासुरेण गवाक्षमाविरुह्य किंनरैरुद्गीयमानस्य कुमारजयमंगलध्वनेः श्रवणम्.	१३७	२
३२	किंनरैर्गीयमानां कुमारस्तुतिं श्रुत्वा तारकासुरेणोपस्थिताद्बालकान्निजवधं निश्चित्य मन्त्रिभिः सह संमन्त्र्य समस्तदैत्यसेनासंनाहपूर्वकं देवैः संग्रामार्थं स्वपुरान्निर्याणम्, ततो देवदैत्यसंग्रामारम्भः, तस्मिन्घोरसंग्रामे तारकासुरसैनिकैर्देवसैन्यपराभवकरणम्, अथ कुमारस्वामिनस्तारकासुरसंमुखे युद्धार्थमवस्थानम्. तारकासुरं शिवभक्तं दृष्ट्वा कुमारस्वामिनो मनसि विष्णोरुपदेशेऽपि तद्वधकरणेऽप्रवृत्तिः, तस्मिन्नवसरे तारकासुरेण विष्णुरुद्रादिदेवजर्जरीकरणम्, शंकरं प्रत्यभियांतं तारकं दृष्ट्वाऽऽकाशवाण्या कुमारस्वामिनस्तारकासुरहननेच्छोत्पत्तिः, ततः कुमारेण तारकवधार्थं मयूरादुत्प्लुत्य विष्णुं प्रशस्य तारकस्य शिरसा निर्गतां शक्तिं निरीक्ष्य निःशक्तिकस्य तारकासुरस्योपरि निजशक्तिं विसृज्य तारकासुरवधकरणम्, ततः केशवप्रेरणया निजशक्त्या बाणादिदैत्यव्यालादिसमन्वितक्रौञ्चपर्वतभस्मीकरणम्. ततः कुमारस्वामिनो देवगन्धर्वादिकृतविजयोत्सववर्णनम्.	१३९	१
३३	तारकासुरवधेन कुमारस्वामिनो रुद्रभक्तहननजन्यपापशंकया शोककरणम्, ततो महाविष्णूपदेशेन कुमारस्वामिना रुद्रभक्तवधजनितपातकशांतये विश्वकर्मद्वारा त्रीणि शिवलिंगानि निर्माप्य तन्मध्ये प्रतिज्ञेश्वरच्छिद्रेश्वरयोः स्थापनवर्णनम्. ...	१४२	२
३४	ततः कुमारस्वामिना ब्रह्मदेवानीतस्य लिङ्गस्य कुमारेश्वरनाम्ना स्थापनम्. कुमारस्य तत्स्थापनोत्तरं शंकराच्छिवपूजाविधिश्रवणम्, कुमारस्वामिकृता कुमारेश्वरमहादेवस्तुतिः, कुमारेश्वरेण कुमारस्वामिने वरप्रदानम्, जगदम्बायाः सदा कुमारेश्वरसंनिधानकथनपूर्वकं कुमारस्वामिने वरप्रदानम्, ततः कपर्दिगणेश्वरकृतवरप्रदानम्, कुमारेश्वरसंनिधौ कुमारस्वामिनोंऽशेनावस्थानम्, महीसागरसंगमस्थकुमारेश्वरमहादेवसेवामाहात्म्यवर्णनम्.	१४४	१
३५	अथ महीसागरसंगमे देवानां प्रार्थनया जयस्तम्भं संस्थाप्य तदुपरि विश्वकर्मविनिर्मितस्य तृतीयस्य लिङ्गस्य स्तंभेश्वरनाम्ना संस्थापनम्, कूपतीर्थनिर्माणं च, स्तम्भेश्वरमाहात्म्यवर्णनम्.	१४६	२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अध्यायाः	विषयाः	प०	पृ०
३६	महीसागरसंगमे ब्रह्मेन्द्ररुद्रप्रमुखदेवादिभिः कोटिशो लिङ्गस्थापनम्, तन्माहात्म्यं च, सिद्धाम्बिकासिद्धकूपसिद्धेश्वरादिमाहात्म्यपूर्वकं पञ्चलिङ्गोपाख्यानवर्णनम्. ...	१४७	१
३७	बर्बरीतीर्थमाहात्म्यप्रसंगेन कौमारिकाखण्डनामकारणीभूतकन्याकुमारिकाचरित्रवर्णनम्, तत्प्रसंगेन जगदुत्पत्तिब्रह्माण्डपरिमाणभूगोलसंस्थितिप्रकारकथनम्. ...	१४८	१
३८	ब्रह्माण्डपरिमाणप्रसंगेन खगोलसंस्थितिवर्णनपूर्वकसमस्तोर्ध्वलोकव्यवस्थितिकथनम्.	१५०	१
३९	अथ ब्रह्माण्डपरिमाणप्रसंगेन पाताललोकव्यवस्थितिवर्णनपूर्वकं पातालादधोभागे विविधनरकनिरूपणम्, तत्तत्पातकिनां तत्तन्नरकेषु यातनाभोगवर्णनम्, एवं समस्तब्रह्माण्डस्य पालकानां देवानां वसुधानादीनां वर्णनम्, एवमनंतकोटिब्रह्माण्डरूपवैभवशालिनो महेश्वरस्य सर्वातिशायिमाहात्म्यकथनम्, अथ कालपरिमाणकथनम्, एवं समस्तवैधात्रप्रपञ्चस्य व्यवस्थितिवर्णनम्, अथ ऋषभात्मजभरतभूपपुत्रस्य शतशृंगाख्यस्य नवापत्यमध्ये जायमानाया एकस्याः कुमारिकाया वर्करीमुखत्वकारणकथनप्रसंगेन प्राग्जन्मीयवृत्तान्तस्मरणपूर्वकं महीसागरसंगमे जालिगुल्मान्तरविलग्ननिजाऽजावक्रनिक्षेपणात्सद्यः सुन्दरस्त्रीमुखत्वप्राप्तिवृत्तान्तवर्णनम्, तया कुमारिकया वर्करेशस्थापनम्, वर्करेशानेन कुमार्यै वरप्रदानम्.शतशृंगभूपेन निजकन्यायै कुमार्याख्यायै नवधा विभक्तस्य भरतखण्डस्यैकविभागप्रदानात्तन्नाम्ना तद्विभागस्य कौमारिकाखण्डाख्यया प्रसिद्धिवर्णनम्–भरतखण्डस्थदेशग्रामनगरसंख्यापरिगणनम्, तया च कुमार्या निजभ्रातृपुत्रेभ्यः स्वकीयभागानां यथासंख्यं विभज्य प्रदानपूर्वकं स्तम्भतीर्थं प्रत्यागत्य कुमारेश्वरकुमारीश्वरसेवाकरणसुप्रसन्नभवानीशङ्करवरप्रसादसंपादनम्. वृद्धया तया रुद्रोपदेशेन सरस्वतीतीरस्थमहाकालनामकसिद्धवरणम्–महाकालवल्लभायास्तस्यास्तपःप्रभावेण चित्रलेखाप्सरस्त्वप्राप्तिवर्णनम्–वर्करेश्वरलिङ्गमाहात्म्यवर्णनम्.	१५१	२
४०	अथ महाकालनामकस्य सिद्धस्य चरित्रवर्णनम्, तत्र वाराणसीनिवासिनो माण्टिमहर्षेः शिवप्रसादेन पत्न्याश्चटिकाख्याया उदरे गर्भस्य चतुर्वर्षपर्यन्तं स्थितावपि तस्य गर्भस्य वहिर्निर्गमनाभावं निरीक्ष्य माण्टिना तस्य वहिर्निर्गमनायाज्ञाकरणम्-जन्मसंसारभीत्या गर्भस्य वहिर्निर्गमनेऽनिच्छां दृष्ट्वा माण्टिना शिवं प्रति प्रसादनम्, शिवेन तस्य गर्भस्याश्वासनार्थं निजविभूतीनामाज्ञाकरणम्, शिवविभूतिभिर्धर्मादिभिस्तस्य सान्त्वने कृते सति गर्भगृहाद्बालकस्य प्रसूतिः,तस्य बालकस्य कालाद्भीतिमापन्नतया कालभीतिनामकस्य बिल्ववृक्षस्याधस्तात्तपः कुर्वतः समीपे शंकरेण नररूपेणागत्य निजचरणांगुष्ठेन गर्तपूरणेन तीर्थं निर्माय निजरूपप्रकटनम्, ततः कालभीतिप्रार्थनया महाकाललिङ्गरूपेण भगवतोऽवस्थानम्, महाकालप्रसादेन कालभीतेर्मोचनान्महाकालत्वप्राप्तिपूर्वकं महाकालभगवतः प्रसादेन नन्दिगणरूपेण शिवप्रतीहारत्वप्राप्तिवृत्तान्तवर्णनम्, अथ महाकालेन करंधमभूपतये धर्मस्वरूपचतुर्युगव्यवस्थादिधर्मकर्मोपदेशवर्णनम्	१५५	१
४१	अथ करंधमपृष्टेन महाकालसिद्धेन ब्रह्मविष्णुरुद्रदेवानां भक्तिविषयकसंशयनिराकरणम्, नानाविधकर्मभेदसविस्तरविवरणम्, संक्षेपतो यथाशास्त्रशिवपूजाविधानवर्णनम्, नित्याचरणीयसदाचारवर्णनम्, ततश्च महाकालसिद्धस्य शिवलोकप्राप्तिवृत्तान्तवर्णनम्.	१६१	१
४२	अथ नारदस्थापितवृद्धवासुदेवमाहात्म्यवृत्तान्तवर्णनम्, तत्प्रसंगेनैतरेयब्राह्मणचारित्रवर्णनम्, महीसागरसंगमतीरस्थहारीतान्वयोत्पन्नमाण्डूकिनामकस्य ब्राह्मणस्येतरानाम्न्याः पत्न्या उदरे समुत्पन्नस्यैतरेयब्राह्मणस्य जन्मान्तरीयसिद्धत्वेऽपि प्रकृतजन्मनि मूकभावं समाश्रित्य हरिमन्दिरे निरंतरं भगवन्मन्त्रजपतत्परत्वे सति मातुः खेदापनोदार्थं शास्त्रपूतया वाण्या मात्रे संसारासारतोपदेशवर्णनपूर्वकं निजपूर्णज्ञानित्वप्रकटनेनानन्दसमुत्पादनवृत्तान्तवर्णनम्, ततश्चेतराख्यायास्तन्मातुस्तस्य महाज्ञानित्वं दृष्ट्वाऽत्यानन्दप्राप्तिः,ततस्तयोर्मातापुत्रयोरग्रतो भगवतो वासुदेवस्याविर्भावः.		

Nepal Sanskrit Univ...

CC-0. In Public Domain. Digitization by eGangotri

अध्यायाः	विषयाः	प०	पृ०
	ऐतेरयकृता भगवत्स्तुतिः, तत्कृतस्तुतिप्रसन्नेन भगवतैतेरेयब्राह्मणाय वरप्रदानम्, भगवत्प्रसादेनैतरेयब्राह्मणस्य विवाहादिसर्वमंगलप्राप्तिपूर्वकैहिकसकलभोगभोगानंतरं मोक्षप्राप्तिवृत्तान्तवर्णनम्.	१६५	१
४३	महीसागरसंगमे नारदस्थापितभट्टादित्यसूर्यमूर्तिवृत्तान्तवर्णनम्. तत्प्रसंगेन सूर्यपूजाविधिवर्णनम्.	१७०	२
४४	भट्टादित्यस्य पुरतः सद्यःप्रत्ययकारकाष्टविधशपथादिदिव्यप्रकारकथनम् ...	१७२	२
४५	कपिलस्थापितकपिलेश्वरस्य नंदभद्रवणिजा त्रिकालमर्चाकरणम्,संसारासारविचारःपूर्वकं नंदभद्रवैश्यस्य शुद्धसदाचारप्रवृत्तिवर्णनम्, सद्धर्माचरणनिष्ठस्य नंदभद्रस्य दैववशाद्भार्यापुत्रनाशेन दुःखितस्य तत्समीपवर्तिना सत्यव्रताख्येन नास्तिकशूद्रेण बुद्धिभेदार्थं विरुद्ध उपदेशे क्रियमाणे नन्दभद्रेण तद्विरुद्धवादखण्डनपूर्वकं देवतास्तित्वस्थापनपूर्वकं सद्धर्माचरणाय भट्टार्कस्थले बहूदककुंडं प्रत्यागमनम्... ...	१७४	१
४६	बहूदककुंडसमीपवर्तिकपिलेश्वरमभ्यर्च्य स्वतनुत्यागार्थमुद्यतस्य नंदभद्रवैश्यस्य समीपे कुष्ठरोगार्तेन केनचिद्ब्राह्मणपुत्रेणागत्य नंदभद्राय ज्ञानोपदेशकरणम्, अथ नंदभद्रपृष्टेन ब्राह्मणबालकेन निजचरित्रवृत्तांतकथनम्, तस्माद्ब्राह्मणबालकादुपदेशश्रवणेन सुप्रसन्नेन नंदभद्रेण गुरुदक्षिणार्थं गुरूपदेशेन गुरुनाम्ना बालादित्यस्थापनवृत्तांतवर्णनम्...	१७७	१
४७	नारदेन बहूदकतीर्थरक्षार्थं सिद्धांबिकादिचतुर्दशमहाशक्तीनां सपरिवाराणां स्थापनवर्णनम्, तासां सर्वासां महाशक्तीनां माहात्म्यवर्णनम्	१८०	२
४८	सोमनाथमाहात्म्यवर्णनम्,तत्र चौडदेशीययोर्जयंतप्रालेयनामकविप्रयोर्वृत्तांतवर्णनम्, सोमनाथदर्शनार्थं प्रभासक्षेत्रगमनोद्यतयोस्तयोर्मार्गेऽतिश्रांततया मध्येमार्गं लुण्ठमानयोरनुग्रहार्थं सोमनाथप्रादुर्भावः, महीसागरसंगमवर्तिसोमकुण्डस्नानसोमनाथदर्शनमाहात्म्यवर्णनम्, हाटकेश्वरलिंगमाहात्म्यवर्णनम्...	१८३	१

अध्यायाः	विषयाः	प०	पृ०
४९	नारदस्थापितमहीनगरस्थितविविधतीर्थमाहात्म्यप्रसंगे जयादित्यमाहात्म्यवर्णनम्, तत्र नारदेन सूर्यदर्शनार्थं सूर्यलोकं प्रति गतेन निजस्थापितमहीनगरस्थब्राह्मणप्रशंसायां कृतायां सूर्यनारायणेन तत्रत्यब्राह्मणानां दर्शनार्थं वृद्धातिथिरूपेणागमनम्, तत्र ज्ञानचर्चारूपपरमभोजनमाकाङ्क्षतो भास्करस्य हारीतपुत्रेणाष्टवर्षवयसा कमठाख्येन सर्वशास्त्रीयसिद्धान्तसिद्धजीवगत्यादिविषयकप्रश्नानां सुस्पष्टतयोत्तरप्रदानेन सूर्यभगवतोऽत्यन्तसंतोषप्राप्तिवृत्तान्तवर्णनम्...	१८३	२
५०	अथ भास्करकृतशरीरलक्षणविषयकप्रश्नस्य कमठबालकेन सशास्त्रप्रमाणसिद्धशरीरलक्षणकथनेन सम्यगुत्तरप्रदानम्, तत्प्रसंगेन जीवस्य पारलौकिकगतिवर्णनम्	१८५	१
५१	अथ भास्करकृतविविधकर्मफलविषयकप्रश्नस्य कमठबालकेन सशास्त्रप्रमाणसिद्धसकलप्राणिकर्मविपाकवर्णनेन सम्यगुत्तरप्रदानम्, तत्प्रसंगेन धर्मप्रशंसावर्णनम्, कमठप्रोक्तसम्यक्प्रश्नोत्तरश्रवणसंतुष्टेन भगवता भास्करेण तत्पुत्रप्रभृतिहारीतादितन्नगरस्थब्राह्मणप्रशंसापूर्वकं निजनामकथनम्, अथ ब्राह्मणानां प्रार्थनया भगवता भास्करेण जयादित्यनाम्ना तस्मिन्महीनगरे मूर्तात्मवास्थितिकरणम्, कमठकृताऽष्टकस्तोत्रेण जयादित्यस्तुतिः, भगवता भास्करेण कमठाख्याय हारीतब्राह्मणबालकाय वरप्रदानम्, जयादित्यमाहात्म्यवर्णनम्.	१८७	१
५२	अथ महीसागरसंगमे ब्रह्मदेवस्थापितकोटितीर्थमाहात्म्यवृत्तान्तवर्णनम्,कोटितीर्थसमीपस्थात्रीश्वरभरद्वाजेश्वरगौतमेश्वराहिल्यासरोमाहात्म्यम्, अहिल्यासरोवर्णनप्रसंगेन शक्रकृताहिल्याधर्षणादिवृत्तान्तवर्णनम्.	१८९	१
५३	अथ महीसागरसंगमे नारदस्थापितस्थानरक्षार्थकत्रिपुरुषशालाव्यवस्थापनादिवृत्तान्तपूर्वकशालामाहात्म्यम्, अथ नारदीयसरोवरनागेश्वरमाहात्म्यम्, अपरद्वारकोत्तरद्वारकामाहात्म्यवर्णनम्.	१९०	१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अध्यायाः	विषयाः	प०	पृ०
५४	अथ महीसागरसंगमवर्तिनारदमूर्तिस्थापनवृत्तान्तः, तत्प्रसंगेन बाभ्रव्यार्जुनसंवादः, बाभ्रव्येणार्जुनाय नारदमूर्तिस्थापनप्रसंगेनोग्रसेनश्रीकृष्णसंवादकथनपूर्वकं श्रीकृष्णेनोग्रसेनशंकापनोदनाय नारदप्रशंसाकथनपूर्वकं नारदाष्टकस्तुतिकरणकथनम्, श्रीकृष्णकृतनारदपूजादिकथनम्, नारदमाहात्म्यवर्णनम्.	१९०	२
५५	बाभ्रव्यमुखादर्जुनेन नारदमाहात्म्यं श्रुत्वा प्रशंसाकरणपूर्वकं गुप्तक्षेत्रमाहात्म्यश्रवणेच्छया प्रश्नकरणम्, नारदेनार्जुनाय गुप्तक्षेत्रस्थितगौतमेश्वरलिंगमाहात्म्यवर्णनप्रसंगेन सविस्तरयोगतत्त्वस्वरूपलक्षणवर्णनम्.	१९२	१
५६	अथ महीनगरकात्पूर्वदिक्स्थितब्रह्मसरोब्रह्मेश्वरलिंगमाहात्म्यवर्णनम्, नारदस्थापितजयादित्यकूपगर्भेश्वरापरपर्यायमोक्षेश्वरलिंगमाहात्म्यवर्णनम्.	१९५	१
५७	अथ केदारेश्वरनीलकण्ठमाहात्म्यम्.	१९५	२
५८	अथ तस्य महीसागरसंगमक्षेत्रस्य गुप्तक्षेत्रेतिनामप्रसिद्धौ कारणवर्णनम्, तत्प्रसंगेन ब्रह्मलोके मधुपर्कसमये तीर्थक्षेत्राणां महत्त्ववर्णनप्रस्तावे महीसागरसंगमेन स्वमुखेन स्वप्रख्यातौ क्रियमाणायां ब्रह्मणो ज्येष्ठपुत्रेण धर्मेण तस्मा अप्रख्यातिरूपशापप्रदानम्, अथ तच्छापवचनश्रवणोत्तरं गुहस्य तत्रागत्य तदुक्तस्वप्रख्यातिसमर्थनम्, अथ धर्मेण गुहस्याग्रे स्तुतिपूर्वकं स्वापराधक्षमापणम्, महीसागरसंगमक्षेत्रस्य गर्वरूपस्तंभवशेन स्तम्भतीर्थाख्यया प्रसिद्धिवृत्तान्तवर्णनपुरःसरं स्तम्भतीर्थापरपर्यायमहीसागरसंगममाहात्म्यकथनम्, अर्जुनस्य तीर्थयात्रापरिसमाप्तिवृत्तान्तवर्णनम्.	१९५	२
५९	अथ सिद्धेश्वरलिंगसिद्धाम्बिकामाहात्म्यम्, तत्प्रसंगेन पाण्डवतीर्थयात्रायां घटोत्कचाख्यस्य भीमपुत्रस्य पाण्डवैः सह समागमः, अथ श्रीकृष्णेन सह पाण्डवानां विवाहमंगलविषये मन्त्रकरणम्, अथ श्रीकृष्णेन कामकटंकटाख्याया वृत्तान्तं संवर्ण्य तस्या विजयपूर्वकं वरणार्थं घटोत्कचस्य प्राग्ज्योतिपपुरं प्रति प्रेषणम्, श्रीकृष्णादीनामनुज्ञया घटोत्कचस्य प्राग्ज्योतिपपुरं प्रति गमनम्.	१९७	१
६०	अथ घटोत्कचस्य कामकटंकटायाः प्रासादे प्रवेशः, अथ कामकटंकटाया घटोत्कचेन श्रीकृष्णस्मरणपूर्वकसपूर्वकथाकथनेन प्रश्नद्वारा निरुत्तरीकरणम्, अथ युद्धोपायेन तां कामकटंकटां पराजित्य तस्याः पृष्ठिमारुह्य श्रीकृष्णपाण्डवसमीपं प्रति घटोत्कचस्यागमनम्, अथ घटोत्कचकामकटंकटयोर्विवाहः, ततो हिडिम्बवने घटोत्कचेन राक्षसराज्यकरणम्, घटोत्कचस्य कामकटंकटायां बर्बरीकाख्यसुतोत्पत्तिवृत्तान्तवर्णनम्.	१९९	१
६१	अथ घटोत्कचस्य बर्बरीकं पुत्रमादाय श्रीकृष्णदर्शनार्थं द्वारकापुरीं प्रति गमनम्. ततः श्रीकृष्णेन बर्बरीकाय संक्षेपतश्चातुर्वर्ण्यधर्मवर्णनपूर्वकं क्षात्रधर्मानुसारेण लौकिकबलप्राप्त्यै देव्याराधनार्थमुपदेशपूर्वकं सुहृदयेति नामकरणम्, श्रीकृष्णोपदेशेन तेन सुहृदयेन गुप्तक्षेत्रे दग्धस्थलीमागत्य देवीनामाराधनम्, सुप्रसन्नानां देवीनामनुज्ञया तेन सुहृदयेन तत्रैव स्थित्वा विजयनामकमागधब्राह्मणस्य तत्र सिद्धाम्बिकायाः पुरत आगत्य महाविद्यां साधयितुं प्रवृत्तस्य सुहृदयेन विघ्ननिवारणार्थं साहाय्यकरणम्, विजयब्राह्मणेन महाविद्यासाधनार्थमादौ गाणेश्वरकल्पोपासनाकरणवर्णनम्. ...	२००	२
६२	अथ गणेश्वरक्षेत्रपालोत्पत्तिवृत्तान्तवर्णनम्, क्षेत्रपालपूजनादिविधानवर्णनम्, ततो विजयब्राह्मणेन वटयक्षिणीविद्यासाधनम्, ततश्चापराजितामहाविद्यासाधनम् ...	२०२	१
६३	अथ प्रथमयामान्ते विघ्नकरणार्थं समागताया महाजिह्वाराक्षस्याः सुहृदयेन घटोत्कचपुत्रेण दमनम्, ततो मध्यरात्रसमये विघ्नकरणार्थं समागतस्य रेपलेन्द्रस्य घटोत्कचपुत्रेण सुहृदयेन दमनम्, ततस्तृतीययामान्ते विघ्नकरणार्थं समागताया दुहद्रुहाख्याश्वतर्याः सुहृदयेन हनने कृते सति तत्प्रक्षेपस्थले दुहद्रुहाख्यग्रामप्रसिद्धिवर्णनम्, अथ चतुर्थयामे विघ्नकरणार्थं समागतस्य क्षपणकवेषधारिणः पलाशिनाम्नो दैत्यस्य नवकोटिदैत्यसेनासमन्वितस्य भैमिपुत्रेण सुहृदयेन पातालगुहां तमनु गत्वा हननम्, ततश्च तत्कृतेन दैत्यवधेन संतुष्टैर्नागलोकैः सुहृदयाय वरप्रदानम्, अथ पातालविवरस्थरत्नलिङ्गपूजकनागकन्याभिः प्रवर्णितन मार्गेण सुहृदयस्य भूतले सिद्धाम्बिका-		

CC-0. In Public Domain. Digitization by eGangotri

अध्यायाः	विषयाः	प०	पृ०
	पुरःस्थले विजयाख्यब्राह्मणसमीपं प्रत्यागमनम्, ततः सर्वमहाविद्यासिद्धिसंपन्नतया सुप्रसन्नेन विजयब्राह्मणेन सुहृदयायाशीःप्रदानम्, ततो भविष्यत्संग्रामे पाण्डवसंरक्षणहेतुना देवानां देवीनां चानुज्ञया विजयब्राह्मणदत्तसिन्दूरसदृशहोमभस्मग्रहणपूर्वकं सर्वदेवीदेवैः सुहृदयस्य सिद्धसेनेतिनामकरणवर्णनम्.	२०३	२
६४	अथ देव्याराधनतत्परतया सिद्धाम्बिकासंनिधौ सिद्धसेने स्थिते वनवासप्रसंगेनागतानां पाण्डवानां मध्येऽतितृपार्तेन भीमेन देवीपुरतः स्थिते कुण्डे प्रवेशे कृते सत्यतिक्रुद्धेन सिद्धसेनेन भीमेन सह युद्धं कृत्वा भीमसेनस्य जर्जरीकरणम्, ततो भीमसेनं गृहीत्वा सागरे प्रक्षेप्तुं प्रचलितस्य सिद्धसेनस्य समीपे वियति भगवता रुद्रदेवेन समभ्येत्य सिद्धसेनाय भीमसेनस्य पितामहत्ववर्णनम्, तद्रुद्रवचः श्रुत्वा सिद्धसेनस्य शोककरणपूर्वकं भीमसेनाग्रेऽपराधक्षमापणम्, भीमसेनेन स्वपौत्रस्यालिंगनम्, अथ पितामहापराधदोपविपण्णस्य सिद्धसेनस्य समुद्रं प्रति निजप्राणत्यागार्थं गमनम्, तन्निवारणार्थं भीमसेनस्यापि तत्पश्चाद्गमनम्, ततो रुद्रसहिताभिः सिद्धाम्बिकादिदेवीभिः सिद्धसेनस्य सांत्वनपूर्वकं चण्डिलेतिनामकरणम्, भीमेन चण्डिलेन सह युधिष्ठिरादिपाण्डवसमीपं गत्वा सर्ववृत्तनिवेदनम्, भीमस्थापितभीमेश्वररुद्रलिङ्गमाहात्म्यवर्णनम्.	२०५	२
६५	अथ युधिष्ठिरकृतां सिद्धाम्बिकास्तुतिं निशम्य भीमसेनेन युधिष्ठिरस्य स्त्रोस्तुतिकरत्वं मत्वा निर्भर्त्सनम्, ततो देव्यवज्ञानाद्भीमसेनस्याङ्गवैकल्यप्राप्तौ भीमेन स्वापराधक्षमापणाय सिद्धाम्बिकाजगदम्बिकास्तुतिकरणम्, ततो जगदम्बिकया तस्मै वरप्रदानम्, अथ देव्या स्वस्या निमित्तान्तरेण लोहाणास्थकेलेश्वरीदुर्गावत्सेश्वरीगयत्राडेत्यादिनामभेदस्थानभेदेन तत्र क्षेत्रेऽवस्थितिवर्णनपूर्वकं सर्वपाण्डवानामभयप्रदानम्, पाण्डवैर्बर्बरीकस्य तत्रैव स्थाने संस्थापनपूर्वकं तीर्थयात्राकरणम्... ...	२०७	२
६६	अथ त्रयोदशवर्षानन्तरं वनवासान्निवृत्त्य स्वकीयराज्यप्राप्तये संग्रामांगणं समुपस्थितेषु ससैन्येषु पाण्डवकौरवेषु मध्ये सर्वशत्रुसैन्यवधसमर्थवीरपरिगणनायां प्रक्रान्तायां घटोत्कचपुत्रेण चण्डिलेन सर्वातिशायिस्वसामर्थ्यप्रकटनप्रौढ्या परीक्षाप्रदानार्थं पुरा देव्यग्रतः कृतहोमेन विजयनामकसिद्धब्राह्मणेन प्रदत्तस्य सिन्दूराभभस्मनः स्वशराग्रे संयोजनपूर्वकं बाणप्रक्षेपेण सर्वशत्रुसैन्यस्य मृत्युमर्मनिदर्शनकरणम्, अथ तद्दृष्ट्वा सर्वेषां युधिष्ठिरादीनां तत्प्रशंसापूर्वकं सुमहति साधुवादे संप्रवृत्ते सत्यकस्मादेव कृष्णेन तस्य घटोत्कचपुत्रस्य स्वचक्रेण शिरश्छेदकरणम्, अथ कृष्णेन तच्छिरश्छेदं कृतं दृष्ट्वा शोकाकुलान्पांडवादीन्घटोत्कचं च प्रति तस्मिन्संग्रामांगणे सिद्धाम्बिकादिचतुर्दशदेवीनामागमनम्, ताभिश्च चण्डिलस्य प्राग्जन्मजातसुवर्चोनामकयक्षस्य वृत्तान्तकथनपूर्वकं सर्वेषां सान्त्वनम्, अथ श्रीकृष्णेन तच्छिरश्छेदकारणकथनम्, ततो देव्याऽमृतसिञ्चनेन तच्छिरसोऽमृतीकरणम्. अथ श्रीकृष्णेन शिरोरूपस्य चण्डिलस्य वरप्रदानम्, अथ श्रीकृष्णाज्ञया युद्धभूमिसमीपवर्तिगिरिशृंगमधिरुह्य तेन बर्बरीकेण पाण्डवकौरवाणां युद्धनिरीक्षणम्, अथ भारतमहायुद्धनिवृत्त्यनन्तरं गर्वान्वितस्य भीमस्य श्रीकृष्णेन बर्बरीकमुखतः परमपुरुषेण हरिहराभिन्नरूपेण केनचित्परमपुरुषेण सर्वं सैन्यं निर्दलितमिति सत्यापयित्वापि लंकाद्वाःस्थितकुम्भकर्णशिरःकरोटिकादर्शनेन गर्वपरिहरणवृत्तान्तवर्णनम्, अथ रणाजिरं प्रत्येत्य घटोत्कचपुत्राय बर्बरीकाय श्रीकृष्णेन वरप्रदानम्, अथ बर्बरीकस्तवः, बर्बरीकपूजनमाहात्म्यम्, अथ महीनगरस्थकेदारेश्वरात्रोश्वरनीलकण्ठेश्वरजयादित्यमाहात्म्यम्, एवं सप्तक्रोशात्मकगुप्तक्षेत्रापरपर्यायमहीसागरसंगमक्षेत्रमाहात्म्यश्रवणपठनादिफलश्रुतिः	२०९	२

इति माहेश्वरखण्डे द्वितीयं कौमारिकाखण्डं संपूर्णम् ॥ (१–२) ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अध्यायाः विषयाः प० पृ०

अथ माहेश्वरखण्डे तृतीयेऽरुणाचलमाहात्म्ये पूर्वार्धम् ॥ (१-३-१) ॥

१ नैमिषारण्यंवासिभिर्मुनिभिः सूतमहर्षिं प्रत्यरुणाचलमाहात्म्यश्रवणेच्छया पृष्टे सूतेन तान्प्रत्यरुणाचलमाहात्म्यकथनोपक्रमे ब्रह्मसनकसंवादकथनम्, सनकेन तैजसशिवलिङ्गमाहात्म्यश्रवणेच्छया पृष्टेन भगवता ब्रह्मणाऽरुणाचलेश्वरतैजसशिवध्यानपूर्वकमरुणाचलेश्वरमाहात्म्यकथनोपक्रमवर्णनम्, तत्र पूर्वं विष्णुब्रह्मणोः परस्परमात्मश्रैष्ठ्यप्रागल्भ्यपूर्वकं युध्यमानयोर्मध्ये वह्निस्तम्भमयभगवदाविर्भावः, आकाशवाण्या च तयोर्युद्धाद्विरतिः, अथ तस्याग्निस्तम्भमयरूपस्याऽनाद्यन्तस्य भगवतोऽधोऽन्तं परिच्छेत्तुं विष्णोर्वराहरूपेण गतस्याऽनन्तस्यान्तं परिच्छेत्तुमशक्यतया विषादप्राप्त्यनन्तरं पूर्वस्थलं प्रत्यागमनम्, ऊर्ध्वमन्तं परिच्छेत्तुं ब्रह्मणो हंसरूपेण गतस्याऽनन्तस्यान्तं परिच्छेत्तुमशक्यतया विषादप्राप्त्यनन्तरमूर्ध्वलोकस्थितानां सिद्धानां वचनतोऽनन्तस्यानन्ततां परिज्ञाय पूर्वस्थलं प्रति समेत्य भगवतः पुरतोऽवस्थितिवर्णनम्. २१४ २

२ अथ ब्रह्मविष्णुभ्यां वह्निस्तम्भमयस्य भगवतः स्तवनम्, ततो वह्निस्तम्भमयपरमेश्वरेण ब्रह्मविष्ण्वोर्वरप्रदानम्, ब्रह्मविष्ण्वोः प्रार्थनया वह्निस्तम्भमयेन परमेश्वरेण निजरूपमुपसंहृत्यारुणाचलरूपेण स्थावरलिंगताधारणम्, स्थावरलिंगमाहात्म्यवर्णनम्. २१६ २

३ अथारुणाद्रीश्वरचरित्रवर्णनम्, तत्र भगवत्या जगदम्बया कदाचिद्रहसि शम्भोः क्रीडावशेन नेत्रत्रयपिधानम्, शंकरस्य चन्द्रसूर्याग्निरूपेषु त्रिषु नेत्रेषु पार्वत्या निमिषमात्रं पिहितेषु सकलजगतोऽकाले क्षयः, तदानीमविनाशिभिस्तपसा लब्धस्फूर्तिभिः सिद्धैस्तपोबलप्राप्तज्ञानचक्षुषा तत्सांबशंकरचरित्रं विज्ञाय सांबसदाशिवस्तुतिकरणम्, श्रीशंकरेण सिद्धानां स्तुतिमाकर्ण्य निजनिमिषार्धेन वत्सरकोटिपरिमितकालातिक्रमणेन जगतः प्रलयं दृष्ट्वाः पार्वतीं प्रतीदं त्वयाऽयोग्यं कर्म कृतमित्युक्ते पार्वत्यास्वकृतजगत्क्षयजनितदुरितनिवृत्त्यै प्रायश्चित्तपृच्छायां कृतायां भगवता लोकशिक्षार्थं पार्वत्यै तपःकरणार्थमनुज्ञाकरणम्, ततः श्रीशंकरानुज्ञया पार्वत्याः कांचीपुरीस्थकंपानदीतीरस्थितैकाम्रतले तपश्चर्यार्थमागमनम्. ... ...

४ अथ कम्पानदीतीरस्थितैकाम्रतले पार्वत्या सैकतशिवलिंगं संस्थाप्य, स्वधर्माचरणपूर्वकं तपश्चर्याकरणम्, अथ शंकरेण पार्वत्या दृढभक्तिपरीक्षणार्थं नदीपूरप्रवाहेण समंततो व्याप्तौ कृतायां देव्या सैकतशिवलिंगस्य प्रवाहाल्लयभीत्या दृढमालिंग्य पूरप्रवाहेण वेष्ट्यमानयाऽपि लिङ्गं विहायाऽन्यतोऽगमनम्, पार्वतीदृढपरिरम्भणतः सैकतलिङ्गे पार्वतीकुचचूचुकचिह्नमुद्राङ्कितत्ववर्णनम्, अथाकाशवाण्या पार्वतीमाश्वास्य तस्य सैकतलिंगस्याभ्यर्हणे वरं प्रदायारुणाचलं प्रति गत्वा गौतमोपदेशेन तपःकरणार्थमनुज्ञाकरणम्, अथ देव्या पार्वत्या तत्र कंपानदीतीरे दर्शनार्थं सेवार्थं चागतेभ्यः सर्वदेवेभ्य ऋषिभ्यश्च सैकतशिवलिङ्गपूजनार्थमाज्ञाकरणम्, ततः पार्वत्याः सर्वदेवैः सहारुणाद्रौ गौतममहर्षेराश्रमं प्रति गमनम्.... ... ... २१८ २

५ अथ गौतममहर्षिणा पार्वत्याः स्वागतसत्कारकरणम्, पार्वतीप्रार्थितेन गौतममहर्षिणा पार्वतीं प्रत्यरुणाचलमाहात्म्यवर्णनम्–तत्प्रसंगेन ब्रह्मपुष्करमाहात्म्यवृत्तान्तवर्णनम्. २२० १

६ अरुणाचले श्रीमहाविष्णुप्रभृतिसमस्तदेवगणमहर्षिगणराजर्षिगणस्थापितविविधतीर्थमाहात्म्यानां वृत्तान्तपूर्वकं वर्णनम् २२१ २

७ अथाग्निमयस्य लिङ्गस्य पार्वत्योपशान्तताकारणे पृष्टे गौतममहर्षिणाऽरुणाचलेश्वरस्य चतुर्युगीयनामभेदवर्णनम्. तत्र देवकृतस्तुत्यारुणाचलेश्वरस्य भगवतः शीतलताप्राप्तिवृत्तान्तवर्णनम्, अथारुणाचलस्थाष्टलोकपालस्थापिताष्टदिक्स्थतीर्थमाहात्म्यवृत्तान्तः, मार्कण्डेयप्रार्थनया महेश्वरेण सर्वतीर्थसमुच्चयस्यैकीकरणवर्णनम्, अथ तीर्थमाहात्म्यं श्रुत्वा सुप्रसन्नया पार्वत्या श्रीपरमेश्वरार्चनविधिजिज्ञासया गौतममहर्षिं प्रति प्रश्नकरणम्. २२४ १

८ अथ गौतमेन महर्षिणा पार्वत्यै श्रीशङ्करशोणाद्रीश्वरप्रसादादिरूपनिजवृत्तान्तं निवेद्य श्रीशंकरप्रोक्तागमोक्तसविस्तरारुणाचलेश्वरशिवाराधनामाहात्म्यवर्णनम्. ... २२५ १

CC-0. In Public Domain. Digitization by eGangotri

अध्यायाः	विषयाः	प०	पृ०
९	श्रीशंकरेण श्रीशोणाद्रीश्वरविविधनामकथनम्, अथ शोणाद्रीश्वरप्रदक्षिणामाहात्म्यकथनम्, शोणाद्रीश्वरप्रदक्षिणामाहात्म्यप्रसंगेन धर्मकेतुराजवृत्तान्तवर्णनम्, भगवते विविधोपचारसमर्पणमाहात्म्यवर्णनम्, गौतमेन स्वस्मै भगवता भगवत्या अपीतकुचाख्यायाः पार्वत्यास्तपोदीक्षाग्रहणाय स्वसमीपं प्रत्यागमनादिभविष्यद्वृत्तान्तं वर्णयित्वा भगवत्याः पार्वत्याः प्रशंसाकरणम्, ततः पार्वत्या तपः कर्तुं गौतमेनानुमोदितया गौतमाश्रमे कांचित्पर्णशालामध्यास्य यथोक्तनियमपूर्वकं तपश्चर्याकरणवर्णनम्. ...	२२६	२
१०	अथ तत्र तपस्यन्तीं देवीं प्रति महिषासुरत्रस्तानां सर्वेषामिन्द्रादिदेवानामागमनम्, इन्द्रादिदेवैर्देव्यै महिषासुरकृतनिजवित्रासनिवेदनम, देवानां दैन्यमालोक्य देव्या महिषासुरवधार्थं प्रतिज्ञां कृत्वा देवानामाश्वासनकरणम्, देवीत आश्वासनं प्राप्य देवेषु गतेषु सत्सु देव्या स्वात्मनः परितश्चतुर्षु दिक्छैलेषु स्थानरक्षार्थं चतुर्वटुकस्थापनम्, तथा च चतसृणां निजपरिचारिकाणामरुणाद्रिं प्रति केवलमतिथिप्रेषणार्थमाज्ञाकरणम्, एवं व्यवस्थां कृत्वा गौतमाश्रमसंनिधौ पार्वत्यास्तपःकरणम्, पार्वतीतपःसामर्थ्यात्तत्राश्रमे सर्वतःशान्ततावर्णनम्; अथ कदाचिन्महिषासुरस्य मृगयार्थं शोणाद्रिपरिसरे भ्रमणम्, अथ देवीस्थाने वटुभिर्निरुद्धेन महिषासुरेण वृद्धातिथिब्राह्मणरूपेण देवीं प्रति गत्वा निजप्रशंसाकरणपूर्वकं स्ववरणार्थं स्वाभिप्रायनिवेदनम्, अथ देव्या महिषासुरं प्रति युद्धार्थं निजाभिप्रायकथनम्, ततो युद्धोद्यतं महिषासुरं दृष्ट्वा कन्यारूपायास्तस्या जगदंबाया भव्यभयंकरदुर्गारूपेणावस्थानम्, महिषासुरेण निजसेनाह्वानम्, ब्रह्मादिदेवैर्देव्यै विविधनिजायुधसमर्पणम्, देवीस्वरूपं दृष्ट्वा भयेन पलायितं महिषासुरं प्रति देव्या वानरमुखसुरगुरुद्वाराऽरुणाचलं प्रत्यागन्तुं निषेद्धुं सन्देशप्रेषणम्, सुरगुरुप्रोक्तं देवीसंदेशं निशम्य भृशं क्रुद्धेन महिषासुरेणारुणाचले देव्या सह युद्धार्थं सर्वदैत्यसैन्यप्रेषणम्, आगतं दैत्यसैन्यं विलोक्य देव्या स्वतेजसा विविधभूतवेतालमातृकायोगिन्यादिगणानां सृष्टिकरणम्, दैत्यसैन्यदेवीसैन्ययोः प्रचण्डयुद्धवर्णनम्, तत्र युद्धे महिषासुरेण सह देव्या युद्धारम्भः.	२२९	१
११	देवीमहिषासुरयोर्युद्धे देव्या महिषासुरमर्दनम, अथ महिषार्दिन्या दुर्गाया इन्द्रादिदेवैः स्तुतिकरणम्, अथ महिषासुरशिरःस्थितशिवलिंगस्य देव्याः पाणितल आसञ्जनवर्णनम्, ततः स्वहस्तेन शिवभक्तहननं जातमिति मन्यमानाया जगदम्बायाः शोकेन गौतमाग्रतस्तीर्थयात्रार्थकस्वसंकल्पनिवेदनम्, ततो गौतमेन जगदम्बाया आश्वासनपूर्वकं महिषासुरवृत्तकथनपूर्वकं गौर्यै दोषनिवृत्त्यर्थमरुणाचलाग्रतस्तीर्थस्नानरूपोपायकथनम्.	२३१	२
१२	अथाकाशवाण्या गौर्या स्वखड्गेन खड्गतीर्थं निर्माय तत्र कार्तिकमासपर्यंतं निमज्जनम्, खड्गतीर्थतीरे स्वहस्तच्युतमहिषासुराशिरःस्थितलिंगस्थापनम्, ततः कार्तिके मासि कृत्तिकानक्षत्रेऽरुणाद्रीश्वरस्तुतिकरणम्, ततः प्रसन्नेन भगवताऽरुणाद्रीश्वरेण ज्योतीरूपेणाविर्भूय ज्योतिरन्तर्गतहिरण्मयपुरुषरूपेण जगदंबायै वरप्रदानम्, ततो जगदम्बयाऽरुणाद्रीश्वरस्य प्रदक्षिणाकरणम्, ततः प्रसन्नेन श्रीशोणाद्रीश्वरेण शंकरेण भगवता सह जगदंबायाः समागमवर्णनम्	२३३	१
१३	अथ शिवेन पार्वत्यै वरप्रदानपूर्वकं पार्वत्या सह रंतुकाम्यया पार्वत्यंगे मृगमदालेपनम्, मृगमदोत्पत्तिवृत्तान्तवर्णने पुलकाख्यदैत्यस्य चरित्रकथनम्, देवीहस्तोत्थितकमलस्य वृत्तान्तः, तत्प्रसंगेन काञ्चीस्थमहादेवमाहात्म्यवर्द्धनपूर्वकपार्वतीदर्शनमाहात्म्यवृद्धये पार्वत्याः शिवं प्रति प्रार्थना, शिवेन पार्वत्यै वरप्रदानम्, अरुणाद्रीश्वरमहावैभवमाहात्म्यवर्णनम्.	२३५	१

इति माहेश्वरखण्डे तृतीयेऽरुणाचलमाहात्म्ये पूर्वार्धम् ॥ (१–३–१) ॥

अथ माहेश्वरखण्डे तृतीयेऽरुणाचलमाहात्म्य उत्तरार्धम् ॥ (१–३–२)

अध्यायाः	विषयाः	प०	पृ०
१	सूतशौनकसंवादे मार्कण्डेयनन्दीश्वरयोः संवादारम्भः, तत्र मार्कण्डेयेन विविधमुनिवरैः सहितेन नन्दिकेश्वरं प्रति शैवागमप्रोक्तशिवधर्मजिज्ञासया प्रार्थनाकरणरूपेण स्थानमाहात्म्यप्रस्तावर्णनम्	२३७	१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अध्यायाः	विषयाः	प०	पृ०
२	अथ नन्दिकेश्वरेण श्रीशिवनिवासभूतमहीमण्डलस्थविविधक्षेत्रतीर्थस्थानवर्णनम्.	२३७	१
३	अथ मार्कण्डेयेन नन्दिकेश्वरं प्रति सर्वफलप्राप्तिकरसर्वश्रेष्ठरहस्यस्थानजिज्ञासया सह महर्षिगणैः श्रोतुमुत्सुकताप्रदर्शनपूर्वकं प्रश्नकरणम्.	२३९	१
४	अथ नन्दिकेश्वरेण सशिष्यं मार्कण्डेयमहर्षिं प्रति संश्लाघ्य दक्षिणदिक्स्थद्राविडदेशान्तर्गतश्रीमदरुणाचलेश्वरस्थानस्य सविस्तरमहावैभवमाहात्म्यवर्णनम्... ...	२३९	२
५	अथ नन्दिकेश्वरेण शिवभक्तिदार्ढ्याय सात्त्विकराजसतामसवृत्तिपुरुषवर्णनप्रसंगेन विविधकर्मविपाकवर्णनम्...	२४०	२
६	सकलमहापापापनोदकप्रायश्चित्तवर्णनप्रसंगेन श्रीमदरुणाचले कर्त्तव्यविविधधर्मवर्णनम्.	२४१	१
७	अथ शोणाद्रीश्वरस्य सूर्यादिवारप्रतिपदादितिथ्यश्विन्यादिनक्षत्रमेषादिराशिपूर्वाह्णमध्याह्नसायाह्नायनमासादिसमयविशेषपरत्वेन पूजाविशेषोपचारमाहात्म्यपूर्वककाम्यकर्मवर्णनम्...	२४२	१
८	अथ विस्तरेण श्रीमदरुणाचलेश्वरश्रीशंकरचरित्रमाहात्म्यकथनारम्भः, तत्र श्रीशंकरेण निजदक्षिणवामाङ्गाभ्यां ब्रह्मविष्ण्वोरुत्पत्तिः, रजोगुणसत्त्वगुणाभ्यां ब्रह्मविष्ण्वोर्योगकरणम्, ततो भगवदाज्ञया ब्रह्मणः सृष्टिकार्ये महाविष्णोश्च स्थितिकार्येऽधिकारप्रवृत्त्या निजोत्पादकभगवद्विस्मृत्या स्वस्वगुणकार्यवशेन गर्वप्राप्तिवृत्तान्तवर्णनम्.	२४३	१
९	विरंच्यच्युतयोः स्वाधिकारगर्वेण मोहजन्यस्वश्रैष्ठ्यविषयकमहाविवादवर्णनम्...	२४३	२
१०	अथ भृशं सासूयं विवदमानयोर्ब्रह्मविष्ण्वोर्मध्ये तद्विवादशान्तये तेजोमयश्रीशंकरभगवल्लिंगप्रादुर्भाववृत्तान्तवर्णनम्, ततो ब्रह्मविष्ण्वोस्तस्य लिङ्गस्योर्ध्वाधोभागपर्यन्तशोधनार्थं निश्चयकरणपूर्वकमन्तशोधस्य निर्धारणम्.	२४४	२
११	अथ तस्य तेजोमयलिंगस्याधोऽन्तपर्यन्तपरिच्छित्तये वराहरूपधारिणो विष्णोरधोलोकगमनम्, लिंगाधोभागशोधनं कृत्वा तस्य लिंगस्यानन्ततां निश्चित्य ततो निवृत्य पुनः पूर्वस्थलं प्रत्यागमनम्.	२४५	१
१२	अथ तस्य तेजोमयलिंगस्योर्ध्वान्तपर्यन्तपरिच्छित्तये हंसरूपधारिणा ब्रह्मण ऊर्ध्वलोकगमनम्, तत्र लिंगोपरितनभागशोधनप्रवृत्तस्य ब्रह्मणोऽतिदूरऽतिचिरागतकेतकीपत्रेण सह समागमः.	२४५	२
१३	अथ मिथ्यासाक्ष्यप्रदानाय प्रार्थितेन केतकीपत्रेण सह ब्रह्मणो मूलस्थानं प्रत्यागत्य विष्णवे लिङ्गोर्ध्वपर्यंतदर्शनस्य केतकीपत्रद्वारा मिथ्यासाक्ष्येण सत्यापनम्.	२४६	१
१४	अथ विष्णुना हृदयेन तदसत्यं विनिश्चित्य स्वात्मरक्षार्थं ब्रह्मगर्वमदनिवृत्तये तेजोमयलिंगस्वरूपस्य भगवतः स्तुतिकरणम्.	२४६	२
१५	अथ विष्णुकृतस्तुत्या प्रसन्नेन शंकरेण तेजःस्तंभं विनिर्भिद्य सगुणपञ्चवदनमूर्तिप्रकटनम्, तं सगुणरूपं परमेश्वरं श्रीशंकरं दृष्ट्वा विष्णोरानन्दः, तथा च ब्रह्मणो लज्जाप्राप्तिः, महेश्वरेण ब्रह्मणेऽपूज्यतारूपशापप्रदानम्, केतकच्छदस्य च स्वपूजानर्हतारूपशापप्रदानम्, अथ ब्रह्मदेवकृताशिवस्तुत्युद्यमः.	२४७	२
१६	अथ ब्रह्मदेवेन शिवस्तुतिकरणम्, एवं ब्रह्मविष्णुस्तुतिप्रसन्नेन भगवता श्रीशंकरेण ब्रह्मविष्ण्वोर्वरप्रदानपूर्वकं पुनः स्वाधिकारपालनार्थमाज्ञाकरणम्, श्रीशोणाचलेऽवस्थित्यर्थमाज्ञाकरणं च, ततो भगवदन्तर्धानानन्तरं ब्रह्मविष्णुभ्यां श्रीशोणाचले सरःखननपूर्वकमरुणपुरनिर्माणपुरःसरारुणाचलेश्वरमन्दिरनिर्माणम्.	२४८	२
१७	अथ शिवपार्वत्योर्विहारवर्णनम्, कृतस्य तपसो वृत्तान्तवर्णने तत्र चानेकचरितपुरःसरं चतुर्मुखनारायणयोर्हेरम्बषडाननत्वादिवृत्तान्तवर्णनम्.	२४९	१
१८	अथ प्रणयकोपकुपितायाः पार्वत्याः शिवसकाशतो निष्क्रम्य निजदेहकालिमनिवृत्तये तपःकरणार्थं सखीभिः सह गौतमाश्रमं प्रत्यागमनम्, अथ गौतमोपदेशेन देव्या तदाश्रमसमीपे तीव्रतरनियमधारणपूर्वकमनुदिनमरुणाचलेश्वरपरिचरणरूपतपःकरणम्.	२४९	२

CC-0. In Public Domain. Digitization by eGangotri

अध्यायाः	विषयाः	प०	पृ०
१९	अथ तत्र तपःस्थिताया देव्या लोभनार्थं महिषासुरेण निजप्रशंसानिवेदनाय देवीं प्रति दूतीप्रेषणम्, देवीसख्या महिषासुरदूत्यां ततः स्थानान्निःसारितायां महिषासुरस्य महता सैन्येन सह देवीं प्रत्यागमनम्, अथ देव्या महिषासुरसैन्यकोलाहलं श्रुत्वा दैत्यसंहारार्थं दुर्गां प्रत्याज्ञाकरणम्, दुर्गादेव्या स्वांगेभ्यो विविधयोगिनीचक्रमातृकादिसैन्यनिर्माणम्, ततो देवीसैन्यदैत्यसैन्ययोस्तुमुलद्वन्द्वयुद्धवर्णनम्, ततो महिषासुरस्याजय्यतां दृष्ट्वा मातृकादिभिर्दुर्गादेवीस्तुतिकरणम्, ततो दुर्गादेव्या महिषासुरेण सह संग्रामे दुर्गादेवीकृतमहिषासुरवधवृत्तान्तवर्णनम्.	२५१	२
२०	अथ दुर्गाहस्ते महिषासुरमस्तकसंलग्नतायां देव्या उपदेशेन दुर्गया खड्गेन शिलापट्टपाटनपूर्वकं खड्गतीर्थं निर्माय तत्र निमज्जनम्, तन्निमज्जनसमये महिषासुरकण्ठस्थितलिङ्गपतनम्, तस्य लिङ्गस्य पापनाशनसंज्ञया खड्गतीर्थतीरे स्थापनम्, ततो दुर्गादेव्या हस्तात्तस्मात्तीर्थादुन्मज्जनसमये महिषासुरमस्तकपतनम्, अथ पार्वत्या दुर्गादेव्यै शिवभक्तमहिषासुरहननार्थं निजानुमतिप्रदानात्पापशङ्काप्राप्त्यनन्तरं पापापनोदाय प्रायश्चित्तजिज्ञासया गौतमप्रार्थनम्, ततो गौतमेन कार्तिकपूर्णिमायामरुणाचलेश्वरज्योतिर्दर्शनपर्यन्तं तपश्चर्याकरणार्थमुपदेशकरणम्, अथ गौतमोपदेशेन पार्वत्या तपश्चर्याकरणम्, ततः कार्तिकपौर्णमास्यां दिनांते श्रीशोणाचलशिखरे ज्योतिर्दृष्ट्वा पार्वत्या श्रीशोणाद्रीश्वरस्तुतिकरणम्, अथ तत्कृतस्तुतिसंतुष्टेन भगवता सद्यः सुस्वरूपरूपदर्शनपूर्वकं जगदम्बायाः पार्वत्याः सान्त्वनवर्णनम्. ...	२५३	६
२१	अथ श्रीशङ्करेण जगदम्बायाः प्रशंसापूर्वकं पार्श्वे निवेशनम्, स्तन्यार्थिनं स्कन्दं विहाय तपोऽर्थं पार्वत्याः शिवसकाशतो निर्गमनकारणाच्छ्रीशंकरेण जगदम्बायां अपीतकुचेतिनामकरणम्, महिषासुरमर्दिन्या दुर्गायाः श्रीजगदम्बासमीपेऽवस्थानम्, खड्गतीर्थस्य गौतममहर्षेः सप्तमातृकादीनां च श्रीशङ्करेण वरप्रदानवर्णनम्.	२५४	१
२२	अथ पाण्ड्यदेशीयसार्वभौमवज्रांगदभूपालचरित्रवर्णनम्, तत्र वज्रांगदस्य हयमारुह्य मृगमनु शोणाचलं गतस्य मध्येमार्गं वाहात्पतनम्, तुरङ्गस्य कस्तूरीमृगस्य चेत्युभयोरपि शोणाद्रौ देहपतनेन तत्क्षण एव मरणात्खेचरत्वप्राप्तिः, अथ राज्ञा पृष्टयोस्तयोः खेचरयोर्विद्याधरयोर्मध्ये कान्तिशालिना विद्याधरेण वज्रांगदायात्मनो दुर्वासःशापकारणकथनप्रसंगेन श्रीशोणशैलप्रदक्षिणामाहात्म्यकथनम्, तत्र श्रीशोणाद्रीशेन शम्भुना निजप्रदक्षिणां कृतवते हेरम्बाय फलप्रदानपूर्वकं स्वस्य श्रीशोणाद्रीश्वरस्य प्रदक्षिणामाहात्म्यकथनम्.	२५४	२
२३	अथ कलाधराख्येन विद्याधरेण वज्रांगदाय भूपतये निजशापवृत्तान्तनिवेदनम्, अथ कान्तिशालिकलाधरयोर्विद्याधरयोरुपदेशेन वज्रांगदभूपस्य श्रीमदरुणाचलभक्तिविषये दृढनिश्चयकरणम्.	२५५	२
२४	अथ वज्रांगदभूपतिना श्रीमदरुणाचलसेवार्थं निजसर्वसंपत्त्युपयोगेन ब्राह्मणेभ्यो विविधाग्रहारादिसमर्पणपूर्वकं गौतमाश्रमसमीपे निजतपोवनं विधाय सर्वतीर्थस्नानसर्वदेवपूजापूर्वकशिवार्चाकरणम्, वज्रांगदकृतया तपश्चर्यया संतुष्टेन भगवता वज्रांगदाय निजमहिमोपदेशपूर्वकवरप्रदानम्, भगवद्वरप्रसादेन वज्रांगदस्य सर्वभोगावाप्तिपूर्वकसद्गतिवर्णनम्, अरुणाचलेश्वरस्य सर्वातिशायिश्रैष्ठ्यमाहात्म्यवर्णनपूर्वकमरुणाचलमाहात्म्यसमाप्तिवर्णनम्.	२५६	१

इति माहेश्वरखण्डे तृतीयेऽरुणाचलमाहात्म्य उत्तरार्धम् ॥ (१-३-२) ॥

इति स्कांदे महापुराणे प्रथमं माहेश्वरखण्डम् ॥ १ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ स्कान्दे महापुराणे द्वितीयं वैष्णवखण्डम् ॥ २ ॥

अथ वैष्णवखण्डे प्रथमं वेङ्कटाचलमाहात्म्यम् ॥ (२-१) ॥

अध्यायाः	विषयाः	प०	पृ०
१	सूतशौनकसंवादे नारदस्य सुमेरुशिखरस्थयज्ञवराहदर्शनम्, ततः स्वामिपुष्करिण्याः सर्वतीर्थातिशायित्ववर्णनम्, कुमारधारामाहात्म्यम्, तुंवतीर्थमाहात्म्यम्, पाण्डवतीर्थमाहात्म्यम्, पापनाशन–देवतीर्थयोर्माहात्म्यम्, धरणीकृतवराहस्तुतिः, वराहस्य धरण्या साकं शेषाचलं प्रत्यागमनम्, वेङ्कटाचलमाहात्म्यश्रवणावसरः, अध्यायफलश्रुतिः.	१	१
२	वराहमंत्राराधनविधिः.	४	१
३	अथागस्त्यप्रार्थनया भगवतः सर्वजनदृग्गोचरत्ववर्णनम्, ततो मित्रवर्मण आकाशराजाख्यसुतोत्पत्तिवर्णनम्, धरणीतलात्पद्मावत्युत्पत्तिक्रमः, आकाशराजस्य धरण्याख्यपत्न्यां वसुदानाख्यसुतोत्पत्तिः.	४	२
४	उद्यानवासिन्याः पद्मावत्याः समीपे नारदागमनम्, नारदोदीरितपद्मावतीशरीरलक्षणानि, पद्मावत्याः स्वसखीभिः साकं पुष्पाटवीगमनम्, मृगयार्थं पुष्पाटवीं प्रति श्रीनिवासागमनम्, भगवतः कन्यकानां चान्योन्यसंवादः.	५	२
५	अथ पद्मावतीदर्शनेन श्रीनिवासस्य मोहप्राप्तिः, मुह्यमानं श्रीनिवासं प्रति वकुलमालिकोक्तिः, श्रीनिवासोक्तपद्मावतीपरिणयकारणानि, वियद्राजपुरं प्रति वकुलमालिकागमनम्, दिव्योद्यानस्थपद्मावतीसखीः प्रति वकुलमालिकोक्तिः. ...	७	१
६	अथ वकुलमालिकां प्रति सखीविनिवेदितपद्मावत्युदन्तः, पद्मावतीमुद्दिश्य दैवज्ञं प्रति वियद्राजकृतप्रश्नादिः, दैवज्ञोक्त्याऽगस्त्यलिंगार्चनाय विप्रादिप्रेषणम्, धरणीकृतप्रश्नस्य पुलिन्दिनीप्रतिवचनम्, पद्मावतीनिवेदितभगवद्भागवतयोर्लक्षणानि, वकुलमालिकया सार्धं सखीनां धरणीसमीप आगमनम्.	८	२
७	धरणीदेव्यै वकुलमालिकानिवेदितश्रीनिवासोदन्तः, श्रीनिवासोक्त्या शंखनृपस्य स्वामितीर्थे तपःकरणम्, वकुलमालिकोक्त्या धरण्यादिकृतविवाहनिश्चयः, विश्वकर्मकृतपुरालंकारादिक्रमः, शुकेन सह वकुलायाः श्रीनिवाससमीपे गमनम्, श्रीनिवासाय शुकावेदितपद्मावतीपरिणयवृत्तान्तः, पद्मावत्याः शुकदत्तश्रीनिवासमालाधारणम्.	१०	१
८	अथ श्रीनिवासस्य लक्ष्म्यादिकृतपरिणयालंकारः, ब्रह्मादिभिः साकं श्रीनिवासस्य वियद्राजपुरगमनम्, वधूवरयोर्वियद्राजवितीर्णप्राभृतादिकम्, श्रीनिवासकृपया वियद्राजस्य भक्तिरूपवरप्राप्तिः, विवाहार्थमागतानां ब्रह्मादीनां स्वावासगमनम्.	११	२
९	अथ वसुनामकनिषादवृत्तान्तः, सुतहननोद्युक्तं वसुं प्रति भगवदुक्तिः, रंगदासस्य श्रीनिवाससेवार्थं श्रीशेषाचलागमनम्, श्रीनिवासार्थं रंगदासकृतदिव्योद्यानमण्डपादिनिर्माणानि, रंगदासस्य गंधर्वक्रीडादर्शनेन भगवत्कैंकर्यविस्मृतिः, स्वरूपानुसंधानेन लज्जितं रंगदासं प्रति श्रीनिवासवचनम्, तोण्डमान्नामकनृपवृत्तान्तः, तस्य मृगयार्थं श्रीशेषाचलगमनम्, श्रीनिवाससमीपस्थपञ्चवर्णशुकवृत्तान्तः, तोण्डमान्नृपस्य निषादेन सह श्रीनिवाससमीपागमनम्, तोण्डमान्नृपं प्रति रेणुकोक्तिः, देवादिकृतश्रीलक्ष्मीस्तुतिः.	१२	२
१०	अथ तोंडमान्नृपस्य स्वपितुः सकाशाद्राज्यप्राप्तिः, तोण्डमान्नृपाय वसुनिवेदितवाराहोदन्तः, नृपस्य निषादवाक्यस्वप्नाभ्यां बिलमार्गेण शेषाचलगमनम्, भगवदुक्त्या तोण्डमान्नृपकृतक्षीराभिषेकवप्रनिर्माणादिकम्, अस्थिसरोवरमाहात्म्यम्. कुर्वग्रामस्थकुलालवंशजभीमाख्यभक्तोदन्तः, कुर्वग्रामस्थभीमाख्यभक्तस्य पत्न्या सह वैकुण्ठप्राप्तिः, श्रीनिवासकृपया तोंडमान्नृपस्य सारूप्यप्राप्तिः, एतन्माहात्म्यपठनश्रवणफलश्रुतिः	१५	१
११	अथ काश्यपस्य स्वामिपुष्करिणीस्नानेन महापातकनाशः, शाकल्योक्तधर्मकथनम्.	१७	१

CC-0. In Public Domain. Digitization by eGangotri

अध्यायाः	विषयाः	प०	पृ०
१२	स्वामिपुष्करिणीस्नानात्तामिस्रादिनरकनिस्तारः, स्वामितीर्थमहिमाऽश्रद्धालूनां महानरकप्राप्तिः	१९	१
१३	अथ धर्मगुप्तचरित्रवर्णनम्, जैमिनिवाक्यात्स्वामितीर्थस्नातस्य धर्मगुप्तस्योन्मादनिवृत्तिः	२०	१
१४	सुमत्याख्यद्विजवृत्तान्तः, अथ सुमत्याख्यद्विजस्य किरातीसङ्गान्महापातकप्राप्तिः, सुमतिं प्रति दुर्वासःकथितब्रह्महत्यामुक्त्युपायः, सुमतेः स्वामिपुष्करिणीस्नानाद्ब्रह्महत्याविमुक्तिः	२१	२
१५	अथ रामकृष्णतीर्थमाहात्म्यम्, रामकृष्णाख्यमहर्षितपःप्रसन्नभगवदाविर्भावः ...	२२	२
१६	अथ वेङ्कटाद्रौ जलदानप्रशंसा, श्रुतदेवपादोदकसेवनेन हेमाङ्गस्य जातिस्मरणम्, श्रुतदेवदत्तपुण्येन हेमाङ्गस्य गोधिकात्वविमुक्तिः	२३	१
१७	अथ वेङ्कटाचलक्षेत्रादिवर्णनम्.	२४	१
१८	अथ श्रीवेङ्कटेश्वरवैभववर्णनम्.	२४	२
१९	अथ ब्रह्मादीनां नैरन्तर्येण श्रीवेङ्कटाचले स्थितिवर्णनम्, श्रीवेङ्कटाचलारोहणसमयानुसंधानक्रमः, पापविनाशनाख्यतीर्थमाहात्म्यम्, दृढमत्याख्यशूद्रवृत्तान्तः, दृढमतये सुमत्याख्यविप्रप्रकाशितकर्मानुष्ठानक्रमः, शूद्रस्य वैदिककर्मोपदेशेन सुमत्यनुभूतदुर्गतिः, अथागस्त्योक्त्या दुर्गत्यपनोदार्थं सुमतेर्वेङ्कटाद्रिगमनम्, सुमतेः पापनाशनस्नानेन दुर्गत्यपनोदनम्, वैदिककर्मानुष्ठातुर्दृढमतेर्दुर्गतिप्राप्त्यपनोदनम्.	२५	२
२०	अथ पापविनाशनतीर्थमाहात्म्यवर्णनम्, भद्रमत्याख्यदरिद्रद्विजवृत्तान्तः, भद्रमतेः कामिन्या वेङ्कटाद्रिगमनप्रोत्साहनकरणम्, कामिनीकथितभूदानप्रशंसा, भद्रमतये भूप्रदानात्सुघोषस्य सद्गतिः, भद्रमतेः पापनाशनतीरे भूदानार्थं वेङ्कटाद्रिगमनम्, भूदानप्रभावेण भद्रमतेर्भगवत्साक्षात्कारः.	२७	१
२१	अथ रामानुजाख्यद्विजवृत्तान्तः, आकाशगंगातीरे रामानुजतपस्तुष्टभगवदाविर्भावः, रामानुजाख्यविप्रकृतभगवत्स्तुतिः, रामानुजाख्यविप्रकृतभगवत्प्रार्थना, भगवद्वर्णिताकाशगंगातीर्थस्नानकालः, भगवद्वर्णितभागवतलक्षणानि.	२९	१
२२	दानार्हसत्पात्रनिर्णयः, आकाशगंगामाहात्म्यम्, पुण्यशीलस्य वन्ध्यापतिनिमन्त्रणेन गर्दभमुखवत्त्वप्राप्तिः वन्ध्यापतेः श्राद्धनिमन्त्रणानर्हत्वकथनम्, आकाशगंगास्नानेन पुण्यशीलस्य तद्विकृतिनिवृत्तिः.	३०	२
२३	अथ चक्रतीर्थमाहात्म्यम्, पद्मनाभाख्यद्विजकृततपःप्रकारः, चक्रतीर्थे पद्मनाभद्विजकृततपस्तुष्टभगवदाविर्भावः, पद्मनाभाख्यद्विजकृतश्रीनिवासस्तुतिः, पद्मनाभस्य चक्रतीर्थे निरन्तरवासाय भगवन्नियमनम्, पद्मनाभहननोद्यतासुरवधाय भगवत्कृतचक्रप्रेषणम्, भगवत्प्रेषितचक्रकृतासुरवधः, द्विजप्रार्थनया चक्रकृतवरदानादिः.	३१	२
२४	अथ सुन्दराख्यगन्धर्वस्य राक्षसत्वप्राप्तिनिवृत्त्योरुपोद्धातः, सुन्दराख्यस्य वसिष्ठोक्तराक्षसत्वनिवृत्त्युपायः, सुन्दराख्यस्य राक्षसत्वविमुक्तिपूर्वकं स्वस्वरूपप्राप्तिः.	३२	२
२५	अथ जावालितीर्थमाहात्म्यवर्णनम्, कावेरीतीरवासिदुराचाराख्यद्विजोदन्तः, जावालितीर्थस्नानाद्दुराचारवेतालयोर्महापातकादिनिवृत्तिः, जावालिवर्णितपार्वणश्राद्धाकरणदोषकथनम्.	३३	२
२६	अथ तुम्बरु (घोण) तीर्थमाहात्म्यम्, घोणतीर्थस्नानविमुखानां महादोषवर्णनम्, घोणस्नानस्य सर्वपापापनोदकवर्णनम्, तुंबर्वाख्यगन्धर्वचरितम्, स्वभार्यायै तुम्बरूपदिष्टमाघस्नानविधिप्रकारः, भार्यां प्रति तुम्बरुदत्तशापतद्विमुक्तिप्रकारौ, घोणतीर्थेऽगस्त्यदर्शनेन तुम्बरुपत्न्या वर्षाभूत्वनिवृत्तिः, अगस्त्यकथितपातिव्रताधर्माः, घोणतीर्थस्नातॄणां नानाविधफलप्राप्तिः.	३४	२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अध्यायाः	विषयाः	प०	पृ०
२७	अथ वेङ्कटाचलस्य सर्वपुण्यतीर्थाधारत्ववर्णनम्, स्वामिपुष्करिण्यादिषट्तीर्थस्नानकालनिर्णयः, पुराणश्रवणस्य विशेषतः प्राशस्त्यवर्णनम्, पुराणवक्तुः सर्वपूजनीयत्ववर्णनम्...	३६	२
२८	कटाहतीर्थमाहात्म्यम्, कटाहतीर्थमहिमश्रद्धाशून्यानां जनानां महानरकप्राप्तिः, कटाहतीर्थपानक्रमः, केशवाख्यद्विजवृत्तान्तः, गणिकालंपटस्य केशवद्विजस्य ब्रह्महत्याप्राप्तिक्रमः, स्वसुतरक्षणोद्युक्ते पद्मनाभे ब्रह्महत्योक्तिः, पद्मनाभं प्रति भारद्वाजकथितो ब्रह्महत्याविमुक्त्युपायः, भारद्वाजोक्त्या कटाहतीर्थपानेन केशवस्य ब्रह्महत्याविमुक्तिः ब्रह्महत्याविमुक्तसुतेन सहितं पद्मनाभं प्रति भगवदुक्तिः ...	३८	१
२९	अथार्जुनतीर्थयात्रोपोद्घातः, अर्जुनस्य गङ्गादितीर्थावगाहनपूर्वकं सुवर्णमुखर्यां गमनम्	४०	१
३०	अथ सुवर्णमुखरीवर्णनम्, अर्जुनस्य स्वर्णमुखरीतीरस्थकालहस्तीश्वरादिसेवाप्राप्तिः, अर्जुनस्य स्वर्णमुखरीतीरस्थभरद्वाजाश्रमगमनम्, अर्जुनकृतभरद्वाजसेवाक्रमः, अर्जुनं प्रति भरद्वाजकृताऽऽतिथ्यसत्कारः.	४१	१
३१	अथ स्वर्णमुखरीप्रभावशुश्रूषया भरद्वाजं प्रत्यर्जुनप्रश्नः, भरद्वाजकथितशंकरविवाहप्रक्रिया, भूसाम्यकरणायागस्त्यस्य हिमाद्रेर्दक्षिणदिग्गमनम्.	४२	१
३२	अथ नद्युत्पादनायागस्त्यं प्रति अशरीर्युक्तिः, सुवर्णमुखर्युत्पादनायागस्त्यं प्रति महर्षिप्रार्थना, सुवर्णमुखर्याविर्भावायागस्त्यकृततपःप्रकारः, अगस्त्याश्रमं प्रति चतुर्मुखागमनम्, अगस्त्यप्रार्थनया गंगां प्रति चतुर्मुखचोदना, अगस्त्यसमीपे स्वांशत्वेन गंगया कृतो नद्युत्पत्त्यभ्युपगमः.	४२	२
३३	सुवर्णमुखरीं प्रति शक्रादिस्तुतिः वायुकथितसुवर्णमुखरीनामनिष्पत्तिः, अगस्त्यकृतस्वानीतसुवर्णमुखरीमहिमानुवर्णनम्, भारद्वाजवर्णितसुवर्णमुखरीमाहात्म्यम्, अगस्त्यप्रतिमादानविधिः.	४४	१
३४	अथागस्त्यतीर्थाऽगस्त्येश्वरयोः प्रभावः, सुवर्णमुखरीस्नानकालनिर्णयः, देवर्षिपितृतीर्थमाहात्म्यम्, वेणासुवर्णमुखरीसंगमवर्णनम्. सुवर्णमुखर्यां व्याघ्रपदाह्वयनदीसंगमः, शंखतीर्थवर्णनम्....	४५	२
३५	अथ सुवर्णमुखर्याः कल्पानदीसंगमः, सुवर्णमुखरीतीरस्थश्रीवेंकटाचलवर्णनम्, वेंकटाचलवासिभगवद्वैभववर्णनम्, भगवत्कृतभूतसृष्ट्यादिवर्णनम्	४६	२
३६	वराहकृतधरण्युद्धारक्रमः, कल्पवृत्तान्तवर्णनपूर्वकं श्वेतवराहावतारवर्णनम्. ...	४८	१
३७	शंखाभिधाननृपवृत्तान्तः, भगवदुक्त्या शंखनृपस्य श्रीवेंकटाचलागमनम्, भगवद्दर्शनार्थमगस्त्यस्य श्रीवेङ्कटाचलागमनम्, अगस्त्यं प्रति गुरुवस्वाद्युक्तिः, अगस्त्यादिकृतश्रीवेङ्कटाचलस्थरम्यवस्तुदर्शनम्.	४९	२
३८	अगस्त्यशंखादितपस्तुष्टस्य भगवत आविर्भावः, ब्रह्मादिप्रार्थनया भगवद्गृहीतसौम्यरूपप्रकारः, अगस्त्यप्रार्थनया स्वर्णमुखरीनद्या भगवद्दत्तसर्वाधिकत्वप्राप्तिः, शंखनृपवरप्रदानपूर्वकं भगवदन्तर्धानम्, भरद्वाजवर्णितश्रीवेङ्कटाचलमाहात्म्यनिरूपणम्.	५०	२
३९	पुत्रार्थमञ्जनाकृततपःप्रकारः.	५२	१
४०	व्यासप्रोक्ताकाशगङ्गास्नानकालनिर्णयः, व्यासप्रोक्तश्रीवेंकटाचलकरणीयदानप्रशंसा.	५३	१

इति वैष्णवखण्डे प्रथमं वेंकटाचलमाहात्म्यम् ॥ (२–१) ॥

॥ अथ वैष्णवखण्डे द्वितीयं पुरुषोत्तम (जगन्नाथ) क्षेत्रमाहात्म्यम् ॥ (२–२) ॥

अध्यायाः	विषयाः	प०	पृ०
१	जैमिनिऋषिसंवादप्रसंगेन सर्वक्षेत्रतोऽपि पुरुषोत्तमक्षेत्रस्य मुख्यत्ववर्णनम्, सृष्टिभारनिपीडितेन ब्रह्मणा विष्णुस्तवकरणम्, तेन विष्णोराविर्भवनम्, दक्षिणसागरस्योत्तरदिक्स्थसिंधुतीरे नीलपर्वते मया वासो विधीयते तत्र गत्वा यो मां चक्रादिचिह्नितं पश्येत्स मुक्तपापो भवेदिति तत्पुण्यस्थानमाहात्म्यवर्णनम्, भगवतोऽन्तर्धानवर्णनम्.	५६	१
२	तत्र पुरुषोत्तमक्षेत्रे ब्रह्मण आगमनम्, तावत्कश्चिद्वायसस्तत्रित्यकुण्डे स्नात्वा भगवद्दर्शनेन मुक्तोऽभवदिति दृष्ट्वा ब्रह्मणा विस्मयः, अयं क्षेत्रप्रभाव इति ज्ञात्वा		

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अध्यायाः	विषयाः	प०	पृ०
	साश्चर्यं भगवन्तं नीलाद्रौ दृष्ट्वा ब्रह्मदेवकृता भगवतः स्तुतिः, यमस्य तत्रागमनम्, यमकृता भगवत्स्तुतिः, भगवदाज्ञया यमं प्रति लक्ष्म्या उक्तिः, क्षेत्रमाहात्म्यश्रवणे लक्ष्मीं प्रति यमप्रार्थना	५६	२
३	यमलक्ष्मीसंवादप्रसंगेन प्रलये मार्कण्डेयस्य नावि समारोहणं जले सर्वत्र भ्रमणञ्च, एतत्क्षेत्रनिकटे वटवृक्षदर्शनम्, वालवचनं श्रुत्वा समीपागमनञ्च, तत्र भगवद्दर्शनम्, मार्कण्डेयकृता भगवत्स्तुतिः, ततो मार्कण्डेयस्य प्रसन्नस्य भगवतो मुखे प्रवेशः, सहस्त्रब्रह्माण्डव्याप्तं तद्भगवत उदरं दृष्ट्वा तदंतं चागत्वा मार्कण्डेयस्य बहिरागमनम्, तत्रैव चावस्थानम्, इति लक्ष्म्युक्तवृत्तांतं श्रुत्वा यमेन यमेश्वरेतिनाम्ना लिङ्गस्थापनम्.	५७	२
४	लक्ष्मीयमसंवादप्रसंगेन प्रतितीर्थकिञ्चित्कथादर्शनम्, तत्र च कपालमोचनतीर्थवर्णनम्. सिन्धुराजस्य सलिलाद्वटस्यामूलान्तास्थितानामाब्रह्मस्थावरान्तानां सर्वेषां मुक्तिर्भवतीति तत्स्थानमाहात्म्यकथनम्, ततः कामाख्यनृसिंहतीर्थमाहात्म्यवर्णनम्, मङ्गलाद्यष्टदेवतानामष्टसु दिक्षु संस्थापनम्, कपालमोचनयमेश्वरमार्कण्डेयविल्वेशवटेशनीलकण्ठेशानक्षेत्रपालाद्यष्टलिङ्गस्थापनम्. इन्द्रद्युम्नस्य कथानकम्, तदनन्तरं यमब्रह्मणोः स्वस्थानं प्रति गमनम्. भगवतो दारुमयवपुर्धारणपूर्वकमिन्द्रद्युम्नाय वरप्रदानम्, दारुवपुष्मतो हरेर्गुणानुवादश्रवणसंजातकौतुकयोर्दुर्वर्तनकारिणोः पुण्डरीकांवरीपकनाम्नोर्ब्राह्मणक्षत्रिययोस्तत्रागमनम्, तत्रैव चेन्द्रद्युम्नेन दारुमयतीर्थस्थापनम्, तन्माहात्म्यवर्णनं च	५९	१
५	तत्तीर्थप्रभावेन पुण्डरीकांवरीपकयोर्वेश्यादिदुःसंगत्यागवर्णनम्, तयोर्दोषवाहुल्याद्भगवत्स्वरूपस्यादर्शनम्, भगवद्दर्शनं विनाऽन्नाग्रहणरूपनिग्रहं दृष्ट्वा भगवता तयोर्निशीथे दर्शनदानम्, ताभ्यां भगवत्स्तुतिकरणम्, सततं भगवन्नामग्रहणेन तयोर्मुक्तिवर्णनम्.	६१	१
६	एतादृशं महत्पुण्यप्रदं पुरुषोत्तमक्षेत्रं क वर्तत इति ऋषिप्रश्नं श्रुत्वा जैमिनिना नानाद्रुमसंकुलारामोपशोभितानेकसत्पुरुषसेवितपुण्यप्रददक्षिणोदधिगामिनीऋषिकुल्यानदीतीरस्थोत्कलदेशवर्तीदं क्षेत्रमिति प्रश्नोत्तरदानम्.	६२	२
७	अवंतीनगरस्थेन्द्रद्युम्नस्य तीर्थयात्रासमुत्सुकस्याज्ञया पुरोहितभ्रातुर्विद्यापते रोहिणोकुण्डकल्पवृक्षादिपरिवेष्टितं पुरुषोत्तमक्षेत्रं गन्तुमुद्युक्तस्य पथि शवरदर्शनम्. विद्यापतिशवरभाषणं च.	६३	१
८	दिनत्रयोपोषितं विद्यापतिं दृष्ट्वा राजकार्यमकृत्वा भगवद्दर्शनं विना नैवान्नग्रहणमिति तन्निश्चयं ज्ञात्वा चिन्तयानस्य शवरस्य विद्यापतिना सह वनप्रयाणपूर्वकरोहिणीकुंडगमनम्, तत्र भगवद्दर्शनम्, तेन भगवत्स्तुतिकरणम्, पश्चाद्विद्यापतेः स्वदेशगमनोत्सुकत्ववर्णनम.	६५	१
९	यावद्विद्यापतिः स्वदेशं गन्तुमुद्युक्तस्तावत्पूजासमये चण्डवातेन सर्वदेवानां नेत्रे स्वर्णसिकताया विकर्षणम्, तेन तेषां देवानां भगवद्दर्शनराहित्येन भगवदवलोकनप्रार्थ्ये भगवत्स्तुतिवर्णनम्, इत उत्तरं भगवद्दर्शनं केषामपि नैव भवेदिति भगवदुक्तिवर्णनम्, ततो विद्यापतेरवन्त्यां दिनात्यये प्रतिनिवृत्यागमनम्, राजकृतोत्थानादिसत्कारेण विद्यापतिना राज्ञः कण्ठे निर्माल्यमालायाः समारोपादिवर्णनम्, विद्यापतीन्द्रद्युम्नाभ्यां भगवत्स्तुतिकरणम्, विद्यापतिकथितपुरुषोत्तमक्षेत्ररोहिणीकुण्डादितीर्थप्रभाववर्णनम्.	६६	२
१०	इन्द्रद्युम्नवचसा विद्यापतिना पुरुषोत्तमक्षेत्रस्थभगवत्स्वरूपादिवटवृक्षाद्यनेकतीर्थमाहात्म्यपूर्वकं सायाह्ने चंडवातेन व्यथितदेवस्थितिस्वरूपवर्णनम्, तत्रांतरे तत्समीपे नारदागमनम्, इन्द्रद्युम्नकृतनारदसत्कारः, इन्द्रद्युम्नं प्रति नारदकथितवैष्णवमाहात्म्यवर्णनम्.	६८	१
११	नीलाद्रिस्थभगवद्दर्शनसमुत्सुकोऽयमिति ज्ञात्वा त्वां तत्र नेष्यामीति नारदवचनमाकर्ण्य राज्ञः पुरोहितेन समं सर्वनागरिकाननुलक्षीकृत्य सर्वैः सह नीलमाधवदर्शनं		

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अध्यायाः	विषयाः	प०	पृ०
	ग्रहीतुं नारदेन समं भेरीमृदंगादिवाद्यैः सह चतुरङ्गसैन्यं गृहीत्वा बहिः प्रस्थानम्, पथि चोत्कलदेशसीमास्थां चर्चिकानाम्नीं देवीं दृष्ट्वा तस्या वर्णनम्, ओढ्रराजकृतेन्द्रद्युम्नस्वागतवर्णनम्. तयोर्मिथः संभाषणोत्तरं निशीथे ओढ्रराज्ञ इन्द्रद्युम्नाज्ञया निजनगरं प्रत्यागमनादिवृत्तान्तवर्णनम्.	७०	२
१२	ओढ्रराजगमनानन्तरं गतेन नारदेनेन्द्रद्युम्नाय मध्येमार्गं पर्वतोपरि स्थितस्य शिवमंदिरस्य वृत्तान्तकथनम्, तत्र गौरीप्रियं कुर्वता शंकरेण वाराणसीसमीपस्थाविमुक्तिक्षेत्रस्थापनम्, काशीराजेन शिवतो वरलब्धिः, श्रीकृष्णकाशिराजयोर्युद्धं, काशीनगरोपरि श्रीकृष्णप्रेपितसुदर्शनेन काशिराजस्य शिरश्छित्त्वा काशीनगरीदाहः, तत्रोपितेन शिवेन श्रीकृष्णोपरि पाशुपतास्त्रप्रहरणम्, पाशुपतं विजित्य काश्यां निर्दग्धायां भीतेन शंकरेण विष्णुस्तुतिकरणम्, स्तुतिप्रसन्नेन विष्णुना मन्नाम्नाख्यातं पुरुषोत्तमेतिक्षेत्रस्थापनं कुर्वित्यादेशकरणम्, विष्णवाज्ञया श्रीशंकरेण पुरुषोत्तमक्षेत्रस्थापनम्, इति तत्क्षेत्रस्थापनमाहात्म्यं श्रुत्वेंद्रद्युम्नेन नीलमाधवपुरुषोत्तमस्तुतिकरणम्, तत एकाम्रनामकं त्र्यम्बकक्षेत्रमागत्य तं पूजयित्वा कोटिलिंगेशस्य स्तुतिकरणम्, तेन प्रसन्नेन कोटिलिंगेशेन इन्द्रद्युम्नस्य वैष्णवत्ववर्णनम्, शिवान्तर्धानम्, तत इन्द्रद्युम्नस्य नारदेन साकं कपोतेशक्षेत्रे गमनम्, विल्वेशादिदेवता नमस्कृत्य नारदेन सह रथमास्थाय भगवच्चिन्तनं कुर्वत इन्द्रद्युम्नस्य भगवत्सान्निध्ये गमनम्.	७३	२
१३	शंकरधृतकपोतवेषेण भगवदाराधनां कृत्वा तत्प्रसादेन कपोतेशस्थलीस्थापनम्, ततः पातालवासिभिर्दैत्यैः पीडितां भुवं दृष्ट्वा तदसुरनिबर्हणाय श्रीकृष्णेन विल्वफलं गृहीत्वा भगवदाराधनां कृत्वा त्र्यंबककृपया असुराञ्जित्वा विल्वेशक्षेत्रस्थापनम्, तन्माहात्म्यवर्णनं च.	७६	१
१४	सपुरोहितस्येन्द्रद्युम्नस्य नारदेन सह नीलकण्ठक्षेत्रं प्रति गमनम्, वर्त्मनि वामबाहुस्फुरणाद्यपशकुनान्दृष्ट्वा सुदुःखितेन राज्ञा नारदं प्रति वि भि... ...श्नः, ततो नारदेन त्वया समं पुरुषोत्तमक्षेत्रे गत्वाऽन्तर्हितेऽपि भगवति दारवतनुं दृष्ट्वाऽश्वक्रतुं विधाय ते भगवद्दर्शनं निश्चयेन कारयिष्यामीति प्रतिज्ञापूर्वकमिन्द्रद्युम्नस्य सान्त्वनम्.	७६	२
१५	ततो नारदेन सह सविप्रस्येन्द्रद्युम्नस्य नीलपर्वतोपरि तिष्ठन्तं देवं द्रष्टुं नीलकण्ठसकाशतो निर्गत्य नीलभूधराशिखरोपरि नरसिंहदर्शनम्, भगवद्दर्शनं गृहीत्वा ततो नारदेन पुरुषोत्तमभगवत्स्थितिस्थलदर्शनम्, ततः सर्वैः सहेन्द्रद्युम्नेन भगवत्स्तुतिकरणम्, स्तुतिप्रसन्नेन भगवताऽशरीरिण्या वाण्येन्द्रद्युम्नाय वाजिमेधं कुर्वित्याज्ञाकरणम्, भगवदाज्ञयेन्द्रद्युम्नकृतवाजिमेधसमारंभवर्णनम्.	७७	२
१६	नारदानुज्ञया नरसिंहमूर्तिस्थापनार्थमग्रत इन्द्रद्युम्नस्य गमनम्, चन्दनद्रुमसमीपमागत्येन्द्रद्युम्नं प्रति त्वदर्थे नरसिंहालयं घटयिष्यामीति देवशिल्पिसुतस्य संभाषणम्, इन्द्राद्युम्नाज्ञया देवशिल्पिना देवालयनिर्माणम्, ततो नारदहस्तेन नरसिंहमूर्तिस्थापनम्, स्थापितनृसिंहमूर्तेरिन्द्रद्युम्नकृतस्तुतिवर्णनम्, नृसिंहमाहात्म्यवर्णनम्.	७८	२
१७	इन्द्रद्युम्नेन क्रतुकरणार्थं सेन्द्रान्देवान्स्तुत्वा आमन्त्र्य च देवसाहाय्येन वाजिमेधक्रतुयज्ञमहोत्सवकरणम्, तद्यज्ञप्रभावेणेन्द्रद्युम्नस्य दिनेदिने कान्त्याधिक्यं गतस्य स्वप्ने शेषशायिभगवद्दर्शनम्, नारदं प्रति स्वप्नवृत्तान्ते प्रोक्ते नारदेन तस्य स्वप्नस्य सुफलकथनम्.	८०	१
१८	अथ विल्वेश्वरासन्नप्रदेशे समुद्रस्य तटान्तेऽकस्मादागत्य प्रादुर्भूतं कंचिद्वृक्षं दृष्ट्वा विस्मयमापन्नैस्तद्रक्षकै राजानं प्रति वृक्षदर्शनवृत्तान्तनिवदनम्, ततोऽवभृथस्नानेन यज्ञपरिसमाप्तिः, भगवद्रोमभिर्निर्मितोऽयमिति नारदेन तद्वृक्षमाहात्म्यवर्णनम्, वृक्षस्थापनम्, ततः कस्मिंश्चित्समये पूजां कर्तुं स्थितेनेन्द्रद्युम्नेन कीदृशी विष्णुमूर्तिर्विधेयत्येवं नारदं प्रति प्रश्नः, को वा चेदृशीं मूर्तिं विधास्यतीति चिन्त-		

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अध्यायाः	विषयाः	प०	पृ०
	यतस्तस्य राज्ञोऽग्रे भगवद्धृतवृद्धवर्द्धकिस्वरूपदर्शनम्, अहं तां मूर्तिं विधास्यामीति कथयित्वा तस्य तस्यां पटाच्छादितायां वेद्यामेवान्तर्धानम्.	८२	२
१९	अथेन्द्रद्युम्नं प्रत्याकाशवाण्या सिद्धमूर्तिसंस्कारपूर्वकस्थापनादिपूजाप्रवृत्तिविषयकाज्ञाकरणम्, ततः पञ्चदशदिनोत्तरं महावेदिवेष्टनमुन्मोच्य सिंहासनस्थितरामकृष्णसुभद्रावासुदेवसुदर्शनानां दर्शनम्, तद्दर्शनसंजातमहानन्दनिमग्नस्येन्द्रद्युम्नस्य नारदेन भाग्योदयाधिक्यवर्णनम्.....	८३	२
२०	नारदबोधितेन राज्ञा विष्णुस्तुतिकरणम्, नारदेन च गद्यरूपेण भगवद्रूपधारिणः स्थाणोः स्तुतिकरणम्, अन्यैर्ऋष्यादिभिरपि भगवद्वर्णनकरणम्, इन्द्रद्युम्नेनानेकमन्त्रसूक्तादिभिः सपरिवारस्य भगवतः पूजनम्, ततश्च राज्ञा ब्राह्मणेभ्यस्तत्र कोट्यवधिगोप्रदानम्, ततश्चेन्द्रद्युम्नेन भगवद्भव्यप्रासादनिर्माणायारम्भकरणम्, इन्द्रद्युम्नविनिर्मितप्रासादप्रतिष्ठापनार्थं विध्याज्ञया देवानां तत्रागमनम्.	८४	२
२१	श्रुत्यादिविहितोपायैर्विना नैव भगवद्दर्शनमिति कस्यचिदृग्वेदपाठिनो ब्राह्मणस्य मुखाद्दारुवपुर्माहात्म्यवर्णनं श्रुत्वा नारदेनेन्द्रद्युम्नराज्ञे वेदविहितभगवदुपासनोपदेशकरणपूर्वकं प्रतिष्ठाकाले ब्रह्मणो निमंत्रणार्थं स्वस्य ब्रह्मलोकं प्रति गंतुमिच्छाप्रकटनम्, राज्ञोऽपि ब्रह्माणं निमन्त्रयितुं ब्रह्मलोकं प्रति नारदाग्रे स्वेच्छाप्रकटनम्.	८६	१
२२	अथ नारदेन सममिन्द्रद्युम्नस्य पुष्परथविमानेन ब्रह्मलोकं प्रति गमनम्, मध्येमार्गं राज्यचिन्तया व्याकुलितचित्तं नृपं प्रति शोककारणविषये नारदेन प्रश्नकरणम्, राज्ञश्चिन्ताकारणं श्रुत्वा नारदेन नृपस्य समाधानकरणपूर्वकं चिन्तादूरीकरणम्, तत इन्द्रद्युम्ननारदयोः सर्वलोकान्भ्रान्त्वा ब्रह्मलोकं प्रति प्राप्तिपूर्वकं द्वारपालादिकृतसत्कारवर्णनम्.	८७	२
२३	इन्द्रद्युम्नेन ब्रह्मदेवप्रणामकरणम्, किमर्थमागमनमिति ब्रह्मणा प्रश्ने कृते सतीन्द्रद्युम्नेन मया निर्मिते प्रासादे देवस्थापनं कर्तुं भवद्भिरागन्तव्यमेवेति ब्रह्माणं प्रति प्रार्[illegible]रणम्, अथेन्द्रद्युम्नाय भूतले बहुकालात्ययवृत्तान्तकथनपूर्वकं पद्मनिधिना देवैश्च सह भूतलं प्रति गमनायाज्ञाकरणम्, प्रतिष्ठाकर्मणि स्वस्यागमनायाश्वासनप्रदानम्, ततो ब्रह्माज्ञयेन्द्रद्युम्नमहीपतेः सर्वदेवैः पद्मनिधिना ब्रह्मर्षिभिश्च सह भूतलं प्रत्यागमनम्.	८८	१
२४	देवैर्विप्रैः पद्मनिधिना च सहेन्द्रद्युम्नेन तत्रागत्य भगवद्दर्शनं गृहीत्वा पुरुषसूक्तेन भगवत्स्तुतिकरणम्, ततः पद्मनिधिद्वारा दारुमूर्तिं स्थापयेति नभोवाण्या भगवद्वचनम्.	९०.	१
२५	नारदलिखितसाहित्यसंभारसंग्रहपत्रं श्रुत्वेन्द्रद्युम्नाज्ञया पद्मनिधिना स्वर्णशालानिर्माणम्, नारदाज्ञया विश्वकर्मणा स्यन्दनत्रयनिर्माणम्, तस्य रथस्य नारदकरेण स्थापनम्, तत्प्रसंगेन रथस्थापनविधिप्रकारवर्णनम्, रथध्वजे नृसिंहमूर्तिं विधाय समन्त्रकां गरुडप्रार्थनां कृत्वा रथे भगवन्मूर्तिप्रतिष्ठापनवर्णनम्, पश्चाद्भगवत्प्रार्थनां कृत्वा केन रथावयवेन नष्टेन कस्य विनाश इत्यपघातादिदोषवर्णनम्, रथस्यासमंततो दिग्देवतास्थापनादिप्रकारवर्णनम्, भगवत्स्वरूपवर्णनम्, भगवता लोकानामाशीर्वादप्रदानम्.	९१	१
२६	प्रासादस्थापितस्य भगवत इन्द्रद्युम्नेन पूजनकरणम्, स्वराष्ट्रेऽन्यराज्ञ आगमनशंकया क्रुद्धस्यससैन्यस्य गालनृपतेस्तत्रागमनम्, तस्य गालभूभृत इन्द्रद्युम्नसंपादितान्दुर्लभसंभारान्दृष्ट्वाऽऽश्चर्यचकितत्वम्, पश्चान्नम्रीभूतेन गालेनेन्द्रद्युम्नं प्रति स्वस्य युद्धार्थागमनादिसर्ववृत्तकथनम्, ततो गालेन्द्रद्युम्नयोर्मिथः संभाषणोत्तरमिन्द्रद्युम्नस्य स्वात्मपूर्ववंशपुरुषत्वं ज्ञात्वा गालभूपतिनेन्द्रद्युम्नस्य स्वराज्यसिंहासने स्थापनपूर्वकं तदाज्ञावर्तित्वस्वीकरणम्.	९२	२
२७	अथ ब्रह्मेन्द्रादिभिरिन्द्रद्युम्नकृतभगवन्मन्दिरप्रतिष्ठार्थं ब्रह्मलोकाद्भूलोकमागत्येन्द्रद्युम्नभक्तिवैभववर्णनम्, ततो ब्रह्मागमनसंतुष्टेनेन्द्रद्युम्नेन ब्रह्मदेवप्रार्थनाकरणम्, ब्रह्मदेवेन रथप्रासादादिकानां दर्शनं गृहीत्वा भगवत्स्तोत्रकरणम्, ततः सुभद्रास्यन्दनं		

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अध्यायाः	विषयाः	प०	पृ०
	गत्वा ब्रह्मदेवकृतसुभद्रास्तुतिवर्णनम्, वलभद्रस्य स्तोत्रकरणम्, स्यन्दनत्रयपूजनफलश्रुतिकथनम्.	९३	२
२८	ततोऽकस्मात्प्रकटितं भयंकरं नरकेसरिस्वरूपं दृष्ट्वेन्द्रद्युम्नादिकानां भयत्रस्ततावर्णनम्, नारदवचसा ब्रह्मणा नृसिंहप्रभावकथनम्, नृसिंहस्य ब्रह्मणा स्तोत्रकरणम्, देवताप्रतिष्ठासमयोच्चारितमंत्रैस्तत्तद्देवतानां प्रत्यक्षदर्शनं स्वस्थानावस्थानं च, वेदादीनामपि प्रत्यक्षमूर्तिभिरागमनम्, ब्रह्मदेवेनेन्द्रद्युम्नाय मन्त्रोपदेशकरणम्, ततो लक्ष्मीनरासिंहयोः शान्तिकरणम्, दारुदेवतापूजनमाहात्म्यवर्णनम्. ...	९५	२
२९	इन्द्रद्युम्नेन वलभद्रस्य द्वादशाक्षरमंत्रैर्नारायणस्य पुरुषसूक्तेन देव्या देवीसूक्तेन चार्चनम्, ततो ब्रह्मदेवेन दारुदेहस्येन्द्रद्युम्नभक्तपालनाय स्तोत्रकरणम्, दारुदेहेन भगवतेन्द्रद्युम्नाय वरप्रदानम्, दारुदेहेन स्वमुखतो राज्ञे स्थानमाहात्म्यकथनम, मासतिथ्यादियोगपरत्वेन जपदानादिफलश्रुतिवर्णनम्. ...	९६	२
३०	ज्येष्ठमासे स्नानदानादिमाहात्म्यवर्णनम्, मार्कण्डेयावटपञ्चवारुणन्यग्रोधनारायणसीरध्वजस्यन्दनत्रयस्थदारुदेहविष्णुबलभद्रसुभद्रादिस्वर्गद्वारचतुःस्वस्तिककोणकसिंधुराजादितीर्थक्षेत्रस्थानमाहात्म्यवर्णनपूर्वकं स्तोत्रपूजाद्यनेकविधिविधानफलकथनम्.	९८	१
३१	ततश्चेन्द्रद्युम्नसरःस्नानमाहात्म्यवर्णनपूर्वकं नृसिंहमंत्रोच्चारणेन वहुफलप्राप्तिकथनम्, मञ्चस्थितपुरुषोत्तमदर्शनमाहात्म्यम्, ज्येष्ठमासे पुरुषोत्तमस्नानमाहात्म्यम्, पुरुषोत्तमस्तोत्रपद्धतिवर्णनम, पुरुषोत्तमदर्शनेन स्वेष्टसर्वफलप्राप्तिकथनम्.	१०१	१
३२	दक्षिणामूर्तिदर्शनमाहात्म्यफलवर्णनम्, ज्येष्ठपञ्चकव्रतवर्णनम्, महाज्यैष्ठीदिने जातस्य पुरुषोत्तमदर्शनस्य फलमाहात्म्यवर्णनम्, पञ्चदीपान्प्रज्वाल्य नृसिंहपूजनं विधेयमित्यादिमाहात्म्यवर्णनम्, ज्येष्ठपौर्णमास्यां कृतस्योपोषणस्य कृष्णबलभद्रसुभद्रापूजनस्य च फलकथनम्....	१०३	१
३३	महादेवीमहोत्सवप्रधानदेवतापूजनस्नानदानादिविधिमाहात्म्यवर्णनम्, सुरथं कृत्वा यात्रार्थं भगवन्मूर्तिं स्थापयित्वा तस्य सीमोल्लंघनादिवर्णनम्, रथस्थविष्णुदर्शनमहाफलप्राप्तिवर्णनम्, महादेवीव्रते पुरुषोत्तमवलभद्रसुभद्रादर्शनफलवर्णनम्, महाज्यैष्ठ्यां दारुदेहदर्शनफलम्, सहस्रदीपप्रज्वलनमाहात्म्यम्.	१०४	२
३४	अश्वमेधांगसरस्तीर्थमाहात्म्यवर्णनम्, विन्दुतीर्थमाहात्म्यम्, महावेद्यां कृतस्य पितृकर्मणः फलवर्णनम्, इन्द्रद्युम्नसरोनृसिंहक्षेत्रवनजागरणतीर्थहृषीकेशादितीर्थस्नानदानादिमाहात्म्यवर्णनम्.	१०६	२
३५	रथरक्षाकरविधिकथनम्, तत्रस्थपुरुषोत्तमवलभद्रसुभद्रादर्शनफलवर्णनम्, तत्स्तुतिप्रकारकथनम्.	१०७	२
३६	शयनोत्सवव्रतविधिकथनम्, आषाढीमारभ्य कार्तिकीपर्यन्तं चातुर्मास्यपुण्यकालवर्णनम्, नानाविधपापक्षालनार्थं चातुर्मास्ये तीर्थस्नानपुरुषोत्तमादिक्षेत्रदर्शनफलम्, चातुर्मास्ये ग्राह्याग्राह्यवस्तुविचारकथनम्, चातुर्मास्ये धार्यनियमानुकथनम, एतच्चातुर्मास्योद्भवव्रतमाहात्म्यश्रवणफलम्.	१०८	१
३७	कर्कसंक्रांत्यां दक्षिणायनारंभपुण्यकालनियमक्रमवर्णनम्, दक्षिणायने पुरुषोत्तमपूजनफलम्, पुरुषोत्तमस्य दशदिक्षु स्थितानां देवानां नामनिर्देशस्तद्दर्शनपूजनफलकथनं च, इन्द्रद्युम्नेन शतवर्षांते नृहरिदर्शनम्, श्वेतराजेन पुरुषोत्तमनृसिंहयोः पूजनं स्तवनं च, भगवता राज्ञे वरप्रदानम्.	१०९	१
३८	श्वेतराज्ञे वरं दत्त्वा भगवतोऽन्तर्धानम्, भगवदुच्छिष्टभक्षणफलकथनम्, भगवत्तीर्थप्राशननिर्माल्यधारणादिफलकथनम्, कलिकालनिर्णयः, कलौ भगवच्चिन्तनेन फलप्राप्तिवर्णनम्, भगवतो दयादाक्षिण्यादिस्वभाववर्णनम्, कस्यचिद्द्विजस्य पुरुषोत्तमक्षेत्र आगमनम्, द्विजेन संशयवता भगवदुच्छिष्टमिति मत्वा भगवन्निवेदितमन्नं नैव भक्षितमतस्तस्य देहपीडासंप्राप्तिकथनम्, अन्यद्विजानां भगवदुच्छिष्टभक्षणेन देवतुल्यकान्तिप्राप्तिवृत्तान्तः, नैवेद्यं त्यक्तवतो द्विजस्येश्वर-		

CC-0. In Public Domain. Digitization by eGangotri

अध्यायाः	विषयाः	प०	पृ०
	प्रार्थनां कृत्वा संजातया नृसिंहकृपया सौंदर्यप्राप्तिकथनम्, दमनकदैत्यविनाशसमये सुगंधिनिर्मितमालोत्पत्तिकथनम्, भगवद्भक्तपूजनपूर्वकदेवपूजनविधिवर्णनम्, इष्टैः सह नृसिंहप्रसादभोजनादिफलवर्णनम्.	११०	१
३९	दक्षिणामूर्तिदर्शनेन शयनोत्सवव्रतविधानेन च सर्वयात्राफलावाप्तिकथनम्, भगवच्छयनपरिवर्तनकालकथनम्, कौमुद्याख्योत्थापनमहोत्सवविधिकालकथनम्, तस्मिन्काले भगवत्पूजासाहित्यवर्णनम्, पूजाफलकथनम्, अनयैव पूजया सार्धत्रिकोटितीर्थाभिषेकफलप्राप्तिकथनम्.	११२	२
४०	मार्गशीर्षशुक्लषष्ठ्यां प्रावरणोत्सवकथनम्, प्रावरणोत्सवव्रतविधिविधानफलकथनम्.	११४	२
४१	पुष्यस्नानोत्सवव्रतदिनविधानकथनम्, पुष्यस्नानोत्सवव्रतपूजासाहित्यादिवर्णनम्.	११४	२
४२	मकरसंक्रमणविधिपूर्वकमुदगयनकाले तीर्थस्नानभगवद्दर्शनादिफलकथनम्.	११५	१
४३	फाल्गुने मासि दोलारोहणविधिकथनम्.	११६	१
४४	फाल्गुनपौर्णमास्यां सांवत्सरव्रतविधानम्, विष्णुमूर्तिप्रतिष्ठावर्णनम्, ज्येष्ठपंचकव्रतवर्णनम्.	११६	२
४५	वासन्तिकादमनभंजिकायात्राकथनम्.	११७	२
४६	अक्षयमोक्षदयात्राकथनम्, तस्यां यात्रायां भगवत्स्तोत्रवर्णनम्.	११७	२
४७	नीलाचलोपरि स्थितस्य दारुदेहस्य भगवतो दर्शनफलवर्णनम्.	११८	२
४८	प्रासादस्थापनानन्तरमिन्द्रद्युम्नेन किं कृतमिति महर्षीणां प्रश्न इन्द्रद्युम्नकृतभगवत्स्वरूपवर्णनपूर्वकं प्रश्नोत्तरदानं पुरुषोत्तममाहात्म्योपसंहारश्च.	११९	१
४९	पुराणमाहात्म्यफलश्रवणम्.	११९	२

इति वैष्णवखण्डे द्वितीयं पुरुषोत्तम (जगन्नाथ) क्षेत्रमाहात्म्यम् ॥ (२–२) ॥

अथ वैष्णवखण्डे तृतीयं बदरिकाश्रममाहात्म्यम् ॥ (२–३)॥

अध्यायाः	विषयाः	प०	पृ०
१	सूतशौनकसंवादप्रसंगेन केन मुक्तिर्भवेदिति प्रश्ने शिवस्कन्दसंवादारम्भः, तत्रोपक्रमपूर्वकं गङ्गागोदावरीयमुनानर्मदादिबहुतीर्थवर्णनपुरःसरकाश्यादिक्षेत्रमाहात्म्यवर्णनपूर्वकबदर्याख्यक्षेत्रमाहात्म्यवर्णनम्, अयोध्याक्षेत्रमाहात्म्यम्, गोमतीतीर्थस्नानविधिवर्णनम्, पञ्चक्रोशीतीर्थयात्राफलम्, विश्रांतितीर्थस्नानफलम्, रामतीर्थे स्वर्णदानमाहात्म्यम्, मार्कण्डेयह्रदस्नानफलकथनपूर्वकजगन्नाथदर्शनमाहात्म्यम्, इन्द्रद्युम्नह्रदस्नानमाहात्म्यम्, बदरीनामकीर्तनेनोपयुक्तसर्वफलप्राप्तिकथनम्.	१२३	१
२	बदर्याख्यक्षेत्रस्योत्पत्तिपूर्वकं माहात्म्यवर्णनम्, सुतासंगमकारिणो ब्रह्मदेवस्य शिवेन पञ्चममस्तकच्छेदनवृत्तान्तवर्णनम्, तदा तद्ब्रह्मकपालं हस्ते गृहीत्वा शिवस्य ब्रह्महत्यादोषनिवृत्त्यर्थं सर्वतीर्थेषु गमनम्, ततो गिरिजापतेर्बदरिकाश्रमे गमनम्, बदरिकाश्रमगमनेन शिवस्य ब्रह्महत्यानिरासः, दशाश्वमेधिकतीर्थवर्णनम्, व्यासवचनादग्नेर्बदरिकाश्रमं प्रति गमनम्, अग्निकृतभगवत्स्तुतिवर्णनम्.	१२४	१
३	अग्नितीर्थमाहात्म्यवर्णनम्, नारदशिलामार्कण्डेयशिलयोर्माहात्म्यवर्णनम्.	१२५	१
४	वैनतेयशिलामाहात्म्यवर्णनम्, वाराहीशिलामाहात्म्यम्, तत्र भगवतो देवर्ष्यादिभिः स्तुतिकरणम्, नारसिंहीशिलामाहात्म्यम्.	१२६	२
५	भगवत्प्रदक्षिणाफलकथनम्, विशालायां भगवतोऽदर्शनं दृष्ट्वा ब्रह्मादिदेवैः क्षीराब्धौ भगवतः स्तुतिकरणम्, भगवदाविर्भावः, कुमेधसां मद्दर्शनं स्यादिति भिया मयान्तर्धानं कृतमित्यभिधाय भगवतोन्तर्धानम्, शिवकृतभगवत्स्थापनम्, बदरीदर्शनेन बदरीतिनामग्रहणेन च ब्रह्माण्डदानफलप्राप्तिः, बदरीक्षेत्रे ब्राह्मणभोजनादिदानमाहात्म्यवर्णनम्.	१२७	२
६	पितृतीर्थकपालमोचनतीर्थब्रह्मतीर्थोत्पत्तिवृत्तान्तवर्णनम्, ब्रह्मणा तत्र तपःकरणम्, भगवद्दर्शनसञ्जातसन्तोषेण ब्रह्मणा भगवत्स्तुतिकरणम्, भगवतः प्रसादा-		

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अध्यायाः	विषयाः	प०	पृ०
	द्ब्रह्मणः सृष्ट्युत्पत्त्यधिकारप्राप्तिः, ब्रह्मणः सर्ववेदार्थज्ञानाधिकारप्राप्तिः, सरस्वतीस्नानप्रभावेन वेदव्यासस्य पुराणादिसंहिताकरणाधिकारप्राप्तिः, काम्यतीर्थमाहात्म्यम्, वसुधारातीर्थमाहात्म्यवर्णनम्.	१२९	१
७	प्रभासपुष्करगयानैमिषकुरुक्षेत्रादिपञ्चधारातीर्थमाहात्म्यम्, पञ्चधारातीर्थानां मलिनत्वप्राप्तिस्तन्निवृत्त्यर्थं च तेषां बदरिकाश्रमे गमनम्, सोमकुण्डस्योत्पत्तिपूर्वकं माहात्म्यम्, सप्तपदचतुःस्रोतोर्वशीतीर्थमाहात्म्यम्.	१३०	२
८	विशालायां भगवदावासेन संतुष्टैरिंद्रादिभिर्मेरुं हित्वा विशालां प्रति गमनम्, तदा भगवतेन्द्रादिसुखहेतोर्मेरोस्तत्र विशालायां स्थापनम्, देवैर्भगवत्स्तुतिकरणम्, भगवदाज्ञया देवानां तत्रैव वासः, बदरिकाश्रमे लोकपालस्थापनम्, बदरिकाश्रमे दानेन सर्वफलप्राप्तिवर्णनम्, धर्मक्षेत्रवर्णनम्, दण्डपुष्करिणीतीर्थवर्णनम.	१३२	२

इति वैष्णवखण्डे तृतीयं बदरिकाश्रममाहात्म्यम् ॥ (२–३) ॥

अथ वैष्णवखण्डे चतुर्थं कार्तिकमासमाहात्म्यम् ॥ (२–४) ॥

अध्यायाः	विषयाः	प०	पृ०
१	मङ्गलाचरणम्, कार्तिकमासवैभवं ज्ञातुं सूतं प्रति शौनकप्रश्नः, प्रश्नोत्तरं वक्तुं सूतोक्तिः, ब्रह्मनारदसंवादे प्रस्तावपूर्वकं कार्तिकव्रतप्रशंसनम्, आपत्काले कार्तिकव्रतकरणनिर्णयः.	१३६	१
२	ब्रह्मा नारदं प्रति कार्तिकव्रतधर्मानाह, तत्र गुरुशुश्रूषाप्रसंगेन गौतमशिष्याणां मेधाविकपिलसुमतीनामितिहासो व्रतधर्माश्च, अन्नदानप्रसंगेन सत्यकेतुद्विजाख्यानम्, गोदानप्रसङ्गेन सुमतिब्राह्मणेतिहासः, नामस्मरणप्रसङ्गेन पुष्करेतिहासकथनम्, गीतापठनमाहात्म्यप्रसङ्गेन जडब्राह्मणेतिहासकथनम्, शिलादानप्रसङ्गेन ब्राह्मणीकथाकथनम्.	१३७	२
३	कार्तिकव्रतारंभावसानकालनिर्णयपूर्वकव्रतवैभववर्णनम्.	१४१	१
४	स्नानकालनिरूपणपूर्वकं स्नानविधिः, कूपतीर्थादिपूत्तरोत्तराधिकपुण्यदायकस्नानकालनिरूपणम्, तुलार्के कावेरीस्नानफलनिरूपणम्, पञ्चनदीतीर्थमाहात्म्यम्, स्नान उत्तममध्यमाधमकाललक्षणं भर्तृप्रशंसा च, तीर्थस्नानफलभाङ्मनुष्यलक्षणम्, चतुर्विधस्नानलक्षणम्.	१४३	२
५	उषःकालमारभ्य दिनकृत्यनिरूपणम्, तत्र मूत्रपुरीषोत्सर्जनविधिः, दन्तधावनादिविधिः, स्नानादिकृत्यम्, हविष्यान्नामिषान्ननिरूपणम्, मुखशुद्ध्यादिशयनान्तकर्मनिरूपणम्.	१४६	१
६	कार्तिके कर्तव्याकर्तव्यव्रतदाननिरूपणम्.	१४८	१
७	विष्णुमंदिरे दीपदानमाहात्म्ये कुत्सद्विजकथानकम्, परदीपप्रबोधमाहात्म्यप्रसंगेनेन्दुमतीवेश्येतिहासकथनम्, आकाशदीपदानमाहात्म्यम्, खगमार्जारकथानकम्, तत्रैव चन्द्रशर्मसुनन्दनृपसंवादेन कार्तिकव्रतधर्मनिरूपणम्, दीपमाहात्म्यम्, आकाशदीपदानविधिः, आकाशदीपदानेन पिशाचमुक्तिकथनम्, पञ्चदिनेषु दीपदानम्, कार्तिकदीपकरणे स्थलानि, दीपदाने हरिकरब्राह्मणेतिहासः, कर्पूरदीपदानादिफलम्.	१४९	२
८	तुलसीमाहात्म्यकथनप्रसङ्गेन हरिमेधःसुमेधोब्राह्मणेतिहासः.	१५३	१
९	वत्सद्वादशीविधानम्, पञ्चदीपे शकुनावलोकनम्, वत्सद्वादशीव्रतेनैकाङ्गीगोपालिकाया धनधान्यसुखप्राप्तिवृत्तान्तवर्णनम्, यमत्रयोदशीविधानम्, हेमनकस्येतिहासः, नरकचतुर्दशीविधानम्, दीपावलिविधानम्, तत्र कौमुदीशब्दार्थः, पार्वणश्राद्धादिकरणम्, सायं महालक्ष्मीमहाकालीमहासरस्वतीपूजा, लक्ष्मीप्रबोधोत्सवप्रकरणम्, दीपोत्सवनीराजनम्, बलिराज्यबालक्रीडाशुभाशुभशकुनावलोकनम्, अर्धरात्रेऽलक्ष्म्या बहिर्निष्कासनम्, सुखरात्रिव्रतकथनम्.	१५४	२
१०	द्यूतप्रतिपद्वर्णनम्, बलिराज्यप्रतिपन्निरूपणम्, प्रतिपत्तिथिनिर्णयः, अंगणे गोमयमूर्तिपूजनम्, गोवर्धनपूजा, बलीवर्दमहिषवृषभाणां युद्धक्रीडादर्शनम्, मार्गपालीविधिः, रात्रौ बलिपूजाविधानम्, गोक्रीडावर्णनम्, यष्टिशकुनावलोकनम्.	१५८	२
११	यमद्वितीयाव्रतविधानम्.	१६०	२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अध्यायाः	विषयाः	प०	पृ०
१२	धात्रीमाहात्म्यम्, तत्र धात्रीपूजाविधिः, धात्रीवृक्षोत्पत्तिवृत्तान्तः, धात्र्यां देवतानिवासवर्णनम्, धात्रीच्छायामाहात्म्यम्, तत्र वैश्येतिहासः, कथाश्रवणेन मूषकमुक्तिकथनम्, धात्रीच्छायायां भोजनमाहात्म्यम्, धात्रीच्छायासु भोजनेन दोषविनाशवर्णनम्, धात्रीमालाधारणम्, धात्रीच्छायायां दीपमालार्पणम्, धात्रीच्छायायां दंपतिभोजनफलम्, धात्रीफलमाहात्म्यम्, आमलकस्नानफलं वर्ज्यकालश्च, धात्रीच्छायायां पिण्डदानफलम्, धात्रीफलधारणेऽङ्गावयवविशेषवर्णनम्, धात्रीच्छायायां ब्राह्मणपूजनफलम्, धात्रीपूजायां तिथयः, वनभोजनविधानम्, धात्रीस्पर्शमाहात्म्यम्, गृहे धात्रीवृक्षमाहात्म्यम्.	१६२	२
१३	सत्यभामाकृष्णसंवादे सत्यभामायाः पूर्वजन्मनि कार्तिकव्रतपुण्येन कृष्णभार्यात्वप्राप्तिर्जातेति वर्णनम्, सर्वेषां मध्ये कार्तिकः प्रवरः कथमिति पृष्टेन कृष्णेन सत्यभामां प्रति शंखासुराख्यानेन कार्तिकप्रवरत्वनिरूपणम्; प्रयागस्थानमाहात्म्यम्.	१६६	१
१४	तुलसी कथमुत्पन्ना कथं च हरिप्रिया जातेति पृथुना पृष्टे नारदेन तदुत्पत्तिं वक्तुमादाविन्द्रवज्रपातेन क्रुद्धस्य शिवस्य क्रोधाग्निना जलन्धरोत्पत्तिप्रसंगवर्णनम्.....	१६७	२
१५	ततो जलंधरस्य दिग्विजये जयप्राप्तिवर्णनम्, बृहस्पतेर्जीवनामप्राप्तिकारणवर्णनम्...	१६८	१
१६	युद्धपराजितैर्देवैः स्तुतेन विष्णुनाविर्भूय युद्धकरणम्.	१६९	१
१७	जलन्धरसभायां नारदोपदेशेन स्त्रीरत्नस्य पार्वत्या ग्रहणार्थं राहुप्रेषणम्, तेन क्रुद्धस्य शिवस्य भ्रूमध्यात्कीर्तिमुखगणोत्पत्तिवर्णनम्.	१६९	२
१८	ततो देवासुरसंग्रामे रुद्रसेनापराभववर्णनम्.	१७०	२
१९	वीरभद्रपतनम्.	१७१	२
२०	ततो जलंधरशिवयोर्महायुद्धम्.	१७२	२
२१	वृन्दायाः पातिव्रत्यभङ्गेन जलंधरस्य हननं भविष्यतीति विचार्य विष्णुना वृन्दायै मायाप्रदर्शनम्, ततो मिथस्तयोर्विष्णुवृन्दयोः शापवृत्तान्तवर्णनम्, वृन्दया देहविसर्जने कृते सति तद्देहभस्मनि विष्णोर्लुण्ठनम्.	१७३	१
२२	ततो युद्धे जलंधरं हत्वा प्रसन्नतया स्थितस्य शिवस्याऽऽज्ञया विष्णुबोधनाय देवैरादिशक्तीनां स्तवनम्, ततस्तुष्टाभिर्देवीभिर्देवेभ्यो विष्णुबोधनार्थं बीजत्रयप्रदानम्.	१७४	१
२३	तद्बीजेभ्यो धात्रीमालतीतुलसीनामुत्पत्तिः	१७५	१
२४	धर्मदत्तस्य कार्तिकपुण्यदानात्कलहाया राक्षसीजन्मतो मुक्तिः	१७५	२
२५	कलहावचनात्कार्तिकमासे दानमाहात्म्यकथनम्, विष्णुदूतानीतविमानेन समं कलहाया वैकुण्ठप्राप्तिः, विष्णुदूतेन त्वं जन्मान्तरे सूर्यवंशे दशरथेतिनाम्ना प्रसिद्धो राजा भविष्यसि तथैव भगवान्विष्णुः स्वयं त्वत्पुत्रत्वेनावतरिष्यतीति धर्मदत्ताय वरप्रदानम्....	१७६	१
२६	विष्णुभक्तिमाहात्म्यकथनम्, तत्प्रसंगेन चोलराजविष्णुदासद्विजेतिहासवर्णनम्. ...	१७७	१
२७	विष्णुदासाख्यद्विजेन स्वस्य रूक्षान्नापहरणकारिणं चंडालं दृष्ट्वा तस्मै घृतप्रदानार्थं तं प्रत्यनुधावनम्, ततो मूर्च्छितं पतितं चण्डालमवलोक्य तेन विष्णुदासेन कृपया तस्य चण्डालस्य सत्कारकरणम्, ततश्चण्डालरूपधारिणा भगवता विष्णुदासस्यानुग्रहकरणम्, भगवत्प्रसादाद्विष्णुदासब्राह्मणं प्रति स्वर्गतो विमानागमनम्, तस्मिन्नाधिरुह्य विष्णुदासे गच्छति सति चोलराजेनाग्निप्रवेशनम्, ततोऽस्मै भगवता स्वरूपदर्शनम्, चोलभूपविष्णुदासब्राह्मणयोर्मुक्तिप्राप्तिश्च.	१७७	२
२८	जयविजययोः कार्तिके गण्डकीस्नानेन विष्णोर्द्वारपालत्वप्राप्तिः.	१७८	२
२९	कार्तिकव्रतिनां संसर्गपुण्येन धनेश्वरस्य यक्षजन्मप्राप्तिर्जातेति वर्णनम्....	१७९	२
३०	अदत्तपुण्यपापप्राप्तिवर्णनम्, पतिव्रताख्यानम्, मासोपवासव्रतविधानम्. ...	१८०	१
३१	कूष्माण्डनवमीविधिः, तुलसीविवाहविधिकथनम्.	१८२	२
३२	भीष्मपञ्चकव्रतविधानम्.	१८३	२
३३	प्रबोधिन्येकादशीमाहात्म्यम्, द्वादशीविधानम्.....	१८५	१
३४	कार्तिकव्रतोद्यापनविधिः	१८७	१

॥ १५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अध्यायाः	विषयाः	प०	पृ०
३५	वैकुण्ठचतुर्दशीमाहात्म्यम्, त्रिपुरोत्सवमाहात्म्यम्.	१८८	१
३६	अन्तिमपुष्करिणीत्रयतिथिमाहात्म्यम्, पुराणश्रवणविधिफलवर्णनम्.	१९०	२

अथ कार्तिकमासमाहात्म्यप्रसंगेन कार्तिकमासव्रतिभिः कर्तव्याकर्तव्यनियमास्तावदुच्यन्ते ॥ १ ॥

तत्र कर्तव्यनियमाः ।

१ नित्यसतारकस्नानम. २ राधादामोदरपूजनम्. ३ विष्णुहरिशिवनामस्मरणम. ४ इन्द्रियजयः. ५ मनोनिग्रहः. ६ सर्वभूतेपु दया. ७ ईश्वरध्यानम. ८ ईश्वरपूजनम्. ९ सत्यभाषणम्. १० हविष्यान्नभोजनम्. ११ नक्तव्रतम्. १२ धारणापारणाव्रतम्. १३ मौनव्रतम. १४ ब्रह्मचर्यव्रतम्. १५ सत्समागमः. १६ धात्रीपूजनम्. १७ धात्रीच्छायायां विष्णुपूजनम्. १८ नित्यकथाश्रवणम. १९ भूमिदानम्. २० मातापितृसेवनम्. २१ गुरुसेवनम्. २२ नित्यं देवदर्शनम्. २३ देवमन्दिरे गानम्. २४ देवालये नित्यदीपदानम्. २५ चतुष्पथे दीपदानम्. २६ ब्राह्मणाय दीपदानम. २७ गोशालायां दीपदानम्. २८ तुलसीपूजनम्. २९ अश्वत्थपूजनम. ३० देवब्राह्मणगोपूजनम. ३१ देवप्रदक्षिणाकरणम्. ३२ तुलसीलक्षप्रदक्षिणाकरणम्. ३३ अश्वत्थप्रदक्षिणा. ३४ ब्राह्मणभोजनम. ३५ अन्नदानम्. ३६ गोवृषमहिषीगजदानम्. ३७ स्वर्णधातुरत्नदानम्. ३८ अनाथरक्षणम. एतान्नियमान्कार्तिके सास्यवश्यं सेवेत ।

अथ वर्ज्यनियमाः—

१ परद्रव्येच्छा. २ परक्रिया. ३ परापवादाः. ४ परशय्या. ५ परान्नम्. ६ पर्युषितान्नम्. ७ पलाण्डुः. ८ पापिसंसर्गः ९ परपुरुषसङ्गः १० परस्त्रीगमनम्. ११ परपैशुन्यम. १२ परोत्कर्षासहनम्. १३ परदोषानुकीर्तनम्. १४ परानिष्टविचिन्तनम्. १५ असत्प्रलापः. १६ अगम्यागमनम. १७ अभोज्यान्नम. १८ शास्त्रेणानुक्तम्. १९ आमिषपदार्थाः. २० असच्छास्त्रम्. २१ शास्त्रेऽविश्वासः. २२ चौर्यम्. २३ मिथ्यावादः. २४ दुष्टसंसर्गः. २५ दुष्टभाषणम्. २६ मांसम्. २७ मृतवत्सादुग्धम्. २८ रजस्वलादृष्टान्नम्. २९ नीचाहृतजलम्. ३० गुडमिश्रं गव्यम्. ३१ राजमाषाः. ३२ कांस्यपात्रे पानं भोजनं च. ३३ द्विदलान्नम्. ३४ वृन्ताकम्. ३५ मूलकम्. ३६ तैलम. ३७ दूषितान्नम्. ३८ जम्बीरम्. ३९ दिवा मदनसेवनम. ४० नित्यमदनसेवनम्. ४१ रसविक्रयः. एतांन्कार्तिके सास्यवश्यं वर्जयेत् ।

इति कार्तिकमासे कर्तव्याकर्तव्यनिर्णयः ॥

इति वैष्णवखण्डे चतुर्थं कार्तिकमासमाहात्म्यम् ॥ (२–४) ॥

अथ वैष्णवखण्डे पञ्चमं मार्गशीर्षमाहात्म्यम् ॥ (२–५) ॥

अध्यायाः	विषयाः	प०	पृ०
१	सूतशौनकसंवादप्रसङ्गेन भगवता ब्रह्मदेवं प्रति मार्गशीर्षमाहात्म्यश्रवणेन सर्वमनोरथंफलप्राप्तिवर्णनम्, गोपीभिः कृतस्य मार्गशीर्षे प्रातःस्नानस्य वर्णनम, प्रातःस्नानपुण्येन गोपीनां कृष्णप्राप्तिः....	१९३	१
२	प्रातःस्नानशौचमुखमार्जनादिसमंत्रकयथाविधिविधानवर्णनपूर्वकं स्नानोत्तरं त्रिपुंड्रधारणमाहात्म्यवर्णनम्.....	१९३	२
३	द्वारवतीसमुद्भवमृत्तिकातुलसीमूलमृत्तिकादिकृतत्रिपुंड्धारणविधिः, गोपीचन्दनमुद्राधारणविधिवर्णनम्, स्वशरीरे भगवदवतारचिह्नधारणफलम, भगवदायुधचिह्नितदेहस्य पुण्यफलप्राप्तिकथनम्, भगवदष्टाक्षरनाम्ना मुद्रितशरीरस्य सर्वकर्माधिकारवर्णनम्.	१९४	१
४	तप्तचक्राङ्कितमुद्राधारणस्य पद्माक्षतुलसीमालाधारणस्य च फलवर्णनम्, धात्रीफलमालाधारणमाहात्म्यम्, तुलसीकाष्ठधारणमाहात्म्यम्, भगवन्मूर्तिस्थापनध्यानपूजनप्रकारवर्णनम्, शंखपूजनादिसमंत्रकक्रमवर्णनम्.	१९५	२
५	पञ्चामृतस्नानफलमाहात्म्यम, शंखोदकस्नानफलमाहात्म्यम्, शंखपूजनफलकथनम.	१९६	२
६	घंटानादमाहात्म्यवर्णनम, भगवन्मूर्तिपूजनफलम्, तुलसीकाष्ठचंदनार्पणफलकथनम.	१९७	१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अध्यायाः	विषयाः	प०	पृ०
७	भगवदर्पितजातिपुष्पफलमाहात्म्यवर्णनम्, भगवत्प्रियपुष्पाणां वर्णनम्, सर्वपुष्पाणां मध्ये जातिपुष्पश्रैष्ठ्यमाहात्म्यम, विष्णुकंठे जातिसहस्रपुष्पांकितमालास्थापनफलमाहात्म्यवर्णनम्.	१९८	१
८	तुलसीमाहात्म्यवर्णनम्, तुलसीपत्रदानेन सर्ववस्तुदानफलप्राप्तिः, तुलसीकृतभगवत्पूजाफलवर्णनम्, धूपदीपदानफलमाहात्म्यम्, सहस्रवर्तियुक्तदीपमाहात्म्यम्.	१९८	२
९	नैवेद्यपात्रान्नव्यञ्जनादियथाशास्त्रविधिविधानकथनम्.	१९९	२
१०	नैवेद्योत्तरभगवदर्चाविधिमाहात्म्यकथनम्, प्रदक्षिणादिफलकथनम्, विष्णुसहस्रनामपठनफलम्, भगवतो दामोदरेतिनामप्राप्तिकारणकथनम्, तीर्थप्रसादसेवनमाहात्म्यम्, पूजाविधिसमापनं तदुद्यापनं तत्फलकथनं च.	२००	२
११	वीरवाहुराजकथासंदर्शनपूर्वकमेकादशीमाहात्म्यम्, भरद्वाजेन वीरवाहुनृपस्यातिथ्यकरणम्, भरद्वाजेन वीरवाहोः प्राग्जन्मवृत्तान्तकथने प्राग्जन्मनि शूद्रेण ब्राह्मणसत्कारजन्यात्पुण्यादिह जन्मनि राज्यप्राप्तिवृत्तान्तवर्णनम्.	२०१	१
१२	वीरवाहुना प्राग्जन्मन्यात्मनः शूद्रत्वप्राप्तिकारणं पृष्टेन देवशर्मणा द्विजेन प्राग्ब्राह्मणत्वं गतेनापि दशमीयुतद्वादशीस्वीकरणदोषेण तस्य शूद्रत्वप्राप्तिवृत्तान्तकथनपूर्वकं दशमीयुतद्वादशीनिषेधकथनम्, प्राग्जन्मनि विप्रातिथ्यादिसुकर्मणा शूद्रत्वेऽपि तस्य सन्मतिर्जाताऽतोऽवश्यमेवातिथिसत्कारः कार्य इत्यादिवर्णनं च, राज्ञे भरद्वाजेनैकादशीव्रतोद्यापनविधिक्रमवर्णनम, अखण्डैकादशीव्रतकथनम. ...	२०३	१
१३	द्वादशीजागरमाहात्म्यम्, जागरे दानादिविधिक्रमवर्णनम्, द्वादशीसम्भवपुत्रस्याधिकारवर्णनम्.	२०४	४
१४	द्वादश्यां मत्स्योत्सवमाहात्म्यवर्णनपूर्वकस्नानदानपूजादिविधिविधानकथनम्, मत्स्योत्सवे मन्त्रजपविधानम, स्नानसमये नदीप्रार्थनामन्त्रकथनम्, भगवते फलपुष्पाद्यर्पणफलकथनम्, मत्स्यरूपस्वर्णमूर्तिदानमाहात्म्यवर्णनम्.	२०५	२
१५	मार्गशीर्षे दम्पतिपूजनप्रकारकथनम्, गोभूमिस्वर्णवस्त्रशय्यालंकारसद्मदानमाहात्म्यम्, भगवत्पूजासमये फलपुष्पदानमाहात्म्यम्, मार्गशीर्षे दानादिभिर्ब्राह्मणसंतोषकरणमाहात्म्यम्, मार्गशीर्षे भगवन्नामस्मरणमाहात्म्यम्.	२०६	२
१६	भगवद्ध्यानं तन्माहात्म्यं च, भगवत्स्तोत्रोपदेशाधिकारवर्णनम्, गुरुशिष्यलक्षणम्, भागवतमाहात्म्यवर्णनम्, भागवतफलश्रुतिः, भागवतग्रन्थार्चनपूर्वकपठनफलवर्णनम्.	२०७	२
१७	मथुरामाहात्म्यवर्णनम्.	२०९	१

इति वैष्णवखण्डे पञ्चमं मार्गशीर्षमासमाहात्म्यम् ॥ (२-५) ॥

अथ वैष्णवखण्डे षष्ठं भागवतमाहात्म्यम् ॥ (२-६) ॥

अध्यायाः	विषयाः	प०	पृ०
१	सूतशौनकसंवादप्रसङ्गेन माथुरहस्तिनापुरयो राज्यसिंहासनयोर्वज्रपरीक्षितावभिषिच्य श्रीकृष्णपांडवानां स्वधामगमनवर्णनम्, वज्रनाभपरीक्षितसंवादोत्तरं शांडिल्यर्षेरागमनम्, शांडिल्येन व्रजशब्दार्थविवेचनपूर्वकं कृष्णकृतव्रजलीलावर्णनम्, गोवर्धनमाथुरादिराज्यकरणेनोद्धवदर्शनलाभकथनम्.	२१३	१
२	इत्थमुक्त्वा शांडिल्यस्य स्वाश्रमगमनम्, परीक्षिद्राज्ञस्तत्र माथुरमण्डलं प्रत्यागमनम्, वज्रपरीक्षिद्राजभ्यां गोविन्दगोपीललितस्थानस्थापनम्, माथुरस्यासमन्ततो बहूनां ग्रामाणामत्रस्थापनम्, माथुरे कुण्डकूपादिपूर्तकर्मपूर्वकं शिवलिङ्गस्थापनम्, श्रीकृष्णविरहेण कृष्णपत्नीकृतशोकवर्णनम्, कालिंदीवर्णितभगवद्गुणानुवादवर्णनम्, गोवर्धनपर्वतसमीपे परीक्षिदादीनामुद्धवदर्शनवर्णनम्.	२१४	१
३	उद्धवपरीक्षित्संवाद उद्धवेन भगवन्माहात्म्यकथनम्, कृष्णकृतबालक्रीडादिवर्णनम्, भागवतग्रन्थपठनेन सर्वमनोरथफलप्राप्तिकथनम्, यद्गृहे भागवतं तदेव श्रीकृष्णावासस्थानमित्यादिवर्णनम्, भागवतश्रवणेन मोक्षप्राप्तिवर्णनम्, श्रीमद्भागवतसंप्राहश्रवणफलम्, भगवत्कृतं सत्त्वरजस्तमोमयविष्णुब्रह्मदेवशंकरकार्यस्थित्युत्पत्तिलयाद्युपदेशवर्णनम्, श्रीमद्भागवतग्रहणेन शिवस्य तमोगुणनि-		

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अध्यायाः	विषयाः	प०	पृ०
	रासः, भागवतश्रवणोत्सुकेन परीक्षितोद्धवस्य प्रार्थनाकरणम्, शुकमुखात्तव भागवतश्रवणं स्यादित्युद्धववचनं श्रुत्वोद्धवाज्ञया कलिनिग्रहार्थं दिग्विजयार्थं च परीक्षितो गमनम्, वज्रस्य प्रतिबाहुं पुत्रं राज्ये संस्थाप्य वृन्दावनं गत्वोद्धवसंकीर्तितश्रीमद्भागवतश्रवणेन मुक्तिप्राप्तिवर्णनम्.	२१५	१
४	सूतशौनकसंवादप्रसंगेन श्रीमद्भागवतभगवतोरेकस्वरूपत्वकथनम्, श्रीमद्भागवतश्रवणविधिकथनम्, श्रीमद्भागवतश्रवणेन सद्यः सर्वसिद्धिप्राप्तिवर्णनम्.	२१६	२

इति वैष्णवखण्डे षष्ठं भागवतमाहात्म्यम् ॥ (२--६) ॥

अथ वैष्णवखण्डे सप्तमं वैशाखमासमाहात्म्यम् ॥ (२-७) ॥

अध्यायाः	विषयाः	प०	पृ०
१	सूतशौनकसंवादे वैष्णवादिधर्मजिज्ञासोरंबरीषस्य नारदं प्रति प्रश्नः, नारदकृतवैशाखमासप्रशंसा, वैशाखस्नानमहिमा च.	२२०	१
२	वैशाखप्रशंसा, ततो वैशाखमासव्रताकरणे दोषप्रसङ्गः, व्रतप्रशंसा, वैशाखे जलप्रपादानम्, व्यजनच्छत्रपादत्राणदानप्रशंसा, अन्नदानप्रशंसा च.	२२१	२
३	शय्याकम्बलवस्त्रकर्पूरकुसुमकुंकुमचंदनगोरोचनताम्बूलफलादिदानम्, विश्राममण्डपकरणम्, कूपतडागोद्यानप्रशंसा, पुत्राभावे पुत्रवत्सप्तपदार्थवर्णनम्, ताम्बूलतक्रदधितंदुलघृतगुडेक्षुदण्डेक्ष्वादिरसपानकदानमाहात्म्यम्.	२२२	२
४	वैशाखव्रतिनां वर्ज्यपदार्थाः, गृहस्नाने दुष्टफलम्, व्रताकरणे दोषः, नदीसप्तगंगादेवखातवापीषु स्नानं दानं च, मधुसूदनप्रार्थनार्घ्यदानपूजनादिकम्.	२२३	२
५	वैशाखमासस्य हेतुपूर्वकं श्रेष्ठत्वकथनम्.	२२७	१
६	वैशाखमासे जलदानमाहात्म्यकथनम्, तद्विषये हेमाङ्गदराजकथा, वैशाखमासे जलादानात्तस्य तिर्यग्योनिप्राप्तिः, मैथिलराजगृहे गोधिकात्वं प्राप्तस्य तस्य श्रुतदेवसकाशान्मुक्तिः.	२२८	२
७	तदद्भुतं दृष्ट्वा विस्मितेन मैथिलेन पृष्टेन श्रुतदेवेन वैशाखमासे जलदानादिमाहात्म्यकथनम्, तद्विषये स्वपितुर्वृत्तान्तकथनम्.	२३०	१
८	मैथिलपृष्टेन श्रुतदेवेनेश्वरपार्वतीसंवादद्वारा वैशाखमाहात्म्यविषय इक्ष्वाकुतनयस्य काकुत्स्थस्येतिहासकथनम्.	२३१	२
९	मैथिलपृष्टेन श्रुतकीर्तिविप्रेण कुमारजन्मकथनम्, वैशाखधर्मप्रशंसा च. ...	२३५	१
१०	अशून्यव्रतकथनम्, वैशाखमासे छत्रदानादिप्रशंसा.	२३८	१
११	मैथिलनृपेण वैशाखधर्मप्रसिद्धिकरणम्, तेन सर्वजनानां सद्गतिप्राप्त्या नरकाणां शून्यतया खिन्नस्य यमस्य ब्रह्मसमीपे गमनम्.	२४०	१
१२	ब्रह्मणे यमेन स्वदुःखनिवेदनम्.	२४३	१
१३	वैशाखमाहात्म्यकथनपूर्वकं ब्रह्मणा यमस्य समाधानकरणम्, तथापि खेदयुक्तेन यमेन साकं ब्रह्मणो विष्णुसमीपे गमनम्, विष्णुना यमाय वरप्रदानम्, तत्र वैशाखधर्माणां प्रशंसा.	२४४	२
१४	वैशाखस्नानप्रशंसा, वैशाखमाहात्म्यकथाश्रवणप्रशंसा, तत्र कर्मनिष्ठतपोनिष्ठद्विजकथा.	२४६	१
१५	पञ्चालदेशाधिपस्य पुरुयशसो नृपस्य वैशाखधर्माचरणात्स्वराज्यप्राप्तिः.	२४७	२
१६	अथ पुरुयशसाऽक्षय्यतृतीयायां विष्णोः स्तुतिकरणम्, विष्णुकृपया च तस्य सायुज्यमुक्तिप्राप्तिः.	२५०	१
१७	वैशाखधर्मकथनोपक्रम उपानद्दानप्रसङ्गेन शङ्खनामकद्विजकथानकम्, तत्र शङ्खनामकद्विजेन व्याधाय वैशाखधर्मकथनप्रसङ्गेन दन्तिलकोहलमुक्तिप्राप्तिवृत्तांतकथनम्.	२५१	२
१८	व्याधस्य पूर्वजन्मवृत्तान्तकथनम्.	२५३	१
१९	ब्रह्मशब्दप्रतिपादनपूर्वकं सर्वदेवापेक्षयाः प्राणस्य मुख्यत्वकथनम्, प्राणदेवस्य महत्त्वलोपे कण्वशापप्रतिपादनम्, त्वं गुरुद्रोही भवेति कण्वं प्रति प्राणवायुना शापप्रदानम्.	२५५	१
२०	सत्त्वादिभिर्गुणैर्जीवानां तदनुरूपजन्मकर्मादिफलप्राप्तिकथनम्, प्रलयवर्णनम्, व्यूहावतारकर्मनिरूपणम्, धर्मभेदनिरूपणपूर्वकं भगवद्भक्तलक्षणनिरूपणम्, वैशाखमासधर्मनिरूपणम्.	२५७	२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अध्यायाः	विषयाः	प०	पृ०
२१	वैशाखमासमाहात्म्यश्रवणेन सर्पस्य मुक्तिः, तस्यैव पूर्वजन्मवृत्तान्तकथनम्, शंखव्याधसंवादे व्याधस्य जन्मान्तरे वाल्मीकित्वप्राप्तिकथनम्.	२६०	२
२२	वैशाखस्थतिथिमाहात्म्यवर्णनम्, कलिधर्मनिरूपणम्.	२६२	२
२३	अक्षय्यतृतीयामाहात्म्यम्.	२६५	२
२४	वैशाखशुक्लद्वादशीमाहात्म्यम्, काश्मीरदेशस्थदेवद्विजकथा....	२६६	२
२५	वैशाखशुक्लत्रयोदशी–चतुर्दशी–पूर्णिमातिथीनां माहात्म्यवर्णनम्, वैशाखमाहात्म्यश्रवणफलवर्णनम्.	२६९	२

इति वैष्णवखण्डे सप्तमं वैशाखमासमाहात्म्यम् ॥ (२–७) ॥

अथ वैष्णवखण्डेऽष्टममयोध्यामाहात्म्यम् ॥ (२–८) ॥

अध्यायाः	विषयाः	प०	पृ०
१	सूतकृतं मंगलार्थं व्यासादिविद्वद्वर्यस्तवनम्, सूतशौनकसंवादप्रसंगेन नानाद्रुमलतादिशोभितायोध्यामाहात्म्यवर्णनम्, अगस्तिमुनेरयोध्यागमनम्, अयोध्याप्रभावदर्शनेनागस्त्यस्यानन्दप्राप्तिवर्णनम्, त्रिगुणत्रिस्वरूपस्थितायोध्यावर्णनेनायोध्याशब्दस्य व्युत्पत्त्यर्थकथनम्, अयोध्यायामगस्तिव्याससंवादपूर्वकं विष्णुशर्मकृतपञ्चाग्निसाधनवर्णनम्, विष्णुशर्मणा भगवत्स्तोत्रकरणम्, विष्णुशर्मणो भगवद्दर्शनम्, भगवता विष्णुशर्मणे वरप्रदानम्, तस्मिन्नेव स्थले भगवता स्वचक्रेण जलप्रवाहानयनम्, चक्रतीर्थेतिनाम्ना तत्तीर्थस्य प्रसिद्धिवर्णनम्, विष्णुनामपूर्वकविष्णुहरीतिमूर्तिस्थापनम्, विष्णुहरिमाहात्म्यवर्णनम्.	२७४	१
२	ब्रह्मणोऽयोध्यायामागमनम्, यात्रादिकं विधाय यज्ञकरणम्, स्वनाम्ना ब्रह्मकुण्डस्थापनम्, ब्रह्मदेवेन ब्रह्मकुण्डमाहात्म्यवर्णनम्, सरयूतीरस्थर्णमोचनतीर्थमाहात्म्यम्, लोमशेन पापमोचनतीर्थमाहात्म्यवर्णनम्, अगस्त्येन सहस्रधारामाहात्म्यवर्णनम्.	२७६	१
३	अगस्त्येन स्वर्गद्वारतीर्थमाहात्म्यकथनम्, मुक्तिद्वारतीर्थमाहात्म्यम्, चंद्रहरिव्रतोद्यापनविधिकथनम्, चन्द्रसहस्रव्रतोद्यापनमाहात्म्यकथनम्.	२७८	१
४	धर्महरिमाहात्म्यम्, तत्र धर्मराजकृतनर्तनं दृष्ट्वा भगवत आगमनम्, धर्मेण भगवत्स्तुतिकरणम्, भगवता धर्मराजाय वरप्रदानम्, रघुसंज्ञकेन राज्ञा दिग्विजयं कृत्वा सूर्याज्ञया कृतस्य सर्वस्वदक्षिणनामकस्य यज्ञस्य परिसमाप्तेरनंतरं कौत्सऋषेरागमनम्, स्वपूजनार्थमानीतं संभारं दृष्ट्वा विस्मितेन कौत्सर्षिणा धनाभावाद्दात्रंतरं प्रति गन्तुं स्वेच्छाप्रकटनम्, कौत्साय द्रव्यं दातुं कौबेरीं संपत्तिमादातुं कुबेरजिगीषया रघोः प्रस्थानम्, रघुभिया कुबेरेण द्रव्यवृष्टिकरणम्, कौत्साय रघुणा सर्वद्रव्यदानवर्णनम्, कौत्सेन रघुराजायाशीर्वाददानवर्णनम्, कौत्सस्य स्वाश्रमगमनम्, स्वर्णखानिमाहात्म्यवर्णनम्.	२७९	२
५	कौत्सवृत्तान्तवर्णनम्, तत्र विश्वामित्रस्य तपश्चर्यां श्रुत्वा तद्दर्शनार्थं दुर्वाससः आगमनम्, दुर्वासःकृतां भोजनयाच्ञां श्रुत्वा विश्वामित्रदत्तस्य पायसादिकस्य वर्णनम्, कौत्साय चतुर्दशकोटिसुवर्णात्मकगुरुदक्षिणादानायाज्ञाकरणम्, तिलोदकीतीर्थमाहात्म्यवर्णनम्.	२८१	१
६	सीताकुण्डमाहात्म्यवर्णनम्, देवासुरयुद्धेऽसुरैर्देवपराजये कृते देवैर्भगवत्स्तुतिकरणम्, देवस्तुतिं श्रुत्वा भगवदाविर्भावः, भगवद्वचनाद्गुप्तरीत्या देवानामयोध्यागमनम्, गुप्तहरीतिनाम्ना तत्तीर्थप्रसिद्धिवर्णनम्, गुप्तहरिमाहात्म्यम्, चक्रहरिपीठे दानमाहात्म्यम्, सरयूघर्घरानद्योः संगमे स्नानमाहात्म्यम्, गोप्रतारतीर्थमाहात्म्यम्, रामचन्द्रस्य स्वधामगमनसमये वानरेभ्यो वरप्रदानवर्णनम्, रामचन्द्रस्य मार्गे सरयूदर्शनम्, सर्वदेवानां तत्रागमनम्, देवै रामचन्द्रस्य स्तोत्रकरणम्, रामचन्द्रेण सह देवानां स्वर्गगमनम्, स्वर्गद्वारगोप्रतारतीर्थस्नानदानादिमाहात्म्यम्.	२८१	२

CC-0. In Public Domain. Digitization by eGangotri

अध्यायाः	विषयाः	प०	पृ०
७	क्षीरोदकतीर्थमाहात्म्यम्, तत्र पुत्रप्राप्त्यर्थं दशरथकृतस्य पुत्रकामेष्टियज्ञस्य वर्णनम्, धनयक्षतीर्थमाहात्म्यम्, विश्वामित्रवचनाद्यक्षस्य धनयक्षतीर्थस्नानेन दुर्गंधितस्यांगस्य सुगंधित्वप्राप्तिवर्णनम्, विश्वामित्रेण यक्षं प्रति कथितस्य निधिलक्ष्मीपूजनविधानस्य वर्णनम्, वसिष्ठकुंडमाहात्म्यम्, चतुःषष्टियोगिनीपूजनमाहात्म्यम्, योगिनीकुण्डस्नानमाहात्म्यम्, उर्वशीकुण्डमाहात्म्यम्, घोषराज्ञाऽऽदित्यस्तुतिकरणम्, घोषार्ककुण्डमाहात्म्यम्, रुक्मिणीकुण्डबृहस्पतिकुण्डसागरकुण्डमाहात्म्यम्.	२८६	१
८	रतिकुण्डमाहात्म्यम्, कुसुमायुधकुण्डमाहात्म्यम्, रतिकंदर्पपूजाविधिकथनम्, मंत्रेश्वरक्षेत्रमाहात्म्यम्, महारत्नतीर्थमाहात्म्यम्, दुर्भराख्यतीर्थमाहात्म्यम्, महाभरतीर्थमाहात्म्यम्, महाविद्यातीर्थमाहात्म्यम्, सिद्धपीठतीर्थमाहात्म्यम्, दुग्धेश्वरमाहात्म्यम्, हनुमत्कुण्डमाहात्म्यम्, वसिष्ठरामसंवादप्रसंगेनायोध्यामाहात्म्यवर्णनम्, क्षीरेश्वरमाहात्म्यम्, सीताकुण्डमाहात्म्यम्, सुग्रीवतीर्थमाहात्म्यम्, विभीषणसरोमाहात्म्यम्, अयोध्यायात्राविधिक्रमवर्णनम्.	२८९	१
९	गयाकूपमाहात्म्यम्, पिशाचमोचनतीर्थमाहात्म्यम्, माण्डव्यतीर्थमाहात्म्यम, भरतकुण्डमाहात्म्यम, मानसतीर्थमाहात्म्यम्, गौतम्याद्याश्रमवर्णनम्, सीताकुण्डदुग्धेश्वरमाहात्म्यम, भैरवकुण्डमाहात्म्यम, जटाकुण्डमाहात्म्यम्.	२९१	१
१०	सत्तगजेन्द्रस्थानमाहात्म्यवर्णनम्, अयोध्यायात्राविधिक्रमवर्णनम, सरयूवर्णनम्, विघ्नेश्वरस्थानमाहात्म्यम, रामजन्मस्थानमाहात्म्यम्, अयोध्यामाहात्म्यश्रवणफलम.	२९२	२

इति वैष्णवखण्डेऽष्टममयोध्यामाहात्म्यम् ॥ (२--८) ॥

॥ इति स्कान्दे महापुराणे द्वितीयं वैष्णवखण्डम् ॥ २ ॥

अथ स्कान्दे महापुराणे तृतीयं ब्राह्मखण्डम् ॥ ३ ॥

अथ ब्राह्मखण्डे प्रथमं सेतुमाहात्म्यम् ॥ (३-१) ॥

अध्यायाः	विषयाः	प०	पृ०
१	मङ्गलाचरणम्, नैमिषारण्यनिवासिनां शौनकादिमहर्षीणां समाजे पौराणिकस्य सूतमहर्षेरागमनम्, शौनकादिभिर्महर्षिभिः सूतं प्रति सत्कारकरणानन्तरं क्षेत्रतीर्थमाहात्म्यजिज्ञासया प्रश्नकरणम्, सूतेन श्रीरामेश्वरक्षेत्रमाहात्म्यवर्णनोपक्रमकरणम्, तत्रादौ दक्षिणोदधिस्थश्रीरामनिर्मितसेतुबन्धयात्रासेतुबन्धदर्शनरामसेतुस्नानरामेश्वरलिङ्गदर्शनमाहात्म्यम्.	१	१
२	अथ सेतुबन्धनवृत्तान्तप्रसङ्गेन श्रीरामचन्द्रस्य पितुराज्ञया दण्डकारण्यगमनसीताहरणसुग्रीवसख्यसमुद्रतीरगमनविभीषणसमागमान्तरामायणवृत्तान्तवर्णनम्, अथ सर्वराक्षसराज्ये विभीषणाभिषेचनानन्तरं समुद्रतरणोपायचिन्तया चक्रतीर्थे सुग्रीवादिभिः सह दर्भशयने स्थित्वा मन्त्रकरणम्, ततस्त्रिरात्रपर्यन्तं समुद्रतरणोपायं चिन्तयानेन रामेण समुद्रस्योपासनापूर्वकं प्रतीक्षणम्, अथ समुद्रस्य स्वं प्रत्यनागमनादिरूपमनादरं दृष्ट्वा श्रीरामेण समुद्रं शोषयितुं प्रतिज्ञायां कृतायां भयभीतेन समुद्रेण श्रीरामं प्रति शरणमागत्य श्रीरामस्य स्तुतिकरणम्, ततस्तत्स्तुतिप्रसन्नेन श्रीरामेण लङ्कागमनार्थं तरणार्थमुक्ते समुद्रेण स्वोपरि सेतुबन्धनार्थं विज्ञप्तिकरणम्, ततः श्रीरामेण सर्ववानरसाहाय्येन विश्वकर्मसुतनलवानरद्वारा समुद्रे सेतुबन्धनम्, दर्भशयनस्य सेतुमूलत्ववर्णनम्, सेतौ स्थितानां चक्रतीर्थादिचतुर्विंशतितीर्थानां वर्णनम्.	४	१
३	अथ सेतुमूलाख्यचक्रतीर्थप्रसिद्धिवृत्तान्तवर्णनम्, तत्र धर्मपुष्करिणीतीरे गालवाख्यमहर्षितपस्तुष्टेन भगवता गालवाय वरप्रदानपूर्वकं धर्मस्याराधनसन्तोषितहरप्रसादलब्धहरवाहनवृषभत्वप्राप्तिवृत्तान्तवर्णनम्, अथ हरि[illegible]रायणस्य गालवमहर्षेः केनचिद्राक्षसेन भक्षणार्थं गृहीतस्य स्तुत्या भगवता [illegible] सुदर्शनचक्रेण		

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अध्यायाः | विषयाः | प० | पृ०

राक्षसस्य हननम्, ततो निहतं राक्षसं दृष्ट्वा गालवेन पुरःस्थितस्य देदीप्यमानस्य सुदर्शनचक्रस्य स्तुतिकरणम्, ततः सुदर्शनचक्रेण गालवमहर्षये वरप्रदानपूर्वकं धर्मपुष्करिण्यां सदा सन्निधानकरणम्, तत एव धर्मपुष्करिण्याश्चक्रतीर्थत्वेन प्रसिद्धिः, धर्मतीर्थापरपर्यायचक्रतीर्थस्य माहात्म्यवर्णनम्.... ... ... ६ २

४ गालवमहर्षित्रासदायकराक्षसवृत्तान्तवर्णनम्, तत्र विश्वावसुगन्धर्वसुतस्य दुर्दमाख्यस्य सलिलाशये विवस्त्रस्य विवस्त्राभिःस्त्रीभिः सह क्रीडया मदान्धतामवेक्ष्य माध्याह्निकविधानार्थं सलिलाशयं प्रत्यागतेन वसिष्ठमहर्षिणा शापप्रदानम्, वसिष्ठशापाद्दुर्दमस्य राक्षसत्वप्राप्तिः, तद्भार्याभिः प्रार्थितेन वसिष्ठेन दुर्दमस्य शापान्तावधिकरणम्, ततो दुर्दमस्य सुदर्शनचक्रकृतशिरश्छेदानन्तरं दिव्यदेहप्राप्तिः, दुर्दमेन सुदर्शनचक्रस्तुतिकरणम्, दर्भशयनमारभ्य देवीपत्तनपर्यन्तं चक्रतीर्थस्यायामविस्तारवत्त्वे सत्यपि मध्येमध्ये विच्छिन्नताकारणकथनानुसारेण शक्रकृतपर्वतपक्षच्छेदनवृत्तान्तवर्णनम्. ८ २

५ अथ चक्रतीर्थमाहात्म्यप्रसंगेन विधूमाख्यवस्वलंबुसाप्सरोवृत्तान्तवर्णनम्, तत्र ब्रह्मलोके निजसभायां सावित्रीसनकप्रभृतिसमस्तसुरमुनिसिद्धवसुगन्धर्वैः सह स्थितस्य ब्रह्मणः पुरस्तादखिलाप्सरसां पर्यायनृत्यसमारंभे क्रमेणालंबुसाख्याया अप्सरसो नृत्यमानाया लीलया वायुनाभ्यन्तरवस्त्रे समुत्क्षिप्ते सति स्पष्टोरुमूलजघनदर्शनेन कामबाणनिपीडितस्य विधूमनामकस्य वसोर्निर्लज्जतां निरीक्ष्य ब्रह्मणा तस्मै मनुष्यत्वप्राप्तिरूपशापप्रदानम्, अलंबुसायाश्च मानुषीत्वप्राप्तिरूपशापप्रदानम्, विधूमप्रार्थनया ब्रह्मणा तच्छापान्तावधिकरणम्, अथ भूतले शतानीकमहीपतेर्भार्यायां विधूमवसोः सहस्रानीकनाम्ना जन्म, तस्य त्रयाणामनुचराणां च तन्मन्त्रिसेनानीवयस्यानां गृहेषु जन्म, अलंबुसाख्यायाः स्वर्वेश्याया अयोध्याधिपतेः कृतवर्मणः कन्यात्वम्, अथ शतानीके नृपे दिवि दैत्येन सह युद्धे मृते सति सहस्रानीकस्य राज्याभिषेकः, अनन्तरं सनंदनमहोत्सवे शक्रनिमन्त्रणवशाच्छक्रभवनं गतेन सहस्रानीकेन शक्रवचनान्निजशापान्तवृत्तान्तमाज्ञाय भुवमागत्य मृगावतीपरिणयनम्, मृगावतीपरिणयोत्तरं कौशांबीं नगरीं प्रति प्रस्थितस्य सहस्रानीकस्य मध्येमार्गं शक्रवचनं ध्यात्वाऽनालोकितया तिलोत्तमाख्ययाऽप्सरसा चतुर्दशसमापर्यंतं भार्यया सह ते वियोगो भविष्यतीति शापप्रदानम्, अथ कालेन गर्भिण्यां मृगावत्यां दौर्हृदपरिपूर्त्यै कौसुम्भकुसुमपूर्णवाप्यां निमज्जने क्रियमाणे सुपर्णकुलसंभवेन विकटपक्षिणा हरणपूर्वकमुदयाचलशिखरोपरि नयनम्, तत्र जमदग्निना शोकाकुलाया मृगावत्याः सान्त्वनपूर्वकं स्वाश्रमे स्थापनम्, अथ तत्र प्रसूताया मृगावत्याः पुत्रस्य जमदग्निनोदयनेतिनामकरणम्, उदयनेन स्वमातृदत्तकंकणं प्रदाय शवरव्याधतो मोचितेन सद्यो मनुष्यरूपधृता किंनराख्यनागेन सह पातालं प्रति गत्वा धृतराष्ट्रनागकन्यया किंनरनागभगिन्या ललिताख्यया सह विवाहकरणम्, ललितायां तस्मात्पुत्रोत्पत्तिः, अथ ललितायाः शापतो विमुक्तिः, उदयनस्य ललितासकाशात्पुत्रं तांबूलीस्रजं घोपवतीं वीणां च गृहीत्वा स्वमातरं प्रति जमदग्न्याश्रम आगमनम्, शवरव्याधसमीपे स्थितं निजमुद्रांकितकंकणं दृष्ट्वा सहस्रानीकेन शवरात्कंकणप्राप्तिवृत्तांतं श्रुत्वा मन्त्रिभिः सह जमदग्न्याश्रमं प्रति गमनम्, जमदग्नितः स्वभार्यां मृगावतीं स्वपुत्रमुदयनं स्वपौत्रं च प्राप्य स्वपुरीं प्रत्यागमनम्, तत उदयनाख्ये स्वपुत्रे राज्यभारं न्यस्य स्वशापनिवृत्तये मृगावतीपत्न्या वसंतकरुमण्वद्यौगन्धरायणाख्यैर्निजमन्त्रिपुत्रादिभिश्च सह दक्षिणोदधितटस्थचक्रतीर्थं गत्वा तत्र स्नानमात्रेण तस्य शापनिवृत्तिपूर्वकपूर्वरूपप्राप्तिवर्णनम्, ततस्तेषां चतुर्णामपि पूर्वस्वरूपावाप्तिवर्णनम्, चक्रतीर्थमाहात्म्यवर्णनम्. १० १

६ अथ नवपापापस्थानस्थदेवीपत्तनवृत्तान्तवर्णनम्, तत्र देवैर्हतपुत्रया दित्या निजपुत्रीं प्रति तपश्चरणार्थमाज्ञाकरणम्, दित्याज्ञया तत्पुत्र्या महिषीरूपं धृत्वा तपोवनं गत्वा पंचाग्निसाधनादिघोरतपःकरणम्, तत्तपःक्षुब्धेन सुपार्श्वमुनिना तां प्रति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अध्यायाः विषयाः प० पृ०

देवविजयिमाहिपमुखनररूपपुत्रप्राप्तिमाश्वास्य तां गृहीत्वा च स्वस्थानं प्रति गमनम्, अथ तस्या दितिपुत्र्याः सकाशान्महिषासुरोत्पत्तिः, महिषासुरेण सर्वदैत्यराज्याधिपत्यप्राप्त्यनंतरं देवैः सह युद्धं कृत्वा सर्वदेवानां पराजयकरणम्, अथ पराजितान्देवान्गृहीत्वा ब्रह्मणो नारायणशिवसमीपं प्रति गमनम्, ब्रह्मनिवेदितमहिषासुरोपद्रववृत्तान्तमाश्रुत्य क्रुद्धयो रमेश्वरमहेश्वरयोर्मुखतः सुमहत्तेजसो निष्क्रमणम्, तदनु सर्वदेवशरीरेभ्यस्तेजसो निष्क्रमणम्, तेषां सर्वेषां तेजसामेकत्र समुदायेन परमभास्वरसर्वाङ्गसुन्दरदुर्गानामकनारीसमुत्पत्तिः, ततः सर्वदेवैस्तस्यै दुर्गादेव्यै निजायुधेभ्य उत्पादितानामायुधानां प्रदानम्, सर्वदेवैः स्तुतया देव्या सिंहमारुह्य महिषासुरवधार्थं सुभैरवाट्टहासकरणम्, अथ महिषासुरसैन्यैः सह देवानामतिभयंकरयुद्धम्, तत्र युद्धे देव्या महिषासुरसैन्यवधकरणवर्णनम्. १३ २

७ अथ देव्या महिषासुरप्रहितचण्डकोपाख्यासुरहनानन्तरं युद्धार्थं स्वयमुपस्थितेन महिषासुरेण सह तुमुलयुद्धकरणम, ततो देव्या महिषासुरवधकरणम्, महिषासुरवधेन संतुष्टैर्देवैर्देव्याः स्तुतिकरणम्, ततो देवेषु स्वस्वाधिकारस्थानेषु गतेषु सत्सु जगन्मात्रा देव्या दक्षिणोदधितीरे धर्मपुष्करिणीतीर्थदेवीपत्तनयोर्निर्माणपूर्वकं वरप्रदानम्. श्रीरामचन्द्रेण नवग्रहस्वरूपनवपाषाणस्थापनपूर्वकं नलद्वारा सेतुनिर्मापणम्, सेत्वारम्भसीमास्थानवर्णनम्, सेतुनाथहरिमाहात्म्यम्, चक्रतीर्थप्रशंसा, दर्भशयनस्थानमारभ्य सेतुयात्रारम्भकथनम्. १५ १

८ अथ वेतालवरदतीर्थवृत्तान्तवर्णनम्, तत्र गालवमहर्षिकन्यायाः कान्तिमतीनाम्न्याः सुदर्शनाख्येन विद्याधरकुमारेण मदनविह्वलतया केशेषु ग्रहणम्, गालवेन सुदर्शनाख्यविद्याधराय मनुष्यत्वप्राप्तिपूर्वकवेतालत्वप्राप्तिशापप्रदानम, तदनुमोदकस्य तत्कनिष्ठबन्धोः सुकर्णकाख्यस्य च केवलमनुष्यत्वप्राप्तिरूपशापप्रदानम्, ततस्तयोः सुदर्शनसुकर्णकयोर्यमुनातीरनिवासिगोविन्दस्वामिनो गृहे विजयदत्ताशोकदत्तनामकतनयत्वप्राप्तिः, अथ स्वदेशे दुर्भिक्षवशाद्वाराणसीं प्रति गतेन गोविंदस्वामिना कपालमालाभरणाख्ययतिमुखाद्विजयदत्तनामकपुत्रभविष्यद्वियोगश्रवणम्, विजयदत्तस्याकस्मात्कपालस्फोटनामकवेतालत्वप्राप्तिवृत्तान्तवर्णनम्. १६ २

९ अथ पुत्रशोकव्याकुलस्य गोविंदस्वामिनः स्वगृहं प्रत्यागत्य भार्यया सह विलापकरणम्, अशोकदत्तनाम्ना गोविंदस्वामिद्वितीयपुत्रेण प्रतापमुकुटाख्यनरपतेरनुज्ञया दाक्षिणात्यमहामल्लस्य निपातनपूर्वकं हननम्, अथ प्रतापमुकुटनृपतेराश्रयेणाशोकदत्तस्य स्थितिः, अथ कदाचिद्विजनेऽरण्ये नृपेण सह परिभ्रमता धैर्यवताऽशोकदत्तेन स्मशानं गत्वा मायिकाया विद्युत्केशाख्याया राक्षस्याः पादतलं निगृह्यैकं रत्ननूपुरं गृहीत्वा राजसमीपमागत्य राज्ञे रत्ननूपुरसमर्पणम्, ततस्तद्धैर्यसन्तुष्टेन प्रतापमुकुटाख्येन राज्ञाऽशोकदत्ताय वैवाहिकेन विधिना मदनलेखाख्यनिजसुताप्रदानम्, ततो नृपेच्छां विज्ञाय द्वितीयनूपुरप्राप्तयेऽशोकदत्तस्य महामांसं गृहीत्वा स्मशाने गमनम, तत्र मन्त्रैर्भूतानामामन्त्रणे क्रियमाणे रक्षःकन्यासमावृताया विद्युत्केशाख्यराक्षस्यास्तत्समीपं प्रति मांसभक्षणलालसयाऽऽगमनम्, ततस्तद्धैर्यसन्तुष्टया विद्युत्केशाख्यया राक्षस्याऽशोकदत्ताख्याय द्विजसूनवे स्वपादस्थितद्वितीयरत्ननूपुरप्रदानपूर्वकं विद्युत्प्रभाख्यानिजकन्याप्रदानम्, तस्मा एव च जामात्रे कन्याप्रदानप्राभृतत्वरूपेण सुवर्णकमलप्रदानम्, तत्सर्वं गृहीत्वाऽशोकदत्तस्य प्रतापमुकुटाख्यनृपसमीप आगमनम्, प्रतापमुकुटेनाशोकदत्तस्य प्रशंसाकरणम्, अथ कदाचिदेकान्ते विद्युत्प्रभां प्रति तन्मातृदत्तसुवर्णपङ्कजोत्पत्तिस्थले पृष्टे तया कपालविस्फोटकनामकवेतालभूपालिदिव्यसरोवृत्तान्तवर्णनम्, अथ तया विद्युत्प्रभया सहाशोकदत्तस्य कपालविस्फोटकवेतालरक्षितकाञ्चनकमलसरः प्रति गमनम्, तत्र विघ्नकारिणो वेतालान्हत्वा कपालविस्फोटकाख्यं वेतालं हन्तुकामेनाशोकदत्तेन विमानारूढविज्ञप्तिकौतुकनामकविद्याधरपतिदर्शनम्, तद्दर्शनमात्रेणाशोकदत्तस्य गालवमहर्षिदत्तमनुष्यत्वरूप-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अध्यायाः	विषयाः	प०	पृ०
	शापान्मुक्तिपूर्वकं सुकर्णाख्यस्वस्वरूपप्राप्तिः, अथो विज्ञप्तिकौतुकाविद्याधरपतिवचनेन वेतालत्वं प्राप्तस्य निजभ्रातुरुद्धारार्थं तेन सह दक्षिणोदधितीरस्थितचक्रतीर्थं गत्वा स्नानकरणम्, तत्तीर्थजलकणस्पर्शमात्रेण वेतालस्य वेतालत्वनिवृत्तिपूर्वकं पुनर्विजयदत्ताख्यद्विजपुत्रत्वप्राप्तिः, तेन विजयदत्तेन पुनः संकल्पपूर्वकं स्नाने कृते सति ततस्तस्य मनुष्यत्वरूपशापनिवृत्तिपूर्वकं सुदर्शनाख्यविद्याधरत्वप्राप्तिवर्णनम्, वेतालत्वमोचकत्वेन तत्तीर्थस्य वेतालवरदनाम्ना प्रख्यातिवर्णनम्.	१८	१
१०	अथ दक्षिणोदधिस्थगन्धमादनपर्वतमाहात्म्यवर्णनम्, गन्धमादनपर्वतस्थपापविनाशनतीर्थमाहात्म्यम्, तत्र दृढमत्याख्यशूद्रवृत्तान्तवर्णनम्, तत्प्रसंगेन शूद्रधर्मवर्णनम्, यागदीक्षानर्हस्य दृढमत्याख्यशूद्रस्य देवायतनादिधर्मकृत्यकरणपूर्वकं तपः कर्तुं मुनिवृत्त्या स्थितस्य सुमत्याख्यविप्रेण वैदिककर्मोपदेशकरणम्, तेनायाज्ययाजनदोषेण सुमत्याख्यविप्रस्य नरकादिप्राप्तिपूर्वकविविधगर्दभादियोनिप्राप्तिरूपदुर्गतिवर्णनम्, अथ कतिपयजन्मानन्तरं तस्य ब्राह्मणजन्मप्राप्तौ ब्रह्मराक्षसग्रहगृहीततया वैदिककर्मपरिभ्रष्टत्वम्, अथ तत्पित्रा तं गृहीत्वागस्त्यं प्रति शरणगमनम् ततोऽगस्त्योपदेशेन दक्षिणोदधितीरस्थपापविनाशाख्यतीर्थे तत्पित्रा नीतस्य तस्य संकल्पपूर्वकस्नानमात्रेण ब्रह्मराक्षसग्रहमुक्तिः, सकलभोगावाप्तिपूर्वकमोक्षावाप्तिश्च, तदुपदिष्टवैदिककर्माचरणतत्परस्य दृढमत्याख्यशूद्रस्य नरकप्राप्तिपूर्वकानेकतिर्यग्योनिजन्मप्राप्तिः, ततः क्रमेण गृध्रजन्मप्राप्तौ दक्षिणोदधिस्थगन्धमादनपर्वतवर्तिपापविनाशनाख्यतीर्थजलप्राशनात्स्वर्गलोकावाप्तिः, पापविनाशनतीर्थप्रभाववर्णनम्.	२०	१
११	अथ सीतासरस्तीर्थमाहात्म्यवर्णनम्, तत्प्रसंगेन पुरंदरब्रह्महत्याविमुक्तिवृत्तान्तवर्णनम्, तत्र ससैन्यस्य कपालाभरणाख्यराक्षसस्य शक्रादिदेवैः सह युद्धम्, तस्मिन्युद्धे शक्रेण कपालाभरणराक्षसवधकरणम्, तद्वधजनितया ब्रह्महत्यया शक्रस्योपद्रवणम्, कपालाभरणाख्यराक्षसस्य ब्राह्मणत्वकारणवर्णनप्रसंगेन त्रिवक्रराक्षसभार्यायाः सुशीलानाम्न्याः पत्याज्ञया शुचिनामकब्राह्मणसकाशात्पुत्रोत्पादनात्कपालाभरणस्य		

अध्यायाः	विषयाः	प०	पृ०
	ब्राह्मणवीर्योत्पन्नत्ववृत्तान्तः, अथ ब्रह्महत्ययोपद्रुतस्य शक्रस्य ब्रह्मोपदेशेन दक्षिणोदधिस्थगन्धमादनपर्वतवर्तिसीताकुण्डे स्नानेन यज्ञैः सदाशिवसंतोषणेन च ब्रह्महत्यातो विमुक्तिवर्णनम्. सीतासरोमाहात्म्यप्रशंसावर्णनम्.	२२	१
१२	अथ मङ्गलाख्यतीर्थमाहात्म्यवर्णनम्. तत्प्रसंगेन मनोजवाख्यराजवृत्तान्तवर्णनम्, अहंकारवतो मनोजवनृपस्य ब्राह्मणेभ्यः करग्रहणजन्यपापेन गोलभाख्येन तच्छत्रुभूपेन राज्यहरणपूर्वकं राज्यान्निर्वासनम्, अथ पत्नीपुत्राभ्यां सह मनोजवस्य वने गमनम्, तत्र पुत्रस्य क्षुत्परीततां विलोक्य मनोजवस्य दुःखेनातिपश्चात्तापकरणपूर्वकं मूर्छया पतनम्, तत्पत्न्याः सुमित्राख्याया विलापकरणम्, पुत्रस्यापि रोदनम्, अथ तस्मिन्नवसरे तत्र तेषां समीपे पराशरमहर्षेरागमनम्, पराशरेण राजोपरि मंत्रपूतजलसेचनेन तस्य मूर्छापनयनम्, ततो राज्ञा विज्ञापितेन पराशरमुनिना राजानं प्रति श्रीरामसेतुस्थमंगलाख्यतीर्थयात्रोपायकथनपूर्वकमेकाक्षररामंत्रोपदेशकरणम्, मुन्याज्ञया भार्यापुत्राभ्यां सह मंगलतीर्थं गत्वा चत्वारिंशद्दिनपर्यंतं मंत्रोपासनानुष्ठानं कृतवतो मनोजवनृपस्य पुरतो मंगलाख्यतीर्थाद्धनुर्निषङ्गखड्गचर्मगदामुसलशङ्खवाजियुक्तससारथिसपताकरथकांचनमयकवचादिसर्वराजालंकारादिवस्तुप्रादुर्भावः, ततो मनोजवेन पराशरमुनये तेषां सर्ववस्तूनां निवेदनम्, अथ पराशरेण मुनिना मनोजवभूपस्य मन्त्राभिषेककरणम्, ब्रह्मास्त्राद्यस्त्रविद्याप्रदानपूर्वकाशीःप्रदानं च, अथ मनोजवनृपेण स्वपुरं प्रत्यागत्य ब्रह्मास्त्रेण गोलभनृपं विनाश्य निजराज्यं प्राप्य धर्मेण वर्तनम्, अंते मङ्गलतीर्थमासाद्य तनुत्यागानन्तरं मनोजवभूपस्य शिवलोकावाप्तिवर्णनम्. ...	२३	३
१३	अथैकान्तरामनाथाख्यक्षेत्रवर्णनम्, तत्रामृतवापिकातीर्थमाहात्म्यम्, तत्प्रसंगेनागस्त्यानुजवृत्तान्तवर्णनम्, हिमवत्पर्वतेऽगस्त्यानुजेन तपःकरणम्, तत्तपस्तुष्टस्य शंकरस्य प्रादुर्भावेऽगस्त्यानुजेन शिवस्तुतिकरणम्, ततस्तुष्टस्य शिवस्य वचनादगस्त्यानुजस्य दक्षिणोदधिस्थगन्धमादनपर्वतोपर्येकान्तरामनाथक्षेत्रवर्तिनि तीर्थे		

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अध्यायाः	विषयाः	प०	पृ०
	स्नानं कृत्वा समाधियोगेन मुक्तिप्राप्त्याऽमरत्वात्तस्य तीर्थस्यामृतवापीतिनामप्रथा-वर्णनम्, अथैकान्तरामनाथक्षेत्रप्रथाकारणकथनप्रसङ्गेन श्रीरामचन्द्रस्य लक्ष्मणेन सहैकान्तस्थितिपूर्वकं समुद्रतरणोपायविचिन्तनवृत्तान्तवर्णनम्, एकान्तराघव-माहात्म्यम्.	२६	१
१४	अथ दक्षिणोदधिस्थगन्धमादनवर्तिब्रह्मकुण्डमाहात्म्यवर्णनम्, तत्प्रसंगेन ब्रह्मकुण्डस्थ-भस्मना त्रिपुण्ड्रधारणस्य माहात्म्यम्, ब्रह्मकुण्डोत्पत्तिवृत्तान्तः, तत्र ब्रह्मविष्णवो-र्मध्ये श्रैष्ठ्यविषये परस्परं विवादे समुत्पन्ने तयोर्मध्ये भगवतोऽनाद्यन्तलिङ्ग-प्रादुर्भावः, तदूर्ध्वाधोऽन्तपर्यन्तशोधनार्थं ब्रह्मविष्णवोर्हंसवराहरूपधारणपूर्वकं गमनम्, लिङ्गस्याधःपर्यन्तमदृष्ट्वा स्वपूर्वस्थानं प्रत्यागतेन विष्णुना सत्यवाचा लिङ्गपर्यन्तादर्शनकथनम्, ब्रह्मणोर्ध्वपर्यन्तमदृष्ट्वा प्रत्यागतेनापि च्छद्मना मिथ्या लिङ्गपर्यन्तदर्शनकथनम्, अथ तन्मिथ्याभाषणप्रकुपितेन शंकरेण लिङ्गमध्या-त्प्रादुर्भूय ब्रह्मणेऽपूज्यत्वप्राप्तिरूपशापप्रदानम्, ततो ब्रह्मणा स्तुतेन शङ्करेण ब्रह्मणे मिथ्यादोषप्रशांत्यर्थं दक्षिणोदधिस्थगन्धमादनपर्वते यागार्थमाज्ञाकरणम्, शंकराज्ञया ब्रह्मणो गन्धमादनपर्वते शिवमुदिश्य यागकरणम्, तत्र प्रादुर्भूतेने-श्वरेण ब्रह्मणे श्रौतस्मार्तकर्मपूज्यत्वरूपवरप्रदानपूर्वकं ब्रह्मकुण्डाभिधतीर्थाय वर-प्रदानम्, ब्रह्मकुण्डमाहात्म्यम्.	२७	१
१५	अथ हनुमत्कुंडमाहात्म्यवर्णनम्, तत्प्रसंगेन धर्मसखाख्यराजचरितवर्णनम्, धर्म-सखनृपतिपुत्रस्य सुचन्द्रस्य वृश्चिकदंशवृत्तांतः, अथ बहुपुत्रत्वमाकांक्षमाणेन धर्मसखाख्यमहीपतिना निजर्त्विग्वचनतो यज्ञसामग्रीं संपाद्य स्वपत्नीभिः सर्व-परिजनैर्ऋत्विग्भिश्च सह दक्षिणोदधितीरस्थगन्धमादनपर्वतवार्ति हनुमत्कुण्डं प्रति गमनम्, तत्र स्नात्वा पुत्रीयेष्टिं च कृत्वा हुतोच्छिष्टं प्राश्य ब्राह्मणेभ्यो ग्रामा-ग्रहारादिकं दत्त्वा भार्याशतेन सहावभृथस्नानं कृत्वा स्वपुरीं प्रति प्रत्या-गमनम्, तत्र हनुमत्कुण्डप्रभावात्तस्य धर्मसखस्य शतभार्यासु शतपुत्रप्राप्तिः, अथान्तकाले हनुमत्कुण्डमभ्येत्य धर्मसखेन राज्ञा तपःकरणम्, ततस्तस्य वैकुण्ठलोकावाप्तिः, तत्पुत्रेण सुचन्द्रेण पितुरौर्ध्वदैहिककर्मकरणम्, सुचन्द्रादीनां सर्वेषां पुत्राणां सौभ्रात्रपूर्वकं राज्यसुखभोगवर्णनम्, हनुमत्कुण्डमाहात्म्यम्. ...	२८	२
१६	अथागस्तितीर्थमाहात्म्यवर्णनम्, तन्माहात्म्यप्रसंगेन दीर्घतमोमुनिपुत्रस्य कक्षीवतश्च-रित्रवर्णनम्. तत्रोदंकाख्यस्य गुरोर्गृहे कक्षीवता षष्टिवर्षपर्यन्तं विद्याभ्यासं कृत्वा गृहं प्रत्यागन्तुं गुरोः प्रार्थनाकरणम्, ततस्तद्गुरुणा तस्योद्वाहायोपायकथनम्, गुर्वाज्ञया कक्षीवताऽगस्त्यतीर्थे स्नात्वा तस्मात्तीर्थादुद्गतं चतुर्दन्तं शुभ्रं गजेन्द्र-मारुह्य मध्येमार्गमेव मिलितेन स्वनयाख्येन राज्ञा सह तस्य पुरं प्रति गमनम्, ततः स्वनयेन राज्ञा कक्षीवते स्वकन्यायाः प्रदानाय तद्वचनात्तत्पितुर्दीर्घतमसः सुदर्शनाख्यपुरोधोद्वाराऽऽमन्त्रणं कृत्वा सत्कारपूर्वकं स्वपुरं प्रत्यानयनम्, दीर्घ-तमसं पितरं प्रति कक्षीवताऽभिवादनम्, निजविद्याध्ययनवृत्तान्तनिवेदनं च....	३०	१
१७	अथ तस्मिन्नगस्तितीर्थे स्वनयेन राज्ञा दीर्घतमोमुनेः सत्कारकरणम्. अत्रांतर एव तत्रागस्तितीर्थे स्नातुं सशिष्यसमूहस्योदङ्कमहर्षेरागमनम्, उदङ्कदीर्घतमसोः समा-गमः, अथोदङ्कदर्शनार्थं स्वनयेन राज्ञाऽऽगत्य निजोद्देशनिवेदनम्, अथोदङ्केन सह दीर्घतमसा स्वनयस्य राज्ञः कक्षीवते निजकन्याप्रदानस्यानुमोदनम्, ततः स्वनयेन राज्ञा मधुरापुरीतः स्वपरिचारकैः कन्यामानीय विवाहविधिना कक्षीवते कन्यादानकरणम्, ततः स्वर्णगोदासीग्रामादिविपुलवैवाहिकप्राभृतप्रदानम्, अथ दीर्घतमसो मुनेस्तत्सर्वमादाय पुत्रेण स्नुषया च सह वेदारण्यस्थितस्वाश्रमं प्रत्यागमनम्, स्वनयेन राज्ञाऽन्तःपुरैः सहागस्तितीर्थे स्नात्वा स्वपुरं प्रति गमनम्, अगस्तितीर्थमाहात्म्यम्.	३२	१
१८	अथ रामकुण्डाख्यतीर्थमाहात्म्यवर्णनम्, तत्प्रसंगेनागस्त्याशिष्यसुतीक्ष्णमुनीतिहास-वर्णनम्, रामचन्द्रसरस्तीर्थे तपस्तपता सुतीक्ष्णेन श्रीरामचन्द्रस्तुतिकरणम्, एवं तपस्तपतः सुतीक्ष्णस्यालौकिकतपःसिद्धिवर्णनप्रसंगेन रामकुण्डमाहात्म्यवर्णनम्,		

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अध्यायाः	विषयाः	प०	पृ०
	रामकुण्डतीरे रामस्थापितश्रीशिवलिङ्गमाहात्म्यवर्णनम्, तत्प्रसंगेन धर्मपुत्रस्य युधिष्ठिरस्यासत्यभाषणदोषनिवृत्तिवृत्तान्तवर्णनम्, तत्र भारतयुद्धे द्रोणं जेतुं केशवेन भीमद्वारा 'अश्वत्थामा युद्धे हतः' इति मृषा प्रवादप्रसरणम्, तं प्रवादमाकर्ण्य द्रोणेन युधिष्ठिरादपि तथैवेति श्रुत्वा सत्यं मत्वा योगेन स्वतनुत्यागकरणम्, तस्मिन्काले सदैव सत्यभाषिणो युधिष्ठिरस्य मृषाप्रवादजनितपातकप्राप्तिः, तस्य च युद्धसमाप्त्यनन्तरं राज्याभिषेकसमये नभोवाण्या च्छद्मनाऽसत्यभाषणजनितपातकेन राज्याभिषेकानर्हताकथनम्, युधिष्ठिरेण पश्चात्तापकरणम्, तस्मिन्नवसरे समागतेन व्यासमहर्षिणा युधिष्ठिरं प्रति दक्षिणोदधितीरस्थरामतीर्थे स्नानार्थमुपदेशकरणम्, ततो युधिष्ठिरेण निजकनिष्ठबन्धुं सहदेवं राज्ये प्रतिष्ठाप्य धौम्येनोपाध्यायेन भीमादिभिर्निजानुजैश्च सह रामसेतुं समुद्दिश्य वाहनारोहणं विना यात्राविधिना रामतीर्थं समासाद्य पुरोहितोक्तमार्गेण स्नानकरणम्, तेन रामतीर्थस्नानदानश्राद्धमासोपवासादिप्रभावेण नभोवाण्या युधिष्ठिरस्यासत्यभाषणजनितपातकनिवृत्तिपूर्वकराज्यारोहणयोग्यतावर्णनम्. रामकुण्डाख्यतीर्थमाहात्म्यम्.	३३	१
१९	अथ लक्ष्मणतीर्थमाहात्म्यवर्णनम्, तत्प्रसंगेन बलभद्रब्रह्महत्याविमुक्तिवृत्तान्तवर्णनम्, तत्र कौरवपांडववधं द्रष्टुमनिच्छतो बलभद्रस्य तीर्थयात्राप्रसंगेन नैमिषारण्ये महर्षिसमाजे गमनम्, तत्र बलभद्रेण पुराणकथनायोच्चब्रह्मासने स्थितस्य सूतस्याविचार्य निजहस्तोत्सृष्टकुशाग्रेण हननाद्ब्रह्महत्याप्राप्तिः, अथ मुनीनां वचनेन लोकसंग्रहाय प्रायश्चित्तचिकीर्षया मुनीन्प्रति प्रार्थनम्, मुनिभिर्बलभद्राय बल्वलाख्यराक्षसवधं कृत्वा वर्षपर्यंतं तीर्थयात्राकरणरूपप्रायश्चित्तकथनम्, अथ बलभद्रेण बल्वलनामकराक्षसहननम्, ततो वर्षपर्यन्तं भूतलस्थसर्वतीर्थेषु स्नानपूर्वकं यात्राकरणम्, कृतायामपि तीर्थयात्रायां ब्रह्महत्याया निवृत्तिमदृष्ट्वा मुनिवाक्येन दक्षिणोदधिस्थगन्धमादनवर्तिलक्ष्मणतीर्थं गत्वा स्नानमात्रेण लक्ष्मणेश्वरलिंगदर्शनेन च ब्रह्महत्यातो विमुक्तिवर्णनम्. लक्ष्मणतीर्थमाहात्म्यम. ...	३५	२
२०	अथ जटातीर्थमाहात्म्यवर्णनम्, तत्प्रसङ्गेन शुकाचार्यचरित्रवर्णनम्, तत्र शुकेन व्यासं प्रति चित्तशुद्ध्यर्थमुपाये पृष्टे सति व्यासेन भृगुवरुणेतिहासकथनपूर्वकं रामसेतुस्थजटातीर्थमाहात्म्यवर्णनम्. ततः शुकस्य व्यासोपदेशं श्रुत्वा जटातीर्थं गत्वा स्नानमात्रेण मनःशुद्धिवर्णनम्, जटातीर्थमाहात्म्यम्.	३७	१
२१	अथ लक्ष्मीतीर्थमाहात्म्यवर्णनम्, तत्प्रसङ्गेन युधिष्ठिरवृत्तान्तवर्णनम्, तत्रेन्द्रप्रस्थे स्थितेन युधिष्ठिरेण श्रीकृष्णं प्रति महैश्वर्यप्रापकधर्मविषयकपृच्छायां कृतायां श्रीकृष्णेन युधिष्ठिरायानेकेतिहासपूर्वकं गन्धमादनस्थलक्ष्मीतीर्थमाहात्म्यकथनम्, ततो युधिष्ठिरेण लक्ष्मीतीर्थं गत्वा मासपर्यन्तं नियमपूर्वकं स्नानं विधाय स्वपुरं प्रत्यागत्य ततस्तत्प्रभावेण संप्राप्तनिरतिशयसंपदैश्वर्यवशान्महता समारम्भेण श्रीकृष्णसाहाय्येन राजसूययज्ञकरणम्. लक्ष्मीतीर्थमाहात्म्यम.	३८	१
२२	अथाग्नितीर्थमाहात्म्यवर्णनम्, तत्प्रसंगेन सीताशुद्धिवृत्तान्तवर्णनम्, तत्र रामचन्द्रेण लंकायां रावणं हत्वा शक्रादिभिः सह सेतुमार्गेण गन्धमादनं प्रत्यागत्य लक्ष्मीतीर्थतटे स्थित्वा जानकीशोधनायाग्नेराह्वानकरणम्, ततोऽग्निना तत्र समेत्य रामस्याग्रे सीतायाः शुद्धताकथनम्, अग्निवचनाद्रामचन्द्रेण जानक्याः स्वीकरणम्, अग्नेर्विनिर्गमस्थानस्याग्नितीर्थाभिधया प्रसिद्धिः, अग्नितीर्थमाहात्म्यप्रसंगेन पशुमन्नामधेयस्य वणिग्वरस्य चरित्रवर्णनम्, तत्र तस्य पशुमतोऽष्टपुत्रेषु मध्येऽष्टमपुत्रस्य दुष्पण्याख्यस्य नगरस्थबालकमारणरूपातिदुष्कर्मपरस्य राज्ञा तत्पितुः सच्छीलं निरीक्ष्य देशान्निर्वासनम्, ततो वनं प्रयातेनापि तेनोग्रश्रवोमुनिपुत्रे जले निमज्ज्य मारिते सत्युग्रश्रवसा मुनिना दुष्पण्याय जलनिमज्जनतस्ते मृत्युर्भविष्यतीति शापप्रदानम्, अथ वर्षाकालेऽतिवृष्टौ सत्यां दुष्पण्येन मृतपतितगजशरीरमध्यं प्रवेशे कृते तस्य गजशरीरस्य महता पयःपूरप्रवाहेण समुद्रं प्रति		

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अध्यायाः	विषयाः	प०	पृ०
	प्रवेशे सति तदन्तःस्थितस्य दुष्पण्यस्य मृत्युः, तदनंतरं तस्य पिशाचत्वप्राप्तिः, ततः पिशाचरूपिणा तेनागस्त्याश्रमसमीपं प्रत्यभ्येत्योच्चैः स्वमुक्तये महर्षीणां प्रार्थनाकरणम्, अथ तस्य विमुक्तयेऽगस्त्यमहर्षिणा सुतीक्ष्णाख्यं स्वशिष्यं प्रति तदुद्देशेनाग्नितीर्थे स्नानार्थमाज्ञाकरणम्, सुतीक्ष्णेन पिशाचस्य विमुक्त्युद्देशेनाग्नितीर्थे स्नाने कृते सति दुष्पण्यस्य पिशाचत्वविमुक्तिपूर्वकं दिव्यं विमानमारुह्य महर्षीन्नमस्कृत्य दिव्यलोकं प्रति गमनम्, अग्नितीर्थमाहात्म्यम्.	३९	२
२३	अथ चक्रतीर्थमाहात्म्यवर्णनम्, तत्प्रसंगेनाहिर्बुध्न्याख्यब्राह्मणकृतसुदर्शनोपासनावर्णनम्, सुदर्शनचक्रेण तस्य ब्राह्मणस्य तपोविघ्नकारिणां राक्षसानां नाशनम्, सुदर्शनचक्रसंनिधानात्तीर्थस्य चक्रतीर्थत्वेन प्रसिद्धिः, ब्रह्मदेवाज्ञया राक्षसत्रस्तैस्सर्वदेवैश्चक्रतीर्थसंनिधौ माहेश्वरयज्ञकरणम्, तस्मिन्यज्ञे प्राशित्रपात्रस्पर्शमात्राच्छिन्नपाणेः सवितुर्देवस्याष्टावक्रमुनिवचनाच्चक्रतीर्थे स्नानमात्रेण हिरण्मयपाण्यवाप्तिवृत्तान्तवर्णनम्, चक्रतीर्थमाहात्म्यम्.	४२	१
२४	अथ शिवतीर्थमाहात्म्यवर्णनम्, तत्प्रसंगेन कालभैरववृत्तान्तवर्णनम्, तत्र ब्रह्मविष्ण्वोः परस्परं श्रैष्ठ्यविषये विवादे समुत्पन्ने प्रणवेन शिवस्य श्रैष्ठ्ये वर्णितेऽपि दुराग्रहवशाद्ब्रह्मविष्णुभ्यां शिवश्रैष्ठ्येऽनादृते सति शिवेन तेजोमयस्वस्वरूपप्रकटनम्, महेश्वरं दृष्ट्वा ब्रह्मणा तं प्रत्यप्यनादरपूर्वकं गर्वोक्तिसंभाषणम्, अथ महेश्वरेण ब्रह्माणं प्रति कालभैरवाख्यपुरुषप्रेषणम्, ब्रह्मणा सह कालभैरवस्य युद्धे कालभैरवेण ब्रह्मणः पञ्चमशिरश्छेदपूर्वकं वधकरणम्, ततो भगवता महेश्वरेण ब्रह्मणः सञ्जीवनम्, ब्रह्मदेवेन भगवतः शङ्करस्य स्तुतिकरणम्, शंकरेण ब्रह्मणेऽभयप्रदानम्, अथ शिवाज्ञया कालभैरवस्य ब्रह्महत्यादोषविशुद्धये ब्रह्मशिरः करे संधार्य वर्षपर्यंतं समस्ततीर्थयात्राकरणपूर्वकं दक्षिणांभोधिस्थगन्धमादनवर्तिशिवतीर्थस्नानकरणाद्ब्रह्महत्यानिवृत्तिः, तत्रैव कालभैरवेण कपालस्थापनात्तस्य शिवतीर्थस्य कपालतीर्थत्वेनाभिधानम्, शिवतीर्थमाहात्म्यम्. ...	४३	१
२५	अथ शङ्खतीर्थमाहात्म्यवर्णनम्, शङ्खमुनिना तपः कृत्वा प्रकल्पितत्वेन तस्य तीर्थस्य शङ्खतीर्थत्वेन प्रसिद्धिः, तत्तीर्थमाहात्म्यप्रसङ्गेन वत्सनाभाख्यविप्रवृत्तान्तः, तत्र तपः कर्तुं निश्चलतया स्थितवतो वत्सनाभाख्यद्विजस्योपरि सञ्जाते वल्मीके वासवेन तपोविघ्नार्थं वृष्टिनिपातेनोपद्रवे क्रियमाणे भगवता धर्मदेवेन महामहिषरूपं धृत्वा वाल्मीकोपरि स्थित्वा स्वपृष्ठे वृष्टिधारा गृहीत्वा मुनेः संरक्षणकरणम्, अथ तपःसमाधितो निवृत्तेन वत्सनाभेन स्वसमीपस्थस्य महिषरूपेण स्वरक्षितुर्धर्मदेवस्य पूजाऽकरणहेतोः पुनः समाधौ मनश्चाञ्चल्यं निश्चित्य स्वस्य कृतघ्नतादोषनिवृत्तये प्राणत्यागार्थं मेरोर्भृगोः पतनार्थं प्रयत्नकरणम्, तदा धर्मदेवेन माहिषरूपं परित्यज्य स्वरूपेण प्रादुर्भूय वत्सनाभद्विजस्य मरणप्रयत्नान्निवारणपूर्वकं कृतघ्नतादोषनिवृत्तिपुरःसरचित्तशुद्धये दक्षिणोदधितीरस्थशंखतीर्थे स्नानार्थमुपदेशकरणम्, धर्मोपदेशेन वत्सनाभद्विजस्य शंखतीर्थे स्नानमात्रेण कृतघ्नतादोषनिवृत्त्यनन्तरं चित्तशुद्धिपूर्वकब्रह्मभूयत्वप्राप्तिवर्णनम्, शंखतीर्थमाहात्म्यम्.	४४	२
२६	अथ गङ्गायमुनागयाख्यतीर्थत्रितयमाहात्म्यवर्णनम्, तत्प्रसंगेन जानश्रुतिराजवृत्तान्तवर्णनम्, तत्र जन्मतः पङ्गोः सयुग्वापरपर्यायस्य रैक्वमहर्षेर्दक्षिणोदधिस्थगन्धमादनपर्वते बहुकालं तपस्तपतः पामरोगोत्पत्तिः, तेन यमुनागङ्गागयाख्यतीर्थत्रयस्नानचिकीर्षया मन्त्रोच्चारणपूर्वकध्यानेन तीर्थत्रयस्याह्वाने कृतमात्रे यमुनागङ्गागयाख्यतीर्थत्रयस्य तत्समीप उपस्थितिः, तत्र महर्षिवचनात्तस्य तीर्थत्रयस्य सदा संनिधानम्, तस्मिन्नवसरे कदाचित्सौधवातायनस्थस्य पौत्रायणस्य जानश्रुतिमहीपतेः समीपेऽनुग्रहार्थं निशीथसमये हंसरूपेण महर्षीणामागमनम्, तेष्वृषिषु मध्य एकेन हंसरूपिणा महर्षिणा जानश्रुतेर्ब्रह्मज्ञानप्राप्तये परोक्षेण रैक्वमहर्षिप्रशंसां कृत्वा सर्वैः सह ब्रह्मलोकं प्रति गमनम्, अथ गतेषु तेषु महर्षिषु जानश्रुतेर्ब्रह्मविद्योपलब्धये सयुग्वनं रैक्वमहर्षिं प्रति शरणगमनम्,		

Nepal Sanskrit University, Balmiki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अध्यायाः	विषयाः	प०	पृ०
	ततः सयुग्वनो रैकमहर्षेराज्ञया यमुनागङ्गागयाख्यतीर्थत्रये स्नानं विधाय चित्तशुद्धेरनन्तरं जानश्रुते राज्ञो रैक्ककृतब्रह्मज्ञानोपदेशेन ब्रह्मभूयत्वप्राप्तिवर्णनम्.	४६	१
२७	अथ कोटितीर्थमाहात्म्यवर्णनम्, तत्प्रसंगेन श्रीरामचन्द्रचरित्रवर्णनम्, तत्र श्रीरामचंद्रेण रावणवधोद्भूतब्रह्महत्यापनोदाय दक्षिणोदधिस्थगन्धमादनपर्वते रामनाथाख्यशिवलिंगं संस्थाप्य तत्स्नापनार्थं जाह्नवीं स्मृत्वा निजधनुष्कोटया धरणीं विभिद्य रसातलाद्गंगाऽऽनयनवृत्तान्तवर्णनम्, ततस्तस्य तीर्थस्य कोटितीर्थत्वेन प्रसिद्धिः, कोटितीर्थमाहात्म्यप्रसंगेन श्रीकृष्णचरित्रवर्णनम्, तत्र वसुदेवस्य विवाहानंतरं रथेन बसुदेवस्य स्वपुरं प्रति प्रस्थितस्य मध्येमार्गं तद्रथसारथेः कंसस्याकाशवाण्या भविष्यान्निजहन्तुर्मातुर्देवक्याः स्वस्वसुर्हननायोद्यतस्य वसुदेवेन सुतप्रदानप्रतिज्ञया सान्त्वनपूर्वकं हननान्निवर्तनम्, अथ वसुदेवपत्न्यां देवक्यां सप्तमगर्भस्यानन्तस्य रोहिण्यां योगमायया संक्रामणानंतरं भगवतः श्रीकृष्णस्य जन्म, वसुदेवेन भगवत्स्तुतिकरणम्, भगवदाज्ञया वसुदेवेन श्रीकृष्णस्य गोकुले नयनम्, यशोदाकन्यायाश्च मथुरायामानयनम्, अथ कंसेन निजमृत्युभीत्या कन्यायाः शिलायां पोथने क्रियमाण आदिमायायास्तस्यास्तद्धस्तान्निःसृत्याकाशे भव्यादिव्यरूपेण गमनम्, कंसं प्रति तया देव्या मृत्युस्ते यत्रकुत्रापि जात इत्युक्त्वा निर्भर्त्स्यानेकेषु स्थानेषु पूजाप्राप्तिः, गोकुलस्थयोः श्रीकृष्णरामयोर्बालक्रीडावर्णनम्, ततो मथुरां प्रति गत्वा कंसं हत्वोग्रसेनस्य राज्याभिषेककरणम्, अथ कदाचिदात्मानं द्रष्टुं समागतान्नारदादीन्प्रति श्रीकृष्णेन मातुलवधजनितदोषनिवृत्तये प्रायश्चित्तार्थं प्रश्नकरणम्, ततो नारदादिवचनाद्रामसेतावागत्य कोटितीर्थे स्नानमात्रेण श्रीकृष्णस्य मातुलवधजनितदोषनिवृत्तिः, कोटितीर्थमाहात्म्यम्.	४८	१
२८	अथ साध्यामृततीर्थमाहात्म्यवर्णनम्, तत्प्रसंगेन पुरूरवसो राज्ञो वृत्तान्तवर्णनम्, तत्र पुरूरवसो राज्ञ उर्वश्याऽप्सरसा सह समागमः, अथ कालान्तरे समयप्रतिज्ञाभङ्गेन वियोगेऽतिशोकाकुलस्य तस्य कुरुक्षेत्रे मिलितयोर्वश्या समागमपुरःसरपुत्रप्राप्तिकथनपूर्वकमाश्वासनम्, अथैकवत्सरानन्तरं नृपस्य कुरुक्षेत्रस्थपद्मतटाके पुनरुर्वश्या सह समागमः; उर्वश्या नृपाय स्वस्यां नृपवीर्यतः समुत्पन्नस्यायुर्नामकपुत्रस्य समर्पणम्, अथैकरात्रप्रसंगेन तस्यामुर्वश्यां पञ्चगर्भवीर्यस्थापनम्, ततस्तत्सूचनया निरन्तरमुर्वशीलोकप्राप्तये पुरूरवसा गन्धर्वप्रार्थनाकरणम्, तत्प्रार्थनया संतुष्टैर्गन्धर्वैस्तस्मै पुरूरवसेऽग्निस्थालीं प्रदाय यज्ञार्थमुपदेशकरणम्, उर्वश्यप्राप्तिवशादसंतुष्टेन नृपेण मध्येवनमेवाग्निस्थालीं प्राक्षिप्य स्वपुरं प्रति गमनम्, अग्निस्थालीनिक्षेपस्थाने शमीगर्भाश्वत्थोत्पत्तिः, ततस्तस्याश्वत्थस्य चतुर्विंशत्यंगुलामरणिं कृत्वा तत्र निर्मन्थनादग्नित्रयं समुत्पाद्य बहून्यज्ञान्कृत्वा गन्धर्वलोकमासाद्योर्वश्या सह पुरूरवसो नृपस्य रमणम्, अथ कदाचिच्छक्रस्य पुरतो नृत्यसमारंभे परस्परं वीक्ष्य हास्यतत्परयोरुर्वशीपुरूरवसोस्तुंबरुणा देवनाट्याचार्येण वियोगो वां भविष्यतीति शापप्रदानम्, अथ पुरूरवसा शक्रं प्रार्थ्य तदुक्तोपायचिकीर्षया भूतलं समेत्य दक्षिणोदधिस्थगन्धमादनपर्वतवर्तिसाध्यामृताख्यतीर्थे स्नानमात्रेण शापान्मुक्त्वा पुनरुर्वशीलोकं प्रति गत्वोर्वश्या सह रमणवर्णनम्, साध्यामृततीर्थमाहात्म्यम्.	५०	३
२९	अथ सर्वतीर्थमाहात्म्यवर्णनम्. तत्प्रसङ्गेन सुचरिताख्याविप्रचरित्रवर्णनम्, तत्र सुचरितविप्रेण जरातुरतयाऽशक्तेन सर्वतीर्थस्नानकामनया दक्षिणांभोधिस्थगन्धमादनपर्वतमागत्य शिवदीक्षां गृहीत्वा तपःकरणम्, तत्तपसा शङ्करस्य प्रादुर्भावे सति सुचरिताख्यविप्रेण श्रीशिवस्तुतिकरणम्, श्रीशिवेन सुचरितेहितपूरणाय सुचरितसमीपे सर्वाणि तीर्थान्यावाह्यैकत्र सर्वतीर्थसमवायकरणेन सर्वतीर्थाभिधैकतीर्थं निर्माय सुचरिताय स्नानार्थमाज्ञाकरणम्, सुचरितमुनिना शिवाग्रे सर्व-		

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अध्यायाः	विषयाः	प०	पृ०
	तीर्थे स्नानकरणम्, सर्वतीर्थे स्नानकरणात्सुचारिताख्यविप्रस्य जरानिर्मुक्तिपूर्वकतारुण्यसौन्दर्यादिप्राप्तिः, सर्वतीर्थाख्यतीर्थमाहात्म्यम्.	५२	१
३०	अथ धनुष्कोटितीर्थमाहात्म्यवर्णनम्, धनुष्कोटितीर्थस्यानेकविधपापविनाशनसामर्थ्यवर्णनम्, धनुष्कोटितीर्थमाहात्म्यप्रसंगेन श्रीरामचन्द्रेण विभीषणप्रार्थनया लंकायामन्यलोकानामगमनाय निजधनुष्कोट्या रेखाकरणेन स्वसेतुभेद्करणवर्णनम्, धनुष्कोटितीर्थे सर्वदेवतासांनिध्यवर्णनम्, माघमासादिकालेषु धनुष्कोटितीर्थस्नानमाहात्म्यवर्णनम.	५३	२
३१	अथ धनुष्कोढितीर्थमाहात्म्यप्रसंगेनाश्वत्थाम्नश्चरित्रवर्णनम्, तत्राश्वत्थाम्ना पाण्डवशिबिरस्थसर्वसुप्तशूरवीराणां हननार्थं प्रतिज्ञां कृत्वा रात्रिसमये कृतवर्मकृपाभ्यां सह शिबिरद्वारमासाद्य महादेवमाराध्य प्रसन्नात्तस्माद्विजयखड्गं लब्ध्वा स्वपितृघातकधृष्टद्युम्नशिबिरं प्रथमतः प्रविश्य धृष्टद्युम्नं प्रथमतो हत्वा पश्चात्सर्वशिबिरस्थद्रौपदीपुत्रादिसर्वसैन्यहननम्, शिबिरद्वारतो बहिर्निर्यातानां सैन्यानां कृतवर्मकृपाचार्याभ्यां हननम्. ततोऽश्वत्थामादीनां शिबिरतो निर्गत्य पृथक्पृथग्देशान्प्रति पलायनम्, अथ नर्मदातीरे महर्षिमध्ये प्रविष्टस्याश्वत्थाम्नो ब्राह्मणैः पातित्य उक्ते ततो लज्जया निर्गत्याश्वत्थाम्ना तीर्थयात्राकरणम्, अथ बदरिकाश्रमस्थितं व्यासं प्रति शरणगमनम्, ततो व्यासोपदेशेनाश्वत्थाम्ना सुप्तमारणदोषशान्तये रामसेतुं समासाद्य धनुष्कोटितीर्थे स्नानकरणपूर्वकं रामनाथशिवसेवाकरणम्, ततः प्रादुर्भूतस्य शिवस्य स्तुतिकरणम्, अथ प्रसन्नेन महादेवेनाश्वत्थाम्ने वरप्रदानम्, धनुष्कोटितीर्थमाहात्म्यम्.	५६	१
३२	अथ पुनर्धनुष्कोटितीर्थमाहात्म्यवर्णनप्रसंगेन सोमवंशसमुद्भवनन्दनामकनृपतिपुत्रस्य धर्मगुप्तस्य चरित्रवर्णनम्, तत्र नन्दनृपे तपस्यार्थं वनं प्रयाते सति राज्येऽभिषिक्तस्य धर्मगुप्तस्य कदाचिन्मृगयार्थं वनं प्रविष्टस्य रात्रौ सिंहादिश्वापदभीत्या वृक्षाधिरोहणम्, तत्रैव केनचित्सिंहेनाभिद्रुतस्य कस्यचिदृक्षस्य निजप्राणपरिरिरक्षिषया वृक्षस्थराजसमीपमागमनम्. ततो मिथः संभाषणपूर्वकं विश्वासं समुत्पाद्य रात्रौ यामद्वयविभागेन भूपत्यृक्षाभ्यां पर्यायेण निद्राजागृतिव्यवस्थाकरणम्, अथ प्रथमं राजनि सुप्ते सति सिंहेनर्क्षं प्रति राजानं नीचैर्निक्षिपेत्युक्तेऽपि तेनर्क्षेण विश्वासधर्मपरिपालनार्थं राजानमनिक्षिप्य सिंहं प्रति मित्रद्रोहपातकपरिणामकथनम्, ततो नृपे प्रबुद्धे सति तस्मिन्नृक्षे सुप्ते सति सिंहेन भूपं प्रत्यृक्षं नीचैर्निक्षिपेत्युक्ते राज्ञर्क्षस्य नीचैः पातनम्, तस्मिन्नवसरे स्वनखावलंबितपादपेन तेनर्क्षेण पुनः पादपमधिरुह्य स्वस्य ध्यानकाष्ठाभिधमुनित्वकथनपूर्वकं कामत ऋक्षरूपधारित्वमुक्त्वा भूपतये त्वमुन्मत्तो भवेति शापं प्रदाय सिंहं प्रति गौतमदत्तशापवशात्सिंहत्वप्राप्तिरूपपूर्ववृत्तान्तकथनम्, ध्यानकाष्ठमुनिवचःश्रवणेन सिंहस्य तत्क्षणमेव यक्षरूपस्वरूपावाप्तिपूर्वकं विमानमारुह्य यक्षलोकं प्रति गमनम्, ततो निजेच्छया ऋक्षरूपं धृतवतो ध्यानकाष्ठमुनेः स्वेच्छया वनांतरं प्रति गमनम्, ध्यानकाष्ठमुनिशापाद्धर्मगुप्तस्योन्मत्तताप्राप्त्यनन्तरं स्वपुरं प्रत्यागमनम्, ततस्तं धर्मगुप्तमुन्मत्तं दृष्ट्वा तस्य मन्त्रिभिर्नर्मदातीरनिवासिनस्तत्पितुर्नन्दभूपस्य समीपं प्रति तस्य धर्मगुप्तस्य नयनम्, अथ तत्पित्रा नन्देन स्वपुत्रस्योन्मत्ततादोपशान्तये जैमिनिमहर्षेः प्रार्थनाकरणम्, ततो जैमिनिमहर्षेराज्ञया नन्दमहीभृता धर्मगुप्तं पुत्रं गृहीत्वा रामसेतुस्थधनुष्कोटितीर्थमभ्येत्य स्नानकरणम्, धनुष्कोटितीर्थे स्नानमात्रेण धर्मगुप्तस्योन्मादशान्तिः, ततो नन्दस्य तपोऽर्थं पुनस्तपोवनं प्रति गमनम्, धर्मगुप्तेन रामनाथस्य बहुवित्तदानपूर्वकं सपर्यां कृत्वा मन्त्रिभिः सह स्वपुरं प्रत्यागमनम्, धनुष्कोटितीर्थमाहात्म्यम्.	५८	२
३३	अथ पुनर्धनुष्कोटितीर्थमाहात्म्यप्रसङ्गेन परावसुनामकब्राह्मणब्रह्महत्याविमुक्तिवृत्तान्तवर्णनम, तत्र बृहद्द्युम्नचक्रवर्तिनः सत्रे रैभ्यमहर्षिपुत्रयोरर्वावसुपरावसुनाम्नोरध्वरकर्मार्थं गतयोर्मध्ये परावसोरध्वरकर्मणस्तृतीयसवनान्ते गृहकृत्यनिरीक्षणार्थं स्वाश्रमं प्रत्यागमनम्, तदा मध्येमार्गं मृगाजिनं परिधाय रात्रौ चरतः स्वपितु-		

CC-0. In Public Domain. Digitization by eGangotri

अध्यायाः	विषयाः	प०	पृ०
	हिंस्रमृगशंकया परावसुना हननम्, अथ परावसुना तदन्तिकमभ्येत्य स्वपितरमेव तं स्वेन हतं निरीक्ष्य महांतं शोकं कृत्वा पितुः प्रेतकार्यं समाप्य नृपतेः सत्रे समेत्य स्वानुजायार्वावसवे पितृहननादिवृत्तनिवेदनम्, ततः पितृहत्यादोपनिवृत्तये प्रायश्चित्तकरणार्थं कनिष्ठं भ्रातरमाज्ञाप्य परावसुना स्वयं वृहद्द्युम्नस्य राज्ञः सत्रे यज्ञकर्मकरणम्, अथार्वावसौ द्वादशवर्षपर्यन्तं ब्रह्महत्यानिवृत्तये प्रायश्चित्तपूर्वकं व्रतं कृत्वा सत्रे समागते सति तज्ज्येष्ठबन्धुना परावसुना तस्मिन्निजकनिष्ठबन्धावर्वावसावेव ब्रह्महत्यादोपमारोप्य वृहद्द्युम्नराजद्वाराऽर्वावसोः सत्रसदनाद्बहिर्निष्कासनम्, ततो वास्तविकतया निरपराधिनाऽर्वावसुना निरुपायवशात्सत्राद्विनिष्क्रम्य वनं गत्वा तपःकरणम्, तत्तपस्तुष्टेभ्य आदित्येन्द्रादिदेवेभ्योऽर्वावसुना निजपितृसंजीवनरूपवरयाचनं स्वभ्रातुश्च पितृब्रह्महत्यादोपशान्तिरूपवरयाचनं च, ततो देवोक्तोपायमाश्रुत्यार्वावसुना कनिष्ठबन्धुना परावसोर्ज्येष्ठबन्धोर्ब्रह्महत्यादोपनिवृत्तये परावसुं गृहीत्वा दक्षिणोदधिस्थधनुष्कोटितीर्थे स्नानकरणम्, तेन स्नानप्रभावेण परावसोः पितृब्रह्महत्यादोपनिवृत्तिः, ततः स्वगृहं प्रत्यागतयोस्तयोरर्वावसुपरावस्वोः पितू रैभ्यमुनेः सञ्जीव्योत्थानम्, ब्रह्महत्यादिसमस्तदोपविनाशकधनुष्कोटितीर्थमाहात्म्यम्. ...	५९	२
३४	अथ पुनर्धनुष्कोटिमाहात्म्यप्रसङ्गेन सृगालवानरसंवादवृत्तान्तवर्णनम्, तत्र पूर्वजातिस्मरयोः कयोश्चित्सृगालवानरयोः परस्परं संवादेऽन्योन्यं निजपूर्वजन्मकर्मवृत्तान्तकथनम्, एवं परस्परं भापमाणयोः सृगालवानरयोः समीपे सिन्धुद्वीपाख्यमुनेरागमनम्, अथ ताभ्यां सृगालवानराभ्यां निजमुक्त्युपायं पृष्टेन सिन्धुद्वीपमहर्षिणा धनुष्कोटितीर्थस्नानोपदेशपूर्वकं किरातीसंसर्गिसुरापायिसुमतिनामकब्राह्मणसमुद्धारवृत्तान्तकथनम्, तत्र महाराष्ट्रस्थयज्ञदेवाद्विजपुत्रस्य सुमत्याख्यस्य किरातीसंगलोलुपतया धनं संपादयितुं चौर्याय प्रवृत्तस्य हस्तेन कस्यचिद्ब्राह्मणस्य हत्यया ब्रह्महत्याप्राप्तिः, अथ तया घोरया ब्रह्महत्ययोपद्रुतस्य सर्वां भूमिं भ्रान्त्वा स्वग्राममागत्य पितुः समीपे शरणागमनम्, ब्रह्महत्यया तत्पितुस्तस्य रक्षणे निपेधकरणम्, तत्पित्रादीनां पुरतश्च तया ब्रह्महत्यया सुमतेस्ताडने कृते तत्पित्रादीनां सर्वेषां दुःखेन रोदनम्, अथ तस्मिन्नेवावसरे तत्र समागतस्य दुर्वासोमहर्षेस्तत्पित्रा यज्ञदेवेन स्वपुत्रस्य दोपनिवृत्तये प्रार्थनाकरणम्, ततो दुर्वाससा तस्मै ब्रह्महत्यादोपनिवृत्तये श्रीरामधनुष्कोटितीर्थे स्नानार्थमुपदेशकरणम्, धनुष्कोटितीर्थमाहात्म्यप्रसङ्गेन दुर्विनीताख्यविप्रस्य गुरुस्त्रीगमनपापनिवृत्तिवृत्तान्तवर्णनम्.	६१	२
३५	अथ यज्ञदेवस्य दुर्वाससं प्रति दुर्विनीतविप्रचारित्रजिज्ञासया प्रश्ने सति दुर्वाससा यज्ञदेवाय दुर्विनीताख्यद्विजवृत्तान्तवर्णनम्, तत्र पाण्ड्यदेशस्थेध्मवाहाभिधब्राह्मणपुत्रस्य दुर्विनीतस्य पितुर्मरणोत्तरं पितुरौर्ध्वदैहिकं कर्म कृत्वा विधवया निजमात्रा सह स्वदेशे दुर्भिक्षवशाद्गोकर्णं समागत्य निवासकरणम्, तत्र बहुकालं निवसता तेन मूढबुद्धिना दुर्विनीतेन पूर्वदुष्कर्मपरिपाकादकस्मादनङ्गशरपीडितेन मामेतिवादिनीं विधवां निजांबां बलादाकृष्य मैथुनकरणम्, अथ रेतःसेकादनन्तरं दुर्विनीतस्य भृशपश्चात्तापं कृत्वा निजदेहविशुद्धये प्रायश्चित्तार्थं महर्षीन्प्रति प्रार्थनम्, सर्वैर्महर्षिभिर्महापातकिनस्तस्य निर्भर्त्सनपूर्वकं निःसारणे कृते सत्यपि परमदयालुना व्यासमहर्षिणा तं प्रति गुर्वङ्गनागमनदोपनिवृत्तये धनुष्कोटिस्नानार्थमुपदेशकरणम्, व्यासादुपदेशं श्रुत्वा दुर्विनीतेन निजमात्रा सह धनुष्कोटितीर्थे संकल्पपूर्वकं स्नात्वा मासोपवासान्ते पारणां कृत्वा पुनर्व्यासांतिकमागत्यानन्तरकर्तव्योपदेशार्थं प्रार्थनाकरणम्, ततो व्यासेन दुर्विनीताय सर्वसज्जनकर्तव्यसदुपदेशकरणम्, ततो दुर्विनीतस्य व्यासोक्तनियमाचरणपूर्वकं दारसंग्रहं कृत्वा गार्हस्थ्यधर्माचरणपूर्वकं धर्माचरणेनान्ते मुक्तिवर्णनम्, इत्थं दुर्वाससा प्रोक्तं धनुष्कोटितीर्थमाहात्म्यं श्रुत्वा यज्ञदेवेन ब्राह्मणेन ब्रह्महत्योपद्रुतं निजपुत्रं गृहीत्वा धनुष्कोटितीर्थं गत्वा स्नानकरणम्, तत्प्रभावेण तत्राकाश-		

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अध्यायाः	विषयाः	प०	पृ०
	वाण्या यज्ञदेवद्विजपुत्रस्य सुमत्याख्यस्य ब्रह्महत्यादिसकलपातकनिवृत्तिः, इत्थं सिन्धुद्वीपोक्तं धनुष्कोटितीर्थमाहात्म्यं श्रुत्वा सृगालवानराभ्यां धनुष्कोटितीर्थं गत्वा स्नानकरणम्, तत्प्रभावेण सृगालवानरयोर्मोक्षावाप्तिवर्णनम्, धनुष्कोटिमाहात्म्यम्.	६३	१
३६	अथ पुनर्धनुष्कोटितीर्थमाहात्म्यप्रसंगेन दुराचाराभिधविप्रवृत्तांतवर्णनम्, तत्र गौतमीतीरस्थस्य दुराचाराख्यस्य द्विजस्य महापातकिभिर्जनैः सह संसर्गेण निःशेषब्राह्मण्यविनाशे वेतालेन गृहीत्वा गौतमीप्रदेशाद्धनुष्कोटितीर्थे नीत्वा धनुष्कोटितीर्थजले निमज्जनम्, तत्तीर्थस्नानमात्राद्वेतालग्रहान्मुक्तस्य दुराचारस्य श्रीदत्तात्रेयं प्रति गत्वा निजवृत्तान्तजिज्ञासया प्रार्थनायां कृतायां दत्तात्रेयेण तस्मै वेतालग्रहग्रहणादिवेतालमुक्तिपर्यन्तवृत्तकथनपूर्वकं धनुष्कोटितीर्थमाहात्म्यकथनम्, तत्प्रसंगेन वेतालस्य पूर्वजन्मनि ब्राह्मणस्य भाद्रपदकृष्णपक्षे पितृश्राद्धाकरणाद्वेतालत्वप्राप्तिवर्णनम्, तत्प्रसंगेन महालयपक्षस्थप्रतितिथिश्राद्धफलवर्णनम्, महालयश्राद्धकरणप्रभावाद्धारिश्चन्द्रादीनां राजर्षीणामत्र्यादिब्रह्मर्षीणां च सर्वदुःखनिस्तारपूर्वकसर्वाणिमादिसिद्धिफलावाप्तिवर्णनम्, श्रीदत्तात्रेयाद्धनुष्कोटितीर्थमाहात्म्यं महालयपक्षीयादिश्राद्धमाहात्म्यफलानि च श्रुत्वा त्यक्तदुराचारस्य दुराचाराख्यविप्रस्य दत्तात्रेयोक्तमार्गेण स्वगृहं प्रत्यागत्य स्वधर्माचरणेन देहांते मोक्षवर्णनम्, सर्वपापनिवृत्तिकरधनुष्कोटितीर्थप्रशंसा.	६४	२
३७	अथ फुल्लग्रामस्थक्षीरकुण्डमाहात्म्यवर्णनम्, तत्प्रसंगेन मुद्गलब्राह्मणचरित्रवर्णनम्, तत्र मुद्गलेन यज्ञे क्रियमाणे तत्र यज्ञे प्रादुर्भूतस्य महाविष्णोर्मुद्गलेन स्तुत्या प्रसादनम्, अथ मुद्गलमुनिमनोपितपूरणाय भगवता विष्णुना विश्वकर्मद्वारा मुद्गलाश्रमे विस्तीर्णं कुण्डं खानयित्वा सुरभीं प्रति पयःपूरणायाज्ञाप्य सुरभ्याऽखण्डपयसा पूरिते तस्मिन्कुण्डे भगवता मुद्गलाय सायंप्रातर्होमार्थं तत्कुण्डं दत्त्वा तस्य क्षीरसर इति नाम कृत्वा मुद्गलाय वरं प्रदायान्तर्धानकरणम्, मुद्गलस्य महर्षेर्भगवत्प्रीतये होमादिस्वधर्माचरणपूर्वकं देहान्ते मोक्षप्राप्तिः, क्षीरकुण्डमाहात्म्यप्रसंगेन स्वसपत्न्याश्छलकारिण्याः कद्र्वाख्यायाः कश्यपपत्न्याश्छलजन्यपातकनिवृत्तिवृत्तान्तवर्णनम्, क्षीरकुण्डमाहात्म्यवर्णनम्.	६८	२
३८	विनताकद्र्वोर्भगिन्योरपि सपत्न्योः कदाचित्सूर्याश्वपुच्छवर्णकथनपणेन दासीभावे निश्चिते विनतया सूर्याश्वपुच्छे यथार्थतया श्वेतवर्णे प्रोक्ते सत्यपि कद्रा छलेन निजपुत्राणां नागानां सूर्याश्वपुच्छस्य निजगात्रवेष्टनेनाच्छाद्य नीलत्वविधानायाज्ञाकरणम्, नागैस्तद्वचस्यनंगीकृते कद्र्वा नागेभ्यः शापप्रदानम्, अथ कर्कोटकाख्यनागेन मात्रर्थे सूर्याश्वपुच्छस्य स्वभोगेनाच्छाद्य नीलीकरणम्, अथ कद्रूविनताभ्यां सह मिलित्वा कृष्णपुच्छसूर्यहयदर्शनम्, कृष्णपुच्छं तं सूर्यहयं दृष्ट्वा छलेन निर्जितयाऽत एव दुःखितया विनतया कद्र्वाश्चेटीत्वं स्वीकृत्य स्वसुतेन गरुडेन सह कद्र्वास्तत्पुत्राणां नागानां च वहनम्, अथ गरुडेन मातृतश्चेटीत्वकारणं विज्ञाय तस्याः कद्र्वाः सकाशात्स्वमातुर्दास्यविमुक्तये सुधाहरणार्थं गमनाय मातुः समीपे भक्ष्यप्रार्थनम्, मात्रा गरुडाय समुद्रमध्यास्थितशबरभक्षणार्थमाज्ञाकरणम्, गरुडेन शबरान्भक्षयित्वा तन्मध्य आगतस्य विप्रस्य तद्भार्यया किरात्या सह मुखान्निरुद्गिरणम्, अथ शबरान्भक्षयित्वाप्यतृप्तेन गरुडेन निजपितुः कश्यपस्य समीपमेत्य तं प्रति क्षुद्बाधानिवृत्तये भक्ष्यप्रार्थनम्, कश्यपेन विभावसुसुप्रतीकयोर्भ्रात्रोः परस्परं शापतो गजकच्छपत्वं प्राप्तयोर्भक्षणार्थं गरुडं प्रत्याज्ञाकरणम्, ततो गरुडेन निजनखाभ्यां तौ गजकच्छपौ गृहीत्वा तद्भक्षणार्थमवस्थितये विलंबाख्यतीर्थतीरस्थरोहिणाख्यतरुशाखाधिरोहणम्, तस्मिन्नारूढमात्रे तच्छाखाभङ्गे तच्छाखायामवलंबमानानां बालखिल्यमहर्षीणां पतनभीत्या गरुडेन तच्छाखाया उच्चैरुत्तोल्य मध्ये सान्तराले कस्मिंश्चिन्निर्जनप्रदेशे निधानपूर्वकं गजकच्छपभक्षणम्, अथ गरुडे सुधामाहर्तुं स्वर्गलोकं प्रति प्रस्थातुकामे सति स्वर्गलोकेऽनिष्टोत्पातान्दृष्ट्वा बृहस्पतिं प्रतीन्द्रेणोत्पात-		

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अध्यायाः	विषयाः	प०	पृ०
	कारणप्रश्नकरणम्, बृहस्पतिनेन्द्राय वालखिल्यदत्तशापोदयकालकथनम्, ततो गरुडेन स्वर्गं प्रत्यागमनम्, गरुडस्य देवैः सह युद्धवर्णनम्, तस्मिन्युद्धे वरदानच्छलेन विष्णुना गरुडस्य निजवाहनत्वेन प्रार्थनम्, अथ तस्मै शक्रेण वरप्रदानम्, गरुडेन सुधामानीय नागानां संनिधौ कुशेषु स्थापयित्वा स्वस्य मातुर्दास्यान्मोक्षणम्, अथ स्नानं कृत्वा समागच्छत्सु नागेषु शक्रेण सुधाकलशस्य हरणम्, स्नात्वा समागतैर्नागैः सुधाशंकया कुशेषु लिह्यमानेषु नागानां जिह्वापाटनेन द्विजिह्वत्वप्राप्तिः, अथ निजमातरमुद्दिश्य च्छलकारिण्यै कद्र्वै गरुडेन भर्तृपरिचर्यानर्हतारूपशापप्रदानम्, अथ तद्भर्त्रा कश्यपेन कद्र्वा निर्भर्त्सनम्, अथ साध्व्याः सच्छीलाया विनतायाः प्रार्थनया कश्यपेन कद्र्वै च्छलदोषशान्तये दक्षिणोदधितीरस्थफुल्लग्रामवर्तिक्षीरसरसि स्नानार्थमाज्ञाकरणम्, क्षीरकुंडे स्नानेन कद्र्वाश्छलजन्यदोषशान्तिः, क्षीरसरोमाहात्म्यम्.	७०	१
३९	अथ कपितीर्थमाहात्म्यवर्णनम्, तत्र रावणादिराक्षसहननानंतरं सर्वकपिभिस्तीर्थं निर्माय स्नानकरणम्, कपितीर्थस्य श्रीरामचन्द्रेण वरप्रदानम्, कपितीर्थमाहात्म्यप्रसंगेन विश्वामित्रचरित्रवर्णनम्, तत्र ब्राह्मण्यप्राप्तये तपः कुर्वतो विश्वामित्रस्य तपोविघ्नार्थं समागताया रंभाया विश्वामित्रशापाच्छिलात्वप्राप्तिः, श्वेतमुनिना निजोपद्रवार्थमागताया राक्षस्या उपरि तद्विद्रावणाय शिलायाः प्रक्षेपणम्, तस्याः शिलायास्तां राक्षसीं प्रहृत्य हत्वा कपितीर्थे पतितायास्तत्तीर्थप्रभावेण पुना रम्भात्वप्राप्तिः, तस्या राक्षस्या अपि शापमुक्तिपूर्वकं घृताच्यप्सरस्त्वप्राप्तिः, कपितीर्थमाहात्म्यम्.	७३	१
४०	अथ गायत्रीसरस्वतीतीर्थद्वयमाहात्म्यवर्णनम्, तत्प्रसंगेन निजदुहितरं प्रति कामुकस्य ब्रह्मणः शिवेन हननम्, गायत्रीसरस्वतीप्रार्थनया शिवेन ब्रह्मणः संजीवनम, ब्रह्मणा शिवस्तुतिकरणम्, शिवाज्ञया गायत्रीसरस्वत्योर्गन्धमादने कुण्डद्वयनिर्माणपूर्वकं संनिधानम्, गायत्रीसरस्वतीकुण्डद्वयमाहात्म्यम्.	७४	२
४१	अथ गायत्रीसरस्वतीकुण्डमाहात्म्यप्रसंगेन काश्यपाख्यविप्रवृत्तान्तवर्णनम्, तत्र शमीकमुनिपुत्रशप्तस्य परीक्षिद्भूपस्य भविष्यत्सर्पदंशजन्यमृत्युनिवारणार्थं गच्छतो विषापहरविद्यानिपुणस्य काश्यपब्राह्मणस्य मध्येमार्गमेव तक्षकाद्धनमादाय परावृत्तौ राजजीवितस्यारक्षणात्सकलजनानिन्द्यताप्राप्तिः, ततः शाकल्यमुनेर्निजलोकनिन्द्यताकारणं ज्ञात्वा तद्दोषपरिहारार्थं शाकल्योपदेशेन दक्षिणोदधितोरस्थगायत्रीसरस्वतीकुण्डद्वयं गत्वा स्नानकरणम्, तदानीं प्रादुर्भूतयोर्गायत्रीसरस्वत्योः काश्यपेन स्तुतिकरणम्, तस्मै ताभ्यां वरप्रदानम्, तत्प्रसादेन काश्यपब्राह्मणस्य मुक्तकिल्बिषत्ववर्णनम्, गायत्रीसरस्वतीकुण्डद्वयमाहात्म्यम्. ...	७५	२
४२	अथर्णमोचनतीर्थपंचपाण्डवतीर्थदेवतीर्थसुग्रीवतीर्थनलतीर्थगवाक्षतीर्थाङ्गदतीर्थगजगवयशरभकुमुदहरपनसानिर्मिततीर्थविभीषणतीर्थविभीपणसाचिवविनिर्मिततीर्थचतुष्टयमाहात्म्यवर्णनपूर्वकं गन्धमादनस्थसरयूनदीरामनाथमहादेवादिमाहात्म्यवर्णनम्.	७८	१
४३	अथ श्रीरामचन्द्रस्थापितरामनाथलिङ्गमाहात्म्यवर्णनम्, तत्र श्रीरामेश्वरमहालिंगदर्शनादिभक्तिपूर्वकपूजनादिसविस्तरप्रशंसामाहात्म्यवर्णनम.	७९	१
४४	श्रीरामेश्वरलिङ्गमाहात्म्यप्रसंगेन श्रीरामचन्द्रचरित्रवर्णनम्, तत्र श्रीरामचन्द्रेण सागरे सेतुं वद्धा लंकायां युद्धे रावणं हत्वा सीतां संशोध्य दक्षिणोदधितीरे गन्धमादनपर्वतेऽवस्थानम्, अथागस्त्यादिमुनिभिरागत्य श्रीरामस्य स्तुतिकरणम्, अथ श्रीरामेण रावणहननजन्यब्रह्महत्यादोषापनुत्तये मुनीनामुपदेशेन श्रीमहेश्वरस्य लिङ्गं स्थापयितुं मुनिभिः सुमुहूर्तं निश्चित्य कैलासाच्छिवलिङ्गमानेतुं हनुमन्तं प्रत्याज्ञाकरणम्, कैलासं प्रति शिवलिङ्गमानेतुं गतस्य हनुमतो लिङ्गमादायागमने विलंवं दृष्ट्वा मुनीनां संमत्या सुमुहूर्तातिक्रमभीत्या श्रीरामेण जानकीकृतवालुकामयशिवलिङ्गस्य स्थापनपूर्वकं पूजाकरणम्, ततो लिङ्गस्थितेन श्रीसांबसदाशिवेन लिङ्गमध्यात्प्रादुर्भूय श्रीरामचन्द्राय वरप्रदानम्, रामचन्द्रेण		

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अध्यायाः	विषयाः	प०	पृ०
	श्रीरामेश्वराग्रतो नंदिकेश्वरं संस्थाप्येश्वरस्याभिषेकार्थं निजधनुष्कोट्या कोटितीर्थाख्यकूपनिर्माणम्, लिङ्गप्रतिष्ठाकरणम्.	८२	१
४५	श्रीरामेण सुमुहूर्ते सैकतश्रीशिवलिङ्गप्रतिष्ठाकरणानन्तरं हनुमता कैलासपर्वताच्छिवलिङ्गानयनम्, रामेण स्वागमनात्पूर्वमेव स्थापितं शिवलिङ्गं दृष्ट्वा मारुतेः क्रोधपूर्वकशोकाकुलत्वदशावर्णनम्, श्रीरघुनाथेन मारुतिसान्त्वनम्, ततो रामाज्ञया हनुमता हनुमदीश्वरस्थापनम्, एवं तत्र रामेश्वराद्येकादशशिवलिङ्गवर्णनम्, अथ हनुमता रामस्थापितसीताविनिर्मितसैकतलिङ्गोत्पाटनाय साहसेन प्रयत्ने कृतेऽपि प्रयत्ननैष्फल्यतो मारुतेर्मूर्छाप्राप्तिपूर्वकं पतनम्, अथ श्रीसीतारामचन्द्राभ्यां मारुतेः स्वास्थ्याय प्रयत्नकरणम्.	८४	२
४६	श्रीरामचन्द्रेण मूर्छापन्नस्य मारुतेः कृते शोककरणम्, अथ मारुतेर्मूर्छानिवृत्त्यनन्तरं मारुतिना श्रीरामजानक्योः स्तुतिकरणम्, श्रीरामचन्द्रेण मारुतये शिवभक्त्युपदेशं कृत्वा मारुतिपतनस्थानसमुत्पन्नगङ्गायमुनासरस्वतीनदीत्रयरूपहनुमत्कुण्डरूपतीर्थस्नानायाज्ञाकरणम्, रामनाथसमीपे हनुमता स्वानीतलिङ्गस्थापनम्. ...	८६	१
४७	अथ श्रीरामचन्द्रस्य ब्रह्महत्योत्पत्तिहेतुवर्णनंप्रसंगेन रावणादीनां कैकस्यां सुमालिराक्षसकन्यायां विश्रवसो मुनेः सकाशादुत्पत्तिवृत्तान्तवर्णनम्, एवं रावणकुम्भकर्णयोर्ब्राह्मणत्वेन रामचन्द्रस्य तद्धननाद्ब्रह्महत्याप्राप्तौ तन्निवृत्तये रामचन्द्रेण सेतुबन्धे रामेश्वरलिङ्गस्थापनम्, ब्रह्महत्याविमोचनाख्यतीर्थं निर्माय तत्समीपवर्तिनि विले ब्रह्महत्यां प्रापय्य तद्बिलस्योपरि भैरवस्थापनम्, रामनाथमहालिंगस्य दक्षिणभागे गिरिजायाः स्थितिः, आसमंतात्परिवारादिग्देवतानां च स्थापनम्, रामेश्वरलिङ्गपूजासेवार्थं रामचंद्रेण ब्राह्मणानामग्रहारादिवृत्तिप्रदानम्. ...	८८	१
४८	अथ रामनाथमाहात्म्यप्रसङ्गेन पाण्ड्यदेशाधिपशंकरराजवृत्तान्तवर्णनम्, कदाचिन्मृगयार्थं वने विचरता शंकरभूपेन व्याघ्रचर्मावृतस्य कस्यचिच्छाकल्यमुनेस्तथाविधाया एव व्याघ्रचर्मावृतायास्तत्पत्न्याश्च व्याघ्रशंकया हननम्. स्वपितरौ हतौ दृष्ट्वा तयोर्बालकस्य रोदनम्, तद्रोदनं श्रुत्वा शंकरनृपस्य तत्समीपं प्रत्यागमनम्, तत्रत्यैर्मुनिभिर्बालकसमीपं प्रत्येत्य धनुर्धरं राजानं मृतौ पितरौ रुदन्तं बालकं च निरीक्ष्य बालकस्य तत्त्वज्ञानोपदेशेन सान्त्वनकरणपूर्वकं मातापित्रोरौर्ध्वदैहिकार्थमाज्ञाकरणम, मुनीनामाज्ञया तेन मुनिपुत्रेण पित्रोरौर्ध्वदैहिकं कृत्वा हालास्यतीर्थे रामेश्वरस्थले पित्रोरस्थिनिधानपूर्वकं श्राद्धादिविधिकरणम्, तत्प्रभावेन तत्पित्रोर्मुक्तिवर्णनम, अथ ब्राह्मणैः शंकरभूपस्य धिक्कारपूर्वकं ब्रह्महत्यापनोदाय वह्निप्रवेशार्थमाज्ञाकरणम्, ततो ब्राह्मणाज्ञया शंकरभूपेन स्वमंत्रिणो निजराज्ये स्वपुत्रस्याभिषेकार्थमाज्ञाप्याग्निं प्रज्वाल्य तस्मिन्पतितुं प्रयत्ने कृते सत्याकाशवाण्या शंकरभूपस्य बह्निपतनतो निवारणपूर्वकं स्त्रीहत्याब्रह्महत्यादोषनिवृत्तये रामनाथदर्शनार्थमाज्ञाकरणम्, ततो ब्राह्मणानामपि तथैवानुमोदने सति शंकरभूपेनैकवर्षपर्यन्तं श्रीरामेश्वरलिङ्गसेवनम्, तत्स्तुतिप्रभावेण शङ्करभूपस्य मुखतो विनिर्गतायाः स्त्रीहत्यासमन्वितब्रह्महत्याया भैरवेण शिवाज्ञया हननम, अथ पवित्रस्य शंकरस्य श्रीरामनाथेन भगवताऽऽविर्भूय वरप्रदानम्, श्रीरामनाथप्रसादाच्छंकरभूपस्य शिवसायुज्यप्राप्तिवर्णनम्.	८९	१
४९	अथ श्रीरामचन्द्रलक्ष्मणसीताहनुमदादिसमस्तवानरसमस्तमुनिसमस्तदेवादिभिः श्रीरामेश्वरभगवतः स्तुतिकरणम्, ततः प्रसन्नेन श्रीरामेश्वरेण श्रीरामचन्द्रादिभ्यो वरप्रदानवर्णनम.	९२	१
५०	अथ सेतुमाधववैभववर्णनम्, तत्प्रसङ्गेन पुण्यनिधिनामकराजवृत्तान्तवर्णनम्, तत्र कदाचिन्मधुरापुरीनरेशस्य पुण्यनिधे रामधनुष्कोटौ स्नात्वा तुलापुरुषादिदानानि दत्त्वा स्वपुरीं प्रति प्रस्थातुकामस्य कन्यारूपधारिण्या लक्ष्म्या दर्शनम्, तया कन्यया पुण्यनिधिभूपतिं प्रत्यहं ते कन्या भूत्वा तव गृहे निवत्स्यामीति स्वाभिप्रायकथनम्, ततः पुण्यनिधिना तस्याः कन्यारूपधारिण्या लक्ष्म्याः स्वगृहं प्रत्यानीय विन्ध्यावल्याख्यायाः स्वभार्यायाः समीपे प्रदानं पुत्रवत्पो-		

अध्यायाः	विषयाः	प०	पृ०
	पणपूर्वकं वर्धनं च, अथ तस्या लक्ष्म्या अन्वेषणार्थं विप्रवेषधारिणा विष्णुना तत्रागमनं तत्रोद्याने पुष्पाणि विचिन्वन्त्याः कन्यारूपधारिण्या लक्ष्म्या हठात्करग्रहणं च, ततः कन्यारोदनं श्रुत्वा पुण्यनिधिना निजदूतद्वारा तस्य विप्ररूपधारिणो विष्णोः श्रीरामनाथमन्दिरं नीत्वा निगडैर्बन्धनम्, अथ रात्रौ स्वप्ने पुण्यनिधिना तस्य विप्रस्य भगवद्विष्णुरूपेण निजकन्यायाश्च लक्ष्मीरूपेण दर्शनम्, ततः प्रभाते स्वकन्यां गृहीत्वा रामनाथालयं गत्वा तं विप्रं स्वप्नदृष्टभगवद्रूपवन्तं दृष्ट्वा तं विष्णुं विज्ञाय स्तुतिकरणपूर्वकं स्वापराधक्षमापणम्, निजकन्यारूपायाश्च तस्या लक्ष्म्याः स्तुतिकरणम्, तत्प्रार्थनया प्रसन्नेन सलक्ष्मीकेण भगवता पुण्यनिधये वरप्रदानम्, तस्य भक्तस्य पुण्यनिधेर्भूपस्य निरन्तरकीर्त्यै भगवता सेतुमाधवसंज्ञया निगडबद्धमूर्तिधारणपूर्वकमेव तत्रावस्थितिकरणम्, ततः पुण्यनिधिभूपेन सेतुमाधवभगवत्सेवाकरणम्, पुण्यनिधेर्देहान्ते मुक्तिप्राप्तिः, सेतुमाधवमाहात्म्यवर्णनम्.	९४	२
५१	अथ सेतुयात्राविधिक्रमवर्णनम्, स्वगृहे स्नानपूर्वकं संकल्पं विधाय यात्रोद्देशेन यात्रिकनित्यनियमधारणपूर्वकं सविस्तरयात्राविधानवर्णनम्.	९६	२
५२	अथ विशेषतः सेतुवैभववर्णनपुरःसरं धनुष्कोटितीर्थस्नानदानादिमाहात्म्यवर्णनम्, श्रीरामचन्द्रेण धनुष्कोटितीर्थस्य वरप्रदानवृत्तान्तवर्णनम्, दानप्रसंगेन पात्रविचारे प्रस्तूयमाने वसिष्ठदिलीपसंवादे सत्पात्रप्रशंसा, रामसेतौ धनुष्कोटितीर्थे स्नानादिकर्मस्वर्योदयादिकालप्रशंसापूर्वकं पूजार्घ्यव्रतादिसत्कर्मप्रशंसनम्, सेतुमाहात्म्यपठनश्रवणदानमाहात्म्यवर्णनम्, सेतुमाहात्म्यस्योपसंहारपूर्वकसमाप्तिवर्णनम्.	९८	२

इति ब्राह्मखण्डे प्रथमं सेतुमाहात्म्यम् ॥ (३-१) ॥

अध्यायाः	विषयाः	प०	पृ०

अथ ब्राह्मखण्डे द्वितीयं धर्मारण्यखण्डम् ॥ (३-२) ॥

१	मङ्गलाचरणम्, नैमिषारण्ये समागतं सूतमहर्षिं प्रति शौनकादिमहर्षिभिः सत्कारपूर्वकं धर्मवर्धककथाश्रवणेच्छया प्रश्नकरणम्, अथ सूतमहर्षिणा धर्मारण्यमाहात्म्यकथनायोपक्रमकरणम्, तत्र श्रीयमधर्मदेवस्य ब्रह्मणः सभां प्रति गमनम्, तत्र ब्रह्मसभायां व्यासमहर्षिणा वाच्यमानां दिव्यां धर्मारण्यकथां श्रुत्वा यमधर्मदेवस्य स्वपुरीं प्रति गमनम्, तत्र यमधर्मराजं प्रति नारदस्यागमनम्, नारदेन हर्षकारणं पृष्टेन यमधर्मराजेन स्वसन्तोषकारणकथनपूर्वकं नारदाय ब्रह्मलोके व्यासमुखतः श्रुताया धर्मारण्यकथायाः कथनम्, यमधर्मराजतो धर्मारण्यकथां श्रुत्वा नारदस्य भूतले युधिष्ठिरं धर्मराजं प्रत्यागमनम्, धर्मराजसत्कृतेन नारदेन धर्मारण्यकथां शुश्रूषवे धर्मराजाय माघमासे गंगायां स्नानार्थं त्वं गच्छ अद्यैव व्यासमहर्षिरागमिष्यति तन्मुखात्त्वं धर्मारण्यकथां च शृण्वित्युक्त्वा नारदस्यान्तर्धानम्, अथ धर्मराजं प्रति श्रीव्यासमहर्षेरागमनम्, अथ युधिष्ठिरेण व्यासं सिंहासने समावेश्य सम्पूज्यानामयप्रश्नकरणम्, ततो व्यासेन युधिष्ठिराय धर्मारण्यकथाकथनायोपक्रमकरणम्.	१०६	१
२	अथ मोहेरकापरपर्यायधर्मारण्यमुख्यस्थानमाहात्म्यवर्णनम्, तत्र तस्य धर्मारण्यस्य सर्वतीर्थारण्याद्यतिशायिपुण्यशालित्ववर्णनम्, तन्माहात्म्यजिज्ञासया व्यासमहर्षिं प्रति युधिष्ठिरेण प्रश्नकरणम्.	१०८	२
३	अथ व्यासेन धर्मारण्यकथारम्भकरणम्, तत्र श्रीभगवत्स्वरूपदिदृक्षया धर्मदेवस्य वनमध्ये गत्वा महादेवं ध्यात्वा तपश्चर्यावर्णनम्, तत्तपःसमुद्भूताग्निशिखाप्रतप्तैः सपरिवारैर्ब्रह्मादिदेवैः कैलासे श्रीमहादेवं प्रति गत्वा महादेवस्य स्तुतिकरणम्, ततो रुद्रवचनाद्धर्मतो भयाभावं ज्ञात्वा सर्वेषां देवानां स्वस्थानं प्रति गमनेऽकारणमेव शंकामापन्नेनेन्द्रेण बृहस्पत्यनुमत्या धर्मं प्रति तपोविघ्नकरणायोर्वशीवचनाद्वर्धन्याख्याप्सरसः संप्रेषणम्, तया च धर्मसमीपं गत्वा गायनसमन्वितनृत्येन		

CC-0. In Public Domain. Digitization by eGangotri

अध्यायाः	विषयाः	प०	पृ०
	धर्मराजचित्ताकर्षणकरणम्, वर्धन्यप्सरोवर्णनप्रसंगेन स्त्रीस्वभावदोषानुकीर्तनम्.	१०९	१
४	अथ वर्द्धन्यप्सरसा सह धर्मराजस्य संवादः,धर्मराजेन वर्द्धन्यप्सरसे वरप्रदानम्, ततो वर्द्धन्या शक्राय धर्मस्य व्यवसितनिवेदनपूर्वकं शक्राद्वरं लब्ध्वा स्वस्थानं प्रति गमनम्, अथाप्सरोगमनानन्तरं धर्मदेवेन पञ्चाग्निसाधनाद्युग्रतपःकरणम्, तदुग्रतपसोद्विग्नमानसानां देवादीनां कैलासं प्रति गत्वा शिवस्तुतिकरणम्, अथ देवैः सह शङ्करस्य वने तपस्यन्तं धर्मदेवं प्रत्यागमनम्, धर्मेण भगवतः स्तुतिकरणम्, तत्स्तुतिप्रसन्नेन शङ्करेण वरप्रदानप्रसंगे योजनद्वितयात्मकयमधर्मतपोवनस्य धर्मारण्यप्रथाकरणपूर्वकं यमधर्मदेवाय वरप्रदानम्, ततो धर्मारण्यक्षेत्रस्थापनम्, तत्र प्रथमतो यमधर्मेण भगवतो विश्वेश्वरस्य धर्मेश्वराभिख्यया स्वयंभुवलिंगस्थापनम्, धर्मवापीकरणम्, धर्मवापीधर्मेश्वरयोर्माहात्म्यम्, तत्प्रसंगेन यमधर्मतर्पणमाहात्म्यवर्णनम्, अथ यमधर्मराजेन स्वयं धर्मारण्यस्य वैभववर्णनपूर्वकं स्वयंस्थापितक्षेत्रभूम्यै सर्वातिशायित्ववरप्रदानम्.	११०	२
५	अथ धर्मारण्येषु ब्रह्मविष्णुमहेशैर्विनिर्मितानामष्टादशसहस्रब्राह्मणानां माहात्म्यवर्णनम्, तत्प्रसंगेन वर्णाश्रमसदाचारवर्णनपूर्वकसर्वसाधारणप्रातःस्मरणादिनित्याह्निकक्रमवर्णनम्.	११३	१
६	अथ गृहस्थाश्रमधर्मसदाचारलक्षणवर्णनम्, तत्रातिथिसत्कारप्रशंसा, अथाष्टविधविवाहलक्षणवर्णनम्, गृहस्थाचरणीयपञ्चमहायज्ञादिधर्मवर्णनम्, अथ गृहस्थवर्जनीयकर्मवर्णनम्, वृद्धोपसेवनदानादिप्रशंसावर्णनं च.	११६	१
७	अथ धर्मारण्यस्थधर्मवाप्यां तर्पणपिण्डदानादिमाहात्म्यवर्णनम्, अथ शौनकादिपृच्छायां सूतेन पतिव्रताधर्मसदाचारवर्णनम्, पतिव्रताधर्मप्रशंसाप्रसंगेन दुराचारिणीनां दुर्विपाकप्रदर्शनम्, विधवानियमधर्मवर्णनम्, धर्मवाप्यां तिलधेन्वादिदानप्रशंसावर्णनपुरःसरश्राद्धमाहात्म्यवर्णनम्	११८	२
८	अथ शिवस्कन्दसंवादरूपेण धर्मारण्यकथाप्रशंसनोपक्रमः, तत्र शिवेन स्कन्दमुखादिन्द्रादिदेवानागताञ्छ्रुत्वा सहसाऽऽसनादुत्थाय गन्तुकामनया वृषभेऽनारोहणं दृष्ट्वा स्कन्देन शिवं प्रति गमनत्वराकारणजिज्ञासया प्रश्नकरणम्, अथ स्कन्दं प्रति शिवेन सृष्ट्यादिवृत्तवर्णनपुरःसरं पौराणिककथावर्णनम्, तत्र ब्रह्मदेवसुतमरीच्यादिमहर्षिवंशवर्णनपुरःसरं सूर्यपुत्रयमधर्मराजनिर्मितधर्मारण्यमाहात्म्यवर्णनम्, धर्मारण्यं प्रति श्रीमहाविष्णुमानेतुं वैकुण्ठं प्रति गन्तुमुत्सुकेन शिवेन सह स्कन्दादीनां ब्रह्मादिदेवानां च वैकुंठं प्रति गमनम्, तत्र गत्वा ब्रह्मादिभिर्विष्णोः स्तुतिकरणम्, ब्रह्मादिस्तुत्या विष्णोरुत्थानम्...	१२०	२
९	अथ विष्णुना ब्रह्मादीन्देवान्प्रति स्वं प्रत्यागमनकारणे पृष्टे सति ब्रह्मणा धर्मारण्यदिदृक्षानिवेदनपुरःसरं तत्रागमनाय विष्णोः प्रार्थनाकरणम्, ततो विष्णुना बाढमित्युक्त्वा तार्क्ष्यमारुह्य ब्रह्मरुद्रेन्द्रादिदेवैः सह धर्मारण्ये यमधर्मराजं प्रत्यागमनम्, यमधर्मराजेन सर्वेषां देवानां सत्कारपूर्वकं स्तुतिकरणम्, विष्णुना यमधर्मं प्रति वरार्थं छन्दनम्, ततो यमधर्मेण स्वकीये धर्मारण्ये महर्ष्याश्रमकरणार्थं प्रार्थनायां कृतायां विष्ण्वादिभिर्देवैर्नानादेशेभ्यः सदाचारसंपन्नान्सशिष्यपरिवारान्ब्राह्मणानानीय तस्मिन्धर्मारण्ये तेषामृषीणां सुविपुलानाश्रमान्विधाय स्थापनम्. अथ तत्र धर्मारण्ये निवसतां पुत्रपौत्रादिसमेतानां ब्राह्मणानां मध्ये चतुर्विंशतिमुख्यमहर्षिगोत्रप्रवरादिविस्तारपूर्वकं वर्णनं तत्तद्गोत्रोद्भवानां ब्राह्मणानां स्वभाववर्णनं च, अथ धर्मारण्यमाहात्म्यप्रसङ्गेन जृम्भकनामकयक्षवृत्तान्तवर्णनम्. तत्र जृम्भकयक्षोद्वेजितसमस्तब्राह्मणप्रार्थनया सर्वदेवैस्तेषां ब्राह्मणानां रक्षणाय तस्मिन्धर्मारण्ये प्रत्येकैकगोत्रप्रवरदेवतारूपश्रीमातृप्रभृतियोगिनीनां स्थापनम्, ततो योगिनीभी रक्षितानां ब्राह्मणानां स्वास्थ्यम्, अथ कदाचित्तत्र धर्मारण्ये समागतै रुद्रादिभिर्देवैर्विप्राणां शुश्रूषार्थं सृष्टिं विधातुं विष्णुद्वारा ब्रह्माणं		

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अध्यायाः	विषयाः	प०	पृ०
	प्रति प्रेरणम्, ततो ब्रह्मणा द्विजशुश्रूषुवर्गसिसृक्षया धर्मारण्ये कामधेनोः स्मरणे कृते सति कामधेनोर्धर्मारण्ये ब्रह्मणः समीप आगमनम्.	१२१	२
१०	अथ ब्रह्मणा कामधेनवे विप्रेभ्योऽनुचरप्रदानार्थं स्वाभिप्रायनिवेदनम्, ब्रह्मोक्तिं श्रुत्वा कामधेन्वा निजक्षीरधारया धरोल्लेखने कृते सति ततः शिखासूत्रधारिषट्त्रिंशत्सहस्रसंख्याकवणिजामुत्पत्तिः, ततः सर्वदेवानुशिष्टेन ब्रह्मणा तेषामष्टादशसहस्रब्राह्मणानां प्रतिब्राह्मणमनुचरद्वयप्रदानपूर्वकं तत्तद्ब्राह्मणानुसारेण तत्तद्ब्राह्मणानुचराणां तेषांतेषां वणिजां गोत्रप्रवरादिव्यवस्थाकरणम्, तदनन्तरं सर्वदेवैः कामधेनोः स्तुतिकरणम्, अथ तेषां गोभुजानां वणिजां परिग्रहार्थं रुद्रेण विश्वावसुगन्धर्वतो गन्धर्वकन्या आनीय ताभिः सह गोभुजानां दारसंग्रहकरणम्, ततःप्रभृति गान्धर्वविवाहप्रथाप्रवृत्तिः, षट्त्रिंशत्सहस्राणां तेषां गोभुजवणिजां पुत्रपौत्राद्यसंख्यातसंततिभिः सह धर्मारण्ये निवासपूर्वकं ब्राह्मणसेवाशुश्रूषादिकर्मकरणवर्णनम्. ...	१२४	१
११	अथ कदाचित्त्रेतायुगे लोलजिह्वाख्यराक्षसेन धर्मारण्यमागत्योपद्रवे क्रियमाणे श्रीमातादिगोत्रदेवीभिस्तेन राक्षसेन सह युद्धकरणम्, तद्युद्धावसरे तत्र विष्णुनागत्य प्रेरितेन निजचक्रेण लोलजिह्वराक्षसस्य वधकरणम्, ततो रक्षोभीत्या पलायितानां धर्मारण्यनिवासिब्राह्मणादीनां विष्णोराज्ञया देवैरामन्त्र्य पुनर्धर्मारण्ये स्थापनम्, भगवता सत्यलोकादागत्य राक्षसं हत्वा ब्राह्मणानां हितार्थं संस्थापितस्य पुरस्य सत्यमन्दिरनामप्रसिद्धिवर्णनम्.	१२५	२
१२	अथ तस्य सत्यमन्दिरस्थापनवशात्सत्यपुरस्य समंततः सर्वभागेषु गणेशभास्करादिसर्वदेवतावासवर्णनपुरःसरं नगरशोभावर्णनम्, तत्र गणेशस्थापनप्रसंगेन पार्वत्याः सकाशाद्गणेशोत्पत्त्यादिवृत्तान्तवर्णनम्, सर्वदेवैर्गणेशस्य स्तुतिपूर्वकं धर्मारण्यनिवासिजनरक्षणार्थं प्रार्थनाकरणम्, गणाध्यक्षेण देवप्रार्थनां स्वीकृत्य धर्मारण्यनिवासिजनानां रक्षणार्थमवस्थितौ कृतायां तत्रत्यसर्वजनैर्विवाहादिमङ्गलकार्येषु निर्विघ्नतासिद्धये श्रीगणेशस्य पूजनम्.	१२६	१
१३	अथ धर्मारण्ये शंभोः पश्चिमभागे रविक्षेत्रवर्णनप्रसंगेन नासत्याश्विनोरुत्पत्तिसविस्तरवृत्तान्तवर्णनम्, तत्र सूर्यभार्यासंज्ञाचरित्रे सूर्यतेजोऽसहमानया संज्ञया छायायाः सूर्यसमीपे स्थापनानंतरं तपोर्थं गमनम्, छायया पुत्रवात्सल्यवैषम्यतः क्रुद्धस्य यमस्य प्रहारार्थमुद्यतपादस्य शापप्रदानम्, ततो यमेन निवेदितं मातृवृत्तान्तं श्रुत्वा सूर्येण ध्यानेन स्वपत्न्याः संज्ञाया वडवारूपेण तपःप्रवृत्तिं विज्ञायाश्वरूपेण तस्याः समीपे गमनम्, ततो वडवाया घ्राणे लिङ्गं प्रवेश्य सूर्येण संभोगे कृते सति युगलयोरश्विनोः समुत्पत्तिः, अश्वरूपधारिणः सूर्यस्य पूर्वपश्चिमखुरक्षोदनस्थले तप्तकुण्डद्वयोत्पत्तिः, तत्तत्प्रवरविकुण्डमाहात्म्यवर्णनम्, ततो ब्रह्मादिदेवैस्तत्र सूर्यस्य बकुलादित्यनाम्ना संस्थापनम्, संज्ञायाः कुमारयोरश्विनोश्च स्थापनम्, रविकुण्डबकुलार्कमाहात्म्यवर्णनम्, बकुलार्कनामप्रसिद्धिकारणवर्णनम्.	१२७	१
१४	अथ शिवस्कन्दसंवादेन धर्मारण्ये हयग्रीवस्य विष्णोस्तपश्चर्याया वृत्तान्तवर्णनम्, तत्र पूर्वं धरातले देवैर्यज्ञ आरब्धे सति विष्णोराह्वानार्थं रुद्रादीनां वैकुण्ठं प्रति गमनम्, तस्मिन्काले भगवत एकान्तस्थाने हस्ते धनुर्धृत्वा समाधियोगेन तपःकरणम्, ततस्तस्य प्रबोधार्थं बृहस्पतिप्रोक्तोपायमाचरितुं वम्र्याः कीटिकायास्तेन भगवता हस्ते धृतस्य धनुषो गुणस्य कर्तनाय यज्ञभागप्रदानच्छंदनेन देवैराज्ञापनम्, अथ वम्र्या धनुर्गुणे भक्षितमात्र एव ज्याघातेन विष्णोः शीर्षच्छेदः, तस्य शीर्ष्णश्चाकाशे गमनपूर्वकं निलयनम्.	१२८	२
१५	अथ छिन्ने तन्मस्तके बहुशः शोधनेनाप्यलब्धे सति ब्रह्मादिदेवैर्विश्वकर्माणं प्रति विष्णोः शिरःसंधानार्थमाज्ञापनम्, अथ विश्वकर्मणे देवैर्यज्ञभागप्रदानस्य प्रतिश्रवणम्, ततो मध्याह्ने मध्येऽम्बरं समापन्नस्य सूर्यरथस्याश्वे देवैः समानीते सति विश्वकर्मणा तस्याश्वस्य शिरश्छित्त्वा विष्णोः कबंधे संयोजनम्, ततोऽश्वशीर्षमहाविष्णोर्देवैः स्तुतिकरणम्, ततस्तत्स्तुतिसंतुष्टेन हयग्रीवेण ब्रह्मादिदेवेभ्यो		

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अध्यायाः	विषयाः	प०	पृ०
	वरप्रदानम्, ततो ब्रह्मादिदेवैर्यज्ञकर्मकरणम्, तस्मिन्यज्ञकर्मणि वम्रीभ्यो विश्वकर्मणे च पूर्वं प्रतिश्रुतस्य यज्ञभागस्य प्रदानम्, ब्रह्मादिभिर्यज्ञकर्म समाप्य स्वलोकं प्रति गमनम्. अथ विष्णोर्हयशीर्षत्वकारणकथनप्रसंगेन ब्रह्मसभायां विष्णोः प्रागल्भ्यवादे ब्रह्मणा विष्णोः शीर्षपतनरूपशापवृत्तांतवर्णनम्, अथाश्वशीर्षेण विष्णुना धर्मारण्ये देवसरस्तीर्थमुत्पाद्य तपःकरणम्, ब्रह्मणापि तत्पुरतः स्थित्वा तपःकरणम्, ततस्तत्तीर्थप्रभावाद्विष्णोरश्वशिरसो यथापूर्वशुभशीर्षत्वलाभवर्णनम्, अथ येन मुखेन ब्रह्मा विष्णवे शापमदात्तत्तस्य मुखं शार्दूलमुखमिव पंचममासीत्, तद्ब्रह्मणः पंचमं मुखं धर्मारण्ये हरेण च्छेदितमिति कथावर्णनम्, ब्रह्मणा मोक्षतीर्थकरणपूर्वकमोक्षेश्वरस्थापनवर्णनम्, देवसरस्तीर्थस्नानप्रभावेण वन्ध्यात्वनिवृत्तिप्रभृतिसत्फलप्राप्तिवर्णनम्, मोक्षेश्वरमाहात्म्यम्, देवखातसरोवरप्रभाववर्णनम्.	१३०	१
१६	अथ धर्मारण्ये ब्रह्मविष्णुरुद्रैर्धर्मारण्यनिवासिनां जनानां राक्षसादिभयविनाशाय नानाविधस्थानविशेषेषु श्रीमातादिगोत्रदेवीनां स्थापनवर्णनम्, तासां स्थानमातृकारूपाणां देवीनां स्वरूपनामादिवर्णनपूर्वकपूजाविशेषादिवर्णनम्, तत्र पूर्वदिशि श्रीमाताद्यानन्दापर्यंतदेवीनां माहात्म्यवर्णनम्.	१३१	२
१७	अथ दक्षिणदिक्स्थितशांतादेव्यादिदेवीमाहात्म्यवर्णनपूर्वकश्रीमातादेवीमाहात्म्यवर्णनम्.	१३२	१
१८	अथ श्रीमातादेवीमाहात्म्यवर्णनप्रसंगेन धर्मारण्यस्थसद्योविवाहितद्विजदंपतिहरकर्णाटकाख्यदैत्यवधाय श्रीमातादेव्या मातंगीदेवीनिर्माणादिवृत्तान्तवर्णनम्, मातंग्याः कर्णाटकदैत्येन सह युद्धवर्णनम्, तस्मिन्युद्धे कर्णाटकेन मायया मातंगीं वंचयित्वा श्रीमातादेवीं प्रत्यागत्य स्ववरणार्थं तस्याः प्रार्थनाकरणम्, ततः श्रीमातादेव्या श्यामलया ममानुजया सह विवाहं कुर्वित्युक्त्वा श्यामलादेवीं प्रति कर्णाटकदैत्यस्य प्रेषणम्, ततः श्यामलादेव्या युद्धेन कर्णाटकदैत्यस्य वधकरणम्, ततः संतुष्टैर्द्विजादिभिः श्रीमातामातंगीश्यामलादेवीनां विशेषोपचारपूर्वकपूजाविधिजिज्ञासया श्रीमातादेवीं प्रति प्रश्नकरणम्, श्रीमातादेव्या तेभ्यः पूजाविधानकथनम्, श्रीमातामातंगीश्यामलादेवीनां माहात्म्यवर्णनम्. ...	१३३	१
१९	अथेन्द्रसरोमाहात्म्यपूर्वकेन्द्रेश्वरमाहात्म्यवर्णनप्रसंगेन वृत्रहत्यासंत्रस्तेन्द्रकृततपश्चर्यावृत्तान्तवर्णनम्, इन्द्रतीर्थेन्द्रेश्वरमाहात्म्यम्, तत्समीप एव जयन्तस्थापितजयन्तेश्वरमाहात्म्यवर्णनम्.	१३६	२
२०	अथ शिवतीर्थमाहात्म्यप्रसंगेन श्रीशंकरस्य पुनर्जन्मवृत्तान्तवर्णनम, तत्र पार्वत्यै शिवेन मन्त्रकूटाक्षरबीजवर्णनम्, तादृशमंत्रजपेन देव्या दुष्टचित्तताप्राप्तिः, अथ शिवस्य धर्मारण्यं प्रति गत्वाऽकस्मात्पतनम्, तस्यांगस्वेदतः कूटगणानामुत्पत्तिः, तैर्गणैः कालकूटोपरि स्थित्वा कूटमंत्रसाधने कृते सति तेषां सिद्धतया स्वं प्रत्येव शिवत्वेन कथनं श्रुत्वा पार्वत्याः सलज्जत्वम्, ततः शिवाज्ञया पार्वत्या तपः कृत्वा शिवस्य सन्तोषणम्, तस्य तपःस्थानस्य धराक्षेत्राख्यया प्रसिद्धिः, तस्य धराक्षेत्रस्य माहात्म्यवर्णनम्.	१३७	२
२१	अथ धर्मारण्यस्थितभट्टारिकादिकुलदेवतानां धर्मारण्यनिवासिब्राह्मणगोत्रप्रवरदेवतावटंकादीनां च सविस्तरं वर्णनम्.	१३८	२
२२	अथ धर्मारण्ये ब्रह्मविष्णुमहेशैर्विनिर्मितानामाशापूर्यादियोगिनीनां प्राच्यादिदिग्देशस्थानास्थितिवर्णनम्.	१३९	२
२३	अथ कदाचिद्दानवैः सह युद्धे पराजितैर्देवैर्ब्रह्माणं प्रति गमनम्, ततो ब्रह्माज्ञया सर्वैर्देवैर्धर्मारण्यं प्रत्यागत्य सहस्राब्दपर्यंतं सत्रारंभणम्, तत्र सत्रे विविधपक्वान्नभोजनप्रदानेन ब्राह्मणानां संतर्पणम्, ततो धर्मारण्ये दानप्रभावात्प्राप्तबलैर्देवैर्दैत्यानां वधं कृत्वा स्वर्गं प्रति गमनवर्णनम्, अथ कदाचिल्लोहासुराख्येनासुरेण धर्मारण्यं प्रत्यागत्य तन्निवासिनां ब्राह्मणानां वणिजां चात्यंतोपद्रवकरणम्, तद्भयत्रस्तैस्तत्रत्यैर्ब्राह्मणैर्वणिग्भिश्च कांदिशिकीभूय यतस्ततो निर्गत्य शूद्रै-		

CC-0. In Public Domain. Digitization by eGangotri

अध्यायाः	विषयाः	२०	पृ०
	द्विजैश्चैकीभूय धर्मारण्यान्नातिदूरे शम्भुग्रामे निवासकरणम्, वणिग्भिश्चाडालजादिस्वस्वमुख्यवणिङ्नामनिर्मितग्रामेषु निवासकरणम्, तेषां वणिजां मोहेतिसंज्ञाकारणकथनम्, तेनैव कारणेन तत्रत्यानां वणिजां ज्ञातिभेदवर्णनम्, एवं लोहासुरेण धर्मारण्यस्योद्वासकरणपूर्वकं स्वस्थानं प्रति गमनवर्णनम्. ...	१३९	२
२४	अथ युधिष्ठिरेण धर्मराजेनेत्थं व्यासमुखाद्धर्मारण्यमाहात्म्यं श्रुत्वा धर्मारण्यं प्रति गत्वा तीर्थस्नानेष्टापूर्तादिविधिं कृत्वेन्द्रप्रस्थं प्रत्यागत्य राज्यशासनम्, धर्मारण्यस्थतीर्थमाहात्म्यप्रभाववर्णनम्.	१४०	२
२५	अथ धर्मारण्ये सत्यलोकात्सरस्वत्यागमनवृत्तान्तवर्णनप्रसंगेन महर्षीणां मार्कण्डेयेन सह संवादवर्णनम्, तत्र मार्कण्डेयेन स्वयं सत्यलोकात्सरस्वत्यानयनवर्णनम्, सरस्वत्यां स्नानदानश्राद्धादेः फलवर्णनम्.	१४१	१
२६	अथ धर्मारण्यस्थितद्वारकाक्षेत्रमाहात्म्यवर्णनम्.	१४१	२
२७	अथ धर्मारण्यस्थितगोवत्सलिंगोत्पत्तिवृत्तान्तपूर्वकगोवत्सलिङ्गमाहात्म्यवर्णनम्, गोवत्सलिङ्गस्याग्रतो वर्तमानस्य चण्डालस्थलस्य वर्णनम्, गोवत्सलिङ्गसमीपस्थितगङ्गकूपकमाहात्म्यवर्णनम्.	१४२	१
२८	अथ गोवत्सान्नैर्ऋतभागे लोहयष्टिकायां स्थितस्य स्वयंभुलिङ्गस्य माहात्म्यवर्णनम्, लोहयष्टिकायां सरस्वत्याख्ये मोक्षतीर्थे स्नानदानश्राद्धादिफलवर्णनम्. ...	१४३	१
२९	अथ लोहासुरचरित्रवर्णनम्, तत्र लोहासुरेण सरस्वतीतीरे शिवसन्तोषणाय तपश्चर्याकरणम्, तपस्यतस्तस्येन्द्रेण तपोभंगार्थं मुष्टिभिस्ताडनम्, ततो देवैः सह लोहासुरस्य युद्ध उत्तानपतितस्य तस्योरसि शंकरस्य कण्ठे ब्रह्मणश्चरणयोर्विष्णोश्चावस्थितिवर्णनम्. अथ ब्रह्मवाक्याल्लोहासुरस्य स्वशरीरे ब्रह्मविष्णुमहेश्वरस्थित्या सन्तुष्टस्य तस्मिन्धर्मारण्ये तथैवोत्तानपतितस्थित्याऽवस्थानम्, ततो ब्रह्मविष्णुरुद्रैर्लोहासुरस्य वरप्रदानवर्णनम्.	१४३	१

अध्यायाः	विषयाः	प०	पृ०
३०	अथ धर्मारण्यस्थतीर्थमाहात्म्यप्रसंगेन श्रीरामचन्द्रस्य भगवतो बाल्यमारभ्य सीतापरिणय–वनवास–राक्षसयुद्ध–रावणहनन–सीताप्राप्त्ययोध्याऽऽगमन–राज्याभिषेकपर्यंतं सविस्तरचरित्रवर्णनम्. अथ वसिष्ठं प्रति रामेण सर्वतीर्थोत्तमतीर्थमाहात्म्यजिज्ञासया प्रश्नकरणम्.	१४५	१
३१	अथ रामेण स्वकृतब्राह्मणराक्षसहत्यादोषनिवृत्तये वसिष्ठं प्रति सर्वोत्तमतीर्थे पृष्टे सति वसिष्ठेन महर्षिणा गंगानर्मदाद्यनेकतीर्थमाहात्म्यकथनपूर्वकं धर्मारण्यस्य सर्वोत्तमत्ववर्णनपुरःसरमाहात्म्यवर्णनम्. वसिष्ठप्रोक्तं धर्मारण्यक्षेत्रमाहात्म्यं श्रुत्वा श्रीरामचन्द्रेण स्वकीयपरिवारैः सह धर्मारण्यक्षेत्रयात्राकरणम्, तत्र मांडलिकपुरं गत्वा ततस्तत्रत्यैर्वणिग्जनैः सह वसिष्ठवचनाच्छ्रीरामेण शिबिकावाहनं त्यक्त्वा स्वयं पादचारेण सर्वसैनिकैः स्वपरिवारैश्च सह यथाशास्त्रं यात्राविधिं विधाय श्रीरामेश्वरकामेश्वराभिख्याशिवलिङ्गे संस्थाप्य कृतकृत्यतां समासाद्य स्वस्थतया नदीतीरे स्वपरिवारैः सह शयनम्, अथ तत्राऽर्धरात्रसमयेऽकस्मात्कस्याश्चिन्नार्या रोदनं श्रुत्वा तस्या वृत्तं विज्ञातुं तस्याः समीपे निजदूतप्रेषणम्. अथ तया नार्या श्रीरामस्य स्वयमत्रागमने सति निजवृत्तं निवेदयिष्यामीति कथनम्. ...	१४७	१
३२	अथ दूतैः श्रीरामसमीपमागत्य तस्या नार्या वचनस्य कथनम्, ततः श्रीरामेण स्वयं तस्या नार्याः समीपे गत्वा रोदनकारणे पृष्टे सति तया धर्मारण्याधिदेवतया श्रीमातादेव्या श्रीरामप्रशंसापूर्वकं लोहासुरकृतधर्मारण्यनिर्जनत्वरूपनिजदुःखनिवेदनपूर्वकं धर्मारण्ये पुनः पूर्ववद्ब्राह्मणादिसर्वजनसर्वसदाचारकुलाचारसंस्थापनप्रवृत्त्युद्देशेन श्रीरामं प्रति प्रार्थनाकरणम्. श्रीमातावचनं श्रुत्वा श्रीरामेण धर्मारण्यस्य पुनः पूर्ववत्सत्यमंदिरनगरस्थितिस्थापनार्थं जगन्मातुः समीपे प्रतिज्ञां कृत्वा निजदूतान्संप्रेष्य तद्द्वारा यत्रतत्र स्थितांस्तत्रत्यान्सर्वब्राह्मणान्स्तुतिप्रार्थनापूर्वकं महता सत्कारेणानीय तेषां पूजासत्कारं विधाय तेभ्यो वस्त्रालंकारधनप्रभृतिबहुविधदानप्रदानम्.	१४८	१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अध्यायाः	विषयाः	प०	पृ०
३३	अथ श्रीरामेण तेषां तत्क्षेत्रनिवासिनां ब्राह्मणानां पुरतो धर्मारण्यक्षेत्रस्य जीर्णोद्धारं कृत्वा यज्ञपूर्वकं दानप्रदानार्थं प्रार्थनाकरणम्, ततस्तैः सर्वैर्ब्राह्मणैर्मिलित्वा संमंत्र्य श्रीरामं प्रति स्वेषां प्रतिग्रहपराङ्मुखत्वरूपस्वधर्मकथनपूर्वकब्रह्मविष्णुमहेश्वराज्ञावर्तित्ववर्णनम्, ततः श्रीरामेण ब्रह्मविष्णुशिवादिसमस्तदेवानां स्मरणम्, श्रीरामस्य स्मरणमात्रेण ब्रह्मादिसमस्तदेवानामागमनम्, श्रीरामेण तेषां सर्वेषां देवानां पूजादिना सत्कारकरणम्, ततः समस्तदेवैः श्रीरामचन्द्रस्य धर्मारण्यक्षेत्रजीर्णोद्धारेच्छां दृष्ट्वा प्रशंसाकरणम्, ततः श्रीरामचन्द्रेण तेषां ब्रह्मविष्णुरुद्रादिदेवानामनुज्ञां लब्ध्वा श्रीधर्मारण्यक्षेत्रस्य जीर्णोद्धारकार्यारम्भं विधाय विविधवहिःशालागृहशालाब्रह्मशालानां निर्मापणं कृत्वा तासु सर्वासु विविधधनधान्यधातुधेनुरत्नादिवस्तुसंभारान्संपूर्य चतुश्चत्वारिंशच्छतग्रामाणां ब्राह्मणेभ्यः प्रदानकरणम्, षट्त्रिंशत्सहस्रगोभुजवणिग्भ्यश्च श्वेताश्वचामरखड्गप्रदानपूर्वकं ब्राह्मणानां शुश्रूषाकरणायाज्ञाकरणम्, विवाहादिसमये चामरादिराजचिह्नधारणगुरुकुलदेवीपूजाद्यर्थमाज्ञाकरणं च, सपादलक्षमाण्डलीकमण्डलेश्वरवणिजां च चामरखड्गादि प्रदाय द्विजशुश्रूषार्थमाज्ञाकरणम्, ततः स्वकुलस्वामिसूर्यप्रतिष्ठां कृत्वा ब्रह्मदेवश्रीमाताशून्यस्वामिहरिगणाध्यक्षादिदेवतास्थापनपूर्वकं दुर्गकुंडप्रतोलीधर्मवापीकूपप्रभृतिनगरोपयोगिव्यवस्थां विधाय ताम्रपट्टेऽखण्डशासनं विलिख्य त्रैविद्यविद्येभ्यो ब्राह्मणेभ्यः प्रदाय तस्य धर्मारण्यक्षेत्रस्य तन्निवासिनां ब्राह्मणानां वणिजां च निरंतरं रक्षार्थं मारुतेराज्ञाकरणम्, एवं जीर्णोद्धारं कृत्वा कृतकृत्येन श्रीरामेण श्रीमातरं संपूज्य प्रणम्य देवेभ्यो द्विजेभ्यश्चाशीर्ग्रहणम्.....	१५०	१
३४	अथ श्रीरामचन्द्रेण ब्राह्मणेभ्यो दत्तस्य ताम्रपट्टशासनस्य मध्ये विलिखितस्य लेखस्य वर्णनम्, तैर्ब्राह्मणैः श्रीरामचन्द्रदत्तस्य ताम्रपट्टशासनस्याहन्यहनि सेवाकरणम्, ततः श्रीरामचन्द्रस्य तत्रत्यान्ब्राह्मणान्वणिजश्च मारुतिं प्रति सदा स्वेच्छानिवेदनं कर्तव्यं स सदा वः कार्यं करिष्यतीत्यभयवचनप्रदानपूर्वकं ब्राह्मणाज्ञां गृहीत्वाऽयोध्यापुरीं प्रत्यागत्य राज्यकरणवर्णनम्...	१५१	२
३५	अथ श्रीरामेणायोध्यायां कदाचित्कथाप्रसंगे श्रीवसिष्ठमुखारविंदाद्धर्मारण्यक्षेत्रस्थप्रयागत्रिवेणीशुक्लतीर्थसिद्धक्षेत्रकाशीगङ्गाधर्मारण्यसुवर्णाहरिक्षेत्रादिमाहात्म्यं श्रुत्वा धर्मारण्ये पुनर्यात्रां विधातुं स्वपरिजनैः सह गत्वा मोहेरकपुरे स्थित्वा वसिष्ठाज्ञया समाहूतैः कुशिकादिमहर्षिभिः सह यज्ञकृत्यं समाप्यावभृथस्नानकरणम्, अथ तत्र यज्ञान्ते सीताया विज्ञप्त्या मोहेरकपुरस्य पुरतः सीतानाम्ना सीतापुरं निर्माय विदुषे ब्राह्मणाय समर्पणम्, अथ धर्मालयं प्रति गत्वा सीतावचनेन गुरुवाक्येन च श्रीरामचन्द्रेण ब्राह्मणेभ्यः षोडशमहादानकरणपूर्वकं सीतापुरमारभ्य सत्यमन्दिरपर्यंतपञ्चपञ्चाशद्ग्रामदानवृत्तान्तवर्णनम्, तेषु पञ्चपञ्चाशद्ग्रामेषु निवसतां वात्स्यायनाद्यष्टादशसहस्रमहर्षीणां शुश्रूषार्थं षट्त्रिंशत्सहस्रवैश्यानां तच्चतुर्गुणशूद्राणां च प्रदानकरणम्, अथ रामेण विप्राणां प्रार्थनापूर्वकं वैश्यानां शूद्राणां च तेषां विप्राणां शुश्रूषार्थमाज्ञाकरणम्, ततः श्रीरामचन्द्रस्य स्वपुरीं प्रत्यागमनम्, एवं श्रीरामचन्द्रेण धर्मारण्यक्षेत्रस्थतीर्थस्थानजीर्णोद्धारकरणवृत्तान्तवर्णनम्. ...	१५२	२
३६	अथ नारदाय ब्रह्मदेवेन हनुमत्कृतरक्षणप्रभावाद्धर्मारण्यस्य सुस्थितिवर्णनम्, युधिष्ठिरेण व्यासं प्रति धर्मारण्यस्य कदापि भङ्गो जातो न वेति प्रश्नकरणम्, ततो व्यासमहर्षिणा पूर्वकलियुगवृत्तान्तवर्णनम्, तत्र कान्यकुब्जाधिपसार्वभौमाऽऽमनामकराजवृत्तान्तवर्णनम्, तेन स्वगुरुतः कलिधर्मं श्रुत्वा कलिप्रभावेण तेनाऽऽमभूपतिना कलुषितचित्ततया वैष्णवं धर्ममुत्सृज्य बौद्धधर्मस्वीकरणवृत्तान्तः, अथ तस्यामभूपस्य भार्यायामामानाम्न्यां रत्नगङ्गाख्यायाः कन्याया उत्पत्तिः, तस्या रत्नगङ्गाख्यायाः क्षपणकैर्मोहिततया जैनधर्मपरायणतावर्णनम्, ब्रह्मावर्ताधिपतये कुंभीपालाय रत्नगङ्गायाः प्रदानम्, तस्या विवाहे तत्पित्राऽऽमभूपेन तत्पतये धर्मारण्यस्थितमोहेरकाख्यपुरप्रदानम्, ततः कुंभीपालेन भूपेन धर्मारण्यं समागत्य		

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अध्यायाः विषयाः प० पृ०

मोहेरकनगरं निजराजधानीं कृत्वा तस्मिन्निजराज्ये सर्वतो जैनधर्मस्य विस्तारकरणम्, तदा सर्ववर्णानां जैनधर्मे प्रवृत्तिः, श्रीरामचन्द्रसकाशतो लब्धशासनपत्राणां ब्राह्मणानां वृत्तिलोपे सति तैः सर्वैर्मोढब्राह्मणैर्मिलित्वा कान्यकुब्जदेशे सार्वभौममामभूपतिं गत्वा तस्मै रामदत्तशासनपत्रवृत्तांतं निवेद्य तज्जामातृकृत–निजवृत्तिलोपवृत्तान्तनिवेदनम्, तत आमभूपेन तद्द्विजद्वारा निजजामात्रे रामशासनपालनायाज्ञाप्रेषणम्, कुंभीपालापरपर्यायेण कुमारपालाख्येन धर्मारण्यभूभृता सत्यामपि श्वशुरस्याज्ञायां रामशासनस्यानादरं कृत्वा ब्राह्मणेभ्यो वृत्तिहरणार्थमुद्यम्य नास्तिकवादेन मारुतेरानयनेन प्रत्ययो दीयतामिति ब्राह्मणान्प्रति कथनम्, ततस्तैर्ब्राह्मणैः सेतुबंधे स्थितं मारुतिं प्रत्यानेतुं तत्र धर्मस्थाने सर्वैः सह मिलित्वा गमनाय संघशो द्विजमेलापकसभां कृत्वा सर्वेषां संघीभूय रामेश्वरं प्रति मारुत्यानयनाय गंतुं दृढानिश्चयप्रातिज्ञां कृत्वा हस्ताक्षरग्रहणम्, अष्टादशसहस्रब्राह्मणानां रामेश्वरक्षेत्रं प्रति गंतुं प्रवृत्तानां निवारणार्थं सर्वगोभुजेभ्यो राज्ञा कुमारपालेनाज्ञायां कृतायां तैः षट्त्रिंशत्सहस्रैर्जैनधर्मेणालिप्तैः शुद्धैर्गोभुजवणिग्भिर्ब्राह्मणेभ्यः शापभयाद्राज्ञश्च वृत्तिभंगभयान्मौनस्वीकरणम्, ततश्चाडालयस्थानां कतिपयानां जैनधर्मपरायणानां शूद्राणां मध्ये कतिचिच्छूद्राणां ब्राह्मणनिवारणार्थं राज्ञा प्रेषणम्, तैर्जैनधर्मवासनाकलुपितचित्तैः कतिपयैः शूद्रै राजाज्ञया तेषां ब्राह्मणानां समीपं गत्वा तेषां परावर्तनाय हेतुवादेन संभाषणकरणम्, तेषां शूद्राणां हेतुवादवचः श्रुत्वा शिथिलदृढसंकल्पबंधनैरष्टादशसहस्रब्राह्मणानां मध्ये पञ्चदशसहस्रसंख्याकैर्ब्राह्मणै रामशासनानपेक्षाप्रदर्शनपूर्वकं रामेश्वरक्षेत्रं प्रति गमनात्परावर्तनम्, उर्वरितानां च त्रिसहस्रसंख्याकानां द्विजानां दृढनिश्चयेन श्रीरामेश्वरक्षेत्रे मारुतिं प्रति गमनम्, मध्येमार्गमतिश्रमखिन्नानां तेषां समीपे श्रीरामप्रेरणया मारुतेर्वृद्धब्राह्मणरूपेणागमनम्, ब्राह्मणोद्देशजिज्ञासया प्रश्नकरणेन रामदर्शनस्याशक्यताकथनेन च तान्ब्राह्मणान्बहुधा परीक्ष्य ततो हनुमता तेभ्यो निजरूपप्रदर्शनपूर्वकं तान्ब्राह्मणान्सेतुबन्धरामेश्वरं प्रत्यानीय रामेश्वरमहादेवदर्शनादिकं कारयित्वा तद्दर्शनेन स्वात्मनो धन्यतामननपूर्वकं प्रशंसाकरणम्. १५४ १

३७ अथ तैस्त्रिसहस्रब्राह्मणैर्मारुतेः स्तुतिकरणम्, तत्स्तुतिसंतुष्टेन मारुतिना तेभ्यः क्षुन्निवृत्तये भक्षणार्थं फलप्रदानम्, ततस्तेभ्यो ब्राह्मणेभ्योऽभिज्ञानार्थं निजकक्षाद्वयस्थरोम्णां पृथक्पृथक्पुटिकाद्वयं प्रदाय क्रमेण राज्ञः समग्रैश्वर्यदहनार्थं समग्रैश्वर्यपुनरुज्जीवनार्थं च राजद्वारे प्रक्षेपणायाज्ञाकरणम्, ततस्तत्पुटिकाद्वयं समादाय सुप्रसन्नैस्तैर्मोढब्राह्मणैस्तत्र श्रीमारुतिसमीपे श्रीरामतीर्थे त्रिरात्रं स्थित्वा ब्रह्मयज्ञादिकरणम्, ततस्तृतीयदिनरात्रौ हनुमता दशयोजनविस्तीर्णशिलायां तान्द्विजान्स्थापयित्वा शयनार्थं विज्ञप्तिकरणम्, ततो निद्राणेषु तेषु द्विजेषु मारुतिना निजपितुर्वायोर्द्वारा तस्याः शिलाया धर्मारण्यं प्रति संप्रापणम्, अथ धर्मारण्ये तया विशालया शिलया सह तेष्वागतेषु ग्रामस्थितैर्जनैस्तेषां ब्राह्मणानां पुत्रपौत्रैश्च तत्समीपं प्रत्यागमनम्, तेषां त्रिसहस्रब्राह्मणानां सर्वैर्ग्रामस्थितैर्ब्राह्मणैः सह समागमनसंभाषणोत्सवानन्तरं महता समारंभेण स्वस्वसदनं प्रति गमनम्. ... ... १५८ ?

३८ अथ परेद्युः प्रभाते पौर्वाह्णिककर्मसमाप्त्यनन्तरं तैर्ब्राह्मणै राजसभां गत्वा राज्ञे निजग्रामप्रभृतिवृत्तिप्रदानाय श्रीमारुतिसंदेशनिवेदनम्, तद्ब्राह्मणोदितं मारुतिसंदेशं श्रुत्वा राज्ञा कुमारपालेन तदनादरणे क्रियमाणे तैर्ब्राह्मणैर्मारुतिदत्तकक्षारोमपुटिकाद्वयमध्यत एकस्या वामकक्षास्थरोमपुटिकाया राजद्वारे प्रक्षेपकरणम्, तेन प्रक्षेपमात्रेण तत्कालमेव तस्य कुमारपालस्य राज्ञः समस्तस्त्रीपुत्रगजाश्वादिवैभवदहनम्, नग्नक्षपणकानां कुमारपालराज्ञश्च तेनाग्निप्रकोपेनातीव दुर्दशावर्णनम्, ततः कुमारपालेन राज्ञा तेषां ब्राह्मणानां संनिधौ शरणगमनम्, ततस्तैः कृपालुभिर्ब्राह्मणैस्तस्मै भूपाय श्रीमारुतिदत्तदक्षिणकक्षारोमपुटिकायाः प्रदानम्, तस्यां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पुटिकायां राजद्वारे प्रक्षिप्तमात्रायां राज्ञः पुनः समस्तस्त्रीपुत्रगजाश्वादिवैभव-
संजीवनपुरःसरसर्वशांतिप्राप्तिः,ततः संजातश्रीराममारुतिप्रभावप्रत्ययेन तेन राज्ञा
तेभ्यो विप्रेभ्यः पुरावन्नवीनं वृत्तिशासनपत्रं कृत्वा प्रदानम्, स्वराज्यात्सर्वनग्न-
क्षपणकादिवेदवाह्यपाषंडलोकानां निष्कासनम्, अथ षट्त्रिंशत्सहस्रसदाचार-
संपन्नगोभुजवणिजामढवीजानां वणिजां च यथापूर्वं विप्रशुश्रूषार्थं निरूपणम्, अथ
राज्ञा दत्तस्य वृत्तिशासनपत्रस्य सेतुबन्धगतत्रिसहस्रब्राह्मणानामेवाधिकारवर्णनम्,
पञ्चदशसहस्रसंख्याकानां सेतुबंधगमने निजप्रतिज्ञावचनलोपकराणां ब्राह्मणानां
ग्रामवृत्तिसंबंधानधिकारित्वनिरूपणम्, सत्यप्रतिज्ञां कुर्वाणानां त्रयीविद्यसंज्ञकानां
त्रिसहस्रब्राह्मणानां मोहेरकपुरमध्ये निवासकरणम्, स्वप्रतिज्ञाभंगकराणां च
सर्वेषां चातुर्विद्यसंज्ञकानां पञ्चदशसहस्रसंख्याकानां ब्राह्मणानां मोहेरकग्रामाद्ब-
हिः सुखवासस्थाने निवासकरणम्, सर्वैस्तैर्मोढवंशजैस्त्रैविद्यैश्चातुर्वेदिभिश्च ब्राह्मणैः
प्रतिवर्षं पौषशुक्लत्रयोदश्यां कुलदेवतापूजनोत्सवकरणवर्णनम्. १५९ २

३९ अथ कदाचिद्ब्रह्मविष्णुरुद्रादिदेवानां धर्मारण्यं प्रत्यागमनम्, तत्रत्यैः सर्वैर्ब्राह्मणै-
र्गोभुजाख्यवणिग्भिश्च तेषां पूजादिसत्कारकरणम्, तैर्ब्रह्मादिभिर्देवैस्तेषां धर्मार-
ण्यनिवासिनां ब्राह्मणानां पृथक्पृथग्वृत्तिविभागं कृत्वा स्वस्थानं प्रति गमनम्,
ततः पंचपंचाशद्ग्रामेषु पंचदशसहस्राणां चातुर्विद्यानां त्रैविद्यानां च ब्राह्मणानां
निवासवर्णनम्, चातुर्विद्यानां पंचदशगोत्रनामानि, सीतापुरादिपंचपंचाशद्ग्रा-
मनामवर्णनम्, अथ सीतापुरादिपंचपंचाशद्ग्रामस्थाननिवासिचातुर्विद्यब्राह्मणस-
विस्तरगोत्रप्रवरदेवतास्वभावादिवर्णनम्, अथ हनुमत्समीपतः समागतानां
त्रैविद्यब्राह्मणानां शीलायादिसप्तदशस्थाननिरूपणम्, चतुर्विंशतिचातुर्विद्यानां
त्रैविद्यानां च कियत्कालपर्यन्तं विरोध आसीदिति वर्णनम्, अथ केषांचिच्छूद्राणां
भ्रष्टाचारवशेन जातिभेदवर्णनम्, अथ कलियुगे प्राप्ते तत्रत्यानां केषांचिद्वणिजां
मध्ये भ्रष्टाचारवशात्पृथगाचारवशाच्च संबन्धपृथक्करणादिवर्णनम्, अथ पूर्वं
कुमारपालराजभयात्सीतापुरं विहाय सांभ्रमतीतटे निवासार्थं गतानां पुनरा-
गत्य सुखवासकस्थाननिवासपूर्वकं धेनुसंचारणवृत्त्योपजीवनवर्णनम् ततस्तेषां
चातुर्विद्यब्राह्मणानां विधवासु कन्यासु गोपालवृत्तिधारकैर्ब्राह्मणैः संभोगेनो-
त्पादितानां कुमाराणांःकातीभगोलकधेनुजनाम्ना ख्यातिवर्णनम्, अथ हनुमत्सका-
शागतानां ग्रामवृत्त्यधिकारवतां त्रैविद्यानां त्रिसहस्रब्राह्मणानां मध्ये कतिपयैः
कुष्ठिपंगुमूर्खवधिरकाणकुब्जमूकादिभिः स्वजातिमध्ये स्वविवाहार्थं कन्य-
काया अलाभवशाद्यौनसंबंधेन चातुर्विद्यकन्यकाभिः सहोद्वाहेन समुत्पादितानां
मिश्रसंभूतीनां ब्राह्मणानां त्रिदलजसंज्ञावर्णनम्, तेषां वृत्तिविभागपूर्वकज्ञातिभेद-
वर्णनम्. १६१ २

४० अथ पूर्वोक्तप्रकारेण मोहेरकपुरे ज्ञातिभेदसमुत्पत्त्यनन्तरं ब्राह्मणादीनां कलियुगे पापा-
चारभीत्या सर्वसंमत्या परंपरागतधर्माचारकुलाचारस्थानाचारप्रभृतिगोत्रमातृ-
पूजाविध्यादिव्यवस्थापत्रकरणवर्णनम्, सर्वेषां मोढब्राह्मणानां गोत्रप्रवरावटंक-
शाखादिवर्णनम्, धर्मारण्यस्थानां वणिजां शूद्राणां च द्विजशुश्रूषापरायणत्वो-
पदेशवर्णनम्, धर्मारण्यमाहात्म्यफलश्रुतिवर्णनपुरःसरं धर्मारण्यमाहात्म्यसमाप्ति-
वर्णनम्. १६८ १

इति ब्राह्मखण्डे द्वितीयं धर्मारण्यमाहात्म्यम् ॥ (३-२) ॥

अथ ब्राह्मखण्डे तृतीयं ब्राह्मोत्तरखण्डम् ॥ (३-३) ॥

१ अथ नैमिषारण्ये शौनकादिमहर्षीणां सूतमहर्षिं प्रति श्रीशंकरमाहात्म्यजिज्ञासया
प्रश्नकरणम्, तत्र श्रीसूतमहर्षिणादौ शौनकादिमहर्षीन्प्रति श्रीशंकरस्य पञ्चाक्षर-
मन्त्रमाहात्म्यवर्णनम्, सद्गुरोः सकाशान्मन्त्रग्रहणादिविधिवर्णनम्, तत्प्रसंगेन
मथुराधिपतिदाशार्हराजवृत्तान्तवर्णनम्, तत्र दाशार्हभूपेन काशिराजतनयां

CC-0. In Public Domain. Digitization by eGangotri

अध्यायाः	विषयाः	प०	पृ०
	विवाह्य ततो व्रतवशाद्रतमनिच्छंत्या तया सह रिरंसया तां बलादाकृष्य राज्ञा तदंगे स्पृष्टमात्रे तप्तायोगोलवदतितप्ततमं तदंगं तत्क्षणमेव समुत्सृज्य भयं प्राप्य तप्तांगताकारणे पृष्टे तया तस्मै राज्ञे स्वानुष्ठितशिवपञ्चाक्षरीमन्त्रप्रभावानुवर्णनम्, राज्ञश्च सद्गुरोः सकाशाच्छिवपञ्चाक्षरीमन्त्रग्रहणार्थं विज्ञप्तिकरणम्, ततस्तद्वचनमाकर्ण्य राज्ञा गर्गगुरोः सकाशात्कालिन्दीतीरे पुण्यतरोर्मूले श्रीशिवमंत्रोपदेशे गृहीते सति तस्य राज्ञः शरीररन्ध्रेभ्यः शतकोट्यवधिकाकरूपेण पातकानां निर्गमनपूर्वकं भस्मभवनम्, ततः पवित्रदेहस्य तस्य दाशार्हभूपस्य गुरुशुभाशीर्वचनेन चन्दनशीतलांग्या तया निजपत्न्या सह स्वगृहमागत्य सुखोपभोगपूर्वकं राज्यकरणम्, शिवपञ्चाक्षरीमन्त्रमाहात्म्यम्....	१७२	१
२	अथ माघकृष्णचतुर्दशीमहाशिवरात्रिमाहात्म्यवर्णनम्, तत्रोपवासशिवलिङ्गपूजनबिल्वपत्रसमर्पणमाहात्म्यम्, तत्प्रसंगेनेक्ष्वाकुवंशजमित्रसहाख्यराजवृत्तान्तवर्णनम्, तत्र मित्रसहेन राज्ञा मृगयायां गत्वा कस्मिंश्चिद्राक्षसे निहते सति तस्य राक्षसस्यानुजभ्रात्रा छद्मना भृत्यवेषं धृत्वा छिद्रान्वेषणप्रतीक्षणाय राजानं प्रति विनीतरूपेणागमनम्, राज्ञा तस्य राक्षसस्य निजमहानसाध्यक्षतायां नियोजनम्, ततस्तेन राज्ञा कदाचिन्निजकुलगुरौ वसिष्ठे भोजनार्थं निमन्त्रिते सति तद्भोजनपात्रे छद्मवेषधारिणा राक्षसेन मनुष्यमांसपरिवेषणम्, तदमेध्यं भोजनं निरीक्ष्य क्रुद्धेन वसिष्ठमहर्षिणा राज्ञे द्वादशवर्षपर्यंतराक्षसत्वरूपशापप्रदानम्, ततो निष्कारणशापं श्रुत्वा क्रुद्धेन राज्ञा स्वगुरवे वसिष्ठाय प्रतिशापं प्रदातुं हस्ते जलग्रहणम्, ततो राज्ञ्या मदयन्त्या गुरवे शापं प्रदातुमुद्यतस्य तस्य राज्ञः प्रार्थनां कृत्वा निवर्तनम्, ततस्तेन राज्ञा गुरवे शापप्रदानाय हस्ते गृहीतस्य जलस्य निजपादयोः प्रक्षेपणम्, तेन तत्पादयोः कल्माषतापत्त्या तस्य राज्ञः कल्माषपादनामत्वेन प्रसिद्धिः, अथ राक्षसत्वप्राप्त्यनन्तरं वने विचरता कल्माषपादराज्ञा कस्यचिन्मुनिकुमारस्य भक्षणे कृते तत्र तेन सह चरंत्या तस्य मुनिकुमारस्य पत्न्या तस्मै राक्षसत्वं प्राप्ताय कल्माषपादराज्ञे 'स्त्रीसंगे सति ते मृत्युर्भविष्यति' इति शापं प्रदायाग्नौ प्रवेशकरणम्, अथ शापकालावध्यनंतरं शापनिर्मुक्तस्य तस्य स्वस्वरूपं प्राप्य स्वगृहं प्रत्यागमनम्, ततस्तत्पत्न्या मदयन्त्या विप्रपत्नीशापं श्रुत्वा निजवैधव्यभीत्या रतिं याचमानस्य पत्युर्निवारणम्, अथ राज्यभोगनिराशे राज्ञि वनं प्रयाते सति सूर्यवंशस्य प्रतिष्ठायै वसिष्ठेन मुनिना तद्राजपत्न्यां मदयन्त्यां सुतोत्पादनम्, अथ वनं प्रति गतस्य तस्य कल्माषपादराज्ञः पश्चाद्घोराया ब्रह्महत्याया अनुद्रवणम्, ब्रह्महत्योपद्रुतस्य राज्ञो मिथिलोद्याने गौतममहर्षिं प्रति गमनम्, ततो गौतममहर्षिणा राज्ञे ब्रह्महत्यादोषनिवारणाय गोकर्णक्षेत्रे शिवलिङ्गदर्शनं कर्तुं गमनायोपदेशकरणम्, तत्प्रसंगेन गोकर्णेश्वरमाहात्म्यवर्णनम्.	१७३	३
३	अथ गौतमेन गोकर्णेश्वरमाहात्म्यवर्णनप्रसंगेन कस्याश्चिद्वृद्धायाश्चांडाल्याः शिवलोकं प्रति नयनाय समागतैः शिवदूतैः सह स्वस्य संवादवर्णनम्, तत्र शिवदूतान्प्रति गौतमेन चाण्डाल्याः शिवलोकं प्रति नयनकारणे पृष्टे शिवदूतैस्तस्याश्चांडाल्याः पूर्वजन्मवृत्तान्तवर्णनम्, तत्र तस्याः पूर्वजन्मनि ब्राह्मणविधवायाः कामवशेन जातिभ्रष्टतां प्राप्य शूद्ररताया हस्तेन रात्रावज्ञानाद्गोवत्सस्य वधे जाते सति तं प्रकाशे दृष्ट्वा गोवत्सं ज्ञात्वा पश्चात्तापेन 'शिवशिव' इत्युच्चारणम्, अथ तस्याः कालेन मृत्युं प्राप्तायाश्चांडालीत्वप्राप्तिपूर्वकदैवदुर्विपाकवर्णनम्, अस्याश्चांडाल्या अन्नादिभिक्षायाचनार्थं गोकर्णक्षेत्रं प्रति गमने मध्येमार्गं मृत्यूपस्थितौ तत्कृतशिवनामसंकीर्तनप्रभावेण शिवेन तस्याः स्मरणात्तस्याः शिवदूतैर्जीवलेशं समाकृष्य दिव्यतेजोंशेन योजयित्वा शिवलोकं प्रति नयनवर्णनम्, अथ तत्प्रसंगेन राज्ञा गौतमाय शिवलोकस्वरूपे पृष्टे सति गौतममहर्षिणा कल्माषपादापरपर्यायाय मित्रसहाय राज्ञे शिवलोकस्वरूपवर्णनम्, अथ		

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अध्यायाः	विषयाः	प०	पृ०
	गौतमोपदेशेन राज्ञो गोकर्णक्षेत्रं गत्वा श्रीगोकर्णेश्वरमहादेवदर्शनपूजनादिप्रभावेन विमुक्तब्रह्महत्यादिपापतापूर्वकं शिवलोकावाप्तिवर्णनम्.	१७६	२
४	अथ श्रीशिवपूजामाहात्म्यवर्णनम्, तत्प्रसङ्गेन किरातदेशस्थविमर्दनाख्यराजवृत्तान्तवर्णनम्, तस्य राज्ञो निरंतरमधर्मपरत्वेऽपि शिवभक्तिपरत्वम्, अथैकदैकान्ते तस्य पत्न्या कुमुद्वत्या तं राजानं प्रति सुतरां दुराचारपरत्वेऽपि शिवभक्तितत्परत्वकारणजिज्ञासया प्रश्नकरणम्, ततो विमर्दनभूपेन निजपूर्वजन्मवृत्तांतवर्णनम्, पूर्वजन्मनि पंपानगरे सारमेयेन महाशिवरात्र्यां श्रीशिवमन्दिरे महापूजायां प्रवर्तमानायां श्रीशिवमंदिरस्य प्रदक्षिणाकरणम्, तत्रत्यैर्जनैर्द्वारदेशे तस्य सारमेयस्य शरप्रहारेण हननात्प्राणे गते सति श्रीशिवसंनिधिप्रभावाद्राजजन्मप्राप्तिवर्णनम्, श्वयोनौ भक्ष्यलिप्सावासनावशात्सर्वभक्षतानैर्घृण्यादिदुराचारप्रवृत्तिवर्णनं च, ततो राज्ञा राज्ञ्यै तस्या राज्ञ्याः पूर्वजन्मवृत्तान्तवर्णनम्, तत्र तस्याः प्राग्जन्मनि कपोत्या मांसपिण्डमादाय शिवमन्दिरशिखरमारूढाया मांसपिण्डजिघृक्षया तीक्ष्णतुण्डेन गृध्रेण पातनान्मरणे सति श्रीशङ्करस्याग्रे मरणस्य प्रभावाद्राजपत्नीत्वप्राप्तिवर्णनम्, अथ राज्ञीपृष्टेन राज्ञोभयोरपि भविष्यत्सप्तजन्मवृत्तान्तवर्णनपूर्वकं महाशिवरात्र्यां श्रीशिवपूजनप्रभावेण शिवपदप्राप्तिर्भविष्यतीति वर्णनम्.	१७९	२
५	अथ शिवभक्तिमाहात्म्यवर्णनम्, तत्प्रसङ्गेनोज्जयनीस्थचन्द्रसेनराजवृत्तान्तवर्णनम्, तत्र चन्द्रसेनस्य राज्ञः सर्वदा शिवभक्तिपरायणतां निरीक्ष्य मणिभद्राख्येन शिवगणेन मित्रतां कृत्वा तस्मै राज्ञे चिन्तामणिरत्नप्रदानम्, तं चिंतामणिं कंठे धृत्वा राज्यं कृतवतश्चंद्रसेनस्य महीपतेरैश्वर्यमसहमानैस्तच्चिन्तामणिरत्नं तं प्रति याचमानैरन्यभूपालैर्युद्धार्थं संन्यह्यावन्तीपुरीं प्रत्यागत्यासमन्ततोऽवन्तीपुरनिरोधकरणम्, तस्मिन्नवसरे राज्ञश्चंद्रसेनस्य श्रीमहाकालं महेश्वरं प्रति शरणं गत्वाऽहर्निशं श्रीशंकरस्य महापूजाकरणम्, तस्मिन्नवसरे श्रीशिवमंदिरं समागतया पञ्चहायननिजबालकसमेतया कयाचिद्विधवया गोपांगनया राज्ञा कृतं पूजोत्सवं दृष्ट्वा स्वशिविरं प्रति गमने कृते सति पञ्चहायनेन तस्या बालकेन स्वशिविरानिकट एकान्तशून्यस्थाने पाषाणरूपं शिवलिङ्गं संस्थाप्य यथालब्धानि पुष्पाणि गृहीत्वा कृत्रिमान्गन्धाद्युपचारान्कल्पयित्वाऽनन्यमानसेन शिवपूजाकरणम्, अथ तावत्तत्र तया गोपाङ्गनया समागत्य रोषेण तस्याः स्वबालककृतायाः शिवपूजाया विनाशनम्, ततः शंभुपूजाविनाशं दृष्ट्वा बालकस्यातिशोकेनाक्रोशेन मूर्छाप्राप्तिः, ततः कियता कालेन लब्धसंज्ञेन तेन बालकेन तत्रैव स्थाने दिव्यहिरण्मयशिवमन्दिररत्नमयशिवलिङ्गदर्शनम्, ततस्तेन प्रसन्नेन बालकेन श्रीशङ्करस्य पुरतः स्वमातुः शिवपूजाभङ्गजनितापराधक्षमापणम्, अथ सायं रात्रेरागमे श्रीशिवप्रसादात्तस्य सर्वस्य गोपगणशिविरस्य दिव्यकांचनमयत्वं दृष्ट्वा तत्र दिव्यरूपधरां सुप्तां निजमातरमन्तिके गत्वा प्रबोध्य सर्वशिविरस्य काञ्चनमयत्वकथनम्, अथ तया गोप्या तदाश्चर्यं दृष्ट्वा राज्ञः समीपमागत्य तस्मै सर्ववृत्तनिवेदनम्, ततो राज्ञा निजमंत्र्यादिभिः सह तच्छिबिरमागत्य रत्नकांचनमयं तद्दृष्ट्वा तस्य पञ्चहायनस्य गोपबालकस्यालिङ्गनम्, एवमानन्देन तस्यां रात्र्यां व्युष्टायां प्रभाते चारवचनैरासमंतात्पुरीं स्थितैः सर्वैः परराजभिस्तदद्भुतगोपसुतचरितं श्रुत्वा विस्मयमापद्य राज्ञा सह वैरभावं त्यक्त्वा परममैत्रीं कृत्वा तां पुरीं प्रविश्य राज्ञा कृतं सत्कारमुपलभ्य श्रीमहाकालं दृष्ट्वा गोपशिविरं गत्वा तत्र गोपसूनोः प्रसादाय प्रादुर्भूतं शिवमंदिरं दृष्ट्वा हृष्टमानसैस्तैः सर्वैर्भूपैस्तस्मै गोपसूनवे वासोहिरण्यरत्नादिप्रदानं कृत्वा सर्वदेशास्थितगोपानां राज्यप्रदानम्, एतस्मिन्नेवावसरे तत्र वानरेश्वरेण श्रीहनुमता प्रादुर्भूय सर्वेषां भूपानां पूजासत्कारं गृहीत्वा तेषां सर्वेषां मध्ये तं गोपबालकं समाश्लिष्य सर्वान्भूपान्प्रति शिवशनिप्रदोषमाहात्म्यं वर्णयित्वा तस्य गोपकुमारस्य श्रीकरइति नाम कृत्वा शिवाचारं समुपदिश्यान्तर्धा-		

CC-0. In Public Domain. Digitization by eGangotri

अध्यायाः | विषयाः | प० | पृ०

नम्, चन्द्रसेनभूपतेः श्रीकराख्यगोपकुमारस्य च शिवाराधनप्रभावाच्छिवलोकावाप्तिवर्णनम्. १८१ १

६ अथ प्रदोषपूजामाहात्म्यवर्णनम्, तत्प्रसंगेन विदर्भदेशस्थसत्यरथाख्यनृपतिवृत्तान्तवर्णनम्, तत्र सत्यरथाख्यभूपस्य शाल्वभूपैः सह युद्धे मरणम्, तदनन्तरं तस्य गार्भिण्याः पत्न्या यत्नेन नगराद्विनिर्गत्य दुर्गमेऽरण्ये गमनम्, तत्र कस्यचित्तरोर्मूले तस्याः प्रसवे पुत्रस्य जन्म, तदाऽतितृषाक्रान्तायास्तस्याः समीपवर्तिनि सरसि जलप्राशनार्थं प्रवेशे ग्राहेण ग्रसनान्मरणम्, तस्मिन्नवसरे जातमात्रस्य तत्कुमारस्य क्रन्दनध्वनिं श्रुत्वा तत्र प्रदेशे विचरंत्यैकहायनवालकवत्या कयाचिद्विधवयोमानाम्न्या विप्रपत्न्या तमनाथमच्छिन्ननाभिनालं बालकं दृष्ट्वा दयाविष्टचेतस्कतया तत्पोषणार्थं तमादाय स्वगृहं प्रत्यानेतुं सशंकमानसया भिक्षुरूपधारिणः शंकरस्य वचनाद्विश्वासं प्राप्य तस्य वालकस्य पोषणं कर्तुं स्वगृहं प्रत्यानयनम्, अथैकचक्राह्वये ग्रामे निवसंत्या तयोमाख्यया विप्रपत्न्या तस्य वालकस्य स्वसुतेन सहाविशेषवुद्धया भैक्ष्यं संपाद्य पालनं पोषणं च, अथ कदाचित्तस्यां विप्रवनितायां ताभ्यां वालकाभ्यां सह कंचिद्देवालयं देवं द्रष्टुं प्रविष्टायां सत्यां तत्र देवालये स्थितेन शाण्डिल्यमहर्षिणा तौ बालकौ दृष्ट्वा तन्मध्ये तं राजपुत्रं समुद्दिश्य दैवगतेर्विचित्रत्वकथनम्, तद्वचः श्रुत्वा तया विप्रवनितया तस्य स्वानीतस्य वालकस्य कुलवंशादिजिज्ञासया प्रश्ने कृते सति श्रीशाण्डिल्यमहर्षिणा तस्य वालकस्य सविस्तरसकलपूर्वजन्मकर्मवृत्तान्तकथनम्, तत्र पूर्वजन्मनि पाण्ड्यनृपतेः शिवप्रदोषपूजाभङ्गदोषेण जन्मान्तरे शत्रुहस्ततो मरणम्, तत्पुत्रस्यापि प्रदोषे शिवपूजाव्यतिक्रमदोषेण जन्मान्तरे दारिद्र्यप्राप्तिः, तस्य मातुश्च पूर्वजन्मनि च्छद्मना स्वसपत्नीहननदोषेण जन्मान्तरे ग्राहेण ग्रसनान्मरणवर्णनम्, विप्रांगनातनयस्य च पूर्वजन्मनि केवलं प्रतिग्रहमात्रपरायणत्वाद्यज्ञयागदानाद्यभावाज्जन्मान्तरे दारिद्र्यप्राप्तिवर्णनम्, अथ प्रदोषे शिवपूजनस्य माहात्म्यं कथयित्वोभयोरपि तयोर्बालकयोः प्रदोषे शिवपूजनायोपदेशकरणम्. १८२ २

७ अथ तयोमाख्यया विप्रवनितया पृष्टेन श्रीशाण्डिल्यमहर्षिणा प्रदोषव्रतप्रसंगेन सविस्तरयथासांगश्रीशिवपूजाविधानवर्णनम्, अथ तेन शाण्डिल्यमहर्षिणा तयोर्ब्राह्मणकुमारराजकुमारयोर्मध्ये ब्राह्मणकुमारस्य शुचिव्रतइति नामकरणं राजकुमारस्य च धर्मगुप्तइति नामकरणं च कृत्वा तयोः शिवपूजाविधानाय शिवमन्त्रोपदेशकरणम्, ततस्तस्या द्विजांगनायास्ताभ्यां कुमाराभ्यां सह शांडिल्यमुनिं नत्वा समामन्त्र्य गमनम्, ततः प्रभृति ताभ्यां द्विजराजबालकाभ्यां प्रदोषे शिवपूजाकरणपूर्वकं निजमातुराज्ञायां वर्तनम्, अथ कदाचिद्विजपुत्रस्य नदीतीरे विचरतो निधानसुवर्णकलशीप्राप्तौ मात्रा तयोर्वालकयोः समं विभज्य ग्रहणायाज्ञाकरणम्, तदा राजकुमारेण द्विजकुमारलब्धस्य धनस्य स्वेन ग्रहणे स्वस्यानिच्छाप्रदर्शनपूर्वकं स्वभाग्यलब्धेनैव स्वसन्तोषप्रदर्शनम्, अथैकदा वनांतरे विचरद्भ्यां द्विजराजकुमाराभ्यां क्रीडन्तीनां गन्धर्वकन्यानां दर्शनम्, ता दृष्ट्वा तत्संनिधौ गमनाय द्विजकुमारेण निषिद्धेनापि तेन राजकुमारेण तासां गन्धर्वकन्यानां समीपे गमनम्, तं सुन्दरांगं युवानं राजकुमारं दृष्ट्वा तत्समीप एकाकिन्या द्रविकनामकगन्धर्वराजकन्याया अंशुमत्याख्याया आगमनम्, उभयोः परस्परावलोकनेन कामशरनिपीडितयोः परस्परसंवादे गन्धर्वराजकन्यया तस्मै धर्मगुप्ताय राजपुत्राय निजकंठस्थमुक्ताहारं समर्प्य परश्वस्त्वया सहाहं विवाहं करिष्यामि' इति प्रतिज्ञां कृत्वा स्वसखीभिः सह स्वपितुरंतिकं प्रति गमनम्, ततो धर्मगुप्तेन राजकुमारेण शुचिव्रताख्येन द्विजकुमारेण सह स्वभवनं गत्वा स्वमात्रे विप्रभार्यायै वने संजायमानस्य वृत्तस्य निवेदनम्, अथ परश्वोदिने प्राप्ते तेन धर्मगुप्ताख्येन राजपुत्रेण द्विजपुत्रेण सह तस्मिन्वने गमनम्, समागतयोस्तयोः कुमारयोर्गन्धर्वपतिना संमानं कृत्वा श्रीशङ्करस्य स्वं प्रति जातामाज्ञां निवेद्य तस्मै धर्मगुप्ताय राज-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अध्यायाः विषयाः प० पृ०

कुमाराय स्वकन्यायाः पाणिग्रहणविधानपूर्वकं समर्पणम्, विवाहे विविधरत्नगजाश्व-
रथशस्त्रास्त्रसौवर्णवर्मदासदास्यादिवैभवपारिवर्हं प्रदाय स्वयं विमानेन गन्धर्वलोकं
प्रति गमनम्, तयांशुमत्या गन्धर्वकन्यया सह कृतोद्वाहेन तेन धर्मगुप्ताख्येन राजकु-
मारेण तया श्वशुरेण पारिवर्हे दत्तया शूरगंधर्वाणां सेनया सह निजपितृराजधा-
नीविदर्भनगरमागत्य सर्वशत्रून्हत्वा निजपितृपैतामहराज्यपदे राज्याभिषेकपूर्वकम-
धिरोहणम्, तस्यां विप्रवनितायां मातृत्वसम्मानं तस्मिन्विप्रकुमारके च भ्रातृत्व-
सन्मानं कृत्वा तया गन्धर्वतनयया निजभार्यया सह तस्य धर्मगुप्ताख्यस्य राज-
कुमारस्य विदर्भनगरे प्रदोषव्रतप्रभावेण श्रीशङ्करप्रसादान्महता सौख्येन राज्यक-
रणवर्णनम्. प्रदोषव्रतशिवपूजामाहात्म्यवर्णनम्. १८४ २

८. अथ सोमप्रदोषव्रतमाहात्म्यवर्णनम्, तत्प्रसंगेनार्यावर्तस्थचित्रवर्मनृपतिकन्यायाः
सीमन्तिन्या आख्यानवर्णनम्, तत्र तस्याः सीमन्तिन्याः स्वपितुः समीपे समा-
गताभ्यां सामुद्रिकवेदिभ्यां ब्राह्मणाभ्यां सकाशादात्मनो भाविमहाभाग्यं भाविवै-
धव्यं च पृथक्पृथक्छ्रुत्वा वैधव्यप्राप्तिभीत्या मैत्रेय्याख्याया याज्ञवल्क्यमहर्षिपत्न्याः
सकाशात्सौभाग्यवर्धनायोपायश्रवणार्थं शरणगमनम्, अथ तस्यै मैत्रेय्या सोम-
वारे शिवगौरीपूजनविधिकथनम्, अथ तया सीमन्तिन्या राजकन्यया मैत्रेय्यु-
पदिष्टमार्गेण यथासांगसोमवारव्रतारम्भणम्, इन्द्रसेनपुत्रेण चित्राङ्गदेन सह
सीमन्तिन्या विवाहः, अथ श्वशुरालये निवसतस्तस्य चित्राङ्गदस्य कदाचिद्यमुनां
नदीं तर्तुं तरीमारूढस्य तर्या मध्येप्रवाहमकस्मान्निमज्जनम्, तर्यामारूढानां स-
र्वेषां मरणम्, तस्य चित्राङ्गदस्य राजपुत्रस्य तरीनिमज्जनेन मरणं विज्ञाय चित्र-
वर्मादीनां शोककरणम्, एवं सीमन्तिन्या वैधव्यदशाप्राप्तिः, प्राप्तायामपि वैध-
व्यदशायां सीमन्तिन्या यथावद्वर्षत्रयपर्यंतं सोमवारव्रतानुष्ठानकरणम्, अथ
यमुनाजलेऽधोऽधो निमज्ज्यमानस्य चित्राङ्गदस्य क्रीडन्तीभिर्नागकन्याभिः पाताले
तक्षकपुरं प्रति नीत्वा तक्षकराजं प्रति निवेदनम्, तक्षकेण तस्य चित्राङ्गदस्य

अध्यायाः विषयाः प० पृ०

सत्कारपूर्वकमुपास्यदेवताविषयकप्रश्नादिकरणम्, चित्रांगदेन स्वोपास्यभगव-
च्छ्रीशङ्करभक्तिकथनम्, तद्वचनं श्रुत्वा प्रसन्नेन तक्षकेण तस्य चित्राङ्गदस्य बहु-
सत्कारकरणम्, ततश्चित्राङ्गदस्य स्वगेहं प्रति गंतुं प्रार्थनां श्रुत्वा तक्षकेण तं तत्र-
त्यकल्पवृक्षरसान्नभोजनेनाप्याययित्वा बहुधनं दत्त्वा तथैकं राक्षसमेकं पन्नगं
च साहाय्यार्थं दत्त्वा कामगममव्याहतगतिमश्वं च वाहनाय प्रदायाशीर्भिर-
भियुज्य चित्रांगदस्य स्वसदनं प्रति गन्तुमाज्ञादानम्, ततश्चित्राङ्गदस्य
तक्षकराजं प्रणम्याज्ञां गृहीत्वा हयमारुह्य धनं गृहीत्वा साहाय्यार्थं दत्ताभ्यां
ताभ्यां राक्षसपन्नगाभ्यां सह ततः पातालात्प्रस्थाय यमुनाजलात्तूर्णमुन्मज्ज्य
यमुनातीरे वाजिनमारुह्य विहारकरणम्, अथैतस्मिन्नेव समये स्वसखीभिः सह
यमुनायां स्नातुमागतया सीमन्तिन्या तस्य दर्शनम्, ततः सखीमुखात्सीम-
न्तिनीवृत्तान्तश्रवणं कृत्वा स्वयं तां सीमंतिनीं प्रति 'अस्माभिस्तव पतिर्दृष्टस्त्वां प्रति
स शीघ्रमेवागमिष्यति त्वं समाहितमना भव शोकं मा कार्षीर्वयं कामगमाः
सिद्धानाम देवाः' इत्याश्वास्य तस्य चित्राङ्गदस्य स्वपितुर्नगरं प्रति गमनम्,
तत्र नष्टपुत्रस्येन्द्रसेनस्य पितुर्दायादैः कृतं राज्यपदभ्रंशं श्रुत्वा चित्रांगदेन
नागपुत्रद्वारा दायादान्प्रति राज्यपदत्यागाय संदेशप्रेषणम्, नागपुत्रप्रोक्तं चित्रा-
ङ्गदसंदेशं श्रुत्वा सर्वैर्दायादैरिंद्रसेनाय राज्यपदं दत्त्वा पुत्रागमनवृत्तान्तं श्राव-
यित्वा निजापराधक्षमापणाय प्रार्थनां कृत्वा प्रसादनम्, ततश्चित्रांगदेन निज-
मंदिरं गत्वा स्वपित्रोर्वन्दनम्, पित्रोः पुत्रस्य प्राप्त्याऽत्यानन्दावाप्तिः, अथेन्द्र-
सेनेन राज्ञा निजपुत्रस्य पातालात्सुखागमनरूपमङ्गलमयवृत्तान्तनिवेदनाय
चित्रवर्मनृपतिं प्रति दूतप्रेषणम्, दूतमुखान्निजजामात्रागमनवार्तां श्रुत्वा चित्र-
वर्मनृपतेरत्यानन्दमङ्गलावाप्तिः, ततो राज्ञा निजकन्यायै सीमन्तिन्यै सहर्ष-
तया पत्युर्मङ्गलमयवार्तानिवेदनम्, ततश्चित्रवर्मणेन्द्रसेनसुतं चित्राङ्गदं समा-
हूय पुनः सविस्तरविवाहविधिं विधाय तस्मै चित्रांगदाय निजकन्यायाः

CC-0. In Public Domain. Digitization by eGangotri

अध्यायाः | विषयाः | प० | पृ०

सीमन्तिन्या महता ससारम्भेण प्रदानम्, अथ पातालानीतभूषणादिवस्तुभिश्चित्रांगदेन स्वपत्न्याः संतोषकरणपूर्वकं तां समादाय स्वनगरीमागत्य महताऽऽनन्देन राज्यसुखोपभोगकरणम्, एवं सोमवारे शिवगौरीपूजनव्रतप्रभावाच्चित्राङ्गदसीमन्तिन्योः सर्वाभीप्सितसुखावाप्तिवर्णनम्. १८७ २

९ अथ सीमन्तिनीकृतसोमवारव्रतप्रभावकथनप्रसङ्गेन सुमेधःसामवदाख्ययोर्द्वयोर्वेदमित्रसारस्वताख्यब्राह्मणद्वयस्य पुत्रयोर्वृत्तान्तवर्णनम्, तत्र सुमेधःसामवतोर्ब्राह्मणपुत्रयोर्गुरुकुले सांगविद्याध्ययनानन्तरं पित्राज्ञया निजविवाहार्थं धनसंपादनाय विदर्भाधिपतेः समीपे गमनम्, अथ विदर्भाधिपतिना याचमानौ तौ द्विजसुतौ निरीक्ष्य किञ्चिद्विहस्य–'युवां द्वयोर्मध्य एकं स्त्रीवेषेण वेषयित्वा विप्रदंपती भूत्वा सीमंतिन्याः सत्कारमुपलभ्य मत्समीपमागच्छतं तदाहं युवाभ्यां बहु धनं दास्यामि' इत्युक्ते सति राजाज्ञाया अलंघनीयतां मन्यमानाभ्यां ताभ्यां द्विजकुमाराभ्यां सामवन्तं प्रति कृत्रिमस्त्रीवेषेण वेषयित्वा द्विजदंपतिस्वरूपेण नैषधदेशं प्रति गमनम्, ततश्च सोमवारदिने सीमन्तिन्या तयोर्मध्ये पुरुषस्य महादेवबुद्ध्या स्त्रियाश्च पार्वतीबुद्ध्या पूजाकरणम्, तया सीमन्तिन्या पार्वतीबुद्ध्या पूजितस्य स्त्रीवेषधारिणः सामवदाख्यस्य द्विजपुत्रस्य तत्क्षणमेव सत्यतया स्त्रीत्वप्राप्तिः, ततश्च सीमन्तिनीदत्तं रत्नस्रग्वस्त्रभूषणादि गृहीत्वा प्रयातयोर्द्विजकुमारयोर्मध्ये सामवतः स्त्रीत्वप्राप्त्या कामविकारोत्पत्तिः, ततस्तया सामवत्या जातया कामविहारार्थं सुमेधसः प्रार्थनाकरणम्, ततः सुमेधसा निजमित्रस्य स्त्रीत्वप्राप्तिं लक्षणैरेकान्ते स्वरूपेण च दृष्ट्वा सुरतार्थं प्रार्थयानां तां विवेकवचनैः कथंकारं सान्त्वयित्वा तां सामवतीं समादाय स्वगृहं समानीय स्वपित्रे तत्पित्रे च सर्ववृत्तान्तनिवेदनम्, अथ शोकाकुलाभ्यां तत्पितृभ्यां तौ निजपुत्रौ समादाय वैदर्भभूपं प्रति गत्वा तस्मै 'त्वद्दोषेण सामवतः स्त्रीत्वप्राप्तिः' इति कथनम्, ततस्तेन महीभृता तस्य द्विजपुत्रस्य स्त्रीत्वनिवृत्तिपूर्वकपुंस्त्वप्राप्तये भरद्वाजमुनेरुपदेशेन भरद्वाजमुनिना ताभ्यां द्विजकुमाराभ्यां च सहाम्बिकाभवनं गत्वा श्रीजगदम्बाया उपासनाकरणम्, ततः प्रसन्नया जगदम्बया प्रादुर्भूय स्वभक्तकृतस्यान्यथाकर्तुमशक्यतां कथयित्वा सामवत्याः सुमेधसा सह पत्नीत्वेन कामसुखोपभोगार्थमाज्ञां कृत्वा तत्पितुः सारस्वतब्राह्मणस्य पूर्वसुतापेक्षयाऽधिकगुणवत्सुतो भविष्यतीति वरप्रदानम्, ततस्तेन सारस्वतब्राह्मणेन तस्याः सामवत्याख्याया निजसुतायास्तस्मै सुमेधसे विवाहविधिना प्रदानकरणम्, तयोः सुमेधःसामवत्योर्गार्हस्थ्यधर्मसेवनपूर्वकं कामसुखोपभोगकरणवर्णनम्, इत्थं सीमंतिनीकृतशिवभक्तिमाहात्म्यवर्णनम्. १९१ २

१० अथ शिवमाहात्म्यवर्णनप्रसंगेनावन्तीविषयस्थमन्दराह्वयब्राह्मणवृत्तान्तवर्णनम्, तत्र तस्य मन्दराख्यब्राह्मणस्य विषयासक्तिपरायणतया पिङ्गलाख्यवेश्यासद्मनि नित्यं निवासकरणम्, अथैकदा तस्या वेश्यायाः सद्मनि तस्मिन्द्विजे निवसति सति धर्मात्मन ऋषभनाम्नः शिवयोगिन आगमनम्, तस्यर्षभयोगिनस्ताभ्यां मन्दरद्विजपिंगलावेश्याभ्यां पादप्रक्षालनादिपादसंवाहनान्तसम्यक्छुश्रूषाकरणेनैकरात्रपर्यंतमतिसन्तोषसमुत्पादनम्, अथ द्वितीयेऽह्नि यात्राप्रसंगेनागतस्य तस्यर्षभयोगिनो गमनम्, ततः कालान्तरेण मन्दरद्विजस्य मरणानन्तरं दशार्णाधिपतेर्वज्रबाहोर्भूपालस्य भार्यायां जन्म, तत्रादौ गर्भावस्थायामेव तस्या नृपभार्याया मरणार्थं सपत्नीभिश्छद्मना विषे दत्तेऽपि दैवयोगान्न मरणम्, परंतु विषजन्यदाहादत्यन्तक्लेशावाप्तिः, तस्यां नृपभार्यायां समुत्पन्नस्य बालकस्य विषोत्पन्नदाहेनातिक्लेशप्राप्तिः, उभयोरपि मातापुत्रयोर्गरयोगप्रभावेणातिक्लेशं समवेक्ष्य राज्ञा वैद्यद्वारा भेषजे कृतेऽप्यस्वास्थ्यं दृष्ट्वा 'नूनमेतौ नरकादागतौ' इति स्वबुद्ध्या निश्चित्य निजसारथिद्वारा रथेन विजनेरण्ये तयोः परित्यागकरणम्, अथ तेन शिशुना बालकेन सह वने विचरंत्या तया राज्यपत्न्या दैवयोगात्सुदूरे लब्धेन वणिङ्मार्गेण वैश्यनगरं प्रति गमनम्, अथ तन्नगरस्वामिनः पद्माकराख्यवैश्यस्य दास्या

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अध्यायाः	विषयाः	प०	पृ०
	तां नृपांगनां विदित्वा स्वस्वामिनः पद्माकरवैश्यस्य समीपे तस्या नयनम्, ततः पद्माकरवैश्येन तस्या राजपत्न्याः सांत्वनं कृत्वा सत्कारपूर्वकं स्वगृहे स्थापनम्, अथ तत्र वैश्यसद्मनि तस्यां राजपत्न्यां निवसन्त्यां सत्यां कदाचिद्दैवयोगेन तस्या बालकस्य व्रणादिरोगेण मरणम्, तदानीं तया राजपत्न्यातिविलापकरणम्, दैवयोगात्तस्मिन्नेव दिने तस्यैव पद्माकरवैश्यस्य गृहे पूर्वोक्तस्यर्षभाख्यशिवयोगिनो यात्राप्रसंगेनागमनम्, तेनर्षभशिवयोगिना वैश्यकृतं पूजासत्कारं गृहीत्वा पुत्रमरणेन भृशं शोचन्त्यास्तस्या राजपत्न्याः समीपं गत्वा तां प्रति परमार्थबोधोपदेशेन शिवभक्तिकरणायाज्ञाकरणपूर्वकं तस्या मृतस्य पुत्रस्य समीपं गत्वा शिवमन्त्राभिमन्त्रितभस्मना तस्य प्राणसंजीवनकरणम्, ततो बालके संजीविते सति राज्ञ्याः सर्वजनानां चात्यानन्दप्राप्तिः, तत ऋषभशिवयोगिना तयोर्मातापुत्रयोर्देहयोः शिवमन्त्राभिमन्त्रितेन भस्मना स्पर्शनम्, तद्भस्मस्पर्शमात्रेण तयोर्मातापुत्रयोर्दिव्यदेहत्वप्राप्तिः, ततस्तस्य बालकस्यर्षभशिवयोगिना भद्रायुरिति नामकरणपूर्वकमुभयोरपि भाविभाग्योदयं वर्णयित्वा शिशोर्विद्याप्राप्तिपर्यन्तं पद्माकरवैश्यस्य गृहे निवासायाज्ञां कृत्वा यात्राकरणार्थं स्थानांतरं प्रति गमनम्.	१९३	२
११	अथ पिङ्गलावेश्यायाः श्रीशिवभक्तर्षभाख्यशिवयोगिपूजनसत्कारप्रभावेण जन्मान्तरे चित्राङ्गदराजपत्न्यां सीमन्तिन्याख्यायां जन्मवर्णनम्, अथ भद्रायोः पद्माकरवैश्यगृहे तस्य पद्माकरवैश्यस्य पुत्रेण सुनयेन सह बाल्यतः सख्यपूर्वकं वृद्धिः सहक्रीडादिकं च, अथ तयोर्वैश्यकुमारराजकुमारयोः पद्माकरवैश्येन ब्राह्मणद्वारोपनयनादिसंस्कारकरणपूर्वकं विद्याध्ययनसंपन्नताकरणम्, अथ भद्रायो राजकुमारस्य षोडशे वर्षे संप्राप्ते तत्समीपे पूर्वोक्तस्यर्षभयोगीशस्यागमनम्, तस्यर्षभयोगिनो भद्रायुमात्रा स्वपुत्रेण सह वन्दनकरणं भद्रायोः सन्मार्गोपदेशाय प्रार्थनाकरणं च, तत ऋषभशिवयोगिना भद्रायुषे राजपुत्राय श्रुतिस्मृतिपुराणप्रोक्तसनातनवर्णाश्रमानुरूपधर्मोपदेशकरणम्, अथ सर्वसंकटविमुक्तये श्रीशिवसेवोपदेशकरणम्.	१९५	२
१२	अथ श्रीमतर्षभशिवयोगिना सर्वरक्षाकरश्रीशिवकवचस्तोत्रोपदेशं कृत्वा तस्मै भद्रायुनाम्ने राजपुत्राय विजयकरं सर्वशत्रुविनाशकं शंखं प्रदाय शिवमन्त्रमन्त्रितेन भस्मना तदंगं स्पृष्ट्वा तस्मै द्वादशसहस्रगजबलं दत्त्वा दर्शनमात्राच्छत्रुविजयकरं खड्गं प्रदाय करणीयकृत्योपदेशं कृत्वा शुभाशीर्वचनेन समनुशास्य ताभ्यां पूजासत्कारमवाप्याभीष्टदेशं प्रति गमनम्.	१९६	२
१३	अथ ततः कदाचित्स्वल्पीयसैव समयेन तस्य शिवभक्तिं प्रकुर्वतो भद्रायोः पितुर्वज्रबाहुनामकस्य दशार्णदेशभूपालस्य शत्रुणा मगधराजेन महता सैन्येन सह युद्धायागमनम्, ततो मगधराजेन दशार्णदेशभूपेन सह युद्धं कृत्वा युद्धे तं निर्जित्य तस्य सर्वं सैन्यं निर्णाश्य दशार्णदेशराष्ट्रं स्वायत्तीकृत्य तं रथे बद्ध्वा स्वदेशं प्रति गमनम्, इत्थं वैश्यनगरे निवसता भद्रायुराजपुत्रेण जनमुखान्निजपितृराष्ट्रविप्लववार्तां श्रुत्वा पद्माकरवैश्यपुत्रेण सुनयेन सहायेन हयमाधिरुह्य महता जवेन निजपितृपालितं दशार्णदेशं मगधेश्वराख्यशत्रुभूपसैनिकैर्विध्वस्तं निरीक्ष्य ततः क्रोधावेशेन तूर्णमेव शत्रुसेनां प्रविश्य शिवयोगिदत्तविजयशंखमाध्माय विजयखड्गं चोद्यम्य सर्वाञ्छत्रुगणान्मूर्च्छनया विमोह्य बहुशः शत्रून्हत्वा शत्रुभी रथे निबद्धस्यात्मनः पितुर्बन्धान्मोक्षयित्वा शत्रुवशगाः सर्वाः स्वपितृपत्नीः पुरवासिजनानां पत्नीश्च कन्याश्च गोधनादीनि च मोचयित्वा स्वपित्रादीन्सर्वानाश्वास्य स्वपुर्यां संप्रेषणम्, ततोऽरिसैन्ये प्रवेशं कृत्वा तेषां स्त्रीगजाश्वरथदासदास्यादिसर्वसंपत्तिं हृत्वा मगधेशं पराजित्य समन्त्र्यादिपरिजनं तं निर्बध्य च स्वपुरीं प्रत्यागमनम्, अथ तेन भद्रायुना सुव्यक्तस्वनामाद्यकथयित्वैव सामान्यतः क्षत्रियपुत्रत्वकथनपूर्वकं स्वपितुः पादाभिवन्दनकरणम्, अथ पितुर्नमनानंतरं तेन सुनयाख्येन वैश्यपुत्रेण सह भद्रायुणा वैश्यपुरं प्रत्यागत्य		

CC-0. In Public Domain. Digitization by eGangotri

अध्यायाः	विषयाः	प०	पृ०
	निजमात्रे तस्मै पद्माकराख्याय वैश्यवर्याय च सर्वयुद्धादिवृत्तान्तनिवेदनम्, अथ द्वितीयेऽह्नि चन्द्रांगदापरपर्यायं चित्राङ्गदं नृपं प्रति तस्य पूर्वोक्तस्यर्षभाख्यशिवयोगिन आगमनं चित्रांगदं प्रति भद्रायुषे राजपुत्राय कन्याप्रदानार्थमुपदेशपूर्वकमाज्ञाकरणं च, तत ऋषभयोगिवचनाच्चित्राङ्गदेन भूपेन भद्रायुषमाहूय तस्मै कीर्तिमालिन्याख्यां निजकन्यां प्रदाय वैवाहिकविधिकरणाय समारम्भकरणम्, अथ तत्पितुर्वज्रबाहोः समीपे दूतं प्रेषयित्वा पुत्रस्योद्वाहार्थं सत्कारपूर्वकं निमन्त्रणम्, वज्रबाहोः सपरिवारस्य तत्र निषधेशराजधान्यामागमनम्, तस्यागतस्य पितुर्वज्रबाहोर्भद्रायुना पुत्रेणाभिवादनम्, तथाप्यविज्ञाततत्कुलनाम्ना वज्रबाहुना तस्य भद्रायोर्जिज्ञासया प्रश्ने कृते सति निषधेश्वरेण वज्रबाहुं प्रति 'अयं त्वया मात्रा सह वने त्यक्तस्तवैव पुत्रो भद्रायुनामास्ति' इति तस्य वृत्ते कथिते सति वज्रबाहोर्निजकर्मणः ससुतपत्नीत्यागरूपस्य लज्जया गर्हणानन्तरं प्रतापशालिनिजपुत्रप्राप्त्याऽत्यन्तानन्दप्राप्तिः, अथ चित्राङ्गदेन भूपेन कृतं पूजासत्कारमादायात्मनोऽग्रमहिषीं तां भद्रायोर्मातरं स्वस्नुषया समेतं भद्रायुषं स्वपुत्रं च गृहीत्वा वज्रबाहोर्निजपरिवारजनैः सह महता समारम्भेण सानन्दं स्वपुरीं प्रत्यागमनम्, ततो भद्रायुना पूर्वं पितुराज्ञया यौवराज्यं कृत्वा पितुः स्वर्गारोहणानन्तरं सर्वभूमण्डलराज्यकरणम्, राज्याधिरोहणानन्तरं भद्रायुना पूर्वं निबद्धस्य हेमरथाख्यमागधभूपस्य मैत्रीं संधाय बन्धनान्मोचनम्, ततो भद्रायुना स्वपत्न्या कीर्तिमालिन्या सह सुखोपभोगपूर्वकराज्यकरणम्, इत्थं पूर्वजन्मकृतशिवयोगिपूजासत्कारप्रभाववर्णनम्.	१९८	१
१४	अथ प्राप्तराज्यसिंहासनस्य भद्रायोः कदाचिन्निजभार्यया सह वनं गत्वा स्वच्छन्दविहारकरणम्, तस्मिन्नेव समये तस्मिन्वने कयोश्चिद्द्विजदम्पत्योर्मध्ये व्याघ्रेणानुगत्योपद्रवे क्रियमाणे ताभ्यां निजरक्षणार्थमुच्चैः शब्देन राज्ञः प्रार्थनाकरणम्, तदैव व्याघ्रेणागत्य द्विजपत्न्या ग्रहणम्, तस्योपरि भद्रायुना कृतेऽपि शस्त्रप्रहारे सर्वशस्त्राणां व्यर्थीभावः, व्याघ्रेण च द्विजपत्न्यां हृतायां द्विजेन शोकपूर्वकं राज्ञो धिक्कारकरणम्. अथ राज्ञा भद्रायुणा व्याघ्रनाशितपत्नीकस्य तस्य द्विजस्य सान्त्वनाय बहुविधप्रार्थनाकरणम्, ततो द्विजेन राजानं प्रति निजकामोपभोगशान्त्यर्थं राजपत्नीं प्रति याचनाकरणम्, ततो भद्रायुणा तस्मै ब्राह्मणाय निजपत्नीं दत्त्वाग्निं प्रज्वाल्य शिवं ध्यात्वाऽग्नौ पतनायोद्यमनम्, तस्मिन्नेवावसरे तद्भक्तिपरीक्षार्थं द्विजरूपधारिणा तेनैव श्रीशंकरेण स्वस्वरूपेण प्रादुर्भवनम्, तस्य श्रीशंकरस्य भद्रायुणा स्तुतिकरणम्, तत्स्तुतिप्रसन्नेन भगवता श्रीशंकरेण सपत्नीकाय भद्रायुषे वरप्रदानम्, भद्रायुषः शिवप्रसादाद्राज्यसुखोपभोगप्राप्तिवर्णनम्, अन्ते च पुत्रेषु राज्यं विन्यस्य भद्रायुषः शिवसायुज्यप्राप्तिः, भद्रायुश्वशुरस्य चित्राङ्गदस्य निजपत्न्या सीमन्तिन्या सह शाम्भवपदावाप्तिवर्णनम्, इत्थं शिवभक्तिमाहात्म्यवर्णनम्.	२००	१
१५	अथ भस्ममाहात्म्यवर्णनम्. तत्प्रसङ्गेन वामदेवाख्यशिवयोगिनो वृत्तान्तवर्णनम्, तत्रैकदा क्रौञ्चारण्ये विचरंतं तं वामदेवशिवयोगिनं प्रति भक्षितुं समागच्छता ब्रह्मराक्षसेन निजदोर्भ्यां दृढनिपीडने कृते तदंगस्पर्शमात्रादेव तस्य सद्यो विध्वस्तकल्मषताप्राप्तिः, ततो निजपूर्वदुष्कर्मस्मरणेन निर्विण्णमानसेन तेन ब्रह्मराक्षसेन वामदेवशिवयोगिनं प्रति निजपूर्वपञ्चविंशतितमजन्माचरितदुष्कर्मतत्परिपाकयाम्ययातनाब्रह्मराक्षसत्वप्राप्त्यादिवर्णनम्, ततश्च वामदेवं प्रति 'त्वद्देहस्पर्शमात्रेण मे पूर्वसहस्रजन्मस्मृतिर्जातास्ति, मम चित्तं च सुप्रसन्नं वर्ततेऽत एतादृशः प्रभावस्त्वया कथं लब्धः' इति प्रश्ने कृते वामदेवशिवयोगिना निजदेहलिप्तस्य भस्मनोऽयं प्रभाव इति कथयित्वा भस्मसामर्थ्यवर्णनम्, तत्प्रसंगेन च द्रविडदेशस्थदुराचारवर्तिब्राह्मणस्य प्रेतोपरि भस्मलिप्तपादस्य शुनोऽङ्घ्रिलग्नभस्मस्पर्शनमात्रेण तस्य ब्राह्मणस्य शिवलोकावाप्तिवृत्तान्तवर्णनम्, इत्थं वामदेवोक्तं		

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अध्यायाः	विषयाः	प०	पृ०
	भस्ममाहात्म्यं श्रुत्वा ब्रह्मराक्षसेन पुनर्विस्तरेण भस्ममाहात्म्यं श्रोतुं वामदेवं प्रति प्रश्नकरणम्.	२०१	२
१६	अथ वामदेवेन सविस्तरं भस्ममाहात्म्यं वर्णयितुमुपक्रमे क्रियमाणे मन्दरशैलेन्द्रे श्रीमहेशं प्रति शक्रादिसर्वदेवानामागमनवर्णनम्, तत्र महोत्सवे सर्वदेवै रत्नसिंहासनोपरि स्थितस्य भगवतो महेश्वरस्योपासनापूर्वकं स्तुतिकरणम्, ततश्च सुप्रसन्नं श्रीरुद्रदेवं प्रति सनत्कुमारेण महर्षिणा वेदशास्त्रोक्तधर्मविषयप्रश्नप्रसङ्गेन त्रिपुण्ड्रधारणविधिजिज्ञासया प्रश्नकरणम्, तत्कृतं प्रश्नमाकर्ण्य भगवता श्रीरुद्रदेवेन सविस्तरभस्मत्रिपुण्ड्रधारणमाहात्म्यवर्णनम्.	२०३	१
१७	अथ भस्ममाहात्म्यकथनप्रसंगेन शवरवृत्तान्तवर्णनम्. तत्र पांचालदेशीयराजपुत्रस्य सिंहकेतोः कदाचिन्मृगयार्थं वने विचरतः साहाय्यार्थं गतवता केनचित्तदनुचरेण शवरेण वने कस्यचित्स्थंडिलस्योपरि भिन्नपिण्डकं शिवलिङ्गं दृष्ट्वा तद्गृहीत्वा राजपुत्रस्य सविधे गत्वा तं प्रत्येव शिवलिङ्गपूजाविधिजिज्ञासया प्रश्नकरणम्, ततस्तेन राजपुत्रेण तं प्रति परिहासेन नित्यं चिताभस्मपूर्वकोपचारैः शिवपूजाविध्युपदेशकरणम्, तेन शवरेण च स्वगृहे तल्लिंगं नीत्वा भक्तिभावपूर्वकं राजपुत्रोक्तमार्गेणैव नित्यं चिताभस्मानीय श्रीशंकरस्य यथोपचारैः पूजाकरणम्, अथैकदा तस्य शवरस्य शिवपूजार्थं चिताभस्मनोऽलाभाच्चिन्तातुरत्वे सति तस्य पत्न्या शवर्या स्वभर्तारं सांत्वयित्वा निजगृहं वह्निना सन्दीप्य तन्मध्ये स्वयं प्रविश्य स्वशरीरदहनम्, ततस्तेन शवरेण तस्य दग्धस्वगृहस्य समीप एव तेन निजपत्नीदेहदहनजनितेन चिताभस्मना श्रीशंकरस्य यथासाङ्गपूजां विधाय पूजावसानान्ते श्रीशिवप्रसादग्रहणार्थं निजपत्न्याः शवर्याः प्रतिदिनवदाह्वाने कृते सति तदानीमेव तत्पृष्ठे तस्याः शवर्याः प्रतिदिनवद्यथापूर्वमागत्य स्थितिः, तस्य गृहस्य च यथापूर्वं स्थितिः, ततश्चकितेन तेन भार्यया सह संभाषणे क्रियमाणे दिव्यविमानप्राप्तिः, तद्विमानमारुह्य तयोः शवरदंपत्योः शिवलोकं गत्वा शिवसारूप्यमुक्तिप्राप्तिः, इत्थं दृढश्रद्धामाहात्म्यवर्णनम्.	२०४	२
१८	अथ सर्वार्थसिद्धिप्रदोमामहेश्वरव्रतमाहात्म्यवर्णनम्, तत्प्रसंगेनानर्तदेशस्थितवेदरथाख्यद्विजकन्यायाः शारदानाम्न्याश्चारित्रवर्णनम्, तत्र तस्याः शारदायाः पत्युः पद्मनाभद्विजस्य सर्पदंशेन मरणे सति प्राप्तवैधव्यायाः शारदायाः स्वपितुर्गृहे निवासे कदाचित्तत्र पितृगृहे समागतस्य नैध्रुवाख्यमहर्षेः समीपे गत्वा तया शारदया तं वृद्धमन्धं नैध्रुवमुनिं प्रति नमस्कारे कृते सति तेन मुनिना तस्यै 'सौभाग्यवती पुत्रवती भव' इति मङ्गलाशीःप्रदानम्, ततो ज्ञाततद्वैधव्यवृत्तान्तेन नैध्रुवमुनिना तस्यै शारदायै सौभाग्यप्राप्तये सविस्तरोमामहेश्वरव्रतविधानोपदेशकरणम्, ततस्तया शारदया मुनिप्रोक्तोमामहेश्वरव्रतग्रहणम्, ततस्तस्याः पितृमात्रादिभिः शारदाया वैधव्यदुःखविनाशाय नैध्रुवमहर्षेस्तस्या व्रतस्य यथासांगसमाप्तिपर्यन्तं निवासकरणाय प्रार्थनाकरणम्, तत्प्रार्थनया नैध्रुवमहर्षेः शारदाकृतस्य व्रतस्य यथासांगसमाप्तिपर्यन्तं तत्रैव मठेऽवस्थितिकरणम्.	२०६	१
१९	अथ शारदया तस्य स्वगुरोर्नैध्रुवमहर्षेः संनिधौ स्थित्वैकवर्षपर्यन्तं यथाविध्युमामहेश्वरव्रताचरणम्, ततः संवत्सरांते तस्य व्रतस्योद्यापनकरणम्, उद्यापनदिनस्य रात्रौ तेन नैध्रुवमहर्षिणा तया शारदया सह जपध्यानतपोभिः श्रीजगदम्बायाः संतोषकरणम्, तस्मिन्नवसरे तयोर्भक्तिप्रभावाच्छ्रीजगदम्बायाः प्रादुर्भावः, तदानीमेव श्रीजगदम्बाप्रसादात्तस्यान्धस्य नैध्रुवमहर्षेश्चक्षुर्द्वयप्राप्तिः, ततो नैध्रुवमहर्षिणा तया शारदया सह जगदम्बायाः स्तुतौ कृतायां सुप्रसन्नया जगदम्बया नैध्रुवमहर्षिप्रार्थनया शारदायाः पूर्वजन्मकर्मवर्णनपूर्वकम् 'एतस्याः स्वप्ने स्वपतिना सह रतिसुखप्राप्तिर्भविष्यति' इति वरं प्रदाय शारदायै 'निजगर्भजातपुत्रं स्वप्ने कृतभोगस्य पुरुषस्य यदा प्रत्यक्षं दर्शनं करिष्यसि तदा तस्मै देहि' इत्याज्ञां कृत्वान्तर्धानकरणम्, ततः सुप्रसन्नया तया शारदया बालया स्वगुरो-		

CC-0. In Public Domain. Digitization by eGangotri

अध्यायाः विपयाः प० पृ०

नैध्रुवमुनेः पूजासत्कारकरणम्, ततो नैध्रुवमुनेः शारदापित्रो रहसि जगदम्बावरप्रदानादिवृत्तं संश्राव्य सर्वानामन्त्र्य स्वेच्छया देशान्तरं प्रति गमनम्, अथ शारदायाः श्रीजगदम्बायाः प्रसादेन स्वप्ने स्वभर्त्रा सह रतिसंभोगकरणाद्गर्भधारणम्, ततो विधवां तां शारदां गार्भिणीं श्रुत्वा सर्वजनैर्धिक्कारकरणपूर्वकं तस्याः स्वग्रामाद्बहिर्निर्वासनाय सर्वैः सहैकत्र मिलित्वा मन्त्रकरणम्, एवं तैर्जनैर्दुर्विचारे क्रियमाणे सत्याकाशवाण्या तस्याः शारदाया निर्दोपत्वकथनम्, तच्छ्रुत्वा सुप्रसन्नैस्तैःसर्वजनैः स्त्रीजनैश्च शारदायाः सकाशादेकान्ते सहर्षं सत्यवृत्तान्तं विज्ञाय तस्याः प्रशंसां कृत्वा स्वस्वगृहं प्रति गमनम्, अथ शारदायाः पुत्रसन्तानोत्पत्तिः, तस्य शारदेयाख्यस्य शारदापुत्रस्य गुरुणोपनयने कृते सत्युपनयनादनन्तरं चतुर्भिरेव वर्षैश्चतुर्वेदादिसाङ्गोपाङ्गसमग्रविद्यापारंगतावर्णनम्, अथ कदाचिद्गोकर्णेश्वरमहादेवक्षेत्रं प्रति कस्मिंश्चिच्छिवमहापर्वणि तद्ग्रामस्थितानां यात्रार्थं प्रयाणे सति तैः सर्वस्वग्रामनिवासिभिर्जनैः सह तस्याः शारदाया अपि तेन स्वपुत्रेण सह गमनम्, तत्र तया शारदया नित्यं प्रति स्वप्ने रतिदायिनः पूर्वजन्मीयस्य विप्रस्य स्वभर्तुर्दर्शनम्, तेनापि पुरुषेण प्रतिदिनं स्वप्ने रतिदायिन्यास्तस्याः शारदायाः स्वप्न दृष्टस्य स्वस्माद्गुत्पन्नस्य तस्य पुत्रस्य च प्रत्यक्षदर्शनम्, ततस्तेन विप्रेण विस्मयाविष्टचित्ततया तत्समीपमागत्य शारदां प्रति तस्या वृत्तान्तजिज्ञासया प्रश्नकरणम्, ततः शारदया तस्मै सर्वस्ववृत्तान्तनिवेदनम्, ततस्तेन विप्रेण तद्दत्तं कुमारं तां शारदां च तस्याः पित्रोरनुज्ञया गृहीत्वा स्वगृहं प्रति गमनम्, ततः कालान्तरे तस्य विप्रस्य मरणोत्तरं चिताग्नौ शारदायास्तेन स्वभर्त्रा सहानुगमनम्, ततस्तयोर्दंपत्योः शिवलोकं प्रति गमनम्. इत्थमुमामहेश्वरव्रतप्रभाववर्णनम्. २०७ २

२० अथ रुद्राक्षमाहात्म्यवर्णनम्, तत्र रुद्राक्षधारणपुण्यवर्णनप्रसंगेन काश्मीरदेशनृपतिभद्रसेनसुतस्य सुधर्माख्यस्य राजामात्यसुतस्य तारकाख्यस्य चेत्युभयो राजपुत्रा-

अध्यायाः विपयाः प० पृ०

मात्यपुत्रयोर्वाल्यत आरभ्य परममैत्रीभावेन वर्तनम्, उभयोरपि सदैव हेमरत्नमयालङ्कारपरित्यागपूर्वकं रुद्राक्षधारणेऽत्यन्तप्रेमाणं दृष्ट्वाऽतिविस्मयाविष्टेन राज्ञा भद्रसेनेनैकदा स्वगृहं प्रत्यागतं पराशरमुनिं प्रति पूजाविधिना सत्कृत्य तयोर्बालकयो रुद्राक्षधारणाभिरुचिकारणजिज्ञासया प्रश्नकरणम्, ततस्तेन पराशरमहर्षिणा तयो राजपुत्रामात्यपुत्रयोः पूर्वजन्मवृत्तान्तवर्णनम्, तत्र पूर्वं नन्दिग्रामनिवासिन्या महावैभवशालिन्याः सदा सदाशिवपूजानिरताया महानन्दानाम्न्याः कस्याश्चिद्वेश्यायाः सद्मनि निवसतोः कुक्कुटमर्कटयो रुद्राक्षकृतकर्ण-बाहु-चूडाभरणयोर्वेश्यया प्रतिदिनं कृतायां नृत्यशिक्षायां प्रावीण्यं प्राप्तयोः प्रतिदिनं तस्या वेश्यायाः शिवाग्रतो नृत्यसमये नृत्यम्, अथ कदाचित्तस्या भवनं कस्यचिच्छिवव्रतधारिणः शिवयोगिनो वैश्यस्यागमनम्, तत्करे दिव्यरत्नकंकणं दृष्ट्वा तल्लिप्सया तया वेश्यया तस्मै वैश्याय स्वस्या वारांगनात्वे सत्यपि त्रिदिनपर्यन्तं 'तव पत्नीत्वं स्वीकृत्य सहधर्मचारिणीधर्मेणाऽहं त्वां सेविष्ये' इति प्रतिज्ञाकरणम्, ततश्च तेन शिवव्रतपरायणेन वैश्येन तस्या वचनमाकर्ण्य वाढमित्युक्त्वा तस्या हस्ते निजनित्यपूजनीयरत्नमयशिवलिङ्गं दत्त्वैतस्य रत्नमयशिवलिङ्गस्य नाशे मम प्राणनाशः स्यादिति कथयित्वा तस्य लिङ्गस्यातिप्रयत्नेन संरक्षणायाज्ञाकरणम्, तया महानन्दावेश्यया तस्य वैश्यस्याज्ञां संमान्य तद्दत्तं लिङ्गमादाय नाट्यमण्डपिकास्तम्भोपरि तल्लिंगं निधाय स्वगृहं प्रविश्य रात्रौ तेन वैश्येन पर्यंके सुखेन संगतया निद्राकरणम्, ततो निशीथसमयेऽकस्मादुत्थितेन वह्निना तस्या वेश्यायाः सर्वनाट्यमण्डपस्य दहनम्, तस्मिन्नवसरे सद्यः प्रबुद्धया तया वेश्यया तत्र सत्वरमेत्य रज्ज्वा शृंखलया च निवद्धयोः तयोः कुक्कुटमर्कटयोः सत्वरं वन्धनतो मोचनम्, मोचितयोस्तयोः कुक्कुटमर्कटयोस्तस्मान्मण्डपस्थलाद्वह्निभीत्या दूरे पलायनम्, सर्वमण्डपदाहे सति मण्डपस्थस्तम्भस्य तदुपरि निहितस्य वैश्यदत्तरत्नमयलिङ्गस्य च दहनेन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शकलीभवनम्, तल्लिङ्गनाशं दृष्ट्वा तेन वैश्येन मरणाय निश्चयं कृत्वा चिता-निर्माणाय तां महानन्दावेश्यां प्रत्याज्ञाकरणम्; ततस्तस्य वैश्यस्य दृढनिर्बन्धं दृष्ट्वा तया वेश्यया ग्रामाद्बहिः काष्ठैश्चिताया निर्माणम्, ततः प्रज्वालितायां तस्यां चितायां तेन शिवभक्तेन वैश्येन प्रवेशकरणम्, तं वैश्यं चितां प्रविष्टं दृष्ट्वाऽतिखिन्नया तया महानन्दया वेश्यया तेन त्रिरात्रं पत्नीत्वप्रतिज्ञाना-त्सहधर्मचारिणीधर्मं पुरस्कृत्य शिवभक्तेभ्यः स्वकीयं सर्वस्वं प्रदाय तमग्निं त्रिः परिक्रम्य शिवं स्मृत्वा तस्मिन्नग्नौ पत्यनुगमनाय प्रवेशकरणायोद्यमनम्, तदानीं साक्षाद्भगवता शंकरेण तत्र प्रादुर्भूय तस्या निवारणं कृत्वा स्वस्यैव भक्तिपरीक्षणाय वैश्यरूपेणागमनादि कथयित्वा सर्वपरिवारजनैः सह तस्या महानन्दाया वेश्यायाः शिवलोकं प्रति नयनम्, तत्परिवारजनेष्ववशिष्टयोर्गृह-दहनसमये वन्धनाद्विमुच्य दूरं पलायितयोस्तयोः कुक्कुटमर्कटयोः स्वस्वकालेन मरणे सति मर्कटस्य राजपुत्रत्वं कुक्कुटस्य चामात्यपुत्रत्वं संप्रति संप्राप्तमिति पराशरेण राजपुत्रामात्यपुत्रयोः पूर्वजन्मवृत्तान्तकथनम्.... ... ... २१० १

२१ अथ राज्ञा भद्रसेनेन तस्य राजकुमारस्य भविष्यद्भाग्यविषये पराशरमुनिं प्रति पृच्छायां कृतायां पराशरमुनिना तस्य सुधर्माख्यस्य राजपुत्रस्याद्यदिनात्सप्तमेऽह्नि मृत्युर्भविष्यतीति भविष्यत्कथनम्, तच्छ्रुत्वाऽतिदुःखितं भद्रसेनभूपं प्रति बोध-वचनैः समाश्वास्य तस्य सुधर्माख्यराजपुत्रस्य मृत्युनिवारणाय रुद्राध्यायजपा-नुष्ठानकथनम्, अथ राज्ञः प्रार्थनया रुद्राध्यायपाठपूर्वकं तेन पराशरमुनिना व्रततपःसदाचारसंपन्नैर्ब्राह्मणैः सह तस्य राजकुमारस्य प्रतिदिनमभिषेके क्रिय-माणे सप्तमेऽह्न्यकस्मात्क्षणमात्रं मूर्छनां प्राप्य पुनः सद्य एव प्रबोधनम्, तदानीं तेन कुमारेण मूर्छनावस्थायां मृत्योः शिवदूतस्य चागमनपूर्वकं शिवदूतकृत-मृत्युपराभवकथनम्, ततः पराशरादिभिः सर्वैर्ऋषिभिस्तस्य राजकुमारस्याशी-र्वचनं प्रदाय तत्पित्रे राज्ञेऽभयशंसनम्, ततो राज्ञा सर्वेषां ब्राह्मणानां विपुल-भोजनप्रदानादिना सत्कारकरणम्, ततः स्वपुत्रेण पराशरगुरुप्रभृतिमहर्षिभिश्च सह सिंहासन उपविष्टस्य सुप्रसन्नस्य तस्य भद्रसेननृपस्य समीपे महायोगिनः श्रीनारदमहर्षेरागमनम्, ततो भद्रसेनेन राज्ञा कृतपूजासत्क्रियेण नारदेन राजानं प्रति 'तव पुत्रं नेतुं यमस्यात्रागमने सति शंकरेण प्रेषितेन वीरभद्रेण यमस्य शासनं कृतम्' इति वर्णनं यमेन वीरभद्रस्य प्रणामपूर्वकं स्तुतिकरणानंतरं वीरभ-द्राद्यममोचनादिवृत्तान्तवर्णनं च, 'रुद्राध्यायपठनपूर्वकाभिषेचनप्रभावात्तव पुत्रस्य मृत्युभीतिनिवारणं जातमस्यायुतवर्षपर्यंतमायुः सकलसौख्यावाप्तिश्च भविष्यति' इत्याशीः प्रदाय नारदस्य गमनम्, पराशरादिमहर्षीणां च सहपुत्राय राज्ञ आशीः प्रदाय स्वस्वाश्रमगमनम्, इत्थं रुद्राध्यायप्रभाववर्णनम्. २११ २

२२ अथ शिवभक्तिमाहात्म्यप्रतिपादकपुण्यमयपुराणकथापठनश्रवणविधिपूर्वकफलवर्णन-म्, पुराणश्रवणमाहात्म्यवर्णनप्रसंगेन जारकर्मप्रवृत्तयोर्विंदुराख्यब्राह्मणाधमबिन्दु-लाख्यतत्पत्न्योर्वृत्तान्तवर्णनम्, तत्र जारकर्मणा वेश्यासक्तेन विंदुराख्यब्राह्मणा-धमेन नित्यं जारेण सह संगतामपि कस्मिंश्चिदेकस्मिन्दिने जारेण सह रतासक्तां जारिणीं स्वभार्यां दृष्ट्वा तां प्रति संताड्य 'त्वं जारेभ्यो रतिं दत्त्वा तेभ्यो धनमादाय मह्यं वेश्यायै धनप्रदानाय देहि तेनाहं वेश्यायां रमिष्ये त्वं जारैः रमस्व' इत्युक्त्वा प्रतिदिनमुभयोरप्यधमयोस्तयोर्दुराचारे प्रवृत्तिः, इत्थं कियता कालेन तस्य ब्राह्म-णाधमस्य मरणानंतरं किंचिदुत्क्रान्तयौवनायास्तस्या बिंदुलाख्याया जारोत्पन्नैर्नि-जपुत्रैः स्वकीयैर्बान्धवैश्च सह कदाचित्पर्वविशेषे गोकर्णक्षेत्रं प्रति यात्रार्थं गम-नम्, तत्र गत्वा कस्मिंश्चिद्देवालये पौराणिकेन पुराणे वाच्यमाने तया बिंदुलया तस्य पौराणिकस्य मुखात्पुराणश्रवणसमये 'जारसक्तानां नारीणां स्मरमन्दिरे यमकिङ्कराः संतप्तलोहपरिघं क्षिपन्ति' इति यमयातनावृत्तांतं श्रुत्वा सततकृत-स्वकीयजारदुष्कर्मस्मरणसंतप्तहृदया तया बिंदुलया रहसि तं पौराणिकं ब्राह्मणं प्रति गत्वा निजदुष्कर्मपरिशान्तय उपायजिज्ञासया प्रश्नकरणम्, ततस्तेन

CC-0. In Public Domain. Digitization by eGangotri

अध्यायाः	विषयाः	प०	पृ०
	पौराणिकेन तस्याः पुराणश्रवणमात्रेण निजघोरव्यभिचारपापस्मरणेनात्युग्रयमयातनाभीताया विंदुलाख्यायाः सांत्वनपूर्वकं शिवभक्तिपुरःसरशिवनाममन्त्रोच्चारणपूर्वकशिवभक्तिप्रतिपादकपुराणकथाश्रवणोपदेशकरणम्, ततस्तया विन्दुलया तस्मादेव पौराणिकात्सद्गुरोः सकाशाच्छिवभक्तिवर्द्धकपुराणकथाश्रवणम्, पुराणश्रवणप्रभावात्तस्या विन्दुलायाः शनैःशनै रजस्तमोमलध्वंसे जाते सति हृदये श्रीशङ्करस्य प्रवेशः, ततः प्रतिदिनं तया गुरूपदिष्टमार्गेण श्रीशङ्करस्य भक्तिकरणम्, श्रीशिवभक्तिप्रभावात्तया निखिलकर्मबंधं समाच्छिद्यान्ते शिवलोकं प्रति गमनम्, तत्र शिवलोके श्रीपार्वतीजगदम्बायाः समीपे गतायास्तस्याः पार्वत्या संमानकरणम्, ततः पार्वत्याः सकाशान्निजभर्तुः पिशाचत्वप्राप्तिं श्रुत्वा तस्य निजभर्तुः पिशाचयोनेर्मोक्षाय तया तुंबरुंनाम गन्धर्वं प्रति विंध्यशैले स्थिताय निजभर्त्रे पुराणश्रावणार्थं प्रार्थनाकरणम्, तया प्रार्थितेन तुंबरुणा विंध्यशैलं गत्वा तं पिशाचं प्रति श्रीगौरीपतिकथायाः श्रावणे कृते तस्य पिशाचत्वं प्राप्तस्य विंदुलापतेः पिशाचयोनितो मुक्तिपूर्वकं विमानमारुह्य शिवलोकं प्रति गमनवर्णनम्, ततस्तयोर्दंपत्योः श्रीमहेश्वरसद्गुणगायनेन कैवल्यमुक्तिप्राप्तिवर्णनम्, श्रीशिवभक्तिप्रतिपादकब्राह्मोत्तरखण्डपुण्याख्यानवैभववर्णनपूर्वकं ब्राह्मोत्तरखण्डसमाप्तिवर्णनम्.	२१३	२

इति ब्राह्मखण्डे तृतीयं ब्राह्मोत्तरखण्डं समाप्तम् ॥ (३–३) ॥

इति श्रीस्कान्दे महापुराणे तृतीयं ब्राह्मखण्डम् ॥ ३ ॥

अथ श्रीस्कान्दे महापुराणे चतुर्थं काशीखण्डम् ॥ ४ ॥

अथ काशीखण्डे पूर्वार्धम् ॥ (४–१) ॥

अध्यायाः	विषयाः	प०	पृ०
१	मङ्गलाचरणम्, सूताग्रे व्यासस्य काशीखण्डकथोपक्रमकरणम्, नारदस्य नर्मदाम्भसि स्नात्वोंकारमभ्यर्च्य च पुरतो विन्ध्यपर्वतदर्शनम्, प्रसंगेन विन्ध्याचलवर्णनम्, मेरुस्त्वामवमन्यत इति नारदमुनेर्वचः श्रुत्वा विंध्यस्य वर्धनेन श्रीसूर्यमार्गावरोधवर्णनं च.	१	१
२	एकतो नैशतिमिरसंबंधादन्यत्र दिवाकरचण्डातपात्त्रैलोक्यानवस्थावर्णनम्, देवैर्विधिस्तवनम्, सत्यलोके भयाभावं दर्शयितुं सत्यलोकागन्तृपुरुषपुण्याचारवर्णनपूर्वकं विधिकृतदेवसान्त्वनम्, ब्रह्मणो वचनात्त्रैलोक्यापन्निवारणाय श्रीक्षेत्रकाशीस्थागस्त्यमुनिसमीपे गन्तुं श्रीकाशीशकाशीदर्शनोत्सुकाऽमरप्रयाणवर्णनम्, संक्षेपतः काशीवर्णनं च.	१०	१
३	काशीक्षेत्रे मणिकर्णिकास्नानविश्वेश्वरदर्शनादियात्रां विधाय सुराणामगस्त्यमुन्याश्रमगमनम्, सुराणां तदाश्रमे लोपामुद्रामुन्यगस्त्यरूपदर्शनं च.	१५	१
४	वृहस्पतिप्रणीतागस्त्यमुनिस्तुतिप्रसंगेन लोपामुद्रावर्णनम्, एतत्प्रसङ्गेन पतिव्रताचारनिरूपणम्, सूर्यमार्गनिरोधकविन्ध्यवृद्धिनिवारणाय प्रार्थयमानस्य सुराचार्यस्य वचनानुसारेणागस्त्येनामराश्वासनम्, अमराणां स्वर्गलोकगमनं च.	२०	१
५	अमरप्रार्थनामङ्गीकृत्य विन्ध्यवृद्धिनिराकरणाय भार्यया सहाऽगस्त्यमुनेः काशीक्षेत्राद्बहिः प्रयाणम्, काशीवियोगदुःखितस्य मुनेर्विश्वनाथकालभैरवादिदेवताज्ञाग्रहणपूर्वकं विशेषतो विलापकरणम्, अगस्त्यमुनिमायान्तं दृष्ट्वा विन्ध्यस्य खर्वतास्वीकारः, यावन्ममागमनं पुनर्न भवेत्तावत्खर्वतरो भवेति मुनेरद्रिं प्रति		

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अध्यायां:	विषया:	प०	पृ०
	कथनम्, मुनेर्महालक्ष्मीदर्शनम्, अगस्त्यमुनिना महालक्ष्मीस्तोत्रकरणंम्, महालक्ष्म्याऽगस्त्याय वरप्रदानम्, अगस्त्यस्याग्रे प्रयाणं च....	२३	२
६	परोपकारप्रशंसनम्, श्रीशैलशिखरादिपुण्यस्थानदर्शनेन मुक्तिश्चेत्किं काशीमहत्त्वमिति लोपामुद्राप्रश्नः, तीर्थमाहात्म्यवर्णनप्रसङ्गेन काशीक्षेत्रमहत्त्वकथनम्, सर्वतीर्थानि काशीक्षेत्रप्रापकाणीति काशीश्रैष्ठ्यद्योतनं च.	३०	२
७	शिवशर्माख्यस्य मथुरापुरीस्थद्विजस्य स्वदेहे समागतां जरां दृष्ट्वा चिन्तोद्गाराः, सप्तपुरीयात्रार्थं गृहाद्बहिर्द्विजस्य प्रयाणम्, अयोध्यायात्रां समाप्य प्रयागे समागमनम्, प्रसङ्गेन प्रयागमाहात्म्यवर्णनम्, द्विजस्य काशीयात्राकथनम्, तस्य महाकालपुरीप्रयाणम्, तत्प्रसङ्गान्महाकालमाहात्म्यकथनम्, मायापुरीतीर्थयात्राकथनम्, द्विजस्य मायापुर्यां देहावसानम्, पुण्यशीलसुशीलनामकवैष्णवगणाधिष्ठितस्वर्णविमानमास्थाय द्विजस्य नभोवर्त्मारोहणं च.	३३	१
८	मायाख्यायां मुक्तिपुर्यां मृतस्य शिवशर्मणो द्विजस्य कथं मोक्षानवाप्तिरिति लोपामुद्रासतीप्रश्नः, मायादिषु षट्पुरीषु साक्षात्सायुज्यं नास्तीति दर्शयितुं शिवशर्मविष्णुगणसंवादारम्भः, द्विजप्रश्नानुसारेण पिशाचगुह्यकगन्धर्वलोकस्थितपुरुषसंपादितसदाचारवर्णनम्, यमलोकमागतस्य द्विजस्य शिवशर्मणः सत्कारपूर्वकपूजनार्थं धर्मराजस्यागमनम्, धर्मराजस्य सौम्यमूर्तेः सौम्यवचांसि श्रुत्वा कथमिदमिति द्विजप्रश्नः, यमस्य रूपद्वयनिरूपणप्रसङ्गेन संक्षेपतो यमलोकवर्णनं च.	३८	२
९	अप्सरोलोकवर्णनम्, सूर्यलोकवर्णनम्, सूर्योपासनावर्णनप्रसङ्गेन गायत्रीमन्त्रमाहात्म्यनिरूपणम, अर्घप्रदानविधिनिरूपणं च.	४३	१
१०	सहस्राक्षपुरवर्णनम्, अर्चिष्मत्याख्यवीतिहोत्रपुरीवर्णनम्, कृशानूत्पत्तिकथनप्रसंगेन ज्योतिष्मतीपुरीस्थविश्वानराख्यमुनीतिहासकथनम्, शुचिष्मतीकथनानुसारेण मुनेः काशीक्षेत्रे गत्वा वीरेश्वराशिवलिङ्गसमीपे तपोऽनुष्ठानकथनम्, त्रयोदशे मासि बालरूपेण लिङ्गे शिवदर्शनम्, अभिलाषाष्टकस्तोत्रकथनम्, शिवाद्वरलाभेन सन्तुष्टस्य मुनेः स्वगृहे प्रयाणं च....	४६	२
११	कालान्तरेण विश्वानराच्छुचिष्मत्यां गर्भाधानम्, शुभमुहूर्ते सुतोत्पत्तिः, जातकर्मादिसंस्कारनिरूपणम्, हस्तसामुद्रिकं वीक्ष्य नारदोक्तं वैश्वानराख्यस्य बालस्य गण्डान्तं श्रुत्वा मातापित्राः शोककरणम्, अपमृत्युहरणाय मुनिकुमारस्य काश्यां लिङ्गं संस्थाप्यानुष्ठानकरणम्, तृतीयसंवत्सरे वरप्रदानाय समागतस्य कुलिशायुधस्य मुनिकुमारं प्रति वचनम्, 'नाहं त्वत्तो वरान्ग्रहीतुमुत्सहे' इति वचः श्रुत्वा इन्द्रस्य कुलिशपातनोद्योगं विलोक्य मुनिकुमारस्य मूर्च्छावगमः, तत्रैव शिवप्रादुर्भावः, शिववराद्वैश्वानरस्य दिक्पतित्वादिप्राप्तिवर्णनं च.	५१	१
१२	नैर्ऋतलोकवर्णनम्, विन्ध्याटव्यां पल्लीपतेः पिंगाक्षस्य विश्वनाथपुरीं प्रति यातुकामस्य सार्थस्य प्राणपरिरक्षणार्थं प्राणदानाल्लोकपालत्वप्राप्तिः, वारुणलोकवर्णनम्, कर्दमस्य प्रजापतेः पुत्रस्य शुचिष्मतो जलक्रीडायां शिशुमारेण सरस्याहरणम्, सरसि मग्नं श्रुत्वाऽपि सुतं पूजायामधिकासक्तस्य मुनेः सविधे शिवगणेन सशिशुमारस्य बालकस्यानयनम्, शुचिष्मतो मुनिकुमारस्य काश्यां शिवलिंगं संस्थाप्य तपश्चरणम्, शिवप्रसादाद्वारुणलोकसंप्राप्तिश्च....	५७	२
१३	जगत्प्राणस्य पवनस्य गंधवतीपुरीवर्णनम्, कश्यपपुत्रस्य पूतात्मनः श्रीकाशीक्षेत्रे लिंगं संस्थाप्य तपश्चरणम्, तस्य शिवाल्लोकपालत्वप्राप्तिकथनम्, गुह्यकेश्वरस्यालकावतीपुरीवर्णनम्, काम्पिल्यनगरे यज्ञदत्तनाम्नो ब्राह्मणस्य नाम्ना गुणनिधिरप्यगुणनिधिर्द्यूतासक्तो मद्यपः पुत्रो बभूव तस्य मात्रा बहुकालं प्रच्छन्नदुराचारस्य सुतस्य दुष्कृतिं संपश्यता पित्रा स्वगृहान्निष्कासनम्, स्वार्थं दीपदशोद्द्योतेन लिंगमौलितमोहरस्य बहूपोषितस्यास्य शिवरात्र्यां शिवालये ऽन्नापहरणाद्धातितस्य कलिङ्गदेशराजपुत्रत्वप्राप्तिवर्णनम्, तत्र तस्य शिवालयेषु दीपदानात्कल्पान्तरे विश्रवःसुतत्वमभिगम्य दुःसहतपश्चरणतः शिवसख्यालकाराज्यादिलाभवर्णनं च.	६१	१

CC-0. In Public Domain. Digitization by eGangotri

अध्यायाः	विषयाः	प०	पृ०
१४	रुद्रभक्तोपितैशानीपुरीवर्णनम्, अजैकपादादिरुद्रगणस्थापितैशानलिंगमाहात्म्यवर्णनम्, चन्द्रलोकवर्णनम्, ब्रह्मणो मानसात्समुद्भूतस्य सोमस्य वाराणस्यां लिंगं विधाय तत्पुरो महत्तपश्चरणम्, शिवप्रसादात्तस्य महैश्वर्यलाभकथनं च.	६६	२
१५	दक्षप्रजापतेः षष्टिदुहितृमध्ये रोहिण्यादिभिः सप्तविंशतिभिः कन्याभिरेकपतिलाभाय लिंगं संस्थाप्य वाराणस्यां तपःकरणाच्छिववरानुसारतः सोमं पतिमासाद्य संपादितस्य नक्षत्रलोकस्य संक्षेपतो वर्णनम्, अत्रिपुत्रस्य सोमस्य गुरुभार्यापहरणम्, रुद्रचन्द्रमसोर्युद्धकथनम्, युद्धं निवार्य ब्रह्मणो वचनाच्चन्द्रस्य बृहस्पतये तारासमर्पणम्, तस्यां बुधस्योत्पत्तिः, बुधकृतशिवाराधनम्, बुधस्य शिववराल्लोकपालत्वादिवरैश्वर्यलाभवर्णनं च.	६८	२
१६	समरे देवैर्घातितानां दानवेन्द्रान्धकसैनिकानां संजीवनीमन्त्रतो भार्गवशुक्रेण पुनरुज्जीवनम्, देवप्रार्थनया शिवेन नंदिकेश्वरद्वारा शुक्रमानाय्य स्वमुखे तस्य निक्षेपणम्, अन्धकस्य ससैन्यस्य प्रमथैः सह युद्धवर्णनम्, शुक्रतः शुक्रस्य वहिर्निःसरणम्, शुक्रस्य वाराणस्यां तपश्चरणाच्छिवप्रसादतो लोकाधिपत्यादिवरप्राप्तिवर्णनं च...	७१	२
१७	श्रीशिवस्य भालस्थलतो भूमौ निपतितात्स्वेदबिन्दोर्लोहिताङ्गस्योत्पत्तिः, शिवप्रसादात्तस्य लोकाधिपत्यादिकथनम्, आङ्गिरसस्य शिवप्रसादार्थं वाराणस्यां तपःकरणम्, शिवस्य वरप्रसादाल्लोकपतित्वदेवगुरुत्वलाभः, मार्तण्डात्संज्ञाप्रतिकृतौ छायायां शनैश्चरोत्पत्तिकथनम्, तस्य वाराणस्यां तपश्चरणाल्लोकपालत्वग्रहमुख्यत्वलाभवर्णनं च.	७६	२
१८	ब्रह्ममानससृष्टमरीच्यादिपुत्रसप्तर्षिलोकवर्णनम्, अरुन्धतीनक्षत्रस्थानदर्शनादिवर्णनं च.	८१	१
१९	पितुरंकाधिष्ठितस्य सापत्नमात्रा तिरस्कृतस्य ध्रुवस्य मातृवचनात्तपस्यार्थं विपिनप्रवेशः, तत्र सप्तर्षिसमागमः, तस्मै द्वादशाक्षरमन्त्रमुपदिश्य मुनीनामन्तर्धानं च.	८२	१
२०	यमुनातटे मधुवने स्थितस्य ध्रुवस्य तपस्यावर्णनम्, इन्द्रप्रेषितनानाविधतपोविघ्ननिरूपणम्, ध्रुवस्य साक्षाच्छ्रीभगवतो दर्शनं च.	८६	२
२१	ध्रुवकृतश्रीभगवत्स्तोत्रनिरूपणम्, 'ज्योतिश्चक्रस्याधारपदं ते दास्यामि तथापि मया सह काशीं याहि तत्र लिंगार्चनं कृत्वा कृतकृत्यो भव' इति ध्रुवं सन्दिश्य तेन सह भगवतः काशीपुर्यां प्रयाणम्, तत्र ध्रुवस्य लिंगस्थापनेन कृतकृत्यत्वमासाद्य स्वगृहे प्रयाणं च.	९०	१
२२	महर्जनतपोलोकवर्णनम्, सत्यलोके समागतानां ब्रह्मणा सह संवादाः, द्विजप्रशंसनपूर्वकं ब्रह्मकृतकाशीवर्णनं च.	९५	१
२३	भूलोकाच्छिवलोकपर्यन्तं योजनप्रमाणकथनम्, शिवोपासनतो विष्णोरात्मसात्म्यप्राप्तिकथनपूर्वकं शिवकृतविष्ण्वभिषेकवर्णनं च....	९९	१
२४	द्विजस्य मायापुर्यां मरणतो विष्णुलोके ब्रह्मणो वत्सरपर्यंतं बहुविधोपभोगप्राप्तिः, ततश्च पुण्यक्षये नन्दिवर्धनग्रामे भूपत्वमासाद्य प्रजारञ्जनकर्तुरस्य काशीमाहात्म्यश्रवणसंजातहर्षस्य काश्यां प्रयाणम्, विश्वेश्वरानुग्रहात्तत्र शिवप्रासादं विधाय वृद्धकालेश्वराख्यस्थापितशिवलिङ्गाग्रे तपस्यतः परीक्षणार्थमागतेन शिवेन परीक्षणोत्तरं सह तेन सस्त्रीकस्य राज्ञस्तस्मिन्नेव लिंगे लयो भविष्यति इति विष्णुगणप्रतिपादितशिवशर्मद्विजभाविस्थितिवर्णनम्.	१०१	१
२५	अगस्त्यमुनेः सभार्यस्य श्रीगिरिं प्रदक्षिणीकृत्य स्कन्दवने कुमारदर्शनम्, अगस्त्यकृतस्कन्दस्तोत्रम्, काशीमाहात्म्यविषये स्कन्दं प्रति मुनिप्रश्नः, स्कन्दनिरूपितकाशीवासफलकथनं च....	१०४	२
२६	अविमुक्तक्षेत्रोत्पत्तिवर्णनम्, चक्रपुष्करिणीतीरे विष्णोस्तपोवर्णनम्, मणिकर्णिकाया उत्पत्तिवर्णनम्, मणिकर्णिकास्नानविधिकथनं च.	१०७	२
२७	गंगामाहात्म्यवर्णनम्, दशहरास्तोत्रकथनं च.	११३	१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अध्यायाः	विषयाः	प०	पृ०
२८	शिवाधिष्ठानगौरवतः काश्यां गंगास्नानान्महापातकोपपातकशमनवर्णनम्, कलिंगदेशे वाहीकनाम्नः कस्यचिन्नाममात्रद्विजस्य वृषलीपतेररण्ये व्याघ्रेण मारणम्, सास्थि तन्मांसं समादाय गच्छतो गृध्रस्यान्यगृध्रेण युद्धम्, दैवतस्तदस्थ्नो गंगाजले पतनेन गंगाजलसंगमान्महाश्चर्यम्, नानाविधपातकक्षालनाय कुम्भीपाकादिनरकेषु प्रक्षिप्तस्यापि तस्य वाहीकस्य सुखावाप्तिं विलोक्य सर्वेषां विस्मयकरणम्, अन्ते विमानमारुह्य वाहीकस्य स्वर्गलोकप्रयाणम्, गंगामाहात्म्यकथनं च.	११९	१
२९	अशक्तानां स्नानतुल्यफलावाप्तिमिच्छूनां महावौघनिवारकश्रीगंगासहस्रनामस्तोत्रवर्णनम्.	१२२	१
३०	मणिकर्ण्यां भगीरथनृपानीतगंगासंगमात्क्षेत्रमाहात्म्याधिक्यकथनम्, दक्षिणोत्तरभागेऽसिवरणावस्थितिकथनम्, देहलीविनायकस्य शिवाज्ञां विना अन्तः प्रवेशं कुर्वतां विघ्नोत्पादनाय नियोजनम्, धनंजयवणिगितिहासकथनम्, काश्या वाराणसीनामनिर्वचनं च.	१३६	१
३१	ब्रह्मणः शिरश्छेत्तुं शिवात्कालराजस्योत्पत्तिः, शिवनिंदाकारिब्रह्मशिरश्छेदात्कालराजस्य कापालिकवेषेण काश्यां प्रयाणम्, तत्र गतस्य कालभैरवस्य पृष्ठलग्नाया ब्रह्महत्यायाः पातालगमनम्, तत्र कपालमोचनतीर्थे सर्वेषां पातकक्षालनाय कालभैरवस्थितिवर्णनं च.	१४२	२
३२	पूर्णभद्रनामकयक्षस्य शिवाराधनात्कनककुण्डलाख्यभार्यायां हरिकेशाभिधपुत्रजन्मकथनम्, बाल्यावस्थामारभ्य शिवासक्तस्य हरिकेशस्य पितुस्ताडनभयाद्गृहान्निर्गतस्य काश्यां प्रयाणम्, पार्वतीं प्रति शिवनिरूपितानन्दकाननवर्णनम्, आनन्दकानने हरिकेशस्य तपःसन्तुष्टमहेश्वराद्दण्डपाणित्वकथनम्, दण्डपाण्यष्टककथनं च.	१४७	२
३३	ज्ञानवापीनामकतीर्थोत्पत्तिवर्णनपूर्वकतन्नाममाहात्म्यवर्णनम्, काशीनिवासिहरिस्वामिकन्याया ज्ञानवापीं सेवमानायास्तद्रूपमोहितविद्याधरेणाहरणम्, मलयपर्वते विद्याधरेण सार्कं राक्षसस्य युद्धवर्णनम्, युद्धे राक्षसविद्याधरयोः परस्परप्रहारेणैव मरणाद्धरिस्वामिकन्याया विद्याधरं प्रति मन्यमानाया देहपरित्यागकथनम्, उभयो राजदेहमासाद्य तत्र चित्रपटीविलोकनानन्तरं विवाहः	१५५	२
३४	माल्यकेतुकलावत्योस्तयोः काशीप्रयाणम्, तत्र काशीयात्रां विधाय ज्ञानवापीनिकटे शिवोपदेशाद्विमानमारुह्योभयोः शिवलोकगमनकथनम्, ज्ञानवापीमाहात्म्यकथनं च.	१६१	१
३५	काशीप्रापकब्राह्मणसदाचारवर्णनप्रसङ्गेन नित्यकर्तव्यधर्मनिरूपणम्.	१६४	२
३६	सदाचारवर्णनप्रसङ्गेन द्विजानां ब्रह्मचर्यधर्मनिरूपणम्.	१७४	२
३७	सुलक्षणां स्त्रियं विना गृहस्थाश्रमस्य न सिद्धिस्तस्माद्विस्तरेण स्त्रीलक्षणनिरूपणम्.	१७७	१
३८	अष्टविधविवाहवर्णनम्, द्विजादीनां काशीप्राप्तिकरस्य शुभाचारस्य विस्तरेण कथनं च.	१८२	१
३९	दिवोदासनृपेतिहासकथनप्रसङ्गेनाविमुक्ते क्षेत्रे अविमुक्तेशशिवलिङ्गोत्पत्तिकथनम्...	१८५	२
४०	काशिकाक्षेत्रगमनविघ्नविधायिद्विजादिनिषिद्धाचारस्वरूपवर्णनम्, गृहस्थाश्रमिणां विहिताचारनिरूपणं च.	१८८	१
४१	वानप्रस्थयतिधर्माणां विस्तरेण निरूपणे योगाख्यानम्.	१९३	१
४२	निकटासन्नमृत्युचिह्नकथनपूर्वकं श्रीक्षेत्रकाशीमाहात्म्यमिश्रितकालवञ्चनोपायकथनम्	२००	२
४३	दिवोदासे काश्यामुषित्वा भुवो राज्यं शासति सति सर्वेषां विश्वेश्वरादिदेवानां भुवं परित्यज्य मन्दराचलगमनम्, दिवोदासराज्ये प्रजासौख्यवर्णनम्, भुवं परित्यज्य अग्नेरपि स्वर्गगमनम्, तद्विलोक्य राज्ञा व्याहृतस्य स्वसामर्थ्यस्य वर्णनं च.	२०२	२
४४	विश्वनाथभवान्योर्मन्दरागिरिवरे स्थितयोः काशीवियोगदुःखवर्णनम्, दिवोदासनृपस्य काशीक्षेत्रपरित्यागार्थं शिवेन योगिनीगणप्रेषणवर्णनं च...	२०६	१
४५	चतुःषष्टियोगिनीनां शिवाज्ञया काशीपुरे राज्ञो दिवोदासस्य विघ्नार्थं प्रवेशकथनम्, तासां नामनिरूपणं च....	२१०	१

CC-0. In Public Domain. Digitization by eGangotri

अध्यायाः	विषयाः	प०	पृ०
४६	दिवोदासस्य विघ्नमुत्पाद्य काश्यां बहिर्निष्कासनाय शिवादिष्टरव्यागमनम्, दिवोदासराज्ये नानाविधप्रयत्नेन च्छिद्रान्वेषणोद्यतस्य रवेर्द्वादशधा आत्मानं विभज्य काश्यामेव निवासकथनम्, लोलार्कस्थानकथनम्, तत्तीर्थयात्राविधिमाहात्म्यकथनं च.	२११	२
४७	उत्तरार्ककुण्डनिरूपणम्, तत्र स्थिताया द्विजकन्याया मातापित्रोर्मरणानन्तरमुत्तरार्कसमीपे तपश्चरणम्, तस्यै गौर्या स्वसखीत्वरूपवरप्रदानम्, उत्तरार्ककुण्डमाहात्म्यनिरूपणं च.	२१३	२
४८	कृष्णपुत्रस्य सांवस्य नारदापमानात्कृष्णशापप्रभवकुष्ठरोगात्रगमकथनम्, तत्परिहाराय काश्यां तस्य स्वनाम्ना कुण्डं विधाय तपश्चरणाद्रोगनिवृत्तिः, कुण्डमाहात्म्यसहितसांवादित्यमाहात्म्यकथनं च.	२१५	१
४९	पाण्डवानां वनवासप्रसङ्गेन काश्यां गमनम्, तत्र द्रौपद्या सूर्याराधनम्, तस्यै सूर्यतः स्थालीप्राप्तिः, द्रौपद्याराधितरवेः स्थाननिरूपणम्, मयूखादित्यमाहात्म्यवर्णनं च.	२१७	१
५०	उच्चैःश्रवसो वर्णविषये कद्रूविनतयोर्वादकथनम्, तत्र कापट्येन विनतायाः पराभवात्कद्रूदास्यकरणम्, मातुर्दास्यापनोदाय गरुडस्य सुधाहरणवर्णनम्, विनतागरुडयोः काश्यां शिवलिंगस्थापनपूर्वकं तपश्चरणम्, तयोर्वरप्रदानपूर्वकखखोल्कादित्यस्थानमाहात्म्यकथनं च.	२२०	१

इति श्रीकाशीखण्डपूर्वार्धम् ॥ (४–१) ॥

॥ अथ काशीखण्डोत्तरार्धम् ॥ (४–२) ॥

अध्यायाः	विषयाः	प०	पृ०
५१	अरुणादित्यमाहात्म्यवर्णनम्, विनतादास्यकारणकथनम्, वृद्धहारीतोपासितवृद्धादित्यमाहात्म्यकथनम्, विष्णुवचनात्काश्यां शिवलिंगं प्रतिष्ठाप्य सूर्यस्य तपश्चरणम्, तस्य केशवादित्यनामप्राप्तिपूर्वकमाहात्म्यवर्णनम्, विमलगंगायमादित्यानां संक्षेपतो वर्णनं च.	२२६	१
५२	दिवोदासनृपतिनिष्कासनाय शिवप्रेषितस्य चतुराननस्य द्विजवेषेण काश्यां दशसंख्याकाश्वमेधकरणात्तीर्थस्य दशाश्वमेधनामकरणकथनम्, तत्तीर्थमाहात्म्यवर्णनं च.	२२९	१
५३	शिवप्रेषितानां योगिनीभानुविधीनां काश्यामेव शिवलिंगानि संस्थाप्य तत्रैव स्थितानां स्थितिं परिज्ञातुं दिवोदासस्य निष्कासनाय च शंकुकर्णादीनां शिवाज्ञया काशीप्रयाणवर्णनम्, काशीवर्णनं च.	२३१	२
५४	शम्भोरत्यन्तप्रियकपर्दिगणस्थापिताशिवलिंगमाहात्म्यवर्णनप्रसङ्गेन वाल्मीकिसंज्ञकद्विजेतिहासकथनम्, तत्कृतपिशाचोद्धारवर्णनम्, पिशाचमोचनतीर्थयात्रामाहात्म्यकथनं च.	२३५	१
५५	पिंगलादिगणस्थापितशिवलिंगमाहात्म्यनिरूपणम्, ये ये गणाद्याः काशीस्थितिं विलोकयितुं शिवेन प्रेषितास्तेषामपुनरावृत्तिं विलोक्य काश्यां शिवाज्ञया गणेशस्य प्रवेशवर्णनं च.	२३७	२
५६	गणेशस्य ज्यौतिपिकद्विजवेषमाश्रित्य काश्यां प्रवेशवर्णनम्, स्वमायया पुरीस्थितानेकजनमोहं विधाय राज्ञोऽन्तःपुरे गणेशस्य राजस्त्रीभिः सहाऽऽलापादिवर्णनम्, दिवोदासनृपसमागमे राज्ञो वर्णनपूर्वकं गणेशेन तस्मै ब्राह्मणागमनपूर्वकब्राह्मणकृतोपदेशरूपभविष्यकथनं च.	२३९	१
५७	अथ शिवेन कृताया गणेशस्तुतेः प्रसंगतो वर्णनम्, गणेशस्य ढुंढिराजनामकथनम्, भगीरथहरिश्चन्द्रादिगणेशस्थानकथनं च.	२४१	१
५८	अथ गणेशेऽपि विलंविते चिन्तापरवशेन शिवेन दिवोदासनृपस्य काशीत उच्चाटनाय विष्णुनिरूपणम्, काश्यां विष्णोर्नानाविधस्थाननिरूपणम्, विष्णुलक्ष्मीगरुडैः सौगतपरिव्राजिकाशिष्यरूपैर्बौद्धधर्मस्थापनप्रकारवर्णनम्, प्रजा अधर्मरुचीः कृत्वा गणेशवचनानुसारेण द्विजरूपस्य विष्णो राज्ञे शिवलिंगस्थापनोपदेशकथनम्, शिवलिङ्गमभ्यर्च्य राज्ञो दिवोदासस्य विमानमारुह्य कैलासपुरप्रयाणवर्णनं च.	२४५	१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अध्यायाः	विषयाः	प०	पृ०
५९	वेद्शिरसो मुनेः शुचिमप्सरसं दृष्ट्वा स्खलितवीर्यस्य वीर्यात्कन्योत्पत्तिकथनम्, तस्या धूतपापाख्यायाः कन्यायाः पितुर्वचनात्तपश्चर्याकरणम्, ब्रह्मणो वरदानात्तस्याः पावित्र्यविशेषताप्राप्तिकथनम्, तां दृष्ट्वा धर्मस्य कामोद्दीपनात्परस्परं शापप्रसङ्गेन तयोर्नदीनदत्वप्राप्तिकथनम्, गंगायमुनासरस्वतीकिरणाधूतपापाधर्मनद्संगमात्पञ्चनदीतीर्थकथनम्, तन्माहात्म्यकथनं च.	२५१	१
६०	अग्निबिंदुमुनिकृतविष्णुस्तुतिवर्णनम्, तत्र बिंदुमाधवावस्थानवर्णनम्, बिन्दुमाधवमाहात्म्यवर्णनं च.	२५४	२
६१	आदिकेशवतार्क्ष्यकेशवादिवैष्णवस्थानानां संक्षेपतो वर्णनम्, बिंदुमाधवनिरूपितनानास्थानतद्यात्रादिनिरूपणम्, बिंदुमाधवकथनादग्निबिंदुमुनेः सुदर्शनचक्रसंस्पर्शात्सायुज्यलाभनिरूपणं च.	२५८	१
६२	दिवोदासनृपे विष्णुकथनानुसारेण कैलासपुरं प्रविष्टे विष्णवादीनां मन्दरे हरसन्निधौ शिवानयनार्थं गमनम्, शिवकृतकपिलतीर्थवर्णनम्, कपिलतीर्थे वृषध्वजप्रादुर्भावकथनं च.	२६४	१
६३	जैगीषव्यमुनितपोवर्णनम्, तस्य शिवाद्वरप्राप्तिकथनम्, ज्येष्ठेशमाहात्म्यकथनं च.	२६७	१
६४	मन्दराचलादागतं शिवं सगणं साम्बं द्रष्टुं नानातीर्थागतानां द्विजानां शिवदर्शनम्, शिवप्रणीतकाशीक्षेत्ररहस्यकथनं च.	२६९	१
६५	पराशरेश्वरमांडव्येश्वरजाबालेश्वरकन्दुकेश्वरादिनानाविधशिवलिङ्गमाहात्म्यकथनम्.	२७२	१
६६	शैलेश्वरादीनां काशीक्षेत्रस्थितशिवलिङ्गानां निर्णयकथनम्...	२७४	१
६७	गौरीं प्रति शिवनिरूपितरत्नेश्वरशिवलिङ्गमाहात्म्यकथनम्, कस्याश्चिन्नर्तक्याः शिवरात्र्यां रत्नेश्वरसमीपे नर्तनगानादिना जागरणाच्च शिवप्रसादेन देहान्तरे वसुभूतिनामकगन्धर्वराजतनयात्वलाभवर्णनम्, रत्नावलीनाम्न्यास्तस्या गन्धर्वकन्याया रत्नेश्वरवरलिंगप्रभावात्परमाश्चर्यजनकविवाहादिचरितवर्णनम्, दाक्षायणीश्वरमाहात्म्यकथनं च.	२७८	१
६८	महिषासुरपुत्रस्य गजासुरस्य विधिवरादन्यावध्यस्य शिवेन शूलेन विनाशनम्, कृत्तिवासेश्वरोत्पतिकथनम्, कृत्तिवासेशमाहात्म्यकथनं च.	२८३	२
६९	नानाविधस्थानस्थितानां शुभदानामष्टषष्टिसंख्याकानामायतनानां काश्यां समागमकथनम्.	२८६	१
७०	वेतालादिपरिवारसहितानां नवकोटिसंख्यचण्डीनां काशीरक्षणाय स्थानेस्थाने स्थापनवर्णनं च...	२९०	१
७१	रुरुदैत्यपुत्रस्य पुंभिरजेयस्य दुर्गासुरस्य त्रैलोक्यराज्यकर्तुर्नाशाय स्वनिकटे तमानेतुं भगवत्याः कालरात्रेः प्रेषणम्, कालरात्रिवचनात्ससैन्यस्य दुर्गदैत्यस्य भगवत्याः समीप आगमनम्, युद्धोद्यतं दुर्गसैन्यं विलोक्य देवीशरीराच्छक्त्युद्गमवर्णनम्, दुर्गासुरस्य भगवत्या सह युद्धवर्णनं च.	२९२	२
७२	भगवतीशरीरोत्पन्नशक्तीनां नामनिरूपणम्, दैत्यदेवीयुद्धवर्णनम्, दुर्गदैत्यवधसन्तुष्टदेवकृतदुर्गादेवीस्तुतिकथनम्, दुर्गाभैरवपूजनफलकथनं च.	२९६	१
७३	पार्वतीं प्रति शिवनिरूपितोंकारादिचतुर्दशलिंगगणनम्, ओंकारेशोत्पत्तिवर्णनप्रसंगेन ब्रह्मकृतोंकारस्तुतिकथनम्, ओंकारेशलिङ्गमाहात्म्यनिरूपणं च.	२९९	१
७४	पाद्मकल्पीयभरद्वाजसुतदमनस्य विद्यामधीत्य विरक्तस्य रेवातीरेऽमरकंटकक्षेत्रे गर्गनाम्नो मुनेर्दर्शनम्, गर्गमुनिनिरूपितोंकारमाहात्म्यवर्णनं च.	३०४	२
७५	सप्तजन्मार्जितपापनिवारणैकदक्षत्रिलोचनेश्वराविर्भावकथनम्, तन्माहात्म्यनिरूपणं च.	३०८	१
७६	मणिमाणिक्यनिर्मितत्रिलोचनप्रासादस्थितपारावतद्वन्द्वेतिहासकथनपूर्वकं त्रिलोचनाख्यशिवलिंगमाहात्म्यकथनम्.	३१०	१
७७	केदारेश्वरमाहात्म्यकथनप्रसङ्गेनोज्जयिनीस्थितद्विजदारकेतिहासकथनम.	३१४	१
७८	यमधर्माराधितधर्मेश्वराख्यशिवलिंगमाहात्म्यनिरूपणम्.	३१५	२
७९	धर्मतपःसाक्षिणां कीरशिशूनां शिववरात्कैलासपदाप्तिकथनपूर्वकं धर्मेशमाहात्म्यकथनम्.	३१७	२

CC-0. In Public Domain. Digitization by eGangotri

अध्यायाः	विषयाः	प०	पृ०
८०	पुलोमजां प्रति शिवनिरूपितस्य चैत्रशुक्लतृतीयामारभ्य फाल्गुनशुक्लतृतीयापर्यन्तं विश्वभुजाख्यगौरीविनायकदैवतमनोरथतृतीयाव्रतस्य विस्तरेण वर्णनम्....	३२०	१
८१	सुरगुरोर्वचनाद्वृत्रहत्योद्भवत्रासससंतप्तेन्द्रस्य काश्यामुत्तरवाहिन्यां स्नात्वा धर्मेशाख्यशिवलिंगसंनिधौ तपश्चरणम्, ब्रह्महत्यानिवृत्तिपूर्वकमिंद्रस्य पूर्ववत्तेजःप्राप्तिकथनम्, दुर्दमभूपेतिहासकथनपूर्वकधर्मेशमाहात्म्यकथनं च.	३२२	१
८२	वीरेश्वराविर्भावप्रसङ्गेन मित्रजित्पराक्रमवर्णनम्, महावैष्णवस्य मित्रजिन्नृपस्य कंकालासुरं त्रिशूलेन हत्वा कंकालासुरहृतमलयगन्धिनीं विद्याधरकन्यां गान्धर्वेणोद्वाह्य तया सह काश्यामागमनम्, अभीष्टतृतीयाव्रतविषये राज्ञीं प्रति नृपप्रश्नश्च.	३२४	१
८३	नृपप्रश्नानुसारेण मार्गशीर्षशुक्लतृतीयायां राज्ञीनिरूपितगौरीविधिदेवताभीष्टतृतीयाव्रतानिरूपणम्, व्रतकरणाद्राज्ञ्याः पुत्रलाभः, मूलर्क्षे जातस्य मात्रा विकटादेवीपुरतः स्थापितस्य तस्य शिशोर्देव्यनुज्ञया माहेश्वर्यादिमातृसमीपे प्रेपणम्, मातृविसृष्टस्य बालकस्यानन्दकानने पञ्चमुद्रादेवीनिकटे तपश्चरणाच्छिवलिंगाविर्भावः, अस्यैव लिंगस्य वीरेश्वराख्याप्राप्तिस्तन्माहात्म्यकथनम्, वीरेश्वरशिवेन तस्मै राजपुत्राय नानाविधवरान्दत्त्वा कथितानासिगंगासंगमास्थितपुण्यस्थानानां क्रमेण वर्णनं च.	३२७	२
८४	मित्रजिन्नृपपुत्राय वीरेश्वराख्यशिवनिरूपितानां श्रीमदादिकेशवादिभगीरथतीर्थानां कथनम्.	३३०	१
८५	आनंदकानने शिवलिंगं संस्थाप्य बहुतपस्तप्त्वाऽपि फलाभावाद्दुर्वाससि काशीं शप्तुमुद्यते शिवस्य लिंगादाविर्भाववर्णनम्, दुर्वासःकामपूरणात्तच्छिवलिंगस्य कामेश्वराभिधानं तन्माहात्म्यकथनं च....	३३३	१
८६	विश्वकर्मनिर्मितशिवलिंगस्य काश्यां विश्वकर्मेश्वराभिधानकथनपूर्वकमाहात्म्यवर्णनम्.	३३५	१
८७	दक्षेश्वरोत्पत्तिकथनपूर्वकं केनचित्प्रसङ्गेन शिववैरिणो दक्षप्रजापतेः शिवौ विना यज्ञारम्भवर्णनम्.	३३८	१
८८	नारदमुखादध्वरवृत्तमाकर्ण्य शिववचनमनादृत्यैव सत्या दक्षयज्ञं प्रति गमनम्, तत्र शिवनिंदां पितुर्मुखादाकर्ण्य परमकुपितया तया देहविसर्जनम्. ...	३४१	१
८९	शिवगणवीरभद्रकृतं यज्ञविध्वंसनपूर्वकं दक्षशिरोनाशनम्, पुनर्वीरभद्रेण शिवाज्ञया दक्षस्य मेषवदनत्वं संपाद्य विमोचनम्, काश्यां शिवलिंगं संस्थाप्य दक्षस्य तपःकरणम्, दक्षेश्वरोत्पत्तिकथनं च.	३४४	१
९०	पार्वतीकृतपार्वतीशशिवलिंगस्थापनम्, तन्माहात्म्यनिरूपणं च.	३४७	२
९१	विश्वनाथशिवलिंगात्पूर्वतो गंगास्थापितगंगेशलिंगमाहात्म्यवर्णनं च.	३४८	१
९२	ब्रह्मणः सकाशाद्गङ्गासाम्यरूपं वरमलब्ध्वा काश्यां शिवलिङ्गं संस्थाप्य रेवायास्तपःकरणम्, नर्मदेश्वरदत्तरेवावरदानकथनपूर्वकतल्लिङ्गमाहात्म्यवर्णनं च.	३४८	२
९३	शिवं पतिं लब्धुं काश्यां सतीस्थापितसतीश्वरलिंगमाहात्म्यवर्णनम्.	३४९	१
९४	अमृतेश्वरकरुणेश्वरज्योतीरूपेश्वराणां शिवलिंगानां माहात्म्यवर्णनम्.	३५०	१
९५	काश्यामपि भुजमूर्ध्वीकृत्य हरिः सेव्यो हरिः सेव्य इति व्यासवचनं श्रुत्वा शैलादिकृतव्यासभुजवाक्स्तम्भनवर्णनम्, ततो विष्णोरुपदेशेन व्यासेन विष्णुकण्ठसंस्पर्शनात्स्तम्भनान्निवृत्य शिवस्तुतिकरणम्.	३५१	२
९६	व्यासशापमोचनकथनम्, कृच्छ्रादिस्वरूपकथनम्, व्यासस्य काशीतो बहिर्निष्कासनवृत्तान्तवर्णनम्.	३५३	२
९७	सर्वपापापनोदनकाशीक्षेत्रस्थितसर्वतीर्थकथनम्.	३५८	२
९८	काश्यां मुक्तिमण्डपे श्रीविश्वेश्वरसमागमनमहोत्सवस्य विशेषेण वर्णनम्. ...	३६४	२
९९	श्रीशम्भुना ब्रह्मविष्ण्वादिदेवेभ्यः श्रीविश्वेश्वराख्यस्य काशीक्षेत्रपरमदैवतस्य माहात्म्यनिरूपणम्.	३६७	१
१००	काशीखण्डान्तर्गतेतिहासानुक्रमवर्णनम्, पञ्चतीर्थ्यादियात्रावर्णनम्, काशीखण्डश्रवणपठनफलवर्णनं च.	३६९	१

इति काशीखण्डोत्तरार्धम् ॥ (४–२) ॥

इति श्रीस्कान्दे महापुराणे चतुर्थं काशीखण्डम् ॥ ४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ अथश्रीस्कान्दे महापुराणे पञ्चममावन्त्यखण्डम् ॥ ५ ॥

॥ अथावन्त्यखण्डे प्रथममावन्त्यक्षेत्रमाहात्म्यम् ॥ (५-१) ॥

अध्यायाः	विषयाः	प०	पृ०
१	अथादौ परममङ्गलकारिणः श्रीमहाकालदेवस्य स्तवनम्, महाकालवनमाहात्म्यं शुश्रूषोर्व्यासस्य सनत्कुमारसमीप आगमनम, सनत्कुमारव्याससंवादारम्भः, तत्र सनत्कुमारेण महाकालवनप्रशंसावर्णनम्.	२	१
२	कल्पारंभे सृष्ट्युत्पत्तिवर्णनम, ब्रह्मविष्णुमहेश्वराणामुत्पत्तिवर्णनम्, देवकृतेश्वरस्तुतिवर्णनम्, ब्रह्मणः पञ्चमकपालच्छेदनात्तत्कपालधारणात्कपालीति नाम्ना देवैः शिवलिंगस्थापनम्.	२	१
३	ब्रह्मणो मस्तकगलिताद्रुधिरात्कुण्डलिपुरुषस्योत्पत्तिवर्णनम्, ब्रह्माज्ञया तस्य शिवविनाशार्थं शिवाग्रे गमनम्, शिवस्य विष्ण्वाश्रमे गमनम्, विष्णुना शिवाय दक्षिणभुजसमर्पणम्, विष्ण्वसृक्संभवस्य पुरुषस्य ब्रह्मस्वेदजातस्य पुरुषस्य च युद्धवर्णनम्, शिवविनाशार्थं राक्षसप्रेषणात्प्राप्तदोषस्य ब्रह्मणः प्रायश्चित्तविधानवर्णनम्.	३	२
४	सनत्कुमारव्याससंवादप्रसंगेन वैश्वानरोत्पत्तिवर्णनम्.	[illegible]	१
५	नरनारायणयोर्बदर्याश्रमं प्रति गमनम्, ताभ्यां जगद्धितार्थं तपःकरणम्, तद्वने दृष्ट्वा तुष्टेन शंकरेण पादपादिकान्प्रति वरप्रदानम्, तत्र नरनारायणदर्शनम्, पादपवचनाच्छिवस्य तत्रैवावस्थानम्, शिवदर्शनार्थं ब्रह्मादिदेवानां तत्रागमनम्.	[illegible]	१
६	तद्वने शिवदर्शनाभावाद्देवैर्यज्ञसमारंभणम्, सहस्रसमापर्यन्तं तपस्तप्त्वा [illegible] शिवदर्शनम्, देवैः शिवस्तुतिकरणम्, शिवेन देवेभ्यो वरप्रदानम्, शिववचना[illegible] स्थापनम्, कपालमोक्षणतीर्थमाहात्म्यवर्णनम्.	८	२
७	महाकालवनवासविधिवर्णनम्, महाकालवने वासं कुर्वतां पुरुषाणां फलप्राप्तिवर्णनपूर्वकं महाकालमाहात्म्यवर्णनम्.	११	१
८	सनत्कुमारव्याससंवादप्रसंगेन महाकालवने दानमाहात्म्यवर्णनम, शिवगौर्योः कलहे जायमाने तत्र कलकलेश्वरोत्पत्तिवर्णनम्, कलहनाशनकुण्डोत्पत्तिवर्णनम्, कलहनाशनकुण्डे दानमाहात्म्यवर्णनम्, अप्सरस्तीर्थोत्पत्तिमाहात्म्यवर्णनम, अप्सरसां तीर्थे स्नानदानादिमाहात्म्यवर्णनम्, अप्सरःकुण्डमाहात्म्यवर्णनम्. ...	१२	२
९	माहिषकुण्डोत्पत्तिवर्णने महिषवेषधारिणो हालाहलनामकराक्षसस्य शिवेन युद्धवर्णनम्, शिवन राक्षसस्य पराजयं कृत्वा तत्रैव-लिङ्गस्थापनम, [illegible]सरोमाहात्म्यवर्णनम्.	१४	१
१०	कौटुम्बिकेश्वरमाहात्म्यवर्णनम्.	१४	२
११	पारिजातकुसुममालां गृहीत्वा विद्याधरपतेर्वासववेश्मनि गमनम्, तत्र नृत्यकारिण्यै मेनकायै तेन तन्मालाप्रदानम्, तया मालया मोहितां तां मेनकां दृष्ट्वा नृत्यभंगाच्छक्रेण विद्याधरस्य शापप्रदानम्, शक्राज्ञया विद्याधरपतेर[illegible]गमनम, तत्र तीर्थे स्नानेन विद्याधरपतेः स्वस्थाने गमनम्, विद्याधरतीर्थमाहात्म्यवर्णनम्.	१५	१
१२	मर्कटेश्वरमाहात्म्यवर्णनम्, शीतलातीर्थमाहात्म्यवर्णनम्.	१५	१
१३	स्वर्गद्वारमाहात्म्यवर्णनम्....	१५	२
१४	चतुःसमुद्रमध्यप्रदेशे स्थितस्य राजस्थलतीर्थस्य माहात्म्यम्, तत्र सुद्युम्नराजस्य सुदर्शनाख्यया पत्न्या पृष्टेन दाल्भ्यमुनिना चतुःसमुद्रस्नानेन पुत्रप्राप्तिरूपफलकथनम्, दाल्भ्यवचनाच्छिवाराधनाय सुद्युम्नस्य गन्धमादने गमनम्, शिववाक्यादवन्त्यां तस्य गमनम्, चतुःसमुद्राराधनेन चतुःसमुद्राणां मूर्तत्वेन दर्शनम्, चतुर्भिरब्धिभिः पार्थिवाय वरप्रदानम्, तत्रैव तीर्थस्थापनम, चतुःसमुद्रमाहात्म्यवर्णनम्.	१५	२

CC-0. In Public Domain. Digitization by eGangotri

अध्यायाः	विषयाः	प०	पृ०
१५	शङ्करवापीतीर्थमाहात्म्यवर्णनम्, शिवेन सूर्याराधनां कृत्वा तन्नाम्ना स्वालिंगस्थापनम्, शंकरादित्यमाहात्म्यवर्णनम्.	१६	१
१६	नीलगन्धवतीप्रभावमाहात्म्यवर्णनम्, तत्र श्राद्धादिकरणेन स्नानदानादिभिश्च महापुण्यफलप्राप्तिकथनम्....	१६	२
१७	सनत्कुमारव्याससंवादप्रसङ्गेन दशाश्वमेघतीर्थमाहात्म्यवर्णने मन्वादिभिः स्नानेन दशाश्वमेधफलं सम्पादितमित्यादिसदृष्टान्तवर्णनम्.	१७	१
१८	एकानंशादेव्युत्पत्तिवर्णने तारकासुरराक्षसपीडितेन ब्रह्मणा निशादेव्याः स्मरणम्, तया तारकविनाशार्थं ब्रह्मण उपायकथनम्, तत्रैव ब्रह्मणा तस्याः स्थापनम्, एकानंशादेवीतीर्थमाहात्म्यवर्णनम्.	१७	१
१९	शिवपार्वत्योरक्षक्रीडासमये तत्र स्थले चण्डप्रचण्डदैत्ययोरागमनम्, पार्वत्या तयोः पराभवकरणम्, हरसिद्धिरिति शङ्करेण पार्वत्या नामकरणम्, हरसिद्धितीर्थमाहात्म्यवर्णनम्.	१८	१
२०	वटयक्षिणीमाहात्म्यवर्णनम्, पिशाचकतीर्थमाहात्म्यम्, शिप्रागुंफेश्वरतीर्थमाहात्म्यवर्णनम्, अगस्त्येश्वरमाहात्म्यवर्णनम्, ढुण्ढेश्वरमाहात्म्यवर्णनम्, डमरुकेश्वरमाहात्म्यवर्णनम्, अनादिकल्पेश्वरमाहात्म्यवर्णनम्, सिद्धेश्वरवीरभद्रचंडिकामाहात्म्यवर्णनम्, स्वर्णजालेश्वरतीर्थमाहात्म्यवर्णनम्, महामायामाहात्म्यवर्णनम्, कपालेश्वरमाहात्म्यवर्णनम्, स्वर्गद्वारतीर्थयात्रामाहात्म्यवर्णनम्.	१८	२
२१	हनुमत्केश्वरमाहात्म्यवर्णने रावणवधानन्तरं रामादीनामयोध्यायां गमनम्, तत्र राज्याभिषेकवर्णनम्, लिंगं याचितुं हनुमता लंकां गत्वा विभीषणाज्ञया लिंगं गृहीत्वाऽवन्त्यामागमनम्, सरस्तीरे लिंगं संस्थाप्य हनुमतः स्नानकरणम्, स्नानान्ते लिङ्गस्याऽचलनं दृष्ट्वा शिवाज्ञया तत्रैव तस्य लिङ्गस्य स्थापनम्, हनुमत्केश्वरतीर्थमाहात्म्यवर्णनम्.	१९	१
२२	यमेश्वरमाहात्म्यवर्णनम्, रुद्रसरोमाहात्म्यवर्णनम्.	१९	२
२३	महाकालयात्रावर्णनम्, यात्रामाहात्म्यवर्णनम्.	१९	२
२४	सुमतिनामकब्राह्मणस्य कैशिकपत्न्यां जातस्याग्निशर्मणः कुमारस्याऽभ्यासत्यागवर्णनम्, अग्निशर्मकृतदुष्टसंगतिवर्णनम्, नित्यप्राणिहिंसनशीलत्वात्सप्तर्षीनागतान्दृष्ट्वाऽग्निशर्मणा तद्वधोपायकरणम्, अत्रिवचनाद्गृहं गत्वा तस्य पापभागित्वेन स्वपरिवारं प्रति प्रश्नकरणम्, ततस्तैर्गृहस्थितैः पित्रादिभिः पापफलभोगस्यास्वीकरणं श्रुत्वाऽग्निशर्मणा पश्चात्तापं कृत्वा महर्षीन्प्रति शरणं गत्वा प्रार्थनाकरणम्, ततोऽत्रिमहर्षिदत्तमन्त्रस्योपासनात्पापनिष्कृतिवर्णनम्, ततः कालांतरेण वल्मीकसम्भवाद्वाल्मीकिरिति महर्षिभिस्तस्याभिधानकरणम्, तेन वाल्मीकिना कुशस्थलीं गत्वा शिवमाराध्य स्वनाम्ना लिंगस्थापनम्, वाल्मीकीश्वरमाहात्म्यवर्णनम्.	२०	२
२५	शुक्रेश्वरभीमेश्वरगर्गेश्वरकामेश्वरचूडामणीश्वरचण्डीश्वरादितीर्थमाहात्म्यवर्णनम्.	२१	२
२६	कालवनस्य सौन्दर्यपूर्वकमाहात्म्यवर्णनम्, कालवनस्यासमन्तात्सर्वदिक्षु स्थितानां पिंगलेशादिदेवतानां माहात्म्यवर्णनम्, कल्पसप्तकमाहिमवर्णनम्, पंचेशानीयात्रामाहात्म्यम्, अक्रूरेश्वरमाहात्म्यम्, ब्रह्मकुण्डमाहात्म्यवर्णनम्, मन्दाकिनीतीर्थमाहात्म्यवर्णनम्.	२१	२
२७	अंकपादाख्यस्थानमाहात्म्यवर्णने वलरामकृष्णयोर्जन्मकर्मनिरूपणम्, सांदीपनये गुरुदक्षिणां दातुं प्रवृत्तयोस्तयो रामकृष्णयोः समुद्रस्थं शंखासुरं हत्वा यमलोके गमनम्, तत्र यमस्य पराजयं कृत्वा सांदीपनिपुत्रं गृहीत्वा तयोर्गुरुसमीप आगमनम्, अवंत्यामङ्कपादाख्ये लिंगस्थापनम्, मूर्तिपञ्चकमाहात्म्यवर्णनम्. ...	२४	१
२८	चन्द्रादित्यमाहात्म्यम्, करभेश्वरमाहात्म्यम्, गणेशमाहात्म्यम्, कुसुमेश्वरजयेश्वरयोर्माहात्म्यवर्णनम, शिवद्वारमाहात्म्यवर्णनम्, मार्कण्डेयेश्वरमाहात्म्यवर्णनम्, ब्रह्मेश्वरमाहात्म्यम, ब्रह्माणीकुण्डमाहात्म्यम्, यज्ञवापीमाहात्म्यम्, पशुपतिरुद्रपुररूपकुंडकेदारकुंडकरीकुंडाजागंधचक्रतीर्थादिमाहात्म्यवर्णनम्, सोमवतीलिंगसोमेश्वरलिंगमाहात्म्यवर्णनम्.	२६	२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अध्यायाः	विषयाः	प०	पृ०
२९	अनरकतीर्थमाहात्म्यवर्णनम्, तत्प्रसंगेन नरकवर्णनं नरकयातनादिकानां च वर्णनम्, नरकाप्राप्तिसाधनकथनं च.	२९	१
३०	अनरकतीर्थे दीपदानमाहात्म्यम्, तत्र पूजाविधिविधानकथनम्, दीपदानेन वीर्यतेजआदिवृद्धिप्राप्त्यादिकथनम्.	२९	२
३१	केदारेश्वरतीर्थमाहात्म्यवर्णनम्, जटातीर्थशुंगतीर्थेन्द्रतीर्थचंद्रेश्वरकुण्डेश्वरगोपतीर्थचिपिटातीर्थानंदेश्वररामेश्वरादितीर्थमाहात्म्यवर्णनम्, तत्र रामेण पितुर्दशरथस्य श्राद्धकर्मकरणम्, सौभाग्यतीर्थघृततीर्थयोगेश्वरीदेवीशंखावर्तसुधोदकसुधेश्वरकिंपुनतीर्थपत्तनेश्वरदुर्धर्षस्थविरविनायककामोदकादितीर्थमाहात्म्यवर्णनम्.	३२	१
३२	शक्रवचनादर्जुनेन केशवार्कस्थापनम्, श्रीकृष्णवचसाऽर्जुनेन सूर्यस्तंभनम्, संतुष्टेन सूर्येण तस्मै वरप्रदानम्, अर्जुनेन सूर्यस्तुतिकरणम्, सूर्याज्ञया तत्रैव नरादित्येतिनाम्ना सूर्यस्य स्थापनं च, नरादित्यमाहात्म्यवर्णनम्.	३४	१
३३	श्रीकृष्णेन सूर्यस्तवनकरणम्, केशवादित्यमाहात्म्यवर्णनम्.	३६	१
३४	स्कन्दजन्मकथावर्णनम्, तत्र शंकरेण कामज्वलनम्, अग्निना शिववीर्यप्राशनम्, गंगायां वीर्यत्यागः, स्नातुमागतानां षट्कृत्तिकानामुदरे तस्य वीर्यस्य प्रवेशः, ततः स्कन्दोत्पत्तिः, शक्तिभेदतीर्थमाहात्म्यवर्णनम्.	३६	२
३५	अगस्त्येश्वरमाहात्म्यवर्णनम्.	३८	२
३६	प्रतिकल्पस्थभिन्नभिन्नलिंगानां नामनिदर्शनपूर्वकं तीर्थवर्णनम्, अन्धकासुरयुद्धसमये शिवस्थापितस्य नरदीपतीर्थस्य माहात्म्यवर्णनम्.	३९	१
३७	ओंकारेश्वरमाहात्म्यवर्णनम्, अभयेश्वरलिंगमाहात्म्यम्, अंगारकीचतुर्थीव्रतमाहात्म्यवर्णनम्.	४०	२
३८	देवीचंडीकृतं पराभवमसहमानेनान्धकासुरेण शिवस्तुतिकरणवर्णनम्, शिवेन तत्रावन्त्यां चामुंडादीनां मातॄणां स्थापनम्, मातृकापूजनविधिवर्णनम्, अन्धकस्य शिवगणत्वप्राप्तिवृत्तान्तवर्णनम्.	४२	१

अध्यायाः	विषयाः	प०	पृ०
३९	महाकालवनमाहात्म्यवर्णनम्.	४३	१
४०	शिवब्रह्मसंवादे कनकशृंगाभिधानपुरीवर्णनम्.	४३	१
४१	कुशस्थलीमाहात्म्यवर्णनम्.	४४	१
४२	अवन्त्यभिधानपुरीमाहात्म्यवर्णनम्.	४४	२
४३	उज्जयिन्यां त्रिपुरासुरेण ब्रह्माणमुद्दिश्य तपश्चरणम्, ब्रह्मणा तस्मै वरप्रदानम्, त्रिपुरासुरपीडितानामिन्द्रादीनां शिवाग्रे गमनम्, शिवेन तेभ्योऽभयदानम्, शिवाज्ञयेन्द्रादिभिरवन्त्यां चामुण्डोपास्तिकरणम्, चामुण्डावचनाच्छिवेन दैत्यपराजयकरणम्, तत्र त्रिपुरदानवस्य उज्जितत्वादुज्जयिनीति नाम्ना तस्य पुरस्य प्रसिद्धिवर्णनम्, उज्जयिनीमाहात्म्यवर्णनम्.	४५	२
४४	रत्नाभावाद्रत्नोत्पादनार्थं समुद्रमंथनं कृत्वा ततो निर्गतस्य पीयूषस्य ग्रहणार्थं देवासुरयोर्विवादे समुत्पन्ने भगवता मोहिनीरूपमास्थायामृतविभागे क्रियमाणे देवपंक्त्यां कपटेन स्थितस्य राहोः शिरश्छेदकरणम्, तत्र राहुकेतुपीडानिरसनार्थं तीर्थनिर्मापणम्, राहुतीर्थमाहात्म्यवर्णनम्, रत्नकुण्डस्नानमाहात्म्यवर्णनम्, पद्मावतीपुरीनामवृत्तान्तवर्णनम्.	४७	१
४५	कुमुद्वतीपुरीशोभावर्णनम्, कुमुद्वतीप्रभावमाहात्म्यवर्णनं च.	४७	२
४६	महाकालवनवर्णने नंदनवनवर्णनम्, कामधेनुवर्णनम्, अमरावतीपुरीनामवृत्तान्तवर्णनम्.	४८	२
४७	विशालाख्यापुरीमाहात्म्यवर्णनम्.	४९	१
४८	निमेपादारभ्य चतुरशीतिकल्पपर्यन्तं कालप्रमाणनियमवर्णनम्.	५०	१
४९	कपालधारिणः शिवस्य वैकुण्ठे भिक्षार्थं गमनम्, भिक्षादानसमये विष्णोरंगुल्यां शिवेन शूलेन प्रहारे कृते विष्णोरंगुलितोऽसृक्प्रवाहनिर्गमनम्, तस्यैव प्रवाहस्य नदीरूपेण परिणतस्य शिप्रानाम्ना प्रसिद्धिकथनम्, बाणासुरकृष्णयुद्धवर्णनम्, तत्र शिवविष्ण्वोर्युद्धे मिथोऽस्त्रप्रेषणम्, शैवज्वरवैष्णवज्वरयोर्मध्ये शैवज्वरस्य पराभव-		

CC-0. In Public Domain. Digitization by eGangotri

अध्यायाः	विषयाः	प०	पृ०
	वर्णनम्, तस्य स्थानस्य ज्वरघ्नीति नाम्ना प्रसिद्धिवर्णनम, ज्वरघ्नीतीर्थमाहात्म्यवर्णनम्.	५१	१
५०	पापनाशिनीतीर्थवर्णनप्रसङ्गेनाधर्मचारिणो दमनस्य राज्ञो मृगयार्थमरण्ये गमनम्, निशि वटवृक्षे घोटकं बद्ध्वा तत्रैव राज्ञो निद्राकरणम्, ततो राजमस्तके सर्पपतनम्, सर्पदंशनेन पीडितस्याग्रे यमदूतानामागमनम्, ततो यमलोकगतस्य राज्ञो यमयातनासमये वायसभक्षितस्य तच्छरीरमांसस्य शिप्रायां पतनम्, तेन पुण्येन दमनस्य शिवलोके गमनम्, यमयमदूतसंवादे शिप्रामाहात्म्यवर्णनम्.	५२	१
५१	भिक्षार्थं शिवस्य नागलोके गमनम्, भिक्षालब्ध्यभावात्तत्रस्थैकविंशतिकुण्डस्थस्य सर्वामृतस्य प्राशनेन भीतैः पन्नगैर्वासुकिस्तवनम्, सर्वपन्नगैः शिप्रां गत्वा शिवस्तवनकरणम्, तेन तुष्टेनेशेन तत्राऽमृतोद्भवानाम्ना कुण्डस्थापनम्, अमृतोद्भवामाहात्म्यवर्णनम्.	५३	१
५२	हिरण्याक्षपीडितैरिंद्रादिभिर्ब्रह्मलोकं गत्वा ब्रह्मणे सर्ववृत्तान्तकथनम्, ब्रह्मदेवेन देवेभ्यो जयविजययोः शापकारणकथनम्, हिरण्याक्षहिरण्यकशिप्वोर्जन्मकर्मकथनम्, हिरण्याक्षवधाय वराहावतारवर्णनम्, वराहाङ्गतः शिप्राया उत्पत्तिवर्णनम्, शिप्रानदीशोभावर्णनम्, शिप्रामाहात्म्यवर्णनम्.	५४	१
५३	महाकालवने सुन्दराख्यतीर्थमाहात्म्यवर्णनम्, पिशाचमोचनतीर्थमाहात्म्यवर्णनम्, तत्र देवलद्विजस्य कथावर्णनम्.	५५	२
५४	नीलगंगामाहात्म्यवर्णनम्.	५७	१
५५	रेवाजलनिमग्नां भूमिं दृष्ट्वा तदुद्धारार्थमगस्त्येन विन्ध्ये तपश्चरणम्, तत्तपःप्रसन्नाया विन्ध्यवासिन्या उज्जयिन्यां गमनम्, विन्ध्यवासिनीविमलेदतीर्थमाहात्म्यवर्णनम्.	५७	२
५६	मांधातृक्षेत्ररुद्रसरोमाहात्म्यवर्णनम्, क्षातासंगमतीर्थवर्णने सूर्यानुसूर्ययोर्विवाहानन्तरं यमयमुनयोरुत्पत्तिवर्णनम्, क्षातासंगमतीर्थमाहात्म्यम.	५८	२

अध्यायाः	विषयाः	प०	पृ०
५७	गयातीर्थमाहात्म्यवर्णनम्, तत्र गयातीर्थप्रशंसायां तुहुण्डराक्षसपीडितानां सर्वेषां देवानां ब्रह्माग्रे गमनम्, ब्रह्मादिभिर्विष्णुलोके गत्वा विष्णुस्तवनकरणम्, विष्ण्वनुज्ञया सर्वेषां गयातीर्थे गमनम्.	६०	१
५८	गयातीर्थे समंत्रकविधानपूर्वकश्राद्धकर्ममाहात्म्यवर्णनम्.	६०	२
५९	गयाक्षेत्रस्थफल्गुनदीमाहात्म्यवर्णनम्, आदिगयावृद्धगयाविष्णुपदीगयाकोष्टगदाधरवेदिकाऽक्षयवटप्रेतमुक्तिकरीशिलाऽच्छोदादितीर्थेषु स्नानदानफलमाहात्म्यम्, तत्र ऋषिपत्नीनारदसंवादे नारदेनर्षिपञ्चमीव्रतमाहात्म्यवर्णनम्.	६२	१
६०	पुरुषोत्तममाहात्म्यवर्णने लक्ष्मीनारायणसंवादप्रसंगेन मलमासमाहात्म्यवर्णनम्, अधिमासे व्रतनियमादिविविधविधानकथनम्, मलिम्लुचमासे स्नानदानादिमाहात्म्यवर्णनम्.	६२	२
६१	अधिमासे महाकालवनवासमाहात्म्यम्, पुरुषोत्तमपूजाक्रममाहात्म्यम्, जटेश्वरमहेश्वरतीर्थस्नानमाहात्म्यम्, भार्गवरामतीर्थमाहात्म्यम्, कौशिकीनदीमाहात्म्यम्, अधिमासे स्नानदानादिमाहात्म्यवर्णनम्.	६४	१
६२	गोमतीकुण्डमाहात्म्यम्, काशीमाहात्म्यम्, गोमतीकुण्डे स्नानादिपुण्यफलप्राप्तिवर्णनम्.	६४	२
६३	कन्थडेश्वरखगर्तासंगमवीरेश्वरवामनतीर्थमाहात्म्यवर्णनम्, तत्र बलिपीडितैर्देवैर्ब्रह्मलोकं गत्वा सर्वबलिवृत्तनिवेदनम्, ब्रह्मणा विष्णोराराधनार्थमुपायकथनम्, तत्र ब्रह्मदेवेन्द्रादिदेवसंवादप्रसंगेन विष्णुसहस्रनामकथनम्, सहस्रनामफलश्रुतिकथनम्, वामनावतारादिकुण्डस्थापनवृत्तान्तमाहात्म्यवर्णनम्.	६५	१
६४	वीरेश्वरकालभैरवतीर्थवर्णनम्, तत्र भैरवाष्टककथनम्.	७०	२
६५	नागालयतीर्थप्रस्तावे जनमेजयास्तिककथानकम्, नवकुण्डनामनिदर्शनपूर्वकमाहात्म्यवर्णनम्, रमासरस्तीर्थमाहात्म्यम्.	७१	२
६६	नृसिंहजन्मकथावर्णनपूर्वकं नृसिंहतीर्थमाहात्म्यवर्णनम्.	७२	२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अध्यायाः	विषयाः	प०	पृ०
६७	कुटुम्बेश्वरमाहात्म्यवर्णने दक्षमहादेवादितपश्चर्यावर्णनम्.	७२	२
६८	देवप्रयागतीर्थमाहात्म्यवर्णनम्, आनन्दभैरवतीर्थमाहात्म्यम्, अखण्डेश्वरतीर्थवर्णने ब्रह्मदत्तस्य महापापिनोऽपि तत्र मरणाद्ब्रह्मलोकप्राप्तिवर्णनम्, नारदब्रह्मसंवाद-प्रसंगेनाखंडसरस्तीर्थमाहात्म्यवर्णनम्.	७३	२
६९	कर्कराजतीर्थमाहात्म्यम्, विधूम्रार्चिस्तीर्थवर्णनम्, चातुर्मास्यफलवर्णनम्. ...	७४	१
७०	बिन्दुसरोरम्यसरस्तीर्थमाहात्म्यम्, तीर्थसंख्यापरिगणनपूर्वकं क्रमेण नामनिर्देशकरणम्, देवयात्रांतर्गृहीसर्वतीर्थयात्रानुक्रमणिकादिकथनम्.	७५	१
७१	अवन्तीक्षेत्रमाहात्म्यफलश्रुतिवर्णनम्, ग्रन्थोपसंहारवर्णनम्.	७७	१

इत्यावन्त्यखण्डे प्रथममवन्तीक्षेत्रमाहात्म्यम् ॥ (५-१) ॥

अथावन्त्यखण्डे द्वितीयमवन्तीस्थचतुरशीतिलिंगमाहात्म्यम् ॥ (५-२) ॥

अध्यायाः	विषयाः	प०	पृ०
१	अथ चतुरशीतिलिंगमाहात्म्यप्रस्ताव उमामहेश्वरसंवादारम्भः, तत्र प्रथममगस्त्येश्वरलिंगमाहात्म्यवर्णनम्, तत्प्रसंगेन पूर्वेतिहासवर्णनम्, तत्र देवानां सुखप्राप्त्यर्थं कुंभयोनिना दैत्यान्हत्वा पश्चात्तापेन हत्यादोषभीतेनेश्वराराधनां कृत्वा शिवानुज्ञया स्वनाम्ना शिवलिंगस्थापनम्, तस्यागस्त्येश्वरलिंगस्य माहात्म्यवर्णनम्. ...	७९	२
२	अथ गुहेश्वरलिंगमाहात्म्यवर्णनम्, तत्र मंकणकऋषिणा तपस्तप्त्वा कस्मिंश्चित्समये कराच्छाकरसनिर्गमनेनाश्चर्यं प्राप्य नर्तनकरणम्, तेन सर्वेषां स्थावरजंगमानां संजातं नृत्यं दृष्ट्वा देवानां शिवलोके गमनम्, शिवेन तस्य मंकणकस्य शंकानिरासकरणम्, शिवाज्ञया महाकालवने लिंगस्थापनम्, मंकणकर्षेर्मुक्तिप्राप्तिवर्णनम्, गुहेश्वरमाहात्म्यवर्णनम्.	८०	२
३	अथ ढुंढेश्वरमाहात्म्यवर्णनम्, तत्र ढुंढनामकशैवगणस्येन्द्रसभायां गमनम्, तत्र नृत्यमानां रंभां दृष्ट्वा काममोहितस्य ढुंढस्येन्द्रेण शापप्रदानम्, ततो मानुष्यं प्राप्य ढुंढेन महाकालवने शिवमाराध्य स्वनाम्ना लिंगस्थापनम्, ढुंढेश्वरतीर्थलिंगमाहात्म्यवर्णनम्.	८१	२
४	अथ डमरुकेश्वरमाहात्म्यवर्णनम्, तत्र रुरुपुत्रेण वज्रदैत्येन सह युद्धे पराजयं प्राप्तानां सेन्द्रादिदेवानां ब्रह्मलोके गमनम्, ब्रह्मणः शरीरतो निर्गतायाः सकन्यकायाः कृत्याया वज्रेण समं युद्धवर्णनम्, वज्रकृतकृत्यापराभववर्णनम्, कृत्यादिभिरीश्वराराधनाकरणम्, ईश्वरवज्रयोर्युद्धवर्णनम्, ईश्वरप्रेरितडमरुणा वज्रनाशकरणम्, ततस्तत्र डमरुकेश्वरेतिलिंगस्थापनम्, डमरुकेश्वरलिंगमाहात्म्यवर्णनम्.	८२	१
५	अथानादिकल्पेश्वरलिंगमाहात्म्यवर्णनम्.	८३	१
६	अथ स्वर्णजालेश्वरमाहात्म्यवर्णनम्, तत्र पार्वत्या सह क्रीडतः शंकरस्य वीर्यप्राशनेन वह्निना तद्दाहशमनार्थं गंगायामवलोडनकरणम्, ततो वह्नेः काञ्चननामकप्रथमापत्यस्य दर्शनेन सर्वत्र वादप्रचलनम्, तमनर्थं दृष्ट्वा वह्निना शंकराय कांचनपुत्रस्य समर्पणम्, शंकराज्ञया काञ्चनस्य महाकालवने गमनम्, काञ्चनेन तपस्तप्त्वा ईश्वरवचनात्स्वनाम्ना लिंगस्थापनम्, स्वर्णजालेश्वरलिंगमाहात्म्यवर्णनम्.	८४	१
७	अथ त्रिविष्टपेश्वरलिंगमाहात्म्यवर्णनम्, तत्र नारदवचनान्महाकालवने त्रिविष्टपैर्लिंगस्थापनम्, त्रिविष्टपेश्वरलिंगमाहात्म्यवर्णनम्.	८५	१
८	अथ कपालेश्वरलिंगमाहात्म्यवर्णनम्, तत्र महाकालवने पैतामहयज्ञे हस्ते कपालं धृत्वा शंकरस्यागमनम्, शंकरस्य कुचेलवेषं दृष्ट्वा ब्राह्मणैरपमानकरणम्, ततः शिवेन तत्र यज्ञमण्डपे कपालं निधाय गमनम्, तदसहमानैर्ब्राह्मणैर्मण्डपाद्बहिः कपालप्रक्षेपणम्, ततः सहस्रावधिकपालानां दर्शनम्, तदद्भुतं दृष्ट्वा सविस्मयैर्ब्राह्मणैः शिवस्तवनकरणम्, कपालेश्वरनाम्ना लिंगस्थापनम्, कपालेश्वरलिंगदर्शनेन ब्रह्महत्यादिमहापातकविनाशकमाहात्म्यवर्णनम्.	८६	१

CC-0. In Public Domain. Digitization by eGangotri

अध्यायाः	विषयाः	प०	पृ०
९	अथ स्वर्गद्वारलिंगमाहात्म्यवर्णनम्, तत्र दक्षयज्ञे दक्षकृतेनापमानेन संक्रुद्धस्य शिवस्याज्ञया वीरभद्रादिशैवगणानां विष्ण्वादिदेवैः सह युद्धवर्णनम्, तत्र विष्ण्वादिदेवानां पराभवः, शैवगणैः स्वर्गद्वारनिर्बन्धनकरणम्, देवैः स्वर्गप्रवेशाभावं समवलोक्य विष्ण्वाज्ञया शिवाराधनार्थं महाकालवने गमनम्, तत्र स्वर्गद्वारनामकलिंगस्थापनम्, स्वर्गद्वारलिंगमाहात्म्यवर्णनम्.	८७	१
१०	अथ कर्कोटकेश्वरलिंगमाहात्म्यवर्णनम्, तत्र मातृदत्तशापविनाशार्थं कर्कोटकनागेन महाकालवने तपश्चरणम्, तत्तपःप्रसन्नेन शिवेन तस्मै वरप्रदानम्, शिवलिंगस्य स्वनाम्ना स्थापनम्, कर्कोटकेश्वरलिंगमाहात्म्यवर्णनम्.	८८	१
११	अथ सिद्धेश्वरलिंगमाहात्म्यवर्णनम्, तत्र सिद्धिप्राप्त्यर्थं देवदारुवने तपः कुर्वाणैर्विप्रैराकाशवाणीश्रवणान्महाकालवने गमनम्, तत्र तपस्तप्त्वा सिद्धिप्रातिदलिंगस्थापनम्, सिद्धेश्वरलिंगमाहात्म्यवर्णनम्.	८८	२
१२	अथ लोकपालेश्वरलिंगमाहात्म्यवर्णनम्, तत्र हिरण्यकशिपोः सकाशात्सञ्जातपराभवैर्लोकपालैर्विष्ण्वाज्ञया तपश्चरणाय महाकालवने गमनम्, तपःप्रभावेन दैत्याञ्जित्वा स्वस्वस्थानं प्रति गमनम्, लोकपालेतिनाम्ना महाकालवने लिंगस्थापनम्, लोकपालेश्वरलिंगमाहात्म्यवर्णनम्.	८९	१
१३	अथ कामेश्वरमाहात्म्यवर्णनम्, तत्र ब्रह्मणा सृष्टिनिर्मापणार्थं काममुत्पाद्य तस्य द्वादशस्थानानि दत्त्वा शिवोपरि कामोद्दीपनार्थं प्रेषणम्, शिवेन स्वतपसो विघ्नकारिणः कन्दर्पस्य भस्मकरणम्, पतिनाशं ज्ञात्वा रत्या शोककरणम्, ततः शिवाज्ञया अनंगीभूतस्य कामस्य महाकालवने गमनम्, तत्र तपस्तप्त्वा लिंगस्थापनम्, कामेश्वरलिंगमाहात्म्यवर्णनम्.	८९	२
१४	अथ कुटुम्बकेश्वरलिंगमाहात्म्यवर्णनम्, तत्र क्षीराब्धिमन्थनसमये निर्गतं कालकूटं पीत्वा तदुत्थं दाहमसहमानेन शंकरेण शिप्रायै तस्य कालकूटस्य प्रदानम्, तद्गृहीत्वा शिप्राया महाकालवने गमनम्, शिप्रया कामेश्वरलिंगसमीपस्थलिंगोपरि तस्य कालकूटविषस्य निक्षेपणम्, कालकूटविषलेपनात्तद्दर्शनार्थमागतानां विप्राणां मरणप्राप्तिवर्णनम्, शिवेन तत्रागत्य विप्राणां पुनरुज्जीवनकरणम्, शिवेन तल्लिंगस्य कुटुंबकेश्वरेति नामकरणम्, कुटुंबकेश्वरलिंगमाहात्म्यवर्णनम्. ...	९१	१
१५	अथेन्द्रद्युम्नेश्वरलिंगमाहात्म्यवर्णनम्, तत्र पुण्यभ्रंशादिन्द्रद्युम्नस्य स्वर्गतः पतनम्, पश्चात्तापेनाक्षयां कीर्तिं सम्पादयितुं हिमवन्नगे मार्कण्डेयदर्शनं गृहीत्वा तदाज्ञया महाकालवने गत्वा शिवलिंगार्चनकरणम्, तेनाक्षयां कीर्तिं लब्ध्वा स्वनाम्ना लिंगस्थापनम्, इन्द्रद्युम्नेश्वरलिंगमाहात्म्यवर्णनम्.	९१	२
१६	अथेशानेश्वरलिंगमाहात्म्यवर्णनम्, तत्र मुंडपुत्रेण तुहुण्डेन जितैर्देवैः शिवाज्ञया महाकालवने गत्वा शिवलिंगार्चनकरणम्, ईश्वरेण प्रसन्नेन स्वनाम्ना तस्य लिंगस्येशानेश्वरेति नामकरणम्, ईशानेश्वरस्य देवैः स्तोत्रकरणम्, ईशानेश्वरलिंगमाहात्म्यवर्णनम्.	९२	२
१७	अथाप्सरसेश्वरलिंगमाहात्म्यवर्णनम्, तत्र शक्रसभायां नृत्यमानाया रंभायास्तालादिभिर्विकलत्वं प्राप्तं नृत्यं दृष्ट्वा शक्रेण क्रुधा रंभायै शापदानम्, तया शापनिवृत्त्यर्थं नारदवचनात्स्वनाम्ना महाकालवने लिंगं संस्थाप्य नित्यपूजनेन शिवं सन्तोष्य तस्माद्वरं लब्ध्वा स्वर्लोकं प्रति गमनम्, अप्सरसेश्वरलिंगमाहात्म्यवर्णनम्. ...	९३	१
१८	अथ कलकलेश्वरलिंगमाहात्म्यवर्णनम्, तत्रोमामहेश्वरविवादप्रसंगे त्रिभुवने कम्पिते सति तत्र सर्वतः समुत्पन्नेन कलकलेतिशब्देन लिंगप्रादुर्भावोऽतस्तस्य लिंगस्य कलकलेतिनामकरणम्, कलकलेश्वरलिंगमाहात्म्यवर्णनम्.	९३	२
१९	अथ नागचंडेश्वरलिङ्गमाहात्म्यवर्णनम्, तत्र नागचंडेन स्थापितस्य लिंगस्य दर्शनार्थं देवानामागमनम्, तल्लिंगसंपूजने निर्माल्यलंघनादिदोषे प्राप्ते तस्य नागचण्डेश्वरलिंगस्य समीपे लिङ्गस्थापनम्, तेन देवानां निर्माल्यलंघनादिदोषान्निवृत्तिः, नागचंडेश्वरलिंगमाहात्म्यवर्णनम्....	९४	२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अध्यायाः	विषयाः	पृ०	पं०
२०	अथ प्रतीहारेश्वरलिङ्गमाहात्म्यवर्णनम्, तत्र रममाणयोरुमामहेश्वरयोर्द्वारि स्थितेन प्रतिहारेण नन्दिनाऽज्ञातेन वह्निनाऽन्तःपुरे प्रवेशकरणम्, तेन रुष्टेन शिवेन नन्दिने शापप्रदानम्, तेन शापेन नंदिना पृथिव्यां महाकालवने गत्वा प्रतिहारेश्वरेति नाम्ना शिवलिंगस्थापनम्, तत्प्रसादेन नंदिनः पुनः शिवलोकं प्रति गमनम्, प्रतिहारेश्वरलिंगमाहात्म्यवर्णनम्.	९५	१
२१	अथ कुक्कुटेश्वरलिंगमाहात्म्यवर्णनम्, तत्र कौशिकाख्यस्व भूपस्य प्राग्जन्मनि नित्यं कुक्कुटभक्षणात्ताम्रचूडदत्तशापेन प्रतिनिशि कुक्कुटत्वप्राप्तिः, तच्छापनाशार्थं महाकालवने पक्षियोनिविमोचनाख्यलिंगपूजनम्, तेन तस्य कुक्कुटत्वप्राप्तिनिवृत्तिः, कुक्कुटेश्वरलिंगस्थापनम्, कुक्कुटेश्वरलिंगमाहात्म्यवर्णनम्.	९५	२
२२	अथ कर्कटेश्वरलिंगमाहात्म्यवर्णनम्, तत्र धर्ममूर्त्याख्यनृपतिवसिष्ठसंवादप्रसंगेनैश्वर्यप्राप्तिकारणं जिज्ञासमानेन तेन पृष्टेन वसिष्ठेन 'तव प्राग्जन्मनि कृतेन पातकेन कर्कटत्वप्राप्तौ केनचिद्वायसेन कर्कटशरीरं धृत्वा शिवाग्रे पातितं ततोऽन्तकाले शिवदर्शनप्रभावेनैतास्मिञ्जन्मन्यैश्वर्यप्राप्तिः' इति वृत्तान्तकथनम्, कर्कटेश्वरलिंगमाहात्म्यवर्णनम्.	९७	१
२३	अथ मेघनादेश्वरलिङ्गमाहात्म्यवर्णनम्, तत्र मदांधाख्येन राज्ञा दौर्जन्याद्यज्ञक्रियाणामकरणेन भूतले वृष्ट्यभावाद्देवानां ब्रह्मलोके गमनम्, ततो ब्रह्माज्ञया देवानां महाकालवने गमनम्, तत्र देवैर्मेघप्रतिष्ठापितलिङ्गस्तवनम्, तस्य लिंगस्य पूजनेन वृष्टिप्राप्तिवर्णनम्, अतस्तस्य मेघस्थापितस्य लिंगस्य मेघनादेश्वरेतिनामकरणम्, मेघनादेश्वरलिंगमाहात्म्यवर्णनम्.	९७	२
२४	अथ महालयेश्वरलिंगमाहात्म्यवर्णनम्.	९८	२
२५	अथ मुक्तीश्वरलिंगमाहात्म्यवर्णनम्, तत्र महाकालसमीपस्थे मुक्तिलिंगे त्रयोदशवर्षपर्यंतं नारायणं ध्यायतो मुक्तिनामकविप्रस्याग्रेऽकस्मात्कस्यचिद्व्याधस्यागमनम्, विप्रदर्शनेन लिंगदर्शनेन च व्याधस्य दौर्जन्यं गत्वा सौष्ठवप्राप्तिवर्णनम्, व्याधेन जले स्थित्वा तपश्चरणम्, अष्टाक्षरमंत्रजपेन तस्य मुक्तिः, तत्स्थाने प्राप्तस्य कस्यचिद्व्याघ्रस्यापि तन्मंत्रश्रवणेन मोक्षवर्णनम्, व्याघ्रेण पूर्वजन्मकथानककथनपूर्वकमात्मनः शापकारणकथनम्, तयोर्व्याघ्र-मुक्तिद्विजयोर्महाकालवने गमनम्, तत्र लिंगस्थापनम्, मुक्तीश्वरलिंगमाहात्म्यवर्णनम.	९९	१
२६	अथ सोमेश्वरलिंगमाहात्म्यवर्णनम्, तत्र रोहिणीं विनाऽन्यासु चन्द्रस्याप्रीतिं दृष्ट्वा क्रोधेन दक्षेण दत्तस्य शापस्य निवृत्त्यर्थं सोमस्य सत्यलोके गमनम्, तेन ब्रह्मणा सह वैकुंठं गत्वा विष्णोःस्तवकरणम्, विष्णवाज्ञया सोमस्य महाकालवने गमनम्, तत्र लिंगस्थापनम्, तेन सोमस्य यक्ष्मरोगशान्तिवर्णनम्, सोमेश्वरलिंगमाहात्म्यवर्णनम्.	१००	२
२७	अथानरकेश्वरलिंगमाहात्म्यवर्णनम्, तत्र नरकयातनाक्रमवर्णनपुरःसरं निमिना पुण्यबाहुल्येऽपि किञ्चित्पापेन यमलोकगमनम्, पुनरनरकेश्वरदर्शनेन सर्वपापक्षये जाते विमानमारुह्येन्द्रलोके गमनम्, यमयातनोपभोगकारिणां प्राणिनां दुःखेन दुःखितस्य निमेर्यमकृतं सान्त्वनम्, अनरकेश्वरलिंगमाहात्म्यवर्णनम्. ...	१०२	१
२८	अथ जटेश्वरमाहात्म्यवर्णनम, तत्र वीरधन्वनो राज्ञः कथाकथनपूर्वकं जटेश्वरमाहात्म्यवर्णनम्, जटेश्वरलिंगस्थापनादिवर्णनम्.	१०४	१
२९	अथ रामेश्वरलिंगमाहात्म्यवर्णनम्, तत्रैकविंशतिवारान्निःक्षत्रियां पृथिवीं कृत्वा शत्रुहत्यादोषनिवर्हणार्थं नानातीर्थक्षेत्राणि भ्रान्त्वा दोषाभावमदृष्ट्वा नारदोपदेशाज्जामदग्न्ये रामस्य महाकालवने जटेश्वरसमीपे गमनम्, तत्र तपस्तप्त्वा दोषनाशं दृष्ट्वा स्वनाम्ना लिंगस्थापनम्, रामेश्वरलिंगमाहात्म्यवर्णनम्.	१०५	२
३०	अथ च्यवनेश्वरलिंगमाहात्म्यवर्णनम्, तत्र च्यवननामकर्षिणा शर्यातिराजकन्यां वृत्वा ततो महाकालवने तपस्तप्त्वा स्वनाम्ना लिंगस्थापनम्, च्यवनेश्वरलिंगमाहात्म्यवर्णनम्.	१०६	२

CC-0. In Public Domain. Digitization by eGangotri

अध्यायाः	विषयाः	प०	पृ०
३१	अथ खण्डेश्वरलिंगमाहात्म्यवर्णनम्, तत्र प्रियव्रतपुत्रस्य भद्राश्वराजस्य कुंभयोनिवचनान्महाकालवने गमनम्, तत्र खण्डितव्रतपूर्णतायै लिंगस्थापनम्, खण्डेश्वरलिंगमाहात्म्यवर्णनम्.	१०८	१
३२	अथ पत्तनेश्वरलिंगमाहात्म्यवर्णनम्.	१०८	२
३३	अथानन्देश्वरलिङ्गमाहात्म्यवर्णनम्, तत्रानमित्रसुतेनानंदेन केनचित्कारणेन महाकालवने गत्वा स्वनाम्ना लिंगस्थापनम्, आनंदेश्वरलिंगमाहात्म्यवर्णनम्. ...	१०९	२
३४	अथ कंथडेश्वरलिंगमाहात्म्यवर्णनम्, तत्र पाण्डवनामकब्राह्मणस्य कन्थानिमित्तकं तपस्तप्त्वा कन्थानाम्ना लिंगस्थापनम्, कन्थडेश्वरलिंगमाहात्म्यवर्णनम्. ...	११०	१
३५	अथेन्द्रेश्वरलिङ्गमाहात्म्यवर्णनम्, तत्र ब्रह्मपुत्रस्य कुशध्वजस्य स्वर्गतः पातनात्क्रुद्धेन ब्रह्मणा स्वजटामुत्पाट्य भूमौ पातनाद्वृत्रासुरोत्पत्तिस्ततो वृत्रासुरेन्द्रयोर्युद्ध इन्द्रस्य पराभवः, वृत्रं जेतुं बृहस्पतेराज्ञया शक्रस्य महाकालवने गमनम्, तपःप्रभावेन वृत्रासुरं हत्वा तद्धत्यादोषनिवृत्तये तत्र लिंगस्थापनम्, इन्द्रेश्वरमाहात्म्यवर्णनम्.	१११	१
३६	अथ मार्कण्डेयेश्वरमाहात्म्यवर्णनम्, तत्र मार्कण्डेयजन्मकथावर्णनपूर्वकं महाकालवने मार्कंडेयेन स्वनाम्ना लिङ्गस्थापनम्, मार्कंडेयेश्वरलिंगमाहात्म्यवर्णनम्. ...	११२	१
३७	अथ शिवेश्वरलिंगमाहात्म्यवर्णनम्, तत्र रिपुञ्जयकथानकवर्णनम्, शिवेश्वरमाहात्म्यवर्णनम्.	११३	१
३८	अथ कुसुमेश्वरलिंगमाहात्म्यवर्णनम्, तत्र कुसुमक्रीडाविहारत्वात्कुसुमेश्वरेतिनामकरणम्, कुसुमेश्वरलिंगमाहात्म्यवर्णनम्.	११४	१
३९	अथाक्रूरेश्वरलिंगमाहात्म्यवर्णनम्, तत्र भृंगिरिटिना निजक्रूरबुद्धिविनाशाय महाकालवने लिंगं स्थापयित्वा तस्य पूजाकरणम्, तेन तस्य क्रूरभावनिवृत्तिः, तस्य लिंगस्याक्रूरेश्वरनाम्ना प्रसिद्धिः, अक्रूरेश्वरलिंगमाहात्म्यवर्णनम्.	११५	१
४०	अथ कुण्डेश्वरलिंगमाहात्म्यवर्णनम्, तत्र शिवपार्वत्योर्वृषारूढयोर्मार्गे केनचिन्निमित्तेन शिवान्तर्धानं दृष्ट्वा पार्वत्या शिवदर्शनोत्सुकयाऽन्तर्विघ्नकारिणं कुण्डनामकगणं प्रति शापदानम्, तेन कुण्डेन शापनिवृत्त्यर्थं महाकालवने स्वनाम्ना लिंगस्थापनम्, कुण्डेश्वरलिंगमाहात्म्यवर्णनम्.	११६	१
४१	अथ लुम्पेश्वरलिंगमाहात्म्यवर्णनम्, तत्र सामगब्राह्मणवधात्तत्पुत्रदत्तशापेन कुष्ठित्वं प्राप्तेन लुंपराजेन नारदोपदेशान्महाकालवने गमनम्, तत्र कुष्ठनाशनाय लिंगस्थापनम्, सैकतेश्वरापरनाम्नो लुम्पेश्वरस्य लिंगस्य माहात्म्यवर्णनम्. ...	११७	१
४२	अथ गङ्गेश्वरलिंगमाहात्म्यवर्णनम्, तत्र शिवजटाजूटतो भूम्यां गङ्गाप्रपातेन शिप्रातटे गङ्गेश्वरेतिनाम्ना भगीरथस्थापितलिंगमाहात्म्यम्, गङ्गेश्वरपूजनादिविधिमाहात्म्यवर्णनम्.	११७	२
४३	अथांगारकेश्वरलिंगमाहात्म्यवर्णनम्, तत्र शिवगात्रादंगारकपुत्रोत्पत्तिवर्णनम्, अङ्गारकेश्वरमाहात्म्यवर्णनम्.	११८	२
४४	अथोत्तरेश्वरलिंगमाहात्म्यवर्णनम्, तत्र नवग्रहपीडितानामिंद्रादीनां शिवादेशाच्छिप्रायां गमनम्, उत्तरमेघकृतं शिवलिंगस्थापनम्, उत्तरेश्वरलिंगमाहात्म्यवर्णनम्.	११९	२
४५	अथ त्रिलोचनेश्वरलिंगमाहात्म्यवर्णनम्.	१२१	१
४६	अथ वीरेश्वरलिंगमाहात्म्यवर्णनम्.	१२४	१
४७	अथ नूपुरेश्वरलिंगमाहात्म्यवर्णनम्.	१२७	२
४८	अथाभयेश्वरलिंगमाहात्म्यवर्णनम्.	१२८	२
४९	अथ पृथुकेश्वरलिंगमाहात्म्यवर्णनम्....	१२९	१
५०	अथ स्थावरेश्वरलिंगमाहात्म्यवर्णनम्.	१३०	१
५१	अथ शूलेश्वरलिङ्गमाहात्म्यवर्णनम्, तत्र देव्यांऽधकासुरस्य शूलेन नाशं विधाय शूलनाम्ना लिंगस्थापनम्, शूलेश्वरलिंगमाहात्म्यवर्णनम्...	१३१	१
५२	अथोंकारेश्वरलिङ्गमाहात्म्यवर्णनम्, तत्र शिववक्त्रान्निर्गतेनोंकारेण शिववाक्यात्स्थापितस्योंकारेश्वरलिंगस्य माहात्म्यवर्णनम्.	१३२	१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अध्यायाः	विषयाः	प०	पृ०
५३	अथ विश्वेश्वरलिंगमाहात्म्यवर्णनम्, तत्र विदूरथस्य राज्ञो ब्रह्मवधजनितदोषेण दुष्टद्वादशजन्मानि गृहीत्वा त्रयोदशे चण्डालत्वं प्राप्य शिवसंनिधौ मृतत्वाद्विश्वेशनाम्ना पुना राजकुले समुत्पत्तिवर्णनम्, पूर्वजन्मनि संस्मृत्य महाकालवने तेन लिंगस्थापनम्, विश्वेश्वरलिंगमाहात्म्यवर्णनम्.	१३२	२
५४	अथ कंटेश्वरलिंगमाहात्म्यवर्णनम्, तत्र कस्यचिच्छत्रुभिः पराजितस्य राज्ञो वसिष्ठाश्रमे गमनम्, तस्य वचनान्महाकालवने गत्वा राज्ञा लिंगस्थापनपूर्वकं पूजाकरणम्, तेन निष्कंटकराज्यप्राप्तिरतः कंटेश्वरनाम्ना तस्य लिङ्गस्य प्रसिद्धिः, कंटेश्वरलिंगमाहात्म्यवर्णनम्.	१३३	२
५५	अथ सिंहेश्वरलिंगमाहात्म्यवर्णनम्, तत्र शिवप्राप्त्यर्थं गौर्या तपसि क्रियमाणे ब्रह्मण आगमनम्, ब्रह्मवचनात्क्रुद्धाया देव्या मुखतः सिंहस्योत्पत्तिस्तत्पोषार्थं देव्याः स्तनाभ्यां दुग्धस्रावव्रर्णनम्, पार्वत्याज्ञया सिंहस्य महाकालवने गमनम्, तस्य गौरीवाहनत्वप्राप्तिवर्णनम्, तेन सिंहेन स्वनाम्ना लिंगस्थापनम्, सिंहेश्वरलिंगमाहात्म्यवर्णनम्.	१३५	१
५६	अथ रेवंतेश्वरलिङ्गमाहात्म्यवर्णनम्, तत्र सूर्यपुत्रेण रेवंतेन देवाञ्जित्वा कैलासे गमनम्, शिववचनेन महाकालवनमागत्य तत्र स्वनाम्ना शिवलिंगस्थापनम्, रेवंतेश्वरलिंगमाहात्म्यवर्णनम्.	१३५	२
५७	अथ घण्टेश्वरलिङ्गमाहात्म्यवर्णनम्, तत्र शैवगणेन घंटेन शिवं त्यक्त्वा स्वगायनकौशलं दर्शयितुं ब्रह्मलोके गमनम्, नारदेन तत्र गतं तं दृष्ट्वा शिवाय कथनम्, तेन रुष्टेन शिवेन घंटाख्यगणाय शापदानम्, तच्छापनिवृत्त्यै नारदादेशान्महाकालवनं गत्वा शिवलिंगस्थापनम्, घंटेश्वरलिंगमाहात्म्यवर्णनम्.	१३६	२
५८	अथ प्रयागेश्वरलिङ्गमाहात्म्यवर्णनम्, तत्र प्रियव्रतनारदसंवादे नारदस्य सावित्र्या दर्शनम्, सावित्रीदर्शनेन नारदस्य वेदनाशः, तद्दृष्ट्वाऽऽश्चर्येण पृष्टया सावित्र्या सर्ववृत्तकथनम्, सावित्रीवचनान्नारदस्य प्रयागगमने निष्ठाप्रापणम्, प्रियव्रतेन समं नारदस्यावन्तीस्थप्रयागे गमनम्, तत्र गत्वा लिंगस्य स्थापनं पूजनं च, प्रयागेश्वरलिंगमाहात्म्यवर्णनम्.	१३७	२
५९	अथ सिद्धेश्वरलिङ्गमाहात्म्यवर्णनम्, तत्राश्वशिरसो राज्ञो जैगीषव्यकपिलमहामुन्योर्दर्शनम्, ताभ्यां दर्शितया मायया भगवत्स्वरूपं दृष्ट्वा आश्चर्येण शरणगमनम्, तयोराज्ञया तेन राज्ञा महाकालवने गत्वा सिद्धिप्राप्त्यर्थं लिंगपूजनम्, सिद्धेश्वरलिंगमाहात्म्यवर्णनम्.	१३८	२
६०	अथ मतंगेश्वरलिंगमाहात्म्यवर्णनम्, तत्र सुगतिविप्रपुत्रेण मतंगेन लिंगस्य स्थापनं पूजनं च, मतंगेश्वरलिङ्गमाहात्म्यवर्णनम्.	१३९	२
६१	अथ सौभाग्येश्वरलिंगमाहात्म्यवर्णनम्, तत्राश्ववाहननृपभार्यया सुमत्या पतिवियोगादतिदुःखितया निजपतिप्राप्त्यर्थमृष्यादेशाल्लिंगपूजनम्, तत्प्रसादात्तस्याः पत्युरागमनेन सौभाग्यप्राप्तिः, सौभाग्येश्वरलिंगमाहात्म्यवर्णनम्.	१४०	२
६२	अथ रूपेश्वरलिंगमाहात्म्यवर्णनम्, तत्र पद्मराजस्य कण्वाश्रमे गमनम्, तत्र तेन कण्वमदृष्ट्वा तत्कन्याया दर्शनम्, काममोहितेन तेन तया सह व्यभिचरणम्, तत्कण्वेन ज्ञानचक्षुषा दृष्ट्वा तयोः कुरूपभवनरूपशापप्रदानम्, ततः कण्वाज्ञया तयोर्महाकालवने गमनम्, तत्र लिंगपूजनेन सुस्वरूपप्राप्तिवर्णनम्, रूपेश्वरलिंगमाहात्म्यवर्णनम्.	१४२	१
६३	अथ धनुःसाहस्रेश्वरलिंगमाहात्म्यवर्णनम्, तत्र विदूरथराजस्य कन्यायाः कुसुंभदैत्येन हरणम्, ततो विदूरथपुत्राभ्यां साकं तस्य दैत्यस्य युद्धम्, तत्र राज्ञा विदूरथेन स्वपुत्रयोः पराभवं बन्धनत्वप्राप्तिं च ज्ञात्वा तत्पराजयार्थमृष्यनुज्ञया महाकालवनं गत्वा लिंगपूजनम्, तेन पूजनप्रभावेण तस्य धनुःसहस्रतुल्यधनुष्यप्राप्तिः, तेन धनुःसहायेन दैत्यस्य पराभवः, तस्य राज्ञः पुत्रकन्यादिसहितस्य सुखप्राप्तिपूर्वकमन्ते मोक्षप्राप्तिवर्णनम्, धनुःसाहस्रेश्वरलिंगमाहात्म्यवर्णनम्.	१४३	१

CC-0. In Public Domain. Digitization by eGangotri

अध्यायाः	विषयाः	प०	पृ०
६४	अथ पशुपतीश्वरलिंगमाहात्म्यवर्णनम्, तत्र पशुपालराजेन लिंगस्य स्थापनम्, तस्य पूजनं च, पशुपतीश्वरलिंगस्य माहात्म्यवर्णनम्.	१४४	१
६५	अथ ब्रह्मेश्वरलिंगमाहात्म्यवर्णनम्, तत्र पुलोमदैत्येन स्वसैन्येन सह विष्णुं जेतुं क्षीराब्धौ गमनम्, तद्दृष्ट्वा ब्रह्मणो दैत्यजयार्थं महाकालवने गमनम्, तत्र तपस्तप्त्वा प्रसन्नेन शिवेन दैत्यपराजयकरणवर्णनम्, ब्रह्मणा स्वनाम्ना लिंगस्थापनम्, ब्रह्मेश्वरलिंगस्य माहात्म्यवर्णनम्.....	१४५	१
६६	अथ जल्पेश्वरलिंगमाहात्म्यवर्णनम्, तत्र जल्पनामकेन राज्ञा पञ्चपुत्रान्राज्ये संस्थाप्य वने गमनम्,ततः परस्परबन्धुविरोधेन मृतान्पञ्चपुत्राञ्ज्ञात्वा तद्वियोगेन दुःखितस्य जल्पस्य राज्ञो वसिष्टाज्ञया महाकालवने गमनम्, तत्र स्वनाम्ना लिंगस्थापनम्, जल्पेश्वरलिंगमाहात्म्यवर्णनम्.	१४६	१
६७	अथ केदारेश्वरलिंगमाहात्म्यवर्णनम्, तत्र हिमपीडितानां सब्रह्मकानां देवानां कैलासे गमनम्, तत्र शिवं ध्यात्वा तदादेशात्केदारेश्वरे गमनम्, तत्पुण्यप्रभावेन हिमपीडानिवृत्तिवर्णनम्, केदारेश्वरलिङ्गमाहात्म्यवर्णनम्.	१४७	१
६८	अथ पिशाचेश्वरलिंगमाहात्म्यवर्णनम्, सोमनामकस्य शूद्रस्य दुराचारत्वात्पिशाचत्वप्राप्तिवर्णनम्, तत्र पिशाचस्य शाकटायनस्य ब्राह्मणस्य च संवादवर्णनम्, शाकटायनवचनात्पिशाचत्वतो मुक्तिहेतोर्महाकालवने गमनम्, तत्र लिंगं संपूज्य तस्य पिशाचस्य मोक्षप्राप्तिः, पिशाचेश्वरलिंगमाहात्म्यवर्णनम्.	१४८	२
६९	अथ सङ्गमेश्वरलिंगमाहात्म्यवर्णनम्, तत्र पत्नीवचनात्सुबाहुना प्राग्जन्मकथानककथनम्, ततः सङ्गमेश्वरकृपया राज्यमुपभुज्यान्ते मोक्षप्राप्तिवर्णनम्, संगमेश्वरलिंगमाहात्म्यवर्णनम्.	१४९	२
७०	अथ दुर्धर्षेश्वरलिंगमाहात्म्यवर्णनम्, दुर्धर्षनाम्नो राज्ञो मृगयार्थं वने गमनम्, तत्र कल्पाख्यस्यर्षेः कन्यां दृष्ट्वा तया मोहितेन तत्र वासकरणम्, राज्यस्य नाशे तत्प्राप्त्यै महाकालवने शिवपूजनेन तस्य राज्यप्राप्तिः सर्वसुखोपभोगानन्तरमन्ते मोक्षप्राप्तिश्च, दुर्धर्षेश्वरलिंगमाहात्म्यवर्णनम्.	१५१	१
७१	अथ प्रयागेश्वरलिंगमाहात्म्यवर्णनम्, तत्र शंतनुना वृताया गंगाया अष्टपुत्रप्राप्तिवर्णनम्, गंगाया मनुष्ययोनितो मुक्तिप्राप्त्यर्थं नारदवचनात्प्रयागेश्वरे गमनम्, लिंगपूजनेन पापान्निवृत्तिः, प्रयागेश्वरलिंगमाहात्म्यवर्णनम्.	१५२	२
७२	अथ चन्द्रादित्येश्वरमाहात्म्यवर्णनम्, तत्र शंबरेण पराभूतान्देवान्दृष्ट्वा चन्द्रसूर्ययोर्वैकुंठे गमनम्, विष्ण्वाज्ञया तयोर्महाकालवने गत्वा शिवपूजने कृते शिवलिंगतो ज्योतिर्निर्गत्य तेन ज्योतिषा शंबरस्य पराजयकरणवर्णनम, चन्द्रादित्येश्वरलिंगमाहात्म्यवर्णनम्.	१५४	१
७३	अथ करभेश्वरलिंगमाहात्म्यवर्णनम्, मृगयां कर्तुं गतस्य राज्ञो वीरकेतोः करभस्यानुधावनम्, महारण्ये करभस्यान्तर्धानम्, ततः कस्यचिदृषेरनुज्ञया महाकालवने करभेश्वरपूजनेन कैलासपदप्राप्तिवर्णनम्, करभेश्वरलिंगमाहात्म्यवर्णनम्.	१५५	२
७४	अथ राजस्थलेश्वरलिंगमाहात्म्यवर्णनम्, तत्र ब्रह्मणा सृष्टिं विधाय अराजकां दृष्ट्वा रिपुंजयाय राजदानम्, तेन रिपुंजयेन राज्ञा पुत्रवत्प्रजापालनं कुर्वता देवदत्तातिवृष्ट्यनावृष्ट्यादित्रासं निराकर्तुं महाकालवने गत्वा शिवं संपूज्य तत्कृपया प्रजानां सुखप्राप्तिकरणवर्णनम्, राजस्थलेश्वरलिंगमाहात्म्यवर्णनम... ...	१५७	१
७५	अथ वडलेश्वरमाहात्म्यवर्णनम्, तत्र मणिभद्रपुत्रेण वडलसंज्ञकेन भार्यया साकं क्रीडितुं वने गमनम्, तत्र क्रीडावनरक्षितृभी राक्षसैः समं वडलस्य युद्धम्, तत्र राक्षसपराजयः, तेन स्वपुत्रस्य कर्मणा क्रुद्धेन मणिभद्रेण यक्षेण स्वपुत्राय वडलाय शापदानम्, शापनिवृत्त्यर्थं वडलस्य महाकालवने गमनम्, शिवपूजनेन तस्य मोक्षप्राप्तिवर्णनम्, वडलेश्वरलिंगमाहात्म्यवर्णनम्.	१५८	१
७६	अथारुणेश्वरमाहात्म्यवर्णनम्, तत्र कश्यपसंभूतस्य विनतासुतस्यारुणस्य नारदोपदेशान्महाकालवने गत्वा शिवपूजनेन सूर्यसारथित्वप्राप्तिवर्णनम्, अरुणेश्वरलिंगमाहात्म्यवर्णनम्.	१५९	२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अध्यायाः	विषयाः	प०	पृ०
७७	अथ पुष्पदंतेश्वरमाहात्म्यवर्णनम्, तत्र शिनिनामकद्विजेन पुत्रप्राप्त्यर्थमीश्वरस्याराधने कृते सति तत्प्रसादेन तस्य पुष्पदन्तनामकपुत्रप्राप्तिवर्णनम्, पुष्पदन्तेन महाकालवने शिवलिंगस्थापनम्, पुष्पदन्तेश्वरलिंगमाहात्म्यवर्णनम्.	१६०	३
७८	चित्रसेननृपतेर्विरक्तायाः कन्यकाया वचनादविमुक्तक्षेत्र आगमनम्, तत्र शिवलिंगपूजनेन तस्य मुक्तिप्राप्तिवर्णनम्, अविमुक्तेश्वरलिंगमाहात्म्यवर्णनम्...	१६२	१
७९	अथ हनुमत्केश्वरलिंगमाहात्म्यवर्णनम्, तत्र हनुमद्बाललीलावर्णनपुरःसरं लिंगपूजनेन हनुमतो बलप्राप्तिवर्णनम्, रावणवधानंतरं रामराज्याभिषेकोत्तरं रामप्रस्तुतहनुमद्वर्णने केनाचिद्द्विजेन हनुमतोऽधिक्षेपे कृते हनुमता महाकालवने गत्वा शिवपूजनम्, हनुमत्केश्वरलिंगमाहात्म्यम्.	१६३	२
८०	अथ स्वप्नेश्वरलिंगमाहात्म्यवर्णनम्, तत्र कल्मापपादकथावर्णनपूर्वकं दुःस्वप्ननाशकस्वप्नेश्वराख्यानवर्णनम्, स्वप्नेश्वरलिंगमाहात्म्यवर्णनम्.	१६४	२
८१	अथ पिंगलेश्वरलिंगमाहात्म्यवर्णनम्, तत्र चतुर्दिक्स्थितानां चतुर्लिंगानां वर्णनम्, तत्र पिंगलानाम्न्या पिंगलकन्यकया पितृमातृहीनया प्राग्जन्मदुष्कृतस्मरणं कृत्वा धर्मानुज्ञया महाकालवने गमनम्, तत्र गत्वा स्वनाम्ना लिंगस्थापनम्, पिंगलेश्वरमाहात्म्यवर्णनम्.	१६६	१
८२	अथ कायावरोहणेश्वरलिंगमाहात्म्यवर्णनम्, तत्र दक्षयज्ञविध्वंसनसमये वीरभद्रभद्रकाल्यादिभिः पराजितानां दक्षादीनां महाकालवने गमनम्, तत्र लिंगपूजनेन सर्वेषां कायावरोहणात्कायावरोहणेश्वरेतिनामस्थापनम्, कायावरोहणेश्वरलिंगमाहात्म्यवर्णनम्.	१६८	१
८३	अथ विल्वेश्वरलिंगमाहात्म्यवर्णनम्, तत्र कपिलेन शिवमाराध्यावध्यत्वसंपादनमक्षयत्वसंपादनं च, तथा विल्वेन नृपेण विष्णुमाराध्य "कपिलो मां प्रति 'त्वत्तोऽहं विभेमि' इति यथा वदेत्तथा कुरु" इत्यादिवरप्रार्थनाकरणम्, तस्मै 'तथास्तु' इत्युक्त्वा विष्णुना वरप्रदानम्, स्वदत्तं वरं सत्यं कर्तुं विष्णुना कपिलस्य प्रार्थनाकरणम्, स्ववाक्यं तिरस्कुर्वता कपिलेन समं कृष्णस्य युद्धवर्णनम्, तत्र कृष्णपराजयः, ततो बिल्वनृपेण शक्रवचनाद्बिल्वेश्वरमाराध्य कपिलमुखेन 'अहं त्वत्तो बिभेमि' इति भाषावन्धकरणम्, विल्वेश्वरमाहात्म्यवर्णनम्.... ...	१६९	२
८४	अथोत्तरेश्वरलिंगमाहात्म्यवर्णनम्, तत्र परीक्षिन्नामकस्यायोध्याधिपतेर्मृगयार्थमरण्ये गमनम्, तत्र कयाचित्कन्यया समं प्रश्नोत्तरगद्यप्रबन्धेन संभाषणम्, तां गृहीत्वा विहरति राजनि तया कन्यया वापीं प्रविश्य पाताले गमनम्, परीक्षिता शोककरणम्, परीक्षिदाज्ञया प्रधानादिभिर्दर्दुरवधकरणम्, तत एकेन वृद्धदर्दुरेण निजपूर्वजन्मकथानककथनपूर्वकं गालवशापेन दर्दुरत्वप्राप्तिकथनम्, दर्दुरेण कन्यास्मरणे कृते सति स्मरणोत्तरमागतायाः कन्यायास्तस्मै परीक्षिते समर्पणम्, उत्तरेश्वरपूजनेन दर्दुरस्य गालवदत्तशापनिवृत्तिः, उत्तरेश्वरलिंगमाहात्म्यवर्णनम्, इत्थमवन्तीक्षेत्रस्थितचतुरशीतिलिंगमाहात्म्यकथाफलश्रुतिवर्णनम्; आवन्त्यखण्डस्थितचतुरशीतिलिंगमाहात्म्योपसंहारवर्णनम्.	१७१	१

इत्यावन्त्यखण्डे द्वितीयं चतुरशीतिलिङ्गमाहात्म्यम् ॥ (५–२) ॥

अथावन्त्यखण्डे तृतीयं रेवाखण्डम् ॥ (५–३) ॥

अध्यायाः	विषयाः	प०	पृ०
१	मङ्गलाचरणम्, रेवावर्णनम्, सूतशौनकसंवादप्रसङ्गेन पुराणधर्मशास्त्रात्मविद्यानां मुख्यत्ववर्णनम्, अष्टादशमहापुराणोपपुराणानां संख्यावर्णनं नामनिर्देशश्च, पुराणश्रवणफलवर्णनम्.	२७६	१
२	जनमेजयवैशंपायनसंवादप्रसङ्गेन वनवाससमये यात्रार्थं गतानां पाण्डवानां विन्ध्यपर्वतं प्रति गमनम्, तत्र विन्ध्यारण्यस्थस्य मार्कण्डेयर्षेर्दर्शनम्, स्वातिथ्यकारिणं मार्कण्डेयं प्रति धर्मराजस्य तीर्थक्षेत्रादिमाहात्म्यसंबन्धिप्रश्नवर्णनम्, मार्कण्डेयेन गङ्गादिसर्वतीर्थमाहात्म्यवर्णनम्, रेवामाहात्म्यस्य ततोऽप्यधिकत्ववर्णनम्.	१७७	१

CC-0. In Public Domain. Digitization by eGangotri

अध्यायाः	विषयाः	प०	पृ०
३	मार्कण्डेयेन [illegible] प्रलयकालीनास्थितिवर्णनम्, सलिले भ्रमतो मार्कण्डेयस्याग्रे नौकां गृहीत्वा कस्याश्चिदबलाया आगमनम्, मनुना सह मार्कण्डेयस्य नावि समारोहणम्, मार्कण्डेयेन भगवत्स्तुतिवर्णनम्.	१७८	१
४	मार्कण्डेयस्य त्रिकूटशिखरस्थमहादेवदर्शनम्, अबलावृत्तान्तवर्णने नर्मदोत्पत्तिकथनम्, शंकरप्रसादान्नर्मदाया अक्षय्यत्वस्य वर्णनम्, नर्मदापञ्चदशनामवर्णनम्.	१७९	१
५	युधिष्ठिरमार्कण्डेयसंवादप्रसङ्गेन सप्तकल्पवर्णनम्, सप्तकल्पपर्यंतं नर्मदाया आस्थानम्, ततो मार्कण्डेयं प्रति युधिष्ठिरेण नर्मदामाहात्म्यजिज्ञासया प्रश्नवर्णनम्, मार्कण्डेयेन नर्मदामाहात्म्यकथनम्, तत्र प्रथमं नर्मदानामनिरुक्तिवर्णनम्.	१८०	१
६	मायूरकल्पे मयूररूपस्य महादेवस्य नर्मदायाश्च संवादपूर्वकं नर्मदया स्वस्या अक्षय्यत्वादिवर्णनम्, त्रिकूटस्य शिखरद्वन्द्वतो नर्मदागंगयोरुत्पत्तिवर्णनम्. त्रिकूटस्य भग्नीभूततृतीयशिखरतः सप्तकुलपर्वतानामुत्पत्तिवर्णनम्, नर्मदायाः सहेतुकनाममाहात्म्यवर्णनम्.	१८१	१
७	कूर्मकल्पसमये नद्यादिपर्वतसमुद्भववर्णनम्.	१८२	१
८	कल्पकाले कस्यचिद्बकस्य मार्कण्डेयेन दर्शनम्, कस्त्वमिति मार्कण्डेयपृष्टेन बकेन जगत्स्थितिरक्षाप्रलयादिकर्ताहमित्याद्युत्तरप्रदानवर्णनम्, मार्कण्डेयस्य किंचिच्छब्दश्रवणम्, दशदिक्षु स्थितायाः कन्याया दर्शनम्, ततो महाशिवलिंगदर्शनम्, शिवलिंगार्चनकारिण्याः कन्याया दर्शनम्, तया स्वस्या नर्मदानामकथनम्, इत्थं बककल्पसमुद्भववर्णनम्.	१८२	२
९	कल्पसमये शयानं भगवन्तं दृष्ट्वा तथा कांचित्कन्यकां दृष्ट्वा शंकरं च समालोक्य मार्कण्डेयेनेश्वरस्तुतिकरणम्, शंकरनर्मदासंवादवर्णनम्, नर्मदोत्पत्तिस्नानफलादिकथनम्.	१८३	२
१०	सर्वकल्पेषु नर्मदायाः स्थितिवर्णनम्, नर्मदास्नानफलश्रुतिकथनम्.	१८५	१
११	नर्मदातीरे वेदाध्ययनपठनफलम्, नर्मदायां स्नानदानजपहोमहवनादिफलम्, नर्मदादर्शनपुण्यफलम्, नर्मदासहवासेन सर्वसिद्ध्यादिमनोरथप्राप्तिफलकथनम्, नर्मदातीरे भस्मलेपनाद्याह्निककर्मफलकथनम्, नर्मदायाः सर्वतोऽप्यधिकत्वरूपमाहात्म्यवर्णनम्.	१८६	२
१२	नर्मदातीरे संप्राप्तैर्ऋषिभिर्नर्मदास्तोत्रकरणम्.	१८८	२
१३	एकविंशतिसंख्याकानां कल्पानां यथाक्रमेण नामनिर्देशपूर्वकं वर्णनम्, तेषु कल्पेषु नर्मदावस्थानवर्णनम्.	१८९	१
१४	कालरात्रिकृतसृष्टिसंहारसंरंभवर्णनम्.	१९०	१
१५	संवर्तसमये वातोष्णशीतादीनां प्रकोपनपूर्वकसृष्टिसंहारवर्णनम्.	१९१	२
१६	कालरात्रिसाहाय्येन शिवेन कृताज्जगन्नाशात्त्रस्तानां देवानां ब्रह्मणा समाश्वासनम्, ब्रह्मणा कालवर्णनम्, ब्रह्मणा शिवस्तुतिकरणवर्णनम्.	१९२	१
१७	संवर्तकाले द्वादशादित्यप्रतपनवर्णनम्, पञ्चमहाभूतप्रकोपवर्णनम्, जगत्संहरणवर्णनम्.	१९३	१
१८	चतुरुदधीनामेकीभवनम्, गजशुंडापरिमितधारासंपातवृष्टिवर्णनम्, चतुर्दशभुवनानां सलिलमध्य एकत्राऽऽवासवर्णनम्, मार्कण्डेयेन भयाद्भगवत्स्तवनकरणवर्णनम्.	१९३	२
१९	भगवत्स्तवनेन मार्कण्डेयं प्रति कयाचिद्गोरूपधारिण्या नर्मदयाऽभिवचनदानम्, मार्कण्डेयकृता नर्मदास्तुतिः, श्रीवाराहकल्पवृत्तांतवर्णनम्.	१९४	१
२०	प्रजासंहारचिह्नलक्षणवर्णनम्, प्रलयकाल एकाकिना मार्कण्डेयेन भिया शेषशायिनः स्तवकरणम्, तदा कस्याश्चिद्देव्या दर्शनम्, ततो मार्कण्डेयोपदेशकारिण्या पृथ्व्या देव्या अन्तर्धानम्.	१९५	२
२१	नर्मदातीरस्थतीर्थमाहात्म्यवर्णनोपक्रम प्रथमतः कपिलासरित्संभववर्णनम्.	१९७	१
२२	गंगादिषोडशनदीनां पत्नीत्वेन प्राप्तयेऽग्निनेश्वरमुद्दिश्य तपःकरणम्, तेन तपसा संतुष्टेन शंकरेणाग्नये वरप्रदानम्, विशल्यासंभववर्णनम्.	१९८	२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अध्यायाः	विषयाः	प०	पृ०
२३	कपिलाविशल्यानद्योः संगमे स्नानदानफलमाहात्म्यवर्णनम्.	१९९	२
२४	करानर्मदासंगममाहात्म्यवर्णनम्.	२००	१
२५	नीलगंगायाः संगममाहात्म्यवर्णनम्.	२००	२
२६	जालेश्वरोत्पत्तिकथनमाहात्म्यवर्णने बाणासुराद्यसुरपीडितेषु सेन्द्रादिदेवेषु ब्रह्माणं विष्णुं प्रति च शरणगमनम्, ततश्च सब्रह्मणा विष्णुना सार्धं सर्वेषां देवानां कैलास आगमनम्, तत्र सर्वैर्देवर्षिभिर्महेश्वरस्तवनम्, शिवाज्ञया नारदस्य बाणासुर-समीप आगमनम्, बाणासुरवचनान्नारदस्य बाणांतःपुरे बाणदारान्द्रष्टुकामस्य प्रवेशः, बाणस्त्रिया पृष्टेन नारदेन तां प्रति मधूकतृतीयाव्रतस्नानदानादिफल-माहात्म्यकथनम्.	२००	१
२७	राज्ञीनारदसंवादप्रसंगेन त्रिपुरक्षोभवर्णनम्.	२०३	२
२८	नर्मदातट उमया सार्धं क्रीडमानस्य शिवस्याग्रे नारदगमनम्, कृतकार्यस्य नारदस्य शिवेन सत्कारकरणम्, त्रिपुरवधार्थं शिवेन मन्त्रपूर्वकशरप्रेरणम्, शंकरप्रेरित-पत्रिणा सर्वशत्रूणां भस्मीकरणम्, मस्तके शिवलिंगं धृत्वा बाणेन शिवस्तुतिकर-णम्, ईश्वरेण बाणासुराय वरप्रदानम्, ज्वालेश्वरतीर्थस्य ज्वालानामकनद्याश्च उत्पत्तिमाहात्म्यवर्णनम्, अमरेश्वरतीर्थमाहात्म्यवर्णनम्.	२०३	२
२९	युधिष्ठिरमार्कण्डेयसंवादप्रसंगेन कावेरीसंगमस्नानदानफलमाहात्म्यवर्णनम्, तत्र का-वेरीसंगमे स्नानं कर्तुं कुबेरस्य चान्द्रायणादितीक्ष्णतरतपोनियमान्दृष्ट्वा परमेश्वर-स्यागमनम्, कुबेरेणेश्वरस्तवनम्, तुष्टेनेशेन तत्तीर्थस्नानमाहात्म्यकथनम्. ...	२०६	२
३०	अथ दारुतीर्थमाहात्म्यम्....	२०७	२
३१	ब्रह्मावर्ततीर्थमाहात्म्यम्.	२०७	२
३२	पत्रेश्वरमाहात्म्यम्, शक्रेश्वरमाहात्म्यम्.	२०८	१
३३	अग्नितीर्थमाहात्म्यम्, तत्र पूर्वकालिकस्य दुर्योधनाख्यस्य कस्यचिद्राज्ञः कन्यां सुदर्शनानाम्नीं याचितुमागतस्य द्विजरूपधारिणो वह्नेरसवर्णत्वाद्राज्ञा दुर्योधनेन निषेधकरणम्, ततो दुःखितस्याग्नेरदर्शनम्, यज्ञं चिकीर्षोर्दुर्योधनस्य राज्ञो यज्ञ-कुण्डे वह्न्यभावं दृष्ट्वा सविस्मयीभवनम्, तत्कारणं ज्ञात्वा अग्निना समं स्वसुताया विवाहकरणम्.	२०८	२
३४	केनचिद्ब्राह्मणेन सूर्योपासनां कृत्वा नर्मदातीरे शिवलिंगस्थापनवर्णनम्, रवितीर्थे स्नानदानमाहात्म्यम्.	२०९	२
३५	मन्दोदरीरावणविवाहवर्णनपूर्वकं तयोर्विमानेन क्रीडाविहारवर्णनम्, रावणस्य पुत्रेण मेघनादेन शिवाराधनां कृत्वा स्वनाम्ना शिवलिंगस्थापनम्, मेघनादतीर्थे स्नान-दानमाहात्म्यम्.	२१०	१
३६	दारुकाख्येन शक्रमित्रेण शिवप्रसादेन तल्लिंगस्थापनम्, दारुतीर्थे स्नानादिमाहा-त्म्यवर्णनम्.	२१०	२
३७	देवतीर्थमाहात्म्यवर्णनम्.	२११	१
३८	दारुवने पार्वत्या सह विमानेन शंकरस्यागमनम्, शंकरपार्वतीसंवादपूर्वकं दारुव-नमाहात्म्यवर्णनं नर्मदेश्वरतीर्थमाहात्म्यवर्णनं च.	२११	२
३९	कुण्डात्समुत्थितायाः कपिलाया ब्रह्मदेवेन स्तुतिकरणम्, ब्रह्माज्ञया कपिलायाः स्वर्गतो मृत्युलोकं प्रत्यागमनम्, कपिलायाः प्रत्यङ्गे भिन्नभिन्नदेवतास्थापनवर्ण-नम्, कपिलातीर्थे स्नानादिमाहात्म्यवर्णनम्.....	२१३	१
४०	करंजनामकेन दनोः पुत्रेण ईश्वराराधनां कृत्वा तत्प्रसादेन स्वनाम्ना शिवलिंगस्थाप-नम्, करंजेश्वरतीर्थे स्नानमाहात्म्यम्.	२१४	१
४१	विश्रवसः पुत्रेण कुण्डलेन स्थापितस्य कुण्डलेश्वरतीर्थस्य माहात्म्यवर्णनम्.	२१४	२
४२	याज्ञवल्क्यकृततपश्चरणवर्णनम्, भ्रातरमन्वेषन्त्या याज्ञवल्क्यभगिन्यास्तत्रागमनम्, याज्ञवल्क्यस्य स्वप्ने वस्त्रान्तः शुक्रनिःसरणम्, प्रातर्वस्त्रमितस्ततोऽन्वेषयमाणस्य याज्ञवल्क्यस्य समीपे तद्भगिन्या आगमनम्, भगिनीप्रश्नवचनात्सर्ववृत्तान्तकथ-नम्, मृतभर्तृकया याज्ञवल्क्यभगिन्या तद्वस्त्रसंलग्नरेतःसंपर्कवशाद्गर्भधारणे		

CC-0. In Public Domain. Digitization by eGangotri

अध्यायाः	विषयाः	प०	पृ०
	जाते सति लज्जयाऽश्वत्थवृक्षमूले गत्वा तद्गर्भत्यागवर्णनम्, पिप्पलमूले वर्धितेन पिप्पलादनामकबालमुनिना नारदेनोक्तां स्वस्य शनैश्वरग्रहकृतां पीडां दृष्ट्वाऽऽकाशपथा गच्छतः शनैश्वरस्य निजदृष्टिप्रक्षेपमात्रेणाधःपातनम्, बालकस्याषोडशाद्वर्षाच्छनैश्वरपीडा न भविष्यतीति निर्बन्धकथनम्, आग्नेयीधारणयाऽग्निं समुत्थाप्य पिप्पलादस्य कृत्यानिर्माणम्, पितुर्याज्ञवल्क्यस्योपरि कृत्यायाः प्रेरणम्, कृत्याभीतेन याज्ञवल्क्येन स्वस्य परित्राणार्थं ब्रह्मवैकुण्ठादिलोकेषु गमनम्, शंकरेण तस्याः कृत्याया योगीश्वरीति नामकरणम, पिप्पलादस्य तपश्चरणवर्णनम, शिवप्रसादेन पिप्पलादेन स्वनाम्ना पिप्पलादेश्वरेति लिंगस्थापनम्, तन्माहात्म्यवर्णनम्.	२१५	१
४३	विमलेश्वरतीर्थमाहात्म्यवर्णनम्.	२१६	२
४४	शूलभेदप्रशंसावर्णनम्.	२१७	१
४५	शूलभेदतीर्थोत्पत्तिवर्णनेऽधकासुरवरप्रदानवृत्तान्तवर्णनम्.	२१८	१
४६	शूलभेदतीर्थोत्पत्तिवर्णनेऽन्धकासुरेण देवाञ्जित्वा शचीहरणवर्णनम्.	२१९	१
४७	देवानां ब्रह्मलोके गमनम्, देवैर्ब्रह्मणःस्तुतिं कृत्वा स्वागमनकारणकथनम्, ब्रह्मदेवेन सह देवानां विष्णुलोके गमनम्, ब्रह्मादिदेवैर्विष्णुस्तुतिकरणम्, विष्णुना देवान्प्रत्यभयवचनदानम्.	२१९	२
४८	उत्तानपादशंकरसंवादे अंधकविष्णवोर्युद्धवर्णनम्, तत्र परस्परेण परस्परोपर्यस्त्रप्रेषणम्, युद्धं कर्तुमसमर्थस्यान्धकस्य भगवता सामकरणम्, अन्धकेन भगवत्स्तुतिकरणम्, विष्णोराज्ञया शंकरेण समं युद्धं कर्तुं गतेनान्धकेन कैलासपर्वतस्य कम्पनम्, कोपाविष्टेन शिवेन साकमन्धकस्य महद्युद्धम्, शंकरप्रार्थिताया दुर्गायास्तत्रागमनम्, दुर्गासाहाय्येनान्धकस्य पराभवकरणम, अंधकेन शिवस्तुतिकरणम्, शंकरेणांधकस्य स्वसाम्यकरणवर्णनम्.	२२०	१
४९	अंधकासुरं हत्वोमया सार्धं शंकरस्य कैलासे गमनम, कैलासे प्राप्तैर्देवैः शंकरस्तुतिकरणम्, ततोंऽधकासुरयुद्धस्थाने शूलभेदतीर्थस्थापनम्, शूलभेदतीर्थमाहात्म्यवर्णनम्.	२२२	१
५०	पात्रापात्रपरीक्षादानादिनियमवर्णनम्.	२२३	१
५१	शूलभेदतीर्थे दानधर्मप्रशंसामाहात्म्यवर्णनम्.	२२४	१
५२	दीर्घतपोमुन्याख्यानवर्णनम्.	२२५	१
५३	ऋक्षशृंगस्वर्गगमनवृत्तान्तवर्णनम्.	२२५	२
५४	दीर्घतपसः स्वर्गारोहणवृत्तान्तवर्णनम्.	२२६	२
५५	शूलभेदमाहात्म्ये काशीराजमोक्षगमनवृत्तान्तवर्णनम्.	२२८	१
५६	उत्तानपादेश्वरसंवादप्रसंगेन विंध्याचले देवैः शिवाराधनया भूम्यां गंगाया आह्वानकरणम्, गंगाया भुव्यागमनम्, गंगातीरे स्नानादिमाहात्म्यवर्णनम्, देवशिलामाहात्म्यवर्णनम्, चेदिनाथस्य वैधव्यं गताया भानुमतीनाम्न्याः कन्यकाया रेवातटे गमनम्, भानुमत्या ओंकारेश्वरामरकंटकचक्रतीर्थशूलभेदादितीर्थेषु गमनवर्णनम्, अथ देवशीलामाहात्म्यवर्णनम्, तत्प्रसंगेन भार्यया सह शबरव्याधस्य मृगयार्थमरण्ये गमनम्, मृगानलब्ध्वा भार्यावचनात्पद्मानि ग्रहीतुं सरस्तीरे शबरस्य गमनं पद्मग्रहणं च, शूलभेदादितीर्थेषु गत्वा शबरेण पद्मैः शिवार्चाकरणम्, भानुमतीशबरभार्ययोः संवादः, शबरेण सर्वतीर्थेषु श्राद्धविधिकरणम्, तीर्थस्नानदानादिफलमाहात्म्यवर्णनम्.	२२९	१
५७	भानुमत्या त्रयोदश्यां मार्कण्डेयह्रदे गत्वा स्नानदानादिकरणम्, व्याधस्वर्गगमनवृत्तान्तवर्णनम्.	२३२	१
५८	उत्तानपादशिवसंवादप्रसङ्गेन भानुमत्याः शूलभेदे तपःकरणम, भानुमत्याः स्वर्गगमनवृत्तान्तवर्णनम्, शूलभेदमाहात्म्यवर्णनम्.	२३२	२
५९	पुष्करिणीतीर्थमाहात्म्यवर्णनम्, आदित्यतीर्थमाहात्म्यम्.	२३३	१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अध्यायाः	विषयाः	प०	पृ०
६०	रेवातीर्थागतब्राह्मणैर्नर्मदायाः स्तोत्रकरणम्, रेवातीरस्थस्यादित्येश्वरस्य माहात्म्यवर्णनम्, ब्रह्महत्यादिपापयुक्तानां ब्राह्मणानामादित्येश्वरक्षेत्रे स्नानादिना पापनिवृत्तिपूर्वकमोक्षप्राप्तिवृत्तान्तवर्णनम्.	२३३	२
६१	इन्द्रकृततपश्चर्यावर्णनपूर्वकं शक्रेश्वरतीर्थमाहात्म्यवर्णनम्.	२३५	१
६२	इन्द्रस्थापितकरोडीश्वरतीर्थमाहात्म्यवर्णनम्.	२३५	२
६३	कुमारेश्वरतीर्थमाहात्म्यवर्णनम्.	२३६	१
६४	अगस्त्येश्वरतीर्थमाहात्म्यवर्णनम्.	१३६	१
६५	आनन्देश्वरतीर्थमाहात्म्यवर्णनम्.	२३६	१
६६	मातृतीर्थमाहात्म्यवर्णनम्....	२३६	२
६७	लुङ्केश्वरतीर्थमाहात्म्यवर्णनप्रसङ्गेन कालपृष्ठदानवस्य तपश्चर्यावर्णनम्, शिवेन तस्मै वरप्रदानम्, दानववृषभयोर्युद्धे वृषभेण लांगूलेन दानवस्य पराभवकरणम्, दानवमागतं दृष्ट्वा वृषभं समारुह्य देवस्योमया सह कैलासे गमनम्, शङ्करेण स्वपृष्ठतोऽनुधावन्तं दानवं दृष्ट्वा इन्द्रब्रह्मादिलोकेषु पलायनम्, शिववचनान्नारदेन विष्णवे दानवपीडनादिसर्ववृत्तान्तकथनम्, मायया न्यग्रोधसमीपे विष्णोर्दानवमोहार्थं कन्यारूपधारणम्, कन्यां दृष्ट्वा मोहितेन कालपृष्ठदानवेन स्वमस्तकोपरि हस्तं कृत्वा भस्मभवनम्, ततो विष्णोः स्वस्थाने गमनम्, लुंकेश्वरस्थापनम्, लुंकेश्वरतीर्थस्नानमाहात्म्यवर्णनम्.	२३६	२
६८	धनदतीर्थमाहात्म्यवर्णनम्.	२३९	१
६९	मङ्गलस्थापितमंगलेश्वरोत्पत्तिवर्णनपूर्वकं मंगलेश्वरमाहात्म्यवर्णनम्.	२३९	१
७०	रविनिर्मितरवितीर्थमाहात्म्यवर्णनम्.	२३९	२
७१	कामेश्वरतीर्थमाहात्म्यवर्णनम्.	२३९	२
७२	मणिनागेश्वरतीर्थवर्णने कद्रूविनतयोरुच्चैःश्रवोहयं दृष्ट्वा हयवर्णनिर्णयसंबन्धिकं मिथः प्रतिज्ञाकरणम्, स्वस्वप्रतिज्ञां सत्यां कर्तुमुभयोः प्रयत्नः, तत्र कद्रा नागेभ्यः शापे दत्ते तच्छापनिवारणाय मणिनागेन तपः कृत्वा शिवलिंगस्थापनम्, मणिनागेश्वरतीर्थे स्नानदानादिमाहात्म्यवर्णनम्.	२३९	२
७३	कामधेनुतपश्चरणे गोदेहान्निःसृतस्य गोपारेश्वरस्य तीर्थस्य माहात्म्यवर्णनम्. ...	२४१	१
७४	गौतमस्थापितगौतमेश्वरलिंगतीर्थमाहात्म्यवर्णनम्.	२४१	२
७५	शंखचूडतीर्थमाहात्म्यवर्णनम्.	२४२	१
७६	पारेश्वरतीर्थमाहात्म्यवर्णने पुत्रप्राप्त्यर्थं पराशरमुनितपश्चर्यावृत्तान्तवर्णनम्, तत्तपस्तुष्टेन शंकरेण पराशराय वरप्रदानम्, तत्र पराशरेण लिंगस्थापनम्, पारेश्वरतीर्थे स्नानदानादिमाहात्म्यवर्णनम्.....	२४२	१
७७	भीमेश्वरतीर्थमाहात्म्यवर्णनम्.	२४२	२
७८	रेवाया उत्तरे तीरे नारदेन तपश्चरणम्, तत्तपःसंतुष्टेन शिवेन नारदाय वरप्रदानम्, ईश्वरवचनान्नारदेन शिवलिंगस्थापनम्, नारदेश्वरतीर्थे स्नानदानादिफलमाहात्म्यवर्णनम्.	२४२	२
७९	दधिस्कन्दमधुस्कन्दयोस्तीर्थयोर्दधिमधुदानमाहात्म्यवर्णनम्, दधिस्कन्दमधुस्कन्दतीर्थस्नानदानमाहात्म्यवर्णनम्.	२४३	२
८०	दधिस्कन्दमधुस्कन्दतीर्थप्रभावोत्कर्षं प्रदर्शयितुं नानातीर्थान्भ्रान्त्वाऽऽगतेन नंदिना तपः कृत्वा तत्रैव स्वनाम्ना लिंगस्थापनम्, नंदिकेश्वरतीर्थमाहात्म्यवर्णनम्. ...	२४३	२
८१	वरुणेश्वरतीर्थमाहात्म्यवर्णनम्.	२४३	२
८२	वह्नितीर्थवर्णनपूर्वकं दधिस्कन्दादिपञ्चतीर्थानां माहात्म्यवर्णनम्.	२४४	१
८३	हनुमंतेश्वरमाहात्म्यवर्णने रामेण रावणादीनां विनाशे कृते हनुमतः शिवदर्शनार्थं कैलासे गमनम्, राक्षसानां विनाशे ब्रह्महत्यादोषारोपीकरणान्नान्दिना द्वारे हनुमत्स्तंभनम्, ब्रह्महत्यानिवर्हणार्थं हनुमतो नर्मदायामागमनम्, हनुमत्कृतेन तपसा तुष्टेनेश्वरेण हनुमत आशीर्वचनम्, ईश्वराज्ञया हनुमता लिंगस्थापनम्, सुपर्वनामकस्य राज्ञः पुत्रस्य शतबाहुसंज्ञकस्य भ्रमतो हनुमद्वन		

CC-0. In Public Domain. Digitization by eGangotri

अध्यायाः	विषयाः	प०	पृ०
	आगमनम्, तत्रास्थिक्षेपार्थमागतस्य पिंगलकद्विजस्य राजपुत्रेण सह समागमः संवादश्च, अस्थिक्षेपकारणं पृच्छन्तं राजपुत्रं प्रति ब्राह्मणेन शिखंडिराजतत्कन्यासंवादपुरःसरवृत्तान्तकथनपूर्वकं हनुमंतेश्वरमाहात्म्यवर्णनम्....	२४४	१
८४	कपितीर्थमाहात्म्यम्, रामेश्वरलक्ष्मणेश्वरकुम्भेश्वरतीर्थेषु स्नानदानादिफलमाहात्म्यवर्णनम्.	२४६	२
८५	दक्षेणेन्दवे सप्तविंशतिकन्या दत्त्वा रोहिणीं विना चान्यासु चन्द्रस्याप्रीतिं दृष्ट्वा निजकन्यासु कारुण्याच्चन्द्राय क्षयित्वरूपशापदानम्, ततश्चन्द्रेण शापनिवृत्त्यर्थमीश्वरस्तुतिकरणम्, तत ईशानुज्ञया सोमनाथेति लिंगस्थापनम्, सोमनाथेश्वरलिंगप्रभावदर्शनार्थं ब्रह्महत्यायुतस्य कण्वर्षेर्ब्रह्महत्याविनाशनपूर्वककथावर्णनम्, सोमनाथेश्वरलिंगमाहात्म्यवर्णनम्.	२४८	१
८६	पिंगलेश्वरतीर्थमाहात्म्यवर्णनम्.	२५०	१
८७	ऋणत्रयमोचनतीर्थमाहात्म्यवर्णनम्.	२५०	२
८८	कपिलेश्वरतीर्थमाहात्म्यवर्णनम्.	२५०	२
८९	पूतिकेश्वरतीर्थमाहात्म्यवर्णनम्.	२५०	२
९०	चक्रिनिर्मितचक्रतीर्थमाहात्म्यवर्णने तालमेघदानवजितान्देवान्दृष्ट्वा ब्रह्मणो विष्णुसमीपे गमनम्, देवकृतां स्वस्तुतिं श्रुत्वा भगवता देवेभ्योऽभयवचनदानम्, ततो विष्णुतालमेघयोर्युद्धे मिथः शस्त्रास्त्रप्रेरणम्, ततो भगवता स्वचक्रेण तालमेघशिरश्छेदकरणम्, तद्भगवच्चक्रं नर्मदाम्भसि पतितं दृष्ट्वा तत्र तीर्थनिर्माणम्, तस्य तीर्थस्य जलशायीत्यपरनामकचक्रतीर्थेतिनाम्ना प्रसिद्धिः, तत्र स्नानदानादिविशेषविधिविधानमाहात्म्यवर्णनम्.	२५१	१
९१	चंडादित्यतीर्थमाहात्म्यवर्णनम्.	२५३	१
९२	यमहास्यतीर्थमाहात्म्यवर्णनम्.	२५३	२
९३	कल्होडीतीर्थमाहात्म्यवर्णनम्.	२५४	१
९४	नंदिकेश्वरतीर्थमाहात्म्यवर्णनम्.	२५४	२
९५	नरनारायणस्थापितनारायणतीर्थमाहात्म्यवर्णनम्.	२५४	२
९६	कोटीश्वरतीर्थमाहात्म्यवर्णनम्.	२५५	१
९७	व्यासतीर्थोत्पत्तिवर्णनप्रसङ्गे पराशरमुनितपश्चरणवृत्तान्तवर्णनम्, तपसोऽन्ते पराशरमुनिना कस्याश्चिद्बालाया दाशकन्याया दर्शनम्, तां प्रति 'त्वं राजकन्यासि' इत्युक्त्वा तस्याः प्राक्सर्ववृत्तान्तकथनम्, ततः पराशरस्य तया मत्स्यगंधया सह संगमे तत्क्षणमेव पराशरमुनिवीर्यप्रभावाद्व्यासस्योत्पत्तिवर्णनम्, व्यासेन नर्मदातटे तपश्चरणम्, तत्तपःसंतुष्टेनेश्वरेण व्यासाय वरप्रदानम्, व्यासेन नर्मदास्तोत्रकरणं व्यासेन नर्मदातटे शिवलिंगस्थापनं च, व्यासतीर्थे स्नानदानादिफलमाहात्म्यवर्णनम्.	२५५	१
९८	प्रभासतीर्थमाहात्म्यवर्णनम्.	२५९	१
९९	नागेश्वरतीर्थमाहात्म्यवर्णनम्.	२६०	१
१००	मार्कंडेयस्थापितमार्कंडेयेशमाहात्म्यवर्णनम्.	२६०	२
१०१	संकर्षणतीर्थमाहात्म्यवर्णनम्.	२६०	२
१०२	मन्मथेश्वरमाहात्म्यवर्णनम्.	२६१	१
१०३	एरंडीसंगममाहात्म्यवर्णनम्, तत्रानपत्यत्वादत्र्यनसूयाभ्यां शोककरणम्, अत्रेरनुज्ञया नर्मदातीरस्थैरंडीसंगमेऽनसूयया तपोर्थं गमनम्, तपसोऽन्ते त्रयाणां ब्रह्मादिदेवतानामागमनम्, देवैः पुत्रप्राप्त्यर्थमनसूयायै वरप्रदानम्, ततोऽनसूयाया दुर्वासोदत्तसोमाख्यपुत्रत्रयप्राप्तिवृत्तान्तवर्णनम्, ततस्तत्तीर्थमाहात्म्यवर्णनप्रसंगेन पुत्रशोकेन संतप्तस्य गोविन्दनाम्नः कृषीवलस्य कथावर्णनम्, तत्र तस्यैव भूमौ शयानस्य कृमित्वप्राप्तिवर्णनम्, ततस्तस्य पत्न्या सममेरण्डीसंगमे स्नानाद्यर्थं गमनम्, तत्र गोभूहिरण्यादिदानेन तयोर्दुःखान्मुक्तिः, गोविंदाख्यानश्रवणफलवर्णनम्, एरण्डीसंगममाहात्म्यवर्णनम्.	२६१	१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अध्यायाः	विषयाः	प०	पृ०
१०४	सुवर्णशिलातीर्थमाहात्म्यवर्णनम्.	२६५	२
१०५	करंजतीर्थमाहात्म्यवर्णनम्.	२६५	२
१०६	कामदतीर्थमाहात्म्यवर्णनम्.	२६५	२
१०७	भण्डारीतीर्थमाहात्म्यवर्णनम्.	२६६	१
१०८	रोहिणीतपश्चरणपूर्वकं रोहिणीतीर्थमाहात्म्यवर्णनम्.	२६६	२
१०९	चक्रतीर्थमाहात्म्यवर्णनम्.	२६६	२
११०	धौतपापतीर्थमाहात्म्यवर्णनम्.	२६७	१
१११	स्कन्दतीर्थवर्णनप्रसङ्गेन स्कन्दजन्मवृत्तान्तकथनम्, स्कन्दस्य सेनापतित्वे स्थापनम्, स्कन्देन शिवलिंगस्थापनम्, स्कन्दतीर्थमाहात्म्यवर्णनम्.	२६७	१
११२	अङ्गिरसतीर्थमाहात्म्यवर्णनम्.	२६८	१
११३	कोटितीर्थमाहात्म्यवर्णनम्.	२६८	२
११४	अयोनिसंभवतीर्थमाहात्म्यवर्णनम्.	२६८	२
११५	अङ्गारकतीर्थमाहात्म्यवर्णनम्.	२६८	२
११६	पांडुतीर्थमाहात्म्यवर्णनम्.	२६९	१
११७	त्रिलोचनतीर्थमाहात्म्यवर्णनम्.	१६९	१
११८	देवदैत्ययुद्धे वृत्रं हत्वा ब्रह्महत्याभिभूतस्येन्द्रस्य तपःकरणार्थं नर्मदातीरे गमनम्, तत्र तस्य तपसोऽन्ते ब्रह्मविष्णुमहेश्वराणामागमनम्, तदाज्ञयेन्द्रेण शिवलिंगस्थापनम्, इन्द्रतीर्थमाहात्म्यवर्णनम्.	२६९	१
११९	कह्लोडीतीर्थमाहात्म्यवर्णनम्.	२७०	१
१२०	कंबुनामकस्य दानवस्य तपोऽर्थं नर्मदातीरे गमनम्, तत्तपसः प्रभावेण तुष्टेन शंकरेण तस्मै वरप्रदानम्, कंबुकृतं शिवलिंगस्थापनम्, कंबुकेश्वरतीर्थमाहात्म्यवर्णनम्.	२७०	१
१२१	क्षयित्वं प्राप्तेन सोमेन तपस्तप्त्वा शिवलिंगस्थापनम्, सोमतीर्थचन्द्रहासतीर्थयोर्माहात्म्यवर्णनम्.	२७१	१
१२२	कोहनस्वतीर्थमाहात्म्यवर्णने ब्रह्मनिर्मितसृष्टिवर्णनम्, चातुर्वर्ण्यव्यवस्थावर्णनम्, सदाचारसंपन्नेन विप्रेण हनस्वेति वाक्यं श्रुत्वा भिया कृतं महिषारूढस्य यमस्य दर्शनम्, शतरुद्रीयजपस्तवनेनेश्वरदर्शनं, यमपराभववर्णनम्, कोहनस्वलिंगस्थापनम्, कोहनस्वतीर्थमाहात्म्यवर्णनम्.	२७१	२
१२३	कर्मदेश्वरतीर्थमाहात्म्यवर्णनम्.	२७२	१
१२४	नर्मदेश्वरतीर्थमाहात्म्यवर्णनम्.	२७२	१
१२५	रवेरादित्यभास्करेतिनामद्वयप्राप्तिकारणकथनम्, रविकृतस्य तपसो वर्णनम्, रविणा शिवलिंगस्थापनम्, रवितीर्थमाहात्म्यवर्णनम्.	२७२	१
१२६	अयोनिप्रभवतीर्थमाहात्म्यवर्णनम्.	२७३	१
१२७	अग्नितीर्थमाहात्म्यवर्णनम्.	२७३	२
१२८	भृकुटेश्वरतीर्थमाहात्म्यवर्णनम्.	२७३	२
१२९	ब्रह्मतीर्थमाहात्म्यवर्णनम्.	२७४	१
१३०	देवतीर्थमाहात्म्यवर्णनम्.	२७४	१
१३१	नागतीर्थोत्पत्तिकथने विनताकद्रोर्वादप्रसंगकथनम्, नागेश्वरतीर्थमाहात्म्यवर्णनम्.	२७४	२
१३२	आदिवाराहतीर्थमाहात्म्यवर्णनम्.	२७५	१
१३३	चतुर्भिर्लोकपालैरीश्वराराधनां कृत्वेश्वरतः स्वेष्टवरग्रहणकथनम्, तैरेव चतुर्भिर्लोकपालैः शिवलिंगस्थापनम्, कुवेरादिलिंगचतुष्टयमाहात्म्यवर्णनम्.	२७५	२
१३४	रामेश्वरतीर्थमाहात्म्यवर्णनम्.	२७६	२
१३५	सिद्धेश्वरमाहात्म्यवर्णनम्.	२७६	२
१३६	अहिल्यासंगकारिणमिन्द्रं प्रति गौतमेन शापप्रदानम्, अहिल्यायाः पतिशापेनाश्म-		

CC-0. In Public Domain. Digitization by eGangotri

अध्यायाः	विषयाः	प०	पृ०
	त्वप्राप्तिवर्णनम्, रामेण पदा स्पृष्टाया अहिल्यायाः शापमोचनम्, अहिल्यया स्वनाम्ना शिवलिंगस्थापनम्, अहिल्येश्वरतीर्थमाहात्म्यवर्णनम्.	२७६	२
१३७	कर्कटेश्वरमाहात्म्यवर्णनम्.	२७७	१
१३८	शक्रेण गौतमदत्तशापनिवृत्त्यर्थं तपस्तप्त्वा शिवलिंगस्थापनम्, शक्रेश्वरतीर्थमाहात्म्यवर्णनम्.	२७७	२
१३९	सोमतीर्थमाहात्म्यवर्णनम्.	२७७	२
१४०	नन्दादेव्युत्पत्तिवर्णनपूर्वकनंदाह्रदतीर्थमाहात्म्यवर्णनम्.	२७८	१
१४१	तापेश्वरतीर्थमाहात्म्यवर्णनम्.	२७८	१
१४२	रुक्मिणीतीर्थमाहात्म्यवर्णनप्रसंगेन रुक्मिण्याः श्रीकृष्णेन कृतस्य पाणिग्रहणस्य वृत्तान्तवर्णनम्, तत्र श्रीकृष्णचैद्यमागधादीनां युद्धप्रसंगवर्णनम्, श्रीकृष्णकृतरुक्मिपराभववर्णनम, रुक्मिणीकृष्णयोर्विवाहविधिवर्णनम्, रुक्मिणीस्थापितस्य रुक्मिणीतीर्थस्य माहात्म्यवर्णनम्.	२७८	२
१४३	योजनेश्वरतीर्थमाहात्म्यवर्णनम्.	२८०	२
१४४	द्वादशीतीर्थमाहात्म्यवर्णनम्.	२८१	१
१४५	शिवतीर्थमाहात्म्यवर्णनम्.	२८१	१
१४६	अस्माहकतीर्थे स्नानदानजपहोमादिपितृश्राद्धवृषोत्सर्गाद्यनेककृतकर्मणां विस्तरेण फलमाहात्म्यवर्णनम्.	२८१	१
१४७	सिद्धेश्वरतीर्थमाहात्म्यवर्णनम्.	२८३	२
१४८	मंगलेश्वरतीर्थमाहात्म्यवर्णनम्.	२८३	२
१४९	लिंगवाराहतीर्थमाहात्म्यवर्णनम्.	२८४	१
१५०	शंकरेण कामे भस्मीकृते सति तदुत्थानार्थं देवैरीश्वरस्तुतिकरणम्, अनंगस्य पुनरङ्गकरणम्, कामदेवेन तपः कृत्वा शिवलिंगस्थापनम्, कुसुमेश्वरलिंगमाहात्म्यवर्णनम्.	२८४	२
१५१	श्वेतवाराहतीर्थमाहात्म्यवर्णनम्.	२८५	२
१५२	भार्गलेश्वरतीर्थमाहात्म्यवर्णनम्.	२८६	१
१५३	आदित्येश्वरतीर्थमाहात्म्यवर्णनम्.	२८६	२
१५४	कलकलेश्वरतीर्थमाहात्म्यवर्णनम्.	२८७	१
१५५	शुक्लतीर्थोत्पत्तिवर्णने वायसाभ्यां वञ्चितस्य चाणक्यस्य कथानकम्, चाणक्यस्य कौटिल्यवर्णनम्, चाणक्यसिद्धिप्राप्तिवृत्तान्तवर्णनम्.	२८७	२
१५६	शुक्लतीर्थे स्नानदानादिमाहात्म्यवर्णनम्.	२९०	१
१५७	हुंकारस्वामितीर्थमाहात्म्यवर्णनम्.	२९१	१
१५८	संगमेश्वरतीर्थमाहात्म्यवर्णनम्.	२९१	१
१५९	अनरकेश्वरतीर्थमाहात्म्यवर्णने कर्मविपाकवर्णनम्, गर्भावलिवर्णनम्, वैतरण्यादिमहादानानां फलमाहात्म्यवर्णनम्, आश्विनकृष्णचतुर्दश्यां यमस्य दीपादिदानमाहात्म्यम्, अनरकेश्वरतीर्थमाहात्म्यवर्णनम्.	२९१	२
१६०	मोक्षतीर्थमाहात्म्यवर्णनम्.	२९४	१
१६१	सर्पतीर्थमाहात्म्यवर्णनम्.	२९४	१
१६२	गोपेश्वरतीर्थमाहात्म्यवर्णनम्.	२९४	१
१६३	नागतीर्थमाहात्म्यवर्णनम्.	२९४	२
१६४	सांवौरेश्वरतीर्थमाहात्म्यवर्णनम्.	२९४	२
१६५	सिद्धेश्वरतीर्थमाहात्म्यवर्णनम.	२९४	२
१६६	सिद्धेश्वरीतीर्थमाहात्म्यवर्णनम्.	२९५	१
१६७	मार्कण्डेयेन तपस्तप्त्वा शिवानुज्ञया शिवलिंगस्थापनम, मार्कण्डेयेश्वरलिंगमाहात्म्यवर्णनम...	२९५	१
१६८	अंकूरेश्वरतीर्थमाहात्म्यवर्णने कुबेरजन्मकथावर्णनम, रावणादित्रयाणां जन्मकर्म-		

॥ ४५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अध्यायाः	विषयाः	प०	पृ०
	वर्णनम्, रावणादिभिस्तपः कृत्वा शिवतो वरादिग्रहणम्, तैरंकूरेश्वरलिंगस्थापनम, अंकूरेश्वरतीर्थमाहात्म्यवर्णनम.	२९६	१
१६९	मांडव्यशूलारोपणकथाप्रसंगेनेश्वराराधनया जातकन्यकस्य देवपन्नाख्यस्य राज्ञः कामप्रमोदिन्याख्यायाः कन्यायाः श्येनरूपधारिणा शंबरेण हरणम्.	२९६	२
१७०	कामप्रमोदिनीसंज्ञकराजकन्याहरणेन तत्सखीभिः कृतस्य विलापस्य वर्णनम्, देवपन्नेन राज्ञा तद्वृत्तांतं श्रुत्वा तच्छोधनार्थं मंत्र्यादीनां प्रेषणम्, मांडव्याश्रमे राजकन्यकाया आभरणानि दृष्ट्वा सैवैं राज्ञे तद्वृत्तान्तनिवेदनम्, ततो राजाज्ञया मांडव्यस्य शूलारोपणवर्णनम्.	२९७	२
१७१	शूलारोपितस्य माण्डव्यस्य दर्शनार्थमृषीणामागमनम्, राज्ञे शापं दातुमृषीणां प्रवृत्तिवर्णनम्, ततो माण्डव्येन महर्षिणर्षिभ्यः कर्मविपाकवर्णनम्, मांडव्याज्ञयर्षीणां स्वाश्रमे गमनम्, तत्र पत्न्याः स्कन्धे स्थितस्य रोगिणः शांडिल्यर्षेरागमनम्, शांडिल्यपत्न्याऽजानन्त्या स्खलनवशात्स्वपद्भ्यां शूलदण्डस्य स्पर्शने कृते सति तज्जन्यप्रतिघातेन शूलदण्डकम्पनाद्व्यथितस्य मांडव्यस्य शांडिल्यपत्न्याश्च संवादवर्णनम्, मिथः परस्पराभ्यां परस्परयोः शापप्रदानम्.	२९८	१
१७२	देवर्षीणां मांडव्याश्रमे पुनरागमनम्, तेषां भाषणम्, देवपन्नराजाग्रे शंबरेण कन्याया आनयनम्, मांडव्यस्य शापतो मुक्तिवर्णनम्, तया विप्रपत्न्या निजपातिव्रत्यप्रभावेण प्रतिबन्धीकृतस्य सूर्यस्य बन्धतो मोचनम्, शांडिल्यर्षेः पुनर्जीवप्रदानवर्णनम्, मांडव्यतीर्थे स्नानदानादिमाहात्म्यवर्णनम्.	२९९	२
१७३	शुद्धेश्वरतीर्थमाहात्म्यवर्णनम्.	३०१	१
१७४	गोपेश्वरतीर्थमाहात्म्यवर्णनम्.	३०१	२
१७५	सगरात्मजानामुद्धाराय कपिलेन नर्मदारोधसि तपस्तप्त्वा निर्मितं कपिलेश्वरतीर्थम्, कपिलेश्वरतीर्थमाहात्म्यवर्णनम्.	३०२	१
१७६	पिंगलेश्वरतीर्थमाहात्म्यवर्णनम.	३०२	१
१७७	भूतीश्वरतीर्थमाहात्म्यवर्णनम्.	३०३	१
१७८	गंगावहकतीर्थमाहात्म्यवर्णनम्.	३०३	२
१७९	गौतमेश्वरतीर्थमाहात्म्यवर्णनम्.	३०४	१
१८०	दशाश्वमेधिकतीर्थमाहात्म्यप्रस्तावे शंकरपार्वतीसंवादे केनचिद्द्विजेन तपस्तप्त्वा लिंगस्थापनवर्णनम्, दशाश्वमेधिकोत्पत्तिवर्णनपूर्वकं दशाश्वमेधिकतीर्थमाहात्म्यवर्णनम्.	३०४	२
१८१	भृगुतीर्थमाहात्म्यवर्णने भृगुकथावर्णनपूर्वकं भृगुं हन्तुं प्राप्तस्य नंदिनोऽनु भृगुऋषेर्गमनम्, क्वापि स्वराक्षितारमदृष्ट्वा देवसमीपे वृषभस्य गमनम्, भृगुणा शिवस्य स्तुतिकरणम्, ईश्वरेण भृगवे वरप्रदानम्, भृगुणा लिंगस्थापनम्, भृगुकच्छोत्पत्तिवर्णनपूर्वकमाहात्म्यवर्णनम्.	३०६	१
१८२	भृगुकच्छतीर्थे स्नानदानादिमाहात्म्यवर्णनम्.	३०७	२
१८३	केदारेश्वरतीर्थमाहात्म्यवर्णनम्.	३०९	१
१८४	ब्रह्मणः पंचमशिरश्छेदनेन ब्रह्महत्योपद्रुतेन शंभुना धौतपापाख्यतीर्थस्थापनम्, धौतपापतीर्थमाहात्म्यवर्णनम्.	३०९	१
१८५	एरण्डीतीर्थमाहात्म्यवर्णनम्.	३१०	१
१८६	गरुडेन चामुंडास्तवनकरणम्, चामुंडाप्रसादेन गरुडेन कनखलेश्वरलिंगस्थापनकरणम्, कनखलेश्वरलिंगमाहात्म्यवर्णनम्.	३१०	१
१८७	कालाग्निरुद्रतीर्थमाहात्म्यवर्णनम्.	३११	१
१८८	शालिग्रामतीर्थमाहात्म्यवर्णनम्.	३११	२
१८९	वराहोत्पत्तिवर्णनपूर्वकमुदीर्णवराहतीर्थमाहात्म्यवर्णनम्.	३११	२
१९०	चन्द्रहास्यापरनामकचन्द्रप्रभासतीर्थमाहात्म्यवर्णनम्.	३१२	२
१९१	द्वादशादित्यतीर्थमाहात्म्यवर्णनम्.	३१३	१
१९२	नरनारायणयोस्तपोविघ्नार्थमिंद्रेणाप्सरआदीनां प्रेषणम्, अप्सरोभिर्नरनारायणस्तवनम्, नरनारायणाभ्यामप्सरआदीनामुपदेशादिकरणम्, स्वविराड्देहे नानावरां-		

अध्यायाः	विषयाः	प०	पृ०
	गनादीनां ब्रह्माण्डस्थवस्तूनां च दर्शनम्, तद्दर्शनविस्मितैर्वसंतकामाप्सरोभिर्विराड्रूपिनरनारायणस्तोत्रकरणम्, अप्सरआदीनां स्वर्गे गमनम्, इन्द्राय सर्ववृत्तान्तकथनम्, श्रीपतिमाहात्म्यवर्णनम्.	३१३	२
१९३	श्रीपतिक्षेत्रे स्नानस्य गवादिदानस्य च फलवर्णनम्.	३१५	२
१९४	नारायणप्रभावं शक्रमुखाच्छ्रुत्वा तं नारायणं कामयमानया लक्ष्म्या तत्प्राप्त्यर्थं सागरान्ते तपश्चरणम्, तुष्टेन नारायणेन लक्ष्म्या समं विवाहकरणम्, श्रीपतिविवाहसमारंभवर्णनम्.	३१७	१
१९५	श्रीपतिमाहात्म्यवर्णनम्.	३१९	१
१९६	हंसतीर्थमाहात्म्यवर्णनम्.	३२०	१
१९७	मूलस्थानतीर्थमाहात्म्यवर्णनम्.	३२०	१
१९८	शूलारोपितस्य माण्डव्यर्षे राज्ञा शूलतोऽवरोहणकरणम्, तत्र शंकरस्यागमनम्, माण्डव्येन शंकराग्रे दाक्षायणीविनाशादिप्राक्संभूतकथावर्णनम्, माण्डव्येन देवीस्तवनकरणम्, नानास्थलस्थितया देव्या भिन्नभिन्ननामादिवर्णनम्, शूलेश्वरनाम्ना शिवलिंगस्थापनं च, तस्य शूलेश्वरलिंगस्य माहात्म्यवर्णनम्....	३२०	१
१९९	आश्विनतीर्थमाहात्म्यवर्णनम्.	३२२	२
२००	सावित्रीतीर्थमाहात्म्यवर्णनम्.	३२३	१
२०१	देवतीर्थमाहात्म्यवर्णनम्.	३२३	२
२०२	शिखितीर्थमाहात्म्यवर्णनम्.	३२३	२
२०३	कोटितीर्थमाहात्म्यवर्णनम्.	३२४	१
२०४	पैतामहतीर्थमाहात्म्यवर्णनम्.	३२४	१
२०५	कुर्कुरीतीर्थमाहात्म्यवर्णनम्.	३२४	२
२०६	दशकन्यातीर्थमाहात्म्यवर्णनम्.	३२४	२
२०७	सुवर्णबिंदुतीर्थमाहात्म्यवर्णनम्.	३२४	२
२०८	ऋणमोचनतीर्थमाहात्म्यवर्णनम्.	३२५	१
२०९	पुष्कलीतीर्थक्षमानाथतीर्थमाहात्म्यवर्णनम्, भारभूतीतीर्थवर्णनप्रस्तावे विष्णुशर्माग्रे बटुवेषधारिणः शिवस्यागमनम्, बटुना स्वप्रतिज्ञायां सत्यापितायां स्वस्वप्रतिज्ञाभ्रष्टानामन्यशिष्याणां नर्मदाम्भसि मज्जनम्, गुर्वनुज्ञया शिष्यभाराणां पुनरुज्जीवनम्, तत्र लिंगस्थापनमतो भारभूतीति नाम्ना तस्य तीर्थस्य प्रसिद्धिवर्णनम्, भारभूतीतीर्थमाहात्म्यवर्णनम्, विश्वासघातिनः सुकेश्याख्यवैश्यस्य कथानककथनम्.	३२५	१
२१०	पुंखिलतीर्थमाहात्म्यवर्णनम्.	३२९	१
२११	मुण्डितीर्थमाहात्म्यवर्णनम्.	३२९	१
२१२	एकशालडिंडिमेश्वरतीर्थमाहात्म्यवर्णनम्.	३२९	२
२१३	आमलेश्वरतीर्थमाहात्म्यवर्णनम्.	३२९	२
२१४	श्रीकपालतीर्थमाहात्म्यवर्णनम्.	३३०	१
२१५	शृंगितीर्थमाहात्म्यवर्णनम्.	३३०	३
२१६	आषाढीतीर्थमाहात्म्यवर्णनम्.	३३०	२
२१७	एरंडीतीर्थमाहात्म्यवर्णनम्.	३३०	२
२१८	स्वपितुर्जमदग्नेरपराधकारिणः सहस्रार्जुनस्य विनाशे कृते सत्येकविंशतिवारं समस्तक्षत्रियवधे च कृते सति तत्पापशमनार्थं परशुरामेण जामदग्न्येश्वरस्थापनं जामदग्न्यतीर्थकरणं च, जामदग्न्यतीर्थमाहात्म्यवर्णनम्, जामदग्न्येश्वरपूजनविधिवर्णनं च.	३३०	२
२१९	कोटितीर्थमाहात्म्यवर्णनम्.	३३१	२
२२०	लोटणेश्वरतीर्थमाहात्म्यवर्णनम्.	३३२	१
२२१	ब्रह्महंससंवादपूर्वकं हंसेश्वरमाहात्म्यवर्णनम्.	३३३	१
२२२	तिलोदेश्वरतीर्थमाहात्म्यवर्णनम्.	३३३	२
२२३	वासेश्वरतीर्थमाहात्म्यवर्णनम्.	३३४	१

CC-0. In Public Domain. Digitization by eGangotri

अध्यायाः विषयाः प० पृ०

२२४ कोटीश्वरतीर्थमाहात्म्यवर्णनम्. ३३४ १
२२५ अलिकानामकगन्धर्वकन्यया स्वनाम्ना शिवलिंगस्थापनम्, अलिकेश्वरतीर्थमाहात्म्यवर्णनम्..... .... ३३४ २
२२६ भानुमतीकासुकेन भानुना कुष्ठरोगानिरसनार्थं शान्तया भार्यया सार्धं तपस्तप्त्वा शिवाज्ञया विमलेश्वरेतिनाम्ना शिवलिंगस्थापनम्, विमलेश्वरतीर्थमाहात्म्यवर्णनम्. ३३५ १
२२७ नर्मदातीरस्थानां प्राक्कथितसर्वतीर्थानां यथाक्रमेण यात्राविधिवर्णनम्, विशेषतस्तीर्थमाहात्म्यवर्णनम्. ३३५ २
२२८ परार्थतीर्थयात्राकरणमाहात्म्यपुण्यादिकथनम्. ३३७ १
२२९ रेवाखण्डश्रवणपठनादिदानादिफलश्रुतिवर्णनम्. ३३७ १
२३० तीर्थसंगमभेदकथनम्, तीर्थावलिवर्णनम्. ३३८ १
२३१ तीर्थसंख्यापरिगणनपूर्वकं सर्वतीर्थानां विशिष्टव्यवस्थाकथनपूर्वकयात्राक्रमवर्णनम्. ३४० १
२३२ रेवाखण्डसमाप्तिपूर्वकं रेवाखण्डपुस्तकदानफलवर्णनम्. ३४१ १

इत्यावन्त्यखण्डे तृतीयं रेवाखण्डम् ॥ (५–३)

इति स्कान्दे महापुरणे पंचममावन्त्यखण्डम् ॥ ५ ॥

॥ अथ स्कान्दे महापुराणे षष्ठं नागरखण्डम् ॥ ६ ॥

१ मंगलाचरणम्, सूतशौनकसंवादारम्भः, तत्र शौनकप्रश्नं श्रुत्वा तस्योत्तरं दातुं सूतेन लिंगोत्पत्तिवर्णनप्रसंगेन स्त्रीवियोगिनः शिवस्य ऋष्याश्रमे गमनवर्णनम्, तत्रार्षिभिर्दिगंबरं शिवं दृष्ट्वा तस्मै शापप्रदानम्, तेन शापन शिवस्य तत्रव लिंगपतनम्, ब्रह्मविष्ण्वादिभिः शिवस्तवनकरणम्, तेन तुष्टेन शंकरेण लिंगपूजनविधिकथनम्, ततो देवैर्हाटकेश्वरक्षेत्रे गत्वा तत्रैव तस्य शिवलिंगस्य स्थापनम्, लिंगपूजनमाहात्म्यवर्णनम्. १ १
२ लिंगोत्पाटनेन पातालतो गंगाया आगमनम्, त्रिशंकोश्चण्डालत्वं कथं प्राप्तमिति प्रश्ने तत्कथोपाख्याने सशरीरेण स्वर्गगमनाय त्रिशंकुना वसिष्ठस्य प्रार्थनाकरणम्, वसिष्ठेनेदमशक्यामिति कथितेऽन्यं गुरुं प्रष्टुं मनसि दुराग्रहेण निर्धारणम्. ३ २
३ वसिष्ठवाक्यमनादृत्य दुराग्रहेण स्वेच्छया वर्तितुमुद्युक्तं त्रिशंकुं प्रति वसिष्ठपुत्रैः 'चण्डालो भव' इति शापदानम्, तेन शापेन सद्यश्चण्डालत्वं प्राप्य पश्चात्तापेन दुःखितस्य त्रिशंकोराज्ञया तस्य मन्त्रिभिस्त्रिशंकुज्येष्ठपुत्रं हरिश्चंद्रं राज्येभिषेचनम्, तस्य त्रिशंकोश्च महारण्ये पद्भ्यां गमनम्. ४ १
४ अरण्ये गच्छतश्चण्डालस्य त्रिशङ्कोर्विश्वामित्राश्रमे गमनम्, ततो विश्वामित्रेण सर्ववृत्तान्तं श्रुत्वा स्पर्धया 'त्वामनेनैव देहेन स्वर्गं नेष्यामि', इति प्रतिज्ञां कृत्वा तेन चण्डालेन साकं तस्य पापनिरसनायानेकतीर्थक्षेत्रेषु भ्रमणम्, भ्रमतोस्तयोर्मार्कण्डयेन समं संवादः, मार्कण्डेयवचनाद्धाटकेश्वरे गमनम्, हाटकेश्वरलिंगपूजनेन त्रिशंकोश्चण्डालत्वनिवृत्तिः, ततः स्वर्गप्राप्तिकरं यज्ञं कर्तुं तयोर्ब्रह्मानुज्ञाग्रहणम्. ५ १
५ ब्रह्मणा तथा करणेऽनुज्ञायामदत्तायामपि विश्वामित्रेण त्रिशंकोः सशरीरेण स्वर्गप्राप्तये स्वतपःप्रभावाद्द्वादशवार्षिकं सत्रं ब्राह्मणद्वारा समाप्य ततोऽन्तेऽवभृथस्नानादिकं कृत्वा यज्ञसमाप्तिकरणम्. ६ २
६ स्वर्गप्राप्त्यभावाद्विश्वामित्रं प्रति प्रश्नं कुर्वतस्त्रिशंकोर्विष्णुं स्तुत्वा ततो वरं गृहीत्वा विश्वामित्रदत्तं नूतनस्वर्गं रचयित्वा सशरीरेण स्वर्गं प्रति गमनम्..... ... ७ १
७ विश्वामित्रकृतसृष्ट्या ब्रह्मसृष्ट्या साकं परस्पराविवादं दृष्ट्वा देवानां ब्रह्माभ्याशे गमनम्, ततो ब्रह्मादीनां जगत्स्थित्यर्थं विश्वामित्रसमीपे गमनम्, विश्वामित्र-

CC-0. In Public Domain. Digitization by eGangotri

अध्यायाः	विषयाः	प०	पृ०
	वचनादनन्यगतिकत्वात्रिशंकोः स्वर्गे गमनम्, विश्वामित्रस्य नूतनसृष्टेः स्वेच्छया निवर्तनम्, त्रिशंकूपाख्यानोपसंहारश्च.	७	२
८	हाटकेश्वरप्रभावं श्रुत्वा सर्वजनानां तत्र गमनम्, विश्वामित्रस्यापि कुरुक्षेत्रं त्यक्त्वा तत्रैव वासः, यज्ञादीनकृत्वापि मोक्षप्राप्तिदमिदं क्षेत्रमिति मत्वा देवाज्ञया हाटकेश्वरस्य पाताले स्थापनम्, तेन नागानामपि तद्बिलेन सर्वत्र गमनम्, हाटकेश्वरमाहात्म्यवर्णने हिरण्यकाशिपोः सुतया रमानाम्न्या पुत्रप्राप्त्यर्थं विष्णुमुद्दिश्य तपश्चरणम्, विष्णुकृपया ततो वृत्रासुरोत्पत्तिः, इन्द्रादिभिर्वृत्रवधार्थं कृतया विष्णुप्रार्थनया तद्वचनाद्वज्रोत्पादनार्थं दधीच्यग्रे गमनम्, दधीच्यस्थिनिर्मितवज्रेण वृत्रस्य पराजयः, तज्जन्यब्रह्महत्यादोषनिरासार्थं शक्रस्य हाटकेश्वरे गमनम्, हाटकेश्वरपूजनेन दोषनिवृत्तिः, स्वस्थाने गमनम्, हाटकेश्वरमाहात्म्यवर्णनम्.	८	१
९	शक्रेण नागविलपूर्तये संवर्तानिलस्य प्रेषणम्, शक्राज्ञया संवर्तानिलस्य नागविले गमनम्, लिंगोद्भवशापेन भीतस्य संवर्तानिलस्य शक्रपुरं प्रत्यागमनम्, ततो बृहस्पतेराज्ञया शक्रस्य हिमालयपुत्रान्बिलपूर्तिकरणार्थं प्रेषितुं हिमालयसन्निधौ गमनम्, शक्रकार्यं कर्तुं हिमालयेनाज्ञापितानामप्यस्वीकृताज्ञानां मैनाकनंदिवर्धनरक्तशृंगाख्यानां त्रयाणां पुत्राणामननुमोदनं दृष्ट्वा तेभ्यः शक्रेण शापप्रदानम्, शापभीत्या रक्तशृंगाख्यपर्वतस्य नागविलपूर्तिकरणार्थं तत्र गमनम्, ततो देवेन्द्रेण रक्तशृंगाख्यपर्वतस्य सुखजनकानामनेकतीर्थानां संस्थापनम्, शक्रकृतरक्तशृंगशिखरोत्साहवर्णनम्.	११	१
१०	शंखतीर्थमाहात्म्यवर्णने चमत्कारनृपस्य मृगयाकरणम्, तत्र बुभुक्षितस्य बालस्य स्तनं ददत्या मृग्याश्चमत्कारेण वधकरणम्, मृगीदत्तशापेन चमत्कारनृपतेः कुष्ठरोगप्राप्तिः, तत्कुष्ठस्य शापस्य च निवर्हणार्थं भ्रमतश्चमत्कारनृपतेर्हाटकेश्वरक्षेत्रे शंखतीर्थे गमनम्, शंखतीर्थस्नानेन चमत्कारनृपतेः कुष्ठनिरासवर्णनम्, शंखतीर्थमाहात्म्यवर्णनम्.	१२	१
११	चमत्कारनृपऋषिसंवादे शंखतीर्थोत्पत्तिवृत्तान्ते शंखकृतेन लिखिताश्रमवृक्षोद्भूतफलग्रहणेन चौर्यमिदमिति मत्वा लिखितेन शंखहस्तच्छेदनकरणम्, ततः शंखस्य हाटकेश्वरे तपश्चरणम्, तत्तपस्तुष्टेन शिवेन शंखाय वरप्रदानम्, पूर्ववत्तत्पुण्येन हस्तप्राप्तिकथनम्, तत्र तेन स्वनाम्ना लिंगस्थापनम्, शंखतीर्थोत्पत्तिवर्णनपूर्वकं शंखतीर्थमाहात्म्यवर्णनम्, चमत्कारभूपतिना ब्राह्मणेभ्यो नगरं निर्मापयित्वा दानकरणम्.	१२	२
१२	चमत्कारेण भूपेन ब्राह्मणाज्ञया नगरस्थित्यर्थं पुत्रोपदेशकरणम्, ब्रह्मदत्ताशीर्वादग्रहणम्.	१४	१
१३	स्वराज्यं पुत्रेषु निक्षिप्य तपःकरणार्थं चमत्कारनृपतेर्हाटकेश्वरे गमनम्, तत्र शिवमाराध्य शिवप्रसादेन अचलेश्वरेतिनाम्ना लिंगस्थापनम्; अचलेश्वरमाहात्म्यवर्णनम्.	१४	१
१४	चमत्कारपुरे कस्यचिद्गोरक्षकस्य गोयूथादेकस्या गोररण्ये तृणलोभेन गमनम्, तस्याः शोधनार्थं गोरक्षकस्याप्यरण्ये गमनम्, ततः कालान्तरेण द्वयोः पञ्चत्वप्राप्तिवर्णनम्, ततो गोरक्षकस्य दशार्णाधिपतेः कुले जन्मवर्णनम्, तथा गोस्तन्मंत्रिकुले जननम्, ततस्ताभ्यां पूर्वजन्मवृत्तान्तस्मरणं कृत्वा चमत्कारपुरप्रदक्षिणाकरणेन वैमानिकपथा मोक्षप्रापणम्, चमत्कारपुरप्रदक्षिणामाहात्म्यवर्णनम्. ...	१५	१
१५	रक्तशृंगपर्वतप्रभाववर्णनपूर्वकं चमत्कारपुरप्रदक्षिणामाहात्म्यातिशयवर्णनम्. ...	१६	१
१६	रक्तशृंगसान्निध्ये स्थित्वा रक्तशृंगस्य सेवनफलश्रैष्ठ्यवर्णनम्.	१६	२
१७	चमत्कारपुरस्य चतुर्दिक्षु स्थितानां तीर्थानां वर्णनम्, तत्रादौ गयाशिरोमाहात्म्यवर्णनप्रसंगे विदूरथस्य मृगयायामरण्ये गमनम्, तत्र मृगाननुधावतो विदूरथस्य वनाद्वनं प्रयाणेन श्रान्तस्याश्वस्य भूम्यां पतनम्, ततो विदूरथस्य तत्रैवाश्वमुत्सृज्य पद्भ्यां मृगानुचंक्रमणम्.	१६	२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अध्यायाः	विषयाः	प०	पृ०
१८	ततो दूरगमनोत्तरं पथि मांसादादिपिशाचत्रयदर्शनम्, मांसादादिवचनाद्दृष्याश्रमपदं प्राप्तस्य विदूरथस्य नृपस्य मुनिभिः सह संवादपूर्वकं सायन्तनकर्मादिविधानवर्णनम्.	१७	१
१९	परेऽहनि विदूरथस्य स्वनगरे गमनम्, गयाशिरासि पितृतीर्थकूपिकायां विदूरथेन मांसादादिभ्यः श्राद्धदानम्, ततो मांसादादिभिर्विदूरथस्य स्वप्ने स्वस्वमुक्तिकथनम्, पितृकूपिकातीर्थमाहात्म्यवर्णनम्.	१९	२
२०	पितृकूपिकातीर्थे रामलक्ष्मणसीतानां गमनम्, तत्र श्राद्धकरणेन रामादीनां प्रत्यक्षपितृदर्शनम्, ततो मनसि रामं सीतां च हन्तुं विश्वासघातं कर्तुं च प्रवर्तमानस्य लक्ष्मणस्य विश्वासघातदोषनिरासार्थं वालमण्डनतीर्थे गमनम्, तत्तीर्थस्नानेन तस्य दोषनिवृत्तिः, ततो रामकृतं याम्यदिशि प्रयाणम्, वालमण्डनतीर्थमाहात्म्यवर्णनम्.	२०	२
२१	वालसख्यतीर्थोत्पत्तिवर्णने मृकण्डतो मार्कण्डसुतोत्पतिवर्णनपूर्वकं मार्कण्डेयेन दीर्घायुष्ट्वं प्राप्य तपस्तप्त्वा हाटकेश्वरे लिंगस्थापनम्, वालसख्यतीर्थमाहात्म्यवर्णनम्.	२२	१
२२	वालमण्डनतीर्थमाहात्म्ये कश्यपाद्दितेरेकोनपञ्चाशन्मरुतामुत्पत्तिवर्णने शक्रेण दितिजठरं प्रविश्य शस्त्रेण पुत्रच्छेदनादिवर्णनम्, तेन मातृद्रोहेण तद्दोषपरिहारार्थं शक्रेण वालमण्डनतीर्थे स्नानकरणम्, शक्रस्य तीर्थस्नानेन दोषनिवृत्तिः, वालमण्डनतीर्थमाहात्म्यवर्णनम्. ..., ...	२४	१
२३	मृगतीर्थवर्णने कस्यचिद्वृक्षस्य च्छायायां संस्थितान्मृगान्दृष्ट्वा लुब्धकानां तत्रागमनम्, लुब्धकदर्शनेन भीतानां मृगानां ततः पलायनम्, लुब्धकानां मृगानुधावनम्, मृगानां सरोवरप्रवेशनेन सद्य एव मानुषत्वप्राप्तिः, तत्सरःप्रभावं मृगमुखाच्छ्रुत्वा लुब्धकैरपि तस्मिन्सरसि स्नानकरणम्, तेन लुब्धकानामपि सौन्दर्यप्राप्तिः, सर्वेषां मोक्षप्राप्तिवर्णनम्, मृगतीर्थमाहात्म्यवर्णनम्.	२५	१
२४	वलिनिग्रहसमये वामनेन पदद्वयेन लोकान्व्याप्य तृतीयपदेन ब्रह्माण्डोर्ध्वभागे भिन्ने सति ततो गङ्गाजलस्य निर्गमनम्, विष्णुपदतीर्थोत्पत्तिपूर्वकमाहात्म्यवर्णनम्.	२५	२
२५	विष्णुपदीगंगामाहात्म्यवर्णने मद्यप्राशनं कुर्वतः कस्याचिद्ब्राह्मणस्य तत्र स्नानेन मद्यप्राशनदोषनिवृत्तिवर्णनम्, विष्णुपदीगंगामाहात्म्यवर्णनम्.	२६	२
२६	कस्यचिद्गोकर्णब्राह्मणस्य यमानुशासनादागतैर्यमदूतैः सह यमलोके गमनम्, तत्र गोकर्णपृच्छया यमेन द्वाविंशतिनरकवर्णनम्, केन पातकेन कस्य नरकस्य प्राप्तिरिति वर्णनम्, गोकर्णस्य यमानुज्ञया चमत्कारपुरे गमनम्, तत्र तीर्थस्नानेन मुक्तिवर्णनम्, गोकर्णतीर्थमाहात्म्यवर्णनम्.	२७	२
२७	अण्वादिचतुर्युगान्तकालपरिगणनम्, चतुर्युगस्वरूपमाहात्म्यप्रमाणनिदर्शनम्, चातुर्वर्ण्यकर्मनिरूपणम्, रजकादिचण्डालानामुत्पत्तिवर्णनम्, विशेषतः कलिकालमाहात्म्यवर्णनम्.	२९	२
२८	वृहस्पतीन्द्रसंवादे सर्वतीर्थसमाश्रयवर्णनम्.	३१	२
२९	सिद्धेश्वरमाहात्म्यवर्णने सूतस्य पितुराज्ञया वत्समहर्षिशुश्रूषाकरणम्, तत्र वत्समहर्षिणा स्वस्य प्राग्जन्मचरित्रकथनम्, देवरातस्य मुनेरग्रे स्नातुं विवस्त्रां काञ्चित्स्त्रियं विलोक्य जले रेतःस्खलनम्, तद्रेतसो मृग्या प्राशनम्, दशमासान्ते मृगीतः कन्याजननम्, देवरातेन वत्सर्षये कन्यादानम्, वहुकाले गते सर्पदंशनेन स्त्रीमरणं दृष्ट्वा बहुशोकव्याकुलितचेतसो वत्सस्य वने प्रयाणम्, तस्य बहुधा ऋषिभिः सान्त्वने कृतेऽपि क्रुधा सर्पनाशनारंभकरणम्, तस्मिन्सर्पहननं कुर्वति सति तत्रैकस्य सर्पस्य मानुषरूपं धृत्वा संवादवर्णनम्, तेन मानुषरूपधारिणा सर्पेण वत्साय पूर्वशापकारणे कथ्यमाने 'प्राग्जन्मनि मया हाटकेश्वरक्षेत्रयात्रागतानां जनसमूहानां मध्ये सर्पप्रक्षेपे कृते सत्यृषिणा दत्तेन शापेन सर्पजन्मप्राप्तिः' इति कथनम्, तेन मानुषरूपिणा सर्पेण वत्सायोपदेशकरणम्, तत्प्र-		

CC-0. In Public Domain. Digitization by eGangotri

अध्यायाः	विषयाः	प०	पृ०
	संगेन हिंसाऽहिंसाधर्मनिरूपणम्, ततो वत्सार्पिणा सर्पवधपश्चात्तापेन महेश्वरपूजां विधातुं स्वमनसि निर्धारणम्, वत्सस्य सिद्धेश्वरपूजनेन सिद्धिप्राप्तिवर्णनम्.	३२	१
३०	सिद्धेश्वरोत्पत्तिवर्णने सिद्धाधिपनामकहंसेन बृहस्पत्याज्ञया पुत्रप्राप्त्यर्थं लिंगं संस्थाप्य पूजने कृते तस्य पुत्रप्राप्तिः, सिद्धेश्वरमाहात्म्यवर्णनम्.	३७	२
३१	नागह्रदमाहात्म्यवर्णनप्रसंगेन नवनागानां ब्रह्माज्ञया हाटकेश्वरक्षेत्रे गमनम्, तत्र स्वनाम्ना लिंगस्थापनम्, इन्द्रसेनराज्ञः सर्पदंशनेन मृत्युप्राप्तिवर्णनम्, ततः स्वपुत्रस्य स्वप्न आगत्येन्द्रसेनेन स्वप्रेतत्वप्राप्तिकथनम्, पित्राज्ञया पुत्रस्य नागतीर्थे गमनम्, तत्र पितृश्राद्धकरणेन लिंगपूजनेन च पितुर्मोक्षवर्णनम्, नागतीर्थमाहात्म्यवर्णनम्.	३८	१
३२	सप्तर्षितीर्थवर्णने सप्तर्षिपूजनप्रकारकथनम्, सप्तर्षितीर्थोत्पत्तिवर्णने द्वादशवार्षिक्यामनावृष्ट्यां बुभुक्षितानां सप्तर्षीणां सर्वत्र भ्रमणम्, तेषां वृषादर्भे राज्ञो देशे गमनम्, तत्र मृतकुमारकं दृष्ट्वा तद्भक्षणार्थं सप्तर्षिभिरुद्योगकरणम्, तावद्वृषादर्भेर्भूपस्य तत्रागत्य तैः सह संवादकरणम्, ततो मृतकुमारमभक्षयित्वैवर्षीणां चमत्कारपुरे गमनम्, तत्र तैस्तपःकरणम्, लिंगस्थापनं च.... ...	४०	२
३३	अगस्त्याश्रमवर्णने विन्ध्यमेर्वोर्मिथः कलहे संपद्यमाने सूर्यमार्गनिरोधात्सूर्यस्यागस्त्याश्रमे गमनम्, सूर्यवचनाद्विंध्यं निम्नमुखीकृत्य दक्षिणदिशि हाटकेश्वरेऽगस्त्यस्य गमनम्, तत्र लोपामुद्रया पत्न्या सह गत्वा लिंगस्थापनम्, अगस्त्याश्रममाहात्म्यवर्णनम्....	४२	२
३४	अगस्त्यकृतसमुद्रप्राशनकारणवर्णने प्रथमं देवदैत्ययोर्युद्धे ब्रह्मविष्ण्विन्द्रादीनां पराजयं दृष्ट्वा शंकरेण शूलेन दैत्यपराजयकरणवर्णनम्.	४४	१
३५	धर्मविनाशेनैव देवपराजयः स्यादिति निश्चयं कृत्वा स्नानसंध्यायज्ञयागादिजपकर्तृणां ब्राह्मणानां दैत्यैर्वधकरणम्, जलावासिनां दैत्यानां वधार्थं ब्रह्मण आज्ञया जलप्राशनार्थं देवैरगस्त्यस्य प्रार्थनाकरणम्, देवकार्यार्थमगस्त्येन समुद्रप्राशनम्, देवैर्दैत्यवधकरणम्, अगस्त्यस्थापितपीठस्य देवैः स्वकार्यकरणाच्चित्रेश्वरपीठेतिनामकरणम्.	४५	२
३६	चित्रेश्वरपीठमाहात्म्यवर्णनम्.	४६	१
३७	दुःशीलाख्यप्रासादोत्पत्तिवर्णनम्.	४७	१
३८	धुन्धुमारेश्वरलिंगमाहात्म्यवर्णनम्.	४८	१
३९	ययातीश्वरलिंगमाहात्म्यवर्णनम्.	४८	२
४०	ब्रह्मणा पृथ्व्यां शिलास्थापनम्, ततस्तत्र ब्रह्माज्ञया सरस्वत्या पातालतो ह्रदं निर्मायागमनम्, ततो मंकणकमहर्षिणा तत्र तपस्तप्त्वा लिंगस्थापनम्, चित्रशिलामंकणकेश्वरलिंगमाहात्म्यवर्णनम्.	४९	१
४१	वाष्कलिदैत्यपीडितैरिन्द्रादिभिर्देवैर्विष्णोराज्ञया हाटकेश्वरे तपःकरणम्, ततो बृहस्पतिवचनादशून्यशयनतिथौ भगवत्पूजनेन सन्तुष्टस्य भगवत आज्ञया वाष्कलिना समं युद्धकरणम्, भगवता वाष्कलिदैत्यपराजयं कृत्वा शक्रस्य स्वस्थाने गमनम्, भगवतस्तत्र वासकरणं लिंगस्थापनं च, जलशाय्युत्पत्तिवर्णनम्.	५०	२
४२	विश्वामित्रकुण्डोत्पत्तिवृत्तान्तवर्णनम्, तत्र विश्वामित्रमेनकासमागमवर्णने विश्वामित्रेण मेनकायै स्त्रीधर्मकथनम्.	५१	२
४३	विश्वामित्रकथितपातिव्रत्यधर्मास्तिरस्कृत्य कुत आगमनं क गमनमित्यादिपृष्टायां विश्वामित्रदर्शनेन मेनकायां लोलुपायां सत्यां विश्वामित्रेण स्त्रीसंगमस्य धिक्कृतिकरणम्.	५२	२
४४	विश्वामित्रेण स्वसंगमे तिरस्कारिते बहुशो दुःखसंतप्तया मेनकया विश्वामित्राय विश्वामित्रेण मेनकायै च मिथो जराप्राप्तिरूपशापप्रदानम्, ततस्तयोः कुण्डस्नानेन शापमुक्तिः, विश्वामित्रेण तत्र लिंगस्थापनम्, विश्वामित्रकुण्डविश्वामित्रेश्वरलिंगमाहात्म्यवर्णनम्.	५३	१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अध्यायाः	विषयाः	प०	पृ०
४५	त्रिपुष्करतीर्थमाहात्म्यवर्णनम्.	५३	२
४६	सरस्वतीतीर्थमाहात्म्यवर्णने बलभद्रनृपतो जातस्य अंबुवीचिनामकस्य मूकपुत्रस्य मूकत्वनाशनार्थं सरस्वतीतीर्थे सपुत्रकस्य नृपस्य गमनम्, तत्र स्नानेन लिंगपूजनेन च पुत्रस्य मूकत्वनिरसनम्, अंबुवीचिकृतं सरस्वतीस्तवनम्, सरस्वतीतीर्थमाहात्म्यवर्णनम्.	५५	१
४७	महाकालमाहात्म्यवर्णने सपत्नीकस्य रुद्रसेनस्य राज्ञो हाटकेश्वरे गमनम्, तत्र देवं संपूज्य बहुशो विप्रेभ्यो दानानि दत्त्वा विप्रसंसदि राज्ञा विप्रेभ्यः स्वपूर्वजन्मवृत्तान्तकथनम्, तत्र वणिग्जात्युद्भवस्य तस्यान्नप्राप्त्यभावादुपोषितस्य सपत्नीकस्य महाकालवने गमनम्, तत्र देवं दृष्ट्वा कमलैर्देवस्य पूजाकरणम्, तेन पुण्यप्रभावेन राजकुले जननम्, महाकालेश्वरतीर्थलिंगमाहात्म्यवर्णनम्. ...	५६	१
४८	उमामहेश्वरलिंगमाहात्म्ये हरिश्चन्द्रेण पुत्रप्राप्त्यर्थमुमामहेश्वराराधनम्, तेन तपसा संतुष्टाभ्यामुमामहेश्वराभ्यां पुत्रप्रदवरप्रदानम्, तं वरं गृहीत्वा हरिश्चन्द्रस्य स्वभवने गमनम्, ततो हाटकेश्वरक्षेत्र उमामहेश्वरप्रीतये लिंगस्थापनम्, उमामहेश्वरलिंगमाहात्म्यवर्णनम्.	५७	२
४९	कलशेश्वरमाहात्म्यवर्णने कलशनृपस्य गृहे दुर्वासस आगमनम्, चातुर्मास्यव्रतस्य पारणं कर्तुमागताय दुर्वाससे नृपेणातिथ्यसत्कारपूर्वकं भोजनादिसमर्पणम्, तत्र भोजनपात्रे लवणादिभिः सुसंस्कृतं मांसं दृष्ट्वा 'व्याघ्रो भव' इति नृपाय शापप्रदानम्, कलशनृपतेर्दुर्वाससः शापेन व्याघ्रत्वप्राप्तिर्वर्णनम्.	५८	२
५०	नन्दिनीव्याघ्रसंवादे नन्दिन्या व्याघ्रसमीपे शपथकरणम्.	५९	१
५१	व्याघ्रवचनान्नन्दिन्या स्वस्थानं गत्वा वत्सस्य तृप्तिकरणम्, सर्वान्पृष्ट्वा नन्दिन्या व्याघ्राग्रे गमनम्, तेन तस्याः सत्यत्वं दृष्ट्वा पश्चात्तापेन मुक्तिप्राप्त्यर्थं तस्यै प्रश्नकरणम्, शापाद्व्याघ्रत्वं प्राप्तस्य नृपस्य नंदिनीदर्शितबाणस्थापितलिंगस्य पूजनेन व्याघ्रत्वप्रापकाच्छापान्मुक्त्वा पूर्ववद्राजत्वप्राप्तिः, ततो हराराधनं विधाय स्वनाम्ना लिंगस्थापनम्, शिवलोके गमनं च, कलशेश्वरलिंगमाहात्म्यवर्णनम्. ...	५९	२
५२	रुद्रकोटिमाहात्म्यवर्णनम्.	६१	२
५३	भ्रूणगर्तामाहात्म्यवर्णने मित्रसहस्य राज्ञो वसिष्ठशापाद्राक्षसत्वप्राप्तिवृत्तान्तवर्णनम्, राक्षसधर्मेणानुवर्तमानेन तेन राज्ञा विप्रादीनामपि हननम्, तेन नृपेण ब्रह्महत्यादोषनिवृत्तये शापमुक्त्युत्तरं वसिष्ठाज्ञया तीर्थयात्राकरणम्, भ्रूणगर्तातीर्थस्नानेन ब्रह्महत्यादोषादुन्मुच्य पूर्ववद्राज्यकरणम्, राज्योत्तरमन्ते शिवलोके गमनं च, भ्रूणगर्तामाहात्म्यवर्णनम्.	६२	२
५४	नलकथावर्णनपूर्वकं नलस्थापितचर्ममुण्डामाहात्म्यवर्णनम्.	६४	२
५५	नलेन स्वनाम्ना स्थापितस्य रोगाद्यनिष्टदोषपरिहारकस्य नलेश्वरस्य माहात्म्यवर्णनम्	६५	१
५६	सांबादित्यमाहात्म्ये गालवेनादित्यप्रसादेन वरं लब्ध्वा पुत्राभावात्सांबादित्यपूजनेन पुत्रप्राप्तिकरणम्, सांबादित्यमाहात्म्यवर्णनम्.	६५	२
५७	गाङ्गेययात्राख्यानवर्णनम्...	६६	२
५८	गाङ्गेयकृतलिंगचतुष्टयस्थापनवर्णनम्, शिवगंगामाहात्म्यवर्णनम्.	६७	२
५९	विदुरेण पुत्रप्राप्त्यर्थं तपस्तप्त्वा स्वनाम्ना लिंगस्थापनम्, विदुरेश्वरमाहात्म्यवर्णनम्, विदुरकृतदेवप्रासादवृत्तान्तवर्णनम्.	६७	२
६०	मित्रावरुणपुत्रेण माहित्थानामदेवतास्थापनम्, नरादित्येश्वरमाहात्म्यवर्णनम्.	६८	२
६१	शर्मिष्ठातीर्थमाहात्म्ये विषकन्योत्पत्तिवर्णनम्.	६९	१
६२	विषकन्यात्यागमकुर्वतो नृपस्य मरणप्राप्तिर्युद्धवर्णनं च, सर्वलोकापवादाच्छ्रुत्वा विषकन्यायास्तपोऽर्थे वनं प्रति प्रयाणम्, मार्गे स्वपूर्वजन्मस्मरणेन दुःखिताया विषकन्यायाः पञ्चाग्निसाधनादिकं घोरं तपो विलोक्य पार्वत्येन्द्राणीरूपेणागमनम्, इन्द्राणीतो वरमगृहीत्वा तया पुनस्तपसि क्रियमाणे पार्वत्या तां प्रति		

CC-0. In Public Domain. Digitization by eGangotri

अध्यायाः	विषयाः	प०	पृ०
	स्वरूपदर्शनम्, विषकन्यया पार्वतीस्तवनम्, पार्वत्या सह विषकन्यायाः कैलासे गमनम्, शर्मिष्ठातीर्थमाहात्म्यवर्णनम्.	६९	२
६३	सोमेश्वरमाहात्म्ये दक्षशापयुक्तेन सोमेन रोमकमहर्षेर्वचनाद्धाटकेश्वरे लिंगपूजनम्, वत्प्रभावेण सोमस्य शापनिवृत्तिः, स्वनाम्ना लिंगस्थापनम्, सोमनाथेश्वरमाहात्म्यवर्णनम्.	७२	१
६४	चमत्कारनृपस्थापितचमत्कारीदुर्गादेवीमाहात्म्यवर्णनम्.	७३	१
६५	आनर्तकेश्वरशूद्रेश्वरयोर्माहात्म्यवर्णनमुत्पत्तिकथनं च.	७४	१
६६	रामह्रदवर्णनप्रसंगे जमदग्निवधवर्णने ससैन्यस्य सहस्रार्जुनहैहयनृपतेर्जमदग्न्याश्रमे गमनम्, तत्र कामधेनुप्रभावं दृष्ट्वा तेन सहस्रार्जुनेन लोभेन तां याच्यमानेन जमदग्निना तस्या अदाने क्रुधाविष्टेन हैहयेन जमदग्निवधकरणम्.	७५	२
६७	पितृवधं श्रुत्वा परशुरामेण पितुरुत्तरक्रियां विधाय निःक्षत्रियां पृथ्वीं कर्तुं प्रतिज्ञाकरणम्, ततो रामेण युद्धे सहस्रार्जुनस्य वधकरणम्.	७६	२
६८	सहस्रार्जुनवधोत्तरं हाटकेश्वरे गत्वा सहस्रार्जुनशरीरान्निर्गतेन रक्तेन पितृश्राद्धं विधाय सर्वां संपादितां महीं ब्राह्मणेभ्यो दत्त्वा स्वनिवासार्थं परशुरामेण समुद्रापसरणकरणम्.	७७	२
६९	पुनर्ब्राह्मणेभ्यो दत्तां महीं वलात्कारेण ग्रहीतॄणां क्षत्रियाणां रामेण वधकरणम्, एवमेकविंशतिवारान्निःक्षत्रियां पृथ्वीं कृत्वा ब्राह्मणेभ्यस्तस्याः समर्पणम्, ब्राह्मणवचनादाशीर्वादेन च रामह्रदेति नाम्ना गर्तातीर्थस्थापनम्, रामह्रदे शस्त्रहतानां श्राद्धेन विशेषफलकथनम्, सामान्यतो रामह्रदमाहात्म्यवर्णनम्. ...	७८	१
७०	तारकासुरवधप्रकरणे कार्तिकेयस्य साद्यन्तोत्पत्तिवृत्तान्तवर्णनम्.	७८	२
७१	कार्तिकेय (स्कन्द) स्थापितशक्तिमाहात्म्यवर्णनम्.	८०	१
७२	पाण्डवधृतराष्ट्रादिकृतहाटकेश्वरक्षेत्रदर्शनवर्णनम्.	८१	१
७३	ततः कौरवाणां द्वारवत्यां गमनम्, दुर्योधनस्य भानुमत्या सह विवाहवर्णनम्, ततः		

अध्यायाः	विषयाः	प०	पृ०
	पुनर्यादवेन समं कौरवपाण्डवानां हाटकेश्वरे गमनम्, धृतराष्ट्रकृतप्रासादस्थापनादिवृत्तान्तवर्णनम्.	८१	२
७४	तत्र हाटकेश्वरे धृतराष्ट्रादिभिरेकोत्तरशतलिंगस्थापनम्, सर्वैर्द्रोणादिभिः पाण्डवैर्यादवादिभिश्च सहस्रशः पृथक्पृथक्स्वनाम्ना लिंगस्थापनम्, कौरवपाण्डवयादवकृतलिंगप्रतिष्ठावर्णनम्.	८२	२
७५	यज्ञभूमिमाहात्म्यवर्णनम्....	८३	१
७६	मुण्डीरकालप्रियमूलस्थानेतिभास्करतीर्थत्रयवर्णने कस्यचित्कुष्ठरोगिणः पुरुषस्य ब्राह्मणवचनात्तत्तीर्थत्रये स्नानेन कुष्ठनिरसनवृत्तान्तवर्णनम, मुण्डीरकालप्रियमूलस्थानमाहात्म्यवर्णनम्.	८३	१
७७	शंकरपार्वतीविवाहसमये ब्रह्मणः पार्वतीदर्शनेन रेतःस्खलनम्, तेन पापेन लिप्तांगेन ब्रह्मणा रुद्रशिरसमाराध्य दोपनिवृत्तिकरणम्, हराश्रयवेदिकामाहात्म्यवर्णनम्.	८५	१
७८	रुद्रशीर्षमाहात्म्यवर्णने व्यभिचारिण्याः कस्याश्चिद्ब्राह्मण्या रुद्रशीर्षदर्शनेन तत्पातकान्निवृत्तिवर्णनम्, तथैव विदूरथनृपपत्न्या अपि रुद्रशीर्षदर्शनान्मुक्तिवर्णनम्, रुद्रशीर्ष (जागेश्वर) माहात्म्यवर्णनम्.	८६	२
७९	वालखिल्याश्रममाहात्म्यवर्णने शक्रोपरि वालखिल्यैः कोपकरणवृत्तान्तवर्णनम्, वालखिल्याश्रममाहात्म्यम्.	८८	१
८०	सुपर्णाख्यमाहात्म्यवर्णने वालखिल्यैराथर्वणिकैर्मंत्रैरभिमंत्रितममृतकलशं गृहीत्वा पुत्रप्राप्त्यर्थं कश्यपेन स्वपत्न्यै दानम्, अमृतकलशप्राशनेन कश्यपाद्गरुडोत्पत्तिः, मित्रब्राह्मणकन्याया वरशोधार्थं गरुडस्य ब्राह्मणकन्याभ्यां सह गमनम्, पथि नारदस्य दर्शनम्, नारदेन समं विष्णुदर्शनार्थं तेषां सर्वेषां हाटकेश्वरे गमनम्, तत्र गत्वा नारदगरुडाभ्यां विष्णुसंदर्शनग्रहणम्.	८९	१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अध्यायाः	विषयाः	प०	पृ०
८१	विष्णुदर्शनं गृहीत्वा गरुडेन विष्णुं प्रति विप्रकन्यावरणार्थमाग्रहकरणम्, विष्ण्वनुज्ञया गरुडेन विष्ण्वग्रे सकन्यकस्य विप्रस्यानयनम्, विप्रकन्यायाः विष्णोः स्त्रीत्वं प्राप्तं दृष्ट्वा क्रुधा लक्ष्म्या 'अश्वमुखी भव' इति तस्यै कन्यायै शापप्रदानम्, तथैव विप्रेणापि 'गजवक्त्रा भव' इति लक्ष्म्यै शापदानम्, ततो विष्णुना विप्रकन्यायाः सांत्वनकरणमुच्छापदानं च, विष्ण्वाज्ञया ससुतस्य विप्रस्य स्वगृहे गमनम्, विष्णुपुरःस्थितां शाण्डिलीनाम्नीं वृद्धस्त्रीं दृष्ट्वा गरुडेन हास्ये कृते सत्यन्तः क्रुधा शांडिल्या मनसा शापदानेन गरुडपक्षभस्मीकरणम्.	९०	२
८२	निजपक्षदाहं दृष्ट्वा गरुडेन विष्णुना च शांडिलीस्तवनम्, ततः शांडिलीवचनाद्गरुडेन हाटकेश्वरं गत्वा रुद्रशीर्षकालरुद्रनीलरुद्रादीन्नत्वा शिवाराधनकरणम्, तेन गरुडस्य पुनः सुवर्णमयपक्षप्राप्तिवर्णनम्, सुपर्णेश्वराख्यमाहात्म्यवर्णनम्.	९१	१
८३	सुपर्णेश्वरमाहात्म्यवर्णने वेणुनामकनृपतेर्दुर्वासनत्वाद्दुराचरितपरिपाकात्कुष्ठप्राप्तिवर्णनम्, तत्कुष्ठनिरासार्थं भ्रमता वेणुनृपेण सुपर्णेश्वरं प्रति गमनम्, तदाराधनेन तस्य कुष्ठनिरासवर्णनम्.	९२	१
८४	लक्ष्मीशापिताया विप्रकन्याया विष्णोरुच्छापेन कृष्णावतारे सुभद्रेति नाम्ना पद्मादत्तशापविमुक्तिपूर्वकं विष्णुभगिनीत्वप्राप्तिवर्णनम्.	९२	२
८५	विप्रदत्तशापनिवृत्त्यर्थं लक्ष्म्या ब्रह्माणमुद्दिश्य तपश्चरणम्, ब्रह्मणा शापनिवृत्तिपूर्वकं लक्ष्म्यै वरप्रदानम्, गजवक्त्रामहालक्ष्मीति ब्रह्मणा तत्स्थलस्य नामकरणम्, महालक्ष्मीमाहात्म्यवर्णनम्.	९३	१
८६	दक्षस्य सप्तविंशतिकन्याभिश्चन्द्रप्रीतिविवर्धनार्थं हाटकेश्वरे चंड्याराधनेन चन्द्रस्य प्रीत्यास्पदीकरणम्, सप्तविंशतिकेति नाम्ना लिंगस्थापनम्, सप्तविंशतिकालिंगमाहात्म्यवर्णनम्.	९३	२
८७	सोमप्रासादमाहात्म्यवर्णनम्.	९४	१
८८	अंवावृद्धेत्यभिधाभ्यां काशीराजभार्यायां पतिनाशोत्तरं तत्रैव पुररक्षार्थं वासकरणम्, तत एकस्मात्कुण्डाद्गजवक्त्राश्वमुख्यादिदेवतानां समुत्पत्तिं दृष्ट्वा तत्कृतजनत्रासनिवारणार्थं तासां तद्भक्षणीयपदार्थस्य ताभ्यामंवावृद्धाभ्यां व्यवस्थाकरणम्, ततः स्वनाम्ना हाटकेश्वरे लिंगस्थापनम्, अंबावृद्धामाहात्म्यवर्णनम्.... ...	९५	१
८९	अंवावृद्धाज्ञया सर्वबालकक्षयकारिणीनां देवतानां व्यवच्छेदार्थं चमत्कारराजप्रार्थनयाऽम्बावृद्धादेव्या स्वपादुकास्थापनकरणम्, पादुकादर्शनेन जनानां दुःखनिवृत्तिभवनम्, पादुकादर्शनमकुर्वतां शृगालत्वप्राप्तिवर्णनम्, ध्यानं कुर्वतः शंकरस्य तृतीयनयनात्कन्यकोत्पत्तिः, शंकरवचनात्पादुकापूजनेन तस्याः सर्वसिद्धिप्राप्तिकथनम्, पादुकामाहात्म्यवर्णनम्.	९६	१
९०	वह्नितीर्थोत्पत्तिमाहात्म्यवर्णने ज्येष्ठं भ्रातरमुत्सृज्य कनिष्ठेन शंतनुना राज्यकरणादयमधर्म इति मत्वा शक्रेणानावृष्टिकरणवर्णनम्, तेन कारणेन वने भ्रमता विश्वामित्रेण चण्डालगृहे गत्वा तत्र लब्धेन श्वमांसेन वह्नौ पञ्चमहायज्ञकरणम्, तेन कारणेन रुष्टेनाग्निना कृतं सर्वतः स्वात्मनो गोपनम्, अग्निमन्वेष्टुकामानां देवानां गजादिभिः स्वनाम्नि कथिते सति तदुपरि रुष्टेन वह्निना गजादीनां शापप्रदानम्, ततो ह्रदान्निर्गतमग्निं दृष्ट्वा ब्रह्मणा स्वात्मगोपनकारणे पृष्टे वह्निना 'शक्रवृष्ट्यकरणाद्विश्वामित्रकृतश्वजाघनीहवनान्मया स्वात्मगोपनं कृतम्' इति कथिते शक्रेण स्वाज्ञया वृष्टिकरणम्, ततो ब्रह्मणाग्नये वरप्रदानम्, तस्य ह्रदस्याग्नितीर्थेति नामकरणम्, तत्र अग्नौ घृतस्य वसोर्धाराया माहात्म्यम्, अग्नितीर्थमाहात्म्यवर्णनम्.	९७	१
९१	वह्निशापितानां गजादीनां ब्रह्मादिदेवैरुच्छापदानपूर्वकं सांत्वनकरणम्, ततो देवानां स्वस्वस्थाने गमनम्, अग्नितीर्थोत्पत्तिवर्णनम्.	९९	१
९२	मार्कण्डेयस्थापितब्रह्मकुण्डमाहात्म्यवर्णनम्, तत्र स्नानं कुर्वतः कस्यचिच्छूद्रस्य देवं प्रसाद्य मोक्षप्राप्तिवृत्तान्तवर्णनम्.	९९	२

CC-0. In Public Domain. Digitization by eGangotri

अध्यायाः	विषयाः	प०	पृ०
९३	गोमुखतीर्थोत्पत्तिवर्णनपूर्वकं गोमुखतीर्थमाहात्म्यवर्णनम्, तत्र कुष्ठं प्राप्तस्य स्वपुत्रस्य कुष्ठनिरासार्थमम्बरीषेण भूपतिना तपःकरणम्, तेन तुष्टेन भगवता तत्पुत्रस्य पूर्वजन्मकृतदोषकथनम्, भगवदाज्ञया गोमुखतीर्थस्नानेन तत्पुत्रस्य कुष्ठनिरासवर्णनम्, गोमुखतीर्थमाहात्म्यवर्णनम्. ...	१००	१
९४	ब्राह्मणवचनात्परशुरामेण कुठारं भंक्त्वा लोहयष्टिविमोचनेन लोहयष्टितीर्थस्थापनम्, लोहयष्टिमाहात्म्यवर्णनम्. ...	१०१	१
९५	अजापालनृपनिर्मितकामप्रदादेव्युत्पत्तिवर्णने वसिष्ठवचनादजापालस्य हाटकेश्वरक्षेत्रे गमनम्, तत्र देवीमाराध्य तं प्रति प्रसन्नया देव्या वरप्रदानम्, वरग्रहणेनाजापालराज्ये स्थितान्पुण्यवतो जनान्दृष्ट्वा नरकस्य पापिनामभावाच्छून्यतां दृष्ट्वा यमस्य ब्रह्मलोके गमनम्, तत्र स्थितेन शिवेन तच्छ्रुत्वा शिवस्य व्याघ्ररूपेण राजसमीपे गमनम्, व्याघ्रकृताजाभक्षणेन रुष्टेन राज्ञा प्रेरितानां चंडीदत्तास्त्राणां व्याघ्ररूपिणा शंकरेण भक्षणम्, पश्चादस्त्राभावाद्व्याघ्रेण समं राज्ञो द्वंद्वयुद्धवर्णनम्, ततो व्याघ्ररूपं त्यक्त्वा तस्मै शिवेन प्रत्यक्षदर्शनदानम्, अजापालेन शिववर्णनम्, शिववचनाद्राज्ञः पाताले गमनम्, स्वनाम्ना लिंगस्थापनं च, तत्राजापालेश्वरीतिनाम्ना चण्डीस्थापनम्, अजापालेश्वरीमाहात्म्यवर्णनम्.	१०१	२
९६	राज्ञा दशरथेन ज्योतिर्विन्मुखाद्रोहिणीशकटभेदादिभविष्यं श्रुत्वा तन्निवारणाय शनैश्चरसमीपे युद्धार्थं गमनम्, तस्य तच्छौर्यं दृष्ट्वा संतुष्टेन शनैश्चरेण नाहं रोहिणीभेदं करिष्यामीति प्रतिज्ञां कृत्वाऽभयदानकरणम्, शनैश्चरदशरथसंवादफलश्रुतिवर्णनम्. ...	१०३	२
९७	शनैश्चरेण 'रोहिणीशकटमहं न भेत्स्यामि' इति प्रतिज्ञापूर्वकमाशीःप्रदानोत्तरमिन्द्रेण दशरथस्य शौर्यवर्णनपूर्वकप्रशंसाकरणम्, ततोऽपुत्रस्य नैव सद्गतिरिति दशरथेन शक्रमुखाज्ज्ञात्वा पुत्रप्राप्त्यर्थं तपःकरणार्थं समुद्योगकरणम्. ...	१०४	२
९८	दशरथस्य हाटकेश्वरक्षेत्रे गत्वा तपःकरणम्, तत्तपस्तुष्टेन विष्णुना चतुःपुत्रत्वेनाहमवतरिष्यामीति दशरथाय वरप्रदानम्, दशरथकृततपःस्थलस्य तत्पूजितेन विष्णुना राजस्वामीति स्वनामस्वीकरणपूर्वकं तत्कृतवाप्या राजवापीति नामकरणम्, राजस्वामिराजवापीमाहात्म्यवर्णनम्. ...	१०५	२
९९	रामेश्वरस्थापनप्रस्तावे रामेण सीतात्यागं कृत्वा स्वर्णमयीं सीतां निर्माय यज्ञ आरभ्यमाणे तत्र दुर्वाससः आगमनम्, दुर्वासोरामसंवादवर्णनम्. ...	१०६	१
१००	लक्ष्मणेन रामाज्ञाभंगकरणाद्रामाज्ञया नगरतो गमनकरणम्, सरयूस्नानेन लक्ष्मणस्य दोषनिवृत्तिवर्णनम्, ततो लक्ष्मणस्य योगसाधनेन प्राणनिष्क्रमणम्, वियद्गतं लक्ष्मणं दृष्ट्वा रामेण शोककरणम्, मंत्रिभी रामस्य सान्त्वनम्, लक्ष्मणशवस्याग्निं दातुं प्रवृत्तं रामं दृष्ट्वा 'संन्यस्ते नाग्निसंस्कारः' इति नभोवाण्या निषेधकरणम्, ततो लक्ष्मणस्यौर्ध्वदेहिककर्मकरणानन्तरं रामस्य पुष्पकविमानेन किष्किन्धागमनम, तत्र सुग्रीवकृतसत्कारादिवर्णनम्. ...	१०७	१
१०१	ततः पुष्पकमारुह्य वानरैः समं रामस्य लंकायां गमनम्, तत्र विभीषणेन रामचन्द्रस्य सत्कारकरणम्, ततः श्रीरामेण तैः सर्वैः सह हाटकेश्वरक्षेत्रमागत्य तत्र रामेश्वरलिंगप्रतिष्ठाकरणम्, रामेश्वरमाहात्म्यवर्णनम्. ...	१०८	२
१०२	लक्ष्मणप्रासादपञ्चकप्रतिष्ठापनवर्णनम्. ...	१०९	२
१०३	आनर्तवडागे राक्षसैः सह रामस्यागमनम्, तत्र रामविप्रसंवादेऽप्सरोवेष्टिते विमाने स्थित्वा स्वर्गं प्रति गच्छतोऽन्धविप्रस्य पूर्वजन्मकथावृत्तान्ते तडागमाहात्म्यवर्णनम्, आनर्ततीर्थकूपिकामाहात्म्यवर्णनम्. ...	११०	१
१०४	अथ श्रीरामचन्द्रस्य स्वलोकं प्रति गमनानन्तरं हाटकेश्वरक्षेत्रे शिवपूजार्थं समागतै राक्षसैस्तत्र मिलितानां ब्राह्मणानां भक्षणेन त्रासितान्ब्राह्मणान्दृष्ट्वा श्रीरामपुत्रेण कुशेन राक्षसानां पराजयकरणम्, राक्षसैस्तत्रानर्ततडागे बहुशो लिंगस्था-		

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अध्यायाः	विषयाः	प०	पृ०
	पनकरणम्, कुशेन विभीषणाय संदेशं प्रेषयित्वा तद्द्वारा राक्षसानां जंबूद्वीपागमने निरोधकरणम्, कुशेश्वरलवेश्वरप्रतिष्ठावर्णनम्.	११२	१
१०५	तुलागते मरीचिमालिनि विभीषणशापेन व्यंतरत्वं प्राप्तैः राक्षसैर्हाटकेश्वरक्षेत्रे राक्षसस्थापितानां चतुर्मुखलिंगानां भूम्यां पूरणम्, तत्र क्षेत्रे प्रासादरहिते प्रदेशे बृहदश्वराजस्य गमनम्, तत्र प्रासादनिर्माणे राज्ञा प्रयत्नकरणम्, ततो भूमिखननसमये चतुर्वक्त्रलिंगदर्शनम्, लिंगैरावृतां भूमिं दृष्ट्वा राज्ञो मृत्युप्राप्तिवर्णनम्, राक्षसलिंगाच्छादनवृत्तान्तवर्णनम्.	११५	१
१०६	लुप्ततीर्थानां माहात्म्यवर्णनम्.	११५	१
१०७	अष्टषष्टितीर्थोत्पत्तिमाहात्म्ये वत्सान्वयसंभूतचित्रशर्मनामनृपेण पातालस्थं हाटकेश्वरमग्रस्थल आनेतुमुद्युक्तेन शिवाराधनाकरणम्, शिवकृपया लिंगस्थापनम्, ततोऽष्टषष्टिगोत्रोद्भवैर्ब्राह्मणैर्नृपाज्ञया शिवमाराध्य तत्कृपया अष्टषष्टीतिनाम्नां लिंगानां नवप्रासादं रचयित्वा स्थापनाकरणम्, ब्राह्मणैश्चित्रशर्मणा च कृतस्य लिंगस्थापनस्य वृत्तान्तवर्णनम्.	११६	१
१०८	अष्टषष्टितीर्थवर्णने शिवपार्वतीसंवादे नारदशक्रादिभिश्चमत्कारक्षेत्रे स्नानादि कृत्वा शिवलिंगं संपूज्य तीर्थलिंगस्तुतिकरणम्, वाराणस्याद्यष्टषष्टितीर्थवर्णनम्. ...	११७	२
१०९	अष्टषष्टितीर्थानां प्रतितीर्थेषु भिन्नभिन्नलिंगानां नामनिर्देशपूर्वकप्रभाववर्णनम्.	११८	२
११०	अष्टषष्टितीर्थमाहात्म्यवर्णनम्.	११९	१
१११	कस्मिंश्चित्समय आनर्तभूपस्य पत्न्या दमयन्त्या हाटकेश्वरक्षेत्रे गमनम्, तत्र तीर्थे हरिबोधवासरे स्नात्वा भगवन्तं ध्यायमानां दमयन्तीं दृष्ट्वाऽन्याभिर्ब्राह्मणस्त्रीभिर्दमयन्तीवर्णनकरणम्, दमयन्त्या ध्यानोत्तरं ब्राह्मणस्त्रीभ्यः स्वकीयसर्वालङ्कारदानकरणम्, चतसृभिस्तापसीभिर्विना अन्याभिः सर्वाभिर्ब्राह्मणस्त्रीभिर्भूषणग्रहणेनाह्लादकरणम्, तथैव प्रतिदिने राजपत्न्या ताभ्यो भूषणप्रदानकरणम्, पञ्चमीदिने चतसृभिर्विप्रपत्नीभिर्भूषणानामग्रहणे तत्समीपे भूषणानि गृहीत्वा दमयन्त्या गमनम्, ताभिर्भूषणग्रहणातिरस्कारकरणम्, याभिर्दमयन्तीदत्तानां भूषणानां तिरस्कृतिरकारि तासां पतिभिराकाशमार्गेण स्वाश्रमे स्वपुण्यप्रभावेणागमनकरणम्, याभिर्लोभाद्दमयन्तीदत्तानां भूषणानां ग्रहणं कृतं तासां पतीनां तत्स्त्रीगृहीतदुष्पारिग्रहवशात्पापेनाकाशगतिक्षयेण तत्रैव पतनम्, तैश्चतुर्भिराकाशमार्गेणागतैर्ऋषिभिस्तत्कारणं दृष्ट्वा दमयन्त्यै 'शिला भव' इति शापप्रदानम्, ततस्तस्या दमयन्त्यास्तत्र शिलाभावं प्राप्य पतनम्, तद्वृत्तान्तं श्रुत्वा द्विजप्रसादनाय दमयन्तीपतेरानर्तदेशराजस्य तत्रागमनम्, शिलाभूतां पत्नीं दृष्ट्वा राज्ञा शोककरणम्.	११९	२
११२	राज्ञे शापं दातुं गृहीतजलानां विप्राणामन्यद्विजप्रार्थनया शांतिं गत्वा भूम्यामेवोदकप्रक्षेपणात्तस्या भूमेरूषरत्वप्राप्तिवर्णनम्, ऊषरस्थानस्योत्पत्तिपूर्वकमाहात्म्यवर्णनम्.	१२१	२
११३	तत आनर्ताधिपतेः प्रतिमासं हाटकेश्वरे गमनम्, ब्राह्मणान्सन्तोष्य शान्तिकर्मादिकं विधाय स्वपुरं प्रत्यागमनं च, वह्निवचनान्मासिमासि भविष्यद्धोमकार्ये केनापि ब्राह्मणाधमेन ग्रहाद्युद्देशेन कृतस्य द्रव्यादिदानस्याग्रहणाद्ग्रहाणामधिका पीडेति ज्ञात्वा सर्वैः प्रार्थनायां कृतायां तत्र तीर्थे स्नानकरणेनैकं ब्राह्मणं विना सर्वेषां शुद्धिवर्णनम्, अशुद्धेन कुष्ठितेन ब्राह्मणेन सर्वब्राह्मणानां प्रार्थनाकरणम्, तत्र तीर्थे अग्नेः स्थापनाकरणम्, त्रिजातकविशुद्धयेऽग्निकुण्डमाहात्म्यवर्णनम्.	१२२	१
११४	कुष्ठित्वं प्राप्तेन द्विजेनारण्यं गत्वा तपःकरणम्, तेन तपसा तुष्टेन शिवेन वरप्रदानम्, चमत्कारपुरे वसतो देवरातविप्रस्य क्रथनामकपुत्रस्य नागतीर्थे गमनम्, तत्र तेन क्रथेन रुद्रमालसंज्ञकं नागेन्द्रतनयं दृष्ट्वा लगुडेन हननम्, पुत्रहननं दृष्ट्वा तत्पितृमातृभिरन्यैश्च शोककरणम्, ततो रुष्टैः पन्नगैस्तत्पुरस्थजनानां भक्षणे समारब्ध आदौ सकुटुम्बदेवरातसुतक्रथभक्षणकरणम्, ततो भयभीतैर्ग्रामस्थैः		

CC-0. In Public Domain. Digitization by eGangotri

अध्यायाः	विषयाः	प०	पृ०
	सर्वैर्जनैर्वनं प्रति प्रयाणम्, निर्जनं पुरं दृष्ट्वा पुत्रदुःखनिरसनम्, सर्वेषां सर्पत्रस्तानां जनानां त्रिजातब्राह्मणसमीपे गमनम्, तद्दुःखं श्रुत्वा त्रिजातेन शिवप्रार्थनां कृत्वा सर्पभीतिनिरासाय शिवतो वरग्रहणम्, तत्रस्थानां सर्पाणां निर्विषत्वकरणाय शिवेन तेभ्यः सर्पनिर्विषत्वकारक 'न गरं न गरम्' इति महामन्त्रदानम्, तन्महामन्त्रजपेन सर्पाणां नगरत्वकरणेन नगरेति तस्य पुरस्य नामाभिधानकरणम्, तत्रस्थानां विप्राणां नागरेति नामकरणम्, निर्विषाणां सर्पाणां ततः पलायनम्, नगरोत्पत्तिवृत्तान्तवर्णनम्.	१२४	१
११५	त्रिजातब्राह्मणस्य जन्मकर्मादिवर्णने गोत्रादीनां वर्णनम्, त्रिजातेन ब्राह्मणेभ्यः स्वसाद्यन्तवृत्तान्तकथनम्, भर्तृयज्ञकृतयज्ञविधानमुनिगोत्रव्यवस्थावर्णनम्. ...	१२६	१
११६	कुटुंबभक्षणेन शापितया रेवतीसर्पिण्या भट्टिकाख्यायाः क्रथद्विजभगिन्या दंशकरणम्, भट्टिकाशापं स्मृत्वा रेवतीसर्पिण्या मानुषत्वे जननम्, रेवतीकृतं देव्याराधनम्, देवीवचनात्स्वनाम्ना तीर्थस्थापनम्, देव्या तस्या अंबा दुर्गेत्यादिबहुनामकरणम्, अंबारेवतीतीर्थोत्पत्तिपूर्वकमाहात्म्यवर्णनम्.	१२७	१
११७	भट्टिकोपाख्याने तक्षकेण भार्यात्वाय भट्टिकायाः पाताले नयनम्, तदा भट्टिकया मर्त्यो भवेति तक्षकाय शापदानम्, तस्य प्रणतिपूर्वकप्रार्थनयोच्छापदानं च, ततो भट्टिकाया दारुपर्वते प्रयाणम्, भट्टिकया तत्र निजशुद्धताप्रत्ययप्रदानायाग्निं प्रज्वाल्य तस्मिन्प्रज्वलितेऽग्नौ प्रवेशकरणेनाग्नेः शीतलत्वे खात्पुष्पवर्षणम्, देवदूतैर्भट्टिकायाः स्तवनकरणम्, देवदूतवचनान्मृत्युमप्राप्य भट्टिकायाः स्वगृहे गमनम्, तया स्वनाम्ना तत्रैव तीर्थस्थापनम्, भट्टिकातीर्थोत्पत्तिमाहात्म्यकथनम्.	१२८	२
११८	भट्टिकाशापात्तक्षकस्य मनुष्यत्वप्राप्तौ रैवतनृपरूपेण भूमौ जन्मवृत्तान्तवर्णनम्, रैवतप्रभंजनयो राज्ञोर्युद्धवर्णनम्, पुत्रं राज्ये निक्षिप्य क्षेमंकर्या भार्यया सह रैवतस्य राज्ञो वने प्रयाणम्, ततस्तयोर्हाटकेश्वरक्षेत्रे गमनं शिवलिंगस्थापनं च, क्षेमंकरीरैवतेश्वरोत्पत्तिमाहात्म्यवर्णनम्.	१३०	१
११९	दीर्घबाहुराजाय महिषो भवेति दुर्वाससा शापदानम्, ततो महिषत्वं प्राप्य शुक्राज्ञया हाटकेश्वरे शिवाराधनम्, तदा शिवेन स्त्रीं विना ते मरणं न स्यादित्युक्त्वाऽन्येभ्योऽवध्यत्वरूपवरप्रदानम्, महिषतीर्थमाहात्म्यवर्णनम्, महिषपुरःसरैर्दैत्यैः सह देवानां युद्धवर्णनम्, दैत्यैर्देवसेनापराभवकरणम्, सर्वदेवैर्बृहस्पतिना सहैकीभूय मंत्रकरणम्.	१३१	१
१२०	महिषासुरादिदैत्यवधार्थं कात्यायन्युत्पत्तिवर्णनम्.	१३२	२
१२१	स्वतेजोवृद्ध्यर्थं कात्यायन्या सिंहमारुह्य विन्ध्यं गत्वा तपःकरणम्, तेजोरूपां तां दृष्ट्वा कामवशगस्य महिषासुरस्य सैन्येन सह तत्रागत्य भार्यात्वाय तस्याः प्रार्थनाकरणम्, देव्या महिषवचने तिरस्कृते सति क्रुद्धस्य महिषासुरस्य देव्या सह महायुद्धवर्णनम्, ततः कात्यायन्या महिषदैत्यस्य केशान्धृत्वा यावद्गात्रविनाशं कर्तुं प्रयत्न आरभ्यत तावद्दानवेन देव्याः स्तवनम्, ततो देव्या दयया महिषासुराय जीवदानम्, इत्थं महिषपराजयपूर्वकं कात्यायन्या महिषासुरमाक्रम्यावस्थितिकरणम्, कात्यायनीमाहात्म्यवर्णनम्.	१३३	१
१२२	हिरण्याक्षपीडितैर्देवैः स्तुत्या संतोषितेनेश्वरेण माहिषं रूपमास्थाय 'के दारयामि' इति प्रश्नकारणात्तत्स्थलस्य केदारेति नामकरणम्, केदारमाहात्म्यवर्णनम्.	१३४	२
१२३	शुक्लतीर्थमाहात्म्यवर्णने शुद्धकनामकरजकेनाज्ञानाद्ब्राह्मणानां सुवस्त्राणां नीलीमध्ये प्रक्षेपकरणम्, तच्छ्रुत्वा रजककन्यया स्वसख्यै दाशकन्यायै पितृकृत्यनिवेदनकरणम्, तज्ज्ञात्वा दाशकन्यया कृष्णवस्त्राणां शुक्लत्वापादकं जलाशयं स्मृत्वा रजककन्यायै तन्निवेदनकरणम्, ततो रजककन्ययाऽपि स्वसखीकथितोपायस्य स्वपित्रे शुद्धकाय निवेदनम्, तत्र वस्त्रक्षालनेन तेषां वस्त्राणां पूर्वापेक्षयाप्यतिशुक्लत्वप्राप्तिः, रजकेन ब्राह्मणेभ्यो वस्त्रादिवृत्तान्तनिवेदनकरणम्, ततस्तस्य जलाशयस्य शुक्लतीर्थेति प्रसिद्धिभवनम्, शुक्लतीर्थमाहात्म्यवर्णनम्.	१३६	१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अध्यायाः	विषयाः	प०	पृ०
१२४	मुखारतीर्थोत्पत्तिवर्णने लोहजंघापरनामकवाल्मीकिजन्मकथानिरूपणम्, मुखारतीर्थमाहात्म्यवर्णनम्.	१३७	२
१२५	कर्णोत्पलतीर्थवर्णने सत्यसंधराज्ञः कर्णोत्पलेतिनाम्न्याः कन्याया उत्पत्तिवर्णनम्, कर्णोत्पलेयं कस्मै देयेति प्रष्टुं सकन्यकस्य सत्यसंधस्य ब्रह्मलोके गमनम्, ब्रह्मवचनात्तत्र ब्रह्मलोके स्थातुं प्रवृत्तं स्वपितरं दृष्ट्वा कन्यया प्रार्थनाकरणम्, कन्यावचनाद्राज्ञः स्वदेशे गमनम्, देशे वैपरीत्यं दृष्ट्वाऽऽश्चर्यकरणम्, तत्रस्थैः सह मिथो भापणे स्वस्ववृत्तान्तकथनम्, सकन्यकस्य सत्यसंधस्य तत्रैव गर्तासमीपे तपःकरणवर्णनम्.	१३९	१
१२६	सत्यसंधेन राज्ञा तपस्तप्त्वा लिंगस्थापनाकरणम्, सत्यसंधेश्वरमाहात्म्यवर्णनम्.	१४१	१
१२७	सत्यसंधकन्यया कर्णोत्पलया पतिप्राप्त्यर्थं देवीमुद्दिश्य तपःकरणम्, तत्तपःप्रसन्नाया देव्या आज्ञया तया कर्णोत्पलया गर्तातीर्थे स्नाने कृते सति तस्या यौवनप्राप्तिवर्णनम्, तस्याः सौन्दर्यं दृष्ट्वा कामदेवेन तल्लिप्सया प्रार्थनायां कृतायां सत्यसंधेन स्वकन्याया अभिप्रायं ज्ञात्वा तस्मै कामाय स्वकन्याया वैवाहिकेन विधिना दानकरणम्, कर्णोत्पलादेव्यग्रे कर्णोत्पलया स्वनाम्ना तीर्थस्थापनम्, कर्णोत्पलातीर्थमाहात्म्यवर्णनम्.	१४२	१
१२८	अराजकमानर्तदेशं दृष्ट्वा सत्यसंधवचनात्सुपुत्रदकुण्डे स्नानेन आनर्ताधिपते राज्ञीष्वटादिसंज्ञकानां पुत्राणां जन्मकथनम्, अटेश्वरमाहात्म्यवर्णनम्.	१४२	२
१२९	निजाज्ञाभंगक्रुद्धस्य शाकल्यगुरोर्निर्बन्धात्क्रुद्धेन याज्ञवल्क्येन तस्माद्गुरोः पठितां विद्यां तस्मै गुरवे निवेद्य तद्विद्यासंपादनार्थं सूर्योपास्तिकरणम्, ततः सूर्येण याज्ञवल्क्याय लघिमाविद्याप्रदानम्, तया लघुभूत्वा सूर्याश्वकर्णं समाश्रित्य सूर्यमुखनिर्गतानां वेदानां याज्ञवल्क्येन पठनकरणम्, सर्वविद्यासंपादनोत्तरं याज्ञवल्क्येन वेदार्थदर्शकोपनिषन्निर्माणकरणम, स्वनाम्ना हाटकेश्वरे तीर्थस्थापनम्, याज्ञवल्क्याश्रमतीर्थमाहात्म्यवर्णनम्.	१४४	१
१३०	याज्ञवल्क्यस्य मैत्रेयीपत्न्युपरि विशेषां प्रीतिं दृष्ट्वा तादृशीमात्मोपरि तस्य प्रीतिं संपादयितुं कात्यायनीनामकद्वितीयपत्न्या शाण्डिलीसमीपे गमनम्, शाण्डिल्या कात्यायन्यै स्वस्थितिवृत्तान्तकथनम्, शाण्डिलीवचनात्कात्यायन्या वर्षपर्यन्तं गौरीपूजनकरणम्, पंचपिंडागौर्युत्पत्तिवर्णनम्.	१४५	२
१३१	ईशानोत्पत्तिपञ्चपिंडिकागौरीमाहात्म्यवररुचिस्थापितगणपतिमाहात्म्यवर्णनम्. ...	१४७	१
१३२	कात्यायननिर्मितवास्तुपदतीर्थोत्पत्तिमाहात्म्यवर्णनम्.	१४८	१
१३३	अजापालनिर्मिताजागृहोत्पत्तिमाहात्म्यवर्णनम्.	१४९	१
१३४	हारीतपत्न्याः स्नानार्थं जलाशये गमनम्, तत्रैव रतिवासनया कामदेवस्यागमनम्, तत्सर्वं ज्ञात्वा हारीतेन कामं स्वपत्नीं च प्रति शापप्रदानम्, तत्रैव हारीतपत्न्याः पतिशापेन शिलात्वप्राप्तिवर्णनम्, कुष्ठित्वं गतस्य कामस्य विप्रवचनात्खण्डशिलाराधनेन कुष्ठनिवृत्तिवर्णनम्, खण्डशिलासौभाग्यकूपिकोत्पत्तिमाहात्म्यवर्णनम्.	१५०	१
१३५	दीर्घिकोत्पत्तिवर्णने वीरशर्मब्राह्मणेन स्वकन्याया दुर्दोषनिवारणार्थं चान्द्रायणादिव्रतकरणम्, कन्ययापि व्रतकरणम्, शक्रवचनात्तया कुष्ठिब्राह्मणस्य पाणिग्रहकरणम्, पतिवाक्यमनुसृत्य तस्या अष्टषष्टिषु तीर्थेषु गमनम्, मार्गे शूलस्थितेन माण्डव्येन ताभ्यां शापप्रदानम्, तया सूर्यनिरोधकरणम्, 'वयं ते पतिं जीवापयिष्यामः' इति देववचनात्सूर्योदयकरणम्, कुष्ठिब्राह्मणस्य मरणम्, देवैस्तस्य संजीव्योत्थापनम्, देवैस्तस्यै दीर्घायै पतिव्रतायै वरप्रदानम्.	१५२	१
१३६	माण्डव्येन यमाय शूद्रयोनिप्रापकशापप्रदानम्, दीर्घिकागर्तोत्पत्तिमाहात्म्यवर्णनम्.	१५४	१
१३७	माण्डव्यशूलप्राप्तिकारणकथनम्.	१५४	२
१३८	धर्मराजेन माण्डव्यदत्तशापविनाशाय तपःकरणम्, धर्मराजेश्वरोत्पत्तिवर्णनम्. ...	१५५	१
१३९	कश्यपवंशोद्भूतोपाध्यायसंज्ञकद्विजस्य पञ्चवर्षात्मकपुत्रस्य मरणेन शोकवर्णनम्, ततः क्रुधा ब्राह्मणेन यमाय शापप्रदानम्, शापितस्य यमस्य ब्रह्माग्रे गमनम्, यमस्य ब्रह्मवचनाच्छापनिवृत्त्यर्थं हाटकेश्वरे गमनम्, ततो यमेन द्विजरूपं धृत्वा		

CC-0. In Public Domain. Digitization by eGangotri

अध्यायाः	विषयाः	प०	पृ०
	ब्राह्मणगृहमेत्य ब्राह्मणाय तत्पुत्रस्य प्रदानम्, धर्मराजेन शिवलिंगस्थापनम्, धर्मराजेश्वरमाहात्म्याख्यानवर्णनम्.	१५५	१
१४०	धर्मराजपुत्राख्यानवर्णनम्.	१५६	२
१४१	मिष्टान्नदायकलिंगमाहात्म्यवर्णने वसुसेननामकस्य भूपस्याऽन्नं विना वहुदानकरणेन स्वर्गं गत्वा वुभुक्षितत्वप्राप्तिवर्णनम्, तेन पीडितेन वसुसेनेनेन्द्रं प्रति पृष्टे सति तस्मिन्नेव समये तत्र नारदस्यागमनं दृष्ट्वा तस्मै सर्ववृत्तान्तकथनम्, वसुसेनस्य प्रार्थनया नारदेन पितृश्राद्धादौ नित्यमन्नदानादिकं कुर्वीति वसुसेनपुत्राय सत्यसेनाय पितुराज्ञासन्देशनिवेदनकरणम्, नारदद्वारा स्वपितुः संदेशं श्रुत्वा सत्यसेनेन स्वपित्रेऽन्नप्रदानम्, अवर्षणादन्नाभावेन सत्यसेनेन शिवाराधनाकरणम्, तदाराधनासन्तुष्टेन शिवेन यथेष्टमिष्टान्नादिदानम्, ततः सत्यसेनेन मिष्टान्नदेश्वरनाम्ना लिंगस्थापनम्, मिष्टान्नदेश्वरमाहात्म्यकथनम्.	१५६	२
१४२	गणपतित्रयमाहात्म्यवर्णनम्.	१५८	१
१४३	जावालितपोविघ्नकरणार्थं तत्रेन्द्रवाक्याद्रंभाया आगमनम्, तत्र रंभया जावालिचित्तं क्षोभयित्वा कृत्रिमभावैस्तेन सह रमणम्.	१५९	१
१४४	रंभोद्भूतां स्वकन्यां दृष्ट्वा जावालिना तस्याः पोषणकरणम्, यौवनं प्राप्तायाः कौमारवत्या जावालिकन्याया अग्रे चित्रसेनगन्धर्वस्य गमनम्, तां जावालिकन्यां गृहीत्वा गन्धर्वस्य देवमन्दिरे गमनम्, ततो दुहितरमन्वेषयमाणेन जावालिना देवमन्दिरे स्वकन्यां पलायमानं तं गन्धर्वं च दृष्ट्वा लगुडेन स्वकन्यायास्ताडनम्, गन्धर्वाय च शापप्रदानम्, गन्धर्वेण शापनिवृत्त्यर्थं तपस्तप्त्वा शापान्निवृत्त्य लिंगस्थापनम्, फलवतीनामकया जावालिकन्ययाऽपि शापनिवर्हणार्थं तपःकरणम्, तत्तपःप्राप्तदिव्यभावया तया कन्यया सह जावालिमहर्षेः प्रश्नोत्तररूपेण संवादे जायमाने तया कन्यया स्वपितुर्जावालेर्निरुत्तरीकरणम्, जावालीश्वरचित्रांगदेश्वरफलवतीयोगिनीत्रयमाहात्म्यवर्णनम्.	१६०	१
१४५	अमरेश्वरमाहात्म्यवर्णने दैत्यकृतं देवपराजयं श्रुत्वा आदित्येश्वराराधनाकरणम्, ईश्वरकृपया देवदैत्ययुद्धे देवकृतदैत्यपराजयवर्णनम्, अमरत्वप्राप्तिकरत्वात्तस्य लिंगस्यामरेश्वरेति नामकरणम्, अमरेश्वरलिंगमाहात्म्यवर्णनम्.	१६३	२
१४६	अमरेश्वरप्रभाववर्णन आदित्यवसुरुद्रादीनां नामवर्णनम्, अमरेश्वरकुण्डमाहात्म्यवर्णनम्.	१६४	२
१४७	शुक्रजन्मवर्णनम्, ततो व्यासशुकसंवादवर्णनम्.	१६५	१
१४८	शुकाचार्यपुत्रविरहाद्दुःखेन तन्मात्रा पिंगलेत्यपरनाम्न्या वटिकया द्वितीयपुत्रप्राप्त्यर्थं शिवमाराध्य वरग्रहणम्, वटिकया स्वनाम्ना लिंगस्थापनम्, वटिकेश्वरमाहात्म्यवर्णनम्.	१६६	२
१४९	केलीश्वर्युत्पत्तिवर्णने हिरण्यकशिपोः सकाशादन्धकासुरस्य जन्म, तस्य राज्यप्राप्तिवर्णनम्, ततः सहस्रवर्षपर्यन्तं तपस्तप्त्वान्धकेन ब्रह्मणो वरग्रहणकरणम्, तेन ब्रह्मदत्तवरेणोन्मत्तेनान्धकेन सेन्द्रान्देवाञ्जित्वा शंभुमपि जित्वा शंभुनिर्मिताग्निकुण्डजाकेलीश्वर्या देव्या समं युद्धकरणम्.	१६६	२
१५०	स्वदैत्यसैन्यपराजयं दृष्ट्वाऽन्धकेन प्रार्थितेन शुक्रेण शंभुनेव वह्नावाथर्वणिकमन्त्रैराबाहने कृते सति केलीश्वर्या उत्पत्तिवर्णनम्, ततोऽन्धकेन तस्या देव्याः सकाशतो वरं लब्ध्वा केलीश्वरीस्तवनकरणम्, केलीश्वरीमाहात्म्यवर्णनम्.	१६९	१
१५१	अन्धकशिवयोर्युद्धे वर्तमाने शिवेनान्धकस्य पराजयकरणम्, अन्धककृतया स्तुत्या प्रसन्नेन भगवताऽधकस्य भृंगिरिटीति नाम्ना स्वकीयशैवगणत्वप्रदानवर्णनम्, अथ राज्याद्भ्रष्टस्य सुरथस्य वसिष्ठवचनाद्धाटकेश्वरे गत्वा भैरवं स्थापयित्वा तस्य पूजनेन राज्यप्राप्तिवर्णनम्, भैरवक्षेत्रमाहात्म्यवर्णनम्.	१६९	२
१५२	चक्रपाणिमाहात्म्यवर्णनेऽर्जुनस्य युधिष्ठिरानुज्ञया ब्राह्मणानां गवां संरक्षणार्थमरण्ये गमनम्, ततो गोमोचनं कृत्वा तीर्थयात्रां कर्तुमुद्युक्तस्य फाल्गुनस्य हाटकेश्वरे गमनं चक्रपाणिस्थापनं च, चक्रपाणिमाहात्म्यवर्णनम्.	१७१	१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अध्यायाः	विषयाः	प०	पृ०
१५३	रूपतीर्थमाहात्म्यवर्णने तिलोत्तमोत्पत्तिवर्णनम्, ब्रह्माज्ञया तिलोत्तमायाः कैलासे गमनम्, शिवं नत्वा प्रदक्षिणां कुर्वत्यां तिलोत्तमायां शिवमनसः क्षुब्धतां समालोक्य पार्वत्या 'कुरूपा भव' इति तिलोत्तमां प्रति शापदानम्, तिलोत्तमा-प्रार्थनया तिलोत्तमां गृहीत्वा पार्वत्या हाटकेश्वरे रूपतीर्थे गमनम्, तेन पूर्वव-त्स्थितां तिलोत्तमां प्रति पार्वत्या वरप्रदानम्, अप्सरःकुण्डोत्पत्तिमाहात्म्य-वर्णनम्.	१७२	१
१५४	चित्रेश्वरीपीठमाहात्म्यवर्णनम्.	१७३	१
१५५	हाटकेश्वरक्षेत्रे द्वादशादित्याष्टवस्वेकादशरुद्राणां पूजनमाहात्म्यवर्णनम्, पुष्पादि-त्यमाहात्म्यवर्णनम्, तत्र मणिभद्रक्षत्रियवृत्तान्तवर्णनम्, धृद्धमणिभद्राय कन्यां प्रदातुं तस्याः कन्यायाः पित्रा क्षत्रियेण निजभार्यायै वोधोपदेशकरणम्. ...	१७४	१
१५६	मणिभद्रविवाहोत्तरं मणिभद्रेन पुष्पनामकब्राह्मणस्य विडंबनकरणम्, तस्मै ब्राह्म-णाय नगरवासिभिः सान्त्वनपूर्वकं भोजनायाभ्यर्थनाकरणम्.	१७५	१
१५७	ततो भोजनमकृत्वैव सूर्यमाराधयितुं पुष्पकस्य चमत्कारपुरे गमनम्, ततः सम-न्त्रकं सांगं होमं कृत्वा स्वमांसेन स्विष्टकृदादिकमवेक्ष्य सूर्यस्य तत्समीपं प्रत्या-गमनम्, सूर्येण पुष्पाख्याय मणिभद्ररूपकरण-स्वरूपकरणप्रभावशालिगुटिकाद्वय-प्रदानम्, पुष्पब्राह्मणेन स्वनाम्ना पुष्पादित्यस्थापनम्, पुष्पादित्यमाहात्म्यवर्णनम्.	१७६	१
१५८	सूर्यदत्तगुटिकाप्रभावात्पुष्पकेण मणिभद्रसदृशं रूपं धृत्वा मणिभद्रगृहे गमनम्, तस्य सत्यमणिभद्रस्य गृहं गत्वा द्वारस्थं पण्ढं वस्त्रादिना सन्तोष्य तस्य पत्नीं वस्त्रालंकारादिना सन्तोष्य तया सह सुखेन भुक्त्वा संभोगकरणम्, ततस्तस्य कृत्रिममणिभद्रस्य वचनात्सत्यमणिभद्रस्य द्वारस्थपण्ढेन धिक्कारकरणम्, कृत्रि-माकृत्रिममणिभद्रयो राजमंदिरे विवादवर्णनम्, ततो राजवचनादकृत्रिममणि-भद्रस्य तत्पत्न्या स्वपतित्वेनास्वीकारे राजाज्ञया तस्याकृत्रिममणिभद्रस्य राज-दूतद्वारा शाखावलंबेन निधनवर्णनम्.	१७७	१
१५९	तत आप्तवर्गान्समाहूय तेन कृत्रिमेण पुष्परूपमणिभद्रेण भोजनवस्त्रादिदानवर्णनम्, पुष्पविभववर्णनम्.	१७९	१
१६०	माहिकाप्रार्थनया पूर्ववत्पुष्पशरीरं धृत्वा तेन पुष्पब्राह्मणेन माहिकायाः सौख्यकर-णम्, ततस्तेन पुष्पेण स्वपुत्रेभ्यो धनं दत्त्वा कृतस्य पापस्य क्षालनार्थं हाटकेश्वर-क्षेत्रे गमनम्, पुरश्चरणादीन्कर्तुं ब्राह्मणनिमंत्रणकरणम्, पुष्पादित्यस्य मंदिर-निर्माणकरणम्.	१७९	१
१६१	पुष्पादित्यमाहिकादुर्गोत्पत्तिमाहात्म्यवर्णनम्.	१८०	१
१६२	पुरश्चरणसप्तमीव्रतकथने मार्कण्डेयरोहिताश्वसंवादे न्यासपूर्वकं षोडशोपचारपूजन-विधिवर्णनम्, प्रतिमासपूजाविशेषभेदवर्णनम्, केनचिच्चंडशर्मणा ब्राह्मणेन पुष्पं प्रति पुरश्चरणसप्तमीव्रतविधिवर्णनम्.	१८०	२
१६३	चंडशर्मणा शास्त्राण्यालोड्य कथितेन प्रायश्चित्तविधिना पुष्पस्य पापशुद्धौ जातायां लोकैश्चण्डशर्मणस्तिरस्करणम्, ततस्तेन चण्डशर्मणा ब्राह्मणेन तपःकरणम्, चंड-शर्मणा पुष्पादित्यं प्रदक्षिणीकृत्य स्वमांसेनाग्नौ होमे क्रियमाणे प्रत्यक्षेश्वरसूर्य-नारायणेन निजदर्शनदानम्, सूर्यदर्शनेन पुष्पचण्डशर्मणोः पापनिवृत्तिपूर्वकसुरू-पप्राप्तिवर्णनम्, ब्रह्मनागरोत्पत्तिवृत्तान्तवर्णनम्.	१८२	१
१६४	ततः पुनः पुष्पचंडशर्मणोः सरस्वतीतीरे गमनम्, तत्र कर्दमेन लिंगकरणपूर्वकं पूजनं कृतवता चण्डशर्मणा नागरेश्वरेति नाम्ना लिंगस्थापनम्, चण्डशर्मपत्न्या शाकं-भर्याऽपि शाकम्भरीदुर्गास्थापनम्, चण्डशर्मणा सरस्वतीतीरे नागरादित्यस्थापनम्, नागरेश्वरनागरादित्यशाकंभर्युत्पत्तिमाहात्म्यवर्णनम्.	१८३	१
१६५	विश्वामित्रोत्पत्तिकथन ऋचीकस्य गाधिकन्यायाचनार्थं गाधिगृहे गमनम्, ततो याचनोत्तरं सहस्रश्यामकर्णप्रदानेन कन्यां दास्यामीति राजप्रतिज्ञां श्रुत्वा तच्छ्या-मकर्णलब्धये सरस्वतीतीरे ऋचीकेन तपःकरणम्, ततो मन्त्रसामर्थ्येन श्याम-कर्णांल्लब्ध्वा गाधिसमीपे ऋचीकस्य गमनम्, अश्वतीर्थोत्पत्तिवर्णनम्. ...	१८४	१

CC-0. In Public Domain. Digitization by eGangotri

अध्यायाः	विषयाः	प०	पृ०
१६६	वरप्रदानोत्सुकस्यर्चीकस्य वचः श्रुत्वा मातुराज्ञया ऋचीकपत्न्या मातुरात्मनश्च पुत्रप्राप्त्यर्थमृचीकं प्रति प्रार्थनाकरणम्, ऋचीकेन पत्नीवाक्यं श्रुत्वा क्षात्रतेजः-प्रपूरकपुरोडाशं गाधिपत्न्यर्थं ब्राह्मतेजःसंयुक्तपुरोडाशं स्वपत्न्यर्थमिति पुरोडाश-द्वयं निर्माय ऋचीकेन भिन्नत्वेन द्वाभ्यां तत्पुरोडाशद्वयस्य संप्रदानकरणम्, तत्तद्गृहीत्वा ताभ्यां राजपत्नीद्विजपत्नीभ्यां विपर्यासकरणादृचीकेन गर्भदोहद-लक्षणपरीक्षया पुरोडाशव्यत्ययं विदित्वा स्वपत्न्यै शापप्रदानम्, ततस्तत्प्रार्थनया तस्यै 'तव पौत्रः क्षात्रतेजोयुक्तो भवेत्' इत्याद्युच्छापप्रदानम्, परशुरामोत्पत्ति-वर्णनम्.	१८४	२
१६७	विश्वामित्रोत्पत्तिवर्णनम्, विश्वामित्रस्य ससैन्यस्य वसिष्ठाश्रमे गमनम्, वसिष्ठकाम-धेनुप्रभावं ज्ञात्वा तत्प्राप्त्यर्थं वसिष्ठं प्रति याचनाकरणम्, वसिष्ठविश्वामित्र-योर्युद्धवर्णनम्, तत्र वसिष्ठेन विश्वामित्रस्य दोःस्तंभनकरणम्, ब्राह्मं तेजः क्षात्र-तेजोपेक्षया वरिष्ठमिति मत्वा ब्राह्मतेजःसंपादनार्थं राज्यं त्यक्त्वा विश्वामि-त्रस्य वने प्रयाणम्.	१८५	२
१६८	विश्वामित्रकृतां घोरतपश्चर्यां विलोक्येन्द्रब्रह्मणोर्वरप्रदानार्थं विश्वामित्राग्रे गमनम्, ब्राह्मं तेजो दुर्लभमिति मत्वापि ऋचीकवचनात्केवलं वसिष्ठं विना सर्वैरयं ब्रह्म-र्षिरिति भाषितकरणम्, वसिष्ठविनाशार्थं विश्वामित्रेणाथर्वणिकमंत्रैरग्नौ होम आरब्धे सति तस्मादग्नेः कृत्याया उद्भवः, विश्वामित्रेण तस्याः कृत्याया वसिष्ठं प्रति प्रेषणम्, तस्या वसिष्ठहृदयं स्पृष्ट्वा तत्रैव पतनम्, धारेति तस्या नामकरणम्, धारोत्पत्तिमाहात्म्यवर्णनम्.	१८७	२
१६९	वसिष्ठपत्न्याऽरुन्धत्या धारातीर्थं आगत्य तत्तीर्थस्य देव्याश्च स्तवकरणम्, धाराना-मोत्पत्तिवृत्तान्तधारादेवीमाहात्म्यवर्णनम्.	१८८	२
१७०	धारातीर्थोत्पत्तिमाहात्म्यवर्णनम्.	१८९	२
१७१	विश्वामित्रेण वसिष्ठोपरि प्रेषितायाः स्वशक्त्या निष्फलत्वं वीक्ष्य ब्राह्मास्त्राद्यस्त्रैर्युद्ध-करणम्, वसिष्ठप्रेरिततत्प्रतिद्वन्द्व्यस्त्रैर्भूतले प्रलयमिव दृष्ट्वा तत्र ब्रह्मणो गमनम्, वसिष्ठविश्वामित्रयोः सामकरणम्, विश्वामित्रवसिष्ठयोर्युद्धे दिव्यास्त्रनिवर्तनव-र्णनम्.	१८९	२
१७२	वसिष्ठद्रोहकरणार्थं सरस्वत्या विश्वामित्रेणाज्ञाकरणम्, तया सरस्वत्या कृतं स्वाज्ञा-भंगं विज्ञाय विश्वामित्रेण सरस्वत्यै शापप्रदानम्.	१९०	१
१७३	सरस्वतीशापमोचनपूर्वकसाभ्रमत्युत्पत्तिवृत्तान्तवर्णनम्.	१९०	२
१७४	अथ पिप्पलादोत्पत्तिवृत्तान्तवर्णनम्, तत्र जन्मकालेऽतिकष्टतरां दशामापन्नं पिप्प-लादं प्रति समागतेन नारदेन पिप्पलादकृतं निजदुर्दशाकारणजिज्ञासया प्रश्नं श्रुत्वा शनैश्चरस्य जन्मराशिस्थत्वादिदं ते गर्हितं जन्मेति पिप्पलादं प्रति कथिते सति पिप्पलादेन स्वदृष्टिपातेन शनैश्चरस्य स्वस्थानात्पाते कृते सति नारदेन शनैश्चरस्य गगने स्तंभनम्, ततः पिप्पलादेन नारदोपदेशात्पीडापरिहारार्थं शनै-श्चरस्तुतिकरणम्, शनैश्चरेण तस्मै वरप्रदानम्, पिप्पलादस्य याज्ञवल्क्याय समर्पणकरणम्.	१९१	१
१७५	याज्ञवल्क्येन स्वकृताज्ञानजन्यपातकदोषनिवर्हणार्थं ब्रह्माज्ञया हाटकेश्वरे गमनं लिंग-स्थापनं च, याज्ञवल्क्येश्वरमाहात्म्यवर्णनम्.	१९३	१
१७६	कंसारेश्वरोत्पत्तिमाहात्म्यवर्णनम्.	१९३	२
१७७	काशिराजपत्न्या पद्मावत्या सौभाग्यवर्धनार्थं वालुकया पञ्चलिंगान्निर्माय तत्पूजनम्, तत्प्रभावेण तस्या राज्यादिसौभाग्यप्राप्तिवर्णनम्, पञ्चपिंडिकोत्पत्तिमाहात्म्य-वर्णनम्.	१९४	१
१७८	पञ्चपिंडिकागौरीमाहात्म्यवर्णने लक्ष्मीविष्णुसंवादे विष्णुपृच्छया लक्ष्म्या विष्णु-प्राप्त्यर्थं दुर्वाससो वचनात्पंचगौरीपूजनम्, अथ लक्ष्म्या तद्विसर्जनसमये		

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अध्यायाः	विषयाः	प०	पृ०
	गौरीवचनात्पंचपिंडागौरीतिनाम्ना हाटकेश्वरे स्थापनम्, पञ्चपिंडागौरीमाहात्म्यवर्णनम्.	१९५	२
१७९	पुष्करत्रयवर्णने ब्रह्मनारदसंवादे नारदमुखादनेकदुःखावृताञ्जनानवेक्ष्य ब्रह्मणा लोकरक्षार्थं भूतले कमलप्रक्षेपणम्, तत्र हाटकेश्वरे तत्कमलपतनेन गर्तात्रयनिर्माणकरणम, ततस्तत्र ब्रह्मादिभिर्यज्ञसमारंभार्थमुपकरणानयनब्राह्मणामंन्त्रणादिप्रकारकथनम्.	१९७	२
१८०	यज्ञमण्डपप्राप्तब्राह्मणसत्कारपूर्वकर्त्विगादिस्थानयोजनापूर्वकाध्वरकर्मारंभवर्णनम्....	१९८	२
१८१	नागरैर्वाह्यं श्राद्धं यज्ञो वा वृथेति नागरब्राह्मणान्ब्रह्मणा वरप्रदानम्, ब्रह्मणो वचनात्सावित्रीमानेतुं नारदस्य ब्रह्मलोके गमनम्, 'नाहमेकाकिन्यागमिष्यामि' इति तस्या वचनं श्रुत्वा ब्रह्मणा पुनः पुलस्त्यस्य संप्रेषणम्, सावित्र्या दुराग्रहं समालोक्य कामप्यन्यां कन्यामानयेति शक्रं प्रति ब्रह्मणा संप्रेषणम्, शक्रेण कांचिद्गोपकन्यां दृष्ट्वा गृहीत्वा च गोर्वक्त्रेण प्रवेश्य गुह्येन निष्कास्य तस्याः पवित्रीकरणम्, तां पूतां दृष्ट्वा विष्णुरुद्रादिदेववचनाद्ब्रह्मणा तस्या गोपकन्यायाः पाणिग्रहणकरणम्, गायत्रीविवाहोत्तरं गायत्रीतीर्थस्थापनम्, गायत्रीतीर्थमाहात्म्यवर्णनम्.	१९९	२
१८२	ततो गायत्र्या नखनिकृन्तनं ब्रह्मणः केशनिर्वपणं च कारयित्वा दण्डादिकं हस्ते दत्त्वा चर्मादिभिः सहोभयोर्यज्ञशालागमनम्, ततस्तत्र कस्यचिज्जाल्मस्यागमनम्, पैतामहोऽयं यज्ञोऽनिन्द्य इति तेषामृत्विजां वचनमाकर्ण्य यज्ञे जाल्मेन कपालप्रक्षेपणम्, ऋषिभिः पदाऽऽहत्य तस्मिन्कपाले बहिर्निक्षिप्ते तत्स्थले पुनरनन्तकपालोत्पत्तिं दृष्ट्वा ब्रह्मणा हरप्रार्थनाकरणम्, हरकृपयाऽरिष्टनिरसनम्, रूपतीर्थोत्पत्तिवर्णनपूर्वकं तस्य यज्ञस्य प्रथमदिवसवृत्तान्तवर्णनम्.	२०१	१
१८३	यज्ञस्य द्वितीयदिवसे यज्ञमध्ये केनापि वटुना सर्पनिक्षेपणम्, तेन सर्पेण होतुः शरीरं वेष्टितमिति मैत्रावरुणकर्माणि स्थितेन होतुः पुत्रेण दृष्ट्वा सर्पनिक्षेपकारिणं वटुं प्रति शापदानम्, ततस्तत्प्रार्थनयोच्छापस्यापि प्रदानम्, तत्रैव नागतीर्थस्थापनम्, नागतीर्थमाहात्म्यवर्णनम्.	२०२	२
१८४	तृतीये दिवसे तत्र यज्ञे भोजनादिसमारंभे कस्यचिदतिथेरागमनम्, तेन सह संवाद ऋत्विग्भिस्तस्य पुष्टत्वकारणे पृष्टे तेनातिथिना 'पिंगलादिषड्गुरुभ्यो मया ज्ञानं लब्धम्' इति कथनम्, तच्छ्रुत्वा 'कथं ज्ञानं लब्धम्' इत्यृत्विग्भिः प्रश्ने कृतेऽतिथिना तान्प्रति पिंगलाख्यानकथनम्, तत्र प्रथमतः स्वस्य गोत्रकुलजन्मादिवृत्तान्तकथनम्, तस्यातिथेर्बाल्ये वयसि पितर्युपरते सत्यानर्ताधिपतेर्गृहे सेवाकरणार्थं गमनम्, तत्र आनर्ताधिपतेः पिंगलाया वेश्यायाः सुरतसुखोपभोगे गततृष्णत्वेन सुखेन स्वपनम्, तथाऽन्यासां स्त्रीणां कामपीडितत्वेन शान्तिसमाधानसुखाभावं दृष्ट्वा पिंगलातो विगततृष्णत्वरूपगुणग्रहणवर्णनम्, पिंगलोपाख्यानवर्णनम्. ...	२०४	१
१८५	कुररतो गुणग्रहणादिवर्णने यथा कुररो निरामिषः सुखी बभूव तथा मनुष्यैर्भाव्यमित्यादि मनसि विचार्य सर्वं वित्तं दायादहस्ते दत्त्वातिथेः सुखीभवनम्, सर्पाद्गुरुत्वबुद्ध्या गुणग्रहणवर्णने परगृहवासिनां सर्पाणां स्वभाववर्णनपूर्वकयतिधर्मनिरूपणम्, एवं भ्रमरादिभ्योऽपि गुणग्रहणवर्णनम्, एवमतिथिसंभाषणे प्रवृत्ते सति तत्र विष्ण्विन्द्रादीनां देवानामागमनम्, पैतामहयज्ञशोभावर्णनम्, अतिथितीर्थोत्पत्तिमाहात्म्यवर्णनम्.	२०४	२
१८६	गृहागतस्यातिथेः सत्कारपूजनादिमाहात्म्यवर्णनम्.	२०७	१
१८७	चतुर्थेऽहनि कस्यचिद्विश्वावसुनाम्नः पुलस्त्यपुत्रस्य जिह्वालौल्याद्याज्ञियपशुगुदमांसभक्षणेन ब्राह्मणैस्तस्य राक्षसत्वप्रापकशापप्रदानम्, तेन शापेन तस्य विश्वावसुनाम्नः पुलस्त्यपुत्रस्य सद्यो राक्षसत्वप्राप्तिवर्णनम्, ततो ब्रह्मणा तस्य स्वपौत्रस्य तृप्त्यर्थं व्यवस्थाकरणप्रसङ्गेन राक्षसप्राप्यश्राद्धवर्णनम्.	२०७	२
१८८	पञ्चमेऽहनि उद्गातृनिर्मिते गीते गीतश्रवणार्थमौदुंबर्या आगमनम्, औदुंबर्युद्गात्रोः संवादवर्णनम्, तत्रौदुंबर्या स्वजन्मवृत्तान्तकथनम्, औदुंबरीं प्रत्युद्गात्रा वर-		

CC-0. In Public Domain. Digitization by eGangotri

अध्यायाः	विषयाः	प०	पृ०
	प्रदानम्, शंकुप्रचारपूजनमाहात्म्यवर्णनम्, औदुंबरीशापनिवृत्तिवर्णनम्, तत्रेश्वरेण सह सर्वदेवतानामागमनम्, मातृगणस्य स्वस्वस्थानं प्रति गन्तुं तस्याः सकाशतो गमने सति सावित्र्या मातृगणाय शापदानवृत्तान्तवर्णनम्. ...	२०९	१
१८९	औदुंवर्युत्पत्तिपूर्वकतत्प्राग्जन्मवृत्तान्तवर्णनम्.	२११	१
१९०	ब्रह्मणा यज्ञान्ते सर्वान्नागरानाहूय तेभ्यः सर्वं यज्ञगतवृत्तान्तं तीर्थोत्पत्त्यादिकं च कथयित्वा अवभृथस्नानार्थं सर्त्विजो ब्रह्मणो ज्येष्ठपुष्करे गमनम्, ब्रह्मणेन्द्रादिभ्यो वरप्रदानम्, ब्रह्मणा तस्मिन्समये तत्रागताय यक्ष्मणे वरप्रदानम्, यक्ष्मतीर्थोत्पत्तिवर्णनम्.	२११	२
१९१	सावित्र्या यज्ञमण्डपं प्रत्यागमनकाले संजायमानोत्पाताद्यपशकुनोद्भववर्णनम्, घृताच्याद्यप्सरसां तत्रागमनम्, तत्कृतगायनवादनहास्यादीनां वर्णनम्. ...	२१३	२
१९२	सावित्रीं प्रति नारदेन गायत्रीविवाहादिवृत्तकथनम्, सावित्र्या तन्नारदकथितं वृत्तान्तं श्रुत्वा दुःखकरणम्, गौरीवचनान्नारदवाक्यमविश्वास्य ब्रह्मणोऽग्रे यज्ञमण्डपे सावित्र्या गमनम्, सावित्र्या ब्रह्मणो निंदाकरणम्, ब्रह्मणे सावित्र्या शापप्रदानम्, सावित्र्या शक्रवह्निनागरब्राह्मणर्त्विगादिभ्यः शापदानम्, ततः सावित्र्या ततो निर्गत्यैकपदा पर्वतमधिरुह्य गमनम्, सावित्रीमाहात्म्यवर्णनम्.	२१३	२
१९३	गतायां सावित्र्यां तत्र स्थितया गायत्र्या सर्वेभ्यः सावित्र्या दत्तानां शापानां निवृत्तिकरणपूर्वकं वरप्रदानम्.	२१६	१
१९४	सर्वदेवैर्गायत्रीस्तवनकरणम्, ब्रह्मविष्ण्वीशानां समायुष्प्राप्तिवर्णनम्, निमेषादिकल्पान्तपर्यंतकालप्रमाणवर्णनम्, ब्रह्मज्ञानप्राप्त्यर्थं कुमारिकातीर्थद्वयगर्तक्षेत्रस्थपादुकामाहात्म्यवर्णनम्.	२१६	२
१९५	कुमारिकातीर्थद्वयवर्णने ब्राह्मणीनाम्न्याश्छान्दोग्यब्राह्मणकन्याया आनर्ताधिपते रत्नावतीनाम्न्याः कन्यायाश्च मिथोतिसख्यवर्णनम्, विवाहान्त आवयोर्वियोगः स्यादिति ताभ्यां मनसि निधायोपाययोजनम्, नृपब्राह्मणकन्यावृत्तान्तवर्णनम्.	२१७	२
१९६	दशार्णाधिपतेर्बृहद्बलस्यानर्ताधिपतेः पुरं प्रत्यागमनम्.	२१८	२
१९७	तस्मिन्नवसरे वेश्यागृहं गतस्य कस्यचिद्विश्वावसुपुत्रस्य परावसुनाम्नो विप्रविद्यार्थिनो रात्रौ निद्रावशेन तृष्णया पीडिततयाऽज्ञानेन मद्यप्राशनम्, ततः पश्चात्तापेन तेन प्रातः शंखतीर्थे गत्वा वपनादिकं कृत्वाऽन्त्यजवद्गुरुगृहे दूरतोऽवस्थाने तत्सतीर्थ्यैस्तं प्रति प्रश्नकरणम्, तत्सतीर्थ्यैस्तस्मै परिहासोक्त्या 'रत्नावतीस्तनग्रहणाधरास्वादनतरते पापनिर्मुक्तिः स्यात्' इति प्रायश्चित्तकथनम्, ततो विश्वावसुना गुरोराज्ञया सर्ववृत्तान्तकथनम्, अथ धर्मशास्त्रज्ञब्राह्मणोक्ताग्नितुल्यघृतप्राशनरूपप्रायश्चित्तं ग्रहीतुमुद्युक्तं विश्वावसुं दृष्ट्वा तन्मातापित्रोराक्रोशकरणम्, ततो भर्तृयज्ञेन रत्नावतीस्तनग्रहणाधरास्वादनेन मद्यपानशुद्धिः स्यादिति प्रथमतो विप्रविद्यार्थिभिः प्रोक्तं प्रायश्चित्तं श्रुत्वा तैः सर्वैर्ब्राह्मणैः सह राजानं प्रत्यागत्य ब्राह्मणजीवदानार्थं प्रार्थनायां कृतायां राज्ञा निजकन्यायै ब्राह्मणस्य प्रायश्चित्तार्थं तथानुगृह्यतामित्युक्ते तया पुत्रदृष्ट्या तस्मै ब्राह्मणाय प्रायश्चित्तार्थं निजस्तनधारणनिजाधरास्वादनार्थमाज्ञायां दत्तायां तेन ब्राह्मणेन मातृभावेन तथा कृते सति ब्राह्मणस्य मुखाद्रत्नावत्याः स्तनाभ्यां च क्षीरनिर्गलनम्, परावसुप्रायश्चित्तवृत्तान्तवर्णनम्.	२१९	१
१९८	दशार्णाधिपतेरेव पाणिग्रहणे रत्नावत्या दुराग्रहकरणम्, रत्नावत्या विवाहाभावे तत्सख्या ब्राह्मण्या अपि विवाहाकरणे दुराग्रहकरणम्, ततस्तयोर्ब्राह्मणीरत्नावत्योस्तपश्चिकीर्षया भर्तृयज्ञाश्रमे गमनम्, भर्तृयज्ञाज्ञया ताभ्यां जलाशये तपःकरणम्, तत ईश्वरस्य प्रसादे जाते सति ताभ्यां लिंगस्थापनम्, शूद्रीब्राह्मणीतीर्थद्वयमाहात्म्यवर्णनम्.	२२१	२
१९९	क्षेत्रत्रयारण्यत्रयपुरीत्रयवनत्रयग्रामत्रयतीर्थत्रयपर्वतत्रयमहानदीत्रयादीनामुत्पत्तिवृत्तान्तपूर्वकं तेषां तेषां माहात्म्यवर्णनम्.	२२४	१
२००	भर्तृयज्ञकृतनागरज्ञातिव्यवस्थावृत्तान्तवर्णनम्.	२२७	२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अध्यायाः	विषयाः	प०	पृ०
२०१	विश्वामित्रभर्तृयज्ञसंवादे विश्वामित्रेण भर्तृयज्ञाय नागरशोधनविषयकप्रश्ने कृते सति भर्तृयज्ञेनोत्तरदानम्, भर्तृयज्ञेन गर्तादितीर्थस्नानेन तत्र पीठिकादिदानेन श्रीसूक्तपावमान्यादिसूक्तपठनेन छांदोग्याद्युपनिषद्वाचनेन शुद्धिः स्यादित्यादिनागरप्रश्ननिर्णयकरणम्.	२२८	२
२०२	तालत्रयं केन देयमिति नागरैः प्रश्ने कृते साति भर्तृयज्ञेन नागरप्रश्नानामुत्तरदानम्, नागराणां वाचि सत्यत्वमतस्तैरेव नागरैस्तालत्रयं देयमित्यादिकथनम्, भर्तृयज्ञनिर्णयवाक्यवर्णनम्.	२२९	१
२०३	देशदेशान्तरस्थितनागरविशुद्धिप्रकारवर्णनम्.	२२९	२
२०४	आनर्तविश्वामित्रसंवादे हिरण्याक्षेन्द्रयुद्धवर्णनम्, तत्र स्वपराजयं दृष्ट्वा शक्रेण विष्णुना सह संगमः, ततः शक्रविष्णुसंवादे युद्धहतानां प्रेतत्वान्मुक्तिः कथं भवेदिति पृष्टेन विष्णुना शक्राय प्रेतश्राद्धकथनम्.	२३०	१
२०५	शक्रविष्णुसंवादे गयाश्राद्धफलमाहात्म्यकथनम्.	२३१	१
२०६	विष्णुवाक्योपरि विश्वस्तेन शक्रेणैरावतमारुह्य हिमवन्तं गत्वा तत्र चमत्कारपुरस्थान्विप्रान्दृष्ट्वा तदाश्रमस्थैर्विप्रैः पूजितेन शक्रेण तान्प्रति कुशलप्रश्नादिकं मिथः कृत्वा गयाकूपे श्राद्धादिकरणम्, तत्र ब्रह्मदेवस्यागमनम्, 'एकोद्दिष्टं विना सर्वत्र विश्वेदेवपूजनं कार्यं न त्वेकोद्दिष्टे' इत्यादि ब्रह्मणा विश्वेदेवानां शक्रदत्तशापस्य व्यवस्थाकरणम्, कूष्मांडादीनामुत्पत्तिनामकथनम्, बालमंडनकतीर्थमाहात्म्यवर्णनम्.	२३१	१
२०७	पञ्चरात्रेन्द्रमहोत्सववर्णनेऽहिल्यया सह सुरतप्रसंगादिन्द्राय गौतमेन शापप्रदानम्, ततो बृहस्पतिना प्रार्थितेन गौतमेन इन्द्रगात्रे सहस्रभगस्थाने नेत्रजाशोभाप्रदानं पञ्चरात्रे भूम्यां पूजालाभप्रदानं च, पञ्चरात्रेन्द्रमहोत्सवमाहात्म्यवर्णनम्.	२३५	१
२०८	अहिल्याया मातुः स्वपित्रा कृतं शिलाजनकत्वशापप्रदानं श्रुत्वा मरणे कृतनिश्चयेन शतानन्देन तच्छुद्ध्यर्थं बहुदुःखकरणम्, ततो गौतमेन शतानन्दस्य सान्त्वनकरणम्, श्रीरामेणाहिल्यायाः शिलारूपायाः पादरजसः स्पर्शनेन शापतो मुक्ताकरणम्, रामवचनाद्धाटकेश्वरेऽभ्येत्य अहिल्याशतानन्दगौतमैः स्वस्वनामभिर्लिंगस्थापनम्, गौतमेश्वराहिल्येश्वरशतानन्देश्वरमाहात्म्यवर्णनम्...	२३६	२
२०९	शंखतीर्थमाहात्म्यवर्णने कुष्ठित्वं गतेनानर्ताधिपेन नारददर्शनम्, नारदेनानर्ताधिपतेः पूर्वजन्मचरित्रवर्णनम्, नारदेन कुष्ठादिपापशुद्ध्यर्थं शंखतीर्थस्नानाद्युपायकथनम्, तत्र शंखतीर्थोत्पत्तिवर्णनम्, शंखादित्यस्थापनवृत्तान्तवर्णनम्, शंखतीर्थशंखादित्यमाहात्म्यवर्णनम्.	२३९	१
२१०	नागवल्लीदोषकारणकथनप्रसंगे नारदेन सिद्धसेननाम्न आनर्ताय समुद्रमन्थनादमृतादिचतुर्दशरत्नोत्पत्तिवर्णनम्, तत्र अमृतप्राशनसमये कुहकेन युक्तस्य राहोः श्रीविष्णुना सुदर्शनेन शिरश्छेदादिवर्णनम्, ऐरावतप्रभिन्नपीयूषकमण्डलुतो वल्लीनिर्गमनम्, तस्या नागालानत्वान्नागवल्लीति नामकरणम्, वाणीवत्सरकाख्यस्य नृपस्य शक्राराधनया शक्रदत्तं विमानमारुह्य शक्रलोके नित्यं गमनम्, तत्र शक्रदत्तं तांबूलं भक्षयित्वा पुनः स्वस्थाने गमनम्, तेन वाणीवत्सरकेण स्वोद्याने क्षितौ नागवल्लीप्रसिद्धिकरणार्थं शक्रलोकतो नागवल्ल्या आनयनम्, तांबूलोत्पत्तितांबूलभक्षणमाहात्म्यवर्णनम्.	२४१	१
२११	आनर्ताधिपतेः शंखतीर्थे स्नानेन कुष्ठमोचनकथनम्, शत्रुहृतराज्यप्राप्तिपूर्वकं शंखतीर्थमाहात्म्यकथनम्.	२४३	१
२१२	विश्वामित्रीयतीर्थमाहात्म्यवर्णने विश्वामित्रप्रशंसावर्णनम्, भास्करतीर्थधन्वन्तारिवापीमाहात्म्यवर्णनम्, रत्नाक्षनाम्नोऽयोध्याधिपतेः कुष्ठविनाशार्थं कार्पटिकवचनाद्धाटकेश्वरमेत्य सप्तम्यां भास्करतीर्थे स्नानेन भास्करपूजनेन च दोषनिवृत्तिकथनम्, रत्नादित्येतिनाम्ना तीर्थस्थापनम्, रत्नादित्यतीर्थमाहात्म्यवर्णनम्. ...	२४३	१
२१३	कुहरवासाख्यसंज्ञकभगवत्स्थापनवर्णनम्, राजमार्गेण गच्छन्तं कृष्णपुत्रं सांबं द्रष्टुं सर्वासां नागरिकस्त्रीणां स्वस्वकार्याणि संत्यज्य गवाक्षद्वार आगमनम्, सांब-		

CC-0. In Public Domain. Digitization by eGangotri

अध्यायाः	विषयाः	प०	पृ०
	दर्शनेन तासां मध्ये कासांचिन्निश्चेष्टितत्वेन पतनादिवर्णनम्, ततः स्वपत्नीस्वरूपेणागतया नंदिनीनाम्न्या कृष्णपत्न्या समं सांबेनाज्ञानाद्रतिक्रीडादिकरणम्, तत्सर्वं तस्याः कुहकं ज्ञात्वा पश्चात्तापेन श्रीकृष्णं प्रति सर्ववृत्तान्तकथनम्, धर्मशास्त्रज्ञब्राह्मणोक्तपद्धत्या तिंगिन्यादिना शुद्धिकरणोपायनिवेदनं च, ततः कृतपापेन कुष्ठितंस्य सांबस्य श्रीकृष्णाज्ञया हाटकेश्वरे गमनम्, तत्र भास्कराराधनया तस्य सांबस्य कुष्ठनिवृत्तिकथनम्, स्वनाम्ना तीर्थस्थापनाकरणम्, कुहरवासिसांबादित्यमाहात्म्यवर्णनम्.	२४४	२
२१४	गणनाथोत्पत्तिवर्णनम्, गणनाथसाहाय्येन दानवान्विजित्य सन्तुष्टेनेन्द्रेण गणनाथाय वरप्रदानम्, रोहिताश्वमार्कण्डेयसंवादेन विश्वामित्रस्य वसिष्ठाश्रमे गमनम्, वसिष्ठकामधेनुप्रभावं ज्ञात्वा कामधेनुं ग्रहीतुं समुत्सुकस्य विश्वामित्रस्य वसिष्ठेन पराजयकरणम्, ततो ब्राह्मं तेजः संपादयितुं विश्वामित्रेण तपःकरणम्, सन्तुष्टेन शिवेन ब्राह्मण्यप्राप्त्यर्थं गणपतिपूजाविधिमाहात्म्यक्रमस्य विश्वामित्राय कथनम्, विश्वामित्रेण गणपतिपूजनेन ब्राह्मण्यसंपादनम्....	२४७	१
२१५	अथ सूतशौनकसंवादप्रसङ्गेन विश्वामित्रेण रोहिताश्वाय भर्तृयज्ञानर्ताधिपतिसंवादेन श्राद्धकल्पकथनम्, तत्र केषांकेषां श्राद्धं कार्यमित्यादि श्राद्धावश्यकताकारणवर्णनम्, श्राद्धकालनिर्णयकरणम्.	२४८	२
२१६	व्यतीपातादिकाले श्राद्धकरणे फलकथनम्, अग्निष्वात्तादिनवपितृगणवर्णनम्, कस्मिंश्चित्समये श्राद्धाभावात्क्षुत्पिपासार्दितानां पितॄणां ब्रह्मलोके गमनम्, ब्रह्मणे स्ववृत्तान्तकथनम्, ब्रह्मणा पितॄणां सांत्वनकरणम्, अमाश्राद्धगयाश्राद्धादिविधानेन सर्वेषां तृप्तिकरणम्, श्राद्धोत्पत्तिवृत्तान्तवर्णनम्.	२५०	१
२१७	श्राद्धे कुतपादिकालमाहात्म्यवर्णनम्, श्राद्धेऽपांक्तेयब्राह्मणलक्षणवर्णनम, श्राद्धे पूजार्हब्राह्मणलक्षणानि, श्राद्धविधिवर्णनम्, श्राद्धे त्याज्यदुष्टकर्माणि, श्वरजस्वलास्त्रीपतितादिदर्शने घरट्टोलूखलादिशब्दश्रवणे च दोषकथनम्, श्राद्धानर्हवस्तुवर्णनम्, प्रतिमासे श्राद्धार्हतिथिवर्णनम्, श्राद्धार्हपदार्थब्राह्मणकालनिर्णयवर्णनम्.	२५३	१
२१८	श्राद्धनियमवर्णनम्.	२५४	२
२१९	काम्यश्राद्धविधिक्रमवर्णनम्.	२५५	१
२२०	गजच्छायायां श्राद्धकरणेन फलप्राप्तिकथनम्, श्राद्धे खड्गमांसादिना ब्राह्मणेभ्यो भोजनदानेन फलवर्णनम्, प्रमादेन श्राद्धाकरणे दोषकथनम्.	२५५	२
२२१	कस्य कस्य मांसेन कतिमासावधिपितृतृप्तिः स्यादित्यादिवर्णनम्, श्राद्धकल्पे सृष्ट्युत्पत्तिकालिकब्रह्मोत्सृष्टश्राद्धार्हवस्तुपरिगणनवर्णनम्.	२५७	२
२२२	शस्त्रमृतानामपमृत्युमृतानामुपसर्गैर्मृतानां विषं भक्षयित्वा मृतानां वह्निदग्धानां जलमृतसर्पव्याघ्रहतानां शृंगैरुद्बन्धनादिभिर्मृतानां च का गतिः कदा वा श्राद्धं कर्तव्यं को विधिरित्यादिवर्णनम्, चतुर्दशीशस्त्रहतश्राद्धनिर्णयवर्णनम्.	२५९	१
२२३	श्राद्धार्हानर्हब्राह्मणवर्णनम्.	२५९	२
२२४	मन्त्रपूर्वकसाद्यन्तश्राद्धविधिकथनम्.....	२६०	१
२२५	एकोद्दिष्टविधिकथनम्, पार्वणश्राद्धविधिकथनम्, नवश्राद्धविधिवर्णनम्, सपिंडीकरणश्राद्धनिर्णयविधिवर्णनम्.	२६१	१
२२६	प्रेतजनकत्वकारणकथनम्, ततो युधिष्ठिरभीष्मसंवादप्रसंगेन एकविंशतिनरकवर्णनम्, यमलोके पुण्यपापधर्मादिव्यवस्थावर्णनम्, केन पातकेन कस्य नरकस्य प्राप्तिरित्यादिवर्णनम्, तत्तद्दुरितप्राप्यैकविंशतिनरकयातनानिरसनोपायवर्णनम्.	२६२	१
२२७	गंगादिपुण्यसलिलेषु देहास्थिपातने नरकयातनाविमोक्षवर्णनम्, प्रायश्चित्तैर्धारातीर्थे देहपातनेन तथाऽन्यैरप्युपायैर्नरकयातनानिरसनोपायकथनम्.	२६३	१
२२८	चातुर्मास्ये जलशायिपूजनेन पापानिवृत्तिकथनम्, बिलद्वारे जलशायिशयनवर्णने हिरण्यकशिपुपुत्रप्रह्लादेन राज्यास्वीकारात्तत्कनिष्ठभ्रात्राऽन्धकेन राज्यस्वीकरणम्, अन्धकेन ब्रह्माणमाराध्य वरं लब्ध्वा देवपराजयकरणम्, तत्पराजितेन शक्रेण		

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अध्यायाः	विषयाः	प०	पृ०
	शंकराराधनकरणम्, तेनाराधनेन तुष्टेन शंकरेण अन्धकबोधनार्थं गणेशवीरभद्रादीनां प्रेषणम्, गणेशवीरभद्रादीनां वाक्यं निशम्य ब्रह्मदत्तवरप्रदानोद्धतेनान्धकासुरेण शंकराज्ञावमाननवर्णनम्.	२६४	१
२२९	ततः क्रुद्धेन शंकरेण वृषमारुह्यान्धकासुरेण सह युद्धं कर्तुममरावत्यामागमनम्, तत्रांधकासुरेण युद्धं कृत्वा तेनान्धकासुरेण कृतया प्रार्थनया भृंगिरिटीतिनाम्ना शैवगणगणनायां निवेशनकरणम्, भृंगिरिट्युत्पत्तिवर्णनम्.	२६५	१
२३०	स्वपितुरंधकस्य स्थितिं ज्ञात्वा तत्पुत्रेण वृकेण हाटकेश्वरे तपश्चर्याकरणम्, तत्तपसा तुष्टेन ब्रह्मणा तस्मै जरामरणवर्जितत्वरूपवरप्रदानम्, ततः शुक्रवचनात्सेन्द्रान्देवान्विजित्य तेषुतेषु देवाधिकारस्थानेषु दैत्यान्संस्थाप्य स्वयं वृकेण शक्राधिकारस्थाने स्वात्मानं संस्थाप्य त्रैलोक्यस्य राज्यकरणम्.	२६६	१
२३१	वृकस्य सांकृतिमहर्षिदत्तशापात्पंगुत्वप्राप्तिवर्णनम्, ततो वृकेण ब्रह्मदत्तवरेण सांकृतिमहर्षिद्वारा चातुर्मास्ये नैव पंगुत्वमित्यादिवरप्रदानम्, कस्मिंश्चित्प्रावृष्यपि लब्धपादो वृकासुर आयास्यतीति भिया शक्रेण वृहस्पतये सर्ववृत्तान्तकथनम्, वृहस्पतिवचनाद्देवानां चातुर्मास्ये प्राप्ते क्षीराब्धौ गमनम्, शक्रेण तत्र क्षीराब्धौ तपस्तप्त्वा विष्णोः प्रबोधनकरणम्, शक्रादिदेवानां दुःखनिवारणाय शेषशायिनो हाटकेश्वरे गमनम्, तत्र गत्वा तेन जलशायिना वृकोपरि शयनकरणेन वृकस्याचलनाच्छक्रस्याखण्डराज्यसुखप्राप्तिवर्णनम्, कार्तिकशुक्लैकादशीव्रतमाहात्म्यवर्णनम्.	२६६	२
२३२	चातुर्मास्यकर्तव्यनियमव्रतहोमजपदानादिफलकथनम्.	२६८	१
२३३	ब्रह्मनारदसंवादे चातुर्मास्यमाहात्म्ये प्रातःस्नानमाहात्म्यवर्णनम्, ततोऽपि गंगोदकस्नानफलमाहात्म्यवर्णनम्.	२६९	१
२३४	स्नानोत्तरं पितृतृप्तये पितृतर्पणफलकथनम्, ततो जपहोमादिकर्मोत्तरं गोविन्दनामस्मरणफलम्, चातुर्मास्यावश्यकनियमविधिवर्णनम्.	२७०	१
२३५	अन्नोदकमणिरत्नप्रवालरूप्यसुवर्णवस्त्रगोदानानां फलकथनम्, वेदपठनफलकथनम्, चातुर्मास्यादिहोमफलम्, आज्यदानवज्रदानघृतदानानां माहात्म्यकथनम्, दुग्धतक्रदानफलकथनम्, वस्त्रदानादिना सोमलोकादिलोकप्राप्तिकथनम्, चातुर्मास्यदानमहिमवर्णनम्.	२७०	२
२३६	चातुर्मास्ये त्याज्यग्राह्यभोजनपात्रनिर्णयकरणम्, त्याज्यात्याज्यवस्त्रधान्यवस्तुविचारफलवर्णनम्, असत्यभाषणादित्यागफलम्, इष्टवस्तुपरित्यागफलकथनम्.	२७१	१
२३७	विष्णुसंनिधौ विधिनिषेधकर्तव्यकालनिर्णयकरणम्, अर्घ्यमंत्रकथनपूर्वकार्घ्यदानफलकथनम्, विष्णुव्रतानां मध्ये ब्रह्मचर्यव्रतस्य श्रेष्ठत्ववर्णनम्, चातुर्मास्ये विशेषेण पालनीयधर्माधर्मनियमविवेचनम्....	२७१	२
२३८	चातुर्मास्ये विष्णुपूजनादितपःफलवर्णनम्, त्रिकालविष्णुपूजाकरणफलवर्णनम्, इन्द्रियानिग्रहादिनियमवर्णनम्, केवलं दुग्धाहारकारिणः फलकथनम्, तपोमहिमवर्णनम्.	२७२	२
२३९	विष्णुपूजायां षोडशोपचारविवेचनकरणे सृष्ट्युत्पत्त्यादिकथनम्, चातुर्वेदेषु षोडशर्चात्मकपुरुषसूक्तपठनफलकथनम्, विष्णुध्यानपद्धतिवर्णनम्, ॐकारपूर्वकप्रत्येकपुरुषसूक्तस्थमन्त्रेणावाहनादिषोडशोपचारपूजाक्रमवर्णनम्, तपोऽधिकारवर्णनपूर्वकं षोडशोपचारपूजामाहात्म्यवर्णनम्, दीपदानमहिमवर्णनम्.	२७३	२
२४०	दीपदानादिसायुज्यचिन्तनान्तभक्तिनिरूपणम्....	२७४	२
२४१	चातुर्मास्ये भगवत्षोडशोपचारपूजनादितपःकर्मणि सच्छूद्राद्यधिकारविचारप्रसंगे सच्छूद्रशब्दव्याख्याविवेचनकरणम्, तपोऽधिकारे सच्छूद्रकथनम्.... ...	२७५	१
२४२	अष्टादशप्रकृतीनां नामवर्णनपुरःसरं तासां धर्मकथनम्, तत्र ब्रह्मण उत्पत्तिकथनम्, विष्णुना ब्रह्मणे सृष्टिवृद्धिकरणार्थमादेशकरणम्, नभोवाणीश्रवणाद्ब्रह्मणा तपःकरणम्, चातुर्वर्ण्योत्पत्तिवर्णनम्, तेषां कर्माधिकारित्ववर्णनम्, शूद्रान्तर्गतवहुविधभेदविवरणम्, तेषां धर्माधर्मविवेचनम्, विष्णुभक्तिमाहात्म्यवर्णनम्. ...	२७६	१

CC-0. In Public Domain. Digitization by eGangotri

अध्यायाः	विषयाः	प०	पृ०
२४३	शूद्रजातिवर्णने पैजवनशूद्रोपाख्याने पैजवनस्य गृहे गालवर्षेरागमनम्, गालवस्य पैजवनकृतबह्वातिथ्यसत्कारवर्णनम्, गालवेन तुलसीमंजर्यादिमाहात्म्यकथनम, शालिग्रामशिलापूजनमाहात्म्यवर्णनम्.	२७७	१
२४४	गालवपैजवनसंवादे भगवतः केशवादिचतुर्विंशतिनामभेदपूर्वकपूजनक्रमविधिवर्णनम्, शालिग्राममूर्तिभेदवर्णनम्, शालिग्रामशिलासु मूर्त्युत्पत्तिवर्णनम्. ...	२७८	२
२४५	गण्डक्यां शालिग्रामशिलोत्पत्तिवृत्तान्तवर्णने दाक्षायण्या हिमालयसुतात्वप्राप्तिवर्णनम्, शिवपार्वतीविवाहवर्णनम्, कामकृतशिवस्तुतिवर्णनम्, तारकासुरप्रभृतिदैत्यैः पीडितानां सेन्द्रादिदेवानां ब्रह्माज्ञया शिवदर्शनार्थं मन्दराचले गमनम्.	२७८	२
२४६	शिवपार्वत्यो रहासि रतिक्रीडासमये देवप्रेषितवह्नेस्तत्रागमनम्, शिवदत्तं वीर्यं प्राश्य वह्नौ गते पार्वत्या स्वस्या रतिश्रमवैफल्यं दृष्ट्वा 'शिला भवत'इति सर्वेषां दिवौकसां शापप्रदानम्....	२८०	१
२४७	कस्मिंश्चित्समये दैत्यपराजितानां देवानां ब्रह्मलोके गमनम्, ततो ब्रह्मेन्द्रसंवादे रुद्रेण विष्णुगणैः सह स्वकीयानामैक्यं कर्तुं हरिहरार्धरूपधारणम्, तत्रैकस्मिन्देहे विष्णोर्वैनतेयादीनां शिवस्य वृषभादीनां चिह्नानामपि दर्शनकरणम्, विष्णुशिवस्वरूपस्यैकत्रदर्शनेन पाखंडिभिर्विस्मयकरणम्, मन्दरे देवैर्महेशविष्णुसंयुक्तायाः पापनाशिन्या मूर्तेः स्थापनम्, वह्निप्रमुखदेवानां मन्दरे विल्ववृक्षस्थां पार्वतीं तुलसीमञ्जरीस्थां लक्ष्मीं च दृष्ट्वा सर्वेषां शापमुक्तिवर्णनम्, अकस्मादाकाशवाण्या देवानुद्दिश्याश्वत्थोत्पत्तिपूर्वकाश्वत्थमाहिमवर्णनम्....	२८०	२
२४८	नभोवाण्या पलाशमाहात्म्यवर्णनम्, तत्र प्रतिदलेपु ब्रह्मादिदेवतानां स्थापनावर्णनम्.	२८१	२
२४९	तुलसीरोपणफलकथनम्, तुलसीदर्शनतुलसीपत्रभक्षणफलकथनम्, तुलस्याः प्रतिपर्णेषु देवतानां स्थापनवर्णनम्, तुलसीशुष्ककाष्ठधारणमाहात्म्यम, सर्वेन्द्रियेपु तुलसीवासकरणेन फलप्राप्तिकथनम्, तुलसीमाहात्म्यवर्णनम्.	२८२	१
२५०	जयापार्वतीसंवादे विल्वोत्पत्तिवर्णने विल्ववृक्षस्य दर्शनस्पर्शनसेवनादिफलकथनम्, विल्ववृक्षस्य प्रत्यवयवेषु भिन्नभिन्नदेवतानां स्थापनादिवर्णनम्, विल्ववृक्षस्य कंटकस्थदेवतानां वर्णनम्, विल्वोत्पत्तिवर्णनम्.	२८२	१
२५१	नभोवाण्यां विरतायां विल्वाश्वत्थपलाशतुलस्याख्यचतुर्वृक्षाणां चातुर्मास्ये सेन्द्रैर्देवैः पूजनकरणम्, तुष्टेन हरिहरात्मकेनेश्वरेण दैत्याञ्जित्वा देवान्प्रति स्वस्वस्थाने गन्तुमाज्ञाकरणम्, ततो देवैर्देवीदत्तशापं स्मृत्वा तच्छापनिवृत्त्यर्थं माहेश्वरीपूजनेन माहेश्वरीस्तवनेन च देवानां गण्डकीनद्यामेव शालिग्रामेति नाम्ना शिलात्वप्राप्तिवर्णनम्, शालिग्रामशिलामाहात्म्यवर्णनम्.	२८२	२
२५२	चातुर्मास्ये तिलदानमाहात्म्यवर्णनम्, चतुर्षु वृक्षेपु देवतानां स्थापनम्, अन्येपु प्रत्येकैकवृक्षविशेषेपु शक्रवरुणयमकुवेरादीनां देवानां यथानुक्रमेण स्थापनम्, वृक्षमाहात्म्यवर्णनम्.	२८३	२
२५३	शंकरकृतपार्वत्यनुनयवर्णनम्.	२८४	२
२५४	चातुर्मास्ये देवानां मन्दराचले ब्रह्मचर्यव्रतपरस्य हरस्याग्रे गमनम्, ततो हरेण 'पार्वतीसंतोषणार्थं ममं साहाय्यार्थमागन्तव्यम्' इत्युक्ते तदुक्तं स्वीकृत्य देवानां स्वंस्वं निकेतनं प्रति गमनम्, तत आपाढशुक्लचतुर्दश्यां भवानीतोषणाय हरेण नृत्यकरणम्, तत्र नृत्यप्रसंगे मन्दरे ब्रह्मादीनां देवानां नारददेवलव्यासादीनां महर्षीणां चागमनम्, तस्मिन्समग्रे हरेण चिन्तितानां श्रीरागादिरागाणां च तत्रागमनम्, तत्र हरनृत्ये प्रवर्तमाने नारदादिभिर्ब्रह्मादिभिश्च साहाय्यकरणम्, हरनृत्येन तुष्टया पार्वत्या हरस्तोत्रकरणम्, हरताण्डवनर्तनवर्णनम्. ...	२८५	१
२५५	लक्ष्मीनारायणमहिमवर्णनम्.	२८७	१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अध्यायाः	विषयाः	प०	पृ०
२७०	प्रायश्चित्तमकुर्वतां जनानां कथं पापमुक्तिरित्याद्यानर्तराजप्रश्ने भर्तृयज्ञेन स्वर्णनिर्मितपापपिंडप्रदानफलकथनम्, तत्र मण्डपादिकं विधाय पृथ्व्यादिदेवानामासमन्तात्स्थापनवर्णनम्, समन्त्रकपूजाविधिकथनम्, पापपिंडदानोदर्ककथनम्. ...	३०५	१
२७१	इन्द्रद्युम्नेश्वरमाहात्म्यवर्णनप्रसङ्गेनेन्द्रद्युम्नस्य विष्णुप्रसादेन सदेहस्वर्गगमनवृत्तान्तवर्णनम्, ब्रह्मलोकं गतस्येन्द्रद्युम्नस्य बहुकालं तत्र निवासानन्तरं ब्रह्मणा चिरकालाद्भूमौ कीर्तेः पुनर्व्यक्तीकरणार्थमिन्द्रद्युम्नस्य भूलोकं प्रति प्रेषणम्, भूलोकं प्रत्यागतेनेन्द्रद्युम्नेन भूलोकस्थितस्य दीर्घजीविनो मार्कण्डेयस्य प्रश्नकरणम, इन्द्रद्युम्नेन स्वकीर्तिपरिज्ञानार्थं रोचकपुरसंबंधिवार्तां कथयितुमसमर्थाञ्जनान्दृष्ट्वा कांपिल्यपुरवासिवचनादिन्द्रद्युम्नस्य मार्कण्डेयेन साकं नाडीजंघवकसमीपे गमनम्, नाडीजंघदर्शनेन समुत्सुकाभ्यामिन्द्रद्युम्नमार्कण्डेयाभ्यां स्वागमनकारणकथनेन नाडीजंघेन स्वकीयवृत्तान्तकथनम्, तत्र प्राग्जन्मनि शापाद्बकत्वप्राप्त्यादिकथनम्, प्रतिमकरसंक्रमणे लिंगोपरि घृताच्छादनेन तुष्टेन शिवेन बकाय वरप्रदानवर्णनम्, ततो निराशस्येन्द्रद्युम्नस्य वार्ताविज्ञानार्थं नाडीजंघेनात्मनोऽप्यपेक्षया दीर्घायुषः प्राकारकर्णनामकस्योलूकस्य समीपे मार्कण्डेयेन्द्रद्युम्नयोर्नयनम्, तेन प्राकारकर्णोलूकेनापीन्द्रद्युम्नवार्तानभिज्ञानकथनोत्तरमिन्द्रद्युम्नप्रश्ने निजदीर्घायुष्ककारणकथनम्, निजवार्तानभिज्ञानादुदासीनस्येन्द्रद्युम्नस्य कृते नाडीजंघेनेन्द्रद्युम्नवार्ताविज्ञानस्यावश्यकताप्रदर्शने प्राकारकर्णोलूकेनात्मनोऽपि दीर्घायुषो गन्धमादनस्थस्य गृध्रस्य समीपं प्रतीन्द्रद्युम्नमार्कण्डेयनाडीजंघबकानां नयनम्, तेन गृध्रेणापीन्द्रद्युम्नवार्तानभिज्ञानवर्णनपूर्वकं निजदीर्घायुष्ककारणवृत्तान्तकथनम्, निजवार्तानभिज्ञानादुदासीनस्येन्द्रद्युम्नस्याग्निप्रवेशोद्योगं दृष्ट्वा प्राकारकर्णप्रार्थनया गृध्रेणात्मनोऽपि दीर्घायुषो मानससरोनिवासिनः कूर्मस्य समीपं प्रतीन्द्रद्युम्नमार्कण्डेयनाडीजंघप्राकारकर्णानां नयनम्, तत्र सरस्तीरे समागतानां तेषां मध्य इन्द्रद्युम्नं नृपं दृष्ट्वा कूर्मस्य तानसत्कृत्यैव जलमध्ये प्रवेशकरणम्, ततो गृध्रेण तस्मै जलप्रवेशकारणपृच्छायां तेन कूर्मेणेन्द्रद्युम्नस्य पूर्वसमस्तवृत्तान्तकथनादिन्द्रद्युम्नस्य कीर्त्युद्धारे जाते सतीन्द्रद्युम्नोपरि देवैः पुष्पवृष्टिकरणम्, ततस्तस्मिन्नेव समये देवदूतेन विमानमानीयेन्द्रद्युम्नं प्रति ब्रह्मलोकं प्रति गमनाय प्रार्थनाकरणम्, इन्द्रद्युम्नेन ब्रह्मलोकं प्रति गन्तुं स्वस्यानिच्छां प्रदर्श्य कूर्मं प्रति तस्यैव दीर्घायुष्ककारणजिज्ञासया प्रश्नकरणम्; कूर्मेण निजपूर्ववृत्तान्तकथनपूर्वकमिन्द्रद्युम्नादीनामातिथ्यकरणम्, ततः षड्भिस्तैर्लोमशमहर्षिणा सह समागमं कृत्वा लोमशस्य दीर्घायुष्ककारणं ज्ञात्वा तैः सर्वैः सप्तभिः स्वस्वनाम्ना लिंगस्थापनम्, ततः सप्तलिंगोत्पत्तिवर्णनम्.....	३०५	२
२७२	आयुःप्रमाणवर्णने निमेषादारभ्य कृतादिचतुर्युगकालप्रमाणवर्णनम्, अग्निष्टोमादिकर्मभिर्देवलोकब्रह्मलोकादिप्राप्तिवर्णनम्, चतुर्युगेषु लोकानां परिस्थितिधर्मादिवर्तनवर्णनम्, तत्प्रसंगेन विशेषतः कलिकालनिर्णयकरणम्.	३१५	१
२७३	ब्रह्मविष्ण्वादीनामायुःप्रमाणवर्णनम्, चान्द्रसौरमासप्रमाणवर्णनम्, नाक्षत्रमासप्रमाणकथनम्, युगप्रमाणवर्णनम्.	३१६	२
२७४	दुर्वाससः कथाप्रसंगे निंबशुचनामकस्य कस्यचिन्मठपतेरग्रतः स्थितां द्रव्यपूरितां मंजूषां ग्रहीतुं केनाचिल्लुब्धकेन तद्विश्वासार्थं निंबशुचशिष्यत्वं स्वीकृत्य कपटेन वर्तनम्, त ा बहुकाले गते कस्मिंश्चित्समये शिष्येण सह निंबशुचस्य मुरलानद्यामागमनम्, तत्र स्वकंथां शिष्यहस्ते निधाय ततोऽतिदूरं मूत्रपुरीषोत्सर्गादिकं विधातुं निंबशुचस्य गमने तां कन्थां गृहीत्वा लुब्धकशिष्यस्य पलायनम्, निंबशुचाख्येन मठपतिना तज्ज्ञात्वा शोककरणम्, ततो दुःशीललुब्धकेन तद्द्रव्यसाहाय्येन व्यापारं कृत्वा दारपरिग्रहोत्तरं स्वस्यापुत्रत्वं दृष्ट्वा पुत्रप्राप्त्यर्थं भार्यया समं चमत्कारपुरे गमनम्, तत्र दुर्वाससा समागमं कृत्वा दुर्वाससं प्रति प्राक्कृतसर्वकपटादिस्वकीयगर्हितकर्म विनिवेद्य दुर्वासोवचसा दुःशीलेन		

CC-0. In Public Domain. Digitization by eGangotri

अध्यायाः	विषयाः	प०	पृ०
२५६	शिवपार्वतीसंवादे चातुर्मास्ये विष्णोर्द्वादशाक्षरमंत्रजपस्य रामेति द्व्यक्षरमंत्रजपस्य च माहात्म्यवर्णनम्. ...	२८८	१
२५७	ईश्वरपार्वतीसंवादे शंकरेण द्वादशाक्षरमाहात्म्यवर्णनम्, शिववचनात्पार्वत्या तपश्चरणवर्णनम्. ...	२८९	१
२५८	तपः कर्तुं गतायां पार्वत्यां कामाकुलितस्य शिवस्य स्नानार्थं यमुनायां गमनम्, तत्र शिवकृतस्नानेन तन्नीरस्य हरकायात्कृष्णत्वप्राप्तिं दृष्ट्वा दुःखितया यमुनया शिवस्तवनकरणम्, यमुनाप्रार्थनया हरेण हरतीर्थस्थापनम्, केनचित्कारणान्तरेण विप्रस्त्रीतः शापं प्राप्तेन शिवेन कैलासं गत्वा देवीस्तोत्रकरणम्. ...	२८९	२
२५९	विप्रस्त्रीभिर्दत्तेन हरस्य शापेन दुःखितानां देवानां हरसमीपे गमनम्, ततोऽमरकण्टकतीर्थस्थापनं तन्माहात्म्यवर्णनं च तत्र देवैर्नीलवृषस्थापनम्, नीलवृषस्तुतिकरणम्. ...	२९०	२
२६०	चातुर्मास्यकथासंक्षेपसारांशकथनम्. ...	२९२	१
२६१	कार्तिकस्वामिजन्मकथनम्, षडाननस्य शंकरपार्वत्यौ नत्वा नदनदीपतींस्तीर्त्वा विमानमारुह्य गमनम्, ततः शिवस्य विष्णुदर्शनार्थं प्लक्षादिसप्तद्वीपसमुद्रानतीत्य विष्णुं दृष्ट्वा विष्णुस्तवनम्, तत्प्रसंगेन ध्यानयोगवर्णनम्. ...	२९२	१
२६२	पार्वत्या ध्यानयोगं प्राप्य ज्ञानयोगं प्राप्तुं शिवस्य प्रार्थनायां कृतायां तेन शिवेन द्वादशाक्षरमंत्रेण ज्ञानयोगप्राप्तिकथनम्, द्वादशाक्षरमंत्रस्य प्रत्यक्षरबीजवर्णनम्, विष्णुस्वरूपवर्णनम्, भगवद्विराट्स्वरूपवर्णनम्, ज्ञानयोगकथनम्.... ...	२९३	२
२६३	शिवेन पार्वत्यै मन्त्रोपदेशकरणम्, योगिपुरुषाणां मुख्यसारतत्त्ववर्णनम्, पार्वत्युत्संगस्थितस्य मत्स्यजातस्य सुतस्य मत्स्येन्द्रनाथेति शिवेन नामाभिधानकरणम्, मत्स्येन्द्रनाथोत्पत्तिवर्णनम्. ...	२९५	१
२६४	तारकासुरपीडितदेवानां प्रार्थनया कार्तिकेयस्य देवसेनाधिपत्येऽभिषेकपूर्वकं तारकासुरेण सह युद्धवर्णनम्, तत्र तारकासुरवधवर्णनम्, देवैः कार्तिकेयस्तवकरणम्.	२९६	२
२६५	भीष्मपञ्चकमाहात्म्यवर्णनम्, भीष्मपञ्चकपूजनपद्धतिवर्णनम्, तत्र भगवत्प्रार्थनावर्णनम्, अशून्यशयनव्रतमाहात्म्यवर्णनम्. ...	२९७	१
२६६	मंकणेश्वरतीर्थमाहात्म्यवर्णनम्, शिवरात्र्यां कस्यचिच्चौरस्य देवालये जागरार्थं प्राप्तानां स्त्रीपुरुषाणां धनहरणार्थं गत्वा तत्समीपस्थितकर्णिकारद्रुममारुह्यावस्थितिकरणम्, तस्य कर्णिकारवृक्षस्याधस्तात्स्थितस्य धरोद्भूतस्य शिवलिंगस्योपरि तेन चौरेणाज्ञानात्कर्णिकारवृक्षपत्राणां हस्तेन विच्छिद्य प्रक्षेपणम्, तस्यां रात्रौ परधनजिहीर्षयाप्यनायासेन तस्य जागरणम्, तेन ज्ञानं विनापि जायमानेन शिवपूजनेन तस्य चौरस्य चौरभावाद्विमुक्तिः शुद्धसात्त्विकस्वभावताप्राप्तिश्च, ततस्तेन शुद्धमनसा शिवपूजाकरणम्, तत्प्रसंगेन शिवपूजाविधिकथनम्, शिवरात्रिपूजनजागरादिमाहात्म्यवर्णनम्, ततः पञ्चत्वं गतस्य चौरस्य दशार्णाधिपतेः कुले तत्पुण्यप्रभावेण जननम्, तस्य राज्यप्राप्तिवर्णनम्, दशार्णाधिपतेर्गृहे शांडिल्यपुलस्त्यादिमहर्षीणामागमनम्, ऋषिभी राज्ञे मङ्गलाशीर्वादादिदानम्, शिवरात्रिमाहात्म्यवर्णनं च. ...	२९८	१
२६७	सिद्धेश्वरमाहात्म्यवर्णनम्, तुलापुरुषदानकालनिर्णयः, तुलापुरुषदानविधिवर्णनम्, तुलापुरुषदानमाहात्म्यवर्णनम्. ...	३००	१
२६८	चक्रवर्तित्वप्रापकोपायकथनम्, तत्र हिरण्मयीभूमिदानस्य समन्त्रकसाग्रविधिकथनम्, भूदानफलमाहात्म्यकथनम्, गौतमेश्वरमाहात्म्यकथनम्. ...	३०१	१
२६९	इन्द्रस्थापितकपालेश्वरमाहात्म्यवर्णनम्, तत्र वृत्रासुरजन्म, राज्यप्राप्त्याद्यनन्तरं वृत्रासुरहननेन ब्रह्महत्याव्याकुलितस्य शक्रस्य ब्रह्महत्यादोषदूरीकरणार्थं ब्रह्मवाक्योपरि विश्वस्याष्टषष्टिषु तीर्थेषु गमनम्, इन्द्रस्य हस्ताद्विश्वामित्रह्रदे कपालपतनाद्ब्रह्महत्यानिवारणम्, तत्रैव लिंगस्थापनम्, तस्य माहात्म्यवर्णनम्, तत्रैव वातफब्राह्मणस्थापितवातकेश्वरोत्पत्तिपूर्वकमाहात्म्यवर्णनं च. ...	३०१	२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अध्यायाः	विषयाः	प०	पृ०
	दानादिकरणं स्वनाम्ना लिंगस्थापनं च, एवं तस्य लिंगस्य दुःशीलेश्वरसंज्ञाप्राप्तिकारणवृत्तान्तवर्णनम्, दुःशीलेश्वरदुर्वाससेश्वरयोर्माहात्म्यवर्णनम्.	३१७	१
२७५	दुःशीलेन स्वगुरोर्निंबशुचस्योद्देशेन निंबेश्वरेतिनाम्ना लिंगस्थापनम्, ततो दुःशीलस्य भार्यया शाकंभरीनाम्न्या शाकंभरीदुर्गास्थापनम्, ततो दुःशीले पञ्चत्वं गते दुःशीलभार्यया शाकंभर्या तेन दुःशीलेन सहाग्नौ प्रवेशकरणम्, दुःशीलेश्वरनिंबेश्वरशाकंभर्युत्पत्तिवर्णनम्.	३१९	२
२७६	एकादशरुद्रवर्णने हाटकेश्वरक्षेत्रं द्रष्टुमहमहमिकयैकादशमहर्षीणामागमनम्, तदा शिवेन सर्वेषां युगपद्दर्शनलाभार्थमेकादशरूपधारणम्, तदेकादशविधं शिवरूपं दृष्ट्वा मुनिभिः स्तुतिकरणम्, तत्रैवैकादशरुद्राणां स्थापनम्, एकादशरुद्रोत्पत्तिमाहात्म्यवर्णनम्.	३१९	२
२७७	एकादशरुद्राणां नामकीर्तनम्, एकादशरुद्रसमीपे दानमाहात्म्यवर्णनम. ...	३२०	२
२७८	द्वादशादित्यवर्णनप्रसंगेन ब्रह्मकृतयज्ञप्रस्तावे शक्रेण ब्रह्मपत्नीत्वेन कर्तुं गोपकन्याया गोवक्त्रेण निष्कास्यानयनम्, गायत्रीब्रह्मणोर्विवाहोत्तरं सावित्र्या आगमनम्, ततः पितामहस्य सावित्रीदत्तशापेन शुनःशेपप्रपौत्रस्य चारायणस्य गृहे याज्ञवल्क्येतिनाम्ना जन्मग्रहणम्, परस्त्रीलम्पटत्वरूपदुर्व्यसनार्तं तं दृष्ट्वा तस्य याज्ञवल्क्यस्य पितामहेन चारायणेन याज्ञवल्क्यस्य स्वाश्रमान्निःसारणम्, ततः शाकल्यस्य शिष्यत्वं प्राप्य तस्य गृहे निवासकरणम्, ततः कदाचिच्छिष्यानुक्रमेणैकदा तस्य याज्ञवल्क्यस्य राजगृहे शांतिपूर्वकमाशीःप्रदानार्थं गमने राज्ञाऽपमानकरणम्, ततः पश्चात्तापवता राज्ञा पुनरपरेद्युस्तस्य याज्ञवल्क्यस्यैव राजमंदिरे प्रेषणार्थं प्रार्थनायां कृतायां राजगृहे गन्तुं तस्य याज्ञवल्क्यस्य गुरुणाज्ञाकरणम्, तां गुर्वाज्ञामुल्लंघ्य याज्ञवल्क्यस्य तस्य राज्ञो गृहे गमननिषेधनम्, ततो याज्ञवल्क्येन क्रुद्धस्य तस्य गुरोरतिनिर्बंधात्तस्मादधीतां विद्यां वमनेन निरुद्गीर्य गुरवे तद्विद्याया निवेदनम्, ततो विद्याप्राप्त्यर्थं सूर्याराधनाकरणम्, ततः सूर्यतो विद्यां लब्ध्वा सूर्यं संमान्य सूर्याज्ञापालनं प्रतिज्ञाय शाकल्यगुरुसमीपे गुरुदक्षिणां दातुं याज्ञवल्क्यस्यागमनम्, ततः सूर्यप्राप्तां विद्यां गुरुदक्षिणात्वेन शाकल्याय कथयित्वा सशिष्येण शाकल्येन समं याज्ञवल्क्यस्य द्वादशादित्यसंनिधौ गमनम्, द्वादशादित्योत्पत्तिरत्नादित्योत्पत्तिमाहात्म्यवर्णनपूर्वकं याज्ञवल्क्यवृत्तान्तवर्णनम्.	३२१	१
२७९	स्कान्दमहापुराणागमपरंपराकथनम्, तत्र नागरखण्डोपसंहारवर्णनम्, नागरखण्डवैभववर्णनम्, नागरखण्डफलश्रुतिकथनम्, गुरुशिष्याधिकारवर्णनम्, पौराणिकव्यासाधिकारवर्णनम्.	३२४	१

॥ इति श्रीस्कान्दे महापुराणे षष्ठं नागरखण्डम् ॥ ६ ॥

॥ अथश्रीस्कान्दे महापुराणे सप्तमं प्रभासखण्डम् ॥ ७ ॥

॥ अथ प्रभासखण्डे प्रथमं प्रभासक्षेत्रमाहात्म्यम् ॥ (७-१) ॥

अध्यायाः	विषयाः	प०	पृ०
१	मंगलाचरणम्, सूतशौनकसंवादप्रसंगवर्णनम्, कथाश्रवणेऽधिकार्यनधिकारिवर्गवर्णनम्, शौनकादिभिः सूतं प्रति प्रश्नकरणम्.	१	१
२	कथालक्षणं कथागुणदोषवर्णनं च, आर्षपौरुषेयकाव्यचिह्नपरीक्षणवर्णनम्, अष्टादशपुराणनामानुक्रमवर्णनम्, उपपुराणनामानुक्रमवर्णनम्, महापुराणस्थश्लोकसंख्यावर्णनम्, अष्टादशमहापुराणपुस्तकदानविधिमाहात्म्यवर्णनम्.	२	२
३	कैलासपर्वतवर्णनम्, तत्र शिवसभावर्णनपूर्वकशिवसिंहासनवर्णनम्, ततो देव्या शिवस्तवनम्, शिवपार्वतीसंवादः, ततः श्रीशिवेन पार्वतीं प्रति विभूतियोगवर्णनम्, ततस्तीर्थमाहात्म्यवर्णनम्, तत्र विशेषतः प्रभासक्षेत्रमाहात्म्यवर्णनम्, प्रभासक्षेत्रस्थतीर्थमाहात्म्यश्रवणेच्छया पार्वत्या शंकरं प्रति प्रश्नकरणम्. ...	५	१

CC-0. In Public Domain. Digitization by eGangotri

अध्यायाः	विषयाः	प०	पृ०
४	पार्वतीपृष्टेन शंकरेण पार्वत्यै प्रभासक्षेत्रसीमाक्षेत्रप्रमाणक्षेत्रमहत्त्वप्रमाणकथनम्, प्रभासक्षेत्रयात्रानुक्रमवर्णनम्, माहेश्वरवैष्णवब्राह्माख्यभेदत्रयेण यात्रावर्णनम्, तत्र त्रिशक्तीनामपि वर्णनम्, मृत्युंजयादिजपफलवर्णनम्, प्रभासक्षेत्रे निवसतां महापापिनामपि मोक्षप्राप्तिवर्णनम, प्रभासक्षेत्ररक्षणकारिणां शैवगणानां माहात्म्यवर्णनम्.	८	१
५	मरीच्यादिमहर्षीणां देवानां देवर्षीणां सर्वतीर्थानां गंगादिपुण्यसरितां च प्रभासक्षेत्रे वास्तव्यवर्णनम्, प्रभासक्षेत्रे पिण्डदानप्रशंसायाः समासेन वर्णनम्, प्रभासक्षेत्रे नानाविधदानमाहात्म्यवर्णनम्, क्षेत्रस्थर्षिदेवगणवर्णनम्.	१०	२
६	सोमेश्वरमाहात्म्यवर्णने सोमेशस्य पञ्चवक्त्रादिचिह्नितस्वरूपवर्णनम्, सोमेशस्तवनम्, पूर्वाह्णाद्यष्टकालेषु भिन्नत्वेन सोमेशस्यगर्गादिमयत्वेन वास्तवस्वरूपवर्णनम्, सोमेशमाहात्म्यवर्णनम्.	११	२
७	सोमेशोत्पत्तिवर्णने सप्तमे ब्रह्मणि वर्तमाने समुत्पन्नस्य लिंगस्य सोमनाथेतिलिंगनाम्नि कथिते पार्वतीवचनाच्छंकरेण तत्कालीनानां सर्वेषां ब्रह्मप्रजापतीनां नामतोऽनुक्रमेण वर्णनम्, तथैव सोमेशस्य तत्प्रसंगे भिन्नत्वेन नामवर्णनम्, शंकरेण पार्वतीं प्रति प्रतिकल्पसंभूतावतारवर्णनपूर्वकतत्तत्कल्पगतपार्वतीनामनिर्देशकथनम्, ततः शतानन्दाख्ये सप्तमे ब्रह्मणि चन्द्रेण शिवमाराध्य प्रभासे शिवतो वरं लब्ध्वा स्वनाम्ना सोमेश्वरलिंगस्थापनम्, प्रभासस्थलास्थितिविस्तारकथनम्, तत्र देविकान्यंकुमतीक्षेत्रपीठगर्भगृहगोमुखाश्वमेधकादिशिवगृहस्थानवर्णनम्, सोमेशस्यासमंततः सर्वतीर्थानां माहात्म्यवर्णनम्, सोमनाथप्रादुर्भाववृत्तान्तवर्णनम्. ...	१२	२
८	पुनः सोमेशमाहात्म्यकथने सोमेशलिंगत ऋद्ध्याद्यष्टसिद्धीनां गारुडादिमन्त्रविद्यानामुत्पत्तिवर्णनम्, अस्य सोमेशस्याराधनेन मुक्तिं गतानां गुण्डमुण्डादीनां यथानुक्रमेण वर्णनम्, सोमेश्वरैश्वर्यवर्णनम्.	१४	२
९	शिवेन स्वेन मुण्डमालाधारणस्य कारणकथनम्, ब्रह्मविष्ण्वादीनां प्रतिकल्पे मत्तो जननमिति शिवेन कथनम्, कोटिकल्पे व्यतीतेऽपि शिवस्य प्रभासाख्यपुण्यक्षेत्रे नित्यत्वेन वासकरणम्, तच्छिववचः श्रुत्वा विस्मितया देव्या शिवस्तवनकरणम्, तत्स्तवनेन संतुष्टेन शिवेन 'प्रभासक्षेत्रस्थानां लिंगानां साद्यन्तं माहात्म्यं कथयिष्यामि' इति पार्वत्यै वरदानम्, पार्वत्या विष्णोर्मत्स्यादिदशावतारविषयकप्रश्नकरणम्, ततः शंकरेण प्रभासे ब्रह्मादीनामावासवर्णनम्, हरिस्थितिवर्णनम्.	१५	२
१०	पञ्चमहाभूतेषु पञ्चदेवतानां स्थानवर्णनम्, छागलण्डादिप्रभासक्षेत्रस्थविष्णुदेवताकेश्वरलिंगतीर्थानामनुक्रमेण वर्णनम्, प्रभासस्थानेकलिंगतीर्थमाहात्म्यवर्णनम्, प्रभासक्षेत्रस्य सर्वक्षेत्रोत्तमत्ववर्णनम्.	१६	२
११	जम्बूद्वीपवर्णने तदासमन्तादष्टकुलपर्वतानां वर्णनम्, जम्बूद्वीपविस्तारसीमानवधाभेदाख्यानवर्णनम्, तत्र भारतवर्षस्य कर्मपुण्यभूमित्वेन श्रेष्ठत्ववर्णनम्, कूर्मरूपेण स्थितस्य भारतस्योपरि नक्षत्रग्रहविन्यासवर्णनम्, भारतस्य नवमे प्राभासिकाख्ये द्विशतयोजनपरिमिते भागे शिवावासवर्णनम्, प्रभासक्षेत्रचिह्नानां वर्णनम्, प्रभासक्षेत्रस्य व्युत्पत्तिबलादीश्वरपरशब्दार्थकरणम्, तत्स्थानस्य प्रभासेति नामकरणे हेतुवर्णनम्, तत्र आदिक्षेत्रमाहात्म्यवर्णनम्, स्वायंभुवे मनौ वर्तमाने भगवतः सूर्यस्य कान्त्या सह ब्रह्मणो लोचनादुत्पत्तिवर्णनम्, सूर्यभूमिसंगमाज्जलस्योत्पत्तिवर्णनम्, ततः सस्यानामुत्पत्तिस्ततो मनुष्यादीनामुत्पत्तिस्ततः स्वाहास्वधाकारैस्तृप्तैर्देवैरोषधीनां समुत्पादनम्, मरीच्यादिब्राह्मणानां हिरण्यकशिप्वादिदैत्यानां चोत्पत्तिवर्णनम्, हिरण्यकशिपोः सकाशात्प्रह्लादस्य जननम्, प्रह्लादपुत्रस्य विरोचनस्य भगिन्यां विश्वकर्मणः सकाशात्सुरेणुनामककन्याया उत्पत्तिवर्णनम्, सूर्यतेजोऽसहमानया संज्ञया छायायाः सूर्यसमीपे स्थापनानंतरं तपोऽर्थं गमनम्, रविदर्शनेन सुरेण्वा नेत्रनिमीलने कृते क्रुद्धेन सूर्येण सुरेणुनाम्न्यै पत्न्यै शापदानम्, ततः सुरेणोः स्वपितुर्गृहे गमनम्, ततः स्वागमनकारणकथनोत्तरं पित्राज्ञया पुनः सुरेण्वाः सूर्यसमीपे गमनम्, ततो यमयमुनाशनैश्वर-		

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अध्यायाः	विषयाः	प०	पृ०
	श्राद्धदेवानामुत्पत्तिवर्णनम्, केनचित्कारणान्तरेण स्वश्वश्रूं शप्तुं सूर्यस्य विश्वकर्मगृहे आगमनम्, विश्वकर्मणा सूर्यस्य सानन्दमातिथ्यादिकं विधाय सांत्वनकरणम्, ततो विश्वकर्मणा सूर्यं प्रार्थ्य तस्य तेजःशातनं कर्तुं समारंभे क्रियमाणे सप्तर्षिभिः सूर्यस्य स्तवकरणम्, विश्वकर्मणा सूर्यस्तोत्रकरणम्, हाहाहूहूनारदतुंवर्वादिभिर्गायनकरणम्, मेनकाद्यप्सरोभिः सूर्यस्य स्तोत्ररूपेण गायनारंभकरणम्, नानाविधवाद्यवादनम्, तपः कर्तुं गतायां वडवारूपधारिण्यां संज्ञायां घोटकरूपधारिणः सूर्यादश्ववक्त्रयोरश्विनीकुमारयोर्जन्मवर्णनम्, राजभट्टारिकोत्पत्तिवर्णनं च.	१८	१
१२	यमस्योत्पत्तिवर्णनम्, मात्रा शप्तस्य पंगुत्वं गतस्य यमस्य प्रभासक्षेत्रे गमनम्, तत्र शिवमाराध्य शिवप्रसादेन पंगुत्वं निरस्य शिवाज्ञया तत्र लिंगस्थापनम्, यमेश्वरलिंगमाहात्म्यवर्णनम्.	३३	१
१३	शाकद्वीपे भ्रमिस्थस्य रवेर्विश्वकर्मणा तक्षणे कृते सत्यनन्तरं विभावसोर्हिरण्यगर्भनाम्ना भूम्यामवतरणम्, कृतत्रेताद्वापरकलिषु सूर्यसवितृभास्करार्कस्थलेति नामभिस्तस्य प्रसिद्धिः, अर्कमाहात्म्यवर्णनप्रसङ्गेनार्कपत्रभक्षणनिषेधकथनम्, अर्कस्थलतीर्थे महिष्यादिदानमाहात्म्यवर्णनम्, प्रभासपवित्रनामकरणार्कस्थलोत्पत्तिवृत्तान्तवर्णनम्.	३३	१
१४	अर्कस्थलपूजनमन्त्रकथनपूर्वकपूजनकालादिवर्णनम्, सिद्धेश्वरजैगीषव्येश्वरमाहात्म्यकथने जैगीषव्यस्य प्रभासे तपःकरणम्, निराहारादिकृच्छ्रचान्द्रायणादीनि विदधतस्तस्य दीर्घतपसा तुष्टेन स्थाणुना तस्मै जैगीषव्याय ज्ञानयोगप्रापकवरप्रदानम्, जैगीषव्येश्वरसिद्धेश्वरलिंगयोर्जैगीषव्येन स्थापनाकरणम्, जैगीषव्येश्वरसिद्धेश्वरमाहात्म्यवर्णनम्.	३४	१
१५	पापनाशनोत्पत्तिमाहात्म्यवर्णनम्.	३४	१
१६	पातालस्थितैः राक्षसैस्तेजसा ग्रस्तं त्रैलोक्यं दृष्ट्वा प्रभाकरेण भगवच्चिन्तनं कृत्वा क्रोधाध्मातेन चक्षुषा दृष्टानां राक्षसानां भूमावाकाशतः पतनम्, ततस्तेषां राक्षसानां पाताले गमनम्, ततस्तत्पातालबिलद्वारे लिंगस्थापनम्, त्रिसंगमे स्नानदानफलमाहात्म्यवर्णनम्, तस्य श्रीमुखद्वारेतिनाम्ना प्रसिद्धिकरणम्, पातालविवरसुनन्दादिमातृगणोत्पत्तिवर्णनम्, सुनन्दादीनां पूजाविधानमाहात्म्यकथनम्.	२४	२
१७	अथार्कस्थलपूजाविधिकथनम्, तत्रादित्यस्य त्रयीमयत्ववर्णनम्, प्रथमं दन्तधावने ग्राह्याग्राह्यकाष्ठनिर्णयः, दन्तधावनप्रकारकथनम्, मुखशुद्धिमकृत्वा भास्करस्पर्शनदर्शनेन कुष्ठत्वप्राप्तिवर्णनम्, अर्कस्थले स्नानादिविधानकथनम्, सूर्यस्य महामन्त्रकथनपूर्वकं जपफलकथनम, उदुत्यमित्युपस्थानकथनम्, अग्निंदूतमाकृष्णेनेत्यादिभिः षोडशोपचारैरादित्यार्चाविधानकथनम्, समन्ततः शृंगपीठदेवतादिपूजाकथनम्, नानाविधमण्डलदानादिकथनम्, अर्कस्थलस्तवनपूर्वकमाहात्म्यंवर्णनम्....	२५	१
१८	शिवशिरोभूषणचन्द्रोत्पत्तिवृत्तान्तवर्णनप्रसंगेन वाराहकल्पवृत्तान्तवर्णनम्, तत्र चतुर्दशरत्नोत्पादनाय समुद्रे मथ्यमाने ततो हिमांशोरुत्पत्तिवर्णनम्, तस्य चंद्रस्य शिवेन शिरसा धारणकरणम्, चन्द्रस्य मस्तके धारणकरणाच्छशिभूषणेति शिवस्य नामप्रसिद्धिः.....	२९	२
१९	षोडशतिथ्यनुक्रमेण चन्द्रषोडशकलानां वर्णनम्, त्रुट्याद्यिब्रह्माण्डान्तकालचक्रवर्णनम्, ब्रह्मणः प्रथमे परार्धे ब्रह्मविष्ण्वीशानां समासेन चरित्रवर्णनम्, ततो द्वितीये परार्धे दक्षादीनामुत्पत्त्यादिवर्णनपूर्वकं सप्तर्ष्यादीनामुत्पत्तिकथनम, चंद्रदत्तात्रेयाद्यवतारकथनम्, विष्णोर्दशावतारादीनां युगपर्यायेण वर्णनम्, कृतयुगारंभसूचकशुभशकुनवर्णनम्, व्यासाद्यवतारवर्णनम्.	३०	१
२०	दैत्यावताराणां क्रमकथने हिरण्यकशिपुना शक्रादिलोकाञ्जेतुं गर्ते स्थित्वा तपःकरणम्, तेन त्रैलोक्यजयित्वसंपादनम्, ततो बलेर्जन्मादिकं कथयित्वा बलिप्रभाववर्णनम्, प्रह्लादजन्मवृत्तान्तवर्णनम्, कार्तवीर्यस्य जन्मकर्मवर्णनम्, विश्रवस		

CC-0. In Public Domain. Digitization by eGangotri

अध्यायाः विषयाः पं० पृ०

उत्पत्तिः, कुबेररावणादीनामुत्पत्तिकथनम्, श्रीरामकृतरावणनाशकथनम्, शिशुपालजन्मकथनम्, नवपौलस्त्यनामवर्णनम्, पुलहर्षेर्मृगादिसंततिवर्णनम्, अत्रेर्दशपत्नीनां भद्राश्वस्य घृताच्यंतदशाप्सरसां भद्रादीनां भास्करपत्नीनां च कथनम, प्रभाकरस्य भद्रापत्न्यां सोमरससमुत्पादनवर्णनम्, ततोऽत्रिणा तत्सोमरसं पीत्वा तपसि क्रियमाणे तन्नेत्राभ्यां प्राशितसोमरसस्रावेण सोममयसोमोत्पत्तिवर्णनम्, तं सोमं दिग्भिर्गृहीत्वा सर्वत्र शीतत्वेन प्रकाशकरणम्, ओषधीनामुत्पत्तिवर्णनम्, कुलत्थश्यामाकादिधान्यानामुत्पत्तिकथनम्, सप्तविंशतिनक्षत्राणामुत्पत्तिवर्णनम्, चन्द्रस्य नक्षत्रौषध्यादीनामाधिपत्यप्रदानवृत्तान्तवर्णनम्, चन्द्रेण राजसूययज्ञमारभ्य तत्रोद्गातृत्वे ब्रह्माणं सदस्यत्वे विष्णुं सनत्कुमारादिकांश्चान्यर्त्विक्स्थानेषु संस्थाप्य यज्ञारंभं कृत्वा तत्समाप्तौ सर्वद्विजर्षभान्दक्षिणादिना संतोषितान्कृत्वाऽवभृथस्नानादिकरणवर्णनम्. ३२ १

२१ अथ दक्षोत्पत्तिवृत्तान्तकथनम्, ब्रह्माज्ञया दक्षेण षष्टिकन्यानामुत्पादनम्, तत्र तासां कन्यानां धर्मादिभ्यः पत्नीत्वेन दानम्, सप्तविंशतिकन्यानां च सोमाय प्रदानम्, दशधर्मपत्नीनां नामवर्णनम्, कश्यपस्य त्रयोदशपत्नीनां सप्तविंशतिसंख्याकानां सोमपत्नीनां भृगुपुत्रस्य द्वयोः पत्न्योः कृशाश्वस्य द्वयोः पत्न्योस्तथाऽङ्गिरसपत्न्योर्नामादिवर्णनपूर्वकं तासां सन्ततिवर्णनम्, चन्द्रेण रोहिणीं विनाऽन्यासां प्रेमाऽकरणेन ताभिरन्याभिश्चन्द्रपत्नीभिर्दक्षं प्रति सर्ववृत्तान्तश्रावणम्, ततो दक्षेण तच्छ्रुत्वा चन्द्रस्यान्यासु कन्यासु विषमभावं समालोक्य क्रुधा चन्द्राय यक्ष्मरोगप्राप्तिरूपशापदानम्, ततो दक्षवचनाच्चन्द्रेण यक्ष्मकुष्ठरोगनिवृत्तये शिवाराधनकरणार्थं दक्षिणसागरसमीपे गमनम्. ३३ २

२२ चन्द्रेण प्रभासक्षेत्रमेत्य कृतस्मरनामानं पर्वतं दृष्ट्वा तत्रैव तस्मिन्पर्वते नानोपवासादिकारिमरीच्यादिमुनीनां दर्शनं गृहीत्वा तान्प्रति सप्तप्रदक्षिणाः कृत्वा ततः शिवाराधनेन शिवं प्रसाद्य प्रादुर्भूतस्य शिवस्य स्तुतिकरणम्, चन्द्रवर्णितामात्मस्तुतिं श्रुत्वा प्रसन्नस्वान्तेन शिवेन चन्द्राय दक्षदत्तशापव्यवस्थाकरणपूर्वकवरप्रदानम्, शिवेन देवद्विजप्रभाववर्णनम्, अनिन्द्यवस्तुकथनम्, ब्राह्मणगुणवर्णनम्. ३५ १

२३ चन्द्रेण शिवदत्तं लिंगं गृहीत्वा विश्वकर्मणे लिंगस्थापनायाज्ञाकरणम्, ततः स्वलोकं गत्वा प्रभासे यज्ञं कर्तुं यज्ञसंभारानानेतुं हेमगर्भमन्त्रिणे चन्द्रेणाज्ञापनम्, चन्द्रवचनाद्धेमगर्भमन्त्रिणा यज्ञसंभारान्संपाद्य प्रभासक्षेत्रे गमनम्, विश्वकर्मणा यज्ञशालापत्नीशालादिनिर्माणम्, ततश्चन्द्रेण ब्रह्मादिभिः सह यज्ञकुण्डान्निर्माय चतुर्दशभूतग्रामान्साध्यान्विश्वेदेवान्वस्वादींश्च स्वस्वस्थानेषु स्थापयित्वा यज्ञकर्मणि प्रारब्धे सर्ववस्तूनामन्यूनतया सर्वेषां तृप्तिकरणम्, ऋत्विगादीन्संस्थाप्य रोहिणीसहितं चन्द्रं दीक्षितं कृत्वा सावित्र्या सहितेन ब्रह्मणा सर्वर्त्विग्वरणं कृत्वा बृहस्पतये होतृत्वं वसिष्ठायाध्वर्युत्वं मरीचय उद्गातृत्वं नारदाय ब्रह्मत्वं दत्त्वा सनत्कुमारान्सदस्यस्थानेषु नियोज्य सर्वेषां पूजनं कृत्वा वस्त्रालंकारान्दत्त्वा यज्ञारंभकरणम्, अवभृथादिभिर्यज्ञं समाप्य सोमेश्वरलिंगस्थापनम्.... .... ३७ २

२४ वैवस्वतस्य मनोर्दशमे त्रेतायुगे रोहिणीनाथेन शिवमाराध्य शंकरं प्रत्यक्षीकृत्य स्तुतिकरणम्, ततस्तुष्टेन शिवेन लिंगसांनिध्यप्रापकवरप्रदानम्, शिवेन चन्द्रमसे सोमेश्वरलिंगप्रभावकथनम्, सोमेश्वरपूजनक्रमवर्णनम्, सोमेश्वरयात्राफलकथनम्, चन्द्रमसो यक्ष्मतो निवृत्तिवर्णनम्, सोमेश्वरस्य प्रियाणां पुष्पाणां कथनम्, चन्द्रब्रह्मादीनां विप्राज्ञया स्वस्वस्थानेषु गमनम्, दुष्टजनेभ्यो वरप्रदानकारणे शंकरं प्रति पार्वत्या पृष्टे सति शंकरेण सात्त्विकराजसतामसभक्तानां वर्णनम्, हरिहराभेदकथनम्, भगवद्धृतनृसिंहाद्यवतारवर्णनम्, सारूप्यादिमुक्तिवर्णनम्, सोमेश्वरसंतोषकोपवासादिविधानवर्णनम्, सोमवारव्रतमाहात्म्यवर्णने स्वयंप्रभानगर्यां स्थितेत सुशीलापत्नीसहितेन घननामकगंधर्वेण बहुकाले गते गंधर्वसेनानामककन्याया उत्पादनम्, गंधर्वसेनायाः पाणिग्राहविधिं विधातुं घननामक-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अध्यायाः	विषयाः	प०	पृ०
	गंधर्वेण सेवकद्वारा वरशोधनकरणम्, शिखंडिगणनायके वियन्मार्गेण गच्छति 'मत्सदृशरूपवान्नैव कोऽपि' इत्यादि गंधर्वसेनानामकगंधर्वकन्याया वाक्यं श्रुत्वा शिखंडिगणेन रूपगर्वितां गंधर्वकन्यां दृष्ट्वा तस्यै कुष्ठप्रापकशापप्रदानम्, गंधर्वसेनया शिखण्डिगणस्य प्रार्थनां कृत्वोच्छापग्रहणम्, शिखण्डिवचनात्स-पितृकाया गंधर्वसेनायाः कुष्ठनिरसनार्थं हिमालयपर्वते गोशृंगमुनेराश्रमे गमनम्, घननामकेन गंधर्वेण तस्मै गोश्रृंगमुनये स्वदुहितुः सर्ववृत्तान्तकथनम्, गोश्रृंगेण तत्सर्वं श्रुत्वा कुष्ठनिरसनकारकोपायकथनम्, घननामकगंधर्वस्य गंधर्वसेनायाश्च गोश्रृंगर्षेर्वचनात्सोमेश्वरे गमनम्, तत्र सोमवारव्रतादिभिः शिवाराधनां विधाय शिवप्रसादं गृहीत्वा गंधर्वसेनायाः कुष्ठनिरसनपूर्वकं शिवतो वरप्राप्तिः, शिवस्य तत्रैवान्तर्धानम्, घननामकगंधर्वस्य गंधर्वसेनायाश्च स्वगृहे गमनम्, सोमवार-व्रतमाहात्म्यवर्णनम्.	४०	२
२५	घननामकगंधर्वेण गोश्रृंगर्षिं प्रति सोमवारव्रतविधिपरिज्ञानार्थं प्रश्नकरणम्, ततो गोश्रृंगर्षिणा सोमवारव्रतमाहात्म्यद्योतनाय दक्षशापेन कुष्ठित्वं गतेन सोमेन सोम-व्रतादिकं कृत्वा शिवप्रसादतः कुष्ठनिरसनकरणादिकथनम्, ततस्तेनैवर्षिणा घननामकगन्धर्वाय सोमवारव्रतकरणे मुखमार्जनशौचादिस्नानान्तविधिकथनपुरः-सरमीश्वरपूजनसंभारादि कथयित्वा समंत्रकशिवपूजाविधिकथनम्, नवमसोम-वार उद्यापनादिकरणविधिकथनम्, पौराणिकद्विजगुरुदेवादिकसंतोषाय वस्त्रा-दिभोजनान्तदानादिकथनम्, ततो गोश्रृंगकथितविधिना सोमवारव्रतं समाप्य प्रसन्नेन शिवेन गंधर्वसेनायाः कुष्ठनिरासकरणम्.	४४	२
२६	सोमेश्वरादुत्तरे भागे घनवाहनामकगंधर्वेण गन्धर्वेश्वरेतिनाम्ना लिंगस्थापनम्, गन्धर्वे-श्वरमाहात्म्यवर्णनम्.	४६	१
२७	घनवाहगन्धर्वकन्यया गंधर्वसेनानाम्न्या गंधर्वसेनेश्वरेतिनाम्ना लिंगस्थापनम्, गंधर्व-सेनेश्वरलिंगमाहात्म्यवर्णनम्.	४६	१
२८	प्रथमतः सोमनाथस्य दर्शने विधिकथनम्, सोमनाथयात्राविधिवर्णनम्, यात्राफल-स्याधिकारिवर्गनिरूपणम्, तीर्थयात्रां कर्तुमुद्युक्तेन पुरुषेण केन विधिना त्याज्या-त्याज्यादिकं विचार्य वर्तितव्यमित्यादिकथनम्, महादानकरणे पुण्यकथनम्, कलौ प्रभासक्षेत्रस्य सर्वक्षेत्राग्रेसरत्ववर्णनम्, हिताहितनियमकथनम्, षोडशतिथिषु भिन्नत्वेन षोडशवस्तुदानकरणफलवर्णनम्, प्रभासक्षेत्रसंजातमरणफलवर्णनम्, शिवलोके गमनायाधिकारित्वकथनम्, तीर्थस्नाने मंत्रकथनम्, तीर्थयात्राविधान-वर्णनम्.	४६	१
२९	अग्नितीर्थमाहात्म्यवर्णनप्रस्तावे प्रथमं पद्मकतीर्थे स्नात्वा वपनादिकं विधाय पुनः स्नानादिकरणेन सोमेश्वरतीर्थस्नानतोऽपि द्विगुणफलकथनम्, स्त्रीणां क्षुरकर्म-वपननिषेधवर्णनम्, स्त्रीणां सर्वान्केशानुद्धृत्यांगुलद्वयविच्छेदकरणवर्णनम्, वपनादिविधायकसप्तस्थानानां वर्णनम्, वपनं विना महोदधिस्पर्शननिषेधवर्णनम्, समंत्रकस्नानोत्तरं तर्पणादिविधिकथनम्, तत्र वृषभादिदानफलमाहात्म्यवर्णनम्, द्विजशापप्रदानेन सागरस्यास्पृश्यत्वदोषवृत्तान्तवर्णनम्, तत्र देवैर्दीर्घसत्रे समारब्धे द्विजाज्ञाभङ्गभयात्तैः शरण्यं सागरं मत्वा तत्राब्धौ स्वस्वदेहानां गोपनकरणम्, समुद्रेण मांसादिना ब्राह्मणेभ्यो भोजनदानात्तेषां मांसभक्षणदोषेणाकाशगतिनिरोधे जाते सति तैर्ब्राह्मणैः 'अपेयत्वं ते भूयात्' इति समुद्रस्य शापदानकथनम्, समुद्रेण ब्राह्मणप्रार्थनाकरणम्, वडवानलसंज्ञकतीर्थस्थापनवृत्तान्तवर्णनम्. ...	४९	१
३०	अग्नितीर्थयात्राविधानवर्णनम्, तत्र स्नानादिकरणोत्तरं स्नानांगतर्पणं कृत्वा कप-र्दिनं गणपतिं पूजयित्वा सोमेश्वरे गमनम्, तत्र सोमेश्वरस्य षोडशोपचारपूजा-विधिवर्णनम्, सोमेश्वरपूजामाहात्म्यवर्णनम्.	५१	१
३१	सोमकारणाद्देवासुरयुद्धे प्रवृत्ते दैत्यपराजितैर्देवैर्दधीच्याश्रमं प्रति गमनम्, ततो दधीचिमहर्षये सर्वदेवकृतस्वस्वशस्त्रसमर्पणवर्णनम्.	५१	२

CC-0. In Public Domain. Digitization by eGangotri

अध्यायाः	विषयाः	प०	पृ०
३२	देवैः स्थापितानामस्त्राणां सारं जलेन सह पीत्वा दधीचेरुत्तरां दिशं सुभद्राख्यया निजपत्न्या सह गमनम्, ततस्तत्राश्रमे स्थितस्य दधीचे रेतसा व्याप्तं वस्त्रं परिधाय ऋतुस्नातायाः सुभद्राया नद्यां गमनम्, तत्र नद्यां स्नानं कुर्वत्याः सुभद्राया उदरे रेतःप्रवेशेन गर्भधारणम्, ततो लज्जयाऽश्वत्थवृक्षमूले स्थित्वा गर्भं त्यक्त्वा "येन दुष्टेन पतिव्रतायाः ममोदरे ज्ञानेनाज्ञानेन वा गर्भाधानं कृतं स मरिष्यति" इति शापदानम्, ततस्तत्रास्त्रग्रहणं चिकीर्षूणां देवानामागमनम्, दधीचिनाऽस्त्रप्राशनं कृतमिति ज्ञात्वाऽस्थिग्रहणाय देवैः समुद्योगकरणम्, वज्रादिशस्त्रनिर्माणार्थं दधीचिना देहत्यागकरणम्, ततो दधीच्यस्थीनि गृहीत्वेन्द्रादिभिर्देवैः स्वस्ववज्रदण्डपाशादिनिर्माणकरणम्, ततो दधीचिमरणाच्छोकाकुलायाः सुभद्राया देवैः समाधानकरणम्, सुभद्रया 'दधीचेर्वीर्यादयं पुत्र उत्पन्नः' इति श्रुत्वाऽऽह्लादकरणम्, सुभद्रया दधीचेरौर्ध्वदेहिकादिकरणम्, जरायुजाण्डजस्वेदजोद्भिज्जानामुत्पत्तिवर्णनम्, सुभद्रया स्वपुत्रस्य पिप्पलादेति नाम कृत्वा वेदोक्तसंस्कारकरणम्, ततः पिप्पलादेन पितृहन्तॄन्देवान्हन्तुं प्रतिज्ञां कृत्वा हिमालये शिवाराधनां कर्तुं गमनम्, कृत्याया निर्माणार्थं पिप्पलादेनोरुं निर्मथ्य वाडवयुक्तवडवोत्पादनम्, ततो वाडववडवाभ्यां वडवानलनरस्योत्पत्तिवर्णनम्, देवान्भक्षितुं पिप्पलादवचनाद्वडवानलस्य स्वर्गे गमनम्, ततो देवस्तुतमहाविष्णुकृतवडवानलवञ्चनवृत्तान्तवर्णनम्.	५२	१
३३	समुद्रं प्रति वडवानलस्य यापनार्थं कुमार्याः सरस्वत्या विष्णुनाऽऽज्ञाकरणम्, ततो ब्रह्मणा सान्त्वितया सरस्वत्या वडवानलमादाय समुद्रे गमनम्.	५४	३
३४	वडवानलात्सरस्वत्या वरग्रहणम्, सरस्वत्या वडवानलसमुद्रयोः स्तुतिकरणम्, वडवानलेन समुद्रोदकस्य भक्षणे क्रियमाणे जलचरैः कृष्णं प्रति शरणगमनम्, कृष्णेन तेभ्योऽभयवचनदानम्, ततोऽक्षयतोययुक्तं समुद्रं दृष्ट्वा देवैर्विष्णुपूजाकरणम्, प्रभासक्षेत्रे सरस्वत्यवतारमाहात्म्यवर्णनम्.	५७	१
३५	सरस्वत्याः पिप्पलमूलतो निर्गत्य प्राचीं दिशं प्रति गमनम्, ततस्तस्याः सिद्धेश्वरपर्यंतं पूर्वाभिमूखीभूत्वा तत ऊर्ध्वं पश्चिमाभिमुखीभवनम्, ततः सरस्वतीतीरस्थानेकतीर्थवर्णनम, हारिण्यादिपञ्चस्रोतसां वर्णनम्, सरस्वत्यब्धिसमागमाग्नितीर्थमाहात्म्यवर्णनम्.	५७	३
३६	प्राचीसरस्वतीमाहात्म्यवर्णने पांडवानां कौरवविनाशोत्तरं हस्तिनापुरे कृष्णेन सह गमनम्, ततो युधिष्ठिरभीमनकुलसहदेवानां गजपुरे गमनसमये "नरनारायणौ निषिध्यौ" इति द्वारपालान्प्रति युधिष्ठिरेण कथनम्, अर्जुनेन द्वारपालान्प्रति निषेधकारणजिज्ञासया प्रश्ने कृते सति तैस्तयोः 'भीष्मादिपूज्यजनदुर्योधनादिवधवहननेन दोषभाजनान्निषेधः' इति कथितेऽर्जुनेन पापक्षालनार्थोपायादिप्रायश्चित्तार्थं श्रीकृष्णं प्रति प्रश्नकरणम्, ततः श्रीकृष्णेन प्राचीसरस्वतीतीर्थस्नानेन पापनिवृत्तिकथनम्, तदनन्तरं सकृष्णेनार्जुनेन प्राचीसरस्वतीं प्रति गमनम्, तत्रार्जुनेन त्रिरात्रोपोषणत्रिरात्रस्नानादिनियमेन स्वपापनिवृत्तिकरणम्, प्राचीसरस्वतीप्रभावं ज्ञात्वा धर्मभीमनकुलसहदेवादिकानामपि तत्रागमनम्, अर्जुनवत्तेषां स्नानादिना पापनिवृत्तिः, प्राचीसरस्वतीमाहात्म्यवर्णनम्.	६०	२
३७	पार्वत्या स्नानकाले किमर्थं जले कंकणप्रक्षेपणं कार्यमिति पृष्टेन शिवेनेन्दुमतीवृत्तान्तकथनम्, तत्र बृहद्रथभूपं प्रति कण्वमहर्षेरागमनम्, बृहद्रथेन कण्वस्यातिथ्यादिकं विधाय मिथो धर्मविषयककथाकरणम्, तत इन्दुमत्या निजैश्वर्यप्राप्तिकारणजिज्ञासया कण्वाय प्रश्नकरणम्, कण्वेन तस्या इन्दुमत्याः पूर्वजन्मवृत्तान्तकथनम्, तत्र पूर्वजन्मनि महाशूद्र्यास्तस्याश्चारित्रकथनम्, सोमेश्वरतीर्थे स्नानकरणसमये तस्या महाशूद्र्या हस्ततो जले कङ्कणपतनम्, तीर्थे तस्य कङ्कणस्य पतनस्य प्रभावेण जन्मान्तरे राजकुले जननकथनम्, तत्कण्ववाक्यं श्रुत्वेन्दुमत्यास्त्रपयाऽधोमुखीभूत्वा तूष्णींभवनम्, ततः कण्वस्य स्वस्थाने गमनम्, ततो बृहद्रथे-		

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अध्यायाः	विषयाः	प०	पृ०
	नेन्दुमत्या सह प्रतिवर्षं सरस्वतीतीरे गत्वा कंकणनिक्षेपणम्, तेन तयोर्वृहद्रथेन्दुमत्योर्देवत्वप्राप्तिवर्णनम्, कंकणप्रक्षेपणमाहात्म्यवर्णनम्.	६१	२
३८	कपर्दीश्वरमाहात्म्यवर्णने दैत्यत्रासितैर्देवैः पार्वत्याः स्तोत्रकरणम्, ततो भगवतीवाक्योपरि विश्वस्य देवैः सोमेश्वरादितीर्थे गत्वा स्नानादिकं विधाय कपर्दीश्वरपूजनेन पुना राज्यकरणम्, कपर्दिविनायकमाहात्म्यवर्णनम्.	६२	१
३९	प्रभासयात्रावर्णने कपर्दीश्वरदर्शनोत्तरं केदारेश्वरतीर्थे गमनम्, ततो भीमेश्वरसमीपस्थवृद्धिलिंगपूजनम्, केदारेश्वरमाहात्म्यवर्णने शशबिंदुसंज्ञकस्य राज्ञः पत्न्या सह यात्रां कर्तुं केदारेश्वरे गमनम्, तत्र राज्ञा रैभ्यादृषिगणान्दृष्ट्वा जागरादिकरणम्, ततो रैभ्यादिभिः शशबिंदोः प्राग्जन्मगतवृत्तान्तज्ञानाय सोमेश्वरं त्यक्त्वा केदारेश्वरागमनकारणज्ञानाय च प्रश्नकरणम्, ततो राज्ञा स्वप्राग्जन्मवृत्तान्तवर्णने ब्राह्मणपूजकसेवाधर्मविशिष्टाधिकारिशूद्रजन्मकथनम्, ततोऽनावृष्टिसमये क्षुत्तृषाभ्यां पीडितस्य सपत्नीकस्य स्वस्य प्रभासक्षेत्रे गमनकथनम्, तत्र सर्वतीर्थेषु स्नात्वा नानालिंगपूजनादिकं विधाय ततो रामसरसि गत्वा प्रतिदिनं रामसरोगतानि सरसिजानि समादाय विक्रीय तेनैवोदरपोषणम्, ततः कस्मिंश्चित्समये कंचित्प्रासादमवलंब्य निशि स्वपत्न्या सह स्थितेन शूद्रेणाकस्माद्गीतध्वनिं श्रुत्वा कस्मिंश्चित्स्थले जागरणं प्रचलितमिति विज्ञाय तत्र कमलानि विक्रेतुं निजभार्यया सह गमनम्, तत्र केदारेश्वरापरनामकवृद्धिलिंगदर्शनम्, तत्रानंगवतीवेश्याया दर्शनम्, तेन शूद्रेण जागरकारणे पृष्टे केनाप्यन्यपुरुषेण तं प्रति शिवरात्रिजागरणफलकथनम्, ततः सपत्नीकेन शूद्रेण शिवरात्रिजागरणोपवासादिकरणेन जन्मांतरे राजकुले जन्मप्राप्तिवर्णनम्, केदारेश्वर (रुद्रेश्वर) लिंगमाहात्म्यवर्णनम्.	६३	२
४०	भीमेश्वरमाहात्म्यवर्णने श्वेतकेतुना प्रभासे तपस्तप्त्वा श्वेतकेत्वीश्वरनाम्ना लिंगस्थापनम्, ततो द्वापरे यात्रां कर्तुमुद्युक्तेन भीमसेनेन तल्लिंगपूजनेन भीमेश्वरेतिनामकरणम्, भीमेश्वरमाहात्म्यवर्णनम्.	६४	२
४१	देवमाताभैरवेश्वरमाहात्म्यवर्णनम्.	६५	१
४२	चण्डया स्थापितेन चण्डगणेनाराधितस्य चण्डीशस्य पूजाविधिवर्णनपुरःसरं माहात्म्यवर्णनम्....	६५	२
४३	आदित्येश्वरमाहात्म्यवर्णनम्.	६५	२
४४	सोमेश्वरमाहात्म्यवर्णनम्.:...	६६	१
४५	त्रिपुरं दग्धुकामस्य शिवस्य नेत्रतो भूम्यामश्रुपतनेनांगारकोत्पत्तिवृत्तान्तवर्णनम्, अंगारकेश्वरमाहात्म्यवर्णनम्.	६६	१
४६	वुधस्थापितवुधेश्वरलिंगमाहात्म्यवर्णनम्.	६६	१
४७	गुरुस्थापितवृहस्पतीश्वरलिंगमाहात्म्यवर्णनम्.	६६	२
४८	शुक्रेण रुद्रमाराध्य रुद्रसाहाय्येन सञ्जीवनीमन्त्रं समालभ्य ग्रहत्वं प्राप्य स्वनाम्ना लिंगस्थापनम्, शुक्रेश्वरलिंगमाहात्म्यवर्णनम्.	६६	२
४९	शनैश्चरेश्वरलिंगमाहात्म्यवर्णने शनैश्चरेण मन्दवारे ग्रहत्वप्राप्तिकरणाय शिवाराधनाकरणम्, ततः शनैश्चरेण शिवानुज्ञया लिंगस्थापनाकरणम्, सौरीश्वरपूजनेन शनिपीडानिरसनादिफलकथनम, कस्मिंश्चित्समये "यदा शने रोहिणीशकटं भित्त्वा गमनं तदा द्वादशवार्षिकं दुर्भिक्षं स्यात्" इति वसिष्ठमुखाच्छ्रुत्वा दशरथेन तत्सङ्कटनिरसनाय रथमारुह्याकाशमार्गेण शनैश्चरसमीपं गत्वा युद्धकरणम्, शनैश्चरेण तद्दशरथस्य शौर्यं दृष्ट्वा दशरथप्रेरितसर्वसंहारास्त्रं दृष्ट्वा भयात् "वरं वृणुष्व" इति कथनम्, ततो दशरथेन शनैश्चरतो रोहिणीशकटभेदनिषेधकवरग्रहणम्, ततो दशरथेन शनैश्चरस्तोत्रकरणम्, शनैश्चरेण स्वस्य स्तोत्रपठनेन पीडाऽकरणकथनम्, शनैश्चरेश्वरमाहात्म्यवर्णनम्.	६७	१
५०	राहुप्रतिष्ठापितराह्वीश्वरमाहात्म्यवर्णनम्.	६८	१
५१	ग्रहाधिपत्यप्राप्त्यर्थं केतुना शिवमाराध्य तदाज्ञया राह्वीशादुत्तरे केत्वीश्वरलिंगस्थापनम्, केत्वीश्वरलिंगमाहात्म्यवर्णनम.	६८	२

CC-0. In Public Domain. Digitization by eGangotri

अध्यायाः	विषयाः	प०	पृ०
५२	पञ्चानां सिद्धादिलिंगानां माहात्म्यवर्णने प्रथममणिमाद्यष्टसिद्धिप्रदसिद्धेश्वरलिंगमाहात्म्यवर्णनम्.	६८	२
५३	कपिलराजर्षिणा तपस्तप्त्वा स्थापितस्य कपिलेश्वरस्य लिंगस्य माहात्म्यवर्णनम्....	६९	१
५४	शिखण्डिगणेन शप्ताया गन्धर्वसेनायाः शापनिवारणार्थं घनवाहनामकगन्धर्वसेनापित्रा गोशृंगर्षिवचनात्सोमवारव्रतं कृत्वा सुतां शापतो मोचयित्वा शिवप्रसादेन तदाज्ञया गन्धर्वेश्वरनाम्ना लिंगस्थापनम्, गन्धर्वेश्वरलिंगमाहात्म्यवर्णनम्.	६९	१
५५	गन्धर्वसेनाविमलत्वकारिविमलेश्वरमाहात्म्यवर्णनम्.	६९	१
५६	अलकाधिपतित्वप्राप्त्यर्थं धनदेन शिवमाराध्य लिंगस्थापनम्, धनदेश्वरमाहात्म्यवर्णनम्.	६९	२
५७	सोमस्य सप्तविंशतिभिः स्त्रीभिः स्वासु सोमस्य प्रसन्नतायै प्रभासे सोमेश्वरमाराध्य सोमेश्वरसमीपे वरारोहेश्वरेतिनाम्ना लिंगस्थापनम्, वरारोहेश्वरलिंगमाहात्म्यवर्णनम्.	६९	२
५८	व्याधिग्रस्तेनाजापालेन राज्ञा तद्व्याधिनिरसनाय भैरवीदेवीपूजनकरणम्, तेनाजारूपेण तत्पातकानां निर्गमनम्, ततोऽजापालेश्वरीतिनामकरणम, अजापालेश्वरीमाहात्म्यवर्णनम्.	७०	१
५९	पार्वत्या शंकराय 'तव षष्ठवक्त्राभावात्कथं षष्ठाद्वक्त्रादजादेव्या उत्पत्तिः' इति पृष्टे शंकरेण पार्वत्यै सद्योजातादिपिच्छवन्तानां स्वस्य सप्तमुखानां वर्णनम, अजादेवीभयाद्दैत्यानां दशदिक्षु पलायनम्, अजादेवीमाहात्म्यवर्णनम्, इति रुद्रशक्तित्रयसंकेतः.	७१	१
६०	ब्राह्मीमंगलादेवीमाहात्म्यवर्णनम्.	७१	२
६१	वैष्णवीललितोमाविशालाक्षीमाहात्म्यवर्णनम्.	७२	१
६२	रौद्रीचत्वरादेवीमाहात्म्यवर्णनम्.	७२	१
६३	भैरवेश्वरमाहात्म्यवर्णनम्.	७२	२
६४	लक्ष्मीश्वरमाहात्म्यवर्णनम्.	७२	२
६५	वाडवेश्वरलिंगमाहात्म्यवर्णनम्.	७२	२
६६	वडवानलधारिण्या सरस्वत्या देव्या प्रभासक्षेत्रमेत्य समुद्रे स्नानादिकं कृत्वाऽर्घ्यं दत्त्वा लिंगस्थापनम्, अर्घ्येश्वरलिंगमाहात्म्यवर्णनम्.	७३	१
६७	कामेश्वरमाहात्म्यवर्णनम्....	७३	१
६८	पार्वत्या शिवस्योपरि रुष्टया महता क्रोधनारण्ये तपःकरणवर्णनम्, ततस्तुष्टेन शिवेन पार्वत्यै वरप्रदानम्, तत्तपोवनदर्शनेन सर्वकार्यार्थसिद्धिफलकथनम्, तत्र लिंगस्थापनम्, गौरीतपोवनमाहात्म्यवर्णनम्.	७३	१
६९	गौरीश्वरलिंगमाहात्म्यवर्णनम्.	७३	२
७०	वरुणस्थापितवरुणेश्वरलिंगमाहात्म्यवर्णनम्.	७४	१
७१	भर्तृदुःखप्रपीडितयोषया भार्यया स्थापितस्योषेश्वरस्य माहात्म्यवर्णनम्. ...	७४	१
७२	जलवासगणपतिमाहात्म्यवर्णनम्.	७४	२
७३	षण्मुखस्थापितकुमारेश्वरलिंगमाहात्म्यवर्णनम्.	७४	२
७४	शाकल्येन (साकल्येन) राजर्षिणा शिवमाराध्य प्रभासे लिंगस्थापनम्, तस्य लिंगस्य कृतत्रेताद्वापरकलिषु भैरवेश्वरसावर्णिकेश्वरगालवेश्वरशाकल्येश्वरनामकरणम्, शाकल्येश्वरलिंगमाहात्म्यवर्णनम्.	७४	२
७५	कलकलेश्वरस्य चतुर्युगेषु भिन्नत्वेन कामेश्वरपुलहेश्वरनारदेश्वरकलकलेश्वरेत्यादिनामकथनम्, कलिद्वापरयोः संधावेकदा नारदेन वर्षशतं प्रभासे लिंगाराधनाकरणम्, ततो गांधर्वं प्राप्य नारदेन पौण्डरीकनामकमहायज्ञकरणम, तत्र विप्राणां सर्वत आगमनम्, दक्षिणार्थं विप्राणां मिथो वादकरणम्, तेन कोलाहलेन कलकलेश्वरेति लिंगस्य नारदेन नामकरणम्, कलकलेश्वरमाहात्म्यवर्णनम्.	७५	१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अध्यायाः	विषयाः	प०	पृ०
७६	कलकलेश्वरसमीपवर्तिलकुलीशमाहात्म्यवर्णनम्.	७५	२
७७	उत्तंकस्थापितोत्तंकेश्वरलिंगमाहात्म्यवर्णनम्.	७५	२
७८	वह्नीशमाहात्म्यवर्णने केनचिच्छुकेन स्वभार्यया सार्धमेकस्मिन्वृक्षे नीडं कृत्वा वासकरणम्, ततो नीडरक्षार्थं समंततो भार्यया सहितेन शुकेन भ्रमणम्, वैश्वानरेश्वरस्याप्यनायासेन प्रदक्षिणाकरणप्रभावादपरजन्मनि तयोर्द्वयोर्लोपामुद्राऽगस्त्यत्वेन जन्मप्राप्तिवर्णनम्, पूर्वजन्म स्मरताऽगस्तिना वैश्वानरेश्वरप्रदक्षिणाफलकथनम्, वैश्वानरेश्वरमाहात्म्यवर्णनम्.	७६	१
७९	लकुलीश्वरमाहात्म्यवर्णनम्.	७६	१
८०	गौतमेश्वरलिंगमाहात्म्यवर्णनम्.	७६	१
८१	दैत्यसूदनमाहात्म्यवर्णने प्रथमं सप्तकल्पे वामनादिदैत्यसूदनान्तनाम्नां वर्णनम्, तत्र दैत्यजितैर्देवैर्विष्णुस्तवने विष्णोर्दशावतारकथनम्, ततो विष्णुहस्तेन चक्रसाहाय्येन दैत्याञ्जित्वा देवैर्दैत्यसूदननाम्ना भगवत्स्थापनाकरणम्, दैत्यसूदनमाहात्म्यवर्णनम्.	७६	२
८२	चक्रतीर्थोत्पत्तिवृत्तान्तमाहात्म्यवर्णनम्.	७७	२
८३	ब्रह्मदत्तवरेणोन्मत्तीभूतस्य महिषासुरस्य मर्दनाय देवैरेकीभूय स्त्रीनिर्माणकरणम्, नारदेन पत्नीत्वेन तां स्त्रियं स्वीकर्तुं महिषासुरं प्रत्याज्ञाकरणम्, तन्नारदवचनं श्रुत्वा ससैन्यस्य महिषासुरस्य तस्याः स्त्रियाः समीपे गमनम्, महिषासुरस्य मतमभिसमीक्ष्य देव्या स्वशरीरतः शतशः स्त्रीनिर्माणकरणम्, ततस्तया देव्या महिषासुरनाशकरणम्, तस्या देव्या देवैः स्तुतिकरणम्, ततो देवैस्तस्या देव्यास्तत्रैव स्थापनाकरणम्, देवीपूजनविधिकथनम्, खड्गमंत्रकथनम्, दुर्गादेवीस्तुतिप्रकारकथनम्, योगीश्वरीमाहात्म्यवर्णनम्.....	७८	१
८४	मेघवाहननामकदैत्यैः पीडितैर्ऋषिभिर्विष्णुस्तवनकरणम्, तत्स्तवनं श्रुत्वा दयया विष्णुना पादाघातेन मेघवाहनदैत्यं समुद्रे पातयित्वा तत्रैवादिनारायणेतिनाम्नाऽवस्थानकरणम्, आदिनारायणमाहात्म्यवर्णनम्.	७९	१
८५	अथ संनिहिताख्यानद्युत्पत्तिवृत्तान्तवर्णनम्, तत्र जरासंधभयाद्विष्णोः सपरिवारस्य मथुरां त्यक्त्वा प्रभासे प्रयाणम्, ततस्तेषां विष्ण्वादीनां ग्रहणकाले समुद्रतीरे कृष्णेन ध्यानमात्रेणानीतायां संनिहितायां स्नानकरणेन पुण्यफलप्राप्तिवर्णनम्, तत्र दानादिकरणप्रभाववर्णनम्, संनिहित्यामाहात्म्यवर्णनम्.	८०	१
८६	पाण्डवैरज्ञातवाससमये प्रभासमेत्य पंचभिरपि स्वस्वनाम्ना लिंगस्थापनम्, पाण्डवेश्वरलिंगमाहात्म्यवर्णनम्.	८०	२
८७	एकादशरुद्राणां नामवर्णनम्, तत्र प्रथमं भूतेशरुद्रमाहात्म्यवर्णनम्.	८०	२
८८	नीलरुद्रमाहात्म्यवर्णनम्.	८१	१
८९	कपालीश्वररुद्रमाहात्म्यवर्णनम्.	८१	२
९०	वृषभेश्वरस्य प्रतिकल्पगतनामवर्णनम्, वृषभेण स्थापितस्य वृषभेश्वराख्यलिंगस्य माहात्म्यवर्णनपूर्वकमिक्ष्वाकोरुपवासादिपूजनफलप्राप्तिवृत्तान्तवर्णनम्. ...	८१	२
९१	त्र्यंबकेश्वरमाहात्म्यवर्णने प्रतियुगेषु नामाभिधानकथनम्, त्र्यंबकेश्वरे स्नानदानादिफलकथनम्, त्र्यंबकेश्वरमाहात्म्यवर्णनम्.	८२	२
९२	अघोरेश्वरमाहात्म्यवर्णनम्.	८२	२
९३	महाकालेश्वरलिंगवर्णने कृतयुगे चित्राङ्गदेश्वरेतिनाम्ना प्रसिद्धिवर्णनम्, चित्रांगदेश्वरस्यैव महाकालेश्वरेतिनाम्ना प्रसिद्धिः, महाकालेश्वरलिंगमाहात्म्यवर्णनम्.	८३	१
९४	भैरवेश्वरमाहात्म्यवर्णनम्.	८३	१
९५	मृत्युञ्जयमाहात्म्यवर्णनम्.	८३	२
९६	कामेश्वरलिंगमाहात्म्यवर्णनम्.	८४	१
९७	योगेश्वरलिंगमाहात्म्यवर्णनम्.	८४	१

CC-0. In Public Domain. Digitization by eGangotri

अध्यायाः	विषयाः	प०	पृ०
९८	दैत्यभारपीडितया पृथ्व्या प्रभासे गमनम्, तत्र पृथ्व्या लिंगं स्थापयित्वा रुद्रमाराध्य रुद्रप्रसादप्राप्तिवर्णनम्, पृथ्वीश्वर (चन्द्रेश्वर) माहात्म्यवर्णनम्. ..	८४	२
९९	दण्डपाणिचक्रधरमाहात्म्यवर्णने वाराणस्यां स्थितेन पौण्ड्रकेण वासुदेवचिह्नानि धृत्वा वासुदेवेन सह कलहं कृत्वा युद्धकरणम्, तत्र वासुदेवेन पौंड्रके हते पौंड्रकपुत्रेण वासुदेवनाशार्थं कृत्यानिर्माणकरणम्, वासुदेवेन सुदर्शनेन तस्याः कृत्यायाः पराजयकरणम्, पराभूतया तया कृत्यया शिवं प्रति शरणगमनम्, ततः शंकरेण कृत्यासंरक्षणार्थं विष्णुप्रेरितसुदर्शनस्य स्ववाणैस्ताडनम्, शिवसायकमिश्रितं कार्यमकृत्वागतं सुदर्शनं दृष्ट्वा क्रुधा भगवता शिवसायकसहितं चक्रं हस्ते धृत्वा कालभैरवनिर्मितकृत्याविनाशाय स्वस्य काश्यां गमनम्, तत्र काश्यां संरक्षणार्थं स्थितानां दण्डपाणीनां गणानां वचनाच्चक्रधरनाम्ना कृष्णस्यावस्थानम्, दण्डपाणिचक्रधरमाहात्म्यवर्णनम्....	८५	१
१००	सांबादित्येश्वरमाहात्म्यवर्णनम्, तत्र कृष्णाज्जांबवत्यां समुत्पन्नेन रूपगर्वितेन सांबेन दुर्वाससोऽवमानकरणम्, ततः क्रोधेन दुर्वाससा सांबाय "कुष्ठी भव" इति शापदानम्....	८६	१
१०१	तथैव द्वारकां प्रति कृष्णदर्शनं ग्रहीतुमागतस्य नारदस्य रूपगर्वितेन सांबेनाऽवज्ञाकरणम्, तद्वैरं साधयित्वा कस्मिंश्चित्समये सस्त्रीके कृष्णे जलक्रीडां कर्तुं प्रवृत्ते सांबस्याकस्मान्नारदवचनात्तत्र गमनम्, सांबमागतं दृष्ट्वा तस्मिन्मानसिकविकृतिं प्राप्ताः स्वस्त्रीर्दृष्ट्वा श्रीकृष्णेन ताः प्रति "चौरहस्तगता भविष्यथ" इति शापदानम्, सांबाय च कुष्टप्रापकशापदानम्, ततः सांबेन पूर्वं दुर्वासऋषिणा दत्तं शापं स्मृत्वा बहुदुःखितेन सता प्रभासक्षेत्रं गत्वाऽऽदित्याराधनाकरणम्, सांबेनादित्यस्तुतिकरणम्, स्तोत्रान्ते तुष्टेनादित्येन सांबस्येच्छितवरप्रदानं कुष्ठनिरासकरणं च, द्वादशादित्यनामकथनम्, तत्रैव सांबेन स्वनाम्ना लिंगस्थापनम्, सांबादित्येश्वरमाहात्म्यवर्णनम्.	८६	२
१०२	सांबादित्येश्वरसमीपवर्तिकंटकशोधिनीदेवीमाहात्म्यवर्णनम्....	८८	१
१०३	दक्षयज्ञे कपालं गृहीत्वा जाल्मवेषधारिणः शंकरस्यागमनं यज्ञमण्डपमध्ये कपालप्रक्षेपणं च, तत्र कपालं क्षिप्तं दृष्ट्वा सर्वैर्हाहाकारकरणम्, ततो महर्षिस्तुत्या महेश्वरेण स्वस्वरूपप्रकटनम्, तत्रैव कपालेश्वरेतिनाम्ना लिंगस्थापनम्, कपालेश्वरमाहात्म्यवर्णनम्.	८८	२
१०४	कोटिसंख्याकैर्ब्राह्मणैः कपालेश्वरे तपस्तप्त्वा लिंगस्थापनात्कोटीश्वरेति नाम्ना प्रसिद्धिकरणम्, कोटीश्वरलिंगमाहात्म्यवर्णनम्.	८९	१
१०५	ब्रह्ममाहात्म्यवर्णने बालरूपिवृद्धरूपिपितामहमाहात्म्यवर्णनम्, ततो ब्रह्मणो द्विपरार्द्धपर्यन्तमायुःकालपरिगणनम्, सप्तविंशतिकल्पानां चतुर्दशेन्द्राणां चतुर्दशमनूनां पृथक्त्वेन नामनिर्देशकरणम्, ब्रह्मणस्तपःकरणे प्रभासे लिंगस्थापने च हेतुं दर्शयित्वा ब्रह्मेश्वरेतिलिंगस्थापनवर्णनम्, मध्ययात्रायां ब्रह्ममाहात्म्यवर्णनम्. ...	८९	१
१०६	ब्रह्मपूजाविधानवर्णनप्रसंगेन ब्राह्मणस्य विशिष्टत्वेन पूज्यत्वादिगौरवगुणवर्णनम्, चतुर्दशेन्द्राणां ब्राह्मणनिन्दाकराणां यमेन शासनकरणवर्णनम्, द्विजरक्षणफलकथनम्, ब्राह्मणानां प्राजापत्यादिवृत्तिभेदकथनम्, चातुर्वर्ण्यधर्मकृच्छ्रचान्द्रायणादिव्रतविधानवर्णनम्, ब्राह्मणप्रशंसावर्णनम्.	९१	१
१०७	ब्रह्मपूजावर्णने बहुविधाया भक्तेर्वर्णनम्, पञ्चगव्यविधिकथनम्, गायत्रीन्यासकथनम्, षोडशोपचारसमन्त्रकपूजाविधिवर्णनम्, ब्रह्मयात्रावर्णनम्, ब्रह्मणो वासस्थाननिर्देशकरणम्, बालरूपिब्रह्मणो माहात्म्यवर्णनम्.	९२	२
१०८	प्रत्यूषेश्वरलिंगमाहात्म्यवर्णने दक्षस्य धर्माय दत्तानां षष्टिकन्यानां मध्ये विश्वानाम्न्यां कन्यकायामष्टवसुपरिगणितप्रत्यूषवसुनामकपुत्रस्य जननम्, तेन प्रत्यूषनामकवसुना प्रभासक्षेत्रे स्वनाम्ना लिंगस्थापनम्, प्रत्यूषेश्वरमाहात्म्यवर्णनम्. ...	९५	१
१०९	अनिलस्थापितानिलेश्वरमाहात्म्यवर्णनम्.	९५	१
११०	अष्टमेन प्रभासनामकेन वसुना लिंगस्थापनम्, प्रभासेश्वरमाहात्म्यवर्णनम्. ...	९५	२

॥ ६२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अध्यायाः	विषयाः	प०	पृ०
१११	रामेश्वरतीर्थवर्णने ससीतालक्ष्मणस्य रामस्य वने प्रयाणम्, ततो यात्रां कर्तुं प्रवृत्तस्य रामस्य प्रभासे गमनम्, तत्र निशि सुप्तस्य रामस्य स्वप्ने पितुर्दशरथस्य दर्शनम्, ततो रामेण ब्राह्मणेभ्यः स्वप्नगतवृत्तनिवेदनम्, ततो ब्राह्मणवचनाद्रामेण बदरादिबहुस्वादुफलान्यादाय श्राद्धकरणम्, रामेश्वरेतिनाम्ना लिंगस्थापनम्, रामेश्वरक्षेत्रमाहात्म्यवर्णनम्....	९५	२
११२	लक्ष्मणस्थापितलक्ष्मणेश्वरमाहात्म्यवर्णनम्.	९६	२
११३	सीतास्थापितजानकीश्वरमाहात्म्यवर्णनम्.	९६	२
११४	वामनस्वामिमाहात्म्यवर्णने विष्णुना बलेः पादत्रयभूमियाचनेन पाताले नयनम्, ब्रह्माण्डे द्वितीयपादस्थापनेन विष्णुपदीगंगोत्पत्तिवर्णनम्, वामनस्वामिमाहात्म्यम्, विष्णुपदीगंगामाहात्म्यम्, विष्णुपदीगंगायाः पुष्करे गमनात्पुष्करमाहात्म्यवर्णनम्.	९७	१
११५	पुष्करेश्वरमाहात्म्यवर्णनम्...	९७	१
११६	शंखोदककुण्डेश्वरीगौरीमाहात्म्यवर्णनम्.	९७	२
११७	भूतनाथेश्वरमाहात्म्यवर्णनम्.	९७	२
११८	गोप्यादित्यतीर्थमाहात्म्ये ससुतगोपीसहितस्य कृष्णस्य प्रभासे गमनम्, तत्र यादवै रैवतकं गिरिमेत्य सर्वत्र ध्वजचक्राङ्कितभूमिकरणम्, तथैव शिवलिंगपूरितभूमिदर्शनम्, ततो हस्तप्रमाणां भूमिकां मध्ये मध्ये विसृज्य तदन्तरेण सर्वत्र प्रासादादिकरणम, कृष्णकलाभूतानां षोडशगोपीनां नामकथनम्, तत्रैव गोपीभिः षोडशसहस्रसंख्याकरम्यगृहनिर्माणकरणम्, तत्र रविस्थापनम्, तस्य गोप्यादित्येति नाम दत्त्वा सर्वेषां तेषां सर्वासां तासां च द्वारकां प्रत्यागमनम्, गोप्यादित्येश्वरमाहात्म्यवर्णनम.	९८	१
११९	बलातिबलदैत्यघ्नीदेव्युत्पत्तिमाहात्म्यवर्णने बलातिबलदैत्यजन्मकथनम्, ताभ्यां ससैनिकाभ्यां बलातिबलदैत्याभ्यां देवान्पराजित्य त्रैलोक्यस्याधिपत्यकरणम्, तदा दैत्यपीडितैर्देवैर्हिमवन्तमेत्य पार्वतीस्तवनकरणम्, तद्देवकृतस्तोत्रं श्रुत्वा देव्या बह्वद्भुतरूपं धृत्वा बहुहस्तेषु बह्वस्त्राणि धृत्वा ससैनिकाभ्यां बलातिबलदैत्याभ्यां युद्धकरणम्, तत्र देव्या बलातिबलदैत्यनाशकरणम्, चतुःषष्टियोगिनीभिः समं तस्या बलातिबलदैत्यघ्न्या देव्याः प्रभासे वासकरणम्, चतुःषष्टियोगिनीनामावलिकथनम्, बलातिबलदैत्यघ्नीमाहात्म्यवर्णनम्.	९८	२
१२०	गोपीसंप्रतिष्ठापितगोपीश्वरमाहात्म्यवर्णनम्.	१००	१
१२१	जमदग्निसुतेन रामेण मातृवधदोषनिबर्हणार्थं प्रभासे शिवलिंगस्थापनम्, जामदग्न्येश्वरमाहात्म्यवर्णनम्.	१००	१
१२२	गंधर्वपतिना चित्राङ्गदेन देवमाराध्य लिंगस्थापनाकरणम्, चित्राङ्गदेश्वरलिंगमाहात्म्यवर्णनम्.	१००	२
१२३	दिग्विजयार्थं पुष्पकेण विमानेन गच्छतो रावणस्य प्रभासे कुण्ठितं विमानं दृष्ट्वा'नीचैः किमस्ति तद्दृष्ट्वाऽऽगच्छ'इति निजमन्त्रिणं प्रत्याज्ञाकरणम्, प्रहस्तमंत्रिणा नीचैर्गत्वा प्रभासक्षेत्रं दृष्ट्वोपर्यागत्य रावणाय प्रभासक्षेत्रमाहात्म्यकथनम्, ततः प्रभासक्षेत्रे तेन रावणेन विमानावतरणम्, सर्वनागारिकवचनात्तत्र स्वनाम्ना लिंगस्थापनम्, रावणेश्वरमाहात्म्यवर्णनम्.	१००	२
१२४	अरुंधत्या सौभाग्यवर्धनाय तपस्तप्त्वा तत्र सौभाग्यरूपां सिद्धिं प्राप्य देवीं संस्थाप्य सौभाग्येश्वरीतिनामकरणम्, सौभाग्येश्वरीमाहात्म्यवर्णनम्.	१०१	१
१२५	तारकेण ध्वस्तानिन्द्रादिदेवान्दृष्ट्वेन्द्रपत्न्या पौलोम्या तारकविनाशाय तपस्तप्त्वा लिंगस्थापनम्, पौलोमीश्वरमाहात्म्यवर्णनम्.	१०१	२
१२६	शाण्डिल्यर्षिसंस्थापितशाण्डिल्येश्वरमाहात्म्यवर्णनम्.	१०१	२
१२७	क्षेमंकरेश्वरमाहात्म्यवर्णनम्.	१०१	२
१२८	सागरादित्यमाहात्म्यवर्णनम्.	१०२	१
१२९	अक्षमालेश्वरोग्रसेनेश्वरलिंगमाहात्म्यवर्णनम्.	१०२	२

CC-0. In Public Domain. Digitization by eGangotri

अध्यायाः	विषयाः	प०	पृ०
१३०	पाशुपतादिभिश्चतुर्भिःसिद्धैः प्रभासे देवमाराध्य पाशुपतेश्वरेतिनाम्ना लिंगस्थापनम्, पाशुपतेश्वरमाहात्म्यवर्णनम्.	१०३	२
१३१	ध्रुवेश्वरोत्पत्तिवर्णन उत्तानपादपुत्रेण ध्रुवेण प्रभासे नालेश्वरमाराध्य शिवस्तवनकरणम्, ध्रुवेश्वरेतिनाम्ना लिंगस्थापनं च, ध्रुवेश्वरलिंगमाहात्म्यवर्णनम्. ...	१०५	२
१३२	सिद्धलक्ष्मीतिनाम्नीवैष्णवीशक्तिमाहात्म्ये प्रभासाद्यनेकपीठस्थानवर्णनम्, तत्राद्यप्रभासक्षेत्रस्थसिद्धलक्ष्मीपीठमाहात्म्यवर्णनम्.	१०६	१
१३३	महाकालीपीठमाहात्म्यवर्णनम्.	१०६	१
१३४	सोमस्य यज्ञे प्रवर्तमाने ब्रह्मणो देवैः सह प्रभासे गमनम्, सोमनाथप्रतिष्ठापनार्थं चंद्रेण ब्रह्मणो निमंत्रणकरणम्, ततो लिंगप्रतिष्ठापनलग्नकाल उपस्थिते पितामहेन मनसा पुष्करस्मरणकरणम्, तत्स्मरणेन तत्र पुष्कराणामागमनम्, तदस्तत्रैवावर्तसंभवात्तस्य तीर्थस्य पुष्करावर्तेतिनामकरणम्, पुष्करावर्तकानदीमाहात्म्यवर्णनम्.	१०६	२
१३५	दुःखान्तकारिणीशीतलागौरीमाहात्म्यवर्णनम्.	१०६	१
१३६	लोमशस्थापितलोमशेश्वरमाहात्म्यवर्णनम्.	१०७	२
१३७	कङ्कालभैरवक्षेत्रपालमाहात्म्यवर्णनम्...	१०७	१
१३८	तृणबिन्दुना प्रभासे मासि मासि कुशाग्रेण जलबिंदुं पीत्वा सहस्रसंवत्सरपर्यंतं तपः कृत्वा लिंगस्थापनम्, तृणबिन्द्वीश्वरमाहात्म्यवर्णनम्.	१०७	१
१३९	मित्रनामककायस्थस्य चित्रनामकपुत्रेण पितर्युपरते प्रभासमेत्यादित्याराधनां कृत्वाऽनेकप्रकारेणादित्यं स्तुत्वा स्वेष्टवरप्राप्तिकरणम्, ततः स्नानार्थं सरासि निमज्जन्तं चित्रं प्रति यमाज्ञया यमकिंकरैः सदेहेन यमलोके नयनम्, तत्र यमेन प्राणिचरित्रलेखककर्मणि चित्रगुप्तेतिनाम्ना संस्थापनाकरणम्, प्रभासे चित्रेश्वरेति लिंगस्थापनम्, चित्रादित्यलिंगमाहात्म्यवर्णनम्.	१०७	१
१४०	चित्रपथानदीमाहात्म्यवर्णने सदेहस्य चित्रस्य यमेन स्वलोके नयने कृते चित्रस्य चित्रानामकभगिन्या स्वभ्रातुरन्वेषणाय नदीरूपेणावस्थानम्, चित्रपथानदीमाहात्म्यवर्णनम्....	१०८	१
१४१	कपर्दिचिन्तामणिमाहात्म्यवर्णनम्.	१०८	२
१४२	चित्रेश्वरमाहात्म्यवर्णनम्....	१०८	२
१४३	विचित्रेश्वरमाहात्म्यवर्णनम्.	१०८	२
१४४	पुष्करकुण्डमाहात्म्यवर्णनम्.	१०८	२
१४५	गजकुम्भोदरमाहात्म्यवर्णनम्.	१०९	१
१४६	छायाशप्तेन धर्मराजेन प्रभासे तपस्तप्त्वा लिंगस्थापनम्, यमेश्वरलिंगमाहात्म्यवर्णनम्.	१०९	१
१४७	ब्रह्मनिर्मितब्रह्मकुण्डमाहात्म्यवर्णनम्.	१०९	१
१४८	कुण्डलकूपमाहात्म्ये सुदर्शनराजेन गांधारराजकन्यां सुनंदां परिणीय सुनंदाभार्यानुमोदनं गृहीत्वा तया सार्धं शिवरात्र्युपोषणादिव्रतकरणम्, तत्र शिवरात्रिमाहात्म्यवर्णने धननाम्ना वणिक्पुत्रेण शिवरात्र्युपोषणकरणम्, तस्याः शिवरात्रिव्रतकारिण्या धननामकवणिग्भार्यायाश्छिद्रमन्वेषयितुं स्थितेन कुण्डलिनेन वणिजा निशि धननामकवणिग्भार्यायाः कर्णौ त्रोटयित्वा पलायनकरणम्, तदा तद्रक्षकैः कर्णत्रोटनवार्तां श्रुत्वा कोलाहलं कृत्वा कुण्डलिनस्य कपालच्छेदकरणम्, सपत्नीकस्य सुदर्शनस्य तत्कपालं द्रष्टुं गमनम्, सुदर्शनसुनंदयोस्तत्र प्रभासे गत्वा कुण्डलिनकपालं दृष्ट्वा कुण्डकूपदर्शनकरणम्, कुण्डकूपमाहात्म्यवर्णनम्.	११०	२
१४९	भैरवेश्वरमाहात्म्यवर्णनम्.	११२	१
१५०	ब्रह्मस्थापितब्रह्मेश्वरमाहात्म्यवर्णनम्.	११२	१
१५१	सावित्रीस्थापितसावित्रीश्वरभैरवमाहात्म्यवर्णनम्.	११२	१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अध्यायाः	विषयाः	प०	पृ०
१५२	कस्मिंश्चित्समये तंत्रीवादनेन भूम्यां ब्राह्मणपतनं दृष्ट्वा नारदेन ब्रह्मदेवं प्रति किमेतदिति प्रश्नकरणम्, ब्रह्मदेवाज्ञया नारदेन सप्तब्राह्मणविध्वंसजनितपातकक्षालनार्थं प्रभासक्षेत्रे तपस्तप्त्वा शिवं प्रसाद्य तदाज्ञया भैरवस्थापनम्, नारदेश्वरभैरवमाहात्म्यवर्णनम्.	११२	२
१५३	ब्रह्मणा यज्ञे समारब्धे द्रव्याभावाद्यज्ञसमाप्तिर्नैवेति मत्वा द्रव्यप्राप्त्यर्थं प्रभासे शिवाराधनाकरणम्, ततः शिवाज्ञया द्रव्यरूपेण सरस्वत्याः प्रवहणम्, तस्यां सरस्वत्यां समुत्पन्नं काञ्चनपद्मरूपं बहुधनं लब्ध्वा ब्रह्मणा यज्ञसमाप्तिकरणम्, तत्रैव हिरण्येश्वरेतिनाम्ना लिंगस्थापनम्, हिरण्येश्वरमाहात्म्यवर्णनम्. ...	११२	२
१५४	गायत्रीसंप्रतिष्ठापितगायत्रीश्वरमाहात्म्यवर्णनम्.	११३	१
१५५	विष्णुना प्रभासे तपस्तप्त्वा रत्नेश्वरलिंगकुण्डस्थापनकरणम्. रत्नेश्वरलिंगमाहात्म्यवर्णनम्....	११३	२
१५६	गरुडेश्वरमाहात्म्यवर्णनम्.	११३	२
१५७	सत्यभामेश्वरमाहात्म्यवर्णनम्.	११३	२
१५८	अनङ्गस्थापितानङ्गेश्वरमाहात्म्यवर्णनम्.	११४	१
१५९	रत्नकुण्डमाहात्म्यवर्णनम्.	११४	१
१६०	रैवंतकराजभट्टारकमाहात्म्यवर्णनम्.	११४	२
१६१	अनन्तेश्वरमाहात्म्यवर्णनम्.	११४	२
१६२	अष्टकुलेश्वरलिंगमाहात्म्यवर्णनम्.	११४	२
१६३	नासत्येश्वरलिंगमाहात्म्यवर्णनम्.	११४	२
१६४	अश्विनेश्वरलिंगमाहात्म्यवर्णनम्.	११४	२
१६५	सावित्रीमाहात्म्यवर्णने प्रथमं शंकरेण वेदोत्पत्तिसृष्ट्युत्पत्त्यादिवर्णनम्, ततो ब्रह्मणा यज्ञकर्म प्रचलितुं समुद्योगकरणम्, ततो ब्रह्मणा पुष्करतीर्थमेत्य यज्ञभूमिकाशुद्धिकरणम्, अध्वर्युणा सावित्रीं प्रति यज्ञार्थं निमन्त्रणे कृते सत्यपि सावित्र्या "एकाकिनी नाहमेष्यामि" इति तं प्रति शंसित्वा स्वगृहकर्मण्यासक्तिकरणम्, ततस्तेनाध्वर्युणा 'सावित्री नायाति' इति ब्रह्मणे कथनम्, ततः क्रोधाविष्टेन ब्रह्मणा शक्रायान्यपत्न्यानयनार्थमाज्ञाकरणम्, ततः शक्रेण कांचिद्गोपकन्यां गृहीत्वा ब्रह्मसमीप आनयनम्, ततो ब्रह्मणा तां गोपकन्यकां परिणीय यज्ञारंभकरणम्, ततो देवस्त्रीभिः परिवृतायाः सावित्र्यास्तत्र यज्ञे गमनम्, तत्र ब्रह्मणाऽन्यपत्नीं परिणीयारब्धं यज्ञं दृष्ट्वा कोपाविष्टया सावित्र्या ब्रह्मदेवस्य निर्भर्त्सनाकरणम्, सावित्रीवचनं श्रुत्वा ब्रह्मणान्यपत्नीवरणकारणे कथितेऽपि सावित्र्या ब्रह्मणेऽपूज्यतारूपशापप्रदानम्, शक्रेण ब्रह्मविवाहार्थमाभीरीनियोजनेन शक्राय युद्धे शत्रुभिः पराजयप्रापकशापप्रदानम्, तथा च सावित्र्या विष्णवे भार्याविरहजनकत्वशापदानम्, सावित्र्या तथैवान्यान्देवान्प्रत्यपि शापदानम्, विष्णुना सावित्र्याः स्तुतिकरणम्, गायत्र्या सावित्रीदत्तशापनिरासाय सर्वेभ्यो वरप्रदानम्, गायत्रीजपविधिकथनम्, सावित्र्याः प्रभासे गमनम्, प्रभासक्षेत्रस्थायाः सावित्र्या माहात्म्यवर्णनम्.	११५	१
१६६	अथ वटसावित्रीव्रतमाहात्म्यवर्णनम्, तत्राश्वपतिना राज्ञाऽनपत्यत्वनिरासाय सावित्रीपूजाराधनाकरणम्, तुष्टया सावित्र्या दत्तेन वरेणाश्वपते राज्ञः सावित्रीनाम्न्याः कन्याया जननम्, तयाश्वपतिपुत्र्या सावित्र्या सत्यवन्तमेव पतित्वेन परिणेष्यामीति निश्चयकरणम्, तत्र नारदेनाश्वपतिं प्रति सत्यवतः सर्ववृत्तान्तकथनम्, सावित्रीसत्यवंद्विवाहवर्णनम्, ततः कस्मिंश्चित्समये समित्कुशाद्याहरणार्थं सावित्र्या सह सत्यवतो वने गमनम्, काष्ठपाटने शिरोवेदनायां जातायां सत्यवता तत्रैव काष्ठानि त्यक्त्वा सावित्रीसमीपमेत्य सावित्र्यङ्के निद्राकरणम, तावद्यमस्यागमनम्, यमसावित्रीसंवादवर्णनम्, यमेन सत्यवच्छरीरतो जीवं निष्कास्य गमनम्, सावित्र्या यमस्यानुगमनम्, यमेन बहुधा सावित्रीं प्रति स्वानुगमननिवारणे कृतेऽपि सावित्र्या दृढनिश्चयं दृष्ट्वा तस्यै वरदानम्, यमप्रसादेन स्वभर्तारमुज्जीव्य त्रिरा-		

CC-0. In Public Domain. Digitization by eGangotri

अध्यायाः	विषयाः	प०	पृ०
	त्रवटसावित्रीव्रतसमाप्तिं कृत्वा भर्त्रा सह सावित्र्या स्वाश्रमे गमनम्, सावित्रीव्रतविधिपूजादानादिमाहात्म्यवर्णनम्, सावित्रीव्रतोद्यापनादिकथनम्.	११८	२
१६७	भूतमातृकामाहात्म्यवर्णने चाक्षुषमन्वन्तरे दक्षशापात्पर्वतकुले पार्वतीजन्मवर्णनम्, पार्वतीशंकरविवाहोत्तरं दिव्यवर्षसहस्रपर्यन्तं तयोः क्रीडमानयोः पार्वत्या रजसः सकाशादेकस्या नार्या उत्पत्तिवर्णनम्, तस्या नार्याः स्वरूपवर्णनम्, तस्या अन्यासां सखीनां नामवर्णनम्, तथैव शिववीर्यत एकस्य पुरुषस्योत्पत्तिवर्णनम्, शंकरेण तयोः शिवपुत्रयोः प्रभासे गन्तुमाज्ञाकरणम्, तयोर्वासे स्थानदानकरणम्, प्रतिपत्प्रभृतिदेव्युत्सववर्णनम्, तस्या भूतमातुः शरीरतः पञ्चकोटिसंख्याकपिशाचोत्पत्तिवर्णनम्, भूतमातृकामाहात्म्यवर्णनम्.	१२१	१
१६८	शालकटंकटामाहात्म्यवर्णनम्.	१२३	२
१६९	वैत्रस्वतेश्वरलिंगमाहात्म्यवर्णनम्.	१२३	२
१७०	मातृगणबलदेवीमाहात्म्यवर्णनम्.	१२४	१
१७१	दशरथेन तपस्तप्त्वा दशरथेश्वरनाम्ना लिंगसंस्थापनम्, दशरथेश्वरमाहात्म्यवर्णनम्.	१२४	१
१७२	भरतेश्वरलिंगमाहात्म्य आग्नीध्रपुत्रेण भरतेन नवधा द्वीपविभागं कृत्वा स्वस्य नवपुत्राणामाधिपत्ये प्रकल्पनम, तत्र नवमे कौमारिकाद्वीपे प्रभासे भरतेन भरतेश्वरस्थापनम्, भरतेश्वरमाहात्म्यवर्णनम्.	१२४	१
१७३	कुशकेश्वरगर्गेश्वरपुष्करेश्वरमैत्रेयेश्वरमाहात्म्यवर्णनम्.	१२४	२
१७४	प्रभासे कुन्तीसमन्वितपाण्डवागमनसमये कुन्तीस्थापितकुन्तीश्वरमाहात्म्यवर्णनम्.	१२४	२
१७५	अर्कस्थलमाहात्म्यवर्णनम्.	१२४	२
१७६	सिद्धेश्वरमाहात्म्यवर्णनम्.	१२५	१
१७७	लकुलीशमाहात्म्यवर्णनम्.	१२५	१
१७८	भार्गवेश्वरमाहात्म्यवर्णनम्.	१२५	१
१७९	माण्डव्येश्वरलिंगमाहात्म्यवर्णनम्.	१२५	१
१८०	पुष्पदन्तेश्वरलिंगमाहात्म्यवर्णनम्.	१२५	१
१८१	क्षेत्रपालेश्वरमाहात्म्यवर्णनम्.	१२५	२
१८२	वसुनन्दामातृगणश्रीमुखविवरमाहात्म्यवर्णनम्.	१२५	२
१८३	त्रिसंगममाहात्म्यवर्णनम्.....	१२५	२
१८४	संकीश्वरमाहात्म्यवर्णनम्.	१२५	२
१८५	देवमातृगौरीमाहात्म्यवर्णनम्.	१२६	१
१८६	यादवक्षयं विधाय पञ्चतां गतं कृष्णं श्रुत्वा बलभद्रस्य प्रभासे गमनम्, तत्र लिंगस्थापनम्, ततो नागरूपं धृत्वा बलभद्रस्य पाताले बिलद्वारेण गमनात्तस्य लिंगस्य नागेश्वरेति नामस्थापनम्, नागेश्वरलिंगमाहात्म्यवर्णनम्..... ...	१२६	१
१८७	प्रभासपञ्चकमाहात्म्यवर्णनम्, तत्र भिक्षार्थं शिवस्य दारुकवने गमनम्, दारुकवने भ्राम्यतः शिवस्य रूपं दृष्ट्वा तत्रत्यानां नारीणां कामोद्दीपनवर्णनम्, ततः कोपयुक्तैस्तत्पतिभिर्नग्नं शिवं दृष्ट्वा शिवाय शापदानम्, तेन शापेन तत्रैव शिवलिंगपतनम्, तल्लिंगपतनेन भूम्याः कंपनवर्णनम्, ततो महार्णवप्लावनादिसर्वब्रह्माण्डक्षयं दृष्ट्वा भीतैर्देवैर्विष्णुसमीपे गमनम्, ततो विष्णुवचनात्सर्वदेवानां प्रभासे गमनम्, तत्रैव तस्य लिंगस्य स्थापनम्, प्रभासपञ्चकमाहात्म्यवर्णनम्.	१२६	२
१८८	रुद्रेश्वरमाहात्म्यवर्णनम्.	१२७	२
१८९	कर्ममोटीमाहात्म्यवर्णनम्.	१२७	२
१९०	मोक्षस्वामिमाहात्म्यवर्णनम्.	१२७	२
१९१	अजीगर्तेश्वरमाहात्म्यवर्णनम्.	१२७	२
१९२	विश्वकर्मेश्वरमाहात्म्यवर्णनम्.	१२७	२
१९३	यमेश्वरमाहात्म्यवर्णनम्....	१२७	२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अध्यायाः	विषयाः	प०	पृ०
१९४	अमरेश्वरमाहात्म्यवर्णनम्.	१२८	१
१९५	वृद्धप्रभासमाहात्म्यवर्णनप्रस्ताव ऋषीणां देवदर्शनार्थं प्रभासे गमनम्, तत्र वज्रेणाच्छादितं देवं दृष्ट्वा ऋषिभिर्विषादकरणम्, ऋषिभिर्लिंगदर्शनविषयकनिश्चयं कृत्वा तपःकरणम्, तपः कुर्वतामृषीणां जराप्राप्तिः, ततस्तुष्टेन देवेन तेभ्यो लिंगदर्शनदानम्, ऋषीणां लिंगदर्शनोत्तरं स्वस्वस्थानेषु प्रयाणम्, ऋषीणां वृद्धभावेन तपसा लिंगदर्शनाद्वृद्धप्रभासेतिनामकरणम्, वृद्धप्रभासलिंगमाहात्म्यवर्णनम्.	१२८	१
१९६	परशुरामेण तपस्तप्त्वा लिंगस्थापनाकरणम्, जलप्रभासलिंगमाहात्म्यवर्णनम्.	१२८	२
१९७	जमदग्नीश्वरलिंगमाहात्म्यवर्णनम्.	१२८	२
१९८	पञ्चप्रभासक्षेत्रमाहात्म्यवर्णनम्.	१२९	१
१९९	कृतस्मरमाहात्म्यवर्णने प्रथमं दक्षस्य शतसंख्याकानां सुतानां व्यवस्थाकरणवर्णनम्, ततो दक्षेण यज्ञ आरब्धे पार्वत्या स्वापमानं दृष्ट्वा स्वदेहत्यागकरणम्, ततः क्रुद्धेन शिवेन वीरभद्रं समुत्पाद्य सैन्यैः सह तस्य वीरभद्रस्य दक्षयज्ञविध्वंसाय प्रेषणम्, तत्र युद्धे प्रवृत्ते वीरभद्रेण पराजितानां देवानां विष्णुसमीपे क्षीराब्धौ गमनम्, ततो विष्णुना वीरभद्रेण सह युद्धकरणम्, तत्र किञ्चिद्वीरभद्रपराजयं दृष्ट्वा क्रुद्धस्य शिवस्य तत्रागमनम्, आगतं शिवं दृष्ट्वा विष्ण्वादिदेवैः पलायनकरणम्, ततः शिवेन दक्षयज्ञविध्वंसकरणम्.	१२९	१
२००	ततस्तारकपीडितैर्देवैर्ब्रह्मणः समीपे गमनम्, ब्रह्माज्ञया शिवमनसि कामोद्दीपनं कर्तुं कामदेवस्य देवैः प्रेषणम्, स्वोपाधिकारिणं कामं दृष्ट्वा शिवेन भस्मीकरणम्, ततः पतिविरहशोकाकुलाया रत्या नभोवाण्या सान्त्वनकरणम्, तत्र लिंगस्थापनम्, कामकुण्डापरनामककृतस्मरमाहात्म्यवर्णनम्.	१३०	२
२०१	कालभैरवश्मशानमाहात्म्यवर्णनम्.	१३१	१
२०२	कस्मिंश्चित्समये कौरवपाण्डवीये युद्धे प्रवृत्ते वलभद्रस्य यात्रार्थं सुरापानं पीत्वा वने गमनम्, तत्र ऋष्याश्रमे वहून्स्थितानृषीन्सूतं च दृष्ट्वा तथैव स्वमनादृत्य सूतपूजनकरणे प्रवृत्तांश्जनान्दृष्ट्वा स्वापमानमसहमानेन वलभद्रेण सूतवधकरणम्, तत उत्तरं वलभद्रे पश्चात्तापेन शोकं कुर्वति नभोगतवाण्या कृतां सूचनां समाकर्ण्य प्रभासमेत्य दोषदूरीकरणार्थं तपस्तप्त्वा स्वनाम्ना लिंगस्थापनम्, रामेश्वरलिंगमाहात्म्यवर्णनम्.	१३१	२
२०३	मंकीश्वरमाहात्म्यवर्णनप्रस्तावे मंकिना कुब्जत्वनिरासाय प्रभासे लिंगस्थापनम्, मंकीश्वरलिंगमाहात्म्यवर्णनम्.	१३३	१
२०४	सरस्वतीसागरसंगममाहात्म्यवर्णनम.	१३३	२
२०५	श्राद्धविधिकथने श्राद्धकालकथनम्, सप्तविधद्रव्यशुद्धिवर्णनम्, श्राद्धार्हदिनवर्णनम्, पार्वणादीनां व्याख्याकरणम्, श्राद्धार्हानर्हब्राह्मणवर्णनम्, श्राद्धीयब्राह्मणपरीक्षणकथनम्....	१३४	१
२०६	श्राद्धविधिवर्णने मौनविधिप्राशस्त्यवर्णनम्, श्राद्धीयान्नवर्णनम्, श्राद्धीयमासादिग्रहणकालनिर्णयवर्णनम्, श्राद्धकर्मणि साहित्यवर्णनम, श्राद्धविधिवर्णनम्.	१३६	१
२०७	श्राद्धे वस्त्रान्नादिदानफलमाहात्म्यवर्णनम्, दानकर्मणि पात्रापात्रविचारकरणम्, वर्णाश्रमधर्मकथनम्, आपत्तिकालिकधर्माचरणकथनम्, श्राद्धदिने मैथुनादिकरणे दोषकथनम्.	१३८	२
२०८	शस्ताशस्तदानविचारकरणम्, एकादशीव्रतविधानकथनम्, षट्पिण्डादिनिर्णयकरणम्.	१४०	२
२०९	मार्कण्डेयेश्वरमाहात्म्यवर्णनम्.	१४१	२
२१०	पुलस्त्येश्वरमाहात्म्यवर्णनम्.	१४२	२
२११	पुलहेश्वरमाहात्म्यवर्णनम्.....	१४२	२
२१२	क्रत्वीश्वरमाहात्म्यवर्णनम्.	१४२	२
२१३	कश्यपेश्वरमाहात्म्यवर्णनम्.	१४२	२
२१४	कौशिकेश्वरमाहात्म्यवर्णनम्.	१४३	१
२१५	कुमारेश्वरमाहात्म्यवर्णनम्.	१४३	१

CC-0. In Public Domain. Digitization by eGangotri

अध्यायाः	विषयाः	प०	पृ०
२१६	गौतमेश्वरमाहात्म्यवर्णनम्.	१४३	१
२१७	देवराजेश्वरमाहात्म्यवर्णनम्.	१४३	१
२१८	मानवेश्वरमाहात्म्यवर्णनम्.	१४३	२
२१९	मार्कण्डेयसमीपस्थनीलकण्ठेश्वरमाहात्म्यवर्णनम.	१४३	२
२२०	वृषभध्वजेश्वरलिंगमाहात्म्यवर्णनम्.	१४४	१
२२१	ऋणमोचनेश्वरमाहात्म्यवर्णनम्.	१४४	१
२२२	रुक्मवतीश्वरमाहात्म्यवर्णनम्.	१४४	२
२२३	बलभद्रेण तत्र स्वगात्रत्यागाद्गात्रोत्सर्गेति नाम्ना प्रकटीभवनम्, गात्रोत्सर्गलिंगमाहात्म्यवर्णनम्, गात्रोत्सर्गतीर्थे श्राद्धादिकरणमाहात्म्यवर्णनम्, तत्र प्रेततीर्थवर्णने गौतमस्य गात्रोत्सर्गतीर्थे गमनम्, तत्र पथि वैष्णववनस्य गौतमेन दर्शनकरणम्, तत्र वने पंचप्रेतान्दृष्ट्वा गौतमेन भयकरणम्, गौतमप्रेतसंवादः, गौतमाय प्रेतैः स्वेषां वृत्तान्तकथनम्, प्रेतैः प्रेतत्वापादकस्वकीयकर्मकारणकथनम्, प्रेततो मुक्तिकारणं श्रुत्वा तदाज्ञया गौतमेन प्रभासे प्रेततीर्थमेत्य तेषांतेषां श्राद्धकरणम्, तेन तेषां प्रेतानां मुक्तिकथनम्, प्रेततीर्थमाहात्म्यवर्णनम्.	१४४	२
२२४	इन्द्रेश्वरमाहात्म्यवर्णनम्.	१४६	२
२२५	अनरकेश्वरमाहात्म्यवर्णने मथुरावासिनं देवशर्मब्राह्मणमानेतुं यमेन स्वदूतेभ्य आज्ञाकरणम्, ततस्तमानीतं देवशर्माणं दृष्ट्वा नायमानेतुमर्ह इति यमेन पुनः स्वदूतान्प्रत्याज्ञाकरणम्, तेन ब्राह्मणेन भुवि गन्तुं स्वस्यानिच्छाप्रदर्शनम्, ततस्तेन ब्राह्मणेन पृष्टेन यमेन तस्मै ब्राह्मणाय नरकवर्णनम्, नरकप्रापकपापादिदोषवर्णनम्, कर्मविपाककथनम्, नरकविनाशकपुण्योपायकथनम्, अनरकेश्वरमाहात्म्यवर्णनम्....	१४६	२
२२६	मेघेश्वरमाहात्म्यवर्णनम्.	१४७	२
२२७	बलभद्रेश्वरमाहात्म्यवर्णनम्.	१४८	१
२२८	भैरवेश्वरमातृगणमाहात्म्यवर्णनम्.	१४८	१
२२९	गङ्गामाहात्म्यवर्णनम्.	१४८	१
२३०	गणपतिमाहात्म्यवर्णनम्.	१४८	१
२३१	जाम्बवतीनदीमाहात्म्यवर्णनम्.	१४८	२
२३२	पाण्डवकूपमाहात्म्यवर्णनम्.	१४८	२
२३३	पाण्डवेश्वरमाहात्म्यवर्णनम्.	१४९	१
२३४	भरतेन प्रभासे दशसंख्याकानश्वमेधान्कृत्वा लिंगस्थापनम्, दशाश्वमेधिकतीर्थलिंगमाहात्म्यवर्णनम्.	१४९	१
२३५	शतमेधादिलिंगत्रयमाहात्म्यम्.	१४९	२
२३६	दुर्वाससा स्थापितस्य दुर्वासेश्वरस्य लिंगस्य माहात्म्यवर्णनम.	१४९	२
२३७	स्त्रीस्वरूपधारिसांबद्वारा यादवैर्ऋषिवञ्चनकरणम्, कोपाविष्टैर्ऋषिभिर्यादवान्धकेभ्यः कुलनाशजनकशापदानम्, तत एरकाभिर्यादवकुलनाशवर्णनम्, ततो निखिलयादवानां नाशोत्तरमवशिष्टेन वज्रसंज्ञकेन यादवेन तेषां यादवानामुत्तरक्रियां कृत्वा प्रभासमेत्य लिंगस्थापनम्, वज्रेश्वरलिंगमाहात्म्यवर्णनम्. ...	१५०	२
२३८	हिरण्यानदीमाहात्म्यवर्णनम्.	१५२	२
२३९	स्यमन्तकाख्यानवर्णनपूर्वकनागरादित्यमाहात्म्यवर्णनम्.	१५२	२
२४०	बलभद्रसुभद्राकृष्णमाहात्म्यवर्णनम्.....	१५३	२
२४१	शेषमाहात्म्यवर्णनम्.	१५३	२
२४२	चण्डमुण्डादिवधवर्णनपुरःसरकुमारीमाहात्म्यवर्णनम्.	१५३	२
२४३	मन्त्रावलिक्षेत्रपालमाहात्म्यवर्णनम्.	१५४	२
२४४	विचित्रेश्वरमाहात्म्यवर्णनम्.	१५४	२
२४५	ब्रह्मेश्वरमाहात्म्यवर्णनम.	१५४	२
२४६	पिंगानदीमाहात्म्यवर्णनम्.	१५४	२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अध्यायाः	विषयाः	प०	पृ०
२४७	पिंगलादित्यपिंगादेवीशुक्रेश्वरमाहात्म्यवर्णनम्.	१५५	१
२४८	ब्रह्मेश्वरमाहात्म्यवर्णनम्.	१५५	१
२४९	संगमेश्वरमाहात्म्यवर्णनम्.	१५५	२
२५०	गंगेश्वरमाहात्म्यवर्णनम्.	१५५	२
२५१	शंकरादित्यमाहात्म्यवर्णनम्.	१५५	२
२५२	शंकरनाथमाहात्म्यवर्णनम्.	१५६	१
२५३	गुफेश्वरमाहात्म्यवर्णनम्.	१५६	१
२५४	घंटेश्वरमाहात्म्यवर्णनम्.	१५६	१
२५५	कस्मिंश्चित्समयेऽवर्षणत्वात्क्षुत्क्षामानृषीन्दृष्ट्वा वृषादर्भिसंज्ञकेन राज्ञा धान्यादिदाने कृतेऽपि तैर्ऋषिभिस्तद्धनधान्यादिकं राजप्रतिग्रहमिति निषिध्य त्यक्त्वा ततो निर्गत्य तीर्थयात्रार्थं गमनम्, किञ्चिद्दूरं गत्वा सरसि बिसानि दृष्ट्वा तान्यादाय तीरे स्थापयित्वा नित्याह्निककरणम, तदा केनापि तानि बिसानि हृतानीति ज्ञात्वा सर्वर्षिभिः सत्यत्वेन शपथकरणम्, तत्र शक्रेण शुनोमुखरूपेणागत्य बिसादिहरणं कृतमिति ज्ञात्वा शक्रेण तेभ्यो वरप्रदानम्, तत्रैव ऋषितीर्थनाम्ना कुण्डस्थापनम्, ऋषितीर्थमाहात्म्यवर्णनम्.	१५६	१
२५६	कुष्ठव्याप्तेन नंदेन राज्ञा सूर्यमाराध्य स्थापनाकरणम्, नन्दादित्यमाहात्म्यवर्णनम्.	१५७	२
२५७	सौराष्ट्रदेशाधिपत्यात्रेयसंज्ञकराजस्यैकतद्वितत्रितेतिपुत्रत्रये पितर्युपरते सर्वविद्यानिष्णातस्य त्रितपुत्रस्य राज्ये स्थापनम, तेन त्रितेन सह मत्सरं कृत्वा एकतद्विताभ्यां त्रितस्य कूपे निक्षेपकरणम्, ततस्त्रितेन तत्र मंत्रैर्देवानावाह्य मंत्रोच्चारैरेव तेषां संतुष्टिकरणम्, तेन तुष्टैर्देवैस्तस्मात्कूपतस्त्रितस्य बहिर्निःसारणम्, त्रितकूपोत्पत्तिवर्णनम्, त्रितकूपे श्राद्धादिकरणेन पुण्यमाहात्म्यवर्णनम्, त्रितकूपतीर्थमाहात्म्यवर्णनम्.	१५८	२
२५८	देवासुरैः समुद्रमंथनं कृत्वाऽमृतं निर्माय चंद्रं विना सर्वदेवैरमृतभक्षणोत्तरमवशिष्टममृतं शशकेन भक्षितं दृष्ट्वाऽमरत्वप्राप्त्यनंतरं चंद्रस्य भयकरणम्, ततश्चन्द्रस्यामृतमलब्ध्वा देवाज्ञयाऽमृतमिश्रिततटाकस्थितजलपानं कुर्वतस्तस्य हृदयेऽमृतप्राशनकारिशशकस्य गमनम्, तत्रैव स्थले कूपं खनित्वा शशापानकूपेतिनामकरणम्, शशापानमाहात्म्यवर्णनम्.	१५९	२
२५९	पर्णादित्यमाहात्म्यवर्णनम्.	१६०	१
२६०	सिद्धेश्वरमाहात्म्यवर्णनम्.	१६०	१
२६१	न्यंकुमतीमाहात्म्यवर्णनम्.	१६०	१
२६२	वाराहस्वामिमाहात्म्यवर्णनम्.	१६०	२
२६३	छायालिंगमाहात्म्यवर्णनम्.	१६०	२
२६४	नंदिनीगुफामाहात्म्यवर्णनम्.	१६०	२
२६५	कनकनंदामाहात्म्यवर्णनम्.	१६०	२
२६६	कुम्भीश्वरमाहात्म्यवर्णनम्.	१६०	२
२६७	गंगापथगंगेश्वरमाहात्म्यवर्णनम्.	१६१	१
२६८	चमसोद्भेदमाहात्म्यवर्णनम्.	१६१	१
२६९	विदुराश्रममाहात्म्यवर्णनम्.	१६१	१
२७०	मङ्कणकेन महर्षिणा प्राचीसरस्वतीमेत्य तपःकरणम्, तपःसिद्धेन तेन कराच्छाकरसनिर्गमनेनाश्चर्यचकितेन नृत्यकरणम्, तस्मिन्मङ्कणके नृत्यति सर्वं ब्रह्माण्डं नृत्यमानं जातमिति मत्वा शंकरेण तत्रागत्य मंकणकं प्रति नृत्यकारणे पृष्टे मंकणकान्नृत्यकारणं ज्ञात्वा स्वहस्ततो भस्मोत्पत्तिकरणम्, तेन मंकणकेन तद्दृष्ट्वा साश्चर्येण सता नृत्यतो विरमणम्, ततः शंकरवचनतो लिंगस्थापनम्, प्राचीसरस्वतीमंकेश्वरलिंगमाहात्म्यवर्णनम्.	१६१	१
२७१	ज्वालेश्वरमाहात्म्यवर्णनम्.	१६२	१

CC-0. In Public Domain. Digitization by eGangotri

अध्यायाः	विषयाः	प०	पृ०
२७२	त्रिपुरलिंगत्रयमाहात्म्यवर्णनम्.	१६२	१
२७३	शंडतीर्थमाहात्म्यवर्णनम्...	१६२	२
२७४	सूर्यप्राचीमाहात्म्यवर्णनम्.	१६२	२
२७५	त्रिनेत्रेश्वरमाहात्म्यवर्णनम्.	१६२	२
२७६	देविकायामुमापतिमाहात्म्यवर्णनम्.	१६३	१
२७७	भूधरयज्ञवराहमाहात्म्यवर्णनम्.	१६३	१
२७८	वैशाखनामकेन केनचिद्विप्रेण स्वधर्मं त्यक्त्वा व्याधधर्मेण कुटुंबपोषणकरणम्, एकदा मार्गे सप्तर्षीन्दृष्ट्वा तन्नाशनोद्योगकरणम्, ततो मुनिभिस्तं वैशाखं नीतिमार्गेणोपदिश्य तस्मै मंत्रोपदेशकरणम्, तन्मन्त्रप्रभावेण तस्य वाल्मीकिनामप्राप्तिवर्णनम्, तेन वाल्मीकिना मुनिवचनाद्देविकापूजनेन सिद्धिप्राप्तिवर्णनम्, देविकामाहात्म्यवर्णनम्, मूलस्थानमाहात्म्यवर्णनम्.	१६३	२
२७९	सूर्याष्टोत्तरशतनामावलिवर्णनम्, च्यवनादित्यमाहात्म्ये सूर्याष्टोत्तरशतनामपठनफलश्रुतिवर्णनम्.	१६५	१
२८०	च्यवनेश्वरमाहात्म्यवर्णनम्.	१६५	२
२८१	अश्विभ्यां सुकन्यायै प्रश्नकरणम्, सुकन्यया स्वपतेः सुरूपतारुण्यप्राप्तये तयोः प्रार्थनाकरणम्, ततोऽश्विनोर्वचनाच्च्यवनस्याश्विभ्यां सह कुण्डे स्नानकरणेन सुस्वरूपत्वप्राप्तिवर्णनम्, च्यवनेश्वरमाहात्म्यवर्णनम्.	१६६	२
२८२	च्यवनमहर्षिणा स्वोपकारकरयोरश्विनीकुमारयोर्यज्ञभागाधिकारसंपादनार्थं शर्यातिद्वारा यज्ञकरणम्, तत्र यज्ञे च्यवनेन नासत्ययज्ञभागप्रतिरोधकवज्रमोचनोद्यतशक्रनाशाय कृत्योद्भवमदनामकमहासुरोत्पादनवृत्तान्तवर्णनम्.	१६७	१
२८३	स्वोपरि प्राप्तं मददैत्यं दृष्ट्वा शक्रेण च्यवनर्षेः प्रार्थनाकरणम्, ततश्च्यवनेन शक्रोपरिं दयां विधाय शक्रापराधक्षमापणम्, च्यवनेश्वरमाहात्म्यवर्णनम्.	१६७	२
२८४	सुकन्यासरोमाहात्म्यवर्णनम्.	१६८	१
२८५	कपटेन मेषरूपधारिणो वातापेरगस्तिना भक्षणकरणादिवृत्तान्तकथनम्, अगस्त्याश्रमगंगेश्वरमाहात्म्यवर्णनम्.	१६८	१
२८६	अगस्त्येश्वरोत्तरस्थबालार्कमाहात्म्यवर्णनम्.	१६९	१
२८७	अजापालेश्वरीमाहात्म्यवर्णनम्.	१६९	१
२८८	अगस्त्याश्रमपूर्वस्थबालार्कमाहात्म्यवर्णनम्.	१६९	१
२८९	पातालगंगेश्वरविश्वामित्रेश्वरबालेश्वराभिधालिंगत्रयमाहात्म्यवर्णनम्.	१६९	२
२९०	कुबेरनगरोत्पत्तिकुबेरस्थापितसोमनाथमाहात्म्यवर्णनम्.	१६९	२
२९१	भद्रकालीमाहात्म्यवर्णनम्.	१७०	२
२९२	भद्रकालीबालार्कमाहात्म्यवर्णनम्.	१७०	२
२९३	कुबेरस्थानोत्पत्तिकुबेरमाहात्म्यवर्णनम्.	१७०	२
२९४	पुष्पेश्वरमाहात्म्यवर्णनपूर्वकमजोगन्धेश्वरमाहात्म्यवर्णनम्.	१७०	२
२९५	चन्द्रोदकतीर्थमाहात्म्यवर्णनपूर्वकमिन्द्रेश्वरमाहात्म्यवर्णनम.	१७१	१
२९६	ऋषितोयानदीमाहात्म्यवर्णनम्.	१७१	२
२९७	सर्वर्षिभिर्ब्रह्मणः स्तुतिकरणम्, ततस्तुष्टेन ब्रह्मणा देवदारुवने सरस्वतीप्रेषणम्, तत्रैवर्षिभिस्तपःकरणम्, ऋषितोयोत्पत्तिवर्णनम्, ऋषितोयामाहात्म्यवर्णनम्...	१७१	२
२९८	ब्राह्मवैष्णवरौद्रेतिकुण्डत्रयवर्णनम्, गुप्तप्रयागमाहात्म्यवर्णनम्.	१७२	२
२९९	माधवमाहात्म्यवर्णनम्.	१७३	१
३००	सङ्गालेश्वरमाहात्म्यवर्णनम्.	१७३	१
३०१	सिद्धेश्वरमाहात्म्यवर्णनम्....	१७३	२
३०२	गन्धर्वेश्वरमाहात्म्यवर्णनम्.	१७३	२
३०३	उत्तरेश्वरमाहात्म्यवर्णनम्.	१७४	१
३०४	संगालेश्वरसमीपवर्तिगंगामाहात्म्यवर्णनम्.	१७४	१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अध्यायाः	विषयाः	प०	पृ०
३०५	नारदेन सांबेनानादृतमात्मानं दृष्ट्वा सांबाय शापदानम्, सांबेनापि नारदाय 'जरायुक्तो भव' इति शापप्रदानम्, नारदेन जराविनाशाय आदित्यपूजनकरणम्, तत्रैव प्रभासे लिंगस्थापनम्, नारदादित्यमाहात्म्यवर्णनम्.	१७४	२
३०६	तत्र प्रभासे स्वशापदूरीकरणाय सांबेनं तपस्तप्त्वा लिंगस्थापनम्, सांबादित्यमाहात्म्यवर्णनम्.	१७५	२
३०७	अक्षरनारायणमाहात्म्यवर्णनम्.	१७६	१
३०८	मूलचण्डीशोत्पत्तिमाहात्म्यवर्णनम्.	१७६	१
३०९	चतुर्मुखविनायकमाहात्म्यवर्णनम्.	१७७	२
३१०	कंबलेश्वरमाहात्म्यवर्णनम्.	१७७	२
३११	गोपालस्वामिहरिमाहात्म्यवर्णनम्.	१७८	१
३१२	बकुलस्वामिमाहात्म्यवर्णनम्.	१७८	१
३१३	उत्तरार्कमाहात्म्यवर्णनम्.	१७८	१
३१४	ऋषितीर्थसंगममाहात्म्यवर्णनम.	१७८	१
३१५	मरुदार्यादेवीमाहात्म्यवर्णनम्.	१७८	१
३१६	क्षेमादित्यमाहात्म्यवर्णनम्.	१७८	२
३१७	कंटकशोषणीमाहात्म्यवर्णनम्.	१७८	२
३१८	ब्रह्मेश्वरमाहात्म्यवर्णनम्.	१७९	१
३१९	उन्नतस्थानमाहात्म्यवर्णनम्.	१७९	१
३२०	लिंगद्वयमाहात्म्यवर्णनम्.	१८०	२
३२१	ब्रह्ममाहात्म्यवर्णनम्.	१८०	२
३२२	दुर्गादित्यमाहात्म्यवर्णनम्.	१८१	१
३२३	क्षेमेश्वरमाहात्म्यवर्णनम्.	१८१	१
३२४	गणनाथमाहात्म्यवर्णनम्.	१८१	१
३२५	उन्नतस्वामिमाहात्म्यवर्णनम्.	१८१	१
३२६	महाकालमाहात्म्यवर्णनम्.	१८१	२
३२७	महोदयमाहात्म्यवर्णनम्.	१८१	२
३२८	संगमेश्वरमाहात्म्यवर्णनम्.	१८१	२
३२९	उन्नतविनायकमाहात्म्यवर्णनम्.	१८१	२
३३०	तलस्वामिमाहात्म्यवर्णनम्.	१८२	१
३३१	कालमेघमाहात्म्यवर्णनम	१८२	१
३३२	रुक्मिणीमाहात्म्यवर्णनम	१८२	१
३३३	पिंगेश्वरभद्रामाहात्म्यवर्णनम्.	१८२	१
३३४	शंकराङ्गत उत्पन्नेन तलाख्यदैत्येन देवपराजयकरणम्, ततो देवैर्विष्णुमाराध्य स्वदुःखनिवेदनकरणम्, ततो विष्णुना समं तलस्य युद्धम्, तयोर्युद्धे प्रवृत्ते श्रांतस्य विष्णोः श्रमविनाशाय हरेण तप्तोदकुण्डनिर्माणकरणम्, तत्र तप्तोदकुण्डे स्नानकरणेन श्रमरहितेन विष्णुना तलस्य कंधरे समाक्रान्ते तलेन हास्यकरणम्, तद्दृष्ट्वा विष्णुना तलाय वरप्रदानम्, तलवचनात्तलस्वामीतिनाम्ना स्थापनाकरणम्, तलस्वामिमाहात्म्यवर्णनम्.	१८२	२
३३५	शंखावर्ततीर्थमाहात्म्यवर्णनम्.	१८४	१
३३६	गोष्पदतीर्थमाहात्म्यवर्णनेंगपुत्राद्वेनराजतः पृथोरुत्पत्तिवर्णनम्, पृथुना भक्षितवीजोत्पादनार्थं गोरूपपृथिवीदोहनवर्णनम्, पुत्रवत्पृथुना प्रजापालनकरणम, स्वपितुः पापकर्माणि संस्मृत्यसंस्मृत्य तत्क्षालनाय पृथुना बहुतीर्थक्षेत्रेषु गमनम्, कुत्रापि पितुः पापक्षालनं नैवेति मत्वा पृथुना गोष्पदे गमनम्, पृथुना गोष्पदतीर्थे स्नानादिकरणेन तस्य पितुः सर्वपापं विधूय मोक्षप्राप्तिः, गोष्पदतीर्थमाहात्म्यवर्णनम्.	१८४	१

CC-0. In Public Domain. Digitization by eGangotri

अध्यायाः	विषयाः	प०	पृ०
३३७	नारायणगृहमाहात्म्यवर्णनम्.	१९०	१
३३८	सरस्वत्युदक आपस्तम्बर्षेस्तपःकरणम्, तत्र धीवरैर्जालानि प्रसार्य मत्स्यैः सह जालेनापस्तंवर्षेर्वहिर्निःसारणम्, तदा धीवरैर्भयभीतैरापस्तम्बस्य प्रार्थनाकरणम्, आपस्तम्बमूल्यदानविषये नाभागाम्बरीषसंवादे गोदानमाहात्म्यवर्णनम्, तत्रैव जालेश्वरेतिनाम्ना लिंगस्थापनम्, जालेश्वरलिंगमाहात्म्यवर्णनम्.	१९०	१
३३९	हुंकारकूपमाहात्म्यवर्णनम्.	१९१	२
३४०	चण्डीश्वरमाहात्म्यवर्णनम्.	१९२	१
३४१	आशापूरविघ्नराजमाहात्म्यवर्णनम्.	१९२	१
३४२	चन्द्रेश्वरकलाकुण्डतीर्थमाहात्म्यवर्णनम्.	१९२	२
३४३	कपिलधाराकपिलेश्वरकपिलाषष्ठीव्रतविधानमाहात्म्यवर्णनम्....	१९२	२
३४४	जरद्गवेश्वरमाहात्म्यवर्णनम्.	१९३	१
३४५	नलेश्वरमाहात्म्यवर्णनम्....	१९३	२
३४६	कर्कोटकार्कमाहात्म्यवर्णनम्, हाटकेश्वरमाहात्म्यवर्णनं च....	१९३	२
३४७	नारदेश्वरीमाहात्म्यवर्णनम्.	१९४	२
३४८	मंत्रविभूषणागौरीमाहात्म्यवर्णनम्.	१९४	२
३४९	दुर्गकूटगणपतिमाहात्म्यवर्णनम्.	१९५	१
३५०	कौरवेश्वरीमाहात्म्यवर्णनम्.	१९५	१
३५१	सुपर्णेलामाहात्म्यवर्णनम्....	१९५	१
३५२	भल्लतीर्थमाहात्म्यवर्णनम्.	१९५	१
३५३	कर्दमालमाहात्म्यवर्णनम्....	१९६	१
३५४	गुप्तेश्वरमाहात्म्यवर्णनम्.	१९६	२
३५५	वहुसुवर्णेश्वरमाहात्म्यवर्णनम्.	१९६	२
३५६	शृंगेश्वरमाहात्म्यवर्णनम्....	१९७	१
३५७	कोटीश्वरमाहात्म्यवर्णनम्.	१९७	१
३५८	नारायणतीर्थमाहात्म्यवर्णनम्.	१९७	१
३५९	शृंगारेश्वरमाहात्म्यवर्णनम्.	१९७	१
३६०	मार्कण्डेश्वरमाहात्म्यवर्णनम्.	१९७	२
३६१	कोटिह्रदमण्डूकेश्वरमाहात्म्यवर्णनम्....	१९७	२
३६२	एकादशरुद्रलिंगमाहात्म्यवर्णनम्.	१९७	२
३६३	हिरण्यातुण्डपुरघर्घरह्रदकन्देश्वरमाहात्म्यवर्णनम्.	१९७	२
३६४	संवर्तेश्वरमाहात्म्यवर्णनम्.	१९७	२
३६५	प्रकीर्णस्थानलिंगमाहात्म्यवर्णनम्.	१९८	१

॥ इति प्रभासखण्डे प्रथमं प्रभासक्षेत्रमाहात्म्यम् ॥ (७–१) ॥

अथ प्रभासखण्डे द्वितीयं वस्त्रापथ (गिरनार) क्षेत्रमाहात्म्यम् ॥ (७-२) ॥

अध्यायाः	विषयाः	प०	पृ०
१	दामोदरमाहात्म्यवर्णने कस्यचिद्गजसंज्ञकस्य राज्ञो गृहे वहूनामृषीणामागमनम्, तत्र गजेन पृष्टैर्ऋषिभिर्गजराजाय सर्वतीर्थक्षेत्रमाहात्म्यकथनम्, नाममाहात्म्यवर्णनम्, दामोदरमाहात्म्यवर्णनम्.	२००	१
२	भवशब्दस्य व्युत्पत्त्यर्थनिदर्शनम्, देवैर्भवस्थापनवर्णनम्, भवमाहात्म्यवर्णनम्....	२०२	२
३	स्वर्णरेखानदीमाहात्म्यवर्णनम्, ब्रह्मकुण्डब्रह्मेश्वरकालमेघदामोदरकालिकाभवेन्द्रेश्वरैवतोज्जयंतकुंभीश्वरभीमेश्वरादिवस्त्रापथक्षेत्रस्थप्रवरतीर्थानुकीर्तनम्.	२०२	२
४	दुन्नावल्लिहद्रिरिस्थानमाहात्म्यवर्णनम्.	२०३	१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अध्यायाः	विषयाः	प०	पृ०
५	यक्षेश्वरमाहात्म्यवर्णनम्.	२०३	१
६	चक्रतीर्थयात्राविधिवर्णनम्, मृगवत्त्रवनकारिबालादर्शनं कृतमिति केनचिद्वनपालेन भोजराजाय कथनम्, तच्छ्रुत्वा तुष्टेन भोजेन तस्मै वनपालाय वहुधनदानम्, ततस्तेन वनपालेन सह तत्र वने गत्वा भोजेन तां मृगवक्त्रां बालां गृहीत्वा स्वगृहे गमनम्, ततो भोजेन तस्यै बालायै मानुष्यशरीरत्वमृगवक्त्रत्वप्रापककारणे पृष्टे तयाऽकथने भोजेन विप्रेभ्यः प्रश्नकरणम्, ततः सारस्वतमहर्षिसंस्कृतपुरोडाशप्राशनसमुपलब्धस्पष्टवाक्प्रसरमृगाननाकथितोभयप्राक्सप्तजन्मवृत्तान्तवर्णनम्.	२०३	१
७	मृगाननाभोजराजसंवादे स्वोत्पत्तिवर्णनप्रसंग उद्दालकर्षेर्मूत्रसर्जनाय वनान्तरे गमनम्, तत्र तस्य वीर्यबिन्दुपतनम्, तत्रैकया मृग्योद्दालकवीर्यबिंदुप्राशनम्, तत उद्दालकान्मृग्यां मृगाननायाः स्वस्या जन्मेति भोजाय मृगाननया कथनम्, द्वारवतीकुरुक्षेत्रादिबहुतीर्थक्षेत्रमाहात्म्यवर्णनम्, स्वर्णरेखायां मृगाननायाः पूर्वजन्ममृगमुखप्रक्षेपणेन दिव्यमुखत्वप्राप्त्युत्तरं भोजनृपतिपरिणयवृत्तान्तपूर्वकं स्वर्णरेखामाहात्म्यवर्णनम्.	२०६	१
८	सारस्वतभोजसंवादे ब्रह्मरुद्रविवादे विष्णुवचनेन ब्रह्मकृतरुद्रप्रसादनवर्णनम्.	२०७	१
९	ब्रह्मणे विष्णुना दक्षयज्ञकथादिवर्णने दक्षयज्ञविध्वंसवर्णनम्, पार्वतीजननविवाहादिवर्णनम्, तत एकस्मिन्समयेऽन्तर्धानं गतं शंकरमदृष्ट्वा सिंहारूढया पार्वत्या समं विष्ण्वादिदेवानां शिवान्वेषणाय गमनम्, ततः प्रभासे वस्त्रापथक्षेत्रे तैः शंकरस्य दर्शनम्, विष्ण्वाद्याज्ञया शंकरेण भवेति नाम्ना स्वस्या मूर्तेस्तत्र वस्त्रापथक्षेत्रे स्थापनम्, भवोत्पत्तिमाहात्म्यवर्णनम्.	२०७	२
१०	वस्त्रापथक्षेत्रयात्रोत्सुकस्य भोजभूपस्य सारस्वतमुनिकृतोपदेशवर्णनम्...	२१२	२
११	वस्त्रापथक्षेत्रयात्राक्रमविधानवर्णनम्....	२१३	१
१२	श्राद्धकरणे गजच्छायादिदिनमाहात्म्यवर्णनम्, यात्राकारिभिस्त्याज्यदोषादिवर्णनम्, भीमेश्वरस्कान्दरामेश्वराद्यन्यान्यतीर्थेषु स्नानदानादिफलवर्णनम्, तीर्थस्मरणफलकथनम्, यात्राविधिवर्णनम्.	२१४	१
१३	हरिहरपूजाफलकथनम्, तत्र स्नानदानजपहोमदेवद्विजार्चनफलकथनम्, धूममार्गार्चिर्मार्गवर्णनम्, श्राद्धदानादिमाहात्म्यवर्णनम्.	२१५	१
१४	वामनपुरे पुत्रशोकाभिसंतप्तेन वसिष्ठेन स्वर्णरेखातटे तपस्तप्त्वा शिवप्रसादेन तत्रैव लिंगस्थापनम्, ततो वामनस्थापितसोमनाथमाहात्म्यवर्णने बलिविद्रावितैर्देवैर्विष्णुं प्रति शरणगमनम्, ततो विष्णुना देवकार्यार्थं वामनरूपं धृत्वा बलिसभायां पादत्रयभूमिग्रहणेन बलिनिग्रहकरणोत्तरं सोमनाथमाराध्य लिंगस्थापनम्, सोमेश्वरोत्पत्तिवर्णनम्.	२१६	१
१५	वामनस्य दामोदरदर्शनं ग्रहीतुं रैवतकारण्ये गमनम्, तत्र नृसिंहं संपूज्य स्नानदानादिकं विधाय तत उत्तरं दामोदरदर्शनाय वस्त्रापथक्षेत्रे गमनम्, तत्र जागरणं कृत्वा सिद्धिं प्रति गमनम्, दामोदराग्रे जागरस्य माहात्म्यवर्णनम्. ...	२१८	१
१६	ततो वामनस्य यात्रार्थं गहनेऽरण्ये गमनम्, अनेकतीर्थक्षेत्रदर्शनोत्तरं मार्गे शिवस्य दर्शनम्, शिववामनसंवादवर्णनम्, तत्र शिवेन वामनायेन्द्रेश्वरमाहात्म्यकथनम्, शिवरात्रिमाहात्म्यवर्णनम्, शिवरात्रिव्रतविधिकथनं च.	२१९	२
१७	भृगुणा शप्तं देवं दृष्ट्वा देवोऽपि वामनावताररूपेण बलिनिग्रहं करिष्यतीति ज्ञात्वा नारदस्य बलेरग्रे गमनम्, तत्र नारदेन बलये त्वत्तोऽपि देवेन्द्रलक्ष्मीरधिकतरेति निवेद्य बलेर्मनः क्षोभयित्वा समुद्रमन्थनसमये देवकृतवञ्चनस्यापि बलये स्मरणं कारयित्वा स्वर्गं प्रत्येत्य शक्रायापि नारदेन तथैव कथनम्, एवं मिथः कलहादिना परस्परं संक्षोभ्य नारदेन बलये राजनीतिधर्मशास्त्रादिव्यवहारकथनम्, रैवतकपर्वतोत्पत्तिवर्णने मेरोर्दक्षिणस्थे कुमुदपर्वते विष्णुमन्दिरे स्थितं देवं		

CC-0. In Public Domain. Digitization by eGangotri

अध्यायाः	विषयाः	प०	पृ०
	द्रष्टुं विष्णोरहरहरागमनम्, कुमुदेन तत्रैव कुमुदपर्वते हरिहरयोः स्थापनम्, कुमुदपर्वताय हरिहराभ्यां वरप्रदानम्, ततो रैवतनामकपञ्चममन्वन्तर ऋतवागृषितो मूढपुत्रोत्पत्त्यावृतवाग्गर्गयोः संवादे रेवत्यृक्षजनितस्वपुत्रस्य मौढ्यदोषं श्रुत्वा क्रुद्धेनर्तवाचार्षिणा स्वदृष्टिनिक्षेपेण रेवत्यृक्षस्याधः पातनम्, ततः कुमुदपर्वते रेवत्यृक्षस्य पतनम्, तेन कुमुदाद्रे रैवतकेतिनाम्ना प्रसिद्धिवर्णनम्, ततो रैवतकगिरे रेवतीनामककन्योत्पत्तिवर्णनम्, रेवत्याः प्रमुञ्चराजर्षिणा पालनकरणम्, अग्निवचनात्प्रमुञ्चेन दुर्दमराजाय रेवतीप्रदानकरणम्, रेवतीकुण्डे स्नानेन रेवतेति ख्यातपुत्रस्य जन्म, वैष्णवपूज्याशिवालक्ष्मीवृक्षमाहात्म्यवर्णनम्, नारदेन बलये वैष्णवव्रतजागरादिविधिकथनम्, तथैव बलिना वैष्णवव्रतजागरादिकं कृत्वा सञ्चलितोत्पातनाशनाय शुक्रानुज्ञया ब्राह्मणानाहूय यज्ञसमारंभकरणम्, बलियज्ञप्रभाववर्णनम्.	२२२	२
१८	प्राणायामादिप्रकारकथनम्, अष्टधा प्रकृत्युत्पत्तिवर्णनम्, सांख्यमतेन पञ्चविंशतितत्त्वाख्यानम्, भवध्यानप्रकारकथनम्, भवसंनिधौ स्थितस्य वामनस्याग्रे नारदागमनम्, नारदेन वामनाय बलियज्ञादिसर्ववृत्तान्तकथनम्, वामनेन नारदस्य वृथाकलहकारित्वस्वभावेन निर्भर्त्सनम्, ततो नारदेन कल्पान्तस्थितिवर्णनम्, नारदेन वामनाय हिरण्याक्षादिवधवृत्तकथनम्, ततो नारदवचनाद्वामनेन बलिनिग्रहाय बलेरग्रमेत्य शुक्रतिरस्कृतमपि बलिं पादत्रयभूमिं याचित्वा ततः स्वात्मवृद्धयाऽखिलब्रह्माण्डं व्याप्य बलेर्निग्रहकरणम्.	२२८	२
१९	सारस्वतभोजसंवादे बलिनिग्रहोत्तरं बलेर्द्वारे विष्णोरवस्थानम्, वस्त्रापथक्षेत्रमाहात्म्यश्रवणफलश्रुतिकथनम्.	२३४	१

इति प्रभासखण्डे द्वितीयं वस्त्रापथक्षेत्रमाहात्म्यम् ॥ (७-२) ॥

॥ अथ प्रभासखण्डे तृतीयमर्बुदखण्डम् ॥ (७-३) ॥

अध्यायाः	विषयाः	प०	पृ०
१	अर्बुदाचलमाहात्म्यवर्णनोपक्रमः, तत्रादौ वसिष्ठस्यार्बुदाचले गमनम्, तत्र तपस्तप्त्वा यज्ञार्थं पालिताया धेनोररण्ये तृणादि चरितुं गतायाः श्वभ्रे पतनम्, सायं धेनोरप्रत्यागमनाद्वसिष्ठेन चिन्ताकरणम्, ततो वसिष्ठेन श्वभ्रसमीपमेत्य स्वधेनोर्भुम्भारावं श्रुत्वा तस्या बहिर्निर्गमनार्थं सरस्वतीध्यानकरणम्, तेन ध्यानेन सरस्वत्या स्वजलेन श्वभ्रं पूरयित्वा गोर्बहिर्निःसरणकरणम्, तां धेनुं गृहीत्वा वसिष्ठस्य स्वाश्रमे गमनम्, ततो वसिष्ठेन तच्छ्वभ्रपूरणाय हिमवन्तं गत्वा श्वभ्रायामविस्तारं हिमवते कथयित्वा हिमवद्वचनाच्छ्वभ्रोत्पत्तिकथनम्, वसिष्ठाश्रमसमीपवर्तिविवरवृत्तान्तोपक्रमवर्णनम्.	२३७	१
२	गौतमशिष्यस्योत्तंकस्य गुरुदक्षिणां दातुं गुरुपत्न्या सौदासपत्नीमदयन्तीकुण्डलानयने प्रचोदितस्य सौदासगृहं प्रति गमनम्, तत्र स्वस्य देहं भक्षितुमागतं व्याघ्रास्यं सौदासं दृष्ट्वा स्वात्मप्रदानाय तस्मै प्रतिज्ञाकरणम्, ततस्तत्पत्न्याः सकाशात्कुण्डललब्धिः, सौदासस्य शापाद्विमुक्तिः, ततः कुण्डले गृहीत्वा गतेन गौतमशिष्येण मध्येमार्गं निहितयोस्तयोः कुंडलयोस्तक्षकेण हरणम्, ततस्तक्षकस्य पृष्ठतस्तत्प्रत्यानयनार्थं पाताले गमनम्, तस्मिन्नेव समये तत्र गर्तोत्पादनम्, गौतमशिष्योत्तंकचरित्रवर्णनम्.	२३७	२
३	वसिष्ठाज्ञया हिमवद्वचनान्नंदिवर्धनपर्वतेनार्बुदनागनीतेन श्वभ्रपूरणकरणम्, अर्बुदाचलमाहात्म्यवर्णनम्.	२३९	१
४	तत्रार्बुदानीतनंदिवर्धनाख्यपर्वते शिवावासार्थं वसिष्ठेन तपःकरणम्, वसिष्ठेन शिवस्तवकरणम्, ततो वसिष्ठेन शिवप्रसादेनाचलेश्वरेतिनाम्ना लिंगस्थापनम्, शिवेन मन्दाकिन्यावासकरणम्, अचलेश्वरमाहात्म्यवर्णनम्.	२४०	१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अध्यायाः	विषयाः	प०	पृ०
५	अर्बुदाचले नागतीर्थमाहात्म्यवर्णने ययातिपुलस्त्यसंवादे गौतम्या नागतीर्थे स्नानार्थं गमनवर्णनम्, तत्र स्नातुं प्रवृत्तायास्तस्याः पुत्रेच्छाव्याकुलितहृदयत्वात्केवलस्नानेन गर्भधारणम्, ततो लज्जया चितां प्रवेष्टुकामायास्तस्या नभोवाणीश्रवणान्मरणतो निवर्तनम्, नागतीर्थमाहात्म्यवर्णनम्.	२४०	२
६	वसिष्ठाश्रममाहात्म्यवर्णनम्.	२४१	१
७	अचलेश्वरप्रभाववर्णनम्....	२४१	२
८	भद्रकर्णह्रदत्रिनेत्रमाहात्म्यवर्णनम्.	२४२	१
९	केदारमाहात्म्यवर्णनेऽजापालं प्रति वसिष्ठेन 'प्राग्जन्मनि शूद्रत्वं प्राप्तेन त्वया कमलैः केदारेश्वरपूजनेनेह जन्मनि ते राज्यपदप्राप्तिः' इति कथनम्, केदारेश्वरमाहात्म्यवर्णनम्.	२४२	१
१०	युगकालप्रमाणादिवर्णनम्, चतुर्युगधर्माधर्मविवेचनम्, कलियुगप्रभावात्सर्वतीर्थागमनवर्णनम्.	२४३	२
११	कोटीश्वरमाहात्म्यवर्णनम्.	२४४	२
१२	वपुर्नामकाप्सरसा रूपतीर्थे स्नानकरणेन सुस्वरूपप्राप्तिः, रूपतीर्थमाहात्म्यवर्णनम्.	२४५	१
१३	हृषीकेशमाहात्म्यवर्णनेऽम्बरीषराजर्षिणा तपः कृत्वा हरिमूर्तिस्थापनम्, हृषीकेशमाहात्म्यवर्णनम्.	२४६	१
१४	विश्वावसुनामकसिद्धेन शिवमाराध्य शिवकृपया लिंगस्थापनम्, सिद्धेश्वरलिंगमाहात्म्यवर्णनम्.	२४७	२
१५	दैत्यान्देवैर्निर्जितान्दृष्ट्वा चिंतया दैत्यजयप्राप्त्यर्थं दैत्यगुरुणा शुक्राचार्येण देवमाराध्य वरं लब्ध्वा दैत्यजयकरणं तत्र शुक्रेश्वरेतिनाम्ना लिंगस्थापनं च, शुक्रेश्वरलिंगमाहात्म्यवर्णनम्.	२४८	१
१६	कयाचिन्मणिकर्णिकाख्यया स्त्रिया स्नानकरणेन तस्याः सुस्वरूपप्राप्तिरतो मणिकर्णिकेतिनाम्ना कुण्डख्यातिकथनम्, मणिकर्णिकेश्वरमाहात्म्यवर्णनम्.	२४८	१
१७	केनचित्पंगुनामकेन पंगुत्वं गतेन विप्रेण शिवं प्रसाद्य पंगुत्वं निराकृत्य स्वनाम्ना तीर्थस्थापनम्, पंगुतीर्थमाहात्म्यवर्णनम्.	२४९	१
१८	अतीवपापकारिणश्चित्रांगदस्य जलं प्रविष्टस्य तृषार्तस्य ग्राहेण हरणम्, ततो यमदूतैः पापिनश्चित्रांगदस्य नरके प्रक्षेपणम्, चित्रांगदस्य नरके प्रक्षेपणेन तत्रत्यजीवानां सुखप्राप्तिः, तत आश्चर्यं दृष्ट्वा यमेन ज्ञानेक्षणेन समवलोक्य मत्तीर्थस्नानकरणेन तत्रैवास्य मृतिप्राप्तेर्नायं नरकलोकदुःखभागिति मनसि विचार्य तस्य नरकतो मोचनम्, ततस्तस्य चित्रांगदस्याप्सरोगणवेष्टितविमानेन स्वर्गे गमनम्, यमतीर्थमाहात्म्यवर्णनम्.	२४९	२
१९	वाराहतीर्थमाहात्म्यवर्णनम्.	२४९	२
२०	दक्षेण चन्द्रं प्रति स्वकन्यासु विषमत्वेन वर्तनदर्शनाद्यक्ष्मजनकशापप्रदानम्, ततश्चन्द्रेण तपस्तपनम्, तेन तपसा तस्य यक्ष्मरोगनिवृत्तिः, चन्द्रेण चन्द्रप्रभासेति नाम्ना लिंगस्थापनम्, चन्द्रप्रभासतीर्थलिंगमाहात्म्यवर्णनम्.	२५०	१
२१	पिण्डोदकतीर्थमाहात्म्यवर्णनम्.	२५०	२
२२	कलिंगनामकदानवेन जितैर्देवैर्देव्याराधनां कृत्वा देवीकृपया स्वर्गप्रापणम्, कलिंगदेहोपरि पर्वतशृंगं निधाय तच्छिखरे देव्या स्वावस्थानकरणम्, देवैः श्रीमातादेवीस्तवनकरणम्, श्रीमातामाहात्म्यवर्णनम्....	२५१	१
२३	अथ शुक्लतीर्थमाहात्म्यम्, तत्र रजकेन नीलीमध्ये प्रक्षिप्तानां वस्त्राणां शुक्लत्वप्राप्त्या तस्य तीर्थस्य शुक्लतीर्थेति नामकरणम्, शुक्लतीर्थमाहात्म्यवर्णनम्.	२५३	१
२४	निशुंभदैत्यं हत्वा देव्यास्तत्रार्बुदाचलेऽवस्थानात्तस्याः कात्यायनीतिनाम्ना देवैः स्थापनम्, कात्यायनीमाहात्म्यवर्णनम्.	२५३	१

CC-0. In Public Domain. Digitization by eGangotri

अध्यायाः	विषयाः	प०	पृ०
२५	पिण्डारकतीर्थमाहात्म्यवर्णनम्.	२५४	१
२६	कनखलतीर्थमाहात्म्यवर्णनम्.	२५४	१
२७	चक्रतीर्थप्रभाववर्णनम्.	२५४	२
२८	मनुष्यतीर्थप्रभाववर्णनम्.	२५४	२
२९	मृगयासक्तेन सुप्रभनृपतिना वालं स्तनंधयंतीं मृगीं प्रति बाणेन वेधकरणम्, ततो मृग्या राज्ञे "रौद्रव्याघ्रो भविष्यसि" इति शापप्रदानम्, तत्काल एव राज्ञो व्याघ्रत्वप्राप्तिः, तत्रैवारण्ये गोकुलतो भ्रष्टायाः कस्याश्चित्कपिलानाम्न्या गोरागमनम्, व्याघ्रकापिलयोः संवादवर्णनम्, ततः कपिलया व्याघ्रसमीपे शपथं कृत्वा स्वस्थानं गोष्ठं गत्वा दुग्धं बालाय पाययित्वा वत्साय वनगतवृत्तान्तं श्रावयित्वा वनमेतुं वत्साग्रहं दृष्ट्वा ततो वत्सस्य निवारणं कृत्वा स्वसखीः प्रत्येत्य सर्वं कथयित्वा सखीभिर्व्याघ्रसन्निधौ गन्तुं निवारितयापि तया सखीवचनमवमन्य व्याघ्रसमीपे प्रत्यागमनम्, गोः सत्यवक्त्रीत्वं दृष्ट्वा विस्मयोत्फुल्लमानसेन व्याघ्रेण गवे जीवदानम्, सुप्रभस्य शापान्मुक्तिः, तस्यैव स्थानस्य कपिलातीर्थेतिनाम्ना प्रसिद्धिः, कपिलातीर्थमाहात्म्यवर्णनम्.	२५५	१
३०	अग्नितीर्थमाहात्म्यवर्णनम्.	२५७	२
३१	इन्द्रसेनस्य शत्रुविनाशार्थं धनहरणार्थं परदेशे गमनम्, ततो दूतमुखेनेन्द्रसेनेनेन्द्रसेनो मृत इति तत्पत्न्यै कथनकरणादिन्द्रसेनपत्नीविनाशः, इन्द्रसेनस्य स्त्रीहत्याविनाशार्थं सोमतीर्थादिप्रभासस्थसर्वतीर्थेषु गमनकरणम्, इन्द्रसेनस्य तत्र गत्वा पापहानेरभावाद्रक्तानुबंधतीर्थे स्नानकरणेनैव पापमुक्तिवर्णनम्, रक्तानुबन्धतीर्थमाहात्म्यवर्णनम्.	२५८	२
३२	उद्वर्तनजं लेपं गृहीत्वा पार्वत्या बालकनिर्माणकरणम्, पार्वत्या लेपाभावाच्छिरोहीनो बालकोऽयमिति मत्वा तत्कबंधेन सह कस्यचिन्मत्तगजमस्तकस्य संधानकरणम्, ततः शिवेन महाविनायकेति तस्य नामकरणम्, महावैनायकीशान्तिकथनम्, महाविनायकमाहात्म्यवर्णनम्.	२५९	१
३३	पार्थेश्वरमाहात्म्यवर्णनम्...	२६०	१
३४	महत्त्वाकांक्षया ब्रह्मविष्ण्वोः परस्परं कलहायमानयोर्युध्यतोश्च मध्य एकस्यानाद्यन्तस्य लिंगस्योत्पत्तिवर्णनम्, तत आकाशवाण्या तयोर्युद्धपरावर्तनं कारयित्वा 'यो लिंगान्तं पश्येत्स महान्' इति पणकथनम्, तत्र ब्रह्मणा शिवसंनिधौ मिथ्या लिंगोर्ध्वपर्यन्तदर्शनवृत्तकथनाच्छिवेन ब्रह्मणेऽपूज्यत्वप्रापकशापदानम्, तथैव ब्रह्मणो मिथ्यासाक्ष्यं दातुं प्रवृत्तस्य केतकस्यापि शापदानम्, ततो विष्णवे शंकरेण वरप्रदानम्, कृष्णतीर्थमाहात्म्यवर्णनम्.	२६०	२
३५	मामुह्रदोत्पत्तिवृत्तान्तवर्णनम्.	२६१	२
३६	महिषासुरपीडितैर्देवैः कृतेनाराधनेन प्रसन्नया देव्या महिषासुरवधकरणम्, तत्रैव देवैश्चण्डिकाश्रमेतिनाम्ना स्थापनवृत्तान्तवर्णनम्, चण्डिकाश्रममाहात्म्यवर्णनम्.	२६३	१
३७	नागोद्भवतीर्थमाहात्म्यवर्णनम्.	२६७	१
३८	शिवगंगाकुण्डोत्पत्तिमाहात्म्यवर्णनम्....	२६७	२
३९	शिवलिंगमाहेश्वरमाहात्म्यवर्णनपुरःसरसक्तुदानमाहात्म्यवर्णनम्.	२६८	२
४०	शंकरेण कामदहनकरणाद्रत्या शोककरणम्, तं रतिकृतं शोकं श्रुत्वा नभोवाण्या कामस्यानङ्गत्वपूर्वकसंजीवनवर्णनम्, तया रत्या सह कामेन लिंगस्थापनम्, कामेश्वरमाहात्म्यवर्णनम्.	२७०	१
४१	मार्कण्डजन्मादिकथानिदर्शनपूर्वकं मार्कण्डेयाश्रमपदोत्पत्तिवृत्तान्तवर्णनम्. ...	२७०	२
४२	उद्दालकेश्वरमाहात्म्यवर्णनम्.	२७१	२
४३	सिद्धेश्वरमाहात्म्यवर्णनम्....	२७१	२
४४	गजतीर्थप्रभाववर्णनम्.	२७१	२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अध्यायाः	विषयाः	प०	पृ०
४५	श्रीदेवखातोत्पत्तिमाहात्म्यवर्णनम्.	२७२	१
४६	व्यासतीर्थमाहात्म्यवर्णनम्.	२७२	१
४७	गौतमाश्रमतीर्थमाहात्म्यवर्णनम्.	२७२	१
४८	इन्दुमत्यप्रस्तुताख्यराजकथावर्णनपूर्वकं कुलसंतारणतीर्थमाहात्म्यवर्णनम्.	२७२	१
४९	परशुरामतीर्थमाहात्म्यवर्णनम्.	२७३	१
५०	कोटितीर्थप्रभाववर्णनम्.	२७३	२
५१	चन्द्रोद्भेदतीर्थमाहात्म्यवर्णनम्.	२७३	२
५२	ईशानीशिखरमाहात्म्यवर्णनम्.	२७४	१
५३	ब्रह्मपदोत्पत्तिमाहात्म्यवर्णनम्.	२७५	१
५४	त्रिपुष्करमाहात्म्यवर्णनम्.	२७५	२
५५	रुद्रह्रदमाहात्म्यवर्णनम्.	२७५	२
५६	गुहेश्वरमाहात्म्यवर्णनम्.	२७५	२
५७	अवियुक्तक्षेत्रमाहात्म्यवर्णनम्.	२७६	१
५८	उमामहेश्वरतीर्थमाहात्म्यवर्णनम्.	२७६	१
५९	महौजसतीर्थप्रभाववर्णनम्.	२७६	१
६०	जंबुतीर्थप्रभाववर्णनम्.	२७६	१
६१	गङ्गाधरतीर्थमाहात्म्यवर्णनम्.	२७६	२
६२	कटेश्वरगङ्गेश्वरमाहात्म्यवर्णनम्.	२७६	२
६३	अर्बुदखण्डमाहात्म्यफलश्रुतिवर्णनम्.	२७७	१

इति प्रभासखण्डे तृतीयमर्बुदखण्डम् ॥ (७-३) ॥

अथ प्रभासखण्डे चतुर्थं द्वारकामाहात्म्यम् ॥ (७-४) ॥

अध्यायाः	विषयाः	प०	पृ०
१	कलौ युगे प्राप्ते विष्णोः काऽऽवासस्थानमिति शौनकादिभिः पृष्टेन सूतेन कलियुगस्थितिवर्णनम्, तत्र स्वावतारादिकानि कार्याणि कृत्वा श्रीकृष्णे देवेऽनन्ते स्वस्थानं गते लुप्तप्रायधर्मं कलिं दृष्ट्वा क वाऽस्मत्सदृशानां स्थितिर्भाव्येति मनसा विचिन्त्य ऋषीन्प्रत्युद्दालकोक्तिः, तदुद्दालकवाक्यं श्रुत्वा कलिकालसंपीडितजनानां मुक्तिप्राप्त्यर्थमुपायं योजयितुमृषीणां ब्रह्मणोऽग्रे गमनम्, उद्दालकाद्यृषिभिर्ब्रह्मस्तुतिकरणम्, ततो ब्रह्मपृच्छयर्षिभिः स्वागमनकारणकथनम्, तदा ब्रह्मणा 'नाहं विष्णोरवस्थितिं जानामि' इत्युत्तरदानम्, ब्रह्मोत्तरं श्रुत्वा प्राणत्यागकरणे प्रवृत्तानृषीन्दृष्ट्वा ब्रह्मणा ऋषिभिः सह प्रह्लादसमीपे गमनम्, प्रह्लादेन सर्वर्षीणां ब्रह्मणश्चातिथ्यकरणम्, ब्रह्ममुखेनर्षिभिः प्रह्लादाय स्वागमनकारणकथनम्, ऋषिभिः प्रह्लादाय कलियुगे भगवत्स्थितिविषयकप्रश्नकरणम्.	२७९	१
२	प्रह्लादेन ऋषीन्प्रत्युत्तरं दातुं कलियुगस्यारम्भस्थितिवर्णनम्, तत्रोद्धवकृष्णयोः संवादे प्रवृत्ते तावद्दुर्वाससो यात्रां कर्तुं प्रवृत्तस्य गौमतीतीरं प्रत्यागमनमिति श्रुत्वा कृष्णरुक्मिण्योस्तत्र दुर्वासोदर्शनार्थं गमनम्, ततो दुर्वाससा कृष्णाय कुशलादिप्रश्नकरणम्, ततो मिथः कुशलं कथयित्वा श्रीकृष्णेन दुर्वाससे द्वारकां प्रत्येतुमाग्रहकरणम्, दुर्वाससा स्वागमार्थं प्रार्थयानं कृष्णं प्रति स्वस्वभावनिवेदनम्, तथापि कृष्णस्यात्याग्रहं दृष्ट्वा कृष्णरुक्मिण्यौ रथवाहकत्वे नियोज्य दुर्वाससो द्वारकागमनप्रवृत्तिवर्णनम्, मध्येमार्गं तृषितां रुक्मिणीं दृष्ट्वा श्रीकृष्णेन पादाक्रान्त्या धरातलं निर्भिद्य पातालतो भोगावत्या आनयनम्, ततो रुक्मिण्या श्रीकृष्णानीतभोगावतीजलस्य प्राशनकरणम्, दुर्वाससा 'मदाज्ञया विना रुक्मिण्या जलप्राशनं कृतम्' इति मत्वा तदसहमानेन तस्यै रुक्मिण्यै शापदानम्. ततो दुर्वाससा रथादवरुह्य भूमाववस्थितिकरणम्, ततः श्रीकृष्णेन		

CC-0. In Public Domain. Digitization by eGangotri

अध्यायाः	विषयाः	प०	पृ०
	रुक्मिण्या च दुर्वाससः आश्वासनम्, ततो दुर्वाससं स्वगृहं नीत्वा तत्पादोदकक्षालनेन स्वदेहकृतार्थीकरणम्. … … …. …. ….	२८०	१
३	रुक्मिण्या दुर्वासोदत्तशापं स्मृत्वा बहुशोककरणम्, रुक्मिण्यग्रे नारदागमनम्, नारदेन बहुप्रकारेण रुक्मिण्यै बोधं कृत्वा रुक्मिण्या सह रुक्मिणीशापनिवृत्त्यर्थं भागीरथीतीर्थे गमनम्, तत्र भागीरथीतीरस्थरुक्मिणीवने सुखेन रममाणाया रुक्मिण्या वृत्तान्तं श्रुत्वा 'स्ववाक्यं कथं मृषा भवेत्' इति मनसि कृत्वा दुर्वाससा भागीरथ्यै रुक्मिणीवनस्थितेभ्योऽन्यवृक्षेभ्यश्च शापदानम्, ततो रुक्मिण्या मरणे निश्चयकरणम्, कण्ठपाशकरां रुक्मिणीं मरणोद्यतां ज्ञात्वा गरुडमारुह्य श्रीकृष्णस्य तत्रागमनम्, ततो दुर्वाससाऽपि 'मया किमिदं कृतम्' इत्येवं स्वयं पश्चात्तापं कृत्वा रुक्मिणीसमीपमेत्य श्रीरुक्मिणीकृष्णयोः क्षमया सन्तोषीकरणम्, रुक्मिणीदुःखशापमोचनकरणम्. …. ….	२८१	१
४	श्रीकृष्णदुर्वाससोः परस्परं वरं दत्त्वा गोमतीतीरे स्वस्वषोडशकलया जनोपकारार्थमावासकरणम्, तत्र गोमतीतीरमाहात्म्यवर्णनम्, समासतो द्वारकामथुरामाहात्म्यवर्णनम्, तत्र बृहस्पतीन्द्रसंवादे कलिकालमाहात्म्यवर्णनप्रसंगः, तत्र चक्रतीर्थाद्यनेकतीर्थस्नानदानादिना कलिकालोद्भूतोन्मत्तम्लेच्छादिबाधाविनाश इति कथयित्वा बृहस्पतिना सेन्द्रदेवानां सांत्वनकरणम्, द्वारकायात्राविधिवर्णनम्. …. …. … … … …	२८३	१
५	प्रह्लादर्षिसंवादे सनत्कुमारतपोबलेन भगवत्प्रादुर्भावधृत्तान्तवर्णनपुरःसरं गोमत्युत्पत्तिमाहात्म्यवर्णनम्. … … … … … …	२८५	२
६	कृष्णपूजाविधानवर्णनम्, स्नानदानब्राह्मणभोजनमाहात्म्यवर्णनम्. … …	२८६	२
७	चक्राख्यतीर्थमाहात्म्यवर्णने षोडशोपचारपूजनविधिक्रमवर्णनम्, तत्रार्घ्यमंत्रकथनम्, गोमत्युदधिसंगमतीरस्थचक्रतीर्थमाहात्म्यवर्णनम्. … … …	२८८	१
८	गोमत्यर्घ्यदानमंत्रवर्णनम्, स्नानविधिवर्णनम्, विश्वेदेवपूजनपूर्वकश्राद्धमाहात्म्यवर्णनम्, गोमतीसंगमस्नानमाहात्म्यवर्णनम्, गोमतीतीरस्थभगवत्स्वरूपमाहात्म्यवर्णनम्.	२८८	२
९	रुक्मिणीह्रदमाहात्म्यवर्णनम्. …. …. … …. …	२९०	१
१०	कृकलासतीर्थमाहात्म्यवर्णने नृगेण राज्ञा यज्ञादिकं विधाय तत्र नित्यं विप्रेभ्यः सालंकृतगोसहस्रदानकरणवृत्तान्तवर्णनम्, ततो राज्ञैकस्मिन्दिने जैमिनिसंज्ञकर्षये गोदानकरणम्, ततस्तस्या गोर्ब्राह्मणगृहान्निर्गत्य नृगराजगोष्ठाने गमनम्, पश्चान्नृगेण तस्या एव गोरन्यब्राह्मणाय दानकरणम्, तां गृहीत्वा गच्छतो ब्राह्मणस्य मध्येमार्गं जैमिनिना दर्शनम्, नृगदत्तां स्वकीयां स्वावासान्निर्गतां गां दृष्ट्वा तेन ब्राह्मणेन सह जैमिनिना वादकरणम्, मिथः प्रजल्पतोस्तयोर्जैमिनिब्राह्मणयोर्नृगमंदिरे गमनम्, ततस्ताभ्यां 'कृकलासो भव' इति राज्ञे शापप्रदानम्, तच्छापेन कृकलासत्वं गतस्य नृगस्य राज्ञः कृष्णेन निजकरेणोद्धरणकरणम्, श्रीकृष्णेन नृगराजाय वरदानम्, विमानमारुह्य श्रीकृष्णप्रसादतो नृगस्य स्वर्गे गमनम्, कृकलासापरनामकनृगतीर्थमाहात्म्यवर्णनम्. …. …. … …	२९०	२
११	विष्णुपदतीर्थमाहात्म्यवर्णनम्. …. … … …. …	२९२	१
१२	गोप्रचारतीर्थमाहात्म्यवर्णने कंसवधोत्तरं श्रीकृष्णेनोद्धवस्य स्वकुशलकथनार्थं गोपीकुशलज्ञानार्थं गोप्युपदेशविधानार्थं च गोकुले संप्रेषणम्, उद्धवमागतं दृष्ट्वा नंदादिभिरुद्धवस्याविश्वासनादिसत्कारकरणम्, गोपीभिरुद्धवायागमनकारणप्रश्नकरणम्, उद्धवेनापि स्वागमनकारणं श्रीकृष्णादीनां क्षेमं च कथयित्वा गोपीदुःखसांत्वनकरणम्, गोपीभिः पृथक्त्वेन प्रणयकोपभङ्गया श्रीकृष्णलीलावर्णनम्, ततः श्रीकृष्णदिदृक्षयोत्कण्ठितानां तासां गोपिकानां समूहेन सहोद्धवस्य मयसरस्यागमनम्, गोपीभिः कृतं शोकं ज्ञात्वा श्रीकृष्णस्याकस्मात्तत्र सरस्यागमनम्, श्रीकृष्णदर्शनेन गोपीनां बह्वाह्लादः, श्रीकृष्णगोपीसंवादे तत्सरसि स्नानदानपू-		

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अध्यायाः	विषयाः	प०	पृ०
	जादिविधिमंत्रकथनम्, मयनिर्मितसरोमाहात्म्यवर्णनम्.....	२९२	२
१३	मयसरस उत्पत्तिवर्णनम्, तत्रैव गोपीभिः श्रीकृष्णाज्ञयाऽन्यसरोनिर्माणकरणम्, तत्रैव गोपीसरसि श्रीकृष्णेन स्वावस्थानकरणम्, श्रीकृष्णेन स्वमुखतो गोपीसरस्तीर्थमाहात्म्यवर्णनम्.	२९४	१
१४	ब्रह्मसरोमाहात्म्यवर्णनम्, इन्द्रसरोमाहात्म्यवर्णनम्, पञ्चनदतीर्थमाहात्म्यवर्णनम्.	२९५	२
१५	ऋषितीर्थसिद्धेश्वरमाहात्म्यवर्णनम्.	२९६	२
१६	गदातीर्थनागतीर्थभद्रतीर्थचित्रातीर्थचन्द्रभागातीर्थमहिषतीर्थमुक्तिद्वारकालिन्दीसरस्तीर्थादितत्रस्थतीर्थवृन्दमाहात्म्यवर्णनम्.	२९७	१
१७	श्रीकृष्णपूजनविधिक्रमवर्णनम्, भगवत्परिचारकवर्गकथनपूर्वकरुक्मिगर्वपरिहारवृत्तान्तवर्णनम्.	२९८	१
१८	यजनदानप्राणायामाद्यन्यकर्मतोऽपि श्रीकृष्णदर्शनस्य फलाधिक्यवर्णनम्, त्रिविक्रमतीर्थवर्णने वलिनिग्रहादिवृत्तान्तस्य समासतो वर्णनम्, गोमतीसंगमस्थचक्रतीर्थेऽनेकतीर्थान्यटतो दुर्वासस आगमनम्, यावद्दुर्वासाः स्नानाय प्रवृत्तस्तावद्दैत्यैर्दुर्वाससं प्रति वहुताडनकरणम्, ततो दैत्यकृतताडनेन दुःखितस्य दुर्वाससो वलिद्वाःस्थवामनाय दैत्यकृतां निजदुर्दशां निवेदयितुं पातालं प्रति गमनम्, वामनाय चक्रतीर्थगतसर्ववृत्तान्तकथनं च.	२९९	२
१९	वामनेन तद्दुर्वाससो वचनं श्रुत्वा पराधीनत्वान्नैव मयि स्वातन्त्र्यामिति दुर्वाससं कथयित्वा यदि वलेराज्ञा भवेत्तर्ह्यहं दैत्यनाशार्थमागमिष्यामीति च शंसित्वा दुर्वाससं प्रति बलेराज्ञाग्रहणाय प्रेरणम्, ततो वलिना दुर्वाससः प्रार्थनामनङ्गीकृत्य भगवतश्चरणयोर्दृढग्रहणम्, ततो भगवता स्वरूपस्य वृद्धिकरणपूर्वकं दुर्वाससा बलभद्रेण च सह चक्रतीर्थे गमनम्, तत्र चक्रतीर्थे कृष्णवलरामदुर्वाससामागमनोत्तरं दुर्वाससः स्नानाद्याह्निकविधिविधानवर्णनम्.	३००	२
२०	तत्र गोमतीतीरस्थचक्रतीर्थे वेदाध्ययनकारिणं दुर्वाससमवेक्ष्य तं प्रति ताडनं कर्तुं तत्प्रदेशरक्षकस्य दैत्यस्यागमनम्, समागतं तं दैत्यं दृष्ट्वा श्रीकृष्णेन तस्य दैत्यस्य सुदर्शनचक्रेण शिरश्छेदकरणम्, तं दैत्यं निहतं दृष्ट्वाऽन्यदैत्यैः श्रीकृष्णबलरामाभ्यां सह युद्धवर्णनम्, ततः कुशदैत्यस्य बलरामश्रीकृष्णाभ्यां युद्धवर्णनम्, तत्र श्रीकृष्णेन कुशराक्षसं हस्तगतं कृत्वा तस्योपरि शिवलिंगस्थापनवृत्तांतवर्णनम्.	३०१	१
२१	ततः कुशराक्षसश्रीकृष्णसंवादे गोमतीतीरस्थक्षेत्रस्थभगवत्पूजामाहात्म्यवर्णनम्.	३०३	२
२२	रुक्मिणीपूजनमाहात्म्यवर्णनम्.	३०३	२
२३	श्रीकृष्णकथाफलश्रुतिवर्णनम्, द्वारकायां श्रीकृष्णदर्शनफलवर्णनम्, रुक्मिणीदर्शनफलवर्णनम्, द्वारवतीगमनदर्शनस्मरणफलकथनम्, स्वर्गं गन्तुं निश्रेणीभूताया द्वारकाया माहात्म्यवर्णनप्रसंगेन चन्द्रशर्मब्राह्मणवृत्तान्तवर्णनम्, तत्र चन्द्रशर्मणो द्वारकापुर्यगमनेन शैवव्रतानां नैष्फल्यं दृष्ट्वा तत्पितृभिः स्वप्न आगत्य तस्मा उपदेशकरणम्, पितॄणामुपदेशं श्रुत्वा चन्द्रशर्मणा ब्राह्मणेन द्वारकागमनेन पितॄणां नरकतः समुद्धरणवर्णनम्, द्वारकाश्रयकरणफलकथनम्, द्वारकागमनमाहात्म्यतुलसीधारणमाहात्म्यवर्णनम्.	३०५	१
२४	द्वारकागमनपूर्वककृष्णदत्तवरग्रहणादिद्वारकानगरीश्रैष्ठ्यमाहात्म्यवर्णनम्.	३०९	१
२५	मार्कण्डेयेन्द्रद्युम्नसंवादे वञ्जुलीद्वारकागंगागयागोविन्दगोमतीगोकुलगीतागोपीचंदनमाहात्म्यवर्णनम्.	३११	१
२६	कोटिजन्मार्जितचतुर्विधपापक्षालनोपायकथनम्, भगवद्भक्तलक्षणवर्णनम्, हरिजागरफलकथनम्, गोहिरण्यतिलवस्त्रादिदानफलकथनम्, भागवतस्कांदगोपीचरितगीतानामसहस्रकादिनित्यपठनफलकथनम्, द्वादशीजागरमाहात्म्यवर्णनम्.	३१२	२
२७	विष्णोर्द्वादशीजागरस्य सर्वतोऽपि वरेण्यत्ववर्णनपुरःसरं माहात्म्यवर्णनम्. ...	३१३	२

CC-0. In Public Domain. Digitization by eGangotri

अध्यायाः	विषयाः	प०	पृ०
२८	विष्णोर्द्वादशीजागरस्थले सर्वदेवतातीर्थक्षेत्रागमनवर्णनम्, द्वादशीजागरमाहात्म्यवर्णनम्.	३१४	१
२९	पापिजनसंसर्गादशुद्धिं गताया गौतम्या नारदादृषीन्प्रति स्वाशुद्धिनिरसनोपायविज्ञानाय प्रश्नकरणम्, तस्या गौतम्याः प्रश्नस्योत्तरं दातुमशक्यतया विमोहितान्नारदादीन्दृष्ट्वा गौतम्या शोककरणम्, ततो गौतमीदुःखपरिहाराय दिव्यवाण्या द्वारकाक्षेत्रं गच्छेति गौतम्यै कथनम्, ततो द्वारकागमनोत्सुकतापूर्वकगोमतीवर्णनम्.	३१५	१
३०	नारदगौतमयोर्द्वारकागमनोत्सुकतादर्शनम्, द्वारकां प्रति गोदावर्यादितीर्थक्षेत्रदेवमहर्षिगमनोत्सवयात्रावर्णनम्.	३१६	२
३१	सर्वतीर्थक्षेत्राणां तत्रागमनवर्णनम्, मूर्तिमतीद्वारवतीदर्शनम्.	३१७	१
३२	नारदादिभिर्द्वारकागमनं कृत्वाऽऽह्लादवशान्नृत्यकरणम्, शङ्करादिदेवैर्गौतमाद्यृषिभिर्गौतम्यादितीर्थक्षेत्रैरपि द्वारकायां नृत्यकरणम्, ततः सर्वैर्भगवद्दर्शनं गृहीत्वा भगवत्स्तुतिकरणम्, विष्णुपार्षदवर्णितद्वारकामाहात्म्यवर्णनम्.	३१८	१
३३	द्वारकायाः समन्ततः सर्वदिक्षु काशीगयाप्रयागाद्यनेकतीर्थक्षेत्रादिकृतनिवासवर्णनम्.	३२०	१
३४	द्वारकापान्थदर्शनमात्रतः काश्यां कृतस्य पापवज्रलेपस्य विनाशने यतिवृत्तान्तपूर्वकं दिलीपकृतद्वारकायात्रामाहात्म्यवर्णनम्.	३२०	२
३५	द्वारकाक्षेत्रस्थस्थावरजङ्गमपदार्थानां माहात्म्यवर्णनम्, द्वारकावासमाहात्म्यम्, द्वारकायां भगवद्दर्शनमाहात्म्यम्, द्वारकानाममाहात्म्यवर्णनम्.	३२२	१
३६	द्वारकादर्शनगोमतीसरित्स्नानविधिमाहात्म्यवर्णनम्.	३२३	१
३७	द्वारकाक्षेत्रस्थसुदर्शनप्रमुखानन्तान्तचक्रचिह्नांकितपापाणमाहात्म्यवर्णनपूर्वकतत्पूजनफलादिकथनम्.	३२३	२
३८	गोमतीतीरगतद्वारकाचक्रतीर्थयोर्जागरादिमाहात्म्यवर्णनम्.....	३२४	१
३९	द्वादशीव्रतादिमाहात्म्यवर्णनम्.	३२५	१
४०	कार्तिके चक्रतीर्थस्नानदानश्राद्धादिमाहात्म्यवर्णनम्.	३२६	१
४१	गोमतीस्नानकृष्णपूजनयतिभोजनदानश्राद्धादिसत्फलवर्णनम्.	३२७	१
४२	वृषोत्सर्गादिक्रियाकरणद्वारकामाहात्म्यश्रवणादिफलवर्णनम्.	३२७	१
४३	द्वारकामाहात्म्यश्रवणादिफलश्रुतिवर्णनपुरःसरतुलसीपत्रकाष्ठमहिमवर्णनपूर्वकं प्रह्लादद्विजसंवादसमाप्त्यनन्तरं बलिना सह द्विजैः कृतस्य द्वारकायात्राविधेर्वर्णनम्.	३२८	१
४४	स्कान्दमहापुराणश्रवणपठनपुस्तकप्रदानपौराणिकव्यासपूजनमाहात्म्यवर्णनपूर्वकं समस्तस्कान्दमहापुराणग्रन्थसमाप्त्युपसंहारपूर्वकं शौनकादिमहर्षिकृतसूतसत्कारवृत्तान्तवर्णनम्.	३२८	२

इति श्रीप्रभासखण्डे चतुर्थं द्वारकामाहात्म्यम् ॥ (७–४) ॥

इति श्रीस्कान्दे महापुराणे सप्तमं प्रभासखण्डम् ॥ ७ ॥

॥ इति श्रीस्कान्दमहापुराणस्थविषयानुक्रमणिका समाप्ता ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अत्रेयमभ्यर्थना.

अस्माक मुद्रणालये वेद-वेदान्त-धर्मशास्त्र-प्रयोग-योग-सांख्य-ज्योतिष-पुराणेतिहास--वैद्यक-मंत्र-स्तोत्र-कोश--काव्य-चम्पू--नाटकालंकार-संगीत-नीति--कथाग्रंथाः, बहवः स्त्रीणां चोपयुक्ता ग्रंथाः, बृहज्ज्योतिषार्णवनामा बहुविचित्रचित्रितोऽयमपूर्वग्रन्थः। संस्कृतभाषया, हिन्दीमार्वाडचन्यतरभाषाग्रन्थास्तत्तच्छास्त्राद्यर्थानुवादकाः, चित्राणि, पुस्तकमुद्रणोपयोगिन्यो यावत्यस्सामग्र्यः, स्वस्वलौकिकव्यवहारोपयोगिचित्रचित्रितालिखितपत्रवत्पुस्तकानिच; मुद्रयित्वा प्रकाशन्ते सुलभेन मूल्येन विक्रयाय। येषां यत्राभिरुचिस्तत्तत्पुस्तकाद्युपलब्धये एवं नव्यतया स्वस्वपुस्तकानि सुमुद्रयिषुभिः सुलभयोग्यमौल्येन सीसकाक्षरैः स्वच्छोत्तमोत्तमपत्रेषु मुद्रिततत्पुस्तकानां स्वस्वसमयानुसारेणोपलब्धये च पत्रिकाद्वारातैः प्रेषणीयोऽस्मि।

अधिकमस्मदीयसूचीपुस्तकानां भिन्नभिन्नविषयाणां प्रापणेन "श्रीवेङ्कटेश्वरसमाचार" पत्रिकाप्रापणद्वारा च ज्ञेयमिति शम्।

क्षेमराज श्रीकृष्णदास, "श्रीवेङ्कटेश्वर" (स्टीम्) यन्त्रालयाध्यक्षः--मुंबई.

KHEMRAJ SHRIKRISHNADAS, 'SHRIVENKATESHWAR' STEAM PRESS,

BOMBAY.

CC-0. In Public Domain. Digitization by eGangotri

॥ इति श्रीस्कान्दमहापुराणस्थविषयानुक्रमणिका समाप्ता ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

CC-0. In Public Domain. Digitization by eGangotri



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ माहेश्वरखण्डम् १ ॥

CC-0. In Public Domain. Digitization by eGangotri



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धन्यवादाः ।

अद्य सानन्दं तस्मै निखिलसद्गुणसमुदयसनाथीकृतानन्तब्रह्माण्डनायकाय श्रीमतेऽपारकरुणापारावाराय भगवते भक्तकामकल्पद्रुमाय सनमोवाकमनन्तान्धन्यवादान्मनसा मन्महे । येन श्रीभगवता निजलीलाप्रभावतोऽनन्तानि ब्रह्माण्डानि निर्माय तत्र स्वयं विद्यामयस्वरूपेणाविर्भूय तदनु सुरनरादिविविधाकारेण निजलीलाभिरवतीर्य स्वस्वामिभावेन विपरिणम्य चाशेषब्रह्माण्डकार्यक्रमोऽनादिकालतोऽनंतकालपर्यंतं निर्वाह्यते । निजनित्यलीलास्वरूपेण निजविभूतिमहिमानं च निरंतरं पर्यालोच्य निजस्वरूपे स्वानन्दमयतयाऽवतेष्ठीयते च । यस्य चेश्वरस्य ज्ञानलेशेनैतत्समग्रं परापराविद्यात्मकं वाङ्मयं समस्ते जगति त्रयीस्वरूपेण प्रकाशमानं विराराज्यते । यस्य चांशांशावतारैरिदं जगत्पुनःपुनः स्वकीयविज्ञानमयेन ज्योतिषा समुद्देदीप्यते च । स एष भगवतः स्वस्वरूपत्वेनाविशेषात्स्वलीलाविषयत्वेऽपि तदपारमायाविलसितविभ्रमविवशतया परिच्छिन्नदृष्टीनामस्मदादिजीवानां दृष्ट्या भगवतः परंपरया जगत उपरि भूयानुपकार इति स्मृत्वा वयं तस्मै भगवतेऽनन्तान्धन्यवादान्कृतज्ञेन मनसाऽऽशास्महे ।

अथ च तस्यैव परमपुरुषस्य लीलावताररूपाय श्रीव्यासमहर्षये सन्तु कोटिशो धन्यवादाः। येन श्रीभगवता व्यासमहर्षिणाऽवतीर्य कालवशेन प्रसरताऽज्ञानेन लुप्तप्रायतादशामभ्युपयियासतीनां समस्तवेदादिविद्यानां निजमतिप्रदीपेन पुनरुज्ज्वलीकरणं व्यधायि। शतकोटिप्रविस्तरं पुराणविद्यावाङ्मयं चतुर्लक्षसङ्ख्याकश्लोकैः सारसमाकर्षं च पुनर्व्यवस्थापि यत्र चास्माकं सर्वेषां सदाचारः सम्यगुपवर्णितः समस्तवेदार्थश्च सम्प्रकटितः प्रचकास्ति । शारीरिकब्रह्मसूत्रैर्वेदांतविद्या च समुज्ज्वालिता । स एष तस्यास्माकमुपरि भूयाननुग्रह इति तदीयमुदारचरितं शिरसा श्लाघामहे ।

अपि च तेभ्यः सज्जनेभ्यो महामान्येभ्यो विद्वज्जनेभ्यो वयं बहून्धन्यवादान्वदामो ये सततं परिचरंति श्रुतिस्मृतिप्रतिपादितं सदाचारमिति ।

अथ च सांप्रतं ये महांतः सज्जनाः स्वकीयमुदारचरितं जगति प्रकाशयन्तो निजप्राचीनसरस्वतीसंग्रहालयादतितरप्रभावसमलंकृतानि नानाविधानि वेदशास्त्रपुराणधर्मशास्त्रव्याकरणन्यायमीमांसावेदांतयोगसाङ्ख्यज्योतिषवैद्यककाव्यालङ्कारनाटकचम्पूप्रभृतिपुस्तकानि मुद्रणद्वारा जगति प्रकाशयितुं प्रदायास्मान्छश्वत्साहाय्येनोपकुर्वन्ति । विद्याप्रकाशनसाहाय्याद्धयं तेभ्यो बहून्धन्यवादान्वदामः ।

तत्प्रसंगेनैवाद्यैतस्य "श्रीस्कान्दमहापुराण" पुस्तकस्य मुद्रणेन प्रकाशनायास्मभ्यं यैः परमपूज्यैः सकलसज्जनवरेण्यैः श्रीमन्महाभ्यु

CC-0. In Public Domain. Digitization by eGangotri

दयैः साहाय्यं प्रदत्तम् । यस्य च साहाय्यस्य प्रभावेणाद्यैतत्सर्वतोऽपि समग्रतयाऽत्यन्तं दुर्लभं श्रीस्कान्दमहापुराणं समग्रमद्य सर्वेषां सज्जनानां सुलभतया संग्रहार्थं पुरत उपस्थापनस्य सुदिनं नः समागतम् । अत एव वयं सहर्षं तेषां महाभ्युदयानां सुमंगलपवित्रनामधेयानि प्रकाशयामः--

१ पुस्तकम्–श्रीमन्तमहाराज**श्रीशंकररावजी**महाराजानां–दाक्षिणात्यभोरसंस्थानाधिपतीनाम् ।

२ पुस्तकम्–पंडितवर्यमहामहोपाध्याय श्रीबाकेलालगोस्वामिनां–दिल्लीपत्तननिवासिनाम् ।

३ पुस्तकम्–ठाकुरश्रीमहान्चन्द्रशुभनामधेयानां–पञ्जाबप्रांतांतर्गतामृतसरपत्तननिवासिनाम् ।

४ पुस्तकम्–पण्डितवर्यश्रीलज्जारामजीमहाभ्युदयानां द्वारा समागतं–पण्डितमान्यश्रीजुगुलकिशोरसमभिधेयानां–रईस–सतोहा-निवासिनाम् ।

५ पुस्तकम्–पण्डितवर्यश्रीहरिकृष्णवेङ्कटरामशास्त्रिमहाराजानाम्–औरंगाबादपत्तननिवासिनाम् ।

६ पुस्तकम्–पण्डितवर्यश्रीज्येष्टारामसुकुन्दजीशास्त्रिणां–मुंबापुरीनिवासिनाम् ।

७ पुस्तकम्–पण्डितवर्यश्रीज्वालाप्रसादजीशास्त्रिवर्याणां–मुरादाबादनिवासिनाम्–उद्योगाह्वायब्रीतः प्राप्तम् ।

८ पुस्तकम्–पण्डितवर्यश्रीपरशुरामकृष्णवैद्य–माधवकॉलेज–एतेषां द्वारा समागतं–पण्डितवर्यश्रीकाशिनाथाचार्याणां मालवप्रांतवर्त्युज्जयनीस्थमाधवकॉलेजसंस्कृताध्यापकानाम् ।

एवमेतेभ्यः परममान्येभ्योऽत्युदारचरितेभ्यो महोदयेभ्य एतानि **श्रीस्कान्दमहापुराणस्या**दर्शप्रतिपुस्तकानि पूर्णान्यपूर्णानि च यथोपलब्धान्यप्यस्माकं समीपे समागतानि संति । तेषामेतेषां सर्वेषां पुस्तकानां साहाय्येनास्माभिरेतत्स्कांदं महापुराणं श्रीबृहन्नारदीयमहापुराणोक्तानुक्रमणिकानुसारेण क्रमसंबद्धं विधाय बहूनां प्रतिपुस्तकं नियमितानां शास्त्रिणां साहाय्येन सम्यक्परिशोध्य पाठांतर--शब्दार्थ--वाक्यार्थ--श्लोकार्थसुव्यञ्जकटिप्पणीभिः समलंकृत्य यतस्ततः समग्रतया सुदुर्लभमपि तेषां सर्वेषां पुस्तकानां संमेलनेन समग्रं कृत्वा श्रीमतां समस्तभूमण्डलनिवासिनां सज्जनानां पुरतः श्रीपरमेश्वरकृपयाद्य समुपढौकितम् । सोऽयमेतेषामत्युदारचरितानां महामान्यानां पुस्तकप्रदानसाहाय्यकरणेन सर्वजगदुपरि भूयानेवानुग्रहः । अत एतेभ्यो महामान्येभ्यो वयं सहर्षं साभिनंदनमसंख्यान्धन्यवादान्प्रशास्महे ।

एवमेव हि विद्याप्रसारसाहाय्यादिसत्कार्ये श्रीमतां सदैव सद्बुद्धिः श्रीशक्रृपया समुद्यच्छतादित्यभ्यर्थयते--

श्रीमतामनन्तोपकारस्मर्ता नम्रसेवकः–क्षेमराज श्रीकृष्णदासः–"श्रीवेंकटेश्वर" स्टीम्–मुद्रणालयाध्यक्षः–मुंबई.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीः ।

प्रस्तावना.

अथ खलु श्रीमदनन्तसद्गुणगणालंकृतानन्तकोटिब्रह्माण्डमण्डलाखण्डलप्रभृतिवृन्दारकवृन्दवन्दितपदारविन्दनिस्यन्दमानामन्दानन्दसन्दोहमिलिन्दायमानमानसवैखानसमुनिजनजेगीयमानविमलविरुदावलिविराजमानदिव्यलीलावतारसमनुगृहीतसमस्तभक्तजनकामनापरिपूरणनिबद्धपरिकरश्रीपरमेश्वरकृपाप्रसादसमवाप्तविशुद्धशेमुषीविशेषविकसितविद्यावैभवकृतार्थीकृतधरित्रीवलयानां समस्तधरणीतलविराजमानविविधसभ्यसम्भावितसभासभाजितविद्वत्त्वसौजन्यसौशील्यप्रभृतिसद्गुणगणावाप्तप्रसरबुधजनसरस्वतीजेगीयमानविमलयशोवलक्षीकृतदिङ्मण्डलानां परमपूज्यताभाजनसमस्तसज्जनाशिरःसरोजसम्भावितनमस्क्रियाप्रभृतिपुरस्क्रियाणां सकलवेदशास्त्रपारावारपारदृश्वनां निखिलकलाकलापकौशल्यशल्योत्खलितदुर्बुद्धिनिबद्धाशयानां समस्तभूमण्डलनिवासिनां सन्मान्यविद्वज्जनानां पुरतोऽद्य नूतनपरिचयप्रभावपरिस्फुरदभिनवादरातिशयसमुत्कण्ठितसरस्वतीसुप्रसादसमवाप्तसुमङ्गलमयगीर्वाणवाग्देवतामधुरतरविलासप्रोल्लासविकसितैः प्रास्ताविकैः कतिपयैर्वाक्यनिकुरम्बैः सुमङ्गलमयमभिनवोदन्तं निवेदयितुं समुत्कण्ठतेऽस्मदीयंमानसम्. तदत्र समस्तविद्वज्जनानां सुविचारविलसितं चित्तमासमन्ततो विविधविचारणीयप्रस्तुतकार्यकदम्बकादावर्ज्य प्रकृतेऽस्मदीयेऽभिनवोदन्तनिवेदनीये वक्तव्यांशेसमवधानाय कृतक्षणं जायतामिति सप्रश्रयं साञ्जलिबन्धं संप्रार्थ्य सम्प्रति निजवक्तव्यांशमुपोद्घातमुखेन प्रस्तोतुमारभामहे—

अयि समस्तसज्जनाः ! विदितमेव खलु सकलवैदिकधर्ममार्गानुयायिनां सदाचारसम्पन्नानां तत्रभवतां भवताम्, यत्—सकलवाङ्मयस्यादिबीजभूतो वेदो भगवद्रूप इति । तदेतदेव किञ्चिदत्र विविच्यते—"तल्लोकपद्मं स उ एव विष्णुः प्रावीविशत्सर्वगुणावभासम् । तस्मिन्स्वयं वेदमयो विधाता स्वयंभुवं यं प्रवदन्ति सोऽभूत् ।।" इति भूतिमैत्रेयोक्तेः साक्षाद्विष्णुरूपः स्वयंभूः सर्ववेदोपवेदेतिहासपुराणोपपुराणवार्तादण्डनीत्यान्वीक्षिक्यादिभिः स्वोत्पन्नज्ञानविभूतिभिः सह सदैव विराजमानो वरीवर्ति। तस्मादेव च ज्ञानस्वरूपेणोपादानकारणरूपाद्भगवतो वेदविद्याविर्भावः समभवत् । तदुक्तं श्रीमद्भागवते तृतीयस्कन्धे—"ऋग्यजुःसामाथर्वाख्यान्वेदादीन्मुखतोऽसृजत् । शस्त्रमिज्यां स्तुतिस्तोमं प्रायश्चित्तं व्यधात्क्रमात् ।। आयुर्वेदं धनुर्वेदं गान्धर्वं वेदमात्मनः । स्थापत्यं चासृजद्वेदं क्रमात्पूर्वादिभिर्मुखैः ।। इतिहासपुराणानि पञ्चमं वेदमीश्वरः । सर्वेभ्य एव वक्त्रेभ्यः ससृजे सर्वदर्शनः ।।" इत्यादिना । तांश्च स्वस्वरूपवन्नित्यसिद्धान्वेदान्भगवान्निजाचिन्त्यशक्त्या वैधदीक्षया ब्रह्माणमुपदिदेश । एतदेवोक्तं श्रुतौ—"यो ब्रह्माणं

CC-0. In Public Domain. Digitization by eGangotri

विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै ।" इति । अनया श्रुत्या च नित्यसिद्धानेव स्वान्तःस्थितान्वेदान्प्रणवमातृकारूपेण सुसूक्ष्मान्ब्रह्ममुखेभ्य ऋगादिस्थूल रूपेणाविर्भावयामासेति तावदुच्यते । अत एव--"अनादिनिधना नित्या वागुत्सृष्टा स्वयम्भुवा । आदौ वेदमयी दिव्या यतः सर्वाः प्रवृत्तयः ॥" इति स्मृतेः "वाचा विरूपनित्यया" इति श्रुतेश्च वेदानां नित्यत्वम् । यच्चोक्तम्--"ऋचः सामानि जज्ञिरे" इति । तत्राप्याविर्भाव एव बोध्यः--जनेः प्रादुर्भावार्थकत्वात् । ननु "शास्त्रयोनित्वात्" इति व्याससूत्रस्य का गतिः ? इति चेत्--तत्र 'योनि'शब्दः प्रमाणार्थक एव बोध्यः, तेन "तं त्वौपनिषदं पुरुषं पृच्छामि" इत्युप निषद्वेद्यत्वं ब्रह्मणस्तत्सूत्रं प्रशास्ति । किं च--"एवं वा अरेऽस्य महतो भूतस्य निश्वसितमेतद्यदृग्वेदो यजुर्वेदः सामवेदः" इत्यादिश्रुतिरपि वेदानामुत्पत्तिं निराकरोति । श्वासप्रश्वासादिवद्भगवानन्तःस्थितान्वेदाँल्लीलयाऽऽविर्भावितवानित्यस्मिन्नेवार्थे श्रुतेस्तात्पर्यात् । ननु लीलयाऽऽविर्भावकर्तृत्वेऽपि ब्रह्मोपादानता वेदानां जातैव, तथात्वे च तेषां पौरुषेयत्वं कथं न भविष्यति ? न च ब्रह्मकार्यत्वेऽपि तेषां वेदानां पौरुषेयत्वं नामास्ति--पुरुषमात्रजन्यत्वेऽपि पौरुषेयत्वे वर्णानां नित्यत्वेऽ प्यानुपूर्वीविशेषस्य पुरुषजन्यत्वान्मीमांसकंमन्यस्यापि वेदाप्रामाण्यप्रसङ्गात्, वर्णनित्यत्वमात्रेणैवापौरुषेयत्वव्यवस्थापने लौकिकास्मदादिवाक्यस्याप्यपौरुषेयत्वप्रसङ्गाच्च । तस्मान्मानान्तरेणार्थमुपलभ्य रचितत्वं पौरुषेयत्वं सापेक्षत्वलक्षणाऽप्रामाण्यप्रयोजकम् । तच्च न वेदेषु, वेदार्थस्य मानान्तरागोचरत्वात् । इदमेव हि श्रुत्या निश्वास दृष्टान्तेन दर्शितम् । तथा हि--निश्वासः पुरुषाज्जायमानोपि न पुरुषचिकीर्षाजन्यः--सुषुप्तावपि तद्दर्शनात् । एवं समग्रो वेदो ज्ञानस्वरूपेणोपादानकारणरूपाद्ब्रह्मणो जायमा नोऽपि न ब्रह्मचिकीर्षाजन्यः--वेदार्थस्य वेदातिरिक्तमानाविषयत्वात् । इत्यनया विधया "कारणगुणा हि कार्यगुणानारभन्ते" इति न्यायेन कारणरूपस्य ब्रह्मणो नित्य त्ववत्तदाविर्भूतवेदानामपि नित्यत्वं तावत्सिद्धम् ॥ एतेषां वेदानां च प्रथमतः प्रणवरूपेण सूक्ष्मतयाऽवस्थितिरासीत् । ततः प्रणवतो मातृकाणामाविर्भावोऽभवत् । तास्ता एव मातृकाः, या अक्षरसमाम्नायत्वेनोच्यन्ते । तस्मादक्षरसमाम्नायत एव सर्वा आन्वीक्षिक्यादयोऽष्टादश विद्या अपि ब्रह्मद्वारा सम्भूताः । तदेतदुक्तं श्रीमद्भागवते तृतीयस्कन्धे विदुरं प्रति मैत्रेयेण--"ऋग्यजुःसामाथर्वाख्यान्वेदादीन्मुखतोऽसृजत्" इत्यारभ्य--"आन्वीक्षिकी त्रयी वार्ता दण्डनीतिस्तथैव च ।" इत्यादिना "शब्दब्रह्मात्मनस्तात" इत्यन्तेन । तत्रैतासामष्टादशविद्यानां भेदाः प्रत्येकशोऽनन्तशाखाप्रशाखावशादनन्तशः प्रसृताः सन्ति । मुख्यतया ता अष्टादशविद्याश्चाधुनोद्देशादिक्रमेण स्तोकं प्रदर्श्यन्ते । तत्र--ऋग्य जुःसामाथर्वभेदेन वेदाश्चत्वारः, शिक्षा कल्पो व्याकरणं निरुक्तं ज्योतिःशास्त्रं छन्दोविचितिरिति षड्वेदाङ्गानि, पुराणानि न्यायविस्तरः मीमांसा धर्मशास्त्रमिति चत्वार्यु पांगानि, आयुर्वेदः धनुर्वेदः गान्धर्वम् अर्थशास्त्रमिति चत्वार उपवेदाः, इति मिलित्वा संकलनयाष्टादश विद्या भवन्ति ॥ तत्र च महापुराणेषूपपुराणानामन्तर्भावः, न्यायनये वैशेषिकनयस्यान्तर्भावः, मीमांसायां वेदान्तस्यान्तर्भावः, धर्मशास्त्रे च महाभारतरामायणयोः सांख्यपातञ्जलपाशुपतवैष्णवादीनां चान्तर्भावः । एवमष्टादशविद्यारूपाण्ये

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तावन्ति ह्यास्तिकानां धर्मप्रस्थानानि भवन्ति। अन्येषामेकदेशिनां धर्मप्रस्थानानामेष्वेवान्तर्भावः। इत्थमिह साक्षात्परंपरया परमार्थोपयोगिनां वेदोपकरणानामेव प्रस्थानानां भेदो दिङ्मात्रेण दर्शितः ।। अथैतेषां प्रस्थानानां स्वरूपभेदहेतुः प्रयोजनभेदस्तावत्किञ्चिदुच्यते । तत्र धर्मप्रतिपादकमपौरुषेयं वाक्यं वेदः । स च मन्त्रब्राह्मणात्मकः । "मन्त्रब्राह्मणयोर्वेदनामधेयम्" इति तत्स्वरूपस्यान्यत्रोक्तेः । तत्र मन्त्रा अनुष्ठानकारकभूतद्रव्यदेवताप्रकाशकाः । ते चर्ग्यजुःसामभेदेन त्रिविधाः । अथर्वणवेदस्यैतेषु त्रिष्वेवान्तर्भूतत्वेन पृथक्कयाऽनभिधानम् । तदेवं निरूपिता मन्त्राः । मन्त्रव्याख्यानरूपं ब्राह्मणमपि त्रिविधम्—विधिरूपमर्थवादरूपं तदुभयविलक्षणं चेति । तत्र विध्यादीनां लक्षणभेदादिविस्तरोऽन्यतोऽवसेयः । तदेतद्ब्राह्मणं च पुनरष्टविधम् । तदुक्तं बृहदारण्यकश्रुतौ—"इतिहासः पुराणं विद्या उपनिषदः श्लोकाः सूत्राणि व्याख्यानान्यनुव्याख्यानान्यस्यैव निश्वसितानि" इति । तत्र कथाप्रतिपादक इतिहासः, विश्वस्य पूर्वावस्थानिरूपकं पुराणम्, उपासनात्मविद्याप्रतिपादिकाः विद्याः, या चोपास्यदेवरहस्यप्रतिपादिका सोपनिषत्, ये मन्त्राः श्लोकवत्पठ्यन्ते ते श्लोकाः, संक्षिप्तार्थप्रतिपादकं सूत्रम्, विस्तृतार्थप्रतिपादकं व्याख्यानम्, व्याख्यानस्यापि स्फुटतापादकमनुव्याख्यानम् । एतान्यष्ट ब्राह्मणानि ॥ शिक्षाकल्परहस्यादीनां च वेदसाङ्गतापादकत्वमेव । मन्त्रब्राह्मणयोर्व्याख्येयव्याख्यानताभावोऽस्ति । तच्च "मान्त्रवर्णिकम्" इति सूत्रव्याख्याने प्रतिपादितं वृत्तिकारैः ॥ एवं च कर्मकाण्डगुणकाण्डब्रह्मकाण्डात्मको वेदो धर्मार्थकाममोक्षहेतुः । स च हौत्राध्वर्यवौद्गात्रप्रयोगत्रयरूपेण यज्ञकर्मविभागनिर्वाहार्थं भिन्नः । अथर्ववेदस्तु चतुर्थो वेदत्रय्यवशिष्टब्रह्मत्वकर्तव्यताप्रतिपादकोऽपि शान्तिकपौष्टिकाभिचारिकादिकर्मप्रतिपादकत्वेन सर्वोपयोग्येव ॥ आचार्यप्रवचनभेदात्प्रतिवेदं भिन्ना भूयस्यः शाखाः सन्ति । तज्ज्ञानं च चरणव्यूहाख्यवैदिकग्रन्थाद्बोध्यम् ॥ अथ षण्णां शिक्षादिवेदांगानां च प्रयोजनं तावदुच्यते । तत्र शिक्षाया व्याकरणस्य च सुस्पष्टवर्णोच्चारपदसाधुत्वविज्ञानार्थमुपयोगः । मन्त्रपदार्थज्ञानार्थं निरुक्तस्योपयोगः । तत्र हि निरुक्ते नामाख्यातनिपातोपसर्गभेदेन चतुर्विधं पदजातं निर्वचनेन निरूप्य वैदिकपदानामर्थः प्रदर्शितः । एवमृङ्मन्त्राणां पादबद्धानुष्टुबादिच्छन्दोविशिष्टत्वात्तद्ज्ञाने च निन्दाश्रवणाच्छन्दोज्ञानार्थं पिङ्गलविरचितायाश्छन्दोविचितेरुपयोगः । एवं वैदिककर्मदर्शादिकालज्ञानार्थमादित्यप्रभृतिप्रणीतस्य ज्यौतिषस्योपयोगः । एवं शाखान्तरीयगुणोपसंहारेण वैदिकानुष्ठानक्रमविशेषविज्ञापनायाश्वलायनसांख्यायनबौधायनापस्तम्बकात्यायनशाट्यायनत्र्य्यारुण्यादिप्रणीतानां कल्पसूत्राणामुपयोगः ॥ एवं निरूपितः षण्णां वेदाङ्गानां प्रयोजनभेदः ॥ अथ चतुर्णामुपाङ्गानां प्रयोजनभेदस्तावत्किञ्चिदुच्यते । तत्र सर्गप्रतिसर्गमन्वन्तरवंशवंश्यानुचरितप्रतिपादकानि भगवता बादरायणेन निरूपितानि पुराणानि । तानि च महापुराणोपपुराणोपोपपुराणभेदाच्चतुःपञ्चाशत् । तद्विषये विशेषतोऽत्र पृथग्वक्तव्यं तदुपरिष्टाद्वक्ष्यामः ॥ तेषां पुराणानां च सर्गप्रतिसर्गादिज्ञानं सद्धर्माचरणप्रवृत्तिदर्शनमेव सम्यक्प्रयोजनम् । न्याय आन्वीक्षिकी विद्या गौतमप्रणीता । प्रमाणप्रमेयादिषोडशपदार्थानामुद्देशलक्षणपरीक्षाभिस्तत्त्वज्ञानान्निःश्रेयसाधिगम एव तत्प्रयोजनम् । कणादप्रणीतं वैशेषिकं शास्त्रमपि सप्तपदार्थव्युत्पादनैकप्रयोजनम् ।

CC-0. In Public Domain. Digitization by eGangotri

तच्च न्याय एवान्तर्भूतमित्युक्तं प्राक् । मीमांसा द्विविधा—धर्ममीमांसा शारीरिकमीमांसा चेति । तत्र द्वादशाध्यायी धर्ममीमांसा "अथातो धर्मजिज्ञासा" इत्यारभ्य "अन्वाहार्ये च दर्शनात्" इत्यन्ता भगवता जैमिनिना प्रणीता । तस्याश्च धर्मप्रमाणादिविज्ञानपूर्वककर्मकांडव्यवस्थापरिज्ञानायोपयोगः । शारीरिकमीमांसा च "अथातो ब्रह्मजिज्ञासा" इत्यारभ्य "अनावृत्तिः शब्दात्" इत्यन्ता जीवब्रह्मैकत्वसाक्षात्कारहेतुश्रवणाख्यविचारप्रतिपादकान्न्यायानुपदर्शयन्ती भगवता बादरायणेन कृता । तस्याश्च जीवब्रह्मैक्यसाक्षात्कारः प्रयोजनम् । एवं धर्मशास्त्राणि मनुयाज्ञवल्क्यविष्णुयमांगिरोवसिष्ठदक्षशातातपपराशरगौतमशंखलिखितहारीतापस्तम्बोशनोव्यासकात्यायनबृहस्पतिदेवलनारदपैठीनसिप्रभृतिभिः कृतानि वर्णाश्रमधर्मविशेषाणां विभागेन प्रतिपादकानि । वर्णाश्रमधर्मविशेषविज्ञानमेवैषां प्रयोजनम् । एवं व्यासकृतं महाभारतं वाल्मीकिकृतं रामायणं चेतिहासत्वेन प्रसिद्धे । ते च धर्मशास्त्र एवान्तर्भूते इत्युक्तं प्राक् । एवं सर्वदेवसाधारणमन्त्रशास्त्रं श्रीमहादेवब्रह्मगौतमादिप्रणीतं धर्मशास्त्र एवान्तर्भूतम् । स्वेष्टदेवतायाः सकाशात्स्वाभीप्सितफलप्राप्तिस्तत्प्रयोजनम् । एवं निरूपितश्चतुर्णामुपाङ्गानां प्रयोजनभेदः ॥ अथ चतुर्णामुपवेदानां प्रयोजनभेदस्तावत्किञ्चिदुच्यते । वेदचतुष्टयस्य च क्रमेण चत्वार उपवेदाः । तत्रर्ग्वेदोपवेदस्य ब्रह्मप्रजापत्यश्व्यादिनिर्मितस्यायुर्वेदस्याष्टौ स्थानानि भवन्ति—सूत्रं शारीरमैन्द्रियं चिकित्सा निदानं विमानं कल्पं प्रसिद्धिश्चेति । कामशास्त्रस्याप्यायुर्वेद एवान्तर्भावः—सुश्रुतेन वाजीकरणाख्यकामशास्त्रस्याभिधानात् । एवं समस्तस्यायुर्वेदस्य रोगतद्धेतुरोगनिवृत्तितत्साधनज्ञानं प्रयोजनम् । तच्च मोक्षसाधनीभूतशरीरारोग्यसंपादकत्वेन मोक्षोपयोग्येव । एवं यजुर्वेदोपवेदो धनुर्वेदः पादचतुष्टयात्मको विश्वामित्रप्रणीतः । क्षत्रियाणां स्वधर्माचरणं युद्धं दुष्टदस्युचौरादिभ्यः प्रजापालनं च धनुर्वेदस्य प्रयोजनम् । एवं सामवेदोपवेदो गान्धर्वशास्त्रं भरताचार्येण प्रणीतम् । तत्र नृत्यगीतवाद्यभेदेन बहुविधोऽर्थः प्रपञ्चितः । तस्य गान्धर्ववेदस्य देवताराधननिर्विकल्पकसमाध्यादिसिद्धिः प्रयोजनम् । रसशास्त्रं च बहुविधं भरतेनैव प्रणीतं गान्धर्ववेद एवान्तर्भूतम् । तच्च रसरीतिशब्दालङ्कारार्थालङ्कारनायकनायिकादिवर्णनरूपम् । अथाथर्ववेदोपवेदोऽर्थशास्त्रम् । तच्चैहिकसर्वसुखोपलब्धिप्रयोजनम् । अथ च तदनुसार्येव नीतिशास्त्रमपि मन्वादिभिः सूत्रितं कामंदकादिभिः प्रणीतम् । तत्संधिविग्रहादिभेदैरनेकधा । लौकिकसर्वव्यवहारनैपुण्यमेव तत्प्रयोजनम् । एवमश्वशास्त्रं गजशास्त्रं शिल्पशास्त्रं सूपशास्त्रं चतुःषष्टिकलाशास्त्रं चेति नानाशास्त्राणि शालिहोत्रादिनानामुनिभिः प्रणीतानि । तेषां च सर्वेषां लौकिकतत्तत्प्रयोजनभेदो द्रष्टव्यः ॥ एवमष्टादश विद्याः सप्रयोजनाः संक्षेपतो नामनिर्देशेन प्रोक्ताः ॥ एवमेव कपिलमुनिप्रणीतं सांख्यशास्त्रं पतञ्जलिमुनिप्रणीतं योगशास्त्रं भगवता पशुपतिना विनिर्मितं पाशुपतशास्त्रं नारदादिभिः कृतं पाञ्चरात्रादिकं वैष्णवशास्त्रं चेत्येवमादिर्वेदानुकूलः प्रस्थानभेदः प्रदर्शितः । इत्थं हि वेदराशिमयस्य भगवतो ज्ञानमयं शरीरमित्याख्यायते ॥ एतस्माद्वेदमयाद्ब्रह्मण एव सकलसृष्ट्युत्पत्त्यादिव्यवस्था प्रचलतीति सर्वमनवद्यम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ प्रकृतमनुसरामः ॥ यदुक्तं प्राग्वेदमयस्य भगवत उपाङ्गेषु पुराणस्य परिगणनमिति । तद्विषयेऽधुना किञ्चिद्विवेकः प्रस्तूयते—अथ पुराणंनाम विश्वस्य पूर्वावस्थानिरूपकं व्यासादिमुनिप्रणीतं वेदार्थवर्णनैकपरं पञ्चलक्षणान्वितं शास्त्रम् । " पुराणं पञ्चलक्षणम् " इत्यमरः । पुराणशब्दनिरुक्तिः सोपक्रमोक्ता ब्रह्मांडपुराणे प्रक्रियापादे—"यो विद्याच्चतुरो वेदान्साङ्गोपनिषदो द्विजः ।। न चेत्पुराणं संविद्यान्नैव स स्याद्विचक्षणः ।। इतिहासपुराणाभ्यां वेदं समुपबृंहयेत् ।। बिभेत्यल्पश्रुताद्वेदो मामयं प्रहरिष्यति ।। यस्मात्पुरा ह्यनक्तीदं पुराणं तेन तत्स्मृतम् ॥ निरुक्तमस्य यो वेद सर्वपापैः स मुच्यते ॥" इति । अथ पुराणोपपत्तिस्तावत्किञ्चिन्निर्णीयते । सा चेत्थम्—"ऋचः सामानि च्छदांसि पुराणं यजुषा सह ॥ उच्छिष्टाज्जज्ञिरे सर्वे दिवि देवा दिविश्रिताः ॥" अथर्व० (का० ११।९।२४) तथा—" स बृहतीं दिशमनुव्यचलत्तमितिहासश्च पुराणं च गाथाश्च नाराशंसीश्चानुव्यचलन् । इतिहासस्य च वै सपुराणस्य च गाथानां च नाराशंसीनाञ्च प्रियं धाम भवति य एवं वेद " अथर्व० (का० १५ अनु० १ प्र० ६ मं० १२) इति । तथा च सामवेदीयगोपथब्राह्मणे—" एवमिमे सर्वे वेदा निर्मिताः सकल्पाः सरहस्याः सब्राह्मणाः सोपनिषत्काः सेतिहासाः सान्वयाख्याताः सपुराणाः सस्वराः" इत्यादि गोपथपूर्वभागे (२ प्र०)। तथा च च्छान्दोग्योपनिषदि—"स होवाच ऋग्वेदं भगवोऽध्येमि यजुर्वेदं सामवेदमाथर्वणं चतुर्थमितिहासपुराणं पञ्चमं वेदानां वेदमिति " छान्दोग्योपनिषदि (प्र० ७ ख० १) " एवं विद्वान्वाकोवाक्यमितिहासः पुराणमित्यहरहः स्वाध्यायमधीते त एनं तृप्तास्तर्पयन्ति सर्वैः कामैः सर्वैर्भोगैः " शतपथब्रा० (११ । ५ । ७ । ९) ॥ इत्येवमाद्यनेकप्रमाणपर्यालोचनया ऋग्वेदादिवेदसंमितत्वेन सर्वसम्मान्यताभाजनत्वं पुराणस्य । तच्चेदं पुराणं नाम शास्त्रं पुरैकमेवासीत् । तथा चोक्तं मात्स्यपुराणे त्रिपञ्चाशदध्याये—" पुराणमेकमेवासीत्तदा कल्पान्तरेऽनघ ॥ त्रिवर्गसाधनं पुण्यं शतकोटिप्रविस्तरम् ॥ निर्दग्धेषु च लोकेषु वाजिरूपेण वै मया ॥ अङ्गानि चतुरो वेदान्पुराणं न्यायविस्तरम् ॥ मीमांसां धर्मशास्त्रं च परिगृह्य मया कृतम् ।। मत्स्यरूपेण च पुनः कल्पादावुदकार्णवे ॥ अशेषमेतत्कथितमुदकान्तर्गतेन च ॥ श्रुत्वा जगाद च मुनीन्प्रति देवश्चतुर्मुखः ।। " इत्याद्युक्त्वाग्रे कैः कैः कांस्कान्प्रति कानिकानि पुराणान्युक्तानीत्युक्तम् ॥ तथा च रेवामाहात्म्ये—"पुराणमेकमेवासीदस्मिन्कल्पान्तरे नृप । त्रिवर्गसाधनं पुण्यं शतकोटिप्रविस्तरम् ॥ स्मृत्वा जगाद च मुनीन्प्रति देवश्चतुर्मुखः । प्रवृत्तीः सर्वशास्त्राणां पुराणस्याभवत्ततः ॥ कालेनाग्रहणं दृष्ट्वा पुराणस्य ततो नृप । व्यासरूपं विभुः कृत्वा संहरेत्स युगेयुगे ॥ चतुर्लक्षप्रमाणेन द्वापरेद्वापरे सदा । तदष्टादशधा कृत्वा भूलोकेऽस्मिन्प्रभाष्यते ॥ अद्यापि देवलोके तच्छतकोटिप्रविस्तरम् ॥ तदर्थोऽत्र चतुर्लक्षसंक्षेपेण निवेशितः । पुराणानि दशाष्टौ च सांप्रतं तदिहोच्यते ॥" इत्येवमुक्त्वाग्रे पुराणनामधेयादीन्युक्तानि । किञ्च पाद्मपुराणे सृष्टिखण्डे प्रथमेऽध्याये—"प्रवृत्तिः सर्वशास्त्राणां पुराणस्याभवत्ततः । कलिनाऽग्रहणं दृष्ट्वा पुराणस्य तदा विभुः । व्यासरूपी तदा ब्रह्मा संग्रहार्थं युगेयुगे । चतुर्लक्षप्रमाणेन द्वापरेद्वापरे विभुः । तदष्टादशधा कृत्वा भूलोकेऽस्मिन्प्रकाशयत् ॥" इत्युक्तम् । अपि च बृहन्नारदीये मरीचिं प्रति ब्रह्मणो

CC-0. In Public Domain. Digitization by eGangotri

वचनम्—"ब्रह्मोवाच—शृणु वत्स प्रवक्ष्यामि पुराणानां समुच्चयम् ॥ यस्मिञ्ज्ञाते भवेज्ज्ञातं वाङ्मयं सचराचरम् ॥ पुराणमेकमेवासीत्सर्वकल्पेषु मानद ॥ चतुर्वर्गस्य बीजस्य शतकोटिप्रविस्तरम् ॥ प्रवृत्तिः सर्वशास्त्राणां पुराणादभवत्ततः ॥ कालेनाग्रहणं दृष्ट्वा पुराणस्य महामतिः ॥ हरिर्व्याससवरूपेण जायते च युगेयुगे ॥ चतुर्लक्षप्रमाणेन द्वापरेद्वापरे सदा ॥ तदष्टादशधा कृत्वा भूर्लोके निर्दिशत्यपि ॥ अद्यापि देवलोके तु शतकोटिप्रविस्तरम् ॥ अस्त्येव तस्य सारस्तु चतुर्लक्षेण वर्ण्यते ॥" इत्युक्त्वाग्रेऽष्टादशपुराणनामसंख्याविषयादि समुपवर्णितम् ॥ अथ च येकेचनाधुनातना अदृष्टशास्त्रयथार्थतत्त्वा अल्पज्ञानेन पण्डितंमन्यमानाः प्रत्यवतिष्ठन्ते—पुराणेषु रामकृष्णाद्यवतारकथानां केवलं व्यासकपोलकल्पितत्वमेव, न तु वास्तविकतया प्रामाणिकत्वम्—इति । तदेतत्तेषामदूरदर्शित्वमेवेति सुस्पष्टं वयं ब्रूमः । पुराणप्रोक्तानां भगवतः सगुणावताराणां वेदमंत्रादिष्वनागताख्यानत्वेन वर्णितत्वात्सर्वथा सप्रमाणत्वमेवेति समस्तास्तिकजनानां सुतरां सुदृढतरो विश्वासो वरीवर्ति । अत एव कानिचित्तद्विषये वेदमंत्रादिप्रमाणानि प्रदर्श्यन्ते। तत्र—वराहावतारः—तैत्तिरीयसंहितायाम्—"आपो वा इदमग्रे सलिलमासीत्तस्मिन्प्रजापतिर्वायुर्भूत्वाऽचरत्स इमामपश्यत्तं वाराहो भूत्वाहरत्", "स वराहो रूपं कृत्वोपन्यमज्जत स पृथिवीमध आर्छत्" इति तैत्तिरीयब्राह्मणे । "इतीयतीह वा इयमग्रे पृथिव्यास प्रादेशमात्री तामेमूष इति वाराह उज्जघान सोऽस्याः पतिः" इति शतपथब्राह्मणे (१४।१।२।११)। परशुरामावतारः—ऐतरेयब्राह्मणे—"प्रोवाच रामो भार्गवेयो विश्वान्तरायः" इति । कृष्णावतारः—छान्दोग्ये—"कृष्णाय देवकीपुत्राय" इति । तैत्तिरीयारण्यके च—"नारायणाय विद्महे वासुदेवाय धीमहि । तन्नो विष्णुः प्रचोदयात् ॥ " इति । वामनावतारः—ऋग्वेदे विष्णुसूक्ते—" विष्णोर्नु कं वीर्याणि प्रवोचं यः पार्थिवानि विममे रजांसि । यो अस्कभायदुत्तरं सधस्थं विचक्रमाणस्त्रेधोरुगायः ॥ १ ॥ प्र तद्विष्णुस्तव ते वीर्येण मृगो न भीमः कुचरो गिरिष्ठाः । यस्योरुषु त्रिषु विक्रमणेष्वधिक्षियन्ति भुवनानि विश्वा ॥२॥" इति । तस्मिन्नेव सूक्ते—"इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम् । समूळ्हमस्य पांसुरे ॥१॥ त्रीणि पदा विचक्रमे विष्णुर्गोपा अदाभ्यः । अतो धर्माणि धारयन् ॥ २ ॥ विष्णोः कर्माणि पश्यत यतो व्रतानि पस्पशे । इन्द्रस्य युज्यः सखा ॥ ३ ॥ तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः । दिवीव चक्षुराततम् ॥ ४ ॥" इति । शतपथब्राह्मणे—"देवाश्च वा असुराश्चोभये प्राजापत्याः पस्पृधिरे ततो देवा अनुव्यामिवासुरथ हासुरा मेनिरेऽस्माकमेवेदं भुवनमिति ॥ १ ॥ ते होचुः हन्तेमां पृथिवीं विभजामहै तां विभज्योपजीवामेति तामौक्ष्णैश्चर्मभिः पश्चात्प्राञ्चो विभजमाना अभीयुः ॥ २ ॥ तद्वै देवाः शुश्रुवुः विभजन्ते ह वा इमामसुराः पृथिवीं प्रेतनदेष्यामो यत्रेमामसुरा विभजन्ते के ततः स्याम यदस्यै न भजेमहीति ते यज्ञमेव विष्णुं पुरस्कृत्येयुः ॥ ३ ॥ ते होचुः अनु नोऽस्यां पृथिव्यामाभजतास्त्वेव नोऽप्यस्यां भाग इति । ते हासुरा असूयंत इवोचुर्यावदेवैष विष्णुरभिशेते तावद्वो दद्म इति ॥ ४ ॥ वामनो ह विष्णुरास तद्देवा न जिहीडिरे महद्वै नोऽदुर्ये नो यज्ञसंमितमदुरिति ॥ ५ ॥ ते प्राञ्चं विष्णुं निपाद्य च्छन्दोभिरभितः पर्यगृह्णन्गायत्रेण त्वा च्छन्दसा परिगृह्णामीति दक्षिणतस्त्रैष्टुभेन त्वा च्छन्दसा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

परिगृह्णामीति पश्चाज्जागतेन त्वा च्छन्दसा परिगृह्णामीत्यानुष्टुभेन च्छन्दसा त्वा परिगृह्णामीत्युत्तरतः ॥ ६ ॥ तं छन्दोभिरभितः परिगृह्याग्निं पुरस्तात्समाधाय तेनार्चन्त अभ्यन्तश्चेरुस्तेनेमाꣳसर्वां पृथिवीꣳसमविन्दन्त ।" इति श० (१।२।५–७)। रुद्रस्य वर्णनम्—अथर्वणवेदे (११ काण्डे २ प्रपाठके ६६) मन्त्रे—"नमस्ते रुद्र मन्यव उतो त इषवे नमः । बाहुभ्यामुत ते नमः ॥" इति । "भवाशर्वौ मृडतं माभियातं भूतपती पशुपती नमो वाम् । प्रतिहितामायसाविस्राष्टं मा नो हिंसिष्टं द्विपदो मा चतुष्पदः ॥ १ ॥ नमस्ते रुद्र कृण्मः सहस्राक्षायामर्त्य ३ । चतुर्नमो अष्टकृत्वो भवाय दशकृत्वः पशुपते नमस्ते ॥ ९ ॥" इति । तैत्तिरीयारण्यके—"नमो हिरण्यबाहवे हिरण्यवर्णाय हिरण्यरूपाय हिरण्यपतयेऽम्बिकापतय उमापतये पशुपतये नमोनमः॥" इति । देव्या वर्णनम्—ऋग्वेदेऽथर्वणवेदे च—"अहं रुद्रेभिर्वसुभिश्चराम्यहमादित्यैरुत विश्वदेवैः । अहं मित्रावरुणोभा बिभर्म्यहमिन्द्राग्नी अहमश्विनोभा ॥ १ ॥ अहं रुद्राय धनुरातनोमि ब्रह्मद्विषे शरवे हन्तवा उ । अहं जनाय समदं कृणोम्यहं द्यावापृथिवी आविवेश ॥ २ ॥" इत्युपक्रम्य—"यं कामये तं तमुग्रं कृणोमि तं ब्रह्माणं तमृषिं सुमेधाम् ॥" इत्यन्तम् । गणपतेर्वर्णनम्—ऋग्वेदे—"गणानां त्वा गणपतिं हवामहे कविं कवीनामुपमश्रवस्तमम् । ज्येष्ठराजं ब्रह्मणां ब्रह्मणस्पत आ नः शृण्वन्नूतिभिः सीद सादनम् ॥" इति । शुक्लयजुर्वेदे च—"गणानां त्वा गणपतिꣳहवामहे प्रियाणां त्वा प्रियपतिꣳहवामहे निधीनां त्वा निधिपतिꣳहवामहे व्वसो मम । आहमजानि गर्ब्भधमा त्वमजासि गर्ब्भधम् ॥" इति । सूर्यस्य वर्णनम्—"उद्यन्नद्य मित्रमह आरोहन्नुत्तरां दिवम् । हृद्रोगं मम सूर्य हरिमाणं च नाशय ॥ शुकेषु मे हरिमाणं रोपणाका सुदध्मसि ॥ अथो हारिद्रवेषु मे हरिमाणं निदध्मसि ॥ उदगादयमादित्यो विश्वेन सहसा सह ॥ द्विषन्तं मह्यं रंधयन्मो अहं द्विषते रधम् ॥" इति । एवमन्येषामपि देवानां वर्णनं वेदमन्त्रादिषु संक्षिप्ततया यत्रतत्र कृतमस्ति । येन च तत्तन्मन्त्रैस्तत्तद्देवतानां पूजाप्रार्थनादिषूपयोगो निखिलयाज्ञिकैः शश्वत्क्रियमाणो दरीदृश्यते याज्ञिकशान्तिकपौष्टिकादिकर्मसु । यतो वेदमन्त्राद्युक्तानां देवानां चारित्राणि समुपबृंह्य पुराणेषूपवर्णितानि ततो न पुराणोक्तदेवताकथानाममूलत्वमिति सुधीभिः सुष्ठ्ववगन्तव्यम् । तथा च श्रीमच्छंकराचार्यकृते ग्रन्थे शारीरिकभाष्येऽप्युक्तम्—"इतिहासपुराणमपि व्याख्यातेन मार्गेण सम्भवन्मन्त्रार्थवादमूलत्वात्प्रभवति देवताविग्रहादि साधयितुं प्रत्यक्षमूलमपि सम्भवति, भवति हि अस्माकमप्रत्यक्षमपि चिरन्तनानां प्रत्यक्षम् । तथा च व्यासादयो देवताभिः प्रत्यक्षं व्यवहरन्तीति स्मर्यते ॥ यस्तु ब्रूयादिदानीन्तनानामिव पूर्वेषामपि नास्ति देवादिभिर्व्यवहर्तुं सामर्थ्यमपि स जगद्वैचित्र्यं प्रतिषेधेत्, इदानीमिव च नान्यदापि सार्वभौमक्षत्रियोऽस्तीति ब्रूयात्, ततश्च राजसूयादिचोदना उपरुन्ध्यात्, इदानीमिव च कालान्तरेऽप्यव्यवस्थितप्रायान्वर्णाश्रमधर्मान्प्रतिजानीयात्, ततश्च व्यवस्थाविधायिशास्त्रमनर्थकं स्यात्, तस्माद्धर्मोत्कर्षवशाच्चिरंतना देवादिभिः प्रत्यक्षं व्यवजह्रुरिति श्लिष्यते ॥ अपि च स्मरन्ति—"स्वाध्यायादिष्टदेवतासंप्रयोगः" इत्यादि । योगोऽप्यणिमाद्यैश्वर्यप्राप्तिफलकः स्मर्यमाणो न शक्यते साहसमात्रेण प्रत्याख्यातुम् । श्रुतिश्च योग

CC-0. In Public Domain. Digitization by eGangotri

माहात्म्यं प्रत्याख्यापयति "पृथिव्यप्तेजोऽनिलखे समुत्थिते पञ्चात्मके योगगुणे प्रवृत्ते । न तस्य रोगो न जरा न मृत्युः प्राप्तस्य योगाग्निमयं शरीरम् ॥" इति । ऋषीणामपि मन्त्रब्राह्मणदर्शिनां सामर्थ्यं नास्मदीयेन सामर्थ्येनोपमातुं युक्तम्, तस्मात्समूलमितिहासपुराणम्" इति शारीरिकभाष्यम् ॥ (१।३।३३।) अथ च स्कांदे महापुराणे पञ्चमेऽवन्तिकाखण्डे तृतीये रेवाखण्डे शौनकादीन्प्रति सूतोक्तिरित्थम्–"वेदोपवेदवेदाङ्गादीन्यभिव्यस्य पूरकः । अष्टादशपुराणानां वक्ता सत्यवतीसुतः ॥ तं नमस्कृत्य वक्ष्यामि पुराणानि यथाक्रमम् । येषामभिव्याहरणादभिवृद्धिर्वृषायुषोः ॥ श्रुतिः स्मृतिश्च विप्राणां चक्षुषी परिकीर्तिते । काणस्तत्रैकया हीनो द्वाभ्यामन्धः प्रकीर्तितः ॥ श्रुतिस्मृतिपुराणानि विदुषां लोचनत्रयम् । यस्त्रिभिर्नयनैः पश्येत्सोंऽशो माहेश्वरः स्मृतः ॥ आत्मनो वेदविद्या च ईश्वरेण विनिर्मिता । शौनकीया च पौराणी धर्मशास्त्रात्मिका च या ॥ तिस्रो विद्या इमा मुख्याः सर्वशास्त्रविनिर्णये । पुराणं पञ्चमो वेद इति ब्रह्मानुशासनम् ॥ यो न वेद पुराणं हि न स वेदात्र किञ्चन ॥ कतमः स हि धर्मोऽस्ति किं वा ज्ञानं तथाविधम् । अन्यद्वा तत्किमत्राह पुराणे यन्न दृश्यते ॥ वेदाः प्रतिष्ठिताः पूर्वं पुराणे नात्र संशयः ॥ बिभेत्यल्पश्रुताद्वेदो मामयं प्रहरिष्यति ॥ इतिहासपुराणैश्च कृतोऽयं निश्चयः पुरा ॥ आत्मा पुराणं वेदानां पृथगङ्गानि तानि षट् ॥ यच्च दृष्टं हि वेदेषु तद्दृष्टं स्मृतिभिः किल ॥ उभाभ्यां यत्तु दृष्टं हि तत्पुराणेषु गीयते ॥ पुराणं सर्वशास्त्राणां प्रथमं ब्रह्मणः स्मृतम् ॥ अनन्तरं च वक्त्रेभ्यो वेदास्तस्य विनिर्गताः ॥ पुराणमेकमेवासीदस्मिन्कल्पान्तरे मुने ॥ त्रिवर्गसाधनं पुण्यं शतकोटिप्रविस्तरम् ॥ स्मृत्वा जगाद च मुनीन्प्रति देवश्चतुर्मुखः ॥ प्रवृत्तिः सर्वशास्त्राणां पुराणस्याभवत्ततः ॥ कालेनाग्रहणं दृष्ट्वा पुराणस्य ततो मुने । व्यासरूपं विभुः कृत्वा संहरेत्स युगेयुगे ॥ अष्टलक्षप्रमाणेन[1] द्वापरे द्वापरे सदा । तदष्टादशधा कृत्वा भूर्लोकेऽस्मिन्प्रभाषते ॥ अद्यापि देवलोके तच्छतकोटिप्रविस्तरम् ॥" इति ॥ ततः कोपराधः परमपूज्यश्रीव्यासमहर्षेराहोस्विद्यथार्थवेदार्थानभिज्ञानां पण्डितंमन्यानामाधुनिकानामल्पश्रुतानामिति निर्मत्सराः सन्त एव विभावयन्तु । हन्त तत एवोक्तम्–"बिभेत्यल्पश्रुताद्वेदो मामयं प्रहरिष्यति" इति । अतः समस्तपुराणानां वेदार्थोपबृंहकत्वेन सर्वथा प्रामाणिकत्वमेव । इत्थं व्यासोक्तपुराणानां कपोलकल्पितत्वं वल्गमानानामल्पश्रुतानां कपोलस्तु चपेटिकया निर्भिन्न इति हेतोः समस्ता आस्तिकजनाः स्वस्थतया विश्वसन्तु समस्तेषु पुराणेषु तदुक्तदेवतादिषु चेति सहर्षं सर्वानास्तिकजनान्वयं सप्रांजलं प्रोत्साहयामः । किं चाग्नेयपुराणे वसिष्ठाग्निसंवादे तु–"पुराणं सर्वशास्त्राणां प्रथमं ब्रह्मणा स्मृतम् ॥ अनन्तरं च वक्त्रेभ्यो वेदास्तस्य विनिर्गताः ॥" इत्युक्तम् । एतेन ह्युपदेशः पूर्वं पुराणस्य पश्चाद्वेदानां मुनिभ्यो ब्रह्मणा कृत इति व्यवस्था सुधीभिरत्रार्थेऽनुसंधेया । अत एवानुपनीतान्ब्राह्मणादित्रैवर्णिकबालकानुप

१ अष्टलक्षप्रमाणेन–महापुराणोपपुराणभेदात्प्रत्येकं चतुश्चतुर्लक्षविभागो बोध्यः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नयनात्प्राक्पौराणिकस्तोत्रपाठाद्युपदिश्य पश्चादुपनयनोत्तरं वेदप्रपाठनं क्रियते । तदेतच्छ्रेष्ठानुविधानंनाम परम्परया सर्वतः प्रचलतीति सुविदितमेव सुधियाम् ॥ एतेन पुराणानां वेदादित्वेन मान्यतायां सत्यामपि पुराणानामप्रामाणिकत्वं मन्यमाना आधुनिकाः पण्डितंमन्या ज्ञानलवदुर्विदग्धाः प्रत्युक्ताः ॥ अथ तत्र सामान्यतः पुराणस्य पञ्च लक्षणान्युच्यन्ते—सर्गः प्रतिसर्गः वंशः मन्वन्तरं वंश्यानुचारितं चेति । क्वचिच्च महापुराणस्य दश लक्षणान्युक्तानि ॥ तानि यथा—सर्गः १ प्रतिसर्गः २ वृत्तिः ३ रक्षा ४ अन्तरम् ५ वंशः ६ वंश्यानुचारितं ७ संस्था ८ हेतुः ९ अपाश्रयः १० इति । तत्र महापुराणान्यष्टादश । तेषामभिधाः संख्याश्चोक्ताः श्रीमद्भागवते द्वादशस्कन्धे । ताश्चेत्थम्—प्रथमं ब्राह्मम् १०००० द्वितीयं पाद्मम् ५५००० तृतीयं वैष्णवम् २३००० चतुर्थं शैवम् २४००० पञ्चमं भागवतम् १८००० षष्ठं नारदीयम् २५००० सप्तमं मार्कंडेयम् ९००० अष्टममाग्नेयम् १५४०० नवमं भविष्यम् १४५०० दशमं ब्रह्मवैवर्तम् १८००० एकादशं लैङ्गम् ११००० द्वादशं वाराहम् २४००० त्रयोदशं स्कान्दम् ८११०० चतुर्दशं वामनम् १०००० पञ्चदशं कौर्मम् १७००० षोडशं मात्स्यम् १४००० सप्तदशं गारुडम् १९००० अष्टादशं ब्रह्माण्डम् १२००० एतेषामष्टादशमहापुराणानां समुदायेन चतुर्लक्षश्लोकाः ४००००० सन्ति । अपि च ब्रह्मवैवर्ते श्रीकृष्णजन्मखण्डे (१३२) अध्याये पुराणविषयमुपक्रम्य कृतमेतद्विवरणं द्रष्टव्यम् । यथा च तत्रोक्तम्—"सूत उवाच—विस्तराणि पुराणानि चेतिहासश्च शौनक ॥ संहितां पञ्चरात्राणि कथयामि यथागमम् ॥ सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च । वंश्यानुचारितं विप्र पुराणं पञ्चलक्षणम् ॥ एतदुपपुराणानां लक्षणं च विदुर्बुधाः ॥ महतां च पुराणानां लक्षणं कथयामि ते ॥ सृष्टिश्चापि विसृष्टिश्च स्थितिस्तेषां च पालनम् ॥ कर्मणां वासना वार्ता मनूनां च क्रमेण च ॥ वर्णनं प्रलयानां च मोक्षस्य च निरूपणम् ॥ उत्कीर्तनं हरेरेव देवानां च पृथक्पृथक् ॥ दशाधिकं लक्षणं च महतां परिकीर्तितम् ॥ संख्यानं च पुराणानां निबोध कथयामि ते ॥ परं ब्राह्मपुराणं च सहस्राणां दशैव च ॥ पंचोनषष्टिसाहस्रं पाद्ममेवं प्रकीर्तितम् ॥ त्रयोविंशतिसाहस्रं वैष्णवं च विदुर्बुधाः ॥ चतुर्विंशतिसाहस्रं शैवमेव निरूपितम् ॥ ग्रन्थाष्टादशसाहस्रं श्रीमद्भागवतं विदुः ॥ पञ्चविंशतिसाहस्रं नारदीयं प्रकीर्तितम् ॥ मार्कण्डं नवसाहस्रं पुराणं पंडिता विदुः ॥ चतुःशताधिकं पञ्चदशसाहस्रमेव च ॥ परमग्निपुराणं च रुचिरं परिकीर्तितम् ॥ चतुर्दशसहस्राणि परं पंचशताधिकम् ॥ पुराणप्रवरं चैव भविष्यं परिकीर्तितम् ॥ अष्टादशसहस्रं च ब्रह्मवैवर्तमीरितम् ॥ सर्वेषां च पुराणानां सारमेव विदुर्बुधाः ॥ एकादशसहस्रं च परं लिङ्गपुराणकम् ॥ चतुर्विंशतिसाहस्रं वाराहं परिकीर्तितम् ॥ एकाशीतिसहस्रं च परमेव शताधिकम् ॥ वरं स्कान्दपुराणं च सद्भिरेवं निरूपितम् ॥ वामनं दशसाहस्रं कौर्मं सप्तदशैव तु ॥ मात्स्यं चतुर्दशं प्रोक्तं पुराणं पंडितैस्तथा ॥ ऊनविंशतिसाहस्रं गारुडं परिकीर्तितम् ॥ परं द्वादशसाहस्रं ब्रह्माण्डं परिकीर्तितम् ॥ एवं पुराणसंख्यानं चतु

CC-0. In Public Domain. Digitization by eGangotri

र्लक्षमुदाहृतम् ॥ अष्टादशपुराणानामेवमेव विदुर्बुधाः ॥ एवं चोपपुराणानामष्टादश प्रकीर्तिताः ॥ इतिहासो भारतं च वाल्मीकं काव्यमेव च ॥ पंचकं पांचरात्राणां कृष्णमाहात्म्यपूर्वकम् ॥ वासिष्ठं नारदीयं च कापिलं गौतमीयकम् ॥ परं सनत्कुमारीयं पांचरात्रं च पंचकम् ॥ पंचकं संहितानां च कृष्णभक्तिसमन्वितम् ॥ ब्रह्मणश्च शिवस्यापि प्रह्लादस्य तथैव च ॥ गौतमस्य कुमारस्य संहिताः परिकीर्तिताः ॥" इति । तथा चात्रैव स्कान्दे प्रभासखण्डे प्रभासक्षेत्रमाहात्म्ये द्वितीयेऽध्याये—"पुरा तपश्चचारोग्रममराणां पितामहः ॥ आविर्भूतास्ततो वेदाः सषडङ्गपदक्रमाः ॥ ततः पुराणमखिलं सर्वशास्त्रमयं ध्रुवम् ॥ नित्यशब्दमयं पुण्यं शतकोटिप्रविस्तरम् ॥ निर्गतं ब्रह्मणो वक्त्राद्ब्राह्मं पाद्मं च वैष्णवम् ॥ शैवं भागवतं चैव भविष्यं नारदीयकम् ॥ मार्कंडेयमथाग्नेयं ब्रह्मवैवर्तमेव च ॥ लैङ्गं तथा च वाराहं स्कान्दं वामनमेव च ॥ कौर्म्यं मात्स्यं गारुडं च वायवीयमनन्तरम् ॥ अष्टादशं समुद्दिष्टं सर्वपातकनाशकम् ॥ एकमेव पुरा ह्यासीद्ब्रह्मांडं शतकोटिधा ॥ तदष्टादशधा कृत्वा वेदव्यासो युगेयुगे ॥ प्रख्यापयति लोकेऽस्मिन्साक्षान्नारायणांशजः ॥" इति । पाद्मपुराणे तु—" निस्ताराय तु लोकानां स्वयं नारायणः प्रभुः ॥ व्यासरूपेण कृतवान्पुराणानि महीतले ॥ पठनाच्छ्रवणाद्येषां नृणां पापक्षयो भवेत् ॥ धर्माधर्मपरिज्ञानं सदाचारप्रवर्तनम् ॥ गतिश्च परमा तद्वद्भक्तिर्भगवति प्रभौ ॥ तानि ते कथयिष्यामि सप्रमाणानि भूतले ॥ पुराणानि चतुर्लक्षाण्येतानि धरणीतले ॥ तथा महाभारतं च लक्षसंख्यं प्रकीर्तितम् ॥ आख्यानैश्चाप्युपाख्यानैर्गाथाभिः कल्पशुद्धिभिः ॥ पुराणसंहितां चक्रे पुराणार्थविशारदः ॥ प्रख्यातो व्यासशिष्योऽभूत्सूतो वै लोमहर्षणः ॥ पुराणसंहितां तस्मै ददौ व्यासो महामुनिः ॥ सुमतिश्चाग्निवर्चाश्च मित्रायुः शांशपायनः ॥ अकृतव्रणोऽथ सावर्णिः षट्छिष्यास्तस्य चाभवन् ॥" इति । तत्रैव पाद्मोत्तरखण्डे पुराणानां सात्त्विकत्वादिगुणविवेचनं चेत्थं कृतम्—" मात्स्यं कौर्म्यं तथा लैङ्गं शैवं स्कान्दं तथैव च ॥ आग्नेयं च षडेतानि तामसानि निबोधत ॥ वैष्णवं नारदीयं च तथा भागवतं शुभम् ॥ गारुडं च तथा पाद्मं वाराहं शुभदर्शने ॥ सात्त्विकानि पुराणानि विज्ञेयानि शुभानि वै ॥ ब्रह्माण्डं ब्रह्मवैवर्तं मार्कण्डेयं तथैव च ॥ भविष्यं वामनं ब्राह्मं राजसानि निबोधत ॥" इति । एतेन परिगणनेनैतेषां शिवादिदेवताविशेषमाहात्म्यपरत्वं ध्वन्यते ॥ न तूत्तमाधमफलत्वे तात्पर्यम् ॥ यत्तु कैश्चित्पूर्वोक्तपाद्मपुराणमध्ये स्वयं कृतं पद्यं प्राक्षिप्योच्यते—" सात्त्विका मोक्षदाः प्रोक्ता राजसाः स्वर्गदाः शुभाः ॥ तथैव तामसा देवि निरयप्राप्तिहेतवः ॥" इति, तत्तेषां तुच्छबुद्धीनां दुर्विचारविलसितमेवावगन्तव्यम् । सात्त्विकाइत्यादिपुंस्त्वनिर्देशेनैव विशेष्यीभूतपुराणेषु संबंधाभावात्प्रक्षिप्तत्वं स्फुटमेव प्रतीयते तत्कपोलकल्पितस्योपरितनपद्यस्य । तांस्तुच्छबुद्धीनुद्दिश्योक्तं भविष्यपुराणे—"ब्रह्माणं केशवं रुद्रं भेदभावेन मोहिताः । पश्यन्त्येकं न जानन्ति पाखण्डोपहता जनाः ॥ " इति । परमार्थत एकस्यैव भगवतोऽनेकनाम

१ भेदाः–इति शेषः । २ "स्वयंदृष्टार्थकथनं प्राहुराख्यानकं बुधाः । श्रुतस्यार्थस्य कथनमुपाख्यानं प्रचक्षते ।।" इत्याख्यानोपाख्यानलक्षणे ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0: In Public Domain. Digitization by eGangotri

रूपैः प्रसिद्धिरस्ति न वस्तुतो भेदोऽस्तीति तूक्तं श्रुतौ। तथा च श्रुतिः—"इन्द्रं मित्रं वरुणमग्निमाहुरथो दिव्यः स सुपर्णो गरुत्मान्। एकं सद्विप्रा बहुधा वदन्त्यग्निं यमं मातरिश्वानमाहुः" इति ऋग्वेदे (मं० १। व०२२ सू० १६४। मं० ४६) अष्टादशमहापुराणेषु मध्ये कतिपुराणैः के देवा मुख्यत्वेन प्रतिपादितास्तदुक्तं स्कान्दे महापुराणे केदारखण्डे प्रथमेऽध्याये—"अष्टादशपुराणेषु दशभिर्गीयते शिवः॥ चतुर्भिर्भगवान्ब्रह्मा द्वाभ्यां देवी तथा हरिः॥" इति। तथा तत्तत्पुराणप्रतिपाद्यानां तत्तद्विशिष्टदेवतानां निर्णयः प्रोक्तः शिवरहस्ये सम्भवकाण्डे—"तत्र शैवानि शैवं च भविष्यं च द्विजोत्तमाः॥ मार्कण्डेयं तथा लैङ्गं वाराहं स्कान्दमेव च॥ मात्स्यमन्यत्तथा कौर्मं वामनं च मुनीश्वराः। ब्रह्माण्डं च दशेमानि त्रीणि लक्षाणि संख्यया॥ ग्रन्थानां महिमा सर्वैः शिवस्यैव प्रकाश्यते। असाधारणया मूर्त्या नाम्नाऽसाधारणेन च॥ वदन्ति शिवमेतानि शिवस्तेषु प्रकाश्यते॥ विष्णोर्हि वैष्णवं तच्च तथा भागवतं विदुः॥ नारदीयं पुराणं च गारुडं वैष्णवं विदुः॥ ब्राह्मं पाद्मं ब्रह्मणो द्वे अग्नेराग्नेयमेककम्। सवितुर्ब्रह्मवैवर्तमेवमष्टादश स्मृतम्। चत्वारि वैष्णवानीशविष्ण्वोः साम्यपराणि वै॥ ब्रह्मादिभ्योऽधिकं विष्णुं प्रवदन्ति जगत्पतिम्॥ ब्रह्मविष्णुमहेशानां साम्यं ब्राह्मे पुराणके॥ अन्येषामधिकं देवं ब्रह्माणं जगतां पतिम्। प्रवदन्ति दिनाधीशं ब्रह्मविष्णुशिवात्मकम्॥" इति। एवमेतेषां महापुराणानां संक्षेपतो वर्णितः संघट्टः॥ एवमुपपुराणान्यप्यष्टादश भवन्ति। तान्युक्तानि गारुडे (२२७) अध्याये। यथा—"आद्यं सनत्कुमारोक्तं नारसिंहमथापरम्। तृतीयं स्कान्दमुद्दिष्टं कुमारेण तु भाषितम्॥ चतुर्थं शिवधर्माख्यं साक्षान्नन्दीशभाषितम्॥ दुर्वाससोक्तमाश्चर्यं नारदोक्तमतः परम्॥ कापिलं वामनं चैव तथैवोशनसेरितम्। ब्रह्माण्डं वारुणं चाथ कालिकाह्वयमेव च॥ माहेश्वरं तथा साम्बं सौरं सर्वार्थसंचयम्॥ पराशरोक्तमपरं मारीचं भार्गवाह्वयम्॥" इति। इतोऽन्यान्युपोपपुराणान्यपि गाणेशमौद्गलदेवीपुराणकल्किपुराणादिपुराणप्रभृतीन्यष्टादश सन्तीति॥ सोऽयं प्रोक्तश्चतुष्पञ्चाशत्पुराणसमुदायः।

अथ यानि चोक्तान्यष्टादशमहापुराणानि तत्र प्रस्तुतं तावत्किञ्चिद्विविच्यते—अयि सज्जनमहोदयाः! अस्माभिश्चिरंतनं समयमारभ्याद्ययावदनेकदेशदेशान्तरस्थितेभ्यो महाभाग्यशालिनां समस्तराजवर्याणां विद्वज्जनानां राजसन्मान्यानामग्रहारसंभावितसज्जनानां चातिप्राचीनसरस्वतीभाण्डागारेभ्यो हस्तलिखितान्यतिप्राचीनानि वेदशास्त्रपुराणधर्मशास्त्रयोगवैशेषिकसांख्यव्रतकथेतिहासकर्मकांडव्याकरणन्यायच्छंदोज्यौतिषकाव्यालंकारनाटकोपन्यासचंपूकोशवैद्यकमंत्रस्तोत्रसकलसांप्रदायिकग्रन्थान्महता परिश्रमेण भूयसा द्रव्यव्ययेन च संपाद्यानेकप्रत्यादर्शपुस्तकसंमेलनपुरःसरं शास्त्रिजनद्वारा संपरिशोध्य चास्मदीये "श्रीवेङ्कटेश्वर" मुद्रणालये सुपुष्टचिक्कणपत्रेषु सुमनोहरसीसकाक्षरैः संमुद्रय सर्वेषां सुखलाभायात्यल्पमौल्येन प्रसिद्धिं नीतानीत्यद्ययावदस्मदीय"श्रीवेङ्कटेश्वर"मुद्रणालयपरिचितानां समस्तसज्जनानां सुविदितमेवैतत्। एवमस्मदीयेऽद्ययावदविरतमसंख्यातग्रन्थमुद्रणकार्यक्रमे प्रचलिते सति बहुवर्षेभ्यः प्रागेकस्मिन्समये पुराणग्रन्थपर्यालोचनायामस्माभिः समवधाने क्रियमाणे—श्रीमन्मा

CC-0. In Public Domain. Digitization by eGangotri

र्कण्डेयमहापुराणस्थम्——"अष्टादशपुराणानां नामधेयानि यः पठेत् ॥ त्रिसंध्यं जपते यस्तु सोऽश्वमेधफलं लभेत् ॥ " इति पद्यं, तथा च भविष्यपुराणस्थम्–"ये त्वेतानि समस्तानि पुराणानि च जानते ॥ भारतं च महाबाहो ते सर्वज्ञा मता नृणाम् ॥ " इति पद्यं चास्माकं दृष्टिपथं समायासीत् । एतत्पद्यद्वयावलोकनेन चास्माकं श्रीपरमेश्वरस्य प्रेरणया चाकस्मादेषा बुद्धिपरिस्फूर्तिरजायत–'सर्वेषां भूतलनिवासिनामास्तिकजनानां सकलैहिकामुष्मिकसत्फलोदर्कसमुपलब्धये समस्तपुराणज्ञानोपलब्धिरत्यावश्यकी'इति । परंतु समस्तपुराणग्रन्थोपलब्ध्यधीना समस्तपुराणज्ञानोपलब्धिरिति तु सार्वजनीनम् । ततो बहुकालं विचारान्ते–यद्येतानि समग्राष्टादशमहापुराणानि संमुद्यास्माभिः प्राकाशयिष्यन्त तर्हि नः प्राचीनसमस्तग्रन्थप्रकाशनप्रयत्नसाफल्यं समजनिष्यतेति सहसास्मदीये मनसि समुत्कण्ठा समुदभूत् । अथ चास्माभिस्तदानीमेवाष्टादशमहापुराणपुस्तकमुद्रणार्थं दृढतरः संकल्पोऽकारि । ततोऽस्माभिर्बद्धपरिकरीभूय महान्तं प्रयत्नमारचय्य यतस्ततः स्थितेभ्यः प्राचीनसरस्वतीभाण्डागारेभ्यस्तेभ्यस्तेभ्योऽत्युदारचारितेभ्यस्तत्तत्सरस्वतीभाण्डागाराधिपतिभ्यो महामान्येभ्यो महाभ्युदयेभ्यस्तत्रतत्र यथोपलब्धानि पूर्णान्यपूर्णानि खण्डितानि त्रुटितान्यधिकानि न्यूनानि सटीकान्यटीकानि जीर्णलिखितानि नवलिखितानि शीर्णपत्राणि यथातथां व्यस्तानि समस्तानि भागशः खण्डशः स्थितानि समस्तानां पुराणानां पुस्तकानि भूयसा परिश्रमेण महता द्रव्यव्ययेन कथंकारं संगृह्य संपादितानि । एतावांश्च पुस्तकसंपादनप्रयत्नोऽद्ययावद्विंशतिवर्षैः प्रतिक्षणं प्रचलता प्रक्रमेण परमेश्वरानुग्रहवशात्सफलताप्रायतां प्रापत् । ततश्चास्माभिस्तानि यतस्ततः समुपलभ्य संपादितानि महापुराणपुस्तकानि संगृह्य विविधशास्त्रविद्याविशारदैर्बहुभिः शास्त्रिजनैः सम्यक्परिशोध्य तद्गतगूढविषयविशेषपरिस्फोरणार्थाभिष्टिप्पणीभिः समलंकृत्य च पुष्टचिक्कणपत्रेषु सुन्दराक्षरैः स्वकीये "श्रीवेङ्कटेश्वर" मुद्रणालये संमुद्य प्रकाशयितुमुपक्रान्तानि । एवं प्रचलता प्रक्रमेणाद्ययावत्तानि ब्राह्म–पाद्म–शैव–भागवत–बृहन्नारदीय–मार्कंडेय–आग्नेय–भविष्य–ब्रह्मवैवर्त–लैङ्ग–वाराह–वामन–कौर्म–मात्स्य–गारुड–ब्रह्माण्डेत्येतानि षोडश–एवमन्यानि वायवीयपुराणदेवीभागवतप्रभृतीनि प्रमाणान्तरेण परिगणितानि महापुराणानि तथान्यानि कतिपयानि सांबपुराणनरसिंहपुराणादीन्युपपुराणानि तथाचादिपुराणकालिकापुराणकल्किपुराणप्रभृतीन्युपोपपुराणानि च मुद्रयित्वा प्रकाशितानि सन्ति । एवं क्रमेणाद्ययावन्महापुराणपुस्तकानि संमुद्रय श्रीवेङ्कटेश्वरमुद्रणालयात्सर्वभूमण्डले प्रकाशितानि सन्ति । इदानीं महापुराणमुद्रणप्रक्रमेण चैतत्स्कान्दंनाम महापुराणं महता प्रयासेन बहुभ्यः स्थलेभ्यः श्रीमन्महामान्यानां सज्जनवरिष्ठानां महाभ्युदयानां प्राचीनसरस्वतीभाण्डागारेभ्यः सम्पाद्य संगृहीतम् । तस्यैतस्य स्कान्दमहापुराणस्याष्टौ प्रत्यादर्शपुस्तकानि येषांयेषामुदारचारितानां सज्जनशिरोमणीनां प्राचीनसरस्वतीभाण्डागारेभ्योऽस्माकं मिलितानि तेषां शुभमङ्गलनामधेयानि च सधन्यवादं पृथगत्र प्रथमपृष्ठ एतस्याः प्रस्तावनाया ऊर्ध्वभागे प्रदर्शितान्येव सन्ति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ स्कान्दमहापुराणविषयकसन्देहनिरासः ।

अथैतत्स्कान्दमहापुराणसमवगाहनसमुद्भूतविषयविशेषविवेचनेनैतस्य स्कान्दमहापुराणस्य सर्वेषां सुदृढपरिचयार्थं स्कान्दपुराणविषयकविविधभेदजन्यदुर्निवारसन्देहसन्दोहनिरासार्थं च समस्तसज्जनानां पुरतः किञ्चित्प्रास्ताविकं तावदिदानीं प्रस्तूयते—

अयि महामान्यसज्जनशिरोमणयः ! स्कांदंनाम पुराणं तावद्द्विविधम्—एकं स्कांदं महापुराणं, द्वितीयं च स्कांदंनामोपपुराणम् । तत्राष्टादशमहापुराणेषु यत्त्रयोदशं स्कांदंनाम महापुराणं परिगणितं तदेतदेव—यस्यैषा प्रस्तावनाऽधुना श्रीमद्भिः पर्यालोच्य कृतार्थीक्रियते । तत्र द्विविधत्वं च स्कांदपुराणस्य प्रथमतो विविच्यते । तदित्थम् । महापुराणपरिगणनायां ब्रह्मवैवर्ते श्रीकृष्णजन्मखंडे (१३२) अध्याये—"परं ब्राह्मपुराणं च सहस्राणां दशैव च ॥ पंचोनषष्टिसाहस्रं पाद्ममेव प्रकीर्तितम् ॥" इत्यारभ्य त्रयोदशं स्कांदमहापुराणं समुद्दिश्योक्तम्—"एकाशीतिसहस्रं च परमेव शताधिकम् ॥ वरं स्कांदपुराणं च सद्भिरेवं निरूपितम् ॥" इति । तथा च बृहन्नारदीयपुराणे महापुराणसंख्यानुक्रममुपक्रम्य त्रयोदशं स्कांदं महापुराणमुद्दिश्येत्थमुक्तम्—"शृणु वक्ष्ये मरीचे च पुराणं स्कांदसंज्ञितम् । यस्मिन्प्रतिपदं साक्षान्महादेवो व्यवस्थितः ॥ पुराणे शतकोटौ तु यच्छैवं वर्णितं मया ॥ लक्षितस्यार्थजातस्य सारो व्यासेन कीर्तितः ॥ स्कान्दाह्वयस्तत्र खंडाः सप्तैव परिकल्पिताः ॥ एकाशीतिसहस्रं तु स्कान्दं सर्वाघकृन्तनम् ॥ यः शृणोति पठेद्वापि स तु साक्षाच्छिवः स्थितः ॥ यत्र माहेश्वरा धर्माः षण्मुखेन प्रकाशिताः ॥ कल्पे तत्पुरुषे वृत्ताः सर्वसिद्धिविधायकाः ॥" इति । किञ्चात्रैव स्कान्दे प्रभासखंडे चतुर्थे द्वारकामाहात्म्ये चतुश्चत्वारिंशदध्याये—"सूत उवाच—एतत्पुराणमखिलं पुरा स्कन्देन भाषितम् ॥ भृगवे ब्रह्मपुत्राय तस्माल्लेभे तथांगिराः ॥ ततश्च च्यवनः प्राप ऋचीकश्च ततो मुनिः ॥ एवं परम्पराप्राप्तं सर्वेषु भुवनेष्वपि ॥ स्कान्दं पुराणमेतच्च कुमारेण पुरोद्धृतम् ॥ यः शृणोति सतां मध्ये नरः पापाद्विमुच्यते ॥ इदं पुराणमायुष्यं चतुर्वर्णसुखप्रदम् ॥ निर्मितं षण्मुखेनेह नियतं सुमहात्मना ॥ एवमेतत्समाख्यातमाख्यानं भद्रमस्तु वः ॥ मण्डितं सप्तभिः खण्डैः स्कान्दं यः शृणुयान्नरः ॥ न तस्य पुण्यसंख्यानं कर्तुं शक्येत केनचित् ॥ य इदं धर्ममाहात्म्यं ब्राह्मणाय प्रयच्छति ॥ स्वर्गलोके वसेत्तावद्यावदक्षरसंख्यया ॥" इत्यादिनैतदेव सप्तखण्डात्मकं स्कान्दंनाम महापुराणमित्याख्यायते । किं चैतदेव तत्पुरुषकल्पोक्तं स्कान्दं महापुराणं समुद्दिश्य सप्तखण्डनामानुक्रमण्येकेन श्लोकेन कैश्चिदभियुक्तैरित्थमुक्तास्ति—"माहेश्वरो वैष्णवब्राह्मकाश्यास्त्ववन्तिका नागरमत्र षष्ठम् ॥ प्राभासिको विप्रवरेण खण्डाः स्कान्दे पुराणे कथिताः सुपुण्याः ॥" इति । अपि चात्रैव स्कान्दे महापुराणे सप्तमे प्रभासखंडे प्रथमे प्रभासक्षेत्रमाहात्म्ये द्वितीयेऽध्यायेऽष्टादशमहापुराणभेदवर्णनप्रसंगे—"स्कान्दं तु सप्तधा भिन्नं

CC-0. In Public Domain. Digitization by eGangotri

वेदव्यासेन धीमता ॥ एकाशीतिसहस्राणि शतं चैक तु संख्यया ॥ तस्याद्यो यो विभागस्तु स्कान्दमाहात्म्यसूचकः ॥ माहेश्वरः समाख्यातो द्वितीयो वैष्णवः स्मृतः ॥ तृतीयो ब्रह्मणः प्रोक्तः सृष्टिसंक्षेपसूचकः ॥ काशीमाहात्म्यसंयुक्तश्चतुर्थः परिपठ्यते ॥ रेवायाः पञ्चमो भागः सोज्जयिन्याः प्रकीर्तितः ॥ षष्ठः कल्पो नागरश्च तीर्थमाहात्म्यसूचकः ॥ सप्तमोऽयं विभागो यः स्मृतः प्राभासिको द्विजाः ॥ सर्वे द्वादशसाहस्रा विभागाः संप्रकीर्तिताः ॥ अस्मिन्प्राभासिकः सर्वो वर्ण्यते क्षेत्रविस्तरः ॥ तीर्थानां चैव माहात्म्यं माहात्म्यं शंकरस्य च ॥ अन्येषां चैव देवानां माहात्म्यं च प्रकीर्त्यते ॥ इति भेदः पुराणानां संक्षेपात्कथितो द्विजाः ॥ इममष्टादशानां तु पुराणानामनुक्रमम् ॥ यः पठेद्धव्यकव्येषु स याति भवनं हरेः ॥ इदं पवित्रं हि यशोनिधानमिदं पितॄणामपि वल्लभं च ॥ इदं च देवेष्वमृताय नित्यमिदं महापातकहृच्च पुंसाम् ॥ '' इति । बृहन्नारदीयमहापुराणे समस्तमहापुराणानां संख्यापरिगणनपूर्वकं परिगणनं कृतमस्ति । तत्र समस्तमहापुराणस्थसर्वभागखण्डस्कन्दपर्वपादादिविवेचनपूर्वकतत्तन्महापुराणस्थसमस्तप्रत्येकैकविषयानुक्रमणिकावर्णनप्रक्रमे क्रमायाततया त्रयोदशत्वेन परिगणितस्य सप्तखण्डविभूषितस्यैतस्यैव स्कान्दमहापुराणस्य सविस्तरमाहेश्वरखण्डादिसप्तखण्डस्थविषयानुक्रमणिकायाः संवर्णनादिदं माहेश्वर—वैष्णव—ब्राह्म—काशी—आवन्त्य—नागर—प्रभासेतिसप्तमुख्यखण्डात्मकमेतदुक्तसप्तखण्डान्तर्गतानेकखण्डमाहात्म्योपेतं यथावर्णितैकशताधिकैकाशीतिसहस्रग्रन्थश्लोकसंख्यात्मकं स्कान्दंनाम महापुराणं वरीवर्तितरामिति सुनिपुणैः सुधीभिः साधु निर्धारणीयम् ॥ अथ चैतस्यैव सप्तखण्डान्वितस्य स्कान्दमहापुराणस्य महापुराणत्वेन सत्यापनार्थं बृहन्नारदीयमहापुराणोक्तः समग्रसप्तखण्डानुक्रमणिकाध्याय इदानीं सर्वेषां सज्जनानामेतत्परिचयायैतद्विभागपरिज्ञानाय सर्वसंदेहनिवृत्तये चेहोपन्यस्यते । ततः स्यादेव समस्तसज्जनानामेतस्यैव स्कान्दमहापुराणस्य महापुराणत्वेन सत्यत्वेन प्रतीतिः ॥ स च नारदीयमहापुराणोक्तः स्कान्दमहापुराणस्थविषयानुक्रमणिकाध्याय इत्थम्—"ब्रह्मोवाच——शृणु वत्स प्रवक्ष्यामि पुराणं स्कान्दसंज्ञकम् ॥ यस्मिन्प्रतिपदं साक्षान्महादेवो व्यवस्थितः ॥ १ ॥ पुराणे शतकोटौ तु यच्चैवं वर्णितं मया ॥ लक्षितस्यार्थजातस्य सारो व्यासेन कीर्तितः ॥ २ ॥ स्कान्दाह्वयस्तत्र खण्डाः सप्तैव परिकल्पिताः ॥ एकाशीतिसहस्रं तु स्कान्दं सर्वाघकृन्तनम् ॥ ३ ॥ यः शृणोति पठेद्वापि स तु साक्षाच्छिवः स्थितः ॥ यत्र माहेश्वरा धर्माः षण्मुखेन प्रकाशिताः ॥ ४ ॥ कल्पे तत्पुरुषे वृत्ताः सर्वसिद्धिविधायकाः ॥ तस्य माहेश्वरश्चाद्यः खण्डः पापप्रणाशनः ॥ ५ ॥ किञ्चिन्न्यूनार्कसाहस्रो बहुपुण्यो बृहत्कथः ॥ सुचरित्रशतैर्युक्तः स्कान्दमाहात्म्यसूचकः ॥६॥ यत्र केदारमाहात्म्ये पुराणोपक्रमः पुरा ॥ दक्षयज्ञकथा पश्चाच्छिवलिंगार्चने फलम् ॥७॥ समुद्रमथनाख्यानं देवेन्द्रचरितं महत् ॥ पार्वत्याः समुपाख्यानं विवाहस्तदनंतरम् ॥८॥ कुमारोत्पत्तिकथनं ततस्तारकसंगरः ॥ ततः पाशुपताख्यानं चण्डाख्यानसमन्वितम् ॥ ॥९॥ द्यूतप्रवर्तनाख्यानं नारदेन समागमः ॥ ततः कुमारमाहात्म्ये पञ्चतीर्थकथानकम् ॥ १० ॥ धर्मवर्मनृपाख्यानं महीसागरकीर्तनम् ॥ इन्द्रद्युम्नकथा पश्चान्नाडीजंघ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कथान्विता ॥ ११ ॥ प्रादुर्भावस्ततो मह्याः कथा दमनकस्य च ॥ महीसागरसंयोगः कुमारेशकथा ततः ॥ १२ ॥ ततस्तारकयुद्धं च नानाख्यानसमन्वितम् ॥ वधश्च तारकस्याथ पञ्चलिंगनिवेशनम् ॥१३॥ द्वीपाख्यानं ततः पुण्यमूर्ध्वलोकव्यवस्थितिः॥ ब्रह्माण्डस्थितिमानं च बर्करेशकथानकम् ॥१४॥ महाकालसमुद्भूतिः कथा चास्य महाद्भुता ॥ वासुदेवस्य माहात्म्यं कोटितीर्थं ततः परम् ॥ १५ ॥ नानातीर्थसमाख्यानं गुप्तक्षेत्रे प्रकीर्तितम् ॥ पाण्डवानां कथा पुण्या महाविद्याप्रसाधनम् ॥१६॥ तीर्थयात्रासमाप्तिश्च कौमारमिदमद्भुतम् ॥ अरुणाचलमाहात्म्यं सनकब्रह्मसंकथा ॥१७॥ गौरीतपःसमाख्यानं तत्तत्तीर्थनिरूपणम् ॥ माहिषासुरमाख्यानं वधश्चास्य महाद्भुतः ॥ ॥१८॥ द्रोणाचले शिवास्थानं नित्यदा परिकीर्तितम् ॥ इत्येष कथितः स्कान्दे खण्डो माहेश्वरोद्भुतः ॥ १९ ॥ द्वितीयो वैष्णवः खण्डस्तस्याख्यानानि मे शृणु ॥ प्रथमं भूमिवाराहसमाख्यानं प्रकीर्तितम् ॥ २० ॥ यत्र वेंकटकुध्रस्य माहात्म्यं पापनाशनम् ॥ कमलायाः कथा पुण्या श्रीनिवासस्थितिस्ततः ॥ २१ ॥ कुलालाख्यानकं चात्र सुवर्णमुखरीकथा ॥ नानाख्यानसमायुक्ता भरद्वाजकथाऽद्भुता ॥२२॥ मतङ्गाञ्जनसंवादः कीर्तितः पापनाशनः ॥ पुरुषोत्तममाहात्म्यं कीर्तितं चोत्कले ततः ॥२३॥ मार्कण्डेयसमाख्यानमम्बरीषस्य भूपतेः ॥ इन्द्रद्युम्नस्य माहात्म्यं विद्यापतिकथा ततः ॥ २४ ॥ जैमिनेः समुपाख्यानं नारदस्यापि वाडव ॥ नीलकण्ठसमाख्यानं नरसिंहोपवर्णनम् ॥ २५ ॥ अश्वमेधकथा राज्ञो ब्रह्मलोकगतिस्तथा ॥ रथयात्राविधिः पश्चाज्जन्मस्थानविधिस्तथा ॥ २६ ॥ दक्षिणामूर्त्युपाख्यानं गुण्डिचाख्यानकं ततः ॥ रथरक्षाविधानं च शयनोत्सवकीर्तनम् ॥ २७ ॥ श्वेतोपाख्यानमत्रोक्तं पृथूत्सवनिरूपणम् ॥ दोलोत्सवो भगवतो व्रतं सांवत्सराभिधम् ॥ २८ ॥ पूजा चाकामिका विष्णोरुद्दालकनियोगतः ॥ योगसाधनमत्रोक्तं नानायोगनिरूपणम् ॥ २९ ॥ दशावतारकथनं स्नानादिपरिकीर्तनम् ॥ ततो बदरिकायाश्च माहात्म्यं पापनाशनम् ॥ ३० ॥ अग्न्यादितीर्थमाहात्म्यं वैनतेयशिलाभवम् ॥ कारणं भगवद्वासे तीर्थं कापालमोचनम् ॥ ३१ ॥ पञ्चधाराभिधं तीर्थं मेरुसंस्थापनं तथा ॥ ततः कार्तिकमाहात्म्ये माहात्म्यं मदनालसम् ॥ ३२ ॥ धूम्रकेशसमाख्यानं दिनकृत्यानि कार्तिके ॥ पञ्चभीष्मव्रताख्यानं कीर्तितं भुक्तिमुक्तिदम् ॥ ३३ ॥ ततो मार्गस्य माहात्म्ये विधानं स्नानजं तथा ॥ पुंड्रादिकीर्तनं चात्र मालाधारणपुण्यकम् ॥ ३४ ॥ पञ्चामृतस्नानपुण्यं घंटानादादिजं फलम् ॥ नानापुष्पार्चनफलं तुलसीदलजं फलम् ॥ ३५ ॥ नैवेद्यस्य च माहात्म्यं हरिवासरकीर्तनम् ॥ अखण्डैकादशीपुण्यं तथा जागरणस्य च ॥ ३६ ॥ यात्रोत्सवविधानं च नाममाहात्म्यकीर्तनम् ॥ ध्यानादिपुण्यकथनं माहात्म्यं मथुराभवम् ॥ ३७ ॥ मथुरातीर्थमाहात्म्यं पृथगुक्तं ततः परम् ॥ वनानां द्वादशानां च माहात्म्यं कीर्तितं ततः ॥ ३८ ॥ श्रीमद्भागवतस्यात्र माहात्म्यं कीर्तितं परम् ॥ वज्रशाण्डिल्यसंवादो ह्यन्तर्लीलाप्रकाशकम् ॥ ३९ ॥ ततो माघस्य माहात्म्यं स्नानदानजपोद्भवम् ॥ नानाख्यानसमायुक्तं दशाध्यायैर्निरूपितम् ॥ ४० ॥ ततो वैष्णवमाहात्म्ये शय्यादानादिजं फलम् ॥ जलदानादिविधयः कामाख्यानमतः परम् ॥ ४१ ॥

CC-0. In Public Domain. Digitization by eGangotri

श्रुतदेवस्य चरितं व्याधोपाख्यानमद्भुतम् ॥ तथाऽक्षय्यतृतीयादेर्विशेषात्पुण्यकीर्तनम् ॥ ४२ ॥ ततस्त्वयोध्यामाहात्म्ये चक्रब्रह्माह्वतीर्थके ॥ सुरापापविमोक्षाख्ये तथाधार सहस्रकम् ॥ ४३ ॥ स्वर्गद्वारं चन्द्रहरिर्धर्महर्युपवर्णनम् ॥ स्वर्णवृष्टेरुपाख्यानं तिलोदासरयूयुतिः ॥ ४४ ॥ सीताकुण्डं गुप्तहरिः सरयूघर्घरान्वयः ॥ गोप्रतारं च दुग्धोदं गुरुकुण्डादिपञ्चकम् ॥ ४५ ॥ सोमार्कादीनि तीर्थानि त्रयोदश ततः परम् ॥ गयाकूपस्य माहात्म्यं सर्वाघविनिवर्तकम् ॥ ४६ ॥ माण्डव्याश्रमपूर्वाणि तीर्थानि तदनन्तरम् ॥ अजितादिमानसादितीर्थानि गदितानि च ॥ ४७ ॥ इत्येष वैष्णवः खण्डो द्वितीयः परिकीर्तितः ॥ अतः परं ब्राह्मखण्डं मरीचे शृणु पुत्रक ॥ ४८ ॥ यत्र वै सेतुमाहात्म्ये फलं स्नानेक्षणोद्भवम् ॥ गालवस्य तपश्चर्या राक्षसाख्यानकं ततः ॥ ४९ ॥ चक्रतीर्थादिमाहात्म्यं देवीपत्तनसंयुतम् ॥ वेतालतीर्थमहिमा पापनाशादिकीर्तनम् ॥ ५० ॥ मंगलादिकमाहात्म्यं ब्रह्मकुण्डादिवर्णनम् ॥ हनुमत्कुण्डमहिमाऽगस्त्यतीर्थभवं फलम् ॥ ५१ ॥ रामतीर्थादिकथनं लक्ष्मीतीर्थनिरूपणम् ॥ शंखादितीर्थमहिमा तथा साध्यामृतादिजः ॥ ५२ ॥ धनुष्कोट्यादिमाहात्म्यं क्षीरकुण्डादिजं तथा ॥ गायत्र्यादिकतीर्थानां माहात्म्यं चात्र कीर्तितम् ॥ ५३ ॥ रामनाथस्य महिमा तत्त्वज्ञानोपदेशनम् ॥ यात्राविधानकथनं सेतौ मुक्तिप्रदं नृणाम् ॥ ५४ ॥ धर्मारण्यस्य माहात्म्यं ततः परमुदीरितम् ॥ स्थाणुः स्कन्दाय भगवान्यत्र तत्त्वमुपादिशत् ॥ ५५ ॥ धर्मारण्यसुसंभूतिस्तत्पुण्यपरिकीर्तनम् ॥ कर्मसिद्धेः समाख्यानमृषिवंशनिरूपणम् ॥ ५६ ॥ अप्सरस्तीर्थमुख्यानां माहात्म्यं यत्र कीर्तितम् ॥ वर्णानामाश्रमाणां च धर्मतत्त्वनिरूपणम् ॥ ५७ ॥ देवस्थानविभागश्च बहुलार्ककथा शुभा ॥ छत्रानन्दा तथा शान्ता श्रीमाता च मतंगिनी ॥ ५८ ॥ पुण्यदा च समाख्याता यत्र देव्यः समास्थिताः ॥ इन्द्रेश्वरादिमाहात्म्यं द्वारकादिनिरूपणम् ॥ ५९ ॥ लोहासुरसमाख्यानं गङ्गाकूपनिरूपणम् ॥ श्रीरामचरितं चैव सत्यमन्दिरवर्णनम् ॥ ६० ॥ जीर्णोद्धारस्य कथनमासनप्रतिपादनम् ॥ जातिभेदप्रकथनं स्मृतिधर्मनिरूपणम् ॥ ६१ ॥ ततस्तु वैष्णवा धर्मा नानाख्यानैरुदीरिताः ॥ चातुर्मास्ये ततः पुण्ये सर्वधर्मनिरूपणम् ॥ ६२ ॥ दानप्रशंसा तत्पश्चाद्व्रतस्य महिमा ततः ॥ तपसश्चैव पूजायाः सच्छिद्रकथनं ततः ॥ ६३ ॥ तद्वृत्तीनां भिदाख्यानं शालिग्रामनिरूपणम् ॥ भारकस्य वधोपायो वृक्षार्चामहिमा तथा ॥ ६४ ॥ विष्णोः शापश्च वृक्षत्वं पार्वत्यनुतपस्ततः ॥ हरस्य ताण्डवं नृत्यं रामनामनिरूपणम् ॥ ६५ ॥ हरस्य लिंगकथनं कथा पैजवनस्य च ॥ पार्वतीजन्मचरितं तारकस्य वधोऽद्भुतः ॥ ६६ ॥ प्रणवैश्वर्यकथनं तारकाचरितं पुनः ॥ दक्षयज्ञसमाप्तिश्च द्वादशाक्षरभूषणम् ॥ ६७ ॥ ज्ञानयोगसमाख्यानं महिमा द्वादशाक्षरः ॥ श्रवणादिकमाहात्म्यं कीर्त्तितं शर्मदं नृणाम् ॥ ६८ ॥ ततो ब्राह्मोत्तरे भागे शिवस्य महिमाऽद्भुतः ॥ पञ्चाक्षरस्य महिमा गोकर्णमहिमा ततः ॥ ६९ ॥ शिवरात्रेश्च माहात्म्यं प्रदोषव्रतकीर्तनम् ॥ सोमवारव्रतं चापि सीमन्तिन्याः कथानकम् ॥ ७० ॥ भद्रायूत्पत्तिकथनं सदाचारनिरूपणम् ॥ शिववर्मसमुद्देशो भद्रायूद्वाहवर्णनम् ॥ ७१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भद्रायुमहिमा चापि भस्ममाहात्म्यकीर्तनम् ॥ शबराख्यानकं चैवाथोमामाहेश्वरं व्रतम् ॥ ७२ ॥ रुद्राक्षस्य च माहात्म्यं रुद्राध्यायस्य पुण्यदम् ॥ श्रवणादिक
पुण्यं च ब्राह्मखण्डोऽयमीरितः ॥ ७३ ॥ अतः परं चतुर्थं तु काशीखण्डमनुत्तमम् ॥ विन्ध्यनारदयोर्यत्र संवादः परिकीर्तितः ॥ ७४ ॥ सत्यलोकप्रभाव
श्चागस्त्यावासे सुरागमः ॥ पतिव्रताचारित्रं च तीर्थयात्राप्रशंसनम् ॥ ७५ ॥ ततश्च सप्तपुर्याख्याः संयमिन्या निरूपणम् ॥ बुधस्य च तथेन्द्राग्न्योर्लोकाप्तिः शिव
शिवशर्मणः ॥ ७६ ॥ अग्नेः समुद्भवश्चैव क्रव्याद्वरुणसंभवः ॥ गन्धवत्यलकापुर्योरीश्वर्याश्च समुद्भवः ॥ ७७ ॥ चन्द्रार्कबुधलोकानां कुजेज्यार्कभुवां क्रमात् ॥
मम विष्णोर्ध्रुवस्यापि तपोलोकस्य वर्णनम् ॥ ७८ ॥ ध्रुवलोककथा पुण्या सत्यलोकनिरीक्षणम् ॥ स्कन्दागस्त्यसमालापो मणिकर्णीसमुद्भवः ॥ ७९ ॥
प्रभावश्चापि गङ्गाया गङ्गानामसहस्रकम् ॥ वाराणसीप्रशंसा च भैरवाविर्भवस्ततः ॥ ८० ॥ दण्डपाणिज्ञानवाप्योरुद्भवः समनन्तरम् ॥ ततः कलावत्याख्यानं सदाचार
निरूपणम् ॥ ८१ ॥ ब्रह्मचारिसमाख्यानं ततः स्त्रीलक्षणानि च ॥ कृत्याकृत्यविनिर्देशो ह्यविमुक्तेशवर्णनम् ॥ ८२ ॥ गृहस्थयोगिनो धर्माः कालज्ञानं ततः
परम् ॥ दिवोदासकथा पुण्या काशिकावर्णनं ततः ॥ ८३ ॥ मायागणपतेश्चाथ भुवि प्रादुर्भवस्ततः ॥ विष्णुमायाप्रपञ्चोऽथ दिवोदासविमोक्षणम् ॥ ८४ ॥
ततः पञ्चनदोत्पत्तिर्बिन्दुमाधवसंभवः ॥ ततो वैष्णवतीर्थाख्या शूलिनः काशिकागमः ॥ ८५ ॥ जैगीषव्येण संवादो ज्येष्ठेशाख्या महेशितुः ॥ क्षेत्राख्यानं कन्दुकेशो
व्याघ्रेश्वरसमुद्भवः ॥ ८६ ॥ शैलेशरत्नेश्वरयोः कृत्तिवासस्य चोद्भवः ॥ देवतानामधिष्ठानं दुर्गासुरपराक्रमः ॥ ८७ ॥ दुर्गाया विजयश्चाथ ओँकारेशस्य वर्णनम् ॥ पुन
रोंकारमाहात्म्यं त्रिलोचनसमुद्भवः ॥ ८८ ॥ केदाराख्या च धर्मेशकथा विष्णुसमुद्भवा ॥ वीरेश्वरसमाख्यानं गंगामाहात्म्यकीर्तनम् ॥ ८९ ॥ विश्वकर्मेशमहिमा दक्ष
यज्ञोद्भवस्तथा ॥ सतीशस्यामृतेशादेर्भुजस्तम्भः पराशरे ॥ ९० ॥ क्षेत्रतीर्थकदंबश्च मुक्तिमण्डपसंकथा ॥ विश्वेशविभवश्चाथ ततो यात्रापरिक्रमः ॥ ९१ ॥ अतःपरं
त्ववन्त्याख्यं शृणु खण्डं च पञ्चमम् ॥ महाकालवनाख्यानं ब्रह्मशीर्षच्छिदा ततः ॥ ९२ ॥ प्रायश्चित्तविधिश्चाग्नेरुत्पत्तिश्च सुरागमः ॥ देवदीक्षा शिवस्तोत्रं नानापा
तकनाशनम् ॥ ९३ ॥ कपालमोचनाख्यानं महाकालवनस्थितिः ॥ तीर्थं कनखलेशस्य सर्वपापप्रणाशनम् ॥ ९४ ॥ कुण्डमप्सरसंज्ञं च सरो रुद्रस्य पुण्यदम् ॥ कुंड
वेशं च विद्याध्रं मर्कटेश्वरतीर्थकम् ॥ ९५ ॥ स्वर्गद्वारं चतुःसिंधुतीर्थं शंकरवापिका ॥ शंकरार्कं गंधवतीतीर्थं पापप्रणाशनम् ॥ ९६ ॥ दशाश्वमेधिकानंशातीर्थेशहर
सिद्धिदम् ॥ पिशाचकादियात्रा च हनुमत्केश्वरं सरः ॥ ९७ ॥ महाकालेशयात्रा च वाल्मीकेश्वरतीर्थकम् ॥ शुक्रेश्वरादिमाहात्म्यं कुशस्थल्याः प्रदक्षिणा ॥ ९८ ॥
अक्रूरसंज्ञकं त्वेकपादं चंद्रार्कवैभवम् ॥ करभेशाख्यतीर्थं च लट्टुकेशादितीर्थकम् ॥ ९९ ॥ मार्कंडेशं यज्ञवापीसोमेशं नरकान्तकम् ॥ केदारेश्वररामेशसौभाग्येशनरार्कं
कम् ॥ १०० ॥ केशवार्कं शक्तिभेदं स्वर्णसारमुखानि च ॥ ओँकारेशादितीर्थानि अन्धकश्रुतिकीर्तनम् ॥ १०१ ॥ कालारण्ये लिंगसंख्या स्वर्णश्रृंगाभिधानकम् ॥

CC-0. In Public Domain. Digitization by eGangotri

कुशस्थल्या अवन्त्याश्चोज्जयिन्या अभिधानकम् ॥ १०२ ॥ पद्मावतीकुमुद्वत्यमरावतिकनामकम् ॥ विशालाप्रविकल्पाभिधानं च ज्वरशान्तिकम् ॥ १०३ ॥ शिवानामा दिकफलं नागोद्गीता शिवस्तुतिः ॥ हिरण्याक्षवधाख्यानं तीर्थं सुन्दरकुण्डकम् ॥ १०४ ॥ नीलगंगापुष्कराख्यं विन्ध्यवासनतीर्थकम् ॥ पुरुषोत्तमाभिधानं तु तत्तीर्थं चाघनाशनम् ॥ १०५ ॥ गोमती वामनं कुण्डं विष्णोर्नामसहस्रकम् ॥ वीरेश्वरसरः कालभैरवस्य च तीर्थकम् ॥ १०६ ॥ महिमा नागपंचम्या नृसिंहस्य जयन्तिका ॥ कुटुंबेश्वरयात्रा च देवसाधनकीर्तनम् ॥ १०७ ॥ कर्कराजाख्यतीर्थं च विघ्नेशादिसुरोहनम् ॥ रुद्रकुण्डप्रभृतिषु बहुतीर्थनिरूपणम् ॥१०८॥ यात्राऽष्टतीर्थजा पुण्या रेवामाहात्म्यमुच्यते ॥ धर्मपुत्रस्य वैराग्यान्मार्कंडेयेन संगमः ॥ १०९ ॥ प्राग्रीयानुभवाख्यानममृतापारिकीर्तनम् ॥ कल्पेकल्पे पृथङ्नाम नर्मदायाः प्रकीर्तितम् ॥ ॥ ११० ॥ स्तवमार्षं नार्मदं च कालरात्रिकथा ततः ॥ महादेवस्तुतिः पश्चात्पृथक्कल्पकथाद्भुता ॥ १११ ॥ विशल्याख्यानकं पश्चाज्जालेश्वरकथा तथा ॥ गौरीव्रत समाख्यानं त्रिपुरज्वालनं तथा ॥ ११२ ॥ देहपातविधानं च कावेरीसंगमस्ततः ॥ दारुतीर्थं ब्रह्मावर्तं यज्ञेश्वरकथानकम् ॥ ११३ ॥ अग्नितीर्थं रवितीर्थं मेघनादा दिदारुकम् ॥ देवतीर्थं नर्मदेशं कपिलाख्यं करंजकम् ॥ ११४ ॥ कुण्डलेशं पिप्पलादं विमलेशं च शूलभित् ॥ शचीहरणमाख्यानमन्धकस्य वधस्तथा ॥ ११५ ॥ शूलभेदोद्भवो यत्र दानधर्माः पृथग्विधाः ॥ आख्यानं दीर्घतपस ऋष्यशृङ्गकथा ततः ॥ ११६ ॥ चित्रसेनकथा पुण्या काशीराजस्य लक्षणम् ॥ ततो देवशिलाख्यानं शबरीतीर्थकान्वितम् ॥ ११७ ॥ व्याधाख्यानं ततः पुण्यं पुष्कारिण्यर्कतीर्थकम् ॥ आदित्येश्वरतीर्थं च शक्रतीर्थं करोटिकम् ॥ ११८ ॥ कुमारेशमगस्त्येशमानंदेशं च मातृजम् ॥ लोकेशं धनदेशं च मंगलेशं च कामजम् ॥ ११९ ॥ नागेशं चापि गोपारं गौतमं शंखचूडकम् ॥ नारदेशं नंदिकेशं वरुणेश्वरतीर्थकम् ॥ १२० ॥ दधि स्कन्दादितीर्थानि हनूमंतेश्वरं ततः ॥ रामेश्वरादितीर्थानि सोमेशं पिंगलेश्वरम् ॥१२१॥ ऋणमोक्षं कपिलेशं पूतिकेशं जलेशयम् ॥ चण्डार्कं यमतीर्थं च कह्लोडीशं वनादिकम् ॥ १२२ ॥ नारायणं च कोटीशं व्यासतीर्थं प्रभासकम् ॥ नागेशसंकर्षणकं प्रश्नयेश्वरतीर्थकम् ॥ १२३ ॥ एरण्डीसंगमं पुण्यं सुवर्णशिलतीर्थकम् ॥ करंजं कामहं तीर्थं भाण्डीरो रोहिणीभवम् ॥ १२४ ॥ चक्रतीर्थं धौतपापं स्कान्दमांगिरसाह्वयम् ॥ कोटितीर्थमयोन्याख्यमङ्गाराख्यं त्रिलोचनम् ॥१२५॥ इन्द्रेशं कम्बुकेशं च सोमेशं कोहनाशकम् ॥ नार्मदं चार्कमाग्नेयं भार्गवेश्वरमुत्तमम् ॥ १२६ ॥ ब्राह्मं दैवं च मार्गेशमादिवाराहकेश्वरम् ॥ रामेशमथ सिद्धेशमाहिल्यं कंकटेश्वरम् ॥ ॥ १२७ ॥ शाक्रं सौम्यं च नादेशं तोयेशं रुक्मिणीभवम् ॥ योजनेशं वराहेशं द्वादशीशिवतीर्थकम् ॥ १२८ ॥ सिद्धेशं मंगलेशं च लिंगवाराहतीर्थकम् ॥ कुण्डेशं श्वेतवाराहं गर्भावेशं रवीश्वरम् ॥ १२९ ॥ शुक्लादीनि च तीर्थानि हुंकारस्वामितीर्थकम् ॥ संगमेशं नारकेशं मोक्षणं पञ्चगोपकम् ॥ १३० ॥ नागशावं च सिद्धेशं मार्कंडाक्रूरतीर्थके ॥ कामोदशूलारोपाख्ये मांडव्यं गोपकेश्वरम् ॥ कपिलेशं पिंगलेशं भूतेशं गांगगौतमे ॥ १३१ ॥ अश्वमेधं भृगुकच्छं केदारेशं च पापनुत् ॥ कल्क

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लेशं च जालेशं शालिग्रामं वराहकम् ।। १३२ ।। चन्द्रहास्यं तथादित्यं श्रीपत्याख्यं च हंसकम् ॥ मूलस्थानं च शूलेशमाश्विनं चित्रदैवकम् ॥ १३३ ॥ शिखीशं कोटितीर्थं च तीर्थं पैतामहं परम् ॥ तथैव कुर्कुरीतीर्थं दशकन्यं सुवर्णकम् ॥ ऋणमोक्षं भारभूतिं पुंखिलं मुंडिडिण्डिमम् ॥ १३४ ॥ आमलेशं कपालेशं श्रृंगैरंडीभवं ततः ॥ कोटितीर्थं लोटणेशं फलस्तुतिरतः परम् ॥१३५॥ कृमिजांगलमाहात्म्ये रोहिताश्वकथा ततः ॥ धुंधुमारसमाख्यानं वधोपायस्ततोऽस्य च ॥१३६॥ वधो धुंधोस्ततः पश्चात्तताश्चित्रवहोद्भवः ॥ सहेभास्या ततश्चण्डी सम्प्रभावो रतीश्वरः ॥ १३७ ॥ केदारेशो लक्षतीर्थं ततो विष्णुपदीभवम् ॥ मुखारं च्यवनांधास्यं ब्रह्मणश्च सरस्ततः ॥ १३८ ॥ चक्राख्यं ललिताख्यानं तीर्थं च बहुगोमयम् ॥ रुद्रावर्तं च मार्कण्डं तीर्थं पापप्रणाशनम् ॥ १३९ ॥ श्रवणेशं शुद्धपुटं देवांधप्रेततीर्थकम् ॥ जिह्वोदतीर्थसंभूतिः शिवोद्भेदं फलस्तुतिः ॥ १४० ॥ एष खण्डो ह्यवन्त्याख्यः शृण्वतां पापनाशनः ॥ अतः परं नागराख्यः खण्डः षष्ठोऽभिधीयते ॥ १४१ ॥ लिंगोत्पत्तिसमाख्यानं हरिश्चन्द्रकथा शुभा ॥ विश्वामित्रस्य माहात्म्यं त्रिशंकुस्वर्गतिस्तथा ॥ १४२ ॥ हाटकेश्वरमाहात्म्ये वृत्रासुरवधस्तथा ॥ नागबिलं शंखतीर्थमचलेश्वरवर्णनम् ॥ १४२ ॥ चमत्कारपुराख्यानं चमत्कारकरं परम् ॥ गयशीर्षं बालशाख्यं बालमण्डं मृगाह्वयम् ॥ १४४ ॥ विष्णुपादं च गोकर्णं युगरूपं समाश्रयः ॥ सिद्धेश्वरं नागसरः सप्तार्षेयमगस्त्यकम् ॥ १४५ ॥ भ्रूणगर्तं नलेशं च भैष्मं वैदुरमर्ककम् ॥ शार्मिष्ठं सोमनाथं च दौर्गमानर्तकेश्वरम् ॥ १४६ ॥ जामदग्न्यवधाख्यानं नैःक्षत्रियकथानकम् ॥ रामह्रदं नागपुरं षड्लिंगं चैव यज्ञभूः ॥ १४७ ॥ मुण्डीरादित्रिकार्कं च सतीपरिणयाह्वयम् ॥ रुद्रशीर्षं च यागेशं वालखिल्यं च गारुडम् ॥ १४८ ॥ लक्ष्मीशापः सप्तविंशं सोमप्रासादमेव च ॥ अंबावृद्धं पाण्डुकाख्यमाग्नेयं ब्रह्मकुण्डकम् ॥ १४९ ॥ गोमुखं लोहयष्टयाख्यमजापालेश्वरी तथा ॥ शानैश्चरं राजवापी रामेशो लक्ष्मणेश्वरः ॥ १५० ॥ कुशेशाख्यं लवेशाख्यं लिंगं सर्वोत्तमोत्तमम् ॥ अष्टषष्टिसमाख्यानं दमयन्त्यास्त्रिजातकम् ॥ १५१ ॥ ततोम्बारेवती वापी भक्तिकातीर्थसंभवः ॥ क्षेमंकरी च केदारं शुक्लतीर्थमुखारकम् ॥१५२॥ सत्यसंधेश्वराख्यानं तथा कर्णोत्पलाकथा ॥ अटेश्वरं याज्ञवल्क्यं गौर्यं गाणेशमेव च ॥१५३॥ ततो वास्तुपदाख्यानमजागृहकथानकम् ॥ सौभाग्यान्धुश्च शूलेशं धर्मराजकथानकम् ॥ १५४ ॥ मिष्टान्नदेश्वराख्यानं गाणपत्यत्रयं ततः ॥ जाबालिचरितं चैव मकरेशकथा ततः॥१५५॥ कालेश्वर्यंधकाख्यानं कुण्डमाप्सरसं तथा ॥ पुष्पादित्यं रोहिताश्वं नागरोत्पत्तिकीर्तनम् ॥ १५६ ॥ भार्गवं चरितं चैव वैश्वामित्रं ततः परम् ॥ सारस्वतं पैप्पलादं कंसारीशं च पिण्डकम् ॥ १५७ ॥ ब्रह्मणो यज्ञचरितं सावित्र्याख्यानसंयुतम् ॥ रैवतं भार्तृयज्ञाख्यं मुख्यतीर्थनिरीक्षणम् ॥ १५८ ॥ कौरवं हाटकेशाख्यं प्रभासं क्षेत्रकत्रयम् ॥ पौष्करं नैमिषं धार्ममरण्यत्रितयं स्मृतम् ॥ १५९ ॥ वाराणसी द्वारकाख्यं मन्वाख्येति पुरीत्रयम् ॥ वृन्दावनं खाण्डवाख्यमद्वैताख्यं वनत्रयम् ॥ १६० ॥ कल्पः शालस्तथा नन्दिग्रामत्रयमनुत्तमम् ॥ असिशुक्लपितृसंज्ञं तीर्थत्रयमुदाहतम् ॥ १६१ ॥ श्र्यर्बुदौ रैवतश्चैव पर्वतत्रयमुत्तमम् ॥

CC-0. In Public Domain. Digitization by eGangotri

नदीनां त्रितयं गंगा नर्मदा च सरस्वती ॥ १६२ ॥ सार्धकोटित्रयफलमेकं चैषु प्रकीर्तितम् ॥ कपिका शंखतीर्थं चामरकं बालमण्डनम् ॥ १६३ ॥
हाटकेशक्षेत्रफलप्रदं प्रोक्तं चतुष्टयम् ॥ श्राद्धादित्यं श्राद्धकल्पं यौधिष्ठिरमथांधकम् ॥ १६४ ॥ जलशायि चतुर्मासमशून्यशयनव्रतम् ॥ मङ्कणेशं
शिवरात्रिस्तुलापुरुषदानकम् ॥ १६५ ॥ पृथ्वीदानं वानकेशं कपालमोचनेश्वरम् ॥ पापपिंडं मासलैंगं युगमानादिकीर्तनम् ॥ १६६ ॥ निंबेशशाकंभर्याख्या
रुद्रैकादशकीर्तनम् ॥ दानमाहात्म्यकथनं द्वादशादित्यकीर्तनम् ॥ १६७ ॥ इत्येष नागरः खण्डः प्राभासाख्योऽधुनोच्यते ॥ सोमेशो यत्र विश्वेशोऽर्कस्थलं पुण्यदं
महत् ॥ १६८ ॥ सिद्धेश्वरादिकाख्यानं पृथगत्र प्रकीर्तितम् ॥ अग्नितीर्थं कपर्दीशं केदारेशं गतिप्रदम् ॥ १६९ ॥ भीमभैरवचण्डीशभास्करांगारकेश्वराः ॥ बुधेज्यभृगु
सौरागुशिखीशा हरविग्रहाः ॥ १७० ॥ सिद्धेश्वराद्याः पञ्चान्ये रुद्रास्तत्र व्यवस्थिताः ॥ वरारोहा ह्यजापाला मङ्गला ललितेश्वरी ॥ १७१ ॥ लक्ष्मीशो वाडवेशश्चोर्वीशः
कामेश्वरस्तथा ॥ गौरीशवरुणेशाख्यं दुर्वासेशं गणेश्वरम् ॥ १७२ ॥ कुमारेशं चण्डकल्पं शकुलीश्वरसंज्ञकम् ॥ ततः प्रोक्ताऽथ कोटीशबालब्रह्मादिसत्कथा ॥ १७३ ॥
नरकेशसंवर्तेशनिधीश्वरकथा ततः ॥ बलभद्रेश्वरस्याथ गंगाया गणपस्य च ॥ १७४ ॥ जाम्बवत्याख्यसरितः पाण्डुकूपस्य सत्कथा ॥ शतमेधलक्षमेधकोटिमेधकथा
तथा ॥ १७५ ॥ दुर्वासार्कघटस्थानहिरण्यासंगमोत्कथा ॥ नगरार्कस्य कृष्णस्य संकर्षणसमुद्रयोः ॥ १७६ ॥ कुमार्याः क्षेत्रपालस्य ब्रह्मेशस्य कथा पृथक् ॥
पिंगलासंगमेशस्य शंकरार्कघटेशयोः ॥ १७७ ॥ ऋषितीर्थस्य नन्दार्कत्रितकूपस्य कीर्तनम् ॥ शशापानस्य पर्णार्कन्यंकुमत्योः कथाऽद्भुता ॥ १७८ ॥ वाराहस्वामि
वृत्तान्तं छायालिङ्गाख्यगुल्फयोः ॥ कथा कनकनन्दायाः कुन्तीगंगेशयोस्तथा ॥ १७९ ॥ चमसोद्भेदविदुरत्रिलोकेशकथा ततः ॥ मंकणेशत्रैपुरेशषण्डतीर्थकथा
स्तथा ॥ १८० ॥ सूर्यप्राचीत्रीक्षणयोरुमानाथकथा तथा ॥ भूद्वारशूलस्थलयोश्च्यवनार्केशयोस्तथा ॥ १८१ ॥ अजपालेशबालार्ककुबेरस्थलजा कथा ॥ ऋषितोया
कथा पुण्या संगालेश्वरकीर्तनम् ॥ १८२ ॥ नारदादित्यकथनं नारायणनिरूपणम् ॥ तप्तकुण्डस्य माहात्म्यं मूलचंडीशवर्णनम् ॥ १८३ ॥ चतुर्वक्त्रगणाध्यक्षकलंबे
श्वरयोस्तथा ॥ गोपालस्वामिबकुलस्वामिनोर्मरुतां कथा ॥ १८४ ॥ क्षेमार्कोन्नतविघ्नेशजलस्वामिकथा ततः ॥ कालमेघस्य रुक्मिण्या दुर्वासेश्वरभद्रयोः ॥ १८५ ॥
शंखावर्तमोक्षतीर्थगोष्पदाच्युतसद्मनाम् ॥ जालेश्वरस्य हुंकारेश्वरचण्डीशयोः कथा ॥ १८६ ॥ आशापुरस्थविघ्नेशकलाकुण्डकथाद्भुता ॥ कपिलेशस्य च कथा जरद्गव
शिवस्य च ॥ १८७ ॥ नलककोंटेश्वरयोर्हाटकेश्वरजा कथा ॥ नारदेशयन्त्रभूषादुर्गकूटगणेशजा ॥ १८८ ॥ सुपर्णैलाख्यभैरव्योर्भल्लतीर्थभवा कथा ॥ कीर्तनं
कर्दमालस्य गुप्तसोमेश्वरस्य च ॥ १८९ ॥ बहुस्वर्णेशशृंगेशकोटीश्वरकथा ततः ॥ मार्कण्डेश्वरकोटीशदामोदरगृहोत्थका ॥ १९० ॥ स्वर्णरेखा ब्रह्मकुंडं कुन्तीभीमेश्वरौ
तथा ॥ मृगीकुण्डं च सर्वस्वं क्षेत्रे वस्त्रापथे स्मृतम् ॥ १९१ ॥ दुर्गाभल्लेशगंगेशरैवतानां कथाऽद्भुता ॥ ततोऽर्बुदेश्वरकथा अचलेश्वरकीर्तनम् ॥१९२॥ नागतीर्थस्य च

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कथा वसिष्ठाश्रमवर्णनम् ।। भद्रकर्णस्य माहात्म्यं त्रिनेत्रस्य ततः परम् ॥ १९३ ॥ केदारस्य च माहात्म्यं तीर्थागमनकीर्तनम् ॥ कोटीश्वररूपतीर्थहृषीकेशकथास्ततः ॥ ॥१९४॥ सिद्धेशशुक्रेश्वरयोर्मणिकर्णीशकीर्तनम् ॥ पंगुतीर्थयमतीर्थवाराहतीर्थवर्णनम् ॥ १९५ ॥ चन्द्रप्रभासपिण्डोदश्रीमाताशुक्लतीर्थजम् ॥ कात्यायन्याश्च माहात्म्यं ततः पिण्डारकस्य च ॥ १९६ ॥ ततः कनखलस्याथ चक्रमानुषतीर्थयोः ॥ कपिलाग्नितीर्थकथा तथा रक्तानुबन्धजा ॥ १९७ ॥ गणेशपार्थेश्वरयोर्यात्राया मुज्ज्वलस्य च ॥ चण्डीस्थाननागोद्भवशिवकुण्डमहेशजाः ॥ १९८ ॥ कामेश्वरस्य मार्कण्डेयोत्पत्तेश्च कथा ततः ॥ उद्दालकेशसिद्धेशगततीर्थकथाः पृथक् ॥ १९९ ॥ श्रीदेवमातोत्पत्तिश्च व्यासगौतमतीर्थयोः ॥ कुलसंतारमाहात्म्यं रामकोट्याह्वतीर्थयोः ॥ २०० ॥ चन्द्रोद्भेदेशानशृंगब्रह्मस्थानोद्भवोद्भुतः ॥ त्रिपुष्कररुद्रहृदगुहेश्वर कथा शुभा ॥ २०१ ॥ अविमुक्तस्य माहात्म्यमुमामाहेश्वरस्य च ॥ महौजसः प्रभावश्च जंबुतीर्थस्य वर्णनम् ॥ २०२ ॥ गङ्गाधरमिश्रकयोः कथा चाथ फल स्तुतिः ॥ द्वारकायाश्च माहात्म्ये चन्द्रशर्मकथानकम् ॥ २०३ ॥ जागराद्यर्चनाद्याख्या व्रतमेकादशीभवम् ॥ महाद्वादशिकाख्यानं प्रह्लादर्षिसमागमः ॥ २०४ ॥ दुर्वाससः उपाख्यानं यात्रोपक्रमकीर्तनम् ॥ गोमत्युत्पत्तिकथनं तस्यां स्नानादिजं फलम् ॥ २०५ ॥ चक्रतीर्थस्य माहात्म्यं गोमत्युदधिसंगमः ॥ सनकादिहृदाख्यानं नृगतीर्थकथा ततः ॥ २०६ ॥ गोप्रचारकथा पुण्या गोपीनां द्वारकागमः ॥ गोपीसरःसमाख्यानं ब्रह्मतीर्थादिकीर्तनम् ॥ २०७ ॥ पञ्चनद्यागमाख्यानं नानाख्यानसमन्वितम् ॥ शिवलिंगगदातीर्थकृष्णपूजादिकीर्तनम् ॥ २०८ ॥ त्रिविक्रमस्य मूर्त्याख्या दुर्वासःकृष्णसंकथा ॥ कुशदैत्यवधोच्चारविशेषार्चनजं फलम् ॥ २०९ ॥ गोमत्यां द्वारकायां च तीर्थागमनकीर्तनम् ॥ कृष्णमन्दिरसंप्रेक्षा द्वारवत्यभिषेचनम् ॥ २१० ॥ तत्र तीर्थावासकथा द्वारकापुण्यकीर्तनम् ॥ इत्येष सप्तमः प्रोक्तः खण्डः प्राभासिको द्विजाः ॥ २११ ॥ स्कान्दे सर्वोत्तरकथे शिवमाहात्म्यवर्णने ॥ लिखित्वैतत्तु यो दद्याद्धेमशूलसमन्वितम् ॥ २१२ ॥ माघ्यां सत्कृत्य विप्राय स शैवे मोदते पदे ॥ २१३ ॥ इति श्रीनारदीयपुराणे पूर्व० बृहदुपाख्याने चतुर्थपादे स्कान्दमहापुराणानुक्रमणीवर्णनंनाम चतुरधिकशततमोऽध्यायः ॥ १०४ ॥" इति । अथ प्रसंगानुसारेणैतस्य स्कान्दमहापुराणस्य पुराणत्वोपयुक्तपञ्चलक्षणसमन्वितत्वविचारे क्रियमाणे हि वैष्णवपुराणब्रह्माण्डपुराणयोः— "सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च ॥ वंश्यानुचरितं चैव पुराणं पञ्चलक्षणम् ॥ " इति, स्कान्दे महापुराणे सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये द्वितीयेऽध्याये—"ब्रह्मविष्ण्वर्करुद्राणां माहात्म्यं भुवनस्य च ॥ संहारश्च प्रदृश्येत पुराणं पञ्चलक्षणम् ॥" इति च यद्द्वैविध्येन सामान्यतः पुराणस्य पञ्चलक्षणत्वमाम्नायते तत्रास्य स्कान्दमहापुराणस्य पूर्वोक्तलक्षणस्य यथावदनुक्रमासंबन्धादुत्तरलक्षणस्यैव समन्वयौचित्यादनन्तरोक्तमेव पञ्चलक्षणत्वं साधु युज्यत इति विदांकुर्वंतु सुधियः ॥ अस्त्वेतत्तु प्रसंगोपात्तम् ॥ एतावता विवेचनेनैतदेव माहेश्वरादिप्रभासान्तसप्तखण्डात्मकं स्कान्दंनाम महापुराणमिति हि सर्वथा सिद्धम् ॥

CC-0. In Public Domain. Digitization by eGangotri

अथ च यत्स्कान्दंनामान्यदप्येकं पुराणं षट्संहितात्मकं पञ्चाशत्खण्डमण्डितं लक्षग्रन्थश्लोकसंख्योपनिबद्धम् [विचारदृष्टया यतस्ततः पृथक्पृथगुपलभ्यमानानां तत्रत्यावान्तरान्तःपातिखण्डानां विपुलतरश्लोकसंख्यापरिमाणे बुद्धयाकलिते द्वित्रिलक्षग्रन्थपर्यन्तश्लोकसंख्योपनिबद्धं स्यादेतावदतिविस्तीर्णम्] समुपलभ्यते—तत्तु स्कान्दंनामोपपुराणमिति निश्चयेनावगन्तव्यम् ॥ अथ तस्योपपुराणत्वेन परिगणनं तदन्तःपातिखण्डानुक्रमणिका चेदानीं प्रदर्श्यते । यथा चोक्तमुपपुराणपरिगणना प्रसंगे गारुडे (२२७) अध्याये—"आद्यं सनत्कुमाराख्यं नारसिंहमथापरम् । तृतीयं स्कान्दमुद्दिष्टं कुमारेण तु भाषितम् ॥ चतुर्थं शिवधर्माख्यं साक्षान्नन्दीशभाषितम् ॥ दुर्वाससोक्तमाश्चर्यं नारदोक्तमतः परम् ॥ कापिलं वामनं चैव तथैवोशनसेरितम् ॥ ब्रह्माण्डं वारुणं चाथ कालिकाह्वयमेव च ॥ माहेश्वरं तथा साम्बं सौरं सर्वार्थसञ्चयम् ॥ पराशरोक्तमपरं मारीचं भार्गवाह्वयम् ॥" इति । तथा चात्रैव स्कान्दे महापुराणे प्रभासखण्डे प्रभासक्षेत्रमाहात्म्ये द्वितीयेऽध्याये—" अन्यान्युपपुराणानि मुनिना कथितानि तु ॥ तानि वः कथयिष्यामि संक्षेपादवधार्यताम् ॥ आद्यं सनत्कुमारोक्तं नारसिंहमतः परम् । तृतीयं स्कान्दमुद्दिष्टं कुमारेणाभिभाषितम् ॥ चतुर्थं शिवधर्माख्यं साक्षान्नन्दीशभाषितम् । दुर्वाससोक्तमाश्चर्यं नारदोक्तमतः परम् ॥ कापिलं वामनं चैव तथैवोशनसेरितम् । ब्रह्माण्डं वारुणं चान्यत्कालिकाह्वयमेव च ॥ माहेश्वरं तथा सांबं सौरं सर्वार्थसञ्चयम् । पराशरोक्तं परमं मारीचं भार्गवाह्वयम् ॥ एतान्युपपुराणानि कथितानि द्विजोत्तमाः ॥ " इति । तत्स्कान्दनामकोपपुराणस्थषट्संहितासमग्रग्रन्थसंख्याविस्तरश्च तत्रत्यशांकरसंहितायां हालास्यमाहात्म्य इत्थं वर्णितः— " स्कान्दमद्यापि वक्ष्यामि पुराणं श्रुतिसारजम् ॥ षड्विधं संहिताभेदैः पञ्चाशत्खण्डमण्डितम् ॥ आद्या सनत्कुमारोक्ता द्वितीया सूतसंहिता ॥ तृतीया शांकरी प्रोक्ता चतुर्थी वैष्णवी तथा ॥ पञ्चमी संहिता ब्राह्मी षष्ठी सा सौरसंहिता ॥" इत्येवं संहिताभेदानुक्त्वाऽग्रे प्रतिसंहितं श्लोकग्रन्थसंख्याभेद उक्तः । स यथा—"ग्रन्थेन चैव षट्त्रिंशत्सहस्रेणोपलक्षिता । आद्या तु संहिता विप्रा द्वितीया षट्सहस्रिका ॥ तृतीया ग्रन्थतस्त्रिंशत्सहस्रेणोपलक्षिता ॥ चतुर्थी संहिता पञ्चसहस्रेणाभिनिर्मिता ॥ ततोऽन्या त्रिसहस्रेण ग्रन्थेनैव विनिर्मिता ॥ अन्या सहस्रतः सृष्टा ग्रन्थतः पण्डितोत्तमाः ॥" इति । एतेन तत्स्कान्दंनामोपपुराणमेकाशीतिसहस्रश्लोकग्रन्थसंख्यात्मकमित्येकं मतम् । अन्यच्चाग्रे वक्ष्यमाणकालिकाखण्डोक्तानुक्रमणिकानुसारेण—"स्कान्दमेतल्लक्षमानं स्कन्दो यत्कथयत्पुरा ॥" इत्युक्त्या च लक्षश्लोकग्रन्थसंख्यात्मकमिति मतान्तरम् । अत एव तस्मिन्स्कान्दोपपुराणे क्वचित्पुस्तकेष्वध्यायसमाप्तिदण्डके "शतसाहस्र्यां संहितायाम् " इति, क्वचिच्च "एकाशीतिसाहस्र्यां संहितायाम्" इति च पाठभेदो दरीदृश्यते ॥ किञ्च कानिचिन्मानसखण्डहिंगुलाद्रिखण्डादीनि बहूनि खण्डानि चोपपुराणत्वेन परिगणितस्कान्दोपपुराणखंडानुक्रमण्यां न दृश्यन्तेऽतस्तानि पृथगेव सन्तीति विभाव्यते । तेन ग्रन्थसंख्या त्रिलक्षपर्यन्तापि पर्यवसन्ना स्यादिति तर्क्यते । एतेन तत्स्कान्दंनामोपपुराणमुपपुराणपरिगणनायां तृतीयं विद्यतेऽतस्तत्स्कान्दंनामोपपुराणं महापुराणपरिगणितत्रयोदशस्कान्दमहापुराणादन्यदेवेति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तावत्सिद्धम् ॥ तत्र च षट्संहितात्मके स्कान्दनामकोपपुराणे प्रथमायां सनत्कुमारसंहितायां विंशे कालिकाखण्डे प्रथमेऽध्याये समग्रतत्स्कान्दोपपुराणस्थषट्संहितान्तःपातिपञ्चाशत्खण्डानामनुक्रमणिकोक्ताऽस्ति । सा चेदानीं तत्स्कान्दनामकोपपुराणस्य सर्वसज्जनानां परिचयाय तद्विभागपरिज्ञानाय चेदानीमत्रोच्यते—यथा—"ॐबालसूर्यप्रतीकाशं वंदे देवं गणाधिपम् ॥ करस्थकदलीचूतपनसेक्षुकमोदकम् ॥ १ ॥ पुरा सरस्वतीतीरे मुनयो दीर्घसत्रिणः ॥ तेपुस्तपो महाघोरं मनस्यज्ञानवासिनः ॥ २ ॥ यदृच्छयाऽऽगतं सूतं संपूज्य विनयोत्तरम् ॥ तस्मै ते विष्टरं दत्त्वा पप्रच्छुर्वीतकल्मषाः ॥ ३ ॥ ॥ मुनय ऊचुः ॥ ॥ सूत धन्या वयं सर्वे त्वत्समागमकांक्षिणः ॥ अनष्टाज्ञानतमसः किञ्चित्पृच्छामहे वयम् ॥ ४ ॥ त्वं सर्वमुनिहृत्पद्मविकासनकरो रविः ॥ पाराशर्याद्रहस्यानि श्रुतवानसि विस्तरात् ॥ ५ ॥ पुराणानि सशैवानि स्कान्दादीनि वदाधुना ॥ स्कान्दं कियत्प्रकथितं गुरुणा ते महर्षिणा ॥ ६ ॥ तस्मिन्नहस्यसारं यत्सप्रमाणं वदाधुना ॥ यस्य च श्रवणादेव विमुक्तिर्भवबंधनात् ॥ ७ ॥ ॥ सूत उवाच ॥ ॥ तपस्विनः पात्रतमा भवन्तः पुण्यवर्धनाः ॥ गोप्यं भवत्सु विप्रेषु श्रावयामि पुराणके ॥ ८ ॥ पुरा संशयमापन्नः कृष्णद्वैपायनो मुनिः ॥ प्रणिपत्य स कैलासे कुमारं भववल्लभम् ॥ ९ ॥ स्कान्दं पुराणं संप्राप पञ्चाशत्खण्डमण्डितम् ॥ षड्विधं संहिताभेदैः शिवधर्ममहार्णवम् ॥ १० ॥ सनत्कुमारः श्रुतवान्विस्तरात्तन्मुखोदितम् ॥ सनत्कुमारशिष्येण मम व्यासेन दर्शितम् ॥ ११ ॥ तद्वदाम्यानुपूर्व्येण शृण्वन्तु परमर्षयः ॥ आद्या सनत्कुमारीया संहितास्मिन्पुराणके ॥ १२ ॥ सा पञ्चाशत्सहस्रेण कथिता विस्तराद्द्विजाः ॥ पञ्चविंशतिखण्डैश्च मण्डिता श्रुतिसम्मिता ॥ १३ ॥ क्षेत्रखण्डः प्रथमतो द्वितीयस्तीर्थखण्डकः ॥ वर्षेऽस्मिन्भारते यानि तीर्थक्षेत्राणि सत्तमाः ॥ १४ ॥ शैवानि वैष्णवान्येव कथितानि सुविस्तरात् ॥ काशीखण्डस्तृतीयस्तु खण्डः सह्याद्रिसंज्ञकः ॥ १५ ॥ हिमाचलाख्यखण्डस्तु मलयाचलखण्डकः ॥ विन्ध्याद्रिखण्डो मोक्षाख्यः प्रभासः पुष्करस्तथा ॥ १६ ॥ नागराख्यस्ततः खण्डो नर्मदाखण्ड एव च ॥ श्रीशैलखण्डो विख्यातो ह्यवन्तीखण्ड एव च ॥ १७ ॥ गौरीखण्डस्ततो विप्राः कुरुक्षेत्राख्यखण्डकः ॥ केदारखण्डस्त्वपरो हरिद्वाराख्यखण्डकः ॥ १८ ॥ सेतुमाहात्म्यखण्डाख्यः कालिकाखण्ड एव च ॥ तत्त्वोपाख्यानखण्डश्च नदीखण्डस्तथैव च ॥ ॥ १९ ॥ धर्मखण्डो देशखण्डो वर्षखण्डस्तथैव च ॥ एते सनत्कुमारीयसंहितायां प्रकीर्तिताः ॥ २० ॥ तीर्थखंडे तीर्थकथा तत्र दानतपःक्रियाः ॥ शिवविष्ण्वादिक्षेत्राणां सेतिहासकथादिकम् ॥ २१ ॥ काशीखंडेऽविमुक्तस्य प्रशंसा परिकीर्तिता ॥ सह्याद्रिखंडे सह्याद्रेः प्रभावः कीर्तितो द्विजाः ॥ २२ ॥ सेतुभूपालमाहात्म्यं चन्द्रलापीठवर्णनम् ॥ हिमाचलाख्ये विश्वेशप्रभावो मुनिसत्तमाः ॥ २३ ॥ मलयाचलखंडे तु शिवपूजोपवर्णनम् ॥ विन्ध्याद्रिखंडे विश्वेशमहिमा परिकीर्तितः ॥ २४ ॥ मोक्षाख्ये मोक्षधर्माणां कथनमृषिसत्तमाः ॥ प्रभासे तु प्रभासस्य महिमाकथनं पुनः ॥ २५ ॥ नर्मदाख्यानकथनं नर्मदाखंडके द्विजाः ॥ श्रीशैलखंडे श्रीशैलगुणकीर्तन

CC-0. In Public Domain. Digitization by eGangotri

वर्णनम् ॥ २६ ॥ अवंतिमहिमा चैव तस्मिन्खंडे प्रकीर्तितः ॥ गौर्यास्तपःफलप्राप्तिर्गौरीव्रतविधिः श्रुतः ॥ २७ ॥ कुरुक्षेत्रप्रभावश्च दानं सूर्यग्रहेण च ॥
केदारखंडे चाख्याता प्रभूतिः शूलिनस्तथा ॥ २८ ॥ हरिद्वारप्रशंसा च तस्मिन्खंडे श्रुता द्विजाः ॥ कालीखंडे प्रशंसा च नानाख्यानशिवस्तुतिः ॥
॥ २९ ॥ व्रतानां विधयस्तत्र सोद्यापनविनिर्णयः ॥ नदीपञ्चशतानां तु समुत्पत्तिः प्रकीर्तिता ॥ ३० ॥ धर्माश्रमविधिर्वर्णनिर्णयस्तत्र कीर्तितः ॥ देश
धर्मानुकथनं तथा देशविधिक्रमः ॥ ३१ ॥ वर्षाणां द्वीपभेदानां भुवनस्य विनिर्णयः ॥ तत्र खंडेषु कथिताः संहितायां द्विजातयः ॥ ३२ ॥ पञ्चाशच्च
सहस्रेण संहितेयं कुमारिका ॥ सनत्कुमारी प्रथमा पञ्चविंशतिखंडकैः ॥ ३३ ॥ प्रोक्तेयं दशसाहस्रैरध्यायैर्वेदसम्मता ॥ द्वितीया सूतसंज्ञा हि संहिता
परिकीर्तिता ॥ ३४ ॥ चतुर्धा खण्डिता सापि पवित्रा वेदसम्मिता ॥ शिवमाहात्म्यखण्डाख्यः प्रथमस्तत्र ईरितः ॥ ३५ ॥ द्वितीयो ज्ञानयोगाख्य
स्तृतीयो मुक्तिखण्डकः ॥ चतुर्थस्तत्र विख्यातो यज्ञवैभवखण्डकः ॥ ३६ ॥ ब्रह्मगीतासूतगीताद्वितयं तत्र कीर्तितम् ॥ सप्तषष्टिभिरध्यायैः कीर्तिताः
खण्डकाः पुनः ॥ ३७ ॥ शांकरी संहिता प्रोक्ता त्रिंशत्साहस्रतः स्मृता ॥ प्रथमः संभवः काण्डः स्कन्दोत्पत्त्युपवर्णनम् ॥ ३८ ॥ आसुराख्यस्ततः प्रोक्तो वीरभद्रेन्द्र
संज्ञकः ॥ देवकाण्डस्ततो विप्रा युद्धकाण्डस्ततो द्विजाः ॥ ३९ ॥ दक्षकाण्डस्ततः प्रोक्त उपदेशस्ततः परः ॥ पूर्वार्धे संहितायास्तु प्रोक्तमेतन्मुनीश्वराः ॥ ४० ॥
काण्डाख्ययाऽत्र खण्डो हि कीर्तितश्च मुनीश्वराः ॥ उपवीताख्यखण्डस्तु स्वरखण्डस्तथैवच ॥ ४१ ॥ गङ्गासागरखण्डश्च खण्डः सागरसंज्ञकः ॥ वेदसा
राख्यखण्डस्तु सिद्धखंडस्तथैव च ॥ ४२ ॥ प्रमेयखंडस्त्वपर उमाखंडस्तथैव च ॥ नागराख्यो हि खंडस्तु प्रायश्चित्ताख्यखंडकः ॥ ४३ ॥ विपाकखण्डो
विख्यातः कर्मणां द्विजसत्तमाः ॥ दानप्रशंसाखण्डाख्यः खण्डः कल्याणसंज्ञकः ॥ ४४ ॥ अगस्त्यखंडो विप्रेन्द्राः शांकर्यां तु प्रकीर्तिताः ॥ तंत्रप्रशंसा
कथिता खंडेष्वेतेषु तत्र हि ॥ ४५ ॥ सूताख्यायां तु शांकर्यां खण्डास्ते पञ्चविंशकाः ॥ प्रोक्ताः षट्त्रिंशसाहस्रैः संख्यया मुनिसत्तमाः ॥ ४६ ॥ द्विसहस्रवराध्यायैः
स्कान्दे वै संहिताद्वयम् ॥ वैष्णवी दशसाहस्रा संहितेयं प्रकीर्तिता ॥ ४७ ॥ विष्णुधर्मप्रशंसा च कीर्तिता सा शतत्रयैः ॥ अध्यायैर्मुनयस्तत्र ब्राह्मी तु त्रिसह ॥ १३ ॥
स्रिका ॥ ४८ ॥ तत्रोत्तरो महान्खण्डः स ब्रह्मोत्तरसंज्ञकः ॥ सौरी तु संहिता षष्ठी सहस्रश्लोककैर्युता ॥ ४९ ॥ स्कान्दमेतल्लक्षमानं स्कन्दो यत्कथयत्पुरा ॥
सनत्कुमारमुनये तस्माच्छुश्राव मे गुरुः ॥ ५० ॥ तेन संश्रुतमेतद्धि तद्वक्ष्ये मुनिसत्तमाः ॥ खण्डस्तु कालिकाख्योऽयं धर्मसारमहोदयः ॥ ५१ ॥ नाभक्तायाविनीताय
प्रदेयोऽयं विशेषतः ॥ शृणुध्वं मुनयः सर्वे यथा मय्याह मे गुरुः ॥ ५२ ॥ ॐ तत्सदिति श्रीमत्स्कान्द उपपुराणे सनत्कुमारसंहितायां कालिकाखण्डे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रथमोऽध्यायः ॥ १ ॥ " इति । एतेन सनत्कुमारसंहितादिसौरसंहितान्तषट्संहितात्मकं स्कान्दंनाम उपपुराणमन्यत्, माहेश्वरादिप्रभासान्तसप्तखण्डात्मकं स्कान्दंनाम महापुराणं चान्यदिति सुधियो निःसन्देहं विभावयन्तु ॥ इत्थं हि स्कान्दपुराणस्य महापुराणत्वोपपुराणत्वविषये निरस्तः सन्देहः ॥

इति स्कान्दमहापुराणविषयकसन्देहनिरासः ।

अथ प्रकृतमनुसरामः ॥ अयि सज्जनमहाभ्युदयाः समस्तविद्वज्जनाः ! तदेतन्माहेश्वरादिप्रभासान्तसप्तखण्डात्मकं श्रीस्कान्दंनाम महापुराणं सर्वेषामष्टादशमहापुराणानां मध्ये ग्रन्थसंख्यया गरीयः, प्रायः सर्वतः समग्रतया दुर्लभं च कथमेकत्र संगृहीतं स्यादिति भृशं चिन्तया व्याकुलचित्तैरस्माभिर्महान्तं प्रयत्नमारभ्य यतस्ततः प्राचीनसरस्वतीभाण्डागारेभ्यः संपादितम् । एतस्य संपादितानि पुस्तकानि चाष्टावष्टसरस्वतीभाण्डागारेभ्यः समागतानि । तन्मध्ये कानिचित्पूर्णानि कानिचिदपूर्णानि च पुस्तकान्यासन् । ततश्च तानि विविधदेशदेशान्तरेभ्यः समुपलब्धानि सर्वाणि श्रीस्कान्दपुराणपुस्तकानि परिशोधयितुं खानदेशीयरावेरग्रामनिवासिश्रीपरशुरामभट्टतनयगोविन्दशास्त्रिणां समीपेऽस्माभिर्दत्तानि । ततस्तैर्गोविन्दशास्त्रिभिस्तेषांतेषां सर्वेषां पुस्तकानां सम्यगवगाहनपूर्वकं यथाक्रमं बृहन्नारदीयमहापुराणोक्तानुक्रमणिकानुसारेण विवेचनं, तन्मध्यमिश्रितानां स्कान्दनामकोपपुराणस्थानां केषांचित्खण्डानां पृथक्करणं च कृत्वा समग्रं चैतत्स्कान्दमहापुराणपुस्तकं यथानुक्रमोक्तानुक्रमसंबद्धं विहितम् । ततश्च प्रत्येकप्रत्यादर्शपुस्तकस्थपाठभेदनिदर्शनार्थं सकलविद्याकलाकलापकुशलानां पण्डितवर्यश्रीनिवासनरसिंहाचार्य(श्रीबालाजीस्वामि)श्रीमहावीरदत्तपण्डितश्रीमातादीनपण्डितश्रीनरहरिशास्त्रिश्रीनन्दरामशास्त्रिणां साहाय्यं गृहीत्वा तैर्गोविन्दशास्त्रिभिः स्वयं समग्रस्यास्य श्रीस्कान्दमहापुराणपुस्तकस्याऽऽदित आरभ्य संशोधनं समारभ्य साद्यन्तं प्रत्यादर्शपुस्तकस्थितानां त्रुटितानां पाठक्रमाणां समुपलब्धप्रत्यादर्शपुस्तकानां साहाय्येन संमेलनं कृतम् । क्वचिदन्यार्थकपाठान्तराणां नीचैष्टिप्पण्यां निवेशनं, क्वचिदस्फुटार्थमूलस्थशब्दानां वाक्यानां पद्यानां च स्फुटबोधार्थं शब्दार्थवाक्यार्थश्लोकार्थसुस्पष्टबोधकटिप्पणीनिवेशनं च कृत्वा सरलार्थबोधोपयुक्तार्थैः समलंकरणं, क्वचिच्च सुसूक्ष्मार्थविषयस्य सुस्पष्टप्रतिपत्तयेऽन्यप्रमाणैस्तस्यतस्य सुसूक्ष्मस्याप्यर्थस्य सविस्तरटिप्पणीभिर्विशदीकरणं च सुव्यवस्थयाऽकारि । एवमध्यायसमाप्तिदण्डकस्थविषयोद्घाटनादिव्यवस्था च व्यधायि । तत्तत्खण्डान्तःपातिविविधखण्डमाहात्म्यादिपृथक्पृथग्व्यवस्थितिश्च कृता । अथ चैवं सम्यक्पारिशोधनोपयुक्तां सुव्यवस्थां विधाय समस्तसप्तखण्डान्तःपातिप्रतिखण्डस्थप्रत्यध्यायस्थसविस्तरविषयानुक्रमणिका च निरमायि ॥ अथ चान्त इमां प्रस्तावनां विधायास्यां स्वयं समस्तद्विविधस्कान्दपुराणपुस्तकसमवगाहनसमुद्भूतमहापुराणत्वोपपुराणत्वविवेचनपुरःसरं सोपपत्तिप्रमाणकं महापुराणोपपुराणसन्देहनिरसनं च सम्यग्व्यधायि । तदेतत्तैर्गोविन्दशास्त्रिभिः सम्य

CC-0. In Public Domain. Digitization by eGangotri

क्या सुव्यवस्थापूर्वकं परिशोधनेन परिष्कृतम् ॥ अत्र च स्कान्दमहापुराणे द्वितीयखण्डान्तर्गते कार्तिकमाहात्म्यवैशाखमाहात्म्ये, चतुर्थं काशीखण्डं च समग्रमित्येते भागाः सटीकाः सन्ति । अपरं च सर्वं मूलमात्रं विद्यते । तदेतत्समग्रं "श्रीस्कान्दमहापुराण" पुस्तकं चास्माभिः स्वकीये "श्रीवेङ्कटेश्वर" स्टीम्–मुद्रणालये सुपुष्टचिक्कणपत्रेषु सुन्दरमनोहराक्षरैर्मुद्रयित्वा सर्वेषां विद्वज्जनानां पुरतः प्रकाश्य समुपस्थापितमस्ति ॥

तदेतत्समग्रं सर्वतोऽपि समग्रतया सत्यं दुर्लभं श्रीस्कान्दमहापुराणं सर्वे सन्तो महान्तो विद्वांसो भाविकसद्गृहस्थाः सदाचारसंपन्नाः सज्जनाश्च संगृह्य पठनश्रवणपूर्वकमेतदुक्तदेवतासमुपासनायात्राव्रतदानधर्मसदाचारप्रतिपालनपूर्वकैहिकामुष्मिकधर्मार्थकाममोक्षाख्यचतुर्विधपुरुषार्थं संसाध्यात्मनः पुरुषावतारस्य कृतार्थतां संपादयन्त्विति सप्रश्रयं साञ्जलिबन्धं सम्प्रार्थ्यते । अपि चैतत्प्रसंगेनैव समस्तविद्वज्जनाः सम्प्रार्थ्यन्ते–यदत्र महति ग्रन्थे मनुष्यनिष्ठनैसर्गिकभ्रमप्रमादवशेन क्वचिच्छब्दार्थपदानामशुद्धता स्यात्तदागः क्षन्तव्यमिति । अथान्ततः सर्वसज्जनान्प्रति–सर्वतो दुर्लभस्यैतस्य स्कान्दमहापुराणपुस्तकस्य संग्रहेण, तथा चानेन सहैवास्मदीये "श्रीवेङ्कटेश्वर" स्टीम्–मुद्रणालये संमुद्र्य प्रकाशितानां समग्राणां ब्राह्माद्यष्टादशमहापुराणपुस्तकानां संग्रहेण च स्वकीयमुदारमाश्रयं प्रदाय मदीयमद्ययावदाचरितं श्रीपरमेश्वरस्य कृपया परिपूर्णं समग्राष्टादशमहापुराणग्रन्थमुद्रणविषयकं संकल्पं सनाथीकुर्वन्त्विति च सविनयमभ्यर्थ्यते–

संवत् १९६६ शके १८३१
इ० स० १९१०
फाल्गुन शुक्ल ६
सौम्यवासरे.

समस्तविद्वज्जनसज्जनानां निरन्तरनिर्मलकृपाभिलाषी–

खेमराज श्रीकृष्णदासः–

"श्रीवेङ्कटेश्वर" स्टीम्–मुद्रणालयाध्यक्षः–मुंबई.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ श्रीस्कान्दं महापुराणं प्रारभ्यते ॥

अस्य ग्रन्थस्य पुनर्मुद्रणादयः सर्वेऽधिकारा १८६७ तमाब्दिक २५ श राजनियमानुसारेण "श्रीवेङ्कटेश्वर" (स्टीम्) यन्त्रालयाध्यक्षाधीनाः सन्ति ।

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ अथ श्रीस्कान्दे महापुराणे प्रथमं माहेश्वरखण्डं प्रारभ्यते ॥

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ श्रीगणेशाय नमः ॥ ॐनमो भगवते वासुदेवाय ॥ ॐनारायणं नमस्कृत्य नरं चैव नरोत्तमम् ॥ देवीं सरस्वतीं चैव ततो जयमुदीरयेत् ॥ १ ॥ ॥ ॥ व्यास उवाच ॥ ॥ यस्याज्ञया जगत्स्रष्टा विरिंचिः पालको हरिः॥ संहर्ता कालरुद्राख्यो नमस्तस्मै पिनाकिने ॥१॥तीर्थानामुत्तमं तीर्थं क्षेत्राणां क्षेत्रमुत्तमम् ॥ तत्रैव नैमिषारण्ये शौनकाद्यास्तपोधनाः ॥ दीर्घसत्रं प्रकुर्वतः सत्रिणः कर्मचेतसः ॥ २ ॥ तेषां संदर्शनौत्सुक्यादागतो हि महातपाः ॥ व्यासशिष्यो महाप्राज्ञो लोमशोनाम नामतः ॥३॥ तत्रागतं ते ददृशुर्मुनयो दीर्घसत्रिणः॥उत्तस्थुर्युगपत्सर्वे सार्घ्यहस्ताः समुत्सुकाः ॥४॥ दत्त्वार्घ्यपाद्यं सत्कृत्य मुनयो वीतकल्मषाः ॥ तं पप्रच्छुर्महाभागाः शिवधर्मं सविस्तरम् ॥ ५ ॥ ॥ ऋषय ऊचुः ॥ ॥ कथयस्व महाप्राज्ञ देवदेवस्य शूलिनः ॥ महिमानं महाभाग ध्यानार्चनसमन्वितम् ॥ ६ ॥ संमार्जने किं फलं स्यात्तथा रंगावलीषु च ॥ प्रदाने दर्पणस्याथ तथा वै चामरस्य च ॥ ७ ॥ प्रदाने च वितानस्य तथा धारागृहस्य च ॥ दीपदाने किं फलं स्यात्पूजायां किं फलं भवेत् ॥ ८ ॥ कानिकानि च पुण्यानि कथ्यतां शिवपूजने ॥ इतिहासपुराणानि वेदाध्ययनमेव च ॥ ९ ॥ शिवस्याग्रे प्रकुर्वंति कारयन्त्यथवा नराः ॥ किं फलं च नृणां तेषां कथ्यतां विस्तरेण हि ॥ १० ॥ शिवाख्यानपरो लोके त्वत्तो नान्योऽस्ति वै मुने ॥ ११ ॥ इति श्रुत्वा वचस्तेषां मुनीनां भावितात्मनाम् ॥ उवाच व्यासशिष्योऽसौ शिवमाहात्म्यमुत्तमम् ॥ १२ ॥ ॥ लोमश उवाच ॥ ॥ अष्टादशपुराणेषु गीयते वै परः शिवः ॥ तस्माच्छिवस्य माहात्म्यं वक्तुं कोऽपि न पार्यते ॥ ॥ १३ ॥ शिवेति द्व्यक्षरं नाम व्याहरिष्यंति ये जनाः ॥ तेषां स्वर्गश्च मोक्षश्च भविष्यति न चान्यथा ॥ १४ ॥ उदारो हि महादेवो देवानां पतिरीश्वरः ॥ येन सर्वं प्रदत्तं हि तस्मात्सर्व इति स्मृतः ॥ १५ ॥ ते धन्यास्ते महात्मानो ये भजंति सदा शिवम् ॥ १६ ॥ विना सदाशिवं यो हि संसारं तर्तुमिच्छति ॥ स मूढो हि महापापः शिवद्वेषी न संशयः ॥१७॥ भक्षितं हि गरं येन दक्षयज्ञो विनाशितः॥ कालस्य दहनं येन कृतं राज्ञः प्रमोचनम् ॥ १८॥ ॥ ऋषय ऊचुः ॥ ॥ यथा गरं भक्षितं च यथा यज्ञो विनाशितः ॥ दक्षस्य च तथा ब्रूहि परं कौतूहलं हि नः ॥१९॥ ॥ सूत उवाच ॥ ॥ दाक्षायणी पुरा दत्ता शंकराय महात्मने ॥ वचनाद्ब्रह्मणो विप्रा दक्षेण परमेष्ठिनः ॥ २० ॥ एकदा हि स दक्षो वै नैमिषारण्यमागतः ॥ यदृच्छावशमापन्न ऋषिभिः परिपूजितः ॥ २१ ॥ स्तुतिभिः प्रणिपातैश्च तथा सर्वैः सुरासुरैः ॥ तत्र स्थितो महादेवो नाभ्युत्थानाभिवादने ॥ चकार स्य ततः क्रुद्धो दक्षो वचनमब्रवीत् ॥ २२ ॥ सर्वत्र सर्वे हि सुरासुरा भृशं नमंति मां विप्रवराः समुत्सुकाः ॥ कथं ह्यसौ दुर्जनवन्महात्मा भूतादिभिः प्रेतपिशाचयुक्तः ॥ श्मशानवासी निरपत्रपो ह्ययं कथं प्रणामं न करोति मेऽधुना ॥२३॥ पाखंडिनो दुर्जनाः पापशीला विप्रं दृष्ट्वा चोद्धता

CC-0. In Public Domain. Digitization by eGangotri

उन्मदाश्च ॥ वध्यास्त्याज्याः सद्भिरेवंविधा हि तस्मादेनं शापितुं चोद्यतोऽस्मि ॥२४॥ इत्येवमुक्त्वा स महातपास्तदा रुषान्वितो रुद्रमिदं बभाषे ॥
॥ २५ ॥ शृण्वं त्वमी विप्रतमा इदानीं वचो हि मे कर्तुमिहार्हथैतत् ॥ रुद्रो ह्ययं यज्ञबाह्यो वृतो मे वर्णातीतो वर्णपरो यतश्च ॥ २६ ॥ नंदी निशम्य
तद्वाक्यं शैलादो हि रुषान्वितः॥अब्रवीत्त्वरितो दक्षं शापदं तं महाप्रभम् ॥२७॥ ॥ नन्द्युवाच ॥ ॥ यज्ञबाह्यो हि मे स्वामी महेशोऽयं कृतः कथम् ॥
यस्य स्मरणमात्रेण यज्ञाश्च सफला ह्यमी ॥ २८ ॥ यज्ञो दानं तपश्चैव तीर्थानि विविधानि च ॥ यस्य नाम्ना पवित्राणि सोयं शप्तोऽधुना कथम् ॥
॥ २९ ॥ वृथा ते ब्रह्मचापल्याच्छप्तोऽयं दक्ष दुर्मते ॥ येनेदं पालितं विश्वं सर्वेण च महात्मना ॥ शप्तोऽयं स कथं पाप रुद्रोऽयं ब्राह्मणाधम ॥ ३० ॥
एवं निर्भर्त्सितस्तेन नंदिना हि प्रजापतिः ॥ नंदिनं च शशापाथ दक्षो रोषसमन्वितः ॥ ३१ ॥ यूयं सर्वे रुद्रवरा वेदबाह्याश्च वै भृशम् ॥ शप्ता
हि वेदमार्गैश्च तथा त्यक्ता महर्षिभिः ॥ ३२ ॥ पाषंडवादसंयुक्ताः शिष्टाऽऽचारबहिष्कृताः ॥ कपालिनः पानरतास्तथा कालमुखा ह्यमी ॥३३॥ इति
शप्तास्तदा तेन दक्षेण शिवकिंकराः ॥ तदा प्रकुपितो नंदी दक्षं शप्तुं प्रचक्रमे ॥ ३४ ॥ शप्ता वयं त्वया विप्र साधवः शिवकिंकराः ॥ वृथैव ब्रह्म
चापल्यादहं शापं ददामि ते ॥ ३५ ॥ वेदवादरता यूयं नान्यदस्तीतिवादिनः ॥ कामात्मानः स्वर्गपरा लोभमोहसमन्विताः ॥ ३६ ॥ वैदिकं च
पुरस्कृत्य ब्राह्मणाः शूद्रयाजकाः ॥ दरिद्रिणो भविष्यंति प्रतिग्रहरताः सदा ॥३७॥ दक्ष केचिद्भविष्यन्ति ब्राह्मणा ब्रह्मराक्षसाः ॥ ॥ लोमश उवाच ॥
विप्रास्ते शपितास्तेन नंदिना कोपिना भृशम् ॥ ३८ ॥ अथाकर्ण्येश्वरो वाक्यं नंदिनः प्रहसन्निव ॥ उवाच वाक्यं मधुरं बोधयुक्तं सदाशिवः
॥३९॥ ॥ महादेव उवाच ॥ कोपं नार्हसि वै कर्तुं ब्राह्मणान्प्रति वै सदा ॥ ब्राह्मणा गुरवो ह्येते वेदवादरताः सदा ॥ ४० ॥ वेदो मंत्रमयः साक्षात्तथा
सूक्तमयो भृशम् ॥ सूक्ते प्रतिष्ठितो ह्यात्मा सर्वेषामपि देहिनाम् ॥ ४१ ॥ तस्मान्नात्मविदो निन्द्या आत्मैवाहं न चेतरः ॥ कोऽयं कस्त्वं क्व चाहं
वै कस्माच्छप्ता हि वै द्विजाः ॥ ४२ ॥ प्रपंचरचनां हित्वा बुद्धो भव महामते ॥ तत्त्वज्ञानेन निर्वर्त्य स्वस्थः क्रोधादिवर्जितः ॥ ४३ ॥ एवं प्रबो
धितस्तेन शंभुना परमेष्ठिना ॥ विवेकपरमो भूत्वा शैलादो हि महातपाः ॥ शिवेन सह संगम्य परमानंदसंप्लुतः ॥ ४४ ॥ दक्षोपि हि रुषाऽऽविष्ट
ऋषिभिः परिवारितः ॥ ययौ स्थानं स्वकं तत्र प्रविवेश रुषाऽन्वितः ॥४५॥ श्रद्धां विहाय परमां शिवपूजकानां निंदापरः स हि बभूव नराधमश्च ॥
सर्वैर्महर्षिभिरुपेत्य स तत्र शर्वं देवं निनिन्द न बभूव कदापि शान्तः ॥४६॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां प्रथमे मा
हेश्वरखण्डे केदारखण्डे पुराणप्रस्तावदक्षवृत्तान्तवर्णनंनाम प्रथमोऽध्यायः ॥ १ ॥ छ ॥ ॥ लोमश उवाच ॥ एकदा तु तदा तेन यज्ञः प्रारंभितो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

महान् ॥ तत्राहूतास्तदा सर्वे दीक्षितेन तपस्विना ॥ १ ॥ ऋषयो विविधास्तत्र वशिष्ठाद्याः समागताः ॥ अगस्त्यः कश्यपोऽत्रिश्च वामदेवस्तथा भृगुः ॥ २ ॥ दधीचो भगवान्व्यासो भरद्वाजोऽथ गौतमः॥ एते चान्ये च बहवः समाजग्मुर्महर्षयः ॥ ३ ॥ तथा सर्वे सुरगणा लोकपालास्तथाऽपरे विद्याधराश्च गंधर्वाः किंनराप्सरसां गणाः ॥ ४ ॥ सप्तलोकात्समानीतो ब्रह्मा लोकपितामहः॥ वैकुंठाच्च तथा विष्णुः समानीतो मखं प्रति ॥ ५ ॥ देवेन्द्रो हि समानीत इंद्राण्या सह सुप्रभः ॥ तथा चंद्रो हि रोहिण्या वरुणःप्रियया सह ॥ ६ ॥ कुबेरः पुष्पकारूढो मृगाऽऽरूढोऽथ मारुतः ॥ बस्ताऽऽरूढः पावकश्च प्रेताऽऽरूढोऽथ निर्ऋतिः ॥ ७ ॥ एते सर्वे समायाता यज्ञवाटे द्विजन्मनः ॥ ते सर्वे सत्कृतास्तेन दक्षेण च दुरात्मना॥ ८ ॥ भवनानि महार्हाणि सुप्रभाणि महांति च ॥ त्वष्ट्रा कृतानि दिव्यानि कौशल्येन महात्मना ॥ ९ ॥ तेषु सर्वेषु धिष्ण्येषु यथाजोषं समास्थिताः ॥ १० ॥ वर्त्तमाने महायज्ञे तीर्थे कनखले तथा ॥ ऋत्विजश्च कृतास्तेन भृग्वाद्याश्च तपोधनाः ॥ ११ ॥ दीक्षायुक्तस्तदा दक्षः कृतकौतुक मंगलः ॥ भार्यया सहितो विप्रैः कृतस्वस्त्ययनो भृशम् ॥ १२ ॥ रेजे महत्त्वेन तदा सुहृद्भिः परितः सदा ॥ एतस्मिन्नंतरे तत्र दधीचिर्वाक्य मब्रवीत् ॥ १३ ॥ ॥ दधीचिरुवाच ॥ ॥ एते सुरेशा ऋषयो महत्तराः सलोकपालाश्च समागतास्तव ॥ तथाऽपि यज्ञस्तु न शोभते भृशं पिनाकिना तेन महात्मना विना ॥ १४ ॥ येनैव सर्वाण्यपि मंगलानि जातानि शंसंति महाविपश्चितः ॥ सोऽसौ न दृष्टोऽत्र पुमान्पुराणो वृषध्वजो नीलकण्ठः कपर्दी ॥ १५ ॥ अमंगलान्येव च मंगलानि भवंति येनाधिकृतानि दक्ष ॥ त्रियंबकेनाथ सुमंगलानि भवंति सद्यो ह्यपमंगलानि ॥ १६ ॥ तस्मात्त्वयैव कर्तव्यमाह्वानं परमेष्ठिना ॥ त्वरितं चैव शक्रेण विष्णुना प्रभविष्णुना ॥ १७ ॥ सर्वैरेव हि गंतव्यं यत्र देवो महेश्वरः ॥ १८ ॥ दाक्षायण्या समेतं तमानयध्वं त्वरान्विताः ॥ तेन सर्वं पवित्रं स्याच्छंभुना योगिना भृशम् ॥ १९ ॥ यस्य स्मृत्या च नामोक्त्या समग्रं सुकृतं भवेत् ॥ तस्मात्सर्वप्रयत्नेन समानेयो वृषध्वजः ॥ २० ॥ तस्य तद्वचनं श्रुत्वा प्रहसन्नाह दुष्टधीः ॥ मूलं विष्णुर्हि देवानां यत्र धर्मः सनातनः ॥२१॥ यस्मिन्वेदाश्च यज्ञाश्च कर्माणि विविधानि च ॥ प्रतिष्ठितानि सर्वाणि सोऽसौ विष्णुरिहागतः ॥ २२ ॥ सत्यलोकात्समायातो ब्रह्मा लोकपितामहः ॥ वेदैश्चोपनिषद्भिश्च आगमैर्विविधैः सह ॥ २३ ॥ तथा सुरगणैः साकमागतः सुरराट् स्वयम् ॥ तथा यूयं समायाता ऋषयो वीतकल्मषाः॥२४॥ येये यज्ञोचिताः शांतास्तेते सर्वे समागताः॥ वेदवेदार्थतत्त्वज्ञाः सर्वे यूयं दृढव्रताः ॥२५॥ अत्रैव च किमस्माकं रुद्रेणापि प्रयोजनम् ॥ कन्या दत्ता मया विप्रा ब्रह्मणा नोदितेन हि ॥ २६ ॥ अकुलीनो ह्यसौ विप्रा नष्टो नष्टप्रियः सदा ॥

CC-0. In Public Domain. Digitization by eGangotri

भूतप्रेतपिशाचानां पतिरेको दुरत्ययः ॥२७॥आत्मसंभावितो मूढः स्तब्धो मौनी समत्सरः ॥ कर्मण्यस्मिन्नयोग्योऽसौ नानीतो हि मयाऽधुना ॥२८॥ तस्मात्त्वया न वक्तव्यं पुनरेवं वचो द्विज॥सर्वैर्भवद्भिः कर्तव्यो यज्ञो मे सफलो महान् ॥२९॥ एतच्छुत्वा वचस्तस्य दधीचिर्वाक्यमब्रवीत् ॥३०॥ ॥ दधीचिरुवाच ॥ ॥ सर्वेषामृषिवर्याणां सुराणां भावितात्मनाम् ॥ अनयोऽयं महाञ्जातो विना तेन महात्मना ॥३१॥ विनाशोऽपि महान्सद्यो ह्यत्र त्यानां भविष्यति॥एवमुक्त्वा दधीचोऽसावेक एव विनिर्गतः॥३२॥यज्ञवाटाच्च दक्षस्य त्वरितः स्वाश्रमं ययौ॥मुनौ विनिर्गते दक्षः प्रहसन्निदमब्रवीत् ॥ ३३ ॥ गतः शिवप्रियो वीरो दधीचिर्नाम नामतः ॥ आविष्टचित्ता मंदाश्च मिथ्यावादरताः खलाः ॥ ३४ ॥ वेदबाह्या दुराचारास्त्याज्यास्ते ह्यत्र कर्मणि ॥ वेदवादरता यूयं सर्वे विष्णुपुरोगमाः ॥ ३५ ॥ यज्ञं मे सफलं विप्राः कुर्वंतु ह्यचिरादिव ॥ तदा ते देवयजनं चक्रुः सर्वे सहर्षयः ॥ ३६ ॥ एतस्मिन्नंतरे तत्र पर्वते गंधमादने ॥ धारागृहे विमानेन सखीभिः परिवारिता॥ ३७ ॥ दाक्षायणी महादेवी चकार विविधास्तदा ॥ क्रीडा विमानमध्यस्था कन्दुकाद्याः सहस्रशः ॥ ३८ ॥ क्रीडासक्ता तदा देवी ददर्शाथ महासती ॥ यज्ञं प्रयांतं सोमं च रोहिण्या सहितं प्रभुम् ॥ ३९ ॥ क्व गमिष्यति चंद्रोऽयं विजये पृच्छ सत्वरम् ॥ तयोक्ता विजया देवी तं पप्रच्छ यथोचितम् ॥ ४० ॥ कथितं तेन तत्सर्वं दक्षस्यैव मखादिकम् ॥ तच्छ्रुत्वा त्वरिता देवी विजया जातसंभ्रमा ॥ कथयामास तत्सर्वं यदुक्तं शशिना भृशम् ॥ ४१ ॥ विमृश्य कारणं देवी किमाह्वानं करोति न ॥ दक्षः पिता मे माता च विस्मृता मां कुतोऽधुना ॥ ४२ ॥ पृच्छामि शंकरं चाद्य कारणं कृतनिश्चया ॥ स्थापयित्वा सखीस्तत्र आगता शंकरं प्रति ॥ ४३ ॥ ददर्श तं सभामध्ये त्रिलोचनमवस्थितम् ॥ गणैः परिवृतं सर्वैश्चंडमुंडादिभिस्तदा ॥ ४४ ॥ बाणो भृंगिस्तथा नंदी शैलादो हि महातपाः ॥ महाकालो महाचंडो महामुंडो महाशिराः॥४५॥ धूम्राक्षो धूम्रकेतुश्च धूम्रपादस्तथैव च ॥ एते चान्ये च बहवो गणा रुद्रानुवर्तिनः ॥४६॥ केचिद्भयानका रौद्राः कबंधाश्च तथा परे ॥ विलोचनाश्च केचिच्च वक्षोहीनास्तथा परे॥४७॥ एवंभूताश्च शतशः सर्वे ते कृत्तिवाससः॥जटाकलापसंभूषाः सर्वे रुद्राक्षभूषणाः ॥४८॥ जितेंद्रिया वीतरागाः सर्वे विषयवैरिणः॥एभिः सर्वैः परिवृतः शंकरो लोकशंकरः॥दृष्टस्तया उपाविष्ट आसने परमाद्भुते॥४९॥आक्षिप्तचित्ता सहसा जगाम शिवसंनिधिम् ॥ शिवेन स्थापिता स्वांके प्रीतियुक्तेन वल्लभा॥५०॥ प्रेम्णोदिता वचोभिः सा बहुमानपुरःसरम् ॥ किमागमनकार्यं मे वद शीघ्रं सुमध्यमे ॥५१॥ एवमुक्ता तदा तेन उवाचासितलोचना ॥५२॥ ॥ सत्युवाच ॥ ॥ पितुर्मम महायज्ञे कस्मात्तव न रोचते ॥ गमनं देवदे

१-अकारान्तोऽप्ययं दधीचशब्दः,इकारान्तोऽपि च, चान्तोऽपि च ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वेश तत्सर्वं कथय प्रभो ॥ ५३ ॥ सुहृदामेष वै धर्मः सुहृद्भिः सह संगतिम् ॥ कुर्वंति यन्महादेव सुहृदां प्रीतिवर्धिनीम् ॥ ५४ ॥ तस्मात्सर्वप्रयत्नेन अनाहूतोऽपि गच्छ भोः ॥ यज्ञवाटं पितुर्मेऽद्य वचनान्मे सदाशिव ॥ ५५ ॥ तस्यास्तद्वचनं श्रुत्वा बभाषे सूनृतं वचः ॥ त्वया भद्रे न गंतव्यं दक्षस्य यजनं प्रति ॥ ५६ ॥ तस्य ये मानिनः सर्वे ससुरासुरकिंनराः ॥ ते सर्वे यजनं प्राप्ताः पितुस्तव न संशयः ॥५७॥अनाहूताश्च ये सुभ्रु गच्छंति परम न्दिरम् ॥अपमानं प्राप्नुवन्ति मरणादधिकं ततः॥५८॥ परेषां मंदिरं प्राप्त इंद्रोपि लघुतां व्रजेत् ॥ तस्मात्त्वया न गंतव्यं दक्षस्य यजनं शुभे ॥५९॥ एवमुक्ता सती तेन महेशेन महात्मना ॥ उवाच रोषसंयुक्तं वाक्यं वाक्यविदां वरा ॥ ६० ॥ यज्ञो हि सत्यं लोके त्वं स त्वं देववरेश्वर ॥ अनाहूतोऽसि तेनाद्य पित्रा मे दुष्टचारिणा ॥ तत्सर्वं ज्ञातुमिच्छामि तस्य भावं दुरात्मनः ॥६१॥ तस्माच्चाद्यैव गच्छामि यज्ञवाटं पितुर्म्मम ॥ अनुज्ञां देहि मे नाथ देवदेव जगत्पते ॥ ६२ ॥ इत्युक्तो भगवान्रुद्रस्तया देव्या शिवः स्वयम् ॥ विज्ञाताखिलदृग्द्रष्टा भगवान्भूतभावनः ॥ ६३ ॥ स तामुवाच देवेशो महेशः सर्वसिद्धिदः ॥ गच्छ देवि त्वरायुक्ता वचनान्मम सुव्रते ॥ ६४ ॥ एतं नंदिनमारुह्य नानाविधगणान्विता ॥ गणाः षष्टिसहस्राणि जग्मू रौद्राः शिवाज्ञया ॥ ६५ ॥ तैर्गणैः संवृता देवी जगाम पितृमंदिरम् ॥ निरीक्ष्य तद्बलं सर्वं महादेवोतिविस्मितः ॥६६॥ भूषणानि महार्हाणि तेभ्यो देव्यै परंतपः ॥ प्रेषयामास चाव्यग्रो महादेवोऽनु पृष्ठतः ॥ ६७ ॥ देव्या गतं वै स्वपितुर्गृहं तदा विमृश्य सर्वं भगवान्महेशः ॥ दाक्षायणी पित्रवमानिता सती न यास्यतीति स्वपुरं पुनर्जगौ ॥६८॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां प्रथमे माहेश्वरखण्डे केदारखंडे दक्षयज्ञं प्रति सतीदेव्यागमनवर्णनंनाम द्वितीयोऽध्यायः ॥२॥ ॥ लोमश उवाच ॥ ॥ दाक्षायणी गता तत्र यत्र यज्ञो महानभूत् ॥ तत्पितुः सदनं गत्वा नानाश्चर्यसमन्वितम्॥ १॥द्वारि स्थिता तदा देवा अवतीर्य निजासनात्॥ नंदिनो हि महाभागा देवलोकं निरीक्ष्य च ॥२॥ मातरं पितरं दृष्ट्वा सुहृत्संबंधि बांधवान् ॥ अभिवाद्यैव पितरं मातरं च मुदान्विता ॥ ३ ॥ बभाषे वचनं देवी प्रस्तावसदृशं तदा॥ अनाहूतस्त्वया कस्माच्छंभुः परमशोभनः ॥४॥ येन पूतमिदं सर्वं समग्रं सचराचरम् ॥ यज्ञो यज्ञविदां श्रेष्ठो यज्ञांगो यज्ञदक्षिणः ॥५ ॥ द्रव्यं मंत्रादिकं सर्वं हव्यं कव्यं च यन्मयम् ॥ विना तेन कृतं सर्वमपवित्रं भविष्यति ॥ ६ ॥ शंभुना हि विना तात कथं यज्ञः प्रवर्तते ॥एते कथं समायाता ब्रह्मणा सहिताः पितः ॥ ७ ॥ हे भृगो त्वं न जानासि हे कश्यप महामते॥अत्रे वशिष्ठ एकस्त्वं शक्र किं कृतमद्य ते ॥८॥ हे विष्णो त्वं महादेवं जानासि परमेश्वरम् ॥ ब्रह्मन्किं त्वं न जानासि महादेवस्य विक्रमम् ॥ ९ ॥ पुरा पंचमुखो भूत्वा गर्वितोसि सदाशिवम् ॥ कृतश्चतुर्मुखस्तेन विस्मृतोऽसि तदद्भुतम् ॥ १० ॥ भिक्षाटनं कृतं येन पुरा दारुवने

CC-0. In Public Domain. Digitization by eGangotri

विभुः॥शप्तोयं भिक्षुको रुद्रो भवद्भिः सखिभिस्तदा ॥११॥ शप्तेनापि च रुद्रेण भवद्भिर्विस्मृतं कथम् ॥ यस्यावयवमात्रेण पूरितं सचराचरम् ॥१२॥
लिंगभूतं जगत्सर्वं जातं तत्क्षणमेव हि॥लयनाल्लिंगमित्याहुः सर्वे देवाः सवासवाः॥१३॥सर्वे देवाश्च संभूता यतो देवस्य शूलिनः ॥ सोऽसौ वेदांतगो
देवस्त्वया ज्ञातुं न पार्यते ॥१४॥ तस्या वचनमाकर्ण्य दक्षः क्रुद्धोऽब्रवीद्वचः॥किं त्वया बहुनोक्तेन कार्यं नास्तीह सांप्रतम् ॥ १५ ॥ गच्छ वा तिष्ठ
वा भद्रे कस्मात्त्वं हि समागता ॥ अमंगलो हि भर्ता ते अशिवोसौ सुमध्यमे ॥ १६ ॥ अकुलीनो वेदबाह्यो भूतप्रेतपिशाचराट् ॥ तस्मान्नाका
रितो भद्रे यज्ञार्थं चारुभाषिणि ॥ १७ ॥ मया दत्तासि सुश्रोणि पापिना मंदबुद्धिना ॥ रुद्रायाविदितार्थाय उद्धताय दुरात्मने ॥ १८ ॥
तस्मात्कायं परित्यज्य स्वस्था भव शुचिस्मिते ॥ दक्षेणोक्ता तदा पुत्री सा सती लोकपूजिता ॥ १९ ॥ निंदायुक्तं स्वपितरं विलोक्य
रुपिता भृशम् ॥ चिंतयंती तदा देवी कथं यास्यामि मंदिरे ॥ २० ॥ शंकरं द्रष्टुकामाहं किं वक्ष्ये तेन पृच्छिता ॥ यो निंदति महादेवं निंद्य
मानं शृणोति यः ॥ तावुभौ नरके यातो यावच्चन्द्रदिवाकरौ ॥ २१ ॥ तस्मात्त्यक्ष्याम्यहं देहं प्रवेक्ष्यामि हुताशनम् ॥ २२ ॥ एवं मी
मांसमाना सा शिवरुद्रेतिभाषिणी ॥ अपमानाभिभूता सा प्रविवेश हुताशनम् ॥ २३ ॥ हाहाकारेण महता व्याप्तमासीद्दिगंतरम् ॥
सर्वे ते मंचमारूढाः शस्त्रैर्व्याप्ता निरंतराः ॥ २४ ॥ शस्त्रैः स्वैर्जघ्नुरात्मानं स्वानि देहानि चिच्छिदुः ॥ केचित्करतले गृह्य शिरांसि
स्वानि चोत्सुकाः ॥ २५ ॥ नीराजयंतस्त्वरिता भस्मीभूताश्च जज्ञिरे ॥ एवमूचुस्तदा सर्वे जगर्ज्जुरतिभीषणम् ॥ २६ ॥ शस्त्रप्रहारैः
स्वांगानि चिच्छिदुश्चातिभीषणाः ॥ ते तथा विलयं प्राप्ता दाक्षायण्या समं तदा ॥ २७ ॥ गणास्तत्रायुते द्वे च तदद्भुतमिवाभवत् ॥ ते सर्वे
ऋषयो देवा इंद्राद्याः समरुद्गणाः॥ २८ ॥ विश्वेऽश्विनौ लोकपालास्तूष्णींभूतास्तदाभवन् ॥ विष्णुं वरेण्यं केचिच्च प्रार्थयंतः समंततः ॥ २९ ॥
एवंभूतस्तदा यज्ञो जातस्तस्य दुरात्मनः ॥ दक्षस्य ब्रह्मबंधोश्च ऋषयो भयमागताः ॥ ३० ॥ एतस्मिन्नंतरे विप्रा नारदेन महात्मना ॥
कथितं सर्वमेवैतद्दक्षस्य च विचेष्टितम् ॥ ३१ ॥ तदाकर्ण्येश्वरो वाक्यं नारदस्य मुखोद्गतम् ॥ चुकोप परमं क्रुद्ध आसनादुत्पतन्निव ॥ ३२ ॥
उद्धृत्य च जटां रुद्रो लोकसंहारकारकः ॥ आस्फोटयामास रुषा पर्वतस्य शिरोपरि ॥ ३३ ॥ ताडनाच्च समुद्भूतो वीरभद्रो महायशाः ॥ तथा काली
समुत्पन्ना भूतकोटिभिरावृता ॥ ३४ ॥ कोपान्निःश्वसितेनैव रुद्रस्य च महात्मनः ॥ जातं ज्वराणां च शतं सन्निपातास्त्रयोदश ॥ ३५ ॥ विज्ञप्तो
वीरभद्रेण रुद्रो रौद्रपराक्रमः ॥ किं कार्यं भवतः कार्यं शीघ्रमेव वद प्रभो ॥ ३६ ॥ इत्युक्तो भगवान्रुद्रः प्रेषयामास सत्वरम् ॥ गच्छ वीर महा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बाहो दक्षयज्ञं विनाशय ॥ ३७ ॥ शासनं शिरसा धृत्वा देवदेवस्य शूलिनः ॥ कालिकाऽऽलिहितो वीरः सर्वभूतैः समावृतः ॥ वीरभद्रो महातेजा ययौ दक्षमखं प्रति ॥ ३८ ॥ तदानीमेव सहसा दुर्निमित्तानि चाभवन् ॥ रूक्षो ववौ तदा वायुः शर्कराभिः समावृतः ॥ ३९ ॥ असृग्वर्षति देवश्च[1] तिमिरेणाऽऽवृता दिशः ॥ उल्कापाताश्च बहवः पेतुरुर्व्यां सहस्रशः ॥ ४० ॥ एवंविधान्यरिष्टानि ददृशुर्विबुधादयः ॥ दक्षोऽपि भयमापन्नो विष्णुं शरणमाययौ ॥ ४१ ॥ रक्षरक्ष महाविष्णो त्वं हि नः परमो गुरुः ॥ यज्ञोऽसि त्वं सुरश्रेष्ठ भयान्मां परिमोचय ॥ ४२ ॥ दक्षेण प्रार्थ्य मानो हि जगाद मधुसूदनः ॥ मया रक्षा विधातव्या भवतो नात्र संशयः ॥ ४३ ॥ अवज्ञा हि कृता दक्ष त्वया धर्ममजानता ॥ ईश्वरावज्ञया सर्वं विफलं च भविष्यति ॥ ४४ ॥ अपूज्या यत्र पूज्यंते पूजनीयो न पूज्यते ॥ त्रीणि तत्र प्रवर्तंते दुर्भिक्षं मरणं भयम् ॥ ४५ ॥ तस्मात्सर्वप्रय त्नेन माननीयो वृषध्वजः ॥ अमानितान्महेशात्त्वां महद्भयमुपस्थितम् ॥ ४६ ॥ अधुनैव वयं सर्वे प्रभवो न भवामहे ॥ भवतो दुर्नयेनैव नात्र कार्या विचारणा ॥ ४७ ॥ विष्णोस्तद्वचनं श्रुत्वा दक्षश्चिंतापरोऽभवत् ॥ विवर्णवदनो भूत्वा तूष्णीमासीद्भुवि स्थितः ॥ ४८ ॥ वीरभद्रो महा बाहू रुद्रेणैव प्रचोदितः ॥ काली कात्यायनीशाना चामुंडा मुंडमर्दिनी ॥ ४९ ॥ भद्रकाली तथा भद्रा त्वरिता वैष्णवी तथा ॥ नवदुर्गादिसहितो भूतानां च गणो महान् ॥ ५० ॥ शाकिनी डाकिनी चैव भूतप्रमथगुह्यकाः ॥ तथैव योगिनीचक्रं चतुःषष्ट्या समन्वितम् ॥ ५१ ॥ निर्जग्मुः सहसा तत्र यज्ञवाटं महाप्रभम् ॥ वीरभद्रसमेता ये गणाः शतसहस्रशः ॥ ५२ ॥ पार्षदाः शंकरस्यैते सर्वे रुद्रस्वरूपिणः ॥ पंचवक्रा नीलकंठाः सर्वे ते शस्त्रपाणयः ॥ ५३ ॥ छत्रचामरसंवीताः सर्वे हरपराक्रमाः ॥ दशबाहवस्त्रिनेत्रा जटिला रुद्रभूषणाः ॥ ५४ ॥ अर्धचंद्रधराः सर्वे सर्वे चैव महौजसः ॥ सर्वे ते वृषभारूढाः सर्वे ते वेषभूषणाः ॥ ५५ ॥ सहस्रबाहुर्भुजगाधिपैर्वृतस्त्रिलोचनो भीमबलो भयावहः ॥ एभिः समेतश्च तदा महात्मा स वीरभद्रोऽभिजगाम यज्ञम् ॥५६॥ युग्यानां च सहस्रेण द्विप्रमाणेन स्यंदनम् ॥ सिंहानां प्रयुतेनैव वाह्यमानं च तस्य तत् ॥५७॥ तथैव दंशिताः सिंहा बहवः पार्श्वरक्षकाः ॥ शार्दूला मकरा मत्स्या गजाश्चैव सहस्रशः ॥ छत्राणि विविधान्येव चामराणि तथैव च ॥ ५८ ॥ मूर्द्धनि ध्रियमाणानि सर्वतोग्राणि सर्वशः ॥ ततो भेरीमहानादाः शंखाश्च विविधस्वनाः ॥ पटहा गोमुखाश्चैव शृंगाणि विविधानि च ॥ ५९ ॥ ततोऽवाद्यंत तान्येव घनानि सुषिराणि च ॥ कलगानपराः सर्वे सर्वे मृदंगवादिनः ॥ ६० ॥ अनेकलास्यसंयुक्ता वीरभद्राग्रतोभवन् ॥ रणवादित्र

१ देवः—पर्जन्य इत्यर्थः ।

CC-0. In Public Domain. Digitization by eGangotri

निर्घोषैर्जर्गर्जुरमितौजसः ॥ ६१ ॥ तेन नादेन महता नादितं भुवनत्रयम् ॥ एवं सर्वे समायाता गणा रुद्रप्रणोदिताः ॥ ६२ ॥ यज्ञवाटं च दक्षस्य
विनाशार्थं प्रहारिणः ॥ रजसा चाऽऽवृतं व्योम तमसा च वृता दिशः ॥६३॥ सप्तद्वीपवती पृथ्वी चचाल साद्रिकानना ॥ ते दृष्ट्वा महदाश्चर्य्यं लोक
क्षयकरं तदा ॥ ६४ ॥ उत्तस्थुर्युगपत्सर्वे देवदैत्यनिशाचराः ॥ ते वै ददृशुरायांतीं रुद्रसेनां भयावहाम् ॥ ६५ ॥ पृथ्वीं केचित्समायाता गगने केचि
दागताः ॥ दिशश्च प्रदिशश्चैव समावृत्य तथापरे ॥ ६६ ॥ अनंता ह्यक्षयाः सर्वे शूरा रुद्रसमा युधि ॥ एवंभूतं च तत्सैन्यं रुद्रैश्च परिवारितम् ॥ दृष्ट्वो
चुर्विस्मिताः सर्वे यामोऽद्य शस्त्रपाणयः ॥६७॥ इंद्रो हि गजमारूढो मृगारूढः सदागतिः ॥ यमो महिषमारूढो यमदंडसमन्वितः ॥ ६८ ॥ कुबेरः
पुष्पकारूढः पाशी मकरमेव च ॥ अग्निर्बस्तसमारूढो निर्ऋतिः प्रेतमेव च ॥ ६९ ॥ तथान्ये सुरसंघाश्च यक्षचारणगुह्यकाः ॥ आरुह्य वाहनान्येव
स्वानिस्वानि प्रतापिनः ॥७०॥ स्त्वेषामुद्योगमालोक्य दक्षश्चाश्रुमुखस्ततः ॥ दंडवत्पतितो भूमौ सर्वानेवाभ्यभाषत ॥७१॥ युष्मद्बलेनैव मया यज्ञः
प्रारंभितो महान् ॥ सत्कर्मसिद्धये यूयं प्रमाणं सुमहाप्रभाः ॥ ७२ ॥ विष्णो त्वं कर्मणः साक्षाद्यज्ञानां परिपालकः ॥ धर्मस्य वेदगर्भस्य ब्रह्मण्य
स्त्वं च माधव ॥ ७३ ॥ तस्माद्रक्षा विधातव्या यज्ञस्याऽस्य महाप्रभो ॥ दक्षस्य वचनं श्रुत्वा उवाच मधुसूदनः ॥ ७४ ॥ मया रक्षा विधातव्या
धर्मस्य परिपालने ॥ तत्सत्यं तु त्वयोक्तं हि किं तु तस्य व्यतिक्रमः ॥ ७५ ॥ यातस्त्वद्येव यज्ञस्य यत्त्वयोक्तं सदाशिवम् ॥ नैमिषेऽनिमिषक्षेत्रे
तदा किं न स्मृतं त्वया ॥ ७६ ॥ योऽयं रुद्रो महातेजा यज्ञरूपः सदाशिवः ॥ यज्ञबाह्यः कृतो मूढ तच्च दुर्म्मंत्रितं तव ॥ ७७ ॥ रुद्रकोपाच्च को
ह्यत्र समर्थो रक्षणे तव ॥ न पश्यामि च तं विप्र त्वां वै रक्षति दुर्म्मतिम् ॥ ७८ ॥ किं कर्म्म किमकर्म्मेति तन्न पश्यसि दुर्म्मते ॥ समर्थं केवलं कर्म
न भविष्यति सर्वदा ॥ ७९ ॥ सेश्वरं कर्म विद्धचेतत्समर्थत्वेन जायते ॥ न ह्यन्यः कर्म्मणो दाता ईश्वरेण विना भवेत् ॥ ८० ॥ ईश्वरस्य च ये
भक्ताः शांतास्तद्गतमानसाः ॥ कम्मर्णो हि फलं तेषां प्रयच्छति सदाशिवः॥८१॥ केवलं कर्म चाश्रित्य निरीश्वरपरा जनाः ॥ निरयं ते च गच्छंति
कोटियज्ञशतैरपि ॥ ८२ ॥ पुनः कर्ममयैः पाशैर्बद्धा जन्मनिजन्मनि ॥ निरयेषु प्रपच्यंते केवलं कर्म्मरूपिणः ॥ ८३॥ इति श्रीस्कांदे महापुराण
एकाशीतिसाहस्र्यां संहितायां प्रथमे माहेश्वरखण्डे केदारखंडे वीरभद्रप्रादुर्भाववर्णनंनाम तृतीयोऽध्यायः ॥३॥ ॥ लोमश उवाच ॥ ॥ विष्णुनोक्तं
वचः श्रुत्वा दक्षो वचनमब्रवीत् ॥ वेदानामप्रमाणं च कृतं ते मधुसूदन ॥ १ ॥ वैदिकं कर्म चोत्सृज्य कथं सेश्वरतां व्रजेत् ॥ तदुच्यतां महाविष्णो
येन धर्मः प्रतिष्ठितः॥२॥दक्षेणोक्तो महाविष्णुरुवाच परिसांत्वयन् ॥ त्रैगुण्यविषया वेदाः संभवंति न चान्यथा ॥३॥ वेदोदितानि कर्माणि ईश्वरेण

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विना कथम् ॥ सफलानि भविष्यंति विफलान्येव तानि च ॥४॥ तस्मात्सर्वप्रयत्नेन ईश्वरं शरणं व्रज॥एवं ब्रुवति गोविन्द आगतः सैन्यसागरः॥ वीरभद्रेण सदृशो ददृशुस्तं तदा सुराः॥ ५ ॥ इंद्रोपि प्रहसन्विष्णुमात्मवादरतं तदा ॥ वज्रपाणिः सुरैः सार्द्धं योद्धुकामोऽभवत्तदा ॥ ६ ॥ भृगुणा चारितः शीघ्रमुच्चाटनपरेण हि ॥ तदा गणाः सुरैः सार्धं युयुधुस्ते गणान्विताः ॥ ७ ॥ शरतोमरनाराचैर्जघ्नुस्ते च परस्परम् ॥ नेदुःशंखाश्च बहुश स्तस्मिन्रणमहोत्सवे ॥ ८ ॥ तथा दुन्दुभयो नेदुः पटहा डिंडिमादयः ॥ तेन शब्देन महता श्लाघ्यमानास्तदा सुराः ॥ लोकपालैश्च सहिता जघ्नुस्ता ञ्छिवकिंकरान् ॥ ९ ॥ खड्गैश्चापि हताः केचिद्गदाभिश्च विपोथिताः ॥ देवैः पराजिताः सर्वे गणाः शतसहस्रशः ॥ १० ॥ इंद्राद्यैर्लोकपालैश्च गणा स्ते च पराङ्मुखाः ॥ कृताश्च तत्क्षणादेव भृगोर्मंत्रबलेन हि ॥११॥ उच्चाटनं कृतं तेषां भृगुणा यज्विना तदा ॥ यजनार्थं च देवानां तुष्ट्यर्थं दीक्षित स्य च ॥ १२ ॥ तेनैव देवा जयिनो जातास्तत्क्षणमेव हि ॥ स्वानां पराजयं दृष्ट्वा वीरभद्रो रुषान्वितः ॥१३॥ भूतान्प्रेतान्पिशाचांश्च कृत्वा तानेव पृष्ठतः ॥ वृषभस्थान्पुरस्कृत्य स्वयं चैव महाबलः ॥ तीक्ष्णं त्रिशूलमादाय पातयामास तान्रणे ॥ १४ ॥ देवान्यक्षान्पिशाचांश्च गुह्यकान्राक्षसां स्तथा ॥ शूलघातैश्च ते सर्वे गणा देवान्प्रजघ्निरे ॥ १५ ॥ केचिद्द्विधाकृताः खड्गैर्मुद्गरैश्चापि पोथिताः ॥ परश्वधैः खंडशश्च कृताः केचिद्रणाजिरे ॥ ॥ १६ ॥ शूलैर्भिन्नाश्च शतशः केचिच्च शकलीकृताः ॥ एवं पराजिताः सर्वे पलायनपरायणाः ॥ १७ ॥ परस्परं परिष्वज्य गतास्तेपि त्रिविष्टपम् ॥ केवलं लोकपालाश्च इंद्राद्यास्तस्थुरुत्सुकाः ॥ बृहस्पतिं पृच्छमानाः कुतोस्माकं जयो भवेत् ॥१८॥ बृहस्पतिरुवाचेदं सुरेंद्रं त्वरितस्तदा ॥ ॥ बृहस्पति रुवाच ॥ ॥ यदुक्तं विष्णुना पूर्वं तत्सत्यं जातमद्य वै ॥ १९ ॥ अस्ति चेदीश्वरः कश्चित्फलरूप्यस्य कर्म्मणः ॥ कर्तारं भजते सोपि न ह्यकर्तुः प्रभुर्हिसः ॥ २० ॥ न मंत्रौषधयः सर्वे नाभिचारा न लौकिकाः ॥ न कर्माणि न वेदाश्च न मीमांसाद्वयं तथा ॥ २१ ॥ ज्ञातुमीशाः संभवंति भक्त्याज्ञेयस्त्वनन्यया ॥ शांत्या च परया तुष्ट्या ज्ञातव्यो हि सदाशिवः ॥ २२ ॥ तेन सर्वं संभवंति सुखदुःखात्मकं जगत् ॥ परंतु संवदिष्यामि कार्याकार्यविवक्षया ॥ २३ ॥ त्वमिंद्र बालिशो भूत्वा लोकपालैः सहाद्य वै ॥ आगतो बालिशो भूत्वा इदानीं किं करिष्यसि ॥ २४ ॥ एते रुद्रसहायाश्च गणाः परमशोभनाः ॥ कुपिताश्च महाभागा न तु शेषं प्रकुर्वते ॥ २५ ॥ एवं बृहस्पतेर्वाक्यं श्रुत्वा तेऽपि दिवौकसः ॥ चिंतामापेदिरे सर्वे लोकपाला महेश्वराः ॥ २६ ॥ ततोऽब्रवीद्वीरभद्रो गणैः परिवृतो भृशम् ॥ सर्वे यूयं बालिशत्वादवदानार्थमागताः ॥ २७ ॥ अवदानानि दास्यामि तृप्त्यर्थं भवतां त्वरन् ॥ एवमुक्त्वा शितैर्बाणैर्जघानाथ रुषान्वितः ॥ २८ ॥ तैर्बाणैर्निहताः सर्वे जग्मुस्ते च दिशो दश ॥ २९ ॥

CC-0. In Public Domain. Digitization by eGangotri

गतेषु लोकपालेषु विद्रुतेषु सुरेषु च ॥ यज्ञवाटे समायातो वीरभद्रो गणान्वितः ॥ ३० ॥ तदा त ऋषयः सर्वे सर्वमेवेश्वरेश्वरम् ॥ विज्ञप्तुकामाः सहसा ऊचुरेवं जनार्दनम् ॥३१॥ रक्ष यज्ञं हि दक्षस्य यज्ञोसि त्वं न संशयः ॥ एतच्छ्रुत्वा तु वचनमृषीणां वै जनार्दनः ॥३२॥ योद्धुकामः स्थितो युद्धे विष्णुरध्यात्मदीपकः ॥ वीरभद्रो महाबाहुः केशवं वाक्यमब्रवीत् ॥३३॥ अत्र त्वयागतं कस्माद्विष्णो वेत्रा महाबलम् ॥ दक्षस्य पक्षमाश्रित्य कथं जेष्यसि तद्वद ॥ ३४ ॥ दाक्षायण्या कृतं यच्च न दृष्टं किं त्वयानघ ॥ त्वं चापि यज्ञे दक्षस्य अवदानार्थमागतः ॥ अवदानं प्रयच्छामि तव चापि महाभुज ॥ ३५ ॥ एवमुक्त्वा प्रणम्यादौ विष्णुं सदृशरूपिणम् ॥ वीरभद्रोऽग्रतो भूत्वा विष्णुं वाक्यमथाब्रवीत् ॥ ३६ ॥ यथा शंभुस्तथा त्वं हि मम नास्त्यत्र संशयः ॥ तथापि त्वं महाबाहो योद्धुकामोऽग्रतः स्थितः ॥ नेष्याम्यपुनरावृत्तिं यदि तिष्ठेस्त्वमात्मना ॥ ३७ ॥ तस्य तद्वचनं श्रुत्वा वीरभद्रस्य धीमतः ॥ उवाच प्रहसन्देवो विष्णुः सर्वेश्वरेश्वरः ॥३८॥ ॥ विष्णुरुवाच ॥ ॥ रुद्रतेजःप्रसूतोसि पवित्रोऽसि महामते ॥ अनेन प्रार्थितः पूर्वं यज्ञार्थं च पुनःपुनः ॥ ३९ ॥ अहं भक्तपराधीनस्तथा सोऽपि महेश्वरः ॥ तेनैव कारणेनात्र दक्षस्य यजनं प्रति ॥ ४० ॥ आगतोऽहं वीरभद्र रुद्रकोपसमुद्भव ॥ अहं निवारयामि त्वां त्वं वा मां विनिवारय ॥ ४१ ॥ इत्युक्तवति गोविंदे प्रहस्य स महाभुजः ॥ प्रश्रयावनतो भूत्वा इदमाह जनार्दनम् ॥ ४२ ॥ यथा शिवस्तथा त्वं हि यथा त्वं च तथा शिवः ॥ सेवकाश्च वयं सर्वे तव वा शंकरस्य च ॥ ४३ ॥ तच्छ्रुत्वा वचनं तस्य सोऽच्युतः संप्रहस्य च ॥ इदं विष्णुर्महावाक्यं जगाद परमेश्वरः ॥४४॥ योधयस्व महाबाहो मया सार्धमशंकितः ॥ तवास्त्रैः पूर्यमाणोऽहं गच्छामि भवनं स्वकम् ॥ ४५ ॥ तथेत्युक्त्वा तु वीरोऽसौ वीरभद्रो महाबलः ॥ गृहीत्वा परमास्त्राणि सिंहनादैर्जगर्ज ह ॥ ४६ ॥ विष्णुश्चापि महाघोषं शंखनादं चकार सः ॥ तच्छ्रुत्वा ये गता देवा रणं हित्वाऽऽययुः पुनः ॥ ४७ ॥ व्यूहं चक्रुस्तदा सर्वे लोकपालाः सवासवाः ॥ तदेन्द्रेण हतो नंदी वज्रेण शतपर्वणा ॥ ४८ ॥ नंदिना च हतः शक्रस्त्रिशूलेन स्तनांतरे ॥ वायुना च हतो भृंगी भृंगिणा वायुराहतः ॥४९॥ शूलेन सितधारेण संनद्धो दण्डधारिणा ॥ यमेन सह संग्रामं महाकालो बलान्वितः ॥ ५० ॥ कुबेरेण च संगम्य कूष्मांडानां पतिः स्वयम् ॥ वरुणेन समं युद्धं मुंडश्चैव महाबलः ॥५१॥ युयुधे परया शक्त्या त्रैलोक्यं विस्मयन्निव ॥ नैर्ऋतेन समागम्य चंडश्च बलवत्तरः ॥ ५२ ॥ युयुधे परमास्त्रेण नैर्ऋत्यं च विडंबयन् ॥ योगिनीचक्रसंयुक्तो भैरवो नायको महान् ॥५३॥ विदार्य देवानखिलान्पपौ शोणितमद्भुतम् ॥ क्षेत्रपालास्तथा चान्ये भूतप्रमथगुह्यकाः ॥ ५४ ॥ शाकिनी डाकिनी रौद्रा नवदुर्गास्तथैव च ॥ योगिन्यो यातुधान्यश्च तथा कूष्मांडकादयः ॥ नेदुः पपुः शोणितं च बुभुजुः पिशितं बहु ॥ ५५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भक्ष्यमाणं तदा सैन्यं विलोक्य सुरराट्स्वयम् ॥ विहाय नंदिनं पश्चाद्वीरभद्रं समाक्षिपत् ॥ ५६ ॥ वीरभद्रो विहायैव विष्णुं देवेन्द्रमास्थितः ॥ तयोर्युद्धमभूद्घोरं बुधांगारकयोरिव ॥ ५७ ॥ वीरभद्रं यदा शक्रो हंतुकामस्त्वरान्वितः ॥ तावच्छक्रं गजस्थं हि पूरयामास मार्गणैः ॥ ५८ ॥ वीरभद्रो रुषाविष्टो दुर्निवार्यो महाबलः ॥ तदेंद्रेणाहतः शीघ्रं वज्रेण शतपर्वणा ॥ ५९ ॥ सगजं च सवज्रं च वासवं ग्रस्तुमुद्युतः ॥ हाहाकारो महानासीद्भूतानां तत्र पश्यताम् ॥ ६० ॥ वीरभद्रं तथाभूतं हंतुकामं पुरंदरम् ॥ त्वरमाणस्तदा विष्णुर्वीरभद्राग्रतः स्थितः ॥ ६१ ॥ शक्रं च पृष्ठतः कृत्वा योधयामास वै तदा ॥ वीरभद्रस्य विष्णोश्च युद्धं परमभूत्तदा ॥ ६२ ॥ शस्त्रास्त्रैर्विविधाकारैर्योधयामासतुस्तदा ॥ पुनर्नंदिनमालोक्य शक्रो युद्धविशारदः ॥ ६३ ॥ द्वंद्वयुद्धं सुतुमुलं देवानां प्रमथैः सह ॥ प्रमथा मथिता देवैः सर्वे ते प्राद्रवन्रणात् ॥६४॥ गणान्पराङ्मुखान्दृष्ट्वा सर्वे ते व्याधयो भृशम् ॥ रुद्रकोपात्समुद्भूता देवाश्चापि प्रदुद्रुवुः ॥ ६५ ॥ ज्वरैस्तु पीडितान्देवान्दृष्ट्वा विष्णुर्हसन्निव ॥ जीवग्राहेण जग्राह देवांस्तांश्च पृथक्पृथक् ॥ ॥ ६६ ॥ देवाश्विनौ तदाहूय व्याधीन्हंतुं तदा भृतिम् ॥ ददौ ताभ्यां प्रयत्नेन गणयित्वा सुबुद्धिमान् ॥ ६७ ॥ ज्वरांश्च सन्निपातांश्च अन्ये भूतद्रुहस्तदा ॥ तान्सर्वान्निगृहीत्वाथ अश्विनौ तौ मुदान्वितौ ॥ विज्वरानथ देवांश्च कृत्वा मुमुदतुश्चिरम् ॥ ६८ ॥ तैर्जितं योगिनीचक्रं भैरवं व्याकुलीकृतम् ॥ तीक्ष्णाग्रैः पातयामासुः शरैर्भूतगणानपि ॥ ६९ ॥ सुरैर्विद्रावितं सैन्यं विलोक्य पतितं भुवि ॥ वीरभद्रो रुषाविष्टो विष्णुं वचनमब्रवीत् ॥ ७० ॥ त्वं शूरोसि महाबाहो देवानां पालको ह्यसि ॥ युध्यस्व मां प्रयत्नेन यदि ते मतिरीदृशी ॥ ७१ ॥ इत्युक्त्वा तं समासाद्य विष्णुं सर्वेश्वरेश्वरम् ॥ ववर्ष निशितैर्बाणैर्वीरभद्रो महाबलः ॥ ७२ ॥ तदा चक्रेण भगवान्वीरभद्रं जघान सः ॥ आयांतं चक्रमालोक्य ग्रसितं तत्क्षणाच्च तत् ॥ ७३ ॥ ग्रसितं चक्रमालोक्य विष्णुः परपुरंजयः ॥ मुखं तस्य परामृज्य विष्णुनोद्गिलितं पुनः ॥ ७४ ॥ स्वचक्रमादाय महानुभावो दिवं गतोऽथो भुवनैकभर्ता ॥ ज्ञात्वा च तत्सर्वमिदं च विष्णुः कृती कृतं दुष्प्रसहं परेषाम् ॥ ७५ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां प्रथमे माहेश्वरखण्डे केदारखंडे वीरभद्रादीनां विष्णवादिभिः सह युद्धवर्णनंनाम चतुर्थोऽध्यायः ॥ ४ ॥ ॥ छ ॥ ॥

लोमश उवाच ॥ ॥ विष्णौ गते तदा सर्वे देवाश्च ऋषिभिः सह ॥ विनिर्जिता गणैः सर्वे ये च यज्ञोपजीविनः ॥ १ ॥ भृगुं च पातयामास श्मश्रूणां लुंचनं कृतम् ॥ द्विजांश्चोत्पाटयामास पूष्णो विकृतविक्रियान् ॥ २ ॥ विडंबिता स्वधा तत्र ऋषयश्च विडंबिताः ॥ ववृषुस्ते पुरीषेण वितानाग्नौ रुषान्विताः ॥३॥ अनिर्वाच्यं तदा चक्रुर्गणाः क्रोधसमन्विताः ॥ अंतर्वेद्यंतरगतो दक्षो वै महतो भयात् ॥ ४ ॥ तं निलीनं समाज्ञाय

CC-0. In Public Domain. Digitization by eGangotri

आनिनाय रुषान्वितः ॥ कपोलेषु गृहीत्वा तं खड्गेनोपहतं शिरः ॥ ५ ॥ अभेद्यं तच्छिरो मत्वा वीरभद्रः प्रतापवान् ॥ स्कंधं पद्भ्यां समाक्रम्य कंधरेऽ
पीडयत्तदा ॥ ६ ॥ कंधरात्पात्यमानाच्च शिरश्छिन्नं दुरात्मनः ॥ दक्षस्य च तदा तेन वीरभद्रेण धीमता ॥ तच्छिरः सुहुतं कुंडे ज्वलिते तत्क्षणा
त्तदा ॥ ७ ॥ ये चान्य ऋषयो देवाः पितरो यक्षराक्षसाः ॥ गणैरुपद्रुताः सर्वे पलायनपरा ययुः ॥ ८ ॥ चंद्रादित्यगणाः सर्वे ग्रहनक्षत्रतारकाः ॥
सर्वे विचलिता ह्यासन्गणैस्तेपि ह्युपद्रुताः ॥ ९ ॥ सत्यलोकं गतो ब्रह्मा पुत्रशोकेन पीडितः ॥ चिंतयामास चाव्यग्रः किं कार्यं कार्यमद्य वै ॥
॥ १० ॥ मनसा दूयमानेन शं न लेभे पितामहः ॥ ज्ञात्वा सर्वं प्रयत्नेन दुष्कृतं तस्य पापिनः ॥ ११ ॥ गमनाय मतिं चक्रे कैलासं पर्वतं प्रति ॥
हंसारूढो महातेजाः सर्वदेवैः समन्वितः ॥ १२ ॥ प्रविष्टः पर्वतश्रेष्ठं स ददर्श सदाशिवम् ॥ एकांतवासिनं रुद्रं शैलादेन समन्वितम् ॥ १३ ॥
कपर्दिनं श्रिया युक्तं वेदांगानां च दुर्गमम् ॥ तथाविधं समालोक्य ब्रह्मा क्षोभपरोऽभवत् ॥ १४ ॥ दंडवत्पतितो भूमौ क्षमापयितुमुद्यतः ॥ संस्पृशं
स्तत्पदाब्जं च चतुर्मुकुटकोटिभिः ॥ स्तुतिं कर्तुं समारेभे शिवस्य परमात्मनः ॥ १५ ॥ ॥ ब्रह्मोवाच ॥ ॥ नमो रुद्राय शांताय ब्रह्मणे परमा
त्मने ॥ त्वं हि विश्वसृजां स्रष्टा धाता त्वं प्रपितामहः ॥ १६ ॥ नमो रुद्राय महते नीलकंठाय वेधसे ॥ विश्वाय विश्वबीजाय जगदानंदहेतवे ॥
॥ १७ ॥ ओंकारस्त्वं वषट्कारः सर्वारंभप्रवर्तकः ॥ यज्ञोसि यज्ञकर्मासि यज्ञानां च प्रवर्तकः ॥ १८ ॥ सर्वेषां यज्ञकर्तॄणां त्वमेव प्रतिपालकः ॥
शरण्योसि महादेव सर्वेषां प्राणिनां प्रभो ॥ रक्ष रक्ष महादेव पुत्रशोकेन पीडितम् ॥ १९ ॥ ॥ महादेव उवाच ॥ ॥ शृणुष्वावहितो भूत्वा मम वाक्यं
पितामह ॥ दक्षस्य यज्ञभंगोयं न कृतश्च मया क्वचित् ॥ २० ॥ स्वीयेन कर्मणा दक्षो हतो ब्रह्मन्न संशयः ॥ २१ ॥ परेषां क्लेशदं कर्म न कार्यं
तत्कदाचन ॥ परमेष्ठिन्परेषां यदात्मनस्तद्भविष्यति ॥ २२ ॥ एवमुक्त्वा तदा रुद्रो ब्रह्मणा सहितः सुरैः ॥ ययौ कनखलं तीर्थं यज्ञवाटं प्रजापतेः ॥
॥ २३ ॥ रुद्रस्तदा ददर्शाथ वीरभद्रेण यत्कृतम् ॥ स्वाहा स्वधा तथा पूषा भृगुर्मतिमतां वरः ॥ २४ ॥ तदान्य ऋषयः सर्वे पितरश्च तथाविधाः ॥
येऽन्ये च बहवस्तत्र यक्षगंधर्वकिन्नराः ॥ २५ ॥ त्रोटिता लुंचिताश्चैव मृताः केचिद्रणाजिरे ॥ २६ ॥ शंभुं समागतं दृष्ट्वा वीरभद्रो गणैः सह ॥
दंडप्रणामसंयुक्तस्तस्थावग्रे सदाशिवम् ॥ २७ ॥ दृष्ट्वा पुरः स्थितं रुद्रो वीरभद्रं महाबलम् ॥ उवाच प्रहसन्वाक्यं किं कृतं वीर नन्विदम् ॥ २८ ॥
दक्षमानय शीघ्रं भो येनेदं कृतमीदृशम् ॥ यज्ञे विलक्षणं तात यस्येदं फलमीदृशम् ॥ २९ ॥ एवमुक्तः शंकरेण वीरभद्रस्त्वरान्वितः ॥ कबंध
मानयित्वाथ शंभोरग्रे तदाक्षिपत् ॥ ३० ॥ तदोक्तः शंकरेणैव वीरभद्रो महामनाः ॥ शिरः केना पनीतं च दक्षस्यास्य दुरात्मनः ॥ ३१ ॥ दास्या

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मि जीवनं वीर कुटिलस्यापि चाधुना ॥ एवमुक्तः शंकरेण वीरभद्रोऽब्रवीत्पुनः ॥ ३२ ॥ मया शिरो हुतं चाग्नौ तदानीमेव शंकर ॥ अवशिष्टं शिरः शंभो पशोश्च विकृताननम् ॥ ३३ ॥ इति ज्ञात्वा ततो रुद्रः कबंधेऽपरि चाक्षिपत् ॥ शिरः पशोश्च विकृतं कूर्चयुक्तं भयावहम् ॥ ३४ ॥ स दक्षो जीवितं लेभे प्रसादाच्छंकरस्य च ॥ स दृष्ट्वाग्रे तदा रुद्रं दक्षो लज्जासमन्वितः ॥ तुष्टाव प्रणतो भूत्वा शंकरं लोकशंकरम् ॥ ३५ ॥ ॥ दक्ष उवाच ॥ ॥ नमामि देवं वरदं वरेण्यं नमामि देवेशवरं सनातनम् ॥ नमामि देवाधिपमीश्वरं हरं नमामि शंभुं जगदेकबंधुम् ॥ ३६ ॥ नमामि विश्वेश्वरविश्व रूपं सनातनं ब्रह्म निजात्मरूपम् ॥ नमामि सर्वं निजभावभावं वरं वरेण्यं वरदं नतोऽस्मि ॥ ३७ ॥ ॥ लोमश उवाच ॥ ॥ दक्षेण संस्तु तो रुद्रो बभाषे प्रहसन्नहः ॥ ३८ ॥ ॥ हर उवाच ॥ ॥ चतुर्विधा भजंते मां जनाः सुकृतिनः सदा ॥ आर्तो जिज्ञासुरर्थार्थी ज्ञानी च द्विजसत्तम ॥ ३९ ॥ तस्मान्मे ज्ञानिनः सर्वे प्रियाः स्युर्नात्र संशयः ॥ विना ज्ञानेन मां प्राप्तुं यतंते ते हि बालिशाः ॥ ४० ॥ केवलं कर्मणा त्वं हि संसारात्तर्तुमिच्छसि ॥ ४१ ॥ न वेदैश्च न दानैश्च न यज्ञैस्तपसा क्वचित् ॥ न शक्नुवंति मां प्राप्तुं मूढाः कर्म्मवशा नराः ॥ ४२ ॥ तस्माज्ज्ञानपरो भूत्वा कुरु कर्म्म समाहितः ॥ सुखदुःखसमो भूत्वा सुखी भव निरंतरम् ॥ ४३ ॥ ॥ लोमश उवाच ॥ ॥ उपदिष्टस्तदा तेन शंभुना परमेष्ठिना ॥ दक्षं तत्रैव संस्थाप्य ययौ रुद्रः स्वपर्वतम् ॥ ४४ ॥ ब्रह्मणापि तथा सर्वे भृग्वाद्याश्च महर्षयः ॥ आश्वासिता बोधिताश्च ज्ञानिनश्चाभवन्क्षणात् ॥ ४५ ॥ गतः पितामहो ब्रह्मा ततश्च सदनं स्वकम् ॥ ४६ ॥ दक्षोपि च स्वयं वाक्यात्परं बोधमुपागतः शिवध्यानपरो भूत्वा तपस्तेपे महामनाः ॥ ४७ ॥ तस्मात्सर्वप्रयत्नेन संसेव्यो भगवाञ्छिवः ॥ ४८ ॥ संमार्जनं च कुर्वंति नरा ये च शिवांगणे ॥ ते वै शिवपुरं प्राप्य जगद्वंद्या भवंति च ॥ ४९ ॥ ये शिवाय प्रयच्छंति दर्प्पणं सुमहाप्रभम् ॥ भविष्यंति शिवस्याग्रे पार्षदत्वेन ते नराः ॥ ५० ॥ चामराणि प्रयच्छंति देवदेवस्य शूलिनः ॥ चामरैर्वीज्यमानास्ते भविष्यंति जगत्त्रये ॥ ५१ ॥ दीपदानं प्रयच्छंति महादेवालये नराः ॥ तेजस्विनो भविष्यंति ते त्रैलोक्यप्रदीपकाः ॥ ५२ ॥ धूपं ये वै प्रयच्छन्ति शिवाय परमात्मने ॥ यशस्विनो भविष्यंति उद्धरन्ति कुलद्वयम् ॥ ५३ ॥ नैवेद्यं ये प्रयच्छंति भक्त्या हरिहराग्रतः ॥ सिक्थेसिक्थे क्रतुफलं प्राप्नुवंति हि ते नराः ॥ ५४ ॥ भग्नं शिवालयं ये च प्रकुर्वंति[1] नरोत्तमाः ॥ प्राप्नुवंति फलं ते वै द्विगुणं नात्र संशयः ॥ ५५ ॥ नूतनं ये प्रकुर्वंति इष्टकैरश्मनापि वा ॥ स्वर्गे हि ते

१ प्रकुर्वंति—जीर्णोद्धारं प्रकुर्वन्ति—इत्यर्थः ।

CC-0. In Public Domain. Digitization by eGangotri

प्रमोदंते यावत्तिष्ठति निर्मलम् ॥ यशो भूमौ द्विजश्रेष्ठा नात्र कार्या विचारणा ॥ ५६ ॥ कारयंति च ये विप्राः प्रासादं बहुभूमिकम् ॥ शिवस्याथ महाप्राज्ञाः प्राप्नुवंति परां गतिम् ॥ ५७ ॥ शुद्धं धवलितं ये च कुर्वन्ति हरमंदिरम् ॥ स्वीयं परकृतं चापि तेऽपि यांति परां गतिम् ॥ ५८ ॥ वितानं ये प्रयच्छति नराः सुकृतिनोपि हि ॥ तारयंति कुलं कृत्स्नं शिवलोकं गताः पुनः ॥ ५९ ॥ ये च नादमयीं घंटां निबध्नंति शिवालये ॥ तेजस्विनः कीर्तिमंतो भविष्यंति जगत्रये ॥ ६० ॥ एककालं द्विकालं वा त्रिकालं चानुपश्यति ॥ आढ्यो वापि दरिद्रो वा सुखं दुःखात्प्रमुच्यते ॥ ६१ ॥ श्रद्धावान्भजते यो वा शिवाय परमात्मने ॥ कुलकोटिं समुद्धृत्य शिवेन सह मोदते ॥ ६२ ॥ अत्रैवोदाहरंतीममितिहासं पुरातनम् ॥ ऐंद्रद्युम्नेश्च संवादं यमस्य च महात्मनः ॥ ६३ ॥ पुरा कृतयुगे ह्यासीदिन्द्रसेनो नराधिपः ॥ प्रतिष्ठानाधिपो वीरो मृगयारसिकः सदा ॥ ६४ ॥ अब्रह्मण्यः सदा क्रूरः केवलासुतृपः सदा ॥ परप्राणैर्निजप्राणान्पुष्णाति स खलः सदा ॥ ६५ ॥ परस्त्रीलंपटोऽत्यंतं परद्रव्येषु लोलुपः ॥ ब्राह्मणा घातितास्तेन सुरापश्च निरंतरम् ॥ ६६ ॥ गुरुतल्पगतोत्यर्थं सदा सौवर्णतस्करः ॥ तथाभूतानुगाः सर्वे राज्ञस्तस्य दुरात्मनः ॥ ६७ ॥ एवं बहुविधं राज्यं चकार स दुरात्मवान् ॥ ततः कालेन महता पंचत्वं प्राप दुर्मतिः ॥६८॥ तदा यामयैश्च नीतोऽसाविंद्रसेनो दुरात्मवान् ॥ यमान्तिकमनुप्राप्तस्तदा राजा सकल्मषः ॥ ६९ ॥ यमेन दृष्टस्तत्रासाविंद्रसेनोग्रतः स्थितः ॥ अभ्युत्थानपरो भूत्वा ननाम शिरसा शिवम् ॥ ७० ॥ दूतान्संभर्त्सयामास यमो धर्मभृतां वरः ॥ पाशैर्बद्धं चंद्रसेनं मुक्त्वा प्रोवाच धर्मराट् ॥ ७१ ॥ गच्छ पुण्यतमाँल्लोकान्भुंक्ष्व राजन्यसत्तम ॥ यावदिंद्रश्च नाकेऽस्ति यावत्सूर्यो नभस्तले ॥ ७२ ॥ पंचभूतानि यावच्च तावत्त्वं च सुखी भव ॥ सुकृती त्वं महाराज शिवभक्तोऽसि नित्यदा ॥ ७३ ॥ यमस्य वचनं श्रुत्वा इंद्रसेनोभ्यभाषत ॥ अहं शिवं न जानामि मृगयारसिको ह्यहम् ॥ ७४ ॥ तच्छ्रुत्वा वचनं तस्य यमो भाष्यमभाषत ॥ आहर प्रहरस्वेति उक्तं चेदं सदा त्वया ॥ ७५ ॥ तेन कर्मविपाकेन सदा पूतोसि मानद ॥ तस्मात्त्वं गच्छ कैलासं पर्वतं शंकरं प्रति ॥ ७६ ॥ एवं संभाषमाणस्य यमस्य च महात्मनः ॥ आगताः शिवदूतास्ते वृषारूढा महाप्रभाः ॥७७॥ नीलकंठा दशभुजाः पंचवक्त्रास्त्रिलोचनाः ॥ कपर्दिनः कुंडलिनः शशांकांकितमौलयः ॥७८॥ तान्दृष्ट्वा सहसोत्थाय यमो धर्मभृतां वरः ॥ पूजयामास तान्सर्वान्महेंद्रप्रतिमांस्तदा ॥ ७९ ॥ त्वरितेनैव ते सर्वे ऊचुर्वैवस्वतं यमम् ॥ अत्रागतो महाभाग इंद्रसेनोऽमितद्युतिः ॥ नाम्नः प्रवर्त्तको नित्यं रुद्रस्य च महात्मनः ॥८०॥ श्रुत्वा च वचनं तेषां यमेन च पुरस्कृतः ॥ इंद्रसेनो विमानस्थः प्रेषितो हि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शिवालयम् ॥ ८१ ॥ आनीतोयं तदा तैश्च पार्षदप्रवरोत्तमैः ॥ शंभुना हि तदा दृष्ट इंद्रसेनोऽमितद्युतिः ॥ ८२ ॥ अभ्युत्थायागतो रुद्रः परि
ष्वज्य तदा नृपम् ॥ अर्द्धासनगतं कृत्वा इंद्रसेनं ततोऽब्रवीत् ॥ ८३ ॥ किं दातव्यं नृपश्रेष्ठ प्रयच्छामि तवेप्सितम् ॥ इति श्रुत्वा वचस्तस्य
महेशस्य तदा नृपः ॥ आनंदाश्रुकणान्मुंचन्प्रेम्णा नोवाच किंचन ॥ ८४ ॥ तदा कृतो महेशेन पार्षदो हि महात्मना ॥ चंडो नाम्ना
च विख्यातो मुण्डस्य च सखा प्रियः॥८५॥नामोच्चारणमात्रेण रुद्रस्य परमात्मनः॥सिद्धिं प्राप्तो हि पापिष्ठ इद्रसेनो नराधिपः ॥८६॥ हरे हरेति वै
नाम्ना शंभोश्चक्रधरस्य च ॥ रक्षिता बहवो मर्त्याः शिवेन परमात्मना ॥ ८७ ॥ महेशान्नापरो देवो दृश्यते भुवनत्रये ॥ तस्मात्सर्वप्रयत्नेन पूजनीयः
सदाशिवः॥८८॥पत्रैःपुष्पैः फलैर्वापि जलैर्वा विमलैः सदा॥ करवीरैः पूज्यमानः शंकरो वरदो भवेत् ॥८९॥ करवीराद्दशगुणमर्कपुष्पं विशिष्यते॥
विभूत्यादिकृतं सर्वं जगदेतच्चराचरम् ॥ ९० ॥ शिवस्यांगणलग्ना या तस्मात्तां धारयेत्सदा ॥ ततस्त्रिपुंड्रे यत्पुण्यं तच्छृणुध्वं द्विजोत्तमाः ॥ ९१ ॥
सर्वपापहरं पुण्यं तच्छृणुध्वं द्विजोत्तमाः ॥ स्तेनः कोऽपि महापापो घातितो राजदूतकैः ॥ ९२ ॥ तं खादितुं समायातः श्वा शिरस्युपरि स्थितः॥
नखांतरालसंलग्ना रक्षा तस्यैव पापिनः ॥ ९३ ॥ ललाटे पतिता तस्य त्रिपुंड्रांकितमुद्रया ॥ चैतन्येन विना तस्य देहमात्रैकलग्नया ॥ ९४ ॥
कैलासं तस्करो नीतो रुद्रदूतैस्ततस्तदा ॥ विभूतेर्महिमानं तु को विशेषितुमर्हति ॥ ९५ ॥ विभूत्या मंडितांगानां नराणां पुण्यकर्मणाम् ॥
मुखे पंचाक्षरो येषां रुद्रास्ते नात्र संशयः ॥ ९६ ॥ जटाकलापिनो ये च ये रुद्राक्षविभूषणाः ॥ ते वै मनुष्यरूपेण रुद्रा नास्त्यत्र संशयः ॥
॥ ९७ ॥ तस्मात्सदाशिवः पुंभिः पूजनीयो हि नित्यशः ॥ प्रातर्मध्याह्नकाले च सायं संध्या विशिष्यते ॥ ९८ ॥ प्रातस्तु दर्शनाच्छंभोर्नैश
मेनो व्यपोहति ॥ मध्याह्ने दर्शनाच्छंभोः सप्तजन्मार्जितं नृणाम् ॥ पापं प्रणाशमायाति निशायां नैव गण्यते ॥ ९९ ॥ शिवेति द्व्यक्षरं नाम महा
पापप्रणाशनम् ॥ येषां मुखोद्गतं नृणां तैरिदं धार्यते जगत् ॥ १०० ॥ शिवांगणे तु या भेरी स्थापिता पुण्यकर्मभिः ॥ तस्या नादेन पूता वै ये
च पापरता जनाः ॥ पापंडिनोऽप्यसद्वादास्तेऽपि यांति परां गतिम् ॥ १०१ ॥ पशोर्यस्य च संबद्धा चर्मणा च शिवालये ॥ नृभिर्या स्था
पिता भेरी मृदंगमुरजादि च ॥ स पशुः शिवसान्निध्यमाप्नोत्यत्र न संशयः ॥ १०२ ॥ तस्मात्ततं च विततं घनं सुषिरमेव च ॥ चामराणि महा
र्हाणि मंचकाः शयनानि च ॥ १०३ ॥ गाथाश्च इतिहासाश्च गायनं च यथाविधि ॥ बहुरूपादिकं शंभोः प्रियान्येतानि कल्पयेत् ॥ १०४ ॥
कल्पयित्वा च गच्छंति शिवलोकं हि पापिनः ॥ सुधर्माणो महात्मानः शिवपूजाविशारदाः ॥ १०५ ॥ गुरोर्मुखाच्च संप्राप्तशिवपूजारताश्च ये ॥

CC-0. In Public Domain. Digitization by eGangotri

शिवरूपेण ये विश्वं पश्यंति कृतनिश्चयाः ॥ १०६ ॥ सम्यग्बुद्ध्या समाचारा वर्णाश्रमयुता नराः ॥ ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्चान्ये तथा नराः ॥ १०७ ॥ श्वपचोऽपि वरिष्ठः स शंभोः प्रियतरो भवेत् ॥ शंभुनाधिष्ठितं सर्वं जगदेतच्चराचरम् ॥ १०८ ॥ तस्मात्सर्वं शिवमयं ज्ञातव्यं सुविशेषतः ॥ वेदैः पुराणैः शास्त्रैश्च तथौपनिषदैरपि[1] ॥१०९॥ आगमैर्विविधैः शंभुर्ज्ञातव्यो नात्र संशयः ॥ निष्कामैश्च सकामैश्च पूजनीयः सदा शिवः ॥ ११० ॥ ॥ लोमश उवाच ॥ ॥ कथयामि पुरावृत्तमितिहासं पुरातनम् ॥ नंदी नाम पुरा वैश्यो ह्यवंतीपुरमावसत् ॥ १११ ॥ शिवध्यानपरो भूत्वा शिवपूजां चकार सः ॥ नित्यं तपोवनस्थं हि लिंगमेकं समर्चयत् ॥ ११२ ॥ उषस्युषसि चोत्थाय प्रत्यहं शिववल्लभः ॥ नंदी लिंगार्चनरतो बभूवातिशयेन हि ॥ ११३ ॥ लिंगं पंचामृतेनैव यथोक्तेनाभ्यषेचयत् ॥ विप्रैः समावृतो नित्यं वेदवेदांगपारगैः ॥ ११४ ॥ यथाशास्त्रेण विधिना लिंगार्चनपरोऽभवत् ॥ स्नापयित्वा ततः पुष्पैर्नानाश्चर्यसमन्वितैः ॥ ११५ ॥ मुक्ताफलैरिंद्रनीलैर्गोमेदैश्च निरंतरम् ॥ वैडूर्यैश्चैव नीलैश्च माणिक्यैश्च तथार्चयत् ॥ ११६ ॥ एवं नंदी महाभागो बहून्यब्दानि चार्चयत् ॥ विजनस्थं तदा लिंगं नानाभोगसमन्वितम् ॥ ११७ ॥ एकदा मृगयासक्तः किरातो भूतहिंसकः ॥ अविवेकपरो भूत्वा मृगयारसिकः सदा ॥ ११८ ॥ पापी पापसमाचारो विचरन्गिरिकंदरे ॥ अनेकश्वापदाकीर्णे हन्यमान इतस्ततः ॥ ११९ ॥ एवं विचरमाणोऽसौ किरातो भूतहिंसकः ॥ यदृच्छयागतस्तत्र यत्र लिंगं सुपूजितम् ॥ १२० ॥ उदकं वीक्षमाणोऽसौ तृषया पीडितो भृशम् ॥ ततो वने सरः शीघ्रं दृष्ट्वा तोये समाविशत् ॥ १२१ ॥ तीरे संस्थाप्य दुष्टात्मा तत्सर्वं मृगयादिकम् ॥ गंडूषोत्सर्जनं कृत्वा पीत्वा तोयं च निर्गतः ॥ १२२ ॥ शिवालयं ददर्शाग्रे अनेकाश्चर्यमंडितम् ॥ दृष्टं सुपूजितं लिंगं नानारत्नैः पृथक्पृथक् ॥ १२३ ॥ तथा लिंगं समालक्ष्य यदा पूजां समाहरत् ॥ रत्नानि सर्वभूतानि विधूतानि इतस्ततः ॥ १२४ ॥ स्नपनं तस्य लिंगस्य कृतं गंडूषवारिणा ॥ करेणैकेन पूजार्थं बिल्वपत्राणि सोऽर्पयत् ॥ १२५ ॥ द्वितीयेन करेणैव मृगमांसं समर्पयत् ॥ दण्डप्रणामसंयुक्तः संकल्पं मनसाऽकरोत् ॥ १२६ ॥ अद्यप्रभृति पूजां वै करिष्यामि प्रयत्नतः ॥ त्वं मे स्वामी च भक्तोहमद्यप्रभृति शंकर ॥ १२७ ॥ एवं नैयमिको भूत्वा किरातो गृहमागतः ॥ नन्दी ददर्श तत्सर्वं किरातेन इतस्ततः ॥ १२८ ॥ चिंतायुक्तोऽभवन्नंदी जातं किं छिद्रमद्य मे ॥ कथितानि च विघ्नानि शिवपूजारतस्य च ॥ उपस्थितानि तान्येव मम भाग्यविपर्ययात् ॥ १२९ ॥

१ औपनिषदैः—ग्रंथैः—इति विशेष्यमध्याहरणीयम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवं विमृश्य सुचिरं प्रक्षाल्य शिवमंदिरम् ॥ यथागतेन मार्गेण नंदी स्वगृहमागतः ॥ १३० ॥ ततो नंदिनमागत्य पुरोधा गतमानसम् ॥ अब्रवो द्वचनं तं तु कस्मात्त्वं गतमानसः ॥ १३१ ॥ पुरोहितं प्रति तदा नन्दी वचनमब्रवीत् ॥ १३२ ॥ अद्य दृष्टं मया विप्र अमेध्यं शिवसंनिधौ ॥ केनेदं कारितं तत्र न जानामि कथंचन ॥ ॥ १३३ ॥ ततः पुरोधा वचनं नन्दिनं चाब्रवीत्तदा ॥ येन विस्खलितं तत्र रत्नादीनां प्रपूजनम् ॥ सोऽपि मूढो न संदेहः कार्याकार्येषु मंदधीः ॥ १३४ ॥ तस्माच्चिंता न कर्तव्या त्वया अणुरपि प्रभो ॥ प्रभाते च मया सार्द्धं गम्यतां तच्छिवाल यम् ॥ १३५ ॥ निरीक्षणार्थं दुष्टस्य तत्कार्यं विदधाम्यहम् ॥ एतच्छुत्वा तु वचनं नन्दी तस्य पुरोधसः ॥ १३६ ॥ आस्थितः स्वगृहे नक्तं दूयमा नेन चेतसा ॥ तस्यां रात्र्यां व्यतीतायामाहूय च पुरोधसम् ॥ १३७ ॥ गतः शिवालयं नन्दी समं तेन महात्मना ॥ ततो दृष्टं पूर्वदिने कृतं तेन दुरात्मना ॥ १३८ ॥ सम्यक्प्रपूजनं कृत्वा नानारत्नपरिच्छदम् ॥ पञ्चोपचारसंयुक्तं चैकादश्यन्वितं[1] तथा ॥ १३९ ॥ अनेकस्तुतिभिः स्तुत्वा गिरीशं ब्राह्मणैः सह ॥ तदा यामद्वयं जातं स्तूयमानस्य नंदिनः ॥ १४० ॥ आयातो हि महाकालस्तथारूपो महाबलः ॥ कालरूपो महारौद्रो धनुष्पाणिः प्रतापवान् ॥ १४१ ॥ तं दृष्ट्वा भयवित्रस्तो नन्दी स विललाप ह ॥ पुरोधाश्चैव सहसा भयभीतस्तदाभवत् ॥ १४२ ॥ किरातेन कृतं तत्र यथापूर्वमविस्खलम् ॥ तां पूजां प्रपदाहत्य बिल्वपत्रं समर्पयत् ॥१४३॥ स्नपनं तस्य कृत्वा च ततो गंडूषवारिणा ॥ नैवेद्यं तत्पलं चैव किरातः शिवमर्पयत् ॥ १४४ ॥ दण्डवत्पतितो भूमावुत्थाय स्वगृहं गतः ॥ तद्दृष्ट्वा महदाश्चर्यं चिंतयामास वै चिरम् ॥ १४५ ॥ पुरोधसा सह तदा नंदी व्याकुलचेतसा ॥ तेन चाकारिता विप्रा बहवो वेदवादिनः ॥ १४६ ॥ निवेद्य तेषु तत्सर्वं किरातेन च यत्कृतम् ॥ किं कार्यमथ भो विप्राः कथ्य तां च यथातथम् ॥ १४७ ॥ संप्रधार्य ततः सर्वे मिलित्वा धर्मशास्त्रतः ॥ ऊचुः सर्वे तदा विप्रा नंदिनं चातिशंकिनम् ॥ १४८ ॥ इदं विघ्नं समुत्पन्नं दुर्निवार्यं सुरैरपि ॥ तस्मादानय लिंगं त्वं स्वगृहं वैश्यसत्तम ॥ १४९ ॥ तथेति मत्वासौ नंदी शिवस्योत्पाटनं तदा ॥ कृत्वा स्वगृह मानीय प्रतिष्ठाप्य यथाविधि ॥ १५० ॥ सुवर्णपीठिकां कृत्वा नवरत्नसुशोभिताम् ॥ उपचारैरनेकैश्च पूजयामास वै तदा ॥ १५१ ॥ अथापरे द्युरायातः किरातः शिवमंदिरम् ॥ यावद्विलोकयामास लिंगमैशं न दृष्टवान् ॥ १५२ ॥ मौनं विहाय सहसा ह्याक्रोशन्निदमब्रवीत् ॥ हे शंभो क्व ग तोसि त्वं दर्शयात्मानमद्य वै ॥१५३॥ न दृष्टोसि मया त्वं हि त्यजाम्यद्य कलेवरम्॥ हे शंभो हे जगन्नाथ त्रिपुरांतकर प्रभो ॥१५४॥ हे रुद्र हे महादेव

१ एकादश्यन्वितम्—रुद्रैकादशिन्यभिषेकसमन्वितम्—इत्यर्थः ।

CC-0. In Public Domain. Digitization by eGangotri

दर्शयात्मानमात्मना ॥ १५५ ॥ एवं साक्षेपमधुरैर्वाक्यैः क्षितः सदाशिवः ॥ किरातेन ततो रंगैर्वीरोसौ जठरं स्वकम् ॥ १५६ ॥ बिभेदाशु ततो
बाहूनास्फोटचैव रुपाब्रवीत् ॥ हे शंभो दर्शयात्मानं कुतो मां त्यज्य यास्यसि ॥ १५७ ॥ इति क्षित्वा ततोंत्राणि मांससमुकृत्त्य सर्वतः ॥ तस्मिन्गर्ते
करेणैव किरातः सहसाक्षिपत् ॥१५८॥स्वस्थं च हृदयं कृत्वा सस्नौ तत्सरसि ध्रुवम् ॥ तथैव जलमानीय बिल्वपत्रं त्वरान्वितः॥१५९॥पूजयित्वा
यथान्यायं दंडवत्पतितो भुवि ॥ १६० ॥ ध्यानस्थितस्ततस्तत्र किरातः शिवसंनिधौ ॥ प्रादुर्भूतस्तदा रुद्रः प्रमथैः परिवारितः ॥ १६१ ॥
कर्पूरगौरो द्युतिमान्कपर्दी चंद्रशेखरः ॥ तं गृहीत्वा करे रुद्र उवाच परिसांत्वयन् ॥१६२॥ भोभो वीर महाप्राज्ञ मद्भक्तोसि महामते ॥ वरं वृणीष्वात्म
हितं यत्तेऽभिलषितं महत् ॥ १६३ ॥ एवमुक्तः स रुद्रेण महाकालो मुदान्वितः ॥ पपात दंडवद्भूमौ भक्त्या परमया युतः ॥ १६४ ॥ ततो रुद्रं
बभाषे स वरं सम्प्रार्थयाम्यहम् ॥ अहं दासोस्मि ते रुद्र त्वं मे स्वामी न संशयः ॥ १६५ ॥ एतद्बुद्ध्वात्मनो भक्तिं देहि जन्मनिजन्मनि ॥ त्वं
माता च पिता त्वं च त्वं बंधुश्च सखा हि मे ॥ १६६ ॥ त्वं गुरुस्त्वं महामंत्रो मंत्रवेद्योऽसि सर्वदा ॥ तस्मात्त्वदपरं नान्यत्त्रिषु लोकेषु किंचन ॥
॥ १६७ ॥ निष्कामं वाक्यमाकर्ण्य किरातस्य तदा भवः ॥ ददौ पार्षदमुख्यत्वं द्वारपालत्वमेव च ॥ १६८ ॥ तदा डमरुनादेन नादितं भुवन
त्रयम् ॥ भेरीभांकारशब्देन शंखानां निनदेन च ॥ १६९ ॥ तदा दुंदुभयो नेदुः पटहाश्च सहस्रशः ॥ नंदी तं नादमाकर्ण्य विस्मयात्त्वरितो ययौ
॥ १७० ॥ तपोवनं यत्र शिवः स्थितः प्रमथसंवृतः ॥ किरातो हि तथा दृष्टो नंदिना च तदा भृशम् ॥ १७१ ॥ उवाच प्रश्रितो वाक्यं स
नंदी विस्मयान्वितः ॥ किरातं स्तोतुकामोऽसौ परमेण समाधिना ॥ १७२ ॥ इहानीतस्त्वया शंभुस्त्वं भक्तोसि परंतप ॥ त्वं भक्तोऽहमिह
प्राप्तो मां निवेदय शंकरे ॥ १७३ ॥ तच्छ्रुत्वा वचनं तस्य किरातस्त्वरयान्वितः ॥ नंदिनं च करे गृह्य शंकरं समुपागतः ॥ १७४ ॥ प्रहस्य भग
वान्रुद्रः किरातं वाक्यमब्रवीत् ॥ कोऽयं त्वया समानीतो गणानामिह सन्निधौ ॥ १७५ ॥ ॥ किरात उवाच ॥ ॥ विज्ञप्तोऽसौ किरातेन शंकरो
लोकशंकरः ॥ तव भक्तः सदा देव तव पूजारतो ह्यसौ ॥ १७६ ॥ प्रत्यहं रत्नमाणिक्यैः पुष्पैश्चोच्चावचैरपि ॥ जीवितेन धनेनापि पूजितोऽसि न
संशयः ॥ १७७॥ तस्माज्जानीहि मन्मित्रं नंदिनं भक्तवत्सल ॥ १७८ ॥ ॥ महादेव उवाच ॥ ॥ न जानामि महाभाग नंदिनं वैश्यचर्चितम् ॥
त्वं मे भक्तः सखा चेति महाकाल महामते ॥ १७९ ॥ उपाधिरहिता ये च येऽपि चैव मनस्विनः ॥ तेऽतीव मे प्रिया भक्तास्ते विशिष्टा नरोत्त

१ रङ्गैः—नखैः—इत्यर्थोऽत्र प्रकरणात्कथंचिदवगन्तव्यः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

माः ॥ १८० ॥ तव भक्तो ह्यहं तात स च मे प्रियकृत्तरः ॥ तावुभौ स्वीकृतौ तेन पार्षदत्वेन शंभुना ॥१८१॥ ततो विमानानि बहूनि तत्र समा
गतान्येव महाप्रभाणि ॥ किरातवर्येण स वैश्यवर्य उद्धारितस्तेन महाप्रभेण ॥ १८२ ॥ कैलासं पर्वतं प्राप्तौ विमानैर्वेगवत्तरैः ॥ सारूप्यमेव संप्रा
प्तावीश्वरेण महात्मना ॥ १८३ ॥ नीराजितौ गिरिजया शिवेन सहितौ तदा ॥ उवाचेदं ततो देवी प्रहस्य गजगामिनी ॥ १८४ ॥ यथा त्वं हि
महादेव तथा चैतौ न संशयः ॥ स्वरूपेण च गत्या च हास्यभावैः सुपूजितौ ॥१८५॥ मया त्वमेक एवासीः सेवितो वै न संशयः ॥ देव्यास्तद्वचनं
श्रुत्वा किरातो वैश्य एव च ॥ १८६ ॥ सद्यः पराङ्मुखौ भूत्वा शंकरस्य च पश्यतः ॥ भवावस्त्वनुकंप्यौ च भवता हि त्रिलोचन ॥ १८७ ॥
तव द्वारि स्थितौ नित्यं भवावस्ते नमोनमः ॥ १८८ ॥ तयोर्भावं स भगवान्विदित्वा प्रहसन्भवः ॥ उवाच परया भक्त्या भवतोरस्तु वांछितम् ॥
॥ १८९ ॥ तदा प्रभृति तावेतौ द्वारपालौ बभूवतुः ॥ शिवद्वारि स्थितौ विप्रा मध्याह्ने शिवदर्शिनौ ॥ १९० ॥ एको नंदी महाकालो द्वावेतौ
शिववल्लभौ ॥ ऊचतुस्तौ मुदायुक्तावेक एव सदाशिवः ॥ १९१ ॥ एकांगुलिं समुद्धृत्य महादेवोऽभ्यभाषत ॥ तथा नंदी उवाचेदमुद्धृत्य स्वांगुलिद्व
यम् ॥ १९२ ॥ एवं संज्ञान्वितौ द्वारि तिष्ठतस्तौ महात्मनः ॥ शंकरस्य महाभागाः शृण्वंतु ऋषयो ह्यमी ॥ १९३ ॥ शैलादेन पुरा प्रोक्तं शिवध
र्ममनंतकम् ॥ प्राणिनां कृपया विप्राः सर्वेषां दुष्कृतात्मनाम् ॥१९४॥ ये पापिनोऽप्यधर्मिष्ठा अंधा मूकाश्च पंगवः ॥ कुलहीना दुरात्मानः श्वपचा
अपि मानवाः ॥ १९५ ॥ यादृशास्तादृशाश्चान्ये शिवभक्तिपुरस्कृताः ॥ तेऽपि गच्छंति सांनिध्यं देवदेवस्य शूलिनः ॥१९६॥ लिंगं सिकतामयं ये
पूजयंति विपश्चितः ॥ ते रुद्रलोकं गच्छंति नात्र कार्या विचारणा ॥ १९७ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां प्रथमे
माहेश्वरखण्डे केदारखंडे शिवशास्त्रे शिवभक्तिमाहात्म्यवर्णनंनाम पंचमोऽध्यायः ॥ ५ ॥छ॥ ॥ ऋषय ऊचुः ॥ ॥ लिंगे प्रतिष्ठा च कथं शिवं
हित्वा प्रवर्तिता ॥ तत्कथ्यतां महाभाग परं शुश्रूषतां हि नः ॥ १ ॥ ॥ लोमश उवाच ॥ ॥ यदा दारुवने शंभुर्भिक्षार्थं प्राचरत्प्रभुः ॥ २ ॥
दिगंबरो मुक्तजटाकलापो वेदांतवेद्यो भुवनैकभर्ता ॥ स ईश्वरो ब्रह्मकलापधारो योगीश्वराणां परमः परश्च ॥ ३ ॥ अणोरणीयान्महतो मही
यान्महानुभावो भुवनाधिपो महान् ॥ स ईश्वरो भिक्षुरूपी महात्मा भिक्षाटनं दारुवने चकार ॥ ४ ॥ मध्याह्न ऋषयो विप्रास्तीर्थं जग्मुः
स्वकाश्रमात् ॥ तदानीमेव सर्वास्ता ऋषिभार्याः समागताः ॥ ५ ॥ विलोकयंत्यः शंभुं तमाचख्युश्च परस्परम् ॥ कोऽसौ भिक्षुक
रूपोयमागतोऽपूर्वदर्शनः ॥ ६ ॥ अस्मै भिक्षां प्रयच्छामो वयं च सखिभिः सह ॥ तथेति गत्वा सर्वास्ता गृहेभ्य आनयन्मुदा ॥ ७ ॥

CC-0. In Public Domain. Digitization by eGangotri

भिक्षान्नं विविधं श्लक्ष्णं सोपचारं च शक्तितः ॥ प्रदत्तं भिक्षितं तेन देवदेवेन शूलिना ॥ ८ ॥ काचित्प्रियतमं शंभुं बभाषे विस्मयान्विता ॥ को
सि त्वं भिक्षुको भूत्वा आगतोत्र महामते ॥ ९ ॥ ऋषीणामाश्रमं शुद्धं किमर्थं नो निषीदसि ॥ तयोक्तोऽपि तदा शंभुर्बभाषे प्रहसन्निव ॥ १० ॥
ईश्वरोहं सुकेशांते पावनं प्राप्तवानिमम् ॥ ईश्वरस्य वचः श्रुत्वा ऋषिभार्या उवाच तम् ॥ ११ ॥ ईश्वरोऽसि महाभाग कैलासपतिरेव च ॥ एका
किनः कथं देव भिक्षार्थमटनं तव ॥ १२ ॥ एवमुक्तस्तया शंभुः पुनस्तामब्रवीद्वचः ॥ दाक्षायण्या विरहितो विचरामि दिगंबरः ॥ १३ ॥ भिक्षाट
नार्थं सुश्रोणि संकल्परहितः सदा ॥ तया सत्या विना किंचित्स्त्रीमात्रं मम भामिनि ॥ न रोचते विशालाक्षि सत्यं प्रतिवदामि ते ॥ १४ ॥
तस्योक्तं वचनं श्रुत्वा उवाच कमलेक्षणा ॥ स्त्रियो हि सुखसंस्पर्शाः पुरुषस्य न संशयः ॥ १५ ॥ तास्स्त्रियो वर्जिताः शंभो त्वादृशेन विपश्चिता
॥ १६ ॥ इति च प्रमदाः सर्वा मिलिता यत्र शंकरः ॥ भिक्षापात्रं च तच्छंभोः पूरितं च महागुणैः ॥१७॥ अन्नैश्चतुर्विधैः षड्भी रसैश्च परिपूरितम् ॥
यदा शंभुर्गंतुकामः कैलासं पर्वतं प्रति ॥ तदा सर्वा विप्रपत्न्यो ह्यन्वगच्छन्मुदान्विताः ॥ १८ ॥ गृहकार्यं परित्यज्य चेरुस्तद्गतमानसाः ॥
गतासु तासु सर्वासु पत्नीषु ऋषिसत्तमाः ॥ १९ ॥ यावदाश्रममभ्येत्य तावच्छून्यं व्यलोकयन् ॥ परस्परमथोचुस्ते पत्न्यः सर्वाः कुतो गताः ॥ २० ॥
न विदामोऽथ वै सर्वाः केन नष्टेन चाहृताः ॥ एवं विमृश्यमानास्ते विचिन्वंतस्ततस्ततः ॥ २१ ॥ समपश्यंस्ततः सर्वे शिवस्यानुगताश्च ताः ॥
शिवं दृष्ट्वा तु संप्राप्ता ऋषयस्ते रुषान्विताः ॥ २२ ॥ शिवस्याथाग्रतो भूत्वा ऊचुः सर्वे त्वरान्विताः ॥ किं कृतं हि त्वया शंभो विरक्तेन
महात्मना ॥ परदारापहर्त्तासि त्वमृषीणां न संशयः ॥ २३ ॥ एवं क्षिप्तः शिवो मौनी गच्छमानोऽपि पर्वतम् ॥ तदा स ऋषिभिः प्राप्तो
महादेवोऽव्ययस्तथा ॥ यस्मात्कलत्रहर्ता त्वं तस्मात्षंढो भव त्वरम् ॥ २४ ॥ एवं शप्तः स मुनिभिर्लिंगं तस्यापतद्भुवि ॥ भूमिप्राप्तं च तल्लिंगं
ववृधे तरसा महत् ॥ २५ ॥ आवृत्य सप्त पातालान्क्षणाल्लिंगमधोर्ध्वतः ॥ व्याप्य पृथ्वीं समग्रां च अंतरिक्षं समावृणोत् ॥ २६ ॥ स्वर्गाः
समावृताः सर्वे स्वर्गातीतमथाभवत् ॥ न मही न च दिक्चक्रं न तोयं न च पावकः ॥ २७ ॥ न च वायुर्न वाकाशं नाहंकारो न वा महत् ॥
न चाव्यक्तं न कालश्च न महाप्रकृतिस्तथा ॥ २८ ॥ नासीद्द्वैतविभागं च सर्वं लीनं च तत्क्षणात् ॥ यस्माल्लीनं जगत्सर्वं तस्मिँल्लिंगे महात्मनः
॥ २९ ॥ लयनाल्लिंगमित्येवं प्रवदंति मनीषिणः ॥ तथाभूतं वर्द्धमानं दृष्ट्वा तेऽपि सुरर्षयः ॥ ३० ॥ ब्रह्मेंद्रविष्णुवाय्वग्निलोकपालाः सपन्नगाः ॥
विस्मयाविष्टमनसः परस्परमथाब्रुवन् ॥३१॥ किमायामं च विस्तारं क्व चांतः क्व च पीठिका॥इति चिंतान्विता विष्णुमूचुः सर्वे सुरास्तदा ॥३२॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ देवा ऊचुः ॥ ॥ अस्य मूलं त्वया विष्णो पद्मोद्भव च मस्तकम् ॥ युवाभ्यां च विलोक्यं स्यात्स्थाने स्यात्परिपालकौ॥३३॥ श्रुत्वा तु तौ महाभागौ वैकुंठकमलोद्भवौ॥विष्णुर्गतो हि पातालं ब्रह्मा स्वर्गं जगाम ह ॥३४॥स्वर्गं गतस्तदा ब्रह्मा अवलोकनतत्परः ॥ नापश्यत्तत्र लिंगस्य मस्तकं च विचक्षणः ॥ ३५ ॥ तथा गतेन मार्गेण प्रत्यावृत्त्याब्जसंभवः ॥ मेरुपृष्ठमनुप्राप्तः सुरभ्या लक्षितस्ततः ॥ ३६ ॥ स्थिता या केतकीच्छायामुवाच मधुरं वचः॥तस्या वचनमाकर्ण्य सर्वलोकपितामहः॥उवाच प्रहसन्वाक्यं छलोक्त्या सुरभिं प्रति॥३७॥लिंगं महाद्भुतं दृष्टं येन॰ यात्तं जगत्रयम् ॥ दर्शनार्थं च तस्यांतं देवैः संप्रेषितोस्म्यहम् ॥ ३८॥ न दृष्टं मस्तकं तस्य व्यापकस्य महात्मनः ॥ किं वक्ष्येऽहं च देवाग्रे चिंता मे चाति वर्तते ॥ ॥ ३९ ॥ लिंगस्य मस्तकं दृष्टं देवानां च मृषा वदेः ॥ ते सर्वे यदि वक्ष्यंति इंद्राद्या देवतागणाः ॥ ४० ॥ ते संति साक्षिणो देवा अस्मिन्नर्थे वद त्वरम् ॥ अर्थेऽस्मिन्भव साक्षी त्वं केतक्या सह सुव्रते॥४१॥तद्वचः शिरसा गृह्य ब्रह्मणः परमेष्ठिनः॥ केतकीसहिता तत्र सुरभी तदमानयत् ॥४२॥ एवं समागतो ब्रह्मा देवाग्रे समुवाच ह ॥ ४३ ॥ ॥ ब्रह्मोवाच ॥ ॥ लिंगस्य मस्तकं देवा दृष्टवानहमद्भुतम्॥समीचीनं चार्चितं च केतकीदलसंयुतम् ॥ ४४ ॥ विशालं विमलं श्लक्ष्णं प्रसन्नतरमद्भुतम् ॥ रम्यं च रमणीयं च दर्शनीयं महाप्रभम् ॥ ४५ ॥ एतादृशं मया दृष्टं न दृष्टं तद्विना क्वचित् ॥ ब्रह्मणो हि वचः श्रुत्वा सुरा विस्मयमाययुः॥४६॥एवं विस्मयपूर्णास्ते इंद्राद्या देवतागणाः ॥ तिष्ठंति तावत्सर्वेशो विष्णुरध्यात्मदीपकः ॥ ४७॥ पातालादागतः सद्यः सर्वेषामवदत्त्वरम् ॥ तस्याप्यंतो न दृष्टो मे ह्यवलोकनतत्परः ॥ ४८॥ विस्मयो मे महाञ्जातः पातालात्परतश्चरन् ॥ अतलं सुतलं चापि नितलं च रसातलम् ॥४९॥ तथा गतस्तलं चैव पातालं च तथातलम् ॥ तलातलानि तान्येवं शून्यवद्यद्विभाव्यते ॥५०॥ शून्यादपि च शून्यं च तत्सर्वं सुनिरीक्षितम् ॥ न मूलं च न मध्यं च न चांतो ह्यस्य विद्यते ॥ ५१ ॥ लिंगरूपी महादेवो येनेदं धार्यते जगत् ॥ यस्य प्रसादादुत्पन्ना यूयं च ऋषयस्तथा ॥ ५२ ॥ श्रुत्वा सुराश्च ऋषयस्तस्य वाक्यमपूजयन् ॥ तदा विष्णुरुवाचेदं ब्रह्माणं प्रहसन्निव ॥ ५३ ॥ दृष्टं हि चेत्त्वया ब्रह्मन्मस्तकं परमार्थतः ॥ साक्षिणः के त्वया तत्र अस्मिन्नर्थे प्रकल्पिताः ॥ ५४ ॥ आकर्ण्य वचनं विष्णोर्ब्रह्मा लोकपितामहः ॥ उवाच त्वरितेनैव केतकी सुरभीति च ॥ ५५ ॥ ते देवा मम साक्षित्वे जानीहि परमार्थतः ॥ ब्रह्मणो हि वचः श्रुत्वा सर्वे देवास्त्वरान्विताः ॥ ५६ ॥ आह्वानं चक्रिरे तस्याः सुरभ्याश्च तया सह ॥ आगते तत्क्षणादेव कार्यार्थं ब्रह्मणस्तदा ॥ ५७ ॥ इंद्राद्यैश्च तदा देवैरुक्ता च सुरभी ततः ॥ उवाच केतकीसार्द्धं दृष्टो वै ब्रह्मणा सुराः ॥ ५८ ॥ लिंगस्य मस्तको देवाः केतकीदलपूजितः ॥ तदा नभोगता वाणी सर्वेषां

CC-0. In Public Domain. Digitization by eGangotri

शृण्वतामभूत् ॥ ५९ ॥ सुरभ्या चैव यत्प्रोक्तं केतक्या च तथा सुराः ॥ तन्मृषोक्तं च जानीध्वं न दृष्टो ह्यस्य मस्तकः ॥ ६० ॥ तदा सर्वेऽथ विबुधाः सेंद्रा वै विष्णुना सह ॥ शेपुश्च सुरभीं रोषान्मृषावादनतत्पराम् ॥ ६१ ॥ मुखेनोक्तं त्वयाद्यैवमनृतं च तथा शुभे ॥ अपवित्रं मुखं तेऽस्तु सर्वधर्मबहिष्कृतम् ॥ ६२ ॥ सुगंधकेतकी चापि अयोग्या त्वं शिवार्चने ॥ भविष्यसि न संदेहो अनृता चैव भामिनि ॥ ६३ ॥ तदा नभो गता वाणी ब्रह्माणं च शशाप वै ॥ मृषोक्तं च त्वया मंद किमर्थं बालिशेन हि ॥ ६४ ॥ भृगुणा ऋषिभिः साकं तथैव च पुरोधसा ॥ तस्माद्यूयं न पूज्याश्च भवेयुः क्लेशभागिनः ॥ ६५ ॥ ऋषयोऽपि च धर्मिष्ठास्तत्त्ववाक्यबहिष्कृताः ॥ विवादनिरता मूढा अतत्त्वज्ञाः समत्सराः ॥ ६६ ॥ याचकाश्चावदान्याश्च नित्यं स्वज्ञानघातकाः॥ आत्मसंभाविताः स्तब्धाः परस्परविनिंदकाः ॥ ६७ ॥ एवं शप्ताश्च मुनयो ब्रह्माद्या देवतास्तथा॥ शिवेन शप्तास्ते सर्वे लिंगं शरणमाययुः ॥ ६८ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां प्रथमे माहेश्वरखण्डे केदारखण्डे श्रीशिवलिङ्गमाहात्म्ये ब्रह्मादिशापवृत्तान्तवर्णनं नाम षष्ठोऽध्यायः ॥ ६ ॥ छ ॥ ॥ लोमश उवाच ॥ ॥ तदा च ते सुराः सर्व ऋषयोपि भयान्विताः ॥ ईडिरे लिंगमैशं च ब्रह्माद्या ज्ञानविह्वलाः ॥ १ ॥ ॥ ब्रह्मोवाच ॥ ॥ त्वं लिंगरूपी तु महाप्रभावो वेदांतवेद्योसि महात्मरूपी ॥ येनैव सर्वं जगदात्ममूलं कृतं सदानंदपरेण नित्यम् ॥ २ ॥ त्वं साक्षी सर्वलोकानां हर्ता त्वं च विचक्षणः ॥ रक्षणोसि महादेव भैरवोसि जगत्पते ॥ ३ ॥ त्वया लिंगस्वरूपेण व्याप्तमेतज्जगत्त्रयम् ॥ क्षुद्राश्चैव वयं नाथ मायामोहितचेतसः ॥ ४ ॥ अहं सुराऽसुराः सर्वे यक्षगंधर्वराक्षसाः ॥ पन्नगाश्च पिशाचाश्च तथा विद्याधरा ह्यमी ॥ ५ ॥ त्वंहि विश्वसृजां स्रष्टा त्वं हि देवो जगत्पतिः ॥ कर्ता त्वं भुवनस्यास्य त्वं हर्ता पुरुषः परः ॥ ६ ॥ त्राह्यस्माकं महादेव देवदेव नमोऽस्तु ते ॥ एवं स्तुतो हि वै धात्रा लिंगरूपी महेश्वरः ॥ ७ ॥ ऋषयः स्तोतुकामास्ते महेश्वरमकल्मषम् ॥ अस्तुवन्गीर्भिरग्र्याभिः श्रुतिगीताभिरादृताः ॥ ८ ॥ ॥ ऋषय ऊचुः ॥ ॥ अज्ञानिनो वयं कामान्न विंदामोऽस्य संस्थितिम् ॥ त्वं ह्यात्मा परमात्मा च प्रकृतिस्त्वं विभाविनी ॥ ९ ॥ त्वमेव माता च पिता त्वमेव त्वमेव बंधुश्च सखा त्वमेव॥ त्वमीश्वरो वेदविदेकरूपो महानुभावैः परिचिंत्यमानः ॥ १० ॥ त्वमात्मा सर्वभूतानामेको ज्योतिरिवैधसाम् ॥ सर्वं भवति यस्मात्त्वत्तस्मात्सर्वोऽसि नित्यदा ॥ ११ ॥ यस्माच्च संभवत्येतत्तस्माच्छंभुरिति प्रभुः ॥ १२ ॥ त्वत्पादपंकजं प्राप्ता वयं सर्वे सुरादयः ॥ ऋषयो देवगंधर्वा विद्याधरमहोरगाः ॥ १३ ॥ तस्माच्च कृपया शंभो पाह्यस्माञ्जगतः पते ॥ १४ ॥ ॥ महादेव उवाच ॥ ॥ शृणुध्वं तु वचो मेऽद्य क्रियतां च

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

त्वरान्वितैः ॥ विष्णुं सर्वे प्रार्थयंतु त्वरितेन तपोधनाः ॥ १५ ॥ तस्य तद्वचनं श्रुत्वा शंकरस्य महात्मनः ॥ विष्णुं सर्वे नमस्कृत्य ईडिरे च तदा सुराः ॥ १६ ॥ ॥ देवा ऊचुः ॥ ॥ विद्याधराः सुरगणा ऋषयश्च सर्वे त्रातास्त्वयाद्य सकला जगदेकबंधो ॥ तद्वत्कृपाकर जनान्परिपालयाद्य त्रैलोक्यनाथ जगदीश. जगन्निवास ॥ १७ ॥ प्रहस्य भगवान्विष्णुरुवाचेदं वचस्तदा ॥ दैत्यैः प्रपीडिता यूयं रक्षिताश्च पुरा मया ॥ १८ ॥ अद्यैव भयमुत्पन्नं लिंगादस्माच्चिरंतनम् ॥ न शक्यते मया त्रातुमस्माल्लिंगभयात्सुराः ॥ १९ ॥ अच्युतेनैवमुक्तास्ते देवाश्चितान्विताभवन्॥तदा नभोगता वाणी उवाचाश्वास्य वै सुरान्॥२०॥ एतल्लिंगं संवृणुष्व पूजनाय जनार्दन॥पिंडीभूत्वा महाबाहो रक्षस्व सचराचरम्॥ तथेति मत्वा भगवान्वीरभद्रोऽभ्यपूजयत् ॥ २१ ॥ ब्रह्मादिभिः सुरगणैः सहितैस्तदानीं संपूजितः शिवविधानरतो महात्मा ॥ स वीरभद्रः शशिशेखरोऽसौ शिवप्रियो रुद्रसमस्त्रिलोक्याम् ॥ २२ ॥ लिंगस्यार्चनयुक्तोऽसौ वीरभद्रोऽभवत्तदा ॥ तद्रूपस्यैव लिंगस्य येन सर्वमिदं जगत् ॥ २३ ॥ उद्भाति स्थितिमाप्नोति तथा विलयमेति च ॥ तल्लिंगं लिंगमित्याहुर्लयनात्तत्त्ववित्तमाः ॥ २४ ॥ ब्रह्माण्डगोलकैर्व्याप्तं तथा रुद्राक्षभूषितम् ॥ तथा लिंगं महज्जातं सर्वेषां दुरतिक्रमम् ॥ २५ ॥ तदा सर्वेऽथ विबुधा ऋषयो वै महाप्रभाः ॥ तुष्टुवुश्च महालिंगं वेदवादैः पृथक्पृथक् ॥ २६ ॥ अणोरणीयांस्त्वं देव तथा त्वं महतो महान् ॥ तस्मात्त्वया विधातव्यं सर्वैषां[1] लिंगपूजनम् ॥ २७ ॥ तदानीमेव सर्वेण लिंगं च बहुशः कृतम् ॥ सत्ये ब्रह्मेश्वरं लिंगं वैकुण्ठे च सदाशिवः ॥ २८ ॥ अमरावत्यां सुप्रतिष्ठममरेश्वरसंज्ञकम् ॥ वरुणेश्वरं च वारुण्यां याम्यां कालेश्वरं प्रभुम् ॥ २९ ॥ नैर्ऋतेश्वरं च नैर्ऋत्यां वायव्यां पावनेश्वरम् ॥ केदारं मृत्युलोके च तथैव अमरेश्वरम् ॥ ३० ॥ ओंकारं नर्मदायां च महाकालं तथैव च ॥ काश्यां विश्वेश्वरं देवं प्रयागे ललितेश्वरम् ॥ ३१ ॥ त्रियम्बकं ब्रह्मगिरौ कलौ भद्रेश्वरं तथा ॥ द्राक्षारामेश्वरं लिंगं गंगासागरसंगमे ॥ ३२ ॥ सौराष्ट्रे च तथा लिंगं सोमेश्वरमिति स्मृतम् ॥ तथा सर्वेश्वरं विन्ध्ये श्रीशैले शिखरेश्वरम् ॥ कान्त्यामह्यालनाथं च सिंहनाथं च सिंगले ॥ ३३ ॥ विरूपाक्षं तथा लिंगं कोटिशङ्करमेव च ॥ त्रिपुरान्तकं भीमेशममरेश्वरमेव च ॥ ३४ ॥ भोगेश्वरं च पाताले हाटकेश्वरमेव च ॥ एवमादीन्यनेकानि लिंगानि भुवनत्रये ॥ स्थापितानि तदा देवैर्विश्वोपकृतिहेतवे ॥ ३५ ॥ लिंगेशैश्च तथा सर्वैः पूर्णमासीज्जगत्त्रयम् ॥ तथा च वीरभद्रांशाः पूजार्थममरैः कृताः ॥ ॥ ३६ ॥ तत्र विंशतिसंस्कारास्तेषामष्टाधिकाभवन् ॥ कथिताः शंकरेणैव लिंगस्याचनसूचकाः ॥ ३७ ॥ संति रुद्रेण कथिताः शिवधर्म सना

[1] सर्वैषाम्— हे सर्व—एषाम् इति पदच्छेदः । हे सर्व शंकर—एषां देवादीनाम्—देवादिभिः—कर्त्रर्थे षष्ठी । लिंगपूजनं यथा सुकरं भविष्यति तथा—इत्यध्याहरणीयम् । कर्तव्यम्—उ[illegible]कर्तव्यम्—इत्यर्थयाजना [illegible] [illegible]सुधया ।

CC-0. In Public Domain. Digitization by eGangotri

तनाः ॥ वीरभद्रो यथा रुद्रस्तथान्ये गुरवः स्मृताः ॥ ३८ ॥ गुरोर्जाताश्च गुरवो विख्याता भुवनत्रये ॥ लिंगस्य महिमानं तु नन्दी जानाति तत्त्व
तः ॥३९॥ तथा स्कन्दो हि भगवानन्ये ते नामधारकाः ॥ यथोक्ताः शिवधर्मा हि नन्दिना परिकीर्त्तिताः ॥ ४० ॥ शैलादेन महाभागा विचित्रा
लिंगधारकाः ॥ शवस्योपरि लिंगं च ध्रियते च पुरातनैः ॥ ४१ ॥ लिंगेन सह पञ्चत्वं लिंगेन सह जीवितम् ॥ एते धर्माः सुप्रतिष्ठाः शैलादेन
प्रतिष्ठिताः ॥४२॥ धर्मः पाशुपतः श्रेष्ठः स्कन्देन प्रतिपालितः ॥४३॥ शुद्धा पञ्चाक्षरी विद्या प्रासादी[1] तदनन्तरम् ॥ षडक्षरी तथा विद्या प्रासादस्य
च दीपिका ॥४४॥ स्कन्दात्तत्समनुप्राप्तमगस्त्येन महात्मना॥पश्चादाचार्यभेदेन ह्यागमा बहवोऽभवन् ॥ ४५ ॥ किं नु वै बहुनोक्तेन शिव इत्यक्षरद्व
यम् ॥ उच्चारयंति ये नित्यं ते रुद्रा नात्र संशयः ॥४६॥ सतां मार्गं पुरस्कृत्य ये सर्वे ते पुरांतकाः ॥ वीरा माहेश्वरा ज्ञेयाः पापक्षयकरा नृणाम् ॥४७॥
प्रसंगेनानुषंगेण श्रद्धया च यदृच्छया ॥ शिवभक्तिं प्रकुर्वन्ति ये वै ते यांति सद्गतिम् ॥ ४८ ॥ शृणुध्वं कथयामीह इतिहासं पुरातनम् ॥ कृतं
शिवालये यच्च पतंग्या मार्जनं पुरा ॥ ४९ ॥ आगता भक्षणार्थं हि नैवेद्यं केन चार्पितम् ॥ मार्जनं रजसस्तस्याः पक्षाभ्यामभवत्पुरा ॥ ५० ॥
तेन कर्मविपाकेन उत्तमं स्वर्गमागता ॥ भुक्त्वा स्वर्गसुखं चोग्रं पुनः संसारमागता ॥ ५१ ॥ काशिराजसुता जाता सुन्दरीनाम विश्रुता ॥ पूर्वा
भ्यासाच्च कल्याणी बभूव परमा सती ॥ ५२ ॥ उषस्युषसि तन्वंगी शिवद्वाररता सदा ॥ संमार्जनं च कुरुते भक्त्या परमया युता ॥ ५३ ॥ स्वय
मेव तदा देवी सुन्दरी राजकन्यका ॥ तथाभूतां च तां दृष्ट्वा ऋषिरुद्दालकोऽब्रवीत् ॥ ५४ ॥ सुकुमारी सती बाले स्वयमेव कथं शुभे ॥ संमार्जनं
च कुरुषे कन्यके त्वं शुचिस्मिते ॥ ५५ ॥ दासी दास्यश्च बहवः संति देवि तवाग्रतः ॥ तवाज्ञया करिष्यंति सर्वं संमार्जनादिकम् ॥ ५६ ॥
ऋषेस्तद्वचनं श्रुत्वा प्रहस्येदमुवाच ह ॥ ५७ ॥ शिवसेवां प्रकुर्वाणाः शिवभक्तिपुरस्कृताः ॥ ये नराश्चैव नार्य्यश्च शिवलोकं व्रजंति वै ॥ ५८ ॥
संमार्जनं च पाणिभ्यां पद्भ्यां यानं शिवालये ॥ तस्मान्मया च क्रियते संमार्जनमतंद्रितम् ॥ ५९ ॥ अन्यत्किञ्चिन्न जानामि एकं संमार्जनं विना ॥
ऋषिस्तद्वचनं श्रुत्वा मनसा च विमृश्य हि ॥ ६० ॥ अनया किं कृतं पूर्वं केयं कस्य प्रसादतः ॥ तदा ज्ञातं च ऋषिणा तत्सर्वं ज्ञानचक्षुषा ॥
विस्मयेन समाविष्टस्तूष्णींभूतोऽभवत्तदा ॥ ६१ ॥ सविस्मयोऽभूदथ तद्विदित्वा उद्दालको ज्ञानवतां वरिष्ठः ॥ शिवप्रभावं मनसा विचिंत्य ज्ञाना
त्परं बोधमवाप शांतः ॥ ६२ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां प्रथमे माहेश्वरखण्डे केदारखण्डे सप्तमोऽध्यायः॥ ७ ॥छ॥

[1] प्रासादः प्रणवः—इति मन्त्रशास्त्रे प्रणवस्य प्रासादवीजसंज्ञा ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

॥ . ॥ लोमश उवाच ॥ ॥ तस्करोऽपि पुरा ब्रह्मन्सर्वधर्मबहिष्कृतः ॥ ब्रह्मघ्नोऽसौ सुरापश्च सुवर्णस्य च तस्करः ॥ १ ॥ लंपटो हि महापाप उत्तमस्त्रीषु सर्वदा ॥ द्यूतकारी सदा मंदः कितवैः सह संगतः ॥ २ ॥ एकदा क्रीडता तेन हारितं द्यूतमद्भुतम् ॥ कितवैर्मर्द्यमानो हि तदा नोवाच किञ्चन ॥ ३ ॥ पीडितोऽप्यभवत्तूष्णीं तैरुक्तः पापकृत्तमः ॥ द्यूते त्वया च तद्द्रव्यं हारितं किं प्रयच्छसि ॥ ॥ ४ ॥ नो वा तत्कथ्यतां शीघ्रं याथातथ्येन दुर्मते ॥ यद्धारितं प्रयच्छामि रात्रावित्यब्रवीच्च सः ॥ ५ ॥ तैर्मुक्तस्तेन वाक्येन गतास्ते कितवादयः ॥ तदा निशीथसमये गतोऽसौ शिवमंदिरम् ॥ ६ ॥ शिरोधिरुह्य शम्भोश्च घण्टामादातुमुद्यतः ॥ तावत्कैलासशिखरे शंभुः प्रोवाच किंकरान् ॥ ७ ॥ अनेन यत्कृतं चाद्य सर्वेषामधिकं भुवि ॥ सर्वेषामेव भक्तानां वरिष्ठोऽयं च मत्प्रियः ॥ ८ ॥ इति प्रोत्कानयामास वीरभद्रादिभिर्गणैः ॥ ते सर्वे त्वरिता जग्मुः कैलासाच्छिववल्लभात् ॥ ९ ॥ सर्वैर्डमरुनादेन नादितं भुवनत्रयम् ॥ तान्दृष्ट्वा सहसोत्तीर्य तस्करोसौ दुरात्मवान् ॥ लिंगस्य मस्तकात्सद्यः पलायनपरोऽभवत् ॥ १० ॥ पलायमानं तं दृष्ट्वा वीरभद्रः समाह्वयत् ॥ ११ ॥ कस्माद्बिभेषि रे मन्द देवदेवो महेश्वरः ॥ प्रसन्नस्तव जातोद्य उदारचरितो ह्यसौ ॥ १२ ॥ इत्युक्त्वा तं विमाने च कृत्वा कैलासमाययौ ॥ पार्षदो हि कृतस्तेन तस्करो हि महात्मना ॥ १३ ॥ तस्माद्भाव्या शिवे भक्तिः सर्वेषामपि देहिनाम् ॥ पशवोऽपि हि पूज्याः स्युः किं पुनर्मानवा भुवि ॥ १४ ॥ ये तार्किकास्तर्कपरास्तथा मीमांसकाश्च ये ॥ अन्योन्यवादिनश्चान्ये चान्ये वात्मवितर्ककाः ॥१५॥ एकवाक्यं न कुर्वंति शिवार्चनबहिष्कृताः ॥ तर्को हि क्रियते यैश्च ते सर्वे किं शिवं विना ॥ १६ ॥ तथा किं बहुनोक्तेन सर्वेऽपि स्थिरजंगमाः ॥ प्राणिनोऽपि हि जायंते केवलं लिंगधारिणः ॥ १७ ॥ पिण्डीयुक्तं यथा लिंगं स्थापितं च यथाऽभवत् ॥ तथा नरा लिंगयुक्ताः पिण्डीभूतास्तथा स्त्रियः ॥ १८ ॥ शिवशक्तियुतं सर्वं जगदेतच्चराचरम् ॥ तं शिवं मौढ्यतस्त्यक्त्वा मूढाश्चान्यं भजंति ये ॥ १९ ॥ धर्ममात्यंतिकं तुच्छं नश्वरं क्षणभंगुरम् ॥ यो विष्णुः स शिवो ज्ञेयो यः शिवो विष्णुरेव सः ॥ २० ॥ पीठिका विष्णुरूपं स्याल्लिंगरूपी महेश्वरः ॥ तस्माल्लिंगार्चनं श्रेष्ठं सर्वेषामपि वै द्विजाः ॥ २१ ॥ ब्रह्मा मणिमयं लिंगं पूजयत्यनिशं शुभम् ॥ इन्द्रो रत्नमयं लिंगं चन्द्रो मुक्तामयं तथा ॥ २२ ॥ भानुस्ताम्रमयं लिंगं पूजयत्यनिशं शुभम् ॥ रौक्मं लिंगं कुबेरश्च पाशी चारक्तमेव च ॥ २३ ॥ यमो नीलमयं लिंगं राजतं नैर्ऋतस्तथा ॥ काश्मीरं पवनो लिंगमर्चयत्यनिशं विभोः ॥ २४ ॥ एवं ते

CC-0. In Public Domain. Digitization by eGangotri

लिंगिताः सर्वे लोकपालाः सवासवाः ॥ तथा सर्वेऽपि पाताले गंधर्वाः किंनरैः सह ॥ २५ ॥ दैत्यानां[1] वैष्णवाः केचित्प्रह्लादप्रमुखा द्विजाः ॥ तथाहि राक्षसानां च विभीषणपुरोगमाः ॥ २६ ॥ बलिश्च नमुचिश्चैव हिरण्यकशिपुस्तथा ॥ वृषपर्वा वृषश्चैव संह्रादो बाण एव च ॥ २७ ॥ एते चान्ये च बहवः शिष्याः शुक्रस्य धीमतः ॥ एवं शिवार्चनरताः सर्वे ते दैत्यदानवाः ॥२८॥ राक्षसा एव ते सर्वे शिवपूजान्विताः सदा ॥ हेतिः प्रहेतिः संया तिर्विघसः प्रवसस्तथा ॥ २९ ॥ विद्युज्जिह्वस्तीक्ष्णदंष्ट्रो धूम्राक्षो भीमविक्रमः ॥ माली चैव सुमाली च माल्यवानतिभीषणः ॥ ३० ॥ विद्युत्केश स्तडिज्जिह्वो रावणश्च महाबलः ॥ कुंभकर्णो दुराधर्षो वेगदर्शी प्रतापवान् ॥ ३१ ॥ एते हि राक्षसाः श्रेष्ठाः शिवार्चनरताः सदा ॥ लिंगमभ्यर्च्य च सदा सिद्धिं प्राप्ताः पुरा तु ते ॥ ३२ ॥ रावणेन तपस्तप्तं सर्वेषामपि दुःसहम् ॥ तपोधिपो महादेवस्तुतोष च तदा भृशम् ॥ ३३ ॥ वरान्प्राय च्छत तदा सर्वेषामपि दुर्लभान् ॥ ज्ञानं विज्ञानसहितं लब्धं तेन सदाशिवात् ॥ ३४ ॥ अजेयत्वं च संग्रामे द्वैगुण्यं शिरसामपि ॥ पंचवक्त्रो महा देवो दशवक्त्रोऽथ रावणः ॥ ३५ ॥ देवानृषीन्पितॄंश्चैव निर्जित्य तपसा विभुः ॥ महेशस्य प्रसादाच्च सर्वेषामधिकोऽभवत् ॥ ३६ ॥ राजा त्रिकूटा धिपतिर्महेशेन कृतो महान् ॥ सर्वेषां राक्षसानां च परमासनमास्थितः ॥ ३७ ॥ तपस्विनां परीक्षार्थं यद्दषीणां विहिंसनम् ॥ कृतं तेन तदा विप्रा रावणेन तपस्विना ॥ ३८ ॥ अजेयो हि महाञ्जातो रावणो लोकरावणः ॥ सृष्ट्यंतरं कृतं येन प्रसादाच्छंकरस्य च ॥ ३९ ॥ लोकपाला जिता स्तेन प्रतापेन तपस्विना ॥ ब्रह्मापि विजितो येन तपसा परमेण हि ॥ ४० ॥ अमृतांशुकरो भूत्वा जितो येन शशी द्विजाः ॥ दाहकत्वाज्जितो वह्निरीशः कैलासतोलनात् ॥ ४१ ॥ ऐश्वर्येण जितश्चेन्द्रो विष्णुः सर्वगतस्तथा ॥ लिंगार्चनप्रसादेन त्रैलोक्यं च वशीकृतम् ॥ ४२ ॥ तदा सर्वे सुरगणा ब्रह्मविष्णुपुरोगमाः ॥ मेरुपृष्ठं समासाद्य सुमंत्रं चक्रिरे तदा ॥ ४३ ॥ पीडिताः स्मो रावणेन तपसा दुष्करेण वै ॥ गोकर्णाख्ये गिरौ देवाः श्रूयतां परमाद्भुतम् ॥४४॥ साक्षाल्लिंगार्चनं येन कृतमस्ति महात्मना ॥ ज्ञानज्ञेयं ज्ञानगम्यं यद्यत्परममद्भुतम् ॥ तत्कृतं रावणेनैव सर्वेषां दुर तिक्रमम् ॥ ४५ ॥ वैराग्यं परमास्थाय औदार्यं च ततोऽधिकम् ॥ तेनैव ममता त्यक्ता रावणेन महात्मना ॥ ४६ ॥ संवत्सरसहस्राच्च स्वशिरो हि महाभुजः॥कृत्त्वा करेण लिंगस्य पूजनार्थं समर्पयत् ॥४७॥ रावणस्य कबंधं च तदग्रे च समीपतः ॥ योगधारणया युक्तं परमेण समाधिना॥४८॥

१ दैत्यानां मध्ये इति शेषः । ते वैष्णवा अपि प्रह्लादाद्याः शिवलिङ्गं पूजयंत्येव—विभीषणादिसाहचर्येण चैतत्सुस्पष्टमवगम्यते । लिङ्गपूजने पिण्डिकारूपेण विष्णोरपि पूजनस्य सहजसिद्धत्वात् । अतो न वैष्णवानां शिव लिङ्गपूजनपराङ्मुखत्वमुचितमित्याधुनिकैराग्रहग्रस्तैर्वैष्णवैः साधु मनसि विचारणीयम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लिंगे लयं समाधाय कयापि कलया स्थितम् ॥ अन्यच्छिरो विवृश्च्यैवं तेनापि शिवपूजनम् ॥ कृतं नैवान्यमुनिना तथा चैवापरेण हि ॥ ४९ ॥ एवं शिरांस्येव बहूनि तेन समर्पितान्येव शिवार्चनार्थे ॥ भूत्वा कबंधो हि पुनः पुनश्च तदा शिवोऽसौ वरदो बभूव ॥५०॥ मया विनासुरस्तत्र पिंडीभू तेन वै पुरा ॥ वरान्वरय पौलस्त्य यथेष्टं तान्ददाम्यहम् ॥५१॥ रावणेन तदा चोक्तः शिवः परममंगलः ॥ यदि प्रसन्नो भगवन्देयो मे वर उत्तमः ॥ ५२ ॥ न कामयेऽन्यं च वरमाश्रये त्वत्पदांबुजम् ॥ यथा तथा प्रदातव्यं यद्यस्ति च कृपा मयि ॥ ५३ ॥ तदा सदाशिवेनोक्तो रावणो लोकरावणः ॥ मत्प्रसादाच्च सर्वं त्वं प्राप्स्यसे मनसेप्सितम् ॥५४॥ एवं प्राप्तं शिवात्सर्वं रावणेन सुरेश्वराः ॥ तस्मात्सर्वैर्भवद्भिश्च तपसा परमेण हि ॥५५॥ विजेतव्यो रावणोयमिति मे मनसि स्थितम् ॥ अच्युतस्य वचः श्रुत्वा ब्रह्माद्या देवतागणाः ॥ ५६ ॥ चिंतामापेदिरे सर्वे चिरं ते विषयान्विताः ॥ ब्रह्मापि चेंद्रियग्रस्तः सुतां रमितुमुद्यतः ॥ ५७ ॥ इंद्रो हि जारभावाच्च चंद्रो हि गुरुतल्पगः ॥ यमः कदर्यभावाच्च चंचलत्वात्सदागतिः ॥ ५८ ॥ पावकः सर्वभक्षित्वात्तथान्ये देवतागणाः ॥ अशक्ता रावणं जेतुं तपसा च विजृंभितम् ॥ ५९ ॥ शैलादो हि महातेजा गणश्रेष्ठः पुरातनः ॥ बुद्धिमान्नीतिनिपुणो महाबलपराक्रमी ॥ ६० ॥ शिवप्रियो रुद्ररूपी महात्मा ह्युवाच सर्वानथ चेंद्रमुख्यान् ॥ कस्माद्यूयं संभ्रमादागताश्च एतत्सर्वं कथ्यतां विस्तरेण ॥ ६१ ॥ नंदिना च तदा सर्वे पृष्टाः प्रोचुस्त्वरान्विताः ॥ ६२ ॥ ॥ देवा ऊचुः ॥ ॥ रावणेन वयं सर्वे निर्जिता मुनिभिः सह ॥ प्रसादयितुमायाताः शिवं लोकेश्वरेश्वरम् ॥ ६३ ॥ प्रहस्य भगवान्नंदी ब्रह्माणं वै ह्युवाच ह ॥ क्व यूयं क्व शिवः शंभुस्तपसा परमेण हि ॥ द्रष्टव्यो हृदि मध्यस्थः सोऽद्य द्रष्टुं न पार्यते ॥ ६४ ॥ यावद्भावा ह्यनेकाश्च इंद्रियार्थास्तथैव च ॥ यावच्च ममताभावस्तावदीशो हि दुर्लभः ॥६५॥ जितेंद्रियाणां शांतानां तन्निष्ठानां महात्मनाम् ॥ सुलभो लिंगरूपी स्याद्भवतां हि सुदुर्लभः ॥ ६६ ॥ तदा ब्रह्मादयो देवा ऋषयश्च विपश्चितः ॥ प्रणम्य नंदिनं प्राहुः कस्मात्त्वं वानराननः ॥ तत्सर्वं कथयान्यं च रावणस्य तपोबलम् ॥६७॥ ॥ नंदीश्वर उवाच ॥ ॥ कुबेरोऽधिकृतस्तेन शंकरेण महात्मना ॥ धनानामाधिपत्ये च तं द्रष्टुं रावणोऽत्र वै ॥६८॥ आगच्छत्त्वरया युक्तः समारुह्य स्ववाहनम् ॥ मां दृष्ट्वा चाब्रवीत्क्रुद्धः कुबेरो ह्यत्र आगतः ॥ ६९ ॥ त्वया दृष्टोऽथ वात्रासौ कथ्यतामविलंबितम् ॥ किं कार्यं धनदेनाद्य इति पृष्टो मया हि सः ॥ ७० ॥ तदोवाच महातेजा रावणो लोकरावणः ॥ मय्यश्रद्धान्वितो भूत्वा विषयात्मा सुदुर्मदः ॥७१॥ शिक्षापयितुमारब्धो मैवं कार्यमिति प्रभो ॥ यथाहं च श्रिया युक्त आढ्योऽहं बलवानहम् ॥ तथा त्वं भव रे मूढ मा मूढत्वमुपार्जय ॥ ७२ ॥ अहं मूढः कृतस्तेन कुबेरेण महात्मना ॥ मया निराकृतो रोषात्तपस्तेपे स गुह्यकः ॥७३॥

CC-0. In Public Domain. Digitization by eGangotri

कुबेरः स हि नंदिन्किमागतस्तव मंदिरम् ॥ दीयतां च कुबेरोद्य नात्र कार्या विचारणा ॥ ७४ ॥ रावणस्य वचः श्रुत्वा ह्यवोचं त्वरितोऽप्यहम् ॥
लिंगकोसि महाभाग त्वमहं च तथाविधः ॥ ७५ ॥ उभयोः समतां ज्ञात्वा वृथा जल्पसि दुर्मते ॥ यथोक्तः स त्ववादीन्मां वदनार्थे बलोद्धतः ॥
॥ ७६ ॥ यथा भवद्भिः पृष्टोऽहं वदनार्थे महात्मभिः ॥ पुरावृत्तं मया प्रोक्तं शिवार्चनविधेः फलम् ॥ शिवेन दत्तं सारूप्यं न गृहीतं मया तदा ॥७७॥
याचितं च मया शंभोर्वदनं वानरस्य च ॥ शिवेन कृपया दत्तं मम कारुण्यशालिना ॥ ७८ ॥ निराभिमानिनो ये च निर्दंभा निष्परिग्रहाः ॥
शंभोः प्रियास्ते विज्ञेया ह्यन्ये शिवबहिष्कृताः ॥७९॥तथावदन्मया सार्द्धं रावणस्तपसो बलात् ॥ मया च याचितान्येव दश वक्राणि धीमता ॥८०॥
उपहासकरं वाक्यं पौलस्त्यस्य तदा सुराः॥ मया तदा हि शप्तोऽसौ रावणो लोकरावणः॥८१॥ ईदृशान्येव वक्राणि येषां वै संभवंति हि ॥ तैः समेतो
यदा कोऽपि नरवर्यो महातपाः ॥ मां पुरस्कृत्य सहसा हनिष्यति न संशयः ॥ ८२ ॥ एवं शप्तो मया ब्रह्मन्रावणो लोकरावणः ॥ अर्चितं केवलं
लिंगं विना तेन महात्मना ॥ ८३ ॥ पीठिकारूपसंस्थेन विना तेन सुरोत्तमाः ॥ विष्णुना हि महाभागास्तस्मात्सर्वं विधास्यति ॥ ८४ ॥ देवदेवो
महादेवो विष्णुरूपी महेश्वरः ॥ सर्वे यूयं प्रार्थयंतु विष्णुं सर्वगुहाशयम् ॥ ८५ ॥ अहं हि सर्वदेवानां पुरोवर्ती भवाम्यतः ॥ ते सर्वे नंदिनो वाक्यं
श्रुत्वा मुदितमानसाः ॥ वैकुंठमागता गीर्भिर्विष्णुं स्तोतुं प्रचक्रिरे ॥ ८६ ॥ ॥ देवा ऊचुः ॥ ॥ नमो भगवते तुभ्यं देवदेव जगत्पते ॥
त्वदाधारमिदं सर्वं जगदेतच्चराचरम् ॥ ८७ ॥ एतल्लिंगं त्वया विष्णो धृतं वै पिण्डिरूपिणा ॥ महाविष्णुस्वरूपेण घातितौ मधुकैटभौ ॥ ८८ ॥
तथा कमठरूपेण धृतो वै मंदराचलः ॥ वराहरूपमास्थाय हिरण्याक्षो हतस्त्वया ॥ ८९ ॥ हिरण्यकशिपुर्दैत्यो हतो नृहरिरूपिणा ॥
त्वया चैव बलिर्बद्धो दैत्यो वामनरूपिणा ॥ ९० ॥ भृगूणामन्वये भूत्वा कृतवीर्यात्मजो हतः ॥ इतोप्यस्मान्महाविष्णो तथैव परिपा
लय ॥ ९१ ॥ रावणस्य भयादस्मात्त्रातुं भूयोर्हसि त्वरम् ॥ ९२ ॥ एवं संप्रार्थितो देवैर्भगवान्भूतभावनः ॥ उवाच च सुरान्सर्वान्वासुदेवो
जगन्मयः ॥ ९३ ॥ हे देवाः श्रूयतां वाक्यं प्रस्तावसदृशं महत् ॥ शैलादिं च पुरस्कृत्य सर्वे यूयं त्वरान्विताः ॥ अवतारान्प्रकुर्वन्तु वानरीं
तनुमाश्रिताः ॥ ९४ ॥ अहं हि मानुषो भूत्वा ह्यज्ञानेन समावृतः ॥ संभविष्याम्ययोध्यायां गृहे दशरथस्य च ॥ ब्रह्मविद्यासहायोस्मि भवतां
कार्यसिद्धये ॥ ९५ ॥ जनकस्य गृहे साक्षाद्ब्रह्मविद्या जनिष्यति ॥ भक्तो हि रावणः साक्षाच्छिवध्यानपरायणः ॥ ९६ ॥ तपसा महता युक्तो ब्रह्म
विद्यां यदेच्छति ॥ तदा सुसाध्यो भवति पुरुषो धर्मनिर्जितः ॥ ९७ ॥ एवं संभाष्य भगवान्विष्णुः परममङ्गलः ॥ वाली चेन्द्रांशसंभूतः सुग्रीवो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शुमतः सुतः ॥ ९८ ॥ तथा ब्रह्मांशसंभूतो जाम्बवान्नृक्षकुञ्जरः ॥ शिलादतनयो नंदी शिवस्यानुचरः प्रियः ॥ ९९ ॥ यो वै चैकादशो रुद्रो हनूमान्स[1]महाकपिः ॥ अवतीर्णः सहायार्थं विष्णोरमिततेजसः ॥ १०० ॥ मैंदादयोऽथ कपयस्ते सर्वे सुरसत्तमाः ॥ एवं सर्वे सुरगणा अवतेरुर्यथा तथम् ॥ १०१ ॥ तथैव विष्णुरुत्पन्नः कौशल्यानंदवर्द्धनः ॥ विश्वस्य रमणाच्चैव राम इत्युच्यते बुधैः ॥ १०२ ॥ शेषोपि भक्त्या विष्णोश्च तपसाऽवातरद्भुवि ॥ १०३ ॥ दोर्दण्डावपि विष्णोश्च अवतीर्णौ प्रतापिनौ ॥ शत्रुघ्नभरताख्यौ च विख्यातौ भुवनत्रये ॥ १०४ ॥ मिथिलाधिपतेः कन्या या उक्ता ब्रह्मवादिभिः ॥ सा ब्रह्मविद्यावतरत्सुराणां कार्य्यसिद्धये ॥ सीता जाता लांगलस्य इयं भूमिविकर्षणात् ॥ १०५ ॥ तस्मात्सीतेति विख्याता विद्या सान्वीक्षिकी तदा ॥ मिथिलायां समुत्पन्ना मैथिलीत्यभिधीयते ॥ १०६ ॥ जनकस्य कुले जाता विश्रुता जनकात्मजा ॥ ख्याता वेदवती पूर्वं ब्रह्मविद्याघनाशिनी ॥ १०७ ॥ सा दत्ता जनकेनैव विष्णवे परमात्मने ॥ १०८ ॥ तयाथ विद्यया सार्द्धं देवदेवो जगत्पतिः ॥ उग्रे तपसि लीनोऽसौ विष्णुः परममङ्गलः ॥ १०९ ॥ रावणं जेतुकामो वै रामो राजीवलोचनः ॥ अरण्यवासमकरोद्देवानां कार्यसिद्धये ॥ ॥ ११० ॥ शेषावतारोऽपि महांस्तपः परमदुष्करम् ॥ तताप परया शक्त्या देवानां कार्यसिद्धये ॥ १११ ॥ शत्रुघ्नो भरतश्चैव तेपतुः परमं तपः ॥ ११२ ॥ ततोऽसौ तपसा युक्तः सार्द्धं तैर्देवतागणैः ॥ सगणं रावणं रामः षड्भिर्मासैरजीहनत् ॥ विष्णुना घातितः शस्त्रैः शिवसारूप्यमाप्तवान् ॥ ॥ ११३ ॥ सगणः स पुनः सद्यो बंधुभिः सह सुव्रताः ॥ ११४ ॥ शिवप्रसादात्सकलं द्वैताद्वैतमवाप ह ॥ द्वैताद्वैतविवेकार्थमृषयोप्यत्र मोहिताः ॥ तत्सर्वं प्राप्नुवंतीह शिवार्चनरता नराः ॥ ११५ ॥ येऽर्चयंति शिवं नित्यं लिंगरूपिणमेव च ॥ स्त्रियो वाप्यथ वा शूद्राः श्वपचा ह्यंत्य वासिनः ॥ तं शिवं प्राप्नुवंत्येव सर्वदुःखोपनाशनम् ॥ ११६ ॥ पशवोऽपि परं याताः किं पुनर्मानुषादयः ॥ ११७ ॥ ये द्विजा ब्रह्मचर्येण तपः परममास्थिताः ॥ वर्षैरनेकैर्यज्ञानां तेऽपि स्वर्गपरा भवन् ॥ ११८ ॥ ज्योतिष्टोमो वाजपेयो ह्यतिरात्रादयो ह्यमी ॥ यज्ञाः स्वर्गं प्रयच्छंति सत्रिणां नात्र संशयः ॥ ११९ ॥ तत्र स्वर्गसुखं भुक्त्वा पुण्यक्षयकरं महत् ॥ पुण्यक्षयेऽपि यज्वानो मर्त्यलोकं पतंति वै ॥ १२० ॥ पतितानां च संसारे दैवाद्बुद्धिः प्रजायते ॥ गुणत्रयमयी विप्रास्तासुतास्त्विह योनिषु ॥ १२१ ॥ यथा सत्त्वं संभवति सत्त्वयुक्तभवं नराः ॥ राजसाश्च तथा ज्ञेयास्ता मसाश्चैव ते द्विजाः ॥ १२२ ॥ एवं संसारचक्रेऽस्मिन्भ्रमिता बहवो जनाः ॥ यदृच्छया दैवगत्या शिवं संसेवते नरः ॥ १२३ ॥ शिवध्यानप

---

१ अडभाव आर्षः ।

.CC-0. In Public Domain. Digitization by eGangotri

राणां च नराणां यतचेतसाम् ॥ मायानिरसनं सद्यो भविष्यति न चान्यथा ॥ १२४ ॥ मायानिरसनात्सद्यो नश्यत्येव गुणत्रयम् ॥ यदा गुणत्रयातीतो भवतीति स मुक्तिभाक् ॥ १२५ ॥ तस्माल्लिङ्गार्चनं भाव्यं सर्वेषामपि देहिनाम् ॥ लिङ्गरूपी शिवो भूत्वा त्रायते सचराचरम् ॥ ॥ १२६ ॥ पुरा भवद्भिः पृष्टोऽहं लिङ्गरूपी कथं शिवः ॥ तत्सर्वं कथितं विप्रा याथातथ्येन संप्रति ॥ १२७ ॥ कथं गरं भक्षितवाञ्छिवो लोकमहेश्वरः ॥ तत्सर्वं श्रूयतां विप्रा यथावत्कथयामि वः ॥ १२८ ॥ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां प्रथमे माहेश्वरखण्डे केदारखंडे शिवशास्त्रे शिवलिङ्गार्चनमाहात्म्यकथने श्रीरामावतारकथावर्णनंनामाष्टमोऽध्यायः ॥ ८ ॥ छ ॥ ॥ लोमश उवाच ॥ ॥ एकदा तु सभामध्य आस्थितो देवराट् स्वयम् ॥ लोकपालैः परिवृतो देवैश्च ऋषिभिस्तथा ॥ १ ॥ अप्सरोगणसंवीतो गंधर्वैश्च पुरस्कृतः ॥ उपगीयमानविजयः सिद्धविद्याधरैरपि ॥ २ ॥ तदा शिष्यैः परिवृतो देवराजगुरुः सुधीः ॥ आगतोऽसौ महाभागो बृहस्पतिरुदारधीः ॥ ३ ॥ तं दृष्ट्वा सहसा देवाः प्रणेमुः समुपस्थिताः ॥ इंद्रोपि ददृशे तत्र प्राप्तं वाचस्पतिं तदा ॥ ४ ॥ नोवाच किंचिद्दुर्मेधा वचो मानपुरःसरम् ॥ नाह्वानं नासनं तस्य न विसर्जनमेव च ॥ ५ ॥ शक्रं प्रमत्तं ज्ञात्वाथ मदाद्राज्यस्य दुर्मतिम् ॥ तिरोधानमनुप्राप्तो बृहस्पती रुषान्वितः ॥ ६ ॥ गते देवगुरौ तस्मिन्विमनस्काऽभवन्सुराः ॥ यक्षा नागाः सगंधर्वा ऋषयोऽपि तथा द्विजाः ॥ ७ ॥ गांधर्वस्यावसाने तु लब्धसंज्ञो हरिः सुरान् ॥ पप्रच्छ त्वरितेनैव क्व गतो हि महातपाः ॥ ८ ॥ तदैव नारदेनोक्तः शक्रो देवाधिपस्तथा ॥ त्वया कृता ह्यवज्ञा च गुरोर्नास्त्यत्र संशयः ॥ ९ ॥ गुरोरवज्ञया राज्यं गतं ते बलसूदन ॥ तस्मात्क्षमापनीयोऽसौ सर्वभावेन हि त्वया ॥ १० ॥ एतच्छ्रुत्वा वचस्तस्य नारदस्य महात्मनः ॥ आसनात्सहसोत्थाय तैः सर्वैः परिवारितः ॥ आगच्छत्त्वरया शक्रो गुरोर्गेहमतंद्रितः ॥ ११ ॥ पृष्ट्वा तारां प्रणम्यादौ क्व गतो हि महातपाः ॥ न जानामीत्युवाचेदं तारा शक्रं निरीक्षती ॥ १२ ॥ तदा चिंतान्वितो भूत्वा शक्रः स्वगृहमाव्रजत् ॥ एतस्मिन्नंतरे स्वर्गे ह्यनिष्टान्यद्भुतानि च ॥ १३ ॥ अभवन्सर्वदुःखार्थे शक्रस्य च महात्मनः ॥ पातालस्थेन बलिना ज्ञातं शक्रस्य चेष्टितम् ॥ १४ ॥ ययौ दैत्यैः परिवृतः पातालादमरावतीम् ॥ तदा युद्धमतीवासीद्देवानां दानवैः सह ॥१५॥ देवाः पराजिता दैत्यै राज्यं शक्रस्य तत्क्षणात् ॥ संप्राप्तं सकलं तस्य मूढस्य च दुरात्मनः ॥ १६ ॥ नीतं सर्वप्रयत्नेन पातालं त्वरितं गताः ॥ शुक्रप्रसादात्ते सर्वे तथा विजयिनोऽभवन् ॥ १७ ॥ शक्रोऽपि निःश्रिको जातो देवैस्त्यक्तस्ततो भृशम् ॥ देवी तिरोधानगता बभूव कमलेक्षणा ॥ १८ ॥ ऐरावतो महानागस्तथैवोच्चैःश्रवा हयः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवमादीनि रत्नानि अनेकानि बहून्यपि ॥ नीतानि सहसा दैत्यैर्लोभादसाधुवृत्तिभिः ॥ १९ ॥ पुण्यभांजि च तान्येव पतितानि च सागरे ॥
तदा स विस्मयाविष्टो बलिराह गुरुं प्रति ॥ २० ॥ देवान्निर्जित्य चास्माभिरानीतानि बहूनि च ॥ रत्नानि तु समुद्रेऽथ पतितानि तदद्भुतम्
॥ २१ ॥ बलेस्तद्वचनं श्रुत्वा उशना प्रत्युवाच तम् ॥ अश्वमेधशतेनैव सुरराज्यं भविष्यति ॥ दीक्षितस्य न संदेहस्तस्माद्वोक्ता स एव च ॥ २२ ॥
अश्वमेधं विना किंचित्स्वर्गं भोक्तुं न पार्यते ॥ २३ ॥ गुरोर्वचनमाज्ञाय तूष्णींभूतो बलिस्ततः ॥ बभूव देवैः सार्द्धं च यथोचितमकारयत् ॥२४॥
इन्द्रोपि शोच्यतां प्राप्तो जगाम परमेष्ठिनम् ॥ विज्ञापयामास तथा सर्वं राज्यभयादिकम् ॥ २५ ॥ शक्रस्य वचनं श्रुत्वा परमेष्ठी उवाच ह ॥
॥ २६ ॥ संमिलित्वा सुरान्सर्वांस्त्वया साकं त्वरान्विताः ॥ आराधनार्थं गच्छामो विष्णुं सर्वेश्वरेश्वरम् ॥ २७ ॥ तथेति गत्वा ते सर्वे शक्राद्या
लोकपालकाः ॥ ब्रह्माणं च पुरस्कृत्य तटं क्षीरार्णवस्य च ॥ प्राप्योपविश्य ते सर्वे हरिं स्तोतुं प्रचक्रमुः ॥ २८ ॥ ॥ ब्रह्मोवाच ॥ ॥ देवदेव
जगन्नाथ सुरासुरनमस्कृत ॥ पुण्यश्लोकाव्ययानंत परमात्मन्नमोऽस्तु ते ॥ २९ ॥ यज्ञोऽसि यज्ञरूपोऽसि यज्ञांगोऽसि रमापते ॥ ततोऽद्य कृपया
विष्णो देवानां वरदो भव ॥ ३० ॥ गुरोरवज्ञया चाद्य भ्रष्टराज्यः शतक्रतुः ॥ जातः सुरर्षिभिः साकं तस्मादेनं समुद्धर ॥ ३१ ॥ ॥ श्रीभगवा
नुवाच ॥ ॥ गुरोरवज्ञया सर्वं नश्यतीति किमद्भुतम् ॥ ये पापिनो ह्यधर्मिष्ठाः केवलं विषयात्मकाः ॥ पितरौ निंदितौ यैश्च निर्देवा [illegible] न
संशयः ॥ ३२ ॥ अनेन यत्कृतं ब्रह्मन्सद्यस्तत्फलमागतम् ॥ कर्मणा चास्य शक्रस्य सर्वेषां संकटागमः ॥ ३३ ॥ विपरीतो यदा कालः पुरुषस्य
भवेत्तदा ॥ भूतमैत्रीं प्रकुर्वंति सर्वकार्यार्थसिद्धये ॥ ३४ ॥ तेन वै कारणेनेंद्र मदीयं वचनं कुरु ॥ कार्यहेतोस्त्वया कार्यो दैत्यैः सह समागमः ॥
॥ ३५ ॥ एवं भगवतादिष्टः शक्रः परमबुद्धिमान् ॥ अमरावतीं ययौ हित्वा सुतलं दैवतैः सह ॥ ३६ ॥ इन्द्रं समागतं श्रुत्वा इंद्रसेनो रुषान्वितः ॥
बभूव सह सैन्येन हंतुकामः पुरंदरम् ॥ ३७ ॥ नारदेन तदा दैत्या बलिश्च बलिनां वरः ॥ निवारितस्तद्वधाच्च वाक्यैरुच्चावचैस्तथा ॥ ३८ ॥
ऋषेस्तस्यैव वचनात्त्यक्तमन्युर्बलिस्तदा ॥ बभूव सह सैन्येन आगतो हि शतक्रतुः ॥ ३९ ॥ इन्द्रसेनेन दृष्टोऽसौ लोकपालैः समावृतः ॥
उवाच त्वरया युक्तः प्रहसन्निव दैत्यराट् ॥ ४० ॥ कस्मादिहागतः शक्र सुतलं प्रति कथ्यताम् ॥ तस्यैतद्वचनं श्रुत्वा स्मयमान उवाच
तम् ॥ ४१ ॥ वयं कश्यपदायादा यूयं सर्वे तथैव च ॥ यथा वयं तथा यूयं विग्रहो हि निरर्थकः ॥ ४२ ॥ मम राज्यं क्षणेनैव नीतं
दैववशात्त्वया ॥ तथा ह्येतानि तान्येव रत्नानि सुबहून्यपि ॥ गतानि तत्क्षणादेव यत्नानीतानि वै त्वया ॥ ४३ ॥ तस्माद्विमर्शः कर्तव्यः

CC-0. In Public Domain. Digitization by eGangotri

पुरुषेण विपश्चिता ॥ विमर्शाज्जायते ज्ञानं ज्ञानान्मोक्षो भविष्यति ॥ ४४ ॥ किं तु मे बत उक्तेन जाने न च तवाग्रतः ॥ शरणार्थी ह्यहं प्राप्तः सुरैः सह तवांतिकम् ॥ ४५ ॥ एतच्छ्रुत्वा तु शक्रस्य वाक्यं वाक्यविदां वरः ॥ प्रहस्योवाच मतिमाञ्छक्रं प्रति विदां वरः ॥ ४६ ॥ त्वमागतोसि देवेंद्र किमर्थं तन्न वेद्म्यहम् ॥ ४७ ॥ शक्रस्तद्वचनं श्रुत्वा ह्यश्रुपूर्णाकुलेक्षणः ॥ किंचिन्नोवाच तत्रैनं नारदो वाक्यमब्रवीत् ॥ ४८ ॥ बले त्वं किं न जानासि कार्याकार्यविचारणाम् ॥ धर्मो हि महतामेष शरणागतपालनम् ॥ ४९ ॥ शरणागतं च विप्रं च रोगिणं वृद्धमेव च ॥ य एतान्न च रक्षंति ते वै ब्रह्महणो नराः ॥ ५० ॥ शरणागतशब्देन आगतस्तव सन्निधौ ॥ संरक्षणाय योग्यश्च त्वया नास्त्यत्र संशयः ॥ एवमुक्तो नारदेन तदा दैत्यपतिः स्वयम् ॥ ५१ ॥ विमृश्य परया बुद्ध्या कार्याकार्यविचारणाम् ॥ शक्रं प्रपूजयामास बहुमानपुरःसरम् ॥ लोकपालैः समेतं च तथा सुरगणैः सह ॥ ५२ ॥ प्रत्ययार्थं च सत्त्वानि ह्यनेकानि व्रतानि वै ॥ बलिप्रत्ययभूतानि स चकार पुरंदरः ॥ ५३ ॥ एवं स समयं कृत्वा शक्रः स्वार्थपरायणः ॥ बलिना सह चावात्सीदर्थशास्त्रपरो महान् ॥ ५४ ॥ एवं निवसतस्तस्य सुतलेऽपि शतक्रतोः ॥ वत्सरा बहवो ह्यासंस्तदा बुद्धिमकल्पयत् ॥ संस्मृत्य वचनं विष्णोर्विमृश्य च पुनःपुनः ॥ ५५ ॥ एकदा तु सभामध्य आसीनो देवराट्स्वयम् ॥ उवाच प्रहसन्वाक्यं बलिमुद्दिश्य नीतिमान् ॥ ५६ ॥ प्राप्तव्यानि त्वया वीर अस्माकं च त्वया बले ॥ गजादीनि बहून्येव रत्नानि विविधानि च ॥ ५७ ॥ गतानि तत्क्षणादेव सागरे पतितानि वै ॥ प्रयत्नो हि प्रकर्तव्यो ह्यस्माभिस्त्वरयान्वितैः ॥ ५८ ॥ तेषां चोद्धरणे दैत्य रत्नानामिह सागरात् ॥ तर्हि निर्मथनं कार्यं भवता कार्यसिद्धये ॥ ५९ ॥ बलिः प्रवर्तितस्तेन शक्रेण सुरसूदनः ॥ उवाच शक्रं त्वरितः केनेदं मथनं भवेत् ॥ ६० ॥ तदा नभोगता वाणी मेघगंभीरनिःस्वना ॥ उवाच देवा दैत्याश्च मंथध्वं क्षीरसागरम् ॥ ६१ ॥ भवतां बलवृद्धिश्च भविष्यति न संशयः ॥ ६२ ॥ मंदरं चैव मंथानं रज्जुं कुरुत वासुकिम् ॥ पश्चाद्देवाश्च दैत्याश्च मेलयित्वा विमथ्यताम् ॥ ६३ ॥ नभोगतां च तां वाणीं निशम्याथ तदा सुराः ॥ दैत्यैः सार्द्धं ततः सर्वं उद्यमं चक्रुरुद्यताः ॥ ६४ ॥ पातालान्निर्गताः सर्वे तदा तेऽथ सुरासुराः ॥ आजग्मुरतुलं सर्वे मंदरं पर्वतोत्तमम् ॥ ६५ ॥ दैत्याश्च कोटिसंख्याकास्तथा देवा न संशयः ॥ उंद्युक्ताः सहसा प्राऽयुर्मंदरं कनकप्रभम् ॥ ६६ ॥ सरत्नं वर्तुलाकारं स्थूलं चैव महाप्रभम् ॥ अनेकरत्नसंवीतं नानाद्रुमनिषेवितम् ॥६७॥ चंदनैः पारिजातैश्च नागपुन्नागचंपकैः ॥ नानामृगगणाकीर्णं सिंहशार्दूलसेवितम् ॥ ६८ ॥ एवंविधं

१ इदं सर्वं पद्यं पुनरुक्तमिवाभाति । तथाऽपि पाठक्रमस्य विभिन्नत्वेन मूले परिगृहीतमतो न दुष्यतीत्यवधेयम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

महाशैलं दृष्ट्वा ते सुरसत्तमाः ॥ ऊचुः प्रांजलयः सर्वे तदा ते सुरसत्तमाः ॥ ६९ ॥ ॥ देवा ऊचुः ॥ ॥ अद्रे सुरा वयं सर्वे विज्ञप्तुमिह चागताः ॥ तच्छृणुष्व महाशैल परेषामुपकारकः ॥७०॥ एवमुक्तस्तदा शैलो देवैर्दैत्यैः स मंदरः ॥ उवाच निःसृतो भूत्वा परं विग्रहवान्वचः ॥ ७१ ॥ तेन रूपेण रूपी स पर्वतो मंदराचलः ॥ किमर्थमागताः सर्वे मत्समीपं तदुच्यताम् ॥ ७२ ॥ तदा बलिरुवाचेदं प्रस्तावसदृशं वचः ॥ इंद्रोपि त्वरया युक्तो बभाषे सूनृतं वचः ॥ ७३ ॥ अस्माभिः सह कार्यार्थे भव त्वं मंदराचल ॥ अमृतोत्पादनार्थे त्वं मंथानं भव सुव्रत ॥ ७४ ॥ तथेति मत्वा तद्वाक्यं देवानां कार्यसिद्धये ॥ ऊचे देवासुरांश्चेदमिन्द्रं प्रति विशेषतः ॥ ७५ ॥ छेदितौ च त्वया पक्षौ वज्रेण शतपर्वणा ॥ गंतुं कथं समर्थोऽहं भवतां कार्यसिद्धये ॥ ७६ ॥ तदा देवासुराः सर्वे स्तूयमाना महाचलम् ॥ उत्पाटयेयुरतुलं मंदरं च ततोद्धतम् ॥ ७७ ॥ क्षीरार्णवं नेतुकामा ह्यशक्तास्ते ततोऽभवन् ॥ पर्वतः पतितः सद्यो देवदैत्योपरि ध्रुवम् ॥ ७८ ॥ केचिद्भग्ना मृताः केचित्केचिन्मूर्छापरा भवन् ॥ परीवादरताः केचित्केचित्क्लेशत्वमागताः ॥ ७९ ॥ एवं भग्नोद्यमा जाता असुराः सुरदानवाः ॥ चेतनां परमां प्राप्तास्तुष्टुवुर्जगदीश्वरम् ॥ ८० ॥ रक्षरक्ष महाविष्णो शरणागतवत्सल ॥ त्वया ततमिदं सर्वं जंगमाजंगमं च यत् ॥ ८१ ॥ देवानां कार्यसिद्ध्यर्थं प्रादुर्भूतो हरिस्तदा ॥ तान्दृष्ट्वा सहसा विष्णुर्गरुडोपरि संस्थितः ॥ ८२ ॥ लीलया पर्वतश्रेष्ठमुत्तभ्यारोपयत्क्षणात् ॥ गरुत्मति तदा देवः सर्वेषामभयं ददौ ॥ ८३ ॥ तत उत्थाय तान्देवान्क्षीरोदस्योत्तरं तटम् ॥ नीत्वा तं पर्वतं वृद्धं निक्षिप्याप्सु ततो ययौ ॥ ८४ ॥ तदा सर्वे सुरगणाः स्वागत्य असुरैः सह ॥ वासुकिं च समादाय चक्रिरे समयं च तम् ॥ ८५ ॥ मंथानं मंदरं चैव वासुकिं रज्जुमेव च ॥ कृत्वा सुराऽसुराः सर्वे ममंथुः क्षीरसागरम् ॥ ८६ ॥ क्षीराब्धेर्मथ्यमानस्य पर्वतो हि रसातलम् ॥ गतः स तत्क्षणादेव कूर्मो भूत्वा रमापतिः ॥ उद्धृतस्तत्क्षणादेव तदद्भुतमिवाभवत् ॥ ८७ ॥ भ्राम्यमाणस्ततः शैलो नोदितः सुरदानवैः ॥ भ्रममाणो निराधारो बोधश्चेव गुरुं विना ॥ ८८ ॥ परमात्मा तदा विष्णुराधारो मंदरस्य च ॥ दोर्भिश्चतुर्भिः संगृह्य ममंथाब्धिं सुखावहम् ॥ ८९ ॥ तदा सुरासुराः सर्वे ममंथुः क्षीरसागरम् ॥ एकीभूत्वा बलेनैवमतिमात्रं बलोत्कटाः ॥ ९० ॥ पृष्ठकंठोरुजान्वंतः कमठस्य महात्मनः ॥ तथासौ पर्वतश्रेष्ठो वज्रसारमयो दृढः ॥ उभयोर्घर्षणादेव वडवाग्निः समुत्थितः ॥ ९१ ॥ हलाहलं च संजातं तद्दृष्ट्वा नारदेन हि ॥ ततो देवानुवाचेदं देवर्षिरमितद्युतिः ॥९२॥ न कार्यं मथनं चाब्धेर्भवद्भिरधुनाऽखिलैः ॥ प्रार्थयध्वं शिवं देवाः सर्वे दक्षस्य याजनम् ॥ तद्विस्मृतिं च वो यातं वीरभद्रेण यत्कृतम् ॥ ९३ ॥ तस्माच्छिवः स्मर्यतां चाशु देवाः परः पराणामपि वा परश्च ॥ परात्परः परमानंदरूपो योगिध्येयो निष्प्रपंचो

CC-0. In Public Domain. Digitization by eGangotri

ह्यरूपः ॥ ९४ ॥ ते मथ्यमानास्त्वरिता देवाः स्वात्मार्थसाधकाः ॥ अभिलाषपराः सर्वे न शृण्वंति यतो जडाः ॥ ९५ ॥ उपदेशैश्च बहुभिर्नोप देश्याः कदाचन ॥ ते रागद्वेषसंघाताः सर्वे शिवपराङ्मुखाः ॥ ९६ ॥ केवलोद्यमसंवीता ममंथुः क्षीरसागरम् ॥ अतिनिर्मथनाज्जातं क्षीराब्धेश्च हलाहलम् ॥ ९७ ॥ त्रैलोक्यदहने प्रौढं प्राप्तं हंतुं दिवौकसः ॥ अत ऊर्ध्वं दिशः सर्वा व्याप्तं कृत्स्नं नभस्तलम् ॥ ग्रसितुं सर्वभूतानां कालकूटं समभ्ययात् ॥ ९८ ॥ दृष्ट्वा बृहंतं स्वकरस्थमोजसा तं सर्पराजं सह पर्वतेन ॥ तत्रैव हित्वापययुस्तदानीं पलायमाना ह्यसुरैः समेताः ॥ ९९ ॥ तथैव सर्व ऋषयो भृग्वाद्याः शतशस्ततः ॥ दक्षस्य यजनं तेन यथा जातं तथाभवत् ॥ १०० ॥ सत्यलोकं गताः सर्वे भृगुणा नोदिता भृशम् ॥ वेदवाक्यैश्च विविधैः कालकूटं प्रशाम्यति ॥ देवा नास्त्यत्र संदेहः सत्यं सत्यं वदामि वः ॥ १०१ ॥ भृगुणोक्तं वचः श्रुत्वा कालकूटविषार्दिताः ॥ सत्यलोकं समासाद्य ब्रह्माणं शरणं ययुः ॥ १०२ ॥ तदा जाज्वल्यमानं वै कालकूटं प्रभोज्ज्वलम् ॥ दृष्ट्वा ब्रह्माथ तान्दृष्ट्वा ह्यकर्मज्ञान्सुरासुरान् ॥ तेषां शपितुमारेभे नारदेन निवारितः ॥ १०३ ॥ ॥ ब्रह्मोवाच ॥ ॥ अकार्यं किं कृतं देवाः कस्मात्क्षोभोयमुद्यतः ॥ ईश्वरस्य च जातोऽद्य नान्यथा मम भाषितम् ॥ १०४ ॥ ततो देवैः परिवृतो वेदोपनिषदैस्तथा ॥ नानागमैः परिवृतः कालकूटभयाद्ययौ ॥ १०५ ॥ ततश्चिंतान्विता देवा इदमूचुः परस्परम् ॥ अविद्याकामसंवीताः कुर्यामः शंकरं च कम् ॥ १०६ ॥ ब्रह्माणं च पुरस्कृत्य तदा देवास्त्वरान्विताः ॥ वैकुण्ठमाव्रजन्सर्वे कालकूट भयार्दिताः ॥ १०७ ॥ ब्रह्मादयश्चर्षिगणाश्च तदा परेशं विष्णुं पुराणपुरुषं प्रभविष्णुमीशम् ॥ वैकुण्ठमाश्रितमधोक्षजमाधवं ते सर्वे सुरासु रगणाः शरणं प्रयाताः ॥ १०८ ॥ तावत्प्रवृद्धं सुमहत्कालकूटं समभ्ययात् ॥ दग्ध्वादौ ब्रह्मणो लोकं वैकुण्ठं च ददाह वै ॥ १०९ ॥ कालकूटा ग्निना दग्धो विष्णुः सर्वगुहाशयः ॥ पार्षदैः सहितः सद्यस्तमालसदृशच्छविः ॥ ११० ॥ वैकुण्ठं च सुनीलं च सर्वलोकैः समावृतम् ॥ जलकल्म षसंवीताः सर्वे लोकास्तदाभवन् ॥ १११ ॥ अष्टावरणसंवीतं ब्रह्मांडं ब्रह्मणा सह ॥ भस्मीभूतं चकाराशु जलकल्मषमद्भुतम् ॥ ११२ ॥ नो भूमिर्न जलं चाग्निर्न वायुर्न नभस्तदा ॥ नाहंकारो न च महान्मूलाविद्या तथैव च ॥ शिवस्य कोपात्संजातं तदा भस्माकुलं जगत् ॥ ११३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां प्रथममाहेश्वरखण्डान्तर्गते केदारखण्डे नवमोऽध्यायः ॥ ९ ॥ छ ॥ मुनय ऊचुः ॥ ॥ यत्त्वया कथितं ब्रह्मन्ब्रह्मांडं सचराचरम् ॥ भस्मीभूतं रुद्रकोपात्कालकूटाग्निनाऽखिलम् ॥ १ ॥ ब्रह्मांडांतरतः किं तु रुद्रं मन्यामहे वयम् ॥ तदा चराचरं नष्टं ब्रह्मविष्णुपुरोगमम् ॥ २ ॥ भस्मीभूतं रुद्रकोपात्कथं सृष्टिः प्रवर्तिता ॥ कुतो ब्रह्मा च विष्णुश्च कुतश्चंद्रपुरोगमाः ॥ ३ ॥ अन्ये सुरा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सुराः कुत्र भस्मीभूता लयं गताः ॥ अत ऊर्ध्वं किमभवत्तत्सर्वं वक्तुमर्हसि ॥ ४ ॥ व्यासप्रसादात्सकलं वेत्थ त्वं नापरो हि तत् ॥ तस्माज्ज्ञा नमयं शास्त्रं तज्जानासि न चापरः ॥ ५ ॥ इति पृष्टस्तदा सर्वैर्मुनिभिर्भावितात्मभिः ॥ सूतो व्यासं नमस्कृत्य वाक्यं चेदमथाब्रवीत् ॥ ६ ॥ ॥ लोमश उवाच ॥ ॥ यदा ब्रह्मांडमध्यस्था व्याप्ता देवा विषाग्निना ॥ हरिब्रह्मादयो ह्येते लोकपालाः सवासवाः ॥ तदा विज्ञापितः शंभुर्हेरं बेन महात्मना ॥७॥ ॥ हेरंब उवाच ॥ ॥ हे रुद्र हे महादेव हे स्थाणो हे जगत्पते ॥ मया विघ्नं विनोदेन कृतं तेषां सुदुर्जयम् ॥ ८ ॥ भयेन मति मोहात्त्वां नार्चयंति च मामपि ॥ उद्योगं ये प्रकुर्वन्ति तेषां क्लेशोऽधिको भवेत् ॥९ ॥ एवमभ्यर्थितस्तेन पिनाकी वृषभध्वजः ॥ विघ्नांधकारसूर्येण गणाधिपतिना तदा ॥ १० ॥ लिंगरूपोऽब्रवीच्छंभुर्निराकारो निरामयः ॥ निरंजनो व्योमकेशः कपर्दी नीललोहितः ॥ ११ ॥ ॥ महेश्वर उवाच ॥ ॥ हेरंब शृणु मे वाक्यं श्रद्धया परया युतः ॥ अहंकारात्मकं चैव जगदेतच्चराचरम् ॥ १२ ॥ स्थितिं करोत्यहंकारः प्रलयोत्पत्तिमेव च ॥ जगदादौ गणपते तदा विज्ञप्तिमात्रतः॥१३॥ मायाविरहितं शांतं द्वैताद्वैतपरं सदा ॥ ज्ञप्तिमात्रस्वरूपं तत्सदानंदैकलक्षणम् ॥ १४॥ ॥ गणपतिरु वाच ॥ ॥ यदि त्वं केवलो ह्यात्मा परमानन्दलक्षणः ॥ तस्मात्त्वदपरं किंचिन्नान्यदस्ति परंतप ॥ १५ ॥ नानारूपं कथं जातं सुरासुरविलक्ष णम् ॥ विचित्रं मोहजननं त्रिभिर्देवैश्च लक्षितम् ॥ १६ ॥ भूतग्रामैश्चतुर्भिश्च नानाभेदैः समन्वितैः ॥ जातं संसारचक्रं च नित्यानित्यविलक्षणम् ॥ १७ ॥ परस्परविरोधेन ज्ञानवादेन मोहिताः ॥ कर्मवादरताः केचित्केचित्स्वगुणमाश्रिताः ॥ १८ ॥ ज्ञाननिष्ठाश्च ये केचित्परस्परविरो धिनः ॥ एवं संशयमापन्नं त्राहि मां वृषभध्वज ॥ १९ ॥ अहं गणश्च कुत्रत्याः क्व चायं वृषभः प्रभो ॥ एते चान्ये च बहवः कुतो जाताश्च कुत्र वै ॥ २० ॥ कृताः सर्वे महाभागाः सात्त्विका राजसाश्च वै ॥ प्रहस्य भगवाञ्छंभुर्गणेशं वक्तुमुद्यतः ॥ २१ ॥ ॥ महेश्वर उवाच ॥ ॥ काल शक्त्या च जातानि रजःसत्त्वतमांसि च ॥ तैरावृतं जगत्सर्वं सदेवासुरमानुषम् ॥ २२ ॥ परिदृश्यमानमेतच्चानश्वरं परमार्थतः ॥ विद्धचेतत्सर्वंसि द्धचैव कृतकत्वाच्च नश्वरम् ॥२३ ॥ लोमश उवाच ॥ यावद्गणेशसंयुक्तो भाषमाणः सदाशिवः ॥ लिंगरूपी विश्वरूपः प्रादुर्भूता सदाशिवात् ॥२४॥ शिवरूपा जगद्योनिः कार्यकारणरूपिणी ॥ लिंगरूपी स भगवान्निमग्नस्तत्क्षणादभूत् ॥२५॥ एका स्थिता परा शक्तिर्ब्रह्मविद्यात्मलक्षणा ॥ गणेशो विस्मयाविष्टो ह्यवलोकनतत्परः ॥ २६ ॥ ॥ ऋषय ऊचुः ॥ ॥ प्रकृत्यन्तर्गतं सर्वं जगदेतच्चराचरम् ॥ गणेशस्य पृथक्त्वं च कथं जातं तदु च्यताम् ॥ २७ ॥ ॥ लोमश उवाच ॥ ॥ साक्षात्प्रकृत्याः संभूतो गणेशो भगवानभूत् ॥ यथारूपः शिवः साक्षात्तद्रूपो हि गणेश्वरः ॥ २८ ॥

CC-0. In Public Domain. Digitization by eGangotri

शिवेन सह संग्रामो ह्यभूत्तस्य महात्मनः ॥ अज्ञानात्प्राकृतो भूत्वा बहुकालं निरन्तरम् ॥ २९ ॥ तस्य दृष्ट्वा ह्यजेयत्वं गजारूढस्य तत्तदा ॥ त्रिशूलेनाहनच्छंभुः सगजं तमपातयत् ॥ ३० ॥ तदा स्तुतो महादेवः परशक्त्या परंतपः ॥ परशक्तिमुवाचेदं वरं वरय शोभने[१] ॥ ३१ ॥ तदा वृतो महादेवो वरेण परमेण हि ॥ योऽयं त्वया हतो देव मम पुत्रो न संशयः ॥ ३२ ॥ त्वां न जानात्ययं मूढः प्रकृत्यंशसमुद्भवः[१] ॥ तस्मात्पुत्रं जीवयेमं मम तुष्ट्यर्थमेव च ॥ ३३ ॥ प्रहस्य भगवान्रुद्रो मायापुत्रमजीवयत् ॥ सिंधुरवदनेनैव मुखे स समयोजयत् ॥ ३४ ॥ तदा गजाननो जातः प्रसादाच्छंकरस्य च ॥ मायापुत्रोपि निर्मायो ज्ञानवान्संबभूव ह ॥ ३५ ॥ आत्मज्ञानामृतेनैव नित्यतृप्तो निरामयः ॥ समाधिसंस्थितो रौद्रः कालकालांतकोऽभवत् ॥ ३६ ॥ योगदंडार्थमुत्पाद्य स्वकीयं दशनं महत् ॥ करे गृह्य गणाध्यक्षः शब्दब्रह्मातिवर्त्तते ॥ ऋद्धिसिद्धिद्वयेनैव एकत्वेन विराजितः ॥ ३७ ॥ ये ते गणाश्च विघ्नाश्च ये चान्येऽभ्यधिका भुवि ॥ तेषामपि पतिर्जातः कृतोऽसौ शंभुना तदा ॥ ३८ ॥ तस्माद्विलोकयामास प्रकृतिं विश्वरूपिणीम् ॥ पृथक्स्थित्वाग्रतो जानाल्लिंगं प्रकृतिमेव च ॥ ददर्श विमलं लिंगं प्रकृतिस्थं स्वभावतः ॥ ३९ ॥ आत्मानं च गणैः सार्द्धं तथैव च जगत्त्रयम् ॥ लीनं लिंगे समस्तं तद्धेरम्बो ज्ञानवानपि ॥ ४० ॥ मुमोह च पुनः संज्ञां प्रतिलभ्य प्रयत्नतः ॥ ननाम शिरसा ताभ्यामीशाभ्यां स गणेश्वरः ॥ ४१ ॥ तदा ददर्श तत्रैव लोकसंहारकारकम् ॥ ब्रह्माणं चैव रुद्रं च विष्णुं चैव सदाशिवम् ॥ ४२ ॥ ददर्श प्रेततुल्यानि लिंगशक्त्यात्मकानि च ॥ ब्रह्माण्डगोलकान्येव कोटिशः परमाणुवत् ॥ ४३ ॥ लीयंते च विलीयंते महेशे लिंगरूपिणि ॥ प्रकृत्यंतर्गतं लिंगं लिंगस्यांतर्गता च सा ॥ ४४ ॥ शक्त्या लिंगं च संछन्नं तदा सर्वमदृश्यत ॥ लिंगेन शक्तिः संछन्ना परस्परमवर्तत ॥ ४५ ॥ शिवाभ्यां संश्रितं लोकं जगदेतच्चराचरम् ॥ गणेशो वापि तज्ज्ञानं न परेऽपि तथाविदन् ॥ ४६ ॥ तदोवाच महातेजा गणाध्यक्षो गणैः सह ॥ सशक्तिकं स्तूयमानः शक्त्या च परया तदा ॥ ४७ ॥ ॥ गणेश उवाच ॥ ॥ नमामि देवं शक्त्यान्वितं ज्ञानरूपं प्रसन्नं ज्ञानात्परं परमं ज्योतिरूपम् ॥ रूपात्परं परमं तत्त्वरूपं तत्त्वात्परं परमं मंगलं च आनंदाख्यं निष्कलं निर्विषादम् ॥ ४८ ॥ धूमात्परमयोवह्निर्धूमवत्प्रतिभासते ॥ प्रकृत्यंतर्गतस्त्वं हि लक्ष्यसे ज्ञानसंभवः ॥ प्रकृत्यंतर्गतस्त्वं हि मायाव्यक्तिरितीयसे ॥ ४९ ॥ एवंविधस्त्वं भगवन्स्वमायया सृजस्यथोलुंपसि पासि विश्वम् ॥ अस्माद्भरात्सर्वमिदं प्रनष्टं सब्रह्मविप्रेंद्रयुतं चराचरम् ॥ ५० ॥ यथा पुरासीर्भगवान्महेशस्त्रैलोक्यनाथोऽसि चराचरात्मा ॥

१ इदं पद्यं वा गद्यं वा–इति न निश्चेतुं शक्यते–परं पद्यवत्प्रातिभाति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कुरुष्व शीघ्रं सहजीवकोशं चराचरं तत्सकलं प्रदग्धम् ॥ ५१ ॥ ॥ लोमश उवाच ॥ ॥ एवं स्तुतो गणेशेन भगवान्भूतभावनः ॥ यदुत्थितं कालकूटं लोकसंहारकारकम् ॥५२॥ लिंगरूपेण तद्ग्रस्तं विमलं चाकरोत्तदा ॥ सदेवासुरमर्त्यांश्च सर्वाणि त्रिजगन्ति च॥तत्क्षणाद्रक्षितान्येव कृपया परया युतः ॥ ५३ ॥ ब्रह्मा विष्णुः सुरेंद्रश्च लोकपालाः सहर्षयः ॥ यक्षा विद्याधराः सिद्धा गंधर्वाप्सरसां गणाः ॥ उत्थिताश्चैव ते सर्वे निद्रापरिगता इव ॥ ५४ ॥ विस्मयेन समाविष्टा बभूवुर्जातसाध्वसाः ॥ सर्वे देवासुराश्चैव ऊचुराश्चर्यवत्ततः ॥ ५५ ॥ क्व कालकूटं सुमहद्येन विद्राविता वयम् ॥ मृतप्रायाः कृताः सद्यः सलोकपालका ह्यमी ॥ ५६ ॥ इत्यब्रुवंस्तदा दैत्यास्तूष्णींभूतास्तदा स्थिताः ॥ शक्रादयो लोकपाला विष्णुं सर्वेश्वरेश्वरम् ॥ ब्रह्माणं च पुरस्कृत्य इदमूचुः समेधिताः ॥ ५७ ॥ केनेदं कारितं विष्णो न विदामोऽल्पमेधसः ॥ तदा प्रहस्य भगवान्ब्रह्मणा सह तैः सुरैः ॥ ५८ ॥ समाधिमगमन्सर्वेऽप्येकाग्रमनसस्तदा ॥ तत्त्वज्ञानेन निर्हृत्य कामक्रोधादिकान्द्विजाः ॥ ५९ ॥ तदात्मनि स्थितं लिंगमपश्यन्विबुधादयः ॥ विष्णुं पुरस्कृत्य तदा तुष्टुवुः परमार्थतः ॥ ६० ॥ आत्मना परमात्मानं योगिनः पर्युपासते ॥ ६१ ॥ लिंगमेव परं ज्ञानं लिंगमेव परं तपः ॥ लिंगमेव परो धर्मो लिंगमेव परा गतिः ॥ तस्माल्लिंगात्परतरं यच्च किंचिन्न विद्यते ॥ ६२ ॥ एवं ब्रुवंतो हि तदा सुरासुराः सलोकपाला ऋषिभिश्च साकम्॥विष्णुं पुरस्कृत्य तमालवर्णं शंभुं शरण्यं शरणं प्रपन्नाः ॥६३॥ त्राहित्राहि महादेव कृपालो परमेश्वर॥पुरा त्राता यथा सर्वे तथा त्वं त्रातुमर्हसि ॥६४॥ तद्देवदेव भवतश्चरणारविंदं सेवानुबंधमहिमानमनंतरूपम् ॥ त्वदाश्रितं यत्परमानुकंपया नमोऽस्तु ते देववर प्रसीद ॥६५॥ लिंगस्वरूपमध्यस्थो भगवान्भूतभावनः ॥ सर्वैः सुरगणैः साकं बभाषेदं रमापतिः ॥ ६६ ॥ त्वं लिंगरूपी भगवाञ्जगतामभयप्रदः ॥ विष्णुना संस्तुतो देवो लिंगरूपी महेश्वरः ॥ ६७ ॥ मृतास्त्राता गरात्सर्वे तस्मान्मृत्युंजय प्रभो ॥ रक्षरक्ष महाकाल त्रिपुरांत नमोस्तु ते ॥ ६८ ॥ विष्णुना संस्तुतो देवो लिंगरूपी महेश्वरः ॥ प्रादुर्बभूव सांबोऽथ बोधयन्निव तान्सुरान् ॥६९॥ हे विष्णो हे सुराः सर्व ऋषयः श्रूयतामिदम् ॥ मन्यतेऽपि हि संसारे अनित्ये नित्यताकुलम् ॥ ७० ॥अविलोकयताऽऽत्मानमात्मना विबुधादयः ॥ किं यज्ञैः किं तपोभिश्च किमुद्योगेन कर्मणाम् ॥ ७१ ॥ एकत्वेन पृथक्त्वेन किंचिन्नैव प्रयोजनम् ॥ यस्माद्भवद्भिर्मिलितैः कृतं यत्कर्म दुष्करम् ॥ ७२ ॥ क्षीराब्धेर्मथनं तच्च अमृतार्थं कथं कृतम् ॥ मृत्युंजयं निराकृत्य अवज्ञाय च मां सदा ॥ ७३ ॥ तस्मात्सर्वे मृत्युमुखं पतिता वै न संशयः ॥ अस्माभिर्निर्मितो देवो गणेशः कार्यसिद्धये ॥ ७४ ॥

१ यतः—इति शेषः ।

CC-0. In Public Domain. Digitization by eGangotri

न नमंति गणेशं च दुर्गां चैव तथाविधाम् ॥ क्लेशभाजो भविष्यंति नात्र कार्या विचारणा ॥७५॥ यूयं सर्वे त्वधर्मिष्ठाः स्तब्धाः पंडितमानिनः ॥ कार्याकार्यमविज्ञाय केवलं मानमोहिताः ॥ ७६ ॥ तस्मात्कालमुखे सर्वे पतिता नात्र संशयः ॥ सर्वे श्रुतिपरा यूयमिंद्राद्या देवतागणाः ॥ ७७॥ प्ररोचनपराः सर्वे क्षुद्राश्चेंद्रादयो वृथा ॥ नात्मानं च प्रपंचेन वेत्सि त्वं हि शचीपते ॥ ७८ ॥ कृतः प्रयत्नो हि महानमृतार्थं त्वया शठ ॥ अश्वमेधशतेनैव यद्राज्यं प्राप्तवानसि ॥ अपि तच्च पराधीन तन्न जानासि दुर्मते ॥ ७९ ॥ यैर्वेदवाक्यैस्त्वं मूढ संस्तुतोऽसि तपस्विभिः ॥ ते मूढास्तो पयंति त्वां तत्तद्रागपरायणाः ॥ ८० ॥ विष्णो त्वं च पक्षपातान्न जानासि हिताहितम् ॥ केचिद्धतास्त्वया विष्णो रक्षिताश्चैव केचन ॥ ८१ ॥ इच्छायुक्तस्त्वमत्रैव सदा बालकचेष्टितः ॥ येऽन्ये च लोकपाः सर्वे तेषां वार्ता कुतस्त्विह ॥ ८२ ॥ अन्यथा हि कृते ह्यर्थे अन्यथात्वं भविष्यति ॥ कार्यसिद्धिर्भवेद्येन भवद्भिर्विस्मृतं च तत् ॥ ८३ ॥ येनाद्य रक्षिताः सर्वे कालकूटमहाभयात् ॥ येन नीलीकृतो विष्णुर्येन सर्वे पराजिताः ॥ ८४॥ लोका भस्मीकृता येन तस्माद्येनापि रक्षिताः ॥ तस्यार्चनाविधिः कार्यो गणेशस्य महात्मनः ॥ ८५॥ कर्मारंभे तु विघ्नेशं ये नार्चंति गणाधिपम् ॥ कार्यसिद्धिर्न तेषां वै भवेत्तु भवतां यथा ॥ ८६ ॥ एतन्महेशस्य वचो निशम्य सुरासुराः किंनरचारणाश्च ॥ पूजाविधानं परमार्थतोऽपि पप्रच्छुरेनं च तदा गिरीशम् ॥ ८७ ॥ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां प्रथमे माहेश्वरखण्डे केदारखण्डे समुद्रमंथनाख्याने शिवकृतविषभक्षणवृत्तान्तवर्णनंनाम दशमोऽध्यायः ॥ १० ॥ छ ॥ ॥ महेश्वर उवाच ॥ ॥ प्रतिपक्षे चतुर्थ्यां तु पूजनीयो गणाधिपः ॥ स्नात्वा शुक्लतिलैः शुद्धैः शुक्लपक्षे सदा नृभिः ॥ १ ॥ कृत्वा चावश्यकं सर्वं गणेशस्यार्चनक्रियाम् ॥ प्रयत्नेनैव कुर्वीत गंधमाल्याक्षतादिभिः ॥ २ ॥ ध्यानमादौ प्रकर्तव्यं गणेशस्य यथाविधि ॥ आगमा बहवो जाता गणेशस्य यथा मम ॥ ३ ॥ बहुधोपासका यस्मात्तमःसत्त्वरजोन्विताः ॥ गणभेदेन तान्येव नामानि बहुधाऽभवन् ॥ ४ ॥ पंचवक्त्रो गणाध्यक्षो दशबाहुस्त्रिलोचनः ॥ कांतस्फटिकसंकाशो नीलकंठो गजाननः ॥ ५॥ मुखानि तस्य पंचैव कथयामि यथातथम् ॥ ६॥ मध्यमं तु मुखं गौरं चतुर्दन्तं त्रिलोचनम् ॥ शुंडादंडमनोज्ञं च पुष्करे मोदकान्वितम् ॥ ७ ॥ तथान्यत्पीतवर्णं च नीलं च शुभलक्षणम् ॥ पिंगलं च तथा शुभ्रं गणेशस्य शुभाननम् ॥ ८॥ तथा दशभुजेष्वेव ह्यायुधानि ब्रवीमि वः ॥ पाशं परशुपद्मे च अंकुशं दंतमेव च ॥ ९ ॥ अक्षमालां लांगलं च मुसलं वरदं तथा ॥ पूर्णं च मोदकैः पात्रं पाणिना च विचिंतयेत् ॥ १० ॥ लंबोदरं विरूपाक्षं निवीतं मेखलान्वितम् ॥ योगासने चोपविष्टं चंद्रलेखां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कशेखरम् ॥ ११ ॥ ध्यानं च सात्त्विकं ज्ञेयं राजसं हि नृणामिव ॥ शुद्धचामीकराभासं गजाननमलौकिकम् ॥ १२ ॥ चतुर्भुजं त्रिनयनमेकदंतं महोदरम् ॥ पाशांकुशधरं देवं दंतमोदकपात्रकम् ॥ १३ ॥ नीलं च तामसं ध्यानमेवं त्रिविधमुच्यते ॥ ततः पूजा प्रकर्तव्या भवद्भिः शीघ्रमेव च ॥ १४ ॥ एकविंशतिदूर्वाभिर्द्वाभ्यां नाम्ना पृथक्पृथक् ॥ सर्वनामभिरेकैव दीयते गणनायके ॥ १५ ॥ तथैव नामभिर्देया एकविंशतिमोदकाः ॥ दशनामान्यहं वक्ष्ये पूजनार्थं पृथक्पृथक् ॥ १६ ॥ गणाधिप नमस्तेस्तु उमापुत्राघनाशन ॥ विनायकेशपुत्रेति सर्वसिद्धिप्रदायक ॥ १७ ॥ एकदंतेभवक्रेति तथा मूषकवाहन ॥ कुमारगुरवे तुभ्यं पूजनीयः प्रयत्नतः ॥ १८ ॥ एवमुक्त्वा सुरान्सद्यः परिष्वज्य च सादरम् ॥ विष्णुं गुहाशयं सद्यो ब्रह्माणं च सदाशिवः ॥ १९ ॥ तिरोधान गतः सद्यः शंभुः परमशोभनः ॥ प्रणम्य शंभुं ते सर्वे गणाध्यक्षार्च्चने रताः ॥ २० ॥ ततः संपूज्य विधिवद्गणाध्यक्षार्च्चने रताः ॥ उपचारैरनेकैश्च दूर्वाभिश्च पृथक्पृथक् ॥ २१ ॥ संतुष्टो हि गणाध्यक्षो देवानां वरदोऽभवत् ॥ प्रदक्षिणं नमस्कृत्य तैः सर्वैरभितोषितः ॥ २२ ॥ तमोगुणान्विताः सर्वे ह्यसुरा नाभ्यपूजयन् ॥ उपहासपरास्ते वै देवान्प्रत्यसुरोत्तमाः ॥ २३ ॥ पूजयित्वा शांकरिं ते पुनः क्षीरार्णवं ययुः ॥ ब्रह्मा विष्णुश्च ऋषयो देवदैत्याः सुरोत्तमाः ॥ २४ ॥ मंथानं मंदरं कृत्वा रज्जुं कृत्वाथ वासुकिम् ॥ ममंथुश्च तदा देवा विष्णुं कृत्वाथ सन्निधौ ॥ २५ ॥ मथ्यमाने तदाब्धौ च निर्गतश्चंद्र अग्रतः ॥ पीयूषपूर्णः सर्वेषां देवानां कार्यसिद्धये ॥ २६ ॥ ॥ शौनक उवाच ॥ ॥ अर्णवे किं पुरा चंद्रो निक्षिप्तः केन सुव्रत ॥ गजादिकानि रत्नानि कथितानि त्वया पुरा ॥ २७ ॥ एतत्सर्वं समासेन आदौ कथय मे प्रभो ॥ ज्ञात्वा सर्वे वयं सूत पश्चादावर्णयामहे ॥ २८ ॥ तेषां तद्वचनं श्रुत्वा सूतो वाक्यमुपाददे ॥ २९ ॥ चंद्र आपोमयो विप्रा अत्रिपुत्रो गुणान्वितः ॥ उत्पन्नो ह्यनसूयायां ब्रह्मणोंऽशात्ससुद्भवः ॥ रुद्रस्यांशाद्धि दुर्वासा विष्णोरंशात्तु दत्तकः ॥ ३० ॥ क्षीराब्धिं मथ्यमानं तु दृष्ट्वा चंद्रो मुदान्वितः ॥ क्षीराब्धिरपि चंद्रं च दृष्ट्वा सोऽप्युत्सुकोऽभवत् ॥ ३१ ॥ प्रविष्टश्चोभयप्रीत्या शृण्वतां भो द्विजोत्तमाः॥ चंद्रो ह्यमृतपूर्णोऽभूदग्रतो देवसन्निधौ ॥३२॥ दृष्ट्वा च कांतिं त्वरितोऽथ चंद्रो नीराजितो देवगणैस्तदानीम् ॥ वादित्रघोषैस्तुमुलैरनेकैर्मृदंगशंखैः पटहैरनेकैः॥३३॥ नमश्चक्रुश्च ते सर्वे ससुरासुरदानवाः ॥ तदा गर्गं पृच्छमाना बलं चंद्रस्य तत्त्वतः॥३४॥ गर्गेणोक्तास्तदा देवाः सर्वेषां बलमद्य वै ॥ केंद्रस्थानगताः सर्वे भवतामुत्तमा ग्रहाः ॥ ३५ ॥ चंद्रं गुरुः समायातो बुधश्चैव समागतः ॥ आदित्यश्च तथा शुक्रः शनिरंगारको महान् ॥ ३६ ॥ तस्माच्चंद्रबलं श्रेष्ठं भवतां कार्यसिद्धये ॥ गोमंतसंज्ञकोनाम मुहूर्तोऽयं जयप्रदः ॥ ३७ ॥ एवमाश्वासिता देवा गर्गेणैव महात्मना ॥ ममंथुरब्धिं त्वरिता गर्जमाना

CC-0. In Public Domain. Digitization by eGangotri

महाबलाः ॥ ३८ ॥ द्विगुणं बलमापन्ना महात्मानो दृढव्रताः ॥ महेशं स्मरमाणास्ते गणेशं च पुनःपुनः ॥ ३९ ॥ निर्मथ्यमानादुदधेर्गर्जमानाच्च सर्वशः ॥ निर्गता सुरभिः साक्षाद्देवानां कार्यसिद्धये ॥ ४० ॥ तुष्टा कपिलवर्णा सा ऊधोभारेण भूयसा ॥ तरंगोपरि गच्छंती शनकैः शनकैस्ततः ॥ ४१ ॥ कामधेनुं समायांतीं दृष्ट्वा सर्वे सुरासुराः ॥ पुष्पवर्षेण महता ववर्षुरमितप्रभाम् ॥ ४२ ॥ तदा तूर्याण्यनेकानि नेदुर्वाद्यान्यनेकशः ॥ आनीता जलमध्याच्च संवृता गोशतैरपि ॥ ४३ ॥ तासु नीलाश्च कृष्णाश्च कपिलाश्च कपिंजलाः ॥ बभ्रवः श्यामका रक्ता जंबूवर्णाश्च पिंगलाः ॥ आभिर्युक्ता तदा गोभिः सुरभिः प्रत्यदृश्यत ॥ ४४ ॥ असुरासुरसंवीतां कामधेनुं ययाचिरे ॥ ऋषयो हर्षसंयुक्ता देवान्दैत्यांश्च तत्क्षणात् ॥ ४५ ॥ सर्वेभ्यश्चैव विप्रेभ्यो नानागोत्रेभ्य एव च ॥ सुरभीसहिता गावो दातव्या नात्र संशयः ॥ ४६ ॥ तैर्याचितास्तेऽत्र सुरासुराश्च ददुश्च ता गाः शिवतोषणाय ॥ तैः स्वीकृतास्ता ऋषिभिः सुमंगलैर्महात्मभिः पुण्यतमैः सुरभ्यः ॥ ४७ ॥ पुण्याहं मुनिभिः सर्वैः कारितास्ते तदा सुराः ॥ देवानां कार्यसिद्ध्यर्थमसुराणां क्षयाय च ॥ ४८ ॥ पुनः सर्वे सुसंरब्धा ममंथुः क्षीरसागरम् ॥ मथ्यमानात्तदा तस्मादुदधेश्च तथाऽभवत् ॥ ४९ ॥ कल्पवृक्षः पारिजातश्चूतः संतानकस्तथा ॥ तान्द्रुमानेकतः कृत्वा गन्धर्वनगरोपमान् ॥ ममंथुरुग्रं त्वरिताः पुनः क्षीरार्णवं बुधाः ॥ ५० ॥ निर्मथ्यमानादुदधेरभवत्सूर्यवर्चसम् ॥ रत्नानामुत्तमं रत्नं कौस्तुभाख्यं महाप्रभम् ॥ ५१ ॥ स्वकीयेन प्रकाशेन भासयंतं जगत्त्रयम् ॥ चिंतामणिं पुरस्कृत्य कौस्तुभं ददृशुर्हि ते ॥ ५२ ॥ सर्वे सुरा ददुस्तं वै कौस्तुभं विष्णवे तदा ॥ चिंतामणिं ततः कृत्वा मध्ये चैव सुरासुराः ॥ ममंथुः पुनरेवाब्धिं गर्जतस्ते बलोत्कटाः ॥ ५३ ॥ मथ्यमानात्ततस्तस्मादुच्चैःश्रवाः समद्भुतम् ॥ बभूव अश्वो रत्नानां पुनश्चैरावतो गजः ॥ ५४ ॥ तथैव गजरत्नं च चतुःषष्ट्या समन्वितम् ॥ गजानां पांडुराणां च चतुर्दन्तं मदान्वितम् ॥ ५५ ॥ तान्सर्वान्मध्यतः कृत्वा पुनश्चैव ममंथिरे ॥ निर्मथ्यमानादुदधेर्निर्गतानि बहून्यथ ॥ ५६ ॥ मदिरा विजया भृंगी तथा लशुनगृंजनाः ॥ अतीव उन्मादकरो धत्तूरः पुष्करस्तथा ॥ ५७ ॥ स्थापिता नैकपद्येन तीरे नदनदीपतेः ॥ पुनश्च ते तत्र महासुरेन्द्रा ममंथुरब्धिं सुरसत्तमैः सह ॥ ५८ ॥ निर्मथ्यमानादुदधेस्तदासीत्सा दिव्यलक्ष्मीर्भुवनैकनाथा ॥ आन्वीक्षिकीं ब्रह्मविदो वदंति तथा चान्ये मूलविद्यां गृणंति ॥ ५९ ॥ ब्रह्मविद्यां केचिदाहुः समर्थाः केचित्सिद्धिमृद्धिमाज्ञामथाशाम् ॥ यां वैष्णवीं योगिनः केचिदाहुस्तथा च मायां मायिनो नित्ययुक्ताः ॥ ६० ॥ वदंति सर्वे केन[1]सिद्धांतयुक्तां यां योगमायां ज्ञानशक्त्या

१ केनसिद्धान्तयुक्ताम्--केनोपनिषत्प्रतिपाद्योमाशब्दवाच्यब्रह्मविद्याम्--इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्विता ये ॥६१॥ ददृशुस्तां महालक्ष्मीमायांतीं शनकैस्तदा ॥ गौरां च युवतीं स्निग्धां पद्मकिंजल्कभूषणाम् ॥ ६२ ॥ सुस्मितां सुद्विजां श्यामां नव यौवनभूषणाम् ॥ विचित्रवस्त्राभरणरत्नानेकोद्यतप्रभाम् ॥ ६३ ॥ बिंबोष्ठीं सुनसां तन्वीं सुग्रीवां चारुलोचनाम् ॥ सुमध्यां चारुजघनां बृहत्कटितटां तथा ॥ ६४ ॥ नानारत्नप्रदीपैश्च नीराजितमुखांबुजाम् ॥ चारुप्रसन्नवदनां हारनूपुरशोभिताम् ॥ ६५ ॥ मूर्द्धनि ध्रियमाणेन च्छत्रेणापि विराजि ताम् ॥ चामरैर्वीज्यमानां तां गंगाकल्लोललोहितैः ॥ ६६ ॥ पांडुरं गजमारूढां स्तूयमानां महर्षिभिः ॥ सुरद्रुमपुष्पमालां बिभ्रतीं मल्लिकायुताम् ॥ ॥ ६७ ॥ कराग्रे ध्रियमाणां तां दृष्ट्वा देवाः समुत्सुकाः ॥ आलोकनपरा यावत्तावत्तान्ददृशे ह्यसौ ॥ ६८ ॥ देवांश्च दानवांश्चैव सिद्धचारणपन्न गान् ॥ यथा माता स्वपुत्रांश्च महालक्ष्मीस्तथा सती ॥ ६९ ॥ आलोकितास्तथा देवास्तया लक्ष्म्या श्रियान्विताः ॥ सञ्जातास्तत्क्षणादेव राज्य लक्षणलक्षिताः ॥ दैत्यास्ते निःश्रिका जाता ये श्रियाऽनवलोकिताः ॥ ७० ॥ निरीक्ष्यमाणा च तदा मुकुन्दं तमालनीलं सुकपोलनासम् ॥ विभ्राजमानं वपुषा परेण श्रीवत्सलक्ष्मं सदयावलोकम् ॥ ७१ ॥ दृष्ट्वा तदैव सहसा वनमालयान्विता लक्ष्मीर्गजादवततार सुविस्मयंती ॥ कंठे सस र्ज पुरुषस्य परस्य विष्णोर्मालां श्रिया विरचितां भ्रमरैरुपेताम् ॥ ७२ ॥ वामांगमाश्रित्य तदा महात्मनः सोपाविशत्तत्र समीक्ष्य ता उभौ ॥ सुराः सदैत्या मुदमापुरद्भुतां सिद्धाप्सरःकिंनरचारणाश्च ॥ ७३ ॥ सर्वेषामेव लोकानामैकपद्येन सर्वशः ॥ हर्षो महानभूत्तत्र लक्ष्मीनारायणागमे ॥ ७४ ॥ लक्ष्म्या वृतो महाविष्णुर्लक्ष्मीस्तेनैव संवृता ॥ एवं परस्परं प्रीत्या ह्यवलोकनतत्परौ ॥ ७५ ॥ शंखाश्च पटहाश्चैव मृदंगानकगोमुखाः ॥ भेर्यश्च झर्झरीणां च स शब्दस्तुमुलोऽभवत् ॥ ७६ ॥ बभूव गायकानां च गायनं सुमहत्तदा ॥ ततानि विततान्येव घनानि सुषिराणि च ॥ ७७॥ एवं वाद्यप्रभेदैश्च विष्णुं सर्वात्मना हरिम् ॥ अतोषयन्सुगीतज्ञा गंधर्वाप्सरसां गणाः ॥ ७८ ॥ तथा जगुर्नारदतुंबुराद्यो गंधर्वयक्षाः सुरसिद्ध संघाः ॥ संसेवमानाः परमात्मरूपं नारायणं देवमगाधबोधम् ॥ ७९ ॥ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां प्रथमे माहे श्वरखण्डे केदारखण्डे समुद्रमन्थनाख्याने लक्ष्मीप्रादुर्भाववर्णनंनामैकादशोऽध्यायः ॥ ११ ॥ ॥ लोमश उवाच ॥ ॥ प्रणम्य परमात्मानं रमायुक्तं जनार्दनम् ॥ अमृतार्थं ममंथुस्ते सुरासुरगणाः पुनः ॥१॥ उदधेर्मथ्यमानाच्च निर्गतः सुमहायशाः ॥ धन्वंतरिरिति ख्यातो युवा मृत्युञ्जयः परः ॥२॥ पाणिभ्यां पूर्णकलशं सुधायाः परिगृह्य वै ॥ यावत्सर्वे सुराः सर्वे निरीक्षंते मनोहरम् ॥ ३ ॥ तदा दैत्याः समं गत्वा हर्तुकामा बलादिव ॥ सुधया पूर्णकलशं धन्वंतरिकरे स्थितम् ॥ ४ ॥ यावत्तरंगमालाभिरावृतोऽभूद्रिपक्रमः ॥ शनैःशनैः समायातो दृष्टोऽसौ वृषपर्वणा ॥ ५ ॥

CC-0. In Public Domain. Digitization by eGangotri

करस्थः कलशस्तस्य हृतस्तेन बलादिव ॥ असुराश्च ततः सर्वे जगर्जुरतिभीषणम् ॥ ६ ॥ कलशं सुधया पूर्णं गृहीत्वा ते समुत्सुकाः ॥ दैत्याः पातालमाजग्मुस्तदा देवा भ्रमान्विताः ॥ ७ ॥ अनुजग्मुः सुसंनद्धा योद्धुकामाश्च तैः सह ॥ तदा देवान्समालोक्य बलिरेवमभाषत ॥ ८ ॥ ॥ ॥ बलिरुवाच ॥ ॥ वयं तु केवलं देवाः सुधया परितोषिताः ॥ शीघ्रमेव प्रगंतव्यं भवद्भिश्च सुरोत्तमैः ॥ ९ ॥ त्रिविष्टपं मुदा युक्तैः किमस्माभिः प्रयोजनम् ॥ पुरास्माभिः कृतं मैत्रं भवद्भिः स्वार्थतत्परैः ॥ अधुना विदितं तच्च नात्र कार्या विचारणा ॥ १० ॥ एवं निर्भर्त्सितास्तेन बलिना सुरसत्तमाः ॥ यथागतेन मार्गेण जग्मुर्नारायणं प्रभुम् ॥ ११ ॥ तं दृष्ट्वा विष्णुना सर्वे सुरा भग्नमनोरथाः ॥ आश्वासिता वचोभिश्च नानानुनयकोविदैः ॥ १२ ॥ मा त्रासं कुरुतात्रार्थ आनयिष्यामि तां सुधाम् ॥ एवमाभाष्य भगवान्मुकुन्दोऽनाथसंश्रयः ॥ १३ ॥ स्थापयित्वा सुरान्सर्वांस्तत्रैव मधुसूदनः ॥ मोहनीरूपमास्थाय दैत्यानामग्रतोऽभवत् ॥१४॥ तावद्दैत्याः सुसंरब्धाः परस्परमथाब्रुवन्॥ विवादः सर्वदैत्यानाममृतार्थे तदाऽभवत् ॥ ॥१५॥ एवं प्रवर्तमाने तु मोहिनीरूपमाश्रिताम् ॥ दृष्ट्वा योषां तदा दैवात्सर्वभूतमनोरमाम् ॥ १६ ॥ विस्मयेन समाविष्टा बभूवुस्तृषितेक्षणाः ॥ तां संमान्य तदा दैत्यराजो बलिरुवाच ह ॥ १७ ॥ ॥ बलिरुवाच ॥ ॥ सुधा त्वया विभक्तव्या सर्वेषां गतिहेतवे ॥ शीघ्रत्वेन महाभागे कुरुष्व वचनं मम ॥ १८ ॥ एवमुक्ता ह्युवाचेदं स्मयमाना बलिं प्रति ॥ स्त्रीणां नैव च विश्वासः कर्तव्यो हि विपश्चिता ॥ १९ ॥ अनृतं साहसं माया मूर्खत्वमतिलोभता ॥ अशौचं निर्घृणत्वं च स्त्रीणां दोषाः स्वभावजाः ॥ २० ॥ निःस्नेहत्वं च विज्ञेयं धूर्तत्वं चैव तत्त्वतः ॥ स्वस्त्रीणां चैव विज्ञेया दोषा नास्त्यत्र संशयः ॥ २१ ॥ यथैव श्वापदानां च वृका हिंसापरायणाः ॥ काका यथांडजानां च श्वापदानां च जंबुकाः ॥ धूर्ता तथा मनुष्याणां स्त्री ज्ञेया सततं बुधैः ॥ २२ ॥ मया सह भवद्भिश्च कथं सख्यं प्रवर्तते ॥ सर्वथात्र न विज्ञेयाः के यूयं चैव का ह्यहम् ॥ २३ ॥ तस्माद्भवद्भिः संचिंत्य कार्याकार्यविचक्षणैः ॥ कर्तव्यं परया बुद्ध्या प्रयातासुरसत्तमाः ॥ २४ ॥ ॥ बलिरुवाच ॥ ॥ यास्त्वया कथिता नार्यो ग्राम्या ग्राम्यजनप्रियाः ॥ तासां त्वं कथ्यमानानां मध्यगा नासि शोभने ॥ २५ ॥ किं त्वया बहुनोक्तेन कुरुष्व वचनं हि नः ॥ सा मोहिनीदं प्रोवाच बलेर्वाक्यादनंतरम् ॥ २६ ॥ करिष्यामि च ते वाक्यं सूक्तासूक्तमिति प्रभो ॥ २७ ॥ ॥ बलिरुवाच ॥ ॥ अद्यामृतं च सर्वेषां विभजस्व यथातथम् ॥ त्वया दत्तं च गृह्णीमः सत्यंसत्यं वदामि ते ॥ २८ ॥ एवमुक्ता तदा देवी मोहिनी सर्वमंगला ॥ उवाचाथासुरान्सर्वान्रोचयल्लौकिकीं स्थितिम् ॥ २९ ॥ ॥ भगवानुवाच ॥ ॥ यूयं सर्वे कृतार्थाश्च जाता दैवेन केनचित् ॥ अद्योपवाससंयुक्ता अमृतस्याधिवासनम् ॥ ३० ॥ क्रियताम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सुराः श्रेष्ठाः शुभेच्छा किंचिदस्ति वः ॥ श्वोभूते पारणं कुर्याद्व्रतार्चनरतिश्च वः ॥ ३१ ॥ न्यायोपार्जितवित्तेन दशमांशेन धीमता ॥ कर्तव्यो विनियोगश्च ईशप्रीत्यर्थहेतवे ॥ ३२ ॥ तथेति मत्वा ते सर्वे यथोक्तं देवमायया ॥ चक्रुस्तथैव दैतेया मोहिता नातिकोविदाः ॥ ३३ ॥ मयासुरेण च तदा भवनानि कृतानि वै ॥ मनोज्ञानि महार्हाणि सुप्रभाणि महांति च ॥ ३४ ॥ तेषूपविष्टास्ते सर्वे सुस्नाताः समलंकृताः ॥ स्थापयित्वा सुसंरब्धाः पूर्णं कलशमग्रतः ॥ ३५ ॥ रात्रौ जागरणं सर्वैः कृतं परमया मुदा ॥ अथोषसि प्रवृत्ते च प्रातःस्नानयुता भवन् ॥ ३६ ॥ असुरा बलिमुख्याश्च पंक्तिभूता यथाक्रमम् ॥ सर्वमावश्यकं कृत्वा तदा पानरता भवन् ॥ ३७ ॥ बलिश्च वृषपर्वा च नमुचिः शंख एव च ॥ सुदंष्ट्रश्चैव संह्रादी कालनेमिर्विभीषणः ॥ ३८ ॥ वातापिरिल्वलः कुम्भो निकुम्भः प्रच्छदस्तथा ॥ तथा सुन्दोपसुन्दौ च निशुम्भः शुम्भ एव च ॥ ३९ ॥ महिषो महिषाक्षश्च बिडालाक्षः प्रतापवान् ॥ चिक्षुराख्यो महाबाहुर्जृंभणोऽथ वृषासुरः ॥ ४० ॥ विबाहुर्बाहुको घोरस्तथा वै घोरदर्शनः ॥ एते चान्ये च बहवो दैत्यदानवराक्षसाः ॥ यथाक्रमं चोपविष्टा राहुः केतुस्तथैव च ॥ ४१ ॥ तेषां तु कोटिसंख्यानां दैत्यानां पंक्तिरास्थिता ॥ ४२ ॥ ततस्तया तदा देव्या अमृतार्थं हि वै द्विजाः ॥ यज्जातं तच्छृणुध्वं हि तया देव्या कृतं महत् ॥४३॥ सर्वे विज्ञापिताः सद्यो गृहीतकलशा तदा ॥ शोभया परया युक्ता साक्षात्सा विष्णुमोहिनी ॥ ४४ ॥ करस्थेन तदा देवी कलशेन विराजिता ॥ शुशुभे परया कांत्या जगन्मंगलमंगला ॥४५॥ परिवेषधराः सर्वे सुरास्ते ह्यसुरांतिकम् ॥ आगतास्तत्क्षणादेव यत्र ते ह्यसुरोत्तमाः ॥ ४६ ॥ तान्दृष्ट्वा मोहिनी सद्य उवाच प्रमदोत्तमा ॥ ४७ ॥ ॥ मोहिन्युवाच ॥ ॥ एते ह्यतिथयो ज्ञेया धर्म्मसर्वस्वसाधनाः ॥ एभ्यो देयं यथाशक्त्या यदि सत्यं वचो मम ॥ प्रमाणं भवतां चाद्य कुरुध्वं मा विलंबथ ॥ ४८ ॥ परेषामुपकारं च ये कुर्वंति स्वशक्तितः ॥ धन्यास्ते चैव विज्ञेयाः पवित्रा लोकपालकाः ॥ ४९ ॥ केवलात्मोदरार्थाय उद्योगं ये प्रकुर्वते ॥ ते क्लेशभागिनो ज्ञेया नात्र कार्या विचारणा ॥ ॥ ५० ॥ तस्माद्विभजनं कार्यं मयैतस्य शुभव्रताः ॥ देवेभ्यश्च प्रयच्छध्वं यद्धि चात्मप्रियाप्रियम् ॥ ५१ ॥ इत्युक्ते वचने देव्या तथा चक्रुरतंद्रिताः ॥ आह्वयामासुरसुराः सर्वान्देवान्सवासवान् ॥ ५२ ॥ उपविष्टाश्च ते सर्वे अमृतार्थं च भो द्विजाः ॥ तेषूपविश्यमानेषु ह्युवाच परमं वचः ॥ मोहिनी सर्वधर्म्मज्ञा असुराणां स्मयन्निव ॥ ५३ ॥ ॥ मोहिन्युवाच ॥ ॥ आदौ ह्यभ्यागताः पूज्या इति वै वैदिकी श्रुतिः ॥ ५४ ॥ तस्माद्यूयं वेदपराः सर्वे देवपरायणाः ॥ ब्रुवंतु त्वरितेनैव आदौ केषां ददाम्यहम् ॥ अमृतं हि महाभागा बलिमुख्या वदंतु भोः ॥ ५५ ॥ बलिनोक्ता तदा देवी

CC-0. In Public Domain. Digitization by eGangotri

यत्ते मनसि रोचते ॥ स्वामिनी त्वं न संदेहो ह्यस्माकं सुंदरानने ॥ ५६ ॥ एवं संमानिता तेन बलिना भावितात्मना ॥ परिवेषणकार्यार्थं कलशं
गृह्य सत्वरा ॥ ५७ ॥ तस्मान्नरेन्द्रकरभोरुलसद्दुकूला श्रोणीतटालसगतिर्मदविह्वलांगी ॥ सा कूजती कनकनूपुरसिंजितेन कुंभस्तनी कलशपा
णिरथाविवेश ॥ ५८ ॥ तदा तु देवी परिवेषयंती सा मोहिनी देवगणाय साक्षात् ॥ ववर्ष देवेषु सुधारसं पुनःपुनः सुधाहाररसामृतं यथा ॥ ५९ ॥
पुनश्च ते देवगणाः सुधारसं दत्तं तया परया विश्वमूर्त्या ॥ देवेंद्रमुख्याः सह लोकपाला गंधर्वयक्षाप्सरसां गणाश्च ॥ ६० ॥ सर्वे दैत्या आसनस्था
स्तदानीं चिंतान्विताः क्षुधया पीडिताश्च ॥ तूष्णींभूता बलिमुख्या द्विजेंद्रा मनस्विनो ध्यानपरा बभूवुः ॥ ६१ ॥ ततस्तथाविधान्दृष्ट्वा दैत्यांस्ता
न्मोहमाश्रितान् ॥ तदा राहुश्च केतुश्च द्वावेतौ दैत्यपुंगवौ ॥ ६२ ॥ देवानां रूपमास्थाय अमृतार्थं त्वरान्वितौ ॥ उपविष्टौ तदा पङ्क्त्यां देवानाममृता
र्थिनौ ॥ ६३ ॥ यदामृतं पातुकामो राहुः परमदुर्जयः ॥ चन्द्रार्काभ्यां प्रकथितो विष्णोरमिततेजसः ॥ ६४ ॥ तदा तस्य शिरश्छिन्नं राहोर्दुर्विग्र
हस्य च ॥ शिरो गगनमापेदे कबंधं च महीतले ॥ भ्रममाणं तदा ह्यद्रींश्चूर्णयामास वै तदा ॥ ६५ ॥ साद्रिश्च सर्वभूलोकश्चूर्णितश्च तदाऽभवत् ॥
तया[1] तेन च देहेन चूर्णितं सचराचरम् ॥ ६६ ॥ दृष्ट्वा तदा महादेवस्तस्योपरि तु संस्थितः ॥ निवासः सर्वदेवानां तस्याः पादतलेऽभवत् ॥ ६७ ॥
पीडनं तत्समीपेथ निवास इति नाम वै ॥ ६८ ॥ महतामालयं यस्माद्यस्यास्तच्चरणांबुजम् ॥ महालयेति विख्याता जगत्त्रयविमोहिनी ॥ ६९ ॥
केतुश्च धूमरूपोऽसावाकाशे विलयं गतः ॥ सुधां समर्प्य चंद्राय तिरोधानगतोऽभवत् ॥ ७० ॥ वासुदेवो जगद्योनिर्जगतां कारणं परम् ॥ विष्णोः
प्रसादात्तज्जातं सुराणां कार्यसिद्धिदम् ॥ ७१ ॥ असुराणां विनाशाय जातं दैवविपर्ययात् ॥ विना दैवेन जानीध्वमुद्यमो हि निरर्थकः ॥ ७२ ॥
यौगपद्येन तैः सर्वैः क्षीराब्धेर्मथनं कृतम् ॥ सिद्धिर्जाता हि देवानामसिद्धिरसुरान्प्रति ॥ ७३ ॥ ततश्च ते देववरान्प्रकोपिता दैत्याश्च मायाप्रवि
मोहिताः पुनः ॥ अनेकशस्त्रास्त्रयुतास्तदाऽभवन्विष्णौ गते गर्जमानास्तदानीम् ॥ ७४ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां
प्रथमे माहेश्वरखण्डे केदारखंडे समुद्रमंथनाख्याने देवानाममृतप्राशनवर्णनंनाम द्वादशोऽध्यायः ॥ १२ ॥ ॥ छ ॥ ॥ लोमश उवाच ॥ ॥
ततस्ते गर्जमानाश्च आक्षिपंतः सुरान्रणे ॥ शतक्रतुप्रमुख्यांस्तान्महाबलपराक्रमान् ॥ १ ॥ विमानमारुह्य तदा महात्मा वैरोचनिः
सर्वबलेन सार्द्धम् ॥ दैत्यैः समेतो विविधैर्महाबलैः सुरान्प्रदुद्राव महाभयावहम् ॥ २ ॥ स्वानि रूपाणि बिभ्रंतः[2] समापेतुः स

१-तया-मोहिन्या-इत्यर्थः । २ आर्षोऽत्र नुम्-बिभ्रतः-इत्यपेक्षितम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हस्रशः ॥ केचिद्व्याघ्रान्समारूढा महिषांश्च तथा परे ॥ ३ ॥ अश्वान्केचित्समारूढा द्विपान्केचित्तथा परे ॥ सिंहांस्तथा परे रूढाः शार्दूलाञ्छरभां स्तथा ॥ ४ ॥ मयूरान्राजहंसांश्च कुक्कुटांश्च तथा परे ॥ केचिद्व्यान्समारूढा उष्ट्रानश्वतरानपि ॥ ५ ॥ गजान्खरान्परे चैव शकटांश्च तथा परे ॥ पादाता बहवो दैत्याः खड्गशक्त्यृष्टिपाणयः ॥६॥ परिघायुधिनः पाशशूलमुद्गरपाणयः ॥ असिलोमान्विताः केचिद्भुशुंडीपरिघायुधाः ॥ ७ ॥ हयनागरथाश्चान्ये समारूढाः प्रहारिणः ॥ विमानानि समारूढा बलिमुख्याः सहस्रशः ॥ ८ ॥ स्पर्द्धमानास्तथान्योन्यं गर्जतश्च मुहुर्मुहुः ॥ वृषपर्वा ह्युवाचेदं बलिनं दैत्यपुंगवम् ॥ ९ ॥ त्वया कृतं महाबाहो इंद्रेण सह संगमम् ॥ विश्वासो नैव कर्तव्यो दुर्हृदा च कथंचन ॥ १० ॥ ऊनेनापि हि तुच्छेन वैरिणापि कथंचन ॥ मैत्री बुद्धिमता कार्या आपद्यपि निवर्तते ॥११॥ न विश्वसेत्पूर्वविरोधिना क्वचित्पराजिताः स्मोऽथ बले त्वयाधुना ॥ पुराणदुष्टाः कथमद्य वै पुनर्मंत्रं विकर्तुं न च ते यतेरन् ॥ १२ ॥ इत्यूचुस्ते दुराधर्षा योद्धुकामा व्यवस्थिताः ॥ ध्वजैश्छत्रैः पताकैश्च रणभूमिमंडयन् ॥ १३ ॥ चामरैश्च दिशः सर्वा लोपितं च रणस्थलम् ॥ तथा सर्वे सुरास्तत्र दैत्यान्प्रति समुत्सुकाः ॥१४॥ पीत्वामृतं महाभागा वाहान्यारुह्य दंशिताः ॥ गजारूढो महेंद्रोपि वज्रपाणिः प्रतापवान् ॥ सूर्यश्चोच्चैःश्रवारूढो मृगा रूढश्च चन्द्रमाः॥१५॥छत्रचामरसंवीताः शोभिता विजयश्रिया ॥ प्रणम्य विष्णुं ते सर्व इंद्राद्या जयकांक्षिणः ॥ १६ ॥ ते विष्णुना ह्यनुज्ञाता असुरान्प्रति वै रुषा ॥ असुराश्च महाकाया भीमाक्षा भीमविक्रमाः ॥ ॥ १७ ॥ तेषां घोरमभूद्युद्धं देवानां दानवैः सह ॥ तुमुलं च महाघोरं सर्वभूतभयावहम् ॥ १८ ॥ शरधारान्वितं सर्वं बभूव परमाद्भुतम् ॥ ततश्चटचटाशब्दा बभूवुश्च दिशोदश ॥ १९ ॥ ततो निमिषमात्रेण शरघातयुता भवन्[1] ॥ शरतोमरनाराचैराहताश्चापतन्भुवि ॥ २० ॥ विध्यमानास्तथा केचिद्विविधुश्चापरारणे ॥ भल्लैर्भग्नाश्च पतिता नाराचैः शकलीकृताः ॥ २१ ॥ क्षुरप्रहारिताः केचिद्दैत्या दानवराक्षसाः ॥ शिलीमुखैर्मारिताश्च भग्नाः केचिच्च दानवाः ॥ २२ ॥ एवं भग्नं दानवानां च सैन्यं दृष्ट्वा देवा गर्जमानाः समंतात् ॥ हृष्टाः सर्वे संमिलित्वा तदानीं लब्ध्वा युद्धे ते जयं श्लाघयन्ते ॥ २३ ॥ शंखवादित्रघोषेण पूरितं च जगत्रयम् ॥ देवान्प्रति कृतामर्षा दानवास्ते महाबलाः ॥ २४ ॥ बलिप्रभृतयः सर्वे संभ्रमेणोत्थिताः पुनः ॥विमानैः सूर्यसंकाशैरनेकैश्च समन्विताः ॥ २५ ॥ द्वंद्वयुद्धं सुतुमुलं देवानां दानवैः सह ॥ संप्रवृत्तं पुनश्चैव परस्परजिगीषया ॥ २६ ॥ बलिना दानवेंद्रेण महेंद्रो युयुधे तदा॥तथा यमो महाबाहुर्नमुच्या सह संगतः ॥२७॥ नैर्ऋतः प्रघसेनैव पाशी कुंभेन संगतः॥ निकुंभेनैव सुमहद्युद्धं

१ भवन्—अभवन्—अडभाव आर्षः ।

CC-0. In Public Domain. Digitization by eGangotri

चक्रे सदारयः ॥ २८ ॥ सोमेन सह राहुश्च युद्धं चक्रे सुदारुणम् ॥ राहुणा चन्द्रदेहोत्थममृतं भक्षितं तदा ॥ संपर्कादमृतस्यैव यथा राहुस्तथाऽभवत् ॥ ॥ २९ ॥ तानि सर्वाणि दृष्टानि शंभुना परमेष्ठिना ॥ आश्रयोऽहं च सर्वेषां भूतानां नात्र संशयः ॥ असुराणां सुराणां च सर्वेषामपि वल्लभः ॥ ३० ॥ एवमुक्तस्तदा राहुः प्रणम्य शिरसा शिवम् ॥ मौलौ स्थितस्तदा चंद्रो अमृतं व्यसृजद्भयात् ॥ ३१ ॥ तेन तस्य हि जातानि शिरांसि सुबहून्यपि ॥ ऐकपद्येन तेषां च स्रजं कृत्वा मनोहराम् ॥ बबंध शंभुः शिरसि शिरोभूषणवत्कृतम् ॥ ३२ ॥ अशनात्कालकूटस्य नीलकंठोऽभवत्तदा ॥ देवानां कार्यसिद्ध्यर्थं मुंडमाला तथा कृता ॥ ३३ ॥ दधार शिरसा तां च मुण्डमालां महेश्वरः ॥३४॥ तया स्रजाऽसौ शुशुभे महात्मा देवादिदेवस्त्रिपुरांतको हरः ॥ गजासुरो येन निपातितो महानथांधको येन कृतश्च चूर्णः ॥ ३५ ॥ गंगा धृता येन शिरस्सुमध्ये चंद्रं च चूडे कृतवान्भयापहः ॥ वेदाः पुराणानि तथागमाश्च तथैव नानाश्रुतयोऽथ शास्त्रम् ॥ ३६ ॥ जल्पंति नानागमभेदभेदैर्मीमांसमानाश्च भवंति मूकाः ॥ नानागमाचार्यमतप्रभेदैर्निरूप्यमाणो जगदेकबंधुः ॥ ३७ ॥ शिवं हि नित्यं परमात्मदैवं वेदैकवेद्यं परमात्मदिव्यम् ॥ विहाय तं मूढजनाः प्रमत्ताः शिवं न जानंति परात्मरूपम् ॥ ३८ ॥ येनैव सृष्टं विधृतं च येन येन श्रितं येन कृतं समग्रम् ॥ यस्यांशभूतं हि जगत्कदाचिद्वेदांतवेद्यः परमात्मा शिवश्च ॥ ३९ ॥ आढ्यो वापि दरिद्रो वा उत्तमो ह्यधमोऽपि वा ॥ शिवभक्तिरतो नित्यं शिव एव न संशयः ॥ ४० ॥ यो वा परकृतां पूजां शिवस्योपरि शोभिताम् ॥ दृष्ट्वा संतोषमायाति दायं प्राप्नोति तत्समम् ॥ ४१ ॥ ये दीपमालां कुर्वंति कार्तिक्यां श्रद्धयान्विताः ॥ यावत्कालं प्रज्वलंति दीपास्ते लिंगमग्रतः ॥ तावद्युगसहस्राणि दाता स्वर्गे महीयते ॥ ४२ ॥ कौसुंभतैलसंयुक्ता दीपा दत्ताः शिवालये ॥ दातारस्तेऽपि कैलासे मोदन्ते शिवसंनिधौ ॥ ४३ ॥ अतसीतैलसंयुक्ता दीपा दत्ताः शिवालये ॥ दातारस्तेऽपि कैलासे मोदन्ते शिवसंनिधौ ॥ ४४ ॥ ज्ञानिनोऽपि हि जायंते दीपदानफलेन हि ॥ ४५ ॥ तिलतैलेन संयुक्ता दीपा दत्ताः शिवालये ॥ ते शिवं यांति संयुक्ताः कुलानां च शतेन वै ॥ ४६ ॥ घृताक्ता यैः कृता दीपा दीपिताश्च शिवालये ॥ ते यांति परमं स्थानं कुललक्षसमन्विताः ॥ ४७ ॥ कर्पूरागुरुधूपैश्च ये यजंति सदा शिवम् ॥ आरार्तिकां सकर्प्पूरां ये कुर्वंति दिनेदिने ॥ ते प्राप्नुवंति सायुज्यं नात्र कार्या विचारणा ॥ ४८ ॥ एककालं द्विकालं वा त्रिकालं ये ह्यतंद्रिताः ॥ लिंगार्चनं प्रकुर्वंति ते रुद्रा नात्र संशयः ॥४९॥ रुद्राक्षधारणं ये च कुर्वंति शिवपूजने ॥ दाने तपसि तीर्थे च पर्वकाले ह्यतंद्रिताः ॥ तेषां यत्सुकृतं सर्वमनंतं भवति द्विजाः ॥ ५० ॥ रुद्राक्षा ये शिवेनोक्तास्ताञ्छृणुध्वं द्विजोत्तमाः ॥ आरभ्यैकमुखं तावद्यावद्वक्त्राणि षोडश ॥ एतेषां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्वौ च विज्ञेयौ श्रेष्ठौ तारयितुं द्विजाः ॥ ५१ ॥ रुद्राक्षाणां पंचमुखस्तथा चैकमुखः स्मृतः ॥ ये धारयंत्येकमुखं रुद्राक्षमनिशं नराः ॥ रुद्रलोकं च गच्छंति मोदन्ते रुद्रसंनिधौ ॥५२॥ जपस्तपः क्रिया योगः स्नानं दानार्चनादिकम् ॥ क्रियते यच्छुभं कर्म्म ह्यनंतं चाक्षधारणात् ॥५३॥ शुनः कंठनिबद्धोऽपि रुद्राक्षो यदि वर्तते ॥ सोऽपि संतारितस्तेन नात्र कार्या विचारणा ॥ ५४ ॥ तथा रुद्राक्षसंबंधात्पापमपि क्षयं व्रजेत् ॥ एवं ज्ञात्वा शुभं कर्म कार्यं रुद्राक्षबंधनात् ॥ ५५ ॥ त्रिपुण्ड्रधारणं येषां विभूत्या मन्त्रपूतया ॥ ते रुद्रलोके रुद्राश्च भविष्यंति न संशयः ॥ ५६ ॥ कपिलायाश्च संगृह्य गोमयं चांतरिक्षगम् ॥ शुष्कं कृत्वाथ संदाह्यं विभूत्यर्थं शिवप्रियैः ॥५७॥ विभूतीति समाख्याता सर्वपापप्रणाशिनी ॥ ललाटेऽंगुष्ठरेखा च आदौ भाव्या प्रयत्नतः ॥ ५८ ॥ मध्यमां वर्जयित्वा तु अंगुलीकद्वयेन च ॥ एवं त्रिरेखासंयुक्तो ललाटे यस्य दृश्यते ॥ स शैवः शिववज्ज्ञेयो दर्शनात्पापनाशनः ॥ ५९ ॥ जटाधराश्च ये शैवाः सप्त पंच तथा नव ॥ जटा ये स्थापयिष्यंति शैवेन विधिना युताः ॥ ६० ॥ ते शिवं प्राप्नुवं तीह नात्र कार्या विचारणा ॥ रुद्राक्षधारणं कार्यं शिवभक्तैर्विशेषतः ॥ ६१ ॥ अल्पेन वा महत्त्वेन पूजितो वा सदाशिवः ॥ कुलकोटिं समुद्धृत्य शिवेन सह मोदते ॥ ६२ ॥ तस्माच्छिवात्परतरं नास्ति किंचिद्द्विजोत्तमाः ॥ यदेवमुच्यते शास्त्रे तत्सर्वं शिवकारणम् ॥ ६३ ॥ शिवो दाता हि लोकानां कर्ता चैवानुमोदिता ॥ शिवशक्त्यात्मकं विश्वं जानीध्वं हि द्विजोत्तमाः ॥ ६४ ॥ शिवेति द्व्यक्षरं नाम त्रायते महतो भयात् ॥ तस्माच्छिवश्चिंत्यतां वै स्मर्यतां च द्विजोत्तमाः ॥ ६५ ॥ ॥ ऋषय ऊचुः ॥ ॥ सोमनाथस्य माहात्म्यं ज्ञातं तस्य प्रसादतः ॥ राहोः शिरोभ यात्सर्वे रक्षिताः परमेष्ठिना ॥ ६६ ॥ सुराश्चेंद्रादयश्चान्ये तस्मिन्युद्धे सुदारुणे ॥ अत ऊर्ध्वं सुराः सर्वे किमकुर्वत उच्यताम् ॥ ६७ ॥ शिवस्य महिमा सर्वः श्रुतस्तव मुखोद्गतः ॥ अथ युद्धस्य वृत्तान्तः कथ्यतां परमार्थतः ॥ ६८ ॥ ॥ लोमश उवाच ॥ ॥ यदा हि दैत्यैश्च पराजिताः सुराः शम्भुं च सर्वे शरणं प्रपन्नाः ॥ शिवं प्रणेमुः सहसा सुरोत्तमा युद्धाय सर्वे च मनो दधुस्तदा ॥ ६९ ॥ तथैव दैत्या अपि युध्यमाना उत्साह युक्तातिबलाश्च सर्वे ॥ देवैः समेताश्च पुनः पुनश्च युद्धं प्रचक्रुः परमास्त्रयुक्ताः ॥७०॥ एवं च सर्वे ह्यसुराः सुराश्च शक्त्यृष्टिशूलैः परिघैः परश्वधैः ॥ जयार्थिनोमर्षयुताः परस्परं सिंहा यथा हैमवतीं दुरत्ययाः ॥ निहन्यमाना ह्यसुराः सुरैस्तदा नानास्त्रयोगैः परमैर्निपेतुः ॥ ७१ ॥ चक्रुस्ते सकलामुर्वीं मांसशोणितकर्दमाम् ॥ महीं वृक्षाद्रिसंयुक्तां ससागरवनाकराम् ॥ ७२ ॥ शिरांसि च कबन्धानि कवचानि महांति च ॥ ध्वजा रथाः पताकाश्च गजवाजिशिरांसि च ॥ ७३ ॥ वहन्त्यश्चापगा ह्यासन्नद्यो भीरुभयावहाः ॥ अगाधाः शोणितोदाश्च तरंतो ब्रह्मराक्षसाः ॥ त

Nepal Sanskrit University...

CC-0. In Public Domain. Digitization by eGangotri

यंति परान्भूतप्रेतप्रमथराक्षसान् ॥ ७४ ॥ शाकिनीडाकिनीसंघा यक्षिण्योऽथ सहस्रशः ॥ नानाकेलिषु संयुक्ताः परस्परमुदान्विताः ॥ ७५ ॥
एवं संक्रीडमानास्ते भूतप्रमथराक्षसाः ॥ रणे तस्मिन्महारौद्रे देवासुरसमागमे ॥ ७६ ॥ बलिना सह देवेन्द्रो युयुधेऽद्भुतविक्रमः ॥ शक्त्या जघान
देवेंद्रं वैरोचनिरमर्षणः ॥ ७७ ॥ तां शक्तिं वञ्चयामास महेन्द्रो लघुविक्रमः ॥ जघान स बलिं यत्नाद्दैत्येंद्रं परमेण हि ॥ ७८ ॥ वज्रेण शिरःधारेण
बाहुं चिच्छेद विक्रमी ॥ गतासुरपतद्भूमौ विमानात्सूर्यसंनिभात् ॥ ७९ ॥ पतितं च बलिं दृष्ट्वा वृषपर्वा रुषान्वितः ॥ ववर्ष शरधा
राभिः पयोद इव पर्वतम् ॥ ८० ॥ महेंद्रं सगजं चैव सहमानं शिताञ्छरान् ॥ तदा युद्धमभूद्धोरं महेन्द्रवृषपर्वणोः ॥ ८१ ॥
निपात्य वृषपर्वाणमिंद्रः परबलार्दनः ॥ ८२ ॥ ततो वज्रेण महता दानवानवधीद्रणे ॥ शिरसि च्छेदिताः केचित्केचित्कंधरतो हताः ॥ ८३ ॥
विह्वलाश्च कृताः केचिदिंद्रेण कुपितेन च ॥ तथा यमेन निहता वायुना वरुणेन च ॥ ८४ ॥ कुबेरेण हताश्चान्ये नैर्ऋतेन तथा परे ॥ अग्निना
निहताः केचिदीशेनैव विदारिताः ॥ ८५ ॥ एवं तदा तैर्निहता बलीयसो महासुरा विक्रमशालिनश्च ॥ सुरैस्तु सर्वैः सह लोकपालैः शिवप्रसादा
भिहतास्तदानीम् ॥८६॥ ततो महादैत्यवरो दुरात्मा स कालनेमिः परमास्त्रयुक्तः ॥ ययौ तदानीं सुरसत्तमांस्तान्हंतुं सदा क्रूरमतिः स एकः ॥८७॥
सिंहारूढो दंशितश्च त्रिशूलेन हि संयुतः ॥ दैत्यानामर्बुदेनैव सिंहारूढेन संवृतः ॥ ८८ ॥ ते सिंहा दंशिताः सर्वे महाबलपराक्रमाः ॥ तेषु
सिंहेषु चारूढा महादैत्याश्च तत्समाः ॥ ८९ ॥ आयांतीं दैत्यसेनां तां सर्वां सिंहविभूषिताम् ॥ कालनेमियुतां दृष्ट्वा देवा इंद्रपुरोगमाः ॥ भयमाज
ग्मुरतुलं तदा ध्यानपरा भवन्[1] ॥ ९० ॥ किं कुर्मोऽद्य वयं सर्वे कथं जेष्याम चाद्भुतम् ॥ एतादृशमसंख्याकमनीकं सिंहसंवृतम् ॥ ९१ ॥ एवं
विचिंत्यमानास्ते ह्यागतस्तत्र नारदः ॥ नारदेन च तत्सर्वं पुरावृत्तं महत्तरम् ॥ ९२ ॥ कथितं च महेंद्राय कालनेमेस्तपोबलम् ॥ अजेयत्वं च
संग्रामे वरदानबलेन तु ॥ ९३ ॥ विष्णुं विना वयं देवा अशक्ता रणमंडले ॥ जेतुं च स ततो विष्णुः स्मर्यतां परमेश्वरः ॥ तमालनीलो वरदः सर्वै
र्विजयकांक्षिभिः ॥९४॥ नारदस्य वचः श्रुत्वा तदा देवास्त्वरान्विताः॥ध्यानेन च महाविष्णुं ततः परबलार्दनम् ॥ स्मरंतः परमात्मानमिदमूचुश्च तं
विभुम् ॥ ९५ ॥ ॥ देवा ऊचुः ॥ ॥ नमस्तुभ्यं भगवते नमस्ते विश्वमंगलम् ॥ श्रीनिवास नमस्तुभ्यं श्रीपते ते नमोनमः ॥९६॥ अद्यास्मान्भयभी
तांस्त्वं कालनेमिभयार्दितान् ॥ त्रातुमर्हसि दैत्याच्च देवानामभयप्रद ॥९७॥ एवं ध्यातः संस्मृतश्च प्रादुर्भूतो हरिस्तदा ॥ नीलो गरुडमारुह्य जगता

१ अडभावः आर्षः--अभवन् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मभयप्रदः ॥ ९८ ॥ चक्रपाणिस्तदायातो देवानां विजयाय च ॥ गगनस्थं महाविष्णुं गरुडोपरि संस्थितम् ॥ श्रीवासमेनं दुर्द्धर्षं योद्धुकामं दद
र्शिरे ॥ ९९ ॥ तथा दृष्ट्वा कालनेमिस्तदानीं प्रहस्यमानोऽतिरुषा बलान्वितः ॥ कस्त्वं महाभाग वरेण्यरूपः श्यामो युवा वारणमत्तविक्रमः ॥ करे
गृहीतं निशितं महाप्रभं चक्रं च कस्मात्कथयस्व मे प्रभो ॥ १०० ॥ ॥ श्रीभगवानुवाच ॥ ॥ युद्धार्थमिह चायातो देवानां कार्यसिद्धये ॥
त्वं स्थिरो भव रे मंद दहाम्यद्य न संशयः ॥ १०१ ॥ श्रुत्वा भगवतो वाक्यं कालनेमिः प्रतापवान् ॥ उवाच रुषितो भूत्वा भगवंतमधोक्षजम् ॥
॥ १०२ ॥ मूलभूतो हि देवानां भगवान्युद्धदुर्मदः ॥ युद्धं कुरु मया सार्द्धं यदि शूरोऽसि संप्रति ॥ १०३ ॥ प्रहस्य भगवान्विष्णुरुवाचेदं महाप्रभः ॥
गगनस्थो भव त्वं हि महीस्थोऽहं भवामि वै ॥ १०४ ॥ अप्रशस्तं च विषमं युद्धं चैव यथा भवेत् ॥ तथा कुरु महाबाहो गगने वा महीतले ॥
॥ १०५ ॥ तथेति मत्वा हि महानुभावो दैत्यैः समेतोऽर्बुदसंख्यकैश्च ॥ सिंहोपरिस्थैश्च महानुभावैर्महाबलैः क्रूरतरैस्तदानीम् ॥ १०६ ॥ गगनमथ
जगाहे मंदमंदं महात्मा ह्यसुरगणसमेतो विश्वरूपं जिघांसुः ॥ त्रिशिखमपरमुग्रं गृह्य संदेशचेष्टादशनविकृतवक्त्रो योद्धुकामो हरिं सः ॥ १०७ ॥
इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां प्रथमे माहेश्वरखण्डे केदारखंडे समुद्रमंथनाख्याने देवासुरसंग्रामवर्णनंनाम त्रयो
दशोऽध्यायः ॥ १३ ॥ ॥ लोमश उवाच ॥ ॥ ततो युद्धमतीवासीदसुरैर्विष्णुना सह ॥ ततः सिंहाः सपक्षास्ते दंशिताः परमाद्भुताः ॥ १ ॥
असुरैरुह्यमानास्ते गरुत्मंतं व्यदारयन् ॥ सिंहास्ते दारितास्तेन खंडशश्च विदारिताः ॥ २ ॥ विष्णुना च तदा दैत्याश्चक्रेण शकलीकृताः ॥
हतांस्तानसुरान्दृष्ट्वा कालनेमिः प्रतापवान् ॥ ३ ॥ त्रिशूलेनाहनद्विष्णुं रोषपर्याकुलेक्षणः ॥ तमायांतं च जगृहे मुकुंदोऽनाथसंश्रयः ॥ ४ ॥
करेण वामेन जघान लीलया तं कालनेमिं ह्यसुरं महाबलम् ॥ तेनैव शूलेन समाहतोऽसौ मूर्च्छान्वितोऽसौ सहसा पपात ॥ ५ ॥ पतितः
पुनरुत्थाय शनैरुन्मील्य लोचने ॥ पुरतः स्थितमालोक्य विष्णुं सर्वगुहाशयम् ॥ ६ ॥ लब्धसंज्ञोऽब्रवीद्वाक्यं कालनेमिर्महाबलः ॥
तव युद्धं न दास्यामि नास्ति लोके स्पृहा मम ॥ ७ ॥ ये येऽसुरा हता युद्धे अक्षयं लोकमाप्नुयुः ॥ ब्रह्मणो वचनात्सद्य इंद्रेण सह संगताः
॥ ८ ॥ भुंजतो विविधान्भोगान्देववद्विचरंति ते ॥ इंद्रेण सहिताः सर्वे संसारे च पतंत्यथ ॥ ९ ॥ तस्माद्युद्धेन मरणं न कांक्षे क्षणभंगुरम् ॥
अन्यजन्मनि मे वीर वैरभावान्न संशयः ॥ दातुमर्हसि मे नाथ कैवल्यं केवलं परम् ॥ १० ॥ तथेति दैत्यप्रवरो निपातितः परेण पुंसा
परमार्थदेन ॥ दत्त्वाऽभयं देवतानां तदानीं तथा सुधां देवताभ्यः प्रदत्त्वा ॥ ११ ॥ कालनेमिर्हतो दैत्यो देवा जाता ह्यकंटकाः ॥ शल्यरूपो

महान्सद्यो विष्णुना प्रभविष्णुना ॥ १२ ॥ तिरोधानं गतः सद्यो भगवान्कमलेक्षणः ॥ इंद्रोऽपि कदनं कृत्वा दैत्यानां परमाद्भुतम् ॥ १३ ॥
पतितानां क्लीबरूपाणां भग्नानां भीतचेतसाम् ॥ मुक्तकच्छशिखानां च चक्रे स कदनक्रियाम् ॥ १४ ॥ अर्थशास्त्रपरो भूत्वा महेंद्रो दुरतिक्रमः ॥
दैत्यानां कालरूपोऽसौ शचीपतिरुदारधीः ॥ १५ ॥ एवं निहन्यमानानामसुराणां शचीपतेः ॥ निवारणार्थं भगवानागतो नारदस्तदा ॥ १६ ॥
॥ ॥ नारद उवाच ॥ ॥ युद्धहताश्च ये वीरा ह्यसुरा रणमण्डले ॥ तेषामनु कथं कर्ता भीतानां च विहिंसनम् ॥ १७ ॥ ये भीतांश्च प्रपन्नांश्च
घातयंति मदोद्धताः ॥ ब्रह्मघ्नास्तेऽपि विज्ञेया महापातकसंयुताः ॥ १८ ॥ तस्मात्त्वया न कर्त्तव्यं मनसापि विहिंसनम् ॥ एवमुक्तस्तदा शक्रो
नारदेन महात्मना ॥ १९ ॥ सुरसेनान्वितः सद्य आगतो हि त्रिविष्टपम् ॥ तदा सर्वे सुरगणाः सुहृद्भ्यश्च परस्परम् ॥ बभूवुर्मुदिताः सर्वे
यक्षगंधर्वकिंनराः ॥ २० ॥ तदा इंद्रोऽमरावत्यां सह शच्याऽभिषेचितः ॥ २१ ॥ देवर्षिप्रमुखैश्चैव ब्रह्मर्षिप्रमुखैस्तथा ॥ शक्रोऽपि विजयं प्राप्तः
प्रसादाच्छंकरस्य च ॥ २२ ॥ तदा महोत्सवो विप्रा देवलोके महानभूत् ॥ शंखाश्च पटहाश्चैव मृदंगा मुरजा अपि ॥ तथानकाश्च भेर्यश्च नेदुर्दुंदु
भयः समम् ॥ २३ ॥ गायकाश्चैव गंधर्वाः किन्नराश्चाप्सरोगणाः ॥ ननृतुर्जगुस्तुष्टुवुश्च सिद्धचारणगुह्यकाः ॥ २४ ॥ एवं विजयमापन्नः शक्रो
देवेश्वरस्तदा ॥ देवैर्हतास्तदा दैत्याः पतितास्ते महीतले ॥ २५ ॥ गतासवो महात्मानो बलिप्रमुखतो ह्यमी ॥ तपस्तप्तुं पुरा विप्रो भार्गवो मान
सोत्तरम् ॥ २६ ॥ गतः शिष्यैः परिवृतस्तस्माद्युद्धं न वेद तत् ॥ अवशेषाश्च ये दैत्यास्ते गता भार्गवं प्रति ॥ २७ ॥ कथितं वै महद्वृत्तमसुराणां
क्षयावहम् ॥ निशम्य मन्युमाविष्टो ह्यागतो भृगुनंदनः ॥ २८ ॥ शिष्यैः परिवृतो भूत्वा मृतांस्तानसुरानपि ॥ विद्यया मृतजीविन्या पतितान्स
मजीवयत् ॥ २९ ॥ निद्रा[1]पायगता यद्वदुत्थितास्ते तदाऽसुराः ॥ उत्थितः स बलिः प्राह भार्गवं ह्यमितद्युतिम् ॥ ३० ॥ जीवितेन किमद्यैव मम
नास्ति प्रयोजनम् ॥ पातितस्त्रिदशेंद्रेण यथा कापुरुषस्तथा ॥ ३१ ॥ बलिनोक्तं वचः श्रुत्वा शुक्रो वचनमब्रवीत् ॥ मनस्विनो हि ये शूराः
पतंति समरे बुधाः ॥३२॥ ये शस्त्रेण हताः सद्यो म्रियमाणा व्रजंति वै ॥ त्रिविष्टपं न संदेह इति वेदानुशासनम् ॥ ३३ ॥ एवमाश्वासयामास
बलिनं भृगुनंदनः ॥ तपस्तताप विविधं दैत्यानां सिद्धिदायकम् ॥ ३४ ॥ तथा दैत्या गताः सर्वे भृगुणा च प्रचोदिताः ॥ पातालमवसन्सर्वे

१ निद्रापायगताः--निद्रान्तं गताः निद्रावस्थातो जाग्रदवस्थामापन्नाः--इत्यर्थः ।

CC-0. In Public Domain. Digitization by eGangotri

बलिमुख्याः सुखेन वै ॥ ३९ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां प्रथमे माहेश्वरखण्डे केदारखण्डे देवासुरसंग्रामे भार्गवेण मृतदैत्यसंजीवनवर्णनंनाम चतुर्दशोऽध्यायः ॥ १४ ॥ ॥ छ ॥ ॥ ऋषय ऊचुः ॥ ॥ राज्यं प्राप्तो हि देवेंद्रः कथितस्ते गुरुं विना ॥ गुरोरवज्ञया जातो राज्यभ्रंशो हि तस्य तु ॥ १ ॥ केन प्रणोदितश्चेंद्रो बभूव चिरमासने ॥ तत्सर्वं कथयाशु त्वं परं कौतूहलं हि नः ॥ २ ॥ ॥ लोमश उवाच ॥ ॥ गुरुणापि विना राज्यं कृतवान्स शचीपतिः ॥ विश्वरूपोक्तविधिना इंद्रो राज्ये स्थितो महान् ॥ ॥ ३ ॥ विश्वकर्मसुतो विप्रा विश्वरूपो महानृपः ॥ पुरोहितोऽथ शक्रस्य याजकश्चाभवत्तदा ॥ ४ ॥ तस्मिन्यज्ञेऽवदानैश्च यजने असुरान्सुरान् ॥ मनुष्यांश्चैव त्रिशिरा अपरोक्षं शचीपतेः ॥ ५ ॥ देवान्ददाति साक्रोशं दैत्यांस्तूष्णीमथांददात् ॥ मनुष्यान्मध्यपातेन प्रत्यहं स ग्रहान्द्विजः ॥ ६ ॥ एकदा तु महेंद्रेण सूचितो गुरुलाघवात् ॥ अलक्ष्यमाणेन तदा ज्ञातं तस्य चिकीर्षितम् ॥ ७ ॥ दैत्यानां कार्यसिद्ध्यर्थमवदानं प्रयच्छति ॥ असौ पुरोहितोऽस्माकं परेषां च फलप्रदः ॥ ८ ॥ इति मत्वा तदा शक्रो वज्रेण शतपर्वणा ॥ चिच्छेद तच्छिरांस्येव तत्क्षणादभवद्वधः ॥ ९ ॥ येनाकरोत्सोमपानमजायंत कपिंजलाः ॥ ततोन्येन सुरापानात्कलविंका भवन्मुखात् ॥ १० ॥ अन्याननादजायंत तित्तिरा विश्वरूपिणः ॥ एवं हतो विश्वरूपः शक्रेण मंदभागिना ॥ ११ ॥ ब्रह्महत्या तदोद्भूता दुर्धर्षा च भयावहा ॥ दुर्धर्षा दुर्मुखा दुष्टा चण्डालरजसान्विता ॥ १२ ॥ ब्रह्महत्या सुरापानं स्तेयं गुर्वंगनागमः ॥ इत्येपामप्यघवतामिदमेव च निष्कृतिः ॥ १३ ॥ नामव्याहरणं विष्णोर्यतस्तद्विषया मतिः ॥ त्रिशिरा धूम्रहस्ता सा शक्रं ग्रस्तुमुपाययौ ॥ १४ ॥ ततो भयेन महता पलायनपरोऽभवत् ॥ पलायमानं तं दृष्ट्वा ह्यनुयाता भयावहा ॥ १५ ॥ यतो धावति साऽधावत्तिष्ठंतमनुतिष्ठति ॥ अंगकृता यथा छाया शक्रस्य परिवेष्टितुम् ॥ आयाति तावत्सहसा इंद्रोऽप्यप्सु न्यमज्जत ॥ १६ ॥ शीघ्रत्वेन यथा विप्राश्चिरंतनजलेचरः ॥ १७ ॥ एवं दिव्यशतं पूर्णं वर्षाणां च शचीपतेः ॥ वसतस्तस्य दुःखेन तथा चैव शतद्वयम् ॥ अराजकं तदा जातं नाकपृष्ठे भयावहम् ॥ १८ ॥ तदा चिंतान्विता देवा ऋषयोऽपि तपस्विनः ॥ त्रैलोक्यं चाऽऽपदा ग्रस्तं बभूव च तदा द्विजाः ॥ १९ ॥ एकोऽपि ब्रह्महा यत्र राष्ट्रे वसति निर्भयः ॥ अकालमरणं तत्र साधूनामुपजायते ॥ २० ॥ राजा पापयुतो यस्मिन्राष्ट्रे वसति तत्र वै ॥ दुर्भिक्षं चैव मरणं तथैवोपद्रवा द्विजाः ॥ २१ ॥ भवंति बहवोऽनर्थाः प्रजानां नाशहेतवे ॥ तस्माद्राज्ञा तु कर्तव्यो धर्म्मः श्रद्धापरेण हि ॥ २२ ॥ तथा प्रकृ

१ अडभात्र आर्पः । २ संबोधनमिदम्—हे द्विजाः ।

CC-0. In Public Domain. Digitization by eGangotri

तयो राज्ञः शुचित्वेन प्रतिष्ठिताः ॥ इन्द्रेण च कृतं पापं तेन पापेन वै द्विजाः ॥ नानाविधैर्महातापैः सोपद्रवमभूज्जगत् ॥ २३ ॥ ॥ शौनक
उवाच ॥ ॥ अश्वमेधशतेनैव प्राप्तं राज्यं महत्तरम् ॥ देवानामखिलं सूत कस्माद्विघ्नमजायत ॥ शक्रस्य च महाभाग यथावत्कथयस्व नः ॥२४॥
॥ सूत उवाच ॥ ॥ देवानां दानवानां च मनुष्याणां विशेषतः ॥ कर्म्मैव सुखदुःखानां हेतुभूतं न संशयः ॥ २५ ॥ इन्द्रेण च कृतं विप्रा मह
द्भूतं जुगुप्सितम् ॥ गुरोरवज्ञा च कृता विश्वरूपवधः कृतः ॥ २६ ॥ गौतमस्य गुरोः पत्नी सेविता तस्य तत्फलम् ॥ प्राप्तं महेंद्रेण चिरं यस्य
नास्ति प्रतिक्रिया ॥ २७ ॥ ये हि दुष्कृतकर्म्माणो न कुर्वंति च निष्कृतिम् ॥ दुर्दशां प्राप्नुवन्त्येते यथैवेन्द्रः शतक्रतुः ॥ २८ ॥ दुष्कृतोपार्जितस्या
तः प्रायश्चित्तं हि तत्क्षणात् ॥ कर्तव्यं विधिवद्विप्राः सर्वपापोपशांतये ॥ २९ ॥ उपपातकमध्यस्तं महापातकतां व्रजेत् ॥ ३० ॥ ततः स्वधर्मनिष्ठां[1]
च ये कुर्वंति सदा नराः ॥ प्रातर्मध्याह्नसायाह्ने तेषां पापं विनश्यति ॥ ३१ ॥ प्राप्नुवंत्युत्तमं लोकं नात्र कार्या विचारणा ॥ तस्मादसौ दुराचारः
प्राप्तो वै कर्मणः फलम् ॥ ३२ ॥ स प्रधार्य तदा सर्वे लोकपालास्त्वरान्विताः ॥ बृहस्पतिमुपागम्य सर्वमात्मनि धिष्ठितम् ॥ कथयामासुरव्यग्रा
इंद्रस्य च गुरुं प्रति ॥ ३३ ॥ देवैरुक्तं वचो विप्रा निशम्य च बृहस्पतिः ॥ अराजकं च संप्राप्तं चिंतयामास बुद्धिमान् ॥ ३४ ॥ किं कार्यं
चाद्य कर्तव्यं कथं श्रेयो भविष्यति ॥ देवानां चाद्य लोकानामृषीणां भावितात्मनाम् ॥ ३५ ॥ मनसैव च तत्सर्वं कार्याकार्यं
विचार्य च ॥ जगाम शक्रं त्वरितो देवैः सह महायशाः ॥ ३६ ॥ प्राप्तो जलाशयं तं च यत्रास्ते हि पुरंदरः ॥ यस्य तीरे स्थिता हत्या
चंडालीव भयावहा ॥ ३७ ॥ तत्रोपविष्टास्ते सर्वे देवा ऋषिगणान्विताः ॥ आह्वानं च कृतं तस्य शक्रस्य गुरुणा स्वयम् ॥ ३८ ॥ समुत्थितस्ततः
शक्रो ददर्श स्वगुरुं तदा ॥ बाष्पपूरितवक्त्रो हि बृहस्पतिमभाषत ॥ ३९ ॥ प्रणिपत्य च तत्रत्यान्कृताञ्जलिरभाषत ॥ तदा दीनमुखो भूत्वा मनसा
संविमृश्य च ॥ ४० ॥ स्वयमेव कृतं पूर्वमज्ञानलक्षणं महत् ॥ अधुनैव मया कार्यं किं कर्तव्यं वद प्रभो ॥ ४१ ॥ प्रहस्योवाच भगवान्बृहस्पति
रुदारधीः ॥ पुरा त्वया कृतं यच्च तस्येदं कर्मणः फलम् ॥ ४२ ॥ मां च उद्दिश्य भो इंद्र तद्भोगादेव संक्षयः ॥ प्रायश्चितं हि हत्याया न दृष्टं स्मृति
कारिभिः ॥ ४३ ॥ अज्ञानतो हि यज्जातं पापं तस्य प्रतिक्रिया ॥ कथिता धर्म्मशास्त्रज्ञैः सकामस्य न विद्यते ॥ ४४ ॥ सकामेन कृतं पापमकामं
नैव जायते ॥ ताभ्यां विषयभेदेन प्रायश्चित्तं विधीयते ॥ ४५ ॥ मरणांतो विधिः कार्यो कामेन हि कृतेन हि ॥ अज्ञानजनिते पापे प्रायश्चित्तं

१ स्वधर्मनिष्ठां--नित्यं स्नानसन्ध्यावन्दनादिरूपाम्--इत्यर्थः । २ सर्वम्--इत्यस्य कथयामासुः--इत्यनेन सम्बन्धः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विधीयते ॥ ४६ ॥ तस्मात्त्वया कृतं यच्च स्वयमेव हतो द्विजः ॥ पुरोहितश्च विद्वांश्च तस्मान्नास्ति प्रतिक्रिया ॥ ४७ ॥ यावन्मरणमप्येति तावदप्सु स्थिरो भव ॥ ४८ ॥ शताश्वमेधसंज्ञं च यत्फलं तव दुर्मते ॥ तन्नष्टं तत्क्षणादेव घातितो हि द्विजो यदा ॥ ४९ ॥ सच्छिद्रे च यथा तोयं न तिष्ठति घटेऽण्वपि ॥ तथैव सुकृतं पापे हीयते च प्रदक्षिणम् ॥ ५० ॥ तस्माच्च दैवसंयोगात्प्राप्तं स्वर्गादिकं च यैः ॥ यथोक्तं तद्भवे तेषां धर्मिष्ठानां न संशयः ॥ ५१ ॥ एतच्छ्रुत्वा वचस्तस्य शक्रो वचनमब्रवीत् ॥ कुकर्मणा मदीयेन प्राप्तमेतन्न संशयः ॥ ५२ ॥ अमरावतीमाशु त्वं गच्छ देवर्षिभिः सह ॥ लोकानां कार्यसिद्ध्यर्थं देवानां च बृहस्पते ॥ इंद्रं कुरु महाभाग यस्ते मनसि रोचते ॥ ५३ ॥ यथा मृतस्तथाहं वै ब्रह्महत्यावृतो महान् ॥ रागद्वेषसमुत्थेन पापेनास्मि परिप्लुतः ॥ ५४ ॥ तस्मात्त्वरान्विता यूयं देवराजानमाशु वै ॥ कुर्वंतु मदनुज्ञाताः सत्यं प्रतिवदामि वः ॥ ५५ ॥ एवमुक्तास्तदा सर्वे बृहस्पतिपुरोगमाः ॥ एत्यामरावतीं तूर्णं पुरंदरविचेष्टितम् ॥ कथयामासुरव्यग्राः शचीं प्रति यथा तथा ॥ ५६ ॥ राज्यस्य हेतोः किं कार्यं विमृशंतः परस्परम् ॥ ५७ ॥ एवं विमृश्यमानानां देवानां तत्र नारदः ॥ यदृच्छयागतस्तत्र देवर्षिरमितद्युतिः ॥ ५८ ॥ उवाच पूजितो देवान्कस्माद्यूयं विचेतसः ॥ तेनोक्ताः कथयामासुः सर्वं शक्रस्य चेष्टितम् ॥ ५९ ॥ गतमिंद्रस्य चेंद्रत्वमेनसा परमेण तु ॥ ततः प्रोवाच तान्देवान्देवर्षिर्नारदो वचः ॥ ६० ॥ यूयं देवाश्च सर्वज्ञास्तपसा विक्रमेण च ॥ तस्मादिंद्रो हि कर्तव्यो नहुषः सोमवंशजः ॥ ६१ ॥ सोऽस्मिन्राष्ट्रे प्रतिष्ठाप्यस्त्वरितेनैव निर्जराः ॥ एकोनमश्वमेधानां शतं तेन महात्मना ॥ कृतमस्ति महाभागा नहुषेण च यज्वना ॥ ६२ ॥ शच्या श्रुतं च तद्वाक्यं नारदस्य मुखोद्गतम् ॥ गतांतःपुरमव्यग्रा बाष्पपूरितलोचना ॥ ६३ ॥ नारदस्य वचः श्रुत्वा सर्वे देवान्वमोदयन्[1] ॥ ६४ ॥ नहुषं राज्यमारोढुमैकपद्येन ते यदा ॥ आनीतो हि तदा राजा नहुषो ह्यमरावतीम् ॥ ६५ ॥ राज्यं दत्तं महेंद्रस्य सुरैः सर्वैर्महर्षिभिः ॥ तदागस्त्यादयः सर्वे नहुषं पर्युपासत ॥ ६६ ॥ गंधर्वाप्सरसो यक्षा विद्याधरमहोरगाः ॥ यक्षाः सुपर्णाः पतगा ये चान्ये स्वर्गवासिनः ॥ ६७ ॥ तदा महोत्सवो जातो देवपुर्यां निरंतरः ॥ शंखतूर्यमृदंगानि नेदुर्दुंदुभयः समम् ॥ ६८ ॥ गायकाश्च जगुस्तत्र तथा वाद्यानि वादकाः ॥ नर्तका ननृतुस्तत्र तथा राज्यमहोत्सवे ॥ ६९ ॥ अभिषिक्तस्तदा तत्र बृहस्पतिपुरोगमैः ॥ ७० ॥ अर्चितो देवसूक्तैश्च यथा वद्ग्रहपूजनम् ॥ कृतवांश्चैव ऋषिभिर्विद्वद्भिर्भावितात्मभिः ॥ ७१ ॥ तथा च सर्वैः परिपूजितो महान्राजा सुराणां नहुषस्तदानीम् ॥ इंद्रासने चेंद्र

१ सन्धिरार्षः—देवाः अन्वमोदयन्—इति पदच्छेदः ।

CC-0. In Public Domain. Digitization by eGangotri

समानरूपः संस्तूयमानः परमेण वर्चसा ॥ ७२ ॥ सुगंधदीपैश्च सुवाससा युतोऽलंकारभोगैः सुविराजितांगः ॥ बभौ तदानीं नहुषो मुनींद्रैः संस्तूयमानो हि तथाऽमरेंद्रैः ॥ ७३ ॥ इति परमकलान्वितोऽसौ सुरमुनिवरगणैश्च पूज्यमानः ॥ नहुषनृपवरोऽभवत्तदानीं हृदि महता हृच्छयेन तप्तः ॥ ७४ ॥ ॥ नहुष उवाच ॥ ॥ इंद्राणी कथमद्यैव नायाति मम सन्निधौ ॥ तां चाह्वयत शीघ्रं भो मा विलंबितुमर्हथ ॥ ७५ ॥ नहुषस्य वचः श्रुत्वा बृहस्पतिरुदारधीः ॥ शचीभवनमासाद्य उवाच च सविस्तरम् ॥ ७६ ॥ शक्रस्य दुर्निमित्तेन ह्यानीतो नहुषोऽत्र वै ॥ राज्यार्थे भामिनि त्वं च अर्द्धासनगता भव ॥ ७७ ॥ शची प्रहस्य चोवाच बृहस्पतिमकल्मषम् ॥ असौ न परिपूर्णो हि यज्ञैः शक्रासने स्थितः ॥ एकोनमश्वमेधानां शतं कृतमनेन वै ॥ ७८ ॥ तस्मान्न योग्यो मां प्राप्तुं तत्त्वतो हि विमृश्यताम् ॥ यदि मां साभिलाषो हि परस्त्रियमचेतनः ॥ अवाह्यवाहनेनैव अत्रागत्य लभेत माम् ॥ ७९ ॥ तथेति गत्वा त्वरितो बृहस्पतिरुवाच तम् ॥ नहुषं कामसंतप्तं शच्योक्तं च यथातथम् ॥ ८० ॥ तथेति मत्वा राजासौ नहुषः काममोहितः ॥ विमृश्य परया बुद्ध्या अवाह्यं किं प्रशस्यते ॥ ८१ ॥ स बुद्ध्या च चिरं स्मृत्वा ब्राह्मणाश्च तपस्विनः ॥ अवाह्याश्च भवंत्यस्मादात्मानं वाहयाम्यहम् ॥ ८२ ॥ द्वाभ्यां च तस्याः प्राप्त्यर्थमिति मे हृदि वर्तते ॥ शिबिकां च ददौ ताभ्यां द्विजाभ्यां काममोहितः ॥ ८३ ॥ उपविश्य तदा तस्यां शिबिकायां समाहितः ॥ सर्पसर्पेति वचनान्नोदयामास तौ तदा ॥ ८४ ॥ अगस्त्यः शिबिकावाही ततः क्रुद्धोऽशपन्नृपम् ॥ विप्राणामवमंता त्वमुन्मत्तोऽजगरो भव ॥ ८५ ॥ शापोक्तिमात्रतो राजा पतितो ब्राह्मणस्य हि ॥ तत्रैवाजगरो भूत्वा विप्रशापो दुरत्ययः ॥ ८६ ॥ यथा हि नहुषो जातस्तथा सर्वेऽपि तादृशाः ॥ विप्राणामवमानेन पतन्ति निरयेऽशुचौ ॥ ॥ ८७ ॥ तस्मात्सर्वप्रयत्नेन पदं प्राप्य विचक्षणैः ॥ अप्रमत्तैर्नरैर्भाव्यमिहामुत्र च लब्धये ॥ ८८ ॥ तथैव नहुषः सर्प्पो जातोरण्ये महाभये ॥ एवं चैवाभवत्तत्र देवलोके ह्यराजकम् ॥ ८९ ॥ तथैव ते सुराः सर्वे विस्मयाविष्टचेतसः ॥ अहो बत महत्कष्टं प्राप्तं राज्ञा ह्यनेन वै ॥ ९० ॥ न मर्त्यलोको न स्वर्गो जातो ह्यस्य दुरात्मनः ॥ सतामवज्ञया सद्यः सुकृतं दग्धमेव हि ॥ ९१ ॥ याज्ञिको ह्यपरो लोके कथ्यतां च महामुने ॥ तदोवाच महातेजा नारदो मुनिसत्तमः ॥ ९२ ॥ ययातिं च महाभागा आनयध्वं त्वरान्विताः ॥ देवदूतास्तु वै तूर्णं ययातिं द्रुतमानयन् ॥ ९३ ॥ विमानमारुह्य तदा महात्मा ययौ दिवं देवदूतैः समेतः ॥ पुरस्कृतो देववरैस्तदानीं तथोरगैर्यक्षगंधर्वसिद्धैः ॥ ९४ ॥ आयातः सोऽमरावत्यां त्रिदशैरभितोषितः ॥ इंद्रासने चोपविष्टो बभाषे च स सत्वरम् ॥ ९५ ॥ नारदेनैवमुक्तस्तु त्वं राजा याज्ञिको ह्यसि ॥ सतामवज्ञया प्राप्तो नहुषो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दंदशूकताम् ॥ ९६ ॥ ये प्राप्नुवंति धर्मिष्ठा दैवेन परमं पदम् ॥ प्राक्तनेनैव मूढास्ते न पश्यंति शुभाशुभम् ॥ ९७ ॥ पतंति नरके घोरे स्तब्धा वै नात्र संशयः ॥ ९८ ॥ ॥ ययातिरुवाच ॥ ॥ यैः कृतं चामितं पुण्यं तेषां विघ्नः प्रजायते ॥ अल्पकत्वेन देवर्षे विद्धि सर्वं परं मम ॥ ९९ ॥ महादानानि दत्तानि अन्नदानयुतानि च ॥ गोदानानि बहून्येव भूमिदानयुतानि च ॥ १०० ॥ तथैव सर्वाण्यपि चोत्तमानि दानानि चोक्तानि मनीषिभिर्यदा ॥ एतानि सर्वाणि मया तदैव दत्तानि काले च महाविधानतः ॥ १०१ ॥ यज्ञैरिष्टं वाजपेयातिरात्रैर्ज्योतिष्टोमै राजसूयादिभिश्च ॥ शास्त्रप्रोक्तैरश्वमेधादिभिश्च यूपैरेषालंकृता भूः समंतात् ॥ १०२ ॥ देवदेवो जगन्नाथ इष्टो यज्ञैरनेकशः ॥ गालवाय पुरे दत्ता कन्या त्वेषा च माधवी ॥ १०३ ॥ पत्नीत्वेन चतुर्भ्यश्च दत्ताः कन्या मुने तदा ॥ गालवस्य गुरोरर्थे विश्वामित्रस्य धीमतः ॥ १०४ ॥ एवं भूतान्यनेकानि सुकृतानि मया पुरा ॥ महांति च बहून्येव तानि वक्तुं न पार्यते ॥ १०५ ॥ भूयः पृष्टः सर्वदेवैः स राजा कृतं सर्वं गुप्तमेवं यथार्थम् ॥ विज्ञातुमिच्छाम यथार्थतोपि सर्वे वयं श्रोतुकामा ययाते ॥ १०६ ॥ वचो निशम्य देवानां ययातिरमितद्युतिः ॥ कथयामास तत्सर्वं पुण्यशेषं यथार्थतः ॥ १०७ ॥ कथितं सर्वमेतच्च निःशेषं व्यासवत्तदा ॥ स्वपुण्यकथनेनैव ययातिरपतद्भुवि ॥ १०८ ॥ तत्क्षणादेव सर्वेषां सुराणां तत्र पश्यताम् ॥ एवमेव तथा जातमराजकमतंद्रितम् ॥ १०९ ॥ अन्यो न दृश्यते लोके याज्ञिको यो हि तत्र वै ॥ शक्रासनेऽभिषेकार्थं श्रूयतां हि द्विजोत्तमाः ॥ ११० ॥ सर्वे सुराश्च ऋषयोऽथ महाफणींद्रा गन्धर्वयक्षखगचारणकिंनराश्च ॥ विद्याधराः सुरगणाप्सरसां गणाश्च चिंतापराः समभवन्मनुजास्तथैव ॥ १११ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां प्रथमे माहेश्वरखण्डे केदारखंडे शिवशास्त्रे देवेन्द्रस्वाराज्याभिषेकवृत्तान्ते देवेन्द्रस्य ब्रह्महत्ययोपद्रुतौ नहुषशापययातिभूपपुण्यक्षयवृत्तान्तवर्णनंनाम पंचदशोऽध्यायः ॥ १५ ॥ छ ॥

॥ ॥ लोमश उवाच ॥ ॥ ततः शची तान्प्रोवाच वाचं धर्मार्थसंयुताम् ॥ मा चिंता क्रियतां देवा बृहस्पतिपुरोगमाः ॥ १ ॥ गच्छत त्वरिताः सर्वे शक्रं द्रष्टुं विचक्षणाः ॥ ब्रह्महत्याभिभूतोऽसौ यत्रास्ते सुरसत्तमः ॥ २ ॥ बहूनां कारणेनैव विश्वरूपो हि मंदधीः ॥ हतस्तेन महेंद्रेण सर्वैः सोऽपि निराकृतः ॥ ३ ॥ तस्मात्सर्वैर्भवद्भिश्च गंतव्यं यत्र स प्रभुः ॥ अवज्ञा हि कृता पूर्वं महेंद्रेण तवानघ ॥ ४ ॥ अवज्ञामात्रक्षुब्धेन त्वया शप्तः पुरंदरः ॥ तथैव शापितश्चासि मया त्वं हि बृहस्पते ॥ ५ ॥ निरस्तोऽपि हि तस्मात्त्वमवसानपरो भव ॥ ६ ॥ यथा मदर्थमानीतौ शक्रे जीवति तावुभौ ॥ त्वयि जीवति भो ब्रह्मन्कार्यं तव करिष्यति ॥ ७ ॥ कोऽपि सौभाग्यवाँल्लोके तव क्षेत्रे जनिष्यति ॥ पुत्रं विख्यातनामानमत्र

CC-0. In Public Domain. Digitization by eGangotri

नैवास्ति संशयः ॥ ८ ॥ गच्छ शीघ्रं सुरैः सार्द्धं शक्रमानय मा चिरम् ॥ प्रयासि त्वरितो नो चेत्पुनः शापं ददामि ते ॥ ९ ॥ शच्योक्तं वचनं श्रुत्वा सुरैः सार्द्धं जगाम सः ॥ पुरंदरं गताः सर्वे ब्रह्महत्याभिपीडितम् ॥ १० ॥ सरसस्तीरमासाद्य ते शक्रं चाभ्यवादयन् ॥ दृष्टाः शक्रेण ते सर्वे तदा ह्यप्सु स्थितेन वै ॥ ११ ॥ उवाच देवान्देवेशः कस्माद्यूयमिहागताः ॥ अहं हि पातकग्रस्तो ब्रह्महत्यापरिप्लुतः ॥ अप्सु तिष्ठामि भो देवा एकाकी तपसान्वितः ॥ १२ ॥ तच्छ्रुत्वा वचनं तस्य सर्वे देवाः शतक्रतोः ॥ ऊचुर्विह्वलिता एनं देवराजानमद्भुतम् ॥ १३ ॥ एतादृशं न वाच्यं ते परेषामुपकारतः ॥ कृतं त्वयैव यत्कर्म विश्वरूपवधादिकम् ॥ १४ ॥ विश्वकर्मसुतेनैव कृतं याजनमद्भुतम् ॥ येन देवाः क्षयं यांति ऋषयोऽपि महाप्रभाः ॥ १५ ॥ तस्माद्धतस्त्वया देव परेषामुपकारतः ॥ ततः सर्वे वयं प्राप्तास्त्वां नेतुममरावतीम् ॥ १६ ॥ एवं विवदमानेषु देवेषु च तदाऽब्रवीत् ॥ ब्रह्महत्या त्वरायुक्ता देवेंद्रं वरयाम्यहम् ॥ १७ ॥ तदा बृहस्पतिर्वाक्यमुवाच सहसैव तु ॥ १८ ॥ ॥ बृहस्पतिरुवाच ॥ ॥ वासार्थं च करिष्यामः स्थानानि तव सांप्रतम् ॥ प्रसांत्विता तदा हत्या देवैस्तत्कार्यगौरवात् ॥ १९ ॥ विमृश्य सर्वे विभेजुश्चतुर्द्धा हत्यां सुरास्ते ऋषयो मनीषिणः ॥ यक्षाः पिशाचा उरगाः पतंगास्तथा च सर्वे सुरसिद्धचारणाः ॥२०॥ आदौ क्षमां प्रति तदा ऊचुः सर्वे दिवौकसः ॥ हे क्षमेंऽशस्त्वया ग्राह्यो हत्यायाः कार्यसिद्धये ॥ २१ ॥ सुराणां तद्वचः श्रुत्वा धरित्री कंपिताऽवदत् ॥ कथं ग्राह्यो मया ह्यंशो हत्यायास्तद्विमृश्यताम् ॥ ॥ २२ ॥ अहं हि सर्वभूतानां धात्री विश्वं धराम्यहम् ॥ अपवित्रा भविष्यामि एनसा संवृता भृशम् ॥ २३ ॥ पृथ्व्यास्तद्वचनं श्रुत्वा बृहस्पतिरुवाच ताम् ॥ मा भैषीश्चारुसर्वांगि निष्पापासि न चान्यथा ॥ २४ ॥ यदा यदुकुले श्रीमान्वासुदेवो भविष्यति ॥ तदा तत्पदविन्यासान्निष्पापा त्वं भविष्यसि ॥ २५ ॥ कुरु वाक्यं त्वमस्माकं नात्र कार्या विचारणा ॥ २६ ॥ इत्युक्ता पृथिवी तेषां निष्पापा साकरोद्वचः ॥ ततो वृक्षान्समाहूय सर्वे देवाऽब्रुवन्वचः ॥ २७ ॥ हत्यांशो हि ग्रहीतव्यो भवद्भिः कार्यसिद्धये ॥ एवमुक्ताऽब्रुवन्वृक्षा देवान्सर्वे समागताः ॥ २८ ॥ वयं सर्वे तथा भूतास्तापसानां फलप्रदाः ॥ तदा हत्यान्विताः सर्वे भविष्यंति तपस्विनः ॥ २९ ॥ पापिनो हि महाभागास्तस्मात्सर्वं विमृश्यताम् ॥ तदा पुरोधसा चोक्ताः सर्वे वृक्षाः समागताः ॥ ३० ॥ मा चिंता क्रियतां सर्वैः प्रसादाच्च शतक्रतोः ॥ छेदिताश्चैव सर्वे वै ह्यनेकांशत्वमागताः ॥३१॥ ततो विटपिनो नित्यं यूयं सर्वे भविष्यथ ॥ इत्युक्तास्ते तदा सर्वेऽगृह्णन्हत्यां विभागशः ॥ ३२ ॥ ततो ह्यपः समाहूय ऊचुः

१ विभजुः इत्यत्रैत्वाभाव आर्षश्छन्दोनुरोधेन, विभेजुः इति त्वपेक्षितम् । २ सन्धिरार्षः आर्षो वाडभावः । ३ सन्धिरार्षः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सर्वे दिवौकसः ॥ अद्भिश्च गृह्यतामद्य हत्यांशः कार्यसिद्धये ॥ ३३ ॥ तदा ह्यापो मिलित्वाथ ऊचुः सर्वाः पुरोधसम् ॥ यानि कानि च पापानि तथा दुश्चरितानि च ॥ ३४ ॥ अस्मत्संपर्कसंबंधात्स्नानशौचाशनादिभिः ॥ पुनंति प्राणिनः सर्वे पापेन परिवेष्टिताः ॥ ३५ ॥ तासां वचनमाकर्ण्य बृहस्पतिरुवाच ह ॥ मा भयं क्रियतामाप एनसा दुस्तरेण हि ॥ ३६ ॥ आपः पुनंतु सर्वेषां चराचरनिवासिनाम् ॥ तदा स्त्रियः समाहूय बृहस्पतिरुवाच ह ॥ ३७ ॥ अद्यैव ग्राह्यो हत्यांशः सर्वकार्यार्थसिद्धये ॥ निशम्य तद्गुरोर्वाक्यमूचुः सर्वाश्च योषितः ॥ ३८ ॥ पापमाचरते योषा तेन पापेन नान्यथा ॥ लिप्यंते बहवः पक्षा इति वेदानुशासनम् ॥ ३९ ॥ श्रुतमस्ति न ते किंचिद्धे पुरोधो विमृश्यताम् ॥ योषिद्भिः प्रोच्यमानोऽपि उवाचाथ बृहस्पतिः ॥ ४० ॥ मा भयं क्रियतां सर्वाः पापादस्मात्सुलोचनाः ॥ भविष्याणां तथान्येषां भविष्यति फलप्रदः ॥ हत्यांशो यो हि सर्वासां यथाकामित्वमेव च ॥४१॥ एवमंशाश्च हत्यायाश्चत्वारः कल्पिताः सुरैः ॥ निवासमकरोत्सद्यस्तेषुतेषु द्विजोत्तमाः ॥ ४२ ॥ निष्पापो हि तदा जातो महेंद्रो ह्यभिषेचितः ॥ देवपुर्यां सुरगणैस्तथैव ऋषिभिः सह ॥ ४३ ॥ शच्या समेतो हि तदा पुरंदरो बभूव विश्वाधिपतिर्महात्मा ॥ देवैः समेतो हि महानुभावैर्मुनीश्वरैः सिद्धगणैस्तदानीम् ॥ ४४ ॥ तदाग्नयः शोभना वायवश्च सर्वे ग्रहाः सुप्रभाः शांतियुक्ताः ॥ जाताः सद्यः पृथिवी शोभमाना तथाद्रयो मणिप्रभवा बभूवुः ॥ ४५ ॥ प्रसन्नानि तथा ह्यासन्मनांसि च मनस्विनाम् ॥ ४६ ॥ नद्यश्चामृतवाहिन्यो वृक्षा ह्यासन्सदाफलाः ॥ अकृष्टपच्यौषधयो बभूवुश्चामृतोपमाः ॥ ४७ ॥ ऐकपद्येन सर्वेषामिंद्रलोकनिवासिनाम् ॥ बभूव परमोत्साहो महामोदकरस्तथा ॥ ४८ ॥ ॥ लोमश उवाच ॥ ॥ एतस्मिन्नंतरे त्वष्टा दृष्ट्वा चेंद्रमहोत्सवम् ॥ बभूव रुषितोऽतीव पुत्रशोकप्रपीडितः ॥ ४९ ॥ जगाम निर्वेदपरस्तपस्तप्तुं सुदारुणम् ॥ तपसा तेन संतुष्टो ब्रह्मा लोकपितामहः ॥ ५० ॥ त्वष्टारमब्रवीत्तुष्टो वरं वरय सुव्रत ॥ तदा वव्रे वरं त्वष्टा सर्वलोकभयावहम् ॥ वरं पुत्रो हि दातव्यो देवानां हि भयावहः ॥ ५१ ॥ तथेति च वरो दत्तो ब्रह्मणा परमेष्ठिना ॥ वरदानात्सद्य एव बभूव पुरुषस्तदा ॥ ५२ ॥ वृत्रनामांकितस्तत्र दैत्यो हि परमाद्भुतः ॥ धनुषां शतमात्रं हि प्रत्यहं ववृधेऽसुरः ॥ ॥ ५३ ॥ पातालान्निर्गता दैत्या ये पुराऽमृतमंथने ॥ घातिताः सुरसंघैश्च भृगुणा जीवितास्त्वरात् ॥ ५४ ॥ सर्वं महीतलं व्याप्तं तेनैकेन महात्मना ॥ ५५ ॥ तदा सर्वेऽपि ऋषयो वध्यमानास्तपस्विनः ॥ ब्रह्माणं त्वरिताः सर्वे ऊचुर्व्यसनमागतम् ॥ ५६ ॥ तथा चेंद्रादयो देवा गंधर्वाः सम

१ सा हत्या-इति शेषः । २ रुषितः-क्रुद्धः--इत्यर्थः ।

CC-0. In Public Domain. Digitization by eGangotri

रुद्रगणाः ॥ ब्रह्मणा कथितं सर्वं त्वष्टुश्चैतच्चिकीर्षितम् ॥ ५७ ॥ भवद्वधार्थं जनितस्तपसा परमेण तु ॥ वृत्रोनाम महातेजाः सर्वदैत्याधिपो महान् ॥
॥ ५८ ॥ तथापि यत्नः क्रियतां यथा वध्यो भवेदसौ ॥ निशम्य ब्रह्मणो वाक्यमूचुर्देवाः सवासवाः ॥ ५९ ॥ ॥ देवा ऊचुः ॥ ॥ यदा इंद्रो हि
हत्याया विमुक्तः स्थापितो दिवि ॥ तदास्माभिरकार्यं वै कृतमस्ति दुरासदम् ॥ ६० ॥ शस्त्राण्यस्त्राण्यनेकानि संक्षिप्तानि ह्यबुद्धितः ॥ दधीच
स्याश्रमे ब्रह्मन्किं कार्यं करवामहे ॥ ६१ ॥ तच्छ्रुत्वा प्रहसन्वाक्यं देवान्ब्रह्मा तदाऽब्रवीत् ॥ चिरं स्थितानि विज्ञायागच्छध्वं तानि वै सुराः ॥ ६२ ॥
गत्वा देवास्तदा सर्वे नापश्यन्स्वं स्वमायुधम् ॥ पप्रच्छुश्च दधीचिं ते सोऽवादीन्नैव वेद्म्यहम् ॥ ६३ ॥ पुनर्ब्रह्माणमागत्य ऊचुः सर्वे मुनेर्वचः ॥
॥ ६४ ॥ ब्रह्मोवाच तदा देवान्सर्वेषां कार्यसिद्धये ॥ तस्यास्थीन्येव याचध्वं प्रदास्यति न संशयः ॥ ६५ ॥ तच्छ्रुत्वा ब्राह्मणो वाक्यं शक्रो वचन
मब्रवीत् ॥ ६६ ॥ विश्वरूपो हतो देव देवानां कार्यसिद्धये ॥ एक एव तदा ब्रह्मन्पापिष्ठोऽहं कृतः सुरैः ॥ ६७ ॥ तथा पुरोधसा चैव
निःश्रीकस्तत्क्षणात्कृतः ॥ दिष्ट्या परमया चाहं प्रविष्टो निजमंदिरम् ॥ ६८ ॥ दधीचं घातयित्वा वै तस्यास्थीनि बहून्यपि ॥
अस्त्राणि तानि भगवन्कृतानि ह्यशुभानि वै ॥ ६९ ॥ त्वष्ट्रा हि जनितो यो वै वृत्रो नामैष दैत्यराट् ॥ कथं तं घातयाम्येवं सततं
पापभीरुणा ॥ शक्रेणोक्तं निशम्याथ ब्रह्मा वाक्यमुवाच ह ॥ ७० ॥ अर्थशास्त्रपरेणैव विधिना तमबोधयत् ॥ आततायिनमायांतं ब्राह्मणं वा
तपस्विनम् ॥ हंतुकामं जिघांसीयान्न तेन ब्रह्महा भवेत् ॥ ७१ ॥ ॥ इन्द्र उवाच ॥ ॥ दधीचस्य वधाद्ब्रह्मन्नहं भीतो न संशयः ॥ तस्माद्ब्रह्म
वधात्सत्यं महदेनो भविष्यति ॥ ७२ ॥ अतो न कार्यमस्माभिर्ब्राह्मणानां तु हेलनम् ॥ हेलनाद्बहवो दोषा भविष्यंति न चान्यथा ॥ ७३ ॥
अदृष्टं परमं धर्म्यं विधिना परमेण हि ॥ कर्तव्यं मनसा चैवं पुरुषेण विजानता ॥७४॥ निःस्पृहं तस्य तद्वाक्यं श्रुत्वा ब्रह्मा ह्युवाच तम् ॥ शक्र
स्वबुद्ध्या वर्तस्व दधीचिं गच्छ सत्वरम् ॥७५॥याचस्व तस्य चास्थीनि दधीचेः कार्यगौरवात् ॥ गुरुणा सहितः शक्रो देवैः सह समन्वितः ॥७६॥
तथेति गत्वा ते सर्वे दधीचस्याश्रमं शुभम् ॥ नानासत्त्वसमायुक्तं वैरभावविवर्जितम् ॥ ७७ ॥ मार्जारमूषकाश्चैव परस्परमुदान्विताः ॥ ऐकपद्येन
सिंहाश्च गजिन्यः कलभैः सह ॥ ७८ ॥ तथा जात्यश्च विविधाः क्रीडायुक्ताः परस्परम् ॥ नकुलैः सह सर्पाश्च क्रीडायुक्ताः परस्परम् ॥ ७९ ॥
एवंविधान्यनेकानि ह्याश्चर्याणि तदाश्रमे ॥ पश्यंतो विबुधाः सर्वे विस्मयं परमं ययुः ॥ ८० ॥ अथासने मुनिश्रेष्ठं ददृशुः परमास्थितम् ॥ तेजसा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

परमेणैव भ्राजमानं यथा रविम् ॥ ८१ ॥ विभावसुं द्वितीयं वा सुवर्चासहितं तदा ॥ यथा ब्रह्मा हि सावित्र्या तथासौ मुनिसत्तमः ॥ ८२ ॥ तं प्रणम्य ततो देवा वचनं चेदमब्रुवन् ॥ त्वं दाता त्रिषु लोकेषु त्वत्सकाशमिहागताः ॥ ८३ ॥ निशम्य वचनं तेषां देवानां मुनिरब्रवीत् ॥ किमर्थमागताः सर्वे वदध्वं तत्सुरोत्तमाः ॥ ८४ ॥ प्रयच्छामि न संदेहो नान्यथा मम भाषितम् ॥ तदोचुः सहिताः सर्वे दधीचिं स्वार्थकामुकाः ॥ ८५ ॥ भयभीता वयं विप्र भवद्दर्शनकांक्षिणः ॥ त्रातारं त्वां समाकर्ण्य ब्रह्मणा नोदिता वयम् ॥८६॥ सम्प्राप्ता विद्धि तत्सर्वं दातुमर्होऽथ सुव्रत ॥ ८७ ॥ निशम्य वचनं तेषां किं दातव्यं तदुच्यताम् ॥८८॥ ततो देवाब्रुवन्विप्र दैत्यानां निधनाय नः ॥शस्त्रनिर्माणकार्यार्थं तवास्थीनि प्रयच्छ वै ॥८९॥ प्रहस्योवाच विप्रर्षिस्तिष्ठध्वं क्षणमेव हि ॥ स्वयमेव त्वहं देवास्त्यक्ष्याम्यद्य कलेवरम् ॥९०॥ इत्युक्त्वा तानथो पत्नीं समाहूय सुवर्चसम् ॥ प्रोवाच स महातेजाः शृणु देवि शुचिस्मिते ॥ ९१ ॥ अस्थ्यर्थं याचितो देवैस्त्यजाम्येतत्कलेवरम् ॥ ब्रह्मलोकं व्रजाम्यद्य परमेण समाधिना ॥ ९२ ॥ मयि याते ब्रह्मलोकं त्वं स्वधर्मेण तत्र माम् ॥ प्राप्स्यस्येव न संदेहो वृथा चिन्तां च मा कृथाः ॥ ९३ ॥ इत्युक्त्वा तां स्वपत्नीं स प्रेषयामास चाश्रमम् ॥ ततो देवाग्रतो विप्रः समाधिमगमत्तदा ॥९४॥ समाधिना परेणैव विसृज्य स्वं कलेवरम् ॥ ब्रह्मलोकं गतः सद्यः पुनर्नावर्तते यतः॥९५॥ दधीचिनामा मुनिवृंदवर्यः शिवप्रियः शिवदीक्षाभियुक्तः ॥ परोपकारार्थमिदं कलेवरं शीघ्रं स विप्रोऽत्यजदात्मना तदा ॥ ९६ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां प्रथमे माहेश्वरखण्डे केदारखण्डे देवैरस्थिकृताऽभ्यर्थितस्य दधीचेर्योगेन स्वदेहविसर्जनंनाम षोडशोऽध्यायः॥ ॥ १६ ॥छ॥ लोमश उवाच ॥ ॥ ततः सर्वे सुरगणा दृष्ट्वा तं विलयं गतम् ॥ चिंतयंतः सुरगणाः कथं च विदधामहे ॥ १ ॥ सुरभिं चाह्वयित्वाथ तदोवाच शचीपतिः ॥ कलेवरं दधीचस्य लिह्यास्त्वं वचनान्मम ॥२॥ तथेति च वचो मत्वा तत्क्षणादेव लिह्य तत् ॥ निर्मांसं च कृतं सद्यस्तया धेन्वा कलेवरम् ॥३॥ जगृहुस्तानि चास्थीनि चक्रुः शस्त्राणि वै सुराः ॥ तस्य वंशोद्भवं वज्रं शिरो ब्रह्मशिरस्तथा ॥४॥ अन्यानि चास्थीनि बहूनि तस्य ऋषेस्तदानीं जगृहुः सुराश्च ॥ तथा शिराजालमयांश्च पाशांश्चक्रुः सुरा वैरयुताश्च दैत्यान् ॥ ५ ॥ शस्त्राणि कृत्वा ते सर्वे महाबलपराक्रमाः ॥ ययुर्देवास्त्वरायुक्ता वृत्रघातनतत्पराः ॥६॥ ततः सुवर्चाश्च दधीचिपत्नी या प्रेषिता सा सुरकार्यसिद्धये ॥ व्यलोकयत्तत्र समेत्य सर्वं मृतं पतिं देहमथो ददर्श तम् ॥ ७ ॥ ज्ञात्वा च तत्सर्वमिदं सुराणां कृत्यं तदानीं च चुकोप साध्वी ॥ ददौ सती शापमतीव रुष्टा तदा सुवर्चा ऋषिवर्यपत्नी ॥ ८ ॥

१ इवार्थे 'वा' शब्दः । २ ब्रुवन्—अब्रुवन्—अडभाव आर्षः । ३ वंशोद्भवं—पृष्ठवंशास्थ्युद्भवम्—इत्यर्थः ।

CC-0. In Public Domain. Digitization by eGangotri

अहो सुरा दुष्टतराश्च सर्वे सर्वे ह्यशक्ताश्च तथैव लुब्धाः ॥ तस्माच्च सर्वेऽप्रजसो भवंतु दिवौकसोऽद्यप्रभृतीत्युवाच सा ॥ ९ ॥ एवं शापं ददौ तेषां
सुराणां सा तपस्विनी ॥ प्रविश्याश्वत्थमूले सा स्वोदरं दा[1]रयत्तदा ॥ १० ॥ निर्गतो जठराद्गर्भो दधीचस्य महात्मनः ॥ साक्षाद्रुद्रावतारोऽसौ
पिप्पलादो महाप्रभः ॥ ११ ॥ प्रहस्य जननी गर्भमुवाच रुषितेक्षणा ॥ सुवर्चा तं पिप्पलादं चिरं तिष्ठास्य सन्निधौ ॥ १२ ॥ अश्वत्थस्य
महाभाग सर्वेषां सफलो भवेः ॥ तथैव भाषमाणा सा सुवर्चा तनयं प्रति ॥ पतिमन्वगमत्साध्वी परमेण समाधिना ॥ १३ ॥ एवं दधीचपत्नी
सा पतिना स्वर्गमाव्रजत् ॥ १४ ॥ ते देवाः कृतशस्त्रास्त्रा दैत्यान्प्रति समुत्सुकाः ॥ आजग्मुश्चेंद्रमुख्यास्ते महाबलपराक्रमाः ॥ १५ ॥ गुरुं
पुरस्कृत्य तदाज्ञया ते गणाः सुराणां बहवस्तदानीम् ॥ भुवं समागत्य च मध्यदेशमूचुश्च सर्वे परमास्त्रयुक्ताः ॥ १६ ॥ समागतानुपसृत्य
देवांश्चेंद्रपुरोगमान् ॥ ययौ वृत्रो महादैत्यो दैत्यवृन्दसमावृतः ॥ १७ ॥ यथा मेरोश्च शिखरं परिपूर्णं प्रदृश्यते ॥ तथा सोऽपि महातेजा विश्वकर्म्म
सुतो महान् ॥ १८ ॥ तेन दृष्टो महेन्द्रश्च महेंद्रेण महासुरः ॥ देवानां दानवानां च दर्शनं च महाद्भुतम् ॥ १९ ॥ तदा ते बद्धवैराश्च देवदैत्याः
परस्परम् ॥ अन्योन्यमभिसंरब्धा जगर्जुः परमाद्भुतम् ॥ २० ॥ वादित्राणि च भीमानि वाद्यमानानि सर्वशः ॥ श्रूयंतेऽत्र गभीराणि सुरा
सुरसमागमे ॥ २१ ॥ वाद्यमानेषु तूर्येषु ते सर्वे त्वरयान्विताः ॥ अनेकैः शस्त्रसंघातैर्जघ्नुरन्योन्यमोजसा ॥ २२ ॥ तदा देवासुरे युद्धे त्रैलोक्यं
सचराचरम् ॥ भयेन महता युक्तं बभूव गतचेतनम् ॥ २३ ॥ छेदिताः स्फोटिताश्चैव केचिच्छस्त्रैर्द्विधा कृताः ॥ नाराचैश्च तथा केचिच्छस्त्रास्त्रैः
शकलीकृताः ॥ २४ ॥ भल्लैश्चेरुर्हताः केचिद्व्यंगभूता दिवौकसः ॥ रश्मयो मेघसंभूताः प्रकाशंते नभस्स्विव ॥ २५ ॥ शिरांसि पतितान्येव बहूनि
च नभस्तलात् ॥ नक्षत्राणीव च यथा महाप्रलयसंकुलम् ॥ २६ ॥ प्रवर्तितं मध्यदेशे सर्वभूतक्षयावहम् ॥ शक्रेण सह संग्रामं चकार नमुचिस्तदा
॥ २७ ॥ वज्रेण जघ्ने तरसा नमुचिं देवराट् स्वयम् ॥ न रोमैकं च त्रुटितं नमुचेरसुरस्य च ॥ २८ ॥ वज्रेणापि तदा सर्वे विस्मयं परमं गताः ॥
असुराश्च सुराश्चैव महेंद्रो व्रीडितस्तदा ॥ २९ ॥ गदया नमुचिं जघ्ने गदा सापि विचूर्णिता ॥ नमुचेरंगलग्नापि पपात वसुधातले ॥ ३० ॥
तथा शूलेन महता तं जघान पुरंदरः ॥ तच्छूलं शतधा चूर्णं नमुचेरंगमाश्रितम् ॥ ३१ ॥ एवं तं विविधैः शस्त्रैराजघान सुरारिहा ॥ प्रहस्य
मानो नमुचिर्न जघान पुरंदरम् ॥ ३२ ॥ तूष्णींभूतस्तदा चेंद्रश्चिंतया परया युतः ॥ किं कार्यं किमकार्यं वा इतींद्रो नाविदत्तदा ॥ ३३ ॥ एतस्मि

१ दारयत्—अदारयत्—अडभाव आर्षः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्नंतरे तत्र महायुद्धे महाभये ॥ जाता नभोगता वाणी इंद्रमुद्दिश्य सत्वरम् ॥ ३४ ॥ जह्येनमद्याशु महेंद्र दैत्यं दिवौकसां घोरतरं भयावहम् ॥
फेनेन चैवाशु महासुरेन्द्रमपां समीपेन दुरासदेन ॥ ३५ ॥ अन्येन शस्त्रेण च आहतोऽसौ वध्यः कदाचिन्न भवत्ययं तु ॥ तस्माच्च देवेश
वधार्थमस्य कुरु प्रयत्नं नमुचेर्दुरात्मनः ॥ ३६ ॥ निशम्य वाचं परमार्थयुक्तां दैवीं सदानंदकरीं शुभावहाम् ॥ चक्रे परं यत्नवतां वरिष्ठो गत्वोदधेः
पारमनंतवीर्यः ॥ ३७ ॥ तत्रागतं समीक्ष्याथ नमुचिः क्रोधमूर्छितः ॥ हत्वा शूलेन देवेंद्रं प्रहसन्निदमब्रवीत् ॥ ३८ ॥ समुद्रस्य
तटः[1] कस्मात्सेवितः सुरसत्तम ॥ विहाय रणभूमिं च त्यक्तशस्त्रोऽभवद्भवान् ॥ ३९ ॥ त्वदीयेनैव वज्रेण किं कृतं मम दुर्मते ॥
॥ ४० ॥ तथान्यानि च शस्त्राणि अस्त्राणि सुबहूनि च ॥ गृहीतानि पुरा मंद हंतुं मामेव चाधुना ॥ ४१ ॥ किं करिष्यसि मां हंतुं
युद्धाय समुपस्थितः ॥ केन शस्त्रेण रे मंद योद्धुमिच्छसि संयुगे ॥ ४२ ॥ त्वां घातयामि चाद्यैव यदि तिष्ठसि संयुगे ॥ नो चेद्गच्छ मया
मुक्तश्चिरं जीव सुखी भव ॥ ४३ ॥ एवं स गर्वितं तस्य वाक्यमाहवशोभिनः ॥ श्रुत्वा महेंद्रोऽपि रुषा जगृहे फेनमद्भुतम् ॥ ४४ ॥ फेनं
करस्थं दृष्ट्वा तु असुरा जहसुस्तदा ॥ ४५ ॥ क्षयं गतानि चास्त्राणि फेनेनैव पुरंदरः ॥ हंतुमिच्छति मामद्य शतक्रतुरुदारधीः ॥ ४६ ॥ एवं
प्रहस्य नमुचिरवज्ञाय पुरंदरम् ॥ सावज्ञं पुरतस्तस्थौ नमुचिर्दैत्यपुंगवः ॥ ४७ ॥ तदैव तं स फेनेन शीघ्रमिंद्रो जघान ह ॥ ४८ ॥ हते तु
नमुचौ देवाः सर्वे चैव मुदान्विताः ॥ साधुसाध्विति शब्देन ऋषयश्चाभ्यपूजयन् ॥ ४९ ॥ तदा सर्वे जयं प्राप्ता हत्वा नमुचिमाहवे ॥ दैत्यास्ते
कोपसंरब्धा योद्धुकामा मुदान्विताः ॥ ५० ॥ पुनः प्रववृते युद्धं देवानां दानवैः सह ॥ शस्त्रास्त्रैर्बहुधा मुक्तैः परस्परवधैषिभिः ॥ ५१ ॥ यदा
ते ह्यसुरा देवैः पातिताश्च पुनःपुनः ॥ तदा वृत्रो महातेजाः शतक्रतुमुपाव्रजत् ॥ ५२ ॥ वृत्रं दृष्ट्वा तदा सर्वे ससुरासुरमानवाः ॥ भयेन
महताविष्टाः पतिता भुवि शेरते ॥५३॥ एवं भीतेषु सर्वेषु सुरसिद्धेषु वै तदा ॥ इंद्रश्चैरावणारूढो वज्रपाणिः प्रतापवान् ॥५४॥ छत्रेण ध्रियमाणेन
चामरेण विराजितः ॥ तदा सर्वैः समेतो हि लोकपालैः प्रतापितः ॥ ५५ ॥ वृत्रं विलोक्य ते सर्वे लोकपाला महेश्वराः ॥ भयभीताश्च ते
सर्वे शिवं शरणमन्वयुः ॥ ५६ ॥ मनसाचिंतयन्सर्वे शंकरं लोकशंकरम् ॥ लिंगं संपूज्य विधिवन्महेंद्रो जयकामुकः ॥ ५७ ॥ गुरुणा
विदितः सद्यो विश्वासेन परेण हि ॥ उवाच च तदा शक्रं बृहस्पतिरुदारधीः ॥ ५८ ॥ ॥ ॥ बृहस्पतिरुवाच ॥ ॥ कार्तिके शुक्लपक्षे तु

१–'तटं त्रिपु' इत्यमरात्–पुंस्त्वमपि ।

CC-0. In Public Domain. Digitization by eGangotri

मंदवारे त्रयोदशी ॥ समग्रा यदि लभ्येत सर्वप्राप्त्यै न संशयः ॥ ५९ ॥ तस्यां प्रदोषसमये लिंगरूपी सदाशिवः ॥ पूजनीयो हि देवेंद्र सर्व
कामार्थसिद्धये ॥ ६० ॥ स्नात्वा मध्याह्नसमये तिलामलकसंयुतम् ॥ शिवस्य चार्चनं कुर्याद्गंधपुष्पफलादिभिः ॥ ६१ ॥ पश्चात्प्रदोषवेलायां
स्थावरं लिंगमर्च्चयेत् ॥ स्वयंभु स्थापितं चापि पौरुषेयमपौरुषम् ॥ ६२ ॥ जने वा विजने वापि अरण्ये वा तपोवने ॥ तल्लिंगमर्चयेद्भक्त्या
प्रदोषे तु विशेषतः ॥ ६३ ॥ ग्रामाद्बहिः स्थितं लिंगं ग्रामाच्छतगुणं फलम् ॥ बाह्याच्छतगुणं पुण्यमरण्ये लिंगमद्भुतम् ॥ ६४ ॥ आरण्याच्छ
तगुणं पुण्यमर्चितं पार्वतं यथा ॥ पार्वताच्चैव लिंगाच्च फलं चायुतसंज्ञितम् ॥ तपोवनाश्रितं लिंगं पूजितं वा महाफलम् ॥ ६५ ॥ तस्मादेतद्वि
भागेन शिवपूजनार्चनं बुधैः ॥ कर्तव्यं निपुणत्वेन तीर्थस्नानादिकं तथा ॥ ६६ ॥ पंचपिंडान्समुद्धृत्य स्नानमात्रेण शोभनम् ॥ कूपे स्नानं
प्रकुर्वीत उद्धृतेन विशेषतः ॥६७॥ तडागे दश पिंडांश्च उद्धृत्य स्नानमाचरेत् ॥ नदीस्नानं विशिष्टं च महानद्यां विशेषतः ॥ ६८ ॥ सर्वेषामपि
तीर्थानां गंगास्नानं विशिष्यते ॥ देवखाते च तत्तुल्यं प्रशस्तं स्नानमाचरेत् ॥ ६९ ॥ प्रदीपानां सहस्रेण दीपनीयः सदाशिवः ॥ तथा दीपशतेनापि
द्वात्रिंशद्दीपमालया ॥७०॥ घृतेन दीपयेद्दीपाञ्छिवस्य परितुष्टये ॥ तथा फलैश्च दीपैश्च नैवेद्यैर्गंधधूपकैः ॥७१॥ उपचारैः षोडशभिर्लिंगरूपी सदा
शिवः ॥ पूज्यः प्रदोषवेलायां नृभिः सर्वार्थसिद्धये ॥ ७२ ॥ प्रदक्षिणं प्रकुर्वीत शतमष्टोत्तरं तथा ॥ नमस्कारान्प्रकुर्वीत तावत्संख्यान्प्रयत्नतः ॥७३॥
प्रदक्षिणनमस्कारैः पूजनीयः सदाशिवः ॥ नाम्नां शतेन रुद्रोऽसौ स्तवनीयो यथाविधि ॥ ७४ ॥ नमो रुद्राय भीमाय नीलकण्ठाय वेधसे ॥
कपर्दिने सुरेशाय व्योमकेशाय वै नमः ॥ ७५ ॥ वृषध्वजाय सोमाय नीलकण्ठाय वै नमः ॥ दिगंबराय भर्गाय उमाकांतकपर्दिने ॥ ७६ ॥
तपोमयाय व्याप्ताय शिपिविष्टाय वै नमः ॥ व्यालप्रियाय व्यालाय व्यालानां पतये नमः ॥ ७७ ॥ महीधराय व्याघ्राय पशूनां पतये नमः ॥
त्रिपुरांतकसिंहाय शार्दूलोग्ररवाय च ॥ ७८ ॥ मीनाय मीननाथाय सिद्धाय परमेष्ठिने ॥ कामांतकाय बुद्धाय बुद्धीनां पतये नमः ॥ ७९ ॥
कपोताय विशिष्टाय शिष्टाय परमात्मने ॥ वेदाय वेदबीजाय देवगुह्याय वै नमः ॥ ८० ॥ दीर्घाय दीर्घदीर्घाय दीर्घार्घाय महाय च ॥ नमो
जगत्प्रतिष्ठाय व्योमरूपाय वै नमः ॥ ८१ ॥ गजासुरविनाशाय ह्यंधकासुरभेदिने ॥ नीललोहितशुक्लाय चण्डमुण्डप्रियाय च ॥ ८२ ॥ भक्तिप्रि
याय देवाय ज्ञानज्ञानाव्ययाय च ॥ महेशाय नमस्तुभ्यं महादेवहराय च ॥ ८३ ॥ त्रिनेत्राय त्रिवेदाय वेदांगाय नमोनमः ॥ अर्थाय अर्थरूपाय
परमार्थाय वै नमः ॥ ८४ ॥ विश्वरूपाय विश्वाय विश्वनाथाय वै नमः ॥ शंकराय च कालाय कालावयवरूपिणे ॥ ८५ ॥ अरूपाय च

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सूक्ष्माय सूक्ष्मसूक्ष्माय वै नमः ॥ श्मशानवासिने तुभ्यं नमस्ते कृत्तिवाससे ॥ ८६ ॥ शशांकशेखरायैव रुद्रविश्वाश्रयाय च ॥ दुर्गाय दुर्गसाराय दुर्गावयवसाक्षिणे ॥ ८७ ॥ लिंगरूपाय लिंगाय लिंगानां पतये नमः ॥ नमः प्रणवरूपाय प्रणवार्थाय वै नमः ॥ ८८ ॥ नमोनमः कारणकारणाय ते मृत्युंजयायात्मभवस्वरूपिणे ॥ त्रियंबकायासितकंठ भर्ग गौरीपते सकलमंगलहेतवे नमः ॥ ८९ ॥ ॥ बृहस्पतिरुवाच ॥ ॥ नाम्नां शतं महेशस्य उच्चार्य व्रतिना तदा ॥ प्रदक्षिणनमस्कारैरेतत्संख्यैः प्रयत्नतः ॥ कार्यं प्रदोषसमये तुष्ट्यर्थं शंकरस्य च ॥ ९० ॥ एवं व्रतं समुद्दिष्टं तव शक्र महामते ॥ शीघ्रं कुरु महाभाग पश्चाद्युद्धं कुरु प्रभो ॥ ९१ ॥ शंभोः प्रसादात्सर्वं ते भविष्यति जयादिकम् ॥ ९२ ॥ वृत्रो ह्ययं महातेजा दैतेयस्तपसा पुरा ॥ शिवं प्रसादयामास पर्वते गंधमादने ॥ ९३ ॥ नाम्ना चित्ररथो राजा वनं चित्ररथस्य तत ॥ एतज्जानीहि भो इन्द्र शिवपुर्याः समीपतः ॥ ९४ ॥ यस्मिन्वने महाभाग न संति च षडूर्मयः ॥ तस्माच्चैत्ररथं नाम वनं परममंगलम् ॥ तस्य राज्ञः शिवेनैव दत्तं यानं महाद्भुतम् ॥ ९५ ॥ कामगं किंकिणीयुक्तं सिद्धचारणसेवितम् ॥ गंधर्वैरप्सरोयक्षैः किंनरैरुपशोभितम् ॥ ९६ ॥ ततस्तेनैव यानेन पृथिवीं पर्यटन्पुरा ॥ तथा गिरीशमुख्यांश्च द्वीपांश्च विविधांस्तथा ॥ ९७ ॥ एकदा पर्यटन्राजा नाम्ना चित्ररथो महान् ॥ कैलासमागतस्तत्र स ददर्श पराद्भुतम् ॥ ९८ ॥ सभातलं महेशस्य गणैश्चैव विराजितम् ॥ अर्द्धांगलग्नया देव्या शोभितं च महेश्वरम् ॥ ९९ ॥ निरीक्ष्य देव्या सहितं सदाशिवं देव्यान्वितं वाक्यमिदं बभाषे ॥ १०० ॥ वयं च शंभो विषयान्विताश्च मंत्र्यादयः स्त्रीजिताश्चापि चान्ये ॥ न लोकमध्ये वयमेव चाज्ञाः स्त्रीसेवनं लज्जया नैव कुर्मः ॥ १०१ ॥ एतद्वाक्यं निशम्याथ महेशः प्रहसन्निव ॥ उवाच न्यायसंयुक्तं सर्वेषामपि शृण्वताम् ॥ १०२ ॥ भयं लोकापवादाच्च सर्वेषामपि नान्यथा ॥ ग्रासितं कालकूटं च सर्वेषामपि दुर्जरम् ॥ १०३ ॥ तथापि उपहासो मे कृतो राज्ञा हि दुर्जरः ॥ तं चित्ररथमाहूय गिरिजा वाक्यमब्रवीत् ॥ १०४ ॥ ॥ गिरिजोवाच ॥ ॥ रे दुरात्मन्कथं त्वज्ञ शंकरश्चोपहासितः ॥ मया सहैव मंदात्मन्द्रक्ष्यसे कर्मणः फलम् ॥ १०५ ॥ साधूनां समचित्तानामुपहासं करोति यः ॥ देवो वाप्यथ वा मर्त्यः स विज्ञेयोऽधमाधमः ॥ १०६ ॥ एते मुनींद्राश्च महानुभावास्तथा ह्यमी ऋषयो वेदगर्भाः ॥ तथैव सर्वे सनकादयो ह्यमी अज्ञाश्च सर्वे शिवमर्चयंते ? ॥ १०७ ॥ रे मूढ सर्वेषु जनेष्वभिज्ञस्त्वमेक एवाद्य न चापरे जनाः ॥ तस्मादभिज्ञं हि करोमि दैत्यं देवैर्द्विजैश्चापि बहिष्कृतं त्वाम् ॥ १०८ ॥ एवं शप्तस्तया देव्या भवान्या राजसत्तमः ॥ राजा चित्ररथः सद्यः पपात सहसा दिवः ॥ १०९ ॥ आसुरीं योनिमासाद्य वृत्रोनाम्नाऽभवत्तदा ॥ तपसा परमेणैव त्वष्ट्रा संयोजितः

CC-0. In Public Domain. Digitization by eGangotri

क्रमात् ॥ ११० ॥ तपसा तेन महता अजेयो वृत्र उच्यते ॥ तस्माच्छंभुं समभ्यर्च्य प्रदोषे विधिनाऽधुना ॥ १११ ॥ जहि वृत्रं महादैत्यं देवानां कार्यसिद्धये ॥ गुरोस्तद्वचनं श्रुत्वा उवाचाथ शतक्रतुः ॥ सोद्यापनविधिं ब्रूहि प्रदोषस्य च मेऽधुना ॥ ११२ ॥ ॥ बृहस्पतिरुवाच ॥ ॥ कार्तिके मासि संप्राप्ते मंदवारे त्रयोदशी ॥ संपूर्तिस्तु भवेत्तत्र संपूर्णव्रतसिद्धये ॥ ११३ ॥ वृषभो राजतः कार्यः पृष्ठे तस्य सुपीठकम् ॥ तस्योपरि न्यसेद्देवमुमाकांतं त्रिलोचनम् ॥ ११४ ॥ पंचवक्त्रं दशभुजमर्द्धांगे गिरिजां सतीम् ॥ एवं चोमामहेशं च सौवर्णं कारयेद्बुधः ॥ ११५ ॥ सवृषं ताम्रपत्रे च वस्त्रेण परिगुंठिते ॥ स्थापयित्वोमया सार्द्धं नानाभोगसमन्वितम् ॥ ११६ ॥ विधिना जागरं कुर्याद्रात्रौ श्रद्धासमन्वितः ॥ पंचामृतेन स्नपनं कार्यमादौ प्रयत्नतः ॥ ११७ ॥ गोक्षीरस्नानं देवेश गोक्षीरेण मया कृतम् ॥ स्नपनं देवदेवेश गृहाण परमेश्वर ॥ ११८ ॥ दध्ना चैव मया देव स्नपनं क्रियतेऽधुना ॥ गृहाण च मया दत्तं सुप्रसन्नो भवाद्य वै ॥ ११९ ॥ सर्पिषा च मया देव स्नपनं क्रियतेऽधुना ॥ गृहाण श्रद्धया दत्तं तव प्रीत्यर्थमेव च ॥ १२० ॥ इदं मधु मया दत्तं तव प्रीत्यर्थमेव च ॥ गृहाण त्वं हि देवेश मम शांतिप्रदो भव ॥ १२१ ॥ सितया देवदेवेश स्नपनं क्रियतेऽधुना ॥ गृहाण श्रद्धया दत्तां सुप्रसन्नो भव प्रभो ॥ १२२ ॥ एवं पंचामृतेनैव स्नपनीयो वृषध्वजः ॥ पश्चादर्घ्यं प्रदातव्यं ताम्रपात्रेण धीमता ॥ अनेनैव च मंत्रेण उमाकांतस्य तुष्टये ॥ १२३ ॥ अर्घ्योऽसि त्वमुमाकांत अर्चेणानेन वै प्रभो ॥ गृहाण त्वं मया दत्तं प्रसन्नो भव शंकर ॥ १२४ ॥ मया दत्तं च ते पाद्यं पुष्पगंधसमन्वितम् ॥ गृहाण देवदेवेश प्रसन्नो वरदो भव ॥ १२५ ॥ विष्टरं विष्टरेणैव मया दत्तं च वै प्रभो ॥ शांत्यर्थं तव देवेश वरदो भव मे सदा ॥ १२६ ॥ आचमनीयं मया दत्तं तव विश्वेश्वर प्रभो ॥ गृहाण परमेशान तुष्टो भव ममाद्य वै ॥ १२७ ॥ ब्रह्मग्रन्थिसमायुक्तं ब्रह्मकर्मप्रवर्तकम् ॥ यज्ञोपवीतं सौवर्णं मया दत्तं तव प्रभो ॥ १२८ ॥ सुगंधं चंदनं देव मया दत्तं च वै प्रभो ॥ भक्त्या परमया शंभो सुगंधं कुरु मां भव ॥ १२९ ॥ दीपं हि परमं शंभो घृतप्रज्वलितं मया ॥ दत्तं गृहाण देवेश मम ज्ञानप्रदो भव ॥ १३० ॥ दीपं विशिष्टं परमं सर्वौषधिविजृंभितम् ॥ गृहाण परमेशान मम शांत्यर्थमेव च ॥ १३१ ॥ दीपावलिं मया दत्तां गृहाण परमेश्वर ॥ आरार्तिकप्रदानेन मम तेजःप्रदो भव ॥ १३२ ॥ फलदीपादिनैवेद्यतांबूलादिक्रमेण च ॥ पूजनीयो विधानज्ञैस्तस्यां रात्रौ प्रयत्नतः ॥ १३३ ॥ पश्चाज्जागरणं कार्यं गृहे वा देवतालये ॥ वितानमंडपं कृत्वा नानाश्चर्यसमन्वितम् ॥ गीतवादित्रनृत्येन अर्चनीयः सदाशिवः ॥ १३४ ॥ अनेनैव विधानेन प्रदोषोद्यापने विधिः ॥ कार्यो विधिमता शक्र सर्वकार्यार्थसिद्धये ॥१३५॥ गुरुणा कथितं सर्वं तच्चकार शतक्रतुः ॥ तेनैव च सहायेन इंद्रो युद्धपरायणः ॥१३६॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वृत्रं प्रति सुरैः सार्द्धं युयुधे च शतक्रतुः ॥ तुमुलं युद्धमभवद्देवानां दानवैः सह ॥ १३७ ॥ तस्मिन्सुतुमुले गाढे देवदैत्यक्षयावहे ॥ द्वंद्वयुद्धं सुतुमुलमतिवेलं भयावहम् ॥ १३८ ॥ व्योमो यमेन युयुधे ह्यग्निना तीक्ष्णकोपनः ॥ वरुणेन महादंष्ट्रो वायुना च महाबलः ॥ १३९ ॥ द्वन्द्वयुद्धरताः सर्वे अन्योन्यबलकांक्षिणः ॥ १४० ॥ तथैव ते देववरा महाभुजाः संग्रामशूरा जयिनस्तदाऽभवन् ॥ पराजयं दैत्यवराश्च सर्वे प्राप्तास्तदानीं परमं समंतात् ॥ १४१ ॥ दृष्ट्वा सुरैर्दैत्यवरान्पराजितान्पलायमानानथ कान्दिशीकान् ॥ तदैव वृत्रः परमेण मन्युना महाबलो वाक्यमिदं बभाषे ॥ १४२ ॥ ॥ वृत्र उवाच ॥ ॥ हे दैत्याः परमार्ताश्च कस्माद्यूयं भयातुराः ॥ पलायनपराः सर्वे विसृज्य रणमद्भुतम् ॥ १४३ ॥ स्वंस्वं पराक्रमं वीरा युद्धाय कृतनिश्चयाः ॥ दर्शयध्वं सुरगणास्सूदयध्वं महाबलाः॥१४४॥ गदाभिः पट्टिशैः खड्गैः शक्तितोमरमुद्गरैः ॥ असिभिर्भिंदिपालैश्च पाशतोमरमुष्टिभिः ॥ १४५ ॥ तदा देवाश्च युयुधुर्दधीचास्थिसमुद्भवैः ॥ शस्त्रैरस्त्रैश्च परमैरसुरान्समदारयन् ॥१४६॥ पुनर्दैत्या हता देवैः प्राप्तास्तेपि पराजयम् ॥ पुनश्च तेन वृत्रेण नोद्यमानाः सुरान्प्रति ॥ १४७ ॥ यदा हि ते दैत्यवराः सुरेशैर्निहन्यमानाश्च विदुद्रुवुर्दिशः ॥ केचिद्दृष्ट्वा दानवास्ते तदानीं भीतित्रस्ताः क्लीबरूपाः क्रमेण॥१४८॥वृत्रेण कोपिना चैवं धिक्कृता दैत्यपुंगवाः ॥ हे पुलोमन्महाभाग वृषपर्वन्नमोस्तु ते ॥१४९॥ हे धूम्राक्ष महाकाल महादैत्य वृकासुर ॥ स्थूलाक्ष हे महादैत्य स्थूलदंष्ट्र नमोस्तु ते ॥ १५० ॥ स्वर्गद्वारं विहायैव क्षत्रियाणां मनस्विनाम् ॥ पलायध्वे किमर्थं वा संग्रामाङ्गणमुत्तमम् ॥ १५१ ॥ संगरे मरणं येषां ते यांति परमं पदम् ॥ यत्र तत्र च लिप्सेत संग्रामे मरणं बुधः ॥ १५२ ॥ त्यजन्ति संगरं ये वै ते यांति निरयं ध्रुवम् ॥ १५३ ॥ ये ब्राह्मणार्थे भृत्यार्थे स्वार्थे वै शस्त्रपाणयः ॥ संग्रामं ये प्रकुर्वंति महापातकिनो नराः ॥ १५४ ॥ शस्त्रघातहता ये वै मृता वा संगरे तथा ॥ ते यांति परमं स्थानं नात्र कार्या विचारणा ॥ १५५ ॥ शस्त्रैर्विच्छिन्नदेहा ये गवार्थे स्वामिकारणात् ॥ रणे मृताः क्षता ये वै ते यांति परमां गतिम् ॥ १५६ ॥ तस्माद्रणेऽपि ये शूराः पापिनो निहताः पुरः ॥ प्राप्नुवंति परं स्थानं दुर्लभं ज्ञानिनामपि ॥ १५७ ॥ अथवा तीर्थगमनं वेदाध्ययनमेव च ॥ देवतार्चनयज्ञादिश्रेयांसि विविधानि च ॥ १५८ ॥ ऐकपद्येन तान्येव कलां नार्हंति षोडशीम् ॥ संग्रामे पतितानां च सर्वशास्त्रेष्वयं विधिः ॥ १५९ ॥ तस्माद्युद्धावदानं च कर्तव्यमविशंकितैः ॥ भवद्भिर्नान्यथा कार्यं देववाक्यप्रमाणतः ॥ १६० ॥ यूयं सर्वे शौरवृत्त्या समेताः कुलेन शीलेन महानुभावाः ॥ पदानि तान्येव पलायमाना गच्छंत्यशूरा रणमंडलाच्च ॥ १६१ ॥

---

१ अस्य श्लोकस्य पूर्वश्लोकस्थेन 'दर्शयध्वम्'—इति क्रियापदेनान्वयः ।

त एव सर्वे खलु पापलोकान्गच्छंति नूनं वचनात्स्मृतेश्च ॥ १६२ ॥ ये पापिष्ठास्त्वधर्म्मस्था ब्रह्मघ्ना गुरुतल्पगाः ॥ नरकं यांति ते पापं तथैव रणविच्युताः ॥ १६३ ॥ तस्माद्भवद्भिर्योद्धव्यं स्वामिकार्यभरक्षमैः ॥ एवमुक्तास्तदा तेन वृत्रेणापि महात्मना ॥ १६४ ॥ चक्रुस्ते वचनं तस्य असुराश्च सुरान्प्रति ॥ चक्रुः सुतुमुलं युद्धं सर्वलोकभयंकरम् ॥ १६५ ॥ तस्मिन्प्रवृत्ते तुमुले विगाढे वृत्रो महादैत्यपतिः स एकः ॥ उवाच रोषेण महाद्भुतेन शतक्रतुं देववरैः समेतम् ॥ १६६ ॥ ॥ वृत्र उवाच ॥ ॥ शृणु वाक्यं मया चोक्तं धर्म्मार्थसहितं हितम् ॥ त्वं देवानां पतिर्भूत्वा न जानासि हिताहितम् ॥ १६७ ॥ किंबलार्थपरो भूत्वा विश्वरूपो हतस्त्वया ॥ प्रातमद्यैव भो इंद्र तस्येदं कर्म्मणः फलम् ॥ १६८ ॥ ये दीर्घदर्शिनो मंदा मूढा धर्मबहिष्कृताः ॥ अकल्पाः कार्यसिद्ध्यर्थं यत्कुर्वंति च निष्फलम् ॥ तत्सर्वं विद्धि देवेंद्र मनसा संप्रधार्यताम् ॥ १६९ ॥ तस्माद्ध र्म्मपरो भूत्वा युध्यस्व गतकल्मषः ॥ भ्रातृहा त्वं ममैवेंद्र तस्मात्त्वां घातयाम्यहम् ॥ १७० ॥ मा प्रयाहि स्थिरो भूत्वा देवैश्च परिवारितः ॥ एव मुक्तस्तु वृत्रेण शक्रोऽतीव रुषान्वितः ॥ ऐरावतं समारुह्य ययौ वृत्रजिघांसया ॥ १७१ ॥ इंद्रमायांतमालोक्य वृत्रो बलवतां वरः ॥ उवाच प्रहसन्वाक्यं सर्वेषां शृण्वतामपि ॥ १७२ ॥ आदौ मां प्रहरस्वेति तस्मात्त्वां घातयाम्यहम् ॥ १७३ ॥ इत्येवमुक्तो देवेंद्रो जघान गदया भृशम् ॥ वृत्रं बलवतां श्रेष्ठं जानुदेशे महाबलम् ॥ १७४ ॥ तामापतंतीं जग्राह करेणैकेन लीलया ॥ तयैवैनं जघानाशु गदया त्रिदिवेश्वरम् ॥ ॥ १७५ ॥ सा गदा पातयामास सवज्रं च पुरंदरम् ॥ पतितं शक्रमालोक्य वृत्र ऊचे सुरान्प्रति ॥ १७६ ॥ नयध्वं स्वामिनं देवाः स्वपुरीमम रावतीम् ॥ १७७ ॥ एतच्छ्रुत्वा वचः सत्यं वृत्रस्य च महात्मनः ॥ तथा चक्रुः सुराः सर्वे रणाच्चेंद्रं समुत्सुकाः ॥ १७८ ॥ अपोवाह्य गजस्थं हि परिवार्य भयातुराः ॥ सुराः सर्वे रणं हित्वा जग्मुस्ते त्रिदिवं प्रति ॥ १७९ ॥ ततो गतेषु देवेषु ननर्त च महासुरः ॥ वृत्रो जहास च परं तेना पूर्यत दिक्तटम् ॥ १८० ॥ चचाल च मही सर्वा सशैलवनकानना ॥ चुक्षुभे च तदा सर्वं जंगमं स्थावरं तथा ॥ १८१ ॥ श्रुत्वा प्रयातं देवेंद्रं ब्रह्मा लोकपितामहः ॥ उपयातोऽथ देवेंद्र स्वकमण्डलुवारिणा ॥ अस्पृशल्लब्धसंज्ञोऽभूत्तत्क्षणाच्च पुरंदरः ॥ १८२ ॥ दृष्ट्वा पितामहं चाग्रे व्रीडायु क्तोऽभवत्तदा ॥ महेंद्रं त्रपया युक्तं ब्रह्मोवाच पितामहः ॥ १८३ ॥ ॥ ब्रह्मोवाच ॥ ॥ वृत्रो हि तपसा युक्तो ब्रह्मचर्यव्रते स्थितः ॥ त्वष्टुश्च तपसा युक्तो वृत्रश्चायं महायशाः ॥ अजेयस्तपसोग्रेण तस्मात्त्वं तपसा जय ॥१८४॥ वृत्रासुरो दैत्यपतिश्च शक्र ते समाधिना परमेणैव जय्यः ॥

१ स्वयम्-इति शेषः ।

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निशम्य वाक्यं परमेष्ठिनो हरिः सस्मार देवं वृषभध्वजं तदा ॥ १८५ ॥ स्तुत्या तदा तं स्तवमानो महात्मा पुरंदरो गुरुणा नोदितो हि ॥ १८६ ॥ ॥ इंद्र उवाच ॥ ॥ नमो भर्गाय देवाय देवानामतिदुर्गम ॥ वरदो भव देवेश देवानां कार्यसिद्धये ॥ १८७ ॥ एवं स्तुतिपरो भूत्वा शचीपतिरुदारधीः ॥ स्वकार्यदक्षो मंदात्मा प्रपंचाभिरतः खलु ॥ १८८ ॥ प्रपंचाभिरता मूढाः शिवभक्तिपरा ह्यपि ॥ न प्राप्नुवंति ते स्थानं परमीशस्य रागिणः ॥ १८९ ॥ निर्मला निरहंकारा ये जनाः पर्युपासते ॥ मृडं ज्ञानप्रदं चेशं परेशं शंभुमेव च ॥ १९० ॥ तेषां परेषां वरद इहामुत्र च शंकरः ॥ महेंद्रेण स्तुतः शर्वो रागिणा परमेण हि ॥ १९१ ॥ रागिणां हि सदा शंभुर्दुर्लभो नात्र संशयः ॥ तस्माद्विरागिणां नित्यं सन्मुखो हि सदाशिवः ॥ १९२ ॥ राजा सुराणां हि महानुरागी स्वकर्मसंसिद्धिमहाप्रवीणः ॥ तस्मात्सदा क्लेशपरः शचीपतिः स्वकामभावात्मपरो हि नित्यम् ॥ १९३ ॥ स्तवमानं तदा चेंद्रमब्रवीत्कार्यगौरवात् ॥ विज्ञायाखिलदृग्द्रष्टा महेशो लिंगरूपवान् ॥ १९४ ॥ इंद्र गच्छ सुरैः सार्द्धं वृत्रं वै दानवं प्रति ॥ तपसैव च साध्योऽयं रणे जेतुं शतक्रतो ॥ १९५ ॥ ॥ इंद्र उवाच ॥ ॥ केनोपायेन साध्योऽयं वृत्रो दैत्यवरो महान् ॥ तच्छीघ्रं कथ्यतां शंभो येन मे विजयो भवेत् ॥ १९६ ॥ ॥ रुद्र उवाच ॥ ॥ रणे न शक्यते हंतुमपि देववरैरपि ॥ तस्मात्त्वया हि कर्तव्यं कुत्सितं कर्म चाद्य वै ॥ १९७ ॥ अस्य शापः पुरा दत्तः पार्वत्या मम सन्निधौ ॥ असौ चित्ररथो नाम्ना विख्यातो भुवनत्रये ॥ १९८ ॥ पर्यटन्सु विमानेन मया दत्तेन भास्वता ॥ उपहासादिमां योनिं संप्राप्तो दैत्यपुंगवः ॥ १९९ ॥ तस्मादजेयं जानीहि रणे रणविदां वर ॥ एवमुक्तो महेंद्रोऽयं शंभुना योगिना भृशम् ॥ २०० ॥ तथेति मत्वा शक्रोऽसौ नियमं तमुपाददे ॥ २०१ ॥ रंध्रं प्रतीक्ष्य वृत्रस्य तत्समीपे सहस्रकम् ॥ वत्सराणां महाभागा वसन्हंतुं मनो दधे ॥ २०२ ॥ अंतर्वेद्यां बहिः स्थित्वा वज्रपाणिरतुज्ञया ॥ गुरोः पुरोधसश्चैव स्वकार्यमकरोद्भृशम् ॥ ॥ २०३ ॥ एकदा नर्म्मदायां वै वृत्रो दानवपुंगवः ॥ दैत्यैः परिवृतः सर्वैः समायातो यदृच्छया ॥ २०४ ॥ इंद्रः पराभवं प्राप्तो नीतो देवैर्दिवं प्रति ॥ अहमेव हतारिश्च नान्योस्ति सदृशो मम ॥ २०५ ॥ मन्यमानः सदा वृत्रः पौरुषेण समन्वितः ॥ प्रदोषसमये विप्रा नर्मदायामुपस्थितः ॥ २०६ ॥ दृष्टश्चेंद्रेण सुमहानसुरैः परिवारितः ॥ वृत्रो बलवतां श्रेष्ठः प्रदोषसमये तदा ॥ २०७ ॥ तस्मिन्प्रदोषे संयुक्ता मंदवारे त्रयोदशी ॥ नोदितो गुरुणा चेंद्रः करे गृह्य बृहस्पतिः ॥ २०८ ॥ प्रदक्षिणानमस्कारैर्यथोक्तविधिना तदा ॥ पूजितो लिंगरूपी च ओंकारो नर्मदातटे ॥ २०९ ॥ प्रदोषव्रतमाहात्म्याद्वज्रपाणिः प्रतापवान् ॥ संजातस्तत्क्षणादेव प्रसादाच्छंकरस्य

CC-0. In Public Domain. Digitization by eGangotri

च ॥ २१० ॥ वृत्रोपि तपसा युक्तः प्रदोषसमये महान् ॥ निद्रासक्तोऽभवत्तत्र शुंडेन प्रतिबोधितः ॥ २११ ॥ स्वापात्प्रदोषवेलायां तपसा चार्जितं
फलम् ॥ प्रनष्टं तत्क्षणादेव निःश्रीकत्वमुपागतः ॥ २१२ ॥ देव्याः शापाच्च संजातो वृत्रो भग्नमनोरथः ॥ २१३ ॥ संध्यापादो गतो यावद्वृत्र
स्तीर्थमुपाविशत् ॥ परीतो विविधैर्दैत्यैर्नानायुधसमन्वितैः ॥ २१४ ॥ तस्य तत्कर्मणश्छिद्रं छिद्रान्वेषी शचीपतिः ॥ ज्ञात्वा गतः शनैर्हंतुमात्म
शत्रुं शतक्रतुः ॥ २१५ ॥ तावद्दैत्याः सुसंरब्धा भीमा भीमपराक्रमाः ॥ उत्तस्थुर्युगपत्सर्वे दुःसहाश्च शतक्रतुम् ॥ २१६ ॥ ततस्तैरभवद्युद्धमतिप्रब
लदंडिभिः ॥ सर्वे देवाः सहायार्थं तदाऽऽजग्मुः शतक्रतोः ॥ २१७ ॥ तदा दैत्याश्च देवाश्च युयुधुस्ते तरस्विनः ॥ रात्रौ युद्धं समभवत्सुरासुरविम
र्दनम् ॥२१८॥ अनेकशस्त्रसंवीतं महारौद्रमवर्तत ॥ एवं प्रवर्तमाने तु संग्रामे रौद्रदारुणे ॥ तदा वृत्रोऽथ सन्नद्धो गृहीत्वा शूलमुल्बणम् ॥२१९॥ इंद्र
प्रमुखतो भूत्वा जगर्जातिविभीषणम् ॥ तस्य नादप्रणादेन त्रासितं भुवनत्रयम् ॥ २२० ॥ ऐरावणं समारुह्य महेंद्रः शुशुभे तदा ॥ ध्रियमाणेन
च्छत्रेण चंद्रमंडलशोभिना ॥ २२१ ॥ चामरैर्वीज्यमानोऽथ बभाषे दैत्यपुंगवम् ॥ २२२ ॥ ॥ ॥ इंद्र उवाच ॥ ॥ संग्रामं कुरु मे
वृत्र बलेन महता वृतः ॥ शूरस्त्वमसि शूराणां तपसा परमेण हि ॥ २२३ ॥ एवमुक्तस्तदा तेन वृत्रो वाक्यमुवाच ह ॥ आदौ प्रहर मामिंद्र
पश्चात्त्वां घातयाम्यहम् ॥ २२४ ॥ तथेति मत्वा तदतीव दुःसहं वज्रं तदानीं शतधारमेव ॥ स मोक्तुकामो हि तदा पुरंदरो निवारितस्तेन
महाप्रभेण ॥ पुरोधसा बुद्धिमतां वरेण तथेति मत्वा स चकार चेंद्रः ॥ २२५ ॥ गदां प्रगृह्य देवेंद्रो वृत्रं विव्याध तां गदाम् ॥ वारयामास वृत्रोसा
वतिथिं कृपणो यथा ॥ २२६ ॥ व्यर्थां च स्वगदां दृष्ट्वा इंद्रश्चितामवाप ह ॥ २२७ ॥ तं चिंत्यमानं स तदा पुरंदरं वृत्रो बभाषे परिभर्त्समानः ॥
पुराकृतं शक्र महाद्भुतं त्वया जुगुप्सितं कर्म्म च विस्मृतं किम् ॥ येनैव जातोऽसि सहस्रनेत्रः शापान्महर्षेरथ गौतमस्य ॥ २२८ ॥ ये शूराश्चें
द्रियग्रामं वर्तंते हि नियम्य तु ॥ ते जयं प्राप्नुवंतीह नेतरे हि भवादृशाः ॥ २२९ ॥ रणाजिरं महाघोरं पापिनां नात्र संशयः ॥ २३० ॥ एवं
निर्भर्त्सयामास देवेंद्रं दैत्यपुंगवः ॥ त्रिशूलं धूनयामास देवेंद्रो हि तडित्समम् ॥ २३१ ॥ तेन शूलेन महता वृत्रोऽद्भुतपराक्रमः ॥ बभौ
तीव्रेण तपसा यथा रुद्रो युगांतकृत् ॥ २३२ ॥ तथाभूतं समालक्ष्य देवराजः शतक्रतुः ॥ अभ्युद्ययौ हंतुकामो वृत्रं दानवपुंगवम् ॥ २३३ ॥
तमायांतमभिप्रेक्ष्य हंतुकामं पुरंदरम् ॥ जहास परमं तत्र शक्रस्य च भयावहम् ॥ मुखं प्रसार्य सुमहदागतो हि पुरंदरम् ॥ २३४ ॥ ग्रस्तुकामो
महातेजा दैत्यानामधिपस्तदा ॥ आगत्य सहसा शक्रं ग्रासयित्वा सकुंजरम् ॥ २३५ ॥ सवज्रं सकिरीटं च ननर्त च जगर्ज्ज च ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निमिषांतरमात्रेण ग्रसितोऽसौ पुरंदरः ॥ २३६ ॥ हाहाकारो महानासीद्देवानां तत्र पश्यताम् ॥ भूकम्पो हि तदा ह्यासीदुल्कापातः सह स्वशः ॥ २३७ ॥ तिमिरेणावृतं सर्वं जगत्स्थावरजंगमम् ॥ नर्तमानस्तदा वृत्रो बभूव परमद्युतिः ॥ २३८ ॥ विध्यमानास्तदा सर्वे देवा ब्रह्माणमागताः ॥ शशंसुः सर्वमेवैतद्वृत्रासुरविचेष्टितम् ॥ २३९ ॥ तच्छ्रुत्वा भगवान्ब्रह्मा व्यथितोऽतीव विस्मितः ॥ कथं जातं महेंद्रस्य व्यसनं परमाद्भुतम् ॥ २४० ॥ देवैः सह तदा ब्रह्मा सर्वलोकपितामहः ॥ तुष्टाव गिरिशं देवं परमेण समाधिना ॥ २४१ ॥ ॥ ब्रह्मोवाच ॥ ॐनमो लिंगरूपाय महादेवाय वै नमः ॥ विश्वरूपाय देवाय विरूपाक्षाय वै नमः ॥ २४२ ॥ त्राहित्राहि त्रिलोकेश वृत्रग्रस्तं पुरंदरम् ॥ तदा नभोगता वाणी सर्वेषामेव शृण्वताम् ॥ २४३ ॥ उवाच हितकामाय विधिं लिंगार्चने सती ॥ प्रदोषव्रतयुक्तेन इंद्रेण विकृतं कृतम् ॥ २४४ ॥ निर्माल्यं पीठिकां चैव च्छायाप्रासादमेव च ॥ प्रदक्षिणां कृतवता पीठिकालंघनं कृतम् ॥ २४५ ॥ लंघयंति च ये मूढास्ते वै दंड्या न संशयः ॥ चंडस्य गणमुख्यस्य तस्मात्कुर्यात्प्रयत्नतः ॥ प्रदक्षिणानमस्कारौ लिंगार्चनसमन्वितः ॥ २४६ ॥ श्रेयःप्राप्त्येकबुद्ध्या वै प्रयत्नाल्लिंगपूजनम् ॥ कार्यं दीक्षापरैर्नित्यं सर्वपापोपशांतये ॥ २४७ ॥ आशरीरं च तद्वाक्यं श्रुत्वा ब्रह्मादयः सुराः ॥ पप्रच्छुस्ते प्रांजलयो नभोवाणीं शुभावहाम् ॥ २४८ ॥ कथमर्चामहे लिंगं केनैव विधिना ततः ॥ प्रातर्मध्याह्नसमये सायंकाले तथैव च ॥ २४९ ॥ कानि पुष्पाणि सायाह्ने मध्याह्ने च तथैव हि ॥ प्रातःकाले तु तान्येव कथयस्व यथातथम् ॥ २५० ॥ तदा नभोगता वाणी कथयामास विस्तरम् ॥ २५१ ॥ करवीरं चार्कपुष्पं बृहतीपुष्पमेव च ॥ धत्तूरकुसुमं चैव शतपत्रं तथैव च ॥ २५२ ॥ आरग्वधं च पुन्नागं बकुलं नागकेशरम् ॥ ब्रंध्नोत्पलं[1] कदम्बं च मंदारकुसुमं तथा ॥ २५३ ॥ बहूनि वरपुष्पाणि बहूनि कमलान्यपि ॥ त्रिकाले च पवित्राणि ज्ञेयानि सततं बुधैः ॥ २५४ ॥ जातीपुष्पं मल्लिकायाश्च पुष्पं पुष्पं मोगरकं[2] नीलपुष्पं तथैव ॥ तथा पुष्पं कुटजं कर्णिकारं कौसुम्भाख्यं वारिजं रक्तवर्णम् ॥ २५५ ॥ एतान्येव च पुष्पाणि मध्याह्ने लिंगपूजने ॥ विशिष्टानि मयोक्तानि सायाह्ने कथयाम्यहम् ॥ २५६ ॥ चंपकानि त्रिकाले च पवित्राणि न संशयः ॥ रात्रौ मोगरकाण्येव पवित्राणि न संशयः ॥ ॥ २५७ ॥ एवमर्चनभेदांश्च ज्ञात्वा तल्लिंगपूजने ॥ कार्यो विधिर्विधिज्ञैश्च सततं च शिवालये ॥ २५८ ॥ वृषभांतरितो भूत्वा पीठिकांतरमेव च ॥ प्रदक्षिणां न कुर्वीत कुर्वन्किल्बिषमश्नुते ॥ २५९ ॥ तथा ह्यनेन शक्रेण कृतं चैव प्रदक्षिणम् ॥ राजसं भावमाश्रित्य तस्माज्जातं

१ ब्रध्नोत्पलम्—सूर्यविकासि कमलम्—इत्यर्थः । ब्रह्मोत्पलम्—इति पाठान्तरम् । २ अत्र च्छन्दोभंग इवाभाति ।

CC-0. In Public Domain. Digitization by eGangotri

च निष्फलम् ॥ २६० ॥ ग्रसितोऽद्यैव वृत्रेण सगजो हि पुरंदरः ॥ भवद्भिरेव तत्कार्यं येन इन्द्रः प्रमुच्यते ॥ २६१ ॥ महारुद्रविधानेन मुक्तो भवति तत्क्षणात् ॥ पुरंदरो ह्ययं देवा नात्र कार्या विचारणा ॥२६२॥ तेनैव वचसा देवा रुद्रमभ्यर्च्य यत्नतः॥यथोक्तेन विधानेन रुद्रसूक्तेन यत्नतः ॥ २६३ ॥ तथा चैकादशीरुद्रया रुद्रमभ्यर्च्य वै सुराः॥हवनं प्रत्यहं चक्रुर्दशांशेन द्विजोत्तमाः॥२६४॥जपं च पूजां हवनं च चक्रुर्विमोक्तुकामाः सहसा पुरंदरम् ॥ शंभोः प्रसादात्सहसा विनिर्गतः कुक्षिं भित्त्वा देवराजस्तदानीम् ॥ २६५ ॥ तं निर्गतं समीक्ष्याथ देवदेवेंद्रमोजसा ॥ सगजं च स वज्रं च सकिरीटं सकुण्डलम् ॥ श्रिया परमया युक्तं पुरंदरं महौजसम् ॥ २६६ ॥ देवदुंदुभयो नेदुस्तथा शंखा ह्यनेकशः ॥ गंधर्वाप्सरसो यक्षा ऋषयश्च मुदान्विताः ॥ २६७ ॥ ऐकपद्येन सर्वेषां महाहर्षो दिवौकसाम् ॥ संजातस्तत्क्षणादेव यदा मुक्तः पुरंदरः ॥ तदा शची समायाता यत्र मुक्तः पुरंदरः ॥ २६८ ॥ तत्र शच्या समेतोऽसावभिषिक्तो महर्षिभिः ॥ पुण्याहवाचनं तस्य कृतं सर्वैः प्रयत्नतः ॥ २६९ ॥ एवं तदाभिषिक्तोऽसौ महेंद्र ऋषिभिः पुनः ॥ मही मंगलभूयिष्ठा तदा जाता द्विजोत्तमाः ॥ २७० ॥ दिशः प्रसन्नतां याता निर्मलं चाभवन्नभः ॥ शांतास्तदाग्नयो ह्यास न्मनांसि च महात्मनाम् ॥ २७१ ॥ एवमादीन्यनेकानि मंगलानि ततोऽभवन् ॥ मुक्ते शतक्रतौ तस्मिन्बभूव परमाद्भुतम् ॥ २७२ ॥ एवं प्रवर्तमाने तु महतां च महोत्सवे ॥ तावद्वृत्रस्य पतितं शरीरं च भयानकम् ॥ २७३ ॥ तत्रैव ब्रह्महत्या च पापिष्ठा पतिता भुवि ॥ गंगायमुनयोर्मध्ये अंतर्वेदीति कथ्यते ॥ २७४ ॥ पुण्यभूमिरिति ख्याता प्रसिद्धा लोकपावनी ॥ वृत्रहत्याप्रतिष्ठा सा यस्मिदेशे स पापवान् ॥ २७५ ॥ मलस्य बहुसंभूत्या मालावेति प्रकीर्तिता ॥ तस्यां तु मलभूम्यां वै वृत्रस्य च महच्छिरः ॥ २७६ ॥ षण्मासेष्वपतत्सर्वैः कृत्तं देवैः सवासवैः ॥ एवं वृत्रवधं कृत्वा शक्रो जयमवाप ह ॥ २७७ ॥ इंद्रासने चोपविष्टो निरातंकः शचीपतिः ॥ एतस्मिन्नंतरे दैत्याः पातालवासिनं बलिम् ॥ शशंसुः सर्वमागत्य शक्रस्य च विचेष्टितम् ॥ २७८ ॥ तेषां तद्वचनं श्रुत्वा वैरोचनी रुषान्वितः ॥ शुक्रं पप्रच्छ स तदा कथमिंद्रो वशी भवेत् ॥ २७९ ॥ तेनोक्तं बलये राजञ्जयस्यन्दनलब्धये ॥ महायज्ञं कुरुष्वाद्य तेन ते विजयो भवेत् ॥ २८० ॥ तेनोक्तो भृगुणा चैवं बलिर्यज्ञार्थमुद्यतः ॥ दधौ यानीह द्रव्याणि यज्ञयोग्यानि तानि वै ॥ मेलयित्वा त्वरेणैव वैरोचनिरुदारधीः ॥ २८१ ॥ प्रवर्तितो महायज्ञो भार्गवेण महात्मना ॥ दीक्षायुक्तो बलिरभूज्जुहुवे हव्यवाहनम् ॥ २८२ ॥ हूयमाने तदाग्नौ तु कर्मणा विधिहेतुना ॥ तस्माद्बलेः समुत्पन्नः स्यंदनः परमाद्भुतः ॥ २८३ ॥ हयैश्चतुर्भिः संयुक्तो ध्वजे सिंहो महाप्रभः ॥ शस्त्रास्त्रैः संयुतः श्रीमान्हयैः श्वेतैरलंकृतः ॥ २८४ ॥ ततश्चावभृथस्नानं चक्रे शुक्रप्रणोदितः ॥ स्यंदनं पूजयित्वाथ आरुरोह बलि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्तदा ॥ २८५ ॥ दैत्यैः परिवृतः सद्यो योद्धुकामः पुरंदरम् ॥ सद्य एव दिवं प्राप्तो बलिर्वैरोचनो महान् ॥ २८६ ॥ आगत्य सेनया सार्द्धमारुरो हामरावतीम् ॥ संरुद्धां तां पुरीं दृष्ट्वा तदा ते सुरसत्तमाः ॥ विमर्शयित्वा सुचिरमूचुः सर्वे बृहस्पतिम् ॥ २८७ ॥ किं कुर्मोऽद्य महाभाग आगता दैत्यपुंगवाः ॥ योद्धुकामा महाघोराः सर्वे युद्धविशारदाः ॥ २८८ ॥ तेषां तद्वचनं श्रुत्वा बृहस्पतिरभाषत ॥ २८९ ॥ एते घृतमुखा घोरा भृगुणा नोदिताः सुराः ॥ अजेयाश्चैव ते सर्वे तपसा विक्रमेण च ॥ २९० ॥ एतन्निशम्य वचनं च गुणाभियुक्तं सर्वे सुराः समभवंस्त्रपयाभियुक्ताः ॥ इंद्रो ऽपि बुद्धिविकलः परिचिंतया च व्रीडायुतः समभवत्परिभर्त्स्यमानः ॥ २९१ ॥ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां प्रथमे माहेश्वरखण्डे केदारखंडे बलिदैत्यस्य संग्रामोद्योगवर्णनंनाम सप्तदशोऽध्यायः ॥ १७ ॥ छ ॥ ॥ लोमश उवाच ॥ ॥ कर्मणा परिभूतो हि महेंद्रो गुरुमब्रवीत् ॥ विना यत्नेन संक्लेशात्तर्तुं कर्म्म किमुच्यताम् ॥ १ ॥ बृहस्पतिरुवाचेदं त्यक्त्वा चैवामरावतीम् ॥ यास्यामोऽन्यत्र सर्वे वै सकुटुंबा जिगीषवः ॥ २ ॥ तथा चक्रुः सुराः सर्वे हित्वा चैवामरावतीम् ॥ बर्हिणो रूपमास्थाय गतः सद्यः पुरंदरः ॥ ३ ॥ काको भूत्वा यमः साक्षात्कृकलासो धनाधिपः ॥ अग्निः कपोतको भूत्वा भेको भूत्वा महेश्वरः ॥ ४ ॥ नैर्ऋतस्तत्क्षणादेव कपोतोऽभूत्ततो गतः ॥ पाशी कपिंजलो भूत्वा वायुः पारावतोऽभवत् ॥ ५ ॥ एवं नानातनुभृतो हित्वा ते त्रिदिवं गताः ॥ कश्यपस्याश्रमं पुण्यं संप्राप्ता स्ते भयातुराः ॥ ६ ॥ अदितिं मातरं सर्वे शशंसुर्दैत्यचेष्टितम् ॥ ७ ॥ अप्रियं तदुपाकर्ण्य ह्यदितिः पुत्रलालसा ॥ उवाच कश्यपं सा तु सुराणां व्यसनं महत् ॥ महर्षे श्रूयतां वाक्यं श्रुत्वा तत्कर्तुमर्हसि ॥ ८ ॥ दैत्यैः पराजिता देवा हित्वा चैवामरावतीम् ॥ त्वदीयमाश्रमं प्राप्तास्तान्रक्षस्व प्रजापते ॥ ९ ॥ तस्यास्तद्वचनं श्रुत्वा कश्यपो वाक्यमब्रवीत् ॥ तपसा महता तन्वि जानीहि त्वं च भामिनि ॥ अजेया ह्यसुराः साध्वि भृगुणा ह्यनुमोदिताः ॥ १० ॥ तेषां जयो हि तपसा उग्रेणाऽऽद्येन भामिनि ॥ कुरु शीघ्रतरेणैव सुराणां कार्यसिद्धये ॥ ११ ॥ व्रतमेतन्महाभागे कथयाम्यर्थसिद्धये ॥ तत्कुरुष्व प्रयत्नेन यथोक्तविधिना शुभे ॥ १२ ॥ मासि भाद्रपदे देवि दशम्यां नियता शुचिः ॥ एकभक्तं प्रकुर्वीत विष्णोः प्रीत्यर्थमेव च ॥ १३ ॥ प्रार्थनीयो हरिः साक्षात्सर्वकामवरेश्वरः ॥ मंत्रेणानेन सुभगे तद्भक्तैर्वरवर्णिनि ॥ १४ ॥ तव भक्तोस्म्यहं नाथ दशम्यादिदिनत्रयम् ॥ व्रतं चराम्यहं विष्णो अनुज्ञां दातुमर्हसि ॥ १५ ॥ अनेनैव च मंत्रेण प्रार्थनीयो जगत्पतिः ॥ एकभक्तं प्रकुर्वीत तच्च भक्तं च केवलम् ॥ ॥ १६ ॥ रंभापत्रे च भोक्तव्यं वर्जितं लवणेन हि ॥ एकादश्यां चोपवासं प्रकुर्वीत प्रयत्नतः ॥ १७ ॥ रात्रौ जागरणं कुर्यात्प्रयत्नेन सुमध्यमे ॥

CC-0. In Public Domain. Digitization by eGangotri

द्वादश्यां निपुणत्वेन पारणा तु विधानतः ॥ कर्तव्या ज्ञातिभिः सार्द्धं भोजयित्वा द्विजोत्तमान् ॥ १८ ॥ एवं द्वादशमासांस्तु कुर्याद्व्रतमतंद्रितः ॥
मासि भाद्रपदे प्राप्ते एकादश्यां प्रयत्नतः ॥ विष्णुमभ्यर्च्य यत्नेन कलशोपरि संस्थितम् ॥ १९ ॥ सौवर्णं राजतं वापि यथाशक्त्या प्रकल्पयेत् ॥
श्रवणेन तु संयुक्तां द्वादशीं पापनाशिनीम् ॥ व्रती उपवसेद्यत्नात्सर्वदोषप्रशांतये ॥ २० ॥ एवं हि कश्यपेनोक्तं श्रुत्वाऽदितिरथाचरत् ॥ व्रतं
सांवत्सरं यावन्नियमेन समन्विता ॥ २१ ॥ वर्षांतेन व्रतेनैव परितुष्टो जनार्दनः ॥ प्रादुर्बभूव द्वादश्यां श्रवणेन तदा द्विजाः ॥ २२ ॥ बटुरूपधरः
श्रीशो द्विभुजः कमलेक्षणः ॥ अतसीपुष्पसंकाशो वनमालाविभूषितः ॥ २३ ॥ तं दृष्ट्वा विस्मयाविष्टा पूजामध्येऽदितिस्तदा ॥ कश्यपेन समायुक्ता
साऽस्तौषीत्कमलेक्षणा ॥२४॥ ॥ अदितिरुवाच ॥ ॥ नमोनमः कारणकारणाय ते विश्वात्मने विश्वसृजे चिदात्मने ॥ वरेण्यरूपाय परावरात्मने
ह्यकुंठबोधाय नमोनमस्ते ॥ २५ ॥ इति स्मृतस्तदाऽदित्या देवानां पतिरच्युतः ॥ प्रहस्य भगवानाह अदितिं देवमातरम् ॥ २६ ॥ ॥ श्रीभगवा
नुवाच ॥ ॥ तपसा परमेणैव प्रसन्नोहं तवानघे ॥ अमुना वपुषा चैव देवानां कार्यसिद्धये ॥ २७ ॥ श्रुत्वा भगवतो वाक्यमदितिस्तमुवाच
ह ॥ भगवन्पराजिता देवा असुरैर्बलवत्तरैः ॥ तान्रक्ष शरणापन्नान्सुरान्सर्वाञ्जनार्दन ॥ २८ ॥ निशम्य वाक्यं किल तच्च तस्या विष्णुर्विकुं
ठाधिपतिः स एकः ॥ ज्ञात्वा च सर्वं सुरचेष्टितं तदा बलेश्च सर्वं च चिकीर्षितं च ॥ २९ ॥ किं कार्यमद्यैव मया हि कार्यं येनैव देवा जयमाप्नु
वंति ॥ पराजयं दैत्यवराश्च सर्वे विष्णुः परात्मैव विचिंत्य सर्वम् ॥ ३० ॥ गदामुवाच भगवान्गच्छस्वाद्य वधं प्रति ॥ वैरोचनिं महाभागे घात
यस्व त्वरान्विता ॥ ३१ ॥ गदोवाच हृषीकेशं प्रहसन्तीव भामिनी ॥ मया ह्यशक्यो वधितुं ब्रह्मण्यो हि बलिर्महान् ॥ ३२ ॥ चक्रं प्रति तदा
विष्णुरुवाच परिसांत्वयन् ॥ त्वं गच्छ बलिनं हंतुं शीघ्रमेव सुदर्शन ॥ ३३ ॥ तदोवाच त्वरेणैव चक्रपाणिं सुदर्शनम् ॥न शक्यते मया हंतुं
बलिनं तं महाप्रभो ॥ ३४ ॥ ब्रह्मण्योऽसि यथा विष्णो तथासौ दैत्यपुंगवः ॥ धनुषा च तथैवोक्तः शार्ङ्गपाणिश्च विस्मितः ॥ चिंतयामास बहुधा
विमृश्य सुचिरं बहु ॥ ३५ ॥ ॥ अत्रिरुवाच ॥ ॥ तदा ते ह्यसुराः सर्वे किमकुर्वंस्तदुच्यताम् ॥३६॥ ॥ लोमश उवाच ॥ ॥ तदा ते
ह्यसुराः सर्वे बलिप्रभृतयो दिवि ॥ रुरुधुर्नगरीं रम्यां योद्धुकामाः पुरंदरम् ॥ ३७ ॥ न विदुर्ह्यसुराः सर्वे गतान्देवांस्त्रिविष्टपात् ॥ नानारूपधरां
स्तस्मात्कश्यपस्याश्रमं प्रति ॥ ३८ ॥ प्राकारमारुह्य तदा हि संभ्रमाद्दैत्याः सुरेशं प्रति हंतुकामाः ॥ यावत्प्रविष्टा ह्यमरावतीं तां शून्यामपश्यन्प

१ तेपु—नैमिपारण्ये कथाश्रवणार्थमुपविष्टेषु शौनकादिमहर्षिष्वेव मध्येऽत्रिर्नाम मुनिर्लोमशं प्रति प्रश्नमकार्षीत् । प्रसङ्गान्तरं वा संवादान्तरं वेति भ्रमितव्यम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रितुष्टमानसाः ॥ ३९ ॥ इंद्रासने च शुक्रेण ह्यभिषिक्तो बलिस्तदा ॥ सहाभिषेकविधिना ह्यसुरैः परिवारितः ॥ ४० ॥ तथैवाधिष्ठितो राज्ये बलिर्वैरोचनो महान् ॥ शुशुभे परया भूत्या महेंद्राधिकृतस्तदा ॥ ४१ ॥ नागैश्चासुरसंघैश्च सेव्यमानो महेंद्रवत् ॥ सुरद्रुमो जितस्तेन कामधेनुर्मणिस्तथा ॥ ४२ ॥ दानैर्दाता च सर्वेषां येऽन्ये दानित्वमागताः ॥ सर्वेषामेव भूतानां दानैर्दाता बलिर्महान् ॥ ४३ ॥ यान्यान्कामयते कामांस्तान्सर्वान्वितरत्यसौ ॥ सर्वेभ्योऽपि स चार्थिभ्यो दानवानामधीश्वरः ॥ ४४ ॥ ॥ शौनक उवाच ॥ ॥ देवेंद्रो हि महाभाग न ददाति कदाचन ॥ कथं बलिरसौ दाता कथयस्व यथातथम् ॥ ४५ ॥ ॥ लोमश उवाच ॥ ॥ यत्नतो येन यत्किंचित्क्रियते सुकृतं नरैः ॥ शुभं वाप्यशुभं वापि ज्ञातव्यं हि विपश्चिता ॥ ४६ ॥ शक्रो हि याज्ञिको विप्रा अश्वमेधशतेन वै ॥ प्राप्तराज्योऽमरावत्यां केवलं भोगलोलुपः ॥ ४७ ॥ अर्थितं तत्फलं विद्धि पुनः कार्पण्यमाविशत् ॥ पुनर्मरणमाविश्य क्षीणपुण्यो भविष्यति ॥ ४८ ॥ य इंद्र कृमिरेव स्यात्कृमिरिंद्रो हि जायते ॥ तस्माद्दानात्परतरं नान्यदस्तीह मोचनम् ॥ ४९ ॥ दानाद्धि प्राप्यते ज्ञानं ज्ञानान्मोक्षो न संशयः ॥ मोक्षात्परतरा भक्तिः शूलपाणौ हि वै द्विजाः ॥ ५० ॥ ददाति सर्व सर्वेशः प्रसन्नात्मा सदाशिवः ॥ किंचिदल्पेन तोयेन परितुष्यति शंकरः ॥ ५१ ॥ अत्रैवोदाहरंतीममितिहासं पुरातनम् ॥ विरोचनसुतेनेदं कृतमस्ति न संशयः ॥ ५२ ॥ कितवो हि महापापो देवब्राह्मणनिंदकः ॥ निकृत्या परयोपेतः परदाररतो महान् ॥ ॥ ५३ ॥ एकदा तु महापापात्कैतवाच्च जितं धनम् ॥ गणिकार्थे च पुष्पाणि तांबूलं चंदनं तथा ॥५४॥ कौपीनमात्रं तस्यैव कितवस्य प्रदृश्यते ॥ कराभ्यां स्वस्तिकं कृत्वा गंधमाल्यादिकं च यत् ॥ ५५ ॥ गणिकार्थमुपादाय धावमानो गृहं प्रति ॥ तदा प्रस्खलितो भूमौ निपपात च तत्क्षणात् ॥ ५६ ॥ पतनान्मूर्छया युक्तः क्षणमात्रं तदाऽभवत् ॥ ततो मूर्छागतस्यास्य पापिनोऽनिष्टकारिणः ॥ ५७ ॥ बुद्धिः सद्यः समुत्पन्ना कर्मणा प्राक्तनेन हि ॥ निर्वेदं परमापन्नः कितवो दुःखसंयुतः ॥ ५८ ॥ भूम्यां निपतितं यच्च गंधपुष्पादिकं महत् ॥ समर्पितं शिवायेति कितवेनाप्यबुद्धिना ॥ ५९ ॥ तेनैव सुकृतेनैव याम्यैर्नीतो यमालयम् ॥ तं पापीति यमोऽवोचत्सर्वलोकभयावहः ॥ ६० ॥ पचनीयोसि मे मंद नरकेषु महत्सु च ॥ इत्युक्तो धर्मराजेन कितवो वाक्यमब्रवीत् ॥ ६१ ॥ पापाचारो हि भगवन्कश्चिन्नैव मया कृतः ॥ विमृश्यतां मे सुकृतं याथातथ्येन भो यम ॥ ६२ ॥ चित्रगुप्तेन चाख्यातं दत्तमस्ति त्वया पुनः ॥ पतितं चैव देहांते शिवाय परमात्मने ॥ ६३॥ तेन कर्मविपाकेन घटिकात्रयमेव

१ मे–मया–इत्यर्थः ।

CC-0. In Public Domain. Digitization by eGangotri

च ॥ शचीपतेः पदं विद्धि प्राप्स्यसि त्वं न संशयः ॥ ६४ ॥ आगतस्तत्क्षणाद्देवः सुरैः सर्वैः समन्वितः ॥ ऐरावतं समारूढो नीतोऽसौ शक्रमंदिरम् ॥ शक्रः प्रबोधितस्तेन गुरुणा भावितात्मना ॥ ६५ ॥ घटिकात्रितयं यावत्तावत्कालं पुरंदर ॥ निजासनेऽपि संस्थाप्यः कितवोऽपि ममाज्ञया ॥ ६६ ॥ गुरोर्वचनमाकर्ण्य कृत्वा शिरसि तत्क्षणात् ॥ गतोऽन्यत्रैव शक्रोऽसौ कितवो हि प्रवेशितः ॥ भवनं देवराजस्य नानाश्चर्यसमन्वितम् ॥ ६७ ॥ शक्रासनेऽभिषिक्तोऽसौ राज्यं प्राप्तः शतक्रतोः ॥ शंभोर्गंधप्रदानाच्च पुष्पतांबूलसंयुतम् ॥ ६८ ॥ किं पुनः श्रद्धया युक्ताः शिवाय परमात्मने ॥ अर्पयंति सदा भक्त्या गंधपुष्पादिकं महत् ॥ ६९ ॥ शिवसायुज्यमायाताः शिवसेनासमन्विताः ॥ प्राप्नुवंति महामोदं शक्रो ह्येषां च किंकरः ॥ ७० ॥ शिवपूजारतानां च यत्सुखं शांतचेतसाम् ॥ ब्रह्मशक्रादिकानां च तत्सुखं दुर्लभं महत् ॥ ७१ ॥ वराकास्ते न जानंति मूढा विषयलोलुपाः ॥ वंदनीयो महादेवो ह्यर्चनीयः सदाशिवः ॥ ७२ ॥ पूजनीयो महादेवः प्राणिभिस्तत्त्ववेदिभिः ॥ तस्मादिंद्रत्वमगमत्कितवो घटिकात्रयम् ॥ ७३ ॥ पुरोधसाभिषिक्तोऽसौ पुरंदरपदे स्थितः ॥ तदानीं नारदेनोक्तः कितवोऽसौ महायशाः ॥ ७४ ॥ इन्द्राणीमानयस्त्वेति यथा राज्यं सुशोभितम् ॥ ततः प्रहस्य चोवाच कितवः शिववल्लभः ॥ ७५ ॥ इन्द्राण्या नास्ति मे कार्यं न वाच्यं ते महामते ॥ एवमुक्त्वाथ कितवः प्रदातुमुपचक्रमे ॥ ७६ ॥ ऐरावतमगस्त्याय प्रददौ शिववल्लभः ॥ विश्वामित्राय कितवो ददौ हयमुदारधीः ॥ ७७ ॥ उच्चैःश्रवससंज्ञं च कामधेनुं महायशाः ॥ ददौ वशिष्ठाय तदा चिंतामणिं महाप्रभम् ॥ ७८ ॥ गालवाय महातेजास्तदा कल्पतरुं च सः ॥ कौंडिन्याय महाभागः कितवोपि गृहं तदा ॥ ७९ ॥ एवमादीन्यनेकानि रत्नानि विविधानि च ॥ ददावृषिभ्यो मुदितः शिवप्रीत्यर्थमेव च ॥ ८० ॥ घटिकात्रितयं यावत्तावत्कालं ददौ प्रभुः ॥ घटिकात्रितयादूर्ध्वं पूर्वस्वामी समागतः ॥ ८१ ॥ पुरंदरोऽमरावत्यामुपविश्य निजासने ॥ ऋषिभिः संस्तुतश्चैव शच्या सह तदाऽभवत् ॥ ८२ ॥ शचीमुवाच दुर्मेधाः कितवेनासि भामिनि ॥ भुक्ता ह्यस्यैव कथय याथातथ्येन शोभने ॥ ८३ ॥ तदा प्रहस्य चोवाच पुरंदरमकल्मषा ॥ आत्मौपम्येन सर्वत्र पश्यसि त्वं पुरंदर ॥ ८४ ॥ असौ महात्मा कितवस्त्वरूपी शिवप्रसादात्परमार्थविज्ञः ॥ वैराग्ययुक्तो हि महानुभावो येनापि सर्वं परमं प्रपन्नम् ॥ ८५ ॥ राज्यादिकं मोहमयं च पाशं त्यक्त्वा परेभ्यो विजयी स जातः ॥ ८६ ॥ वचो निशम्य देवेश इंद्राण्याः स पुरंदरः ॥ व्रीडायुक्तोऽभवत्तूष्णीमिंद्रासनगतस्तदा ॥ ८७ ॥ बृहस्पतिमुवाचेदं वाक्यं वाक्यविदां वरः ॥ ऐरावतो न

१ प्रदानक्रियाविशेषणमिदम् । शम्भोः पुष्पतांबूलसंयुतं यथा स्यात्तथा गन्धप्रदानात्—इत्यन्वयो बोद्धव्यः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दृश्येत तथैवोच्चैःश्रवा हयः ॥ ८८ ॥ पारिजातादयः सर्वे पदार्थाः केन वा हृताः ॥ ततो गुरुरुवाचेदं कितवेन कृतं महत् ॥ ८९ ॥ ऋषिभ्यो दत्त
मद्यैव यावत्सत्ता हि तस्य वै ॥ स्वसत्तायां महत्यां च स्वसत्ता ये भवंति च ॥ ९० ॥ अप्रमत्ताश्च ये नित्यं शिवध्यानपरायणाः ॥ ते प्रियाः शंक
रस्यैव हित्वा कर्मफलानि वै ॥ केवलं ज्ञानमाश्रित्य ते यांति परमं पदम् ॥ ९१ ॥ एतच्छ्रुत्वा वचनं तस्य चेंद्रो बृहस्पतेर्वाक्यमिदं बभाषे ॥
प्रायो यमो वक्ष्यति सर्वमेतत्समृद्धये ह्यात्मनश्चैव शक्रः ॥ ९२ ॥ तथेति मत्वा गुरुणा सहैव राजा सुराणां सहसा जगाम ॥ स्वकार्यकामो
हि तथा पुरंदरो ययौ पुरीं संयमिनीं तदानीम् ॥ ९३ ॥ यमेन पूज्यमानो हि शक्रो वाक्यमुवाच ह ॥ त्वया दत्तं मम पदं कितवाय
दुरात्मने ॥ ९४ ॥ अनेनैतत्कृतं कर्म्म जुगुप्सितं महत्तरम् ॥ मदीयानि च रत्नानि यानि सर्वाण्यनेन वै ॥ एभ्य एभ्यः
प्रदत्तानि धर्म्म जानीहि तत्त्वतः ॥ ९५ ॥ त्वं धर्मनामासि कथं कितवाय प्रदत्तवान् ॥ मम राज्यविनाशाय कृतमस्ति त्वयाऽ
धुना ॥ ९६ ॥ आनयस्व महाभाग गजादीनि च सत्वरम् ॥ अन्यानि चैव रत्नानि दत्तानि च यतस्ततः ॥ ९७ ॥ निशम्य
वाक्यं शक्रस्य यमो वचनमब्रवीत् ॥ कितवं च रुषाविष्टः किं त्वया पापिना कृतम् ॥ ९८ ॥ भोगार्थं चैव यद्दत्तं शक्रराज्यं त्वयाऽधुना ॥ प्रदत्तं च
द्विजातिभ्यो ह्यन्यथा वै कृतं महत् ॥ ९९ ॥ अकार्यं वै त्वया मूढ परद्रव्यापहारणम् ॥ तेन पापेन महता निरयं प्रतिगच्छसि ॥ १०० ॥ यमस्य
वचनं श्रुत्वा कितवो वाक्यमब्रवीत् ॥ अहं निरयगामी च नात्र कार्या विचारणा ॥ १०१ ॥ यावत्स्वता मम विभो जाता शक्रासने तथा ॥ ताव
द्दत्तं हि यत्किंचिद्द्विजेभ्यो हि यथातथम् ॥ १०२ ॥ ॥ यम उवाच ॥ ॥ दानं प्रशस्तं भूम्यां च दृश्यते कर्म्मणः फलम् ॥ स्वर्गे दानं न दातव्यं
केनचित्कस्यचित्कचित् ॥ तस्माद्दंड्योऽसि रे मूढ अशास्त्रीयं कृतं त्वया ॥ १०३ ॥ गुरुरात्मवतां शास्ता राजा शास्ता दुरात्मनाम् ॥ सर्वेषां
पापशीलानां शास्ताऽहं नात्र संशयः ॥ १०४ ॥ एवं निर्भर्त्सयित्वा तं कितवं धर्मराट्स्वयम् ॥ उवाच चित्रगुप्तं च नरके पच्यतामयम् ॥ तदा
प्रहस्य चोवाच चित्रगुप्तो यमं प्रति ॥ १०५ ॥ कथं निरयगामित्वं कितवस्य भविष्यति ॥ येन दत्तो ह्यगस्त्याय गज ऐरावतो महान् ॥ १०६ ॥
तथाश्वो ह्यब्धिसंभूतो गालवाय महात्मने ॥ विश्वामित्राय भद्रं ते चिंतामणिर्महाप्रभः ॥ १०७ ॥ एवमादीनि रत्नानि दत्तानि कितवेन हि ॥
तेन कर्मविपाकेन पूजनीयो जगत्त्रये ॥ १०८ ॥ शिवमुद्दिश्य यद्दत्तं स्वर्गे मर्त्ये च यैर्नरैः ॥ तत्सर्वं त्वक्षयं विद्यान्निश्छिद्रं कर्म चोच्यते ॥ तस्मा
न्नरकगामित्वं कितवस्य न विद्यते ॥ १०९ ॥ यानियानि च पापानि कितवस्य महात्मनः ॥ भस्मीभूतानि सर्वाणि जातानि स्मरणाच्च

CC-0. In Public Domain. Digitization by eGangotri

वै ॥ ११० ॥ शंभोः प्रसादात्सर्वाणि सुकृतानि च तत्क्षणात् ॥ तद्वचश्चित्रगुप्तस्य निशम्य प्रेतराट् स्वयम् ॥ १११ ॥ प्रहस्यावाङ्मुखो भूत्वा इद
माह शतक्रतुम् ॥ त्वं हि राजा सुरेंद्राणां स्थविरो राज्यलंपटः ॥ ११२ ॥ अश्वमेधशतेनैव एकं जन्मार्जितं कृतम् ॥ त्वया नास्त्यत्र संदेहो
ह्यर्जितं तेन वै महत् ॥ ११३ ॥ प्रार्थयित्वा ह्यगस्त्यादीन्मुनीन्सर्वान्विशेषतः ॥ अर्थेन प्रणिपातेन त्वया लभ्यानि तानि च ॥ गजादिकानि
रत्नानि येन त्वं च सुखी त्वरन् ॥ ११४ ॥ तथेति मत्वा वचनं पुरंदरो गतः पुरीं स्वामविवेकदृष्टिः ॥ अभ्यर्थयामास विनम्रकंधरश्चर्षींस्ततो लब्ध
वान्पारिजातम् ॥ ११५ ॥ अनेनैव प्रकारेण लब्धराज्यः पुरंदरः ॥ जातस्तदामरावत्यां राजा सह महात्मभिः ॥ ११६ ॥ कितवस्य पुनर्जन्म दत्तं
वैवस्वतेन हि ॥ किंचित्कर्मविपाकेन विरोचनसुतोऽभवत् ॥ ११७ ॥ सुरुचिर्जननी तस्य कितवस्याभवत्तदा ॥ विरोचनस्य महिषी दुहिता
वृषपर्वणः ॥ तस्थौ जठरमास्थाय तस्याः सोऽपि महात्मनः ॥ ११८ ॥ तदाप्रभृति तस्यैव प्रह्लादस्यात्मजात्स वै ॥ सुरुचेश्च तथाप्यासीद्धर्मे
दाने महामतिः ॥ ११९ ॥ तेनैव जठरस्थेन कृता मतिरनुत्तमा ॥ कितवेन कृता विप्रा दुर्लभा या मनीषिणाम् ॥ १२० ॥ एकदा वै तदा शक्रो
ययौ वैरोचनं प्रति ॥ हंतुकामो हि दैत्येंद्रं विप्रो भूत्वाऽथ याचकः ॥ १२१ ॥ विरोचनगृहं प्राप्त इंद्रो वाक्यमुवाच ह ॥ स्थविरो ब्राह्मणो भूत्वा
देहीति मम सुव्रत ॥ मनस्वी त्वं च दैत्येंद्र दाता च भुवनत्रये ॥ १२२ ॥ तव विप्रा महाभाग चरितं परमाद्भुतम् ॥ वर्णयन्ति सभा
जेषु स्थित्वा कीर्तिं च निर्मलाम् ॥ याचकोऽहं च दैत्येंद्र दातुमर्हसि सुव्रत ॥ १२३ ॥ तस्य तद्वचनं श्रुत्वा दैत्येंद्रो वाक्यमब्रवीत् ॥ किं दातव्यं
तव विभो वद शीघ्रं ममाधुना ॥ १२४ ॥ इंद्रो हि विप्ररूपेण विरोचनमुवाच ह ॥ याचयामि च दैत्येंद्र यदहं परिभावितः ॥ १२५ ॥ आत्म
प्रीत्या च दातव्यं मम[1] नास्त्यत्र संशयः ॥ उवाच प्रहसन्वाक्यं प्रह्लादस्यात्मजोऽसुरः ॥ १२६ ॥ ददाम्यात्मशिरो विप्र यदि कामयसेऽधुना ॥
इदं राज्यमनायासमियं श्रीर्नान्यगामिनी ॥ अहं समर्पयिष्यामि तव नास्त्यत्र संशयः ॥ १२७ ॥ इत्युक्तस्तेन दैत्येन विमृश्य च तदा हरिः ॥
उवाच देहि मे स्वीयं शिरो मुकुटसेवितम् ॥ १२८ ॥ एवमुक्ते तु वचने शक्रेण द्विजरूपिणा ॥ त्वरन्महेंद्राय तदा शिर उत्कृत्य वै मुदा ॥
स्वकरेण ददौ तस्मै प्रह्लादस्यात्मजोऽसुरः ॥ १२९ ॥ प्रह्लादेन पुरा यस्तु कृतो धर्म्मः सुदुष्करः ॥ केवलं भक्तिमाश्रित्य विष्णोस्त
त्परचेतसा ॥ १३० ॥ दानात्परतरं चान्यत्कचिद्वस्तु न विद्यते ॥ तद्दानं च महापुण्यमार्तेभ्यो यत्प्रदीयते ॥ १३१ ॥ स्वशक्त्या यच्च किंचिच्च

१ आत्मप्रीत्या च दातव्यम्--यत्तव मनसोऽत्यन्तमभीष्टं स्यात्तन्मह्यं दातव्यम्--इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तदानंत्याय कल्पते ॥ दानात्परतरं नान्यत्त्रिषु लोकेषु विद्यते ॥ १३२ ॥ सात्त्विकं राजसं चैव तामसं च प्रकीर्तितम् ॥ तथा कृतमनेनैव दानं सात्त्विकलक्षणम् ॥ १३३ ॥ शिर उत्कृत्य चेंद्राय प्रदत्तं विप्ररूपिणे ॥ किरीटः पतितस्तत्र मणयो हि महाप्रभाः ॥ १३४ ॥ ऐकपद्येन पतितास्ते जाता मंडलाय वै ॥ दैत्यानां च नरेंद्राणां पन्नगानां तथैव च ॥ १३५ ॥ विरोचनस्य तद्दानं त्रिषु लोकेषु विश्रुतम् ॥ गायंत्यद्यापि कवयो दैत्येंद्रस्य महात्मनः ॥ १३६ ॥ विरोचनस्य पुत्रोऽभूत्कितवोऽसौ महाप्रभः ॥ मृते पितरि जातोऽसौ माता तस्य पतिव्रता ॥ १३७ ॥ कलेवरं च तत्याज पतिलोकं गता ततः ॥ भार्गवेणाभिषिक्तोऽसौ जनकस्य निजासने ॥ १३८ ॥ नाम्ना बलिरिति ख्यातो बभूव च महायशाः ॥ तेन सर्वे सुरगणास्त्रासिताः सुमहाबलाः ॥ १३९ ॥ गतास्ते कथिताः पूर्वं कश्यपस्याश्रमं शुभम् ॥ तदा बलिरभूदिन्द्रो देवपुर्यां महायशाः ॥ १४० ॥ स्वयं तताप तपसा सूर्यो भूत्वा तदाऽसुरः ॥ ईशो भूत्वा स्वयं चास्ते ऐशान्यां दिशि पालयन् ॥ १४१ ॥ तथा च नैर्ऋतो भूत्वा तथा त्वंबुपतिः स्वयम् ॥ धनाध्यक्ष उदीच्यां वै स्वयमास्ते बलिस्तदा ॥ एवमास्ते बलिः साक्षात्स्वयमेव त्रिलोकभुक् ॥ १४२ ॥ शिवार्चनरतेनैव कितवेन[1] बलिर्द्विजाः ॥ पूर्वाभ्यासेन तेनैव महादानरतोऽभवत् ॥ १४३ ॥ एकदा तु सभामध्ये आस्थितो भृगुणा सह ॥ दैत्येंद्रैः संवृतः श्रीमाञ्छंडामर्कौ वचोऽब्रवीत् ॥ ॥ १४४ ॥ आवासः क्रियतामत्र असुरैर्म्मम सन्निधौ ॥ हित्वा पातालमद्यैव मा विलंबितुमर्हथ ॥ १४५ ॥ भार्गवस्तदुपश्रुत्य प्रहस्येदमुवाच ह ॥ यज्ञैश्च विविधैश्चैव स्वर्गलोके महीयते ॥१४६॥ याज्ञिकैश्च महाराज नान्यथा स्वर्गमेव हि ॥ भोक्तुं हि पार्यते राजन्नान्यथा मम भाषितम् ॥१४७॥ गुरोर्वचनमाज्ञाय दैत्येंद्रो वाक्यमब्रवीत् ॥ मया कृतं च यत्कर्म तेन सर्वे महासुराः ॥ स्वर्गे वसंतु सुचिरं नात्र कार्या विचारणा ॥ १४८ ॥ प्रहस्योवाच भगवान्भार्गवाणां महातपाः ॥ बलिनं बालिशं मत्वा शुक्रो बुद्धिमतां वरः ॥ १४९ ॥ यत्त्वयोक्तं च वचनं बले मम न रोचते ॥ इहैव त्वं समागत्य वस्तुं चेच्छसि सुव्रत ॥ १५० ॥ अश्वमेधशतेनैव यज त्वं जातवेदसम् ॥ कर्म्मभूमिं गतो भूत्वा मा विलंबितुमर्हसि ॥१५१॥ तथेति मत्वा स बलिर्महात्मा हित्वा तदानीं त्रिदिवं मनस्वी ॥ दैत्यैः समेतो गुरुणा च संगतो ययौ भुवं सोनुचरैः समेतः ॥ १५२ ॥ तन्नर्मदाया गुरुकुल्यसंज्ञकं तीरे महातीर्थमुदारशोभम् ॥ गत्वा तदा दैत्यपतिर्महात्मा जित्वा समग्रं वसुधातलं च ॥१५३॥ ततोऽश्वमेधैर्बहुभिर्विचक्षणो गुरुप्रयुक्तः स महायशा बलिः ॥ ईजे च दीक्षां परमामुपेतो वैरोचनिं सत्यवतां वरिष्ठः ॥ १५४ ॥ कृत्वा ब्राह्मणमाचार्यमृत्विजः षोडशाऽभवन् ॥ सुपरीक्षितेन तेनैव भार्गवेण

१ कृतेन—इत्यध्याहारः । हे द्विजाः शिवार्चनरतेन कितवेन कृतेन तेनैव पूर्वाभ्यासेन बलिः महादानरतोऽभवत्—इति समुदितवाक्यान्वयः ।

CC-0. In Public Domain. Digitization by eGangotri

महात्मना ॥१५५॥ यज्ञानामूनमेकेन शतं दीक्षापरेण हि ॥ बलिना चाश्वमेधानां पूर्णं कर्तुं समादधे ॥ १५६ ॥ यावद्यज्ञशतं पूर्णं तस्य राज्ञो भवि
ष्यति ॥ पुरा प्रोक्तं मया चात्र ह्यदित्या व्रतमुत्तमम् ॥ १५७ ॥ व्रतेन तेन संतुष्टो भगवान्हरिरीश्वरः ॥ बटुरूपेण महता पुत्रभूतो बभूव ह॥ १५८ ॥
अदित्याः कश्यपेनैव उपनीतस्तदा प्रभुः ॥ उपनीतेऽथ संप्राप्तो ब्रह्मा लोकपितामहः ॥ १५९ ॥ दत्तं यज्ञोपवीतं च ब्रह्मणा परमेष्ठिना ॥ दंडकाष्ठं
प्रदत्तं हि सोमेन च महात्मना ॥ १६० ॥ मेखला च समानीता अजिनं च महाद्भुतम् ॥ तथा च पादुके चैव मह्या दत्ते महात्मनः ॥ १६१ ॥
तत्र भिक्षा समानीता भवान्या चार्थसिद्धये ॥ एवं भगवते दत्तं विष्णवे बटुरूपिणे ॥ १६२ ॥ अभिवंद्य तथा श्रीशो वामनो ह्यदितिं तथा ॥ कश्यपं
च महातेजा यज्ञवाटं जगाम च ॥ याज्ञिकस्य बलेराह च्छलनार्थं स्वयं प्रभुः ॥१६३॥ तदा महेशः स जगाम स्वर्गं प्रकंपयन्गां प्रपदा भरेण ॥
स वामनो बटुरूपी च साक्षाद्विष्णुः परात्मा सुरकार्यहेतोः ॥ १६४॥ गीर्भिर्यथार्थाभिरभिष्टुतो जनैर्मुनीश्वरैर्देवगणैर्महात्मा ॥ त्वरेण गच्छन्स च
यज्ञवाटं प्राप्तस्तदानीं जगदेकबंधुः ॥ १६५ ॥ उद्गापयन्साम यतो हि साक्षाच्चकार देवो बटुरूपवेषः॥ उद्गीयमानो भगवान्स ईश्वरो वेदांत
वेद्यो हरिरीश्वरः प्रभुः ॥ १६६ ॥ ददर्श तं महायज्ञमश्वमेधं बलेस्तदा ॥ द्वारि स्थितो महातेजा वामनो बटुरूपधृक् ॥ १६७ ॥ ब्रह्मरूपेण
महता व्याप्तमासीद्दिगंतरम् ॥ पवमानस्य च बटोर्वामनस्य महात्मनः ॥ १६८॥ तच्छ्रुत्वा च बलिः प्राह शंडामर्कौ च बुद्धिमान् ॥ ब्राह्मणाः
कतिसंख्याश्च आगताः संति ईक्ष्यताम् ॥ १६९ ॥ तथेति मत्वा त्वरितावुत्थितौ तौ तदा द्विजाः ॥ शंडामर्कौ समागम्य मंडपद्वारि संस्थितौ
॥ १७० ॥ ददृशाते महात्मानं श्रीहरिं बटुरूपिणम्॥ त्वरितौ पुनरायातौ बलेः शंसयितुं तदा ॥ १७१ ॥ ब्रह्मचारी समायात एक एव न
चापरः ॥ पठनादौ महाराज चागतस्तव सन्निधौ ॥ किमर्थं तन्न जानीमो जानीहि त्वं महामते ॥ १७२ ॥ एवमुक्ते तु वचने ताभ्यां स च
महामनाः ॥ उत्थितस्तत्क्षणादेव दर्शनार्थे बटुं प्रति ॥ १७३ ॥ स ददर्श महातेजा विरोचनसुतो महान् ॥ दंडवत्पतितो भूमौ ननाम शिरसा
बटुम् ॥ १७४ ॥ आनयित्वा बटुं सद्यः संनिवेश्य निजासने ॥ अर्घ्यपाद्येन महताभ्यर्चयामास तं बटुम्॥ १७५॥ विनम्रकंधरो भूत्वा
उवाच श्लक्ष्णया गिरा ॥ कुतः कस्माच्च कस्यासि तच्छीघ्रं कथ्यतां प्रभो ॥ १७६ ॥ तच्छ्रुत्वा वचनं तस्य विरोचनसुतस्य वै ॥ मनसा
हर्षितश्चासौ वामनो वक्तुमारभत् ॥ १७७॥ ॥ भगवानुवाच ॥ ॥ त्वं हि राजा त्रिलोकेशो नान्यो भवितुमर्हसि ॥ स्वकुलं न्यूनतां गच्छे
द्यो वै कापुरुषः स्मृतः ॥ १७८ ॥ समं वा चाधिको वापि यो गच्छेत्पुरुषः स्मृतः ॥ त्वया कृतं च यत्कर्म्म न कृतं पूर्वजैस्तव ॥ १७९ ॥ दैत्यानां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

च वरिष्ठा ये हिरण्यकशिपादयः ॥ कृतं महत्तपो येन दिव्यं वर्षसहस्रकम् ॥ १८० ॥ शरीरं भक्षितं यस्य जुषाणस्य तपो महत् ॥ पिपीलिकाभिर्बहुभिर्दंशैश्चैव समावृतम् ॥१८१॥ अभवत्तस्य तज्ज्ञात्वा सुरेंद्रो ह्यगमत्पुरा ॥ नगरं तस्य च तदा सैन्येन महता वृतः ॥१८२॥ तत्सन्निधौ हताः सर्वे असुरा दैत्यशत्रुणा ॥ विंध्या तु महिषी तस्य नीयमाना निवारिता ॥ १८३ ॥ नारदेन पुरा राजन्किंचित्कार्यं चिकीर्षुणा ॥ शंभोः प्रसादादखिलं मनसा यत्समीक्षितम् ॥ दैत्येंद्रेण च तत्सर्वं तपसैव वशीकृतम् ॥ १८४ ॥ तस्याः पुत्रो महातेजा येन नीतोऽभवत्सभाम् ॥ तस्य पुत्रो महाभाग पिता ते पितृवत्सलः ॥ नाम्ना विरोचनो विद्वानिंद्रो येन महात्मना ॥ १८५ ॥ दानेन तोषितो राजन्स्वेनैव शिरसा तदा ॥ तस्यात्मजोसि भो राजन्कृतं ते परमं यशः ॥ १८६ ॥ यशोदीपेन महता दग्धाः शलभवत्सुराः ॥ इंद्रोपि निर्जितो येन त्वया नास्त्यत्र संशयः ॥ १८७ ॥ श्रुतमस्ति मया सर्वं चरितं तव सुव्रत ॥ अल्पकोऽहमिहायातो ब्रह्मचर्यव्रते स्थितः ॥ १८८ ॥ उटजार्थे च मे देहि भूमिं भूमिभृतांवर ॥ बटोस्तस्यैव तद्वाक्यं श्रुत्वा बलिरभाषत ॥ १८९ ॥ हे बटो पंडितो भूत्वा यदुक्तं वचनं पुरा ॥ शिशुत्वात्तन्न जानासि श्रुत्वा मन्ये यथार्थतः ॥ १९० ॥ वद शीघ्रं महाभाग कियन्मात्रां महीं तव ॥ दास्यामि त्वरितेनैव मनसा तद्विमृश्यताम् ॥१९१॥ तदाह वामनो वाक्यं स्मयन्मधुरया गिरा ॥ असंतोषपरा ये च विप्रा नष्टा न संशयः ॥ १९२ ॥ संतुष्टा ये हि विप्रास्ते नान्ये वेषधरा ह्यमी ॥ स्वधर्मनिरता राजन्निर्दंभा निरवग्रहाः ॥ १९३ ॥ निर्मत्सरा जितक्रोधा वदान्या हि महामते ॥ विप्रास्ते हि महाभाग तैरियं धार्यते मही ॥ १९४ ॥ मनस्वी त्वं बहुत्वाच्च दातासि भुवनत्रये ॥ तथापि मे प्रदातव्या मही त्रिपदसंमिता ॥ १९५ ॥ बहुत्वे नास्ति मे कार्यं मह्या वै सुरसूदन ॥ प्रवेशमात्रमुटजं तथा मम भविष्यति ॥ १९६ ॥ त्रिपदं पूर्यतेऽस्माकं वस्तुं नास्त्यत्र संशयः ॥ देहि मे क्रमतो राजन्यावद्भूमिभविष्यति ॥ तावत्संख्या प्रदातव्या यदि दातासि भो बले ॥ १९७ ॥ प्रहस्य तमुवाचेदं बलिर्वैरोचनात्मजः ॥ दास्यामि ते महीं कृत्स्नां सशैलवनकाननाम् ॥ १९८ ॥ मदीयां वै महाभाग मया दत्तां गृहाण वै ॥ याचकोऽसि बटो पश्य दानं दैत्यात्प्रयाचसे ॥ १९९ ॥ याचको ह्यल्पको वास्तु दाता सर्वं विमृश्य वै ॥ तथा विलोक्य चात्मानं ह्यर्थिभ्यश्च ददाति वै ॥ २०० ॥ आत्मौपम्येन सर्वत्र यो ददाति ह्युदारधीः ॥ तस्मान्न याचितव्यं हि अर्थिना मंदभागिना ॥ २०१ ॥ बटो ददाम्यहं तेऽद्य सशैलवनकाननाम् ॥ पृथ्वीं सपर्वतां साब्धिं नान्यथा मम भाषितम् ॥२०२॥ पुनः प्रोवाच स बटुर्विरोचनसुतं प्रति ॥ पूर्यते मम दैत्येंद्र क्रमतो हि पदैस्त्रिभिः ॥२०३॥

१ अदन्तोऽप्ययं स्यादत्रतु च्छन्दोऽनुरोधेन। २ यः उदारधीः पुरुषः--सः--सर्वत्र--आत्मौपम्येन ददाति--इति योजना बोद्धव्या।

CC-0. In Public Domain. Digitization by eGangotri

बटोस्तद्वचनं श्रुत्वा असुरेन्द्रो बलिस्तदा ॥ उवाच प्रहसन्वाक्यं मन्यमानो बलिर्भृशम् ॥ गृह्यतां च मया दत्तां पदैस्त्रिभिरलंकृताम् ॥ २०४ ॥ इत्युक्तो वामनः प्राह प्रहसन्नसुरं प्रति ॥ संकल्प्य सकलां पृथ्वीं दातुमर्हसि सुव्रत ॥ २०५ ॥ तथेति मत्वा बलिना सुपूजितः स वामनः कश्यपनंदनो महान् ॥ बलिस्तदानीं सहसा नितातं संस्तूयमानस्त्वृषिभिर्मुनींद्रैः ॥ २०६ ॥ तं पूजयित्वा स बलिर्यावद्दातुं समुद्यतः ॥ गुरुणा वारितस्तावद्विरोचनसुतो महान् ॥ २०७ ॥ न दातव्यं त्वया दानं विष्णवे बटुरूपिणे ॥ इंद्रार्थमागतः सद्यो यज्ञविघ्नं करोति ते ॥ तस्मात्त्वया न पूज्यो हि विष्णुरध्यात्मदीपकः ॥ २०८ ॥ पुरा कृतमनेनैव मोहिनीरूपधारिणा ॥ देवेभ्यश्चामृतं दत्तं राहुर्येन हतो महान् ॥ २०९ ॥ येन विद्राविता दैत्याः कालनेमिर्हतो बली ॥ २१० ॥ एवंविधोऽयं पुरुषो महात्मा स ईश्वरो विश्वपतिः स एव ॥ विमृश्य सर्वं मनसा महामते हिताहितं कर्तुमिहार्हसि त्वम् ॥ २११ ॥ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां प्रथमे माहेश्वरखण्डे केदारखण्डे बलियज्ञे वामनगमनवर्णनं नामाष्टादशोऽध्यायः ॥ १८ ॥ ॥ छ ॥ ॥ लोमश उवाच ॥ ॥ एवं संबोधितो दैत्यो गुरुणा भार्गवेण हि ॥ उवाच प्रहसन्वाक्यं मेघगंभीरया गिरा ॥ १ ॥ त्वयोक्तोहं हितार्थाय यैर्वाक्यैश्चालितोऽस्म्यहम् ॥ तव वाक्यं मम प्रीत्यै हितमप्यहितं भवेत् ॥ २ ॥ दास्यामि भिक्षितं चास्मै विष्णवे बटुरूपिणे ॥ पात्रीभूतो ह्ययं विष्णुः सर्वकर्मफलेश्वरः ॥ ३ ॥ येषां हृदि स्थितो विष्णुस्ते वै पात्रतमा ध्रुवम् ॥ यस्य नाम्ना सर्वमिदं पवित्रमिव चोच्यते ॥ ४ ॥ येन वेदाश्च यज्ञाश्च मंत्रतंत्रादयो ह्यमी ॥ सर्वे संपूर्णतां यांति सोऽयं विश्वेश्वरो हरिः ॥ ५ ॥ आगतः कृपया मेद्य सर्वात्मा हरिरीश्वरः ॥ उद्धर्तुं मां न संदेह एतज्जानीहि तत्त्वतः ॥ ६ ॥ तस्य तद्वचनं श्रुत्वा चुकोप च रुषान्वितः ॥ भार्गवः शप्तुमारेभे दैत्येंद्रं धर्म्मवत्सलम् ॥ ७ ॥ मम वाक्यमतिक्रम्य दातुमिच्छस्यरिंदम ॥ विगुणो भव रे मंद तस्मात्त्वं निःश्रिको भव ॥ ८ ॥ एवं शशाप च तदा परमार्थविज्ञं शिष्यं महात्मानमगाधबोधम् ॥ स वै जगामाथ महाकविस्त्वरात्स्वमाश्रमं धर्म्मविदां वरिष्ठः ॥ ९ ॥ गते तु भार्गवे तस्मिन्बलिर्विरोचनात्मजः ॥ वामनं चार्चयित्वा स महीं दातुं प्रचक्रमे ॥ १० ॥ विंध्यावलिः समागत्य बलेरर्द्धांगशोभिता ॥ अवनिज्य बटोः पादौ प्रददौ विष्णवे महीम् ॥ ११ ॥ संकल्पपूर्वेण तदा विधिना विधिकोविदः ॥ संकल्पेनैव महता ववृधे भगवानजः ॥ १२ ॥ यदैकेन मही व्याप्ता विष्णुना प्रभविष्णुना ॥ सर्वे स्वर्गा[1] द्वितीयेन व्याप्तास्तेन महात्मना ॥ १३ ॥ सत्यलोकगतो विष्णोश्चरणः परमेष्ठिना ॥ कमण्डलुगतेनैव

१ सर्वे स्वर्गाः--एकविंशतिः स्वर्गाः--इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अंभसा चावनेनिजे ॥ १४ ॥ तत्पादसंपर्कजलाच्च जाता भागीरथी सर्वसुमंगला च ॥ यया त्रिलोकी च कृता पवित्रा यया च सर्वे सगराः समुद्धृताः ॥ यया कपर्दः परिपूरितो वै शंभोस्तदानीं च भगीरथेन ॥ १५ ॥ तीर्थानां तीर्थमाद्यं च गंगाख्यमवतारितम् ॥ तद्विष्णोश्चरणेनैव समेतं ब्रह्मणा कृतम् ॥ १६ ॥ त्रिविक्रमात्परो ह्यात्मा नाम्ना त्रिविक्रमोऽभवत् ॥ त्रिविक्रमक्रमाक्रांतं त्रैलोक्यं च तदाऽभवत् ॥ १७ ॥ पदद्वयेन वा पूर्णं जगदेतच्चराचरम् ॥ विहाय तत्स्वरूपं च देवदेवो जनार्दनः ॥ पुनश्च बटुरूपोऽसावुपविश्य निजासने ॥ १८ ॥ तदा देवाः सगंधर्वा मुनयः सिद्धचारणाः ॥ आगताश्च बलेर्यज्ञं द्रष्टुं यज्ञपतिं प्रभुम् ॥ १९ ॥ तत्र ब्रह्मा समागत्य स्तुतिं चक्रे परात्मनः ॥ बलेस्तत्रैव चान्ये च दैत्येंद्राश्चागतास्त्वरम् ॥ २० ॥ एभिः सर्वैः परिवृतो वामनो बलिसद्मनि ॥ उपविश्यासने सोऽथ उवाच गरुडं प्रति ॥ २१ ॥ दैत्योऽसौ बालिशो भूत्वा दत्तानेन मही मम ॥ त्रिपदक्रमणेनैव गृहीतं च पदद्वयम् ॥ २२ ॥ पदमेकं प्रतिश्रुत्य न ददाति हि दुर्मतिः ॥ तस्मात्त्वया गृहीतव्यं तृतीयं पदमेव च ॥ ॥ २३ ॥ इत्युक्तो गरुडस्तेन वामनेन महात्मना ॥ वैरोचनिं विनिर्भर्त्स्यं वाक्यं चेदमुवाच ह ॥ २४ ॥ रे बले किं त्वया मूढ कृतमस्ति जुगुप्सितम् ॥ अविद्यमाने ह्यर्थे हि किं ददासि परमात्मने ॥ औदार्येण हि किं कार्यमल्पकेन त्वयाधुना ॥ २५ ॥ इत्युक्तो बलिराविष्टः स्मयमानः खगेश्वरम् ॥ वक्ष्यमाणमिदं वाक्यं गरुत्मन्तं तदाऽब्रवीत् ॥ २६ ॥ समर्थोऽस्मि महापक्ष कृपणो न भवाम्यहम् ॥ येनेदं कारितं सर्वं तस्मै किं प्रददाम्यहम् ॥ २७ ॥ असमर्थो ह्यहं तात कृतोऽनेन महात्मना ॥ तदोवाच बलिं सोऽपि तार्क्ष्यपुत्रो महामनाः ॥ २८ ॥ जानन्नपि च दैत्येंद्र गुरुणापि निवारितः ॥ विष्णवेऽपि महीं प्रादास्त्वया किं विस्मृतं महत् ॥ २९ ॥ दातव्यं तत्पदं विष्णोस्तृतीयं यत्प्रतिश्रुतम् ॥ न ददासि कथं वीर निरये च पतिष्यसि ॥ ३० ॥ न ददासि तृतीयं च पदं मे स्वामिनः कथम् ॥ बलाद्गृह्णामि रे मूढ इत्युक्त्वा तं महासुरम् ॥ बबंध वारुणैः पाशैर्विरोचनसुतं तदा ॥ ३१ ॥ नितरां निष्ठुरो भूत्वा गरुडो जयतां वरः ॥ बद्धं स्वपतिमालोक्य विंध्यावलिः समभ्ययात् ॥ ३२ ॥ बाणमेकं समारोप्य वामनस्याग्रतः स्थिता ॥ वामनेन तदा पृष्टा केयं चात्राग्रतः स्थिता ॥ ३३ ॥ तदोवाच महातेजाः प्रह्लादो ह्यसुराधिपः ॥ बलेः पत्नीति त्वां प्राप्ता इयं विंध्यावली सती ॥ ३४ ॥ प्रह्लादस्य वचः श्रुत्वा वामनो वाक्यमब्रवीत् ॥ ब्रूहि विंध्यावले वाक्यं-किं कार्यं ते करोम्यहम् ॥ एवमुक्ता भगवता विंध्यावलिरभाषत ॥ ३५ ॥ ॥ विन्ध्यावलिरुवाच ॥ ॥ कस्माद्बद्धो मम पतिर्गरुडेन महात्मना ॥ तत्कथ्यतां महाभाग त्वरन्नेव जनार्दन ॥ तदोवाच महातेजा बटुवेषधरो हरिः ॥ ३६ ॥ ॥ श्रीभगवानुवाच ॥ ॥ अनेनैव प्रदत्ता मे मही त्रिपदलक्षणा ॥ पदद्वयेन च मयाक्रांतं

CC-0. In Public Domain. Digitization by eGangotri

त्रैलोक्यमद्य वै ॥ ३७ ॥ अनेन मम दातव्यं तृतीयं पदमेव च ॥ तस्माद्बद्धो मया साध्वि गरुडेनैव ते पतिः ॥ ३८ ॥ श्रुत्वा भगवतो वाक्यमु
वाच परमं वचः ॥ प्रतिश्रुतमनेनैव न दत्तं हि तव प्रभो ॥ ३९ ॥ क्रांतं त्रिभुवनं चाद्य त्वया विक्रमरूपिणा ॥ तदस्माकं विजघ्नीथाः स्वर्गे वाप्य
थवा भुवि ॥ ४० ॥ किंचिन्न दत्ता हि विभो देवदेव जगत्पते ॥ प्रहस्य भगवानाह तदा विंध्यावलिं प्रभुः ॥ ४१ ॥ पदानि त्रीणि मे चाद्य दात
व्यानि कुतोऽधुना ॥ शीघ्रं वद विशालाक्षि यत्ते मनसि वर्त्तते ॥ तदोवाच च सा साध्वी ह्युरुक्रममवस्थिता ॥ ४२ ॥ त्वया कुतो वेयमुरुक्रमेण
क्रांता त्रिलोकी भुवनैकनाथ ॥ तथैव सर्वं जगदेकबंधो देयं किमस्माभिरतुल्यरूपिणे ॥ ४३ ॥ तस्माद्विहाय तद्विष्णो त्वमेवं कुरु संप्रति ॥ प्रति
श्रुतानि मे भर्त्रा पदानि त्रीणि चाधुना ॥ ददाति मे पतिस्तेद्य नात्र कार्या विचारणा ॥४४॥ निधेहि मे पदं त्वं हि शीर्ष्णि देववर प्रभो ॥ द्वितीयं
मे शिशोस्त्वं हि कुरु मूर्ध्नि जगत्पते ॥ ४५ ॥ तृतीयं च जगन्नाथ कुरु शीर्ष्णि पतेर्मम ॥ एवं त्रीणि पदानीश तव दास्यामि केशव ॥ ४६ ॥
तस्यास्तद्वचनं श्रुत्वा परितुष्टो जनार्दनः ॥ उवाच श्लक्ष्णया वाचा विरोचनसुतं प्रति ॥ ४७ ॥ ॥ भगवानुवाच ॥ ॥ सुतलं गच्छ दैत्येन्द्र मा विलं
बितुमर्हसि ॥ सर्वैश्चासुरसंघैश्च चिरं जीव सुखी भव ॥४८॥ परितुष्टोऽस्म्यहं तात किं कार्यं करवाणि ते ॥ सर्वेषामपि दातॄणां वरिष्ठोऽसि महामते
॥ ४९ ॥ वरं वरय भद्रं ते सर्वान्कामान्ददामि ते ॥ त्रिविक्रमेणैवमुक्तो विरोचनसुतस्तदा ॥ ५० ॥ विमुक्तो हि परिष्वक्तो देवदेवेन चक्रिणा ॥ तदा
बलिरुवाचेदं वाक्यं वाक्यविशारदः ॥ ५१ ॥ त्वया कृतमिदं सर्वं जगदेतच्चराचरम् ॥ तस्मान्न कामये किंचित्त्वत्पदाब्जं विना प्रभो ॥ ५२ ॥ भक्ति
रस्तु पदांभोजे तव देव जनार्दन ॥ भूयोभूयश्च देवेश भक्तिर्भवतु शाश्वती ॥५३॥ एवमभ्यर्थितस्तेन भगवान्भूतभावनः ॥ उवाच परमप्रीतो विरो
चनसुतं तदा ॥ ५४ ॥ ॥ भगवानुवाच ॥ ॥ बले त्वं सुतलं याहि ज्ञातिसंबंधिभिर्वृतः ॥ एवमुक्तस्तदा तेन असुरो वाक्यमब्रवीत् ॥ ५५ ॥
सुतले किं नु मे कार्यं देवदेव वदस्व मे ॥ तिष्ठामि तव सांनिध्ये नान्यथा वक्तुमर्हसि ॥ ५६ ॥ तदोवाच हृषीकेशो बलिं तं कृपयाऽन्वितः ॥
अहं तव समीपस्थो भवामि सततं नृप ॥ ५७ ॥ द्वारि स्थितस्तव विभो निवसामि नित्यं मा खिद्यतामसुरवर्य बले शृणुष्व ॥ वाक्यं तु मे वर
महो वरदस्तवाद्य वैकुंठवासिभिरलं च भजामि गेहम् ॥ ५८ ॥ तच्छ्रुत्वा वचनं तस्य विष्णोरतुलतेजसः ॥ जगाम सुतलं दैत्यो ह्यसुरैः परिवा
रितः ॥ ५९ ॥ तदा पुत्रशतेनैव बाणमुख्येन सत्वरम् ॥ वसमानो महाबाहुर्दातॄणां च परा गतिः ॥ ६० ॥ त्रैलोक्ये याचका ये च सर्वे यांति बलिं
प्रति ॥ द्वारि स्थितस्तस्य विष्णुः प्रयच्छति यथेप्सितम् ॥ ६१ ॥ भुक्तिकामाश्च ये केचिन्मुक्तिकामास्तथा परे ॥ येषां यज्ञे च ते विप्रास्तत्तेभ्यः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संप्रयच्छति ॥ ६२ ॥ एवंविधो बलिर्जातः प्रसादाच्छंकरस्य च ॥ पुरा हि कितवत्वेन यद्दत्तं परमात्मने ॥ ६३ ॥ अशुचिं भूमिमासाद्य गंधपुष्पा दिकं महत् ॥ पतितं चार्पितं तेन शिवाय परमात्मने ॥ ६४ ॥ किं पुनः परया भक्त्या चार्चयंति महेश्वरम् ॥ गंधं पुष्पं फलं तोयं ते यांति शिवसन्निधिम् ॥ ६५ ॥ शिवात्परतरो नास्ति पूजनीयो हि भो द्विजाः ॥ ये हि मूकास्तथांधाश्च पंगवो ये जडास्तथा ॥ ६६ ॥ जातिहीनाश्च चंडालाः श्वपचा ह्यंत्यजा ह्यमी ॥ शिवभक्तिपरा नित्यं ते यांति परमां गतिम् ॥ ६७ ॥ तस्मात्सदाशिवः पूज्यः सर्वैरेव मनीषिभिः ॥ पूजनीयो हि संपूज्यो ह्यर्चनीयः सदाशिवः ॥ ६८ ॥ महेशं परमार्थज्ञाश्चिंतयंति हृदि स्थितम् ॥ यत्र जीवो भवत्येव शिवस्तत्रैव तिष्ठति ॥ ६९ ॥ विना शिवेन यत्किंचिदशिवं भवति क्षणात् ॥ ब्रह्मा विष्णुश्च रुद्रश्च गुणकार्यकरा ह्यमी ॥ ७० ॥ रजोगुणा न्वितो ब्रह्मा विष्णुः सत्त्वगुणान्वितः ॥ तमोगुणाश्रितो रुद्रो गुणातीतो महेश्वरः ॥ ७१ ॥ लिंगरूपो महादेवो ह्यर्चनीयो मुमुक्षुभिः ॥ शिवा त्परतरो नास्ति भुक्तिमुक्तिप्रदायकः ॥ ७२ ॥ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां प्रथमे माहेश्वरखण्डे केदारखण्डे बलये वरप्रदानवर्णनंनामैकोनविंशोऽध्यायः ॥ १९ ॥ छ ॥ ॥ ऋषय ऊचुः ॥ ॥ ब्रह्मा विष्णुश्च रुद्रश्च सगुणाः कीर्तितास्त्वया ॥ लिंगरूपी तथैवेशो निर्गुणोऽसौ कथं वद ॥ १ ॥ त्रिभिर्गुणैर्व्याप्तमिदं चराचरं जगन्महद्वाप्यथ वाल्पकं वा ॥ मायामयं सर्वमिदं विभाति लिंगं विना केन कुतोविभाति ॥ २ ॥ यद्दृश्यमानं महदल्पकं च तन्नश्वरं कृतकत्वाच्च सूत ॥ ३ ॥ तस्माद्विमृश्य भोः सूत संशयं छेत्तुमर्हसि ॥ व्यासप्रसादात्सकलं जानासि त्वं न चापरः ॥ ४ ॥ ॥ सूत उवाच ॥ ॥ व्यासेन कथितं सर्वमस्मिन्नर्थे शुकं प्रति ॥ ॥ शुक उवाच ॥ ॥ लिंगरूपी कथं शंभु र्निर्गुणः कथते त्वया ॥ एतन्मे संशयं तात च्छेत्तुमर्हस्यशेषतः ॥ ५ ॥ ॥ व्यास उवाच ॥ ॥ शृणु वत्स ब्रवीम्येतत्पुरा प्रोक्तं च नंदिना ॥ अगस्त्यं पृच्छमानं च येन सर्वं श्रुतं शुक ॥ ६ ॥ निर्गुणं परमात्मानं विद्धि लिंगस्वरूपिणम् ॥ परा शक्तिस्तथा ज्ञेया निर्गुणा शाश्वती सती ॥ ७ ॥ यया कृतमिदं सर्वं गुणत्रयविभावितम् ॥ एतच्चराचरं विश्वं नश्वरं परमार्थतः ॥ ८ ॥ एक एव परो ह्यात्मा लिंगरूपी निरंजनः ॥ प्रकृत्या सह ते सर्वे त्रिगुणा विलयं गताः ॥ ९ ॥ यस्मिन्नेव ततो लिंगं लयनात्कथितं पुरा ॥ तस्माल्लिंगे लयं प्राप्ता परा शक्तिः कुतोऽपरे ॥ १० ॥ लीना गुणाश्च रुद्रोक्त्या यैरिदं बद्धमेव च ॥ चराचरं महाभाग तस्माल्लिंगं प्रपूजयेत् ॥ ११ ॥ लिंगं च निर्गुणं साक्षाज्जानीध्वं भो द्विजोत्तमाः ॥ लयाल्लिंगस्य माहात्म्यं गुणानां परिकीर्त्यते ॥ १२ ॥ शंकरः सुखदाता हि उच्यमानो मनीषिभिः ॥ सर्वो हि कथ्यते विप्राः सर्वेषामाश्रयो हि

CC-0. In Public Domain. Digitization by eGangotri

सः ॥ १३ ॥ शंभुर्हि कथ्यते विप्रा यस्माच्च शुभसंभवः ॥ १४ ॥ एवं सर्वाणि नामानि सार्थकानि महात्मनः ॥ तेनावृतं जगत्सर्वं शंभुना
परमेष्ठिना ॥ १५ ॥ ॥ ऋषय ऊचुः ॥ ॥ यदा दाक्षायणी चाग्नौ पतिता यज्ञकर्मणि ॥ दक्षस्य च महाभागा तिरोधानगता सती ॥ १६ ॥
प्रादुर्भूता कदा सूत कथ्यतां तत्त्वयाऽधुना ॥ परा शक्तिर्महेशस्य मिलिता च कथं पुनः ॥ १७ ॥ एतत्सर्वं महाभाग पूर्ववृत्तं च तत्त्वतः ॥ कथ
नीयं च अस्माकं नान्यो वक्तास्ति कश्चन ॥ १८ ॥ ॥ सूत उवाच ॥ ॥ जज्ञे दाक्षायणी ब्रह्मन्विदग्धावयवा यदा ॥ विना शक्त्या महेशोऽपि
तताप परमं तपः ॥ १९ ॥ लीलागृहीतवपुषा पर्वते हिमवद्गिरौ ॥ भृंगिणा सह विश्वेन नंदिना च तथैव च ॥ २० ॥ तथा चंडेन मुंडेन तथान्यैर्ब
हुभिर्वृतः ॥ दशभिः कोटिगुणितैर्गणैश्च परिवारितः ॥ २१ ॥ गणानां चैव कोट्या च तथा षष्टिसहस्रकैः ॥ एवं तत्र गणैर्देव आवृतो वृषभध्वजः
॥ २२ ॥ तपो जुषाणः सहसा महात्मा हिमालयस्याग्रगतस्तथैव ॥ गणैर्वृतो वीरभद्रप्रधानैः स केवलो मूलविद्याविहीनः ॥ २३ ॥ एतस्मिन्नंतरे
दैत्याः प्रादुर्भूता ह्यविद्यया ॥ विष्णुना हि बलिर्बद्धस्तथा ते वै महाबलाः ॥ २४ ॥ जाता दैत्यास्ततो विप्रा इंद्रोपद्रवकारकाः ॥ कालखंजा महा
रौद्राः कालकायास्तथापरे ॥ २५ ॥ निवातकवचाः सर्वे रवरावकसंज्ञकाः ॥ अन्ये च बहवो दैत्याः प्रजासंहारकारकाः ॥ २६ ॥ तारको नमुचेः
पुत्रस्तपसा परमेण हि ॥ ब्रह्माणं तोषयामास ब्रह्मा तस्य तुतोष वै ॥ २७ ॥ वरान्ददौ यथेष्टांश्च तारकाय दुरात्मने ॥ वरं वृणीष्व भद्रं ते सर्वान्कामा
न्ददामि ते ॥२८॥ तच्छ्रुत्वा वचनं तस्य ब्रह्मणः परमेष्ठिनः ॥ वरयामास च तदा वरं लोकभयावहम् ॥ २९ ॥ यदि मे त्वं प्रसन्नोऽसि अजरामरतां
प्रभो ॥ देहि मे यद्विजानासि अजेयत्वं तथैव च ॥ ३० ॥ एवमुक्तस्तदा तेन तारकेण दुरात्मना ॥ उवाच प्रहसन्वाक्यममरत्वं कुतस्तव ॥ ३१ ॥
जातस्य हि ध्रुवो मृत्युरेतज्जानीहि तत्त्वतः ॥ प्रहस्य तारकः प्राह अजेयत्वं च देहि मे ॥ ३२ ॥ ब्रह्मोवाच तदा दैत्यमजेयत्वं तवानघ ॥ विनाऽर्भ
केण दत्तं वै ह्यर्भकस्त्वां विजेष्यते ॥ ३३ ॥ तदा स तारकः प्राह ब्रह्माणं प्रणतः प्रभो ॥ कृतार्थोऽहं हि देवेश प्रसादात्तव संप्रति ॥ ३४ ॥ एवं
लब्धवरो भूत्वा तारको हि महाबलः ॥ देवान्युद्धार्थमाहूय युयुधे तैः सहासुरः ॥ ३५ ॥ मुचुकुन्दं समाश्रित्य देवास्ते जयिनोऽभवन् ॥ पुनःपुन
र्विकुर्वाणा देवास्ते तारकेण हि ॥ ३६ ॥ मुचुकुन्दबलेनैव जयमापुः सुरास्तदा ॥ किं कर्तव्यं हि चास्माकं युध्यमानैर्निरंतरम् ॥ ३७ ॥ भवित
व्यमिति स्मृत्वा गतास्ते ब्रह्मणः पदम् ॥ ब्रह्मणश्चाग्रतो भूत्वा ह्यब्रुवंस्ते सवासवाः ॥ ३८ ॥ ॥ देवा ऊचुः ॥ ॥ बलिना सह पातालमास्तेऽसौ
मधुसूदनः ॥ विष्णुं विना हि ते सर्वे वृषाद्याः पतिताः परैः ॥ ३९ ॥ दैत्यैंद्रैश्च महाभाग त्रातुमर्हसि नः प्रभो ॥ तदा नभोगता वाणी ह्युवाच परि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सांत्व्य वै ॥ ४० ॥ हे देवाः क्रियतामाशु मम वाक्यं हि तत्त्वतः ॥ शिवात्मजो यदा देवा भविष्यति महाबलः ॥ ४१ ॥ युद्धे पुनस्तारकं च वधिष्यति न संशयः ॥ येनोपायेन भगवाञ्छंभुः सर्वगुहाशयः ॥ ४२ ॥ दारापरिग्रही देवास्तथा नीतिर्विधीयताम् ॥ क्रियतां च परो यत्नो भवद्भिर्नान्यथा वचः ॥ ४३ ॥ यूयं देवा विजानीध्वमित्युवाचाशरीरवाक् ॥ परं विस्मयमापन्ना ऊचुर्देवाः परस्परम् ॥ ४४ ॥ श्रुत्वा नभोगतां वाणीमाजग्मुस्ते हिमालयम् ॥ बृहस्पतिं पुरस्कृत्य सर्वे देवा वचोऽब्रुवन् ॥ ४५ ॥ हिमालयं महाभागाः सर्वे कार्यार्थगौरवात् ॥ हिमालय महाभाग श्रूयतां नोऽधुना वचः ॥ ४६ ॥ तारकस्त्रासयत्यस्मान्साहाय्यं तद्वधे कुरु ॥ त्वं शरण्यो भवास्माकं सर्वेषां च तपस्विनाम् ॥ तस्मात्सर्वे वयं याता महेंद्रसहिता विभो ॥ ४७ ॥ ॥ लोमश उवाच ॥ ॥ एवमभ्यर्थितो देवैर्हिमवान्गिरिसत्तमः ॥ उवाच देवान्प्रहसन्वाक्यं वाक्यविदां वरः ॥ ४८ ॥ महेन्द्रमुद्दिश्य तदा ह्युपहाससमन्वितः ॥ अक्षमाश्च वयं सर्वे महेन्द्रेण कृताः सुराः ॥ ४९ ॥ किं कुर्मः सुरकार्यं च तारकस्य वधं प्रति ॥ पक्षयुक्ता वयं सर्वे यदि स्याम सुरोत्तमाः ॥ ५० ॥ तदा वयं घातयामस्तारकं सह बांधवैः ॥ अचलोहं विपक्षश्च किं कार्यं करवाणि वः ॥ ५१ ॥ तस्य तद्वचनं श्रुत्वा सर्वे देवास्तमब्रुवन् ॥ सर्वे यूयं वयं चैव असमर्था वधं प्रति ॥ तारकस्य महाभाग एतत्कार्यं विचिंत्यताम् ॥ ५२ ॥ येन साध्यो भवेच्छत्रुस्तारको हि महाबलः ॥ तदोवाच महातेजा हिमवान्स सुरान्प्रति ॥ ५३ ॥ केनोपायेन भो देवास्तारकं हंतुमिच्छथ ॥ कथयंतु त्वरेणैव कार्यं वेत्तुं ममैव हि ॥ ५४ ॥ तदा सुरैः कथितं सर्वमेतद्वाण्या चोक्तं यत्पुरा कार्यहेतोः ॥ श्रुतं तदा गिरिणा वाक्यमेतदोवाचेदं हिमवान्पर्वतो हि ॥ ५५ ॥ शिवस्य पुत्रेण च धीमता यदा वध्यो दैत्यस्तारको वै महात्मा ॥ तदा सर्वं सुरकार्यं शुभं स्याद्वाण्या चोक्तं सत्यमेतद्भवेच्च ॥ ५६ ॥ तस्मात्तदेनत्क्रियतां भवद्भिर्यथा महेशः कुरुते परिग्रहम् ॥ कन्या यथा तस्य शिवस्य योग्या निरीक्ष्यतामाशु सुरैरिदानीम् ॥ ५७ ॥ तस्य तद्वचनं श्रुत्वा प्रहस्योचुः सुरास्तदा ॥ जनितव्या त्वया कन्या शिवार्थं कार्यसिद्धये ॥ ५८ ॥ सुराणां च गिरे वाक्यं कुरु शीघ्रं महामते ॥ आधारस्त्वं तु देवानां भविष्यसि न संशयः ॥ ५९ ॥ इत्युक्तो गिरिराजोऽथ देवैः स्वगृहमाविशत् ॥ पत्नीं मेनां च पप्रच्छ सुरकार्यं समागतम् ॥ ६० ॥ जनितव्या सुकन्यैका सुरकार्यार्थसिद्धये ॥ देवानां च ऋषीणां च तथैव च तपस्विनाम् ॥ ६१ ॥ प्रियं न भवति स्त्रीणां कन्याजननमेव च ॥ तथापि जनितव्या च कन्यैका च वरानने ॥ ६२ ॥ प्रहस्य मेना प्रोवाच स्वपतिं च हिमालयम् ॥ यदुक्तं भवता वाक्यं श्रूयतां मे त्वयाऽधुना ॥ ६३ ॥ कन्या सदा दुःखकरी नृणां पते स्त्रीणां तथा शोककरी महामते ॥ तस्मा

CC-0. In Public Domain. Digitization by eGangotri

द्विमृश्य सुचिरं स्वयमेव बुद्ध्या यथा हितं शैलपते तदुच्यताम् ॥ ६४ ॥ हिमवांस्तदुपश्रुत्य प्रियाया वचनं तदा ॥ उवाच वाक्यं मेधावी परोपक
रणान्वितम् ॥ ६५ ॥ येनयेन प्रकारेण परेषामुपजीवनम् ॥ भविष्यति च तत्कार्यं धीमता पुरुषेण हि ॥ ६६ ॥ स्त्रियापि चैव तत्कार्यं परोपकर
णान्वितम् ॥ एवं प्रवर्तिता तेन गिरिणा महिषी तदा ॥ दधार जठरे कन्यां मेना भाग्यवती तदा ॥ ६७ ॥ महाविद्या महामाया महामेधास्वरू
पिणी ॥ रुद्रकाली च अंबा च सती दाक्षायणी परा ॥ ६८ ॥ तां विभूतिं विशालाक्षी जठरे परमां सती ॥ बभार सा महाभागा मेना चारुविलो
चना ॥ ६९ ॥ स्तुतिं चक्रुस्तदा देवा ऋषयो यक्षकिन्नराः ॥ मेनाया भूरिभाग्यायास्तथा हिमवतो गिरेः ॥ ७० ॥ एतस्मिन्नंतरे जाता गिरिजा
नाम नामतः ॥ प्रादुर्भूता यदा देवी सर्वेषां च सुखप्रदा ॥७१॥ देवदुंदुभयो नेदुर्ननृतुश्चाप्सरोगणाः ॥ जगुर्गंधर्वपतयो ननृतुश्चाप्सरोगणाः ॥ ७२ ॥
पुष्पवर्षेण महता ववृषुर्विबुधास्तथा ॥ तदा प्रसन्नमभवत्सर्वं त्रैलोक्यमेव च ॥ ७३ ॥ यदावतीर्णा गिरिजा महासती तदैव दैत्या भयमाविशंस्ते ॥
प्राप्ता मुदं देवगणा महर्षयः सचारणाः सिद्धगणास्तथैव ॥ ७४ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां प्रथमे माहेश्वरखण्डे केदार
खण्डे श्रीभवान्युत्पत्तिवर्णनंनाम विंशोऽध्यायः ॥ २० ॥ ॥ छ ॥ ॥ लोमश उवाच ॥ ॥ वर्द्धमाना तदा साध्वी रराज प्रतिवासरम् ॥ अष्टवर्षा
यदा जाता हिमालयगृहे सती ॥ १ ॥ महेशो हिमवद्द्रोण्यां ततापं परमं तपः ॥ सर्वैर्गणैः परिवृतो वीरभद्रादिभिस्तदा ॥ २ ॥ एतत्तपो जुषाणं तं
महेशं हिमवान्ययौ ॥ तत्पादपल्लवं द्रष्टुं पार्वत्या सह बुद्धिमान् ॥ ३ ॥ यावत्समागतो द्रष्टुं नंदिनासौ निवारितः ॥ द्वारि स्थितेन च तदा क्षणमेकं
स्थिरोऽभवत् ॥ ४ ॥ पुनर्विज्ञापयामास नंदिना हिमवान्गिरिः ॥ विज्ञप्तो नंदिना शंभुरचलो द्रष्टुमागतः ॥ ५ ॥ तदाकर्ण्य वचस्तस्य नंदिनः परमे
श्वरः ॥ आनयस्व गिरिं चात्र नंदिनं वाक्यमब्रवीत् ॥ ६ ॥ तथेति मत्वा नंदी तं पर्वतं च हिमाचलम् ॥ आनयामास स तथा शंकरं लोकशंक
रम् ॥ ७ ॥ दृष्ट्वा तदानीं सकलेश्वरं प्रभुं तपो जुषाणं विनिमीलितेक्षणम् ॥ ८ ॥ कपर्दिनं चंद्रकलाविभूषणं वेदांतवेद्यं परमात्मनि स्थितम् ॥
ववंद शीर्ष्णा च तदा हिमाचलः परां मुदं प्रापदहीनसत्त्वः ॥ ९ ॥ उवाच वाक्यं जगदेकमंगलं हिमालयो वाक्यविदां वरिष्ठः ॥ १० ॥ सभाग्योऽहं
महादेव प्रसादात्तव शंकर ॥ प्रत्यहं चागमिष्यामि दर्शनार्थं तव प्रभो ॥ ११ ॥ अनया सह देवेश अनुज्ञां दातुमर्हसि ॥ श्रुत्वा तु वचनं तस्य
देवदेवो महेश्वरः ॥ १२ ॥ आगंतव्यं त्वया नित्यं दर्शनार्थं ममाचल ॥ कुमारीं च गृहे स्थाप्य नान्यथा मम दर्शनम् ॥ १३ ॥ अचलः
प्रत्युवाचेदं गिरिशं नतकंधरः ॥ कस्मान्मयानया सार्द्धं नागंतव्यं तदुच्यताम् ॥ अचलं च व्रती शंभुः प्रहसन्वाक्यमब्रवीत् ॥ १४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इयं कुमारी सुश्रोणी तन्वी चारुप्रभाषिणी ॥ नानेतव्या मत्समीपे वारयामि पुनः पुनः ॥ १५ ॥ एतच्छ्रुत्वा वचनं तस्य शंभोर्निरामयं निःस्पृहनिष्ठुरं वा ॥ तपस्विनोक्तं वचनं निशम्य उवाच गौरी च विहस्य शंभुम् ॥ १६ ॥ ॥ गौर्युवाच ॥ ॥ तपःशक्त्यान्वितः शंभो करोषि विपुलं तपः ॥ तव बुद्धिरियं जाता तपस्तप्तुं महात्मनः ॥ १७ ॥ कस्त्वं का प्रकृतिः सूक्ष्मा भगवंस्तद्विमृश्यताम् ॥ पार्वत्यास्तद्वचः श्रुत्वा महेशो वाक्यमब्रवीत् ॥ १८ ॥ तपसा परमेणैव प्रकृतिं नाशयाम्यहम् ॥ प्रकृत्या रहितः सुभ्रु अहं तिष्ठामि तत्त्वतः ॥ तस्माच्च प्रकृतेः सिद्धैर्न कार्यः संग्रहः क्वचित् ॥ १९ ॥ ॥ पार्वत्युवाच ॥ ॥ यदुक्तं परया वाचा वचनं शंकर त्वया ॥ सा किं प्रकृतिर्नैव स्यादतीतस्तां भवान्कथम् ॥ २० ॥ यच्छृणोषि यदश्नासि यच्च पश्यसि शंकर ॥ वाग्वादेन च किं कार्यमस्माकं चाधुना प्रभो ॥ ॥ २१ ॥ तत्सर्वं प्रकृतेः कार्यं मिथ्यावादो निरर्थकः ॥ प्रकृतेः परतो भूत्वा किमर्थं तप्यते तपः ॥ २२ ॥ त्वया शंभोऽधुना ह्यस्मिन्गिरौ हिमवति प्रभो ॥ प्रकृत्या मिलितोऽसि त्वं न जानासि हि शंकर ॥ २३ ॥ वाग्वादेन च किं कार्यमस्माकं चाधुना प्रभो ॥ प्रकृतेः परतस्त्वं च यदि सत्यं वचस्तव ॥ तर्हि त्वया न भेतव्यं मम शंकर संप्रति ॥ २४ ॥ प्रहस्य भगवान्देवो गिरिजां प्रत्युवाच ह ॥ २५ ॥ ॥ महादेव उवाच ॥ ॥ प्रत्यहं कुरु मे सेवां गिरिजे साधुभाषिणि ॥ २६ ॥ इत्येवमुक्त्वा गिरिजां महेशो हिमालयं वाक्यमथो बभाषे ॥ अत्रैव सोऽहं तपसा परेण चरामि भूम्यां परमार्थभावः ॥ २७ ॥ तपस्तप्तुमनुज्ञा मे दातव्या पर्वताधिप ॥ अनुज्ञया विना किंचित्तपः कर्तुं न पार्यते ॥ २८ ॥ एतच्छ्रुत्वा वचस्तस्य देवदेवस्य शूलिनः ॥ प्रहस्य हिमवाञ्छंभुमिदं वचनमब्रवीत् ॥ २९ ॥ त्वदीयं हि जगत्सर्वं सदेवासुरमानुषम् ॥ किमहं तु महादेव तुच्छो भूत्वा ददामि ते ॥ ३० ॥ एवमुक्तो हिमवता शंकरो लोकशंकरः ॥ प्रहस्य गिरिराजं तं याहीति प्राह सादरम् ॥ ३१ ॥ शंकरेणाभ्यनुज्ञातः स्वगृहं हिमवान्ययौ ॥ सार्द्धं गिरिजया सोऽपि प्रत्यहं दर्शने स्थितः ॥ ३२ ॥ एवं कतिपयः कालो गतश्चोपासनात्तयोः ॥ ३३ ॥ सुतापित्रोश्च तत्रैव शंकरो दुरतिक्रमः ॥ पार्वतीं प्रति तत्रैव चिंतामापेदिरे सुराः ॥ ३४ ॥ ते चिंत्यमानाश्च सुरास्तदानीं कथं महेशो गिरिजां समेष्यति ॥ किं कार्यमद्यैव वयं च कुर्मो बृहस्पते तत्कथयस्व मा चिरम् ॥ ३५ ॥ बृहस्पतिरुवाचेदं महेंद्रं प्रति सद्वचः ॥ एवमेतत्त्वया कार्यं महेंद्र श्रूयतां तदा ॥ ३६ ॥ एतत्कार्यं मदनेनैव राजन्नान्यः समर्थो भविता त्रिलोके ॥ विश्वावितं तापसानां तपो हि तस्मात्त्वरात्प्रार्थनीयो हि मारः ॥ ३७ ॥ गुरोर्वचनमाकर्ण्य आह्वयन्मदनं हरिः ॥ आह्वानादाजगामाथ मदनः कार्यसाधकः ॥ ३८ ॥ रत्या समेतः सह माधवेन

CC-0. In Public Domain. Digitization by eGangotri

स पुष्पधन्वा पुरतः सभायाम् ॥ महेंद्रमागम्य उवाच वाक्यं सगर्वितं लोकमनोहरं च ॥ ३९ ॥ अहमाकारितः कस्माद्ब्रूहि मेऽद्य शचीपते ॥ किं
कार्यं करवाण्यद्य कथ्यतां मा विलंबितम् ॥४०॥ मम स्मरणमात्रेण विभ्रष्टा हि तपस्विनः॥ त्वमेव जानासि हरे मम वीर्यपराक्रमौ ॥ ४१ ॥ मम
वीर्यं च जानाति शक्तेः पुत्रः पराशरः ॥ एवं चान्ये च बहवो भृग्वाद्या ऋषयो ह्यमी ॥ ४२ ॥ गुरुरप्यभिजानाति भार्यौतथ्यस्य चैव हि ॥ तस्यां
जातो भरद्वाजो गुरुणा संकरो हि सः॥४३॥ भर द्वाजो महाभाग इत्युवाच गुरुस्तदा॥ जानाति मम वीर्यं च शौर्यं चैव प्रजापतिः ॥ ४४ ॥ क्रोधो हि
मम बंधुश्च महाबलपराक्रमः ॥ उभाभ्यां द्रावितं विश्वं जंगमाजंगमं महत् ॥ ब्रह्मादिस्तंबपर्यंतं प्लावितं सचराचरम् ॥ ४५ ॥ ॥ देवा ऊचुः ॥ मदन
त्वं समर्थोसि अस्माञ्जेतुं सदैव हि ॥ महेशं प्रति गच्छाशु सुरकार्यार्थसिद्धये ॥ पार्वत्या सहितं शंभुं कुरुष्वाद्य महामते ॥ ४६ ॥ एवमभ्यर्थितो
देवैर्मदनो विश्वमोहनः ॥ जगाम त्वरितो भूत्वा अप्सरोभिः समन्वितः ॥ ४७ ॥ ततो जगामाशु महाधनुर्द्धरो विस्फार्य चापं कुसुमान्वितं
महत् ॥ तथैव बाणांश्च मनोरमांश्च प्रगृह्य वीरो भुवनैकजेता ॥ तस्मिन्हिमाद्रौ परिदृश्यमानोऽवनौ स्मरो योधयतां वरिष्ठः ॥ ४८ ॥ तत्रागता
तदा रंभा उर्वशी पुंजिकस्थली ॥ सुम्लोचा मिश्रकेशी च सुभगा च तिलोत्तमा ॥ ४९ ॥ अन्याश्च विविधा जाताः साहाय्ये मदनस्य च ॥ अप्स
रसो गणैर्दृष्टा मदनेन सहैव ताः ॥ ५० ॥ सर्वे गणाश्च सहसा मदनेन विमोहिताः ॥ भृंगिणा च तदा रंभा चण्डेन सह चोर्वशी ॥ ५१ ॥ मेनका
वीरभद्रेण चण्डेन पुंजिकस्थली ॥ तिलोत्तमादयस्तत्र संवृताश्च गणैस्तदा ॥५२॥ उन्मत्तभूतैर्बहुभिस्त्रपां त्यक्त्वा मनीषिभिः ॥ अकाले कोकिला
भिश्च व्याप्तमासीन्महीतलम् ॥ ५३ ॥ अशोकाश्चंपकाश्चूता यूथ्यश्चैव कदंबकाः ॥ नीपाः प्रियालाः पनसा राजवृक्षाश्चरायणाः ॥ ५४ ॥ द्राक्षा
वल्ल्यः प्रदृश्यंते बहुला नागकेशराः ॥ तथा कदल्यः केतक्यो भ्रमरैरुपशोभिताः ॥ ५५ ॥ मत्ता मदनसंगेन हंसीभिः कलहंसकाः ॥ करेणुभिर्गजा
ह्यासञ्छिखंडीभिः शिखंडिनः ॥ ५६ ॥ निष्कामा ह्यातुरा ह्यासञ्छिवसंपर्कजैर्गुणैः ॥ अकस्माच्च तथाभूतं कथं जातं विमृश्य च ॥ ५७ ॥
शैलादो हि महातेजा नंदी ह्यमितविक्रमः ॥ रक्षसां विबुधानां वा कृत्यमस्तीत्यचिंतयत् ॥ ५८ ॥ एतस्मिन्नंतरे तत्र मदनो हि धनुर्द्धरः ॥ पंचबाणा
न्समारोप्य स्वकीये धनुषि द्विजाः ॥ तरोश्छायां समाश्रित्य देवदारुगतां तदा ॥ ५९ ॥ निरीक्ष्य शंभुं परमासने स्थितं तपो जुषाणं परमेष्ठिनां
पतिम् ॥ गंगाधरं नीलतमालकंठं कपर्दिनं चन्द्रकलासमेतम् ॥ ६० ॥ भुजंगभोगांकितसर्वगात्रं पंचाननं सिंहविशालविक्रमम् ॥ कर्पूरगौरं परया
न्वितं च स वेद्धुकामो मदनस्तपस्विनम् ॥ ६१ ॥ दुरासदं दीप्तिमतां वरिष्ठं महेशमुग्रं सह माधवेन ॥ यावच्छिवं वेद्धुकामः शरेण तावद्याता

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गिरिजा विश्वमाता ॥ सखीजनैः संवृता पूजनार्थं सदाशिवं मंगलं मंगलानाम् ॥ ६२ ॥ कनककुसुममालां संदधे नीलकंठे सितकिरणमनोज्ञा दुर्ल्लभा सा तदानीम् ॥ स्मितविकसितनेत्रा चारुवक्त्रं शिवस्य सकलजनजनित्री वीक्षमाणा बभूव ॥ ६३ ॥ तावद्विद्धः शरेणैव मोहनाख्येन च त्वरात् ॥ विध्यमानस्तदा शंभुः शनैरुन्मील्य लोचने ॥ ददर्श गिरिजां देवोऽब्धिर्यथा शशिनः कलाम् ॥ ६४ ॥ चारुप्रसन्नवदनां बिंबोष्ठीं सस्मितेक्षणाम् ॥ सुद्विजामग्निजां तन्वीं विशालवदनोत्सवाम् ॥ ६५ ॥ गौरीं प्रसन्नमुद्रां च विश्वमोहनमोहनाम् ॥ यया त्रिलोकरचना कृता ब्रह्मादिभिः सह ॥ ६६ ॥ उत्पत्तिपालनविनाशकरी च या वै कृत्वाग्रतः सत्त्वरजस्तमांसि ॥ सा चेतनेन ददृशे पुरतो हरेण संमोहनी सकलमंगलमंगलैका ॥ ॥ ६७ ॥ तां निरीक्ष्य भवो देवो गिरिजां लोकपावनीम् ॥ मुमोह दर्शनात्तस्या मदनेनातुरीकृतः ॥ विस्मयोत्फुल्लनयनो बभूव सहसा शिवः ॥ ॥ ६८ ॥ एवं विलोकमानोऽसौ देवदेवो जगत्पतिः ॥ मनसा दूयमानेन इदमाह सदाशिवः ॥ ६९ ॥ अनया मोहितः कस्मात्तपःस्थोऽहं निरामयः ॥ कुतः कस्माच्च केनेदं कृतमस्ति ममाप्रियम् ॥ ७० ॥ ततो व्यलोकयच्छंभुर्दिक्षु सर्वासु सादरम् ॥ तावद्दृष्टो दक्षिणस्यां दिशि ह्यात्तशरासनः ॥ ७१ ॥ चक्रीकृतधनुः सज्जं चक्रे वेद्धुं सदाशिवम् ॥ यावत्पुनः संधयति मदनो मदनांतकम् ॥ तावद्दृष्टो महेशेन सरोषेण तदा द्विजाः ॥ ७२ ॥ निरीक्षितस्तृतीयेन चक्षुपा परमेण हि ॥ मदनस्तत्क्षणादेव ज्वालामालावृतोऽभवत् ॥ हाहाकारो महानासीद्देवानां तत्र पश्यताम् ॥ ७३ ॥ ॥ देवा ऊचुः ॥ ॥ देवदेव महादेव देवानां वरदो भव ॥ गिरिजायाः सहायार्थं प्रेषितो मदनोऽधुना ॥७४॥ वृथा त्वयाथ दग्धोऽसौ मदनो हि महाप्रभः ॥ ॥ ७५ ॥ त्वया हि कार्यं जगदेकबंधो कार्यं सुराणां परमेण वर्चसा ॥ अस्यां समुत्पत्स्यति देव शंभो तेनैव सर्वं भवतीह कार्यम् ॥ ७६ ॥ तारकेण महादेव देवाः संपीडिता भृशम् ॥ तदर्थं जीवितं चास्य दत्त्वा च गिरिजां प्रभो ॥ ७७ ॥ वरयस्व महाभाग देवकार्ये भव क्षमः ॥ गजासुरात्त्वया त्राता वयं सर्वे दिवौकसः ॥ ७८ ॥ कालकूटाच्च नूनं हि रक्षिताः स्मो न चान्यथा ॥ भस्मासुराच्च सर्वेश त्वया त्राता न संशयः ॥ ७९ ॥ मदनोयं समायातः सुराणां कार्यसिद्धये ॥ तस्मात्त्वया रक्षणीय उपकारः परो हि नः ॥ ८० ॥ विना तेन जगत्सर्वं नाशमेष्यति शंकर ॥ निष्कामस्त्वं कथं शंभो स्वबुद्ध्या च विमृश्यताम् ॥ ८१ ॥ तदोवाच रुषाविष्टो देवान्प्रति महेश्वरः ॥ विना कामेन भो देवा भवितव्यं न चान्यथा ॥ ८२ ॥ यदा कामं पुरस्कृत्य सर्वे देवाः सवासवाः ॥ पदभ्रष्टाश्च दुःखेन व्याप्ता दैन्यं समाश्रिताः ॥ ८३ ॥ कामो हि नरकायैव सर्वेषां प्राणिनां ध्रुवम् ॥ दुःखरूपी ह्यनंगोऽयं जानीध्वं मम भाषितम् ॥ ८४ ॥ तारकोऽपि दुराचारो निष्कामोऽद्य भविष्यति ॥ विना

CC-0. In Public Domain. Digitization by eGangotri

कामेन च कथं पापमाचरते नरः ॥ ८५ ॥ तस्मात्कामो मया दग्धः सर्वेषां शांतिहेतवे ॥ युष्माभिश्च सुरैः सर्वैरसुरैश्च महर्षिभिः ॥ ८६ ॥ अन्यैः
प्राणिभिरेवात्र तपसे धीयतां मनः ॥ कामक्रोधविहीनं च जगत्सर्वं मया कृतम् ॥ ८७ ॥ तस्मादेनं पापिनं दुःखमूलं न जीवयिष्यामि सुराः
प्रतीक्ष्यताम् ॥ निरन्तरं चात्मसुखप्रबोधमानंदलक्षणमगाधमनन्यरूपम् ॥ ८८ ॥ एवमुक्तास्तदा तेन शंभुना परमेष्ठिना ॥ ऊचुर्महर्षयः सर्वे
शंकर लोकशंकरम् ॥ ८९ ॥ यदुक्तं भवता शंभो परं श्रेयस्करं हि नः ॥ किं तु वक्ष्याम देवेश श्रूयतां चावधार्यताम् ॥ ९० ॥ यथा
सृष्टमिदं विश्वं कामक्रोधसमन्वितम् ॥ तत्सर्वं कामरूपं हि स कामो न तु हन्यते ॥ ९१ ॥ धर्मार्थकाममोक्षाश्च चत्वारो ह्येकरूपताम् ॥ नीता
येन महादेव स कामोऽयं न हन्यते ॥ ९२ ॥ कथं त्वया हि संदग्धः कामो हि दुरतिक्रमः ॥ येन संघटितं विश्वमाब्रह्मस्थावरात्म
कम् ॥ ९३ ॥ कामेन हीयते विश्वं विश्वं कामेन पाल्यते ॥ कामेनोत्पद्यते विश्वं तस्मात्कामो महाबलः ॥ ९४ ॥ यस्मात्क्रोधो
भवत्युग्रो येन त्वं च वशीकृतः ॥ तस्मात्कामं महादेव संबोधयितुमर्हसि ॥ ९५ ॥ त्वया संपादितो देव मदनो हि महाबलः ॥ समर्थो हि समर्थ
त्वात्तत्सामर्थ्यं करिष्यति ॥ ९६ ॥ ऋषिभिश्चैवमुक्तोऽपि द्विगुणं रूपमास्थितः ॥ चक्षुषा हि तृतीयेन दग्धुकामो हरस्तदा ॥ ९७ ॥
मुनिभिश्चारणैः सिद्धैर्गणैश्चापि सदाशिवः ॥ स्तुतश्च वंदितो रुद्रः पिनाकी वृषवाहनः ॥ ९८ ॥ मदनं च तथा दग्ध्वा त्यक्त्वा तं
पर्वतं रुषा ॥ हिमवंताभिधं सद्यस्तिरोधानगतोऽभवत् ॥ ९९ ॥ तिरोधानगतं देवी वीक्ष्य दग्धं च मन्मथम् ॥ सकोकिलं सचूतं च सभृंगं
सहचंपकम् ॥ १०० ॥ तथैव दग्धं मदनं विलोक्य रत्या विलापं च तदा मनस्विनी ॥ सबाष्पदीर्घं विमना विमृश्य कथं स रुद्रो वशगो
भवेन्मम ॥ १०१ ॥ एवं विमृश्य सुचिरं गिरिजा तदानीं संमोहमाप च सती हि तथा बभाषे ॥ संमुह्यमाना रुदतीं निरीक्ष्य
रतिर्महारूपवतीं मनस्विनीम् ॥ १०२ ॥ मा विषादं कुरु सखि मदनं जीवयाम्यहम् ॥ त्वदर्थं भो विशालाक्षि तपसाऽऽराधयाम्यहम् ॥ १०३ ॥
हरं रुद्रं विरूपाक्षं देवदेवं जगद्गुरुम् ॥ मा चिंतां कुरु सुश्रोणि मदनं जीवयाम्यहम् ॥ १०४ ॥ एवम श्वास्य तां साध्वी गिरिजां रतिरंजसा ॥
तपस्तेपे च सुमहत्पतिं प्राप्तुं सुमध्यमा ॥ १०५ ॥ मदनो यत्र दग्धश्च रुद्रेण परमात्मना ॥ तप्यमानां तपस्तत्र नारदो ददृशे तदा ॥ १०६ ॥
उवाच गत्वा सहसा भामिनीं रतिमंतिके ॥ कस्यासि त्वं विशालाक्षि केन वा तप्यते तपः ॥ १०७ ॥ तरुणी रूपसंपन्ना सौभाग्येन परेण हि ॥
नारदस्य वचः श्रुत्वा रोषेण महता तदा ॥ उवाच वाक्यं मधुरं किंचिन्निष्ठुरमेव च ॥ १०८॥ ॥ रतिरुवाच ॥ ॥ नारदोऽसि मया ज्ञातः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कुमारस्त्वं न संशयः ॥ स्वस्वरूपादर्शनं च कर्तुमर्हसि सुव्रत ॥ १०९ ॥ यथागतेन मार्गेण गच्छ त्वं मा विलंबितम् ॥ बटो न किंचिज्जानासि केवलं कलिकृन्महान् ॥ ११० ॥ परस्त्रीकामुकाः क्षुद्रा विटा व्यसनिनश्च ये ॥ तथा ह्यकर्मिणः स्तब्धास्तेषां मध्ये त्वमग्रणीः ॥ १११ ॥ एवं निर्भर्त्सितो रत्या नारदो मुनिसत्तमः ॥ स्वयं जगाम त्वरितं शंबरं दैत्यपुंगवम् ॥ ११२ ॥ शशंस दैत्यराजाय दग्धं मदनमेव च ॥ रुद्रेण क्रोधयुक्तेन तस्य भार्या मनस्विनी ॥ ११३ ॥ तामानय महाभाग भार्यां कुरु महाबल ॥ अतीव रूपसंपन्ना या आनीतास्त्वयानघ ॥ तासां मध्ये रूपवती रतिः सा मदनप्रिया ॥ ११४ ॥ एवमाकर्ण्य वचनं देवर्षेर्भावितात्मनः ॥ जगाम सहसा तत्र यत्रास्ते सा सुशोभना ॥ ११५ ॥ तां दृष्ट्वा सुविशालाक्षीं रतिं मदनमोहिनीम् ॥ उवाच प्रहसन्वाक्यं शंबरो देवसंकटः ॥ ११६ ॥ एहि तन्वि मया सार्द्धं राज्यं भोगान्यथेष्टतः ॥ भुंक्ष्व देवि प्रसादान्मे तपसा किं प्रयोजनम् ॥ ११७ ॥ एवमुक्ता तदा तेन शंबरेण महात्मना ॥ उवाच तन्वी मधुरं महिषी मदनस्य सा ॥ ११८ ॥ विधवाहं महाबाहो नैवं भाषितुमर्हसि ॥ राजा त्वं सर्वदैत्यानां लक्षणैः परिवारितः ॥ ११९ ॥ एतत्तद्वचनं श्रुत्वा शंबरः काममोहितः ॥ करे ग्रहीतुकामोऽसौ तदा रत्या निवारितः ॥ १२० ॥ विमृश्य मनसा सर्वमजेयत्वं च तस्य वै ॥ मा स्पृश त्वं च रे मूढ मम संस्पर्शजेन वै ॥ १२१ ॥ संपर्केण च दग्धोऽसि नान्यथा मम भाषितम् ॥ तदोवाच महातेजाः शंबरः प्रहसन्निव ॥ १२२ ॥ विभीषिकाभिर्बह्वीभिर्मां भीषयसि मानिनि ॥ गच्छ शीघ्रं मम गृहं बहूक्त्या किं प्रयोजनम् ॥ १२३ ॥ इत्युच्यमानेन तदा नीता सा प्रसभं तथा ॥ स्वपुरं परमं तन्वी शंबरेण मनस्विनी ॥ ॥ १२४ ॥ कृता महानसेऽध्यक्षा नाम्ना मायावतीति च ॥ १२५ ॥ ॥ ऋषय ऊचुः ॥ ॥ पार्वत्याधिकृतं सर्वं मदनानयनं प्रति ॥ शंबरेण हृता तन्वी मदनस्य प्रिया सती ॥ अत ऊर्ध्वं तदा सूत किं जातं तत्र वर्ण्यताम् ॥ १२६ ॥ ॥ सूत उवाच ॥ ॥ गतं तदा शिवं दृष्ट्वा दग्ध्वा मदनमोजसा ॥ पार्वती तपसा युक्ता स्थिता तत्रैव भामिनी ॥ १२७ ॥ पित्रा तेन तदा तन्वी मात्रा चैव विचारिता ॥ बाले एहि गृहे शीघ्रं मा श्रमं कर्तुमर्हसि ॥ १२८ ॥ उक्ता ताभ्यां तदा साध्वी गिरिजा वाक्यमब्रवीत् ॥ १२९ ॥ ॥ पार्वत्युवाच ॥ ॥ नागच्छामि गृहं मातस्तात मे शृणु तत्त्वतः ॥ वाक्यं धर्मार्थयुक्तं च येन त्वं तोषमेष्यसि ॥१३०॥ शंभुः परेषां परमो दग्धो येन महाबलः ॥मदनो मम सान्निध्यमानयेऽत्रैव तं शिवम्॥१३१॥दुर्लभो हि तदा शंभुः प्राणिनां गृहमिच्छताम्॥नागच्छामि गृहं मातस्तस्मात्सर्वं विमृश्यताम् ॥१३२॥तदोवाच महातेजा हिमवान्स्वसुतां प्रति ॥ दुराराध्यः शिवः साक्षात्सर्वदेवनमस्कृतः॥त्वया प्राप्तुमशक्यो हि तस्मात्त्वं स्वगृहं व्रज ॥१३३॥ सा बाष्पपूरितेनैव कंठेन स्वसुतां प्रति ॥ उवाच मेना तन्वंगि

CC-0. In Public Domain. Digitization by eGangotri

याहि शीघ्रं गृहं प्रति ॥ १३४ ॥ तदा प्रहस्य चोवाच मातरं प्रति पार्वती ॥ प्रतिज्ञां शृणु मे मातस्तपसा परमेण हि ॥ १३५ ॥ अत्रैव तं समानीय
वरयामि विचक्षणम् ॥ नाशयामि च रुद्रस्य रुद्रत्वं वरवर्णिनि ॥ १३६ ॥ सुखरूपं परित्यज्य गिरिजा च मनस्विनी ॥ शंभोराराधनं चक्रे
परमेण समाधिना ॥ १३७ ॥ जया च विजया चैव माधवी च सुलोचना ॥ सुश्रुता च श्रुता चैव तथैव च शुकी परा ॥ १३८ ॥ प्रम्लोचा
सुभगा श्यामा चित्रांगी चारुणी स्वधा ॥ एताश्चान्याश्च बहवः सख्यस्ता गिरिजां प्रति ॥ उपासांचक्रिरे सा च देवगर्भा च भामिनी ॥ १३९ ॥
तपसा परमोग्रेण चरंती चारुहासिनी ॥ मदनो यत्र दग्धश्च रुद्रेण च महात्मना ॥ तत्रैव वेदिं कृत्वा च तस्योपरि सुसंस्थिता ॥ १४० ॥ त्यक्त्वा
जलाशनं बाला पर्णादा ह्यभवच्च सा ॥ ततः साऽऽर्द्राणि पर्णानि त्यक्त्वा शुष्काणि चाददे ॥ १४१ ॥ शुष्काणि चैव पर्णानि नाशितानि तया
यदा ॥ अपर्णेति च विख्याता बभूव तनुमध्यमा ॥ १४२ ॥ वायुपानरता जाता अंबुपानादनंतरम् ॥ कालक्रमेण महता बभूव गिरिजा सती ॥
एकांगुष्ठेन च तदा दधार च निजं वपुः ॥ १४३ ॥ एवमुग्रेण तपसा शंकराराधनं सती ॥ चकार परया तुष्ट्या शंभोः प्रीत्यर्थमेव च ॥ १४४ ॥
परं भावं समाश्रित्य जगन्मंगलमंगला ॥ तुष्ट्यर्थं च महेशस्य ततापं परमं तपः ॥ १४५ ॥ एवं दिव्यसहस्राणि वर्षाणि च ततापं वै ॥ हिमा
लयस्तदागत्य पार्वतीं कृतनिश्चयाम् ॥ १४६ ॥ सभार्यः स सुतामाप्त उवाच च महासतीम् ॥ मा खिद्यतां महादेवि तपसानेन भामि
नि ॥ १४७ ॥ क्व रुद्रो दृश्यते बाले विरक्तो नात्र संशयः ॥ त्वं तन्वी तरुणी बाला तपसा च विमोहिता ॥ १४८ ॥ भविष्यति न
संदेहः सत्यं प्रतिवदामि ते ॥ तस्मादुत्तिष्ठ याह्याशु स्वगृहं वरवर्णिनि ॥ १४९ ॥ किं तेन तव रुद्रेण येन दग्धः पुराऽनघे ॥ मदनो निर्विका
रित्वात्तं कथं प्रार्थयिष्यसि ॥ १५० ॥ गगनस्थो यथा चंद्रो ग्रहीतुं न हि शक्यते ॥ तथैव दुर्गमः शंभुर्जानीहि त्वं शुचिस्मिते ॥ १५१ ॥
तथैव मेनया चोक्ता तथा सह्याद्रिणा सती ॥ मेरुणा मंदरेणैव मैनाकेन तथैव च ॥ १५२ ॥ एभिरुक्ता तदा तन्वी पार्वती तपसि स्थिता ॥
उवाच प्रहसन्त्येव हिमवंतं शुचिस्मिता ॥ १५३ ॥ पुरा प्रोक्तं त्वया तात अंब किं विस्मृतं त्वया ॥ अधुनैव प्रतिज्ञां च शृणुध्वं मम बांधवाः ॥ १५४ ॥
विरक्तोऽसौ महादेवो मदनो येन वै हतः ॥ तं तोषयामि तपसा शंकरं लोकशंकरम् ॥ १५५ ॥ सर्वे यूयं च गच्छंतु नात्र कार्या विचारणा ॥
दग्धो हि मदनो येन येन दग्धं गिरेर्वनम् ॥ १५६ ॥ तमानयामि चात्रैव तपसा केवलेन हि ॥ तपोबलेन महता सुसेव्यो हि सदाशिवः ॥
॥ १५७ ॥ तं जानीध्वं महाभागाः सत्यंसत्यं वदाम्यहम् ॥ १५८ ॥ संभाषमाणा जननीं तदानीं हिमालयं चैव तथा च मेनाम् ॥ तथैव मेरुं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मितभाषिणी तदा सा मंदरं पर्वतराजकन्या ॥ जग्मुस्तदा तेन पथा च पर्वता यथागतेनापि विचक्षमाणाः ॥ १५९ ॥ गतेषु तेषु सर्वेषु सखीभिः परिवारिता ॥ तत्रैव च तपस्तेपे परमार्था सती तदा ॥१६०॥ तपसा तेन महता तप्तमासीच्चराचरम् ॥ तदा सुरासुराः सर्वे ब्रह्माणं शरणं गताः ॥ ॥ १६१ ॥ ॥ देवा ऊचुः ॥ ॥ त्वया सृष्टमिदं सर्वं जगद्देव चराचरम् ॥ त्रातुमर्हसि देवान्नस्त्वदन्यो नोपपद्यते ॥ १६२ ॥ अस्माकं रक्षणे शक्त इत्याकर्ण्य वचस्तदा ॥ विमृश्य च तदा ब्रह्मा मनसा परमेण हि ॥ १६३ ॥ गिरिजातपसोद्भूतं दावाग्निं परमं महत् ॥ ज्ञात्वा ब्रह्मा जगामाशु क्षीराब्धिं परमाद्भुतम् ॥ १६४ ॥ तत्र सुप्तं सुपर्यंके शेषाख्ये चातिशोभने ॥ लक्ष्म्या पादोपयुगलं सेव्यमानं निरंतरम् ॥ १६५ ॥ दूरस्थेनापि तार्क्ष्येण नतकंधरधारिणा ॥ सेव्यमानं श्रिया कांत्या क्षांत्या वृत्त्या दयादिभिः ॥ १६६ ॥ नवशक्तियुतं विष्णुं पार्षदैः परिवारितम् ॥ कुमुदोथ कुमुद्रांश्च सनकश्च सनंदनः ॥ १६७ ॥ सनातनो महाभागः प्रसुप्तो विजयोऽरिजित् ॥ जयंतश्च जयत्सेनो जयश्चैव महाप्रभः ॥ १६८ ॥ सनत्कुमारः सुतपा नारदश्चैव तुंबुरुः ॥ पांचजन्यो महाशंखो गदा कौमोदकी तथा ॥ १६९ ॥ सुदर्शनं तथा चापं शार्ङ्गं च परमाद्भुतम् ॥ एतानि वै रूपवंति दृष्टानि परमेष्ठिना ॥ १७० ॥ विष्णोः समीपे परमामनो भृशं समेत्य सर्वे सुरदानवास्तदा ॥ विष्णुं चाहुः परमेष्ठिनां पतिं तीरे तदानीमुदधेर्महात्मनः ॥ १७१ ॥ त्राहित्राहि महाविष्णो तप्तान्नः शरणागतान् ॥ तपसोग्रेण महता पार्वत्याः परमेण हि ॥ शेषासने चोपविष्ट उवाच परमेश्वरः ॥ १७२ ॥ युष्माभिः सहितश्चापि व्रजामि परमेश्वरम् ॥ महादेवं प्रार्थयामो गिरिजां प्रति वै सुराः ॥ १७३ ॥ पाणिग्रहार्थमधुना देवदेवः पिनाकधृक् ॥ यथा नेष्यति तत्रैव करिष्यामोऽधुना वयम् ॥ १७४ ॥ तस्माद्वयं गमिष्यामो यत्र रुद्रो महाप्रभुः ॥ तपसोग्रेण संयुक्तो ह्यास्ते परममंगलः ॥ १७५ ॥ विष्णोस्तद्वचनं श्रुत्वा ऊचुः सर्वे सुरासुराः ॥ न यास्यामो वयं सर्वे विरूपाक्षं महाप्रभम् ॥ १७६ ॥ यदा दग्धः पुरा तेन मदनो दुरतिक्रमः ॥ तथैव धक्ष्यत्यस्माकं नात्र कार्या विचारणा ॥ १७७ ॥ प्रहस्य भगवान्विष्णुरुवाच परमेश्वरः ॥ मा भयं क्रियतां सर्वैः शिवरूपी सदाशिवः ॥ १७८ ॥ स न धक्ष्यति सर्वेषां देवानां भयनाशनः ॥ तस्माद्भवद्भिर्गंतव्यं मया सार्द्धं विचक्षणाः ॥ १७९ ॥ शंभुं पुराणं पुरुषं ह्यधीशं वरेण्यरूपं च परं पराणाम् ॥ तपो जुषाणं परमार्थरूपं परात्परं तं शरणं व्रजामि ॥ १८० ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां प्रथमे माहेश्वरखण्डे केदारखण्डे पार्वतीतपश्चर्यावर्णनंनामैकविंशतितमोऽध्यायः ॥ २१ ॥ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ एवमुक्तास्तदा देवा विष्णुना परमेष्ठिना ॥ जग्मुः सर्वे महेशं च

CC-0. In Public Domain. Digitization by eGangotri

द्रष्टुकामाः पिनाकिनम् ॥ १ ॥ परे पारे समुद्रस्य परमेण समाधिना ॥ योगपीठे स्थितं शंभुं गणैश्च परिवारितम् ॥ २ ॥ यज्ञोपवीतविधिना उरसा बिभ्रतं वृतम् ॥ वासुकिं सर्पराजं च कंबलाश्वतरौ तथा ॥ ३ ॥ कर्णद्वये धारयंतं तथा कर्कोटकेन हि ॥ पुलहेन च बाहुभ्यां धारयंतं च कंकणे ॥ ४ ॥ सन्नूपुरे शङ्खकपद्मकाभ्यां संधारयंतं च विराजमानम् ॥ कर्पूरगौरं शितिकंठमद्भुतं वृषान्वितं देववरं ददर्शुः ॥ ५ ॥ तदा ब्रह्मा च विष्णुश्च ऋषयो देवदानवाः ॥ तुष्टुवुर्विविधैः सूक्तैर्वेदोपानिषदन्वितैः ॥ ६ ॥ ॥ ब्रह्मोवाच ॥ ॥ नमो रुद्राय देवाय मदनांतकराय च ॥ भर्गाय भूरिभाग्याय त्रिनेत्राय त्रिविष्टपे ॥ ७ ॥ शिपिविष्टाय भीमाय शेषशायिन्नमोनमः ॥ त्र्यंबकाय जगद्धात्रे विश्वरूपाय वै नमः ॥ ८ ॥ त्वं धाता सर्वलोकानां पिता माता त्वमीश्वरः ॥ कृपया परया युक्तः पाह्यस्मांस्त्वं महेश्वर ॥ ९ ॥ इत्थं स्तुवत्सु देवेषु नन्दी प्रोवाच तान्प्रति ॥ किमर्थमागता यूयं किं वा मनसि वर्तते ॥ ११ ॥ ते प्रोचुर्देवकार्यार्थं विज्ञप्तुं शंभुमागताः ॥ विज्ञप्तो नंदिना तेन शैलादेन महात्मना ॥ ध्यानस्थितो महादेवः सुरकार्यार्थसिद्धये ॥ ११ ॥ ब्रह्मादयः सुरगणाः सुरसिद्धसंघास्त्वां द्रष्टुमेव सुरवर्य विशेषयंति ॥ कार्य्यार्थिनोऽसुरवरैः परिभर्त्स्यमाना अभ्यागताः सपदि शत्रुभिरर्दिताश्च ॥ १२ ॥ तस्मात्त्वया हि देवेश त्रातव्याश्चाधुना सुराः ॥ एवं तेन तदा शंभुर्विज्ञप्तो नंदिना द्विजाः ॥ १३ ॥ शनैःशनैरुपरमच्छंभुः परमकोपनः ॥ समाधेः परमात्माऽसावुवाच परमेश्वरः ॥ १४ ॥ ॥ महादेव उवाच ॥ ॥ कस्माद्यूयं महाभागा ह्यागता मत्समीपगाः ॥ ब्रह्मादयो ह्यमी देवा ब्रूत कारणमद्य वै ॥ १५ ॥ तदा ब्रह्मा ह्युवाचेदं सुरकार्यं महत्तरम् ॥ तारकेण कृतं शंभो देवानां परमाद्भुतम् ॥ १६ ॥ कष्टात्कष्टतरं देव तद्विज्ञप्तुमिहागताः ॥ हे शंभो तव पुत्रेण औरसेन हतो भवेत् ॥ तारको देवशत्रुश्च नान्यथा मम भाषितम् ॥ १७ ॥ तस्मात्त्वया गिरिजा देव शंभो गृहीतव्या पाणिना दक्षिणेन ॥ पाणिग्रहेणैव महानुभाव दत्ता गिरीन्द्रेण च तां कुरुष्व ॥ १८ ॥ ब्रह्मणो हि वचः श्रुत्वा प्रहसन्नब्रवीच्छिवः ॥ यदा मया कृता देवी गिरिजा सर्वसुन्दरी ॥ १९ ॥ तदा सर्वे सुरेन्द्राश्च ऋषयो मुनयस्तथा ॥ सकामाश्च भविष्यंति अक्षमाश्च परे पथि ॥ २० ॥ मदनो हि मया दग्धः सर्वेषां कार्यसिद्धये ॥ मया ह्यधिकृता तन्वी गिरिजा च सुमध्यमा ॥ २१ ॥ तदानीमेव भो देवाः पार्वती मदनं च सा ॥ जीवयिष्यति भो ब्रह्मन्नात्र कार्या विचारणा ॥ २२ ॥ एवं विमृश्य भो देवाः कार्या कार्यविचारणा ॥ मदनेनैव दग्धेन सुरकार्यं महत्कृतम् ॥ २३ ॥ यूयं सर्वे च निष्कामा मया नास्त्यत्र संशयः ॥ यथाहं च सुराः सर्वे तथा यूयं प्रयत्नतः ॥ २४ ॥ तपः परमसंयुक्ताः कारयामः सुदुष्करम् ॥ परमानन्दसंयुक्ताः सुखिनः सर्व एव हि ॥ २५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यूयं समाधिना तेन मदनेन च विस्मृतम् ॥ कामो हि नरकायैव तस्मात्क्रोधोऽभिजायते ॥ २६ ॥ क्रोधाद्भवति संमोहः संमोहाद्भ्रमते मनः ॥ कामक्रोधौ परित्यज्य भवद्भिः सुरसत्तमैः ॥ सर्वैरेव च मंतव्यं मद्वाक्यं नान्यथा क्वचित् ॥ २७ ॥ एवं विश्राव्य भगवान्स हि देवो वृषध्वजः ॥ सुरान्प्रबोधयामास तथा ऋषिगणान्मुनीन् ॥ २८ ॥ तूष्णींभूतोऽभवच्छंभुर्ध्यानमाश्रित्य वै पुनः ॥ आस्ते पुरा यथावच्च गणैश्च परिवारितः ॥ २९ ॥ ध्यानस्थितं च तं दृष्ट्वा नन्दी सर्वान्विसृज्य तान् ॥ सब्रह्मसेन्द्रान्विबुधानुवाच प्रहसन्निव ॥ ३० ॥ यथागतेन मार्गेण गच्छध्वं मा विलंबितम् ॥ तथेति मत्वा ते सर्वे स्वंस्वं स्थानमथाऽव्रजन् ॥ ३१ ॥ गतेषु तेषु सर्वेषु समाधिस्थोऽभवद्भवः ॥ आत्मानमात्मना कृत्वा आत्मन्येव विचिंतयन् ॥ ३२ ॥ परात्परतरं स्वच्छं निर्मलं निरवग्रहम् ॥ निरञ्जनं निराभासं यस्मिन्मुह्यंति सूरयः ॥ ३३ ॥ भानुर्न भात्यग्निरथो शशी वा न ज्योतिरेवं न च मारुतो न हि ॥ यं केवलं वस्तुविचारतोऽपि सूक्ष्मात्परं सूक्ष्मतरात्परं च ॥ ३४ ॥ अनिर्देश्य मचिन्त्यं च निर्विकारं निरामयम् ॥ ज्ञप्तिमात्रस्वरूपं च न्यासिनो यांति तत्र वै ॥ ३५ ॥ शब्दातीतं निर्गुणं निर्विकारं सत्तामात्रं ज्ञान गम्यं त्वगम्यम् ॥ यत्तद्वस्तु सर्वदा कथ्यते वै वेदातीतैश्चागमैर्मन्त्रभूतैः ॥ ३६ ॥ तद्वस्तुभूतो भगवान्स ईश्वरः पिनाकपाणिर्भगवान्वृषध्वजः ॥ येनैव साक्षान्मकरध्वजो हतस्तपो जुषाणः परमेश्वरः सः ॥ ३७ ॥ ॥ लोमश उवाच ॥ ॥ गिरिजा हि तदा देवी तताप परमं तपः[1] ॥ तपसा तेन रुद्रोऽपि उत्तमं भयमागतः ॥ ३८ ॥ विजित्य तपसा देवी पार्वती परमेण हि ॥ शम्भुं सर्वार्थदं स्थाणुं केवलं स्वस्वरूपिणम् ॥ ३९ ॥ यदा जितस्तया देव्या तपसा वृषभध्वजः ॥ समाधेश्चलितो भूत्वा यत्र सा पार्वती स्थिता ॥ ४० ॥ जगाम त्वरितेनैव देवदेवः पिनाकधृक् ॥ तत्रापश्यत्स्थितां देवीं सखीभिः परिवारिताम् ॥ ४१ ॥ वेदिकोपरि विन्यस्तां यथैव शशिनः कलाम् ॥ स देवस्तां निरीक्ष्याथ बटुर्भूत्वाथ तत्क्षणात् ॥ ४२ ॥ ब्रह्मचारिस्वरूपेण महेशो भगवान्भवः ॥ सखीनां मध्यमाश्रित्य ह्युवाच बटुरूपवान् ॥ किमर्थमालिमध्यस्था तन्वी सर्वांगसुन्दरी ॥ ४३ ॥ केयं कस्य कुतो याता किमर्थं तप्यते तपः ॥ सर्वं मे कथ्यतां सख्यो याथातथ्येन संप्रति ॥ ४४ ॥ तदोवाच जया रुद्रं तपसः कारणं परम् ॥ ४५ ॥ हिमाद्रेर्दुहितेयं वै तपसा रुद्रमीश्वरम् ॥ प्राप्तुकामा पतित्वेन सेयमत्रोपविश्य च ॥ ४६ ॥ तपस्तताप सुमहत्सर्वेषां दुरतिक्रमम् ॥ बटो जानीहि मे वाक्यं नान्यथा मम भाषितम् ॥ ४७ ॥ तच्छ्रुत्वा वचनं

१ तपः—इति दूरान्वितमप्यर्थसंबन्धाद्बोध्यम् ।

CC-0. In Public Domain. Digitization by eGangotri

तस्याः प्रहस्येदमुवाच ह ॥ शृण्वतीनां सखीनां वै महेशो बटुरूपवान् ॥ ४८ ॥ मूढेयं पार्वती सख्यो न जानाति हिताहितम् ॥ किमर्थं च
तपः कार्यं रुद्रप्राप्त्यर्थमेव च ॥ ४९ ॥ सोऽमंगलः कपाली च श्मशानालय एव च ॥ अशिवः शिवशब्देन भण्यते च वृथाथ वै ॥ ५० ॥
अनया हि वृतो रुद्रो यदा सख्यः समेष्यति ॥ तदेयमशुभा तन्वी भविष्यति न संशयः ॥ ५१ ॥ यो दक्षशापाद्धिकृतो यज्ञबाह्योऽभवद्विटः ॥ ये
ह्यंगभूताः शर्वस्य सर्पा ह्यासन्महाविषाः ॥ ५२ ॥ शवभस्मान्वितो रुद्रः कृत्तिवासा ह्यमंगलः ॥ पिशाचैः प्रमथैर्भूतैरावृतो हि निरंतरम् ॥
॥ ५३ ॥ तेन रुद्रेण किं कार्यमनया सुकुमारया ॥ निवार्यतां सखीभिश्च भर्तुकामा पिशाचवत् ॥ ५४ ॥ इंद्रं हित्वा मनोज्ञं च यमं चैव महाप्र
भम् ॥ नैर्ऋतं च विशालाक्षं वरुणं च अपां पतिम् ॥ ५५ ॥ कुबेरं पवनं चैव तथैव च विभावसुम् ॥ एवमादीनि वाक्यानि उवाच परमे
श्वरः ॥ सखीनां शृण्वतीनां च यत्र सा तपसि स्थिता ॥५६॥ इत्याकर्ण्य वचस्तस्य रुद्रस्य बटुरूपिणः ॥ चुकोप च शिवा साध्वी महेशं बटुरू
पिणम् ॥ ५७ ॥ जये त्वं विजये साध्वि प्रम्लोचेऽप्यथ सुन्दरि ॥ सुलोचने महाभागे समीचीनं कृतं हि मे ॥ ५८ ॥ किमेतस्य बटोः कार्यं भव
तीनामिहाधुना ॥ बटुस्वरूपमास्थाय आगतो देवनिंदकः ॥ ५९ ॥ अयं विसृज्यतां सख्यः किमनेन प्रयोजनम् ॥ बटुस्वरूपिणं रुद्रं कुपिता
सा ततोऽब्रवीत् ॥ ६० ॥ बटो गच्छाशु त्वरितो न स्थेयं च त्वयाऽधुना ॥ किमनेन प्रलापेन तव नास्ति प्रयोजनम् ॥ ६१ ॥ बटुर्निर्भर्त्सित
स्तत्र तया चैवं तदा पुनः ॥ प्रहस्य वै स्थिरो भूत्वा पुनर्वाक्यमथाब्रवीत् ॥ ६२ ॥ शनैःशनैरवितथं विजयां प्रति सत्वरम् ॥ कस्मात्कोपस्तया
तन्वि कृतः केनैव हेतुना ॥६३॥ सर्वेषामपि तद्वाच्यं वचनं सूक्तमेव यत् ॥ यथोक्तेन च वाक्येन कस्मात्तन्वी प्रकोपिता ॥ ६४ ॥ यः शंभुरुच्यते
लोके भिक्षुको भिक्षुकप्रियः ॥ यदि मे ह्यनृतं प्रोक्तं तदा कोप इहोचितः ॥ ६५॥ इयं तावत्सुरूपा च विरूपोऽसौ सदाशिवः ॥ विशालाक्षी त्वियं
बाला विरूपाक्षो भवस्तथा ॥ ६६ ॥ एवंभूतेन रुद्रेण मोहितेयं कथं भवेत् ॥ सभाग्यो हि पतिः स्त्रीणां सदा भाव्यो रतिप्रियः ॥ ६७ ॥ इयं
कथं मोहितास्ति निर्गुणेन गुणात्मिका ॥ न श्रुतो न च विज्ञातो न दृष्टः केन वा शिवः ॥ ६८ ॥ सकामानां च भूतानां दुर्लभो
हि सदाशिवः ॥ तपसा परमेणैव गर्वितेयं सुमध्यमा ॥ ६९ ॥ निःस्तंभो हि सदा स्थाणुः कथं प्राप्स्यति तं पतिम् ॥ मयोक्तं
किं विशालाक्षि कस्मान्मे रुषिताऽधुना ॥ ७० ॥ यावद्दोषो भवेन्नृणां नारीणां च विशेषतः ॥ तेन रोषेण तत्सर्वं भस्मीभूतं भवि
ष्यति ॥ ७१ ॥ सुकृतं चोर्जितं तन्वि सत्यमेवोदितं सति ॥ कामः क्रोधश्च लोभश्च दंभो मात्सर्यमेव च ॥ ७२ ॥ हिंसेर्ष्या च प्रपंचश्च

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तेन सर्वं विनश्यति ॥ तस्मात्तपस्विभिर्युक्तं कामक्रोधादिवर्जनम् ॥ ७३ ॥ यदीश्वरो हृदि मध्ये विभाव्यो मनीषिभिः सर्वदा ज्ञप्तिमात्रः ॥ तदा सर्वैर्मुनिवृत्त्या विभाव्यस्तपस्विभिर्नान्यथा चिंतनीयः ॥ ७४ ॥ एतच्छ्रुत्वा वचनं तस्य शंभोस्तदाब्रवीद्विजया तं च सर्वम् ॥ गच्छात्र किंचित्तव नास्ति कार्यं न वक्तव्यं वचनं बालिशान्यत् ॥ ७५ ॥ एवं विवदमानं तं बटुरूपं सदाशिवम् ॥ विसर्जयामास तदा विजया वाक्यकोविदा ॥ ॥ ७६ ॥ तिरोधानं गतः सद्यो महेशो गिरिजां प्रति ॥ अलक्ष्यमाणः सर्वासां सखीनां परमेश्वरः ॥ ७७ ॥ प्रादुर्बभूव सहसा निजरूपधरस्तदा ॥ यदा ध्यानस्थिता देवी निजध्यानपरा सती ॥ ७८ ॥ तदा हृदिस्थो देवेशो बहिर्दृष्टिचरोभवत् ॥ नेत्रे उन्मील्य सा साध्वी गिरिजायतलोचना ॥ अपश्यद्देवदेवेशं सर्वलोकमहेश्वरम् ॥ ७९ ॥ द्विभुजं चैकवक्त्रं च कृत्तिवाससमद्भुतम् ॥ कपर्दं चंद्ररेखांकं निवीतं गजचर्मणा ॥ ८० ॥ कर्णस्थौ हि महानागौ कंबलाश्वतरौ तदा ॥ वासुकिः सर्पराजश्च कृताहारो महाद्युतिः ॥ ८१ ॥ वलयानि महार्हाणि तदा सर्पमयानि च ॥ कृतानि तेन रुद्रेण तथा शोभाकराणि च ॥ ८२ ॥ एवंभूतस्तदा शंभुः पार्वतीं प्रति चाग्रतः ॥ उवाच त्वरया युक्तो वरं वरय भामिनि ॥ ८३ ॥ व्रीडया परया युक्ता साध्वी प्रोवाच शंकरम् ॥ त्वं नाथो मम देवेश त्वया किं विस्मृतं पुरा ॥ ८४ ॥ दक्षयज्ञविनाशं च यदर्थं कृतवान्प्रभो ॥ स त्वं साहं समुत्पन्ना मेनायां कार्यसिद्धये ॥ ८५ ॥ देवानां देवदेवेश तारकस्य वधं प्रति ॥ भवतो हि मया देव भविष्यति कुमारकः ॥ ८६ ॥ तस्मात्त्वया हि कर्तव्यं मम वाक्यं महेश्वर ॥ गंतव्यं हिमवत्पार्श्वं नात्र कार्या विचारणा ॥ ८७ ॥ याचस्व मां महादेव ऋषिभिः परिवारितः ॥ करिष्यति न संदेहस्तव वाक्यं च मे पिता ॥ ८८ ॥ दक्षकन्या पुराहं वै पित्रा दत्ता यदा तव ॥ यथोक्तविधिना तत्र विवाहो न कृतस्त्वया ॥ ॥ ८९ ॥ न ग्रहाः पूजितास्तेन दक्षेण च महात्मना ॥ ग्रहाणां विषयत्वेन सच्छिद्रोऽयं महानभूत् ॥ ९० ॥ तस्माद्यथोक्तविधिना कर्तुमर्हसि सुव्रत ॥ विवाहं स्वं महाभाग देवानां कार्यसिद्धये ॥ ९१ ॥ तदोवाच महाबाहो गिरिजां प्रहसन्निव ॥ स्वभावेनैव तत्सर्वं जंगमाजंगमं महत् ॥ जातं त्वया मोहितं च त्रिगुणैः परिवेष्टितम् ॥ ९२ ॥ अहंकारात्समुत्पन्नं महत्तत्त्वं च पार्वति ॥ महत्तत्त्वात्तमो जातं तमसा वेष्टितं नभः ॥ ९३ ॥ नभसो वायुरुत्पन्नो वायोरग्निरजायत ॥ अग्नेरापः समुत्पन्ना अद्भ्यो जाता मही तदा ॥ ९४ ॥ मह्यादिकानि स्थास्नूनि चराणि च वरानने ॥ दृश्यं यत्सर्वमेवैतन्नश्वरं विद्धि मानिनि ॥ ९५ ॥ एकोऽनेकत्वमापन्नो निर्गुणो हि गुणावृतः ॥ स्वज्योतिर्भाति यो नित्यं परज्योत्स्नान्वितोऽभवत् ॥ स्वतंत्रः परतंत्रश्च त्वया देवि महत्कृतम् ॥ ९६ ॥ मायामयं कृतमिदं च जगत्समग्रं सर्वात्मना अवधृतं परया च बुद्ध्या ॥ सर्वात्मभिः सुकृतिभिः

CC-0. In Public Domain. Digitization by eGangotri

परमार्थभावैः संसक्तिरिंद्रियगणैः परिवेष्टितं च ॥९७॥ के ग्रहाः के उडुगणाः के बाध्यंते त्वया कृताः ॥ विमुक्तं चाधुना देवि शर्वार्थं वरवर्णिनि
॥ ९८ ॥ गुणकार्यप्रसंगेन आवां प्रादुर्भवः कृतः ॥ त्वं हि वै प्रकृतिः सूक्ष्मा रजःसत्त्वतमोमयी ॥ ९९ ॥ व्यापारदक्षा सततमहं चैव सुमध्यमे ॥
हिमालयं न गच्छामि न याचामि कथंचन ॥ १०० ॥ देहीति वचनात्सद्यः पुरुषो याति लाघवम् ॥ इत्थं ज्ञात्वा च भो देवि किमस्माकं वदस्व
वै ॥ १०१ ॥ कार्यं त्वदाज्ञया भद्रे तत्सर्वं वक्तुमर्हसि ॥ तेनोक्तात्र तदा साध्वी उवाच कमलेक्षणा ॥ १०२ ॥ त्वमात्मा प्रकृतिश्चाहं नात्र
कार्या विचारणा ॥ तथापि शंभो कर्तव्यं मम चोद्वहनं महत् ॥ १०३ ॥ देहो ह्यविद्ययाक्षिप्तो विदेहो हि भवान्परः ॥ तथाप्येवं महादेव
शरीरावरणं कुरु ॥ १०४ ॥ प्रपंचरचनां शंभो कुरु वाक्यान्मम प्रभो ॥ याचस्व मां महादेव सौभाग्यं चैव देहि मे ॥ १०५ ॥ इत्येवमुक्तः स
तया महात्मा महेश्वरो लोकविडंबनाय ॥ तथेति मत्वा प्रहसञ्जगाम स्वमालयं देववरैः सुपूजितः ॥ १०६ ॥ एतस्मिन्नंतरे तत्र हिमवान्गि
रिभिः सह ॥ मेनया भार्यया सार्द्धमाजगाम त्वरान्वितः ॥ १०७ ॥ पार्वतीदर्शनार्थं च सुतैश्च परिवारितः ॥ तेन दृष्टा महादेवी सखीभिः
परिवारिता ॥१०८॥ पार्वत्या च तदा दृष्टो हिमवान्गिरिभिः सह ॥ अभ्युत्थानपरा साध्वी प्रणम्य शिरसा तदा ॥ पितरौ च तदा भ्रातॄन्बंधूंश्चैव
च सर्वशः ॥ १०९ ॥ स्वमंकमारोप्य महायशास्तदा सुतां परिष्वज्य च बाष्पपूरितः ॥ उवाच वाक्यं मधुरं हिमालयः किं वै कृतं साध्वि यथा
तथेन ॥ ११० ॥ तत्कथ्यतां महाभागे सर्वं शुश्रूषतां हि नः ॥ तच्छ्रुत्वा मधुरं वाक्यमुवाच पितरं प्रति ॥ १११ ॥ तपसा परमेणैव
प्रार्थितो मदनांतकः ॥ शांतं च मे महत्कार्यं सर्वेषामपि दुर्लभम् ॥ ११२ ॥ तत्र तुष्टो महादेवो वरणार्थं समागतः ॥ स मयोक्तस्तदा शंभुर्मम
पाणिग्रहः कथम् ॥ ११३ ॥ क्रियते च तदा शंभो मम पित्रा विनाधुना ॥ यथागतेन मार्गेण गतोऽसौ त्रिपुरांतकः ॥ ११४ ॥ तस्यास्तद्वचनं
श्रुत्वा अवाप परमां मुदम् ॥ बंधुभिः सह धर्मात्मा उवाच स्वसुतां पुनः ॥ ११५ ॥ स्वगृहं चाद्य गच्छामो वयं सर्वे च भूधराः ॥ अनया
राधितो देवः पिनाकी वृषभध्वजः ॥ ११६ ॥ इत्यूचुस्ते सुराः सर्वे हिमालयपुरोगमाः ॥ पार्वतीसहिताः सर्वे तुष्टुवुर्वाग्भिरादृताः ॥ ११७ ॥
तां स्तूयमानां च तदा हिमालयो ह्यारोप्य चांसं वरवर्णिनीं च ॥ सर्वेथ शैलाः परिवार्य चोत्सुकाः समानयामासुरथ स्वमालयम् ॥ ११८ ॥
देवदुंदुभयो नेदुः शंखतूर्याण्यनेकशः ॥ वादित्राणि बहून्येव वाद्यमानानि सर्वशः ॥ ११९ ॥ पुष्पवर्षेण महता तेनानीता गृहं प्रति ॥ १२० ॥
सा पूज्यमाना बहुभिस्तदानीं महाविभूत्युल्लसिता तपस्विनी ॥ तथैव देवैः सह चारणैश्च महर्षिभिः सिद्धगणैश्च सर्वशः ॥ १२१ ॥ पूज्यमाना

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तदा देवी उवाच कमलासनम् ॥ देवानृषीन्पितॄन्यक्षानन्यान्सर्वान्समागतान् ॥ १२२ ॥ गच्छध्वं सर्व एवैते येन्ये ह्यत्र समागताः ॥ स्वंस्वं स्थानं यथाजोषं सेव्यतां परमेश्वरः ॥१२३॥ एवं तदानीं स्वपितुर्गृहं गता संशोभमाना परमेण वर्चसा ॥ सा पार्वती देववरैः सुपूजिता संचिंतयंती मनसा सदाशिवम् ॥ १२४ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां प्रथमे माहेश्वरखण्डे केदारखण्डे पार्वत्यै शंकरेण स्वरूपदर्शनंनाम द्वाविंशोऽध्यायः ॥ २२ ॥ ॥ लोमश उवाच ॥ ॥ एतस्मिन्नंतरे तत्र महेशेन प्रणोदिताः ॥ आजग्मुः सहसा सद्य ऋषयोऽपि हिमालयम् ॥ १ ॥ तान्दृष्ट्वा सहसोत्थाय हिमाद्रिः प्रीतमानसः ॥ पूजयामास तान्सर्वानुवाच नतकंधरः ॥ २ ॥ किमर्थमागता यूयं ब्रूतागमनकारणम् ॥ तदोचुः सप्त ऋषयो महेशप्रेरिता वयम् ॥ ३ ॥ समागतास्त्वत्सकाशं कन्यायाश्च विलोकने ॥ तानस्मान्विद्धि भोः शैल स्वां कन्यां दर्शयाशु वै ॥ ४ ॥ तथेत्युक्त्वा ऋषिगणानानीता तत्र पार्वती ॥ स्वोत्संगे परिगृह्याशु गिरीन्द्रः पुत्रवत्सलः ॥ हिमवान्गिरिराजोऽथ उवाच प्रहसन्निव ॥ ५ ॥ इयं सुता मदीया हि वाक्यं शृणुत मे पुनः ॥ तपस्विनां वरिष्ठोऽसौ विरक्तो मदनांतकः ॥ ६ ॥ कथमुद्वहनार्थी च येनानंगः कृतः स्मरः ॥ अत्यासन्ने चातिदूरे आढ्ये धनविवर्जिते ॥ वृत्तिहीने च मूर्खे च कन्यादानं न शस्यते ॥ ७ ॥ मूढाय च विरक्ताय आत्मसंभाविताय च ॥ आतुराय प्रमत्ताय कन्यादानं न कारयेत् ॥८॥ तस्मान्मया विचार्यैव भवद्भिर्ऋषिसत्तमाः ॥ प्रदातव्या महेशाय एतन्मे व्रतमुत्तमम् ॥९॥ तच्छ्रुत्वा गिरिराजस्य वचनं ते महर्षयः ॥ ऐकपद्येन ऊचुस्ते प्रहस्य च हिमालयम् ॥ १० ॥ यया कृतं तपस्तीव्रं यया चाराधितः शिवः ॥ तपसा तेन संतुष्टः प्रसन्नोद्य सदाशिवः ॥ ११ ॥ अस्यास्तस्य च भोः शैल न जानासि च किंचन ॥ महिमानं परं चैव तस्मादेनां प्रयच्छ वै ॥ १२ ॥ शिवाय गिरिजामेनां कुरुष्व वचनं हि नः ॥ तच्छ्रुत्वा वचनं तेषामृषीणां भावितात्मनाम् ॥ १३ ॥ उवाच त्वरया युक्तः पर्वतान्पर्वतेश्वरः ॥ हे मेरो हे निषध किं गन्धमादन मन्दर ॥ मैनाक क्रियतामद्य शंसध्वं च यथातथम् ॥ १४ ॥ मेना तदा उवाचेदं वाक्यं वाक्यविशारदा ॥ अधुना किं विमर्शेन कृतं कार्यं तदेव हि ॥ १५ ॥ उत्पन्नेयं महाभागा देवकार्यार्थमेव च ॥ प्रदातव्या शिवायेति शिवस्यार्थेऽवतारिता ॥ २६ ॥ अनयाराधितो रुद्रो रुद्रेण परिभाविता ॥ इयं सती महाभागा शिवाय प्रतिदीयताम् ॥ १७ ॥ निमित्तमात्रं च कृतं तया वै शिवपूजने ॥ एतच्छ्रुत्वा वचस्तस्या मेनायाः परिभाषितम् ॥ १८ ॥ परितुष्टो हिमाद्रिश्च वाक्यं चेदमुवाच ह ॥ ऋषीन्प्रति निरीक्षंस्तां कन्येयं मम संप्रति ॥ १९ ॥ ततः समानीय

CC-0. In Public Domain. Digitization by eGangotri

सुलोचनां तां श्यामां नितंबार्पितमेखलां शुभाम् ॥ वैडूर्यमुक्तावलयान्दधानां भास्वत्प्रभां चांद्रमसीं वै रेखाम् ॥ २० ॥ लावण्यामृतवापिकां
सुवदनां गौरीं सुवासां शुभां दृष्ट्वा ते ह्यृषयोऽपि मोहमगमन्भ्रांतास्तदा संभ्रमात् ॥ नोचुः किंचन वाक्यमेव सुधियो ह्यासन्प्रमत्ता इव स्तब्धाः
कान्तिमतीमतीव रुचिरां त्रैलोक्यनाथप्रियाम् ॥ २१ ॥ एवं तदा ते ह्यृषयोऽपि मोहिता रूपेण तस्याः किमुताथ देवताः ॥ तथैव सर्वे च
निरीक्ष्य तन्वीं सतीं गिरीन्द्रस्य सुतां शिवप्रियाम् ॥ २२ ॥ ततः पुनश्चैत्य शिवं शिवप्रियाः शशंसुरस्मां ऋषयस्तदानीम् ॥ २३ ॥ ॥ ऋषय
ऊचुः ॥ ॥ भूषिता हि गिरीन्द्रेण स्वसुता नास्ति संशयः ॥ उद्वोढुं गच्छ देवेश देवैश्च परिवारितः ॥ २४ ॥ गच्छ शीघ्रं महादेव पार्वतीमात्मज
न्मने ॥ तच्छ्रुत्वा वचनं तेषां प्रहस्येदमुवाच ह ॥ २५ ॥ विवाहो हि महाभागा न दृष्टो न श्रुतोऽपि वा ॥ मया पुरा च ऋषयः कथ्यतां च विशे
षतः ॥ २६ ॥ तदोचुर्ऋषयः सर्वे प्रहसंतः सदाशिवम् ॥ विष्णुमाह्वय वै देव ब्रह्माणं च शतक्रतुम् ॥ २७ ॥ तथा ऋषिगणांश्चैव यक्षगन्धर्वपन्न
गान् ॥ सिद्धविद्याधरांश्चैव किंनरांश्चाप्सरोगणान् ॥ २८ ॥ एतांश्चान्यांश्च सुबहूनानयस्वेति सत्वरम् ॥ तदाकर्ण्य ऋषिप्रोक्तं वाक्यं वाक्यवि
शारदः ॥ २९ ॥ उवाच नारदं देवो विष्णुमानय सत्वरम् ॥ ब्रह्माणं च महेन्द्रं च अन्यांश्चैव समानय ॥ ३० ॥ शंभोर्वचनमादाय शिरसा
लोकपावनः ॥ जगाम त्वरितो भूत्वा वैकुण्ठं विष्णुवल्लभः ॥ ३१ ॥ ददर्श देवं परमासने स्थितं श्रिया च देव्या परिसेव्यमानम् ॥ चतुर्भुजं देव
वरं महाप्रभं नीलोत्पलश्यामतनुं वरेण्यम् ॥ ३२ ॥ महार्हरत्नावृतचारुकुण्डलं महाकिरीटोत्तमरत्नभास्वतम् ॥ सुवैजयंत्या वनमालया वृतं स नार
दस्तं भुवनैकसुन्दरम् ॥ ३३ ॥ उवाच नारदोऽभ्येत्य शंभोर्वाक्यमथादरात् ॥ ब्रह्मवीणां वाद्यमानः सर्वज्ञ ऋषिसत्तमः ॥ ३४ ॥ एह्येहि त्वं महा
विष्णो महादेवं त्वरान्वितः ॥ उद्वाहनार्थं शंभोश्च त्वमेकः कार्यसाधकः ॥ ३५ ॥ प्रहस्य भगवान्प्राह नारदं प्रति वै तदा ॥ कथमुद्वहने बुद्धिरु
त्पन्ना तस्य शूलिनः ॥ विज्ञातार्थोऽपि भगवान्नारदं परिपृष्टवान् ॥ ३६ ॥ ॥ नारद उवाच ॥ ॥ तपसा महता रुद्रः पार्वत्या परितोषितः ॥
स्वयमेवागतस्तत्र यत्रास्ते गिरिजा सती ॥ ३७ ॥ दासोऽहमवदच्छंभुः पार्वत्या परितोषितः ॥ पार्वतीं च समभ्यर्थ्य वरयस्व च भामिनि ॥ ३८ ॥
त्वरितेनावदच्छंभुस्त्वामाह्वयति संप्रति ॥ तस्य तद्वचनं श्रुत्वा देवदेवो जनार्दनः ॥ नारदेन समायुक्तः पार्षदैः परिवारितः ॥ ३९ ॥ सुपर्णमारुह्य
तदा महात्मा योगीश्वराणां प्रभुरच्युतो महान् ॥ ययौ तदाऽऽकाशपथा हरिः स्वयं सनारदो देववरैः समेतः ॥ ४० ॥ तं दृष्ट्वा त्वरितं देवो योगिध्ये

१ इवार्थे वशब्दः । २ अस्मै:--ऋषयः--इति पदच्छेदः । ३ नुमभाव आर्षः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यांघ्रिपंकजः ॥ अभ्युत्थाय मुदा युक्तः परिष्वज्य च शार्ङ्गिणम् ॥ ४१ ॥ तदा हरिहरौ देवावैकपद्येन तिष्ठतः ॥ ऊचतुः स्म तदान्योन्यं क्षेमं कुशलमेव च ॥ ४२ ॥ ॥ ईश्वर उवाच ॥ ॥ गिरिजातपसा विष्णो जितोऽहं नात्र संशयः ॥ पाणिग्रहार्थमेवाद्य गंतुकामो हिमालयम् ॥ ४३ ॥ यथार्थेन च भो विष्णो कथयामि तवाग्रतः ॥ यदा दक्षेण भो विष्णो प्रदत्ता च पुरा सती ॥४४॥ न च संकल्पविधिना मया पाणिग्रहः कृतः ॥ अधुनैव मया कार्यं कर्मविस्तारणं बहु ॥ ४५ ॥ यत्कार्यं तत्र जानामि सर्वं पाणिग्रहोचितम् ॥ शंभोस्तद्वचनं श्रुत्वा प्रहस्य मधुसूदनः ॥ ४६ ॥ यावद्वक्तुं समारेभे तावद्ब्रह्मा समागतः ॥ इंद्रेण सह सर्वैश्च लोकपालैस्त्वरान्वितः ॥४७॥ तथैव देवासुरयक्षदानवा नागाः पतंगाप्सरसो महर्षयः ॥ समेत्य सर्वे परिवक्रुमीशमूचुस्तदानीं शिरसा प्रणम्य ॥ ४८ ॥ गच्छगच्छ महादेव अस्माभिः सहितः प्रभो ॥ ततो विष्णुरुवाचेदं प्रस्तावसदृशं वचः ॥ ४९ ॥ गृह्योक्तविधिना शंभो कर्म कर्तुमिहार्हसि ॥ ५० ॥ नांदीमुखं मण्डपस्थापनं च तथा चैतत्कुरु धर्मेण युक्तम् ॥ महानदीसंगमं वर्जयित्वा कुर्वंति केचिद्वेदमनीषिणश्च ॥ ५१ ॥ मण्डपस्थापनं चैव क्रियतां ह्यधुना विभो ॥ तथोक्तो विष्णुना शंभुश्चकारात्महिताय वै ॥ ५२ ॥ ब्रह्मादिभिः कृतं तेन सर्वमभ्युदयोचितम् ॥ ग्रहाणां पूजनं चक्रे कश्यपो ब्रह्मणा युतः ॥ ५३ ॥ तथात्रिश्च वशिष्ठश्च गौतमोथ गुरुर्भृगुः ॥ कण्वो बृहस्पतिः शक्तिर्जमदग्निः पराशरः ॥ ५४ ॥ मार्कंडेयः शिलावाकः शून्यपालोऽक्षतश्रमः ॥ अगस्त्यश्च्यवनो गर्गः शिलादोऽथ महामुनिः॥५५॥ एते चान्ये च बहवो ह्यागताः शिवसन्निधौ ॥ ब्रह्मणा नोदितास्तत्र चक्रुस्ते विधिवत्क्रियाम् ॥ ५६ ॥ वेदोक्तविधिना सर्वे वेदवेदांगपारगाः ॥ चक्रू रक्षां महेशस्य कृतकौतुकमंगलाम् ॥ ५७ ॥ ऋग्यजुःसामसहितैः सूक्तैर्नानाविधैस्तथा ॥ मंगलानि च भूरीणि ऋषयस्तत्त्ववेदिनः ॥ ५८ ॥ अभ्यंजनादिकं सर्वं चक्रुस्तस्य परात्मनः ॥ ख्यातः कपर्दस्तस्यैव शिवस्य परमात्मनः ॥ ५९ ॥ अनेकैर्मौक्तिकैर्युक्ता मुण्डमालाऽभवत्तदा ॥ ये सर्पा ह्यंगभूताश्च ते सर्वे तत्क्षणादिव ॥ बभूवुर्मंडनान्येव जातरूपमयानि च ॥ ६० ॥ सर्वभूषणसंपन्नो देवदेवो महेश्वरः ॥ ययौ देवैः परिवृतः शैलराजपुरं प्रति ॥ ६१ ॥ चंडिका वरभगिनी तदा जाता भयावहा ॥ प्रेतासना गता चण्डी सर्पाभरणभूषिता ॥ ॥ ६२ ॥ हैमं कलशमादाय पूर्णं मूर्ध्ना महाप्रभा ॥ परिवारैर्महाचंडी दीप्तास्या ह्युग्रलोचना ॥ ६३ ॥ तत्र भूतान्यनेकानि विरूपाणि सहस्रशः ॥ तैः समेताग्रतश्चंडी जगाम विकृतानना ॥ ६४ ॥ तस्याः सर्वे पृष्ठतश्च गणाः परमदारुणाः ॥ कोटयेकादशसंख्याका रौद्रा रुद्रप्रियाश्च ये ॥ ६५ ॥ तदा डमरुनिर्घोषव्याप्तमासीज्जगत्त्रयम् ॥ भेरीझांकारशब्देन शंखानां निनदेन च ॥ ६६ ॥ तथा दुंदुभिनिर्घोषैः शब्दः

CC-0. In Public Domain. Digitization by eGangotri

कोलाहलोऽभवत् ॥ गणानां पृष्ठतो भूत्वा सर्वे देवाः समुत्सुकाः ॥ अन्वयुः सर्वसिद्धाश्च लोकपालैः समन्विताः ॥ ६७ ॥ मध्ये व्रजन्महेंद्रोऽथ ऐरावतमुपास्थितः ॥ शुभ्रेणोच्छ्रियमाणेन छत्रेण परमेण हि ॥ ६८ ॥ चामरैर्वीज्यमानोऽसौ सुरैर्बहुभिरावृतः ॥ तदा तु व्रजमानास्त ऋषयो बहवो ह्यमी ॥ ६९ ॥ भरद्वाजादयो विप्राः शिवस्योद्वहनं प्रति ॥ शाकिन्यो यातुधानाश्च वेताला ब्रह्मराक्षसाः ॥ ७० ॥ भूतप्रेतपिशाचाश्च तथान्ये प्रमथादयः ॥ पृच्छमानास्तदा चंडीं पृष्ठतोऽन्वगमंस्तदा ॥ ७१ ॥ क्व गता साऽधुना चंडी धावमानास्तदा भृशम् ॥ प्राप्ता गता व्रजंतीं तां प्रणिपत्य महाप्रभाम् ॥ ७२ ॥ अथ प्रोचुस्तदा सर्वे चंडीं भैरवसंयुताम् ॥ विनास्माभिः कुतो यासि वद चंडि यथा तथा ॥ ७३ ॥ प्रहस्यो वाच सा चंडी भूतानां तत्र शृण्वताम् ॥ शंभोरुद्वहनार्थाय प्रेतारूढा व्रजाम्यहम् ॥ ७४ ॥ हैमं कलशमादाय शिरसा बिभ्रती स्वयम् ॥ करवालीस्व रूपेण चंडी जाता ततः स्वयम् ॥ ७५ ॥ भूतैः परिवृता सर्वैः सर्वेषामग्रतोऽव्रजत् ॥ गणास्तामनुजग्मुस्ते गणानां पृष्ठतः सुराः ॥ ७६ ॥ इंद्रादयो लोकपाला ऋषयस्तेऽग्रपृष्ठतः ॥ ऋषीणां पृष्ठतो भूत्वा पार्षदाश्च महाप्रभाः ॥ ७७ ॥ विष्णोरमितभावज्ञा मुकुंदाच्च मनोरमाः ॥ सर्वे पयोदसंकाशाः स्रग्विणो वनमालिनः ॥ श्रीवत्सांकधराः सर्वे पीतवासोन्विताश्च ते ॥ ७८ ॥ चतुर्भुजाः कुंडलिनः किरीटकटकांगदैः ॥ हारनूपुरसूत्रैश्च कटिसूत्राङ्गु लीयकैः ॥ शोभिताः सर्व एवैते महापुरुषलक्षणाः ॥ ७९ ॥ तेषां मध्ये गतो विष्णुः श्रियोपेतः सुरारिहा ॥ ८० ॥ बभौ त्रिलोकीकृतविश्वमंगलो महा नुभावेर्हृदि कृत्य धिष्ठितः ॥ शिवेन साकं परमार्थदस्तदा हरिः परात्मा जगदेकबंधुः ॥ ८१ ॥ स तार्क्ष्यपुत्रोपरि संस्थितो महाँल्लक्ष्म्या समेतो भुवनैक भर्ता ॥ स चामरैर्वीज्यमानो मुनींद्रैः सर्वैः समेतो हरिरीश्वरो महान् ॥ ८२ ॥ तथा विरिंचिर्निजवाहनस्थो वेदैः समेतः सह षड्भिरंगैः ॥ तथागमैः सेतिहासैः पुराणैः स संवृतो हेमगर्भो बभूव ॥ ८३ ॥ वेधोहरिभ्यां च तदा सुरेंद्रैः समावृतश्चर्षिभिः संपरीतः ॥ वृषारूढो वृषकेतुर्दुरापो योगीश्वरैरपि सर्वैरगम्यः ॥ ८४ ॥ शुद्धस्फटिकसंकाशं वृषभं धर्मवत्सलम् ॥ समेतो मातृभिश्चैव गोभिश्च कृतलक्षणम् ॥ ८५ ॥ एभिस्समेतोऽसुर दानवैः सह ययौ महेशो विबुधैरलंकृतः ॥ हिमालयं गिरिवर्यं तदानीं पाणिग्रहार्थं प्रमदोत्तमायाः ॥ ८६ ॥ इति श्रीस्कांदे महापुराण एकाशीति साहस्र्यां संहितायां प्रथमे माहेश्वरखण्डे केदारखंडे श्रीशिवस्य विवाहवर्णनंनाम त्रयोविंशोऽध्यायः ॥ २३ ॥ ॥ लोमश उवाच ॥ ॥ तथैव सर्वं परया मुदान्वितश्चक्रे गिरींद्रः स्वसुतार्थमेव ॥ गर्गं पुरस्कृत्य महानुभावो मंगल्यभूमिं परया विभूत्या ॥ १ ॥ आहूय विश्वकर्माणं कारया

१ निजधारणस्थः—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मास सादरम् ॥ मंडपं च सुविस्तीर्णं वेदिकाभिर्मनोरमम् ॥ २ ॥ अयुतेनैव विस्तारं योजनानां द्विजोत्तमाः ॥ मंडपं च गुणोपेतं नानाश्चर्यसमन्वितम् ॥ ३ ॥ स्थावरं जंगमं चैव सदृशं च मनोहरम् ॥ जंगमं च जितं तत्र स्थावरेण तथैव च ॥ ४ ॥ जंगमेन च तत्रैव जितं स्थावरमेव च ॥ पयसा च जिता तत्र स्थलभूमिरभूत्तदा ॥ ५ ॥ जलं किं नु स्थलं तत्र न विदुस्तत्त्वतो जनाः ॥ क्वचित्सिंहाः क्वचिद्धंसाः सारसाश्च महाप्रभाः ॥ ६ ॥ क्वचिच्छिखंडिनस्तत्र कृत्रिमाः सुमनोहराः ॥ तथा नागाः कृत्रिमाश्च हयाश्चैव तथा मृगाः ॥ ७ ॥ के सत्याः के असत्याश्च संस्कृता विश्वकर्मणा ॥ तथैव चैवं विधिना द्वारपा अद्भुताः कृताः ॥ ८ ॥ पुंसो धनूंषि चोत्कृष्य स्थावरा जंगमोपमाः ॥ तथाश्वाः सादिभिश्चैव गजाश्च गजसादिभिः ॥ ९ ॥ चामरैर्वीज्यमानाश्च केचित्पुष्पांकुरान्विताः ॥ केचिच्च पुरुषास्तत्र विरेजुः स्रग्विणस्तथा ॥ ॥ १० ॥ कृत्रिमाश्च तथा बह्व्यः पताकाः कल्पितास्तथा ॥ द्वारि स्थिता महालक्ष्मीः क्षीरोदधिसमुद्भवा ॥ ११ ॥ गजाः स्वलंकृता ह्यासन्कृत्रिमा ह्यकृतोपमाः ॥ तथाश्वाः सादिभिश्चैव गजाश्च गजसादिभिः ॥ १२ ॥ रथा रथियुता ह्यासन्कृत्रिमा ह्यकृतोपमाः ॥ सर्वेषां मोहनार्थाय तथा च संसदः कृताः ॥ १३ ॥ महाद्वारि स्थितो नंदी कृतस्तेन हि मंडपे ॥ शुद्धस्फटिकसंकाशो यथा नंदी तथैव सः ॥ १४ ॥ तस्योपरि महद्दिव्यं पुष्पकं रत्नभूषितम् ॥ राजितं पल्लवच्छत्रैश्चामरैश्च सुशोभितम् ॥ १५ ॥ वामपार्श्वे गजौ द्वौ च शुद्धकाश्मीरसन्निभौ ॥ चतुर्दंतौ षष्टिवर्षौ महात्मानौ महाप्रभौ ॥ १६ ॥ तथैव दक्षिणे पार्श्वे द्वावश्वौ दंशितौ कृतौ ॥ रत्नालंकारसंयुक्ताँल्लोकपालांस्तथैव च ॥ १७ ॥ षोडश प्रकृतीस्तेन याथातथ्येन धीमता ॥ सर्वे देवा यथार्थेन कृता वै विश्वकर्मणा ॥ १८ ॥ तथैव ऋषयः सर्वे भृग्वाद्याश्च तपोधनाः ॥ विश्वे च पार्षदैः साकमिंद्रो हि परमार्थतः ॥ १९ ॥ कृताः सर्वे महात्मानो याथातथ्येन धीमता ॥ एवंभूतः कृतस्तेन मंडपो दिव्यरूपवान् ॥ २० ॥ अनेकाश्चर्यसंभूतो दिव्यो दिव्यविमोहनः ॥ एतस्मिन्नंतरे तत्र आगतो नारदोग्रतः ॥ २१ ॥ ब्रह्मणा नोदितस्तत्र हिमालयगृहं प्रति ॥ नारदोथ ददर्शाग्रे आत्मानं विनयान्वितम् ॥ २२ ॥ भ्रांतो हि नारदस्तेन कृत्रिमेण महायशाः ॥ अवलोकपरस्तत्र चरितं विश्वकर्मणः ॥ ॥ २३ ॥ प्रविष्टो मंडपं तस्य हिमाद्रे रत्नचित्रितम् ॥ सुवर्णकलशैर्जुष्टं रंभाद्यैरुपशोभितम् ॥ २४ ॥ सहस्रस्तम्भसंयुक्तं ततोऽद्रिः स्वगणैर्वृतः ॥ तमृषिं पूजयामास किं कार्यमिति पृष्टवान् ॥ २५ ॥ ॥ नारद उवाच ॥ ॥ आगतास्ते महात्मानो देवा इन्द्रपुरो

CC-0. In Public Domain. Digitization by eGangotri

गमाः ॥ तथा महर्षयः सर्वे गणैश्च परिवारिताः ॥ महादेवो वृषारूढो ह्यागतोद्वहनं प्रति ॥ २६ ॥ ततस्तद्वचनं श्रुत्वा हिमवान्गि
रिसत्तमः ॥ उवाच नारदं वाक्यं प्रशस्तमधुरं महत् ॥ २७ ॥ पूजयित्वा यथान्यायं गच्छ त्वं शंकरं प्रति ॥ २८ ॥ ततस्तद्वचनं श्रुत्वा
मुनिर्हिमवतो गिरेः ॥ तथैव मत्वा वचनं शैलराजानमब्रवीत् ॥ मैनाकेन च सह्येन मेरुणा गिरिणा सह ॥ २९ ॥ एभिः समेतो ह्यधुना
महामते यतस्व शीघ्रं शिवमत्र चानय ॥ देवैः समेतं च महर्षिवर्यैः सुरासुरैरर्चितपादपंकजम् ॥ ३० ॥ तथेति मत्वा स जगाम तूर्णं सहै
व तैः पर्वतराजभिश्च ॥ त्वरागतश्चैकपदेन शंभुं प्राप्नोदृषीणां प्रवरो महात्मा ॥ ३१ ॥ तावद्दृष्टो महादेवो देवैश्च परिवारितः ॥ तदा ब्रह्मा च
विष्णुश्च रुद्रश्चैव सुरैः सह ॥ ३२ ॥ पप्रच्छुर्नारदं सर्वे येऽन्ये रुद्रचरा भृशम् ॥ कथ्यतां पृच्छमानानामस्माकं कथ्यते न हि ॥ ३३ ॥ एकैकस्या
त्मजाः स्वाः स्वाः सह्यमैनाकमेरवः ॥ कन्यां दास्यंति वा शंभोः किं त्विदानीं प्रवर्तते ॥ ३४ ॥ ततोऽवोचन्महातेजा नारदश्चर्षिसत्तमः ॥
ब्रह्माणं पुरतः कृत्वा विष्णुं प्रति सहेतुकम् ॥ ३५ ॥ एकांतमाश्रित्य तदा सुरेन्द्रं स नारदो वाक्यमिदं बभाषे ॥ त्वष्ट्रा कृतं वै भवनं महत्तरं येनैव
सर्वे च विमोहिता वयम् ॥ ३६ ॥ पुरा कृतं तस्य महात्मनस्त्वया किं विस्मृतं तत्सकलं शचीपते ॥ तस्मादसौ त्वां विजिगीषुकामो गृहे वसंस्तस्य
गिरेर्महात्मनः ॥ ३७ ॥ अहो विमोहितस्तेन प्रतिरूपेण भास्वता ॥ तथा विष्णुः कृतस्तेन शंखचक्रगदादिभृत् ॥ ३८ ॥ ब्रह्मा चैव तथाभूतस्तं
चैव कृतवानसौ ॥ ३९ ॥ मायामयो वृषभस्तेन वेषात्कृतो हि नागोऽश्वतरस्तथैव ॥ तथा चान्यान्यप्यनेनामरेन्द्र सर्वाण्येवोल्लिखितान्यत्र विद्धि
॥ ४० ॥ तच्छ्रुत्वा वचनं तस्य देवेंद्रो वाक्यमब्रवीत् ॥ ४१ ॥ विष्णुं प्रति तदा शीघ्रं दृष्ट्वा यामि वसात्र भोः ॥ पुत्रशोकेन ततोऽसौ व्याजेनान्येन
वाऽकरोत् ॥ ४२ ॥ तस्य तद्वचनं श्रुत्वा देवदेवो जनार्दनः ॥ उवाच प्रहसन्वाक्यं शक्रमात्तभयं तदा ॥ ४३ ॥ निवातकवचैः पूर्वं मोहितोऽसि शची
पते ॥ विद्याऽमृता तत्र मया समानीतोपसत्तये ॥ ४४ ॥ महाविद्याबलेनैव प्रविश्य मण्डपेऽधुना ॥ पर्वतो हिमवानेष तथान्ये पर्वतोत्तमाः ॥ ४५ ॥
विपक्षा हि कृताः सर्वे मम वाक्याच्च वासव ॥ हेतुं स्मृत्वाथ वै त्वष्टा मायया ह्यकरोदिदम् ॥ ४६ ॥ जयमिच्छंति वै मूढा न च भेतव्यमण्वपि ॥
॥ ४७ ॥ एवं विवदमानांस्तान्देवाञ्छक्रपुरोगमान् ॥ सांत्वयामास वै विष्णुर्नारदं ते ततोऽब्रुवन् ॥ ४८ ॥ ददाति वा न ददाति कन्यां गिरीन्द्रः
स्वां वै कथ्यतां शीघ्रमेव ॥ किं तेन दृष्टं किं कृतं चाद्य शंस तत्सर्वं भो नारद ते नमोऽस्तु ॥ ४९ ॥ तच्छ्रुत्वा प्रहसञ्छंभुरुवाच वचनं तदा ॥ कन्यां

१ आगतः—उद्वहनं प्रति—इति पदच्छेदः । विसर्गलोपसन्धी आर्षौ । २ असौ—विश्वकर्मा ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दास्यति चेन्मह्यं पर्वतो हि हिमालयः ॥ मायया मम किं कार्यं वद विष्णो यथातथम् ॥ ५० ॥ केनाप्युपायेन फलं हि साध्यमित्युच्यते पंडितै
र्न्यायविद्भिः ॥ तस्मात्सर्वैर्गम्यतां शीघ्रमेव कार्यार्थिभिश्चेन्द्रपुरोगमैश्च ॥५१॥ तदा शिवोऽपि विश्वात्मा पंचबाणेन मोहितः ॥ महाभूतेन भूतेशस्त्व
न्येषां चैव का कथा ॥ ५२ ॥ एवं च विद्यमानेऽसौ शंभुः परमशोभनः ॥ कृतो ह्यनंगेन वशे यथान्यः प्राकृतो जनः ॥५३॥ मदनो हि बली लोके
येन सर्वमिदं जगत् ॥ जितमस्ति निजप्रौढ्या सदेवर्षिसमन्वितम् ॥ ५४ ॥ सर्वेषामेव भूतानां देवानां च विशेषतः ॥ राजा ह्यनंगो बलवान्यस्य
चाज्ञा बलीयसी ॥ ५५ ॥ पार्वतीस्त्रीस्वरूपेण अजेयो भुवनत्रये ॥ तां दृष्ट्वा हि स्त्रियं सर्वे ऋषयोऽपि विचक्षणाः ॥ ५६ ॥ देवा मनुष्या गन्धर्वाः
पिशाचोरगराक्षसाः ॥ आज्ञानुल्लंघिनः सर्वे मदनस्य महात्मनः ॥ ५७ ॥ तपोबलेन महता तथा दानबलेन च ॥ वेत्तुं न शक्यो मदनो विन
येन विना द्विजाः ॥ ५८ ॥ तस्मादनंगस्य महान्क्रोधो हि बलवत्तरः ॥ ईश्वरं मदनेनैवं मोहितं वीक्ष्य माधवः ॥ ५९ ॥ उवाच वाक्यं वाक्यज्ञो
मा चिंतां कुरु वै प्रभो ॥ यदुक्तं नारदेनैव मंडपं प्रति सर्वशः ॥ ६० ॥ त्वष्ट्रा कृतं विचित्रं च तत्सर्वं मदनात्प्रभोः ॥ तदानीं शंकरो वाक्यमुवाच
मधुसूदनम् ॥ ६१ ॥ अविद्यया वृतं तेन कृतं त्वष्ट्रा हि मण्डपम् ॥ किं तु वक्ष्यामहे विष्णो मण्डपः केवलेन हि ॥ ६२ ॥ विवाहो हि महाभाग
अविद्यामूल एव च ॥ तस्मात्सर्वे वयं याम उद्वाहार्थं च संप्रति ॥ ६३ ॥ नारदं च पुरस्कृत्य सर्वे देवाः सवासवाः ॥ हिमाद्रिसहिता जग्मुर्म
न्दिरं परमाद्भुतम् ॥ अनेकाश्चर्यसंयुक्तं विचित्रं विश्वकर्मणा ॥ ६४ ॥ कृतं च तेनाद्य पवित्रमुत्तमं तं यज्ञवाटं बहुभिः पुरस्कृतम् ॥ विचित्रचित्रं
मनसो हरं च तं यज्ञवाटं स चकार बुद्धिमान् ॥ ६५ ॥ प्रवेक्ष्यमाणास्ते सर्वे सुरेन्द्रा ऋषिभिः सह ॥ दृष्टा हिमाद्रिणा तत्र अभ्युत्थानगतोऽभवत् ॥
॥ ६६ ॥ तथैव तेषां च मनोहराणि हर्म्याणि तेन प्रतिकल्पितानि ॥ गन्धर्वयक्षाः प्रमथाश्च सिद्धा देवाश्च नागाप्सरसां गणाश्च ॥ वसंति यत्रैव
सुखेन तेभ्यः स तत्रतत्रोपवनं चकार ॥६७॥ तेषामर्थे महार्हाणि धाराजिरगृहाणि च ॥ अत्यद्भुतानि शोभंते कृतान्येव महात्मना ॥ ६८ ॥ निवा
सार्थे कल्पितानि सावकाशानि तत्र वै ॥ देवानां चैव सर्वेषामृषीणां भावितात्मनाम् ॥ ६९ ॥ एवं विस्तारयामास विश्वकर्मा बहून्यपि ॥ मन्दि
राणि यथायोग्यं यत्र तत्रैव तिष्ठताम् ॥ ७० ॥ भैरवाः क्षेत्रपालाश्च येऽन्ये च क्षेत्रवासिनः ॥ श्मशानवासिनश्चान्ये येऽन्ये न्यग्रोधवासिनः ॥
॥ ७१ ॥ अश्वत्थसेविनश्चान्ये खेचराश्च तथा परे ॥ येये यत्रोपविष्टाश्च तत्रतत्रैव तेन वै ॥ ७२ ॥ कृतानि च मनोज्ञानि भवनानि महांति
वै ॥ तेषामेवानुकूलानि भूतानां विश्वकर्मणा ॥ ७३ ॥ तत्रैव ते सर्वगणैः समेता निवासितास्तेन हिमाद्रिणा स्वयम् ॥ सेंद्राः सुरा यक्षपिशाचर

CC-0. In Public Domain. Digitization by eGangotri

क्षसां गन्धर्वविद्याप्सरसां समूहाः ॥ ७४ ॥ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां प्रथमे माहेश्वरखण्डे केदारखंडे पार्वतीपरिणयने हिमाद्रिणा देवानां निवासस्थानकरणवर्णनंनाम चतुर्विंशोऽध्यायः ॥ २४ ॥ ॥ छ ॥ ॥ लोमश उवाच ॥ ॥ तत्रोपविविशुः सर्वे सत्कृताश्च हिमाद्रिणा ॥ ते देवाः सपरीवाराः सहर्षाश्च सवाहनाः ॥ १ ॥ तत्रैव च महामात्रं निर्मितं विश्वकर्मणा ॥ दीप्त्या परमया युक्तं निवासार्थं स्वयम्भुवः ॥ २ ॥ तथैव विष्णोस्त्वपरं भवनं स्वयमेव हि ॥ भास्वरं सुविचित्रं च कृतं त्वष्ट्रा मनोरमम् ॥ वण्डीगृहं मनोज्ञं च तथैव कृतवान्स्वयम् ॥ ३ ॥ तथैव श्वेतं परमं मनोज्ञं महाप्रभं देववरैः सुपूजितम् ॥ कैलासलक्ष्मीप्रभया महत्या सुशोभितं तद्भवनं चकार ॥ ४ ॥ तत्रैव शंभुः परया विभूत्या स स्थापितस्तेन हिमाद्रिणा वै ॥ ५ ॥ एतस्मिन्नंतरे मेना समायाता सखीगणैः ॥ नीराजनार्थं शंभुं च ऋषिभिः परिवारिता ॥ ॥ ६ ॥ तदा वादित्रनिर्घोषैर्नादितं भुवनत्रयम् ॥ नीराजनं कृतं तस्य मेनया च तपस्विनः ॥ ७ ॥ अवलोक्य परा साध्वी मेनाऽजानाद्धरं तदा ॥ गिरिजोक्तमनुस्मृत्य मेना विस्मयमागता ॥ ८ ॥ यद्वै पुरोक्तं च तया पार्वत्या मम सन्निधौ ॥ ततोऽधिकं प्रपश्यामि सौंदर्यं परमेष्ठिनः ॥ महेशस्य मया दृष्टमनिर्वाच्यं च संप्रति ॥ ९ ॥ एवं विस्मयमापन्ना विप्रपत्नीभिरावृता ॥ अहतांबरयुग्मेन शोभिता वरवर्णिनी ॥ १० ॥ कंचुकी परमा दिव्या नानारत्नैश्च शोभिता ॥ अंगीकृता तदा देव्या रराज परया श्रिया ॥ ११ ॥ बिभ्रती च तदा हारं दिव्यरत्नविभूषितम् ॥ वलयानि महार्हाणि शुद्धचामीकराणि च ॥ १२ ॥ तत्रोपविष्टा सुभगा ध्यायंती परमेश्वरम् ॥ सखीभिः सेव्यमाना सा विप्रपत्नीभिरेव च ॥ ॥ १३ ॥ एतस्मिन्नंतरे तत्र गर्गो वाक्यमभाषत ॥ पाणिग्रहार्थं शंभुं च आनयध्वं स्वमंदिरम् ॥ त्वरितेनैव वेलायामस्यामेव विचक्षणाः ॥ ॥ १४ ॥ तच्छ्रुत्वा वचनं तस्य गर्गस्य च महात्मनः ॥ अभ्युत्थानपराः सर्वे पर्वताः सकलत्रकाः ॥ १५ ॥ महाविभूत्या संयुक्ताः सर्वे मंगलपाणयः ॥ सालंकृतास्तदा तेषां पत्न्योलंकारमंडिताः ॥१६॥ उपायनान्यनेकानि जगृहुः स्निग्धलोचनाः ॥ तदा वादित्रघोषेण ब्रह्मघोषेण भूयसा ॥ १७ ॥ आजग्मुः सकलत्रास्ते यत्र देवो महेश्वरः ॥ प्रमथैरावृतस्तत्र चंड्या चैवाभिसेवितः ॥ १८ ॥ तथा महर्षिभिस्तत्र तथा देवगणैः सह ॥ एभिः परिवृतः श्रीमाञ्छंकरो लोकशंकरः ॥ १९ ॥ श्रुत्वा वादित्रनिर्घोषं सर्वे शंकरसेवकाः ॥ उत्थिता ऐकपद्येन देवैर्ऋषिभिरा

१ वण्डीगृहम्—बहुनिवासनिवासिनां जनानामेकत्र संमेलनार्थं यत्सभाप्रायं गृहं ''बैठक'' इत्याख्यं तत्—'वण्डीगृहम्' इत्यर्थः। अत एव दाक्षिणात्येषु ''पिम्पळवण्डी'' ''बेलवण्डी'' इत्यादिनामानः केचन ग्रामाः प्रसिद्धाः सन्ति—इति समवधेयं सुधीभिः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वृताः ॥२०॥ तथोद्यतो योगिनीचक्रयुक्तो गणो गणानां पतिरेकवर्चसाम् ॥ शिवं पुरस्कृत्य तदानुभावास्तथैव सर्वे गणनायकाश्च ॥२१॥ तद्योगिनी चक्रमतिप्रचंडं टंकारभेरीरवनिस्वनेन ॥ चंडीं पुरस्कृत्य भयानकां तदा महाविभूत्या समलंकृतां तदा ॥ २२ ॥ कंठे कर्कोटकं नागं हारभूतं च कार सा ॥ पदकं वृश्चिकानां च दंदशूकांश्च बिभ्रती ॥ २३ ॥ कर्णावतंसान्सा दध्रे पाणिपादमयांस्तथा ॥ रणे हतानां वीराणां शिरांस्युरसि चापरान् ॥ २४ ॥ द्वीपिचर्मपरीधाना योगिनीचक्रसंयुता ॥ क्षेत्रपालावृता तद्वद्भैरवैः परिवारिता ॥ २५ ॥ तथा प्रेतैश्च भूतैश्च कपटैः परिवारिता॥ वीरभद्रादयश्चैव गणाः परमदारुणाः ॥ ये दक्षयज्ञनाशार्थे शिवेनाज्ञापितास्तदा ॥ २६ ॥ तथा काली भैरवी च माया चैव भयावहा ॥ त्रिपुरा च जया चैव तथा क्षेमकरी शुभा ॥२७॥ अन्याश्चैव तथा सर्वाः पुरस्कृत्य सदाशिवम् ॥ गंतुकामाश्चोग्रतरा भूतैः प्रेतैः समावृताः ॥ २८ ॥ एताः सर्वा विलोक्याथ शिवभक्तो जनार्दनः ॥ महर्षींश्च पुरस्कृत्य ह्यमरांश्च तथैव च ॥ अनसूयां पुरस्कृत्य तथैव च ह्यरुंधतीम् ॥२९॥ ॥ विष्णुरुवाच ॥ ॥ चण्डीं कुरु समीपस्थां लोकपालनतां प्रभो ॥ ३० ॥ तदुक्तं विष्णुना वाक्यं निशम्य जगदीश्वरः ॥ उवाच प्रहसन्नेव चंडीं प्रति सदाशिवः ॥ ३१ ॥ अत्रैव स्थीयतां चंडि यावदुद्वहनं भवेत् ॥ मम भावान्विजानासि कार्याकार्ये सुशोभने ॥३२॥ एवमाकर्ण्य वचनं शंभोरमिततेजसः ॥ उवाच कुपिता चंडी विष्णुमुद्दिश्य सादरम् ॥ ३३ ॥ तथान्ये प्रमथाः सर्वे विष्णुमूचुः प्रकोपिताः ॥ यत्रयत्र शिवो भाति तत्रतत्र वयं प्रभो ॥ ३४ ॥ त्वया निवारिताः कस्माद्वयमाभ्युदये परे ॥ तेषां तद्वचनं श्रुत्वा केशवो वाक्यमब्रवीत् ॥ ३५ ॥ चण्डीमुद्दिश्य प्रमथानन्यांश्चैव तथाविधान् ॥ यूयं चैव मया प्रोक्ता मा कोपं कर्त्तुमर्हथ ॥३६॥ एवमुक्तास्तदा तेन चंडीमुख्या गणास्तदा ॥ एकांतमाश्रिताः सर्वे विष्णुवाक्याज्ज्वलद्धृदः ॥३७॥ तावत्सर्वे समायाताः पर्वतेंद्रस्य मंत्रिणः ॥ सकलत्राः संभ्रमेण महेशं प्रति सत्वरम् ॥ ३८ ॥ पंचवाद्यप्रघोषेण ब्रह्मघोषेण भूयसा ॥ योषिद्भिः संवृतास्तत्र गीतशब्देन भूयसा ॥ ३९ ॥ एवं प्राप्ता यत्र शंभुः सकलैः परिवारितः ॥ आगत्य कलशैः साकं स्नापितो हि सदाशिवः ॥ स्त्रीभिर्मंगलगीतेन सर्वाभरणभूषितः ॥४०॥ ऋषयो देवगंधर्वास्तथान्ये पर्वतोत्तमाः ॥ शंभ्वग्रगास्तदा जग्मुः स्त्रियश्चैव सुपूजिताः ॥ बभौ छत्रेण महता ध्रियमाणेन मूर्द्धनि ॥ ४१ ॥ चामरैर्वीज्यमानोऽसौ मुकुटेन विराजितः ॥ ब्रह्मा विष्णुस्तथा चंद्रो लोकपालास्तथैव च ॥ ४२ ॥ अग्रगा ह्यपि शोभंतः श्रिया परमया युताः ॥ तथा शंखाश्च भेर्यश्च पटहानकगोमुखाः ॥ ४३ ॥ तथैव गायकाः सर्वे जग्मुः परममंगलम् ॥ पुनःपुनरवाद्यंत वादित्राणि महोत्सवे ॥ ४४ ॥ अरुंधती महाभागा अनसूया तथैव च ॥ सावित्री च तथा लक्ष्मीर्मातृभिः परिवारिताः ॥ ४५ ॥ एभिः समेतो जगदेकबंधुर्बभौ तदानीं परमेण वर्चसा ॥

CC-0. In Public Domain. Digitization by eGangotri

सचंद्रसूर्यानिलवायुना वृतः सलोकपालप्रवरैर्महर्षिभिः ॥ ४६ ॥ स वीज्यमानः पवनेन साक्षाच्छत्रं च तस्मै शशिना ह्यधिष्ठितम् ॥ सूर्यः पुरस्ताद्भवत्प्रकाशकः श्रियान्वितो विष्णुरभूच्च सन्निधौ ॥४७॥ पुष्पैर्ववर्षुर्ह्यवकीर्यमाणा देवास्तदानीं मुनिभिः समेताः ॥ ययौ गृहं कांचनकुट्टिमं महन्महाविभूत्यापरिशोभितं तदा ॥ विवेश शंभुः परया सपर्यया संपूज्यमानो नरदेवदानवैः ॥४८॥ एवं समागतः शंभुः प्रविष्टो यज्ञमण्डपम् ॥ संस्तूयमानो विबुधैः स्तुतिभिः परमेश्वरः ॥ ४९ ॥ गजादुत्तारयामास महेशं पर्वतोत्तमः ॥ उपविश्य ततः पीठे कृत्वा नीराजनं महत् ॥५०॥ मेनया सखिभिः साकं तथैव च पुरोधसा ॥ मधुपर्कादिकं सर्वं यत्कृतं चैव तत्र वै ॥ ५१ ॥ ब्रह्मणा नोदितः सद्यः पुरोधाः कृतवान्प्रभुः ॥ मंगलं शुभकल्याणं प्रस्तावसदृशं बहु ॥ ५२ ॥ अंतर्वेद्यां संप्रवेश्य यत्र सा पार्वती स्थिता ॥ वेदिकोपरि तन्वंगी सर्वाभरणभूषिता ॥ ५३ ॥ तत्रानीतो हरः साक्षाद्विष्णुना ब्रह्मणा सह ॥ लग्नं निरीक्षमाणास्ते वाचस्पतिपुरोगमाः ॥ ५४ ॥ गर्गो मुनिश्चोपविष्टस्तत्रैव घटिकालये ॥ यावत्पूर्णा घटी जाता तावत्प्रणवभाषणम् ॥ ५५ ॥ ॐपुण्येति प्रणिगदन्गर्गो वध्वंजलिं दधे ॥ पार्वत्यक्षतपूर्णं च शिवोपरि ववर्ष वै ॥ ५६ ॥ तया संपूजितो रुद्रो दध्यक्षतकुशादिभिः ॥ मुदा परमया युक्ता पार्वती रुचिरानना ॥ ५७ ॥ विलोकयंती शंभुं तं यदर्थे परमं तपः ॥ कृतं पुरा महादेव्या परेषां परमं महत् ॥ ५८ ॥ तपसा तेन संप्राप्तो जगज्जीवनजीवनः ॥ नारदेन ततः प्रोक्तो महादेवो वृषध्वजः ॥ ५९ ॥ तथा गंगादिभिश्चान्यैर्मुनिभिः सनकादिभिः ॥ प्रतिपूजां कुरु क्षिप्रं पार्वत्याश्च त्रिलोचन ॥ तदा शिवेन सा तन्वी पूजितार्घ्याक्षतादिभिः ॥ ६० ॥ एवं परस्परं तौ च पार्वतीपरमेश्वरौ ॥ अर्च्यमानौ तदानीं च शुशुभाते जगन्मयौ ॥ ६१ ॥ त्रैलोक्यलक्ष्म्या संवीतौ निरीक्षंतौ परस्परम् ॥ तदा नीराजितौ लक्ष्म्या सावित्र्या च विशेषतः ॥ अरुंधत्या तदा तौ च दंपती परमेश्वरौ ॥ ६२ ॥ अनसूया तथा शंभुं पार्वतीं च यशस्विनीम् ॥ दृष्ट्वा नीराजयामास प्रीत्युत्कलितलोचना ॥ ६३ ॥ तथैव सर्वा द्विजयोषितश्च नीराजयामासुरहो पुनःपुनः ॥ सतीं च शंभुं च विलोकयंत्यस्तथैव सर्वा मुदिता हसंत्यः ॥ ६४ ॥ ॥ लोमश उवाच ॥ ॥ एतस्मिन्नंतरे तत्र गर्गाचार्यप्रणोदितः ॥ हिमवान्मेनया सार्द्धं कन्यां दातुं प्रचक्रमे ॥ ६५ ॥ हैमं कलशमादाय मेना चार्द्धांगमाश्रिता ॥ हिमाद्रेश्च महाभागा सर्वाभरणभूषिता ॥ ६६ ॥ तदा हिमाद्रिणा प्रोक्तो विश्वनाथो वरप्रदः ॥ ब्रह्मणा सह संगत्य विष्णुना च तथैव च ॥ ६७ ॥ सार्द्धं पुरोधसा चैव गर्गेण सुमहात्मना ॥ कन्यादानं करोम्यद्य देवदेवस्य शूलिनः ॥ ६८ ॥ प्रयोगो भण्यतां ब्रह्मन्नस्मिन्समय आगते ॥ तथेति मत्वा ते सर्वे कालज्ञा द्विजसत्तमाः ॥ ६९ ॥ कथ्यतां तात गोत्रं स्वं कुलं चैव विशेषतः ॥ कथयस्व महाभाग इत्याकर्ण्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वचस्तथा ॥ सुमुखो विमुखः सद्यो ह्यशोच्यः शोच्यतां गतः ॥ ७० ॥ एवंविधः सुरवरैर्ऋषिभिस्तदानीं गंधर्वयक्षमुनिसिद्धगणैस्तथैव ॥ दृष्टो निरुत्तर मुखो भगवान्महेशो हास्यं चकार सुभृशं त्वथ नारदश्च ॥ ७१ ॥ वीणां प्रकटयामास ब्रह्मपुत्रोऽथ नारदः ॥ तदानीं वारितो धीमान्वीणां मा वादय प्रभो ॥ ७२ ॥ इत्युक्तः पर्वतेनैव नारदो वाक्यमब्रवीत् ॥ त्वया पृष्टो भवः साक्षात्स्वगोत्रकथनं प्रति ॥ ७३ ॥ अस्य गोत्रं कुलं चैव नाद एव परं गिरे ॥ नादे प्रतिष्ठितः शंभुर्नादो ह्यस्मिन्प्रतिष्ठितः ॥ ७४ ॥ तस्मान्नादमयः शंभुर्नादाच्च प्रतिलभ्यते ॥ तस्माद्वीणा मया चाद्य वादिता हि परंतप ॥ ७५ ॥ अस्य गोत्रं कुलं नाम न जानंति हि पर्वत ॥ ब्रह्मादयो हि विबुधा अन्येषां चैव का कथा ॥ ७६ ॥ त्वं हि मूढत्वमापन्नो न जानासि हि किंचन ॥ वाच्यावाच्यं महेशस्य विषया हि बहिर्मुखाः ॥ ७७ ॥ येये आगमिकाश्चाद्रे नष्टास्ते नात्र संशयः ॥ अरूपोयं विरूपाक्षो ह्यकुलीनोऽयमुच्यते ॥ ७८ ॥ अगोत्रोऽयं गिरिश्रेष्ठ जामाता ते न संशयः ॥ न कर्त्तव्यो विमर्शोऽत्र भवता विबुधेन हि ॥ ७९ ॥ न जानंति हरं सर्वे किं बहूक्त्या मम प्रभो ॥ यस्याज्ञानान्महाभाग मोहिता ऋषयो ह्यमी ॥ ८० ॥ ब्रह्मापि तं न जानाति मस्तकं परमेष्ठिनः ॥ विष्णुर्गतो हि पातालं न दृष्टो हि तथैव च ॥ ८१ ॥ तेन लिंगेन महता ह्यगाधेन जगत्त्रयम् ॥ व्याप्तमस्तीति तद्विद्धि किमनेन प्रयोजनम् ॥ ८२ ॥ अनयाराधितं नूनं तव पुत्र्या हिमालय ॥ तत्त्वतो हि न जानासि कथं चैव महागिरे ॥ ८३ ॥ आभ्यामुत्पाद्यते विश्वमाभ्यां चैव प्रतिष्ठितम् ॥ एतच्छ्रुत्वा वचस्तस्य नारदस्य महात्मनः ॥ ८४ ॥ हिमाद्रिप्रमुखाः सर्वे तथा चेंद्रपुरोगमाः ॥ साधुसाध्विति ते सर्वे ऊचुर्विस्मितमानसाः ॥८५॥ ईश्वरस्य तु गांभीर्यं ज्ञात्वा सर्वे विचक्षणाः ॥ विस्मयेन समाश्लिष्टा ऊचुः सर्वे परस्परम् ॥ ८६ ॥ ॥ ऋषय ऊचुः ॥ ॥ यस्याज्ञया जगदिदं च विशालमेव जातं परात्परमिदं निजबोधरूपम् ॥ सर्वं स्वतंत्रपरमेश्वरभावगम्यं सोऽसौ त्रिलोकनिजरूपयुतो महात्मा ॥ ८७ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां प्रथमे माहेश्वरखण्डे केदारखंडे शिवशास्त्रे शिवपार्वतीविवाहवर्णनंनाम पंचविंशोऽध्यायः ॥ २५ ॥ छ ॥

॥ लोमश उवाच ॥ ॥ अथ ते पर्वतश्रेष्ठा मेर्वाद्या जातसंभ्रमाः ॥ ऊचुस्ते चैकपद्येन हिमवंतं महागिरिम् ॥ १ ॥ ॥ पर्वता ऊचुः ॥ ॥ कन्या दानं क्रियतां चाद्य शैल श्रीमाञ्छम्भुर्भाग्यतस्तेऽद्य लब्धः ॥ हृन्मध्ये वै नात्र कार्यो विमर्शस्तस्मादेषा दीयतामीश्वराय ॥ २ ॥ तच्छ्रुत्वा वचनं तेषां सुहृदां वै हिमालयः ॥ सम्यक्संकल्पमकरोद्ब्रह्मणा नोदितस्तदा ॥ इमां कन्यां तुभ्यमहं ददामि परमेश्वर ॥ ३ ॥ भार्यार्थं प्रतिगृह्णीष्व मंत्रेणानेन दत्तवान् ॥ ॥ अस्मै रुद्राय महते देवदेवाय शंभवे ॥ कन्या दत्ता महेशाय गिरींद्रेण महात्मना ॥ ४ ॥ वेद्यां च बहिरानीतौ दंपती

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कमलेक्षणौ ॥ उपवेशितौ बहिर्वेद्यां पार्वतीपरमेश्वरौ ॥ ५ ॥ आचार्येणाथ तत्रैव कश्यपेन महात्मना ॥ आह्वानं हवनार्थाय कृतमग्नेस्तदा द्विजाः ॥ ॥ ६ ॥ ब्रह्मा ब्रह्मासनगतो बभूव शिवसन्निधौ ॥ प्रवर्तमाने हवन ऋषयश्च विचक्षणाः ॥ ७ ॥ ऊचुः परस्परं तत्र नानादर्शनवेदिनः ॥ वेदवादरताः केचिदवदन्संमतेन वै ॥ ८ ॥ एवमेव न चाप्येवमेवमेव न चान्यथा ॥ कार्यमेव न वा कार्यं कार्याकार्यं तथा परे ॥ ९ ॥ इत्येवं ब्रुवतां शब्दः श्रूयते शिवसन्निधौ ॥ स्वकीयं मतमास्थाय ह्यब्रुवंस्ते परस्परम् ॥ तत्त्वज्ञानविहीनास्ते केवलं वेदबुद्धयः ॥ १० ॥ तेषां तद्व चनं श्रुत्वा परस्परजयैषिणाम् ॥ प्रहस्य नारदो वाक्यमुवाच शिवसन्निधौ ॥ ११ ॥ यूयं सर्वे वादिनश्च वेदवादरतास्तथा ॥ मौनमास्थाय भो विप्रा हृदि कृत्य सदाशिवम् ॥ १२ ॥ आत्मानं परमात्मानं पराणां परमं च तत् ॥ येनेदं कारितं विश्वं यतः सर्वं प्रवर्त्तते ॥ यस्मिन्निलीयते विश्वं तस्मै सर्वात्मने नमः ॥ १३ ॥ सोऽयमास्तेऽधुना गेहे पर्वतेंद्रस्य भो द्विजाः ॥ मुखादस्यैव संजाताः सर्वे यूयं विचक्षणाः ॥ १४ ॥ एवमुक्ता स्तदा तेन नारदेन द्विजोत्तमाः ॥ उपदेशकरैर्वाक्यैर्बोधितास्ते द्विजोत्तमाः ॥ १५ ॥ वर्त्तमाने च यज्ञे च ब्रह्मा लोकपितामहः ॥ ददर्श चरणौ देव्या नखेंदुं च मनोहरम् ॥ १६ ॥ दर्शनात्स्खलितः सद्यो बभूवांबुजसंभवः ॥ मदनेन समाविष्टो वीर्यं च प्राच्यवद्भुवि ॥ १७ ॥ रेतसा क्षरमा णेन लज्जितोऽभूत्पितामहः ॥ चरणाभ्यां ममर्दाथ महद्गोप्यं दुरत्ययम् ॥ १८ ॥ बहवश्चर्षयो जाता वालखिल्याः सहस्रशः ॥ उपतस्थुस्तदा सर्वे तातताततेति चाब्रुवन् ॥१९॥ नारदेन तदोक्तास्ते वालखिल्याः प्रकोपिना ॥ गच्छंतु बटवो यूयं पर्वतं गंधमादनम् ॥ २० ॥ न स्थातव्यं भवद्भिश्च भवतां न प्रयोजनम् ॥ इत्येवमुक्तास्ते सर्वे वालखिल्याश्च पर्वतम् ॥ नारदेन समादिष्टा ययुः सर्वे त्वरान्विताः ॥ २१ ॥ नारदेन ततो ब्रह्माऽऽ श्वासितो वचनैः शुभैः ॥ तावच्च हवनं पूर्णं जातं तस्य महात्मनः ॥ २२ ॥ महेशस्य तथा विप्राः शांतिपाठपरा बभुः ॥ ब्रह्मघोषेण महता व्याप्त मासीद्दिगंतरम् ॥२३॥ ततो नीराजितो देवो देवपत्नीभिरुत्तमः ॥ तथैव ऋषिपत्नीभिरर्चितः पूजितस्तथा ॥ २४ ॥ तथा गिरीन्द्रस्य मनोरमाः शुभा नीराजयामासुरथैव योषितः ॥ गीतैः सुगीतज्ञविशारदाश्च तथैव चान्ये स्तुतिभिर्महर्षयः ॥ २५ ॥ रत्नानि च महार्हाणि ददौ तेभ्यो महा मनाः ॥ हिमालयो महाशैलः संहृष्टः परितोषयन् ॥ २६ ॥ बभौ तदानीं सुरसिद्धसंघैर्वेद्यां स्थितोऽसौ सकलत्रको विभुः ॥ सर्वैरुपेतो निजपार्षदै र्गणैः प्रहृष्टचेता जगदेकसुन्दरः ॥ २७ ॥ एतस्मिन्नंतरे तत्र ब्रह्मविष्णुपुरोगमाः ॥ ऋषिगंधर्वयक्षाश्च येन्ये तत्र समागताः ॥ २८ ॥ सर्वान्सम भ्यर्च्य तदा महात्मा महान्गिरीशः परमेण वर्चसा ॥ सद्रत्नवस्त्राभरणानि सम्यग्ददौ च ताम्बूलसुगन्धवार्यपि ॥ २९ ॥ तदा शिवं पुरस्कृत्याभ्यव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जहुः सुरेश्वराः ॥ तथा सर्वे मिलित्वा तु ऐकपद्येन मोदिताः ॥ ३० ॥ पंक्तीभूताश्च बुभुजुर्लिंगिना शृंगिणा सह ॥ केचिद्गणाः पृथग्भूता नाना हास्यरसैर्विभुम् ॥ ३१ ॥ अतोषयन्नारदाद्या अनेकालीकसंयुताः ॥ तथा चण्डीगणाः सर्वे बभुजुः कृतभाजनाः ॥३२॥ वैतालाः क्षेत्रपालाश्च बुभुजुः कृतभाजनाः ॥ शाकिनी डाकिनी चैव यक्षिण्यो मातृकादयः ॥ ३३ ॥ योगिन्योऽथ चतुःषष्टिर्योगिनो हि तथा परे ॥ दश कोट्यो गणानां च कोट्येका च महात्मनाम् ॥ ३४ ॥ एवं तु ऋषयः सर्वे तथान्ये विबुधादयः ॥ योगिनो हि मया चान्ये कथिताः पूर्वमेव हि ॥ ३५ ॥ योगिन्यश्चैव कथितास्तासां भक्ष्यं वदामि वः ॥ खड्गानां[1] केचिदानीय क्रव्यं पवित्रमेव च ॥ ३६ ॥ भुंजंति चास्थिसंयुक्तं तथांत्राणि बुभुक्षिताः ॥ आनीय केचिच्छीर्षाणि महिषाणां गुरूणि च ॥३७॥ तथा केचिन्नृत्यमानास्तदानीं रोरूय्यमाणाः प्रमथाश्चैव चान्ये ॥ केचित्तूष्णीमास्थिता रुद्ररूपाः परे चान्याँ ह्लोकमानास्तथैव ॥ ३८ ॥ योगिनीचक्रमध्यस्थो भैरवो हि ननर्त च ॥ तथान्ये भूतवेताला मामेत्येवं प्रलापिनः ॥३९॥ एवं तेषामुद्धवं[2] हि निरीक्ष्य मधुसूदनः ॥ उवाच प्रहसन्वाक्यं शंकरं लोकशंकरम् ॥४०॥ एतान्गणान्वारय भो अत्र मत्तांश्च संप्रति ॥ अस्मिन्काले च यत्कार्यं सर्वैस्तत्कार्यमेव च ॥ ४१ ॥ पांडित्येन महादेव तस्मादेतान्निवारय ॥ तच्छ्रुत्वा भगवान्रुद्रो वीरभद्रमुवाच ह ॥ ४२ ॥ ॥ रुद्र उवाच ॥ ॥ वारयस्व प्रमत्तांश्च क्षीबांश्चैव विशेषतः ॥ तेनोक्तो वीरभद्रश्च शंभुना परमेष्ठिना ॥ ४३ ॥ आज्ञापिताः प्रमत्ताश्च वीरभद्रेण धीमता ॥ प्रमथा वारितास्तेन तूष्णीमाश्रित्य ते स्थिताः ॥ ४४ ॥ निश्चला योगिनीमध्ये भूतप्रमथगुह्यकाः ॥ शाकिन्यो यातुधानाश्च कूष्मांडाः कोपिकर्पटाः ॥ ४५ ॥ तथान्ये भूतवेतालाः क्षेत्रपालाश्च भैरवाः ॥ सर्वे शांताः प्रमत्ताश्च बभूवुः प्रमथादयः ॥ ४६ ॥ एवं विस्तारसंयुक्तं कृतमुद्वहनं तदा ॥ हिमाद्रिणा परं विप्राः[3] सुमंगल्यं सुशोभनम् ॥ ४७ ॥ चत्वारो दिवसा जाताः परिपूर्णेन चेतसा ॥ हिमाद्रिणा कृता पूजा देवदेवस्य शूलिनः ॥ ४८ ॥ वस्त्रालंकाराभरणै रत्नैरुच्चावचैस्ततः ॥ पूजयित्वा महादेवं विष्णोर्वचनपरोऽभवत् ॥ ४९ ॥ लक्ष्मीसमेतं विष्णुं च वस्त्रालंकरणैः शुभैः ॥ पूजयामास हिमवांस्तथा ब्रह्माणमेव च ॥ ५० ॥ इंद्रं पुरोधसा सार्द्धमिंद्राण्या सहितं विभुम् ॥ तथैव लोकपालांश्च पूजयित्वा पृथक्पृथक् ॥ ५१ ॥ तथैव पूजिता चंडी भूतप्रमथगुह्यकैः ॥ वस्त्रालंकरणैश्चैव रत्नैर्नानाविधैरपि ॥ ये चान्य आगतास्तत्र ते च सर्वे प्रपूजिताः ॥ ५२ ॥

१ खड्गानाम्--'गेण्डा' इत्याख्यानामारण्यकमहाशूरपशुविशेषाणाम्--इत्यर्थः । २ उद्धवम्--उत्सवम्--इत्यर्थः । ३ संबोधनमिदं शौनकादीनाम् ।

CC-0. In Public Domain. Digitization by eGangotri

एवं तदानीं प्रतिपूजिताश्च देवाश्च सर्वे ऋषयश्च यक्षाः ॥ गंधर्वविद्याधरसिद्धचारणास्तथैव मर्त्याप्सरसां गणाश्च ॥ ९३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां प्रथमे माहेश्वरखण्डे केदारखण्डे शिवपार्वतीविवाहमंगलोत्सववर्णनं नाम षड्विंशोऽध्यायः ॥ २६ ॥ छ ॥ ॥

॥ लोमश उवाच ॥ ॥ तथैव विष्णुना सर्वे पर्वताश्च प्रपूजिताः ॥ सह्याचलश्च विंध्यश्च मैनाको गंधमादनः ॥ १ ॥ माल्यवान्मलयश्चैव महेंद्रो मंदरस्तथा ॥ मेरुश्चैव प्रयत्नेन पूजितो विष्णुना तदा ॥ २ ॥ श्वेतः कृतः श्वेतगिरिर्नीलाद्रिश्च तथैव च ॥ उदयाद्रिश्च शृंगश्च अस्ताचल वरो महान् ॥ ३ ॥ मानसाद्रिस्तथा शैलः कैलासः पर्वतोत्तमः ॥ लोकालोकस्तथा शैलः पूजितः परमेष्ठिना ॥ ४ ॥ एवं ते पर्वतश्रेष्ठाः पूजिताः सर्व एव हि ॥ तथान्ये पूजितास्तेन सर्वे पर्वतवासिनः ॥ ५ ॥ विष्णुना ब्रह्मणा सार्द्धं कृतं सर्वं यथोचितम् ॥ अन्येद्युनि च संप्राप्ते वरयात्रा[1] कृता तथा ॥ ६ ॥ हिमाद्रिणा बंधुभिश्च पर्वतं गंधमादनम् ॥ ययुः सर्वे सुरगणा गणाश्च बहवस्तथा ॥ ७ ॥ प्रमथाश्च तथा सर्वे तथा चंडीगणाः परे ॥ ये चान्ये बहवस्तत्र समायाता हिमालयम् ॥८॥ शिवस्योद्वहनं विप्राः शिवेन परिभाविताः[2] ॥ परं हर्षं समापन्ना दृष्ट्वा तौ दंपती तदा ॥९॥ पार्वतीसहितः शंभुः शंभुना सह पार्वती ॥ पुष्पगन्धौ यथा स्यातां वागर्थाविव तत्त्वतः ॥१०॥ तथा प्रकृतिपुंसौ च ऐकपद्येन नान्यथा ॥ दंपती तौ गजारूढौ शुशुभाते महाप्रभौ ॥११॥ विमानस्थस्तदा ब्रह्मा विष्णुश्च गरुडोपरि ॥ ऐरावतगतश्चेंद्रः कुबेरः पुष्पकोपरि ॥१२॥ पाशी च मकरारूढो यमो महिषमेव च ॥ प्रेतारूढो नैर्ऋतः स्यादग्निर्बस्तगतो महान् ॥ १३ ॥ मृगारूढोऽथ पवन ईशो वृषभमेव च ॥ इत्येवं लोकपालाश्च सग्रहाः परमेष्ठिनः ॥ १४ ॥ स्वैः स्वैर्बलैः परिक्रांतास्तथान्ये प्रमथादयः ॥ हिमाद्रिश्च महाशैल ऋषभो गंधमादनः ॥ १५ ॥ सह्याचलो नीलगिरिर्मंदरो मलयाचलः ॥ कैलासो हि महातेजा मैनाकश्च महाप्रभः ॥ १६ ॥ एते चान्ये च गिरयः श्रीमंतो हि महाप्रभाः ॥सकलत्राश्च ते सर्वे ससुताश्च मनोरमाः ॥ १७ ॥ बलिनो रूपिणः सर्वे मेर्वाद्यास्तत्र पर्वताः ॥ वरयात्राप्रसंगेन शिवार्चनपराभवन्[3] ॥ १८ ॥ नंदिना ह्युपविष्टास्ते मेर्वाद्यास्तत्र पर्वताः ॥ वरयात्रा कृता तेन यथोक्ता च हिमाद्रिणा ॥ सर्वैस्तैर्बंधुभिः सार्द्धं पुनरागमनं कृतम् ॥ १९ ॥ स्वकालयस्थो हिमवान्स रेजे हि महायशाः ॥ शिवसंपर्कजेनैव महसा परमेण च ॥ विख्यातो हि महाशैलस्त्रिषु लोकेषु विश्रुतः ॥ २० ॥ कन्यादानेन महता तुष्टो यस्य च शंकरः ॥ ते धन्यास्ते महात्मानः कृतकृत्यास्तथैव च ॥ २१ ॥ द्व्यक्षरं नाम येषां च जिह्वाग्रे संस्थितं सदा ॥ शिवेति द्व्यक्षरं नाम यैर्व्याहृतमद्य वै ॥ ते

१ वरयात्रा—'वरघोडा' इति प्रसिद्धा । २ परिभाविताः—संमानिताः—इत्यर्थः । ३ शिवार्चनपराः—अभवन्—इति पदच्छेदः । सन्धिरार्षः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वै मनुष्यरूपेण रुद्रा एव न संशयः ॥ २२ ॥ किंचिद्दानेन संतुष्टः पत्रेणापि तथैव च ॥ तोयेनापि हि संतुष्टो महादेवो निरन्तरम् ॥ २३ ॥ पत्रेण पुष्पेण तथा जलेन प्रीतो भवत्येष सदाशिवो हि ॥ तस्माच्च सर्वैः प्रतिपूजनीयः शिवो महाभाग्यकरो नृणामिह॥२४॥ एको महाञ्ज्योतिरजः परेशः परापराणां परमो महात्मा ॥ निरंतरो निर्विकारो निरीशो निराबाधो निर्विकल्पो निरीहः ॥ २५ ॥ निरंजनो नित्यरूपो निरोधो नित्यानन्दो नित्यमुक्तः सदैव ॥ एवंभूतो देवदेवोऽर्चितश्च तैर्देवाद्यैर्विश्ववेद्यो भवश्च ॥ स्तुतो ध्यातः पूजितश्चिंतितश्च सर्वज्ञोऽसौ सर्वदा सर्वदश्च ॥ २६ ॥ यथा वरिष्ठो हिमवान्प्रसिद्धः सर्वैर्गुणैः सर्वगुणो महात्मा ॥ विश्वेशवंद्यो हि तदा हिमालयो जातो गिरीणां प्रवरस्तदानीम् ॥ २७ ॥ मेनया सह धर्मात्मा यथास्थानगतस्ततः ॥ सर्वान्विसर्जयामास पर्वतान्पर्वतेश्वरः ॥ २८ ॥ गतेषु तेषु हिमवान्पुत्रैः पौत्रैः प्रपौत्रकैः ॥ राजा गिरीणां प्रवरो महादेवप्रसादतः ॥ २९ ॥ अथो गिरिजया सार्द्धं महेशो गन्धमादने ॥ एकांते च मतिं चक्रे रमणार्थं स्वरूपवान् ॥ ३० ॥ सुरतेनैव महता तपसा हि समागमे ॥ द्वयोः सुरतमारब्धं तद्द्वयोश्च तदाऽभवत् ॥ ३१ ॥ अनिष्टं महदाश्चर्यं प्रलयोपममेव च ॥ तस्मिन्महारते प्राप्ते नाविंदंत सुखं परम् ॥ ॥ ३२ ॥ सर्वे ब्रह्मादयो देवाः कार्याकार्यव्यवस्थितौ ॥ रेतसा च जगत्सर्वं नष्टं स्थावरजंगमम् ॥ ३३ ॥ सस्मार चाग्निं ब्रह्मा च विष्णुश्चाध्यात्मदायकः ॥ मनसा संस्मृतः सद्यो जगामाग्निस्त्वरान्वितः ॥ ३४ ॥ ताभ्यां संप्रेषितोऽपश्यद्रुचिरं शिवमंदिरम् ॥ द्वारि स्थितं नंदिनं च ददर्शाग्रे महाप्रभम् ॥ ३५ ॥ अग्निर्द्विजस्तदा भूत्वा काश्मीरसदृशच्छविः ॥ प्रविष्टोंतःपुरं शंभोर्नानाश्चर्यसमन्वितम् ॥ ३६ ॥ अनेकरत्नसंवीतं प्रासादैश्च स्वलंकृतम् ॥ तदंगणमनुप्राप्य उपविश्याह हव्यवाट् ॥ ३७ ॥ पाणिपात्रस्य मे ह्यम्ब भिक्षां देह्यवरोधतः ॥ तच्छ्रुत्वा वचनं तस्य पाणिपात्रस्य बालिका ॥ ३८ ॥ यावद्दातुं च सारेभे भिक्षां तस्मै ततः स्वयम् ॥ उत्थाय सुरतात्तस्माच्छिवो हि कुपितो भृशम् ॥ ३९ ॥ रुद्रस्त्रिशूलमुद्यम्य भैरवो ह्यऽभवत्तदा ॥ निवारितो गिरिजया वधात्तस्माच्छिवः स्वयम् ॥ भिक्षां तस्मै ददौ वाचा अग्नये जातवेदसे ॥ ४० ॥ पाणौ भिक्षां गृहीत्वाथ प्रत्यक्षं तेन चाग्निना॥भिक्षिता कुपिता तं वै शशाप गिरिजा ततः॥४१॥रे भिक्षो भविता शापात्सर्वभक्षो ममाशु वै॥अनेन रेतसा सद्यः पीडां प्राप्स्यसि सर्वतः॥४२॥इत्युक्तो भक्षयित्वाग्नी रेत ईशस्य हव्यवाट् ॥ यत्र देवाः स्थिताः सर्वे ब्रह्माद्याश्चैव सर्वशः॥४३॥ आगत्याकथयत्सर्वं तद्रेतोभक्षणादिकम् ॥ सर्वे सगर्भा ह्यभवन्निन्द्राद्या देवतागणाः ॥ ४४॥ अग्नेर्यथा हविश्चैव सर्वेषामुपतिष्ठति ॥ अग्नेर्मुखोद्भवेनैव रेतसा ते सुरेश्वराः॥ ४५॥ सगर्भा ह्यभवन्सर्वे चिंतया च प्रपीडिताः ॥ विष्णुं शरणमाजग्मुर्देवदेवेश्वरं प्रभुम् ॥४६॥ ॥ देवा ऊचुः ॥ ॥ त्वं त्राता सर्वदेवानां लोकानां प्रभुरेव च॥

CC-0. In Public Domain. Digitization by eGangotri

तस्माद्रक्षा विधातव्या शरणागतवत्सल ॥४७॥ वयं सर्वे मर्तुकामा रेतसानेन पीडिताः ॥ असुरेभ्यः परित्रस्ता वयं सर्वे दिवौकसः ॥ ४८ ॥ शरणं
शंकरं याताः परित्रातुं कृतोद्वहाः ॥ यदा पुत्रो हि रुद्रस्य भविष्यति तदा वयम् ॥ सुखिनः स्याम सर्वे वै निर्भयाश्च त्रिविष्टपे ॥ ४९ ॥ एवं विष्ट
भ्यमानानां सर्वेषां भयमागतम् ॥ अनेन रेतसा विष्णो जीवितुं शक्यते कथम् ॥ ५० ॥ त्रिवर्गो हि यथा पुंसां कुतो हि सुपरिष्कृतः ॥ विपरीतो
भवत्येव विना देवेन नान्यथा ॥ ५१ ॥ तस्मात्तद्वै बलं मत्वा सर्वेषामपि देहिनाम् ॥ कार्याकार्यव्यवस्थायां सर्वे मन्यामहे वयम् ॥ ५२ ॥ तथा
निशम्य देवानां परेशः परिदेवनम् ॥ उवाच प्रहसन्वाक्यं देवानां देवतारिहा ॥ ५३ ॥ स्तूयतां वै महादेवो महेशः कार्यगौरवात् ॥ ५४ ॥
तथेति गत्वा ते सर्वे देवा विष्णुपुरोगमाः ॥ तथा ब्रह्मादयः सर्व ईडिरे ऋषयो हरम् ॥ ५५ ॥ ॐनमो भर्गाय देवाय नीलकंठाय मीढुषे ॥ त्रिने
त्राय त्रिवेदाय लोकत्रितयधारिणे ॥ ५६ ॥ त्रिस्वराय त्रिमात्राय त्रिवेदाय त्रिमूर्त्तये ॥ त्रिवर्गाय त्रिधामाय त्रिपदाय त्रिशूलिने ॥ ५७ ॥
त्राहित्राहि महादेव रेतसो जगतः पते ॥ ५८ ॥ ब्रह्मणा तु स्तुतो यावत्तावद्देवो वृषध्वजः ॥ प्रादुर्बभूव तत्रैव सुराणां कार्यसिद्धये ॥ ५९ ॥ दृष्ट
स्तदानीं जगदेकबंधुर्महात्मभिर्देववरैः सुपूजितः ॥ संस्तूयमानो विविधैर्वचोभिः प्रत्यग्ररूपैः श्रुतिसंमतैश्च ॥ ६० ॥ स्तुवतां चैव देवानामुवाच परमे
श्वरः ॥ त्रासं कुर्वंतु मा सर्वे रेतसानेन पीडिताः ॥ ६१ ॥ वमनं वै भवद्भिश्च कार्यमद्यैव भोःसुराः ॥ तथेति मत्वा ते सर्व इंद्राद्या देवतागणाः ॥
वेमुः सर्वे तदा विप्रास्तद्रेतः शंकरस्य च ॥६२॥ ऐकपद्येन तद्रेतो महापर्वतसन्निभम् ॥ तप्तचामीकरप्रख्यं बभूव परमाद्भुतम् ॥ ६३ ॥ सर्वे च सुखिनो
जाता इंद्राद्या देवतागणाः ॥ विना ह्यग्निं च ते सर्वे परितुष्टास्तदाऽभवन् ॥ ६४ ॥ तेनाग्निनापि चोक्तस्तु शंकरो लोकशंकरः ॥ किं मयाद्य महा
देव कर्तव्यं देवतावर ॥ ६५ ॥ तद्ब्रूहि मे प्रभोऽद्य त्वं येनाहं सर्वदा सुखी ॥ भविष्यामि च येनाहं देवानां हव्यवाहकः ॥ ६६ ॥ तदोवाच शिवः
साक्षाद्देवानामिह शृण्वताम् ॥ रेतो विसृज्यतां योनौ तदाग्निः प्रहसन्निव ॥ ६७ ॥ उवाच शंकरं देवं भवत्तेजो दुरासदम् ॥ इदमुल्बणवत्तेजो धार्यते
प्राकृतैः कथम् ॥ ६८ ॥ ततः प्रोवाच भगवानग्निं प्रति महेश्वरः ॥ मासिमासि प्रतप्तानां देहे तेजो विसृज्यताम् ॥ ६९ ॥ तथेति मत्वा वचनं
महाप्रभः स जातवेदाः परमेण वर्चसा ॥ समुज्ज्वलंस्तत्र महाप्रभावो ब्राह्मे मुहूर्त्ते हि सचोपविष्टः ॥ ७० ॥ तदा प्रातः समुत्थाय प्रातः स्नानपराः
स्त्रियः ॥ ययुः सदा ऋषीणां च सत्यस्ता जातवेदसम् ॥ ७१ ॥ दृष्ट्वा प्रज्वलितं तत्र सर्वास्ताः शीतकर्षिताः ॥ तप्तुकामास्तदा सर्वा ह्यरुंधत्या
निवारिताः ॥ ७२ ॥ तया निवारिताश्चापि तास्तेपुः कृत्तिकाः स्वयम् ॥ यावत्तेपुश्च ताः सर्वा रेतसः परमाणवः ॥ विविशू रोमकूपेषु तासां तत्रैव

१ उल्बणवत्--जाज्वल्यमानं विषमिव--इत्यर्थः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सत्वरम् ॥ ७३ ॥ नीरेतोग्निस्तदा जातो विश्रांतः स्वयमेव हि ॥ ७४ ॥ ततस्ता ऋषिभार्या हि ययुः स्वभवनं प्रति ॥ ऋषिभिस्तु तदा शप्ताः कृत्तिकाः खेचराभवन् ॥ ७५ ॥ तदानीमेव ताः सर्वा व्यभिचारेण दुःखिताः ॥ तत्ससर्जुस्तदा रेतः पृष्ठे हिमवतो गिरेः ॥ ७६ ॥ ऐकपद्येन तद्रेतस्तप्तचामीकरप्रभम् ॥गंगायां च तदा क्षिप्रं कीचकैः परिवेष्टितम् ॥ ७७ ॥ षण्मुखं बालकं ज्ञात्वा सर्वे देवा मुदान्विताः ॥ गर्गेणोक्तास्तदंते वै सुखेन ह्रियतामिति ॥ ७८ ॥ शंभोः पुत्रः प्रसादेन सर्वो भवति शाश्वतः ॥ गंगायाः पुलिने जातः कार्त्तिकेयो महाबलः ॥ ॥ ७९ ॥ उपविष्टोथ गांगेयो ह्यहोरात्रोषितस्तदा ॥ शाखो विशाखोऽतिबलः षण्मुखोऽसौ महाबलः ॥ ८० ॥ जातो यदाथ गंगायां षण्मुखः शंकरात्मजः ॥ तदानीमेव गिरिजा संजाता प्रस्नुतस्तनी ॥ ८१ ॥ शिवं निरीक्ष्य सा प्राह हे शंभो प्रस्नवो महान् ॥ संजातो मे महादेव किमर्थस्तन्निरीक्ष्यताम् ॥ सर्वज्ञोऽपि महादेवो ह्यब्रवीत्तामथाज्ञवत् ॥ ८२ ॥ नारदस्तत्र चागत्य प्रोक्तवान्जन्म तस्य तत् ॥ शिवाय च शिवायै च पुत्रो जातो हि सुंदरः ॥ ८३ ॥ तदाकर्ण्य वचो विप्रा हर्षनिर्भरमानसाः ॥ बभूवुः प्रमथाः सर्वे गंधर्वा गीततत्पराः ॥ ८४ ॥ अनेकाभिः पताकाभिश्चैलपल्लवतोरणैः ॥ तथा विमानैर्बहुभिर्बभौ प्रज्वलितो महान् ॥ पर्वतः पुत्रजननाच्छंकरस्य महात्मनः ॥ ८५ ॥ तदा सर्वे सुरगणा ऋषयः सिद्धचारणाः ॥ रक्षोगंधर्वयक्षाश्च अप्सरोगणसेविताः ॥ ८६ ॥ ऐकपद्येन ते सर्वे सहिताः शंकरेण तु ॥ द्रष्टुं गांगेयमधिकं जग्मुः पुलिनसंस्थितम् ॥ ८७ ॥ ततो वृषभमारुह्य ययौ गिरिजया सह ॥ अन्यैः समेतो भगवान्सुरैरिंद्रादिभिस्तथा ॥ ८८ ॥ तदा शंखाश्च भेर्यश्च नेदुस्तूर्याण्यनेकशः ॥ ८९ ॥ तदानीमेव सर्वेशं वीरभद्रादयो गणाः ॥ अन्वयुः केलिसंरब्धा नानावादित्रवादकाः ॥ वादयन्तश्च वाद्यानि ततानि विततानि च ॥ ९० ॥ केचिन्नृत्यपरास्तत्र गायकाश्च तथा परे ॥स्तावकाः स्तूयमानाश्च चक्रुस्ते गुणकीर्तनम् ॥ ९१ ॥ एवंविधास्ते सुरसिद्धयक्षा गंधर्वविद्याधरपन्नगा ह्यमी ॥ शिवेन सार्द्धं परिहृष्टचित्ता द्रष्टुं ययुस्तं वरदं च शांकरिम् ॥ ९२ ॥ यावत्समीक्षयामासुर्गांगेयं शंकरोपमम् ॥ ददृशुस्ते महत्तेजो व्याप्तमासीज्जगत्रयम् ॥ ९३ ॥ तत्तेजसावृतं बालं तप्तचामीकरप्रभम् ॥ सुमुखं सुश्रिया युक्तं सुनसं सुस्मितेक्षणम् ॥ ९४ ॥ चारुप्रसन्नवदनं तथा सर्वांगसुंदरम् ॥ तं दृष्ट्वा महदाश्चर्यं गांगेयं प्रथितात्मकम् ॥ ९५ ॥ ववंदिरे तदा बालं कुमारं सूर्यवर्चसम् ॥ प्रमथाश्च गणाः सर्वे वीरभद्रादयस्तथा ॥ ९६ ॥ परिवार्योपतस्थुस्ते वामदक्षिणभागतः ॥ तथा ब्रह्मा च विष्णुश्च इंद्रश्चापि सुरैर्वृतः ॥ ९७ ॥ ऋषयो यक्षगंधर्वाः परिवार्य

१ खेचराः--अभवन्--इति पदच्छेदः । सन्धिस्त्वार्षः ।

CC-0. In Public Domain. Digitization by eGangotri

कुमारकम् ॥ दंडवत्पतिता भूमौ केचिच्च नतकंधराः ॥ ९८ ॥ प्रणेमुः शिरसा चान्ये मत्वा स्वामिनमव्ययम् ॥ अवाद्यंत विचित्राणि वादित्राणि महोत्सवे ॥ एवमभ्युदये तस्मिन्नृषयः शांतिमापठन् ॥ ९९ ॥ एतस्मिन्नंतरे यातः शंकरो गिरिजापतिः ॥ अवतीर्य वृषाच्छीघ्रं पार्वत्या सह सुव्रताः ॥ १०० ॥ पुत्रं निरैक्षत तदा जगदेकबंधुः प्रीत्या युतः परमया सह वै भवान्या ॥ स्नेहान्वितो भुजगभोगयुतो हि साक्षात्सर्वेश्वरः परिवृतः प्रमथैः प्रहृष्टः ॥ १०१ ॥ उपगुह्य गुहं तत्र पार्वती जातसंभ्रमा ॥ प्रस्नुतं पाययामास स्तनं स्नेहपरिप्लुता ॥ १०२ ॥ तदा नीराजितो देवैः सकलत्रैर्मुदान्वितैः ॥ जयशब्देन महता व्याप्तमासीन्नभस्तलम् ॥ १०३ ॥ ऋषयो ब्रह्मघोषेण गीतेनैव च गायकाः ॥ वाद्यैश्च वादकाश्चैव उपतस्थुः कुमारकम् ॥ १०४ ॥ स्वमंकमारोप्य तदा गिरीशः कुमारकं तं प्रभया महाप्रभम् ॥ बभौ भवानीपतिरेव साक्षाच्छ्रिया युतः पुत्रवतां वरिष्ठः ॥ १०५ ॥ दंपती तौ तदा तत्र ऐकपद्येन नंदतुः ॥ अभिषिच्यमान ऋषिभिरावृतः सुरसत्तमैः ॥ १०६ ॥ कुमारः क्रीडयामास उत्संगे शंकरस्य च ॥ कंठे स्थितं वासुकिं च पाणिभ्यां समपीडयत् ॥ १०७ ॥ मुखं प्रपीडयित्वाऽसौ पाणीनगणयत्तदा ॥ एकं त्रीणि दशाष्टौ च विपरीतक्रमेण च ॥ १०८ ॥ प्रहस्य भगवाञ्छंभुरुवाच गिरिजां तदा ॥ १०९ ॥ मंदस्मितेन च तदा भगवान्महेशः प्राप्तो मुदं च परमां गिरिजासमेतः ॥ प्रेम्णा सगद्गदगिरा जगदेकबंधुर्नोवाच किंचन तदा भुवनैकभर्ता ॥ ११० ॥ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां प्रथमे माहेश्वरखण्डे केदारखण्डे कार्त्तिकेयस्वामिकुमारोत्पत्तिवर्णनंनाम सप्तविंशोऽध्यायः ॥ २७ ॥ ॥ छ ॥

॥ ॥ लोमश उवाच ॥ ॥ कुमारं स्वांकमारोप्य उवाच जगदीश्वरः ॥ देवान्प्रति तदा रुद्रः सेंद्रान्भर्गः प्रतापवान् ॥ १ ॥ किं कार्यं कथ्यतां देवाः कुमारेणाधुना मम ॥ तदोचुः सहिताः सर्वे देवं पशुपतिं प्रति ॥ २ ॥ तारकाद्भयमुत्पन्नं सर्वेषां जगतां विभो ॥ त्राता त्वं जगतां स्वामी तस्मात्त्राणं विधीयताम् ॥ ३ ॥ कुमारेण हतोऽद्यैव तारको भविता प्रभो ॥ तस्मादद्यैव यास्यामस्तारकं हंतुमुद्यताः ॥ ४ ॥ तथेति मत्वा सहसा निर्जग्मुस्ते तदा सुराः ॥ कार्त्तिकेयं पुरस्कृत्य शंकरात्मजमेव हि ॥ ५ ॥ सर्वे मिलित्वा सहसा ब्रह्मविष्णुपुरोगमाः ॥ देवानामुद्यमं श्रुत्वा तारकोऽपि महाबलः ॥ ६ ॥ सैन्येन महता चैव ययौ योद्धुं सुरान्प्रति ॥ देवैर्दृष्टं समायातं तारकस्य महद्बलम् ॥ ७ ॥ तदा नभोगता वाणी ह्युवाच परिसांत्व्य तान् ॥ शांकरिं च पुरस्कृत्य सर्वे यूयं प्रतिष्ठिताः ॥ ८ ॥ दैत्यान्विजित्य संग्रामे जयिनो हि भविष्यथ ॥ ९ ॥ वाचं तु खेचरीं श्रुत्वा देवाः सर्वे समुत्सुकाः ॥ कुमारं च पुरस्कृत्य सर्वे ते गतसाध्वसाः ॥ १० ॥ युद्धकामाः सुरा यावत्तावत्सर्वे समा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गताः ॥ वरणार्थं कुमारस्य सुता मृत्योर्दुरत्यया ॥ ११ ॥ ब्रह्मणा नोदिता पूर्वं तपः परममाश्रिता ॥ तपसा तेन महता कुमारं प्रति वै तदा ॥ आगता दुहिता मृत्योः सेना नामैकसुंदरी ॥ १२ ॥ तां दृष्ट्वा तेऽब्रुवन्सर्वे देवं पशुपतिं प्रति ॥ एनं कुमारमुद्दिश्य आगता द्युतिसुंदरी ॥ १३ ॥ ब्रह्मणो वचनाच्चैव कुमारेण तदा वृता ॥ अथ सेनापतिर्जातः कुमारः शांकरिस्तदा ॥ १४ ॥ तदा शंखाश्च भेर्यश्च पटहानकगोमुखाः ॥ तथा दुंदुभयो नेदुर्मृदंगाश्च महास्वनाः ॥ १५ ॥ तेन नादेन महता पूरितं च नभस्तलम् ॥ तदा गौरी च गंगा च कृत्तिका मातरस्तथा ॥ परस्परमथोचुस्ताः सुतो मम ममेति च ॥ १६ ॥ एवं विवादमापन्नाः सर्वास्ता मातृकादयः ॥ निवारिता नारदेन मौढ्यं मा कुरुतेति च ॥ १७ ॥ पार्वत्यां शंकराज्जातो देवकार्यार्थसिद्धये ॥ तूष्णींभूतास्तदा सर्वाः कृत्तिका मातृभिः सह ॥ १८ ॥ गुहेनोक्तास्तदा सर्वा ऋषिपत्न्यश्च कृत्तिकाः ॥ नक्षत्राणि समाश्रित्य भवद्भिः स्थीयतां चिरम् ॥ १९ ॥ तथा मातृगणस्तेन स्वामिना स्थापितो दिवि ॥ मृत्योः कन्यां च संगृह्य कार्त्तिकेयस्त्वरान्वितः ॥ २० ॥ इंद्रं प्रोवाच भगवान्कुमारः शंकरात्मजः ॥ दिवं याहि सुरैः सार्द्धं राज्यं कुरु निरन्तरम् ॥ २१ ॥ इंद्रेणोक्तः कुमारो हि तारकेण प्रपीडिताः ॥ स्वर्गाद्विद्राविताः सर्वे वयं याता दिशो दश ॥ २२ ॥ किं पृच्छसि महाभाग अस्मान्पदपरिच्युतान् ॥ एवमुक्तस्तदा तेन वज्रिणा शंकरात्मजः ॥ प्रहस्येंद्रं प्रति तदा मा भैषीत्यभयं ददौ ॥ २३ ॥ यावत्कथयतस्तस्य शांकरेश्च महात्मनः ॥ कैलासं तु गते रुद्रे पार्वत्या प्रमथैः सह ॥ २४ ॥ आजगाम महादैत्यो दैत्यसेनाभिरावृतः ॥ रणदुंदुभयो नेदुस्तथा प्रलयभीषणाः ॥ २५ ॥ रणकर्कशतूर्याणि डिंडिमान्यद्भुतानि च ॥ गोमुखाः खरशृंगाणि काहलान्येव भूरिशः ॥ २६ ॥ वाद्यभेदा अवाद्यंत तस्मिन्दैत्यसमागमे ॥ गर्जमानास्तदा वीरास्तारकेण सहैव तु ॥ ॥ २७ ॥ उवाच नारदो वाक्यं तारकं देवकण्टकम् ॥ २८ ॥ ॥ नारद उवाच ॥ ॥ पुरा देवैः कृतो यत्नो वधार्थं नात्र संशयः ॥ तवैव चासुरश्रेष्ठ मयोक्तं नान्यथा भवेत् ॥ २९ ॥ कुमारोऽयं च शर्वस्य तवार्थं चोपपादितः ॥ एवं ज्ञात्वा महाबाहो कुरु यत्नं समाहितः ॥ ३० ॥ नारदोक्तं निशम्याथ तारकः प्रहसन्निव ॥ उवाच वाक्यं मेधावी गच्छ त्वं च पुरंदरम् ॥ ३१ ॥ मम वाक्यं महर्षे त्वं वद शीघ्रं यथातथम् ॥ कुमारं च पुरस्कृत्य मया योद्धुं त्वमिच्छसि ॥ ३२ ॥ मूढभावं समाश्रित्य कर्तुमिच्छसि नान्यथा ॥ मनुष्यमेकमाश्रित्य मुचुकुन्दाख्यमेव च ॥ ॥ ३३ ॥ तत्प्रभावेऽमरावत्यां स्थितोऽसि त्वं न चान्यथा ॥ कौमारं बलमाश्रित्य तिष्ठसे त्वं ममाग्रतः ॥ ३४ ॥ त्वां हनिष्याम्यहं मन्द लोकपालैः सहैव हि ॥ एवं कथय देवेन्द्रं देवर्षे नान्यथा वद ॥ ३५ ॥ तथेति मत्वा भगवान्स नारदो ययौ सुराञ्छक्रपुरोगमांश्च ॥ आचष्ट

CC-0. In Public Domain. Digitization by eGangotri

सर्वं ह्यसुरेन्द्रभाषितं सहोपहासं मतिमांस्तथैव ॥३६॥ ॥ नारद उवाच ॥ ॥ भवद्भिः श्रूयतां देवा वचनं मम नान्यथा ॥ तारकेण यदुक्तं च सानुगे नावधार्यताम् ॥३७॥ ॥ तारक उवाच ॥ ॥ त्वां हनिष्यामि रे मूढ नान्यथा मम भाषितम् ॥ ३८ ॥ मुचुकुन्दं समासाद्य लोकपालैश्च पूजितः ॥ न त्वया भीरुणा योत्स्ये देवो भूत्वा नराश्रितः ॥ ३९ ॥ तस्य वाक्यं निशम्योचुः सर्वे देवाः सवासवाः ॥ कुमारं च पुरस्कृत्य नारदं चर्षिसत्तमम् ॥ ४० ॥ जानासि त्वं हि देवर्षे कुमारस्य बलाबलम् ॥ अज्ञो भूत्वा कथं वाक्यमुक्तं तस्य ममाग्रतः ॥ ४१ ॥ प्रहस्य नारदो वाक्यमुवाच तस्य सन्निधौ ॥ अहमप्युपहासं च वाक्यं तारकमुक्तवान् ॥ ४२ ॥ जानीध्वममराः सर्वे कुमारं जयिनं सुराः ॥ भविष्यत्यत्र मे वाक्यं नात्र कार्या विचारणा ॥ ४३ ॥ नारदस्य वचः श्रुत्वा सर्वे देवा मुदान्विताः ॥ ऐकपद्येन चोत्तस्थुर्योद्धुकामाश्च तारकम् ॥ ४४ ॥ कुमारं गजमारोप्य देवेन्द्रो ह्यग्रगोऽभवत् ॥ सुरसैन्येन महता लोकपालैः समावृतः ॥ ४५ ॥ तदा दुन्दुभयो नेदुर्भेरीतूर्याण्यनेकशः ॥ वीणावेणुमृदंगानि तथा गन्धर्वनिस्वनाः ॥ ४६ ॥ गजं दत्त्वा महेंद्राय कुमारो यानमारुहत् ॥ अनेकरत्नसंवीतं नानाश्चर्यसमन्वितम् ॥ विचित्रचित्रं सुमहत्तथाश्चर्यसमन्वितम् ॥ ॥ ४७ ॥ विमानमारुह्य तदा महायशाः स शांकरिः सर्वगणैरुपेतः ॥ श्रिया समेतः परया बभौ महान्स वीज्यमानश्चमरैर्महाप्रभैः ॥ ४८ ॥ प्राचेतसं छत्रं महामणिप्रभं रत्नैरुपेतं बहुभिर्विराजितम् ॥ धृतं तदा तेन कुमारमूर्द्धनि चन्द्रेण चान्द्रैः किरणैः सुशोभितम् ॥ ४९ ॥ संमीलितास्तदा सर्वे देवा इन्द्रपुरोगमाः ॥ बलैः स्वैः स्वैः परिक्रांता योद्धुकामा महाबलाः ॥ ५० ॥ यमोऽपि स्वगणैः सार्द्धं मरुद्भिश्च सदागतिः ॥ पाथोभिर्वरुणस्तत्र कुबेरो गुह्यकैः सह ॥ ईशोऽपि प्रमथैः सार्द्धं नैर्ऋतो व्याधिभिः सह ॥ ५१ ॥ एवं तेऽष्टौ लोकपा योद्धुकामाः सर्वे मिलित्वा तारकं हंतुमेव ॥ पुरस्कृत्वा शांकरिं विश्ववंद्यं सेनापतिं चात्मविदां वरिष्ठम् ॥ ५२ ॥ एवं ते योद्धुकामा हि अवतेरुश्च भूतलम् ॥ अंतर्वेद्यां स्थिताः सर्वे गंगायमुनमध्यगाः ॥ ५३ ॥ पातालाच्च समायातास्तारकस्योपजीविनः ॥ चेरुरंगबलोपेता हन्तुकामाः सुरान्रणे ॥ ५४ ॥ तारको हि समायातो विमानेन विराजितः ॥ छत्रेण च महातेजा ध्रियमाणेन मूर्द्धनि ॥ ५५ ॥ चामरैर्वीज्यमानो हि शुशुभे दैत्यराट् स्वयम् ॥ ५६ ॥ एवं देवाश्च दैत्याश्च अंतर्वेद्यां स्थितास्तदा ॥ सैन्येन महता तत्र व्यूहान्कृत्वा पृथक्पृथक् ॥ ५७ ॥ गजान्कृत्वा ह्येकतश्च हयांश्च विविधांस्तथा ॥ स्यंदनानि विचित्राणि नानारत्नयुतानि च ॥५८॥ पदाता बहवस्तत्र शक्तिशूलपरश्वधैः ॥ खड्गतोमरनाराचैः पाशमुद्गरशोभिताः ॥५९॥ ते सेने सुरदैत्यानां शुशुभाते पर

१ छत्र--छत्रम्--विभक्तेः 'सुपां सुलुक्' इत्यनेनार्षत्वाल्लुक् । २ यादोभिः--इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu .

CC-0. In Public Domain. Digitization by eGangotri

स्परम् ॥ हंतुकामास्तदा ते वै स्तूयमानाश्च बन्धुभिः ॥६०॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां प्रथमे माहेश्वरखण्डे केदारखंडे शिवशास्त्रे देवैः सह तारकासुरस्य संग्रामे देवदैत्यसेनासंनाहवर्णनंनामाष्टाविंशोऽध्यायः ॥ २८ ॥ ७ ॥ ॥ लोमश उवाच ॥ ॥ उभे सेने तदा तेषां सुराणां चामरद्विषाम् ॥ अनेकाश्चर्यसंवीते चतुरंगबलान्विते ॥ विरेजतुस्तदान्योऽन्यं गर्जतो वांबुदागमे ॥१॥ एतस्मिन्नन्तरे तत्र वल्गमानाः परस्परम् ॥ देवासुरास्तदा सर्वे युयुधुश्च महाबलाः ॥ २ ॥ युद्धं सुतुमुलं ह्यासीद्देवदैत्यसमाकुलम् ॥ रुण्डमुण्डांकितं सर्वं क्षणेन समपद्यत ॥३॥ भूमौ निपतितास्तत्र शतशोऽथ सहस्रशः ॥ केषांचिद्बाहवश्छिन्नाः खड्गपातैः सुदारुणैः ॥ ४ ॥ मुचुकुंदो हि बलवांस्त्रैलोक्येऽमितविक्रमः ॥५॥ तारको हि तदा तेन मुचुकुंदेन धीमता ॥ खड्गेन चाहतस्तत्र सर्वप्राणेन वक्षसि ॥ प्रसह्य तत्प्रहारं च प्रहसन्वाक्यमब्रवीत् ॥ ६ ॥ किं रे मूढ त्वया चाद्य कृतमस्ति बलादिदम् ॥ न त्वया योद्धुमिच्छामि मानुषेणैव लज्जया ॥ ७ ॥ तारकस्य वचः श्रुत्वा मुचुकुंदोऽभ्यभाषत ॥ मया हतोऽसि दैत्येंद्र नान्यो भवितुमर्हसि ॥ ८ ॥ दृष्ट्वा मे खड्गसंपातं न त्वं तिष्ठसि चाग्रतः ॥ त्वां हन्मि पश्य मे शौर्यं दैत्यराज स्थिरो भव ॥ ९ ॥ एवमुक्त्वा तदा वीरो मुचुकुंदो महाबलः ॥ यावज्जघान खड्गेन तावच्छक्त्या समाहतः ॥ मांधातुस्तनयस्तत्र पपात रणमंडले ॥ १० ॥ पतितस्तत्क्षणादेव चोत्थितः परवीरहा ॥ ११ ॥ स सज्जमानोतिमहाबलो वै हंतुं तदा दैत्यपतिं च तारकम् ॥ ब्रह्मास्त्रमुद्यम्य धनुर्गृहीत्वा मांधातृपुत्रो भुवनैकजेता ॥ १२ ॥ स तारकं योद्धुकामस्तरस्वी रुषान्वितोत्फुल्लविलोचनो महान् ॥ स नारदो ब्रह्मसुतो बभाषे तदा नृवीरं मुचुकुंदमेवम् ॥ १३ ॥ न तारको हन्यते मानुषेण तस्मादेतन्मा विमोचीर्महास्त्रम् ॥ १४ ॥ निशम्य वचनं तस्य देवर्षेर्नारदस्य च ॥ मुचुकुंद उवाचेदं भविता कोऽस्य मारकः ॥ १५ ॥ तदोवाच महातेजा नारदो दिव्यदर्शनः ॥ एनं हंता कुमारश्च कुमारोऽयं शिवात्मजः ॥१६॥ तस्माद्भवद्भिः स्थातव्यमैकपद्येन युध्यताम् ॥ तिष्ठ त्वं चायतो भूत्वा मुचुकुंद महामते ॥ १७ ॥ निशम्य वाक्यं च मनोहरं शुभं ह्युदीरितं तेन महाप्रभेण ॥ सर्वे सुराः शांतिपरा बभूवुस्तेनैव साकं नृवरेण यत्नात् ॥ १८ ॥ ततो दुंदुभयो नेदुः शंखाश्च कृतनिश्चयाः ॥ ताडिता विविधैर्वाद्यैः सुरासुरसमन्वितैः ॥ १९ ॥ जगर्जुरसुरास्तत्र देवान्प्रति कृतोद्यमाः ॥ शिवकोपोद्भवो वीरो वीरभद्रो रुषान्वितः ॥२०॥ गणैर्बहुभिरासाद्य तारकं च महाबलम् ॥ मुचुकुंदं पृष्ठतः कृत्वा तथैव च सुरानपि ॥२१॥ तदा ते प्रमथाः सर्वे पुरस्कृत्य कुमारकम् ॥ युयुधुः संयुगे तत्र वीरभद्रादयो गणाः ॥ २२ ॥ त्रिशूलैर्ऋष्टिभिः पाशैः खड्गैः परशुपट्टिशैः ॥ निजघ्नुः

१ इवार्थे--'व' शब्दः । २ अक्षराधिक्यमर्थानुरोधेन न दोषायार्षत्वाच्च ।

CC-0. In Public Domain. Digitization by eGangotri

समरेऽन्योन्यं सुरासुरविमर्दने ॥ २३ ॥ तारको वीरभद्रेण त्रिशूलेन हतो भृशम् ॥ पपात सहसा तत्र क्षणं मूर्छापरिप्लुतः ॥ २४ ॥ उत्थाय च मुहूर्त्ताच्च तारको दैत्यपुंगवः ॥ लब्धसंज्ञो बलाविष्टो वीरभद्रं जघान च ॥ २५ ॥ स शक्तिं च महातेजा वीरभद्रो हि तारकम् ॥ त्रिशूलेन च घोरेण शिवस्यानुचरो बली ॥ २६ ॥ एवं संयुध्यमानौ तौ जघ्नतुश्चेतरेतरम् ॥ द्वंद्वयुद्धं सुतुमुलं तयोर्जातं महात्मनोः ॥ २७ ॥ सुरास्तत्रैव समरे प्रेक्षका ह्यभवंस्तदा ॥ तयोर्भेरीमृदंगाश्च पटहानकगोमुखाः ॥ २८ ॥ तथा डमरुनादेन व्याप्तमासीज्जगत्रयम् ॥ तेन घोषेण महता युध्यमानौ महाबलौ ॥ २९ ॥ शुशुभातेऽतिसंरब्धौ प्रहारैर्जर्जरीकृतौ ॥ अन्योन्यमभिसंरब्धौ तौ बुधांगारकाविव ॥ ३० ॥ नारदेन तदा ख्यातो वीरभद्रस्य तद्वधः ॥ न रोचते च तद्वाक्यं वीरभद्रस्य वै तदा ॥ ३१ ॥ नारदेन यदुक्तं हि तारकस्य वधं प्रति ॥ यथा रुद्रस्तथा सोऽपि वीरभद्रो महाबलः ॥ ॥ ३२ ॥ एवं प्रयुध्यमानौ तौ जघ्नतुश्चेतरेतरम् ॥ अन्योन्यं स्पर्द्धमानौ तौ गर्जतौ सिंहयोरिव ॥ ३३ ॥ एवं तदा तौ भुवि युध्यमानौ महात्मना ज्ञानवतां वरेण ॥ स वीरभद्रो हि तदा निवारितो वाक्यैरनेकैरथ नारदेन ॥३४॥ तथा निशम्य तद्वाक्यं नारदस्य मुखोद्गतम् ॥ वीरभद्रो रुषाविष्टो नारदं प्रत्युवाच ह ॥३५॥ तारकं च वधिष्यामि पश्य मेऽद्य पराक्रमम् ॥ आनयंति च ये वीराः स्वामिनं रणसंसदि ॥ ते पापिनो ह्यधर्मिष्ठा विमृशंति रणं गताः ॥३६॥ भीरवस्ते तु विज्ञेया न वाच्यास्ते कदाचन ॥ त्वं न जानासि देवर्षे योधानां च प्रतिक्रियाम् ॥३७॥ मृत्युं च पृष्ठतः कृत्वा रणभूमौ गतव्यथाः ॥ शस्त्राशस्त्रैर्भिन्नगात्राः प्रशस्ता नात्र संशयः ॥३८॥ इत्युक्त्वा चावदद्देवान्वीरभद्रो महाबलः ॥ शृण्वंतु मम वाक्यानि देवा इन्द्रपुरोगमाः ॥ ॥३९॥ अतारकां महीं चाद्य करिष्ये नात्र संशयः ॥४०॥ अथ त्रिशूलमादाय तारकेण युयोध सः ॥ वृषारूढैरनेकैश्च त्रिशूलवरधारिभिः ॥४१॥ कपर्दिनो वृषांकाश्च गणास्तेतिप्रहारिणः ॥ वीरभद्रं पुरस्कृत्य वीरभद्रपराक्रमाः ॥ ४२ ॥ त्रिशूलधारिणः सर्वे सर्वे सर्पांगभूषणाः ॥ सचंद्रशेखराः सर्वे जटाजूटविभूषिताः ॥ ४३ ॥ नीलकण्ठा दशभुजाः पञ्चवक्त्रास्त्रिलोचनाः ॥ छत्रचामरसंवीताः सर्वे तेऽत्युग्रबाहवः ॥ ४४ ॥ वीरभद्रं पुरस्कृत्य सर्वे हरपराक्रमाः ॥ युयुधुस्ते तदा दैत्यास्तारकासुरजीविनः ॥ ४५ ॥ पुनःपुनस्तैश्च तदा बभूवुर्गणैर्जितास्ते ह्यसुराः पराङ्मुखाः ॥ बभूव तेषां च तदातिसंगरो महाभयो दैत्यवरैस्तदानीम् ॥ ४६ ॥ अमृष्यमाणाः परमास्त्रकोविदैस्ततो गणास्ते जयिनो बभूवुः ॥ गणैर्जितास्ते ह्यसुराः पराभवं तं तारकं ते व्यथिताः शशंसुः ॥ ४७ ॥ विनाम्य चापं हि तथा च तारकः स योद्धुकामः प्रविवेश सेनाम् ॥ यथा झषो वै प्रविवेश सागरं तथा ह्यसौ दैत्यवरो महात्मा ॥ ४८ ॥ गणैः समेतो युयुधे तदानीं स वीरभद्रो हि महाबलश्च ॥ सर्वान्सुरांश्चेंद्रमुखान्महाबलस्तथा गणान्यक्षपिशाचगुह्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कान् ॥ स दैत्यवर्योऽतिरुषं प्रविष्टः संमर्दयामास महाबलो हि ॥ ४९ ॥ ततः समभवद्युद्धं देवदानवसंकुलम् ॥ देवदानवयक्षाणां सन्निपातकरं महत् ॥ ५० ॥ तथा वृषा गर्जमाना अश्वाश्चाश्च सादिभिः ॥ रथिभिश्च रथाञ्जघ्नुः कुंजरान्सादिभिः सह ॥ ५१ ॥ वृषारूढैः सरथैस्ते च सर्वे निष्पाटिता ह्यसुराः पोथिताश्च ॥ ५२ ॥ क्षयं प्रणीता बहवस्तदानीं पेतुः पृथिव्यां निहताश्च केचित् ॥ केचित्प्रविष्टा हि रसातलं च पलायमाना बहवस्तथैव ॥ ५३ ॥ केचिच्च शरणं प्राप्ता रुद्रानुचरकिंकरान् ॥ एवं नष्टं तदा सैन्यं विलोक्यासुरपालकः ॥ तारको हि रुषाविष्टो हंतुं देवगणान्ययौ ॥ ॥ ५४ ॥ भुजानामयुतं कृत्वा दैत्यराजो हि तारकः ॥ आरुह्य सिंहं सहसा घातयामास तान्रणे ॥५५॥ दंशितेन च सिंहेन वृषाः केचिद्विदारिताः ॥ तथैव तारकेणैव घातिता बहवो गणाः ॥ ५६ ॥ एवं कृतं तदा तेन तारकेण महात्मना ॥ सर्वेषामेव देवानामशक्यस्तारको महान् ॥ ५७ ॥ जातस्तदा महाबाहुस्त्रैलोक्यक्षयकारकः ॥ तारकस्यानुगा दैत्या अजेया बलवत्तराः ॥ ५८ ॥ महारूढा दंशिताश्च करालास्ते प्रहारिणः ॥ तैराहता गणाः सर्वे सिंहैश्च वृषभा हताः ॥ ५९ ॥ एवं निहन्यमाना वै गणास्ते रणमण्डले ॥ प्रहस्य विष्णुः प्रोवाच कुमारं शिववल्लभम् ॥ ६० ॥ ॥ ॥ विष्णुरुवाच ॥ ॥ नान्यो हंतास्य पापस्य त्वद्विना कृत्तिकासुत ॥ तस्मात्त्वया हि कर्त्तव्यं वचनं च महाभुज ॥ ६१ ॥ तारकस्य वधार्थाय उत्पन्नोऽसि शिवात्मज ॥ तस्मात्त्वयैव कर्त्तव्य निधनं तारकस्य च ॥ ६२ ॥ तच्छ्रुत्वा भगवान्क्रुद्धः पार्वतीनन्दनो महान् ॥ उवाच प्रहसन्वाक्यं विष्णुं प्रति यथोचितम् ॥ ६३ ॥ मया निरीक्ष्यते सम्यक्चित्रयुद्धं महात्मनाम् ॥ अनभिज्ञोऽस्म्यहं विष्णो कार्याकार्यविचारणे ॥ ६४ ॥ केऽस्मदीयाः परे चैव न जानामि कथंचन ॥ किमर्थं युध्यमाना वै परस्परवधे स्थिताः ॥ ६५ ॥ कुमारस्य वचः श्रुत्वा नारदो वाक्यमब्रवीत् ॥ ६६ ॥ ॥ नारद उवाच ॥ ॥ कुमारोऽसि महाबाहो शंकरस्यांशसंभवः ॥ त्वं त्राता जगतां स्वामी देवानां च परा गतिः ॥ ६७ ॥ तारकेण पुरा वीर तपस्तप्तं सुदारुणम् ॥ येनैव विजिता देवा येन स्वर्गस्तथा जितः ॥ ६८ ॥ तपसा तेन चोग्रेण अजेयत्वमवाप्तवान् ॥ अनेनापि जितश्चेंद्रो लोकपालास्तथैव च ॥ ६९ ॥ त्रैलोक्यं च जितं सर्वं ह्यनेनैव दुरात्मना ॥ तस्मात्त्वया निहंतव्यस्तारकः पापपूरुषः ॥ ७० ॥ सर्वेषां शं विधातव्यं त्वया नाथेन चाद्य वै ॥ नारदस्य वचः श्रुत्वा कुमारः प्रहसन्महान् ॥ विमानादवतीर्याथ पदातिः परमोऽभवत् ॥ ७१ ॥ पद्भ्यां तदासौ परिधावमानः शिवात्मजोयं च कुमाररूपी ॥ करे समादाय महाप्रभावां शक्तिं महोल्कामिव दीप्तियुक्ताम् ॥ ७२ ॥ दृष्ट्वा तमायांतमतीव चंडमव्यक्तरूपं बलिनां वरिष्ठम् ॥ दैत्यो बभाषे सुरसत्तमानामसौ कुमारो द्विषतां

CC-0. In Public Domain. Digitization by eGangotri

निहंता ॥ ७३ ॥ अनेन सार्द्धं ह्यहमेव वीरो योत्स्यामि सर्वानहमेव वीरान् ॥ गणांश्च सर्वानपि घातयामि महेश्वराँल्लोकपालांश्च सद्यः ॥
॥ ७४ ॥ इत्येवमुक्त्वा सततं महाबलः कुमारमुद्दिश्य ययौ च योद्धुम् ॥ जग्राह शक्तिं परमाद्भुतां च स तारको वाक्यमिदं बभाषे ॥ ७५ ॥
॥ ॥ तारक उवाच ॥ ॥ कुमारो मेग्रतश्चाद्य भवद्भिश्च कथं कृतः ॥ यूयं गतत्रपा देवा येषां राजा पुरंदरः ॥ ७६ ॥ पुरा येन कृतं कर्म
विदितं सर्वमेव तत् ॥ प्रसुप्ताश्चार्दिता गर्भे जठरस्था निपातिताः ॥ ७७ ॥ कश्यपस्यात्मजेनैव बहुरूपो हतोऽसुरः ॥ नमुचिश्च हतो वीरो
वृत्रश्चैव तथा हतः ॥ ७८ ॥ कुमारं हंतुकामोसौ देवेंद्रो बलघातकः ॥ कुमारोऽयं मया देवा घातितोद्य न संशयः ॥ ७९ ॥ पुरा हतास्त्वया विप्रा
दक्षयज्ञे ह्यनेकशः ॥ तत्कर्मणः फलं चाद्य वीरभद्र महामते ॥ दर्शयिष्यामि ते वीर रणे रणविशारद ॥ ८० ॥ इत्येवमुक्त्वा स तदा महात्मा दैत्या
धिपो वीरवरः स एकः ॥ जग्राह शक्तिं परमाद्भुतां च स तारको युद्धविदां वरिष्ठः ॥८१॥ इति परमरुषाभिभूतो दितितनयः परीवृतोऽसुरेंद्रैः ॥ युधि
मतिमकरोत्तदा निहंतुं समरविजयी स तारको बलीयान् ॥ ८२ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां प्रथमे माहेश्वरखण्डे
केदारखण्डे शिवशास्त्रे सुरतारकासुरसंग्रामवर्णनंनामैकोनत्रिंशोऽध्यायः ॥ २९ ॥ छ ॥ ॥ लोमश उवाच ॥ ॥ वल्गमानं तमायांतं तारका
सुरमोजसा ॥ आजघान च वज्रेण इंद्रो मतिमतां वरः ॥ १ ॥ तेन वज्रप्रहारेण तारको विह्वलीकृतः ॥ पतितोऽपि समुत्थाय शक्त्या तं प्राहरद्वि
पम् ॥ २ ॥ पुरंदरं गजस्थं हि अपातयत भूतले ॥ हाहाकारो महानासीत्पतिते च पुरंदरे ॥ ३ ॥ तारकेणापि तत्रैव यत्कृतं तच्छृणु प्रभो ॥ पतितं
च पदाक्रम्य हस्ताद्वज्रं प्रगृह्य च ॥ ४ ॥ हतं देवेंद्रमालोक्य तारको रिपुसूदनः ॥ वज्रघातेन महताऽताडयत्तु पुरंदरम् ॥ ५ ॥ त्रिशूलमुद्यम्य
महाबलस्तदा स वीरभद्रो रुषितः पुरंदरम् ॥ संरक्षमाणो हि जघान तारकं शूलेन दैत्यं च महाप्रभेण ॥ ६ ॥ शूलप्रहाराभिहतो निपपात महीतले॥
पतितोऽपि महातेजास्तारकः पुनरुत्थितः ॥ ७ ॥ जघान परया शक्त्या वीरभद्रं तदोरसि ॥ वीरभद्रोपि पतितः शक्तिघातेन तस्य वै ॥ ८ ॥
सगणाश्चैव देवाश्च गंधर्वोरगराक्षसाः ॥ हाहाकारेण महता चुक्रुशुश्च पुनःपुनः ॥ ९ ॥ तदोत्थितः सहसा महाबलः स वीरभद्रो द्विषतां निहंता ॥
त्रिशूलमुद्यम्य तडित्प्रकाशं जाज्वल्यमानं प्रभया निरंतरम् ॥ स्वरोचिषा भासितदिग्वितानं सूर्यदुबिंबाग्न्युडुमण्डलाभम् ॥ १० ॥ त्रिशूलेन तदा
यावद्धंतुकामो महाबलः ॥ निवारितः कुमारेण मावधीस्त्वं महामते ॥११॥ जगर्ज च महातेजाः कार्त्तिकेयो महाबलः ॥१२॥ तदा जयेत्यभिहितो
भूतैराकाशसंस्थितैः ॥ शक्त्या परमया वीरस्तारकं हंतुमुद्यतः ॥ १३ ॥ तारकस्य कुमारस्य संग्रामस्तत्र दुःसहः ॥ जातस्ततो महाघोरः सर्वभूतभयं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

करः ॥ १४ ॥ शक्तिहस्तौ च तौ वीरौ युयुधाते परस्परम् ॥ शक्तिभ्यां भिन्नहस्तौ तौ महासाहससंयुतौ ॥१५॥ परस्परं वंचयंतौ सिंहाविव महाबलौ ॥ वैतालिकीं समाश्रित्य तथा वै खेचरीं गतिम् ॥ १६ ॥ पार्वतं मतमाश्रित्य शक्त्या शक्तिं निजघ्नतुः ॥ एभिर्मतैर्महावीरौ चक्रतुर्युद्धमुत्तमम् ॥ १७ ॥ अन्योन्यसाधकौ भूत्वा महाबलपराक्रमौ ॥ जघ्नतुः शक्तिधाराभी रणे रणविशारदौ ॥ १८ ॥ मूर्ध्नि कण्ठे तथा बाह्वोर्जान्वोश्चैव कटीतटे ॥ वक्षस्युरसि पृष्ठे च चिच्छिदतुः परस्परम् ॥ १९ ॥ तदा तौ युध्यमानौ च हन्तुकामौ महाबलौ ॥ प्रेक्षका ह्यभवन्सर्वे देवगन्धर्वगुह्यकाः ॥ २० ॥ ऊचुः परस्परं सर्वे कोऽस्मिन्युद्धे विजेष्यते ॥ तदा नभोगता वाणी उवाच परिसांत्व्य वै ॥ २१ ॥ तारकं हि सुराश्चाद्य कुमारोऽयं हनिष्यति ॥ मा शोच्यतां सुराः सर्वैः सुखेन स्थीयतां दिवि ॥ २२ ॥ श्रुत्वा तदा तां गगने समीरितां तदैव वाचं प्रमथैः परीतः ॥ कुमारकस्तं प्रति हंतुकामो दैत्याधिपं तारकमुग्ररूपम् ॥ २३ ॥ शक्त्या तया महाबाहुराजघान स्तनांतरे ॥ तारकं ह्यसुरश्रेष्ठं कुमारो बलवत्तरः ॥ २४ ॥ तं प्रहारमनादृत्य तारको दैत्यपुंगवः ॥ कुमारं चाऽपि संक्रुद्धः स्वशक्त्या चाजघान वै ॥ २५ ॥ तेन शक्तिप्रहारेण शांकरिर्मूर्च्छितोऽभवत् ॥ मुहूर्तांचेतनां प्राप्तः स्तूयमानो महर्षिभिः ॥ २६ ॥ यथा सिंहो मदोन्मत्तो हंतुकामस्तथैव च ॥ कुमारस्तारकं दैत्यमाजघान प्रतापवान् ॥ २७ ॥ एवं परस्परेणैव कुमारश्चैव तारकः ॥ युयुधातेऽतिसंरब्धौ शक्तियुद्धपरायणौ ॥ २८ ॥ अभ्यासपरमावास्तामन्योन्यविजिगीषया ॥ तथा तौ युध्यमानौ च चित्ररूपौ तपस्विनौ ॥ २९ ॥ धाराभिश्च अणीभिश्च सुप्रयुक्तौ च जघ्नतुः ॥ अवलोकपराः सर्वे देवगन्धर्वकिन्नराः ॥ ३० ॥ विस्मयं परमं प्राप्ता नोचुः किंचन तस्य वै ॥ न ववौ च तदा वायुर्निष्प्रभोऽभूद्दिवाकरः ॥ ३१ ॥ हिमालयोऽथ मेरुश्च श्वेतकूटश्च दर्दुरः ॥ मलयोऽथ महाशैलो मैनाको विंध्यपर्वतः ॥ ३२ ॥ लोकालोकौ महाशैलौ मानसोत्तरपर्वतः ॥ कैलासो मन्दरो माल्यो गन्धमादन एव च ॥ ३३ ॥ उदयाद्रिर्महेंद्रश्च तथैवास्तगिरिर्महान् ॥ ३४ ॥ एते चान्ये च बहवः पर्वताश्च महाप्रभाः ॥ स्नेहार्दितास्तदाजग्मुः कुमारं च परीप्सवः ॥ ३५ ॥ ततः स दृष्ट्वा तान्सर्वान्भयभीतांश्च शांकरिः ॥ पर्वतान्गिरिजापुत्रो बभाषे प्रतिबोधयन् ॥ ३६ ॥ ॥ कुमार उवाच ॥ ॥ मा खिद्यत महाभागा मा चिंता क्रियतां नगाः ॥ घातयाम्यद्य पापिष्ठं सर्वेषामिह पश्यताम् ॥ ३७ ॥ एवं समाश्वास्य तदा मनस्वी तान्पर्वतान्देवगणैः समेतान् ॥ प्रणम्य शंभुं मनसा हरिप्रियः स्वां मातरं चैव नतः कुमारः ॥ ३८ ॥ कार्त्तिकेयस्ततः शक्त्या निचकर्त रिपोः शिरः ॥ तच्छिरो निपपातोर्व्यां तारकस्य च तत्क्षणात् ॥ एवं स जयमापेदे कार्त्तिकेयो महाप्रभुः ॥ ३९ ॥ ददृशुस्तं सुरगणा ऋषयो गुह्यकाः खगाः ॥ किंनराश्चारणाः सर्पास्तथा चैवाप्सरो

CC-0. In Public Domain. Digitization by eGangotri

गणाः ॥ ४० ॥ हर्षेण महताविष्टास्तुष्टुवुस्तं कुमारकम् ॥ विद्याधर्यश्च ननृतुर्गायकाश्च जगुस्तदा ॥ ४१ ॥ एवं विजयमापन्नं दृष्ट्वा सर्वे मुदा युताः ॥ ततो हर्षात्समागम्य स्वांकमारोप्य चात्मजम् ॥ ४२ ॥ परिष्वज्य तु गाढेन गिरिजापि तुतोष वै ॥ स्वोत्संगे च समारोप्य कुमारं सूर्यवर्चसम् ॥ ॥ ४३ ॥ लालयामास तन्वंगी पार्वती रुचिरेक्षणा ॥ ऋषिभिः सत्कृतः शंभुः पार्वत्या सहितस्तदा ॥ ४४ ॥ आर्यासनगता साध्वी शुशुभे मितभाषिणी ॥ संस्तूयमाना मुनिभिः सिद्धचारणपन्नगैः ॥ ४५ ॥ नीराजिता तदा देवैः पार्वती शंभुना सह ॥ कुमारेण सहै वाथ शोभमाना तदा सती ॥ ४६ ॥ हिमालयस्तदागत्य पुत्रैश्च परिवारितः ॥ मेर्वाद्यैः पर्वतैश्चैव स्तूयमानः परोऽभवत् ॥ ४७ ॥ तदा देव गणाः सर्व इन्द्राद्या ऋषिभिः सह ॥ पुष्पवर्षेण महता ववर्षुरमितद्युतिम् ॥ कुमारमग्रतः कृत्वा नीराजनपरा बभुः ॥ ४८ ॥ गीतवादित्रघो षेण ब्रह्मघोषेण भूयसा ॥ संस्तूयमानो विविधैः सूक्तैर्वेदविदां वरैः ॥ ४९ ॥ कुमारविजयंनाम चरित्रं परमाद्भुतम् ॥ सर्वपापहरं दिव्यं सर्वकामप्रदं नृणाम् ॥ ५० ॥ ये कीर्त्तयंति शुचयोऽमितभाग्ययुक्ताश्चानंत्यरूपमजरामरमादधानाः ॥ कौमारविक्रममहात्म्यमुदारमेतदा नंददायकमनोर्थकरं नृणां हि ॥ ५१ ॥ यः पठेच्छृणुयाद्वापि कुमारस्य महात्मनः ॥ चरितं तारकाख्यं च सर्वपापैः समुच्यते ॥ ५२ ॥ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां प्रथमे माहेश्वरखण्डे केदारखंडे शिवशास्त्रे तारकासुरवधपूर्वकं स्वामिकार्त्तिकेयविजयोत्सववर्णनं नाम त्रिंशोऽध्यायः ॥ ३० ॥ ॥ शौनक उवाच ॥ ॥ हत्वा तं तारकं संख्ये कुमारेण महात्मना ॥ किं कृतं सुमहद्विप्र तत्सर्वं वक्तुमर्हसि ॥ १ ॥ कुमारो ह्यपरः शंभुर्येन सर्वमिदं ततम् ॥ तपसा तोषितः शंभुर्ददाति परमं पदम् ॥ २ ॥ कुमारो दर्शनात्सद्यः सफलो हि नृणां सदा ॥ ये पापिनो ह्यधर्म्मिष्ठाः श्वपचा अपि लोमश ॥ दर्शनाद्भूतपापास्ते भवंत्येव न संशयः ॥ ३ ॥ शौनकस्य वचः श्रुत्वा उवाच चरितं तदा ॥ व्यास शिष्यो महाप्राज्ञः कुमारस्य महात्मनः ॥ ४ ॥ ॥ लोमश उवाच ॥ ॥ हत्वा तं तारकं संख्ये देवानामजयं ततः ॥ अवध्यं च द्विजश्रेष्ठाः कुमारो जयमाप्तवान् ॥५॥ महिमा हि कुमारस्य सर्वशास्त्रेषु कथ्यते ॥ वेदैश्च स्वागमैश्चापि पुराणैश्च तथैव च ॥ ६ ॥ तथोपनिषदैश्चैव मीमांसाद्वि तयेन तु ॥ एवंभूतः कुमारोयमशक्यो वर्णितुं द्विजाः ॥ ७ ॥ यो हि दर्शनमात्रेण पुनाति सकलं जगत् ॥ त्रातारं भुवनस्यास्य निशम्य पितृराट् स्वयम् ॥ ८ ॥ ब्रह्माणं च पुरस्कृत्य विष्णुं चैव सवासवम् ॥ स ययौ त्वरितेनैव शंकरं लोकशंकरम् ॥ तुष्टाव प्रयतो भूत्वा दक्षिणाशापतिः स्वयम् ॥ ९ ॥ नमो भर्गाय देवाय देवानां पतये नमः ॥ मृत्युंजयाय रुद्राय ईशानाय कपर्दिने ॥ १० ॥ नीलकंठाय शर्वाय व्योमावयव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रूपिणे ॥ कालाय कालनाथाय कालरूपाय वै नमः ॥ ११ ॥ यमेन स्तूयमानो हि उवाच प्रभुरीश्वरः ॥ किमर्थमागतोऽसि त्वं तत्सर्वं कथय स्व नः ॥ १२ ॥ ॥ यम उवाच ॥ ॥ श्रूयतां देवदेवेश वाक्यं वाक्यविशारद ॥ तपसा परमेणैव तुष्टिं प्राप्तोसि शंकर ॥ १३ ॥ कर्मणा परमेणैव ब्रह्मा लोकपितामहः ॥तुष्टिमेति न संदेहो वराणां हि सदा प्रभुः ॥ १४ ॥ तथा विष्णुर्हि भगवान्वेदवेद्यः सनातनः ॥ यज्ञैरनेकैः संतुष्ट उपवासव्रतैस्तथा ॥ १५ ॥ ददाति केवलं भावं येन कैवल्यमाप्नुयुः ॥ नराः सर्वे मम मतं नान्यथा हि वचो मम ॥ १६ ॥ ददाति तुष्टो वै भोगं तथा स्वर्गादिसंपदः ॥ सूर्यो नमस्ययाऽऽरोग्यं ददातीह न चान्यथा ॥ १७ ॥ गणेशो हि महादेव अर्घ्यपाद्यादिचंदनैः ॥ मंत्रावृत्त्या तथा शंभो निर्विघ्नं च करिष्यति ॥ १८ ॥ तथान्ये लोकपाः सर्वे यथाशक्त्या फलप्रदाः ॥ यज्ञाध्ययनदानाद्यैः परितुष्टाश्च शंकर ॥ १९ ॥ महदाश्चर्यं संभूतं सर्वेषां प्राणिनामिह ॥ कृतं च तव पुत्रेण स्वर्गद्वारमपावृतम् ॥ २० ॥ दर्शनाच्च कुमारस्य सर्वे स्वर्गौकसो नराः ॥ पापिनोऽपि महादेव जाता नास्त्यत्र संशयः ॥ २१ ॥ मया किं क्रियतां देव कार्याकार्यव्यवस्थितौ ॥ ये सत्यशीलाः शांताश्च वदान्या निरवग्रहाः ॥ २२ ॥ जितेंद्रिया अलुब्धाश्च कामरागविवर्जिताः ॥ याज्ञिका धर्मनिष्ठाश्च वेदवेदांगपारगाः ॥ २३ ॥ यां गतिं यांति वै शंभो सर्वे सुकृतिनोपि हि ॥ तां गतिं दर्शनात्सर्वे श्वपचा अधमा अपि ॥ २४ ॥ कुमारस्य च देवेश महदाश्चर्यकर्मणः ॥ कार्त्तिक्यां कृत्तिकायोगसहितायां शिवस्य च ॥ २५ ॥ शिवस्य तनयं दृष्ट्वा ते यांति स्वकुलैः सह ॥ कोटिभिर्बहुभिश्चैव मत्स्थानं परिमुच्य वै ॥ २६ ॥ कुमारदर्शनात्सर्वे श्वपचा अपि यांति वै ॥ सद्गतिं त्वरितेनैव किं क्रियेत मयाधुना ॥ २७ ॥ यमस्य वचनं श्रुत्वा शंकरो वाक्यमब्रवीत् ॥ २८ ॥ ॥ शंकर उवाच ॥ ॥ येषां त्वंतगतं पापं जनानां पुण्यकर्मणाम् ॥ विशुद्धभावो भो धर्म्म तेषां मनसि वर्त्तते ॥ २९ ॥ सत्तीर्थगमनायैव दर्शनार्थं सतामिह ॥ वांछा च महती तेषां जायते पूर्वकारिता ॥ ३० ॥ बहूनां जन्मनामंते मयि भावोऽनुवर्त्तते ॥ प्राणिनां सर्वभावेन जन्माभ्यासेन भो यम ॥ ३१ ॥ तस्मात्सुकृतिनः सर्वे येषां भावोऽनुवर्त्तते ॥ जन्मजन्मानुवृत्तानां विस्मयं नैव कारयेत् ॥ ३२ ॥ स्त्रीबालशूद्राः श्वपचाधमाश्च प्राग्जन्मसंस्कारवशाद्धि धर्म्म ॥ योनिं गताः पापिषु वर्त्तमानास्तथापि शुद्धा मनुजा भवंति ॥ ३३ ॥ तथा सितेन मनसा च भवंति सर्वे सर्वेषु चैव विषयेषु भवंति तज्ज्ञाः ॥ दैवेन पूर्वचरितेन भवंति सर्वे सुराश्चेंद्रादयो लोकपालाः प्राक्तनेन ॥ ३४ ॥ जाता ह्यमी भूतगणाश्च सर्वे ह्यमी ऋषयो ह्यमी देवताश्च ॥ ३५ ॥ विस्मयो नैव कर्त्तव्यस्त्वया वापि कुमारके ॥ कुमारदर्शने चैव धर्मराज निबोध मे ॥ ३६ ॥

CC-0. In Public Domain. Digitization by eGangotri

वचनं कर्मसंयुक्तं सर्वेषां फलदायकम् ॥ सर्वतीर्थानि यज्ञाश्च दानानि विविधानि च ॥ कार्याणि मनःशुद्ध्यर्थं नात्र कार्या विचारणा ॥ ३७ ॥
मनसा भावितो ह्यात्मा आत्मनात्मानमेव च ॥ आत्मा अहं च सर्वेषां प्राणिनां हि व्यवस्थितः ॥ ३८ ॥ अहं सदा भावयुक्त आत्मसंस्थो निरं
तरः ॥ जंगमाजंगमानां च सत्यं प्रति वदामि ते ॥ ३९ ॥ द्वंद्वातीतो निर्विकल्पो हि साक्षात्स्वस्थो नित्यो नित्ययुक्तो निरीहः ॥ कूटस्थो वै
कल्पभेदप्रवादैर्बहिष्कृतो बोधबोध्यो ह्यनन्तः ॥ ४० ॥ विस्मृत्य चैनं स्वात्मानं केवलं बोधलक्षणम् ॥ संसारिणो हि दृश्यंते समस्ता जीवरा
शयः ॥ ४१ ॥ अहं ब्रह्मा च विष्णुश्च त्रयोऽमी गुणकारिणः ॥ सृष्टिपालनसंहारकारका नान्यथा भवेत् ॥ ४२ ॥ अहंकारवृतेनैव कर्मणा कारिता
वयम् ॥ यूयं च सर्वे विबुधा मनुष्याश्च खगादयः ॥ ४३ ॥ पश्वादयः पृथग्भूतास्तथान्ये बहवो ह्यमी ॥ पृथक्पृथक्समीचीना गुणवतश्च संसृतौ
॥ ४४ ॥ पतिता मृगतृष्णायां मायया च वशीकृताः ॥ वयं सर्वे च विबुधाः प्राज्ञाः पंडितमानिनः ॥ ४५ ॥ परस्परं दूषयंतो मिथ्यावादरताः
खलाः ॥ ४६ ॥ त्रैगुणा भवसंपन्ना अतत्त्वज्ञाश्च रागिणः ॥ कामक्रोधभयद्वेषमदमात्सर्यसंयुताः ॥ ४७ ॥ परस्परं दूषयंतो ह्यतत्त्वज्ञा बहिर्मुखाः ॥
तस्मादेवं विदित्वाथ असत्यं गुणभेदतः ॥ ४८ ॥ गुणातीते च वस्त्वर्थे परमार्थैकदर्शनम् ॥ ४९ ॥ यस्मिन्भेदो ह्यभेदं च यस्मिन्रागो विरागताम् ॥
क्रोधो ह्यक्रोधतां याति तद्धाम परमं शृणु ॥ ५० ॥ न तद्भासयते शब्दः कृतकत्वाद्यथा घटः ॥ शब्दो हि जायते धर्म्मः प्रवृत्तिपरमो यतः ॥
॥ ५१ ॥ प्रवृत्तिश्च निवृत्तिश्च तथा द्वंद्वानि सर्वशः ॥ विलयं यांति यत्रैव तत्स्थानं शाश्वतं मतम् ॥ ५२ ॥ निरंतरं निर्गुणं ज्ञप्तिमात्रं निरंजनं
निर्विकारं निरीहम् ॥ सत्तामात्रं ज्ञानगम्यं स्वसिद्धं स्वयंप्रभं सुप्रभं बोधगम्यम् ॥ ५३ ॥ एतज्ज्ञानं ज्ञानविदो वदंति सर्वात्मभावेन निरीक्षयंति ॥
सर्वातीतं ज्ञानगम्यं विदित्वा येन स्वस्थाः समबुद्ध्या चरंति ॥ ५४ ॥ अतीत्य संसारमनादिमूलं मायामयं मायया दुर्विचार्यम् ॥ मायां त्यक्त्वा
निर्ममा वीतरागा गच्छंति ते प्रेतराण्निर्विकल्पम् ॥ ५५ ॥ संसृतिः कल्पनामूलं कल्पना ह्यमृतोपमा ॥ यैः कल्पना परित्यक्ता ते यांति परमां
गतिम् ॥ ५६ ॥ शुक्त्यां रजतबुद्धिश्च रज्जुबुद्धिर्यथोरणे ॥ मरीचौ जलबुद्धिश्च मिथ्या मिथ्यैव नान्यथा ॥ ५७ ॥ सिद्धिः स्वच्छंदवर्त्तित्वं पार
तंत्र्यं हि वै मृषा ॥ बद्धो हि परतंत्राख्यो मुक्तः स्वातंत्र्यभावनः ॥ ५८ ॥ एको ह्यात्मा विदित्वाथ निर्ममो निरवग्रहः ॥ कुतस्तेषां बंधनं च यथा
खे पुष्पमेव च ॥ ५९ ॥ शशविषाणमेवैतज्ज्ञानं संसार एव च ॥ किं कार्यं बहुनोक्तेन वचसा निष्फलेन हि ॥ ६० ॥ ममतां च निराकृत्य प्राप्तु
कामाः परं पदम् ॥ ज्ञानिनस्ते हि विद्वांसो वीतरागा जितेंद्रियाः ॥ ६१ ॥ यैस्त्यक्तो ममताभावो लोभकोपौ निराकृतौ ॥ ते यांति परमं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्थानं कामक्रोधविवर्जिताः ॥ ६२ ॥ यावत्कामश्च लोभश्च रागद्वेषौ व्यवस्थितौ ॥ नाप्नुवंति च तां सिद्धिं शब्दमात्रैकबोधकाः ॥ ६३ ॥ ॥ ॥ यम उवाच ॥ ॥ शब्दाच्छब्दः प्रवर्त्तेत निःशब्दं ज्ञानमेव च ॥ अनित्यत्वं हि शब्दस्य कथं प्रोक्तं त्वया प्रभो ॥ ६४ ॥ अक्षरं ब्रह्म परमं शब्दो वै ह्यक्षरात्मकः ॥ तस्माच्छब्दस्त्वया प्रोक्तो निरीक्षक इति श्रुतम् ॥ ६५ ॥ प्रतिपाद्यं हि यत्किंचिच्छब्देनैव विना कथम् ॥ तत्सर्वं कथ्यतां शंभो कार्याकार्यव्यवस्थितौ ॥ ६६ ॥ ॥ शंकर उवाच ॥ ॥ शृणुष्वावहितो भूत्वा परमार्थयुतं वचः ॥ यस्य श्रवणमात्रेण ज्ञातव्यं नावशिष्यते ॥ ६७ ॥ ज्ञानप्रवादिनः सर्वं ऋषयो वीतकल्मषाः ॥ ज्ञानाभ्यासेन वर्त्तंते ज्ञानं ज्ञानविदो विदुः ॥ ६८ ॥ ज्ञानं ज्ञेयं ज्ञानगम्यं ज्ञात्वा च परिगीयते ॥ कथं केन च ज्ञातव्यं किं तद्वक्तुं विवक्षितम् ॥ ६९ ॥ एतत्सर्वं समासेन कथयामि निबोध मे ॥ एको ह्यनेकधा चैव दृश्यते भेदभावनः ॥ ७० ॥ यथा भ्रमरिकादृष्टा भ्रम्यते च मही यम ॥ तथात्मा भेदबुद्ध्या च प्रतिभाति ह्यनेकधा ॥ ७१ ॥ तस्माद्विमृश्य तेनैव ज्ञातव्यः श्रवणेन च ॥ मंतव्यः सुप्रयोगेण मननेन विशेषतः ॥ ७२ ॥ निर्द्धार्य चात्मनात्मानं सुखं बंधात्प्रमुच्यते ॥ मायाजालमिदं सर्वं जगदेतच्चराचरम् ॥ ७३ ॥ मायामयोऽयं संसारो ममतालक्षणो महान् ॥ ममतां च बहिः कृत्वा सुखं बंधात्प्रमुच्यते ॥ ७४ ॥ कोऽहं कस्त्वं कुतश्चान्ये महामायावलंबिनः ॥ अजागलस्तनस्येव प्रपंचोऽयं निरर्थकः ॥ ७५ ॥ निष्फलोऽयं निराभासो निःसारो धूमडंबरः ॥ तस्मात्सर्वप्रयत्नेन आत्मानं स्मर वै यम ॥ ७६ ॥ ॥ लोमश उवाच ॥ ॥ एवं प्रचोदितस्तेन शंभुना प्रेतराट्स्वयम् ॥ बुद्धो भूत्वा यमः साक्षादात्मभूतोऽभवत्तदा ॥ ७७ ॥ कर्म्मणां हि च सर्वेषां शास्ता कर्मानुसारतः ॥ बभूव डंबरो नृणां भूतानां च समाहितः ॥ ७८ ॥ ॥ ऋषय ऊचुः ॥ ॥ हत्वा तु तारकं युद्धे कुमारेण महात्मना ॥ अत ऊर्ध्वं कथ्यतां भोः किं कृतं महदद्भुतम् ॥ ७९ ॥ ॥ सूत उवाच ॥ ॥ हते तु तारके दैत्ये हिमवत्प्रमुखाद्रयः ॥ कार्त्तिकेयं समागत्य गीर्भी रम्याभिरैडयन् ॥ ८० ॥ ॥ गिरय ऊचुः ॥ ॥ नमः कल्याणरूपाय नमस्ते विश्वमंगल ॥ विश्वबंधो नमस्तेऽस्तु नमस्ते विश्वभावन ॥ ८१ ॥ वरिष्ठाः श्वपचा येन कृता वै दर्शनात्त्वया ॥ त्वां नमामो जगद्बंधुं त्वां वयं शरणागताः ॥ ८२ ॥ नमस्ते पार्वतीपुत्र शंकरात्मज ते नमः ॥ नमस्ते कृत्तिकासूनो अग्निभूत नमोस्तु ते ॥ ८३ ॥ नमोस्तु ते देववरैः सुपूज्य नमोऽस्तु ते ज्ञानविदां वरिष्ठ ॥ नमोऽस्तु ते देववर प्रसीद शरण्य सर्वार्तिविनाशदक्ष ॥८४॥ एवं स्तुतो गिरिभिः कार्त्तिकेयो ह्युमासुतः ॥ तान्गिरीन्सुप्रसन्नात्मा वरं दातुं समुत्सुकः ॥ ८५ ॥ ॥ कार्त्तिकेय उवाच ॥ ॥ भोभो गिरिवरा यूयं शृणुध्वं मद्वचोऽधुना ॥ कार्मिभिर्ज्ञानिभिश्चैव सेव्यमाना भविष्यथ ॥ ८६ ॥ भवत्स्वेव

CC-0. In Public Domain. Digitization by eGangotri

हि:वर्त्तते दृषदो यत्नसेविताः ॥ पुनंतु विश्वं वचनान्मम ता नात्र संशयः ॥ ८७ ॥ पर्वतीयानि तीर्थानि भविष्यंति न चान्यथा ॥ शिवालयानि दिव्यानि दिव्यान्यायतनानि च ॥ ८८ ॥ अयनानि विचित्राणि शोभनानि महांति च ॥ भविष्यंति न संदेहः पर्वता वचनान्मम ॥८९॥ योऽयं मातामहो मेऽद्य हिमवान्पर्वतोत्तमः ॥ तपस्विनां महाभागः फलदो हि भविष्यति ॥ ९० ॥ मेरुश्च गिरिराजोऽयमाश्रयो हि भविष्यति ॥ लोकालोको गिरिवर उदयाद्रिर्महायशः ॥ ९१ ॥ लिंगरूपो हि भगवान्भविष्यति न चान्यथा ॥ श्रीशैलो हि महेंद्रश्च तथा सह्याचलो गिरिः ॥ ९२ ॥ माल्यवान्मलयो विन्ध्यस्तथासौ गंधमादनः ॥ श्वेतकूटस्त्रिकूटो हि तथा दर्दुरपर्वतः ॥ ९३ ॥ एते चान्ये च बहवः पर्वता लिंगरूपिणः ॥ मम वाक्याद्भविष्यंति पापक्षयकरा ह्यमी ॥ ९४ ॥ एवं वरं ददौ तेभ्यः पर्वतेभ्यश्च शांकरिः ॥ ततो नंदी ह्युवाचाथ सर्वागमपुरस्कृतम् ॥ ९५ ॥ ॥ नंद्युवाच ॥ ॥ त्वया कृता हि गिरयो लिंगरूपिण एव ते ॥ शिवालयाः कथं नाथ पूज्याः स्युः सर्वदैवतैः ॥ ९६ ॥ ॥ कुमार उवाच ॥ ॥ लिंगं शिवालयं ज्ञेयं देवदेवस्य शूलिनः ॥ सर्वैर्नृभिर्दैवतैश्च ब्रह्मादिभिरतंद्रितैः ॥ ९७ ॥ नीलं मुक्ता प्रवालं च वैडूर्यं चंद्रमेव च ॥ गोमेदं पद्मरागं च मारतं कांचनं तथा ॥ ९८ ॥ राजतं ताम्रमारं च तथा नागमयं परम् ॥ रत्नधातुमयान्येव लिंगानि कथितानि ते ॥ ९९ ॥ पवित्राण्येव पूज्यानि सर्वकामप्रदानि च ॥ एतेषामपि सर्वेषां काश्मीरं हि विशिष्यते ॥ १०० ॥ ऐहिकामुष्मिकं सर्वं पूजाकर्तुः प्रयच्छति ॥ १०१ ॥ ॥ नंद्युवाच ॥ ॥ लिंगानामपि पूज्यं स्याद्बाणलिंगं त्वया कथम् ॥ कथितं चोत्तमत्वेन तत्सर्वं वद सुव्रत ॥ १०२ ॥ ॥ कुमार उवाच ॥ रेवायां तोयमध्ये च दृश्यंते दृषदो हि याः ॥ शिवप्रसादात्तास्तु स्युर्लिंगरूपा न चान्यथा ॥ १०३ ॥ श्लक्ष्णमूलाश्च कर्तव्याः पिंडिकोपरि संस्थिताः ॥ पूजनीयाः प्रयत्नेन शिवदीक्षायुतेन हि ॥ १०४ ॥ पिंडीयुक्तं च शास्त्रेण विधिना च यजेच्छिवम् ॥ वरदो हि जगन्नाथः पूजकस्य न चान्यथा ॥ १०५ ॥ पंचाक्षरी यस्य मुखे स्थिता सदा चेतोनिवृत्तिः शिवचिंतने च ॥ भूतेषु:साम्यं परिवादमूकता पंढत्वमेवं परयोषितासु ॥ १०६ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां प्रथमे माहेश्वरखण्डे केदारखण्डे शिवशास्त्रे कार्त्तिकेयप्रोक्तशिवलिंगमाहात्म्यवर्णनं नामैकत्रिंशोऽध्यायः ॥ ३१ ॥ ॥ लोमश उवाच ॥ ॥ एवं ते शिवधर्माश्च कथितास्तेन वै द्विजाः ॥ सविशेषाः पाशुपताः प्रसादाच्चैव विस्तरात् ॥ १ ॥ अनेकागमसंवीता यथातत्त्वमुदाहृताः ॥ कापालिकानां भेदाश्च प्रोक्ता व्याससमासतः ॥:२ ॥

१ वचनम्–इति शेषः । २ अत्र–'तस्य'–इत्यध्याहृत्य 'पूजकस्य' इति पूर्वोक्तश्लोकस्थेन संबध्य–तस्य पूजकस्य जगन्नाथो वरदो भवेत्–इति समुदितवाक्यार्थो बोद्धव्यः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धर्मा नानाविधाः प्रोक्ता नंदिनं प्रति वै तदा ॥ ३ ॥ ॥ ऋषय ऊचुः ॥ ॥ श्रुतं कुमारचरितमविशेषं सुमंगलम् ॥ अस्माभिश्च महाभाग किंचित्पृच्छामहे वयम् ॥ ४ ॥ श्वेतस्य राजसिंहस्य चरितं परमाद्भुतम् ॥ येन संतोषितो रुद्रः शिवो भक्त्याऽप्रमेयया ॥ ५ ॥ ते भक्तास्ते महात्मानो ज्ञानिनस्ते च कर्मिणः ॥ येऽर्चयंति महाशंभुं देवं भक्त्या समावृताः ॥ ६ ॥ तस्मात्पृच्छामहे सर्वे चरितं शंकरस्य च ॥ व्यासप्रसादात्सर्वं यज्जानासि त्वं न चापरः ॥७॥ निशम्य वचनं तेषां मुनीनां लोमशोऽब्रवीत् ॥ ८॥ ॥ लोमश उवाच ॥ ॥ आकर्ण्यतां महाभागाश्चरितं परमाद्भुतम् ॥ तस्य राज्ञो हि भजतो राजभोगांश्च सर्वशः ॥ मतिर्द्धर्मे समुत्पन्ना श्वेतस्य च महात्मनः ॥ ९ ॥ पृथिवीं पालयामास प्रजा धर्मेण पालयन् ॥ ब्रह्मण्यः सत्यवाक्छूरः शिवभक्तो निरंतरम् ॥ १० ॥ राज्यं शशासाथ स शक्तितो नृपो भक्त्या तदा चैव समर्चयत्सदा ॥ शंभुं परेशं परमं परात्परं शांतं पुराणं परमात्मरूपम् ॥ ११ ॥ आयुस्तस्य परिक्षीणमर्चतः परमेश्वरम् ॥ अथैतच्च महाभाग चरितं श्रूयतां मम ॥ १२ ॥ वाणी शिवकथायुक्ता परमाश्चर्यसंयुता ॥ न वाऽऽधयो हि तस्यैव व्याधयो हि महीपतेः ॥ १३ ॥ तस्य राज्ञो न बाधंते तथा चोपद्रवास्त्वमी ॥ निरीतिको जनो ह्यासीन्निरुपद्रव एव च ॥ १४ ॥ अकृष्टपच्यौषधयस्तस्य राज्ञोऽभवन्भुवि ॥ तपस्विनो ब्राह्मणाश्च वर्णाश्रमयुता जनाः ॥ ॥ १५ ॥ न पुत्रमरणे दुःखं नापमानं न मारकाः ॥ न दारिद्र्यं च ते सर्वे प्राप्नुवन्ति कदाचन ॥ १६ ॥ एवं बहुतरः कालस्तस्य राज्ञो महात्मनः ॥ गतो हि सफलो विप्राः शिवपूजारतस्य वै ॥ १७ ॥ एकदा पूजमानं तं शंकरं परमार्थदम् ॥ यमो हि प्रेषयामास यमदूतान्नृपं प्रति ॥ १८ ॥ वचनाच्चित्रगुप्तस्य श्वेत आनीयतामिति ॥ तथेति मत्वा ते दूता आगताः शिवमंदिरम् ॥ १९ ॥ राजानं नेतुकामास्ते पाशहस्ता महाभयाः ॥ यावत्समागता याम्या राजानं ददृशुस्त्वरात् ॥ २० ॥ न चक्रिरे तदा दूता आज्ञां धर्मस्य चैव हि ॥ ज्ञात्वा सर्वं यमश्चैव आगतः स्वयमेव हि ॥ २१ ॥ उद्धृत्य दंडं सहसा नेतुकामस्तदा नृपम् ॥ ददर्श च महाबाहुः शिवध्यानपरायणम् ॥ २२ ॥ शिवभक्तियुतं शांतं केवलं ज्ञानसंयुतम् ॥ यमोऽपि दृष्ट्वा राजानं परं क्षोभमुपागमत् ॥ २३ ॥ चित्रस्थो ह्यभवत्सद्यः प्रेतराजोऽतिविह्वलः ॥ कालरूपश्च यो नित्यं प्रजानां क्षयकारकः ॥ २४ ॥ आगतस्तत्क्षणादेव नृपं प्रति रुषान्वितः ॥ खड्गेन सितधारेण चर्मणा परमेण हि ॥ २५ ॥ तावत्तं ददृशे सोऽपि स्थितं द्वारि भयावृतम् ॥ उवाच कालो हि तदा यमं वैवस्वतं प्रति ॥ २६ ॥ कस्मात्त्वया धर्मराज नो नीतोऽयं नृपो महान् ॥ यम दूतसहायश्च भीतवत्प्रतिभासि मे ॥ २७ ॥ कालात्ययो न कर्त्तव्यो वचनान्मम सुव्रत ॥ कालेनोक्तस्तदा धर्म उवाच प्रस्तुतं वचः ॥ २८ ॥ तवाज्ञां च करि

CC-0. In Public Domain. Digitization by eGangotri

ष्यामि नात्र कार्या विचारणा ॥ असौ दुरत्ययोऽस्माकं शिवभक्तो निरंतरम् ॥ २९ ॥ चित्रस्था इव तिष्ठाम भयादेवस्य शूलिनः ॥ यमस्य वचनं श्रुत्वा कालः क्रोधसमन्वितः ॥ राजानं हंतुमारेभे त्वरितः खड्गमाददे ॥ ३० ॥ त्रिगुणाष्टार्कसंकाशं प्रविवेश शिवालयम् ॥ यावत्कोपेन महता तावद्दृष्टः पिनाकिना ॥ स्वभक्तं हंतुकामोसौ श्वेतराजानमुत्तमम् ॥ ३१ ॥ ध्यानस्थितं चात्मनि तं विशुद्धज्ञानप्रदीपेन विशुद्धचित्तम् ॥ आत्मानमात्मात्मतया निरंतरं स्वयंप्रकाशं परमं पुरस्तात् ॥ ३२ ॥ एवंविधं तं प्रसमीक्ष्य कालं संचिंत्यमानं मनसाऽचलेन ॥ शैवं पदं यत्परमार्थरूपं कैवल्यसायुज्यकरं स्वरूपतः ॥ ३३ ॥ सदाशिवेन दृष्टोऽसौ कालः कालांतकेन च ॥ उच्छृंखलः खलो दर्पाद्विशमानो निजांतिके ॥ ३४ ॥ नंदिकेश्वरमध्यस्थो यावद्दृष्टो निजांतिके ॥ शिवेन जगदीशेन भक्तवत्सलबंधुना ॥ ३५ ॥ निरीक्षितस्तृतीयेन चक्षुषा परमेष्ठिना ॥ स्वभक्तं रक्षमाणेन भस्मसादभवत्क्षणात् ॥ ३६ ॥ ददाह तं कालमनेकवर्णं व्यात्ताननं भीमबहूग्ररूपम् ॥ ज्वालावलीभिः परिदह्यमानमतिप्रचंडं भुवनैकभक्षणम् ॥ ३७ ॥ ददर्शिरे देवगणाः समेताः सयक्षगंधर्वपिशाचगुह्यकाः ॥ सिद्धाप्सरःसर्वखगाश्च पन्नगाः पतत्रिणो लोकपालास्तथैव ॥ ३८ ॥ ज्वालामालावृतं कालमीश्वरस्याग्रतः स्थितम् ॥ लब्धसंज्ञस्तदा राजा कालं स्वं हंतुमागतम् ॥ ३९ ॥ पुनः पुनर्ददर्शाथ दह्यमानं कृशानुना ॥ प्रार्थयामास स व्यग्रो रुद्रं कालाग्निसन्निभम् ॥ ४० ॥ ॥ राजोवाच ॥ ॥ नमो रुद्राय शांताय स्वज्योत्स्नायात्मवेधसे ॥ निरंतराय सूक्ष्माय ज्योतिषां पतये नमः ॥ ४१ ॥ त्राता त्वं हि जगन्नाथ पिता माता सुहृत्सखा ॥ त्वमेव बंधुः स्वजनो लोकानां प्रभुरीश्वरः ॥ ४२ ॥ किं कृतं हि त्वया शंभो कोऽसौ दग्धो ममाग्रतः ॥ न जानामि च किं जातं कृतं केन महत्तरम् ॥ ४३ ॥ एवं प्रार्थयतस्तस्य श्रुत्वा च परिदेवनम् ॥ उवाच शंकरो वाक्यं बोधयन्निव तं नृपम् ॥ ४४ ॥ ॥ रुद्र उवाच ॥ ॥ मया दग्धो ह्ययं कालस्तवार्थे च तवाग्रतः ॥ दह्यमानो हि दृष्टस्ते ज्वालामालाकुलो महान् ॥ ४५ ॥ एवमुक्तस्तदा तेन शंभुना राजसत्तमः ॥ उवाच प्रश्रितो भूत्वा वचनं शिवमग्रतः ॥ ४६ ॥ किमनेन कृतं शंभो अकृत्यं वद तत्त्वतः ॥ य इमां प्रापितोऽवस्थां प्राणात्ययकरीं भव ॥ ४७ ॥ एवं विज्ञापितस्तेन ह्युवाच परमेश्वरः ॥ भक्षकोऽयं महाराज सर्वेषां प्राणिनामिह ॥ ४८ ॥ भक्षणार्थं तव विभो सोऽयं क्रूरोऽधुनाऽऽगतः ॥ ममांतिकं महाराज तस्माद्दग्धो मया विभो ॥ ४९ ॥ बहूनां क्षेममन्विच्छंस्तवार्थेऽन्हं विशेषतः ॥ ५० ॥ ये पापिनो ह्यधर्मिष्ठा लोकसंहारकारकाः ॥ पाषंडवादसंयुक्ता वध्यास्ते मम चैव हि ॥ वाक्यं निशम्य रुद्रस्य श्वेतो वचनमब्रवीत् ॥ ५१ ॥ कालेनैव हि लोकोऽयं पुण्यमाचरते सदा ॥ धर्मनिष्ठाश्च केचित्तु भक्त्या

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

परमया युताः ॥ ५२ ॥ उपासनारताः केचिज्ज्ञानिनो हि तथा परे ॥ केचिदध्यात्मसंयुक्ताश्चान्ये मुक्ताश्च केचन ॥ ५३ ॥ कालो हि हर्ता च चराचराणां तथा ह्यसौ पालकोऽप्यद्वितीयः ॥ स स्रष्टा वै प्राणिनां प्राणभूतस्तस्मादेनं जीवयस्वाशु भूयः ॥ ५४ ॥ यदि सृष्टिपरोऽसि त्वं कालं जीवय सत्वरम् ॥ यदि संहारभूतोऽसि सर्वेषां प्राणिनामिह ॥ ५५ ॥ तर्ह्येवं कुरु शंभो त्वं कालस्य च महात्मनः ॥ विना कालेन यत्किंचिद्भविष्यति न शंकर ॥ ५६ ॥ इति विज्ञापितस्तेन राज्ञा शंभुः प्रतापिना ॥ चकार वचनं तस्य भक्तस्य च चिकीर्षितम् ॥ ५७ ॥ शंभुः प्रहस्याथ तदा महेशः संजीवयामास पिनाकपाणिः ॥ चकार रूपं च यथा पुरासीदालिंगितोसौ यमदूतमध्ये ॥ ५८ ॥ उपस्थितोऽसौ त्वथ लज्जमानस्तुष्टाव देवं वृषभध्वजं तम् ॥ नत्वा पुरःस्थाग्निमयं हि कालः सविस्मयो वाक्यमिदं बभाषे ॥ ५९ ॥ ॥ काल उवाच ॥ ॥ कालांतक त्रिपुरेश त्रिपुरांतकर प्रभो ॥ मदनो हि त्वया देव कृतोऽनंगो जगत्पते ॥ ६० ॥ दक्षयज्ञविनाशश्च कृतो हि परमाद्भुतः ॥ कालकूटं दुःप्रसहं सर्वेषां क्षयकृन्महत् ॥ ६१ ॥ ग्रसितं तत्त्वया शंभो अन्येषामपि दुर्द्धरम् ॥ लिंगरूपेण महता व्याप्तमासीज्जगत्त्रयम् ॥ ६२ ॥ लयनाल्लिंगमित्युक्तं सर्वैरपि सुरासुरैः ॥ यस्यांतं न विदुर्देवा ब्रह्मविष्णुपुरोगमाः ॥ ६३ ॥ लिंगस्य देवदेवस्य महिमानं परस्य च ॥ नमस्ते परमेशाय नमस्ते विश्वमंगल ॥ नमस्ते शितिकण्ठाय नमस्तस्मै कपर्दिने ॥ ६४ ॥ नमोनमः कारणकारणाय ते नमोनमो मंगलमंगलात्मने ॥ ज्ञानात्मने ज्ञानविदां मनीषिणां त्वमादिदेवोऽसि पुमान्पुराणः ॥ ६५ ॥ त्वमेव सर्वं जगदेकबंधो वेदांतवेद्योऽसि महानुभावः ॥ महानुभावैः परिकीर्त्तनीयस्त्वमेव विश्वेश्वर विश्वमान्यः ॥ ६६ ॥ त्वं पासि लुंपसि जगत्त्रितयं महेश स्रष्टासि भूतपतिरेव न कश्चिदन्यः ॥ ६७ ॥ इति स्तुतस्तदा तेन कालेन जगदीश्वरः ॥ उवाच कालो राजानं श्वेतं संबोधयन्निव ॥ ६८ ॥ ॥ काल उवाच ॥ ॥ मनुष्यलोके सकले नान्यस्त्वत्तो हि विद्यते ॥ येन त्वया जितो देवो ह्यजेयो भुवनत्रये ॥ ६९ ॥ मया हतमिदं विश्वं जगदेतच्चराचरम् ॥ जेताहं सर्वदेवानां सर्वेषां दुरतिक्रमः ॥ ७० ॥ स हि ते चानुगो जातो महाराज प्रयच्छ मे ॥ अभयं देवदेवाच्च शूलिनः परमेष्ठिनः ॥ ७१ ॥ एवमुक्तस्तदा तेन श्वेतः कालेन चैव हि ॥ उवाच प्रहसन्वाचा मेघनादगभीरया ॥ ७२ ॥ ॥ राजोवाच ॥ ॥ शिवस्य परमं रूपं त्वमेको नास्ति संशयः ॥ कालस्त्वमसि भूतानां स्थितिसंहाररूपवान् ॥ ७३ ॥ तस्मात्पूज्यतमोऽसि त्वं सर्वेषां च नियामकः ॥ त्वद्भयात्कृतिनः सर्वे शरणं परमेश्वरम् ॥ व्रजंति विविधैर्भावैरात्मलक्षणतत्पराः ॥ ७४ ॥ ॥ सूत उवाच ॥ ॥ तेनैवं रक्षितः कालो राज्ञा परमधर्मिणा ॥ शिवप्रसादमात्रेण लब्धसंज्ञो बभूव ह ॥ ७५ ॥ तदा यमेन स्तवितो मृत्युना यमदूतकैः ॥

CC-0. In Public Domain. Digitization by eGangotri

शिवं प्रणम्य संस्तुत्य श्वेतं राजानमेव च ॥ ययौ स्वमालयं विप्रा मेने स्वं जनितं पुनः ॥ ७६ ॥ मायया सह पत्न्या च शिवस्य चरितं महत् ॥ अनुसंस्मृत्य संस्मृत्य विस्मयं परमं ययौ ॥ ७७ ॥ कथयामास सर्वेषां दूतानां स्वयमेव हि ॥ आकर्ण्यतां मम वचो हे दूतास्त्वरितेन हि ॥ ७८ ॥ कर्त्तव्यं च प्रयत्नेन नान्यथा मम भाषितम् ॥ ७९ ॥ ॥ काल उवाच ॥ ॥ ये त्रिपुण्ड्रं धारयंति तथा ये वै जटाधराः ॥ ये रुद्राक्षधराश्चैव तथा ये शिवनामिनः ॥ ८० ॥ उपजीवनहेतोश्च भिया ये ह्यपि मानवाः ॥ पापिनोऽपि दुराचाराः शिववेषधरा ह्यमी ॥ ८१ ॥ नानेतव्या भवद्भिश्च मम लोकं कदाचन ॥ वर्ज्यास्ते हि प्रयत्नेन पापिनोऽपि सदैव हि ॥ ॥ ८२ ॥ अन्येषां का कथा दूता येऽर्चयंति सदाशिवम् ॥ भक्त्या परमया शंभुं रुद्रास्ते नात्र संशयः ॥ ८३ ॥ रुद्राक्षमेकं शिरसा बिभर्ति यस्तथा त्रिपुंड्रं च ललाटमध्यके॥ पंचाक्षरीं ये प्रजपंति साधवः पूज्या भवद्भिश्च न चान्यथा क्वचित् ॥ ८४ ॥ यस्मिन्राष्ट्रेऽथ वा देशे ग्रामे चापि विचक्षणः ॥ शिवभक्तो न दृश्येत स्मशानात्तु विशिष्यते ॥ तद्राष्ट्रं देशमित्याहुः सत्यं प्रतिवदामि वः ॥ ८५ ॥ यस्मिन्न संति नित्यं हि शिवभक्तिसमन्विताः ॥ तद्ग्रामस्था जनाः सर्वे शासनीया न संशयः ॥ ८६ ॥ एवमाज्ञापयामास यमोऽपि निजकिंकरान् ॥ तथेति मत्वा ते सर्वे तूष्णीमासन्सुविस्मिताः ॥ ८७ ॥ एवंविधोऽयं भुवनैकभर्ता सदाशिवो लोकगुरुः स एकः ॥ दाता प्रहर्ता निजभावयुक्तः सनातनोऽयं जगदेकबंधुः ॥८८॥ दग्ध्वा कालं महादेवो निर्भयं च ददौ विभुः ॥ श्वेतस्य राजराजस्य महीपालवरस्य च ॥ ८९ ॥ तदा निर्भयमापन्नः श्वेतराजो महामनाः ॥ भक्त्या च परया मुक्तो बभूव कृतनिश्चयः ॥ ९० ॥ तदा देवैः पूज्यमान ऋषिभिः पन्नगैस्तथा ॥ श्वेतो राजन्यवर्योऽसौ शिवसायुज्यमाप्तवान् ॥ ९१ ॥ एवं भक्तिपराणां च महेशे च जगद्गुरौ ॥ सिद्धिः करतले तेषां सत्यं प्रतिवदामि वः ॥ ९२ ॥ श्वपचोऽपि वरिष्ठः स्यात्प्रसादाच्छंकरस्य च ॥ तस्मात्सर्वप्रयत्नेन पूजनीयो हि शंकरः ॥ ९३ ॥ बहूनां जन्मनामंते शिवभक्तिः प्रजायते ॥ ९४ ॥ ज्ञानिनां कृतबुद्धीनां जन्म जन्मनि शंकरः ॥ किं मया बहुनोक्तेन पूजनीयः सदाशिवः ॥ ९५ ॥ अत्रैवोदाहरंतीममितिहासं पुरातनम् ॥ किरातेन कृतं यच्च व्रतं च परमाद्भुतम् ॥ येनैव तारितं विश्वं जगदेतच्चराचरम् ॥ ९६ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां प्रथमे माहेश्वरखण्डे केदारखण्डे श्वेतराजचरिते शिवभक्तिप्रभावेण कालदहनवृत्तान्तवर्णनंनाम द्वात्रिंशोऽध्यायः ॥ ३२ ॥ ॥ छ ॥ ॥ ऋषय ऊचुः ॥ ॥ किन्नामा च किरातोऽभूत्किं तेन व्रतमाहितम् ॥ तत्त्वं कथय विप्रेंद्र परं कौतूहलं हि नः ॥ १ ॥ तत्सर्वं श्रोतुमिच्छामो याथातथ्येन कथ्यताम् ॥ न ह्यन्यो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विद्यते लोके त्वद्विना वदतां वरः ॥ तस्मात्कथय भो विप्र सर्वं शुश्रूषतां हि नः ॥ २ ॥ एवमुक्तस्तदा तेन शौनकेन महात्मना ॥ कथयामास
तत्सर्वं पुष्कसेन कृतं च यत् ॥ ३ ॥ ॥ लोमश उवाच ॥ ॥ आसीत्पुरा महारौद्रश्चंडोनाम दुरात्मवान् ॥ क्रूरसंगो निष्कृतिको भूतानां
भयवाहकः ॥ ४ ॥ जालेन मत्स्यान्दुष्टात्मा घातयत्यनिशं खलु ॥ भल्लैर्मृगाञ्छापदांश्च कृष्णसारांश्च शल्लकान् ॥ ५ ॥ खड्गांश्चैव च दुष्टात्मा
दृष्ट्वा कांश्चिच्च पापवान् ॥ पक्षिणोऽघातयत्क्रुद्धो ब्राह्मणांश्च विशेषतः ॥ ६ ॥ लुब्धको हि महापापो दुष्टो दुष्टजनप्रियः ॥ भार्या तथाविधा तस्य
पुष्कसस्य महाभया ॥७॥ एवं विहरतस्तस्य बहुकालोत्यवर्तत ॥ गते बहुतिथे काले पापौघनिरतस्य च ॥८॥ निषंगे जलमादाय क्षुत्पिपासार्दितो
भृशम् ॥ एकदा निशि पापीयाच्छ्रीवृक्षोपरि संस्थितः ॥ कोलं हंतुं धनुष्पाणिर्जाग्रच्चानिमिषेण हि ॥९॥ माघमासेऽसितायां वै चतुर्दश्यामथाग्रतः ॥
मृगमार्गविलोकार्थी बिल्वपत्राण्यपातयत् ॥ १० ॥ श्रीवृक्षपर्णानि बहूनि तत्र स च्छेदयामास रुषान्वितोपि ॥ श्रीवृक्षमूले परिवर्तमानो लिंगं च तस्योपरि
दुष्टभावः ॥ ११ ॥ ववर्ष गंडूषजलं दुरात्मा यदृच्छया तानि शिवे पतंति ॥ श्रीवृक्षपर्णानि च दैवयोगाज्जातं च सर्वं शिवपूजनं तत् ॥ १२ ॥
गंडूषवारिणा तेन स्नपनं च कृतं महत् ॥ बिल्वपत्रैरसंख्यातैरर्चनं च महत्कृतम् ॥ १३ ॥ अज्ञानेनापि भो विप्राः पुष्कसेन दुरात्मना ॥ माघ
मासेऽसिते पक्षे चतुर्दश्यां विधूदये ॥ १४ ॥ पुष्कसोऽथ दुराचारो वृक्षादवततार सः ॥ आगत्य जलसंकाशं मत्स्यान्हंतुं प्रचक्रमे ॥ १५ ॥ लुब्ध
कस्यापि भार्याभून्नाम्ना चैव घनोदरी ॥ दुष्टा सा पापनिरता परद्रव्यापहारिणी ॥ १६ ॥ गृहान्निर्गत्य सायाह्ने पुरद्वारबहिः स्थिता ॥ वनमार्गं प्रप
श्यंती पत्युरागमनेच्छया ॥ १७ ॥ चिराद्भर्तरि नायाते चिन्तयामास लुब्धकी ॥ अद्य सायाह्नवेलायामागताः सर्वलुब्धकाः ॥ १८ ॥ तमःस्तोमेन
संछन्नाश्चतस्रो विदिशो दिशः ॥ रात्रौ यामद्वयं यातं किं मतंगः समागतः ॥ १९ ॥ किं वा केसरलोभेन सिंहेनैव विदारितः ॥ किं भुजंगफणार
त्नहारी सर्पविषार्दितः ॥ २० ॥ किं वा वराहदंष्ट्राग्रघातैः पंचत्वमागतः ॥ मधुलोभेन वृक्षाग्रात्स वै प्रपतितो भुवि ॥ २१ ॥ क्वान्वेषयामि पृच्छामि
क्व गच्छामि च कं प्रति ॥ एवं विलप्य बहुधा निवृत्ता स्वं गृहं प्रति ॥ २२ ॥ नैवान्नं नो जलं किंचिन्न भुक्तं तद्दिने तया ॥ चिंतयंती पतिं
चापि लुब्धकी त्वनयन्निशाम् ॥ २३ ॥ अथ प्रभाते विमले पुष्कसी वनमाययौ ॥ अशनार्थं च तस्यान्नमादाय त्वरिता सती ॥ २४ ॥ भ्रममाणा
वने तस्मिन्ददर्श महतीं नदीम् ॥ तस्यास्तीरे समासीनं स्वपतिं प्रेक्ष्य हर्षिता ॥ २५ ॥ तदन्नं कूलतः स्थाप्य नदीं तर्तुं प्रचक्रमे ॥ निरीक्ष्य चाथ
मत्स्यान्स जालप्रोतान्समानयत् ॥ २६ ॥ तावत्तयोक्तश्चण्डोऽसावेहि शीघ्रं च भक्षय ॥ अन्नं त्वदर्थमानीतमुपोष्य दिवसं मया ॥ २७ ॥

CC-0. In Public Domain. Digitization by eGangotri

कृतं किमद्य रे मंद गतेऽहनि च किं कृतम् ॥ नाऽशितं च त्वया मूढ लंघितेनाद्य पापिना ॥ २८ ॥ नद्यां स्नातौ तथा तौ च दम्पती च शुचि
व्रतौ ॥ यावद्गतश्च भोक्तुं स तावच्छ्वा स्वयमागतः ॥ २९ ॥ तेन सर्वं भक्षितं च तदन्नं स्वयमेव हि ॥ चंडी प्रकुपिता चैव श्वानं हंतुमुप
स्थिता ॥ ३० ॥ आवयोर्भक्षितं चान्नमनेनैव च पापिना ॥ किं च भक्षयसे मूढ भविताद्य बुभुक्षितः ॥ ३१ ॥ एवं तयोक्तश्चण्डोऽसौ
बभाषे तां शिवप्रियः ॥ यच्छुना भक्षितं चान्नं तेनाहं परितोषितः ॥ ३२ ॥ किमनेन शरीरेण नश्वरेण गतायुषा ॥ शरीरं दुर्लभं लोके
पूज्यते क्षणभंगुरम् ॥ ३३ ॥ ये पुष्णंति निजं देहं सर्वभावेन चाहताः ॥ मूढास्ते पापिनो ज्ञेया लोकद्वयबहिष्कृताः ॥ ३४ ॥ तस्मान्मानं परि
त्यज्य क्रोधं च दुरवग्रहम् ॥ स्वस्था भव विमर्शेन तत्त्वबुद्ध्या स्थिरा भव ॥ ३५ ॥ बोधिता तेन चंडी सा पुष्कसेन तदा भृशम् ॥ जागरादि
च संप्राप्तः पुष्कसोऽपि चतुर्दशीम् ॥ ३६ ॥ शिवरात्रिप्रसंगाच्च जायते यद्व्ययसंशयम् ॥ तज्ज्ञानं परमं प्राप्तः शिवरात्रिप्रसंगतः ॥ ३७ ॥ यामद्वयं
च संजातममावास्यां तु तत्र वै ॥ आगताश्च गणास्तत्र बहवः शिवनोदिताः ॥ ३८ ॥ विमानानि बहून्यत्र आगतानि तदंतिकम् ॥ दृष्टानि तेन
तान्येव विमानानि गणास्तथा ॥ ३९ ॥ उवाच परया भक्त्या पुष्कसोऽपि च तान्प्रति ॥ कस्मात्समागता यूयं सर्वे रुद्राक्षधारिणः ॥ ४० ॥
विमानस्थाश्च केचिच्च वृषारूढाश्च केचन ॥ सर्वे स्फटिकसंकाशाः सर्वे चंद्रार्द्धशेखराः ॥ ४१ ॥ कपर्दिनश्चर्मपरीतवाससो भुजंगभोगैः कृत
हारभूषणाः ॥ श्रियान्विता रुद्रसमानवीर्या यथातथं भो वदतात्मनोचितम् ॥ ४२ ॥ पुष्कसेन तदा पृष्टा ऊचुः सर्वे च पार्षदाः ॥ रुद्रस्य देवदे
वस्य संनम्राः कमलेक्षणाः ॥ ४३ ॥ ॥ गणा ऊचुः ॥ ॥ प्रेषिताः स्मो वयं चंड शिवेन परमेष्ठिना ॥ आगच्छ त्वरितो भूत्वा सस्त्रीको या
नमारुह ॥ ४४ ॥ लिंगार्चनं कृतं यच्च त्वया रात्रौ शिवस्य च ॥ तेन कर्मविपाकेन प्राप्तोऽसि शिवसन्निधिम् ॥ ४५ ॥ तथोक्तो वीरभद्रेण उवाच
प्रहसन्निव ॥ पुष्कसोऽपि स्वया बुद्ध्या प्रस्तावसदृशं वचः ॥ ४६ ॥ ॥ पुष्कस उवाच ॥ ॥ किं मया कृतमद्यैव पापिना हिंसकेन च ॥
मृगयारसिकेनैव पुष्कसेन दुरात्मना ॥ ४७ ॥ पापाचारो ह्यहं नित्यं कथं स्वर्गं व्रजाम्यहम् ॥ कथं लिंगार्चनमिदं कृतमस्ति तदुच्यताम् ॥ ४८ ॥
परं कौतुकमापन्नः पृच्छामि त्वां यथातथम् ॥ कथयस्व महाभाग सर्वं चैव यथाविधि ॥ ४९ ॥ इत्येवं पृच्छतस्तस्य पुष्कसस्य यथाविधि ॥ ॥ ६७ ॥
कथयामास तत्सर्वं शिवधर्मं मुदान्वितः ॥ ५० ॥ ॥ वीरभद्र उवाच ॥ ॥ देवदेवो महादेवो देवानां पतिरीश्वरः ॥ परितुष्टोऽद्य हे चंड स महेश
उमापतिः ॥ ५१ ॥ प्रासंगिकतया माघे कृतं लिंगार्चनं त्वया ॥ शिवतुष्टिकरं चाद्य पूतोऽसि त्वं न संशयः ॥ शिवरात्र्यां प्रसंगेन कृतमर्चन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मेव च ॥ ५२ ॥ कोलं निरीक्षमाणेन बिल्वपत्राणि चैव हि ॥ च्छेदितानि त्वया चंड पतितानि तदैव हि ॥ लिंगस्य मस्तके तानि तेन त्वं सुकृती प्रभो ॥ ५३ ॥ ततश्च जागरो जातो महान्वृक्षोपरि ध्रुवम् ॥ तेनैव जागरेणैव तुतोष जगदीश्वरः ॥ ५४ ॥ छलेनैव महाभाग कोलसंदर्शनेन हि ॥ शिवरात्रिदिने चात्र स्वप्रस्ते न च योषितः ॥ ५५ ॥ तेनोपवासेन च जागरेण तुष्टो ह्यसौ देववरो महात्मा ॥ तव प्रसादाय महानुभावो ददाति सर्वान्वरदो महांश्च ॥ ५६ ॥ एवमुक्तस्तदा तेन वीरभद्रेण धीमता ॥ पुष्कसोऽपि विमानाग्र्यमारुरोह च पश्यताम् ॥ ५७ ॥ गणानां देवतानां च सर्वेषां प्राणिनामपि ॥ तदा दुंदुभयो नेदुर्भेर्यस्तूर्याण्यनेकशः ॥ ५८ ॥ वीणावेणुमृदंगानि तस्य चाग्रे गतानि च ॥ जगुर्गंधर्वपतयो ननृतुश्चाप्सरोगणाः ॥ ५९ ॥ विद्याधरगणाः सर्वे तुष्टुवुः सिद्धचारणाः ॥ चामरैर्वीज्यमानो हि च्छत्रैश्च विविधैरपि ॥ महोत्सवेन महता आनीतो गंधमादनम् ॥ ६० ॥ शिवसान्निध्यमगमच्चंडोसौ तेन कर्मणा ॥ शिवरात्र्युपवासेन परं स्थानं समागमत् ॥ ६१ ॥ पुष्कसोऽपि तथा प्राप्तः प्रसंगेन सदाशिवम् ॥ किं पुनः श्रद्धया युक्ताः शिवाय परमात्मने ॥ ६२ ॥ पुष्पादिकं फलं गंधं तांबूलं भक्ष्यमृद्धिमत् ॥ ये प्रयच्छंति लोकेऽस्मिन्रुद्रास्ते नात्र संशयः ॥६३॥ चंडेन वै पुष्कसेन सफलं तस्य चाभवत् ॥ प्रसंगेनापि तेनैव कृतं तच्चाल्पबुद्धिना ॥ ६४ ॥ ॥ ऋषय ऊचुः ॥ ॥ किं फलं तस्य चोद्देशः केन चैव पुरा कृतम् ॥ कस्माद्व्रतमिदं जातं कृतं केन पुरा विभो ॥ ६५ ॥ ॥ लोमश उवाच ॥ ॥ यदा सृष्टं जगत्सर्वं ब्रह्मणा परमेष्ठिना ॥ कालचक्रं तदा जातं पुरा राशिसमन्वितम् ॥ ६६ ॥ द्वादश राशयस्तत्र नक्षत्राणि तथैव च ॥ सप्तविंशतिसंख्यानि मुख्यानि कार्यसिद्धये ॥ ६७ ॥ एभिः सर्वं प्रचंडं च राशिभिरुडुभिस्तथा ॥ कालचक्रान्वितः कालः क्रीडयन्सृजते जगत् ॥ ६८ ॥ आब्रह्मस्तंबपर्यंतं सृजत्यवति हंति च ॥ निबद्धमस्ति तेनैव कालेनैकेन भो द्विजाः ॥ ६९ ॥ कालो हि बलवाँल्लोके एक एव न चापरः ॥ तस्मात्कालात्मकं सर्वमिदं नास्त्यत्र संशयः ॥७०॥ आदौ कालः कालनाच्च लोकनायकनायकः ॥ ततो लोका हि संजाताः सृष्टिश्च तदनंतरम् ॥ ७१ ॥ सृष्टेर्लवो हि संजातो लवाच्च क्षणमेव च ॥ क्षणाच्च निमिषं जातं प्राणिनां हि निरंतरम् ॥ ७२ ॥ निमिषाणां च षष्ट्या वै पल इत्यभिधीयते ॥ पंचदश्या अहोरात्रैः पक्ष इत्यभिधीयते ॥७३॥ पक्षाभ्यां मास एव स्यान्मासा द्वादश वत्सरः ॥ तं कालं ज्ञातुकामेन कार्यं ज्ञानं विचक्षणैः ॥ ७४ ॥ प्रतिपद्दिनमारभ्य पौर्णमास्यंतमेव च ॥ पक्षः पूर्णो हि यस्माच्च पूर्णिमेत्यभिधीयते ॥ ७५ ॥ पूर्णचंद्रमसी या तु सा पूर्णा देवताप्रिया ॥ नष्टस्तु चंद्रो यस्यां वा[3] अमा सा

१ कोलसंदर्शनेन—कोलः कदाऽऽगमिष्यतीति कालप्रतीक्षणेन—इत्यर्थः । कालसंदर्शनेन इ० च पा० । २ महान्—उत्सवान्—सर्वान्—उत्सवान्—इत्यर्थः । ३ वै—अमा—इति पदच्छेदः ।

CC-0. In Public Domain. Digitization by eGangotri

कथिता बुधैः ॥ ७६ ॥ अग्निष्वात्तादिपितॄणां प्रियातीव बभूव ह ॥ त्रिंशद्दिनानि ह्येतानि पुण्यकालयुतानि च ॥ तेषां मध्ये विशेषो यस्तं शृणुध्वं द्विजोत्तमाः ॥ ७७ ॥ योगानां वा व्यतीपात ऊडूनां श्रवणस्तथा ॥ अमावास्या तिथीनां च पूर्णिमा वै तथैव च ॥ ७८ ॥ संक्रांतयस्तथा ज्ञेयाः पवित्रा दानकर्मणि ॥ तथाष्टमी प्रिया शंभोर्गणेशस्य चतुर्थिका ॥ ७९ ॥ पञ्चमी नागराजस्य कुमारस्य च षष्ठिका ॥ भानोश्च सप्तमी ज्ञेया नवमी चण्डिकाप्रिया ॥ ८० ॥ ब्रह्मणो दशमी ज्ञेया रुद्रस्यैकादशी तथा ॥ विष्णुप्रिया द्वादशी च अंतकस्य त्रयोदशी ॥ ८१ ॥ चतुर्दशी तथा शंभोः प्रिया नास्त्यत्र संशयः ॥ निशीथसंयुता या तु कृष्णपक्षे चतुर्दशी ॥ उपोष्या सा तिथिः श्रेष्ठा शिवसायुज्यकारिणी ॥ ८२ ॥ शिवरात्रितिथिः ख्याता सर्वपापप्रणाशिनी ॥ अत्रैवोदाहरंतीममितिहासं पुरातनम् ॥ ८३ ॥ ब्राह्मणी विधवा काचित्पुरा ह्यासीच्च चंचला ॥ श्वपचाभिरता सा च कामुकी कामहेतुतः ॥ ८४ ॥ तस्यां तस्य सुतो जातः श्वपचस्य दुरात्मनः ॥ दुःसहो दुष्टनामात्मा सर्वधर्मबहिष्कृतः ॥ ॥ ८५ ॥ महापापप्रयोगाच्च पापमारभते सदा ॥ कितवश्च सुरापायी स्तेयी च गुरुतल्पगः ॥ ८६ ॥ मृगयुश्च दुरात्मासौ कर्मचण्डाल एव सः ॥ अधर्मिष्ठो ह्यसद्वृत्तः कदाचिच्च शिवालयम् ॥ शिवरात्र्यां च संप्राप्तो ह्युषितः शिवसन्निधौ ॥ ८७ ॥ श्रवणं शैवशास्त्रस्य यदृच्छाजातमंतिके ॥ शिवस्य लिंगरूपस्य स्वयंभुवो यदा तदा ॥ ८८ ॥ स एकत्रोषितो दुष्टः शिवरात्र्यां तु जागरात् ॥ तेन कर्मविपाकेन पुण्यां योनिमवाप्तवान् ॥ ॥ ८९ ॥ भुक्त्वा पुण्यतमाँल्लोकानुषित्वा शाश्वतीः समाः ॥ चित्रांगदस्य पुत्रोभूद्भूपालेश्वरलक्षणः ॥ ९० ॥ नाम्ना विचित्रवीर्योऽसौ सुभगः सुंदरीप्रियः ॥ राज्यं महत्तरं प्राप्य निःस्तंभो हि महानभूत् ॥ ९१ ॥ शिवे भक्तिं प्रकुर्वाणः शिवकर्मपरोऽभवत् ॥ शैवशास्त्रं पुरस्कृत्य शिवपूजनतत्परः ॥ रात्रौ जागरणं यत्नात्करोति शिवसन्निधौ ॥ ९२ ॥ शिवस्य गाथा गायंस्तु आनंदाश्रुकणान्मुहुः ॥ प्रमुंचंश्चैव नेत्राभ्यां रोमांचपुलकावृतः ॥ ९३ ॥ आयुष्यं च गतं तस्य शिवध्यानपरस्य च ॥ शिवो हि सुलभो लोके पशूनां ज्ञानिनामपि ॥ ९४ ॥ संसेवितुं सुखप्राप्त्यै ह्येक एव सदाशिवः ॥ शिवरात्र्युपवासेन प्राप्तो ज्ञानमनुत्तमम् ॥ ९५ ॥ ज्ञानात्सर्वमनुप्राप्तं भूतसाम्यं निरंतरम् ॥ सर्वभूतात्मकं ज्ञात्वा केवलं च सदाशिवम् ॥ विना शिवेन यत्किंचिन्नास्ति वस्त्वत्र न क्वचित् ॥ ९६ ॥ एवं पूर्णं निष्प्रपंचं ज्ञानं प्राप्नोति दुर्लभम् ॥ प्राप्तज्ञानस्तदा राजा जातो हि शिववल्लभः ॥ ९७ ॥ मुक्तिं सायुज्यतां प्राप्तः शिवरात्रेरुपोषणात् ॥ तेन लब्धं शिवाज्जन्म पुरा यत्कथितं मया ॥ ९८ ॥ दाक्षायणीवियो

१ अत्र नास्ति—च परं क्वचिदन्यत्रापि नास्तीत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गाच्च जटाजूटेन विस्तरात् ॥ य उत्पन्नो मस्तकाच्च शिवस्य परमात्मनः ॥ वीरभद्रेति विख्यातो दक्षयज्ञविनाशनः ॥ ९९ ॥ शिवरात्रिव्रतेनैव तारिता बहवः पुरा ॥ प्राप्ताः सिद्धिं पुरा विप्रा भरताद्याश्च देहिनः ॥ १०० ॥ मांधाता धुन्धुमारिश्च हरिश्चन्द्रादयो नृपाः ॥ प्राप्ताः सिद्धि मनेनैव व्रतेन परमेण हि ॥ १०१ ॥ ततो गिरीशो गिरिजासमेतः क्रीडान्वितोऽसौ गिरिराजमस्तके ॥ द्यूतं तथैवाक्षयुतं परेशो युक्तो भवान्या स भृशं चकार ॥ १०२ ॥ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां प्रथमे माहेश्वरखण्डे केदारखंडे शिवरात्रिव्रतमाहात्म्यवर्णनंनाम त्रयस्त्रिंशोऽध्यायः ॥ ३३ ॥ ॥ छ ॥ ॥ लोमश उवाच ॥ ॥ राज्यं चकार कैलासे देवदेवो जगत्पतिः ॥ गणैः समेतो बहुभिर्वीरभद्रान्वितो महान् ॥ १ ॥ ऋषिभिः सहितो रुद्रो देवैरिन्द्रादिभिः सह ॥ ब्रह्मा यस्य स्तुतिपरो विष्णुः प्रेष्यवदास्थितः ॥ २ ॥ इंद्रो देवगणैः सार्द्धं सेवाधर्मपरोऽभवत् ॥ यस्य च्छत्रधरश्चंद्रो वायुश्चामरधृक्तथा ॥ ३ ॥ सूपान्नकर्ता सततं जातवेदा निरन्तरम् ॥ गंधर्वा गायका यस्य स्तावकाश्च पिनाकिनः ॥ ४ ॥ विद्याधराश्च बहवस्तथा चाप्सरसां गणाः ॥ ननृतु श्चाग्रगा यस्य सोऽसौ कैलासपर्वते ॥ ५ ॥ पुत्रैर्गणेशस्कंदाद्यैस्तथा गिरिजया सह ॥ राज्यं प्रतापिभिश्चक्रेऽशंकश्चंक्रमणेन च ॥६॥ येनांधको महा दैत्यः स देवानामरिर्महान् ॥ दुष्टो विद्धस्त्रिशूलेन गगने स्थापितश्चिरम् ॥ ७ ॥ हत्वा गजासुरं येन उत्कृत्त्य चर्म वै कृतम् ॥ चिरं प्रावरणं दिव्यं तथा त्रिपुरदीपनम् ॥ विष्णुना पाल्यभूतेन[1] रेजे सर्वांगसुन्दरः ॥ ८ ॥ तं द्रष्टुकामो भगवान्नारदो दिव्यदर्शनः ॥ ययौ च पर्वतश्रेष्ठं कैलासं चन्द्रपांडुरम् ॥ ९ ॥ सुधया परया चापि सेवितं परमाद्भुतम् ॥ कर्पूरगौरं च तदा दृष्ट्वा तं सुमहाबलम् ॥ नारदो विस्मयाविष्टः प्रविष्टो गन्धमादनम् ॥ १० ॥ अनेकाश्चर्यसंयुक्तं तपनैश्च सुशोभितम् ॥ गायद्विद्याधरीभिश्च पूरितं च महाप्रभम् ॥ ११ ॥ कल्पद्रुमाश्च बहवो लताभिः परिवेष्टिताः ॥ घनच्छायासु तास्वेव विशिष्टाः कामधेनवः ॥ १२ ॥ पारिजातवनामोदलंपटा बहवोऽलयः ॥ कलहंसाश्च बहवः क्रीडमानाःःसरस्सु च ॥ १३ ॥ शिखंडिनो महच्चक्रुस्तत्र केकारवं मुदा ॥ पंचमालापिनः सर्वे विहंगाः संमदान्विताः ॥ १४ ॥ करिणः करिणीभिश्च मोदमानाः सुवर्चसः ॥ सिंहास्तथा गर्जमानाः शार्दूलैः सह संगताः ॥ १५ ॥ वृषभा नंदिमुख्याश्च रेभमाना निरन्त रम् ॥ देवद्रुमाश्च बहवस्तथा चंदनवाटिकाः ॥ १६ ॥ नागपुंनागबकुलाश्चंपका नागकेसराः ॥ तथा च वनजंब्वश्च तथा कनककेतकाः ॥ १७ ॥

१ पाल्यभूतेनपाल्यानि भूतानि येन सः—पाल्यभूतः तेन—सकलभूतपालकेन—इत्यर्थः ।

कह्लाराः करवीराश्च कुमुदानि ह्यनेकशः ॥ मंदाराश्च बदर्यश्च क्रमुकाः पाटलास्तथा ॥ १८ ॥ तथान्ये बहवो वृक्षाः शम्भोस्तोषकरा ह्यमी ॥ ऐकपद्येन दृष्टास्ते नानाद्रुमलतान्विताः ॥ आरामा बहवस्तत्र द्विगुणाश्च बभूविरे ॥ १९ ॥ गगनान्निस्सृतः सद्यो गंगौघः परमाद्भुतः ॥ पतितो मस्तके तस्य पर्वतस्य सुशोभिते ॥ २० ॥ कूपो हि पयसां ये न पवित्रं वर्तते जगत् ॥ सोपि द्विधा तदा दृष्टो नारदेन महात्मना ॥ २१ ॥ सर्वं तदा द्विधाभूतं दृष्टं तेन महात्मना ॥ नारदेन तदा विप्राः परमेण निरीक्षितः ॥ २२ ॥ एवं विलोकमानोऽसौ नारदो भगवानृषिः ॥ त्वरितेन तथा यातः शिवालोकनतत्परः ॥ २३ ॥ यावद्वारि स्थितोपश्यन्महदाश्चर्यमेव च ॥ द्वारपालौ तदा दृष्टौ कृतकौ विश्वकर्मणा ॥ २४ ॥ नारदो मोहितो ह्यासीत्पप्रच्छ च स तौ तदा ॥ अहं प्रवेष्टुमिच्छामि शिवदर्शनलालसः ॥ २५ ॥ तस्मादनुज्ञा दातव्या दर्शनार्थं शिवस्य च ॥ अशृण्वन्तौ तदा दृष्ट्वा नारदो विस्मितोऽभवत् ॥ २६ ॥ ज्ञानदृष्ट्या विलोक्याथ तूर्ष्णींभूतोऽभवत्तदा ॥ कृत्रिमौ हि च तौ ज्ञात्वा प्रविष्टो हि महामनाः ॥ २७ ॥ तथान्ये तत्सरूपाश्च दृष्टास्तेन महात्मना ॥ ऋषिः प्रणमितस्तैश्च नारदो भगवान्मुदा ॥ २८ ॥ एवमादीन्यनेकानि आश्चर्याणि ददर्श सः ॥ ददर्शाथ च सुव्यक्तं त्र्यंबकं गिरिजान्वितम् ॥ २९ ॥ अर्धासनगता साध्वी शंकरस्य महात्मनः ॥ तनया गिरिराजस्य यया व्याप्तं जगत्रयम् ॥ ३० ॥ गौरी सितेक्षणा बाला तन्वंगी चारुलोचना ॥ यया रूपी कृतः शम्भुरुपादेयः कृतो महान् ॥ ३१ ॥ निर्विकारो विकारैश्च बहुभिर्विकलीकृतः ॥ अर्द्धांगलग्ना सा देवी दृष्टा तेन शिवस्य च ॥ ३२ ॥ नारदेन तथा शंभुर्दृष्टस्त्रिभुवनेश्वरः ॥ शुद्धचामीकरप्रख्यः सेव्यमानः सुरासुरैः ॥ ३३ ॥ शंखेन भोगिवर्येण सेवितं चांघ्रिपंकजम् ॥ धृतराष्ट्रेण च तथा तक्षकेण विशेषतः ॥ तथा पद्मेन महता शेषेणापि विशेषतः ॥ ३४ ॥ अन्यैश्च नागवर्यैश्च सेवितो हि निरंतरम् ॥ वासुकिः कंठलग्नो हि हारभूतो महाप्रभः ॥ ३५ ॥ कंबलाश्वतरौ नित्यं कर्णभूषणभूषितौ ॥ जटामूलगताश्चान्ये महाफणिवरा ह्यमी ॥ ३६ ॥ अनेकजातिसंवीता नानावर्णाश्च पन्नगः ॥ तक्षकः कुलिकः शंखो धृतराष्ट्रो महाप्रभः ॥ ३७ ॥ पद्मो दंभः सुदंभश्च करालो भीषणस्तथा ॥ एते चान्ये च बहवो नागाश्चाशीविषा ह्यमी ॥ ३८ ॥ अंगभूता हरस्यासन्पूज्यस्यास्य जगत्रये ॥ फणैकया शोभमानाः केचिद्धि पन्नगोत्तमाः ॥ ३९ ॥ फणानां द्वितयं केषां[1] त्रितयं च महाप्रभम् ॥ चतुष्कं पंचकं

१ केषाम्—केषांचित्—इत्यर्थः । इदं 'केषाम्' इति पदं 'तथा शङ्खमितानि च' इत्येतत्पर्यन्तं यथायोगमनुषञ्जनीयम् । अत्र—केषांचिन्नागानां फणानां द्वितयं त्रितयमित्येवं यथाकथंचित्संख्यासङ्गतिरवगन्तव्या नात्र व्याकरणशुद्धिर्दृश्यते—आर्षप्रयोगा अवगन्तव्याः ।

CC-0. In Public Domain. Digitization by eGangotri

षट्कं सप्तकं चाष्टकं तथा ॥ ४० ॥ नवकं दशकं चैव तथैकादशकं त्वथ ॥ द्वादशकं चाष्टादशकमेकोनविंशकं तथा ॥ ४१ ॥ चत्वारिंशत्फणाः केऽपि पंचाशत्कं च षष्टिकम् ॥ सप्ततिश्चाप्यशीतिश्च नवतिश्च तथैव च ॥ ४२ ॥ तथा शतसहस्राणि ह्ययुतप्रयुतानि च ॥ अर्बुदानि च रत्नानि तथा शङ्कमितानि च ॥ ४३ ॥ अनंताश्च फणा येषां ते सर्पाः शिवभूषणाः ॥ दृष्टास्तदानीं ते सर्वे नारदेन महात्मना ॥ ४४ ॥ विद्यावंतोऽपि ते सर्वे भोगिनोऽपि सुशोभिताः ॥ हारभूषणभूतास्ते मणिमंतोऽमितप्रभाः ॥ ४५ ॥ अर्द्धचंद्रांकितो यस्य कपर्दस्त्वतिसुंदरः ॥ चक्षुषा च तृतीयेन भालस्थेन विराजितः ॥ ४६ ॥ पंचवक्रो महादेवो बाहुभिर्दशभिर्वृतः ॥ तथा मरकतश्यामकंधरोऽतीवसुंदरम् ॥ ४७ ॥ उरो यस्य विशालं च तथोरुजघनं परम् ॥ चरणद्वयं च रुद्रस्य शोभितं परमं महत् ॥ ४८ ॥ तद्दृष्टं चरणारविंदमतुलं तेजोमयं सुंदरं संध्यारागसुमंगलं च परमं तापापनुत्तिकरम् ॥ तेजोराशिकरं परात्परमिदं लावण्यलीलास्पदं सर्वेषां सुखवृद्धिकारणपरं शंभोः पदं पावनम् ॥ ४९ ॥ तथैव दृष्ट्वा परमं पराणां परा सती रूपवती च सुंदरी ॥ सौभाग्यलावण्यमहाविभूत्या विराजमाना ह्यतिसुंदरी शुभा ॥ ५० ॥ दृष्ट्वा तौ दंपती शुद्धौ राजमानौ जगत्त्रये ॥ अभिन्नौ भेदमापन्नौ निर्गुणौ गुणिनौ च तौ ॥ ५१ ॥ साकारौ च निराकारौ निरातंकौ सुखप्रदौ ॥ ववंदे च मुदा तौ स नारदो भगवत्प्रियः ॥ उत्थायोत्थाय च तदा तुष्टाव जगदीश्वरौ ॥ ५२ ॥ ॥ नारद उवाच ॥ ॥ नतोस्म्यहं देववरौ युवाभ्यां परात्पराभ्यां कलया तथापि ॥ दृष्टौ मया दंपती राजमानौ यौ बीजभूतौ सचराचरस्य ॥ ५३ ॥ पितरौ सर्वलोकस्य ज्ञातौ चाद्यैव तत्त्वतः ॥ मया नास्त्यत्र संदेहो भवतोः कृपया तथा ॥ ५४ ॥ एवं स्तुतौ तदा तेन नारदेन महात्मना ॥ तुतोष भगवाञ्छंभुः पार्वत्या सहितस्तदा ॥ ५५ ॥ ॥ महादेव उवाच ॥ ॥ सुखेन स्थीयते ब्रह्मन्किं कार्यं करवाणि ते ॥ तच्छ्रुत्वा वचनं शंभोर्नारदो वाक्यमब्रवीत् ॥ ५६ ॥ दर्शनं जातमद्यैव तेन तुष्टोऽस्म्यहं विभो ॥ दर्शनात्सर्वमेवाद्य शंभो मम न संशयः ॥ ५७ ॥ क्रीडनार्थमिहायातः कैलासं पर्वतोत्तमम् ॥ हृदिस्थो हि सदा नृणामास्थितो भगवन्प्रभो ॥ ५८ ॥ तथापि दर्शनं भाव्यं सततं प्राणिनामिह ॥ ५९ ॥ ॥ गिरिजोवाच ॥ ॥ का क्रीडा हि त्वया भाव्या वद शीघ्रं ममाग्रतः ॥ तस्यास्तद्वचनं श्रुत्वा उवाच प्रहसन्निव ॥ ६० ॥ द्यूतक्रीडा महादेवि दृश्यते विविधात्र च ॥ भवेद्वाभ्यां च द्यूते हि रमणाच्च महत्सुखम् ॥ ६१ ॥ इत्येवमुक्त्वो परतं सती भृशमुवाच वाक्यं कुपिता ऋषिं प्रति ॥ कथं विजानासि परं प्रसिद्धं द्यूतं च दुष्टोदरकं मनस्विनाम् ॥ ६२ ॥ त्वं ब्रह्मपुत्रोऽसि मुनिर्मनीषिणां शास्ता हि वाक्यं विविधैः प्रसिद्धैः ॥ चरिष्यमाणो भुवनत्रये सदा न हि त्वदन्यो ह्यपरो मनस्वी ॥ ६३ ॥ एवमुक्तस्तदा देव्या

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नारदो देवदर्शनः ॥ उवाच वाक्यं प्रहसन्गिरिजां शिवसन्निधौ ॥ ६४ ॥ ॥ नारद उवाच ॥ ॥ द्यूतं न जानामि न चाश्रयामि ह्यहं तपस्वी शिवकिंकरश्च ॥ कथं च मां पृच्छसि राजकन्यके योगीश्वराणां परमं पवित्रे ॥ ६५ ॥ निशम्य वाक्यं गिरिजा सती तदा ह्युवाच वाक्यं च विहस्य तं प्रति ॥ जानासि सर्वं च बटोऽद्य पश्य मे द्यूतं महेशेन करोमि तेऽग्रतः ॥ ६६ ॥ इत्येवमुक्त्वा गिरिराजकन्यका जग्राह चाक्षान्भुवनैकसुंदरी ॥ क्रीडां चकाराथ महर्षिसाक्ष्यके तत्रास्थिता सा हि भवेन संयुता ॥ ६७ ॥ तौ दंपती क्रीडया सज्जमानौ दृष्टौ तदा ऋषिणा नारदेन ॥ सविस्मयोत्फुल्लमना मनस्वी विलोकमानोऽतितरां तुतोष ॥ ६८ ॥ सखीजनेन संवीता तदा द्यूतपरा सती ॥ शिवेन सह संगत्य च्छलाद्द्यूतमकारयत् ॥ ॥ ६९ ॥ स पणं च तदा चक्रे छलेन महता वृतः ॥ जिता भवानी च तदा शिवेन प्रहसन्निव ॥ ७० ॥ नारदोऽस्याः शिवेनाथ उपहासकरोऽभवत् ॥ निशम्य हारितं द्यूतमुपहासं निशम्य च ॥ ७१ ॥ नारदस्य दुरुक्तैश्च कुपिता पार्वती भृशम् ॥ उवाच त्वरिता चैव दत्त्वा चैवार्द्धचंद्रकम् ॥ ७२ ॥ तथा शिरोमणी चैव तरले च मनोहरे ॥ मुखं सुशोभनं चैव तथा कुपितसुंदरम् ॥ दृष्टं हरेण च पुनः पुनर्द्यूतमकारयत् ॥ ७३ ॥ तथा गिरिजया प्रोक्तः शंकरो लोकशंकरः ॥ हारितं च मया दत्तः पण एव च नान्यथा ॥ ७४ ॥ क्रियते च त्वया शंभो कः पणो हि तदुच्यताम् ॥ ततः प्रहस्य चोवाच पार्वतीं च त्रिलोचनः ॥ ७५ ॥ मया पणोऽयं क्रियते भवानि त्वदर्थमेतच्च विभूषणं महत् ॥ सा चंद्रलेखा हि महान्हि हारस्तथैव कर्णोत्पलभूषणद्वयम् ॥ ७६ ॥ इदमेव त्वया तन्वि मां जित्वा गृह्यतां सुखम् ॥ ततः प्रवर्तितं द्यूतं शंकरेण सहैव च ॥ ७७ ॥ एवं विक्रीडमानौ तावक्षविद्याविशारदौ ॥ तदा जितो भवान्याथ शंकरो बहुभूषणः ॥ ७८ ॥ प्रहस्य गौरी प्रोवाच शंकरं त्वतिसुंदरी ॥ हारितं च पणं देहि मम चाद्यैव शंकर ॥ ७९ ॥ तदा महेशः प्रहसन्सत्यं वाक्यमुवाच ह ॥ न जितोऽहं त्वया तन्वि तत्त्वतो हि विमृश्यताम् ॥ ८० ॥ अजेयोऽहं प्राणिनां सर्वथैव तस्मान्न वाच्यं तु वचो हि साध्वि ॥ द्यूतं कुरुष्वाद्य यथेष्टमेव जेष्यामि चाहं च पुनः प्रपश्य॥८१॥ तदाम्बिकाह स्वपतिं महेशं मया जितोऽस्यद्य न विस्मयोऽत्र ॥ एवमुक्त्वा तदा शंभुं करे गृह्य वरानना ॥ जितोऽसि त्वं न संदेहस्त्वं न जानासि शंकर ॥ ८२ ॥ एवं प्रहस्य रुचिरं गिरिजा तु शंभुं सा प्रेक्ष्य नर्मवचसा स तयाभिभूतः ॥ देहीति मे सकलमंगलमंगलेश यद्धारितं स्मररिपो वचसानुमोदितम् ॥ ८३ ॥ ॥ ॥ शिव उवाच ॥ ॥ अजेयोऽहं विशालाक्षि तव नास्त्यत्र संशयः ॥ अहंकारेण यत्प्रोक्तं तत्त्वतस्तद्विमृश्यताम् ॥ ८४ ॥ तस्य तद्वचनं श्रुत्वा प्रोवाच च विहस्य सा ॥ अजेयो हि महादेवः सर्वेषामपि वै प्रभो ॥ ८५ ॥ मयैकया जितोऽसि त्वं द्यूतेन विमलेन हि ॥ न जानासि च

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

किंचिच्च कार्याकार्यं विवक्षितम् ॥ ८६ ॥ एवं विवदमानौ तौ दंपती परमेश्वरौ ॥ नारदः प्रहसन्वाक्यमुवाच ऋषिसत्तमः ॥ ८७ ॥ ॥ नारद उवाच ॥ ॥ आकर्णयाऽऽकर्णविशालनेत्रे वाक्यं तदेकं जगदेकमंगलम् ॥ असौ महाभाग्यवतां वरेण्यस्त्वया जितः किं च मृषा ब्रवीषि ॥ ८८ ॥ अजितो हि महादेवो देवानां परमो गुरुः ॥ अरूपोऽयं सुरूपोयं रूपातीतोऽयमुच्यते ॥ ८९ ॥ एक एव परं ज्योतिस्तेषामपि च यन्महः ॥ त्रैलोक्यनाथो विश्वात्मा शंकरो लोकशंकरः ॥ ९० ॥ कथं त्वया जितो देवि ह्यजेयो भुवनत्रये ॥ शिवमेनं न जानासि स्त्रीभावाच्च वरानने ॥ ॥ ९१ ॥ नारदेनैवमुक्ता सा कुपिता पार्वती भृशम् ॥ बभाषे मत्सरग्रस्ता साक्षेपं वचनं सती ॥ ९२ ॥ ॥ पार्वत्युवाच ॥ ॥ चापल्याच्च न वक्तव्यं ब्रह्मपुत्र नमोस्तु ते ॥ तव भीतास्मि भद्रं ते देवर्षे मौनमावह ॥ ९३ ॥ कथं शिवो हि देवर्ष उक्तोऽतो हि त्वया बहु ॥ मत्प्रसादाच्छिवो जात ईश्वरो यो हि पठ्यते ॥ ९४ ॥ मया लब्धप्रतिष्ठोऽयं जातो नास्त्यत्र संशयः ॥ ९५ ॥ एवं बहुविधं श्रुत्वा नारदो मौनमाश्रयत् ॥ उपस्थितं च तद्दृष्ट्वा भृंगी वाक्यमथाब्रवीत् ॥ ९६ ॥ ॥ भृंग्युवाच ॥ ॥ त्वया बहु न वक्तव्यं पुनरेव च भामिनि ॥ अजेयो निर्विकारो हि स्वामी मम सुमध्यमे ॥ ९७ ॥ स्त्रीभावयुक्तासि वरानने त्वं देवं न जानासि परं पराणाम् ॥ कामं पुरस्कृत्य पुरा भवानि समागतास्येव महेशमुग्रम् ॥ ९८ ॥ यथा कृतं तेन पिनाकिना पुरा एतत्स्मृतं किं सुभगे वदस्व नः ॥ कृतो ह्यनंगो हि तदा ह्यनेन दग्धं वनं तस्य गिरेः पितुस्ते ॥ ९९ ॥ पश्चात्त्वयाराधित एव एष शिवः पराणां परमः परात्मा ॥ १०० ॥ भृंगिणेत्येवमुक्ता सा ह्युवाच कुपिता भृशम् ॥ शृण्वतो हि महेशस्य वाक्यं रुष्टा च भृंगिणम् ॥ ॥ १०१ ॥ ॥ पार्वत्युवाच ॥ ॥ हे भृंगिन्पक्षपातित्वाद्यदुक्तं वचनं मम ॥ शिवप्रियोऽसि रे मन्द भेदबुद्धिरतो ह्यसि ॥ १०२ ॥ अहं शिवात्मिका मूढ शिवो नित्यं मयि स्थितः ॥ कथं शिवाभ्यां भिन्नत्वं त्वयोक्तं वाग्बलेन हि ॥ १०३ ॥ श्रुतं च वाक्यं शुभदं पार्वत्या भृंगिणा तदा ॥ उवाच पार्वतीं भृंगी रुषितः शिवसन्निधौ ॥ १०४ ॥ पितुर्यज्ञे च दक्षस्य शिवनिंदा त्वया श्रुता ॥ अप्रियश्रवणात्सद्यस्त्वया त्यक्तं कलेवरम् ॥ १०५ ॥ तत्क्षणादेव तन्वंगि ह्यधुना किं कृतं त्वया ॥ संभ्रमात्किं न जानासि शिवनिंदकमेव च ॥ १०६ ॥ कथं वा पर्वतश्रेष्ठाज्जातासि वरवर्णिनि ॥ कथं वा तपसोग्रेण संतप्तासि सुमध्यमे ॥ १०७ ॥ सप्रेमा च शिवे भक्तिस्तव नास्तीह सांप्रतम् ॥ शिवप्रियासि तन्वंगि तस्मादेवं ब्रवीमि ते ॥ १०८ ॥ शिवात्परतरं नान्यत्त्रिषु लोकेषु विद्यते ॥ शिवे भक्तिस्त्वया कार्या सप्रेमा वरवर्णिनि ॥ १०९ ॥ भक्तासि त्वं महादेवि महाभाग्यवतां वरे ॥ संसेव्यतां प्रयत्नेन तपसोपार्जितस्त्वया ॥ ११० ॥ शिवो वरेण्यः सर्वेशो नान्यथा कर्तुमर्हसि ॥ भृंगिणो वचनं श्रुत्वा गिरिजा तमुवाच

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ह ॥ १११ ॥ ॥ गिरिजोवाच ॥ ॥ रे भृंगिन्मौनमालंब्य स्थिरो भवाथ वा व्रज ॥ वाच्यावाच्यं न जानासि किं ब्रवीषि पिशाचवत् ॥११२॥
तपसा केन चानीतः कया चापि शिवो ह्ययम् ॥ काहं कोऽसौ त्वया ज्ञातो भेदबुद्ध्या ब्रवीषि मे ॥ ११३ ॥ कोऽसि त्वं केन युक्तोऽसि कस्माच्च
बहु भाषसे ॥ शापं तव प्रदास्यामि शिवः किं कुरुतेऽधुना ॥ ११४ ॥ भृंगिणोक्ता तिरस्कृत्य तदा शापं ददौ सती ॥ निर्मांसो भव रे मन्द रे
भृंगिञ्छंकरप्रिय ॥ ११५ ॥ एवमुक्त्वा तदा देवी पार्वती शंकरप्रिया ॥ अथ कोपेन संयुक्ता पार्वती शंकरं तदा ॥ ११६ ॥ करे गृह्य च तन्वंगी
भुजंगं वासुकिं तथा ॥ उदतारयत्कंठात्सा तथान्यानि बहूनि च ॥ ११७ ॥ शंभोर्जग्राह कुपिता भूषणानि त्वरान्विता ॥ हृता चंद्रकला तस्य
गजाजिनमनुत्तमम् ॥ ११८ ॥ कंबलाश्वतरौ नागौ महेशकृतभूषणौ ॥ हृतौ तया महादेव्या छलोक्त्या च प्रहस्य वै ॥ ११९ ॥ कौपीनाच्छा
दनं तस्य च्छलोक्त्या च प्रहस्य वै ॥ तदा गणाश्च सख्यश्च त्रपया पीडिता भवन्[1] ॥ १२० ॥ पराङ्मुखाश्च संजाता भृङ्गी चैव महातपाः ॥
तथा चण्डो हि मुण्डश्च महालोमा महोदरः ॥ १२१ ॥ एते चान्ये च बहवो गणास्ते दुःखिनोऽभवन् ॥ तांश्च दृष्ट्वा तथाभूतान्महेशो लज्जितोऽ
भवत् ॥ १२२ ॥ उवाच वाक्यं रुषितः पार्वतीं प्रति शंकरः ॥ १२३ ॥ ॥ रुद्र उवाच ॥ ॥ उपहासं प्रकुर्वंति सर्वे हि ऋषयो भृशम् ॥
तथा ब्रह्मा च विष्णुश्च तथा चेन्द्रादयो ह्यमी ॥ १२४ ॥ उपहासपराः सर्वे किं त्वयाद्य कृतं शुभे ॥ कुले जातासि तन्वंगि
कथमेवं करिष्यसि ॥ १२५ ॥ त्वया जितो ह्यहं सुभ्रु यदि जानासि तत्त्वतः ॥ तर्ह्येवं कुरु मे देहि कौपीनाच्छादनं परम् ॥ देहि कौपी
नमात्रं मे नान्यथा कर्तुमर्हसि ॥ १२६ ॥ एवमुक्ता सती तेन शंभुना योगिना तदा ॥ प्रहस्य वाक्यं प्रोवाच पार्वती रुचिरानना ॥ १२७ ॥ किं
कौपीनेन ते कार्यं मुनिना भावितात्मना ॥ दिगम्बरेणैव तदा कृतं दारुवनं तथा ॥ १२८ ॥ भिक्षाटनमिषेणैव ऋषिपत्न्यो विमोहिताः ॥ गच्छ
तस्ते तदा शंभो पूजनं तैर्महत्कृतम् ॥ १२९ ॥ कौपीनं पतितं तत्र मुनिभिर्नान्यथोदितम् ॥ तस्मात्त्वया प्रहातव्यं द्यूते हारितमेव तत् ॥
॥ १३० ॥ तच्छ्रुत्वा कुपितो रुद्रः पार्वतीं परमेश्वरः ॥ निरीक्षमाणोऽतिरुषा तृतीयेनैव चक्षुषा ॥ १३१ ॥ कुपितं शंकरं दृष्ट्वा सर्वे देवगणास्तदा ॥
भयेन महताविष्टास्तथा गणकुमारकाः ॥ १३२ ॥ ऊचुः सर्वे शनैस्तत्र शंकितेन परस्परम् ॥ अद्यायं कुपितो रुद्रो गिरिजां प्रति संप्रति ॥१३३॥
यथा हि मदनो दग्धस्तथेयं नान्यथा वचः ॥ एवं मीमांसमानास्ते गणा देवर्षयस्तदा ॥ १३४ ॥ विलोकितास्तया देव्या सर्वे सौभाग्यमुद्रया ॥
उवाच प्रहसन्नेव सती सत्पुरुषं तदा ॥ १३५ ॥ किमालोकपरो भूत्वा चक्षुषा परमेण हि ॥ नाहं कालो न कामोऽहं नाहं दक्षस्य वै मखः ॥१३६॥

: १ भवन्—अभवन्—अडभाव आर्षः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्रिपुरो नैव वै शंभो नांधको वृषभध्वज ॥ वीक्षितेनैव किं तेन तव चाद्य भविष्यति ॥ वृथैव त्वं विरूपाक्षो जातोऽसि मम चाग्रतः ॥ १३७ ॥ एवमादीन्यनेकानि ह्युवाच परमेश्वरी ॥ निशम्य देवो वाक्यानि गमनाय मनो दधे ॥ १३८ ॥ वनमेव वरं चाद्य विजनं परमार्थतः ॥ एकाकी यतचित्तात्मा त्यक्तसर्वपरिग्रहः ॥ १३९ ॥ स सुखी परमार्थज्ञः स विद्वान्स च पंडितः ॥ येन मुक्तौ कामरागौ स मुक्तः स सुखी भवेत् ॥ ॥ १४० ॥ एवं विमृश्य च तदा गिरिजां विहाय श्रीशंकरः परमकारुणिकस्तदानीम् ॥ यातः प्रियाविरहितो वनमद्भुतं च सिद्धाटवीं परमहंसयुतां तथैव ॥ १४१ ॥ निर्गतं शंकरं दृष्ट्वा सर्वे कैलासवासिनः ॥ निर्ययुश्च गणाः सर्वे वीरभद्रादयोऽनु तम् ॥ १४२ ॥ छत्रं भृंगी समादाय जगाम तस्य पृष्ठतः ॥ चामरे वीज्यमाने च गंगायमुनसन्निभे ॥ १४३ ॥ ताभ्यां युक्तस्तदा नंदी पृष्ठतोऽन्वगमत्सुधीः ॥ वृषभो ह्यग्रतो भूत्वा पुष्पकेण विराजितः ॥ १४४ ॥ शोभमानो महादेव एभिः सर्वैः सुशोभनैः ॥ अंतःपुरगता देवी पार्वती सा हि दुर्मनाः ॥ १४५ ॥ सखीभिर्बहुभिस्तत्र तथान्याभिः सुसंवृता ॥ गिरिजा चिंतयामास मनसा परमेश्वरम् ॥ १४६ ॥ ततो दूरं गतः शंभुर्विसृज्य च गणांस्तदा ॥ गणेशं च कुमारं च वीरभद्रं तथाऽपरान् ॥ १४७ ॥ भृंगिणं नंदिनं चंडं सोमनंदिनमेव च ॥ एतानन्यांश्च सर्वांश्च कैलासपुरवासिनः ॥ १४८ ॥ विसृज्य च महादेव एक एव महातपाः ॥ गतो दूरं वनस्यांते तथा सिद्धवटं शिवः ॥ १४९ ॥ काश्मीररत्नोपलसिद्धरत्नवैदूर्यचित्रं सुधया परिष्कृतम् ॥ दिव्यासनं तस्य च कल्पितं भुवा तत्रास्थितो योगपतिर्महेशः ॥ १५० ॥ पद्मासने चोपविष्टो महेशो योगवित्तमः ॥ केवलं चात्मनात्मानं दध्यौ मीलितलोचनः ॥ ॥ १५१ ॥ शुशुभे स महादेवः समाधौ चंद्रशेखरः ॥ योगपट्टः कृतस्तेन शेषस्य च महात्मनः ॥ वासुकिः सर्पराजश्च कटिबद्धः कृतो महान् ॥ ॥ १५२ ॥ आत्मानमात्मात्मतया च संस्तुतो वेदांतवेद्यो न हि विश्वचेष्टितः ॥ एको ह्यनेको हि दुरंतपारस्तथा ह्यतर्क्यो निजबोधरूपः ॥ स्थितस्तदानीं परमं पराणां निरीक्षमाणो भुवनैकभर्ता ॥ १५३ ॥ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां प्रथमे माहेश्वरखण्डे केदारखंडे शिवशास्त्रे शिवपार्वतीद्यूतप्रसंगेन पार्वतीहारितसर्वस्वस्य शिवस्य कैलासं विहाय तपोवनगमनवर्णनंनाम चतुस्त्रिंशोऽध्यायः ॥ ३४ ॥ ॥ छ ॥ ॥ लोमश उवाच ॥ ॥ वनं गते महादेवे गिरिजा विरहातुरा ॥ सुखं न लेभे तन्वंगी हर्म्येष्वायतनेषु वा ॥ १ ॥ चिंतयंती शिवं तन्वी सर्वभावेन शोभना ॥ चिंतमानां शिवां ज्ञात्वा ह्युवाच विजया सखी ॥ २ ॥ ॥ विजयोवाच ॥ ॥ तपसा महता चैव शिवं प्राप्तासि शोभने ॥ मृषा द्यूतं कृतं तेन शंकरेण तपस्विना ॥ ३ ॥ द्यूते हि बहवो दोषा न श्रुताः किं त्वयाऽनघे ॥ क्षमा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पय शिवं तन्वि त्वरेणैव विचक्षणे ॥ ४ ॥ अस्माभिः सहिता देवि गच्छगच्छ वरानने ॥ ५ ॥ यावच्छंभुर्दूरतो नाभिगच्छेत्ताव
द्गत्वा शंकरं क्षामयस्व ॥ नो चेत्तन्वि क्षामयेथाः शिवं त्वं दुःखं पश्चात्ते भविष्यत्यवश्यम् ॥ ६ ॥ निशम्य वाक्य विजयाप्रयुक्तं प्रह
स्यमाना समधीरचेताः ॥ उवाच वाक्यं विजयां सखीं च आश्चर्यभूतं परमार्थयुक्तम् ॥ ७ ॥ मया जितोऽसौ निरपत्रपश्च पुरा
वृतो वै परया विभूत्या ॥ किंचिच्च कृत्यं मम नास्ति सद्यो मया विनासौ च विरूप आस्थितः ॥ ८ ॥ रूपीकृतो मया देवो महेशो
नान्यथा वद ॥ मया तेन वियोगश्च संयोगो नैव जायते ॥ ९ ॥ साकारो हि निराकारो महेशो हि मया कृतः ॥ १० ॥ कृतं मया
विश्वमिदं समग्रं चराचरं देववरैः समेतम् ॥ क्रीडार्थमस्योद्भववृत्तिहेतुभिश्चिक्रीडितं मे विजये प्रपश्य ॥ ११ ॥ एवमुक्त्वा तदा देवी गिरिजा
सर्वमंगला ॥ शबरीरूपमास्थाय गंतुकामा महेश्वरम् ॥ १२ ॥ श्यामा तन्वी शिखरदशना बिंबबिंबाधरोष्ठी सुग्रीवाढ्या कुचभरनता वर्द्धित
स्निग्धकेशी ॥ मध्ये क्षामा पृथुकटितटा हेमरंभोरुगौरी पल्लीयुक्ता वरवलयिनी बर्हिबर्हावतंसा ॥ १३ ॥ पाणौ मृणालसदृशं दधती च चापं
पृष्ठे लसत्कृतककेतकिबाणकोशम् ॥ सा तं निरीशमलोकयति स्म तत्र संसेविता सुवदना बहुभिः सखीभिः ॥ १४ ॥ भृंगीनादेन महता नादयंती
जगत्रयम् ॥ गिरिजा मन्मथं सद्यो जीवयंती पुनःपुनः ॥ १५ ॥ सकामना राजहंसा बभूवुस्तत्क्षणादपि ॥ द्विरेफा बर्हिणश्चैव सर्वे ते हृच्छयान्वि
ताः ॥ १६ ॥ एकाकी संस्थितो यत्र समाधिस्थो महेश्वरः ॥ दृष्टस्ततस्तया देव्या भृंगीनादेन मोहितः ॥ १७ ॥ प्रबुद्धो हि महादेवो निरीक्ष्य
शबरीं तदा ॥ समाधेरुत्थितः सद्यो महेशो मदनान्वितः ॥ १८ ॥ यावत्करे गृह्यमाणो गिरिजां स समीपगः ॥ तावत्तस्य पुरः सद्यस्तिरोधानं
गता सती ॥ १९ ॥ तद्दृष्ट्वा तत्क्षणादेव देवो भ्रांतिविनाशनः ॥ भ्रममाणस्तदा शंभुर्नापश्यदसितेक्षणाम् ॥ २० ॥ विरहेण समायुक्तो हृच्छ
येन समन्वितः ॥ मदनारिस्तदा शंभुर्ज्ञानरूपो निरंतरम् ॥ २१ ॥ निर्मोहो मोहमापन्नो ददर्श गिरिजां पुनः ॥ उवाच वाक्यं शबरीं प्रस्ताव
सदृशं महत् ॥ २२ ॥ ॥ शिव उवाच ॥ ॥ वाक्यं मे शृणु तन्वंगि श्रुत्वा तत्कर्तुमर्हसि ॥ कासि कस्यासि तन्वंगि किमर्थमटनं वने ॥
तत्कथ्यतां महाभागे याथातथ्यं सुमध्यमे ॥ २३ ॥ ॥ शिवोवाच ॥ ॥ पतिमन्वेषयिष्यामि सर्वज्ञं सकलार्थदम् ॥ स्वतंत्रं निर्विकारं च
जगतामीश्वरं वरम् ॥ २४ ॥ इत्युक्तः प्रत्युवाचेदं गिरिजां वृषभध्वजः ॥ अहं तवोचितो भद्रे पतिर्नान्यो हि भामिनि ॥ २५ ॥ विमृश्यतां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वरारोहे तत्त्वतो हि वरानने ॥ वचो निशम्य रुद्रस्य स्मितपूर्वमभाषत ॥ २६ ॥ मयार्थितो महाभाग पतिस्त्वं नान्यथा वद ॥ किं तु वक्ष्यामि भद्रं ते निर्गुणोऽसि परंतपः ॥ २७ ॥ यया पुरा वृतोऽसि त्वं तपसा च परेण हि ॥ परित्यक्ता त्वयारण्ये क्षणमात्रेण भामिनी ॥ २८ ॥ दुराराध्योऽसि सततं सर्वेषां प्राणिनामपि ॥ तस्मान्न वाच्यं हि पुनर्यदुक्तं ते ममाग्रतः ॥ २९ ॥ शबर्या वचनं श्रुत्वा प्रत्युवाच वृषध्वजः ॥ मैवं वद विशालाक्षि न त्यक्ता सा तपस्विनी ॥ यदि त्यक्ता मया तन्वि किं वक्तुमिह पार्यते ॥ ३० ॥ एवं ज्ञात्वा विशालाक्षि कृपणं कृपणप्रियम् ॥ तस्मात्त्वया हि कर्तव्यं वचनं मे सुमध्यमे ॥ ३१ ॥ एवमभ्यर्थिता तेन बहुधा शूलपाणिना ॥ प्रहस्य गिरिजा प्राह उपहासपरं वचः ॥ ३२ ॥ तपोधनोऽसि योगीश विरक्तोऽसि निरंजनः ॥ आत्मारामो हि निर्द्वंद्वो मदनो येन घातितः ॥ ३३ ॥ स त्वं साक्षाद्विरूपाक्षो मया दृष्टोसि चाद्य वै ॥ अशक्यो हि मया प्राप्तुं सर्वेषां दुरतिक्रमः ॥ तस्मात्त्वया न वक्तव्यं यदुक्तं च पुरा मम ॥ ३४ ॥ तस्यास्तद्वचनं श्रुत्वा प्रोवाच मदनांतकः ॥ मम भार्या भव त्वं हि नान्यथा कर्तुमर्हसि ॥ ३५ ॥ इत्युक्त्वा तां करेऽगृह्णाच्छबरीं मदनातुरः ॥ उवाच तं स्मयंती सा मुंचमुंचेति सादरम् ॥ ३६ ॥ नोचितं भगवन्कर्तुं तापसेन बलादिदम् ॥ याचयस्व पितुर्मे त्वं नान्यथाभिभविष्यसि ॥ ३७ ॥ ॥ महादेव उवाच ॥ ॥ ॥ पितरं कथयाशु त्वं स्थितः कुत्र शुभानने ॥ द्रक्ष्यामि तं विशालाक्षि प्रणिपातपुरःसरम् ॥ ३८ ॥ एतदुक्तं तदा तेन निशम्यासितनेत्रया ॥ आनीतो हि तया तन्व्या पितरं वृषभध्वजः ॥ ३९ ॥ स्थितं कैलासशिखरे हिमवंतं नगोत्तमम् ॥ अहिभिर्बहुभिश्चैव संवृतं च महाप्रभम् ॥ ४० ॥ द्वारि स्थितं तया देव्या दर्शितं शंकरस्य च ॥ असौ मम पिता देव याचस्व विगतत्रपः ॥ ददाति मां न संदेहस्तपस्विन्मा विलंबितम् ॥ ४१ ॥ तथेति मत्वा सहसा प्रणम्य हिमालयं वाक्यमिदं बभाषे ॥ प्रयच्छ तां चाद्य गिरीशवर्य ह्यार्ताय कन्यां सुभगां महामते ॥ ४२ ॥ कृपणं वाक्यमाकर्ण्य समुत्थाय हिमालयः ॥ महेशं च समादाय ह्युवाच गिरिराट् स्वयम् ॥ ४३ ॥ किं जल्पसि हि भो देव तवायुक्तं च सांप्रतम् ॥ त्वं दाता त्रिषु लोकेषु त्वं स्वामी जगतां विभो ॥ ४४ ॥ त्वया ततमिदं विश्वं जगदेतच्चराचरम् ॥ एवं स्तुतिपरोऽभूच्च हिमालयगिरिर्महान् ॥ आगतो नारदस्तत्र ऋषिभिः परिवारितः ॥ ४५ ॥ उवाच प्रहसन्वाक्यं शूलपाणे नमः प्रभो ॥ हे शंभो शृणु मे वाक्यं तत्त्वसारमयं परम् ॥ ४६ ॥

१ हे महाभाग त्वं मयार्थितः पतिः न—असि—त्वम् अन्यथा—यथेच्छम्—इति शेषः । वद ब्रूहि—अहं तु त्वां मद्योग्यं पतिं न जानामि—इति परिहासोक्तौ गूढाभिप्रायः । वस्तुतस्तु हे महाभाग मयार्थितः पतिस्त्वं—त्वमेवासि—अन्यथा न वद—मा ब्रूहि—इति—शब्दयोजना बोद्धव्या ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

योषिद्भिः संगतिः पुंसां विडंबायोपकल्पते ॥ त्वं स्वामी जगतां नाथः पराणां परमः परः ॥ विमृश्य सर्वं देवेश यथावद्वक्तुमर्हसि ॥ ४७ ॥ एवं प्रबो
धितस्तेन नारदेन महात्मना ॥ प्रबोधमगमच्छंभुर्जहास परमेश्वरः ॥ ४८ ॥ ॥ शिव उवाच ॥ ॥ सत्यमुक्तं त्वया चात्र नान्यथा नारद
क्वचित् ॥ योषित्संगतिमात्रेण नृणां पतनमेव च ॥ ४९ ॥ भविष्यति न संदेहो नान्यथा वचनं तव ॥ अनया मोहितोऽद्याहमानीतो गंधमाद
नम् ॥ ५० ॥ पिशाचवत्कृतमिदं चरितं परमाद्भुतम् ॥ ५१ ॥ तस्मान्न तिष्ठामि गिरेः समीपे व्रजामि चाद्यैव वनांतरं पुनः ॥ इत्येवमुक्त्वा स
जगाम मार्गं दुरत्ययं योगिनामप्यगम्यम् ॥ ५२ ॥ निरालंबं स विज्ञाय नारदो वाक्यमब्रवीत् ॥ गिरिजां च गिरींद्रं च पार्षदान्प्रति सत्वरम् ॥
॥ ५३ ॥ वंदनीयश्च स्तुत्यश्च क्षाम्यतां परमार्थतः ॥ महेशोऽयं जगन्नाथस्त्रिपुरारिर्महायशाः ॥ ५४ ॥ एतच्छ्रुत्वा तु वचनं नारदस्य मुखोद्गतम् ॥
गिरिजां पुरतः कृत्वा गिरयो हि महाप्रभाः ॥ ५५ ॥ दण्डवत्पतिताः सर्वे शंकरं लोकशंकरम् ॥ तुष्टुवुः प्रणताः सर्वे प्रमथा गुह्यकादयः ॥ ५६ ॥
स्तूयमानो हि भगवानागतो गंधमादनम् ॥ अंगिरसा हि सर्वेशो ह्यभिषिक्तो महात्मभिः ॥ ५७ ॥ तदा दुन्दुभयो नेदुर्वादित्राणि बहूनि च ॥
इन्द्रादयः सुराः सर्वे पुष्पवर्षं ववर्षिरे ॥ ५८ ॥ ब्रह्मादिभिः सुरगणैर्बहुभिः परीतो योगीश्वरो गिरिजया सह विश्ववंद्यः ॥ अभ्यर्थितः परममंगल
मंगलैश्च दिव्यासनोपरि रराज महाविभूत्या ॥ ५९ ॥ एवंविधान्यनेकानि चरितानि महात्मनः ॥ महेशस्य च भो विप्राः पापहारीणि शृण्व
ताम् ॥ ६० ॥ यानियानीह रुद्रस्य चरितानि महांत्यपि ॥ श्रुतानि परमाण्येव भूयः किं कथयामि वः ॥ ६१ ॥ ॥ ऋषय ऊचुः ॥ ॥ एव
मुक्तं त्वया सूत चरितं शंकरस्य च ॥ अनेन चरितेनैव संतृप्ताः स्मो न संशयः ॥ ६२ ॥ ॥ सूत उवाच ॥ ॥ व्यासप्रसादाच्छ्रुतमस्ति सर्वं
मया ततं शंकररूपमद्भुतम् ॥ सुविस्तृतं चाद्भुतवेदगर्भं ज्ञानात्मकं परमं चेदमुक्तम् ॥६३॥ श्रद्धया परयोपेताः श्रावयंति शिवप्रियम् ॥ शृण्वंति चैव
ये भक्त्या शंभोर्माहात्म्यमद्भुतम् ॥ शिवशास्त्रमिदं प्रीत्या ते यांति परमां गतिम् ॥ ६४ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां
प्रथमे माहेश्वरखण्डे केदारखण्डे शिवशास्त्रे पार्वत्या शबरीरूपेण शिवस्य गन्धमादनपर्वतं प्रत्यानयनपूर्वकं बृहस्पतिकृताशिवराज्याभिषेकवर्णनं
नाम पञ्चत्रिंशोऽध्यायः ॥ ३५ ॥ छ ॥ ॥ इति श्रीस्कान्दमहापुराणे प्रथमे माहेश्वरखण्डे प्रथमः केदारखण्डः समाप्तः ॥ १ ॥

॥ ❀ ॥ इति केदारखण्डः समाप्तः ॥ ❀ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इदं पुस्तकं मुम्बय्यां श्रीकृष्णदासात्मजक्षेमराजश्रेष्ठिना
स्वकीये "श्रीवेङ्कटेश्वर" (स्टीम्) मुद्रणालये मुद्रितम्।
संवत् १९६६, शके १८३१.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ इति श्रीस्कांदे महापुराणे प्रथमे माहेश्वरखण्डे केदारखण्डः समाप्तः ॥ (१) ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ अथ श्रीस्कांदे महापुराणे प्रथमे माहेश्वरखण्डे कौमारिकाखण्डः प्रारभ्यते ॥ (२)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीगणेशाय नमः ॥ ॐ नमो बृहस्पतये ॥ नमतस्मै ब्रह्मणे ॥ विष्णवे नमः ॥ श्रीमुनय ऊचुः ॥ दक्षिणा[1]र्णवतीरेषु यानि तीर्थानि पंच च ॥ तानि ब्रूहि विशालाक्ष वर्णयंत्यति तानि च ॥ १ ॥ सर्वतीर्थफलं येषु नारदाद्या वदंति च ॥ तेषां चरितमाहात्म्यं श्रोतुमिच्छामहे वयम् ॥ २ ॥ ॥ ॥ उग्रश्रवा उवाच ॥ ॥ शृणुध्वमत्यद्भुतपुण्यसत्कथं कुमारनाथस्य महाप्रभावम् ॥ द्वैपायनो यन्मम चाह पूर्वं हर्षांबुरोमोद्गमचर्चितांगः ॥ ॥ ३ ॥ कुमारगीता गा[2]थात्र श्रूयतां मुनिसत्तमाः ॥ या सर्वदेवैर्मुनिभिः पितृभिश्च प्रपूजिता ॥ ४ ॥ म[3]ध्वाचारस्तंभतीर्थं यो निषेवेत मानवः ॥ नियतं तस्य वासः स्याद्ब्र[4]ह्मलोके यथा मम ॥ ५ ॥ ब्रह्मलोकाद्विष्णुलोकस्तस्मादपि शिवस्य च ॥ पुत्रप्रियत्वात्तस्यापि गुहलोको महत्तमः ॥ ॥ ६ ॥ अत्राश्चर्यकथा या च फाल्गुनस्य पुरेरिता ॥ नारदेन मुनिश्रेष्ठा[5]स्तां वो वक्ष्यामि विस्तरात् ॥ ७ ॥ पुरा निमित्ते कस्मिंश्चित्किरीटी मणि कू[6]टतः ॥ समुद्रे दक्षिणेऽभ्यागात्स्नातुं तीर्थानि पंच च ॥ ८ ॥ वर्जयंति सदा यानि भयात्तीर्थानि तापसाः ॥ कुमारेशस्य पूर्वं च तीर्थमस्ति मुनेः प्रियम् ॥ ९ ॥ स्तंभेशस्य द्वितीयं च सौभद्रस्य मुनेः प्रियम् ॥ बँ[7]र्करेश्वरमन्यच्च पौलोमीप्रियमुत्तमम् ॥ १० ॥ चतुर्थं च महाकालं करंधम नृपप्रियम् ॥ भरद्वाजस्य तीर्थं च सिद्धेशाख्यं हि पंचमम् ॥ ११ ॥ एतानि पंच तीर्थानि ददर्श कुरुपुंगवः ॥ तपस्विभिर्वर्जितानि म[8]हापुण्यानि तानि च ॥ १२ ॥ दृष्ट्वा पार्श्वे नारदीयानपृच्छत महामुनीन् ॥ तीर्थानीमानि रम्याणि प्रभावाद्भुतवंति च ॥ १३ ॥ किमर्थं ब्रूत वर्ज्यंते सदैव ब्रह्मवादिभिः ॥ ॥ तापसा ऊचुः ॥ ॥ ग्राहाः पंच वसंत्येषु हरंति च तपोधनान् ॥ १४ ॥ अत एतानि वर्ज्यंते तीर्थानि कुरुनंदन ॥ इति श्रुत्वा महाबाहुर्गमनाय मनो दधे ॥ १५ ॥ ततस्तं तापसाः प्रोचुर्गंतुं नार्हसि फाल्गुन ॥ बहवो भक्षिता ग्राहै राजानो मुनयस्तथा ॥ १६ ॥ तत्त्वं द्वादश वर्षाणि तीर्थानामर्बुदेष्वपि ॥ स्नातः किमेतैस्तीर्थैस्ते मा पतंगव्रतो भव ॥ १७ ॥ ॥ अर्जुन उवाच ॥ ॥ यदुक्तं करुणासारैः सारं किं तदिहोच्यताम् ॥ धर्मार्थी मनुजो यश्च न स वार्यो महात्मभिः ॥ १८ ॥ ध[9]र्मकामं हि मनुजं यो वारयति मंदधीः ॥ तदाश्रितस्य जं[10]गतो निःश्वासैर्भस्मसाद्भवेत् ॥ १९ ॥ यज्जीवितं चाचिरांशुसमानक्षणभंगुरम् ॥ तच्चेद्धर्मकृते याति यातु दोषोऽस्ति को ननु ॥ २० ॥ जीवितं च धनं दाराः पुत्राः क्षेत्रगृहाणि च ॥ यान्ति येषां धर्मकृते त एव भुवि मानवाः ॥ २१ ॥ ॥ तापसा ऊचुः ॥ ॥ एवं ते ब्रुवतः पार्थ दीर्घमायुः प्रवर्धताम् ॥

१ दक्षिणार्णवतीरे तु–इति पाठान्तरम् । २ कुमारनाथगीतात्र– इ० पा० । ३ साध्वाचारस्तम्भतीर्थम्–इ०पा० । ४ मम–इ०पा० । ५ मुनिश्रेष्ठ तात् वक्ष्याम–इ० पा० । ६ मणिपूरतः–इ० पा० । ७ वर्वरेश्वरम्–इ०पा० । ८ यानि पुण्यानि तानि च–इ० पा० । ९ वत्सकामं च–इ०पा० । १० जगतः–जंगमस्य–देहस्य–इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सदा धर्मे रतिर्भूयाद्याहि स्वं कुरु वांछितम् ॥ २२ ॥ एवमुक्तः प्रणम्यैतानाशीर्भिरभिसंस्तुतः ॥ जगाम तानि तीर्थानि द्रष्टुं भरतसत्तमः ॥ ॥ २३ ॥ ततः सौभद्रमासाद्य महर्षेस्तीर्थमुत्तमम् ॥ विगाह्य तरसा वीरः स्नानं चक्रे परंतपः ॥ २४ ॥ अथ तं पुरुषव्याघ्रमंतर्जलचरो महान् ॥ निजग्राह जले ग्राहः कुंतीपुत्रं धनंजयम् ॥ २५ ॥ तमादायैव कौंतेयो विस्फुरंतं जलेचरम् ॥ उदतिष्ठन्महाबाहुर्बलेन बलिनां वरः ॥ २६ ॥ उद्धृतश्चैव तु ग्राहः सोऽर्जुनेन यशस्विना ॥ बभूव नारी कल्याणी सर्वाभरणभूषिता ॥ २७ ॥ दीप्यमानशिखा विप्रा दिव्यरूपा मनोरमा ॥ तदद्भुतं महद्दृष्ट्वा कुंतीपुत्रो धनंजयः ॥ २८ ॥ तां स्त्रियं परमप्रीतं इदं वचनमब्रवीत् ॥ का वै त्वमसि कल्याणि कुतो वा जलचारिणी ॥ २९ ॥ किमर्थं च महत्पापमिदं कृतवती ह्यसि ॥ ॥ नार्युवाच ॥ ॥ अप्सरा ह्यस्मि कौंतेय देवारण्यनिवासिनी ॥ ३० ॥ इष्टा धनपतेर्नित्यं वर्चानाम महाबल ॥ मम सख्यश्चतस्रोऽन्याः सर्वाः कामगमाः शुभाः ॥ ३१ ॥ ताभिः सार्धं प्रयातास्मि देवराजनिवेशनात् ॥ ततः पश्यामहे सर्वा ब्राह्मणं चानिकेतनम् ॥ ३२ ॥ रूपवंतमधीयानमेकमेकांतचारिणम् ॥ तस्य वै तपसा वीर तद्वनं तेजसावृतम् ॥ ३३ ॥ आदित्य इव तं देशं कृत्स्नमेवान्वभासयत् ॥ तस्य दृष्ट्वा तपस्तादृग्रूपं चाद्भुतदर्शनम् ॥ ३४ ॥ अवतीर्णास्मि तं देशं तपोविघ्नचिकीर्षया ॥ अहं च सौरभेयी च सामेयी बुद्बुदा लता ॥ ३५ ॥ यौगपद्येन[3] तं विप्रमभ्यगच्छाम भारत ॥ गायंत्यो ललमानाश्च लोभयंत्यश्च तं द्विजम् ॥ ३६ ॥ स च नास्मासु कृतवान्मनो वीरः कथंचन ॥ नाकंपत महातेजाः स्थितस्तपसि निर्मले ॥ ३७ ॥ सोऽशपत्कुपितोऽस्मासु ब्राह्मणः क्षत्रियर्षभ ॥ ग्राहभूता जले यूयं भविष्यथ शतं समाः ॥ ३८ ॥ ततो वयं प्रव्यथिताः सर्वा भरतसत्तम ॥ आयाताः शरणं विप्रं तपोधनमकल्मषम् ॥ ३९ ॥ रूपेण वयसा चैव कंदर्पेण च दर्पिताः ॥ अयुक्तं कृतवत्यः स्म क्षंतुमर्हसि नो द्विज ॥ ४० ॥ एष एव वधोऽस्माकं स पर्याप्तस्तपोधन ॥ यद्वयं शंसितात्मानं प्रलोब्धुं त्वामुपागताः ॥ ४१ ॥ अवध्याश्च स्त्रियः सृष्टा मन्यंते धर्मचिंतकाः ॥ तस्माद्धर्मेण धर्मज्ञ एष वादो मनीषिणाम् ॥ ४२ ॥ शरणं च प्रपन्नानां शिष्टाः कुर्वंति पालनम् ॥ शरण्यं त्वां प्रपन्नाः स्मस्तस्मात्त्वं क्षंतुमर्हसि ॥ ४३ ॥ एवमुक्तस्तु धर्मात्मा ब्राह्मणः शुभकर्मकृत् ॥ प्रसादं कृतवान्छूररविसोमसमप्रभः ॥४४॥ ॥ब्राह्मण उवाच ॥ ॥ भवतीनां चरित्रेण परिशुद्ध्यामि चेतसि ॥ अहो धार्ष्ट्यमहो मोहो यत्पापाय प्रवर्तनम् ॥ ४५ ॥ मस्तकस्थायिनं मृत्युं यदि पश्येदयं जनः ॥ आहारोऽपि न रोचेत किमुताकार्यकारिता ॥४६॥ आहो मानुष्यकं जन्म सर्वजन्मसु दुर्लभम् ॥ तृणवत्क्रियते

१ तथा सौभद्रमासाद्य—इ०पा० । २ परमप्रीतामिदम्—इ० पा० । ३ योगमभ्येत्य—इ०पा० । ४ धैर्यम्—इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कैश्चिद्योषिन्मूढैर्दुराधरैः ॥ ४७ ॥ तान्वयं समपृच्छामो जनिर्वः किंनिमित्ततः ॥ को वा लाभो विचार्यैतन्मनसा सह प्रोच्यताम् ॥४८॥ न चैताः परिनिन्दामो जनिर्याभ्यः प्रवर्तते ॥ केवलं तान्विनिंदामो ये च तासु निरर्गलाः[1] ॥४९॥ यतः पद्मभुवा सृष्टं मिथुनं विश्ववृद्धये ॥ तत्तथा परिपाल्यं वै नात्र दोषोऽस्ति कश्चन ॥ ५० ॥ या बांधवैः प्रदत्ता स्याद्वह्निद्विजसमागमे ॥ गार्हस्थ्यपालनं धन्यं तया साकं हि सर्वदम् ॥ ५१ ॥ यथाप्रकृति पुंयोगो यत्नेनापि परस्परम् ॥ साध्यमानो गुणाय स्यादगुणायाप्यसाधितः ॥ ५२ ॥ एवं यत्नात्साध्यमानं स्वकं गार्हस्थ्यमुत्तमम् ॥ गुणाय महते भूयादगुणायाप्यसाधितम् ॥ ५३ ॥ पुरे पंचमुखे द्वाःस्थ एकादशभटैर्युतः ॥ साकं नार्या बह्वपत्यः स कथं स्यादचेतनः ॥ ५४ ॥ यश्च स्त्रिया समायोगः पंचयज्ञादिकर्मभिः ॥ विश्वोपकृतये सृष्टा मूढैर्हा साध्यतेऽन्यथा ॥ ५५ ॥ अहो शृणुध्वं नो चेद्वः शुश्रूषा जायते शुभा ॥ तथापि बाहुमुद्धृत्य रोरूयामः शृणोति कः ॥ ५६ ॥ षड्धातुसारं तद्वीर्यं समानं परिहाय च ॥ विनिक्षेपे कुयोनौ तु तस्येदं प्रोक्तवान्यमः ॥ ५७ ॥ प्रथमं चौषधीद्रोग्धा आत्मद्रोग्धा ततः पुनः ॥ पितृद्रोग्धा विश्वद्रोग्धा यात्यंधं शाश्वतीः समाः ॥ ५८ ॥ मनुष्यं पितरो देवा मुनयो मानवास्तथा ॥ भूतानि चोपजीवंति तदर्थं नियतो भवेत् ॥ ५९ ॥ वचसा मनसा चैव जिह्वया करश्रोत्रकैः ॥ दांतमाहुर्हि सत्तीर्थं काकतीर्थमतः परम् ॥ ॥ ६० ॥ काकप्राये नरे यस्मिन्नमंते तामसा जनाः ॥ हंसोऽयमिति देवानां कोऽर्थस्तेन विचिंत्यताम् ॥६१॥ एवंविधं हि विश्वस्य निर्माणं स्मरतो हृदि ॥ अपि कृते त्रिलोक्याश्च कथं पापे रमेन्मनः ॥ ६२ ॥ तदिदं चान्यमर्त्यानां शास्त्रदृष्टमहो[2] स्त्रियः ॥ यमलोके मया दृष्टं मुह्ये प्रत्यक्षतः कथम् ॥ ६३ ॥ भवतीषु च कः कोपो ये यदर्थे हि निर्मिताः ॥ ते तमर्थं प्रकुर्वंति सत्यमस्तुभमेव[3] च ॥ ६४ ॥ शतं सहस्रं विश्वं च सर्वमक्षयवाचकम् ॥ परिमाणं शतं त्वेव नैतदक्षय्यवाचकम् ॥ ६५ ॥ यदा च वो ग्राहभूता गृह्णतीः पुरुषाञ्जले ॥ उत्कर्षति जलात्कश्चित्स्थले पुरुषसत्तमः ॥ ६६ ॥ तदा यूयं पुनः सर्वाः स्वं रूपं प्रतिपत्स्यथ ॥ अनृतं नोक्तपूर्वं मे हसतापि कदाचन ॥ कल्याणस्य सुपृक्तस्य शुद्धिस्तद्वद्धरा हि वः ॥ ॥ ६७ ॥ ॥ नार्युवाच ॥ ॥ ततोभिवाद्य तं विप्रं कृत्वा चैव प्रदक्षिणम् ॥ ६८ ॥ अचिंतयामापसृत्य तस्माद्देशात्सुदुःखिताः ॥ क्व नु नाम वयं सर्वाः कालेनाल्पेन तं नरम् ॥ ६९ ॥ समागच्छेम यो नः स्वं रूपमापादयेत्पुनः ॥ ता वयं चिंतयित्वेह मुहूर्तादिव भारत ॥ ७० ॥ दृष्टवत्यो महाभागं देवर्षिमथ नारदम् ॥ सर्वा हृष्टाः स्म तं दृष्ट्वा देवर्षिममितद्युतिम् ॥ ७१ ॥ अभिवाद्य च तं पार्थ स्थिताः स्मो व्यथिता

१ निरर्थतः—इ० पा० । २ शास्त्रदृष्टं च भोः स्त्रियः—इ० पा० । ३ अस्तुभम्—असत्यमित्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ननाः ॥ स नोऽपृच्छद्दुःखमूलमुक्तवत्यो वयं च तम् ॥ ७२ ॥ श्रुत्वा तच्च यथातत्त्वमिदं वचनमब्रवीत् ॥ दक्षिणे सागरेऽनूपे पंच तीर्थानि संति
वै ॥ ७३ ॥ पुण्यानि रमणीयानि तानि गच्छत मा चिरम् ॥ तत्रस्थाः पुरुषव्याघ्रः पांडवो वो धनंजयः ॥ ७४ ॥ मोक्षयिष्यति शुद्धात्मा दुःखा
दस्मान्न संशयः ॥ तस्य सर्वा वयं वीर श्रुत्वा वाक्यमिहागताः ॥ ७५ ॥ त्वमिदं सत्यवचनं कर्तुमर्हसि पांडव ॥ त्वद्विधानां हि साधूनां
जन्म दीनोपकारकम् ॥ ७६ ॥ श्रुत्वेति वचनं तस्याः सस्नौ तीर्थेष्वनुक्रमात् ॥ ग्राहभूताश्चोज्जहार यथापूर्वाः स पांडवः ॥ ७७ ॥
ततः प्रणम्य ता वीरं प्रोच्यमाना जयाशिषः ॥ गंतुं कृताभिलाषाश्च प्राह पार्थो धनंजयः ॥ ७८ ॥ एष मे हृदि संदेहः सुदृढः परिवर्तते ॥ कस्माद्वो
नारदमुनिरनुजज्ञे प्रवासितुम् ॥ ७९ ॥ सर्वः कोऽप्यतिहीनोऽपि स्वपूज्यस्यार्थसाधकः ॥ स्वपूज्यतीर्थेष्वावासं प्रोक्तवान्नारदः कथम् ॥ ८० ॥
तथैव नवदुर्गासु सतीष्वतिबलासु च ॥ सिद्धेशे सिद्धगणपे चापि वोऽत्र स्थितिः कथम् ॥ ८१ ॥ एकैक एषां शक्तो हि अपि देवान्निवारितुम् ॥
तीर्थसंरोधकारिण्यः सर्वा नावारयत्कथम् ॥ ८२ ॥ इति चिंतयते मह्यं भृशं दोलायते मनः ॥ महन्मे कौतुकं जातं सत्यं वा वक्तुमर्हथ ॥ ८३ ॥
॥ ॥ अप्सरस ऊचुः ॥ ॥ योग्यं पृच्छसि कौन्तेय पुनः पश्योत्तरां दिशम् ॥ ८४ ॥ एष स्वविप्रैरभिसंवृतोऽर्च्यो मुनिः समायाति तथेति नारदः ॥
सर्वं हि पृष्टं तव वै स वक्ता प्रोच्यैवमाकाशतलं गतास्ताः ॥ ८५ ॥ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां प्रथमे माहेश्वर
खण्डे कौमारिकाखंडे पार्थेन पञ्चाप्सरःसमुद्धरणंनाम प्रथमोऽध्यायः ॥ १ ॥छ॥ ॥ सूत उवाच ॥ ॥ ततो द्विजैः परिवृतं नारदं देवपूजितम् ॥
अभिगम्योपजग्राह सर्वानथ स पाण्डवः ॥ १ ॥ ततस्तं नारदः प्राह जयारातिधनंजय ॥ धर्मे भवंति ते बुद्धिर्देवेषु ब्राह्मणेषु च ॥ २ ॥ कच्चिदेतां
महायात्रां वीर द्वादशवार्षिकीम् ॥ आचरन्खिद्यसे नैवमथ वा कुप्यसे न च ॥३॥ मुनीनामपि चेतांसि तीर्थयात्रासु पांडव ॥ खिद्यंति परिकुप्यंति
श्रेयसां विघ्नमूलतः ॥ ४ ॥ कच्चिन्नैतेन दोषेण समाश्लिष्टोऽसि पांडव ॥ अत्र चांगिरसा गीतां गाथामेतां हि शुश्रुम ॥ ५ ॥ यस्य हस्तौ च
पादौ च मनश्चैव सुसंयतम् ॥ निर्विकाराः क्रियाः सर्वाः स तीर्थफलमश्नुते ॥ ६ ॥ तदिदं हृदि धार्यं ते किं वा त्वं तात मन्यसे ॥ भ्राता
युधिष्ठिरो यस्य सखा यस्य स केशवः ॥ ७ ॥ पुनरेतत्समुचितं यद्विप्रैः शिक्षणं नृणाम् ॥ वयं हि धर्मगुरवः स्थापितास्तेन विष्णुना ॥ ८ ॥ विष्णु
ना चात्र शृणुमो गीतां गाथां द्विजान्प्रति ॥ ९ ॥ यस्यामलामृतयशःश्रवणावगाहः सद्यः पुनाति जगदा श्वपचाद्विकुंठः ॥ सोहं भवद्भिरुपलब्ध

१ श्रुत्वा तद्यत्तथा तत्त्वम्—इ० पा० । २ संकल्पः—इ०पा० । ३ यथापूर्वं स पाण्डवः—इ०' सर्वा नार्यः पृथक्पृथक्—इ० च पा० । ४ भवतु—इ० पा० । ५ सक्षणम्—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सुतीर्थकीर्तिश्छिद्यां स्वबाहुमपि यः प्रतिकूलवर्ती ॥ १० ॥ प्रियं च पार्थ ते ब्रूमो येषां कुशलकामुकः ॥ सर्वे कुशलिनस्ते च यादवाः पांडवास्तथा
॥ ११ ॥ अधुना भीमसेनेन कुरूणामुपतापकः ॥ शासनाद्धृतराष्ट्रस्य वीरवर्मा नृपो हतः ॥ १२ ॥ स हि राज्ञामजेयोऽभूद्यथापूर्वं बलिर्बली ॥
कंटकं कंटकेनेव धृतराष्ट्रो जिगाय तम् ॥ १३ ॥ इत्यादिनारदप्रोक्तां वाचमाकर्ण्य फाल्गुनः ॥ अतीव मुदितः प्राह तेषामकुशलं कुतः ॥ १४ ॥
ये ब्राह्मणमते नित्यं ये च ब्राह्मणपूजकाः ॥ अहं च शक्त्या नियतस्तीर्थानि विचरन्ननु ॥ १५ ॥ आगतस्तीर्थमेतद्धि प्रमोदोऽतीव मे हृदि ॥
तीर्थानां दर्शनं धन्यमवगाहस्ततोऽधिकः ॥ १६ ॥ माहात्म्यश्रवणं तस्माद्दौर्वोऽपि मुनिरब्रवीत् ॥ तदहं श्रोतुमिच्छामि तीर्थस्यास्य गुणान्मुने
॥ १७ ॥ एतेनैव श्राव्यमेतद्यत्त्वयांगीकृतं मुने ॥ त्वं हि त्रिलोकीं विचरन्वेत्सि सर्वां हि सारताम् ॥ १८ ॥ तदेतत्सर्वतीर्थेभ्योऽधिकं मन्ये त्वदा
हृतम् ॥ १९ ॥ ॥ नारद उवाच ॥ ॥ उचितं तव पार्थैतद्यत्पृच्छसि गुणिन्गुणान् ॥ गुणिनामेव युज्यन्ते श्रोतुं धर्मोद्भवा गुणाः ॥ साधूनां
धर्मश्रवणैः कीर्तनैर्याति चान्वहम् ॥ २० ॥ पापानामसदालापैरायुर्याति यथान्वहम् ॥ तदहं कीर्तयिष्यामि तीर्थस्यास्य गुणान्बहून् ॥ २१ ॥ यथा
श्रुत्वा विजानासि युक्तमंगीकृतं मया ॥ पुराहं विचरन्पार्थ त्रिलोकीं कपिलानुगः ॥ २२ ॥ गतवान्ब्रह्मणो लोकं तत्रापश्यं पितामहम् ॥ स हि
राजर्षिदेवर्षिमूर्तामूर्तैः सुसंवृतः ॥ २३ ॥ विभाति विमलो ब्रह्मा नक्षत्रैरुडुराडिव ॥ तमहं प्रणिपत्याथ चक्षुषा कृतस्वागतः ॥ २४ ॥ उपविष्टः
प्रमुदितः कपिलेन सहैव च ॥ एतस्मिन्नंतरे तत्र वार्तिकाः समुपागताः ॥ २५ ॥ प्रहीयंते हि ते नित्यं जगद्द्रष्टुं हि ब्रह्मणा ॥ कृतप्रणामानथ तान्स
मासीनान्पितामहः ॥ २६ ॥ चक्षुषामृतकल्पेन प्लावयन्निव चाब्रवीत् ॥ कुत्र कुत्र विचीर्णं वो दृष्टं श्रुतमथापि वा ॥ २७ ॥ किंचिदेवाद्भुतं ब्रूत
श्रवणाद्येन पुण्यता ॥ एवमुक्ते भगवता तेषां यः प्रवरो मतः ॥ २८ ॥ सुश्रवानाम ब्रह्माणं प्रणिपत्येदमूचिवान् ॥ प्रभोरग्रे च विज्ञप्तिर्यथा दीपो रवे
स्तथा ॥ २९ ॥ तथापि खलु वाच्यं मे परार्थं प्रेरितेन ते ॥ मुनिः कात्यायनोनाम श्रुत्वा धर्मान्पुनर्बहून् ॥ ३० ॥ सारजिज्ञासया तस्थावेकांगुष्ठः
शतं समाः ॥ ततः प्रोवाच तं दिव्या वाणी कात्यायन शृणु ॥ ३१ ॥ पुण्ये सरस्वतीतीरे पृच्छ सारस्वतं मुनिम् ॥ स ते सारं धर्मसाध्यं धर्मज्ञोऽ
भिवदिष्यति ॥ ३२ ॥ इति श्रुत्वा मुनिवरो मुनिश्रेष्ठमुपेत्य तम् ॥ प्रणम्य शिरसा भूमौ पप्रच्छेदं हृदि स्थितम् ॥ ३३ ॥ सत्यं केचित्प्रशंसंति
तपः शौचं तथा परे ॥ सांख्यं केचित्प्रशंसंति योगमन्ये प्रचक्षते ॥ ३४ ॥ क्षमां केचित्प्रशंसंति तथैव भृशमार्ज्जवम् ॥ केचिन्मौनं प्रशंसंति केचि

१ किं तु कुशलमेव स्यात् । ततः--इ० पा० । २ देवोपि मुनिरब्रवीत्--इ० पा० । ३ ह्लादयन्निव--इ० पा० । ४ इदमुक्ते--इ० पा० । ५ चेदमवाच्यं मे--इ० पा० । ६ ऽपि वदिष्यति--इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दाहुः परं श्रुतम् ॥ ३५ ॥ सम्यग्ज्ञानं प्रशंसंति केचिद्वैराग्यमुत्तमम् ॥ अग्निष्टोमादिकर्माणि तथा केचित्परं विदुः ॥ ३६ ॥ आत्मज्ञानं परं केचि त्सम[1]लोष्टाश्मकांचनम् ॥ इत्थं व्यवस्थिते लोके कृत्याकृत्यविधौ जनाः ॥ ३७ ॥ व्यामोहमेव गच्छंति किं श्रेय इति वादिनः ॥ यदेतेषु परं कृत्यम नुष्ठेयं[2] महात्मभिः ॥ ३८ ॥ वक्तुमर्हसि धर्मज्ञ मम सर्वार्थसाधकम् ॥ ३९ ॥ ॥ सारस्वत उवाच ॥ ॥ यन्मां सरस्वती प्राह सारं वक्ष्यामि तच्छृणु ॥ छायाकारं जगत्सर्वमुत्पत्तिक्षयधर्मि[3] च ॥ वारांगनानेत्रभंगवद्भंगुरमेव तत् ॥ ४० ॥ धनायुर्यौवनं भोगाञ्जलचंद्रवदस्थिरान् ॥ बुद्ध्या सम्यक्परामृश्य स्थाणुदानं समाश्रयेत् ॥ ४१ ॥ दानवान्पुरुषः पापं नालं कर्तुमिति श्रुतिः ॥ स्थाणुभक्तो जन्ममृत्यू नाप्नोतीति श्रुति स्तथा ॥ ४२ ॥ सावर्णिना च गाथे द्वे कीर्तिते शृणु ये पुरा ॥ वृषो हि भगवान्धर्मो वृषभो यस्य वाहनम् ॥ ४३ ॥ पूज्यते स महादेवः स[4] धर्मः पर उच्यते ॥ दुःखावर्ते तमोघोरे[5] धर्माधर्मजले तथा ॥ ४४ ॥ क्रोधपंके मदग्राहे[6] लोभबुद्बुदसंकटे ॥ मानगंभीरपाताले सत्त्वयानविभूषिते[7] ॥ ४५ ॥ मज्जंतं तारयत्येको हरः संसारसागरात् ॥ दानं वृत्तं व्रतं वाचः[8] कीर्तिधर्मौ तथायुषः[9] ॥ ४६ ॥ परोपकरणं कायादसारात्सारमुद्धरेत् ॥ धर्मे रागः श्रुतौ चिंता दाने व्यसनमुत्तमम् ॥ ४७ ॥ इंद्रियार्थेषु वैराग्यं संप्राप्तं जन्मनः फलम् ॥ देशेऽस्मिन्भारते जन्म प्राप्य मानुष्यमध्रुवम् ॥ ४८ ॥ न कुर्यादात्मनः श्रेयस्तेनात्मा वंचितश्चिरम् ॥ देवासुराणां सर्वेषां मानुष्यमतिदुर्लभम् ॥ ४९ ॥ तत्संप्राप्य तथा कुर्यान्न गच्छेन्नरकं यथा ॥ सर्वस्य मूलं मानुष्यं तथा सर्वार्थसाधकम् ॥ ५० ॥ यदि लाभे न यत्नस्ते मूलं रक्ष प्रयत्नतः ॥ महता पुण्यमूल्येन[10] क्रीयते कायनौस्त्वया ॥ ५१ ॥ गंतुं दुःखोदधेः पारं तर यावन्न भिद्यते ॥ अविकारिशरीरत्वं दुष्प्राप्यं प्राप्य वै ततः ॥ ५२ ॥ नापक्रामति संसारादात्महा स नराधमः ॥ तपस्तप्यन्ति यतयो जुह्वते चात्र यज्विनः ॥ दानानि चात्र दीयंते परलोकार्थमादरात् ॥ ५३ ॥ ॥ कात्यायन उवाच ॥ ॥ दानस्य तपसो वापि भगवन्किं च दुष्करम् ॥ किं वा महत्फलं प्रेत्य सारस्वत ब्रवीहि तत् ॥ ५४ ॥ ॥ सारस्वत उवाच ॥ ॥ न दानाद्दुष्करतरं पृथिव्यामस्ति किंचन ॥ मुने प्रत्यक्षमेवैतद्दृश्यते लोकसाक्षिकम्[11] ॥ ५५ ॥ परित्यज्य प्रियान्प्राणान्धनार्थे हि महाभयम् ॥ प्रविशंति

१ समलोष्टाश्मकांचनाः—इ० पा० । अत्र च—समलोष्टाश्मकांचनमिति ह्यात्मज्ञानस्य विशेषणं बोध्यम् । आत्मवस्तुनः सर्वस्वरूपत्वेन निर्विशेषत्वात्—लोष्टाश्मकांचनानां परमार्थतश्चिदेकरूपत्वादात्मज्ञाने लोष्टाश्मकांचनानां चिदविशेषेण समत्वात्—समानि लोष्टाश्मकांचनानि यस्मिन्नेतादृशमात्मज्ञानं केचित्प्रशंसंतीत्यर्थः । २ अनुश्रेयम्—इ० पा० । ३ उत्पन्नक्षयकर्मि च—इ० पा० । ४ सर्वधर्मः स उच्यते—इ० पा० । ५ तमोद्वारे—इ० पा० । ६ गदग्राहे—इ० पा० । ७ सत्त्वपानाविभूषिते—इ० पा० । ८ सुमंगलानि सत्यप्रियाणि या वदेयुरेतादृशीर्वाचः इत्यर्थः । ९ आयुषः—आयुर्वर्धकानौषधाद्युपचारान्योगादिविहितायुर्वर्धकोपायांश्च इत्यर्थः । १० महता पुण्यपण्येन क्रीतेयं कायनौस्त्वया—इत्यन्यत्र पा० । ११ लोकलक्षितम्—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

महालोभात्समुद्रमटवीं गिरिम् ॥ ५६ ॥ सेवामन्ये प्रपद्यंते श्ववृत्तिरिति या स्मृता ॥ हिंसाप्रायां बहुक्लेशां कृषिं चैव तथा परे ॥ ५७ ॥ तस्य दुःखार्जितस्येह प्राणेभ्योपि गरीयसः ॥ आयासशतलब्धस्य परित्यागः सुदुष्करः ॥ ५८ ॥ यद्ददाति यदश्नाति तदेव धनिनो धनम् ॥ अन्ये मृतस्य क्रीडंति दारैरपि धनैरपि ॥ ५९ ॥ अहन्यहनि याचंतमहं मन्ये गुरुं यथा ॥ मार्जनं द[1]र्पणस्येव यः करोति दिनेदिने ॥ ६० ॥ दीयमानं हि नापैति भूय एवाभिवर्धते ॥ कूप उ[2]त्सिच्यमानो हि भवेच्छुद्धो बहूदकः ॥ ६१ ॥ एकजन्मसुखस्यार्थे सह[3]स्राणि विलापयेत् ॥ प्राज्ञो जन्मसह[3]स्रेषु संचिनोत्येकजन्मनि ॥ ६२ ॥ मूर्खो हि न ददात्यर्थानिह दारिद्र्यशंकया ॥ प्राज्ञस्तु विसृजत्यर्थान[4]मुत्र तस्य शंकया ॥ ६३ ॥ किं धनेन करिष्यंति देहिनो भंगुराश्रयाः ॥ यदर्थं[5] धनमिच्छंति तच्छरीरमशाश्वतम् ॥ ६४ ॥ अक्षरद्वयमभ्यस्तं नास्तिनास्तीति यत्पुरा ॥ तदिदं देहिदेहीति विपरीतमुपस्थितम् ॥ ६५ ॥ बोधयंति च यावंतो देहीति कृपणं जनाः ॥ अवस्थेयमदानस्य मा भूदेवं भवानपि ॥ ६६ ॥ दातुरेवोपकाराय वदत्यर्थीति देहि मे ॥ यस्माद्दाता प्रयात्यूर्ध्वमधस्तिष्ठेत्प्रतिग्रही ॥ ६७ ॥ दरिद्रा व्याधिता मूर्खाः परप्रेष्यकराः सदा ॥ अदत्तदानाज्जायंते दुःखस्यैव हि भाजनाः ॥ ६८ ॥ धनवंतमदातारं दरिद्रं वाऽतपस्विनम् ॥ उभावंभसि मोक्तव्यौ कंठे[6] बद्ध्वा महाशिलाम् ॥ ६९ ॥ शतेषु जायते शूरः सहस्रेषु च पंडितः ॥ वक्ता शतसहस्रेषु दाता जायते[7] वा न वा ॥ ७० ॥ गोभिर्विप्रैश्च वेदैश्च सतीभिः सत्यवादिभिः ॥ अलुब्धैर्दानशीलैश्च सप्तभिर्धार्यते मही ॥ ७१ ॥ शिबिरौशीनरोऽङ्गानि सुतं च प्रियमौरसम् ॥ ब्राह्मणार्थ[8]मुपाकृत्य नाकपृष्ठमितो गतः ॥ ७२ ॥ प्रतर्दनः काशिपतिः प्रदाय नयने स्वके ॥ ब्राह्मणायातुलां कीर्तिमिह चामुत्र चाश्नुते ॥ ७३ ॥ निमी राष्ट्रं च वैदेहो जामदग्न्यो वसुंधराम् ॥ ब्राह्मणेभ्यो ददौ चापि गयश्चोर्वीं सपत्तनाम् ॥ ७४ ॥ अवर्षति च पर्जन्ये सर्वभूतनिवासकृत् ॥ वसिष्ठो जीवयामास प्रजापतिरिव प्रजाः ॥ ७५ ॥ ब्रह्मदत्तश्च पांचाल्यो राजा बुद्धिमतां वरः ॥ निधिं शंखं द्विजाग्र्येभ्यो दत्त्वा स्वर्गमवाप्तवान् ॥ ७६ ॥ सहस्रजिच्च राजर्षिः प्राणानिष्टान्महायशाः ॥ ब्राह्मणार्थे परित्यज्य गतो लोकाननुत्तमान् ॥ ७७ ॥ एते चान्ये च बहवः स्थाणो[9]र्दानेन भक्तितः ॥ रुद्रलोकं गता नित्यं शान्तात्मानो जिते

१ दक्षिणस्येव–इ०पा० । २ उल्लंघ्यमानोऽपि–इ०पा० । ३ जन्मसहस्राणि–इत्यर्थः । ३ जन्मसहस्रेषु–इति मूलस्थपाठे जन्मसहस्रेषु प्राप्तव्यं सुखरूपं फलं प्राज्ञो दानप्रभावादेकस्मिन्नेव जन्मनि संचिनोति–इत्यर्थः । ४ प्राज्ञस्तु–इह चेद्दानं न दत्तं स्यात्तर्हि जन्मान्तरेऽदत्तदोषेण दारिद्र्यमायास्यतीति शङ्कयाऽर्थान् धनानि विसृजति ददातीत्यर्थः । ५ इति–इ०पा० । ६ गले–इ०पा० । ७ भवति–इ०पा० । ८ ब्राह्मण्यर्थम्–इ० पा० । ९ दर्णाः–इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

न्द्रियाः ॥ ७८ ॥ एषां प्रतिष्ठिता कीर्तिर्यावत्स्थास्यति मेदिनी ॥ इति संचिंत्य सारार्थी स्थाणुदानपरो भव ॥ ७९ ॥ सोऽपि मोहं परित्यज्य तथा कात्यायनोऽभवत् ॥ ८० ॥ ॥ नारद उवाच ॥ ॥ एवं सुश्रवसा प्रोक्तां कथामाकर्ण्य पद्मभूः ॥ हर्षाश्रुसंयुतोऽतीव प्रशशंस मुहुर्मुहुः ॥ ८१ ॥ साधु ते व्याहृतं वत्स एवमेतन्न चान्यथा ॥ सत्यं सारस्वतः प्राह सत्या चैवं तथा श्रुतिः ॥ ८२ ॥ दानं यज्ञानां वरूथं दक्षिणा लोके दातारँसर्वभूतान्युपजीवंति दानेनारातीरँपानुदंत दानेन द्विषंतो मित्रा भवंति दाने सर्वं प्रतिष्ठितं तस्माद्दानं परमं वदंतीति ॥ ८३ ॥ संसारसागरे घोरे धर्माधर्मोर्मिसंकुले ॥ दानं तत्र निषेवेत तच्च नौरिव निर्मितम् ॥ ८४ ॥ इति संचिंत्य चैं मया पुष्करे स्थापिता द्विजाः ॥ गङ्गायमुनयोर्मध्ये मध्यदेशे द्विजाः कृते ॥ ८५ ॥ स्थापिताः श्रीहरिभ्यां तु श्रीगौर्या वेदवित्तमाः ॥ रुद्रेण नागराश्चैव पार्वत्या शक्तिपूर्भवाः ॥ ८६ ॥ श्रीमाले च तथा लक्ष्म्या ह्येवमादिसुरोत्तमैः ॥ नानाग्रहाराः संदत्ता लोकोद्धरणकांक्षया ॥ ८७ ॥ न हि दानफले कांक्षा काचिन्नोऽस्ति सुरोत्तमाः ॥ साधुसंरक्षणार्थं हि दानं नः परिकीर्तितम् ॥८८॥ ब्राह्मणाश्च कृतस्थाना नानाधर्मोपदेशनैः ॥ समुद्धरंति वर्णांस्त्रींस्ततः पूज्यतमा द्विजाः ॥ ८९ ॥ दानं चतुर्विधं दानमुत्सर्गः कल्पितं तथा ॥ संश्रुतं चेति विविधं तत्क्रमात्परिकीर्तितम् ॥ ९० ॥ वापीकूपतडागानां वृक्षविद्यासुरौकसाम् ॥ मठ प्रपागृहक्षेत्रदानमुत्सर्ग इत्यसौ ॥ ९१ ॥ उपजीवन्निमान्यश्च पुण्यं कोऽपि चरेन्नरः ॥ षष्ठमंशं स लभते यावद्यो विसृजेद्द्विजः ॥ ९२ ॥ तदेषा मेव सर्वेषां विप्रसंस्थापनं परम् ॥ देवसंस्थापनं चैव धर्मस्तन्मूल एव यत् ॥ ९३ ॥ देवतायतनं यावद्यावच्च ब्राह्मणगृहम् ॥ तावद्दातुः पूर्वजानां पुण्यांशश्चोपतिष्ठति ॥ ९४ ॥ एतत्स्वल्पं हि वाणिज्यं पुनर्बहुफलप्रदम् ॥ जीर्णोद्धारे च द्विगुणमेतदेव प्रकीर्तितम् ॥ ९५ ॥ तस्मादिदं त्वहमपि ब्रवीमि सुरसत्तमाः ॥ नास्ति दानसमं किंचित्सत्यं सारस्वतो जगौ ॥ ९६ ॥ ॥ नारद उवाच ॥ ॥ इति सारस्वतप्रोक्तां तथा पद्मभुवेरिताम् ॥ साधुसाध्वित्यमोदंत सुराश्चाहं सुविस्मिताः ॥ ९७ ॥ ततः सभाविसर्गांते सुरम्ये मेरुमूर्धनि ॥ उपविश्य शिलापृष्ठे अहमेतदचिंतयम् ॥ ९८ ॥ सत्यमाह विरंचिस्तु स किमर्थं तु जीवति ॥ येनैकमपि तद्वृत्तं नैव येन कृतार्थता ॥ ९९ ॥ तदहं दानपुण्यं हि करिष्यामि कथं स्फुटम् ॥ कौपी नदण्डात्मधनो धनं स्वल्पं हि नास्ति मे ॥ १०० ॥ अनर्हते यद्ददाति न ददाति तथार्हते ॥ अर्हानर्हपरिज्ञानाद्दानधर्मो हि दुष्करः ॥१०१॥ देशे

१ प्राह चेदं तथा श्रुतिः—इ० पा० । २ निर्मलम्—इ० पा० । ३ मनसा—इ० पा० । ४ "नानाग्रहारा"—इत्ययं श्लोकः—"साधुसंशिक्षणार्थं हि"—इत्यस्मादर्धादग्रे—द्वयोः पुस्तकयोर्मध्ये दृश्यते—अत्रैतास्मिञ्छ्लोके सत्यप्य र्थसांगत्याद त्रैवायं श्लोकः पुस्तकांतरे दृष्टोऽतोऽत्रैव स्थापितः । ५ आर्षत्वाल्लघुत्वेऽपि न दोष इत्यवधेयं शुद्धपाठात् । ६ यद्वृत्तम्—इ०, यद्दतम्—इ० च पा० ।

काले च पात्रे च शुद्धेन मनसा तथा ॥ न्यायार्जितं च यो दद्याद्यौवने स तदश्नुते ॥१०२॥ तमोवृतस्तु यो दद्याद्भयात्क्रोधात्तथैव च ॥ भुंक्ते दान फलं तद्धि गर्भस्थो नात्र संशयः ॥ ३ ॥ बालत्वेऽपि च सोऽश्नाति यद्दत्तं दम्भकारणात् ॥ दत्तमन्यायतो वित्तं तथा वै चार्थकारणम्[1] ॥ ४ ॥ वृद्धत्वे हि समश्नाति नरो वै नात्र संशयः ॥ तस्माद्देशे च काले च सुपात्रे विधिना नरः ॥ शुभार्जितं प्रयुञ्जीत श्रद्धया[2] शाठ्यवर्जितः ॥ ५ ॥ तदेतन्निर्धनत्वाच्च कथं नाम भविष्यति ॥ सत्यमाहुः पुरा वाक्यं पुराणमुनयोऽमलाः[3] ॥ ६ ॥ नाधनस्यास्त्ययं लोको न परश्च कथंचन ॥ अभि[4]शस्तं प्रपश्यंति दरिद्रं पार्श्वतः स्थितम् ॥ ७ ॥ दारिद्र्यं पातकं लोके कस्तच्छंसितुमर्हति ॥ पतितः शोच्यते सर्वैर्निर्धनश्चापि शोच्यते ॥ ८ ॥ यः कृशाश्वः कृशधनः कृशभृत्यः कृशातिथिः ॥ स वै प्रोक्तः कृशोनाम न शरीरकृशः कृशः ॥ ९ ॥ अर्थवान्दुष्कुलीनोऽपि लोके पूज्यतमो नरः ॥ शशिनस्तुल्यवंशोऽपि निर्धनः परिभूयते ॥११०॥ ज्ञानवृद्धास्तपोवृद्धा ये च वृद्धा बहुश्रुताः ॥ ते सर्वे धनवृद्धस्य द्वारि तिष्ठन्ति किंकराः ॥११॥ यद्यप्ययं त्रिभुवने अर्थोऽस्माकं पराग्रहि ॥ तथाप्यन्यप्रार्थितो हि तस्यैव फलदो भवेत् ॥१२॥ अथवैतत्[5]पुरा सर्वं चिंतयिष्यामि सुस्फुटम् ॥ विलोकयामि पूर्वं तु किंचिद्योग्यं हि स्थानकम् ॥ १३ ॥ स[6] चिंतयित्वेति बहुप्रकारं देशांश्च ग्रामान्नगराणि चाश्रमान् ॥ बहूनहं पर्यटन्नाप्तवान्हि[7] स्थानं हितं स्थापये यत्र विप्रान् ॥ ११४ ॥ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां प्रथमे माहेश्वरखण्डे कौमारिकाखण्डे नारदार्जुनसंवादे दानप्रशंसावर्णनंनाम द्वितीयोऽध्यायः ॥ २ ॥ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ एवं स्थानानि पुण्यानि यानियानीह वै भुवि ॥ निरीक्षंस्तत्र तत्राहं नारदो वीरसत्तम ॥१॥ विचरन्मेदिनीं सर्वां प्राप्तोऽहमाश्रमं भृगोः ॥ यत्र रेवानदी पुण्या सप्तकल्पस्मरा[8] वरा ॥२॥ महापुण्या पवित्रा च सर्वतीर्थमयी शुभा ॥ पुनाति कीर्तनेनैव दर्शनेन विशेषतः ॥ ३ ॥ तत्रावगाहनात्पार्थ मुच्यते जंतुरंहसा ॥ यथा सा पिङ्गला नाडी देहमध्ये व्यवस्थिता ॥ ४ ॥ इयं ब्रह्मांडपिण्डस्य स्थाने तस्मिन्प्रकीर्तिता[9] ॥ तत्रास्ते शुक्लतीर्थाख्यं रेवायां पापनाशनम् ॥ ५ ॥ यत्र वै स्नानमात्रेण ब्रह्महत्या प्रणश्यति ॥ तस्यापि सन्निधौ पार्थ रेवाया उत्तरे तटे ॥ ६ ॥ नानावृक्षसमाकीर्णं लतागुल्मोपशोभितम् ॥ नानापुष्पफलो

१ कार्यकारणात्–इ॰ पा॰ । २ श्रद्धयाशाविवर्जितः–इ॰ पाठे–फलाकांक्षाविवर्जितः–इत्यर्थो बोध्यः । 'अफलाकांक्षिभिः कर्म यत्तत्सात्त्विकमुच्यते' इति भगवता निष्कामकर्मणः प्राशस्त्यमभिहितम् । ३ पुराणे मुनयः–इ॰ पा॰ । ४ निन्दितमित्यर्थः । ५ अथ चैतत्–इ॰ पा॰ । ६ सः अहम्–इति सम्बन्धः । ७ न आप्नुयामि–इ॰ पाठे नाप्नोमि–इत्यर्थः । आप्नुयामीति ह्यार्षः प्रयोगः । ८ सप्तकल्पस्मरा–सप्तकल्पपर्यंतं स्मरः स्मरणं फलप्रदं यस्याः सा–इत्यर्थो बोध्यः । यस्या एकवारं स्मरणे कृते सति सप्तकल्पपर्यन्तमुत्तमसौख्यादिफलप्राप्तिर्भवतीति भावः । ९ प्रकीर्त्यते–इ॰ पा॰ ।

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पेतं कदलीखंडमंडितम् ॥ ७ ॥ अनेकश्वापदाकीर्णं विहगैरनुनादितम् ॥ सुगंधपुष्पशोभाढ्यं मयूररवनादितम् ॥ ८ ॥ भ्रमरैः सर्वमुत्सृज्य निलीनं रावसंयुतम् ॥ यथा संसारमुत्सृज्य भक्तेन हरपादयोः ॥ ९ ॥ कोकिला मधुरैः स्वानैर्नादयंति तथा मुनीन् ॥ यथा कथामृताख्यानैर्ब्राह्मणा भवभीरुकान् ॥ १० ॥ यत्र वृक्षा ह्लादयंति फलैः पुष्पैश्च पत्रकैः ॥ छायाभिरपि काष्ठैश्च लोकानिव हरव्रताः ॥ ११ ॥ पुत्रपुत्रेति वाशंते यत्र पुत्रप्रियाः खगाः ॥ यथा शिवप्रियाः शैवा नित्यं शिवशिवेति च ॥ १२ ॥ एवंविधं मुनेस्तस्य भृगोराश्रममंडलम् ॥ विप्रैस्त्रैविद्यसंयुक्तैः सर्वतः समलंकृतम् ॥१३॥ ऋग्यजुःसामनिर्घोषैरापूरितदिगन्तरम् ॥ रुद्रभक्तेन धीरेण यथैव भुवनत्रयम् ॥ १४ ॥ तत्राहं पार्थ संप्राप्तो यत्रास्ते मुनिसत्तमः ॥ भृगुः परमधर्मात्मा तपसा द्योतितप्रभः ॥१५॥ आगच्छंतं तु मां दृष्ट्वा दीनं च मुदितं तथा ॥ अभ्युत्थानं कृतं सर्वैर्विप्रैर्भृगुपुरोगमैः ॥ १६ ॥ कृत्वा सुस्वागतं दत्त्वा अर्घाद्यं भृगुणा सह ॥ आसनेषूपविष्टास्ते मुनींद्रा ग्राहिता मया ॥ १७ ॥ विश्रांतं तु ततो ज्ञात्वा भृगुर्मामप्युवाच ह ॥ क्व गंतव्यं मुनिश्रेष्ठ कस्मादिह समागतः ॥ १८ ॥ आगमनकारणं सर्वं समाचक्ष्व परिस्फुटम् ॥ ततस्तं चिंतयाविष्टो भृगुं पार्थाहम ब्रुवम् ॥ १९ ॥ श्रूयतामभिधास्यामि यदर्थमहमागतः ॥ मया पर्यटिता सर्वा समुद्रांता च मेदिनी ॥ २० ॥ द्विजानां भूमिदानार्थं मार्गमाणः पदेपदे ॥ निर्दोषां च पवित्रां च तीर्थेष्वपि समन्विताम् ॥ २१ ॥ रम्यां मनोरमां भूमिं न पश्यामि कथंचन ॥ ॥ भृगुरुवाच ॥ ॥ विप्राणां स्थापनार्थाय मयापि भ्रमता पुरा ॥ २२ ॥ पृथ्वी सागरपर्यंता दृष्टा सर्वा तदानघ ॥ महीनाम नदी पुण्या सर्वतीर्थमयी शुभा ॥ २३ ॥ दिव्या मनोरमा सौम्या महापापप्रणाशिनी ॥ नदीरूपेण तत्रैव पृथ्वी सा नात्र संशयः ॥ २४ ॥ पृथिव्यां यानि तीर्थानि दृष्टादृष्टानि नारद ॥ तानि सर्वाणि तत्रैव निवसंति महीजले ॥ २५ ॥ सा समुद्रेण संप्राप्ता पुण्यतोया महानदी ॥ संजातस्तत्र देवर्षे महीसागरसंगमः ॥ २६ ॥ स्तंभाख्यं तत्र तीर्थं तु त्रिषु लोकेषु विश्रुतम् ॥ तत्र ये मनुजाः स्नानं प्रकुर्वंति विपश्चितः ॥ २७ ॥ सर्वपापविनिर्मुक्ता. नोपसर्पंति वै यमम् ॥ तत्राद्भुतं हि दृष्टं मे पुरा स्नातुं गतेन वै ॥ २८ ॥ तदहं कीर्तयिष्यामि मुने शृणु महाद्भुतम् ॥ यावत्स्नातुं व्रजाम्यस्मिन्महीसागरसंगमे ॥ २९ ॥ तीरे स्थितं प्रपश्यामि मुनींद्रं पावकोपमम् ॥ प्रांशुं वृद्धं चास्थिशेषं तपोलक्ष्म्या विभूपितम् ॥ ३० ॥ भुजावूर्ध्वौ ततः कृत्वा प्ररुदंतं मुहुर्मुहुः ॥

१ मयूररवमोदितम्--इ० पा० । २ वीर--इ० पा० । ३ ग्राहिताः--आसनोपवेशनार्थं प्रार्थिताः--इत्यर्थः । ४ वसन्ति च--इ० पा० । ५ विरूपितम्--इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तं तथा दुःखितं दृष्ट्वा दुःखितोऽहमथाभवम् ॥ ३१ ॥ सतां लक्षणमेतद्धि यद्दृष्ट्वा दुःखितं जनम् ॥ शतसंख्यं तस्य भवेत्तथाहं विललाप ह ॥ ३२ ॥ अहिंसा सत्यमस्तेयं मानुष्ये सति दुर्लभम् ॥ ततस्तमुपसंगम्य पर्यपृच्छमहं तदा ॥ ३३ ॥ किमर्थं रोदिषि मुने शोके किं कारणं तव ॥ सुगुह्यमपि चेद्ब्रूहि जिज्ञासा महती हि मे ॥ ३४ ॥ मुनिस्ततो मामवदद्भृगो निर्भाग्यवानहम् ॥ तेन रोदिमि मा पृच्छ दुर्भाग्यं चालपेद्धि कः ॥ ३५ ॥ तमहं विस्मयाविष्टः पुनरेवेदमब्रुवम् ॥ दुर्लभं भारते जन्म तत्रापि च मनुष्यता ॥ ३६ ॥ मनुष्यत्वे ब्राह्मणत्वं मुनित्वं तत्र दुर्लभम् ॥ तत्रापि च तपःसिद्धिः प्राप्यैतत्पंचकं परम् ॥ ३७ ॥ किमर्थं रोदिषि मुने विस्मयोऽत्र महान्मम ॥ एवं संपृच्छते मह्यमेतस्मिन्नेव चांतरे ॥३८॥ सुभद्रोनाम नाम्ना च मुनिस्तत्राभ्युपाययौ ॥ स हि मेरुं परित्यज्य ज्ञात्वा तीर्थस्य सारताम् ॥३९॥ कृताश्रमः पूजयति सदा स्तंभेश्वरं मुनिः ॥ सोऽप्येवं मामिवापृच्छन्मुनिं रोदनकारणम् ॥ ४० ॥ अथाहाचम्य स मुनिः श्रूयतां कारणं मुनी ॥ अहं हि देवशर्माख्यो मुनिः संयतवाङ्मनाः ॥ ४१ ॥ निवसामि कृतस्थानो गंगासागरसंगमे ॥ तत्र दर्शे तर्पयामि सदैव च पितॄनहम् ॥ ४२ ॥ श्राद्धांते ते च प्रत्यक्षा ह्याशिषो मे वदंति च ॥ ततः कदाचित्पितरः प्रहृष्टा मामथाब्रुवन् ॥ ४३ ॥ वयं सदात्र चायामो देवशर्मंस्तवांतिके ॥ स्थानेऽस्माकं कदाचित्त्वं न चायासि कुतः सुत ॥ ४४ ॥ स्थानं दिदृक्षुस्तच्चाहं न शक्तोऽस्मि निवेदितुम् ॥ ततः परममित्युक्त्वा गतवान्पितृभिः सह ॥ ४५ ॥ पितृणां मंदिरं पुण्यं भौमर्मलोकसमास्थितम् ॥ तत्रतत्र स्थितश्चाहं तेजोमण्डलदुर्दृशान् ॥ ४६ ॥ दृष्ट्वाग्रतः पूजयाब्द्यानपृच्छं स्वान्पितॄनिति ॥ के ह्यमी समुपायांति भृशं तृप्ता भृशार्चिताः ॥ भृशं प्रमुदिता नैव तथा यूयं यथा ह्यमी ॥ ४७ ॥ ॥ पितर ऊचुः ॥ ॥ भद्रं ते पितरः पुण्याः सुभद्रस्य महामुनेः ॥ तर्पितास्तेन मुनिना महीसागरसंगमे ॥ ४८ ॥ सर्वतीर्थमयी यत्र निलीना ह्युदधौ मही ॥ तत्र दर्शे तर्पयति सुभद्रस्तानमून्सुत ॥ ४९ ॥ इत्याकर्ण्य वचस्तेषां लज्जितोऽहं भृशं तदा ॥ विस्मितश्च प्रणम्यैतान्पितॄन्स्वं स्थानमागतः ॥ ५० ॥ यथा तथा चिंतितं च तत्र यास्याम्यहं स्फुटम् ॥ पुण्यो यत्रापि विख्यातो महीसागरसंगमः ॥ ५१ ॥ कृताश्रमश्च तत्रैव तर्पयिष्ये निजान्पितॄन् ॥ दर्शेदर्शे यथा चासौ स्तुत्यनामा सुभद्रकः ॥ ५२ ॥ किं तेन ननु जातेन कुलांगारेण पापिना ॥ यस्मिञ्जीवत्यपि निजाः पितरोऽन्यस्पृहाकराः ॥ ५३ ॥ इति संचिंत्य मुदितो रुचिं भार्यामथाब्रुवम् ॥ रुचे त्वया समायुक्तो महीसा

१ शतसंख्यं जायते तस्य तथावकलितापहम्–इ०, तथावकलिलापहम्– इ० च पा० । २ तथा–इ० पा० । ३ संबोधनद्विवचनमिदम्–हे मुनी–हे भृगुसुभद्रौ–इत्यर्थः । ४ सोमलोकसमाश्रितम्–इ०पा० । ५ कृतावासश्च–इ०पा० । ६ सत्यनामा–इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गरसंगमम् ॥ ५४ ॥ गत्वा स्थास्यामि तत्रैव शीघ्रं त्वं सम्मुखीभव ॥ पतिव्रतासि शुद्धासि कुलीनासि यशस्विनि ॥ तस्मादेतन्मम शुभे कर्तुमर्हसि चिंतितम् ॥ ५५ ॥ ॥ रुचिरुवाच ॥ ॥ हता तस्य जनिर्नाभूत्कथं पाप दुरात्मना ॥ ५६ ॥ श्मशानस्तंभ येनाहं दत्ता तुभ्यं कृतं त्वया ॥ इह कंदफलाहारैर्यत्किं तेन न पूर्यते ॥ ५७ ॥ नेतुमिच्छसि मां तत्र यत्र क्षारोदकं सदा ॥ त्वमेव तत्र संयाहि नंदंतु तव पूर्वजाः ॥ ५८ ॥ गच्छ वा तिष्ठ वा वृद्ध वस वा कांकवच्चिरम् ॥ तथा ब्रुवन्त्यां तस्यां तु कर्णावस्मि पिधाय च ॥ ५९ ॥ विपुलं शिष्यमादिश्य गृह एकोऽत्र आगतः ॥ सोऽहं स्नात्वात्र संतर्प्य पितॄञ्छ्रद्धापरायणः ॥ ६० ॥ चिंतां सुविपुलां प्राप्तो नरके दुष्कृती यथा ॥ यदि तिष्ठामि चात्रैव अर्धदेहधरो ह्यहम् ॥ ६१ ॥ नरो हि गृहिणीहीनो अर्धदेह इति स्मृतः ॥ यथात्मना विना देहे कार्यं किंचिन्न सिध्यति ॥ ६२ ॥ एवं गृहिण्या हीनो हि न स कर्मसु शस्यते ॥ यो नरः स्त्रीषु देहेषु अनुरक्तस्त्वसौ पशुः ॥६३॥ अनयोर्हि फलं ग्राह्यं सारता नात्र काचन ॥ अर्धदेही च मनुजस्त्वसंस्पृश्यः सतां मतः ॥ ६४ ॥ औत्तानपादिरस्पृश्य उत्तमो हि सुरैः कृतः ॥ अथ चेत्तत्र संयामि न महीसागरस्ततः ॥६५॥ यामि वा तत्कथं पादौ चलतो मे कथंचन ॥ एतस्मिन्मे मनो विद्धं खिद्यतेऽज्ञानसंकटे ॥६६॥ अतोऽहमतिमुह्यामि भृशं शोचामि रोदिमि ॥ इति श्रुत्वा वचस्तस्य भृशं रोमांचपूरितम् ॥ ॥६७॥ साधुसाध्वित्यथोवाच तं सुभद्रोऽप्यहं तथा ॥ दण्डवच्च प्रणमितो महीसागरसङ्गमम् ॥६८॥ चिन्तयावश्च मनसि प्रतीकारं मुनेरुभौ ॥ यो हि मानुष्यमासाद्य जलबुद्बुदभंगुरम् ॥६९॥ परार्थाय भवत्येष पुरुषोऽन्ये पुरीषकाः ॥ ततः संचिंत्य प्राहेदं सुभद्रो मुनिसत्तमम् ॥७०॥ मा मुने परिखिद्यस्व देवशर्मन्स्थिरो भव ॥ अहं ते नाशयिष्यामि शोकं सूर्यस्तमो यथा ॥ ७१ ॥ गमिष्याम्याश्रमं त्वं च नात्रापि परिहास्यते ॥ शृणु तत्कारणं तुभ्यं तर्पयिष्ये पितॄनहम् ॥ ७२ ॥ ॥ देवशर्मोवाच ॥ ॥ एवं ते वदमानस्य आयुरस्तु शतं समाः ॥ यदशक्यं महत्कर्म कर्तुमिच्छसि मत्कृते ॥ ॥ ७३ ॥ हर्षस्थाने विपादश्च पुनर्मां बाधते शृणु ॥ अपि वाक्यं शुभं सन्तो न गृह्णन्ति मुधा मुने ॥ ७४ ॥ कथमेतन्महत्कर्म कारयामि मुधा वद ॥ पुनः किंचित्प्रवक्ष्यामि यथा मे निष्कृतिर्भवेत् ॥७५॥ शापितोऽसि मया प्राणैर्यथा वच्मि तथा कुरु ॥ अहं सदा करिष्यामि दर्शे चोद्दिश्य ते पितॄन् ॥ ७६ ॥ श्राद्धं गंगार्णवे चात्र मत्पितॄणां त्वमाचर ॥ अहं चैवापि तपसः संचितस्यापि जन्मना ॥ चतुर्भागं प्रदास्यामि एवमेवैतदा

१ वकवत्--इ०पा० । २ असन्धिरार्षः । ३ तिष्ठन्- इ०पा० । ४ अर्धदेहस्तथा ह्यहम्--इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

चर ॥ ७७ ॥ ॥ सुभद्र उवाच ॥ ॥ यद्येवं तव संतोषस्त्वेवमस्तु मुनीश्वर ॥ साधूनां च[1] यथा हर्षस्तथा कार्यं विजानता ॥ ७८ ॥ ॥ भृगु
रुवाच ॥ ॥ देवशर्मा ततो हृष्टो दत्त्वा पुण्यं त्रिवांचिकम्[2] ॥ चतुर्थांशं ययौ धाम स्वं सुभद्रोऽपि[3] च स्थितः ॥ ७९ ॥ एवंविधो नारदासौ मही
सागरसंगमः ॥ यमनुस्मरतो मह्यं रोमांचोऽद्यापि वर्तते ॥ ८० ॥ ॥ नारद उवाच ॥ ॥ इति श्रुत्वा फाल्गुनाहं हर्षगद्गदया गिरा ॥ मृतोमृत इवा
वोचं साधुसाध्विति तं भृगुम् ॥ ८१ ॥ यूयं वयं गमिष्यामो महीतीरं सुशोभनम् ॥ आवामीक्षावहे सर्वं स्थानकं तदनुत्तमम् ॥ ८२ ॥ मम चैवं
वचः श्रुत्वा भृगुः सह मयाययौ ॥ समस्तं तु महापुण्यं महीकूलं निरीक्षितम् ॥ ८३ ॥ तद्दृष्ट्वा चातिहृष्टोहमासं रोमांचकंचुकः ॥ अब्रवं मुनिशार्दूलं
हर्षगद्गदया गिरा ॥ ८४ ॥ त्वत्प्रसादात्करिष्यामि भृगो स्थानमनुत्तमम् ॥ स्वस्थानं गम्यतां ब्रह्मन्नतः कृत्यं विचिंतये ॥ ८५ ॥ एवं भृगुं चास्मि
विसर्जयित्वा कल्लोलकोलाहलकौतुकीतटे ॥ अथोपविश्येदमचिंतयं तदा किं कृत्यमात्मानमिवैकयोगी[4] ॥ ८६ ॥ ॥ इति श्रीस्कांदे महापुराण
एकाशीतिसाहस्र्यां संहितायां प्रथमे माहेश्वरखण्डे कौमारिकाखंडे नारदार्जुनसंवादे महीसागरसंगमतीर्थमाहात्म्ये तृतीयोऽध्यायः ॥ ३ ॥ छ ॥
॥ ॥ नारद उवाच ॥ ॥ ततस्त्वहं चिंतयामि कथं स्थानमिदं भवेत् ॥ ममायत्तं यतो राज्ञां भूमिरेषा सदा वशे ॥ १ ॥ यत्त्वहं धर्मवर्माणं गत्वा
याचे ह मेदिनीम् ॥ अर्पयत्येव स च मे याचितो न पुनः परः ॥ २ ॥ तथा हि मुनिभिः प्रोक्तं द्रव्यं त्रिविधमुत्तमम्[5][6] ॥ शुक्लं मध्यं च शबलम
धमं कृष्णमुच्यते ॥ ३ ॥ श्रुतेः[7] संपादनाच्छिष्यात्प्राप्तं शुक्लं च कन्यया ॥ तथा कुसीदवाणिज्यकृषियाचितमेव च ॥ ४ ॥ शबलं प्रोच्यते सद्भिर्द्यू
तचौर्येण साहसैः ॥ व्याजेनोपार्जितं[8] यच्च तत्कृष्णं समुदाहृतम् ॥ ५ ॥ शुक्लवित्तेन यो धर्मं प्रकुर्याच्छ्रद्धयान्वितः ॥ तीर्थं पात्रं समासाद्य देवत्वे
तत्समश्नुते ॥ ६ ॥ राजसेन च भावेन वित्तेन शबलेन च ॥ प्रदद्याद्दानमर्थिभ्यो मानुष्यत्वे तदश्नुते ॥ ७ ॥ तमोवृतस्तु यो दद्यात्कृष्णवित्तेन
मानवः ॥ तिर्यक्त्वे तत्फलं प्रेत्य समश्नाति नराधमः ॥ ८ ॥ तत्तु याचितद्रव्यं मे राजसं हि स्फुटं भवेत् ॥ अथ ब्राह्मणभावेन नृपं याचे प्रति
ग्रहम् ॥ ९ ॥ तदप्यहो चातिकष्टं हेतुना तेन मे मतम् ॥ अयं प्रतिग्रहो घोरो मध्वास्वादो विषोपमः ॥ १० ॥ प्रतिग्रहेण संयुक्तं

---

१ हि—इ० पा० । २ त्रिवारकम्—इ० पा० । ३ व्यवस्थितः—इ० पा० । ४ यथैकयोगी स्वरूपं चिन्तयति तथाहं किं कृत्यामित्याचिंतयामिति योजना । ५ विविधम्—इ० पा० । ६ उत्तममित्यस्य शुक्लमित्यनेनाग्रिमेणान्वयः । ७ श्रुतेः संपादनाद्वेदस्याध्यापनेन शिष्यद्वारा प्राप्तं यद्द्रव्यं तच्छुक्लमित्याचक्षते । कन्यया प्राप्तं तथा कुसीदवाणिज्यकृषितः प्राप्तं तथा च याचितप्राप्तं च यद्द्रव्यं तच्छबलमित्युत्तरेण सम्बन्धो बोध्यः । क्वचित्पुस्तके 'शुल्कं च कन्यया' इति पाठो दृश्यते । परं तस्य 'कन्यया' इति पदसाहचर्येण रूढरीत्या 'शुल्कम्' इति पाठेन भवितव्यमिति नातिप्रबुद्धलेखकप्रमादकृतमेव विलेखनमिति भाति । प्रसंगतश्चात्र 'शुक्लम्' इत्येतदन्तस्यैवैकस्य शुक्ल विभागस्य वक्तव्यत्वेन समौचित्यात् 'श्रुतेः सम्पादनाच्छिष्यात्प्राप्तं शुक्लम्' इत्येतस्यैवैकवाक्यत्वमुचितमिति सुधीभिरवधेयम् । ८ अच्छेणोपार्जितम्--इ०, अज्ञेनोपार्जितम्--इ० च पा० ।

CC-0. In Public Domain. Digitization by eGangotri

ह्यमीवमाविशेद्द्विजम् ॥ तस्मादहं निवृत्तश्च पापादस्मात्प्रतिग्रहात् ॥ ११ ॥ ततः केनाप्युपायेन द्वयोरन्यतरेण तु ॥ स्वायत्तं स्थानकं कुर्म एतत्सञ्चिंतये मुहुः ॥ १२ ॥ यथा कुभार्यः पुरुषश्चिन्तांतं न प्रपद्यते ॥ तथैव विमृशंश्चाहं चिंतांतं न लभाम्यणु ॥ १३ ॥ एतस्मिन्नन्तरे पार्थ स्नातुं तत्र समागताः ॥ बहवो मुनयः पुण्ये महीसागरसंगमे ॥ १४ ॥ अहं तानब्रवं सर्वान्कुतो यूयं समागताः ॥ ते मामूचुः प्रणम्याथ सौराष्ट्रविषये मुने ॥ १५ ॥ धर्मवर्मेति नृपतिर्योऽस्य देशस्य भूपतिः ॥ स तु दानस्य तत्त्वार्थी तेपे वर्षगणान्बहून् ॥ १६ ॥ ततस्तं प्राह खे वाणी श्लोकमेकं नृप शृणु ॥ द्विहेतुं षडधिष्ठानं षडंगं च द्विपाकयुक् ॥ १७ ॥ चतुःप्रकारं त्रिविधं त्रिनाशं दानमुच्यते ॥ इत्येकं श्लोकमाभाष्य खे वाणी विरराम ह ॥ १८ ॥ श्लोकस्यार्थं नावभाषे पृच्छमानापि नारद ॥ ततो राजा धर्मवर्मा पटहे नान्वघोषयत् ॥ १९ ॥ यस्तु श्लोकस्य चैवास्य लब्धस्य तपसा मया ॥ करोति सम्यग्व्याख्यानं तस्य चैतद्ददाम्यहम् ॥ २० ॥ गवां च सप्त नियुतं सुवर्णं तावदेव तु ॥ सप्तग्रामान्प्रयच्छामि श्लोकव्याख्यां करोति यः ॥ २१ ॥ पटहेनेति नृपतेः श्रुत्वा राज्ञो वचो महत् ॥ आजग्मुर्बहुदेशीया ब्राह्मणाः कोटिशो मुने ॥ २२ ॥ पुनर्दुर्बोधविन्यासः श्लोकस्तैर्विप्रपुंगवैः ॥ आख्यातुं शक्यते नैव गुडो मूकैर्यथा मुने ॥ २३ ॥ वयं च तत्र याताः स्मो धनलोभेन नारद ॥ दुर्बोधत्वान्नमस्कृत्य श्लोकं चात्र समागताः ॥ २४ ॥ दुर्व्याख्येयस्त्वयं श्लोको धनं लभ्यं न चैव नः ॥ तीर्थयात्रां कथं यामीत्येवाचिंत्यात्र चागताः ॥ २५ ॥ एवं फाल्गुन तेषां तु वचः श्रुत्वा महात्मनाम् ॥ अतीव संप्रहृष्टोऽहं तान्विसृज्येत्यचिंतयम् ॥ २६ ॥ अहो प्राप्त उपायो मे स्थानप्राप्तौ न संशयः ॥ श्लोकं व्याख्याय नृपतेर्लप्स्ये स्थानं धनं तथा ॥ २७ ॥ विद्यामूल्येन नैवं च याचितः स्यात्प्रतिग्रहः ॥ सत्यमाह पुराणर्षिर्वासुदेवो जगद्गुरुः ॥२८॥ धर्मस्य यस्य श्रद्धा स्यान्न च सा नैवं पूर्यते॥पापस्य यस्य श्रद्धास्यान्न च सापि न पूर्यते॥२९॥एवं विचिंत्य विद्वांसः प्रकुर्वंति यथारुचि ॥ सत्यमेतद्विभोर्वाक्यं दुर्लभोऽपि यथा हि मे॥३०॥ मनोरथोऽयं सफलः संभूतोंकुरितः स्फुटम् ॥ एनं च दुर्विदं श्लोकमहं जानामि सुस्फुटम् ॥३१॥ अमूर्तैः पितृभिः पूर्वमेष ख्यातो हि मे पुरा ॥ एवं हर्षान्वितः पार्थ संचिंत्याऽहं ततो मुहुः॥३२॥

१ अमीवं पापमित्यर्थः । अपायमिति पाठान्तरम् । तत्र नाशमित्यर्थः । २ अनुदात्तेत्त्वलक्षणात्मनेपदस्य चक्षिङो ङित्करणज्ञापकेनानित्यत्वात्परस्मैपदम्, आर्षं वा । ३ द्विहेतुः--इ० पा० । ४ खेचरी--इ० पा० । ५ वै--इ० पा० । ६ दुर्बोधविज्ञानः--इ० पा० । ७ द्विजपुंगवैः--इ० पा० । ७ गूढः--इ० पा० । परमत्र गुडो मूकैरित्येव पाठः साधुः । ८ यामि--इति प्रत्येकविवक्षयैकवचनम । ९ तेन इ० पा० । १० प्रकुर्वन्तु--इ० पा० । ११ सस्फुटम्--इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रणम्य[1] तीर्थं चलितो महीसागरसंगमम् ॥ वृद्धब्राह्मणरूपेण ततोहं यातवान्नृपम् ॥ ३३ ॥ इदं भणितवानस्मि श्लोकव्याख्यां नृप शृणु ॥ यत्ते पटहविख्यातं दानं च प्रगुणीकुरु ॥ ३४ ॥ एवमुक्ते नृपः प्राह प्रोचुरेवं हि कोटिशः ॥ द्विजोत्तमाः पुनर्नास्य[2] प्रोक्तुमर्थो हि शक्यते ॥ ३५ ॥ के द्विहेतू षडाख्यातान्यधिष्ठानानि कानि च ॥ कानि चैव षडंगानि कौ द्वौ पाकौ तथा स्मृतौ ॥३६॥ के च प्रकाराश्चत्वारः किंस्वित्तत्त्रिविधं द्विज ॥ त्रयो नाशाश्च के प्रोक्ता दानस्यैतत्स्फुटं वद ॥ ३७ ॥ स्फुटान्प्रश्नानिमान्सप्त यदि वक्ष्यसि ब्राह्मण ॥ ततो गवां सप्तनियुतं सुवर्णं तावदेव तु ॥ ॥३८॥ सप्त ग्रामांश्च दास्यामि नो चेद्यास्यसि स्वं गृहम् ॥ इत्युक्तवचनं पार्थ सौराष्ट्रस्वामिनं नृपम् ॥ ३९ ॥ धर्मवर्माणमस्त्वेवं प्रावोचमवधारय ॥ श्लोकव्याख्यां स्फुटां वक्ष्ये दानहेतू च तौ[3] शृणु ॥ ४० ॥ अल्पत्वं[4] वा बहुत्वं वा दानस्याभ्युदयावहम् ॥ श्रद्धा शक्तिश्च दानानां वृद्धयक्षयकरे हि ते ॥ ४१ ॥ तत्र श्रद्धाविषये श्लोका भवन्ति ॥ कायक्लेशैश्च बहुभिर्न चैवार्थस्य राशिभिः ॥४२॥ धर्मः संप्राप्यते सूक्ष्मः श्रद्धा धर्मोऽद्भुतं तपः ॥ श्रद्धा स्वर्गश्च[5] मोक्षश्च श्रद्धा सर्वमिदं जगत् ॥४३॥ सर्वस्वं जीवितं चापि दद्यादश्रद्धया यदि ॥ नाप्नुयात्स फलं किंचिच्छ्रद्दधानस्ततो भवेत् ॥ ४४ ॥ श्रद्धया साध्यते धर्मो महद्भिर्नार्थराशिभिः ॥ अकिंचना हि मुनयः श्रद्धावंतो दिवं गताः ॥ ४५ ॥ त्रिविधा भवति श्रद्धा देहिनां साँ स्वभावजा ॥ सात्त्विकी राजसी चैव तामसी चेति तां शृणु ॥ ४६ ॥ यजंते सात्त्विका देवान्यक्षरक्षांसि राजसाः ॥ प्रेतान्भूतपिशाचांश्च यजंते तामसा जनाः ॥ ॥ ४७ ॥ तस्माच्छ्रद्धावता पात्रे दत्तं न्यायार्जितं हि यत् ॥ तेनैव भगवान्रुद्रः स्वल्पकेनापि तुष्यति ॥ ४८ ॥ शक्तिविषये च श्लोका भवंति ॥ कुटुंबभुक्तवसनाद्देयं यदतिरिच्यते ॥ मध्वास्वादो विषं पश्चाद्दातुर्धर्मोऽन्यथा भवेत् ॥ ४९ ॥ शक्ते परजने दाता स्वजने दुःखजीविनि ॥ मध्वापानविषादः स धर्माणां प्रतिरूपकः ॥ ५० ॥ भृत्यानामुपरोधेन यत्करोत्यौर्ध्वदैहिकम् ॥ तद्भवत्यसुखोदर्कं जीवतोऽस्य मृतस्य च ॥ ५१ ॥ सामान्यं याचितं न्यासमाधिर्दाराश्च दर्शनम् ॥ अन्वाहितं च निक्षेपः सर्वस्वं चान्वये सति ॥ ५२ ॥ आपत्स्वपि न देयानि नववस्तूनि[6] पंडितैः ॥ यो ददाति स मूढात्मा प्रायश्चित्तीयते नरः ॥ ५३ ॥ इति ते गदितौ राजन्द्वौ हेतू श्रूयतामतः ॥ अधिष्ठानानि वक्ष्यामि षडेव शृणु तान्यपि ॥५४॥ धर्ममर्थं च कामं च व्रीडाहर्षभयानि च ॥ अधिष्ठानानि दानानां षडेतानि प्रचक्षते ॥ ५५ ॥ पात्रेभ्यो दीयते नित्यमनपेक्ष्य[7] प्रयोजनम् ॥ केवलं

१ प्रणम्यातीव तीर्थे च--इ० पा० । २ नाम--इ० पा० । ३ द्वौ--इ० पा० । ४ मालत्वं वा--इ, माल्यत्वं वा--इ० पा० । ५ स्वर्गस्य मोक्षस्य--इ० च पा० । ६ मुनिः--इ०, मुने--इ० च पा० । ७ च--इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धर्मबुद्ध्या यद्धर्मदानं तदुच्यते ॥ ५६ ॥ धनिनं धनलोभेन लोभयित्वार्थमाहरेत् ॥ तदर्थदानमित्याहुः कामदानमतः शृणु ॥ ५७ ॥ प्रयोजनमपेक्ष्यैव प्रसंगाद्यत्प्रदीयते ॥ अनर्हेषु सरागेण कामदानं तदुच्यते ॥ ५८ ॥ संसदि व्रीडयाऽऽश्रुत्य अर्थिभ्यः[1] प्रददाति च ॥ प्रतिदीयते च यद्दानं व्रीडादानमिति श्रुतम् ॥ ५९ ॥ दृष्ट्वा प्रियाणि श्रुत्वा वा हर्षवद्यत्प्रदीयते ॥ हर्षदानमिति प्रोक्तं दानं तद्धर्मचिंतकैः ॥ ६० ॥ आक्रोशानर्थहिंसानां प्रतीकाराय यद्भवेत् ॥ दीयतेऽनुपकर्तृभ्यो भयदानं तदुच्यते ॥ ६१ ॥ प्रोक्तानि षडधिष्ठानान्यंगान्यपि च षट्च्छृणु ॥ दाता प्रतिग्रहीता च शुद्धिर्देयं च धर्मयुक् ॥ ६२ ॥ देशकालौ च दानानामंगान्येतानि षड्विदुः ॥ अपरोगी च धर्मात्मा दित्सुरव्यसनः शुचिः ॥ ६३ ॥ अनिंद्याजीवकर्मा[2] च षड्भिर्दाता प्रशस्यते ॥ अनृजुश्चाश्रद्दधानोऽशांतात्मा धृष्टभीरुकः[3] ॥ ६४ ॥ असत्यसंधो निद्रालुर्दातायं तामसोऽधमः ॥ त्रिशुक्लः कृशवृत्तिश्च घृणालुः सकलेंद्रियः ॥ ६५ ॥ विमुक्तो योनिदोषेभ्यो ब्राह्मणः पात्रमुच्यते ॥ सौमुख्यादभिसंप्रीतिरर्थिनां दर्शने सदा ॥ सत्कृतिश्चानसूया च तदा शुद्धिरिति स्मृता ॥ ६६ ॥ अपराबाधमक्लेशं[5] स्वयत्नेनार्जितं धनम् ॥ स्वल्पं वा विपुलं वापि देयमित्यभिधीयते ॥ ६७ ॥ तेनापि किल धर्मेण उद्दिश्य किल किंचन ॥ देयं तद्धर्मयुगिति शून्ये शून्यं फलं मतम् ॥ ६८ ॥ न्यायेन दुर्लभं द्रव्यं देशे कालेपि वा पुनः ॥ दानार्हौ देशकालौ तौ स्यातां श्रेष्ठौ न चान्यथा ॥ ६९ ॥ षंडगानीति चोक्तानि द्वौ च पाकावतः शृणु ॥ द्वौ पाकौ दानजौ प्राहुः परत्राथ त्विहोच्यते ॥ ७० ॥ सद्भ्यो यद्दीयते किंचित्तत्परत्रोपतिष्ठति ॥ असत्सु[6] दीयते किंचित्तद्दानमिह भुज्यते ॥ ७१ ॥ द्वौ पाकाविति निर्दिष्टौ प्रकारांश्चतुरः शृणु ॥ ध्रुवमाहुस्त्रिकं[7] काम्यं नैमित्तिकमिति क्रमात् ॥ ७२ ॥ वैदिको दानमार्गोऽयं चतुर्धा वर्ण्यते द्विजैः ॥ प्रपारामतडागादिसर्वकामफलं ध्रुवम् ॥ ७३ ॥ तदाहुस्त्रिकमित्याहुर्दीयते यद्दिनेदिने ॥ अपत्यविजयैश्वर्यस्त्रीबालार्थं प्रदीयते ॥ ॥ ७४ ॥ इच्छासंस्थं च यद्दानं काम्यमित्यभिधीयते ॥ कालापेक्षं क्रियापेक्षं गुणापेक्षमिति स्मृतौ ॥ ७५ ॥ त्रिधा नैमित्तिकं प्रोक्तं सदा होमविवर्जितम् ॥ इति प्रोक्ताः प्रकारास्ते त्रैविध्यमभिधीयते ॥ ७६ ॥ अष्टोत्तमानि चत्वारि मध्यमानि विधानतः ॥ कानीयसानि शेषाणि त्रिविधत्वमिदं विदुः ॥७७॥ गृहप्रासादविद्याभूगोकूपप्राणहाटकम्[8] ॥ एतान्युत्तमदानानि उत्तमद्रव्यदानतः ॥ ७८ ॥ अन्नारामं च वासांसि हयप्र

---

१ अथेऽर्थिभ्यः प्रयाति च प्रदीयते च यद्दानम्—इ० पा० । २ अनिन्द्या जीवकर्मा च—आजीवः आजीविका कर्म व्यवसायः अनिन्द्ये आजीव—कर्मणीउपजीविकाव्यवसायौ यस्य सः—अनिन्द्याजीवकर्मा अगर्हितोपजीविकाव्यवसाय इत्यर्थः । ३ दृढभीरुकः—इ० पा० । ४ क्रीडालुः—इ० पा० । ५ अपराबाधम्—न विद्यन्ते परस्य बाधा यस्मिंस्तदपराबाधम् । परबाधाविवर्जितमित्यर्थः । ६ स्वसत्सु—इ० पा० । ७ आहुस्त्रिकमिति दानस्य संज्ञा । ८ प्राणदानं च रुग्णस्यौषधेन निरामयीकरणम् मरणोन्मुखस्य अन्नादिना रक्षणम् अग्निजलाद्युपसृष्टस्य परित्राणं चेत्येवमाद्यनेकसंकटग्रस्तस्य व्याघ्रादिभयहेतुभ्यो रक्षणं प्राणदानमित्युच्यते ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भृतिवाहनम् ॥ दानानि मध्यमानीति मध्यमद्रव्यदानतः ॥ ७९ ॥ उपानच्छत्रपात्रादिदधिमध्वासनानि च ॥ ८० ॥ दीपकाष्ठोपलादीनि चरमं बहुवार्षिकम् ॥ इति कानीयसान्याहुर्दाननाशत्रयं शृणु ॥८१॥ यद्दत्त्वा तप्यते पश्चादासुरं तद्वृथा मतम् ॥ अश्रद्धया यद्ददाति राक्षसं स्याद्वृथैव तत् ॥ ८२ ॥ यच्चाक्रुश्य ददात्यंग दत्त्वा वाक्रोशति द्विजम् ॥ पैशाचं तद्वृथा दानं दाननाशास्त्रयस्त्वमी ॥ ८३ ॥ इति सप्तपदैर्बद्धं दानमाहात्म्यमुत्तमम् ॥ शक्त्या ते कीर्तितं राजन्साधु वाऽसाधु वा वद ॥ ८४ ॥ ॥ धर्मवर्मोवाच ॥ ॥ अद्य मे सफलं जन्म अद्य मे सफलं तपः ॥ अद्य ते कृतकृत्योऽस्मि कृतः कृतिमतां वर ॥ ८५ ॥ पठित्वा सकलं जन्म ब्रह्मचारी यथा वृथा ॥ बहुक्लेशात्प्राप्तभार्यः सा वृथाऽप्रियवादिनी ॥ ८६ ॥ क्लेशेन कृत्वा कूपं वा स च क्षारोदको वृथा ॥ बहुक्लेशैर्जन्म नीतं विना धर्मं तथा वृथा ॥ ८७ ॥ एवं मे यद्वृथा नाम जातं तत्सफलं त्वया ॥ कृतं तस्मान्नमस्तुभ्यं द्विजेभ्यश्च नमोनमः ॥ ८८ ॥ सत्यमाह पुरा विष्णुः कुमारान्विष्णुसद्मनि ॥ ८९ ॥ नाहं तथाद्मि यजमानहविर्वितानश्च्योतद्घृतप्लुतमदन्हुतभुङ्मुखेन ॥ यद्ब्राह्मणस्य मुखतश्चरतोनुघासं तुष्टस्य मय्यवहितैर्निजकर्मपाकैः ॥ ९० ॥ तन्मयाऽशर्मणा वापि यद्विप्रेष्वप्रियं कृतम् ॥ सर्वस्य प्रभवो विप्रास्तत्क्षमंतां प्रसादये ॥ ९१ ॥ त्वं च कोसि न सामान्यः प्रणम्याहं प्रसादये ॥ आत्मानं ख्यापय मुने प्रोक्तश्चेत्यब्रवं तदा ॥ ९२ ॥ ॥ नारद उवाच ॥ ॥ नारदोऽस्मि नृपश्रेष्ठ स्थानकार्थी समागतः ॥ प्रोक्तं च देहि मे द्रव्यं भूमिं च स्थानहेतवे ॥ ९३ ॥ यद्यपीयं देवतानां भूमिर्द्रव्यं च पार्थिव ॥ तथापि यस्मिन्यः काले राजा प्रार्थ्यः स निश्चितम् ॥ ९४ ॥ सहीश्वरस्यावतारो भर्ता दाताऽभयस्य सः ॥ तथैव त्वामहं याचे द्रव्यशुद्धिपरीप्सया ॥ पूर्वं ममालयं देहि देयार्थे प्रार्थनापरः ॥ ९५ ॥ ॥ ॥ राजोवाच ॥ यदि त्वं नारदो विप्र राज्यमस्त्वखिलं तव ॥ अहं हि ब्राह्मणानां ते दास्यं कर्ता न संशयः ॥ ९६ ॥ ॥ नारद उवाच ॥ ॥ यद्यस्माकं भवान्भक्तस्तत्ते कार्यं च नो वचः ॥ ९७ ॥ सर्वं यत्तद्देहि मे द्रव्यमुक्तं भुवं च मे सप्तगव्यूतिमात्राम् ॥ भूयात्त्वत्तोप्यस्य

१ दानानीति शेषः । इति कानीयसानि दानान्याहुरिति वाक्यपूर्तिः । २ भवेत्--इ०पा० । ३ च--इ०पा० । ४ पूर्वमिति । देयार्थे--यत्त्वया मे देयं तत्स्थापनार्थं पूर्वं प्रथमं मम आलयं स्थानं प्रार्थनापरः प्रार्थनां विपर्ततीति प्रार्थनापरः कामपूरकः त्वं देहि । यत्त्वया पूर्वं प्रतिश्रुतं "गवां च सप्तनियुतं सुवर्णं तावदेव तु । सप्त ग्रामान्प्रयच्छामि श्लोकव्याख्यां करोति यः" इति, तावतोऽस्य त्वद्देयस्य स्थापनार्थं मम आलयं विपुलमावासस्थानं देहीत्यर्थो बोध्यः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रक्षेति सोऽपि मेने त्वहं चिंतये चार्थशेषम् ॥ ९८ ॥ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां प्रथमे माहेश्वरखण्डे कौमारिकाखण्डे नारदार्जुनसंवादे दानभेदप्रशंसावर्णनंनाम चतुर्थोऽध्यायः ॥ ४ ॥ ॥ छ ॥ ॥ नारद उवाच ॥ ॥ ततोऽहं धर्मवर्माणं प्रोच्य तिष्ठे[1]द्धनं त्वयि ॥ कृत्यकाले ग्रहीष्यामीत्यागमं रैवतं गिरिम् ॥ १ ॥ आसं प्रमुदितश्चाहं पश्यंस्तं गिरिसत्तमम् ॥ आह्वयानं नरान्साधून्भूमेर्भुजमिवोच्छ्रितम् ॥ २ ॥ यस्मिन्नानाविधा वृक्षाः प्रकाशंते समंततः ॥ साधुं गृहपतिं प्राप्य पुत्रभार्यादयो यथा ॥ ३ ॥ मुदिता यत्र संतृप्ता वा[2]शंते कोकिलादयः ॥ सद्गुरोर्ज्ञानसंपन्ना यथा शिष्यगणा भुवि ॥ ४ ॥ यत्र तप्त्वा तपो मर्त्या यथेप्सितमवाप्नुयुः ॥ श्रीमहादेवमासाद्य भक्तो यद्वन्मनोरथम् ॥ ॥ ५ ॥ तस्याहं च गिरेः पार्थ समासाद्य महाशिलाम् ॥ शीतसौरभ्य[3]मंदेन प्रीणितोऽचिंतयं हृदि ॥ ६ ॥ तावन्मया स्थानमाप्तं यदतीव सुदुर्लभम् ॥ इदानीं ब्राह्मणार्थेऽहं कुर्वे तावदुपक्रमम् ॥ ७ ॥ ब्राह्मणाश्च विलोक्या मे ये हि पात्रतमा मताः ॥ तथा हि चात्र श्रूयंते वचांसि श्रुतिवादिनाम् ॥ ८ ॥ न जलोत्तरणे शक्ता यद्वन्नौः कर्णवर्जिता ॥ तद्वच्छ्रेष्ठोऽप्यनाचारो विप्रो नोद्धरणक्षमः ॥ ९ ॥ ब्राह्मणो ह्यनधीयानस्तृणाग्निरिव शाम्यति ॥ तस्मै हव्यं न दातव्यं न हि भस्मनि हूयते ॥ १० ॥ दानपात्रमतिक्रम्य यदपात्रे प्रदीयते ॥ तद्दत्तं गामतिक्रम्य गर्दभस्य गवाह्निकम् ॥ ११ ॥ ऊषरे वापितं बीजं भिन्नभांडे च[4] गोदुहम् ॥ भस्मनीव हुतं हव्यं मूर्खे दानमशाश्वतम् ॥ १२ ॥ विधिहीने तथाऽपात्रे यो ददाति प्रतिग्रहम् ॥ न केवलं हि तद्याति शेषं पुण्यं प्रणश्यति ॥ १३ ॥ भूराप्ता गौस्तथा भोगाः सुवर्णं देहमेव च ॥ अश्वश्चक्षुस्तथा वासो घृतं तेजस्तिलाः प्रजाः ॥ १४ ॥ घ्नंति तस्मादविद्वांस्तु बिभियाच्च प्रतिग्रहात् ॥ स्वल्पकेनाप्यविद्वांस्तु पंके गौरिव सीदति ॥ १५ ॥ तस्माद्ये गूढतपसो गूढस्वाध्यायसाधकाः ॥ स्वदारनिरताः शांतास्तेषु दत्तं सदाऽक्षयम् ॥ १६ ॥ देशे काल उपायेन द्रव्यं श्रद्धासमन्वितम् ॥ पात्रे प्रदीयते यत्तत्सकलं धर्मलक्षणम् ॥ १७ ॥ न विद्यया केवलया तपसा वापि पात्रता ॥ यत्र वृत्तमिमे चोभे तद्धि पात्रं प्रचक्षते ॥ १८ ॥ तेषां त्रयाणां मध्ये च विद्या मुख्यो महागुणः ॥ विद्यां विनांधवद्विप्राश्चक्षुष्मंतो हि ते मताः ॥ १९ ॥ तस्माच्चक्षुष्मतो विद्वान्देशे देशे परीक्षयेत् ॥ प्रश्नान्ये मम वक्ष्यंति तेभ्यो दास्याम्यहं ततः ॥२०॥ इति संचिंत्य मनसा तस्माद्देशात्समुत्थितः ॥

१ धनं त्वयि तिष्ठेत्--इदानीं त्वत्समीप एव तिष्ठतु--कृत्यकाले--यदा धनस्य कार्यं स्यात्तदा तद्धनं ग्रहीष्यामि--इति योजना । २ वसन्ते--इ०पा० । ३ वायुनेति शेषः । ४ भिन्नभाण्डेषु--इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आश्रमेषु महर्षीणां विचराम्यस्मिं फाल्गुन ॥ २१ ॥ इमाञ्छ्लोकान्गायमानः प्रश्नरूपाञ्छृणुष्व तान् ॥ मातृकां को विजानाति कतिधा कीदृशा
क्षराम् ॥ २२ ॥ पंचपंचाद्भुतं गेहं को विजानाति वा द्विजः ॥ बहुरूपां स्त्रियं कर्तुमेकरूपां च वत्ति कः ॥ २३ ॥ को वा चित्रकथाबंधं वेत्ति संसार
गोचरः ॥ को वार्णवमहाग्राहं वेत्ति विद्यापरायणः ॥ २४ ॥ को वाष्टविधं ब्राह्मण्यं वेत्ति ब्राह्मणसत्तमः ॥ युगानां च चतुर्णां वा को मूलदिवसा
न्वदेत् ॥ २५ ॥ चतुर्दशमनूनां वा मूलवासरं वेत्ति कः ॥ कस्मिंश्चैव दिने प्राप पूर्वं वा भास्करो रथम् ॥ २६ ॥ उद्वेजयति भूतानि कृष्णाहिरिव
वेत्ति कः ॥ को वास्मिन्घोरसंसारे दक्षदक्षतमो भवेत् ॥ २७ ॥ पंथानावपि द्वौ कश्चिद्वेत्ति वक्ति च ब्राह्मणः ॥ इति मे द्वादश प्रश्नान्ये विदुर्ब्राह्मणो
त्तमाः ॥ २८ ॥ ते मे पूज्यतमास्तेषामहमाराधकश्चिरम् ॥ इत्यहं गायमानो वै भ्रमितः सकलां महीम् ॥ २९ ॥ ते चाहुर्दुःखदाः ख्याताः प्रश्नास्ते
कुर्महे नमः ॥ इत्यहं सकलां पृथ्वीं विचिंत्यालब्धब्राह्मणः ॥ ३० ॥ हिमाद्रिशिखरासीनो भूयश्चितामवाप्तवान् ॥ सर्वे विलोकिता विप्राः किमतः
कर्तुमुत्सहे ॥३१॥ ततो मे चिंतयानस्य पुनर्जाता मतिस्त्वियम् ॥ अद्यापि न गतश्चाहं कलापग्राममुत्तमम् ॥३२॥ यस्मिन्विप्राः संवसंति मूर्तानीव
तपांसि च ॥ चतुराशीतिसाहस्राः श्रुताध्ययनशालिनः ॥३३॥ स्थाने तस्मिन्गमिष्यामीत्युक्त्वाहं चलितस्तदा ॥ खेचरो हिममाक्रम्य परं पारं गत
स्ततः ॥३४॥ अद्राक्षं पुण्यभूमिस्थं ग्रामरत्नमहं महत् ॥ शतयोजनविस्तीर्णं नानावृक्षसमाकुलम् ॥ ३५ ॥ यत्र पुण्यवतां संति शतशः प्रवराश्रमाः ॥
सर्वेषामपि जीवानां यत्रान्योन्यं न दुष्टता ॥ ३६ ॥ यज्ञभाजां मुनीनां यदुपकारकरं सदा ॥ सतां धर्मवतां यद्वदुपकारो न शाम्यति ॥ ३७ ॥
मुनीनां यत्र परमं स्थानं चाप्यविनाशकृत् ॥ स्वाहास्वधावषट्कारहन्तकारो न नश्यति ॥३८॥ यत्र कृतयुगस्यार्थं बीजं पार्थावशिष्यते ॥ सूर्य
स्य सोमवंशस्य ब्राह्मणानां तथैव च ॥ ३९ ॥ स्थानकं तत्समासाद्य प्रविष्टोऽहं द्विजाश्रमान् ॥ तत्र ते विविधान्वादान्विवदंते द्विजोत्तमाः ॥४०॥
परस्परं चिंतयाना वेदा मूर्तिधरा यथा ॥ तत्र मेधाविनः केचिदर्थमन्यैः प्रपूरितम् ॥ ४१ ॥ विचिक्षिपुर्महात्मानो नभोगतमिवामिषम् ॥ तत्रा
हं करमुद्यम्य प्रावोचं पूर्यतां द्विजाः ॥ ४२ ॥ काकारावैः किमेतैर्वो यद्यस्ति ज्ञानशालिता ॥ व्याकुरुध्वं ततः प्रश्नान्मम दुर्विषहान्बहून् ॥ ४३ ॥
॥ ॥ ब्राह्मणा ऊचुः ॥ ॥ वद ब्राह्मण प्रश्नान्स्वाञ्छ्रुत्वाऽऽधास्यामहे वयम् ॥ परमो ह्येष नो लाभः प्रश्नान्पृच्छति यद्भवान् ॥ ४४ ॥ अहं

१ अस्मि--अहामित्यर्थकं विभक्तिप्रतिरूपकमव्ययमिदम् । २ इत्थम्--इ०पा० । ३ यत्र स्थानमनुत्तमम्--इ०पा० । ४ वितण्डानाम्--इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पूर्विकया ते वै न्यषेधंत परस्परम् ॥ अहं पूर्वमहं पूर्वमिति वीरा यथा रणे ॥ ४५ ॥ ततस्तानब्रवं प्रश्नानहं द्वादश पूर्वकान् ॥ श्रुत्वा ते मामवोचंत लीलायंतो मुनीश्वराः ॥ ४६ ॥ किं ते द्विज बालप्रश्नैरमीभिः स्वल्पकैरपि ॥ अस्माकं यन्नि[1]हीनं त्वं मन्यसे स ब्रवीत्वमून् ॥ ४७ ॥ ततोतिविस्मितश्चाहं मन्यमानः कृतार्थताम् ॥ तेषां निहीनं संचिंत्य प्रावोचं प्र[2]ब्रवीत्वयम् ॥ ४८ ॥ ततः सुतनुनामा स बालोऽबालोऽभ्युवाच माम् ॥ मम मंदायते वाणी प्रश्नैः स्वल्पैस्तव द्विज ॥ तथापि वच्मि मां यस्मान्निहीनं मन्यते भवान् ॥ ४९ ॥ ॥ सुतनुरुवाच ॥ ॥ अक्षरास्तु द्विपंचाशन्मातृकायाः प्रकीर्तिताः ॥ ५० ॥ ॐकारः प्रथमस्तत्र चतुर्दश स्वरास्तथा ॥ स्पर्शाश्चैव त्रयस्त्रिंशदनुस्वारस्तथैव च ॥ ५१ ॥ विसर्जनीयश्च परो जिह्वामूलीय एव च ॥ उपध्मानीय एवापि द्विपंचाशदमी स्मृताः ॥ ५२ ॥ इति ते कथिता संख्या अर्थं चैषां शृणु द्विज ॥ अस्मिन्नर्थे चेतिहासं तव वक्ष्यामि यः[3] पुरा ॥ ५३ ॥ मिथिलायां प्रवृत्तोऽभूद्ब्राह्मणस्य निवेशने ॥ मिथिलायां पुरा पुर्यां ब्राह्मणः कौथुमाभिधः ॥ ५४ ॥ येन विद्याः प्रपठिता वर्तंते भुवि या द्विज ॥ एकत्रिंशत्सहस्राणि वर्षाणां सँ[4] कृतादरः ॥ ५५ ॥ क्षणमप्यनवच्छिन्नं पठित्वा गेहवानभूत् ॥ ततः केनापि कालेन कौथुमस्याभवत्सुतः ॥ ५६ ॥ जडवद्वर्त्तमानः स मातृकां प्रत्यपद्यत ॥ पठित्वा मातृकामन्यन्नाध्येति स कथंचन ॥ ५७ ॥ ततः पिता खिन्नरूपी जडं तं समभाषत ॥ अधीष्व पुत्रकाधीष्व तव दास्यामि मोदकान् ॥ ५८ ॥ अथान्यस्मै प्रदास्यामि कर्णावुत्पाटयामि ते ॥ ५९ ॥ ॥ पुत्र उवाच ॥ ॥ तात किं मोदकार्थाय पठ्यते लोभहेतवे ॥ पठनंनाम यत्पुंसां परमार्थं हि तत्स्मृतम् ॥ ६० ॥ ॥ कौथुम उवाच ॥ ॥ एवं ते वदमानस्य आयुर्भवतु ब्राह्मणः ॥ साध्वी बुद्धिरियं तेऽस्तु कुतो नाध्येष्यतः परम् ॥ ६१ ॥ ॥ पुत्र उवाच ॥ ॥ तात सर्वं परिज्ञेयं ज्ञातमत्रैव वै यतः ॥ ततः परं कं[5]ठशोषः किमर्थं क्रियते वद ॥ ६२ ॥ ॥ पितोवाच ॥ ॥ विचित्रं भाषसे बाल ज्ञातोऽत्रार्थश्च कस्त्वया ॥ ब्रूहि ब्रूहि पुनर्वत्स श्रोतुमिच्छामि ते गिरम् ॥ ६३ ॥ ॥ पुत्र उवाच ॥ ॥ एकत्रिंशत्सहस्राणि पठित्वापि त्वया पितः ॥ नानातर्कान्भ्रांतिरेव संधिता मनसि स्वके ॥ ६४ ॥ अयमयं चायमिति धर्मो यो दर्शनोदितः ॥ तेषु वातायते चेतस्तव तं[6]न्नाशयामि ते ॥ ६५ ॥ उपदेशं पठस्येव नैवार्थं[7]ज्ञोऽसि तत्त्वतः ॥ पाठमात्रा हि ये विप्रा द्विपदाः पशवो हि ते ॥ ६६ ॥ तत्ते ब्रवीमि तद्वाक्यं मोहमार्तंडमद्भुतम् ॥ ६७ ॥ अकारः कथितो ब्रह्मा उकारो

१ अस्माकं मध्ये यं ब्राह्मणं प्रति निहीनं प्रज्ञया मन्दं स्वल्पज्ञं पण्डितं मन्यसे स ब्राह्मणोऽमूंस्त्वत्कृतान्प्रश्नान्ब्रवीतु । महतां पण्डितानामुत्तरदानयोग्यस्थेमानस्त्वत्प्रश्ना न सन्तीति भावः । २ च ब्रवीत्वयम्–इ० पा० ।
३ यः–इ० पा० । ४ ललमानः–इ० पा० । ५ कायशोषः–इ० पा० । ६ यत्–इ० पा० । ७ नैवार्थं शंसि तत्त्वतः–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विष्णुरुच्यते ॥ मकारश्च स्मृतो रुद्रस्त्रयश्चैते गुणाः स्मृताः ॥ ६८ ॥ अर्धमात्रा च या मूर्ध्नि परमः स सदाशिवः ॥ एवमोंकारमाहात्म्यं श्रुतिरेषा[1] सनातनी॥६९॥ ॐकारस्य च माहात्म्यं याथात्म्येन न शक्यते[2] ॥ वर्षाणामयुतेनापि ग्रंथकोटिभिरेव वा ॥७०॥ पुनर्यत्सारसर्वस्वं प्रोक्तं तच्छ्रूयतां परम् ॥ अःकारांता अकाराद्या मनवस्ते चतुर्दश ॥ ७१ ॥ स्वायंभुवश्च स्वारोचिरौत्तमो रैवतस्तथा ॥ तामसश्चाक्षुषः षष्ठस्तथा वैवस्वतोऽधुना ॥ ॥७२॥ सावर्णिर्ब्रह्मसावर्णी रुद्रसावर्णिरेव च ॥ दक्षसावर्णिरेवापि धर्मसावर्णिरेव च ॥७३॥ रौच्यो भौत्यस्तथा चापि मनवोऽमी चतुर्दश ॥ श्वेतः पांडुस्तथा रक्तस्ताम्रः पीतश्च कापिलः ॥७४॥ कृष्णः श्यामस्तथा धूम्रः सुपिशंगः पिशंगकः ॥ त्रिवर्णः शबलो वर्णैः कर्कंधुर इति क्रमात् ॥ ७५ ॥ वैवस्वतः क्षकारश्च तात[4] कृष्णः प्रदृश्यते[3] ॥ ककाराद्या हकारांतास्त्रयस्त्रिंशच्च देवताः ॥ ७६ ॥ ककाराद्याष्ठकारांता आदित्या द्वादश स्मृताः ॥ धाता मित्रोऽर्यमा शक्रो वरुणश्चांशुरेव च ॥ ७७ ॥ भगो विवस्वान्पूषा च सविता दशमस्तथा ॥ एकादशस्तथा त्वष्टा विष्णुर्द्वादश उच्यते ॥ ७८ ॥ जघन्यजः स सर्वेषामादित्यानां गुणाधिकः ॥ डकाराद्या बकारांता रुद्राश्चैकादशैव तु ॥ ७९ ॥ कपाली पिंगलो भीमो विरूपाक्षो विलोहितः ॥ अजकः शासनः शास्ता शंभुश्चण्डो भवस्तथा ॥ ८० ॥ भकाराद्याः षकारांता अष्टौ हि वसवो मताः ॥ ध्रुवो घोरश्च सोमश्च आपश्चैव नलोऽनिलः ॥ ८१ ॥ प्रत्यूषश्च प्रभासश्च अष्टौ ते वसवः स्मृताः ॥ सौ हश्चेत्यश्विनौ ख्यातौ त्रयस्त्रिंशदिमे स्मृताः ॥ ८२ ॥ अनुस्वारो विसर्गश्च जिह्वामूलीय एव च ॥ उपध्मानीय इत्येते जरायुजास्तथांडजाः ॥ ८३ ॥ स्वेदजाश्चोद्भिजाश्चेति तत जीवाः प्रकीर्तिताः॥ भावार्थः कथितश्चायं तत्त्वार्थं शृणु सांप्रतम् ॥ ८४ ॥ ये पुमांसस्त्वमून्देवान्समाश्रित्य क्रियापराः ॥ अर्धमात्रात्मके नित्ये पदे लीनास्त एव हि ॥ ८५ ॥ चतुर्णां जीवयोनीनां तदैव परिमुच्यते ॥ यदाभून्मनसा वाचा कर्मणा च[5] यजेत्सुरान् ॥ ८६ ॥ यस्मिञ्छास्त्रे त्वमी देवा मानिता नैव पापिभिः ॥ तच्छास्त्रं हि न मंतव्यं यदि ब्रह्मा स्वयं वदेत् ॥ ८७ ॥ अमी च देवाः सर्वत्र श्रौते मार्गे प्रतिष्ठिताः ॥ पाषण्डशास्त्रे सर्वत्र निषिद्धाः पापकर्मभिः ॥ ८८ ॥ तदमून्ये व्यतिक्रम्य तपो दानमथो जपम् ॥ प्रकुर्वंति दुरात्मानो वेपंते[6] मरुतः पथि ॥ ८९ ॥ अहो मोहस्य माहात्म्यं पश्यताविजितात्मनाम् ॥ पठंति मातृकां पापा मन्यंते न सुरानिह ॥ ९० ॥ ॥ सुतनुरुवाच ॥ ॥ इति तस्य वचः श्रुत्वा पिताभूदतिविस्मितः ॥ पप्रच्छ च बहून्प्रश्नान्सोप्य

१ एषा ॐकाररूपा—सनातनी—श्रुतिः--सर्ववेदानामोंकारप्रभवत्वात्--"यो वेदादौ स्वरः प्रोक्तः"इत्याद्युक्तेः—'तस्य वाचकः प्रणवः' इति सनातनब्रह्मवाचकत्वादोंकारस्य सनातनत्वम् । २ वर्णयितुमिति शेषः । ३ प्रयस्यते--इ०, प्रपश्यते--इ० च पा० । ४ तत--तातेत्यर्थे ह्रस्वपूर्वोऽपि ततशब्दः । ५ भजते पुमान्--इ० पा० । ६ भ्रमंति--इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वादीत्तथातथा ॥ ९१ ॥ मयापि तव प्रोक्तोऽयं मातृकाप्रश्न उत्तमः ॥ द्वितीयं शृणु तं प्रश्नं पंचपंचाद्भुतं गृहम् ॥ ९२ ॥ पंचभूतानि पञ्चैव कर्मज्ञानेंद्रियाणि च ॥ पंच पंचापि विषया मनोबुद्ध्यहमेव च ॥ ९३ ॥ प्रकृतिः पुरुषश्चैव पञ्चविंशः सदाशिवः ॥ पञ्चपञ्चभिरेतैस्तु निष्पन्नं गृहमुच्यते ॥ ९४ ॥ देहमेतदिदं वेद तत्त्वतो यात्यसौ शिवम् ॥ बहुरूपां स्त्रियं प्राहुर्बुद्धिं वेदांतवादिनः ॥ ९५ ॥ सा हि नानार्थभजनान्नानारूपं प्रपद्यते ॥ धर्मस्यैकस्य संयोगाद्बहुधाप्येकिकैव सा ॥ ९६ ॥ इति यो वेद तत्त्वार्थं नासौ नरकमाप्नुयात् ॥ मुनिभिर्यच्च न प्रोक्तं यन्न मन्येत दैवतान् ॥ ९७ ॥ वचनं तद्बुधाः प्राहुर्बंधं चित्रकथं त्विति ॥ यच्च कामान्वितं वाक्यं पंचमं वाप्यतः शृणु ॥ ९८ ॥ एको लोभो महान्ग्राहो लोभात्पापं प्रवर्तते ॥ लोभात्क्रोधः प्रभवति लोभात्कामः प्रवर्तते ॥ ९९ ॥ लोभान्मोहश्च माया च मानः स्तम्भः परेप्सुता[1] ॥ अविद्याऽप्रज्ञता चैव सर्वं लोभात्प्रवर्तते ॥ १०० ॥ हरणं परवित्तानां परदाराभिमर्शनम् ॥ साहसानां च सर्वेषामकार्याणां क्रियास्तथा ॥ १०१ ॥ स लोभः सह मोहेन विजेतव्यो जितात्मना ॥ दम्भो द्रोहश्च निंदा च पैशुन्यं मत्सरस्तथा ॥ १०२ ॥ भवन्त्येतानि सर्वाणि लुब्धानामकृतात्मनाम् ॥ सुमहांत्यपि शास्त्राणि धारयंति बहुश्रुताः ॥ १०३ ॥ छेत्तारः संशयानां च लोभग्रस्ता[2] व्रजंत्यधः ॥ लोभक्रोधप्रसक्ताश्च शिष्टाचारबहिष्कृताः ॥ १०४ ॥ अन्तःक्षुरा वाङ्मधुराः कूपाश्छन्नास्तृणैरिव ॥ कुर्वते ये बहून्मार्गांस्तांस्तान्हेतुबलान्विताः ॥ १०५ ॥ सर्वमार्गं विलुंपंति लोभाज्ज्ञातिषु निष्ठुराः ॥ धर्मावतंसकाः क्षुद्रा मुष्णंति ध्वजिनो[3] जगत् ॥ १०६ ॥ एतेऽतिपापिनो ज्ञेया नित्यं लोभसमन्विताः ॥ जनको युवनाश्वश्च वृषादर्भिः प्रसेनजित् ॥ ॥ १०७ ॥ लोभक्षयाद्दिवं प्राप्तास्तथैवान्ये जनाधिपाः ॥ तस्मात्त्यजंति ये लोभं तेऽतिक्रामंति सागरम् ॥ १०८ ॥ संसाराख्यमतोऽन्ये ये ग्राहग्रस्ता न संशयः ॥ अथ ब्राह्मणभेदांस्त्वमष्टौ विप्रावधारय ॥ १०९ ॥ मात्रश्च ब्राह्मणश्चैव श्रोत्रियश्च ततः परम् ॥ अनूचानस्तथा भ्रूण ऋषिकल्प ऋषिर्मुनिः ॥ ११० ॥ एते ह्यष्टौ समुद्दिष्टा ब्राह्मणाः प्रथमं श्रुतौ ॥ तेषां परः परः श्रेष्ठो विद्यावृत्तविशेषतः ॥ १११ ॥ ब्राह्मणानां कुले जातो जातिमात्रो यदा भवेत् ॥ अनुपेतः क्रियाहीनो मात्र इत्यभिधीयते ॥ ११२ ॥ एकोद्देश्यमतिक्रम्य[4] वेदस्याचारवानृजुः ॥ स ब्राह्मण इति प्रोक्तो निभृतः सत्यवाग्घृणी ॥ ११३ ॥ एकां शाखां सकल्पां च षड्भिरंगैरधीत्य च ॥ षट्कर्मनिरतो विप्रः श्रोत्रियोनाम धर्मवित् ॥ ११४ ॥ वेदवेदांगत

१ परेप्सुता—परधनलिप्सेत्यर्थः । २ लोभत्रस्ताः—इ० पा० । ३ ध्वजिनः—धर्मध्वजिनः—दांभिकतया धृतधार्मिकवेषाः—इत्यर्थः । ४ एकोद्देश्यमतिक्रम्य—कामनां वर्जयित्वा—वेदस्याचारवान्—वेदोदितसदाचारकर्मानुष्ठानतत्पर इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्वज्ञः शुद्धात्मा पापवर्जितः ॥ श्रेष्ठः श्रोत्रियवान्प्राज्ञः सोऽनूचान इति स्मृतः ॥११५॥ अनूचानगुणोपेतो यज्ञस्वाध्याययंत्रितः ॥ भ्रूण इत्युच्यते शिष्टैः शेषभोजी जितेंद्रियः ॥११६॥ वैदिकं लौकिकं चैव सर्वज्ञानमवाप्य यः ॥ आश्रमस्थो वशी नित्यमृषिकल्प इति स्मृतः ॥११७॥ ऊर्ध्वरेता भवत्यग्र्यो नियताशी नसंश यी ॥ शापानुग्रहयोः शक्तः सत्यसंधो भवेदृषिः ॥ ११८ ॥ निवृत्तः सर्वतत्त्वज्ञः कामक्रोधविवर्जितः ॥ ध्यानस्थो निष्क्रियो दांतस्तुल्यमृत्कांचनो मुनिः ॥ ११९ ॥ एवमन्वयविद्याभ्यां वृत्तेन च समुच्छ्रिताः ॥ त्रिशुक्लानाम विप्रेंद्राः पूज्यन्ते सवनादिषु ॥१२०॥ इत्येवंविधविप्रत्वमुक्तं शृणु युगादयः ॥ नवमी कार्तिके शुक्ला कृतादिः परिकीर्तिता ॥ १२१ ॥ वैशाखस्य तृतीया या शुक्ला त्रेतादिरुच्यते ॥ माघे पञ्चदशीनाम द्वापरादिः स्मृता बुधैः ॥ १२२ ॥ त्रयोदशी नभस्ये च कृष्णा सा हि कलेः स्मृता ॥ युगादयः स्मृता ह्येता दत्तस्याक्षयकारकाः ॥ १२३ ॥ एताश्चतस्रस्तिथयो युगाद्या दत्तं हुतं चाक्षयमाशु विद्यात् ॥ युगेयुगे वर्षशतेन दानं युगादिकाले दिवसेन तत्फलम् ॥ १२४ ॥ युगाद्याः कथिता ह्येता मन्वाद्याः शृणु सांप्रतम् ॥ अश्वयुक्छुक्लनवमी द्वादशी कार्तिके तथा ॥ १२५ ॥ तृतीया चैत्रमासस्य तथा भाद्रपदस्य च ॥ फाल्गुनस्य त्वमावास्या पौषस्यैकादशी तथा ॥ १२६ ॥ आषाढस्यापि दशमी माघमासस्य सप्तमी ॥ श्रावणस्याष्टमी कृष्णा तथाषाढी च पूर्णिमा ॥ १२७ ॥ कार्तिकी फाल्गुनी चैत्री ज्येष्ठे पञ्चदशी सिता ॥ मन्वंतरादयश्चैता दत्तस्याक्षयकारकाः ॥ १२८ ॥ यस्यां तिथौ रथं पूर्वं प्राप देवो दिवाकरः ॥ सा तिथिः कथिता विप्रैर्माघे या रथसप्तमी ॥ १२९ ॥ तस्यां दत्तं हुतं चेष्टं सर्वमेवाक्षयं मतम् ॥ सर्वदारिद्र्यशमनं भास्करप्री

---

१ श्रोत्रियवान्--वेदाद्यध्ययनपरायणशिष्यवृन्दसम्पन्न इत्यर्थः । २ युगादयो या भवन्ति ता इति शेषः । ३ पंचदशी--अमा--बोध्या । न तु पूर्णिमा । तथा च मन्वादि–युगादितिथिवर्णनं मुहूर्तचिंतामणौ प्रथमे शुभाशुभप्रकरणे "मन्वाद्यास्त्रितिथी मधौ तिथिरवी ऊर्जे शुचौ दिक्तिथी ज्येष्ठेन्त्ये च तिथिस्त्विषे नव तपस्यश्वाः सहस्ये शिवाः । भाद्रेऽग्निश्च सिते त्वमाष्ट नभसः कृष्णे युगाद्याः सिते गोऽग्नी बाहुलराधयोर्मदनदर्शौ भाद्रमाघासिते ॥ ९७ ॥" इति । अत्रेदं तावद्विचार्यं–माघकृष्णामा–द्वापरादिः, भाद्रपदकृष्णत्रयोदशी कलियुगादिः, इति मूले स्पष्टमुक्तम् । परं तदेतत्–'मदनदर्शौ भाद्रमाघासिते' इत्यनेन मुहूर्तचिन्तामणिस्थवचनेन विरुध्यते । तत्र हि यथासंख्यमित्युक्त्वा पीयूषधाराव्याख्यायां भाद्रपदकृष्णत्रयोदशी द्वापरादिः, माघकृष्णामा कल्यादिरिति स्पष्टं व्याख्यातम् । एवं प्रमाणद्वैधे सन्देहः संतिष्ठते । तदर्थं प्रमाणान्तरं तावदन्वेषणीयं स्यात् । तच्च यथोक्तं पीयूषधारायां नारदवचनं–"कार्तिके शुक्लनवमी चादिः कृतयुगस्य सा । त्रेतादिर्माधवे शुक्ला तृतीया पुण्यसंमिता ॥ कृष्णा पंचदशी माघे द्वापरादिरुदीरिता । कल्यादिः स्यात्कृष्णपक्षे नभस्ये च त्रयोदशी ॥" इति । एतेन चेदं सिद्धं–युगादितिथीनामत्र मूल एवोक्तः क्रमः समीचीन इति । मुहूर्तचिन्तामणिकारैः स्वीकृतः क्रमो नैतत्प्रमाणद्वयगोचरः । स्यात्स प्रमाणान्तरगोचरस्तत्र प्रमाणवचनं मृग्यम् । ४ एता मन्वादितिथयो मुहूर्तचिन्तामण्युक्तरीत्यपेक्षया पौर्वापर्यक्रमे विसंवादानुक्रमा दृश्यन्ते । स्वायंभुवादिमनूनामाश्विनशुक्लनवम्यादिः क्रमोऽत्र मूले, चैत्रशुक्लतृतीयादिः क्रमो मुहूर्तचिन्तामणौ । अत्र च निर्णयः सुधीभिः प्रमाणांतरं परिचिन्त्य बोद्धव्यः । यथा श्रुत एवात्र स्वायंभुवादिमन्वादिपरिसंख्यया बोध्यः । ५ इष्टम्–पूजनं कृतमित्यर्थः । हुतमित्यनेनैव यज्ञस्योक्तत्वादपौनरुक्त्या वायमेवार्थः साधुः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तये मतम् ॥१३०॥ नित्योद्वेजकमाहुर्यं बुधास्तं शृणु तत्त्वतः ॥ यश्च याचनिको नित्यं न स स्वर्गस्य भाजनम् ॥१३१॥ उद्वेजयति भूतानि यथा चौरास्तथैव सः ॥ नरकं याति पापात्मा नित्योद्वेगकरस्त्वसौ ॥ १३२ ॥ इहोपपत्तिर्मम केन कर्मणा क्व च प्रयातव्यमितो मयेति ॥ विचार्य चैवं प्रतिकारकारी बुधैः स चोक्तो द्विज दक्षदक्षः ॥ १३३ ॥ मासैरष्टभिरह्ना च पूर्वेण वयसायुषा ॥ तत्कर्म पुरुषः कुर्याद्येनांते सुखमेधते ॥ १३४ ॥ अर्चिर्धूमश्च मार्गौ द्वावाहुर्वेदांतवादिनः॥अर्चिषा याति मोक्षं च धूमेनावर्तते पुनः॥१३५॥यज्ञैरासाद्यते धूमो नैष्कर्म्येणार्चिराप्यते॥एतयोरपरो मार्गः पाखंड इति कीर्त्यते॥१३६॥यो देवान्मन्यते नैव धर्मांश्च मनुसूचितान्॥नैतौ स याति पंथानौ तत्त्वार्थोऽयं निरूपितः॥१३७॥इति ते कीर्तिताः प्रश्नाः शक्त्या ब्राह्मणसत्तम ॥ साधु वाऽसाधु वा ब्रूहि ख्यापयात्मानमेव च ॥ १३८ ॥ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां प्रथमे माहेश्वरखण्डे कौमारिकाखण्डे कलापग्रामवासिसुतनुब्राह्मणेन नारदप्रश्नोत्तरकथनंनाम पंचमोऽध्यायः ॥ ५ ॥ ॥ छ ॥ ॥ श्रीनारद उवाच ॥ ॥ इति श्रुत्वा फाल्गुनाहं रोमांचपुलकीकृतः ॥ स्वरूपं प्रकटीकृत्य ब्राह्मणानिदमब्रवम् ॥ १ ॥ अहो धन्यः पितास्माकं यस्य सृष्टस्य पालकाः ॥ युष्मद्विधा ब्राह्मणेंद्राः सत्यमाह पुरा हरिः ॥ २ ॥ मत्तोऽप्यनंतात्परतः परस्मात्समस्तभूताधिपतेर्न किंचित् ॥ तेषां किमु स्यादितरेण येषां द्विजेश्वराणां मम मार्गवादिनाम् ॥ ३ ॥ तत्सर्वथाद्य धन्योऽस्मि संप्राप्तं जन्मनः फलम् ॥ यद्भवन्तो मया दृष्टाः पापोपद्रववर्जिताः[1] ॥ ४ ॥ ततस्ते सहसोत्थाय शातातपपुरोगमाः ॥ अर्घ्यपाद्यादिसत्कारैः पूजयामासुर्मां द्विजाः ॥ ५ ॥ प्रोक्तवन्तश्च मां पार्थ वचः साधुजनोचितम्[2] ॥ धन्या वयं हि देवर्षे त्वमस्मान्यदिहागतः ॥ ६ ॥ कुतो वाऽऽगमनं तुभ्यं गन्तव्यं वा क्व सांप्रतम् ॥ अत्राप्यागमने कार्यमुच्यतां मुनिसत्तम ॥ ७ ॥ श्रुत्वा प्रीतिकरं वाक्यं द्विजानामिति पांडव ॥ प्रत्यवोचं मुनीन्द्रांस्ताञ्छ्रूयतां द्विजसत्तमाः ॥ ८ ॥ अहं हि ब्रह्मणो वाक्याद्विप्राणां स्थानकं शुभम् ॥ दातुकामो महातीर्थे महीसागरसंगमे ॥ ९ ॥ परीक्षन्ब्राह्मणानत्र प्राप्तो यूयं परीक्षिताः ॥ अहं वः स्थापयिष्यामि चानुजानीत[3] तद्द्विजाः ॥ १० ॥ एवमुक्तो विलोक्यैव द्विजाञ्छातातपोऽब्रवीत् ॥ देवानामपि दुष्प्राप्यं सत्यं नारद भारतम् ॥ ११ ॥ किं पुनश्चापि तत्रैव महीसागरसंगमः ॥ यत्र स्नातो महातीर्थफलं सर्वमुपाश्नुते ॥ १२ ॥ पुनरेको महान्दोषो बिभीमो नितरां यतः ॥ तत्र चौराः सुबहवो निर्घृणाः

---

१ पापोद्भवविवर्जिताः–इ० पा० । २ साधुजनोदितम्–इ० पा० । ३ चानुजीवत–इ० पा० ।

CC-0. In Public Domain. Digitization by eGangotri

प्रियसाहसाः ॥ १३ ॥ स्पर्शेषु[1] षोडशं चैकविंशं गृह्णंति नो धनम् ॥ धनेन तेन हीनानां कीदृशं जन्म नो भवेत् ॥ १४ ॥ वरं बुभुक्षया वासो मा चौरकरगा[2] वयम् ॥ ॥ अर्जुन उवाच ॥ ॥ अद्भुतं वर्ण्यते विप्र के हि चौराः प्रकीर्तिताः ॥ १५ ॥ किं धनं च हरंत्येते येभ्यो बिभ्यति ब्राह्मणाः ॥ ॥ ॥ नारद उवाच ॥ ॥ कामक्रोधादयश्चौरास्तप एव धनं तथा ॥ १६ ॥ तस्यापहारभीतास्ते मामूचुरिति ब्राह्मणाः ॥ तानहं प्राब्रवं पश्चाद्वि[3]जानीत द्विजोत्तमाः ॥ १७ ॥ जाग्रतां तु मनुष्याणां चौराः कुर्वंति किं खलाः ॥ भयभीतश्चालसश्च तथा चाशुचिरेव यः ॥ १८ ॥ तेन किं नाम संसाध्यं भूमिस्तं ग्रसते नरम् ॥ १९ ॥ ॥ शातातप उवाच ॥ ॥ वयं चौरभयाद्भीतास्ते हरंति धनं महत् ॥ कर्तुं तदा कथं शक्यमंगजागरणं तथा ॥ २० ॥ खलाश्चौरा गताः क्वापि ततो नत्वाऽऽगता वयम् ॥ तस्मात्सर्वं संत्यजामो भयभीता वयं मुने ॥ २१ ॥ प्रतिग्रहश्च वै घोरः षष्ठांऽशफलदस्तथा ॥ एवं ब्रुवति तस्मिंश्च हारीतोनाम चाब्रवीत् ॥ २२ ॥ मूढबुद्ध्या हि को नाम महीसागरसंगमम् ॥ त्यजेच्च यत्र मोक्षश्च स्वर्गश्च करगोऽथ वा ॥ २३ ॥ कलापादिषु ग्रामेषु को वसेत् विचक्षणः ॥ यदि वासः स्तम्भतीर्थे क्षणार्धमपि लभ्यते ॥ २४ ॥ भयं च चौरजं सर्वं किं करिष्यति तत्र नः ॥ कुमारनाथं मनसि पालकं कुर्वतां दृढम् ॥ २५ ॥ साहसं च विना भूतिर्न कथंचन प्राप्यते ॥ तस्मान्नारद तत्राहमायास्ये तव वाक्यतः ॥ २६ ॥ षड्विंशतिसहस्राणि ब्राह्मणा मे परिग्रहे ॥ षट्कर्मनिरताः शुद्धा लोभदम्भविवर्जिताः ॥ २७ ॥ तैः सार्धमागमिष्यामि ममेदं मतमुत्तमम् ॥ इत्युक्ते वचने तांश्च कृत्वाहं दंडमूर्धनि[5] ॥ २८ ॥ निवृत्तः सहसा पार्थ खेचरोऽतिमुदान्वितः ॥ शतयोजनमात्रं तु हिममार्गमतीत्य च ॥ २९ ॥ केदारं समुपायातो युक्तस्तैर्द्विजसत्तमैः ॥ आकाशेन सुशक्यश्च बिलेनाथ स देशकः ॥ ३० ॥ अतिक्रांतुं नान्यथा च तथा स्कंदप्रसादतः ॥ ३१ ॥ ॥ अर्जुन उवाच ॥ क्व कलापं च तद्ग्रामं कथं शक्यं बिलेन च ॥ कथं स्कंदप्रसादः स्यादेतन्मे ब्रूहि नारद ॥ ३२ ॥ ॥नारद उवाच॥ ॥ केदाराद्धिमसंयुक्तं योजनानां शतं स्मृतम् ॥ तदंते योजनशतं विस्तृतं तत्कलापकम् ॥ ३३ ॥ तदंते योजनशतं वालुकार्णवमुच्यते ॥ शतयोजनमात्रः स भूमिस्वर्गस्ततः स्मृतः ॥ ३४ ॥ बिलेन च यथा शक्यं गंतुं तत्र शृणुष्व तत् ॥ निरन्नं वै निरुदकं देवमाराधयेद्गुहम् ॥ ३५ ॥ दक्षिणायां दिशि ततो निष्पापं मन्यते यदा ॥ तदा गुहोऽस्य दिशति स्वप्ने गच्छेति भारत ॥ ३६ ॥ ततो गुहात्पश्चिमतो बिल

१ कादयो मावसानाः स्पर्शाः, तत्र कादिष्वक्षरेषु षोडशं 'त' इति, एकविंशं 'प' इति, एवं च 'तप' इति जातम्, तदेव धनं तपोरूपं धनमित्यर्थो निष्पन्नः। २ चौरवशगाः—इ० पा०। ३ ब्राह्मणा अकुतोभयम्—इ० पा०। ४ जितक्रोधमनुष्याणाम्—इ० पा०। ५ अहं तान्ब्राह्मणान्मम दण्डस्य यष्टीकृतस्य मूर्धनि मस्तके कृत्वा स्थापयित्वेत्यर्थः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मस्ति बृहत्तरम् ॥ तत्र प्रविश्य गंतव्यं क्रमाणां शतसप्तकम् ॥ ३७ ॥ तत्र मारकतं लिंगमस्ति सूर्यसमप्रभम् ॥ तदग्रे मृत्तिका चास्ति स्वर्ण वर्णा सुनिर्मला ॥ ३८ ॥ नमस्कृत्य च तल्लिंगं गृहीत्वा मृत्तिकां च ताम् ॥ आगंतव्यं स्तंभतीर्थे समाराध्य कुमारकम् ॥ ३९ ॥ कोलं वा कूपतो ग्राह्यं भूतायां निशि तज्जलम् ॥ तेनोदकेन मृत्तिकया कृत्वा नेत्रद्वयाञ्जनम् ॥ ४० ॥ उद्वर्तनं च देहस्य कदाचित्षष्टिमे पदे ॥ नेत्रांजनप्रभावाच्च बिलं पश्यति शोभनम् ॥ ४१ ॥ तन्मध्येन ततो याति गात्रोद्वर्त्तप्रभावतः ॥ कारीषैर्नाम चात्युग्रैर्भक्ष्यते नैव कीटकैः ॥ ४२ ॥ बिलमध्ये च संपश्यन्सिद्धान्भास्करसन्निभान् ॥ यात्येवं यात्यसौ पार्थ कलापं ग्राममुत्तमम् ॥ ४३ ॥ तत्र वर्षसहस्राणि चत्वार्यायुःप्रकीर्तितम् ॥ फलानां भोजनं च स्यात्पुनः पुण्यं च नार्ज्जयेत् ॥ ४४ ॥ इत्येतत्कथितं तुभ्यमतश्चाभूच्छृणुष्व तत् ॥ तपःसामर्थ्यतः सूक्ष्मान्दण्डस्याग्रे निधाय तान् ॥ ॥ ४५ ॥ द्विजानहं समायातो महीसागरसंगमम् ॥ ४६ ॥ तदोत्तार्य मया मुक्तास्तीरे पुण्यजलाशये ॥ ततो मया कृतं स्नानं सह तैर्द्विजसत्तमैः ॥ ॥ ४७ ॥ निःशेषदोषदावाग्नौ महीसागरसंगमे ॥ पितॄणां देवतानां च कृत्वा तर्पणसत्क्रियाः ॥ ४८ ॥ जपमानाः परं जप्यं निविष्टाः संगमे वयम् ॥ भास्करं समवेक्षंतश्चिंतयंतो हरिं हृदि ॥ ४९ ॥ तस्मिंश्चैवांतरे पार्थ देवाः शक्रपुरोगमाः ॥ आदित्याद्या ग्रहाः सर्वे लोकपालाश्च संगताः ॥ ५० ॥ देवानां योनयो ह्यष्टौ गंधर्वाप्सरसां गणाः ॥ महोत्सवे ततस्तस्मिन्गीतवादित्र उत्तमे ॥ ५१ ॥ पादप्रक्षालनं कर्तुं विप्राणामुद्यतस्त्वहम् ॥ तस्मिन्काले चाश्शृणवमहमातिथ्यवाक्यताम् ॥ ५२ ॥ सामध्वनिसमायुक्तां तृतीयस्वरनादिताम् ॥ अतीव मनसो रम्यां शिव भक्तिमिवोत्तमाम् ॥५३॥ विप्रैरुत्थाय संपृष्टः कस्त्वं विप्र क्व चागतः ॥ किं वा प्रार्थयसे ब्रूहि यत्ते मनसि रोचते ॥५४॥ ॥ विप्र उवाच ॥ ॥ मुनिः कपिलनामाहं नारदाय निवेद्यताम् ॥ आगतः प्रार्थनायैव तच्छ्रुत्वाहमथाब्रवम् ॥ ५५ ॥ धन्योहं यदिहायातः कपिल त्वं महामुने ॥ नास्त्यदेयं तवास्माभिः पात्रं नास्ति तवाधिकम् ॥ ५६ ॥ ॥ कपिल उवाच ॥ ॥ ब्रह्मपुत्र त्वया देयं यदि मे त्वं शृणुष्व तत् ॥ अष्टौ विप्रसहस्राणि मम देहीति नारद ॥ ५७ ॥ भूमिदानं करिष्यामि कलापग्रामवासिनाम् ॥ ब्राह्मणानामहं चैषां तदिदं क्रियतां विभो ॥ ५८ ॥ ततो मया प्रतिज्ञातमेवमस्तु महामुने ॥ त्वयापि क्रियतां स्थानं कापिलं कपिलोत्तमम् ॥ ५९ ॥ श्राद्धे वा प्रातकाले वा ह्यतिथिर्विमुखीभवेत् ॥ यस्याश्रममुपायातस्तस्य सर्वं हि निष्फलम् ॥ ६० ॥ स गच्छेद्रौरवाँल्लोकान्योऽतिथिं नाभिपूजयेत् ॥ अतिथिः पूजितो येन स देवैरपि पूज्यते ॥ ६१ ॥ दानैर्यज्ञैस्त

१ माहेश्वरम्–इ० पा० । २ कूलं वा–इ० पा० । ३ षष्टिमे–षष्टितमे–इत्यर्थः । ४ निनीय–इ० पा० ।

CC-0. In Public Domain. Digitization by eGangotri

तस्तस्मिन्भोजितः कपिलो मुनिः ॥ ततो महामुनिः श्रीमान्हारीतो ह्वयितस्तदा ॥६२॥ पादप्रक्षालनार्थाय सिद्धदेवसमागमे ॥ हारीतश्च पुरस्कृत्य वामपादं तदा स्थितः ॥६३॥ ततो हासो महाञ्जज्ञे सिद्धाप्सरःसुपर्वणाम् ॥ विचिंत्य बहुधा पृथ्वीं साधु साधुकृता द्विजाः ॥६४॥ ततो ममापि मनसि शोकवेगो महानभूत् ॥ सत्यां चैव तथा मेने गाथां पूर्वबुधेरिताम् ॥६५॥ सर्वेष्वपि च कार्येषु हेतिशब्दो विगर्हितः ॥ कुर्वतामतिकार्याणि शिलापातो ध्रुवं भवेत ॥ ६६ ॥ ततोहमब्रवं विप्रान्यूयं मूर्खा भविष्यथ ॥ धनधान्याल्पसंयुक्ता दारिद्र्यकलिलावृताः ॥ ६७ ॥ एवमुक्ते प्रहस्यैव हारीतः प्राब्रवीदिदम् ॥ तवैवेयं मुने हानिर्यदस्माञ्छपते भवान् ॥ ६८ ॥ कः शापो दीयते तुभ्यं शापोयमयमेव ते ॥ ततो विमृश्य भूयोऽहमब्रवं किमहं द्विज ॥ ६९ ॥ तथाविधस्य भवतो वामपादप्रदानतः ॥ ७० ॥ ॥ हारीत उवाच ॥ ॥ शृणु तत्कारणं धीमञ्छून्यता मे यतो भवेत् ॥ ७१॥ इति चिंतयतश्चित्ते हा दुःखोऽयं प्रतिग्रहः ॥ प्रतिग्रहेण विप्राणां ब्राह्मं तेजो हि शाम्यति ॥ ७२ ॥ महादानं हि गृह्णानो ब्राह्मणः स्वं शुभं हि यत् ॥ ददाति दातुर्दाता च अशुभं यच्छति स्वकम् ॥ ७३ ॥ दाता प्रतिग्रहीता च वचनं हि परस्परम् ॥ मन्यतेऽधःकरो यस्य सोऽल्पबुद्धिः प्रहीयते ॥ ७४ ॥ इति चिंतयतो मह्यं शून्यताभूद्धि नारद ॥ निद्रार्तश्च भयार्तश्च कामार्तः शोकपीडितः ॥ ७५ ॥ हृतस्वश्चान्यचित्तश्च शून्या ह्येते भवंति च ॥ तदेषु मतिमान्कोपं न कुर्वीत यदि त्वया ॥ ७६ ॥ कृतः कोपस्ततस्तुभ्यमेवं हानिरियं मुने ॥ ततस्तांस्तापान्वितश्चाहं तान्विप्रानब्रवं पुनः ॥ ७७ ॥ धिङ्मामस्तु च दुर्बुद्धिमविमृश्यार्थकारिणम् ॥ कुर्वतामविमृश्यैव तत्किमस्ति न यद्भवेत् ॥७८॥ सहसा न क्रियां कुर्यात्पदमेतन्महापदाम् ॥ विमृश्यकारिणं धीरं वृणते सर्वसंपदः ॥ ७९ ॥ सत्यमाह महाबुद्धिश्चिरकारी पुरा हि सः ॥ पुरा हि ब्राह्मणः कश्चित्प्रख्यातोंगिरसां कुले ॥ ८० ॥ चिरकारी महाप्राज्ञो गौतमस्याभवत्सुतः ॥ चिरेण सर्वकार्याणि यो विमृश्य प्रपद्यते ॥ ८१ ॥ चिरकार्याभिसंपत्तेश्चिरकारी तथोच्यते ॥ अलसग्रहणं प्राप्तो दुर्मेधावी तथोच्यते ॥ ८२ ॥ बुद्धिलाघवयुक्तेन जनेनादीर्घदर्शिना ॥ व्यभिचारेण कस्मिन्स व्यतिक्रम्यापरान्सुतान् ॥ ८३ ॥ पित्रोक्तः कुपितेनाथ जहीमां जननीमिति ॥ स तथेति चिरेणोक्तः स्वभावाच्चिरकारकः ॥ ८४ ॥ विमृश्य चिरकारित्वाच्चिंतयामास वै चिरम् ॥ पितुराज्ञां कथं कुर्यां न हन्यां मातरं कथम् ॥ ८५ ॥ कथं धर्मच्छलेनास्मिन्निमज्जेयमसाधुवत् ॥ पितुराज्ञा परो धर्मो

१ ह्वयितः—आमन्त्रितः—प्रार्थित इत्यर्थः । २ शिवालापः—इ०पा० । ३ तपस्विनः—इ०पा० । ४ अमुमेवार्थं भारविकविः—"सहसा विदधीत न क्रियामविवेकः परमापदां पदम् । वृणते हि विमृश्यकारिणं गुणलुब्धाः स्वयमेव संपदः ॥" इत्यस्मिन्पद्ये निर्जगौ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ह्यधर्मो मातृरक्षणम् ॥ ८६ ॥ अस्वतंत्रं च पुत्रत्वं किं तु मां नात्र पीडयेत् ॥ स्त्रियं हत्वा मातरं च को हि जातु सुखी भवेत् ॥ ८७ ॥ पितरं चाप्यवज्ञाय कः प्रतिष्ठामवाप्नुयात् ॥ अनवज्ञा पितुर्युक्ता युक्तं मातुश्च रक्षणम् ॥ ८८ ॥ क्षमायोग्यावुभावेतौ नातिवर्तेत वै कथम् ॥ पिता ह्यात्मानमाधत्ते जायायां जज्ञिवानिति ॥ ८९ ॥ शीलचारित्रगोत्रस्य धारणार्थं कुलस्य च ॥ सोऽहमात्मा स्वयं पित्रा पुत्रत्वे परिकल्पितः ॥ ९० ॥ जातकर्मणि यत्प्राह पिता यच्चोपकर्मणि ॥ पर्याप्तः स दृढीकारः पितुर्गौरवलिप्सया ॥ ९१ ॥ शरीरादीनि देयानि पिता त्वेकः प्रयच्छति ॥ तस्मात्पितुर्वचः कार्यं न विचार्यं कथंचन ॥ ९२ ॥ पातकान्यपि चूर्यंते पितुर्वचनकारिणः ॥ पिता स्वर्गः पिता धर्मः पिता परमकं तपः ॥ ९३ ॥ पितरि प्रीतिमापन्ने सर्वाः प्रीणंति देवताः ॥ आशिषस्ता भजंत्येनं पुरुषं प्राह याः पिता ॥ ९४ ॥ निष्कृतिः सर्वपापानां पिता यदभिनंदति ॥ मुच्यते बंधनात्पुष्पं फलं वृंतात्प्रमुच्यते ॥ ९५ ॥ क्लिश्यन्नपि सुतः स्नेहं पिता स्नेहं न मुंचति ॥ एतद्विचिंत्य तं तावत्पुत्रस्य पितृगौरवम् ॥ ९६ ॥ पिता नाल्पतरं स्थानं चिंतयिष्यामि मातरम् ॥ यो ह्ययं मयि संघातो मर्त्यत्वे पांचभौतिकः ॥९७॥ अस्य मे जननी हेतुः पावकस्य यथारणिः ॥ माता देहारणिः पुंसः सर्वस्यार्थस्य निर्वृतिः ॥९८॥ मातृलाभे सनाथत्वमनाथत्वं विपर्यये ॥ न स शोचति नाप्येनं स्थावर्यमपि कर्षति ॥ ९९ ॥ श्रिया हीनोऽपि यो गेहे अंबेति प्रतिपद्यते ॥ पुत्रपौत्रसमापन्नो जननीं यः समाश्रितः ॥ १०० ॥ अपि वर्षशतस्यांते स द्विहायनवच्चरेत् ॥ समर्थं वाऽसमर्थं वा कृशं वाप्यकृशं तथा ॥ १ ॥ रक्षयेच्च सुतं माता नान्यः पोष्यविधानतः ॥ तदा स वृद्धो भवति तदा भवति दुःखितः ॥ २ ॥ तदा शून्यं जगत्तस्य यदा मात्रा वियुज्यते ॥ नास्ति मातृसमा च्छाया नास्ति मातृसमा गतिः ॥ ॥ ३ ॥ नास्ति मातृसमं त्राणं नास्ति मातृसमा प्रपा ॥ कुक्षिसंधारणाद्धात्री जननाज्जननी तथा ॥ ४ ॥ अंगानां वर्धनादंबा वीरसूत्वे च वीरसूः ॥ शिशोः शुश्रूषणाच्छुश्रूर्माता स्यान्माननात्तथा ॥ ५ ॥ देवतानां समावापमेकत्वं पितरं विदुः ॥ मर्त्यानां देवतानां च पूगो नात्येति मातरम् ॥ ६ ॥ पतिता गुरवस्त्याज्या माता च न कथंचन ॥ गर्भधारणपोषाभ्यां तेन माता गरीयसी ॥७॥ एवं स कौशिकीतीरे बलिं राजानमीक्षतीम् ॥ स्त्रीवृत्तिं चिरकालत्वाद्धन्तुं दिष्टः स्वमातरम् ॥ ८ ॥ विमृश्य चिरकालं हि चिंतांतं नाभ्यपद्यत ॥ एतस्मिन्नंतरे शक्रो ब्राह्मणं रूपमास्थितः ॥ ९ ॥ गायन्गा

१ पित्रा मातृहननविषयेऽनुज्ञायां कृतायामिदानीं मातृरक्षणम्--अधर्मः स्यात् अन्यथा सर्वदैव मातृरक्षणं हि पुत्रस्य धर्म एवेति रहस्यं बोध्यम् । २ अवाप्तवान्--इ० पा० । ३ नाभिवर्तेत--इ० पा० । ३ बाल्ये दुग्धपानप्रदत्वात्प्रपासादृश्यं मातुः । ४ नैव कदाचन--इ० पा० ।

थामुपायातः पितुस्तस्याश्रमांतिके ॥ अनृता हि स्त्रियः सर्वाः सूत्रकारो यदब्रवीत् ॥११०॥ अतस्ताभ्यः फलं ग्राह्यं न स्याद्दोषेक्षणः सुधीः ॥ इति श्रुत्वा तमानर्च मेधातिथिरुदारधीः ॥ ११ ॥ दुःखितश्चिंतयन्प्राप्तो भृशमश्रूणि वर्तयन् ॥ अहोऽहमीर्ष्ययाक्षिप्तो मग्नोऽहं दुःखसागरे ॥ १२ ॥ हत्वा नारीं च साध्वीं च को नु मां तारयिष्यति ॥ सत्वरेण मयाज्ञप्तश्चिरकारी ह्युदारधीः ॥१३॥ यद्ययं चिरकारी स्यात्स मां त्रायेत पातकात् ॥ चिरकारिक भद्रं ते भद्रं ते चिरकारिक ॥ १४ ॥ यदद्य चिरकारी त्वं ततोऽसि चिरकारिकः ॥ त्राहि मां मातरं चैव तपो[1] यच्चार्जितं मया ॥ १५ ॥ आत्मानं पातके विष्टं शुभाह्व चिरकारिक ॥ एवं स दुःखितः प्राप्तो गौतमोऽचिंतयत्तदा ॥ १६ ॥ चिरकारिकं ददर्शाथ पुत्रं मातुरुपांतिके ॥ चिरकारी तु पितरं दृष्ट्वा परमदुःखितः ॥ १७ ॥ शस्त्रं त्यक्त्वा स्थितो मूर्ध्ना प्रसादायोपचक्रमे ॥ मेधातिथिः सुतं दृष्ट्वा शिरसा पतितं भुवि ॥ ॥ १८ ॥ पत्नीं चैव तु जीवंतीं परामभ्यगमन्मुदम् ॥ हन्यादिति न सा वेद शस्त्रपाणौ स्थिते सुते ॥ १९ ॥ बुद्धिरासीत्सुतं दृष्ट्वा पितुश्चरणयोर्नतम् ॥ शस्त्रग्रहणचापल्यं संवृणोति भयादिति ॥ १२० ॥ ततः पित्रा चिरं स्मृत्वा चिरं चाघ्राय मूर्धनि ॥ चिरं दोर्भ्यां परिष्वज्य चिरंजीवेत्युदाहृतः॥२१॥चिरं मुदान्वितः पुत्रं मेधातिथिरथाब्रवीत्॥चिरकारिक भद्रं ते चिरकारी भवेच्चिरम्॥२२॥चिराय यत्कृतं सौम्य चिरमस्मिन्न दुःखितः॥ गाथाश्चाप्यब्रवीद्विद्वान्गौतमो मुनिसत्तमः॥२३॥चिरेण मंत्रं संधीयाच्चिरेण च कृतं त्यजेत्॥चिरेण विहितं मित्रं चिरं धारणमर्हति॥२४॥ रोगे दर्पे च माने च द्रोहे पापे च कर्मणि॥ अप्रिये चैव कर्तव्ये चिरकारी प्रशस्यते॥२५॥बंधूनां सुहृदां चैव भृत्यानां स्त्रीजनस्य च॥अव्यक्तेष्वपराधेषु चिरकारी प्रशस्यते॥२६॥चिरं धर्मान्निषेवेत कुर्याच्चान्वेषणं चिरम्॥चिरमन्वास्य विदुषश्चिरमिष्टानुपास्य च॥२७॥चिरं विनीय चात्मानं चिरं यात्यनवज्ञताम् ॥ ब्रुवतश्च परस्यापि वाक्यं धर्मोपसंहितम् ॥२८॥ चिरं पृच्छेच्च शृणुयाच्चिरं न परिभूयते ॥ धर्मे शत्रौ शस्त्रहस्ते पात्रे च निकटस्थिते ॥२९॥ भये च साधुपूजायां चिरकारी न शस्यते ॥ एवमुक्त्वा पुत्रभार्यासहितः प्राप्य चाश्रमम् ॥ १३० ॥ ततश्चिरमुपास्याथ दिवं यातश्चिरं मुनिः ॥ वयं त्वेवं ब्रुवन्तोऽपि मोहेनैवं प्रतारिताः[2] ॥ ३१ ॥ कलौ च भवतां विप्रा मच्छापो निपतिष्यति ॥ केचित्सदा भविष्यंति विप्राः सर्वगुणैर्युताः ॥ ३२ ॥ पादप्रक्षालनं कृत्वा ततोऽहं धर्मवर्मणः ॥ समीपे साक्षिणो देवान्कृत्वा संकल्पमाचरम् ॥ ३३ ॥ कांचनैर्गोप्रदानैश्च गृहदानैर्धनादिभिः ॥ भार्याभूषणवस्त्रैश्च कृतार्था ब्राह्मणाः कृताः ॥ ३४ ॥ ततः करं समुद्यम्य प्राहेन्द्रो देवसंगमे ॥ हरांगरुद्धवामार्द्धा यावद्देवी गिरेः सुता ॥ ३५ ॥ गणा

१ ततो यच्चार्चितं मया–इ० पा० । २ प्रकारिताः–इ० पा० ।

CC-0. In Public Domain. Digitization by eGangotri

धीशो वयं यावद्यावत्त्रिभुवनं त्विदम् ॥ तावन्नन्द्यादिदं स्थानं नारदस्थापितं सुराः ॥ ३६ ॥ ब्रह्मशापो रुद्रशापो विष्णुशापस्तथैव च ॥ द्विजशापस्तथा भूयादिदं स्थानं विलुंपतः ॥ ३७ ॥ ततस्तथेति तैः सर्वैर्हृष्टैस्तत्र तथोदितम् ॥ एवं मया स्थापिते स्थानकेऽस्मिन्संस्थापयामास च कापिलं मुनिः॥ स्थाने उभे देवकृते प्रसन्नास्ततो ययुर्देवता देवसद्म ॥१३८॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां प्रथमे माहेश्वरखण्डे कौमारिकाखंडे नारदीयस्थानप्रतिष्ठावर्णनंनाम षष्ठोऽध्यायः ॥ ६ ॥ ॥ छ ॥ ॥ अर्जुन उवाच ॥ ॥ महीसागरमाहात्म्यमद्भुतं कीर्तितं त्वया ॥ विस्मयः परमो मह्यं प्रहर्षश्चोपजायते ॥ १ ॥ तदहं विस्तराच्छ्रोतुमिदमिच्छामि नारद ॥ कस्य यज्ञे मही ग्लाना वह्नितापाभिता पिता ॥ २ ॥ ॥ नारद उवाच ॥ ॥ महदाख्यानमाख्यास्ये यथा जाता महीनदी ॥ शृण्वन्नेतां कथां पुण्यां पुण्यमाप्स्यसि पांडव ॥ ३ ॥ पुराभूद्भूपतिर्भूमाविन्द्रद्युम्न इति श्रुतः ॥ वदान्यः सर्वधर्मज्ञो मान्यो मानयिता प्रभुः ॥ ४ ॥ उचितज्ञो विवेकस्य निवासो गुणसागरः ॥ न तदस्ति धरापृष्ठे नगरं ग्रामपत्तनम् ॥ ५ ॥ तदीयपूर्तधर्मस्य चिह्नेन न यदंकितम् ॥ कन्यादानानि बहुधा ब्राह्मेण विधिना व्यधात् ॥ ६ ॥ भूपालोऽसौ ददौ दानमासहस्राद्धनार्थिनाम् ॥ दशमीदिवसे रात्रौ गजपृष्ठेन दुन्दुभिः ॥ ७ ॥ ताड्यते तत्पुरे प्रातः कार्यमेकादशीव्रतम् ॥ यज्वना तेन भूपेन विच्छिन्नं सोमपायिनाम् ॥ ८ ॥ स्वरणैरास्तृता दर्भैर्द्व्यंगुलोत्सेधिता मही ॥ गंगायां सिकता धारा वर्षतो दिवि तारकाः ॥ ९ ॥ शक्या गणयितुं प्राज्ञैस्तदीयं सुकृतं न तु ॥ ईदृशैः सुकृतैरेष तेनैव वपुषा नृपः ॥ १० ॥ धाम प्रजापतेः प्राप्तो विमानेन कुरूद्वह ॥ बुभुजे स तदा भोगान्दुर्लभानमरैरपि ॥ ११ ॥ अथ कल्पशतस्यांते व्यतीते तं महीपतिम् ॥ प्राह प्रजापतिः सेवावसरायातमात्मनः ॥ १२ ॥ ॥ ब्रह्मोवाच ॥ ॥ इंद्रद्युम्न द्रुतं गच्छ धरापृष्ठं नृपोत्तम ॥ न स्थातव्यं मदीयेद्य लोके क्षणमपि त्वया ॥ १३ ॥ ॥ इंद्रद्युम्न उवाच ॥ ॥ कस्माद्ब्रह्मन्नितो भूमौ मां प्रेषयसि सम्प्रति ॥ सति पुण्ये मदीये तु बहुले वद कारणम् ॥ १४ ॥ ॥ ब्रह्मोवाच ॥ ॥ न पुण्यं केवलं राजन्गुप्तं स्वर्गस्य साधकम् ॥ विना निष्कलमषां कीर्तिं त्रिलोकीतलविस्तृताम् ॥ १५ ॥ तव कीर्तिसमुच्छेदः सांप्रतं वसुधातले ॥ संजातश्चिरकालेन गत्वा तां कुरु नूतनाम् ॥१६॥ यदि वांछा महीपाल मम धामनि संस्थितौ ॥ १७ ॥ ॥ इन्द्रद्युम्न उवाच ॥ ॥ मदीयं सुकृतं ब्रह्मन्कथं भूमौ भवेदिति ॥ किं कर्तव्यं मया नैतन्मम चेतसि तिष्ठति ॥१८॥ ॥ ब्रह्मोवाच ॥ ॥ बलवानेष भूपाल कालः कलयति स्वयम् ॥१९॥ ब्रह्मांडान्यपि मां चैव गणना का भवादृशाम् ॥

१ य इदं स्थानं विलुंपेचौर्याद्युपद्रवानत्र यः कुर्यात्तस्य ब्रह्मादिशापः स्यात्, एतेनात्र चौरादिभीतिशंका या मुनीनामासीत्सा निरस्तेति रहस्यम्। २ अथ-इ० पा०।

CC-0. In Public Domain. Digitization by eGangotri

तदेतदेव मन्येऽहं तव भूपाल सांप्रतम्॥२०॥यत्कीर्तिमात्मनो व्यक्तिं नीत्वाभ्येहि[1] पुनर्दिवम् ॥ शुश्रुवानिति वाचं स ब्रह्मणः पृथिवीपतिः ॥ २१ ॥ पश्यतिस्म तथात्मानं महीतलमुपागतम् ॥ कांपिल्यनगरे भूयः पप्रच्छात्मानमात्मना ॥ २२ ॥ नगरं स तदा देशमप्राक्षीदि[2]दिति विस्मितः ॥ ॥ जना ऊचुः ॥ ॥ न जानीमो वयं भूपमिंद्रद्युम्नं न तत्पुरम् ॥ २३ ॥ यत्त्वं पृच्छसि भो भद्र कञ्चित्पृच्छ चिरायुषम् ॥ ॥ इन्द्रद्युम्न उवाच ॥ ॥ कः संप्रति धरापृष्ठे चिरायुः प्रथितो जनाः ॥ २४ ॥ पृथिवीजयराज्येस्मिन्यत्र प्रब्रूत मा चिरम् ॥ ॥ जना ऊचुः ॥ ॥ श्रूयते नैमिषारण्ये सप्तकल्पस्मरो मुनिः ॥ २५ ॥ मार्कंडेय इति ख्यातस्तं गत्वा पृच्छ संशयम् ॥ तथोपदिष्टस्तैर्गत्वा तत्र तं मुनिपुंगवम् ॥ २६॥ निशम्य प्रणिपत्याह नृपः स्वहृदयस्थितम् ॥ ॥ इंद्रद्युम्न उवाच ॥ ॥ चिरायुर्भगवान्भूमौ विश्रुतः सांप्रतं ततः ॥ २७ ॥ पृच्छाम्यहं भवान्वेत्ति इंद्रद्युम्नं नृपं न वा ॥ २८ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ सप्तकल्पान्तरे[3] नाभूत्कोपींद्रद्युम्नसंज्ञितः ॥ भूपाल किमहं वच्मि तवान्यत्पृच्छ संशयम् ॥ २९ ॥ स निराशस्तदाकर्ण्य वचो भूपोग्निसाधने[4] ॥ समुद्योगं तदा चक्रे तं दृष्ट्वाह तदा मुनिः ॥ ३० ॥ ॥ मार्कंडेय उवाच ॥ ॥ मा साहसमिदं कार्षीर्भद्र वाचं शृणुष्व मे ॥ एति जीवंतमानंदो नरं वर्षशतादपि ॥ ३१ ॥ तत्करोमि प्रतीकारं तव दुःखोपशांतये ॥ शृणु भद्र ममास्तीह बको मित्रं चिरंतनः ॥ ३२ ॥ नाडीजंघ इति ख्यातः स त्वा ज्ञास्यत्यसंशयम् ॥ तस्मादेहि द्रुतं यावदावां तत्र व्रजावहे ॥३३॥ परोपकारैकफलं जीवितं हि महात्मनाम् ॥ यदि ज्ञास्यत्यसंदिग्धमिंद्रद्युम्नं स वक्ष्यति ॥ ३४ ॥ तौ प्रस्थिताविति तदा विप्रेंद्रनृपपुंगवौ ॥ हिमाचलं प्रति प्रीतौ नाडीजंघालयं प्रति ॥ ३५ ॥ बकोऽथ मित्रं स्वं वीक्ष्य चिरकालादुपागतम् ॥ मार्कंडेयं ययौ प्रीत्युत्कंठितः सम्मुखं द्विजैः[6] ॥ ३६ ॥ कृतसंविदभूत्पूर्वं कुशलस्वागतादिना ॥ पप्रच्छानंतरं कार्यं वँदागमनकारणम्[7] ॥ ३७ ॥ मार्कंडेयोथ तं प्राह बकं प्रस्तुतमीप्सितम् ॥ इंद्रद्युम्नं भवान्वेत्ति भूपालं पृथिवीतले ॥ ३८ ॥ एतस्य मम मित्रस्य तेन ज्ञातेन कारणम् ॥ नो वायं त्यजति प्राणान्पुरा वह्निप्रवेशनात् ॥ ३९ ॥ एतस्य प्राणरक्षार्थं ब्रूहि जानासि चेन्नृपम् ॥ ४० ॥ ॥ नाडीजंघ उवाच ॥ ॥ चतुर्दश स्मराम्यस्मि[8] कल्पान्विप्रेंद्र सांप्रतम् ॥ आस्तां तद्दर्शनं वार्तामपि वां न स्मराम्यहम् ॥ ४१ ॥ इंद्रद्युम्नो महीपालः कोऽपि नासीन्महीतले ॥ एतावन्मात्रमेवाहं जानामि द्विजपुंगव ॥ ४२ ॥ ॥ नारद उवाच ॥ ॥ ततः स

१ आयाहि—इ० पा० । २ अस्प्राक्षीत्—इ०पा० । ३ न दृष्टो न श्रुतः कोपि—इ०पा० । ४-अग्निसाधने समुद्योगम्—अग्निं प्रज्वाल्य तस्मिन्प्रवेशने उद्योगम्—काष्ठादिसंपादनोपक्रममित्यर्थः । ५ पुनर्मुनिः—इ०पा० । ६ द्विजाः—इ०पा० । ७ तदागमनकारणम्--इ० पा० । ८ अस्मीत्यहमर्थकं विभक्तिप्रतिरूपकमव्ययम् । ९ नास्य--इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विस्मयाविष्टस्तस्यायुरिति शुश्रुवान् ॥ पप्रच्छ राजा को हेतुर्दानस्य तपसोऽथ वा ॥ यदायुरीदृशं दीर्घं संजातमिति विस्मितः ॥ ४३ ॥
॥ ॥ नाडीजंघ उवाच ॥ ॥ घृतकंबलमाहात्म्यान्मम देवस्य शूलिनः ॥ दीर्घमायुरिदं विप्र शापाद्बकवपुः शृणु ॥४४॥ पुरा जन्मन्यहं बालो ब्राह्मण
स्याभवं भुवि ॥ पाराशर्यसगोत्रस्य विश्वरूपस्य सन्मुनेः ॥४५॥ बालको बक इत्येवं प्रतीतोऽतिप्रियः पितुः ॥ चपलोऽतीव बालत्वे निसर्गादेव भद्रक
॥ ४६ ॥ अथ मारकतं लिंगं देवतावसरात्पितुः ॥ चापल्याद्बालभावाच्चापहृत्य निहितं मया ॥४७॥ घृतस्य कुंभे संक्रांतौ मकरस्योत्तरायणे ॥ अथ
प्रातर्व्यतीतायां निशि यावत्पिता मम ॥ ४८ ॥ निर्माल्यापनयं चक्रे तावच्छून्यं शिवालयम् ॥ निशम्य कांदिशीको मां पप्रच्छ मधुरस्वरम् ॥
॥४९॥वत्स क्व नु त्वया लिंगं नूनं विनिहितं वद ॥ दास्यामि वांछितं यत्ते भक्ष्यमन्यत्तवेप्सितम् ॥५०॥ ततो मया बालभावाद्भक्ष्यलुब्धेन तत्पितुः ॥
घृतकुंभांतराकृष्य भद्रलिंगं समर्पितम् ॥५१॥ अथ काले तु संप्राप्ते प्रमीतोऽहं नृपालये ॥ जातो जातिस्मरस्तावदानर्ताधिपतेः सुतः ॥५२॥घृतकंबल
माहात्म्यान्मकरस्थे दिवाकरे ॥ अपि बाल्यादवज्ञानात्संयोगाद्घृतलिंगयोः ॥ ५३ ॥ ततः संस्थापितं लिंगं प्राग्जन्म स्मरता मया ॥ ततः प्रभृति
लिंगानि घृतेनाच्छादयाम्यहम् ॥ ५४ ॥ पितृपैतामहं प्राप्य राज्यं शक्त्यनुरूपतः ॥ ततः प्रसन्नो भगवान्पार्वतीपतिराह माम् ॥ ५५ ॥ पूर्वज
न्मनि तुष्टोऽहं घृतकंबलपूजया ॥ प्रयच्छाम्यस्मि त राज्यमधुनाभिमतं वृणु ॥ ५६ ॥ ततो मया वृतः प्रादाद्गाणपत्यं मदीप्सितम् ॥ कैलासे मां
शिवो नित्यं संतुष्टः प्राह चेति च ॥ ५७ ॥ तेनैव हि शरीरेण प्रणतं पुरतः स्थितम् ॥ अद्यप्रभृति संक्रांतौ मकरस्यापरोपि यः ॥ ५८ ॥ घृतेन
पूजां कर्तासौ भावी मम गणः स्फुटम् ॥ इत्युक्त्वा मां शिवो भद्र गणकोटीश्वरं व्यधात् ॥ ५९ ॥ प्रतीपपालकंनाम संस्थितं शिवशासनम् ॥ ततः
कामादिभिः षड्भिः पदैश्चंक्रमणात्मिकाम् ॥ ६० ॥ निसर्गचपलां प्राप्य भ्रमरीमिव तां श्रियम् ॥ नैवालमभवं तस्या धारणे दैवयोगतः ॥ ६१ ॥
विचचार तदा मत्तः किलाहं वारणो यथा ॥ कृत्याकृत्यविचारेण विमुक्तोऽतीव गर्वितः ॥ ६२ ॥ विद्यामभिजनं लक्ष्मीं प्राप्य नीचनरो यथा ॥
आपदां पात्रतामेति सिंधूनामिव सागरः ॥ ६३ ॥ अथ काले व्यतिक्रांते कियन्मात्रे यदृच्छया ॥ विचरन्नगमं शैलं हिमानीरुद्धकंदरम् ॥ ६४ ॥
तपस्यति मुनिस्तत्र गालवो भार्यया सह ॥ सदैव तीव्रतपसा कृशो धमनिसंततः ॥ ६५ ॥ ब्राह्मणस्य हि देहोयं नैवैहिकफलप्रियः ॥ कृच्छ्राय
तपसे चेह प्रेत्यानंतसुखाय च ॥ ६६ ॥ तस्य भार्याऽतिरूपेण विजिग्ये विश्ववर्णिनी ॥ तन्वी श्यामा मृगाक्षी सा पीनोन्नतपयोधरा ॥ ६७ ॥

१ वरेण—इति शेषः । २ घृतकुंभान्तः—आकृष्य—इति पदच्छेदः । घृतकुम्भमध्यात् आकृष्य निष्कास्येत्यर्थः । ३ तात—इ० पा० । ४ अस्मि—अहमित्यर्थः । ५ मां प्राहेति पूर्वेण सम्बन्धः । ६ सर्वशासनम्—इ० पा० ।

CC-0. In Public Domain. Digitization by eGangotri

हंसगद्गदसंभाषा मत्तमातंगगामिनी ॥ विस्तीर्णजघना मध्ये क्षामा दीर्घशिरोरुहा ॥ ६८ ॥ निम्ननाभिर्विधात्रैषा निर्मिता संदिदृक्षुणा ॥ विकीर्ण
मिव सौंदर्यमेकपात्रमिव स्थितम् ॥ ६९ ॥ ततोऽविनीतस्तां वीक्ष्य भद्र गालववल्लभाम् ॥ अहमासं शरव्रातैस्ताडितः पुष्पधन्विना ॥ विवेकिनो
ऽपि मुनयस्तावदेव विवेकिनः ॥ ७० ॥ यावन्न हरिणाक्षीणामपांगविवरेक्षिताः ॥ मया व्यवसितं चित्ते तदानीं तां जिहीर्षुणा ॥ ७१ ॥ इति चेति
हरिष्यामि तपसा रक्षितां मुनेः ॥ अस्याः कृते यदि शपेन्मुनिस्तत्र पराभवः ॥ ७२ ॥ मम भावी भवेदेषा भार्या मृत्युरुतापि मे ॥ तस्माच्छिष्यो
भवाम्यस्य शुश्रूषानिरतो मुनेः ॥ ७३ ॥ प्राप्यांतरं हरिष्यामि नास्य योग्येयमंगना ॥ इति व्यवस्य विद्यार्थिमूर्तिमास्थाय गालवम् ॥ ७४ ॥ नम
स्कृत्य वचोऽवोचमिति भाव्यर्थनोदितः ॥ तथा मतिस्तथा मित्रं व्यवसायस्तथा नृणाम् ॥ ७५ ॥ भवेदवश्यं तद्भावि यथा पुंभिः पुरा कृतम् ॥
विवेकवैराग्ययुतो भगवंस्त्वामुपस्थितः ॥ ७६ ॥ शिष्योऽहं भवता पाठ्यं कर्णधारं महामुनिम् ॥ अपारपारदं विष्णुं विप्रमूर्तिमुपाश्रितम् ॥ ७७ ॥
नमस्ये चेतनं ब्रह्म प्रत्यक्षं गालवाख्यया ॥ अविद्याकृष्णसर्पेण दष्टं तद्विषपीडितम् ॥ ७८ ॥ उपदेशमहामंत्रैर्मां जांगुलिक[1] जीवय ॥ महामोहमहा
वृक्षो हृद्यावापसमुत्थितः ॥ ७९ ॥ त्वद्वाक्यतीक्ष्णधारेण कुठारेण क्षयं व्रजेत् ॥ अपवर्गपथव्यापी मूढसंसर्गसेचनः ॥ ८० ॥
छिद्यतां सूत्रधारेण[2] विद्यापरशुनाधुना ॥ भजामि तव शिष्योऽहं वरिवस्यापरश्चिरम् ॥ ८१ ॥ समिद्दर्भान्मूलफलं दारूणि जलमेव
च ॥ आहरिष्येऽनुगृह्णीष्व विनीतं मामुपस्थितम् ॥ ८२ ॥ इत्थं पुरा बकाभिख्यं बकवृत्तिमुपाश्रितम् ॥ तदाऽऽर्जवे कृतमतिरनुज
ग्राह मां मुनिः ॥ ८३ ॥ ततोऽतीव विनीतोऽहं भूत्वा तं ब्राह्मणीयुतम् ॥ विश्वासनाय सुदृढं तोषयामि दिनेदिने ॥ ८४ ॥ स[4] च जान
न्मुनिः पत्नीं पात्रभूतामविश्वसन् ॥ स्त्रीचरित्रविदंके तां विधाय स्वपिति द्विजः ॥ ८५ ॥ अथान्यस्मिन्दिने साभूद्ब्राह्मण्यथ रजस्वला ॥
तद्दूरशायिनी रात्रौ विश्वासान्मे तपस्विनी ॥ ८६ ॥ इदमन्तरमित्यंतर्विचिंत्याहं प्रहर्षितः ॥ मलिम्लुचाकृतिर्भूत्वा निशीथे तामथाहरम् ॥ ८७ ॥
विललाप तदा बाला ह्रियमाणा मयोच्चकैः ॥ मैवं मैवमिति ज्ञात्वा मां स्वरेणाब्रवीन्मुनिम् ॥ ८८ ॥ बकवृत्तिरयं दुष्टो धर्मकंचुकमाश्रितः ॥
हरते मां दुराचारस्तस्मात्त्वं त्राहि गालव ॥ ८९ ॥ तव शिष्यः पुरा भूत्वा कोप्येषोद्य मलिम्लुचः ॥ मां जिहीर्षति तद्रक्ष शरण्य शरणं भव ॥ ९० ॥ ॥ ९१ ॥
तद्वाक्यसमकालं स प्रबुद्धो गालवो मुनिः ॥ तिष्ठतिष्ठेति मामुक्त्वा गतिस्तम्भं व्यधान्मम ॥ ९१ ॥ ततश्चित्राकृतिरहं स्तम्भितो मुनिनाऽभवम् ॥

१ जांगुलिक–विषवैद्य इत्यर्थः । 'विषवैद्योजांगुलिकः' इत्यमरः । २ सूत्रधारेण काष्ठपाटनकरेण तक्ष्णेत्यर्थः । ३ कृतमतिः–दत्तावधान इत्यर्थः । ४ सः–द्विजः गालवमुनिः–इत्यर्थः । ५ अन्तः–अन्तःकरणे–इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

व्रीडितं प्रविशामीव स्वांगानि किल लज्जया ॥ ९२ ॥ ततः प्रकुपितः प्राह मामभ्येत्याथ गालवः ॥ तद्वज्रदुःसहं वाक्यं येनाहमभवं बकः ॥ ॥ ९३ ॥ ॥ गालव उवाच ॥ ॥ बकवृत्तिमुपाश्रित्य वंचितोऽहं यतस्त्वया ॥ तस्माद्बकस्त्वं भविता चिरकालं नराधम ॥ ९४ ॥ इति शप्तोऽहमभवं मुनिनाऽधर्ममाश्रितः ॥ परदारोपसेवार्थमनर्थमिममागतः ॥ ९५ ॥ न हीदृशमनायुष्यं लोके किंचन विद्यते ॥ यादृशं पुरुषस्येह परदारोपसेवनम् ॥ ९६ ॥ ततः सती सा मत्स्पर्शदूषितांगी तपस्विनी ॥ मया विमुक्ता स्नात्वा मां तथैवानुशशाप ह ॥ ९७ ॥ एवं ताभ्यामहं शप्तो ह्यश्वत्थपर्णवद्भयात् ॥ कंपमानः प्रणम्योभावत्रोचं तत्र दम्पती ॥ ९८ ॥ गणोऽहमीश्वरस्यैव दुर्विनीततरो युवाम् ॥ निरोधमेवं[1] कुरुतं भगवंतावनुग्रहम् ॥ ९९ ॥ वाचि क्षुरो नावनीतं हृदयं हि द्विजन्मनाम् ॥ प्रकुप्यंति प्रसीदंति क्षणेनापि प्रसादिताः ॥ १०० ॥ त्वयि विप्रतिपन्नस्य त्वमेव शरणं मम ॥ भूमौ स्खलितपादानां भूमिरेवावलंबनम् ॥ १०१ ॥ गणाधिपत्यमपि मे जातं परिभवास्पदम् ॥ विपदंता हि जायन्ते दुर्विनीतस्य सम्पदः ॥ २ ॥ विदुरेष्यद्धियाऽपायं परतोऽन्ये वि[2]वेकिनः ॥ नैवोभयं विदुर्नीचा विनाऽनुभवमात्मनः ॥ ३ ॥ दुर्विनीतः श्रियं प्राप्य विद्यामैश्वर्यमेव वा ॥ न तिष्ठति चिरं स्थाने यथाहं मदगर्वितः ॥४॥ विद्यामदो धनमदस्तृतीयोऽभिजनो मदः ॥ एते मदा मदांधानामेत एव सतां दमाः ॥ ५ ॥ नोदर्कशालिनी बुद्धिर्येषामविजितात्मनाम् ॥ तैः श्रियश्चपला वाच्यं[3] नीयंते मादृशैर्जनैः ॥ ६ ॥ तत्प्रसीद मुनिश्रेष्ठ शापांतं मेऽधुना कुरु ॥ दुर्विनीतेष्वपि सदा क्षमाचारा हि साधवः ॥ ७ ॥ इत्थं वचसि विज्ञप्ते विनीतेनापि वै मया ॥ प्रसादप्रवणो भूत्वा शापांतं मे तदा व्यधात् ॥ ॥ ८ ॥ ॥ गालव उवाच ॥ ॥ छन्नकीर्तिसमुद्धारसहायस्त्वं भविष्यसि ॥ यदेन्द्रद्युम्नभूपस्य तदा मोक्षमवाप्स्यसि ॥ ९ ॥ इत्यहं मुनिशापेन तदाप्रभृति पर्वते ॥ हिमाचले बको भूत्वा काश्यपेयो वसामि च ॥ ११० ॥ राज्यं चिरायुरिति मे घृतकम्बलस्य जातिस्मरत्वमधुनापि तथानुभावान् ॥ शापाद्बकत्वमभवन्मुनिगालवस्य तद्भद्र सर्वमुदितं भवताद्य पृष्टम् ॥ १११ ॥ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां प्रथमे माहेश्वरखण्डे कौमारिकाखंडे महीप्रादुर्भावे सप्तमोऽध्यायः ॥ ७ ॥ ॥ छ ॥ ॥ नारद उवाच ॥ ॥ नाडीजंघबकेनोक्तां वाचमाकर्ण्य भूपतिः ॥ मार्कंडेयेन संयुक्तो बभूवातीव दुःखितः ॥ १ ॥ तं नि[4]शम्य मुनिर्भूपं दुःखितं साश्रुलोचनम् ॥ समानव्यसनः प्राह तदर्थं स पुनर्ब

---

१ यथा निरोधं कृतवन्तौ—तथा—अनुग्रहमपि कुरुतम्—इति वक्तव्यं बोद्धव्यम्। २ विवेकिनः परतः अन्यस्मात् एष्यत् आगमिष्यन्तम् अपायं धिया (विवेकशालिन्या) (अपायागमात् पूर्वमेव) विदुः। विवेकशालित्वात्। ३ श्रियः 'चपला' इति वाच्यम्—दोषम्—नीयंते इत्यर्थः। मदान्धानां श्रियः शीघ्रमेव नश्यन्ति--इति भावः। ४ निशम्य--दृष्ट्वेत्यर्थः।

कम् ॥ २ ॥ विधायाशां महाभाग त्वदंतिकमुपागतौ ॥ आवां चिरायुर्ज्ञातांशाविन्द्रद्युम्नमिति द्विज ॥ ३ ॥ निष्पन्नं नास्य तत्कार्यं प्राणा
नेष मुमुक्षति ॥ वह्निप्रवेशेन परं वैराग्यं समुपागतः ॥ ४ ॥ तन्मामुपागतोऽहं च त्वां सिद्धं नास्य वांछितम् ॥ तदेनमनुयास्या
मि मरणेन त्वया शपे ॥ ५ ॥ आशां कृत्वाभ्युपायातं निराशं नेक्षितुं क्षमाः ॥ भवंति साधवस्तस्माज्जीवितान्मरणं वरम् ॥ ६ ॥ प्रार्थितं चामुना
हृत्स्थं मया चास्मै प्रतिश्रुतम् ॥ त्वां मित्रं तत्परिज्ञाने धृत्वा हृदि चिरायुषम् ॥ ७ ॥ असंपादयतो नार्थं प्रतिज्ञातं ममायुषा ॥ कलुषेणार्थिना[1]
माशापूरकेण सखेधुना ॥ ८ ॥ प्रतिश्रुतं कृतं श्लाघ्या दासतांत्यजपक्कणे ॥ हरिश्चंद्रस्येव नृणां न श्लाघ्या सत्यसंधता ॥ ९ ॥ मित्रस्नेहस्य पर्याय
स्तच्च साप्तपदं स्मृतम् ॥ स्नेहः स कीदृशो मित्रे दुःखिते यो न दृश्यते ॥ १० ॥ तदवश्यमहं साकमधुना वह्निसाधनम् ॥ करिष्ये कीर्तिवपुषः
कृते सत्यमिदं सखे ॥ ११ ॥ अनुजानीहि मामेतद्दर्शनं तव पश्चिमम् ॥ त्वया सह महाभाग नाडीजंघ द्विजोत्तम ॥ १२ ॥ ॥ नारद
उवाच ॥ वज्रवद्दुःसहां वाचं मार्कंडेयसमीरिताम् ॥ शुश्रुवान्स क्षणं ध्यात्वा प्रतीतः प्राह तावुभौ ॥ १३ ॥ ॥ नाडीजंघ उवाच ॥ ॥
यद्येवं तदिदं मित्रं विशंतं ज्वलनेऽधुना ॥ निवारय मुनिश्रेष्ठ मत्तोऽस्ति चिरजीवितः ॥ १४ ॥ प्राकारकर्णनामासावुलूकः शिवपर्वते ॥ स ज्ञास्यति
महीपालमिंद्रद्युम्नं न संशयः ॥ १५ ॥ तस्मादहं त्वया सार्धममुना च शिवालयम् ॥ व्रजामि तं शिखरिणं मित्रकार्यप्रसिद्धये ॥ १६ ॥ इत्येव
मुक्त्वा ते जग्मुस्त्रयोऽपि[2] द्विजपुंगवाः ॥ कैलासं ददृशुस्तत्र तमुलूकं स्वनीडगम् ॥ १७ ॥ कृतसंविदसौ तेन बकः स्वागतपूजया ॥ पृष्टश्च तावुभौ
प्राह तत्सर्वमभिवांछितम् ॥ १८ ॥ चिरायुरसि जानीषे यदीन्द्रद्युम्नभूपतिम् ॥ तद्ब्रूहि तेन ज्ञानेन कार्यं जीवामहे वयम् ॥ १९ ॥ इति पृष्टः स
विमना मित्रकार्यप्रसाधनात् ॥ कौशिकः[3] प्राह जानामि नेन्द्रद्युम्नमहं नृपम् ॥ २० ॥ अष्टाविंशत्प्रमाणा मे कल्पा जातस्य भूतले ॥ न दृष्टो न श्रुतो
वासाविंद्रद्युम्नो नृपः क्षितौ ॥ २१ ॥ तच्छ्रुत्वा विस्मितो भूपस्तस्यायुरतिमात्रतः ॥ दुःखितोऽपि तदा हेतुं पप्रच्छासौ तदायुषः ॥ २२ ॥ एवमा
युर्यदि तव कथं प्राप्तं ब्रवीहि तत् ॥ उलूकत्वं कथमिदं जुगुप्सितमतीव च ॥ २३ ॥ ॥ प्राकारकर्ण उवाच ॥ ॥ शृणु भद्र यथा दीर्घमायुर्मे
शिवपूजनात् ॥ जुगुप्सितमुलूकत्वं शापेन च महामुनेः ॥ २४ ॥ वसिष्ठकुलसंभूतः पुराहमभवं द्विजः ॥ घंट इत्यभिविख्यातो वाराणस्यां शिवे
रतः ॥ २५ ॥ धर्मश्रवणनिष्ठस्य साधूनां संसदि स्वयम् ॥ श्रुत्वास्मि[4] पूजयामीशं बिल्वपत्रैरखंडितैः ॥ २६ ॥ न मालती न मंदारः शतपत्रं न

१ कलुषेण--कपटेनेत्यर्थः । कलुकेन--इ० पाठान्तरम् । २ त्रयः--इ०पा० । ३ कौशिकः--उलूकः । ४ अस्मि--अहमित्यर्थः ।

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मल्लिका ॥ तथा प्रियाणि श्रीवृक्षो यथा मदनविद्विषः ॥ २७ ॥ अखंडबिल्वपत्रेण एकेन शिवमूर्धनि ॥ निहितेन नरैः पुण्यं प्राप्यते लक्षपुष्प
जम् ॥ २८ ॥ अखंडितैर्बिल्वपत्रैः श्रद्धया स्वयमाहृतैः ॥ लिंगप्रपूजनं कृत्वा वर्षलक्षं वसेद्दिवि ॥ २९ ॥ सच्छास्त्रेभ्य इति श्रुत्वा पूजयाम्यहमी
श्वरम् ॥ त्रिकालं श्रद्धया पत्रैः श्रीवृक्षस्य त्रिभिस्त्रिभिः ॥ ३० ॥ ततो वर्षशतस्यांते तुतोष शशिशेखरः ॥ प्रत्यक्षीभूय मामाह मेघगंभीरया गिरा
॥ ३१ ॥ ॥ ईश्वर उवाच ॥ ॥ तुष्टोस्मि तव विप्रेंद्राखंडबिल्वदलार्चनात् ॥ वृणीष्वाभिमतं यत्ते दास्याम्यपि च दुर्लभम् ॥ ३२ ॥ अखंडबि
ल्वपत्रेण महातुष्टिः प्रजायते ॥ एकेनापि यथान्येषां तथा न मम कोटिभिः ॥३३ ॥ इत्युक्तोऽहं भगवता शंभुना स्वमनःस्थितम् ॥ वृणोमि स्म वरं देव
कुरु मामजरामरम् ॥३४॥ अथ लीलाविलासो मां तथेत्युक्त्वाऽविचारितम् ॥ ययावदर्शनं प्रीतिमहं च महतीं गतः ॥ ३५ ॥ कृतकृत्यं तदात्मानम
ज्ञासिषमहं क्षितौ ॥ एतस्मिन्नेव काले तु भृगुवंश्योऽभवद्द्विजः ॥३६॥ अवदातत्रिजन्मासवक्षविद्याक्षरार्थवित् ॥ सुदर्शनेति प्रथिता प्रिया तस्याभवत्सती
॥३७॥ अतीव मुदिता पत्युर्मुखं प्रेक्ष्यास्य दर्शनात् ॥ तनया देवलस्यैषा रूपेणाप्रतिमा भुवि ॥३८॥ तस्यां तस्मादभूत्कन्या निर्विशेषा निजारणेः॥
निवृत्तबालभावाभूत्कुमारी यौवनोन्मुखी ॥ ३९ ॥ नालं बभूव तां दातुं तनयां गुणशालिनीम् ॥ कस्यापि जनकः सा च वयःसंधौ मयेक्षिता ॥
॥ ४० ॥ प्रविशद्यौवनाभोगभावैरतिमनोहरा ॥ निर्वास्यमानैरपरैस्तिलतंदुलिताकृतिः ॥ ४१ ॥ क्रीडमाना वयस्याभिर्लावण्यप्रतिमेव सा ॥
व्यचिंतयमहं विप्र तां निरीक्ष्य सुमध्यमाम् ॥ ४२ ॥ अनन्याकृतिमन्योऽसौ विधिर्येनेति निर्मिता ॥ ततः सात्त्विकभावानां तत्क्षणादस्मि गोच
रम् ॥ ४३ ॥ प्रापितो लीलयाहत्य बाणैः कुसुमधन्विना ॥ ततो मया स्खलद्वाचं पृष्टा कस्येति तत्सखी ॥ ४४ ॥ प्राहेति भृगुवंश्यस्य कन्येयं
द्विजजन्मनः ॥ अनूढाद्यापि केनापि समायातात्र खेलितुम् ॥ ४५ ॥ ततः कुसुमबाणेन शरव्रातैर्भृशं हतः ॥ पितरं प्रणतो गत्वा ययाचे तां भृगूद्व
हम् ॥ ४६ ॥ स च मां सदृशं ज्ञात्वा शीलेन च कुलेन च ॥ अतीव चार्थिनं मह्यं ददौ वाचा पुरः क्रमात् ॥४७॥ ततः सा तनया तस्य भार्गवस्या
शृणोदिति ॥ दत्तास्मि तस्मै विप्राय विरूपायेति जल्पताम् ॥ ४८ ॥ रोरूयमाणा जननीमाह पश्य यथा कृतम् ॥ अतीवानुचितं दत्त्वा जनकेन
तथा वरे ॥ ४९ ॥ विषमालोड्य पास्यामि प्रवेक्ष्यामि हुताशनम् ॥ वरं न तु विरूपस्योद्वोढुर्भार्या कथंचन ॥ ५० ॥ ततः संबोध्य जननी तां
सुतामाह भार्गवम् ॥ न देयास्मै त्वया कन्या विरूपायेति चाग्रहात् ॥ ५१ ॥ स वल्लभावचः श्रुत्वा धर्मशास्त्राण्यवेक्ष्य च ॥ दत्तामपि हरेत्पूर्वां

१ मदनविद्विषः—शंकरस्य । २ लीलाविलासः—शिवः—लीलाविलासत्वादेव अविचारितमेव यथा स्यात्तथा 'तथास्तु' इत्युक्त्वाऽदर्शनं ययाविति योजना ।

CC-0. In Public Domain. Digitization by eGangotri

श्रेयांश्चेद्द्वर आव्रजेत् ॥ ५२ ॥ अर्वाक्छिलाक्रमणतो निष्ठा स्यात्सप्तमे पदे ॥ इति व्यवस्य प्रददावन्यस्मै तां द्विजः सुताम् ॥ ५३ ॥ श्वोभा
विनि विवाहे तु तच्च सर्वं मया श्रुतम् ॥ ततोतीव विलक्ष्योहं वयस्यानां पुरस्तदा ॥ ५४ ॥ नाशकं वदनं भद्र तथा दर्शयितुं निजम् ॥ कामा
र्तोतीव तां सुप्तामर्वाग्निशि तदाहरम् ॥ ५५ ॥ नीत्वा दुर्गतमैकांतेऽकार्षमौद्वाहिकं विधिम् ॥ गांधर्वेण विवाहेन ततोऽकार्षं हृदीप्सितम् ॥
॥ ५६ ॥ अनिच्छंतीं तदा बालां बलात्सुरतसेवनम् ॥ अथानुपदमागत्य तत्पिता प्रातरेव माम् ॥ ५७ ॥ निश्वस्य संवृतो विप्रैस्तां वीक्ष्योद्वा
हितां सुताम् ॥ शशाप कुपितो भद्र मां तदानीं स भार्गवः ॥ ५८ ॥ ॥ भार्गव उवाच ॥ ॥ निशाचरस्य धर्मेण यत्त्वयोद्वाहिता सुता ॥
तस्मान्निशाचरः पाप भव त्वमविलंबितम् ॥ ५९ ॥ इति शप्तः प्रणम्यैनं पादोपग्रहपूर्वकम् ॥ हाहेति च ब्रुवन्गाढं साश्रुनेत्रं सगद्गदम् ॥ ६० ॥
ततोहमब्रवं कस्माददोषं मां भवानिति ॥ शपते भवता दत्ता मम वाचा पुरा सुता ॥ ६१ ॥ सोद्वाहिता मया कन्या दानं सकृदिति स्मृतिः ॥ सकृ
ज्जल्पंति राजानः सकृज्जल्पंति पण्डिताः ॥ ६२ ॥ सकृत्कन्याः प्रदीयंते त्रीण्येतानि सकृत्सकृत् ॥ किं च प्रतिश्रुतार्थस्य निर्वाहस्तत्सतां व्रतम् ॥
॥ ६३ ॥ भवादृशानां साधूनां तस्य त्यागो विगर्हितः ॥ प्रतिश्रुता त्वया लब्धा तदा कालमियं मया ॥ ६४ ॥ उद्वोढा चाधुना नाहमुचितः
शापभाजनम् ॥ वृथा शपन्ति मह्यं च भवंतस्तद्विचार्यताम् ॥ ६५ ॥ यो दत्त्वा कन्यकां वाचा पश्चाद्धरति दुर्मतिः ॥ स याति नरकं चेति धर्म
शास्त्रेषु निश्चितम् ॥६६॥ तदाकर्ण्य व्यवस्यासौ तथ्यं मद्वचनं हृदा ॥ पश्चात्तापसमोपेतो मुनिर्मामित्यथाब्रवीत् ॥६७॥ न मे स्यादन्यथा वाणी
उलूकस्त्वं भविष्यति ॥ निशाचरो ह्युलूकोऽपि प्रोच्यते द्विजसत्तम ॥६८॥ यदेंद्रद्युम्नविज्ञाने सहायस्त्वं भविष्यसि॥तदा त्वं प्रकृतिं विप्र प्राप्स्यसीत्य
ब्रवीत्स माम् ॥६९॥ तद्वाक्यसमकालं च कौशिकत्वमिदं मम ॥ एतावंति दिनान्यासीदद्यविंशद्दिनं विधेः॥७०॥बिल्वीदलैरिति पुरा शशिशेखरस्य
संपूजनेन मम दीर्घतरं किलायुः ॥ संजातमत्र च जुगुप्सितमस्य शापात्कैलासरोधसि निशाचररूपमासीत् ॥ ७१ ॥ इति श्रीस्कांदे महापुराण एका
शीतिसाहस्र्यां संहितायां माहेश्वरखण्डे कौमारिकाखण्डे महीनदीप्रादुर्भावे बिल्वदलमाहात्म्यवर्णनंनामाष्टमोऽध्यायः ॥८॥छ॥ ॥ उलूक उवाच ॥
॥ ॥ इतीदमुक्तमखिलं पूर्वजन्मसमुद्भवम् ॥ स्वरूपमायुषो हेतुः कौशिकत्वस्य चेति मे ॥ १ ॥ इत्युक्त्वा विरते तस्मिन्पुरुहूतसनामनि ॥ नाडी
जंघो बको मित्रमाह तं दुःखितो वचः ॥ २ ॥ ॥ नाडीजंघ उवाच ॥ ॥ यदर्थं वयमायातास्तन्न सिद्धं महामते ॥ कार्यं तन्मरणं नूनं त्रयाणाम

१ विलक्ष्यः--लज्जितः--इत्यर्थः । २ वाक्यम्--इति शेषः । ३ स्वरूपम्--इत्यर्थः । ४ कैलासपर्वतनिर्यन्मंदाकिनीनदीतीरसमीपवर्तिप्रदेशे--इत्यर्थो बोध्यः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्युपागतम् ॥ ३ ॥ इंद्रद्युम्नापरिज्ञाने भद्रकोऽयं मुमूर्षति ॥ तस्यानु मित्रं मार्कंडस्तं चान्वहमपि स्फुटम् ॥ ४ ॥ मित्रकार्ये विनिर्वृत्ते म्रियमाणं
निरीक्षते ॥ यो मित्रं जीवितं तस्य धिगस्निग्धं दुरात्मनः ॥ ५ ॥ तदेतावनुयास्यामि म्रियमाणावहं द्विज ॥ आपृच्छे त्वां नमस्कारं आश्लेषश्चाथ
पश्चिमः ॥ ६ ॥ प्रतिज्ञातमनिष्पाद्य मित्रस्याभ्यागतस्य च ॥ कथंकारं न लज्जंते हताशा जीवितेप्सवः ॥ ७ ॥ तस्माद्वह्निं प्रवेक्ष्यामि सार्धमा
भ्यामसंशयम् ॥ आपृष्टोऽस्यधुना स्नेहान्मम देहि जलांजलिम् ॥ ८ ॥ इत्युक्तवत्युलूकोऽसौ नाडीजंघे सगद्गदम् ॥ साश्रुनेत्रं स्थिरीभूय प्राह वाचं
सुधासुचम् ॥ ९ ॥ ॥ उलूक उवाच ॥ ॥ मयि जीवति मित्रे मे भवान्मरणमेति च ॥ अद्यप्रभृति कस्तर्हि हृदा मम लभिष्यति ॥ १० ॥
अस्त्युपायो महानत्र गन्धमादनपर्वते ॥ मत्तश्चिरायुर्मित्रोऽस्ति गृध्रः प्राणसमः सुहृत् ॥ ११ ॥ स विज्ञास्यति वोऽभीष्टमिंद्रद्युम्नं महीपतिम् ॥
इत्युक्त्वा पुरतस्तस्थावुलूकः स च भूपतिः ॥ १२ ॥ मार्कंडेयो बकश्चैव प्रययुर्गंधमादनम् ॥ तमायांतमथालोक्य वयस्यं पुरतः स्थितम् ॥ १३ ॥
स्वकुलायात्प्रहृष्टोऽसौ गृध्रः संमुखमाययौ ॥ कृतसंविदसौ पूर्वं स्वागतासनभोजनैः ॥ १४ ॥ उलूकं गृध्रराजश्च कार्यं पप्रच्छ तं तथा ॥ स चाच
ख्यावयं मित्रं बको मेऽस्य मुनिः किल ॥ १५ ॥ मुनेरपि तृतीयोऽयं मित्रं चार्थोयमुद्यतः ॥ इंद्रद्युम्नपरिज्ञाने स्वयं जीवति नान्यथा ॥ १६ ॥ वह्निं
प्रवेक्ष्यते व्यक्तमयं तदनु वै वयम् ॥ मया निषिद्धोऽयं ज्ञात्वा त्वां चिरंतनमात्मना ॥ १७ ॥ तच्चेज्जानासि तं ब्रूहि चतुर्णां देहि जीवितम् ॥ संर
क्ष्याशुहि सत्कीर्तिं क्षयं चाखिलपाप्मनः ॥ १८ ॥ ॥ गृध्र उवाच ॥ ॥ षट्पंचाशद्व्यतीता मे कल्पा जातस्य कौशिक ॥ न दृष्टो न श्रुतोऽस्मा
भिरिंद्रद्युम्नो महीपतिः ॥ १९ ॥ तच्छ्रुत्वा विस्मयाविष्ट इंद्रद्युम्नोऽपि दुःखितः ॥ पप्रच्छ जीविते हेतुमतिमात्रे विहंगमम् ॥ २० ॥ ॥ गृध्र
उवाच ॥ ॥ शृणु भद्र पुरा जातो मर्कटोऽहं च चापलः ॥ आसं कदाचिदभवद्वसंतोऽथ ऋतुः क्रमात् ॥ २१ ॥ तत्राग्रे देवदेवस्य वनमध्ये शिवा
लये ॥ भवोद्भवस्य पुरतो जगद्योगेश्वराभिधे ॥ २२ ॥ चतुर्दशीदिने हस्तनक्षत्रे हर्षणाभिधे ॥ योगे चैत्रे सिते पक्ष आसीद्दमनकोत्सवः ॥ २३ ॥
अत्र सौवर्ण्यदोलायां लिंग आरोपिते जनैः ॥ निशायामधिरुह्याऽहं दोलां तां च व्यचालयम् ॥२४॥ निसर्गाज्जातिचापल्याच्चिरकालं पुनःपुनः ॥
अथ प्रभात आयाता जनाः पूजाकृते कपिम् ॥२५॥ दोलाधिरूढमालोक्य लकुटैर्मां व्यताडयन् ॥ दोलासंस्थित एवाहं प्रमीतः शिवमंदिरे ॥२६॥
तेषां प्रहारैः सुदृढैर्बहुभिर्वज्रदुःसहैः ॥ शिवांदोलनमाहात्म्याज्जातोऽहं नृपमंदिरे ॥ २७ ॥ काशीश्वरस्य तनयः प्रतीतोऽस्मि कुशध्वजः ॥ जाति

१ सुहृदामभिलप्स्यति–इ० पा० । २ शुचिः–इ० पा० । ३ चित्रानक्षत्रे–इ० पा० । मूलस्थो हस्तनक्षत्रे इत्येव पाठः साधुः । पौर्णमास्या एव चित्रानक्षत्रेण समन्वितत्वस्य "सास्मिन्पौर्णमासीति संज्ञायाम्" इत्यनेनोचितत्वात्।

CC-0. In Public Domain. Digitization by eGangotri

स्मरस्ततो राज्ये क्रमात्प्राप्याहमैश्वरम् ॥ २८ ॥ कारयामि धरापृष्ठे चैत्रे दमनकोत्सवम् ॥ यथा यथा दोलयति शिवं दोलास्थितं नरः ॥ २९ ॥ तथा तथाऽशुभं याति पुण्यमायाति भद्रक ॥ शिवदीक्षामुपागम्याखिलसंस्कारसंस्कृतः ॥ ३० ॥ शिवाचार्यैर्विमुक्तोऽहं पशुपाशैस्तदागमात् ॥ निर्वाहदीक्षापर्यंतान्संस्कारान्प्राप्य सर्वतः ॥ ३१ ॥ आराधयामि देवेशं प्रत्यक्चित्तमुमापतिम् ॥ समस्तक्लेशविच्छेदकारणं जगतां गुरुम् ॥ ३२ ॥ चित्तवृत्तिनिरोधेन वैराग्याभ्यासयोगतः ॥ जपन्नुद्गीतमस्यार्थं भावयन्नष्टमं रसम् ॥ ३३ ॥ ततो मां प्रणिधानेनाभ्यासेन दृढभूमिना ॥ अन्तरायानुपहतं ज्ञात्वा तुष्टोऽब्रवीद्धरः ॥ ३४ ॥ ॥ ईश्वर उवाच ॥ ॥ कुशध्वजाहं तुष्टोद्य वरं वरय वांछितम् ॥ न हीदृशमनुष्ठानं कस्याप्यस्ति महीतले ॥ ॥ ३५ ॥ श्रुत्वेत्युक्तो मया शम्भुर्भूयासं ते गणो ह्यहम् ॥ अनेनैव शरीरेण तथेत्येवाह गां प्रभुः ॥ ३६ ॥ ततः कैलासमानीय विमानं मम चादिशत्[२] ॥ सर्वरत्नमयं दिव्यं दिव्याश्चर्यसमावृतम् ॥ ३७ ॥ विचरामि प्रतीतोऽहं तदारूढो यदृच्छया ॥ अथ काले कियन्मात्रे व्यतीतेऽत्रैव पर्वते ॥ ३८ ॥ गवाक्षाधिष्ठितोऽपश्यं वसंते मुनिकन्यकाम् ॥ प्रवाति दक्षिणे वायौ मदनाग्निप्रदीपितः ॥ ३९ ॥ अग्निवेश्यसुतां भद्र विवस्त्रां जलमध्यगाम् ॥ उद्भिन्नयौवनां श्यामां मध्यक्षामां मृगेक्षणाम् ॥ ४० ॥ विस्तीर्णजघनाभोगां रंभोरुं संहतस्तनीम् ॥ तामंकुरितलावण्यां जलसेकादिवाग्रतः ॥ ४१ ॥ प्रोन्निद्रपंकजमुखीं वर्णनीयतमाकृतिम् ॥ यथाप्रज्ञानयाथात्म्याद्भिद्धिरपि वर्णिनीम् ॥ ४२ ॥ प्रोद्यत्कटाक्षविक्षेपैः शरव्रातैरिव स्मरः ॥ स्वयं तदंगमास्थाय ताडयामास मां दृढम् ॥ ४३ ॥ वयस्यासंवृतामेवं खेलमानां यदृच्छया ॥ अवतीर्याहमहरं विमानान्मदनातुरः ॥ ४४ ॥ सा गृहीता मया दीर्घं प्रकुर्वाणा महास्वनम्[३] ॥ तातेति च विमानस्था रुरोदातीव भद्रक ॥ ४५ ॥ ततो वयस्यास्ता दीना मुनिमाहुः प्रधाविताः ॥ वैमानिकेन केनापि ह्रियते तव पुत्रिका ॥ ४६ ॥ रुदन्तीं भगवन्नेतां त्राह्युत्तिष्ठेति सर्वतः ॥ तासां तदाकर्ण्य वचो मुनिर्भद्रतपोनिधिः ॥ ४७ ॥ अग्निवेश्योऽभ्यगात्तस्या व्योमन्युपपदं त्वरन् ॥ तिष्ठतिष्ठेति मामुक्त्वा संस्तभ्य तपसा गतिम् ॥ ४८ ॥ ततः प्रकुपितः प्राह मुनिर्मामतिदुःसहम् ॥ ॥ अग्निवेश्य उवाच ॥ ॥ यस्मान्मदीया तनया मांसपेशीव ते हृता ॥ ४९ ॥ गृध्रेणेवाऽधुना व्योम्नि तस्माद्गृध्रो भव द्रुतम् ॥ अनिच्छंती मदीयेयं सुता बाला तपस्विनी ॥ ५० ॥ त्वया हृताधुनास्यैतत्फलमाप्नुहि दुर्मते ॥ इत्याकर्ण्य भयाविष्टो लज्जयाधोमुखो मुनेः ॥ ॥ ५१ ॥ पादौ प्रगृह्य न्यपतं रुदन्नतितरां तदा ॥ न मयेयं परिज्ञाय हृता नाद्यापि धर्षिता ॥ ५२ ॥ प्रसादं कुरु ते शापं व्यावर्तय तपो

१ प्राणधारेण-इ० पा० । २ अदिशत्-ददावित्यर्थः । ३ महारवम्-इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निधे ॥ प्रणतेषु क्षमावन्तो निसर्गेण तपोधनाः ॥ ९३ ॥ भवंति संतस्तद्गृध्रो मा भवेयं प्रसीद मे ॥ इति प्रपन्नेन मया प्रणतोऽसौ महामुनिः ॥ ९४ ॥ प्रसन्नः प्राह नो मिथ्या मम वाक्यं भवेत्कचित् ॥ किं त्विंद्रद्युम्नभूपालपरिज्ञाने सहायताम् ॥ ९५ ॥ यदा यास्यसि शापस्य तदा मुक्तिमवाप्स्यसि ॥ ९६ ॥ इत्युक्त्वा स मुनिः प्रायाद्गृहीत्वा निजकन्यकाम् ॥ अखण्डशीलां स्वावासमहं गृध्रोऽभवं तदा ॥ ९७ ॥ एवं तदा दमनकोत्सव ईश्वरस्य आंदोलनेन नृपवेश्मनि मेऽवतारः ॥ शम्भोर्गणत्वमभवच्च तथाग्निवेश्यशापेन गृध्र इह भद्र तवेदमुक्तम् ॥ ॥ ९८ ॥ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां प्रथमे माहेश्वरखण्डे कौमारिकाखंडे महीप्रादुर्भावे दमनकमाहात्म्यंनाम नवमोऽध्यायः ॥ ९ ॥ ॥ छ ॥ ॥ नारद उवाच ॥ ॥ गृध्रस्यैतद्वचः श्रुत्वा दुःखविस्मयसंयुतः ॥ इन्द्रद्युम्नस्तमापृच्छ्य मरणायोपचक्रमे ॥ १ ॥ ततस्तमालोक्य तथा मुमूर्षुं कौशिकादिभिः ॥ स संहितं विचिंत्याह दीर्घायुषमथात्मनः ॥ २ ॥ मैवं कार्षीः शृणु गिरं भद्रक त्वं चिरंतनः ॥ मत्तोऽप्यस्ति स्फुटं चैव ज्ञास्यति त्वदभीप्सितम् ॥ ३ ॥ मानसे सरसि ख्यातः कूर्मो मंथरकाख्यया ॥ तस्य नाविदितं किंचिदेहि तत्र व्रजामहे ॥ ४ ॥ ततः प्रतीतास्ते भूपमुनिगृध्रबकास्तथा ॥ उलूकसहिता जग्मुः सर्वे कूर्मं दिदृक्षवः ॥ ५ ॥ सरस्तीरे स्थितः कूर्मस्तान्निरीक्ष्य विदूरगान् ॥ कांदिशीको विवेशासौ जलं शीघ्रतरं तदा ॥ ६ ॥ कौशिकोऽथ तमाहेदं प्रहस्य वचनं स्वयम् ॥ कस्मात्कूर्म प्रनष्टोद्य विमुखोऽभ्यागतेष्वपि ॥ ७ ॥ अग्निर्द्विजानां विप्रश्च वर्णानां रमणः स्त्रियाम् ॥ गुरुः पिता च पुत्राणां सर्वस्याभ्यागतो गुरुः ॥ ८ ॥ विहाय तमिमं धर्ममातिथ्यविमुखः कथम् ॥ गृह्णासि पापं सर्वेषां ब्रूहि कूर्माधुनोत्तरम् ॥ ९ ॥ ॥ कूर्म उवाच ॥ ॥ चिरंतनो हि जानामि कर्त्तुमातिथ्यसत्क्रियाम् ॥ अभ्यागतेष्वपचितिं धर्मशास्त्रेषु निश्चितम् ॥ १० ॥ सुमहत्कारणं चात्र श्रूयतां तद्वदामि वः ॥ नाहं पराङ्मुखो जात एतावंति दिनान्यपि ॥ ११ ॥ अभ्यागतस्य कस्यापि सर्वसत्कारसद्व्रती ॥ किं त्वेष पंचमो यो वो दृश्यते सरलाकृतिः ॥ ॥ १२ ॥ इंद्रद्युम्नो महीपालो बिभेम्यस्मादलंतराम् ॥ अमुना यजमानेन रौचकाख्ये पुरा पुरे ॥ १३ ॥ यज्ञपावकदग्धा मे पृष्ठिर्नाद्यापि निर्व्रणा ॥ तन्मे भयं पुनर्जातं किमयं पुनरेव माम् ॥ १४ ॥ आसुतीवलमाधाय भुवि धक्ष्यति संप्रति ॥ इति वाक्यावसाने तु कूर्मस्य कुरुसत्तम ॥ १५ ॥ पपात पुष्पवृष्टिः खाद्विमुक्ताप्सरसां गणैः ॥ सस्वनुर्देववाद्यानि कीर्त्युद्धारे महीपतेः ॥ १६ ॥ विस्मितास्ते च ददृशुर्विमानं पुरतः स्थितम् ॥ इंद्रद्युम्नकृते देवदूतेनाधिष्ठितं तदा ॥ १७ ॥ अयातयामाः प्रददुराशिषोऽस्मै सुरद्विजाः ॥ साधुवादो दिवि महानासीत्तस्य महीपतेः ॥ १८ ॥

CC-0. In Public Domain. Digitization by eGangotri

ततो विमानमालंब्य देवदूतस्तमुच्चकैः ॥ इंद्रद्युम्नमुवाचेदं शृण्वतां नाकवासिनाम् ॥ १९ ॥ ॥ देवदूत उवाच ॥ ॥ नवीकृताधुना कीर्तिस्तव भूपाल निर्मला ॥ त्रिलोक्यामपि तच्छीघ्रं विमानमिदमारुह ॥ २० ॥ गम्यतां ब्रह्मणो लोकमाकल्पं तपसोर्जितम् ॥ प्रेषितोऽहमने नैव तवानयनकारणात् ॥ २१ ॥ यावत्कीर्तिर्मनुष्यस्य पृथिव्यां प्रथिता भवेत् ॥ तावानेव भवेत्स्वर्गी सति पुण्ये ह्यनंतके ॥ २२ ॥ सुरालयसरो वापीकूपारामादिकल्पना ॥ एतदर्थं हि पूर्ताख्या धर्मशास्त्रेषु निश्चिता ॥ २३ ॥ ॥ इंद्रद्युम्न उवाच ॥ ॥ अमी ममैव सुहृदो मार्कंडबककौ शिकाः ॥ गृध्रकूर्मौ प्रभावोऽयममीषां मम वृद्धये ॥ २४ ॥ तच्चेदमी मया साकं ब्रह्मलोकं प्रयांत्युत ॥ पुरःस्थितास्तदायास्ये ब्रह्मलोकं च नान्यथा ॥ २५ ॥ परेषामनपेक्ष्यैव कृतप्रतिकृतं हि यः ॥ प्रवर्तते हितायैव स सुहृत्प्रोच्यते बुधैः ॥ २६ ॥ स्वार्थोद्युक्तधियो ये स्युरन्वर्थास्ते प्यसुंधराः ॥ मरणं प्रकृतिश्चैवं जीवितं विकृतिर्यदा ॥ २७ ॥ प्राणिनां परमो लाभः केवलं प्राणिसौहृदम् ॥ दरिद्रा रागिणोऽसत्यप्रतिज्ञाता गुरु द्रुहः ॥ २८ ॥ मित्रावसानिनः पापाः प्रायो नरकमंडनाः ॥ परार्थनष्टास्तदमी पंच संप्रति साधवः ॥ २९ ॥ मम कीर्तिसमुद्धारः स प्रभावो महा त्मनाम् ॥ अमीषां यदि ते स्वर्गं प्रयास्यन्ति मया सह ॥ तदाहमपि यास्यामि देवदूतान्यथा न हि ॥ ३० ॥ ॥ देवदूत उवाच ॥ ॥ एते हरगणाः सर्वेशापभ्रष्टाः क्षितिं गताः ॥ ३१ ॥ शापांते हरपार्श्वे तु यास्यंति पृथिवीपते ॥ विहायेमानतो भूप त्वमागच्छ मया सह ॥ ३२ ॥ न चैषां रोचते स्वर्गो हित्वा देवं महेश्वरम् ॥ ॥ इंद्रद्युम्न उवाच ॥ ॥ यद्येवं गच्छ तद्दूत नायास्येहं त्रिविष्टपम् ॥ ३३ ॥ तथा तथा यति ष्यामि भविष्यामि यथा गणः ॥ अविशुद्धिक्षयाधिक्यदूषणैरेष निंदितः ॥ ३४ ॥ स्वर्गः सदानुश्रविकस्तस्मादेनं न कामये ॥ तत्रस्थस्य पुनः पातो भयं न व्येति मानसात् ॥ ३५ ॥ पुनः पातो यतः पुंसस्तस्मात्स्वर्गं न कामये ॥ सति पुण्ये स्वयं तेन पातितो निजलोकतः ॥ ३६ ॥ चतुर्मुखेन वैलक्ष्यं गतोऽस्मि कथमेमि तम् ॥ इतीदमुक्त्वा दूतं तं शृण्वतोऽस्यैव विस्मयात् ॥ ३७ ॥ अप्राक्षीद्भूपतिः कूर्मं तदायुःकारणं तदा ॥ इदमायुः कथं जातं कूर्म दीर्घतमं तव ॥ ३८ ॥ सुहृन्मित्रं गुरुस्त्वं मे येन कीर्तिर्ममोद्धृता ॥ ३९ ॥ ॥ कूर्म उवाच ॥ ॥ शृणु भूप कथां दिव्यां श्रवणात्पापनाशिनीम् ॥ कथां सुमधुरामेतां शिवमाहात्म्यसंयुताम् ॥ ४० ॥ शृण्वन्निमामपि कथां नृपते म

१ चैतत्—इ० पा० । २ लोभः—इ०पा० । ३ गन्तव्यम्—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नुष्यः सुश्रद्धया भवति पापविमुक्तदेहः ॥ शंभोः प्रसादमभिगम्य यथाग्रुरेवमासीत्प्रसादत इयं मम कूर्मता च ॥ ४१ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां प्रथमे माहेश्वरखण्डे कौमारिकाखण्डे महीप्रादुर्भावे दशमोऽध्यायः ॥ १० ॥ ॥ छ ॥ ॥ कूर्म उवाच ॥ ॥ शांडिल्य इति विख्यातः पुराहमभवं द्विजः ॥ बालभावे मया भूप क्रीडमानेन निर्मितम् ॥ १ ॥ पुरा प्रावृषि पांशूत्थं शिवायतनमुच्छ्रितम् ॥ जलार्द्रवालुकाप्रायं प्रांशुप्राकारशोभितम् ॥ २ ॥ पंचायतनविन्यासमनोहरतरं नृप ॥ विनायकशिवासूर्यमधुसूदनमूर्तिमत् ॥ ३ ॥ पीतमृत्स्वर्ण कलशं ध्वजमालाविभूषितम् ॥ काष्ठतोरणविन्यस्तं दोलकेन विभूषितम् ॥ ४ ॥ दृढप्रांशुसमुद्भूतसोपानश्रेणिभासुरम् ॥ सर्वाश्चर्यमयं दिव्यं वयस्यैः संवृतेन मे ॥ ५ ॥ तत्र जागेश्वरं लिंगं कृत्वाथ विनिवेशितम् ॥ बाल्यादुपलरूपं तद्वर्षावारिविशुद्धिमत् ॥ ६ ॥ बकपुष्पैस्तथान्यैश्च केदारोत्थैः समाहृतैः ॥ कोमलैरपरैः पुष्पैर्वृतिवल्लीसमुद्भवैः ॥ ७ ॥ कूष्मांडैश्चैव वर्णाद्यैरुन्मत्तकुसुमायुतैः ॥ मंदारैर्बिल्वपत्रैश्च दूर्वाद्यैश्च नवांकुरैः ॥ ८ ॥ पूजा विरचिता रम्या शंभोरिति मया नृप ॥ ततस्तांडवमारब्धमनपेक्षितसत्क्रियम् ॥ ९ ॥ शिवस्य पुरतो बाल्याद्गीतं च स्वरवर्जितम् ॥ अकार्षं सकृदेवाहं बाल्ये शिशुगणावृतः ॥ १० ॥ ततो मृतोऽहं जातश्च विप्रो जातिस्मरो नृप ॥ वैदिशे नगरेऽकार्षं शिवपूजां विशेषतः ॥ ११ ॥ शिवदीक्षामुपागम्यानुगृहीतः शिवागमैः ॥ शिवप्रासाद आधाय लिंगं श्रद्धासमन्वितः ॥१२॥ कल्पकोटिं वसेत्स्वर्गे यः करोति शिवालयम् ॥ यावंति परमाणूनि शिवस्यायतने नृप ॥ १३ ॥ भवंति तावद्वर्षाणि कारकः शिवसद्मनि ॥ इति पौराणवाक्यानि स्मरञ्छैलं शिवालयम् ॥ १४ ॥ अकारिषमहं रम्यं विश्वकर्मविधानतः ॥ मृन्मयं काष्ठनिष्पन्नं पाक्केष्टं शैलमेव वा ॥ १५ ॥ कृतमायतनं दद्यात्क्रमाद्दशगुणं फलम् ॥ भस्मशायी त्रिषवणो भिक्षान्नकृतभोजनः ॥ १६ ॥ जटाधरस्तपस्यंश्च शिवाराधनतत्परः ॥ इत्थं मे कुर्वतो जातं पुनर्भूप प्रमापणम्[1] ॥ १७ ॥ जातो जातिस्मरस्तत्र तृतीयेहं भवांतरे ॥ सार्वभौमो महीपालः प्रतिष्ठाने पुरोत्तमे ॥ १८ ॥ जयदत्त इति ख्यातः सूर्यवंशसमुद्भवः ॥ ततो मया बहुविधाः प्रासादाः कारिता नृप ॥ १९ ॥ तस्मिन्भवांतरे शंभोराराधनपरेण च ॥ ततो निरूपिता जाता बकपुष्पपुरस्सराः ॥ २० ॥ सौवर्णै राजतै रत्ननिर्मितैः कुसुमैर्नृप ॥ तथाविधेऽन्नदानादि करोमि नृपसत्तम ॥ २१ ॥ केवलं शिवलिंगानां पूजां पुष्पैः करोम्यहम् ॥ ततो मे भगवाञ्छंभुः संतुष्टोऽथ वरं ददौ ॥ २२ ॥ अजरामरतां राजंस्तेनैव वपुषा वृतः ॥ ततस्तथाविधं प्राप्यानन्यसाधारणं वरम् ॥ २३ ॥ विचरामि

१ प्रमापणम् -मरणमित्यर्थः ।

CC-0. In Public Domain. Digitization by eGangotri

महीमेतां मदांध इव वारणः ॥ शिवभक्तिं विहायाथ नृपोऽहं मदनातुरः ॥ २४ ॥ प्रधर्षयितुमारब्धः स्त्रियः परपरिग्रहाः ॥ आयुषस्त
पसः कीर्तेस्तेजसो यशसः श्रियः ॥ २५ ॥ विनाशकारणं मुख्यं परदारप्रधर्षणम् ॥ सकर्णः श्रुतिहीनोऽसौ पश्यन्नंधो वदञ्जडः ॥ २६ ॥
अचेतनश्चेतनावान्मूर्खो विद्वानपि स्फुटम् ॥ तदा भवति भूपाल पुरुषः क्षणमात्रतः ॥ २७ ॥ यदैव हरिणाक्षीणां गोचरं याति चक्षुषाम् ॥ मृतस्य
निरये वासो जीवतश्चेश्वराद्भयम् ॥२८॥ एवं लोकद्वयं हंत्री परदारप्रधर्षणा ॥ जरामरणहीनोहमिति निश्चयमास्थितः ॥ २९ ॥ ऐहिकामुष्मिकभयं
विहायाहं ततः परम् ॥ प्रधर्षयितुमारब्धस्तदा भूप परस्त्रियः ॥ ३० ॥ अथ मां संपरिज्ञाय मर्यादारहितं यमः ॥ वरप्रदानादीशस्य तदंतिकमुपा
ययौ ॥ व्यजिज्ञपन्मदीयं च शंभोर्धर्मव्यतिक्रमम् ॥ ३१ ॥ ॥ यम उवाच ॥ ॥ नाहं तवानुभावेन गुप्तस्यास्य विनिग्रहम् ॥ ३२ ॥ शक्नोमि
पापीनो देव मन्नियोगेऽन्यमादिश ॥ जगदाधाररूपा हि त्वयेशोक्ताः पतिव्रताः ॥ ३३ ॥ गावो विप्राः सनिगमा अलुब्धा दानशीलिनः ॥ सत्य
निष्ठा इति स्वामिंस्तेषां मुख्यतमा सती ॥ ३४ ॥ तास्तेन धर्षिता लुप्तं मदीयं धर्मशासनम् ॥ वरदानप्रमत्तेन तवैव परिभूय माम् ॥ ३५ ॥ जय
दत्तेन देवेश प्रतिष्ठानाधिवासिना ॥ इमां धर्मस्य भगवान्गिरमाकर्ण्य कोपितः ॥ शशाप मां समानीय वेपमानं कृतांजलिम् ॥ ३६ ॥ ॥
॥ ईश्वर उवाच ॥ ॥ यस्माद्दुष्टसमाचार धर्षितास्ते पतिव्रताः ॥ ३७ ॥ कामार्तेन मया शप्तस्तस्मात्कूर्मः क्षणाद्भव ॥ ततः प्रणम्य विज्ञप्तः
शापतापहरो मया ॥ ३८ ॥ प्राह षष्टितमे कल्पे विशापो भविता गणः ॥ मदीय इति संप्रोच्य जगामादर्शनं शिवः ॥ ३९ ॥ अहं कूर्मस्तदा
जातो दशयोजनविस्तृतः ॥ समुद्रसलिले नीतस्त्वयाहं यज्ञसाधने ॥ ४० ॥ पुरस्ताद्यायजूकेन[1] स्मरंस्तच्च बिभेमि ते ॥ दग्धस्त्वयाहं पृष्ठेत्र
व्रणान्येतानि पश्य मे ॥ ४१ ॥ चयनानि बहून्यत्र कल्पसूत्रविधानतः ॥ पृष्ठोपरि कृतान्यासन्निंद्रद्युम्न तदा त्वया ॥ ४२ ॥ भूयः संतापिता यज्ञैः
पृथिवी पृथिवीपते ॥ सुस्राव सर्वतीर्थानां सारं साऽभून्महीनदी ॥ ४३ ॥ तस्यां च स्नानमात्रेण सर्वपापैः प्रमुच्यते ॥ ततो नैमित्तिके कस्मिन्नपि
प्रलय आगतः ॥ ४४ ॥ प्लवमानमिदं राजन्मानसं शतयोजनम् ॥ षट्पंचाशत्प्रमाणेन कल्पा मम पुरा नृप ॥ ४५ ॥ व्यतीता इह चत्वारः शेषे
मोक्षस्ततः परम् ॥ एवमायुरिदं दीर्घमेवं शापाच्च कूर्मता ॥ ४६ ॥ ममाभूदीश्वरस्यैव सतीधर्मद्रुहो नृप ॥ ब्रूहि किं क्रियतां शत्रोरपि ते गृहगामिनः
॥ ४७ ॥ मम पृष्ठिश्चिरं भूप त्वया दग्धाग्निनाऽपुरा[2] ॥ अहं ज्वलंतीमिव तां पश्याम्यद्यापि सत्रिणा[3] ॥ ४८ ॥ इदं विमानमायातं त्वया कस्मान्निरा

१ 'यायजूकोऽतियष्टरि'—इत्यमरः ।२ अधुना—इ॰पा॰ । ३ सत्रिणा--अद्यापि ज्वलन्तीं पृष्ठिं पश्यामि--इत्यनेन--कीर्तेरखंडितानुगतिर्वर्णिता ततस्ते स्वर्गादिलोका उचिताः--इति तात्पर्यम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

कृतम् ॥ देवदूतसमायुक्तं भुंक्ष्व भोगान्निजार्जितान् ॥ ४९ ॥ ॥ इंद्रद्युम्न उवाच ॥ ॥ चतुर्मुखेन तेनाहं स्वर्गान्निर्वासितः स्वयम् ॥ विलक्ष्यो[1] न प्रयास्यामि पाताधिक्यादिदूषिते ॥ ५० ॥ तस्माद्विवेकवैराग्यमविद्यापापनाशनम् ॥ आलिंग्याहं यतिष्यामि प्राप्य बोधं विमुक्तये ॥ ५१ ॥ तन्मे गृहागतस्याद्य यथातिथ्यकरो भवान् ॥ तदादिश यथाऽपारपारदः कोपि मे गुरुः ॥ ५२ ॥ ॥ कूर्म उवाच ॥ ॥ लोमशोनाम दीर्घायुर्मत्तोऽप्यस्ति महामुनिः ॥ मया कलापग्रामे स पूर्वं दृष्टः क्वचिन्नृप ॥ ५३ ॥ ॥ इंद्रद्युम्न उवाच ॥ ॥ तस्मादागच्छ गच्छामस्तमेव सहिता वयम् ॥ प्राहुः पूततमां तीर्थादपि सत्संगतिं बुधाः ॥ ५४ ॥ इत्थं निशम्य नृपतेर्वचनं तदानीं सर्वेऽपि ते षडथ तं मुनिमुख्यमाशु ॥ चित्ते विधाय मुदिताः प्रययुर्द्विजेंद्रं जिज्ञासवः सुचिरजीवितहेतुमस्य ॥ ५५ ॥ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां प्रथमे माहेश्वरखण्डे कौमारिकाखण्डे महीप्रादुर्भावे कूर्माख्यानंनामैकादशोऽध्यायः ॥ ११ ॥ ॥ छ ॥ ॥ नारद उवाच ॥ ॥ अथ ते ददृशुः पार्थ संयमस्थं महामुनिम् ॥ क्रियायोगसमायुक्तं तपोमूर्तिधरं यथा ॥ १ ॥ जटास्त्रिषवणस्नानकपिलाः शिरसा तदा ॥ धारयन्तं लोमशाख्यमाज्यसिक्तमिवानलम् ॥ २ ॥ सव्यहस्ते तृणौघं च च्छायार्थे विप्रसत्तमम् ॥ दक्षिणे चाक्षमालां च बिभ्रतं मैत्रमार्गगम् ॥ ३ ॥ अहिंसयन्दुरुक्ताद्यैः प्राणिनो भूमिचारिणः ॥ यः सिद्धिमेति जप्येन स मैत्रो मुनिरुच्यते ॥ ४ ॥ बकभूपद्विजोलूकगृध्रकूर्मा विलोक्य च ॥ नेमुः कलापग्रामे तं चिरंतनतपोनिधिम् ॥५॥ स्वागतासनसत्कारेणामुना तेऽति सत्कृताः ॥ यथोचितं प्रतीतास्तमाहुः कार्यं हृदि स्थितम् ॥६॥ ॥ ॥ कूर्म उवाच ॥ ॥ इन्द्रद्युम्नोऽयमवनीपतिः सत्रिजनाग्रणीः ॥ कीर्तिलोपान्निरस्तोऽयं वेधसा नाकपृष्ठतः ॥७॥ मार्कंडेयादिभिः प्राप्य कीर्त्युद्धारं च सत्तम ॥ नायं कामयते स्वर्गं पुनःपातादिभीषणम् ॥८॥ भवतानुगृहीतोऽयमिहेच्छति महोदयम् ॥ प्रणोद्य[2]स्तदयं भूपः शिष्यस्ते भगवन्मया ॥ त्वत्सकाशमिहानीतो ब्रूहि साध्वस्य वांछितम् ॥ ९ ॥ परोपकरणं नाम साधूनां व्रतमाहितम् ॥ विशेषतः प्रणोद्यानां[3] शिष्यवृत्तिमुपेयुषाम् ॥ १० ॥ अप्रणोद्येषु पापेषु साधुं[4] प्रोक्तमसंशयम् ॥ विद्वेषं मरणं चापि कुरुतेऽन्यतरस्य च ॥११॥ अप्रमत्तः प्रणोद्येषु मुनिरेष प्रयच्छति ॥ तदेवेति भवानेवं धर्मं वेत्ति कुतो वयम् ॥१२॥ ॥ लोमश उवाच ॥ ॥ कूर्म युक्तमिदं सर्वं त्वयाभिहितमद्य नः ॥ धर्मशास्त्रोपनतं तत्स्मारिताः स्म पुरातनम् ॥१३॥

---

१ विलक्ष्यो लज्जित इत्यर्थः । २ प्रबोध्यः—इ० पा० । प्रणोद्यः—प्रबोध्य इत्येवार्थः । ३ प्रबोध्यानाम्—इ० पा० । ४ यत्साधु उपदेशवाक्यं प्रोक्तं, तत्—असंशयम्—अन्यतरस्य गुरोर्वा पापस्य शिष्यस्य वा विद्वेषं वा मरणं वा कुरुते—इति योजना ।

CC-0. In Public Domain. Digitization by eGangotri

ब्रूहि राजन्सुविश्रब्धं सन्देहं हृदयस्थितम् ॥ कस्ते किमब्रवीच्छेषं वक्ष्याम्यहं न संशयः ॥ १४ ॥ ॥ इन्द्रद्युम्न उवाच ॥ ॥ भगवन्प्रथमः
प्रश्नस्तावदेव ममोच्यताम् ॥ ग्रीष्मकालेऽपि मध्यस्थे रवौ किं न तवाश्रमः ॥ १५ ॥ कुटीमात्रोऽपि यच्छाया तृणैः शिरसि पाणिगैः ॥ १६ ॥
॥ ॥ लोमश उवाच ॥ ॥ मर्तव्यमस्त्यवश्यं च काय एष पतिष्यति ॥ कस्यार्थे क्रियते गेहमनित्यभवमध्यगैः ॥ १७ ॥ यस्य मृत्युर्भवे
न्मित्रं पीतं वाऽमृतमुत्तमम् ॥ तस्यैतदुचितं वक्तुमिदं मे श्वो भविष्यति ॥ १८ ॥ इदं युगसहस्रेषु भविष्यमभवद्दिनम् ॥ तदप्यद्यत्वमापन्नं का कथा
मरणावधेः ॥ १९ ॥ कारणानुगतं कार्यमिदं शुक्रादभूद्वपुः ॥ कथं विशुद्धिमायाति क्षालितांगारवद्वद ॥ २० ॥ तदस्यापि कृते पापं शत्रुष
ड्वर्गनिर्जिताः ॥ कथंकारं न लज्जन्ते कुर्वाणा नृपसत्तम ॥ २१ ॥ तद्ब्रह्मण इहोत्पन्नः सिकताद्वयसम्भवः ॥ निगमोक्तं पठञ्छृण्वन्निदं जीविष्यते
कथम् ॥ २२ ॥ तथापि वैष्णवी माया मोहयत्यविवेकिनम् ॥ हृदयस्थं न जानंति ह्यपि मृत्युं शतायुषः ॥ २३ ॥ दन्ताश्चलाश्चला लक्ष्मीर्यौवनं
जीवितं नृप ॥ चलाचलमतीवेदं दानमेवं गृहं नृणाम् ॥ २४ ॥ इति विज्ञाय संसारमसारं च चलाचलम् ॥ कस्यार्थे क्रियते राजन्कुटजादि
परिग्रहः ॥२५॥ ॥ इन्द्रद्युम्न उवाच ॥ ॥ चिरायुर्भगवानेव श्रूयते भुवनत्रये[1] ॥ तदर्थमहमायातस्तत्किमेवं वचस्तव ॥२६॥ ॥ लोमश उवाच ॥ ॥
प्रतिकल्पं मच्छरीरादेकरोमपरिक्षयः ॥ जायते सर्वनाशे च मम भावि प्रमापणम् ॥ २७ ॥ पश्य जानुप्रदेशं मे द्व्यंगुलं रोमवर्जितम् ॥ जातं वपुस्त
द्बिभेमि मर्तव्ये सति किं गृहैः ॥ २८ ॥ ॥ नारद उवाच ॥ ॥ इत्थं निशम्य तद्वाक्यं स प्रहस्यातिविस्मितः ॥ भूपालस्तस्य पप्रच्छ कारणं तादृ
शायुषः ॥ २९ ॥ ॥ इन्द्रद्युम्न उवाच ॥ ॥ पृच्छामि त्वामहं ब्रह्मन्यदायुरिदमीदृशम् ॥ तव दीर्घं प्रभावोऽसौ दानस्य तपसोऽथवा ॥ ३० ॥
॥ ॥ लोमश उवाच ॥ ॥ शृणु भूप प्रवक्ष्यामि पूर्वजन्मसमुद्भवाम् ॥ शिवधर्मयुतां पुण्यां कथां पापप्रणाशनीम् ॥३१॥ अहमासं पुरा शूद्रो दरिद्रो
ऽतीवभूतले ॥ भ्रमामि वसुधापृष्ठे ह्यशनापीडितो भृशम् ॥ ३२ ॥ ततो मया महल्लिंगं जालिमध्यगतं तदा ॥ मध्याह्नेऽस्य जलाधारो[2] दृष्टश्चैवा
विदूरतः ॥ ३३ ॥ ततः प्रविश्य तद्वारि पीत्वा स्नात्वा च शांभवम् ॥ तल्लिंगं स्नापितं पूजा विहिता कमलैः शुभैः ॥ ३४ ॥ अथ क्षुत्क्षामकंठोऽहं
श्रीकंठं तं नमस्य च ॥ पुनः प्रचलितो मार्गे प्रमीतो नृपसत्तम ॥ ३५ ॥ ततोऽहं ब्राह्मणगृहे जातो जातिस्मरः सुतः ॥ स्नापनाच्छिवलिंगस्य
सकृत्कमलपूजनात् ॥ ३६ ॥ स्मरन्विलसितं मिथ्या सत्याभासमिदं जगत् ॥ अविद्यामयमित्येवं ज्ञात्वा मूकत्वमास्थितः ॥ ३७ ॥ तेन विप्रेण

१ भगवान्—त्वम्—इत्यर्थोत्र बोध्यः—"उत्पत्तिं प्रलयं चैव भूतानामागतिं गतिम् । वेत्ति विद्यामविद्यां च स वाच्यो भगवानिति" इति महर्षेर्भगवच्छब्दवाच्यत्वम् । २ जलाधारः--तीर्थजलाशयः—इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वार्धक्ये समाराध्य महेश्वरम् ॥ प्राप्तोऽहमिति मे नाम ईशान इति कल्पितम् ॥ ३८ ॥ ततः स विप्रो वात्सल्यादगदान्सुबहून्मम ॥ चकार व्यपनेष्यामि मूकत्वमिति[1] निश्चयः[2] ॥ ३९ ॥ मंत्रवादान्बहून्वैद्यानुपायानपरानपि ॥ पित्रोस्तथा महामायासंबद्धमनसोस्तथा ॥ ४० ॥ निरीक्ष्य मूढतां हास्यमासीन्मनसि मे तदा ॥ तथा यौवनमासाद्य निशि हित्वा निजं गृहम् ॥ ४१ ॥ संपूज्य कमलैः शंभुं ततः शयनमभ्यगाम् ॥ ततः प्रमीते पितरि मूढ[3]इत्यहमुज्झितः ॥ ४२ ॥ संबंधिभिः प्रतीतोऽथ फलाहारमवस्थितः ॥ प्रतीतः पूजयामीशमब्जैर्बहुविधैस्तथा ॥ ४३ ॥ अथ वर्षशतस्यांते वरदः शशिशेखरः ॥ प्रत्यक्षो याचितो देहि जरामरणसंक्षयम् ॥ ४४ ॥ ॥ ईश्वर उवाच ॥ ॥ अजरामरता नास्ति नामरूपभृतो यतः ॥ ममापि देहपातः स्यादवधिं कुरु जीविते ॥ ४५ ॥ इति शंभोर्वचः श्रुत्वा मया वृतमिदं तदा ॥ कल्पांते रोमपातोऽस्तु मरणं सर्वसंक्षये ॥ ॥ ४६ ॥ ततस्तव गणो भूयामिति मेऽभीप्सितो वरः ॥ तथेत्युक्त्वा स भगवान्हरश्चादर्शनं गतः ॥ ४७ ॥ अहं तपसिनिष्ठश्च[4] ततः प्रभृति चाभवम् ॥ ब्रह्महत्यादिभिः पापैर्मुच्यते शिवपूजनात् ॥ ४८ ॥ बिल्वाब्जैरितरैर्वापि कमलैर्नात्र संशयः ॥ एवं कुरु महाराज त्वमप्याप्स्यसि वांछितम् ॥ ४९ ॥ हरभक्तस्य लोकस्य त्रिलोक्यां नास्ति दुर्लभम् ॥ बहिःप्रवृत्तिं संगृह्य ज्ञानकर्मेन्द्रियादि च ॥ ५० ॥ लयः सदाशिवे नित्यमंतर्योगोऽयमुच्यते ॥ दुष्करत्वाद्बहिर्योगं शिव एव स्वयं जगौ ॥ ५१ ॥ पंचभिश्चार्चनं भूतैर्विशिष्टफलदं ध्रुवम् ॥ क्लेशकर्मविपाकाद्यैराशयैश्चाप्यसंयुतम् ॥५२॥ ईशानमाराध्य जपन्प्रणवं मुक्तिमाप्नुयात् ॥ सर्वपापक्षये जाते शिवे भवति भावना ॥५३॥ पापोपहतबुद्धीनां शिवे वार्तापि दुर्लभा ॥ दुर्लभं भारते जन्म दुर्लभं शिवपूजनम् ॥ ५४ ॥ दुर्लभं जाह्नवीस्नानं शिवे भक्तिः सुदुर्लभा ॥ दुर्लभं ब्राह्मणे दानं दुर्लभं वह्निपूजनम् ॥ ५५ ॥ अल्पपुण्यैश्च दुष्प्रापं पुरुषोत्तमपूजनम् ॥ ५६ ॥ लक्षेण धनुषां योगस्तदर्धेन हुताशनः ॥ पात्रं शतसहस्रेण रेवा रुद्रश्च षष्टिभिः ॥ ५७ ॥ इतीदमुक्तमखिलं मया तव महीपते ॥ यथायुरभवद्दीर्घं समाराध्य महेश्वरम् ॥ ५८ ॥ न दुर्लभं न दुष्प्रापं न चासाध्यं महात्मनाम् ॥ शिवभक्तिकृतां पुंसां त्रिलोक्यामिति निश्चितम् ॥ ५९ ॥ नंदीश्वरस्य तेनैव वपुषा शिवपूजनात् ॥ सिद्धिमालोक्य को राजञ्छंकरं न नमस्यति ॥ ॥ ६० ॥ श्वेतस्य च महीपस्य श्रीकंठं च नमस्यतः ॥ कालोपि प्रलयं यातः कस्तमीशं न पूजयेत् ॥ १६ ॥ यदिच्छया विश्वमिदं जायते व्यव

१ वै पुनः—इ० पा० । २ इति निश्चयो यस्य स इतिनिश्चयः इति समस्तं पदं ब्राह्मणस्य विशेषणमिदम् । ३ मूकः—इ० पा० । ४ तपसिनिष्ठः—इत्यलुक्समासः—उरसिलोमेतिवत् । "हलदन्तात्—" इत्यत्र 'संज्ञायाम्' इत्यस्य योगविभागेन पार्थक्येन असंज्ञायामपि पूर्वेणालुक् । ५ पदम्—इ०, स्थानम्—इ०, घटम्—इ० च पा० ।

CC-0. In Public Domain. Digitization by eGangotri

तिष्ठते ॥ तथा संलीयते चांते कस्तं न शरणं व्रजेत् ॥ ६२ ॥ एतद्रहस्यमिदमेव नृणां प्रधानं कर्तव्यमत्र शिवपूजनमेव भूप ॥ यस्यांतरायपदवीमुपयांति लोकाः सद्यो नरः शिवनतः शिवमेति सत्यम् ॥ ६३ ॥ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां प्रथमे माहेश्वरखण्डे कौमारिकाखण्डे महीप्रादुर्भावे लोमशवृत्तान्ते शिवपूजनमाहात्म्यवर्णनंनाम द्वादशोऽध्यायः ॥ १२ ॥ छ ॥ ॥ ॥ नारद उवाच ॥ ॥ इति तस्य मुनींद्रस्य भूपतिः शुश्रुवान्वचः ॥ प्राह नाहं गमिष्यामि त्वां विहाय नरं क्वचित् ॥ १ ॥ लिंगमाराधयिष्येऽद्य सर्वसिद्धिप्रदं नृणाम् ॥ त्वयैवानुगृहीतोऽद्य यांतु सर्वे यथागतम् ॥ २ ॥ तद्भूपतिवचः श्रुत्वा बको गृध्रोऽथ कच्छपः ॥ उलूकश्च तथैवोचुः प्रणता लोमशं मुनिम् ॥ ३ ॥ स च सर्वसुहृद्विप्रस्तथेत्येवाह तांस्तदा ॥ प्रणोद्यान्प्रणतान्सर्वाननुजग्राह शिष्यवत् ॥ ४ ॥ शिवदीक्षाविधानेन लिंगपूजां समादिशत् ॥ तेषामनुग्रहपरो मुनिः प्रर्णतवत्सलः ॥ तीर्थादप्यधिकं स्थाने सतां साधुसमागमः ॥ ५ ॥ पचेलिमफलः सद्यो दुरंतकलुषापहः ॥ अपूर्वः कोऽपि सद्गोष्ठीसहस्रकिरणोदयः ॥ ६ ॥ य एकांततयात्यंतमंतर्गततमोपहः ॥ साधुगोष्ठीसमुद्भूतसुखामृतरसोर्मयः ॥ ७ ॥ सर्वे वराः सुधाकाराः शर्करामधुषड्रसाः ॥ ततस्ते साधुसंसर्गं संप्राप्ताः शिवशासनात् ॥ ८ ॥ आरेभिरे क्रियायोगं मार्कंडनृपपूर्वकाः ॥ तेषां तपस्यतामेवं समाँजग्मे कदाचन ॥ तीर्थयात्रानुषंगेन लोमशालोकनोत्सुकः ॥ ९ ॥ मुख्या पुरुषयात्रा हि तीर्थयात्रानुषंगतः ॥ सद्भिः समाश्रितो भूप भूमिभागस्तथोच्यते ॥ १० ॥ कृताहर्णातिथ्यविधिं विश्रांतं मां च फाल्गुन ॥ प्रणम्य तेऽथ पप्रच्छुर्नाडीजंघपुरःसराः ॥ ११ ॥ ॥ त उचुः ॥ ॥ शापभ्रष्टा वयं ब्रह्मंश्चत्वारोऽपि स्वकर्मणा ॥ तन्मुक्तिसाधनार्थाय स्थानं किंचित्समादिश ॥ १२ ॥ इयं हि निष्फला भूमिः सफलं भारतं मुने ॥ १३ ॥ तत्रापि क्वचिदेकत्र सर्वतीर्थफलं वद ॥ इति पृष्टस्त्वहं तैश्च तानब्रवमिदं तदा ॥ १४ ॥ संवर्तं परिपृच्छध्वं स वो वक्ष्यति तत्त्वतः ॥ सर्वतीर्थफलावाप्तिकारकं भूप्रदेशकम् ॥ १५ ॥ ॥ त उचुः ॥ ॥ कुत्रासौ विद्यते योगी नाज्ञासिष्म वयं च तम् ॥ संवर्तदर्शनान्मुक्तिरिति चास्मदनुग्रहः ॥ १६ ॥ यदि जानासि तं ब्रूहि सुहृत्संगो न निष्फलः ॥ ततोऽहमब्रवं तांश्च विचार्येदं पुनःपुनः ॥ १७ ॥ वाराणस्यामसावास्ते संवर्तो गुप्तलिंगभृत् ॥ मलदिग्धो विवसनो भिक्षाशी कृतपादनु ॥ १८ ॥

१ लोकाः स्वर्गसत्यादयो लोकाः । २ नित्यम्–इ०पा० । ३ अन्यं नरमित्यर्थः । ४ सुव्रतवत्सलः–इ०पा० । ५ पचेलिमफलः–परिपक्वफलः इत्यर्थः । तदुत्तमफलः–इ०पा० । ६ सुधासीधुशर्करामधुषड्रसाः–इ०पा० । ७ समाजग्मे–अहं नारदः समागतः इत्यर्थः । समागतोऽस्मि–इति वा । ८ सद्भिः समाश्रितं मुक्तिस्थानं किंचित्समादिश–इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

करपात्रकृताहारः सर्वथा निष्परिग्रहः ॥ भावयन्ब्रह्म परमं प्रणवाभिधमीश्वरम् ॥ १९ ॥ भुक्त्वा निर्याति सायाह्ने वनं न ज्ञायते जनैः ॥ योगीश्वरोऽसौ तद्रूपाः सन्त्यन्ये लिंगधारिणः ॥ २० ॥ वक्ष्यामि लक्षणं तस्य यथा ज्ञास्यथ तं मुनिम् ॥ प्रतोल्या राजमार्गे तु निशि भूमौ शवं जनैः ॥ २१ ॥ अविज्ञातं स्थापनीयं स्थेयं तदविदूरतः ॥ यस्तां भूमिमुपागम्य अकस्माद्विनिवर्तते ॥ २२ ॥ स संवर्तो न चाक्रामत्येष शल्यमसंशयम् ॥ प्रष्टव्योऽभिमतं चासावुपाश्रित्य विनीतवत् ॥ २३ ॥ यदि पृच्छति केनाहमाख्यात इति मां ततः ॥ निवेद्य चैतद्वक्तव्यं त्वामाख्यायाग्निमाविशत् ॥ २४ ॥ तच्छ्रुत्वा ते तथा चक्रुः सर्वेपि वचनं मम ॥ प्राप्य वाराणसीं दृष्ट्वा संवर्तं ते तथा व्यधुः[1] ॥ २५ ॥ शवं दृष्ट्वा च तैर्न्यस्तं संवर्तो वै न्यवर्तत ॥ क्षुत्परीतोऽपि तं ज्ञात्वा ययुस्तमनु शीघ्रगम् ॥ २६ ॥ तिष्ठ ब्रह्मन्क्षणमिति जल्पंतो राजमार्गगम् ॥ याति निर्भर्त्स्यत्येष निवर्तध्वमिति ब्रुवन् ॥ २७ ॥ समया[2] मामरे भोऽद्य नागंतव्यं न वो हितम् ॥ पलायनमसौ कृत्वा गत्वा दूरतरं सरः ॥ कुपितः प्राह तान्सर्वान्केनाख्यातोऽहमित्युत ॥ २८ ॥ निवेदयत शीघ्रं मे यथा भस्म करोमि तम् ॥ शापाग्निनाथ वा युष्मान्यदि सत्यं न वक्ष्यथ ॥ २९ ॥ अथ प्रकंपिताः प्राहुर्नारदेनेति तं मुनिम् ॥ स तानाह पुनर्यातः पिशुनः क्व नु संप्रति ॥ ३० ॥ लोकानां येन शापाग्नौ भस्मशेषं करोमि तम् ॥ ब्रह्मबंधुमहं प्राहुर्भीतास्ते तं पुनर्मुनिम् ॥ ३१ ॥ ॥ त ऊचुः ॥ ॥ त्वां निवेद्य स चास्माकं प्रविष्टो हव्यवाहनम् ॥ तत्कालमेव विप्रेंद्र न विद्मस्तत्र कारणम् ॥ ३२ ॥ ॥ संवर्त उवाच ॥ ॥ अहमप्येवमेवास्य कर्ता तेन स्वयं कृतम् ॥ तद्ब्रूत कार्यं नैवात्र चिरं स्थास्यामि वः कृते ॥ ॥ ३३ ॥ ॥ अर्जुन उवाच ॥ ॥ यदि नारद देवर्षे प्रविष्टोऽसि हुताशनम् ॥ जीवितस्तत्कथं भूय आश्चर्यमिति मे वद ॥ ३४ ॥ ॥ ॥ नारद उवाच ॥ ॥ न हुताशः समुद्रो वा वायुर्वा वृक्षपर्वतः ॥ आयुधं वा न मे शक्ता देहपाताय भारत ॥ ३५ ॥ पुनरेतत्कृतं चापि संवर्तो मन्यते यथा ॥ अहं सन्मानितश्चेति वह्निं प्राप्याप्यगामहम् ॥ ३६ ॥ यथा पुष्पगृहे कश्चित्प्रविशत्यंग फाल्गुन ॥ तथाहमग्निं संविश्य यातवानुत्तरं शृणु ॥ ३७ ॥ संवर्तस्तान्पुनः प्राह मार्कंडेयमुखानिति ॥ विशल्यः क्रियतां पंथाः क्षुधितोऽहं पुनः पुरीम् ॥ भिक्षार्थं पर्यटिष्यामि प्रश्नं प्रब्रूत चैव मे ॥ ३८ ॥ ॥ त ऊचुः ॥ ॥ शापभ्रष्टा वयं मोक्षं प्राप्स्यामस्त्वदनुग्रहात् ॥ प्रतीकारं तदाख्याहि प्रणतानां महामुने ॥ ३९ ॥ यत्र तीर्थे सर्वतीर्थफलं प्राप्नोति मानवः ॥ तत्तीर्थं ब्रूहि संवर्त तिष्ठामो यत्र वै वयम् ॥ ४० ॥ ॥ संवर्त उवाच ॥ ॥ नमस्कृत्य कुमाराय दुर्गाभ्यश्च नरो

१ व्यधुः—अकार्षुः—इत्यर्थः। विदुः—इति पाठान्तरम्। २ समया—समीपे—इत्यर्थः।

CC-0. Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्तमाः ॥ तीर्थं च संप्रवक्ष्यामि महीसागरसंगमम् ॥ ४१ ॥ अमुना राजसिंहेन इंद्रद्युम्नेन धीमता ॥ यजनाद्दचंगुलोत्सेधा कृतेयं वसुधायदा ॥ ॥ ४२ ॥ तदा संताप्यमानाया भुवः काष्ठस्य वै यथा ॥ सुस्राव यो जलौघश्च सर्वदेवनमस्कृतः ॥ ४३ ॥ महीनाम नदी सा च पृथिव्यां यानि कानिचित् ॥ तीर्थानि तेषां सलिलसंभवं तज्जलं विदुः ॥ ४४ ॥ महीनाम समुत्पन्ना देशे मालवकाभिधे ॥ दक्षिणं सागरं प्राप्ता पुण्योभयतटा शिवा ॥ ४५ ॥ सर्वतीर्थमयी पूर्वं महीनाम महानदी ॥ किं पुनर्यः समायोगस्तस्याश्च सरितां पतेः ॥ ४६ ॥ वाराणसी कुरुक्षेत्रं गंगा रेवा सरस्वती ॥ ४७ ॥ तापी पयोष्णी निर्विंध्या चन्द्रभागा इरावती ॥ कावेरी शरयूश्चैव गंडकी नैमिषं तथा ॥ ४८ ॥ गया गोदावरी चैव अरुणा वरुणा तथा ॥ एताः पुण्याः शतशोन्या याः काश्चित्सरितो भुवि ॥ ४९ ॥ सहस्रविंशतिश्चैव षट्शतानि तथैव च ॥ तासां सारसमुद्धृतं महीतोयं प्रकीर्तितम् ॥५०॥ पृथिव्यां सर्वतीर्थेषु स्नात्वा यत्फलमाप्यते ॥ तन्महीसागरे प्रोक्तं कुमारस्य वचो यथा ॥५१॥ एकत्र सर्वतीर्थानां यदि संयोगमिच्छथ ॥ तद्गच्छथ महापुण्यं महीसागरसंगमम्[1] ॥ ५२ ॥ अहं चापि च तत्रैव बहून्वर्षगणान्पुरा ॥ अवसं चागतश्चात्र नारदस्य भयात्तथा ॥ ॥ ५३ ॥ स हि तत्र समीपस्थः पिशुनश्च विशेषतः ॥ मरुत्तः कुरुते यत्नं तस्मै ब्रूयादिदं भयम् ॥ ५४ ॥ अत्र दिग्वाससां मध्ये बहूनां तत्समस्त्वहम् ॥ निवसाम्यतिप्रच्छन्नो मरुत्तादतिभीतवत् ॥ ५५ ॥ पुनरत्रापि मां नूनं कथयिष्यति नारदः ॥ तथाविधा हि चेष्टास्य पिशुनस्य प्रदृश्यते[2] ॥ ॥ ५६ ॥ भवद्भिश्च न चाप्यत्र वक्तव्यं कस्यचित्कचित् ॥ मरुत्तः कुरुते यत्नं भूपालो यज्ञसिद्धये ॥ ५७ ॥ देवाचार्येण संत्यक्तो भ्रात्रा मे कारणांतरे ॥ गुरुपुत्रं च मां ज्ञात्वा यज्ञार्त्विज्यस्य कारणात् ॥ ५८ ॥ अविद्यांतर्गतैर्यज्ञकर्मभिर्न प्रयोजनम् ॥ मम हिंसात्मकैरस्ति निगमोक्तैरचेतनैः ॥ ५९ ॥ समित्पुष्पकुशप्रायैः साधनैर्यद्यचेतनैः ॥ क्रियते तत्तथा भावि कार्यं कारणवन्नृणाम् ॥ ६० ॥ तद्यूयं तत्र गच्छध्वं शीघ्रमेव नृपानुगाः ॥ अस्ति विप्रः स्वयं ब्रह्मा याज्ञवल्क्यश्च तत्र वै ॥ ६१ ॥ स हि पूर्वं मिथेः पुर्यां वसन्नाश्रममुत्तमम् ॥ आगच्छमानं नकुलं दृष्ट्वा गार्गीं वचोऽब्रवीत् ॥ ६२ ॥ गार्गि रक्ष पयो भद्रे नकुलोऽयमुपेति च ॥ पयः पातुं कृतिमतिं नकुलं तं निराकुरु ॥ ६३ ॥ इत्युक्तो नकुलः क्रुद्धः स हि क्रुद्धः पुराऽभवत् ॥ जमदग्नेः पूर्वजैश्च शप्तः प्रोवाच तं मुनिम् ॥ ॥ ६४ ॥ अहो वा धिग्धिगित्येव भूयो धिगिति चैव हि ॥ निर्लज्जता मनुष्याणां दृश्यते पापकारिणाम् ॥ ६५ ॥ कथं ते नाम पापानि प्रकुर्वंति

१ महीसागरसंगमे–इ०पा० । २ प्रचक्षते–इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नराधमाः ॥ मरणांतरिता येषां नरके तीव्रवेदना ॥ ६६ ॥ निमेषोऽपि न शक्येत जीविते[1] यस्य निश्चितम् ॥ तन्मात्रपरमायुर्यः पापं कुर्यात्कथं स च ॥ ६७ ॥ त्वं मुने मन्यसे चेदं कुलीनोऽस्मीति बुद्धिमान् ॥ ततः क्षिपसि मां मूढ नकुलोऽयमिति स्मयन् ॥ ६८ ॥ किमधीतं याज्ञवल्क्य का योगेश्वरता तव ॥ निरपराधं क्षिपसि धिगधीतं हि तत्तव ॥ ६९ ॥ कस्मिन्वेदे स्मृतौ कस्यां प्रोक्तमेतद्ब्रवीहि मे ॥ परुषैरिति वाक्यैर्मां नकुलेति ब्रवीषि यत् ॥ ७० ॥ किमिदं नैव जानासि यावत्यः परुषा गिरः ॥ परः संश्राव्यते तावच्छंकवः श्रोत्रतः पुरा ॥ ७१ ॥ कंठे यमानुगाः पादं कृत्वा तस्य सुदुर्मतेः ॥ अतीव रुदतो लोहशंकून्क्षेप्स्यंति कर्णयोः ॥ ७२ ॥ वावदूकाश्च ध्वजिनो मुष्णंति कृपणाज्जनान् ॥ स्वयं हस्तसहस्रेण धर्मस्यैवं भवद्विधाः ॥ ७३ ॥ वज्रस्य दिग्धशस्त्रस्य कालकूटस्य चाप्युत ॥ समेन वचसा तुल्यं मृत्योरिति ममाभवत् ॥ ७४ ॥ कर्णनासिकनाराचान्निर्हरंति शरीरतः ॥ वाक्छल्यस्तु न निर्हर्तुं शक्यो हृदिशयो हि सः ॥ ७५ ॥ यंत्रपीडैः समाक्रम्य वरमेष हतो नरः ॥ न तु तं परुषैर्वाक्यैर्जिघांसेत कथंचन ॥ ७६ ॥ त्वया त्वहं याज्ञवल्क्य नित्यं पंडितमानिना ॥ नकुलोसीति तीव्रेण वचसा ताडितः कुतः ॥ ७७ ॥ ॥ संवर्त उवाच ॥ ॥ इति श्रुत्वा वचस्तस्य भृशं विस्मितमानसः ॥ याज्ञवल्क्योऽब्रवीदेतत्प्रबद्धकरसंपुटः ॥ ७८ ॥ नमोऽधर्माय महते न विद्मो यस्य वै भवम् ॥ परमाणुमपि व्यक्तं कोत्र विद्यामदः सताम् ॥ ७९ ॥ विरंचिविष्णुप्रमुखाः सोमेंद्रप्रमुखास्तथा ॥ सर्वज्ञास्तेऽपि मुह्यंति गणनास्मादृशां च का ॥ ८० ॥ धर्मज्ञोऽस्मीति यो मोहादात्मानं प्रतिपद्यते ॥ स वायुं मुष्टिना बद्धुमीहते कृपणो नरः ॥ ८१ ॥ केचिदज्ञानतो नष्टाः केचिज्ज्ञान[2]मदादपि ॥ ज्ञानं प्राप्यापि नष्टाश्च केचिदालस्यतोऽधमाः ॥ ८२ ॥ वेदस्मृतीतिहासेषु पुराणेषु प्रकल्पितम् ॥ चतुःपादं तथा धर्मं नाचरत्यधमः पशुः ॥ ८३ ॥ स पुरा शोचते व्यक्तं प्राप्य तच्चांतकं[3] गृहम् ॥ तथाहि गृह्यकारेण श्रुतौ प्रोक्तमिदं वचः ॥ ८४ ॥ नकुलं सकुलं ब्रूयान्न कंचिन्मर्मणि स्पृशेत् ॥ प्रपठन्नपि चैवाहमिदं सर्वं तथा शुकः ॥ ८५ ॥ आलस्येनाप्यनाचाराद्वृथाकार्येकमंग तत् ॥८६॥ केवलं पाठमात्रेण यश्च संतुष्यते नरः ॥ तथा पंडितमानी च कोन्यस्तस्मात्पशुर्मतः ॥ ८७ ॥ न च्छंदांसि वृजिनात्तारयंति मायाविनं माययाऽऽवर्तमानम् ॥ नीडं शकुंता इव जातपक्षाश्छंदास्येनं प्रजहत्यंतकाले ॥ ८८ ॥ स्वर्गाय बद्धकक्षो यः पाठमात्रेण ब्राह्मणः ॥ स बालो मातुरंकस्थो ग्रहीतुं सोममिच्छति ॥ ८९ ॥ तद्भवान्सर्वथा मह्यमनयं सोढुमर्हसि ॥ सर्वः कोऽपि वदत्येवं तन्मयैवमुदाहृतम् ॥ ९० ॥ ॥ नकुल

१ जीवने--इ०पा० । २ केचिन्नष्टा मदादपि--इ०पा० । ३ आंतकम्--अंतकस्येदमान्तकम्--यमसदनमित्यर्थः ।

Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उवाच ॥ ॥ वृथेदं भाषितं तुभ्यं सर्वलोकेन यत्समम् ॥ आत्मानं मन्यसे नैतद्वक्तुं योग्यं महात्मनाम् ॥ ९१ ॥ वाजिवारणलोहानां काष्ठपाषाणवाससाम् ॥ नारीपुरुषतोयानामंतरं महदंतरम् ॥ ९२ ॥ अन्ये चेत्प्राकृता लोका बहुपापानि कुर्वते ॥ प्रधानपुरुषेणापि कार्यं तत्पृष्ठतो नु किम् ॥ ९३ ॥ सर्वार्थं निर्मितं शास्त्रं मनोबुद्धी तथैव च ॥ दत्ते विधात्रा सर्वेषां तथापि यदि पापिनः ॥ ९४ ॥ ततो विधातुः को दोषस्त एव खलु दुर्भगाः ॥ ब्राह्मणेन विशेषेण किं भाव्यं लोकवद्यतः ॥ ९५ ॥ यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः ॥ स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते ॥ ९६ ॥ तस्मात्सदा महद्भिश्च आत्मार्थं च परार्थतः ॥ सतां धर्मो न संत्याज्यो न्याय्यं तच्छिक्षणं तव ॥ ९७ ॥ यस्मात्त्वया पीडितोऽहं घोरेण वचसा मुने ॥ तस्माच्छीघ्रं त्वां शप्स्यामि शापयोग्यो हि मे मतः ॥ ९८ ॥ नकुलोऽसीति मामाह भवांस्तस्मात्कुलाधमः ॥ शीघ्रमुत्पत्स्यसे मोहात्त्वमेव नकुलो मुने ॥ ९९ ॥ ॥ संवर्त उवाच ॥ ॥ इति वाचं समाकर्ण्य भाव्यर्थकृतनिश्चयः ॥ याज्ञवल्क्यो मरौ देशे विप्रस्याजायतात्मजः ॥ १०० ॥ दुराचारस्य पापस्य निघृणस्यातिवादिनः ॥ दुष्कुलीनस्य जातोऽसौ तदा जातिस्मरः सुतः ॥ १०१ ॥ सोऽथ ज्ञानात्समालोक्य भर्तृयज्ञ इति द्विजः ॥ गुप्तक्षेत्रं समापन्नो महीसागरसंगमम् ॥ १०२ ॥ तत्र पाशुपतो भूत्वा शिवाराधनतत्परः ॥ स्वायंभुवं महाकालं पूजयन्वर्ततेऽधुना ॥ १०३ ॥ यो हि नित्यं महाकालं श्रद्धया पूजयेत्पुमान् ॥ स दौष्कुलीनदोषेभ्यो मुच्यतेऽहिरिव त्वचः ॥ १०४ ॥ यथायथा श्रद्धयासौ तल्लिंगं परिपश्यति ॥ तथातथा विमुच्येत दोषैर्जन्मशतोद्भवैः ॥ १०५ ॥ भर्तृयज्ञस्तु तत्रैव लिंगस्याराधनात्क्रमात् ॥ बीजदोषाद्विनिर्मुक्तस्तल्लिंगमहिमा त्वसौ ॥ १०६ ॥ बभ्रुं च नकुलं प्राह विमुक्तो दुष्टजन्मतः ॥ यस्मात्तस्मादिदं तीर्थं ख्यातं वै बभ्रु पावनम् ॥ १०७ ॥ तस्माद्व्रजध्वं तत्रैव महीसागरसंगमम् ॥ पंच तीर्थानि सेवन्तो मुक्तिमाप्स्यथ निश्चितम् ॥ १०८ ॥ इत्येवमुक्त्वा संवर्तो ययावभिमतं द्विजः ॥ भर्तृयज्ञं मुनिं प्राप्य ते च तत्र स्थिताभवन् ॥ १०९ ॥ ततस्तानाह स ज्ञात्वा गणाञ्ज्ञानेन शांभवान् ॥ महद्धो विमलं पुण्यं गुप्तक्षेत्रे यदत्र वै ॥ ॥ ११० ॥ भवन्तोऽभ्यागता यत्र महीसागरसंगमः ॥ स्नानं दानं जपो होमः पिंडदानं विशेषतः ॥ १११ ॥ अक्षयं जायते सर्वं महीसागरसंगमे ॥ कृतं तथाऽक्षयं सर्वं स्नानदानक्रियादिकम् ॥ ११२ ॥ यदात्र स्थानकं चक्रे देवर्षिर्नारदः पुरा ॥ तदा ग्रहैर्वरा दत्ताः शनिना च वरस्त्वसौ ॥ ११३ ॥ शनैश्चरेण संयुक्ता त्वमावास्या यदा भवेत् ॥ श्राद्धं तत्र प्रकुर्वीत स्नानदानपुरःसरम् ॥ ११४ ॥ यदि श्रावणमासस्य शनैश्चर

१ लोकवत्--प्राकृतसामान्यलोकवत्--भाव्यं किम्--अपि तु नेति तात्पर्यम् । २ सन्धिरार्षः । स्थिता अभवन्--इति पदच्छेदः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दिने शुभा ॥ कुहूर्भवति तस्यां तु संक्रांतिं कुरुते रविः ॥ ११५ ॥ तस्यामेव तिथौ योगो व्यतीपातो भवेद्यदि ॥ पुष्करंनाम तत्पर्व सूर्यपर्वशताधिकम् ॥ ११६ ॥ सर्वयोगसमावापः कथंचिदपि लभ्यते ॥ तस्मिन्दिने शनिं लोहं कांचनं भास्करं तथा ॥ ११७ ॥ महीसागरसंसर्गे पूजयीत यथाविधि ॥ शनिमंत्रैः शनिं ध्यात्वा सूर्यमंत्रैर्दिवाकरम् ॥ ११८ ॥ अर्घ्यं दद्याद्भाकरस्य सर्वपापप्रशांतये ॥ प्रयागादधिकं स्नानं दानं क्षेत्रात्कुरोरपि ॥ ११९ ॥ पिंडदानं गयाक्षेत्रादधिकं पांडुनंदन ॥ इदं संप्राप्यते पर्व महद्भिः पुण्यराशिभिः ॥ १२० ॥ पितॄणामक्षया तृप्तिर्जायते दिवि निश्चितम् ॥ यथा गयाशिरः पुण्यं पितॄणां तृप्तिदं परम् ॥ १२१ ॥ तथा समधिकः पुण्यो महीसागरसंगमः ॥ १२२ ॥ अग्निश्च रेतो मृडया च देहे रेतोधा विष्णुरमृतस्य नाभिः ॥ एवं ब्रुवञ्छ्रद्धया सत्यवाक्यं ततोऽवगाहेत महीसमुद्रम् ॥ १२३ ॥ मुखं च यः सर्वनदीषु पुण्यः पाथोधिरंबा प्रवरा मही च ॥ समस्ततीर्थाकृतिरेतयोश्च ददामि चार्घ्यं प्रणमामि नौमि ॥ १२४ ॥ ताम्रा रस्याः पयोवाहाः पितृप्रीतिप्रदाः शुभाः ॥ सस्यमाला महासिन्धुर्दातुर्दात्री पृथुस्तुता ॥ इन्द्रद्युम्नस्य कन्या च क्षितिजन्मा इरावती ॥ १२५ ॥ महीपर्णा महीशृंगा गंगा पश्चिमवाहिनी ॥ नदी राजनदी चेति नामाष्टादशमालिकाम् ॥ १२६ ॥ स्नानकाले च सर्वत्र श्राद्धकाले पठेन्नरः ॥ पृथुनोक्तानि नामानि यज्ञमूर्तिपदं व्रजेत् ॥ १२७ ॥ महीदोहे महानंदसंदोहे विश्वमोहिनि[1] ॥ जातासि सरितां राज्ञि पापं हर महीद्रवे ॥ इत्यर्घ्यमंत्रः ॥ १२८ ॥ कंकणं रजतस्यापि योऽत्र निक्षिपते नरः ॥ स जायते महीपृष्ठे धनधान्ययुते कुले ॥ १२९ ॥ महीं च सागरं चैव रौप्यकंकणपूजया ॥ पूजयामि भवेन्मा मे द्रव्यनाशो दरिद्रता ॥ १३० ॥ कंकणक्षेपणम् ॥ यत्फलं सर्वतीर्थेषु सर्वयज्ञैश्च[2] यत्फलम् ॥ तत्फलं स्नानदानेन महीसागरसंगमे ॥ १३१ ॥ विवादे च समुत्पन्ने अपराधी च यो मतः ॥ जलहस्तः सदा वाच्यो महीसागरसंगमे ॥ १३२ ॥ संस्नाप्याघोरमंत्रेण स्थाप्य नाभिप्रमाणके ॥ जले करं समुद्धृत्य दक्षिणं वाचयेद्द्रुतम् ॥ १३३ ॥ यदि धर्मोऽत्र सत्योऽस्ति सत्यश्चेत्संगमस्त्वसौ ॥ सत्याश्चेत्क्रतुद्रष्टारः सत्यं स्यान्मे शुभाशुभम् ॥ १३४ ॥ एवमुक्त्वा करं क्षिप्य दक्षिणं सकलं ततः ॥ निःसृतः पापकारी चेज्ज्वरेणापीड्यते क्षणात् ॥ १३५ ॥ सप्ताहाद्दृश्यते चापि तावन्निर्दोषवान्मतः ॥ अत्र स्नात्वा च जप्त्वा च तपस्तप्त्वा तथैव च ॥ १३६ ॥ रुद्रलोकं सुबहवो गताः पुण्येन कर्मणा ॥ सोमवारे विशेषेण स्नात्वा योत्र सुभक्तितः ॥१३७॥ पंच तीर्थानि कुरुते मुच्यते पंचपातकैः ॥ इत्याद्युक्तं बहुविधं तीर्थमाहात्म्यमुत्तमम् ॥१३८॥

१ विश्वजीविनि--इ० पा० । २ सर्वयज्ञैश्च--इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भर्तृयज्ञः शिवस्यो[1]चे तेषामाराधने क्रमम् ॥ शिवागमोक्तमादिश्य पूजायोगं यथाविधि ॥ १३९ ॥ शिवभक्तिसमुद्रैकपूरितः प्राह तान्मुनिः ॥ न
शिवात्परमो देवः सत्यमेतच्छिवव्रताः ॥ १४० ॥ शिवं विहाय यो ह्यन्यदसत्किंचिदुपासते ॥ करस्थं सोऽमृतं त्यक्त्वा मृगतृष्णां प्रधावति ॥१४१॥
शिवशक्तिमयं ह्येतत्प्रत्यक्षं दृश्यते जगत् ॥ लिंगांकं च भगांकं च नान्यदेवांकितं क्वचित् ॥ १४२ ॥ यश्च तं पितरं रुद्रं त्यक्त्वा मातरमं
बिकाम् ॥ वर्ततेऽसौ स्वपितरं त्यक्त्वोदपितृपिंडकः ॥ यस्य रुद्रस्य माहात्म्यं शतरुद्रीयमुत्तमम् ॥ १४३ ॥ शृणुध्वं यदि पापानामिच्छध्वं क्षालनं
परम् ॥ ब्रह्मा हाटकलिंगं च समाराध्य कपर्दिनः ॥ १४४ ॥ जगत्प्रधानमिति च नाम जप्त्वा विराजते ॥ कृष्णमूले कृष्णलिंगं नाम चार्जितमेव
च ॥ १४५ ॥ सनकाद्यैश्च तल्लिंगं पूज्याज[2]युर्जगद्गतिम् ॥ दर्भांकुरमयं सप्त मुनयो विश्वयोनिकम् ॥ १४६ ॥ नारदस्त्वंतरिक्षे च जगद्बीजमिदं
गृणन् ॥ वज्रमिंद्रो लिंगमेवं विश्वात्मानं च नाम च ॥ १४७ ॥ सूर्यस्ताम्रं तथा लिंगं नाम विश्वसृजं जपन् ॥ चंद्रश्च मौक्तिकं लिंगं जपन्नाम जग
त्पतिम् ॥१४८॥ इंद्रनीलमयं वह्निर्नाम विश्वेश्वरं जपन् ॥ पुष्परागं गुरुर्लिंगं विश्वयोनिं जपन्हरम् ॥१४९॥ पद्मरागमयं शुक्रो विश्वकर्मेति नाम
च ॥ हेम[3]लिंगं च धनदो जपन्नाम्ना तथेश्वरम् ॥ १५० ॥ रौप्यजं विश्वदेवाश्च नामापि जगतांप[4]तिम् ॥ वायवो रीतिजं लिंगं शंभु[5]मित्येव नाम च ॥
॥१५१॥ काशजं वसवो लिंगं स्वयंभुमिति नाम च ॥ त्रिलोहं मातरो लिंगं नाम भूतेशमेव च ॥ १५२ ॥ लौहं च रक्षसां नाम भूतभव्यभवोद्भवम् ॥
गुह्यकाः सीसजं लिंगं नाम योगं जपंति च ॥ १५३ ॥ जैगीषव्यो ब्रह्मरंध्रं नाम योगेश्वरं जपन् ॥ निमिर्नयनयोर्लिंगे जपञ्शर्वे[6]ति नाम च ॥
॥१५४॥ धन्वंतरिर्गोमयं च सर्वलोके[7]श्वरेश्वरम् ॥ गंधर्वा दारुजं लिंगं सर्वश्रेष्ठेति नाम च॥१५५॥ वैडूर्यं राघवो लिंगं जगज्ज्येष्ठेति नाम च ॥ बाणो
मारकतं लिंगं वसिष्ठमिति नाम च॥१५६॥ वरुणः स्फाटिकं लिंगं नाम्ना च परमेश्वरम्॥ नागा विद्रुमलिंगं च नाम लोकक्षयंकरम्॥१५७॥भारती तार[8]
लिंगं च नाम लोकत्रयाश्रितम् ॥ शनिश्च संगमावर्ते जगन्नाथेति नाम च ॥ १५८ ॥ शनिदेशे मध्यरात्रौ महीसागरसंगमे ॥ जातीजं रावणो लिंगं
जपन्नाम सुदुर्जयम् ॥ १५९ ॥ सिद्धाश्च मानसं नाम काममृत्युजरातिगम् ॥ उंछजं च बलिर्लिंगं ज्ञानात्मेत्यस्य नाम च ॥ १६० ॥ मरीचिपाः
पुष्पजं च ज्ञानगम्येति नाम च ॥ शकृताः शकृतं लिंगं ज्ञानज्ञेयेति नाम च ॥ १६१ ॥ फेनपाः फेनजं लिंगं नाम चापि सुदुर्[10]विदम् ॥ कपिलो

१ ऊचे--उक्तवान् । २ अजयुः--जितवन्तः । ३ हिमलिंगं च--इ०पा० । ४ जगतां गतिम्--इ०पा० । ५ स्वयंभुमिति नाम च--इ० पा० । ६ शिवेति--इ० पा० । ७ सर्वलोकसुरेश्वरम्--इ०पा० ।
८ तालिंगं च--इ०पा० । ९ कामजम्--इ०पा० । १० सुदुर्लभम्--इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वालुकालिंगं वरदं च जपन्हरम् ॥ १६२ ॥ सारस्वतो वाचिलिंगं नाम वागीश्वरेति च ॥ गणा मूर्तिमयं लिंगं नाम रुद्रेति चाब्रुवन् ॥ १६३ ॥ जांबूनदमयं देवाः शितिकण्ठेति नाम च ॥ शंखलिंगं बुधो नाम कनिष्ठमिति संजपन् ॥ १६४ ॥ अश्विनौ मृन्मयं लिंगं नाम्ना चैव सुवेधसम् ॥ विनायकः पिष्टलिंगं नाम्ना चापि कपर्दिनम् ॥ १६५ ॥ नावनीतं कुजो लिंगं नाम चापि करालकम् ॥ तार्क्ष्य ओदनलिंगं च हर्यक्षेति हि नाम च ॥ ॥ १६६ ॥ गौडं कामस्तथा लिंगं रतिदं चेति नाम च ॥ शची लवणलिंगं तु बभ्रुकेशेति नाम च ॥ १६७ ॥ विश्वकर्मा च प्रासादलिंगं याम्येति नाम च ॥ विभीषणश्च पांसूत्थं सुहृत्तमेति नाम च ॥ वंशांकुरोत्थं सगरो नाम संगतमेव च ॥ १६८ ॥ राहुश्च रामठं लिंगं नाम गम्येति कीर्तयन् ॥ लेप्यलिंगं तथा लक्ष्मीर्हरिनेत्रेति नाम च ॥ १६९ ॥ योगिनः सर्वभूतस्थं स्थाणुरित्येव नाम च ॥ नानाविधं मनुष्याश्च पुरुषंनाम नाम च ॥ १७० ॥ तेजोमयं च ऋक्षाणि भगं नाम च भास्वरम् ॥ किंनरा धातुलिंगं च सुदीप्तमिति नाम च ॥ १७१ ॥ देवदेवेति नामास्ति लिंगं च ब्रह्मराक्षसाः ॥ दंतजं वारणा लिंगं नाम रंहसमेव च ॥ १७२ ॥ सप्तलोकमयं साध्या बहुरूपेति नाम च ॥ दूर्वांकुरमयं लिंगमृतवः सर्वनाम च ॥ १७३ ॥ कौंकुममप्सरसो लिंगं नाम शंभोः प्रियेति च ॥ सिंदूरजं चोर्वशी च नाम च प्रियवासनम् ॥ १७४ ॥ ब्रह्मचारि गुरुलिंगं नाम चोष्णीषिणं विदुः ॥ अलक्तकं च योगिन्यो नाम चास्य सुबभ्रुकम् ॥ १७५ ॥ श्रीखंडं सिद्धयोगिन्यः सहस्राक्षेति नाम च ॥ डाकिन्यो मांसलिंगं च नाम चास्य च मीढुषम् ॥ १७६ ॥ अप्यन्नजं च मनवो गिरिशेति च नाम च ॥ अगस्त्यो व्रीहिजं वापि सुशांतमिति नाम च ॥१७७॥ यवजं देवलो लिंगं पतिमित्येव नाम च ॥ वल्मीकजं च वाल्मीकिश्चिरवासीति नाम च ॥ १७८ ॥ प्रतर्दनो बाणलिंगं हिरण्यभुजनाम च ॥ राजिकं च तथा दैत्या नाम उग्रेति कीर्तितम् ॥ १७९ ॥ निष्पावजं दानवाश्च लिंगनाम च दिक्पतिम् ॥ मेघा नीरमयं लिंगं पर्जन्यपतिनाम च ॥ १८० ॥ राजमाषमयं यक्षा नाम भूतपतिं स्मृतम् ॥ तिलान्नजं च पितरो नाम वृषपतिस्तथा ॥ १८१ ॥ गौतमो गोरजमयं नाम गोपतिरेव च ॥ वानप्रस्थाः फलमयं नाम वृक्षावृतेति च ॥ १८२ ॥ स्कंदः पाषाणलिंगं च नाम सेनान्य एव च ॥ नागश्चाश्वतरो धान्यं मध्यमेत्यस्य नाम च ॥ १८३ ॥ पुरोडाशमयं यज्वा स्रुवहस्तेति नाम च ॥ यमः कालायसमयं नाम प्राह च धन्विनम् ॥ १८४ ॥ यवांकुरं जामदग्न्यो भर्गदैत्येति नाम च ॥ पुरूरवाश्चान्नमयं बहुरूपेति नाम च ॥ १८५ ॥ मांधाता शर्करालिंगं नाम बाहुयुगेति च ॥ गावः पयोमयं लिंगं नाम

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

नेत्रसहस्रकम् ॥ १८६ ॥ साध्या भर्तृमयं लिंगं नाम विश्वपतिः स्मृतम् ॥ नारायणो नरो मौंजं सहस्रशिरनाम च ॥ १८७ ॥ तार्क्ष्यं पृथुस्तथा लिंगं सहस्रचरणाभिधम् ॥ पक्षिणो व्योमलिंगं च नाम सर्वात्मकेति च ॥ १८८ ॥ पृथिवी मेरुलिंगं च द्वितनुश्चास्य नाम च ॥ भस्मलिंगं पशुपतिर्नाम चास्य महेश्वरः ॥ १८९ ॥ ऋषयो ज्ञानलिंगं च चिरस्थानेति नाम च ॥ ब्राह्मणा ब्रह्मलिंगं च नाम ज्येष्ठेति तं विदुः ॥ १९० ॥ गोरोचनमयं शेषो नाम पशुपतिः स्मृतम् ॥ वासुकिर्विषलिंगं च नाम वै शंकरेति च ॥ १९१ ॥ तक्षकः कालकूटाख्यं बहुरूपेति नाम च ॥ हालाहलं च कर्कोट एकाक्ष इति नाम च ॥ १९२ ॥ शृंगी विषमयं पद्मो नाम धूर्जटिरेव च ॥ पुत्रः पितृमयं लिंगं विश्वरूपेति नाम च ॥ १९३ ॥ पारदं च शिवा देवी नाम त्र्यम्बक एव च ॥ मत्स्याद्याः शास्त्रलिंगं च नाम चापि वृषाकपिः ॥ १९४ ॥ एवं किं बहुनोक्तेन यद्यत्सत्त्वं विभूतिमत् ॥ जगत्यामस्ति तज्जातं शिवाराधनयोगतः ॥ १९५ ॥ भस्मनो यदि वृक्षत्वं ज्ञायते नीरसेवनात् ॥ शिवभक्तिविहीनस्य ततोऽस्य फलमुच्यते ॥ १९६ ॥ धर्मार्थकाममोक्षाणां यदि प्राप्तौ भवेन्मतिः ॥ ततो हरः समाराध्यस्त्रिजगत्याः प्रदो मतः ॥ १९७ ॥ य इदं शतरुद्रीयं प्रातःप्रातः पठिष्यति ॥ तस्य प्रीतः शिवो देवः प्रदास्यत्यखिलान्वरान् ॥ १९८ ॥ नातः परं पुण्यतमं किंचिदस्ति महाफलम् ॥ सर्ववेदरहस्यं च सूर्येणोक्तमिदं मम ॥ १९९ ॥ वाचा च यत्कृतं पापं मनसा वाप्युपार्जितम् ॥ पापं तन्नाशमायाति कीर्तिते शतरुद्रिये ॥ २०० ॥ रोगार्तो मुच्यते रोगाद्बद्धो मुच्येत बन्धनात् ॥ भयान्मुच्येत भीतश्च जपेद्यः शतरुद्रियम् ॥ २०१ ॥ नाम्नां शतेन यः कुम्भैः पुष्पैस्ता वद्गिरीश्वरम् ॥ प्रणामानां शतेनापि मुच्यते सर्वपातकैः ॥ २०२ ॥ लिंगानां शतमेतच्च शतमाराधकास्तथा ॥ नामानि च शतं सर्वदोषसंनाशकं स्मृतम् ॥ २०३ ॥ विशेषादेषु लिंगेषु यः पठिष्यति पंचसु ॥ पंचभिर्विषयोद्भूतैः स दोषैः परिमुच्यते ॥ २०४ ॥ ॥ नारद उवाच ॥ ॥ निशम्यैवं प्राप्य ते ऽपि गुप्तक्षेत्रे मुदान्विताः ॥ पंचलिंगान्यर्चयंतः शिवध्यानपराभवन् ॥ २०५ ॥ ततो बहुतिथे काले प्रत्यक्षीभूय शंकरः ॥ प्राह तान्मुदितो देवस्तेषां भक्तिविशेषतः ॥ २०६ ॥ ॥ शिव उवाच ॥ ॥ बकोलूकगृध्रकूर्मा इन्द्रद्युम्न च पार्थिव ॥ सारूप्यां मुक्तिमापन्ना मल्लोके निवसिष्यथ ॥ २०७ ॥ लोमशश्चापि मार्कंडो जीवन्मुक्तौ भविष्यतः ॥ इत्युक्ते देवदेवेन लिंगं स्थापितवान्नृपः ॥ २०८ ॥ इन्द्रद्युम्नेश्वरं नाम

१ बाहुयुतेति च--इ०पा० । २ धीरध्वानेति--इ०पा० । ३ वसुलिंगं च--इ० पा० । ४ प्रमोदतः--इ० पा० । ५ तु--इ० पा० । ६ ते--इन्द्रद्युम्नादयः अपि । ७ शिवध्यानपराः अभवन्--इति पदच्छेदः । सन्धिरार्षः ।

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

महाकालाख्यमित्युत[1] ॥ ज्ञात्वा तीर्थगुणान्राजा कीर्तिमिच्छंश्चिरंतनीम् ॥ २०९ ॥ त्रिरम्यमतुलं लिंगं संस्थाप्येदमुवाच ह ॥ यावच्चंद्रश्च सूर्यश्च याव त्तिष्ठति मेदिनी ॥ २१० ॥ इन्द्रद्युम्नेश्वरं लिंगं नंदताच्छाश्वतीः समाः ॥ ततस्तथेति भगवाञ्छिवः प्रोच्याब्रवीत्पुनः ॥ २११ ॥ अत्र यो नि यतं लिंगमैंद्रद्युम्नं प्रपूजयेत् ॥ स गणो जायते नूनं मम लोके निवत्स्यति ॥ २१२ ॥ इत्युक्त्वा सह तैश्चैव पंचभिः शशिशेखरः ॥ रुद्रलोकम गाद्देवस्तेऽपि जाता गणाः पुनः ॥ २१३ ॥ एवं प्रभावो राजाभूदिंद्रद्युम्नो महीपतिः ॥ यजता येन वीरेण निर्मितेयं महीनदी ॥ २१४ ॥ एवंविधः स पुण्योऽयं महीसागरसंगमः ॥ अभूत्ततोऽपि संक्षेपात्तव पार्थ प्रकीर्तितः ॥ २१५ ॥ स्नात्वात्र संगमे यश्च इन्द्रद्युम्नेश्वरं नरः ॥ पूजयेत्तस्य वासः स्याद्यत्रे[2]शः पार्वतीपतिः ॥ २१६ ॥ सर्वबन्धहरं लिंगं गाणपत्यप्रदं त्विदम् ॥ यतो बन्धान्विहायैव स्थापितं तेन फाल्गुन ॥ २१७ ॥ इतीदमुक्तं तव पुण्यकारि माहात्म्यमस्योत्तमसंगमस्य ॥ माहात्म्यमत्यद्भुतपुण्यमिन्द्रद्युम्नेश्वरस्यापि च पुण्यकारि ॥ २१८ ॥ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां प्रथमे माहेश्वरखण्डे कौमारिकाखण्डे महीसागरसंगममाहात्म्यशतरुद्रियलिंगमाहात्म्येन्द्रद्युम्नेश्वरलिंगमाहात्म्य वर्णनंनाम त्रयोदशोऽध्यायः ॥ १३ ॥ ॥ छ ॥ ॥ अर्जुन उवाच ॥ ॥ कुमारनाथमाहात्म्यं यत्त्वयोक्तं कथांतरे ॥ तदहं श्रोतु मिच्छामि विस्तरेण महामुने ॥ १ ॥ ॥ नारद उवाच ॥ ॥ तारकं विनिहत्यैव वज्रांगतनयं प्रभुः ॥ गुहः संस्थापयामास लिंगमेतच्च फाल्गुन ॥ २ ॥ दर्शनाच्छ्रवणाद्ध्यानात्पूजया श्रुतिवंदनैः ॥ सर्वपापापहः पार्थ कुमारेशो न संशयः ॥ ३ ॥ ॥ ॥ अर्जुन उवाच ॥ ॥ अत्याश्चर्यमयी रम्या कथेयं पापनाशिनी ॥ विस्तरेण च मे ब्रूहि याथातथ्येन नारद ॥ ४ ॥ वज्रांगः कोप्यसौ दैत्यः किंप्रभावश्च तारकः ॥ कथं स निहतश्चैव जातश्चैव कथं गुहः ॥ ५ ॥ कथं संस्थापितं लिंगं कुमारेश्वरसंज्ञितम् ॥ किं फलं चास्य लिंगस्य ब्रूहि तद्विस्तरान्मम ॥ ६ ॥ ॥ नारद उवाच ॥ ॥ प्रणिपत्य कुमाराय सेनान्ये चेश्वराय च ॥ शृणु चैकमनाः पार्थ कुमारचरितं महत् ॥ ७ ॥ मानसो ब्रह्मणः पुत्रो दक्षो नाम प्रजापतिः ॥ षष्टिं सोऽजनयत्कन्या वीरिण्यां नाम फाल्गुन ॥ ८ ॥ ददौ स दश धर्माय कश्यपाय त्रयोदश ॥ सप्तविंशतिं सोमाय चतस्रोरिष्टनेमिने ॥ ९ ॥ भूतांगिरःकृशाश्वेभ्यो द्वेद्वे चैव ददौ प्रभुः ॥ नामधेयान्यमूषां च सपत्नीनां च मे शृणु ॥ १० ॥ यासां प्रसूतिप्रभवा लोका आपूरितास्त्रयः ॥ भानुर्लम्बा ककु[3]द्मिर्विश्वा साध्या मरुत्वती ॥ ११ ॥ वसुर्मुहूर्ता संकल्पा धर्मपत्न्यः

१ महाकालाख्यमव्ययम्–इ० पा० । २ तत्रेति शेपः । ३ कुकुर्मित्रा–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सुताञ्छृणु ॥ भानोस्तु देवऋषभ इंद्रसेनः सुतोऽभवत् ॥ १२ ॥ विद्योत आसील्लंबायां ततश्च स्तनयित्नवः ॥ ककुदः शकटः पुत्रः कीकटस्तनयो यतः ॥ १३ ॥ भुवो दुर्गस्तथा स्वर्गो नंदश्चैव ततोऽभवत् ॥ विश्वेदेवाश्च विश्वाया अप्रजांस्तान्प्रचक्षते ॥ १४ ॥ साध्या द्वादश साध्याया अर्थसिद्धिस्तु तत्सुतः ॥ मरुत्वान्सुजयंतश्च मरुत्वत्या बभूवतुः ॥ १५ ॥ नरनारायणौ प्राहुर्यौ तौ ज्ञानविदो जनाः ॥ वसोश्च वसवश्चाष्टौ मुहूर्तायां मुहूर्तकाः ॥ १६ ॥ ये वै फलं प्रयच्छंति भूतानां स्वं स्वकालजम् ॥ संकल्पायाश्च संकल्पः कामः संकल्पजः सुतः ॥ १७ ॥ सुरूपासूत तनयान्रुद्रानेकादशैव तु ॥ कपाली पिंगलो भीमो विरूपाक्षो विलोहितः ॥ १८ ॥ अजकः शासनः शास्ता शंभुश्चांत्यो भवस्तथा ॥ रुद्रस्य पार्षदाश्चान्ये विरूपायाः सुताः स्मृताः ॥ १९ ॥ प्रजापतेरंगिरसः स्वधा पत्नी पितॄनथ ॥ जज्ञे सनी (ची?) तथा पुत्रमथर्वांगिरसं प्रभुम् ॥२०॥ कृशाश्वस्य च द्वे भार्ये अर्चिश्च धिषणा तथा ॥ अग्नग्रामो ययोः पुत्रः ससंहारः प्रकीर्तितः ॥ २१ ॥ पतंगी यामिनी ताम्रा तिमिश्चारिष्टनेमिनः ॥ पतंग्यसूत पतगान्यामिनी शलभानथ ॥ २२ ॥ ताम्रायाः श्येनगृध्राद्यास्तिमेर्यादोगणास्तथा ॥ अथ कश्यपपत्नीनां यत्प्रसूतमिदं जगत् ॥ ॥ २३ ॥ शृणु नामानि लोकानां मातॄणां शंकराणि च ॥ अदितिर्दितिर्दनुः सिंही दनायुः सुरभिस्तथा ॥ २४ ॥ अरिष्टा विनता ग्रावा दया क्रोधवशा इरा ॥ कद्रुर्मुनिश्च ते चोभे मातरस्ताः प्रकीर्तिताः ॥ २५ ॥ आदित्याश्चादितेः पुत्रा दितेर्दैत्याः प्रकीर्तिताः ॥ दनोश्च दानवाः प्रोक्ता राहुः सिंहीसुतो ग्रहः ॥ २६ ॥ दनायुषस्तथा जातो दनायुश्च गणो बली ॥ गावश्च सुरभेर्जातारिष्टापुत्रा युगंधराः ॥ २७ ॥ विनतासूत अरुणं गरुडं च महाबलम् ॥ ग्रावायाः श्वापदाः पुत्रा गणः क्रोधवशस्तथा ॥ २८ ॥ जातः क्रोधवशायाश्च इराया भूरुहाः स्मृताः ॥ कद्रूसुताः स्मृता नागा मुनेरप्सरसां गणाः ॥ २९ ॥ तत्र द्वौ तनयौ यौ च दितेस्तौ विष्णुना हतौ ॥ हिरण्यकशिपुर्वीरो हिरण्याक्षस्तथाऽपरः ॥ ३० ॥ ततो निहतपुत्रा सा दितिराराध्य कश्यपम् ॥ अयाचत वरं देवी पुत्रमन्यं महाबलम् ॥ ३१ ॥ समरे शक्रहंतारं स तस्या अददात्प्रभुः ॥ नियमे चापि वर्तस्व वर्षाणां च सहस्रकम् ॥ ३२ ॥ इत्युक्ता सा तथा चक्रे पुष्करस्था समाहिता ॥ वर्तंत्या नियमे तस्याः सहस्राक्षः समाहितः ॥ ३३ ॥ उपासामाचरद्भक्त्या सा चैनमन्वमन्यत ॥ दशवत्सरशेषस्य सहस्रस्य तदा दितिः ॥ ३४ ॥ उवाच शक्रं सुप्रीता भक्त्या शक्रस्य तोषिता ॥ ॥ दितिरुवाच ॥ ॥ अत्रोत्तीर्णव्रतप्रायां विद्धि मां देवसत्तम ॥३५॥ भविष्यति तव भ्राता तेन सार्धं

१ अपि–इ॰पा॰। २ जाताः अरिष्टापुत्राः--इति पदच्छेदः। संधिरार्षः। ३ अत्रासंधिरार्षः। ४ संरब्धौ-- इ॰पा॰।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मिमां श्रियम् ॥ भोक्ष्यसे त्वं यथान्यायं त्रैलोक्यं हतकंटकम् ॥३६॥ इत्युक्त्वा निद्रयाविष्टा चरणाक्रांतमूर्धजा ॥ दिवा सुप्ता दितिर्देवी भाव्यर्थबल नोदिता ॥ ३७ ॥ तत्तु रंध्रमवेक्ष्यैव योगमूर्तिस्तदाविशत् ॥ जठरस्थं दितेर्गर्भं चक्रे वज्रेण सप्तधा ॥ ३८ ॥ एकैकं च पुनः खण्डं चकार मघवा ततः ॥ सप्तधा सप्तधा कोपादुद्बुध्य च ततो दितिः ॥३९॥ न हंतव्यो न हंतव्य इति सा शक्रमब्रवीत् ॥ वज्रेण कृत्यमानानां बुद्ध्वा सा रोदनेन च ॥ ४० ॥ ततः शक्रश्च मा रोदीरिति तांस्तान्यथाऽवदत् ॥ निर्गत्य जठरात्तस्मात्ततः प्रांजलिरग्रतः ॥ ४१ ॥ उवाच वाक्यं चात्रस्तो मातरं रोषपूरिताम् ॥ दिवास्वापं कृथा मातः पादाक्रांतशिरोरुहा ॥ ४२ ॥ सुप्ताथ सुचिरं वाते छिन्नो गर्भो मया तव ॥ कृता एकोनपंचाशद्भागा वज्रेण ते सुताः ॥ ४३ ॥ सत्यं भवतु ते वाक्यं सार्धं भोक्ष्यामि तैः श्रियम् ॥ दास्यामि तेषां स्थानानि दिवि यावदहं दिते ॥ ४४ ॥ मा रोदीरिंति मे प्रोक्ताः ख्याताश्च मरुतस्त्विवति ॥ इत्युक्ता सा च सव्रीडा दितिर्जाता निरुत्तरा ॥ ४५ ॥ सार्धं तैर्गतवानिंद्रो दिगंते वायवः स्मृताः ॥ ततः पुनश्च भर्तारं दितिः प्रोवाच दुःखिता ॥ ४६ ॥ पुत्रं मे भगवन्देहि शक्रहंतारमूर्जितम्[1] ॥ यो नास्त्रशस्त्रैर्वध्यत्वं गच्छेत्रिदिववासिनाम् ॥ ४७ ॥ न ददास्युत्तरं विद्धि मृतामेव प्रजापते ॥ इत्युक्तः स तदोवाच तां पत्नीमतिदुःखिताम् ॥ ४८ ॥ दशवर्षसहस्राणि तपोनिष्ठा तु तप्स्यसे ॥ वज्रसारमयैरंगैरच्छेद्यैरायसैर्दृढैः ॥ ४९ ॥ वज्रांगोनाम पुत्रस्ते भविता धर्मवत्सलः ॥ सा तु लब्धवरा देवी जगाम तपसे वनम् ॥ ५० ॥ दशवर्षसहस्राणि तपो घोरं समाचरत् ॥ तपसोंऽते भगवती जनयामास दुर्जयम् ॥ ५१ ॥ पुत्रमप्रतिकर्माणमजेयं वज्रदुश्छिदम् ॥ स जातमात्र एवाभूत्सर्वशास्त्रार्थपारगः ॥ ५२ ॥ उवाच मातरं भक्त्या मातः किं करवाण्यहम् ॥ तमुवाच ततो हृष्टा दितिर्दैत्याधिपं सुतम् ॥ ५३ ॥ बहवो मे हताः पुत्राः सहस्राक्षेण पुत्रक ॥ तेषामपचितिं कर्तुमिच्छे शक्रवधादहम् ॥ ५४ ॥ बाढमित्येव सं[2] प्रोच्य जगाम त्रिदिवं बली ॥ ससैन्यं समरे शक्रं स च बाह्वायुधोऽजयत् ॥ ५५ ॥ पादेनाकृष्य देवेंद्रं सिंहः क्षुद्रमृगं यथा ॥ मातुरंतिकमागच्छद्याचमानं भयातुरम् ॥ ५६ ॥ एतस्मिन्नंतरे ब्रह्मा कश्यपश्च महातपाः ॥ आगतौ तत्र संत्रस्तावथो ब्रह्मा जगाद तम् ॥ ५७ ॥ मुंचामुं पुत्र याचंतं किमनेन प्रयोजनम् ॥ अवमानो वधः प्रोक्तो वीरसंभावितस्य च ॥ ५८ ॥ अस्मद्वाक्येन यो मुक्तो जीवन्नपि मृतो हि सः ॥ शत्रुं ये घ्नंति समरे न ते वीराः प्रकीर्तिताः ॥ ५९ ॥ कृत्वा मानपरिग्लानिं ये मुंचंति वरा हि ते ॥ यथामान्यतमं मत्वा त्वया मातुर्वचः कृतम् ॥ ६० ॥ तथा पितुर्वचः कार्यं मुंचामुं पुत्र वासवम् ॥ एतच्छ्रु

१ शक्रजेतारम्--इ० पा० । २ तस्योक्त--इत्यशुद्धः पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्वा तु वज्रांगः प्रणतो वाक्यमब्रवीत् ॥ ६१ ॥ न मे कृत्यमनेनास्ति मातुराज्ञा कृता मया ॥ त्वं सुरासुरनाथो वै मम च प्रपितामहः ॥ ६२ ॥
करिष्ये त्वद्वचो देव एष मुक्तः शतक्रतुः ॥ न च कांक्षे शक्रभुक्तामिमां त्रैलोक्यराजताम् ॥ ६३ ॥ परभुक्ता यथा नारी परभुक्तामिव
स्रजम् ॥ यच्च त्रिभुवनेष्वस्ति सारं तन्मम कथ्यताम् ॥ ६४ ॥ ॥ ब्रह्मोवाच ॥ ॥ तपसो न परं किंचित्तपो हि महतां धनम् ॥
तपसा प्राप्यते सर्वं तपोयोग्योऽसि पुत्रक ॥ ६५ ॥ ॥ वज्रांग उवाच ॥ ॥ तपसे मे रतिर्देव न विघ्नं तत्र मे भवेत् ॥ त्वत्प्रसादेन भगवन्नि
त्युक्त्वा विरराम सः ॥ ६६ ॥ ॥ ब्रह्मोवाच ॥ ॥ क्रूरभावं परित्यज्य यदीच्छसि तपः सुत ॥ अनया चित्तबुद्ध्या तत्त्वयात्तं जन्मनः फलम् ॥
॥ ६७ ॥ इत्युक्त्वा पद्मजः कन्यां ससर्जायतलोचनाम् ॥ तामस्मै प्रददौ देवः पत्न्यर्थं पद्मसंभवः ॥ ६८ ॥ वरांगीति च नामास्याः कृतवांश्च
पितामहः ॥ जगाम च ततो ब्रह्मा कश्यपेन समं दिवम् ॥ ६९ ॥ वज्रांगोऽपि तया सार्धं जगाम तपसे वनम् ॥ ऊर्द्ध्वबाहुः स दैत्येंद्रोऽतिष्ठदब्दस
हस्रकम् ॥ ७० ॥ कालं कमलपत्राक्षः शुद्धबुद्धिर्महातपाः ॥ तावानधोमुखः कालं तावत्पंचाग्निसाधकः ॥ ७१ ॥ निराहारो घोरतपास्तपोराशि
रजायत ॥ ततः सोंऽतर्जले चक्रे कालं वर्षसहस्रकम् ॥ ७२ ॥ जलांतरप्रविष्टस्य तस्य पत्नी महाव्रता ॥ तस्यैव तीरे सरसस्तत्परा मौनमा
श्रिता ॥ ७३ ॥ निराहारं पतिं मत्वा तपस्तेपे पतिव्रता ॥ तस्यास्तपसि वर्तंत्या इंद्रश्चक्रे विभीषिकाम् ॥ ७४ ॥ भूत्वा तु मर्कटाकारस्तस्याअभ्या
शमागतः ॥ अपविध्य दृशं तस्या मूत्रविष्ठे चकार सः ॥ ७५ ॥ तथा विलोलवसनां विलोलवदनां तथा ॥ विलोलकेशां तां चक्रे विधित्सुस्तपसः
क्षतिम् ॥ ७६ ॥ ततश्च मेषरूपेण[1] क्लेशं तस्याश्चकार सः ॥ ततो भुजंगरूपेण बद्ध्वा चरणयोर्द्वयोः ॥ ७७ ॥ अपाकर्षत दूरं स तस्माद्देवभृत[2]स्तथा ॥
तपोबलाच्च सा तस्य न वध्यत्वं जगाम ह ॥ ७८ ॥ क्षमया च महाभागा क्रोधमण्वपि नाकरोत् ॥ ततो गोमायुरूपेण तमदूषयदाश्रमम् ॥ ७९ ॥
अग्निरूपेण तस्याश्च स ददाह महाश्रमम् ॥ चकर्ष वायुरूपेण महोग्रेण च तां शुभाम् ॥ एवं सिंहवृकाद्याभिर्भीषिकाभिः पुनःपुनः ॥ ८० ॥ विर
राम यदा नैव वज्रांगमहिषी तदा ॥ शैलस्य दुष्टतां मत्वा शापं दातुं व्यवस्यत ॥ ८१ ॥ तां शापाभिमुखीं दृष्ट्वा शैलः पुरुषविग्रहः ॥ उवाच तां
वरारोहां त्वरयाथ सुलोचनाम् ॥८२॥ ॥ शैल उवाच ॥ ॥ नाहं महाव्रते दुष्टः सेव्योऽहं सर्वदेहिनाम् ॥ अतिखेदं करोत्येष ततः क्रुद्धस्तु वृत्रहा ॥
॥८३॥ एतस्मिन्नंतरे जातः कालो वर्षसहस्रिकः ॥ तस्मिन्याते स भगवान्काले कमलसंभवः ॥८४॥ तुष्टः प्रोवाच वज्रांगं तमागम्य जलाशये ॥८५॥

१ मेषरूपेण—इ०पा०। २ देवभृतः--देवाः भृताः पालिता येन--इंद्रः इत्यर्थः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ॥ ब्रह्मोवाच ॥ ॥ ददामि सर्वकामांस्ते उत्तिष्ठ दितिनन्दन ॥ एवमुक्तस्तदोत्थाय दैत्येंद्रस्तपसो निधिः ॥ उवाच प्रांजलिर्वाक्यं सर्वलोकपिता महम् ॥ ८६ ॥ ॥ वज्रांग उवाच ॥ ॥ आसुरो मेऽस्तु मा भावः शक्रराज्ये च मा रतिः॥ तपोधर्मरतिश्चास्तु वृणोम्येतत्पितामह ॥ ८७ ॥ एवमस्त्विति तं ब्रह्मा प्राह विस्मितमानसः ॥ उपेक्षते च शक्रं स भाव्यर्थं कोऽतिवर्तते ॥८८॥ ऋषयो मनुजा देवाः शिवब्रह्ममुखा अपि ॥ भाव्यर्थं नातिवर्तंते वेलामिव महोदधिः ॥ ८९ ॥ इति चिंत्य विरिंचोऽपि तत्रैवांतरधीयत ॥ वज्रांगोऽपि समाप्ते तु तपसि स्थिरसंयमः ॥ ९० ॥ आहारमिच्छन्स्वां भार्यां न ददर्शाश्रमे स्वके ॥ भार्याहीनोऽफलश्चेति स संचिंत्य इतस्ततः ॥९१॥ विलोकयन्स्वकां भार्यां विधित्सुः कर्म नैत्यकम् ॥ विलोकयन्ददर्शाथ इहामुत्र सहयिनीम् ॥ ९२ ॥ रुदन्तीं स्वां प्रियां दीनां तरुप्रच्छादिताननाम्॥तां विलोक्य ततो दैत्यः प्रोवाच परिसांत्वयन् ॥९३॥ ॥ ॥ वज्रांग उवाच ॥ ॥ केन तेऽपकृतं भीरु वर्तंत्यास्तपसि स्वके ॥ कथं रोदिषि वा बाले मयि जीवति भर्तरि ॥ कं वा कामं प्रयच्छामि शीघ्रं प्रब्रूहि भामिनि ॥९४॥ गृहेश्वरीं सद्गुणभूषितां शुभां पंग्वंधयोगेन पतिं समेताम् ॥ न लालयेत्पूरयेन्नैव कामं स किं पुमान्न पुमान्मे मतोस्ति ॥ ॥ ९५ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां प्रथमे माहेश्वरखण्डे कौमारिकाखण्डे कुमारेश्वरमाहात्म्ये वज्रांगेतिहासवर्णनं नाम चतुर्दशोऽध्यायः ॥ १४ ॥ छ ॥ ॥ वरांग्युवाच ॥ ॥ नाशितास्म्यपविद्धास्मि त्रासिता पीडितास्मि च ॥ रौद्रेण देवनाथेन नष्टनाथेव भूरिशः ॥ १ ॥ दुःखपारमपश्यंती प्राणांस्त्यक्तुं व्यवस्थिता ॥ पुत्रं मे घोरदुःखस्य तारकं देहि चेत्कृपा ॥ २ ॥ एवमुक्तस्तु दैत्येंद्रो दुःखितोऽचिंतयद्धृदि ॥ आसुरेष्वपि भावेषु स्पृहा यद्यपि नास्ति मे ॥ ३ ॥ तथापि मन्ये शास्त्रेभ्यस्त्वनुकंप्या प्रियेति यत् ॥ सर्वाश्रमानुपादाय स्वाश्रमेण कलत्रवान् ॥ ४ ॥ व्यसनार्णवमत्येति जलयानैरिवार्णवम् ॥ यामाश्रित्येंद्रियारातीन्दुर्जयानितराश्रयैः ॥ ५ ॥ गेहिनो हेलया जिग्युर्दस्यून्दुर्गपतिर्यथा ॥ न केऽपि प्रभवस्तां चाप्यनुकर्तुं गृहेश्वरीम् ॥ ६ ॥ अथायुषा वा कात्स्न्र्येन धर्मे दित्सुर्यथैव च ॥ यस्यां भवति चात्मैव ततो जाया निगद्यते ॥ ७ ॥ भर्तव्या एव यस्माच्च तस्माद्भार्येति सा स्मृता ॥ सा एव गृहमुक्तं च गृहिणी सा ततः स्मृता ॥ ८ ॥ संसारकलमषात्त्रात्री कलत्रमिति सा ततः ॥ एवंविधां प्रियां को वै नानुकंपितुमर्हति ॥ ९ ॥ त्रीणि ज्योतींषि पुरुष इति वै देवलोऽब्रवीत् ॥ भार्या कर्म च विद्या च संसाध्यं यत्नतस्त्रयम् ॥ १० ॥ तदेनां पीडितां चेद्यः पतिर्भूत्वा न पालये ॥ ततो यास्ये शास्त्रवादान्नरकांतं न संशयः ॥ ११ ॥ अह

१ चेद्य–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मप्येनमिंद्रं वै शक्तो जेतुं यथाऽनृणाम् ॥ पुनः कामं करिष्येऽस्या दास्ये पुत्रं महाबलम् ॥ १२ ॥ इति संचिंत्य वज्रांगः कोपव्याकुललो
चनः ॥ प्रतिकर्तुं महेंद्राय तपो भूयो व्यवस्यत ॥१३॥ ज्ञात्वा तु तस्य संकल्पं ब्रह्मा क्रूरतरं पुनः ॥ आजगाम त्वरायुक्तो यत्राऽसौ दितिनंदनः ॥
॥ १४ ॥ उवाचैनं स भगवान्प्रभुर्मधुरया गिरा ॥ १५ ॥ ॥ ब्रह्मोवाच ॥ ॥ किमर्थं भूय एव त्वं नियमं क्रूरमिच्छसि ॥ आहाराभिमुखो दैत्य
तन्मे ब्रूहि महाव्रतः ॥ १६ ॥ यावदब्दसहस्रेण निराहारेण वै फलम् ॥ त्यजता प्राप्तमाहारं लब्धं ते क्षणमात्रतः ॥ १७ ॥ त्यागो ह्यप्राप्तकामानां
न तथा च गुरुः स्मृतः ॥ यथा प्राप्तं परित्यज्य कामं कमललोचन ॥ श्रुत्वैतद्ब्रह्मणो वाक्यं दैत्यः प्रांजलिरब्रवीत् ॥ १८ ॥ ॥ दैत्य उवाच ॥ ॥
पत्न्यर्थेऽहं करिष्यामि तपो घोरं पितामह ॥ पुत्रार्थमुद्यतश्चाहं यः स्याद्गीर्वाणदर्पहा ॥ १९ ॥ एतच्छ्रुत्वा वचो देवः पद्मगर्भोद्भवस्तदा ॥ उवाच
दैत्यराजानं प्रसन्नश्चतुराननः ॥ २० ॥ ॥ब्रह्मोवाच ॥ ॥ अलं ते तपसा वत्स मा क्लेशे विस्तरे विश ॥ पुत्रस्ते तारकोनाम भविष्यति
महाबलः ॥ २१ ॥ देवसीमंतिनीकाम्यधम्मिल्लकविमोक्षणः ॥ इत्युक्तो दैत्यराजस्तु प्रणम्य प्रपितामहम् ॥ २२ ॥ विसृज्य गत्वा महिषीं नंदया
मास तां मुदा ॥ तौ दंपती कृतार्थौ च जग्मतुश्चाश्रमं तदा ॥ २३ ॥ आहितं च ततो गर्भं वरांगी वरवर्णिनी ॥ पूर्णं वर्षसहस्रं तु दधारोदर
एव हि ॥ २४ ॥ ततो वर्षसहस्रांते वरांगी समसूयत ॥ जायमाने तु दैत्येंद्रे तस्मिँल्लोकभयंकरे ॥ २५ ॥ चचाल सकला पृथ्वी प्रोद्भूताश्च महा
र्णवाः ॥ चेलुर्धराधराश्चापि ववुर्वाता विभीषणाः ॥ २६ ॥ जेपुर्जप्यं मुनिवरा व्याधविद्धा मृगा इव ॥ जहुः कांतिं च सूर्याद्या नी
हाराश्छादयन्दिशः ॥ २७ ॥ जाते महासुरे तस्मिन्सर्व एव महासुराः ॥ आजग्मुर्हर्षितास्तत्र तथा चासुरयोषितः ॥ २८ ॥ जगु
र्हर्षसमाविष्टा ननृतुश्चासुरांगनाः॥ ततो महोत्सवे जाते दानवानां पृथासुत ॥ २९॥ विषण्णमनसो देवाः समहेंद्रास्तदाभवन् ॥ जातमात्रस्तु दैत्यें
द्रस्तारकश्चंडविक्रमः ॥ ३० ॥ अभिषिक्तोऽसुरो दैत्यैः कुरंगमहिषादिभिः ॥ सर्वासुरमहाराज्ये युतः सर्वैर्महासुरैः ॥ ३१ ॥ स तु प्राप्तमहाराज्य
स्तारकः पांडुसत्तम ॥ उवाच दानवश्रेष्ठान्युक्तियुक्तमिदं वचः ॥ ३२ ॥ शृणुध्वमसुराः सर्वे वाक्यं मम महाबलाः ॥ श्रुत्वा वः स्थेयसी बुद्धिः
क्रियतां वचने मम ॥ ३३ ॥ अस्माकं जातिधर्मेण विरूढं वैरमक्षयम् ॥ करिष्याम्यहं तद्वैरं तेषां च विजयाय च ॥ ३४ ॥ किं तु तत्तपसा ॥१०५॥

१ लब्धमाहारम्–इ०पा०। २ अडभाव आर्षः। आच्छादयन्–इत्याडा सहचरितमिदं क्रियापदमपेक्षितम्। ३ कुरंगमहिषादिभिः—तन्नामकैर्दैत्यैरित्यर्थः। ४ स्थेयसी—स्थिरा—इत्यर्थः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सा[1]ध्यं मन्येहं सुरसंगमम् ॥ तस्मादादौ करिष्यामि तपो घोरं दनोः सुताः ॥ ३५ ॥ ततः सुरान्विजेष्यामो भोक्ष्[2]यामोऽथ जगत्रयम् ॥
युक्तोपायोऽहि पुरुषः स्थिरश्रीरेव जायते ॥ ३६ ॥ अयुक्तश्चपलः प्राप्तामपि रक्षितुमक्षमः ॥ तच्छ्रुत्वा दानवाः सर्वे वाक्यं तस्यासुरस्य तु
॥ ३७ ॥ साधुसाध्वित्यथोचुस्ते वचनं तस्य विस्मिताः ॥ सोऽगच्छत्पारियात्रस्य गिरेः कंदरमुत्तमम् ॥ ३८ ॥ सर्वर्तुकुसुमाकीर्णनानौषधिविदी
पितम् ॥ नानाधातुरसस्रावविचित्रनानागृहाश्रयम् ॥ ३९ ॥ अनेकाकारबहुलं पृथक्पक्षिकुलाकुलम् ॥ नानाप्रस्रवणोपेतं नानाविधजलाशयम् ॥
॥ ४० ॥ प्राप्य तत्कंदरं दैत्यश्चकार विपुलं तपः ॥ वहन्पाशुपतीं दीक्षां पंच मंत्राञ्जजाप सः ॥ ४१ ॥ निराहारः पंचतपा वर्षायुतमभूत्किल ॥
ततः स्वदेहादुत्कृत्त्य कर्षंकर्षं दिनेदिने ॥ ४२ ॥ मांसस्याग्नौ जुहावैव ततो निर्मांसतां गतः ॥ ततो निर्मांसदेहः स तपोराशिरजायत ॥ ४३ ॥
जज्वलुः सर्वभूतानि तेजसा तस्य सर्वतः ॥ उद्विग्नाश्च सुराः सर्वे तपसा तस्य भीषिताः ॥ ४४ ॥ एतस्मिन्नंतरे ब्रह्मा परमं तोषमागतः ॥ तार
कस्य वरं दातुं जगाम शिखरं गिरेः ॥ ४५ ॥ प्राप्य तं शैलराजानं हंसस्यंदनमास्थितः ॥ उवाच तारकं देवो गिरा मधुरया तदा ॥ ४६ ॥
॥ ॥ ब्रह्मोवाच ॥ ॥ उत्तिष्ठ पुत्र तपसो नास्त्यसाध्यं तवाधुना ॥ वरं वृणीष्वाभिमतं यत्ते मनसि वर्तते ॥ ४७ ॥ इत्युक्तस्तारको दैत्यः
प्रांजलिः प्राह तं विभुम् ॥ ४८ ॥ ॥ तारक उवाच ॥ ॥ वयं प्रभो जातिधर्माः कृतवैराः सहामरैः ॥ तैश्च निःशेषिता दैत्याः कृताः क्रूरैर्नृशं
सवत् ॥ ४९ ॥ तेषामहं समुद्धर्ता भवेयमिति मे मतिः ॥ अवध्यः सर्वभूतानामस्त्राणां च महौजसाम् ॥ ५० ॥ स्यामहं चामरैश्चैष वरो मम हृदि
स्थितः ॥ एतन्मे देहि देवेश नान्यं वै रोचये वरम् ॥ ५१ ॥ तमुवाच ततो दैत्यं विरंचोऽमरनायकः ॥ न युज्यते विना मृत्युं देहिनो देहधारणम् ॥
जातस्य हि ध्रुवो मृत्युः सत्यमेतच्छ्रुतीरितम् ॥ ५२ ॥ इति संचिंत्य वरय वरं यस्मान्न शंकसे ॥ ततः संचिंत्य दैत्येंद्रः शिशु[3]तः सप्तवासरात् ॥
॥ ५३ ॥ ॥ तारक उवाच ॥ ॥ वासराणां च सप्तानां वर्जयित्वा तु बालकम् ॥ देवानामप्यवध्योऽहं भूयासं तेन याचितः ॥ ५४ ॥ वव्रे महा
सुरो मृत्युं ब्रह्माणं मानमोहितः ॥ ब्रह्मा प्रोचे ततस्तं च तथेति हरवाक्यतः ॥ ५५ ॥ जगाम त्रिदिवं देवो दैत्योऽपि स्वकमालयम् ॥ उत्तीर्णं
तपसस्तं च दैत्यं दैत्येश्वरास्तदा ॥ ५६ ॥ परिवव्रुः फलाकीर्णं वृक्षं शकुनयो यथा ॥ तस्मिन्महति राज्यस्थे तारके दितिनंदने ॥ ५७ ॥ ब्रह्मणाभिहि

१ वाक्यम्— इ० पा० । २ भक्ष्यामः—इ० पा० । ३ ततः दैत्येन्द्रः यदि मृत्युर्भवेदेव तर्हि सः अत्यंतमशक्यः कथं स्यादिति विचार्य सप्तवासरात् शिशोः सकाशान्मृत्युर्भवत्विति ब्रह्माणं वरं याचे—इति संचिंत्य—तारक उवाचेत्युक्तेन संबंधः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्थाने महार्णवतटोत्तरे ॥ तरवो जज्ञिरे पार्थ तत्र सर्वर्तवः शुभाः ॥ ५८ ॥ कांतिर्द्युतिर्धृतिर्मेधा श्रीरखंडा च दानवम् ॥ परिवव्रुर्गुणाकीर्णं निश्छिद्राः सर्व एव हि ॥ ५९ ॥ कालागरुविलिप्तांगं महासुकुटमंडितम्[1] ॥ रुचिरांगदसन्नद्धं महासिंहासने स्थितम् ॥ ६० ॥ नृत्यंत्यप्सरसः श्रेष्ठा गन्धर्वा गाययंति च ॥ चन्द्रार्कौ दीपमार्गेषु व्यजनेषु च मारुतः ॥ ग्रहा अग्रेसरास्तस्य जीवादेशप्रभाषिणः ॥ ६१ ॥ एवं स्वकाद्बाहुबलात्स दैत्यः संप्राप्य राज्यं परिमोदमानः ॥ कदाचिदाभाष्य जगाद मंत्रिणः प्रोद्धृत्तसर्वांगबलेन दर्पितः ॥ ६२ ॥ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां प्रथमे माहेश्वरखण्डे कौमारिकाखण्डे कुमारेशमाहात्म्ये तारकासुरोत्पत्तिवर्णनंनाम पंचदशोऽध्यायः ॥ ॥ १५ ॥ ॥ छ ॥ ॥ तारक उवाच ॥ ॥ राज्येन बुद्बुदाभेन स्त्रीभिरक्षैश्च पानकैः ॥ मोहितो जन्म लब्ध्वात्र त्यजते पौरुषं नरः ॥ १ ॥ जन्म तस्य वृथा सर्वमाकल्पांतं न संशयः ॥ २ ॥ मातापितृभ्यां न करोति कामान्बन्धूनशोकान्न करोति यो वा ॥ कीर्तिं हि वा नार्जयते न मानं नरः स जातोऽपि मृतोऽत्र लोके ॥ ३ ॥ तस्माज्जयायामरपुंगवानां त्रैलोक्यलक्ष्मीहरणाय शीघ्रम् ॥ संयोज्यतां मे रथमष्टचक्रं बलं च मे दुर्जयदैत्यचक्रम् ॥ ४ ॥ ध्वजं च मे कांचनपट्टबन्धं छत्रं च मे मौक्तिकजालबद्धम् ॥ अद्याहमासां सुरकामिनीनां धम्मिल्लकांश्चाग्रथितान्करिष्ये ॥ ५ ॥ यथा पुरा मर्कटको जनन्यास्तस्याश्च सत्येन तु तारकः स्याम् ॥ ६ ॥ ॥ नारद उवाच ॥ ॥ तारकस्य वचः श्रुत्वा ग्रसनोनाम दानवः ॥ सेनानीर्दैत्यराजस्य तथा चक्रेऽविलंबितम् ॥७॥ आहत्य भेरीं गम्भीरां दैत्यानाहूय सत्वरः ॥ सज्जं चक्रे रथं दैत्यो दैत्यराजस्य धीमतः ॥ ८ ॥ गरुडानां सहस्रेण गरुडोपमितत्विषा ॥ ते हि पुत्राः सुपर्णस्य संस्थिता मेरुकन्दरे ॥ ९ ॥ विजित्य दैत्यराजेन वाहनत्वे प्रकल्पिताः ॥ अष्टाष्टचक्रः सरथश्चतुर्योजनविस्तृतः ॥१०॥ नानाक्रीडागृहयुतो गीतवाद्यमनोहरः ॥ गंधर्वनगराकारः संयुक्तः प्रत्यदृश्यत ॥ ११ ॥ आजग्मुस्तत्र दैत्याश्च दश चंडपराक्रमाः ॥ कोटिकोटिपरीवारा अन्ये च बहवो रणे ॥१२॥ तेषामग्रेसरो जम्भः कुजम्भोनंतरस्तथा ॥ महिषः कुञ्जरो मेघः कालनेमिर्निमिस्तथा ॥१३॥ मथनो जंभकः शुम्भो दैत्येंद्रा दश नायकाः ॥ दैत्येंद्रा गिरिवर्ष्माणः संति चंडपराक्रमाः ॥१४॥ नानाविधप्रहरणा नानाशस्त्रास्त्रपारगाः ॥ तारकस्याभवत्केतुर्बहुरूपो महाभयः ॥ १५ ॥ क्वचिच्च राक्षसो घोरः पिशाचध्वांक्षगृध्रकः ॥ एवं बहुविधाकारः स केतुः प्रत्यदृश्यत ॥ १६ ॥ केतुना मकरेणापि सेनानीर्ग्रसनो बभौ ॥ पैशाचं यत्र वदनं जंभस्यासीदयस्मयम् ॥ १७ ॥ खरो विधुतलांगूलः कुजम्भस्याभवद्ध्वजे ॥

१ महासुकुटबृंहिणम्–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

महिषस्य च गोमायुः कांतो हैमस्तथा[1] बभौ ॥१८॥ गृध्रो वै कुंजरस्यासीन्मेषस्याभूच्च राक्षसः ॥ कालनेमेर्महाकालो निमेरासीन्महातिमिः ॥१९॥ राक्षसी मथनस्यापि ध्वांक्षोऽभूज्जंभकस्य च ॥ महावृकश्च शुम्भस्य ध्वजा एवंविधा बभुः ॥ २० ॥ अनेकाकारविन्यासादन्येषां च ध्वजा भवन्[2] ॥ शतेन शीघ्रवेगानां व्याघ्राणां हेममालिनाम् ॥ २१ ॥ ग्रसनस्य रथो युक्तो महामेघरवो बभौ ॥ शतेन चापि सिंहानां रथो जंभस्य योजितः ॥ २२ ॥ कुजंभस्य रथो युक्तः पिशाचवदनैः खरैः ॥ तावद्भिर्महिषस्योष्ट्रैर्गजस्य च हयैर्युतः ॥ २३ ॥ मेषस्य द्वीपिभिर्भीमैः कुञ्जरैः कालनेमिनः ॥ पर्वतं वै समारूढो निश्चित्य विधृतं गजैः ॥२४॥ चतुर्दंष्ट्रैर्गंधवद्भिश्चतुर्भिर्मेघसन्निभैः ॥ शतहस्तायते कृष्णे तुरंगे हेमभूषणे ॥२५॥ सितचामरजालेन शोभिते पुष्पदामनि[3] ॥ मथनोनाम दैत्येन्द्रः पाशहस्तो व्यराजत ॥२६॥ किंकिणीमालिनं चोष्ट्रमारूढोऽभूच्च जंभकः ॥ कालमुंचं महामेघमारूढः शुम्भदानवः ॥ २७ ॥ अन्ये च दानवा वीरा नानावाहनहेतयः ॥ प्रचण्डचित्रवर्माणः कुण्डलोष्णीषभूषिताः ॥ २८ ॥ नानाविधोत्तरासंगा नानामाल्यविभूषणाः ॥ नानासुगंधगंधाढ्या नानाबंदिशतस्तुताः ॥२९॥ नानावाद्यपरिस्यंदसाग्रेसरमहारथाः ॥ नानाशौर्यकथासक्तास्तस्मिन्सैन्ये महारथाः ॥ ॥ ३० ॥ तद्बलं दैत्यसिंहस्य भीमरूपं व्यदृश्यत ॥ भूमिरेणुसमालिंगत्तुरंगरथपत्तिकम् ॥ ३१ ॥ स च दैत्येश्वरः क्रुद्धः समारूढो महारथम् ॥ दशभिः शुशुभे दैत्यैर्दशबाहुरिवेश्वरः ॥ जगद्धंतुं प्रवृत्तो वा प्रतस्थेऽसौ सुरान्प्रति ॥ ३२ ॥ एतस्मिन्नंतरे वायुर्देवदूतः सुरालयम् ॥ दृष्ट्वा तद्दानवबलं जगामेंद्रस्य शंसितुम् ॥ ३३ ॥ स गत्वा तु सभां दिव्यां महेंद्रस्य महात्मनः ॥ शशंस मध्ये देवानामिदं कार्यमुपस्थितम् ॥ ३४ ॥ तच्छ्रुत्वा देवराजः स निमीलितविलोचनः ॥ बृहस्पतिमुवाचेदं वाक्यं काले महामतिः ॥ ३५ ॥ ॥ इन्द्र उवाच ॥ ॥ संप्राप्तोऽतिविमर्दोऽयं देवानां दानवैः सह ॥ कार्यं किमत्र तद्ब्रूहि नीत्युपायोपबृंहितम् ॥ ३६ ॥ एतच्छ्रुत्वा च वचनं महेंद्रस्य गिरांपतिः ॥ प्रत्युवाच महाभागो बृहस्पतिरुदारधीः ॥ ३७ ॥ ॥ बृहस्पतिरुवाच ॥ ॥ सामपूर्वं स्मृता नीतिश्चतुरंगामनीकिनीम् ॥ जिगीषतां सुरश्रेष्ठ स्थितिरेषा सनातनी ॥ ३८ ॥ साम दानं च भेदश्च चतुर्थो दंड एव च ॥ नीतौ क्रमात्प्रयोज्याश्च देशकालविशेषतः ॥ ३९ ॥ तत्र साम प्रयोक्तव्यमार्येषु गुणवत्सु च ॥ दानं लुब्धेषु भेदश्च शंकितेष्विति निश्चयः ॥ ४० ॥ दण्डश्चापि प्रयोक्तव्यो नित्यकालं दुरात्मसु ॥ साम दैत्येषु नैवास्ति निर्गुणत्वाद्दुरात्मसु ॥ ४१ ॥ श्रिया तेषां च किं कार्यं समृद्धानां तथापि यत् ॥ जातिधर्मेण चाभेद्या विधातुरपि ते मताः ॥ ४२ ॥ एको ह्युपायो दंडोऽत्र भवतां यदि रोचते ॥

१ तदा—इ० पा० । २ अभवन्—अत्राडभाव आर्षः । ३ पुष्पमालिनि—इ० पा० ।

CC-0. In Public Domain. Digitization by eGangotri

दुर्जनः सुजनत्वाय कल्पते न कदाचन ॥ ४३ ॥ लालितः पालितो वापि स्वस्वभावं न मुंचति ॥ एवं मे मन्यते बुद्धिर्भवंतो यद्व्यवस्यताम् ॥
॥ ४४ ॥ एवमुक्तः सहस्राक्ष एवमेवेत्युवाच ह ॥ कर्तव्यतां च संचिंत्य प्रोवाचामरसंसदि ॥ ४५ ॥ बहुमानेन मे वाचं शृणुध्वं नाकवासिनः ॥
॥ ४६ ॥ भवंतो यज्ञभोक्तारः सतामिष्टाश्च सात्त्विकाः ॥ स्वे स्वे पदे स्थिता नित्यं जगतः पालने रताः ॥ ४७ ॥ भवतां च निमित्तेन बाधंते
दानवेश्वराः ॥ तेषां सामादि नैवास्ति दंड एव विधीयताम् ॥ ४८ ॥ क्रियतां समरे बुद्धिः सैन्यं संयोज्यतामिति ॥ आवाह्यंतां च शस्त्राणि पूज्यं
तां शस्त्रदेवताः ॥ ४९ ॥ इत्युक्ताः समनह्यंत देवानां ये प्रधानतः ॥ वाजिनामयुतेनाजौ हेमपट्टपरिष्कृताः ॥ ५० ॥ वाहनानि विमानानि योज
यंतु ममामराः ॥ यमं सेनापतिं कृत्वा शीघ्रं निर्यात देवताः ॥ ५१ ॥ नानाश्चर्यगुणोपेता दुर्जया देवदानवैः ॥ रथो मातलिना युक्तो महेंद्रस्याप्यदृ
श्यत ॥ ५२ ॥ यमो महिषमास्थाय सेनाग्रे समवर्तत ॥ चंडकिंकिणिवृंदेन सर्वतः परिवारितः ॥५३॥ कल्पकालोज्ज्वलज्वालापूरितांबरगोचरः ॥
हुताश उरणारूढः शक्तिहस्तो व्यवस्थितः ॥ ५४ ॥ पवनोऽकुशपाणिस्तु विस्तारितमहाजवः ॥ महाऋक्षं समारूढः सेनाग्रे समदृश्यत ॥
॥ ५५ ॥ भुजगेन्द्रं समारूढो जलेशो भगवान्स्वयम् ॥ महापाशधरो वीरः सेनायां समवर्तत ॥ ५६ ॥ नरयुक्ते रथे दिव्ये धनाध्यक्षो व्यचीच
रत् ॥ महासिंहरवो युद्धे गदाहस्तो व्यवस्थितः ॥ ५७ ॥ राक्षसेशोऽथ निर्ऋती रथे रक्षोमुखैर्हयैः ॥ धन्वी रक्षोगणवृतो महारावो व्यदृश्यत ॥
॥ ५८ ॥ चंद्रादित्यावश्विनौ च वसवः साध्यदेवताः ॥ विश्वेदेवाश्च रुद्राश्च सन्नद्धास्तस्थुराहवे ॥ ५९ ॥ हेमपीठोत्तरासंगाश्चित्रवर्मायुधध्वजाः ॥
गंधर्वाः प्रत्यदृश्यन्त कृत्वा विश्वावसुं मुखे ॥ ६० ॥ तथा रक्तोत्तरासंगा निर्मलायोविभूषणाः ॥ गृध्रध्वजा अदृश्यंत राक्षसा रक्तमूर्धजाः ॥ ६१ ॥
तथा भीमाशनिकराः कृष्णवस्त्रा महारथाः ॥ यक्षास्तत्र व्यदृश्यंत मणिभद्रादिकोटिशः ॥६२॥ ताम्रोलूकध्वजा रौद्रा द्वीपिचर्मांबरास्तथा॥पिशाचा
स्तत्र राजंते महावेगपुरःसराः ॥ ६३ ॥ तथैव श्वेतवसनाः सितपट्टपताकिनः ॥ मत्तेभवाहनप्रायाः किंनरास्तस्थुराहवे ॥ ६४ ॥ मुक्ताजाल
परिष्कारो हंसो हारसमप्रभः ॥ केतुर्जलधिनाथस्य सौम्यरूपो व्यराजत ॥ ६५ ॥ पंचरागमहारत्नविटंको धनदस्य च ॥ ध्वजः समुत्थितो भाति
यातुकाम इवांबरम् ॥ ६६ ॥ कार्ष्णलोहमयो ध्वांक्षो यमस्याभून्महाध्वजः ॥ राक्षसेशस्य वदनं प्रेतस्य ध्वज आबभौ ॥ ६७ ॥ हेमसिंहध्वजौ
देवौ चन्द्रार्कावमितद्युती ॥ कुंभेन चित्रवर्णेन केतुराश्विनयोरभूत् ॥ ६८ ॥ मातंगो हेमरचितश्चित्ररत्नपरिष्कृतः ॥ ध्वजः शतक्रतोरासीत्सितचा
मरसंस्थितः ॥ ६९ ॥ अन्येषां च ध्वजास्तत्र नानारूपा बभू रणे ॥ सनागयक्षगंधर्वमहोरगनिशाचरा ॥ ७० ॥ सेना सा देवराजस्य दुर्जया प्रत्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दृश्यत ॥ कोटयस्तास्त्रयस्त्रिंशन्नानादेवनिकायिनाम् ॥ ७१ ॥ हैमाचलाभे सितकर्णचामरे सुवर्णपद्मामलसुंदरस्रजि ॥ कृताभिरामोज्ज्वलकुंकुमांकुरे कपोललीलाविविमुक्तरावे ॥ ७२ ॥ श्रितस्तदैरावणनामकुंजरे महाबलश्चित्रविशेषितांबरः ॥ विशालवज्रांगवितानभूषितः प्रकीर्णकेयूरभुजाग्रमंडलः ॥ ७३ ॥ सहस्रदृग्बंदिसहस्रसंस्तुतस्त्रिविष्टपेऽशोभत पाकशासनः ॥ ७४ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां प्रथमे माहेश्वरखण्डे कौमारिकाखण्डे तारकासुरदेवेन्द्रयुद्धोपक्रमवर्णनंनाम षोडशोऽध्यायः ॥ १६ ॥ ॥ नारद उवाच ॥ ॥ ततस्तयोः समायोगः सेनयोरुभयोरभूत् ॥ युगांते समनुप्राप्ते यथा क्षुब्धसमुद्रयोः ॥ १ ॥ सुरासुराणां संमर्दे तस्मिन्परमदारुणे ॥ तुमुलं सुमहत्क्रांते सेनयोरुभयोरपि ॥२॥ गर्जतां देवदैत्यानां शंखभेरीरवेण च ॥ तूर्याणां चैव निर्घोषैर्मातंगानां च बृंहितैः ॥३॥ हेषितैर्हयवृंदानां रथनेमिस्वनेन च॥ घोषेण चैव तूर्याणां युगांत इव चाभवत् ॥४॥ रोषेणाभिपरीतांगास्त्यक्तजीवितचेतसः ॥ समसज्जन्त तेन्योन्यं प्रक्रमेणातिलोहिताः॥५॥ रथा रथैः समासक्ता गजाश्चापि महागजैः॥ पत्तयः पत्तिभिश्चैव हयाश्चापि महाहयैः ॥ ६ ॥ ततः प्रासाशनिगदाभिंडिपालपरश्वधैः ॥ शक्तिभिः पट्टिशैः शूलैर्मुद्गरैः कणयैर्गुडैः ॥ ७ ॥ चक्रैश्च शक्तिभिश्चैव तोमरैरंकुशैरपि ॥ कर्णिनालीकनाराचवत्सदंतार्द्धचंद्रकैः ॥ ८ ॥ भल्लैर्वैतसपत्रैश्च शुकतुंडैश्च निर्मलैः ॥ वृष्टिभिश्चाद्भुताकारैर्गगनं समपद्यत ॥ ९ ॥ संप्रच्छाद्य दिशः सर्वास्तमोमयमिवाभवत् ॥ प्राज्ञायंत न तेऽन्योन्यं तस्मिंस्तमसि संकुले ॥ १० ॥ अदृश्यभूतास्तमसि न्यकृंतंत परस्परम् ॥ ततो भुजैर्ध्वजैश्छत्रैः शिरोभिश्च सकुंडलैः ॥ ११ ॥ गजैस्तुरंगैः पादातैः पतद्भिः पतितैरपि ॥ आकाशशिरसो भ्रष्टैः पंकजैरिव भूश्चिता ॥ १२ ॥ भग्नदंता भिन्नकुंभाश्छिन्नदीर्घमहाकराः[1] ॥ गजाः शैलनिभाः पेतुर्धरण्यां रुधिरस्रवाः ॥ १३ ॥ भग्नैषाश्च रथाः पेतुर्भग्नाक्षाः शकलीकृताः ॥ पत्तयः कोटिशः पेतुस्तुरंगाश्च सहस्रशः ॥ १४ ॥ ततः शोणितनद्यश्च हर्षदाः पिशिताशिनाम् ॥ वैतालानंददायिन्यो व्यजायंत सहस्रशः ॥ १५ ॥ तस्मिंस्तथाविधे युद्धे सेनानीर्ग्रसनोऽरिहा ॥ बाणवर्षेण महता देवसैन्यमकंपयत् ॥ १६ ॥ ततो ग्रसनमालोक्य यमः क्रोधविमूर्छितः ॥ ववर्ष शरवर्षेण विशेषादग्निवर्चसा ॥ १७ ॥ स विद्धो बहुभिर्बाणैर्ग्रसनोऽतिपराक्रमः ॥ कृतप्रतिकृताकांक्षी धनुरानम्य भैरवम् ॥ १८ ॥ शरैः सहस्रैश्च पञ्चलक्षैश्चैव व्यताडयत् ॥ ग्रसनेन विमुक्तांस्ताञ्छरान्सोपि निवार्य च ॥ १९ ॥ बाणवृष्टिभिरुग्राभिर्यमो ग्रसनमर्दयत् ॥ कृतांतशरवृष्टीनां संततीः प्रतिसर्पतीः ॥ चिच्छेद शरवर्षेण ग्रसनो दानवेश्वरः ॥ २० ॥ विफलां

१ छिन्नदीर्घमहाकराः--विच्छिन्नलम्बमहाशुण्डाः--इत्यर्थः ।

CC-0. In Public Domain. Digitization by eGangotri

तां समालोक्य यमः स्वशरसंततिम् ॥ २१ ॥ प्राहिणोन्मुद्गरं दीप्तं ग्रसनस्य रथं प्रति ॥ स तं मुद्गरमायांतमुत्पत्य रथसत्तमात् ॥ २२ ॥ जग्राह वामहस्तेन लीलया ग्रसनोऽरिहा ॥ तेनैव मुद्गरेणाथ यमस्य महिषं रुषा ॥ २३ ॥ ताडयामास वेगेन स पपात महीतले॥ उत्पत्याथ यमस्तस्मान्महिषान्निपतिष्यतः ॥ २४ ॥ प्रासेन ताडयामास ग्रसनं वदने दृढम् ॥ स तु प्राप्तप्रहारेण मूर्छितो न्यपतद्भुवि ॥ २५ ॥ ग्रसनं पतितं दृष्ट्वा जंभो भीमपराक्रमः ॥ यमस्य भिंडिपालेन प्रहारमकरोद्धृदि ॥ २६ ॥ यमस्तेन प्रहारेण सुस्राव रुधिरं मुखात् ॥ अतिगाढप्रहारार्त्तः कृतांतो मूर्छितोऽभवत् ॥ २७ ॥ कृतांतमर्दितं दृष्ट्वा गदापाणिर्धनाधिपः ॥ वृतो यक्षायुतगणैर्जंभं प्रत्युद्ययौ रुषा ॥ २८ ॥ जंभो रुषा तमायांतं दानवानीकसंवृतः ॥ जग्राह वाक्यं राज्ञस्तु यथा स्निग्धेन भाषितम् ॥ २९ ॥ ग्रसनो लब्धसंज्ञोऽथ यमस्य प्राहिणोद्गदाम् ॥ मणिहेमपरिष्कारां गुर्वीं परिघमर्दिनीम् ॥ ३० ॥ तामापतंतीं संप्रेक्ष्य गदां महिषवाहनः ॥ गदायाः प्रतिघातार्थं जगज्ज्वलनभैरवम् ॥ ३१ ॥ दंडं मुमोच कोपेन ज्वालामालासमाकुलम् ॥ स गदां वियति प्राप्य ररासांबुधरोद्धतम् ॥ ३२ ॥ संघट्टश्चाभवत्ताभ्यां शैलाभ्यामिव दुःसहः ॥ ताभ्यां निष्पेषनिर्ह्रादजडीकृतदिगंतरम् ॥ ३३ ॥ जगद्व्याकुलतां यातं प्रलयागमशंकया ॥ क्षणात्प्रशांतनिर्ह्रादं ज्वलदुल्कासमाचितम् ॥ ३४ ॥ निष्पेषणं तयोर्भीममभूद्गगनगोचरम् ॥ निहत्याथ गदां दण्डस्ततो ग्रसनमूर्धनि ॥ ३५ ॥ पपात पौरुषं हत्वा यथा दैवं पुरार्जितम् ॥ स तु तेन प्रहारेण दृष्ट्वा सतिमिरा दिशः ॥ ३६ ॥ पपात भूमौ निःसंज्ञो भूमिरेणुविभूषितः ॥ ततो हाहारवो घोरः सेनयोरुभयोरभूत् ॥ ३७ ॥ ततो मुहूर्तमात्रेण ग्रसनः प्राप्य चेतनाम् ॥ अपश्यत्स्वां तनुं ध्वस्तां विलोलाभरणांबराम् ॥ ३८ ॥ स चापि चिंतयामास कृतप्रतिकृतक्रियाम् ॥ धिगस्तु पौरुषं मह्यं प्रभोरग्रेसरः कथम् ॥ ३९ ॥ मय्याश्रितानि सैन्यानि जिते मयि जितानि च ॥ असंभावितरूपो हि सज्जनो मोदते सुखम् ॥ ४० ॥ संभावितस्त्वशक्तश्चेत्तस्य नायं परोऽपि वा ॥ एवं संचिंत्य वेगेन समुत्तस्थौ महाबलः ॥ ४१ ॥ मुद्गरं कालदण्डाभं गृहीत्वा गिरिसंनिभम् ॥ ग्रसनो घोरसंकल्पः संदष्टौष्ठपुटच्छदः ॥ ४२ ॥ रथेन त्वरितोऽगच्छदाससादांतकं रणे ॥ समासाद्य यमं युद्धे ग्रसनो भ्राम्य मुद्गरम् ॥ ४३ ॥ वेगेन महता रौद्रं चिक्षेप यममूर्धनि ॥ विलोक्य मुद्गरं दीप्तं यमः संभ्रांतलोचनः ॥ ४४ ॥ वंचयामास दुर्द्धर्षं मुद्गरं तं महाबलः ॥ तस्मिन्नपसृते दूरं चंडानां भीमकर्मणाम् ॥ ॥ ४५ ॥ याम्यानां किंकराणां च अयुतं निष्पिपेष ह ॥ ततस्तदयुतं दृष्ट्वा हतं किंकरवाहिनी ॥ ४६ ॥ दशार्बुदमिता क्रुद्धा ग्रसनायान्वधावत ॥ ग्रसनस्तु समालोक्य तां किंकरमयां शुभाम् ॥ ४७ ॥ मेने यमसहस्राणि तादृग्रूपबला हि सा ॥ विगाह्य ग्रसनं सेना ववर्ष शरवृष्टिभिः ॥ ४८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

कल्पांतघोरसंकाशो बभूव स महारणः ॥ केचिच्छैलेन बिभिदुः केचिद्बाणैरजिह्मगैः ॥ ४९ ॥ पिपिषुर्गदया केचित्केचिन्मुद्गरवृष्टिभिः ॥ केचित्प्रासप्रहारैश्च ताडयामासुरुद्धताः॥५०॥अपरे किंकरास्तस्य ललंबुर्बाहुमंडले॥शिलाभिरपरे जघ्नुर्द्रुमैरन्ये महोच्छ्रयैः ॥५१॥ तस्यापरे च गात्रेषु दशनांश्च न्यपातयन् ॥ अपरे मुष्टिभिः पृष्ठं किंकरास्ताडयंति च ॥ ५२ ॥ एवं चाभिद्रुतस्तैः स ग्रसनः क्रोधमूर्छितः ॥ उत्साद्य[1] गात्रं भूपृष्ठे निष्पिपेष सहस्रशः ॥ ५३ ॥ कांश्चिदुत्थाय जघ्नेऽसौ मुष्टिभिः किंकरात्रणे ॥ कांश्चित्पादप्रहारेण धावन्नन्यानचूर्णयत् ॥ ५४ ॥ क्षणैकेन स तान्निन्ये यमलोकाय भारत ॥ स च किंकरयुद्धेन ववृधेऽग्निरिवैधसा ॥ ५५ ॥ तमालोक्य यमोऽश्रांतं श्रांतांस्तांश्च हतान्स्वकान् ॥ आजगाम समुद्यम्य दंडं महिषवाहनः ॥ ५६ ॥ ग्रसनस्तु तमायांतमाजघ्ने गदयोरसि ॥ अचिंतयित्वा तत्कर्म ग्रसनस्यांतकोऽरिहा ॥ ५७ ॥ व्याघ्रान्दंडेन संजघ्ने स रथान्न्यपतद्भुवि ॥ ततः क्षणेन चोत्थाय संचिंत्यात्मानमुद्धतः ॥ ५८ ॥ वायुवेगेन सहसा ययौ यमरथं प्रति ॥ पदातिः स रथं तं च समारुह्य यमं तदा[2] ॥ ॥ ५९ ॥ योधयामास बाहुभ्यामाकृष्य बलिनां वरः ॥ यमोऽपि शस्त्राण्युत्सृज्य बाहुयुद्धे प्रवर्तते ॥६०॥ ग्रसनं कटिवस्त्रे तु यमं गृह्य बलोत्कटः ॥ भ्रामयामास वेगेन संभ्रमाविष्टचेतसम् ॥६१॥ विमोच्याथ यमः कष्टात्कंठेऽवष्टभ्य चासुरम् ॥ बाहुभ्यां भ्रामयामास सोऽप्यात्मानममोचयत् ॥६२॥ ततो जघ्नतुरन्योन्यं मुष्टिभिर्निर्दयौ च तौ ॥ दैत्येंद्रस्यातिवीर्यत्वात्परिश्रांततरो यमः ॥ ६३ ॥ स्कंधे निधाय दैत्यस्य मुखं विश्रांतिमैच्छत ॥ तमालक्ष्य ततो दैत्यः श्रांतमुत्पाद्य[3] चौजसा ॥ ६४ ॥ निष्पिपेष महीपृष्ठे विनिघ्नन्पार्ष्णिपाणिभिः ॥ ततो यमस्य वदनात्सुस्राव रुधिरं बहु ॥ ६५ ॥ निर्जीवमिति तं दृष्ट्वा ततः संत्यज्य दानवः ॥ जयं प्राप्योद्धतं नादं मुक्त्वा संत्रास्य देवताः ॥ ६६ ॥ स्वकं सैन्यं समासाद्य तस्थौ गिरिरिवाचलः ॥ ॥ ६७ ॥ नादेन तस्य ग्रसनस्य संख्ये महायुधैश्चार्दितसर्वगात्राः ॥ गते कृतांते वसुधां च निष्प्रभे चकंपिरे कांदिशिकाः सुरास्ते ॥ ६८ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां प्रथमे माहेश्वरखण्डे कौमारिकाखण्डे तारकसैन्यदेवसैन्ययोर्मध्ये यमग्रसनयोर्युद्धवर्णनं नाम सप्तदशोऽध्यायः ॥ १७ ॥ ॥ छ ॥ ॥ नारद उवाच ॥ ॥ धनाधिपस्य जंभेन सायकैर्मर्मभेदिभिः ॥ दिशोपरुद्धाः क्रुद्धेन सैन्यं चाभ्यर्दितं भृशम् ॥ १ ॥ तद्दृष्ट्वा कर्म दैत्यस्य धनाध्यक्षः प्रतापवान् ॥ आकर्णाकृष्टचापस्तु जंभमाजौ महाबलम् ॥ २ ॥ हृदि विव्याध बाणानां सहस्रेणाग्निवर्चसाम् ॥ स प्रहस्य ततो वीरो बाणानामयुतत्रयम् ॥ ३ ॥ नियुतं च तथा कोटिमर्बुदं चाक्षिपत्क्षणात् ॥ तस्य तल्लाघवं

१ उत्साद्य—निर्वूय—कंपयित्वा—तानंगलग्नान्यमकिंकरान्निःसार्येत्यर्थः । उत्सृज्य—इति पाठान्तरम् । २ यदा—इ० पा० । ३ संपद्य—इ०पा० ।

Nepal Sanskrit University

CC-0. In Public Domain. Digitization by eGangotri

दृष्ट्वा क्रुद्धो गृह्य महागदाम् ॥ ४ ॥ धनाध्यक्षः प्रचिक्षेप स्वर्गेप्सुः स्वधनं यथा ॥ मुक्तायां च गदायां वै नादोऽभूत्प्रलये यथा ॥ ५ ॥ भूतानां
बहुधा रावा जज्ञिरे खे महाभयाः ॥ वायुश्च सुमहाञ्जज्ञे खमायान्मेघसंकुलम् ॥ ६ ॥ सा हि वैश्रवणस्यास्ते त्रैलोक्याभ्यर्चिता गदा ॥ आयांतीं तां
समालोक्य तडित्संघातदुर्दृशाम् ॥ ७ ॥ दैत्यो गदाविघातार्थं शस्त्रवृष्टिं मुमोच ह ॥ चक्राणि कुणपान्प्रासाञ्छतघ्नीः पट्टिशांस्तथा ॥ ८ ॥
परिघान्मुशलान्वृक्षान्गिरींश्चातुलविक्रमः ॥ कदर्थीकृत्य शस्त्राणि तानि सर्वाणि सा गदा ॥ ९ ॥ कल्पांतभास्करो यद्वन्न्यपतद्दैत्यवक्षसि ॥ स
तया गाढभिन्नः सन्सफेनरुधिरं वमन् ॥ १० ॥ निःपपात रथाज्जंभो वसुधां गतचेतनः ॥ जंभं निपतितं दृष्ट्वा कुजंभो घोरनिश्चयः ॥ ११ ॥
धनाधिपस्य संक्रुद्धो नादेनापूरयन्दिशः ॥ चक्रे बाणमयं जालं शकुंतस्येव पंजरम् ॥ १२ ॥ विच्छिद्य बाणजालं च मायाजालमिवोत्कटम् ॥
मुमोच बाणानपरांस्तस्य यक्षाधिपो बली ॥१३॥ चिच्छेद लीलया तांश्च दैत्यः क्रोधीव सद्वचः ॥ निष्फलांस्तांस्ततो दृष्ट्वा बाणान्क्रुद्धो धनाधिपः
॥१४॥ शक्तिं जग्राह दुर्धर्षां शतघंटामहास्वनाम् ॥ प्रेषिता सा तदा शक्तिर्दारयामास तं हृदि॥१५॥यथाल्पबोधं पुरुषं दुःखं संसारसंभवम्॥तथास्य
हृदयं भित्त्वा जगाम धरणीतलम् ॥ १६ ॥ निमेषात्सोभिसंस्तभ्य दानवो दारुणाकृतिः ॥ जग्राह पट्टिशं दैत्यो गिरीणामपि भेदनम् ॥ १७ ॥
स तेन पट्टिशेनाजौ धनदस्य स्तनांतरम् ॥ वाक्येन तीक्ष्णरूपेण मर्माक्षरविसर्पिणा ॥१८॥ निर्बिभेदाभिजातस्य हृदयं दुर्जनो यथा ॥ तेन पट्टिश
घातेन धनेशः परिमूर्छितः ॥१९॥ निषसाद रथोपस्थे दुर्वाचा सुजनो यथा ॥ तथागतं तु तं दृष्ट्वा धनेशं वै मृतं यथा ॥२०॥ राक्षसो निर्ऋतिर्देवो
निशाचरबलानुगः ॥ अभिदुद्राव वेगेन कुजंभं भीमविक्रमम् ॥ २१ ॥ अथ दृष्ट्वातिदुर्धर्षं कुजंभो राक्षसेश्वरम् ॥ नोदयामास दैत्यान्स राक्षसेश
रथं प्रति ॥ २२ ॥ स दृष्ट्वा नोदितां सेनां प्रबलास्त्रां सुभीषणाम् ॥ रथादाप्लुत्य वेगेन निर्ऋती राक्षसेश्वरम् ॥ २३ ॥ खड्गेन तीक्ष्णधारेण चर्मपा
णिरधावत ॥ प्रविश्य दानवानीकं गजः पद्मसरो यथा ॥ २४ ॥ लोडयामास बहुधा विनिष्कृत्य सहस्रशः ॥ चिच्छेद कांश्चिच्छतशो बिभेदान्या
न्वरासिना ॥ २५ ॥ संदष्टौष्ठमुखैः पृथ्वीं दैत्यानां सोऽभ्यपूरयत् ॥ ततो निःशेषितप्रायां विलोक्य स्वां चमूं तदा ॥ २६ ॥ मुक्त्वा धनपतिं दैत्यः
कुजंभो निर्ऋतिं ययौ ॥ लब्धसंज्ञस्तु जंभोऽपि धनाध्यक्षपदानुगान् ॥ २७ ॥ जीवग्राहं स जग्राह बद्ध्वा पाशैः सहस्रधा ॥ मूर्तिमंति च रत्नानि
पद्मादींश्च निधींस्तथा ॥ २८ ॥ वाहनानि च दिव्यानि विमानानि च सर्वशः ॥ धनेशो लब्धसंज्ञस्तु तामवस्थां विलोक्य सः ॥ २९ ॥ निःश्व
सन्दीर्घमुष्णं च रोषात्ताम्रविलोचनः ॥ ध्यात्वास्त्रं गारुडं दिव्यं बाणं संधाय कार्मुके ॥ ३० ॥ मुमोच दानवानीके तं बाणं शत्रुदारणम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रथमं कार्मुकं तस्य वह्निज्वालमदृश्यत ॥ ३१ ॥ निश्चेरुर्विस्फुलिंगानां कोट्यो धनुषस्तथा ॥ ततो ज्वालाकुलं व्योम चक्रे चास्त्रं समंततः ॥ ॥ ३२ ॥ तदस्त्रं सहसा दृष्ट्वा जंभो भीमपराक्रमः ॥ संवर्तं मुमुचे तेन प्रशांतं गारुडं तदा ॥ ३३ ॥ ततस्तं दानवो दृष्ट्वा कुबेरं रोषविह्वलः ॥ अभिदुद्राव वेगेन पदातिर्धनदं नदन् ॥ ३४ ॥ अथाभिमुखमायांतं दैत्यं दृष्ट्वा धनाधिपः ॥ बभूव संभ्रमाविष्टः पलायनपरायणः ॥ ३५ ॥ ततः पलायतस्तस्य मुकुटो रत्नमंडितः ॥ पपात भूतले दीप्तो रविबिंबमिवांबरात् ॥ ३६ ॥ यक्षाणामभिजातानां भग्नं प्रववृते रणात् ॥ मर्तुं संग्राम शिरसि युक्तं नो भूषणाय तत् ॥ ३७ ॥ इति व्यवस्य दुर्धर्षा नानाशस्त्रास्त्रपाणयः ॥ युयुत्सवस्तथा यक्षा मुकुटं परिवार्य ते ॥ ३८ ॥ अभिमान धना वीरा धनदस्य पदानुगाः ॥ तानमर्षाच्च संप्रेक्ष्य दानवश्चंडपौरुषः ॥ ३९ ॥ भुशुण्डीं भीषणाकारां गृहीत्वा शैलगौरवाम् ॥ रक्षिणो मुकुट स्याथ निष्पिपेष निशाचरान् ॥ ४० ॥ तान्प्रमथ्याथ नियुतं मुकुटं तं स्वके रथे ॥ समारोप्यामरिपुर्जित्वा धनदमाहवे ॥४१॥ धनानि च निधी न्गृह्य स्वसैन्येन समावृतः ॥ नादेन महता देवान्द्रावयामास सर्वशः ॥ ४२ ॥ धनदोऽपि धनं सर्वं गृहीतो मुक्तमूर्धजः ॥ पदातिरेकः सन्त्रस्तः प्राप्यैवं दीनवत्स्थितः ॥ ४३ ॥ कुजंभेनाथ संसक्तो रजनीचरनंदनः ॥ मायाममोघामाश्रित्य तामसीं राक्षसेश्वरः ॥ ४४ ॥ मोहयामास दैत्येन्द्रो जगत्कृत्वा तमोमयम् ॥ ततो विफलनेत्राणि दानवानां बलानि च ॥ ४५ ॥ न शेकुश्चलितुं तत्र पदादपि पदं तदा ॥ ततो नानास्त्रवर्षेण दान वानां महाचमूः ॥ ४६ ॥ जघान निर्ऋतिर्देवस्तमसा संवृता भृशम् ॥ हन्यमानेषु दैत्येषु कुजंभे मूढचेतसि ॥ ४७ ॥ महिषो दानवेन्द्रस्तु कल्पांतां भोदसन्निभः ॥ अस्त्रं चकार सावित्रमुल्कासंघातमंडितम् ॥ ४८ ॥ विजृंभत्यथ सावित्रे परमास्त्रे प्रतापिनि ॥ प्रणाशमगमत्तीव्रं तमो घोरमनंत रम् ॥ ४९ ॥ ततोऽस्त्रविस्फुलिंगांकं तमः शुक्लं व्यजायत ॥ प्रोत्फुल्लारुणपद्मौघं शरदीवामलं सरः ॥ ५० ॥ ततस्तमसि संशांते दैत्येन्द्राः प्राप्तच क्षुषः ॥ चक्रुः क्रूरेण तमसा देवानीकं महाद्भुतम् ॥ ५१ ॥ अथादाय धनुर्घोरमिषुं चाशीविषोपमम् ॥ कुजंभोऽधावत क्षिप्रं रक्षोदेवबलं प्रति ॥ ॥ ५२ ॥ राक्षसेन्द्रस्तथायांतं दृष्ट्वा तं स पदानुगः ॥ विव्याध निशितैर्बाणैः कालाशनिसमस्वनैः ॥ ५३ ॥ नादानं न च सन्धानं न मोक्षो वास्य लक्ष्यते ॥ चिच्छेदोग्रैः शरव्रातैस्तान्छरानतिलाघवात् ॥ ५४ ॥ ध्वजं शरेण तीक्ष्णेन निचकर्तामरद्विषः ॥ सारथिं चास्य भल्लेन रथनीडादपाह रत् ॥ ५५ ॥ कालकल्पेन बाणेन तं च वक्षस्यताडयत् ॥ स तु तेन प्रहारेण चकम्पे पीडितो भृशम् ॥ ५६ ॥ दैत्येंद्रो राक्षसेन्द्रेण क्षितिकंपे

१ वीराः--इ० पा० । २ एवं--दशामिति शेषः । ३ तथा--इ० पा० । ४ तमसा संवृताः--इति दानवानां महाचमूः--इत्येतस्य विशेषणम् । ५ वनुः--इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नगो यथा ॥ स मुहूर्तात्समाश्वास्य मत्वा तं दुर्जयं रणे ॥ ५७ ॥ पदातिरासाद्य रथं रक्षो वामकरेण च ॥ केशेषु निर्ऋतिं गृह्य जानुनाक्रम्य च स्थितः ॥ ५८ ॥ ततः खड्गेन च शिरश्छेत्तुमैच्छदमर्षणः ॥ ततः कलकलो जज्ञे देवानां सुमहांस्तदा ॥ कुजंभस्य वशं प्राप्तं दृष्ट्वा निर्ऋतिमाहवे ॥ ५९॥ एतस्मिन्नन्तरे देवो वरुणः पाशभृद्रुतः॥ पाशेन दानवेंद्रस्य बबन्धाशु भुजद्वयम् ॥६०॥ ततो बद्धभुजं दैत्यं विफलीकृतपौरुषम् ॥ ताडयामास गदया दयामुत्सृज्य पाशभृत् ॥ ६१ ॥ स तु तेन प्रहारेण स्रोतोभिः क्षतजं स्रवन् ॥ दधार कालमेघस्य रूपं विद्युल्लताभृतम् ॥ ६२ ॥ तदवस्थागतं दृष्ट्वा कुजंभं महिषासुरः ॥ व्यावृत्तवदनारावो भोक्तुमैच्छत्सुरावुभौ ॥ ६३ ॥ निर्ऋतिं वरुणं चैव तीक्ष्णदंष्ट्रोत्कटाननः ॥ तावभिप्रायमालोक्य तस्य दैत्यस्य दूषितम् ॥ ६४ ॥ त्यक्त्वा रथावुभौ भीतौ पदाती प्रद्रुतौ द्रुतम् ॥ जग्मतुर्महिषाद्भीतौ शरणं पाकशासनम् ॥ ६५ ॥ क्रुद्धोऽथ महिषो दैत्यो वरुणं समुपाद्रवत् ॥ तमंतकमुखासन्नमालोक्य हिमदीधितिः ॥ ६६ ॥ चक्रे शस्त्रं विसृष्टं हि हिमसंघातमुल्बणम् ॥ वायव्यं चास्त्रमतुलं चंद्रश्चक्रे द्वितीयकम् ॥ ६७ ॥ वायुना तेन चंडेन संशुष्केण हिमेन च ॥ महाहिमनिपातेन शस्त्रैश्चंद्रप्रणोदितैः ॥ ६८ ॥ गात्राण्यसुरसैन्यानामदह्यंत समंततः ॥ व्यथिता दानवाः सर्वे शीतच्छादितपौरुषाः ॥ ६९ ॥ न शेकुश्चलितुं तत्र नास्त्राण्यादातुमेव च ॥ महिषो निष्प्रयत्नश्च शीतेनाकंपिताननः ॥ ७० ॥ अंसमालिंग्य पाणिभ्यामुपविष्टो ह्यधोमुखः ॥ सर्वे ते निष्प्रतीकारा दैत्याश्चंद्रमसा जिताः ॥ ७१ ॥ रणेच्छां दूरतस्त्यक्त्वा तस्थुस्ते जीवितार्थिनः ॥ तत्राब्रवीत्कालनेमिर्दैत्यान्क्रोधविदीपितः ॥७२॥ भोभोः शृंगारिणः क्रूराः सर्वशस्त्रास्त्रपारगाः ॥ एकैकोऽपि जगत्कृत्स्नं शक्तस्तुलयितुं भुजैः ॥ ७३ ॥ एकैकोऽपि क्षमो ग्रस्तुं जगत्सर्वं चराचरम् ॥ एकैकस्यापि पर्याप्ता न सर्वेऽपि दिवौकसः ॥ ७४ ॥ किं त्रस्तनयनाश्चैव समरे परिनिर्जिताः ॥ न युक्तमेतच्छूराणां विशेषाद्दैत्यजन्मनाम् ॥ ७५ ॥ राज्ञश्च तारकस्यापि दर्शयिष्यथ किं मुखम् ॥ विरतानां रणाच्चासौ क्रुद्धः प्राणान्हरिष्यति ॥ ७६ ॥ इति ते प्रोच्यमानापि नोचुः किंचिन्महासुराः ॥ शीतेन नष्टश्रुतयो भ्रष्टवाक्याश्च ते तथा ॥ ॥ ७७ ॥ मूकास्तथाभवन्दैत्या मृतकल्पा महारणे ॥ तान्दृष्ट्वा नष्टचेतस्कान्दैत्याञ्छीतेन पीडितान् ॥ ७८ ॥ मत्वा कालक्षमं कार्यं कालनेमिर्महासुरः ॥ आश्रित्य मानवीं मायां वितत्य च महावपुः ॥ ७९ ॥ पूरयामास गगनं दिशो विदिश एव च ॥ निर्ममे दानवेन्द्रोऽसौ शरीरे भास्करायुतम् ॥ ८० ॥ दिशश्च विदिशश्चैव पूरयामास पावकैः ॥ ततो ज्वालाकुलं सर्वं त्रैलोक्यमभवत्क्षणात् ॥ ८१ ॥ तेन ज्वालासमूहेन हिमां

१ रक्षः—दैत्यराक्षसोऽत्र बोध्यः । २ विद्युल्लता भृशम्—इ० पा० । ३ मोक्तुम्—इ० पा० । ४ प्रोच्यमानाः अपि—इति पदच्छेदः । सन्धिरार्षः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

शुरगमद्भुतम् ॥ ततः क्रमेण विभ्रष्टं शीतदुर्दिनमाबभौ ॥ ८२ ॥ तद्बलं दानवेंद्राणां मायया कालनेमिनः ॥ तद्दृष्ट्वा दानवानीकं लब्धसंज्ञं दिवा
करः ॥ उवाचारुणमत्यर्थं कोपरक्तांतलोचनः ॥ ८३ ॥ ॥ दिवाकर उवाच ॥ ॥ नयारुण रथं शीघ्रं कालनेमिरथो यतः ॥ ८४ ॥ विमर्दे तत्र
विषमे भविता भूतसंक्षयः ॥ जित एषशशांकोऽथ वयं यद्बलमाश्रिताः ॥ ८५ ॥ इत्युक्तश्चोदयामास[1] रथं गरुडपूर्वजः ॥ रथे स्थितोऽपि तैरश्वैः
सितचामरधारिभिः ॥ ८६ ॥ जगद्दीपोऽथ भगवाञ्जग्राह विततं धनुः ॥ शरौघो वै पांडुपुत्र क्षिप्रमासीद्द्विषद्द्युतिः ॥८७॥ शंबरास्त्रेण संधाय बाणमेकं
ससर्ज ह ॥ द्वितीयं चेन्द्रजालेनायोजितं प्रमुमोच ह ॥ ८८ ॥ शंबरास्त्रं क्षणाच्चक्रे तेषां रूपविपर्ययम् ॥ देवानां दानवं रूपं दानवानां च दैविकम् ॥
॥ ८९ ॥ मत्वा सुरान्स्वकानेव[2] जघ्ने घोरास्त्रलाघवात् ॥ कालनेमी रुषाविष्टः कृतांत इव संक्षये ॥ ९० ॥ कांश्चित्खड्गेन तीक्ष्णेन कांश्चिन्नाराचवृ
ष्टिभिः ॥ कांश्चिद्गदाभिर्घोराभिः कांश्चिद्घोरैः परश्वधैः ॥ ९१ ॥ शिरांसि केषांचिदपातयद्रथाद्भुजांस्तथा सारथींश्चोग्रवेगान् ॥ कांश्चित्पिपेषाथ
रथस्य वेगात्कांश्चित्तथात्यद्भुतमुष्टिपातैः ॥ ९२ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां प्रथमे माहेश्वरखण्डे कौमारिका
खण्डे तारकसैन्यदेवसैन्ययोर्युद्धवर्णनंनामाष्टादशोऽध्यायः ॥ १८॥ ॥ छ ॥ ॥ नारद उवाच ॥ ॥ कालनेमी रुषाविष्टस्तेषां रूपं न बुद्ध
वान् ॥ ततो निमिं च दैत्येन्द्रं मत्वा देवं महाजवः ॥ १ ॥ केशेषु गृह्य तं वीरं चकर्ष च ननाद च ॥ ततो निमिरुवाचेदं कालनेमिं महाब
लम् ॥ २ ॥ अहं निमिः कालनेमे सुतं मत्वा वधस्व मा ॥ भवता मोहितेनाजौ देवान्मत्वासुराः स्वकाः ॥ ३ ॥ सुरैः सुदुर्जयाः कोट्यो निहता
दश विद्धि तत् ॥ सर्वास्त्रवारणं मुंच ब्राह्ममस्त्रं त्वरान्वितः ॥ ४ ॥ स तेन बोधितो दैत्यो मुक्त्वा तं संभ्रमाकुलः ॥ बाणं ब्रह्मास्त्रविहितं मुमोच
त्वरयान्वितः ॥ ५ ॥ ब्रह्मास्त्रं तत्प्रजज्वाल ततः खे सुमहाद्भुतम् ॥ देवानां चाभवत्सैन्यं सर्वमेव भयाकुलम् ॥ ६ ॥ शंबरास्त्रं ततः शांतं ब्राह्मप्रति
हतं तदा ॥ तस्मिन्प्रतिहते ह्यस्त्रे संक्रुद्धो भास्करः प्रभुः ॥ ७ ॥ महेंद्रजालमास्थाय चक्रे स्वां भीषणां तनुम् ॥ विस्फूर्जत्करसंघातसमाक्रांतजग
त्त्रयः ॥ ८ ॥ ततापदानवानीकं गलन्मज्जाङ्घ्रिशोणितम् ॥ चक्षूंषि दानवेन्द्राणां चकारांधानि स प्रभुः ॥ ९ ॥ गजानामगलन्मेदः पेतुश्चापि
रथा भुवि ॥ तुरंगमाः श्वसंतश्च घर्मार्ता रथिनोपि च ॥ १० ॥ इतश्चेतश्च सलिलं प्रार्थयंतस्तृषातुराः ॥ गिरिद्रोणीश्च पादांश्च गिरीणां गहनानि
च ॥ ११ ॥ तेषां प्रार्थयतां शीघ्रमन्योन्यं च विसर्पिणाम् ॥ दावाग्निरज्वलत्तीव्रो घोरो निर्दग्धपादपः ॥ १२ ॥ तोयार्थिनः पुरो दृष्ट्वा तोयं कल्लो

१ नोदयामास—इ०पा०। २ स्वकान् एव—राक्षसानेव—इत्यर्थः।

Nepal Sanskrit University, Balmiki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लमालितम् ॥ पुरःस्थितमपि प्राप्तुं न शेकुरुपसादितुम् ॥ १३ ॥ अप्राप्य सलिलं भूमावभ्याशे द्रुतमेव ते ॥ तत्रतत्र व्यदृश्यन्त मृता दैत्येश्वरा
भुवि ॥ १४ ॥ रथा गजाश्च पतितास्तुरंगाश्च श्रमान्विताः ॥ स्थिता वमंतो धावंतो गलद्धुतवसास्रजः ॥ १५ ॥ दानवानां कोटिकोटि व्यदृश्यत
मृतं तदा ॥ एवं क्षयो दानवानां तस्मिन्महति वर्तिते ॥ १६ ॥ प्रकोपोद्धूतताम्राक्षः कालनेमी रुषातुरः ॥ बभूव कालमेघाभः स्फुरद्रोमशतह्रदः ॥
॥ १७ ॥ गंभीरास्फोटनिर्ह्रादजगद्धृदयकंपनः ॥ प्रच्छाद्य गगनं सूर्यप्रभां सर्वां व्यनाशयत् ॥ १८ ॥ ववर्ष शीतं च जलं दानवेन्द्रबलं प्रति ॥
दैत्यास्तां वृष्टिमासाद्य समाश्वस्तास्ततः क्रमात् ॥ १९ ॥ बीजांकुरा इव म्लानाः प्राप्य वृष्टिं धरातले ॥ ततः स मेघरूपेण[1] कालनेमिर्महासुरः ॥
॥ २० ॥ शस्त्रवृष्टिं ववर्षोग्रां देवानीकेषु दुर्जयः ॥ तया वृष्ट्या पीड्यमाना दैत्यैरन्यैश्च देवताः ॥ २१ ॥ गतिं कांचिन्न पश्यन्ति गावः
शीतार्दिता इव ॥ परस्परं व्यलीयंत गजेषु तुरगेषु च ॥ रथेषु च भयत्रस्तास्तत्रतत्र निलिल्यिरे ॥ २२ ॥ एवं ते लीयमानाश्च निहताः कालने
मिना ॥ दृश्यंते पतिता देवाः शस्त्रभिन्नांगसंधयः ॥ २३ ॥ विभिन्ना भिन्नमूर्धानस्तथा भिन्नोरुजानवः ॥ विपर्यस्तं रथांगैश्च पतितं ध्वजश
क्तिभिः ॥ २४ ॥ तुरंगाणां सहस्राणि गजानामयुतानि च ॥ रक्तेन तेषां घोरेण दुस्तरा चाभवन्मही ॥ २५ ॥ एवमाजौ महादैत्यः कालनेमिर्म
हासुरः ॥ जघ्ने मुहूर्तमात्रेण गंधर्वाणां दशायुतम् ॥२६ ॥ यक्षाणां पंचलक्षाणि किंनराणां तथैव च ॥ जघ्ने पिशाचमुख्यानां सप्तलक्षाणि निर्भयः ॥
॥ २७ ॥ इतरेषां न संख्यास्ति सुरजातिनिकायिनाम् ॥ जघ्ने स कोटिशः क्रुद्धः कालनेमिर्मदोत्कटः ॥ २८ ॥ एवं प्रतिभये भीमे तदामर
महाक्षये ॥ संक्रुद्धावश्विनौ वीरौ चित्रास्त्रकवचोज्ज्वलौ ॥ २९ ॥ जघ्नतुस्तौ रणे दैत्यमेकैकं षष्टिभिः शरैः ॥ निर्भिद्य ते[3] महादैत्यं सपुंखा विवि
शुर्महीम् ॥ ३० ॥ ताभ्यां बाणप्रहारैस्तु किंचित्सोऽवाप्तचेतनः ॥ जग्राह चक्रं लक्षारं तैलधौतं रणेऽधिकम् ॥ ३१ ॥ तेन चक्रेण सोऽश्विभ्यां
चिच्छेद रथकूबरम् ॥ जग्राहाथ धनुर्दैत्यः शरांश्चाशीविषोपमान् ॥ ३२ ॥ ववर्ष भिषजोर्मूर्ध्नि संछाद्याकाशगोचरम् ॥ तावप्यस्त्रैः स्मृतैः सर्वाश्छे
दतुर्दैत्यसायकान् ॥ ३३ ॥ तच्च कर्म तयोर्दृष्ट्वा विस्मितः कोपमाविशत् ॥ जग्राह मुद्गरं भीमं कालदंडविभीषणम् ॥ ३४ ॥ स तमुद्भ्राम्य वेगेन
चिक्षेपास्य रथं प्रति ॥ तं तु मुद्गरमायांतमालोक्यांबरगोचरे ॥ ३५ ॥ मुक्त्वा रथावुभौ वेगादाप्लुतौ तरसाश्विनौ ॥ तौ रथौ स तु निष्पिष्य
मुद्गरोऽचलसंनिभः ॥ ३६ ॥ दारयामास धरणीं हेमजालपरिष्कृतः ॥ तस्य कर्माथ तद्दृष्ट्वा भिषजौ चित्रयोधिनौ ॥ ३७ ॥ वज्रास्त्रं च प्रकुर्वाणौ

१ मेघरूपी तु--इ०पा० । २ महाबलः--इ० पा० । ३ ते शराः--इत्यर्थः । ४ आर्षोऽयं प्रयोगः । चिच्छिदतुः--इत्यपेक्षितम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

दानवेंद्रमयुध्यताम् ॥ घोरवज्रप्रहारैस्तु दानवः स परिक्षतः ॥ ३८ ॥ रथो ध्वजो धनुश्चैव छत्रं च कवचं तथा ॥ क्षणेन शतधा भूतं सर्वसैन्यस्य पश्यतः ॥ ३९ ॥ तद्दृष्ट्वा दुकरं कर्म सोऽश्विभ्यां भीमविक्रमः ॥ नारायणास्त्रं बलवान्मुमोच रणमूर्धनि ॥ ४० ॥ ततः शशाम वज्रास्त्रं कालनेमिस्ततो रुषा ॥ जीवग्राहं ग्राहयितुमश्विनौ तौ प्रचक्रमे ॥ ४१ ॥ तावभिप्रायमालक्ष्य संत्यज्य समरांगणम् ॥ पदाती वेपमानांगौ प्रद्रुतौ वासवो यतः ॥ ४२ ॥ तयोरनुगतो दैत्यः कालनेमिर्नदन्मुहुः ॥ प्राप्येंद्रस्य बलं क्रूरो दैत्यानीकपदानुगः ॥ ४३ ॥ स काल इव कल्पांते यदा वासवमाद्रुतः ॥ तं दृष्ट्वा सर्वभूतानि विविशुर्विह्वलानि तु ॥ ४४ ॥ हाहारावं प्रकुर्वाणास्तदा देवाश्च मेनिरे ॥ पराजयं महेंद्रस्य सर्वलोकक्षयावहम् ॥ ॥ ४५ ॥ चेलुः शिखरिणो मुख्याः पेतुरुल्का नभस्तलात् ॥ जगर्जुर्जलदा दिक्षु संभूतश्च महारवः ॥ ४६ ॥ तां भूंतविकृतिं दृष्ट्वा देवाः सेंद्रा भयावहाः ॥ मनसा शरणं जग्मुर्वासुदेवं जगत्पतिम् ॥ ४७ ॥ नमो ब्रह्मण्यदेवाय गोब्राह्मणहिताय च ॥ जगद्धिताय कृष्णाय गोविंदाय नमोनमः ॥ ४८ ॥ स नो रक्षतु गोविंदो भंयार्तास्ते जगुः सुराः ॥ सुराणां चिंतितं ज्ञांत्वा भगवान्गरुडध्वजः ॥ ४९ ॥ विबुध्यैव च पर्यंकाद्योगनिद्रां विहाय सः ॥ लक्ष्मीकरयुगांभोजलालितांघ्रिसरोरुहः ॥ ५० ॥ शारदांबरनीराब्जकांतिदेहच्छविः प्रभुः ॥ कौस्तुभोद्भासिहृदयः कांतकेयूरभास्करः ॥ ५१ ॥ विमृश्य सुरसंक्षोभं वैनतेयमथाह्वयत् ॥ आहूतेऽवस्थितेतस्मिन्गरुडे दुःखिते भृशम् ॥ ५२ ॥ दिव्यनानास्त्रतीक्ष्णार्चिरारुह्यागात्सुराहवम् ॥ तत्रापश्यत देवेंद्रं भयभीतमभिद्रुतम् ॥ ५३ ॥ दानवेंद्रैर्नवांभोदसच्छायैः सर्वथोत्कटैः ॥ यथा हि पुरुषं घोरैरभाग्यैरर्थकांक्षिभिः ॥ ५४ ॥ तत्राणायाव्रजद्विष्णुः स्तूयमानो मुहुः सुरैः ॥ अभाग्येभ्यः परित्रातुं सुकृतं निर्मलं यथा ॥ ५५ ॥ अथापश्यत दैत्येंद्रो वियति द्युतिमंडलम् ॥ स्फुरंतमुदयाच्छीघ्रं कांतं सूर्यशतं यथा ॥ ५६ ॥ प्रभवं ज्ञातुमिच्छंतो दानवास्तस्य तेजसः ॥ गरुडं तमथा पश्यन्कल्पांतानलभैरवम् ॥ ५७ ॥ तत्र स्थितं चतुर्बाहुं हरिं चानुपमद्युतिम् ॥ तमालोक्यासुरेंद्रास्तु हर्षसंपूर्णमानसाः ॥ ५८ ॥ अयं स देवः सर्वेषां शरणं केशवोऽरिहा ॥ अस्मिञ्जिते जिताः सर्वा देवता नात्र संशयः ॥ ५९ ॥ एनमाश्रित्य लोकेशा यज्ञभागभुजोऽमराः ॥ इत्युक्ता ते समागम्य सर्व एव ततस्ततः ॥ ६० ॥ तं जघ्नुर्विविधैः शस्त्रैः परिवार्य समंततः ॥ कालनेमिप्रभृतयो दश दैत्यमहारथाः ॥ ६१ ॥ षष्ट्या विव्याध बाणानां कालनेमिर्जनार्दनम् ॥ निमिः शतेन बाणानां मथनोऽशीतिभिः शरैः ॥ ६२ ॥ जंभकश्चैव सप्तत्या शुंभो दशभिरेव च ॥ शेषा दैत्ये

१ भूतानां पृथिव्यादिपंचमहाभूतानाम्--विकृतिं--विकारम्--इत्यर्थः । २ भयार्तास्तेऽसकृज्जगुः-इ०पा० । ३ दृष्ट्वा--इ०पा० । ४ अर्थशालिभिः--इ०पा० । ५ यत्ताः--इ०पा० ।

CC-0. In Public Domain. Digitization by eGangotri

श्वराः सर्वे विष्णुमेकैकशः शरैः ॥ ६३ ॥ दशभिर्दशभिः शल्यैर्जघ्नुः सगरुडं रणे ॥ तेषाममृष्यत्तत्कर्म विष्णुर्दानवसूदनः ॥ ६४ ॥ एकैकं दानवं जघ्ने षड्भिः षड्भिरजिह्मगैः ॥ आकर्णकृष्टैर्भूयश्च कालनेमिस्त्रिभिः शरैः ॥ ६५ ॥ विष्णुं विव्याध हृदये रोषाद्रक्तविलोचनः ॥ तस्याशोभंत ते बाणा हृदये तप्तकांचनाः ॥ ६६ ॥ मयूखा इव संदीप्ताः कौस्तुभस्य स्फुरत्त्विषः ॥ तैर्बाणैः किंचिदायस्तो हरिर्जग्राह मुद्गरम् ॥ ६७ ॥ स तमुद्राह्य वेगेन दानवाय मुमोच वै ॥ दानवेन्द्रस्तमप्राप्तं वियत्येव शतैः शरैः ॥ ६८ ॥ चिच्छेद तिलशः क्रुद्धो दर्शयन्पाणिलाघवम् ॥ ततो विष्णुः प्रकुपितः प्रासं जग्राह भैरवम् ॥ ६९ ॥ तेन दैत्यस्य हृदयं ताडयामास वेगतः ॥ क्षणेन लब्धसंज्ञस्तु कालनेमिर्महासुरः ॥ ७० ॥ शक्तिं जग्राह तीक्ष्णाग्रां हेमघंटाट्टहासिनीम् ॥ तया वामं भुजं विष्णोर्बिभेद दितिनंदनः ॥ ७१ ॥ भिन्नं शक्त्या भुजं तस्य स्रुतशोणितमाबभौ ॥ नीले बलाहके विद्युद्विद्योतंती यथा मुहुः ॥ ७२ ॥ ततो विष्णुः प्रकुपितो जग्राह विपुलं धनुः ॥ सप्तदश च नाराचांस्तीक्ष्णाग्रान्मर्मभेदिनः ॥ ७३ ॥ दैत्यस्य हृदयं षड्भिर्विव्याध च शरैस्त्रिभिः ॥ चतुर्भिः सारथिं चास्य ध्वजं चैकेन पत्रिणा ॥ ७४ ॥ द्वाभ्यां धनुर्ज्याधनुषी भुजं चैकेन पत्रिणा ॥ स विद्धो हृदये गाढं दोषैर्मूढो यथा नरः ॥ ७५ ॥ स्रुतरक्तारुणः प्रांशुः पीडाचलितमानसः ॥ चकंपे मारुतेनेव चोदितः किंशुकद्रुमः ॥ ७६ ॥ ततः कंपितमालक्ष्य गदां जग्राह केशवः ॥ तां च वेगेन चिक्षेप कालनेमिवधं प्रति ॥ ७७ ॥ सा पपात शिरस्युग्रा सहसा कालनेमिनः ॥ संचूर्णितोत्तमांगस्तु निष्पिष्टमुकुटोसुरः ॥ ७८ ॥ स्रुतरक्तौघरंध्रश्च स्रुतधातुरिवाचलः ॥ पपात स्वे रथे भग्नो विसंज्ञः शिष्टजीवनः ॥ ७९ ॥ पतितस्य रथोपस्थे दानवस्याच्युतोऽरिहा ॥ स्मितपूर्वमुवाचेदं वाक्यं चक्रायुधः प्रभुः ॥ ८० ॥ गच्छासुर विमुक्तोऽसि सांप्रतं जीव निर्वृतः ॥ ततः स्वल्पेन कालेन अहमेव तवांतकः ॥ ८१ ॥ एवं वचस्तस्य निशम्य विष्णोः सर्वेश्वरस्याथ रथं निमेषात् ॥ निनाय दूरं किल कालनेमिनो भीतस्तदा सारथिर्लोकनाथात् ॥ ८२ ॥ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां प्रथमे माहेश्वरखण्डे कौमारिकाखण्डे देवासुरसंग्रामे कालनेमिकृतयुद्धसंमर्दे विष्णुना सह कालनेमियुद्धवर्णनंनामैकोनविंशोऽध्यायः ॥ १९ ॥ ॥ छ ॥ ॥ नारद उवाच ॥ ॥ तं दृष्ट्वा दानवाः सर्वे क्रुद्धाः स्वैःस्वैर्बलैर्वृताः ॥ सरघा इव माक्षिकं[2] रुरुधुः सर्वतस्ततः ॥ १ ॥ पर्वताभे गजे भीमे मदस्राविणि दुर्दमे ॥ सितचित्रपताके तु प्रभिन्नकरटामुखे ॥ २ ॥ स्वर्णवर्णाचिते यद्वन्नगे दावाग्निसंवृते ॥ आरुह्याजौ निमिर्दैत्यो हरिं प्रत्युद्ययौ बली ॥ ३ ॥ तस्यासन्दानवा

१ तया--इ०पा० । २ माध्वीकम्--इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

रौद्रा गजस्य परिरक्षिणः ॥ सप्तविंशतिकोट्यश्च किरीटकवचोज्वलाः ॥ ४ ॥ अश्वमारुह्य शैलाभं मथनो हरिमाद्रवत् ॥ पंचयोजनप्रग्रीव
मुष्ट्रमास्थाय जंभकः ॥ ५ ॥ शुम्भो मेषं समारुह्याव्रजद्द्वादशयोजनम् ॥ अपरे दानवेन्द्राश्च यत्ता नानास्त्रपाणयः ॥ ६ ॥ आजग्मुः समरे क्रुद्धा
विष्णुमक्लिष्टकारिणम् ॥ परिघेण निमिर्दैत्यो मथनो मुद्गरेण च ॥ ७ ॥ शुम्भः शूलेन तीक्ष्णेन प्रासेन ग्रसनस्तथा ॥ चक्रेण क्रथनः क्रुद्धो जंभः
शक्त्या महारणे ॥ ८ ॥ जघ्नुर्नारायणं शेषा विशिखैर्मर्मभेदिभिः ॥ तान्यस्त्राणि प्रयुक्तानि विविशुः पुरुषोत्तमम् ॥ ९ ॥ उपदेशा गुरोर्यद्वत्सच्छिष्यं
बहुधेरिताः ॥ ततः क्रुद्धो हरिर्गृह्य धनुर्बाणांश्च पुष्कलान् ॥ १० ॥ ममर्द दैत्यसेनां तद्धर्ममर्थवचो यथा ॥ निमिं विव्याध विंशत्या बाणैरनलव
र्चसैः ॥ ११ ॥ मथनं दशभिश्चैव शुम्भं पंचभिरेव च ॥ शतेन महिषं क्रुद्धो विव्याधोरसि माधवः ॥ १२ ॥ जंभं द्वादशभिस्तीक्ष्णैः सर्वांश्चैकैक
शोऽष्टभिः ॥ तस्य तल्लाघवं दृष्ट्वा दानवाः क्रोधमूर्छिताः ॥ १३ ॥ चक्रुर्गाढतरं यत्नमावृण्वाना हरिं शरैः ॥ चिच्छेदाथ धनुर्ज्यां च निमिर्भल्लेन
दानवः ॥ १४ ॥ हस्ताच्चापं च संरंभाच्चिच्छेद महिषासुरः ॥ पीडयामास गरुडं जंभो बाणायुतैस्त्रिभिः ॥ १५ ॥ भुजावस्य च विव्याध शुंभो
बाणायुतेन वै ॥ ततो विस्मितचित्तस्तु गदां जग्राह माधवः ॥ १६ ॥ तां प्राहिणोत्स वेगेन मथनाय महाहवे ॥ तामप्राप्तां निमिर्बाणैर्मुशलाभैः
सहस्रशः ॥ १७ ॥ आहत्य पातयामास विनदन्कालमेघवत् ॥ ततोऽतरिक्षे हाहेति भूतानां जज्ञिरे कथाः ॥ १८ ॥ नैतदस्ति बलं व्यक्तं यत्राशी
र्यत सा गदा ॥ तां हरिः पतितां दृष्ट्वा अस्थाने प्रार्थनामिव॥ १९ ॥ जग्राह मुद्गरं घोरं दिव्यरत्नपरिष्कृतम् ॥ तं मुमोचातिवेगेन निमिमुद्दिश्य दान
वम् ॥ २० ॥ तमायांतं वियत्येव त्रयो दैत्या ह्यवारयन् ॥ गदया जंभदैत्यस्तु ग्रसनः पट्टिशेन तु ॥२१॥ शक्त्या च महिषो दैत्यो विनदंतो महार
रवम् ॥ निराकृतं तमालोक्य दुर्जनैः सुजनं यथा ॥ २२ ॥ जग्राह शक्तिमुग्रोग्रां शतघंटामहास्वनाम् ॥ जंभाय तां समुद्दिश्य प्राहिणोद्भीषणे
रणे ॥२३॥ तामायान्तीमथालोक्य जंभोऽन्यस्य रथात्त्वरात् ॥ आप्लुत्य लीलया गृह्णन्कामिनीं कामुको यथा ॥२४ ॥ तयैव गरुडं मूर्ध्नि जघ्ने स
प्रहसन्बली ॥ ततो भूयो रथं प्राप्य धनुर्गृह्याभ्ययोजयत् ॥ २५ ॥ विचेताश्चाभवद्युद्धे गरुडः शक्तिपीडितः ॥ ततः प्रहस्य तं विष्णुः साधुसाध्विति
भारत ॥ २६ ॥ करस्पर्शेन कृतवान्विमोहं विनतात्मजम् ॥ समाश्वास्य च तं वाग्भिः शक्तिं दृष्ट्वा च निष्फलाम् ॥२७॥ कुभार्यस्य यथा पुंसः सर्वं

१ कुम्भः--इ० पा० । २ धर्मं प्रति यथा अर्थवचः केवलस्वार्थसंपादनतत्परतया धर्मे विषयेऽनास्था स्यात्तां न दृष्ट्वा केवलं स्वार्थबुद्ध्या दम्भं पुरस्कृत्य प्रसारितं दांभिकवाग्जालं धर्मं मर्दयति तथा--इत्ययं गूढोऽभिप्रायः । ३ मुशलाग्रैः--इ० पा० । ४ विनदन्त्या--इ० पा० । ५ अभ्ययोधयत् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्याच्चिंतितं वृथा ॥ दृढसारमहामौर्वीमन्यां संयोजयत्ततः ॥२८॥ कृत्वा च तलनिर्घोषं रौद्रमस्त्रं मुमोच सः॥ततोऽस्त्रतेजसा सर्वमाकाशं नैव दृश्यते ॥२९॥ भूमिर्दिशश्च विदिशो बाणजालमया बभुः ॥ दृष्ट्वा तदस्त्रमाहात्म्यं सेनानीर्ग्रसनोऽसुरः ॥ ३० ॥ ब्राह्ममस्त्रं चकाराशु सर्वास्त्रविनिवारणम् ॥ तेन तत्प्रशमं यातं रौद्रास्त्रं लोकभीषणम् ॥ ३१ ॥ अस्त्रे प्रतिहते तस्मिन्विष्णुर्दानवसूदनः ॥ कालदंडास्त्रमकरोत्सर्वलोकभयंकरम् ॥ ३२ ॥ संधीयमानेस्त्रे तस्मिन्मारुतः परुषो ववौ ॥ चकंपे च मही देवी भिन्नाश्चांबुधयोऽभवन् ॥ ३३ ॥ तदस्त्रमुग्रं दृष्ट्वा तु दानवा युद्धदुर्मदाः ॥ चक्रुरस्त्राणि दिव्यानि नानारूपाणि संयुगे ॥ ३४ ॥ नारायणास्त्रं ग्रसनस्तु चक्रे त्वाष्ट्रं निमिश्चास्त्रवरं मुमोच ॥ ऐषीकमस्त्रं च चकार जंभो युद्धस्य दण्डास्त्रनिवारणाय ॥ ३५ ॥ यावच्च संधानवशं प्रयांति नारायणादीनि निवारणाय ॥ तावत्क्षणेनैव जघान कोटींर्दैत्येश्वराणां किल कालदंडः ॥ ३६ ॥ अनंतरं शांतभयं तदस्त्रं दैत्यास्त्रयोगेन च कालदण्डम् ॥ शांतं तदालोक्य हरिः स्वमस्त्रं कोपेन कालानलतुल्यमूर्तिः ॥ ३७ ॥ जग्राह चक्रं तपनायुतप्रभमुग्रारमात्मानमिव द्वितीयम् ॥ चिक्षेप सेनापतये ज्वलंतं चतुर्भुजः संयति संप्रगृह्य ॥ ३८ ॥ तदात्रजच्चक्रमथो विलोक्य सर्वात्मना दैत्यवराः स्ववीर्यात् ॥ नाशक्नुवन्वारयितुं प्रचंडं दैवं यथा पूर्वमिवोपपन्नम् ॥ ३९ ॥ तदप्रतर्क्यं नवहेतितुल्यं चक्रं पपात ग्रसनस्य कण्ठे ॥ तद्रक्तधारारुणघोरनाभि जगाम भूयोपि करं मुरारेः ॥ ४० ॥ चक्राहतः संयति दानवश्च पपात भूमौ प्रममार चापि ॥ दैत्याश्च शेषा भृशशोकमापुः क्रोधं च केचित्पिपिषुर्भुजांश्च ॥ ४१ ॥ ततो विनिहते दैत्ये ग्रसने बलनायके ॥ निर्मर्यादमयुध्यंत हरिणा सह दानवाः ॥ ४२ ॥ पट्टिशैर्मुशलैः प्रासैर्गदाभिः कणपैरपि ॥ तीक्ष्णाननैश्च नाराचैश्चक्रैः शक्तिभिरेव च ॥ ४३ ॥ तदस्त्रजालं तैर्मुक्तं लब्धलक्षो जनार्दनः ॥ एकैकं शतधा चक्रे बाणैरग्निशिखोपमैः ॥ ४४ ॥ जघान तेषां संक्रुद्धः कोटिकोटिं जनार्दनः ॥ ततस्ते सहसा भूत्वा न्यपतन्केशवोपरि ॥ ४५ ॥ गरुडं जगृहुः केचित्पादयोः शतशोऽसुराः ॥ ललंबिरे च पक्षाभ्यां मुखे चान्ये ललंबिरे ॥ ४६ ॥ केशवस्यापि धनुषि भुजयोः शीर्ष एव च ॥ ललंबिरे महादैत्या निनदंतो मुहुर्मुहुः ॥ ४७ ॥ तदद्भुतं महद्दृष्ट्वा सिद्धचारणवार्तिकाः ॥ हाहेति मुमुचुर्नादमंबरे चास्तुवन्हरिम् ॥ ४८ ॥ ततो हरिर्विनिर्धूय पातयामास तान्भुवि ॥ यथा प्रबुद्धः पुरुषो दोषान्संसारसंभवान् ॥ ४९ ॥ विकोशं च ततः कृत्वा नंदकं खड्गमुत्तमम् ॥ चर्म चाप्यमलं विष्णुः पदातिस्तानधावत ॥ ५० ॥ ततो मुहूर्तमात्रेण पद्मानि दश केशवः ॥ चकर्त्त मार्गे बहुभिर्विचरन्दैत्यसत्तमान् ॥ ५१ ॥ ततो निमिप्रभृतयो विनद्यासुरस

१ खिन्नाः—इ० पा० । २ कणकैः—इ०पा० । कणपाख्यो वा कणकाख्यो वा आयुधविशेषः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्तमाः ॥ अधावंत महेष्वासाः केशवं पादचारिणम् ॥ ५२ ॥ गरुत्मांश्चाभ्ययात्तूर्णमारुरोह च तं हरिः ॥ उवाच च गरुत्मंतं तस्मिंश्च तुमुले रणे ॥ ५३ ॥ अश्रांतो यदि ताक्ष्यासि मथनं प्रति तद्व्रज ॥ श्रांतश्चेच्च मुहूर्तं त्वं रणादपसृतो भव ॥ ५४ ॥ ॥ ताक्ष्यं उवाच ॥ ॥ न मे श्रमोऽस्ति लोकेश किंचित्संस्मरतश्च मे ॥ यन्मे सुतान्वाहनत्वे कल्पयामास तारकः ॥ ५५ ॥ इति ब्रुवन्रणे दैत्यं मथनं प्रति सोऽगमत् ॥ दैत्यस्त्वभिमुखं दृष्ट्वा शंखचक्रगदाधरम् ॥ ५६ ॥ जघान भिंडिपालेन शितधारेण वक्षसि ॥ तं प्रहारमचिंत्यैव विष्णुस्तस्मिन्महाहवे ॥ ५७ ॥ जघान पंचभिर्बाणैर्गिरीन्द्रस्यापि भेदकैः ॥ आकर्णकृष्टैर्दशभिः पुनर्विद्धः स्तनांतरे ॥ ५८ ॥ विचेतनो मुहूर्तात्स संस्तभ्य मथनः पुनः ॥ गृहीत्वा परिघं मूर्ध्नि जनार्दनमताडयत् ॥ ५९ ॥ विष्णुस्तेन प्रहारेण किंचिदाघूर्णितोऽभवत् ॥ ततः कोपविवृत्ताक्षो गदां जग्राह माधवः ॥ ६० ॥ तया संताडयामास मथनं हृदये दृढम् ॥ स पपात तथा भूमौ चूर्णितांगो ममार च ॥ ६१ ॥ तस्मिन्निपतिते भूमौ मथने मथिते भृशम् ॥ अवसादं ययुर्दैत्याः सर्वे ते युद्धमण्डले ॥ ६२ ॥ ततस्तेषु विषण्णेषु दानवेष्वतिमानिषु ॥ चुकोप रक्तनयनो महिषो दानवेश्वरः ॥ ६३ ॥ प्रत्युद्ययौ हरिं रौद्रः स्वबाहुबलमाश्रितः ॥ तीक्ष्णधारेण शूलेन महिषो हरिमर्दयन् ॥ ६४ ॥ शक्त्या च गरुडं वीरो हृदयेऽभ्यहनद्दृढम् ॥ ततो विवृत्य वदनं महाचलगुहानिभम् ॥ ६५ ॥ ग्रस्तुमैच्छद्रणे दैत्यः सगरुत्मंतमच्युतम् ॥ अथाच्युतोऽपि विज्ञाय दानवस्य चिकीर्षितम् ॥ ६६ ॥ वदनं पूरयामास दिव्यैरस्त्रैर्महाबलः ॥ स तैर्बाणैरभिहतो महिषोऽचलसंनिभः ॥ ६७ ॥ परिवर्तितकायार्धः पपाताथ ममार च ॥ महिषं पतितं दृष्ट्वा जीवयित्वा पुनर्हरिः ॥ ६८ ॥ महिषं प्राह मत्तस्त्वं वधं नार्हसि दानव ॥ योषिद्वध्यः पुरोक्तस्त्वं साक्षात्कमलयोनिना ॥ ६९ ॥ उत्तिष्ठ गच्छ मन्मुक्तो द्रुतमस्मान्महारणात् ॥ इत्युक्तो हरिणा तस्माद्देशादपगतोऽसुरः ॥ ७० ॥ तस्मिन्पराङ्मुखे दैत्ये महिषे शुंभदानवः ॥ संदष्टौष्ठपुटाटोपो भृकुटीकुटिलाननः ॥ ७१ ॥ निर्मथ्य पाणिना पाणिं धनुरादाय भैरवम् ॥ सज्जीकृत्य महाघोरान्मुमोच शतशः शरान् ॥ ७२ ॥ स चित्रयोधी दृढमुष्टिपातस्ततश्च विष्णुं गरुडं च दैत्यः ॥ बाणैर्ज्वलद्वह्निशिखानिकाशैः क्षिप्तैरसंख्यैः प्रतिघातहीनैः ॥ ७३ ॥ विष्णुश्च दैत्येंद्रशरार्दितो भृशं भुशुंडिमादाय कृतांततुल्याम् ॥ तया मुखं चास्य पिपेष संख्ये शुंभस्य जत्रुं च धराधराभम् ॥ ७४ ॥ ततस्त्रिभिः शुंभभुजं द्विपष्ट्या सूतस्य शीर्षं दशभिश्च केतुम् ॥ विष्णुर्विकृष्टैः श्रवणावसानं दैत्यस्य बाणैर्ज्वलनार्कवर्णैः ॥ ७५ ॥ स तैश्च विद्धो व्यथितो

१ पादचारिणः--इ० पा० । २ भिंदिपालेन--इ०, भिंडिनालेन--इ० च पा० । ३ कर्म एकाकिनं ययुः--इति कस्मिंश्चित्पुस्तके पाठः अस्यार्थो नावगम्यते । ४ विघूर्णेषु--इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बभूव दैत्येश्वरो विस्रुतशोणिताक्तः ॥ ततोऽस्य किंचिच्चलितस्य धैर्यादुवाच शंखांबुजशार्ङ्गपाणिः ॥ ७६ ॥ योषित्सुवध्योऽसि रणं विमुंच शुंभा
ऽशुभ स्वल्पतरैरहोभिः ॥ मत्तोर्हसि त्वं न वृथैव मूढ ततोऽपयातः स च शुंभदानवः ॥७७॥ जम्भोऽथ तद्विष्णुमुखान्निशम्य जगर्ज चोच्चैः कृतसिंह
नादः ॥ प्रोवाच वाक्यं च सलीलमाजौ महाट्टहासेन जगद्विकंप्य ॥ ७८ ॥ किमेभिस्ते जलावास दैत्यैर्हीनपराक्रमैः ॥ मामासादय युद्धेऽस्मि
न्यदि ते पौरुषं क्वचित् ॥ ७९ ॥ यत्ते पूर्वं हता दैत्या हिरण्याक्षमुखाः किल ॥ जंभस्तदाभवन्नैव पश्य मामद्य संस्थितम् ॥ ८० ॥ पश्य तालप्रती
काशौ भुजावेतौ हरे मम ॥ वक्षो वा वज्रकठिनं मयि प्रहर तत्सुखम् ॥ ८१ ॥ इत्युक्तः केशवस्तेन सृक्किणी संलिहन्रुषा ॥ मुमोच परिघंघोरं
गिरीणामपि दारणम् ॥ ८२ ॥ ततस्तस्याप्यनुपदं कालायसमयं दृढम् ॥ मुमोच मुद्गरं विष्णुर्द्वितीयं पर्वतं यथा ॥ ८३ ॥ तदायुधद्वयं दृष्ट्वा जंभो
न्यस्य रथे धनुः ॥ आप्लुत्य परिघं गृह्य गरुडं तेन जघ्निवान् ॥ ८४ ॥ द्वितीयं मुद्गरं चानु गृहीत्वा विनदन्रणे ॥ सर्वप्राणेन गोविंदं तेन मूर्ध्नि
जघान सः ॥ ८५ ॥ ताभ्यां चातिप्रहाराभ्यामुभौ गरुडकेशवौ ॥ मोहाविष्टौ विचेतस्कौ मृतकल्पाविवासताम् ॥ ८६ ॥ तदद्भुतं महद्दृष्ट्वा जगर्जु
र्दैत्यसत्तमाः ॥ नैतान्हर्षमदोद्भूतानिदं सेहे जगत्तदा ॥८७॥ सिंहनादैस्तलोन्नादैर्धनुर्नादैश्च बाणजैः ॥ जंभं ते हर्षयामासुर्वासांस्याद्दुधुवुश्च ते ॥८८॥
शंखांश्च पूरयामासुश्चिक्षिपुर्देवता भृशम् ॥८९॥ संज्ञामवाप्याथ महारणे हरिः सवैनतेयः परिरभ्य जंभम् ॥ पराङ्मुखः संयुगादप्रधृष्यात्पलायनं वेग
परश्चकार ॥९०॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां प्रथमे माहेश्वरखण्डे कौमारिकाखंडे दैत्यैः सह विष्णोर्युद्धवर्णनंनाम विंशो
ऽध्यायः ॥ २० ॥ ॥ छ ॥ ॥ नारद उवाच ॥ ॥ तमालोक्य पलायंतं विध्वस्तध्वजकार्मुकम् ॥ दैत्यांश्च मुदितानिंद्रः कर्तव्यं नाध्यगच्छत ॥१॥
अथायान्निकटं विष्णोः सुरेशस्त्वरयान्वितः ॥ उवाच चैनं मधुरमुत्साहपरिबृंहितम् ॥ २ ॥ किमेभिः क्रीडसे देव दानवैर्दुष्टमानसैः ॥ दुर्जनैर्लब्ध
रंध्रस्य पुरुषस्य कुतः क्रियाः ॥ ३ ॥ शक्तेनोपेक्षितो नीचो मन्यते बलमात्मनः ॥ तस्मान्न नीचं मतिमानुपेक्षेत कथंचन ॥४॥ अथाग्रेसरसंपत्त्या
रथिनो जयमाययुः ॥ कस्ते सखाभवत्पूर्वं हिरण्याक्षवधे विभो ॥ ५ ॥ हिरण्यकशिपुर्दैत्यो वीर्यशाली मदोद्धतः ॥ प्राप्य त्वां तृणवन्नष्टस्तत्र कोऽ
ग्रेसरस्तव ॥ ६ ॥ पूर्वं प्रतिबला दैत्या मधुकैटभसन्निभाः ॥ निविष्टास्त्वां तु संप्राप्य शलभा इव पावकम् ॥ ७ ॥ युगेयुगे च दैत्यानां त्वत्तो नाशोऽ
भवद्धरे ॥ तथैवाद्येह भीतानां त्वं हि विष्णो सुराश्रयः ॥ ८ ॥ एवं संनोदितो विष्णुर्व्यवर्धत महाभुजः ॥ बलेन तेजसा ऋद्ध्या सर्वभूताश्रयोऽ

१ सृक्किणी—ओष्ठप्रान्तभागौ—इत्यर्थः । २ विभ्रष्टध्वजकार्मुकम्—इ० पा० । ३ बलवान्—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

त्रैलोक्यदानवान्सर्वान्दग्धुं शक्तः क्षणा
रिहा ॥ ९ ॥ अथोवाच सहस्राक्षं केशवः प्रहसन्निव ॥ एवमेतद्यथा प्राह भवानस्मद्गतं वचः ॥ १० ॥ त्रैलोक्यदानवान्सर्वान्दग्धुं शक्तः क्षणा
दहम् ॥ दुर्जयस्तारकः किं तु मुक्ता सप्तदिनं शिशुम् ॥ ११ ॥ महिषश्चैव शुंभश्च उभौ वध्यौ च योषिता ॥ जंभो दुर्वाससा शप्तः शक्रवध्यो भवा
निति ॥ तस्मात्त्वं दिव्यवीर्येण जहि जंभं मदोत्कटम् ॥१२॥ अवध्यः सर्वभूतानां त्वामृते स तु दानवः ॥ १३ ॥ मया गुप्तो रणे जंभो जंगत्कंटक
मुद्धर ॥ तद्वैकुंठवचः श्रुत्वा सहस्राक्षोमरारिहा ॥ १४ ॥ समादिशत्सुराध्यक्षान्सैन्यस्य रचनां प्रति ॥ ततश्चाभ्यर्थितो देवैर्विष्णुः सैन्यमकल्पयत् ॥
॥ १५ ॥ यत्सारं सर्वलोकस्य वीर्यस्य तपसोऽपि च ॥ तदैकादश रुद्रांश्च चकाराग्रेसरान्हरिः ॥ १६ ॥ व्यालीढांगा महादेवा बलिनो नीलकं
धराः ॥ चंद्रखंडत्रिपुंड्राश्च पिंगाक्षाः शूलपाणयः ॥ १७ ॥ पिंगोत्तुंगजटाजूटाः सिंहचर्मावसायिनः ॥ भस्मोद्धूलितगात्राश्च भुजमंडलभैरवाः ॥
॥ १८ ॥ कपालीशादयो रुद्रा विद्रावितमहाऽसुराः ॥ कपाली पिंगलो भीमो विरूपाक्षो विलोहितः ॥ १९ ॥ अजकः शासनः शास्ता शंभु
श्चंद्रो भवस्तथा ॥ एत एकादशानंतबला रुद्राः प्रभाविनः ॥ २० ॥ अपालयंत त्रिदशान्विगर्जंत इवांबुदाः ॥ हिमाचलाभे महति कांचनांबुरुह
स्रजि ॥ २१ ॥ प्रचंचलमहाहेमघंटासंहतिमंडिते ॥ ऐरावते चतुर्दंते मत्तमातंग आस्थितः ॥ २२ ॥ महामदजलस्रावे कामरूपे शतक्रतुः ॥ तस्थौ
हिमगिरेः शृंगे भानुमानिव दीप्तिमान् ॥ तस्यारक्षत्पदं सव्यं मारुतोऽमितविक्रमः ॥ २३ ॥ जुगोपापरमग्निश्च ज्वालापूरितदिङ्मुखः ॥ पृष्ठरक्षोऽभव
द्विष्णुः समरेशः शतक्रतोः ॥ २४ ॥ आदित्या वसवो विश्वे मरुतश्चाश्विनावपि ॥ गंधर्वा राक्षसा यक्षाः सकिंनरमहोरगाः ॥२५॥ कोटिशःकोटिशः
कृत्वा वृंदं चिह्नोपलक्षितम् ॥ विश्रावयंतः स्वां कीर्तिं बंदिवृन्दैः पुरःसरैः ॥ २६ ॥ चेलुर्दैत्यवधे हृष्टा नानावर्णायुधध्वजाः ॥ २७ ॥ शतक्रतोरमरनि
कायपालिता पताकिनी याननिनादनादिता ॥ सितोन्नतध्वजपटकोटिमंडिता बभूव सा दितिसुतशोकवर्धिनी ॥२८॥ आयांतीं तां विलोक्याथ सुर
सेनां गजासुरः ॥ गजरूपी महांश्चैव संहारांभोधिविक्रमः ॥ २९ ॥ परश्वधायुधो दैत्यो दशनौष्ठकसंपुटः ॥ ममर्द चरणे देवांश्चिक्षेपान्यान्करेण
च ॥३०॥ परान्परशुना जघ्ने दैत्येंद्रो रौद्रविक्रमः ॥ तस्यैवं निघ्नतः क्रुद्धा देवगन्धर्वकिंनराः ॥ ३१ ॥ मुमुचुः संहताः सर्वे चित्रशस्त्रास्त्रसंहतिम् ॥
परश्वधांश्च चक्राणि भिण्डिपालान्समुद्गरान् ॥ ३२ ॥ कुन्तान्प्रासाञ्छरांस्तीक्ष्णान्मुद्गरांश्चापि दुःसहान् ॥ तान्सर्वान्सोग्रसदैत्यो यूथपः
कवलानिव ॥ ३३ ॥ कोपस्फुरितदंष्ट्राग्रः करस्फोटेन नादयन् ॥ सुरान्निम्नंश्चचाराजौ दुष्प्रेक्ष्यः सोऽथ दानवः ॥ ३४ ॥ यस्मिन्यस्मिन्निपतति सुर

१ जगत्कंटकं तमिति शेषः तं जंभमित्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वृंदे गजासुरः ॥ तस्मिंस्तस्मिन्महाशब्दो हाहाकारो व्यजायत ॥३५॥ अथ विद्रवमानं तद्बलं प्रेक्ष्य समंततः ॥ रुद्राः परस्परं प्रोचुरहंकारोत्थिता र्चिषः ॥ ३६ ॥ भोभो गृह्णत दैत्येंद्रं भिंदतैनं महाबलाः ॥ कर्षतैनं शितैः शूलैर्भञ्जतैनं हि मर्मसु ॥ ३७ ॥ कपाली वाक्यमाकर्ण्य शूलं सितशितं मुखे ॥ संमार्ज्य वामहस्तेन संरंभाद्विवृतेक्षणः ॥ ३८ ॥ प्रोत्फुल्लारुणनीलाब्जसंहतिः सर्वतो दिशः ॥ अथागाद्भ्रुकुटीवक्त्रो दैत्येंद्राभिमुखो रणे ॥ ॥ ३९ ॥ दृढेन मुष्टिबन्धेन शूलं विष्टभ्य निर्मलः ॥ जघान कुम्भदेशे तु कपाली गजदानवम् ॥४०॥ ततो दशापि ते रुद्रा निर्मलायोमयै रणे ॥ जघ्नुः शूलैस्तु दैत्येंद्रं शैलवर्ष्माणमाहवे ॥ ४१ ॥ सुस्राव शोणितं पश्चात्सर्वस्रोतस्सु तस्य वै ॥ शूलरक्तेन रुद्रस्य शुशुभे गजदानवः ॥ ४२ ॥ प्रोत्फुल्लामलनीलाब्जं शरदीवामलं सरः ॥ भस्मशुभ्रतनुच्छाये रुद्रे हंसैरिवावृतम् ॥ ४३ ॥ क्रुद्धं कपालिनं दैत्यः प्रचलत्कर्णपल्लवः ॥ भवं च दन्तै र्बिभिदे नाभिदेशे गजासुरः ॥ ४४ ॥ दृष्ट्वानुरक्तं रुद्राभ्यां नवरुद्रास्ततो द्रुतम् ॥ विव्यधुर्विशिखैः शूलैः शरीरममरद्विषः ॥ ४५ ॥ ततः कपा लिनं त्यक्त्वा भवं चासुरपुंगवः ॥ वेगेन कुपितो दैत्यो नव रुद्रानुपाद्रवत् ॥ ममर्द चरणाघातैर्दन्तैश्चापि करेण च ॥ ४६ ॥ ततोऽसौ शूलयुद्धेन श्रममासादितो यदा ॥ तदा कपाली जग्राह करमस्यामरद्विषः ॥ ४७॥ भ्रामयामास चातीव वेगेन च गजासुरम् ॥ दृष्ट्वा श्रमातुरं दैत्यं किंचिच्च्यावितजीवितम् ॥ ४८ ॥ निरुत्साहं रणे तस्मिन्गतयुद्धोत्सवोऽभवत् ॥ ततो भ्रमत एवास्य चर्म उत्कृत्य भैरवम् ॥ ४९ ॥ स्रवत्सर्वांगर क्तौघं चकारांबरमात्मनः ॥ तुष्टुवुस्तं तदा देवा बहुधा बहुभिः स्तवैः ॥ ५० ॥ ऊचुश्चैनं च यो हन्यात्स म्रियेत ततस्त्वसौ ॥ दृष्ट्वा कपालिनो रूपं गजचर्मांबरावृतम् ॥ ५१ ॥ वित्रेसुर्दुद्रुवुर्जघ्नुर्निपेतुश्च सहस्रशः ॥ एवं विलुलिते तस्मिन्दानवेन्द्रे महाबले ॥ ५२ ॥ गजं मत्तमथारुह्य शतदुन्दु भिनादितम् ॥ निमिरभ्यपतत्तूर्णं सुरसैन्यानि लोडयन् ॥ ५३ ॥ यांयां निमिगजो याति दिशं तांतां सवाहनाः ॥ दुद्रुवुश्चुक्रुशुर्देवा भयेना कंपिता मुहुः ॥ ५४ ॥ गन्धेन सुरमातंगा दुद्रुवुस्तस्य हस्तिनः ॥ पलायितेषु सैन्येषु सुराणां पाकशासनः ॥ ५५ ॥ तस्थौ दिक्पालकैः सार्ध मष्टभिः केशवेन च ॥ संप्राप्तस्तस्य मातंगो यावच्छक्रगजं प्रति ॥ ५६ ॥ तावच्छक्रगजो भीतो मुक्त्वा नादं सुभैरवम् ॥ ध्रियमाणोऽपि यत्नेन चकोर इव तिष्ठति ॥ ५७ ॥ पलायति गजे तस्मिन्नारूढः पाकशासनः ॥ विपरीतमुखं युद्धं दानवेन्द्रेण सोऽकरोत् ॥ ५८ ॥ शतक्र तुस्तु शूलेन निमिं वक्षस्यताडयत् ॥ गदया दंतिनं तस्य गल्लदेशेहनद्भृशम् ॥ ५९ ॥ तं प्रहारमचिंत्यैव निमिर्निर्भयपौरुषः ॥

१ मुखे अग्रभागे सितं सुवृष्टत्वात्--शितं तीक्ष्णीकृतं च=सितशितम् । एतादृशं शूलम् । २ कथंचिद्दंतैः--इ० पा० । ३ अद्रवन्--इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ऐरावतं कटीदेशे मुद्गरेणाभ्यताडयत् ॥ ६० ॥ स हतो मुद्गरेणाथ शक्रकुञ्जर आहवे ॥ जगाम पश्चात्पद्भ्यां च पृथिवीं भूधराकृतिः ॥ ॥ ६१ ॥ लाघवात्क्षिप्रमुत्थाय ततोऽमरमहागजः ॥ रणादपससर्पाथ भीषितो निमिहस्तिना ॥ ६२ ॥ ततो वायुर्ववौ रूक्षो बहुशर्करपांशुलः ॥ सम्मुखो निमिमातंगोऽकंपनोऽचलकंपनः ॥ स्रुतरक्तो बभौ शैलो [१]धनधातुह्रदो यथा ॥ ६३ ॥ धनेशोऽपि गदां गुर्वीं तस्य दानव[२]हस्तिनः ॥ मुमोच वेगान्न्यपतत्सा गदा तस्य मूर्धनि ॥ ६४ ॥ गजो गदानिपातेन स तेन परिमूर्छितः ॥ दंतैर्भित्वा धरां वेगात्पपाताचलसन्निभः ॥ ६५ ॥ पतिते च गजे तस्मिन्सिंहनादो महानभूत् ॥ सर्वतः सुरसैन्यानां गजबृंहितबृंहितः ॥ ६६ ॥ हेषारवेण चाश्वानां रणास्फोटैश्च धन्विनाम् ॥ गजं तं निहतं दृष्ट्वा निमिं चापि पराङ्मुखम् ॥ ६७ ॥ सुराणां सिंहनादं च सन्नादितदिगंतरम् ॥ जंभो जज्वाल कोपेन संदीप्त इव पावकः ॥ ॥ ६८ ॥ ततः स कोपरक्ताक्षो धनुष्यारोप्य सायकम् ॥ तिष्ठेति चाब्रवीत्तारं सारथिं चाप्यनंदयत् ॥ ६९ ॥ तमायांतमभिप्रेक्ष्य धनुष्याहितसायकम् ॥ शतक्रतुरदीनात्मा दृढमादत्त कार्मुकम् ॥ ७० ॥ बाणं च तैलधौताग्रमर्धचंद्रमजिह्मगम् ॥ ७१ ॥ तेनास्य सशरं चापं चिच्छेद बलवृत्रहा ॥ अपास्य तद्धनुश्छिन्नं जंभो दानवनंदनः ॥ ७२ ॥ अन्यत्कार्मुकमादाय वेगवद्भारसाधनम् ॥ शरांश्चाशीविषाकारांस्तैलधौतानजिह्मगान् ॥ ॥ ७३ ॥ शक्रं विव्याध दशभिर्जत्रुदेशे च पत्रिभिः ॥ हृदये च त्रिभिश्चैव द्वाभ्यां च स्कन्धयोर्द्वयोः ॥ ७४ ॥ शक्रोपि दानवेन्द्राय बाणजालमभीरयन् ॥ अप्राप्तान्दानवेन्द्रस्तु शरांश्छक्रभुजेरितान् ॥ ७५ ॥ चिच्छेद शतधाऽऽकाशे शरैरग्निशिखोपमैः ॥ ततश्च शरजालेन देवेन्द्रो दानवेश्वरम् ॥ ७६ ॥ आच्छादयत यत्नेन वर्षास्विव घनैर्नभः ॥ दैत्योऽपि बाणजालेन विव्याध सायकैः शितैः ॥ ७७ ॥ यथा वायुर्घनाटोपं यदवार्यं दिशां मुखे ॥ शक्रोऽथ क्रोधसंरंभान्न विशेषयते यदा ॥ ७८ ॥ दानवेन्द्रं तदा चक्रे गंधर्वास्त्रं महाद्भुतम् ॥ ततोऽस्य तेजसा व्याप्तमभूद्गगनगोचरम् ॥ ७९ ॥ गन्धर्वनगरैश्चापि नानाप्राकारतोरणैः ॥ मुंचद्भिरद्भुताकारैरस्त्रवृष्टिं समंततः ॥ ८० ॥ तयास्त्रवृष्ट्या दैत्यानां हन्यमाना महाचमूः ॥ जंभं शरणमागच्छत्त्राहित्राहीति भारत ॥ ८१ ॥ ततो जंभो महावीर्यो विनद्य प्रहसन्मुहुः ॥ स्मरन्साधुसमाचारं दैत्यानामभयं ददौ ॥ ८२ ॥ ततोऽस्त्रं मौशलंनाम मुमोच सुमहाभयम् ॥ अथोग्रमुसलैः सर्वमभवत्पूरितं जगत् ॥ ८३ ॥ तैश्च भग्नानि सर्वाणि गंधर्वनगराणि च ॥ अथोग्रैकप्रहारेण रथमश्वं गजं सुरम् ॥८४॥ चूर्णयामास तत्क्षिप्रं शतशोऽथ सहस्रशः ॥ ततः सुराधिपः शक्रस्त्वाष्ट्रमस्त्रमुदैरयत् ॥ ८५ ॥ संध्यमाने ततश्चास्त्रे

१ वनधातुह्रदो यथा—इ० पा० । २ शरीरे—इति शेषः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

निश्चेरुः पावकार्चिषः ॥ ततो यंत्रमया विद्याः प्रादुरासन्सहस्रशः ॥८६॥ तैर्यंत्रैरभवद्युद्धमंतरिक्षं वितारकम् ॥ तैर्यंत्रैर्मौशलं भग्नं हन्यंते चासुरास्तदा
॥८७॥ शैलास्त्रं मुमुचे जंभो यंत्रसंघातचूर्णनम् ॥ व्यामप्रमाणैरुपलैस्ततो वर्षः[2] प्रवर्तत॥८८॥त्वाष्ट्रेण निर्मितान्याशु यानि यंत्राणि भारत ॥ तेनोपल
निपातेन गतानि तिलशस्ततः॥८९॥ततः शिरस्सु देवानां शिलाः पेतुर्महाजवाः॥ दारयंत्यश्च वसुधां चतुरंगबलं च तत् ॥ ९० ॥ ततो वज्रास्त्रमकरोत्स
हस्राक्षः पुरंदरः॥ततः शिलामहावर्षं व्यशीर्यत समंततः ॥९१॥ ततः प्रशांतेः शैलास्त्रैर्जंभो भूधरसन्निभः ॥ ऐषीकमस्त्रमकरोच्चूर्णितान्यपराक्रमः॥९२॥
ऐषीकेणागमन्नाशं वज्रास्त्रं गिरिदारणम् ॥ विजृंभत्यथ चैषीके परमास्त्रेऽतिदारुणे ॥ ९३ ॥ जज्वलुर्देवसैन्यानि सस्यंदनगजानि च ॥ दह्यमानेष्व
नीकेषु तेजसास्त्रस्य सर्वतः ॥ ९४ ॥ आग्नेयमस्त्रमकरोद्बलहा पाकशासनः ॥ तेनास्त्रेण च तन्नाशमैषीकमगमत्तदा ॥ ९५ ॥ तस्मिन्प्रतिहते
चास्त्रे पावकास्त्रं व्यजृंभत ॥ जज्वाल सेना जंभस्य रथः सारथिरेव च ॥ ९६ ॥ ततः प्रतिहतास्त्रोऽसौ दैत्येंद्रः प्रतिभानवान् ॥ वारुणास्त्रं मुमोचाथ
शमनं पावकार्चिषाम् ॥ ९७ ॥ ततो जलधरैर्व्योम स्फुरद्विद्युल्लताकुलैः ॥ गं[3]भीराक्षसमाधारैश्चाभ्यपूर्यत मेदिनी ॥ ९८ ॥ करींद्रकरतुल्याभिर्धा
राभिः पूरितं जगत् ॥ शांतमाग्नेयमस्त्रं च विलोक्येंद्रश्चकार ह ॥ ९९ ॥ वायव्यमस्त्रमतुलं तेन मेघा ययुः क्षयम् ॥ वायव्यास्त्रबलेनाथ निर्धूते
मेघमंडले ॥ १०० ॥ बभूवानाविलं व्योम नीलोत्पलदलप्रभम् ॥ वायुना चातिरूपेण कंपिताश्चैव दानवाः ॥१०१॥ न शेकुस्तत्र ते स्थातुं रणेऽपि
बलिनोऽपि ये ॥ जंभस्ततोऽभवच्छैलो दशयोजनविस्तृतः ॥ १०२ ॥ मारुतप्रतिघातार्थं दानवानां बलाधिपः ॥ नानाश्चर्यसमायुक्तो नानाद्रुम
लतावृतः ॥ १०३ ॥ ततः प्रशमिते वायौ दैत्येंद्रे पर्वताकृतौ ॥ महाशनिं वज्रमयीं मुमोचाशु शतक्रतुः ॥ १०४ ॥ तयाशन्या पतितया दैत्यस्याच
लरूपिणः ॥ कंदराणि व्यशीर्यंत समंतान्निर्झराणि च ॥१०५॥ ततः सा दानवेंद्रस्य शैलमाया न्यवर्तत ॥ निवृत्तशैलमायोऽथ दानवेंद्रो मदोत्कटः
॥ १०६ ॥ बभूव कुंजरो भीमो महाशैलमयाकृतिः ॥ममर्द च सुरानीकं दंतैश्चाभ्यहनत्सुरान् ॥ १०७॥ बभंज पृष्ठतः कांश्चित्करेणाकृष्य दानवः ॥
ततः क्षपयतस्तस्य सुरसैन्यानि वृत्रहा ॥ १०८ ॥ अस्त्रं त्रैलोक्यदुर्धर्षं नारसिंहं मुमोच ह ॥ ततः सिंहसहस्राणि निश्चेरुर्मंत्रतेजसा ॥ १०९ ॥
हृष्टदंष्ट्राट्टहासानि क्रकचाभनखानि च ॥ तैर्विपाटितगात्रोऽसौ गजमायां व्यपोहयत् ॥ ११० ॥ ततश्चाशीविषो घोरोऽभवत्फणसमाकुलः ॥ विष
निःश्वासनिर्दग्धसुरसैन्यमहारथः ॥ १११ ॥ ॥ ततोऽस्त्रं गारुडं चक्रे शक्रः संप्रहरन्रणे ॥ ततस्तस्माद्गरुत्मंतः सहस्राणि विनिर्ययुः ॥ ११२ ॥

१ तथा--इ०पा० । २ अत्राडभाव आर्षः—प्रावर्तत । ३ गंभीराक्षाः गजाः तत्समाः आधाराः कृष्कपाषाणाः येषां तैः । अयमेवार्थो युक्तः प्रतिभाति ।

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तैर्गरुत्मद्भिरासाद्य जंभं भुजगरूपिणम् ॥ कृतस्तु खंडशो दैत्यः सास्य माया व्यनश्यत ॥ ११३ ॥ मायायां च प्रनष्टायां ततो जंभो महासुरः ॥ चकार रूपमतुलं चंद्रादित्यपदानुगम् ॥ ११४ ॥ विवृत्तनयनो ग्रस्तुमियेष सुरपुंगवान् ॥ ततोऽस्य प्राविशद्वक्रं समहारथकुंजरा ॥ ११५ ॥ सुरसेनाऽभवद्भीमं पातालोत्तालतालुकम् ॥ सैन्येषु ग्रस्यमानेषु दानवेन बलीयसा ॥ ११६ ॥ शक्रो दीनत्वमापन्नः श्रांतवाहनवाहनः ॥ कर्तव्यतां नाध्यगच्छत्प्रोवाचेदं जनार्दनम् ॥ ११७ ॥ किमनंतरमेवास्ति कर्तव्यं नो विशेषतः ॥ तदादिश घटामोऽस्य दानवस्य युयुत्सतः ॥ ११८ ॥ ततो हरिरुवाचेदं वज्रायुधमुदारधीः ॥ न सांप्रतं रणं त्याज्यं शत्रुकातरभैरवम् ॥ ११९ ॥ मा गच्छ मोहं मा गच्छ क्षिप्रमस्त्रं स्मर प्रभो ॥ नारायणास्त्रं प्रयतः श्रुत्वेति मुमुचे स च ॥ १२० ॥ एतस्मिन्नंतरे दैत्यो विवृतास्योऽग्रसत्क्षणात् ॥ त्रीणित्रीणि च लक्षाणि किंनरोरगरक्षसाम् ॥ १२१ ॥ ततो नारायणास्त्रं च निपपातास्य वक्षसि ॥ महास्त्रभिन्नहृदयः सुस्राव रुधिरं च सः ॥१२२॥ ततः स्वतेजसा रूपं तस्य दैत्यस्य नाशितम् ॥ ततश्चां तर्दधे दैत्यः कृत्वा हासं महोत्कटम् ॥ १२३ ॥ गगनस्थः स दैत्येंद्रः शस्त्राशनिमतींद्रियः ॥ मुमोच सुरसैन्यानां संहारकरणीं पराम् ॥ १२४ ॥ तथा परश्वधांश्चक्रवज्रबाणान्समुद्गरान् ॥ कुंतान्खड्गान्भिंडिपालानयोमुखगुडांस्तथा ॥ १२५ ॥ ववर्ष दानवो रोषादवध्यानक्षयानपि ॥ तैरस्त्रै दानवोन्मुक्तैर्देवानीकेषु भीषणैः ॥१२६॥ बाहुभिर्धरणी पूर्णा शिरोभिश्च सकुंडलैः ॥ ऊरुभिर्गजहस्ताभैः करींद्रैश्चाचलोपमैः ॥ १२७ ॥ भग्नेषा दंडचक्राक्षै रथैश्च रथिभिः सह ॥ दुःसंचाराभवत्पृथ्वी मांसशोणितकर्दमा ॥ १२८ ॥ रुधिरौघह्रदावर्ता गजदेहशिलोच्चया ॥ कबंधनृत्यबहुला महासुरप्रवाहिनी ॥ १२९ ॥ शृगालगृध्रध्वांक्षाणां परमानंदकारिणी ॥ पिशाचजातिभिः कीर्णं पीत्वाऽऽमिषं सशोणितम् ॥ १३० ॥ असंभ्रमाभि भार्याभिः सह नृत्यद्भिरुद्धता ॥ काचित्पत्नी प्रकुपिता गजकुंभांतमौक्तिकैः ॥ १३१ ॥ पिशाचो यत्र चाश्वानां खुरानेकत्र चांकरोत् ॥ कर्णपूरेषु मोदंते पश्यंत्यन्याः सरोषतः ॥ १३२ ॥ प्रसादयंति बहुधा महाकर्णार्थकोविदाः ॥ केचिद्वदन्ति भो देवा भो दैत्याः प्रार्थयामहे ॥ १३३ ॥ आकल्पमेवं योद्धव्यमस्माकं तृप्तिहेतवे ॥ केचिदूचुरयं दैत्यो देवोयमतिमांसलः ॥ १३४ ॥ म्रियते यदि संग्रामे धातुर्दद्मोऽपर्याँचितम् ॥ केचि युध्यत्सु वीरेषु सृक्किणी संलिहंति च ॥ १३५ ॥ एतेन पयसा विद्मो दुर्जनः सुजनो यथा ॥ केचिद्रक्तनदीनां च तीरेष्वास्तिक्यबुद्धयः ॥ १३६ ॥

१ अतींद्रियः--गुप्तरूपः--इत्यर्थोऽत्र बोध्यः। २ ध्वांक्षाः--काकाः--इत्यर्थः। ३ अलंकारार्थमिति शेषः। ४ नमस्यितं पूजादि इत्यर्थः। ५ केचित्पिशाचा वीरेषु युध्यत्सु सत्सु तद्रक्तरसास्वादसमुत्सुकतया मुखे पानीयम् (अम्लवद्वस्तु दृष्ट्वा यथा निःसृतं भवति तथा) यन्निरसरत्--एतेन पयसा मुखनिष्यन्दिना अयं योधः सुरसदेहो वा विदुष्टरसदेहो वा इति विद्मः ज्ञास्यामः इति मनसि निधाय ओष्ठप्रान्तभागौ संलिहन्ति। तन्निःसरज्जलं प्राशितुं सृक्किणी संलिहन्तीत्यर्थः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पितृन्देवांस्तर्पयंति शोणितैश्चामिषैः शुभैः ॥ केचिदामिषराशिस्था दृष्ट्वान्यस्य करामिषम् ॥ १३७ ॥ देहिदेहीति वाशंतो धनिनः कृपणा यथा ॥ केचित्स्वयं प्रतृताश्च दृष्ट्वा वै खादतः परान् ॥ १३८ ॥ सरोषमोष्ठौ निर्भुज्य पश्यंत्येवात्यसूयया ॥ केचित्स्वमुदरं क्रुद्धा निंदंति ताडयंति च ॥ १३९ ॥ सर्वभक्षमभीप्संतस्तृताः परधनं यथा ॥ केचिदाहुरद्य एव श्लाघ्या सृष्टिस्तु वेधसः ॥ १४० ॥ सुप्रभातं सुनक्षत्रं पूर्वमासीद्वृथैव तत् ॥ एवं बहुविधालापे पलादानां ततस्ततः ॥ १४१ ॥ अदृश्यः समरे जंभो देवाञ्छस्त्रैरचूर्णयत् ॥ ततः शक्रो धनेशश्च वरुणः पवनोऽनलः ॥ १४२ ॥ यमोऽथ निर्ऋतिश्चापि दिव्यास्त्राणि महाबलाः ॥ आकाशे मुमुचुः सर्वे दानवायाभिसंध्य तु ॥ ॥ १४३ ॥ व्यर्थतां जग्मुरस्त्राणि देवानां दानवं प्रति ॥ यथातिक्रूरचित्तानामार्ये कृत्यशतान्यपि ॥ १४४ ॥ गतिं न विविदुश्चापि श्रांता दैत्याश्च देवताः ॥ दैत्यास्त्रभिन्नसर्वांगा गावः शीतार्दिता इव ॥ १४५ ॥ परस्परं व्यलीयंत हाहाकिंभाविवादिनः ॥ तामवस्थां हरिर्दृष्ट्वा देवाञ्छक्रमुवाच ह ॥ १४६ ॥ अघोरमंत्रं स्मर देवराज अस्त्रं हि यत्पाशुपतप्रभावम् ॥ रुद्रेण तुष्टेन तव प्रदत्तमव्याहतं वीरवराभिघाति ॥ १४७ ॥ एवं स शक्रो हरिबोधितस्तदा प्रणम्य देवं वृषकेतुमीश्वरम् ॥ समाददे बाणममित्रघातनं संपूजितं दैवरणेऽर्द्धचंद्रम् ॥ १४८ ॥ धनुष्यजय्ये विनियोज्य बुद्धिमान्न्ययोजयत्तत्र अघोरमंत्रम् ॥ १४९ ॥ ततो वधायाशु मुमोच तस्य वा आकृष्य कर्णांतमकुंठदीधितिम् ॥ अथासुरः प्रेक्ष्य महास्त्रमापतद्विसृज्य मायां सहसा व्यवस्थितः ॥१५०॥ प्रवेपमानेन मुखेन युज्यताचलेन गात्रेण च संभ्रमाकुलः ॥ ततस्तु तस्यास्त्रवराभिमंत्रितः शरोऽर्धचंद्रः प्रसभं महारणे ॥ १५१ ॥ पुरंदरस्येष्वसनप्रमुक्तो मध्यार्कबिंबं वपुषा विडंबयन् ॥ १५२ ॥ किरीटकूटस्फुरकांतिसंकुलं सुगंधिनानाकुसुमाधिवासितम् ॥ प्रकीर्णधूमज्वलनाभमूर्धजं न्यपातयज्जंभशिरः सकुंडलम् ॥ १५३ ॥ तस्मिन्निंद्रहते जंभे प्रशशंसुः सुरा बहु ॥ वासुदेवोऽपि भगवान्साधु साध्विति चाब्रवीत् ॥ १५४ ॥ ततो जंभं हतं दृष्ट्वा दानवेन्द्राः पराङ्मुखाः ॥ सर्वे ते भग्नसंकल्पा दुद्रुवुस्तारकं प्रति ॥ १५५ ॥ तांश्च त्रस्तान्समालोक्य श्रुत्वा स चतुरो हतान् ॥ सारथिं प्रेरयामास याहींद्रं लघु संगरे ॥ १५६ ॥ तथेत्युक्त्वा स च प्रायात्तारके रथमास्थिते ॥ सावलेपं च सक्रोधं सगर्वं सपराक्रमम् ॥ १५७ ॥ साविष्कारं सधिक्कारं प्रयातो दानवेश्वरः ॥ स युक्तं रथमास्थाय सहस्रेण गरुत्मताम् ॥ १५८ ॥ सर्वायुधपरिष्कारं सर्वास्त्रपरिरक्षितम् ॥ त्रैलोक्यऋद्धिसंपन्नं कल्पांतांतकनादितम् ॥ १५९ ॥ सैन्येन महता युक्तो नादयन्विदिशो दिशः ॥

१ वाशन्तः शब्दायमानाः । वाशृ शब्दे धातुः । २ तृतृता निधनं यथा—इ० पा० । ३ लघु--क्षिप्रमित्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सहस्राक्षश्च तं दृष्ट्वा त्यक्त्वा वाहनदंतिनम् ॥ १६० ॥ रथं मातलिना युक्तं तप्तहेमपरिष्कृतम् ॥ चतुर्योजनविस्तीर्णं सिद्धसंघपरिष्कृतम् ॥१६१॥ गंधर्वकिंनरोद्गीतमप्सरोनृत्यसंकुलम् ॥ १६२ ॥ सर्वायुधमहाबाधं महारत्नसमाचितम् ॥ अध्यतिष्ठत्तं रथं च परिवार्य समंततः ॥ १६३ ॥ दंशिता[1] लोकपालाश्च तस्थुः सगरुडध्वजाः ॥ ततश्चचाल वसुधा ववौ रूक्षो मरुद्गणैः[2] ॥ १६४ ॥ चेलुश्च सागराः सप्त तथाऽनश्यद्रवेः प्रभा ॥ ततो जज्वलुरस्त्राणि ततोऽकंपंत वाहनाः ॥ १६५ ॥ ततः समस्तमुद्भूत्तं ततोदृश्यत तारकः ॥ एकतस्तारको दैत्यः सुरसंघास्तथैकतः ॥ १६६ ॥ लोकावसादमेकत्र लोकोद्धरणमेकतः ॥ चराचराणि भूतानि भयविस्मयवंति च ॥ १६७ ॥ प्रशशंसुः सुराः पार्थ तदा तस्मिन्समागमे ॥ १६८ ॥ अस्त्राणि तेजांसि धनानि योधा यशो बलं वीरपराक्रमाश्च ॥ सत्त्वौजसान्यंग बभूवुरेषां देवासुराणां तपसः परं तु नः ॥ १६९ ॥ अथाभिमुखमायांतं देवा विनतपर्वभिः ॥ बाणैरनलकल्पाग्रैर्विव्यधुस्तारकं प्रति ॥ १७० ॥ स तानचिंत्य दैत्येंद्रो देवबाणक्षतान्हृदि ॥ बाणैर्व्योम दिशः पृथ्वीं पूरयामास दानवः ॥ १७१ ॥ नारायणं च सप्तत्या नवत्या च हुताशनम् ॥ दशभिर्मारुतं मूर्ध्नि यमं दशभिरेव च ॥ १७२ ॥ धनदं चैव सप्तत्या वरुणं च तथाष्टभिः ॥ विंशत्या निर्ऋतिं दैत्यः पुनश्चाष्टभिरेव च ॥ १७३ ॥ विव्याध पुनरेकैकं दशभिर्मर्मभेदिभिः ॥ तथा च मातलिं दैत्यो विव्याध त्रिभिराशुगैः ॥ १७४ ॥ गरुडं दशभिश्चैव महिषं नवभिस्तथा ॥ पुनर्दैत्योऽथ देवानां तिलशो नतपर्वभिः ॥ १७५ ॥ चकार वर्मजालानि चिच्छेद च धनूंषि च ॥ ततो विकवचा देवा विधनुष्काः प्रपीडिताः ॥ १७६ ॥ चापान्यन्यानि संगृह्य यावन्मुंचंति सायकान् ॥ तावद्बाणं समाधाय कालानलसमप्रभम् ॥ १७७ ॥ ताडयामास शक्रं स हृदि सोपि मुमोच ह ॥ ततोंऽतरिक्षमालोक्य दृष्ट्वा सूर्यशताकृती ॥ १७८ ॥ तार्क्ष्ये विष्णू समाजघ्ने शराभ्यां तावमुद्यताम् ॥ प्रेतनाथस्य वह्नेश्च वरुणस्य शितैः शरैः ॥ १७९ ॥ निर्ऋतेश्चाकरोत्कार्यं भीतभीतं विमोहयन् ॥ निरुच्छ्वासं समाहृत्य चक्रे बाणैः समीरणम् ॥ १८० ॥ ततः प्राप्य हरिः संज्ञां प्रोत्साह्य च दिशां पतीन् ॥ बाणेन सारथेः कायाच्छिरोऽहार्षीत्सकुण्डलम् ॥ १८१ ॥ धूमकेतोर्ज्वलत्क्रुद्धस्तस्य च्छित्त्वा न्यपातयत् ॥ दैत्यराजकिरीटं च चिच्छेद वासवस्ततः ॥ १८२ ॥ धनेशश्च धनुः क्रुद्धो बिभेद बहुधा शरैः ॥ वायुश्चक्रे च तिलशो रथं वा क्षोणिकूबरम् ॥ १८३ ॥ निर्ऋतिस्तिलशो वर्म चक्रे बाणैस्ततो रणे ॥ कृत्वैतदतुलं कर्म तिष्ठतिष्ठेति चाब्रुवन् ॥ १८४ ॥ लिहंतः सृक्किणीं देवा वासुदेवादयस्तदा ॥ दृष्ट्वा तत्कर्म देवानां तारकोऽतुलविक्रमः ॥ १८५ ॥

१ दंशिताः—शस्त्रास्त्रैः संनद्धाः—इत्यर्थः । २ मरुत्—वायुः—गणैः—सहेति शेषः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मुमोच मुद्गरं भीमं सहस्राक्षाय संगरे ॥ दृष्ट्वा मुद्गरमायांतमनिवार्यं रणाजिरे ॥ १८६ ॥ रथादाप्लुत्य धरणीमगमत्पाकशासनः ॥ मुद्गरोऽपि रथोपस्थे पपात परुषस्वनः ॥ १८७ ॥ स रथं चूर्णयामास न ममार च मातलिः ॥ गृहीत्वा पट्टिशं दैत्यो जघानोरसि केशवम् ॥ १८८ ॥ स्कन्धे गरुत्मतः सोऽपि निषसाद विचेतनः ॥ खड्गेन राक्षसेन्द्रं च भित्त्वा भूमावपातयत् ॥ १८९ ॥ यमं च पातयामास भूमौ दैत्यो मुखे हतम् ॥ वह्निं च भिंडिपालेन चक्रे हत्वा विचेतनम् ॥ १९० ॥ वायुं पदा तदाक्षिप्य पातयामास भूतले ॥ धनेशं तद्धनुष्कोट्या कुट्टयामास कोपनः ॥ १९१ ॥ ततो देवनिकायानामेकैकं क्षणमात्रतः ॥ तेषामेव जघानासौ शस्त्रैर्बालान्यथा गुरुः ॥ १९२ ॥ लब्धसंज्ञस्ततो विष्णुश्चक्रं जग्राह दुर्धरम् ॥ दानवेंद्रवसामेदोरुधिरेणाभिरंजितम् ॥ १९३ ॥ मुमोच दानवेंद्रस्य दृढं वक्षसि केशवः ॥ पपात चक्रं दैत्यस्य पतितं भास्करद्युति ॥ १९४ ॥ व्यशीर्यताथ कायेऽस्य नीलोत्पलमिवाश्मनि ॥ ततो वज्रं महेन्द्रोऽपि प्रमुमोचार्चितं चिरम् ॥ १९५ ॥ तस्मिञ्जयाशा शक्रस्य दानवेन्द्राय संयुगे ॥ तारकस्य च संप्राप्य शरीरं शौर्यशालिनः ॥ १९६ ॥ विशीर्यत विकीर्णार्चिः शतधा खण्डशो गतम् ॥ ततो वायुरदीनात्मा वेगेन महता नदन् ॥ १९७ ॥ ज्वलितज्वलनाभासमंकुशं प्रमुमोच ह ॥ विशीर्णं तस्य तच्चांगे दृष्ट्वा वायुर्महारुषा ॥ १९८ ॥ ततः शैलेन्द्रमुत्पाट्य पुष्पितद्रुमकंदरम् ॥ चिक्षेप दानवेन्द्राय दशयोजनविस्तृतम् ॥ १९९ ॥ महीधरं तमायांतं सस्मितं दैत्यपुंगवः ॥ जग्राह वामहस्तेन बालः कन्दुकलीलया ॥ २०० ॥ ततस्तेनैव चाहत्य पातयामास चांतकम् ॥ दण्डं ततः समुद्यम्य कृतांतः क्रोधमूर्छितः ॥ २०१ ॥ दैत्येन्द्रमूर्ध्नि चिक्षेप भ्राम्य वेगेन दुर्जयम् ॥ सोऽसुरस्यापतन्मूर्ध्नि दैत्यस्तं जगृहे स्मयन् ॥ २०२ ॥ कल्पांतलोकदहनो ज्वलनो रोषसंज्वलन् ॥ शक्तिं चिक्षेप दुर्धर्षां दानवेन्द्राय संयुगे ॥ २०३ ॥ ततः शिरीषमालेव सास्य वक्षस्यराजत ॥ ततः खड्गं समाकृष्य कोशादाकाशनिर्मलम् ॥ २०४ ॥ द्युतिभासितत्रैलोक्यं लोकपालोऽपि निर्ऋतिः ॥ चिक्षेप दानवेन्द्राय तस्य मूर्ध्नि पपात ह ॥ २०५ ॥ पतितश्चागमत्खड्गः स शीघ्रं शतखण्डताम् ॥ जलेशश्च ततः क्रुद्धो महाभैरवरूपिणम् ॥ २०६ ॥ मुमोच पाशं दैत्येन्द्रभुजबन्धाभिलाषुकः ॥ स दैत्यभुजमासाद्य पाशः सद्यो व्यपद्यत ॥२०७॥ स्फुटितः क्रकचक्रूरदशनालिरहीश्वरः ॥ ततोऽश्विनौ सचंद्रार्कौ साध्याश्च वसवश्च ये ॥ २०८ ॥ यक्षराक्षसगन्धर्वाः सर्पाश्चास्त्रैः पृथग्विधैः ॥ जघ्नुर्दैत्येश्वरं सर्वे भूयशस्ते महाबलाः ॥२०९॥ न चास्त्राण्यस्यासज्जन्त गात्रे वज्राचलोपमे ॥ ततो देवानवप्लुत्य तारको दानवाधिपः ॥ २१० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जघान कोटिशः क्रुद्धो मुष्टिपार्ष्णिभिरेव च ॥ तथाविधं तस्य वीर्यमालोक्य भगवान्हरिः ॥ २११ ॥ पलायध्वमहो देवा वदन्नन्तर्हितोऽभवत् ॥ शक्रादयस्ततो देवाः पलायनकृतादराः ॥ २१२ ॥ कालनेमिमुखैर्दैत्यैरुपरुद्धा मदोत्कटैः ॥ मुष्टिभिः पादघातैश्च केशेष्वाकृष्य तैर्मुदा ॥ २१३ ॥ ताडिताः शुष्कसरितं देवमार्गाश्च दर्शिताः ॥ बहुधा चाप्यकृष्यंत लोकपाला महासुरैः ॥ २१४ ॥ ततो निनादः संजज्ञे दैत्यानां बलशालिनाम् ॥ कम्पयन्पृथिवीं द्यां च पातालानि च भारत ॥ २१५॥ जयेति मुदिता दैत्यास्तुष्टुवुस्तारकं तदा॥शंखांश्च पूरयामासुः कुन्देन्दुसदृशप्रभान् ॥२१६॥ धनुर्बाणरवांश्चोग्रान्कराघातांश्च चक्रिरे ॥ भृशं हर्षान्विता दैत्या नेदुश्च ननृतुर्मुहुः ॥ २१७॥ ततो देवान्पुरस्कृत्य पशुपालः पशूनिव ॥ दैत्येन्द्रो रथमास्थाय जगाम सहितोऽसुरैः ॥ २१८ ॥ महीसागरकूलस्थं तारकः स पुरं बली ॥ योजनद्वादशायामं ताम्रप्राकारशोभितम् ॥२१९॥ प्रासादैर्बहुभिः कीर्णं दिव्याश्चर्योपशोभितम् ॥ यत्र शब्दास्त्रयो नैव जीर्यंते चानिशं पुरे ॥२२०॥ गीतघोषश्च व्याघोषो भुज्यंतां विषयास्त्विति ॥ तत्प्रविश्य पुरं राजा जगाम स्वकमालयम् ॥२२१॥ महोत्सवेन महता पुत्रस्त्रीप्रतिनंदितः ॥ तत्र दिव्यां सभां राजा प्राप्य सिंहासनस्थितः ॥२२२॥ स्तूयमानो दितिसुतैरप्सरोभिर्विनोदितः ॥ दिव्यासनस्थैर्दैत्येंद्रैर्वृतः सिंहैरिव प्रभुः ॥२२३॥ एतस्मिन्नंतरे काचिद्दिव्यस्त्री तत्पुरेऽभवत् ॥ विस्मितस्तैर्वृतो दैत्यैः प्रोवाचेदं स्मयन्निव ॥२२४॥ रूपेणानुपमा पार्थ नानाभरणभूषिता ॥ तां दृष्ट्वा तारको राजा भृशं वै विस्मितोऽभवत्॥२२५॥कासि देवि मम ब्रूहि किं मया रूपसुंदरि ॥ त्वत्समां योषितं नैव दृष्टवंतः पुरा वयम् ॥२२६॥ ॥ स्त्र्युवाच ॥ ॥ अहं त्रैलोक्यलक्ष्मीति विद्धि मां दैत्यसत्तम ॥ अर्जिता तपसा चास्मि त्वया वीर्येण वा विभो ॥ २२७ ॥ वीर्यवंतं त्वनलसं तपस्विनमकातरम् ॥ दातारं चापि भोक्तारं युक्त्या सेवामि तं नरम् ॥ २२८ ॥ भीरुं निर्विण्णमत्यर्थं साध्वीपीडाकरं नरम् ॥ सर्वातिशंकिनं सद्यस्त्यजामि दितिनंदन ॥ २२९ ॥ महेंद्रेण च माता ते यदा सा व्यपमानिता ॥ तदैव त्यक्तप्रायोऽसाविदानीं तव संवशे ॥ २३० ॥ तारकश्च ततः प्राह परमं चेति तां तदा ॥ सा चाविवेश तं देवी त्रिजगत्पूजिता रमा ॥ २३१ ॥ ततो दैत्याधिपं नार्यो दानवानां विभूषिताः ॥ वीरकांस्यमुपादाय वर्धयांचक्रिरे मुदा ॥ २३२ ॥ देवाश्च द्वारि तिष्ठंति बद्धा दैत्यैर्भृशातुराः ॥ उपहस्यमाना नारीभिर्दैत्यैरन्यैश्च नागरैः ॥२३३॥ एतस्मिन्नंतरे विष्णुर्दैत्यरूपं समास्थितः ॥ उपहासकमध्यस्थो गाथे द्वे प्राह बुद्धिमान् ॥२३४॥

१ शिशुपालः—इ० पा० । २ इदानीं "खंबायत" इति नाम्ना गुर्जरदेशे प्रसिद्धं नगरमिदन् । ३ पुरस्त्रीप्रतिनंदितः—इ० पा० । ४ परस्मैपदमार्षम् । ५ परमं--बाढं तिष्ठेत्यर्थः । ६ वीराणां युद्धाद्विजयमादाय गृहमागतानां नीराजनार्थं यत्कांस्यपात्रं तद्वीरकांस्यपात्रमित्युच्यते ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इदमल्पतरंनाम यदमीषां च दृश्यते ॥ मातृक्रोधं स्मरन्राजा किंकिं यन्न करिष्यति ॥ २३५ ॥ बलीयांसं समासाद्य न नमेद्यो न चास्ति सः ॥
मर्कवच्छ्वेतबाकीयैरुपायैः स्थीयतां सुराः ॥ २३६ ॥ उपहासमुखेनामी उपदेशं हरेर्मुखात् ॥ समाकर्ण्य ततो देवा मर्कहूपेण संस्थिताः ॥ २३७ ॥
नृत्यंतस्ते च बहुधा दैत्याश्चासुरयोषितः ॥ भृशं च नोदयामासुर्मुदा भोज्यानि ते ददुः ॥ २३८ ॥ विष्णुर्दैत्यप्रतीहारं ततः प्रोवाच बुद्धिमान् ॥
विनोदाय महाराज्ञो मर्कानेतान्प्रकीर्तय ॥ २३९ ॥ प्रतीहारस्ततो हृष्टः सभामध्ये विवेश सः ॥ जानुभ्यां धरणीं गत्वा बद्ध्वा च करसंपुटम् ॥
॥ २४० ॥ उवाचानाविलं वाक्यमल्पाक्षरपरिस्फुटम् ॥ दैत्येंद्र मर्कवृंदानि द्वारि तिष्ठंति ते प्रभो ॥ २४१ ॥ भृशं विनोदकारीणि स्पृहा चेद्द्रष्टुमर्हसि ॥ तन्निशम्याब्रवीद्राजा किं चिरं क्रियते त्वया ॥ २४२ ॥ क्षत्ता[1] चेति वचः श्रुत्वा कालनेमिं तदाब्रवीत् ॥ मर्कानेतान्महाराजो द्रष्टुमिच्छति
शीघ्रतः ॥ २४३ ॥ रक्षपाल सहैभिस्त्वं राजानमनुकूलय ॥ कालनेमिरुपादाय मर्कान्यातो नृपं ततः ॥ २४४ ॥ मर्कमध्ये विष्णुमर्को यातस्त्यक्त्वा
च दैत्यताम् ॥ ततस्तारकदैत्यस्य पुरतो ननृतुर्भृशम् ॥२४५॥ मर्का दैत्यकरोत्तालैर्हर्षनादविनोदितैः ॥ ततोऽतिमुदितो राजा तेषां नृत्येन सोऽब्रवीत् ॥ २४६ ॥ अभयं वो मर्कदेवास्तुष्टो यच्छाम्यहं त्विदम् ॥ मद्गृहे स्थीयतामेव न च कार्यं भयं हृदि ॥२४७॥ इति श्रुत्वा विष्णुमर्कः प्रनृत्यन्निदमब्रवीत् ॥ राजन्विज्ञातुमिच्छामस्तव गेहावधिं वयम्॥२४८॥एवमुक्ते प्रहस्याह तारको दैत्यसत्तमः॥त्रिभूमिकं हि मे गेहमिदं यद्भुवनत्रयम् ॥२४९॥
हरिमर्कस्ततः प्राह यद्येवं स्वं वचः स्मर ॥ त्रैलोक्ये विचरंत्वेते मर्का राजन्सुनिर्भयाः ॥ २५० ॥ अश्वमेधशतस्यापि सत्यं राजन्विशिष्यते ॥
धर्ममेनं स्मरन्सत्यं वचनं कुरु दैत्यप ॥ २५१ ॥ ततः सुविस्मितो दैत्यः प्राहेदं वचनं तदा ॥ मर्कटाहो प्रबुद्धोऽसि सत्यं ब्रूहि च को भवान् ॥
॥ २५२ ॥ ॥ श्रीभगवानुवाच ॥ ॥ अहं नारायणोनाम यदि श्रोत्रमुपागतः ॥ देवानां रक्षणार्थाय मर्करूपमुपाश्रितः ॥ २५३ ॥ तच्चेन्मान्यतमो धर्मस्तव तद्वचनं स्वकम् ॥ परिपालय ते गेहं विचरंतु सुरास्त्वमी ॥ २५४ ॥ अवलेपश्च राजेंद्र न कर्तव्यस्त्वया हृदि ॥ वीरोऽहमिति
संचिन्त्य पश्यता कालजं बलम् ॥ २५५ ॥ पर्यायैर्हन्यमानानामभिहंता न विद्यते ॥ मौढ्यमेतत्तु यद्द्वेष्टा कर्ताहमिति मन्यते ॥ १५६ ॥ ऋषींश्च
देवांश्च महासुरांश्च त्रैविद्यवृद्धांश्च वने मुनींश्च ॥ कं वापदो[2] नोपनमंति काले कालस्य वीर्यं न तु कर्तुरेतत् ॥ २५७ ॥ न मंत्रबलवीर्येण प्रज्ञया
पौरुषेण वा ॥ अलभ्यं लभ्यते काले काले सुतोपि विंदति ॥२५८॥ न मातृपितृशुश्रूषा न च दैवतपूजनम् ॥ नान्यो गुणसमाचारः पुरुषस्य सुखा

१ क्षत्ता—द्वारपालः—इत्यर्थः । २ कं वा पुरुषम् आपदः विपत्तयः न उपनमन्ति अपि तु सर्वानेव ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वहः ॥ २५९ ॥ न विद्या न तपो दानं न मित्राणि न बांधवाः ॥ शक्नुवंति परित्रातुं नरं कालेन पीडितम् ॥ २६० ॥ नागामिगमनार्थं हि प्रतिघातशतैरपि ॥ शक्नुवंति प्रतिव्योढुमृते कालबलं नराः ॥ २६१ ॥ देहवत्पुण्यकर्माणि जीववत्काल उच्यते ॥ द्वयोः समागमे दैत्य कार्याणां सिद्धिरिष्यते ॥ २६२ ॥ अहो दैत्य त्वद्विशिष्टा दैत्यानां कोटयः पुरा॥शाल्मलेस्तूलवत्क्षिप्ताः कालवातेन दुर्दशाः ॥ २६३ ॥ इदं तु लब्ध्वा त्वं स्थानमात्मानं बहु मन्यसे ॥ सर्वभूतभवं देवं ब्रह्माणमिव शाश्वतम् ॥ २६४ ॥ न चेदमचलं स्थानमनंतं चापि कस्यचित् ॥ त्वं तु बालिशया बुद्ध्या ममेदमिति मन्यसे ॥ २६५ ॥ अविश्वास्ये विश्वसिषि मन्यसे चाऽध्रुवं ध्रुवम् ॥ ममेदमिति मोहात्त्वं त्रिलोकीश्रियमीप्ससि ॥ २६६ ॥ नेयं तव न चास्माकं न चान्येषां स्थिरा मता ॥ अतिक्रम्य बहूनन्यांस्त्वयि तावदियं स्थिता ॥ २६७ ॥ कंचित्कालमियं स्थित्वा त्वयि तारक चंचला ॥ पुंश्चलीवातिचपला पुनरन्यं गमिष्यति ॥ २६८ ॥ सरत्नौषधिसंपन्नं ससरित्पर्वताकरम् ॥ तानिदानीं न पश्यामि यैर्भुक्तं भुवनत्रयम् ॥ २६९ ॥ हिरण्यकशिपुर्वीरो हिरण्याक्षश्च दुर्जयः ॥ प्रह्लादो नमुचिर्वीरो विप्रचित्तिर्विरोचनः ॥ २७० ॥ कीर्तिः शूरश्च वीरश्च वातापिरिल्वलस्तथा ॥ अश्वग्रीवः शंबरश्च पुलोमा मधुकैटभौ ॥ २७१ ॥ विश्वजित्प्रमुखाश्चान्ये दानवेंद्रा महाबलाः ॥ कालेन निहताः सर्वे कालो हि बलवत्तरः ॥ २७२ ॥ सर्वैर्वर्षायुतं तप्तं न त्वमेको महातपाः ॥ सर्वे सत्यव्रतपराः सर्वे चासन्बहुश्रुताः ॥ २७३ ॥ सर्वे यथार्हदातारः सर्वे दाक्षायणीसुताः ॥ ज्वलंतः प्रजयंतश्च कालेन प्रतिसंहताः ॥ २७४ ॥ मुंचेच्छां कामभोगेषु मुंचेमं श्रीभवं मदम् ॥ एतदैश्वर्यनाशे त्वां शोकः संपीडयिष्यति ॥२७५॥ शोककाले शुचो मा त्वं हर्षकाले च मा हर्षः ॥ अतीतानागते हि त्वा प्रत्युत्पन्नेन वर्तय ॥२७६॥ इंद्रं चेदागतः कालः सदा युक्तमतंद्रितम्॥ क्षमस्व न चिराद्दैत्य त्वामप्युपगमिष्यति॥२७७॥को हि स्थातुमलं लोके मम क्रुद्धस्य संयुगे॥ कालस्तु बलवान्प्राप्तस्तेन तिष्ठामि तारक॥ ॥२७८॥त्वमेव वेत्सि मां दैत्य योहं यादृक्पराक्रमः ॥ कल्पेकल्पे महादैत्याः कोटिशोऽर्बुदशो हताः ॥ २७९ ॥ येषां त्वं कोटिभागेऽपि परिपूर्णो न तारक॥ कल्पेकल्पे सृजामीदं ब्रह्मादि सकलं जगत् ॥ २८० ॥ इच्छन्संजीवयाम्येतदनिच्छन्नाशये क्षणात् ॥ न हि त्वां नोत्सहे हंतुं सर्वदैत्यसमायुतम् ॥ २८१ ॥ अंगुल्यग्रेण दैत्येंद्र पुनर्धर्मं न लोपये ॥ यद्यहं प्रवरो भूत्वा धर्मं ब्रह्मवरात्मकम् ॥ २८२ ॥ लोपयामि ततः कं च धर्मोऽयं शरणं व्रजेत् ॥ अहं कर्तेति मा मंस्थाः कर्ता यस्तु सदा प्रभुः ॥ २८३ ॥ सोऽयं कालः पचेद्विश्वं वृक्षे फलमिवागतम् ॥ यैरेव कर्मभिः सौख्यं दुःखं तैरेव

१ प्रतिव्यूढम्--इ० पा० । २ शाल्मलिवृक्षकार्पासवत्--इत्यर्थः । ३ सुरश्च--इ० पा० । ४ माहृषः--हर्षं न मन्यथाः--इत्यर्थः । ५ प्रत्युत्पन्नेन वर्तमानेन कालेन--इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

कर्मभिः ॥ २८४ ॥ प्राप्नोति पुरुषो दैत्य पश्य कालस्य चित्रताम् ॥ सर्वं कालवशादेव बोद्धव्यं धीयुतैर्नरैः ॥ २८५ ॥ स्वकर्मपरिपाकस्य
फलदं वै विदुर्बुधाः ॥ तस्मात्कर्म शुभं कार्यं पुण्यात्पुण्यात्मकं च यत् ॥ २८६ ॥ पुण्येन तत्र सौख्यं स्याद्दुःखं पापेन निश्चितम् ॥ इति संचिंत्य
दैत्येंद्र स्वं वचः परिपालय ॥ मदुक्तं वचनं सर्वं यदि मंतुमिहार्हसि ॥ २८७ ॥ ॥ तारक उवाच ॥ ॥ मामत्र संस्थितं दृष्ट्वा कालनेमिमुखैर्युतम्
तम् ॥ २८८ ॥ कस्येह न व्यथेद्बुद्धिर्मृत्योरपि जिघांसतः ॥ सा ते न व्यथते बुद्धिरचला तत्त्वदर्शिनी ॥ २८९ ॥ ब्रवीषि यद्यत्त्वं वाक्यं तत्तथैव
न संशयः ॥ को हि विश्वासमर्थेषु शरीरे वा शरीरभृत् ॥ २९० ॥ कर्तुमुत्सहते लोके दृष्ट्वा संप्रस्थितं जगत् ॥ अहमप्येवमेवैनं लोकं जानाम्यशा
श्वतम् ॥ २९१ ॥ कालाग्नावाहितं घोरे गुह्ये सततगंत्वरे ॥ इदमद्य करिष्यामि श्वःकर्तास्मीतिवादिनः ॥ २९२ ॥ कालो हरति संप्राप्ते नदीवेग
इवोन्मुखान् ॥ इदानीं तावदेवासौ मया दृष्टो न विस्मृतः ॥ २९३ ॥ कालेन ह्रियमाणानां प्रलापः श्रूयते नृणाम् ॥ ईर्ष्याभिमानलोभेषु कामक्रो
धभयेषु च ॥ २९४ ॥ स्पृहामोहातिवादेषु लोकः सक्तो न बुध्यते ॥ गुरुं वाप्यगुरुं वापि कृत्याकृत्यं च केशव ॥ २९५ ॥ जानामि त्वामहं
विष्णो सर्वभूतवरं प्रभुम् ॥ किं कुर्मः स्वस्वभावेन बलिना त्वां न मन्महे ॥ २९६ ॥ केचिद्भजंति त्वां भक्त्या वैरेण हेलया परे ॥ सर्वेनुकंप्यास्ते
तुभ्यमंतरात्मासि देहिनाम् ॥ २९७ ॥ पुराणः शाश्वतो धर्मः सर्वप्राणभृतां समः ॥ मामालंब्य मया मुक्ता यांतु सर्वे दिवौकसः ॥ २९८ ॥ पुनर्म
र्कस्वरूपेण भ्रांतव्यं भुवनत्रयम् ॥ स्पृहापि यज्ञभागानां न कार्या समयस्त्वयम् ॥२९९॥ एवमुक्ते तारकेण देवा हर्षं प्रपेदिरे ॥ मुच्यते हृतलोमापि
मेषो लाभो हि सौनिकात् ॥ ३०० ॥ ॥ श्रीभगवानुवाच ॥ ॥ दैत्येंद्र भव तत्त्वज्ञो विद्याज्ञानतपोन्वितः ॥ कालं पश्यसि सुव्यक्तं पाणावामलकं
यथा ॥ ३०१ ॥ कालचारित्रतत्त्वज्ञ शिवभक्त महामते ॥ वज्रांगसुत धन्योऽसि स्पृहणीयोऽसि धीमताम् ॥ ३०२ ॥ यावत्ते तपसो वीर्यं तावद्भुंक्ष्व
जगत्त्रयम् ॥ एतेन समयेनैते चरिष्यंति सुरा जगत् ॥ ३०३ ॥ इत्युक्त्वा मर्कयूथेन वृतो नारायणः प्रभुः ॥ स्थानादस्मादपाक्रम्य मेरुं प्रति ययौ
तदा ॥ ३०४ ॥ ततो मेरुं समागम्य प्रोवाच वचनं हरिः ॥ भवंतो यांतु ब्रह्माणं स धास्यति च वो हितम् ॥ ३०५ ॥ अप्रमत्तैः सदा भाव्यं
पालयश्च समयस्तथा ॥ इत्युक्त्वा भगवान्विष्णुस्तत्रैवांतरधीयत ॥ ३०६ ॥ प्रणतः संस्तुतो देवैर्ब्रह्माणं च सुरा ययुः ॥ ३०७ ॥ दिव्योत्तमैस्तत्र

१ सततगत्वरे—सततगामिनि—इत्यर्थः । २ सौनिकात्—पशुवधकरात्—सकाशात्—हृतलोमा हृतकेशः मेषः मुक्तः स एव तस्य जीवनरक्षणरूपो लाभ एव यथा, तथा संप्रति हृतयज्ञभागा देवा मुक्ताः स एष तेषां लाभ एव यत्तेषां जीवितदानम् सर्वत्र संचारानुमोदनं च । एवं चतस्य तारकस्य सर्वदेवानामुपरि अनुग्रह एवेति भावः ।

CC-0. In Public Domain. Digitization by eGangotri

गतैरभिष्टुतो विदीततेजा भुवनत्रयेऽपि ॥ वज्रांगपुत्रोऽपि मुमोद वीरः शिवप्रसादेन महर्द्धिमाप्य ॥ ३०८ ॥ स्वयमिन्द्रो निमिर्वह्निः कालनेमिर्यमोऽपि च ॥ स्तम्भश्च निर्ऋतिस्थाने महिषो वरुणस्तथा ॥ ३०९ ॥ मेषो वाताधिकारी च कुजंभो धनदोऽभवत् ॥ अन्येषां चाधिकारांश्च दैत्यानां तारको ददौ ॥ ३१० ॥ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां प्रथमे माहेश्वरखण्डे कौमारिकाखण्डे देवासुरसंग्रामे तारकविजयवर्णनंनामैकविंशतितमोऽध्यायः ॥ २१ ॥ ॥ छ ॥ ॥ नारदउवाच ॥ ॥ एवं विप्रकृता देवा महेंद्रसहितास्तदा ॥ ययुः स्वायंभुवं धाम मर्करूपसुपाश्रिताः[1] ॥ १ ॥ ततश्च विस्मितो ब्रह्मा प्राह तान्सुरपुंगवान् ॥ स्वरूपेणेह तिष्ठध्वं नात्र वस्तारकाद्भयम् ॥ २ ॥ ततो देवाः स्वरूपस्थाः प्रम्लानवदनांबुजाः ॥ तुष्टुवुः प्रणताः सर्वे पितरं पुत्रका यथा ॥ ३ ॥ नमो जगत्प्रसूत्यै ते हेतवे पालकाय च ॥ संहर्त्रे च नमस्तुभ्यं तिस्रोऽवस्थास्तव प्रभो ॥ ४ ॥ त्वमपः प्रथमं सृष्ट्वा तासु वीर्यमवासृजः ॥ तदण्डमभवद्धैमं यस्मिल्लँोकाश्चराचराः ॥ ५ ॥ वेदेष्वाहुर्विराड्रूपं त्वामेकरूपमीदृशम् ॥ पातालं पादमूलं च पार्ष्णिपादे रसातलम् ॥ ६ ॥ महातलं चास्य गुल्फौ जंघे चापि तलातलम् ॥ सुतलं जानुनी चास्य ऊरू च वितलातले ॥ ७ ॥ महीतलं च जघनं नाभिश्चास्य नभस्तलम् ॥ ज्योतिःपदमुरःस्थानं स्वर्लोको बाहुरुच्यते ॥ ८ ॥ ग्रीवा महश्च वदनं जनलोकः प्रकीर्त्यते ॥ ललाटं च तपोलोकः शीर्षं सत्यमुदाहृतम् ॥ ९ ॥ चन्द्रसूर्यौ च नयने दिशः श्रोत्रे नासिकाश्विनौ ॥ आत्मानं ब्रह्मरंध्रस्थमाहुस्त्वां वेदवादिनः ॥ १० ॥ एवं ये ते विराड्रूपं संस्मरंत उपासते ॥ जन्मबन्धविनिर्मुक्ता यांति त्वां परमं पदम् ॥ ११ ॥ एवं स्थूलं प्राणिमध्यं च सुक्ष्मं भावेभावे भावितं त्वां गृणंति ॥ सर्वत्रस्थं त्वामतः प्राहुर्वेदास्तस्मै तुभ्यं पद्मज इद्धिधेम ॥ १२ ॥ एवं स्तुतो विरिंचिस्तु कृपयाभिपरिप्लुतः ॥ जानन्नपि तदा प्राह तेषामाश्वासहेतवे ॥ १३ ॥ सर्वे भवन्तो दुःखार्ताः परिम्लानमुखांबुजाः ॥ भ्रष्टायुधास्तथाऽकस्माद्भ्रष्टाभरणवाससः ॥ १४ ॥ ममैवेयं कृतिर्देवा भवतां यद्विडम्बना ॥ यद्वैराजशरीरे मे भवन्तो बाहुसंज्ञकाः ॥ १५ ॥ यद्यद्विभूतिमत्सत्त्वं धार्मिकं चोर्जितं महत् ॥ तत्रासीद्बाहुनाशो मे बाहुस्थाने च ते मम ॥ १६ ॥ तन्नूनं मम भग्नौ च बाहू तेन दुरात्मना ॥ येन चोपहतं[2] देवास्तन्ममाख्यातुमर्हथ ॥ १७ ॥ ॥ देवा ऊचुः ॥ ॥ योऽसौ वज्रांगतनयस्त्वया दत्तवरः प्रभो ॥ भृशं विप्रकृतास्तेन तत्त्वं जानासि तत्त्वतः ॥ १८ ॥ यत्तन्महीसमुद्रस्य तटं शार्विकतीर्थकम् ॥ तदाक्रम्य कृतं तेन मरुभूमिसमं प्रभो ॥ १९ ॥ ऋद्धयः सर्वदेवानां गृहीतास्तेन सर्वतः ॥ महाभूतस्वरू

१ समाश्रिताः—इ० पा० । २ भवतामैस्वर्यमिति शेपः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

पेण स एव च जगत्पतिः ॥ २० ॥ चंद्रसूर्यौ ग्रहास्तारा यच्चान्यद्देवपक्षतः ॥ तच्च सर्वं निराकृत्य स्थापितो दैत्यपक्षकः ॥ २१ ॥ वयं च विधृता
स्तेन बहूपहसितास्तथा ॥ विष्णोः प्रसादान्मुक्ताश्च कथंचिदिव कष्टतः ॥ २२ ॥ तद्वयं शरणं प्राप्ताः पीडिताः क्षुत्तृषार्दिताः ॥ धर्मरक्षा
कराश्चेति संचिंत्य त्रातुमर्हसि ॥ २३ ॥ इत्युक्तः स्वात्मभूर्देवः सुरैर्दैत्यविचेष्टितम् ॥ सुरानुवाच भगवानतः संचिंत्य तत्त्वतः ॥
॥ २४ ॥ अवध्यस्तारको दैत्यः सर्वैरपि सुरासुरैः ॥ यस्य वध्यश्च नाद्यापि स जातो भगवान्पुनः ॥ २५ ॥ मया च वरदानेन च्छन्दयित्वा
निवारितः ॥ २६ ॥ तपसा स हि दीप्तोऽभूत्त्रैलोक्यदहनात्मकः ॥ स च वव्रे वधं दैत्यः शिशुतः सप्तवासरात् ॥ २७ ॥ स च सप्तदिनो बालः
शंकराद्यो भविष्यति ॥ तारकस्य च वीरस्य वधकर्ता भविष्यति ॥ २८ ॥ सतीनामा तु या देवी विनष्टा दक्षहेलया[1] ॥ सा भविष्यति
कल्याणी हिमाचलशरीरजा ॥ २९ ॥ शंकरस्य च तस्याश्च यत्नः कार्यः समागमे ॥ अहमप्यस्य कार्यस्य शेषं[2] कर्ता न संशयः ॥ ३० ॥
इत्युक्तास्त्रिदशास्तेन साक्षात्कमलयोनिना ॥ जग्मुर्मेरुं प्रणम्येशं मर्करूपेण संवृताः ॥ ३१ ॥ ततो गतेषु देवेषु ब्रह्मा लोकपितामहः ॥ निशां
सस्मार भगवान्स्वां तनुं पूर्वसंभवाम् ॥ ३२ ॥ ततो भगवती रात्रिरुपतस्थे पितामहम् ॥ तां विविक्ते समालोक्य तथोवाच विभावरीम् ॥ ३३ ॥
विभावरि महत्कार्यं विबुधानामुपस्थितम् ॥ तत्कर्तव्यं त्वया देवि शृणु कार्यस्य निश्चयम् ॥ ३४ ॥ तारकोनाम दैत्येंद्रः सुरकेतुः[3]रनिर्जितः ॥
तस्याभावाय भगवाञ्जनयिष्यति यं शिवः ॥ ३५ ॥ सुतः स भविता तस्य तारकस्यांतकारकः ॥ अहं त्वादौ यदा जातस्तदापश्यं पुरःस्थितम् ॥
॥ ३६ ॥ अर्धनारीश्वरं देवं व्याप्य विश्वमवस्थितम् ॥ दृष्ट्वा[4] तमब्रुवं देवं भजस्वेति च भक्तितः ॥ ३७ ॥ ततो नारी पृथग्जाता पुरुषश्च तथा
पृथक्[5] ॥ तस्याश्चैवांशजाः सर्वाः स्त्रियस्त्रिभुवने स्मृताः ॥ ३८ ॥ एकादश च रुद्राश्च पुरुषास्तस्य चांशजाः ॥ तां नारीमहमालोक्य पुत्रं दक्षमथा
ब्रवम् ॥ ३९ ॥ भजस्व पुत्रीं जगती[6] ममापि च तवापि च ॥ पुंदुःखनरकात्रात्री पुत्री ते भाविनी त्वियम् ॥ ४० ॥ एवमुक्तो मया दक्षः पुत्रीत्वे परि
कल्पिताम् ॥ रुद्राय दत्तवान्भक्त्या नाम दत्त्वा सतीति यत् ॥ ४१ ॥ ततः काले च[7] कस्मिंश्चिदवमेने च तां पिता ॥ मुमूर्षुः पापसंकल्पो दुरात्मा
कुलकज्जलः ॥ ४२ ॥ ये रुद्रं नैव मन्यंते ते स्फुटं कुलकज्जलाः ॥ पिशाचास्ते दुरात्मानो भवंति ब्रह्मराक्षसाः ॥ ४३ ॥ अवमानेन तस्यापि

१ यज्ञहेलया–इ० पा० । २ शेषाम्–इ० पा० । ३ सुरकेतुः–सुराणां केतुरिवानिष्टफलसूचकः । आकाशे केतूदयो हि प्रायोऽनिष्टफलसूचको भवतीति ज्योतिःशास्त्रे । ४ श्रुत्वा–इति पाठः–परं सोऽप्रासंगिकः ।
५ कुल-इ०पा० । ६ जगती इदं जगत् ममापि, मया सृज्यमानत्वात् । तवापि, त्वत्संतत्या परिपूर्यमाणत्वात्–इत्यभिप्रायः । ७ तु–इ० पा० ।

CC-0. In Public Domain. Digitization by eGangotri

यथा देवी जहौ तनुम् ॥ यथा यज्ञः स च ध्वस्तो भवेन विदितं हि ते[1] ॥ ४४ ॥ अधुना हिमशैलस्य भवित्री दुहिता च सा ॥ महेश्वरं पतिं सा च पुनः प्राप्स्यति निश्चितम् ॥ ४५ ॥ तदिदं च त्वया कार्यं मेनागर्भे प्रविश्य च ॥ तस्याश्छविं कुरु कृष्णां यथा काली भवेत्तु सा ॥ ॥ ४६ ॥ यदा रुद्रोपहसिता तपस्तप्स्यति सा महत् ॥ समाप्तनियमा देवी यदा चोग्रा भविष्यति ॥ ४७ ॥ स्वयमेव यदा रूपं सुगौरं प्रतिपत्स्यते ॥ विरहेण हरश्चास्या मत्वा शून्यं जगत्त्रयम् ॥ ४८ ॥ तस्यैव हिमशैलस्य कंदरे सिद्धसेविते ॥ प्रतीक्षमाणस्तां देवीमुग्रं संतप्स्यते तपः ॥ ॥ ४९ ॥ तयोः सुततंतपसोर्भविता यो महान्सुतः[2] ॥ भविष्यति स दैत्यस्य तारकस्य निवारकः ॥ ५० ॥ तपसो हि विना नास्ति सिद्धिः कुत्रापि शोभने ॥ सर्वासां कर्मसिद्धीनां मूलं हि तप उच्यते ॥ ५१ ॥ त्वयापि दानवो देवि देहनिर्गतया तदा ॥ चंडमुंडपुरोगाश्च हंतव्या लोकदुर्जयाः ॥ ५२ ॥ यस्माच्चंडं च मुंडं च त्वं देवि निहनिष्यसि ॥ चामुंडेति ततो लोके ख्याता देवि भविष्यसि ॥ ५३ ॥ ततस्त्वां वरदे देवि लोकः संपूजयिष्यति ॥ भेदैर्बहुविधाकारैः सर्वगां कामसाधनीम् ॥ ५४ ॥ ओंकारवक्त्रां गायत्रीं त्वामर्चंति द्विजोत्तमाः ॥ ऊर्जितां बलदां चापि राजानः सुमहाबलाः ॥ ५५ ॥ वैश्याश्च भूतिमित्येव शिवां शूद्रास्तथा शुभे ॥ क्षांतिर्मुनीनामक्षोभ्या दया नियमिनामपि[3][4] ॥ ५६ ॥ त्वं महोपायसन्दोहा नीतिर्नयविसर्पिणाम् ॥ परिस्थितिस्त्वमर्थानां त्वमहो प्राणिका मता ॥ ५७ ॥ त्वं युक्तिः[5] सर्वभूतानां त्वं गतिः सर्वदेहिनाम् ॥ रतिस्त्वं रतिचित्तानां प्रीतिस्त्वं हृद्यदर्शिनाम् ॥ ५८ ॥ त्वं कांतिः शुभरूपाणां त्वं शांतिः शुभकर्मिणाम् ॥ त्वं भ्रांतिर्मूढचित्तानां त्वं फलं क्रतुयाजिनाम् ॥५९॥ जलधीनां महावेला त्वं च लीला विलासिनाम् ॥ संभूतिस्त्वं पदार्थानां स्थितिस्त्वं लोकपालिनी ॥ ६० ॥ त्वं कालरात्रिर्निःशेषभुवनावलिनाशिनी॥ प्रियकंठग्रहानन्ददायिनी त्वं विभावरी ॥ ६१ ॥ प्रसीद प्रणतानस्मान्सौम्यदृष्ट्या विलोकय॥ ६२ ॥ इति स्तुवंतो ये देवि पूजयिष्यंति त्वां शुभे ॥ ते सर्वकामानाप्स्यंति नियता नात्र संशयः ॥ ६३ ॥ इत्युक्ता तु निशादेवी तथेत्युक्त्वा कृताञ्जलिः ॥ जगाम त्वरिता पूर्वं गृहं[6] हिमगिरेर्महत् ॥ ६४ ॥ तत्राऽऽसीनां महाहर्म्ये रत्नभित्तिसमाश्रये ॥ ददर्श मेनामापांडुच्छविवक्त्रसरोरुहाम् ॥ ६५ ॥ किंचिच्छ्यामम‍ुखोदग्रस्तनभागावनामिताम् ॥ महौषधिगणाबद्धमंत्रराजनिषेविताम् ॥ ६६ ॥ ततः किंचित्प्रमिलिते मेनानेत्रांबुजद्वये ॥ आविवेश मुखं रात्रिर्ब्रह्मणो वचनात्तदा ॥ ६७ ॥ जन्मदाया जगन्मातुः क्रमेण जठरांतरम् ॥ अरंजयच्छविं देव्या गुहमातुर्विभावरी ॥ ६८ ॥ ततो जगन्म

१ ते—तवेत्यर्थः । २ सुततपवपुषोः—इ० पा० । ३ शान्तिर्मुनीनामक्षोभ्या दया नियमिनोऽपि च—इ० पा० । ४ दयेति यमिनामपि—इत्यपि पा० । ५ मुक्तिः—इ० पा० । ६ गिरिम्—इ० पा० अप्रयोजकः । गृहमित्येव साधुः पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गलदा मेना हिमगिरेः प्रिया ॥ ब्राह्मे मुहूर्ते सुभगे प्रासूयत[1] शुभाननाम् ॥ ६९ ॥ तस्यां तु जायमानायां जंतवः स्थाणुजंगमाः ॥ अभवन्सुखिनः सर्वे सर्वलोकनिवासिनः ॥ ७० ॥ अभवत्क्रूरसत्त्वानां चेतः शांतं च देहिनाम् ॥ ज्योतिषामपि तेजस्त्वमभवत्सुतरां तदा ॥ ७१ ॥ वनाश्रिता श्चौषधयः स्वादवंति फलानि च ॥ गंधवंति च माल्यानि विमलं च नभोऽभवत् ॥ ७२ ॥ मारुतश्च सुखस्पर्शो दिशश्च सुमनोहराः ॥ विस्मृता नि च शास्त्राणि प्रादुर्भावं प्रपेदिरे ॥ ७३ ॥ प्रभावस्तीर्थमुख्यानां तदा[2] पुण्यतमोऽभवत् ॥ सत्ये धर्मे चाध्ययने यज्ञे दाने तपस्यपि ॥ ७४ ॥ सर्वेषामभवच्छ्रद्धा जन्मकाले गुहारणेः ॥ अंतरिक्षेमराश्चापि प्रहर्षोत्फुल्ललोचनाः ॥ ७५ ॥ हरिब्रह्ममहेंद्रार्कवायुवह्निपुरोगमाः ॥ पुष्पवृष्टिं प्रमु मुचुस्तस्मिन्मेनागृहे शुभे ॥ ७६ ॥ मेरुप्रभृतयश्चापि मूर्तिमंतो महानगाः ॥ तस्मिन्महोत्सवे प्राप्ता वीरकांस्योपशोभिताः[3] ॥ ७७ ॥ सागराः सरित श्चैव समाजग्मुश्च सर्वशः ॥ ७८ ॥ हिमशैलोऽभवल्लोके तदा सर्वैश्चराचरैः ॥ सेव्यश्चाप्यभिगम्यश्च पूजनीयश्च भारत ॥ ७९ ॥ अनुभूयोत्सवं ते च जग्मुः स्वानालयांस्तदा ॥ ८० ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां प्रथमे माहेश्वरखण्डे कौमारिकाखंडे कुमारेश माहात्म्ये पार्वतीजन्मवर्णनंनाम द्वाविंशोऽध्यायः ॥ २२ ॥ ॥ छ ॥ ॥ नारद उवाच ॥ ॥ ततश्च शैलजा देवी चिक्रीड सुभगा तदा ॥ देवगंधर्वकन्याभिर्नगकिंनरसंभवाः ॥ मुनीनां चापि याः कन्यास्ताभिः सार्धं च शोभना ॥१॥ कदाचिदथ मेरुस्थो वासवः पांडुनंदन ॥ सस्मार मां ययौ चाहं संस्मृतो वासवं तदा ॥ २ ॥ मां दृष्ट्वा च सहस्राक्षः समुत्थायातिहर्षितः ॥ पूजयामास तां पूजां प्रतिगृह्याहमब्रुवम् ॥ ३ ॥ महासुर महोन्मादकालानल दिवस्पते ॥ कुशलं विद्यते कच्चित्तव कच्चिच्च नंदसि ॥ ४ ॥ पृष्टस्त्वेवं मया शक्रः प्रोवाच वचनं स्मयन् ॥ कुशलस्यांकुरस्ता वत्संभूतो भुवनत्रये ॥५॥ तत्फलोदयसंपत्तौ तद्भवान्संस्मृतो मुने ॥ वेत्सि सर्वमतं त्वं वै तथापि परिनोदकः ॥६॥ निर्वृतिं परमां याति निवेद्यार्थं सुहृज्जने ॥७॥ तद्भवाञ्छैलजां देवीं शैलेंद्रं शैलवल्लभाम् ॥ हरं संभावय वरं यन्नान्यं रोचयंति ते ॥८॥ ततस्तद्वाक्यमाकर्ण्य गतोऽहं शैलसत्तमम् ॥ ओषधिप्रस्थनिलयं साक्षादिव दिवस्पतिम् ॥९॥ तत्र हैमे स्वयं तेन महाभक्त्या निवेदिते ॥ महासने पूजितोहमुपविष्टो महासुखम् ॥१०॥ गृहीतार्घ्यं ततो मां च पप्रच्छ श्लक्ष्णया गिरा ॥ कुशलं तपसः शैलः शनैः फुल्लाननांबुजः ॥११॥ अहमप्यस्य तत्प्रोच्य प्रत्यवोचं गिरीश्वरम् ॥ त्वया शैलेंद्र पूर्वां वाप्यपरां च[4] दिशं तथा ॥ १२ ॥ अवगाह्य स्थितवता क्रियते प्राणिपालना ॥ अहो धन्योसि विप्रेंद्राः साहाय्येन तवाचल ॥१३॥ तपोजप

१ प्रासूयन्त—इति शेषः । २ धर्मे—इ० पा० । ३ वीरकांस्यं नीराजनपात्रं तेन उपशोभिताः । ४ वा—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

व्रतस्नानैः साधयंत्यात्मनः परम्॥ यज्ञांगसाधनैः कांश्चित्कंदादिफलदानतः॥१४॥त्वं समुद्धरसि विश्रान्किमतः प्रोच्यते तव॥अन्येऽपि जीवा बहुधा त्वामुपाश्रित्य भूधर॥१५॥मुदिताः प्रतिवर्तंते गृहस्थमिव प्राणिनः॥शीतमातपवर्षांश्च क्लेशान्नानाविधान्सहन् ॥१६॥ उपाकरोषि जंतूनामेवंरूपा हि साधवः ॥ किमतः प्रोच्यते तुभ्यं धन्यस्त्वं पृथिवीधर ॥ १७ ॥ कंदरं यस्य चाध्यास्ते स्वयं तव महेश्वरः ॥ इत्युक्तवति वाक्यं च यथार्थं मयि फाल्गुन ॥ १८ ॥ हिमशैलस्य महिषी मेना आगाद्दिदृक्षया ॥ अनुयाता दुहित्रा च स्वल्पाश्च परिचारिकाः ॥ १९ ॥ लज्जयानतसर्वांगी प्रविवेश सदो महत् ॥ ततो मां शैलमहिषी ववंदे प्रणिपत्य सा ॥२०॥ वस्त्रनिर्गूढवदना पाणिपद्मकृतांजलिः ॥ तामहं सत्यरूपाभिराशीर्भिः समवर्धयम् ॥ ॥ २१ ॥ पतिव्रता शुभाचारा सुभगा वीरसूः शुभे ॥ सदा वीरवती चापि भव वंशोन्नतिप्रदे ॥ २२ ॥ ततोऽहं विस्मिताक्षीं च हिमवद्गिरिपुत्रिकाम् ॥ मृदुवाण्या प्रत्यवोचमेहि बाले ममांतिकम् ॥ २३ ॥ ततो देवी जगन्माता बालभावं स्वकं मयि ॥ दर्शयंती स्वपितरं कंठे गृह्यांकमाविशत् ॥ २४ ॥ उवाच वाचं तां मंदं मुनिं वंदय पुत्रिके ॥ मुनेः प्रसादतोऽवश्यं पतिमाप्स्यसि संमतम् ॥ २५ ॥ इत्युक्ता सा ततो बाला वस्त्रांतपिहितानना ॥ किंचित्सहुंकृतोत्कंपं प्रोच्य नोवाच किंचन ॥ २६ ॥ ततो विस्मितचित्तोहमुपचारविदांवरः ॥ प्रत्यवोचं पुनर्देवीमेहि दास्यामि ते शुभे ॥ २७ ॥ रत्नक्रीडनकं रम्यं स्थापितं सुचिरं मया ॥ इत्युक्ता सा तदोत्थाय पितुरंकात्सवेगतः ॥ २८ ॥ वंदमाना च मे पादौ मया नीतांकमात्मनः॥ मन्यता तां जगत्पूज्यामुक्तं बाले तवोचितम् ॥ २९ ॥ न तत्पश्यामि यत्तुभ्यं दद्म्याशीः का तवोचिता ॥ इत्युक्ते मातृवात्सल्याच्छैलेन्द्रमहिषी तदा ॥ ३० ॥ नोदयामास मां मंदमनाशीःशंकिता तदा ॥ भगवन्वेत्सि सर्वं त्वमतीतानागतं प्रभो ॥ ३१ ॥ तदहं ज्ञातुमिच्छामि कीदृशोऽस्याः पतिर्भवेत् ॥ श्रुत्वेति सस्मितमुखः प्रावोचं नर्मवल्लभः ॥ ३२ ॥ न जातोऽस्याः पतिर्भद्रे वर्तते च कुलक्षणः ॥ नग्नोऽतिनिर्धनः क्रोधी वृतः क्रूरैश्च सर्वदा ॥ ३३ ॥ श्रुत्वेति संभ्रमाविष्टो ध्वस्तवीर्यो हिमाचलः ॥ मां तदा प्रत्युवाचेदं साश्रुकण्ठो महागिरिः ॥ ३४ ॥ अहो विचित्रः संसारो दुर्वेद्यो महतामपि ॥ प्रवरस्त्वपि शक्त्या यो नरेषु न कृपायते ॥३५॥ यत्नेन महता तावत्पुण्यैर्बहुविधैरपि ॥ साधयत्यात्मनो लोको मानुष्यमतिदुर्लभम् ॥ ३६ ॥ अध्रुवं तद्ध्रुवत्वे च कथंचित्परिकल्प्यते ॥ तत्रापि दुर्लभानाम समानव्रतचारिणी ॥ ३७ ॥ साध्वी महाकुलोत्पन्ना भार्या या स्यात्पतिव्रता ॥ तत्रापि दुर्लभं यच्च तया धर्मनिषेवणम् ॥ ३८ ॥ सह वेदपुराणोक्तं जगत्त्रयहितावहम् ॥ एतत्सुदुर्लभं यच्च तस्यां चैव प्रजा

१ सहमानः—इत्यर्थः । आर्षं परस्मैपदित्वं सहेः । २ लज्जावनतसर्वाङ्गी—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यते ॥ ३९ ॥ तदपत्यमपत्यार्थं संसारे[1] किल नारद ॥ एतेषां दुर्लभानां हि किंचित्प्राप्नोति पुण्यवान् ॥ ४० ॥ सर्वमेतदवाप्नोति स कोपि यदि वा न वा ॥ किंचित्केनापि हि न्यूनं संसारः कुरुते नरम् ॥ ४१ ॥ अथ सांसारिको दोषः स्वकृतं यत्र भुज्यते ॥ गार्हस्थ्यं च प्रशंसंति वेदाः सर्वेऽपि नारद ॥ ४२ ॥ नेति केचित्तत्र पुनः कथं ते यदि नो गृही ॥ अतो धात्रा च शास्त्रेषु सुतलाभः [2]प्रशंसितः ॥ ४३ ॥ पुनश्च सृष्टिवृद्ध्यर्थं नरकत्राणनाय च ॥ तत्र स्त्रीणां समुत्पत्तिं विना सृष्टिर्न जायते ॥ ४४ ॥ सा च जातिप्रकृत्यैव कृपणा दैन्यभागिनी ॥ तासामुपरि मावज्ञा भवेदिति च वेधसा ॥ शास्त्रेषूक्तमसंदिग्धं वाक्यमेतन्महत्फलम् ॥ ४५ ॥ दशपुत्रसमा कन्या दशपुत्रान्प्रवर्द्धयन् ॥ यत्फलं लभते मर्त्यस्तल्लभ्यं कन्ययैकया ॥ ४६ ॥ तस्मात्कन्या पितुः शोच्या सदा दुःखविवर्धिनी ॥ ४७ ॥ यापि स्यात्पूर्णसर्वार्था पतिपुत्रधनान्विता ॥ त्वयोक्तं च कृते ह्यस्यास्तद्वाक्यं मम शोकदम् ॥ ४८ ॥ केन दोषेण मे पुत्री न योग्या आशिषा मता ॥ न जातोऽस्याः पतिः कस्माद्वर्तते वा कुलक्षणः ॥ ४९ ॥ निर्धनश्च मुने कस्मात्सर्वेषां सर्वदः कुतः ॥ इति दुर्घटवाक्यं ते मनो मोहयतीव मे ॥ ५० ॥ इति तं पुत्रवात्सल्यात्सभार्यं शोकसंप्लुतम् ॥ अहमाश्वासयं वाग्भिः सत्याभिः पांडुनंदन ॥ ५१ ॥ मा शुचः शैलराज त्वं हर्षस्थानेऽतिपुण्यभाक् ॥ शृणु तद्वचनं मह्यं यन्मयोक्तं च ह्यर्थवत् ॥ ५२ ॥ जगन्माता त्वियं बाला पुत्री ते सर्वसिद्धिदा ॥ पुरा भवेऽभवद्भार्या सतीनाम्ना भवस्य या ॥ ५३ ॥ तदस्याः किमहं दद्मि रवेर्दीपमिवाल्पकः ॥ संचिंत्येति महादेव्या नाशिषं दत्तवानहम् ॥ ५४ ॥ न जातोऽस्याः पतिश्चेति वर्तते च भवो हि सः ॥ न स जातो महादेवो भूतभव्यभवोद्भवः ॥ ५५ ॥ शरण्यः शाश्वतः शास्ता शंकरः परमेश्वरः ॥ ५६ ॥ सर्वे देवा यत्पदमामनंति वेदैश्च सर्वैरपि यो न लभ्यः ॥ ब्रह्मादिविश्वं ननु यस्य शैल बालस्य वा[3] क्रीडनकं वदंति ॥ ५७ ॥ स चामंगल्यशीलोऽपि मंगलायतनो हरः ॥ निर्धनः सर्वदश्चासौ वेद स्वं स्वयमेव सः ॥५८॥ स च देवोऽचलः स्थाणुर्महादेवोऽजरो हरः ॥ भविष्यति पतिः सोऽस्यास्तत्किमर्थं तु शोचसि ॥ ५९ ॥ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां प्रथमे माहेश्वरखण्डे कौमारिकाखण्डे कुमारेशमाहात्म्ये हिमवदाश्वासनंनाम त्रयोविंशोऽध्यायः ॥ २३ ॥ ॥ छ ॥ ॥ नारद उवाच ॥ ॥ एवं श्रुत्वा सभार्यः स प्रमोदप्लुतमानसः ॥ प्रणम्य मामिति प्राह यद्येवं पुण्यवानहम् ॥ १ ॥ पुनः किंचित्प्रवक्ष्यामि पुत्र्या मे दक्षिणः करः ॥ उत्तानः कारणं किं तच्छ्रोतुमिच्छामि नारद ॥ २ ॥ इति

१ संयुक्तम्--इ० पा० । २ प्रकीर्तितः--इ०पा० । ३ वा--इव--इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पृष्टोऽस्मि शैलेन प्रावोचं कारणं तदा ॥ सर्वदैव करो ह्यस्याः सर्वेषां प्राणिनां प्रति ॥ ३ ॥ अभयस्य प्रदाताऽसावुत्तानस्तु करस्ततः ॥ एषा भार्या जगद्भर्तुर्वृषांकस्य महीधर ॥ ४ ॥ जननी सर्वलोकस्य भाविनी भूतभाविनी ॥ तद्यथा शीघ्रमेवैषा योगं यातु पिनाकिना ॥ ५ ॥ त्वया विधेयं विधिवत्तथा शैलेन्द्रसत्तम ॥ अस्त्यत्र सुमहत्कार्यं देवानां हिमभूधर ॥ ६ ॥ इति प्रोच्य तमापृच्छय प्रावोचं वासवाय तत् ॥ मम भूयस्तु कर्तव्यं तन्मया कृतमेव हि ॥ ७ ॥ किं तु पंचशरः प्रेर्यः कार्यशेषेऽत्र वासव ॥ इत्यादिश्य गतश्चाहं तारकं प्रति फाल्गुन ॥ ८ ॥ कलिप्रि यत्वात्तस्यैनमर्थं कथयितुं स्फुटम् ॥ हिमाद्रिरपि मे वाक्यप्रेरितः पार्वतीं प्रति ॥ ९ ॥ भवस्याराधनां कर्तुं ससखीमादिशत्तदा ॥ सा तं परिचचारेशं तस्या दृष्ट्वा सुशीलताम् ॥ १० ॥ पुष्पतोयफलाद्यानि नियुक्ता पार्वती व्यधात् ॥ महेन्द्रोपि च मद्वाक्यात्स्मरं सस्मार भारत ॥ ११ ॥ स च तत्स्मरणं ज्ञात्वा वसंतरतिसंयुतः ॥ चूतांकुरास्त्रः सहसा प्रादुरासीन्मनोभवः ॥ १२ ॥ तमाह च वचो धीमा न्स्मयन्निव च तं स्पृशन् ॥ उपदेशेन बहुना किं त्वां प्रति रतिप्रिय ॥ १३ ॥ चित्ते वससि तेन त्वं वेत्सि भूतमनोगतम् ॥ तथापि त्वां वदिष्यामि स्वकार्यपरतां स्मरन् ॥ १४ ॥ ममैकं सुमहत्कार्यं कर्तुमर्हसि मन्मथ ॥ महेश्वरं कृपानाथं सतीभार्यावियोजितम् ॥ १५ ॥ संयो जय पुनर्देव्या हिमाद्रिगृहजातया ॥ देवी देवश्च तुष्टौ ते करिष्यत इहेप्सितम् ॥ १६ ॥ ॥ मदन उवाच ॥ ॥ अलीकमेतद्देवेन्द्र स हि देवस्त पोरतिः ॥ नान्यासादयितव्यानि तेजांसि मनुरब्रवीत् ॥ १७ ॥ वेदान्तेषु च मां विप्रा गर्हयंति पुनःपुनः ॥ महाशनो महापाप्मा कामोऽयम नलो महान् ॥ १८ ॥ आवृतं ज्ञानमेतेन ज्ञानिनां नित्यवैरिणा ॥ तस्मादयं सदा त्याज्यः कामोऽहिरिव सत्तमैः ॥ १९ ॥ एवं शीलस्य मे कस्मात्प्रतुष्यति महेश्वरः ॥ मद्यपस्येव पापस्य वासुदेवो जगद्गुरुः ॥ २० ॥ ॥ इंद्र उवाच ॥ ॥ मैवं ब्रूहि महाभाग त्वां विना कः पुमान्भुवि ॥ धर्ममर्थं तथा कामं मोक्षं वा प्राप्नुमीश्वरः ॥ २१ ॥ यत्किंचित्साध्यते लोके मूलं तस्य च कामना ॥ कथं कामं विनिंदंति तस्मात्ते मोक्षसाधकाः ॥ २२ ॥ सत्यं चापि श्रुतेर्वाक्यं तव रूपं त्रिधागतम् ॥ तामसं राजसं चैव सात्त्विकं चापि मन्मथ ॥ २३ ॥ असुक्तितः

१ 'अभितः परितः' इत्यादिना द्वितीयाप्राप्तावपि सम्बन्धसामान्यविवक्षायां षष्ठी । सर्वेभ्यः प्राणिभ्यः अभयस्य प्रदाता—इत्यर्थोऽत्र विवक्षित एव । २ तदा— इ० पा० । ३ तं हिमाद्रिकंदरस्थं तपस्तप्यन्तं शंकरं परिचचार । तस्याः पार्वत्याः सुशीलतां दृष्ट्वा । तेन शंकरेण—इति शेषः । तेन शंकरेण नियुक्ता निजपरिचरणार्थं कृताज्ञा पार्वती । शंकरार्थमिति शेषः शंकरं परिचरितुमित्यर्थ । पुष्पतोयफलाद्यानि व्यधात्--आनीय समर्प्य परिचचारेति श्लोकार्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कामनया रूपं तत्तामसं तव ॥ सुखबुद्ध्या स्पृहा या च रूपं तद्राजसं तव ॥ २४ ॥ केवलं यावदर्थार्थं तद्रूपं सात्त्विकं तव ॥ तत्ते रूपत्रयमिदं ब्रूहि नोपासते हि के ॥ २५ ॥ त्वं साक्षात्परमः पूज्यः कुरु कार्यमिदं हि नः ॥ अथ वा पीडितान्दृष्ट्वा सामान्यानपि पंडिताः ॥ स्वप्राणैरपि त्रायंति परमेतन्महाफलम् ॥ २६ ॥ इति संचिंत्य कार्यं त्वं सर्वथा कुरु तत्स्फुटम् ॥ २७ ॥ इत्याकर्ण्य तथेत्युक्त्वा वसंतरतिसंयुतः ॥ पिकादिसैन्यसंपन्नो हिमाद्रिं प्रययौ स्मरः ॥ २८ ॥ तत्रापश्यत शंभोः स पुण्यमाश्रममंडलम् ॥ नानावृक्षसमाकीर्णं शांतसत्त्वसमाकुलम् ॥ २९ ॥ तत्रापश्यत्त्रिनेत्रस्य वीरकंनाम द्वारपम् ॥ यथा साक्षान्महेशानं गणांश्चायुतशोऽस्य च ॥ ३० ॥ ददर्श च महेशानं नासाग्रकृतलोचनम् ॥ देवदारुद्रुमच्छायावेदिकामध्यमाश्रितम् ॥ समकायं सुखासीनं समाधिस्थं महेश्वरम् ॥ ३१ ॥ निस्तरंगं विनिर्गृह्य स्थितमिंद्रियगोचरान् ॥ आत्मानमात्मना देवं प्रविष्टं तपसो निधिम् ॥ ३२ ॥ तं तथाविधमालोक्य सोंतर्भेदाय यत्नवान् ॥ भ्रमरध्वनिव्याजेन विवेश मदनो मनः ॥ ३३ ॥ एतस्मिन्नंतरे देवो विकासितविलोचनः ॥ सस्मार नगराजस्य तनयां रक्तमानसः ॥ ३४ ॥ निवेदिता वीरकेण विवेश च गिरेः सुता ॥ तस्मिन्काले महाभागा सदा यद्वदुपैति सा ॥ ३५ ॥ ततस्तस्यां मनः स्वीयमनुरक्तमवेक्ष्य च ॥ निगृह्य लीलया देवः स्वकं पृष्ठमवैक्षत ॥ तावदापूर्णधनुषमपश्यत रतिप्रियम्¹ ॥ ३६ ॥ तत्राशक्तधिया देवो नानास्थानेषु सोऽगमत् ॥ तावत्पश्यति पृष्ठस्थमाकृष्य धनुषः शरम् ॥ ३७ ॥ स नदीः पर्वतांश्चैव आश्रमान्सरसीस्तथा ॥ परिभ्रमन्महादेवः पृष्ठस्थं तमवैक्षत ॥ ३८ ॥ जगत्त्रयं परिभ्रम्य पुनरागात्स्वमाश्रमम् ॥ पृष्ठस्थमेव तं वीक्ष्य निःश्वासं मुमुचे हरः ॥ ३९ ॥ ततस्तृतीयनेत्रोत्थवह्निना नाकवासिनाम् ॥ क्रोशतां गमितः कामो भस्मत्वं पांडुनंदन ॥ ४० ॥ स तु तं भस्मसात्कृत्वा हरनेत्रोद्भवोऽनलः ॥ व्यजृंभत जगद्दग्धुं ज्वालापूरितदिङ्मुखः ॥ ४१ ॥ ततो भवो जगद्धेतोर्व्यभजज्जातवेदसम् ॥ साहंकारे जने चंद्रे सुमनस्सु च गीतके ॥ ४२ ॥ भृंगेषु कोकिलास्येषु विहारेषु स्मरानलम् ॥ तत्प्राप्तौ स्नेहसंयुक्तं कामिनां हृदयं किल ॥ ४३ ॥ ज्वालयत्यनिशं सोऽग्निर्दुश्चिकित्स्योऽसुखावहः ॥ विलोक्य हरनिःश्वासज्वालाभस्मीकृतं स्मरम् ॥ ४४ ॥ विललाप रतिर्दीना मधुना बंधुना सह ॥ विलपंती सुबहुशो मधुना परिसांत्विता ॥ ४५ ॥ रत्याः प्रलापमाकर्ण्य देवदेवो वृषध्वजः ॥ कृपया परया प्राह कामपत्नीं निरीक्ष्य च ॥ ४६ ॥ अमूर्तोऽपि ह्ययं भद्रे कार्यं सर्वं पतिस्तव ॥ रतिकाले ध्रुवं बाले करिष्यति न संशयः ॥ ४७ ॥ यदा विष्णुश्च भविता वसुदेवात्मजो विभुः ॥ तदा तस्य सुतो यः स्यात्स

१ प्रिय–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पतिस्ते भविष्यति ॥४८॥ सा प्रणम्य ततो रुद्रमिति प्रोक्ता रतिस्ततः ॥ जगाम स्वेच्छया गत्या वसंतादिभिरन्विता ॥ ४९ ॥ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां प्रथमे माहेश्वरखण्डे कौमारिकाखण्डे कुमारेश्वरमाहात्म्ये कामदहनोनाम चतुर्विंशोऽध्यायः ॥ २४ ॥ ॥ छ ॥ ॥ अर्जुन उवाच ॥ ॥ देवर्षे वर्ण्यते चेयं कथा पीयूषसोदरा ॥ पुनरेतन्मुने ब्रूहि यदा वेत्ति महेश्वरः ॥ १ ॥ भगवान्स्वां सतीं भार्यां वधार्थं चापि तारकम् ॥ सत्याश्च विरहात्त[1]प्यन्ददाह किमसौ स्मरम् ॥ २ ॥ त्वयैवोक्तं स विरहात्सत्यास्तप्यति वै तपः ॥ हिमाद्रिमास्थितो देवस्तस्याः संगमवांछया ॥ ३ ॥ ॥ नारद उवाच ॥ ॥ सत्यमेतत्पुरा[2] पार्थ भवस्येदं मनीषितम् ॥ अतप्ततपसा योगो न कर्तव्यो मयाऽनया ॥ ४ ॥ तपो विना शुद्धदेहो न कथंचन जायते ॥ अशुद्धदेहेन समं संयोगो नैव दैहिकः ॥ ५ ॥ महत्कर्माणि यानीह तेषां मूलं सदा तपः ॥ नातप्ततपसां सिद्धिर्महत्कर्माणि यांति वै ॥ ६ ॥ एतस्मात्कारणाद्देवो दर्पितं तं ददा[3]ह तु ॥ ततो दग्धे स्मरे चापि पार्वतीमपि व्रीडिताम् ॥ ७ ॥ विहाय सगणो देवः कैलासं समपद्यत ॥ देवी च परमोद्विग्ना प्रस्खलंती पदेपदे ॥ ८ ॥ जीवितं स्वं विनिंदंती बभ्रामेतस्ततश्च सा ॥ हिमाद्रिरपि स्वे शृंगे रुदतीं पृष्टवान्रतिम् ॥ ९ ॥ कासि कस्यासि कल्याणि किमर्थं चापि रोदिषि ॥ पृष्टा सा च रतिः सर्वं यथावृत्तं न्यवेदयत् ॥ १० ॥ निवेदिते तथा रत्या शैलः संभ्रांतमानसः ॥ प्राप्य स्वां त[4]नयां पाणावादायागात्स्वकं पुरम् ॥ ११ ॥ सा तत्र पितरौ प्राह सखीनां वदनेन च ॥ दुर्भगेन शरीरेण किमनेन हि कारणम् ॥ १२ ॥ देहवासं परित्यक्ष्ये प्राप्स्ये वाभिमतं पतिम् ॥ असाध्यं चाप्यभीष्टं च कथं प्राप्यं तपो विना ॥ १३ ॥ नियमैर्विविधैस्तस्माच्छोषयिष्ये कलेवरम् ॥ अनुजानीत मां तत्र यदि वः करुणा मयि ॥ १४ ॥ श्रुत्वेति वचनं माता पिता च प्राह तां शुभाम् ॥ उ मेति चपले पुत्रि न क्षमं तावकं वपुः ॥ १५ ॥ सोढुं क्लेशात्मरूपस्य तपसः सौम्यदर्शने ॥ भावीन्यप्यनिवार्याणि वस्तूनि च सदैव तु ॥ १६ ॥ भाविनोर्था भवंत्येव नरस्यानिच्छतोपि हि ॥ तस्मान्न तपसा तेऽस्ति बाले किंचित्प्रयोजनम् ॥ १७ ॥ ॥ ॥ श्रीदेव्युवाच ॥ ॥ यदिदं भवतो वाक्यं न सम्यगिति मे मतिः ॥ केवलं न हि दैवेन प्राप्तुमर्थो हि शक्यते ॥१८॥ त्किंचिद्दैवाद्धठात्किंचित्किंचिदेव स्वभावतः ॥ पुरुषः फलमाप्नोति चतुर्थं नात्र कारणम् ॥ १९॥ ब्रह्मणा चापि ब्रह्मत्वं प्राप्तं किल तपोबलात् ॥ अन्यैरपि च यल्लब्धं तत्र

१ क्षुम्यत्--इ०, कुप्यन्--इ० च पा० । २ पुनः--इ०पा० । ३ तदादहत्--इ० पा० । ४ तनयापर्णाम्--इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संख्यातुमुत्सहे ॥ २० ॥ अध्रुवेण शरीरेण यद्यभीष्टं न साध्यते ॥ पश्चात्स शोच्यते मंदः पतितेऽस्मिञ्छरीरके ॥ २१ ॥ यस्य देहस्य धर्मोऽयं क्वचिज्जायेत्क्वचिन्म्रियेत् ॥ क्वचिद्गर्भगतं नश्येज्जातमात्रं क्वचित्तथा ॥ २२ ॥ बाल्ये च यौवने चापि वार्धक्येपि विनश्यति ॥ तेन चंचलदेहेन कोऽर्थः स्वार्थो न चेद्भवेत् ॥ २३ ॥ इत्युक्त्वा स्वसखीयुक्ता पितृभ्यां साश्रु वीक्षिता ॥ शृंगं हिमवतः पुण्यं नानाश्चर्यं जगाम सा ॥ २४ ॥ तत्रां बराणि संत्यज्य भूषणानि च शैलजा ॥ संवीता वल्कलैर्दिव्यैस्तपोऽतप्यत संयता ॥२५॥ ईश्वरं हृदि संस्थाप्य प्रणवाभ्यसनादृता ॥ मुनीनामप्य भून्मान्या तदानीं पार्थ पार्वती ॥२६॥ त्रिस्नाता पाटलापत्रभक्षकाभूच्छतं समाः ॥ शतं च बिल्वपत्रेण शीर्णेन कृतभोजना ॥२७॥ जलभक्षा शतं चाभूच्छतं वै वायुभोजना ॥ ततो नियममादाय पादांगुष्ठस्थिताभवत् ॥ २८ ॥ निराहारा ततस्तापं प्रापुस्तत्तपसो जनाः ॥ ततो जगत्समालोक्य तदीयतपसोर्जितम् ॥२९॥ हरस्तत्राययौ साक्षाद्ब्रह्मचारिवपुर्द्धरः ॥ वसानो वल्कलं दिव्यं रौरवाजिनसंवृतः ॥३०॥ सुलक्षणाषाढधरः सद्वृत्तः प्रति भानवान् ॥ ततस्तं पूजयामासुस्तत्सख्यो बहुमानतः ॥३१॥वक्तुमिच्छुः शैलपुत्रीं सखीभिरिति चोदितः ॥ ब्रह्मन्नियं महाभागा गृहीतनियमा शुभा ॥३२॥ मुहूर्तपंचमात्रेण नियमोऽस्याः समाप्यते ॥ तत्प्रतीक्षस्व तं कालं पश्चादस्मत्सखीसमम् ॥३३॥ नानाविधा धर्मवार्ताः प्रकरिष्यसि ब्राह्मण ॥ इत्युक्त्वा विजयाद्यास्ता देवीचरितवर्णनैः ॥३४॥ अश्रुमुख्यो द्विजस्याग्रे निन्युः कालं च तं तदा ॥ ततः काले किंचिदूने ब्रह्मचारी महामतिः ॥३५॥ विलोकनमिषेणागादाश्रमोपस्थितं ह्रदम् ॥ निपपात च तत्रासौ चुक्रोशातितरां ततः ॥ ३६ ॥ अहमत्र निमज्जामि कोऽपि मामुद्धरेत भोः ॥ इति तारेण क्रोशंतं श्रुत्वा तं विजयादिकाः ॥ ३७ ॥ आजग्मुस्त्वरया युक्ता ददुस्तस्मै करं च ताः ॥ स चुक्रोश ततो गाढं दूरेदूरे पुनःपुनः ॥ ॥ ३८ ॥ नाहं स्पृशाम्यसंसिद्धां म्रिये वा नानृतं त्विदम् ॥ ततः समाप्तनियमा पार्वती स्वयमाययौ ॥ ३९ ॥ सव्यं करं ददावस्य तं चासौ नाभ्यनन्दत ॥ भद्रे यच्छुचि नैव स्याद्यच्चैवावज्ञया कृतम् ॥ ४० ॥ सदोषेण कृतं यच्च तदादद्यान्न कर्हिचित् ॥ सव्यं चाशुचि ते हस्तं नावलं बामि कर्हिचित् ॥ ४१ ॥ इत्युक्ता पार्वती प्राह नाहं दत्तं च दक्षिणम् ॥ ददामि कस्यचिद्विप्र देवदेवाय कल्पितम् ॥ ४२ ॥ दक्षिणं मे करं देवो ग्रहीता भव एव च ॥ शीर्यते चोग्रतपसा सत्यमेतन्मयोदितम् ॥ ४३ ॥ ॥ विप्र उवाच ॥ ॥ यद्येवमवलेपस्ते गर्मनं केन वार्यते ॥ यथा तव

१ संज्ञातुम्--इ०पा० । २ सतीनाम्--इ०पा० । ३ निम्बपत्रेण--इ०पा० । ४ आस्थाय--इ०पा० । ५ आषाढः--दण्डः--इत्यर्थः । ६ च उदितः--इति पदच्छेदः । ७ कापि--इ० पा० । ८ गगनम्--इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रतिज्ञेयं ममापीयं तथाचला ॥ ४४ ॥ रुद्रस्यापि वयं मान्याः कीदृशं ते तपो वद ॥ विषमस्थं यत्र विप्रं म्रियमाणमुपेक्षसि ॥ ४५ ॥ अवज्ञा नासि विप्रांस्त्वं तच्छीघ्रं व्रज दर्शनात् ॥ यदि वा मन्यसे पूज्यांस्ततोऽभ्युद्धर नान्यथा ॥ ४६ ॥ ततो विचार्य बहुधा इति चेति च सा शुभा ॥ विप्रस्योद्धरणं सर्वधर्मेभ्योऽमन्यताधिकम् ॥ ४७ ॥ ततः सा दक्षिणं दत्त्वा करं तं प्रोज्जहार च ॥ नरं नारी प्रोद्धरति सज्जन्तं भववारिधौ ॥ एतत्सन्दर्शनार्थाय तथा चक्रे भवोद्भवः ॥ ४८ ॥ प्रोद्धृत्य च ततः स्नात्वा बद्ध्वा योगासनं स्थिता ॥ ४९ ॥ ब्रह्मचारी ततः प्राह प्रहसन्किमिदं शुभे ॥ कर्तुकामासि तन्वंगि दृढयोगासनस्थिता ॥ ५० ॥ देवी प्राह ज्वालयिष्ये शरीरं योगवह्निना ॥ महादेवकृतमतिरुच्छिष्टाहं यतोऽभवम् ॥ ५१ ॥ ब्रह्मचारी तंतः[1] प्राह काश्चिद्ब्राह्मणकाम्यया ॥ कृत्वा वार्तास्ततः स्वीयमभीष्टं कुरु पार्वति ॥ ५२ ॥ नोपहन्या[2] कदाचिद्धि साधुभिर्विप्रकामना ॥ धर्ममेनं मन्यसे चेन्मुहूर्तं ब्रूहि पार्वति ॥ ५३ ॥ देवी प्राह ब्रूहि विप्र मुहूर्तं संस्थिता त्वहम् ॥ ततः स्वयं व्रती प्राह देवीं तां स्वसखीयुताम् ॥ ५४ ॥ किमर्थमिति रम्भोरु नवे वयसि दुश्चरम् ॥ तपस्त्वया समारब्धं नानुरूपं विभाति मे ॥५५॥ दुर्लभं प्राप्य मानुष्यं गिरिराजगृहेऽधुना ॥ भोगांश्च दुर्लभान्देवि त्यक्त्वा किं क्लिश्यते वपुः ॥ ५६ ॥ अतीव दूये वीक्ष्य त्वां सुकुमारतराकृतिम् ॥ अत्युग्रतपसा क्लिष्टा पद्मिनीव हिमार्दिता ॥ ५७ ॥ इदं चान्यत्तव शुभे शिरसो रोगदं मम ॥ यद्देहं त्यक्तुकामा त्वं प्रबुद्धा नासि बालिके ॥ ५८ ॥ वामः कामो मनुष्येषु सत्यमेतद्वचो यतः ॥ स्पृहणीयासि सर्वेषामेवं पीडयसे वपुः ॥ ५९ ॥ अविज्ञातान्वयो नग्नः शूली भूतगणाधिपः ॥ श्मशाननिलयो भस्मोद्धूलनो वृषवाहनः ॥ ६० ॥ गजाजिनो द्विजिह्वाद्यलंकृतांगो जटाधरः ॥ विरूपाक्षः कथंकारं निर्गुणः स्यात्तवोचितः ॥ ६१ ॥ गुणा ये कुलशीलाद्या वराणामुदिता बुधैः ॥ तेषामेकोऽपि नैवास्ति तस्मिंस्तन्नोचितः स ते ॥ ६२ ॥ शोचनीयतमा पूर्वमासीत्पार्वति कौमुदी ॥ त्वं संवृत्ता द्वितीयासि तस्यास्तत्संगमाशया ॥ ६३ ॥ तपोधनाः सर्वसमा वयं यद्यपि पार्वति ॥ दुनोत्येव तवारंभः शूलायां यूपसत्क्रिया ॥ ॥६४॥ वृषभारोहणं वासः श्मशाने पाणिसंग्रहः ॥ सव्यालपाणिना क्षौमगजत्वग्बंधनः कथम् ॥ ६५ ॥ जनहास्यकरं सर्वं त्वयारब्धमसांप्रतम् ॥ स्त्रीभावाद्भूतिसंपर्कः कथं चाभिमतस्तव ॥ ६६ ॥ निवर्तय मनस्तस्माद॑स्मात्[3] सर्वविरोधिनः ॥ मृगाक्षि मदनारातेर्मर्कटाक्षस्य प्रार्थनात् ॥ ६७ ॥ विरुद्धवादिनं चैवं[4] ब्रह्मचारिणमीश्वरम् ॥ निशम्य कुपिता देवी प्राह वाचा सगद्गदम् ॥ ६८ ॥ मा मा ब्राह्मण भाषिष्ठा विरुद्धमिति शंकरे ॥

[1] पुनः–इ० पा० । [2] नोपहन्या–न उपहन्तव्या–इत्यर्थः । [3] तस्मादस्मात्कारणादित्येव योजना समीचीना । [4] चैनम्–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

महत्तमो याति पुमान्देवदेवस्य निंदया ॥ ६९ ॥ न सम्यगभिजानासि[1] तस्य देवस्य चेष्टितम् ॥ शृणु ब्राह्मण तत्त्वं पापाद्यथास्मात्परिमुच्यसे ॥७०॥ स आदिः सर्वजगतां कोस्य वेदान्वयं[2] ततः ॥ सर्वं जगद्यस्य रूपं दिग्वासाः कीर्त्यते ततः ॥ ७१ ॥ गुणत्रयमयं शूलं शूली यस्माद्बिभर्ति सः ॥ अबद्धाः सर्वतो मुक्ता भूता एव च तत्पतिः ॥७२॥ श्मशानं चापि संसारस्तद्वासी कृपयार्थिनाम् ॥ भूतयः कथिता भूतिस्तां बिभर्ति स भूतिभृत् ॥ ॥ ७३ ॥ वृषो धर्म इति प्रोक्तस्तमारूढस्ततो वृषी ॥ सर्पाश्च दोषाः क्रोधाद्यास्तान्बिभर्ति जगन्मयः ॥ ७४ ॥ नानाविधाः कर्मयोगा जटारूपा बिभर्ति सः ॥ वेदत्रयी त्रिनेत्राणि त्रिपुरं त्रिगुणं वपुः ॥ ७५ ॥ भस्मीकरोति तद्देवस्त्रिपुरघ्नस्ततः स्मृतः ॥ एवंविधं महादेवं विदुर्ये सूक्ष्मदर्शिनः ॥ ॥ ७६ ॥ कथंकारं हि ते नाम भजंते नैव तं हरम् ॥ अथ वा भीतसंसाराः सर्वे विप्र यतो जनाः ॥ ७७ ॥ विमृश्य कुर्वते सर्वं विमृश्यैतन्मया कृतम्[3] ॥ शुभं वाप्यशुभं वास्तु त्वमप्येनं प्रपूजय ॥ ७८ ॥ इति ब्रुवंत्यां तस्यां तु किंचित्प्रस्फुरिताधरम् ॥ विज्ञाय तां सखीमाह किमप्येष विवक्षुकः ॥ ७९ ॥ वार्यतामिति विप्रोऽयं महद्दूषणभाषकः ॥ न केवलं पापभागी श्रोता वै स्यान्न संशयः ॥ ८० ॥ अथ वा किं च नः कार्यं वादेन सह ब्राह्मणैः ॥ कर्णौ पिधाय यास्यामो यथा यः स्यात्तथास्तु सः ॥ ८१ ॥ इत्युक्त्वोत्थाय गच्छंत्यां पिधाय श्रवणावुभौ ॥ स्वरूपं समुपाश्रित्य जगृहे वसनं हरः ॥ ८२ ॥ ततो निरीक्ष्य तं देवं संभ्रांता परमेश्वरी ॥ प्रणिपत्य महेशानं तुष्टावावनता उमा ॥ ८३ ॥ प्राह तां च महादेवो दासोऽस्मि तव शोभने ॥ तपोद्रव्येण क्रीतश्च समादिश यथेप्सितम् ॥ ८४ ॥ ॥ देव्युवाच ॥ ॥ मनसस्त्वं प्रभुः शंभो दत्तं तच्च मया तव ॥ वपुषः पितरावीशौ तौ सम्मानयितुमर्हसि ॥ ८५ ॥ ॥ महादेव उवाच ॥ ॥ पित्रा हि ते परिज्ञातं दृष्ट्वा त्वां रूपशालिनीम् ॥ बालां स्वयंवरं पुत्रीमहं दास्यामि नान्यथा ॥ ८६ ॥ तत्तस्य सर्वमेवास्तु वचनं त्वं हिमाचलम् ॥ स्वयंवरार्थं सुश्रोणि प्रेरय त्वां वृणे ततः ॥ ८७ ॥ इत्युक्ता तां महादेवः शुचिः शुचिषदो विभुः ॥ जगामेष्टं तदा देशं स्वपुरं प्रययौ च सा ॥ ८८ ॥ दृष्ट्वा देवीं तदा हृष्टो मेनया सहितोऽचलः ॥ ८९ ॥ आलिंग्याघ्राय पप्रच्छ सर्वं सा च न्यवेदयत् ॥ दुहितुर्देवदेवेन आज्ञप्तं तु हिमाचलः ॥ ९० ॥ स्वयंवरं प्रमुदितः सर्वलोकेष्वघोषयत् ॥ अश्विनौ द्वादशादित्या गन्धर्वगरुडोरगाः ॥ ९१ ॥ यक्षाः सिद्धास्तथा साध्या दैत्याः किंपुरुषा नगाः ॥ समुद्राद्याश्च ये केचित्त्रैलोक्यप्रवराश्च ये ॥ ९२ ॥ त्रयस्त्रिंशत्सहस्राणि त्रयस्त्रिंशच्छतानि च ॥ त्रयस्त्रिंशच्च ये देवास्त्रयस्त्रिंशच्च कोटयः ॥ ९३ ॥ जग्मुर्गिरी

१ अवजानासि–इ०पा० । २ अन्वयं–वंशमित्यर्थः । ३ दृढम्–इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्द्रपुत्र्यास्तु स्वयंवरमनुत्तमम् ॥ आमंत्रितस्तथा विष्णुर्मेरुमाह हसन्निव ॥ ९४ ॥ तातास्माकं च[1] सा देवी मेरो गच्छ नमामि ताम् ॥ अथ शैलसुता देवी हैममारुह्य शोभनम् ॥ ९५ ॥ विमानं सर्वतोभद्रं सर्वरत्नैरलंकृतम् ॥ अप्सरोभिः प्रनृत्यद्भिः सर्वाभरणभूषिता ॥ ९६ ॥ गंधर्वसंघैर्विविधैः किंनरैश्च सुशोभनैः ॥ बंदिभिः स्तूयमाना च वीरकांस्यधरा स्थिता ॥ ९७ ॥ सितातपत्ररत्नांशुमिश्रितं चावहत्तदा ॥ शालिनी नाम पार्वत्याः संध्यापूर्णेंदुमंडला ॥ ९८ ॥ चामरासक्तहस्ताभिर्दिव्यस्त्रीभिश्च संवृता ॥ मालां प्रगृह्य सा तस्थौ सुरद्रुमसमुद्भवाम् ॥ ९९ ॥ एवं तस्यां स्थितायां तु स्थिते लोकत्रये तदा॥ शिशुर्भूत्वा महादेवः क्रीडार्थं वृषभध्वजः ॥१००॥ उत्संगतलसंगुप्तो बभूव भगवान्भवः ॥ जयेति यत्पदं ख्यातं तस्य सत्यार्थमीश्वरम् ॥ १०१ ॥ अथ दृष्ट्वा शिशुं देवास्तस्य उत्संगवर्तिनः ॥ कोयमत्रेति संमंत्र्य चुकुशुर्भृशरोषिताः ॥ १०२ ॥ वज्रमाहारयत्तस्य बाहुमुद्यम्य वृत्रहा ॥ स बाहुरुद्यतस्तस्य तथैव समतिष्ठत ॥ १०३ ॥ स्तंभितः शिशुरूपेण देवदेवेन लीलया ॥ वज्रं क्षेप्तुं न शक्नोति बाहुं चालयितुं तदा ॥ १०४ ॥ वह्निः शक्तिं तदा क्षेप्तुं न शशाक तथोत्थितः ॥ यमोऽपि दंडं खड्गं च निर्ऋतिस्तं शिशुं प्रति ॥ १०५ ॥ पाशं च वरुणो राजा ध्वजयष्टिं समीरणः ॥ सोमो गुडं धनेशश्च गदां सुमहतीं दृढाम् ॥ १०६ ॥ नानायुधानि चादित्या मुसलं वसवस्तथा ॥ महाघोराणि शस्त्राणि तारकाद्याश्च दानवाः ॥ १०७॥ स्तंभिता देवदेवेन तथान्ये भुवनेषु ये ॥ पूषा दंतान्दशन्दंतैर्बालमैक्षत मोहितः ॥ १०८ ॥ तस्यापि दशनाः पेतुर्दृष्टमात्रस्य शंभुना ॥ भगश्च नेत्रे विकृते चकार स्फुटिते च ते ॥ १०९ ॥ बलं तेजश्च योगांश्च सर्वेषां जगृहे प्रभुः ॥ अथ तेषु स्थितेष्वेव मन्युमत्सु सुरेष्वपि ॥ ११० ॥ ब्रह्मा ध्यानमुपाश्रित्य बुबोध हरचेष्टितम् ॥ सोऽभिगम्य महादेवं तुष्टाव प्रयतो विधिः ॥ १११ ॥ पौराणैः सामसंगीतैर्वैदिकैर्गुह्यनामभिः ॥ नमस्तुभ्यं महादेव महादेव्यै नमोनमः ॥ ११२ ॥ प्रसादात्तव बुद्ध्यादिर्जगदेतत्प्रवर्तते ॥ मूढाश्च देवताः सर्वा नैनं बुध्यत शंकरम् ॥ ११३ ॥ महादेवमिहायातं सर्वदेवनमस्कृतम् ॥ गच्छध्वं शरणं शीघ्रं यदि जीवितुमिच्छत ॥ ११४ ॥ ततः संभ्रमसंपन्नास्तुष्टुवुः प्रणताः सुराः ॥ नमोनमो महादेव पाहिपाहि जगत्पते ॥ ११५ ॥ दुराचारान्भवानस्मानात्मद्रोहपरायणान् ॥ अहो पश्यत नो मौढ्यं जानंतस्तव भाविनीम् ॥ ११६ ॥ भार्यामुमां महादेवीं तथाप्यत्र समागताः ॥ युक्तमेतद्यदस्माकं राज्यं गृह्येत चासुरैः ॥ ११७ ॥ येषामेवंविधा बुद्धिरस्माभिः किं कृतं त्विदम् ॥ अथ वा नो न दोषोऽस्ति पशवो हि वयं यतः ॥ ११८ ॥ त्वयैव पतिना सर्वे प्रेरिताः कुर्महे विभो ॥ ईश्वरः सर्व

१ हि–इ०पा० । २ अस्य सार्धश्लोकस्यार्थो यथार्थतस्तत्त्वता नावगम्यते । ३ गुडं तस्य शस्त्रविशेषम् । ४ किमिति प्रश्ने—अध्याहर्तव्यम् । ५ आर्षं घित्वं समासाभावेऽपि ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भूतानां पतिस्त्वं परमेश्वरः ॥ ११९ ॥ भ्रामयस्यखिलं विश्वं यन्त्रारूढं स्वमायया ॥ येन विभ्रांमिता मूढाः समायाताः स्वयंवरम् ॥ १२० ॥
तस्मै पशूनां पतये नमस्तुभ्यं प्रसीद नः ॥ अथ तेषां प्रसन्नोऽभूद्देवदेवस्त्रियंबकः ॥ १२१ ॥ यथापूर्वं चकारैतान्संस्तवाद्ब्रह्मणः प्रभुः ॥ तारकप्र
मुखा दैत्याः संक्रुद्धास्तत्र प्रोचिरे ॥ १२२ ॥ कोयमंग महादेवो न मन्यामो वयं च तम् ॥ ततः प्रहस्य बालोऽसौ हुंकारं लीलया व्यधात् ॥
॥ १२३ ॥ हुंकारेणैव ते दैत्याः स्वमेव नगरं गताः ॥ विस्मृतं सकलं तेषां स्वयंवरमुखं च तत् ॥ १२४ ॥ महादेवप्रभावेन दैत्यानां घोरकर्मणाम् ॥
एवं यस्य प्रभावो हि देवदैत्येषु फाल्गुन ॥ १२५ ॥ कथमीश्वरवाक्यार्थस्तस्मादन्यत्र मुच्यते ॥ असंशयं विमूढास्ते पश्चात्तापः पुरा महान् ॥
॥१२६॥ ईश्वरं भुवनस्यास्य ये भजंते न त्र्यंबकम् ॥ ततः संस्तूयमानः स सुरैः पद्मभुवादिभिः ॥१२७॥ वपुश्चकार देवेशस्त्र्यंबकः परमाद्भुतम् ॥
तेजसा तस्य देवास्ते सेंद्रचंद्रदिवाकराः ॥१२८॥ सब्रह्मकाः ससाध्याश्च वसुर्विश्वे च देवताः ॥ सयमाश्च सरुद्राश्च चक्षुरप्रार्थयन्प्रभुम् ॥ १२९ ॥
तेभ्यः परतमं चक्षुः स्ववपुर्द्रष्टुमुत्तमम् ॥ ददावम्बापतिः शर्वो भवान्याश्चाचलस्य च ॥ १३० ॥ लब्ध्वा रुद्रप्रसादेन दिव्यं चक्षुरनुत्तमम् ॥ सब्र
ह्मकास्तदा देवास्तमपश्यन्महेश्वरम् ॥ १३१ ॥ ततो जगुश्च मुनयः पुष्पवृष्टिं च खेचराः ॥ मुमुचुश्च तदा नेदुर्देवदुंदुभयो भृशम् ॥ १३२ ॥ जगु
र्गंधर्वमुख्याश्च ननृतुश्चाप्सरोगणाः ॥ मुमुदुर्गणपाः सर्वे मुमोदांबा च पार्वती ॥ १३३ ॥ ब्रह्माद्या मेनिरे पूर्णां भवानीं च गिरीश्वरम् ॥ तस्य देवी
ततो दृष्ट्वा समक्षं त्रिदिवौकसाम् ॥ १३४ ॥ पादयोः स्थापयामास मालां दिव्यां सुगंधिनीम् ॥ साधुसाध्विति संप्रोच्य तया तं तत्र चर्चितम् ॥
॥ १३५ ॥ सह देव्या नमश्चक्रुः शिरोभिर्भूतलाश्रितैः ॥ सर्वे सब्रह्मका देवा जयेति च मुदा जगुः ॥ १३६ ॥ ॥ इति श्रीस्कांदे महापुराण एका
शीतिसाहस्र्यां संहितायां प्रथमे माहेश्वरखण्डे कौमारिकाखण्डे कुमारेश्वरमाहात्म्ये श्रीमहादेववैवाहिकोत्साहवर्णनंनाम पञ्चविंशोऽ
ध्यायः ॥ २५ ॥ ॥ छ ॥ ॥ नारद उवाच ॥ ॥ अथ ब्रह्मा महादेवमभिवाद्य कृतांजलिः ॥ उद्वाहः क्रियतां देव इत्युवाच महेश्वरम् ॥ १ ॥
तस्य तद्वचनं श्रुत्वा प्राहेदं भगवान्हरः ॥ पराधीना वयं ब्रह्मन्हिमाद्रेस्तव चापि यत् ॥ २ ॥ यद्युक्तं क्रियतां तद्धि वयं युष्मद्वशेऽधुना ॥ ततो
ब्रह्मा स्वयं दिव्यं पुरं रत्नमयं शुभम् ॥ ३ ॥ उद्वाहार्थं महेशस्य तत्क्षणात्समकल्पयत् ॥ शतयोजनविस्तीर्णं प्रासादशतशोभितम् ॥ ४ ॥ पुरे
तस्मिन्महादेवः स्वयमेव व्यतिष्ठत ॥ ततः सप्तमुनीन्देवश्चिंतिताभ्यागतान्पुरः ॥ ५ ॥ प्राहिणोदंबिकायाश्च स्थिरपत्रार्थमीश्वरः ॥ सारुंधतीकास्ते

१ त्रिभ्रंशिताः--इ० पा० । २ मुदिताः–इ० पा० । ३ स्थिरपत्न्यर्थम्–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्र ह्लादयंतो हिमाचलम् ॥ ६ ॥ सभार्यमीश्वरगुणैः स्थिरपत्राणि चादधुः ॥ ततः संपूजितास्तेन पुनरागम्य ते[1]ऽचलात् ॥ ७ ॥ न्यवेदयंस्तथंब
काय स च तानभ्यनंदत ॥ उद्वाहार्थं ततो देवो विश्वं सर्वं न्यमंत्रयत् ॥ ८ ॥ समागतं च तत्सर्वं विना दैत्यैर्दुरात्मभिः ॥ स्थावरं जंगमं यच्च
विश्वं विष्णुपुरोगमम् ॥ ९ ॥ सब्रह्मकं पुरारातेर्महिमानमवर्धयत् ॥ ततस्तं विधिराहेदं गन्धमादनपर्वते ॥ १० ॥ पुरे स्थितं विवाहस्य देव
कालः प्रवर्तते ॥ ततस्तस्य जटाजूटे चंद्रखंडं पितामहः ॥ ११ ॥ बबंध प्रणयोदारविस्फारितविलोचनः ॥ कपर्दं शोभनं विष्णुः स्वयं चक्रेऽस्य
हर्षतः ॥ १२ ॥ कपालमालां विपुलां चामुण्डा मूर्ध्न्यबंधत ॥ उवाच चापि गिरिशं पुत्रं जनय शंकर ॥ १३ ॥ यो दैत्येंद्रकुलं हत्वा मां रक्तै
स्तर्पयिष्यति ॥ सूर्यो ज्वलच्छिखारक्तं भाभासितजगत्त्रयम् ॥ १४ ॥ बबंध देवदेवस्य स्वयमेव प्रमो[3]दतः ॥ शेषवासुकिमुख्याश्च ज्वलंतस्तेजसा
शुभाः ॥ १५ ॥ आत्मानं भूषणस्थाने स्वयं ते चक्रुरीश्वरे ॥ वायवश्च ततस्तीक्ष्णशृंगं हिमगिरिप्रभम् ॥ १६ ॥ वृषं विभूषयामासुर्नानारत्नोपप
त्तिभिः ॥ शक्रो गजाजिनं गृह्य स्वयमग्रे व्यवस्थितः ॥ १७ ॥ विना भस्म समाधाय कपाले रजतप्रभम् ॥ मनुजास्थिमयीं मालां प्रेतनाथश्च
वन्दनम् ॥ १८ ॥ वह्निस्तेजोमयं दिव्यमजिनं प्रददौ स्थितः ॥ एवं विभूषितः सर्वैर्भृत्यैरीशो बभौ भृशम् ॥ १९ ॥ ततो हिमाद्रेः पुरुषा वीरकं
प्रोचिरे वचः ॥ मा भूत्कालात्ययः शीघ्रं भवस्यैतन्निवेद्यताम् ॥ २० ॥ ततो देवं प्रणम्याह वीरकः करसंपुटी ॥ त्वरयंति महेशानं हिमाद्रेः पुरुषा
स्त्वमी ॥ २१ ॥ इति श्रुत्वा वचो देवः शीघ्रमित्येव चाब्रवीत् ॥ सप्त वारिधयस्तस्य चक्रुर्दर्पणदर्शनम् ॥ २२ ॥ तत्रैक्षत महादेवः स्वरूपं स जग
न्मयम् ॥ ततो बद्धांजलिर्धीमान्स्थाणुं प्रोवाच केशवः ॥ २३ ॥ देवदेव महादेव त्रिपुरांतक शंकर ॥ शोभसेऽनेन रूपेण जगदानंददा
यिना ॥ २४ ॥ महेश्वर यथा साक्षादपरस्त्वं महेश्वरः ॥ ततः स्मयन्महादेवो जयेति भुवने श्रुतः ॥ २५ ॥ करमालंब्य विष्णोश्च वृषभं रुरुहे
शनैः ॥ ततश्च वसवो देवाः शूलं तस्य न्यवेदयन् ॥ २६ ॥ धनदो निधिभिर्युक्तः समीपस्थस्ततोऽभवत् ॥ स शूलपाणिर्विश्वात्मा संचचाल
ततो हरः ॥ २७ ॥ देवदुंदुभिनादैश्च पुष्पासारैश्च गीतकैः ॥ नृत्यद्भि[4]रप्सरोभिश्च जयेति च महास्वनैः ॥ २८ ॥ सव्यदक्षिणसंस्थानौ ब्रह्मविष्णू
तु जग्मतुः ॥ हंसं च गरुडं चैव समारुह्य महाप्रभौ ॥ २९ ॥ अथादितिर्दितिः सा च दनुः कद्रूः सुपर्णजा ॥ पौलोमी सुरसा चैव सिंहिका

१ ते च तत्–इ० पा० । २ विश्वं सर्वं विश्वं जगत्–इत्यर्थः । ३ प्रबोधतः–इ०, प्रबोधितः–इ०च पा० । ४ नृत्यद्भिः अन्यैः देवैः च चपरम्–अप्सरोभिः–इति योजनात्र युक्ता । अप्सरसां विशेषणत्वे स्त्रीलिङ्गप्रयोगस्य युक्तत्वात्–"उगितश्च" इति ङीब्विधानात् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सुरभिर्मुनिः ॥ ३० ॥ सिद्धिर्माया क्षमा दुर्गा देवी स्वाहा स्वधा सुधा ॥ सावित्री चैव गायत्री लक्ष्मीः सा दक्षिणा द्युतिः ॥ ३१ ॥ स्पृहा मतिर्धृतिर्बुद्धिर्मर्थिर्ऋद्धिः सरस्वती ॥ राका कुहूः सिनीवाली देवी भानुमती तथा ॥ ३२ ॥ धरणी धारणी वेला राज्ञी चापि च रोहिणी ॥ इत्येताश्चान्यदेवानां मातरः पत्नयस्तथा ॥ ३३ ॥ उद्वाहं देवदेवस्य जग्मुः सर्वा मुदान्विताः ॥ उरगा गरुडा यक्षा गंधर्वाः किंनरा नराः ॥ ॥ ३४ ॥ सागरा गिरयो मेघा मासाः संवत्सरास्तथा ॥ वेदा मंत्रास्तथा यज्ञाः श्रौता धर्माश्च सर्वशः ॥ ३५ ॥ हुंकाराः प्रणवाश्चैव इतिहासाः सहस्रशः ॥ कोटिशश्च तथा देवा महेंद्राद्याः सवाहनाः ॥ ३६ ॥ अनुजग्मुर्महादेवं कोटिशोऽर्बुदशश्च हि ॥ गणाश्च पृष्ठतो जग्मुः शंखवर्णाश्च कोटिशः ॥ ३७ ॥ दशभिः केकराख्याश्च विद्युतोऽष्टाभिरेव च ॥ चतुःषष्ट्या विशाखाश्च नवभिः पारियात्रिकाः ॥ ३८ ॥ षड्भिः सर्वांतकः श्रीमांस्तथैव विकृताननः ॥ ज्वालाकेशो द्वादशभिः कोटिभिः संवृतो ययौ ॥ ३९ ॥ सप्तभिः समदः श्रीमान्दुंदुभोष्टाभिरेव च ॥ पंचभिश्च कपालीशः षड्भिः संह्रादकः शुभः ॥ ४० ॥ कोटिकोटिभिरेवैकः कुंडकः कुंभकस्तथा ॥ विष्टंभोऽष्टाभिरेवेह गणपः सर्वसत्तमः ॥ ४१ ॥ पिप्पलश्च सहस्रेण सन्नादश्च तथा बली ॥ आवेशनस्तथाष्टाभिः सप्तभिश्चंद्रतापनः ॥ ४२ ॥ महाकेशः सहस्रेण नंदिर्द्वादशभिस्तथा ॥ नगः कालः करालश्च महाकालः शतेन च ॥ ४३ ॥ अग्निकः शतकोटया वै कोटयाग्निमुख एव च ॥ आदित्यमूर्धा कोट्या च कोट्या चैव धनावहः ॥४४॥ सन्नागश्च शतेनैव कुमुदः कोटिभिस्त्रिभिः ॥ अमोघः कोकिलश्चैव कोटिकोट्या सुमंत्रकः ॥ ४५ ॥ काकपादस्तथा षष्ट्या षष्ट्या संतानको गणः ॥ महाबलश्च नवभिर्मधुपिंगश्च पिंगलः ॥ ४६ ॥ नीलो नवत्या सप्तत्या चतुर्वक्त्रश्च पूर्वपात् ॥ वीरभद्रश्चतुःषष्ट्या करणो बालकस्तथा ॥ ४७ ॥ पंचाक्षः शतमन्युश्च मेघमन्युश्च विंशतिः ॥ काष्ठकोटिश्चतुःषष्ट्या सुकोशो वृषभस्तथा ॥ ४८ ॥ विश्वरूपस्तालकेतुः पंचाशच्च सिताननः ॥ ईशानो वृद्धदेवश्च दीप्तात्मा मृत्युहा तथा ॥ ४९ ॥ विषादो यमहा चैव गणो भृंगारिटिस्तथा ॥ अशनी हासकश्चैव चतुःषष्ट्या सहस्रपात् ॥ ५० ॥ एते चान्ये च गणपा असंख्याता महाबलाः ॥ सर्वे सहस्रहस्ताश्च जटामुकुटधारिणः ॥ ५१ ॥ चंद्रलेखावतंसाश्च नीलकंठास्त्रिलोचनाः ॥ हारकुंडलकेयूरमुकुटाद्यैरलंकृताः ॥ ५२ ॥ अणिमादिगुणैर्युक्ताः शक्ताः शापप्रसादयोः ॥ सूर्यकोटिप्रतीकाशास्तत्राजग्मुर्गणेश्वराः ॥ ५३ ॥ पातालांबरभूमिस्थाः सर्वलोकनिवासिनः ॥ तुंबुरुर्नारदो हाहा हूहूश्चैव तु सामगाः ॥ ५४ ॥ तंत्रीमादाय वाद्यां

१ आर्षोऽयं प्रयोगः । २ जनुः—इ० पा० । ३ तुंगः—इ० पा० । ४ कोटिकोटिः—इ०पा० । ५ कुणपाः—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्चाऽवादयञ्छंकरोत्सवे ॥ ऋषयः कृत्स्नशश्चैव वेदगीतांस्तपोधनाः ॥ ९५ ॥ पुण्यान्वैवाहिकान्मंत्राञ्जेपुः संहृष्टमानसाः ॥ एवं प्रतस्थे गिरिशो वीज्यमानश्च गंगया ॥ ९६ ॥ तथा यमुनया चापांपतिना धृतच्छत्रया ॥ स्त्रीभिर्नानाविधालापैर्लाजाभिश्चानुमोदितः ॥ ९७ ॥ महोत्सवेन देवेशो गिरिस्थानं विवेश सः ॥ प्रभासत्स्वर्णकलशं तोरणानां शतैर्युतम् ॥ ९८ ॥ वैडूर्यबद्धभूमिस्थं रत्नजैश्च गृहैर्युतम् ॥ तत्प्रविश्य स्तूयमानो द्वारमभ्याससाद ह ॥ ९९ ॥ ततो हिमाचलस्तत्र दृश्यते व्याकुलाकुलः ॥ आदिशदात्मभृत्यानां महादेव उपस्थिते ॥ ॥ ६० ॥ ततो ब्रह्माणमचलो गुरुत्वे प्रार्थयत्तदा ॥ कृत्यानां सर्वभारेषु वासुदेवं च बुद्धिमान् ॥ ६१ ॥ प्रत्याह च विवाहेऽस्मिन्कुमारीभ्रातरं विना ॥ भविष्यति कथं विष्णो लाजहोमादिकर्मसु ॥ ६२ ॥ सुतो हि मम मैनाकः स प्रविष्टोऽर्णवे स्थितः ॥ इति चिंताविषण्णं तं विष्णुराह महामतिः ॥ ६३ ॥ अत्र चिंता न कर्तव्या गिरिराज कथंचन ॥ अहं भ्राता जगन्मातुरेतदेवं[1] च नान्यथा ॥ ६४ ॥ ततः प्रमुदितः शैलः पार्वतीं च स्वलंकृताम् ॥ सखीभिः कोटिसंख्याभिर्वृतां प्रावेशयत्सदः ॥ ६५ ॥ ततो नीलमयस्तंभं ज्वलत्कांचनकुट्टिमम् ॥ मुक्ताजालपरिष्कारं ज्वलितौषधिदीपितम् ॥ ६६ ॥ रत्नासनसहस्राढ्यं शतयोजनविस्तृतम् ॥ विवाहमंडपं शर्वो विवेशानुचरावृतः ॥ ६७ ॥ ततः शैलः सपत्नीकः पादौ प्रक्षाल्य हर्षितः ॥ भवस्य तेन तोयेन सिषिचे स्वं जगत्तथा ॥ ६८ ॥ पाद्यमाचमनं दत्त्वा मधुपर्कं च गां तथा ॥ प्रदानस्य प्रयोगं च संचिंतयंति ब्राह्मणाः ॥ ६९ ॥ दौहित्रीं कव्यवाहानां दद्मि पुत्रीं स्वकामहम् ॥ इत्युक्त्वा तस्थिवाञ्छैलो, न जानाति हरस्य सः ॥ ७० ॥ ततः सर्वानपृच्छत्स कुलं कोऽपि न वेद तत् ॥ ततो विष्णुरिदं प्राह पृच्छ्यंतेऽन्ये किमर्थतः ॥ ७१ ॥ अज्ञातकुलतां तस्य पृच्छ्यतामयमेव च ॥ अहिरेव अहेः पादान्वेत्ति नान्यो हिमाचल ॥ ७२ ॥ स्वगोत्रं यदि न ब्रूते न देया भगिनी मम ॥ ततो हासस्तदा जज्ञे सर्वेषां सुमहास्वनः ॥ ७३ ॥ निवृत्तश्च क्षणाद्भूयः किं वक्ष्यति हरस्त्विति ॥ ततो विमृश्य बहुधा किंचिद्भीताननो[2] यथा ॥ ७४ ॥ लज्जाजडः स्मितं चक्रे ततः पार्थ स वै हरः ॥ ततो विशिष्टा ब्रुवति शीघ्रं कालोऽतिवर्तते ॥ ७५ ॥ हरिः प्राह महेशानं बिभ्यदावेद्म्यहं तव ॥ मातामहं च पितरं प्रयोगं शृणु भूधर ॥ ७६ ॥ आत्मपुत्राय ते शंभो आत्मदौहित्रकाय ते ॥ इत्युक्ते विष्णुना सर्वे साधुसाध्विति ते जगुः ॥ ७७ ॥ देवोऽप्युदाहरेद्बुद्धिं सर्वेभ्योऽप्यधिकां वराम् ॥ ततः शैलस्तथोक्त्वा दत्त्वा देवीं च सोदकम् ॥ ७८ ॥ आत्मानं चापि देवाय प्रददौ सोदकं नगः ॥ ततः सर्वे तुष्टुवुस्तं विवाहं विस्मयान्विताः ॥ ७९ ॥ दाता

१ एतदेव न संशयः--इ० पा० । २ यदि स्वं गोत्रं न कथयिष्यामि तदायं पार्वतीं न दास्यतीति हेतोः किंचित् भीतमाननं यस्य सः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

महीभृतां नाथो होता देवश्चतुर्मुखः ॥ वरः पशुपतिः साक्षात्कन्या विश्वारणिस्तथा ॥ ८० ॥ ततः स्तुवत्सु मुनिषु पुष्पवर्षे महत्यपि ॥ नदत्सु
देवतूर्येषु करं जग्राह त्र्यम्बकः ॥ ८१ ॥ देवो देवीं समालोक्य सलज्जां हिमशैलजाम् ॥ न तृप्यति न चाह्लादत्सा च देवं वृषध्वजम् ॥ ८२ ॥ तत्र
ब्रह्मादिमुनयो देवीमद्भुतरूपिणीम् ॥ पश्यंतः शरणं जग्मुर्मनसा परमेश्वरम् ॥ ८३ ॥ मा मुह्याम पार्वतीं च यथा नारदपर्वतौ ॥ ततस्तथैव तच्चक्रे
सर्वेषामीप्सितं वचः ॥ ८४ ॥ ततो देवैश्च मुनिभिः संस्तुतः परमेश्वरः ॥ प्रविवेश शुभां वेदिं मूर्तिमज्ज्वलनाश्रिताम् ॥ ८५ ॥ वेधाः श्रुतीरितैर्मं
त्रैर्मूर्तिमद्भिरुपस्थितैः ॥ मूर्तमग्निं जुहाव त्रिः परिक्रम्य च तं हरः ॥ ८६ ॥ लाजाहोम उमाभ्राता प्राह तं सस्मितं हरिः ॥ बहवो मिलिताः संति
लोकाः संमर्द ईश्वर ॥ ८७ ॥ सावधानेन रक्ष्याणि भूषणानि त्वया हर ॥ ततो हरश्च तं प्राह स्वजने माऽतिगोपय ॥ ८८ ॥ किंचित्प्रार्थय
दास्यामि प्राह विष्णुस्ततो वरम् ॥ त्वयि भक्तिर्दृढा मेऽस्तु स च तद्दुर्लभं ददौ ॥ ८९ ॥ ददतुः सृष्टिसंरक्षां ब्रह्मणे दक्षिणामुभौ ॥ अग्नये
यज्ञभागांश्च प्रीतौ हरजनार्दनौ ॥ ९० ॥ भृग्वादीनां ततो दत्त्वा श्रुतिरक्षणदक्षिणाम् ॥ ततो गीतैश्च नृत्यैश्च भोजनैश्च यथेप्सितैः ॥ ९१ ॥
महोत्सवैरनेकैश्च विस्मयं समपद्यत ॥ विसृज्य लोकं तं सर्वं किमिच्छादानकैर्भवः ॥ ९२ ॥ सरस्वत्या च पितरौ देव्याश्चाऽऽश्वास्य दुःखितौ ॥
आमंत्र्य हिमशैलेंद्रं ब्रह्माणं च सकेशवम् ॥ ९३ ॥ जगाम मंदरगिरिं गिरिंणा सानुगोर्चितः ॥ ९४ ॥ ततो गते भगवति नीललोहिते सहोमया
गिरिममलं हि भूधरः ॥ सबांधवो रुदिति हि कस्य नो मनो विसंष्ठुलं जगति हि कन्यकापितुः ॥ ९५ ॥ इमं विवाहं गिरिराजपुत्र्याः शृणोति
चाध्येति च यो नरः शुचिः ॥ विशेषतश्चापि विवाहमंगले स मंगलं वृद्धिमवाप्नुते चिरम् ॥ ९६ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां
संहितायां प्रथमे माहेश्वरखण्डे कौमारिकाखण्डे कुमारेशमाहात्म्ये हरगौरीविवाहवर्णनंनाम षड्विंशोऽध्यायः ॥ २६ ॥ ॥ छ ॥ ॥ नारद
उवाच ॥ ॥ ततो निरुपमं दिव्यं सर्वरत्नमयं शुभम् ॥ ईशाननिर्मितं साक्षात्सह देव्याविशद्गृहम् ॥ १ ॥ तत्रासौ मंदरगिरौ सह देव्या भगाक्षहा ॥
प्रासादे तत्र चोद्याने रेमे संहृष्टमानसः ॥ २ ॥ एतस्मिन्नंतरे देवास्तारकेणातिपीडिताः ॥ प्रोत्साहितेन चात्यर्थं मया कलिचिकीर्षुणा ॥ ३ ॥

१ श्रीमतीं च–इ० पा० । २ नर्मोक्तिरियम्--स्वजने तव स्वकीयजने पार्वतीरूपे माम् अति गोपय–अत्यंतं किंचिदाभूषणादिकमपहृत्य गुप्तं मा कुरु । इदानीं पार्वतीभ्रातृत्वं त्वया स्वीकृतं, तर्हि किमपि अलंकारादिकं मा अपहर । यदि तव किंचिदिच्छा स्यात् तर्हि प्रार्थय अहं तवाभिलषितं दास्यामि इति शंकरस्य विष्णुं प्रति नर्मवचनम् । ३ अवरत्--इ०पा० । ४ किमिच्छादानकैः--यस्ययस्यया येच्छा तत्तदिच्छानुसारेण तस्मैतस्मै दानैः–इत्यर्थः । ५ सरस्वत्या मंजुलमधुरया वाण्या--इत्यर्थः । ६ आर्षः प्रयोगः । ७ विसंष्ठुलं--विह्वलमित्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आसाद्य ते भवं देवं तुष्टुवुर्बहुधा स्तवैः ॥ एतस्मिन्नंतरे देवी प्रोद्वर्तयत गात्रकम् ॥ ४ ॥ उद्वर्तनमलेनाथ नरं चक्रे गजाननम् ॥ देवानां संस्तवैः पुण्यैः कृपयाभिपरिप्लुता ॥ ५ ॥ पुत्रेत्युवाच तं देवी ततः संहृष्टमानसा ॥ एतस्मिन्नंतरे शर्वस्तत्रागत्य वचोऽब्रवीत् ॥ ६ ॥ पुत्रस्तवायं गिरिजे शृणु यादृग्भविष्यति ॥ विक्रमेण च वीर्येण कृपया सदृशो मया ॥ ७ ॥ यथाहं तादृशश्चासौ पुत्रस्ते भविता गुणैः ॥ ये च पापा दुराचारा वेदान्धर्मं द्विषंति च ॥ ८ ॥ तेषामामरणांतानि विघ्नान्येष करिष्यति ॥ ये च मां नैव मन्यंते विष्णुं वापि जगद्गुरुम् ॥ ९ ॥ विघ्निता विघ्नराजेन ते यास्यंति महत्तमः ॥ तेषां गृहेषु कलहः सदा नैवोपशाम्यति ॥ १० ॥ पुत्रस्य तव विघ्नेन समूलं तस्य नश्यति ॥ येषां न पूज्याः पूज्यंते क्रोधासत्यपराश्च ये ॥ ११ ॥ रौद्रसाहसिका ये च तेषां विघ्नं करिष्यति ॥ श्रुतिधर्माञ्ज्ञातिधर्मान्पालयंति गुरूंश्च ये ॥ १२ ॥ कृपालवो गतक्रोधास्तेषां विघ्नं हरिष्यति ॥ सर्वे धर्माश्च कर्माणि तथा नानाविधानि च ॥ १३ ॥ सविघ्नानि भविष्यंति पूजयास्य विना शुभे ॥ एवं श्रुत्वा उमा प्राह एवमस्त्विति शंकरम् ॥ १४ ॥ ततो बृहत्तनुः सोऽभूत्तेजसा द्योतयन्दिशः ॥ ततो गणैः समं शर्वः सुराणां प्रददौ च तम् ॥ यावत्तार कहंता वो भवेत्तावदयं प्रभुः ॥ १५ ॥ ततो विघ्नपतिर्देवैः संस्तुतः प्रणतार्तिहा ॥ चकार तेषां कृत्यानि विघ्नानि दितिजन्मनाम् ॥ १६ ॥ पार्वती च पुनर्देवी पुत्रत्वे परिकल्प्य च ॥ अशोकस्यां[1]कुरं वार्भिरवर्द्धयत स्वाहृतैः ॥ १७ ॥ सप्तर्षीनथ चाहूय संस्कारमंगलं तरोः[2] ॥ कारया मास तन्वंगी ततस्तां मुनयोऽब्रुवन् ॥ १८ ॥ त्वयैव दर्शिते मार्गे मर्यादां कर्तुमर्हसि ॥ किं फलं भविता देवि कल्पितैस्तरुपुत्रकैः ॥ १९ ॥ ॥ ॥ देव्युवाच ॥ ॥ यो वै निरुदके ग्रामे कूपं कारयते बुधः ॥ यावत्तोयं भवेत्कूपे तावत्स्वर्गे स मोदते ॥ २० ॥ दशकूपसमा वापी दशवापी समं सरः ॥ दशसरःसमा कन्या दशकन्यासमः क्रतुः ॥ २१ ॥ दशक्रतुसमः पुत्रो दशपुत्रसमो द्रुमः ॥ २२ ॥ एषैव मम मर्यादा नियता लोकभाविनी ॥ जीर्णोद्धारे कृते वापि फलं तद्द्विगुणं मतम् ॥ २३ ॥ ॥ इति गणेशोत्पत्तिः ॥ ॥ ततः कदाचिद्भगवानुमया सह मंदरे ॥ मंदिरे हर्षजनने कलधौतमये शुभे ॥ २४ ॥ प्रकीर्णकुसुमामोदमहालिकुलकूजिते ॥ किंनरोद्गीतसंगीत प्रतिशब्दितमध्यके ॥ २५ ॥ क्रीडामयूरैर्हंसैश्च श्रुतैश्चैवाभिनादिते ॥ मौक्तिकैर्विविधै रत्नैर्विनिर्मितगवाक्षके ॥ २६ ॥ तत्र पुण्यकथाभिश्च क्रीडतो रुभयोस्त[3]योः ॥ प्रादुरभून्महाञ्छब्दः पूरितांबरगोचरः ॥ २७ ॥ तं श्रुत्वा कौतुकाद्देवी किमेतदिति शंकरम् ॥ पर्यपृच्छच्छुभतनुर्हरं विस्मयपूर्व

१ अशोकस्य--अशोकवृक्षस्य--इत्यर्थः । पुत्रप्राप्तयेऽशोकतत्रतमिदम् । २ तरुः--इ० पा० । ३ तथा--इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कम् ॥ २८ ॥ तामाह देवीं गिरिशो दृष्टपूर्वास्तु ते त्वया ॥ एते गणा मे क्रीडंति शैलेऽस्मिंस्त्वत्प्रियाः शुभे ॥ २९ ॥ तपसा ब्रह्मचर्येण क्लेशेन क्षेत्रसाधनैः ॥ यैरहं तोषितः पृथ्व्यां त एते मनुजोत्तमाः ॥ ३० ॥ मत्समीपमनुप्राप्ता मम लोकं वरानने ॥ चराचरस्य जगतः सृष्टिसंहारणक्षमाः ॥ ३१ ॥ विनैतान्नैव मे प्रीतिर्नैभिर्विरहितो रमे ॥ एते अहमहं चैते तानेतान्पश्य पार्वति ॥ ३२ ॥ इत्युक्ता विस्मिता देवी ददृशे तान्गवाक्षके ॥ स्थिता पद्मपलाशाक्षी महादेवेन भाषिता ॥ ३३ ॥ केचित्कृशा ह्रस्वदीर्घाः केचित्स्थूलमहोदराः ॥ व्याघ्रेभमेषाजमुखा नानाप्राणिमहामुखाः ॥ ३४ ॥ व्याघ्रचर्मपरीधाना नग्ना ज्वालामुखाः परे ॥ गोकर्णा गजकर्णाश्च बहुपादमुखेक्षणाः ॥ ३५ ॥ विचित्रवाहनाश्चैव नानायुधधरास्तथा ॥ गीतवादित्रतत्त्वज्ञाः सत्त्वगीतरसप्रियाः ॥ ३६ ॥ तान्दृष्ट्वा पार्वती प्राह कतिसंख्याभिधास्त्वमी ॥ ३७ ॥ ॥ श्रीशंकर उवाच ॥ ॥ असंख्येयास्त्वमी देवि असंख्येयाभिधास्तथा ॥ जगदापूरितं सर्वमेतैर्भीमैर्महाबलैः ॥ ३८ ॥ सिद्धक्षेत्रेषु रथ्यासु जीर्णोद्यानेषु वेश्मसु ॥ दानवानां शरीरेषु बालेषून्मत्तकेषु च ॥ ३९ ॥ एते विशति मुदिता नानाहारविहारिणः ॥ ऊष्मपाः फेनपाश्चैव धूम्रपा मधुपायिनः ॥ मदाहाराः सर्वभक्ष्यास्तथान्ये चाप्यभोजनाः ॥ ४० ॥ गीतनृत्योपहाराश्च नानावाद्यरवप्रियाः ॥ अनंतत्वादमीषां च वक्तुं शक्या न वै गुणाः ॥ ४१ ॥ ॥ श्रीदेव्युवाच ॥ ॥ मनःशिलेन कल्केन य एष च्छुरिताननः ॥ तेजसा भास्कराकारो रूपेण सदृशस्तव ॥ ४२ ॥ आकर्ण्याकर्ण्य ते देव गणैर्गीतान्महागुणान् ॥ मुहुर्नृत्यति हास्यं च विदधाति मुहुर्मुहुः ॥ ४३ ॥ सदाशिवशिवेत्येवं विह्वलो वक्ति यो मुहुः ॥ धन्योऽयमीदृशी यस्य भक्तिस्त्वयि महेश्वरे ॥ ४४ ॥ एनं विज्ञातुमिच्छामि किंनामासौ गणस्तव ॥ ॥ श्रीशंकर उवाच ॥ ॥ स एष वीरको देवि सदा मेऽद्रिसुते प्रियः ॥ ४५ ॥ नानाश्चर्यगुणाधारः प्रतीहारो मतोऽबिके ॥ ॥ देव्युवाच ॥ ॥ ईदृशस्य सुतस्यापि ममोत्कंठा पुरांतक ॥ ४६ ॥ कदाहमीदृशं पुत्रं लप्स्याम्यानंददायकम् ॥ ॥ शर्व उवाच ॥ ॥ एष एव सुतस्तेस्तु यावदीदृक्परो भवेत् ॥ ४७ ॥ इत्युक्ता विजयां प्राह शीघ्रमानय वीरकम् ॥ विजया च ततो गत्वा वीरकं वाक्यमब्रवीत् ॥ ४८ ॥ एहि वीरक ते देवी गिरिजा तोषिता शुभा ॥ त्वामाह्वयति सा देवी भवस्यानुमते स्वयम् ॥ ४९ ॥ इत्युक्तः संभ्रमयुतो मुखं संमार्ज्य पाणिना ॥ देव्याः समीपमागच्छज्जययाऽनुगतः शनैः ॥ ५० ॥ तं दृष्ट्वा गिरिजा प्राह गिरा मधुरवर्णया ॥ एह्येहि पुत्र दत्तस्त्वं भवेन मम पुत्रकः ॥ ५१ ॥ इत्युक्तो दंडवद्देवीं प्रणम्यावस्थितः पुरः ॥ माता ततस्तमालिंग्य कृत्वोत्संगे च वीर

१ पूज्याः--इ०पा० । २ परस्मैपदमार्षम् । ३ नरः--इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कम् ॥९२॥ चुचुंब च कपोले तं गात्राणि च प्रमार्जयत् ॥ भूषयामास दिव्यैस्तं स्वयं नानाविभूषणैः ॥९३॥ एवं संकल्प्य तं पुत्रं लालयित्वा उमा चिरम् ॥ उवाच पुत्र क्रीडेति गच्छ सार्धं गणैरिति ॥९४॥ ततश्चिक्रीड मध्ये स गणानां पार्वतीसुतः ॥ मुहुर्मुहुः स्वमनसि स्तुवन्भक्तिं स शांकरीम् ॥९५॥ प्रणम्य सर्वभूतानि प्रार्थयाम्यस्मिं[1] दुष्करम् ॥ भक्त्या भजध्वमीशानं यस्या भक्तेरिदं फलम् ॥ ९६ ॥ क्रीडितुं वीरके याते ततो देवी च पार्वती ॥ नानाकथाभिश्चिक्रीड पुनरेव जटाभृता ॥ ९७ ॥ ततो गिरिसुताकण्ठे क्षिप्त[2]बाहुर्महेश्वरः ॥ तपसस्तु विशेषार्थं नर्म देवीं किलाब्रवीत ॥ ९८ ॥ स हि गौरतनुः शर्वो विशेषाच्छशिशोभितः ॥ रंजिता च विभावर्या देवी नीलोत्पलच्छविः ॥ ९९ ॥ ॥ शर्व उवाच ॥ ॥ शरीरे मम तन्वंगी सिते भास्यसितद्युतिः ॥ भुजंगीवासिता शुभ्रे संश्लिष्टा चन्दने तरौ ॥ ६० ॥ चंद्रज्योत्स्नाभिसंपृक्ता तामसी रजनी यथा ॥ रजनी वा सिते पक्षे दृष्टिदोषं ददासि मे ॥ ६१ ॥ इत्युक्ता गिरिजा तेन कण्ठं शर्वाद्विमुच्य सा ॥ उवाच कोपरक्ताक्षी भ्रुकुटीविकृतानना ॥ ६२ ॥ स्वकृतेन जनः सर्वो जनेन परिभूयते ॥ अवश्यमर्थी प्राप्नोति खण्डनां शशिखंडभृत् ॥६३॥ तपोभिर्दीप्तचरितैर्यत्त्वां प्रार्थितवत्यहम् ॥ तस्य मे नियमस्यैवमवमानः पदेपदे ॥ ॥ ६४ ॥ नैवाहं कुटिला शर्व विषमा न च धूर्जटे ॥ स्वदोषैस्त्वं गतः क्षांतिं तथा दोषाकरश्रियः ॥ ६५ ॥ नाहं मुष्णामि नयने नेत्रहंता भवान्भव ॥ भगस्तत्ते विजानाति तथैवेदं जगत्त्रयम् ॥ ६६ ॥ मूर्ध्नि शूलं जनयसे स्वैर्दोषैर्मामधिक्षिपन् ॥ यत्त्वं मामाह कृष्णेति महाकालोऽसि विश्रुतः ॥ ६७ ॥ यास्याम्यहं परित्यक्तुमात्मानं तपसा गिरिम् ॥ जीवंत्या नास्ति मे कृत्यं धूर्तेन परिभूतया ॥ ६८ ॥ निशम्य तस्या वचनं कोपतीक्ष्णाक्षरं भवः ॥ उवाचाथ च संभ्रांतो दुर्ज्ञेयचरितो हरः ॥ ६९ ॥ न तत्त्वज्ञासि गिरिजे नाहं निंदापरस्तव ॥ चाटूक्तिबुद्ध्या कृतवांस्तवाहं नर्मकीर्तनम् ॥ ७० ॥ विकल्पः स्वच्छचित्तेति गिरिजैषा मम प्रिया ॥ प्रायेण भूतिलिप्तानामन्यथा चिंतिता हृदि ॥ ७१ ॥ अस्मादृशानां कृष्णांगि प्रवर्ततेऽन्यथा गिरः ॥ यद्येवं कुपिता भीरु [3]न ते वक्ष्याम्यहं पुनः ॥ ७२ ॥ नर्मवादी भविष्यामि जहि कोपं शुचिस्मिते ॥ शिरसा प्रणतस्तेऽहं रचितस्ते मयाञ्जलिः ॥ ७३ ॥ दीनेनाप्यपमानेन निंदिता नमि विक्रियाम् ॥ वरमस्मि विनम्रोऽपि न त्वं देवि गुणान्विता ॥ ७४ ॥ इत्यनेकैश्चाटुवाक्यैः सूक्तैर्देवेन बोधिता ॥ कोपं तीव्रं न तत्याज सती मर्मणि घट्टिता ॥ ७५ ॥ अवष्टब्धावथ क्षिप्त्वा पादौ शंकरपाणिना ॥ विपर्यस्तालका वेगाद्गन्तुमैच्छत शैलजा ॥ ७६ ॥ तस्यां व्रजन्त्यां कोपेन पुनराह पुरांतकः ॥ सत्यं सर्वैरवयवैः सुतेति सदृशी पितुः ॥ ७७ ॥

१ अस्मि—इति अहमर्थकं विभक्तिप्रतिरूपकमव्ययम् । २ क्षिप्य बाहुम्--इ० पा० । ३ त्वं तवाहं न ते पुनः--इ० पा० । ४ तवायं रचितोऽञ्जलिः--इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हिमाचलस्य शृंगैस्तैर्मेघमालाकुलैर्मनः ॥ तथा दुरवगाह्योऽसौ हृदयेभ्यस्तवाशयः ॥ ७८ ॥ काठिन्यं कष्टमस्मिंस्ते वनेभ्यो बहुधा गतम् ॥
कुटिलत्वं नदीभ्यस्ते दुःसेव्यत्वं हिमादपि ॥ ७९ ॥ संक्रांतं सर्वमेवैतत्तव देवि हिमाचलात् ॥ इत्युक्ता सा पुनः प्राह गिरिशं शैलजा तदा ॥
॥ ८० ॥ कोपकंपितधूम्रास्या प्रस्फुरद्दशनच्छदा ॥ मा शर्वात्मोपमानेन निंद त्वं गुणिनो जनान् ॥ ८१ ॥ तवापि दुष्टसंपर्कात्संक्रांतं सर्वमेव
हि ॥ व्यालेभ्योऽनेकजिह्वत्वं भस्मनः स्नेहवन्ध्यता ॥ ८२ ॥ हृत्कालुष्यं शशांकात्ते दुर्बोधत्वं वृषादपि ॥ अथवा बहुनोक्तेन अलं वाचा श्रमेण मे
॥ ८३ ॥ श्मशानवास आसीस्त्वं नग्नत्वान्न तव त्रपा ॥ निर्घृणत्वं कपालित्वादेवं कः शक्नुयात्तवै ॥ ८४ ॥ इति श्रीस्कांदे महापुराण एकाशी
तिसाहस्र्यां संहितायां प्रथमे माहेश्वरखण्डे कौमारिकाखण्डे कुमारेश्वरमाहात्म्ये पार्वतीप्रकोपवर्णनंनाम सप्तविंशोऽध्यायः ॥ २७ ॥ ॥ छ ॥
॥ ॥ नारद उवाच ॥ ॥ इत्युक्ता मदिरात्तस्मान्निर्जगाम हिमाद्रिजा ॥ तस्यां व्रजंत्यां चक्रुश्च गणाः किलकिलध्वनिम् ॥ १ ॥ क्व मातर्गच्छ
सीत्युक्त्वा रुदन्तो धाविताः पुरः ॥ विष्टभ्य चरणौ देव्या वीरको बाष्पगद्गदम् ॥ २ ॥ प्रोवाच मातः किं न्वेतत्क यासि कुपिता त्वरा[3]॥अहं त्वामनु
यास्यामि मातरं स्नेहवत्सलाम् ॥ ३ ॥ नाहं सहिष्ये परुषं गिरीशस्य त्वयोज्झितः ॥ पुत्रः पारुष्यपात्रं हि भवेन्मात्रा विना पितुः ॥ ४ ॥ उन्नाम्य
वदनं पश्चाद्दक्षिणेन तु पाणिना ॥ उवाच वीरकं माता मा शोकं पुत्र भावय ॥ ५ ॥ शैलाग्रात्पतितुं नैव न्[4]याय्यं गंतुं मया सह ॥ वक्ष्यामि पुत्र
ते योग्यं तत्तु कार्यं त्वया शृणु ॥ ६ ॥ कृष्णेत्युक्ता हरेणाहं निंदिता च तृ[5]णायिता ॥ साहं तपः करिष्यामि यथा गौरीत्वमाप्नुयाम् ॥ ७ ॥ गौरांगी
लंपटो ह्येष यातायां मय्यनंतरम् ॥ द्वाररक्षा त्वया कार्या नित्यं रंध्रान्यवेक्षिणा ॥ ८ ॥ यथा न काचित्प्रविशेद्योषिदत्र हरांतिके ॥ दृष्ट्वा परां स्त्रियं
चात्र वदेथा मम पुत्रक ॥ ९ ॥ शीघ्रमेव करिष्यामि ततो युक्तमनंतरम् ॥ एवमस्त्विति तां देवीं वीरकः प्राह सां[6]प्रतम् ॥ १० ॥ मातुराज्ञा सु[7]तो ह्लाद
प्लावितांगो गतज्वरः ॥ जगाम त्र्यक्षं संद्रष्टुं प्रणिपत्य च मातरम् ॥११॥ गजवक्त्रं ततः प्राह प्रणम्य समवस्थितम् ॥ साश्रुकंठं प्रयाचंतं नय मामपि
पार्वति ॥ १२ ॥ गजवक्त्रं हि त्वां बाल मामिवोप[8]हसिष्यति ॥ तदागच्छ मया सार्धं या गतिर्मे तवापि सा ॥ १३ ॥ पराभवाद्धि धूर्तानां मरणं

१ गिरिजा--इ० पा० । २ दोषान्वक्तुम्--इति शेषः । ३ त्वरा--त्वरयेत्यर्थः । ४ मात्रर्थे शोकं कृत्वा--शैलाग्रात् पतितुं त्वया मया सह गन्तुं न न्याय्यम् । इत्यर्थो लापनीयः । अयमेव चार्थो युज्यते--मातुः पुत्रसमाधाने । ५ तृणायिता--तृणवत्तुच्छा कृता । ६ मातुराज्ञा--सांप्रतम्--इति वीरकः प्राह--मातुराज्ञा सांप्रतं--योग्येत्यर्थः--तथैव करिष्यामि यथा भवत्याज्ञापयतीति । ७ सुतो ह्लादप्लाविताङ्गः--इत्युत्तरान्वयि । ८ उपहनिष्यति--इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

साधु पुत्रक ॥ एवमुक्त्वा समादाय हिमाद्रिं प्रति सा ययौ ॥ १४ ॥ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां प्रथमे माहेश्वर खण्डे कौमारिकाखण्डे कुमारेश्वरमाहात्म्ये पार्वत्यास्तपोर्थं गमनवर्णनंनामाष्टाविंशोऽध्यायः ॥ २८ ॥ ॥ छ ॥ ॥ नारद उवाच ॥ ॥ व्रजंती गिरिजाऽपश्यत्सखीं मातुर्महाप्रभाम् ॥ कुसुमामोदिनींनाम तस्य शैलस्य देवताम् ॥ १ ॥ सापि दृष्ट्वा गिरिसुतां स्नेहविक्लवमानसा ॥ क्वपुनर्गच्छसीत्युच्चैरालिंग्योवाच देवता ॥ २ ॥ सा चास्यै सर्वमाचख्यौ शंकरात्कोपकारणम् ॥ पुनश्चोवाच गिरिजा देवतां मातृसंमताम् ॥ ३ ॥ नित्यं शैलाधिराजस्य देवता त्वमनिंदिते ॥ सर्वं च सन्निधानं च मयि चातीव वत्सला ॥ ४ ॥ तदहं संप्रवक्ष्यामि यद्विधेयं तवाधुना ॥ अथान्य स्त्रीप्रवेशे तु समीपे तु पिनाकिनः ॥ ५ ॥ त्वयाख्येयं मम शुभे युक्तं पश्चात्करोम्यहम् ॥ तथेत्युक्ते तया देव्या ययौ देवी गिरिं प्रति ॥ ६ ॥ रम्ये तत्र महाशृंगे नानाश्चर्योपशोभिते ॥ विभूषणादि संन्यस्य वृक्षवल्कलधारिणी ॥ ७ ॥ तपस्तेपे गिरिसुता पुत्रेण परिपालिता ॥ ग्रीष्मे पंचाग्निसं तप्ता वर्षासु च जलोषिता ॥ ८ ॥ स्थंडिलस्था च हेमंते निराहारा ततप सा ॥ एतस्मिन्नंतरे दैत्यो ह्यंधकस्य सुतो बली ॥ ९ ॥ ज्ञात्वा गतां गिरिसुतां पितुर्वैरमनुस्मरन् ॥ आडिर्नाम[1] बकभ्राता रहस्यांतरप्रेक्षकः ॥ १० ॥ जिते किलांधके दैत्ये गिरिशेनामरद्विषि ॥ आडिश्चकार[2] विपुलं तपो हरजिगीषया ॥ ११ ॥ तमागत्याब्रवीद्ब्रह्मा तपसा परितोषितः ॥ ब्रूहि किं वासुरश्रेष्ठ तपसा प्राप्तुमिच्छसि ॥ १२ ॥ ब्रह्माणमाह दैत्यस्तु निर्मृत्युत्वमहं वृणे ॥ ॥ ब्रह्मोवाच ॥ ॥ न कश्चिच्च विना मृत्युं जंतुरासुर विद्यते ॥ १३ ॥ यतस्ततोऽपि दैत्येंद्र मृत्युः प्राप्यः शरीरिणा ॥ इत्युक्तो दैत्यसिंहस्तु प्रोवाचांबुजसंभवम् ॥ १४ ॥ रूपस्य परिवर्तो मे यदा स्यात्पद्मसंभव ॥ तदा मृत्युर्मम भवेदन्यथा त्वमरो ह्यहम् ॥ १५ ॥ इत्युक्तस्तं तथेत्याह तुष्टः कमलसंभवः ॥ इत्युक्तोऽमरतां मेने दैत्यराज्यस्थितोऽसुरः ॥ १६ ॥ आजगाम स च स्थानं तदा त्रिपुरघातिनः ॥ आगतो ददृशे तं च वीरकं द्वार्यवस्थितम् ॥ १७ ॥ तं चासौ वंचयित्वा च आडिः सर्पशरीरभृत् ॥ अवारितो वीरकेण प्रविवेश हरांतिकम् ॥ १८ ॥ भुजंगरूपं संत्यज्य बभूवाथ महासुरः ॥ उमारूपी छलयितुं गिरिशं मूढचेतनः ॥ १९ ॥ कृत्वोमायास्ततो रूपमप्रतर्क्यमनोहरम् ॥ सर्वाव यवसंपूर्णं सर्वाभिज्ञानसंवृतम् ॥ २० ॥ चक्रे भगांतरे दैत्यो दंतान्वज्रोपमान्दृढान् ॥ तीक्ष्णाग्रान्बुद्धिमोहेन गिरिशं हंतुमुद्यतः ॥ २१ ॥ कृत्वोमारूपमेवं स स्थितो दैत्यो हरांतिके ॥ तां दृष्ट्वा गिरिशस्तुष्टः समालिंग्य महासुरम् ॥ २२ ॥ मन्यमानो गिरिसुतां सर्वैं

१ आटिर्नाम--इ०पा० । २ आटिः--इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रवयवांतरैः ॥ अपृच्छत्साधु ते भावो गिरिपुत्री ह्यकृत्रिमा ॥ २३ ॥ या त्वं मदाशयं ज्ञात्वा प्राप्तेह वरवर्णिनि ॥ त्वया विरहितः शून्यं मन्येऽस्मिन्भु
वनत्रये ॥ २४ ॥ प्राप्ता प्रसन्ना या त्वं मां युक्तमेवंविधं त्वयि ॥ इत्युक्ते गूहयंश्चेष्टामुमारूप्यसुरोऽब्रवीत् ॥ २५ ॥ यातास्मि तपसश्चरितु कालीवा
क्यात्तवातुलम् ॥ रतिश्च तत्र मे नाभूत्ततः प्राप्ता तवांतिकम् ॥ २६ ॥ इत्युक्तः शंकरः शंकां किंचित्प्राप्यावधारयत् ॥ कुपिता मयि तन्वंगी
प्रत्यक्षा च दृढव्रता ॥ २७ ॥ अप्राप्तकामा संप्राप्ता किमेतत्संशयो मम ॥ रहसीति विचिंत्याथ अभिज्ञानाद्विचारयन् ॥ २८ ॥ नापश्यद्वामपार्श्वे तु
तस्यांकं पद्मलक्षणम् ॥ लोम्नामावर्तचरितं ततो देवः पिनाकधृक् ॥ २९ ॥ बुद्ध्वा तां दानवीं मायां किंचित्प्रहसिताननः ॥ मेढ्रे रौद्रास्त्रमाधाय
चक्रे दैत्यमनोरथम् ॥ ३० ॥ स रुदन्भैरवान्नावानवसादं गतोऽसुरः ॥ अबुध्यद्वीरको नैतदसुरेंद्रनिषूदनम् ॥ ३१ ॥ हते च मारुतेनाशुगामिना
नगदेवता ॥ अपरिच्छिन्नतत्त्वार्था शैलपुत्र्यां न्यवेदयत् ॥ ३२ ॥ श्रुत्वा वायुमुखाद्देवी क्रोधरक्तातिलोचना ॥ अपश्यद्वीरकं पुत्रं हृदयेन विदूयता ॥
॥ ३३ ॥ मातरं मां परित्यज्य यस्मात्त्वं स्नेहविह्वलाम् ॥ विहितावसरः स्त्रीणां शंकरस्य रहोविधौ ॥ ३४ ॥ तस्मात्ते परुषा रूक्षा जडा हृदय
वर्जिता ॥ गणेशाक्षरसदृशा शिला माता भविष्यति ॥ ३५ ॥ एवमुत्सृष्टशापाया गिरिपुत्र्यास्त्वनंतरम् ॥ निर्जगाम मुखात्क्रोधः सिंहरूपी महा
बलः ॥ ३६ ॥ पश्चात्तापं समाश्रित्य तया देव्या विसर्जितः ॥ स तु सिंहः करालास्यो महाकेसरकंधरः ॥ ३७ ॥ प्रोद्भूतबललांगूलदंष्ट्रोत्कट
गुहामुखः ॥ व्यावृतास्यो ललज्जिह्वः क्षामकुक्षिश्चिखादिषुः ॥ ३८ ॥ तस्यास्ये वर्तितुं देवी व्यवस्यत सती तदा ॥ ज्ञात्वा मनोगतं तस्या भगवां
श्चतुराननः ॥ ३९ ॥ आजगामाश्रमपदं संपदामाश्रयं ततः ॥ आगम्योवाच तां ब्रह्मा गिरिजां मृष्टया गिरा ॥ ४० ॥ किं देवि प्राप्तुकामासि
किमलभ्यं ददामि ते ॥ तच्छ्रुत्वोवाच गिरिजा गुरुगौरवगर्भितम् ॥ ४१ ॥ तपसा दुष्करेणात्तः पतित्वे शंकरो मया ॥ स मां श्यामलवर्णेति
बहुशः प्रोक्तवान्भवः ॥ ४२ ॥ स्यामहं कांचनाकारा वाल्लभ्येन च संयुता ॥ भर्तुर्भूतपतेरंगे ह्येकतो निर्विशंकिता ॥ ४३ ॥ तस्यास्तद्भाषितं
श्रुत्वा प्रोवाच जलजासनः ॥ एवं भवतु भूयस्त्वं भर्तुर्देहार्धधारिणी ॥ ४४ ॥ ततस्तस्याः शरीरात्तु स्त्री सुनीलांबुजत्विषा ॥ निर्गता साभवद्भीमा
घंटाहस्ता त्रिलोचना ॥ ४५ ॥ नानाभरणपूर्णांगी पीतकौशेयवासिनी ॥ तामब्रवीत्ततो ब्रह्मा देवीं नीलांबुजत्विषम् ॥ ४६ ॥ अस्माद्भूधरजा ॥१३२॥
देहसंपर्कात्त्वं ममाज्ञया ॥ संप्राप्ता कृतकृत्यत्वमेकानंशा पुराकृतिः ॥ ४७ ॥ य एष सिंहः प्रोद्भूतो देव्याः क्रोधाद्वरानने ॥ स तेस्तु वाहनो देवि

१ भागुरिमतेन टावन्तमिदम्। सुनीलांबुजत्वचा–इ० पा०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

केतौ चास्तु महाबलः ॥४८॥ गच्छ विंध्याचले तत्र सुरकार्यं करिष्यति ॥ अत्र शुंभनिशुंभौ च हत्वा तारकसैन्यपौ ॥४९॥ पांचालोनाम यक्षोऽयं यक्षलक्षपदानुगः ॥ दत्तस्ते किंकरो देवि महामायाशतैर्युतः ॥ ५० ॥ इत्युक्ता कौशिकी देवी तथेत्याह पितामहम् ॥ निर्गतायां च कौशिक्यां जाता स्वैराश्रिता गुणैः ॥ ५१ ॥ सर्वैः पूर्वभवोपात्तैस्तदा स्वयमुपस्थितैः ॥ उमापि प्राप्तसंकल्पा पश्चात्तापपरायणा ॥ ५२ ॥ मुहुः स्वं परिनिंदंती जगाम गिरिशांतिकम् ॥ संप्रयांतीं च तां द्वारि अपवार्य समाहितः ॥५३॥ रुरोध वीरको देवीं हेमवेत्रलताधरः ॥ तामुवाच च कोपेन तिष्ठ तिष्ठ क्व यासि च ॥५४॥ प्रयोजनं न तेऽस्तीह गच्छ यावन्न भर्त्स्यसे ॥ देव्या रूपधरो दैत्यो देवं वंचयितुं त्विह ॥ ५५ ॥ प्रविष्टो न च दृष्टोऽसौ स च देवेन घातितः॥घातिते चाहमाक्षिप्तो नीलकण्ठेन धीमता॥५६॥कापि स्त्री नापि मोक्तव्या त्वया पुत्रेति सादरम् ॥ तस्मात्त्वमत्र द्वारिस्था वर्षपूगान्यनेकशः ॥५७॥भविष्यसि न चाप्यत्र प्रवेशं लप्स्यसे व्रज ॥ एका मे प्रविशेदत्र माता या स्नेहवत्सला॥५८॥नगाधिराजतनया पार्वती रुद्रवल्लभा ॥ इत्युक्ता तु ततो देवी चिंतयामास चेतसा ॥ ५९ ॥ न सा नारी तु दैत्योऽसौ वायोर्नैवावभासत ॥ वृथैव वीरकः शप्तो मया क्रोधपरीतया ॥६०॥ अकार्यं क्रियते मूढैः प्रायः क्रोधसमन्वितैः ॥ क्रोधेन नश्यते कीर्तिः क्रोधो हंति स्थिरां श्रियम् ॥ ६१ ॥ अपरिच्छिन्नसर्वार्था पुत्रं शापितवत्यहम् ॥ विपरीतार्थबोद्धृणां सुलभा विपदो यतः ॥६२॥ संचिंत्यैवमुवाचेदं वीरकं प्रति शैलजा ॥ अधो लज्जाविकारेण वदनेनांबुजत्विषा ॥ ६३ ॥ अहं वीरक ते माता मा तेऽस्तु मनसो भ्रमः ॥ शंकरस्यास्मि दयिता सुता तु हिमभूभृतः॥६४॥मम गात्रस्थितिभ्रांत्या मा शंकां पुत्र भावय ॥ तुष्टेन गौरता दत्ता ममेयं पद्मयोनिना ॥ ६५ ॥ मया शप्तोऽस्यविदिते वृत्तांते दैत्यनिर्मिते ॥ ज्ञात्वा नारीप्रवेशं तु शंकरे रहसि स्थिते ॥ ६६ ॥ न निवर्तयितुं शक्यः शापः किं तु ब्रवीमि ते ॥ मानुष्यां तु शिलायां त्वं शिलादात्संभविष्यसि ॥ ६७ ॥ पुण्ये चाप्यर्बुदारण्ये स्वर्गमोक्षप्रदे नृणाम् ॥ अचलेश्वरलिंगं तु वर्तते यत्र वीरक ॥ ६८ ॥ वाराणस्यां विश्वनाथसमं तत्फलदं नृणाम् ॥ प्रभासस्य च यात्राभिर्दशभिर्यत्फलं नृणाम् ॥ ६९ ॥ तदेकयात्रया प्रोक्तमर्बुदस्य महागिरेः ॥ यत्र तप्त्वा तपो मर्त्या देहधातून्विहाय च ॥ ७० ॥ संसारी न पुनर्भूयान्महेश्वरवचो यथा ॥ अर्बुदो यदि लभ्येत सेवितुं जन्मदुःखितैः ॥ ७१ ॥ वाराणसीं च केदारं किं स्मरंति वृथैव ते ॥ तत्राराध्य भवं देवं भवान्नन्दीति नामभृत् ॥ ७२ ॥ शीघ्रमेष्यसि चात्रैव प्रतीहारत्वमाप्स्यसि ॥ एवमुक्ते हृष्टरोमा वीरकः प्रणिपत्य ताम् ॥ ७३ ॥ संस्तूय विविधैर्वाक्यैर्मातरं समभाषत ॥ धन्योऽहं देवि यो लप्स्ये

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मानुष्यमतिदुर्लभम् ॥ ७४ ॥ शापोऽनुग्रहरूपोऽयं विशेषादर्बुदाचले ॥ समीपे यस्य पुण्योऽस्ति महीसागरसंगमः ॥ ७५ ॥ ऊधः पृथिव्या देशोऽयं यो गिरेश्चार्णवांतरे ॥ तत्र गत्वा महत्पुण्यमवाप्य भवभक्तितः ॥ ७६ ॥ पुनरेष्यामि भो मातरित्युक्त्वाभूच्छिलासुतः ॥ देवी च प्रविवेशाथ भवनं शशिमौलिनः ॥ ७७ ॥ ॥ इत्यार्बुदाख्यानम् ॥ ॥ ततो दृष्ट्वा च तां प्राह धिग्भार्य इति त्र्यंबकः ॥ ७८ ॥ सा च प्रणम्य तं प्राह सत्यमेतन्न मिथ्यया ॥ जडः प्रकृतिभागोयं नार्यश्चार्हंति निन्दनाम् ॥ ७९ ॥ पुरुषाणां प्रसादेन मुच्यंते भवसागरात् ॥ ततः प्रहृष्टस्तामाह हरो योग्याऽधुना शुभे ॥८०॥ पुत्रं दास्यामि येन त्वं ख्यातिमाप्स्यसि शोभने ॥ ततो रेमे हि देव्या स नानाश्चर्यालयो हरः ॥८१॥ ततो वर्षसहस्रेषु देवास्त्वरितमानसाः ॥ ज्वलनं नोदयामासुर्ज्ञातुं शंकरचेष्टितम् ॥८२॥ द्वारि स्थितं प्रतीहारं वंचयित्वा च पावकः ॥ पारावतस्य रूपेण प्रविवेश हरांतिकम् ॥ ८३ ॥ ददृशे तं च देवेशो विनतां प्रेक्ष्य पार्वतीम् ॥ ततस्तं ज्वलनं प्राह नैतद्योग्यं त्वया कृतम् ॥८४॥ यदिदं क्षुभितं स्थानान्मम तेजो ह्यनुत्तमम् ॥ गृहाण त्वं सुदुर्बुद्धे नो वा धक्ष्यामि त्वां रुषा ॥ ८५ ॥ भीतस्ततोऽसौ जग्राह सर्वदेवमुखं च सः ॥ तेन ते वह्निसहिता विह्वलाश्च सुराः कृताः ॥ ८६ ॥ विपाट्य जठराण्येषां वीर्यं माहेश्वरं ततः ॥ निष्क्रांतं तत्सरो जातं पारदं शतयोजनम् ॥ ८७ ॥ वह्निश्च व्याकुलीभूतो गंगायां मुमुचे सकृत् ॥ दह्यमाना च सा देवी तरंगैर्बहिरुत्सृजत् ॥ ८८ ॥ जातस्त्रिभुवनख्यातस्तेन च श्वेतपर्वतः ॥ एतस्मिन्नंतरे वह्निराहूतश्च हिमालये ॥ ८९ ॥ सप्तर्षिभिर्वह्निहोमं कुर्वद्भिर्मंत्रवीर्यतः ॥ आगत्य तत्र जग्राह वह्निर्भागं च तं हुतम् ॥ ९० ॥ गतेऽह्न्यत्वस्मिंश्च तत्रस्थः पत्नीस्तेषामपश्यत ॥ सुवर्णकदलीस्तंभनिभास्ताश्चंद्रलेखया ॥ ९१ ॥ पश्यमानः प्रफुल्लाक्षो वह्निः कामवशं गतः ॥ स भूयश्चिंतयामास न न्याय्यं क्षुभितोऽस्मि यत् ॥ ९२ ॥ साध्वीः पत्नीर्द्विजेंद्राणामकामाः कामयाम्यहम् ॥ पापमेतत्कर्म चोग्रं नश्यामि तृणवत्स्फुटम् ॥ ९३ ॥ कृत्वैतन्नश्यते कीर्तिर्यावदाचंद्रतारकम् ॥ एवं संचिंत्य बहुधा गत्वा चैव वनांतरम् ॥ ९४ ॥ संयन्तुं नाभवच्छक्त उपायैर्बहुभिर्मनः ॥ ततः स कामसंतप्तो मूर्छितः समपद्यत ॥ ९५ ॥ ततः स्वाहा च भार्यास्य बुबुधे तद्विचेष्टितम् ॥ ज्ञात्वा च चिंतयामास प्रहृष्टा मनसि स्वयम् ॥ ९६ ॥ स्वां भार्यामथ मां त्यक्त्वा बहुवासादवज्ञया ॥ भार्याः कामयते नूनं सप्तर्षीणां महात्मनाम् ॥ ९७ ॥ तदासां रूपमाश्रित्य रमिष्ये तेन चाप्यहम् ॥ ततस्त्वंगिरसो भार्या शिवानामेति शोभना ॥ ९८ ॥ तस्या रूपं समाधाय पावकं प्राप्य साब्रवीत् ॥ मामग्ने कामसंतप्तां त्वं कामयितुमर्हसि ॥ ९९ ॥ न

१ गोरूपधारिण्याः पृथिव्याः ऊधःस्थानीयोऽयमर्बुदाचलप्रदेशः । २ मिथ्यया मिथ्या—इत्यर्थः । आर्षोऽयं प्रयोगः । ३ पारापतस्य--इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चेत्करिष्यसे देव मृतां मामुपधारय ॥ अहमंगिरसो भार्या शिवानाम हुताशन ॥ १०० ॥ सर्वाभिः सहिता प्राप्ता ताश्च यास्यंत्यनुक्रमात् ॥
अस्माकं त्वं प्रियो नित्यं त्वच्चित्ताश्च[1] वयं तथा ॥१०१॥ ततः स कामसंतप्तः संबभूव तया सह ॥ प्रीते प्रीता च सा देवी निर्जगाम वनांतरात् ॥
॥१०२॥ चिंतयंती ममेदं चेद्रूपं द्रक्ष्यंति कानने ॥ ते ब्राह्मणीनामनृतं दोषं वक्ष्यंति पावकात् ॥१०३॥ तस्मादेतद्रक्षमाणा गरुडी संभवाम्यहम् ॥
सुपर्णा सा ततो भूत्वा ददृशे श्वेतपर्वतम् ॥ १०४ ॥ शरस्तंबैः सुसंपृक्तं रक्षोभिश्च पिशाचकैः ॥ सा तत्र सहसा गत्वा शैलपृष्ठं सुदुर्गमम् ॥ १०५ ॥
प्राक्षिपत्कांचने कुंडे शुक्रं तद्धारणेऽक्षमा ॥ शिष्टानामपि देवीनां सप्तर्षीणां महात्मनाम् ॥ १०६ ॥ पत्नीसरूपतां कृत्वा कामयामास पावकम् ॥
दिव्यं रूपमरुंधत्याः कर्तुं न शकितं तया ॥ १०७ ॥ तस्यास्तपःप्रभावेण भर्तुः शुश्रूषणेन च ॥ षट्कृत्वस्तत्तु निक्षिप्तमग्निरेतः कुरूद्वह ॥
॥ १०८ ॥ कुंडेऽस्मिंश्चैत्रबहुले प्रतिपद्येव स्वाहया ॥ ततश्च पावको दुःखाच्छुशोच च मुमोह च ॥ १०९ ॥ आः पापं कृतमित्येव देहन्यासेऽ
करोन्मतिम् ॥ ततस्तं खेचरी वाणी प्राह मा मरणं कुरु ॥ ११० ॥ भाव्यमेतच्च भाव्यर्थात्को हि पावक मुच्यते ॥ भाव्यर्थेनापि यत्ते च परदारोप
सेवनम् ॥ १११ ॥ कृतं तच्चेतसा तेन त्वामजीर्णं प्रवेक्ष्यति ॥ श्वेतकेतोर्महायज्ञे घृतधाराभितर्पितम् ॥ ११२ ॥ शोकं च त्यज नैतास्ताः स्वाहै
वेयं तव प्रिया ॥ श्वेतपर्वतकुंडस्थं पुत्रं त्वं द्रष्टुमर्हसि ॥ ततो वह्निस्तत्र गत्वा ददृशे तनयं प्रभुम् ॥ ११३ ॥ ॥ अर्जुन उवाच ॥ ॥ कस्मात्स्वाहा
करोद्रूपं षण्णां तासां महामुने ॥ ११४ ॥ यत्ता भर्तृपराः साध्व्यस्तपस्विन्योग्निसंनिभाः ॥ न बिभेति च किं ताभ्यः षड्भ्यः स्वाहाऽपराधिनी ॥
भर्तृभक्त्या जगद्दग्धुं यतः शक्ताश्च ता मुने ॥११५॥ ॥ नारद उवाच ॥ ॥ सत्यमेतत्कुरुश्रेष्ठ शृणु तच्चापि कारणम् ॥ येन तासां कृतं रूपं न वा शापं
ददुश्च ताः ॥११६॥ यत्र तद्वह्निना क्षिप्तं रुद्रतेजः सकृत्पुरा ॥ गंगायां तत्र सस्नुस्ताः षट्त्न्योऽज्ञानभावतः ॥ ११७ ॥ ततस्ता विह्वलीभूतास्तेजसा
तेन मोहिताः ॥ लज्जया च स्वभर्तॄणां गंगातीरस्थिता रहः ॥ ११८ ॥ एतदंतरमालोक्य चिकीर्षंती मनीषितम् ॥ स्वाहा शरीरमाविश्यतासां तेजो
जहार तत् ॥ ११९ ॥ चिक्रीड वह्निजायापि यथा ते कथितं मया ॥ १२० ॥ उपकारमिमं ताभिः स्मरंतीभिश्च भारत ॥ न शप्ता सा यतः
शापो न देयश्चोपकारिणि ॥ १२१ ॥ ततः सप्तर्षयो ज्ञात्वा ज्ञानेनाशुचितां गताः ॥ तत्यजुः षट् तदा पत्नीर्विना देवीमरुंधतीम् ॥ १२२ ॥ विश्वा
मित्रस्तु भगवान्कुमारं शरणं गतः ॥ स्तवं दिव्यं संप्रचक्रे महासेनस्य चापि सः ॥ १२३ ॥ अष्टोत्तरशतं नाम्नां शृणु त्वं तानि फाल्गुन ॥ जपेन

१ त्वयि ताश्चैतदावरा—इ०, त्वच्चित्ताश्चैतदाचरः—इ० च पा० । २ केऽपि जनाः—इत्यध्याहारः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

येषां पापानि यांति ज्ञानमवाप्नुयात् ॥ १२४ ॥ त्वं ब्रह्मवादी त्वं ब्रह्मा ब्रह्म ब्राह्मणवत्सलः ॥ ब्रह्मण्यो ब्रह्मदेवश्च ब्रह्मदो ब्रह्मसंग्रहः ॥ १२५ ॥ त्वं
परं परमं तेजो मंगलानां च मंगलम् ॥ अप्रमेयगुणश्चैव मंत्राणां मंत्रगो भवान् ॥ १२६ ॥ त्वं सावित्रीमयो देव सर्वत्रैवापराजितः ॥ मंत्रः शर्वा
त्मको देवः षडक्षरवतां वरः ॥ १२७ ॥ माली मौली पताकी च जटी मुंडी शिखंड्यपि ॥ कुण्डली लांगली बालः कुमारः प्रवरो वरः ॥ १२८ ॥
गवांपुत्रः सुरारिघ्नः संभवो भवभावनः ॥ पिनाकी शत्रुहा श्वेतो गूढः स्कन्दः कराग्रणीः ॥ १२९ ॥ द्वादशो भूर्भुवो भावी भुवः पुत्रो नमस्कृतः ॥
नागराजः सुधर्मात्मा नाकपृष्ठः सनातनः ॥ १३० ॥ त्वं भर्ता सर्वभूतात्मा त्वं त्राता त्वं सुखावहः ॥ शरदक्षः शिखी जेता षड्वक्त्रो भयना
शनः ॥ १३१ ॥ हेमगर्भो महागर्भो जयश्च विजयेश्वरः ॥ त्वं कर्ता त्वं विधाता च नित्यो नित्यारिमर्दनः ॥ १३२ ॥ महासेनो महातेजा वीरसे
नश्च भूपतिः ॥ सिद्धासनः सुराध्यक्षो भीमसेनो निरामयः ॥ १३३ ॥ शौरिर्यदुर्महातेजा वीर्यवान्सत्यविक्रमः ॥ तेजोगर्भोऽसुररिपुः सुरमूर्तिः
सुरोर्जितः ॥ १३४ ॥ कृतज्ञो वरदः सत्यः शरण्यः साधुवत्सलः ॥ सुव्रतः सूर्यसंकाशो वह्निगर्भः कणो भुवः ॥ १३५ ॥ पिप्पली शीघ्रगो रौद्री
गांगेयो रिपुदारणः ॥ कार्त्तिकेयः प्रभुः क्षंता नीलदंष्ट्रो महामनाः ॥ १३६ ॥ निग्रहो निग्रहाणां च नेता त्वं सुरनंदनः ॥ प्रग्रहः परमानंदः क्रोध
घ्नस्तार उच्छ्रितः ॥ १३७ ॥ कुक्कुटी बहुली दिव्यः कामदो भूरिवर्धनः ॥ अमोघोऽमृतदो ह्यग्निः शत्रुघ्नः सर्वमोदनः ॥ १३८ ॥ अव्ययो ह्यमरः
श्रीमानुन्नतो ह्यग्निसंभवः ॥ पिशाचराजः सूर्याभः शिवात्मा शिवनंदनः ॥ १३९ ॥ अपारपारो दुर्ज्ञेयः सर्वभूतहिते रतः ॥ अग्राह्यः कारणं कर्ता
परमेष्ठी परं पदम् ॥ १४० ॥ अचिंत्यः सर्वभूतात्मा सर्वात्मा त्वं सनातनः ॥ एवं स सर्वभूतानां संस्तुतः परमेश्वरः ॥ १४१ ॥ नाम्नामष्टशतेनायं
विश्वामित्रमहर्षिणा ॥ प्रसन्नमूर्तिराहेदं मुनींद्रं व्रियतामिति ॥ १४२ ॥ मम त्वया द्विजश्रेष्ठ स्तुतिरेषा निरूपिता ॥ भविष्यति मनोऽभीष्टप्राप्तये
प्राणिनां भुवि ॥ १४३ ॥ विवर्धते कुले लक्ष्मीस्तस्य यः प्रपठेदिमम् ॥ न राक्षसाः पिशाचा वा न भूतानि न चापदः ॥ १४४ ॥ विघ्नकारीणि
तद्गेहे यत्रैव संस्तुवंति माम् ॥ दुःस्वप्नं च न पश्येत्स बद्धो मुच्येत बंधनात् ॥ १४५ ॥ स्तवस्यास्य प्रभावेण दिव्यभावः पुमान्भवेत् ॥ त्वं च मां
श्रुतिसंस्कारैः सर्वैः संस्कर्तुमर्हसि ॥ १४६ ॥ संस्काररहितं जन्म यतश्च पशुवत्स्मृतम् ॥ त्वं च मद्वरदानेन ब्रह्मर्षिश्च भविष्यसि ॥ १४७ ॥ ततो मुनिस्तस्य

१ सर्वात्मकः--इ० पा० । २ वृन्दी--इ० पा० । ३ पटुः--इ० पा० । ४ अरुणो भुवः--इ०, कणोऽग्रकः--इ० च पा० । ५ सिद्धगः--इ० पा० । ६ सर्वबोधनः--इ० पा० । ७ विघ्नकारीणि--इत्यत्र पुंनपुंसकयोर्मध्ये नपुंसकैकशेषः परनिपातान्नपुंसकस्य ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चक्रे जातकर्मादिकाः क्रियाः॥पौरोहित्यं तथा भेजे स्कंदस्यैवाज्ञया प्रभुः॥१४८॥ततस्तं वह्निरभ्यागाद्ददर्श च सुतं गुहम् ॥ षट्छीर्षं द्विगुणश्रोत्रं द्वादशाक्षिभुजक्रमम्॥१४९॥ एकग्रीवं चैककायं कुमारं स व्यलोकयत् ॥ कलिलं प्रथमे चाह्नि द्वितीये व्यक्तितां गतम् ॥१५०॥ तृतीयायां शिशुर्जातश्चतुर्थ्यां पूर्ण एवच ॥ पंचम्यां संस्कृतः सोऽभूत्पावकं चाप्यपश्यत ॥१५१॥ ततस्तं पावकः पार्थ आलिलिंग चुचुंब च ॥ पुत्रेति चोक्त्वा तस्मै स शक्त्यस्त्रम ददात्स्वयम् ॥१५२॥ स च शक्तिं समादाय नमस्कृत्य च पावकम् ॥ श्वेतशृंगं समारूढो मुखैः पश्यन्दिशो दश ॥१५३॥ व्यनदद्भैरवं नादं त्रासयन्सासुरं जगत् ॥ ततः श्वेतगिरेः शृंगं रक्षःपद्मदशावृतम् ॥ १५४ ॥ बिभेद तरसा शक्त्या शतयोजनविस्तृतम् ॥ तदेकेन प्रहारेण खंडशः पतितं भुवि ॥ १५५ ॥ चूर्णीकृता राक्षसास्ते सततं धर्मशत्रवः ॥ ततः प्रव्यथिता भूमिर्व्यशीर्यत समंततः ॥ १५६ ॥ भीताश्च पर्वताः सर्वे चुक्रुशुः प्रलया यथा ॥ भूतानि तत्र सुभृशं त्राहित्राहीति चोज्जगुः ॥ १५७ ॥ एवं श्रुत्वा ततो देवा वासवं सह तेऽब्रुवन् ॥ येनैकेन प्रहारेण त्रैलोक्यं व्याकुलीकृतम् ॥ १५८ ॥ स संक्रुद्धः क्षणाद्विश्वं संहरिष्यति वासव ॥ वयं च पालनार्थाय सृष्टा देवेन वेधसा ॥ १५९ ॥ तच्च त्राणं सदा कार्यं प्राणैः कंठगतैरपि ॥ अस्माकं पश्यतामेवं यदि संक्षोभ्यते जगत् ॥ १६० ॥ धिक्ततो जन्म वीराणां श्लाघ्यं हि मरणं क्षणात् ॥ तदस्माभिः सहैनं त्वं क्षंतुमर्हसि वासव ॥ १६१ ॥ एवमुक्तस्तथेत्युक्त्वा देवैः सार्धं तमभ्ययात् ॥ विधित्सुस्तस्य वीर्यं स शक्रस्तूर्णतरं तदा ॥ १६२ ॥ उग्रं तच्च महावेगं देवानीकं दुरासदम् ॥ नर्दमानं गुहः प्रेक्ष्य ननाद जलधिर्यथा ॥ १६३ ॥ तस्य नादेन महता समुद्धूतोदधिप्रभम् ॥ बभ्राम तत्रतत्रैव देवसैन्यमचेतनम् ॥ १६४ ॥ जिघांसूनुपसंप्राप्तान्देवान्दृष्ट्वा स पावकिः ॥ विससर्ज मुखात्तत्र प्रवृद्धाः पावकार्चिषः ॥१६५॥ अदहद्देवसैन्यानि चेष्टमानानि भूतले ॥ ते प्रदीप्तशिरोदेहाः प्रदीप्तायुधवाहनाः॥१६६॥ प्रच्युताः सहसा भांति दिवस्तारागणा इव ॥ दह्यमानाः प्रपन्नास्ते शरणं पावकात्मजम् ॥ १६७ ॥ देवा वज्रधरं प्रोचुस्त्यज वज्रं शतक्रतो ॥ उक्तो देवैस्तदा शक्रः स्कंदे वज्रमवासृजत् ॥ १६८ ॥ तद्विसृष्टं जघानाशु पार्श्वं स्कंदस्य दक्षिणम् ॥ बिभेद च कुरुश्रेष्ठ तदा तस्य महात्मनः ॥ १६९ ॥ वज्रप्रहारात्स्कंदस्य संजातः पुरुषोऽपरः ॥ युवा कांचनसन्नाहः शक्तिधृग्दिव्यकुंडलः ॥१७०॥ शाख इत्यभिविख्यातः सोपि व्यनदद्द्भुतम् ॥ ततश्चेंद्रः पुनः क्रुद्धो हृदि स्कंदं व्यदारयत् ॥ १७१ ॥ तत्रापि तादृशो जज्ञे नैगमेय इति श्रुतः ॥ ततो विनद्य स्कंदाद्याश्चत्वारस्तं तदाभ्ययुः ॥ १७२ ॥ तदेंद्रो वज्रमुत्सृज्य प्रांजलिः शरणं ययौ ॥ तस्याभयं ददौ स्कंदः

१ तृतीये दिने--इत्यर्थः । एवमेव चतुर्थ्यां, पंचम्यामित्यनयोः चतुर्थपंचमदिनयोरित्यर्थो बोध्यः । २ देवा वज्रधरं त्यक्त्वा ततः शान्तिमुपागताः--इ० पाठान्तरम् । परं त्वेतेन सम्यग्वक्तव्यार्थबोधो न भवति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सहसैन्यस्य सत्तमः ॥ १७३ ॥ ततः प्रहृष्टास्त्रिदशा वादित्राण्यभ्यवादयन् ॥ वज्रप्रहारात्कन्याश्च जज्ञिरेऽस्य महाबलाः ॥ १७४ ॥ या हरंति शिशूञ्जातान्गर्भस्थांश्चैव दारुणाः ॥ काकी च हिलिमा[1] चैव रुद्रा च वृषभा तथा ॥ १७५॥ आया पलाला मित्रा च सप्तैताः शिशुमातरः ॥ एतासां वीर्यसंपन्नः शिशुश्चाभूत्सुदारुणः ॥ १७६ ॥ स्कंदप्रसादजः पुत्रो लोहिताक्षो भयंकरः ॥ एष वीराष्टकः प्रोक्तः स्कंदमातृगणोऽद्भुतः ॥ १७७ ॥ पूजनीयः सदा भक्त्या सर्वापस्मारशांतिदः ॥ उपातिष्ठत्ततः स्कंदं हिरण्यकवचस्रजम् ॥ १७८ ॥ लोहितांबरसंवीतं त्रैलोक्यस्यापि सुप्रभम् ॥ युवानं श्रीः स्वयं भेजे तं प्रणम्य शरीरिणी ॥१७९॥ श्रिया जुष्टं च तं प्राहुः सर्वे देवाः प्रणम्य वै ॥ हिरण्यवर्ण्ण भद्रं ते लोकानां शंकरो भव ॥१८०॥ भवानिंद्रोऽस्तु नो[2] नाथ त्रैलोक्यस्य हिताय वै॥१८१॥ ॥ स्कंद उवाच ॥ ॥ किमिंद्रः सर्वलोकानां करोतीह सुरोत्तमाः॥कथं देवगणांश्चैव पाति नित्यं सुरेश्वरः ॥१८२॥ ॥ देवा ऊचुः ॥ ॥ इंद्रो दिशति भूतानां बलं तेजः प्रजाः सुखम् ॥ प्रज्ञां प्रयच्छति तथा सर्वान्दायान्सुरेश्वरः ॥१८३॥ दुर्वृत्तानां स हरति वृत्तस्थानां प्रयच्छति ॥ अनुशास्ति च भूतानि कार्येषु बलवत्तरः॥१८४॥ असूर्ये च भवेत्सूर्यस्तथाऽचंद्रे च चंद्रमाः ॥ भवत्यग्निश्च वायुश्च पृथिव्यां जीवकारणम् ॥ १८५ ॥ एतदिंद्रेण कर्तव्यमिंद्रो हि विपुलं बलम् ॥ त्वं चेंद्रो भव नो वीर तारकं जहि ते नमः ॥ १८६ ॥ ॥ इंद्र उवाच ॥ ॥ त्वं भवेंद्रो महाबाहो सर्वेषां नः सुखावहः ॥ प्रणम्य प्रार्थये स्कंद तारकं जहि रक्ष नः ॥ १८७ ॥ ॥ स्कंद उवाच ॥ ॥ शाधि त्वमेव त्रैलोक्यं भवानिंद्रोस्तु सर्वदा ॥ करिष्ये चेंद्रकर्माणि न ममेंद्रत्वमीप्सितम् ॥ १८८ ॥ त्वमेव राजा भद्रं ते त्रैलोक्यस्य ममैव च ॥ करोमि किं च ते शक्र शासनं ब्रूहि तन्मम ॥ १८९ ॥ ॥ इंद्र उवाच ॥ ॥ यदि सत्यमिदं वाक्यं निश्चयाद्भाषितं त्वया ॥ अभिषिच्यस्व देवानां सैनापत्ये महाबल ॥ अहमिंद्रो भविष्यामि तव वाक्याद्यशोऽस्तु ते ॥ १९० ॥ ॥ स्कंद उवाच ॥ ॥ दानवानां विनाशाय देवानामर्थसिद्धये ॥ गोब्राह्मणस्य चार्थाय एवमस्तु वचस्तव ॥ १९१ ॥ इत्युक्ते सुमहानादः सुराणामभ्यजायत ॥ भूतानां चापि सर्वेषां त्रैलोक्याकंपकारकः ॥ १९२ ॥ जयेति तुष्टुवुश्चैनं वादित्राण्यभ्यवादयन् ॥ ननृतुस्तुष्टुवुश्चैनं कराघातांश्च चक्रिरे ॥ १९३ ॥ तेन शब्देन महता विस्मिता नगनंदिनी ॥ शंकरं प्राह को देव नादोऽयमतिवर्तते ॥ १९४ ॥ ॥ रुद्र उवाच ॥ ॥ अद्य नूनं प्रहृष्टानां सुराणां विविधा गिरः ॥ श्रूयंते च तथा देवि यथा जातः सुतस्तव ॥ १९५ ॥ गवां च ब्राह्मणानां च साध्वीनां च दिवौकसाम् ॥ मार्जयिष्यति चाश्रूणि पुत्रस्ते पुण्यवत्यपि ॥ १९६ ॥ एवं वदति सा देवी द्रष्टुं

१ ललिमा–इ०पा० । २ नः–अस्माकम्–इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तंमुत्सुकाऽभवत् ॥ शंकरश्च महातेजाः पुत्रस्नेहाधिको यतः ॥ १९७ ॥ वृषभं तत आरुह्य देव्या सह समुत्सुकः ॥ सगणो भव आगच्छत्पुत्र दर्शनलालसः ॥ १९८ ॥ ततो ब्रह्मा महासेनं प्रजापतिरथाब्रवीत ॥ अभिगच्छ महादेवं पितरं मातरं प्रभो ॥ १९९ ॥ अनयोर्वीर्यसंयोगात्तवोत्पत्ति स्तु प्राथमी ॥ एवमस्त्विवति चाप्युक्त्वा महासेनो महेश्वरम् ॥ २०० ॥ अपूजयदमेयात्मा पितरं मातरं च ताम् ॥ ततस्तमालिंग्य सुतं चिरं संयोज्य त्वाशिषः ॥ २०१ ॥ चिरं जहृषतुश्चोभौ पार्वतीपरमेश्वरौ ॥ सिद्धसारस्य तत्त्वं च ददौ तुष्टोऽस्य शंकरः ॥ २०२ ॥ देवी प्रकृंतिमोक्षं च तुष्टा हर्षपरिप्लुता ॥ एतस्मिन्नेव काले तु षड्देव्यस्तं समागमन् ॥ २०३ ॥ ऋषिभिस्ताः परित्यक्तास्तं पुत्रेति जगुस्तदा ॥ पार्वती च ततः प्राह मम पुत्रो न वस्त्वयम् ॥ २०४ ॥ स्वाहा ममेति च प्राह पावकश्च ममेति च ॥ रुद्रो ममेति च प्राह मम देवनदीति च ॥ २०५ ॥ चक्रुस्ते कलहं घोरं विवदंतः परस्परम् ॥ पुत्रस्नेहो हि बलवान्पार्थ किंकिं न कारयेत् ॥ २०६ ॥ ततस्तान्प्रहसन्नाह विवादो युज्यते न च ॥ सर्वेषां वो गुहः पुत्रो मत्तो वै व्रियतां वरः ॥ २०७ ॥ ततः प्राहुश्च षड्देव्यः स्वर्गो नो ह्यक्षयो भवेत् ॥ तथेति ता गुहः प्राह शक्रस्तत्रांतरेऽब्रवीत् ॥ २०८ ॥ रोहिण्याश्चानुजा स्कंद स्पर्धमानाभिजित्खला ॥ इच्छंती ज्येष्ठतां देवी पृथक्त्वं च तपोरता ॥ २०९ ॥ ततः प्रभृति मूढोऽस्मि तत्स्थाने स्थापय प्रभो ॥ ततस्तथेति च प्रोक्ते कृत्तिकास्ता दिवं गताः ॥ २१० ॥ नक्षत्रं सप्तशीर्षाभं भाति तद्वह्निदैवतम् ॥ अथैनमब्रवीत्स्वाहा प्रिया नाहं महा चिषः ॥ तदग्नेः प्रियतां देहि सहवासं सदैव च ॥ २११ ॥ ॥ स्कंद उवाच ॥ ॥ हव्यं कव्यं च यत्किंचिद्द्विजा होष्यंति पावके ॥ २१२ ॥ तत्ते नाम्ना प्रदास्यंति वासः सार्धं भवेत्तव ॥ पावकः प्रार्थयामास यज्ञभागान्पुनः सुतान् ॥ २१३ ॥ स चाप्याहाद्यप्रभृति यज्ञभागानवाप्नुहि ॥ इतरे प्रार्थयामासुः ख्यातो नस्त्वं सुतो भव ॥ २१४ ॥ एवमेवेति तानाह स्कंदस्तद्धि सुदुर्लभम् ॥ ततस्तं योगिनः सर्वे संभूय सनकादयः ॥ अभ्यषिंचन्गिरौ तस्मिन्योगिनामाधिपत्यके ॥ २१५ ॥ योगीश्वरमिति प्राहुस्ततस्तं योगिनस्तथा ॥ जहृषुर्देवताश्चैव नानावाद्यान्यवादयन् ॥ ॥ २१६ ॥ अभिषिक्तेन तेनासौ शुशुभे श्वेतपर्वतः ॥ आदित्येनेवांशुमता सुरम्य उदयाचलः ॥२१७॥ ततो देवाः सगन्धर्वा नृत्यंत्यप्सरसस्तथा ॥ हृष्टानां सर्वभूतानां श्रूयते निनदो महान् ॥ २१८ ॥ एवं सेन्द्रं जगत्सर्वं श्वेतपर्वतसंस्थितम् ॥ प्रहृष्टं प्रेक्ष्य तं स्कन्दं न च तृप्यति दर्शनात् ॥ २१९ ॥ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां प्रथमे माहेश्वरखण्डे कौमारिकाखण्डे कुमारेश्वरमाहात्म्ये स्कन्दकुमारस्य सर्वदेवसैनाधिपत्याभिषेकोत्सववर्णनंनामैकोनत्रिंशोऽध्यायः ॥ २९ ॥ छ ॥ ॥ नारद उवाच ॥ ॥ ततः स्कन्दः सुरैः सार्धं श्वेतपर्वत

१ द्रष्टुमत्युत्सुकाभवत्–इ० पा० । २ प्रपञ्चमोक्षं च–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मस्तकात् ॥ उत्तीर्य तारकं हन्तुं दक्षिणां स दिशं ययौ ॥ १ ॥ ततः सरस्वतीतीरे यानि भूतानि नारद ॥ ग्रहाश्चोपग्रहाश्चैव वेतालाः शाकिनी
गणाः ॥ २ ॥ उन्मादा ये ह्यपस्माराः पलादाश्च पिशाचकाः ॥ देवैस्तेषामाधिपत्ये सोऽभ्यषिच्यत पावकिः ॥ ३ ॥ यथा ते नैव मर्यादां संत्य
जंति दुराशयाः ॥ एतैस्तस्मात्समाक्रांतः शरण्यं पावकिं व्रजेत् ॥ ४ ॥ अप्रकीर्णेन्द्रियं दांतं शुचिं नित्यमतंद्रितम् ॥ आस्तिकं स्कन्दभक्तं च
वर्जयंति ग्रहादिकाः ॥ ५ ॥ महेश्वरं च ये भक्ता भक्ता नारायणं च ये ॥ तेषां दर्शनमात्रेण नश्यंते ते विदूरतः[1] ॥ ६ ॥ ततः सर्वैः सुरैः सार्धं मही
तीरं ययौ गुहः ॥ तत्र देवैः प्रकथितं महीमाहात्म्यमुत्तमम् ॥ ७ ॥ शृण्वन्विसिस्मिये स्कन्दः प्रणनाम च तां नदीम्[2] ॥ ततो महीदक्षिणतस्तीरमा
श्रित्य धिष्ठितम् ॥८॥ प्रणम्य शक्रप्रमुखा गुहं वचनमब्रुवन् ॥ अभिषिक्तं विना स्कन्द सेनापतिमकल्मषम् ॥९॥ न शर्म लभते सेना तस्मात्त्वमभि
षेचय ॥ महीसागरसंभूतैः पुण्यैश्चापि शिवैर्जलैः ॥१०॥ अभिषेक्ष्यामहे त्वां च तत्र नो द्रष्टुमर्हसि ॥ यथा हस्तिपदे सर्वपदांतर्भाव इष्यते ॥ ११॥
सर्वतीर्थान्तरस्थानं तथार्णवमहीजले ॥ सर्वभूतमयो यद्वत्त्र्यंबकः परिकीर्त्यते ॥ १२ ॥ सर्वतीर्थमयस्तद्वन्महीसागरसंगमः ॥ अर्धनारीश्वरं रूपं
यथा रुद्रस्य सर्वदम् ॥१३॥ तथा महीसमुद्रस्य स्नानं सर्वफलप्रदम् ॥ येनात्र पितरः स्कन्द तर्पिता भक्तिभावतः ॥१४॥ तेन सर्वेषु तीर्थेषु तर्पिता
नात्र संशयः ॥ न चैतद्धृदि मंतव्यं क्षारमेतज्जलं हि यत् ॥ १५ ॥ यथा हि कटुतिक्तादि गवा ग्रस्तं हि क्षीरदम् ॥ एवमेतत्त्विदं तोयं पितॄणां तृप्ति
दायकम् ॥ १६ ॥ एवं ब्रुवत्सु देवेषु कपिलोऽपि मुनिर्जगौ ॥ सत्यमेतदुमापुत्र सर्वतीर्थमयी मही ॥ १७ ॥ कर्दमो यस्त्वहमपि[3] ज्ञात्वा तीर्थमहा
गुणान् ॥ सर्वां भुवं परित्यज्य कृत्वा ह्याश्रममास्थितः ॥ १८ ॥ ततो महेश्वरः प्राह सत्यमेतत्सुरोदितम् ॥ ब्रह्माद्यास्तं तथा प्राहुरत्र भूयोऽप्यथो
गुरुः ॥ १९ ॥ अत्राभिषेकं ते वीर करिष्यामः समादिश ॥ ततः सुविस्मितस्तत्र स्नात्वा स्कन्दो महामनाः ॥ २० ॥ अभिषिञ्चन्तु मां देवा इति
तानब्रवीद्वचः ॥ ततोऽभिषेकसंभारान्सर्वान्संभृत्य शास्त्रतः ॥ २१ ॥ जुहुवुर्मंत्रपूतेऽग्नौ चत्वारो मुख्यऋत्विजः ॥ ब्रह्मा च कपिलो जीवो विश्वा
मित्रश्चतुर्थकः ॥ २२ ॥ अन्ये च शतशस्तत्र मुनयो वेदपारगाः ॥ तत्राद्भुतं महादेवो दर्शयामास भारत ॥ २३ ॥ यदग्निकुण्डमध्यस्थो लिंगमूर्ति
र्व्यदृश्यत ॥ अहमेवाग्निमध्यस्थो हविर्गृह्णामि नित्यशः ॥ २४ ॥ एतत्संदर्शनार्थाय लिंगमूर्तिरभूद्विभुः ॥ तल्लिंगमतुलं देवा नमश्चक्रुर्मुदा
न्विताः ॥ २५ ॥ सर्वपापापहं पार्थ सर्वकामफलप्रदम् ॥ तत्र होमावसाने च दत्ते हिमवता शुभे ॥ २६ ॥ दिव्यरत्नान्विते स्कन्दो निषण्णः परमा

१ तेऽतिदूरतः—इ० पा० । २ नदी—इ० पा० । ३ यः कर्दमः मत्पिता, तथा चाहमपि—इति योजना ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सने ॥ सर्वमंगलसंभारैर्विधिमंत्रपुरस्कृतम् ॥ २७ ॥ अभ्यषिंचंस्ततो देवाः कुमारं शंकरात्मजम् ॥ इंद्रो विष्णुर्महावीर्यो ब्रह्मरुद्रौ च फाल्गुन ॥२८॥
आदित्याद्या ग्रहाः सर्वे तथोभावनिलानलौ ॥ आदित्या वसवो रुद्राः साध्याश्चैवाश्विनावुभौ ॥ २९ ॥ विश्वेदेवाश्च मरुतो गंधर्वाप्सरसस्तथा ॥
देवब्रह्मर्षयश्चैव वालखिल्या मरीचिपाः ॥ ३० ॥ विद्याधरा योगसिद्धाः पुलस्त्यपुलहादयः ॥ पितरः कश्यपोऽत्रिश्च मरीचिर्भृगुरंगिराः ॥ ३१ ॥
दक्षोऽथ मनवो ये च ज्योतींषि ऋतवस्तथा ॥ मूर्तिमत्यश्च सरितो महीप्रभृतिकास्तथा ॥ ३२ ॥ लवणाद्याः समुद्राश्च प्रभासाद्याश्च तीर्थकाः ॥
पृथिवी द्यौर्दिशश्चैव पादपाः पार्वतास्तथा ॥ ३३ ॥ आदित्याद्या मातरश्च कुर्वंत्यो गुहमंगलम् ॥ वासुकिप्रमुखा नागास्तथोभौ गरुडारुणौ ॥
॥ ३४ ॥ वरुणो धनदश्चैव यमः सानुचरस्तथा ॥ राक्षसो निर्ऋतिश्चैव भूतानि च पलाशनाः ॥ ३५ ॥ धर्मो बृहस्पतिश्चैव कपिलो गाधिनंदनः ॥
बहुलत्वाच्च ये नोक्ता विविधा देवतागणाः ॥ ३६ ॥ ते च सर्वे महीकूले ह्यभ्यषिंचन्मुदा गुहम् ॥ ततो महास्वनामुग्रां देवदैत्यादिदर्पहाम् ॥ ३७ ॥
ददौ पशुपतिस्तस्मै सर्वभूतमहाचमूम् ॥ विष्णुर्ददौ वैजयंतीं मालां बलविवर्धिनीम् ॥ ३८ ॥ उमा ददौ चारजसी वाससी सूर्यसप्रभा ॥ गंगा कमं
डलुं दिव्यममृतोद्भवमुत्तमम् ॥ ३९ ॥ मही महानदी तस्य चाक्षमालां ससागरा[1] ॥ ददौ मुदा कुमाराय दंडं चैव बृहस्पतिः ॥ ४० ॥ गरुडो
दयितं पुत्रं मयूरं चित्रबर्हिणम् ॥ अरुणस्ताम्रचूडं च प्रददौ चरणायुधम्[2] ॥ ४१ ॥ छागं च वरुणो राजा बलवीर्यसमन्वितम् ॥ कृष्णाजिनं तथा
ब्रह्मा ब्रह्मण्याय ददौ जयम् ॥ ४२ ॥ चतुरोऽनुचरांश्चैव महावीर्यान्बलोत्कटान् ॥ नंदिसेनं लोहिताक्षं घण्टाकर्णं च मानसान् ॥ ४३ ॥ चतुर्थं
चाप्यतिबलं ख्यातं कुसुममालिनम् ॥ ततः स्थाणुर्ददौ देवो महापारिषदं क्रतुम् ॥ ४४ ॥ स हि देवासुरे युद्धे दैत्यानां भीमकर्मणाम् ॥ जघान
दोर्भ्यां संक्रुद्धः प्रयुतानि चतुर्दश ॥ ४५ ॥ यमः प्रादादनुचरौ यमकालोपमौ[3] तदा ॥ उन्माथं च प्रमाथं च महावीर्यौ महाद्युती ॥ ४६ ॥ सुभ्राजौ
भास्करस्यैव यौ सदा चानुयायिनौ ॥ तौ सूर्यः कार्तिकेयाय ददौ पार्थ मुदान्वितः ॥ ४७ ॥ कैलासशृङ्गसंकाशौ श्वेतमाल्यानुलेपनौ ॥ सोमोऽ
प्यनुचरौ प्रादान्मणिं सुमणिमेव च ॥ ४८ ॥ ज्वालाजिह्वं ज्योतिषं च ददावग्निर्महाबलौ ॥ परिघं च बलं चैव भीमं च सुमहाबलम् ॥ ४९ ॥
स्कंदाय त्रीननुचरान्ददौ विष्णुरुरुक्रमः ॥ उत्क्रोशं पंचजं चैव वज्रदण्डधरावुभौ ॥५०॥ ददौ महेशपुत्राय वासवः परवीरहा ॥ तौ हि शत्रून्महेन्द्रस्य
जघ्नतुः समरे बहून् ॥ ५१ ॥ वर्धनं बंधनं चैव आयुर्वेदविशारदौ ॥ स्कन्दाय ददतुः प्रीतावश्विनौ भरतर्षभ ॥ ५२ ॥ बलं चातिबलं चैव महावक्त्रौ

१ ससागराम्—इ० पा० । २ चरणायुधं—कुक्कुटम्—इत्यर्थः । ३ यमकामोपमौ—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

महाबलौ ॥प्रददौ कार्तिकेयाय वायुश्चानुचरावुभौ ॥ ५३ ॥ घसं चातिघसं [1]वीरौ वरुणश्च ददौ प्रभुः ॥ सुवर्चसं महात्मानं तथैवाप्यतिवर्चसम् ॥
॥ ५४ ॥ हिमवान्प्रददौ पार्थ साक्षाद्दौहित्रकाय वै ॥ कांचनं च ददौ मेरुर्मेघमालिनमेव च ॥५५॥ उच्छ्रितं चातिशृंगं च महापाषाणयोधिनौ ॥
स्वाहेयाय ददौ प्रीतः स विंध्यः पार्षदौ शुभौ ॥ ५६ ॥ संग्रहं विग्रहं चैव समुद्रोऽपि गदाधरौ ॥ प्रददौ पार्षदौ वीरौ महीनद्या समन्वितः ॥५७॥
उन्मादं पुष्पदंतं च शंकुकर्णं तथैव च ॥ प्रददावग्निपुत्राय पार्वती शुभदर्शना ॥ ५८ ॥ जयं महाजयं चैव नागौ ज्वलनसूनवे ॥ प्रददुर्बलिनां श्रेष्ठौ
सुपर्णः पार्षदावुभौ ॥५९॥ एवं साध्याश्च रुद्राश्च वसवः पितरस्तथा ॥ सर्वे जगति ये मुख्या ददुः स्कंदाय पार्षदान् ॥ ६० ॥ नानावीर्यान्महावीर्या
न्नानायुधविभूषणान् ॥ बहुलत्वान्न शक्यंते संख्यातुं ते च फाल्गुन ॥ ६१ ॥ मातरश्च ददुस्तस्मै तदा मातृगणान्प्रभो ॥ याभिर्व्याप्तास्त्र
यो लोकाः कल्याणीभिश्चराचराः ॥ ६२ ॥ प्रभावती विशालाक्षी गोपाला गोनसा तथा ॥ अप्सुजाता बृहद्दंडी कालिका बहुपुत्रका ॥ ६३ ॥
भयंकरी च चक्रांगी तीर्थनेमिश्च माधवी ॥ गीतप्रिया अलाताक्षी [2]चंटुला शलभामुखी ॥ ६४ ॥ विद्युज्जिह्वा रुद्रकाली शतोलूखलमेखला ॥ शत
घंटाकिंकिणिका चक्राक्षी चत्वरालया ॥ ६५ ॥ पूतना रोदना [3]त्वामा कोटरा मेघवाहिनी ॥ ऊर्ध्ववेणीधरा चैव जरायुर्जर्जरानना ॥ ६६ ॥ [4]खं
टखेटी दहदहा तथा धमधमा जया ॥ बहुवेणी बहुशिरा बहुपादा बहुस्तनी ॥ ६७ ॥ शतोलूकमुखी कृष्णा कर्णप्रावरणा तथा ॥ शून्यालया
धान्यवासा पशुदा धान्यदा सदा ॥ ६८ ॥ एताश्चान्याश्च बह्व्यश्च मातरो भरतर्षभ ॥ बहुलत्वादहं तासां न संख्यातुमिहोत्सहे ॥ ६९ ॥ वृक्षचत्व
रवासिन्यश्चतुष्पथनिवेशनाः ॥ गुहास्मशानवासिन्यः शैलप्रस्रवणालयाः ॥ ७० ॥ नानाभरणवे[5]षांस्ता नानामूर्तिधरास्तथा ॥ नानाभाषायुधधराः
परिवव्रुस्तदा गुहम् ॥ ७१ ॥ ततः स शुशुभे श्रीमान्गुहो गु[6]हं इवापरः ॥ सैनापत्ये चाभिषिक्तो देवैर्नानामुनीश्वरैः ॥ ७२ ॥ ततः प्रणम्य सर्वांस्ता
नेकैकत्वेन पावकिः ॥ व्रियतां वर इत्याह भवब्रह्मपुरोगमान् ॥ ७३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां प्रथमे माहेश्वरखण्डे
कौमारिकाखण्डे कुमारेश्वरमाहात्म्ये कार्तिकेयस्य सेनानीत्वेऽभिषेकवर्णनंनाम त्रिंशोऽध्यायः ॥ ३० ॥ ॥ छ ॥ ॥ नारद उवाच ॥ ॥
ते चैनं योज्य चाशीर्भिरयाचंत वरं गुहम् ॥ एष एव वरोऽस्माकं यत्पापं तारकं जहि ॥ १ ॥ एवमस्त्विति तानुक्त्वा योगोयोग इति ब्रुवन् ॥
तारकारिमहातेजा मयूरं चाध्यरोहत ॥ २ ॥ शक्तिहस्तो विनद्याथ गुहो देवांस्तदाब्रवीत् ॥ यद्यद्य तारकं पापं नाहं हन्मि सुरोत्तमाः ॥ ३ ॥

१ चैव–इ०पा० । २ वहुला–इ० पा० । ३ वासा--इ०पा० । ४ वेटखेटी–इ०पा० । ५ नानाभरणलेखाः--इ०पा० । ६ गुहो गुह इव--अन्योपमाभावादत्रानन्वयालङ्कारः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गोब्राह्मणावमन्तॄणां ततो यामि गतिं स्फुटम् ॥ एवं तेन प्रतिज्ञाते शब्दोऽतिसुमहानभूत् ॥ ४ ॥ योगोयोग इति प्राहुराज्ञया शरजन्मनः ॥ अरजो वाससी रक्ते वसानः पार्वतीसुतः ॥ ५ ॥ अथाग्रे सर्वदेवानां स्थितो वीरो ययौ मुदा ॥ तस्य केतुरलं भाति चरणायुधशोभितः ॥ ६ ॥ चरणाभ्यां गिरीञ्छक्तो यो विदारयितुं रणे ॥ या चेष्टा सर्वभूतानां प्रभा शांतिर्बलं यथा ॥ ७ ॥ तन्मया गुहशक्तिः सा भृशं हस्ते व्यरोचत ॥ यद्दाढर्यं सर्वलोकेषु तन्मयं कवचं तथा ॥ ८ ॥ योत्स्यमानस्य वीरस्य देहेप्रादुरभूत्स्वयम् ॥ धर्मः सत्यमसंमोहस्तेजः कांतत्वमक्षतिः ॥ ९ ॥ बलमोजः कृपा चव बद्धा करयुगं तथा ॥ आदेशकारीण्यग्रेऽस्य स्वयं तस्थुर्महात्मनः ॥ १० ॥ तमग्रे चापि गच्छंतं पृष्ठतोनुययौ हरः ॥ रथेनादित्यवर्णेन पार्वत्या सहितः प्रभुः ॥ ११ ॥ निर्मितेन हरेणैव स्वयमीशेन लीलया ॥ सहस्रं तस्य सिंहानां तस्मिन्युक्तं रथोत्तमे ॥ १२ ॥ अभीषून्पुरुषव्याघ्र ब्रह्मा च जगृहे स्वयम् ॥ ते पिबंत इवाकाशं त्रासयंतश्चराचरम् ॥ १३ ॥ सिंहा रथस्य गच्छंतो नदंतश्चारुकेसराः ॥ तस्मिन्रथे पशुपतिः स्थितो भात्युमया सह ॥ १४ ॥ विद्युता मंडितः सूर्यः सेंद्रचापघनो यथा ॥ अग्रतस्तस्य भगवान्धनेशो गुह्यकैः सह ॥ १५ ॥ आस्थाय रुचिरं याति पुष्पकं नरवाहनः ॥ ऐरावणं समास्थाय शक्रश्चापि सुरैः सह ॥ १६ ॥ पृष्ठतोनुययौ यांतं वरदं वृषभध्वजम् ॥ तस्य दक्षिणतो देवा मरुतश्चि त्रयोधिनः ॥ १७ ॥ गच्छंति वसुभिः सार्धं रुद्रैश्च सह संगताः ॥ यमश्च मृत्युना सार्धं सर्वतः परिवारितः ॥ १८ ॥ घोरैर्व्याधिशतै श्चापि सव्यतो याति कोपितः ॥ यमस्य पृष्ठतश्चापि घोरस्त्रिशिखरः सितः ॥ १९ ॥ विजयोनाम रुद्रस्य याति शूलः स्वयं कृतः ॥ तमुग्रपाशो भगवान्वरुणः सलिलेश्वरः ॥ २० ॥ परिवार्य शनैर्याति यादोभिर्विविधैर्वृतः ॥ पृष्ठतो विजयस्यापि याति रुद्रस्य पट्टिशः ॥ २१ ॥ गदामुशलशक्त्याद्यैर्वरप्रहरणैर्वृतः ॥ पट्टिशं चान्वगात्पार्थ अस्त्रं पाशुपतं महत् ॥ २२ ॥ बहुशीर्षं महाघोरमेकपादं बहूदरम् ॥ कमंडलुश्चास्य पश्चान्महर्षिगणसेवितः ॥ २३ ॥ तस्य दक्षिणतो भाति दण्डो गच्छञ्छ्रिया वृतः ॥ भृग्वंगिरोभिः सहितो देवैरप्य भिपूजितः ॥ २४ ॥ राक्षसाश्चान्यदेवाश्च गन्धर्वा भुजगास्तथा ॥ नद्यो नदाः समुद्राश्च मुनयोऽप्सरसां गणाः ॥ २५ ॥ नक्षत्राणि ग्रहाश्चैव जंगमं स्थावरं तथा ॥ मातरश्च महादेवमनुजग्मुः क्षुधान्विताः ॥ २६ ॥ सर्वेषां पृष्ठतश्चासीत्तार्क्ष्यस्थो बुद्धिमान्हरिः ॥ पालयन्पृतनां सर्वां स्वपरीवारसंवृतः ॥ २७ ॥ एवं सैन्यसमोपेत उत्तरं तटमागतः ॥ ताम्रप्राकारमाश्रित्य तस्थौ त्र्यंबकनंदनः ॥ २८ ॥ स तारकपुरस्यापि पश्यन्नृद्धि

१. हरेणाशु-- इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मनुत्तमाम् ॥ विसिष्मिये महासेनः प्रशशंस तपोऽस्य च ॥ २९ ॥ स्थितः पश्यन्स शुशुभे मयूरस्थो गुहस्तदा ॥ छत्रेण ध्रियमाणेन स्वयं सोम समस्त्विषा ॥ ३० ॥ वीज्यमानश्चामराभ्यां वाय्वग्निभ्यां महाद्युतिः ॥ मातृभिश्च सुरैर्दत्तैः स्वैर्गणैरपि संवृतः ॥ ३१ ॥ ततः प्रणम्य तं शक्रो देव मध्ये वचोऽब्रवीत् ॥ पश्यपश्य महासेन दैत्यानां बलशालिनाम् ॥ ३२ ॥ ये त्वां कालं न जानंति मर्त्या गृहरता इव ॥ एतेषां च गृहे दूतो यस्त्वां शंसतु तारकम् ॥ ३३ ॥ वीराणामुचितं त्वेतत्कीर्तिदं च महाजने ॥ अनुज्ञया ततः स्कन्दभक्तं शक्रो धनंजय ॥ ३४ ॥ मामादिश्यासुरेन्द्राय प्राहिणोद्दौत्ययोग्यकम् ॥ अहं स्वयं गन्तुकामः शक्रेणापि च प्रेषितः ॥ ३५ ॥ प्रासादे स्त्रीसहस्राणां प्रावोचं मध्यतोऽप्यहम् ॥ असुराधम दुर्बुद्धे शक्रस्त्वामाह तच्छृणु ॥ ३६ ॥ यज्जगद्दलनादात्तं किल्बिषं दानव त्वया ॥ तस्याहं नाशकस्तेऽद्य पुरुषश्चेद्भविष्यसि ॥ ३७ ॥ शीघ्रं निःसर पापिष्ठ निःसरिष्यसि चेन्न हि ॥ क्षणात्तव पुरं क्षेप्स्ये पावित्र्यायैव सागरे ॥ ३८ ॥ इति श्रुत्वा रूक्षवाचं क्रुद्धः स्त्रीगणसंवृतः ॥ मुष्टिमुद्यम्य माँऽधावद्भीतश्चाहं पलायितः ॥ ३९ ॥ व्याकुलस्तत्र वृत्तांतं कुमाराय न्यवेदयम् ॥ मयि चाप्यागते दैत्यश्चिंतयामास चेतसि ॥ ४० ॥ नालब्धसंश्रयः शक्रो वक्तुमेतदिहार्हति ॥ निमित्तानि च घोराणि संत्रासं जनयंति मे ॥ ४१ ॥ एवं विचिंत्य चोत्थाय गवाक्षं सोध्यरोहत ॥ सहस्रभौमिकावासशृङ्गवातायनस्थितः ॥ ४२ ॥ अपश्यद्देवसैन्यं स दिवं भूमिं च संवृतम् ॥ रथैर्गजैर्हयैश्चापि नादिताश्च दिशो दश ॥ ४३ ॥ विमानैश्चाद्भुताकारैः किंनरोद्गीतनादितैः ॥ दुन्दुभिभिर्गोविषाणैस्तालैः शंखैश्च नादितैः ॥ ४४ ॥ अक्षोभ्यामिव तां सेनां दृष्ट्वा सोऽचिंतयत्तदा ॥ एते मया जिताः पूर्वं कस्माद्भूयः समागताः ॥ ४५ ॥ इति चिंतापरो दैत्यः शुश्राव कटुकाक्षरम् ॥ देवबंदिभिरुद्घुष्टं घोरं हृदयदारणम् ॥४६॥ जयातुलशक्तिदीधितिपिंजररुचारुणमंडलभुजोद्भासितदेवसैन्य पुरवदनकुमुदकाननविकासनेंदो कुमारनाथ जय दितिकुलमहोदधिवडवानल मधुररवमयूररवासुरमुकुटकूटकुट्टितचरणनखांकुर महासेन तारकवंशशुष्कतृणदावानल योगीश्वर योगिजनहृदयगगनविततचिंतासंतानसंतमसनोदनखरकिरणकलपनखनिकरविराजितचरणकमल स्कन्द जय बाल सप्तवासर भुवनावलिशोकसंदहन ॥ ४७ ॥ नमो नमस्तेस्तु मनोरमाय नमोस्तु ते साधुभयापहाय ॥ नमोस्तु ते बालकृताचलाय नमोनमो नाशय देवशत्रून् ॥ ४८ ॥ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां प्रथमे माहेश्वरखण्डे कौमारिकाखण्डे कुमारेश्वरमाहात्म्ये कुमारस्य तारकासुरनगरं प्रति गमनवर्णनंनामैकत्रिंशोऽध्यायः ॥ ३१ ॥ ॥ छ ॥

१ प्रेष्यः—इति शेषः। २ शंसति—इ० पा०। ३ मा—माम्—नारदम्। ४ देवदुन्दुभिनिर्घोषम्—इ० पा०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ॥ नारद उवाच ॥ ॥ श्रुत्वैतं संस्तवं दैत्यः संघुष्टं देवबंदिभिः ॥ सस्मार ब्रह्मणो वाक्यं वधं बालादुपस्थितम् ॥ १ ॥ श्रुत्वा स क्लिन्नसर्वांगो द्वाःस्थं राजा वचोऽब्रवीत् ॥ अमात्यान्द्रष्टुमिच्छामि शीघ्रमानय मा चिरम् ॥ २ ॥ ततस्ते राजवचनात्कालनेमिमुखागताः ॥ प्राह तांस्तारको दैत्यः किमिदं वो विचेष्टितम् ॥ ३ ॥ यैः शत्रुसंभवा वार्ता कापि न श्रावितस्त्वहम् ॥ मदिराकाममत्तानां मंत्रित्वं वो न युज्यते ॥ हितं मन्त्रयते राज्ञस्तेन मंत्री निगद्यते ॥ ४ ॥ ॥ अमात्या ऊचुः ॥ ॥ को जानाति सुरान्दीनान्दैत्यानामिति नो मतिः ॥ ५ ॥ मा विषीद महाराज वयं जेष्यामहे सुरान् ॥ बालादपि भयं किं वा लज्जायै चिंतितं त्विदम् ॥ ६ ॥ सर्वमेतत्सुसाध्यं च भेरी संताड्यतां दृढम् ॥ ततो दैत्येन्द्रवचनात्संनाहजननी तदा ॥ ७ ॥ भृशं संताडिता भेरी कंपयामास सा जगत् ॥ स्मरणाद्दैत्यराजस्य पर्वतेभ्यो महासुराः ॥ ८ ॥ निम्नगाभ्यः समुद्रेभ्यः पातालेभ्योंऽबरादपि ॥ सहसा समनुप्राप्ता युगांतानलसप्रभाः ॥ ॥ ९ ॥ कोटिकोटिसहस्रैस्तु परार्धैर्दशभिः शतैः ॥ सेनापतिः कालनेमिः[1] शीघ्रं देवानुपाययौ ॥ १० ॥ चतुर्योजनविस्तीर्णे नानाश्चर्यसमन्विते ॥ रथे स्थितो मनाग्दीनस्तारकः समदृश्यत ॥ ११ ॥ एतस्मिन्नंतरे पार्थ क्रुद्धैः स्कन्दस्य पार्षदैः ॥ प्राकारः पातितः सर्वो भग्नान्युपवनानि च ॥ ॥ १२ ॥ ततश्चचाल वसुधा देवी सवनकानना ॥ जज्वाल खं सनक्षत्रं प्रमूढं भुवनं भृशम् ॥ १३ ॥ तमोभूतं जगच्चासीद्धूम्रैर्व्याप्तं नभोऽभवत् ॥ ततो नानाप्रहरणं प्रलयांबुदसन्निभम् ॥ १४ ॥ कालनेमिमुखं पार्थ अदृश्यत महद्बलम् ॥ तद्धि घोरमसंख्येयं जगर्ज विविधा गिरः ॥ ॥ १५ ॥ अभ्यद्रवद्रणे देवान्भगवंतं च शंकरम् ॥ विनदद्भिस्ततो दैत्यैर्देवानीकं महायुधैः ॥ १६ ॥ पर्वतैश्च शतघ्नीभिरायसैः परिघैरपि ॥ क्षणेन द्रावितं सर्वं विमुखं चाप्यदृश्यत ॥ १७ ॥ असुरैर्वध्यमाने तु पावकैरिव काननम् ॥ अपतद्दावभूमिष्ठं[2] महाद्रुमवनं यथा ॥ १८ ॥ ते भिन्नास्थिशिरोदेहाः प्राद्रवंत दिवौकसः ॥ न नाथमध्यगच्छंत वध्यमाना महासुरैः ॥ १९ ॥ अथ तद्विद्रुतं सैन्यं दृष्ट्वा देवः पुरंदरः ॥ आश्वासयन्नुवाचेदं बलवद्दानवार्दितम् ॥ २० ॥ भयं त्यजत भद्रं वः शूराः शस्त्राणि गृह्णत ॥ कुरुध्वं विक्रमे बुद्धिं मा च काचिद्व्यथास्तु वः ॥ २१ ॥ एष कालानलप्रख्यो मयूरं समुपस्थितः ॥ रक्षिता वो महासेनः कथं भीतिस्तथापि वः ॥ २२ ॥ शक्रस्य वचनं श्रुत्वा समाश्वस्ता दिवौकसः ॥ दानवान्प्रत्ययुध्यंत शक्रं कृत्वा व्यपाश्रयम् ॥ २३ ॥ कालनेमिर्महेन्द्रेण संयुगे समयुज्यत ॥ सहस्राक्षौहिणीयुक्तो जंभकः शंकरेण च ॥ २४ ॥ कुजंभो विष्णुना चैव तावत्य

१ कालनेमिपुरोगमाः—इ०पा० । २ 'दवदावौ वनारण्यवह्नी—'इत्यमरः । दावभूमिष्ठम्—अरण्यानीस्थम्—इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

क्षौहिणीवृतः ॥ अन्ये च त्रिदशाः सर्वे मरुतश्च महाबलाः॥२५॥प्रत्ययुध्यंत दैत्येंद्रैः साध्याश्च वसुभिः सह ॥ ततो बहुविधं युद्धं कालनेमिर्विधाय च ॥२६॥ उत्सृज्य सहसा पार्थ ऐरावणशिरःस्थितः ॥ स तु पादप्रहारेण मुष्टिना चैव तं गजम् ॥ २७ ॥ शक्रं च जघ्ने विनदन्पेततुस्तावुभौ भुवि ॥ ततः शक्रं समादाय कालनेमिर्विचेतसम् ॥२८॥ रथमाश्रित्य भूयोपि तारकाभिमुखो ययौ ॥ अथ क्रुष्टं तदा देवैः सहसा चांतकादिभिः ॥ २९ ॥ ह्रियते ह्रियते राजा त्राता कोऽपि न विद्यते ॥ एतस्मिन्नंतरे शर्वः पिनाकधनुषश्च्युतैः ॥ ३० ॥ बाणैः ससैन्यं कृत्वा च जंभकं गृध्रमोदनम्[1] ॥ कालनेमिं समागम्य रथस्थो वाक्यमब्रवीत् ॥ ३१ ॥ किमेतेन महेन्द्रेण मया युध्यस्व दानव[2] ॥ वीरंमन्य सुदुर्बुद्धे ततो ज्ञास्यसि वीरताम् ॥ ३२ ॥ ॥ ॥ कालनेमिरुवाच ॥ ॥ नग्नेन सह को युध्येद्धतेनापि च येन वा॥शंसत्सु दैत्यवीराणामुपहासः प्रजायते॥३३॥आत्मनस्तु समं किंचिद्विलोकय सुदुर्मते॥तदाकर्ण्य च सावज्ञं वचः शर्वो विसिष्मिये॥३४॥ततः कुमारः सहसा मयूरस्थोऽभ्यधावत ॥ कुजंभं सानुगं हत्वा वासुदेवोप्यधावत ॥३५॥ ततो हरिः स्कंदमाह किमेतेन तव प्रभो ॥ दैत्याधमेन पापेन मुहूर्तं पश्य मे बलम् ॥ ३६ ॥ एवमुक्त्वा निवार्यैनं केशवो गरुडस्थितः ॥ शार्ङ्गको दंडनिर्मुक्तैर्बाणैर्दैत्यमवाकिरत् ॥ ३७ ॥ स तैर्बाणैस्ताड्यमानो वज्रैरिव महासुरः ॥ विमुच्य वासवं क्रुद्धो बाणांस्तान्व्यधमच्छरैः ॥ ३८ ॥ यान्यान्बाणान्हरिर्दिव्यानस्त्राणि च मुमोच[3] ह ॥ निवारयति दैत्यस्तान्प्रहसँल्लीलयैव च ॥ ३९ ॥ ततः कौमोदकीं गृह्य क्षिप्रकारी जनार्दनः ॥ मुमोच सैन्यनाथाय सारथिं च व्यचूर्णयत् ॥ ४० ॥ ततो रथादवप्लुत्य विवृत्य वदनं महत् ॥ गरुडं चंचुनादाय स विष्णुं क्षिप्तवान्मुखे ॥ ४१ ॥ ततोऽभूत्सर्वदेवानां विमोहो जगतामपि ॥ चचाल वसुधा चेलुः पर्वताः सप्त चार्णवाः ॥ ४२ ॥ कालनेमिर्नदंश्चैव प्रानृत्यत महारणे ॥ असंमूढस्ततो विष्णुस्त्वराकाल उपस्थिते ॥ ४३ ॥ कुक्षिं विदार्य चक्रेण भास्करोऽभादिवोदितः ॥ बहिर्भूतो हरिश्चैनं मोहयित्वा स्वनिन्दया ॥ ४४ ॥ पातालस्य तलं निन्ये तत्र शिश्ये स काष्ठवत् ॥ ततश्चक्रेण दैत्यानां निहता दशकोटयः ॥ ४५ ॥ प्रमोदितास्तथा देवा विमोहास्तत्क्षणाद्बभुः ॥ ततः शर्वस्तमालिंग्य साधुसाधु जनार्दन ॥ ४६ ॥ त्वया यद्विहितं कर्म तत्कर्तान्यो न विद्यते ॥ महिषाद्याः सुदुर्जेया देव्या ये विनिपतिताः ॥ ४७ ॥ तेषामतिबलो ह्येष त्वया विष्णो विनिर्जितः ॥ तारकामयसंग्रामे वध्यस्तेसौ जनार्दन ॥ ४८ ॥ कंसरूपः पुनस्तेऽयं हंतव्योऽष्टमजन्मनि ॥ एवं प्रशंसमानास्ते वासुदेवं जगद्गुरुम् ॥ ४९ ॥ शस्त्रजालैर्लब्धसंज्ञान्दैत्यसैन्याननाशयत् ॥ तानि दैत्यशरीराणि जर्जराणि महायुधैः ॥ ५० ॥

१ गृध्राणां मोदनमानन्ददायकम्—हतमित्यभिप्रायः । हत एव वीरे रणे तन्मांसभक्षणेन गृध्राणामानन्दोदयो भवतीति । २ वृथा युध्यसि दानव--इ०पा० । ३ प्रमुंचति--इ०पा० ।

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अपतन्भूतले पार्थ च्छिन्नाभ्राणीव सर्वशः ॥ ततस्तद्दानवं सैन्यं हतनाथमभूत्तदा[1] ॥ ५१ ॥ देवैः स्कंदानुगैश्चैव कृतं शस्त्रैः पराङ्मुखम् ॥ अथो क्रुष्टं तदा हृष्टैः सर्वैर्देवैर्मुदायुतैः ॥ ५२ ॥ संहतानि च सर्वाणि तदा तूर्याण्यवादयन् ॥ अथ भग्नं बलं प्रेक्ष्य हतवीरं महारणे ॥ ५३ ॥ देवानां च महामोदं तारकः प्राह सारथिम् ॥ सारथे पश्य सैन्यानि द्राव्यमाणानि मे सुरैः ॥ ५४ ॥ येस्माभिस्तृणवद्दृष्टाः पश्य कालस्य चित्रताम् ॥ तन्मे वाहय शीघ्रं त्वं रथमेनं सुरान्प्रति ॥ ५५ ॥ पश्यंतु मे बलं बाह्वोर्द्रवंतु च सुराधमाः ॥ ब्रुवन्नेवं सारथिं स विधुन्वन्सुमहद्धनुः ॥ ५६ ॥ क्रोध रक्तेक्षणो राजा देवसैन्यं समाविशत् ॥ आगच्छमानं तं दृष्ट्वा हरिः स्कंदमथाब्रवीत् ॥ ५७ ॥ कुमार पश्य दैत्येंद्रं कालं यद्वद्युगात्यये ॥ अयं स येन तपसा घोरेणाराधितः शिवः ॥ ५८ ॥ अयं स येन शक्राद्याः कृता मर्काः समार्बुदम् ॥ अयं स सर्वशस्त्रौघैर्योऽस्माभिर्न जितो रणे ॥ ॥ ५९ ॥ नावज्ञया प्रद्रष्टव्यस्तारकोऽयं महासुरः ॥ सप्तमं हि दिनं तेऽद्य मध्याह्नोऽयं च वर्तते ॥ ६० ॥ अर्वागस्तमनादेनं जहि वध्योऽन्यथा न हि ॥ एवमुक्त्वा स शक्रादींस्त्वरितः केशवोऽब्रवीत् ॥ ६१ ॥ आयासयत दैत्येंद्रं सुखवध्यो यथा भवेत् ॥ ततस्ते विष्णुवचनाद्विनदन्तो दिवौकसः ॥ ६२ ॥ तमासाद्य शरव्रातैर्मुदिताः समवाकिरन् ॥ प्रहसन्निव देवांस्तान्द्रावयामास तारकः ॥ ६३ ॥ यथा नास्तिकदुर्वृत्तो नानाशास्त्रोपदेशकान् ॥ सोढुं शक्ता न ते वीरं महति स्यंदने स्थितम् ॥ ६४ ॥ महापस्मारसंक्रांतं यथैवाप्रियवादिनम् ॥ विधूय सकलान्देवान्क्षणमात्रेण तारकः ॥ ६५ ॥ आजगाम कुमाराय विधुवन्स महाधनुः ॥ आगच्छमानं तं दृष्ट्वा स्कंदः प्रत्युद्ययौ ततः ॥ ६६ ॥ तस्यारक्षद्भवः पार्श्वं दक्षिणं चैव तं हरिः ॥ पृष्ठे च पार्षदास्तस्य कोटिशोऽर्बुदशस्तथा ॥ ६७ ॥ ततस्तौ सुमहायुद्धे संसक्तौ देवदैत्ययोः ॥ धर्माधर्माविवोदग्रौ जगदाश्चर्यकारकौ ॥ ६८ ॥ ततः कुमारमासाद्य लीलया तारकोऽब्रवीत् ॥ अहो बालातिबालस्त्वं यत्त्वं गीर्वाणवाक्यतः ॥ ६९ ॥ आसादयसि मां युद्धे पतंग इव पावकम् ॥ वधेन तव को लाभो मम मुक्तोऽसि बालक ॥ ७० ॥ पिब क्षीरं गृहाणेमं कंदुकं क्रीड लीलया ॥ एवमुक्तः प्रहस्याह तारकं योगिनां गुरुः ॥ ७१ ॥ शिशुत्वं मावमंस्था मे शिशुः कष्टो भुजंगमः ॥ दुष्प्रेक्ष्यो भास्करो बालो दुःस्पर्शोऽल्पोऽपि पावकः ॥ ७२ ॥ अल्पाक्षरो न मंत्रः किं सस्फुरो[2] दैत्य दृश्यते ॥ एवमुक्त्वा दैत्यमुक्तं गृहीत्वा कंदुकं च तम् ॥ ७३ ॥ तस्मिञ्छक्त्यस्त्रमादाय दैत्याय प्रमुमोच ह ॥ तस्य[3] तेन प्रहारेण रथश्चूर्णीकृतोऽभवत् ॥ ७४ ॥ चतुर्योजनमात्रो यो नानाश्चर्यसमन्वितः ॥ गरुडस्य सुता ये च शीर्यमाणे रथोत्तमे ॥ ७५ ॥

---

१ हतनाथम्—हतसेनापति—इत्यर्थः । २ सस्फुरः—स्फुरणेन सहितः—फलदायकः—इत्यर्थः । ३ ततस्तेन—इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

मुक्ताः कथंचिदुत्पत्य सागरांतरमाविशन् ॥ ततः क्रुद्धस्तारकश्च मुद्गरं क्षिप्तवान्गुहे ॥ ७६ ॥ विंध्याद्रिमिव तं स्कंदो गृहीत्वा तं व्यताडयत् ॥
स्थिरे तस्योरसि व्यूढे मुद्गरः शतधाऽगमत् ॥ ७७ ॥ मेने च दुर्जयं दैत्यस्तदा षड्वदनं रणे ॥ चिंतयामास बुद्ध्या च प्राप्तं तद्ब्रह्मणो वचः ॥ ७८ ॥
तं भीतमिव चालक्ष्य दैत्यवीराश्च कोटिशः ॥ नदंतोऽतिमहासेनं नानाशस्त्रैरवाकिरन् ॥ ७९ ॥ क्रुद्धस्तेषु ततः स्कंदः शक्तिं घोरामथाददे ॥
अभ्यस्यमाने शक्त्यस्त्रे स्कंदेनामिततेजसा ॥ ८० ॥ उल्काजालं महाघोरं पपात वसुधातले ॥ चाल्यमाना तथा शक्तिः सुघोरा भवसूनुना ॥
॥ ८१ ॥ ततः कोट्यो विनिष्पेतुः शक्तीनां भरतर्षभ ॥ स शक्त्यस्त्रेण बलवान्करस्थेनाहनत्प्रभुः ॥ ८२ ॥ अष्टौ पद्मानि दैत्यानां दशकोटि
शतानि च ॥ तथा नियुतसाहस्रं वाहनं कोटिरेव च ॥ ८३ ॥ ह्रदोदरं च दैत्येंद्रं निखर्वैर्दशभिर्वृतम् ॥ तत्राकुर्वन्सुतुमुलं नादं वध्येषु शत्रुषु ॥ ८४ ॥
कुमारानुचराः पार्थ पूरयंतो दिशो दश ॥ शक्त्यस्त्रस्यार्चिःसंभूतशक्तिभिः केऽपि सूदिताः ॥ ८५ ॥ पताकयावधूताश्च हताः केचित्सहस्रशः ॥
केचिद्घंटारवत्रस्ताश्छिन्नभिन्नह्रदोऽपतन् ॥ ८६ ॥ केचिन्मयूरपक्षाभ्यां चरणाभ्यां च सूदिताः ॥ कोटिशस्ताम्रचूडेन विदार्यैव च भक्षिताः ॥ ८७ ॥
पार्षदैर्मातृभिः सार्धं पद्मशो निहताः परे ॥ एवं निहन्यमानेषु दानवेषु गुहादिभिः ॥ ८८ ॥ अभाग्यैरिव लोकेषु तारकः स्कंदमाययौ ॥ जग्राह
च गदां दिव्यां लक्षघंटादुरासदाम् ॥ ८९ ॥ तया मयूरमाजघ्ने मयूरो विमुखोऽभवत् ॥ दृष्ट्वा पराङ्मुखं स्कंदं वासुदेवोऽब्रवीत्त्वरन् ॥ ९० ॥
देवसेनापते शीघ्रं शक्तिं मुंच महासुरे ॥ प्रतिज्ञामात्मनः पाहि लंबते रविमंडलम् ॥ ९१ ॥ ॥ स्कंद उवाच ॥ ॥ त्वयैव रुद्रभक्तोऽयं
जनार्दन ममेरितम् ॥ वधार्थं रुद्रभक्तस्य बाहुः शक्तिं मुंचति ॥ ९२ ॥ नारुद्रः पूजयेद्रुद्रं भक्तरूपस्य यो हरः ॥ रुद्ररूपमसुं हत्वा कीदृशं जन्म
नो भवेत् ॥ ९३ ॥ तिरस्कृता विप्रलब्धाः शप्ताः क्षिप्ताः प्रपीडिताः ॥ रुद्रभक्ताः कुलं सर्वं निर्दहंति हताः किमु ॥ ९४ ॥ एष चेद्धंति तद्भद्रं
हन्यतामेष मां रणे ॥ रुद्रभक्ते पुनर्विष्णो नाहं शस्त्रमुपाददे ॥ ९५ ॥ ॥ श्रीभगवानुवाच ॥ ॥ नैतत्तवोचितं स्कंद रुद्रभक्तो यथा शृणु ॥ द्वे तनू
गिरिजाभर्तुर्वेदज्ञा मुनयो विदुः ॥ ९६ ॥ एका जीवात्मिका तत्र प्रत्यक्षा च तथापरा ॥ द्रोग्धा भूतेषु भक्तश्च रुद्रभक्तो न स स्मृतः ॥ ९७ ॥ भक्तो
रुद्रे कृपावांश्च जंतुष्वेव हरव्रतः ॥ तदेनं भूतमर्त्येषु द्रोग्धारं त्वं पिनाकिनः ॥ ९८ ॥ जहि नैवात्र पश्यामि दोषं कंचन ते प्रभो ॥ श्रुत्वेति वाचं
गोविंदात्सत्यार्थामपि भारत ॥ ९९ ॥ हंतुं न कुरुते बुद्धिं रुद्रभक्त इति स्मरन् ॥ तारकस्तु ततः क्रुद्धो ययौ वेगेन केशवम् ॥ १०० ॥

१ अभ्यस्यमाने–जप्यमाने–इत्यर्थः । २ ह्रदोदरम्–ह्रदवत्–अति निम्नम् उदरं यस्य तम् । ३ विभिन्नह्रदयाः पतन्–इति पाठेऽडभाव आर्षः । ४ पादाभ्यां के च सूदिताः–इ० पा० ।

CC-0. In Public Domain. Digitization by eGangotri

प्राह चैवं सुदुर्बुद्धे हन्मि त्वां पश्य मे बलम् ॥ देवानां चापि धर्माणां मूलं मतिमतां तथा ॥ हत्वा त्वामद्य सर्वांस्तांश्छेत्स्ये पश्याद्य मे बलम् ॥ ॥ १०१ ॥ ॥ विष्णुरुवाच ॥ ॥ दैत्येंद्र तव चास्माभिः किमहो शृणु सत्यताम् ॥ १०२ ॥ रथे य एष शर्वोऽयं हतेऽस्मिन्सकलं हतम् ॥ श्रुत्वेति तारकः क्रुद्धस्तूर्णं रुद्ररथं ययौ ॥ १०३ ॥ अभिसृत्य स जग्राह रुद्रस्य रथकूबरम् ॥ यदा स कूबरं क्रुद्धस्तारकः सहसाऽग्रहीत् ॥ १०४ ॥ रेसतू रोदसी तूर्णं मुमुहुश्च महर्षयः ॥ व्यनदंश्च महाकाया दैत्या जलधरोपमाः ॥ १०५ ॥ आसीच्च निश्चितं तेषां जितमस्माभिरित्युत ॥ तारकस्याप्यभिप्रायं भगवान्वीक्ष्य शंकरः ॥ १०६ ॥ उमया सह संत्यक्त्वा रथं वृषभमावहत् ॥ ओमित्यथ जपन्ब्रह्मा आकाशं सहसाश्रितः ॥ ॥ १०७ ॥ ततस्तं शतसिंहं च रथं रुद्रेण निर्मितम् ॥ उत्क्षिप्य पृथ्व्यामास्फोट्य चूर्णयामास तारकः ॥ १०८ ॥ शूलपाशुपतादीनि सहसोपस्थितानि च ॥ वारयामास गिरिशो भवः साध्य इति ब्रुवन् ॥ १०९ ॥ ततः स्ववंचितं ज्ञात्वा रुद्रेणात्मानमीर्ष्यया ॥ विनदन्सहसाऽधावद्वृषभस्थं महेश्वरम् ॥ ११० ॥ ततो जनार्दनोऽधावच्चक्रमुद्यम्य वेगतः ॥ वज्रमिंद्रस्तथोद्यम्य दंडं चापि यमो नदन् ॥ १११ ॥ गदां धनेश्वरः क्रुद्धः पाशं च वरुणो नदन् ॥ वायुर्महांकुशं घोरं शक्तिं वह्निर्महाप्रभाम् ॥ ११२ ॥ निर्ऋतिर्निशितं खड्गं रुद्राः शूलानि कोपिताः ॥ धनूंषि साध्या देवाश्च परिघान्वसवस्तथा ॥ ११३ ॥ विश्वेदेवाश्च मुसलं चंद्रार्कौ स्वप्रभामपि ॥ ओषधीश्चाश्विनौ देवौ नागाश्च ज्वलितं विषम् ॥ ११४ ॥ हिमाद्रिप्रमुखाश्चापि समुद्यम्य महीधरान् ॥ भृशमुन्नदतो देवान्धावतो वीक्ष्य तारकः ॥ ११५ ॥ निवृत्तः सहसा पार्थ महागज इवोन्नदन् ॥ स वज्रमुष्टिनाहत्य भुजे शक्रमपातयत् ॥ ११६ ॥ दंडं यमादुपादाय मूर्ध्न्याहत्य न्यपातयत् ॥ उरसाहत्य सगदं धनदं भुव्यपातयत् ॥ ११७ ॥ वरुणात्पाशमादाय तेन बद्ध्वा न्यपातयत् ॥ महांकुशेन वायुं च चिरं मूर्ध्नि जघान सः ॥ ११८ ॥ फूत्कारैरुद्धतं वह्निं शमयामास तारकः ॥ निर्ऋतिं खड्गमादाय हत्वा तेन न्यपातयत् ॥ ११९ ॥ [१]शूलैरेव तथा रुद्राः साध्याश्च धनुषार्दिताः ॥ परिघैरेव वसवो मुशलैरेव विश्वकाः ॥ १२० ॥ रेणुनाच्छाद्य चंद्रार्कौ वल्मीकस्थाविवेक्षितौ ॥ महोग्राश्चौपधीस्तालैरश्विभ्यां सोऽभ्यवर्तयत् ॥ १२१ ॥ सविषाश्च कृता नागा निर्विषाः पादकुट्टनैः ॥ पर्वताः पर्वतैरेव निरुच्छ्वासा भृशं कृताः ॥ १२२ ॥ एवं तद्देवसैन्यं च हाहाभूतमचेतनम् ॥ कृत्वा मुहूर्तादाधावच्चक्रपाणिं तमुन्नदन् ॥ ॥ १२३ ॥ ततश्चांतर्दधे सद्यः प्रहसन्निव केशवः ॥ कुयोगिन इव स्वामी सदा बुद्धिमतां वरः ॥ १२४ ॥ अपश्यंस्तारको विष्णुं पुनर्वृषभवा

१ निर्ऋतेः--इत्ययमपि पाठः साधुः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

हनम् ॥ अधावत्कुपितो दैत्यो मुष्टिमुद्यम्य वेगतः ॥ १२५ ॥ अचिरांशुरिवालक्ष्यो लक्ष्योथ भगवान्हरिः ॥ आबभाषे ततो देवान्बाहुमुद्यम्य चोच्चकैः ॥ १२६ ॥ पलायध्वमहो देवाः शक्तिश्चेद्वः पलायितुम् ॥ विमूढा हि वयं सर्वे ये बालवचसागताः ॥ १२७ ॥ किं न श्रुतः पुरा गीतः श्लोकः स्वायंभुवेन यः ॥ यथा बालेषु निक्षिप्ताः स्त्रीषु पंडितकेषु च ॥ अपस्मारिषु चैवापि सर्वे ते संशयं गताः ॥१२८॥ प्रत्यक्षं तदिदं सर्वमधुना चात्र दृश्यते ॥१२९॥ अज्ञासिष्म पुरैवैतद्रुद्रभक्तं न हंत्यसौ ॥ यत्प्रतिज्ञां नाकरिष्यन्न स्यान्नः कदनं महत् ॥१३०॥ अथैष यदि दैत्येंद्रं न निहंति कुबुद्धिमान्॥मा भयं वो महाभागा निहनिष्यामि वो रिपून्॥१३१॥अद्य मे विपुलं बाह्वोर्बलं पश्यत देवताः॥ दैत्याधमं नाशयामि मुष्टिनैकेन पश्यत ॥१३२॥ मया हि दक्षिणो बाहुर्दत्तश्च भवतां सदा ॥ रिपून्वा निहनिष्यामि सत्यं तत्परिपालये॥१३३॥ येंऽबरे ये च पाताले भुवि ये च महासुराः॥ क्षणात्तान्नाशयिष्यामि महावातो घनानिव ॥१३४॥ एवमुक्त्वा जगन्नाथो मुष्टिमुद्यम्य दक्षिणम् ॥ निरायुधस्तार्क्ष्यपृष्ठादवप्लुत्याभ्यधावत ॥१३५॥ तस्मिन्धावति गोविंदे चचाल भुवनत्रयम् ॥ विमूर्छितमभूद्विश्वं देवा भीतिं परां ययुः ॥१३६॥ धावतश्चापि कल्पांतं रुद्रकल्पस्य तस्य[1] याः ॥ मुखा त्समुद्ययुर्ज्वालास्ताभिः खर्वशतं हतम् ॥ १३७ ॥ ततोंऽतरिक्षे वाचश्च प्रोचुः सिद्धाः स्वयं तदा ॥ जहि कोपं वासुदेव त्वयि क्रुद्धे क्व वै जगत् ॥ ॥ १३८ ॥ अनादृत्यैव तद्वाक्यं ब्रुवन्नान्यत्करोम्यहम् ॥ आह्वयंश्च महादैत्यं क्रुद्धो हरिरधावत ॥ १३९ ॥ उवाच वाचं साधूंश्च यत्नात्पालयतां फलम् ॥ दुष्टान्विनिघ्नतां चैव तत्फलं मम जायताम् ॥ १४० ॥ अथापश्यन्महासेनो रुद्रं यांतं च तारकम् ॥ तारकं चान्वधावन्तं पुराणपुरुषं हरिम् ॥ १४१ ॥ जगच्च क्षुब्धमत्यर्थं[2] स्वां प्रतिज्ञां पुरा कृताम् ॥ पश्चिमां प्रतिलंबंतं भास्करं चापि लोहितम् ॥ १४२ ॥ आकाशवाणीं शृण्वंश्च किं स्कन्द त्वं विषीदसि ॥ पश्चात्तापो यदि भवेत्कृत्वा ब्रह्मवधं त्वयि ॥ १४३ ॥ स्थापयेर्लिंगमीशस्य मोक्षो हत्याशतैरपि ॥ आविवेश[3] महाक्रोधं दिधक्षुरिव मेदिनीम् ॥ १४४ ॥ अथोत्प्लुत्य मयूरात्स प्रहसन्निव केशवम् ॥ बाहुभ्यामप्युपादाय प्रोवाच भवनंदनः ॥ १४५ ॥ जानामि त्वामहं विष्णो महाबुद्धिपराक्रमम् ॥ भूतभव्यभविष्यांश्च दैत्यान्हंस्यपि हूंकृतैः ॥ १४६ ॥ त्वमेव हंता दैत्यानां देवानां परिपालकः ॥ धर्मसंस्थापकश्च त्वमेष ते रचितोंऽजलिः ॥ १४७ ॥ क्षणार्धं पश्य मे वीर्यं भास्करो लोहितायते ॥ एवं प्रणम्य स्कन्देन वासुदेवः प्रसादितः ॥१४८॥ विरोषोऽभूत्तमालिंग्य वचनं केशवोऽब्रवीत् ॥ सनाथस्त्वद्य धर्मोऽयं सुराश्चैव त्वया गुह ॥ १४९ ॥ स्मरात्मानं यदर्थं त्वमुत्पन्नोऽसि महेश्व

१ विष्णोः । २ पुरा तारकहनने कृतां स्वां प्रतिज्ञां प्रति (अपालनात्) अत्यर्थं क्षुब्धम्—जगत्—अपश्यत्—इति योजना । ३ इति आकाशवाणीं शृण्वन् सन् महाक्रोधमाविवेश स्कन्दः—इति योजना ।

CC-0. In Public Domain. Digitization by eGangotri

रात् ॥ साधूनां पालनार्थाय दुष्टसंहरणाय च ॥ सुरविप्रकृते जन्म जीवितं च महात्मनाम् ॥ १६० ॥ रुद्रस्य देव्या गंगायाः कृत्तिकानां च
तेजसा ॥ स्वाहावह्नेश्च[1] जातस्त्वं तत्तेजः सफलीकुरु ॥ साधूनां च कृते यस्य धनं वीर्यं च संपदः ॥ १६१ ॥ सफलं तस्य तत्सर्वं नान्यथा
रुद्रनंदन ॥ १६२ ॥ अद्य धर्मश्च देवाश्च गावः साध्याश्च ब्राह्मणाः ॥ नंदंतु[2] तव वीर्येण प्रदर्शय निजं बलम् ॥ १६३ ॥ ॥ स्कन्द उवाच ॥ ॥ या
गतिः शिवत्यागेन त्वत्त्यागेन च केशव ॥ तां गतिं प्राप्नुयां क्षिप्रं हन्मि चेन्न हि तारकम् ॥ १६४ ॥ या गतिः श्रुतित्यागेन साध्वी
भार्यातिपीडनात् ॥ साधूनां च परित्यागाद्वृथा जीवितसाधनात् ॥ निष्ठुरस्य गतिर्या च तां गतिं यामि केशव ॥ १६५ ॥ इत्युक्ते सुमहान्नादः संप्र
जज्ञे दिवौकसाम् ॥ प्रशशंसुर्गुहं केचित्केचिन्नारायणं प्रभुम् ॥ १६६ ॥ ततस्तार्क्ष्यं समारुह्य हरिस्तस्मिन्महारणे ॥ ताम्रचूडं महासेन
स्तारकं चाप्यधावताम् ॥ १६७ ॥ लोहितांबरसंवीतो लोहितस्रग्विभूषणः ॥ लोहिताक्षो महाबाहुर्हिरण्यकवचः प्रभुः ॥ १६८ ॥ भुजेन तोल
यञ्छक्तिं सर्वभूतानि कम्पयन् ॥ प्राप्य तं तारकं प्राह महासेनो हसन्निव ॥ १६९ ॥ तिष्ठतिष्ठ सुदुर्बुद्धे जीवितं ते मयि स्थितम् ॥ सुदृष्टः
क्रियतां लोको दुर्लभः सर्वसिद्धिदः ॥ १६० ॥ यत्ते सुनिष्ठुरत्वं च धर्मे देवेषु गोषु च ॥ तस्य ते प्रहराम्यद्य स्मर शस्त्रं सुशिक्षितम् ॥ १६१ ॥
एवमुक्ते गुहेनाथ निवृत्तस्यास्य भारत ॥ तारकस्य शिरोदेशात्कापि नारी विनिर्ययौ ॥ १६२ ॥ तेजसा भासयंती तमध ऊर्ध्वं दिशो दश ॥
दृष्ट्वा नारीं गुहः प्राह कासि कस्माच्च निर्गता ॥ १६३ ॥ ॥ नार्युवाच ॥ ॥ अहं शक्तिर्गुहाख्याता भूतलेषु सदा स्थिता ॥ अनेन दैत्यराजेन
महता तपसार्ज्जिता ॥ १६४ ॥ सुरेषु सर्वेषु वसामि चाहं विप्रेषु शास्त्रार्थरतेषु चाहम् ॥ साध्वीषु नारीषु तथा वसामि विना गुणान्नास्मि[3] वसामि कुत्र
चित् ॥१६५॥ तदस्य पुण्यसंघस्य संप्राप्तोद्यावधिर्गुह ॥ तदेनं त्यज्य यास्यामि जह्येनं विश्वहेतवे ॥११६॥ तस्यां ततो निर्गतायां दैत्यशीर्षं व्यक
म्पयत् ॥ कंपितं चास्य तद्देहं गतवीर्योऽभवत्क्षणात् ॥ १६७ ॥ एतस्मिन्नंतरे शक्तिं सोऽक्षिपद्गिरिजात्मजः ॥ उल्काज्वाला विमुञ्चंतीमतिसूर्या
ग्निसप्रभाम् ॥ १६८ ॥ कल्पांभोधिसमुन्नादां दिधक्षंतीं जगद्यथा ॥ तारकस्यांतकालाय अभाग्यस्य दशामिव ॥ १६९ ॥ दारणीं पर्वतानां च सर्व
सत्त्वबलाधिकाम् ॥ उत्क्षिप्य तां विनद्योच्चैरमुञ्चत्कुपितो गुहः ॥ १७० ॥ धर्मश्चेद्बलवाँल्लोके धर्मो जयति चेत्सदा ॥ तेन सत्येन दैत्योयं प्रलयं
यात्वितीरयन् ॥ १७१ ॥ सा कुमारभुजोत्सृष्टा दुर्निवार्या दुरासदा ॥ बिभेद हृदयं चास्य भित्त्वा च धरणिं गता ॥ १७२ ॥ निःसृत्य जलकल्लो

१ स्वाहावह्नेः स्वाहासहिताद्वह्नेः । २ वहन्तु--इ०पा० । ३ अस्मि--अहम्--इत्यर्थः । ४ आक्षिप्य--इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लपूर्विका स्कंदमाययौ ॥ स च संताडितः शक्त्या विभिन्नहृदयोसुरः ॥ नादयन्वसुधां सर्वां पपाताधोमुखो मृतः ॥ १७३ ॥ एवं प्रताप्य त्रैलोक्यं निर्जित्य बहुशः सुरान् ॥ महारणे कुमारेण निहतः पार्थ तारकः ॥ १७४ ॥ एतस्मिन्निहते दैत्ये प्रहर्ष विश्वमाययौ ॥ १७५ ॥ ववुर्वातास्तथा पुण्याः[1] सुप्रभोभूद्दिवाकरः ॥ जज्वलुश्चाग्नयः शांताः शांता दिग्जनितस्वनाः ॥ १७६ ॥ ततः पुनः स्कंदमाह प्रहृष्टः केशवोऽरिहा ॥ स्कंदस्कंद महाबाहो बाणो[2]नाम बलात्मजः ॥ १७७ ॥ क्रौंचपर्वतमादाय देवसंघान्प्रबाधते ॥ सोऽधुना ते भयाद्वीर पलायित्वा नगं गतः ॥ जहि तं पापसंकल्पं क्रौंचस्थं शक्तिवेगतः ॥ १७८ ॥ ततः क्रौंचं महातेजा नानाव्यालविनादितम् ॥ शक्त्या बिभेद बहुभिर्वृक्षैर्जीवैश्च संकुलम् ॥ १७९ ॥ तत्र व्यालसहस्राणि दैत्यकोट्ययुतं तथा ॥ ददाह बाणं च गिरिं भित्त्वा शक्तिर्महारवा ॥ १८० ॥ अद्यापि छिद्रं तत्पार्थ क्रौंचस्य परिवर्तते ॥ ॥ १८१ ॥ येन हंसाश्च क्रौंचाश्च मानसाय प्रयांति च ॥ हत्वा बाणं महाशक्तिः पुनः स्कंदं समागता ॥ प्रत्यायाति मनः साधोराहृतं प्रहितं तथा ॥ १८२ ॥ ततो हरींद्रप्रमुखाः प्रतुष्टुवुर्ननृतुश्च रंभाप्रमुखा वरांगनाः ॥ वाद्यानि सर्वाणि च वादयंतस्तं साधुसाध्वित्यमरा जगुर्भृशम् ॥ १८३ ॥

इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां प्रथमे माहेश्वरखण्डे कौमारिकाखण्डे कुमारेश्वरमाहात्म्ये कुमारकृततारकवधवर्णनंनाम द्वात्रिंशोऽध्यायः ॥ ३२ ॥ ॥ छ ॥

॥ नारद उवाच ॥ ॥ ततस्तं गिरिवष्मार्णं पतितं वसुधोपरि ॥ आलिंगितमिव पृथ्व्या गुणिन्या गुणिनं यथा ॥ १ ॥ दृष्ट्वा[3] देवा विस्मितास्ते जयं जगुस्तथा मुहुः ॥ केचित्समीपमागंतुं बिभ्यति त्रिदिवौकसः ॥ २ ॥ उत्थाय तारको दैत्यः कदाचिन्नो निहंति चेत् ॥ तं तथा पतितं दृष्ट्वा वसुधामण्डले[4] गुहः ॥ ३ ॥ आसीद्दीनमनाः पार्थ शुशोच च महामतिः ॥ स्तवनं चापि देवानां वार[5]यित्वा वचोऽब्रवीत् ॥ ४ ॥ शोच्यं पातकिनं मां च संस्तुवध्वं कथं सुराः ॥ पंचानामपि यो भर्ता प्राकृतो[6]ऽसौ न कीर्त्यते ॥ ५ ॥ स तु रुद्रांशजः प्रोक्तस्तस्य द्रुह्यन्न रुद्रवत्[7] ॥ स्वायंभुवेन गीतश्च श्लोकः संश्रूयते तथा ॥ ६ ॥ वीरं हि पुरुषं हत्वा गोसहस्रेण मुच्यते ॥ यथाकथंचित्पुरुषो न हंतव्यस्ततो बुधैः ॥ ७ ॥ पापशीलस्य हनने दोषो यद्यपि नास्ति च ॥ तथापि रुद्रभक्तोऽयं संस्मरन्[8]निति शोचिमि ॥ ८ ॥ तदहं श्रोतुमिच्छामि प्रायश्चित्तं च किंचन ॥ प्रायश्चित्तैरपैत्येनो यतोपि महदर्जितम् ॥ ९ ॥ इति संशोचतस्तस्य शिवपुत्रस्य धीमतः ॥ वासु

१ गम्याः--इ०पा० । २ बालोनाम--इ०पा० । ३ दृष्ट्वा देवा विस्मितशरीराः संतो जग्मुस्तदा मुहुः--इ०पाठान्तरम् । ४ वसुधामण्डनम्--इ०पा० । ५ वाचयित्वा--इ०पा० । ६ न सा प्रकृतिर्मानवी--इति पाठः । किं तु देवांशज एवेत्यर्थः । ७ तस्य--रुद्रांशजस्य द्रुह्यन्--तेन सह द्वेषं कुर्वन्--रुद्रवत्--रुद्रभक्तस्य रुद्रांशजत्वस्य वर्णितत्वाद्रुद्रतुल्यः--न भवतीत्यर्थः । ८ आर्षोऽयं प्रयोगः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

देवो गुरुः पुंसां देवमध्ये वचोऽब्रवीत् ॥ १० ॥ श्रुतिः स्मृतिश्चेतिहासाः पुराणं च शिवात्मज ॥ प्रमाणं चेत्ततो दुष्टवधे दोषो न विद्यते ॥ ११ ॥ स्वप्राणान्यः परप्राणैः प्रपुष्णात्यघृणः पुमान् ॥ तद्वधस्तस्य हि श्रेयो यद्दोषाद्यात्यधः पुमान् ॥ १२ ॥ अन्नादे भ्रूणहा मार्ष्टि पत्यौ भार्यापचारिणी ॥ गुरौ शिष्यश्च याज्यश्च स्तेनो राजनि किल्बिषम् ॥ १३ ॥ पापिनं पुरुषं यो हि समर्थो न निहंति च ॥ तस्य तावंति पापानि तदर्धं सोऽप्यवाश्नुते ॥ १४ ॥ पापिनो यदि वध्यंते नैव पालनसंस्थितैः ॥ ततोऽयमक्षमो लोकः कं याति शरणं गुह ॥ १५ ॥ कथं यज्ञाश्च वेदाश्च वर्तंते विश्वधारकाः ॥ तस्मात्त्वया पुण्यमात्तं न च पापं कथंचन ॥ १६ ॥ अथ चेद्रुद्रभक्तेषु बहुमानस्तव प्रभो ॥ तत्र ते कीर्तयिष्यामि प्रायश्चित्तं महोत्तमम् ॥ १७ ॥ आजन्मसंभवैः पापैः पुमान्येन विमुच्यते ॥ आकल्पांतं च वा येन रुद्रलोके प्रमोदते ॥ १८ ॥ कृते पापेऽनुतापो वै यस्य स्कन्द प्रजायते ॥ रुद्राराधनतोऽन्यच्च प्रायश्चित्तं परं न हि ॥ १९ ॥ [1]न यस्यालमपि ब्रह्मा महिमानं विवर्णितुम् ॥ श्रुतिश्च भीता यं वक्ति किं तस्मात्परमं भवेत् ॥ २० ॥ अकांडे यच्च ब्रह्मांडक्षयोद्युक्तं हलाहलम् ॥ कण्ठे दधार श्रीकण्ठः कस्तस्मात्परमो भवेत् ॥ २१ ॥ दुःखतांडवदीनोऽभूदण्डसंकीर्णमानसः ॥ मारमारश्च यो देवः कस्तस्मात्परमो भवेत् ॥ २२ ॥ वियद्व्यापी सुरसरित्प्रवाहो विप्रुषाकृतिः ॥ बभूव यस्य शिरसि कस्तस्मात्परमो भवेत् ॥ २३ ॥ यज्ञादिकाश्च ये धर्मा विना यस्यार्चनं वृथा ॥ दक्षोऽत्र सत्यदृष्टांतः कस्तस्मात्परमो भवेत् ॥ २४ ॥ क्षोणी रथो विधिर्यंता शरोऽहं मन्दरो धनुः ॥ रथांगे चापि चंद्रार्कौ युद्धे यस्य च त्रैपुरे ॥ २५ ॥ आराधनं तस्य केचिद्योगमार्गेण कुर्वते ॥ दुःखसाध्यं हि तत्तेषां नित्यं शून्यमुपासताम् ॥ २६ ॥ तस्मात्तस्यार्चयेल्लिंगं भुक्तिमुक्ती य इच्छति ॥ सृष्ट्यादौ लिंगरूपी स विवादो मम ब्रह्मणः ॥ २७ ॥ अभूद्यस्य परिच्छेदे नालमावां बभूविव[2] ॥ चराचरं जगत्सर्वं यतो लीनं सदात्र च ॥ २८ ॥ तस्माल्लिंगमिति प्रोक्तं देवै रुद्रस्य धीमतः ॥ तोयेन स्नापयेल्लिंगं श्रद्धया शुचिना[3] च यः ॥ २९ ॥ ब्रह्मादितृणपर्यंतं तेनेदं तर्पितं जगत् ॥ पंचामृतेन तल्लिंगं स्नापयेद्यश्च बुद्धिमान् ॥ ३० ॥ तर्पितं तेन विश्वं स्यात्सुधया पितृभिः समम् ॥ पुष्पैरभ्यर्चयेल्लिंगं यथाकालोद्भवैश्च यः ॥ ३१ ॥ तेन संपूजितं विश्वं सकलं नात्र संशयः ॥ नैवेद्यं तत्र यो दद्याल्लिंगस्याग्रे विचक्षणः ॥ ३२ ॥ भोजितं तेन विश्वं स्याल्लिंगस्यैवं फलं महत् ॥ किमत्र बहुनोक्तेन स्वल्पं वा यदि वा बहु ॥ ३३ ॥ लिंगस्य क्रियते यच्च तत्सर्वं विश्वप्रीतिदम् ॥ तच्च लिंगं स्थापयेद्यः

१ एतदारभ्य–शिवमहिमस्तोत्रस्यस्यार्थस्य प्रतिपादकाः कतिपयेऽत्र श्लोकाः संवर्णिताः संतीति सुधीभिरवधेयम्। २ अभवत्–इ० पा०। ३ शुचिमानसः–इ० पा०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शुचौ देशे सुभक्तितः[1] ॥ ३४ ॥ स सर्वपापनिर्मुक्तो रुद्रलोके प्रमोदते ॥ यन्नित्यं यजतो यज्ञैः फलमाहुर्मनीषिणः ॥ ३५ ॥ तच्च स्थापयतो लिंगं शिवस्य शुभलक्षणम् ॥ यथाग्निः सर्वदेवानां मुखं स्कन्द प्रकीर्त्यते ॥ ३६ ॥ तथैव सर्वजगतां मुखं लिंगं न संशयः ॥ प्रारंभान्मुच्यते पापैः सर्वजन्मकृतैरपि ॥ ३७ ॥ अतीतं च तथागामि कुलानां तारयेच्छतम् ॥ मृन्मयं काष्ठनिष्पन्नं पक्वेष्टं शैलमेव च ॥ ३८ ॥ कृतमायतनं दद्यात्क्रमाच्छतगुणं फलम् ॥ कलशं तत्र चारोप्य एकविंशत्कुलैर्युतः ॥ ३९ ॥ आकल्पांतं रुद्रलोके मोदते रुद्रवत्सुखी ॥ एवंविधफलं[2] लिंगमतो भूयो[3]ऽप्यधो न हि ॥ ४० ॥ तस्मादत्र महासेन लिंगं स्थापितुमर्हसि ॥ यदुक्तमेतदश्लीलं यदि किंचन चात्र चेत् ॥ ४१ ॥ तद्ब्रवीतु महासेन स्वयं साक्षी महेश्वरः ॥ एवं वदति गोविंदे साधुवादो महानभूत् ॥ ४२ ॥ महादेवो ह्यथालिंग्य स्कन्दं वचनमब्रवीत् ॥ यद्भवान्मम भक्तेषु प्रकरोति कृपां पराम् ॥ ४३ ॥ तेनापि परमा प्रीतिर्मम जाता तवोपरि ॥ किं तु यद्भगवानाह वासुदेवो जगद्गुरुः ॥ ४४ ॥ तत्तथा नान्यथा किंचिदत्र प्रोक्तं हि विष्णुना ॥ यो ह्यहं स हरिर्ज्ञेयो यो हरिः सोऽहमित्युत ॥ ४५ ॥ नावयोरंतरं किंचिद्दीपयोरिव सुव्रत ॥ एनं द्वेष्टि स मां द्वेष्टि योन्वेत्येनं स मां[4]ऽनुगः ॥ ४६ ॥ इति स्कन्द विजानाति स मद्भक्तोन्यथा न हि ॥ ४७ ॥ ॥ स्कन्द उवाच ॥ ॥ एवमेवास्मि जानामि त्वां च विष्णुं च शंकर ॥ ४८ ॥ यच्च लिंगकृते प्राह हरिर्मां धर्मवत्सलः ॥ खे वाणी तारकवधे एवमेव पुराह माम् ॥ ४९ ॥ लिंगं संस्थापयिष्यामि[5] सर्वपापापहं ततः ॥ एकं यत्र प्रतिज्ञा मे गृहीतास्य वधाय च ॥ ५० ॥ द्वितीयं यत्र निःसत्त्वस्त्यक्तः शक्त्याऽसुरोऽभवत् ॥ तृतीयं यत्र निहतो हत्यापापोपशांतिदम् ॥ ५१ ॥ इत्युक्त्वा विश्वकर्माणमाहूय प्राह पावकिः ॥ त्रीणि लिंगानि शुद्धानि शीघ्रं त्वं कर्तुमर्हसि ॥ ५२ ॥ वचनाद्बाहुलेयस्य निर्ममे देववर्द्धकिः ॥ त्रीणि लिंगानि शुद्धानि न्यवेदयत तानि च ॥ ५३ ॥ ततो ब्रह्मादिभिः सार्धं विष्णुना शंकरेण च ॥ पूर्वं संस्थापयामास पश्चिमायामदूरतः ॥ ५४ ॥ प्रतिज्ञेश्वरमित्येव लिंगं परमशोभनम् ॥ अष्टम्यां बहुले चात्र चैत्रे स्नात्वा उपोष्य च ॥ ५५ ॥ पूजां च जागरं कृत्वा मुच्येत्पारुष्यपापतः ॥ इत्याह स्कंदप्रीत्यर्थं स्वयं तत्र महेश्वरः ॥ ५६ ॥ ततो द्वितीयं लिंगं तु वह्निकोणाश्रितं तथा ॥ स्थापयामास सरसो यत्र शक्तिर्विनिर्ययौ ॥ ५७ ॥ कपालेश्वरमित्येव लिंगं पापापहं शुभम् ॥ शक्तिं च तामभिष्टूय स्थापयामास तत्र च ॥ ५८ ॥ कपालेश्वरसांनिध्यं

१ स्वभक्तितः--इ०पा० । २ एवंविधं फलं लिंगे--इ०पा० । ३ भूयोऽपि अधिकमेव, अधः न हि न्यूनं न हीत्यर्थः । ४ मानुगः--मा मां प्रति अनुगः अनुयायी । ५ लिंगं स्थापयिष्यामि--इति पूर्वेण संबन्धः । एवं स्थानत्रयेऽपि त्रीणि लिंगानि स्थापयिष्यामि--इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

देवीं कापालिकेश्वरीम् ॥ तत्र चोत्तरदिग्भागे शक्तिच्छिद्रं प्रचक्षते ॥ ५९ ॥ पातालगंगा यत्रास्ति सर्वपापहरा शिवा ॥ तत्र स्नात्वा ददौ स्कंदः कृपयाभिपरिप्लुतः ॥ ६० ॥ तदा तोयं तारकाय सहितः सर्वदैवतैः ॥ ६१ ॥ काश्यपेयाय वज्रांगतनयाय महात्मने ॥ रुद्रभक्ताय सतिलमक्षय्योदकमस्त्विति ॥ ६२ ॥ ततो महेश्वरः प्रीतः प्राह स्कंदस्य शृण्वतः ॥ चतुर्दश्यां कृष्णपक्षे मधौ चैवात्र यो नरः ॥ स्नात्वोपोष्य समभ्यर्च्य कपालेश्वरमीश्वरीम् ॥ ६३ ॥ तेजोवधसमुद्भूतपातकेन स मुच्यते ॥ ६४ ॥ अस्यामेव तिथौ सोमः शिवयोगश्च तैतिलम् ॥ षड्योगः शक्तिच्छिद्रे यो दिनं रुद्रं जपन्निशि ॥ स्नात्वात्र सशरीरो वै रुद्रलोकं व्रजिष्यति ॥ ६५ ॥ कपालेशस्य सांनिध्ये शक्तिच्छिद्रं हि कीर्त्यते ॥ तस्य तुल्यं परं तीर्थं पृथिव्यां नैव विद्यते ॥ ६६ ॥ इति श्रुत्वा रुद्रवाक्यं स्कंदः प्रीतोऽभवद्भृशम् ॥ देवाश्च मुदिताः सर्वे साधुसाध्विति ते जगुः ॥ ६७ ॥ ॥ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां प्रथमे माहेश्वरखण्डे कौमारिकाखण्डे कुमारस्थापितप्रतिज्ञेश्वरशक्तिच्छिद्रेश्वरमाहात्म्यवर्णनं नाम त्रयस्त्रिंशोऽध्यायः ॥ ३३ ॥ ॥ छ ॥ ॥ नारद उवाच ॥ ॥ ततस्तृतीयलिंगस्य चिकीर्षुं स्थापनं गुहम् ॥ ब्रह्मा प्राहास्य प्रीत्यर्थं स्वयमन्यं प्रकुर्महे ॥ १ ॥ यद्यप्येतच्छुभं लिंगं सर्वदोषविवर्जितम् ॥ तथाप्यन्यत्करिष्येऽहं सर्वश्रेष्ठतमं हि यत् ॥ २ ॥ ततो ब्रह्मा सर्वदोषविमुक्तं निर्ममे स्वयम् ॥ दृष्टिकांतं मनःकांतं फलकांतं सुलिंगकम् ॥ ३ ॥ तत्र स्कंदस्य प्रीत्यर्थं सर्वदेवैर्विनिर्मितम् ॥ सरः सुरम्यं तीर्थानि तत्र ते निदधुस्तथा ॥ ४ ॥ गंगादिकानि तीर्थानि यानि प्रोचुर्दिवौकसः ॥ इदं यावत्सरस्तावत्सर्वैरत्र समुष्यताम् ॥ ५ ॥ एवमस्त्विति तान्यूचुः प्रीत्यर्थं शरजन्मनः ॥ ततो ब्रह्मा स्वयं तत्र रौद्रैर्मंत्रैर्हुताशनम् ॥ गाधिपुत्रादिभिर्विप्रैस्तर्पयामास संयुतः ॥ ६ ॥ ततो वैशाखमासस्य चतुर्दश्यां शुभे दिने ॥ प्रतिष्ठां चक्रिरे लिंगे चिरं विप्रमुखा द्विजाः ॥७॥ जगुर्गंधर्वपतयो ननृतुश्चाप्सरोगणाः॥ ततः स्कंदः प्रीतियुक्तः स्नात्वा सरसि शोभने॥ ॥८॥ सर्वतीर्थोदकैः स्नाप्य तल्लिंगं भक्तिसंयुतः ॥ विविधैः पूजयामास पुष्पैर्मंत्रैश्च पंचभिः ॥९॥ पूजाकाले स्वयं तत्र लिंगमध्ये स्थितो हरः ॥ जंगमाजंगमैः सार्धं स्वयं जग्राह पूजनम् ॥ १० ॥ ततस्तं पूजयन्प्राह स्कंदो भक्तिपरिप्लुतः ॥ केन केनोपहारेण त्वयि दत्तेन किं फलम् ॥ ११ ॥ ॥ ॥ श्रीमहादेव उवाच ॥ ॥ मम यः स्थापयेल्लिंगं शुभं सद्म च कारयेत् ॥ मल्लोके वसतेऽसौ च यावच्चंद्रदिवाकरौ ॥ १२ ॥ मम सद्म सुधाशुभ्रं यावत्संख्यं करोति यः ॥ तावंत्येव च जन्मानि यशसासौ विराजते ॥१३॥ ध्वजभूतो ध्वजं दत्त्वा विपापः स्यात्पताकया ॥ विधाय चित्र

१ तानि--इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

विन्यास गंधर्वैः सह मोदते ॥ १४ ॥ रजःसंशोधनं कृत्वा नरो रोगैः प्रमुच्यते ॥ प्राप्नोति देहं हार्दं च सुरसद्मानुलेपनात् ॥ १५ ॥ पुष्पाक्षतादि भिर्दत्तैस्तिलांभोऽक्षतदर्भकैः ॥ शंभोः शिरसि दत्त्वार्घ्यं दिवि वर्षायुतं वसेत् ॥ १६ ॥ घृतेन हंतपापः स्यान्मधुना सुभगो भवेत् ॥ निरोगो दधि दुग्धाभ्यां लिंगं संस्नाप्य जायते ॥ १७ ॥ पानीयदधिदुग्धाद्यैः क्रमाद्दशगुणं फलम् ॥ मांसं संस्नाप्य तैः भक्त्या पिष्टाद्यैश्च विरूक्षयेत् ॥ १८ ॥ कपिलापंचगव्येन सुरसिंधुजलेन वा ॥ मां च संस्नाप्य चाभ्यर्च्य मल्लोकमधिगच्छति ॥ १९ ॥ कुशोदकाद्गंधजलं तस्मात्तीर्थोदकं वरम् ॥ तीर्थेभ्यश्च जलं दर्शे महीसागरसंभवम् ॥ २० ॥ कपिलां दत्त्वा यदाप्नोति तत्फलं कलशे पृथक् ॥ मृत्ताम्ररौप्यसौवर्णैः क्रमाच्छतगुणं फलम् ॥ २१ ॥ श्रीखंडागरुकाश्मीरशशिनः क्रमशोऽधिकाः ॥ मां च तैश्च समालभ्य स्याच्छ्रीमान्सुभगः सुखी ॥ २२ ॥ प्रशस्तो गुग्गुलो धूपस्तस्माच्चंद्रोऽगरुर्वरः ॥ धूपानेतान्नरो दत्त्वा सुखं स्वर्गमवाप्नुयात् ॥ २३ ॥ दीपदः कीर्तिमाप्नोति चक्षुरुत्तममेव च ॥ नैवेद्यस्य प्रदानेन नरो मृष्टाशनो भवेत् ॥ २४ ॥ पुष्पेण हेमकर्णस्य प्रबद्धेन द्विसंगुणम् ॥ फलमाप्नोति पुरुषः सत्यसंधश्च जायते ॥ २५ ॥ अखंडैर्बिल्वपत्रैश्च पुष्पैर्वा विविधैरपि ॥ लिंगं प्रपूरणं कृत्वा लक्षमेकं वसेद्दिवि ॥ २६ ॥ यस्तु पुष्पगृहं कुर्यान्नरः शुद्धाशयो भवेत् ॥ पुष्पकेण विमानेन दिवि संक्रीडते चिरम् ॥ २७ ॥ भूषणांबरदानेन नरो भवति भोगभाक् ॥ सच्चामरप्रदानेन जायते पार्थिवो नरः ॥ २८ ॥ रम्यं वितानं यो दद्याच्छत्रुभिर्नाभिभूयते ॥ गीतं वाद्यं प्रनृत्यं च कृत्वा शुद्धो व्रजेत्स माम् ॥ २९ ॥ शंखघंटाप्रदानेन विद्वान्भवति शब्दवान् ॥ विधाय रथयात्रां च चिरं शोकैः प्रमुच्यते ॥ ३० ॥ नमस्कारं प्रणामं च कृत्वा जायेन्महाकुले ॥ वाचयंश्चाग्रतः शास्त्रं मम ज्ञानी प्रजायते ॥ ३१ ॥ विमुच्यते मनोमोहैर्भक्त्या स्तुत्वा च मां नरः ॥ गोदानफलमाप्नोति निर्माल्यस्फेटनान्मम ॥ ३२ ॥ आरार्तिकं भ्रामयित्वा अर्तिहीनः प्रजायते ॥ कृत्वा शीतलिकां तापैर्मुच्यते दोषसंभवैः ॥ ३३ ॥ नत्वा दत्त्वाथ शक्त्या च दानं लिंगस्य संनिधौ ॥ फलं शतगुणं प्राप्य इह चामुत्र मोदते ॥ ३४ ॥ प्रणामात्पंचदश च स्नानाद्विंशतिं पूजया ॥ शतं यथाप्रोक्तविधेरपराधानहं क्षमे ॥ ३५ ॥ एतत्सर्वं यथोदिष्टं कुमारात्र भविष्यति ॥ ये मां प्रपूजयिष्यंति कुमारेश्वर

१ रजःसंमार्जनम्–इ०पा० । २ सोऽप्यपापः–इ०पा० । ३ मां च संस्थाप्य–इ०पा० । ४ भवेत्–इ०पा० । ५ परस्मैपदमार्षम्–जायते–इति बोध्यम् । ६ निर्माल्यस्फेटनात्–निर्माल्यस्य स्नेहेन (आदरेण) धारणात्, पवित्रस्थाने प्रक्षेपणाद्वा–इत्यर्थो बोध्यः । भ्वादौ 'ष्णिह ९१ स्नेहने' 'स्फिट ९२ इत्येके' इत्युक्तः स्फिटधातुः स्नेहनेऽर्थे दृश्यते । ७ दुःखसंभवैः–इ०पा० । तदा दुःखस्य संभवो येभ्यस्तैः–इत्यर्थो बोध्यः । ८ तथा–इ०पा० ।

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संस्थितम् ॥ ३६ ॥ वाराणस्यां यथा वत्स विश्वनाथोऽस्मि संस्थितः ॥ ३७ ॥ गुप्तक्षेत्रे तथा स्थास्ये कुमारेश्वरमध्यतः ॥ ३८ ॥ श्रुत्वेति वचनं रुद्राद्देवानां शृण्वतां गुहः ॥ विस्मितः प्रणिपत्यैनं तुष्टाव गिरिजापतिम् ॥ ३९ ॥ नमः शिवायास्तु निरामयाय नमः शिवायास्तु मनोमयाय ॥ नमः शिवायास्तु सुरार्चिताय तुभ्यं सदा भक्तकृपापराय ॥ ४० ॥ नमो भवायास्तु भवोद्भवाय नमोस्तु ते ध्वस्तमनोभवाय ॥ नमोऽस्तु ते गूढमहाव्रताय नमोऽस्तु मायागहनाश्रयाय ॥ ४१ ॥ नमोस्तु शर्वाय[1] नमः शिवाय नमोस्तु सिद्धाय पुरातनाय ॥ नमोस्तु कालाय नमः कलाय नमोऽस्तु ते कालकलातिगाय ॥ ४२ ॥ नमो निसर्गात्मकभूतिकाय नमोऽस्त्वमेयोक्षमहर्द्धिकाय ॥ नमः शरण्याय नमोऽगुणाय नमोऽस्तु ते भीमगुणानुगाय ॥ ४३ ॥ नमोऽस्तु नानाभुवनाधिकर्त्रे नमोऽस्तु भक्ताभिमतप्रदात्रे ॥ नमोऽस्तु कर्मप्रसवाय धात्रे नमः सदा ते भगवन्सुकर्त्रे ॥ ४४ ॥ अनंतरूपाय सदैव तुभ्यमसह्यकोपाय सदैव तुभ्यम् ॥ अमेयमानाय नमोस्तु तुभ्यं वृषेंद्रयानाय नमोऽस्तु तुभ्यम् ॥ ४५ ॥ नमः प्रसिद्धाय महौषधाय नमोऽस्तु ते व्याधिगणापहाय ॥ चराचराया[2]थ विचारदाय कुमारनाथाय नमः शिवाय ॥ ४६ ॥ ममेश भूतेश महेश्वरोसि कामेश वागीश बलेश धीश ॥ क्रोधेश मोहेश परापरेश नमोस्तु मोक्षेश गुहाशयेश ॥ ४७ ॥ इति संस्तूय वरदं शूलपाणिमुमापतिम् ॥ प्रणिपत्य उमापुत्रो नमोनम उवाच ह ॥ ४८ ॥ एवं भक्तिपराक्रांतमात्मयोग्यं स्त[3]वं शिवः ॥ अभिनन्द्य चिरं कालमिदं वचनमब्रवीत् ॥ ४९ ॥ त्वया दुःखं न संचिंत्यं मम भक्तवधात्मकम् ॥ कर्मणानेन श्लाघ्योऽसि मुनीनामपि पुत्रक ॥ ५० ॥ ये च सायं तथा प्रातस्त्वत्कृतेन स्तवेन माम् ॥ स्तोष्यंति परया भक्त्या शृणु तेषां च यत्फलम् ॥ ५१ ॥ न व्याधिर्न च दारिद्र्यं न चैवेष्टवियोजनम् ॥ भुक्त्वा भोगान्दुर्लभांश्च मम यास्यंति सद्म ते ॥ ५२ ॥ तथान्यानपि दास्यामि वरान्परमदुर्लभान् ॥ भक्त्या तवातितुष्टोऽहं प्रीत्यर्थं तव पुत्रक ॥ ५३ ॥ महीसागरकूले[4] तु ये मां स्तोष्यंति पूजया ॥ तेषां तदक्षयं सर्वं वैशाख्यां दानपूजनम् ॥ ५४ ॥ सरस्यत्र च ये स्नानं प्रकरिष्यंति मानवाः ॥ सर्वतीर्थफलावाप्तिर्वैशाख्यां प्र[5]भविष्यति ॥ ५५ ॥ कुमारेशं तु[6] मां भक्त्या महीसागरसंगमे ॥ स्नात्वा संपूजयेन्नित्यं तस्य जातिस्मृतिर्भवेत् ॥ ५६ ॥ जातिस्मृतिरियं पुत्र यस्यां जातौ प्रजायते ॥ स्मरतेऽस्याः प्रकर्तव्यं श्रेयोरूपं सुदुर्लभम् ॥ ५७ ॥ यस्मिन्काले ह्यनावृष्टिर्जायते कृत्तिकासुत ॥ स्नापयेद्विधिवन्मां च कलशैर्विविधैः शुभैः ॥ ५८ ॥ एकरात्रं त्रिरात्रं वा पञ्चरात्रं च सप्त वा ॥ स्नापयेद्गंधतोयेन कुंकुमेन विलेपयेत् ॥ ५९ ॥ करवीरै[7] रक्त

१ नमः कपर्दिने–इ० पा० । २ चराचरं चारविचारदाय–इ०पा० । ३ सुतम्–इ०पा० । ४ महीसागरकूलेषु–इ०पा० । ५ संभविष्यति–इ०पा० । ६ च–इ०पा० । ७ कर्णिकारैः–इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पुष्पैर्जपापुष्पैस्तथैव च ॥ अर्चयेत्पुष्पमालाभिः परि[1]धायारुणवाससी ॥ ६० ॥ भोजयेद्ब्राह्मणांश्चैव तापसाञ्छंसितव्रतान् ॥ लक्षहोमं प्रकुर्वीत शिवहोमं ग्रहादिकम्[2] ॥ ६१ ॥ भूमिदानं ततः कुर्यात्ततो दद्याद्गवाह्निकम् ॥ आघोषयेच्छिवां शांतिं रुद्रजाप्यं हि[3] कारयेत् ॥ ६२ ॥ अनेनैव विधानेन कृतेन तु द्विजोत्तमैः ॥ अगर्भितास्तदा मेघा वर्षंते नात्र संशयः ॥ ६३ ॥ विविधैः पूर्यते धा[4]न्यैः शाद्वलैश्च वसुन्धरा ॥ आरोग्यं हि भवेच्चैव जने गोपकुले तथा ॥ ६४ ॥ धर्मयुक्तो भवेद्राजा परचक्रैर्न पीड्यते ॥ घृतेन स्नापयेन्मां च अर्क[5]क्रांतौ नरोऽत्र यः ॥ ६५ ॥ कन्यादान फलं तस्य नात्र का[6]र्या विचारणा ॥ क्षीरेण स्नापयेद्देवं तथा पंचामृतेन यः ॥ ६६ ॥ अग्निष्टोमस्य यज्ञस्य फलं तस्योपजायते ॥ कुमारेश्वरतीर्थे यः प्राणत्यागं करोति हि ॥ ६७ ॥ रुद्रलोके वसेत्तावद्यावदाँ[7]भूतसंप्लवम् ॥ अयने विषुवे चैव ग्रहणे चंद्रसूर्ययोः ॥ ६८ ॥ पौर्णमास्याममावास्यां संक्रांतौ वैधृते तथा ॥ कुमारेशं नरः स्नात्वा महीसागरसंगमे ॥ ६९ ॥ भक्त्या योऽभ्यर्चयेन्मां च तस्य पुण्यफलं शृणु ॥ यन्महीतलतीर्थेषु स्नाने स्यात्तु महत्फलम् ॥ ७० ॥ यच्चार्चितेषु लिंगेषु सर्वेषु स्यात्फलं च तत् ॥ आरोग्यं पुत्रलाभं च धनलाभं सुखं सुतम् ॥ ७१ ॥ निश्चितं लभते मर्त्यः कुमारेश्वरसेवया ॥ ब्रह्मचारी शुचिर्भूत्वा यस्तिष्ठेदत्र तापसः ॥७२॥ परं पाशुपतं योगं प्राप्य याति लयं मयि ॥ पापात्मनां च मर्त्यानां सद्योऽस्मि फलदर्शकः ॥७३॥ दिव्येनाष्टविधेनात्र कोशः साधारणोऽत्र[8] च ॥ अघोराद्यैः पंचमं[9]त्रैः स्नाप्य लिंगं महोज्ज्वलम् ॥ ७४ ॥ अघोरेणैव तत्तोयं दद्याद्दि[10]व्यस्य कारणे ॥ पिबेदेतदुदीर्यासौ प्रसृतित्रयमेव च ॥ ७५ ॥ यदि धर्मस्तथा सत्यमीश्वरोऽत्र जगत्त्रये ॥ कोशपानात्फलं सद्यो द्रक्ष्याम्यस्मि[11] शुभाशुभम् ॥ ७६ ॥ यास्ये चेति कुलं हन्याद्गमने च[12] कुटुम्बकम् ॥ दर्शने च शुभं पाने हन्याद्देहं च मिथ्यया ॥ ७७ ॥ त्रिभिर्दिनैस्त्रिभिः पक्षैस्त्रिभिर्मासैस्त्रिभिः[13] समैः ॥ अत्युग्रपुण्यपापानां मानेन[14] फलमश्नुते ॥ ७८ ॥ एते वरा मया लिंगे दत्ता[15]त्र स्थापिते त्वया ॥ तव प्रीत्यभिवृद्ध्यर्थं ब्रूहि भूयोऽप्युमात्मज ॥ ७९ ॥ ॥ स्कन्द उवाच ॥ ॥ कृतकृत्यो वरैर्दत्तैस्त्वया चैतैर्महेश्वर ॥ नमोनमो नमस्तेस्तु नात्र त्याज्यं त्वया विभो ॥ ८० ॥ एवं प्रणम्य देवं स मातरं प्रणतोऽब्रवीत् ॥ त्वयापि मातर्नैवात्र त्याज्यं मम प्रियेप्सया ॥ ८१ ॥ त्वामप्यत्र स्थापयिष्ये वरदा भव पार्वति ॥ ८२ ॥

१ परीष्यारुणवाससी--इ०पा० । २ गवादिकम्--इ०पा० । ३ च--इ०पा० । ४ अन्नाद्यैः--इ०पा० । ५ अर्कक्रांतौ--सूर्यसंक्रांतौ--इत्यर्थः । इषक्रांतौ--इ०पा० । तदा आश्विनमासे या सूर्यसंक्रांतिस्तस्यामित्यर्थो बोध्यः । ६ काचित्--इ० पा० । ७ यावदाहूतसंप्लवम्--इ० पा० । ८ वः--इ०पा० । ९ पंचमुख्यैः--इ०पा० । १० दिव्यस्य कारणे दिव्यपरीक्षार्थमित्यर्थः । ११ असि--इत्यहमर्थकमव्ययम् । १२ गमनेन--इ०पा० । १३ पुंस्त्वमार्षम् । १४ पर्यायेण--इ०पा० । १५ दत्ताः अत्र--इति पदच्छेदः । संधिरार्षः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ॥ श्रीदेव्युवाच ॥ ॥ यत्र शर्वः स्वभावेन तत्र तिष्ठाम्यहं सुत ॥ ८३ ॥ तव भक्त्या विशेषेण स्थास्ये स्त्रीणां वरप्रदा ॥ युद्धेषु तव कर्माणि रुद्रभक्तेषु ते[1] कृपाम् ॥ ८४ ॥ पश्यंती पुत्रिणां मुख्या प्रीणिता च भृशं त्वया ॥ गर्भक्लेशः स्त्रियो मन्ये साफल्यं भजते तदा ॥ ८५ ॥ सुतो यदा रुद्रभक्तः सानंदं सद्भिरीर्यते ॥ भव तस्मात्प्रियार्थाय तिष्ठाम्यत्र षडानन ॥ ८६ ॥ स्त्रीभिराराधिता दास्ये सौभाग्यं सुपतिं सुतान् ॥ चैत्रे चापि तृतीयायां स्नात्वा शीतेन वारिणा ॥ ८७ ॥ अर्चयिष्यंति मां याश्च पुष्पैर्धूपैर्विलेपनैः ॥ दास्यामि चाष्टसौभाग्यं या नारी भक्तितत्परा ॥ ८८ ॥ पितरौ श्वशुरौ पुत्रान्पतिं सौभाग्यसंपदः ॥ कुंकुमं पुष्पश्रीखंडं तांबूलांजनमिक्षवः ॥ ८९ ॥ सप्तमं लवणं प्रोक्तमष्टमं च सुजीरकम् ॥ तोलयेत्तुलया वापि सांग्निश्च तुलिता भवेत् ॥ ९० ॥ सुवर्णेनाथ सौगन्ध्यद्रव्यैः शुभफलैरपि ॥ भुंक्ते वा लवणं पश्चान्नासौ वै विधवा भवेत् ॥ ९१ ॥ माघे वा कार्तिके वापि चैत्रे स्नात्वार्चयेत माम् ॥ दौर्भाग्यदुःखदारिद्र्यैर्न सा संयोगमाप्नुयात् ॥ ९२ ॥ श्रुत्वेति गिरिजावाचं सानंदः पार्वतीसुतः ॥ स्थापयित्वा गिरिसुतां कपर्[3]दिनमथाब्रवीत् ॥ ९३ ॥ पुष्पैर्धूपैर्मोदकैश्च पूर्वमभ्यर्च्य त्वां प्रभो ॥ पूजयंति कुमारेशं तेषां विघ्नहरो भव ॥ ९४ ॥ ॥ कपर्द्युवाच ॥ ॥ [4]भ्रांतस्त्वया स्थापितेऽस्मिँल्लिंगे भक्ताश्च ये नराः ॥ न तेषां मम विघ्नानि मम वागनुगामिनी ॥ ९५ ॥ एवमुक्ते विघ्नराज्ञा प्रतीतेऽस्थापयच्च तम् ॥ तस्मादसौ सदाभ्यर्च्यश्चतुर्थ्यां च विशेषतः ॥ ९६ ॥ एवं स्थाप्य कुमारेशं लब्ध्वा चैतान्वराञ्छिवात् ॥ [5]मनसा कृतकृत्यं चात्मानं मेने षडाननः ॥ ९७ ॥ तस्थावंशेन तत्रैव कुमारेश्वरसंनिधौ ॥ अत्र स्थितं कुमारं ये पश्यन्ति स्वामियात्रिणः ॥ ९८ ॥ सफला स्वामियात्रा च तेषां भवति भारत ॥ कार्तिक्यां च विशेषेण कार्तिकेयं समर्चयेत् ॥ ९९ ॥ यत्फलं स्वामियात्रायां तत्फलं समवाप्नुयात् ॥ एवंविधमिदं पार्थ महीसागरसंगमम् ॥ १०० ॥ निमित्तीकृत्य चात्मानं साध्वर्थे लिंगमर्[6]चितम् ॥ रोगाभिभूतो रोगैर्वा नाम्नामष्टोत्तरं शतम् ॥ १०१ ॥ जप्त्वा शुचिर्ब्रह्मचारी मासं मुच्येत पातकात् ॥ एतदाराध्य संजाता रजिरामादयः पुरा ॥ १०२ ॥ शतसंख्याबलं राज्यं रुद्रलोक च भेजिरे ॥ जामदग्न्यस्त्विदं लिंगमाराध्य च समायुतम् ॥ १०३ ॥ लेभे कुठारमुग्रं ह्रदे येनार्जुनभुजान्युधि ॥ अग्रतो देवदेवस्य ज्ञात्वा तीर्थे[7] महागुणान् ॥ १०४ ॥ रामेश्वरमिति ख्यातं स्थापितं लिंगमुत्तमम् ॥ तच्च योऽभ्यर्चयेद्भक्त्या रुद्रलोकं स गच्छति ॥ १०५ ॥ प्रीतः स्यात्तस्य रामश्च कुमारेशश्च

१ च—इ० पा० । २ अष्टमं कर्पटकम्—इ० पा० । ३ कपर्दी अत्र गणपतिर्बोध्यः । मोदकैरित्याद्युक्तेः,—अग्रे च—भ्रातः—इत्याद्युक्तेश्च । ४ तात—इ० पा० । ५ सुदिनम्—इ० पा० । ६ अर्पितम्—इ० पा० । ७ तीर्थमहागुणान्—इत्यपि पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

फाल्गुन ॥ इति संक्षेपतः प्रोक्तं कुमारेशस्य वर्णनम् ॥ १०६ ॥ कुमारेशस्य माहात्म्यं कीर्तयेद्यस्तदग्रतः ॥ ये च शृण्वंत्यनुदिनं रुद्रलोके वसंति ते ॥१०७॥ अस्य लिंगस्य माहात्म्यं श्राद्धकाले तु यः पठेत् ॥ पितॄणामक्षयं श्राद्धं जायते नात्र संशयः ॥१०८॥ अस्य लिंगस्य माहात्म्यं गुर्विणीं श्रावयेद्यदि ॥ गुणवाञ्जायते पुत्रः कन्या चापि पतिव्रता ॥ १०९ ॥ एतत्पुण्यं पापहरं धर्म्यं चाह्लादकारकम् ॥ पठतां शृण्वतां चापि सर्वाभीष्टफलप्रदम् ॥ ११० ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां प्रथमे माहेश्वरखण्डे कौमारिकाखण्डें कुमारेशस्थापनपूर्वकमाहात्म्यवर्णनं नाम चतुस्त्रिंशोऽध्यायः ॥३४॥ ॥ छ ॥ ॥ नारद उवाच ॥ ॥ कुमारेण स्थापितोऽत्र कुमारेशस्ततः सुराः ॥ प्रणम्य गुहमूचुश्च प्रबद्धकरसंपुटाः ॥ १ ॥ किंचिद्विज्ञापयिष्यामो वयं त्वां शृणु तत्त्वतः ॥ पूर्वप्रसिद्ध आचारः प्रोच्यते जयिनामयम् ॥ २ ॥ जयंति ये रणे शत्रूंस्तैः कार्यः स्तंभचिह्नकः[1] ॥ तस्मात्तव जयोद्द्योतनिमित्तं स्तंभमुत्तमम् ॥ ३ ॥ निक्षिपाम वयं यावत्त्वमनुज्ञातुमर्हसि ॥ विश्वकर्मकृतं यच्च तृतीयं लिंगमुत्तमम् ॥ ४ ॥ तस्य स्तंभाग्रतस्तं च संस्थापय शिवात्मज ॥ एवमुक्ते सुरैः स्कन्दस्तथेत्याह महामनाः ॥ ५ ॥ ततो हृष्टाः सुरगणाः शक्राद्याः स्तंभमुत्तमम् ॥ जांबूनदमयं शुभ्रं रणभूमौ विनिक्षिपुः[2] ॥ ६ ॥ परितः स्थंडिलं दिक्षु सर्वरत्नमयं तु ते ॥ तत्र हृष्टाश्चाप्सरसो ननृतुर्दशधा शुभाः ॥ ७ ॥ मातरो मंगलान्यस्य जगुः स्कन्दस्य नंदिताः ॥ इंद्राद्या ननृतुस्तत्र स्वयं विष्णुश्च वादकः ॥ ८ ॥ पेतुः खात्पुष्पवर्षाणि देववाद्यानि सस्वनुः ॥ एवं स्तंभं समारोप्य जयाख्यं विश्वनंदकः[3] ॥ ९ ॥ स्तम्भेश्वरस्ततो देवः स्थापितस्त्र्यक्षसूनुना ॥ विरिंचिप्रमुखैर्देवैर्जातानन्दैः समं तदा[4] ॥ १० ॥ हरिहरादित्ययुक्तैस्तैः सेन्द्रैर्मुनिगणैरपि ॥ तस्यैव पश्चिमे भागे शक्त्यग्रेण महात्मना ॥११॥ गुहेन निर्मितः कूपो गंगा तत्र तलोद्भवा ॥ माघस्य च चतुर्दश्यां कृष्णायां पितृतर्पणम् ॥१२॥ कूपे स्नानं नरः कृत्वा भक्त्या यः पांडुनंदन ॥ गयाश्राद्धेन यत्पुण्यं तत्फलं लभते स्फुटम् ॥१३॥ स्तंभेश्वरं ततो देवं गन्धपुष्पैः प्रपूजयेत् ॥ वाजपेयफलं प्राप्य मोदते रुद्रसद्मनि ॥ १४ ॥ पौर्णमास्याममावास्यां महीसागरसंगमे ॥ श्राद्धं कृत्वा च योऽभ्यर्चेत्स्तंभेश्वरमकल्मषः ॥ १५ ॥ पितरस्तस्य तृप्यंति तृप्ता यच्छंति चाशिषः ॥ स भित्त्वा सर्वपापानि रुद्रलोके महीयते ॥ १६ ॥ इत्याह भगवान्रुद्रः स्कन्दस्य प्रीतये पुरा ॥ एवमेव चतुर्थं च स्थापितं लिंगमुत्तमम् ॥१७॥ प्रणेमुर्देवताः सर्वे साधुसाध्विति ते जगुः ॥ १८ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां प्रथमे माहेश्वरखण्डे कौमारिकाखण्डे स्तंभेश्वरमाहात्म्यवर्णनंनाम पंचत्रिंशोऽध्यायः ॥ ३५ ॥ ॥ छ ॥

१ तत्र चिह्नकः—इ०पा०। २ आर्षः प्रयोगः। विनिचिक्षिपुः—इत्यपेक्षितम्। ३ विश्वनंदनः—इ०पा०। ४ समंततः—इ०पा०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ॥ नारद उवाच ॥ ॥ एवं दृष्ट्वा क्षितौ तानि लिंगानि हरसूनुना ॥ हरिब्रह्मेंद्रप्रमुखा देवाः प्रोचुः परस्परम् ॥ १ ॥ अहो धन्यः
कुमारोऽयं महीसागरसंगमे ॥ येन चत्वारि लिंगानि स्थापितानि सुदुर्लभे ॥ २ ॥ वयमप्यत्र शुद्ध्यर्थं तोषार्थं स्कन्दरुद्रयोः ॥ साध्वर्थे
चात्मलाभाय कुर्मो लिंगपरंपराम् ॥ ३ ॥ अथवा कोटिशो देवा मुनयो नैव संख्यया ॥ सर्वे चेत्स्थापयिष्यंति लिंगान्यत्र महीतटे ॥ ४ ॥
पूजा तेषां कथं भावि बहुत्वाच्चात्र पच्यते ॥ यस्य राष्ट्रे रुद्रलिंगं पूज्यते नैव शक्तितः ॥ ५ ॥ तस्य सीदति तद्राष्ट्रं दुर्भिक्षव्याधितस्करैः ॥
संभूय स्थापयिष्यामो लिंगमेकं ततः शुभम् ॥ ६ ॥ इति कृत्वा मतिं सर्वे प्राप्यानुज्ञां महेश्वरात् ॥ प्रहर्षिता गुहश्चैव हरिब्रह्मसु
खाः सुराः ॥ ७ ॥ भूमिभागं शुभं वीक्ष्य विजने लिंगमुत्तमम् ॥ स्थापयामासुरथ ते स्वयं ब्रह्मविनिर्मितम् ॥ ८ ॥ सिद्धार्थैः स्थापितं यस्मा
द्देवैर्ब्रह्मादिभिः स्वयम् ॥ सिद्धेश्वरमिति प्राह नाम लिंगस्य वै गुहः ॥ ९ ॥ सर्वैर्देवैस्तत्र लिंगे खानितं सर उत्तमम् ॥ सर्वतीर्थोदकैः शुभ्रैः पूरितं
च महात्मभिः ॥ १० ॥ एतस्मिन्नंतरे पार्थ पातालाच्छेषनंदनः ॥ कुमुदोनाम आगत्य प्राह शेषाहिपन्नगान् ॥ ११ ॥ अस्मिंस्तारकयुद्धे तु प्रलं
बोनाम दानवः ॥ पलायित्वा स्कंदभीत्या पापः पातालमाविशत् ॥ १२ ॥ स वो वसूनि पुत्रांश्च भार्याः कन्या गृहाणि च ॥ विध्वंसयति
नागेंद्राः शीघ्रं धावतधावत ॥ १३ ॥ शेषात्मजस्य तद्वाक्यं कुमदस्य निशम्य ते ॥ औत्सुक्यमापुर्नागेंद्रा यामयामेति वादिनः ॥ १४ ॥ तान्नि
वार्य ततः स्कंदः क्रुद्धः शक्तिमथाददे ॥ पातालाय मुमोचाथ प्रोच्य दैत्यो निहन्यताम् ॥ १५ ॥ ततः स्कंदभुजोत्सृष्टा भुवं निर्भिद्य वेगतः ॥
प्रविष्टा सहसा शक्तिर्यथा दैवं नरं प्रति ॥ १६ ॥ सा तं हत्वा प्रलंबं च कोटिभिर्दशभिर्वृतम् ॥ नंदयित्वा गता नागाञ्जलकल्लोलपूर्विका ॥ १७ ॥
यांत्या शक्त्या तया पार्थ यत्कृतं विवरं भुवि ॥ पातालगंगातोयेन पूरितं पापहारिणा ॥ १८ ॥ तस्य नाम ददौ स्कंदः सिद्धकूप इति स्मृतः ॥
कृष्णाष्टम्यां चतुर्दश्यामुपवासी नरः स्वयम् ॥ १९ ॥ स्नात्वा कूपेऽर्चयेदीशं सिद्धेश्वरमनन्यधीः ॥ प्रभूतभवसंभूतपापं तस्य विलीयते ॥ २० ॥ सिद्ध
कुंडे च यः स्नात्वा श्राद्धं कुर्याद्विचक्षणः ॥ सर्वकल्मषनिर्मुक्तो भक्तियोग्यो भवेभवे[2] ॥ २१ ॥ वटश्चाप्यक्षयस्तस्य तुष्टो रुद्रो वरं ददौ ॥ प्रयाग
वटतुल्योऽयमेतत्सत्यं न संशयः ॥ २२ ॥ अत्रागत्य महाभागः श्राद्धं कुर्यात्सुभक्तितः ॥ पितॄणामक्षयं तच्च सर्वेषां पिंडपातनम् ॥ २३ ॥ ततो
ब्रह्मादयो देवाः स्कंदेन सहितास्तदा ॥ सिद्धांबिकां महाशक्तिं प्रार्थयामासुरीश्वरीम् ॥ २४ ॥ त्वयाविष्टो हि भगवान्मत्स्यरूपी जनार्दनः ॥

१ प्रद्वा–इ०, दृष्ट्वा० इ० च पा० । २ भवेत्–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जगदुद्धारणार्थाय चक्रे कर्माण्यनेकशः ॥ २५ ॥ इति तां प्रार्थयामासुरत्र त्याज्यं न ते शुभे ॥ अत्र स्थिताः सर्व इमे क्षेत्रपाला महाबलाः ॥२६ ॥ अष्टम्यां वा चतुर्दश्यां बलिपुष्पैश्च त्वां शुभे ॥ ये पूजयंति ते पाल्याः सर्वापत्सु च या सदा ॥ २७ ॥ एवमुक्ता सिद्धमाता तथेति प्रत्यपद्यत ॥ स्थापयामासुरथ तां लिंगादुत्तरभागतः ॥ २८ ॥ ततः क्षेत्रपतीन्देवाश्चतुःषष्टिं महेश्वरम् ॥ सिद्धेयं नाम क्षेत्रस्य रक्षार्थं निदधुः स्वयम् ॥ २९ ॥ त्वां च ये पूजयिष्यंति कार्यारंभेषु सर्वदा ॥ वर्षे वर्षे राजमाषबलिना च विशेषतः ॥३०॥ तानसौ पालयेत्तुष्टः पिता लोकानिव स्वकान् ॥ ततः सिद्धिकृतो देवास्तत्र सिद्धिविनायकम् ॥ ३१ ॥ कपर्दितनयं प्रार्थ्य स्थापयांचक्रिरे मुदा ॥ तं च ये पूजयंत्यत्र कार्यारंभेषु सर्वदा ॥ ३२ ॥ तेषां सिद्धिं ददात्येष प्रबलो विघ्नराड्भवः ॥ यद्यत्र पूजयेद्यस्तु सततं सिद्धसप्तकम् ॥ ३३ ॥ पश्येद्वा स्मरते वापि सर्वदोषैर्विमुच्यते ॥ ३४ ॥ सिद्धेश्वरः सिद्धवटश्च साक्षात्सिद्धांबिका सिद्धविनायकश्च ॥ सिद्धेयक्षेत्राधिपतिश्च सिद्धसरस्तथा सिद्धकूपश्च सप्त ॥ ३५ ॥ अत्र तुष्टो ददौ रुद्रः सुराणां दुर्लभान्वरान् ॥ वैशाखमासस्याष्टम्यां कृष्णायां सिद्धकूपके ॥ ३६ ॥ स्नात्वा पिंडान्वटे कृत्वा पूजयन्मां च सिद्धभाक् ॥ सदा योऽभ्यर्चयेन्मां च ब्रह्मचारी जितेंद्रियः ॥ ३७ ॥ अष्टाविष्टकरा नित्यं भवेयुस्तस्य सिद्धयः ॥ मंत्रजाप्यं बलिं होममत्र यः कुरुते नरः ॥ ३८ ॥ एकचित्तः शुचिर्भूत्वा सोऽभीष्टां सिद्धिमाप्नुयात् ॥ समाहितमनाश्चाथ सिद्धेशं यस्तु पश्यति ॥ ३९ ॥ तस्य सिद्धिर्भवत्येव विघ्नैर्यदि न हन्यते ॥ सिद्धांबिका महादेवी ह्यत्र संनिहितास्ति या ॥ ४० ॥ सिद्धिदा साधकेंद्राणां महाविद्यां जपंति ये ॥ धीरेभ्यो ब्रह्मचारिभ्यः सत्यचित्तेभ्य एव च ॥ ४१ ॥ मंत्रजाप्याद्ददात्येषा सर्वसिद्धीर्यथेप्सिताः ॥ पातालस्य बिलं चैतद्गुहशक्त्या कृतं महत् ॥ ४२ ॥ सिद्धांबिकाप्रसादेन विघ्नक्षेत्रपयोर्मम ॥ प्रत्यक्षं भविता यत्र नानाश्चर्याणि भूरिशः ॥ ४३ ॥ अत्र सिद्धिं प्रयास्यंति कोटिशः पुरुषाः सुराः ॥ विद्याधरत्वं देवत्वं गंधर्वत्वं च नागता ॥ ४४ ॥ यक्षत्वं चामरत्वं च प्राप्स्यंत्यत्र च साधकाः ॥ अत्र वै विजयोनाम स्थंडिलस्य प्रभावतः ॥ ४५ ॥ सिद्धांबिकां समाराध्य सिद्धिमाप्स्यति दुर्लभाम् ॥ यो मां द्रक्ष्यति चात्रस्थं यश्च मां पूजयिष्यति ॥ वादप्रचारतो वापि पुण्यावाप्तिर्भविष्यति ॥ ४६ ॥ ॥ ॥ नारद उवाच ॥ ॥ त्र्यंबकेण वरेष्वेवं दत्तेष्वपि सुरोत्तमाः ॥ ४७ ॥ प्रहृष्टाः समपद्यंत गाथां चेमां जगुस्तदा ॥ तेन यज्ञैर्जपैः स्तोत्रैस्तपो

१ सिद्धेयं नाम–सिद्धायाः इदं सिद्धेयम् । अपत्यार्थकोऽप्यत्रार्षत्वात्सामान्यतश्चातुरर्थिकः–"स्त्रीभ्यो ढक्" इति ढक्प्रत्ययः। २ तदा–इ०पा०। ३ पूजयिष्यन्ति–इ० पा०। ४ वाध–इ० पा०। ५ नागता–नागत्वमित्यर्थः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

भिस्तोषिता वयम्[1] ॥ ४८ ॥ सर्वे देवाः सिद्धिलिंगं यो नरः पूजयिष्यति ॥ सर्वकामफलावाप्तिरित्येवं शंकरोऽब्रवीत् ॥ ४९ ॥ इत्युक्त्वा ते जयं
प्राप्ताः स्कंदेन सहिताः सुराः ॥ काराय्य[2] रम्यप्रासादान्रम्यैस्तारकसंभवैः ॥ ५० ॥ चतुर्वर्गफलावाप्तिं दत्त्वा क्षेत्रस्य संययुः ॥ केचित्स्कंदं प्रशंसंतस्ती
र्थमन्ये हरिं परे ॥ ५१ ॥ केचिल्लिंगानि पंचापि युद्धं केचिद्दिवं ययुः ॥ ततोंऽतरिक्षे चालिंग्य महासेनं हरोऽब्रवीत् ॥ ५२ ॥ सप्तमे मारुतस्कंधे व
स नित्यं प्रियात्मज ॥ कार्येष्वहं त्वया पुत्र संप्रष्टव्यः सदैव हि ॥ ५३ ॥ दर्शनान्मम भक्त्या च श्रेयः परमवाप्स्यसि ॥ स्तंभतीर्थे च[4] वत्स्येऽहं न
विमोक्ष्यामि कर्हिचित् ॥ ५४ ॥ इत्युक्त्वा विससर्जैनं परिष्वज्य महेश्वरः ॥ ब्रह्मविष्णुमुखांश्चैव भक्त्या तैर[5]भिनंदितः ॥ ५५ ॥ विसर्जिताः सुरा[6]
जग्मुः स्वानिस्वान्यालयाँनि च ॥ शर्वो जगाम कैलासं स्कँधं वै सप्तमं गुहः ॥ ५६ ॥ इत्येतत्कथितं पार्थ लिंगपंचकसंभवम् ॥ यः पठेत्स्कंदं[9] सं
बद्धां कथां मर्त्यो महामतिः ॥ ५७ ॥ शृणुयाच्छ्रावयेद्वा[11]पि स भवेत्कीर्तिमान्नरः ॥ बह्वायुः सुभगः श्रीमान्कांतिमाञ्छुभदर्शनः ॥ ५८ ॥ भूतेभ्यो
निर्भयश्चापि सर्वदुःखविवर्जितः ॥ शुचिर्भूत्वा पुमान्यश्च कुमारेश्वरसन्निधौ ॥ ५९ ॥ शृणुयात्स्कंदचरितं महाधनपतिर्भवेत् ॥ बालानां व्याधिदुष्टा
नां राजद्वारोपसेविनाम् ॥ ६० ॥ इदं तत्परमं धन्यं सर्वदोषहरं सदा ॥ तनुक्षये च सायुज्यं षण्मुखस्य व्रजेन्नरः ॥ ६१ ॥ वरमेनं ददुर्देवाः स्कंद
स्याथ गता दिवम् ॥ ६२ ॥ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां प्रथमे माहेश्वरखण्डे कौमारिकाखण्डे पंचलिंगोपा
ख्यानसमाप्तिवर्णनंनाम षट्त्रिंशोऽध्यायः ॥ ३६ ॥ ॥ छ ॥ ॥ श्रीनारद उवाच ॥ ॥ बर्बरीतीर्थमाहात्म्यमथो वक्ष्यामि तेऽर्जुन ॥ यथा
बर्बरिका जाता शतशृंगा नृपात्मजा ॥ १ ॥ कुमारिकेति विख्याता तस्या नाम्ना प्रकथ्यते ॥ इदं कौमारिकाखंडं चतुर्वर्गफलप्रदम् ॥ २ ॥ यया
कृता पृथिव्यां च नानाग्रामादिकल्पना ॥ इदं भरतखंडं च यया सम्यक्प्रकल्पितम् ॥ ३ ॥ ॥ धनंजय[12] उवाच ॥ ॥ महदेतन्ममाश्चर्यं श्रो
तव्यं परमं मुने ॥ कुमारीचरितं सर्वं ब्रूहि मह्यं सविस्तरम् ॥ ४ ॥ कथं विश्वमिदं जातं कर्मजातिप्रकल्पितम्[13] ॥ कथं वा भारतं खंडं शुश्रूषेयं सदा
मम ॥ ५ ॥ ॥ नारद उवाच ॥ ॥ अव्यक्तेऽस्मिन्निरालोके प्रधानपुरुषावुभौ ॥ अजौ[14] समागतावेकौ केवलं शृणुमो वयम् ॥ ६ ॥ ततः
स्वभावकालाभ्यां स्वरूपाभ्यां समीरितम् ॥ ईक्षणेनैव प्रकृतेर्महत्तत्त्वमजायत ॥ ७ ॥ महत्तत्त्वाद्विकुर्वाणादहंतत्त्वं व्यजायत ॥ त्रिधा तन्मुनिभिः

---

१ च ये—इ०पा०। २ काराय्य—कारयित्वा—इत्यर्थः। ३ प्रपालकौ—इत्यशुद्धः पाठः। ४ तु—इ०पा०। ५ तैः—महेश्वरब्रह्मविष्णुभिः—इत्यर्थो बोध्यः। ६ ततः—इ०पा०। ७ आर्षं नपुंसकत्वम्। ८ सप्तमं स्कन्धं—मारुतस्कन्धाख्यम्। ९ रहस्यं परमं शुभम्—इ०पा०। १० यः पठेत्पाठयेच्चैव—इ०पा०। ११ चापि—इ०पा०। १२ अर्जुन उवाच—इ०पा०। १३ कर्म चास्ति प्रकल्पितम्—इ०पा०। १४ श्रुतौ—इ०पा०।

CC-0. In Public Domain. Digitization by eGangotri

प्रोक्तं सत्त्वराजसतामसम् ॥ ८ ॥ तामसात्पंच जातानि तन्मात्राणि विदुर्बुधाः ॥ तन्मात्रेभ्यश्च भूतानि विशेषाः पंच तद्भवाः ॥ ९ ॥ सात्त्विका च्चाप्यहंकाराद्बिद्धि कर्मेंद्रियाणि च ॥ एकादशं मनश्चैव राजसं च द्वयोर्विदुः ॥ १० ॥ चतुर्विंशतितत्त्वानि जातानीति पुरा विदुः ॥ सदाशिवेन वै पुंसा तानि दृष्टानि भारत ॥ ११ ॥ बुद्बुदाकारतां जग्मुरंडं जातं ततः शुभम् ॥ शतकोटिप्रमाणं च ब्रह्मांडमिदमुच्यते ॥ १२ ॥ आत्मास्य कथितो ब्रह्मा व्यभजत्स त्रिधा त्विदम् ॥ ऊर्ध्वं तत्र स्थिता देवा मध्ये चैव च मानवाः ॥ १३ ॥ नागा दैत्याश्च पाताले त्रिधैतत्परिकल्पितम् ॥ एकैकं सप्तधाभूय ततस्तेन प्रकल्पितम् ॥ १४ ॥ पातालानि च द्वीपानि स्वर्लोकाः सप्तसप्त च ॥ सप्त द्वीपानि वक्ष्यामि शृणु तेषां प्रकल्पनाम् ॥ १५ ॥ लक्षयोजनविस्तारं जंबूद्वीपं प्रकीर्त्यते[1] ॥ सूर्यबिंबसमाकारं तावत्क्षारार्णवावृतम् ॥ १६ ॥ शाकद्वीपं द्विगुणतो जंबूद्वीपात्ततः परम् ॥ तावता क्षीरतोयेन समुद्रेण परीवृतम् ॥ १७ ॥ सुरातोयेन दैत्यानां मोहकार्यर्णवेन हि ॥ पुष्करं तु ततो द्वीपं द्विगुणं तावता वृतम् ॥ १८ ॥ कुशद्वीपं द्विगुणतस्ततस्तत्परतः[2] स्मृतम् ॥ दधितोयेन परितस्तावदर्णवसंवृतम् ॥ १९ ॥ ततः परं क्रौञ्चसंज्ञं द्विगुणं हि घृताब्धिना ॥ ततः शाल्मलिद्वीपं च द्विगुणं तावतैव च ॥ २० ॥ इक्षुसारस्वरूपेण समुद्रेण परीवृतम् ॥ गोमेदं तस्य परितो द्विगुणं तावता वृतम् ॥ २१ ॥ स्वादुतोयेन रम्येण समुद्रेण समंततः ॥ एवं कोटिद्वयं पार्थ लक्षपंचाशतत्रयम् ॥ २२ ॥ पंचाशच्च सहस्राणि सप्तद्वीपाः ससागराः ॥ दशोत्तराणि पंचैव अंगुलानां शतानि च ॥ २३ ॥ अपां वृद्धिक्षयो दृष्टः पक्षयोः शुक्लकृष्णयोः ॥ ततो हेममयी भूमिर्दशकोट्यः[3] कुरूद्वह ॥ २४ ॥ देवानां क्रीडनस्थानं लोकालोकस्ततः परम् ॥ पर्वतो वलयाकारो योजनायुतविस्तृतः ॥ २५ ॥ अस्य[4] बाह्ये तमो घोरं दुष्प्रेक्ष्यं जीववर्जितम् ॥ पंचत्रिंशत्स्मृताः कोट्यो लक्षाण्येकोनविंशतिः ॥ २६ ॥ चत्वारिंशत्सहस्राणि योजनानां च फाल्गुन ॥ सप्तसागरमानस्तु गर्भोदस्तदनंतरम् ॥ २७ ॥ कोटियोजनविस्तारः कटाहः संव्यवस्थितः ॥ ब्रह्मणोऽडं कटाहेन संयुक्तं मेरुमध्यतः ॥ २८ ॥ पंचाशत्कोट्यो ज्ञेया दशदिक्षु समंततः ॥ जंबुद्वीपस्य मध्ये तु मेरुनामास्ति पर्वतः ॥ २९ ॥ स लक्षयोजनो ज्ञेयो ह्यधश्चोर्ध्वं प्रमाणतः ॥ षोडशैव सहस्राणि योजनानामधः स्थितः ॥ ३० ॥ उच्छ्रयश्चतुराशीतिर्द्वात्रिंशन्मूर्ध्नि विस्तृतः ॥ त्रिभिः शृंगैः समायुक्तः शरावाकृतिमस्तकः ॥ ३१ ॥ मध्यशृंगे ब्रह्मवास ऐशान्यां त्र्यंबकस्य च ॥ नैर्ऋत्ये वासुदेवस्य हेमशृंगं च ब्रह्मणः ॥३२॥ रत्नजं शंकरस्यापि राजतं केशवस्य च ॥ मेरुदिक्षु चतसृषु विष्कंभा गिरयः स्मृताः ॥ ३३ ॥ पूर्वेण मंदरो नाम

१ प्रकल्प्यते—इ०पा०। २ तत्परितः—इ०पा०। ३ दशकोट्यः दशकोटियोजनपरिमाणत्तदशकोटिः कुरूद्वह—इ०पा०। ४ ततः परम्—इ० पा०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दक्षिणे गंधमादनः ॥ विपुलः पश्चिमो[1] ज्ञेयः सुपार्श्वस्तु तथोत्तरे ॥३४॥ कदंबो मंदरे ज्ञेयो जंबुर्वै गंधमादने ॥ अश्वत्थो विपुले चैव सुपार्श्वे च वटो मतः ॥३५॥ एकादशशतायामाश्चत्वारो गिरिकेतवः ॥ एतेषां संति चत्वारि वनानि जयमूर्धसु ॥३६॥ पूर्वं चैत्ररथं नाम दक्षिणे गंधमादनम् ॥ वैभ्राजं पश्चिमे ज्ञेयमुदक्चित्ररथं वनम् ॥ ३७ ॥ सरांसि चापि चत्वारि चतुर्दिक्षु निबोध मे ॥ प्राच्येऽरुणोदसंज्ञं तु मानसं दक्षिणे सरः ॥३८॥ प्रत्यक्छीतोदकंनाम उत्तरे च महाह्रदः ॥ विष्कंभगिरयो ह्येत उच्छ्रिताः पंचविंशतिः ॥३९॥ योजनानां सहस्राणि सहस्रं पिंडतः[2] स्मृतम्॥ अन्ये च संति बहुशस्तत्र वै केसराचलाः ॥४०॥ मेरोर्दक्षिणतश्चैव त्रयो मर्यादपर्वताः ॥ निषधो हेमकूटश्च हिमवानिति ते त्रयः॥४१॥लक्षयोजनदीर्घाश्च विस्तीर्णा द्विसहस्रकम् ॥ त्रयश्चोत्तरतो मेरोर्नीलः श्वेतोऽथ शृंगवान् ॥ ४२ ॥ माल्यवान्पूर्वतो मेरोर्गंधाख्यः पश्चिमे तथा ॥ इत्येते गिरयः प्रोक्ता जंबुद्वीपे समंततः ॥ ४३ ॥ गंधमादनसंस्थाया महागजप्रमाणतः ॥ फलानि जंब्वास्तन्नाम्ना जंबूद्वीपमिति स्मृतम् ॥ ४४ ॥ आसीत्स्वायंभुवोनाम मनुराद्यः प्रजापतिः ॥ आसीत्स्त्री शतरूपा तामुदुवोढ प्रजापतिः ॥ प्रियव्रतोत्तानपादौ तस्याऽऽस्तां तनयावुभौ ॥ ४५ ॥ ध्रुवश्चोत्तानपादस्य पुत्रः परमधार्मिकः ॥ भक्त्या स विष्णुमाराध्य स्थानं चैवाक्षयं गतः ॥ ४६ ॥ प्रियव्रतस्य राजर्षेरुत्पन्ना दश सूनवः ॥ त्रयः प्रव्रजितास्तत्र परंब्रह्म समाश्रिताः ॥ ४७ ॥ सप्त सप्तसु द्वीपेषु तेन पुत्राः प्रतिष्ठिताः ॥ जंबूद्वीपाधिपो ज्येष्ठ आग्नीध्र इति विश्रुतः ॥ ४८ ॥ तस्यासन्नव सुताः पार्थ नववर्षेश्वराः स्मृताः ॥ तेषां नाम्ना च ते वर्षास्तिष्ठंत्यद्यापि चांकिताः ॥ ४९ ॥ योजनानां सहस्राणि नव प्रत्येकशः स्मृताः ॥ मेरोश्चतुर्दशं खंडं गंधमाल्यवतोर्द्वयोः ॥ ५० ॥ अंतरे हेमभूमिष्ठमिलावृतमिहोच्यते ॥ माल्यवत्सागरांतस्य भद्राश्वमिति प्रोच्यते ॥ ५१ ॥ गंधवत्सागरांतस्य केतुमालमिति स्मृतम् ॥ ५२ ॥ शृंगवज्जलधेरंतः कुरुखंडमिति स्मृतम् ॥ शृंगवच्छ्वेतमध्ये च खण्डं प्रोक्तं हिरण्मयम् ॥ ५३ ॥ सुनीलश्वेतयोर्मध्ये खंडमाहुश्च रम्यकम् ॥ निषधो हेमकूटश्च हरिखंडं तदंतरा ॥ ५४ ॥ हिमवद्धिमकूटांतः खण्डं किंपुरुषं स्मृतम् ॥ हिमाद्रिजलधेरन्तर्नाभिखण्डमिति स्मृतम् ॥ ५५ ॥ नाभिखण्डं च कुरवो द्वे वर्षे धनुषाकृती ॥ हिमवांश्च गिरिश्शृंगी ज्यास्थाने परिकीर्तितौ ॥ ५६ ॥ नाभेः पुत्रश्च ऋषभ ऋषभाद्भरतोऽभवत् ॥ तस्य नाम्ना त्विदं वर्षं भारतं चेति कीर्त्यते ॥ ५७ ॥ अत्र धर्मार्थकामानां मोक्षस्य च उपार्जनम् ॥ अन्यत्र भोगभूमिश्च सर्वत्र कुरुनंदन ॥ ५८ ॥ शाकद्वीपे च शाकोऽस्ति योजनानां सहस्रकः ॥ तस्य नाम्ना च तद्वर्षं शाकद्वीपमिति स्मृतम् ॥ ५९ ॥ तस्य च प्रिय

१ पश्चिमे भागे–इ०पा० । २ परितः–इत्यपि पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

व्रत एवाधिपतिर्नाम्ना मेधातिथिरिति ॥ ६० ॥ तस्य पुरोजवमनोजववेपमानधूम्रानीकचित्ररेफबहुरूपविश्वचारसंज्ञानि पुत्रनामानि सप्त वर्षाणि ॥ ॥ ६१ ॥ शाकद्वीपे च वर्ष ऋतव्रतसत्यव्रतानुव्रतनामानो वा¹य्वात्मकं भगवंतं जपंति ॥ ६२ ॥ अंतः प्रविश्य भूतानि यो विभज्यात्मकेतुभिः ॥ अंतर्यामीश्वरः साक्षात्पातु नो यद्वशे जगत् ॥ ६३ ॥ इति जपः ॥ कुशद्वीपे कुशस्तंबो योजनानां सहस्रकः ॥ तच्चिह्नचिह्नितं तस्मात्कुशद्वीपं ततः स्मृतम् ॥ ६४ ॥ तद्द्वीपपतिश्च प्रैयव्रतो हिरण्यरोमा तत्पुत्रवसुवसुदानदृढकविनाभिगुप्तसत्यव्रतवामदेवनामांकितानि सप्त वर्षाणि ॥ व²र्णाश्च कुलिशकोविदाभियुक्तकुलकसंज्ञा जातवेदसं भगवंतं स्तुवंति ॥ ६५ ॥ परस्य ब्रह्मणः साक्षाज्जातवेदा³सि हव्यवाट् ॥ देवानां पुरुषांगानां यज्ञेन⁴ पुरुषं यजः ॥ ६६ ॥ इति स⁵्तुतिः ॥ क्रौंचद्वीपे क्रौंचनामा पर्वतो योजनायुतः ॥ योऽसौ गुहेन निर्भिन्नस्तच्चिह्नं क्रौंचद्वीपकम् ॥ ६७ ॥ तत्र च प्रैयव्रतो घृतपृ⁶ष्ठिनामा तत्पुत्राममधुरुहमेघपृष्ठस्वधामऋताश्वलोहितार्णववनस्पतिइतिसप्तपुत्रनामांकितानि सप्त वर्षाणि ॥ ६८ ॥ वर्णाश्च गुरुऋषभद्रविणदेवकसंज्ञाः ॥ ६९ ॥ आपोमयं भगवंतं स्तुवंति ॥ ७० ॥ आपः पुरुषवीर्याश्च पुनंतीर्भूर्भुवःस्वश्च ॥ तैः पुनरमीवघ्नाः संस्पृशेतात्मना भुवः ॥७१॥ इति जपः ॥ शाल्मलेर्नाम वृक्षस्य तत्रवासः सहस्रं योजनानां तच्चिह्नं शाल्मलिद्वीपमुच्यते ॥ ७२ ॥ तस्याधिपतिः प्रैयव्रतो यज्ञबाहुस्तत्पुत्रसुरोचनसौमनस्यरमणकदेववर्हिपारिभद्राप्यायनाभिज्ञाननामानि सप्तवर्षाणि ॥७३॥ वर्णाश्च श्रुतधरवीर्यवसुंधरइषंधरसंज्ञा भगवंतं सोमं यजंति ॥७४॥ स्वयोनिः पितृदेवेभ्यो विभजञ्छुक्लकृष्णयोः ॥ अधः प्रजानां सर्वासां राजा नः सोमोस्तु ॥ ७५ ॥ इति जपः गोमेदनामा प्लक्षोस्ति सुरम्यो यस्य च्छायया ॥ मेदोवृद्धिं गतं लौल्याद्गोमेदं द्वीपमुच्यते ॥ ७६ ॥ तत्र प्रैयव्रत इध्मजिह्वः पतिस्तत्पुत्रशिवसुरम्यसुभद्रशांत्यशँतामृताभयनामांकितानि सप्त वर्षाणि ॥७७॥ वर्णाश्च हंसपतंगोर्ध्वांचनसत्यांगसंज्ञाश्चत्वारो भगवंतं सूर्यं यजंते ॥ ७८ ॥ प्रश्नस्य विष्णुरूपं यत्तत्रोत्थस्य ब्रह्मणोऽमृतस्य च ॥ मृत्योश्च सूर्यमात्मानं धीमहि ॥ ७९ ॥ इति जपः ॥ स्वर्णपत्राणि नियुतं योजनानां सहस्रकम् ॥ पुष्करं ज्वलदाभाति तच्चिह्नं द्वीपपुष्करम् ॥८०॥ तस्याधिपतिः प्रैयव्रतो वीतहोत्रनामा तत्पुत्रौ रमणकघातकौ ॥८१॥ तन्नामचिह्नितं खंडद्वयम् ॥८२॥ तयोरंतराले मानसाचलो नाम वलयाकारः पर्वतो यस्मिन्भ्रमति भगवान्भास्कर इति ॥८३॥ तत्र वर्णाश्च न संति केवलं समानास्ते ब्रह्म ध्यायंति ॥८४॥

१ ब्रह्मात्मकम्--इ०पा० । २ वर्णाश्च--इ० पा० । परंतु मूलस्थ एव पाठः समीचीनः । ३ संधिरार्षः--मंत्रत्वात् । ४ यज्ञेति--इ०पा० । ५ इति श्रुतिः--इ० पा० । ६ घृतपुष्टिनामा--इ०पा० । ७ अक्षितः--इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यद्यत्कर्ममयं लिंगं ब्रह्मलिंगं जनोर्चयन् ॥ भेदेनैकांतमद्वैतं तस्मै भगवते नमः ॥ ८५ ॥ ॥ इति जपः ॥ ॥ नैषु क्रोधो न मात्सर्यं पुण्यपापा
र्जनेन च ॥ अयुतं द्विगुणं चापि क्रमादायुः प्रकीर्तितम् ॥ ८६ ॥ जपंतः कामिनीयुक्ता विहरंत्यमरा इव ॥ अथ ते संप्रवक्ष्यामि ऊर्ध्वलोकस्य
संस्थितिम् ॥ ८७ ॥ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां प्रथमे माहेश्वरखण्डे कौमारिकाखण्डे कुमारिकाख्याने भूसं
स्थितिवर्णनंनाम सप्तत्रिंशोऽध्यायः ॥ ३७ ॥ ॥ छ ॥ ॥ नारद उवाच ॥ ॥ भूमेर्योजनलक्षे च कौरव्य रविमंडलम् ॥ योजनानां सह
[1]स्राणि भास्करस्य रथो नव ॥ १ ॥ ईषादंडस्तथैवास्य द्विगुणः परिकीर्तितः ॥ सार्धकोटिस्तथा सप्त नियुतानि विवस्वतः ॥ २ ॥ योजनानां
तु तस्याक्षस्तत्र चक्रं प्रतिष्ठितम् ॥ त्रिनाभि तच्च पंचारं षण्नेमि परिकीर्तितम् ॥ ३ ॥ चत्वारिंशत्सहस्राणि द्वितीयोऽक्षोऽपि विस्तृतः ॥ पंच चा
न्यानि सार्द्धानि स्यन्दनस्य तु पांडव ॥ ४ ॥ अक्षप्रमाणमुभयोः प्रमाणं तद्युगार्द्धयोः ॥ ह्रस्वोऽक्षस्तद्युगार्द्धं च ध्रुवाधारं रथस्य वै ॥ ५ ॥
द्वितीयोऽक्षस्तथा सव्ये चक्रं तन्मानसे स्थितम् ॥ हयाश्च सप्त च्छंदांसि तेषां नामानि मे शृणु ॥ ६ ॥ गायत्री च बृहत्युष्णिग्जगती त्रिष्टुवेव च ॥
अनुष्टुप्पंक्तिरित्युक्ताश्छंदांसि हरयो रवेः ॥ ७ ॥ नैवास्तमनमर्कस्य नोदयः सर्वदा सतः ॥ उदयास्तमनाख्यं हि दर्शनादर्शनं रवेः ॥ ८ ॥
शक्रादीनां पुरे तिष्ठन्स्पृशत्येष पुरत्रयम् ॥ विकीर्णो[3]ऽतो विकर्णस्थस्त्रिकोणा[4]र्धपुरे तथा ॥ ९ ॥ अयनस्योत्तरस्यादौ मकरं याति भास्करः ॥
ततः कुम्भं च मीनं च राशे राश्यंतरं तथा ॥ १० ॥ त्रिष्वेतेष्वथ भुक्तेषु ततो वैषुवतीं गतिम् ॥ प्रयाति सविता कुर्वन्नहोरात्रं च तत्समम् ॥
॥ ११ ॥ ततो रात्रिः क्षयं याति वर्धते तु दिनं दिनम् ॥ ततश्च मिथुनस्यांते परां काष्ठामुपागतः ॥ १२ ॥ राशिं कर्कटकं प्राप्य कुरुते दक्षिणायां
नम् ॥ कुलालचक्रपर्यंतो यथा शीघ्रं निवर्तते ॥ १३ ॥ दक्षिणायक्रमे सूर्यस्तथा शीघ्रं निवर्तते ॥ अतिवेगितया कालं वायुमार्गबलाच्चरन् ॥ १४ ॥
तस्मात्प्रकृष्टां भूमिं स कालेनाल्पेन गच्छति ॥ कुलालचक्रमध्यस्थो यथा मंदं प्रसर्पति ॥ १५ ॥ तथोदगयने सूर्यः सर्पते मंदविक्रमः ॥ तस्मा
द्दीर्घेण कालेन भूमिमल्पं निगच्छति ॥ १६ ॥ संध्याकाले च मंदेहाः सूर्यमिच्छंति खादितुम् ॥ प्रजापतिकृतः शापस्तेषां फाल्गुन रक्षसाम् ॥
॥ १७ ॥ अक्षयत्वं शरीराणां मरणं च दिनेदिने ॥ ततः सूर्यस्य तैर्युद्धं भवत्यत्यंतदारुणम् ॥ १८ ॥ ततो गायत्रिपूतं यद्द्विजास्तोयं क्षिपंति च ॥
तेन दह्यंति ते पापाः संध्योपासनतः सदा ॥ १९ ॥ ये संध्यां नाप्युपासंते कृतघ्ना यांति रौरवम् ॥ प्रतिमासं पृथक्सूर्य ऋषिगन्धर्वराक्षसैः ॥२०॥

१ सहस्रे द्वे--इ० पा० । २ च सव्यतः--इ० पा० । ३ विकीर्णौ द्वौ विकीर्णस्थः--इ० पा० । ४ त्रिकोणात्स्वपुरे ततः--इ० पा० । ५ विदुः--इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अप्सरोग्रामणीसर्पैरथो याति च सप्तभिः ॥ धातार्यमा मित्रवरुणौ विवस्वानिन्द्र एव च ॥ २१ ॥ पूषा च सविता सोऽथ भगस्त्वष्टा च कीर्तितः ॥ विष्णुश्चैत्रादिमासेषु आदित्या द्वादश स्मृताः ॥ २२ ॥ ततो दिवाकरस्थानान्मंडलं शशिनः स्थितम् ॥ लक्षमात्रेण तस्यापि त्रिचक्रो रथ उच्यते ॥ २३ ॥ कुंदाभा दश चैवाश्वा वामदक्षिणतो युताः ॥ पूर्णे शतसहस्रे च योजनानां निशाकरात् ॥ २४ ॥ नक्षत्रमण्डलं कृत्स्नमुपरिष्टात्प्रकाशते ॥ चतुर्दश चार्बुदान्यप्यशीतिः सरितांपतिः[1] ॥ २५ ॥ विंशतिश्च तथा कोट्यो नक्षत्राणां प्रकीर्तिताः ॥ द्वे लक्षे चोत्तरे तस्माद्बुधो नक्षत्रमण्डलात् ॥ २६ ॥ वाय्वग्निद्रव्यसंभूतो रथश्चंद्रसुतस्य च ॥ पिशंगैस्तुरगैर्युक्तः सोष्टाभिर्वायुवेगिभिः ॥ २७ ॥ द्विलक्षश्चोत्तरे तस्माद्बुधाच्चाप्युशना स्मृतः ॥ शुक्रस्यापि रथोष्टाभिर्युक्तोऽभूत्संभवैर्हयैः ॥ २८ ॥ लक्षद्वयेन भौमस्य स्मृतो देवपुरोहितः ॥ अष्टाभिः पांडुरैरश्वैर्युक्तोऽस्य कांचनो रथः ॥ २९ ॥ सौरिर्बृहस्पतेश्चोर्ध्वं द्विलक्षे समुपस्थितः ॥ आकाशसंभवैरश्वैरष्टाभिः शबले रथः ॥ ३० ॥ स्वर्भानोस्तुरगाश्चाष्टौ भृंगाभा धूसरा रथम् ॥ वहंति च सकृद्युक्ता आदित्याधःस्थितास्तथा ॥ ३१ ॥ सौरेर्लक्षं स्मृतं चोर्ध्वं ततः सप्तर्षिमण्डलम् ॥ ऋषिभ्यश्चापि लक्षेण ध्रुवश्चोर्ध्वं व्यवस्थितः ॥ ३२ ॥ मेढीभूतः समस्तस्य ज्योतिश्चक्रस्य वै ध्रुवः ॥ ध्रुवोऽपि शिंशुमारस्य पुच्छाधारे व्यवस्थितः ॥ ३३ ॥ यमाहुर्वासुदेवस्य रूपमात्मानमव्ययम् ॥ वायुपाशैर्ध्रुवे बद्धं सर्वमेतच्च फाल्गुन ॥ ३४ ॥ नवयोजनसाहस्रं मण्डलं सवितुः स्मृतम् ॥ द्विगुणं सूर्यविस्तारान्मण्डलं[2] शशिनः स्मृतम् ॥ ३५ ॥ तुल्यस्तयोस्तु स्वर्भानुर्भूत्वाधस्तात्प्रसर्पति ॥ उद्धृत्य पृथिवीच्छायां निर्मलां मण्डलाकृतिः ॥ ३६ ॥ चन्द्रस्य षोडशो भागो भार्गवश्च विधीयते ॥ भार्गवात्पादहीनस्तु विज्ञेयोऽथ बृहस्पतिः ॥ ३७ ॥ बृहस्पतेः पादहीनौ वक्रसौरी बुधस्तथा ॥ शतानि पंच चत्वारि त्रीणि द्वे चैकयोजनम् ॥ ३८ ॥ योजनार्धप्रमाणानि भानि ह्रस्वं न विद्यते ॥ भूमिलोकश्च भूर्लोकः[3] पादगम्यः प्रकीर्तितः ॥ ३९ ॥ भूमिसूर्यांतरं तच्च भुवर्लोकः प्रकीर्तितः ॥ ध्रुवसूर्यांतरं तच्च नियुतानि चतुर्दश ॥ ४० ॥ स्वर्लोकः सोऽपि गदितो लोकसंस्थानचिंतकैः ॥ ध्रुवादूर्ध्वं तथा

१ अत्र–सरितांपतिः–इत्यनेन–"एकदशशतसहस्रायुतलक्षप्रयुतकोटयः क्रमशः । अर्बुदमब्जं खर्वनिखर्वमहापद्मशंकवस्तस्मात् । जलधिश्चान्त्यं मध्यं परार्धमिति दशगुणोत्तराः संज्ञाः ॥ १ ॥ संख्यायाः स्थानानां व्यवहारार्थं कृताः पूर्वैः ।" इति लीलावत्युक्तसंख्यासंज्ञान्तर्गत–'जलधि' नामकसंख्या बोध्या । २ विस्तारः शशिनः स्मृतः–इ०पा० । ३ अन्यत्र च ज्योतिःशास्त्रे भूर्भुवःस्वरादिकसंस्थितिरित्थं वर्णितास्ति–"भूर्लोकाख्यो दक्षिणे व्यक्षदेशात्तस्मात्सौम्योऽयं भुवः स्वश्च मेरुः । लभ्यः पुण्यैः खे महः स्याज्जनोऽतोऽनल्पानल्पैः स्वैस्तपःसत्यमन्त्यः ॥" एवं सप्तलोककल्पना कृतास्ति । अत्र व्यक्षदेशः लंकाप्रभृतिः । तस्माद्देशाद्दक्षिणे यः प्रदेशः स भूर्लोकः, तस्मादुत्तरे भुवर्लोकः यत्रास्मिँल्लोके वयं तिष्ठामः । मेरुः स्वर्लोकः, ततः खे आकाशे महर्लोकः, ततो जनलोकः, ततस्तपोलोकः, ततः सत्यलोकः, इति सिद्धान्तशिरोमणौ लोकसंस्थानकल्पनोक्ता बोद्धव्या ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कोटिर्महर्लोकः प्रकीर्तितः ॥ ४१ ॥ द्वे कोट्यौ च जनो यत्र निवसंति चतुःसनाः ॥ चतुर्भिश्चापि कोटीभिस्तपोलोकस्ततः स्मृतः ॥ ४२ ॥ वैराजा यत्र ते देवाः स्थिता दाहविवर्जिताः ॥ षड्गुणेन तपोलोकात्सत्यलोको विराजते ॥ ४३ ॥ अपुनर्मरका यत्र ब्रह्मलोको हि सं स्मृतः ॥ अष्टादश तथा कोट्यो लक्षाण्यशीतिपंच च ॥ ४४ ॥ शुभं निरुपमं स्थानं तदूर्ध्वं संप्रकाशते ॥ भूर्भुवःस्वरिति प्रोक्तं त्रैलोक्यं कृतकं त्विदम् ॥ ४५ ॥ जनस्तपस्तथा सत्यमिति चाकृतकं त्रयम् ॥ कृतकाकृतयोर्मध्ये महर्लोक इति स्मृतः ॥ ४६ ॥ शून्यो भवति कल्पांते योत्यंतं न विनश्यति ॥ एते सप्त समाख्याता लोकाः पुण्यैरुपार्जिताः ॥ ४७ ॥ यज्ञैर्दानैर्जपैर्होमैस्तीर्थैर्व्रतसमुच्चयैः ॥ वेदादिप्रोक्तैरन्यैश्च साध्याँल्लोकानिमान्विदुः ॥ ४८ ॥ ततश्चांडस्य शिरसो धारा नीरमयी शिवा ॥ सर्वलोकान्समाप्लाव्य गंगा मेरावुपागता ॥ ४९ ॥ ततो महीतलं सर्वं पातालं प्रविवेश सा ॥ अंडमूर्ध्नि स्थिता देवी सततं द्वारवासिनी ॥ ५० ॥ देवीनां कोटिकोटीभिः संवृता पिंगलेन च ॥ तत्र स्थिता सदा रक्षां कुरुतेऽण्डस्य सा शुभा ॥५१॥ निहंति दुष्टसंघातान्महाबलपराक्रमा॥वायुस्कंधानि सप्तापि शृणु यद्वत्स्थितान्यपि ॥५२॥ पृथिवीं समभिक्रम्य संस्थितो मेघमंडले ॥ प्रवहोनाम यो मेघान्प्रवहत्यतिशक्तिमान् ॥ ५३ ॥ धूमजाश्चोष्मजा मेघाः सामुद्रैर्येन पूरिताः ॥ तोयैर्भवंति नीलांगा वर्षिष्ठाश्चैव भारत ॥ ५४ ॥ द्वितीयश्चावहो नाम निबद्धः सूर्यमंडले ॥ तेन बद्धं ध्रुवेणेदं भ्राम्यते सूर्यमंडलम् ॥ ५५ ॥ तृतीयश्चोद्वहो नाम चंद्रस्कंधे प्रतिष्ठितः ॥ बद्धं ध्रुवेण येनेदं भ्राम्यते चंद्रमंडलम् ॥ ५६ ॥ चतुर्थः संवहो नाम स्थितो नक्षत्रमण्डले ॥ वातरश्मिभिराबद्धं ध्रुवेण सह भ्राम्यते ॥ ५७ ॥ ग्रहेषु पंचमः सोऽपि विवहो नाम मारुतः ॥ ग्रहचक्रमिदं येन भ्राम्यते ध्रुवसंधितम् ॥ ५८ ॥ षष्ठः परिवहो नाम स्थितः सप्तर्षिमंडले ॥ भ्रमंति ध्रुवसंबद्धा येन सप्तर्षयो दिवि ॥ ५९ ॥ सप्तमश्च ध्रुवे बद्धो वायुर्नाम्ना परावहः ॥ येन संस्थापितं ध्रौव्यं चक्रं चान्यानि भारत ॥ ६० ॥ यं समासाद्य वेगेन दिशामंतं प्रपेदिरे ॥ दक्षस्य दश पुत्राणां सहस्राणि प्रजापतेः ॥ ६१ ॥ एवमेते दितेः पुत्राः सप्तसप्त व्यवस्थिताः ॥ अनारमंतः संवांति सर्वगाः सर्वधारिणः ॥ ६२ ॥

---

१ चतुःसनाः–सनक–सनंदन–सनातन–सनत्कुमाराः । २ संमतः–इ० पा० । ३ या--इ० पा० । ४ ज्योतिःशास्त्रे तु--"भूवायुरावह इह प्रवहस्तदूर्ध्वः स्यादुद्वहस्तदनु संवहसंज्ञकश्च । अन्यस्ततोऽपि सुवहः परिपूर्वकोऽस्माद्बाह्यः परावह इमे पवनाः प्रसिद्धाः ॥" इति सिद्धांतशिरोमण्युक्तरीत्या किंचिद्विरुद्धक्रमो दृश्यते । अत्र मूले प्रथमं प्रवह उक्तः--अत्र ज्योतिःशास्त्रे च पूर्वमावह उच्यते । अत्र मतभेदः प्रतिभाति । प्रमाणान्तरेण तस्य गतिः स्यात् । ५ एते–मरुतः–इत्यर्थः । दितिगर्भे शक्रेण सप्तसप्तधा कृतपरिच्छेदा ज्ञेयाः । तेषां कथा पूर्वमत्रैव खण्ड उक्ता ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ध्रुवादूर्ध्वमसूर्यं चाप्यनक्षत्रमतारकम् ॥ स्वतेजसा स्वशक्त्या चाधिष्ठितास्ते हि नित्यदा ॥ ६३ ॥ इत्यूर्ध्वं ते समाख्यातं पातालान्यथ मे शृणु ॥ ६४ ॥ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां प्रथमे माहेश्वरखण्डे कौमारिकाखण्डे कुमारिकाख्याने लोकव्यवस्थितिवर्णनंनामाष्टत्रिंशोऽध्यायः ॥ ३८ ॥ ॥ छ ॥ ॥ नारद उवाच ॥ ॥ सहस्रसतत्युच्छ्राये पातालानि परस्परम् ॥ अतलं वितलं चैव नितलं च रसातलम् ॥ १ ॥ तलातलं च सुतलं पातालं चापि सप्तमम् ॥ कृष्णशुक्लारुणाः पीताः शर्कराशैलकांचनाः ॥ २ ॥ भूमयो यत्र कौरव्य वरप्रासादशोभिताः ॥ तेषु दानवदैतेयनागाश्चैव सहस्रशः ॥ ३ ॥ स्वर्लोकादपि रम्याणि दृष्टानि बहुशो मया ॥ आह्लादकारिणो नानामणयो यत्र पन्नगाः ॥ ४ ॥ दैत्यदानवकन्याभिर्महारूपाभिरन्विते ॥ पाताले कस्य न प्रीतिर्विमुक्तस्यापि जायते ॥ ५ ॥ यत्र नोष्णं न वा शीतं न वर्षं दुःखमेव च ॥ भक्ष्यभोज्यमहाभोगकालो यत्रापि जायते ॥ ६ पाताले सप्तमे चास्ति लिंगं श्रीहाटकेश्वरम् ॥ ब्रह्मणा स्थापितं पार्थ सहस्रयोजनोच्छ्रितम् ॥ ७ ॥ हाटकस्य तु लिंगस्य प्रासादो योजनायुतः ॥ सर्वरत्नमयो दिव्यो नानाश्चर्यविभूषितः ॥ ८ ॥ तच्चार्चयंति तल्लिंगं नानानागेन्द्रसत्तमाः ॥ तदधस्ताज्जलं भूरि तस्याधो नरकाः स्मृताः ॥ ९ ॥ पापिनो येषु पात्यंते तान्छृणुष्व महामते ॥ कोटयः पंचपंचाशद्राजानश्चैकविंशति ॥ १० ॥ रौरवः शूकरो रोधस्तालो विशसनस्तथा ॥ महाज्वालस्तप्तकुम्भो लवणोथ विमोहकः ॥ ११ ॥ रुधिरांधो वैतरणी कृमिशः कृमिभोजनः ॥ असिपत्रवनं कृष्णो लालाभक्ष्यश्च दारुणः ॥ १२ ॥ तथा पूयवहः पापो वह्निर्ज्वालोऽप्यधःशिराः ॥ संदंशः कृष्णसूत्रश्च तमश्चावीचिरेव च ॥ १३ ॥ श्वभोजनो विसूचिश्चाप्यवीचिश्च तथाऽपरः ॥ कूटसाक्षी रौरवं च रोधं गोविप्ररोधकः ॥ १४ ॥ सुरापः सूकरं याति तालं मिथ्यामनुष्यहा ॥ गुरुतल्पी तप्तकुम्भं तप्तलोहं च भक्तहा ॥ १५ ॥ गुरूणामवमंता यो महाज्वाले निपात्यते ॥ लवणं शास्त्रहंता च निर्मर्यादो विमोहके ॥ ॥ १६ ॥ कृमिभक्ष्ये देवद्वेष्टा कृमिशे तु दुरिष्टकृत् ॥ पितृदेवात्पूर्वमश्नँल्लालाभक्ष्ये प्रयाति च ॥ १७ ॥ मिथ्याजीवविरोधी विशसने कूटशस्त्रकृत् ॥ अधोमुखे ह्यसद्ग्राही एकाशी पूयवाहके ॥१८॥ मार्जारकुक्कुटश्वानपक्षिपोष्टा प्रयाति च ॥ बधिरांधगृहक्षेत्रतृणधान्यादिज्वालकः ॥ १९ ॥ नक्षत्रंगजीवी च याति वैतरणीं नरः ॥ धनयौवनमत्तो यो धनहा कृष्णमेति सः॥२०॥असिपत्रवनं याति वृक्षच्छेदी वृथैव यत्॥कुहकाजीविनः सर्वे वह्निज्वाले पतंति ते॥२१॥परस्त्रीं च परान्नं च गच्छन्संदंशमेति च॥ दिवास्वप्नपरा ये च व्रतलोपपराश्च ये॥२२॥शरीरमदमत्ताश्च यांति चैते श्वभोजनम्॥

१ अथ संशृणु—इ० पा० । २ च—इ०पा० । ३ स च—इ० पा० । ४ वह्निजालः—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शिवं हरिं न मन्यंते यांत्यवीचिनमेव च ॥ २३ ॥ इत्येवमादिभिः पापैरशास्त्रौघस्य सेवनैः ॥ पतंत्येव महाघोरनरकेषु सहस्रशः ॥ २४
तस्माद्य इच्छेदेतेभ्यो विमोक्षं बुद्धिमान्नरः ॥ श्रुतिमार्गेण तेनार्च्यौ देवौ हरिहरावुभौ ॥ २५ ॥ नरकाणामधोभागे स्थितः कालाग्निसंज्ञकः ॥
तदधो हट्टकश्चैव अनंतस्तदधः स्मृतः ॥ २६ ॥ यस्यैतत्सकलं विश्वं मूर्धाग्रे सर्षपायते ॥ इत्यनंतप्रभावात्स ह्यनंत इति कीर्त्यते ॥ २७ ॥ दिशां
गजास्तत्र पद्मकुमुदांजनवामनाः ॥ तदधोऽडकटाहश्च एकवीरास्ति तत्र च ॥ २८ ॥ चतुर्लक्षसहस्राणि नवतिश्च शतानि[2] च ॥ एतेनैव प्रमाणेन
उदकं च ततः स्मृतम् ॥ २९ ॥ तदधो नरकाः कोट्यो द्विकोट्योऽग्निस्ततो महान् ॥ चत्वारिंशत्सहस्रैश्च तदधस्तम उच्यते ॥ ३० ॥ चत्वारिंशच्च
कोट्यस्तु चतस्रश्च ततः पराः ॥ एकोननवतिर्लक्षाः सहस्राशीतिरेव च ॥ ३१ ॥ तदधोऽडकटाहोथ कोटिमात्रस्तथापरः ॥ देवी युक्ता कपालीशा
दंडहस्तेन चापि सा ॥ ३२ ॥ देवीनां कोटिकोटीभिः संवृता तत्र पालिनी ॥ संकर्षणस्य निःश्वासप्रेरितो दाहकोऽनलः ॥ ३३ ॥ कालाग्निं प्रेरय
त्येव कल्पांते दह्यते जगत् ॥ एवंविधं[3]मधःसूत्रं निर्मितं चात्र भारत ॥ ३४ ॥ मध्यसूत्रे कटाहे च पालकांस्ताञ्छृणुष्व मे ॥ वसुधामा स्थितः
पूर्वे शंखपालश्च दक्षिणे ॥ ३५ ॥ तक्षकेशः स्थितः पश्चादुत्तरे केतुमानिति ॥ हर[4]सिद्धिः सुपर्णाक्षी भास्करा योगनंदिनी ॥ ३६ ॥ कोटिकोटी
युता देवी देवीनां पालयत्यदः ॥ एवमेतन्महाश्चर्यं ब्रह्मांडं स्थापितं च यैः ॥ ३७ ॥ नमामि तानहं नित्यं ब्रह्मविष्णुमहेश्वरान् ॥ विष्णुलोको
रुद्रलोको बहिश्चास्मात्प्रकीर्त्यंते[5] ॥ ३८ ॥ तं च वर्णयितुं ब्रह्मा शक्तो नैवास्मदादयः ॥ विमुक्ता यत्र संयांति नित्यं हरिहरव्रताः ॥ ३९ ॥ ब्रह्मांडं
संवृतं ह्येतत्कटाहेन समंततः ॥ कपित्थस्य यथा बीजं कटाहेन सुसंवृतम् ॥ ४० ॥ दशोत्तरेण पयसा वृतं तच्चापि तेजसा ॥ तेजश्च वायुना वायुर्नभ
साहंतया च तत् ॥४१॥ अहंकारश्च महता तं चापि प्रकृतिः परा ॥ दशोत्तराणि सर्वाणि षडाहुः सप्तमं च तत् ॥४२॥ प्राकृतं चरणं पार्थ तदनंतं
प्रकीर्तितम् ॥ अंडानां तु सहस्राणां सहस्राण्ययुतानि च ॥ ४३ ॥ ईदृशानां तथा चात्र[6] कोटिकोटिशतानि च ॥ सर्वाण्येवंविधान्येव यादृशं कीर्तितं
त्विदम् ॥ ४४ ॥ यस्यैवं वैभवं पार्थ तं नमामि सदाशिवम् ॥ अहो मंदः स पापात्मा को वा तस्मादचेतनः ॥ ४५ ॥ य एवंविधसंमोहतारकं न
शिवं भजेत् ॥ अथ ते कीर्तयिष्यामि कालमानं निबोध तं[7]त् ॥ ४६ ॥ काष्ठा निमेषा दश पंच चाहुस्त्रिंशच्च काष्ठा गणयेत्कला हि ॥ त्रिंशत्कला

१ कालाग्निसंस्थितः--इ०, कालाख्यसंस्थितः--इ०च पा० । २ तलानि च--इ०पा० । ३ एवं च विविधं सूत्रम्--इ०पा० । ४ हरिसिद्धिः सुवर्णाक्षी--इ० पा० । ५ प्रकीर्तितः--इ० पा० । ६ तत्र--इ०पा० । ७ मे--इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्चापि भवेन्मुहूर्त्तं तत्त्रिंशता राव्यहनी उभे च ॥ ४७ ॥ दिवसे पंच कालाः स्युस्त्रिमुहूर्ताः शृणुष्व तान् ॥ प्रातस्ततः संगवश्च मध्याह्नश्चापरा
ह्णकः ॥ ४८ ॥ सायाह्नः पंचमश्चापि मुहूर्ता दश पंच च ॥ अहोरात्राः पंचदश पक्ष इत्यभिधीयते ॥ ४९ ॥ मासः पक्षद्वयेनोक्तो द्वौ मासौ
चार्कजावृतुः ॥ ऋतुत्रयं चाप्ययनं द्वेयने वर्षमुच्यते ॥ ५० ॥ चतुर्भेदं मासमाहुः पंचभेदं च वत्सरम् ॥ संवत्सरस्तु प्रथमो द्वितीयः परि
वत्सरः ॥ ५१ ॥ इद्वत्सरस्तृतीयोऽसौ चतुर्थश्चानुवत्सरः ॥ पंचमश्च युगोनाम गणनानिश्चयो हि सः ॥ ५२ ॥ मासेन च मनुष्या
णामहोरात्रं च पैतृकम् ॥ कृष्णपक्षस्त्वहः प्रोक्तः शुक्लपक्षश्च शर्वरी ॥ ५३ ॥ मानुषेण च वर्षेण दैविको दिवसः स्मृतः ॥ अहस्तत्रो
दगयनं रात्रिः स्याद्दक्षिणायनम् ॥ ५४ ॥ वर्षेण चैव देवानां मतः सप्तर्षिवासरः ॥ सप्तर्षीणां च वर्षेण ध्रौवश्च दिवसः स्मृतः ॥
॥ ५५ ॥ मनुष्याणां च वर्षाणि लक्षसप्तदशैव तु ॥ अष्टाविंशतिसहस्राणि कृतं त्रेतायुगं ततः ॥ ५६ ॥ लक्षद्वादशसाहस्रषण्णव
त्यधिकाः पराः ॥ अष्टौ लक्षाश्चतुःषष्टिसहस्राणि च द्वापरः ॥ ५७ ॥ चतुर्लक्षं तु द्वात्रिंशत्सहस्राणि कलिः स्मृतः ॥ चतुर्भिरेतैर्देवानां
युगमित्यभिधीयते ॥ ५८ ॥ आयुर्मनोर्युगानां च साधिका ह्येकसप्ततिः ॥ चतुर्दशमनूनां च कालेन ब्रह्मणो दिनम् ॥ ५९ ॥ युगानां
च सहस्रेण स च कल्पः शृणुष्व तान् ॥ भवोद्भवस्तपोभव्य ऋतुर्वह्निर्वराहकः ॥ ६० ॥ सावित्र आसिकश्चापि गांधारः कुशिकस्तथा ॥
ऋषभश्च तथा खड्गो गांधारीयश्च मध्यमः ॥ ६१ ॥ वैराजश्च निषादश्च मेघवाहनपंचमौ ॥ चित्रको ज्ञान आकूतिर्मीनो दंशश्च बृंहकः ॥ ६२ ॥
श्वेतो लोहितरक्तौ च पीतवासाः शिवः प्रभुः ॥ सर्वरूपश्च मासोऽयमेवं वर्षशतावधिः ॥ ६३ ॥ पूर्वार्धमपरार्धं च ब्रह्ममानमिदं स्मृतम् ॥
विष्णोश्च शंकरस्यापि नाहं शक्तश्च वर्णने ॥ ६४ ॥ क्वाहमल्पमतिः पार्थ क्वापरौ हरित्र्यंबकौ ॥ दैविकेनैव मानेन पातालेष्वपि गण्यते ॥ ६५ ॥
इति ते सूचितं बुद्ध्या शृणु तत्प्राकृतं पुनः ॥ ६६ ॥ इति वैधात्रव्यवस्थितिः ॥ ॥ श्रीनारद उवाच ॥ ॥ ऋषभोनाम यन्नाम्ना नानापाषंड
कल्पनाः ॥ कलौ पार्थ भविष्यंति लोकानां मोहनात्मिकाः ॥ ६७ ॥ तस्य पुत्रस्तु भरतः शतशृंगस्तु तत्सुतः ॥ तस्य पुत्राष्टकं जातं तथैका
च कुमारिका ॥ ६८ ॥ इंद्रद्वीपः कसेरुश्च ताम्रद्वीपो गभस्तिमान् ॥ नागः सौम्यश्च गांधर्वो वरुणश्च कुमारिका ॥ ६९ ॥ वदनं चापि
कन्यायाः पार्थ बर्करिकाकृति ॥ शृणु तत्कारणं सर्वं महाश्चर्यसमन्वितम् ॥ ७० ॥ महीसागरपर्यंतं वृक्षराजिविराजिते ॥ जालीगुल्मलताकीर्णे

१ संधिरात्रैः । २ गुणोनाम--इ० पा० । ३ मध्यतः--इ० पा० । ४ मनोदर्शश्च--इ० पा० । ५ सितः--इ० पा० । ६ शृणुष्व प्रकीर्तिं नर--इ० पा० । ७ चात्र--इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्तंभतीर्थस्य संनिधौ ॥ ७१ ॥ अजासमजतो[1] मध्यात्काचिदेका च बर्करी ॥ श्रांता सती समायाता प्रदेशे तत्र दुश्चरे ॥ ७२ ॥ इतस्ततो भ्रमंती सा जालिमध्ये समंततः ॥ निर्गंतुं नैव शक्नोति क्षुत्पिपासार्दिता शुभा ॥ ७३ ॥ विलग्ना जालिमध्ये तु ततः पंचत्वमागता ॥ कालेन कियता तस्य त्रुटित्वा शिरसो ह्यधः ॥ ७४ ॥ पपात शनिदर्शे[2] च महीसागरसंगमे ॥ सर्वतीर्थमये तत्र सर्वपापप्रमोचने ॥ ७५ ॥ शिरस्तु तदवस्थं हि समग्रं तत्र संस्थितम् ॥ जालिगुल्मावलग्नं च तस्या नैवापतज्जले ॥ ७६ ॥ शेषकायप्रपातेन महीसागरसंगमे ॥ तत्तीर्थस्य प्रभावेन बर्करी सा कुरूद्वह ॥ ७७ ॥ शतशृंगस्य वै राज्ञः सिंहलेष्वभवत्सुता ॥ मुखं बर्करिकातुल्यं व्यक्तं तस्या व्यजायत ॥ ७८ ॥ दिव्यनारी शुभाकारा शेष काये बभौ शुभा ॥ पूर्वं तस्याप्यपुत्रस्य राज्ञः पुत्रशतोपमा ॥ ७९ ॥ पुत्री जाता प्रमोदेन स्वजनानंदवर्धिनी ॥ ततस्तस्या विलोक्याथ मुखं बर्करिकाकृति ॥ ८० ॥ विस्मयं समनुप्राप्ताः सर्वे ते राजपूरुषाः ॥ विषादं परमापन्नो राजा सांतःपुरस्तदा ॥ ८१ ॥ खिन्नाः प्रकृतयः सर्वास्ताद्दग्रूपविलोकनात् ॥ तत्किमित्येतदाश्चर्यमूचुः पौराः सुविस्मिताः ॥ ८२ ॥ ततः सा यौवनं प्राप्ता साक्षाद्देवसुतोपमा ॥ स्वमुखं दर्पणे वीक्ष्य स्मृतः पूर्वो भवस्तया ॥ ८३ ॥ तत्तीर्थस्य प्रभावेण मातृपित्रोर्निवेदितम् ॥ विषादो नैव कर्तव्यो मदर्थे तात निश्चितम् ॥ ८४ ॥ मा शोकं कुरु मे मातः पूर्वजन्मार्जितं फलम् ॥ ततः पूर्वं स्ववृत्तांतमुक्त्वा सा च कुमारिका ॥ ८५ ॥ पूर्वजन्मोद्भवः कायस्तस्या यत्रापतत्तथा ॥ गमनाय तमुद्देशं विज्ञप्तौ पितरौ तया[3] ॥ ८६ ॥ अहं तात गमिष्यामि महीसागरसंगमम् ॥ भवामि तत्र[4] संप्राप्ता यथा कुरु तथा नृप ॥ ८७ ॥ ततः पित्रा प्रतिज्ञातं शतशृंगेण तत्तथा ॥ तस्याः संवाहनं चक्रे राजा पोतैः सरत्नकैः ॥ ८८ ॥ स्तंभतीर्थं ततः साऽपि प्राप्य पोतार्थसंयुता ॥ भूरिदानं[5] ततश्चक्रे दानं सर्वस्वलक्षणम् ॥ ८९ ॥ जालिगुल्मांतरेऽन्विष्य ततो दृष्टं निजं शिरः ॥ अस्थिचर्मावशेषं च तदादाय प्रयत्नतः ॥ ९० ॥ दग्ध्वा संगमसांनिध्ये क्षिप्तान्यस्थीनि संगमे ॥ ततस्तीर्थप्रभावेण मुखं जातं शशिप्रभम् ॥ ॥ ९१ ॥ न तादृग्देवकन्यानां न तादृङ्नागयोषिताम् ॥ न तादृङ्मर्त्यनारीणां तस्या यादृङ्मुखं मुखम् ॥ ९२ ॥ सुरासुरनराः सर्वे तस्या रूपेण मोहिताः ॥ बहुधा प्रार्थयंत्येनां न सा वरमभीप्सति ॥ ९३ ॥ कष्टं तया मुदा तत्र प्रारब्धं दुश्चरं तपः ॥ ततः संवत्सरे पूर्णे देवदेवो महे

१ अत्र 'अजासमजतः' इत्येवापेक्षितम् ''पशूनां समजोऽन्येषां समाजस्तु सधर्मिणाम्'' इति काशादिति ध्येयं सुधीभिः । २ शनिदर्शे--शनिवारयुक्तामावास्यायामित्यर्थः । ३ तथा--इ० पा० । ४ तत्र--इ० पा० । ५ भूमिदानम्--इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्वरः ॥ ९४ ॥ प्रत्यक्षतां गतस्तस्यै वरदोऽस्मीति चाब्रवीत् ॥ ततस्तं पूजयित्वा च कुमारी वाक्यमब्रवीत् ॥ ९५ ॥ यदि तुष्टोऽसि देवेश यदि देयो वरो मम ॥ सांनिध्यं क्रियतामत्र सर्वकालं हि शंकर ॥ ९६ ॥ एवमस्त्विति शर्वेण प्रोक्ते हृष्टा कुमारिका ॥ यत्र दग्धं शिरस्तस्या बर्कर्याः कुरुसत्तम ॥ ९७ ॥ बर्करेशः शिवस्तत्र तया संस्थापितस्तदा ॥ मन्मुखान्महदाश्चर्यं श्रुत्वेदं च तलातलात् ॥ ९८ ॥ स्वस्तिकोनाम नागेंद्रः कुमारीं द्रष्टुमागतः ॥ शिरसा गच्छता तेन यत्रोत्क्षिप्ता च भूरभूत् ॥ ९९ ॥ ईशाने बर्करेशस्य कूपोऽभूत्स्वस्तिकाभिधः ॥ पूरितो गंगया पार्थ सर्वतीर्थफलप्रदः ॥ १०० ॥ दृष्ट्वा च स्थापितं लिंगं शिवस्तुष्टो वरं ददौ ॥ येषां मृतशरीराणामत्र दाहः प्रजायते ॥ १०१ ॥ क्षिप्यंतेऽब्धौ तथा स्थीनि तेषां स्यादक्षया गतिः ॥ ते स्वर्गे सुचिरं कालं वसित्वात्र समागताः ॥ १०२ ॥ राजानः सर्वसंपूर्णाः सप्रतापा भवंति ते ॥ बर्करेशं च यो भक्त्या संपूजयति मानवः ॥ १०३ ॥ स्नात्वार्णवमहीतोये तस्य स्यान्मनसेप्सितम् ॥ कार्तिके च चतुर्दश्यां कृष्णायां श्रद्धयान्वितः ॥१०४॥ कूपे स्नानं नरः कृत्वा संतर्प्य च पितॄन्निजान् ॥ पूजयेद्बर्करेशं यः सर्वपापैः स मुच्यते ॥ १०५ ॥ एवं लब्ध्वा वरान्सर्वान्सा पुनः सिंहलं ययौ[1] ॥ शतशृङ्गाय पित्रे च वृत्तांतं स्वं न्यवेदयत् ॥ १०६ ॥ तच्छ्रुत्वा विस्मितो राजा लोकाः सर्वे च फाल्गुन ॥ प्रशशंसुर्महीतीर्थमाजग्मुश्च कृतादराः ॥ ॥ १०७ ॥ स्नात्वा दत्त्वा च दानानि विविधानि च ते ततः ॥ सिंहलं च ययुर्भूयस्तीर्थमाहात्म्यहर्षिताः ॥ १०८ ॥ अनिच्छंत्यां कुमार्यां च वरं द्रव्यं च पार्थिवः ॥ तथान्यदपि प्रीत्यासौ यद्ददौ नृपतिः शृणु ॥ १०९ ॥ इदं भारतखंडं च नवधैव विभज्य सः ॥ ददावष्टौ स्वपुत्राणां कुमार्यै नवमं तथा ॥ ११० ॥ तेषां विभेदान्वक्ष्यामि पर्वतैरुपशोभितान् ॥ पुत्रनामानि वर्षाणि पर्वतांश्च शृणुष्व मे ॥ १११ ॥ महेन्द्रो मलयः सह्यः शुक्तिमानृक्षपर्वतः ॥ विंध्यश्च पारियात्रश्च सप्तात्र कुलपर्वताः ॥ ११२ ॥ महेन्द्रपरतश्चैव इन्द्रद्वीपो निगद्यते ॥ पारियात्रस्य चैवार्वाक्खण्डं कौमारिकं स्मृतम् ॥ ११३ ॥ सहस्रमेकमेकं च सर्वखण्डान्यमूनि च ॥ नदीनां संभवं चापि संक्षेपाच्छृणु फाल्गुन ॥ ११४ ॥ वेदस्मृतिमुखा नद्यः पारियात्रोद्भवा मताः ॥ नर्मदासरसाद्याश्च नद्यो विंध्याद्रिनिर्गताः ॥ ११५ ॥ शतद्रूचन्द्रभागाद्या ऋक्षपर्वतसंभवाः ॥ ऋषिकुल्याकुमार्याद्याः शुक्तिमत्पादसंभवाः ॥ ११६ ॥ तापी पयोष्णी निर्विंध्या कावेरी च महीनदी ॥ कृष्णा वेणी भीमरथी सह्यपादोद्भवाः स्मृताः[2] ॥ ११७ ॥ कृतमालाताम्रपर्णीप्रमुखा मलयोद्भवाः ॥ त्रिसामऋष्यकुल्याद्या महेन्द्रप्रभवाः स्मृताः ॥ ११८ ॥ एवं विभज्य पुत्रेभ्यः कुमार्यै च मही

१ आययौ–इ०पा० । २ स्मृताः–इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पतिः ॥ शतशृंगो गिरिं गत्वा उदीच्यां[1] तप्तवांस्तपः ॥ ११९ ॥ तत्र तप्त्वा तपो घोरं ब्रह्मलोकं जगाम सः ॥ शतशृंगो नृपश्रेष्ठः शतशृंगे नगोत्तमे ॥ १२० ॥ यत्र जातोऽसि कौंतेय पांडोस्त्वं सोदरैः सह ॥ कुमारी च महाभागा स्तंभतीर्थस्थिता सती ॥ १२१ ॥ खंडोद्भवेन द्रव्येण तेपे दानानि यच्छती ॥ ततः केनापि कालेन भ्रातृभ्योऽष्टभ्य एव च ॥ १२२ ॥ महावीर्यबलोत्साहा जाता नव नवात्मजाः ॥ ते समेत्य समागम्य कुमारीं प्रोचिरे ततः ॥ १२३ ॥ कुलदेवी त्वमस्माकं प्रसादं कुरु नः शुभे ॥ अष्टौ खण्डानि चास्माकं विभज्य स्वयमेव च ॥ देहि द्वासप्ततीनां नो विभेदः स्याद्यथा न नः ॥१२४॥ इत्युक्ता सर्वधर्मज्ञा विज्ञाने ब्रह्मणा समा ॥ द्वासप्ततिविभेदैः सा नव खंडान्यचीकरत् ॥ १२५ ॥ तेषां नामानि ग्रामांश्च पत्तनानि च फाल्गुन ॥ वेलाकूलानि संख्यां च वक्ष्यामि तव तत्त्वतः ॥ १२६ ॥ कोटिश्चतस्रो ग्रामाणां नीवृदासी[2]च्च मंडले ॥ सार्धकोटिद्वयग्रामैर्देशो बालाक उच्यते ॥ १२७ ॥ सपादकोटिर्ग्रामाणां पुरसाहणके विदुः ॥ लक्षाश्चत्वार एवापि ग्रामाणाम[3]मंघले स्मृताः ॥ १२८ ॥ एको लक्षश्च नेपाले ग्रामाणां परिकीर्तितः ॥ षट्त्रिंशल्लक्षमानं तु कान्यकुब्जे प्रकीर्तितम् ॥१२९॥ द्वासप्ततिस्तथा लक्षा ग्रामा[4]गाजणके स्मृताः ॥ अष्टादश तथा लक्षा ग्रामाणां गौडदेशके ॥ १३० ॥ कामरूपे च ग्रामाणां नवलक्षाः प्रकीर्तिताः ॥ डा[5]हले वेदसंज्ञे तु ग्रामाणां न[6]वलक्षकम् ॥ १३१ ॥ नवैव लक्षा ग्रामाणां कांतिपुरे प्रकीर्तिताः ॥ नवलक्षास्तथा चैव माचिपूरे प्रकीर्तिताः ॥ १३२ ॥ ओड्डियाणे तथा देशे न[7]वलक्षाः प्रकीर्तिताः ॥ जालंधरे तथा देशे नवलक्षाः प्रकीर्तिताः ॥ १३३ ॥ लोहपूरे तथा देशे लक्षाः प्रोक्ता नवैव च ॥ ग्रामाणां सप्तलक्षं च पांबीपुरे प्रकीर्तितम् ॥१३४॥ ग्रामाणां सप्तलक्षं च रटराजे प्रकीर्तितम् ॥ हरीआले च ग्रामाणां लक्षपंचकसंमितम्[8] ॥१३५॥ सार्धलक्षत्रयं प्रोक्तं द्रडस्य विषये तथा ॥ सार्धलक्षत्रयं प्रोक्तं तथावंभणवाहके ॥ १३६ ॥ एकविंशतिसाहस्रं ग्रामाणां नीलपूरके ॥ तथामलविषये पार्थ ग्रामाणामेकलक्षकम् ॥ ॥ १३७ ॥ नरेंदुनामदेशे तु लक्षमेकं सपादकम् ॥ अतिलांगलदेशे च लक्षः प्रोक्तः सपादकः ॥ १३८ ॥ लक्षाष्टादशसाहस्रं नवती द्वे च मालवे ॥ सयंभरे तथा देशे लक्षः प्रोक्तः सपादकः ॥ १३९ ॥ मेवाडे च तथा प्रोक्तो लक्षश्चैकःसपादकः ॥ अशीतिश्च सहस्राणि वागुरिः परिकीर्तितः ॥ १४० ॥ ग्रामसप्ततिसाहस्रो गुर्जरात्रः प्रकीर्तितः ॥ तथा सप्ततिसाहस्रः पांडोर्विषय एव च ॥ १४१ ॥ जहाहुतिसहस्राणि द्वाचत्वारिंशदेव च ॥

१ उदीच्यां गिरिं—गन्धमादनम्—वदरिकाश्रममित्यर्थः । २ एतानि ग्रामादिदेशादिनामान्यपरिचितत्वाद्यथाप्रति पुस्तकादर्शविलोकितानि स्थापितानि सन्ति । तानि सुधीभिस्तत्तद्देशपरिचितैः संशोधनीयानि । ३ अमले—इ०पा० । ४ माजणके—इ० पा० । ५ डाल्हे—इ० पा० । ६ भवलक्षकम्—इ० पा० । ७ सप्त—इ० पा० । ८ लक्षपंचकसंस्थितम्—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अष्टषष्टिसहस्राणि प्रोक्तं काश्मीरमंडलम् ॥ १४२॥ षष्टिस्त्रिंशत्सहस्राणि ग्रामाणां कौंकणे विदुः ॥ चतुर्दशशतं द्वे च विंशतीलघुकौंकणम् ॥१४३॥ सिंधुः सहस्रदशके ग्रामाणां परिकीर्तितः ॥१४४॥ चतुर्दशशते द्वे च विंशतिः कच्छमंडलम् ॥ पंचपंचाशत्सहस्रं ग्रामाः सौराष्ट्रमुच्यते ॥ १४५ ॥ एकविंशतिसाहस्रो लाडदेशः प्रकीर्तितः ॥ अतिसिंधुश्च ग्रामाणां दशसाहस्र उच्यते ॥ तथा चाश्वमुखं पार्थ दशसाहस्रमुच्यते ॥ १४६ ॥ सहस्रदशकं चापि एकपादः प्रकीर्तितः ॥१४७॥ तथैव दशसाहस्रो देशः सूर्यमुखः स्मृतः ॥ एकबाहुस्तथा देशो दशसाहस्रमुच्यते ॥ १४८ ॥ सहस्रदशकं चैव संजायुरिति देशकः ॥ शिवनामा तथा देशः सहस्रदशकः स्मृतः ॥ सहस्राणि दश ख्यातं तथा कालहयंजयः ॥ १४९ ॥ लिंगोद्भवस्तथा देशः सहस्राणि दशैव च ॥ भद्रश्च देवभद्रश्च [3]प्रत्येकं दशकौ स्मृतौ ॥ १५० ॥ षट्त्रिंशच्च सहस्राणि स्मृतौ चटविराटकौ ॥ षट्त्रिंशच्च सहस्राणि यमकोटिः प्रकीर्तिता ॥ १५१ ॥ अष्टादश तथा कोट्यो रामको देश उच्यते ॥ तोमरश्चापि कर्णाटो युगलश्च त्रयस्त्विमे ॥ १५२ ॥ सपादलक्षग्रामाणां प्रत्येकं परिकीर्तितः ॥ पंचलक्षाश्च ग्रामाणां स्त्रीराज्यं परिकीर्तितम् ॥ १५३ ॥ पुंलस्त्यविषयश्चापि दशलक्षक उच्यते ॥ प्रत्येकं लक्षदशकौ देशौ कांबोज[6]कोशलौ ॥१५४॥ ग्रामाणां च चतुर्लक्षो बाल्हिकः परिकीर्त्यते ॥ षट्त्रिंशच्च सहस्राणि लंकादेशः प्रकीर्तितः ॥१५५॥ चतुःषष्टिसहस्राणि कुरुदेशः प्रकीर्तितः ॥ सार्धलक्षस्तथा प्रोक्तः किरातविजयो जयः ॥१५६॥ पंच प्राहुस्तथा लक्षान्विदर्भायां च ग्रामकान् ॥ चतुर्दशसहस्राणि वर्धमानं प्रकीर्तितम् ॥ १५७ ॥ सहस्रदशकं चापि सिंहलद्वीपमुच्यते ॥ षट्त्रिंशच्च सहस्राणि ग्रामाणां पांडुदेशकः ॥ १५८ ॥ लक्षैकं च तथा प्रोक्तं ग्रामाणां तु भयाणकम् ॥ षट्षष्टिं च सहस्राणि देशो मागध उच्यते ॥ १५९ ॥ षष्टिसहस्राणि तथा ग्रामाणां पांगुदेशकः ॥ त्रिंशत्साहस्र उक्तश्च ग्रामाणां च वरेंदुकः ॥ १६० ॥ पंचविंशतिसाहस्रं मूलस्थानं प्रकीर्तितम् ॥ चत्वारिंशत्सहस्राणि ग्रामाणां यावनः स्मृतः ॥ १६१ ॥ चत्वार्येव सहस्राणि पंक्षबाहुरुदीर्यते ॥ द्वासप्ततिरमी देशाः ग्रामसंख्याः प्रकीर्तिताः ॥ १६२ ॥ एवं भरतखंडेऽस्मिन्षण्णवत्येव कोटयः ॥ द्वासप्ततिस्तथा लक्षाः पत्तनानां प्रकीर्तिताः ॥ १६३ ॥ षट्त्रिंशच्च सहस्राणि वेलाकूलानि भारत ॥ एवं विभज्य खंडानि भ्रातृव्याणां ददौ नव ॥ १६४ ॥ आत्मीयमपि सा देवी अनिच्छुष्वपि तेषु च ॥ यतो मान्येति भगिनी प्रति क्रुध्यंति भ्रातरः ॥ १६५ ॥ भ्रातॄन्प्रति भगिनी च विचार्यैव ददौ शुभा ॥

१ शूर्पनखः—इ० पा० । २ लिंगोद्भवं समाख्यातम्—इ० पा० । ३ सहस्रदशकौ स्मृतौ—इ० पा० । ४ पुंगलश्च—इ— पा० । ५ मुलस्त्य—इ० पा० । ६ उत्तरकोशलौ--इ० पा० । ७ भयानकम्--इ० पा० । ८ पांडुदेशकः--इ० पा० । ९ निगद्यते--इ० पा० । १० यक्षवाहुः--इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्कृत्वा सानुमान्यैतान्स्तंभतीर्थमुपागता ॥ १६६ ॥ तदा तेषु च देशेषु चतुर्वर्गस्य साधनम् ॥ सर्वेषां प्रवरं प्रोक्तं कुमारीश्वरमेव[1] च ॥ १६७ ॥
तत्रापि गुप्तक्षेत्रं च वेदैतत्सा कुमारिका ॥ गुप्तक्षेत्रे कुमारेशं पूजयंती महाव्रता ॥ १६८ ॥ तस्थौ ह्रदेषु स्नायंती षट्सु चैवापि संगमे ॥ ततः काल
प्रकर्षाच्च प्रासादे स्कंदनिर्मिते ॥ १६९ ॥ जीर्णे नव्यं स्वर्णमयं प्रासादं साप्यकारयत् ॥ ततस्तुष्टो महादेवस्तस्या भक्त्यातितोषितः ॥ १७० ॥
कुमारलिंगादुत्थाय प्रत्यक्षस्तामवोचत ॥ भद्रे तवाहं भक्त्या च विज्ञानेन च तोषितः ॥ १७१ ॥ जीर्णः पुनरुद्धृतोऽयं प्रासादस्तेन तोषितः ॥
तव नाम्ना च विख्यातो भविष्यामि कुमारिके ॥ १७२ ॥ कर्ता चापि तथोद्धर्ता द्वौ वै समफलौ स्मृतौ ॥ कुमारेशः कुमारीश इति वक्ष्यंति
मां ततः ॥ १७३ ॥ बर्करेशे च ये दत्ता वरा दत्ताः सदैव ते ॥ तवापि प्राप्तः कालश्च समीपे वरवर्णिनि ॥ १७४ ॥ अभर्तृकाया नार्याश्च न स्वर्गो
मोक्ष एव च ॥ यथैव वृद्धकन्यायाः सरस्वत्यास्तटे शुभे ॥ १७५ ॥ तस्मात्त्वमत्र तीर्थे च महाकालमिति स्मृतम् ॥ सिद्धिं गतं वृणु भद्रे पतित्वे
वरवर्णिनि ॥ १७६ ॥ ततः सा रुद्रवाक्येन वरयामास तं पतिम् ॥ रुद्रलोकं ययौ चापि महाकालसमन्विता ॥ १७७ ॥ तत्र तां पार्वती प्राह
समालिंग्य प्रहर्षिता ॥ यस्मात्त्वया चित्रवच्च लिखिता पृथिवी शुभे ॥ १७८ ॥ चित्रलेखेतिनाम्ना त्वं तस्माद्भव सखी मम ॥ ततः सखी सम
भवच्चित्रलेखेति सा[2] शुभा ॥ १७९ ॥ ययानिरुद्धः कथित उषायाः पतिरुत्तमः ॥ योगिनीनां वरिष्ठा या महाकालस्य वल्लभा ॥ १८० ॥ अप्सु
सा वार्षिकं बिंदुं पूर्णे वर्षशते पपौ ॥ तपश्चरंती तस्मात्सा प्रोच्यते चाप्सरा दिवि ॥ १८१ ॥ एवंविधा कुमारी सा लिंगमेतद्धि फाल्गुन ॥
स्थापयामास शिवदं बर्करेश्वरसंज्ञितम् ॥ १८२ ॥ तस्मादत्र नृणां दाहश्चास्थिक्षेपश्च भारत ॥ प्रयागादधिकौ प्रोक्तौ महेशस्य वचो यथा ॥ १८३ ॥
॥ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां प्रथमे माहेश्वरखण्डे कौमारिकाखण्डे बर्करेश्वरमाहात्म्यवर्णनंनामैकोनचत्वा
रिंशोऽध्यायः ॥ ३९ ॥ छ ॥ ॥ अर्जुन उवाच ॥ ॥ महाकालस्त्वसौ कश्च कथं सिद्धिमुपागतः ॥ अस्मिंस्तीर्थे मुनिश्रेष्ठ महदाश्चर्य
मंत्र[3] मे ॥ १ ॥ सर्वमेतत्समाख्याहि श्रद्दधानाय पृच्छते ॥ २ ॥ ॥ नारद उवाच ॥ ॥ नमस्कृत्य महाकालं वरदं स्थाणुमव्ययम् ॥
शक्तितश्चरितं तस्य वक्ष्ये पांडुकुलोद्वह ॥ ३ ॥ वाराणस्यां पुरि पुरा बभूव जपतां वरः ॥ रुद्रजापी महाभागो मांटिर्नाम महायशाः ॥
॥ ४ ॥ तस्यापुत्रस्य पुत्रार्थे रुद्रान्संजपतः किल ॥ गतं वर्षशतं तुष्टस्ततस्तं प्राह शंकरः ॥ ५ ॥ मांटे तव सुतो धीमान्मत्प्रभावप

१ कुमारीखंडमेव च--इ० पा० । २ शोभना--इ० पा० । ३ महदाश्चर्यं वर्तते--इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

राक्रमः ॥ वंशस्य तव सर्वस्य समुद्धर्ता भविष्यति ॥ ६ ॥ इति श्रुत्वा रुद्रवचो मांटिर्हर्षं परं गतः ॥ ततः काले कियन्मात्रे पत्नी मांटेर्महात्मनः ॥ ७ ॥ दधार गर्भं चटिका तपोमूर्तिधरा यथा ॥ तस्य गर्भस्य वर्षाणि चत्वारि किल संययुः ॥ ८ ॥ न पुनर्मातुरुदरं त्यक्त्वा निर्गच्छते बहिः ॥ ततो मांटिरुपामंत्र्य सामभिस्तमवोचत ॥ ९ ॥ वत्स सामान्यपुत्रोऽपि पित्रोः सुखंकरः सदा ॥ शुद्धायां मातरि भवो मत्तः किं पीडयस्यलम् ॥ १० ॥ वत्स मानुष्यवासस्य स्पृहा तुभ्यं कथं न हि ॥ यत्र धर्मार्थकामानां मोक्षस्यापि च संततिः ॥ ११ ॥ कदा मनुष्या जायेम पूजा यत्र महाफला ॥ पितॄणां देवतानां च नानाधर्माश्च यत्र हि ॥ १२ ॥ इति भूतानि शोचंति नानायोनिगतान्यपि ॥ तत्त्वं मानुष्यमतुलं स्पृहणीयं दिवौकसाम् ॥ अनादृत्य कथं ब्रूहि स्थितश्चोदर एव च ॥ १३ ॥ ॥ गर्भ उवाच ॥ ॥ तात जानाम्यहं सर्वमेतत्परम दुर्लभम् ॥ किं तु बिभेमि चातिमात्रं कालमार्गस्य नित्यशः ॥ १४ ॥ द्वौ मार्गौ किल वेदेषु प्रोक्तौ कालोऽर्चिरेव च ॥ अर्चिषा मोक्षमायांति कालमार्गेण कर्मणि ॥ १५ ॥ स्वर्गे वा नरके वापि कालमार्गगतो ह्ययम् ॥ न शर्म लभते क्वापि व्याधविद्धमृगो यथा ॥ १६ ॥ तस्यैव हेतोः प्रयतेत्कोविदो यन्न दुःखवित् ॥ कालेन घोररूपेण गंभीरेण समाहितः ॥ १७ ॥ तच्चेन्मम मनस्तात नानादोषैर्न मोह्यते ॥ ततोऽहं दुर्लभं जन्म मानुष्यं शीघ्रमाप्नुयाम् ॥ १८ ॥ ततस्तस्य पिता पार्थ कांदिशीको महेश्वरम् ॥ जगाम शरणं देवं त्राहित्राहि महेश्वर ॥ १९ ॥ त्वां विना कोऽपरो देव पुत्रस्याभीष्टदोऽस्ति मे ॥ त्वयैव दत्तस्त्वं चामुं जन्म प्रापय मे सुतम् ॥ २० ॥ ततस्तस्यातिभक्त्यासौ प्राह तुष्टो महेश्वरः ॥ विभूतीः स्वा धर्मज्ञानवैराग्यैश्वर्यमेव च ॥ २१ ॥ विपरीतश्च शीघ्रं भो मांटिपुत्रः प्रबोध्यताम् ॥ ततस्ता द्योतयंत्यश्च विभूत्यो गर्भमूचिरे ॥ २२ ॥ महामते मांटिपुत्र न धार्यं ते भयं हृदि ॥ चत्वारस्त्वां हि धर्माद्या मनस्त्यक्ष्यामहे न ते ॥ २३ ॥ ततोऽपरास्त्वधर्माद्याः प्रोचुर्नैव तथा वयम् ॥ भविष्यामो मनस्तुभ्यम[3]स्मत्तव भयं न हि ॥ २४ ॥ इत्युक्ते स विभूतीभिः शीघ्रमेव कुमारकः ॥ निःससार बहिर्जातश्चकंपेतिरुरोद च ॥ २५ ॥ ततो विभूतयः प्राहुर्मांटे तव सुतस्त्वसौ ॥ अद्यापि कालमार्गस्य भीतः कम्पति रोदिति ॥ २६ ॥ कालभीतिरिति ख्यातस्तस्मादेष भविष्यति ॥ इति दत्त्वा वरं ताश्च महादेवांतिकं ययुः ॥ २७ ॥ सोऽपि बालः प्रववृधे शुक्लपक्ष इवोडुपः ॥ संस्कृतः स च संस्कारैर्धीमान्पशुपतिव्रती ॥ २८ ॥ पंचमंत्रा

१ संपूजकः–इ० पा० । २ महेश्वरः–धर्मज्ञानवैराग्यैश्वर्यरूपाः–विपरीताः–अधर्म–अज्ञान–अवैराग्य--अनैश्वर्य--रूपाः--अष्टौ स्वाः विभूतीः प्राह--इति योजना बोध्या । ३ अस्मत्--इति--पंचमीबहुवचनस्य रूपम् । ४ अनुदात्तेत्त्वलक्षणस्यात्मनेपदस्यानित्यत्वात्–परस्मैपदमपि । ५ उडुराट्-इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जपन्छुद्धस्तीर्थयात्रापरोऽभवत् ॥ रुद्रक्षेत्रेषु सस्नौ स जपन्मन्त्रांश्च भारत ॥ २९ ॥ कालभीतिर्गुप्तक्षेत्रगुणाञ्छ्रुत्वाभ्युपाययौ ॥ स्नात्वा ततो महीतोये जप्त्वा मन्त्रांश्च कोटिशः ॥ ३० ॥ निवृत्तो नातिदूरेथ बिल्ववृक्षं ददर्श सः ॥ दृष्ट्वा तं तस्य चाधस्ताल्लक्षमेकं जजाप सः ॥ ३१ ॥ जपतस्तस्य विप्रस्य इंद्रियाणि लयं ययुः ॥ केवलं परमानंदस्वरूपोऽसावभूत्क्षणात् ॥३२॥ तस्यानंदस्य नौपम्यं स्वर्गादीनां भवेत्क्वचित् ॥ गंगोदकस्येव मानं केवलं सोऽप्यसावपि ॥ ३३ ॥ तत्र लीनो मुहूर्तेन पुनश्चाभूद्यथा पुरा ॥ ततो विसिष्मिये पार्थ कालभीतिरुवाच ह ॥ ३४ ॥ नायं मम महानन्दो वाराणस्यां न नमिषे ॥ न प्रभासे न केदारे न चाप्यमरकण्टके ॥३५॥ श्रीपर्वते न चान्यत्र यादृशोद्य प्रवर्त्तते ॥ निर्विकाराणि स्वच्छानि गंगांभांसीवखानि मे ॥ ३६ ॥ भूतेषु परमा प्रीतिस्त्रिजगद्द्योतते स्फुटम् ॥ धर्ममेकं परं मह्यं चेतश्चाप्यवगच्छति ॥ ३७ ॥ अहो स्थानप्रभावोऽयं स्फुटं चाप्यत्र प्रोच्यते ॥ निर्दोषं यच्छुचि स्थान सर्वोपद्रववर्जितम् ॥३८॥ तत्र स्थितस्य धर्मार्थस्तद्वद्धूयात्सहस्रधा ॥ तदस्माच्च प्रभावाद्धि जानामीतः स्वचेतसि ॥ ३९ ॥ विशिष्टं काशिमुख्येभ्यस्तीर्थेभ्यः स्थानकं त्विदम् ॥ तस्मादत्रैव संस्थोहं तपस्तप्स्यामि पुष्कलम् ॥ ४० ॥ इदं चेदं तीर्थमिति सदा यस्तृषितश्चरेत् ॥ न स सिद्धिमवाप्नोति क्लेशेनैव म्रियेत सः ॥ ४१ ॥ इति संचिंत्य बिल्वस्य वृक्षस्याधो व्यवस्थितः ॥ जजाप मन्त्रान्रुद्रस्य अंगुष्ठाग्रेण धिष्ठितः ॥ ४२ ॥ गृहीत्वा नियमं तोयबिंदुं वर्षशतेऽग्निवत् ॥ ततो वर्षशते याते जपतस्तस्य भारत ॥ ४३ ॥ कश्चित्तोयभृतं कुम्भं गृहीत्वा नर आव्रजत् ॥ स तं प्रणम्य प्राहेदं कालभीतिं प्रहर्षतः ॥ ४४ ॥ अद्य ते नियमः पूर्णस्तोयमेतन्महामते ॥ गृहाण सफलं मह्यं श्रमं कर्तुमिहार्हसि ॥ ४५ ॥ ॥ कालभीतिरुवाच ॥ ॥ को भवान्वर्णतो ब्रूहि किमाचारश्च तत्त्वतः ॥ जन्माचारौ विदित्वा ते ग्रहीष्याम्यन्यथा न हि ॥ ४६ ॥ ॥ नर उवाच ॥ ॥ न जाने पितरौ स्वीयौ नष्टौ वा सर्वथा न हि ॥ एवमेवापि पश्यामि सर्वदाऽहं स एव च ॥ ॥ ४७ ॥ आचारैश्चापि धर्मैश्च न कार्यं मम किंचन ॥ तस्माद्वक्ष्यामि नाप्येतन्न चाप्यस्मि समाचरे ॥ ४८ ॥ ॥ कालभीतिरुवाच ॥ ॥ यद्येवं नोदकं तुभ्यं ग्रहीष्याम्यस्मि कर्हिचित् ॥ शृणुष्वात्र वचो यन्मे गुरुराह श्रुतीरितम् ॥४९॥ न ज्ञायते कुलं यस्य बीजशुद्धिं विना ततः ॥ तस्य खादन्पिबन्वापि साधुः सीदति तत्क्षणात् ॥५०॥ यश्च रुद्रं न जानाति रुद्रभक्तश्च यो नहि ॥ अन्नोदकं तस्य भुञ्जन्पातकी स्यान्न संशयः ॥५१॥

१ शुभक्षेत्रगुणान्–इ० पा० । २ गंगोदकस्य यथा मानम् उपमानं नास्ति तथा तस्य आनन्दस्य औपम्यं नास्ति अत एवानन्वयालंकारमाह–सः केवलम्–असाविव स इवैवाभूदिति । "उपमानोपमेयत्वं यदेकस्यैव वस्तुनः । इन्दुरिन्दुरिव श्रीमानित्यादौ तदनन्वयः ॥" इत्यनन्वयालंकारलक्षणम् । ३ अधियत्–इ० पा० । ४ अस्मि–अहम् । ५ श्रुतीरितम्–वेदप्रोक्तम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अज्ञात्वा यः शिवं भुंक्ते कथ्यते सोऽत्र ब्रह्महा ॥ मार्ष्टि च ब्रह्महान्नादे तस्मात्तस्य न भक्षयेत् ॥ ५२ ॥ गंगोदकुम्भः स्याद्यद्वत्तन्मध्ये मद्य बिंदुना ॥ अशिवज्ञस्य यो भुंक्ते शिवज्ञोऽपि तथैव सः ॥ ५३ ॥ हीनवर्णश्च यः स्याद्धि शिवभक्तोऽपि नैव सः ॥ प्रतिगृह्यौ गुणौ तस्माद्विलोक्यौ द्वौ प्रतिग्रहे ॥ ५४ ॥ ॥ नर उवाच ॥ ॥ एतेन तव वाक्येन हास्यं संजायते मम ॥ अहो मुग्धोऽसि मिथ्या त्वमपस्मारी जडोऽपि च ॥ ५५ ॥ सदा सर्वेषु भूतेषु शिवो वसति नित्यशः ॥ साध्वसाधु[1] ततो वाक्यं नैव निन्दा शिवस्य सा ॥ ५६ ॥ आत्मनश्च परस्यापि यः करोत्यंतरो हरम् ॥ तस्य भिन्नदृशो मृत्युर्विदधे भयमुल्बणम् ॥ ५७ ॥ अथवा का हि पानीये भवेदशुचिता वद ॥ मृत्तिकोद्भवकुम्भोऽयं[2] पावकेनापि पाचितः ॥ ५८ ॥ पूर्णश्च पयसा कस्मिन्नेषामशुचिता कुतः ॥ ५९ ॥ अथ चेन्मम संसर्गादशुचित्वं च मीयते ॥ तदस्यां संस्थितः पृथ्व्यामहं त्वं च कुतो वद ॥ ६० ॥ कुतः पृथिव्यां चरसि खे त्वं नैव चरस्युत ॥ एवं विचार्यमाणे ते भाषितं मुग्धवद्भवेत् ॥ ६१ ॥ ॥ कालभीतिरुवाच ॥ ॥ सर्वभूतेषु चेदेवं शिव एवेति चोच्यते ॥ नास्तिकां मृत्तिका कस्माद्भक्षयंति नभस्यके ॥ ६२ ॥ शुद्ध्यर्थं तेन विश्वस्य स्थापिता संस्थितिर्यथा ॥ फलेन पालिता सा च नान्यथा तां शृणुष्व च ॥ ६३ ॥ ससर्जेति पुरा धाता रूपात्मकमिदं[3] जगत् ॥ तच्च नामप्रपञ्चेन बद्धं दाम्ना च गौर्यथा ॥ ६४ ॥ स च नामप्रपञ्चस्तु चतुर्द्धा भिद्यते किल ॥ ध्वनिर्वर्णाः पदं वाक्यमित्यास्पदचतुष्टयम् ॥ ६५ ॥ तत्र ध्वनिर्नादमयो वर्णाश्चाकारपूर्वकाः ॥ पदं 'श वमि'[4] ति प्रोक्तं वाक्यं चेति 'शिवं' भजेत् ॥ ६६ ॥ तच्चापि वाक्यं त्रिविधं भवेदिति श्रुतेर्मतम् ॥ प्रभुसम्मतमेकं च सुहृत्संमतमेव च ॥ ६७ ॥ कांतासंमतमेवापि वाक्यं हि त्रिविधं विदुः ॥ प्रभुः स्वामी यथा भृत्यमादिशत्येतदाचर ॥ ६८ ॥ तथा श्रुतिस्मृती चोभे प्राहतुः प्रभुसंमतम् ॥ इतिहासपुराणादि सुहृत्संमतमुच्यते ॥ ६९ ॥ सुहृद्वत्प्रतिबोध्यैनं प्रवर्तयति तत्त्वतः ॥ काव्यालापादिकं यच्च कांतासंमतमुच्यते ॥ ७० ॥ प्रभुवाक्यं स्मृतं यच्च सबाह्याभ्यंतरं शुचि ॥ सुहृद्वाक्यं तथा शौचं पालयेत्स्वर्गकांक्षया ॥ ७१ ॥ तदेतत्पालनीयं स्याद्भूमिजानां श्रुतिर्वदेत् ॥ त्वया नास्तिक्यवाक्येन चेदेतदभिधीयते ॥ ७२ ॥ एतेन श्रुतिशास्त्रा

१ साधुसाधु--इ० । २ मृत्तिकामयकुम्भोऽयम्--इ०पा० । ३ रूपव्यक्तन्--इ०पा० । ४ 'श, व' इति पदम्--'श' कार 'व' कारात्मकं पदमिति प्रोक्तम् । ततः--'वाक्यं पदसमूहः' इति शास्त्रात् 'श--व, अनयोः पदयोः समूहेन 'शिव' इति वाक्यम्--संपन्नम्--इति तात्पर्यम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

णि पुराणं च वृथैव किम् ॥ अग्रे सतर्षिपूर्वा ये ब्राह्मणाः क्षत्रिया भंवन् ॥ ७३ ॥ मुग्धाः सर्वेऽभवन्दक्षा ये हि वेदं गता ह्यनु ॥ तथा वेदांतवचनं सत्त्वस्था ह्यूर्ध्वगामिनः ॥ ७४ ॥ तिष्ठंति राजसा मध्ये ह्यधो गच्छंति तामसाः ॥ सत्त्वाहारैः सत्त्ववृत्त्या स्वर्गगामी भवेत्ततः ॥ ७५ ॥ न चैतदप्य सूयामो यद्भूतेषु शिवो न हि ॥ अस्त्येव सर्वभूतेषु शृण्वत्राप्युपमानकम् ॥ ७६ ॥ यथा सुवर्णजातानि भूषणानि बहूनि च ॥ कानिचिच्छुद्धरूपाणि हीनरूपाणि कानिचित् ॥ ७७ ॥ स्वर्णं सर्वेषु चास्त्येव तथैव स सदाशिवः ॥ हीनरूपं शोधितं सच्छुद्धिमेति न चैकताम् ॥ ७८ ॥ तथेदं शोधितं देहं शुद्धं दिवि व्रजेत्स्फुटम् ॥ तस्मात्सर्वात्मना हीनान्न ग्राह्यं बत धीमता ॥ ७९ ॥ चेदिदं शोधयेद्देहं नैव ग्राह्यं समंततः ॥ सर्वतो यः प्रतिग्राही निहाराहारयोर्न च ॥ ८० ॥ शुचिः स्यादल्पदिवसात्पाषाणोऽसौ भवेत्स्फुटम् ॥ तस्मात्सर्वात्मना नैव ग्रहीष्येहं जलं स्फुटम् ॥ ८१ ॥ साधु वाप्यथवाऽसाधु प्रमाणं नः श्रुतिः परा ॥ एवमुक्ते स च नरः प्रहसन्दक्षिणेन च ॥ ८२ ॥ अंगुष्ठेन लिखन्भूमिं चक्रे गर्तं महोत्तमम् ॥ तत्र चिक्षेप तत्तोयं तेन गर्तः स्म पूरितः ॥ ८३ ॥ अत्यरिच्यत तोयं च चक्रे पादेन संलिखन् ॥ चक्रे सरः पूरितं चाप्यतिरिक्तजलेन तत् ॥ ८४ ॥ तदद्भुतं महद्दृष्ट्वा नैव विप्रो विसिष्मिये ॥ यतो बहुविधं चित्रं भवेद्भूताद्युपासिषु ॥ ८५ ॥ तच्चित्रेण न जह्याच्च श्रुतिमार्गं सनातनम् ॥ ८६ ॥

॥ ॥ नर उवाच ॥ ॥ अतिमूर्खोसि विप्र त्वं प्रज्ञावादांश्च भाषसे ॥ किं न श्रुतस्त्वया श्लोकः पुराविद्भिरुदीरितः ॥ कूपोन्यस्य घटोऽन्यस्य रज्जुरन्यस्य भारत ॥ ८७ ॥ पायंत्यन्ये पिबंत्यन्ये सर्वे ते समभागिनः ॥ तज्जलं मम कस्मात्त्वं धर्मज्ञो न पिबस्यसिं ॥ ८८ ॥

॥ ॥ नारद उवाच ॥ ॥ ततो विममृशे श्लोको बहुधा समभागिनाम् ॥ अनिश्चयाद्विचार्यासौ घटाद्यैः समभागिता ॥ ८९ ॥ बहुपोतद्रव्यक्षेपः सर्वैः सा समभागिता ॥ एवं कर्तुः फलैः सर्वैः समं स्याच्च पुनःपुनः ॥ ९० ॥ यः शुचिश्च शिवं ध्यायन्प्रासादकूपकर्तारि ॥ जलप्रतिग्रहाभावात्पिबतोऽस्य समं फलम् ॥ ९१ ॥ इति निश्चित्य प्रोवाच कालभीतिर्नरं च तम् ॥ सत्यमेतत्किं तु कुंभपयसा गर्तपूरणे ॥ ९२ ॥ दृष्ट्वा प्रत्यक्षतो मादृक्कथं पिबति भो वद ॥ साधु वाप्यथवाऽसाधु न पिबेयं कथंचन ॥ ९३ ॥ एवं विनिश्चयं दृष्ट्वास्य स्थिरं कुरुनंदन ॥ पुरुषोऽसौ प्रहस्यैव क्षणादंतर्दधे ततः ॥ ९४ ॥ कालभीतिश्च परमं विस्मयं समुपागतः ॥ वृत्तांतः कोयमित्येव चिंतयामास भूयसा ॥ ९५ ॥ ततश्चिंतयतस्तस्य बिल्वाध

१ अडभाव आर्षः । २ "ऊर्ध्वं गच्छन्ति सत्त्वस्था मध्ये तिष्ठति राजसाः ॥ जघन्यगुणवृत्तिस्था अधो गच्छन्ति तामसाः ॥" इति भगवद्गीतासु । ३ ह्यंभः--इ०पा० । ४ असि-- इति त्वमित्यर्थकं विभक्तिप्रतिरूपकमव्ययम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

स्तात्सुशोभनम् ॥ उच्छ्रितं सुमहार्लिंगं पृथिव्या द्योतयद्दिशः ॥ ९६ ॥ प्रादुर्भावे ततस्तस्य महार्लिंगस्य भारत ॥ ननर्त खेप्सरोवृंदं गंधर्वा
ललितं जगुः ॥ ९७ ॥ पारिजातमयीं पुष्पवृष्टिमिंद्रो मुमोच ह ॥ जयेति देवा मुनयस्तुष्टुवुर्विविधैः स्तवैः ॥ ९८ ॥ तस्मिन्महति कौरव्य
वर्तमाने महोत्सवे ॥ कालभीतिः प्रमुदितः प्रणम्य स्तोत्रमैरयत् ॥ ९९ ॥ पापस्य कालं भवपंककालं कलाकलं कालमार्गस्य कालम् ॥ देवं
महाकालमहं प्रपद्ये श्रीकालकंठं भवकालरूपम् ॥ १०० ॥ ईशानवक्त्रं प्रणमामि त्वाहं स्तौति श्रुतिः सर्वविद्येश्वरस्त्वम् ॥ भूतेश्वरस्त्वं प्रपिता
महस्त्वं तस्मै नमस्तेस्तु महेश्वराय ॥ १०१ ॥ यं स्तौति वेदस्तमहं प्रपद्ये तत्पुरुषसंज्ञं शरणं द्वितीयम् ॥ त्वां विद्महे तच्च नस्त्वं प्रदेहि श्रीरुद्र
देवेश नमोनमस्ते ॥१०२॥ अघोरवक्त्रं त्रितयं प्रपद्ये अथर्वजुष्टं तव रूपकाणि ॥ अघोरघोराणि च घोरघोराण्यहं सदा नौमि भूतानि तुभ्यम् ॥१०३॥
चतुर्थवक्त्रं च सदा प्रपद्ये सद्योभिजाताय नमोनमस्ते ॥ भवेभवेनादिभवो भवस्व भवोद्भवो मां शिव तत्रतत्र ॥१०४॥ नमोस्तु ते वामदेवाय ज्येष्ठरुद्राय
कालाय कलाविकारिणे॥बलंकरायापि बलप्रमाथिने भूतानि हंत्रे च मनोन्मनाय॥१०५॥ त्रियंबकं त्वां च यजामहे वयं सुपुण्यगंधैः शिवपुष्टिवर्ध
नम्॥उर्वारुकं पक्वमिवोग्रबंधनाद्रक्षस्व मां त्र्यंबक मृत्युमार्गात्॥१०६॥षडक्षरं मंत्रवरं तवेश जपंति ये मुनयो वीतरागाः॥तेषां प्रसन्नोऽसि जपामहे
तं त्वोंकारपूर्वं च नमः शिवाय ॥१०७॥ एवं स्तुतो महादेवो लिंगान्निःसृत्य भारत॥त्रिजगद्द्योतयन्भासा प्रत्यक्षः प्राह च द्विजम्॥१०८॥यत्त्वयात्र
महातीर्थे भृशमाराधितो द्विज ॥ तेनाति तुष्टस्ते वत्स नेशः कालः कथंचन ॥ १०९ ॥ अहं च नररूपी यो दृष्ट्वा ते धर्मसंस्थितिम् ॥ धन्यस्तद्धर्म
मार्गोऽयं पाल्यते यद्भवद्विधैः ॥ ११० ॥ सर्वतीर्थोदकैर्गर्तः पूरितो मे सरस्तथा ॥ जलमेतन्महापुण्यं त्वदर्थं मे समाहृतम् ॥ १११ ॥ सप्तमंत्ररहस्यं
च यत्कृतं स्तवनं मम ॥ अनेन पठ्यमानेन सप्तमंत्रफलं भवेत् ॥ ११२ ॥ अभीष्टं च वरं मत्तो वृणीष्व मनसेप्सितम् ॥ त्वयातितोषितो ह्यस्मि
नादेयं विद्यते तव ॥ ११३ ॥ ॥ कालभीतिरुवाच ॥ ॥ धन्योऽस्म्यनुगृहीतोऽस्मि यत्त्वं तुष्टोऽसि शंकर ॥ त्वत्तोषात्सफला धर्माः श्रमायैवान्यथा
मताः ॥ ११४ ॥ यदि तुष्टोऽसि सांनिध्यं लिंगेऽत्र क्रियतां सदा ॥ अक्षयं तत्कृतं चास्तु यल्लिंगे क्रियतेऽत्र च ॥ ११५ ॥ जपतो यत्फलं देव

१ आर्षः प्रयोगः, तृतीयमित्यर्थः । २ अयं क्रमस्त्वत्रैवैतादृशो दृश्यते.–वैदिकपञ्चमन्त्रक्रमस्तु–ईशान–तत्पुरुष–अघोर–वामदेव–सद्योजात–इत्येवंरूपोऽस्ति । अत्र च स्तोतुरिच्छयाऽयं चतुर्थवक्त्रस्तुतिक्रमः न तु मंत्रक्रमतः । मंत्रक्रमतस्तु अत्र–"नमोऽस्तु वामदेवाय--" इत्याद्यग्रिमश्लोकस्यात्र पाठोऽपेक्षितः अस्य च 'चतुर्थवक्त्रं च सदा प्रपद्ये' इत्यत्र 'सुपंचवक्त्रं च--'इत्येवं पाठभेदं विधाय–'नमोऽस्तु ते वामदेवाय--' इत्यस्माच्छ्लोकादग्रे पाठे कृते--मंत्रक्रमेणाऽयं स्तोत्रक्रमः समुचितः स्यात् । वक्तुर्विवक्षाधीनत्वाद्वा यथातथमेवायं पाठक्रमोऽत्र स्थापितो बोद्धव्यः ।

CC-0. In Public Domain. Digitization by eGangotri

पंचमंत्रायुतेन च ॥ तत्फलं जायतां नृणामस्य लिंगस्य दर्शने ॥ ११६ ॥ कालमार्गादहं यस्मान्मोचितोऽहं महेश्वर ॥ महाकालमिति ख्यातं लिंगं तस्माद्भवत्विदम् ॥ ११७ ॥ अस्मिंश्च कूपे यो मर्त्यः स्नात्वा तर्पयते पितॄन् ॥ सर्वतीर्थफलं चास्तु पितॄणामक्षया गतिः ॥ ११८ ॥ इति तस्य वचः श्रुत्वा प्रीतस्तं शंकरोऽब्रवीत् ॥ स्वायंभुवं यत्र लिंगं तत्र नित्यं वसाम्यहम् ॥ ११९ ॥ स्वयंभुबाणरत्नोत्थधातुपाषाणलोहजम् ॥ लिंगं क्रमेण फलदमंत्यात्पूर्वं दशोत्तरम् ॥ १२० ॥ आकाशे तारकालिंगं पाताले हाटकेश्वरम् ॥ स्वायंभुवं धरापृष्ठे तदेतत्त्रितयं समम् ॥ १२१ ॥ विशेषात्प्रार्थितं यच्च तच्च सर्वं भविष्यति ॥ अत्र पुष्पं फलं पूजा नैवेद्यं स्तवनक्रिया ॥ १२२ ॥ दानं वान्यच्च यत्किंचिदक्षयं तद्भविष्यति ॥ माघासितचतुर्दश्यां शिवयोगे च पुत्रक ॥१२३॥ लिंगाच्च पूर्वतः कूपे स्नात्वा यस्तर्पयेत्पितॄन् ॥ सर्वतीर्थफलावाप्तिः पितॄणां चाक्षया गतिः ॥१२४॥ तस्यां रात्रौ महाकालं यामेयामे प्रपूजयेत् ॥ यः क्षिपेत्सर्वलिंगेषु स जागरफलं लभेत् ॥ १२५ ॥ जितेंद्रियश्च यो नित्यं मां लिंगेत्र प्रपूजयेत् ॥ भुक्तिमुक्ती न दूरस्थे तस्य नित्यं द्विजोत्तम ॥ १२६ ॥ माघे चतुर्दश्यष्टम्यां सोमवारे च पर्वणि ॥ स्नात्वा सरसि योऽभ्यर्च्य लिंगमेतच्छिवं व्रजेत् ॥ ॥ १२७ ॥ दानं तपो रुद्रजापः सर्वमक्षयमेव च ॥ त्वं च नन्दी द्वितीयो मे प्रतीहारो भविष्यसि ॥ १२८ ॥ कालमार्गजयाद्वत्स महाकालाभिधश्चिरम् ॥ करंधमोऽत्र राजर्षिरचिरादागमिष्यति ॥ १२९ ॥ तस्य प्रोच्य भवान्धर्मांस्ततो मल्लोकमाव्रज ॥ इत्युक्त्वा भगवान्रुद्रो लिंगमध्ये न्यलीयत ॥ १३० ॥ महाकालोऽपि मुदितस्तत्र तेपे महत्तपः ॥ १३१ ॥ ॥ इति महाकालप्रादुर्भावः ॥ ॥ नारद उवाच ॥ अथ केनापि कालेन पार्थ राजा करंधमः ॥ विशेषमिच्छुर्धर्मेषु श्रुत्वा तीर्थमहागुणान् ॥ १३२ ॥ महाकालचरित्रं च तत्रैव समुपाययौ ॥ महीसागरतोयेऽसौ स्नात्वा लिंगान्यथार्चयत् ॥ १३३ ॥ महाकालमनुप्राप्य परमां प्रीतिमागतः ॥ स पश्यन्सुमहालिंगं नातृप्यत जनेश्वरः ॥ १३४ ॥ यथा दरिद्रः कृपणो निधिकुम्भमवाप्य च ॥ सफलं जीवितं मेने महाकालं निरीक्ष्य सः ॥ १३५ ॥ पंचमंत्रायुतजपफलं यस्येह दर्शनात् ॥ ततः सपर्ययाभ्यर्च्य महत्यासौ प्रणम्य च ॥ १३६ ॥ श्रुत्वा च लिंगप्रवरं महाकालमुपासदत् ॥ ततो रुद्रवचः स्मृत्वा महाकालः स्मयन्निव ॥ १३७ ॥ प्रत्युद्गम्य नृपं पूजामर्घं च प्रत्यपादयत् ॥ ततः कुशलप्रश्नादि कृत्वा शांतमुखं नृपः ॥ १३८ ॥ महाकालमुपामंत्र्य कथांते वाक्यमब्रवीत् ॥

१ लिंगे—इ० पा० । २ स्मृतम्—इ० पा० । ३ कस्मिंश्चित्पुस्तके—अत्र--इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां प्रथमे माहेश्वरखण्डे कौमारिकाखण्डे महाकालेश्वरप्रादुर्भावोनाम चत्वारिंशोऽध्यायः ॥ ४० ॥ इत्यध्यायसमाप्तिदण्डकं वर्तते । अन्यत्र पुस्तकेषु तु--प्रकान्तस्यैवास्याध्यायस्य--चतुर्युगीव्यवस्थावर्णनान्ते समाप्तिदण्डकं दरीदृश्यते ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भगवन्संशयो मह्यं सदाऽयं परिवर्तते ॥ १३९ ॥ यदिदं तर्पणंनाम पितृणां क्रियते नृभिः ॥ जलमध्ये जलं याति कथं तृप्यंति पूर्वजाः ॥ १४० ॥ एवं पिंडादिपूजा च सर्वमत्रैव दृश्यते ॥ कथमेवं स्म मन्यामः पित्राद्यैरुपभुज्यते ॥ १४१ ॥ न चैतदस्ति यत्तेषां नोपतिष्ठति किंचन ॥ स्वप्ने यथा क्रम्य नरं दृश्यंते याचकाश्च ते ॥ १४२ ॥ देवानां चापि दृश्यंते प्रत्यक्षाः प्रत्ययाः सदा ॥ तत्कथं प्रतिगृह्णन्ति मनो मेऽत्र प्रमुह्यति ॥ १४३ ॥ ॥ महाकाल उवाच ॥ ॥ योनिरेवंविधा तेषां पितृणां च दिवौकसाम् ॥ दूरोक्तं दूरपूजा च दूरस्तुतिरथापि यत् ॥ १४४ ॥ भव्यं भूतं भविष्यच्च सर्वं जानंति यांति च ॥ पंचतन्मात्ररूपं च मनोबुद्धिरहंजडाः ॥ १४५ ॥ नवतत्त्वमयं देहं दशमः पुरुषो मतः ॥ तस्माद्गंधेन तृप्यंति रसतत्त्वेन ते तथा ॥ १४६ ॥ शब्दतत्त्वेन तुष्यंति स्पर्शतत्त्वं च गृह्णते ॥ शुचि दृष्ट्वा च तुष्यंति नात्र राजन्भवेन्मृषा ॥१४७॥ यथा तृणं पशूनां च नराणामन्नमुच्यते ॥ एवं दैवतयोनीनामन्नसारस्य भोजनम् ॥ १४८ ॥ शक्तयः सर्वभावानामचिंत्या ज्ञानगोचराः ॥ तस्मात्तत्त्वं प्रगृह्णन्ति शेषमत्रैव दृश्यते ॥ १४९ ॥ ॥ करंधम उवाच ॥ ॥ पितृभ्यो दीयते श्राद्धं स्वकर्मवशगाश्च ते ॥ स्वर्गस्था नरकस्था वा कथं तैरुपभुज्यते ॥ १५० ॥ अथ स्वर्गेऽथ नरके स्थिताः कर्माभियंत्रिताः ॥ शक्नुवंति वरानेतान्दातुं ते चेश्वराः कथम् ॥ १५१ ॥ आयुः प्रजां धनं विद्यां स्वर्गं मोक्षं सुखानि च ॥ प्रयच्छन्तु तथा राज्यं प्रीता नृणां पितामहाः ॥ १५२ ॥ ॥ महाकाल उवाच ॥ ॥ सत्यमेतत्स्वकर्मस्थाः पितरो यन्नृपोत्तम ॥ किं तु देवासुराणां च यक्षादीनाममूर्तकाः ॥ १५३ ॥ मूर्ताश्चतुर्णां वर्णानां पितरः सप्तधा स्मृताः ॥ ते हि सर्वे प्रयच्छंति दातुं सर्वं यथेप्सितम् ॥ १५४ ॥ एकत्रिंशद्गणा येषां पितृणां प्रबला नृप ॥ कृतं च तदिदं श्राद्धं तर्पयेत्तान्परान्पितॄन् ॥ १५५ ॥ ते तृप्तास्तर्पयन्त्यस्य पूर्वजान्यत्र संस्थितान् ॥ एवं स्वानां चोपतिष्ठेच्छ्राद्धं यच्छंति ते वरान् ॥ १५६ ॥ ॥ राजोवाच ॥ ॥ भूतादिभ्यो यथा विप्र नाम्ना वोद्दिश्य दीयते ॥ सुरादीनां कथं चैव संक्षेपेण न दीयते ॥ १५७ ॥ इदं पितृभ्यो देवेभ्यो द्विजेभ्यः पावकाय च ॥ एवं कस्माद्विस्तराः स्युर्मनःकायादिकष्टदाः ॥ १५८ ॥ ॥ महाकाल उवाच ॥ ॥ उचिता प्रतिपत्तिश्च कार्या सर्वेषु नित्यशः ॥ प्रतिपत्तिं चोचितां ते विना गृह्णन्ति नैव च ॥ १५९ ॥ यथा श्वा गृहद्वारस्थो बलिं गृह्णाति किं तथा ॥ प्रधानपुरुषो राजन्गृह्णाति च शुना समः ॥ १६० ॥ एवं ते भूतवद्देवा न हि गृह्णन्ति कर्हिचित् ॥ शुचि कामं जुषंते न

१ अयं संवादः आधुनिकानां नास्तिक्यतया—नित्यनैमित्तिकादिवेदविहितकर्मसु—अश्रद्दधानानां जनानामास्तिक्यबोधेन, यदि सुकृतं तेषु स्यात्तर्हि श्रद्धामुत्पादयेदिति सत्यं भाति। २ उपलभ्यते—इ०पा०। ३ परिगृह्णन्ति—इ०पा०। ४ येषाम्—इ०पा०। ५ दैत्यादियोनीनाम्—इ०पा०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हविरश्रद्दधानतः ॥ १६१ ॥ विना मंत्रैश्च यद्दत्तं न तद्गृह्णन्ति तेऽमलाः ॥ श्रुतिरप्यत्र प्राहेदं मंत्राणां विषये नृप ॥ १६२ ॥ "मंत्रा देवता यद्यद्विद्वान्मन्त्रवत्करोति देवताभिरेव तत्करोति यद्ददाति देवताभिरेव तद्ददाति यत्प्रतिगृह्णाति देवताभिरेव तत्प्रतिगृह्णाति तस्मान्नामन्त्रवत्प्रतिगृह्णीयात् नामन्त्रवत्प्रतिपद्यते" इति ॥ १६३ ॥ तस्मान्मंत्रैः सदा देयं पौराणैर्वैदिकैरपि ॥ अन्यथा ते न गृह्णन्ति भूतानामुपतिष्ठति ॥ १६४ ॥ ॥ राजोवाच ॥ ॥ दर्भांस्तिलानक्षतांश्च तोयं चैतैः सुसंयुतम् ॥ कस्मात्प्रदीयते दानं ज्ञातुमिच्छामि कारणम् ॥ १६५ ॥ ॥ महाकाल उवाच ॥ ॥ पुरा किल प्रदत्तानि भूमेर्दानानि भूरिशः ॥ प्रत्यगृह्णन्त दैत्याश्च प्रविश्याभ्यंतरं बलात् ॥ १६६ ॥ ततो देवाश्च पितरः प्रत्यूचुः पद्मसंभवम् ॥ ॥ १६७ ॥ स्वामिन्नः पश्यतामेव सर्वं दैत्यैः प्रगृह्यते ॥ विधेहि रक्षां तेषां त्वं न नष्टाः स्मो यथा वयम् ॥ १६८ ॥ ततो विमृश्यैव विधी रक्षोपायमचीकरत् ॥ तिलैर्युक्तं पितॄणां च देवानामक्षतैः सह ॥ १६९ ॥ तोयं दर्भांश्च सर्वत्र एवं गृह्णन्ति नासुराः ॥ एतान्विना प्रदत्तं यत्फलं दैत्यैः प्रगृह्यते ॥१७०॥ निःश्वस्य पितरो देवा यांति दातुः फलं न हि ॥ तस्माद्युगेषु सर्वेषु दानमेवं प्रदीयते ॥१७१॥ ॥ करंधम उवाच ॥ ॥ चतुर्युगव्यवस्थानं श्रोतुमिच्छामि तत्त्वतः ॥ महतीयं विवित्सा मे सदैव परिवर्तते ॥ १७२ ॥ ॥ महाकाल उवाच ॥ आद्यं कृतयुगं विद्धि ततस्त्रेतायुगं स्मृतम् ॥ द्वापरं च कलिश्चेति चत्वारश्च समासतः ॥ १७३ ॥ सत्त्वं कृतं रजस्त्रेता द्वापरं च रजस्तमः ॥ कलिस्तमस्तु विज्ञेयं युगवृत्तं युगेषु च ॥ १७४ ॥ ध्यानं परं कृतयुगे त्रेतायां यज्ञ उच्यते ॥ वृत्तं च द्वापरे सत्यं दानमेव कलौ युगे ॥ १७५ ॥ कृते तु मानसी सृष्टिर्वृत्तिः साक्षाद्रसोल्लसा ॥ तेजोमय्यः प्रजास्तृप्ताः सदानंदाश्च भोगिनः ॥ १७६ ॥ अधमोत्तमो न तासां ता निर्विशेषाः प्रजाः शुभाः ॥ तुल्यमायुः सुखं रूपं तासां तस्मिन्कृते युगे ॥ १७७ ॥ न चाप्रीतिर्न च द्वंद्वो न द्वेषो नापि च क्लमः ॥ पर्वतोदधिवासिन्यो ह्यनुक्रोशप्रियास्तु ताः ॥ ॥ १७८ ॥ वर्णाश्रमव्यवस्था च तदासीन्न हि संकरः ॥ एकमन्यं न ध्यायंति परमं ते सदा शिवम् ॥ १७९ ॥ चतुर्थे च ततः पादे नष्टा साऽभूद्रसोल्लसा ॥ प्रादुरासंस्ततस्तासां वृक्षाश्चगृहसंज्ञिताः ॥ १८० ॥ वस्त्राणि च प्रसूयंते फलान्याभरणानि च ॥ तेष्वेव जायते तासां गंधवर्णरसान्वितम् ॥ १८१ ॥ सुमाक्षिकं महावीर्यं पुटके पुटके मधु ॥ तेन ता वर्तयंति स्म कृतस्यांते प्रजास्तदा ॥ १८२ ॥ हृष्टपुष्टास्तथा वृद्धाः प्रजा वै विगतज्वराः ॥ ततः कालेन केनापि तासां वृद्धे रसेंद्रिये ॥१८३॥ युगभावात्तथा ध्याने स्वल्पीभूते शिवस्य च ॥ वृक्षांस्तान्पर्यगृह्णंत मधु वा माक्षिकं

१ शतपथब्राह्मणप्रमाणमेतत् । २ असुराः प्रत्यगृह्णन्त--इ० पा० । ३ योगेषु--इ० पा० । ४ परस्य च--इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बलात् ॥ १८४ ॥ तासां तेनोपचारेण लोभदोषकृतेन वै ॥ प्रनष्टा मधुना सार्धं कल्पवृक्षाः क्वचित्क्वचित् ॥ १८५ ॥ तस्यां चाप्यल्पशिष्टायां
द्वंद्वान्यभ्युत्थितानि वै ॥ शीतातपैर्मनोदुःखैस्ततस्ता दुःखिता भृशम् ॥ १८६ ॥ चक्रुरावरणार्थं हि केतनानि ततस्ततः ॥ ततः प्रादुर्बभौ
तासां सिद्धिस्त्रेतायुगे पुनः ॥ १८७ ॥ वृष्ट्या बभूवुरौषध्यो ग्राम्यारण्याश्चतुर्दश ॥ अकृष्टपच्याश्चानूप्तास्तोयभूमिसमागमात् ॥ १८८ ॥ ऋतु
पुष्पफलैश्चैव वृक्षगुल्माश्च जज्ञिरे ॥ तैश्च वृत्तिरभूत्तासां धान्यैः पुष्पैः फलैस्तथा ॥ १८९ ॥ ततः पुनरभूत्तासां रागो लोभश्च सर्वतः ॥ कालवीर्येण
वा गृह्य नदीक्षेत्राणि पर्वतान् ॥ १९० ॥ वृक्षगुल्मौषधीश्चैव प्रसह्याशु यथाबलम् ॥ विपर्ययेण चौषध्यः प्रनष्टाश्च चतुर्दश ॥ १९१ ॥ नत्वा धरां
प्रविष्टास्ता ओषध्यः पीडिताः प्रजाः ॥ दुदोह गां पृथुर्वैन्यः सर्वभूतहिताय वै ॥ १९२ ॥ तदाप्रभृति चौषध्यः फालकृष्टाः प्रजास्ततः ॥ वार्त्तया
वर्तयंति स्म पाल्यमानाश्च क्षत्रियैः ॥१९३॥ वर्णाश्रमप्रतिष्ठा च यज्ञस्त्रेतासु चोच्यते॥सदाशिवध्यानमयं त्यक्त्वा मोक्षमचेतनाः॥१९४॥ पुष्पितां
वाचमाश्रित्य रागात्स्वर्गमसाधयन् ॥ द्वापरे च प्रवर्तंते मतिभेदास्ततो नृणाम् ॥ १९५ ॥ मनसा कर्मणा वाचा कृच्छ्राद्वार्ता प्रसिध्यति ॥ लोभोऽ
धृतिः शिवं त्यक्त्वा धर्माणां संकरस्तथा ॥ १९६ ॥ वर्णाश्रमपरिध्वंसाः प्रवर्तंते च द्वापरे ॥ तदा व्यासैश्चतुर्द्धा च व्यस्यते द्वापरात्ततः ॥
॥ १९७ ॥ एको वेदश्चतुष्पादैः क्रियते द्विजहेतवे ॥ इतिहासपुराणानि भिद्यंते लोकगौरवात् ॥ १९८ ॥ ब्राह्मं पाद्मं वैष्णवं च शैवं
भागवतं तथा ॥ तथान्यन्नारदीयं च मार्कंडेयं च सप्तमम् ॥ १९९ ॥ आग्नेयमष्टमं प्रोक्तं भविष्यं नवमं स्मृतम् ॥ दशमं ब्रह्मवैवर्तं
लैंगमेकादशं तथा ॥ २०० ॥ वाराहं द्वादशं चैव स्कांदं चैव त्रयोदशम् ॥ चतुर्दशं वामनं च कौर्मं पंचदशं स्मृतम् ॥ २०१ ॥ मात्स्यं
षोडशकं प्रोक्तं गारुडं च ततः परम् ॥ ३तः परं तु ब्रह्मांडमेवश्चाष्टादशानि हि ॥ २०२ ॥ अस्मिन्वाराहकल्पे च व्यासानाकर्णयस्व च ॥
ऋतुः सत्यो भार्गवश्च अंगिराः सविता तथा ॥ २०३ ॥ मृत्युः शतक्रतुर्धीमान्वसिष्ठो भविताऽधुना ॥ सारस्वतस्त्रिधामा च वेदवित्त्रिवृतो मुनिः
॥ २०४ ॥ शततेजाः स्वयं विष्णुर्नारायण इति स्मृतः ॥ करकश्चारुणिर्धीमांस्तथा देव ऋतंजयः ॥ २०५ ॥ कृतंजयो भरद्वाजो गौतमः कविस
त्तमः ॥ वाजश्रवा मुनिश्चैव तथा युंष्मायणो मुनिः ॥ २०६ ॥ तृणबिंदुस्तथा ऋक्षः शक्तिः पाराशरस्तथा ॥ जातूकर्ण्योऽथ विष्णुश्च स्वयं
द्वैपायनो मुनिः ॥ २०७ ॥ अश्वत्थाममुखाश्चैते भविष्याः सूचितास्तव ॥ धर्मशास्त्राणि लोकार्थं भिद्यंते चापि द्वापरे ॥ २०८ ॥ मन्वत्रिवि

१ तस्यां युगसंधौ–इत्यर्थोऽत्र बोध्यः। २ उप्ताः–कृतवापाः–इत्यर्थः। ३ स्वस्ववीर्येण चौषध्यः--इ०पा०। ४ व्यासानाकर्णय नृप–इ० पा०। ५ तथा शुष्मायणो मुनिः–इ० पा०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ष्णुहारीतयाज्ञवल्क्योशनोंगिराः ॥ यमापस्तंबसंवर्ताः कात्यायनबृहस्पती ॥ २०९ ॥ पराशरव्यासशंखलिखिता दक्षगौतमौ ॥ शातातपो वसिष्ठश्च धर्मशास्त्रप्रयोजकाः ॥ २१० ॥ ततो द्वापरसंध्यायां प्रवर्तति कलौ युगे ॥ नश्यमाने शैवयोगे जायंते योगनंदनाः ॥ २११ ॥ आद्ये श्वेतकलौ रुद्रः सुतारस्तारणस्तथा ॥ सुहोत्रः कंकणश्चैव लोकाख्यश्च महामुनिः ॥ २१२ ॥ जैगीषव्यश्च भाव्यो वै भगवान्दधिवाहनः ॥ ऋषभश्च मुनिर्धर्म उग्रश्चात्रिः स[1]बालकः ॥ २१३ ॥ गौतमो वेदशीर्णश्च गोकर्णश्च शिखंडिभृत् ॥ गुहावासी जटामाली अट्टहासश्च दारुणः ॥ २१४ ॥ लांगली संयमी शूली डिं[2]डी जुण्डीश्वरः स्वयम् ॥ सहिष्णुः सोमशर्मा च लकुलीशश्च पार्थिव ॥ २१५ ॥ कायावरोहणो भावीत्याद्या योगेश्वराः क्रमात् ॥ एते संक्षिप्य वक्ष्यंति शिवधर्मं कलौ युगे ॥ २१६ ॥ एवं कलियुगे राजञ्छास्त्रसंक्षेप उच्यते ॥ शृणु तिष्यप्रवृत्तिं च हर्षोद्वेगकरीं किल ॥ २१७ ॥ तिष्ये मायामसूयां च वधं चैव तपस्विनाम् ॥ साधयंति नरास्तत्र तमसा व्याकुलेंद्रियाः ॥ २१८ ॥ कलौ प्रमाथको रागः सततं क्षुद्भयानि च ॥ अनावृष्टिभयं घोरं देशानां च विपर्ययः ॥ २१९ ॥ न प्रमाणं श्रुतेरस्ति नृणां चाधर्मसेवनात् ॥ अधार्मिकास्त्वनाचारा महाकोपाल्पतेजसः ॥ ॥ २२० ॥ अनृतं ब्रुवते लुब्धा नारीप्रायाश्च दुष्प्रजाः ॥ दुरिष्टैर्दुरधीतैश्च दुराचारैर्दुरागमैः ॥ २२१ ॥ विप्राणां कर्मदोषैश्च प्रजानां जायते क्षयः ॥ उत्सीदंति क्षत्रविशो वर्धंते शूद्रविप्रकाः ॥ २२२ ॥ शूद्रा विप्रैः सहासंते शयनासनभोजनैः ॥ शूद्राश्च ब्राह्मणाचाराः शूद्राचाराश्च ब्राह्मणाः ॥ २२३ ॥ राजवृत्त्यां स्थिताश्चौराश्चौराचाराश्च पार्थिवाः ॥ एकपत्न्यो न शिष्यंति वर्धयंत्यभिसारिकाः ॥ २२४ ॥ तदा ह्यल्पफला भूमिः क्वचिच्चापि महाफला ॥ अरक्षितारो हर्तारो राजानः पापनिर्भयाः ॥ २२५ ॥ अक्षत्रियास्तु राजानो विप्राः शूद्रोपजीविनः ॥ शूद्रा विवादिनः सर्वे ब्राह्मणैरभि[3]नंदिताः ॥ २२६ ॥ आसनस्थान्द्विजान्दृष्ट्वा [4]चलंत्यत्यल्पबुद्धयः ॥ आस्ये निधाय वै हस्तं कर्णे शूद्रस्य च द्विजाः ॥ २२७ ॥ नीचस्यापि तदा वाक्यं वक्ष्यंति विनयेन तम् ॥ उच्चासनस्थाञ्छूद्रांश्च द्विजानां पश्यतामपि ॥ ॥ २२८ ॥ ज्ञात्वा न हिंसते राजा पश्य कालबलं नृप ॥ पुष्पैः शुभसितैश्चैव तथान्यैर्मंडनैर्द्विजाः ॥ २२९ ॥ शूद्रानभ्यर्चयंत्यल्पश्रुतभाग्यबलान्विताः ॥ पाषंडिनां च गृह्णंति ब्राह्मणाः कुप्रतिग्रहम् ॥ २३० ॥ येन ते रौरवं यांति सुदुस्तारं द्विजाधमाः ॥ तपोयज्ञफलानां च विक्रेतारो द्विजास्तथा ॥ २३१ ॥ यतयश्च भविष्यंति बहवः [6]कोटिशः कलौ ॥ पुरुषाल्पबहुस्त्रीको नृणां चापत्यसंभवः ॥२३२ ॥ निंदंति वेदवाक्यानि वेदा

१ सुवालिकः—इ० पा० । २ डुण्डी रुण्डीश्वरः—इ०पा० । ३ अभिवन्दिताः—इ० पा० । ४ न चलंत्यल्पबुद्धयः—इ० पा० । ५ द्विजोत्तमाः—इ० पा० । ६ शतकोटिशः—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

र्थाश्च कलौ युगे ॥ शूद्रैः स्वयं निर्मितं यत्प्रमाणं शास्त्रमेव तत् ॥ २३३ ॥ श्वापदप्रबलत्वं च गवां चापि परिक्षयः ॥ कस्यचिद्दानप्रभृतिर्धर्म स्यास्ति न शुद्धता ॥ २३४ ॥ साधूनां बहवो नाशाः पार्थिवाश्चाप्यरक्षिणः ॥ अट्टशूला जनपदाः शिवशूलाश्चतुष्पथाः ॥ २३५ ॥ प्रमदाः केशशूलिन्यो भविष्यंति कलौ युगे ॥ स्त्रीप्रधानानि गेहानि कुचैलास्ताश्च कर्कशाः ॥ २३६ ॥ बहुभक्ष्यावलिप्ताश्च कृत्या इव भवंति च ॥ सर्वे वजिग्ज नाश्चापि चित्रवर्षी च वासवः ॥ २३७ ॥ कुशीलचर्यापाषंडैर्वृथारूपैः समावृतः ॥ बहुयाचनको लोको भविष्यति परस्परी ॥ २३८ ॥ अशंकश्चैव पापेषु तदा लोको भविष्यति ॥ हर्तारः पररत्नानां परदारप्रधर्षकाः ॥ २३९ ॥ ऊनषोडशवर्षाश्च प्रजायंते युगक्षये ॥ तथा द्वादशवर्षाश्च प्रसवंति स्त्रियस्तदा ॥ २४० ॥ चौराश्चौरस्य हर्तारो हर्तुर्हर्त्ता तथापरः ॥ ज्ञानकर्मण्युपरते लोके निष्क्रियतां गते ॥ २४१ ॥ कीटमूषकसर्पाश्च धर्षयिष्यंति मानवान् ॥ वर्णाश्रमाणां ये चान्ये पाषंडाः परिपंथिनः ॥ २४२ ॥ ते तदा प्रोद्भविष्यंति तेषां वृद्धिश्च पार्थिव ॥ दुःखं पुत्रकलत्राद्यं देहोत्सादः सरोगता ॥ २४३ ॥ अधर्माभिनिवेशत्वात्तमसो जायते कलौ ॥ कलेर्दोषनिधेश्चैव शृणुष्वैवं महागुणम् ॥ २४४ ॥ तदाल्पेनैव काले न सिद्धिं गच्छंति मानवाः ॥ त्रियुगीना वदंत्येवं धन्या धर्मं चरंति ये ॥ २४५ ॥ श्रुतिस्मृतिपुराणोक्तं कलौ श्रद्धापरायणाः ॥ त्रेतायां वार्षिको धर्मो द्वापरे मासिकः स्मृतः ॥ २४६ ॥ यथा क्लेशं चरन्प्राज्ञस्तदह्ना प्राप्यते कलौ ॥ युगत्रयेण तावंतः सिद्धिं गच्छंति पार्थिवः ॥ २४७ ॥ यावंतः सिद्धिमायांति कलौ हरिहरव्रताः ॥ अष्टाविंशे कलौ यच्च भावि तत्त्वं निबोध मे ॥ २४८ ॥ त्रिषु वर्षसहस्रेषु कलेर्यातेषु पार्थिवः ॥ त्रिशतेषु दशन्यूनेष्वस्यां भुवि भविष्यति ॥ २४९ ॥ शूद्रकोनाम वीराणामधिपः सिद्धिमत्र सः ॥ चर्चितायां समाराध्य लप्स्यते भूभरापहः ॥ २५० ॥ ततस्त्रिषु सहस्रेषु दशाधिकशतत्रये ॥ भविष्यं नंदराज्यं च चाणक्यो यान्हनिष्यति ॥ २५१ ॥ शुक्लतीर्थे सर्वपापनिर्मुक्तिं योऽभिलप्स्यति ॥ ततस्त्रिषु सहस्रेषु विंशत्या चाधिकेषु च ॥ २५२ ॥ भविष्यं विक्रमादित्यराज्यं सोऽथ प्रलप्स्यते ॥ सिद्धिप्रसादाद्दुर्गाणां दीनान्यो ह्युद्धरिष्यति ॥ २५३ ॥ ततः शतसहस्रेषु शतेनाप्यधिकेषु च ॥ शकोनाम भविष्यश्च योऽतिदारिद्र्यहारकः ॥ २५४ ॥ ततस्त्रिषु सहस्रेषु षट्शतैरधिकेषु च ॥ मागधे हेमसदनादंजन्यां प्रभविष्यति ॥ २५५ ॥ विष्णोरंशो धर्मपाता बुधः साक्षात्स्वयं प्रभुः ॥ तस्य कर्माणि भूरीणि भविष्यंति महात्मनः ॥ २५६ ॥ ज्योतिर्बिंदुमुखानुग्रान्स हनिष्यति कोटिशः ॥ चतुःषष्टिं स वर्षाणि भुक्त्वा द्वीपानि सप्त च ॥ २५७ ॥ भक्तेभ्यः स्वयशो मुक्त्वा

१ अट्टमन्नं शिवो वेदः केशो भग उदीरितः—इत्यन्यत्रोक्ता अट्टादिसंज्ञाः । शूलश्च विक्रयः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दिवं पश्चाद्गमिष्यति ॥ सर्वेषां चावताराणां गुणैः समधिको यतः ॥ २९८ ॥ ततो वक्ष्यंति तं भक्त्या सर्वपापहरं बुधम् ॥ चतुर्षु च सहस्रेषु शतेष्वपि चतुर्षु च ॥ २९९ ॥ साधिकेषु महाराजा प्रमितिः प्रभविष्यति ॥ गोत्रेषु वै चंद्रमसो बहुसेनापतिर्बली ॥ २६० ॥ म्लेच्छान्स कोटिशो हत्वा पाषंडानि च सर्वशः ॥ वैदिकं केवलं शुद्धं सद्धर्मं वर्तयिष्यति ॥ २६१ ॥ गंगायमुनयोर्मध्ये निष्ठां यास्यति पार्थिवः ॥ ततः प्रजाश्च काले न केनापि भृशपीडिताः ॥ २६२ ॥ घोरं वा धर्ममाश्रित्य शाठ्येन च भवंति ताः ॥ अप्रग्रहास्ततस्ता वै लोभाविष्टाश्च वृंदशः ॥२६३॥ उपहिंसंति चान्योन्यं व्याकुलाः श्रमपीडिताः ॥ नष्टे श्रौते तथा स्मार्ते परस्परहतास्तदा ॥ २६४ ॥ निर्मर्यादा निष्करुणा निस्स्नेहा निरपत्रपाः ॥ गृहदाराणि संत्यज्य ह्रस्वकाः पंचविंशतिः ॥ २६५ ॥ हाहाभूताश्चरिष्यंति विषादव्याकुलेंद्रियाः ॥ अनावृष्टिहताश्चैव वार्तामुत्सृज्य दुःखिताः ॥२६६॥ प्रत्यंतांस्ता निषेवंति हित्वा जनपदान्स्वकान् ॥ सरित्सागरकूलांश्च सेवंते पर्वतांस्तथा ॥२६७॥ मांसैर्मूलफलैश्चैव वर्तयंति सुदुःखिताः ॥ चीरपत्राजिनधरा निष्क्रिया निष्परिग्रहाः ॥२६८॥ धर्मस्य वासमात्रं च शाल्वो म्लेच्छो हनिष्यति ॥ उत्तमाधममध्यत्वं सर्वमुच्छिद्य घोरकृत् ॥ २६९ ॥ ततस्तस्य वधार्थाय विष्णुः साक्षाज्जगत्पतिः ॥ शंभले विष्णुयशसो भूत्वा पुत्रो नृपोत्तम ॥ २७० ॥ द्विजोत्तमैः परिवृतः शाल्वं तं संहरिष्यति ॥ कोटिशोऽर्बुदशः पापान्निहत्य च निखर्वशः ॥२७१॥ पालयिष्यति तं धर्मं यो धर्मः श्रुतिपूर्वकः ॥२७२॥ कृत्वा पोतं धर्मरूपं साधूनां परमेश्वरः ॥ गमिष्यति परं लोकं कृत्वा कर्माणि भूरिशः ॥ २७३ ॥ ततः कृतयुगं भूयः प्रवर्तिष्यति पार्थिव ॥ आद्यं कृतयुगं चान्यं तदन्येभ्यो विशिष्यते ॥२७४॥ अष्टाविंशकलिश्चैव शेषः प्रावर्त अन्यतः ॥ ततः कृते सूर्यवंशः सोमवंशः प्रवत्स्यति ॥२७५॥ मरुराजाच्च देवापेः श्रुतदेवाच्च ब्राह्मणाः ॥ इति चातुर्युगी राजन्व्यवस्था परिवर्तते ॥ चतुर्युगे च ते धन्या ये भजंति हराच्युतौ ॥ २७६ ॥ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां प्रथमे माहेश्वरखण्डे कौमारिकाखण्डे महाकालकरन्धमसंवादे चतुर्युगव्यवस्थावर्णनंनाम चत्वारिंशत्तमोऽध्यायः ॥ ४० ॥ ॥ छ ॥ ॥ ॥ करंधम उवाच ॥ ॥ केचिच्छिवं समाश्रित्य विष्णुमाश्रित्य वेधसम् ॥ वर्णयंति परे मोक्षं त्वं तु कस्मात्तु मन्यसे ॥ १ ॥ ॥ महाकाल उवाच ॥ ॥ अपारवैभवा देवास्त्रयोऽप्येते नरर्षभ ॥ योगींद्राणामपि त्वत्र चेतो मुह्यति किं मम ॥ २ ॥ पुरा किलैवं मुनयो नैमिषारण्यवा

१ प्रमतिः–इ० पा० । २ साल्वः–इ० पा० । ३ साल्वम्–इ० पा० । ४ स हनिष्यति–इ० पा० । ९ परिकीर्त्यते–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सिनः ॥ संदिह्यांतः श्रेष्ठतायां ब्रह्मलोकमुपागमन् ॥ ३ ॥ तस्मिन्क्षणे विरिंचोऽपि श्लोकं प्रह्वोऽब्रवीत्किल ॥ अनंताय नमस्तस्मै यस्यांतो नोपलभ्यते ॥ ४ ॥ महेशाय च भक्ते द्वौ कृपायेतां सदा मयि ॥ ततः श्रेष्ठं च तं मत्वा क्षीरोदं मुनयो ययुः ॥ ५ ॥ तत्र योगेश्वरः श्लोकं प्रबुध्यन्नमुमब्रवीत् ॥ ब्रह्माणं सर्वभूतेषु परमं ब्रह्मरूपिणम् ॥ ६ ॥ सदाशिवं च वंदे तौ भवेतां मंगलाय मे ॥ ततस्ते विस्मिता विप्रा अपसृत्य[1] ययुः पुनः ॥ ॥ ७ ॥ कैलासे ददृशुः स्थाणुं वदंतं गिरिजां प्रति ॥ एकादश्यां प्रनृत्यानि जागरे विष्णुसद्मनि ॥ ८ ॥ सदा तपस्यां चरामि प्रीत्यर्थं हरिवेधसोः ॥ श्रुत्वेति चापसृत्यैव खिन्नास्ते मुनयोऽब्रुवन् ॥ ९ ॥ यद्वा देवा न संयांति पारं ये च परस्परम् ॥ तत्सृष्टसृष्टसृष्टेषु गणना काऽस्मदादिषु ॥ १० ॥ उत्तमाधममध्यत्वममीषां वर्णयंति ये ॥ असत्यवादिनः पापास्ते यांति निरयं ध्रुवम् ॥ ११ ॥ एवं ते निश्चयामासुर्नैमिषेयास्तपस्विनः ॥ सत्यमेतच्च राजेंद्र ममापीदं मतं स्फुटम् ॥ १२ ॥ जापकानां सहस्राणि वैष्णवानां तथैव च ॥ शैवानां च विधिं विष्णुं स्थाणुं चाप्यन्वमूमुचन् ॥ १३ ॥ तस्माद्यस्य मनोरागो यस्मिन्देवे भवेत्स्फुटम् ॥ स तं भजेद्विपापः स्यान्ममेदं मतमुत्तमम् ॥ १४ ॥ ॥ करंधम उवाच ॥ ॥ कानि पापानि विप्रेंद्र यैस्तु संमूढचेतसः ॥ न वेदेषु न धर्मेषु रतिमापद्यते मनः ॥ १५ ॥ ॥ महाकाल उवाच ॥ ॥ अधर्मभेदा विज्ञेयाश्चित्तवृत्तिप्रभेदतः[2] ॥ स्थूलाः सूक्ष्मा असूक्ष्माश्च कोटिभेदैरनेकशः ॥ १६ ॥ तत्र ये पापनिचयाः स्थूला नरकहेतवः ॥ ते समासेन कथ्यंते मनोवाक्कायसाधनाः ॥ १७ ॥ परस्त्रीद्रव्यसंकल्पश्चेतसानिष्टचिंतनम् ॥ अकार्याभिनिवेशश्च चतुर्द्धा कर्म मानसम् ॥ १८ ॥ अनिबद्धप्रलापित्वमसत्यं चाप्रियं च यत् ॥ परापवादपैशुन्यं चतुर्धा कर्म वाचिकम् ॥ १९ ॥ अभक्ष्यभक्षणं हिंसा मिथ्या कामस्य सेवनम् ॥ परस्वानामुपादानं चतुर्धा कर्म कायिकम् ॥ २० ॥ इत्येतद्द्वादशविधं कर्म प्रोक्तं त्रिसंभवम् ॥ अस्य भेदान्पुनर्वक्ष्ये येषां फलमनंतकम् ॥ २१ ॥ ये द्विषंति महादेवं संसारार्णवतारकम् ॥ सुमहत्पातकोपेतास्ते यांति नरकाग्निषु ॥ २२ ॥ महांति पातकान्याहुर्निरंतरफलानि षट् ॥ नाभिनंदंति ये दृष्ट्वा शंकरं न स्तुवंति ये ॥ २३ ॥ यथेष्टचेष्टा निःशंकाः संतिष्ठंति रमंति च ॥ उपचारविनिर्मुक्ताः शिवस्य गुरुसंनिधौ ॥ २४ ॥ शिवाचारं न मन्यंते शिवभक्तान्द्विषंति षं[3]ट् ॥ गुरुमार्त्तमशक्तं वा विदेशप्रस्थितं तथा ॥ २५ ॥ आरिभिः परिभूतं वा यस्त्यजति स पापकृत् ॥ तद्भार्यापुत्रमित्रेषु यश्चावज्ञां करोति वा ॥ २६ ॥ इत्येतत्पातकं ज्ञेयं गुरुनिंदासमं महत् ॥ ब्रह्मघ्नश्च सुरा

१ अपसृत्य--पश्चात्परावृत्य--इत्यर्थः । २ चित्तवृत्तिविभेदतः--इ० पा० । ३ तु--इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पश्च स्तेयी च गुरुतल्पगः ॥ २७ ॥ महापातकिनस्त्वेते तत्संसर्गी च पंचमः ॥ क्रोधाद्द्वेषाद्भयाल्लोभाद्ब्राह्मणस्य वदंति ये ॥ २८ ॥ मर्मांतिकं महादोषं ब्रह्मघ्नः स प्रकीर्तितः ॥ ब्राह्मणं यः समाहूय याचमानमकिंचनम् ॥ २९ ॥ पश्चान्नास्तीति यो ब्रूयात्स च वै ब्रह्महा स्मृतः ॥ यश्च विद्याभिमानेन निस्तेजंयति सद्द्विजम् ॥ ३० ॥ उदासीनः सभामध्ये ब्रह्महा स प्रकीर्तितः ॥ मिथ्यागुणैः स्वमात्मानं नयत्युत्कर्षतां बलात् ॥ ३१ ॥ विरुद्धं गुरुभिः सार्धं ब्रह्मघ्नः स प्रकीर्तितः ॥ क्षुत्तृष्णाततदेहानां द्विजानां भोक्तुमिच्छताम् ॥ ३२ ॥ यः समाचरते विघ्नं तमाहुर्ब्रह्मघातकम् ॥ पिशुनः सर्वलोकानां छिद्रान्वेषणतत्परः ॥ ३३ ॥ उद्वेगजननः क्रूरः स चै वै ब्रह्महा स्मृतः ॥ गवां तृषाभिभूतानां जलार्थमुपसर्पताम् ॥ ३४ ॥ यः समाचरते विघ्नं तमाहुर्ब्रह्मघातकम् ॥ परदोषं परिज्ञाय नृपकर्णे जपेत यः ॥ ३५ ॥ पापीयान्पिशुनः क्रूरस्तमाहुर्ब्रह्मघातकम् ॥ न्यायेनोपार्जितं विप्रैस्तद्द्रव्यहरणं च यत् ॥३६॥ छद्मना वा बलाद्वापि ब्रह्महत्यासमं मतम् ॥ अधीत्य यश्च शास्त्राणि परित्यजति मूढधीः ॥ ३७ ॥ सुरापानसमं ज्ञेयं जीवनायैव वा पठेत् ॥ अग्निहोत्रपरित्यागः पंचयज्ञोपकर्मणाम् ॥ ३८ ॥ मातृपितृपरित्यागः कूटसाक्षी सुहृद्वधः ॥ अभक्ष्यभक्षणं वन्यजंतूनां काम्यया वधः ॥ ३९ ॥ ग्रामं वनं गवावासं यश्च क्रोधेन दीपयेत् ॥ इति घोराणि पापानि सुरापानसमानि च ॥ ४० ॥ दीनसर्वस्वहरणं नरस्त्रीगजवाजिनाम् ॥ गोभूरत्नसुवर्णानामौषधीनां रसस्य च ॥ ४१ ॥ चंदनागरुकर्पूरकस्तूरीपट्टवाससाम् ॥ हस्तन्यासापहरणं रुक्मस्तेयसमं स्मृतम् ॥ ४२ ॥ कन्यानां वरयोग्यानामदानं सदृशे वरे ॥ पुत्रमित्रकलत्रेषु गमनं भगिनीषु च ॥ ४३ ॥ कुमारीसाहसं घोरमंत्यजस्त्रीनिषेवणम् ॥ सवर्णायाश्च गमनं गुरुतल्पसमं स्मृतम् ॥ ४४ ॥ द्विजायार्थं प्रतिश्रुत्य न प्रयच्छति यः पुनः ॥ न च स्मारयते विप्रं तुल्यं तदुपपातकम् ॥ ४५ ॥ अभिमानोतिकोपश्च दांभिकत्वं कृतघ्नता ॥ अत्यंतविषयासक्तिः कार्पण्यं शाठ्यमत्सरम् ॥ ४६ ॥ भृत्यानां च परित्यागः साधुबंधुतपस्विनाम् ॥ गवां क्षत्रियवैश्यानां स्त्रीशूद्राणां च ताडनम् ॥ ४७ ॥ शिवाश्रमतरूणां च पुष्पारामविनाशनम् ॥ अयाज्यानां याजनं चाप्ययाच्यानां च याचनम् ॥ ४८ ॥ यज्ञारामतडागादिदारापत्यस्य विक्रयः ॥ तीर्थयात्रोपवासानां व्रतायतनकर्मणाम् ॥ ४९ ॥ स्त्रीधनान्युपजीवंति स्त्रीभिरत्यंतनिर्जिताः ॥ अरक्षणं च नारीणां मद्यपस्त्रीनिषेवणम् ॥ ५० ॥ ऋणानामप्रदानं च मिथ्याकृष्ट्युपजीवनम् ॥ निंदितानां धनादानं साध्वीकन्योक्तिदूषणम् ॥ ५१ ॥ विषमारणयंत्राणां प्रयोगो मूलकर्मणाम् ॥ उच्चाटनाभिचाराश्च रागविद्वेषणक्रिया ॥ ५२ ॥ जिह्वाकामोपभो

१ उद्वेजयति--इ०पा० । २ सचैव--इ०पा० । ३ व्रतायतननर्मगाम्--इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गार्थं यस्यारंभः स्वकर्मसु॥मूल्येनाध्यापयेद्यस्तु मूल्येनाधीयते च ये॥५३॥व्रात्यता व्रतसंत्यागः सर्वाहारनिषेवणम् ॥असच्छास्त्राभिगमनं शुष्कतर्कावलंबनम्॥५४॥देवाग्निगुरुसाधूनां निंदा गोब्राह्मणस्य च॥ प्रत्यक्षं वा परोक्षं वा राज्ञां मंडलिनामपि॥५५॥उत्सन्नपितृदेवेज्याः स्वकर्मत्यागिनश्च ये ॥ दुःशीला नास्तिकाः पापा न सदा सत्यवादिनः ॥ ५६ ॥ पर्वकाले दिवा चाप्सु वियोनौ पशुयोनिषु ॥ रजस्वलास्वयोनौ च मैथुनं यः समाचरेत् ॥ ५७॥ स्त्रीपुत्रमित्रसुहृदामाशाच्छेदकराश्च ये ॥ जनस्याप्रियवक्तारः क्रूराः समयभेदिनः ॥ ५८ ॥ भेत्ता तडागकूपानां संक्रमाणां रसस्य च ॥ एकपंक्तिस्थितानां च पाकभेदं करोति यः ॥ ५९ ॥ इत्येतैश्च नराः पापैरुपपातकिनः स्मृताः ॥ युक्तास्तदूनकैः पापैः पापिनस्तान्निबोध मे ॥ ६० ॥ ये गोब्राह्मणकन्यानां स्वामिमित्रतपस्विनाम् ॥ अन्तरं यांति कार्येषु ते स्मृताः पापिनो नराः ॥ ६१ ॥ परश्रियाभितप्यंते हीनां सेवंति ये स्त्रियाम् ॥ पंक्त्यर्थं ये न कुर्वंति दानयज्ञादिकाः क्रियाः ॥ ६२ ॥ गोष्ठाग्निजलरथ्यासु तरुच्छायानगेषु च ॥ त्यजंति ये पुरीषाद्यमारामायतनेषु च ॥ ६३ ॥ गीतवाद्यरता नित्या मत्ताः किलकिलापराः ॥ कूटवेषक्रियाचाराः कूटसंव्यवहारिणः ॥ ६४ ॥ कूटशासनकर्तारः कूटयुद्धकराश्च ये ॥ निर्दयोऽतीव भृत्येषु पशूनां दमनश्च यः ॥ ६५ ॥ मिथ्याप्रसादितो वाक्यमाकर्णयति यः शनैः ॥ चपलश्चापि मायावी शठो मिथ्याविनीतकः ॥ ६६ ॥ यो भार्यापुत्रमित्राणि बालवृद्धकृशातुरान् ॥ भृत्यानतिथिबंधूंश्च त्यक्त्वाश्नाति बुभुक्षितान् ॥ ६७ ॥ यः स्वयं मृष्टमश्नाति विप्रायान्यत्प्रयच्छति ॥ वृथापाकः स विज्ञेयो ब्रह्मवादिविगर्हितः ॥ ६८ ॥ नियमान्स्वयमादाय ये त्यजंत्यजितेंद्रियाः ॥ ये ताडयंति गां नित्यं वाहयंति मुहुर्मुहुः ॥ ६९ ॥ दुर्बलान्नैव पुष्णंति प्रणष्टार्था द्विषंति च ॥ पीडयन्त्यभिचारेण सक्षतान्वाहयंति च ॥ ७० ॥ तेषा मदत्त्वा चाश्नंति चिकित्संति न रोगिणः ॥ अजाविको माहिषिकः समुद्री वृषलीपतिः ॥७१॥ हीनवर्णात्मवृत्तिश्च वैद्यो धर्मध्वजी च यः ॥ यश्च शास्त्रमतिक्रम्य स्वेच्छयैवाहरेत्करम् ॥ ७२ ॥ सदा दण्डरुचिर्यश्च यो वा दण्डरुचिर्न हि ॥ उत्कोचकैरधिकृतैस्तस्करैश्च प्रपीड्यते ॥ ७३ ॥ यस्य राज्ञः प्रजा राष्ट्रे पच्यते नरकेषु सः ॥ अचौरं चौरवत्पश्येच्चौरं वाऽचौररूपिणम् ॥ ७४ ॥ आलस्योपहतो राजा व्यसनी नरकं व्रजेत् ॥ एवमादीनि चान्यानि पापान्याहुः पुराविदः ॥ ७५ ॥ यद्वातद्वा परद्रव्यमपि सर्षपमात्रकम् ॥ अपहृत्य नरः पापो नारकी नात्र संशयः ॥ ७६ ॥ एवमाद्यैर्नरः पापैरुत्क्रान्तैः समनंतरम् ॥ शरीरं यातनार्थाय पूर्वाकारमवाप्नुयात् ॥ ७७ ॥ तस्मात्त्रिविधमप्येतन्नारकीयं विवर्जयेत् ॥ सदाशिवं

१ अव्रातवान्–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

च शरणं व्रजेत्सच्छ्रद्धया युतः ॥ ७८ ॥ नमस्कारः स्तुतिः पूजा नामसंकीर्तनं तथा ॥ संपर्कात्कौतुकाल्लोभान्न तस्य विफलं भवेत् ॥ ७९ ॥ ॥ ॥ करंधम उवाच ॥ ॥ संक्षेपाच्छिवपूजाया विधानं वक्तुमर्हसि ॥ कृतेन येन मनुजः शिवपूजाफलं लभेत् ॥ ८० ॥ ॥ महाकाल उवाच ॥ ॥ प्रातर्मध्याह्नसायाह्ने शंकरं सर्वदा भजेत् ॥ दर्शनात्स्पर्शनान्मर्त्यः कृतकृत्यो भवेत्स्फुटम् ॥ ८१ ॥ आदौ स्नानं प्रकुर्वीत भस्मस्नानमथापि वा ॥ आपद्गतः कण्ठस्नानं मन्त्रस्नानमथापि वा ॥ ८२ ॥ आविकं परिदध्याच्च ततो वासः सितं च वा ॥ धातुरक्तमथो नव्यं मलिनं संधितं न च ॥ ८३ ॥ उत्तरीयं च संदध्याद्विना तन्निष्फलार्चनम् ॥ भस्मत्रिपुण्ड्रधारी च ललाटे हृदि चांसयोः ॥ ८४ ॥ पूजयेद्यो महादेवं प्रीतः पश्यति तं मुहुः ॥ सर्वदोषान्बहिः क्षिप्य शिवायतनमाविशेत् ॥ ८५ ॥ प्रविश्य च प्रणम्येशं ततो गर्भगृहं विशेत् ॥ पाणी प्रक्षाल्य तच्चित्तो निर्माल्यमवरोपयेत् ॥ ८६ ॥ येन रुद्रायने भक्त्या कुरुते मार्जनक्रियाम् ॥ तस्मान्मार्जयते त्वेवं स्थाणुनैतत्परस्परम् ॥ ८७ ॥ रुद्रभक्त्या च संतिष्ठेन्मालिन्यं मार्जयेत्ततः ॥ भक्तिर्देवस्य तिष्ठेन्न मालिन्यं मार्जतः सदा ॥ ८८ ॥ गडुकान्पूरयेत्पश्चान्निर्मलेन जलेन वै ॥ गडुकास्तु समाः सर्वे सर्वे च शुभदर्शनाः ॥ ८९ ॥ निर्व्रणाः सौम्यरूपाश्च सर्वे चोदकपूरिताः ॥ वस्त्रपूतजलैः पूर्णा गन्धधूपैश्च वासिताः ॥९०॥ क्षालिताः पूरिता नीताः षडक्षरजपेन च ॥ गडुकाष्टशतं कुर्यादथवाप्यष्टविंशतिः ॥ ९१ ॥ अष्टादशापि चतुरस्ततो न्यूनं न कारयेत् ॥ पयो दधि घृतं चैव क्षौद्रमिक्षुरसं तथा ॥ ९२ ॥ एवं सर्वं च तद्द्रव्यं वामतः संन्यसेद्भवात् ॥ ततो बहिर्विनिष्क्रम्य पूजयेत्प्रतिहारकान् ॥९३॥सर्वेषां वाचका मन्त्राः कथ्यंतेऽतः परं क्रमात् ॥९४॥ ॐगं गणपतये नमः ॥ ॐक्षां क्षेत्रपालाय नमः ॥ ॐगं गुरुभ्यो नमः ॥ इति आकाशे ॥ ॐकौं कुलदेव्यै नमः ॥ ॐ नंदिने नमः॥ ॐमहाकालाय नमः ॥ ॐधात्रे विधात्रे नमः ॥ ततः प्रविश्य लिंगाच्च किञ्चिद्दक्षिणतः शुचिः ॥ उदङ्मुखः क्षणं ध्यायेत्समकायासनस्थितः॥९५॥दर्भादिभिः परिवृतं मध्यपद्मार्कमंडलम् ॥ सोममण्डलमध्यस्थं ध्यायेद्वै वह्निमंडलम्॥ ॥९६॥तन्मध्ये विश्वरूपं च वामाद्यष्टादिशक्तिकम्॥पंचवक्त्रं दशभुजं त्रिनेत्रं चंद्रभूषितम्॥९७॥वामांकगिरिजं देवं ध्यायेत्सिद्धैः स्तुतं मुहुः॥ततः पूर्वं प्रदद्याच्च पाद्यार्घं शंभवे नृप ॥९८॥ पानीयमक्षता दर्भा गंधपुष्पं ससर्षिपम्॥ क्षीरं दधि मधु पुनर्नवांगोऽर्घः प्रकीर्तितः ॥९९॥ ततः श्रद्धार्द्रचित्तस्य स्नानं लिंगस्य चाचरेत् ॥ गृहीत्वा गडुकं पूर्वं मलस्नानं समाचरेत् ॥ १०० ॥ अर्द्धेन स्नापयेत्पूर्वं कुर्याच्च मलघर्षणम् ॥ सर्वेण स्नापयेत्पश्चात्पूजये

१ धौतरक्तम्–इ० पा० । २ उमाद्यष्टादिशक्तिकम्–इ० पा० । ३ गुडकान्–इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्स्नापयेत्ततः ॥ १०१ ॥ प्रणम्य च ततो भक्त्या स्नापयेन्मूलमंत्रतः ॥ ॐ ह्रूं विश्वमूर्तये शिवाय नम ॥ इति द्वादशाक्षरो मूलमंत्रः ॥ १०२ ॥ वारि क्षीरदधिक्षौद्रघृतेनेक्षुरसेन च ॥ स्नापयेन्मूलमन्त्रेण जलधूपार्चनात्पृथक् ॥ १०३ ॥ गडुकैः स्नापयेत्सर्वैः स्नातं गन्धैर्विरूक्षयेत् ॥ १०४ ॥ विरूक्षितं ततः स्नाप्य श्रीखण्डेन विलेपयेत् ॥ पूजयेद्विविधैः पुष्पैर्विधिना येन तच्छृणु ॥ १०५ ॥ आग्नेयपादे ॥ ॐ धर्माय नमः ॥ नैर्ऋतके ॥ ॐ ज्ञानाय नमः ॥ वायव्ये ॥ ॐ वैराग्याय नमः ॥ ईशानपादे ॥ ॐ ऐश्वर्याय नमः ॥ पूर्वपादे ॥ ॐ अधर्माय नमः ॥ दक्षिणे ॥ ॐ अज्ञानाय नमः ॥ पश्चिमे ॥ ॐ अवैराग्याय नमः ॥ उत्तरे ॥ ॐ अनैश्वर्याय नमः ॥ ॐ अनन्ताय नमः ॥ ॐ पद्माय नमः ॥ ॐ अर्कमण्डलाय नमः ॥ ॐ सोममण्डलाय नमः ॥ ॐ वह्निमण्डलाय नमः ॥ ॐ वामाज्येष्ठादिपंचमन्त्रशक्तिभ्यो नमः ॥ ॐ परमप्रकृत्यै[१] देव्यै नमः ॥ ॐ ईशानतत्पुरुषाघोरवामदेवसद्योजातपञ्चवक्त्राय रुद्रसाध्यवस्वादित्यविश्वेदेवादिदेवविश्वरूपाय अण्डजस्वेदजोद्भिज्जजरायुजरूपस्थावरजङ्गममूर्तये परमेश्वराय ॐ ह्रूं विश्वमूर्तये शिवाय नमस्त्रिशूलधनुःखड्गकपालदण्डकुठारेभ्यः ॥ १०६ ॥ ततो जलाधारमुखे चण्डीश्वराय नमः ॥ एवं संपूज्य विधिवत्ततोऽर्घं संनिवेशयेत् ॥ १०७ ॥ पानीयमक्षताः पुष्पमेतैर्युक्तं फलोत्तमैः ॥ गृहाणार्घ्यं महादेव पूजासंपूर्तिहेतवे ॥ १०८ ॥ अर्घादनंतरं शक्तः पूजयेद्वसुपूजया ॥ धूपं दीपं च नैवेद्यं क्रमात्पश्चान्निवेदयेत् ॥ १०९ ॥ घण्टां च वादयेत्तत्र ततो नीराजनं चरेत् ॥ भ्रामयेद्देवदेवस्य शंखवादित्रनिःस्वनैः ॥ ११० ॥ नीराजनं च यः पश्येद्देवदेवस्य शूलिनः ॥ स मुच्येत्पातकैः सर्वैः किं पुनर्यः करिष्यति ॥ १११ ॥ नृत्यं गीतं च वाद्यं च अलीकमपि यश्चरेत् ॥ तस्य तुष्येदनंतं हि गीतवाद्यफलं यतः ॥ ११२ ॥ स्तोत्रैस्ततश्च संस्तूय दण्डवत्प्रणमेद्भुवि ॥ क्षमापयेच्च देवेशं सुकृतं कुकृतं क्षम ॥ ११३ ॥ य एवं यजते रुद्रमस्मिँल्लिंगे विशेषतः ॥ पितरं पितामहं चैव तथैव प्रपितामहम् ॥ ११४ ॥ सर्वात्पापात्समुत्तार्य रुद्रलोके वसेच्चिरम् ॥ एवं माहेश्वरो भूत्वा सदाचारव्रतस्थितः ॥ ११५ ॥ पशुपाशविमोक्षार्थं पूजयेत्तन्मना यदि ॥ य एवं यजते रुद्रं तेनैतत्तर्पितं जगत् ॥ ११६ ॥ किं त्वेतत्सफलं राजन्नाचारयो न लंघयेत् ॥ आचारात्फलते धर्मो ह्याचारात्स्वर्गमश्नुते ॥ ११७ ॥ आचाराल्लभते ह्यायुराचारो हंत्यलक्षणम् ॥ यज्ञदानतपांसीह पुरुषस्य न भूतये ॥ ११८ ॥ भवन्ति यः सदाचारं समुल्लंघ्य प्रवर्तते ॥ तस्य किंचित्समुद्देशं वक्ष्ये तं शृणु पार्थिव ॥ ११९ ॥ त्रिवर्गसाधने यतः कर्तव्यो गृहमेधिना ॥ तत्संसिद्धौ गृहस्थस्य सिद्धिरत्र परत्र च ॥ १२० ॥ ब्राह्मे मुहूर्ते बुध्येत धर्मार्थौ चापि चिन्तयेत् ॥ समुत्थाय

१ परमप्रीत्यै–इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तथाचम्य दंतधावनपूर्वकम् ॥ १२१ ॥ सन्ध्यामुपासीत बुधः संशांतः प्रयतः शुचिः ॥ पूर्वां सन्ध्यां सनक्षत्रां पश्चिमां सदिवाक
राम् ॥ १२२ ॥ उपासीत यथान्यायं नैनां जह्यादनापदि ॥ वर्जयेदनृतं चासत्प्रलापं परुषं तथा ॥ १२३ ॥ असत्सेवां ह्यसद्वादं
ह्यसच्छास्त्रं च पार्थिव ॥ आदर्शदर्शनं दंतधावनं केशसाधनम् ॥ १२४ ॥ देवार्चनं च पूर्वाह्णे कार्याण्याहुर्महर्षयः ॥ पालाशमासनं
चैव पादुके दंतधावनम् ॥ वर्जयेदासनं चैव पदा नाकर्षयेद्बुधः ॥ १२५ ॥ जलमग्निं च निनयेद्युगपन्न विचक्षणः ॥ १२६ ॥ पादौ प्रसारयेन्नैव
गुरुदेवाग्निसंमुखौ ॥ चतुष्पथं चैत्यतरुं देवागारं तथा [1]यतिम् ॥ १२७ ॥ विद्याधिकं गुरुं वृद्धं कुर्यादेतान्प्रदक्षिणान् ॥ १२८ ॥ आहारनीहारवि
हारयोगाः सुसंवृता धर्मविदानुकार्याः ॥ वाग्बुद्धिवीर्याणि तपस्तथैव वार्तायुषी गुप्ततमे च कार्ये ॥१२९॥ उभे मूत्रपुरीषे तु दिवा कुर्यादुदङ्मुखः ॥
दक्षिणाभिमुखो रात्रौ ह्येवमायुर्न रिष्यते ॥ १३० ॥ प्रत्यग्निं प्रति सूर्यं च प्रति गां व्रतिनं प्रति ॥ प्रति सोमोदकं सन्ध्यां प्रज्ञा नश्यति मेहतः ॥
॥ १३१ ॥ भोजने शयने स्थाने उत्सर्गे मलमूत्रयोः ॥ रथ्याचंक्रमणे चार्द्रपञ्चकश्चाचमेत्सदा ॥ १३२ ॥ न नद्यां मेहनं कुर्यान्न श्मशाने न
भस्मनि ॥ न गोमये न कृष्टे च नैवालूने न शाड्वले ॥ १३३ ॥ उद्धृत्ताभिस्तथाद्भिस्तु शौचं कुर्याद्विचक्षणः ॥ अंतर्जलाद्देवकुलाद्वल्मीकान्मूषक
स्थलात् ॥ १३४ ॥ अपविद्धापशौचाश्च वर्जयेत्पंच मृत्तिकाः ॥ गन्धलेपापहरणं शौचं कुर्यात्तथा बुधः ॥ १३५ ॥ नात्मानं ताडयेन्नैव दद्याद्दुः
खेभ्य एव च ॥ उभाभ्यामपि पाणिभ्यां कण्डूयेन्नात्मनः शिरः ॥ १३६ ॥ रक्षेद्दारांस्त्यजेदीर्ष्यां तासु निष्कारणं बुधः ॥ सूर्यास्तं न विना
काश्चित्क्रिया नैवाचरेत्तथा ॥ १३७ ॥ अद्रोहेणैव भूतानामल्पद्रोहेण वा पुनः ॥ शिवचित्तोर्जयेद्वित्तं न चातिकृपणो भवेत् ॥ १३८ ॥ नेर्ष्युः
स्यान्न कृतघ्नः स्यान्न परद्रोहकर्मधीः ॥ न पाणिपादचपलो न नेत्रचपलोऽनृजुः ॥ १३९ ॥ न च वागङ्गचपलो न चाशिष्टस्य गोचरः ॥ न शुष्क
वादं कुर्वीत शुष्कवैरं तथैव च ॥ १४० ॥ उपायैः साधयेदर्थान्दण्डस्त्वगतिका गतिः ॥ भिन्नाशनं भिन्नशय्यां वर्जयेद्भिन्नभाजनम् ॥ १४१ ॥
अंतरेण न गच्छेत द्वयोर्ज्वलनलिंगयोः॥नाग्न्योर्न विप्रयोश्चैव न दंपत्योर्नृपोत्तम ॥ १४२ ॥ न सूर्यव्योमयोर्नैव हरस्य वृषभस्य च ॥ एतेषामंतरं
कुर्वन्यतः पापमवाप्नुयात् ॥ १४३ ॥ नैकवस्त्रश्च भुंजीत नाग्नौ होममथाचरेत् ॥ न चार्चयेद्द्विजान्नैव कुर्याद्देवार्चनं बुधः ॥ १४४ ॥ खंडनं
पेषणं मार्ष्टिं जलसंशोधनं तथा ॥ रंधनं भोजनं स्वाप उत्थानं गमनं क्षुतम् ॥ १४५ ॥ कार्यारंभं समाप्तिं च वचः प्रोच्य तथा प्रियम् ॥ पिब

१ पतिम्—इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जिघ्रन्स्पृशञ्छृण्वन्विवक्षुर्मैथुनं तथा ॥ १४६ ॥ शुचित्वं च जपं स्थाणुं यः कुर्याद्विंशतिं तथा ॥ माहेश्वरः स विज्ञेयः शेषोन्यो नामधारकः ॥
॥ १४७ ॥ स वै रुद्रमयो भूत्वा ततश्चांते शिवं व्रजेत् ॥ परस्त्रियं नाभिभाषेत्तथा संभाषयेद्यदि ॥ १४८ ॥ मातःस्वसरथो पुत्रि आर्येति च वदे
द्बुधः ॥ उच्छिष्टो नालभेत्किंचिन्न च सूर्यं विलोकयेत् ॥ १४९ ॥ नेन्दुं न तारकाश्चैव नादयेन्नात्मनः शिरः ॥ स्वस्रा दुहित्रा मात्रा वा नैकांतासन
माचरेत् ॥ १५० ॥ दुर्जयो हींद्रियग्रामो मुह्यते पंडितोऽपि सन् ॥ गुरुमभ्यागतं गेहे स्वयमुत्थाय यत्नतः ॥ १५१ ॥ आसनं कल्पयेत्तस्य कुर्या
त्पादाभिवंदनम् ॥ नोदक्छिराः स्वपेज्जातु न च प्रत्यक्छिरा बुधः ॥ १५२ ॥ शिरस्यगस्त्यमाधाय[१] तथैव च पुरंदरम् ॥ उदक्यादर्शनं स्पर्शं वर्ज्यं
संभाषणं तथा॥१५३॥नाप्सु मूत्रं पुरीषं वा मैथुनं वा समाचरेत्॥कृत्वा विभवतो देवमनुष्यर्षिसमर्चनाम्॥१५४॥पितृणां च ततः शेषं भोक्तुं माहेश्व
रोऽर्हति॥वाग्यतः शुचिराचांतः प्राङ्मुखोदङ्मुखोऽपि वा॥१५५॥अन्तर्जानुश्च तच्चित्तो भुञ्जीतान्नमकुत्सयन् ॥ नोपघातं विना दोषान्न तस्योदाहरेद्बुधः
॥१५६॥ नग्नस्नानं न कुर्वीत न शयीत[२] व्रजेत वा॥दुष्कृतं न गुरोर्ब्रूयात्क्रुद्धं चैनं प्रसादयेत् ॥१५७॥परिवादं न शृणुयादन्येषामपि जल्पताम् ॥ सदा चा
कर्णयेद्धर्मा[३]स्त्यक्त्वा कृत्यशतान्यपि ॥ १५८ ॥ नित्यं नित्यं हि संमार्ष्टि गेहदर्पणयोरिव ॥ शुक्लायां च चतुर्दश्यां नक्तभोजी सदा भवेत् ॥
॥ १५९ ॥ तिस्रो रात्रीर्न शक्तश्चेदेवं माहेश्वरो भवेत् ॥ संयावकृशरामांसं नात्मानमुपसाधयेत् ॥ १६० ॥ सायंप्रातश्च भोक्तव्यं कृत्वा ह्यतिथि
भोजनम् ॥ स्वप्नाध्ययनभोज्यानि संध्ययोश्च विवर्जयेत् ॥ १६१ ॥ भुंजानः संध्ययोर्मोहादसुरावसथो भवेत् ॥ स्नातो न धूनयेत्केशान्क्षुते निष्ठी
वितेऽध्वनि ॥ १६२ ॥ आलभेद्दक्षिणं कर्णं सर्वभूतानि क्षामयेत् ॥ न चापि नीलीवासाः स्यान्न विपर्यस्तवस्त्रधृक्[४] ॥ १६३ ॥ वर्ज्यं च मलिनं
वस्त्रं दशाभिश्च विवर्जितम् ॥ प्रक्षाल्य मुखहस्तौ च पादौ चाप्युपविश्य च ॥ १६४ ॥ अंतजानुस्त्रिराचामेद्द्विर्मुखं परिमार्जयेत् ॥ तोयेन स्पर्श
येत्खानि स्वमूर्धानं तथैव च ॥ १६५ ॥ आचम्य पुनराचम्य क्रियाः कुर्वीत सर्वशः ॥ क्षुते निष्ठीविते चैव दंतलग्ने तथैव च ॥१६६॥ पतितानां च
संभाषे कुर्यादाचमनक्रियाम् ॥ अध्येतव्या त्रयी नित्यं भवितव्यं विपश्चिता ॥ १६७ ॥ धर्मतो धनमाहार्यं यष्टव्यं चापि यत्नतः ॥ हीनेभ्योपि
न युंजीत त्वंकारं कर्हिचिद्बुधः ॥ त्वंकारो वा वधो वापि गुरूणामुभयं समम् ॥ १६८ ॥ सत्यं वाच्यं नित्यमैत्रेण भाव्यं कार्यं त्याज्यं

१ अगस्त्यशब्देनात्र दक्षिणदिशा ग्राह्या । एतेन—दक्षिणशिरा वा प्राचीशिरा वा शयीतेति तात्पर्यम् । २ शयीत--इ०पा० । ३ वार्ताम—इ० पा० । ४ विपर्यस्तवस्त्रधृक् न स्यात् । एतेन पूर्वमधोधृतं वस्त्रं तदेव पश्चादुत्तरीयं न कुर्यात्—इत्यर्थो निष्पद्यते ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नित्यमायासकारि ॥ लोकेऽमुष्मिन्यद्दिनं स्यात्तथास्मिन्नात्मा योगे योजनीयो गभीरैः ॥१६९॥ तीर्थस्नानैः सोपवासैर्व्रतैश्च पात्रे दानैर्होमजप्यैश्च यज्ञैः ॥ भवार्चनैर्देवपूजाविशेषैरात्मा नित्यं शोधनीयो मलाक्तः ॥ १७० ॥ यत्रापि कुर्वतो नात्मा जुगुप्सामेति पार्थिव ॥ तत्कर्तव्यमसंगेन यत्न गोप्यं महाजने ॥ १७१ ॥ इति ते वै समुद्देशः कीर्तितः किंचिदेव च ॥ शेषः स्मृतिपुराणेभ्यस्त्वया श्रोतव्य एव च ॥ १७२ ॥ एवमाचरतो धर्मं महेशस्य गृहे सतः ॥ धर्मार्थकामसंप्राप्तौ परत्रेह च शोभनम् ॥ १७३ ॥ एवं नानाविधान्धर्मान्महाकालस्य फाल्गुन ॥ वदतो ध्वनिराकाशे सुमहानभ्यजायत ॥ १७४ ॥ यावत्पश्यंति ये तत्र समाजग्मुः शृणुष्व तान् ॥ ब्रह्मा विष्णुः स्वयं रुद्रो दे[1]वी रुद्रगणास्तथा ॥ १७५ ॥ इंद्रादयस्तथा देवा वसिष्ठाद्या मुनीश्वराः ॥ तुंबरुप्रवराश्चापि गंधर्वाप्सरसां गणाः ॥ १७६ ॥ तान्महेशमुखान्सर्वान्महाकालो महामतिः ॥ अर्चयामास बहुधा भक्त्युद्रेकातिपूरितः ॥ १७७ ॥ ततो ब्रह्मादिभिर्देवैर्वरे रत्नमयासने ॥ उपविष्टोऽभिषिक्तश्च महीसागरसंगमे ॥ १७८ ॥ ततो देव्या समालिंग्य नीत्वोत्संगं स्वकं मुदा ॥ पुत्रत्वे कल्पितः पार्थ महाकालो महामतिः ॥ १७९ ॥ उक्तश्च यावद्ब्रह्माण्डमिदमास्ते शिवव्रत ॥ तावत्तिष्ठ शिवस्थाने शिववच्छिवभक्तितः ॥ १८० ॥ देवेन च वरो दत्तस्त्वल्लिंगं योऽर्चयिष्यति ॥ जितेन्द्रियः शुचिर्भूत्वा ऊर्ध्वं मल्लोकमेष्यति ॥ १८१ ॥ दर्शनं स्तवनं पूजा प्रणामश्च ततो जपः ॥ दानं चात्र कृतं लिंगे ममातितृप्तिकारणम् ॥ १८२ ॥ इत्युक्ते विस्मिता देवाः साधु साध्विति ते जगुः ॥ ब्रह्मविष्णुमुखाश्चैव महाकालं प्रतुष्टुवुः ॥ १८३ ॥ ततः सुरैःस्तूयमानो वंद्यमानश्च चारणैः ॥ नृत्यद्भिरप्सरोभिश्च गीतैर्गंधर्वजैः शुभैः ॥ १८४ ॥ कोटिकोटिगणैश्चैव स्तुवद्भिः सर्वतो वृतः ॥ १८५ ॥ महाकालो रुद्रभवनं गतो भवपुरस्सरः ॥ एवमेतन्महालिंगमुत्पन्नं कुरुनंदन ॥ १८६ ॥ कूपश्चापि सरः पुण्यं महाकालस्य सिद्धिदम् ॥ अत्र ये मनुजाः पार्थ लिंगस्याराधने रताः ॥ १८७ ॥ महाकालः समालिंग्य तान्छिवाय निवेदयेत् ॥ एतदत्यद्भुतं लिंगं त्रिषु लोकेषु विश्रुतम् ॥ १८८ ॥ दृष्टं स्पृष्टं पूजितं च गतास्ते भवसद्म तत् एवमेतानि लिंगानि सप्त जातानि फाल्गुन ॥ १८९ ॥ ये शृण्वंति गृणंत्येतत्तेपि धन्या नरोत्तमाः ॥ १९० ॥ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां प्रथमे माहेश्वरखण्डे कौमारिकाखण्डे श्रीमहाकालमाहात्म्ये महाकालकरंधमसंवादे शिवपूजनविधिनित्यकर्तव्यधर्मनिरूपणपूर्वकमहाकालशिवलोकप्राप्तिवर्णनंनामैकचत्वारिंशोऽध्यायः ॥ ४१ ॥ ॥ छ ॥ ॥ नारद उवाच ॥ ॥ ततो मया स्थापिते च

१ वीररुद्रगणास्तथा—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्थाने कालांतरेण ह ॥ चिंतितं हृदये भूयो द्विजानुग्रहकाम्यया ॥ १ ॥ वासुदेवविहीनं हि तीर्थमेतन्न रोचते ॥ असूर्यं हि जगद्यद्वत्स हि भूषण
भूषणम् ॥२॥ यत्र नैव हरिः स्वामी तीर्थे गेहेऽथ मानसे ॥ शास्त्रे वा तदसत्सर्वं हांसं तीर्थं न वायसम् ॥ ३ ॥ तस्मात्प्रसाद्य वरदं तीर्थेऽस्मिन्पुरुषो
त्तमम् ॥ आनेष्ये कलया साक्षाद्विश्वानुग्रहकाम्यया ॥ ४ ॥ इति संचिंत्य कौरव्य ततोऽहं चात्र संस्थितः ॥ ज्ञानयोगेन योगींद्रं शतं
वर्षाण्यतोषयम् ॥ ५ ॥ अष्टाक्षरं जपन्मंत्रं संनिगृह्येंद्रियाणि च ॥ वासुदेवमयो भूत्वा सर्वभूतकृपापरः ॥ ६ ॥ एवं मयाराध्यमानो गरुडं
हरिरास्थितः ॥ गणकोटिपरिवृतः प्रत्यक्षः समजायत ॥ ७ ॥ तमहं प्रांजलिर्भूत्वा दत्त्वार्घ्यं विधिवद्धरेः ॥ प्रत्यवोचं प्रणम्याथ प्रबद्धकरसं
पुटः ॥ ८ ॥ श्वेतद्वीपे पुरा दृष्टं मया रूपं तव प्रभो ॥ अजं सनातनं विष्णो नरनारायणात्मकम् ॥ ९ ॥ तद्रूपस्य कलामेकां स्थापयात्र जनार्दन॥
यदि तुष्टोऽसि मे विष्णो तदिदं क्रियतां त्वया ॥ १० ॥ एवं मया प्रार्थितोऽथ प्रोवाच गरुडध्वजः ॥ एवमस्तु ब्रह्मपुत्र यत्त्वयाभीप्सितं हृदि
॥ ११ ॥ तत्तथा भविता सर्वमप्यत्रस्थं सदैव हि ॥ एवमुक्त्वा गते विष्णौ निवेश्य स्वकलां प्रभो ॥ १२ ॥ मया संस्थापितो विष्णुर्लोकानुग्रहका
म्यया ॥ यस्मात्स्वयं श्वेतद्वीपनिवास्यत्र हरिः स्थितः ॥ १३ ॥ वृद्धो विश्वस्य विश्वाख्यो वासुदेवस्ततः स्मृतः ॥ कार्तिके शुक्लपक्षे या भवत्ये
कादशी शुभा ॥ १४ ॥ स्नानं कृत्वा विधानेन तोयप्रस्रवणादिषु ॥ योर्चयेदच्युतं भक्त्या पंचोपचारपूजया ॥ १५ ॥ उपोष्य जागरं कुर्याद्गीतवाद्यं
हरेः पुरः ॥ कथां वा वैष्णवीं कुर्याद्दंभक्रोधविवर्जितः ॥ १६ ॥ दानं दद्याद्यथाशक्त्या नियतो हृष्टमानसः ॥ अनेकभवसंभूतात्कल्मषादखिलादपि
॥ १७ ॥ मुच्यतेऽसौ न संदेहो यद्यपि ब्रह्मघातकः ॥ गारुडेन विमानेन वैकुंठं पदमाप्नुयात् ॥ १८ ॥ कुलानां तारयेत्पार्थ शतमेकोत्तरं नरः ॥
श्रद्धायुक्तं मुदा युक्तं सोत्साहं सस्पृहं तथा ॥ १९ ॥ अहंकारविहीनं च स्नानं धूपानुलेपनम् ॥ पुष्पनैवेद्यसंयुक्तमर्घदानसमन्वितम् ॥ २० ॥
यामेयामे महाभक्त्या कृतारार्तिकसंयुतम् ॥ चामराह्लादसंयुक्तं भेरीनादपुरस्कृतम् ॥ २१ ॥ पुराणश्रुतिसंपन्नं भक्तिनृत्यसमन्वितम् ॥ विनिद्रं
क्षुत्तृषास्वादस्पृहाहीनं च भारत ॥ २२ ॥ तत्पादसौरभघ्राणसंयुतं विष्णुवल्लभम् ॥ सगीतं सार्चनकरं तत्क्षेत्रगमनान्वितम् ॥ २३ ॥ पायुरोधेन
संयुक्तं ब्रह्मचर्यसमन्वितम् ॥ स्तुतिपाठेन संयुक्तं पादोदकविभूषितम् ॥ २४ ॥ सत्यान्वितं सत्ययोगसंयुतं पुण्यवार्तया ॥ पंचविंशतिभिर्युक्तं
गुणैर्यो जागरं नरः ॥ एकादश्यां प्रकुर्वीत पुनर्न जायते भुवि ॥ २५ ॥ अत्र तीर्थवरे पूर्वमैतरेय इति द्विजः ॥ सिद्धिं प्राप्तो महाभागो वासुदेवप्रसा

२ सत्यं भवति केवलम्–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दतः ॥ २६ ॥ ॥ अर्जुन उवाच ॥ ॥ ऐतरेयः कस्य पुत्रो निवासः क्वास्य वा मुने ॥ कथं सिद्धिमगाद्धीमान्वासुदेवप्रसादतः ॥ २७ ॥ ॥ ॥ नारद उवाच ॥ ॥ अस्मिन्नेव मम स्थाने हारीतस्यान्वयेऽभवत् ॥ २८ ॥ मांडूकिरिति विप्राग्र्यो वेदवेदांगपारगः ॥ २९ ॥ तस्यासीदितरा नाम भार्या सांध्वीगुणैर्युता ॥ तस्यामुत्पद्यत सुतस्त्वैतरेय इति स्मृतः ॥ ३० ॥ स च बाल्यात्प्रभृत्येव प्राग्जन्मन्यनुशिक्षितम् ॥ जजाप मंत्रं त्वनिशं द्वादशाक्षरसंज्ञितम् ॥ ३१ ॥ न शृणोति न वक्त्येव मनसापि च किंचन ॥ एवंप्रभावः सोऽभूच्च बाल्ये विप्रसुतस्तदा ॥ ३२ ॥ ततो मूकोऽयमित्येव नानोपायैः प्रबोधितः ॥ पित्रा यदा न कुरुते व्यवहाराय मानसम् ॥ ३३ ॥ ततो निश्चित्य मनसा जडोयमिति भारत ॥ अन्यां विवाहयामास दारान्पुत्रांस्तथादधे ॥ ३४ ॥ पिंगानाम च सा भार्या तस्याः पुत्राश्च जज्ञिरे ॥ चत्वारः कर्मकुशला वेदवेदांगवादिनः ॥ ३५ ॥ यज्ञेषु शांतिहोमेषु द्विजैः सर्वत्र पूजिताः ॥ ऐतरेयोपि नित्यं च त्रिकालं हरिमंदिरे ॥ ३६ ॥ जजाप परमं जाप्यं नान्यत्र कुरुते श्रमम्॥ततो माता निरीक्ष्यैव सपत्नीतनयांस्तथा ॥ ३७ ॥ दार्यमाणेन मनसा तनयं वाक्यमब्रवीत् ॥ क्लेशायैव च जातोऽसि धिग्मे जन्म च जीवितम् ॥३८॥ नार्यास्तस्या नृलोकेऽत्र वरैवाजननिः स्फुटम् ॥ विमानिता या भर्त्रा स्यान्न पुत्रः स्याद्गुणैर्युतः ॥ ३९ ॥ पिंगेयं कृतपुण्या वै यस्याः पुत्रा महागुणाः ॥ वेदवेदांगतत्त्वज्ञाः सर्वत्राभ्यर्चिता गुणैः ॥ ४० ॥ तदहं पुत्र दुर्भाग्या महीसागरसंगमे ॥ निमज्जिष्ये वरं मृत्युर्जीविते किं फलं मम ॥ त्वमप्येवं महामौनी नन्द भक्तो हरेश्चिरम् ॥ ४१ ॥ ॥ नारद उवाच ॥ ॥ इति मातुर्वचः श्रुत्वा प्रहसन्नैतरेयकः ॥ ४२ ॥ ध्यात्वा मुहूर्तं धर्मज्ञो मातरं प्रणतोऽब्रवीत् ॥ मातर्मिथ्याभिभूतासि अज्ञाने ज्ञानवत्यसि ॥ ४३ ॥ अशोच्ये शोचसि शुभे शोच्ये नैवाऽपि शोचसि ॥ देहस्यास्य कृते मिथ्यासंसारे किं विमुह्यसि ॥ ४४ ॥ मूर्खाचरितमेतद्धि मन्मातुरुचितं न हि ॥ अन्यत्संसारसारं च सारमन्यच्च मोहिताः ॥ ४५ ॥ प्रपश्यंति यथा रात्रौ खद्योतं दीपवत्स्थितम् ॥ यदिदं मन्यसे सारं शृणु तस्याप्यसारताम् ॥ ४६ ॥ एवंविधं हि मातुर्यमा गर्भादिति कष्टदम् ॥ अस्थिपट्टतुलास्तम्भे स्नायुबन्धेन यंत्रिते ॥ ४७ ॥ रक्तमांसमदालिप्ते विण्मूत्रद्रव्यभाजने ॥ केशरोमतृणच्छन्ने सुवर्णत्वक्सुधूतके ॥ ४८ ॥ वदनैकमहाद्वारे षड्गवाक्षविभूषिते ॥ ओष्ठद्वयकपाटे च तथा दंतार्गलान्विते ॥ ४९ ॥ नाडीस्वेदप्रवाहे च कालवक्रानलस्थिते ॥ एवंविधे गृहे गेही जीवो नामास्ति शोभने ॥ ५० ॥ गुणत्रयमयी भार्या प्रकृतिस्तस्य तत्र च ॥ बोधाहंकारकामाश्च क्रोधलोभादयोऽपि

१ नारी—इ० पा० । २ अडभाव आर्षः । उदपद्यत—इति पठनीयम् । ३ विवाहिता च सा भार्या—इ० पा० । ४ अजननिः--अजननमेव वरम्--इत्यर्थः । ५ मिथ्या विमूढासि--इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

च ॥ ६१ ॥ अपत्यान्यस्य हा कष्टमेवं मूढः प्रवर्तते ॥ तस्य योयो यथा मोहस्तथा तं शृणु तत्त्वतः ॥ ६२ ॥ स्रोतांसि यस्य सततं प्रस्रवंति गिरे
रिव ॥ कफमूत्रादिकान्यस्य कृते देहस्य मुह्यति ॥ ६३ ॥ सर्वाशुचिनिधानस्य शरीरस्य न विद्यते ॥ शुचिरेकप्रदेशोऽपि विण्मूत्रस्य दृतेरिव ॥
॥ ६४ ॥ स्पृष्ट्वा स्वदेहस्रोतांसि मृत्तोयैः शोध्यते करः ॥ तथाप्यशुचिभांडस्य न विरज्यति किं नरः ॥ ६५ ॥ कायः सुगन्धतोयाद्यैर्यत्नेनापि
सुसंस्कृतः ॥ न जहाति स्वकं भावं श्वपुच्छमिव नामितम् ॥ ६६ ॥ स्वदेहाशुचिगंधेन न विरज्यति यो नरः ॥ विरागे कारणं तस्य किमन्यदु
पदिश्यते ॥ ६७ ॥ गन्धलेपापनोदार्थं शौचं देहस्य कीर्तितम् ॥ द्वयस्यापगमात्पश्चाद्भावशुद्ध्या विशुध्यति ॥ ६८ ॥ गंगातोयेन सर्वैण
मृद्भारैः पर्वतोपमैः ॥ आ मृत्योराचरञ्छौचं भावदुष्टो न शुध्यति ॥ ६९ ॥ तीर्थस्नानैस्तपोभिर्वा दुष्टात्मा नैव शुध्यति ॥ स्वेदितः क्षालित
स्तीर्थे किं शुद्धिमधिगच्छति ॥ ६० ॥ अंतर्भावप्रदुष्टस्य विशतोऽपि हुताशनम् ॥ न स्वर्गो नापवर्गश्च देहनिर्दहनं परम् ॥ ६१ ॥ भावशुद्धिः
परं शौचं प्रमाणं सर्वकर्मसु ॥ अन्यथालिंग्यते कांता भावेन दुहिताऽन्यथा ॥ ६२ ॥ अन्यथैव स्तनं पुत्रश्चिंतयत्यन्यथा पतिः ॥ चित्तं विशो
धयेत्तस्मात्किमन्यैर्बाह्यशोधनैः ॥ ६३ ॥ भावतः संविशुद्धात्मा स्वर्गं मोक्षं च विंदति ॥ ज्ञानामलांभसा पुंसः सद्वैराग्यमृदा पुनः ॥ ६४ ॥
अविद्यारागविण्मूत्रलेपगंधविशोधनम् ॥ एवमेतच्छरीरं हि निसर्गादशुचि विदुः ॥ ६५ ॥ त्वङ्मात्रसारनिःसारं कदलीसारसंनिभम् ॥ ज्ञात्वैवं
दोषवद्देहं यः प्राज्ञः शिथिलीभवेत् ॥ ६६ ॥ स निष्क्रामति संसारे दृढग्राही स तिष्ठति ॥ एवमेतन्महाकष्टं जन्म दुःखं प्रकीर्तितम् ॥
॥ ६७ ॥ पुंसामज्ञातदोषेण नानाकर्मवशेन च ॥ यथा गिरिवराक्रांतः कश्चिद्दुःखेन तिष्ठति ॥ ६८ ॥ यथा जरायुणा देही दुःखं तिष्ठति
वेष्टितः ॥ पतितः सागरे यद्वद्दुःखमास्ते समाकुलः ॥ ६९ ॥ गर्भोदकेन सिक्तांगस्तथाऽऽस्ते व्याकुलः पुमान् ॥ लोहकुम्भे यथा
न्यस्तः पच्यते कश्चिदग्निना ॥ ७० ॥ गर्भकुम्भे तथा क्षिप्तः पच्यते जठराग्निना ॥ सूचीभिरग्निवर्णाभिर्विभिन्नस्य निरन्तरम् ॥ ७१ ॥ यद्दुःखं
जायते तस्य तद्गर्भेऽष्टगुणं भवेत् ॥ इत्येतद्गर्भदुःखं हि प्राणिनां परिकीर्तितम् ॥ ७२ ॥ चरस्थिराणां सर्वेषामात्मगर्भानुरूपतः ॥ तत्रस्थस्य च
सर्वेषां जन्मनां स्मरणं भवेत् ॥ ७३ ॥ मृतश्चाहं पुनर्जातो जातश्चाहं पुनर्मृतः ॥ नानायोनिसहस्राणि मया दृष्टा[1]न्यनेकधा ॥ ७४ ॥ अधुना
जातमात्रोऽहं प्राप्तसंस्कार एव च ॥ ततः श्रेयः करिष्यामि येन गर्भो न संभवेत् ॥ ७५ ॥ अध्येष्यामि हरेर्ज्ञानं संसारविनिवर्तनम् ॥ एवं संचि

१ मया दृष्टानि जायता--इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तयन्नास्ते मोक्षोपायं विचिन्तयन् ॥ ७६ ॥ गर्भात्कोटिगुणं दुःखं जायमानस्य जायते ॥ गर्भवासे स्मृतिर्यासीत्सा जातस्य प्रणश्यति ॥ ७७ ॥ स्पृष्टमात्रस्य बाह्येन वायुना मूढता भवेत् ॥ संमूढस्य स्मृतिभ्रंशः शीघ्रं संजायते पुनः ॥ ७८ ॥ स्मृतिभ्रंशात्ततस्तस्य पूर्वकर्मवशेन च ॥ रतिः संजायते तूर्णं जंतोस्तत्रैव जन्मनि ॥ ७९ ॥ रक्तो मूढश्च लोकोयमकार्ये संप्रवर्तते ॥ तत्रात्मानं न जानाति न परं न च दैवतम् ॥ ८० ॥ न शृणोति परं श्रेयः सति चक्षुषि नेक्षते ॥ समे पथि समैर्गच्छन्स्खलतीव पदेपदे ॥ ८१ ॥ सत्यां बुद्धौ न जानाति बोध्यमानो बुधैरपि ॥ संसारे क्लिश्यते तेन रागमोहवशानुगः ॥ ८२ ॥ गर्भस्मृतेरभावेन शास्त्रमुक्तं महर्षिभिः ॥ तद्दुःखकथनार्थाय स्वर्गमोक्षप्रसाधकम् ॥ ८३ ॥ ये शास्त्रज्ञाने सत्यस्मिन्सर्वकर्मार्थसाधके ॥ न कुर्वंत्यात्मनः श्रेयस्तदत्र परमद्भुतम् ॥ ८४ ॥ अव्यक्तेन्द्रियवृत्तित्वाद्बाल्ये दुःखं महत्पुनः ॥ इच्छन्नपि न शक्नोति वक्तुं कर्तुं च किञ्चन ॥ ८५ ॥ दंतोत्थाने महद्दुःखं मौलेन[1] व्याधिना तथा ॥ बालरोगैश्च विविधैः पीडा बालग्रहैरपि ॥ ८६ ॥ तृड्बुभुक्षापरीतांगः क्वचित्तिष्ठति रारटन् ॥ विण्मूत्रभक्षणाद्यं च मोहाद्बालः समाचरेत् ॥ ८७ ॥ कौमारे कर्णवेधेन मातापित्रोर्विताडनैः ॥ अक्षराध्ययनाद्यैश्च दुःखं स्याद्गुरुशासनात् ॥ ८८ ॥ प्रमत्तेंद्रियवृत्तैश्च कामरागप्रपीडनात् ॥ रागोद्धतस्य सततं कुतः सौख्यं हि यौवने ॥ ८९ ॥ ईर्ष्यया सुमहद्दुःखं मोहाद्रक्तस्य[2] जायते ॥ मत्तस्य कुपितस्यैव रागो दोषाय केवलम् ॥ ९० ॥ न रात्रौ विंदते निद्रा कामाग्निपरिखेदितः ॥ दिवापि हि कुतः सौख्यमर्थोपार्जनचिंतया ॥ ९१ ॥ नारीषु त्वनुभूतासु सर्वदोषाश्रयासु च ॥ विण्मूत्रोत्सर्गसदृशं सौख्यं मैथुनजं[3] स्मृतम् ॥ ९२ ॥ सन्मानमपमानेन वियोगेनेष्टसंगमः ॥ यौवनं जरया ग्रस्तं क्व सौख्यमनुपद्रवम् ॥ ९३ ॥ वलीपलितकायेन शिथिलीकृतविग्रहः ॥ सर्वक्रियास्वशक्तश्च जरया जर्जरीकृतः ॥ ९४ ॥ स्त्रीपुंसोर्यौवनं रूपं यदन्योन्याश्रयं पुरा ॥ तदेवं जरया ग्रस्तमुभयोरपि न प्रियम् ॥ ९५ ॥ जराभिभूतः पुरुषः पत्नीपुत्रादिबांधवैः ॥ अशक्तत्वाद्दुराचारैर्भृत्यैश्च परिभूयते ॥ ९६ ॥ धर्ममर्थं च कामं च मोक्षं च नातुरो[4] यतः ॥ शक्तः साधयितुं तस्माद्युवा धर्मं समाचरेत् ॥ ॥ ९७ ॥ वातपित्तकफादीनां वैषम्यं व्याधिरुच्यते ॥ वातादीनां समूहश्च देहोऽयं परिकीर्तितः ॥ ९८ ॥ तस्माद्व्याधिमयं ज्ञेयं शरीरमिदमात्मनः ॥ रोगैर्नानाविधैर्याति देहे दुःखान्यनेकशः ॥ ९९ ॥ तानि न स्वात्मवेद्यानि किमन्यत्कथयाम्यहम् ॥ एकोत्तरं मृत्युशतमस्मिन्देहे प्रतिष्ठितम् ॥ १०० ॥ तत्रैकः कालसंयुक्तः शेषास्त्वागंतवः स्मृताः ॥ ये त्विहागंतवः प्रोक्तास्ते प्रशाम्यन्ति भेषजैः ॥ १०१ ॥ जपहोमप्रदानैश्च

१ मौलव्याधिर्हि वैद्यकशास्त्रे प्रसिद्धः । २ रक्तस्य संतापाद्दुःखम् । अथवा--रक्तस्य विषयासक्तस्य--इत्यर्थः । ३ मैथुनजं मतं ततः--इ० पा० । ४ आतुरः--वृद्धः--इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कालमृत्युर्न शाम्यति ॥ विविधा व्याधयः शस्ताः सर्पाद्याः प्राणिनस्तथा ॥ १०२ ॥ विषाणि चाभिचाराश्च मृत्योर्द्वाराणि देहिनाम् ॥ पीडितं सर्परोगाद्यैरपि धन्वंतरिः स्वयम् ॥ १०३ ॥ स्वस्थीकर्तुं न शक्नोति कालप्राप्तं हि देहिनम् ॥ नौषधं न तपो मंत्रा न मित्राणि न बांधवाः ॥ ॥ १०४ ॥ शक्नुवंति परित्रातुं नरं कालेन पीडितम् ॥ रसायनतपोजप्यैर्योगसिद्धैर्महात्मभिः ॥ १०५ ॥ कालमृत्युरपि प्राज्ञैर्नीयते नापि संयुतैः ॥ नास्ति मृत्युसमं दुःखं नास्ति मृत्युसमं भयम् ॥ १०६ ॥ नास्ति मृत्युसमस्त्रासः सर्वेषामपि देहिनाम् ॥ सद्भार्यापुत्रमित्राणि राज्यैश्वर्यसुखानि च ॥ १०७ ॥ आबद्धानि स्नेहपाशैर्मृत्युः सर्वाणि कृंतति ॥ किं न पश्यसि मातस्त्वं सहस्रस्यापि मध्यतः ॥ १०८ ॥ जनाः शतायुषः पंच भवंति न भवन्ति वा ॥ अशीतिका विपद्यन्ते केचित्सप्ततिका नराः ॥ १०९ ॥ परमायुः स्थिता षष्टिस्तदप्यस्ति न निश्चितम् ॥ तस्य यावद्भवे दायुर्देहिनः पूर्वकर्मभिः ॥ ११० ॥ तस्यार्धमायुषो रात्रिर्हरते मृत्युरूपिणी ॥ बालभावेन मोहेन वार्धके जरया तथा ॥ १११ ॥ वर्षाणां विंशति र्याति धर्मकामार्थवर्जितः ॥ आगन्तुकैर्भयैः पुंसां व्याधिशोकैरनेकधा ॥ ११२ ॥ ह्रियतेर्द्धं हि तत्रापि यच्छेषं तद्धि जीवितम् ॥ जीवितांते च मरणं महाघोरमवाप्नुयात् ॥ ११३ ॥ जायते योनिकोटीषु मृतः कर्मवशात्पुनः ॥ देहभेदेन यः पुंसां वियोगः कर्मसंख्यया ॥ ११४ ॥ मरणं तद्विनिर्दिष्टं न नाशः परमार्थतः ॥ महातमःप्रविष्टस्य च्छिद्यमानेषु मर्मसु ॥ ११५ ॥ यद्दुःखं मरणं जंतोर्न तस्येहोपमा क्वचित् ॥ हा तात मातर्हा कांते क्रंदत्येवं सुदुःखितः ॥ ११६ ॥ मण्डूक इव सर्पेण गीर्यते मृत्युना जनः ॥ बांधवैः संपरित्यक्तः प्रियैश्च परिवारितः ॥ ११७ ॥ निःश्वसन्दीर्घमुष्णं च मुखेन परिशुष्यता ॥ चतुरंतेषु खट्वायाः परिवर्तन्मुहुर्मुहुः ॥ ११८ ॥ संमूढः क्षिपतेत्यर्थं हस्तपादावितस्ततः ॥ खट्वातो वांछते भूमिं भूमेः खट्वां पुनर्महीम् ॥ ११९ ॥ विवस्त्रो मुक्तलज्जश्च मूत्रविष्ठानुलेपितः ॥ याचमानश्च सलिलं शुष्ककण्ठोष्ठतालुकः ॥ १२० ॥ चिंतयानः स्ववित्तानि कस्यैतानि मृते मयि ॥ पंचावटान्खनमानः कालपाशेन कर्षितः ॥ १२१ ॥ म्रियते पश्यतामेव गले घुर्घुररावकृत् ॥ जीवस्तृणजलूकेव देहाद्देहं विशेत्क्रमात ॥ १२२ ॥ संप्राप्योत्तरमंशेन देहं त्यजति पूर्वकम् ॥ मरणात्प्रार्थना दुःखमधिकं हि विवेकिनः ॥ १२३ ॥ क्षणिकं मरणे दुःखमनंतं प्रार्थनाकृतम् ॥ ज्ञातं मयैतदधुना मृतो भवति यद्गुरुः ॥ १२४ ॥ न परः प्रार्थयेद्भूयस्तृष्णा लाघवकारणम् ॥ आदौ दुःखं तथा मध्ये ह्यन्त्ये दुःखं च दारुणम् ॥ १२५ ॥ निसर्गात्सर्वभूतानामिति दुःखपरंपरा ॥ क्षुधा च सर्वरोगाणां व्याधिः श्रेष्ठतमः स्मृतः ॥ ॥ १२६ ॥ स चान्नौषधिलेपेन क्षणमात्रं प्रशाम्यति ॥ क्षुद्व्याधेर्वेदना तीव्रा निःशेषबलकृन्तनी ॥ १२७ ॥ तयाभिभूतो म्रियते यथान्यैर्व्याधि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भिन्नरः ॥ राज्ञोऽभिमानमात्रं हि ममैव विद्यते गृहे ॥ १२८ ॥ सर्वमाभरणं भारं सर्वमालेपनं मम ॥ सर्वं प्रलापितं गीतं नित्यमुन्मत्तचेष्टितम् ॥ ॥ १२९ ॥ इत्येवं राज्यसंभोगैः कुतः सौख्यं विचारतः ॥ नृपाणां व्यग्रचित्तानामन्योन्यविजिगीषया ॥ १३० ॥ प्रायेण श्रीमदालेपान्नहुषाद्या महानृपाः ॥ स्वर्गं प्राप्यापि पतिताः कः श्रियो विंदते सुखम् ॥ १३१ ॥ उपर्युपरि देवानामन्योन्यातिशये स्थितम् ॥ नरैः पुण्यफलं स्वर्गे मूलच्छेदेन भुज्यते ॥ १३२ ॥ न चान्यत्क्रियते कर्म सोऽत्र दोषः सुदारुणः ॥ छिन्नमूलतरुर्यद्वद्वशः पतते क्षितौ ॥ १३३ ॥ पुण्यमूलक्षये तद्वत्पातयंति दिवौकसः ॥ इति स्वर्गेपि देवानां नास्ति सौख्यं विचारतः ॥ १३४ ॥ तथा नारकिणां दुःखं प्रसिद्धं किं च वर्ण्यते ॥ स्थावरेष्वपि दुःखानि दावाग्निहिमशोषणम् ॥ १३५ ॥ कुठारैश्छेदनं तीव्रं वल्कलानां च तक्षणम् ॥ पर्णशाखाफलानां च पातनं चंडवायुना ॥ १३६ ॥ अपमर्दश्च सततं गजैर्वन्यैश्च देहिभिः ॥ तृड्बुभुक्षा च सर्पाणां क्रोधो दुःखं च दारुणम् ॥ १३७ ॥ दुष्टानां घातनं लोके पाशेन च निबन्धनम् ॥ एवं सरीसृपाणां च दुःखं मातर्मुहुर्मुहुः ॥ १३८ ॥ अकस्माज्जन्ममरणं कीटादीनां तथाविधम् ॥ वर्षाशीतातपैर्दुःखं सुकष्टं मृगपक्षिणाम् ॥ १३९ ॥ क्षुत्तृट्क्लेशेन महता संत्रस्ताश्च सदा मृगाः ॥ पशुनागनिकायानां शृणु दुःखानि यानि च ॥ १४० ॥ क्षुत्तृट्छीतादिदमनं वधबन्धनताडनम् ॥ नासाग्रवेधनं त्रासः प्रतोदांकुशताडनम् ॥ १४१ ॥ वेणुकुन्तादिनिगडमुद्गरांऽकुशताडनम् ॥ भारोद्वहनसंक्लेशं शिक्षायुद्धादिपीडनम् ॥ ॥ १४२ ॥ आत्मयूथवियोगश्च वने च नयनादिकम् ॥ दुर्भिक्षं दुर्भगत्वं च मूर्खत्वं च दरिद्रता ॥ १४३ ॥ अधरोत्तरभावश्च मरणं राष्ट्रविभ्रमः ॥ अन्योन्याभिभवाद्दुःखमन्योन्यातिशयात्पुनः ॥ १४४ ॥ अनित्यता प्रभावाणामुच्छ्रयाणां च पातनम् ॥ इत्येवमादिभिर्दुःखैर्यस्माद्व्याप्तं चराचरम् ॥ १४५ ॥ निरयादिमनुष्यांतं तस्मात्सर्वं त्यजेद्बुधः ॥ स्कन्धात्स्कन्धं नयेद्भारं विश्रामं मन्यतेन्यथा ॥ १४६ ॥ तद्वत्सर्वमिदं लोके दुःखं दुःखेन शाम्यति ॥ एवमेतज्जगत्सर्वमन्योन्यातिशयोच्छ्रितम् ॥ १४७ ॥ दुःखैराकुलितं ज्ञात्वा निर्वेदं परमाप्नुयात् ॥ निर्वेदाच्च विरागः स्याद्विरागाज्ज्ञानसंभवः ॥ १४८ ॥ ज्ञानेन तं परं ज्ञात्वा विष्णुं मुक्तिमवाप्नुयात् ॥ नाहमेतादृशे लोके रमेयं जननि क्वचित् ॥ १४९ ॥ राजहंसो यथा शुद्धः काकामेध्यप्रदर्शकः ॥ शृणु मातर्यत्र संस्थो रमेयं निरुपद्रवः ॥ १५० ॥ अविद्यायनमत्युग्रं नानाकर्मातिशाखिनम् ॥ संकल्पदंशमकरं शोकहर्षहिमातपम् ॥ १५१ ॥ मोहांधकारतिमिरं लोभव्यालसरीसृपम् ॥ विषयानन्यथाध्वानं कामक्रोधविमोक्षकम् ॥ १५२ ॥

१ वृत्तम्--इ०पा० । २ आव्रजेत्--इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तदतीत्य महादुर्गं प्रविष्टोऽस्मि महद्वनम् ॥ न तत्प्रविश्य शोचंति न प्रेदुष्यंति तद्विदः ॥ १५३ ॥ न च बिभ्यति केषांचिन्नास्य बिभ्यति
केचन ॥ १५४ ॥ तस्मिन्वने सप्तमहाद्रुमास्तु सप्तैव नद्यश्च फलानि सप्त ॥ सप्ताश्रमाः सप्त समाधयश्च दीक्षाश्च सप्तैतदरण्यरूपम् ॥ १५५ ॥
पंचवर्णानि दिव्यानि चतुर्वर्णानि कानिचित् ॥ त्रिद्विवर्णैकवर्णानि पुष्पाणि च फलानि च ॥ १५६ ॥ सृजंतः पादपास्तत्र व्याप्य तिष्ठन्ति तद्व
नम् ॥ १५७ ॥ सप्त स्त्रियस्तत्र वसंति सत्यस्त्ववाङ्मुख्यो भानुमतो भवंति ॥ ऊर्ध्वं रसानाददते प्रजाभ्यः सर्वाश्च तास्तत्त्वतः कोपि वेद ॥१५८॥
सप्तैव गिरयश्चात्र धृतं यैर्भुवनत्रयम् ॥ नद्यश्च सरितः सप्त ब्रह्मवारिवहाः सदा ॥ १५९ ॥ तेजश्चाभयदानत्वमद्रोहः कौशलं तथा ॥ अचापल्यम
थाक्रोधः प्रियवादश्च सप्तमः ॥ १६० ॥ इत्येते गिरयो ज्ञेयास्तस्मिन्विद्यावने स्थिताः ॥ दृढनिश्चयस्तथा भासा समता निग्रहो गुणः ॥ १६१ ॥
निर्ममत्वं तपश्चात्र सन्तोषः सप्तमो ह्रदः ॥ भगवद्गुणविज्ञानाद्भक्तिः स्यात्प्रथमा नदी ॥ १६२ ॥ पुष्पादिपूजा द्वितीया तृतीया च प्रदक्षिणा ॥
चतुर्थी स्तुतिवाग्रूपा पञ्चमी ईश्वरार्पणा ॥ १६३ ॥ षष्ठी ब्रह्मैकता प्रोक्ता सप्तमी सिद्धिरेव च ॥ सप्त नद्योऽत्र कथिता ब्रह्मणा परमेष्ठिना ॥ १६४ ॥
ब्रह्मा धर्मो यमश्चाग्निरिंद्रो वरुण एव च ॥ १६५ ॥ धनदश्च ध्रुवादीनां सप्तकानर्चयंत्यमी ॥ नदीनां संगमस्तत्र वैकुंठसमुपह्वरे ॥ १६६ ॥
आत्मतृप्ता यतो यांति शांता दांताः परात्परम् ॥ केचिद्द्रुमाः स्त्रियः केचित्केचित्तत्त्वविदोऽपरे ॥ १६७ ॥ सरितः केचिदाहुः स्म सप्तैव ज्ञान
वित्तमाः ॥ अनपेतव्रतकामोऽत्र ब्रह्मचर्यं चरामि च ॥ १६८ ॥ ब्रह्मैव समिधस्तत्र ब्रह्माग्निर्ब्रह्म संस्तरः ॥ आपो ब्रह्म गुरुर्ब्रह्म ब्रह्मचर्यमिदं मम
॥ १६९ ॥ एतदेवेदृशं सूक्ष्मं ब्रह्मचर्यं विदुर्बुधाः ॥ गुरुं च शृणु मे मातर्यो मे विद्याप्रदोऽभवत् ॥ १७० ॥ एकः शास्ता न द्वितीयोऽस्ति शा
स्ता हृद्येव तिष्ठन्पुरुषं प्रशास्ति ॥ तेनाभियुक्तः प्रणवादिवोदकं यथा नियुक्तोस्मि तथाचरामि ॥ १७१ ॥ एको गुरुर्नास्ति तथा द्वितीयो
हृदि स्थितस्तमहं नु ब्रवीमि ॥ यं चावमान्यैव गुरुं मुकुन्दं पराभूता दानवाः सर्व एव ॥ १७२ ॥ एको बंधुर्नास्ति ततो द्वितीयो हृदि स्थितं त
महमनुब्रवीमि ॥ तेनानुशिष्टा बांधवा बंधुमंतः सप्तर्षयः सप्त दिवि प्रभांति ॥ १७३ ॥ ब्रह्मचर्यं च संसेव्यं गार्हस्थ्य शृणु यादृशम् ॥ पत्नी प्रकृ
तिरूपा मे तच्चित्तो नास्मि कर्हिचित् ॥ १७४ ॥ मच्चित्ता सा सदा मातर्मम सर्वार्थसाधनी ॥ घ्राणं जिह्वा च चक्षुश्च त्वक्च श्रोत्रं च पंचमम्
॥ १७५ ॥ मनो बुद्धिश्च सप्तैते दीप्यंते पावका मम ॥ गंधो रसश्च रूपं च शब्दः स्पर्शश्च पंचमम् ॥ १७६ ॥ मंतव्यमथ बोद्धव्यं सप्तैताः

१ प्रहृष्यन्ति—इ०पा० । २ वैकुण्ठसमुपह्वरे—वैकुण्ठस्य मध्यत्वं नदीनां च तत्रैव संगमः—वैकुण्ठसंनिकटवर्तिप्रदेशे—इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समिधो मम ॥ हुतं नारायणध्यानाद्भुंक्ते नारायणः स्वयम् ॥ १७७ ॥ एवंविधेन यज्ञेन यजाम्यस्मिं तमीश्वरम् ॥ अकामयानस्य च सर्वकामो भवेद्धिषाणस्य च सर्वदोषः ॥ १७८ ॥ न मे स्वभावेषु भवंति लेपास्तोयस्य बिंदोरिव पुष्करेषु ॥ नित्यस्य मे नैव भवंत्यनित्या निरीक्षमाणस्य बहुस्वभावात् ॥ १७९ ॥ न सज्जते कर्मसु भोगजालं दिवीव सूर्यस्य मयूखजालम् ॥ १८० ॥ एवंविधेन पुत्रेण मा मातर्दुःखिनी भव ॥ तत्पदं त्वां च नेष्यामि न यत्क्रतुशतैरपि ॥ १८१ ॥ इति पुत्रवचः श्रुत्वा विस्मिता इतराभवत् ॥ चिंतयामास यद्येवं विद्वान्मम सुतो दृढम् ॥ ॥ १८२ ॥ लोकेषु ख्यातिमायाति ततो मे स्याद्यशः परम् ॥ इत्यादि चिंतयंत्यां च रजन्यां भगवान्हरिः ॥ १८३ ॥ प्रहृष्टस्तस्य तैर्वाक्यैर्विस्मितः प्रादुरास च ॥ मूर्तेः स्वयं विनिष्क्रम्य शंखचक्रगदाधरः ॥ १८४ ॥ जगदुद्भासयन्भासा सूर्यकोटिसमप्रभः ॥ ततो निष्पत्य धरणीं हृष्टरोमाश्रुगद्गदः ॥ १८५ ॥ मूर्ध्नि बद्धांजलिं धीमानैतरेयोऽथ तुष्टुवे ॥ १८६ ॥ नमस्तुभ्यं भगवते वासुदेवाय धीमहि ॥ प्रद्युम्नायानिरुद्धाय नमः संकर्षणाय च ॥ १८७ ॥ नमो विज्ञानमात्राय परमानंदमूर्तये ॥ आत्मारामाय शांताय निवृत्तद्वैतदृष्टये ॥ १८८ ॥ आत्मानंदानुभूत्यैव सम्यत्त्यक्तोर्मये नमः ॥ हृषीकेशाय महते नमस्तेऽनंतशक्तये ॥ १८९ ॥ वचस्युपरते प्राप्यो य एको मनसा सह ॥ अनामरूपचिन्मात्रः सोऽव्यान्नः सदसत्परः ॥१९०॥ यस्मिन्निदं यतश्चेदं तिष्ठत्यपैति जायते ॥ मृन्मयेष्विव मृज्जातिस्तस्मै ते ब्रह्मणे नमः ॥१९१॥ यं न स्पृशंति न विदुर्मनोबुद्धींद्रियासवः ॥ अंतर्बहिश्च विततं व्योमवत्प्रणतोऽस्म्यहम्[1] ॥१९२॥ देहेंद्रियप्राणमनोधियोऽमी यदंशबद्धाः प्रचरंति कर्मसु ॥ नैवान्यदालोहमिव प्रतप्तं स्थानेषु तद्दृष्टपदेन[2] एते ॥ १९३ ॥ चतुर्भिश्च त्रिभिर्द्वाभ्यामेकधा प्रणमामि तम् ॥ पूर्वापरापरयुगे शास्तारं परमीश्वरम् ॥ १९४ ॥ हित्वा गती र्मोक्षकामा यं भजंति दशात्मकम् ॥ तं परं सत्यममलं त्वां वयं पर्युपास्महे ॥ १९५ ॥ ॐनमो भगवते महापुरुषाय महानुभावाय विभूतिपतये सकलसात्वतपरिवृढनिकरकरकमलोत्पलकुड्मलोपलालितचरणारविंदयुगल परमपरमेष्ठिन्नमस्ते ॥ १९६ ॥ तवाग्निरास्यं वसुधांघ्रियुग्मं नभः शिरश्चंद्ररवी च नेत्रे ॥ समस्तलोका जठरं भुजाश्च दिशश्चतस्रो भगवन्नमस्ते ॥ १९७ ॥ जन्मानि तावंति न संति देव निष्पीड्य सर्वाणि च

१ अस्मि—अहम्। २ एतस्य तात्पर्यं नावगम्यते—तर्कितोऽयमर्थोऽनुमीयते—प्रततं लोहं यथा वह्निरूपमेव भवति—न पृथक्तयावभासते—तथा—देहेंद्रियप्राणमनोधियः—त्वद्रूपा एव—भवन्ति। स्थानेषु तत्तद्भिन्नभिन्नाकारविशेषेषु—तद्दृष्टपदेन—'अयं देहः, इमानि इन्द्रियाणि, इमे प्राणाः, इदं मनः' इत्येवं पृथगाकाररूपेण न प्रतीयन्ते। किं तु सर्वं चैतन्यरूपमेवावभासते—इति तात्पर्यम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सर्वकालम् ॥ भूतानि यावंति मयात्र भीमे पीतानि संसारमहासमुद्रे ॥ १९८ ॥ संपच्छिलानां हिमवन्महेंद्रकैलासमेर्वादिषु नैव तादृक् ॥
देहाननेकाननुगृह्णतो मे प्राप्तास्ति संपन्महती यथेश ॥ १९९ ॥ न संति ते देव भुवि प्रदेशा न येषु जातोऽस्मि तथा विनष्टः ॥ भूत्वा मया
येषु न जंतवश्च संभक्षितो वा न च भूतसंघैः ॥ २०० ॥ शोकाभिभूतस्य ममाश्रु देव यावत्प्रमाणं पतितं भवेषु ॥ तावत्प्रमाणं न जलं पयोदा
मुंचंति दिव्यैरपि वर्षलक्षैः॥ २०१ ॥ मन्ये धरित्रीपरमाणुसंख्यामुपैति पित्रोर्गणना न मह्यम् ॥ मित्राण्यमित्राण्यनुजीव्यबंधून्संख्यातुमीशोऽस्मि
न देवदेव ॥ २०२ ॥ त्वय्यर्पितं नाथ पुनः पुनर्मे मनः समाक्षिप्य सुदुर्द्धरारि ॥ कामो वशं क्रोधमुखैः सहायैः करोति किं तद्भगवन्करोमि ॥
॥ २०३ ॥ सोऽहं भृशार्तः करुणाकरस्त्वं संसारगर्ते पतितस्य विष्णो ॥ महात्मनां संश्रयमभ्युपेतो नैवावसीदत्यपि दुर्गतोऽपि ॥ २०४ ॥
परायणं रोगवतो हि वैद्यो महाब्धिमग्नस्य च नौर्नरस्य ॥ बालस्य मातापितरौ सुघोरसंसारखिन्नस्य हरे त्वमेव ॥ २०५ ॥ प्रसीद सर्वेश्वर
सर्वभूत सर्वस्य हेतो परमार्थसार ॥ मामुद्धरास्मादुरुदुःखसंघात्संसारगर्तात्स्वपरिग्रहेण ॥ २०६ ॥ क्षुत्तृड्ढत्रिधातुभिरिमं मुहुरर्द्यमानं शीतोष्ण
वातसलिलैरितरेतराच्च ॥ कामाग्निनाच्युत रुषा च सुदुर्भरेण संपश्यतो मम उरुक्रम सीदतो हि ॥ २०७ ॥ भवंतु भद्राणि समस्तदोषाः प्रयांतु
नाशं जगतोऽखिलस्य ॥ मयाद्य भक्त्या परमेश्वरे प्रभौ स्तुते जगद्धातरि वासुदेवे ॥ २०८ ॥ ये भूतले ये दिवि चांतरिक्षे रसातले प्राणिगणाश्च
केचित् ॥ भवंतु ते सिद्धियुजो मयाद्य स्तुते जगद्धातरि वासुदेवे ॥ २०९ ॥ अज्ञानिनो ज्ञानविदो भवंतु प्रशान्तिभाजः सततोग्रचित्ताः ॥
मया च विश्वंभरणे ह्यनंते स्तुते जगद्धातरि वासुदेवे ॥ २१० ॥ शृण्वंति ये मे स्तुवतस्तथान्ये पश्यंति ये मामिदमीरयंतम् ॥ देवासुराद्या मनुजा
स्तिरश्चो भवंतु तेऽप्यच्युतयोगभाजः ॥ २११ ॥ ये चापि मूका विकलेंद्रियत्वात्पठंति नो नैव विलोकयंति ॥ पश्वादयः कीटपिपीलिकाद्या भवंतु
तेऽप्यच्युतयोगभाजः ॥ २१२ ॥ नश्यंतु दुःखानि जगत्यपेतु लोभादिको दोषगणः प्रजाभ्यः ॥ यथात्मनि भ्रातरि चात्मजे वा तथा नरस्यास्तु
जनेपि भावः ॥ २१३ ॥ संसारवैद्येऽखिलदोषहानिविचक्षणे निर्वृतिहेतुभूते ॥ संसारबंधाः शिथिलीभवंतु हृदि स्थिते सर्वजनस्य विष्णौ ॥
॥ २१४ ॥ पापं प्रणाशं मम च प्रयातु यन्मानसं यच्च करोमि वाचा ॥ शारीरमप्याचरितं च यन्मे स्मृते जगद्धातरि वासुदेवे ॥ २१५ ॥ ॥१६९॥
यथा हि वा वासुदेवेति प्रोक्ते संकीर्त्तनैं विष्णुभक्तस्य वापि ॥ स्मृते हरौ वापि प्रयाति पापं सत्येन मे नश्यतां तेन पापम् ॥ २१६ ॥

१ तावन्ति-इ० पा० । २ परमस्य--इ० पा० । ३ शृण्वन्ति-इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मूढोऽयमल्पमतिरल्पविचेष्टितोऽयं क्लिष्टं मनोऽपि विषयैर्मयि न प्रसंगि ॥ इत्थं कृपां कुरु मयि प्रणतेऽखिलेश त्वां स्तोतुमंबुजभवोऽपि हि देव नेशः ॥ २१७ ॥ स त्वं प्रसीद भगवन्कुरु मय्यनाथे विष्णो कृपां परमकारुणिकः किल त्वम् ॥ संसारसागरनिमग्नमनंत दीनमुद्धर्तुमर्हसि हरे पुरुषोत्तमोसि[1] ॥ २१८ ॥ इत्थं स्तुतः स भगवानैतरेयेण भारत ॥ वासुदेवो विशालात्मा सानंदमिदमाह तम् ॥ २१९ ॥ वत्सै तरेय तुष्टोस्मि भक्त्यानेन स्तवेन ते ॥ वरं वृणुष्व मत्तस्त्वं दुर्लभं यदभीप्सितम् ॥ २२० ॥ ॥ ऐतरेय उवाच ॥ ॥ एष एव वरो नाथ मम नित्यमभीप्सितः ॥ मज्जतो घोरसंसारे कर्णधारो हरे भव ॥ २२१ ॥ ॥ श्रीभगवानुवाच[2] ॥ ॥ मुक्त एवासि संसाराद्यस्य ते भक्तिरीदृशी ॥ ग्रहैर्महाग्रहैर्बद्धो[3] नैव ते द्वित्र्योदशी ॥ २२२ ॥ यश्च स्तोत्रेण सततं गुप्तक्षेत्रसमीहितम् ॥ स्तोष्यते वासुदेवं मां स पापक्षयमाप्स्यति ॥ २२३ ॥ यस्मादेतेन स्तोत्रेण पापं नाशमवाप्स्यति ॥ अघनाशनमित्येव तस्मात्ख्यातिमवाप्स्यति ॥ २२४ ॥ एकादश्यामुपोष्यैव ममाग्रे यः पठिष्यति ॥ स्तवमेनं स पूतात्मा मम लोकमवाप्स्यति ॥ २२५ ॥ सर्वेषामेव क्षेत्राणां गुप्तक्षेत्रं प्रियं यथा ॥ तथा सर्वस्तवानां च स्तवोयं सुप्रियो मम ॥ २२६ ॥ यानि चोद्दिश्य भूतानि जप्यतेऽसौ महात्मभिः ॥ तानि शांतिं भगं प्रज्ञां प्राप्स्यंति कृपया मम ॥ २२७ ॥ त्वं च वत्स श्रौत धर्मान्सम्यगाचर श्रद्धया ॥ न तैर्बंधं मयि न्यस्तैराप्स्यस्यनभिसंधितैः ॥ २२८ ॥ यज यज्ञैरवाप्यैव दारान्नन्दय मातरम् ॥ मयि ध्यानेन तीव्रेण मामवाप्स्यस्यसंशयम् ॥ २२९ ॥ बुद्धिर्मनोथ भूतानि बुद्धिकर्मेन्द्रियाणि च ॥ त्रयोदशग्रहैर्ये स्युस्त्रयोदश महाग्रहाः ॥ २३० ॥ बोद्धव्यमथ मंतव्यमहंता शब्द एव च ॥ स्पर्शो रसो रूपगन्धौ वचनादानमेव च ॥ २३१ ॥ विहृत्युत्सर्ग आनंदस्त्रयोदश महाग्रहाः ॥ एतान्महाग्रहान्पुत्र शुद्धाञ्छुद्धैः स्वकैर्ग्रहैः ॥ २३२ ॥ गृहाण ध्यानयोगेन ममैवं मोक्षमाप्स्यसि ॥ एवं त्वं कर्मभिर्वीर नैष्कर्म्यं समवाप्स्यसि ॥ २३३ ॥ शुल्बं रसेन संविद्धं दक्षो हेम यथाश्नुते ॥ वर्णाश्रमाचारवता मयि संन्यस्तकर्मणा ॥ २३४ ॥ मदनुध्यानयुक्तेन मोक्षो नास्तीह दुर्लभः ॥ तस्मादेवं वर्तमानो नन्द व्रतपरायणः ॥ २३५ ॥ उद्धृत्य सप्तपुरुषाल्लँयं मयि गमिष्यसि ॥ सांप्रतं प्रतिभास्यंति वेदश्चापठिता अपि ॥ २३६ ॥ ततस्त्वं

---

१ पुरुषोत्तमोऽपि--इ० पा० । २ श्रीवासुदेव उवाच—इ० पा० । ३ गृहैर्महागृहैर्बद्धः—इ० पा० । ४ अस्यार्थोऽग्रे "बुद्धिर्मनोथ भूतानि बुद्धिकर्मेंद्रियाणि च । त्रयोदश ग्रहैर्ये स्युस्त्रयोदश महाग्रहाः । बोद्धव्यमथ मंतव्यमहंता शब्द एव च । स्पर्शो रसो रूपगंधौ वचनादानमेव च । विहृत्युत्सर्ग आनंदस्त्रयोदश महाग्रहाः ॥" इत्युक्तो बोद्धव्यः । एतेन—मनोबुद्धि—भूत—ज्ञानेन्द्रियकर्मेन्द्रियाणि मिलित्वा त्रयोदश । तत्र भूतानां सामान्येनैकत्वं विवक्षितमिति बोद्धव्यम् । विषयेषु तु भूतगुणानां पार्थक्येन वर्णनं ज्ञानेंद्रियानुसारेणैवेति न विवादः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कोटितीर्थे च यज्ञे वै हरिमेधसः ॥ याहि तत्र भविष्यं ते सर्वं मातुरभीप्सितम् ॥ २३७ ॥ इत्युक्त्वा भगवान्विष्णुर्मूर्तिमध्ये विवेश ह ॥ विलोक्य
मानो निमिषं मात्रा चैव सुतेन च ॥ २३८ ॥ ततो मूर्तिं नमस्कृत्य वासुदेवस्य विस्मितः ॥ ऐतरेयः[१]स्वजननीं मुदितो वाक्यमब्रवीत् ॥ २३९ ॥
पुराहमभवं शूद्रो भीतः संसारदोषतः ॥ परिनिष्ठागतं धर्मं ब्राह्मणं शरणं गतः ॥ २४० ॥ स कृपालुर्मम प्राह मन्त्रं वै द्वादशाक्षरम् ॥ सदेमं जप
चेत्युक्त्वा तमहं जप्तवान्सदा ॥ २४१ ॥ तेन जाप्यप्रभावेन ममोत्पत्तिस्तवोदरात् ॥ जातस्मृतिर्विष्णुभक्तिः स्थितिरत्र च सर्वदा ॥ २४२ ॥
इदानीं च प्रयाम्येष यज्ञं तं हरिमेधसः ॥ त्वद्रूपं विष्णुप्रीत्यर्थं प्रणम्य त्वां प्रसादये ॥ २४३ ॥ ततो महीनगरकाख्ये कोटितीर्थतलस्थितम् ॥
यजन्तं संवृतं विप्रैः कोटिशस्तमुपागमत् ॥ २४४ ॥ गेहाय मातरं प्रोच्य स यज्ञे प्रोक्तवान्द्विजः ॥ नमस्तस्मै भगवते विष्णवेऽकुण्ठमेधसे ॥
॥ २४५ ॥ यन्मायामोहितधियो भ्रमामः कर्मसागरे ॥ इति श्लोकं महार्थं ते हरिमेधमुखा द्विजाः ॥ २४६ ॥ आकर्ण्यासनपूजाद्यैः पूजयामासु
रंग तम् ॥ ततो वेदार्थनैपुण्यैस्तेन ते तोषिता द्विजाः ॥ २४७ ॥ प्रददुर्दक्षिणां सर्वां हरिमेधाः सुतामपि ॥ द्रव्यं कन्यां च संगृह्य स्वगृहं समुपा
गमत् ॥ २४८ ॥ वन्दयित्वा स्वजननीं पुत्रानुत्पाद्य चामलान् ॥ इष्ट्वा यज्ञैरैतरेयो द्वादशीव्रततत्परः ॥[२]२४९ ॥ वासुदेवानुध्यानेन मोक्षं पश्चादु
पागतः ॥ एवंविधो वासुदेवः स्वयमत्रास्ति भारत ॥ २५० ॥ योर्चयेत्पूजयेत्स्तौति सर्वं तस्याक्षयं विदुः ॥ शिवधर्मेषु यत्प्रोक्तं फलं पूर्वं मया तव
॥ २५१ ॥ तादृशं लभते मर्त्यो वासुदेवप्रसादतः ॥ २५२ ॥ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां प्रथमे माहेश्वरखण्डे
कौमारिकाखण्डे श्रीवृद्धवासुदेवमाहात्म्यवर्णन ऐतरेयब्राह्मणचरित्रवर्णनंनाम द्विचत्वारिंशोऽध्यायः ॥ ४२ ॥ ॥ छ ॥ ॥ ॥ श्रीनारद
उवाच ॥ ॥ ततोऽहं पार्थ भूयोऽपि जनानुग्रहकाम्यया ॥ प्रत्यक्षदेवं मार्तंडमत्रानेतुमियेष ह ॥ १ ॥ सर्वेषां प्राणिनां यस्मादुडुपो भगवान्रविः ॥
इहामुत्र च कौंतेय विश्वोद्धारी रविर्मतः ॥ २ ॥ ये स्मरंति रविं भक्त्या कीर्तयंति च ये नराः ॥ पूजयंति च ये नित्यं कृतार्थास्ते न संशयः ॥३॥
सूर्यभक्तिपरा ये च नित्यं तद्गतमानसाः ॥ ये स्मरंति सदा सूर्यं न ते दुःखस्य भाजिनः ॥ ४ ॥ भवनानि मनोज्ञानि विविधाभरणाः स्त्रियः ॥
धनं चादृष्टपर्यंतं सूर्यपूजाविधेः फलम् ॥ ५ ॥ दुर्लभा भक्तिः सूर्ये वा दुर्लभं तस्य चार्चनम् ॥ दानं च दुर्लभं तस्मै ततो होमश्च दुर्लभः ॥ ६ ॥
नमस्कारादिसंयुक्तं रविरित्यक्षरद्वयम् ॥ जिह्वाग्रे वर्तते यस्य सफलं तस्य जीवितम् ॥ ७ ॥ इत्यहं हृदि संचिंत्य माहात्म्यं रविजं महत् ॥ पूर्णं

१ अंग—इदं संबोधनम् । हे अर्जुन—इत्यर्थः । २ अत्रानयितुमैच्छत—इति पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वर्षशतं पार्थ रविं भक्त्या ह्यतोषयम् ॥ ८ ॥ जपेन सुविशुद्धेन च्छन्दसां वायुभोजनः ॥ ततः खाद्द्वितीयां मूर्तिं कृत्वा योगबलाद्विभुः ॥ ९ ॥
तेजसा दुर्दृशो भास्वान्प्रत्यक्षः समजायत ॥ १० ॥ तमहं प्रांजलिर्भूत्वा नमस्कृत्य रविं प्रभुम् ॥ सामभिर्विविधैर्देवं पर्यतोषयमीश्वरम् ॥ ११ ॥
तुष्टो मामाह वरदो देवर्षे सुचिरं त्वया ॥ तपसाराधितोऽस्मीति वरं वृणु यथेप्सितम् ॥ १२ ॥ इत्युक्तोऽहं लोकनाथं प्रांजलिः प्रास्तुवं वचः ॥
यदि तुष्टो भवान्मह्यं यदि देयो वरो मम ॥ १३ ॥ ततस्ते कामरूपे[1] या कला नाथ प्रवर्तते ॥ राजवर्धनराज्ञा याऽऽराधिता च जनैः पुरा ॥ १४ ॥
तया च कलया भानो सदात्र स्थातुमर्हसि ॥ ततस्तथेति देवेन प्रोक्ते तुष्टेन भारत ॥ १५ ॥ अस्थापयमहं सूर्यं भट्टादित्याभिधानकम्[2] ॥ भट्टेन
स्थापितं यस्मान्मया तस्माद्द्विजर्षभ ॥ १६ ॥ ततः संपूज्य तं पुष्पैः कृतावेशमहं रविम् ॥ भक्त्युद्रेकाप्लुतांगोऽथ स्तुतिमेतामथाचरम् ॥ १७ ॥
सर्ववेदरहस्यैश्च नामभिश्च शताष्टभिः ॥ सप्तसप्तिरचिंत्यात्मा महाकारुणिकोत्तमः ॥ १८ ॥ संजीवनो जयो जीवो जीवनाथो जगत्पतिः ॥
कालाश्रयः कालकर्ता महायोगी महामतिः ॥ १९ ॥ भूतांतकरणो देवः कमलानन्दनन्दनः ॥ सहस्रपाच्च वरदो दिव्यकुण्डलमण्डितः ॥
॥ २० ॥ धर्मप्रियोचितात्मा च सविता वायुवाहनः ॥ आदित्योऽक्रोधनः सूर्यो रश्मिमाली विभावसुः ॥ २१ ॥ दिनकृद्दिनहृन्मौनी सुरथो
रथिनांवरः ॥ राज्ञीपतिः स्वर्णरेताः पूषा त्वष्टा दिवाकरः ॥ २२ ॥ आकाशतिलको धाता संविभागी मनोहरः ॥ प्राज्ञः प्रजापतिर्धन्यो विष्णुः
श्रीशो भिषग्वरः ॥ २३ ॥ आलोककृल्लोकनाथो लोकपालनमस्कृतः ॥ विदिताशयश्च सुनयो महात्मा भक्तवत्सलः ॥ २४ ॥ कीर्तिकीर्तिकरो
नित्यो रोचिष्णुः कल्मषापहः ॥ जितानन्दो महावीर्यो हंसः संहारकारकः ॥ २५ ॥ कृतकृत्यः सुसंगश्च बहुज्ञो वचसां पतिः ॥ विश्वपूज्यो
मृत्युहारी घृणी धर्मस्य कारणम् ॥ २६ ॥ प्रणतार्तिहरोऽरोग आयुष्मान्सुखदः सुखी ॥ मङ्गलं पुण्डरीकाक्षो व्रती व्रतफलप्रदः ॥ २७ ॥ शुचिः
पूर्णो मोक्षमार्गदाता भोक्ता महेश्वरः ॥ धन्वंतरिः प्रियाभाषी धनुर्वेदविदेकराट् ॥ २८ ॥ जगत्पिता धूमकेतुर्विधूतो ध्वांतहा गुरुः ॥
गोपतिश्च कृतातिथ्यः शुभाचारः शुचिप्रियः ॥ २९ ॥ सामप्रियो लोकबन्धुर्नैकरूपो युगादिकृत् ॥ धर्मसेतुर्लोकसाक्षी खेटकः सर्वदः
प्रभुः ॥ ३० ॥ मयैवं संस्तुतो भानुर्नाम्नामष्टशतेन च ॥ तुष्यतां सर्वलोकानां सर्वलोकप्रियो विभुः ॥ ३१ ॥ इत्येवं संस्तवात्प्रीतो भास्करो
मामवोचत ॥ सदात्र कलया स्थास्ये देवर्षे त्वत्प्रियेप्सया ॥ ३२ ॥ यो मामत्र महाभक्त्या भट्टादित्यं[3] प्रपूजयेत् ॥ सहस्रशः का

१ कामरूपे–देशे। २ पट्टादित्याभिधानकम्–३०, भद्रादित्याभिधानकम–३० च पा०। ३ पट्टादित्यम्–३० पा०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मरूपे संपूज्याप्नोति तत्फलम् ॥ ३३ ॥ मामुद्दिश्य च यो विप्रः स्वल्पं वा यदि वा बहु ॥ दास्यतेऽत्राक्षयं तच्च ग्रहीष्ये करजं यथा ॥ ३४ ॥ रक्तोत्पलैश्च कह्लारैः केसरैः करवीरकैः ॥ शतत्रयैर्महापद्मै रविवारेण मानवः ॥ ३५ ॥ सप्तम्यामथ षष्ठ्यां वा येऽर्चयिष्यंति मामिह ॥ यान्यान्प्रार्थयते कामांस्तांस्तान्प्राप्स्यति निश्चितम् ॥ ३६ ॥ दर्शनान्मम भक्त्या च नाशो व्याधिदरिद्रयोः ॥ प्रणामात्स्वर्गमाप्नोति श्रुत्वा मोक्षं च नित्यशः ॥ ३७ ॥ अभक्तिं यश्च कर्ता मे स गच्छेन्निश्चितं क्षयम् ॥ अष्टोत्तरशतं नाम ममाग्रे यत्त्वयेरितम् ॥ ३८ ॥ त्रिकालमेककालं वा पठतः शृणु यत्फलम् ॥ कीर्तिमान्सुभगो विद्वान्सुसुखी प्रियदर्शनः ॥ ३९ ॥ भवेद्वर्षशतायुश्च सर्वरोगविवर्जितः ॥ यस्त्विदं शृणुयान्नित्यं पठेद्वा प्रयतः शुचिः ॥ ४० ॥ अक्षयं स्वल्पमप्यन्नं भवेत्तस्योपसाधितम् ॥ विजयी च भवेन्नित्यं तथा जातिस्मरो भवेत् ॥ ४१ ॥ तस्मादेतत्त्वया जाप्यं[1] परं स्वस्त्ययनं महत् ॥ तथा ममाग्रे कुंडं च कुरु स्नानार्थमुत्तमम् ॥ ४२ ॥ कामरूपकला यत्र तत्र कुंडं वने भवेत् ॥ एवं दत्त्वा वरान्भानुस्तत्रैवां[2]तरधीयत ॥ ४३ ॥ ततो भास्करवाक्येन सिद्धेशस्य च सव्यतः ॥ वनमध्ये मया कुंडं कृतं दर्भशलाकया ॥ ४४ ॥ कामरूपभवं कुंडं वृक्षास्ते चापि भारत ॥ संलीनास्तन्महाश्चर्यं ममाजायत चेतसि ॥ ४५ ॥ माघमासस्य शुक्लायां सप्तम्यां स्त्री नरोऽपि वा ॥ स्नानं कुंडे शुभं कृत्वा भट्टादित्यं[3] प्रपश्यति ॥ ४६ ॥ तस्यानंतं भवेत्पुण्यं रथं यश्च प्रपूजयेत् ॥ रथयात्रां च कुरुते यस्मिन्यस्मिन्नसौ पथि ॥ ४७ ॥ ये च पश्यंति लोकास्ते धन्याः सर्वे न संशयः ॥ पुत्रधान्यधनैर्युक्ता नीरुजस्तेजसाऽन्विताः ॥ ४८ ॥ भविष्यंति नरास्ते ये कारयंति रथोत्सवम् ॥ गंगादिसर्वतीर्थेषु यत्फलं कीर्तितं बुधैः ॥ ४९ ॥ भट्टादित्यस्य[4] कुंडे च तत्फलं सप्तमीदिने ॥ तत्र कुंडे च यः स्नात्वा सूर्यायार्घ्यं प्रयच्छति ॥ कपिलागोशतस्यासौ दत्तस्य फलमश्नुते ॥ ५० ॥ ॥ अर्जुन उवाच ॥ ॥ वासुदेवादयः सर्वे वदंत्येवं महामुने ॥ ५१ ॥ भास्करार्घं विना प्रातः कृतं सर्वं च निष्फलम् ॥ तस्याहं श्रोतुमिच्छामि विधिं विधिविदां वर ॥ ५२ ॥ ॥ नारद उवाच ॥ ॥ यथा ब्रह्मादयो देवा यच्छंत्यर्घं महात्मने ॥ भास्कराय शृणु त्वं तं विधिं सर्वाघनाशनम् ॥ ५३ ॥ प्रथमं तावत्प्रत्यूषे उदिते सूर्ये शुचिर्भूत्वा गोमयकृतमंडलस्योपरि रक्तचंदनेन मंडलकं कृत्वा ततस्ताम्रपात्रे रक्तचंदनोदकश्वेतचंदनादिद्रव्यैः प्रपूरणं कृत्वा तन्मध्ये हेमाक्षतदूर्वादधिसर्पींषि परिक्षिप्य स्थापयेत् ॥ ५४ ॥ स्वशरीरमालभेत् अनेन मंत्रेण ॥ ॐ खखोल्काय नमः ॥ सप्तवारानुच्चार्य स्थातव्यम् ॥ तेन शुद्धिरुपसंजायते देहस्यार्चार्हता भवति ॥ पश्चादासनस्थं देवं

१ सर्वजाप्यम्–इ०पा० । २ चात्र–इ० पा० । ३ पट्टादित्यम्–इ० पा० । ४ पट्टादित्यस्य–इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सवितारं मंडलमध्ये द्वादशात्मकं सुरादिभिः संपूज्यमानं ध्यात्वा पूर्वोक्तमर्घपात्रं शिरसि कृत्वा भूमौ जानुनी निपात्य सूर्याभिमुखस्तद्गतमना भूत्वार्घमंत्रमुदाहरेत् ॥ तदुच्यते सूर्यवक्त्राद्विनिर्गतमिति ॥ ५५ ॥ यस्योच्चारणशब्देन रथं संस्थाप्य भास्करः ॥ प्रतिगृह्णाति चैवार्घ्यं वरमिष्टं च यच्छति ॥ ५६ ॥ ॐयस्याहुः सप्त च्छंदांसि रथे तिष्ठंति वाजिनः ॥ अरुणः सारथिर्यस्य रथवाहोऽग्रतः स्थितः ॥ ५७ ॥ जया च विजया चैव जयंती पापनाशनी ॥ इडा च पिंगला चैव वहंतोऽश्वमुखास्तथा ॥ ५८ ॥ डिंडिश्च शेषनागश्च गणाध्यक्षस्तथैव च ॥ स्कंदरेवंततार्क्ष्याश्च तथा कल्माषपक्षिणौ ॥ ५९ ॥ राज्ञी च निक्षुभा देवी ललिता चैव संज्ञिका ॥ तथा यज्ञभुजो देवा ये चान्ये परिकीर्तिताः ॥ ६० ॥ एभिः परिवृतो योऽसावधरोत्तरवासिभिः ॥ तमहं लोककर्तारमाह्वयामि तमोपहम् ॥ ६१ ॥ अम्मयो भगवान्भानुरमुं यज्ञं प्रवर्तयन् ॥ इदमर्घ्यं च पाद्यं च प्रगृहाण नमोनमः ॥ ६२ ॥ आवाहनम् ॥ सहस्रकिरण वरद जीवनरूप ते नमः ॥ इति सांनिध्यकरणम् ॥ ॐवषट् इत्युच्चार्य सूर्यस्य चरणयुगलं पश्यन् भुवि पद्भ्यां[1] पात्रीं निर्वापयेत् पाद्यं तदुच्यते ॥ एवं पाद्यं दत्त्वा बद्धांजलिः सुस्वागतमिति कुर्यात् ॥ स्वागतं भगवन्नेहि मम प्रसादं विधाय आस्यताम् ॥ इह गृहाण पूजां च प्रसादं च धिया कुरु ॥ तिष्ठ त्वं तावदत्रैव यावत्पूजां करोम्यहम् ॥ ६३ ॥ एवं विज्ञापनं दद्यादनेन मंत्रेण कमलासनम् ॥ तत्कमलासनं कमलनंदन उपाविशति ॥ आसन उपविष्टस्य शेषां पूजां नियोजयेत् अनेन विधानेन ॥ ॐसोममूर्तिक्षीरोदपतये नमः ॥ इति क्षीरादिस्नपनम् ॥ ॐभास्कराय नीरव सिने नमः ॥ इति जलस्नानम् ॥ ततो वासोयुगं शुभ्रं दद्यात् अनेन मंत्रेण ॥ इदं वासोयुगं सूर्य गृहाण कृपया मम ॥ कटिभूषणमेकं ते द्वितीयं चांगप्रावरणंम्[2] ॥ ६४ ॥ ततो यज्ञोपवीतं दद्यात् अनेन मंत्रेण ॥ सूत्रतंतुमयं शुद्धं पवित्रमिदमुत्तमम् ॥ यज्ञोपवीतं देवेश प्रगृहाण नमोऽस्तु ते ॥ ६५ ॥ ततो यथाशक्ति श्वेतमुकुटमुद्रिकादिभूषणानि दद्यात् अनेन मंत्रेण ॥ मुकुटो रत्नबद्धोऽयं मुद्रिकां भूषणानि च ॥ अलंकारं गृहाणेमं मया भक्त्या समर्पितम् ॥ ६६॥ एवमलंकारं निवेद्य पश्चात्केशरकुंकुमकर्पूररक्तचंदनमिश्रमनुलेपनं दद्यात् ॥ ६७ ॥ ॐ तवातिप्रिय वृक्षाणां रसोऽयं तिग्मदीधिते ॥ स तवैवोचितः स्वामिन्गृहाण कृपया मम ॥ ६८ ॥ ततश्चंपकजपाकरवीरकर्णककेसरकोकनदादिभिः पूजां कुर्यात् ॥ ६९ ॥ ॐवनस्पतिरसो दिव्यो गंधाढ्यो गंध उत्तमः ॥ आहारः[3] सर्वदेवानां धूपोऽयं प्रतिगृह्यताम् ॥ ७० ॥ शल्लकीधूपमंत्रः[4] ॥ ततः

१ पद्भ्याम्--सूर्यपादाभ्याम्--तदर्थम्--इत्यर्थः । २ अक्षराधिक्यमार्षम् । ३ आघ्रेयः सर्वदेवानाम्--इति सर्वजनसुप्रसिद्धः पाठः । ४ मल्लकीधूपमंत्रः--इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पायसादिनिष्पन्नं नैवेद्यं निवेदयेदनेन मंत्रेण ॥ नैवेद्यममृतं सर्वभूतानां प्राणवर्धनम् ॥ पूर्णपात्रे मया दत्तं प्रतिगृह्ण प्रसीद मे ॥ ७१ ॥ ततः शौचोदकतांबूलदीपारार्तिकशीतलिकापुनःपूजादि निवेद्य यथाशक्त्या स्तुत्वा सुकृतं दुष्कृतं वा क्षमस्वेति प्रोच्य विसर्जयेत् ॥ ततो भूयो नमस्य हेमवस्त्रोपवीतालंकारान् ब्राह्मणाय निवेद्य निर्माल्यं संहृत्यांभसि निक्षिपेत् ॥ ७२ ॥ इत्यर्घ्यदानविधिः ॥ य एवं भास्करायार्घ्यं मूर्तौ मंडलकेऽपि वा ॥ नित्यं निवेदयेत्प्रातः स्याद्रवेरात्मवत्प्रियः ॥ ७३ ॥ अनेन विधिना कर्णो भास्कराघ्यं प्रयच्छति ॥ ततः सूर्यस्य पार्थासावात्मवद्वल्लभो मतः ॥ ७४ ॥ अशक्तश्चेन्नित्यमेकमर्घ्यं दद्याद्दिवाकृते ॥ ततोऽत्र रथसप्तम्यां कुंडे देयः प्रयत्नतः ॥ ७५ ॥ अश्वमेधफलं प्राप्य सूर्यलोकमवाप्नुयात् ॥ तस्मात्सर्वप्रयत्नेन दातव्योऽर्घोऽत्र भारत ॥ ७६ ॥ एवंविधस्त्वसौ देवो भट्टादित्योऽत्र[१] तिष्ठति ॥ भूयानतोऽपि बहुशः पापहा धर्मवर्धनः ॥ ७७ ॥ दिव्यमष्टविधं चात्र सद्यः प्रत्ययकारकम् ॥ पापानां चोपभुक्तं हि यथा पार्थ हलाहलम् ॥ ७८ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां प्रथमे माहेश्वरखण्डे कौमारिकाखण्डे सागरसंगमे भट्टादित्यमाहात्म्यवर्णनंनाम त्रिचत्वारिंशोऽध्यायः ॥ ४३ ॥

॥ ॥ छ ॥ ॥ अर्जुन उवाच ॥ ॥ दिव्यप्राकारमिच्छामि श्रोतुं चाहं मुनीश्वर ॥ कथं कार्याणि कानीह स्फुटं यैः पुण्यपापकम् ॥ १ ॥

॥ ॥ नारद उवाच ॥ ॥ शपथाः कोशघटकौ विषाग्नी तप्तमाषकौ ॥ फलं च तंदुलं चैव दिव्यान्यष्टौ विदुर्बुधाः ॥ २ ॥ असाक्षिकेषु चार्थेषु मिथो विवदमानयोः ॥ राजद्रोहाभिशापेषु साहसेषु तथैव च ॥ ३ ॥ अविदस्तत्त्वतः सत्यं शपथेनाभिलंघयेत् ॥ महर्षिभिश्च देवैश्च सत्यार्थाः शपथाः कृताः ॥ ४ ॥ जवनो नृपतिः क्षीणो मिथ्याशपथमाचरेत् ॥ वसिष्ठाग्रे वर्षमध्ये सान्वयः किल भारत ॥ ५ ॥ अंधः शत्रुगृहं गच्छेद्यो मिथ्याशपथांश्चरेत् ॥ रौरवस्य स्वयं द्वारमुद्घाटयति दुर्मतिः ॥ ६ ॥ मन्यंते वै पापकृतो न कश्चित्पश्यतीति नः ॥ तांश्च देवाः प्रपश्यंति स्वस्यैवांतरपौरुषाः ॥ ७ ॥ आदित्यचंद्रावनिलोऽनलश्च द्यौर्भूमिरापो हृदयं यमश्च ॥ अहश्च रात्रिश्च उभे च संध्ये धर्मो हि जानाति नरस्य वृत्तम् ॥ ८ ॥ एवं तस्मादभिज्ञाय[३] सत्यार्थशपथांश्चरेत् ॥ वृथा हि शपथान्कुर्वन्प्रेत्य चेह विनश्यति ॥ ९ ॥ इदं सत्यं वदामीति ब्रुवन्साक्षी भवान्यतः ॥ शुभाशुभफलं देहि शुचिः पादौ रवेः स्पृशेत् ॥ १० ॥ अथ शास्त्रस्य विप्रोऽपि शस्त्रस्यापि

१ पट्टादित्यः--इत्येव--सर्वत्र--भट्टादित्यस्थाने पाठः । २ असि--इ० पा० । ३ अविज्ञाय--इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

च क्षत्रियः ॥ मां[1] संस्पृशंस्तथा वैश्यः शूद्रः स्वगुरुमेव च ॥ ११ ॥ मातरं पितरं पूज्यं स्पृशेत्साधारणं त्विदम् ॥ कोशस्य रूपं पूर्वं ते व्याख्यातं पांडुनंदन ॥ १२ ॥ विप्रवर्ज्यं तथा कोशं वर्णिनां दापयेन्नृपः ॥ यो यो यद्देवताभक्तः पाययेत्तस्य तं नरम् ॥ १३ ॥ समभक्तं च देवानामादित्यस्यैव पाययेत् ॥ सर्वेषां चोग्रदेवानां स्नापयेदायुधास्त्रकम् ॥ १४ ॥ स्नानोदकं वा संकल्पं गृहीत्वा पाययेन्नवम् ॥ त्रिसप्तरात्रमध्ये च फलं कोशस्य निर्दिशेत् ॥ १५ ॥ अतः परं महादिव्यविधानं शृणु यद्भवेत् ॥ संशयच्छेदि सर्वेषां धाष्टर्यात्तद्दिव्यमेव च ॥ १६ ॥ सशिरस्कं प्रदातव्यमिति ब्रह्मा पुराब्रवीत् ॥ महोग्राणां च दातव्यमशिरस्कमपि स्फुटम् ॥ १७ ॥ साधूनां वर्णिनां राजा न शिरस्कं प्रदापयेत् ॥ न प्रवाते धटं देयं नोष्णकाले हुताशनम् ॥ १८ ॥ वर्णिनां च तथा कालं तंडुलं मुखरोगिणाम् ॥ १९ ॥ कुष्ठपित्तार्दितानां च ब्राह्मणानां च नो विषम् ॥ तप्तमाषकमर्हंति सर्वे धर्म्यं निरत्ययम् ॥ २० ॥ न व्याधिमरके देशे शपथान्कोशमेव च ॥ दिव्यान्यासुरकैर्मंत्रैः स्तंभयंतीह केचन ॥ २१ ॥ प्रतिघातविदस्तेषां योजयेद्धर्मवत्सलान् ॥ दिव्यानां स्तंभकाञ्ज्ञात्वा पापान्नित्यं महीपतिः ॥ २२ ॥ विवासयेत्स्वकाद्राष्ट्रात्ते हि लोकस्य कंटकाः ॥ तेषामन्वेषणे यत्नं राजा नित्यं समाचरेत् ॥ २३ ॥ ते हि पापसमाचारास्तस्करेभ्योऽपि तस्कराः ॥ प्राग्दृष्टदोषान्स्वल्पेषु दिव्येषु विनियोजयेत् ॥ २४ ॥ महत्स्वपि न चार्थेषु धर्मज्ञान्धर्मवत्सलान् ॥ न मिथ्यावचनं येषां जन्मप्रभृति विद्यते ॥ २५ ॥ श्रद्दध्यात्पार्थिवस्तेषां वचनादेव भारत ॥ ज्ञात्वा धर्मिष्ठतां राजा पुरुषस्य विचक्षणः ॥ २६ ॥ क्रोधाल्लोभात्कारयंश्च स्वयमेव प्रदुष्यति ॥ तस्मात्पापिषु दिव्यं स्यात्तत्रादौ प्रोच्यते धटे ॥ २७ ॥ सुसमायां पृथिव्यां च दिग्भागे पूर्वदक्षिणे ॥ यज्ञियस्य तु वृक्षस्य स्थाप्यं स्यान्मुंडकद्वयम्[2] ॥ २८ ॥ स्तंभकस्य प्रमाणं च सप्तहस्तं प्रकीर्तितम् ॥ द्वौ हस्तौ निखनेत्काष्ठं दृश्यं स्याद्धस्तपंचकम् ॥ २९ ॥ अंतरं तु तयोः कार्यं तथा हस्तचतुष्टयम् ॥ मुंडकोपरि[3] काष्ठं च दृढं कुर्याद्विचक्षणः ॥ ३० ॥ चतुर्हस्तं तुलाकाष्ठमव्रणं कारयेत्स्थिरम् ॥ खदिरार्जुनवृक्षाणां शिंशपाशालजं त्वथ ॥ ३१ ॥ तुलाकाष्ठे तु कर्तव्यं तथा वै शिक्यकद्वयम् ॥ प्राङ्मुखो निश्चलः कार्यः शुचौ देशे धटस्तथा ॥ ३२ ॥ पाषाणस्यापि जायेत स्तंभेषु च धटस्तथा ॥ वणिक्सुवर्णकारो वा कुशलः कांस्यकारकः ॥ ३३ ॥ तुलाधारधरः कार्यो रिपौ मित्रे च यः समः ॥ श्रावयेत्प्राड्विवाकोऽपि तुलाधारं विचक्षणः ॥ ३४ ॥

---

१ मां—संस्पृशन्—इति पदच्छेदो बोध्यः । मा संस्पृशम्—इ० पा० । कस्मिंश्चित्पुस्तके—'वृत्तिम्'—इति पर्यायशब्दो लिखितो दृश्यते । अत्र सुधीभिः—मां—नारदं संस्पृशन्—नारदस्य शपथं कुर्वन्—इत्यर्थो बोध्यः । यद्वा—वृत्तिं स्पृशन्—इति पाठे—स्वकीयं पण्यं स्पृष्ट्वा शपथं कुर्वन्—इत्यर्थो वा बोध्यः । अयं द्वितीयोर्थ एव सयुक्तिकः प्रतिभाति । २ स्तंभकद्वयम्—इ० पा० । ३ मंडलोपरि—इ० पा० ।

CC-0. In Public Domain. Digitization by eGangotri

ब्रह्मघ्ने ये स्मृता लोका ये च स्त्रीबालघातके ॥ तुलाधारस्य ते लोकास्तुलां धारयतो मृषा ॥३५॥ एकस्मिंस्तोलयेच्छिक्ये ज्ञातं सूपोषितं नरम् ॥
द्वितीये मृत्तिकां शुभ्रां गौरां तु तुलयेद्बुधः ॥ ३६ ॥ इष्टिकाभस्मपाषाणकपालास्थीनि वर्जयेत् ॥ तोलयित्वा ततः पूर्वं तस्मात्तमवतारयेत् ॥
॥ ३७ ॥ मूर्ध्नि पत्रं ततो न्यस्य न्यस्तपत्रं निवेशयेत् ॥ पत्रे मंत्रस्त्वयं लेख्यो यः पुरोक्तः स्वयंभुवा ॥ ३८ ॥ ब्रह्मणस्त्वं सुता देवि तुलानाम्नेति
कथ्यते ॥ तुकारो गौरवे नित्यं लकारो लघुनि स्मृतः ॥३९॥ गुरुलाघवसंयोगात्तुला तेन निगद्यसे ॥ संशयान्मोचयस्वैनमभिशस्तं नरं शुभे ॥४०॥
भूय आरोपयेत्तं तु नरं तस्मिन्सपत्रकम् ॥ तुलितो यदि वर्धेत शुद्धो भवति धर्मतः ॥ ४१ ॥ हीयमानो न शुद्धः स्यादिति धर्मविदो विदुः ॥
शिक्यच्छेदे तुलाभंगे पुनरारोपयेन्नरम् ॥४२॥ एवं निःसंशयं ज्ञानं यच्चान्यायं न लोपयेत् ॥ एतत्सर्वं रवौ वारे कार्यं संपूज्य भास्करम् ॥ ४३ ॥
अथातः संप्रवक्ष्यामि विषदिव्यं शृणुष्व मे ॥ ४४ ॥ द्विप्रकारं च तत्प्रोक्तं घटसर्पविषं तथा ॥ शृंगिणो वत्सनाभस्य हिमशैलभवस्य वा ॥ ४५ ॥
यवाः सप्त प्रदातव्या अथवा षड्घृतप्लुताः ॥ मूर्ध्नि विन्यस्तपत्रस्य पत्रे चैवं निवेशयेत् ॥ ४६ ॥ त्वं विष ब्रह्मणः पुत्र सत्यधर्मे व्यवस्थितः ॥
त्रायस्वैनं नरं पापात्सत्येनास्य भवामृतम् ॥ ४७ ॥ येन वेगैर्विना जीर्णं छर्दिमूर्च्छाविवर्जितम् ॥ तं तु शुद्धं विजानीयादिति धर्मविदो विदुः ॥
॥ ४८ ॥ क्षुधितं क्षुधितः सर्पं घटस्थं प्रोच्य पूर्ववत् ॥ संस्पृशेत्तालिकाः सप्त न दशेच्छुध्यतीति सः ॥ ४९ ॥ अग्निदिव्यं यथा प्राह विरंचि
स्तच्छृणुष्व मे ॥ सप्तमंडलकान्कुर्याद्देवस्याग्रे रवेस्तथा ॥ ५० ॥ मंडलान्मंडलं कार्यं पूर्वेणेति विनिश्चयः ॥ षोडशांगुलकं कार्यं मंडलात्तावदं
तरम् ॥ ५१ ॥ आर्द्रवाससमाहूय तथा चैवाप्युपोषितम् ॥ कारयेत्सर्वदिव्यानि देवब्राह्मणसंनिधौ ॥ ५२ ॥ प्रत्यक्षं कारयेद्दिव्यं राज्ञो वाधि
कृतस्य वा ॥ ब्राह्मणानां श्रुतवतां प्रकृतीनां तथैव च ॥ ५३ ॥ पश्चिमे दिनकाले हि प्राङ्मुखः प्राञ्जलिः शुचिः ॥ चतुरस्रे मंडलेऽन्ये कृत्वा चैव
समौ करौ ॥ ५४ ॥ लक्षयेयुः कृतादीनि हस्तयोस्तस्य हारिणः ॥ सप्ताश्वत्थस्य पत्राणि बध्नीयुः करयोस्ततः ॥ ५५ ॥ नवेन कृतसूत्रेण कार्पा
सेन दृढं यथा ॥ ततस्तु सुसमं कृत्वा अष्टांगुलमथायसम् ॥ ५६ ॥ पिंडं हुताशसंतप्तं पंचाशत्पलिकं दृढम् ॥ आदौ पूजां रवेः कृत्वा हुताशस्याथ
कारयेत् ॥ ५७ ॥ रक्तचंदनधूपाभ्यां रक्तपुष्पैस्तथैव च ॥ अभिशस्तस्य पत्रं च बध्नीयाच्चैव मूर्धनि ॥ ५८ ॥ मंत्रेणानेन संयुक्तं ब्राह्मणाभिहि
तेन च ॥ त्वमग्ने वेदाश्चत्वारस्त्वं च यज्ञेषु हूयसे ॥ ५९ ॥ पापं पुनासि वै यस्मात्तस्मात्पावक उच्यसे ॥ त्वं मुखं सर्वदेवानां त्वं मुखं ब्रह्मवादि ॥१७३॥
नाम् ॥ ६० ॥ जठरस्थोऽसि भूतानां ततो वेत्सि शुभाशुभम् ॥ पापेषु दर्शयात्मानमर्चिष्मान्भव पावक ॥ ६१ ॥ अथवा शुद्धभावेषु शीतो भव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

महाबल ॥ ततोऽभिशस्तः शनकैर्मंडलानि परिक्रमेत् ॥ ६२ ॥ परिक्रम्य शनैर्जह्याल्लोहपिंडं ततः क्षितौ ॥ विपत्रहस्तं तं पश्चात्कारयेद्व्रीहिमर्दनम् ॥ ६३ ॥ निर्विकारौ करौ दृष्ट्वा शुद्धो भवति धर्मतः ॥ भयाद्वा पातयेद्यस्तु तदधो वा विभाव्यते ॥ ६४ ॥ पुनस्त्वाहारयेल्लोहं विधिरेष प्रकीर्तितः ॥ अथातः संप्रवक्ष्यामि तप्तमाषविधिं शृणु ॥ ६५ ॥ कारयेदायसं पात्रं ताम्रं वा षोडशांगुलम् ॥ चतुरंगुलखातं तु मृन्मयं वापि कारयेत् ॥ ६६ ॥ पूरयेद्घृततैलाभ्यां पलैर्विंशतिभिस्ततः ॥ सुतप्ते निक्षिपेत्तत्र सुवर्णस्य तु माषकम् ॥ ६७ ॥ वह्नयुक्तं विन्यसेन्मंत्रमभिशस्तस्य मूर्धनि ॥ अंगुष्ठांगुलियोगेन तप्तमाषं समुद्धरेत् ॥ ६८ ॥ शुद्धं ज्ञेयमसंदिग्धं विस्फोटादिविवर्जितम् ॥ फालशुद्धिं प्रवक्ष्यामि तां शृणु त्वं धनंजय ॥ ६९ ॥ आयसं द्वादशपलं घटितं फालमुच्यते ॥ अष्टांगुलमदीर्घं च चतुरंगुलविस्तृतम् ॥ ७० ॥ वह्नयुक्तं विन्यसेन्मंत्रमभिशस्तस्य मूर्धनि ॥ त्रिः परावर्तयेज्जिह्वां लिहन्नस्मात्षडंगुलम् ॥ ७१ ॥ गवां क्षीरं प्रदातव्यं जिह्वाशोधनमुत्तमम् ॥ जिह्वापरीक्षणं कुर्याद्दग्धा चेन्न विमोच्यते ॥ ॥ ७२ ॥ तं विशुद्धं विजानीयाद्विशुद्धा चेत्तु जायते ॥ तंदुलस्याथ वक्ष्यामि विधिधर्मं सनातनम् ॥ ७३ ॥ चौर्ये तु तंदुला देया न चान्यत्र कथंचन ॥ तंदुलानुदके सिक्त्वा रात्रौ तत्रैव स्थापयेत् ॥ ७४ ॥ प्रभाते कारिणे देया भक्षणाय न संशयः ॥ त्रिःकृत्वः प्राङ्मुखश्चैव पत्रे निष्ठीवयेत्ततः ॥ ७५ ॥ पिप्पलस्याथ भूर्जस्य न त्वन्यस्य कथंचन ॥ तांस्तु वै कारयेच्छुद्धांस्तंदुलाञ्छालिसंभवान् ॥ ७६ ॥ मृन्मये भाजने कृत्वा सवितुः पुरतः स्थितः ॥ तन्दुलान्मंत्रयेच्छुद्धान्मन्त्रेणानेन धर्मतः ॥ ७७ ॥ दीयसे धर्मतत्त्वज्ञैर्मानुषाणां विशोधनम् ॥ स्तुतस्तन्दुल सत्येन धर्मतस्त्रातुमर्हसि ॥ ७८ ॥ निष्ठीवने कृते तेषां सवितुः पुरतः स्थिते ॥ शोणितं दृश्यते यस्य तमशुद्धं विनिर्दिशेत् ॥ ७९ ॥ एवमष्टविधं दिव्यं पापसंशयच्छेदनम् ॥ भट्टादित्यस्य पुरतो जायते कुरुनंदन ॥ ८० ॥ जलदिव्यं तथा प्राहुर्द्विप्रकारं पुराविदः ॥ जलहस्तं स्मृतं चैकं मज्जनं चापरं विदुः ॥ ८१ ॥ बाणक्षेपस्तथादानं यावद्वीर्यवताःकृतम् ॥ तावत्तं मज्जयेज्जीवेत्तथा तच्छुद्धिमादिशेत् ॥ ८२ ॥ एवंविधमिदं स्थानं भट्टादित्यस्य भारत ॥ ममैव कृपया भानोर्जातमेतन्महीतले ॥ ८३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां प्रथमे माहेश्वरखण्डे कौमारिकाखण्डे भट्टादित्यमाहात्म्ये दिव्यवर्णनंनाम चतुश्चत्वारिंशोऽध्यायः ॥४४॥ ॥छ॥ ॥ नारद उवाच ॥ ॥ तथा बहूदकस्थाने कथामाकर्णयाद्भुताम् ॥ यस्माद्बहूदकं कुण्डं कामरूपे यदस्ति च ॥१॥ तदस्ति चात्र संक्रांतं तस्मात्प्रोक्तं बहूदकम् ॥ कपिलेनात्र

१ आवारयेत्-इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तप्त्वा च वर्षाणि सुबहून्यपि ॥ २ ॥ स्थापितं शोभनं लिंगं कपिलेश्वरसंज्ञितम् ॥ तच्च लिंगं सदा पार्थ नन्दभद्र इति स्मृतः ॥३॥ वाणिक्संपूज
यामास त्रिकालं च कृतादरः ॥ सर्वधर्मविशेषज्ञः साक्षाद्धर्म इवापरः ॥४॥ नाज्ञातं तस्य किंचिच्च यद्धर्मेषु प्रकीर्त्यते॥सर्वेषां च सुहृन्नित्यं सर्वेषां च
हिते रतः ॥५॥ कर्मणा मनसा वाचा धर्ममेनमुपाश्रितः ॥ न भूतो न भविष्यश्च न स धर्मोऽस्ति किंचन ॥६॥ विदोषो यो हि सर्वत्र निश्चित्यैवं
व्यवस्थितः ॥ अस्य धर्मसमुद्रस्य संप्रवृद्धस्य सर्वतः ॥ ७ ॥ निर्मथ्य नन्दभद्रेण आहृतं तन्निशामय ॥ वाणिज्यं मन्यते श्रेष्ठं जीवनाय तदा
स्थितः ॥ ८ ॥ परिच्छिन्नैः काष्ठतृणैः शरणं[1] तेन कारितम् ॥ मद्यवर्जं भेदवर्जं कूटवर्जं समं तथा ॥ ९ ॥ सर्वभूतेषु वाणिज्यमल्पलाभेन सोऽचरत् ॥
अमायया परेभ्योऽसौ गृहीत्वैव क्रयाणकम् ॥ १० ॥ अमाययैव भूतेभ्यो विक्रीणात्यस्य सद्व्रतम् ॥ केचिद्यज्ञं प्रशंसंति नन्दभद्रो न मन्यते
॥ ११ ॥ दोषमेनं विनिश्चित्य शृणु तं पांडुनन्दन ॥ लुब्धोऽनृती दांभिकश्च स्वप्रशंसापरायणः ॥ १२ ॥ यजन्यज्ञैर्जगद्धंति स्वं चांधतमसं
नयेत् ॥ अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते ॥ १३ ॥ आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः ॥ यद्यदा यजमानस्य ऋत्विजो
द्रव्यमेव च ॥ १४ ॥ चौरप्रायस्य कलुषाज्जन्म जायेज्जनस्य हि ॥ अदक्षिणे वृथा यज्ञे कृते चाप्यविधानतः ॥ १५ ॥ पशवो लकुटैर्हन्युर्यजमानं
मृतं हताः ॥ तस्माच्छुद्धैर्यवद्द्रव्यैर्यजमानः शुभः स्मृतः ॥ १६ ॥ यज्ञ एवं विचार्यासौ यज्ञसारं समास्थितः ॥ श्रद्धया देवपूजा या नम
स्कारः स्तुतिः शुभा ॥ १७ ॥ नैवेद्यं हविषश्चैव यज्ञोऽयं हि विकल्मषः ॥ स एव यज्ञः प्रोक्तो वै येन तुष्यन्ति देवताः ॥ १८ ॥ केचिच्छंसन्ति
संन्यासं नन्दभद्रो न मन्यते ॥ यो हि संन्यस्य विषयान्मनसा गृह्यते[2] पुनः ॥ १९ ॥ उभयभ्रष्ट एवासौ भिन्ना[3] भूमिर्विनश्यति ॥ संन्यासस्य तु
यत्सारं तत्तेनावृतमुत्तमम् ॥ २० ॥ कस्यचिन्नैव कर्माणि शपते वा प्रशंसति ॥ नानामार्गस्थिताँल्लोकांश्चन्द्रवल्लीयते क्षितौ ॥ २१ ॥ न
द्वेष्टि नो कामयते न विरुद्धोऽनुरुध्यते ॥ समाश्मकांचनो धीरस्तुल्यनिंदात्मसंस्तुतिः ॥ २२ ॥ अभयः सर्वभूतेभ्यो यथांधबधिराकृतिः ॥ न कर्म
णां फलाकांक्षा शिवस्याराधनं हि तत् ॥ २३ ॥ कारणाद्धर्ममन्विच्छन्न लोभं[4] च ततश्चरन् ॥ २४ ॥ विविच्य नंदभद्रस्तत्सारं मोक्षेषु जगृहे[5] ॥
कृषिं केचित्प्रशंसंति नंदभद्रो न मन्यते ॥ २५ ॥ यस्यां छिंदंति वृषणा वृषाणां चैव नासिकाम् ॥ कर्षयंति महाभारान्बध्नंति दमयंति च ॥२६॥

१ शरणं—गृहम्—इत्यर्थः । २ गृह्यते—गृह्णाति—इत्यर्थः । विकरणव्यत्ययोऽत्रार्षः । अस्य क्र्यादिगणपठितत्वाच्छ्ना भाव्यम् । परमत्र श्यना निर्देशः । ३ छिन्ना—इ० पा० । ४ लोकम्—इ० पा०

५ न विद्यते नरस्त्वेतत्सारं मोक्षेषु जगृहे—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

बहुदंशमयान्देशान्नयंति बहुकर्दमान् ॥ वाहसंपीडिता धुर्याः सीदंत्यविधिना परे ॥ २७ ॥ मन्यंते भ्रूणहत्यापि विशिष्टा नास्य कर्मणः ॥ अघ्न्या इति गवां नाम श्रुतौ ताः पीडयेत्कथम् ॥ २८ ॥ भूमिं भूमिशयांश्चैव हंति काष्ठमयोमुखम् ॥ पंचेंद्रियेषु जीवेषु सर्वं वसति दैवतम् ॥ २९ ॥ आदित्यश्चंद्रमा वायुः प्रभृत्यैव च तांस्तु यः ॥ विक्रीणाति सुमूढस्य तस्य का नु विचारणा ॥ ३० ॥ अजोऽग्निर्वरुणो मेषः सूर्यश्च पृथिवी विराट् ॥ धेनुर्वत्सश्च सोमो वै विक्रीयैतान्न सिध्यति ॥ ३१ ॥ एवंविधसहस्रैश्च युता दोषैः कृषिः सदा ॥ अष्टागवं स्याद्धि हलं त्रिंशद्भागं त्यजेत्कृषेः ॥३२॥ धर्मे दद्यात्पशून्वृद्धान्पुष्यादेषां[1] कृषिः कुतः ॥ सारमेतत्कृषेस्तेन नंदभद्रेण चाहृतम् ॥३३॥ विसाधितव्यान्यन्नानि[2] स्वशक्त्या देवपितृषु ॥ मनुष्य द्विजभूतेषु नियुज्यांश्नीत[3] सर्वदा ॥ ३४ ॥ केचिच्छंसंति चैश्वर्यं नंदभद्रो न मन्यते ॥ मानुषा मानुषानेव दासभावेन भुंजते ॥ ३५ ॥ वधबंध निरोधेन पीडयंति दिवानिशम् ॥ देहं किमेतद्धातुः स्वं मातुर्वा जनकस्य वा ॥ ३६ ॥ मातुः पितुर्वा बलिनः क्रेतुरग्नेः शुनोऽपि वा ॥ इति सं चिंत्य व्यहरन्नमरा इव ईश्वराः ॥३७॥ ऐश्वर्यमदपापिष्ठा महामद्यमदादयः ॥ ऐश्वर्यमदमत्तो हि ना[4] पतित्वा हि माद्यति ॥ ३८ ॥ आत्मवत्सर्वभूत्येषु श्रिया नैव च माद्यति ॥ ३९ ॥ आत्मप्रत्ययवान्देही क्वेश्वरश्चेदृशोऽस्ति हि ॥ ऐश्वर्यस्यापि सारं स जग्राहैतन्निशामय ॥ ४० ॥ स्वशक्त्या सर्व भूतेषु यदसौ न पराङ्मुखः ॥ तीर्थायेके प्रशंसंति नंदभद्रो न मन्यते ॥ ४१ ॥ श्रमेण संकरात्तापशीतवातक्षुधा तृषा ॥ क्रोधेन धर्मगेहस्य ना[5]पि नाशमवाप्नुयात् ॥ ४२ ॥ सौख्येन वा धनस्यापि श्रद्धया स्वल्पगोर्थवान् ॥ समर्थो हि महत्पुण्यं शक्त आप्तुं क्व वास्ति सः ॥ ४३ ॥ सदा शुचि र्देवयाजी तीर्थसारं गृहेगृहे ॥ नापः पुनंति पापानि न शैला न महाश्रमाः ॥ ४४ ॥ आत्मा पुनाति पापानि यदि पापान्निवर्तते ॥ एवमेष समा चारं प्रादुर्भूतं ततस्ततः ॥ ४५ ॥ एकीकृत्य सदा धीमान्नंदभद्रः समास्थितः ॥ तस्यैवं वर्ततः साधोः स्पृहयंत्यपि देवताः ॥ ४६ ॥ वासवप्रमुखाः सर्वे विस्मयं च परं ययुः ॥ अत्रैव स्थानके चापि शूद्रोऽभूत्प्रतिवेश्मकः ॥ ४७ ॥ स नंदभद्रं धर्मिष्ठं पुनः पुनरसूयत ॥ नास्तिकः स दुराचारः सत्यव्रत इति श्रुतः ॥ ४८ ॥ स सदा नंदभद्रस्य विलोकयति चांतरम् ॥ छिद्रं चेदस्य पश्यामि ततो धर्मान्निवर्तये ॥ ४९ ॥ स्वभाव एव क्रूराणां नास्तिकानां दुरात्मनाम् ॥ आत्मानं पातयंत्येव पातयंत्यपरं च यत् ॥ ५० ॥ ततस्त्वेवं वर्ततोऽस्य नंदभद्रस्य धीमतः ॥ एकोऽभूत्त

१ पशूनेष वणिक्सुतः--इ० पा० । २ विसाधितव्यानि--विनियोज्यानि--इत्यर्थः । ३ नियुज्याश्नाति सर्वदा--इ०, नियुज्यान्नानि सर्वदा--इ० च पा० । ४ ना--नरः--इत्यर्थः । ५ ना--अपि--इति पदच्छेदः । नरः--अपि--इत्यर्थः । ६ स्वल्पगोर्थवान्--स्वल्पधेनुरूपार्थयुक्तः--इत्यर्थः । ७ व्यधात्--इ० पा० ।

CC-0. In Public Domain. Digitization by eGangotri

नयः कष्टाद्वार्धिके सोऽप्यनश्यत ॥ ५१ ॥ तच्च दैवकृतं मत्वा न शुशोच महामतिः ॥ देवो वा मानवो वापि को हि दैवाद्विमुच्यते ॥ ५२ ॥ ततोऽस्य सुप्रिया भार्या सर्वैः साध्वीगुणैर्युता ॥ गृहधर्मस्य मूर्तिर्या साक्षादिव अरुंधती ॥ ५३ ॥ विनाशमागता पार्थ कनकानाम नामतः ॥ ततो यतेंद्रियोऽप्येष गृहधर्मविनाशतः ॥ ५४ ॥ शुशोच हा कष्टमिति पापोहमिति चासकृत् ॥ ततस्य चांतरं दृष्ट्वाऽहृष्यत्सत्यव्रतश्चिरात् ॥ ५५ ॥ उपाव्रज्य च हा कष्टं ब्रुवंस्तं नंदभद्रकम् ॥ दधिकर्ण इवासाद्य नंदभद्रमुवाच सः ॥ ५६ ॥ हा नंदभद्र यद्येवं तवाप्येवंविधं फलम् ॥ एतेन मन्ये मनसि धर्मोप्येष वृथैव यत् ॥ ५७ ॥ इत्यादि बहुधा प्रोच्य तत्तद्वाक्यं ततस्ततः ॥ सत्यव्रतस्ततः प्राह नंदभद्रं कृपान्वितः ॥ ५८ ॥ नंदभद्र सदा तुभ्यं वक्तुकामोस्मि किंचन ॥ प्रस्तावस्याप्यभावाच्च नोदितं च मया क्वचित् ॥ ५९ ॥ अप्रस्तावं ब्रुवन्वाक्यं बृहस्पतिरपि ध्रुवम् ॥ लभते बुद्ध्यवज्ञानमवमानं च हीनवत् ॥ ६० ॥ ॥ नन्दभद्र उवाच ॥ ॥ ब्रूहिब्रूहि न मे किंचित्साधु गोप्यं प्रियं परम् ॥ वचोभिः शुद्धसत्त्वानां न मोक्षोऽप्युपमीयते ॥ ६१ ॥ ॥ सत्यव्रत उवाच ॥ ॥ नवभिर्नवभिश्चैव विमुक्तं वाग्विदूषणैः ॥ नवभिर्बुद्धिदोषैश्च वाक्यं वक्ष्याम्यदोषवत् ॥ ६२ ॥ सौक्ष्म्यं संख्याक्रमश्चापि निर्णयः सप्रयोजनः ॥ पंचैतान्यर्थजातानि यत्र तद्वाक्यमुच्यते ॥ ६३ ॥ धर्ममर्थं च कामं च मोक्षं चोद्दिश्य चोच्यते ॥ प्रयोजनमिति प्रोक्तं प्रथमं वाक्यलक्षणम् ॥ ६४ ॥ धर्मार्थकाममोक्षेषु प्रतिज्ञाय विशेषतः ॥ इदं तदिति वाक्यांते प्रोच्यते स विनिर्णयः ॥ ६५ ॥ इदं पूर्वमिदं पश्चाद्वक्तव्यं यत्क्रमेण हि ॥ क्रमयोगं तमप्याहुर्वाक्यतत्त्वविदो बुधाः ॥ ६६ ॥ दोषाणां च गुणानां च प्रमाणं प्रविभागतः ॥ उभयार्थमपि प्रेक्ष्य सा संख्येत्युपधार्यताम् ॥ ६७ ॥ वाक्यज्ञेयेषु भिन्नेषु यत्राभेदः प्रदृश्यते ॥ तत्रातिशयहेतुत्वं तत्सौक्ष्म्यमिति निर्दिशेत् ॥ ६८ ॥ इति वाक्यगुणानां च वाग्दोषान्द्विनव शृणु ॥ अपेतार्थमभिन्नार्थमपवृत्तं तथाधिकम् ॥ ६९ ॥ अश्लक्ष्णं चापि संदिग्धं पदांते गुरु चाक्षरम् ॥ पराङ्मुखमुखं यच्च अनृतं चाप्यसंस्कृतम् ॥ ७० ॥ विरुद्धं यत्त्रिवर्गेण न्यूनं कष्टातिशब्दकम् ॥ व्युत्क्रमाभिहितं यच्च सशेषं चाप्यहेतुकम् ॥ ७१ ॥ निष्कारणं च वाग्दोषान्बुद्धिजाञ्छृणु त्वं च यान् ॥ कामात्क्रोधाद्भयाच्चैव लोभाद्दैन्यादनार्यकात् ॥ ७२ ॥ हीनानुक्रोशतो मानान्न च वक्ष्यामि किंचन ॥ वक्ता श्रोता च वाक्यं च यदा त्वविकलं भवेत् ॥ ७३ ॥ सममेति विवक्षायां तदा सोऽर्थः प्रकाशते ॥ वक्तव्ये तु यदा वक्ता श्रोतारमवमन्यते ॥ ७४ ॥ श्रोता चाप्यथ वक्तारं तदा वाक्यं न रोहति ॥ अथ यः स्वप्रियं ब्रूयाच्छ्रोतुर्वोत्सृज्य

१ प्रविभागशः—इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यद्दतम् ॥ ७५ ॥ विशंका जायते तस्मिन्वाक्यं तदपि दोषवत् ॥ तस्माद्यः स्वप्रियं त्यक्त्वा श्रोतुश्चाप्यथ यत्प्रियम् ॥ ७६ ॥ सत्यमेव प्रभाषेत स वक्ता नेतरो भुवि ॥ मिथ्यावादाञ्छास्त्रजालसंभवान्यद्विहाय च ॥ ७७ ॥ सत्यमेव व्रतं यस्मात्तस्मात्सत्यव्रतस्त्वहम् ॥ सत्यं ते संप्रवक्ष्यामि मंतुमर्हसि तत्तथा ॥ ७८ ॥ यदाप्रभृति भद्र त्वं पाषाणस्यार्चने रतः ॥ तदाप्रभृति किंचिच्च न हि पश्यामि शोभनम् ॥ ७९ ॥ एकः सोऽपि सुतो नष्टो भार्या चार्याऽप्यनश्यत ॥ कूटानां कर्मणां साधो फलमेवंविधं भवेत् ॥ ८० ॥ क्व देवाः संति मिथ्यैतद्दृश्यंते चेद्भवंत्यपि ॥ सर्वा च कूटविप्राणां द्रव्यायैषा विकल्पना ॥ ८१ ॥ पितॄनुद्दिश्य यच्छंति मम हासः प्रजायते ॥ अन्नस्योपद्रवं यच्च मृतो हि किमशिष्यत ॥ ८२ ॥ यत्त्विदं बहुधा मूढा वर्णयंति द्विजाधमाः ॥ विश्वनिर्माणमखिलं तथापि शृणु सत्यतः ॥ ८३ ॥ उत्पत्तिश्चापि भंगश्च विश्वस्यैतद्द्वयं मृषा ॥ एवमेव हि सर्वं च सदिदं वर्तते जगत् ॥ ८४ ॥ स्वभावतो विश्वमिदं हि वर्तते स्वभावतः सूर्यमुखा भ्रमंत्यमी ॥ स्वभावतो वायवो वांति नित्यं स्वभावतो वर्षति चांबुदोऽयम् ॥ ८५ ॥ स्वभावतो रोहति धान्यजातं स्वभावतो वर्षशीतातपत्वम् ॥ स्वभावतः संस्थिता मेदिनी च स्वभावतः सरितः संस्रवंति ॥ ८६ ॥ स्वभावतः पर्वता भांति नित्यं स्वभावतो वारिधिरेष संस्थितः ॥ स्वभावतो गर्भिणी संप्रसूते स्वभावतोऽमी बहवश्च जीवाः ॥ ८७ ॥ यथा स्वभावेन भवंति वक्रा ऋतुस्वभावाद्बदरीषु कण्टकाः ॥ तथा स्वभावेन हि सर्वमेतत्प्रकाशते कोऽपि कर्ता न दृश्यः ॥ ८८ ॥ तदेवं संस्थिते लोके मूढो मुह्यति मत्तवत् ॥ मानुष्यमपि यद्धूर्ता वदंत्यग्र्यं शृणुष्व तत् ॥ ८९ ॥ मानुष्यान्न परं कष्टं वैरिणां नो भवेद्धि तत् ॥ शोकस्थानसहस्राणि मनुष्यस्य[1] क्षणेक्षणे ॥ ९० ॥ मानुष्यं हि स्मृताकारं सभाग्योऽस्माद्विमुच्यते ॥ पशवः पक्षिणः कीटाः कृमयश्च यथासुखम् ॥ ९१ ॥ अबद्धा विहरंत्येते योनिरेषां सुदुर्लभा ॥ निश्चिंताः स्थावरा ह्येते सौख्यमेषां महद्भुवि ॥ ९२ ॥ बहुना किं मनुष्येभ्यः सर्वो धन्योऽन्ययोनिजः ॥ स्वभावमेव जानीहि पुण्यापुण्यादिकल्पना ॥ ९३ ॥ यदेके स्थावराः कीटाः पतंगा मानुषादिकाः ॥ तस्मान्मिथ्या परित्यज्य नंदभद्र यथासुखम् ॥ पिब[2] क्रीडनकैः सार्धं भोगान्सत्यमिदं भुवि ॥ ९४ ॥ ॥ नारद उवाच ॥ ॥ इत्यैतैरमुखै[3]र्वाक्यैरयुक्तैरसमंजसैः ॥ ९५ ॥ सत्यव्रतस्य नाकम्पन्नंदभद्रो महामनाः ॥ प्रहसन्निव तं प्राह स्वक्षोभ्यः सागरो यथा ॥ ९६ ॥ यद्भवानाह धर्मिष्ठाः सदा दुःखस्य भागिनः ॥ तन्मिथ्या दुःखजालानि पश्यामः पापिनामपि ॥ ९७ ॥ वधबंधपरिक्लेशाः पुत्रदारादि

१ मनुष्यत्वे—इ०पा० । २ पिब क्रीड जलं भुंक्ष्व—इ०पा० । ३ अमुखैः--अमुख्यैः--न तु साधुजनाभिनंदनीयैः--इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पंचता ॥ पापिनामपि दृश्यंते तस्माद्धर्मो गुरुर्मतः ॥ ९८ ॥ अयं साधुरहो कष्टं कष्टमस्य महाजनाः ॥ साधोर्वदंत्येतदपि पापिनां दुर्लभं त्विदम् ॥ ९९ ॥ दारादिद्रव्यलोभार्थं विशतः पापिनो गृहे ॥ भवानपि बिभेत्यस्माद्वेष्टि कुप्यति तद्वृथा ॥ १०० ॥ यथास्य जगतो ब्रूषे नास्ति हेतुर्महेश्वरः ॥ तद्बालभाषितं तुभ्यं किं राजानं विना प्रजाः ॥ १०१ ॥ यच्च ब्रवीषि पाषाणं मिथ्या लिंगं समर्चसि ॥ तद्भवाँल्लिंगमाहात्म्यं वेत्ति नांधो यथा रविम् ॥ १०२ ॥ ब्रह्मादयः सुरा सर्वे राजानश्च महर्द्धिकाः ॥ मानवा मुनयश्चैव सर्वे लिंगं यजंति च ॥ ॥ १०३ ॥ स्वनामकानि चिह्नानि तेषां लिंगानि संति च ॥ एते किं त्वभवन्मूर्खास्त्वं तु सत्यव्रतः सुधीः ॥ १०४ ॥ प्रतिष्ठाप्य पुरा ब्रह्मा पुष्करे नीललोहितम् ॥ प्राप्तवान्परमां सिद्धिं ससर्जेमाः प्रजाः प्रभुः ॥ १०५ ॥ विष्णुनापि निहत्याजौ रावणं पयसांनिधेः ॥ तीरे रामेश्वरं लिंगं स्थापितं चास्ति किं मुधा ॥ १०६ ॥ वृत्रं हत्वा पुरा शक्रो महेंद्रे स्थाप्य शंकरम् ॥ लिंगं विमुक्तपापोऽथ त्रिदिवेप्यपि मोदते ॥ १०७ ॥ स्थापयित्वा शिवं सूर्यो गंगासागरसंगमे ॥ निरामयोऽभूत्सोमश्च प्रभासे पश्चिमोदधौ ॥ १०८ ॥ काश्यां यमश्च धनदः सह्ये गरुडकश्यपौ ॥ नैमिषे वायुवरुणौ स्थाप्य लिंगं प्रमोदिताः ॥ १०९ ॥ अस्मिन्नेव स्तंभतीर्थे कुमारेशं गुहो विभुः ॥ लिंगं संस्थापयामास सर्वपापहरं न किम् ॥ ११० ॥ एवमन्यैः सुरैर्यानि पार्थिवैर्मुनिभिस्तथा ॥ संस्थापितानि लिंगानि तत्र संख्यातुमुत्सहे ॥ १११ ॥ पृथिवीवासिनः सर्वे ये च स्वर्गनिवासिनः ॥ पातालवासिनस्तृप्ता जायंते लिंगपूजया ॥ ११२ ॥ यच्च ब्रवीषि गीर्वाणा न संति सन्ति चेत्कुतः ॥ कुत्रापि नैव दृश्यंते तेन मे विस्मयो महान् ॥ ११३ ॥ रंकवत्किं स्म ते देवा याचंतां त्वां कुलत्थवत् ॥ यमिच्छसि महाप्राज्ञ साधको हि गुरुस्तव ॥ ११४ ॥ स्वभावान्नैव सर्वार्थाः संसिद्धा यदि ते मते ॥ भोजनादि कथं सिध्येद्वद कर्तारमंतरा ॥ ११५ ॥ बदरीमंतरेणापि दृश्यंते कण्टका न हि ॥ तस्मात्कस्यास्ति निर्माणं यस्य यावत्तथैव तत् ॥ ११६ ॥ यच्च ब्रवीषि पश्वाद्याः सुखिनो धन्यकास्त्वमी ॥ त्वदृते नेदमुक्तं च केनापि श्रुतमेव वा ॥ ११७ ॥ तामसा विकला ये च कष्टं तेषां च श्लाघ्यताम् ॥ सर्वेंद्रिययुताः श्रेष्ठाः कुतो धन्या न मानुषाः ॥ ११८ ॥ सत्यं तव व्रतं मन्ये नरकाय त्वयाऽऽदृतम् ॥ अत्यनर्थे न भीः कार्या कामोयं भविताचिरात् ॥ ११९ ॥ आदावाडंबरेणैव ध्रुवतोऽज्ञानमेव मे ॥ इत्थं निःसारता व्यक्तमादावाडंबरात्तु यत् ॥ १२० ॥ मायाविनां हि ब्रुवतां वाक्यं चाडंबरावृतम् ॥ कुनाणकमिवोद्दीप्तं परीक्षेयं सदा सताम् ॥ १२१ ॥ आदौ

१ मता--इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मध्ये तथा चांते येषां वाक्यमदोषवत् ॥ कषदाहैः स्वर्णमिव च्छेदेऽपि स्याच्छुभं शुभम् ॥ १२२ ॥ त्वयान्यथा प्रतिज्ञातमुक्तं चैवान्यथा पुनः ॥ त्वद्दोषो नायमस्माकं तद्वचः शृणुमो हि ये ॥ १२३ ॥ नास्तिकानां च सर्पाणां विषस्य च गुणस्त्वयम् ॥ मोहयंति परं यच्च दोषो नैष परस्य तु ॥ १२४ ॥ आपो वस्त्रं तिलास्तैलं गंधो वा स यथा तथा ॥ पुष्पाणामधिवासेन तथा संसर्गजा गुणाः ॥ १२५ ॥ मोहजालस्य यो योनिर्मूढैरिह समागमः ॥ अहन्यहनि धर्मस्य योनिः साधुसमागमः ॥ १२६ ॥ तस्मात्प्राज्ञैश्च वृद्धैश्च शुद्धभावैस्तपस्विभिः ॥ सद्भिश्च सह संसर्गः कार्यः शमपरायणैः ॥ १२७ ॥ न नीचैर्नाप्यविद्वद्भिर्नानात्मज्ञैर्विशेषतः ॥ येषां त्रीण्यवदातानि योनिर्विद्या च कर्म च ॥ १२८ ॥ तांश्च सेवेद्विशेषेण शास्त्रं येषां हि विद्यते ॥ असतां दर्शनस्पर्शसंजल्पासनभोजनैः ॥ १२९ ॥ धर्माचारात्प्रहीयंते न च सिध्यंति मानवाः ॥ बुद्धिश्च हीयते पुंसां नीचैः सह समागमात् ॥ १३० ॥ मध्यैश्च मध्यतां याति श्रेष्ठतां याति चोत्तमैः ॥ इति धर्मं स्मरन्नाहं संगमार्थी पुनस्तव ॥ यन्निन्दसि द्विजानेव यैरपेयोऽर्णवः कृतः ॥ १३१ ॥ वेदाः प्रमाणं स्मृतयः प्रमाणं धर्मार्थयुक्तं वचनं प्रमाणम् ॥ नैतत्त्रयं यस्य भवेत्प्रमाणं कस्तस्य कुर्याद्वचनं प्रमाणम् ॥ १३२ ॥ इतीरयित्वा वचनं महात्मा स नंदभद्रः सहसा तदैव ॥ गृहाद्विनिःसृत्य जगाम पुण्यं बहूदकं भट्टरवेस्तु कुंडम् ॥ १३३ ॥ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां प्रथमे माहेश्वरखण्डे कौमारिकाखंडे कपिलेश्वरतीर्थ माहात्म्ये नंदभद्रवणिग्वृत्तान्तवर्णनं नाम पञ्चचत्वारिंशत्तमोऽध्यायः ॥ ४५ ॥ ॥ छ ॥ ॥ नारद उवाच ॥ ॥ बहूदकस्य कुंडस्य तीरस्थं लिंगमुत्तमम् ॥ कपिलेश्वरमभ्यर्च्य नंदभद्रस्ततः सुधीः ॥ १ ॥ प्रणम्य चाग्रतस्तस्थौ प्रबद्धकरसंपुटः ॥ संसारचरितैः किंचिद्दुःखी गाथां व्यगायत ॥ २ ॥ स्रष्टारमस्य जगतश्चेत्पश्यामि सदाशिवम् ॥ नानापृच्छाभिरथ तं कुर्यां नाथं विलज्जितम् ॥ ३ ॥ अपूर्यमाणं तव किं जगत्संसृजनं विना ॥ निरीह बहुधा यत्ते सृष्टं भार्गववज्जगत् ॥ ४ ॥ सचेतनेन शुद्धेन रागादिरहितेन च ॥ अथ कस्मादात्मसदृशं न सृष्टं निर्मितं जडम् ॥ ॥ ५ ॥ निर्वैरेण समेनाथ सुखदुःखभवाभवैः ॥ ब्रह्मादिकीटपर्यन्तं किमेवं क्लिश्यते जगत् ॥ ६ ॥ कांश्चित्स्वर्गेऽथ नरके पातयंस्त्वं सदाशिव ॥ किं फलं समवाप्नोषि किमेवं कुरुषे वद ॥ ७ ॥ इष्टैः पुत्रादिभिर्नाथ वियुक्ता मानवा ह्यमी ॥ क्रंदंति करुणासार किं घृणापि भवेन्न ते ॥ ८ ॥ अतीव नोचितं सर्वमेतदीश्वर सर्वथा ॥ यत्ते भक्ताः समं पापैर्मज्जंते दुःखसागरे ॥ ९ ॥ एवंविधेन संसारचारित्रेण विमोहिताः ॥ स्थानांतरं न यास्यामि भोक्ष्ये पास्यामि नोदकम् ॥ १० ॥ मरणांतमेव यास्यामि स्थास्ये संचिंतयन्नदः ॥ स एवं विमृशन्नेव नंदभद्रः स्वयं

१ अत्यन्तम्--इ० पा० । २ तुभ्यम्--इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्थितः ॥ ११ ॥ ततश्चतुर्थे दिवसे बहूदकतटे शुभे ॥ कश्चिद्बालः सप्तवर्षः पीडापीडित आययौ ॥ १२ ॥ कृशोतीव गलत्कुष्ठी प्रमुह्यंश्च पदेपदे ॥ नंदभद्रमुवाचेदं कृच्छ्रात्संस्तभ्य बालकः ॥ १३ ॥ अहो सुरूपसर्वांग कस्माद्दुःखी भवानपि ॥ ततोस्य कारणं सर्वं व्याचष्ट नंदभद्रकः ॥ १४ ॥ श्रुत्वा तत्कारणं सर्वं बालो दीनमना ब्रवीत् ॥ अहो हा कष्टमत्युग्रं बुधानां यदबुद्धिता ॥ १५ ॥ संपूर्णेंद्रियगात्रा यन्मर्तुमिच्छंति वै वृथा ॥ मुहूर्ताद्धयत्र खट्वांगो मोक्षमार्गमुपागतः ॥ १६ ॥ तदहो भारतं खंडं सत्यायुषि त्यजेद्धि कः ॥ अहमेव दृढो मन्ये पितृभ्यां यो विवर्जितः ॥ १७ ॥ अशक्तश्चलितुं वापि मर्तुमिच्छामि नापि च ॥ सर्वे लाभाः सातिमाना इति सत्या बत श्रुतिः ॥ १८ ॥ संतोषोऽप्युचितस्तुभ्यं देहं यस्य दृढं त्विदम् ॥ शरीरं नीरुजं चेन्मे भवेदपि कथंचन ॥ १९ ॥ क्षणेक्षणे च तत्कुर्यां भुज्यते यद्युगेयुगे ॥ इंद्रियाणि वशे यस्य शरीरं च दृढं भवेत् ॥ २० ॥ सोऽप्यन्यदिच्छते चेच्च कोऽन्यस्तस्मादचेतनः ॥ शोकस्थानसहस्राणि हर्षस्थानशतानि च ॥ २१ ॥ दिवसे दिवसे मूढमाविशंति न पंडितम् ॥ न हि ज्ञानविरुद्धेषु बह्वपायेषु कर्मसु ॥ २२ ॥ मूलघातिषु सज्जंते बुद्धिमंतो भवद्विधाः ॥ अष्टांगां बुद्धिमाहुर्या सर्वाश्रेयोविघातिनीम् ॥ २३ ॥ श्रुतिस्मृत्यविरुद्धा सा बुद्धिस्त्वय्यस्ति निर्मला ॥ अथ कृच्छ्रेषु दुर्गेषु व्यांपत्सु[१] स्वजनस्य च ॥ २४ ॥ शारीरमानसैर्दुःखैर्न सीदंति भवद्विधाः ॥ नाप्राप्यमभिवांछंति नष्टं नेच्छंति शोचितुम् ॥ २५ ॥ आपत्सु च न मुह्यंति नराः पंडितबुद्धयः ॥ मनोदेहसमुत्थाभ्यां दुःखाभ्यामर्पितं जगत् ॥ २६ ॥ तयोर्व्याससमासाभ्यां शमोपायमिमं शृणु ॥ [२]व्याधेरनिष्टसंस्पर्शाच्छ्रमादिष्टविसर्जनात् ॥ २७ ॥ चतुर्भिः कारणैर्दुःखं शारीरं मानसं च यत् ॥ मानसं चाप्यप्रियस्य संयोगः प्रियवर्जनम् ॥ २८ ॥ द्विप्रकारं महाकष्टं द्वयोरेतदुदाहृतम् ॥ मानसेन हि दुःखेन शरीरमुपतप्यते ॥ २९ ॥ अयःपिंडेन तप्तेन कुंभसंस्थमिवोदकम् ॥ तदाशु प्रतिकाराच्च सततं च विवर्जनात् ॥ ३० ॥ व्याधेराधेश्च प्रशमः क्रियायोगद्वयेन तु ॥ मानसं शमयेत्तस्माज्ज्ञानेनाग्निमिवांबुना ॥ ३१ ॥ प्रशांते मानसे ह्यस्य शारीरमुपशाम्यति ॥ मनसो दुःखमूलं तु स्नेह इत्युपलभ्यते ॥ ३२ ॥ स्नेहाच्च सज्जनो नित्यं जन्तुर्दुःखमुपैति च ॥स्नेहमूलानि दुःखानि स्नेहजानि भयानि च ॥ ३३ ॥ शोकहर्षौ तथायासः सर्वं स्नेहात्प्रवर्तते ॥ ३४ ॥ स्नेहात्करणरागश्च प्रजज्ञे वैषयस्तथा ॥ अश्रेयस्कावुभावेतौ पूर्वस्तत्र गुरुः स्मृतः ॥ ३५ ॥ त्यागी तस्मान्न दुःखी स्यान्निर्वैरो निरवग्रहः ॥ अत्यागी जन्ममरणे प्राप्नोतीह पुनःपुनः ॥ ३६ ॥ तस्मात्स्नेहं न

१ अडभाव आर्षः । २ ह्यापत्सु--इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लिप्सेत मित्रेभ्यो धनसंचयात् ॥ स्वशरीरसमुत्थं च ज्ञानेन विनिवर्तयेत् ॥ ३७ ॥ ज्ञानान्वितेषु सिद्धेषु शास्त्रज्ञेषु कृतात्मसु ॥ न तेषु सज्जते स्नेहः पद्मपत्रेष्विवोदकम् ॥ ३८ ॥ रागाभिभूतः पुरुषः कामेन परिकृष्यते ॥ इच्छा संजायते चास्य ततस्तृष्णा प्रवर्धते ॥ ३९ ॥ तृष्णा हि सर्वपापिष्ठा नित्योद्वेगकरी मता ॥ अधर्मबहुला चैव घोररूपानुबंधिनी ॥ ४० ॥ या दुस्त्यजा दुर्मतिभिर्या न जीर्यति जीर्यतः ॥ यासौ प्राणांतिको रोगस्तां तृष्णां त्यजतः सुखम् ॥ ४१ ॥ अनाद्यंता तु सा तृष्णा ह्यंतर्देहगता नृणाम् ॥ विनाशयति संभूता लोहं लोहमलो यथा ॥ ४२ ॥ यथैवैधः[1] समुत्थेन वह्निना नाशमृच्छति ॥ तथाऽकृतात्मा[2] लोभेन स्वोत्पन्नेन विनश्यति ॥ ४३ ॥ तस्माल्लोभो न कर्तव्यः शरीरे चात्मबंधुषु ॥ प्राप्तेषु[3] वा न हृष्येत नाशे वापि न शोचयेत् ॥ ४४ ॥ ॥ नंदभद्र उवाच ॥ ॥ अहो बाल न बालस्त्वं मतो मे त्वां नमाम्यहम् ॥ त्वद्वाक्यैरतितृप्तोऽहं त्वां तु प्रक्ष्यामि किंचन ॥ ४५ ॥ कामक्रोधावहंकारमिंद्रियाणि च मानवाः ॥ निंदंति तत्र मे नित्यं विवक्षेयं प्रजायते ॥ ४६ ॥ अहमेष ममेदं च कार्यमीदृशकस्त्वहम् ॥ इत्यादि चात्मविज्ञानमहंकार इति स्मृतः ॥ ४७ ॥ परिहार्यः स चेत्तं च विनोन्मत्तः प्रकीर्त्यते ॥ कामोऽभिलाष इत्युक्तः स चेत्पुंसा विवर्ज्यते ॥ ४८ ॥ कथं स्वर्गो मुमुक्षा वा साध्यते दृषदा यथा ॥ क्रोधो वा यदि संत्याज्यस्ततः शत्रुक्षयः कथम् ॥ ४९ ॥ बाह्यानामांतराणां वा विना तं तृणवद्विदुः ॥ इंद्रियाणि निगृह्यैव दुष्टानीति निपीडयेत् ॥ ५० ॥ कथं स्याद्धर्मश्रवणं कथं वा जीवनं भवेत् ॥ एतस्मिन्मे मनो विद्धं[4] खिद्यतेऽज्ञानसंकटे ॥ ५१ ॥ तथा कस्मादिदं सृष्टं जडं विश्वं चिदात्मना ॥ एवं यद्बहुधा क्लेशैः पीड्यते हा कुतस्त्विदम् ॥ ५२ ॥ ॥ बाल उवाच ॥ ॥ सम्यगेतद्यथा पृष्टं यत्र मुह्यंति जंतवः ॥ शृण्वेकाग्रमना भूत्वा ज्ञातं द्वैपायनान्मया ॥ ५३ ॥ प्रकृतिः पुरुषश्चैव अनादी शृणुमः पुरा ॥ साधर्म्येणावतिष्ठेते सृष्टेः प्रागजरामरौ ॥ ५४ ॥ ततः कालस्वभावाभ्यां प्रेरिता प्रकृतिः पुरा ॥ पुंसः[5] संयोगमैच्छत्सा तदभावात्[6]प्रकुप्यत ॥ ५५ ॥ ततस्तमोमयी सा च लीलया देववीक्षिता ॥ राजसी समभूद्दृष्टा सात्त्विकी समजायत ॥ ५६ ॥ एवं त्रिगुणतां याता प्रकृतिर्देवदर्शनात् ॥ तां समास्थाय परमस्त्रिमूर्तिः समजायत ॥ ५७ ॥ तस्याः प्रोच्चारणार्थं च प्रवृत्तः स्वांशतस्ततः ॥ असूयत महत्तत्त्वं त्रिगुणं तद्विदुर्बुधाः ॥ ५८ ॥ अहंकारस्ततो जातः सत्त्वराजसतामसः ॥ तमो रजस्त्वमापद्य रजः सत्त्वगुणं नयेत् ॥ ५९ ॥ शुद्धसत्त्वे ततो मोक्षं प्रवदंति मनीषिणः ॥ तमसो रजसस्त

१ स्वतः--इत्यध्याहारः । स्वतः स्वस्मात्--समुत्थेन--उत्पन्नेन--इत्यर्थः । २ तथा जनोऽयम्--इ० पा० । ३ इत्येषु वा न हृष्येत प्राप्तौ वा न च शोचयेत्--इ० पा० । ४ विध्रम्--इ० पा० । ५ संयोगमैच्छद्देवेन--इ० पा० । ६ अडभाव आर्षः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्मात्संशुद्ध्यर्थं च सर्वशः[1] ॥ ६० ॥ जीवात्मसंज्ञान्स्वीयांशान्व्यभजत्परमेश्वरः ॥ तावंतस्ते च क्षेत्रज्ञा देहा यावंत एव हि ॥ ६१ ॥ निःसरंति यथा लोहात्तप्तल्लिंगात्स्फुलिंगकाः ॥ तन्मात्रभूतसर्गोयमहंकाराच्चु तामसात् ॥ ६२ ॥ इंद्रियाणां सात्त्विकाच्च त्रिगुणानि च तान्यपि ॥ एतैः संसिद्ध्यंत्रेण सच्चिदानन्दवीक्षणात् ॥ ६३ ॥ रजस्तमश्च शोध्यंते सत्त्वेनैव मुमुक्षुभिः ॥ तस्मात्कामं च क्रोधं च इंद्रियाणां प्रवर्तनम्[2] ॥ ६४ ॥ अहंकारं च संसेव्य सात्त्विकीं सिद्धिमश्नुते ॥ राजसास्तामसाश्चैव त्याज्याः कामादयस्त्वमी ॥ ६५ ॥ सात्त्विकाः सर्वदा सेव्याः संसारविजिगीषुभिः ॥ गुणत्रयस्य वक्ष्यामि संक्षेपाल्लक्षणं तव ॥ ६६ ॥ शास्त्राभ्यासस्ततो ज्ञानं शौचमिंद्रियनिग्रहः ॥ धर्मक्रियात्मचिंता च सात्त्विकं गुणलक्षणम् ॥ ६७ ॥ अन्यायेन धनादानं तंद्री[3] नास्तिक्यमेव च ॥ क्रौर्यं च याचकाद्यं च तामसं गुणलक्षणम् ॥ ६८ ॥ तस्माद्बुद्धिमुखैस्त्वेतैः सात्त्विकैर्देवतां भजेत् ॥ राजसैर्मानवत्वं च तामसैः स्थाणुयोनिता ॥ ६९ ॥ बुद्ध्याद्यैरेव मुक्तिः स्यादेतैरेव च यातना ॥ ७० ॥ अमीषां चाप्यभावे वै न किंचिदुपपद्यते ॥ कलादो[4] हि कलादीनां सुवर्णं शोधयेद्यथा ॥ ७१ ॥ तथा रजस्तमश्चैव संशोध्ये सात्त्विकैर्गुणैः ॥ अस्मादेव गुणानां च समवायादनादिजात् ॥ ७२ ॥ सुखिनो दुःखिनश्चैव प्राणिनः शास्त्रदर्शिनः ॥ अष्टाविंशतिलक्षैश्च गुणमेकैकमीश्वरः ॥ ७३ ॥ व्यभजच्चतुराशीतिलक्षास्ता जीवयोनयः ॥ सकाशान्मनसस्तद्वदात्मनः प्रभवंति हि ॥ ७४ ॥ ईश्वरांशाश्च ते सर्वे मोहिताः प्राकृतैर्गुणैः ॥ क्लेशानासादयंत्येव यथैवाधिकृता विभोः ॥७५॥ अन्नानां पयसां चापि जीवानां चाथ श्रेयसे ॥ मानुष्यमाहुस्तत्त्वज्ञाः शिवभावेन भावितम् ॥ ७६ ॥ ॥ नंदभद्र उवाच ॥ ॥ एवमेतत्किं तु भूयः प्रक्ष्याम्येतन्महामते ॥ ईश्वराः सर्वदातारः पूज्यंते यैश्च देवताः ॥ ७७ ॥ स्वभक्तांस्तान्न दुःखेभ्यः कस्माद्रक्षंति मानवान् ॥ विशेषात्केपि दृश्यंते दुःखमग्नाः सुरान्नताः ॥७८॥ इति मे मुह्यते बुद्धिस्त्वं वा किं बाल मन्यसे ॥७९॥ ॥ बाल उवाच ॥ ॥ अशुचिश्च शुचिश्चापि देवभक्तो द्विधा स्मृतः ॥ कर्मणा मनसा वाचा तद्गतो भक्त उच्यते ॥ ८० ॥ अशुचिर्देवताश्चैव यदा पूजयते नरः ॥ तदा भूतान्याविशंति स च मुह्यति तत्क्षणात् ॥ ८१ ॥ विमूढश्चाप्यकार्याणि तानि तानि निषेवते ॥ ततो विनश्यति क्षिप्रं नाशुचिः पूजयेत्ततः ॥ शुचिर्वाभ्यर्चयेद्यश्च तस्य चेदशुभं भवेत् ॥ ८२ ॥ तस्य पूर्वकृतं व्यक्तं कर्मणां कोटि[5] मुच्यते ॥ महेश्वरो ब्रह्महत्याभयाद्यत्र ततस्ततः ॥ ८३ ॥ सस्नौ तीर्थेषु कस्माच्च इतरो मुच्यते कथम् ॥ अम्बरीषसुतां हत्वा पर्वतान्नारदात्तथा ॥ ८४ ॥ सीतापहारमापेदे रामोऽन्यो मुच्यते कथम् ॥ ब्रह्मापि

१ सर्वथा–इ० पा० । २ प्रवर्धनम्--इ० पा० । ३ तंत्रनास्तिक्यमेव च--इ० पा० । ४ कलादः--सुवर्णकारः । ५ कोटि--इति--नपुंसकमत्र । कोटिः--मुच्यते--इत्ययमर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शिरसश्छेदं कामयित्वा सुतामगात् ॥ ८५ ॥ इंद्रचंद्ररविविष्णुप्रमुखाः प्राप्नुयुः कृतम् ॥ तस्मादवश्यं च कृतं भोज्यमेव नरैः सदा ॥ ८६ ॥
मुच्यते कोऽपि स्वकृतान्नैवेति श्रुतिनिर्णयः ॥ किं तु देवप्रसादेन लभ्यमेकं सुरव्रतैः ॥ ८७ ॥ बहुभिर्जन्मभिर्भोज्यं भुज्यतेऽतैकेन जन्मना ॥ तच्च
भुक्तात तस्त्वंर्थो भवेदिति विनिश्चयः ॥ ८८ ॥ ये तप्यंते गतैः पापैः शुचयो देवताव्रताः ॥ इह ते पुत्रपौत्रैश्च मोदंतेऽमुत्र चेह च ॥ ८९ ॥ तस्मा
द्देवाः सदा पूज्याः शुचिभिः श्रद्धयान्वितैः ॥ प्रकृतिः शोधनीया च स्ववर्णोदितकर्मभिः ॥ ९० ॥ स्वनुष्ठितोऽपि धर्मः स्यात्क्लेशायैव विना
शिवम् ॥ दुराचारस्य देवोपि प्राहेति भगवान्हरः ॥ ९१ ॥ भोक्तव्यं स्वकृतं तस्मात्पूजनीयः सदाशिवः ॥ स्वाचारेण परित्याज्यौ रागद्वेषाविदं
परम् ॥ ९२ ॥ ॥ नन्दभद्र उवाच ॥ ॥ शुद्धप्रज्ञ किमेतच्च पापिनोऽपि नरा यदा ॥ मोदमानाः प्रदृश्यन्ते दारैरपि धनैरपि ॥ ९३ ॥
॥ ॥ बाल उवाच ॥ ॥ व्यक्तं तैस्तमसा दत्तं दानं पूर्वेषु जन्मसु ॥ रजसा पूजितः शंभुस्तत्प्राप्तं स्वकृतं च तैः ॥ ९४ ॥ किं तु यत्तमसा कर्म
कृतं तस्य प्रभावतः ॥ धर्माय न रतिर्भूयात्ततस्तेषां विदांवर ॥ ९५ ॥ भुक्त्वा पुण्यफलं याति नरकं नात्र संशयः ॥ अस्मिंश्च संशये प्रोक्तं मार्कंडे
येन श्रूयते ॥ ९६ ॥ इहैवैकस्य नामुत्र अमुत्रैकस्य नो इह ॥ इह चामुत्र चैकस्य नामुत्रैकस्य नो इह ॥ ९७ ॥ पूर्वोपात्तं भवेत्पुण्यं भुक्तिर्नैवार्जय
न्त्यपि ॥ इह भोगः स वै प्रोक्तो दुर्भगस्याल्पमेधसः ॥९८॥ पूर्वोपात्तं यस्य नास्ति तपोभिश्चार्जयत्यपि ॥ परलोके तस्य भोगो धीमतः स क्रिया
तस्फुटम् ॥ ९९ ॥ पूर्वोपात्तं यस्य नास्ति पुण्यं चेहापि नार्जयेत् ॥ ततश्चेहामुत्र वापि भो धिक्तं च नराधमम् ॥ १०० ॥ इति ज्ञात्वा महाभाग
त्यक्त्वा शल्यानि कृत्स्नशः ॥ भज रुद्रं वर्णधर्मं पालयास्मात्परं न हि ॥ १०१ ॥ यो हि नष्टेष्वभीष्टेषु प्राप्तेष्वपि च शोचति ॥ [3]तृप्येत वा
भवेद्बन्धो निश्चितं सोऽन्यजन्मनः ॥ १०२ ॥ ॥ नन्दभद्र उवाच ॥ ॥ नमस्तुभ्यमबालाय बालरूपाय धीमते ॥ को भवांस्त
त्वतो वेत्तुमिच्छामि त्वां शुचिस्मितम् ॥ १०३ ॥ बहवोऽपि मया वृद्धा दृष्टाश्चोपासिताः सदा ॥ तेषामीदृशका बुद्धिर्न दृष्टा न श्रुता
मया ॥ १०४ ॥ येन मे जन्मसंदेहा नाशिता लीलयैव च ॥ तस्मात्सामान्यरूपस्त्वं निश्चितं न मतं मम ॥ १०५ ॥ ॥ बाल उवाच ॥
महदेतत्समाख्येयमेकाग्रः शृणु तत्त्वतः ॥ इतः सप्ताधिके चापि सप्तमे जन्मनि त्वहम् ॥ १०६ ॥ वैदिशे नगरे विप्रो नाम्नाऽऽसं धर्मजा
लिकः ॥ वेदवेदांगतत्त्वज्ञः स्मृतिशास्त्रार्थविद्वरः ॥ १०७ ॥ व्याख्याता धर्मशास्त्राणां यथा साक्षाद्बृहस्पतिः ॥ किं त्वहं विविधान्धर्माँल्लोकानां

१ ततः स्वर्यम्--इ०पा० । २ तदा--इ०पा० । ३ हृष्येत--इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वर्णये भृशम् ॥ १०८ ॥ स्वयं चातिदुराचारः पापिनामपि पापराट् ॥ मांसाशी मद्यसेवी च परदाररतः सदा ॥ १०९ ॥ असत्यभाषी दम्भी
च सदा धर्मध्वजी खलः ॥ लोभी दुरात्मा कथको न कर्ता कर्हिचित्क्वचित् ॥ ११० ॥ यस्माज्जालिकवज्जालं लोकेभ्योऽहं क्षिपामि च ॥
तत्त्वज्ञा मां ततः प्राहुर्धर्मजालिक इत्युत ॥ १११ ॥ सोऽहं तैर्बहुभिश्चीर्णैः पातकैरंत आगते ॥ मृतो गतो यमस्थानं पातितः कूटशा
ल्मलीम् ॥ ११२ ॥ यमदूतैस्ततः कृष्टः स्मार्यमाणः स्वचेष्टितम् ॥ खड्गैश्च कृत्यमानोऽहं जीवामि प्रमियामि च ॥ ११३ ॥ आत्मानं बहुधा निंद
न्छाश्वतीर्न्यवसं समाः ॥ नरके या मतिर्भूयाद्धर्मं प्रति प्रपीडतः ॥ ११४ ॥ सा चेन्मुहूर्तमात्रं स्यादपि धन्यस्ततः पुमान् ॥ नमोनमः कर्मभूम्यै
सुकृतं दुष्कृतं च वा ॥ ११५ ॥ यस्यां मुहूर्तमात्रेण युगैरपि न नश्यति ॥ ततो विपश्चिज्जनको मोक्षयामास नारकात् ॥ ११६ ॥ तैः सहाहं
प्रमुक्तश्च कथंचिदवपीडितः ॥ स्थाणुत्वमनुभूयाथ क्लेशानासाद्य भूरिशः ॥ ११७ ॥ कीटोहमभवं पश्चात्तीरे सारस्वते शुभे ॥ तत्र मार्गे सुखमिव
संसुतोहं यदृच्छया ॥ ११८ ॥ आगच्छतो रथस्यास्य शब्दमश्रौषमुन्नतम् ॥ तं मेघनिनदं श्रुत्वा भीतोहं सहसा जवात् ॥ ११९ ॥ मार्गमु
त्सृज्य दूरेण प्रपलायनमाचरम् ॥ एतस्मिन्नंतरे व्यासस्तत्र प्राप्तो यदृच्छया ॥ १२० ॥ स मामपश्यत्त्रस्तं च कृपया संयुतो मुनिः ॥ यन्मया
सर्वलोकानां नानाधर्माः प्रकीर्तिताः ॥ १२१ ॥ विप्रजन्मनि तस्यैव प्रभावाद्व्याससंगमः ॥ ततः सर्वरुतज्ञो मां प्राहाचार्यः कीटभाषया ॥
॥ १२२ ॥ किमेवं नश्यसे कीट कस्मान्मृत्योर्बिभेषि च ॥ अहो समुचिता भीतिर्मनुष्यस्य कुतस्तव ॥ १२३ ॥ इत्युक्तो मतिमान्पूर्वपुण्याद्व्यासं
तदोचिवान् ॥ न मे भयं जगद्वंद्य मृत्योरस्मात्कथंचन ॥ १२४ ॥ एतदेव भयं मान्य गच्छेयमधमां गतिम् ॥ अस्या अपि कुयोनेश्च संत्यन्याः को
टिशोऽधमाः ॥ १२५ ॥ तासु गर्भादिकक्लेशभीतस्त्रस्तोऽस्मि नान्यथा ॥ १२६ ॥ ॥ व्यास उवाच ॥ ॥ मा भयं कुरु सर्वाभ्यो योनि
भ्यश्च चिरादिव ॥ मोक्षयिष्यामि ब्राह्मण्यं प्रापयिष्यामि निश्चितम् ॥ १२७ ॥ इत्युक्तोहं कालियेन तं प्रणम्य जगद्गुरुम् ॥ मार्गमागत्य चक्रेण
पीडितो मृत्युमागमम् ॥ १२८ ॥ ततः काकशृगालादियोनिष्वस्मि यदाऽभवम् ॥ तदातदा समागम्य व्यासो मां स्मारयच्च तत ॥ १२९ ॥ ततो
बहुविधा योनीः परिक्रम्यास्मि कर्षितः ॥ ब्राह्मणस्य च गेहेस्यां योनौ जातोऽतिदुःखितः ॥ १३० ॥ ततो जन्मप्रभृत्यस्मि पितृभ्यां परिव
र्जितः ॥ गलत्कुष्ठी महापीडामेतां योऽनुभवामि च ॥ १३१ ॥ ततो मां पंचमे वर्षे व्यास आगत्य जप्तवान् ॥ कर्णे सारस्वतं मंत्रं तेनाहं संस्म

१ उत्तमम्–इ० पा० । २ तत्रस्थम्–इ०पा० । ३ यावन्नेष्यामि–इ० पा० । ४ कालियोऽत्र व्यासो बोध्य इति प्रतिभाति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रामि च ॥ १३२ ॥ अनधीतानि शास्त्राणि वेदान्धर्मांश्च कृत्स्नशः ॥ उक्तं व्यासेन चेदं मे गच्छ क्षेत्रं गुहस्य च ॥ तत्र त्वं नंदभद्रं च आश्वासय महामतिम् ॥ १३३ ॥ त्यक्त्वा बहूदके प्राणानस्थिक्षेपं महीजले ॥ कारय्य त्वं ततो भावी मैत्रेय इति सन्मुनिः ॥ १३४ ॥ गमिष्यसि ततो मोक्षमिति मां व्यास उक्तवान् ॥ आगतश्च ततश्चात्र वाहीकेभ्योऽतिक्लेशतः ॥ १३५ ॥ इति ते कथितं सर्वमात्मनश्चरितं मया ॥ पापमेवंविधं कष्टं नंदभद्र सदा त्यज ॥ १३६ ॥ ॥ नंदभद्र उवाच ॥ ॥ अहो महाद्भुतं तुभ्यं चरितं येन मे हृदि ॥ भूयः शतगुणं जातं धर्माय दृढमानसम् ॥ १३७ ॥ किं तु त्वयोक्तधर्मस्य कर्तुकामोस्मि निष्कृतिम् ॥ धर्मं स्मर भवांस्तस्मात्किंचिदादिश निश्चितम् ॥ १३८ ॥ ॥ ॥ बाल उवाच ॥ ॥ अत्र तीर्थे च सप्ताहं निराहारस्त्वहं स्थितः ॥ सूर्यमंत्राञ्जमिष्यामि त्यक्ष्यामि च ततस्त्वसून् ॥ १३९ ॥ ततो बर्करिकातीर्थे दग्धव्योहं त्वया तटे ॥ अस्थीनि सागरे चापि मम क्षेप्याणि चात्र हि ॥ १४० ॥ यदि सापह्नवं चित्तं मय्यतीव तवास्ति चेत् ॥ ततस्त्वां गुरुकार्यार्थमादेक्ष्यामि शृणुष्व तत् ॥ १४१ ॥ अस्मिन्बहूदके तीर्थे यत्र प्राणांस्त्यजाम्यहम् ॥ तत्र मन्नामचिह्नस्ते संस्थाप्यो भास्करो विभुः ॥ १४२ ॥ आरोग्यं धनधान्यं च पुत्रदारादिसंपदः ॥ भास्करो भगवांस्तुष्टो दद्यादेतच्छ्रुतेर्वचः ॥ १४३ ॥ सविता परमो देवः सर्वस्वं वा द्विजन्मनाम् ॥ वेदवेदांगगीतश्च त्वमप्येनं सदा भज ॥ १४४ ॥ बहूदकमिदं कुंडं संसेव्यं च सदा त्वया ॥ माहात्म्यमस्य वक्ष्यामि संक्षेपाद्व्यास सूचितम् ॥ १४५ ॥ बहूदके कुंडवरे स्नाति यो विधिवन्नरः ॥ आरोग्यं धनधान्याद्यं तस्य स्यात्सर्वजन्मसु ॥ १४६ ॥ बहूदके च यः स्नात्वा सप्तम्यां माघमासके ॥ दद्यात्पिंडं पितॄणां च तेऽक्षय्यां तृप्तिमाप्नुयुः ॥ १४७ ॥ बहूदकस्य तीरे यः शुचिर्यजति वै क्रतुम् ॥ शतक्रतुफलं तस्य नास्ति काचिद्विचारणा ॥ १४८ ॥ अत्र यस्त्यजति प्राणान्बहूदकतटे नरः ॥ मोदते सूर्यलोकेऽसौ धर्मिणां च सुतो भवेत् ॥ १४९ ॥ बहूदकस्य तीरे च यः कुर्य्याज्जपसाधनम् ॥ सर्वं लक्षगुणं प्रोक्तं जपो होमश्च पूजनम् ॥१५०॥ बहूदकस्य तीरे च द्विजमेकं च भोजयेत् ॥ यो मिष्टान्नेन तस्य स्याद्विप्रकोटिश्च भोजिता ॥ १५१ ॥ बहूदकस्य तीरे या नारी गौरिणिकाः शुभाः ॥ संभोजयति तस्याश्च कुर्यात्सुस्वागतं ह्युमा ॥ १५२ ॥ बहूदकस्य तीरे च यः कुर्याद्योगसाधनम् ॥ षण्मासाभ्यन्तरे सिद्धिर्भवेत्तस्य न संशयः ॥ १५३ ॥ बहूदकस्य तीरे च प्रेतानुद्दिश्य दीयते ॥ यत्किंचिदक्षयं तेषामुपतिष्ठेन्न चान्यथा ॥ १५४ ॥ स्नानं दानं जपो होमः स्वाध्यायः पितृतर्पणम् ॥ कृतं बहूदकतटे सर्वं स्यात्सुमहत्फलम् ॥ १५५ ॥

१ ते--पितरः--इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्वयैतद्धृदि संधार्यं फलं व्यासेन सूचितम् ॥ बहूदकस्य कुंडस्य नंदभद्र महामते ॥ १५६ ॥ इत्युक्त्वा सोऽभवन्मौनी स्नात्वा कुंडे ततः शुचिः ॥
तीरे प्रस्तरमाश्रित्य स्वयं मंत्राञ्जजाप ह ॥ १५७ ॥ ॥ श्रीनारद उवाच ॥ ॥ ततः स सप्तरात्रांते जहौ बालो निजानसून् ॥ संस्कारितो
यथोक्तं च नंदभद्रेण ब्राह्मणैः ॥ १५८ ॥ यत्र बालः स च प्राणाञ्जहौ जपपरायणः ॥ बालादित्यमिति ख्यातं तत्रास्थापयत प्रभुम् ॥ १५९ ॥
बहूदके च यः स्नात्वा बालादित्यं प्रपूजयेत् ॥ तस्य स्याद्भास्करस्तुष्टो मोक्षोपायं च विंदति ॥ १६० ॥ नंदभद्रोऽप्यथान्यस्यां भार्यायामपरान्सु
तान् ॥ उत्पाद्यात्मसमान्धीमाञ्छिवसूर्यपरायणः ॥ १६१ ॥ रुद्रदेहं ययौ पार्थ पुनरावृत्तिदुर्लभम् ॥ एवमेतन्महाकुंडं बहूदकमिति स्मृतम् ॥
॥ १६२ ॥ अस्य तीरे स्वमंशं च वल्लीनाथः प्रमोक्ष्यति ॥ दत्तात्रेयस्य यो योगी ह्यवतारो भविष्यति ॥ १६३ ॥ अर्चयित्वा च तं देवं योगसिद्धि
मवाप्नुयात् ॥ पशूनामृद्धिमाप्नोति गोशरण्यो ह्यसौ प्रभुः ॥ १६४ ॥ पश्चिमायां बुधसुतस्तथा क्षेत्रं स भारत ॥ पुरूरवादित्यमिति स्थापया
मास पार्थिवः ॥ १६५ ॥ सर्वकामप्रदश्चासौ भट्टादित्यसमो रविः ॥ बहूदकक्षेत्रसमं तस्य क्षेत्रं च भारत ॥ १६६ ॥ अस्य तीर्थस्य माहात्म्यं
जप्तव्यं कर्णमूलके ॥ पुत्रस्य वापि शिष्यस्य न कथंचन नास्तिकः ॥ १६७ ॥ शृणोतीदं श्रद्धया यस्तस्य तुष्येच्च भास्करः ॥ धारयन्हृदये मोक्षं
मुच्यते भवसागरात् ॥ १६८ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां प्रथमे माहेश्वरखण्डे कौमारिकाखण्डे बहूदकमाहात्म्य
बालादित्यवृत्तान्तवर्णनंनाम षट्चत्वारिंशोऽध्यायः ॥ ४६ ॥ ॥ छ ॥ ॥ नारद उवाच ॥ ॥ ततो मयास्य तीर्थस्य रक्षणाय पुनर्जय ॥
समाराध्य यथा देव्यः स्थापितास्तच्छृणुष्व भोः ॥१॥ यथात्मा सर्वभूतेषु व्यापकः परमेश्वरः ॥ तथैव प्रकृतिर्नित्या व्यापका परमेश्वरी ॥ २ ॥ शक्ति
प्रसादादाप्नोति वीर्यं सर्वांश्च संपदः ॥ ईश्वरी सर्वभूतेषु सा चैवं पार्थ संस्थिता ॥ ३ ॥ बुद्धिर्ह्रीपुष्टिलज्जेति तुष्टिः शांतिः क्षमा स्पृहा ॥ श्रद्धा च
चेतना शक्तिर्मंत्रोत्साहप्रभूद्भवा ॥ ४ ॥ इयमेव च बंधाय मोक्षायेयं च सर्वदा ॥ एनामाराध्य चैश्वर्यमिन्द्राद्याः समवाप्नुयुः ॥ ५ ॥ ये च
शक्तिं न मन्यंते तिरस्कुर्वंति चाधमाः ॥ योगीन्द्रा अपि ते व्यक्तं भ्रश्यंते काशिजा यथा ॥ ६ ॥ वाराणस्यां किल पुरा सिद्धयोगीश्वराः पुनः ॥
अवमन्य च ते शक्तिं पुनर्भ्रंशमुपागताः ॥ ७ ॥ तस्मात्सदा देहिनेयं शक्तिः पूज्यैव नित्यदा ॥ तुष्टा ददाति सा कामान्रुष्टा संहरते क्षणात् ॥ ८ ॥
परमा प्रकृतिः सा च बहुभेदैर्व्यवस्थिता ॥ तासां मध्ये महादेव्यो ह्यत्र संस्थापिताः शृणु ॥९॥ चतस्रस्तु महाशक्त्यश्चतुर्दिक्षु व्यवस्थिताः ॥ सिद्धांबि

१ मोक्षम्--मोक्षकरम्--इत्यर्थः । २ जय--हे अर्जुन--इत्यर्थः । ३ भज्यन्ते--इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

का तु पूर्वस्यां स्थापिता सा गुहेन च ॥१०॥ जगदादौ मूलप्रकृतेरुत्पन्ना सा प्रकीर्त्यते ॥ आराधिता यतः सिद्धैस्तस्मात्सिद्धांबिका च सा ॥११॥
दक्षिणस्यां तथा तारा संस्थिता स्थापिता मया ॥ तारणार्थाय देवानां यस्मात्कूर्मं समाश्रिता ॥ १२ ॥ ययाविष्टः समुज्जह्रे वेदान्कूर्मो जगद्गुरुः ॥
अनयाविष्टदेहश्च बुधो बौद्धान्हनिष्यति ॥१३॥ कोटिशो वेदमार्गस्य ध्वंसकान्पापकर्मिणः॥इयं मया समाराध्य समानीता गिरेः सुता ॥ १४ ॥
कोटिसंख्याभिरत्युग्रदेवीभिः संवृता च सा ॥ दक्षिणां दिशमाश्रित्य संस्थिता मम गौरवात् ॥१५॥ पश्चिमायां तथा देवी संस्थिता भास्करा शुभा ॥
ययाविष्टानि भासंते भास्करप्रमुखानि च॥१६॥बिंबानि सर्वताराणां गच्छन्त्यायांति च द्रुतम् ॥ सैषा महाबला शक्तिर्भास्वरा कुरुनन्दन ॥१७॥
मयाराध्य समानीता कटाहादत्र संस्थिता ॥ कोटिकोटिवृता नित्यं त्रायते पश्चिमां दिशम् ॥ १८ ॥ उत्तरस्यां तथा देवी संस्थिता योगनंदिनी ॥
परमप्रकृतेर्देहात्पूर्वं निःसृतया यया ॥ १९ ॥ दृष्टया दृष्टा निर्मलया योगमापुश्चतुःसनाः ॥ योगीश्वरी च सा देवी सनकाद्यैः सुतोषिता ॥ २० ॥
सैव चांडकटाहान्मे समाराध्यात्र प्रापिता ॥ योगिनीभिः परिवृता संस्थिता चोत्तरां दिशम् ॥ २१ ॥ एवमेता महाशक्त्यश्चतस्रः संस्थिताः
सदा ॥ पूजिताः कामदा नित्यं रुष्टाः संहरणक्षमाः ॥ २२ ॥ ततश्च नव मे दुर्गाः समानीताः शृणुष्व ताः ॥ २३ ॥ त्रिपुरानाम परमा देवी
स्थाणुर्यया पुरा ॥ आविष्टस्त्रिपुरं निन्ये भस्मत्वं जगदीश्वरः ॥ २४ ॥ त्रिपुरेति ततस्तां तु प्रोक्तवान्भगवान्हरः ॥ तुष्टाव च स्वयं तस्मात्पूज्या
सा जगतामपि ॥ २५ ॥ सा चाराध्य समानीता मयामरेश्वरपर्वतात् ॥ भक्तानां कामदा सास्ति भट्टादित्यसमीपतः ॥ २६ ॥ अपरा चापि
कोलंबा महाशक्तिः सनातनी ॥ कोलरूपी ययाविष्टः केशवश्चोज्जहार गाम् ॥ २७ ॥ तस्मात्सा विष्णुना चोक्ता कोलंबेति स्तुतार्चिता ॥ सा च
देवी मया पार्थ भक्तियोगेन तोषिता ॥ २८ ॥ वाराहगिरिसंस्था मां समानीता च साब्रवीत् ॥ यत्राहं नारद सदा तिष्ठामि कृपयार्थिनाम् ॥
॥ २९ ॥ तत्र कूपेन संस्थेयं[3] रुद्राणीसंस्थितेन वै ॥ तं हि कूपं विना मह्यं न रतिर्जायते क्वचित् ॥३०॥ तस्माद्भवान्कूपवरं स्वयमत्र खन द्विज ॥
एवमुक्ते पार्थ देव्या दर्भमूलेन मे तदा ॥ ३१ ॥ कूपोऽखनि यत्र साक्षाद्रुद्राणी कूप आबभौ ॥ ततो मया तत्र देवाः स्नात्वा जप्त्वा च तर्पिताः॥३२॥
पूजिता च ततो देवी कोलंबा जगदीश्वरी ॥ परितुष्टा तदा देवी प्रणतं मां ततोऽब्रवीत् ॥ ३३ ॥ सदात्र चाहं स्थास्यामि प्रसादं प्रापिता त्वया ॥ये
च कूपेत्र संस्नात्वा माघाष्टम्यां विशेषतः ॥३४॥ पूजयिष्यंति मां मर्त्यास्तेषां छेत्स्यामि दुष्कृतम् ॥ सर्वतीर्थमयो यश्च सर्वर्तुकवने स्थितः ॥ ३५ ॥

१ सितात्--इति पाठे--सितात्--गिरेः--धवलगिरेः--इत्यर्थः । हिमालयाद्रिरेरित्यर्थो वा मन्दराचलादित्यर्थो वा । २ च--इ० पा० । ३ संस्थेयम्--स्थातव्यम्--इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मेरोः समीपे रुद्राण्याः कूप एष स एव च ॥३६॥ प्रयागादपि गंगाया गयायाश्च विशेषतः ॥ कूपेस्मिन्नधिकं स्नानं मया नारद कीर्तितम् ॥ ३७ ॥
तदहं तव वाक्येन संस्थितात्र तपोधन ॥ गुहेनाथ सरः पुण्यं पालयिष्याम्यतंद्रिता ॥ ३८ ॥ कुमारेशं पूजयित्वा पूजयिष्यंति ये च माम् ॥ देवीभिः
षष्टिकोटीभिर्युता तेषामभीष्टदा ॥ ३९ ॥ ॥ नारद उवाच ॥ ॥ इत्युक्तोऽहं पार्थ देव्या तदानीं प्रीयमाणया ॥ प्रत्यब्रवं प्रमुदितः कोलंबां विश्वमा
तरम् ॥ ४० ॥ अत्रास्य माता त्वं देवि गुप्तक्षेत्रस्य कारणम् ॥ तीर्थयात्रा वृथा तेषां नार्चयंतीह त्वां च ये ॥ ४१ ॥ इदं च यत्सरः पुण्यं त्वन्नाम्ना
ख्यातिमेष्यति ॥ ईश्वरी सरसोऽस्य त्वं तीर्थस्यास्य तथेश्वरी ॥ ४२ ॥ एवं दीर्घं तपस्तप्त्वा स्थापिता मयका[1] शुभा ॥ महादुर्गा नरैस्तस्मात्पू
ज्येयं सततं बुधैः ॥ ४३ ॥ तृतीया च दिशि तस्यां स्थिता संस्थापिता मया ॥ गुहेन च कपालेश्याः प्रभावोस्याः पुरेरितः ॥ ४४ ॥ धन्यास्ते
ये प्रपश्यंति नित्यमेनां नरोत्तमाः ॥ कपालेश्वरमभ्यर्च्य विश्वशक्तिरियं यतः[2] ॥ ४५ ॥ एवमेतास्तिस्रो दुर्गाः पूर्वस्यां दिशि संस्थिताः ॥ पश्चि
मायां प्रवक्ष्यामि तिस्रो दुर्गा महोत्तमाः ॥ ४६ ॥ सुवर्णाक्षी तु या देवी ब्रह्मांडपरिपालिनी ॥ सा मयात्र समाराध्य तीर्थे देवी निवेशिता ॥
॥ ४७ ॥ ये चैनां प्रणमिष्यंति पूजयिष्यंति भक्तितः ॥ त्रयस्त्रिंशद्भिः कोटीभिर्देवीभिः पूजिता च तैः ॥ ४८ ॥ अपरा च महादुर्गा चर्चिता चेति
संस्थिता ॥ रसातलतलात्तत्र मयानीता सुभक्तितः ॥ ४९ ॥ इयमर्च्या च चिंत्या च वीरत्वं समभीप्सुभिः ॥ बहुभिर्देवदैतेयैर्ददौ तेभ्यश्च वीर
ताम् ॥ ५० ॥ इयमेव महादुर्गा शूद्रकं वीरसत्तमम् ॥ चौरैर्बद्धं कलौ चाग्रे मोक्षयिष्यति विक्रमात् ॥ ५१ ॥ ततस्त्वेतां स चाराध्य वीरेंद्रत्वम
वाप्स्यति ॥ निहनिष्यति चाक्रम्य कालसेनमुखान्रिपून् ॥ ५२ ॥ तस्मादियं समाराध्या वीर्यकामैर्नरैः सदा ॥ चर्चिता या महादुर्गा पश्चिमायां
दिशि स्थिता ॥ ५३ ॥ तथा त्रैलोक्यविजया तृतीयस्यां दिशि स्थिता ॥ यामाराध्य जयं प्राप्तस्त्रिलोक्यां रोहिणीपतिः ॥ सोमलोकान्म
यानीता पूजिता जयदा सदा ॥ ५४ ॥ एवमेताः पश्चिमायामुत्तरस्यामतः शृणु ॥ तिस्रो देव्यश्चोत्तरस्यामेकवीरामुखाः स्थिताः ॥ ५५ ॥
एकवीरेति या देवी साक्षात्सा शिवपूजिता ॥ ययाविष्टो जगत्सर्वं संहरत्येष[3] भूतराट् ॥ ५६ ॥ वीर्येणाद्येकवीरायाः कृत्वा लोकांश्च भस्मसात् ॥
युगैकादशपूर्णत्वे विलक्षोऽभूत्स भस्मनि ॥ ५७ ॥ एवंविधा त्वेकवीरा शक्तिरेषा सनातनी ॥ पूजिताराधिता चैव सर्वाभीप्सितदा नृणाम् ॥
॥ ५८ ॥ ब्रह्मलोकात्समानीता मयाराध्यात्र भारत ॥ नामकीर्तनमप्यस्या दुष्टानां घातनं विदुः ॥ ५९ ॥ द्वितीया हरसिद्ध्याख्या देवी दुर्गा

१ मयका--मया--इत्यर्थः । अकच्प्रत्ययविशिष्टस्य रूपमिदम् । २ ततः--इ०पा० । ३ एव--इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

महाबला ॥ शीकोत्तरात्समाराध्य मयानीतात्र पांडव ॥ ६० ॥ यदा शीकोत्तरस्थेन पार्वत्या प्रार्थितेन च ॥ रुद्रेण डाकिनीमंत्रः प्रोक्तो देव्याः
कृपालुना ॥ ६१ ॥ तदा मंत्रप्रभावेण मोहिता गिरिजा सती ॥ तमेवाक्रम्य मांसं च शोणितं च भवं पपौ ॥ ६२ ॥ ततो रुद्रशरीरात्तु विनिष्क्रांता
र्तिनाशिनी ॥ हरसिद्धिर्महादुर्गा महामंत्रविशारदा ॥ ६३ ॥ सा सहस्रभुजा देवी समाक्रम्याभिपीडच च ॥ मोक्षयामास गिरिशमशापयत तां
तथा ॥ ६४ ॥ ततः प्रभृति सा लोके हरसिद्धिः प्रकीर्त्यते ॥ देवीनां षष्टिकोटीभिरावृता पूज्यते सुरैः ॥ ६५ ॥ एतामाराध्य सुग्रीवप्रमुखा दोष
नाशिनीम् ॥ अभूवन्त्सुमहावीर्या डाकिनीसंघनाशनाः ॥ ६६ ॥ तस्मादेतां पूजयेत्तु मनोवाक्कायकर्मभिः ॥ डाकिन्याद्या न सर्पंति हरसिद्धेरनं
तरम् ॥ ६७ ॥ तृतीयेशानकोणस्था चंडिका नवमी स्थिता ॥ वागीशोऽपि लभेत्पारं नैव यस्याः प्रवर्णने ॥ ६८ ॥ या पुरा पार्वतीदेहाद्विनिः
सृत्य महासुरौ ॥ चंडमुंडौ निहत्यैव भक्षयामास क्रोधतः ॥ ६९ ॥ अक्षौहिणीशतं त्वेकं चंडमुंडौ च तावुभौ ॥ नापूर्यतैकग्रासोऽस्याः किंलक्ष्या[1]
यात्वियं हि सा ॥ ७० ॥ इयमेवांधकानां च तृषिता शोणितं पुनः ॥ पपौ ततो निजग्राह चांधकं भगवान्भवः ॥ ७१ ॥ इयं च रक्तबीजानां
कृत्वा पानं च रक्तजम् ॥ अर्पयामास तं देव्याश्चामुण्डापीतशोणितम् ॥ ७२ ॥ एषा तृप्यति भक्तानां प्रणामेनापि भारत ॥ अर्बुदानां च कोटी
भिर्दैत्यानां पापकर्मिणाम् ॥ ७३ ॥ कुण्डं चास्या मया देव्याः पुण्यं निष्पादितं शुभम् ॥ यत्र वै स्पर्शमात्रेण सर्वतीर्थफलं लभेत् ॥ ७४ ॥ हरसि
द्धिर्देवसिद्धिर्धर्मसिद्धिश्च भारत ॥ विविधा प्राप्यते सिद्धिस्तीर्थेऽस्मिश्चंडिकारतैः ॥ ७५ ॥ यश्च पूजयते देवीं स्वल्पेन बहुनापि वा ॥ कात्या
यनी कोटिशतैर्वृता तस्य विभूतिदा ॥ ७६ ॥ एवमेता महादुर्गा नव तीर्थेऽत्र संस्थिताः ॥ चतस्रश्चापि दिग्देव्यो नित्यमर्च्याः शुभेप्सुभिः[2] ॥७७॥
आश्विनस्य च मासस्य[3] नवरात्रे विशेषतः ॥ उपोष्य चैकभक्तैर्वा[4] देवीस्त्वेताः प्रपूजयेत् ॥ ७८ ॥ बलिपूर्पकनैवेद्यैस्तर्पणैर्धूपगंधिभिः[5] ॥ तस्य
रक्षां चरंत्येता रथ्यासु त्रिकचत्वरे ॥ ७९ ॥ भूतप्रेतपिशाचाद्या नोपकुर्युः प्रपीडनम् ॥ आपदो विद्रवंत्याशु योगिन्यो नंदयंति तम् ॥ ८० ॥
पुत्रार्थी लभते पुत्रान्धनार्थी धनमाप्नुयात् ॥ रोगार्तो मुच्यते रोगाद्बद्धो मुच्येत बन्धनात् ॥ ८१ ॥ आसां यः कुरुते भक्तिं नरो नारी च

१ किंलक्ष्या या त्वियं हि सा--या तु इयम्--(एतादृशप्रभाववती) [अस्ति] सा किंलक्ष्या--कीदृशी (महाप्रभावशालिनी स्यात्) (तत् त्वमेव मनसि विचारय) । इति--अर्थयोजना कर्तव्या । एतेन इयमतीवोग्रस्व
रूपा--अत्यन्तोग्रप्रभावशालिनी चास्ति--इति सूचितम् । २ यतः शुभाः--इ०पा० । ३ माघस्य--इत्यपि पाठः । ४ एकभक्तैः--एकधान्यभोजनैः--इत्यर्थः । ५ बलिपुष्पकनैवेद्यैः--इ० पा० ।

श्रद्धया ॥ सर्वान्कामानवाप्नोति यांश्चिंतयति चेतसि ॥ ८२ ॥ कामगव्य[1] इमा देव्यश्चिन्तामणिनिभास्तथा ॥ कल्पवल्ल्योऽथ भक्तानां
प्रति[2]च्छन्दोऽत्र नव हि ॥ ८३ ॥ तथात्र भूतमातास्ति हरसिद्धेस्तु दक्षिणे ॥ तस्या माहात्म्यमतुलं संक्षेपात्प्रब्रवीमि ते ॥ ८४ ॥ पूर्वं
किल गुहो विद्वान्पुण्ये सारस्वते तटे ॥ भूतप्रेतपिशाचानामाधिराज्येऽभ्यषिच्यत ॥ ८५ ॥ स च सर्वाणि भूतानि मर्यादायामधारयत् ॥ एतदन्नं
प्रदायैव कृपया भगवान्गुहः ॥ ८६ ॥ यदमंत्रहुतं किंचिद्वेदबाह्यं च यत्कृतम् ॥ अश्रद्धया च क्रोधेन तद्वस्तृप्त्यै भविष्यति ॥ ८७ ॥ ततस्त्वनेन
भोगेन तानि नंदंति कृत्स्नशः ॥ ततः केनापि कालेन श्रद्धयाऽश्रद्धया कृतम् ॥ ८८ ॥ पुण्यं तान्येव भूतानि ग्रसंत्याक्रम्य देवताः ॥ ततो देवाः
क्षुधार्त्तास्ते गुहायैतन्न्यवेदयन् ॥ ८९ ॥ स वै तदाकर्ण्य क्रुद्धो गुहः काल इवाभवत् ॥ तस्य क्रुद्धस्य भ्रूपद्ममध्यात्काचिद्विनिर्गता ॥ ९० ॥
ज्वालामाला सुदुर्दर्शा नारी द्वादशलोचना ॥ सा च प्रणम्य तं प्राह तव शक्तिरहं प्रभो ॥ शीघ्रमादिश मां कृत्ये किं करोमि तवेप्सितम् ॥ ९१ ॥
॥ ॥ [3]स्कन्द उवाच ॥ ॥ एतैर्भूतगणैः पापैरुल्लंघ्य मम शासनम् ॥ ९२ ॥ मनुष्यदत्तं सकलं भुज्यते स्वेच्छयाधमैः ॥ शीघ्रमेतानि त्वं
तस्मान्मर्यादायामुपानय ॥ ९३ ॥ एतास्त्वानुव्रजिष्यंति देव्यः कोटिशतं शुभे[4] ॥ ततस्तथेति सा चोक्ता देवीभिः संवृता तदा ॥ ९४ ॥
मयूरं समुपास्थाय गुहशक्तिः समागता ॥ [5]सरोजवनमासाद्य भूतसंघानपश्यत ॥ ९५ ॥ जघान च समासाद्य देवी नानाविधायुधैः ॥
ततः प्रेतपिशाचाद्या हन्यमाना महारणे ॥ ९६ ॥ प्रसा[6]दयंति तां देवीं नानावेषैः सुदीनवत् ॥ केचिद्ब्राह्मणवेषैश्च तापसानां तथो
क्तिभिः ॥ ९७ ॥ नृत्यंति देवि पद्माक्षि प्रसीदेति पुनःपुनः ॥ ततः प्रसन्ना सा देवी व्रियतां स्वेच्छयाऽऽह तान् ॥ ९८ ॥ तां ते प्रोचु
स्त्राहि नस्त्वं भूतमाता भवेश्वरि ॥ मर्यादां नैव त्यक्ष्यामो वयं स्कन्दविनिर्मिताम् ॥ ९९ ॥ ये चैवं त्वां तोषयन्ति तेषां देहि वरान्सदा ॥१००॥
॥ ॥ श्रीदेव्युवाच ॥ ॥ वैशाखे दर्शदिवसे ये चैवं तोषयंति माम् ॥ अरिष्टाभरणैः पुष्पैर्दधिभक्तैश्च पूजनैः ॥ तेषां सर्वोपसर्गा वै यास्यंति
विलयं स्फुटम् ॥ १०१ ॥ एवं दत्त्वा वरं देवी मुमुदे भूतसंवृता ॥ एवंप्रभावा सा देवी मयानीतात्र भारत ॥ १०२ ॥ य एनां प्रणमेन्मर्त्यः सर्वा

१ कामगव्यः--कामधेनवः--कामपूरकाः--इत्यर्थः । कामगम्याः--इ० पा० । २ प्रतिच्छंदोऽत्र संशयस्य पर्यायशब्दो बोद्धव्यः प्रकरणसांगत्याय । ३ कार्तिकेय उवाच--इ० पा० । ४ शुभाः--इ० पा० ।
५ शिरोभुवनम्--इ० च पा० । ६ प्रमोदयंति--इ० पा० ।

CC-0. In Public Domain. Digitization by eGangotri

रिष्टैर्विमुच्यते ॥ १०३ ॥ एवं प्रभावाः परिकीर्तिता मया समासतस्तीर्थवरेऽत्र देव्यः ॥ चतुर्दशैवार्जुन पूजिता याश्चतुर्दशस्थानवरैर्नृमुख्यैः ॥ ॥ १०४ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां प्रथमे माहेश्वरखण्डे कौमारिकाखण्डे श्रीदेव्याख्यानवर्णनंनाम सप्तचत्वारिंशत्तमोऽध्यायः ॥ ४७ ॥ ॥ छ ॥ ॥ नारद उवाच ॥ ॥ अथातः संप्रवक्ष्यामि सोमनाथमहिं[१] स्फुटम् ॥ शृण्वं[२]न्यां कीर्तयिष्यामि पापमोक्षमवाप्नुयात् ॥ १ ॥ पुरा त्रेतायुगे पार्थ चौडं[३]देशसमुद्भवौ ॥ ऊर्जयंतश्च[४] प्रालेयो विप्रावास्तां महाद्युती ॥ २ ॥ तावेकदा पुराणार्थे श्लोकमेकमपश्यताम् ॥ तं दृष्ट्वा सर्वशास्त्रज्ञावास्तां कंटकिततत्वचौ ॥ ३ ॥ प्रभासाद्यानि तीर्थानि पुलस्त्यायाह पद्मभूः ॥ न यैस्तत्राप्लुतं चैव किं तैस्तीर्थमुपासितम् ॥ ४ ॥ इति श्लोकं पठित्वा तौ पुनःपुनरभिष्टुतम् ॥ तद्दैव च प्रभासाय निःसृतौ स्नातुमुत्तमौ ॥ ५ ॥ तौ वनानि नदीश्चैव व्यतिक्रम्य शनैःशनैः ॥ महर्षिगणसंकीर्णामुत्तीर्णौ नर्मदां शिवाम् ॥ ६ ॥ गुप्तक्षेत्रस्य माहात्म्यं महीसागरसंगमम् ॥ तत्र स्नात्वा[५] प्रभासाय तन्मध्येन प्रतस्थतुः ॥ ७ ॥ ततो मार्गस्य शून्यत्वात्तृट्क्षुधापीडितौ भृशम् ॥ आस्तां विचेतनौ विप्रौ सिद्धलिंगसमीपतः ॥ ८ ॥ सिद्धनाथं नमस्कृत्य संप्रयातौ सुधैर्यतः ॥ क्षुधावेगेन तीव्रेण तृषा मध्यार्कतापितौ ॥ ९ ॥ सहसा पतितौ भूमौ स्थूणपादौ विमूर्छितौ ॥ ततो मुहूर्तात्प्रालेय ऊर्जयंतमभाषत ॥ १० ॥ किंचिद्विश्वस्य धैर्याच्च सखे किं न श्रुतं त्वया ॥ यथा यथा विवर्णांगो जायते तीर्थयात्रया ॥ ११ ॥ तथातथा भवेद्दानैर्दीनः सोमेश्वरो हरः ॥ तथाऽऽस्तां लुंठमानौ तावेवमुक्ते श्रुतेऽपि च ॥ १२ ॥ लुंठमानो जगामैव प्रालेयः किंचिदंतरे ॥ उत्थितं सहसा लिंगं भूमिं भित्त्वा सुदुर्दृशम् ॥ १३ ॥ खे वाणी चाभवत्तत्र पुष्पवर्षपुरःसरा ॥ प्रालेय तव हेतोस्तु सोमनाथसमं फलम् ॥ उत्थितं सागरतटे लिंगं तिष्ठात्र सुव्रत ॥ १४ ॥ ॥ प्रालेय उवाच ॥ ॥ यद्येवं सत्यमेतच्च तथाप्यात्मा प्रकल्पितः ॥ १५ ॥ प्रभासाय प्रयातव्यं यदाऽऽमृत्योर्मया स्फुटम् ॥ ततश्चैवोर्ज्जयंतोऽपि मूर्छाभावाल्लुठन्पुरः ॥ १६ ॥ अपश्यदुत्थितं लिंगं स चैवं प्रत्यपद्यत ॥ ततः प्रत्यक्षतां प्राप्तो भवश्चक्रे तयोर्दृढे[६] ॥ १७ ॥ दृष्ट्वा तनू ततो यातौ प्रभासं शिवसद्म च ॥ तावेतौ सोमनाथौ द्वौ सिद्धेश्वरसमीपतः ॥ १८ ॥ ऊर्जयंतः प्रतीच्यां च प्रालेयस्येश्वरोऽपरः ॥ सोमकुंडांभसि शनैः स्नात्वार्णवमहीजले ॥ १९ ॥ सोमनाथद्वयं पश्येज्जन्मपापात्प्रमुच्यते ॥ ब्रह्मात्र स्थापयित्वा तु हाटकेश्वर

१ सोमनाथमहिम्--सोमनाथमाहात्म्यम्--इत्यर्थः । २ ताम्--इति शेषः । यां कीर्तयिष्यामि तां शृण्वन्--मोक्षमवाप्नुयादिति योजना बोध्या । ३ चोलदेशसमुद्भवौ--इ०पा० । ४ अर्जयंतश्च--इ०पा० । ५ श्रुत्वा--इ०पा० । ६ दृढे--इति--तनू--इत्यस्य विशेषणम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

संज्ञितम् ॥ २० ॥ महीनगरके लिंगं पातालात्सुमनोहरम् ॥ तुष्टाव देवं प्रयतः स्तुतिं तां शृणु पांडव ॥ २१ ॥ नमस्ते भगवन्रुद्र भास्करा
मिततेजसे ॥ नमो भवाय रुद्राय रसायांबुमयाय ते ॥ २२ ॥ शर्वाय क्षितिरूपाय सदा सुरभिणे[1] नमः ॥ ईशाय वायवे तुभ्यं संस्पर्शाय[4]
नमोनमः ॥ २३ ॥ पशूनां पतये चापि पावकायातितेजसे ॥ भीमाय व्योमरूपाय शब्दमात्राय ते नमः ॥ २४ ॥ महादेवाय सोमाय
अमृताय नमोऽस्तु ते ॥ उग्राय यजमानाय नमस्ते कर्मयोगिने ॥ २५ ॥ इत्येवं नामभिर्दिव्यैः स्तव एष उदीरितः ॥ यः पठेच्छृणु
याद्वापि पितामहकृतं स्तवम् ॥ २६ ॥ हाटकेश्वरलिंगस्य नित्यं च प्रयतो नरः ॥ अष्टमूर्तेः स सायुज्यं लभते नात्र संशयः ॥ २७ ॥
हाटकेश्वरलिंगं च प्रयतो यः स्मरेदपि ॥ तस्य स्याद्वरदो ब्रह्मा तेनेदं स्थापितं जय[2] ॥ २८ ॥ एवंविधानि तीर्थानि महीसागरसंगमे[3] ॥ बहूनि
संति पुण्यानि संक्षेपाद्वर्णितानि मे ॥ २९ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां प्रथमे माहेश्वरखण्डे कौमारिकाखण्डे
स्तम्भतीर्थमाहात्म्ये सोमनाथवृत्तांतवर्णनंनामाष्टचत्वारिंशोऽध्यायः ॥ ४८ ॥ ॥ छ ॥ ॥ अर्जुन उवाच ॥ ॥ अत्यद्भुतानि तीर्थानि
लिंगानि च महामुने ॥ श्रुत्वा तव मुखांभोजाद्भृशं मे हृष्यते मनः ॥ १ ॥ महीनगरकस्यापि स्थापितस्य त्वया मुने ॥ यानि तीर्थानि
मुख्यानि तानि वर्णय मे प्रभो ॥ २ ॥ ॥ नारद उवाच ॥ ॥ श्रीमन्महीनगरके यानि तीर्थानि फाल्गुन ॥ तानि वक्ष्यामि यत्रास्ते जया
दित्यो रविः प्रभुः ॥ ३ ॥ जयादित्यस्य यो नाम कीर्तयेदिह मानवः ॥ सर्वरोगविनिर्मुक्तो लभेत्सोऽपि हृदीप्सितम् ॥ ४ ॥ यस्य संदर्शनादेव
कल्याणैरपि पूर्यते ॥ मुच्यते चाप्यकल्याणैः श्रद्धावान्पार्थ मानवः ॥ ५ ॥ तस्य देवस्य[5] चोत्पत्तिं शृणु पार्थ वदामि ते ॥ शृण्वन्वा कीर्तयन्वापि
प्रसादं भास्कराल्लभेत् ॥ ६ ॥ अहं संस्थाप्य संस्थानमेतत्कालेन केनचित् ॥ प्रयातो भास्करं लोकं दर्शनार्थी यदृच्छया ॥ ७ ॥ स मां प्रणतमा
सीनमभ्यर्च्यार्घेण भास्करः ॥ प्रहसन्निव प्राहेदं देवो मधुरया गिरा ॥ ८ ॥ कुत आगम्यते विप्र क्व च वा प्रतिगम्यते ॥ क्व चायं नारदमुने
कालस्ते विहृतोऽभवत् ॥ ९ ॥ ॥ नारद उवाच ॥ ॥ एवमुक्तो भास्करेण तं तदा प्राब्रवं वचः ॥ भारते विहृतः खण्डे महीनगरकादपि[6] ॥
दर्शनार्थं तव विभो समायातोऽस्मि भास्कर ॥ १० ॥ ॥ रविरुवाच ॥ ॥ यत्त्वया स्थापितं स्थानं तत्र ये संति ब्राह्मणाः ॥ तेषां गुणान्मम

१ सुरभिणे—सुरभिः—सुगंधः विद्यते यस्य सः सुरभी—सुगन्धिः—तस्मै सुरभिणे । 'सुगंधिं पुष्टिवर्धनम्—' इति श्रुतेः । २ जय—हे अर्जुन—इत्यर्जुनसंबोधनमिदम् । ३ महीसागररोधसि—इ० पा० । ४ संस्पर्शनात्—इ०पा० । ५ तीर्थस्य—इ०पा० । ६ महीसागरकात्—इ० पा० ।

CC-0. In Public Domain. Digitization by eGangotri

ब्रूहि किंगुणा ननु ते द्विजाः ॥ ११ ॥ ॥ नारद उवाच ॥ ॥ एवं पृष्टो भगवता पुनरेवाब्रवं वचः ॥ १२ ॥ यदि तान्भोः प्रशंसामि स्वीया न्स्तौतीति वाच्यता ॥ निंदाम्यनर्हान्कस्माद्वा कष्टमेवोभयत्र च ॥ १३ ॥ अथवापारमाहात्म्ये सति तेषां महात्मनाम् ॥ अल्पे कृते वर्णने स्या द्दोष एव महान्मम ॥ १४ ॥ मदर्चितद्विजेंद्राणां यदि स्याच्छ्रवणेप्सुता ॥ ततः स्वयं विलोक्यास्ते गत्वेदं मे मतं रवे ॥ १५ ॥ इति श्रुत्वा मम वचो रविरासीत्सुविस्मितः ॥ स्वयं द्रक्ष्यामि चोवाच पुनःपुनरहर्पतिः ॥ १६ ॥ सोऽथ विप्रतनुं कृत्वा मां विसर्ज्यैव भास्करः ॥ प्रतपन्दिवि योगाच्च प्रयातोर्णवरोधसि ॥ १७ ॥ जटां त्रिषवणस्नानपिंगलां धारयन्नथ ॥ वृद्धद्विजो महातेजा ददृशे ब्राह्मणैर्मम ॥ १८ ॥ ततो हारीतप्रमुखाः प्रहर्षोत्फुल्ललोचनाः ॥ उत्थाय ब्रह्मशालायास्ते द्विजा द्विजमाद्रवन् ॥१९॥ नमस्कृत्य द्विजाग्र्यं ते प्रहर्षादिदमब्रुवन् ॥२०॥ अद्य नो दिवसः पुण्यः स्थानमद्योत्तमं त्विदम् ॥ यत्त्वया विप्रप्रवर स्वयमागमनं कृतम् ॥ २० ॥ धन्यस्य हि गृहस्थस्य कृपयैव द्विजोत्तमाः ॥ आतिथ्यवेषेणायांति पावनार्थं न संशयः ॥२२॥ तत्त्वं गेहानि चास्माकं पादचंक्रमणेन च ॥ दर्शनाद्भोजनात्स्थानादस्माभिः सह पावय ॥२३॥ ॥ अतिथिरुवाच ॥ ॥ भोजनं द्विविधं विप्रा प्राकृतं परमं तथा ॥ तदहं सम्यगिच्छामि दत्तं परमभोजनम् ॥ २४ ॥ इत्येतदतिथेः श्रुत्वा हारीतः पुत्रमब्रवीत् ॥ अष्टवर्षं तु कमठं वेत्सि पुत्र द्विजोदितम् ॥२५॥ ॥ कमठ उवाच ॥ ॥ तात प्रणम्य त्वां वक्ष्ये तादृक्परमभोजनम् ॥ द्विजं च तर्पयिष्यामि दत्त्वा परमभोजनम् ॥ ॥२६॥ सुतेन किल जातेन जायते चानृणः पिता ॥ सत्यं कारिष्ये तद्वाक्यं संतर्प्यातिथिमुत्तमम् ॥२७॥ भोजनं द्विप्रकारं च प्रविभागस्तयोरयम् ॥ प्राकृतं प्रोच्यते त्वेवमन्यत्परमभोजनम् ॥ २८ ॥ तत्र यत्प्राकृतं नाम प्रकृतिप्रमुखस्य तत् ॥ चतुर्विंशतितत्त्वानां गणस्योक्तं हि तर्पणम् ॥ २९ ॥ षड्रसं भोजनं तच्च पंचभेदं वदंति च ॥ येन भुक्तेन तृप्तं स्यात्क्षेत्रं यद्देहलक्षणम् ॥ ३० ॥ यथापरंपरंनाम प्रोक्तं परमभोजनम् ॥ परमः प्रोच्यते चात्मा तस्य तद्भोजनं भवेत् ॥ ३१ ॥ ततो नानाप्रकारस्य धर्मस्य श्रवणं हि यत् ॥ तदन्नं प्रोच्यते भोक्ता क्षेत्रज्ञः श्रवणौ मुखम् ॥ ३२ ॥ तद्वास्यामि द्विजाग्र्याय पृच्छ विप्र यदिच्छसि ॥ शक्तितस्तर्पयिष्यामि त्वामहं विप्रसंसदि ॥ ३३ ॥ ॥ नारद उवाच ॥ ॥ कमठस्यैतदाकर्ण्य सोऽतिथि र्वचनं महत् ॥ मनसैव प्रशस्यामुं प्रश्नमेनमथाकरोत् ॥ ३४ ॥ कथं संजायते जंतुः कथं चापि प्रलीयते ॥ भस्मतामथ संप्राप्य क्व चायं प्रतिपद्यते ॥ ३५ ॥ ॥ कमठ उवाच ॥ ॥ गुरवे प्राङ्नमस्कृत्य धर्माय तदनंतरम् ॥ छंदोगीतममुं प्रश्नं शक्त्या वक्ष्यामि ते द्विज ॥ ३६ ॥

१ अनर्हान्–निंदितुमनर्हान्–इत्यर्थः । २ "अहरादीनां पत्यादिषु वा रेफः" इति रेफः । ३ यादृक्--इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जनने त्रिविधं कर्म हेतुर्जंतोर्भवेत्किल ॥ पुण्यं पापं च मिश्रं च सत्त्वराजसतामसम् ॥ ३७ ॥ तत्र यः सात्त्विको नाम स स्वर्गं प्रतिपद्यते ॥ स्वर्गात्कालपरिभ्रष्टो धनी धर्मी सुखी भवेत् ॥ ३८ ॥ तथा यस्तामसोनाम नरकं प्रतिपद्यते ॥ भुक्त्वा बह्वीर्यातनाश्च स्थावरत्वं प्रपद्यते ॥ ३९ ॥ महतां दर्शनस्पर्शैरुपभोगसहास्नैः ॥ महता कालयोगेन संसरन्मानवो भवेत् ॥ ४० ॥ सोऽपि दुःखदरिद्राद्यैर्वेष्टितो विकलेंद्रियः ॥ प्रत्यक्षः सर्वलोकानां पापस्यैतद्धि लक्षणम् ॥ ४१ ॥ अथ यो मिश्रकर्मा स्यात्तिर्यक्त्वं प्रतिपद्यते ॥ महतामेव संसर्गात्संसरन्मानवो भवेत् ॥ ४२ ॥ यस्य पुण्यं पृथुतरं पापमल्पं हि जायते ॥ स पूर्वं दुःखितो भूत्वा पश्चात्सौख्यान्वितो भवेत् ॥ ४३ ॥ पापं पृथुतरं यस्य पुण्यमल्पतरं भवेत् ॥ पूर्वं सुखी ततो दुःखी मिश्रस्यैतद्धि लक्षणम् ॥ ४४ ॥ तत्र मानुषसंभूतिं शृणु यादृगसौ भवेत् ॥ पुरुषस्य स्त्रियाश्चैव शुक्रशोणितसंगमे ॥ ४५ ॥ सर्वदोषविनिर्मुक्तो जीवः संसरते स्फुटम् ॥ गुणान्वितंमनोबुद्धिशुभाशुभसमन्वितः[1] ॥ ४६ ॥ जीवः प्रविष्टो गर्भं तु[2] कलले प्रतितिष्ठति ॥ मूढश्च कलले तत्र मासमात्रं च तिष्ठति ॥ ४७ ॥ द्वितीयं तु तथा मासं घनीभूतः स तिष्ठति ॥ तस्यावयवनिर्माणं तृतीये मासि जायते ॥ ४८ ॥ अस्थीनि च तथा मासि जायंते च चतुर्थके ॥ त्वग्जन्म पंचमे मासि षष्ठे रोम्णां समुद्भवः ॥ ४९ ॥ सप्तमे च तथा मासि प्रबोधश्चास्य जायते ॥ मातुराहारपीतं च सप्तमे मास्युपाश्नुते ॥ ५० ॥ अष्टमे नवमे मासि भृशमुद्विजते ततः ॥ जरायुणा वेष्टितांगो मुखे बद्धकरांगुलिः ॥ ५१ ॥ मध्ये क्लीबस्तु वामे स्त्री दक्षिणे पुरुषस्तथा ॥ तिष्ठत्युदरभागे च पृष्ठेरग्निमुखः[3] किल ॥ ५२ ॥ यस्यां तिष्ठत्यसौ योनौ तां च वेत्ति न संशयः ॥ सर्वं स्मरति वृत्तांतं बहूनां जन्मनामपि ॥ ५३ ॥ अंधे तमसि किंर्दृश्यो[4] गंधान्मोहं दृढं लभेत् ॥ शीते मात्रा जले पीते शीतमुष्णं तथोष्णके ॥ ५४ ॥ व्यायामे लभते मातुः क्लेशं व्याधेश्च वेदनाम् ॥ अलक्ष्याः पितृमातृभ्यां जायंते व्याधयः पराः ॥ ५५ ॥ सौकुमार्याद्रुजं तीव्रां जनयंति च तस्य ते ॥ स्वल्पमप्यथ तं कालं वेत्ति वर्षशतोपमम् ॥ ५६ ॥ संतप्यते भृशं गर्भे कर्मभिश्च पुरातनैः ॥ मनोरथांश्च कुरुते सुकृतार्थं पुनःपुनः ॥ ५७ ॥ जन्म चेदहमाप्स्यामि मानुष्ये जीवितं तथा ॥ ततस्तत्प्रकरिष्यामि येन मोक्षो भवेत्स्फुटम् ॥ ५८ ॥ एवं तु चिंतयानस्य सीमंतोन्नयनादनु ॥ मासद्वयं तद्व्रजति पीडतस्त्रियुगाकृति ॥ ५९ ॥ ततः स्वकाले संपूर्णे सूतिमारुतचालितः ॥ भवत्यवाङ्मुखो जंतुः पीडामनुभवन्पराम् ॥ ६० ॥ अधोमुखः संकटेन योनिद्वारेण निःसरेत् ॥ पीडया पीड्यमानोऽपि चर्मोत्कर्तनतुल्यया ॥ ६१ ॥ करपत्रसमस्पर्शं करसंस्पर्शना

१ गुणान्वितसतन्मात्रमनोबुद्ध्या समन्वितः--इ०पा०। २ गर्भे च--इ०पा०। ३पृष्ठेः (पृष्ठभागस्य) उदरभागे--(मध्यप्रदेशे) अग्निमुखः सन्--तिष्ठति--इत्यन्वययोजना।४किंदृश्यः--गूढत्वाददृश्यः--उपरि--इत्यर्थः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दिकम् ॥ असौ जातो विजानाति मासमात्रं विमोहितः ॥ ६२ ॥ प्राक्कर्मवशगस्यास्य गर्भज्ञानं च नश्यति ॥ ततः करोति कर्माणि श्वेतरक्ता सितानि च ॥ ६३ ॥ अस्थिपट्टतुलास्तंभस्नायुबंधेन यंत्रितम् ॥ रक्तमांसमृदालिप्तं विण्मूत्रद्रव्यभाजनम् ॥ ६४ ॥ सप्तभित्तिसुसंबद्धं छन्नं रोम तृणैरपि ॥ वदनैकमहाद्वारं गवाक्षाष्टविभूषितम् ॥ ६५ ॥ ओष्ठद्वयकपाटं च दंतार्गलविमुद्रितम् ॥ नाडीस्वेदप्रवाहं च कफपित्तपरिप्लुतम् ॥ ॥ ६६ ॥ जराशोकसमाविष्टं कालवक्त्रानलस्थितम् ॥ रागद्वेषादिभिर्ध्वस्तं षट्कौशिकसमुद्भवम् ॥ ६७ ॥ एवं संजायते पुंसो देहगेहमिदं द्विज ॥ यस्मिन्वसति क्षेत्रज्ञो गृहस्थो बुद्धिगेहिनी ॥ ६८ ॥ मोक्षं स्वर्गं च नरकमास्ते संसाधयन्नपि ॥ ६९ ॥ ॥ इति श्रीस्कान्दे महापुराण एकाशीति साहस्र्यां संहितायां प्रथमे माहेश्वरखण्डे कौमारिकाखंडे कमठसूर्यसंवादे जीवस्य देहोत्पत्तिवर्णनंनामैकोनपञ्चाशत्तमोऽध्यायः ॥ ४९ ॥ ॥ छ ॥ ॥ ॥ अंतिथिरुवाच ॥ ॥ साध्वबालमते बाल कमठैतत्त्वयोच्यते ॥ शरीरलक्षणं श्रोतुं पुनरिच्छामि तद्वद ॥ १ ॥ ॥ कमठ उवाच ॥ ॥ यथैत द्वेद ब्रह्मांडं शरीरं च तथा शृणु ॥ पादमूलं च पातालं प्रपदं च रसातलम् ॥ २ ॥ तलातलं तथा गुल्फौ जंघे चास्य महातलम् ॥ जानुनी सुतलं चोरू वितलं चातलं कटिम् ॥ ३ ॥ नाभिं महीतलं प्राहुर्भुवर्लोकमथोदरम् ॥ उरःस्थलं च स्वर्लोकं महर्ग्रीवा मुखं जनम् ॥ ४ ॥ नेत्रे तपः सत्यलोकं शीर्षदेशं वदंति च ॥ तद्यथा सप्त द्वीपानि पृथिव्यां संस्थितानि च ॥ ५ ॥ तथात्र धातवः सप्त नामतस्तान्निबोध मे ॥ त्वगसृङ्मांस मेदोऽस्थिमज्जाशुक्राणि धातवः ॥ ६ ॥ अस्थ्नामत्र शतानि स्युस्त्रीणि षष्ट्यधिकानि च ॥ त्रिंशच्छतसहस्राणि नाडीनां कथितानि च ॥ ७ ॥ षट्पंचाशत्सहस्राणि तथान्यानि नवैव तु ॥ ता वहंति रसं देहे जलं नद्यो यथा भुवि ॥८॥ सार्धाभिस्तिसृभिश्छन्नं समंताद्रोमकोटिभिः ॥ शरीरं स्थूलसूक्ष्माभिर्दृश्यादृश्या हि ताः स्मृताः ॥९॥ षडंगानि प्रधानानि कथ्यमानानि मे शृणु ॥ द्वौ बाहू सक्थिनी द्वे च मूर्धा जठरमेव च ॥ १० ॥ अंत्राण्यत्र तथा त्रीणि सार्धव्यामत्रयाणि च ॥ त्रिव्यामानि तथा स्त्रीणामाहुर्वेदविदो द्विजाः ॥ ११ ॥ ऊर्ध्वनालमधोवक्त्रं हृदि पद्मं प्रकीर्त्यते ॥ हृत्पद्मवामतः प्लीहो दक्षिणे स्यात्तथा यकृत् ॥ १२ ॥ मज्जातो मेदसश्चैव वसायाश्च तथा द्विज ॥ मूत्रस्य चैव पित्तस्य श्लेष्मणः शकृतस्तथा ॥ ॥ १३ ॥ रक्तस्य चरमस्यात्र गर्ता द्व्यंजलयः स्मृताः ॥ तेभ्यः प्रवर्तमानास्ते देहं संधारयंत्युत ॥ १४ ॥ सीवन्यश्च तथा सप्त पंच मूर्धानमास्थिताः ॥ एका मेढ्रं गता चैका तथा जिह्वां गता द्विज ॥ १५ ॥ नाड्यः सर्वाः प्रवर्तंते नाभिपद्मात्तथात्र च ॥ यासां श्रेष्ठा शिरो याता सुषुम्नेडाऽ

१ श्वेतरक्तासितानि—सात्त्विक—राजस—तामसानि—इत्यर्थः । २ द्विज उवाच—इ० पा० । ३ उच्यते-इ०पा० । ४ प्रकीर्तितम्—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

थ पिंगला ॥ १६ ॥ नासिकाद्वारमासाद्य संस्थिते देहवर्धने ॥ वायुरग्निश्चंद्रमाश्च पंचधा पंचधात्र च ॥ १७ ॥ प्राणापानसमानाश्च उदानो व्यान एव च ॥ पंच भेदाः स्मृता वायोः कर्माण्येषां वदंति च ॥ १८ ॥ उच्छ्वासश्चैव निःश्वासो ह्यन्नपानप्रवेशनम् ॥ आकंठाच्छीर्षसंस्थास्य प्राणकर्म प्रकीर्तितम् ॥ १९ ॥ त्यागो विण्मूत्रशुक्राणां गर्भविस्रवणं तथा ॥ अपानकर्म निर्दिष्टं स्थानमस्य गुदोपरि ॥ २० ॥ समानो धारयत्यन्नं विवेचयति चाप्यथ ॥ रसयंश्चैव चरति सर्वस्रोणिष्ववारितः ॥ २१ ॥ वाक्प्रवृत्तिप्रदोद्गारे प्रयत्ने सर्वकर्मणाम् ॥ आकंठमुरसंस्थानमुदानस्य प्रकीर्त्यते ॥ २२ ॥ व्यानो हृदि स्थितो नित्यं तथा देहचरोपि च ॥ धातुवृद्धिप्रदः स्वेदलालोन्मेषनिमेषकृत् ॥ २३ ॥ पाचको रजकश्चैव साधकालोचकौ तथा ॥ भ्राजकश्च तथा देहे पञ्चधा पावकः स्थितः ॥ २४ ॥ पाचकस्तु पचत्यन्नं नित्यं पक्वाशये स्थितः ॥ आमाशयस्थोऽपि रसं रंजकः कुरुते त्वसृक् ॥ २५ ॥ साधको हृदिसंस्थश्च बुद्ध्याद्युत्साहकारकः ॥ आलोचकश्च दृक्संस्थो रूपदर्शनशक्तिकृत् ॥ २६ ॥ त्वक्संस्थो भ्राजको देहं भ्राजयेन्निर्मलीकृतः ॥ क्लेदको बोधकश्चैव तर्पणः श्लेष्मणस्तथा ॥ २७ ॥ आलंबकस्तथा देहे पंचधा सोम उच्यते ॥ क्लेदकः क्लेदयत्यन्नं नित्यं पक्वाशये स्थितः ॥२८॥ बोधको रसनास्थश्च रसानामवबोधकः ॥ शिरःस्थश्चक्षुरादीनां तर्पणात्तर्पणः स्मृतः ॥ २९ ॥ सर्वसंधिगतश्चैव श्लेष्मणः श्लेष्मकृत्तथा ॥ उरःस्थः सर्वगात्राणि स वै ह्यालंबकः स्थितः ॥३०॥ एवं वाय्वग्निसोमैश्च देहः संधारितस्त्वसौ ॥ आकाशजानि स्रोतांसि तथा कोष्ठविविक्तता ॥ ३१ ॥ पार्थिवानीह जानीहि घ्राणकेशनखानि च ॥ अस्थीनि धैर्यं गुरुता त्वङ्मांसं हृदयं गुदम् ॥ ३२ ॥ नाभिर्मेदो यकृन्मज्जा अंत्रमामाशयः शिरा ॥ स्नायुः पक्वाशयश्चैव प्राहुर्वेदविदो द्विजाः ॥ ३३ ॥ नेत्रयोर्मंडलं शुक्लं कफाद्भवति पैतृकम् ॥ कृष्णं च मण्डलं वातात्तथा भवति मातृकम् ॥ ३४ ॥ पक्ष्ममण्डलमेकं तु द्वितीयं चर्ममण्डलम् ॥ शुक्लं तृतीयं कथितं चतुर्थं कृष्णमण्डलम् ॥ ३५ ॥ दृङ्मण्डलं पंचमं तु नेत्रं स्यात्पंचमण्डलम् ॥ अपरे नेत्रभागे द्वे उपांगोऽपांग एव च ॥ ३६ ॥ उपांगो नेत्रपर्यंतो नासामूलमपांगकः ॥ वृषणौ च तथा प्रोक्तौ मेदोसृक्कफमांसकौ ॥ ३७ ॥ असृङ्मांसमयी जिह्वा सर्वेषामेव देहिनाम् ॥ हस्तयोरोष्ठयोर्मेढ्रे ग्रीवायां षट् च कूर्चकाः ॥ ३८ ॥ एवमत्र स्थिते जीवो देहेऽस्मिन्सप्तसप्तके ॥ पंचविंशतिको व्याप्य देहं[2] वासोऽस्य मूर्धनि ॥ ३९ ॥ त्वगसृग्मांसमित्याहुस्त्रिकं मातृसमुद्भवम् ॥ मेदोमज्जास्थिकं प्रोक्तं पितृजं षट्च कौशिकम् ॥ ४० ॥ एवं भूतमयं देहं पंचभूतसमुद्भवैः ॥ अन्नैर्यथा वृद्धिमेति तदहं वर्ण

१ अस्यार्थो वैद्यकशास्त्रज्ञाज्ज्ञातव्यः । २ देहं व्याप्य स्थितः--इति योजना । अस्य जीवस्य वासः मूर्धनि--इति तदनुसम्बद्धमन्वयान्तरम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यामि ते ॥४१॥ तदन्नं पिण्डकवलैर्ग्रासैर्भुक्तं च देहि[1]भिः ॥ पूर्वं स्थूलाशये वायुः प्राणः प्रकुरुते द्विधा ॥ ४२ ॥ संप्रविश्यान्नमध्ये तु पृथगन्नं पृथग्जलम् ॥ अग्नेरूर्ध्वं जलं स्थाप्य तदन्नं तज्जलोपरि ॥ ४३ ॥ जलस्याधः स्वयं प्राणः स्थित्वाग्निं धमते शनैः ॥ वायुना धम्यमानोग्निरत्युष्णं कुरुते जलम् ॥ ४४ ॥ तदन्नमुष्णतोयेन समंतात्पच्यते पुनः ॥ द्विधा भवति तत्पक्वं पृथक्किट्टं पृथग्रसम् ॥ ४५ ॥ मलैर्द्वादशभिः किट्टं भिन्नं देहाद्बहिर्व्रजेत् ॥ कर्णाक्षिनासिकाजिह्वादंताः शिश्नं गुदं नखाः ॥ ४६ ॥ रोमकूपाणि चैव स्युर्द्वादशैते मलाश्रयाः॥हृत्पद्मप्रतिबद्धाश्च सर्वा नाड्यः समंततः ॥ ४७ ॥ तासां मुखेषु तं सूक्ष्मं व्यानः स्थापयते रसम् ॥ रसेन तेन ता नाडीः समानः पूरयेत्पुनः ॥ ४८ ॥ ततः प्रयांति संपूर्णास्ताश्च देहं समंततः ॥ ततः स नाडिमध्यस्थो रञ्जकेनोष्मणा रसः ॥ ४९ ॥ पच्यते पच्यमानस्तु रुधिरत्वं भजेत्पुनः ॥ ततस्त्वग्लोमकेशाश्च मांसं स्नायु शिरास्थि च ॥ ५० ॥ नखा मज्जा [2]खवैमल्यं शुक्रवृद्धिः क्रमाद्भवेत् ॥ एवं द्वादशधान्नस्य परिणामः प्रकीर्त्यते ॥ ५१ ॥ एवमेतद्विनिष्पन्नं शरीरं पुण्यहेतवे ॥ यथैव स्यंदनः शुभ्रो भारसंवाहनाय च ॥ ५२ ॥ तैलाभ्यंगादिभिर्यत्नैर्बहुभिः पाल्यते न चेत् ॥ किं कृत्यं साध्यते तेन यदि भारं वहेन्न हि ॥ ५३ ॥ एवमेतेन देहेन किं कृत्यं भोजनोत्तमैः ॥ वर्धितेन न चेत्पुण्यं कुरुते पशुवच्च तत् ॥ ५४ ॥ भवंति चात्र श्लोकाः ॥ यस्मिन्काले च देशे च वयसा यादृशेन च ॥ कृतं शुभाशुभं कर्म तत्तथा तेन भुज्यते ॥ ५५ ॥ तस्मात्सदा शुभं कार्यमविच्छिन्नसुखार्थिभिः ॥ विच्छिद्यंतेऽन्यथा भोगा ग्रीष्मे कुसरितो यथा ॥ ५६ ॥ यस्मात्पापेन दुःखानि तीव्राणि सुबहून्यपि ॥ तस्मात्पापं न कर्तव्यमात्मपीडाकरं हि तत् ॥ ५७ ॥ एवं ते वर्णितः साधो प्रश्नोऽयं शक्तितो मया ॥ यथा संजायते प्राणी यथा शृणु प्रलीयते ॥ ५८ ॥ आयुष्ये कर्मणि क्षीणे संप्राप्ते मरणे नृणाम् ॥ स्वकर्मवशगो देही कृष्यते यमकिंकरैः ॥ ५९ ॥ पंचतन्मात्रसहितः समनोबुद्ध्यहंकृतिः ॥ पुण्यपापमयैः पाशैर्बद्धो जीवस्त्यजेद्वपुः ॥ ६० ॥ शीर्षण्यश्च सप्तभिश्छिद्रैर्निर्गच्छेत्पुण्यकर्मणाम् ॥ अधश्च पापिनां यांति योगिनां ब्रह्मरंध्रतः ॥ ६१ ॥ तत्क्षणात्सोऽथ गृह्णाति शारीरं चातिवाहिकम् ॥ अंगुष्ठपर्वमात्रं तु स्वप्राणैरेव निर्मितम् ॥ ६२ ॥ ततस्तस्मिन्स्थितं जीवं देहे यमभटास्तदा ॥ बद्ध्वा नयंति मार्गेण याम्येनातियथाबलम् ॥ ६३ ॥ तप्तां[3]बरीषतुल्येन अयोगुडनिभेन च ॥ प्रतप्तसिकतेनापि ताम्रपात्रनिभेन च ॥ ६४ ॥ षडशीतिसहस्राणि योजनानां महीतलात् ॥ कृष्यमाणो यमपुरीं नीयते पापकृद्भटैः ॥६५॥ क्वचिच्छीतं महादुर्गमन्धकारं क्वचिन्महत् ॥ अग्निसंस्पर्शवदनैः काककाकोलजंबुकैः ॥६६॥

१ देहिनाम्—इ० पा० । २ खवैमल्यम्--खानामिंद्रियाणां वैमल्यम्—शुद्धता । ३ तप्तांबरीषतुल्येन--तप्तभ्राष्ट्रसंनिभेन—इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मक्षिकादंशमशकैर्भक्ष्यते सर्पवृश्चिकैः ॥ भक्ष्यमाणोऽपि तैर्जंतुः क्रंदते म्रियते न हि ॥ ६७ ॥ क्वचिच्च भक्ष्यते घोरै राक्षसैः कृष्यतेऽस्यते[1] ॥
दह्यमानोतिघोरेण सैकतेन च नीयते ॥ ६८ ॥ मुहूर्तैर्दशभिर्याति तं मार्गमतिदुस्तरम् ॥ तं कालं सुमहद्वेत्ति पुरुषो वर्षसंमितम् ॥ ६९ ॥
तार्यते च नदीं घोरां पूयशोणितवाहिनीम् ॥ नदीं वैतरणींनाम केशशैवलशाद्वलाम् ॥ ७० ॥ ततो यमस्य पुरतः स्थाप्यते यमकिं
करैः ॥ पापी महाभयं पश्येत्कालांतकमुखैर्वृतम् ॥ ७१ ॥ पुण्यकर्मा सौम्यरूपं धर्मराजं तदा किल ॥ मनुष्या एव गच्छंति यमलोकं न चापरे ॥
॥ ७२ ॥ मरणानंतरं तेषां जंतूनां योनिपूरणम् ॥ तथाहि प्रेता मनुजाः श्रूयंते नान्यजंतवः ॥ ७३ ॥ धार्मिकः पूज्यते तत्र पापः पाशगलो भवेत् ॥
धार्मिकश्च यथा याति तं मार्गं शृणु वच्मि ते ॥ ७४ ॥ आरामद्रुमदातारः फलपुष्पवता पथा ॥ छायया च सुखं यांति तथा ये च्छत्रदा नराः ॥
॥ ७५ ॥ उपानहप्रदा यानैर्वितृषाः पूर्तधर्मिणः ॥ विमानैर्यानदा यांति तथा शय्यासनप्रदाः ॥ ७६ ॥ भक्ष्यभोज्यैस्तथा तृप्ता यांति भोजनदा
यिनः ॥ दीपप्रदाः प्रकाशेन गोप्रदास्तां नदीं सुखम् ॥७७॥ श्रीसूर्यं श्रीमहादेवं भक्ता ये पुरुषोत्तमम् ॥ जन्मप्रभृति ते यांति पूज्यमाना यमानुगैः
॥ ७८ ॥ महीं गां कांचनं लोहं तिलान्कार्पासमेव च ॥ लवणं सप्तधान्यं च दत्त्वा याति सुखं नरः ॥७९॥ तेषां तत्र गतानां च पापिनां पुण्यकर्मि
णाम् ॥ चित्रगुप्तः प्रेतपाय निरूपयति वै ततः ॥ ८० ॥ प्रेतलोके स वसति ततः संवत्सरं नरः ॥ वत्सरेण च तेनास्य शरीरमभिजायते ॥ ८१ ॥
सोदकुम्भमथान्नाद्यं बांधवैर्यत्प्रदीयते ॥ दिनेदिने स तद्भुक्त्वा तेन वृद्धिं प्रयाति च ॥ ८२ ॥ पूर्वदत्तमथान्नाद्यं प्राप्नोति स्वयमेव च ॥ स्वयं येन न
दत्तं च तथा दाता न विद्यते ॥ ८३ ॥ न चाप्युदकदातासौ क्षुत्तृड्भ्यामतिपीड्यते ॥ बांधवैस्तूदकं दत्तं नदीभूत्वोपतिष्ठति ॥ ८४ ॥ मासिमासि
च यच्छ्राद्धं षोडशश्राद्धपूर्वकम् ॥ अत्र न क्रियते यस्य प्रेतत्वात्स न मुच्यते ॥ ८५ ॥ मानुषेण दिनेनैव प्रेतलोके दिनं स्मृतम् ॥ तस्माद्दिनेदिने
देयं प्रेतायान्नं च वत्सरम् ॥ ८६ ॥ तं च स्माशानिकानाम गणा याम्या भयावहाः ॥ शीतवातातपोपेतं तत्र रक्षंति पापिनम् ॥ ८७ ॥
यथेह बन्धने कश्चिद्रक्ष्यते विषमैर्नरैः ॥ प्रेतपिंडा न दीयंते षोडशश्राद्धपूर्वकाः ॥ ८८ ॥ यस्य तस्य न मोक्षोऽस्ति प्रेतत्वाद्वै युगैरपि ॥ ततः सपि
ण्डीकरणे बांधवैः सुकृते नरः ॥ ८९ ॥ पूर्णे संवत्सरे देहं संपूर्णं प्रतिपद्यते ॥ पापात्मा घोररूपं तु धार्मिको दिव्यमुत्तमम् ॥ ९० ॥ ततः स
नरकं याति स्वर्गं वा स्वेन कर्मणा ॥ रौरवाद्याश्च नरकाः पातालतलसंस्थिताः ॥९१॥ सुराद्याः सत्यपर्यंताः स्वर्लोकस्योर्ध्वमाश्रिताः ॥ इतिहासपु

१ अस्यते--क्षिप्यते ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

राणेषु वेदस्मृतिषु यच्छ्रुतम् ॥ ९२ ॥ पुण्यं तेन भवेत्स्वर्गो नरकस्तद्विपर्ययात् ॥ तत्रापि कालवसतिकर्मणामनुरूपतः ॥९३॥ अर्वाक्सपिंडीकरणं यस्य वर्षाच्च वा कृतम् ॥ प्रेतत्वमपि तस्यापि प्रोक्तं संवत्सरं ध्रुवम् ॥ ९४ ॥ यैरिष्टं च त्रिभिर्मेधैरर्चितं वा सुरत्रयम् ॥ प्रेतलोकं न ते यांति तथा ये समरे हताः॥९५॥ शुद्धेन पुण्येन दिवं च शुद्धं पापेन शुद्धेन तथा तमोंधम् ॥ मिश्रेण स्वर्गं नरकं च याति देहस्तथैवास्य भवेच्च तादृक् ॥ ९६ ॥ प्रश्नत्रयं चेति तव प्रणीतमुत्पत्तिमृत्यू परलोकवासः ॥ यथा गुरुर्मे समुदाजहार किं भूय इच्छस्युत तद्वदामि ॥ ९७ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां प्रथमे माहेश्वरखण्ड कौमारिकाखण्डे आदित्यकमठसंवादे जीवस्य पारलौकिकगत्यादिवर्णनंनाम पंचाशत्तमोऽध्यायः ॥ ५० ॥ ॥ छ ॥ ॥ अतिथिरुवाच ॥ ॥ यदेतत्परलोकस्य स्वरूपं व्याहृतं त्वया ॥ आगमं समुपाश्रित्य तत्तथैव न संशयः ॥ १ ॥ किंत्वत्र नास्तिकाः पापाः सन्दिह्यन्तेऽल्पचेतनाः ॥ तेषां निःसंशयकृते वद कर्मफलं हि यत् ॥ २ ॥ इहैव कस्य कस्यैव कर्मणः पापकस्य च ॥ प्रभावात्कीदृशो जायेत्कमठैतद्वदास्ति चेत् ॥ ३ ॥ ॥ कमठ उवाच ॥ ॥ सर्वमेतत्प्रवक्ष्यामि स्थिरो भूत्वा शृणुष्व तत् ॥ यथा मम गुरुः प्राह यन्मे चेतसि संस्थितम् ॥ ४ ॥ ब्रह्महा क्षयरोगी स्यात्सुरापः श्यावदंतकः ॥ सुवर्णचौरः कुनखी दुश्चर्मा गुरुतल्पगः ॥ ५ ॥ संसर्गी सर्वरोगी स्यात्पंच पातकिनस्त्वमी ॥ निंदामाकर्ण्य साधूनां बधिरः संप्रजायते ॥ ६ ॥ स्वयं प्रकीर्तयेच्चापि मूकः पापोऽभिजायते ॥ आज्ञालोपी गुरूणां च अपस्मारी भवेन्नरः ॥ ७ ॥ अवज्ञाकारकस्तेषां कृमिरेवाभिजायते ॥ उपेक्षतः पूज्यकार्यं दुष्प्रज्ञत्वं च जायते ॥ ८ ॥ चौर्याय साधुद्रव्याणां दद्याद्यावत्पदानि च ॥ तावद्वर्षाणि पंगुत्वं स प्राप्नोति नराधमः ॥ ९ ॥ दत्त्वा हरति तद्भूयो जायते कृकलासकः ॥ कुपितानप्रसाद्यैव पूज्यान्स्याच्छीर्षरोगवान् ॥ १० ॥ रजस्वलामभिगच्छंश्च चंडालः संप्रजायते ॥ वस्त्रापहारी चित्री स्यात्कृष्णकुष्ठी तथाग्निदः ॥ ११ ॥ दर्दुरो रूप्यहारी स्यात्कूटसाक्षी मुखारुजः ॥ परदारांश्च कामेन द्रष्टा स्यादक्षिरोगवान् ॥ १२ ॥ प्रतिज्ञायाप्रयच्छन्यो ह्यल्पायुर्जायते नरः ॥ विप्रवृत्त्यपहारी स्यादजीर्णो सर्वदाऽधमः ॥ १३ ॥ नैष्ठिकान्नाशनाद्भूयो निवृत्तो रोगवान्सदा ॥ पत्नीबहुत्वे त्वेकस्यां रेतोमोक्षः क्षयी भवेत् ॥ १४ ॥ स्वामिना धर्मयुक्तो यस्त्वन्यायेन समाचरेत् ॥ स्वयं वा भक्षयेद्द्रव्यं स मूढः स्याज्जलोदरी ॥ १५ ॥ दुर्बलं पीडयमानं यो बलवान्समुपेक्षते ॥ अंगहीनः स च भवेदन्नद्वत्क्षुधितो भवेत् ॥ १६ ॥ व्यवहारे पक्षपाती जिह्वारोगी भवेन्नरः ॥ धर्मप्रवृत्तिं

१ कालवसतिकर्मणाम्--अनुरूपतः--कालदेशकर्मानुसारेणेत्यर्थः । २ तत्--इ०पा० । ३ चित्री--चित्र--श्वेतकुष्ठवान्--इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सश्चार्य पत्न्यादीष्टवियोगकृत् ॥ १७ ॥ स्वयंपाकग्रभोजी यो गलरोगमवाप्नुयात् ॥ पंचयज्ञानकृत्तैव भुञ्जानो ग्रामशूकरः ॥ १८ ॥ पर्वमैथुनकृन्मेही परित्यज्य स्वगेहिनीम् ॥ वेश्यादिरक्तो मूढात्मा खल्वाटो जायते नरः ॥ १९ ॥ परिक्षीणान्मित्रबन्धून्स्वामिनं दयितानुगान् ॥ अवमन्य निवृत्तात्मा क्लिष्टवृत्तिः सदा भवेत् ॥ २० ॥ छद्मनोपचरेद्यस्तु पितरौ स्वामिनं गुरून् ॥ प्राप्तव्यार्थस्यातिकष्टात्परिभ्रंशोर्थजो भवेत् ॥ २१ ॥ विश्रब्धस्यापहारी तु दुःखानां भाजनं भवेत् ॥ धार्मिके क्षुद्रकारी यो नरः स वामनो भवेत् ॥ २२ ॥ दुर्बलवृषवाही[1] यः कटिलूती भवेत्स[2] च ॥ २३ ॥ जात्यंधश्चापि यो गोघ्नो निःपशुर्दुःखकृद्गवाम् ॥ निर्दयो गोषु घाताद्यैः सदा सोध्वसु कष्टगः ॥ २४ ॥ निस्तेजकः सभायां यो गलगण्डी स जायते ॥ सदा क्रोधी च चंडालः पूतिवक्त्रश्च सूचकः ॥ २५ ॥ अजविक्रयकृद्व्याधः कुण्डाशी भृतको भवेत् ॥ नास्तिकस्तिलपिंडी स्यादश्रद्धो गीतजीवनः ॥ २६ ॥ अभक्ष्यादो गण्डमाली स्त्रीखादी[3] चाऽऽसुतस्य कृत् ॥ अन्यायतो ज्ञानग्राही मूर्खो भवति मानवः ॥२७॥ शास्त्रचौरः केकराक्षः कथां पुण्यां च द्वेष्टि यः ॥ कृमिवक्त्रः स च भवेद्विभ्रष्टो नरकात्कुधीः ॥ २८ ॥ देवद्विजगवां वृत्तिहारको वांतभक्षकृत्[4] ॥ तडागारामभेत्ता यो भवेद्विकलपाणिकः ॥ २९ ॥ व्यवहारे च्छलग्राही भृत्यग्रस्तो भवेन्नरः ॥ सदा पुरुषरोगी[5] स्यात्परदाररतो नरः ॥ ३० ॥ वातरोगी कुवैद्यः स्याद्दुश्चर्मा गुरुतल्पगः ॥ मधुमेही खरीगामी गोत्रस्त्रीमैथुनोऽप्रसूः[6] ॥ ३१ ॥ स्वसारं मातरं पुत्रवधूं गच्छन्नबीजवान् ॥ कृतघ्नः सर्वकार्याणां वैफल्यं समुपाश्नुते ॥ ३२ ॥ इत्येष लक्षणोद्देशः पापिनां परिकीर्तितः ॥ चित्रगुप्तोऽपि मुह्येत सकलस्यानुवर्णने ॥ ३३ ॥ एते नरकविभ्रष्टा भुक्त्वा योनीः सहस्रशः ॥ एवंविधैश्चिह्निताश्च जायंते लक्षणैर्नराः ॥ ३४ ॥ ये हि धर्मं न मन्यंते तथा ये व्यसनैर्जिताः ॥ अनुमानेन बोद्धव्यं यदेते शेषपापिनः ॥ ३५ ॥ येषां त्वंतगतं पापं स्वर्गाद्वा ये समागताः ॥ सर्वव्यसननिर्मुक्ता धर्ममेकं भजन्ति ते ॥ ३६ ॥ भवंति चात्र श्लोकाः ॥ धर्मादनवमं[7] सौख्यमधर्माद्दुःखसम्भवः ॥ तस्माद्धर्मं सुखार्थाय कुर्यात्पापं विवर्जयेत् ॥ ३७ ॥ लोकद्वयेऽपि यत्सौख्यं तद्धर्मात्प्रोच्यते यतः[8] ॥ धर्ममेकमतः कुर्यात्सर्वकार्यार्थसिद्धये ॥ ३८ ॥ मुहूर्तमपि जीवेत नरः शुक्लेन कर्मणा ॥ न कल्पमपि जीवेत लोकद्वयविरोधिना ॥ ३९ ॥ इति पृष्टं त्वया विप्र यथाशक्त्या मयेरितम् ॥ असूक्तं सूक्तमथवा क्षंतव्यं किं वदामि च ॥ ४० ॥ ॥ नारद उवाच ॥ ॥ कमठस्यैतदाकर्ण्य

१ दुर्वलवृषयायी--इ०पा० । २ नरः--इ०पा० । ३ स्त्रीखादी चासुतस्य कृत्--आसुतस्य मद्यस्य कर्ता स्त्रीखादी--मृतस्त्रीकः स्यादित्यर्थः । ४ वांतभक्षकृत्--वमनपूर्वकभोजनकर्ता । नान्नभक्षकृत्- इति पाठे--अन्नद्वेष्टा--इत्यर्थः । ५ पुरुषरोगी--पुरुषत्वरोगी--नपुंसकः--इत्यर्थः । ६ अप्रसूः--निष्प्रजः--इत्यर्थः । ७ अनवमम्--श्रेष्ठम्--इत्यर्थः । ८ सतः--इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अष्टवर्षस्य भाषितम् ॥ भगवान्भास्करः प्रीतो बभूवातीव विस्मितः ॥ ४१ ॥ प्रशशंस च तान्विप्रान्हारीतप्रमुखांस्तदा ॥ अहो वसुमती धन्या द्विजैरेवंविधोत्तमैः[1] ॥ ४२ ॥ अथ प्रजापतिर्धन्यो यन्मर्यादाभिपाल्यते ॥ अमीभिर्ब्राह्मणवरैर्धन्या वेदाश्च संप्रति ॥ ४३ ॥ येषां मध्ये बालबुद्धिरियमेतादृशी स्फुटा ॥ हारीतप्रमुखानां हि का वै बुद्धिर्भविष्यति ॥ ४४ ॥ असंशयं त्रिलोकस्थमेषामविदितं न हि ॥ यथैतान्नारदः प्राह भूयस्तस्मादमी बहु ॥ ४५ ॥ इति प्रशस्य तान्विप्रान्प्रहृष्टो रविरब्रवीत् ॥ अहं सूर्यो विप्रमुख्या युष्माकं दर्शनात्कृते[2] ॥ ४६ ॥ समागतः सूर्यलोकात्प्राप्तं नेत्रफलं च मे ॥ भवद्भिर्धैर्विप्रमुख्यैः संजल्पनसहासनात् ॥४७॥ अंत्यजा अपि पूयन्ते किं पुनर्मादृशा द्विजाः ॥ सर्वथा नारदो धन्यो योऽसौ त्रैलोक्यतत्त्ववित् ॥ ४८ ॥ युष्माभिर्बध्यते श्रेयो यस्य वै धूतकिल्बिषैः ॥ प्रणमामि च वः सर्वान्मनोबुद्धिसमाधिभिः ॥ तपो विद्या च वृत्तं च यतो वार्द्धक्यकारणम् ॥४९॥ वरं मत्तो वृणीध्वं च दुर्लभं यं हृदीच्छत॥यूयं स्वयं हि वरदा मत्संगो मास्तु निष्फलः॥५०॥देवतानां हि संसर्गो निष्फलो नोपजायते[3] ॥ तस्मान्मत्तो वरं किंचिद्वृणुध्वं[4] प्रददामि वः ॥५१॥ ॥ श्रीनारद उवाच ॥ ॥ इति सूर्यवचः श्रुत्वा प्रहृष्टास्ते द्विजोत्तमाः ॥५२॥ संपूज्य परया भक्त्या पाद्यार्घ्यस्तुतिवंदनैः ॥ मंडलादीन्महाजप्यान्गृणंतः प्रोचिरे रविम्॥५३॥जयादित्य जय स्वामिञ्जय भानो जयामल॥जय वेदपते शश्वत्तारयास्मानहर्पते ॥ ५४ ॥ विप्राणां त्वं परो देवो विप्रसर्गोऽपि त्वन्मयः ॥ नितरां पूतमेतन्नः स्थानं देव त्वयेक्षितम् ॥ ५५ ॥ अद्य नः सफला वेदा अद्य नः सफलाः क्रियाः ॥ अद्य नः सफलं गेहं त्वया संगम्य गोपते ॥ ५६ ॥ वरं यदि प्रदातासि तदेनं प्रवृणीमहे ॥ आस्माकीनमिदं स्थानं न हि त्याज्यं कथंचन ॥ ५७ ॥ ॥ श्रीसूर्य उवाच ॥ ॥ यस्माद्भवद्भिः पूर्वं हि जयादित्येति चोदितम् ॥ जयादित्य इति ख्यातस्तस्मात्स्थास्येऽत्र सर्वदा ॥ ५८ ॥ यावन्मही समुद्राश्च पर्वता नगराणि च ॥ तावत्स्थानमिदं विप्रा न हि त्यक्ष्यामि कर्हिचित् ॥५९॥ दारिद्र्यरोगसंघातान्दद्रवो मंडलानि च ॥ कुष्ठादीन्नाशयिष्यामि भजतामत्र संस्थितः ॥ ६० ॥ यो मामत्र स्थितं चापि पूजयिष्यति मानवः ॥ सूर्यलोकमिवागम्य[5] पूजां तस्य भजाम्यहम् ॥ ६१ ॥ ॥ श्रीनारद उवाच ॥ ॥ एवमुक्ते भगवता हारीताद्या द्विजोत्तमाः ॥ मूर्तिं संस्थापयामासुर्वेदोदितविधानतः ॥ ६२ ॥ ततो द्विजाः प्राहुरेवं कमठं त्वत्कृते रविः ॥ अत्र स्वामी स्थितस्तस्मात्प्रथमं स्तुहि त्वं[6] रविम् ॥ ६३ ॥ इत्युक्तो ब्राह्मणैः सर्वैः कमठो वाग्मिनां वरः ॥

१ स्मृता--इ०पा० । २ दर्शनात्कृते—दर्शनार्थम्—इत्यर्थः । ३ नोपपद्यते—इ०पा० । ४ शृणुध्वं प्रवदामि वः—इ०पा० । ५ यथा—सः सूर्यलोकमागम्य मम पूजां कुर्यात् तां स्वीकृत्य यथाहं सन्तुष्टः स्यां तथा अत्र आगत्य यो मत्पूजां करिष्यति तां पूजामपि तथैव स्वीकरिष्यामीति भावः । एतेनात्र पूजायाः सूर्यलोकं गत्वा सूर्यपूजावन्माहात्म्यं सूचितम् । ३ तम्—इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

प्रणिपत्य जयादित्यं महास्तोत्रमिदं जगौ ॥ ६४ ॥ न त्वं कृतः केवलसंश्रुतश्च यजुष्येवं व्याहरत्यादिदेव ॥ चतुर्विधा भारती दूरदूरं धृष्टः स्तौमि स्वार्थकामः क्षमैतत् ॥ ६५ ॥ मार्तंडसूर्यांशुरविस्तथेन्द्रो भानुर्भगश्चार्यमा स्वर्णरेताः ॥ ६६ ॥ दिवाकरो मित्रविष्णुश्च देव ख्यातस्त्वं वै द्वादशात्मा नमस्ते ॥ लोकत्रयं वै तव गर्भगेहं जलाधारः प्रोच्यसे खं समग्रम् ॥ ६७ ॥ नक्षत्रमाला कुसुमाभिमाला तस्मै नमो व्योमलिंगाय तुभ्यम् ॥ ६८ ॥ त्वं देवदेवस्त्वमनाथनाथस्त्वं प्राप्यपालः कृपणे कृपालुः ॥ त्वं नेत्रनेत्रं जनबुद्धिबुद्धिराकाशकाशो जय जीवजीवः ॥ ६९ ॥ दारिद्र्यदारिद्र्य निधे निधीनाममंगलामंगल शर्मशर्म ॥ रोगप्ररोगः प्रथितः पृथिव्यां चिरं जयादित्य जयाप्रमेय ॥७०॥ व्याधिग्रस्तं कुष्ठरोगाभिभूतं भग्नघ्राणं शीर्णदेहं विसंज्ञम् ॥ माता पिता बांधवाः संत्यजंति सर्वैस्त्यक्तं पासि कोस्ति त्वदन्यः ॥ ७१ ॥ त्वं मे पिता त्वं जननी त्वमेव त्वं मे गुरुर्बान्धवाश्च त्वमेव ॥ त्वं मे धर्मस्त्वं च मे मोक्षमार्गो दासस्तुभ्यं त्यज वा रक्ष देव ॥७२॥ पापोऽस्मि मूढोऽस्मि महोग्रकर्मा रौद्रोऽस्मि नाचारनिधानमस्मि ॥ तथापि तुभ्यं प्रणिपत्य पादयोर्जयं भक्तानामर्पय श्रीजयार्क ॥ ७३ ॥ ॥ नारद उवाच ॥ ॥ एवं स्तुतो जयादित्यः कमठेन महात्मना ॥ स्निग्धगंभीरया वाचा प्राह तं प्रहसन्निव ॥ ७४ ॥ जयादित्याष्टकमिदं यत्त्वया परिकीर्तितम् ॥ अनेन स्तोष्यते यो मां भुवि तस्य न दुर्लभम् ॥ ७५ ॥ रविवारे विशेषेण मां समभ्यर्च्य यः पठेत् ॥ तस्य रोगा न शिष्यंति दारिद्र्यं च न संशयः ॥ ७६ ॥ त्वया च तोषितो वत्स तव दद्मि वरं त्वमुम् ॥ सर्वज्ञो भुवि भूत्वा त्वं ततो मुक्तिमवाप्स्यसि ॥ ७७ ॥ त्वत्पिता स्मृतिकारश्च भविष्यति द्विजार्चितः ॥ स्थानस्यास्य न नाशश्च कदाचित्प्रभविष्यति ॥ ७८ ॥ न चैतत्स्थानकं वत्स परित्यक्ष्यामि कर्हिचित् ॥ एवमुक्त्वा स भगवान्ब्राह्मणैरर्चितः स्तुतः ॥ ७९ ॥ अनुज्ञाप्य द्विजेद्रांस्तांस्तत्रैवांतर्दधे प्रभुः ॥ एवं पार्थ समुत्पन्नो जयादित्योऽत्र भूतले ॥ ८० ॥ आश्विने मासि संप्राप्ते रविवारे च सुव्रत ॥ आश्विने भानुवारेण यो जयादित्यमर्चयेत् ॥८१॥ कोटितीर्थे नरः स्नात्वा ब्रह्महत्यां व्यपोहति॥ पूजनाद्रक्तमाल्यैश्च रक्तचंदनकुंकुमैः॥८२॥ लेपनाद्गंधधूपाद्यैर्नैवेद्यैर्घृतपायसैः ॥ ब्रह्मघ्नश्च सुरापश्च स्तेयी च गुरुतल्पगः ॥ ८३ ॥ मुच्यते सर्वपापेभ्यः सूर्यलोकं च गच्छति ॥ पुत्रदारधनान्यायुः प्राप्य सांसारिकं सुखम् ॥ ८४ ॥ इष्टकामैः समायुक्तः सूर्यलोके चिरं वसेत् ॥ ८५ ॥ सर्वेषु रविवारेषु जयादित्यस्य दर्शनम् ॥ कीर्तनं स्मरणं वापि सर्व

१ तमोघ्नः–इ०पा० । २ प्राप्यपालः–शरणागतपालकः–इत्यर्थः । ३ विदम्–इ०पा० । ४ स महत्फलमश्नुते–इ०पा० । ५ सः–इ०पा० ।

CC-0. In Public Domain. Digitization by eGangotri

रोगोपशांतिदम् ॥ ८६ ॥ अनादिनिधनं देवमव्यक्तं तेजसां निधिम् ॥ ये भक्तास्ते च लीयंते सौरस्थाने निरामये ॥ ८७ ॥ सूर्योपरागे संप्राप्ते रविकूपे समाहितः ॥ स्नानं यः कुरुते पार्थ होमं कुर्यात्प्रयत्नतः ॥ ८८ ॥ दानं चैव यथाशक्त्या जयादित्याग्रतः स्थितः ॥ तस्य पुण्यस्य माहात्म्यं शृणुष्वैकमना जय ॥ ८९ ॥ कुरुक्षेत्रेषु यत्पुण्यं प्रभासे पुष्करेषु च ॥ वाराणस्यां च यत्पुण्यं प्रयागे नैमिषेऽपि वा ॥ तत्पुण्यं लभते मर्त्यो जयादित्यप्रसादतः ॥ ९० ॥ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां प्रथमे माहेश्वरखण्डे कौमारिकाखण्डे जयादित्यमाहात्म्यवर्णनंनामैकपंचाशत्तमोऽध्यायः ॥ ५१ ॥ ॥ छ ॥ ॥ अर्जुन उवाच ॥ ॥ कोटितीर्थं कथं जातं केन वा निर्मितं मुने ॥ कस्माद्वा कोटितीर्थानां फलमत्रोच्यते मुने ॥ १ ॥ ॥ नारद उवाच ॥ ॥ यदा मे स्थापितं स्थानं प्रसाद्याथ मया प्रभुः ॥ ब्रह्मलोकात्समानीतः साक्षाद्ब्रह्मा पितामहः ॥ २ ॥ ततो मध्याह्नसमये स्नानार्थे भगवान्विधिः ॥ सस्मार कोटितीर्थानां[३] स्मृतान्यत्रागतानि च ॥ ३ ॥ स्वर्गात्त्रिदशलक्षाणि सततिश्च महीतलात् ॥ पातालाद्विंशलक्षाणि स्मृतान्यभ्यागतानि च ॥ ४ ॥ अनेन प्रविभागेन लिंगान्यपि कुरूद्वह ॥ आयातानि यथा पूजां विदधाति पितामहः ॥ ५ ॥ ततोऽभिषेचनं कृत्वा लिंगान्यभ्यर्च्य पद्मभूः ॥ मध्याह्नकृत्यं संसाध्य मम प्रेम्णा वरं ददौ ॥ ६ ॥ ततो भगवता ह्यत्र मनसा निर्मितं सरः ॥ भगवानर्चितस्तीर्थैरिदमूचे प्रजापतिः ॥ ७ ॥ किं कुर्म भगवन्धातरादेशं देहि नः प्रभो ॥ तेषां तद्वचनं श्रुत्वा ब्रह्मा प्राह प्रजापतिः ॥ ८ ॥ एतस्मिन्सरसि स्थेयं तीर्थैः सर्वैरथात्र च ॥ एकस्मिंश्च तथा लिंगे सर्वलिंगैर्ममार्चनात् ॥ ९ ॥ कोटीनामेव तीर्थानां लिंगानां स्नानपूजया ॥ दानेन च फलं त्वत्र यदि सत्यं वचो मम ॥ १० ॥ यः श्राद्धं कुरुते चात्र पिंडदानं यथाविधि ॥ पितृणामक्षया तृप्तिर्जायते नात्र संशयः ॥ ११ ॥ स्नात्वा योऽभ्यर्चयेद्देवं कोटीश्वरमनन्यधीः ॥ कोटिलिंगार्चनफलं व्यक्तं तस्योपजायते ॥ १२ ॥ त्रैलोक्ये यानि तीर्थानि गंगाद्याः सरितस्तथा ॥ तेषां स फलमाप्नोति कोटितीर्थावगाहनात् ॥ १३ ॥ एवं दत्त्वा वरं ब्रह्मा ब्रह्मलोकं ययौ प्रभुः ॥ कोटितीर्थं च संजातं ततः प्रभृति विश्रुतम् ॥ १४ ॥ अस्य तीरे पुरा पार्थ ब्रह्माद्यैर्देवसत्तमैः ॥ यज्ञान्बहुविधान्कृत्वा ततः सिद्धिं परां ययुः ॥ १५ ॥ वसिष्ठाद्यैर्मुनिवरैस्तपश्चीर्णं पुरानघ ॥ मनसोऽभीप्सितान्कामान्प्रापुरन्ये तपोधनाः ॥ १६ ॥ अत्र तीर्थे पुरा पार्थ अत्रिणा विहितं तपः ॥ कोटितीर्थाद्दक्षिणतः

१ प्रति—इत्यध्याहृत्य—ये भक्ताः—इत्युत्तरेण सम्बन्धः । २ जय—इत्यर्जुनसंबोधनमिदम् । ३ "कर्मादीनामपि सम्बन्धमात्रविवक्षायां षष्ठ्येव"—इति नियमेनात्र षष्ठी । ४ तीर्थैः—कर्तृभिः—प्रजापतिः—कर्म—ऊचे—इति—कर्मणि क्रियापदम्—तीर्थानि प्रजापतिम् ऊचुः—इति—वाक्यपरिवर्तनम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

स्थापितं लिंगमुत्तमम् ॥ १७ ॥ अत्रीश्वराभिसंज्ञं तु महापापहरं परम् ॥ स्थापयित्वा च तल्लिंगमग्रे चक्रे सरोवरम् ॥ १८ ॥ तत्र स्नात्वा च यो
मर्त्यः श्राद्धं कुर्यात्प्रयत्नतः ॥ अत्रीश्वरं समभ्यर्च्य रुद्रलोके वसेच्चिरम् ॥१९॥ भरद्वाजेन मुनिना कोटितीर्थे सरोवरे ॥ तपश्चीर्णं महाबाहो यज्ञाश्च
विहिताः किल ॥ २० ॥ भरद्वाजेश्वरं लिंगं स्थापितं सुमनोहरम् ॥ तत्र कृत्वा सरो रम्यं परां मुदमवाप्तवान् ॥ २१ ॥ तत्र स्नात्वा नरो
भक्त्या श्राद्धं कुर्याद्विधानतः ॥ भरद्वाजेश्वरं पूज्य शिवलोके महीयते ॥ २२ ॥ ततश्च कोटितीर्थेऽस्मिन्गौतमो भगवानृषिः ॥ अतप्यत
तपो घोरमहल्यासंगमाशया ॥ २३ ॥ तं कामं प्राप्तवान्धीमान्परां मुदमुपागतः ॥ अहल्यया समायोगमेतत्तीर्थप्रभावतः ॥ २४ ॥
अस्मिन्क्षेत्रे महालिंगं गौतमेश्वरसंज्ञितम् ॥ स्थापयामास भगवानहल्यासरसस्तटे ॥ २५ ॥ ॥ अर्जुन उवाच ॥ ॥ अहल्यया कदा
ब्रह्मन्खानितं वै महत्सरः ॥ तन्मम ब्रूहि सकलमहल्यासरःकारणम् ॥ २६ ॥ ॥ नारद उवाच ॥ ॥ अहल्या शापमापन्ना गौतमात्किल
फाल्गुन ॥ पुरा चंद्रसमायोगे परं दुःखमुपागता ॥ २७ ॥ ततो दुःखार्तः स मुनिः कोटितीर्थेऽकरोत्तपः ॥ तपसा तेन वै पार्थाहल्यया सह
संगतः ॥ २८ ॥ ततः साध्वी परं हृष्टा अत्र क्षेत्रे सरोवरम् ॥ चकार सुमहत्पुण्यं तीर्थोदैः परिपूरितम् ॥ २९ ॥ अहल्यासरसि स्नानं पिंडदानं
समाचरेत् ॥ गौतमेशं च संपूज्य ब्रह्मलोकं स गच्छति ॥ ३० ॥ कोटितीर्थे नरश्रेष्ठ अनेके मुनयोऽमलाः ॥ तपस्तप्त्वा सुघोरं च परां सिद्धिमु
पागताः ॥ ३१ ॥ राजभिर्बहुभिः पूर्वं तपो दानं तथाध्वराः ॥ अस्मिंस्तीर्थे सुविहिताः परां सिद्धिमुपागताः ॥ ३२ ॥ अस्य[1] तीरे द्विजं चैकं मृष्टा
न्नैर्यश्च तर्पयेत् ॥ तेन श्रद्धासहायेन कोटिर्भवति तर्पिता ॥ ३३ ॥ अस्य तीरे नरः पार्थ रत्नानि विविधानि च ॥ गोभूमितिलधान्यानि वासांसि
विविधानि च ॥ ३४ ॥ श्रद्धया परया पार्थ द्विजेभ्यः संप्रयच्छति ॥ शतकोटिगुणं पुण्यं कोटितीर्थप्रभावतः ॥ कोटितीर्थे प्रतिश्रुत्य द्विजेभ्यो
न प्रयच्छति ॥ ३५ ॥ नरके पातयित्वा च कुलमेकोत्तरं शतम् ॥ आत्मानं पातयेत्पश्चाद्दारुणं रौरवं महत् ॥ ३६ ॥ माघमासे तु संप्राप्ते
प्रातःकाले तथाऽमले ॥ यः स्नाति मकरादित्ये तस्य पुण्यं शृणुष्व मे ॥ ३७ ॥ सर्वतीर्थेषु यत्पुण्यं सर्वयज्ञेषु यत्फलम् ॥ सर्वदानव्रतैर्यच्च कोटि
तीर्थे दिनेदिने ॥ ३८ ॥ तत्पुण्यं लभते मर्त्यो नात्र कार्या विचारणा ॥ कन्यागते सवितारि यः श्राद्धं कुरुते नरः ॥ ३९ ॥ पितरस्तस्य
तुष्यंति गयाश्राद्धशतैर्न तु ॥ कार्तिके मासि संप्राप्ते स्नानादि कुरुते यदि ॥ ४० ॥ तदक्षयफलं सर्वं ब्रह्मणो वचनं यथा ॥ इष्ट्वात्र यज्ञमेकं

१ अस्मिंस्तीरे—इ०पा० ।

CC-0. In Public Domain. Digitization by eGangotri

तु कोटियज्ञफलं लभेत् ॥ ४१ ॥ कन्यां ब्राह्मेण विधिना दत्त्वा कोटिगुणं फलम् ॥ सर्वदानं कोटिगुणं कोटितीर्थे भवेद्यतः ॥ ४२ ॥ कोटि
तीर्थे त्यजेत्प्राणान्हृदि कृत्वा तु माधवम् ॥ तस्य पार्थ चिरं स्वर्गे ह्यक्षया शाश्वती गतिः ॥ ४३ ॥ कोटितीर्थे तीर्थवरे देहत्यागं करोति यः ॥
तस्य पूजां प्रकुर्वंति ब्रह्माद्या देवतागणाः ॥ ४४ ॥ अस्य तीरे देहदाहो यस्य कस्य प्रजायते ॥अस्थिक्षेपो यस्य भवेन्महीसागरसंगमे ॥ ४५ ॥
तत्फलं गदितुं पार्थ वागीशोऽपि न वै क्षमः ॥ एतज्ज्ञात्वा परं पार्थ कोटितीर्थं प्रसेवते ॥ ४६ ॥ दिनेदिने फलं तस्य कापिलं गोसहस्रकम्[1] ॥
स्वर्गे मर्त्ये च पाताले तस्मादेतत्सुदुर्लभम् ॥ ४७ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां प्रथमे माहेश्वरखण्डे कौमारिकाखण्डे
कोटितीर्थमाहात्म्यवर्णनंनाम द्विपञ्चाशत्तमोऽध्यायः ॥ ५२ ॥ ॥ छ ॥ ॥ नारद उवाच ॥ ॥ अथान्यत्संप्रवक्ष्यामि शालामाहात्म्य
मुत्तमम् ॥ संस्थापिते पुरा स्थाने प्रोक्तोहं द्विजपुंगवैः ॥ १ ॥ स्थानस्य रक्षणार्थाय उपायं कुरु सुव्रत ॥ ततो मया प्रतिज्ञातं करिष्ये स्थान
रक्षणम् ॥ २ ॥ आराधिता मया पश्चाद्ब्रह्मविष्णुमहेश्वराः ॥ त्रयस्त्वेकाग्रचित्तेन ततस्तुष्टाः सुरोत्तमाः ॥ ३ ॥ समागम्याथ मां प्रोचुर्नारद
व्रियतां वरः ॥ प्रोक्तं तानाच्र्य च मया क्रियतां स्थानरक्षणम् ॥ ४ ॥ अयमेव वरो मह्यं देयो देवैः सुतोषितैः ॥ स्थानलोपो यथा न स्याद्यथा
कीर्तिर्भवेन्मम ॥ ५ ॥ एवमस्त्विति देवेशैः प्रतिज्ञातं तदा मुने ॥ स्वांशेन प्रकरिष्याम द्विजानां तव रक्षणम् ॥ ६ ॥ एवमुक्त्वा कलां[3] मुक्त्वा देवै
स्त्रिपुरुषैः स्वयम् ॥ अंतर्धानं ततः प्राप्ताः सर्वेऽपि सुरसत्तमाः ॥ ७ ॥ ततो मया द्विजैः सार्धं शालाग्रे स्थानरक्षणम् ॥ स्थापि
ताश्च पृथग्देवास्त्रयस्त्रिभुवनेश्वराः ॥ ८ ॥ पीड्यमाना यदा विप्राः केनापि च भवंति हि ॥ पूर्वाह्णे चापि ऋग्वेदं मध्याह्ने च यजूं
ष्यथ ॥ ९ ॥ यामे तृतीये सामानि तारस्वरमधीत्य च ॥ शापं यस्य प्रदास्यंति शालाग्रे भृशरोषिताः ॥ १० ॥ सप्ताहाद्दर्षमध्याद्वा
त्रिवर्षाद्भस्मतां व्रजेत् ॥ प्रतिज्ञाता स्थानरक्षा यदि वो[4] नारदाग्रतः ॥ ११ ॥ सत्येन तेन नो वैरी भस्मीभवतु ह क्षणात् ॥ अनेन शाप
मंत्रेण भस्मीभवति निश्चितम् ॥ १२ ॥ शालां त्रिपुरुषां तत्र यः पश्यति दिनेदिने ॥ अर्चयेत्तोषयेच्चासौ स्वर्गलोके महीयते ॥ १३ ॥
॥ इति त्रिपुरुषशालामाहात्म्यम् ॥ ॥ नारद उवाच ॥ ॥ अथान्यत्संप्रवक्ष्यामि मदीयसरसो महत् ॥ १४ ॥ माहात्म्यमतुलं पार्थ देवाना

१ कपिलागोसहस्रदानजम्—इति समुदितार्थः । २ द्विज—इ० पा० । ३ कलाः—मुक्ताः—इति पदच्छेदः । कलाः—स्वांशाः—मुक्ताः—सृष्टाः—इत्यर्थः । ४ वः—युष्माभिः—हे ब्रह्मविष्णुमहेश्वराः देवाः—इत्येध्याहृत्य—संबोध्य च तान्—तदग्रे—शापवचनमेवमुच्चार्यमिति ज्ञेयोऽभिसन्धिः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मपि दुर्लभम् ॥ मया पूर्वं सरः खातं दर्भांकुरशलाकया ॥ १५ ॥ मृत्तिका ताम्रपात्रेण त्यक्ता बाह्ये ततः स्वयम् ॥ सर्वेषामेव तीर्थानामाहृत्योदक मुत्तमम् ॥ १६ ॥ तत्तत्र सरसि क्षिप्तं तेन संपूरितं सरः ॥ आश्विने मासि संप्राप्ते भानुवारे नरः शुचिः ॥ १७ ॥ श्राद्धं यः कुरुते तत्र स्नात्वा दानं विशेषतः ॥ पितरस्तस्य तृप्यंति यावदाभूतसंप्लवम् ॥ १८ ॥ नारदीयं सरो ह्येतद्विख्यातं जगतीतले ॥ महता पुण्ययोगेन देवैरपि हि लभ्यते ॥ १९ ॥ यदत्र दीयते दानं हूयते यच्च पावके ॥ सर्वं तदक्षयं विद्यादन्नपानशनसाधनात् ॥ २० ॥ नारदीये सरःश्रेष्ठे स्नात्वा यो नारदेश्व रम् ॥ पूजयेच्छ्रद्धया मर्त्यः सर्वपापैः प्रमुच्यते ॥ २१ ॥ अत्र तीर्थे पुरा पार्थ सर्वनागैस्तपः कृतम् ॥ कद्रूशापस्य मोक्षार्थमात्मनो हितका म्यया ॥ २२ ॥ ततः सिद्धिं परां प्राप्ता एतत्तीर्थप्रभावतः ॥ ततो नागेश्वरं लिंगं स्थापयामासुरूर्जितम् ॥ २३ ॥ नारदादुत्तरे भागे सर्वे नागाः प्रहर्षिताः ॥ नारदीये सरःश्रेष्ठे यः स्नात्वा पूजयेद्धरम् ॥ २४ ॥ नागेश्वरं महाभक्त्या तस्य पुण्यमनन्तकम् ॥ तेषां सर्पभयं नास्ति नागानां वचनं यथा ॥ २५ ॥ इति नारदीयसरोमाहात्म्यम् ॥ ॥ नारद उवाच ॥ ॥ अपरद्वारकानाम देवी चात्रास्ति पांडव ॥ २६ ॥ सा च ब्रह्मांडद्वारे वै सदैव विहितालया ॥ चतुर्विंशतिकोटीभिर्देवीभिः परिरक्षिता ॥ २७ ॥ ततो दीर्घं तपस्तप्त्वा मयानीतात्र तोषिता ॥ अपरस्मिंस्ततो द्वारे स्था पिता परमेश्वरी ॥ २८ ॥ पूर्वस्मिन्नगरद्वारे स्थापिता द्वारवासिनी ॥ नवमी चैत्रमासस्य कृष्णपक्षे भवेत्तु या ॥ २९ ॥ कुण्डे स्नानं नरैः कृत्वा तां च देवीं प्रपूजयेत् ॥ बलिबाकुलनैवेद्यैर्गन्धधूपादिपूजनैः ॥ ३० ॥ सप्तजन्मकृतं पापं नाशमायाति तत्क्षणात् ॥ यान्यान्प्रार्थयते कामांस्तांस्ताना प्नोति मानवः ॥ ३१ ॥ वन्ध्या च लभते पुत्रं स्नानमात्रेण तत्र वै ॥ नवम्यां चैत्रमासस्य पुष्पधूपार्घ्यपूजया ॥ ३२ ॥ विघ्नानि नाशयेद्देवी सर्वं सिद्धिं प्रयच्छति ॥ भक्तानां तत्क्षणादेव सत्यमेतन्न संशयः ॥ ३३ ॥ उत्तरद्वारकां चापि पूज्यैवं विधिवन्नरः ॥ एतदेव फलं सोपि प्राप्नुयान्मान वोत्तमः ॥ ३४ ॥ पूर्वद्वारे तु वै देवी या स्थिता द्वारवासिनी ॥ तस्याः पूजनमात्रेण प्राप्नुयाद्वांछितं फलम् ॥ ३५ ॥ आश्विने मासि संप्राप्ते नव रात्रे विशेषतः ॥ उपोष्य नवरात्रं च स्नात्वा कुण्डे समाहितः ॥ ३६ ॥ पूजयेद्देवतां भक्त्या पुष्पधूपान्नतर्पणैः ॥ अपुत्रो लभते पुत्रान्निर्धनो लभते धनम् ॥ ३७ ॥ वन्ध्या प्रसूयते पार्थ नात्र कार्या विचारणा ॥ ३८ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां प्रथमे माहेश्वर खण्डे कौमारिकाखंडे कोटितीर्थादिमाहात्म्यवर्णनंनाम त्रिपंचाशत्तमोऽध्यायः ॥ ५३ ॥ ॥छ॥ ॥ नारद उवाच ॥ ॥ ममापि पार्थ तत्रास्ति

१ अत्र द्वयोः प्रतिपुस्तकयोर्मध्ये–अध्यायसमाप्तिदण्डकं–वर्तते। २ ततः–इ०पा०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मूर्तिर्ब्राह्मणकाम्यया ॥ तत्र नाहं त्यजाम्यंग च्छत्रदण्डविभूषिताम् ॥ १ ॥ कार्तिकस्य तु या शुक्ला भवत्येकादशी शुभा ॥ तस्यां मदर्चनं कृत्वा कलिदोषैर्विमुच्यते ॥ २ ॥ ॥ अर्जुन उवाच ॥ ॥ बाल्यात्प्रभृति संदेहो ममायं हृदि वर्तते ॥ पृच्छतस्तं च मे विप्र न क्रोधं कर्तुमर्हसि ॥ ३ ॥ सदा त्वं मोक्षधर्मेषु परिनिष्ठां परां गतः ॥ सर्वभूतसमो दांतो रागद्वेषविवर्जितः ॥ ४ ॥ त्यक्तनिंदास्तुतिर्मौनी मोक्षस्थः परिकीर्त्यसे ॥ त्वं च नारद लोकेषु वायुवच्चपलो मुने ॥ ५ ॥ सौदामिनीव विचरन्दृश्यसे प्राज्ञसंमतः ॥ सदा कलिकरो लोके निर्दयः सर्वप्राणिषु ॥ ६ ॥ बहूनां हि सहस्राणि देवगंधर्वरक्षसाम् ॥ राज्ञां मुनीन्द्रदैत्यानां कलेर्नष्टानि तेऽभवन् ॥ ७ ॥ कस्मात्तदेषा चेष्टा ते संदेहं मे हर द्विज ॥ संदेहान्न सुखं शेते बाणविद्धो मृगो यथा ॥ ८ ॥ ॥ सूत उवाच ॥ ॥ शौनकेदं वचः श्रुत्वा फाल्गुनान्नारदो मुनिः ॥ प्रहसन्निव बाभ्रव्यवदनं स निरैक्षत ॥ ९ ॥ स च बाभ्रव्यनामा वै हारीतस्यान्वयोद्भवः ॥ ब्राह्मणो नारदमुनेः समीपे वर्तते सदा ॥ १० ॥ स च ज्ञात्वा महाबुद्धिर्नारदस्य मनीषितम् ॥ प्रहसन्निव प्रोवाच फाल्गुनं स्निग्धया गिरा ॥ ११ ॥ ॥ बाभ्रव्य उवाच ॥ ॥ सत्यमेतद्यथात्थ त्वं नारदं प्रति पांडव ॥ सर्वोऽपि चात्र वृत्तांते संशयं याति मानवः ॥ १२ ॥ तदहं ते प्रवक्ष्यामि यथा कृष्णान्मया श्रुतम् ॥ स्तोककालांतरे पूर्वं सर्वं यादवनंदनः ॥ १३ ॥ महीसागरयात्रायां कृष्णस्तत्राययौ प्रभुः ॥ उग्रसेनेन सहितो वसुदेवेन बभ्रुणा ॥ १४ ॥ रामेण रौक्मिणेयेन युयुधानादिभिस्तदा ॥ स च ज्ञात्वा ज्ञातिसमं महीसागरसंगमे ॥ १५ ॥ पिंडदानादिकं कृत्वा दत्त्वा दानानि भूरिशः ॥ गुहेश्वरादिलिंगानि यत्नतः प्रतिपूज्य च ॥ १६ ॥ स्नानं कृत्वा कोटितीर्थे जयादित्यं समर्च्य च ॥ पूंजयन्नारदमुनिं युक्तः कृष्णो महामनाः ॥ १७ ॥ उग्रसेनेन राज्ञा वै पूर्वजेन जटायुना ॥ मदादिविप्रमुख्यानां बहूनां चोपशृण्वताम् ॥ उग्रसेनो महाराजः कृष्णं प्रोवाच संसदि ॥ १८ ॥ ॥ उग्रसेन उवाच ॥ ॥ कृष्ण प्रक्ष्यामि त्वामेकं संशयं वद तं मम ॥ १९ ॥ योऽयं नाम महाबुद्धिर्नारदो विश्ववंदितः ॥ कस्मादेषोऽतिचपलो वायुवद्भ्रमते जगत् ॥ २० ॥ कलिप्रियश्च कस्माद्वा कस्मात्त्वय्यतिप्रीतिमान् ॥ २० ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ सत्यं राजंस्त्वया पृष्टमेतत्सर्वं वदामि ते ॥ दक्षेण तु पुरा शप्तो नारदो मुनिसत्तमः ॥ २१ ॥ सृष्टिमार्गात्सुतान्वीक्ष्य नारदेन विचालितान् ॥ नावस्थानं च लोकेषु भ्रमतस्ते भविष्यति ॥ २२ ॥ पैशुन्यवक्ता च तथा द्वितीयानां प्रचालनात् ॥ इति शापद्वयं प्राप्य द्विविधात्मजचालनात् ॥ २३ ॥ निराकर्तुं समर्थोऽपि मुनिर्मेने तथैव तत् ॥ एता

१ पूजयत्—अपूजयत्—इत्यपेक्षितम् । अडभाव आर्षः । २ जटायुना—जटायुतेन—इत्यर्थः करणीयः इति प्रतिभाति । उग्रसेनेन सह कृष्णः अपूजयत्—इत्याद्यन्वययोजना ज्ञेया ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वान्साधुवादो हि यतश्च क्षमते स्वयम् ॥ २४ ॥ विनाशकालं चावेक्ष्य कलिं वर्धयते यतः ॥ सत्यं च वक्ति तस्मात्स न च पापेन लिप्यते ॥२५॥ भ्रमतोऽपि च सर्वत्र नास्य यस्मात्पृथङ्मनः ॥ ध्येयाद्भवति नैव स्याद्भ्रमदोषस्ततोस्य च ॥ यच्च प्रीतिर्मयि तस्य परमा तच्छणुष्व च ॥ २६ ॥ अहं हि सर्वदा स्तौमि नारदं देवदर्शनम् ॥ महेंद्रगदितेनैव स्तोत्रेण शृणु तन्नृप ॥ २७ ॥ श्रुतचारित्रयोर्जाता यस्याहंता न विद्यते ॥ अगुप्तश्रुत चारित्रं नारदं तं नमाम्यहम् ॥ २८ ॥ अरतिक्रोधचापल्ये भयं नैतानि यस्य च ॥ अदीर्घसूत्रं धीरं च नारदं तं नमाम्यहम् ॥ २९ ॥ कामाद्वा यदि वा लोभाद्वाचं यो नान्यथा वदेत् ॥ उपास्यं सर्वजंतूनां नारदं तं नमाम्यहम् ॥ ३० ॥ अध्यात्मगतितत्त्वज्ञं क्षांतं शक्तं जितेंद्रियम् ॥ ऋजुं यथार्थ वक्तारं नारदं तं नमाम्यहम् ॥३१॥ तेजसा यशसा बुद्ध्या नयेन विनयेन च ॥ जन्मना तपसा वृद्धं नारदं तं नमाम्यहम् ॥३२॥ सुखशीलं सुखं वेषं सुभोजं स्वाचरं शुभम्[1] ॥ सुचक्षुषं सुवाक्यं च नारदं तं नमाम्यहम् ॥ ३३ ॥ कल्याणं कुरुते गाढं पापं यस्य न विद्यते ॥ न प्रीयते परानर्थे यो ऽसौ तं नौमि नारदम् ॥ ३४ ॥ वेदस्मृतिपुराणोक्तधर्मे यो नित्यमास्थितः ॥ प्रियाप्रियविमुक्तं तं नारदं प्रणमाम्यहम् ॥ ३५ ॥ अशनादिष्व लिप्तं च पंडितं नालसं द्विजम् ॥ बहुश्रुतं चित्रकथं नारदं प्रणमाम्यहम् ॥ ३६ ॥ नार्थे क्रोधे च कामे च भूतपूर्वोऽस्य विभ्रमः ॥ येनैते नाशिता दोषा नारदं तं नमाम्यहम् ॥ ३७ ॥ वीतसंमोहदोषो यो दृढभक्तिश्च श्रेयसि ॥ सुनयं सत्रपं तं च नारदं प्रणमाम्यहम् ॥ ३८ ॥ असक्तः सर्वसंगेषु यः सक्तात्मेति लक्ष्यते ॥ अदीर्घसंशयो[3] वाग्मी नारदं तं नमाम्यहम् ॥ ३९ ॥ न त्यजत्यागमं किंचिद्यस्तपो नोपजीवति ॥ अवंध्यकालो यस्यात्मा तमहं नौमि नारदम् ॥ ४० ॥ कृतश्रमं कृतप्रज्ञं न च तृप्तं समाधितः ॥ नित्यं यत्नात्प्रमत्तं च नारदं तं नमाम्यहम् ॥ ॥ ४१ ॥ न हृष्यत्यर्थलाभेन योऽलाभे न व्यथत्यपि ॥ स्थिरबुद्धिरसक्तात्मा तमहं नौमि नारदम् ॥ ४२ ॥ तं सर्वगुणसंपन्नं दक्षं शुचिमकातरम् ॥ कालज्ञं च नयज्ञं च शरणं यामि नारदम् ॥४३॥ इमं स्तवं नारदस्य नित्यं राजन्पठाम्यहम् ॥ तेन मे परमां प्रीतिं करोति मुनिसत्तमः ॥ ४४ ॥ अन्योपि यः शुचिर्भूत्वा नित्यमेतां स्तुतिं जपेत् ॥ अचिरात्तस्य देवर्षिः प्रसादं कुरुते परम् ॥ ४५ ॥ एतान्गुणान्नारदस्य त्वमथाकर्ण्य पार्थिव ॥ जप नित्यं स्तवं पुण्यं प्रीतस्ते भविता मुनिः ॥ ४६ ॥ ॥ बाभ्रव्य उवाच ॥ ॥ इति कृष्णमुखाच्छ्रुत्वा नारदस्य गुणान्नृपः ॥ बभूव परमप्री तश्चक्रे तच्च तथा वचः ॥ ४७ ॥ ततो नारदमानर्च दत्त्वा दानं च पुष्कलम् ॥ नारदीयद्विजाग्र्याणां नारदः प्रीयतामिति ॥ ४८ ॥ ययौ द्वारवतीं

१ शुचिम्–इ० पा० । २ यस्मिन्–इ० पा० । ३ अदीर्घसूत्रो यो वाग्मी–इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कृष्णः सभ्रातृज्ञातिबांधवः ॥ तीर्थयात्रामिमां कृत्वा विधिवत्पुरुषोत्तमः ॥ ४९ ॥ तथा त्वमपि कौरव्य नारदस्य गुणानिमान् ॥ श्रुत्वा श्रद्धामयो भूत्वा शृणु कृत्यं यदत्र च ॥ ५० ॥ कार्तिके शुक्लद्वादश्यां प्रबोधिन्यामसौ मुनिः ॥ विष्णोर्ध्यानसमाधेश्च प्रबुद्धो जायते सदा ॥ ५१ ॥ तस्मिन्दिने नारदेन निर्मितेऽत्रैव कूपके ॥ स्नानं कृत्वा प्रयत्नेन श्राद्धं कुर्यात्समाहितः ॥ ५२ ॥ तपो दानं जपश्चात्र कूपे भवति चाक्षयम् ॥ ५३ ॥ इदं विष्णिवति मंत्रेण ततो विष्णुं प्रबोधयेत् ॥ नारदं च मुनिं पश्चान्मन्त्रेणानेन पांडव ॥ ५४ ॥ योगनिद्रा यथा त्यक्ता हरिणा मुनिसत्तम ॥ तथा लोकोपकाराय भवानपि परित्यज ॥ ५५ ॥ इति मंत्रेण चोत्थाप्य नारदं परिपूजयेत् ॥ कृष्णप्रोदितया स्तुत्या छत्रधोत्रार्चनैः शुभैः ॥५६॥ शक्त्या द्विजानां देयं च छत्रं धोत्रं[1] कमंडलुम् ॥ प्रणम्य ब्राह्मणान्भक्त्या नारदः प्रीयतामिति ॥ ५७ ॥ एवं कृते प्रसादात्स मुनेः पापेन मुच्यते ॥ जायते न कलिस्तस्य न चासौख्यं भवेदिह ॥ ५८ ॥ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां प्रथमे माहेश्वरखण्डे कौमारिकाखण्डे नारदमाहात्म्यवर्णनंनाम चतुःपंचाशत्तमोऽध्यायः ॥ ५४ ॥ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ इति बाभ्रव्यवचनमाकर्ण्य कुरुनन्दनः ॥ प्राणमन्नारदं भक्त्या विस्मितः पुलकान्वितः ॥ १ ॥ प्रशस्य च चिरं कालं पुनर्नारदमब्रवीत् ॥ २ ॥ गुप्तक्षेत्रस्य माहात्म्यं शृण्वानस्त्वन्मुखान्मुने ॥ तृप्तिं नैवाधिगच्छामि भूयस्तद्वक्तुमर्हसि ॥ ३ ॥ ॥ नारद उवाच ॥ ॥ महालिंगस्य वक्ष्यामि महिमानं कुरूद्वह ॥ गौतमेश्वरलिंगस्य सावधानः शृणुष्व तत् ॥ ४ ॥ अक्षपादो महायोगी गौतमाख्योऽभवन्मुनिः ॥ गोदावरीसमानेता अहल्यायाः पतिः प्रभुः ॥ ५ ॥ गुप्तक्षेत्रस्य माहात्म्यं स च ज्ञात्वा महोत्तमम् ॥ योगसंसाधनं कुर्वन्नत्र तेपे तपो महत् ॥ ६ ॥ योगसिद्धिं[4] ततः प्राप्य गौतमेन महात्मना ॥ अत्र संस्थापितं लिंगं गौतमेश्वरसंज्ञया[2] ॥ ७ ॥ संस्नाप्यैतन्महालिंगं[3] चन्दनेन विलिप्य च ॥ संपूज्य पुष्पैर्विविधैर्गुग्गुलं दाहयेत्पुरः ॥ सर्वपापविनिर्मुक्तो रुद्रलोके महीयते ॥ ८ ॥ ॥ अर्जुन उवाच ॥ ॥ योगस्वरूपमिच्छामि श्रोतुं नारद तत्त्वतः ॥ योगं सर्वे प्रशंसंति यतः सर्वोत्तमोत्तमम् ॥ ॥ ९ ॥ ॥ नारद उवाच ॥ ॥ समासात्तव वक्ष्यामि योगतत्त्वं कुरूद्वह ॥ श्रवणादपि नैर्मल्यं यस्य स्यात्सेवनात्किमु ॥ १० ॥ चित्तवृत्तिनिरोधाख्यं योगतत्त्वं प्रकीर्त्यते ॥ तदष्टांगप्रकारेण साधयंतीह योगिनः ॥ ११ ॥ यमश्च नियमश्चैव प्राणायामस्तृतीयकः ॥

१ धोत्रमित्यत्र वस्त्रमित्यर्थो [illegible]। महाराष्ट्रभाषायां वर्तत एव वस्त्रार्थको 'धोत्र' शब्दो 'धावु गतिशुद्ध्योः' इति धातोः "सर्वधातुभ्यः ष्ट्रन्" इति सूत्रेण ष्ट्रन्प्रत्यये [illegible] च निष्पन्नो बोध्यः। यद्वा "वेत्रम्" इति पाठश्चेत्तर्हि [illegible] दण्डार्थवाची। २ गौतमेश्वरसंज्ञितम्–इ० पा०। ३ संस्थाप्यैतत्–इ० पा०। ४ योगसिद्धिम्–इ० पा०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रत्याहारो धारणा च ध्येयं ध्यानं च सप्तमम् ॥ १२ ॥ समाधिरिति चाष्टांगो योगः संपरिकीर्तितः ॥ प्रत्येकं लक्षणं तेषामष्टानां शृणु पांडव ॥
॥ १३ ॥ अनुक्रमान्नरो येषां साधनाद्योगमश्नुते ॥ अहिंसा सत्यमस्तेयं ब्रह्मचर्यापरिग्रहौ ॥१४॥ एते पंच यमाः प्रोक्ताः शृण्वेषामपि लक्षणम् ॥
आत्मवत्सर्वभूतेषु यो हिताय प्रवर्तते ॥ १५ ॥ अहिंसैषा समाख्याता वेदसंविहिता च या ॥ दृष्टं श्रुतं चानुमितं स्वानुभूतं यथार्थतः ॥ १६ ॥
कथनं सत्यमित्युक्तं परपीडाविवर्जितम् ॥ अनादानं परस्वानामापद्यपि कथंचन ॥ १७ ॥ मनसा कर्मणा वाचा तदस्तेयं प्रकीर्तितम् ॥
अमैथुनं यतीनां च मनोवाक्कायकर्मभिः ॥ १८ ॥ ऋतौ स्वदारगमनं गेहिनां ब्रह्मचर्यता ॥ यतीनां सर्वसंन्यासो मनोवाक्कायकर्मणा ॥ १९ ॥
गृहस्थानां च मनसा स्मृत एषोऽपरिग्रहः ॥ एते यमास्तव प्रोक्ताः पंचैव नियमाञ्छृणु ॥२०॥ शौचं तुष्टिस्तपश्चैव जपो भक्तिर्गुरोस्तथा ॥ एतेषा
मपि पंचानां पृथक्संशृणु लक्षणम् ॥ २१ ॥ बाह्यमाभ्यंतरं चैव द्विविधं शौचमुच्यते ॥ बाह्यं तु मृज्जलैः प्रोक्तमांतरं शुद्धमानसम् ॥ २२ ॥ न्याये
नागतया वृत्त्या भिक्षया वार्तयापि च ॥ संतोषो यस्य सततं सा तुष्टिरिति चोच्यते ॥ २३ ॥ चांद्रायणादीनि पुनस्तपांसि विहितानि च ॥
आहारलाघवपरः कुर्यात्तत्तप उच्यते ॥ २४ ॥ स्वाध्यायस्तु जपः प्रोक्तः प्रणवाभ्यसनादिकः ॥ शिवे ज्ञाने गुरौ भक्तिर्गुरुभक्तिरिति स्मृता ॥
॥ २५ ॥ एवं संसाध्य नियमान्संयमांश्च विचक्षणः ॥ प्राणायामाय संदध्यान्नान्यथा योगसाधकः ॥ २६ ॥ यतोऽशुचिशरीरस्य वायुकोपो महा
न्भवेत् ॥ वायुकोपात्कुष्ठता च जडत्वादीनुपाश्नुते ॥ २७ ॥ तस्माद्विचक्षणः शुद्धं कृत्वा देहं यतेत्परम् ॥ प्राणायामस्य वक्ष्यामि लक्षणं शृणु
पांडव ॥ २८ ॥ प्राणापाननिरोधश्च प्राणायामः प्रकीर्तितः ॥ लघुमध्योत्तरीयाख्यः स च धीरैस्त्रिधोदितः ॥ २९ ॥ लघुर्द्वादशमात्रस्तु मात्रा
निमिष उन्मिषः ॥ द्विगुणो मध्यमश्चोक्तस्त्रिगुणश्चोत्तमः स्मृतः ॥ ३० ॥ प्रथमेन जयेत्स्वेदं मध्यमेन तु वेपथुम् ॥ विषादं च तृतीयेन जये
द्दोषाननुक्रमात् ॥ ३१ ॥ पद्माख्यमासनं कृत्वा रेचकं पूरकं तथा ॥ कुंभकं च सुखासीनः प्राणायामं त्रिधाऽभ्यसेत् ॥ ३२ ॥ प्राणानामुपसं
रोधात्प्राणायाम इति स्मृतः ॥ यथा पर्वतधातूनां ध्मातानां दह्यते मलः ॥ ३३ ॥ तथेंद्रियवृतो दोषः प्राणायामेन दह्यते ॥ गोशतं कापिलं
दत्त्वा यत्फलं तत्फलं भवेत् ॥ ३४ ॥ प्राणायामेन योगज्ञस्तस्मात्प्राणं सदा यमेत् ॥ प्राणायामेन सिद्ध्यन्ति दिव्याः शान्त्यादयः क्रमात् ॥
॥ ३५ ॥ शांतिः प्रशान्तिर्दीप्तिश्च प्रसादश्च यथाक्रमम् ॥ सहजागंतुकामानां पापानां च प्रवर्तताम् ॥३६॥ वासनाशांतिरित्याख्यः प्रथमो जायते
गुणः ॥ लोभमोहात्मकान्दोषान्निराकृत्यैव कृत्स्नशः ॥ ३७ ॥ तपसां च यदा प्राप्तिः सा शांतिरिति चोच्यते ॥ सर्वेन्द्रियप्रसादश्च बुद्धेर्वै मरुता

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मपि ॥ ३८ ॥ प्रसाद इति स प्रोक्तः प्राप्यमेवं चतुष्टयम् ॥ एवंफलं सदा योगी प्राणायामं समभ्यसेत् ॥ ३९ ॥ मृदुत्वं सेव्यमानास्तु सिंहशार्दूलकुंजराः ॥ यथा यान्ति तथा प्राणो वश्यो भवति साधितः ॥ ४० ॥ प्राणायामस्त्वयं प्रोक्तः प्रत्याहारं ततः शृणु ॥ विषयेषु प्रवृत्तस्य चेतसो विनिवर्तनम् ॥ ४१ ॥ प्रत्याहारं विनिर्दिष्टं तस्य संयमनं हि यत् ॥ प्रत्याहारस्त्वयं प्रोक्तो धारणालक्षणं शृणु ॥ ४२ ॥ यथा तोयार्थिनस्तोयं पत्रनालादिभिः शनैः ॥ आपिबेयुस्तथा वायुं योगी नयति साधितम् ॥ ४३ ॥ प्राग्नाभ्यां हृदये वायुरथ तालौ भ्रुवोंऽतरे ॥ चतुर्दले षड्दशे च द्वादशे षोडशद्विके ॥ ४४ ॥ आकुंचनेनैवमूर्द्धमुन्नीय पवनं शनैः ॥ मूर्धनि ब्रह्मरंध्रे तं प्राणं संधारयेत्कृती ॥ ४५ ॥ प्राणायामा दश द्वौ च धारणैषा प्रकीर्त्यते ॥ दशैता धारणाः स्थाप्य प्राप्नोत्यक्षरसाम्यताम् ॥ ४६ ॥ धारणास्थस्य यद्ध्येयं तस्य त्वं शृणु लक्षणम् ॥ ध्येयं बहुविधं पार्थ यस्यांतो नोपलभ्यते ॥ ४७ ॥ केचिच्छिवं हरिं केचित्केचित्सूर्यं विधिं परे ॥ केचिद्देवीं महद्भूतासुत ध्यायन्ति केचन ॥ ४८ ॥ तत्र यो यच्च ध्यायेत स च तत्र प्रलीयते ॥ तस्मात्सदा शिवं देवं पंचवक्त्रं हरं स्मरेत् ॥ ४९ ॥ पद्मासनस्थं तं गौरं बीजपूरकरं स्थितम् ॥ दशहस्तं सुप्रसन्नवदनं ध्यानमास्थितम् ॥ ५० ॥ ध्येयमेतत्तव प्रोक्तं तस्माद्ध्यानं समाचरेत् ॥ ध्यानस्य लक्षणं चैतन्निमेषार्धमपि स्फुटम् ॥ ५१ ॥ न पृथग्जायते ध्येयाद्धारणां यः समास्थितः ॥ एवमेतां दुरारोहां भूमिमास्थाय योगवित् ॥ ५२ ॥ न किंचिच्चिंतयेत्पश्चात्समाधिरिति कीर्त्यते ॥ समाधेर्लक्षणं सम्यग्ब्रुवतो मे निशामय ॥ ५३ ॥ शब्दस्पर्शरसैर्हीनं गंधरूपविवर्जितम् ॥ परं पुरुषं संप्राप्तः समाधिस्थः प्रकीर्तितः ॥ ५४ ॥ तां तु प्राप्य नरो विघ्नैर्नाभिभूयेत कर्हिचित् ॥ समाधिस्थश्च दुःखेन गुरुणापि न चाल्यते ॥५५॥ शंखाद्याः शतशस्तस्य वाद्यन्ते यदि कर्णयोः ॥ भेर्यश्च यदि हन्यंते शब्दं बाह्यं न विंदति ॥ ५६ ॥ कशाप्रहाराभिहतो वह्निदग्धतनुस्तथा ॥ शीताढ्येवस्थितो घोरे स्पर्शं बाह्यं न विन्दति ॥ ॥ ५७ ॥ रूपे गंधे रसे बाह्ये तादृशस्य तु का कथा ॥ दृष्ट्वा य आत्मनात्मानं समाधिं लभते पुनः ॥ ५८ ॥ तृष्णा वाथ बुभुक्षा वा बाधेते तं न कर्हिचित् ॥ ५९ ॥ न स्वर्गे न च पाताले मानुष्ये क्व च तत्सुखम् ॥ समाधिं निश्चलं प्राप्य यत्सुखं विंदते नरः ॥ ६० ॥ एवमारूढयोगस्य तस्यापि कुरुनंदन ॥ पंचोपसर्गाः कटुकाः प्रवर्तंते यथा शृणु ॥ ६१ ॥ प्रातिभः श्रावणो दैवो भ्रमावर्तोऽथ भीषणः ॥ प्रतिभा सर्वशास्त्राणां प्रातिभोऽयं च सात्त्विकः ॥ ६२ ॥ तेन यो मदमादद्याद्योगी शीघ्रं च चेतसः ॥ योजनानां सहस्रेभ्यः श्रवणं श्रावणस्तु सः ॥ ६३ ॥ द्वितीयः सात्त्विकश्चायमस्मान्मत्तो विनश्यति ॥ अष्टौ पश्यति योनीश्च देवानां दैव इत्यसौ ॥ ६४ ॥ अयं च सात्त्विको दोषो मदादस्माद्विनश्यति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आवर्त इव तोयस्य जनावर्ते यदाकुलः ॥ ६५ ॥ आवर्ताख्यस्त्वयं दोषो राजसः स महाभयः ॥ भ्राम्यते यन्निरालम्बं मनो दोषैश्च योगिनः ॥ ६६ ॥ समस्ताधारविभ्रंशाद्भ्रमाख्यस्तामसो गुणः ॥ एतैर्नाशितयोगाश्च सकला देवयोनयः ॥ ६७ ॥ उपसर्गैर्महाघोरैरावर्त्यंते पुनःपुनः ॥ प्रावृत्य कंबलं शुक्लं योगी तस्मान्मनोमयम् ॥ ६८ ॥ चिंतयेत्परमं ब्रह्म कृत्वा तत्प्रवणं मनः ॥ आहाराः सात्त्विकाश्चैव संसेव्याः सिद्धिमिच्छता ॥ ६९ ॥ राजसैस्तामसैश्चैव योगी सिद्ध्येन्न कर्हिचित् ॥ श्रद्दधानेषु दांतेषु श्रोत्रियेषु महात्मसु ॥ ७० ॥ स्वधर्मादनपेतेषु भिक्षा याच्या च योगिना ॥ भैक्षं यवान्नं तक्रं वा पयो यावकमेव वा ॥ ७१ ॥ फलमूलं विपक्वं वा कणपिण्याकसक्तवः ॥ श्रुता इत्येत आहारा योगिनां सिद्धिकारकाः ॥ ७२ ॥ मृत्युकालं विदित्वा च निमित्तैर्योगसाधकः ॥ योगं युञ्जीत कालस्य वंचनार्थं समाहितः ॥ ७३ ॥ निमित्तानि च वक्ष्यामि मृत्युं यो वेत्ति योगवित् ॥ रक्तकृष्णांबरधरा गायंतीह सती च यम् ॥ ७४ ॥ दक्षिणाशां नयेन्नारी स्वप्ने सोऽपि न जीवति ॥ नग्नं क्षपणकं स्वप्ने हसमानं प्रदृश्य च ॥ ७५ ॥ एनं च वीक्ष्य वलगन्तं तं विद्यान्मृत्युमागतम् ॥ ऋक्षवानरयुग्यस्थो गायन्यो दक्षिणां दिशम् ॥ ॥ ७६ ॥ याति मज्जेदधौ पंके गोमये वा न जीवति ॥ केशांगारैस्तथा भस्मभुजंगैर्निर्जलां नदीम् ॥ ७७ ॥ एषामन्यतमैः पूर्णां दृष्ट्वा स्वप्ने न जीवति ॥ करालैर्विकटै रूक्षैः[1] पुरुषैरुद्यतायुधैः ॥ ७८ ॥ पाषाणैस्ताडितः स्वप्ने सद्यो मृत्युं भजेन्नरः ॥ सूर्योदये यस्य शिवा क्रोशंती याति सम्मुखम् ॥ ७९ ॥ विपरीतं परीतं वा स सद्यो मृत्युमृच्छति ॥ दीपाधिगंधं नो वेत्ति वमत्यग्निं[2] तथा निशि ॥ ८० ॥ नात्मानं परनेत्रस्थं वीक्षते न स जीवति ॥ शक्रायुधं चार्धरात्रे दिवा वा ग्रहणं तथा ॥ ८१ ॥ दृष्ट्वा मन्येत स क्षीणमात्मजीवितमात्तवान् ॥ नासिका वक्रतामेति कर्णयोर्न्नमनोन्नती ॥ ८२ ॥ नेत्रं च वामं स्रवति यस्य तस्यायुरुद्गतम् ॥ आरक्ततामेति मुखं जिह्वा चाप्यसिता यदा ॥ ८३ ॥ तदा प्राज्ञो विजानीयादासन्नं मृत्युमात्मनः ॥ उष्ट्ररासभयानेन स्वप्ने यो याति दक्षिणाम् ॥ ८४ ॥ दिशं कर्णौ पिधायापि निर्घोषं शृणुयान्न च ॥ न स जीवेत्तथा स्वप्ने पति तस्य पिधीयते ॥ ८५ ॥ द्वारं न चोत्तिष्ठति च शुभ्रा दृष्टिश्च लोहिता ॥ स्वप्नेऽग्निं प्रविशेद्यश्च न च निष्क्रमते पुनः ॥ ८६ ॥ जलप्रवेशादपि

१ रौद्रैः–इ०पा० । २ एतस्यार्धश्लोकस्य रहस्यतात्पर्यार्थो यथार्थतया न ज्ञायते । 'दीपाधिगंधं नो वेत्ति'–एतस्य–दीपे निर्वाणे सति तद्वर्तिधूमगंधं यो न वेत्ति–तस्य मृत्युर्नातिदूरे–इति–अन्यत्र वर्णितमिति श्रूयते । परं–'वमत्यग्निं तथा निशि'–एतस्यार्थः–सम्यक्तया न ज्ञायते । यदि वा–दीपः यदि स्ववर्तेः अग्निं वमति–इति पश्येत्–इति चेदर्थः–ततो न सन्तुष्यते चेतः । अत्र यथार्थार्थपरिज्ञानं संदिग्धम् । कुशलेभ्यः पंडितेभ्यः एतस्यार्थो वेदितव्यः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वा तदंतं तस्य जीवितम् ॥ यश्चाभिहन्यते दुष्टैर्भूतै रात्रावथो दिवा ॥ ८७॥ प्रकृतैर्विकृतैर्वापि तस्यासन्नौ यमांतकौ ॥ देवतानां गुरूणां च पित्रोर्ज्ञा नविदां तथा ॥ ८८ ॥ निन्दामवज्ञां कुरुते भक्तो भूत्वा न जीवति ॥ एवं दृष्ट्वा निमित्तानि विपरीतानि योगवित् ॥ ८९ ॥ धारणां सम्यगा स्थाय समाधावचलो भवेत् ॥ यदि नेच्छंति ते मृत्युं ततो नासौ प्रपद्यते ॥ ९० ॥ विमुक्तिमथवा वांछेद्विसृजेद्ब्रह्ममूर्धनि ॥ संति देहे विमुक्ते च उपसर्गाश्च ये पुनः ॥ ९१ ॥ योगिनं समुपायांति शृणु तानपि पांडव ॥ ऐशान्ये राक्षसपुरे यक्षो गन्धर्व एव च ॥ ९२ ॥ ऐन्द्रे सौम्ये प्रजापत्ये ब्राह्मे चाष्टसु सिद्धयः ॥ भवंति चाष्टौ शृणु ताः पार्थिवी या च तैजसी ॥ ९३ ॥ वायवी व्योमात्मिका चैव मानसाहम्भवा मतिः ॥ प्रत्येकमष्टधा भिन्ना द्विगुणा द्विगुणा क्रमात् ॥९४॥ पूर्वे चाष्टौ चतुःषष्टिरन्ते शृणुष्व तद्यथा ॥ स्थूलता ह्रस्वता बाल्यं वार्धक्यं यौवनं तथा ॥९५॥ नानाजाति स्वरूपं च चतुर्भिर्देहधारणम् ॥ पार्थिवांशं विना नित्यमष्टौ पार्थिवसिद्धयः ॥ ९६ ॥ विजिते पृथिवीतत्त्वे यदैशान्ये भवन्ति च ॥ भूमाविव जले वासो नातुरोऽर्णवमापिबेत् ॥ ९७ ॥ सर्वत्र जलप्राप्तिश्च अपि शुष्कं द्रवं फलम् ॥ त्रिभिर्देहस्य धरणं नदीर्वा स्थापयेत्करे ॥ ९८ ॥ अव्रणत्वं शरीरस्य कांतिश्चाथाष्टकं स्मृतम् ॥ अष्टौ पूर्वा इमाश्चाष्टौ राक्षसानां पुरे स्मृताः ॥ ९९ ॥ देहादग्निविनिर्माणं तत्तापभयवर्जनम् ॥ शक्तिदत्वं च लोकानां जलमध्येग्निज्वालनम् ॥ १०० ॥ अग्निग्रहश्च हस्तेन स्मृतिमात्रेण पावनम् ॥ भस्मीभूतस्य निर्माणं द्वाभ्यां देहस्य धारणम् ॥१०१॥ पूर्वाः षोडश चाप्यष्टौ तेजसो यक्षसद्मनि ॥ मनोगतित्वं भूतानामन्तर्निवेशनं तथा॥१०२॥पर्वतादिमहाभारवहनं लीलयैव च ॥ लघुत्वं गौरवत्वं च पाणिभ्यां वायुवारणम् ॥१०३॥ अंगुल्यग्रनिपातेन भूमेः सर्वत्र कम्पनम् ॥ एकेन देहनिष्पत्तिर्गांधर्वे वांति सिद्धयः ॥१०४॥ चतुर्विंशतिः पूर्वा श्चाप्यष्टावेताश्च सिद्धयः ॥ गन्धर्वलोके द्वात्रिंशदत ऊर्ध्वं निशामय ॥ १०५ ॥ छायाविहीननिष्पत्तिरिंद्रियाणामदर्शनम् ॥ आकाशगमनं नित्य मिंद्रियादिशमः स्वयम् ॥ १०६ ॥ दूरे च शब्दग्रहणं सर्वशब्दावगाहनम् ॥ तन्मात्रलिंगग्रहणं सर्वप्राणिनिदर्शनम् ॥ १०७ ॥ अष्टौ वाता त्मिकाश्चैन्द्रे द्वात्रिंशदपि पूर्वकाः ॥ यथाकामोपलब्धिश्च यथाकामविनिर्गमः ॥१०८॥ सर्वत्राभिभवश्चैव सर्वगुह्यनिदर्शनम्[1] ॥ संसारदर्शनं चापि मानस्योऽष्टौ च सिद्धयः ॥ १०९ ॥ चत्वारिंशच्च पूर्वाश्च सोमलोके स्मृतास्त्विमाः ॥ छेदनं तापनं बन्धः संसारपरिवर्तनम्[2] ॥ ११० ॥ सर्वभूत प्रसादत्वं मृत्युकालजयस्तथा ॥ अहंकारोद्भवश्चाष्टौ प्राजापत्ये च पूर्विकाः ॥ १११ ॥ आकारेण जगत्सृष्टिस्तथानुग्रह एव च ॥ प्रलयस्याधिकारं

१ निर्वाणम्–इ०पा० । २ संसारपरिवर्द्धनम्–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

च लोकचित्रप्रवर्तनम् ॥ ११२ ॥ असादृश्यमिदं व्यक्तं निर्वाणं च पृथक्पृथक् ॥ शुभेतरस्य कर्तृत्वमष्टौ बुद्धिभवास्त्वमी ॥ ११३ ॥ षट्चाश
त्तथा पूर्वाश्चतुःषष्टिरिमे गुणाः ॥ ब्राह्मये पदे प्रवर्तंते गुह्यमेतत्तवेरितम् ॥ ११४ ॥ जीवतो देहभेदे वा सिद्धयश्चैतास्तु योगिनाम् ॥ संगो नैव विधा
तव्यो भयात्पतनसंभवात् ॥ ११५ ॥ एतान्गुणान्निराकृत्य युञ्जतो योगिनस्तदा ॥ सिद्धयोऽष्टौ प्रवर्तंते योगसंसिद्धिकारकाः ॥ ११६ ॥ अणिमा
लघिमा चैव महिमा प्राप्तिरेव च ॥ प्राकाम्यं च तथेशित्वं वशित्वं च तथापरे ॥ ११७ ॥ यत्र कामावसायित्वं माहेश्वरपदस्थिताः ॥ सूक्ष्मात्सूक्ष्म
त्वमणिमा शीघ्रत्वाल्लघिमा स्मृता ॥ ११८ ॥ महिमा शेषपूज्यत्वात्प्राप्तिर्नाप्राप्यमस्य यत्[1] ॥ प्राकाम्यमस्य व्यापित्वादीशित्वं चेश्वरो यतः॥११९॥
वशित्वाद्वशिता नाम सप्तमी सिद्धिरुत्तमा ॥ यत्रेच्छा तत्र च स्थानं तत्र कामावसायिता ॥ १२० ॥ ऐश्वर्यं पदमात्तस्य भवंत्येताश्च सिद्धयः ॥
ततो न जायते नैव वर्धते न विनश्यति ॥१२१॥ एष मुक्त इति प्रोक्तो य एवं मुक्तिमाप्नुयात् ॥ यथा जलं जलेनैक्यं निक्षिप्तमुपगच्छति॥१२२॥
तथैवं सात्म्यमभ्येति योगिनामात्मा परात्मना ॥ एवं ज्ञात्वा फलं योगी सदा योगं समभ्यसेत् ॥ १२३ ॥ अत्रोपमां व्याहरंति योगार्थे योगिनोऽ
मलाः ॥ शशांकरश्मिसंयोगादर्ककांतो हुताशनम् ॥ १२४ ॥ समुत्सृजति नैकः सन्नुपमा सास्ति योगिनः ॥ कपिंजलाखुनकुला वसंति स्वामिव
द्गृहे ॥ १२५ ॥ ध्वस्ते यांत्यन्यतो दुःखं न तेषां सोपमा यतेः ॥ मृदेहकल्पदेहोऽपि[2] मुखाग्रेण कनीयसा ॥ १२६ ॥ करोति मृद्भागचयमुपदेशः
स योगिनः ॥ पशुपक्षिमनुष्याद्यैः पत्रपुष्पफलान्वितम् ॥ १२७ ॥ वृक्षं विलुप्यमानं च लब्ध्वा सिध्यंति योगिनः ॥ रुरुगात्रविषाणाग्रमा
लक्ष्य तिलकाकृतिम् ॥ १२८ ॥ सह तेन विवर्धेत योगी सिद्धिमुपाश्नुते ॥ द्रव्यं पूर्णमुपादाय पात्रमारोहते भुवः ॥ १२९ ॥ तुंगमार्गं विलो
क्यैवं विज्ञातं किं न योगिनाम् ॥ तद्गेहं यत्र वसति तद्भोज्यं येन जीवति ॥ १३० ॥ येन निष्पाद्यते चार्थः स्वयं स्याद्योगसिद्धये ॥ तथा ज्ञानमु
पासीत योगी यत्कार्यसाधकम् ॥ १३१ ॥ ज्ञानानां बहुता येयं योगविघ्नकरी हि सा ॥ इदं ज्ञेयमिदं ज्ञेयमिति यस्तृषितश्चरेत् ॥ १३२ ॥ अपि
कल्पसहस्रायुर्नैव ज्ञेयमवाप्नुयात् ॥ त्यक्तसंगो जितक्रोधो लब्धाहारो जितेंद्रियः ॥१३३॥ पिधाय बुद्ध्या द्वाराणि मनो ध्याने निवेशयेत् ॥ आहारं
सात्त्विकं सेवेन्न तं येन विचेतनः ॥१३४॥ स्यादयं तं च भुंजानो रौरवस्य प्रियातिथिः ॥ वाग्दण्डः कर्मदण्डश्च मनोदंडश्च ते त्रयः ॥१३५॥ यस्यैते
नियता दंडाः स त्रिदंडी यतिः स्मृतः ॥ अनुरागं जनो याति परोक्षे गुणकीर्तनम् ॥ १३६ ॥ न बिभ्यति च सत्त्वानि सिद्धेर्लक्षणमुच्यते ॥ १३७ ॥

१ यत्—यतःकिञ्चिदपि—इत्यर्थः । २ मृदेहकल्पदेहः—कीटविशेषः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अलौल्यमारोग्यमनिष्ठुरत्वं गंधः शुभो मूत्रपुरीषयोश्च ॥ कांतिः प्रसादः स्वरसौम्यता च योगप्रवृत्तेः प्रथमं हि चिह्नम् ॥ १३८ ॥ समाहितो ब्रह्मप रोऽप्रमादी शुचिस्तथैकांतरतिर्जितेन्द्रियः ॥ समाप्नुयाद्योगमिमं महामना विमुक्तिमाप्नोति ततश्च योगतः ॥ १३९ ॥ कुलं पवित्रं जननी कृतार्था वसुन्धरा भाग्यवती च तेन ॥ अबाह्यमार्गे सुखसिन्धुमग्नं लग्नं परे ब्रह्मणि यस्य चेतः ॥ १४० ॥ विशुद्धबुद्धिः समलोष्टकांचनः समस्तभूतेषु वसन्समो हि यः ॥ स्थानं परं शाश्वतमव्ययं च यतिर्हि गत्वा न पुनः प्रजायते ॥ १४१ ॥ इदं मया योगरहस्यमुक्तमेवंविधं गौतमः प्राप योगम् ॥ तेनैतच्च स्थापितं पार्थ लिंगं संदर्शनादर्चनात्कल्मषघ्नम् ॥ १४२ ॥ यश्चाश्विने कृष्णचतुर्दशीदिने रात्रौ समभ्यर्चति लिंगमेतत् ॥ स्नात्वा अहल्यासरसि प्रधाने श्रद्धाय सर्वं प्रविधाय भक्तितः ॥ १४३ ॥ महोपकारेण विमुक्तपापः स याति यत्रास्ति स गौतमो मुनिः ॥ १४४ ॥ इदं मया पार्थ तव प्रणीतं[1] गुप्तस्य क्षेत्रस्य समासयोगात् ॥ माहात्म्यमेतत्सकलं[2] शृणोति यः स स्याद्विशुद्धः किमु वच्मि भूयः ॥ १४५ ॥ य इदं शृणुयाद्भक्त्या गौतमाख्यानमुत्तमम् ॥ पुत्रपौत्रप्रियं प्राप्य स याति पदमव्ययम् ॥ १४६ ॥ ॥ इति श्रीस्कांदे महापुराणे एकाशीतिसाहस्र्यां संहितायां प्रथमे माहेश्वरखण्डे कौमारिकाखण्डे गौतमेश्वरमाहात्म्यसविस्तरयोगलक्षणवर्णनंनाम पञ्चपंचाशत्तमोऽध्यायः ॥ ५५ ॥ ॥ छ ॥

॥ ॥ नारद उवाच ॥ ॥ अतः परं प्रवक्ष्यामि ब्रह्मेशं लिंगमुत्तमम् ॥ यस्य स्मरणमात्रेण वाजपेयफलं भवेत् ॥ १ ॥ एकदा तु पुरा पार्थ सृष्टिकामेन ब्रह्मणा ॥ तपः सुचरितं घोरं सार्धवर्षसहस्रकम् ॥ २ ॥ तपसा तेन सन्तुष्टः पार्वतीपतिशंकरः ॥ वरमस्मै ततः प्रादाल्लोककर्त्रे स्ववांछितम् ॥ ३ ॥ ततो हृष्टः प्रमुदितः कृतकृत्यः पितामहः ॥ ज्ञात्वा क्षेत्रस्य माहात्म्यं स्वयं लिंगं चकार ह ॥४॥ चखान च सरः पुण्यं नाम्ना ब्रह्मसरः शुभम् ॥ महीनगरकात्पूर्वे महापातकनाशनम् ॥ ५ ॥ अस्य तीरे महालिंगं स्थापयामास वै विभुः ॥ तत्र देवः स्वयं साक्षाद्ध्रियते किल शंकरः ॥ ॥ ६ ॥ पुष्करादधिकं तीर्थं ब्रह्मेशंनाम फाल्गुन ॥ तत्र स्नात्वा नरो भक्त्या पिण्डदानं समाचरेत् ॥ ७ ॥ दानं चैव यथाशक्त्या कार्तिक्यां च विशेषतः ॥ देवं प्रपूजयेद्भक्त्या ब्रह्मेशं हृष्टमानसः ॥ ८ ॥ पितरस्तस्य तुष्यंति यावदाभूतसंप्लवम् ॥ पुष्करेषु च यत्पुण्यं कुरुक्षेत्रे रविग्रहे ॥ ९ ॥ गंगादिपुण्यतीर्थेषु यत्फलं प्राप्यते नरैः ॥ तत्फलं समवाप्नोति तीर्थस्यास्यावगाहनात् ॥ १० ॥ मोक्षलिंगस्य माहात्म्यं शृणु पार्थ महाद्भुतम् ॥ मया स्थानहितार्थं च समाराध्य महेश्वरम् ॥ ११ ॥ स्थापितं प्रवरं लिंगं नाम्ना मोक्षेश्वरं हरम् ॥ दर्भाग्रेण ततः पार्थ कूपं खनितवानहम् ॥१२॥

१ प्रणीतम्—कथितमित्यर्थः । २ सफलम्—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रसाद्य लोककर्तारं ब्रह्माणं परमेष्ठिनम् ॥ कमण्डलोर्ब्रह्मणश्च समानीता सरस्वती ॥ १३ ॥ कूपेऽस्मिन्मोक्षनाथस्य लोकानां प्रेतमुक्तये ॥ कार्ति
कस्य तु मासस्य शुक्लपक्षे चतुर्दशी ॥ १४ ॥ कूपे स्नात्वा नरस्तस्यां तिलपिण्डं समाचरेत् ॥ प्रेतानुद्दिश्य नियतं मोक्षतीर्थफलं भवेत् ॥ १५ ॥
कुले न जायते तस्य प्रेतः पार्थ न संशयः ॥ प्रेता मोक्षं प्रगच्छन्ति तीर्थस्यास्य प्रभावतः ॥ १६ ॥ जयादित्यकूपवरे नरः स्नात्वा प्रयत्नतः ॥
गर्भेश्वरं नमस्कृत्य न स गर्भेषु मज्जति[1] ॥१७॥ इदं मया पार्थ तव प्रणीतं गुप्तस्य क्षेत्रस्य समासयोगात् ॥ माहात्म्यमेतत्सकलं शृणोति यः स्याद्वि
शुद्धः किमु वच्मि भूयः ॥ १८ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां प्रथमे माहेश्वरखंडे कौमारिकाखंडे ब्रह्मेश्वरमोक्षेश्वर
गर्भेश्वरमाहात्म्यवर्णनंनाम षट्पंचाशत्तमोऽध्यायः ॥५६॥ ॥छ॥ ॥ नारद उवाच ॥ ॥ ततो विप्रा नारदश्च समाराध्य महेश्वरम् ॥ महीनग
रके पुण्ये स्थापयामास शंकरम् ॥ १ ॥ लोकानां च हितार्थाय केदारं लिंगमुत्तमम् ॥ अत्रीशादुत्तरे भागे महापातकनाशनम् ॥ २ ॥ अत्रिकुण्डे
नरः स्नात्वा श्राद्धं कृत्वा यथाविधि ॥ अत्रीशं च नमस्कृत्य केदारं यः प्रपश्यति ॥३॥ मातुः स्तन्यं पुनर्नैव स पिबेन्मुक्तिभाग्भवेत् ॥ ततो रुद्रो
नीलकंठं नारदाय महात्मने ॥४॥ स्वयं दत्त्वा स्वयं तस्थौ महीनगरके शुभे ॥ कोटितीर्थे नरः स्नात्वा नीलकंठं प्रपश्यति ॥ ५ ॥ जयादित्यं नम
स्कृत्य रुद्रलोकमवाप्नुयात् ॥ जयादित्यं पूजयंति कूपे स्नात्वा नरोत्तमाः ॥ ६ ॥ न तेषां वंशनाशोऽस्ति जयादित्यप्रसादतः ॥ इदं ते कथि
तं पार्थ महीनगरकस्य च ॥ ७ ॥ आख्यानं सकलं श्रुत्वा सर्वपापैः प्रमुच्यते ॥ ८ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां
प्रथमे माहेश्वरखण्डे कौमारिकाखंडे नीलकंठमाहात्म्यवर्णनंनाम सप्तपञ्चाशत्तमोऽध्यायः ॥ ५७ ॥ ॥ छ ॥ ॥ अर्जुन उवाच ॥ ॥
गुप्तक्षेत्रमिदं कस्मात्कस्माद्गुप्तं च नारद ॥ यस्य प्रभावः सुमहान्नैव कस्यापि संस्तुतः ॥ १ ॥ ॥ नारद उवाच ॥ ॥ पुरातनामत्र कथां गुप्त
क्षेत्रस्य कारणे ॥ शृणु पांडव शापेन गुप्तमासीदिदं यथा ॥ २ ॥ पुरा निमित्ते कस्मिंश्चित्सर्वतीर्थाधिदैवताः ॥ प्रणामाय ब्रह्मसदो ब्रह्माणं सहिता
ययुः ॥ ३ ॥ पुष्करस्य प्रभासस्य निमिषस्यार्बुदस्य च ॥ कुरुक्षेत्रस्य क्षेत्रस्य धर्मारण्यस्य देवताः ॥ ४ ॥ वस्त्रापथस्य श्वेतस्य फल्गुतीर्थ
स्य चापि याः ॥ केदारस्य तथान्येषां क्षेत्राणां कोटिशोऽपि याः ॥ ५ ॥ सिंधुसागरयोगस्य महीसागरकस्य च ॥ गंगासागरयोगस्य अधिपाः
सूकरस्य[2] च ॥ ६ ॥ गंगारेवामुखीनां तु नदीनामधिदेवताः ॥ शोणह्रदपुरोगाणां ह्रदानां चाधिदेवताः ॥ ७ ॥ ते सर्वे संघशो भूत्वा श्रेष्ठयज्ञा

१ सज्जति--इ० पा० । २ सूकरस्य--वराहक्षेत्रस्य--इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नाय चात्मनः ॥ समुपाजग्मुरमला महतीं ब्रह्मणः सभाम् ॥ ८ ॥ तत्र तीर्थानि सर्वाणि समायातानि वीक्ष्य सः ॥ उत्तस्थौ सहितः सर्वैः सभासद्भिः पितामहः ॥ ९ ॥ प्रणम्य सर्वतीर्थेभ्यः प्रबद्धकरसंपुटः ॥ तीर्थानि भगवानाह विस्मयोत्फुल्ललोचनः ॥ १० ॥ अद्य नः सद्म सकलं युष्माभिरतिपावितम् ॥ वयं च पाविता भूयो युष्माकं दर्शनादपि ॥ ११ ॥ तीर्थानां दर्शनं श्रेयः स्पर्शनं स्नानमेव च ॥ कीर्तनं स्मरणं चापि नं स्यात्पुण्यं विना परम् ॥१२॥ महापापान्विता रौद्रास्त्वपि ये स्युः सुनिष्ठुराः ॥ तेऽपि तीर्थैः प्रपूयंते किं पुनर्धर्मसंस्थिताः ॥१३॥ एवमुक्त्वा पुलस्त्यं स पुत्रमभ्यादिदेश ह ॥ शीघ्रमर्घं तीर्थहेतोः समानय यथार्चये ॥ १४ ॥ ॥ पुलस्त्य उवाच ॥ ॥ असंख्यानीह तीर्थानि दृश्यंते पद्मसंभव ॥ यथा दिशसि मां तात अर्घमेकमुपानये ॥ १५ ॥ धर्मप्रवचने श्लोको यत एष प्रगीयते ॥ १६ ॥ भवेयुर्यद्यसंख्याता अर्घयोग्याः समर्चने ॥ ततस्तेषां वरिष्ठाय दातव्योऽर्घः किलैकतः ॥ १७ ॥ ॥ ब्रह्मोवाच ॥ ॥ साभिप्रायं साधु वत्स त्वया प्रोक्तमिदं वचः ॥ एवं कुरुष्वैकमर्घमानय त्वं सुशीघ्रतः ॥ १८ ॥ ॥ नारद उवाच ॥ ॥ ततः पुलस्त्यो वेगेन समानिन्येऽर्घमुत्तमम् ॥ तं च ब्रह्मा करे गृह्य तीर्थान्याहेति भारतीम् ॥ १९ ॥ सर्वैर्भवद्भिः संहत्य मुख्यस्त्वेकः प्रकीर्त्यताम् ॥ तस्मै चार्घं प्रयच्छामि नैवं मामनयः स्पृशेत् ॥ २० ॥ ॥ तीर्थान्यूचुः ॥ ॥ न वयं श्रेष्ठतां विद्मः कथंचन परस्परम् ॥ अस्माद्धेतोश्च संप्राप्ता ज्ञात्वा देहि त्वमेव तत् ॥ २१ ॥ ॥ ब्रह्मोवाच ॥ ॥ नाहं वेद्मि श्रेष्ठतां वः कथंचन नमोऽस्तु वः ॥ सर्वे चापारमाहात्म्यं स्वयं मे वक्तुमर्हथ ॥ २२ ॥ यत्र गंगा गया काशी पुष्करं नैमिषं तथा ॥ कुरुक्षेत्रं तथा रेवा महीसागरसंगमः ॥ २३ ॥ प्रभासाद्यानि शतशो यत्र नस्तत्र का मतिः ॥ २४ ॥ ॥ नारद उवाच ॥ ॥ एवमुक्ते पद्मभुवा कोपि नोवाच किंचन ॥ चिरेणेदं ततः प्राह महीसागरसंगमः ॥ २५ ॥ ममैनमर्घं त्वं यच्छ चतुरानन शीघ्रतः ॥ यतः कोटिकलायां वा मम कोऽपि न पूर्यते ॥ २६ ॥ यतश्चेन्द्रद्युम्नराज्ञा ताप्यमाना वसुंधरा ॥ सर्वतीर्थद्रवीभूता महीनामाभवन्नदी ॥ २७ ॥ सा च सर्वाणि तीर्थानि संयुक्तानि मया सह ॥ सर्वतीर्थमयस्तस्मादस्मि ख्यातो जगत्त्रये ॥ २८ ॥ गुहेन च महालिंगं कुमारेश्वरमीश्वरम् ॥ संस्थाप्य तीर्थमुख्यत्वं मम दत्तं महात्मना ॥ २९ ॥ नारदेनापि मत्तीरे स्थानं संस्थाप्य शोभनम् ॥ सर्वेभ्यः पुण्यक्षेत्रेभ्यो दत्तं श्रैष्ठ्यं पुरा मम ॥ ३० ॥ एवं त्रिभिर्हेतुवरैर्ममैवार्घः प्रदीयताम् ॥ गुणैकदेशेऽपि समं मम तीर्थं न वै परम् ॥ ३१ ॥ इत्युक्ते वचने पार्थ तीर्थराजेन भारत ॥ सर्वे नोचुः

१ दर्शनादि--इति तु युक्तमत्र । यद्वा--'न स्यात्पुण्यं विना परम्'--अत्र--तीर्थमिति शेषः । तेन च--'तीर्थं विना परं पुण्यं न स्यात्--नास्ति--किं तु तीर्थमेव--परं पुण्यम्--पुण्यकरम्--अस्ति'--इत्यर्थो बोध्यः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

किंचनापि किं ब्रह्मा वक्ष्यतीति यत् ॥ ३२ ॥ ततो ब्रह्मसुतो ज्येष्ठः श्वेतमाल्यानुलेपनः ॥ दक्षिणं बाहुमुद्धृत्य धर्मो वचनमब्रवीत् ॥ ३३ ॥
अहो कष्टमिदं कूक्तं तीर्थराजेन मोहतः ॥ सन्तोऽपि न गुणा वाच्याः स्वयं सद्भिः स्वका यतः ॥ ३४ ॥ स्वीयान्गुणान्स्वयं यो हि सम्पत्सु प्रक्षि
पन्परान् ॥ ब्रवीति राजसस्त्वेष ह्यहंकारो जुगुप्सितः ॥ ३५ ॥ तस्मादस्मादहंकारात्सत्स्वप्येषु गुणेषु च ॥ अप्रख्यातं ध्वस्तरूपमिदं तीर्थं भवि
ष्यति ॥३६॥ स्तंभतीर्थमिति ख्यातं स्तम्भो गर्वः कृतो यतः ॥ स्तंभस्य हि फलं सद्यो ब्रह्मापि प्राप किं परः ॥ ३७ ॥ इत्युक्ते धर्मदेवे न हाहेति
रव उत्थितः ॥ ततः शीघ्रं समायातो योगीशोऽहं च पांडव ॥ ३८ ॥ गुहस्ततो वचः प्राह धर्मदेवसमागमे ॥ अयुक्तमेतच्छापोऽयं दत्तो यद्धर्म
धार्ष्ट्यतः ॥ ३९ ॥ ब्रवीतु कोऽपि सर्वेषां तीर्थानां तेषु वर्तताम् ॥ यद्यैश्वर्यं नार्हतेसौ महीसागरसंगमः ॥ ४० ॥ तिष्ठत्वात्मगुणो यच्च तीर्थरा
जेन वर्णितः ॥ तत्र को विगुणो नाम मिथ्यावादो यतो गुणः ॥ ४१ ॥ अहो न युक्तं पालानां यदि तेऽप्यविमृश्य च ॥ एवमर्थान्करिष्यंति कं
यांति शरणं प्रजाः ॥ ४२ ॥ एवमुक्ते गुहेनाथ धर्मो वचनमब्रवीत् ॥ सत्यमेतद्यदर्होऽयं महीसागरसंगमः ॥ ४३ ॥ मुख्यत्वं सर्वतीर्थानामर्घं चापि
पितामहात् ॥ किंतु नात्मगुणा वाच्याः सतामेतत्सदा व्रतम् ॥ परोक्षेपि स्वप्रशंसा ब्रह्माणमपि चालयेत् ॥ ४४ ॥ स्वप्रशंसां प्रकुर्वाणः पराक्षेपस
मन्विताम् ॥ किं दिवः पृथिवीं पूर्वं ययातिर्न पपात ह ॥ यानि पूर्वं प्रमाणानि कृतानीशेन धीमता ॥४५॥ तानि सम्पालनीयानि तानि कोऽति
क्रमेद्बुधः ॥ तव पित्रा समादिश्य यदर्थं स्थापिता वयम् ॥ ४६ ॥ पालयामास एतच्च त्वं पालयितुमर्हसि ॥ ईश्वराः स्वप्रमाणेन भवंतो यदि कुर्वते
॥ ४७ ॥ तदस्माभिरिदं युक्तं शासनं दिश्यतां परम् ॥ एवमुक्त्वा स्वीयमुद्रां मोक्तुकामं वृषं तदा ॥४८॥ अहं प्रस्तावमन्वीक्ष्य वाक्यमेतदुदैरयम् ॥
नमो धर्माय महते विश्वधात्रे महात्मने ॥ ४९ ॥ ब्रह्मविष्णुशिवैर्नित्यं पूजितायाघनाशिने ॥ यदि मुद्रां भवान्धर्म परित्यक्ष्यति कर्हिचित् ॥ ५० ॥
तदस्माकं कुतो भावो मा विश्वं नाशय प्रभो ॥ योगीश्वरं गुहं चापि संमानयितुमर्हसि ॥ ५१ ॥ शिववन्माननीयो हि यतः साक्षाच्छिवात्मजः ॥
त्वां च देवो गुहः स्वामी संमानयितुमर्हति ॥५२॥ युवयोरैक्यभावेन सुखं जीवेदिदं जगत् ॥ त्वया प्रदत्तः शापोऽयं मा प्रत्याख्यातिलक्षणः॥५३॥
अनुग्रहश्च क्रियतां तीर्थराजस्य मानद ॥५४॥ एवमुच्चरमाणं मां प्रशस्याहापि पद्मभूः ॥ साध्वेतन्नारदेनोक्तं धर्मैतद्वचनं कुरु ॥५५॥ सम्मानय गुहं
चापि गुहः स्वामी यतो हि नः ॥ एवमुक्ते ब्रह्मणा च धर्मो वचनमब्रवीत् ॥५६॥ नमो गुहाय सिद्धाय किंकरा यस्य ते वयम् ॥ मदीयां स्कन्द विज्ञप्तिं नाथै

१ धर्मराजेन—इ०पा० । २ वृषम्—धर्मम्—इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नामवधारय ॥५७॥ स्तंभादेतन्महातीर्थमप्रसिद्धं भविष्यति ॥ स्तंभतीर्थमिति ख्यातं सुप्रसिद्धं भविष्यति ॥५८॥ स्तम्भतीर्थमिति ख्यातं सर्वती र्थफलप्रदम् ॥ यश्चात्र स्नानदानानि प्रकारिष्यति मानवः ॥ ५९ ॥ यथोक्तं च फलं तस्य स्फुटं सर्वं भविष्यति ॥ शनिवारे ह्यमावास्या भवे त्तस्याः फलं च यत् ॥ ६० ॥ महीसागरयात्रायां भवेत्तच्चावधारय ॥ प्रभासदशयात्राभिः सप्तभिः पुष्करस्य च ॥ ६१ ॥ अष्टाभिश्च प्रयागस्य तत्फलं प्रभविष्यति ॥ पंचभिः कुरुक्षेत्रस्य नकुलीशस्य च त्रिभिः ॥ ६२ ॥ अर्बुदस्य च यत्षड्भिस्तत्फलं चं भविष्यति ॥ वस्त्रापथस्य तिसृभि र्गंगायाः पंचभिश्च यत् ॥ ६३ ॥ कूपोदर्याश्चतुर्भिश्च तत्फलं प्रभविष्यति ॥ काश्याः षड्भिस्तथा यत्स्याद्गोदावर्याश्च पंचभिः ॥ ६४ ॥ तत्फलं स्तंभतीर्थे वै शनिदर्शे भविष्यति ॥ एवं दत्ते वरे स्कंदस्तदा प्रीतमना भवत् ॥ ६५ ॥ ब्रह्मापि स्तंभतीर्थाय ददावर्घं समाहितः ॥ ददौ च सर्वतीर्था नां श्रेष्ठत्वममितद्युतिः ॥ ६६ ॥ तीर्थानि च गुहं नाथं सम्मान्य विससर्ज सः ॥ एवमेतत्पुरा वृत्तं गुप्तक्षेत्रस्य कारणम् ॥ ६७ ॥ भूयश्चापि प्रसि द्ध्यर्थं प्रेषिताप्सरसोऽत्र मे ॥ विमोक्षिता ग्राहरूपात्त्वया ताश्च कुरूद्वह ॥ ६८ ॥ यतो धर्मस्य सर्वस्य नानारूपैः प्रवर्ततः ॥ परित्राणाय भवतः कृष्णस्य च भवो भवे ॥६९॥ तदिदं वर्णितं तुभ्यं सर्वतीर्थफलं महत् ॥ श्रुत्वैतदादितः पूर्वं पुमान्पापैः प्रमुच्यते ॥७०॥ ॥ सूत उवाच ॥ ॥ श्रुत्वेति विजयो धीमान्प्रशशंस सुविस्मितः ॥ विसृष्टो नारदाद्यैश्च द्वारकां प्रति जग्मिवान् ॥७१॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां प्रथमे माहेश्वरखण्डे कौमारिकाखंडे महीसागरमाहात्म्यवर्णनेऽर्जुनतीर्थयात्रापरिसमाप्तिवर्णनंनामष्टपंचाशत्तमोऽध्यायः ॥ ५८ ॥ छ ॥ ॥ शौनक उवाच ॥ ॥ अत्यद्भुतमिदं सूत गुप्तक्षेत्रस्य पावनम् ॥ महन्माहात्म्यमतुलं कीर्तितं हर्षवर्धनम् ॥ १ ॥ पुनर्यत्सिद्धलिंगस्य पूर्वं माहात्म्यकीर्तने ॥ इत्युक्तं यत्प्रसादेन सिद्धमातुस्तु सेत्स्यति ॥ २ ॥ विजयोनाम पुण्यात्मा साहाय्याच्चंडिलस्य च ॥ को न्वसौ चंडिलोनाम विजयोनाम कस्तथा ॥ ॥ ३ ॥ कथं च प्राप्तवान्सिद्धिं सिद्धमातुः प्रसादतः ॥ एतदाचक्ष्व तत्त्वेन श्रोतुं कौतूहलं हि नः ॥४॥ सतां चरित्रश्रवणे कौतुकं कस्य नो भवेत् ॥ ॥ ॥ उग्रश्रवा उवाच ॥ ॥ साधु पृष्टमिदं विप्रा दूरांतरितमप्युत ॥ ५ ॥ श्रुतां द्वैपायनमुखात्कथां वक्ष्यामि चात्र वः ॥ पुरा द्रुपदराजस्य पुत्रीमा साद्य पांडवाः ॥ ६ ॥ धृतराष्ट्रमते पश्चादिंद्रप्रस्थं न्यवेशयन् ॥ रक्षिता वासुदेवेन कदाचित्तत्र पांडवाः ॥७॥ उपविष्टाः सभामध्ये कथाश्चक्रुः पृथग्वि धाः ॥ देवर्षिपितृभूतानां राज्ञां चापि प्रकीर्तने ॥ ८ ॥ क्रियमाणेऽथ तत्रागाद्भीमपुत्रो घटोत्कचः ॥ तं दृष्ट्वा भ्रातरः पंच वासुदेवश्च वीर्यवान् ॥ ९ ॥

१ प्रभविष्यति--इ० पा० । २ अडभात्र आर्षः । अभवत् । ३ सिद्धमातुः प्रसादेन–विजयोनाम–चण्डिलस्य साहाय्यात्–सेत्स्यति--इत्युक्तम्--इत्युत्तरश्लोकस्थेनान्वयः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उत्थाय सहसा पीठादालिलिंगुर्मुदा युताः ॥ स च तान्प्रणतः प्रह्वो ववंदे भीमनंदनः ॥ १० ॥ साशिषं च ततो राज्ञा स्वोत्संग उपवेशितः ॥ आघ्राय स्नेहतो मूर्ध्नि प्रोक्तश्च जनसंसदि ॥ ११ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ कुत आगम्यते पुत्र क्व चायं विहृतस्त्वया ॥ कालः कचित्सुखं राज्यं कुरुषे मातुलं तव ॥ १२ ॥ कच्चिद्देवेषु विप्रेषु गोषु साधुषु सर्वदा ॥ हैडंबे नापकुरुषे प्रियमेतद्वरेश्च नः ॥ १३ ॥ हेडंबस्य वनं सर्वं तस्य ये सैन्यराक्षसाः ॥ पाल्यमानास्त्वया साधो वर्धंते जनक्षेमकाः ॥ १४ ॥ कच्चिन्नंदति ते माता भृशं नः प्रियकारिणी ॥ कन्यैव या पुरा भीमं त्यक्त्वा मानं पतिं श्रिता ॥ १५ ॥ इति पृष्टो धर्मराज्ञा स्मयन्हैडंबिरब्रवीत् ॥ हते तस्मिन्दुराचारे मातुलेऽस्मि नियोजितः ॥ १६ ॥ तद्राज्यं शासने स्थाप्य दुष्टान्निघ्नंश्चराम्यहम् ॥ माता कुशलिनी देवी तपो दिव्यमुपाश्रिता ॥ १७ ॥ मामुवाच सदा पुत्र पितॄणां भक्तिकृद्भव ॥ सोऽहं मातुर्वचः श्रुत्वा मेरुपादात्समागतः ॥ १८ ॥ प्रणामायैव भवतां भक्तिप्रह्वेण चेतसा ॥ आत्मानं च महत्यर्थे कस्मिंश्चित्तु नियोजितम् ॥ भवद्भिरहमिच्छामि फलं यस्मादिदं महत् ॥ १९ ॥ यदाज्ञापालनं पुत्रः पितॄणां सर्वदा चरेत् ॥ अथोर्द्ध्वलोकान्स जयेदिह जायेत कीर्तिमान् ॥ २० ॥ ॥ सूत उवाच ॥ ॥ इत्युक्तवंतं तं राजा परिरभ्य पुनःपुनः ॥ उवाच धर्मराट् पुत्रमानंदाश्रुः सगद्गदम् ॥ २१ ॥ त्वमेव नो भक्तिकारी सहायश्चापि वर्तसे ॥ २२ ॥ एतदर्थं च हैडंबे पुत्रानिच्छंति साधवः ॥ इहामुत्र तारयंते तादृशाश्चापि पुत्रकाः ॥ २३ ॥ अवश्यं यादृशी माता तादृशस्तनयो भवेत् ॥ माता च ते भक्तिमती दृढं नस्त्वं च तादृशः ॥ २४ ॥ अहो सुदुष्करं देवी कुरुते मे प्रिया वधूः ॥ या भर्तृश्रियमुल्लंघ्य तप एव समाश्रिता ॥ २५ ॥ नूनं कामेन भोगैर्वा कृत्यं वध्वा न मे मनाक् ॥ या पुत्रसुखमन्वीक्ष्य परलोकार्थमाश्रिता ॥ २६ ॥ दुष्कुलीनापि या भक्ता सूतेऽपत्यं च भक्तिमत् ॥ कुलीनमेव तन्मन्ये ममेदं मतमुत्तमम् ॥ २७ ॥ एवं बहूनि वाक्यानि तानि तानि वदन्नृपः ॥ धर्मराजः समाभाष्य केशवं वाक्यमब्रवीत् ॥ २८ ॥ पुंडरीकाक्ष जानासि यथा भीमादभूदयम् ॥ जातमात्रस्तु यश्चासीद्यौवनस्थो महाबलः ॥ २९ ॥ अष्टानां देवयोनीनां यतो जन्म च यौवनम् ॥ सद्य एव भवेत्तस्मात्सद्योऽस्यासीच्च यौवनम् ॥ ॥ ३० ॥ तदस्योचितदारार्थे सदा चिंतास्ति कृष्ण मे ॥ उचितं बत हैडंबेः क्व कलत्रं करोम्यहम् ॥ ३१ ॥ तद्भवान्कृष्ण सर्वज्ञ त्रिलोकीमपि वेत्सि च ॥ हैडंबेरुचितां दारान्वक्तुमर्हसि यादव ॥ ३२ ॥ ॥ सूत उवाच ॥ ॥ एवमुक्तो धर्मराज्ञा क्षणं ध्यात्वा जनार्दनः ॥ धर्मराजमिदं वाक्यं

१ प्रदृश्यते--इ० पा० । २ यादृशी--इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पदांतरितमब्रवीत् ॥ ३३ ॥ अस्ति राजन्प्रवक्ष्यामि दारानस्योचितां शुभाम् ॥ सांप्रतं संस्थिता रम्ये प्राग्ज्योतिषपुरे वरे ॥ ३४ ॥ सा च पुत्री मुरोः पार्थ दैत्यस्याद्भुतकर्मणः ॥ योऽसौ नरकदैत्यस्य प्राणतुल्यः सखाऽभवत् ॥ ३५ ॥ स च मे निहतो घोरः पाशदुर्गसमन्वितः ॥ नरकश्च दुराचारस्त्वमेतद्वेत्सि सर्वशः ॥ ३६ ॥ ततो हते मुरौ दैत्ये मया तस्य सुताव्रजत् ॥ योद्धुं मामतिवीर्यत्वाद्घोरा कामकटंकटा ॥ ३७ ॥ तां ततोऽहं महायुद्धे खड्गखेटकधारिणीम् ॥ अयोधयं महाबाणैः सुशार्ङ्गधनुषश्च्युतैः ॥ ३८ ॥ खड्गेन चिच्छेद बाणान्मम सा च मुरोः सुता ॥ समागम्य च खड्गेन गरुडं मूर्ध्न्यताडयत् ॥ ३९ ॥ स च मोहसमाविष्टो गरुडोऽभूदचेतनः ॥ ततस्तस्या वधार्थाय मया चक्रं समुद्यतम् ॥ ४० ॥ चक्रं समुद्यतं दृष्ट्वा मया तस्मिन्रणाजिरे ॥ कामाख्या नाम मां देवी पुरः स्थित्वा वचोऽब्रवीत् ॥ ४१ ॥ नैनां हंतुं भवानर्हो रक्षितां पुरुषोत्तम ॥ अजेयत्वं मया ह्यस्या दत्तं खड्गं च खेटकम् ॥ ४२ ॥ बुद्धिरप्रतिमा चापि शक्तिश्च परमा रणे ॥ ततस्त्वया त्रिरात्रेऽपि न जितासीन्मुरोः सुता ॥ ४३ ॥ एवमुक्ते तदा देवीं वचनं चाहमब्रवम् ॥ अयमेष निवृत्तोऽस्मि वारयैनां च त्वं शुभे ॥ ४४ ॥ ततश्चालिंग्य तां भक्तां कामाख्या वाक्यमब्रवीत् ॥ भद्रे रणान्निवर्तस्व नायं हंतुं कथंचन ॥४५॥ शक्यः केनापि समरे माधवो रणदुर्जयः ॥ नाभूदस्ति भविष्यो वा य एनं संयुगे जयेत् ॥४६॥ अपि वा त्र्यंबकः पुत्रि नैनं शक्तः कुतोऽन्यकः ॥ तस्मादेनं नमस्कृत्य भाविनं श्वशुरं शुभे ॥ ४७ ॥ रणादस्मान्निवर्तस्व तवोचितमिदं स्फुटम् ॥ अस्य भ्रातुर्हि भीमस्य स्नुषा त्वं च भविष्यसि ॥ ४८ ॥ तस्मात्त्वं श्वशुरं भद्रे सम्मानय जनार्दनम् ॥ न च शोकस्त्वया कार्यः पितरं प्रति पंडिते ॥ ४९ ॥ जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य च ॥ बहवश्चास्य वेत्तारो वद केनापि वार्यते ॥ ५० ॥ ऋषींश्च देवांश्च महासुरांश्च त्रैविद्यविद्यान्पुरुषान्नृपांश्च ॥ कान्मृत्युरेको न पतेत काले परावरज्ञोऽत्र न मुह्यते क्वचित् ॥ ५१ ॥ श्लाघ्य एव हि ते मृत्युः पितुरस्माज्जनार्दनात् ॥ सर्वपातकनिर्मुक्तो गतोऽसौ धाम वैष्णवम् ॥ ५२ ॥ एवं कामाख्यया प्रोक्ता सा च कामकटंकटा ॥ त्यक्त्वा क्रोधं च संवृत्य गात्राणि प्रणता च माम् ॥ ५३ ॥ तामहं साशिषं चापि प्रावोचं भरतर्षभ ॥ अस्मिन्नेव पुरे तिष्ठ भगदत्तप्रपूजिता ॥ ५४ ॥ मया देव्या पृथिव्या च भगदत्तः कृतो नृपः ॥ स ते पूजां बहुविधां करिष्यति स्वश्वसुर्यथा ॥ ५५ ॥ वसंती चात्र तं वीरं हैडिंबं पतिमाप्स्यसि ॥ एवमाश्वास्य तां देवीं मौर्वीं चाहं व्यसर्जयम् ॥ ५६ ॥ सा स्थिता च पुरे तत्र गतोऽहं शक्रसद्म च ॥ ततो द्वारवतीं प्राप्य त्वया सह

१ पदांतरमथाब्रवीत्--इ०पा० । २ कामाक्षा--इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समागतः ॥ ५७ ॥ एवमेषोचिता दारा हैडंबेर्विद्यते शुभा ॥ कामाख्ये च रणे घोरा या विद्युदिव भासते ॥ ५८ ॥ न च रूपं वर्णितं मे श्वशुरस्यो
चितं यतः ॥ साधोर्हि नैतदुचितं सर्वस्त्रीणां प्रवर्णनम् ॥ ५९ ॥ पुनरेकश्च समयः कृतस्तं शृणु यस्तया ॥ यो मां निरुत्तरां प्रश्ने कृत्वैव विजये[1]
त्पुमान् ॥ ६० ॥ यो मे प्रतिबलश्चापि स मे भर्ता भविष्यति ॥ एवं च समयं श्रुत्वा बहवो दैत्यराक्षसाः ॥ ६१ ॥ तस्या जयार्थमगमंस्तेऽपि
जित्वा हतास्तया ॥ यो य एनां गतः पूर्वं न स भूयो न्यवर्तत ॥ ६२ ॥ वह्नेरिव प्रभां दीप्तां पतंगानां समुच्चयः ॥ एवमेतादृशीं मौर्वीं जेतुमुत्सहते
यदि ॥ ६३ ॥ घटोत्कचो महावीर्यो भार्यास्य नियतं भवेत् ॥ ६४ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ अलं सर्वगुणैस्तस्या यस्यास्त्वेको गुणो
महान् ॥ क्रियते किं हि क्षीरेण यदि तद्विषमिश्रितम् ॥ ६५ ॥ प्राणाधिकं भैमसेनिं कथं केवलसाहसात् ॥ क्षिपेयं तव वाक्यानां शुद्धानां चाथ
कोविदम् ॥ ६६ ॥ अन्या अपि स्त्रियः संति देशे देशे जनार्दन ॥ बह्वयस्तासां वरां कांचिद्योषितं वक्तुमर्हसि ॥६७॥ ॥ भीम उवाच ॥ ॥ सम्यगुक्तं
केशवेन वाक्यं बह्वर्थमुत्तमम् ॥ राज्ञा पुनः स्नेहवशाद्यदुक्तं तन्न भाति मे ॥ ६८ ॥ कार्ये दुःसाध्य एव स्यात्क्षत्रियस्य पराक्रमः ॥ करींद्रस्येव
यूथेषु गजानां न मृगेषु च ॥ ६९ ॥ आत्मा प्रख्यातिमानेयः सर्वथा वीरपुंगवैः ॥ सा च ख्यातिः कथं जायेद्दुःसाध्यकरणादृते ॥ ७० ॥ न
ह्यात्मवशगं पार्थ हैडंबेरस्य रक्षणम् ॥ येन दत्तस्त्वयं धात्रा स एनं पालयिष्यति ॥ ७१ ॥ सर्वथोच्चपदारोहे यत्नः कार्यो विजानता ॥ तन्न सिध्यति
चेद्दैवान्नासौ दोषो विजानतः ॥ ७२ ॥ यथा देवव्रतस्त्वेको[2] जह्ने काशिसुताः पुरा ॥ तथैक एव हैडंबिर्मौर्वीं प्राप्नोतु मा चिरम् ॥ ७३ ॥
॥ ॥ अर्जुन उवाच ॥ ॥ केवलं पौरुषपरं भीमेनोक्तमिदं वचः ॥ अबलं दैवहेतुत्वात्प्रबलं प्रतिभाति मे ॥ ७४ ॥ न मृषा हि वचो ब्रूते
कामाख्या या पुराऽब्रवीत् ॥ भीमसेनसुतः पाणिं तव भद्रे ग्रहीष्यति ॥ ७५ ॥ अनेन हेतुना यातु शीघ्रं तत्र घटोत्कचः ॥ इति मे रोचते कृष्ण
तव किं ब्रूहि रोचते ॥ ७६ ॥ ॥ कृष्ण उवाच ॥ ॥ रोचते मे वचस्तुभ्यं[3] भीमस्य च महात्मनः ॥ न हि तुल्यो भैमसेनेर्बुद्धौ वीर्ये च कश्चन
॥ ७७ ॥ अंतरात्मा च मे वेत्ति प्राप्तामेव मुरोः सुताम् ॥ तच्छीघ्रं यातु हैडंबिस्त्वं च किं पुत्र मन्यसे ॥ ७८ ॥ ॥ घटोत्कच उवाच ॥ ॥ न
हि न्याय्याः स्वका वक्तुं पूज्यानामग्रतो गुणाः ॥ प्रवृत्ता एव भासंते सद्गुणाश्च रवेः कराः ॥ ७९ ॥ सर्वथा तत्करिष्यामि पितरो येन मेऽमलाः ॥
लज्जिष्यंति न संसत्सु मया पुत्रेण पांडवाः ॥ ८० ॥ एवमुक्त्वा महाबाहुरुत्थाय प्रणनाम तान् ॥ जयाशीर्भिश्च पितृभिर्वर्द्धितो गंतुमैच्छत ॥८१॥

१ परस्मैपदमत्रार्षम्—"विपराभ्यां जेः" इत्यनुशासनात् । २ देवव्रतः—भीष्मः—इत्यर्थः । ३ तुभ्यम्--तव--इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तं गंतुकाममाहेदमभिनंद्य जनार्दनः ॥ कथाकथनकाले मां स्मरेथास्त्वं जयावहम् ॥८२॥ यथा बुद्धिं सुदुर्भेद्यां वर्धयामि बलं च ते ॥ इत्युक्त्वालिंग्य तं कृष्णो व्यससर्जत साशिषम् ॥ ८३ ॥ ततो हिडंबातनयो महौजाः सूर्याक्षकालाक्षमहोदरानुगः ॥ वियत्पथं प्राप्य जगाम तत्पुरं प्राग्ज्योतिषं नाम दिनव्यपाये ॥ ८४ ॥ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां प्रथमे माहेश्वरखण्डे कौमारिकाखण्डे बर्बरिकोपाख्याने घटोत्कचस्य प्राग्ज्योतिषपुरं प्रति गमनवर्णनंनामैकोनषष्टितमोऽध्यायः ॥ ५९ ॥ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ सोऽथ प्राग्ज्योतिषाद्बाह्ये महोपवनसंस्थितम् ॥ सहस्रभूमिकं गेहमपश्यत हिरण्मयम् ॥ १ ॥ वेणुवीणामृदंगानां निःस्वनैः परिपूरितम् ॥ दशसाहस्रसंख्याभिश्चेटीभिः परिपूरितम् ॥ २ ॥ आयाद्भिः प्रतियाद्भिश्च भगदत्तस्य किंकरैः ॥ किमिच्छन्तीति भगिनी पृच्छकैरभिपूरितम् ॥ ३ ॥ तदासाद्य स हैडंबिर्मेरोः शिखरवद्गृहम् ॥ द्वारि स्थितां संददर्श कर्णप्रावरणां सखीम् ॥ ४ ॥ तामाह ललितं वीरो भद्रे सा क्व मुरोः सुता ॥ कामुको द्रष्टुमिच्छामि दूरदेशागतोऽतिथिः ॥ ५ ॥ ॥ कर्णप्रावरणोवाच ॥ ॥ किं तवास्ति महाबाहो तया मौर्व्या प्रयोजनम् ॥ कोटिशो निहताः पूर्वं तया कामुक कामुकाः ॥ ६ ॥ तव रूपमहं दृष्ट्वा घटहासं सदोत्कचम् ॥ प्रणम्य पादयोर्वीर स्थिता ते वचनंकरी ॥ ७ ॥ तन्मया सह मोदस्व भुंक्ष्व भोगाँश्च कामुक ॥ दास्याम्यनुचराणां ते त्रयाणां च प्रियात्रयम् ॥ ८ ॥ ॥ घटोत्कच उवाच ॥ ॥ कल्याणि किंवदंती ते प्रमुक्ता स्वोचिता शुभे ॥ पुनर्नैतद्वचस्तुभ्यं विशते मम चेतसि ॥ ९ ॥ वामः कामो यतो भद्रे यस्मिन्नुपनिबद्ध्यते ॥ स चात्र नैव बध्नाति तद्वयं किं प्रकुर्महे ॥ १० ॥ अद्य ते स्वामिनी दृष्टा जिता वा क्रीडते मया ॥ तया वा विजितो यास्ये पूर्वेषां कामिनां गतिम् ॥ ११ ॥ कर्णप्रावरणे तस्माच्छीघ्रमेव निवेद्यताम् ॥ यथा दर्शनमात्रेण पूजयंत्यतिथिं खलु ॥ १२ ॥ इति भैमेर्वचः श्रुत्वा प्रस्खलंती निशाचरी ॥ प्रासादशिखरस्थां तां मौर्वीमेवं वचोवदत् ॥ १३ ॥ देवि कोऽपि युवा श्रीमांस्त्रैलोक्येष्वमितप्रभः ॥ कामातिथिस्तव द्वारि वर्तते दिश तत्परम् ॥ १४ ॥ ॥ कामकटंकटोवाच ॥ ॥ मुच्यतां शीघ्रमेवासौ किमर्थं वा विलंबसे ॥ कदाचिद्दैवसंगत्या समयो मेऽभिपूर्यते ॥ १५ ॥ इत्युक्तवचनाच्चेटी प्राप्यावोचद्घटोत्कचम् ॥ व्रज शीघ्रं कामुक त्वं तस्या मृत्योश्च सन्निधौ ॥ १६ ॥ इत्युक्तः स प्रहस्यैव तत्रोत्सृज्य स्वकानुगान् ॥ प्रविवेश गृहं भैमिः सिंहो मेरुगुहामिव ॥ १७ ॥

१ अभिभूषितम्--इ०पा० । २ अद्य ते स्वामिनी--मया--दृष्टा, (ततः) जिता सती (मया सार्धं) क्रीडते--क्रीडिष्यति--इति--एकं स्यात् । यद्वा--अहं तया विजितः सन्--पूर्वेषां कामिनां गतिं (मृत्युरूपाम्) यास्ये--यास्यामि । इत्यन्वययोजना--ज्ञातव्या । ३ पूजयंत्यतिथिं खलाः--इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स पश्यञ्छुकसंघातान्पारावतगणांस्तथा ॥ सारिकाश्च मदोन्मत्ताश्चेटीस्तां चाप्यपश्यत ॥ १८ ॥ रूपेण वयसा चैव रतेरपि रतिंक रीम् ॥ आंदोलकसुखासीनां सर्वाभरणभूषिताम् ॥ १९ ॥ तां विद्युतमिवोन्नद्धां दृष्ट्वा भैमिरचिंतयत् ॥ अहो कृष्णेन पित्रा मे निर्दि ष्टेयं ममोचिता ॥ २० ॥ न्याय्यमेतत्कृते पूर्वं नष्टा यत्कामिनां गणाः ॥ शरीरक्षयपर्यातं क्षीयते यदि कामिनाम् ॥ २१ ॥ कामिनीनां कृते येषां क्षीयते गणनात्र का ॥ एवं बहुविधं कामी चिंतयन्नाह भीमभूः ॥ २२ ॥ निष्ठुरे वज्रहृदये प्राप्तोऽहमतिथिस्तव ॥ उचितां तत्सतां पूजां कुरु या ते हृदि स्थिता ॥ २३ ॥ इति हैडंबिवचनं श्रुत्वा कामकटंकटा ॥ विस्मिताभूत्तस्य रूपात्स्वं निनिंद च बालिशम् ॥ २४ ॥ धिगहं यन्मया पूर्वं समयः स कृतोऽभवत् ॥ न कृतोऽभूद्यदि पुरा अभविष्यदसौ पतिः ॥ २५ ॥ इति संचिन्तयन्ती सा भैमिं वचनमब्रवीत् ॥ वृथा त्वमागतो भद्र जीवन्याहि पुनः सुखी ॥ २६ ॥ अथ कामयसे मां त्वं तत्कथां शीघ्रमुच्चर ॥ कथामाभाष्य यदि मां सन्देहे पातयिष्यसि ॥ ततोऽहं वशगा जाता हतो वा स्वप्स्यसे मया ॥ २७ ॥ ॥ सूत उवाच ॥ ॥ इत्युक्तवचनामेतां नेत्रोपांतेन वीक्ष्य सः ॥२८॥ स्मृत्वा चराचरगुरुं कृष्णमारब्धवान्कथाम् ॥ कस्यांचिदभवत्पत्न्यां युवा कोऽप्यजितेंद्रियः ॥२९॥ तस्य चैका सुता जज्ञे भार्या तस्य मृताऽभवत् ॥ ततो बालकिकां पुत्रीं ररक्ष च पुपोष च ॥ ३० ॥ सा यदाभूद्यौवनगा व्यंजितावयवा शुभा ॥ प्रोल्लसत्कुचमध्यांगी प्रोल्लसन्मुखपंकजा ॥ ३१ ॥ तदास्य कामलुलितमालानं प्रजहौ मनः ॥ प्रोवाच तां च तनयां समालिंग्य दुराशयः ॥ ३२ ॥ प्रातिवेश्मकपुत्री त्वं मयानीयात्र पोषिता ॥ भार्यार्थं सुचिरं कालं तत्कार्यं साधय प्रिये ॥ ३३ ॥ इत्युक्ता सा च मेने च तत्तथैव वचस्तदा ॥ पतित्वेन च भेजे तं भार्यात्वेन स तां तथा ॥ ३४ ॥ ततस्तस्यां सुता जज्ञे तस्मान्मदनरासभात् ॥ वद सा तस्य भवति किं दौहित्री सुताऽथवा ॥ एनं प्रश्नं मम ब्रूहि शीघ्रं चेच्छक्तिरस्ति ते ॥ ३५ ॥ ॥ ॥ सूत उवाच ॥ ॥ इति प्रश्नं सा च श्रुत्वाचिंतयद्बहुधा हृदि ॥ ३६ ॥ न च पश्यति निर्द्वारं प्रश्नस्यास्य कथंचन ॥ ततः प्रश्नेन विजिता स्वां शक्तिं समुपाददे ॥ ३७ ॥ अताडयद्रुक्मरज्जुं कराभ्यां दोलकस्य च ॥ ततो रक्षांसि निष्पेतुः कोटिशो भीषणान्यति ॥ ३८ ॥ सिंहव्याघ्रवराहाश्च महिषाश्चित्रका मृगाः ॥ समीक्ष्य तानसंख्येयान्खादितुं धावतो रुषा ॥ ३९ ॥ अवादयन्नखौ भैमिः कनिष्ठांगुष्ठजौ हसन् ॥ ततो विनिःसृतास्तत्र द्विगुणा राक्षसादयः ॥ ४० ॥ तैर्मौर्वीनिर्मिताः सर्वे क्षणादेव स्म भक्षिताः ॥ विजितायां स्वशक्तौ च बलशक्तिमथाददे ॥ ४१ ॥ उत्थाय सहसा

१ भीमसूः–इ० पा० । २ विवाहे–इ० पा० । ३ चापि–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दोलात्खड्गमादातुमैच्छत ॥ उत्तिष्ठंतीं च तां भैमिरनुसृत्य जवादिव ॥ ४२ ॥ केशेष्वादाय सव्येन पाणिनाऽपातयद्भुवि ॥ ततः कंठे सव्यपादं दत्त्वादाय च कर्तिकाम् ॥४३॥ दक्षिणेन करेणास्याश्छेत्तुमैच्छत नासिकाम् ॥ विस्फुरंती ततो मौर्वी मंदमाह घटोत्कचम् ॥४४॥ प्रश्नेन शक्त्या च बलेन नाथ त्रिधा त्वयाहं विजिता नमस्ते ॥ तन्मुंच मां कर्मकरी तवास्मि समादिश त्वं प्रकरोमि तच्च ॥ ४५ ॥ ॥ घटोत्कच उवाच ॥ ॥ यद्येवं तर्हि मुक्तासि भूयो दर्शय यद्बलम् ॥ एवमुक्त्वा मुमोचैनां मुक्ता चाह प्रणम्य सा ॥ ४६ ॥ जानामि त्वां महाबाहो वीरं शक्तिमतां वरम् ॥ सर्वराक्षसभर्तारं त्रैलोक्येऽमितविक्रमम् ॥ ४७ ॥ गुह्यकाधिपतिस्त्वं हि कालनाभ इति स्मृतः ॥ षष्टिकोटिपतिर्जातो यक्षरक्षाकृते भुवि ॥ ४८ ॥ इति मां प्राह कामाख्या सर्वं तत्संस्मराम्यहम् ॥ इदं गेहं सानुगं मे दत्तं मयात्मना तव ॥ ४९ ॥ समादिश प्राणनाथ कमादेशं करोमि ते ॥ ॥ घटोत्कच उवाच ॥ ॥ प्रच्छन्नस्तस्य घटते न विवाहः कथंचन ॥ ५० ॥ मौर्वि यस्य हि वर्तंते पितरौ बांधवास्तथा ॥ तन्मां शीघ्रं वह शुभे शक्रप्रस्थाय संप्रति ॥ ५१ ॥ अयं कुलक्रमोऽस्माकं यद्भार्यां पतिमुद्वहेत् ॥ तत्रानुज्ञां समासाद्य परिणेष्यामि त्वामहम् ॥ ५२ ॥ भगदत्तमथो नाथं ततो मौर्वी न्यवेदयत् ॥ समादाय बहुद्रव्यं विससर्जाथ भ्रातरम् ॥ ५३ ॥ ततः पृष्ठिं समारोप्य घटोत्कचमनिंदिता ॥ नानाद्रव्यपरीवारा शक्रप्रस्थं समाव्रजत् ॥ ५४ ॥ ततोऽसौ वासुदेवेन पांडवैश्चाभिनंदितः ॥ शुभे लग्ने पाणिमस्या जगृहे भीमनंदनः ॥ ५५ ॥ कुरूणां राक्षसानां च प्रोक्तोत्तमविधानतः ॥ उद्वाह्य तां तद्धनैश्च तर्पयामास पांडवान् ॥ ५६ ॥ कुंती च द्रौपदी चोभे मुमुदाते नितांततः ॥ मंगलान्यस्य चक्राते मौर्व्याश्च धनतर्पिते ॥ ५७ ॥ ततो विवाहे निर्वृत्ते प्रतिपूज्य घटोत्कचम् ॥ भार्यया सहितं राजा स्वराज्याय समादिशत् ॥ ५८ ॥ मौर्व्याऽऽज्ञां शिरसा गृह्य हैडंबिर्भार्ययान्वितः ॥ शुभं हिडम्बस्य वने स्वराज्यं समुपाव्रजत् ॥५९॥ ततो राक्षसयोषाभिर्वीरकांस्यैः प्रवर्धितः॥महोत्सवेन महता स्वराज्ये प्रमुमोदसः ॥६०॥ततो वनेषु चित्रेषु निम्नगापुलिनेषु च ॥ रेमे सह तया भैमिर्मंदोदर्येव रावणः ॥ ६१ ॥ एवं विक्रीडतस्तस्य गर्भो जज्ञे महाद्युतेः॥ हेडंबे राक्षसव्याघ्राद्बालसूर्यसमप्रभः ॥ ६२ ॥ स जातमात्रो ववृधे क्षणाद्यौवनगोऽभवत् ॥ नीलमेघचयप्रख्यो घटास्यो दीर्घलोचनः ॥ ६३ ॥ ऊर्ध्वकेशश्चोर्ध्वरोमा पितरौ प्रणतोऽब्रवीत् ॥ प्रणमामि युवां चोभौ जातस्य॰पितरौ गुरू ॥ ६४ ॥ भवतोर्हि प्रियं कृत्वा अनृणः स्यां सदा ह्यहम् ॥ भवद्भ्यां दत्तमिच्छामि अभिधानं यथात्मनः ॥ ६५॥ अतः परं तु यच्छ्रेयः कर्तव्यं प्रोन्नतिप्रदम् ॥ ततो भैमिस्तमालिंग्य पुत्रं वचनमब्रवीत् ॥६६॥ बर्बरा

१ प्रथमौ—इ॰पा॰ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कारकेशत्वाद्बर्बरीकाभिधो भवान्[1] ॥ भविष्यति महाबाहो कुलस्यानन्दवर्धनः ॥ ६७ ॥ श्रेयश्च ते यत्परमं दृढं च तत्कीर्त्यते बहुधा विप्रमुख्यैः ॥ प्रक्ष्यावहे तद्यदुवंशनाथं गत्वा पुरीं द्वारकां वासुदेवम् ॥ ६८ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां प्रथमे माहेश्वरखण्डे कौमारिकाखंडे बर्बरीकोत्पत्तिवर्णनंनाम षष्टितमोऽध्यायः ॥ ६० ॥ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ ततो घटोत्कचो मुक्त्वा तत्र कामकटंकटाम् ॥ पुत्रेणानुगतो धीमान्वियता द्वारकां ययौ ॥ १ ॥ आगच्छन्तं च तं दृष्ट्वा राक्षसं राक्षसानुगम् ॥ द्वारकावासिनो योधाश्चक्रुरत्युल्बणं रवम् ॥ २ ॥ ग्रामे ग्रामे सुसंनद्धा नवलक्षमिता रथाः ॥ राक्षसौ द्वौ समायातौ पात्येतां विशिखैरिति ॥ ३ ॥ तान्गृहीतायुधान्दृष्ट्वा यदुवीरान्घटोत्कचः ॥ प्रगृह्य विपुलं बाहुं जगौ तारस्वरेण सः ॥ ४ ॥ राक्षसं वित्त मां वीरा भीमपुत्रं घटोत्कचम् ॥ सुप्रियं वासुदेवस्य प्रणामार्थमुपागतम् ॥ ५ ॥ निवेदयत मां प्राप्तं यादवेन्द्राय सात्मजम् ॥ इति तस्य वचः श्रुत्वा ते कृष्णाय न्यवेदयन् ॥ ६ ॥ आह देवः सभास्थश्च शीघ्रमत्राव्रजत्वसौ ॥ ततः प्रवेशयामासुर्द्वारकां ते घटोत्कचम् ॥ ७ ॥ सपुत्रः सोऽपि रम्याणि वनान्युपवनानि च ॥ क्रीडाशैलांश्च हर्म्याणि संपश्यन्नागतः सभाम् ॥८॥ स तत्र उग्रसेनं च वसुदेवं च सात्यकिम् ॥ अक्रूररामप्रमुखान्ववन्दे कृष्णमेव च ॥ ९ ॥ तं पादयोर्निपतितं समालिंग्य सहात्मजम् ॥ साशिषं स्वसमीपस्थमुपवेश्येदमब्रवीत् ॥ १० ॥ पुत्र राक्षसशार्दूल कुरूणां कुलवर्धन ॥ कुशलं सर्वतः कच्चित्किमर्थस्ते समागमः ॥ ॥ ११ ॥ ॥ घटोत्कच उवाच ॥ ॥ देव युष्मत्प्रसादेन सर्वतः कुशलं मम ॥ श्रूयतां कारणं स्वामिन्यदर्थमहमागतः ॥ १२ ॥ देवोपदिष्टभार्यायां जातोऽयं तनयो मम ॥ स च प्रश्नं वक्ष्यति त्वां श्रूयतामागतस्त्वतः ॥ १३ ॥ ॥ श्रीकृष्ण उवाच[2] ॥ ॥ वत्स मौर्वेय ब्रूहि त्वं सर्वं पृच्छ यदिच्छसि ॥ यथा घटोत्कचो मह्यं सुप्रियश्च तथा भवान् ॥ १४ ॥ ॥ बर्बरीक उवाच ॥ ॥ प्रणम्य त्वामादिदेवं मनोबुद्धिसमाधिभिः ॥ प्रक्ष्यामि केन श्रेयः स्याज्जंतोर्जातस्य माधव ॥ १५ ॥ केचिच्छ्रेयो धर्ममाहुरैश्वर्यं त्यागभोजनम् ॥ केचिद्दमं तपो द्रव्यं भोगान्मुक्तिं च केचन ॥ १६ ॥ तदेवं शतसंख्येषु श्रेयस्सु पुरुषोत्तम ॥ मम चैवं कुलस्यास्य श्रेयो यद्ब्रूहि निश्चितम् ॥ १७ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ वत्स पृथक्पृथक्प्रोक्तं वर्णानां श्रेय उत्तमम् ॥ ब्राह्मणानां तपो मूलं दमोऽध्ययनमेव च ॥ १८ ॥ धर्मप्रकटनं चापि श्रेय उक्तं मनीषिभिः ॥ बलं साध्यं पूर्वमेव क्षत्रियाणां प्रकीर्तितम् ॥ १९ ॥ दुष्टानां शासनं चापि साधूनां परिपालनम् ॥ पाशुपाल्यं च वैश्यानां कृषिर्विज्ञानमेव च ॥ २० ॥

१ महान्–इ० पा० । २ श्रीभगवानुवाच–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शूद्रस्य द्विजशुश्रूषा तया जीवन्वणिग्भवेत् ॥ शिल्पैर्वा विविधैर्जीवेद्द्विजातिहितमाचरन् ॥ २१ ॥ भार्यारतिर्भृत्यपोष्टा शुचिः श्रद्धा परायणः ॥ नमस्कारेण मन्त्रेण पंचयज्ञान्न हापयेत् ॥ २२ ॥ तद्भवान्क्षत्रियकुले जातोऽसि कुरु तच्छृणु ॥ बलं साधय पूर्वं त्वमतुलं तेन शिक्षय ॥ २३ ॥ दुष्टान्पालय साधूंश्च स्वर्गमेवमवाप्स्यसि ॥ बलं च लभ्यते पुत्र देवीनां सुप्रसादतः ॥ २४ ॥ तद्भवान्बलप्राप्त्यर्थं देव्याराधनमाचर ॥ २५ ॥ ॥ बर्बरीक उवाच ॥ ॥ कस्मिन्क्षेत्रे च कां देवीं कथमाराधयाम्यहम् ॥ एतत्प्रसादप्रवणं मनः कृत्वा निवेदय ॥ २६ ॥ ॥ सूत उवाच ॥ ॥ इति पृष्टः क्षणं ध्यात्वा प्राह दामोदरो विभुः ॥ वत्स क्षेत्रं प्रवक्ष्यामि यत्र तप्स्यसि तत्तपः ॥ गुप्तक्षेत्रमिति ख्यातं महीसागरसंगमे ॥ २७ ॥ तत्र त्रिभुवने याश्च संति देव्यः पृथग्विधाः ॥ नारदेन समानीतास्ताश्चैक्यं सुमहात्मना ॥ २८ ॥ चतस्रस्तस्य दिग्देव्यो नव दुर्गाश्च संति याः ॥ समाराधय ता गत्वा तासामैक्यं हि दुर्लभम् ॥ २९ ॥ नित्यं पूजय ताः पुत्र पुष्पधूपविलेपनैः ॥ स्तुतिभिश्चोपहारैश्च यथा तुष्यंति तास्तव ॥ ३० ॥ तुष्टासु देवीषु बलं धनं च कीर्तिश्च पुत्राः सुभगाश्च दाराः ॥ स्वर्गस्तथा मुक्तिपदं च सत्सुखं न दुर्लभं सत्यमेतत्तवोक्तम् ॥ ३१ ॥ ॥ सूत उवाच ॥ ॥ एवमुक्त्वा बर्बरीकं कृष्णः प्राह घटोत्कचम् ॥ घटोत्कचार्य पुत्रस्ते दृढं सुहृदयो ह्यसौ ॥ ३२ ॥ तस्मात्सुहृदयेत्येवं दत्तं नाम मया द्विकम्[1] ॥ एवमुक्त्वा समालिंग्य संतर्प्य विविधैर्धनैः[2] ॥ ३३ ॥ गुप्तक्षेत्राय भगवान्बर्बरीकं समादिशत् ॥ सोऽथ कृष्णं नमस्कृत्य पितरं यादवांश्च तान् ॥ ३४ ॥ अनुज्ञाप्य च तान्सर्वान्गुप्तक्षेत्रं समाव्रजत् ॥ घटोत्कचोऽपि कृष्णेन विसृष्टः स्ववनं ययौ ॥ ३५ ॥ स्मरन्पुत्रगुणान्पत्न्या[3] स्वराज्यं समपालयत् ॥ ततः सुहृदयो धीमान्दग्धस्थलयां कृताश्रमः[4] ॥ ३६ ॥ त्रिकालं पूजयामास देवीः कर्मसमाधिभिः ॥ नित्यं पुष्पैश्च धूपैश्च उपहारैः पृथग्विधैः ॥ ३७ ॥ तस्याराधयतो देव्यस्तुतुषुर्हायनैस्त्रिभिः ॥ ततः प्रत्यक्षतो भूत्वा बलात्तस्य महात्मनः ॥ ३८ ॥ बलं यत्त्रित्तषु लोकेषु कस्यचिन्नास्ति दुर्लभम् ॥ ऊचुश्च कंचित्कालं त्वं वसात्रैव महाद्युते ॥ ३९ ॥ संगत्या विजयस्य त्वं भूयः श्रेयो ह्यवाप्स्यसि ॥ इत्युक्तः सर्वदेवीभिः स तत्रैव व्यवस्थितः ॥ ४० ॥ आजगामाथ विजयो नाम्ना मागधब्राह्मणः ॥ स सर्वां पृथिवीं कृत्वा पादाक्रांतां द्विजोत्तमः ॥ ४१ ॥ काश्यां विद्याबलं प्राप्य साधनार्थमुपाययौ ॥ गुहेश्वरमुखान्येष सप्तलिंगान्यपूजयत् ॥ ॥ ४२ ॥ आराधयामास चिरं देवीर्विद्याफलाप्तये ॥ ततस्तुष्टास्तस्य देव्यः स्वप्ने प्रोचुरिदं वचः ॥ ४३ ॥ विद्यां साधय त्वं साधो सिद्धमातुः पुरो

१ द्विकम्--द्वितीयम्--इत्यर्थः । २ वैः--इ०, नैः--इ० च पा० । ३ पत्न्या सह--इत्यर्थः । ४ कृताश्रयः--इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ऽगणे ॥ अयं भक्तः सुहृदयः साहाय्यं ते करिष्यति ॥ ४४ ॥ ततस्तद्वचनं श्रुत्वा विजयः स्वप्नमध्यतः ॥ उत्थाय गत्वा देव्यास्तं वव्रे भीमात्म जात्मजम् ॥ ४५ ॥ सोऽपि देवीवचः श्रुत्वा मेने साहाय्यकारणम् ॥ ततः कृष्णचतुर्दश्यामुपोष्य विजयः शुचिः ॥ ४६ ॥ स्नात्वाभ्यर्च्यैव लिंगानि देवीश्चैवार्चयत्पृथक् ॥ कृत्वा स्नानमुपोष्यैव बर्बरीकोऽन्तिकेऽभवत् ॥ ४७ ॥ प्रथमायां ततो रात्रौ ययौ सिद्धांबिकापुरः ॥ मंडलं तत्र कृत्वा च भगाकारं करान्नव ॥ ४८ ॥ अष्टदिक्ष्वष्टकीलांश्च निखन्यैव ससूत्रकान् ॥ कृष्णाजिनधरो भूत्वा बर्बरीकसमन्वितः ॥ ४९ ॥ शिखामाबद्ध्य दिग्बंधं कृत्वारेभे ततो विधिम् ॥ मध्ये मंडलस्यापि कुंडे शुभ्रे त्रिमेखले ॥ ५० ॥ समर्प्य च ततः खड्गं खादिरं मंत्रतेजितम् ॥ संस्थाप्य कीलानभितो बर्बरीकमथाब्रवीत् ॥ ५१ ॥ शुचिर्विनिद्रः संतिष्ठ स्तवं देव्याः समुद्गिरन् ॥ यावत्कर्म करोम्येष यथा विघ्नं न जायते ॥ ५२ ॥ इत्युक्ते संस्थिते तत्र बर्बरीके महाबले ॥ विजयः शोषणं दाहं प्लावनं कृतवान्यमी ॥ ५३ ॥ ततः सुखासनो भूत्वा गुंगुरुभ्यो नमः इति ॥ मंत्रमष्टोत्तरशतं जप्त्वा गुरुभ्यः प्रणम्य च ॥ ततो गणेश्वरविधानमारब्धवान् ॥ ५४ ॥ अथातः संप्रवक्ष्यामि मंत्रं गणपतेः परम् ॥ ५५ ॥ सर्वकार्यकरं स्वल्पं महार्थं सर्वसिद्धिदम् ॥ ५६ ॥ ॐगांगींगूंगैंगौंगः सप्ताक्षरोऽयं महामंत्रः ॥ ॐगणपतिमंत्रस्य गणको नाम ऋषिः विघ्नेश्वरो देवता गं बीजम् ॐशक्तिः पूजार्थे जपार्थे वा तिलकार्थे वा मनस ईप्सितार्थे होमार्थे वा विनियोग इति ॥ स्वाध कस्य पूर्वं तिलककरणम् ॥ ॐगांगणपतये नमः ॥ इति तिलकस्योपरि अक्षतान्दद्यात् अनेन मन्त्रेण ॥ ॐ गांगणपतये नमः ॥ इति तिल कमंत्रः ॥ ॐगां गणपतये नमः ॥ अनेन मंत्रेण गणेशाय पुष्पांजलित्रयं दद्यात् ॥ मूलमंत्रेणात्र चंदनगन्धपुष्पधूपदीपनैवेद्यपूगीफल तांबूलादिकं दद्यात् ॥ अत ऊर्ध्वं मूलमन्त्रेण जपं कुर्यात् ॥ अष्टोत्तरशतं सहस्रं लक्षं कोटिं चेति यथाशक्ति जप्त्वा दशांशहोमार्थे गणेशाग्नये आवाहयामीति अग्निमावाह्य ॥ ॐगां गणपतये स्वाहेति मन्त्रेण गुग्गुलगुटिकाभिर्होमं विदध्याद्विनियोगं चेति गाणेश्वरो महाकल्पः ॥ य एवं सर्व विघ्नेषु साधयेन्मन्त्रमुत्तमम् ॥ सर्वविघ्नानि नश्यंति मनोभीष्टं च सिध्यति ॥ ५७ ॥ डाकिन्यो यातुधानाश्च प्रेताद्याश्च भयंकराः ॥ शत्रूणां जायते नाशो वशीकरणमेव च ॥ ५८ ॥ इमं गाणेश्वरं कल्पं विजानन्विजयोऽपि च ॥ तिलकं विधिना कृत्वा जप्त्वा चाष्टोत्तरं शतम् ॥ ५९ ॥

१ समीपम्--इति शेषः--तेन--देव्याः समीपम्--इत्यन्वययोजना बोद्धव्या ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दशांशं गुटिका हुत्वा पूज्य सिद्धिविनायकम् ॥ सिद्धेयक्षेत्रपालस्य चक्रे पूजां ततो निशि ॥ ६० ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां प्रथमे माहेश्वरखण्डे कौमारिकाखण्डे महाविद्यासाधने गाणेश्वरकल्पवर्णनंनामैकषष्टितमोऽध्यायः ॥ ६१ ॥ ॥ छ ॥ ॥ शौनक उवाच ॥ ॥ सूत श्रुता पुरास्माभिरुत्पत्तिर्गणपस्य च ॥ क्षेत्रनाथः कथं जज्ञे वदैतच्छृण्वतां हि नः ॥ १ ॥ ॥ सूत उवाच ॥ ॥ यदा दारुकदैत्येन[1] पीड्यमाना दिवौकसः ॥ शिवं देव्या सहासीनं प्रणिपत्येदमब्रुवन् ॥ २ ॥ देव दैत्येन घोरेण दुर्जयेनं सुरासुरैः ॥ पीडिता दारुकेण स्मः स्वस्थानाच्चापि च्याविताः ॥ ३ ॥ न विष्णुना न चंद्रेण न चान्येनापि केनचित् ॥ शक्यो हंतुं स दुष्टात्मा अर्धनारीश्वरं विना ॥ ४ ॥ तेन संपीड्यमानानामस्माकं शरणं भव ॥ इत्युक्त्वा रुरुदुर्देवास्त्राहित्राहीति चाब्रुवन् ॥ ५ ॥ ततोऽतिकृपयाविष्टहरकंठस्य कालिमाम् ॥ गृहीत्वा पार्वती चक्रे नारीमेकां महाभयाम् ॥ ६ ॥ आत्मशक्तिं तत्र मुक्त्वा प्रोवाचेदं वचः शुभा ॥ यस्मादतीव कालासि नाम्ना त्वं कालिका भव ॥ ७ ॥ देवारिं च दुरात्मानं शीघ्रं नाशय शोभने ॥ एवमुक्ता महारावा कालिका प्राप्य तं तदा ॥ ८ ॥ रवेणैव मृतं चक्रे सानुगं स्फुटितहृदम् ॥ ततोवन्ती श्मशानस्था महारावानमुंचत ॥ ९ ॥ यैरासन्विकला[2] लोकास्त्रयोऽपि प्रमृता यथा ॥ ततो रुद्रो बालरूपं कृत्वा विश्वकृते विभुः ॥ १० ॥ रुदंस्तस्याः समीपे चाप्यागतः प्रेतसद्मनि ॥ रुदंतं च ततो बालं कृत्वोत्संगे कृपान्विता ॥ ११ ॥ कालिकाऽपाययत्स्तन्यं मा रुदेति प्रजल्पती ॥ स्तन्यव्याजेन बालोऽपि पपौ क्रोधं तदंगजम् ॥ १२ ॥ योऽसौ हरकंठभवविषादासीत्सुदुर्धरः ॥ पीतक्रोधस्वभावे च सौम्यासीत्कालिका तदा ॥ १३ ॥ बालोऽपि बालरूपं तत्त्यक्तुमैच्छत्कृतक्रियः ॥ १४ ॥ ततो देवाः कालिकायाः शंकमानाः पुनर्भयम् ॥ ऊचुर्मा बाल बालत्वं परित्यज कृपां कुरु ॥ १५ ॥ ॥ बाल उवाच ॥ ॥ न भेतव्यं कालिकायाः सौम्या देवी यतः कृता ॥ अस्ति चेद्भवतां भीतिरन्यान्स्रक्ष्यामि बालकान् ॥ चतुःषष्टिक्षेत्रपालानित्युक्त्वा सोऽसृजन्मुखात् ॥ १६ ॥ प्राह तान्बालरूपांश्च बालरूपी महेश्वरः ॥ स्वर्गेषु पंचविंशानां पातालेषु च तावताम् ॥ १७ ॥ चतुर्दशानां भूर्लोके वासो वः पालनं तथा ॥ अयमेव श्मशानस्थो भविता श्वा च वाहनम् ॥ १८ ॥ नैवेद्यं भवतां राजमाषतंडुलमिश्रकाः ॥ अनभ्यर्च्य च यो युष्मान्किंचित्कृत्यं विधास्यति ॥ १९ ॥ तस्य तन्निष्फलं भावि भुक्तं प्रेतैश्च राक्षसैः ॥ इत्युक्त्वा भगवान्रुद्रस्तत्रैवांतरधीयत ॥ २० ॥ क्षेत्रपालाः स्थिताश्चैव यथास्थाने निरूपिताः ॥ इति वः क्षेत्रपालानां सृष्टिः प्रोक्ता समासतः ॥ २१ ॥ आराधनं प्रवक्ष्यामि

१ तारकदैत्येन—इ० पा० । २ विह्वलाः—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

येन प्रीता भवंति ते ॥ २२ ॥ ॐक्षां क्षेत्रपालाय नमः ॥ इति नवाक्षरो महामंत्रः ॥२३॥ अनेनात्र चंदनादि दत्त्वा राजमाषतण्डुलमिश्रकांश्च चतुः
षष्टिकृतभागान्वटकान्निवेद्य तावत्यो दीपिकास्तावन्ति पत्राणि पूगानि निवेद्य दण्डवत्प्रणम्य महास्तुतिमेतां जपेत् ॥ २४ ॥ ॐऊर्ध्वकेशा विरू
पाक्षा नित्यं ये घोररूपिणः ॥ रक्तनेत्राश्च पिंगाक्षाः क्षेत्रपालान्नमामि तान् ॥ २५ ॥ अ[1]ह्वरो ह्यापकुम्भश्च इडाचारस्तथैव यः ॥ इंद्रमूर्तिश्च कोला
क्ष उ[2]पपाद ऋतुंसनः ॥ २६ ॥ सिद्धेयश्चैव वलिको नीलपादेकदंष्ट्रिकः ॥ इरापतिश्चाघहारी विघ्नहारी तथांतकः ॥ २७ ॥ ऊर्ध्वपादः कम्बलश्च
खंजनः खर एव च ॥ गोमुखश्चैव जंघालो गणनाथश्च वारणः ॥ २८ ॥ जटालोप्यजटालश्च नौमि स्वःक्षेत्रपालकान् ॥ ऋकारो हठकारी च
टंकपाणिः खणिस्तथा ॥ २९ ॥ ठंठंकणो जंबरश्च स्फुलिंगास्यस्तडिद्रुचिः ॥ दंतुरो घननादश्च नन्दकश्च तथा परः ॥ ३० ॥ फेत्कार
कारी पंचास्यो वर्बरी भीमरूपवान् ॥ भग्नपक्षः कालमेघो युवानो भास्करस्तथा ॥ ३१ ॥ रौरवश्चापि लंबोष्ठो वणिजः सुजटालिकः ॥ सुगंधो
हुहुकश्चैव नौमि पातालरक्षकान् ॥ ३२ ॥ सर्वलिंगेषु हुंकारः स्मशानेषु भयावहः ॥ महालक्षो वने घोरे ज्वालाक्षो वसतौ स्थितः ॥ ३३ ॥ एकवृ
क्षश्च वृक्षेषु करालवदनो निशि ॥ घण्टारवो गुहावासी पद्मखंजो जले स्थितः ॥ ३४ ॥ चत्वरेषु दुरारोहः पर्वते कुरवस्तथा ॥ निर्झरेषु प्रवा
हाख्यो माणिभद्रो निधिष्वपि ॥ ३५ ॥ रसक्षेत्रे रसाध्यक्षो यज्ञवाटेषु कोटनः ॥ चतुर्दश भुवं व्याप्य स्थिताश्चैवं नमामि तान् ॥ ३६ ॥ एवं
चतुःषष्टिमिताञ्छरणं यामि क्षेत्रपान् ॥ प्रसीदंतु प्रसीदंतु तृप्यंतु मम पूजया ॥ ३७ ॥ सर्वकार्येषु यश्चैवं क्षेत्रपानर्चयेच्छुचिः ॥ क्षेत्रपास्तस्य
तुष्यंति यच्छंति च समीहितम् ॥ ३८ ॥ इमं क्षेत्रपकल्पं च विजानन्विजयस्तथा ॥ यथोक्तविधिनाभ्यर्च्य सिद्धेयं तुष्टुवे च तम् ॥ ३९ ॥
प्रणम्य च ततो देवीमानर्च वटयक्षिणीम् ॥ पुरा यदा नारदेन कलापग्रामतो द्विजाः ॥ ४० ॥ समानीतास्तैश्च साकं सुनंदा नाम ब्राह्मणी ॥ विध
वाभ्यागता तत्र तपस्तप्तुं महीतटे ॥ ४१ ॥ सा कृच्छ्राणि पराकांश्च अतिकृच्छ्राणि कुर्वती ॥ ज्येष्ठे भाद्रपदे चक्रे सावित्र्या द्वे त्रिरात्रिके ॥ ४२ ॥
मासोपवासं च तथा कार्तिके कुलनंदिनी ॥ सप्तलिंगानि संपूज्य देवीपूजां सदा व्यधात् ॥ ४३ ॥ दर्शे स्नानं तथा चक्रे महीसागरसंगमे ॥ इत्या
दिबहुभिस्तैस्तैर्नित्यं नियमपालनैः ॥ ४४ ॥ धूतपापा ययौ लोकमुमायाः कृतस्वागता ॥ अंशेन च तटे तस्मिन्संभूता वटयक्षिणी ॥ ४५ ॥
तस्यास्तुष्टो वरं प्रादात्सिद्धलिंगस्थितो हरः ॥ अनभ्यर्च्य य एनां च मत्पूजां प्रकरिष्यति ॥ ४६ ॥ तस्य तन्निष्फलं सर्वमित्युक्तं पाल्यमेव मे ॥

१ अज्वरो ह्यापकुम्भश्च—इ०पा०। २ रिपुपादो रिपुंसनः--इ०पा०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्मात्प्रपूजयेन्नित्यं वटस्थां वटयक्षिणीम् ॥ पुष्पैर्धूपैस्तु नैवेद्यैर्मंत्रेणानेन भक्तितः ॥ ४७ ॥ सुनंदे नंदनीयासि पूजामेतां गृहाण मे ॥ प्रसीद सर्वकालेषु मम त्वं वटयक्षिणि ॥ ४८ ॥ एवं संपूज्य तां नत्वा क्षमाप्य वटयक्षिणीम् ॥ सर्वान्कामानवाप्नोतिनरो नारी च सर्वदा ॥ ४९ ॥ विजयश्चापि माहात्म्यमिदं जानन्महामतिः ॥ आनर्च वटवृक्षस्थां भक्तितो वटयक्षिणीम् ॥ ५० ॥ ततः सिद्धां बिकां स्तुत्वा जप्तवानपराजिताम् ॥ महाविद्यां वैष्णवीं तु साधनेन समन्विताम् ॥ ५१ ॥ यस्याः स्मरणमात्रेण सर्वदुःखक्षयो भवेत् ॥ तां विद्यां कीर्तयिष्यामि शृणुध्वं विप्रपुंगवाः ॥ ५२ ॥ ॐ नमो भगवते वासुदेवाय नमोऽनंताय सहस्रशीर्षाय क्षीरोदार्णवशायिने शेषभोगपर्यंकाय गरुडवाहनाय पीतवाससे वासुदेव संकर्षण प्रद्युम्नानिरुद्ध हयशिरो वराह नरसिंह वामन त्रिविक्रम राम राम वरप्रद नमोऽस्तु ते नमोऽस्तु ते असुरदैत्यदानवयक्षराक्षसभूतप्रेतपिशाचकुंभांडसिद्धयोगिनीडाकिनीस्कंदपुरोगमान्ग्रहान्नक्षत्रग्रहांश्चान्यांश्च हन २ दह २ पच २ मथ २ विध्वंसय २ विद्रावय २ शंखेन चक्रेण वज्रेण गदया मुशलेन हलेन भस्मीकुरु सहस्रबाहवे सहस्रचरणायुध जय २ विजय २ अपराजित अप्रतिहत सहस्रनेत्र ज्वल २ प्रज्वल २ विश्वरूप बहुरूप मधुसूदन महावराह महापुरुष वैकुंठ नारायण पद्मनाभ गोविंद दामोदर हृषीकेश सर्वासुरोत्सादन सर्वभूतवशंकर सर्वदुःखप्रभेदन सर्वयंत्रप्रभंजन सर्वनागप्रमर्दन सर्वदेवमहेश्वर सर्वबंधविमोक्षण सर्वाहितप्रमर्दन सर्वज्वरप्रणाशन सर्वग्रहनिवारण सर्वपापप्रशमन जनार्दन जनानंदकर नमोऽस्तु ते स्वाहा ॥ ५३ ॥ इमामपराजितां परमवैष्णवीं महाविद्यां जपति पठति शृणोति स्मरति धारयति कीर्तयति न च तस्य वाय्वग्निवज्रोपलाशनिवर्षभयं न समुद्रभयं न ग्रहभयं न च चौरभयं न च श्वापदभयं वा भवेत् ॥ ५४ ॥ क्वचिद्रात्र्यंधकारस्त्रीराजकुलविषोपविषगरदवशीकरणविद्वेषणोच्चाटनवधबंधभयं वा न भवेदेतैर्मंत्रपदैरुदाहृतैर्हृदा बद्धैः संसिद्धपूजितैः ॥ ५५ ॥ तद्यथा ॥ नमोनमस्तेऽस्तु अभये अनघे अजिते अत्रसिते अमृते अपराजिते पठितसिद्धे स्मरितसिद्धे एकानंशे उमे ध्रुवे अरुंधति सावित्रि गायत्रि जातवेदसि मानस्तोके सरसि सरस्वति धरणि धारिणि सौदामिनि अदिते विनते गौरि गांधारि मातंगि कृष्णे यशोदे सत्यवादिनि ब्रह्मवादिनि कालि कपालिनि सद्योवयवचयनकरि स्थलगतं जलगतमंतरिक्षगतं वा रक्ष २ सर्वभूतभयोपद्रवेभ्यो रक्ष २ स्वाहा ॥५६॥ यस्याः प्रणश्यते पुष्पं गर्भो वा पतते यदि ॥ म्रियंते बालका यस्याः काकवंध्या च या भवेत् ॥ धारयेत इमां विद्यामेभिर्दोषैर्न लिप्यते ॥ ५७ ॥ रणे राजकुले द्यूते नित्यं

२ नुत्वा--इ०, नत्वा----इ०च पा० । १ जनानन्दन--इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्य जयो भवेत् ॥ शस्त्रं धारयते ह्येषां समरे कांडधारिणी ॥ ५८ ॥ गुल्मशूलाक्षिरोगाणां नित्यं नाशकरी तथा ॥ शिरोरोगज्वराणां च नाशनी सर्वदेहिनाम् ॥ ५९ ॥ तद्यथा ॥ हन २ कालि सर २ कालि सर २ गौरि धम २ गौरि धम २ विद्ये[1] आले तोले माले[2] गंधे बंधे पच २ विद्ये नाशय पापं हन दुःस्वप्नं विनाशय कष्टनाशिनि रजनि संध्ये दुंदुभिनादे मानसवेगे शंखिनि चक्रिणि वज्रिणि शूलिनि अपमृत्युविनाशिनि विश्वेश्वरि द्रविडि द्राविडि केशवदयिते पशुपतिमहिते दुर्दमदमिनि शर्वरि किराति मातंगि ॐह्रांह्रंह्रंह्रंक्रांक्रंक्रंक्रंत्वर २ ये मां द्विपंति प्रत्यक्षं परोक्षं वा सर्वान्दम २ मर्द २ तापय २ पातय २ शोषय २ उत्सादय २ ब्रह्माणि माहेश्वरि वाराहि विनायकि ऐंद्रि आग्नेयि चामुंडे वारुणि प्रचंडविद्योते इंद्रोपेंद्रभगिनि विजये शांतिस्वस्तिपुष्टिविवर्धिनि कामांकुशे कामदुधे सर्वकामवरप्रदे सर्वभूतेषु वासिनि प्रति विद्यां कुरु २ आकर्षिणि वेशिनि ज्वालामालिनि रमणि रामणि धरणि धारिणि मानोन्मानिनि रक्ष २ वायव्ये ज्वालामालिनि तापनि शोषणि नीलपताकिनि महागौरि महाश्रये महामयूरि आदित्यरश्मि जाह्नवि यमघंटे किणि २ चिंतामणि सुरभि सुरोत्पन्ने कामदुघे यथा मनीषितं कार्यं तन्मम सिध्यतु स्वाहा ॐस्वाहा ॐभूः स्वाहा ॐभुवः स्वाहा ॐस्वः स्वाहा ॐभूर्भुवःस्वः स्वाहा यत्रैवागतं पापं तत्रैव प्रतिगच्छतु स्वाहा ॐबले महाबले असिद्धसाधिनि स्वाहा ॥ ६० ॥ इतीमां साधयामास वैष्णवीमपराजिताम् ॥ विजयः संयतो भूत्वा मनोबुद्धिसमाधिभिः ॥ ६१ ॥ य इमां पठते नित्यं साधनेन विनापि च ॥ तस्यापि सर्वविघ्नानि नश्यंति द्विजपुंगवाः ॥ ६२ ॥ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां प्रथमे माहेश्वरखण्डे कौमारिकाखण्डे बर्बरिकोपाख्याने महाविद्यासाधनवर्णनंनाम द्विषष्टितमोऽध्यायः ॥ ६२ ॥ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ अश्वत्थलाक्षावह्नौ च सर्षपान्केसरप्लुतान् ॥ जुह्वतो मंत्रमुख्यैश्च बलातिबलसंज्ञकैः ॥ १ ॥ यामे तु प्रथमे याते काचिन्नारी समाययौ ॥ शोणिताक्तैकवसना महोच्चोर्ध्वशिरोरुहा ॥ २ ॥ दारुणाक्षी शुक्लदन्ती भयस्यापि भयंकरी ॥ सा रुरोद महारावं प्राप्य तां होमभूमिकाम् ॥ ३ ॥ तां दृष्ट्वा चुक्षुभे सद्यो विजयो भीतिमानिव ॥ बर्बरीकश्च निर्भीतिस्तस्याः संमुखमाययौ ॥ ४ ॥ ततः कण्ठं समाश्लिष्य तस्या मतिमतां वरः ॥ रुरोद द्विगुणं वीरो मेघवन्नादयन्बहु ॥ ५ ॥ तं दृष्ट्वा विस्मिता सा च यावन्मुंचति कर्तिकाम् ॥ तावन्निष्पीडिते कंठे मोक्तुं तस्मिन्न चाशकत् ॥ ६ ॥ पीडयमाने च बलिना कंठे तस्या मुहुर्मुहुः ॥ मुमोच विविधा

१ विघ्ने--इ०पा० । २ आले माले माले--इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ञ्छब्दान्वज्राहत इवाचलः ॥ ७ ॥ क्षणं रावांस्ततो मुक्त्वा त्राहि मुञ्चेति वक्त्यणु ॥ ततः कृपालुना मुक्ता पादयोः पतिताऽब्रवीत् ॥ ८ ॥ शरणं ते प्रपन्नास्मि दासी कर्मकरी तव ॥ महाजिह्वेति मां विद्धि राक्षसीं कामरूपिणीम् ॥ ९ ॥ काशीश्मशाननिलयां देवदानवदर्पहाम् ॥ ददासि यदि मे वीर दुर्लभां प्राणदक्षिणाम् ॥ १० ॥ ततस्तपश्चरिष्यामि सर्वभूताभयप्रदा ॥ अस्मिन्नर्थे स्वदेवस्य शपथा मे तथा त्मनः ॥ ११ ॥ यद्येतद्व्यत्ययं कुर्यां भस्मीभूयां ततः क्षणम् ॥ एवं ब्रुवाणां तां वीरो निगृह्य शपथैर्दृढम् ॥ १२ ॥ मुमोच सापि संहृष्टा कृच्छ्रा न्मुक्ता ययौ वनम् ॥ सोऽपि वीरः खड्गधारी तत्रैवावस्थितोऽभवत् ॥ १३ ॥ ततो मध्यमरात्रौ च गर्जितं श्रूयते महत् ॥ अन्धकारं च संजज्ञे तमोंऽधनरकप्रभम् ॥ १४ ॥ ददृशे च ततः शैलः शतशृंगोऽतिविस्तरः ॥ नानाशिलाः प्रमुमुचे नानावृक्षांश्च सोच्छ्रयान् ॥ १५ ॥ नानानिर्झर संघोषं ववृषे शोणितं बहु ॥ तं तथा नगमालोक्य निर्भीतो भैमिनंदनः ॥ १६ ॥ पर्वतो द्विगुणो भूत्वा पर्वतं सहसाप्लुतः ॥ पदाभिजघ्ने संहृत्य पर्वतं स्वेन भूभृता[1] ॥ १७ ॥ तदा विशीर्णः सोऽभूच्च पर्वतो भूमिमंडले ॥ ततो योजनदेहात्मा शतशीर्षः शतोदरः ॥ १८ ॥ वक्त्रैर्मुंचन्म हाज्वालां रेपलेन्द्रोऽभ्यधावत[2] ॥ तं धावमानं दृष्ट्वैव बर्बरीको महाबलः ॥ १९ ॥ विधाय तादृशं रूपं नर्दन्तं चाप्यधावत ॥ ततो मध्यमरात्रौ तौ लघु चित्रं च सुष्ठु च ॥ २० ॥ युयुधाते बाणजालैर्यथा प्रावृषि तोयदौ ॥ छिन्नचापौ च खड्गाभ्यां छिन्नखड्गौ च मुष्टिभिः ॥ ॥ २१ ॥ पर्वताविव सत्पक्षौ[3] चिरं युयुधतुः स्थिरम् ॥ ततः कक्षे समुत्पाट्य भ्रामयित्वा मुहूर्तकम् ॥ २२ ॥ भूमौ प्रधर्षयामास प्रसृतं च मुमोच ह ॥ चिक्षेप चाग्निकोणे तं महीसागररोधसि ॥ २३ ॥ तद्दूरे रेपलेन्द्राख्यं ग्राममद्यापि वर्तते ॥ एवं स रेपलोनाम वृत्रतु ल्यपराक्रमः ॥ २४ ॥ नाथः श्मशानस्यावन्त्या विघ्नकृन्निहतोऽभवत् ॥ तं निहत्य पुनर्वीरो बर्बरीकः स्थितोऽभवत्[4] ॥ २५ ॥ तत स्तृतीययामे च प्रतीच्या दिश आययौ ॥ पर्वताभा महानादा पादैः कम्पयतीव भूः ॥ २६ ॥ दुहद्रुहाख्याश्वतरी मेघभ्रष्टा तडिद्यथा ॥ तामायांतीं तथा दृष्ट्वा सूर्यवैश्वानरप्रभाम् ॥ २७ ॥ उपसृत्य जवाद्भैमी[5] रुरोह प्रहसन्निव ॥ वेगात्ततः प्रद्रवतीं तुंडे प्राहत्य मुष्टिभिः ॥ २८ ॥ स्थापयामास तत्रैव तस्थौ सा चातिपीडिता ॥ ततः क्रुद्धा महारावं कृत्वाप्लुत्य दुहद्रुहा ॥ २९ ॥ जगत्यामाशु चिक्षेप बर्बरीकं तथेच्छकम्[6] ॥

१ भूभृता--पर्वतरूपेण--स्वेन--इति योजना। २ रेपलेन्द्रः--इ० पा०। ३ संवृक्तौ--इ०पा०। ४ स्थिरः--इ० पा०। ५ भैमिः--अत्र--भीमस्यापत्यं भैमिः--तस्याप्यपत्यम्--इत्यस्मिन्नर्थेऽपि--भैमिः--इति--इञ्--आर्षः। ६ तथेच्छकम्--तथा--तद्गमनविषये इच्छा यस्य सः--तथेच्छकः--तं--तथेच्छकम्--इत्यर्थः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ततो नदित्वा चातीव पादघातममुंचत ॥ ३० ॥ पादौ च वीरः संगृह्य चिक्षेप भुवि लीलया ॥ ततः पुनः समुत्थाय धावंतीं तां निगृह्य सः ॥ ॥ ३१ ॥ मुष्टिना पातयित्वैव दंतान्कंठमपीडयत् ॥ छिन्नं वास इवापीड्य प्राणानत्याजयद्द्रुतम् ॥ ३२ ॥ एवं सीकोत्तरस्थाने स्मशानैकपदो द्रवा ॥ शाकिनीनामधीशा सा बर्बरीकेण सूदिता ॥ ३३ ॥ हत्वा तां चापि चिक्षेप प्रतीच्यामेव लीलया ॥ दुहद्रुहाख्यमद्यापि तत्र ग्रामं स्म वर्तते ॥ ३४ ॥ ततस्तथैव संतस्थौ बर्बरीकोऽभिरक्षणे ॥ ततश्चतुर्थे यामे च प्रातः क्षपणकोऽद्भुतः ॥ ३५ ॥ मुंडी नग्नो मयूराणां पिच्छधारी महाव्रतः ॥ प्रोवाच चेदं वचनं हाहा कष्टमतीव भोः ॥ ३६ ॥ अहिंसा परमो धर्मस्तदग्निर्ज्वाल्यते कुतः ॥ हूयमाने यतो वह्नौ सूक्ष्मजीववधो महान् ॥ ३७ ॥ श्रुत्वेदं वचनं तस्य बर्बरीकोऽब्रवीत्स्मयन् ॥ वदने सर्वदेवानां हूयमाने स्म पावके ॥ ३८ ॥ अनृतं भाषसे पाप शिक्षायोग्योऽसि दुर्मते ॥ इत्युक्त्वा सहसोत्पत्य कक्षामध्ये स्थिरोऽस्य च ॥ ३९ ॥ दन्तान्मुष्टिप्रहारैश्च समाहत्याभ्यपातयत् ॥ रुधिराविलवक्त्रं तं मुमोच पतितं भुवि ॥ ४० ॥ स क्षणाच्चेतनां प्राप्य घोरदैत्यवपुर्धरः ॥ भयाद्भैमेः प्रदुद्राव गुहाविवरमाविशत् ॥ ४१ ॥ बहुप्रभेति नगरी षष्टियोजनमायता ॥ तस्यां विवेश सहसा तं चानु बर्बरीककः ॥ ४२ ॥ बर्बरीकं ततो दृष्ट्वा नादोऽभूच्च पलाशिनाम् ॥ धावध्वं हन्यतामेष छिद्यतां भिद्यतामिति ॥ ४३ ॥ तच्छ्रुत्वा दैत्यवीराणां कोटयो नव भीषणाः ॥ नानायुधधरा वीरं बर्बरीकमुपाद्रवन् ॥ ४४ ॥ दृष्ट्वा तान्कोटिशो दैत्यान्क्रुद्धो भीमात्मजात्मजः ॥ निमील्य सहसा नेत्रे तेषां मध्यमधावत ॥ ४५ ॥ पादघातैस्ततः कांश्चिद्भुजाघातैस्तथापरान् ॥ हृदयस्याभिघातैश्च क्षणान्निन्ये यमक्षयम् ॥ ४६ ॥ यथा नलवनं[1] क्रुद्धः कुर्याद्भूमिसमं करी ॥ नवकोटीस्तथा जघ्ने सह तेन पलाशिना ॥ ४७ ॥ ततो नागाः समागम्य[2] वासुकिप्रमुखास्तदा ॥ तुष्टुवुर्विविधैर्वाक्यैरूचुः सुहृदयं च ते ॥ ४८ ॥ नागानां परमं कृत्यं कृतं ते भैमिनंदन ॥ पलाशीनाम दैत्योयं नीतो यत्सानुगो यमम् ॥ ॥ ४९ ॥ अनेन हि वयं वीर सानुगेन दुरात्मना ॥ पीडिता विविधोपायैः पातालादप्यधः कृताः ॥ ५० ॥ वरं वृणीष्व त्वं तस्मान्नागेभ्योऽभिमतं परम् ॥ वरदाः सर्व एव स्म वयं तुभ्यं सुतोषिताः ॥ ५१ ॥ ॥ सुहृदय उवाच ॥ ॥ यदि देयो वरो मह्यं तदेनं प्रवृणोम्यहम् ॥ सर्वविघ्नविनिर्मुक्तो विजयः सिद्धिमाप्नुयात् ॥ ५२ ॥ ततस्तथेति तं प्रोचुः प्रहृष्टा वायुभोजनाः ॥ स च तेभ्यः पुरीं दत्त्वा निवृत्तो नागपूजितः ॥ ५३ ॥ विवरस्य च मध्येन समागच्छन्महाप्रभम् ॥ सर्वरत्नमयं लिंगं स्थितं कल्पतरोरधः ॥ ५४ ॥ अर्च्यमानं सुबह्वीभिर्नागकन्याभिरैक्षत ॥ ततोऽसौ

१ नलवनम्–वोरुवन–इति महाराष्ट्रभाषायाम्। २ समाजग्मुः–इ० पा०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विस्मयाविष्टो नागकन्या ह्यपृच्छत ॥ ५५ ॥ केनेदं स्थापितं लिंगं सूर्यवैश्वानरप्रभम् ॥ लिंगादपि चतुर्दिक्षु मार्गाश्चेमे तु कीदृशाः ॥ ५६ ॥ इति वीरवचः श्रुत्वा बृहत्कटिपयोधरा ॥ सव्रीडं सस्मितापांगनिर्मोक्षमिदमब्रवीत् ॥ ५७ ॥ सर्वपन्नगराजेन शेषेण सुमहात्मना ॥ तप स्तप्त्वा महालिंगमिदमत्र प्रतिष्ठितम् ॥ ५८ ॥ दर्शनात्स्पर्शनाद्ध्यानादर्चनात्सर्वसिद्धिदम् ॥ लिंगात्पूर्वेण मार्गोयं याति श्रीपर्वतं भुवि ॥ ५९ ॥ एलापत्रेण विहितो नागानां तत्र प्राप्तये ॥ दक्षिणेन च मार्गोऽयं याति शूर्पारकं भुवि ॥६०॥ कर्कोटकेन नागेन कृतोऽयं तत्र प्राप्तये ॥ पश्चिमेन च मार्गोऽयं प्रभासं याति सुप्रभम् ॥६१॥ ऐरावतेन विहितो नागानां गमनाय च ॥ उत्तरेण च मार्गोयं येन यातुं भवान्स्थितः॥६२॥ गुप्तक्षेत्रे सिद्ध लिंगं याति शक्तिगुहाऽऽकृतः ॥ विहितस्तक्षकेणासौ यातुं तत्र महात्मना ॥६३॥ इतीदं वर्णितं वीर विज्ञप्तिः श्रूयतां मम॥को भवानधुनैतो दैत्यपृष्ठ गतोऽभवत् ॥ अधुनैव तथैकाकी समायातोऽत्र नो वद ॥६४॥ वयं च सर्वास्ते दास्यस्त्वां पतिं प्रवृणीमहे ॥ अस्माभिः सहितः क्रीड विविधास्वत्र भूमिषु ॥ ६५ ॥ ॥ बर्बरीक उवाच ॥ ॥ अहं कुरुकुलोत्पन्नः पांडुपुत्रस्य पौत्रकः ॥ बर्बरीक इति ख्यातस्तं दैत्यं हंतुमागतः ॥ ६६ ॥ स च दैत्यो हतः पापः पुनर्यास्ये महीतलम् ॥ भवतीभिश्च मे नास्ति कृत्यं भोभोः कथंचन ॥ ६७ ॥ ब्रह्मचारिव्रतं यस्मादहं सततमास्थितः ॥ इत्युक्त्वाभ्यर्च्य तल्लिंगं प्रणिपत्य च दण्डवत् ॥ ६८ ॥ ऊर्ध्वमाचक्रमे वीरः कातरं ताभिरीक्षितः॥ ततो बहिः समागत्य सुप्रकाशं मुखं तदा ॥६९॥ प्रहर्षेणैव पूर्वस्या[1] विजयं ददृशे दिशः ॥ तस्मिन्काले च विजयः कर्म सर्वं समाप्तवान् ॥ ७० ॥ कांत्या सूर्यसमाभास ऊर्ध्वमाचक्रमे क्षणात् ॥ ततो वियद्गतं देवैः पुष्पवर्षमभून्महत् ॥ ७१ ॥ जगुर्गंधर्वमुख्याश्च ननृतुश्चाप्सरोगणाः ॥ विजयो बर्बरीकं च ततो वचनमब्रवीत् ॥ ७२ ॥ तव प्रसादाद्वीरेश सिद्धिः प्राप्ता मयातुला ॥ चिरं जीव चिरं नंद चिरं वस चिरं जय ॥ ७३ ॥ अत एव हि साधूनां संगमिच्छंति साधवः ॥ औषधं सर्वदोषाणां भवेत्सत्सं गमो यतः ॥ ७४ ॥ त्वं च होमस्थितं भस्म सिंदूरसदृशप्रभम् ॥ निःशल्यं सविवरकं पूर्यमाणं गृहाण च ॥ ७५ ॥ अक्षय्यमेतत्संग्रामे प्रथमं ते प्रमुंचतः ॥ शत्रूणां स्थानकं मृत्योर्देहं ध्वस्तं करिष्यति ॥ ७६ ॥ एवं सुखेन विजयः शत्रूणां ते भविष्यति ॥ ७७ ॥ ॥ बर्बरीक उवाच ॥ ॥ उपकुर्यान्निराकांक्षो यः स साधुरितीर्यते ॥ साकांक्षमुपकुर्याद्यः साधुत्वे तस्य को गुणः ॥ ७८ ॥ तद्देहि भस्म चान्यस्मै केनाप्यर्थो न मेऽण्वपि ॥ प्रसादसुमुखां दृष्टिं विना नान्यद्वृणोमि ते ॥ ७९ ॥ ॥ देवा ऊचुः ॥ ॥ कुरूणां पांडवानां च भविष्यति महारणः ॥ ततो भूमिस्थितं भस्म

१ पूर्वस्याः--दिशः -इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्राप्स्यंति यदि कौरवाः ॥ ८० ॥ महानन्थों भविता पांडवानां ततः स्फुटम् ॥ तस्माद्भहाण त्वं भस्म सोपि चक्रे तथा वचः ॥ ८१ ॥ देवीभिः सहिता देवाः संमान्य विजयं च ते ॥ सिद्धैश्वर्यं ददुस्तस्मै सिद्धसेनेति नाम च ॥ ८२ ॥ एवं स विजयो विप्रः सिद्धिं लेभे सुदुर्लभाम् ॥ बर्बरीकश्च कृत्वैतद्देवीभक्तिरतोऽवसत् ॥ ८३ ॥ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां प्रथमे माहेश्वरखण्डे कौमारिकाखंडे कार्यसिद्धिवर्णनंनाम त्रिषष्टितमोऽध्यायः ॥ ६३ ॥ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ एवं तत्र स्थिते तीरे देव्याराधनतत्परे ॥ सप्तलिंगार्चनरते भीमनन्दननन्दने ॥ १ ॥ ततः कालेन केनापि पांडवा द्यूतनिर्जिताः ॥ तत्राजग्मुश्च क्रमतस्तीर्थस्नानकृते भुवम् ॥ २ ॥ प्रागेव चंडिकां देवीं क्षेत्रादीशानतः स्थिताम् ॥ आसेदुर्मार्गखिन्नास्ते द्रौपदीपंचमास्तदा ॥ ३ ॥ तत्रैव चोपविष्टोऽभूत्तदानीं चंडिकागणः ॥ बर्बरीकश्च तान्वीरान्समायातानपश्यत ॥ ४ ॥ परं नासौ वेद पाण्डून्पाण्डवास्तं च नो विदुः ॥ आजन्म यस्मान्नैवाभूत्पाण्डूनां चास्य संगमः ॥ ५ ॥ ततः प्रविश्य वै तस्मिन्देवीमासाद्य पांडवाः ॥ पिंडकार्थं[१] तत्र मुक्त्वा तृषा प्रैक्षि जलं तदा॥६॥ततो भीमः कुण्डमध्यं जलं पातुं विवेश ह ॥ प्रविशंतं च तं प्राह युधिष्ठिर इदं वचः ॥७॥ उद्धृत्य भीम तोयं त्वं पादौ प्रक्षाल्य भो बहिः ॥ ततः पिबाऽन्यथा दोषो महांस्त्वामुपपत्स्यते ॥ ८ ॥ एतद्राज्ञो वचो भीमस्तृषा व्याकुललोचनः ॥ अश्रुत्वैव विवेशासौ कुण्डमध्यं जलेच्छया ॥ ९ ॥ स च दृष्ट्वा जलं पातुं तत्रैव कृतनिश्चयः ॥ मुखं हस्तौ च चरणौ क्षालयामास शुद्धये ॥ १० ॥ यतः पीतं जलं पुंसामप्रक्षाल्य च यद्भवेत् ॥ प्रेताः पिशाचास्तद्रूपं संक्रम्य प्रपिबंति तत् ॥ ११ ॥ एवं प्रक्षालयाने च पादौ तत्र वृकोदरे ॥ उपरिस्थस्तदा प्राह सत्यं सुहृदयो वचः ॥ १२ ॥ दुर्मते भोः किमेतत्त्वं कुरुषे पापनिश्चयः ॥ देवीकुण्डे क्षालयसि मुखं पादौ करौ च यत् ॥ १३ ॥ यतो देवी सदानेन जलेन स्नाप्यते मया ॥ तदत्र प्रक्षिपंस्तोयं मलपापान्न बिभ्यसि ॥ १४ ॥ मलाक्ततोयं यन्नाम अस्पृश्यं तन्नरैरपि ॥ कुतो देवैश्च तत्पापं स्पृश्यते तत्त्वतो वद ॥ १५ ॥ शीघ्रं च त्वं निःसरास्मात्कुण्डाद्धृत्वा बहिः पिब ॥ यद्येवं पाप मूढोऽसि तीर्थेषु भ्रमसे कुतः ॥ १६ ॥ ॥ भीम उवाच ॥ ॥ किमेतद्भाषसे क्रूर परुषं राक्षसाधम ॥ यतस्तोयानि जंतूनामुपभोगार्थमेव हि ॥ १७ ॥ तीर्थेषु कार्यं स्नानं चेत्युक्तं मुनिवरैरपि ॥ अंगप्रक्षालनं स्नानमुक्तं मां निंदसे कुतः ॥ १८ ॥ यदि न क्रियते पानमंगप्रक्षालनं तथा ॥ तत्किमर्थं पूर्तधर्माः क्रियन्ते धर्मशालिभिः ॥ १९ ॥ ॥ सुहृदय उवाच ॥ ॥ स्नातव्यं तीर्थमुख्येषु सत्यमेतन्न संशयः ॥

१ उपयोगार्थम्–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चरेषु किं तु संविश्य स्थावरेषु बहिः स्थितः ॥ २० ॥ स्थावरेष्वपि संविश्य तत्र स्नानं विधीयते ॥ न यत्र देवस्नानार्थं भक्तैः संगृह्यते जलम् ॥२१॥ यच्च हस्तशतादूर्ध्वं सरस्तत्र विधीयते ॥ संवेशेऽपि क्रमश्चायं पादौ प्रक्षाल्य यद्बहिः ॥ २२ ॥ ततः स्नानं प्रकर्तव्यमन्यथा दोष उच्यते ॥ किं न श्रुतस्त्वया प्रोक्तः श्लोकः पद्मभुवा पुरा ॥ २३ ॥ मलं मूत्रं पुरीषं च श्लेष्म निष्ठीनाश्रु च ॥ गंडूषाश्चैव मुञ्चंति ये ते ब्रह्महणैः समाः ॥ २४ ॥ तस्मान्निःसर शीघ्रं त्वं यद्येवमजितेन्द्रियः ॥ तत्किमर्थं दुराचार तीर्थेष्वटसि बालिश ॥ २५ ॥ यस्य हस्तौ च पादौ च मनश्चैव सुसंयतम् ॥ निर्विकाराः क्रियाः सर्वाः स हि तीर्थफलं लभेत् ॥ २६ ॥ ॥ भीम उवाच ॥ ॥ अधर्मो वापि धर्मोऽस्तु निर्गंतुं नैव शक्नुयाम् ॥ क्षुधा तृषा मया नित्यं वारितुं नैव शक्यते ॥ २७ ॥ ॥ सुहृदय उवाच ॥ ॥ जीवितार्थे भवान्कस्मात्पापं प्रकुरुते वद ॥ किं न श्रुतस्त्वया श्लोकः शिविना यः समीरितः ॥ २८ ॥ मुहूर्तमपि जीवेत नरः शुक्लेन कर्मणा ॥ न कल्पमपि जीवेत लोकद्वयविरोधिना ॥ २९ ॥ ॥ भीम उवाच ॥ ॥ काकारवेण ते मह्यं कर्णौ बधिरतां गतौ ॥ पास्याम्येव जलं चात्र कामं विलप शुष्य वा ॥ ३० ॥ ॥ सुहृदय उवाच ॥ ॥ क्षत्रियाणां कुले जातस्त्वहं धर्माभिरक्षिणाम् ॥ तस्मात्ते पातकं कर्तुं न दास्यामि कथंचन ॥ ३१ ॥ तद्गच्छाथ शीघ्रं त्वमस्मात्कुंडाद्विनिःसर ॥३२॥ इष्टकाशकलैः शीघ्रं चूर्णयिष्येऽन्यथा शिरः ॥ इत्युक्त्वा चेष्टकां गृह्य मुमोच शिरसः प्रति ॥ ३३ ॥ भीमश्च वंचयित्वा तामुत्प्लुत्य बहिराव्रजत् ॥ भर्त्सयंतौ ततश्चोभावन्योन्यं भीमविक्रमौ ॥ ३४ ॥ युयुधाते प्रलंबाभ्यां बाहुभ्यां युद्धपारगौ ॥ व्यूढोरस्कौ दीर्घभुजौ नियुद्धकुशलावुभौ ॥ ३५ ॥ मुष्टिभिः पार्ष्णिघातैश्च जानुभिश्चाभिजघ्नतुः ॥ ततो मुहूर्तात्कौरव्यः पर्यहीयत पांडवः ॥ ३६ ॥ हीयमानस्ततो भीम उद्यतोऽभूत्पुनः पुनः ॥ अहीयत ततोऽप्यंग ववृधे बर्बरीककः ॥ ३७ ॥ ततो भीमं समुत्पाद्य बर्बरीको बलादिव ॥ निष्पिपेष ततः क्रुद्धस्तदद्भुतमिवाभवत् ॥ ३८ ॥ मूर्छितं चैवमादाय विस्फुरन्तं पुनःपुनः ॥ सागराय प्रचलितः क्षेप्तुं तत्र महांभसि ॥ ३९ ॥ ददृशुः पांडवा नैतद्देव्या नयनयंत्रिताः ॥ ४० ॥ तथा गृहीते कुरुवीरमुख्ये वीरेण तेनाद्भुतविक्रमेण ॥ आश्चर्यमासीद्दिवि देवतानां देवीभिराकाशतले निरीक्ष्य तम् ॥ ४१ ॥ सागरस्य ततस्तीरे बर्बरीकं गतं तदा ॥ निरीक्ष्य भगवान्रुद्रो वियत्स्थः समभाषत ॥ ४२ ॥ भोभो राक्षसशार्दूल बर्बरीक महाबल ॥ मुंचैनं भरतश्रेष्ठं भीमं तव पितामहम् ॥ ४३ ॥ अयं हि तीर्थयात्रायां विचरन्भ्रातृभिर्युतः ॥ कृष्णया चाप्यदस्तीर्थं स्नातुमेवाभ्युपाययौ ॥ ४४ ॥ सम्मानं सर्वथा तस्मादर्हः

१ उत्तमः--इ०पा० । २ तत्रूवकर--इ०पा० । अस्य पाठभेदस्य चार्थो नावगम्यते ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कौरवनंदनः ॥ अपापो वा सपापो वा पूज्य एव पितामहः ॥ ४५ ॥ ॥ सूत उवाच ॥ ॥ इति रुद्रवचः श्रुत्वा सहसा तं विमुच्य सः ॥ न्यपतत्पादयोर्हा धिक्कष्टं कष्टं च प्राह सः ॥ ४६ ॥ क्षम्यतां क्षम्यतां चेति पुनः पुनरवोचत ॥ शिरश्च ताडयन्स्वीयं रुरोद च मुहुर्मुहुः ॥ ४७ ॥ तं तथा परिशोचंतं मुह्यमानं मुहुर्मुहुः ॥ भीमसेनः समालिंग्य आघ्राय च वचोऽब्रवीत् ॥ ४८ ॥ वयं त्वां नैव जानीमस्त्वं चास्माञ्जन्मकालतः ॥ अत्र वासश्च ते पुत्र भैमेः कृष्णाच्च संश्रुतः ॥ ४९ ॥ परं नो विस्मृतं सर्वं नानादुःखैः प्रमुह्यताम् ॥ दुःखितानां यतः सर्वा स्मृतिर्लुप्ता भवेत्स्फुटम् ॥ ५० ॥ तदस्माकमिदं दुःखं सर्वकालविधानतः ॥ मा शोचस्त्वं च तनय न ते दोषोऽस्ति चाण्वपि ॥ ५१ ॥ यतः सर्वः क्षत्रियस्य दंड्यो विपथिसंस्थितः ॥ आत्मापिदंड्यः साधूनां प्रवृत्तः कुपथाद्यदि ॥ ५२ ॥ पितृमातृसुहृद्भ्रातृपुत्रादीनां किमुच्यते ॥ अतीव मम हर्षोऽयं धन्योहं पूर्वजाश्च मे ॥ ॥ ५३ ॥ यस्य त्वीदृशकः पौत्रो धर्मज्ञो धर्मपालकः ॥ वरार्हस्त्वं प्रशंसार्हो भवान्येषां सतां तथा ॥ ५४ ॥ तस्माच्छोकं विहायेमं स्वस्थो भवितुमर्हसि ॥ ५५ ॥ बर्बरीक उवाच ॥ ॥ पापं मां तातताततात त्वं ब्रह्मघ्नादपि कुत्सितम् ॥ अप्रशस्यं नार्हसीह द्रष्टुं स्प्रष्टुमपि प्रभो ॥ ५६ ॥ सर्वेषामेव पापानां निष्कृतिः प्रोच्यते बुधैः ॥ पित्रोरभक्तस्य पुनर्निष्कृतिर्नैव विद्यते ॥ ५७ ॥ तद्येन देहेन मया तातताताोऽभिपीडितः ॥ तत्स्वमेव समुत्स्रक्ष्ये महीसागरसंगमे ॥ ५८ ॥ मैवं भवेयमन्येषु अपि जन्मसु पातकी ॥ न मामस्मादभिप्रायादर्हः कोऽपि निवर्तितुम् ॥ ५९ ॥ यतोंऽशेन विलुप्येत प्रायश्चित्तान्निवारकः ॥ एवमुक्त्वा समुत्प्लुत्य ययौ चैवार्णवं बली ॥ ६० ॥ समुद्रोऽपि चकंपे च कथमेनं निहन्म्यहम् ॥ ततः सिद्धांबिका याश्च देव्यस्तत्र चतुर्दश ॥ ६१ ॥ समालिंग्य च संस्थाप्य रुद्रेण सहिता जगुः ॥ अज्ञातविहिते पापे नास्ति वीरेंद्र कल्मषम् ॥ ६२ ॥ शास्त्रेघूक्तमिदं वाक्यं नान्यथा कर्तुमर्हसि ॥ अमुं च पृष्ठलग्नं त्वं पश्य भोः स्वं पितामहम् ॥ ६३ ॥ पुत्रपुत्रेति भाषंतमनु त्वा मरणोन्मुखम् ॥ अधुना चेत्स्वकं देहं वीर त्वं परित्यक्ष्यसि ॥ ६४ ॥ ततस्त्यक्ष्यति भीमोऽपि पातकं तन्महत्तव ॥ एवं ज्ञात्वा धारय त्वं स्वशरीरं महामते ॥ ६५ ॥ अथ चेत्त्यक्तुकामस्त्वं तत्रापि वचनं शृणु ॥ स्वल्पेनैव च कालेन कृष्णाद्देवकिनंदनात् ॥ ६६ ॥ देहपातस्तव प्रोक्तस्तं प्रतीक्ष यदीच्छसि ॥ यतो विष्णुकराद्धस्त देहपातो विशिष्यते ॥ ६७ ॥ तस्मात्प्रतीक्ष तं कालमस्माकं प्रार्थितेन च ॥ एवमुक्तो निववृते बर्बरीकोऽपि दुर्मनाः ॥ ६८ ॥ रुद्रं देवीश्च चामुंडां सोपालंभं वचोऽब्रवीत् ॥ त्वमेव देवि जानासि रक्ष्यंते शार्ङ्गधन्विना ॥ ६९ ॥ पांडवा भूमिलाभार्थे[1]

१ भूमिकृत्यार्थे–इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्ते कस्मादुपेक्षितम् ॥ त्वया च समुपागत्य रक्षितोऽयं वृकोदरः ॥ ७० ॥ ॥ देव्युवाच ॥ ॥ अहं च रक्षयिष्यामि स्वभक्तं
कृष्णमृत्युतः ॥ यस्माच्च चंडिकाकृत्ये कृतोऽनेन महारणः ॥ तस्माच्चंडिलनाम्नायं विश्वपूज्यो भविष्यति ॥ ७१ ॥ एवमुक्त्वा गताः
सर्वे देवा देव्यस्त्वदृश्यताम् ॥ भीमोऽपि तं समादाय पांडुभ्यः सर्वमूचिवान् ॥ ७२ ॥ विस्मिताः पांडवास्तं च पूजयित्वा पुनः पुनः ॥
यथोक्तविधिना चक्रुस्तीर्थस्नानमतंद्रिताः ॥ ७३ ॥ भीमोपि यत्र रुद्रेण मोक्षितस्तत्र सुप्रभम् ॥ लिंगं संस्थापयामास भीमेश्वरमिति
श्रुतम् ॥ ७४ ॥ ज्येष्ठमासे कृष्णपक्षे चतुर्दश्यामुपोषितः ॥ रात्रौ संपूज्य भीमेशं जन्मपापाद्विमुच्यते ॥ ७५ ॥ यथैव लिंगानि सुपूजितानि सन्त्यत्र
मुख्यानि महाफलानि ॥ भीमेश्वरं लिंगमिदं तथैव समस्तपापाहरं सुपूज्यम् ॥ ७६ ॥ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहि
तायां प्रथमे माहेश्वरखण्डे कौमारिकाखण्डे भीमेश्वरमाहात्म्यवर्णनंनाम चतुःषष्टितमोऽध्यायः ॥ ६४ ॥ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ उषित्वा
सप्तरात्राणि तीर्थेऽस्मिन्भ्रातृभिः सह ॥ युधिष्ठिरो महातेजा गमनायोपचक्रमे ॥ १ ॥ प्रभाते विमले स्नात्वा देवीलिंगान्यथार्च्य च ॥ कृत्वा प्रद
क्षिणं क्षेत्रं देवीस्तोत्रं जजाप सः ॥ प्रयाणकालेषु सदा जप्यं कृष्णेन कीर्तितम् ॥ २ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ देवि पूज्ये महाशक्ते कृष्णस्य
भगिनि प्रिये ॥ नत्वा त्वां शरणं यामि मनोवाक्कायकर्मभिः ॥ ३ ॥ संकर्षणाभयदाने कृष्णच्छविसमप्रभे ॥ एकानंशे महादेवि पुत्रवत्त्राहि
मां शिवे ॥ ४ ॥ त्वया ततमिदं विश्वं जगदव्यक्तरूपया ॥ इति मत्वा त्वां गतोऽस्मि शरणं त्राहि मां शुभे ॥ ५ ॥ कार्यारम्भेषु सर्वेषु सानुगेन
मया तव ॥ स्व आत्मा कल्पितो भद्रे ज्ञात्वैतदनुकंप्यताम् ॥ ६ ॥ ॥ सूत उवाच ॥ ॥ इति ब्रुवाणं राजानं शिरोबद्धांजलिं तदा ॥ वायु
पुत्रः प्रहस्यैव सासूयमिदमब्रवीत् ॥ ७ ॥ ये त्वां राजन्वदंत्येवं सर्वज्ञोऽयं युधिष्ठिरः ॥ वृथैव वचनं तेषां यतस्त्वं वेत्सि नाण्वपि ॥ ८ ॥ को हि
प्रज्ञावतां मुख्यः सर्वशास्त्रविदांवरः ॥ स्त्रीणां शरणमापद्येद्दुर्बुद्धिर्यथा भवान् ॥ ९ ॥ यतस्त्वमेव वेत्सीदं सर्वशास्त्रेषु कीर्त्यते ॥ जडेयं प्रकृतिर्मूढा
यया संमोह्यते जगत् ॥ १० ॥ सचेतनं च पुरुषं प्रकृतिं च विचेतनाम् ॥ प्राहुर्बुधा नराध्यक्ष पुंसश्च प्रकृतिः प्रिया ॥ ११ ॥ तत्स्वयं पुरुषो
भूत्वा युधिष्ठिर वृथामते ॥ प्रकृतिं नौषि नत्वा तां हासो मेऽतीव जायते ॥ १२ ॥ आरोहयेच्छिरो नैव क्वचिद्धित्वा उपानहौ ॥ यथा स मूढो
भवति देवीभक्तिरतस्तथा ॥ १३ ॥ यदि ते बन्दिवत्पार्थ तिष्ठेद्द्राण्यनिवारिता ॥ तत्किमर्थं महादेवं न स्तौषि त्रिपुरान्तकम् ॥ १४ ॥ अलक्ष्य
मिति वा मत्वा महेशानं महामते ॥ ततः किमर्थं दाशार्हं न स्तौषि पुरुषोत्तमम् ॥ १५ ॥ यस्य प्रसादादस्माभिः प्राप्ता द्रुपदनंदिनी ॥ इन्द्रप्रस्थे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तथा राज्यं राजसूयस्त्वया कृतः ॥ १६ ॥ विजयेन धनुर्लब्धं जरासन्धो मया हतः ॥ प्रत्याहर्तुं तथेच्छामः कौरवेभ्यः स्वकां श्रियम् ॥ १७ ॥
यस्य प्रसादात्तं मुक्त्वा कृष्णं हा स्तौषि यज्जयी ॥ अथ स्वयं कौरवाणामुत्पन्नं कुलसत्तमे ॥ १८ ॥ जानन्नात्मानमल्पत्वाद्बुद्धेर्न स्तौषि याद
वम् ॥ तत्किमर्थं महावीर्यं न स्तौष्यर्जुनमुत्तमम् ॥ १९ ॥ येन विद्धं पुरा लक्ष्यं येन कर्णादयो जिताः ॥ येन तत्खांडवं दग्धं यज्ञे येन नृपा
जिताः ॥ २० ॥ श्रूयते येन विक्रम्य महेशानोऽपि निर्जितः ॥ स्वर्लोकसंस्थितस्यास्य शरणं याहि स्तौषि च ॥ २१ ॥ अथवा तेन शक्रेण
राज्यं मे नार्पितं कुतः ॥ इति मत्वा वृथैव त्वं न स्तौषि भ्रातरं मम ॥ २२ ॥ ततो मां वा कथं वीरं न स्तौषि त्वं युधिष्ठिर ॥ येन त्वं रक्षितः
पूर्वं लाक्षागेहाग्निमध्यतः ॥ २३ ॥ वृक्षेणाहत्य मद्रेशो नदीं शुष्कां प्रसारितः ॥ राजराजस्तथा येन जरासंधो निपातितः ॥ २४ ॥ पूर्वा दिङ्नि
र्जिता येन येन पूर्वं बको हतः ॥ हिडम्बश्च महावीरः किर्मीरश्चाधुना वने ॥२५॥ कालेकाले च रक्षामि त्वामेवाहं सदानुगः ॥ न तां पश्यामि रक्षंतीं
नत्वा यां स्तौषि भारत॥२६॥अथ क्षुधाबलं ज्ञात्वा मामौदरिकसत्तमम्॥क्रूरं साहसिकं चैव न स्तौषि क्षमिणां वरः॥२७॥ततः सुसंयतो भूत्वा प्रणवं
समुदीरयन्॥कथं न यासि मार्गे त्वं वृथालापो हि दोषभाक्॥२८॥ प्रेताः पिशाचा रक्षांसि वृथालापरतं नरम् ॥ आविशंति तदाविष्टो वक्ताबद्धं पुनः
पुनः ॥२९॥ वृथालापी यदश्नाति यत्करोति शुभं क्वचित् ॥ प्रेतादितृप्तये सर्वमिति शास्त्रविनिश्चयः ॥३०॥ नायं तस्यास्ति वै लोकः कुत एव परो
भवेत् ॥ तस्माद्द्विजानता यत्नात्त्याज्यमेव वृथा वचः ॥ ३१ ॥ एवं संस्मारितोऽपि त्वं यदि भूयः प्रवर्तसे ॥ भूताविष्टश्चिकित्स्यो नो विविधैरौषधैर्भ
वान् ॥ ३२ ॥ ॥ सूत उवाच ॥ ॥ इति प्रवर्णितां श्रुत्वा भीमसेनेन भारतीम् ॥ [1]पटीमिव प्रविततां विहस्याह युधिष्ठिरः ॥ ३३ ॥ नूनं त्वमल्पवि
ज्ञानो वेदाधीतास्त्वया वृथा ॥ मातरं सर्वभूतानामंबिकां यन्न मन्यसे ॥ ३४ ॥ स्त्रीपक्ष इति मत्वा तामवजानासि भोः कथम् ॥ स्त्री सती न प्रणम्या
किं त्वया कुन्ती वृकोदर ॥ ३५ ॥ यदि न स्यान्महामाया ब्रह्मविष्णुशिवार्चिता ॥ तव देहोद्भवः पार्थ कथं स्यात्तत्त्वतो वद ॥ ३६ ॥ ईश्वरः पर
मात्मा तां त्यक्तुं शक्तः कथं न हि ॥ पुनर्भेजे यतो देवीं तेन मन्ये महोर्जिताम् ॥ ३७ ॥ वासुदेवोऽपि नित्यं तां स्तौति शक्तिं परात्पराम् ॥ अहं
यदि चिकित्स्यः स्यां चिकित्स्यः सोऽपि किं भवान् ॥ ३८ ॥ नैवं भूयः प्रवक्तव्यं मौर्ख्यात्प्रति महेश्वरीम् ॥ भूमौ निपत्य शरणं याहि चेत्सुख
मिच्छसि ॥ ३९ ॥ ॥ भीम उवाच ॥ ॥ सर्वोपायैर्बोधयंति चाटा[2] हस्तगतं नरम् ॥ इदमेवौषधं तत्र तैः सार्धं जल्पनं न हि ॥ ४० ॥ मुण्डे

१ नटीमिव--इ०, तटीमिव--इ० च पा० । २ चाराः--इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मुण्डे मतिर्भिन्ना सत्यमेतन्नृप स्फुटम् ॥ स्वाभीष्टं कुरुते सर्वः कुर्मोऽभीष्टं वयं तथा ॥ ४१ ॥ नागायुतसमप्राणो वायुपुत्रो वृकोदरः ॥ न स्त्रियं शरणं गच्छेद्वाङ्मात्रेण कथंचन ॥ ४२ ॥ इत्युक्त्वा वचनं भीमो ह्यनुवव्राज तं नृपम् ॥ राजापि सानुगो यातो न साध्विति मुहुर्ब्रुवन् ॥ ४३ ॥ ततः क्षणेन विकलस्त्वितश्चेतश्च प्रस्खलत् ॥ उवाच वचनं भीमः सुसंभ्रांतो नृपं प्रति ॥ ४४ ॥ धर्मराज महाबुद्धे पश्य मां नृपसत्तम ॥ चक्षुर्भ्यां नैव पश्यामि वैकल्यं किमिदं मम ॥ ४५ ॥ ॥ राजोवाच ॥ भीमभीम ध्रुवं देवी कुपिता ते महेश्वरी ॥ तेन नष्टे चक्षुषी ते महासाहसवल्लभ ॥ ४६ ॥ तत्सांप्रतमभिप्रेहि शरणं परमेश्वरीम् ॥ पुनः प्रसन्ना ते दद्यात्कदाचिन्नयने पुनः ॥ ४७ ॥ ॥ भीम उवाच ॥ ॥ अहमप्यंग जानामि समो देव्या न कश्चन ॥ प्रभावप्रत्ययार्थं हि सदा निन्दामि तां पुनः ॥ ४८ ॥ तस्मात्प्रभावं दृष्ट्वैवं निपत्य वसुधातले ॥ मनोवाग्बुद्धिभिर्नत्वा शरणं स्तौमि मातरम् ॥ ४९ ॥ ॥ सूत उवाच ॥ ॥ इत्युक्त्वा भ्रातरं ज्येष्ठं साष्टांगं प्रणिपत्य च ॥ गत्वैव देव्याः शरणं भीमस्तुष्टाव मातरम् ॥ ५० ॥ ॥ भीम उवाच ॥ ॥ सर्वभूतांबिके देवि ब्रह्मांडशतपूरके ॥ बालिशं बालकं स्वीयं त्राहित्राहि नमोऽस्तु ते ॥ ५१ ॥ त्वं ब्राह्मी ब्रह्मणः शक्तिर्वैष्णवी त्वं च शांभवी ॥ त्रिमूर्तिः शक्तिरूपा त्वं रक्षरक्ष नमोऽस्तु ते ॥ ५२ ॥ त्वमैन्द्री च त्वमाग्नेयी त्वं याम्या त्वं च नैर्ऋती ॥ त्वं वारुणी त्वं वायव्या त्वं कौबेरी नमोऽस्तु ते ॥५३ ॥ ऐशानि देवि वाराहि नारसिंहि जयप्रदे ॥ कौमारि कुलकल्याणि कृपेश्वरि नमोऽस्तु ते ॥ ५४ ॥ त्वं सूर्ये त्वं तथा सोमे त्वं भौमे त्वं बुधे गुरौ ॥ त्वं शुक्रे त्वं स्थिता राहौ त्वं केतुषु नमोऽस्तु ते ॥ ५५ ॥ वससि ध्रुवचक्रे त्वं मुनिचक्रे च ते स्थितिः ॥ भचक्रेषु खचक्रेषु भूचक्रे च नमोऽस्तु ते ॥ ५६ ॥ सप्तद्वीपेषु त्वं देवि समुद्रेषु च सप्तसु ॥ सप्तस्वपि च पातालेष्ववसंस्थे नमोऽस्तु ते ॥ ५७ ॥ त्वं देवि चावतारेषु विष्णोः साहाय्यकारिणी ॥ विष्णुनाभ्यर्थ्यसे तस्मात्राहि मातर्नमोऽस्तु ते॥ ५८ ॥ चतुर्भुजे चतुर्वक्रे फलदे चत्वरप्रिये ॥ चराचरस्तुते देवि चरणौ प्रणमामि ते ॥ ५९ ॥ महाघोरे कालरात्रि घंटालि विकटोज्वले ॥ सततं सप्तमीपूज्ये नेत्रदे शरणं भव ॥ ६० ॥ मेरुवासिनि पिंगाक्षि नेत्रत्राणैककारिणि ॥ हुंहुंकारध्वस्तदैत्ये शरण्ये शरणं भव ॥ ६१ ॥ महानादे महावीर्ये महामोहविनाशिनि ॥ महाबन्धापहे देवि देहि नेत्रत्रयं मम ॥ ६२ ॥ सर्वमंगलमंगल्या यदि त्वं सत्यतोंबिके ॥ ततो मे मंगलं देहि नेत्रदानान्नमोस्तु ते ॥ ६३ ॥ यदि सर्वकृपालुभ्यः सत्यंतस्त्वं कृपावती ॥ ततः कृपां कुरु मयि देहि नेत्रे नमोऽस्तु ते ॥ ६४ ॥ पापोयमिति यद्देवि प्रकुप्यसि वृथैव

१ पिंगाभे--इ०पा० । २ सततं त्वम्--इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

तत् ॥ त्वं मां मोहयसि त्वेवं न ते तत्किं नमोऽस्तु ते ॥ ६५ ॥ स्वयमुत्पाद्य यो रेणुं वेष्टितस्तेन कुप्यति ॥ तथा कुप्यसि मे मातरनाथस्यास्य दर्शय ॥ ६६ ॥ इति स्तुता पांडवेन देवी कृष्णच्छविच्छविः ॥ रामा रामाभिवदना प्रत्यक्षा समजायत ॥ ६७ ॥ विद्युत्कोटिसमाभासमुकुटेनातिशोभिता ॥ सूर्यबिंबप्रभाभ्यां च कुण्डलाभ्यां विभूषिता ॥ ६८ ॥ प्रवाहेनेव हारेण सुरनद्या विराजिता ॥ कल्पद्रुमप्रसूनैश्च पूर्णावतंसमंडिता ॥ ६९ ॥ दन्तेन्दुकांतिविध्वस्तभक्तमोहमहाभया ॥ खड्गचर्मशूलपात्रचतुर्भुजविराजिता ॥ ७० ॥ वाससा तडिदाभेन मेघलेखेव वेष्टिता ॥ मालया सुममालिन्या भ्राजिता सालिमालया ॥ ७१ ॥ सतां शरणदाभ्यां च पद्भ्यां नूपुरराजिता ॥ जयेति पुष्पवर्षैश्च शक्राद्यैरभिपूजिता॥ ७२ ॥ गणैर्देवीभिराकीर्णा शतपद्मैर्महामलैः ॥ तां तादृशीं व्योम्नि दृष्ट्वा मातरं व्योमवाहिनीम् ॥ ७३ ॥ भूमौ निपत्य राजेंद्रो नमोनम इति स्थितः ॥ भीमोपि मातरं दृष्ट्वा यथा बालोऽभिधावति ॥ ७४ ॥ तथा सम्मुखमाधावज्जय मातरिति ब्रुवन् ॥ दर्शनेनैव देव्याश्च शुभनेत्रत्रयस्तदा ॥ ७५ ॥ प्रणिपत्य नमस्तुभ्यं [1]नमस्तुभ्यं मुहुर्जगौ ॥ प्रसीद देवि पद्माक्षि पुनर्मातः प्रसीद मे ॥ ७६ ॥ पुनः प्रसीद पापस्य क्षमाशीले प्रसीद मे ॥ ७७ ॥ एवं स्तुता भगवती स्वयमुत्थाप्य पार्थिवम् ॥ भीमं चोत्संगमारोप्य कृपयेदं वचोऽब्रवीत् ॥ ७८ ॥ ॥ श्रीदेव्युवाच ॥ ॥ यत्त्वयाभिहितं स्तोत्रं तेन तुष्टा तवोपरि ॥ अतो नेत्रत्रयं दत्तं द्वे बाह्ये चांतरं परम् ॥ ७९ ॥ नाहं कोपं[2] यत्र तत्र दर्शयामि वृकोदर ॥ त्वं तु प्रमाणपुरुषस्त्वत्तः क्रोधमदर्शयम् ॥ ८० ॥ नैतत्प्रियं च कृष्णस्य भ्रातुर्मे क्रोधमाचरम् ॥ भवन्तो वासुदेवस्य यत्र प्राणा बहिश्चराः ॥ ८१ ॥ त्वं च निन्दसि मां नित्यं तच्च जाने वृकोदर ॥ मत्प्रभावपरिज्ञानहेतवे कीदृशस्त्विति ॥ ८३ ॥ तदेवं नैव भूयस्ते प्रकर्तव्यं कथंचन ॥ अक्षिक्षेपो हि पूज्यानामावहत्यधिकं रुजम् ॥ ८४ ॥ तदिदानीं सर्वमेवं क्षन्तव्यं च परस्परम् ॥ यच्च ब्रवीमि त्वां वीर तन्निशामय भारत ॥ ८५ ॥ यदा यदा हि धर्मस्य ग्लानिराविर्भवेद्धरिः ॥ तदातदावतीर्याहं विष्णोरस्य सहायिनी ॥ ८६ ॥ इदानीं च हरिर्जातो वसुदेवसुतो भुवि ॥ अहं च गोपनन्दस्य एकानंशाभिधा[3]सुता ॥ ८७ ॥ तद्यथा भगवान्कृष्णो मम भ्राताभिपूजितः ॥ भवन्तोऽपि तथा मह्यं भ्रातरः पांडवाः सदा ॥ ८८ ॥ ये भीमभगिनीत्येवं मां स्तोष्यंति नरोत्तमाः ॥ आबाधा नाशयिष्यामि तेषां हर्षसमन्विता ॥ ८९ ॥ त्वं च भ्रातुर्जयं[4] वीर प्रदास्यसि महारणे ॥ भुजयोस्ते वसिष्यामि धार्तराष्ट्रनिपातने ॥ ९० ॥ कृत्वा राज्यं च वर्षाणि षट्त्रिंशत्तदनन्तरम् ॥ महाप्रस्थानधर्मेण पृथिवीं परिचरिष्यथ ॥ ९१ ॥ अस्मिन्नेव ततो

१ मुहुर्मुहुर्वरं जगौ–इ० पा० । २ विभुः–इ० पा० । ३ एकानंशाभिधावती–इ० पा० । ४ तत्र जयम्–इ० पा० ।

CC-0. In Public Domain. Digitization by eGangotri

देशे लोहोनाम महासुरः ॥ भवतां न्यस्तशस्त्राणां वधार्थं प्रक्रमिष्यति ॥ ९२ ॥ ततस्तं सर्वभूतानामवध्यं भवतां कृते ॥ अन्धं कृत्वा पातयिष्ये ततो यूयं प्रयास्यथ ॥ ९३ ॥ निस्तीर्य च हिमं सर्वं निमग्ना वालुकार्णवे ॥ स्वर्गं यास्यति राजैकः सशरीरो गमिष्यति ॥ ९४ ॥ अन्धो यत्र कृतो लोहो लोहाणाभिधया पुरम् ॥ भविष्यति च तत्रैव स्थास्येऽहं कलयां सदा ॥९५॥ ततः कलियुगे प्राप्ते केलोनाम भविष्यति ॥ मम भक्तस्तस्य नाम्ना भाव्या केलेश्वरीत्यहम् ॥ ९६ ॥ वैलाकश्चापरो भक्तो भविष्यति ममोत्तमः ॥ तस्याराधनतः ख्यातिं प्रयास्यामि कलौ युगे ॥ ९७ ॥ लोहाणासंस्थितां चैव येर्चयिष्यंति मां जनाः ॥ श्रद्धया सितसप्तम्यां तैश्च सर्वत्र पूजिता ॥ ९८ ॥ अंधानां च प्रदास्यामि भावीनि नयनान्यहम् ॥ तस्मिन्दिने तर्पिताहं भक्तिभावेन पांडव ॥ ९९ ॥ पादांगुष्ठेन च भवांस्तत्र कुंडं विधास्यति ॥ सर्वतीर्थस्नानतुल्यं तत्र स्नानं च तद्दिने ॥ १०० ॥ मत्स्यानां नेत्रनेत्रस्थतेजस्तन्मात्रमुत्तमम् ॥ उद्धृत्य योजयिष्यामि प्रत्यक्षं तद्भविष्यति ॥ १०१ ॥ एवं मम महास्थानं कलौ ख्यातं भविष्यति ॥ १०२ ॥ लोहाणाख्यं महाबाहो नाम केलेश्वरीति च ॥ दुर्गमाख्यं ततो हत्वा अस्मिन्क्षेत्रे च भारत॥१०३॥ दुर्गा नाम भविष्यामि महीसागरपूर्वतः ॥ धर्मारण्ये वसिष्यामि भवतां त्राणकारणात् ॥ १०४ ॥ धर्मारण्ये स्थितां चैव येऽर्चयिष्यंति मानवाः ॥ आश्विने मासि चैत्रे वा नवम्यां शुक्लपक्षके ॥ १०५ ॥ स्नात्वा महीसागरे च तेषां दास्यामि वांछितम् ॥ विधिना येऽर्चयिष्यंति मां च श्रद्धासन्विताः ॥ १०६ ॥ पुत्रपौत्रान्प्रदास्यामि स्वर्गं मोक्षं न संशयः ॥ प्रवेशे च कलेः काले भवतां वंशसंभवः ॥ वत्सराजः पांडवानां तोषयिष्यति यत्नतः ॥ १०७ ॥ यस्य नाम्ना ततः ख्याता भविष्यामि कलौ युगे ॥ वत्सेश्वरीति वत्सस्य राज्ञः सर्वार्थदायिनी ॥१०८॥ मत्प्रसादात्स राजा वै भवनोत्तापकारिणीम् ॥ अट्टालयांनाम तदा राक्षसीं निहनिष्यति ॥ १०९ ॥ तस्याश्चापि वधस्थानमट्टालजमिति स्थितम् ॥ भविष्यति पुरं तत्र मां च संस्थापयिष्यति ॥ ११० ॥ अट्टालयाजग्रामे मामर्चयिष्यंति ये जनाः ॥ वत्सेश्वरीं सिताष्टम्यामाश्विने तैः सदार्चिता ॥ १११ ॥ वत्सेश्वरीं च ये देवीं पूजयिष्यंति मानवाः ॥ तेषां सर्वफलावाप्तिर्भविष्यति न संशयः ॥ ११२ ॥ इत्थमट्टालये वासो लोहाणे च भविष्यति ॥ धर्मारण्ये महाक्षेत्रे महीसागरसंनिधौ ॥ ११३ ॥ मम लोकहितार्थाय लोहस्य च निशम्यताम् ॥ अधीकृतो मया लोहो बह्वीस्तप्ता तपः समाः ॥ ॥ ११४ ॥ वृत्रासुर इवाजेयो लोकानुत्सादयिष्यति ॥ तं च विश्वपतिर्धीमानवतीर्य बुधो हरिः ॥ ११५ ॥ यत्र हंता तत्र ग्रामं लोहाटीति भवि

१ अडालिजम्—इ० पा० । २ अडालयिजग्रामे—इ० पा० । ३ अड्यालये—इ० पा० । ४ तप्ता—तप्स्यति—इति—अनद्यतनभविष्यदर्थे लुटः प्रथमपुरुषस्यैकवचनम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ष्यति ॥ गयोनाम महादैत्यो भवतां विघ्नकृत्तदा ॥११६॥ प्रस्थाने लोहवद्रावी करिष्ये तं नपुंसकम् ॥ गयत्राडेति मां तत्र पूजयिष्यंति मानवाः ॥ ॥ ११७ ॥ ग्रामं चापि गयत्राडं तत्र ख्यातं भविष्यति ॥ गयत्राडे गयत्राडां येऽर्चयिष्यंति मानवाः ॥ ११८ ॥ माघाष्टम्यां न शिष्यंति तस्य सर्वेऽप्युपद्रवाः ॥ ये च मां कोपयिष्यंति पांडवाराधितां सदा ॥ ११९ ॥ तेषां पुंस्त्वं हरिष्यामि महारौद्राधितिष्ठति ॥ परिवारश्च मे चात्र षण्ढः सर्वो भविष्यति ॥ १२० ॥ तस्मिन्कलियुगे घोरे रौद्रे रुद्रेऽतिनिर्घृणे ॥ एवं तृतीयं तन्मह्यं स्थानमत्र भविष्यति ॥ १२१ ॥ भवत्सु च स्वर्गतेषु गयोऽपि सुमहत्तपः ॥ तप्त्वा प्राप्य पुनः पुंस्त्वं लोकान्संपीडयिष्यति ॥ १२२ ॥ गयातीर्थं गतं तं च गयाध्वंसनकाम्यया ॥ बुध एव जगत्स्वामी तत्र तं सूदयिष्यति ॥ १२३ ॥ इत्थं श्रीमान्पीतवासा अवतीर्य बुधः प्रभुः ॥ बहूनि कृत्वा कर्माणि स्वस्थानं प्रतिपत्स्यते ॥ १२४ ॥ इति संक्षेपतः प्रोक्तं भविष्यं पांडवा मया ॥ भवतां चित्तनिर्वृत्यै श्रूयतां भूय एव च ॥ १२५ ॥ इदं तीर्थवरं मह्यं संसेव्यं सर्वदा प्रियम् ॥ कृतं यदत्रागमनं तेन प्रीतिः परा मम ॥ १२६ ॥ भीमस्य चापि पौत्रेण दृढं संतोषिताऽस्मि च ॥ देव्यः सर्वाश्च मद्रूपं नैतज्ज्ञेयमतोऽन्यथा ॥ १२७ ॥ व्रजध्वं चापि तीर्थानि यानि वो न कृतानि च ॥ आंबाधास्वस्मि सर्वासु स्मरणीया स्वसेव च ॥ १२८ ॥ आपृच्छे चापि वः सर्वान्यूयं कृष्णसमा मम ॥ १२९ ॥ ॥ सूत उवाच ॥ ॥ इति देव्या वचः श्रुत्वा विस्मयोत्फुल्ललोचनाः ॥ पुनःपुनः प्रणम्यैनां नापश्यन्दीपवद्गताम् ॥ १३० ॥ ततस्ते बर्बरीकं च संस्थाप्यात्रैव निष्ठितम् ॥ आगच्छ योगे चोक्त्वेदं चक्रुस्तीर्थानि मुख्यशः ॥ १३१ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां प्रथमे माहेश्वरखण्डे कौमारिकाखण्डे बर्बरीकोपाख्याने केलेश्वरीवत्सेश्वरीदुर्गादेवीगयत्राडामाहात्म्यवर्णनंनाम पञ्चषष्टितमोऽध्यायः ॥ ६५ ॥ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ ततस्त्रयोदशे वर्षे व्यतीते समये तदा ॥ उपप्लवे संगतेषु सर्वराजसु पांडवाः ॥ १ ॥ योद्धुमागत्य संतस्थुः कुरुक्षेत्रं महारथाः ॥ कौरवाश्चापि संतस्थुर्दुर्योधनपुरोगमाः ॥२॥ ततो भीष्मेण प्रोक्तां च नरैः श्रुत्वा युधिष्ठिरः ॥ रथातिरथसंख्यां तु राज्ञां मध्ये वचोऽब्रवीत् ॥३॥ भीष्मेण विहिता कृष्ण रथातिरथवर्णना ॥ ततो दुर्योधनोऽपृच्छदिदं स्वीयान्महारथान् ॥४॥ ससैन्यान्पांडवानेतान्हन्यात्कालेन केन कः ॥ मासेन तु प्रतिज्ञातं भीष्मेण च कृपेण च ॥५॥ पक्षं द्रो

१ अस्मि–अहं सर्वासु आबाधासु–स्वसा इव–भगिनी–इव–स्मरणीया–इति योजना । २ यदा तव–अस्माकं च सम्मेलनस्य योग आयास्यति यदा च वयं वनवासान्निवृत्ता भविष्यामस्तदा आगच्छ–इदं च उक्त्वा ते मुख्यशः तीर्थानि चक्रुः–तीर्थयात्रामकुर्वन् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

णेन चाह्वां च दशभिर्द्रौणिना रणे ॥ षड्भिः कर्णेन च तथा सदा मम भयंकृता ॥ ६ ॥ तदहं स्वांश्च पृच्छामि केन कालेन हंति कः ॥ एतच्छ्रुत्वा
वचो राज्ञः फाल्गुनो वाक्यमब्रवीत् ॥ ७ ॥ अयुक्तमेतद्भीष्माद्यैः प्रतिज्ञातं युधिष्ठिर ॥ ततो जये च विजये निश्चयो हि मृषैव तत् ॥ ८ ॥ तवापि
ये संति नृपाः सन्नद्धा रणसंस्थिताः ॥ पश्यैतान्पुरुषव्याघ्रान्कालकल्पान्दुरासदान् ॥ ९ ॥ द्रुपदं च विराटं च धृष्टकेतुं च कैकयम् ॥ सहदेवं सात्य
किं च चेकितानं च दुर्जयम् ॥ १० ॥ धृष्टद्युम्नं सपुत्रं च महावीर्यं घटोत्कचम् ॥ भीमादींश्च महेष्वासान्केशवं चापराजितम् ॥ ११ ॥ मन्येहमेक
स्त्वेतेषां हन्यात्कौरववाहिनीम् ॥ सन्नद्धाः प्रतिदृश्यंते भीष्माद्या बहवो रथाः ॥ १२ ॥ तेभ्यो भयं न कार्यं ते फल्गवोऽमी मृगा इव ॥ १३ ॥
अस्माकं धनुषां घोषैरिदानीमेव भारत ॥ कौरवा विद्रविष्यंति सिंहत्रस्ता मृगा इव ॥ १४ ॥ वृद्धाद्भीष्माद्द्विजाद्वृद्धाद्द्रोणादपि कृपादपि ॥ बालि
शात्किं भयं द्रौणेः सूतपुत्राच्च दुर्मतेः ॥ १५ ॥ अथवा चित्तनिर्वृत्यै ज्ञातुमिच्छसि भारत ॥ शत्रूणां प्रत्यनीकेषु संधावच्छृणु मे वचः ॥१६॥ एको
ऽहमेव संग्रामे सर्वे तिष्ठंतु ते रथाः ॥ एकाह्ना क्षपये सर्वान्कौरवान्सैन्यसंयुतान् ॥ १७ ॥ इत्यर्जुनवचः श्रुत्वा स्मयन्दामोदरोऽब्रवीत् ॥ एवमेतद्यथा
प्राह फाल्गुनोऽयं मृषा न तत् ॥ १८ ॥ ततश्च शंखान्भेरीश्च शतशश्चैव पुष्करान् ॥ निवार्य राजमध्यस्थो बर्बरीको वचोऽब्रवीत् ॥
॥ १९ ॥ येन तप्तं गुप्तक्षेत्रे येन देव्यः सुतोषिताः ॥ यस्यातुलं बाहुबलं तेन चोक्तं निशम्यताम् ॥ २० ॥ यद्ब्रवीमि वचः सत्यं शृणुध्वं तन्नरा
धिपाः ॥ आत्मनो वीर्यसदृशं केवलं न तु दर्पतः ॥ २१ ॥ यदार्येण प्रतिज्ञातमर्जुनेन महात्मना ॥ न मर्षयामि तद्वाक्यं कालक्षेपो महानयम्
॥ २२ ॥ सर्वे भवंतस्तिष्ठंतु सार्जुनाः सहकेशवाः ॥ एको मुहूर्ताद्भीष्मादीन्सर्वान्नेष्ये यमक्षयम् ॥ २३ ॥ मयि तिष्ठति केनापि शस्त्रं ग्राह्यं न
क्षत्रियैः ॥ स्वधर्मशपथो वोऽस्तु मृते ग्राह्यं ततो मयि ॥ २४ ॥ पश्यध्वं मे बलं बाह्वोर्देव्याराधनसंभवम् ॥ माहात्म्यं गुप्तक्षेत्रस्य तथा भक्तिं च
पांडुषु ॥ २५ ॥ पश्यध्वं मे धनुर्घोरं तूणीरावक्षयौ तथा ॥ खड्गं च देव्या यद्दत्तं ततो वच्मि वचस्त्विदम् ॥ २६ ॥ इति तस्य वचः श्रुत्वा
क्षत्रिया विस्मयं ययुः ॥ अर्जुनश्च कटाक्षेपे लज्जितः कृष्णमैक्षत ॥ २७ ॥ तमाह ललितं कृष्णः फाल्गुनं परमं वचः ॥ आत्मौपयिकमेवेदं भैमि
पुत्रोऽभ्यभाषत ॥ २८ ॥ नवकोटियुतोऽनेन पलाशी निहतः पुरा ॥ क्षणादेव च पाताले श्रूयते महदद्भुतम् ॥ २९ ॥ पुनः प्रक्ष्यामहे
त्वेनं केनोपायेन कौरवान् ॥ मुहूर्ताद्धंसि ब्रूहीति पृच्छयतां चाह तं जयः[1] ॥ ३० ॥ ततः स्मयन्यादवेंद्रो भैमिपुत्रमभाषत ॥ ३१ ॥ भीष्मद्रोण

१ जयः—अर्जुनः ।

CC-0. In Public Domain. Digitization by eGangotri

कृपद्रौणिकर्णदुर्योधनादिभिः ॥ गुप्तां त्र्यंबकदुर्जेयां सेनां हंसि कथं क्षणात् ॥ ३२ ॥ अयं महान्विस्मयस्ते वच गो भैमिनंदन ॥ संभूतः सर्वराज्ञां च फाल्गुनस्य च धीमतः ॥ ३३ ॥ तद्ब्रूहि केनोपायेन मुहूर्तार्द्धंसि कौरवान् ॥ उपायवीर्यं ते ज्ञात्वा मंस्यामो वयमप्युत ॥ ३४ ॥ ॥ सूत उवाच ॥ ॥ इत्युक्तो वासुदेवेन सर्वभूतेश्वरेण च ॥ सिंहवक्षाः पर्वताभो नानाभूषणभूषितः ॥ ३५ ॥ घटास्यो घट्टहासश्च ऊर्ध्वकेशोऽतिदीप्तिमान् ॥ विद्युदक्षो वायुजवो यश्चेच्छेन्नाशयेज्जगत् ॥ ३६ ॥ देवीदत्तातुलबलो बर्बरीकोऽभ्यभाषत ॥ यदि वो मानसं वीरा उपायस्य प्रदर्शने ॥ ३७ ॥ तदहं दर्शयाम्येष पश्यध्वं सहकेशवाः ॥ इत्युक्त्वा धनुरारोप्य संदधे विशिखं त्वरन् ॥ निःशल्यं चापि संपूर्णं सिंदूराभेण भस्मना ॥३८॥ आकर्णमाकृष्य च तं मुमोच मुखादथोद्भूतमभूच्च भस्म ॥ ३९ ॥ सेनाद्वये तच्च पपात शीघ्रं यस्यैव यत्रास्ति च मृत्युमर्म ॥ सर्वरोमसु भीष्मस्य कंठे राधेयद्रोणयोः ॥ ४० ॥ ऊरौ दुर्योधनस्यापि शल्यस्यापि च वक्षसि ॥ कंठे च शकुनेर्दीप्तं भगदत्तस्य चापतत् ॥ ४१ ॥ कृष्णस्य पादतलके कंठे द्रुपदमत्स्ययोः ॥ शिखंडिनस्तथा कट्यां कंठे सेनापतेस्तथा ॥ ४२ ॥ पपात रक्तं तद्भस्म यत्र येषां च मर्म च ॥ केवलं चैव पांडूनां कृपद्रौण्योश्च नास्पृशत् ॥ ४३ ॥ इति कृत्वा ततो भूयो बर्बरीकोऽभ्यभाषत ॥ दृष्टं भवद्भिरेवं यन्मया मर्म निरीक्षितम् ॥ ४४ ॥ अधुना पातयिष्यामि मर्मस्वेषां शिताञ्छरान् ॥ देवीदत्तानमोघाख्यान्यैर्मरिष्यंत्यमी क्षणात् ॥ ४५ ॥ शपथा वः स्वधर्मस्य शस्त्रं ग्राह्यं न वः क्वचित् ॥ मुहूर्तात्पातयिष्यामि शत्रूनेताञ्छितैः शरैः ॥ ४६ ॥ ततो विस्मितचित्तानां युधिष्ठिरपुरोगिणाम् ॥ आसीन्निनादः सुमहान्साधुसाध्विति शंसताम् ॥ ४७ ॥ वासुदेवश्च संक्रुद्धश्चक्रेण निशितेन च ॥ एवं ब्रुवत एवास्य शिरश्छित्त्वा न्यपातयत् ॥ ४८ ॥ ततः क्षणात्सर्वमासीदाविग्नं राजमंडलम् ॥ व्यलोकयन्केशवं ते विस्मिताश्चाभवन्भृशम् ॥ ४९ ॥ किमेतदिति प्राहुश्च बर्बरीकः कुतो हतः[1]॥ पांडवाश्चापि मुमुचुरश्रूणि सहपार्थिवाः ॥ ५० ॥ हाहा पुत्रेति च गृणन्प्रस्खलंश्च पदेपदे ॥ घटोत्कचोऽपतद्दीनः पुत्रोपरि विमूर्छितः ॥ ५१ ॥ एतस्मिन्नंतरे देव्यश्चतुर्दश समाययुः ॥ ५२ ॥ सिद्धांबिका क्रोडमाता कपाली तारा सुवर्णा च त्रिलोकजेत्री ॥ भाणेश्वरी चर्चिका चैकवीरा योगेश्वरी चंडिका त्रैपुरा च ॥५३॥ भूतांबिका हरसिद्धिस्तथामूः संप्राप्य तस्थुर्नृपविस्मयंकराः ॥ श्रीचंडिकाऽऽश्वास्य ततो घटोत्कचं प्रोवाच वाक्यं महता स्वरेण ॥ ५४ ॥ शृणुध्वं पार्थिवाः सर्वे कृष्णेन विदितात्मना ॥ हेतुना येन निहतो बर्बरीको महाबलः ॥ ५५ ॥ मेरुमूर्ध्नि पुरा पृथ्वी समवेतान्दिवौकसः ॥ भाराक्रांता जगादैतान्भारोऽप

१ हतो भैमिसुतः कथम्—इ०, वर्बरीको हतस्त्वया—इ० च पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ह्रियतां हि मे ॥ ९६ ॥ ततो ब्रह्मा प्राह विष्णुं भगवंस्त्वमिदं शृणु ॥ देवास्त्वानुगमिष्यंति भारं हर भुवः प्रभो ॥ ९७ ॥ ततस्तथेति तन्मेने वचनं विष्णुरव्ययः ॥ एतस्मिन्नंतरे बाहुमुद्धृत्योच्चैरभाषत ॥ ९८ ॥ सूर्यवर्चेति यक्षेंद्रश्चतुराशीतिकोटिपः ॥ किमर्थं मानुषे लोके भवद्भिर्जन्म कार्यते ॥ ९९ ॥ मयि तिष्ठति दोषाणामनेकानां महास्पदे ॥ सर्वे भवंतो मोदंतु स्वर्गेषु सह विष्णुना ॥ ६० ॥ अहमेकोऽवतीर्यैतान्हनिष्यामि भुवो भरान् ॥ स्वधर्मशपथा वो वै संति चेज्जन्म प्राप्स्यथ ॥ ६१ ॥ इत्युक्तवचने ब्रह्मा क्रुद्धस्तं समभाषत ॥ दुर्मते सर्वदेवानामविषह्यं महाभरम् ॥६२॥ स्वसाध्यं ब्रूषे मोहात्त्वं शापयोग्योऽसि बालिश ॥ देशकालोचितं स्वीयं परस्य च बलं हृदा ॥ ६३ ॥ अविचार्यैव प्रभुषु वक्ति सोऽर्हति दंडनम् ॥ तस्माद्भूभारहरणे युद्धस्योपक्रमे सति ॥ ६४ ॥ शरीरनाशं कृष्णात्त्वमवाप्स्यसि न संशयः ॥ एवं शप्तो ब्रह्मणाऽसौ विष्णुमेतदयाचत ॥ ६५ ॥ यद्येवं भविता नाशस्तदेकं देव प्रार्थये ॥ जन्मप्रभृति मे देहि मतिं सर्वार्थसाधनीम् ॥ ६६ ॥ ततस्तथेति तं प्राह केशवो देवसंसदि ॥ शिरस्ते पूजयिष्यंति देव्याः पूज्यो भविष्यसि ॥ ६७ ॥ इत्युक्ता चावतीर्णोऽसौ सह देवैर्हरिस्तदा ॥ हरिर्नाम स कृष्णोऽसौ भवंतस्ते तथा सुराः ॥ ६८ ॥ सूर्यवर्चाः स चायं हि निहतो भैमिपुत्रकः ॥ प्राक्छापं ब्रह्मणः स्मृत्वा हतोनेन महात्मना ॥ तस्माद्दोषो न कृष्णेऽस्मिन्द्रष्टव्यः सर्वभूमिपैः ॥६९॥ ॥ श्रीकृष्ण उवाच ॥ ॥ यदुक्तं भूमिपा देव्या तत्तथैव न संशयः ॥ ७० ॥ यद्येनमधुना नैव हन्यां ब्रह्मवचोऽन्यथा ॥ ततो भवेदिति स्मृत्वा मयासौ विनिपातितः ॥ ७१ ॥ गुप्तक्षेत्रे मयैवाऽसौ नियुक्तो देव्यनुस्मृतौ ॥ पूर्वं दत्तं वरं स्वीयं स्मरता देवसंसदि ॥ ७२ ॥ इत्युक्ते चंडिका देवी तदा भक्तशिरस्त्विदम् ॥ अभ्युक्ष्य सुधया शीघ्रमजरं चामरं व्यधात् ॥ ७३ ॥ यथा राहुशिरस्तद्वत्तच्छिरः प्रणनाम तान् ॥ उवाच च दिदृक्षामि युद्धं तदनुमन्यताम् ॥ ७४ ॥ ततः कृष्णो वचः प्राह मेघगंभीरवाक्प्रभुः ॥ यावन्मही सनक्षत्रा यावच्चंद्रदिवाकरौ ॥ ७५ ॥ तावत्त्वं सर्वलोकानां वत्स पूज्यो भविष्यसि ॥ देवीलोकेषु सर्वेषु देवीवद्विचरिष्यसि ॥७६॥ स्वभक्तानां च लोकेषु देवीनां दास्यसे स्थितिम् ॥ बालानां ये भविष्यंति वातपित्तकफोद्भवाः ॥ पिटकास्ताः सुखेनैव शामयिष्यसि पूजनात् ॥ ७७ ॥ इदं च शृंगमारुह्य पश्य युद्धं यथा भवेत् ॥ ७८ ॥ धावंतः कौरवास्त्वस्मान्वयं यामस्त्वमूनिति ॥ इत्युक्ते वासुदेवेन देव्योऽथांबरमाविशन् ॥ ७९ ॥ बर्बरीकशिरश्चैव गिरिशृंगमवाप्य तत् ॥ देहस्य भूमिसंस्काराश्चाभवञ्छिरसो नहि ॥ ततो युद्धं महदभूत्कुरुपांडवसेनयोः ॥८०॥ अष्टादशाहेन हता ये च द्रोणवृषादयः ॥ दुर्योधने हते क्रूरे अष्टाद

१ त्वमवधारय–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शदिनात्यये ॥ ८१ ॥ युधिष्ठिरो ज्ञातिमध्ये गोविंदं समभाषत ॥ पुरुषोत्तम संग्राममम्मुं संतारिता वयम् ॥ ८२ ॥ त्वयैव नाथेन हरे नमस्ते पुरुषोत्तम ॥ श्रुत्वा तस्यापि सासूयमिदं भीमो वचोऽब्रवीत् ॥ ८३ ॥ येन ध्वस्ता धार्तराष्ट्रास्तं निराकृत्य मां नृप ॥ पुरुषोत्तमं कृष्णमिति ब्रवीषि किमु मूढवत् ॥ ८४ ॥ धृष्टद्युम्नं फाल्गुनं च सात्यकिं मां च पांडव ॥ निराकृत्य ब्रवीष्येव सूतं धिक्त्वां युधिष्ठिर ॥ ८५ ॥ ॥ अर्जुन उवाच ॥ ॥ मैवं मैवं ब्रूहि भीम न त्वं वेत्सि जनार्दनम् ॥ न मया न त्वया पार्थ नान्येनाप्यरयो हताः ॥ ८६ ॥ अहं हि सर्वदाग्रस्थं नरं पश्यामि संयुगे ॥ निघ्नंतं शात्रवांस्तत्र न जाने कोऽप्यसाविति ॥ ८७ ॥ ॥ भीम उवाच ॥ ॥ विभ्रांतोऽसि ध्रुवं पार्थ नात्र हंता नरोऽपरः ॥ अथ चेदस्ति त्वत्पौत्रमुच्चस्थं वच्मि हंत कः ॥ ८८ ॥ उपसृत्य ततो भीमो बर्बरीकमपृच्छत ॥ ब्रूह्येते केन निहता धार्तराष्ट्रा हि शत्रवः ॥ ८९ ॥ ॥ बर्बरीक उवाच ॥ ॥ एको मया पुमान्दृष्टो युध्यमानः परैः सह ॥ सव्यतः पंचवक्त्रः स दक्षिणे चैकवक्त्रतः ॥ ९० ॥ सव्यतो दशहस्तश्च धृतशूलाद्युदायुधः ॥ दक्षिणे च चतुर्हस्तो धृतचक्राद्युदायुधः ॥ ९१ ॥ सव्यतश्च जटाधारी दक्षिणे मुकुटोच्चयः ॥ सव्यतो भस्मधारी च दक्षिणे धृतचंदनः ॥ ९२ ॥ सव्यतश्चंद्रधारी च दक्षिणे कौस्तुभद्युतिः ॥ ममापि तद्दर्शनतो महद्भयमजायत ॥ ९३ ॥ ईदृशो मे नरो दृष्टो न चान्यो यो जघान तान् ॥ इत्युक्ते पुष्पवर्षं तु खादासीत्सुमहाप्रभम् ॥ ९४ ॥ सस्वनुर्देववाद्यानि साधुसाध्विति वै जगुः ॥ विस्मिताः पांडवाश्चासन्प्रणेमुः पुरुषोत्तमम् ॥ ९५ ॥ विलक्षश्चाभवद्भीमो निश्वासांश्चाप्यमुंचत ॥ तं ततः केशवः स्वामी समादाय करे दृढे ॥ ९६ ॥ कुरुशार्दूल एहीति प्रोच्य सस्मार काश्यपिम्[1] ॥ आरुह्य गरुडं पश्चात्स्मृतमात्रमुपस्थितम् ॥ ९७ ॥ भीमेन सहितो व्योम्नि प्रयातो दक्षिणां दिशम् ॥ ततोऽर्णवमतीत्यैव सुवेलं च महागिरिम् ॥ ९८ ॥ लंकासमीपे दृष्ट्वैव सरः कृष्णोऽब्रवीद्वचः ॥ कुरुशार्दूल पश्येदं सरो द्वादशयोजनम् ॥ ९९ ॥ यदि शूरोऽसि तच्छीघ्रमानयास्यतलान्मृदम् ॥ इत्युक्तो गरुडाच्छीघ्रं न्यपतत्तज्जले बली ॥ १०० ॥ योजनं वायुजवाद्गच्छन्नधो नांतमपश्यत ॥ ततो भीमो विनिःसृत्य भग्नवीर्योऽभ्यभाषत ॥ १०१ ॥ अगाधमेतत्सुमहत्सरः कैश्चिन्महाबलैः ॥ अहं खादितुमारब्धः कथंचिच्चापि निर्गतः ॥ १०२ ॥ एवमुक्तो हसन्कृष्ण उच्चिक्षेप महत्सरः ॥ स्वेनांगुष्ठेन तेजस्वी तदर्धार्धमजायत ॥ १०३ ॥ तद्दृष्ट्वा विस्मितः प्राह किमिदं कृष्ण ब्रूहि मे ॥ १०४ ॥ ॥ श्रीकृष्ण उवाच[2] ॥ ॥ कुम्भकर्ण इति ख्यातः पूर्वमासीन्निशाचरः ॥ रामबाणहतस्याभूच्छिरश्छिन्नं सुदुर्मतेः ॥ १०५ ॥ शिरसस्तस्य

१ काश्यपिम्—कश्यपपुत्रं गरुडमित्यर्थः ।—गारुडम्—इ० पा० । २ श्रीभगवानुवाच—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तालुक्यखंडमेतद्वृकोदर ॥ योजनद्वादशायामं मृदु क्षितं विचूर्णितम् ॥ १०६ ॥ विधृतस्त्वं च यैस्ते तु सरोगेयाभिधाः सुराः ॥ त्रिकूटस्य शिला भिश्च चूर्णिता ये च कोटिशः ॥ १०७ ॥ एते हि विश्वरिपवो निहताः स्युरुपायतः ॥ गच्छामः पांडवान्भीम द्रौणिर्हि त्वरते दृढम् ॥ १०८ ॥ ततो भीमः प्रणम्याह मनोवाक्कायबुद्धिभिः ॥ कृतमाजन्मतः सव कुकृतं क्षम केशव ॥ १०९ ॥ पुरुषोत्तम भवान्नाथ बालिशस्य प्रसीद मे ॥ ततः क्षांतमिति प्रोच्य भीमेन सहितो हरिः ॥ ११० ॥ रणाजिरं भूय एत्य बर्बरीकं वचोऽब्रवीत् ॥ चरन्नेवं सुहृदय सर्वलोकेषु नित्यशः ॥ ॥ १११ ॥ पूजितः सर्वलोकैस्त्वं यच्छंस्तेषां वरान्वृतान् ॥ गुप्तक्षेत्रं च न त्याज्यं सर्वक्षेत्रोत्तमोत्तमम् ॥ ११२ ॥ देहिस्[१]थल्यां तथा वासी क्ष[२]मस्व दुष्कृतं च यत् ॥ इत्युक्तस्तान्नमस्कृत्य भैमिः स्वैरं ययौ मुदा ॥ ११३ ॥ वासुदेवोऽपि कार्याणि स[३]र्वाण्यूर्ध्वमकारयत् ॥ इति वो वर्णितोत्पत्तिर्बर्बरीकस्य वाडवाः ॥ स्तवं चास्य प्रवक्ष्यामि येन तुष्यति यक्षराट् ॥ ११४ ॥ जयजय चतुरशीतिकोटिपरिवार सूर्यवर्चाभिधान यक्षराज जय भूभारहरणप्रवृत्त लघुशापप्राप्तनैर्ऋतियोनिसंभव जय कामकटंकटाकुक्षिराजहंस जय घटोत्कचानंदवर्धन बर्बरीकाभिधान जय कृष्णोपदिष्टश्रीगुप्तक्षेत्रदेवीसमाराधनप्राप्तातुलवीर्य जय विजयसिद्धिदायक जय पिंगलारेपलेन्द्रदुहद्रुहानवकोटीश्वर पलाशनदावानल जय भूपातालांतराले नागकन्यापरिहारक जय भीममानमर्दन जय सकलकौरवसेनावधमुहूर्तप्रवृत्त जय श्रीकृष्णवरलब्धसर्ववरप्रदानसामर्थ्य जयजय कलिकालवंदित नमोनमस्ते पाहिपाहीति ॥ ११५ ॥ अनेन यः सुहृदयं श्रावणेऽभ्यर्च्य दर्शके ॥ वैशाखे च त्रयोदश्यां कृष्णपक्षे द्विजोत्तमाः ॥ शतदीपैः पूरिकाभिः संस्तवेत्तस्य तुष्यति ॥ ११६ ॥ ततो विप्रा नारदश्च समाराध्य महेश्वरम् ॥ महीनगरके पुण्ये स्थापयामास शंकरम् ॥ ११७ ॥ लोकानां च हितार्थाय केदारं लिङ्गमुत्तमम् ॥ अत्रीशादुत्तरे भागे महापापप्रणाशनम् ॥ ११८ ॥ अत्र कुण्डे नरः स्नात्वा श्राद्धं कृत्वा यथाविधि ॥ अत्रीशं च नमस्कृत्य केदारं च प्रपश्यति ॥ ११९ ॥ मातुः स्तन्यं पुनर्नैव स पिबेन्मुक्तिभाग्भवेत् ॥ ततो रुद्रो नीलकण्ठो नारदाय महात्मने ॥ १२० ॥ वरं दत्त्वा स्वयं तस्थौ महीनगरके शुभे ॥ कोटितीर्थे नरः स्नात्वा नीलकण्ठं प्रपश्यति ॥ १२१ ॥ जयादित्यं नमस्कृत्य रुद्रलोकमवाप्नुयात् ॥ जयादित्यं पूजयंति कूपे स्नात्वा नरोत्तमाः ॥ ११२ ॥ न तेषां वंशनाशोऽस्ति जयादित्यप्रसादतः ॥ तेषां कुले न रोगः स्यान्न दारिद्र्यं न

१ देहिस्थल्याम् देहल्यां–'दिल्ली'–इत्याधुनिकप्रसिद्धपुर्याम्–इत्यर्थः । इह स्थल्याम्–इ० पा० । २ तथा देहिस्थल्यां वासी त्वं–भव–इति शेषः । ये त्वां नत्वा प्रार्थयिष्यंति तेषां यद्दुष्कृतं तत्क्षमस्व–इत्यर्थयोजना । ३ कृत्वान्यानि दिवं गतः–इ० च पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लाञ्छनम् ॥ १२३ ॥ पुत्रपौत्रसमायुक्ता धनधान्यसमायुताः ॥ भुक्त्वा भोगानिह बहून्सूर्यलोके वसन्ति ते ॥ १२४ ॥ इति प्रोक्तं मया विप्रा गुप्तक्षेत्रं समासतः ॥ सप्तक्रोशप्रमाणं च क्षेत्रस्यास्य पुरा द्विजाः ॥ स्वयंभुवा प्रोक्तमिदं सर्वकामार्थसिद्धिदम् ॥ १२५ ॥ इति वो वर्णितः पुण्यो महीसागरसम्भवः ॥ शृण्वन्संकीर्तयंश्चैवं सर्वपापैः प्रमुच्यते ॥ १२६ ॥ य इदं श्रावयेद्विद्वान्महामाहात्म्यमुत्तमम् ॥ सर्वपापविनिर्मुक्तो रुद्रलोकं स गच्छति ॥ १२७ ॥ गुप्तक्षेत्रस्य माहात्म्यं सकलं श्रावयेद्यदि ॥ सर्वैश्वर्यमवाप्नोति ब्रह्महत्यां व्यपोहति ॥ १२८ ॥ कोटितीर्थस्य माहात्म्यं महीनगरकस्य च ॥ शृणोति श्रावयेद्यस्तु ब्रह्मभूयाय कल्पते ॥ १२९ ॥ कोटितीर्थे नरः स्नात्वा श्राद्धं कृत्वा प्रयत्नतः ॥ दानं दद्याद्यथाशक्त्या शृणुध्वं तत्फलं हि मे ॥ १३० ॥ स्वर्गपातालमर्त्येषु यानि तीर्थानि सन्ति वै ॥ तेषु दानेषु यत्पुण्यं तत्फलं प्राप्यते नरैः ॥ १३१ ॥ अश्वमेधादिभिर्यज्ञैरिष्टैश्चैवाप्तदक्षिणैः ॥ सर्वव्रततपोभिश्च कृतैर्यत्पुण्यमाप्यते ॥ १३२ ॥ तत्पुण्यं प्राप्यते विप्राः कोटितीर्थे न संशयः ॥ १३३ ॥ इदं पवित्रं खलु पुण्यदं सदा यशस्करं पापहरं परात्परम् ॥ शृणोति भक्त्या पुरुषः स पुण्यभागसुक्षये रुद्रसलोकतां व्रजेत् ॥ १३४ ॥ धन्यं यशस्यं नियतं सुपुण्यं स्वर्मोक्षदं पापहरं नराणाम् ॥ शृणोति नित्यं नियतः शुचिः पुमान्भित्त्वा रविं विष्णुपदं प्रयाति ॥ १३५ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां प्रथमे माहेश्वरखण्डे कौमारिकाखंडे गुप्तक्षेत्रमाहात्म्यपरिसमाप्तिवर्णनंनाम त्रिषष्टितमोऽध्यायः ॥६३॥ ॥ अत ऊर्ध्वं कापिलस्थानोपाख्यानं भविष्यति ॥(?)॥ इति श्रीस्कान्दपुराणीयप्रथममाहेश्वरखण्डान्तर्गतो द्वितीयः कौमारिकाखण्डः समाप्तः ॥ मूलखंडः ॥ १ ॥ अंतर्गतः खण्डः ॥ (२) ॥ ॥ छ ॥ ॥ छ ॥ ॥छ॥

॥ ❀ ॥ इति कौमारिकाखण्डः समाप्तः ॥ (२) ॥ ❀ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इदं पुस्तकं मुम्बय्यां श्रीकृष्णदासात्मजक्षेमराजश्रेष्ठिना
स्वकीये "श्रीवेङ्कटेश्वर" (स्टीम्) मुद्रणालये मुद्रितम्।
संवत् १९६६, शके १८३१.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ इति श्रीस्कांदे महापुराणे प्रथमे माहेश्वरखण्डे कौमारिकाखण्डः समाप्तः ॥ (२)॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ अथ श्रीस्कांदे महापुराणे प्रथमे माहेश्वरखण्डेऽरुणाचलमाहात्म्यं प्रारभ्यते॥(३)॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ श्रीगणेशाय नमः ॥ ॥ अथ श्रीमदरुणाचलमाहात्म्यपूर्वार्धं[1] प्रारभ्यते ॥ ॥ ललाटे त्रैपुंड्री निटिलकृतकस्तूरितिलकः स्फुरन्मालाधारः स्फुरितकटिकौपीनवसनः ॥ दधानो दुस्तारं शिरसि फणिराजं शशिकलां प्रदीपः सर्वेषामरुणगिरियोगी विजयते ॥१॥ ॥ व्यास उवाचः ॥ ॥ अथाहुर्मुनयः सूतं नैमिषारण्यवासिनः ॥ अरुणाचलमाहात्म्यं त्वत्तः शुश्रूषवो वयम् ॥ २ ॥ तन्माहात्म्यं वदेत्युक्तः सूतः प्रोवाच तान्मुनीन् ॥ ॥ श्रीसूत उवाच ॥ ॥ एतदर्थं चतुर्वक्त्रं पप्रच्छ सनकः पुरा ॥ ३ ॥ शृणुतावहिता यूयं तद्वो वक्ष्यामि सांप्रतम् ॥ यदाकर्णयतां भक्त्या नराणां पापनाशनम् ॥ ४ ॥ सत्यलोके स्थितं पूर्वं ब्रह्माणं कमलासनम् ॥ सनकः परिपप्रच्छ प्रणतः प्रांजलिः स्थितः ॥ ५ ॥ ॥ सनक उवाच ॥ ॥ भुवनाधार देवेश वेदवेद्य चतुर्मुख ॥ आसीदशेषविज्ञानं प्रसादाद्भवतो मम ॥ ६ ॥ भवद्भक्तिविभूत्या मे शोधिते चित्तदर्पणे ॥ बिंबते सकलं ज्ञानं सद्गुदेवोपदेशतः ॥ ७ ॥ सारार्थं वेदवेदानां शिवज्ञानमनाकुलम् ॥ लब्धवानहमत्यंतं कटाक्षैस्ते जगद्गुरोः ॥ ८ ॥ लिंगानि भुवि शैवानि दिव्यानि च कृपानिधे ॥ मानुषाणि च सैद्धानि भौतानि सुरनायक ॥ ९ ॥ यल्लिंगममलं दिव्यमरिच्छेदनवैभवम्[2] ॥ स्वयंभु जांबवे द्वीपे तैजसं तद्वदस्व मे ॥ १० ॥ नामस्मरणमात्रेण यत्पातकविनाशनम् ॥ शिवसारूप्यदं नित्यं मह्यं वद दयानिधे ॥ ११ ॥ अनादिजगदाधारं यत्तेजः शैवमव्ययम् ॥ यच्च दृष्ट्वा कृतार्थः स्यात्तन्मह्यमुपदिश्यताम् ॥ १२ ॥ इति भक्तिमतस्तस्य कौतूहलसमन्वितम् ॥ वाक्यमाकर्ण्य भगवान्प्रससाद तपोनिधिः ॥ ॥ १३ ॥ दध्यौ च सुचिरं शंभुं पंकजासनसंस्थितः ॥ अंतरंगसुखांभोधिमग्नचेताश्चतुर्मुखः ॥ १४ ॥ दृष्ट्वा[3] यदा पुरा दृष्टं तेजःस्तंभमयं शिवम् ॥ उत्तीर्णसकलाधारं न किंचित्प्रत्यबुध्यत ॥ १५ ॥ पुनराज्ञां शिवाल्लब्ध्वामनुपालयितुं प्रभुः ॥ निर्वर्त्य हृदयं योगात्सस्मार सुतमानतम् ॥ १६ ॥ शिवदर्शनसंजातपुलकांकितविग्रहः ॥ आनंदबाष्पवन्नेत्रः सगद्गदमभाषत ॥ १७ ॥ ॥ ब्रह्मोवाच ॥ ॥ अंतः संस्मारितः पुत्र भवताऽहं पुरातनम् ॥ शिवयोगमनुध्यायन्नस्मार्षं तव चादरात् ॥१८॥ शिवभक्तिः परा जाता तपोभिर्बहुभिस्तव ॥ तया मदीयं हृदयं व्यावर्त्तितमिव

---

१ अरुणाचलमाहात्म्यं हि पूर्वार्धोत्तरार्धविभागविभिन्नमस्ति । पूर्वार्धो हि ब्रह्मसनकसंवादप्रवृत्तः । उत्तरार्धश्च—नंदिकेश्वरमार्कण्डेयसंवादप्रवृत्तः । तत्र—यद्यपि प्रायः कथाभागे किञ्चित्सादृश्यं दृश्यते—तथापि कियान्कथाभागः पूर्वार्धे सविस्तरः कियांश्चोत्तरार्धे सविस्तरः । पूर्वार्धश्च त्रयोदशाध्यायात्मकः । उत्तरार्धश्च—चतुर्विंशत्यध्यायरूपः । नारदीयपुराणोक्तरीत्या—ब्रह्मसनकसंवादस्योक्तत्वादत्रायं पूर्वार्ध एव—प्रथमं संनिवेशितोऽस्ति । उत्तरार्धस्यकथानिर्देशो नारदीयपुराणेऽस्तीत्यतः स चैतदुत्तरं यथाक्रमं निवेशितो वोद्धव्यः । संवादभेदेन कथाभागस्य क्वचित्सादृश्ये दृश्यमानेऽपि पौनरुक्त्यदोषो न शंकनीय इति बाढं मनसि निधायैतदरुणाचलमाहात्म्यं पूर्वार्धोत्तरार्धविभागद्वयविभूषितं पठनीयं सुधीभिरित्यवधेयम् । नात्र शङ्कनीयं मनागपीति—सादरं विज्ञाप्यन्ते सुधियः । २ अरिच्छेदनवैभवम्—कामादिविकारनाशकम्—इत्यर्थः । ३ ध्यानकाले—इत्यर्थोऽध्याहृतो वोध्यः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्षणात् ॥ १९ ॥ पावयंति जगत्सर्वं चारितैस्ते निराकुले ॥ येषां सदाशिवे भक्तिर्वर्द्धते सार्वकालिकी ॥ २० ॥ संभाषणं सहावासः क्रीडा चैव
विमिश्रणम् ॥ दर्शनं शिवभक्तानां स्मरणं चाघनाशनम् ॥ २१ ॥ श्रूयतामद्भुतं शैवमाविर्भूतं यथा पुरा ॥ अव्याजकरुणापूर्णमरुणाद्यभिधं
महः ॥ २२ ॥ अहं नारायणश्चोभौ जातौ विश्वाधिकोदयात् ॥ बहु स्यामिति संकल्पं वितन्वानात्सदाशिवात् ॥ २३ ॥ स्वभावेन समुद्भूतौ
विवदंतौ परस्परम् ॥ न च श्रांतौ नियुध्यंतौ साहंकारौ कदाचन ॥२४॥ परस्परं रणोत्साहमावयोरतिभीषणम् ॥ आलोक्य करुणामूर्तिरचिंतयद
थेश्वरः ॥ २५ ॥ किमर्थमनयोर्युद्धं जायते लोकनाशनम् ॥ मया सृष्टमहं पातेति विवादमधितस्थुषोः ॥ २६ ॥ समयेऽस्मिन्स्वयं लक्ष्यो मुग्धयो
रनयोर्भृशम् ॥ यदि युद्धं न रोत्स्यामि तदा स्याद्भुवनक्षयः ॥ २७ ॥ वेदेषु मम माहात्म्यं विश्वाधिकतया श्रुतम् ॥ न जानाते इमौ मुग्धौ क्रोधतो
गलितस्मृती ॥ २८ ॥ सर्वोपि जंतुरात्मानमधिकं मन्यते भृशम् ॥ अमतान्यसमाधिक्यस्त्वधः पतति दुर्मतिः ॥ २९ ॥ यद्यहं क्वापि भुवने
दास्यामि मितिमात्मनः ॥ तदा तद्रूपविज्ञानात्स आत्मा सोपि मामियात् ॥ ३० ॥ इति निश्चित्य मनसा स्वयमेव सदाशिवः ॥ आवयोर्युध्यतो
र्मध्ये वह्निस्तंभः समुद्यतः ॥ ३१ ॥ अतीत्य सकलाँल्लोकान्सर्वतोऽग्निरिव ज्वलन् ॥ ३२ ॥ अनाद्यंततया चाथ दृगातौ संव्यतिष्ठताम् ॥ तेजःस्तंभं
ज्वलंतं तमालोक्य शिथिलाशयौ ॥ ३३ ॥ आवयोः पुरतो जाता वाणी चाप्यशरीरिणी ॥ किमर्थं बालकौ युद्धं कल्प्यते मूढमानसौ ॥ ३४ ॥
युवयोर्बलवैषम्यं शिव एव विवेक्ष्यते ॥ तेजःस्तंभमयं रूपमिदं शंभोर्व्यवस्थितम् ॥ ३५ ॥ आद्यंतयोर्यदि युवामीक्षिषाथां बलाधिकौ ॥ इति तां
गिरमाकर्ण्य नियुद्धाद्विरतौ तदा ॥ ३६ ॥ अहं विष्णुश्च गतिमान्विचेतुं तद्व्यवस्थितौ ॥ अग्निस्तंभमयं रूपं शंभोराद्यंतवर्जितम् ॥ ३७ ॥ आलो
किंतु व्यवसितावावामाद्यंतभागतः ॥ बिं[1]बितं व्योमगं चंद्रं यथा बालौ जिघृक्षतः ॥३८॥ तथैवावां समुद्युक्तौ परिच्छेत्तुं च तन्महः॥ अथ विष्णुर्म
होत्साहात्क्रोडोऽभूत्सुमहावपुः ॥ ३९ ॥ तन्मूलविचयाऽयाच्च भूमिगर्भं व्यदारयत् ॥ अहं च हंसतां प्राप्तो महावेगं समुत्पतन् ॥ ४० ॥ दिदृक्षुस्त
च्छिरोभागं वियदूर्ध्वमगाहिषम् ॥ अधोधो दारयन्क्षोणिमशेषामपि माधवः ॥ ४१ ॥ आविर्भूतमिवाधस्तादग्निस्तंभमवैक्षत ॥ अनेककोटि
वर्षाणि विचिन्वन्नपि तेजसः ॥ ४२ ॥ अपश्यन्नादिमक्षय्यमार्तरूपः स विह्वलः ॥ विशीर्णदंष्ट्रवलयो विगलत्संधिबंधनः ॥ ४३ ॥
श्रमातुरस्तृषाक्रांतो नो यातुमशकद्धरिः ॥ वाराहं रूपमतुलं संधारयितुमक्षमः ॥ ४४ ॥ विहंतुमपि विश्रांतो विषसाद रमापतिः ॥

१ बिंबितं जले–इति योजना ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अर्चितयदमेयात्मा परिश्रांतशरीरवान् ॥ ४५ ॥ गलितश्रीः क्रियाश्रांतः शरणं शिवमाश्रयन् ॥ धिङ्ममेदं महन्मौग्ध्यमहंकारसमुद्भवम् ॥४६॥ येनाहमात्मनो नाथमात्मानं नावबुद्धवान् ॥ अयं हि सर्ववेदानां देवानां जगतामपि ॥ ४७ ॥ मूलभूतः शिवः साक्षान्मूलमस्य कथं भवेत् ॥ अस्मादेव समुद्भूतोऽस्म्यहमाद्यंतवर्जितात् ॥ ४८ ॥ यन्मयान्वेष्टुमारब्धं शिवं पशुवपुर्धृता ॥ अव्याजकरुणाबन्धोः पितुः शंभोः प्रसादतः ॥ ४९ ॥ पुनरेवेदृशी लब्धा मतिर्मे स्वात्मबोधिनी ॥ स्वयमेव महादेवः शंभुर्यं पातुमिच्छति ॥ ५० ॥ तस्य सद्यो भवेज्ज्ञानमनहंकारमात्मजम् ॥ न शक्नोमि पुनः कर्तुं पूजामस्य जगद्गुरोः ॥ ५१ ॥ निवेदयामि चात्मानं शरणं यामि शंकरम् ॥ इति दध्यौ शिवं विष्णुः स्तुत्यामर्पितचेतनः ॥ ॥ ५२ ॥ सत्प्रसादाद्भूतपतेः पुनरेवोद्धृतः क्षितौ ॥ अहं च गगनेऽभ्राम्यमनेकानपि वत्सरान् ॥ ५३ ॥ आघूर्णमानननयनः श्लथपक्षः श्रमं गतः ॥ उपर्युपरि चापश्यं ज्वलनं पुरतः स्थितम् ॥ ५४ ॥ तेजःस्तम्भं स्थूललिंगाभं शैवं तेजः सुरार्चितम् ॥ आहुः स्म केचिदालोक्य सिद्धास्तेजोंशसंभवाः ॥ ५५ ॥ नित्यां शंभोः परां कोटिं दिदृक्षुं मां कृतोद्यमम् ॥ अहोऽयं सत्यं मुग्धत्वमद्यापि च चिकीर्षति ॥ ५६ ॥ आसन्नदेहपातोऽपि नाहंकारोऽस्य वै गतः ॥ विशीर्यमाणपक्षोऽयं श्रांत्वा विश्रांतलोचनः ॥ ५७ ॥ अपारतेजसि व्यर्थो विमोहोऽयं भविष्यति ॥ एवं व्याकुलचित्तोऽयं क्रोडरूपी जनार्दनः ॥ ५८ ॥ व्यावर्त्तितः शिवेनैव निर्व्याजकरुणाजुषा ॥ ईदृशां ब्रह्ममुख्यानां सुराणां कोटिसंभवः ॥ ५९ ॥ यत्तेजःपरमाणुभ्यस्तस्य पारं दिदृक्षते ॥ स्वात्मनो यो गतो ध्यात्वा समये भगवाञ्छिवः ॥ ६० ॥ यदि बुद्धिं ददात्यस्मै तस्य नश्येदहंक्रिया ॥ इत्येवं वदतां तेषां सिद्धानां सदयं वचः ॥ ६१ ॥ आकर्ण्य शीर्णाहंकारो ह्यहमात्मन्यचिंतयम् ॥ न वेदराशिविज्ञानात्तपस्तीर्थनिषेवणात् ॥ ६२ ॥ संजायते शिवज्ञानमस्यैवानुग्रहादृते ॥ शीर्णेऽपि पक्षयुगले सीदत्यंगे ह्यचंचले ॥ ६३ ॥ पुनरुत्सहते चेतः स्वाहंकारस्य संग्रहे ॥ धिङ्मामहंक्रियाक्रांतमनात्मबलवेदिनम् ॥ ६४ ॥ शिवार्पितमनस्केभ्यः सिद्धेभ्यः सततं नमः ॥ येषां संसर्गलब्धेन तपसा शोधिताशयः ॥ ६५ ॥ शिवमेनं विजानामि स्वात्महेतुं पुरःस्थितम् ॥ यत्प्रसादोपलब्धेन विभवेन समन्विताः ॥ ६६ ॥ देवाः सर्वे भविष्यंति सततं शमितारयः ॥ यस्य वेदा न जानंति परमार्थं महागमैः ॥ ६७ ॥ तमेव शरणं यामि शंभुं विश्वविलक्षणम् ॥ अवादिषमथाभाष्यं विष्णुं कमललोचनम् ॥ ६८ ॥ लब्धदेहः शिवं भक्त्या संश्रितश्चन्द्रशेखरम् ॥ अहो किमिदमाश्चर्यमागतं शौर्यशालिनाम् ॥ ६९ ॥ शंभुना यत्समुद्भूतमहंकारमुपाश्रितौ ॥ आवां परस्परं युद्धमाकर्ण्य विपुलं महत् ॥ ७० ॥ स एव शंकरः सर्वमहंकारमथावयोः ॥ अपाहरदमेयात्मा स्वमाहात्म्यप्रकाशनात् ॥ ७१ ॥ इममीश्वरमानतं सुरैरनल

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्तम्भमयं सदाशिवम् ॥ अभिपूजयितुं प्रवर्तते स भवेद्धै भवसागरस्य नौः ॥ ७२ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहि
तायां प्रथमे माहेश्वरखण्डेऽरुणाचलमाहात्म्ये पूर्वार्धे ब्रह्मसनकसंवादे लिंगप्रादुर्भाववर्णनंनाम प्रथमोऽध्यायः ॥ १ ॥ ॥ छ ॥ ॥ ब्रह्मोवाच ॥ ॥
अथाहमुच्चरन्वेदानशेषैर्वदनैः शिवम् ॥ अस्तौषं भक्तिसंपूर्णं कृत्वा मानसमर्चनम् ॥ १ ॥ नमः शिवाय महते सर्वलोकैकहेतवे ॥ येन प्रकाश्यते
सर्वं ध्रियते सततं नमः ॥ २ ॥ विश्वव्याप्तमिदं तेजः प्रकाशयति संततम् ॥ नेक्षंते त्वद्दयाहीना जात्यंधा भास्करं यथा ॥ ३ ॥ भूलिंगममलं
ह्येतद्दृश्यमध्यात्मचक्षुषा ॥ अंतस्स्थं वा बहिस्स्थं वा त्वद्भक्तैरनुभूयते ॥ ४ ॥ अपरिच्छेद्यमाकारमंतरात्मनि योगिनः ॥ तदेतत्तव देवेश ज्वलितं
दर्पणो यथा ॥ ५ ॥ अथवा शांकरी शक्तिः सत्याऽणोरप्यणीयसी ॥ मत्तो नान्यतरः कश्चिद्यन्मय्यपि विलीयते ॥ ६ ॥ अणुस्ते करुणापात्रं
महत्त्वं ध्रुवमश्नुते ॥ नाधिकोऽस्ति परस्त्वत्तो न मत्तोऽपि त्वदाश्रयात् ॥ ७ ॥ त्वय्यर्पितं मनस्त्वत्तो न वियोगमपेक्षते ॥ वाचः कथं प्रवृत्तिः
स्यात्तव वैभवकीर्त्तने ॥ ८ ॥ स्वयमीश महादेव प्रसीद भुवनाधिक ॥ आदिश प्रयतं भक्तमपेक्षितनियुक्तिषु ॥ ९ ॥ इदं विज्ञाप्य विनयान्न
मस्कृत्वा पुनःपुनः ॥ प्रांजलिर्देवदेवेशं न्यषीदं सविधे विभोः ॥१०॥ अथ विष्णुर्नवांभोदगंभीरध्वनिरभ्यधात् ॥ वाचः कृतार्थन्भूयः शुक्लाः शंक
रकीर्त्तनैः ॥ ११ ॥ जय त्रिभुवनाधीश जय गंगाधर प्रभो ॥ जय नाथ विरूपाक्ष जय चंद्रार्द्धशेखर ॥ १२ ॥ अव्याजममितं शंभो कारुण्यं तव
वर्द्धते ॥ येन निर्धूतमखिलं भक्तेषु ज्ञानमाहितम् ॥ १३ ॥ पालनं सर्वविद्यानां प्रापणं भूतिसंचयैः ॥ पुराणं च सपुत्राणां पितुरेव प्रवर्धनम् ॥
॥ १४ ॥ शतानामपि मूर्तीनामेकामपि नवैः स्तवैः ॥ स्तोतुं न शक्नुमेशान समवायस्तु किं पुनः ॥ १५ ॥ त्वमेव त्वामलं वेत्तुं यदि वा त्वत्प्र
सादतः ॥ भ्रमरः कीटमाकृष्य स्वात्मानं किं न चानयेत् ॥ १६ ॥ देवास्त्वदंशसंभूतिप्रभवो[१] न भवन्ति किम् ॥ अप्यायस्याग्निकीलस्य दाह
शक्तिर्न किं भवेत् ॥ १७ ॥ देशकालक्रियायोगाद्यथाग्नेर्भेदसम्भवः ॥ तथा विषयभेदेन त्वमेकोऽपि विभिद्यसे ॥ १८ ॥ अनुग्रहपरो देव मूर्तिं
दर्शय शंकर ॥ आवयोरखिलाधार नयनानंददायिनीम् ॥ १९ ॥ एवं प्रणमतोर्देवः श्रद्धाभक्तिसमन्वितम् ॥ प्रससाद परं शंभुः स्तुवतोरावयो
र्द्वयोः ॥ २० ॥ तेजःस्तंभात्पुनस्तस्माद्देवश्चन्द्रार्द्धशेखरः ॥ आविर्बभूव पुरुषः कपिलः कालकन्धरः ॥ २१ ॥ परशुं बालहरिणं करैरभयवि
श्रमौ ॥ दधानः पुरुषोऽवादीत्पुत्रावावामिति प्रभुः ॥ २२ ॥ परितुष्टोऽस्मि युवयोर्भक्त्या युक्तात्मनोर्मयि ॥ भवतं सर्वलोकानां सृष्टिरक्षाधिपौ

१ त्वदंशसंभूत्या–प्रभवः–समर्थाः–इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

युवाम् ॥ २३ ॥ युवयोरिष्टसिद्ध्यर्थमाविर्भूतोऽस्म्यहं यतः ॥ वरं वृणुतमन्यं च वरदोऽहमुपागतः ॥ २४ ॥ इति देवस्य वचनात्सुप्रीतौ च कृतांजली ॥ विज्ञापयामासिव तौ स्वं स्वमर्थं पृथक्पृथक् ॥ २५ ॥ अहं मन्त्रैः शिशुप्रायजगत्त्रयविधायकः ॥ संस्तुवन्वैदिकैर्मंत्रैरीशानमपराजितम् ॥ ॥ २६ ॥ नमस्येहमिदं रूपं शश्वद्वरदमीश्वरम् ॥ तेजोमयं महादेवं योगिध्येयं निरंजनम् ॥ २७ ॥ आपूर्यमाणं भवता तेजसा गगनांतरम् ॥ परिपृच्छ्यः सुरावासः क्षणादेव भविष्यति ॥ २८ ॥ सिद्धचारणगन्धर्वा देवाश्च परमर्षयः ॥ नावसन्दिवि संचारं लभेरंस्तेजसा तव ॥ २९ ॥ पृथ्वी च सकला चैव तप्यमाना तवौजसा ॥ चराचरसमुत्पत्तिक्षमा नैव भविष्यति ॥ ३० ॥ उपसंहृत्य तेजः स्वमरुणाचलसंज्ञया ॥ भव स्थावरलिंगं त्वं लोकानुग्रहकारणात् ॥ ३१ ॥ ज्योतिर्मयमिदं रूपमरुणाचलसंज्ञितम् ॥ ये नमन्ति नरा भक्त्या ते भवन्त्यमराधिकाः ॥ ३२ ॥ सेवंतां सकला लोकाः सिद्धाश्च परमर्षयः ॥ गणाश्च विविधा भूमौ मानुषं भावमास्थिताः ॥ ३३ ॥ दिव्यारामसमुद्भूतकल्पकाद्याः सुरद्रुमाः ॥ सेविनस्त्वां प्ररोहंतु भरिता विविधैः फलैः ॥ ३४ ॥ दिव्यौषधिगणास्सर्वे सिंहाद्या मृगजातयः ॥ प्रशांताः परिवर्त्ततां पापकल्मषनाशनम् ॥ ३५ ॥ अयनद्वयभिन्नेन गमनेनापि संयुतः ॥ न लंघयिष्यति रविः शृंगं लिंगतनोस्तव ॥ ३६ ॥ दिव्यदुंदुभिशंखानां घोषैः पुष्पौघवृष्टिभिः ॥ सेवितो भव देव त्वमप्सरोनृत्यगीतिभिः ॥ ३७ ॥ अमरत्वं च सिद्धत्वं रससिद्धीश्च निर्वृतिम् ॥ लभंतां मानुषा नित्यं त्वत्संनिधिमुपागताः ॥ ३८ ॥ ईशत्वं च वशित्वं च सौभाग्यं कालवंचनम् ॥ त्वामाश्रित्य नरास्सर्वे लभंतामरुणाचल ॥ ३९ ॥ सर्वावयवदानेन सर्वव्याधिविनाशनात् ॥ सर्वाभीष्टप्रदानेन दृश्यो भव महीतले ॥४०॥ तथेति वरदं देवमरुणाद्रिपतिं शिवम्॥प्रणम्य कमलानाथः प्रार्थयन्निदमब्रवीत् ॥ ४१ ॥ प्रसीद करुणापूर्ण शोणशैलेश्वर प्रभो ॥ महेश सर्वलोकानां हिताय प्रकटोदय ॥ ४२ ॥ यदाहं त्वामुपाश्रित्य जगद्रक्षणदक्षिणः ॥ श्रीपतित्वमनुप्रातस्तदा भक्ता भवंतु ते ॥ ४३ ॥ नाल्पपुण्यैरुपास्येत त्वद्रूपं महदद्भुतम् ॥ मया च ब्रह्मणा चैवमदृष्टपदशेखरः ॥ ४४ ॥ प्रदक्षिणानमस्कारैर्नृत्यगीतैश्च पूजनैः ॥ त्वामर्चयंति ये मर्त्याः कृतार्थास्ते गतांहसः ॥ ४५ ॥ उपवासैर्व्रतैः सत्रैरुपहारैस्तथार्चनैः ॥ त्वामर्चयंति मनुजाः सार्वभौमा भवंतु ते ॥ ४६ ॥ आरामं मंडपं चापि कूपं विधिविशोधनम् ॥ कुर्वतामरुणाद्रीश संनिधाने पुनर्भव ॥ ४७ ॥ अंगप्रदक्षिणं कुर्वन्नष्टैश्वर्यसमन्वितः ॥ अशेषपातकैः सद्यो विमुक्तो निर्मलाशयः ॥ ४८ ॥ आवामप्यविमुंचंतौ सदा त्वत्पादपंकजम् ॥ ध्यातव्यं मनुजैः सर्वैस्तव संनिधिमागतैः ॥ ४९ ॥ तथास्त्विति वरं दत्त्वा विष्णवे चंद्रशेखरः ॥ अरुणाचलरूपेण प्राप्तः स्थावरलिंगताम् ॥ ५० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तैजसं लिंगमेतद्धि सर्वलोकैककारणम् ॥ अरुणाद्रिरिति ख्यातं दृश्यते वसुधातले ॥ ५१ ॥ युगांतसमये क्षुब्धैश्चतुर्भिरपि सागरैः ॥ अपि निर्मग्नलोकांतैरस्पृष्टांतिकभूतलम् ॥ ५२ ॥ गजप्रमाणैः पृषतैः पूरयंतो जगत्त्रयम् ॥ पुष्कराद्या महामेघा विश्रांता यस्य सानुनि ॥ ५३ ॥ प्रवृत्ते भूतसंहारे प्रकृतौ प्रतिसंचरे ॥ भविष्यत्सर्वबीजानि निषेदुर्यत्र निश्चयम् ॥ ५४ ॥ मया चाहूयमानेभ्यः प्रलयानंतरं पुनः ॥ यत्पादसेविविप्रेभ्यो वेदाध्ययनसंग्रहः ॥ ५५ ॥ सर्वासामपि विद्यानां कलानां शास्त्रसंपदाम् ॥ आगमानां च वेदानां यत्र सत्यव्यवस्थितिः ॥ ५६ ॥ यद्गुहागह्वरांतस्स्था मुनयः शंसितव्रताः ॥ जटिनः संप्रकाशंते कोटिसूर्याग्नितेजसः ॥ ५७ ॥ पंचब्रह्ममयैर्मंत्रैः पंचाक्षरवपुर्धरैः ॥ अकारपीठिकारूढोनादात्मा यः सदाशिवः ॥ ५८ ॥ अष्टभिश्च सदा लिंगैरष्टदिक्पालपूजितः ॥ अष्टमूर्त्तितया योऽयमष्टसिद्धिप्रदायकः ॥ ५९ ॥ यत्र सिद्धास्तथालोकान्स्वान्स्वान्मुक्त्वा सुरेश्वराः॥ अपेक्षंते स्थिता मुक्तिं विहाय कनकाचलम् ॥६०॥ एवं वसुंधरापुण्यपरिपाकसमुच्चयः ॥ अरुणाद्रिरिति ख्यातोभक्तभक्तिवरप्रदः ॥६१॥ कैलासान्मेरुशिखरादागतैर्देवसंचयैः ॥ पूज्यते शोणशैलात्मा शंभुः सर्ववरप्रदः ॥६२॥ इति कमलजवक्रपद्मजातं मुदितमनाः सनको निशम्य सत्या ॥ विरचितविनयः प्रणम्य पुत्रः पितरमपृच्छदशेषवेदसारम् ॥ ६३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां प्रथमे माहेश्वरखण्डेऽरुणाचलमाहात्म्ये पूर्वार्धे ब्रह्मविष्णुस्तुतिपूर्वकं शंकरस्य स्थावरलिंगमाहात्म्यवर्णनंनाम द्वितीयोऽध्यायः ॥ २ ॥ ६७ ॥

॥ सनक उवाच ॥ ॥ भगवन्नरुणाद्रीशमाहात्म्यमिदमद्भुतम् ॥ श्रुतं शिवप्रसादेन दयया ते जगद्गुरोः ॥ १ ॥ आश्चर्यमेतन्माहात्म्यं सर्वपापविनाशनम् ॥ आराधयन्पुनः के वा वरदं शोणपर्वतम् ॥ २ ॥ अनादिरंतरहितः शिवः शोणचलाकृतिः ॥ युवयोस्तपसा देव वरदानाय संस्थितः ॥३॥ सकृत्संकीर्तिते नाम्नि शोणाद्रिरिति मुक्तिदे ॥ सन्निधिः सर्वकामानां जायते चाघनाशनम् ॥४॥ शिवशब्दामृतास्वादः शिवार्चनकथाक्रमः॥ इति तद्वचनं श्रुत्वा देवदेवः पितामहः ॥ ५ ॥ उवाच करुणामूर्तिररुणाद्रीशमानमन् ॥ ॥ ब्रह्मोवाच ॥ ॥ श्रूयतां वत्स पार्वत्याश्चरितं यत्पुरातनम् ॥ ६ ॥ अरुणाद्रीशमाश्रित्य यथा सा निर्वृताभवत् ॥ आससाद महादेवः कदाचित्पार्वतीपतिः ॥ ७ ॥ रत्नसिंहासनं दिव्यं रत्नतोरणसंयुतम् ॥ रत्नपुष्पफलोपेतकल्पद्रुममनोहरम् ॥ ८ ॥ परार्ध्यदृषदास्तीर्णं बद्धमुक्तावितानकम् ॥ विमुक्तपुष्पप्रकरदिव्यधूपोरुसौरभम् ॥ ९ ॥ प्रलंबमालिकाजालनिनदद्भृंगसंकुलम् ॥ दिव्यतूर्यघनारावप्रनृत्यद्गुहवाहनम् ॥ १० ॥ पार्वतीसिंहसंचारपरित्रस्तमहागजम् ॥ अप्सरोभिः प्रनर्त्ताभिर्गा

१ ब्रह्मणा—इ० पा० । २ वचनामिति—शेषः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यंतीभिश्च केवलम् ॥ ११ ॥ आसेवितपुरोरंगं दिक्पालकनिषेवितम् ॥ ऋग्यजुःसामजैर्मंत्रैः स्तुवद्भिर्मुनिपुंगवैः ॥ १२ ॥ ब्रह्मर्षिभिस्तथा देवैः
सिद्धै राजर्षिभिर्वृतम् ॥ गणैश्च विविधाकारैर्भस्मालंकृतविग्रहैः ॥ १३ ॥ रुद्राक्षधारसुभगैरापूर्णं शिवतत्परैः ॥ वीणावेणुमृदंगादितौर्यत्रिकजनि
स्वनैः ॥ १४ ॥ घंटाटंकारसुभगैर्वेदध्वनिविमिश्रितैः ॥ मनोहरं महादिव्यमासनं पार्वतीसखः ॥ १५ ॥ अलंचकार भगवान्भक्तानुग्रहकाम्यया ॥
आस्थाय विमलं रूपं सर्वतेजोमयं शिवम् ॥ १६ ॥ अंबिकासहितः श्रीमान्विजहार दयानिधिः ॥ संगीतेन कथाभेदैर्द्यूतक्रीडाविकल्पनैः ॥ १७ ॥
गणानां विकटैर्नृत्यै रमयामास पार्वतीम् ॥ विसृज्य सकलान्देवानृषींश्चापि सभासदः ॥ १८ ॥ वरान्प्रदाय विविधान्भक्तलोकाय वांछितान् ॥
आगमेषु विचित्रेषु सर्वर्तुकुसुमेषु च ॥ १९ ॥ विजहारोमया सार्द्धं रत्नप्रासादपंक्तिषु ॥ वापिकासु मनोज्ञासु रत्नसोपानपंक्तिषु ॥ २० ॥ केलिप
र्वतशृंगेषु हेमरंभावनांतरे ॥ गंगातरंगशीतेन फुल्लपंकजगंधिना ॥ २१ ॥ वातेन मंदगतिना विहारविहतश्रमः ॥ स्वकामतः स्वयं देवः प्रेय
सीमभ्यनन्दयत् ॥ २२ ॥ रतिरूपां शिवां देवीं सर्वसौभाग्यसुन्दरीम् ॥ कदाचिद्रहसि प्रीता निजाज्ञावशवर्त्तिनम् ॥ २३ ॥ रमणं
जानती मुग्धा पश्चादभ्येत्य सादरम् ॥ कराभ्यां कमलाभाभ्यां त्रिणेत्राणि जगद्गुरोः ॥ २४ ॥ पिदधे लीलया शंभोः किमेतदिति कौतुकात् ॥
चन्द्रादित्याग्निरूपेण पिहितेष्वक्षिषु क्रमात् ॥ २५ ॥ अन्धकारोऽभवत्तत्र चिरकालं भयंकरः ॥ निमिषार्द्धेन देवस्य जग्मुर्वत्सरकोटयः ॥ २६ ॥
देवीलीलासमुत्थेन तमसाभूज्जगत्क्षयः ॥ तमसा पूरितं विश्वमपारेण समन्ततः ॥२७॥ शून्यं ज्योतिः प्रचारेण विनाशं प्रत्यपद्यत ॥ न व्यजृंभंत वि
बुधा न च वेदाश्चकाशिरे ॥२८॥ नापि जीवाः समभवन्नव्यक्तं केवलं स्थितम् ॥ जगतामपि सर्वेषामकाले वीक्ष्य संक्षयम् ॥२९॥ तपसा लब्धस्फू
र्तीनां विचारः समपद्यत ॥ किमेतत्तमसो जन्म भुवनक्षयकारणम् ॥ ३० ॥ भगवानपि सर्वात्मा न नूनं कालमाक्षिपत् ॥ देवी विनोदरूपेण पिधत्ते
पुरजिद्दृशः ॥ ३१ ॥ तेनेदमखिलं जातं निस्तेजो भुवनत्रयम् ॥ अकालतमसा व्याप्ते सकले भुवनत्रये ॥ ३२ ॥ का गतिर्लब्धराज्यानां तपसा
देवजन्मनाम् ॥ न यज्ञाः संप्रवर्तंते न पूज्यन्ते सुरा भुवि ॥ ३३ ॥ इति निश्चित्य मनसा वीक्ष्य ते ज्ञानचक्षुषा ॥ नित्यास्ते सूरयो भक्त्या शंभु
मानम्य तुष्टुवुः ॥ ३४ ॥ नमः सर्वजगत्कर्त्रे शिवाय परमात्मने ॥ मायया शक्तिरूपेण पृथग्भावमुपेयुषे ॥ ३५ ॥ अविनाभाविनी शक्तिराद्यैका ॥२१७॥
शिवरूपिणी ॥ लीलया जगदुत्पत्तिरक्षासंहृतिकारिणी ॥ ३६ ॥ अर्धांगी सा तव देव शिवशक्त्यात्मकं वपुः ॥ एक एव महादेवो न परे त्व
द्विना विभो ॥ ३७ ॥ लीलया तव लोकोयमकाले प्रलयं गतः ॥ करुणा तव निर्व्याजा वर्द्धतां लोकवर्द्धनी ॥ ३८ ॥ भवतो निमिषार्द्धेन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तेजसामुपसंहृतेः ॥ गतान्यनेकवर्षाणि जगतां नाशहेतवे ॥ ३९ ॥ ततः प्रसीद करुणामूर्त्ते काल सदाशिव ॥ विरम प्रणयारब्धादमुष्माल्लोकसं
क्षयात् ॥ ४० ॥ इति तेषां वचः श्रुत्वा भक्तानां सिद्धिशालिनाम् ॥ विसृजाक्षीणि गौरीति करुणामूर्त्तिरब्रवीत् ॥ ४१ ॥ विससर्ज च सा देवी
पिधानं हरचक्षुषाम् ॥ सोमसूर्याग्निरूपाणां प्रकाशमभवज्जगत् ॥ ४२ ॥ कियान्कालो गतश्चेति पृष्टैः सिद्धैश्च वै नतैः ॥ उक्तं त्वन्निमिषार्द्धेन
जग्मुर्वत्सरकोटयः ॥ ४३ ॥ अथ देवः कृपामूर्त्तिरालोक्य विहसन्प्रियाम् ॥ अब्रवीत्परमोदारः परं धर्मार्थसंग्रहम् ॥ ४४ ॥ अविचार्य कृतं मुग्धे
भुवनक्षयकारणात् ॥ अयुक्तमिह पश्यामि जगन्मातुस्तवैव हि ॥ ४५ ॥ अहमप्यखिलाँल्लोकान्संहरिष्यामि संक्षये ॥ प्राप्ते काले त्वया मौग्ध्या
दकाले प्रलयं गताः ॥ ४६ ॥ केयं वा त्वादृशी कुर्यादीदृशं सद्भिर्गर्हितम् ॥ कर्म नर्मण्यपि सदा कृपामूर्तिर्न बाधते ॥ ४७ ॥ इति शम्भोर्वचः
श्रुत्वा धर्मलोपभयाकुला ॥ किं करिष्यामि तच्छांत्या[1] इत्यपृच्छत्स्म तं प्रिया ॥ ४८ ॥ अथ देवः प्रसन्नात्मा व्याजहार दयानिधिः ॥ देव्यास्ते
नानुतापेन भक्त्या च तोषितः शिवः ॥ ४९ ॥ मन्मूर्तेस्तव केयं वा प्रायश्चित्तिरिहोच्यते ॥ अथापि धर्ममार्गोयं त्वयैव परिपाल्यते ॥ ५० ॥
श्रुतिस्मृतिक्रियाकल्पा विद्याश्च विबुधादयः ॥ त्वद्रूपमेतदखिलं महदर्थोस्मि तन्मयः ॥ ५१ ॥ मान्ययाभिन्नया देव्या भाव्यं लोकसिसृक्षया[2] ॥
॥ ५२ ॥ तस्माल्लोकानुरूपं ते प्रायश्चित्तं विधीयते ॥ षड्विधो गदितो धर्मः श्रुतिस्मृतिविचारतः ॥ ५३ ॥ स्वामिना नानुपाल्येत यदि त्याज्योऽनु
जीविभिः ॥ न त्वां विहाय शक्नोमि क्षणमप्यासितुं क्वचित् ॥ ५४ ॥ अहमेव तपः सर्वं करिष्याम्यात्मनि स्थितः ॥ पृथ्वी च सकला भूयात्त
पसा सफला तव ॥ ५५ ॥ त्वत्पादपद्मसंस्पर्शात्त्वत्तपोदर्शनादपि ॥ निरस्यंति[3] स्वसान्निध्याद्दुष्टजातमुपद्रवम् ॥ ५६ ॥ कर्मभूमेस्त्वमाधिक्यहेतवे
पुण्यमाचर ॥ त्वत्तपश्चरणं लोके वीक्ष्य सर्वोपि संततम् ॥ ५७ ॥ धर्मे दृढतरां बुद्धिं निबध्नीयान्न संशयः ॥ कृतार्थयिष्यति महीं दया ते धर्म
पालनैः ॥ ५८ ॥ त्वमेवैतत्सकलं प्रोक्ता वेदैर्देवि सनातनैः ॥ अस्ति कांचीपुरी ख्याता सर्वभूतिसमन्विता ॥ ५९ ॥ या दिवं देवसंपूर्णां प्रत्यक्षयति
भूतले ॥ यत्र कृतं तपः किंचिदनंतफलमुच्यते ॥ ६० ॥ देवाश्च मुनयः सर्वे वासं वांछंति संततम् ॥ तत्र कंपेति विख्याता महापातकनाशिनी ॥
॥६१॥ यत्र स्थितानां मर्त्यानां कम्पन्ते पापकोटयः ॥ तत्र चूतद्रुमश्चैको राजते नित्यपल्लवः ॥६२॥ संपूर्णशीतलच्छायः प्रसूनफलपल्लवैः ॥ तत्र
जप्तं हुतं दत्तमनन्तफलदं भवेत् ॥ ६३ ॥ गणाश्च विविधाकारा डाकिन्यो योगिनीगणाः ॥ परितस्त्वां निषेवंतां विष्णुमुख्यास्तथा पराः ॥६४॥

१ तच्छान्त्यै इति—इति पदच्छेदः । २ लोकानां सिसृक्षा यस्यास्तया भाव्यम्—लोकसर्जनेच्छावत्या—भाव्यम्—इत्यर्थः । ३ जनाः—इति शेषः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अहं च निष्कलो भूत्वा तव मानसपंकजे ॥ सन्निधास्यामि मा भूस्त्वं देवि मद्विरहाकुला ॥ ६५ ॥ इत्युक्ता देवदेवेन देवी कंपांतिकं ययौ ॥ तपः कर्तुं सखीयुक्ता विस्मयाक्रान्तलोचना ॥ ६६ ॥ कंपां च विमलां सिन्धुं मुनिसंघनिषेविताम् ॥ आलोक्य कोमलदलमेकाम्रं दृष्टिवारणम् ॥ ६७ ॥ फलपुष्पसमाकीर्णं कोकिलालापसंकुलम् ॥ प्रससाद पुनर्देवं सस्मार च महेश्वरम् ॥ ६८ ॥ कामाग्निपरिवीतांगी तपःक्षामेव साऽभवत् ॥ अभ्यभाषत सा गौरी विजयां पार्श्ववर्त्तिनीम् ॥ ६९ ॥ कामशोकपरीतांगी पुरारिविरहाकुला ॥ ७० ॥ इममघहरमागतानिशं स्वयमपि पूजयितुं तपोभिरीशम् ॥ अयमभिनवपल्लवप्रसूनः स्मरयति मां स्मरबन्धुरेकचूतः ॥ ७१ ॥ कथमिव विरहः शिवस्य सह्यः क्षुभितधियात्र भृशं मनोभवेन ॥ तदपि च तरुणेंदुचूडपादस्मरणमहौषधमेकमेव दृष्टम् ॥ ७२ ॥ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां प्रथमे माहेश्वरखण्डेऽरुणाचलमाहात्म्ये पूर्वार्द्धे पार्वत्याः शिवनेत्रमीलनेन तमसा क्षुब्धलोकपापभयेन कांच्यां कंपास्थितैकाम्रतले तपश्चर्यार्थमागमनंनाम तृतीयोऽध्यायः ॥ ३ ॥ ॥ छ ॥ ॥ ब्रह्मोवाच ॥ ॥ अथाभ्यधत्त विजया प्रणम्य जगदम्बिकाम् ॥ सांत्वयन्ती स्तुतिशतैरुपायैः शिवदर्शनैः ॥ १ ॥ देवि त्वमविनाभूता सदा देवेन शंभुना ॥ प्राणेश्वरी त्वमेकासि शक्तिस्तस्य परात्मनः ॥ २ ॥ तथा मायां त्वमात्मीयां संदर्शयितुमीहसे ॥ पृथग्भावमिवेशानः प्रकाशयति न स्वयम् ॥ ३ ॥ आदेशं प्रतिगृह्यैव समुपेतासि पार्वति ॥ अलंघनीया सेवाज्ञा शांभवी सर्वदा त्वया ॥ ४ ॥ विधातव्यं तपः प्राप्तं स्थानेस्मिञ्छिवकल्पिते ॥ निवृत्य निखिलान्कामाञ्छंभुमाश्रितया त्वया ॥ ५ ॥ अन्यथापि जगद्रक्षा त्वदधीना जगन्मयि ॥ धर्मसंरक्षणं भूयः शिवेन सहितं तव ॥ ६ ॥ निष्कलं शिवमत्यंतं ध्यायंत्यात्मन्यवस्थितम् ॥ वियोगदुःखं कच्चित्त्वं न स्मरिष्यसि पार्वति ॥ ७ ॥ भक्तानां तव मुख्यानां तवैवाचारसंग्रहः ॥ उपदेशितया लोके प्रथतां धर्मवत्सले ॥ ८ ॥ इति तस्या वचः श्रुत्वा गौरी सुस्थिरमानसा ॥ तपः कर्त्तुं समारेभे कंपानद्यास्तटे शुभे ॥ ९ ॥ विमुच्य विविधा भूषा रुद्राक्षगणभूषिता ॥ विसृज्य दिव्यं वसनं पर्यधाद्वल्कले शुभे ॥ १० ॥ अलकैः सहसा शिलपमनयच्च कपर्दताम् ॥ अलिंपत तनूं सर्वां भस्मना मुक्तकुंकुमा ॥ ११ ॥ मृगेषु कृतसंतोषा शिलोंछीकृतवृत्तिषु ॥ जजाप नियमोपेता शिवपंचाक्षरं परम् ॥ १२ ॥ कृत्वा त्रिषवणं स्नानं कम्पापयसि निर्मले ॥ कृत्वा च सैकतं लिंगं पूजयामास सादरम् ॥ १३ ॥ वृक्षप्ररोपणैर्दानैरशेषातिथिपूजनैः ॥ श्रांतिं हरंती जीवानां देवी धर्ममपालयत् ॥ १४ ॥ ग्रीष्मे पंचाग्निमध्यस्था वर्षासु स्थंडिलेशया ॥ हेमन्ते जलमध्यस्था शिशिरे चाकरोत्तपः ॥ १५ ॥ पुण्यात्मनां महर्षीणां दर्शनार्थमुपेयुषाम् ॥ विस्मयं जनयामास पूजयामास सादरम् ॥ १६ ॥ कदाचित्स्वयमुच्चित्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वनांतात्पल्लवान्वितम् ॥ पुष्पोत्करं विशेषेण शोधितुं समुपाविशत् ॥ १७ ॥ कृत्वा च सैकतं लिंगं कंपारोधसि पावने ॥ संपूजयितुमारेभे न्यासा
वाहनपूर्वकम् ॥ १८ ॥ सूर्यमभ्यर्च्य विधिवद्रक्तैः पुष्पैश्च चंदनैः ॥ पंचावरणसंयुक्तं क्रमादानर्च शंकरम् ॥ १९ ॥ धूपैर्दीपैश्च नैवेद्यैर्भक्तिभावसम
न्वितैः ॥ अपरोक्षितमीशानमालुलोके पुरोहितम् ॥ २० ॥ अथ देवः शिवः साक्षात्संशोधयितुमंबिकाम् ॥ कंपानद्याः प्रवाहेण महता पर्यवेष्ट
यत् ॥ २१ ॥ अतिवृद्धं प्रवाहं तं कम्पायाः समुपस्थितम् ॥ आलोक्य नियमासीनामाहुः सख्यस्तदांबिकाम् ॥२२॥ उत्तिष्ठ देवि बहुलः प्रवाहोऽयं
विजृंभते ॥ दिशां मुखानि संपूर्य तरसा प्लावयिष्यति ॥ २३ ॥ इति तद्वचनं श्रुत्वा ध्यायंती मीलितेक्षणा ॥ उन्मील्य वेगमतुलं नद्यास्तं समवैक्षत
॥ २४ ॥ अचिंतयच्च सा देवी पूजाविघ्नसमाकुला ॥ किं करोमि न शक्नोमि हातुमारब्धमर्चनम् ॥ २५ ॥ श्रेयः प्राप्तुमविघ्नेन प्रायः पुण्यात्मनां
भुवि ॥ घटते धर्मसंयोगो मनोरथफलप्रदः ॥ २६ ॥ सैकतं लिंगमतुलप्रवाहाल्लयमेष्यति ॥ लिंगनाशे विमोक्तव्यः सद्भक्तैः प्राणसंग्रहः ॥ २७ ॥
प्रवाहोऽयं समायाति शिवमायाविनिर्मितः ॥ विशोधयितुमात्मानं भक्तियुक्तं निजे पदे ॥ २८ ॥ आलिंग्य सुदृढं दोर्भ्यामेतल्लिंगमनाकुलम् ॥
अहं वत्स्यामि याताशु सख्यो यूयं विदूरतः ॥ २९ ॥ इत्युक्ता सैकतं लिंगं गाढमालिंग्य सांबिका ॥ न मुमोच प्रवाहेन वेष्ट्यमानापि वेगतः
॥ ३० ॥ स्तनचूचुकनिर्मग्नमुद्रादर्शितलांछनम् ॥ महालिंगं स्वसंयुक्तं प्रणनाम तदादरात् ॥ ३१ ॥ निमीलितेक्षणा ध्याननिष्ठैकहृदया स्थिता ॥
पुलकांचितसर्वांगी सा स्मरंती सदाशिवम् ॥ ३२ ॥ कंपस्वेदपरित्राणलज्जाप्रणयकेलिदात् ॥ क्षणमप्यचला लिंगान्न वियोगमपेक्षते ॥ ३३ ॥ अथ
तामब्रवीत्कापि दैवी वागशरीरिणी ॥ विमुंच बालिके लिंगं प्रवाहोऽयं गतो महान् ॥३४॥ त्वयार्चितमिदं लिंगं सैकतं स्थिरवैभवम् ॥ भविष्यति
महाभागे वरदं सुरपूजितम् ॥ ३५ ॥ तपश्चर्यां तवालोक्य रचितं धर्मपालनम् ॥ लिंगं चैतन्नमस्कृत्य कृतार्थाः संतु मानवाः ॥ ३६ ॥ अहं
हि तैजसं रूपमास्थाय वसुधातले ॥ वसामि चात्र सिद्ध्यर्थमरुणाचलसंज्ञया ॥ ३७ ॥ रुणद्धि सर्वलोकेभ्यः परुषं पापसंचयम् ॥ रुणो न
विद्यते यस्मिन्दृष्टे तेनारुणाचलः ॥ ३८ ॥ ऋषयः सिद्धगंधर्वा महात्मानश्च योगिनः ॥ मुक्त्वा कैलासशिखरं मेरुं चैनमुपासते ॥ ३९ ॥ मदंश
जातयोः पूर्वं युध्यतोर्ब्रह्मकृष्णयोः ॥ अहं मोहमपाकर्त्तुं तेजोरूपो व्यवस्थितः ॥ ४० ॥ ब्रह्मणा हंसरूपेण विष्णुना क्रोडरूपिणा ॥ अदृष्टशेखरपदः
प्रणतो भक्तियोगतः ॥ ४१ ॥ ततः प्रसन्नः प्रत्यक्षस्ताभ्यां वरमभीप्सितम् ॥ प्रादां जगत्त्रयस्यास्य संरक्षायां तु कौशलम् ॥ ४२ ॥ प्रार्थितश्च
पुनस्ताभ्यामरुणाचलसंज्ञया ॥ अनेपि तैजसं रूपमहं स्थावरलिंगताम् ॥ ४३ ॥ गत्वा पृच्छ महाभागं मद्भक्तिं गौतमं मुनिम् ॥ अरुणाचलमा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हात्म्यं श्रुत्वा तत्र तपश्चर ॥ ४४ ॥ तत्र ते दर्शयिष्यामि तैजसं रूपमात्मनः ॥ सर्वपापनिवृत्त्यर्थं सर्वलोकहिताय च ॥ ४५ ॥ इति वाचं
समाकर्ण्य निष्कलात्कथितां शिवात् ॥ तथेति सहसा देवी गंतुं समुपचक्रमे ॥ ४६ ॥ अथ देवानृषीन्सर्वान्पश्चात्सेवार्थमागतान् ॥ अवा
दीदंबिकालोक्य स्नेहपूर्णेन चक्षुषा ॥ ४७ ॥ तिष्ठतात्रैव वै देवा मुनयश्च दृढव्रताः ॥ नियमांश्चाधितिष्ठंतः कंपारोधसि पावने ॥ ४८ ॥
सर्वपापक्षयकरं सर्वसौभाग्यवर्द्धनम् ॥ पूज्यतां सैकतं लिंगं कुचकंकणलांछनम् ॥ ४९ ॥ अहं च निष्कलं रूपमास्थायैतद्दिवानिशम् ॥
आराधयामि मंत्रेण शोणेश्वरं वरप्रदम् ॥ ५० ॥ मत्तपश्चरणाल्लोके मद्धर्मपरिपालनात् ॥ मल्लिंगदर्शनाच्चैव सिध्यंत्विष्टविभूतयः ॥
॥ ५१ ॥ सर्वकामप्रदानेन कामाक्षीमिति कामतः ॥ मां प्रणम्यात्र मद्भक्ता लभंतां वांछितं वरम् ॥ ५२ ॥ अहं हि देवदेवस्य शंभोरव्या
हतो जनः ॥ आदेशं पालयिष्यामि गत्वारुणमहीधरम् ॥ ५३ ॥ तत्र गत्वा तपस्तीव्रं कृत्वा शंभुं प्रसाद्य च ॥ मां तु लब्धवरां यूयं पश्चा
द्रक्ष्यथ संगताः ॥ ५४ ॥ इति सर्वान्विसृज्याशु सद्भक्तान्पादसेविनः ॥ अरुणाद्रिं गता बाला तपसे शंकराज्ञया ॥ ५५ ॥ नित्याभिसे
विताऽकारि सखीभिरभियोगतः ॥ आससादारुणाद्रीशं दिव्यदुंदुभिनादितम् ॥ ५६ ॥ अंतस्तेजोमयं शांतमरुणाचलनायकम् ॥ अप्स
रोनृत्यगीतैश्च पूजितं पुष्पवृष्टिभिः ॥ ५७ ॥ प्रणम्य स्थावरं लिंगं कौतूहलसमन्विता ॥ सिद्धानां योगिनां सार्थमृषीणां चान्ववैक्षत ॥ ५८ ॥
अत्रिर्भृगुर्भरद्वाजः कश्यपश्चांगिरास्तथा ॥ कुत्सश्च गौतमश्चान्ये सिद्धविद्याधरामराः ॥ ५९ ॥ तपः कुर्वंति सततमपेक्षितवराप्तये ॥ गंगाद्याः सरित
श्चान्याः परितः पर्युपासते ॥ ६० ॥ दिव्यलिंगमिदं पूज्यमरुणाद्रिरिति स्मृतम् ॥ वंदस्वेति सुरैः प्रोक्ता प्रणनाम पुनःपुनः ॥ ६१ ॥ अभ्यर्थिता
पुनः सर्वैरातिथ्यार्थे महर्षिभिः ॥ शिवाज्ञया गौतमो मे द्रष्टव्य इति सावदत् ॥ ६२ ॥ अयमत्रर्षिभिर्भक्तैर्निर्दिष्टं तमथाभ्यगात् ॥ स मुनिः शिवभ
क्तानां प्रथमस्तपसां निधिः ॥ ६३ ॥ वनांतरं गतः प्रातः समित्कुशफलाहृतेः[1] ॥ अतिथीनाश्रमं प्राप्तानर्चयेति दृढव्रतान् ॥ ६४ ॥ शिष्याना
दिश्य धर्मात्मा गतश्च विपिनांतरम् ॥ अथ सा गौतमं द्रष्टुमागता पर्णशालिकाम् ॥६५॥ क्व गतो मुनिरित्युक्तैरित आयास्यति क्षणात् ॥ शिष्यै
रभ्यर्थितेत्युक्त्वा फलमूलैस्सुगंधिभिः ॥ ६६ ॥ अभ्युत्थानेनासनेन पाद्येनार्घेण सूनृतैः ॥ वचनैः फलमूलेन सार्चिता शिष्यसंपदा ॥ ६७ ॥
क्षणं क्षमस्वेत्यूचुस्तामन्ये जग्मुस्तदन्तिकम् ॥ देव्यां प्रविष्टमात्रायां महर्षेराश्रमो महान् ॥ ६८ ॥ अभवत्कल्पबहुलो मणिप्रासादसंकुलः ॥ वनां

१ समित्कुशफलाहृतेः—समित्कुशफलाहरणार्थमित्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तरादुपावृत्त्य समित्कुशफलाहरः ॥ ६९ ॥ अपश्यत्स्वाश्रमं दूरे विमानशतशोभितम् ॥ किमेतदिति साश्चर्यं चिंतयन्मुनिपुंगवः ॥ ७० ॥ गौर्याः स
मागमं सर्वमपश्यज्ज्ञानचक्षुषा ॥ शीघ्रं निवर्तमानोऽसौ द्रष्टुं तां लोकमातरम् ॥ ७१ ॥ शिष्यैः शीघ्रचरैर्वृत्तमावेदितमथाशृणोत् ॥ ७२ ॥ अथ मह
र्षिरुपागतकौतुको निजतपःफलमेव तदागमम् ॥ शिवदयाकलितं परिचिन्तयन्नभजदाश्रममाश्रितवत्सलः ॥ ७३ ॥ इति श्रीस्कांदे महापुराण एका
शीतिसाहस्र्यां संहितायां प्रथमे माहेश्वरखण्डेऽरुणाचलमाहात्म्ये पूर्वार्धे पार्वत्याः कंपाया अरुणाचले गौतमाश्रमागमनंनाम चतुर्थोऽध्यायः॥ ४ ॥
॥ ॥ ब्रह्मोवाच ॥ ॥ अरण्याद्गौतमं शांतमुटजद्वार आगतम् ॥ प्रत्याधातुं प्रववृते शिवभक्तिर्जगन्मयी ॥१॥ आलुलोके समायातं गौतमं शिष्यसेवि
तम् ॥ लंबमानशिरःश्मश्रुसम्पूर्णमुखमण्डलम् ॥२॥ जटाभिरतिताम्राभिस्तीर्थस्नानविशुद्धिभिः ॥ न्यस्तरुद्राक्षमणिभिर्ज्वालाभिरिव पावकम् ॥
॥ ३ ॥ भस्मत्रिपुण्ड्रकोपेतविशालनिटिलोज्ज्वलम् ॥ शुक्लयज्ञोपवीतेन पूर्णं रुद्राक्षदामभिः ॥ ४ ॥ दधानं वल्कले रक्ते तपःकृशितविग्रहम् ॥
जपंतं वैदिकान्मंत्रान्रुद्रप्रीतिकरान्बहून् ॥ ५ ॥ शम्भुनावसितोदात्तसारूप्यमिव भाषितम् ॥ तेजोनिधिं दयापूर्णं प्रत्यक्षमिव भास्करम् ॥ ६ ॥
आलोक्य तं महात्मानं वृद्धं शंभुपदाश्रयम् ॥ कृतांजलिपुटा गौरी प्रणन्तुमुपचक्रमे ॥ ७ ॥ कृतांजलिं मुनिर्वीक्ष्य समस्तजगदम्बिकाम् ॥ किमे
तदिति साश्चर्यं वारयन्प्रणनाम सः ॥ ८ ॥ स्वागतं गौरि सुभगे लोकमातर्दयानिधे ॥ व्याजेन भक्तसंरक्षां कर्तुमत्रागतास्यहो ॥ ९ ॥ अहो
मान्ये मान्यमर्थं विज्ञायैव पुरा वयम् ॥ पृथग्भावमिवालंब्य शिष्यादिभिः समागताः ॥ १० ॥ यद्देवि ते न चेत्किंचिन्मायाविलसितन्नि
जम् ॥ ततः प्रपंचसंसिद्धिः कथमेव भविष्यति ॥ ११ ॥ तिष्ठत्वशेषं मे वक्तुं मायाविलसितं तव ॥ न शक्यते यन्निर्णेतुं त्वदीयैश्च कदाचन ॥
॥ १२ ॥ आस्यतां पावने शुद्धे आसने कुशनिर्मिते ॥ गृह्यतां पाद्यमर्घं च दत्तं च विधिवन्मया ॥ १३ ॥ इति शिष्यैः समानीते दर्भांके परमासने ॥
आसीनामंबिकां वृद्धो मुनिरानर्च भक्तिमान् ॥१४॥ निवेद्य सकलां पूजां भक्तिभावसमन्वितः ॥ गौर्या समभ्यनुज्ञातः स्वयमप्यासने स्थितः॥१५॥
उवाच दशनज्योत्स्नापरिधौतदिशामुखः ॥ पुलकांचितसर्वांगः सानंदाश्रु सगद्गदम् ॥ १६ ॥ अहो देवस्य माहात्म्यं शम्भोरमिततेजसः ॥ सद्भक्त
रक्षणाय त्वामादिशद्भक्तवत्सलः ॥ १७ ॥ असिद्धमन्यल्लब्धव्यं किं वान्यत्तव विद्यते ॥ अम्बैतद्भक्तिमाहात्म्यं संदर्शयितुमीश्वरः ॥ १८ ॥ कैला
सशैलवृत्तांतः कंपातटतपःस्थितः ॥ अरुणाद्रिसमादेशः सर्वं ज्ञातमिदं मया ॥ १९ ॥ आगतासि महाभागे भक्ताश्रममिमं स्वयम् ॥ स्नेहेन
करुणामूर्ते कर्त्तव्यमुपदिश्यताम् ॥ २० ॥ इति तस्य वचः श्रुत्वा महर्षेः सर्ववेदिनः ॥ अंबिका प्राह कुतुकात्स्तुवन्ती तं महामुनिम् ॥ २१ ॥ महा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वैभवमेतत्ते देवदेवः स्वयं शिवः ॥ मध्ये तपस्विनां त्वं तु द्रष्टव्य इति चादिशत् ॥ २२ ॥ आगमानां शिवोक्तानां वेदानामपि पारगः ॥ तपसा शंभुभक्तानां त्वमेव शिवसंमतः ॥ २३ ॥ अरुणाचलनाम्नाहं तिष्ठामीत्यब्रवीच्छिवः ॥ अस्याचलस्य माहात्म्यं श्रोतव्यं च भवन्मुखात् ॥ २४ ॥ प्राप्तास्म्यहं तपः कर्तुमरुणाचलसन्निधौ ॥ भवतां दर्शनादेव स्वयमीशः प्रसीदति ॥ २५ ॥ शिवभक्तेन संभाषा शिवसंकीर्त्तनश्रवः ॥ शिवलिंगार्चनं लोके वपुर्ग्रहफलोदयः ॥ २६ ॥ तस्मान्ममैतन्माहात्म्यं श्रोतव्यं भवतो मुखात् ॥ सुव्यक्तमुपदेशेन ज्ञानतोऽसि पिता मम ॥ २७ ॥ इति तस्या वचः श्रुत्वा गौतमस्तपसां निधिः ॥ आचख्यौ गिरिशं ध्यायन्नरुणाचलवैभवम् ॥ २८ ॥ अज्ञातमिव यत्किंचित्पृच्छयते च पुनस्त्वया ॥ अवैमि सर्वविद्यानां माया शैवी त्वमेव सा ॥ २९ ॥ अथवा भक्तवक्त्रेण शिववैभवसंश्रवः ॥ शिक्षणं शांभवं तेषां तव तुष्टेश्च कारणम् ॥ ३० ॥ पठितानां च वेदानां यदावृत्तफलावहम् ॥ वदतां शृण्वतां लोके शिवसंकीर्त्तनं तथा ॥ ३१ ॥ सफलान्यद्य सर्वाणि तपांसि चरितानि मे ॥ यदहं शंभुनादिष्टं माहात्म्यं कीर्त्तये श्रुतम् ॥ ३२ ॥ शिवाशिवप्रसादेन माहात्म्यमिदमद्भुतम् ॥ ३३ ॥ अरुणाचलमाहात्म्यं दुरितक्षयकारणम् ॥ श्रूयतामनवद्यांगि पुरावृत्तमिदं महत् ॥ ३४ ॥ अरुणाद्रिमयं लिंगमाविर्भूतं यथा पुरा ॥ न शक्यते पुनर्वक्तुमशेषं वक्त्रकोटिभिः ॥ ३५ ॥ अरुणाचलमाहात्म्यं ब्रह्मणामपि कोटिभिः॥ ब्रह्मणा विष्णुना पूर्वं सोमभास्करवह्निभिः ॥ ३६ ॥ इन्द्रादिभिश्च दिक्पालैः पूजितश्चाष्टसिद्धये ॥ सिद्धचारणगंधर्वयक्षविद्याधरोरगैः ॥ ३७ ॥ खगैश्च मुनिभिर्दिव्यैः सिद्धयोगिभिरर्चितः ॥ तत्तत्पापनिवृत्त्यर्थं तत्तदीप्सितसिद्धये ॥ ३८ ॥ आराधितोऽयं भगवानरुणाद्रिपतिः शिवः ॥ दृष्टो हरति पापानि सेवितो वांछितप्रदः ॥ ३९ ॥ कीर्तितोपि जनैर्दूरैः शोणाद्रिरिति मुक्तिदः ॥ तेजःस्तंभमयं रूपमरुणाद्रिरिति श्रुतम् ॥ ४० ॥ ध्यायन्तो योगिनश्चित्ते शिवसायुज्यमाप्नुयुः ॥ दत्तं हुतं च यत्किंचिज्जप्तं चान्यत्तपः कृतम् ॥ ४१ ॥ अक्षय्यं भवति प्राप्तमरुणाचलसंनिधौ ॥ पुरा ब्रह्मा च विष्णुश्च शिवतेजोंशसंभवौ ॥४२॥ साहंकारौ युयुधतुः परस्परजिगीषया ॥ तथा तयोर्गर्वशांत्यै योगिध्येयः सदाशिवः ॥ ४३॥ अग्नितेजोमयं रूपमादिमध्यांतवर्जितम् ॥ संप्राप्य तस्थौ तन्मध्ये दिशो दश विभासयन् ॥ ४४ ॥ तेजःस्तंभस्य तस्याथ द्रष्टुमाद्यंतभागयोः ॥ हंसक्रोडतनू कृत्वा जग्मतुर्द्यां रसातलम् ॥ ४५ ॥ तौ विषण्णमुखौ दृष्ट्वा भगवान्करुणानिधिः ॥ आविर्बभूव च तयोर्वरं प्रादादभीप्सि

१ वपुर्ग्रहफलोदयः—देहधारणफलावाप्तिः । २ शांभवं शिक्षणम्—शंभुतत्त्वविषयकं शंभुप्रोक्तं वा— शिक्षणमित्यर्थः । ३ आवृत्तफलावहम्—फलावृत्तिकरम्—वेदपठनफलस्य पुनः पुनः प्रदायकम्—इत्यर्थः । अनन्तवारवेद पठनफलप्रदमिति यावत् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तम् ॥४६॥ तत्प्रार्थितश्च देवेशो यातः स्थावरलिंगताम् ॥ अरुणाद्रिरिति ख्यातः प्रशांतः संप्रकाशते ॥४७॥ दिव्यदुन्दुभिनिर्घोषैरप्सरोगीतनर्त्तनैः॥
पूज्यते तैजसं लिंगं पुष्पवृष्टिशतैः सदा ॥ ४८ ॥ ब्रह्मणामप्यतीतानां पुरा षण्णवतेः प्रभुः ॥ विष्णुनाभिसमुद्भूतो ब्रह्मा लोकान्ससर्ज हि ॥ ४९ ॥
स कदाचित्तपोविघ्नं कर्तुकामेन योगिनाम् ॥ इंद्रेण प्रार्थितो ब्रह्मा ससर्ज ललितां स्त्रियम् ॥ ५० ॥ लावण्यगुणसंपूर्णामालोक्य कमलेक्षणाम् ॥
मुमोह कंदर्पशरैः स विद्धहृदयो विधिः ॥ ५१ ॥ स्प्रष्टुकामं तमालोक्य ब्रह्माणं कमलासनम् ॥ नत्वा प्रदक्षिणव्याजाद्गंतुमैच्छद्वराप्सराः ॥ ५२ ॥
अस्यां प्रदक्षिणां भक्त्या कुर्वाणायां प्रजापतेः ॥ चतसृभ्योऽपि दिग्भ्योऽस्य मुखान्युदभवन्क्षणात् ॥ ५३ ॥ सा बाला पक्षिणी भूत्वा गगनं
समगाहत ॥ पुनश्च खगरूपेण समायांतं समीक्ष्य सा ॥ ५४ ॥ शरणं याचमाना सा शोणाद्रिमिममाश्रयत् ॥ ब्रह्मणा विष्णुना च त्वमदृष्टपदशे
खरः ॥ ५५ ॥ रक्ष मामरुणाद्रीश शरण्य शरणागताम् ॥ इति तस्यां भयार्त्तायां क्रोशंत्यामरुणाचलात् ॥ ५६ ॥ उदभूत्स्थावराल्लिंगाद्व्याधः कश्चि
द्धनुर्द्धरः ॥ संधाय सायकं चापे समेघगगनद्युतिः[1] ॥ ५७ ॥ निषादे पुरतो दृष्टे मोहस्तस्य ननाश हि ॥ ततः प्रसन्नहृदयोतिनम्रः कमलोद्भवः
॥ ५८ ॥ नमश्चक्रे शरण्याय शोणाद्रिपतये तदा ॥ सर्वपापक्षयकृते नमस्तुभ्यं पिनाकिने ॥ ५९ ॥ अरुणाचलरूपाय भक्तवश्याय शंभवे ॥
अजानतां स्वभक्तानामकर्मविनिवर्त्तने ॥ ६० ॥ त्वदन्यः कः प्रभुः कर्तुमशक्यं चापि देहिनाम् ॥ उपसंहर मे देहं तेजसा पापनिश्चयम् ॥ ६१ ॥
अन्यं वा सृज विश्वात्मन्ब्रह्माणं लोकसृष्टये ॥ अथ तस्य वचः श्रुत्वा शिवो दीनस्य वेधसः ॥ ६२ ॥ उवाच करुणामूर्तिर्भूत्वा चंद्रार्द्धशेखरः ॥
दत्तः कालस्तव मया पुरैव न निवर्त्त्यते ॥ ६३ ॥ कं वा रागादयो दोषा न बाधेरन्प्रभुस्थितम्[2] ॥ तस्माद्दूरस्थितोऽप्येतदरुणाचलसंज्ञितम् ॥६४॥
भजस्व तैजसं लिंगं सर्वदोषनिवृत्तये ॥ वाचिकं मानसं पापं कायिकं वा च यद्भवेत् ॥६५॥ विनश्यति क्षणात्सर्वमरुणाचलदर्शनात् ॥ प्रदक्षिणा
नमस्कारैः स्मरणैरर्चनैः स्तवैः ॥६६॥ अरुणाद्रिरयं नृणां सर्वकल्मषनाशनः ॥ कैलासे मेरुशृंगे वा स्वस्थानेषु कलाद्रिषु ॥६७॥ संदृश्यः कश्चिदे
वाहमरुणाद्रिरयं स्वयम् ॥ यच्छृंगदर्शनान्नृणां चक्षुर्लाभेन केवलम् ॥ ६८ ॥ भवेत्सर्वाघनाशश्च लाभश्च ज्ञानचक्षुषः ॥ मदंशसंभवो ब्रह्मा स्वना
म्ना ब्रह्मपुष्करे ॥ ६९ ॥ अत्र स्नातः पुरा ब्रह्मन्मोहोऽगाज्जगतीपतेः ॥ स्नात्वा त्वं ब्रह्मतीर्थे मां समभ्यर्च्य कृतांजलिः ॥ ७० ॥ मौनी प्रदक्षिणं कृत्वा
विश्वात्मन्भव विज्वरः ॥७१॥ इति वचनमुदीर्य विश्वनाथं स्थितमरुणाचलरूपतो महेशम् ॥ अथ सरसि निमज्य पद्मजन्मा दुरितहरं समपूजयत्क

१ समेघगगनद्युतिः—मेघविशिष्टाकाशसमानश्यामवर्णः । सः—इति पदच्छेदो वा । २ प्रभुस्थितम्—प्रभुत्वाधिकारस्थितम्—इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मेण ॥७२॥ इममरुणगिरीशमेष वेधा यमनियमादिविशुद्धचित्तयोगः ॥ स्फुटतरमभिपूज्य सोपचारं गतदुरितोऽथ जगाम चाधिपत्यम् ॥७३॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां प्रथमे माहेश्वरखण्डेऽरुणाचलमाहात्म्ये पूर्वार्धे ब्रह्मपुष्करमाहात्म्यवर्णनंनाम पञ्चमोऽध्यायः॥५॥ ॥ ॥ गौतम उवाच ॥ ॥ पुरा नारायणः कल्पे शयानः सलिलार्णवे ॥ शेषपर्यंकशयने कदाचिन्नैव बुध्यत[1] ॥ १ ॥ तमसा पूरितं विश्वमपज्ञातमलक्षणम् ॥ वीक्ष्य कल्पावसानेऽपि विषेदुर्नित्यसूरयः॥२॥ अहो कष्टमिदं रूपं तमसा विश्वमोहनम् ॥ येन कल्पावसानेपि विष्णुर्नाद्यापि बुध्यते ॥३॥ ज्योतिषः पुरुषं पूर्णमपश्यंतं सुरा अपि ॥ कथं वा तमसः शांतिं लभेरन्परिभाविनः ॥४॥इति निश्चित्य मनसा देवदेवमुमापतिम् ॥ चिंतयामासुरात्मस्थं तेजोराशिं निरंजनम् ॥ ५ ॥ ततः प्रसन्नो भगवांस्तेजोराशिर्महेश्वरः ॥ विश्वावनाय विज्ञप्तः प्रणतैर्नित्यसूरिभिः ॥ ६ ॥ ततस्तेजोमयाच्छंभोः स्फुलिंगांशुसमुद्भवाः ॥ उदस्तंभंत देवानां त्रयस्त्रिंशच्च कोटयः ॥७॥ बोधितः सकलैर्देवैः समुत्थाय रमापतिः॥प्रभातं वीक्ष्य सकलं मनस्येवमचिन्तयत् ॥ ८ ॥ मया तमसि उद्रेकादकाले शयनं कृतम् ॥ प्रबोधाय परं ज्योतिः स्वयं दृष्टः सदाशिवः ॥ ९ ॥ जगदुत्पत्तिकृत्यानि स्वयं कर्तुं व्यवस्यति ॥ किं मयात्र पुनः कार्यं ब्रह्मणा वा स्वयंभुवा॥१०॥धिङ्मां स्थितमनात्मज्ञं निद्रया हतचेतसम् ॥ अथवा सर्वकर्तारं शरणं यामि शंकरम् ॥११॥ सर्वदोषप्रशमनं सर्वाभीष्टफलप्रदम् ॥ पवित्रमल्पपुण्यानां दुर्लभं शंभुदर्शनम् ॥१२॥ चिंतयन्नेवमात्मस्थं ज्योतिर्लिंगं सदाशिवम् ॥ प्रणनाम हरिर्भक्त्या देवमष्टांगतो मुहुः॥१३॥ विश्वस्रष्टारमीशानं तुष्टाव दुरितच्छिदम् ॥ अथ तेजोमयः शंभुः शरण्यः शरणागतम् ॥१४॥ अनुगृह्य कटाक्षैस्तं समुत्तिष्ठेत्यभाषत ॥ उत्थाय करुणापूर्णं शंभुं चंद्रार्द्धशेखरम् ॥१५॥नमस्त्रिभुवनेशाय त्रिमूर्तिगुणधारिणे ॥ त्रिदेववपुषे तुभ्यं त्रिदशे त्रिपुरद्रुहे ॥ १६ ॥ त्वमेव जगतामीशो निजांशैर्देवतामयैः ॥ कार्यकारणरूपेण करोषि स्वेच्छया क्रियाः ॥ १७ ॥ मां नियुज्य जगद्धृतौ परिमोह्य च मायया ॥ न दोषमुत संकल्पं विहातुमपि नेच्छसि ॥ १८ ॥ किं करोमि जगन्मूर्त्तौ न्यस्तभारोऽस्म्यहं त्वयि ॥ न दोषमीहसे नूनमकालशयनेन माम् ॥ १९ ॥ हर शम्भो हरेरार्तिमनुतापं समीक्ष्य सः ॥ आदिदेश हरः श्रीमान्प्रायश्चित्तं हरेरिदम् ॥ २० ॥ अरुणाचलरूपेण तिष्ठामि वसुधातले ॥ तस्य दर्शनमात्रेण भविता ते तमःक्षयः ॥ २१ ॥ पूर्वस्मै विष्णवे तत्र वरो दत्तो मया पुराः॥ तदेव तैजसं लिंगमरुणाचलसंज्ञितम् ॥ २२ ॥ तेजोमयमिदं रूपं प्रशांतं लोकरक्षणात् ॥ यदग्निमयमव्यक्तमपारगुणवैभवम् ॥ २३ ॥ नदीनां निर्झराणां च मेवमुक्तां

१ अडभाव आर्षः । अबुध्यत ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भसामपि ॥ अंतर्ज्योतिर्मयत्वेन लयस्तत्रैव दृश्यते ॥ २४ ॥ अंधानां दृष्टिलाभेन पंगूनां पादसंचरैः ॥ अपुत्राणां च पुत्राप्त्या मूकानां वाक्प्रवृ
त्तिभिः ॥ २५ ॥ सर्वसिद्धिप्रदानेन सर्वव्याधिविमोचनैः ॥ सर्वपापप्रशमनैर्यत्सर्ववरदं स्थितम् ॥ २६ ॥ इत्युक्त्वांतर्दधे शम्भुर्हरिश्चैवारुणाच
लम् ॥ आगत्य तप आस्थाय शोणाचलमुपास्त च ॥ २७ ॥ तमद्रिं परितो दृष्ट्वा सुरान्काननसंश्रयान् ॥ ऋषीणामाश्रमान्पुण्यान्स्थापयामास
वै हरिः ॥ वेदान्सांगोपनिषदान्समंतान्मूर्तिधारिणः ॥ २८ ॥ ससर्ज दिव्यरूपाणां शतमप्सरसां कुलम् ॥ नृत्यैर्गीतैश्च वादित्रैस्सेवध्वमिति चा
दिशत् ॥ २९ ॥ स्नात्वा ब्रह्मसरस्यस्मिन्विष्णुः कमललोचनः ॥ प्रदक्षिणं चकारामुमरुणाद्रिं समर्चितम् ॥ ३० ॥ अपापः सर्वलोकानामाधि
पत्यं च लब्धवान् ॥ रमया सहितो नित्यमभिरूपसुरूपया ॥ ३१ ॥ भास्करस्तेजसां राशिरसुरैरपि पीडितः ॥ ब्रह्मोपदेशादानर्च भक्त्यारुण
गिरीश्वरम् ॥ ३२ ॥ निमज्य विमले तीर्थे पावने ब्रह्मनिर्मिते ॥ प्रदक्षिणं चकारैनमरुणाद्रिं स्वयंप्रभुम् ॥ ३३ ॥ अशेषदैत्यविजयं लब्ध्वा मेरु
प्रदक्षिणम् ॥ लेभे च परमं तेजः परतेजःप्रणाशनम् ॥ ३४ ॥ दक्षशापानलाक्रांतस्सोमः शिववचोबलात् ॥ अरुणाचलमभ्यर्च्य लब्धरूपोऽभव
त्पुनः ॥ ३५ ॥ अग्निर्ब्रह्मर्षिशापेन यक्ष्मरोगप्रपीडितः ॥ अपूतोऽपि पवित्रोऽभूदरुणाचलसेवया ॥ ३६ ॥ शक्रो वृत्रं बलं पाकं नमुचिं जृंभमु
द्धतम् ॥ शिवलब्धवरान्दैत्यान्पुरा हत्वा जगत्पतीन् ॥ ३७ ॥ पातकैश्च परिक्षीणस्तथा लोकांतमाश्रितः ॥ शम्भुं प्रसाद्य तपसा शिवेन परिचोदितः
॥ ३८ ॥ अरुणाद्रिं समभ्यर्च्य विपापोऽभूत्सुराधिपः ॥ इष्ट्वा च हयमेधेन प्रीणयामास शंकरम् ॥ ३९ ॥ लब्ध्वा चेन्द्रपदं शक्रः शतमप्सरसां
कुलम् ॥ सेवार्थमादिशच्छ्रीमान्दिव्यदुंदुभिसेवया ॥ ४० ॥ पुष्पमेघान्समादिश्य दिव्याभिः पुष्पवृष्टिभिः ॥ समर्चयति शोणाद्रिं दिवि
नित्यं च वंदते ॥ ४१ ॥ शेषोऽपि शोणशैलेशं समभ्यर्च्य शिवाज्ञया ॥ अभजत्कामरूपत्वं महीमण्डलधारकः ॥ ४२ ॥ अन्ये नागाश्च
गन्धर्वाः सिद्धाश्चाप्सरसां गणाः ॥ दिक्पालाश्च तमभ्यर्च्य लेभिरेऽपेक्षितान्वरान् ॥ ४३ ॥ देवैरशेषैर्दैत्यादीञ्जेतुकामैः समुद्यतैः ॥ प्रार्थि
तः सर्वतोऽभीष्टवरदोऽरुणभूधरः ॥ ४४ ॥ त्वष्ट्रा विरचिताकार आदित्यस्तेजसा तपन् ॥ ग्रहनाथस्तु शोणाद्रिं विलंघयितुमुद्यतः ॥ ४५ ॥
रथवाहाः पुनस्तस्य शक्तिहीनाः श्रमं गताः ॥ सोऽपि श्रिया विहीनश्च जातः शोणाद्रितेजसा ॥ ४६ ॥ नाशक्नोच्च दिवं गन्तुं सर्वगत्यांशुमा
लिनः ॥ स तु ब्रह्मोपदेशेन समाराध्यारुणाचलम् ॥ ४७ ॥ प्रीत्या तस्माद्विभोर्लेभे मार्गं व्योम्नो हयाञ्छुभान् ॥ ततः प्रभृति तिग्मांशुः स हि
शोणाख्यपर्वतम् ॥ ४८ ॥ न लंघयति किं त्वस्य प्रदक्षिणपरिक्रमैः ॥ दक्षयागपरिध्वस्ता हीनांगास्त्रिदशाः पुरा ॥ ४९ ॥ अरुणाचलमाराध्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

नवान्यंगानि लेभिरे ॥ पूषा दन्तं शिखी हस्तं भगो नेत्रं त्वखंडितम् ॥ ५० ॥ घ्राणं वाणी च लेभे सा शोणाचलनिषेवणात् ॥ भार्गवः क्षीणने
त्रस्स विष्णुहस्तकुशाग्रतः ॥ ५१ ॥ बलिदत्तावनीदानजलधारानिरोधतः ॥ स तु शोणाचलं गत्वा तपः कृत्वातिदुष्करम् ॥ ५२ ॥ लेभे नेत्रं
च पूतात्मा भास्कराख्ये गिरौ स्थितः ॥ अरुणाचलनाथस्य सेवया सूर्यसारथिः ॥ ५३ ॥ प्रतर्दनाख्यो नृपतिर्ग्रहीतुं देवकन्यकाम् ॥ अरुणा
द्रिपतेर्गानं कुर्वतीं सादरोऽभवत् ॥ ५४ ॥ क्षणात्कपिमुखो जातो मंत्रिभिश्चोदितो नृपः ॥ प्रत्यर्प्य तां पुनश्चान्याः प्रादादरुणभूभृते ॥ ५५ ॥
ततश्चारुमुखो जातः प्रसादादरुणेशितुः ॥ सायुज्यमस्मै सकलं दत्तवान्भक्तिभावतः ॥५६॥ अरुणाचलनाथस्य संनिधौ ज्ञानदुर्बलः ॥ गंधर्वः पुष्प
काख्यस्तु भक्तिहीनो ह्यगात्पुरा ॥ ५७ ॥ ततो व्याघ्रमुखं दृष्ट्वा गंधर्वपरिचारकाः ॥ किमेतदिति साश्चर्यं पप्रच्छुस्ते परस्परम् ॥ ५८ ॥ अथ नारद
निर्दिष्टमवज्ञाफलमात्मनः ॥ बुद्ध्वारुणाद्रिं संपूज्य पुनश्च सुमुखोऽभवत् ॥ ५९ ॥ शिवभूमिरियं ख्याता परितो योजनद्वयम् ॥ मुक्तिस्तत्र प्रमी
तानां कदापि विलयो न हि ॥ ६० ॥ सप्तर्षयः पुरा भूमौ शापदोषसमन्विताः ॥ सिषेविरेरुणाद्रिं वै नाथो ज्ञात्वा विनिश्चयम् ॥ ६१ ॥ शाप
मोक्षं ददौ श्रीमान्सप्तर्षीणां महात्मनाम् ॥ सप्तर्षिभिः कृतं तीर्थं सर्वपापविनाशनम् ॥ ६२ ॥ शोणाचलस्य निकटे दृश्यते पावनं शुभम् ॥
पंगुर्मुनिः शोणशैलात्पादौ लब्धुं समागतः ॥ ६३ ॥ अंतर्हितप्रार्थितार्थौ दारुहस्तपुटे वहन् ॥ जानुचंक्रमणव्यग्रः शोणनद्यास्तटं गतः ॥ ६४ ॥
दारुहस्तपुटे तीर्थे निचिक्षेप पिपासतः ॥ जानुचंक्रमणे तस्मिन्धूर्तस्तोयं पिपासति ॥ ६५ ॥ अथ शोणाचलं प्राप्तः कथं वा दारुहस्तकः ॥
किमेतादिति तं पृच्छन्नाधावत्कलितत्परः ॥ ६६ ॥ लब्धपादश्च सहसा जगाम च निजालयम् ॥ नाद्राक्षीत्पुरुषं तत्र दारुहस्तौ पुरोगमौ ॥ ६७ ॥
स्वयं गृहीत्वा चालोक्य ववंदेऽरुणपर्वतम् ॥ ननंद लब्धचरणो लब्धरूपो महामुनिः ॥ ६८ ॥ विस्मयोत्फुल्लनयनैः शिवभक्तैर्महात्मभिः ॥ पूजितो
लब्धपादः सञ्जगाम च यथागतम् ॥ ६९ ॥ वाली शक्रसुतः श्रीमाञ्छृंगादुदयभूभृतः ॥ अस्ताचलस्य शिखरं प्रतिगन्तुं समुद्यतः ॥ ७० ॥
आलुलोकेऽरुणगिरिं मध्ये देवनमस्कृतम् ॥ ऊर्ध्वं गंतुं समुद्युक्तः क्षीणवीर्योऽपतद्भुवि ॥ ७१ ॥ पित्रा शक्रेण संगम्य चोदितः शोणपर्व
तम् ॥ लिंगं तैजसमभ्यर्च्य लब्धवीर्योऽभवत्पुनः ॥ ७२ ॥ नलः पूर्वं समभ्यर्च्य स्वसृष्टा मानवप्रियाः ॥ पालयामास धर्मात्मा नीतिसारस
मन्वितः ॥ ७३ ॥ इलः प्रविश्य सहसा गौरीवनमखंडितम् ॥ स्त्रीभावं समनुप्राप्तः पप्रच्छ स्वं पुरोधसम् ॥ ७४ ॥ वशिष्ठेन समादिष्टः शोणाद्रिं
समपूजयत् ॥ तपसाराध्य देवेशं पुनः पुंस्त्वमुपागतः ॥ ७५ ॥ सोमोपदेशाद्भक्त्याथ सस्मारारुणपर्वतम् ॥ ईशानुग्रहतो लेभे शापमोक्षं तपो

CC-0. In Public Domain. Digitization by eGangotri

धिकः ॥ ७६ ॥ लेभे च परमं स्थानमप्राप्यममरैरपि ॥ भरतो मृगशावस्य स्मरणादायुषोऽत्यये ॥ ७७ ॥ न मुक्तिं प्राप योगेन मृगजन्मनि
संगतः ॥ पत्नीविरहजं दुःखं प्राप्तवानमितं हरिः ॥ ७८ ॥ पुनर्भृगूपदेशेन शोणाद्रिमिममर्चयन् ॥ अवतारेषु सर्वेषु सर्वदुःखान्यपाकरोत् ॥ ७९ ॥
सरस्वती च सावित्री श्रीर्भूमिः सरितस्तथा ॥ अभ्यर्च्य शोणशैलेशमापदो निरतारिषुः ॥ ८० ॥ भास्करः पूर्वदिग्भागे विश्वामित्रस्तु दक्षिणे ॥
पश्चिमे वरुणो भागे त्रिशूलं चोत्तराश्रयम् ॥ ८१ ॥ योजनद्वयपर्यंते सीमाः शैलेषु संस्थिताः ॥ चतस्रो देवतास्त्वेताः सेवंते शोणपर्वतम् ॥ ८२ ॥
स्थिताः सीमावसानेषु शोणाद्रीशमवस्थितम् ॥ नमंति देवाश्चत्वारः शिवं शोणाचलाकृतिम् ॥ ८३ ॥ अस्योत्तरस्मिञ्छिखरे दृश्यते वटभूरुहः ॥
सिद्धवेषः सदैवास्ते यस्य मूले महेश्वरः ॥ ८४ ॥ यस्य च्छायातिमहती सर्वदा मण्डलाकृतिः ॥ लक्ष्यते विस्मयोपेतैः सर्वदा देवमानवैः ॥ ८५ ॥
अष्टभिः परितो लिंगैरष्टदिक्पालपूजितैः ॥ अष्टासु संस्थितैर्दिक्षु शोभते ह्युपसेवितः ॥ ८६ ॥ नृपाणां शम्भुभक्तानां शंकराज्ञानुपालिनाम् ॥
अत्रैव महदास्थानमादिदेवेन निर्मितम् ॥ ८७ ॥ बकुलश्च महांस्तत्र सदार्थितफलप्रदः ॥ आगमार्थविदा मूले वामदेवेन सेव्यते ॥ ८८ ॥ अग
स्त्यश्च वशिष्ठश्च संपूज्यारुणभूधरम् ॥ संस्थाप्य लिंगे विमले तेपाते तादृशं तपः ॥८९॥ हिरण्यगर्भतनयः पुरा शोणनदः पुमान् ॥ अत्र तीव्रं तप
स्तप्त्वा गंगाभिमुखगोऽभवत् ॥ ९० ॥ अत्र शोणनदी पुण्या प्रवहत्यमलोदका ॥ वेणा च पुण्यतटिनी परितः सेवतेऽचलम् ॥ ९१ ॥ वायव्याश्च
दिशो भागे वायुतीर्थं च शोभते ॥ तत्र स्नात्वा मरुत्पूर्वं जगत्प्राणत्वमाप्तवान् ॥ ९२ ॥ उत्तरेऽस्य गिरेस्तीर्थं सुवर्णकमलोज्ज्वलम् ॥ दिव्यसौगंधिका
कीर्णं हंसभृंगमनोहरम् ॥ ९३ ॥ कौबेरं तीर्थमैशान्यामैशान्यं तीर्थमुत्तमम् ॥ ९४ ॥ तस्यैव पश्चिमे भागे विष्णुः कमललोचनः ॥ स्नात्वा विष्णु
त्वमभजत्कमलालालिताकृतिः ॥ ९५ ॥ नवग्रहाः पुरा तत्र स्नात्वा ग्रहपदं गताः ॥ नवग्रहप्रसादश्च जायते तत्र मज्जताम् ॥ ९६ ॥ दुर्गा विनायक
स्कन्दौ क्षेत्रपालः सरस्वती ॥ रक्षंति परितस्तीर्थं ब्राह्मयमेतदनन्तरम् ॥ ९७ ॥ गंगा च यमुना चैव गोदावरी सरस्वती ॥ नर्मदासिन्धुकावेर्यः
शोणः शोर्णनदी च सा ॥ ९८ ॥ एता गूढा निषेवंते पूर्वाद्याशासु संततम् ॥ नश्यंत्यः सकलं पापमात्मक्षेत्रसमुद्भवम् ॥ ९९ ॥ अन्याश्च सरितो
दिव्याः पार्थिव्यश्च शुभोदकाः ॥ उदजृंभंत सहसा शोणाद्रीशप्रसादतः ॥ १०० ॥ आगस्त्यं दक्षिणे भागे तीर्थं महदुदाहृतम् ॥ सर्वभाषार्थसंसि
द्धिर्जायते तत्र मज्जताम् ॥ १०१ ॥ अत्रागस्त्यः समागत्य स्नात्वा मुनिगणावृतः ॥ अभ्यर्चयति शोणाद्रिं मासि भाद्रपदे सदा ॥ १०२ ॥ वाशि
ष्ठमुत्तरे भागे तीर्थं दिव्यं शुभोदयम् ॥ सर्ववेदार्थसंसिद्धिर्जायते तत्र मज्जनात् ॥ १०३ ॥ अत्र मेरोः समागत्य वशिष्ठो भगवानृषिः ॥ करोत्या

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्वयुजे मासि शोणाद्रीशनिषेवणम् ॥ १०४ ॥ गंगानाम महत्तीर्थं पूर्वोत्तरदिशि स्थितम् ॥ तत्र स्नानाद्भवेन्नृणां सर्वपातकनाशनम् ॥ १०५ ॥ गंगाद्याः सरितः सर्वाः कार्त्तिके मासि संगताः ॥ अत्रारुणाद्रिनाथस्य सेवां कुर्वंति सादरम् ॥ १०६ ॥ ब्राह्मंनाम महातीर्थमरुणाद्रीशसन्निधौ ॥ तस्योपसंगमात्सद्यो ब्रह्महत्यादि नश्यति ॥ १०७ ॥ मार्गे मासि समागत्य ब्रह्मलोकात्पितामहः ॥ स्नात्वा तत्प्रत्यहं देवमर्चयत्यरुणाचलम् ॥ ॥ १०८ ॥ पौषे मासि समागत्य स्नात्वा तीर्थे निजैः सुरैः ॥ महेन्द्रः शोणशैलेशमभ्यर्चयति शंकरम् ॥ १०९ ॥ शैवंनाम महातीर्थं संनिधौ तत्र वर्तते ॥ रुद्रो ब्रह्मकपालेन सह तत्र न्यमज्जत ॥ ११० ॥ अत्र शम्भुर्गणैः सार्द्धं माघे मासि प्रसीदति ॥ प्रायश्चित्तानि सर्वाणि नृणां सफलयन्भुवि ॥ १११ ॥ आग्नेयमग्निदिग्भागे तीर्थ सौभाग्यदायकम् ॥ अग्निरत्र पुरा स्नात्वा स्वाहया संगतः सुखी ॥ ११२ ॥ अनंगोपि स्मरः स्नात्वा फाल्गुने मासि संगतः ॥ अभ्यर्च्य शोणशैलेशमभूत्सर्वसुखाधिपः ॥ ११३ ॥ दिशि दक्षिणपूर्वस्यां वैष्णवं तीर्थमद्भुतम् ॥ ब्रह्मर्षयः सदा तत्र वसंति कृतकौतुकाः ॥ ११४ ॥ चैत्रे मासि समागत्य विष्णुस्तत्र रमापतिः ॥ स्नात्वाभ्यर्च्यारुणाद्रीशमभवल्लोकनायकः ॥ ११५ ॥ सौरंनाम महातीर्थं कौबेरदिशि जृंभितम् ॥ सर्वरोगोपशांतिश्च जायते तत्र मज्जनात् ॥ ॥ ११६ ॥ वैशाखे मासि दिनकृत्स्नात्वात्रेशं निषेवते ॥ वालखिल्यैः समं श्रीमान्वेदैश्च सह संगतः ॥ ११७ ॥ आश्विनं पावनं तीर्थमीशब्रह्मोत्तरे स्थितम् ॥ आप्लुतौ भिषजौ दस्रौ पूतावत्र निमज्जनात् ॥ ११८ ॥ अत्राश्विनौ समागत्य स्नात्वाभ्यर्च्य च शंकरम् ॥ दक्षिणे शोणशैलस्य निकटे वर्त्तते शुभम् ॥ ११९ ॥ कामदं मोक्षदं चैव तीर्थं पांडवसंज्ञितम् ॥ पुरा हि पांडवास्तत्र मज्जनात्क्षितिनायकाः ॥ १२० ॥ अत्र धात्री समागत्य सर्वौषधिफलान्विता ॥ ज्येष्ठे मासि समं देवैरार्चयच्चारुणाचलम् ॥ १२१ ॥ आषाढे मासि संत्यक्ता विश्वेदेवा महाबलाः ॥ अभ्यर्च्य शोणशैलेशमागच्छन्मखराध्यताम् ॥ १२२ ॥ वैश्वदेवं महातीर्थं सोमसूर्योत्तराश्रयम् ॥ विश्वाधिपत्यमतुलं लभ्यते तत्र मज्जनात् ॥ ॥ १२३ ॥ परितो लक्ष्यते तीर्थं पूर्वस्यां दिशि शोभने ॥ अत्र लक्ष्मीः पुरा स्नात्वा लेभे पुरुषमुत्तमम् ॥ १२४ ॥ उत्तरस्यां दिशि पुरा पुण्या स्कंदनदी स्थिता ॥ अत्र स्नात्वा पुरा स्कंदः संप्राप्तो विपुलं बलम् ॥ १२५ ॥ पश्चिमस्यां दिशि ख्याता परा कुंभनदी शुभा ॥ अगस्त्यः कुंभकः कुंभस्तत्र नित्यं व्यवस्थितः ॥ १२६ ॥ गंगा च मूलभागस्था यमुना गगने स्थिता ॥ सोमोद्भवा शिरोभागे सेवंते शोणपर्वतम् ॥ १२७ ॥ बहून्यपि च तीर्थानि संभूतानि समंततः ॥ तेषां भेदान्पुरा वेत्तुं मार्कंडेयस्तु नाशकत् ॥ १२८ ॥ तपोभिर्बहुभिस्सोयं शोणाद्रीशमतोषयत् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रार्थयामास च वरं प्रीतात्तस्मान्मुनीश्वरः ॥ १२९ ॥ ॥ मार्कंडेय उवाच ॥ ॥ भगवन्नरुणाद्रीश तीर्थभेदाः सहस्रशः ॥ प्रख्याताश्च प्रकाशंते
दुर्बोधास्त्वल्पचेतसाम् ॥ १३० ॥ कथमेकत्र सांनिध्यं लभेरन्भुवि मानवाः ॥ अपर्याप्तश्च भवति पृथगेषां निषेवणे ॥१३१॥ अंतर्निगूढतेजास्त्वं
गत्वा यस्सकलैः सुरैः ॥ आराध्यसे कुरु तथा शोणाद्रिस्पर्शभीरुभिः ॥ १३२ ॥ अहं च शंभुमभ्यर्च्य तपसारुणपर्वतम् ॥ सर्वलोकोपकारार्थं सूक्ष्म
लिंगमपूजयम् ॥ १३३ ॥ विश्वकर्मकृतं दिव्यं विमानं विविधोत्सवम् ॥ संकल्प्य सकलान्भोगान्नित्यानजनयत्पुनः ॥ १३४ ॥ धर्मशास्त्राणि
विविधान्यवापुर्मुनिपुंगवाः ॥ शिवकार्याणि सर्वाणि चक्रुर्भक्तिसमन्विताः ॥ १३५ ॥ मया च शंभुमभ्यर्च्य कृताग्न्याहुतिसंभवाः ॥ सप्त कन्या
वरारोहाः पूजार्थं विनियोजिताः ॥ १३६ ॥ हतशत्रुगणैर्भूपैर्लब्धराज्यैः पुरा नृपैः ॥ प्रत्येकं विविधैर्भोगैः शोणशैलाधिपोर्चितः ॥ १३७ ॥ इद
मनुभववैभवं विचित्रं दुरितहरं शिवलिंगमद्रिरूपम् ॥ अमलमनभिगम्यनामधेयं वरमरुणाद्रिनायकं भजस्व ॥ १३८ ॥ अवनतजनरक्षणोचि
तस्य स्मरणनिराकृतविश्वकल्मषस्य ॥ भजनममितपुण्यराशियोगादरुणगिरेः कृतिनः परं लभस्व ॥ १३९ ॥ इति श्रीस्कांदे महापुराण एकाशीति
साहस्र्यां संहितायां प्रथमे माहेश्वरखण्डेऽरुणाचलमाहात्म्ये पूर्वार्धेऽरुणाचलस्थविविधतीर्थमाहात्म्यवर्णनंनाम षष्ठोऽध्यायः ॥ ६ ॥ छ ॥ ॥ पार्वत्यु
वाच ॥ ॥ कथमग्निमयं लिंगमभिगम्यमभूद्भुवि ॥ प्राणिनामपि सर्वेषामुपशांतिं कथं गतः ॥ १ ॥ तीर्थानामुद्भवः पुण्यात्कथं चारुणपर्वतात् ॥
उपसंहृतसर्वांगः कथं वा वद मेऽचलः ॥२॥ ॥ गौतम उवाच ॥ ॥ कृते त्वग्निमयः शैलस्त्रेतायां मणिपर्वतः ॥ द्वापरे हाटकगिरिः कलौ मरकताचलः
॥ ३ ॥ बहुयोजनपर्यंतं कृते वह्निमये स्थिते ॥ बहिः प्रदक्षिणं चक्रुः प्रशाम्यति महर्षयः ॥४॥ शनैः शांतोरुणाद्रीशः श्रीमानभ्यर्थितः सुरैः ॥ लोक
गुप्त्यर्थमत्यर्थमुपशांतोऽरुणाचलः ॥५॥ अथ गौरी मुनिं प्राह कथं शांतोऽरुणाचलः ॥ कथं वा प्रार्थयामासुर्देवेशं त्रिदशा इमम् ॥६॥ इति तस्या वचः
श्रुत्वा गौतमस्त्वभ्यभाषत ॥ प्रशस्य भक्तिमतुलां तस्यास्तत्त्वार्थवेदिनीम् ॥ ७ ॥ ॥ गौतम उवाच ॥ ॥ अग्निरूपं पुरा शैलमासादयितुमक्षमाः ॥
पुरा सुराः स्तुतिं चक्रुरभ्यर्च्य क्रतुसंभवैः ॥ ८ ॥ भगवन्नरुणाद्रीश सर्वलोकहितावह ॥ अग्निरूपोऽपि संशांतः प्रकाशस्व महीतले ॥ ९ ॥ असौ
यस्ताम्रो अरुण उत बभ्रुः सुमंगलः ॥ इति त्वां सकला वेदाः स्तुवंति शिवविग्रहम् ॥ १० ॥ नमस्ताम्रायारुणाय शिवाय परमात्मने ॥ वेदवेद्य
स्वरूपाय सोमाय सुखरूपिणे ॥ ११ ॥ त्वद्रूपमखिलं देव जगदेतच्चराचरम् ॥ निधानमिव ते रूपं देवानामिदमीक्ष्यते ॥१२॥ वर्षतां च पयोदानां
निर्झराणां च भूयसाम् ॥ सलिलोपायसंहारो युक्तस्ते युगसंक्षये ॥१३॥ अग्नेरापः समुद्भूतास्त्वत्तो हि परमात्मनः ॥ विश्वसृष्टिं वितन्वंति विचित्रगुण

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वैभवात् ॥ १४ ॥ शीतो भव महादेव शोणाचल कृपानिधे ॥ सर्वेषामपि जीवानामभिगम्यो भव प्रभो ॥ १५ ॥ इति स्तुतः सुरैः सर्वैरानतैर्भक्तव
त्सलः ॥ सद्यः शीतलतां गच्छन्नभिगम्योऽभवत्प्रभुः ॥ १६ ॥ प्रावर्त्तंत पुनर्नद्यो निर्झराश्च बहूदकाः ॥ वर्षतामपि मेघानां न जग्राह जलं बहु ॥
॥ १७ ॥ तथापि तरुणार्कोद्यत्कालाग्निशतकोटिभिः ॥ समानदीप्तिरभजज्जीवानामभिगम्यताम् ॥१८॥ विसृज्य विश्वसलिलं नदीश्च रसविक्षरैः ॥
संपूर्यः सकलैर्देवः सर्वदा संप्रकाशते ॥ १९ ॥ तीर्थानि तानि तान्यासन्परितः प्रार्थनावशात् ॥ दिक्पालानां सुराणां च महर्षीणां महात्मनाम् ॥
॥ २० ॥ ॥ ब्रह्मोवाच ॥ ॥ इति तस्य वचः श्रुत्वा गौरी कुतुकसंयुता ॥ तीर्थानामुद्भवं सर्वं श्रोतुं समुपचक्रमे ॥ २१ ॥ ॥ पार्वत्युवाच ॥ ॥
कानि तीर्थानि जातानि शोणाद्रेर्लोकगुप्तये ॥ भगवन्ब्रूहि सकलं तीर्थानामुद्भवं मम ॥ २२ ॥ इति तस्या वचः शृण्वन्गिरीशात्संश्रुतं पुरा ॥
तीर्थानामुद्भवं सर्वं व्याख्यातुमुपचक्रमे ॥ २३ ॥ ॥ गौतम उवाच ॥ ॥ ऐन्द्रंनाम महातीर्थमिंद्रभागे समुत्थितम् ॥ तत्र स्नात्वा पुरा शक्रो
ब्रह्महत्यां व्यपोहयत् ॥ २४ ॥ ब्रह्मतीर्थं पुनर्दिव्यं वह्निकोणे समुत्थितम् ॥ परस्त्रीसंगमात्पापं वह्निः स्नात्वात्र चात्यजत् ॥ २५ ॥ याम्यंनाम
महातीर्थं यमभागे विजृंभते ॥ अत्र स्नात्वा यमोऽत्याक्षीद्भयं ब्रह्मास्त्रसंभवम् ॥ २६ ॥ नैर्ऋतं तु महातीर्थं नैर्ऋत्यां दिशि शोभते ॥ भूतवेतालवि
जयं तत्र स्नात्वर्षयो गताः ॥ २७ ॥ पश्चिमे वारुणं तीर्थं दिग्भागे च प्रकाशते ॥ शल्यकोशं पुरा लेभे स्नात्वात्र वरुणो निजम् ॥ २८ ॥ वायव्ये
वायवीयं च तीर्थमत्र प्रकाशते ॥ तत्र स्नात्वा ययौ वायुर्जगत्प्राणत्ववैभवम् ॥ २९ ॥ उत्तरे चात्र दिग्भागे सोमतीर्थमिति स्मृतम् ॥ तत्र स्नात्वा
पुरा सोमो यक्ष्मरोगादमुंचत ॥ ३० ॥ ऐशाने चात्र दिग्भागे विष्णुतीर्थमिति स्मृतम् ॥ तत्र स्नात्वा पुरा विष्णुः श्रिया च सह संगतः ॥ ३१ ॥
मार्कंडेयः पुरा देवि प्रार्थयामास शंकरम् ॥ सदाशिव महादेव देवदेव जगत्पते ॥ ३२ ॥ बहूनामिह तीर्थानामेकत्र स्यात्समागमः ॥
केनोपायेन भगवन्कृपया वद शंकर ॥ ३३ ॥ इति तस्य वचः श्रुत्वा देवदेव उमापतिः ॥ उपायं दर्शयामास मुनये प्रीतमानसः
॥ ३४ ॥ ॥ महेश्वर उवाच ॥ ॥ सदोपहारवेलायां सर्वतीर्थसमुच्चयः ॥ सन्निधिं मम संप्राप्तः सेवते गूढरूपतः ॥ ३५ ॥ नान्यद
न्वेषणीयं ते तीर्थमत्र महामुने ॥ ममोपहारवेलायां दृश्यते तीर्थसंचयः ॥ ३६ ॥ तस्माद्भक्तियुतैर्नित्यं सर्वतीर्थसमागमः ॥ मुनिभिश्च
सुरैः सर्वैर्नैवेद्यांते विलोक्यताम् ॥ ३७ ॥ इति देवि पुरा देवो मार्कंडेयाय शंकरः ॥ उपादिशदमेयात्मा तीर्थसंदर्शनक्रमम् ॥ ३८ ॥ ॥ गौतम
उवाच ॥ ॥ सर्वाण्यपि च पुण्यानि तीर्थानि शिवसन्निधौ ॥ सदोपहारवेलायां दृश्यानि किल मानवैः ॥ ३९ ॥ व्रतं तीर्थं तपो वेदा यज्ञाश्च

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नियमादयः ॥ योगाश्च शोणशैलेशदर्शनाद्दृष्टसंचराः ॥ ४० ॥ निशम्य वाक्यं मुनिपुंगवस्य प्रसेदुषी पर्वतराजपुत्री ॥ अवोचदत्यद्भुतमेतदत्र त्वयोपदिष्टं भुवि तीर्थजालम् ॥ ४१ ॥ अहं कृतार्था तपतां वरिष्ठ त्वत्संगमात्संप्रति तीर्थजालम् ॥ प्राप्ता नमस्तेऽस्तु तपोविशेषं शिवोपि मेऽत्रादिशदेव कर्तुम् ॥ ४२ ॥ कथं गिरीशः पुनरत्र देवः स्फुरन्महावह्निवपुर्धरोऽपि ॥ प्रशांतरूपः परमेश्वरोऽयमभ्यर्चनीयो भुवि मर्त्यवर्गैः ॥ ४३ ॥ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां प्रथमे माहेश्वरखण्डे ऽरुणाचलमाहात्म्ये पूर्वार्धेऽरुणाचलस्थविविधतीर्थ वर्णनंनाम सप्तमोऽध्यायः ॥ ७ ॥ ॥ छ ॥ ॥ गौतम उवाच ॥ ॥ शृणु देवि पुरावृत्तं कैलासे मेरुधन्विना[1] ॥ आदिष्टस्तीर्थयात्रार्थमहं लिंगानि वीक्षितुम् ॥ १ ॥ रुद्रक्षेत्रे च केदारे तथा बदरिकाश्रमे ॥ काश्यां पुण्येषु देशेषु तथा श्रीपर्वते शिवे ॥ २ ॥ कांचीमुख्यासु पुण्यासु पुरीष्वप्यगमं तदा ॥ ऋषिभिर्विबुधैः सार्धैर्गणैर्योगिभिरुत्तमैः ॥ ३ ॥ स्थापितानि च लिंगानि स्वयंभूनि च दृष्टवान् ॥ तत्रतत्र महाभागे तीर्थानि शिवसन्निधौ ॥ ४ ॥ सेवमानः सशिष्योऽहं पर्यटन्पृथिवीमिमाम् ॥ एवं तीर्थानि सर्वाणि गाहमानो व्रतान्वितः ॥ ५ ॥ तपांसि यज्ञकर्माणि कुर्वन्भूमिं समाचरन् ॥ शिवस्मरणसंयुक्तः शिवलिंगानि सन्नमन् ॥ ६ ॥ सर्वाणि भुवि पुण्यानि देशमेतमुपाश्रयम् ॥ अत्र देवं महादेवमविकेशं त्रियंबकम् ॥ ७ ॥ अरुणाद्रिरितिख्यातं पर्वतं लिंगमैक्षिषि ॥ अत्र सिद्धा महात्मानो मुनयश्च दृढव्रताः ॥ ८ ॥ कंदमूलफलाहारा दृष्टाः शोणाद्रिसेवकाः ॥ अस्तौषमादिमं लिंगमरुणाद्रिमयं महत् ॥९॥ आद्येन ब्रह्मणा पूर्वमर्चितं दिव्यचक्षुषा ॥ असौ यस्ताम्रो अरुण उत बभ्रुः सुमंगलः ॥ ॥ १० ॥ इति वेदाः स्तुवंति त्वामरुणाद्रीश संततम् ॥ नमस्ताम्राय चारुणाय शिवाय परमात्मने ॥ ११ ॥ सर्ववेदस्वरूपाय नित्यायामृतमूर्त्तये ॥ कालाय करुणार्द्राय दृष्टिपेयामृताब्धये ॥१२॥ भक्तवात्सल्यपूर्णाय पुण्याय पुरभेदिने ॥ दर्शनं तव देवेश सर्वधर्मफलप्रदम् ॥१३॥ भुवि लब्धवतां भूयो नान्यत्कार्यं तपः क्वचित् ॥ भवता कर्मभूरेषा वर्ततेद्य निरोधिता ॥ १४ ॥ प्रार्थयंते स्वयं वासान्देवाश्चात्र त्वदाश्रये ॥ कालसंग्रहसंजातं फलं लब्धं मयाधुना ॥ १५ ॥ अन्यत्कृतं तपः सर्वं त्वद्दर्शनफलं मम ॥ ईदृशं तव देवेश रूपमत्यद्भुतोदयम् ॥ १६ ॥ एकमद्रिमयं लिंगं न क्वचिद्दृष्टवान्भुवि ॥ सूर्येंद्वग्निसुसंयुक्तकोणत्रयमनोहरम् ॥ १७ ॥ त्रिमूर्तिरूप देवेश दृश्यते ते वपुर्महत् ॥ शक्तित्रयस्वरूपेण कालत्रयविधानकम् ॥ १८ ॥ त्रिवेदात्मं त्रिकोणांगं लिंगं ते दृष्टमद्भुतम् ॥ त्रैलोक्यरक्षणार्थाय विततं रूपमास्थितः ॥ १९ ॥ दृश्यते वसुधाभागे शोणाद्रिरिति विश्रुतः ॥ अजान

१ मेरुधन्विना—शंकरेण ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तां च मर्त्यानां समालोकनमात्रतः ॥ २० ॥ वितरत्यखिलान्भोगानव्याजकरुणानिधिः ॥ अर्चया रहितं लिंगमन्यं शून्यमुदाहृतम् ॥ २१ ॥
इदं तु पूजितं देवैः सदा सर्ववरप्रदम् ॥ प्रसीद करुणापूर्ण शोणाचल महेश्वर ॥ २२ ॥ त्रायस्व भवभीतं मां प्रपन्नं भक्तवत्सल ॥ द्रष्टव्यं द्रष्टमेतत्ते
रूपमत्यद्भुतं महत् ॥ २३ ॥ कृतार्थय कृपासिंधो शरण्य शरणागतम् ॥ इति संस्तूयमानो मे देवः शोणाचलेश्वरः ॥ २४ ॥ अदर्शयत्परं रूपं दिव्य
मेहीत्युवाच माम् ॥ प्रीतोऽस्मि भवतः स्तोत्रैर्भक्त्या च परया भृशम् ॥ २५ ॥ अत्रैव भवतो वासो नित्यमस्तु ममांतिके ॥ संपूजय च मां
नित्यं भुवि भोगैः सनातनैः ॥ २६ ॥ तपसा तप सर्वेषां महत्त्वमिह दर्शय ॥ पूर्वं कैलासशिखरे वसंतं त्वां तपोन्वितम् ॥ २७ ॥ आदिशं
पृथिवीभागे शोणाद्रौ पूजयेति माम् ॥ सप्तर्षिपूजिता पूजा दिवि मे संप्रकाशते ॥ २८ ॥ तथा नित्यार्चनायुक्तः प्रकाशय धरा-
तले ॥ सर्वेषामेव जंतूनां हिताय त्वं तपोऽधिकः ॥ २९ ॥ भुवि मां पूजयार्चाभिरागमोक्ताभिरादरात् ॥ दिव्या मम महापूजा दृश्या हि
दिवि दैवतैः ॥ ३० ॥ प्रकाशनीया भवता पार्थिवी वसुधातले ॥ माहात्म्यं पूर्वमेवोक्तं यथाहमरुणाचलः ॥ ३१ ॥ स्थितो वसुं-
धराभागे मया प्रीतं तु ते भृशम् ॥ ये वा संपूजयंति स्म पूर्वं मां सुकृताधिकाः ॥ ३२ ॥ तेभ्यस्त्वमधिको भूमौ प्रकाशस्व शिवार्चनम् ॥
इत्यादिष्टो हि देवेशं प्रणम्य भवभक्तिमान् ॥ ३३ ॥ अन्वपृच्छं दयापूर्णमरुणाद्रीशमानमन् ॥ अनासाद्यमिदं रूपमग्निरूपं महेश्वरम् ॥ ३४ ॥
कथमद्यार्चयाम्येनं मर्त्यलोकोचितार्चनैः ॥ आदेशमिममन्वर्थं कथं वा कल्पयाम्यहम् ॥ ३५ ॥ उपायमादिश श्रीमन्नभिगम्यो यथा भवान् ॥
इति विज्ञापितो देवः श्रीमाञ्छोणाचलेश्वरः ॥ ३६ ॥ अन्वग्रहीदशेषात्मा प्रणतं मां दयानिधिः ॥ अहं तु सूक्ष्मलिंगानि प्रकाशिष्ये महीतले ॥
॥ ३७ ॥ आगमोक्तक्रियाभेदैः पूजां मे प्रतिपादय ॥ पंचावरणसंयुक्तं लिंगं मे सूक्ष्ममद्भुतम् ॥ ३८ ॥ अरुणाद्रीश्वराभिख्यं संपूजय तपोबलैः ॥
इत्यादिश्य महादेवः स्वयंभु विमलं महत् ॥ ३९ ॥ रूपं मे दर्शयामास सूक्ष्मलिंगात्मना शिवः ॥ आलोक्य विमलं लिंगं सूक्ष्मं तत्स्वयमुच्छ्रि-
तम् ॥ ४० ॥ अशेषाऽऽवरणोपेतं कृतार्थहृदयोऽभवम् ॥ पुनर्व्यज्ञापयं देवं शम्भुमाश्रितवत्सलम् ॥ ४१ ॥ आगमोक्तप्रकाराणामनिरीक्ष्यत्वमाग-
तम् ॥ कथं तु तव रूपाणां नामभेदान्वियोजितान् ॥ ४२ ॥ जानीयां करुणामूर्त्ते स्वयमीश्वर मत्प्रभो ॥ पूजकास्तव के वा स्युर्मंदिरं वात्र कीदृ-
शम् ॥ ४३ ॥ कथं स्तोत्रं कथं पूजा के वात्र परिचारकाः ॥ स्थानरक्षा कथं वा स्यात्के वात्मपरिरक्षकाः ॥ ४४ ॥ कथं वा मानुषी पूजा नित्या
संवर्धते तव ॥ आगता बहवो देवाः श्रद्धेयं मनुजैः कथम् ॥ ४५ ॥ प्रसीद परमेशान स्वयमाज्ञापयाखिलम् ॥ एवं विज्ञापितो देवः शोणाद्रीशः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वयं प्रभुः ॥ ४६ ॥ आज्ञापयत्तदा देवो विश्वकर्माणमागतम् ॥ सृज त्वं नगरं दिव्यमरुणाख्यं गुणाधिकम् ॥ ४७ ॥ मंदिरं मम दिव्यं च महा मणिगणोज्ज्वलम् ॥ तौर्यत्रिकं सपर्यांगं तन्मे सर्वं प्रकल्पय ॥ ४८ ॥ आबभाषे शिवः श्रीमान्नामभेदार्चनक्रमम् ॥ व्रतं च करुणामूर्त्तिररुणाद्रीश्वरः शिवः ॥ ४९ ॥ शृणु तन्मे च ये सृष्टा पूजार्थं परिचारकाः ॥ शृणु गौतम सर्वं मे मानुषं पूजनक्रमम् ॥ ५० ॥ य एष सर्वलोकानां क्षेमाय प्रथते भुवि ॥ इदं तेजोमयं लिंगमतुलं दृश्यते महत् ॥५१॥ अरुणाद्रीश्वराभिख्यं पूज्यतां सततं त्वया ॥ शक्तिर्ममोत्तरे भागे पूज्या नित्योदया मुदा ॥ ॥ ५२ ॥ दधती स्थानमाहात्म्यमपीतकुचनामिका ॥ अरुणाचलराजोयमविभागः प्रियान्वितः ॥ ५३ ॥ उत्सवार्थो महादेवः पूज्यो भोगसुता वृतः ॥ बोधदो भक्तलोकस्य दत्ताभयकरः शिवः ॥ ५४ ॥ सारंगं परशुं बिभ्रत्प्रसन्नवदनः सदा ॥ उमास्कन्देश्वरः शम्भुर्दिव्यरत्नविभूषणः ॥ ॥ ५५ ॥ आभया भासयँल्लोकानविकुण्ठश्रियान्वितः ॥ शक्तेरुत्सवभद्रे च संपूज्या सुंदरेश्वरी ॥ ५६ ॥ सर्वभूषणसंयुक्ता शृङ्गाररसवर्द्धनी ॥ बालो गणपतिः पूज्यः पुरस्ताद्भूतिनन्दनः ॥ ५७ ॥ मदंतिकमलंकुर्वन्भक्ष्यैर्भोज्यैर्बहूदयैः ॥ मत्पार्श्वमविमुंचंती शोणरेखांचितेक्षणा ॥ ५८ ॥ उत्सवार्था परा शक्तिरंतिकस्थैव पूज्यताम् ॥ मुखरांघ्रिपतिः श्रीमान्नृत्यंस्तांडवपण्डितः ॥ ५९ ॥ उत्सवार्थं समभ्यर्च्यश्चक्षुरग्रेऽमृतेश्वरः ॥ शक्तिश्चान्या महाभागा संपूज्या भूविनायका ॥ ६० ॥ द्वारे नन्दी महाकालः पुरस्तात्सूर्यसंनिभः ॥ भक्तानां मम सर्वेषां पूजनं चापि कल्प्यताम् ॥ ६१ ॥ दक्षिणे मातरः पूज्या विघ्नशास्तृसमन्विताः ॥ संपूज्यो नैर्ऋते कोणे विघ्ननाशो विनायकाः ॥ ६२ ॥ स्कन्दः शक्तिधरश्चैवैशानकोणे समर्च्यताम् ॥ लिंगानि च मनोज्ञानि पूजनीयान्यनन्तरम् ॥ ६३ ॥ मंदिरं मम संपूज्य दक्षिणामूर्ति दक्षिणम् ॥ पश्चिमे विष्णुरूपांकमग्निरूपान्वितं तथा ॥ ६४ ॥ उत्तरे ब्रह्मरूपांकं पूर्वे सारंगभूयुतम् ॥ सर्वदेवगुणोपेतं सर्वशक्तिसमन्वितम् ॥ ॥ ६५ ॥ अपीतकुचनाथायाः सर्वशक्तिसमन्वितम् ॥ मंदिरं गुरु संपूज्य दिक्पालकवधूवृतम् ॥ ६६ ॥ मंदिरस्यावनार्थाय देवीवैभवनायकाः ॥ ॥ ६७ ॥ क्षेत्रपालं तु संपूज्य सर्वावरणसंयुतम् ॥ पुत्रस्य त्राणमायाता पूज्यारुणगिरीश्वरी ॥ ६८ ॥ काली बहुविधाश्चान्या देवता विधिपालकाः ॥ उत्सवा विविधाः कल्प्याः प्रतिमासमहोदयाः ॥ ६९ ॥ सृजस्व कन्यका दिव्याः शिवदेवार्हणे रताः ॥ नृत्तगीतकलाभिज्ञा रूपसौभाग्यसंयुताः ॥ ॥ ७० ॥ चारुविभ्रमसंयुक्ताः कामदा नित्यपावनाः ॥ शिष्यानादिश वेदज्ञान्सदाचारसमुज्ज्वलान् ॥ ७१ ॥ दिव्योपचारसंसिद्ध्यै सुभगाञ्छुद्धचे

१ चक्षुष्येवामृतेश्वरः—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तसः ॥ दीक्षितान्विमलाञ्छुद्धाञ्छैवागमविशारदान् ॥ ७२ ॥ शैवाचारप्रसिद्ध्यर्थमादिशाभ्यर्चने मम ॥ मार्द्दलाञ्छांखिकान्वैणांस्तालिकान्वेणु
वादकान् ॥ ७३ ॥ शौल्बिकान्सृज सद्विद्यांश्चतुर्विद्याविशारदान् ॥ क्षत्रियान्विविधान्वैश्याञ्छूद्रांश्च शिवसंमतान् ॥ ७४ ॥ चत्वारश्च मठाः कल्प्या
श्चतुर्दिक्तीर्थवासिनाम् ॥ मुनीनां शिवभक्तानां निराशानां निवासतः[1] ॥ ७५॥ तेषु स्थिता मुनींद्रा मे रक्षंतु शिवपूजनम् ॥ भिक्षमाणाः पुनः शैवा
भक्ताः पाशुपता अपि ॥ ७६ ॥ पालयंतु सदान्ये च युक्ताः कापालिका अपि ॥ सर्वेषां जायमानानां जातानां संभविष्यताम् ॥ ७७ ॥ अव्या
हताज्ञमारक्ष्यमिदं स्थानं महीभृताम् ॥ बकुलश्च महानत्र दृश्यते दिव्यभूरुहः ॥ ७८ ॥ अत्र भक्ता वितन्वन्तु शिवकार्यविनिश्चयम् ॥ अत्र मे
दीयते द्रव्यमप्रेक्षितपराप्तये ॥ ७९ ॥ यत्तदक्षय्यफलदमारक्ष्यं शिवसेवकैः ॥ भक्तैर्विज्ञापितं चार्थं श्रोष्यामि पुरतः स्थितैः ॥ ८० ॥ सर्वं संपादयि
ष्यामि तेषां चित्तानुकूलकम् ॥ अपराधसहस्राणि क्षंस्ये मां स्वर्चतामहम् ॥ ८१ ॥ आगमोक्ता च पूजेयं मानुषी निर्मिता यतः ॥ ग्रहीष्ये तामहं
सर्वामर्चां सर्वागमोदिताम् ॥ ८२ ॥ संकल्पितं भवेत्कर्म प्रीतिकृन्मम सेवकैः ॥ आगमार्थानशेषांस्त्वमालोक्य समयोचितान् ॥ ८३ ॥
विधायाभ्यर्चनाभेदाँल्लोकरक्षाकृते मुने ॥ कर्तव्या महती पूजा पौर्णमास्यां तु सादरम् ॥ ८४ ॥ सत्राणि विविधान्यत्र कर्तव्यानि सहस्रशः ॥
विविधानि च दानानि शक्त्या चैवास्य सन्निधौ ॥ ८५ ॥ अव्युच्छिन्नप्रदीपस्य दातारो मम सन्निधौ ॥ तेजोमयमिदं रूपं मम यांति न संशयः॥
॥ ८६ ॥ जलजं तरुजं पुष्पं कक्षजं च लतोद्भवम् ॥ ददते ये च भक्त्या मे ते भविष्यंति भूभृतः ॥ ८७ ॥ तेषां पुरोगतः साक्षादहं जेष्यामि
विद्विषः ॥ यस्य यस्य तु देशस्य यो यो राजा तपोधिकः ॥ ८८ ॥ तत्तत्समर्द्धितं रम्यं संभवं ददतेऽत्र मे ॥ मत्संनिधिमुपागत्य दुरात्मानोऽपि
भूमिपाः ॥ ८९ ॥ शिवभक्ता भृशं पूर्णा भविष्यंति न संशयः ॥ ९० ॥ इति शंभुमुखोत्थितं वचः समुपश्रुत्य विधूतकल्मषः ॥ अहमानतवान्व्य
जिज्ञपं कुतुकाच्छोणगिरीश्वरं शिवम् ॥ ९१ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां प्रथमे माहेश्वरखण्डेऽरुणाचलमाहात्म्ये
पूर्वार्धेऽरुणेश्वराराधनामाहात्म्यवर्णनंनामाष्टमोऽध्यायः ॥ ८ ॥छ॥ ॥ गौतम उवाच ॥ ॥ भगवन्नरुणाद्रीश नामधेयानि ते भृशम् ॥ विशेषाच्छ्रो
तुमिच्छामि स्थानेऽस्मिन्सुरपूजिते ॥ १ ॥ ॥ महेश्वर उवाच ॥ ॥ नामानि शृणु मे ब्रह्मन्मुख्यानि द्विजसत्तम ॥ दुर्लभान्यल्पपुण्यानां काम
दानि सदा भुवि ॥ २ ॥ शोणाद्रीशोऽरुणाद्रीशो देवाधीशो जनप्रियः ॥ प्रपन्नरक्षको धीरः शिवसेवकवर्धकः ॥ ३ ॥ अक्षिपेयामृतेशानः स्त्रीपुं

१ निवासतः—निवासाय—सार्वविभक्तिकस्तसिः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भावप्रदायकः ॥ भक्तविज्ञप्तिसंधाता दीनबंदिविमोचकः ॥ ४ ॥ मुखरांघ्रिपतिः श्रीमान्मृडो मृगमदेश्वरः ॥ भक्तप्रेक्षणकृत्साक्षी भक्त
दोषनिवर्त्तकः ॥ ५ ॥ ज्ञानसंबंधनाथश्च श्रीहलाहलसुंदकः ॥ आहवैश्वर्यदाता च स्मर्तृसर्वाघनाशनः ॥ ६ ॥ व्यत्यस्तनृत्यद्ध्वजधृ
क्सकांतिर्निर्नटनेश्वरः ॥ सामप्रियः कलिध्वंसी वेदमूर्तिर्निरंजनः ॥ ७ ॥ जगन्नाथो महादेवस्त्रिनेत्रस्त्रिपुरांतकः ॥ भक्तापरा
धसोढा च योगीशो भोगनायकः ॥ ८ ॥ बालमूर्त्तिः क्षमारूपी धर्मरक्षो वृषध्वजः ॥ हरो गिरीश्वरो भर्गश्चंद्ररेखावतंसकः ॥ ९ ॥ स्मरांतकों
ऽधकरिपुः सिद्धराजो दिगंबरः ॥ आगमप्रिय ईशानो भस्मरुद्राक्षलांछनः ॥ १० ॥ श्रीपतिः शंकरः स्रष्टा सर्वविद्येश्वरोऽनघः ॥ गंगाधरः क्रतुध्वं
सो विमलो नागभूषणः ॥ ११ ॥ अरुणो बहुरूपश्च विरूपाक्षोऽक्षराकृतिः ॥ अनादिरंतरहितः शिवकामः स्वयंप्रभुः ॥ १२ ॥ सच्चिदानंदरूपश्च
सर्वात्मा जीवधारकः ॥ स्त्रीसंगवामसुभगो विधिर्विहितसुंदरः ॥ १३ ॥ ज्ञानप्रदो मुक्तिदश्च भक्तवांछितदायकः ॥ आश्चर्यवैभवः कामी निरवद्यो
निधिप्रदः ॥ १४ ॥ शूली पशुपतिः शंभुः स्वयंभुर्गिरिशो मृडः ॥ एतानि मम मुख्यानि नामान्यत्र महामुने ॥ १५ ॥ अन्यानि दिव्यनामानि
पुराणोक्तानि संस्मर ॥ प्रदक्षिणेन मां नित्यं विशेषात्त्वं समर्चय ॥ १६ ॥ प्रदक्षिणप्रियो यस्मादहं शोणाचलाकृतिः ॥ इत्याज्ञप्तो महादेवमर्चयन्न
रुणाचलम् ॥ अविमुंचन्निहावासं कृतवानहमद्रिजे ॥ १७ ॥ ॥ गौर्युवाच ॥ ॥ भगवन्सर्वधर्मज्ञ गौतमार्य्य मुनीश्वर ॥ प्रदक्षिणस्य माहात्म्यं ब्रूहि
मे शोणभूभृतः ॥ १८ ॥ कस्मिन्काले कथं कार्यं कैर्वा पूर्वं प्रदक्षिणम् ॥ कृतं शोणाद्रिनाथस्य प्राप्तमिष्टं परं पदम् ॥ १९ ॥ ॥ ब्रह्मोवाच ॥ ॥
इति पृष्टो मुनिः प्राह गौतमः शैलकन्यकाम् ॥ श्रूयतां देवि माहात्म्यमादिशन्मे महेश्वरः ॥ २० ॥ ॥ महादेव उवाच ॥ ॥ अहं हि
शोणशैलात्मा प्रकाशो वसुधातले ॥ २१ ॥ परितो मां सुराः सर्वे वर्तंते मुनिभिः सह ॥ २२ ॥ यानि कानि च पापानि जन्मांतरकृतानि च ॥
तानि तानि विनश्यंति प्रदक्षिणपदे पदे ॥ २३ ॥ अश्वमेधसहस्राणि वाजपेयायुतानि च ॥ सिद्ध्यंति सर्वतीर्थानि प्रदक्षिणपदे पदे ॥ २४ ॥
अपि प्रहीणस्य समस्तलक्षणैः क्रियाविहीनस्य निकृष्टजन्मनः ॥ प्रदक्षिणीकृत्य शशांकशेखरं प्रयास्यतः कस्य न सिद्धिरग्रतः ॥ २५ ॥ समस्त
तीर्थाभिगमेषु पुण्यं समस्तयज्ञागमधर्मजातम् ॥ अवाप्यते शोणमहीधरस्य प्रदक्षिणाप्रक्रमणेन सत्यम् ॥ २६ ॥ पदेनैकेन भूलोकं द्वितीयेनांतरि
क्षकम् ॥ तृतीयेन दिवं मर्त्यो जयत्यस्य प्रदक्षिणे ॥ २७ ॥ एकेन मानसं पापं द्वितीयेन तु वाचिकम् ॥ कायिकं तु तृतीयेन पदेन क्षीयते नृणाम्
॥ २८ ॥ पातकानि च सर्वाणि पदेनैकेन मार्जयेत् ॥ द्वितीयेन तपः सर्वं प्राप्नोत्यस्य प्रदक्षिणात् ॥२९॥ पर्णशाला महर्षीणां सिद्धानां च सहस्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शः ॥ सुराणां च तथाऽऽवासा विद्यंतेत्र सहस्रशः ॥ ३० ॥ अत्र सिद्धः पुनर्नित्यं वसाम्यग्रे सुरार्चितः॥ ममांतरे गुहा दिव्या ध्यातव्या भोगसंयुता
॥ ३१ ॥ अग्निस्तंभमयं रूपमरुणाद्रिरिति श्रुतम् ॥ ध्यायँल्लिंगं मम बृहत्मन्दं कुर्यात्प्रदक्षिणम् ॥ ३२ ॥ अष्टमूर्तिमयं लिंगमिदं यैस्तैजसं भृशम् ॥
ध्यात्वा प्रदक्षिणं कुर्वन्पातकानि विनिर्दहेत् ॥३३॥ न पुनः संभवस्तस्य यः करोति प्रदक्षिणाम् ॥ शोणाचलाकृतेर्नित्यं नित्यत्वं ध्रुवमश्नुते ॥३४॥
अस्य पादरजःस्पर्शात्पूयते सकला मही ॥ पदमेकं तु धत्ते यः शोणाद्रीशप्रदक्षिणे ॥ ३५ ॥ नमस्कुर्वन्प्रतिदिशं ध्यायन्स्तौति कृतांजलिः ॥ असं
सृष्टकरः कैश्चिन्मंदं कुर्यात्प्रदक्षिणम् ॥३६॥ आसन्नप्रसवा नारी यथा गच्छेदनाकुलम् ॥ तथा प्रदक्षिणं कुर्यादश्शृण्वंश्च पदध्वनिम् ॥३७॥ स्नातो
विशुद्धवेषः सन्भस्मरुद्राक्षभूषितः ॥ शिवस्मरणसंसृष्टो मंदं दद्यात्पदं बुधः ॥३८॥ मनूनां चरतामग्रे देवानां च सहस्रशः ॥ अदृश्यानां च सिद्धा
नां नान्येषां वायुरूपिणाम् ॥३९॥ संघट्टमतिसंमर्दं मार्गरोधं विचिंतयन् ॥ अनुकूलेन भक्तः सञ्छनैर्दद्यात्पदं बुधः ॥४०॥ अथवा शिवनामानि सं
कीर्त्य वरगीतिभिः॥शिवनृत्यं च रचयन्भक्तैः सार्द्धं परिक्रमेत् ॥४१॥ माहात्म्यं मम वा शृण्वन्ननन्यमतिरादरात् ॥ शनैः प्रदक्षिणं कुर्यादानन्दरसनि
र्भरः ॥ ४२ ॥ दानैश्च विविधैः पुण्यैरुपकारैस्तथार्थिनाम् ॥ यथामति दयापूर्ण आस्तिकः परितो व्रजेत् ॥४३॥ कृते त्वग्निमयं लिंगं त्रेतायां मणि
पर्वतम् ॥ द्वापरे चिंतयेद्धैमं कलौ मरकताचलम् ॥ ४४ ॥ अथवा स्फाटिकं रूपमरुणं तु स्वयंप्रभम् ॥ ध्यायन्विमुक्तः सकलैः पापैः शिवपुरं व्रजे
त् ॥ ४५ ॥ अवाङ्मनसगम्यत्वादप्रमेयतया स्वयम् ॥ अग्नित्वाच्च परं लिंगमनासाद्याचलाभिधम् ॥ ४६ ॥ ध्यात्वा प्रदक्षिणं कर्तुरभिगम्योऽह
मंजसा ॥ तस्य पादरजो नणामजरामरकारणम् ॥ ४७ ॥ रूपमेकं तु धत्ते यः शोणाद्रीशप्रदक्षिणे ॥ वाहनानि सुरौघाणां प्रार्थयंते परस्प
रम् ॥ ४८ ॥ कुर्वतां चरणं वोढुमरुणाद्रिप्रदक्षिणाम् ॥ छायाप्रदानं कुर्वंति कल्पकाद्याः सुरद्रुमाः ॥ ४९ ॥ कुर्वतां भुवि मर्त्यानामरुणाद्रिप्रदक्षि
णाम् ॥ देवगन्धर्वकाद्यानां सहस्रेण समावृताः ॥ ५० ॥ सेवंते ते गणाकीर्णा विमानशतकोटयः ॥ मम प्रदक्षिणं भूमौ कुर्वतां पादपांसुभिः
॥ ५१ ॥ पाविता महती वीथी दृष्टा शिवपदप्रदा ॥ अंगप्रदक्षिणं कुर्वन्क्षणात्स्वर्ग्यतनुर्भवेत् ॥ ५२ ॥ प्राप्तो वज्रशरीरत्वं न धृष्येत महीतले ॥
व्योमयानोत्सुका देवाः सिद्धाश्च परमर्षयः ॥ ५३ ॥ अदृश्याः संचरंत्यत्र पश्यंते मम संनिधिम् ॥ विनयं मम भक्तिं च प्रदक्षिणपरिक्रमे ॥ ५४ ॥
दृष्ट्वा हर्षसमायुक्ता मर्त्येभ्यो ददते वरम् ॥ अत्र देवास्त्रयस्त्रिंशत्पुरा कृत्वा प्रदक्षिणाम् ॥ ५५ ॥ प्रत्यहं मार्गमासीनाः प्रत्येकं कोटितां गताः ॥
आदित्याद्या ग्रहाः सर्वे पुरा कृत्वा प्रदक्षिणाम् ॥ ५६ ॥ संपूर्णजगतीभागे सर्वे ग्रहपतां गताः ॥ यः करोति नरो भूमौ सूर्यवारे प्रदक्षिणाम् ॥ ५७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स सूर्यमंडलं भित्त्वा मुक्तः शिवपुरं व्रजेत् ॥ सोमवारे नरः कुर्वन्नरुणाद्रिप्रदक्षिणाम् ॥ ५८ ॥ अजरामरतां प्राप्तो नासौम्यो भवति क्षितौ ॥ भौम वारे नरः कुर्वन्नरुणाद्रिप्रदक्षिणाम् ॥ ५९ ॥ आनृण्यमखिलं प्राप्य सार्वभौमो भवेद्ध्रुवम् ॥ बुधवारे नरः कुर्वञ्छोणाद्रीशप्रदक्षिणाम् ॥ ६० ॥ सर्वज्ञतामनुप्राप्तः स वाचां पतितामियात् ॥ गुरुवारे नरः कुर्वन्सर्वदेवनमस्कृतः ॥ ६१ ॥ प्रदक्षिणेन शोणाद्रेः स तु लोकगुरुर्भवेत् ॥ भृगुवारे नरः कुर्वन्नरुणाद्रिप्रदक्षिणाम् ॥ ६२ ॥ संप्राप्य महतीं लक्ष्मीं लभते वैष्णवं पदम् ॥ मन्दवारे नरः कृत्वा शोणाद्रीशप्रदक्षिणाम् ॥ ६३ ॥ विमुक्तो ग्रहपीडाभिः स विश्वविजयी भवेत् ॥ नक्षत्राणि च सर्वाणि पुरा तद्दैवतैः सह ॥ ६४ ॥ मम प्रदक्षिणां कर्तुः पुण्यानि सहसा व्रजेत् ॥ तिथयः कर णानीहयोगाश्च मम संमताः ॥ ६५ ॥ अभीष्टफलदा जाताः कुर्वतां मत्प्रदक्षिणाम् ॥ मुहूर्ता विविधा होराः सौम्याश्च सततोदयाः ॥ ६६ ॥ मत्प्रदक्षिणकर्तॄणां जायंते सततं शुभाः॥ प्रच्छिनत्ति प्रकारोऽघं दकारो वांछितप्रदः ॥६७॥ क्षिकारात्क्षीयते कर्म णकारो मुक्तिदायकः॥दुर्बलाः कार्श्य संयुक्ता आधिव्याधिविजृंभिताः ॥ ६८ ॥ मम प्रदक्षिणं कृत्वा मुच्यंते सर्वदुष्कृतैः ॥ मम प्रदक्षिणं कर्तुर्भक्त्या पादेन संततम् ॥६९॥ क्षणेन साध्वां पश्यामि त्रैलोक्यस्य प्रदक्षिणाम्॥लोकेशाश्च दिगीशाश्च ये चान्ये कारणेश्वराः॥७०॥मम प्रदक्षिणां कृत्वा स्थिरा राज्ये पुराऽभवन्॥अहं च गणसं युक्तः सर्वदेवर्षिसंयुतः ॥७१॥ उत्तरायणसंयोगे करोमि स्वप्रदक्षिणाम् ॥ मद्रूपं तैजसं लिंगमरुणाद्रिरिति श्रुतम् ॥७२॥ त्रैलोक्यस्य हितार्थाय करि ष्यामि प्रदक्षिणाम् ॥ आगता च परांते च गौरी तप इहाद्भुतम् ॥७३॥ कर्तुं प्रदक्षिणं कृत्वा मामेष्यत्यनघा पुनः ॥ कार्तिके मासि नक्षत्रे कृत्तिका ख्ये महातपाः ॥ ७४ ॥ मम प्रदक्षिणां गौरी प्रदोषे रचयिष्यति ॥ नराणामल्पपुण्यानां दुर्लभं तत्प्रदक्षिणम् ॥ ७५ ॥ ज्योतिर्लिंगस्य दृष्टस्य देवी प्रार्थनया तथा ॥ मया समेता देवी सा प्राप्ताऽपीतकुचाभिधा ॥ ७६ ॥ आश्वास्यति सुरान्सर्वानुत्तरायणसंगमे ॥ देवगन्धर्वयक्षाणां सिद्धानामपि रक्षसाम् ॥ ७७ ॥ सर्वेषां देवयोनीनां भविता तत्र संगमः ॥ ये तदा मां समागत्य पूजयंति तपोधिकाः ॥ ७८ ॥ सर्वजन्मकृताघौघप्रायश्चित्तं व्रजंति ते ॥ दुर्लभं तद्दिनं पुंसामुत्तरायणसंगमे ॥ ७९ ॥ तदा मद्रूपमभ्यर्च्य कृतार्थाः सन्तु मानवाः ॥ प्रदक्षिणं तु मे दिव्यं कुर्वंति च मही भुजः ॥ ८० ॥ तेषां पुरोगतः साक्षादहं जेष्यामि विद्विषः ॥ राजा यस्य तु देशस्य यो यो राजा तपोधिकः ॥ ८१ ॥ स कारयेद्द्विप्रमुख्यैः श्रोत्रियैर्मे प्रदक्षिणाम् ॥ मंडलं मंडलार्द्धं वा संकल्पविधिपूर्वकम् ॥ ८२ ॥ तस्य तस्य स्थिरं राज्यं शत्रूणां च पराहतिम् ॥ करिष्यामि मुने नित्य महमेव पुरःस्थितः ॥ ८३ ॥ न वाहनेन कुर्वीत मम जातु प्रदक्षिणाम् ॥ धर्मलुब्धमना जानञ्छिवाचारपरिप्लुतिम् ॥ ८४ ॥ धर्मकेतुः पुरा राजा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यमलोकादुपागतः ॥ मम प्रदक्षिणां कर्त्तुं तुरगेणाभ्यरोचयत् ॥ ८५ ॥ क्षणेन तुरगो जातो गणनाथः सुरार्चितः ॥ प्रतिपेदे पदं शैवं विमुच्य
धरणीपतिम् ॥ ८६ ॥ वीक्ष्य तं वाहनं भूयो गणनाथवपुर्द्धरम् ॥ पादप्रदक्षिणां कृत्वा स्वयं च गणपोऽभवत् ॥ ८७ ॥ तदाप्रभृति शक्राद्याः सुरा
विष्णुसमन्विताः ॥ पादाभ्यामेव कुर्वंति मम सर्वे प्रदक्षिणाम् ॥ ८८ ॥ स्वर्गान्निपातितः कोऽपि सिद्धः काले तपःक्षयात् ॥ प्रदक्षिणां ततः कृत्वा
पुनर्लब्धपदोऽभवत् ॥ ८९ ॥ स्खलितं पादजं रक्तं मम कर्तुः प्रदक्षिणम् ॥ मार्ज्यते तस्य देवेन्द्रमौलिमंदारकेसरैः ॥ ९० ॥ प्रदक्षिणमहावीथी
शिलाशकलघट्टितम् ॥ पदं संधार्यते पुंसां श्रीपयोधरकुंकुमैः ॥ ९१ ॥ मणिपर्वतशृंगेषु कल्पद्रुमवनांतरे ॥ संचरंति सदा मर्त्या मम कृत्वा प्रदक्षि
णम् ॥ ९२ ॥ ॥ गौर्युवाच ॥ ॥ उपचारप्रवृत्तानां फलं मे शंस सुव्रत ॥ यैर्वै जनः कृतार्थः स्याद्यथाशक्ति कृता दरः ॥ ९३ ॥ ॥ मुनि
रुवाच ॥ ॥ उपचारफलं देवि शृणु वक्ष्याम्यहं तव ॥ यन्मह्यं कृपया पूर्वमुक्तवान्परमेश्वरः ॥ ९४ ॥ लूती तंतुकजालानि संसृज्य क्वचिदेव मे ॥
जातिस्मरो महीध्रेऽस्मिन्सोंऽशुकैर्मां व्यवेष्टयत् ॥ ९५ ॥ गजः कश्चित्तृषाक्रांतो विमुच्य च मधु क्वचित् ॥ वनपल्लवमुत्कीर्य मुक्तोऽभूद्गणनाय
कः ॥ ९६ ॥ कृमयो विलुठन्तो मे पार्श्वे दुरितवर्जिताः ॥ सिद्धवेषाः पुनः सर्वे मम लोकं व्रजंति ते ॥ ९७ ॥ अव्युच्छिन्नप्रदीपार्चिः क्षणमप्याद
धाति यः ॥ स्वयंप्रकाशः स भवन्मम सारूप्यमश्नुते ॥ ९८ ॥ हारीतः कोपि संप्राप्तः शाखानीडो ममांतिके ॥ खद्योतो दीपवन्नक्तं तावन्मुक्तिं
समागतः ॥ ९९ ॥ गावः प्रस्रवणैः सिक्ता वत्सस्मरणसंभवैः ॥ मत्पार्श्वे मुक्तिमापुस्ता मम लोकं समाश्रयन् ॥ १०० ॥ काकः पक्षजवातेन
बलिग्रहणलोलुपः ॥ मार्जयन्मत्पुरोभागं मुक्तिं प्रापद्यत क्षणात् ॥ १०१ ॥ मूषको मद्गुहाभागं मणिसंघविकर्षणैः ॥ प्रकाशयन्वितिमिरं मम रूप
मपद्यत ॥ १०२ ॥ छायावृक्षत्वमास्थातुं मुनयस्त्रिदशा अपि ॥ प्रार्थयंत्येव मत्पार्श्वे नपुनःसंभवेच्छया ॥१०३॥ गोपुरं शिखरं शालां मण्डपं वा
पिकामपि ॥ कुर्वतां मत्पुरोभागे सिध्यंतीष्टार्थसंपदः ॥ १०४ ॥ सदा मर्त्यैरनासाद्यमग्निलिंगमिदं मम ॥ अनासाद्याचलेशाख्यं पूज्यतां वसुधातले
॥१०५॥ वीक्षणस्पर्शनध्यानैः स्वभूतं निखिलं जगत् ॥ पोषयंती परा शक्तिः पूज्याऽपीतकुचाभिधा ॥१०६॥ सर्वलोकैकजननी संप्राप्ता नित्ययौ
वनम् ॥ यौवनप्रार्थिभिः सेव्या सदाऽपीतकुचाभिधा ॥ १०७॥ क्षणात्तस्य पुरोभागे वसतां प्राणिनामिह ॥ परत्र वात्र दुष्प्राप्यमिष्टवस्तु न विद्यते
॥१०८॥ अप्रमेयगुणाधारमपेक्षितवरप्रदम् ॥ अशेषभोगनिलयं शोणाद्रीशं समर्चय ॥१०९॥ लब्धकामा पुनः शम्भुमाश्रयिष्यसि सुव्रते ॥ तपश्चर
णमप्येतत्तव लोकहितावहम् ॥ ११० ॥ न केवलं तव तपःस्ववांछितफलप्रदम् ॥ तपस्यतामृषीणां च क्षेमायैव भविष्यति ॥१११॥ कारणांतरमाशंक्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तपः कुर्वंति देवताः ॥ रहस्यं देवतानां तु फलेनैवानुमीयते ॥ ११२ ॥ वयं च सहसंवासास्तव व्रतनिरीक्षणात् ॥ कृतार्थाः स्याम देवेशि तप
सा नः कृतार्थता ॥ ११३ ॥ इति तस्य मुनेर्वाक्यमर्थगर्भं निशम्य सा ॥ गौरी कौतुकसंयुक्ता प्रशशंस महामुनिम् ॥ ११४ ॥ तपः किमन्यत्क
र्तव्यं लब्धं तव तु दर्शनम् ॥ अरुणाद्रिरयं दृष्टः श्रुतं माहात्म्यमस्य च ॥ ११५ ॥ अहो भूमेस्तु वैचित्र्यं यतो दृष्टा दिवोऽधिका ॥ यत्रैव तैजसं
लिंगं देवतानां वरप्रदः ॥ ११६ ॥ शिवः प्रसादसिद्धो मे दर्शितं स्थानमात्मनः ॥ अत्रैव शिवमाराध्य वशीकुर्यां जगद्गुरुम् ॥ ११७ ॥ अविना
भूतमैक्यं मे देवेन भवतात्सदा ॥ त्वया कृतेन साह्येन भवेयं शिवनायिका ॥ ११८ ॥ इति गौतमसंनिधौ तदानीं कृतसंवित्तप आदरेण कर्तुम् ॥
अभजद्रुचिरां च पर्णशालां मुनिना चानुमता तथेति भक्त्या ॥ ११९ ॥ सुकुमारतनुः सरोरुहाक्षी घनतुंगस्तनकल्पितोत्तरीया ॥ जटिला हरि
नीलरत्नकांतिर्गिरिजा राजति देहवत्तपःश्रीः ॥ १२० ॥ नियमैर्बहुभिस्तपोविशेषैः ऋतुषु प्राप्तविचित्रयोगबंधैः ॥ निगमागमदृष्टधर्ममार्गं सकलं
सा तु कृतार्थतामनैषीत् ॥ १२१ ॥ तपसा विविधेन तप्यमाना न कदाचित्परिखेदमाप तन्वी ॥ हरिरत्नमयी च कापि वल्ली नितरां दीप्तिमती
बभूव बाला ॥ १२२ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां प्रथमे माहेश्वरखण्डेऽरुणाचलमाहात्म्ये पूर्वार्धेऽरुणेश्वरप्रदक्षिणा
माहात्म्यवर्णनंनाम नवमोऽध्यायः ॥ ९ ॥ ॥ ब्रह्मोवाच ॥ ॥ अथ देवा महीं हित्वा महिषासुरपीडिताः ॥ नत्वा गौरीं तपस्यंतीं जग्मुः शर
णमाकुलाः ॥ १ ॥ अथ तानभयं देहि देवीति भयविह्वलान् ॥ अमरान्वीक्ष्य सा देवी किं कार्यमिति चाभ्यधात् ॥ २ ॥ ततो विज्ञापयामासुर्दैत्यं
द्राद्रयमात्मनाम् ॥ देव्यै बद्धांजलिपुटा देवा इंद्रपुरोगमाः ॥ ३ ॥ ॥ देवा ऊचुः ॥ ॥ अप्सरोभिः परिवृतः सुखं क्रीडति नंदने ॥ ऐरावतमुखा
न्सर्वान्दिङ्नागान्निजमंदिरे ॥ ४ ॥ आवसयन्विनोदार्थमंगनाभिः सहागतान् ॥ उच्चैःश्रवःपुरोगानामुपभोगं करोत्यसौ ॥ ५ ॥ मंदुरास्वस्य रम्यासु
दृश्यंते लक्षकोटयः ॥ हुताशवाहनं मेषं पुत्रारोहार्थमीप्सति ॥ ६ ॥ याम्यं महिषमानीय शकटे सोऽभ्यवाहयत् ॥ सिद्धीराकृष्य सकला
गृहकर्मणि चादिशत् ॥ ७ ॥ अप्सरःसंघमखिलमात्मसेवार्थमानयत् ॥ अन्यत्किमपि यद्वस्तु रत्नभूतं जगत्त्रये ॥ ८ ॥ अनाहृतं पुनर्हर्तुं न
विश्राम्यति कोपवान् ॥ वयं च सेवका भूत्वा नित्यं भीतिसमन्विताः ॥ ९ ॥ पूजयंतश्च तस्याज्ञां नान्यां वीक्षामहे गतिम् ॥ शरणागतसंत्राणं तपः
फलमुदाहृतम् ॥ १० ॥ दुर्जयोऽयं वरो दैत्यः सर्वेषां बलिनामपि ॥ सुराणामपि दैत्यानां शिवाल्लब्धवरोदयः ॥ ११ ॥ अस्य शृंगाहतः सिंधुर्व्यां

१ व्यावर्जितम्–इदं दत्तम्–इदं दत्तम–इति ब्रुवन्–इत्यर्थोऽत्र बोद्धव्यः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वर्जितमिति ब्रुवन् ॥ रत्नोपहारदानेन नित्यं तत्प्रीतिमिच्छति ॥ १२ ॥ पर्वतांश्च समुत्क्षिप्य शृंगाग्रेण महोद्धतः ॥ क्रीडति क्षोदिताशेषधातुधूलि
विलेपनैः ॥ १३ ॥ न शक्यमतुलं तस्य बलमन्यदुरासदम् ॥ स्वयमेव विजानीहि हत्वा ते निजतेजसा ॥ १४ ॥ शंभुशक्तिः परा सेयं स्त्रीरूपे
णात्र दृश्यते ॥ त्वयैवायं निहंतव्यः शिवाल्लब्धवरो ह्ययम् ॥ १५ ॥ न जानीमो वयं देवि किंचिच्छंभुविचेष्टितम् ॥ केवलं पालनीयाः स्म जग
न्मात्रा सदा त्वया ॥ १६ ॥ इति तेषां भयार्तानामाकर्ण्य वचनं शुभम् ॥ व्याजहार प्रसन्नात्मा देवी दत्त्वाभयं तदा ॥ १७ ॥ शरणागतसंत्राणं
तपसि स्थितया मया ॥ कर्त्तव्यममराः कालात्क्षीणः शत्रुर्भविष्यति ॥१८॥ उपायेन समाकृष्य हनिष्यामि महासुरम् ॥ निरागसस्तु हननमद्य मे न
हि युज्यते ॥१९॥ धर्मभंगे धर्मभेत्तारः शलभत्वं व्रजंति हि ॥ देवास्तद्वचनं श्रुत्वा प्रणम्य गिरिकन्यकाम् ॥२०॥ जग्मुर्यथागतं सर्वे निर्भया हृष्टचे
तसः ॥२१॥ गतेषु तेषु देवेषु गौरी कमललोचना ॥ बभूव मोहिनी शक्तिः कांतियुक्ता ततोदरी[1] ॥२२ ॥ सा देवी दिक्षु शैलेषु चतुर्ष्वरुणभूभृतः ॥
रक्षार्थं स्थापितवती चतुरो बटुकान्वरान् ॥ २३ ॥ यदा कैलासशिखरादागता शैलकन्यका ॥ अन्वगच्छन्सेवमानाश्चतस्रो मातरस्तदा ॥ २४ ॥
दुन्दुभिः सत्यवत्याख्या तथा चानवमी परा ॥ सुन्दरीति चतस्रस्तामन्वयुः परिचारिकाः ॥ २५ ॥ विमुञ्चतातिथिं श्रांतं क्षुत्पिपासासमन्वि
तम् ॥ अरुणाद्रिमिमं द्रष्टुं नान्यमित्यब्रवीच्च तान् ॥ २६ ॥ सीमाशलस्थितान्वीरांस्तानादिश्य बलाधिकान् ॥ तपश्चचाराद्रिकन्या गौतमा
श्रमसन्निधौ ॥ २७ ॥ तस्यां तपंत्यां तन्वंग्यां न तापः कश्चिदप्यभूत् ॥ ववर्ष काले जलदः सफलाश्चाभवन्द्रुमाः ॥ २८ ॥ विरोधीनि च
सत्त्वानि मुमुचुः पूर्वमत्सरम् ॥ आश्रमः सर्वजन्तूनां शरण्योऽभूद्भयापहः ॥ २९ ॥ योजनद्वयपर्यंतं सीमाशैलेषु संस्थितैः ॥ चतुर्भिर्बटुकैः शूरै
रक्षितश्चारुणाचलः ॥ ३० ॥ नोदभूत्कश्चन त्रासो न च दृष्टो भयोदयः ॥ न व्याधिपीडनं चासीत्तत्र नारिविजृंभणम्[2] ॥ ३१ ॥ कृतार्था मुनयः
सर्वे प्रशंसंतो नगात्मजाम् ॥ शिवलोकपदं केचित्प्रत्यशंसंस्तथाश्रमम् ॥ ३२ ॥ सा च गौरी तपो घोरं कुर्वती च दिवानिशम् ॥ न तृप्तिमाययौ
बाला शिवसंतोषकारकम् ॥ ३३ ॥ महिषश्च महावीर्यो मृगयां कर्तुमुद्यतः ॥ चचार काननं सर्वं विदूरे शोणभूभृतः ॥ ३४ ॥ दैत्यसैन्यसमा
युक्तो मृगयूथान्यनेकशः ॥ वनेषु निघ्नंस्तरसा विचचाराशु भक्षयन् ॥ ३५ ॥ धन्विभिर्बलिभिर्वीरैर्मृगाः केचिदनुद्रुताः ॥ भयार्त्ताः परिधावंतः
प्राविशंस्तं तथाश्रमम् ॥ ३६ ॥ अनुव्रजन्तो दितिजा मृगांस्तान्हंतुमुद्यताः ॥ वारिता बटुकैर्वीरैर्मायातात्रेति सत्वरैः ॥ ३७ ॥ किमत्रेति तदा पृष्टा

१ ततोदरी–इत्यस्य तु–विस्तृतोदरवती–इत्यर्थो बोध्यः । २ अरिविजृंभणम्–कामक्रोधाद्युदयः न–इति योजना ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बटुका दुष्टदानवैः ॥ तपस्यति वरारोहा कन्यात्रेत्याहुरंजसा ॥ ३८ ॥ न केनचित्प्रवेष्टव्यं बलिना मुनिसेवितम् ॥ तपःस्थानमिदं देव्याः शरणा
गतरक्षकम् ॥ ३९ ॥ इति तेषां वचः श्रुत्वा बलिनो दुष्टदानवाः ॥ तथेति विनिवृत्त्याशु कर्त्तव्यं समचिंतयन् ॥ ४० ॥ मायया पक्षिरूपास्ते
प्रविश्याश्रममादरात् ॥ आरामवृक्षशाखासु निषेदुःखादिदृक्षितुम् ॥ ४१ ॥ सा पुनर्ह्रसितारण्ये सर्वर्तुकुसुमान्विते ॥ तपस्यन्ती तदा दृष्टा मायादै
त्यस्य सैनिकैः ॥ ४२ ॥ रूपलावण्यते तस्या निश्चयं तपसि स्थितम् ॥ वीक्ष्य ते विस्मयोपेता गत्वा तस्मै न्यवेदयन् ॥४३॥ स स्मरार्तो वृद्धरूपः
प्रविवेशाश्रमं तदा ॥ पूजितोऽस्याः सखीभिश्च गतश्रांतिरिव स्थितः ॥ ४४ ॥ वृद्धोऽपृच्छत्किमर्थं तु तपोऽस्या इति तास्तथा ॥ बाला कांत
प्रसादार्थं चिरमत्र तपस्यति ॥ ४५ ॥ परं स बलवान्कांतो न कदापि प्रसीदति ॥ कार्यं विवाहसमये मनोरथं यथोचितम् ॥ ४६ ॥
अपूर्वप्रभुणा तेन नवोधकरणं महत् ॥ सद्योजातकुलालेन सद्यःसृष्टैर्विपाचितैः ॥ ४७ ॥ भाजनैरपि साद्यस्कैर्न्यस्तैः पक्वैश्च शालिभिः ॥ तादृशैः
साधनैः सर्वैस्तादृशैर्द्रव्यसंचयैः ॥ ४८ ॥ अपूर्वदृष्टविभवैः कार्यं स्यादुपकारणम् ॥ सिद्धे तथोपकरणेऽस्याः सद्योऽस्तु स्वयंवरः ॥ ४९ ॥
इति तासां वचः श्रुत्वा विहसन्महिषोऽभ्यधात् ॥ तपःफलमहं प्राप्तः सत्यमस्या इति स्थितम् ॥ मदीयां सकलां भूतिं शृणु बाले
तपस्विनि ॥ ५० ॥ महिषोऽहं महावीरो दैत्येन्द्रः सुरवंदितः ॥ जगत्त्रयमिदं सर्वं मयैव परिगृह्यते ॥ ५१ ॥ अनन्यवीरसद्भावो मय्येव
भुजशुष्मणा ॥ कामरूपोस्म्यहं बाले सर्वभोगप्रदायकः ॥ ५२ ॥ भज मां तव भर्त्तारं प्राणिनां तपसः फलम् ॥ सर्वं संपादयिष्यामि
कल्पवृक्षैः समाहृतैः ॥ ५३ ॥ सृजामि तपसा चाहं विश्वकर्माणमादितः ॥ कामधेनुसहस्राणि सृजामि तपसा क्षणात् ॥ ५४ ॥
नवभिर्निधिभिः प्राप्तैः पार्श्वस्थैर्नित्यदा मम ॥ अपेक्षितार्थसंसिद्धिः सहसैवोपपाद्यते ॥ ५५ ॥ इति तस्य वचः श्रुत्वा स्मृतदेवाभवत्क्रमात् ॥
विसृज्य मौनं शनकैर्विहसंती तमब्रवीत् ॥ ५६ ॥ अहं बलवतो भार्या भविष्यामि तपश्चिरम् ॥ करोमि यद्यसि बली बलं दर्शय मे निजम् ॥५७॥
विरच स्त्रीस्वभावं स्वं श्रुत्वा तद्वाक्यमुत्थितम् ॥ हते कोयमिति क्रोधान्ननर्द महिषासुरः ॥५८॥ जिघृक्षंतं समायांतं वीक्ष्य तं महिषासुरम् ॥ अभू
दुरासदा दुर्गा कन्या सा ज्वलनाकृतिः ॥ ५९ ॥ महामायां समालोक्य ज्वलंतीं पुरतः स्थिताम् ॥ स्वयं स महिषाकारो ववृधे मेरुसन्निभः
॥ ६० ॥ कुलभूधरशृंगाणि शृंगाभ्यां मुहुराक्षिपन् ॥ आजुहाव निजां सेनामापूरितदिगंतराम् ॥ ६१ ॥ अथ ब्रह्ममुखा देवाः प्रणम्य विविधायुधैः ॥

१ कन्या गौर्येव । २ रूपलावण्यते—रूपं च लावण्यता च ते रूपलावण्यते । तद्धितादपि तद्धित आर्षः । ३ तदर्थम्—इति शेषः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पूजयामासुरात्मीयैर्दुर्गां कालाग्निरूपिणीम् ॥ ६२ ॥ पंचहेतीर्हरिः प्रादाद्दश चापि सदाशिवः ॥ ब्रह्मा चतस्रश्च तदा तस्यै मायातिरोहिताः ॥ ६३ ॥ दिक्पालाश्च सुराश्चान्ये पर्वताश्च पयोधयः ॥ स्वीयैराभरणैः शस्त्रैरधृष्यास्तामपूजयन् ॥ ६४ ॥ माया सा बहुभिर्हस्तैर्ज्वलदायुधसंचयैः ॥ आबद्धकवचा तूर्णं दुर्गाभूत्सिंहवाहना ॥ ६५ ॥ आपूरितदिशाभोगा तेजस्तत्सोढुमक्षमः ॥ दुर्गाया घोरमालोक्य महिषस्तु पलायितः ॥ ६६ ॥ अथ तेजो निजं घोरं प्रज्वलत्सोढुमक्षमम् ॥ पलायमानमालोक्य महिषं सा व्यचिंतयत् ॥ ६७ ॥ उपायेन निहंतव्यो दुष्टोऽयं महिषासुरः ॥ मदपूर्वं निवृत्यंते मृगा मृगयुभिर्वने ॥ ६८ ॥ दूतोक्तिभिः समाकृष्य मृद्वीभिर्मर्मवृत्तिभिः ॥ कोपमस्य समुद्भाव्य करिष्येभिमुखं क्षणात् ॥ ६९ ॥ अधर्मवृत्तियुक्तानां धर्मवाक्यपरिश्रवात् ॥ कोपः समुद्भवेत्सद्यः स्वजीवक्षयकारणम् ॥ ७० ॥ अथवा धर्मबुद्धिस्सन्यदि शांतो भविष्यति ॥ तदा हितोपदेशेन धर्मलोपो न संभवेत् ॥ ७१ ॥ तपस्यद्भिः सदा कार्यः कोपत्यागः फलान्वितः ॥ धर्महानिर्न सोढव्या तत्कोपो[1] हि तपः परम् ॥ ७२ ॥ इति संचिंत्य सा गौरी नाम्ना सुरगुरुं मुनिम् ॥ संकल्प्य वानरमुखं प्राहिणोदसुरं प्रति ॥ ७३ ॥ गच्छ त्वं मायया युक्तो महर्षे वानरानन ॥ महिषं बोधयित्वा च वचनं शीघ्रमाव्रज ॥ ७४ ॥ मैव त्वमरुणाद्रीश[2]मुपपीडय दुर्मते ॥ अत्र दुर्मनसां वीर्यमदृश्यं भवति क्षणात् ॥ ७५ ॥ न कलेरुपतापोऽत्र नासुरैरपि पीडनम् ॥ न साहसं च शुभदं शिवभक्तिमतामपि ॥ ७६ ॥ पूर्वजन्मकृतैः पुण्यैर्लब्धवीर्यमहोदयः ॥ मा त्वं शोणाचलेशाग्नौ शलभत्वं भजासुर ॥ ७७ ॥ शिवेन दत्ता विभवास्तव पूर्वतपोबलात् ॥ दह्येरन्यत्र तरसा दाववह्नौ यथा द्रुमाः ॥ ७८ ॥ अत्र धर्मात्मनां वासः शिवभक्तिमतां सदा ॥ परपीडाप्रसक्तानां भवेद्रोगशतावृतः ॥ ७९ ॥ ऐश्वर्यमतुलं प्राप्तो बलमन्यद्दुरासदम् ॥ किमर्थं स्वल्पबुद्धिः सन्स्वदोषैर्नाशमेष्यसि ॥ ८० ॥ मया कन्या पुनर्दृष्टा विशेषादबला मता ॥ अंतर्गतोरुणाद्रीश एतस्मात्सा विशिष्यते ॥ ८१ ॥ अथवा युक्तिभेदैस्त्वं शास्त्रैर्वा शिवसंमतैः ॥ अनिग्राह्यमनोवृत्तिरात्मसैन्यं समानय ॥ ८२ ॥ येन लोकान्समस्तांस्त्वं बाधसे बलगर्वितः ॥ तत्सैन्यं तव वृद्धं च क्षणाद्धक्ष्यामि तेजसा ॥८३॥ आनीय सकलं सैन्यमग्रे स्थापय सायुधम् ॥ सद्यस्त्वात्मबलैः सृष्टैः संहरिष्यामि तत्क्षणात् ॥८४॥ मच्छस्त्रपरिकृत्तस्य ससैन्यस्य तवायुषः ॥ मुक्तिरत्रैव भविता को जानाति शिवेहितम् ॥ ८५ ॥ वार्यमाणोऽपि पूर्वेण कर्मणा प्रेरितो जनः ॥ अवशः कर्म

१ तत्कोपः—धर्महानौ प्राप्तायां सत्यां क्रियमाणः कोपः हि परम्—उत्कृष्टं तप एव । धर्महानिप्रसंगे क्रियमाणस्य धर्मरक्षणार्थत्वेन प्रत्युत—तपस्त्वमेव—इत्यर्थः । २ अरुणाद्रीशः एतस्या इति शेषः । अंतर्गतः—एतस्मात्कारणात्—सा विशिष्यते । दुर्धर्षा भवति—इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कुरुते भुंक्ते च सदृशं फलम् ॥ ८६ ॥ त्वयापि करुणावाक्यं वक्तव्यं किल भूरिभिः ॥ अकार्यविनिवृत्त्यर्थं नित्यधर्मानुपालने ॥ ८७ ॥ इति गौर्या समादिष्टां वाचं कपिमुखो मुनिः ॥ दूतः सन्सर्वमाचष्ट महिषस्याग्रतः स्थितः ॥ ८८ ॥ सोऽपि सर्वं समाकर्ण्य क्रोधवेगसमाकुलः ॥ तं भक्षयितुमारेभे सोपि मायाबलाद्ययौ ॥८९॥ अथ सैन्यं निजं सर्वं समाहूय दुराशयः ॥ सन्नद्धं सायुधं योद्धुमादिशल्लोकभीषणम् ॥९०॥ युगांतसमयोद्वेलचतुरर्णवसंनिभम् ॥ सैन्यानां सैन्यमतुलं शोणाद्रिं पर्यवेष्टयत् ॥ ९१ ॥ अथ गौरी समालोक्य दैत्यानां सैन्यमद्भुतम्॥ ससर्ज तैजसान्शूरान्घोरान्भूतगणान्बहून् ॥९२॥ एकपादाक्षिचरणा लंबकर्णपयोधराः ॥ पाणिपादशिरःकुक्षिवक्त्राः केचिद्विनिर्गताः॥ ९३ ॥ अहं ग्रसामि सकलमपर्याप्तमिदं मम ॥ अहमेव हनिष्यामि दैत्यसैन्यमशेषतः ॥९४॥ किं त्वयात्र पुनः कार्यं वीक्ष्य त्वं तिष्ठ केवलम् ॥ अहमेवात्र योत्स्यामीत्यभाषंत परस्परम्॥ ॥९५॥ तेषां कथयतां शंखं गणानां योगिनीगणैः ॥ अधमत्सा भगवती हंतुं तद्दैत्यमंडलम् ॥९६॥ आलोक्य तां तथारूपामापतंस्तस्य सैनिकाः ॥ दर्शयंतः स्ववीर्याणि स्वामिनोग्रे धृतायुधाः ॥ ९७ ॥ ववृषुः शस्त्रवर्षाणि दैत्याः प्रतिदिगन्तरम् ॥ बाणैः कार्मुकनिर्मुक्तैस्तानि सा तु न्यवारयत् ॥ ॥ ९८ ॥ रथानां वारणेंद्राणां हयानां लक्षकोटिभिः ॥ युयुधुर्भूतवेताला देव्या सृष्टास्तु दुर्जयाः ॥ ९९ ॥ मातरो विविधाकारा डाकिन्यो योगिनीगणाः ॥ सृष्टाश्च तेजसा भूयः पिशाचाः प्रेतराक्षसाः ॥ १०० ॥ देव्या सृष्टेन सैन्येन दुर्जयेन महासुराः ॥ भक्षिताश्चूर्णिता भिन्ना दारिता निहताः क्षणात् ॥ १०१ ॥ देवी च सायुधा दृष्टा ज्वलंती निहतासुरैः ॥ नृत्यद्भूतगणैर्भुक्तैः रक्तैर्मांसैश्च तोषितैः ॥ १०२ ॥ यदा कैलासशिखरात्प्राप्ता कर्त्तुं तपोऽस्रवम् ॥ तदा समागताः काश्चिन्मातृका देहगुप्तये ॥ १०३ ॥ दुंदुभिः सत्यवत्याख्या तथा चान्तवती परा ॥ सुंदरीति चतस्रस्ता अन्वयुः परिचारिकाः ॥ १०४ ॥ देव्या सृष्टा च चामुंडा दंष्ट्रावलयभीषणा ॥ दैत्यकृत्तिवसा मांसरक्ततृप्ता चचार सा ॥ १०५ ॥ असुरं कचिदाक्रम्य नटनं सा चकार ह ॥ १०६ ॥ अथ तां समवेक्ष्य दुर्मदो हि ज्वलयामास च कोपवह्निना सः ॥ अतितीव्रविवृत्तभीष्मनेत्रश्रुतिशृंगाग्रविभिन्नमेघजालः ॥ ॥ १०७ ॥ ज्वलदग्निशिखाभदीर्घजिह्वापरिलीढोन्नतशैलशृंगभागः ॥ अवनिं दलयन्खुराभिघातैरसकृत्पांसुभिरास्वनन्दिगंतान् ॥१०८॥ अतिघर्घरदीर्घघोरनादस्फुटदंडभ्रममोहितामरो यः ॥ धृतवालधिदंडताड्यमानप्रतिशीर्णामितशस्त्रवर्षसंघः ॥१०९॥ मृतये व्यगमद्वलित्रयाढ्यां मृगराजस्थि

२ 'सैन्यास्ते सैनिकाश्च ते' इति कोशात्सेनामध्यगतानां सैनिकानां जनानां सैन्यम्। एतेन शिक्षितयुद्धकलानां सैनिकानां ग्रहणं बोद्धव्यम्। नाशिक्षितयुद्धकलानां तत्सैन्यमासीत्। इति–सैन्यानां सैन्यमतुलम्–इत्यनेनोक्तं भवति। २ निहतासुरैः–निहता असुरा यैस्ते–निहतासुराः–तैः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तिभासुरां भवानीम्॥११०॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां प्रथमे माहेश्वरखण्डेऽरुणाचलमाहात्म्ये पूर्वार्धे देव्यास्तपश्चर्यायांमहिषासुरेण सह युद्धवर्णनंनाम दशमोऽध्यायः ॥१०॥छ॥ ॥ ब्रह्मोवाच ॥ ॥ स तु सिंहस्थितां गौरीं ज्वलंतीं विविधायुधाम् ॥ शैलवर्षेण महता कुपितः समपूरयत् ॥ १ ॥ शरवर्षेण महता तन्निवार्य विदूरतः ॥ बिभेद निशितैः शस्त्रैरशेषं तस्य विग्रहम् ॥ २ ॥ भिद्यमानोऽपि दैत्येंद्रः शैलसारप्रदुर्धरः ॥ विषादं नागमत्किंचिद्ववृधे युद्धदुर्म्मदः ॥ ३ ॥ भिद्यमानः स खड्गेन चक्रैरसिभिर्ऋष्टिभिः ॥ शूलेन चायुधैश्चान्यैरंतर्धानमगाहत ॥ ॥ ४ ॥ ततः सिंहाकृतिर्भीमः प्रचंडनिनदाननः ॥ तीक्ष्णदंष्ट्रः शितनखः परिबभ्राम केसरी ॥ ५ ॥ देवीसिंहश्चपेटेन ताडयामास पाणिना ॥ दैत्यसिंहस्य च नखैस्तस्य वक्षो व्यदारयत् ॥ ६ ॥ अथ व्याघ्रतया प्राप्तः स्फुटव्यात्ताननो महान् ॥ तं हंतुं च बलाद्देवी वेगेन करमक्षिपत् ॥ ७ ॥ दीर्घाभिर्नीलरेखाभिः पूर्णः पिंगलविग्रहः ॥ यानावलिभिराकीर्णः स्वर्णाद्रिरिव संचरन् ॥ ८ ॥ मृगैरिव परित्रातुं मुच्यमानोऽग्रतो बली ॥ ज्वलंतमिव रोपाग्निं जिह्वाहेतिभिरावहन् ॥९॥ आगच्छंतं रयाद्देवी भल्लेन शशिवर्चसा ॥ प्रतिविव्याध तं व्याघ्रं पुरत्रयमिवेश्वरः ॥१०॥ स बाणस्तन्मुखे मग्नस्तद्रक्तेन समुक्षितः ॥ जगाहे गगनं भित्त्वा देहमस्य विनिर्गतः ॥ ११ ॥ स दैत्यो वारणो भूत्वा देवीमाश्वभ्युपागमत् ॥ बलिभिः पशुभिर्भिन्नैस्तस्याः प्रीतिमिवावहन् ॥ १२ ॥ तं गजेंद्रं समायांतं मदक्लिन्नमहीतलम् ॥ देवीसिंहस्तदा दृष्ट्वा ननर्द च जघान च ॥ १३ ॥ अथ खड्गधरो वीरश्चर्मपाणिः समुद्गतः ॥ वक्रं दधानो बभ्राम दंष्ट्राभ्रुकुटिभीषणम् ॥ १४ ॥ देवी च विलसत्खड्गचक्रचक्रलसत्करा ॥ युयोध तेन वीरेण भग्नशीर्षाभ्युपग्रत ॥ १५ ॥ भूयः स माहिषं रूपमास्थायासुरमायया ॥ देव्या योद्धुं प्रववृते यथापूर्वमनाकुलम् ॥ १६ ॥ अथ देवैर्मुनींद्रैश्च चोदितो गौतमो मुनिः ॥ प्रबोधयितुमारेभे स्तुतिभिर्जगदंबिकाम् ॥ १७ ॥ त्वयि सर्वस्य जगतः प्राणशक्तिः परा मता ॥ ओजःशक्तिर्ज्ञानशक्तिर्बलशक्तिश्च गम्यते ॥ १८ ॥ किमेतदद्य मोहाय युद्धमारभ्यते त्वया ॥ उपसंह्रियतामेष दैत्यो भुवनगुप्तये ॥ १९ ॥ भिन्नाऽनामस्य देहानामुपसंहरणात्तव ॥ बलयश्चोपदिश्यन्ते निगमोक्ता वरप्रदाः ॥२०॥ अन्यथा तृणकल्पस्य शत्रोरस्य निबर्हणे ॥ कालाग्निवर्चसो देवि किमर्थं संभ्रमस्त्वियान् ॥ २१ ॥ स्वशक्तिमवसंस्तभ्य समाकर्षयतां रिपोः ॥ प्राणशक्तिं त्रिशूलेन गुणत्रयवपुर्धृता ॥ २२ ॥ इति स्म बोधिता तेन पुरा भगवती तदा ॥ महिषासुरमाक्रम्य त्रिशूलेनाभ्यधारयत् ॥ २३ ॥ अनेकगिरिसंकाशं देव्या विग्रहमात्मनः॥ अशक्तस्तं धारयितुं ससाद महिषासुरः ॥२४॥ निष्पिष्टो विलुठन्क्रोशन्ना

१ शैलसारप्रदुर्धरः—अश्मसारवत्कठोरः—इत्यर्थः । २ भल्लेन—बाणेनेत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्रांतश्च परिस्फुरन् ॥ निर्गंतुमुद्गतशिरा न शशाकासुराधिपः ॥२५॥ त्रिशूलमुखभिन्नांगरक्तधारासमुद्धतः ॥ समुद्र इव संजातः संध्यारुणकलेवरः ॥
॥ २६ ॥ अथ खड्गेन तीक्ष्णेन कर्तयित्वा च तच्छिरः ॥ ननर्त्त तस्य शिरसि तिष्ठन्ती महिषार्दिनी ॥ २७ ॥ दुर्गां सिद्धाश्च गन्धर्वाः प्रशशंसुर्म
हर्षयः ॥ पुष्पवृष्टिश्च महती देवैर्मुक्ता समंततः ॥ प्रणतः प्रांजलिर्देवीं तुष्टाव विबुधाधिपः ॥ २८ ॥ ॥ इन्द्र उवाच ॥ ॥ नमस्ते जगतां मात्रे
भूतानां बीजसंविदे ॥ २९ ॥ भक्तिः श्रद्धा च भजतां शक्तिश्चासि त्वमंबिके ॥ कारणं परमा कीर्तिः शांतिर्दांतिः कला क्षमा ॥ ३० ॥ एकैव
विश्वरूपा त्वं नामभेदैर्निगद्यसे ॥ तेषुतेषु पदेष्वस्मांस्तपोऽनुगुणसिद्धिषु ॥ ३१ ॥ नियुज्य शत्रुं निर्भिद्य शिवा ज्ञेया प्रकाशसे ॥ हतोयं महिषो
दुष्टो विनिकृत्तश्च शांभवि ॥ ३२ ॥ छिन्नमेतस्य तु शिरः सजीवमिव लक्ष्यते ॥ रक्तनेत्रं तीक्ष्णशृंगं ज्वलज्जिह्वं चलं शिरः ॥ ३३ ॥ आक्रम्य तव
तिष्ठन्त्या रूपमेव सदास्तु नः ॥ चक्रशृंगधनुर्बाणखड्गचर्मवराभयैः ॥ ३४ ॥ शूलघण्टांकुशकशाकपालकुलिशादिभिः ॥ अशेषदेवतामूर्तिरशेषै
र्देवतायुधैः ॥ ३५ ॥ आपूरिता त्वमेवांब सर्वशत्रून्निहंसि नः ॥ आयुधानां सहस्राणि तन्मयास्ते विभूतयः ॥ ३६ ॥ त्वज्जितारातयः सर्वे विविधा
युधवाहनाः ॥ रथनागहयैर्युक्ताः ससैन्या अपि भूभृतः ॥ ३७ ॥ क्षणेन दग्धवीर्याः स्युस्त्वत्प्रसादविवर्जिताः ॥ अपदोऽप्यल्पवीर्योऽपि त्वत्पादांबु
जसेवकः ॥ ३८ ॥ त्रिलोकनाथतां प्राप्तः प्रथते कीर्तिमण्डितः ॥ तद्रूपमिदमत्युग्रं ध्यायतामर्चतां सदा ॥ ३९ ॥ न शत्रुभ्यो भयं किंचिद्भक्तिज
यशालिनाम् ॥ ईदृशं सर्वलोकेषु रूपं ते देववंदितम् ॥ ४० ॥ पूज्यतामिष्टसिद्ध्यर्थं देवैर्भृत्यैश्च सर्वदा ॥ मातरश्च त्वया सृष्टाः सर्वाभीष्टफल
प्रदाः ॥ ४१ ॥ सगणाः प्रतिपूज्यंतां सर्वस्थानेषु सर्वदा ॥ अयं च निहतो दैत्यस्त्वत्पादकृतलांछनः ॥ ४२ ॥ तव भक्तैः सदा पूज्यस्त्वत्प्रसादा
त्त्वदग्रतः ॥ इत्थं सुरेन्द्रप्रणुता सर्वर्षिसुरसेविता ॥ ४३ ॥ तथेति वरदा देवी ससर्ज च दिवं प्रति ॥ स्वयमप्यात्मनस्तत्र तद्रूपं विविधायुधम् ॥
॥ ४४ ॥ संस्थाप्य मातृभिः सार्धं स्थानरक्षणमातनोत् ॥ संगृह्य विमलं रूपं सखीजनसमावृता ॥ ४५ ॥ महिषस्य शिरोऽपश्यद्विकृतं खड्गधा
रया ॥ कथयन्ती पुनस्तस्य चित्रं लोकविभूषणम् ॥ ४६ ॥ सखीभिः सह सा बाला कण्ठं तस्य व्यलोकयत् ॥ अपश्यच्च तदा लिंगं कर्त्तुं तस्य
च पूजनम् ॥ ४७ ॥ आदत्त सहसा गौरी लिंगं तस्य गले स्थितम् ॥ आलोकयच्च सुचिरं रक्तधारापरिप्लुतम् ॥ ४८ ॥ आसज्जत पुनर्लिंग
मस्याः पाणितलं गतम् ॥ विमोचयितुमुद्युक्ता नाशक्नोल्लिङ्गमंजसा ॥ ४९ ॥ अचिंतयच्च सा देवी किमेतदिति विस्मयात् ॥ विषादेन च संयुक्ता

१ भूतवेतालराक्षसः–इ०पा० । २ नः–शुभाय–इति शेषः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

महर्षीणां पुरः स्थिता ॥ ५० ॥ आहतः शिवभक्तोऽयमिति शोकं समाविशत् ॥ अगर्हत भृशं मौढ्यमात्मनः स्त्रीस्वभावजम् ॥ ५१ ॥ अविचार
समारब्धं शिवभक्तनिबर्हणम् ॥ उपतापपरीतांगी गौतमं मुनिसत्तमम् ॥ ५२ ॥ उपगम्याब्रवीद्बाला साहसं कृतमात्मना ॥ भगवन्स
र्वधर्मज्ञ गौतमार्य मुनीश्वर ॥ ५३ ॥ मान्यया धर्मरूपेण कोऽप्यधर्मः प्रकल्पितः ॥ देवानां रक्षणं कर्तुमभयं दातुमुद्यता ॥ ५४ ॥
अज्ञानान्महिषं दैत्यं शिवभक्तिममर्दयम् ॥ रजसाक्रान्तबुद्धीनां न भवेद्धर्मसंग्रहः ॥ ५५ ॥ गुरुप्रसादसुलभः स्फुरद्विघ्नशताकुलः ॥
सुदुर्धर्षा निराचारदुर्दमाः शिवसंश्रयाः ॥ ५६ ॥ विशेषतो लिंगधराः शिवस्तान्बहु मन्यते ॥ पुरा पुरत्रयावासा दैतेया लिंगधा
रकाः ॥ ५७ ॥ अजिताः शंभुना पूव मुक्तलिंगा निषूदिताः ॥ अस्य कंठस्थितं लिंगं मम पाणिं न मुंचति ॥ ५८ ॥ कथं पापं निर
स्यामि शिवभक्तवधाश्रितम् ॥ अस्य कंठस्थितं लिंगं धारयंती तपोन्विता ॥ ५९ ॥ तीर्थयात्रां करिष्यामि यावच्छंभुः प्रसीदति ॥ पुनः कैलासमु
ख्येषु शंभुस्थानेषु भूरिषु ॥ ६० ॥ तीर्थेषु रचितस्नाना लप्स्ये पापविशोधनम् ॥ इति तस्याः परिश्रांतिं दुर्धर्मपरिशंकया ॥ ६१ ॥ आकर्ण्य
शिवधर्मज्ञो भयार्त्तां तामवोचत ॥ मा भैषीर्गिरिजे मोहाच्छिवभक्तो हतस्त्विति ॥ ६२ ॥ धर्मसूक्ष्मार्थवेत्तारो दुर्लभा गिरिकन्यके ॥ सदा
शिवस्य वदनैः सद्योजातादिसंश्रितैः ॥ ६३ ॥ आगमाः पंचभिः प्रोक्ता अष्टाविंशतिकोटयः ॥ निर्णयाः शिवभक्तानां शिवमार्गस्य शोभनाः ॥
॥ ६४ ॥ तेषुतेषु मुनींद्रैश्च नत्वैव प्रतिपद्यते ॥ कालो मुखं च कंकालं शैवं पाशुपतं तथा ॥ ६५ ॥ महाव्रतं पंच चैताः शिवमार्गप्रवृत्तयः ॥ भेदाश्च
बहवस्तेषामन्योन्यस्य शिवे रताः ॥ ६६ ॥ साध्य एको हि बलवान्सर्वैस्तैरनिशं शिवः ॥ सर्व एव सदा पूज्याः स्वधर्मपरिनिष्ठितैः ॥ ६७ ॥ अ
मत्सरैः शिवभक्तैः शिवाज्ञापरिपालकैः ॥ वेदैश्च बहुभिर्यज्ञैर्भक्त्या च परया शिवः ॥ ६८ ॥ आराध्यते महादेवः सर्वदा सर्वदायकः ॥ जीवहिंसा
न कर्त्तव्या विशेषण तपस्विभिः ॥ ६९ ॥ शिवधर्मस्य भेत्तारो निहंतव्यास्तथांजसा ॥ न वेषजुषि वीक्षेत न लिंगं नैव संभवम् ॥ ७० ॥ शिव
धर्मस्य भेत्तारं हन्यादेवाविचारयन् ॥ बहुभिः स्फूर्तया बुद्ध्या धर्मविद्भिर्निरूपिते ॥ ७१ ॥ शिवधर्मस्य विलये सद्यः शक्तिः प्रवर्तते ॥ अस्य
कर्म पुनर्दिष्टं लिंगमैश्वर्यचर्चितम् ॥ ७२ ॥ न जेतुं शक्यते देवि तेनासौ सर्वदैवतैः ॥ यदयं निहतो देवि त्वया शंकरमान्यया ॥ ७३ ॥ आ
क्रांतः शापदोषेण महर्षीणां शिवाश्रयात् ॥ अथ ते कुपितास्तस्य वैषम्यादवमानतः ॥ ७४ ॥ शेपुर्महिषवद्दुष्टो महिषोऽयं भवत्विति ॥ ततस्तद्व
चनात्सद्यो महिषोऽभूत्क्षणात्तथा ॥ ७५ ॥ प्रणम्य तोषयामास ययाचे शापमोचनम् ॥ दत्त्वा प्रकामरूपत्वं ददुरस्मै प्रसादिताः ॥ ७६ ॥ महिष

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्वेपि संहारं स्वयं देव्या शिवाज्ञया ॥ विषादो न च कर्त्तव्यो अंगदर्शनतस्त्वया ॥ ७७ ॥ सिद्धानां शिवरूपाणामवज्ञा कं न बाधते ॥ महिषत्वे
समुत्पन्ने दोषेण समुपस्थिते ॥ ७८ ॥ सिद्धप्रसादाल्लब्धोऽयं शापनाशस्त्वया कृतः ॥ सर्वे लोकाश्च संत्राता दुष्टोयं परिरक्षितः ॥ ७९ ॥ शापदो
षसमुत्पन्ने महिषत्वे विमोचिते ॥ त्वया च गिरिशप्रीत्यै तपः कुर्वाणयाद्रिजे ॥ ८० ॥ द्रष्टव्यं तैजसं लिंगमरुणाचलसंज्ञितम् ॥ पूर्वजन्मनि
भक्तोऽयमरुणाद्रिपतेः स्फुटम् ॥ ८१ ॥ महिषत्वे मदाक्रांतः परं लिंगेन संगतः ॥ भक्त्या लिंगधरं हंतुं कः समर्थो जगत्रये ॥ ८२ ॥ दृष्टाः पुर
त्रये पूर्वं रुद्रेण पूजितास्त्रयः ॥ त्वत्खड्गपरिकृत्तेन कंठेनास्य वरानने ॥८३॥ दीक्षादिरहितं लिगं दत्तं हंतीति चोदितम् ॥ कृतं हि महिषेणापि भक्ति
तो लिंगधारणम् ॥ ८४ ॥ कदाचित्क्षपणोक्तानां विभाषात्प्रत्ययं गतः॥ पूर्वजन्मतपोयोगात्स्मरणो[1] लिंगधारणात् ॥८५॥ त्वत्पादपद्मसंस्पर्शादयं
मुक्तो न संशयः॥ मदुक्तनिष्कृतीनां तु पातकानां च नाशनम् ॥८६॥ दर्शनं शैलवर्यस्य प्रायश्चित्तं परं मतम् ॥ संस्थाप्य विविधान्छैवाञ्छिवसि
द्धांतवेदिनः ॥८७॥ आवाह्य सर्वतीर्थानि सर्वदोषनिवृत्तये॥सरः किमपि संपाद्य स्नात्वा तत्र वरानने॥८८॥अघमर्षणसंयुक्ता सलिंगा स्नानमाचर ॥
त्रिसंध्यं चैव मासांते देवयागमहोत्सवे ॥ ८९ ॥ आराधयोपचारैस्त्वमरुणाद्रिमयं शिवम् ॥ ९० ॥ एवं तस्य मुनेर्निशम्य वचनं शैवार्थसंभावितं
प्रीता देवनमस्कृता गिरसुता देवी जगद्रक्षिका ॥ शैवं धममिम विधातुमुचितं शोणाचलस्याग्रतस्तीर्थागाहनबुद्धिमाशु विदधे कर्तुं त्वघक्षाल
नम् ॥ ९१ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां प्रथमे माहेश्वरखण्डेऽरुणाचलमाहात्म्ये पूर्वार्धे महिषासुरवधोत्तरं
देवीपाणौ महिषासुरशिरःसंलग्नतावृत्तांतवर्णनंनामैकादशोऽध्यायः ॥ ११ ॥ ॥ छ ॥ ॥ ब्रह्मोवाच ॥ ॥ इति संभाषमाणे तु महर्षौ मुनि
सेविते ॥ विजहौ गिरिजा शंकां शिवभक्तवधाश्रिताम् ॥ १ ॥ अथांतरिक्षादुदभूद्वाणी कर्णमनोहरा ॥ मा गमः शैलकन्ये त्वं पापनिष्कृतिकार
णात् ॥ २ ॥ गंगा च यमुना सिंधुर्गोदापि च सरस्वती ॥ नर्मदा सा च कावेरी शोणः शोणनदी च सा ॥ ३ ॥ अत्रैव नव तीर्थानि संभवंतु
शिलातले ॥ त्वत्खड्गदारिते देवि कुरु तत्राघमर्षणम् ॥ ४ ॥ अस्मिन्नाश्वियुजे मासि ज्येष्ठानक्षत्र आगते ॥ निमज्ज्य खड्गतीर्थे त्वं सलिंगा मासमा
वस ॥ ५ ॥ निवर्त्य सावनं मासमत्र दिक्पालसंमितम् ॥ ततः पाणिस्थितं लिंगं लब्ध्वा पापविशोधनम् ॥ ६ ॥ प्रतिष्ठापय तीर्थाग्रे लोकानुग्रह
कारणात् ॥ उत्तीर्य तीर्थवर्येऽस्मिन्स्नात्वा लिंगेऽर्चिते शिवे ॥ ७ ॥ तापत्रयोपशांतिश्च त्रैलोक्यस्य न संशयः ॥ सर्वपापहरं लिंगं स्थावरं

१ स्मरणः—जातिस्मरः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

महोत्सवसमायुक्तं यावद्दश
तीर्थसन्निधौ ॥ ८ ॥ स्थापय स्थिरया भक्त्या सदा लोकहिताय च ॥ नक्षत्रे वैश्वदैवत्ये देवक्याः संगमाचर ॥ ९ ॥ ततस्ते दर्शयिष्यामि तैजसं रूपमा
दिनावधि ॥ कृत्वा चावभृथं पुण्यनक्षत्रे वह्निदैवते ॥ १० ॥ सायमभ्यर्च्य विधिवच्छोणाचलवपुर्मम ॥ उभयं कर्तुमारेभे तपसा शैलक
त्मनः ॥ ११ ॥ एतत्कृतं ते लोकानां रक्षायै संभविष्यति ॥ इति तद्वचनं श्रुत्वा महर्षिवचनं च सा ॥ १२ ॥ तस्य कण्ठस्थितं लिंगं ध्यायन्ती पर्वता
न्यका ॥ खड्गेन दारयामास शिलातलमनाकुला ॥ १३ ॥ उदजृंभत तीर्थानां नवकं तत्र तत्क्षणात् ॥ अंतर्वसतितः कांत्या मेचकी
त्मजा ॥ १४ ॥ तीर्थे ममज्ज तस्मिन्सा मुनीनामभ्यनुज्ञया ॥ तीर्थानां नवकं तत्र संजातं स्फटिकप्रभम् ॥ १५ ॥ तत्र श्रिया सरोजानि चक्षुषोत्पलका
कृतमंजसा ॥ वसंत्यां शैलकन्यायां तीर्थे त्रिंशद्दिनं त्वथ ॥ १६ ॥ शम्भोर्विरहसंतप्तं मनश्चंचलतां ययौ ॥ कृतार्थास्सहसा जातास्तत्त
ननम् ॥ १७ ॥ मंदस्मितेन कुमुदं ससर्ज सलिलस्य सा ॥ देव्यास्तेनोदवासेन लोकास्तु निरुपद्रवाः ॥ १८ ॥ पूजयित्वा तपःसिद्धै
त्कालफलान्विताः ॥ मासांते सा समुत्तीर्य कृत्वा देव्युत्सवं तथा ॥ १९ ॥ कार्तिके मासि नक्षत्रे कृत्तिकाख्ये निशोदये ॥ तेजोमयाद्रिलिंगाय सर्वपात
रुपचारैर्बहूदयैः ॥ २० ॥ अरुणाद्रिमयं लिंगं तुष्टाव जगदंबिका ॥ नमस्ते विश्वरूपाय शोणाचलवपुर्भृते ॥ २१ ॥ शक्त्या च तत्त्वसंघातकरः काला
तकनाशिने ॥ ब्रह्मणा विष्णुना च त्वं दुष्परिच्छेद्यवैभवः ॥ २२ ॥ अग्निरूपोऽपि सञ्छांतो लोकानुग्रहकृतये ॥ तेजसां देव सर्वेषां बीजभूतं निग
नलाकृतिः ॥ २३ ॥ अद्रिश्रेष्ठारुणाद्रीश रूपलावण्यवारिधे ॥ विचित्ररूपमेतत्ते वेदवेद्यं सुरार्चितम् ॥ २४ ॥ अद्य पूतास्मि देवेश तव संदर्शनादहम् ॥
द्यसे ॥ दिव्यं हि परमं तेजस्तव देव महेश्वर ॥ २५ ॥ यत्पुरा ब्रह्मणा दृष्टं विष्णुना च विचिन्वता ॥ आविर्बभूव तेजोभिरापूर्य भुवनांतरम् ॥
॥ २६ ॥ तेजो दर्शय मे दिव्यं सर्वदोषहरं परम् ॥ प्रार्थयंत्यां तदा देव्यामरुणाद्रिमयः शिवः ॥ २७ ॥ प्रणम्य परया भक्त्या मुनिभिः सार्धमंबिका ॥
कोटिसूर्योदयप्रख्यं तुल्यं पूर्णेंदुकोटिभिः ॥ २८ ॥ कालाग्निकोटिसंकाशं तेजः परमदृश्यत ॥ हिरण्मयोऽब्रवीद्वाचं पुरुषः कलक
॥ २९ ॥ विस्मयाक्रांतहृदया ननंद नलिनेक्षणा ॥ अथ तेजोनिधेस्तस्मादरुणाद्रिः समुत्थितः ॥ ३० ॥ कारणैर्बहुभिर्लोकान्रक्षेथास्त्वं जग
न्धरः ॥ प्रसन्नोऽस्मि तपोभिस्ते स्थानेषु मम कल्पितैः ॥ ३१ ॥ तेजोमयमिदं रूपमीक्षितं च त्वयाधुना ॥ अशेषो हि प्रशांतोऽभूत्तेज
न्मयि ॥ ३२ ॥ तपांसि कुरुषे भूमौ किमन्यत्प्रार्थितं तव ॥ मल्लोचनत्विषा तेद्य तमोराशिः समुत्थितः ॥ ३३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सोऽस्य निरीक्षणात् ॥ अयं तु महिषो दुष्टो मद्भक्तिं लिंगपूजकः ॥ ३४ ॥ जग्राह सहसा ह्येतत्तस्य लिंगं गले स्थितम् ॥ अनेन भक्षितं तच्च
नास्तिकस्योपदेशतः ॥ ३५ ॥ अकरोन्मय्यविश्वासं लिंगरूपे गले स्थिते ॥ क्रमेण सोपि संप्राप्तो मुनिजन्म मनोहरम् ॥ ३६ ॥ मामेवाभ्य
र्चयन्ध्यायन्गणनाथत्वमावसन् ॥ पूर्वजन्मनि भक्तोऽयं महिषोपि त्वया हतः ॥ ३७ ॥ चिरं मल्लिंगधृग्यस्मात्सिद्धिरस्यापि देव्यतः ॥ शिवलिंगे
ष्वविश्वासः शिवभक्तावमाननम् ॥ ३८ ॥ न कर्त्तव्यं सदा भक्तैस्तस्माद्द्वे मुक्तिकांक्षिभिः ॥ दीक्षया रहितं लिंगं येन संधार्य्यते बलात् ॥
॥ ३९ ॥ न तादृशं फलं दत्ते वज्रवत्तं निहंति च ॥ न दोषस्तत्र किंचित्ते शोणाचलनिरीक्षणात् ॥ ४० ॥ सफला नयनावाप्तिः सर्वदोषविनाश
नात् ॥ त्वत्पुत्रस्तन्यदानेन धात्र्योपकृतमात्मजे ॥ ४१ ॥ त्वामपीतकुचां चक्रे वत्सलां भक्तरक्षिणीम् ॥ नक्षत्रे कृत्तिकाख्येऽत्र तव सन्निधिलोभतः
॥ ४२ ॥ प्रायश्चित्ताभिधानेन भवापीतकुचाभिधा ॥ पूजाशेषं समाधाय भक्तानुग्रहहेतवे ॥ ४३ ॥ भज मां करुणामूर्तिरपीतकुचनायिका ॥
इति देवस्य वचनमाकर्ण्यात्यंतशीतलम् ॥ ४४ ॥ प्रणम्य प्रार्थितवती प्रोवाच च तमंबिका ॥ देवदेव प्रसादेन त्वयानुग्रहशालिना ॥ ४५ ॥ एतत्ते
दर्शितं तेजो दृष्टं देवैश्च मानवैः ॥ प्रत्यक्षं कृत्तिकामासि मद्व्रतांतमहोत्सवे ॥ ४६ ॥ नक्षत्रे कृत्तिकाख्येऽस्मिंस्तेजस्ते दृश्यतां परम् ॥ तद्वीक्षित
मिदं तेजः परमं प्रतिवत्सरम् ॥ ४७ ॥ दृष्ट्वा समस्तैर्दुरितैर्मुच्यंतां सर्वजंतवः ॥ तथेति देवदेवेन प्रोचेऽथांतर्दधे गिरौ ॥ ४८ ॥ प्रदक्षिणं
चकारैनं सखीभिः सा ततोऽबिका ॥ घनश्यामलया कांत्या परितो जृंभमाणया ॥ ४९ ॥ अरुणाद्रिमयं लिंगं चक्रे मरकतप्रभम् ॥ मंदं
चरन्ती जाताभिः प्रभाभिः पादपद्मयोः ॥ ५० ॥ तस्तार परितो भूमिं पद्मपत्रैः सपल्लवैः ॥ प्रफुल्लकनकांभोजनीलोत्पलदलोत्करैः ॥ ५१ ॥
अर्चयन्तीव शोणाद्रिमभितो दृष्टिकांतिभिः ॥ इन्द्रादिलोकपालानामंगनाभिर्निषेविता ॥ ५२ ॥ प्रसादिता मातृगणैर्गंधदानविभूषणैः ॥
छत्रचामरभृंगारतालवृन्तफलाचिकाः ॥ ५३ ॥ वहन्तीभिः सुरस्त्रीभिर्वृता मुनिवधूयुता ॥ प्रदक्षिणं चकारैनमरुणाद्रिं स्वयंप्रभम् ॥
॥ ५४ ॥ कांक्षन्ती शिवसायुज्यं विवाहाग्निमिवाद्रिजा ॥ तस्यां प्रदक्षिणं भक्त्या कुर्वाणायां पदेपदे ॥ ५५ ॥ प्रेषिता शंभुना देवाः परिवव्रुः
सुरेश्वराः ॥ सरस्वतीसमं धात्रा विष्णुना च समं रमा ॥ ५६ ॥ सर्वदिक्पालकांताभिः समेता शैलबालिका ॥ निरुन्धतीव देवेन्द्रं सलिलै
र्वरदानतः ॥ ५७ ॥ अद्रिनाथस्वरूपस्य शीतत्वमिव कुर्वती ॥ तपस्ययाऽविनाभावाद्देवस्येव कृतस्मृतिः ॥ ५८ ॥ दुष्करस्योदवासस्य बोधय

१ सहसा—अकस्मात्—दीक्षया विनैव—इत्यर्थः । २ फलाचिका—तांबूलसंपुटकः—अत्र बोध्यः प्रकरणात् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्तीव साधुताम् ॥ ऋषीणां देवमानानामुपदेष्टुमिव क्रमात् ॥ ५९ ॥ क्रीडामिव पुराभ्यस्तां तपसापि च संगता ॥ आत्मानं विरहोत्तप्ता
मात्मस्थं तादृश शिवम् ॥ ६० ॥ संचिंत्य चोभयोः कर्तुं शीतलत्वं जले स्थिता ॥ तीर्थानामिव सर्वेषामुद्भूतानां शिलातले ॥ ६१ ॥ आधिक्य
मथ लोकस्य वक्तुकामा स्वयं स्थिता ॥ दुरितघ्नं च पंचाग्निमर्थावासं[1] सुदुष्करम् ॥ ६२ ॥ अधिगम्य तपस्तस्य शांतिं कर्तुमिव स्थिता ॥
महिषासुरकंठोत्थरक्तधारापरिप्लुतम् ॥ ६३ ॥ क्षालयंतीव लिंगं तदमलैस्तीर्थवारिभिः ॥ अरुणाख्यं पुरं रम्य निर्मितं विश्वकर्मणा ॥ ६४ ॥
अपीतकुचनाथेशशोणाद्रीश्वरतुष्टये ॥ शृंगेषु यस्य सौधेषु वसन्त्यो वारयोषितः ॥ ६५ ॥ अधःकृताभ्रताडितो जिगीषंतीव चामरीः ॥ यत्तुंगसौ
धशृंगाग्रे गायंतीर्वारयोषितः ॥ ६६ ॥ सिद्धचारणगंधर्वविद्याधरविराजितम् ॥ अष्टापदरथाक्रांतमष्टवीथिविराजितम् ॥ ६७ ॥ अष्टापदपथाकार
मष्टदिक्पालपूजितम् ॥ अष्टसिद्धियुतैः सिद्धैरष्टमूर्तिपदाश्रयैः ॥ ६८ ॥ अष्टांगभक्तियुक्तैस्तैर्युक्तमष्टांगबुद्धिभिः ॥ चातुर्वर्ण्यगुणोपेतमुपवर्ण
परिष्कृतम् ॥ ६९ ॥ लसत्सुवर्णदुर्वर्णशालामालासमास्थितम् ॥ शंखदुंदुभिनिस्साणमृदंगमुरजादिभिः ॥ ७० ॥ वीणावेणुमुखैस्तालैः सालापैरुप
रंजितम् ॥ ब्रह्मघोषनिनादेन महर्षीणां शिवात्मनाम् ॥ ७१ ॥ सेवितव्यं दिने दिव्यसमदर्शवृषध्वजम् ॥ नवरत्नप्रभाजालैर्नवग्रहसमोदयैः ॥७२॥
निशादिवसयोरेवं दर्शयन्निव सर्वदा ॥ विष्णुः स्थितश्च तं प्रीत्या सिषेवे पुरतो विभुम् ॥ ७३ ॥ शक्रः सुरगणैः सार्धं सहस्राक्षः समाययौ ॥
पपात दिव्यगंधाढ्या पुष्पवृष्टिः समंततः ॥ ७४ ॥ व्योमगंगाजलोत्संगशीतलो मरुदाववौ ॥ अतीव सौरभामोदवासिताखिलदिङ्मुखः ॥ ७५ ॥
कनकांकितशृंगाग्रपरिधूतवनावलिः ॥ दर्पसंभ्रमसंनद्धो ननाद वृषभो मुहुः ॥ ७६ ॥ वसंतप्रमुखाः सर्वे सहर्षमृतवः पुरः ॥ असेवंत प्रिय
करैः पुष्पैः स्वयमथोचितैः ॥ ७७ ॥ गणैश्च विविधाकाराः सिद्धाश्च परमर्षयः ॥ सुराश्च कुतुकोपेताः समागच्छन्दिदृक्षवः ॥ ७८ ॥ कुंकुम
क्षोदसंमिश्रकर्पूररजसान्वितः ॥ चर्यासुष्टिमहासारः समकीर्यत सर्वतः ॥ ७९ ॥ अथ मृदगकमर्दलझल्लरीपटहदुंदुभितालसमन्वितैः ॥ जलजकी
चककाहलनिस्वनैः सुरकृतैर्भुवन समपूरयन् ॥ ८० ॥ सुरवधूजननृत्तनिरंतरोल्लुलिततुंबरुगायनगीतिभिः ॥ अभिवृतो मुनिदेवगणान्वितो वृषगतः
समदर्शि वृषध्वजः ॥ ८१ ॥ सरसमेत्य शिवः करुणानिधिर्नतमुखीमपि तामपलज्जया ॥ ललितमंकमनंगरिपुः शिवां धृतिमहानधिरोप्य जहर्ष
सः ॥ ८२ ॥ ललितया निजया प्रिययान्वितः सुरमुनींद्रसमाजसमावृतः ॥ ललितमप्सरसां मुहुरादरान्नटनमैक्षत गीतिसमन्वितम् ॥ ८३ ॥

१ अर्थावासम्—मनोरथसंपादकम्--इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ शिवः सुरराजसमर्पितान्छुभपटीरसुखानिलसौरभान् ॥ हिमगिरिप्रहितांश्च समग्रहीन्मृगमदैः सह गंधसमुच्चयान् ॥ ८४ ॥ समनुले
पितहारसुमंडिताविभिगतौ सिततां समलंकृतौ ॥ स्वयमपीतकुचाकुचकुङ्मलावरणरंभणचञ्चलसत्करौ ॥ ८५ ॥ कठिनतुंगघनस्तनकोरकस्थ
गितमंगलगंधमनोहराम् ॥ गिरिसुतामधिगम्य शिवः स्वयं विरहतापमशेषमपाकरोत् ॥ ८६ ॥ अथ विनोदशतैरुपलक्षितां निजवियोगजताप
कृशान्विताम् ॥ अरुणशैलपतिः स्वयमद्रिजां वरमभीप्सितमर्थय चेत्यशात् ॥ ८७ ॥ सकुतुकं प्रणिपत्य नगात्मजा पुररिपुं भुवनत्रयगुप्तये ॥ इम
मयाचत शोणगिरीश्वरं वरमुदारमनुग्रहसंमुदम् ॥ ८८ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां प्रथमे माहेश्वरखण्डेऽरुणाचलमा
हात्म्ये पूर्वार्धे देव्याः शिवसमागमवर्णनंनाम द्वादशोऽध्यायः ॥ १२ ॥ ॥ ब्रह्मोवाच ॥ ॥ अथ गौरी पुरारातिं प्रणम्य जगदंबिका ॥ अयाचत्ताह
शा शंभुमविनाभावमात्मनः ॥ १ ॥ इदं विज्ञापयामास लोकानुग्रहकारणात् ॥ कृपया परया पूर्णा गौरी संवादसुंदरी ॥ २॥ न त्याज्यमेतत्ते रूपम
त्र दृष्टिमनोहरम् ॥ अहं त्वया न च त्याज्या सापराधापि सर्वदा ॥ मनोहरमिदं रूपमेतत्ते लोकमंगलम् ॥ ३ ॥ आलोक्यतां सदा सर्वैर्दिव्यग
न्धसमन्वितम् ॥ भुजंगगरलब्रह्मकपालशिवभस्मभिः ॥ ४ ॥ भीषणैरलमीशान जय वेषपरिग्रहैः ॥ सुकुमारो भवैर्दिव्यमाल्यगंधांबरादिभिः ॥
॥ ५ ॥ भूषितो रत्नभूषाभिर्विहरस्व महेश्वर ॥ आगता नित्यमीशान देवगन्धर्वकन्यकाः ॥ ६ ॥ सेवंतामत्र देवेशं नृत्यवादित्रगीतिभिः ॥
गणाश्च मानुषा भूत्वा सेवंतां त्वामहर्निशम् ॥ ७ ॥ त्वत्प्रसादादयं देव सुगंधिः पुष्टिवर्द्धनः ॥ आवयोः संगमो दृष्टो भूयात्सर्वार्थदायकः ॥ ८ ॥
गृहीतमत्र देवेश सर्वमंत्रात्मकं वपुः ॥ चरितं तव कैंकर्यमस्तु भक्तिः सदा तव ॥ ९ ॥ ज्ञानाज्ञानकृतं नित्यमपराधसहस्रकम् ॥ क्षम्यतां तव
भक्तानामनन्यशरणेक्षणात् ॥ १० ॥ इति देव्या वचः श्रुत्वा शम्भुः शोणाचलेश्वरः ॥ तमेव वरदः प्रादाद्वरं सर्वमभीप्सितम् ॥ ११ ॥ आभाष्य
गौरीं कुतुकाद्रंतुकामः स्वयं शिवः ॥ धारय त्वं मृगमदं मनोज्ञमिदमूचिवान् ॥ १२ ॥ ॥ महादेव उवाच ॥ ॥ पुलकाख्यो महान्दैत्यो
मृगरूपी तपोधिकम् ॥ कृत्वा प्राप वरं मत्तः सौगन्ध्यं परमाद्भुतम् ॥ १३ ॥ लब्ध्वा वरं स्वगन्धेनामोहयत्सुरयोषितः ॥ तथैवाधर्मसंप्राप्तो
बबाधे सकलं जगत् ॥ १४ ॥ देवैरभ्यर्थितः सोहमाहूयासुरनायकम् ॥ विमुंच लोकरक्षार्थमासुरं देहमित्यशाम् ॥ १५ ॥ ॥ पुलक उवाच ॥ ॥
त्यक्ष्यामि देवदेवेश देहमेतं त्वदाज्ञया ॥ प्रणम्य भक्तिमनसा मामप्यर्चेदमूचिवान् ॥ १६ ॥ मदंगसंभवं दिव्यं सौरभं विश्वमोहनम् ॥ धार्यतां देव
देवेश सदा सादरचेतसा ॥ १७ ॥ पुलकस्वेदजातो हि सदा प्रख्यायतां तव ॥ अयं मृगमदो लोके शृङ्गाररसवर्द्धनः ॥ १८ ॥ त्वत्प्रियः कांतिसौ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भाग्यरूपलावण्यदायकः ॥ विसृजामि निजं देहं देवदेव जगत्पते ॥ १९ ॥ सदा बहुमतो देव्या दिव्यसौरभलुब्धया ॥ मदंशसंभवा ये स्युर्मत्त पोलब्धसौरभाः ॥ २० ॥ लीयंतां तव देवेश मूर्तावालेपनच्छलात् ॥ तथेति मय्युक्तवति स दैत्यः पुलकाभिधः ॥ २१ ॥ विससर्ज निजं देहं म यिसन्यस्तजीवितः ॥ ततस्तदंगसंभूतं मदं बहुलसौरभम् ॥ २२ ॥ अधारयमहं प्रेम्णा शतशृंगारवर्द्धनम् ॥ तपसा देवदेवेशि तप्तं तव वपुः कृशम् ॥ २३ ॥ मदंगं च वियोगात्त इदं निर्वापयाधुना ॥ इति प्रशस्य बहुधा पुलकस्नेहमद्भुतम् ॥ २४ ॥ आलिलिंप महादेवः पार्वतीं प्रेममंदि राम् ॥ अपृच्छच्च हसन्देवः पार्वतीं ललनाकृतिम् ॥ २५ ॥ किमेतदिति हस्तोत्थं दृष्ट्वा तं जगदंबिका ॥ अब्रवीदरुणाद्रीशमानम्य जगदंबिका ॥ ॥ २६ ॥ आगतिं तस्य पुष्पस्य सदा स्वकरवर्तिनः ॥ २७ ॥ ॥ देव्युवाच ॥ ॥ अहं कैलासशिखराद्देवदेव त्वदाज्ञया ॥ तपः कर्तुमनुप्राप्ता कांचीं कनकतोरणाम् ॥ २८ ॥ अवाप्य मानसोद्भूतं कह्लारमिदमुत्तमम् ॥ आराधयं महादेवमम्लानगुरुसौरभम् ॥ २९ ॥ यदक्षयमविश्रांतमर्च नायोजितं मया ॥ अविच्छिन्नमहादीप्तिः कामधेनुघृताप्लुतः ॥ ३० ॥ अवेक्षणीयो भूपालैरनुपाल्यश्च सर्वदा ॥ धर्मलक्षणमाधेयं लोकरक्षार्थ मादरात् ॥ ३१ ॥ सर्वाभीप्सितसिद्ध्यर्थं मत्प्रीतिकरणाय च ॥ मया संस्थापिता धर्मा द्वात्रिंशल्लोकगुप्तये ॥ ३२ ॥ रक्षणीया प्रयत्नेन तत्सं निधिमुपागतैः ॥ सर्वालंकारसंयुक्तं सर्वभोगकृतोत्सवम् ॥ आलोक्यतामिदं रूपं कन्यायां मम कांतिमत् ॥ ३३ ॥ ॥ ब्रह्मोवाच ॥ ॥ इति देव्या वचः श्रुत्वा शम्भुः शोणाचलेश्वरः ॥ ३४ ॥ तथेति वरदः प्रादाद्वरं सर्वमभीप्सितम् ॥ एष शोणाचलः श्रीमान्दृश्यते लोकपूजितः ॥ ॥ ३५ ॥ सर्वदा वरदागौर्या सर्वभोगैश्च संवृतः ॥ य एतच्छांभवं रूपमरुणाद्रितया स्थितम् ॥ ३६ ॥ संपश्यंति नमस्यंति कृतार्थाः सर्व एव ते ॥ अरुणाचलमाहात्म्यमेतच्छृण्वंति ये भुवि ॥ ३७ ॥ भवंति सततं तेषां समग्राः सर्वसंपदः ॥ श्रीमत्त्वं वाक्पतित्वं च रूपमव्या हतं बलम् ॥ ३८ ॥ लभंते पापनाशं च माहात्म्यस्यास्य धारणात् ॥ सर्वतीर्थाभिषवणं सर्वयज्ञक्रियाफलम् ॥ ३९ ॥ सदाशिवप्रसादं च दत्ते शोणाद्रिदर्शनम् ॥ ४० ॥ इति कैलासशिखरात्प्राप्ता देवी शिवाज्ञया ॥ शापमोक्षं गतवती शोणाचलनिरीक्षणात् ॥ ४१ ॥ स्थानेष्वन्येषु देवस्य विद्यमानेषु च क्षितौ ॥ दिवि चात्यंतपुण्येषु शंभुरत्र प्रसेदिवान् ॥ ४२ ॥ अयं सदाशिवः साक्षादरुणाचलरूपतः ॥ दृश्यते परमं तेजः सर्गस्थित्यं तकारणम् ॥ ४३ ॥ एतत्तु तैजसं लिंगं सर्वदेवनमस्कृतम् ॥ दृश्यते कर्मभूरेषा तेन धर्माधिका मता ॥ ४४ ॥ अरुणाचलनाथस्य तेजसा धूत

१ काञ्चीस्थो महादेवः--इति प्रकरणप्रसंगतोऽर्थो वोध्यः । २ कन्यायाम्--कन्यासंक्रमणे--इत्यर्थः । ३ पृच्छंति--इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कल्मषाः ॥ भक्तिमंतो नरा लोके सुखमाप्स्यंति सर्वतः ॥ ४५ ॥ प्रदक्षिणैर्नमस्कारैस्तपोभिर्नियमैरपि ॥ येऽर्चयंत्यरुणाद्रीशं तेषां शंभुर्व
शंगतः ॥ ४६ ॥ न तथा तपसा योगैर्दानैः प्रीणाति शंकरः ॥ यथा सकृदपि प्राप्तादरुणाचलदर्शनात् ॥ ४७ ॥ स्वयंभुवः सदा
वेदाः सेतिहासा दिवि स्थिताः ॥ परितो गिरिरूपास्ते स्तुवंत्यरुणपर्वतम् ॥ ४८ ॥ एतस्य वैभवं सर्वं न मया न च शार्ङ्गिणा ॥ वचसा
शक्यते वक्तुं वर्षकोटिशतैरपि ॥ ४९ ॥ देवाश्च हरिमुख्यास्ते कल्पकाद्याः सुरद्रुमाः ॥ प्रच्छन्नरूपाः सेवंते सर्वदैवारुणाचलम् ॥ ५० ॥
न तस्य कलिदोषः स्यान्नाधिव्याधिविजृंभणा ॥ यत्र संपूज्यते लिंगमरुणाचलसंज्ञितम् ॥ ५१ ॥ इत्येतत्कथितं सर्वं तव शंभुपदाश्रयम् ॥ चरितं
ह्यरुणस्यास्य कल्पपुण्यदुरासदम् ॥ ५२ ॥ ॥ सूत उवाच ॥ ॥ इति विधिमुखनिःसृतामुदारामरुणगिरीशकथासुधापगां हि ॥ श्रुतिपुटयुग
लातिपिबन्मनोज्ञां सनकमुनिस्तपसां फलं स लेभे ॥ ५३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां प्रथमे माहेश्वरखण्डेऽरुणा
चलमाहात्म्ये पूर्वार्धे शिवेनारुणाचलस्य सर्वश्रैष्ठ्यवरप्रदानवर्णनंनाम त्रयोदशोऽध्यायः ॥ १३ ॥छ॥ अरुणाचलमाहात्म्यस्य पूर्वार्द्धं संपूर्णम् ॥

॥ ❀ ॥ इत्यरुणाचलमाहात्म्यपूर्वार्धं समाप्तम् ॥ (३।१) ॥ ❀ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इति श्रीस्कान्दे महापुराणे प्रथमे माहेश्वरखण्डेऽरुणाचलमाहात्म्ये
पूर्वार्धं समाप्तम् ॥ (३ । १) ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

॥ श्रीगणेशाय नमः ॥ अथारुणाचलमाहात्म्योत्तरार्धम्[1] ॥ व्यास उवाच ॥ वसंतो नैमिषारण्ये मुनयः सूतमब्रुवन् ॥ ॥ मुनय ऊचुः ॥ ॥ स्थाना
नामुत्तमं शैवं यत्स्थलं तद्वदस्व नः ॥ १ ॥ सूत उवाच ॥ ॥ यूयं शृणुत यत्पूर्वं नंदीश्वरमुखाच्छ्रुतम् ॥ मार्कंडेयेन तद्वक्ष्ये मुनयः शृणुतादरात् ॥२॥
॥ मार्कंडेय उवाच ॥ नंदीश्वर त्वया प्रोक्तो महिमा मध्यमेश्वरः॥मयाप्यवधृतः सर्वो भक्तिश्रद्धार्द्रचेतसा ॥३॥ तथापि वद मे भूयो देवदेव दयानिधे॥
अहं यत्परिपृच्छामि भवंतं विहितादरः ॥४॥ त्वयाप्यविदितं किंचिन्नास्त्यत्र भुवनत्रये ॥ सर्वागमपुराणेषु बाह्येष्वाभ्यंतरेषु च ॥५॥ स्वर्गापवर्गयोः
पुंसां भूमिरेव विशिष्यते[3] ॥ सर्वकर्माणि निर्मातुं तत्तत्फलपरायणैः ॥६॥ फलं च त्रिविधं पुंसां त्वयैव कथितं पुरा ॥ भूमौ सुखं स्वर्गभोगः कैवल्य
मिति भेदतः ॥ ७ ॥ पुण्यक्षयेण क्षीयेत प्रायः प्राथमिकं द्वयम् ॥ क्षीयते न तृतीयं तु कर्मणामेव नाश्रयात् ॥ ८ ॥ तत्सिद्धिस्तु त्वया प्रोक्ता विशुद्ध
ज्ञानगोचरा ॥ सर्वेषां दुर्लभं शुद्धज्ञानं देहभृतां पुनः ॥९॥ तज्ज्ञानं कुत्र वा क्षेत्रे शास्त्रादिपठनं विना ॥ शिवपूजनमात्रेण सिद्ध्येत्सर्वशरीरिणाम्
॥ १० ॥ ज्ञानयोगक्रियाचर्यास्वशेषाणां शरीरिणाम् ॥ अपि शैवागमोक्तासु न बुद्धिः संप्रवर्त्तते ॥ ११ ॥ यस्य स्थानस्य माहात्म्यादल्पैरपि शरी
रिणः ॥ लप्स्यंते नियमैः शुद्धज्ञानं तन्मम कथ्यताम् ॥ १२ ॥ भस्मरुद्राक्षवहनादीश्वरस्मरणात्सकृत् ॥ यत्र मुग्धैरपि श्रेयो लभ्यं तत्स्थान
मुच्यताम् ॥ १३ ॥ अबुद्धिपूर्वकेणापि यत्र वासेन देहिनाम् ॥ अविघ्नं सेत्स्यते श्रेयः स्थानं तन्मेऽनुगृह्यताम् ॥ १४ ॥ जातानां वर्णसांकर्य्ये
तैरश्चीं योनिमीयुषाम् ॥ स्थावराणामपि श्रेयो यत्र तत्क्षेत्रमुच्यताम् ॥१५॥ इतीरयित्वा स मृकंडुनंदनः समं मुनींद्रैरपरैर्महात्मभिः॥ पपात तस्यां
घ्रिसरोरुहद्वये शिलादसूनोरखिलागमाब्धेः ॥ १६ ॥ इति श्रीस्कांदे महापुराणे एकाशीतिसाहस्र्यां संहितायां प्रथमे माहेश्वरखण्डेऽरुणाचलमा
हात्म्य उत्तरार्धे स्थानमाहात्म्यप्रस्ताववर्णनंनाम प्रथमोऽध्यायः ॥१॥ छ॥ नंदिकेश्वर उवाच ॥ ॥ स्थानं त्वया मुने पृष्टमस्ति माहेश्वराग्रणि॥ चरा

---

१ इदमरुणाचलस्थानं च दक्षिणप्रांते कांचीपुर्या नैर्ऋत्यकोणे 'तिरुवण्णामले' इत्याख्ये ग्रामे विख्यातमस्ति । अत्र ग्रामे रेल्वेस्टेशनमपि–'तिरुवण्णामले' इत्याख्यमेव--मद्रासतो दक्षिणे विळीपुरं--जंक्शनतः पश्चिमे–वर्तते– । तदेतत्तीर्थयात्रोत्सुकैर्बोद्धव्यम् । २ मध्यगेश्वरः---इ०पा० । ३ प्रशिष्यते–इ० पा० । ४ अत्र हि--पुस्तकेषु बहुषु--"इति श्रीस्कान्दे महापुराणे कोटिरुद्रसंहितायामरुणाचलमाहात्म्ये सप्ताशीतितमोऽध्यायः प्रथमः" एवं पाठो वर्तते--एतेन--कोटिरुद्रसंहिता--अत्र पुराणेऽस्ति किं वेति संदेह उत्पद्यते । श्रीनारदीयपुराणोक्तक्रमानुसारेण तु कुमारिकाखण्डान्तिमकथासमनन्तरमरुणाचलकथाप्रस्तावारम्भे--'सनकब्रह्मसंवादः' इत्यादिविषयानुक्रमो वर्तते । तमेव क्रममुपक्रम्यात्र--कुमारिकाखण्डसमनन्तरमरुणाचलमाहात्म्यं प्रक्रान्तमस्तीति बोद्धव्यं सुधीभिः--एवं च--प्रथमे माहेश्वरखण्डे--केदारखण्डं--कुमारिकाखण्ड--अरुणाचलमाहात्म्य--इत्येतेऽन्तर्गता विभागाः--नारदीयपुराणोक्तानुक्रमणिकानुसारेण सन्ति । त एवात्र ग्रंथे गृहीताः सन्तीति बोध्यम् ।

CC-0. In Public Domain. Digitization by eGangotri

चराणां सर्वेषां भूतानामपि शर्मणे ॥ १ ॥ प्रकल्पितं हि देवेन तत्तत्कर्मानुगुण्यतः ॥ शरीरभाजां जननं तासुतास्वपि योनिषु ॥ २ ॥ त्वया शुश्रूषितं तेषां हिताय महते ह्यलम् ॥ अन्यथा संसृतेर्हानिः कल्पकोटिशतैर्न हि ॥ ३ ॥ स्वल्पैर्हि कर्मभिर्ज्ञानैरपि प्राप्ता पुनःपुनः ॥ घटीयंत्रनयाज्जन्ममरणे नैव शाम्यतः ॥ ४ ॥ कथं नु विरतो देही गर्भमोकसमागमात् ॥ विश्रांतये प्रकल्पेत विशुद्धज्ञानतो विना ॥ ५ ॥ प्रदेशाः कथिताः पूर्वं प्रसंगवशतो मया ॥ ऋषिभेदादिकं तेषु निवासः कृत्तिवाससः ॥ ६ ॥ केचित्तीरेषु गंगायाः केचित्सारस्वते तटे ॥ कालिंदीतीरयोरन्ये कतिचिच्छोणरोधसि ॥७॥ अपरे नर्मदातीरे परे गोदावरीतटे ॥ कतिचिद्गोमतीतीरेष्वन्ये हैमवतीतटे ॥८॥ समुद्रपार्श्वेष्वितरे द्वीपेष्वन्ये सरस्वताम् ॥ मुखेषु केचित्सिंधूनां संभेदेष्वपि केचन ॥९॥ कृष्णवेणीतटे केचित्तुंगभद्रांतिके परे ॥ उपवेण्यां कतिपये परे शक्त्यापगांतिके ॥ १० ॥ कावेरीतीर इतरे केचिद्वेगवतीतटे ॥ अन्ये तु ताम्रपर्ण्याश्च कतिचिन्मुरलातटे ॥ ११ ॥ केचिदैरावतीतीरे त्वितरे यातुकांक्षिके ॥ १२ ॥ कन्यातटेषु कतिचित्कतिचित्कुमारीतीरे परे च तमसावरुणांतिकेन्ये ॥ मंदाकिनीसविधयोरितरे परेऽपि शिप्रातटे परिसरेषु परे सरय्वाः ॥ १३ ॥ विपाशाभ्याश इतरे शतद्रुतितटे परे ॥ चर्मण्वत्युपकंठेऽन्ये केचिद्भीमरथीतटे ॥ १४ ॥ केचिद्बिंदुसरोभ्यर्णे परे पंपासरस्तटे ॥ अभ्यर्णकेपि भैरव्याः कतिचित्कौशिकीतटे ॥ १५ ॥ अपरे मालिनीतीरे परे गंधर्वतीतटे ॥ कतिचिन्मानसोपांते केचिदच्छोदरोधसि ॥ १६ ॥ इंद्रद्युम्नसरस्यन्य एके तु मणिकर्णिके ॥ परे तु वरदातीरे ताप्यां कतिचनापरे ॥ पातालगंगासविधे शरावत्यंतिके परे ॥ १७ ॥ लोहित्याकूलयोः केचित्कतिचित्कालमातटे ॥ वितस्तोपांतिके त्वन्ये चंद्रभागांतिके परे ॥ १८ ॥ सुरलोपांतिके केचित्पयोष्णीतीरयोः परे ॥ केचिन्मधुमतीतीरे केचनानु पिनाकिनीम् ॥ १९ ॥ उक्तं वाराणसीक्षेत्रं क्रोशपंचकपावनम् ॥ देवस्तत्राविमुक्ताख्यो विशालाक्ष्या समर्चितः ॥ २० ॥ कपालमोचनं यत्र यत्रास्ते कालभैरवः ॥ मृतानां यत्र रुद्रत्वं काशीं विद्धि हि तां मुने ॥ २१ ॥ गयाप्रयागावपि ते कथितौ सर्वसिद्धिदौ ॥ यत्र पिंडप्रदानेन तुष्यंति पितरः किल ॥ २२ ॥ आकर्णितं च केदारं यस्मिन्महिषरूपधृक् ॥ देवोपि च हतो देव्या सर्वश्रेयस्करो नृणाम् ॥ २३ ॥ सर्वसिद्धिकरं पुंसां क्षेत्रं बदरिकाश्रमम् ॥ यत्रास्ते त्र्यंबको देव्या नरनारायणार्चितः ॥ २४ ॥ श्रुतं हि नैमिषं क्षेत्रं त्वया यत्र महेश्वरः ॥ देवदेवाभिधः पुण्यो देवी सारंगधारिणी ॥ २५ ॥ अमरेशमिति स्थानं प्रोक्तं सर्वार्थसाधकम् ॥ ॐकारनामा तत्रेशश्चंडिकाख्या महेश्वरी ॥ २६ ॥ पुष्कराख्यं महास्थानं श्रुतं ते कथितं मया ॥ यत्र

१ अपि--इ० पा० । २ घटीयन्त्रनयात्--घटीयन्त्रन्यायेन--इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

देवो रुजोगंधिः पुरुहूता महेश्वरी ॥ २७ ॥ आंषाढीनाम ते स्थानं पांवनं कथितं मया ॥ आषाढेशो हरस्तत्र रतीशा परमेश्वरी ॥ २८ ॥ दंडिमुंडी समाख्यं च स्थानं ते कथितं मया ॥ यत्र मुंडी महादेवो दंडिका परमेश्वरी ॥२९॥ लांकुलंनाम ते स्थानं संशुद्धं कथितं मया ॥ लाकुलीशो हरो यस्मिन्ननंगा सर्वमंगला ॥ ३० ॥ मांरभूतिरिति स्थानं भवतोऽभिहितं मया ॥ यत्र माराभिधः शंभुर्भूत्याख्या भूधरात्मजा ॥ ३१ ॥ अंरालकेश्वरं नाम स्थानं ते कथितं मया ॥ यत्र सूक्ष्माभिधः शूली सूक्ष्माख्या शैलनंदिनी ॥ ३२ ॥ गंयानाम महाक्षेत्रं तव प्रस्तावितं मया ॥ मंगलाख्या शिवा यत्र शंकरः प्रपितामहः ॥ ३३ ॥ कुंरुक्षेत्रमिति स्थानं भवते विनिवेदितम् ॥ यत्र स्थाणुप्रिया देवी देवः स्थाणुसमाह्वयः ॥ ३४ ॥ उक्तं कंनखलंनाम मया ते स्थानमुत्तमम् ॥ उग्रो यत्र पुरारातिरुग्रा गिरिवरात्मजा ॥ ३५ ॥ तालंकाख्यं महाक्षेत्रं मार्कंडेय मयोदितम् ॥ देवी स्वायंभुवी यत्र स्वयंभूः परमेश्वरः ॥ ३६ ॥ अंट्टहासमिति प्रोक्तं महास्थानं मया तव ॥ यत्रार्कः पूजयित्वेशमासीत्पूर्णमनोरथः ॥ ॥ ३७ ॥ कृंत्तिवासाभिधं क्षेत्रमुक्तं ते वेदवित्तम ॥ यः कैलासादपि श्लाघ्यो निवासः कृत्तिवाससः ॥ ३८ ॥ भ्रमरांबिकया देव्या महेशो मल्लिकार्जुनः ॥ श्रीशैले सृष्टिसिद्ध्यर्थं पूजितः परमेष्ठिना ॥ ३९ ॥ सुंवर्णमुखरीतीरे कालहस्तीति शंकरः ॥ व्यासेनाराधितो भृंगमुखरालकयांबया ॥ ४० ॥ कांच्यांमेकाम्रमूलस्थः कामाक्ष्या कामशासनः ॥ तपस्यंत्याभिसंश्लिष्टो वलयेनांकितोऽभवत् ॥ ४१ ॥ अस्ति व्यांघ्रपुरंनाम तिल्लिकाननमध्यगम् ॥ यत्र नृत्यंतमीशानं पर्युपास्ते पतंजलिः ॥ ४२ ॥ श्वेतांरण्यमिति स्थानमुक्तं तव मया पुरा ॥ भग्नमैरावतो दंतं भेजे यत्र शिवार्चनात् ॥ ४३ ॥ सेतुंबंधमिति स्थानमवोचं तत्र राघवः ॥ रामनाथाख्यया देवमंहोघ्नं प्रत्यतिष्ठिपत् ॥ ४४ ॥ गर्तप्रत्याह्वय स्थानं विद्यते वृषभध्वजः ॥ यत्र जंबूतरोर्मूले जगद्रक्षार्थमाश्रितः ॥ ४५ ॥ मंणिमुक्तानदीमन्वक्क्षेत्रे वृद्धाचलाह्वये ॥ नित्यं सन्निहितो देव इत्याकर्णित एव ते ॥ ४६ ॥ श्रीमन्मंध्यार्जुनंनाम श्रुतं स्थानमनुत्तमम् ॥ यस्मिन्वरप्रदो नित्यं गौरीसहचरो हरः ॥ ४७ ॥ आस्थितं सोमनाथेन सोमंतीर्थं त्वया श्रुतम् ॥ यत्र त्यक्तवतां देहं न भूयो भवबंधनम् ॥४८॥ आकर्णितं हि भवता क्षेत्रं सिद्धंवटाह्वयम् ॥ यत्र सिद्धाः समर्चंति ज्योतिर्लिंगमनुत्तमम् ॥ ४९ ॥ अश्रावि खलु ते क्षेत्रं कमंलालयसंज्ञकम् ॥ वल्मीकेशार्चनाल्लेभे यत्र श्रीर्जीविता हरेः ॥ ५० ॥ श्रुतवानसि कंकाद्रिं यत्र संनिहितो हरः ॥ इदानीमप्युपासाते मोक्षाय ब्रह्मकेशवौ ॥५१॥ श्रीमद्द्रोणंपुरं वेत्सि यस्मिन्कलियुगक्षये ॥ नौकामारूढवानब्धौ क्षुभिते पार्व

१ श्रवणम्--इ० पा० । २ कंकांडीम्--इ० पा० ।

तीपतिः ॥ ५२ ॥ श्रुतं ब्रह्मपुरंनाम क्षेत्रं यत्रेंद्रजित्पुरा ॥ आर्यपुष्करिणीतीरे स्थापयामास धूर्जटिम् ॥ ५३ ॥ श्रीकोटिकाख्यं ज्ञानाभिक्षेत्रं
यत्रेंदुशेखरः ॥ समाराधयतां पुंसां पापकोटीर्व्यपोहति ॥ ५४ ॥ आकर्णितं च गोकर्णं शिवं यत्संनिधानतः ॥ आरिराधयिषुः स्वर्गं जामदग्न्यो
न कांक्षति ॥ ५५ ॥ त्रिपुरांतकमुक्तं ते क्षेत्रं यत्र त्रियंबकः ॥ निराकरोति निरयाद्भयं दृष्टवतां नृणाम् ॥ ५६ ॥ उक्तं कालांजनं क्षेत्रं यद्रासी
कालकंधरः ॥ निर्वापयति भक्तानां घोरसंसारसंज्वरम् ॥ ५७ ॥ प्रियालवणमाख्यातं क्षेत्रं यत्रांबिकापतिः ॥ पयोर्थिने पयःसिंधुं वितताराप
मन्यवे ॥ ५८ ॥ क्षेत्रं प्रभासमुक्तं ते यत्र खंडेंदुशेखरः ॥ पूजितः शौरिसीरिभ्यां दत्तवानक्षयं फलम् ॥ ५९ ॥ वेदारण्यं विजानीषे यस्मि
न्प्रमथनायकः॥ अभ्यर्थितोऽभून्मोक्षार्थं दक्षेण प्राकृतागसा ॥ ६० ॥ हेमकूटं त्वमश्रौषीः स्थानं विषमचक्षुषः[1] ॥ पुंसां तपस्यतां यत्र पुनर्जननतो
न भीः ॥ ६१ ॥ क्षेत्रं वेणुवनंनाम विद्यते पापनाशनम् ॥ यत्र वंशलतागर्भाज्जातो मुक्तामणिः शिवा ॥ ६२ ॥ जालंधरमिति स्थानमंधकारे
स्त्वया श्रुतम् ॥ लेभे गणपतां तत्र तपस्याभिर्जलंधरः ॥ ६३ ॥ ज्वालामुखमिति स्थानमज्ञासीः कथितं मया ॥ यत्र ज्वालामुखी देवी काल
रुद्रमपूजयत् ॥ ६४ ॥ अस्ति भद्रवटोनाम[2] क्षेत्रमुक्तं श्रुतं त्वया ॥ त्र्यंबकं यत्र हेरंबः संपदे पर्यपूजयत् ॥ ६५ ॥ न्यग्रोधारण्यमुक्तं ते यत्रोग्रो
निर्ममे किल ॥ उच्चंडतांडवं काल्या साकं संघर्षमेयिवान् ॥ ६६ ॥ गंधमादनसंज्ञं तत्क्षेत्रमाकर्णितं त्वया ॥ आंजनेयेन रचितं यत्र मृत्युंजया
र्चनम् ॥ ६७ ॥ गोपर्वतमिति स्थानं शंभोः प्रख्यापितं मया ॥ यत्र पाणिनिना लेभे वैयाकरणिकाग्र्यता ॥ ६८ ॥ वीरकोष्ठमिति क्षेत्रस्थानं
न्नव्वधारितम् ॥ यत्र प्रचेतसा[3] लेभे तपसा कविमुख्यता ॥ ६९ ॥ महातीर्थमिति प्रोक्तं जानीषे यत्र शंभुना ॥ अध्यापितास्सुपर्वाणः सर्वेऽपि
द्रुहिणादयः ॥ ७० ॥ मयूरपुरमुक्तं ते क्षेत्रं माहेश्वरं मया ॥ लेभे यत्र व्रतस्थेन ह्रादिनी वज्रपाणिना ॥ ७१ ॥ श्रीसुंदरमिति क्षेत्रमुक्तं वेगवती
तटे ॥ कलावपि युगे यस्मिन्देवदेवेन दीप्यते ॥ ७२ ॥ कुंभकोणमिति स्थानं शंभोर्वेत्सि हि यत्र सा ॥ गंगापि माघे सान्निध्यं कुरुते स्वावशांतये
॥ ७३ ॥ अनुगोदावरीतीरं त्र्यंबकंनाम ते श्रुतम् ॥ शक्तिं यत्र गुहो लेभे तारकासुरघातिनीम् ॥ ७४ ॥ श्रीपाटलं व्याघ्रपुरमाख्यातं वेदवित्तम ॥
त्रिशंकुना जातिशुद्ध्यै[4] यत्र गंगाधरोर्चितः ॥ ७५ ॥ क्षेत्रं कदंबपुर्याख्यं भवता चावधारितम् ॥ त्वत्कृते यत्र शूलेन कृतांतं शम्भुररक्षिणोत् ॥
॥ ७६ ॥ अविनाशाख्यमुक्तं ते क्षेत्रं यत्र वृषध्वजः ॥ सान्निध्यं पडिकण्ठाय वितताार प्रसेदिवान् ॥ ७७ ॥ रक्तकाननमाख्यातं मया क्षेत्रं तवा

१ विषमचक्षुषः--त्रिनेत्रस्य--इत्यर्थः । २ भद्रवटा--इ० पा० । ३ प्रचेतसा--अत्र--वाल्मीकिना--इत्यर्थो बोध्यः । ४ ज्ञातिशुद्ध्यै--इ०पा० ।

CC-0. In Public Domain. Digitization by eGangotri

नघ ॥ मित्रावरुणयोर्यत्र रुद्रोऽजनि वरप्रदः ॥ ७८ ॥ श्रीहाटकेश्वरं क्षेत्रं पातालस्थं त्वया श्रुतम् ॥ यत्र वैरोचनिर्देवं स्वपदप्राप्तयेऽर्चति ॥ ७९ ॥
वेत्सि शंभोः प्रियावासं कैलासं नित्यसेवकः ॥ यत्र यक्षेश्वरस्त्र्यक्षमभ्यर्चयति भक्तितः ॥ ८० ॥ स्थानानि खंडपरशोरित्युक्तानि मया पुरा ॥
त्वयाप्यवधृतान्येव किं भूयः श्रोतुमिच्छसि ॥ ८१ ॥ इत्यूचिवानेष शिलादनंदनो मुनेर्मृकण्डोस्तनयं मुनीश्वरम् ॥ भक्त्या नमंतं पदयोः करेण
पस्पर्श मौलौ करुणारसार्द्रः ॥ ८२ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां प्रथमे माहेश्वरखण्डेऽरुणाचलमाहात्म्य उत्तरार्धे
महीमण्डलस्थविविधशिवक्षेत्रवर्णनंनाम द्वितीयोऽध्यायः ॥ २ ॥ ॥ मार्कंडेय उवाच ॥ ॥ भगवन्वंचनेनालं त्वदेकप्रवणे मयि ॥ किं मादृशोऽ
स्ति ते शिष्यस्त्वत्कृपैवात्र साक्षिणी ॥ १ ॥ स्थानेषु प्राक्त्वदुक्तेषु फलानि च पृथक्पृथक् ॥ यत्र सर्वफलप्राप्तिः स्थानं तद्वद मे विभो ॥ २ ॥
चराचराणां भूतानां जानतामप्यजानताम् ॥ यस्य स्मरणमात्रेण मुक्तिस्तद्वद देशिक ॥ ३ ॥ पश्यैतेन मयैकेन भगवान्नानुराध्यसे ॥ सर्वैरप्येत
दर्थं हि मुनिभिः परिवार्यसे ॥ ४ ॥ पुलहेन पुलस्त्येन वशिष्ठेन मरीचिना ॥ अगस्त्येन दधीचेन नक्रुणा भृगुणात्रिणा ॥ ५ ॥ जाबालिना
जैमिनिना धौम्येन जमदग्निना ॥ उपयाजेन याजेन भरतेनार्वरीवता ॥ ६ ॥ पिप्पलादेन कण्वेन कुमुदेनोपमन्युना ॥ कुमुदाक्षेण[1] कुत्सेन
वत्सेन वरतंतुना ॥ ७ ॥ विभांडकेन व्यासेन कण्वरीषेण कंडुना ॥ मांडव्येन मतंगेन कुक्षिणा मांडकर्णिना ॥ ८ ॥ चंडकौशिकशांडिल्यशाक
टायनकौशिकैः ॥ शातातपमधुच्छन्दोगर्गसौभरिरोमशैः ॥ ९ ॥ आपस्तंबपृथुस्तंबभार्गवोदंकपर्वतैः ॥ भारद्वाजेन दाल्भ्येन दांतेन श्वेतकेतुना
॥ १० ॥ कौंडिन्यपुण्डरीकाभ्यां रैभ्येण तृणबिन्दुना ॥ वाल्मीकिना नारदेन वह्निना दृढमन्युना ॥ ११ ॥ बोधायनसुबोधाभ्यां हारीतेन मृक
ण्डुना ॥ दुर्वाससातितीक्ष्णेन जालपादेन शक्तिना ॥ १२ ॥ कांकार्येण नदन्तेन देवदत्तेन न्यंकुना ॥ सुश्रुता चाग्निवेश्येन गालवेन मरुत्वता
॥ १३ ॥ लोकाक्षिणा विश्रवसा सैंधवेन सुमंतुना ॥ शिशुपायनमौद्गल्यपथ्यचावनमातुरैः ॥ १४ ॥ ऋष्यशृङ्गैकपात्क्रौंचदृढगोमुखदेवलैः ॥
अंगिरोवामदेवौर्वपतंजलिकपिंजलैः ॥ १५ ॥ सनत्कुमारसनकसनंदनसनातनैः ॥ हिरण्यनाभसत्याख्यवाताशनसुहोतृभिः ॥ १६ ॥ मैत्रेयपुष्प
जित्सत्यतपःशालीष्यशैशिरैः ॥ निदाघोतथ्यसंवर्त्तशौल्कायनिपराशरैः ॥ १७ ॥ वैशम्पायनकौशल्यशारद्वतकपिध्वजैः ॥ कुशस्वार्चिककैवल्य
याज्ञवल्क्याश्वलायनैः ॥ १८ ॥ कृष्णातपोत्तमानंतकरुणामलकप्रियैः ॥ चरकेण पवित्रेण कपिलेन कणाशिना ॥ १९ ॥ नरनारायणाभ्यां च

१ कुमुदाल्येन--इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दिव्यैश्चान्यैर्महर्षिभिः ॥ मत्प्रश्नोत्तरशुश्रूषातत्परैः प्रत्यवेक्ष्यसे ॥ २० ॥ माहेश्वराग्रगण्यस्त्वं समस्तागमपारगः ॥ व्याप्तश्च सर्वलोकेषु यस्मात्तदनुसाधि नः ॥ २१ ॥ त्वन्मुखादेव भगवन्वयमेते सुशिक्षिताः ॥ पूर्वमेव त्वया देव किं वान्यदुपपद्यते ॥ २२ ॥ दिव्यागमपुराणानि द्रष्टव्यः परमेश्वरः ॥ कात्यायनी वा स्कन्दो वा भगवान्वाथ वा भवान् ॥ २३ ॥ त्वयि यद्यस्ति नो भक्तिर्दया चास्मासु ते यदि ॥ रहस्यमिदमुद्घाट्य प्रसादं कर्तुमर्हसि ॥ २४ ॥ इत्थं मृकण्डुतनयेन स नंदिकेशो विज्ञापितः सविनयं स्मयमानवक्त्रम् ॥ तं प्राह चोन्नततरं शिवभक्तिमत्सु प्राग्भक्तितोषितशिवाप्तशरीरसिद्धिम् ॥ २५ ॥ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां प्रथमे माहेश्वरखण्डेऽरुणाचलमाहात्म्य उत्तरार्धेऽरुणाचलाख्यरहस्यस्थानप्रश्नवर्णनंनाम तृतीयोऽध्यायः ॥ ३ ॥ ॥ ॥ छ ॥ ॥ नंदिकेश्वर उवाच ॥ ॥ मुने मनःपरीक्षार्थं तथा त्वं भाषितो मया ॥ तव चेन्नाभिधास्यामि कस्य वान्यस्य कथ्यते ॥ १ ॥ त्वादृगन्योस्ति किं लोके शिवधर्मपरायणः ॥ येन स्वल्पायुषाप्येवं नित्ये[1]नाभावि भक्तितः ॥ २ ॥ कस्यान्यस्य कृते देवः स्वस्यैवाज्ञाकरं यमम् ॥ क्रुद्धो नियंत्रयामास चरणांगुष्ठपीडितम् ॥ ३ ॥ त्वमेव शांकरान्धर्मान्सर्वान्विद्धि रहस्यतः ॥ योग्रेऽसि कालवद्भ्रांतः परिपक्वोसि चेतसा ॥ ४ ॥ त्वयैवान्येन केनाहमेवं शुश्रूषितश्चिरम् ॥ त्वयीव कस्मिन्नन्यस्मिन्ममापि प्रीतिरीदृशी ॥ ५ ॥ उपदेक्ष्यामि ते क्षेत्रं गुप्तं तद्धर्मशासनैः ॥ भक्त्यावधारणीयं यद्भक्तिकैवल्यकांक्षिभिः ॥ ६ ॥ आदरादनुयुंजा[2]नं शिष्यं यो देशिकः स्वयम् ॥ उपदेशेन संतुष्टं न करोति स किंगुरुः ॥ ७ ॥ समाहितमना भूत्वा विश्वासं कुरु शाश्वतम् ॥ मयोपदिश्यमानेऽस्मिन्रहस्ये पारमेश्वरे ॥ ८ ॥ स्मर स्मरांतकं देवं वंदस्वाध्या[3]य शांकरीम् ॥ उपांशूच्चारयोंकारं श्रेयस्ते महदागतम् ॥ ९ ॥ अस्ति दक्षिणदिग्भागे द्राविडेषु तपोधन ॥ अरुणाख्यं महाक्षेत्रं तरुणेंदुशिखामणेः ॥ १० ॥ योजनत्रयविस्तीर्णमुपास्यं शिवयोगिभिः ॥ तद्भूमेर्हृदयं विद्धि शिवस्य हृदयंगमम् ॥ ११ ॥ तत्र देवः स्वयं शम्भुः पर्वताकारतां गतः ॥ अरुणाचलसंज्ञावानस्ति लोकहितावहः ॥ १२ ॥ आवासः सर्वसिद्धानां महर्षीणां सुपर्वणाम् ॥ विद्याधराणां यक्षाणां गंधर्वाप्सरसामपि ॥ १३ ॥ सुमेरोरपि कैलासादप्यसौ मन्दरादपि ॥ माननीयो महर्षीणां यः स्वयं परमेश्वरः ॥ १४ ॥ स्पृहयंति यदीयेभ्यो जंतुभ्योपि दिवौकसः ॥ अयत्नलभ्यमुक्तिभ्यो दिवावासप्रवंचिताः ॥ १५ ॥ न कल्पवृक्षाः सदृशा यत्रत्यानां महीरुहाम् ॥ पत्रपुष्पफलैर्नित्यं येर्चयंति गिरौ हरम् ॥ १६ ॥ हिंसैकरुचयो व्याधा[4] अपि रूपानुसारतः ॥ अनंता यत्र देवस्य प्रादक्षिण्यफ

१ नित्येन--अभावि--चिरंजीविना भूतम्--इत्यर्थः । २ अनुयुंजानं--पृच्छकम्--इत्यर्थः । ३ आध्याय--ध्यात्वेत्यर्थः । ४ व्याघ्राः--इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लास्पदम् ॥ १७ ॥ यदुद्देशचरा मेघाः शिखराण्यभिबंधकाः ॥ गंगावतो हिमवतोऽप्यधिकं स्वं विजानते ॥ १८ ॥ कलारावाः खगा यत्र क्वणंते कीचका अपि ॥ यक्षकिंनरगन्धर्वैर्लभ्यते दुर्लभं पदम् ॥ १९ ॥ स्मरन्तो यत्र खद्योताः कृष्णपक्षे निशागमे ॥ आरार्तिकप्रदातॄणां देवस्याश्नुवते पदम् ॥२०॥ निष्प्रत्यूहकृताश्लेषा नित्यं यत्तटिनीरुहाः ॥ सौभाग्यगर्वतो देवीमपर्णामवमन्वते ॥२१॥ यस्योत्तुंगस्य शृंगाग्रसंगमा[1] अपि तारकाः ॥ आत्मनो लब्धसामान्याश्चन्द्रेण बहु मन्वते ॥ २२ ॥ मृगाः सर्वेपि सततं चरंतो यत्र सानुषु ॥ पाणिप्रणयिनं शम्भोरेणमप्यवजानते[2] ॥ २३ ॥ यस्य पादांतिकचरैः प्रायेण शबरैरपि ॥ निकुम्भकुम्भसादृश्यमयत्नादुपलभ्यते ॥ २४ ॥ किं बहूक्त्याभ्यसूयंते द्वैमातुरकुमारयोः ॥ यदंगरूढास्तरवस्तिर्यंचः शबरा अपि ॥ २५ ॥ सिंहव्याघ्रद्विपा यस्मिन्काले त्यक्तकलेवराः ॥ वासप्रदत्वान्मान्यंते ध्रुवं शोणाद्रिशम्भुना ॥ २६ ॥ अस्य भास्करनामाद्रिः पूर्वस्यां दिशि दृश्यते ॥ यत्र स्थितः सदा वज्री सेवते शोणपर्वतम् ॥२७॥ प्रतीच्यां दिशि दंडाद्रिरिति कश्चिन्महीधरः ॥ प्राचेतसस्तदगगः सेवतेऽरुणपर्वतम् ॥ २८ ॥ दक्षिणस्यां च शोणाद्रेरद्रिरस्त्यमराचलः ॥ कालः शोणाद्रिसेवार्थमध्यास्ते तदधित्यकाम् ॥ २९ ॥ उत्तरेऽस्मिन्हरिद्भागे सिद्धाध्यासितकन्दरः ॥ विराजते त्रिशूलाद्रिः श्रीदेन परिपालितः ॥ ३० ॥ तत्पर्यंतप्रभूतानामन्येषामपि भूभृताम् ॥ तटकेष्वपरे[3] चैव दिक्पालाः पर्युपासते ॥ ३१ ॥ धारिता येन सततं सर्वेपि धरणीरुहाः ॥ आराधनादप्यधिकमधिगच्छंति वैभवम् ॥ ३२ ॥ यस्मिन्गिरीशे संदृष्टे मेनातुहिनभूभृतोः ॥ समानसंबंधतया प्रमोदो वर्द्धतेतराम् ॥ ३३ ॥ तरुपल्लवलक्षेण लक्ष्यमाणजटाधरः ॥ स्थावरोयं स्वयं शम्भुरिहेश इव जंगमः ॥ ३४ ॥ ज्योतिष्मत्तोयशृंगस्य द्विपार्श्वस्थेन्दुभास्करः ॥ व्यनक्ति स्वस्य लोकेभ्यस्तेजस्त्रितयनेत्रताम् ॥ ३५ ॥ वर्षासु शिखराधस्तादभिनीलबलाहकः ॥ विराजते यः कण्ठेन कालकूटमिवोद्वहन् ॥ ३६ ॥ सहस्रपादः साहस्रशीर्षो यः पर्वतेश्वरः ॥ उक्तो न केवलं श्रुत्या साक्षादप्युपलक्ष्यते ॥ ३७ ॥ शिरोलीनामरसरित्स्रोताः प्रागिति नाद्भुतम् ॥ गिरीशोऽद्यापि यः शृंगलीनानेकसरिद्गणः ॥ ३८ ॥ आसादितापकटकः शारदैर्यः पयोधरैः ॥ विडंबयति गोश्रेष्ठमारूढवृषपुंगवम् ॥ ३९ ॥ यत्र शृङ्गाग्रसंलग्नसंलग्ननीललोहितः ॥ स्थाणुत्वं स्थावरत्वेन गहनत्वेन भीमताम् ॥ ४० ॥ सुदुर्गमत्वादुग्रत्वमपि धत्ते न नामतः ॥ क्षुद्राः सरीसृपा यत्र कटकेषु कृतास्पदाः ॥ ४१ ॥ तक्षकानंतसर्पाद्यैः

१ शृंगाग्रसंगमाः--इत्यसंबद्धः पाठः । २ शंभोरेकस्मिन्पाणौ मृगो वर्तते--'कुठारमृगधारकः' इति हि तद्विशेषणम् । एकस्मिन्हस्ते कुठारः, एकस्मिन् मृगः, एको वरमुद्रांकितः, एकश्चाभयमुद्रांकितः श्रीसांबस्य कर इति चतुष्पाणिशिवध्याने वर्णनात् । ३ अपरे--अन्ये--इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्पर्धन्ते भुजगेश्वरैः ॥ अष्टाभिर्योऽभितः कोणैराविर्भूतो विभूतिभिः ॥ ४२ ॥ सुस्पष्टं विशिनष्टीव स्वकीयामष्टमूर्तिताम् ॥ येण्यांशक्तितरंगिण्यो
रिडापिंगलयोः स्वयम् ॥ ४३ ॥ शिवस्य शृङ्गतो मध्ये सुषुम्ना कमलापगा ॥ ज्योतिःस्तंभस्वरूपस्य मूलाग्रे[1] यस्य वीक्षतुम् ॥ ४४ ॥ कोलहं
साकृती नालं[2] ब्रह्मविष्णू बभूवतुः ॥ ताभ्यां च प्रार्थितः शम्भुस्तस्मिन्सांनिध्यवानभूत् ॥ ४५ ॥ अरुणाचलनाथाख्यं प्रपन्नः प्रमदैः[3] समम् ॥
गौतमस्तत्र योगींद्रः सहस्रं परिवत्सरान् ॥ ४६ ॥ तप्त्वा तपांसि तीव्राणि साक्षाच्चक्रे सदाशिवम् ॥ प्रालेयशैलकन्यापि तत्र कृत्वा
तपः पुरा ॥ ४७ ॥ अलब्ध वामदेहार्द्धं मन्मथारेः प्रसेदुषः ॥ गौर्या प्रतिष्ठितं तत्र प्रवालाद्रीश्वराभिधम् ॥ ४८ ॥ लिंगं भोगप्रदं
पुंसां कैवल्याय प्रकल्पते ॥ तत्र गौरीनिदेशेन दुर्गा महिषमर्दिनी ॥ ४९ ॥ साक्षाद्भूय सतां दत्ते मन्त्रसिद्धिमविघ्नतः ॥ खड्गतीर्थमिति
ख्यातं तत्र गौर्याश्रमे नवम् ॥ ५० ॥ सकृन्निमज्जनान्नृणां पंचपातकनाशनम् ॥ दुर्गया चार्चितं लिंगं पापनाशननामकम् ॥ ५१ ॥ सकृत्प्रणाममा
त्रेण सर्वपापप्रणाशनम् ॥ तत्र वज्रांगदो राजा वित्तसारो व्यतिक्रमात् ॥ ५२ ॥ पुनस्तद्भक्तिमाहात्म्याच्छिवसायुज्यमाप्तवान् ॥ तस्य प्रदक्षिणेनैव
कांतिशालिकलाधरौ ॥ ५३ ॥ विद्याधरेश्वरौ मुक्तौ दुर्वासःशापबन्धनात् ॥ नास्ति शोणाद्रितः क्षेत्रं नास्ति पंचाक्षरान्मनुः ॥ ५४ ॥ नास्ति माहे
श्वराद्धर्मो नास्ति देवो महेश्वरात् ॥ नास्ति ज्ञानं शिवज्ञानान्नास्ति श्रीरुद्रतः श्रुतिः ॥५५॥ नास्ति शैवाग्रणीर्विष्णोर्नास्ति रक्षा विभूतितः ॥ नास्ति
भक्तेः सदाचारो नास्ति रक्षाकराद्गुरुः ॥ ५६ ॥ नास्ति रुद्राक्षतो भूषा नास्ति शास्त्रं शिवागमात् ॥ नास्ति बिल्वदलात्पत्रं नास्ति पुष्पं सुवर्ण
कात् ॥५७॥ नास्ति वैराग्यतः सौख्यं नास्ति मुक्तेः परं पदम् ॥ नारुणाद्रेः समो मेरुर्न कैलासो न मंदरः ॥ ५८ ॥ ते निवासा गिरिंव्याप्ताः सोऽयं
तु गिरिशः स्वयम् ॥ ५९ ॥ इति वदति शिलादनंदने मुदितमनाः स मृकण्डुनंदनः ॥ पुनरपि बहुशः प्रणम्य तं चकितमना भवतो[4] व्यजिज्ञपत् ॥
॥ ६० ॥ किंकिं नृणां कर्म भवाय जायते कथं नु तत्तन्नरकाय श्रूयते ॥ तेषां च तेषां च कथं प्रतिक्रिया कथं नु तत्तन्मम कथ्यतामिति ॥ ६१ ॥
इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां प्रथमे माहेश्वरखण्डेऽरुणाचलमाहात्म्य उत्तरार्धेऽरुणाचलस्थानमाहात्म्यवर्णनंनाम चतुर्थो
ऽध्यायः ॥ ४ ॥ ॥ छ ॥ ॥ नंदिकेश्वर उवाच ॥ ॥ शुद्धसत्त्वगुणोपेतो लोकेऽस्मिन्दुर्लभः पुमान् ॥ रजस्तमोगुणोपेता भवंति सुलभा
नराः ॥ १ ॥ सात्त्विकः पुण्यशीलत्वान्निःश्रेयसमवाप्नुयात् ॥ वैचित्र्यात्कर्मणामेषामनुभोगाय वेधसा ॥ २ ॥ वैचित्र्याण्येव सृष्टानि नरकाण्यत्र

१ मूलाग्रे--मूलं च अग्रं च--अधऊर्ध्वप्रान्तौ--इत्यर्थः । २ न--अलम्--इति पदच्छेदः । ३ प्रमदैः--हर्षैः--इत्यर्थः । ४ भवतः--संसारात्--इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्र च ॥ महारौरवभाग्भूत्वा खरः श्वा शूकरोऽपि वा ॥ ३ ॥ चंडालो वा भवेत्प्रेत्य पुरुषो ब्रह्महत्यया ॥ चिरं रौरवसंरुद्धः कृमिकीटपतंगताम् ॥ ॥ ४ ॥ प्राप्नुयात्कर्मकर्तृत्वं सुरापानेन च द्विजः ॥ ब्रह्मस्वहरणाद्ब्रह्मराक्षसत्वमवाप्नुयात् ॥ ५ ॥ यद्यत्तु चोरयेत्तत्तच्छून्यं स्यादन्यजन्मनि ॥ असिपत्रवने पीडामवाप्य सुचिरं पुनः ॥ ६ ॥ नपुंसकत्वं संगच्छेत्पुरुषो गुरुतल्पगः ॥ तप्तैः कालायसैर्दंडैः पीडितो यमकिंकरैः ॥ ७ ॥ नरके कालसूत्राख्ये निवसेत्परदारगः ॥ अग्निदो निवसेद्घोरे सुघोरे गरदायकः ॥ ८ ॥ महाघोरे च पिशुनोऽवीच्यों धर्मविनिंदकः ॥ वसेत्कराले मित्रध्रुग्भीमे हिंसैकतत्परः ॥ ९ ॥ संहारे छन्नपापिष्ठो मृषावादी भयानके ॥ असिघोरे वसेद्वापि कूपक्षेत्रनरादिहृत् ॥ १० ॥ वज्रे परद्रोहरतो मांसाशी तरले द्विज ॥ तीक्ष्णे मातृपितृद्रोही तापने जपदूषकः ॥ ११ ॥ अश्वघ्नोपि निरुच्छ्वासे वसेद्गोघ्नश्च दारुणे ॥ भ्रूणहा निवसेच्चंडे स्त्रीहत्याकृत्कुकूलके ॥ १२ ॥ देवस्वहारी दहने घोरघोरे परस्वहृत् ॥ कृतांतदूता नरके सर्वानेव हि पापिनः ॥ १३ ॥ बध्नंति पाशैर्निघ्नंति दण्डैर्विध्यंति शंकुभिः ॥ तीक्ष्णायश्चंचवः कंकाः क्रूरदंष्ट्रा महोरगाः ॥ १४ ॥ कालेयकाश्च व्याघ्राश्च हिंस्राश्चान्ये दशंत्यमून् ॥ शकलीकुर्वते शस्त्रैर्दहंति देहमेव च ॥ १५ ॥ खनंति गहने श्वभ्रे कशाभिस्ताडयंति च ॥ तैलद्रोण्यां विपच्यंते तुद्यंते सूक्ष्मसूचिभिः ॥ १६ ॥ वाह्यन्ते दुर्वहान्भारान्यमदूतैर्हि पापिनः ॥ ब्रह्महा क्षयरोगी स्यात्सुरापः श्यावदंतकः ॥ १७ ॥ स्वर्णापहारी कुनखी दुश्चर्मा गुरुतल्पगः ॥ अपस्मारी गुरुद्रोही चंडालो वेददूषकः ॥ १८ ॥ कूटसाक्षी चाक्षिरोगी मंदाग्निश्चाग्रभोजनः ॥ विद्यापहारी मूकः स्यादंधः पुस्तकचोरकः ॥ १९ ॥ परदाररतः पंगुबधिरः परनिंदकः ॥ विड्वराहो निराचारो जिह्वारोगी च तस्करः ॥ २० ॥ अभ्यागतातिथित्यागी कपोलकण्टको भवेत् ॥ पर्वसु स्त्रीरतो मेही पूत्यास्योऽभक्ष्यभक्षकः ॥ २१ ॥ मर्यादाभेदको दासस्तटाकारामहृत्खरः ॥ प्रतिश्रुताप्रदाता स्यादल्पायुः श्वा विकत्थनः ॥ २२ ॥ विष्णुद्रोही च सरठः शिवद्रोही च मूषकः ॥ एवं पापफलं ज्ञात्वा प्रायश्चित्तं समाचरेत् ॥ २३ ॥ तच्चास्मिन्नरुणक्षेत्रे कर्तव्यं सम्यगास्तिकैः ॥ २४ ॥ इति निशम्य स दुष्कृतकारिणां बहुविधां नरकेषु नृणां व्यथाम् ॥ चरणयोः पतितश्च तदा पुनःपुनरयाचत तच्छमनक्रियाम् ॥ २५ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां प्रथमे माहेश्वरखण्डेऽरुणाचलमाहात्म्य उत्तरार्धे कर्मविपाकवर्णनं नाम पंचमोध्यायः ॥ ५ ॥ ॥ छ ॥ ॥ नंदिकेश्वर उवाच ॥ ॥ विस्तरात्कथयाम्यद्य प्रायश्चित्तं महांहसाम् ॥ सर्वेषामवधत्स्व त्वम

१ मित्रघ्नः--इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वलंव्यास्तिकीं धियम् ॥ १ ॥ ब्रह्महा प्राप्य शोणाद्रिं निमग्नः खड्गतीर्थके ॥ जपन्पंचाक्षरं मंत्रं भस्मरुद्राक्षधारकः ॥ २ ॥ कृतोपवासः संपूज्य प्रयतः परमेश्वरम् ॥ ब्राह्मणान्भोजयेद्वर्षं भिक्षाशी नियतेंद्रियः ॥ ३ ॥ विशेषपूजाशुश्रूषां कुर्याद्देवस्य भक्तितः ॥ ब्रह्महत्या विनिर्मुक्तो ब्रह्मलोके महीयते ॥ ४ ॥ सुरापोऽप्यरुणक्षेत्रे वर्षमेकं वसन्प्रति ॥ प्राग्वत्कृतसमाचारः संपूज्यैवं महेश्वरम् ॥ ५ ॥ क्षीरेण स्नापये द्देवं शतरुद्रीयमुच्चरन् ॥ सुरापानोद्भवेनाशु पापेन परिमुच्यते ॥ ६ ॥ सुवर्णस्तेयकृच्छोणक्षेत्रे बिल्वदलैर्हरम् ॥ अभ्यर्च्य भोजयेद्विप्रान्पापान्मु च्येत दुष्करात् ॥ ७ ॥ गुरुदाररतिर्गत्वा कृत्तिकास्वरुणाचलम् ॥ यथापूर्वं व्रती भूत्वा सहस्रेण प्रदीपकैः ॥ ८ ॥ मासत्रयं समाराध्य श्रीशो णाचलशंकरम् ॥ प्रदद्याद्भूषितां कन्यां ब्राह्मणाय सुधीमते ॥ ९ ॥ षडक्षरं जपेन्नित्यं तेन मुच्येत पाप्मना ॥ शिवलोके च निवसेदासंसारं न संशयः ॥ १० ॥ परदारापहर्त्ता च क्षेत्रेऽस्मिन्नियतेंद्रियः ॥ मासमेकं नवैः पुष्पैरभ्यर्च्यारुणशंकरम् ॥ ११ ॥ माहेश्वराय वितरेद्धनं शक्त्यानु गुण्यतः ॥ तत्क्षणेन विनिर्मुक्तस्तस्मात्पापाद्भविष्यति ॥ १२ ॥ गरदोऽप्यरुणक्षेत्रे व्रती भूत्वा यथापुरा ॥ क्षीरोपहारं देवाय दत्त्वा दोषेण मुच्यते ॥ १३ ॥ पिशुनोऽप्यरुणक्षेत्रे व्रती वेदरतो नरः ॥ अध्यापयेद्द्विजान्मुख्यांस्ततो निष्कलमषो भवेत् ॥ १४ ॥ अग्निदोऽप्यरुणक्षेत्रे त्रीन्मासान्पूर्व वद्व्रती ॥ दद्याच्छैवाय निर्माप्य गृहं तत्पापशांतये ॥ १५ ॥ धर्मनिंदाकरः शोणक्षेत्रे वर्षं व्रती वसन् ॥ सत्रादिकं प्रकुर्वीत यथाशक्त्यघशां तये ॥ १६ ॥ पितृद्रोह्यरुणक्षेत्रे तिष्ठन्मासमतंद्रितः ॥ गिरीशाय द्विजेभ्योपि प्रदद्याद्गाः सहस्रशः ॥ १७ ॥ ग्रहोपरागकालेषु भोजयित्वा द्विजान्बहून् ॥ विमुंचेद्वृषभं नीलं विमुच्येत ततोंऽहसः ॥ १८ ॥ स्त्रीघ्नश्चापि शिशुघ्नोऽपि शोणक्षेत्रमुपेयिवान् ॥ व्यतीपाते तिलान्दद्याद्द्विजेभ्यो दुरितच्छिदे ॥ १९ ॥ प्रच्छन्नपापकृच्छोणक्षेत्रेऽस्मिन्नियतेंद्रियः ॥ गुप्तदानानि कुर्वीत भवेद्वै गतकल्मषः ॥ २० ॥ मृषाभाष्यरुणक्षेत्रे षण्मा सान्निवसन्व्रती ॥ शोणाचलेश्वरस्तोत्रपाठेन स्यादकल्मषः ॥ २१ ॥ कूपादिभेदकृच्छोणक्षेत्रमासाद्य भक्तितः ॥ तटाकान्खानयेत्तत्र ध्रुवं निर्वृजिनो भवेत् ॥ २२ ॥ क्षेत्रापहारी देवाय क्षेत्रं दद्यान्महाफलम् ॥ आरामकंटकोप्यस्मै दद्यादुद्यानमुत्तमम् ॥ २३ ॥ गृहापहारी कुर्वीत देवस्यायतनं नवम् ॥ अंहसा तेन निर्मुक्तः शिवसायुज्यमाप्नुयात् ॥ २४ ॥ परद्रोही वसञ्छोणक्षेत्रे माहेश्वरान्धनैः ॥ प्रीणयित्वा परांल्लोकान्निःसं शयमवाप्नुयात् ॥ २५ ॥ पश्वादिमांसभुक्छोणक्षेत्रे पक्षत्रयं व्रती ॥ प्रीणयेदरुणेशानं सोपहारैर्मनोहरैः ॥ २६ ॥ त्रिःशोणाचलनाथेति निनदन्न नघो भवेत् ॥ निवसन्नरुणक्षेत्रे पूजयेदरुणेश्वरम् ॥२७॥ अरुणेश्वरमंत्रं च जपेन्मोक्षेच्छुरादरात्॥यद्वस्याभिहितं तेन पद्भ्यामेव प्रदक्षिणाम्॥२८॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ २८ ॥ कुर्वतारुणशैलस्य तत्प्राप्यं शुभमंजसा ॥ क्षुतेषु स्खलितेष्वत्याहिते दुःस्वप्नदर्शने ॥ २९ ॥ प्रीत्युत्कर्षेऽपि च बुधैरुच्चार्योऽरुणशंकरः ॥
अपि वर्णाश्रमभ्रष्टः शिवद्रोहरतोऽपि वा ॥ ३० ॥ त्रीण्यहान्यरुणक्षेत्रे वसन्मुच्येत पातकैः ॥ पार्थिवः शिवलोकोऽयं मूर्त्तमेतत्त्रयीशिरः ॥ ३१ ॥
एष दक्षिणकैलासो योसावरुणपर्वतः ॥ अन्येषु सिद्धक्षेत्रेषु तपोभिः सिद्धयो नृणाम् ॥ ३२ ॥ अस्मिन्स्मरणमात्रेण तारतम्यं विचिंत्यताम् ॥
यद्गंगायां प्रयागे यत्काश्यां वै पुष्करेषु यत् ॥ ३३ ॥ कर्म सेतौ च यत्पुंसां शोणक्षेत्रे ततोऽधिकम् ॥ अग्निष्टोमं वाजपेयं वैराजं सर्वतोमुखम् ॥
॥ ३४ ॥ राजसूयाश्वमेधौ च कुर्याच्छोणाचले बुधः ॥ एकाहं वारुणक्षेत्रे नरो यत्स्यादुपोषितः ॥ ३५ ॥ तस्य चांद्रायणशतं भवेत्सांतपनायुतम् ॥
षोडशापि महादानान्यरुणक्षेत्रसंनिधौ ॥ ३६ ॥ अनुष्ठितानि कल्पोक्तं कुर्वति द्विगुणं फलम् ॥ ३७ ॥ इति नंदिकेश्वरमुखेन शुश्रुवान्मुनिनंद
नोथ निरयप्रतिक्रियाम् ॥ अभिनंद्य तं वद दिनर्तुवत्सरप्रमुखार्हणक्रममिति व्यजिज्ञपत् ॥ ३८ ॥ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसा
हस्र्यां संहितायां प्रथमे माहेश्वरखण्डेऽरुणाचलमाहात्म्य उत्तरार्द्धे पापापनोदकप्रायश्चित्तवर्णनंनाम षष्ठोऽध्यायः ॥ ६ ॥ ॥ छ ॥ ॥
॥ ॥ नंदिकेश्वर उवाच ॥ ॥ रक्तोत्पलैरर्कवारे यः शोणाद्रीशमर्चयेत् ॥ अवश्यं तस्य सिध्यंति सार्वभौममहर्द्धयः ॥ १ ॥ सौम्यवारेऽरुणा
द्रीशं कस्तूरीकरवीरकैः ॥ यः पूजयति तस्य स्यात्सत्यलोके सुखासिका[1] ॥ २ ॥ गुरुवारे सितांभोजैः शोणेशं वरिवस्यतः[2] ॥ जनलोके चिरं वासः
सिद्धैः सह भविष्यति ॥ ३ ॥ चंपकैर्मल्लिकाभिश्च शुक्रवारे समर्चयेत् ॥ तपोलोकं प्रपद्येत ब्रह्मर्षिभिरभिष्टुतः ॥ ४ ॥ सौरिवारे च जातीभिस्समा
राध्यारुणेश्वरम् ॥ न जातु यमलोकानां पापीयानपि कल्पते ॥ ५ ॥ प्रथमायां तिथौ देवस्योपहारं समर्पयेत् ॥ यः पायसेन स भवेद्धनधान्यसमृ
द्धिमान् ॥ ६ ॥ द्वितीयस्यां तिथौ भक्त्या यो दध्यन्नं निवेदयेत् ॥ स भवेद्भाग्यवाञ्छ्रेष्ठः सोमपाश्च भवेद्ध्रुवम् ॥ ७ ॥ तृतीयायां च योऽपूपैः
शोणेशं परितर्पयेत् ॥ तस्याव्याहतमारोग्यमाशरीरं भविष्यति ॥ ८ ॥ चतुर्थ्यामरुणेशाय पूर्णकुम्भोत्करादिकम् ॥ निवेदयति यस्तस्य भवे
त्पूर्णमनोरथः ॥ ९ ॥ मुद्गौदनं च पंचम्यामुपहारं प्रकल्पयेत् ॥ शोणेश्वराय भक्त्या यः स स्यादक्षय्यवैभवः ॥ १० ॥ षष्ठ्यां गुडौदनं
दद्यादरुणाचलशम्भवे ॥ भक्त्या यस्तस्य सन्तानो न कदाचित्प्रहीयते ॥ ११ ॥ तिलौदनं यस्सप्तम्यां शोणेशाय समर्पयेत् ॥
स दीनोऽप्यधमर्णत्वमयत्नेन व्यपोहति ॥ १२ ॥ अष्टम्यां राजशाल्यन्नं यो दद्याच्छोणशम्भवे ॥ तस्य सेवां विनापि स्याद्राज

१ सुखासिका--सुखेन निवासः--इत्यर्थः । २ वरिवस्यतः -पूजयतः--इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लोको वशीकृतः ॥ १३ ॥ गोधूमान्नं नवम्यां च शोणाद्रीशाय योऽर्पयेत् ॥ राजयक्ष्मादयस्तस्य न भविष्यंति जातु च ॥ १४ ॥ दशम्यां शोणनाथाय यः करंभं निवेदयेत् ॥ स भवेत्सर्वलोकानां सदैव प्रीतिभाजनम् ॥ १५ ॥ पृथुकैरुपहारान्य एकादश्यां प्रकल्पयेत् ॥ अरुणाचलनाथस्य स भवेदकुतोभयः ॥ १६ ॥ द्वादश्यां शोणनाथाय सूपौदननिवेदनम् ॥ यः करोति भवेत्तस्य निर्विघातो मनोरथः ॥ १७ ॥ यः सक्तूनरुणेशाय त्रयोदश्यां समर्पयेत् ॥ तस्याव्याकुलचित्तत्वमश्रांतमपि जायते ॥ १८ ॥ अर्पयेच्छोणनाथाय फलानि विविधानि यः ॥ चतुर्दश्यां स मूढोऽपि सिद्धसारस्वतो भवेत् ॥ १९ ॥ यः पौर्णमास्यां शोणाद्रिनाथाय विनिवेदयेत् ॥ पनसस्य फलं तस्य चक्षूरोगो न जायते ॥ २० ॥ कुह्वां च संगमे भक्त्या कंदमूलादि योऽर्पयेत् ॥ शोणाचलेश्वरायास्य तुष्यंति पितरः किल ॥ २१ ॥ अश्विन्यामरुणेशाय दद्याद्वासांसि भक्तिमान् ॥ भरण्यामरुणेशाय दद्यादाभरणान्यपि ॥ २२ ॥ कृत्तिकासु प्रदीपांश्च रोहिण्यां रौप्यमर्पयेत् ॥ मृगशीर्षे मलयजमार्द्रायां हरिचंदनम् ॥ २३ ॥ पुनर्वसौ मृगमदं पुष्ये कर्पूरमर्पयेत् ॥ काश्मीरोद्भवमाश्लेषे मघायां तुहिनोदकम् ॥ २४ ॥ तांबूलं पूर्वफाल्गुन्यां धूपमुत्तरफाल्गुने ॥ कालागुरुंश्च हस्तर्क्षे चित्रायां यक्षकर्दमम् ॥ २५ ॥ स्वात्यां सुवासिनीवृंदं विशाखायां प्रकीर्णकम् ॥ मैत्रे मुक्तातपत्रं च ज्येष्ठायां धेनुकान्यपि ॥ २६ ॥ मूले मुक्तासरान्पूर्वाषाढे मुकुटमर्पयेत् ॥ रत्नानि चोत्तराषाढे श्रवणे भद्रपीठिकाम् ॥ २७ ॥ अष्टापदं धनिष्ठायां वासः शतभिषज्यपि ॥ पूर्वाभाद्रपदे भोगानुत्तरायां तुरंगमान् ॥ २८ ॥ रेवत्यां च रथं हैमं प्रदद्याच्छोणशंभवे ॥ दद्यात्कृत्वा महापूजां तत एवार्पयेन्नरः ॥ २९ ॥ पूज्यो राशिषु मेषादिष्वरुणेशो विशेषतः ॥ सिंदुवारैः कुरबकैः ककुभैः पाटलैः क्रमात् ॥ ३० ॥ कुटजैर्नीपकुसुमैर्जीवंतीमल्लिकादिभिः ॥ सरोरुहैर्दमनकैर्नंद्यावर्तसरोरुहैः ॥ ३१ ॥ पंचामृतेन स्नपयन्नुभयोरुपरागयोः ॥ पंचाक्षरेण कुर्वीत शोणनाथस्य भक्तितः ॥ ३२ ॥ स्नपनं पञ्चगव्येन द्वयोरयनयोरपि ॥ षडक्षरेण कुर्वीत गव्येन स्नपनक्रियाम् ॥ ३३ ॥ प्रणवेनैव कुर्वीत क्षीरेण स्नपनक्रियाम् ॥ अरुणाचलनाथस्य भक्त्या विषुवयोर्द्वयोः ॥ ३४ ॥ प्राह्णे स्याद्रुद्रतुलसी मध्याह्ने कृतमालकम् ॥ अपराह्णे मल्लिका च शोणाद्रीशस्य शस्यते ॥ ३५ ॥ अर्द्धोदये च स्नपयेत्सहस्रकलशोदकैः ॥ शतरुद्रीयमुच्चार्य श्रीशोणाचलशंभवे ॥ ३६ ॥ शिवरात्रौ विशेषेण त्रिशिखैर्बिल्वपत्रकैः ॥ कमलैः कर्णिकारैश्च जागरूको यतेंद्रियः ॥ ३७ ॥ गीतवादित्रनृत्यैश्च दिव्यागमविधानतः ॥ पूजयेदपवर्गार्थं शोणशैले महेश्वरम् ॥ ३८ ॥ मासि पौषे च देवस्य कुर्यादाग्नेयमुत्सवम् ॥ नवान्नैरुपदं

१ गीतवादित्रतौर्यैश्च--इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शाद्यैर्व्याहृतीरुच्चरन्बुधः ॥ ३९ ॥ वैशाखे च विशाखायां शिवतंत्रानुसारतः॥ शोणाचलेश्वरस्यास्य कुर्याद्दमनकोत्सवम् ॥ ४० ॥ प्राबोधिक मार्ग शीर्षे प्रातर्निर्माय सामभिः ॥ महापूजां प्रकुर्वीत शोणशैलस्य भक्तिमान् ॥ ४१ ॥ शनिप्रदोषेष्वार्द्रासु व्यतीपातेषु पर्वसु ॥ सोमार्कवारयोश्चार्चे च्छोणाद्रीशं यथागमम् ॥ ४२ ॥ दीक्षोपनयनोद्वाहपुत्रजन्मादिकेष्वपि ॥ विशेषपूजां कुर्वीत शोणनाथस्य भक्तिमान् ॥ ४३ ॥ अपि स्वजन्मनक्षत्रे संपत्स्वापत्सु भीतिषु ॥ प्रवेशनिर्गमनयोश्चार्चनीयोऽरुणेश्वरः ॥ ४४ ॥ व्रतिचक्रागमे पादबंधने नववैभवे ॥ अरुणेशार्चनं कुर्यादभियानेषु च द्विपाम् ॥ ४५ ॥ स्मरेदतिदवीयांश्चेत्पश्येत्पर्यंतगो यदि ॥ स्थितश्चेदरुणक्षेत्रे त्रिकालं पूजयेच्छिवम् ॥ ४६ ॥ किमन्यद्वद वत्सेति उद्धृत्य भुजमु च्यते ॥ अरुणक्षेत्रतो नान्यदलं स्वर्गापवर्गयोः ॥ ४७ ॥ स्मरणेन मनःश्रोत्रे श्रवणाद्दर्शनाद्दृशौः ॥ जिह्वां च कीर्त्तनाच्छोणक्षेत्रं सद्यः पुनात्य लम् ॥ ४८ ॥ अरुणेस्मिन्महाक्षेत्रे देहिभिर्लब्धजन्मभिः ॥ जीवद्भिर्लभ्यते भोगो मोक्षश्चोन्मुक्तजीवितैः ॥ ४९ ॥ अन्यत्र मुक्तदेहानामप्यत्र श्राद्ध कर्मणा ॥ अपि पापात्मनां पुंसामपवर्गो भविष्यति ॥ ५० ॥ अयोध्यां मथुरां मायां काशीं कांचीमवंतिकाम् ॥ द्वारकां चारुणक्षेत्रमतिशेते न संशयः ॥ ५१ ॥ इत्युक्तवंतं च शिलादपुत्रं मृकण्डुसूनुः पुनरप्युवाच ॥ माहात्म्यमेतन्महनीयकीर्ते भूयोपि पृच्छामि वदस्व मह्यम् ॥ ५२ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां प्रथमे माहेश्वरखण्डेऽरुणाचलमाहात्म्य उत्तरार्धे काम्यकर्मवर्णनं नाम सप्तमोऽध्यायः॥ ७ ॥

॥ ॥ नंदिकेश्वर उवाच ॥ ॥ अरुणाचलमाहात्म्यं विस्तरात्परिपृच्छता ॥ मार्कंडेय त्वया मन्ये मयि न्यस्तो महान्भरः ॥ १ ॥ स्थाने कुतूह लाक्षिप्तं मनस्तव महामते ॥ यः शोणाद्रीशचरितं न वेत्ति स नरः पशुः ॥ २ ॥ कथं वा शक्यते वक्तु जानानरपि कात्स्न्र्यतः ॥ शोणाचलजुषः शंभोर्माहात्म्यं महितोदयम् ॥३॥ कथं वा श्रुतमप्येतदाश्चर्यरसभावितैः ॥ अशेषमवधार्येत प्रज्ञावत्प्रवरैरपि ॥४॥ इदानीं स्मर चित्रं तु चरित्रं स्मर वैरिणः ॥ पराभृतानुभूत्यैव सत्यं नृत्यति मे मनः ॥ ५ ॥ अद्भुतं शिवचारित्रमास्कंदितमनोहरम् ॥ मम वर्णयितुं कात्स्न्र्यान्नैव शक्नोति शेमुषी ॥ ६ ॥ तथाप्येष प्रवक्ष्येऽहमंशांशेन यथामति ॥ पुण्यं शोणाद्रिनाथस्य माहात्म्यं श्रूयतां मुने ॥ ७ ॥ पुरादिदेवकल्पादौ निर्विकल्पो महेश्वरः ॥ स्वेच्छया सकलं विश्वं पुनरप्युदभावयत् ॥ ८ ॥ उद्भावितं च तद्विश्वं स्रष्टुं पातुं च सर्वदा ॥ अन्विच्छन्नादिदेवोऽसौ ब्रह्मविष्णू विनिर्ममे ॥ ९ ॥ असृजद्दक्षिणांगेन त्र्यंबकः परमेष्ठिनम् ॥ विष्टरश्रवसं देवो वामांगेन च सृष्टवान् ॥ १० ॥ ब्रह्माणं रजसा विष्णुं सत्त्वेन समयूयुजत् ॥

१ द्विपाम्—अभियानेषु—युद्धार्थं गमनेषु—इत्यर्थः । २ विष्टरश्रवसम्—विष्णुम्—इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नियुक्तौ देवदेवेन तौ विरिंच्यच्युतावुभौ ॥ ११ ॥ ईशाते सर्वजगतां सृष्टिरक्षाविधानयोः ॥ मनसैव मरीच्यादीन्ससर्ज ब्राह्मणान्दश ॥ १२ ॥ दक्षं च दक्षिणांगुष्ठात्सृष्ट्यै प्रावर्तयद्विधिः ॥ मुखेन ब्राह्मणान्दोर्भ्यां क्षत्रियानूरुतो विशः ॥ १३ ॥ शूद्रांश्च पद्भ्यां निरमात्स्वयं च कमलासनः ॥ मरीचितनयाज्जज्ञुः कश्यपाद्सुरास्सुराः ॥ १४ ॥ मरुतः फणिनो गृध्रा गंधर्वाप्सरसोऽपि च ॥ मनुश्च यस्य संतानो मानवोऽयं प्रवर्त्तते ॥ १५ ॥ नानाज्ञातित्वमापाद्य नानाकर्मप्रवर्तकाः ॥ अत्रेश्च समभूदार्षं[1] क्षात्रं च द्विविधं कुलम् ॥ १६ ॥ पुलस्त्यपुलहाभ्यां च जज्ञिरे यक्षराक्षसाः ॥ उतथ्यगीष्पतिमुखा जज्ञिरेंऽगिरिसो मुनेः ॥ १७ ॥ भृगोरग्निः समुदभूच्च्यवनाद्यास्तथर्षयः ॥ वसिष्ठप्रमुखेभ्यश्च संबभूवुर्महर्षयः ॥ यत्पुत्रपौत्रैर्भुवनमिदमापूर्यतेऽखिलम् ॥ १८ ॥ एवं ब्रह्माऽऽत्मजैः स्वीयैरिदमापूरयज्जगत् ॥ कालेन वैभवेनापि विसस्मार महेश्वरम् ॥ १९ ॥ अच्युतोऽपि भृगोः पुत्रीमुद्वाह्य कमलालयाम् ॥ मत्स्यादिरूपो जगति भवन्नास्मरदीश्वरम् ॥ २० ॥ सृष्टिस्थितिभ्यां द्रुहिणाब्जनाभौ स्वाधीनतां नूनमुपागताभ्याम् ॥ अतीव गर्वं दधतुर्न कस्य मदोऽधिकारेण भवेन्नरस्य ॥ २१ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां प्रथमे माहेश्वरखंडेऽरुणाचलमाहात्म्य उत्तरार्धे सृष्टिवर्णनंनामाष्टमोऽध्यायः ॥ ८ ॥ छ ॥ ॥ नंदिकेश्वर उवाच ॥ ॥ अहमेव प्रभुरिति प्ररूढाधिकगर्वयोः ॥ विरिंच्यच्युतयोरासीद्विवादो मोहसंभवः ॥ १ ॥ रजोविकाराभ्यधिको बाह्ये नील इवोत्थितः ॥ विश्वसृष्टिकरो विष्णुं विरिंच्योऽब्रूत गर्वतः ॥ २ ॥ ॥ ब्रह्मोवाच ॥ ॥ कथं त्वमधिकश्चासि विष्णो जनयितुर्मम ॥ पितामहस्य लोकानां किमेवमतिमोहितः ॥ ३ ॥ त्वत्त एवोदितौ दैत्यौ निहत्य मधुकैटभौ ॥ दैत्यारिरिति मुग्ध त्वं गर्वं वहसि केशव ॥ ४ ॥ त्वामेव सृजतो नित्यं बहुधा मम वेधसः ॥ अद्याप्यायासजां पीडां न परित्यजतः करौ ॥ ५ ॥ मम श्रमांभसोद्भूते महांभोधौ निमज्जतः ॥ नैयग्रोधं न चोत्पन्नं[2] कुतस्तेऽस्त्ववलंबनम् ॥ ६ ॥ मदुपज्ञे महांभोधौ स्रवते कोऽपि पन्नगः ॥ तदाश्रयस्त्वमूर्ध्वं ते पद्मं तच्चासनं मम ॥ ७ ॥ कुतस्तमोमये ब्रूहि त्वयि सत्त्वगुणोदयः ॥ स वेत्सि किं त्वं प्रकृतिं निद्राजडिमनिर्भरः ॥ ८ ॥ जलाशये प्रस्वपता दैत्यभीत्या जनार्दन ॥ कथं त्वया रक्षितासौ मदधीना जगत्रयी ॥ ९ ॥ चतुर्भ्यो मम वक्त्रेभ्यो वेदाः समुदयं गताः ॥ चैतन्यरूपिणी शक्तिः कलत्रं मे सरस्वती ॥ १० ॥ मया हि सृज्यते विश्वमिदं स्थावरजंगमम् ॥ रक्ष्यते च तदिन्द्राद्यैर्मामकैः पुत्रपौत्रकैः ॥ ११ ॥ ततः कथय वैकुंठ मन्नियोज्येषु कश्चन ॥ जगतामीश्वरान्मत्तः कथंनामातिरिच्यसे ॥ १२ ॥

१ आर्षमिदं रूपम् । २ न चोत्पन्नं न चेदुत्पन्नमभविष्यत्—इत्यर्थो बोध्यः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ॥ नंदिकेश्वर उवाच ॥ ॥ इत्थं सरोषसंरंभे विधौ पौरुषभाषिणि ॥ नारायणोऽपि सासूयं स्मित्वैवं समभाषत ॥ १३ ॥
॥ ॥ विष्णुरुवाच ॥ ॥ विरंचे मुंच संरंभं वृथा खलु विकत्थसे ॥ नाभीसरोजसंजातो मम त्वमवधारय ॥ १४ ॥ योगनिद्रां मयोन्मुच्य
पुरा ह मधुकैटभौ ॥ न चेद्यन्मथितौ ताभ्यां तथैव स्याः प्रणाशितः ॥ १५ ॥ सोमकप्रमुखान्दैत्यान्हंतुमात्मेच्छया मम ॥ धृतमत्स्यादि
रूपस्य को वान्यः सृष्टिकारणम् ॥ १६ ॥ न किंचिदपि पश्यंति रजसारूढदृष्टयः ॥ रजोमयेन भवता किं निरूपयितुं क्षमम् ॥ १७ ॥
अविनाभाविनी शक्तिर्ननु मे पद्मवासिनी ॥ यस्याः कटाक्षमात्रेण जगत्त्रितयमेधते ॥ १८ ॥ भूतान्यमूनि कालोऽयमात्मनोप्यहमेव
हि ॥ मया विरहितं किं वा त्रिषु लोकेषु विद्यते ॥ १९ ॥ आदित्या वसवो रुद्रा दिक्पाला मनवोऽप्यहम् ॥ भूर्भुवःस्वस्त्रयीमेनां मद
धीनां विचिंतय ॥ २० ॥ ममैव विनियोगेन सृष्टिशक्तिः स्वयं स्थिता ॥ तन्मे त्रैलोक्यनाथस्य किं त्वं ज्येष्ठः समोऽथवा ॥ २१ ॥ ॥
॥ ॥ नंदिकेश्वर उवाच ॥ ॥ एवं मोहांधमनसोरन्योन्यं प्रतिगर्जतोः ॥ ययावनल्पसमयः संवर्तसदृशस्तयोः ॥ २२ ॥ उदयास्तमयौ स्यातां
न तदा चंद्रसूर्ययोः ॥ नक्षत्राणि च ताराश्च ग्रहाश्च क्षीणतां ययुः ॥ २३ ॥ नाववुर्मरुतो वा न जज्वलुर्जातवेदसः ॥ नांतरिक्षं न च क्षोणी
न दिशोऽपि चकाशिरे ॥ २४ ॥ समुद्राश्चुक्षुभुस्सर्वे पर्वताश्च चकंपिरे ॥ औषध्यः शोषमासेदुरवसेदुश्च जंतवः ॥ २५ ॥ पक्षमासर्तुवर्षादिका
लस्य नियमो गतः ॥ अहोरात्रव्यवस्थापि प्रणाशं समुपाययौ ॥ २६ ॥ इन्द्रादयो लोकपाला मरीच्याद्या महर्षयः ॥ सर्वेप्यकाले संप्राप्तं
कल्पांतं मेनिरे तदा ॥ २७ ॥ एवं जाते महाक्षोभे भूताक्रन्दप्रचोदितः ॥ भूतनाथो जगज्जातमविद्यायामबुध्यत ॥ २८ ॥ व्यचिंतयच्च विश्वात्मा
विश्वसंरक्षणोद्यतः ॥ अबाह्यया दृशाऽपश्यदनयोर्मोहकारणम् ॥ २९ ॥ स्वामिनं सकलैश्वर्यदातारं मां मदोद्धतौ ॥ विस्मृत्य स्वं स्वमेवैता
वमंसेतां जगत्प्रभू ॥ ३० ॥ अहो मोहस्य माहात्म्यं यदिमौ द्रुहिणाच्युतौ ॥ जानानावपि मां सम्यग्भूतामेवमुद्धतौ ॥ ३१ ॥ अज्ञानतिमिरो
द्भूतिदूषिताशयलोचनः ॥ जनः प्राप्तं स्तुतमपि प्रायो वस्तु न पश्यति ॥ ३२ ॥ कृतापराधावप्येतौ निमग्नौ मोहसागरे ॥ मया नोपेक्षणीयौ
हि लोकानां हितकाम्यया ॥ ३३ ॥ इति निश्चित्य मनसा मायावैवश्यमेतयोः ॥ देवो दयामहांभोधिर्व्यपोहयितुमैहत ॥ ३४ ॥ अहोऽनुकम्पा
तरुणेंदुमौलेः स्वभावसिद्धा भुवनत्रयेऽस्मिन् ॥ असौ प्रमोहांबुधिमध्यतोभूदाविर्निरस्तावपि धातृविष्णू ॥ ३५ ॥ इति श्रीस्कांदे महापुराण
एकाशीतिसाहस्र्यां संहितायां प्रथमे माहेश्वरखण्डेऽरुणाचलमाहात्म्य उत्तरार्धे शिवविष्णुविवादवर्णनंनाम नवमोऽध्यायः ॥ ९ ॥ ॥ छ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ॥ मार्कंण्डेय उवाच ॥ ॥ आज्ञापय विभो मह्यं यथा शंभुः सनातनः ॥ अनुजग्राह मोहांधौ वैकुण्ठपरमेष्ठिनौ ॥ १ ॥ ॥ नंदिकेश्वर उवाच ॥ ॥ शृणुष्व सर्वं वक्ष्यामि विस्तरेण यथातथम् ॥ यदेव देवो विदधे दयया भक्तवत्सलः ॥ २ ॥ अथोदस्थात्तयोर्मध्ये तथा विवदमानयोः ॥ ज्योतिःस्तंभत्वमभ्येत्य रोदोरंध्रनिरोधकः ॥ ३ ॥ महता जृंभमाणेन तस्य ब्रह्मांडभेदिनः ॥ अन्तरिक्षमतिश्यामं समुत्क्षितमिवाभवत् ॥ ४ ॥ विष्वग्विवर्णता तस्य ज्योतिर्लिंगस्य तेजसा ॥ दिशो विरेजिरे सद्यो दूरविस्तारिता इव ॥ ५ ॥ तीव्रैस्तस्य महाज्वालैः शोषिता इव सागराः ॥ विमुक्तवीचिसंक्षोभाः स्वामेव प्रकृतिं ययुः ॥ ६ ॥ व्यद्योतंत दिवि प्राग्वद्ग्रहास्तारागणैः सह ॥ तेजःस्तंभात्समुद्भिन्नाः स्फुलिंगा इव केचन ॥७॥ तेजसा तस्य शोणेन गैरिकेणेव रंजिताः ॥ भौमरविश्रियं सर्वेऽप्यवहन्नवनीभृतः ॥८॥ समुद्रास्तत्प्रतिच्छायानिर्भराश्लिष्टयादसः ॥ पद्मरागशिलाखण्डे घटिता इव रेजिरे ॥ ९ ॥ प्रवालगुच्छैः प्रत्यग्रैर्लंबिता इव पादपाः ॥ नद्यश्च निर्भरोत्फुल्लकह्लारा इव रेजिरे ॥ १० ॥ मही कुंकुमलिप्तेव दिशः सिंदूरिता इव ॥ सर्वारुणमिव व्योम समंतात्प्रत्यदृश्यत ॥ ११ ॥ ब्रह्मांडकर्परमभूत्तन्महःपूरितांतरम् ॥ शोणितेनेव संपूर्णं कपालं कृत्तिवाससः ॥ १२ ॥ एवंप्रवर्द्धमानेन तेजःस्तम्भेन तेन च ॥ अरुणाकारतां भेजे विश्वं स्थावरजंगमम् ॥ १३ ॥ तेजोलिंगं तदाश्चर्यं दृष्ट्वा त्यक्तमिथःक्रुधौ ॥ अचिंतयेतामेकैकं चतुर्मुखचतुर्भुजौ ॥ १४ ॥ किमेष वसुधां भित्त्वा शेषादीनां फणाभृताम् ॥ फणामाणिक्यमहसां राशिरुन्मुखतां गतः ॥ १५ ॥ किं वा कल्पांतसुलभप्रादुर्भावाः प्रभाकराः ॥ द्वादशापि नभोभूम्योर्मध्ये युगपदुत्थिताः ॥ १६ ॥ आहोस्विन्मेघसंघर्षाद्वितता व्योममध्यतः॥ अन्योन्यं मिलिताः क्षिप्रा[1] निपतंत्यवनीतले ॥ १७ ॥ प्रतिघ्नन्नेष तेजोभिरक्ष्णोः शक्तिमनुक्षणम् ॥ स्वनिर्विशेषिताशेषभूतजालः प्रवर्द्धते ॥ १८ ॥ एष उद्दीप्यमानोऽपि संतापाय न कल्पते ॥ नेदीयांस्यपि भूतानि न निर्दहति वह्निवत् ॥ १९ ॥ एतस्य कांतिसंक्रांत्या जगदेव न केवलम् ॥ मदीयमपि शोणत्वमनुप्रातमहो वपुः ॥ २० ॥ कस्मादेष समुत्पन्नः किंमूलः किमुपाधिकः ॥ कुतस्त्यः किमुपादानः कया शक्त्या प्रकाशते ॥ २१ ॥ कियानवधिरेतस्य विष्वक्तिर्यगधोर्ध्वतः ॥ अवगाढश्च पातालं कियन्मात्रमसाविति ॥ २२ ॥ तदेतदखिलं ज्ञातुं मनः पर्युत्सुकं मुहुः ॥ इच्छत्युत्पतितुं व्योम प्रवेष्टुं च रसातलम् ॥ २३ ॥ इति चिंताभराक्रांतौ तेजःस्तम्भावलोकनात् ॥ उभावप्यवकुलितौ[2] वैकुण्ठपरमेष्ठिनौ ॥ २४ ॥ अभाषत च गोविंदः सुतरामेव गर्वितम् ॥ हिरण्यगर्भमालोक्य स्मयमानमुखांबुजः ॥ २५ ॥ ॥ विष्णुरुवाच ॥ ॥

१ क्षिप्रा—विद्युतः । २ आर्षः संधिः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अयमेवावयोर्ब्रह्मन्नन्योन्योत्कर्षकांक्षिणोः ॥ सत्यमेव परीक्षायै निकषः समुपस्थितः ॥ २६ ॥ अमुष्य तेजसां राशेरपरिच्छेद्यसंपदः ॥
आद्यंतौ ज्ञातुमेकेन न शक्यं ध्रुवमावयोः ॥ २७ ॥ यः पश्येन्मूलमग्रं वा तेजसोस्य स्वयंभुवः ॥ स एव नावभ्यधिको जगतां नाथकोऽपि
सः ॥ २८ ॥ ॥ नंदिकेश्वर उवाच ॥ ॥ इत्युभावपि विनिश्चिताशयौ मूलमग्रमपि तस्य वीक्षितुम् ॥ तेजसोतिमहतो बभूवतुः स्पर्धया विर
चितोद्यमौ मिथः ॥ २९ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां प्रथमे माहेश्वरखण्डेऽरुणाचलमाहात्म्य उत्तरार्धे ब्रह्म
विष्णवोर्मध्ये तेजोमयलिंगप्रादुर्भाववर्णनंनाम दशमोऽध्यायः ॥ १० ॥ ॥ नंदिकेश्वर उवाच ॥ ॥ अथ हंसाकृतिं व्योमपदवीलंघनक्षमाम् ॥
भेजे विरंचिस्तस्याग्रं द्रक्ष्यामीति कृतोद्यमः ॥ १ ॥ जग्राह विष्णुर्वाराहं विग्रहं दृढविग्रहः ॥ विश्वंभराविनिर्भेदक्रीडासुलभवैभवम् ॥ २ ॥ मूलं तस्य
परिज्ञाय प्रत्यावर्तितुमुत्सुकः ॥ कृत्रिमस्तब्धरोमैष दंष्ट्राभ्यामभिनन्महीम् ॥ ३ ॥ विदारयन्स पोत्रेण भूतधात्रीमवाङ्मुखः ॥ महावराहो ददृशे तेजःस्तंभं
नमन्निव ॥ ४ ॥ क्रीडाक्रोडकठोरेण कंठघोषेण पूरयन् ॥ पातालं बहुलोत्साहः प्रवेष्टुमुपचक्रमे ॥ ५ ॥ विवेश यत्रयत्रासौ तत्र तत्र तथास्थितम् ॥ अवैक्षिष्टानल
स्तंभं तमेव कुहनाकिटिः ॥ ६ ॥ विदारितान्महीरंध्रात्प्रत्यदृश्यंत भोगिनः ॥ प्ररोहा इव शेषाद्यास्तेजःस्तंभस्य केचन ॥ ७ ॥ प्रत्यदृश्यत हेमाद्रेर्मूल
कन्द इव स्थितः ॥ आधारतां गतो दृष्टो ह्यच्युतेनादिकच्छपः ॥ ८ ॥ आराद्वसुन्धरागुल्फे धुरंधरतया स्थिताः ॥ दिक्सिंधुराश्च दृश्यंते मदमंथर
बंधुराः ॥ ९ ॥ मधुद्विषा च स महान्मंडूकोऽपि विलोकितः ॥ अखंडमंडलं भूमेर्यस्य पृष्ठे प्रतिष्ठितम् ॥ १० ॥ आधारशक्तिमपि तामभ्यपश्यदधो
क्षजः ॥ यदनुग्रहतः शेषकूर्माद्या अपि धूर्वहाः ॥ ११ ॥ अतलं वितलं चैष सुतलं नितलं तथा ॥ तलातलं च प्रतलं महातलमिति क्रमात् ॥
॥ १२ ॥ ददर्श सप्त पातालानपि वारिजलोचनः ॥ तत्रत्यान्विविधाकारान्सर्वानपि सविस्मयः ॥ १३ ॥ अत्यगाद्भोगवत्याख्यां पुरीं वैरोचनी
मपि ॥ जगाहेन्यांश्च दैत्यानामावासानतिगह्वरान् ॥ १४ ॥ इदं दृष्टमिदं दृष्टमित्युपारूढकौतुकः ॥ मूलं मुग्धाशयस्तस्य विचिनोति स्म माधवः
॥ १५ ॥ अधस्तादपि गाढेन पयोधेस्तेन पोत्रिणा ॥ तथैव तेजःस्तंभः स निर्विकारमवैक्ष्यत ॥ १६ ॥ दलिता केवलं पृथ्वी पाथोराशिर्विलोलितः ॥
नैवालोक्यत तन्मूलं कोलरूपेन विष्णुना ॥ १७ ॥ इत्थं वर्षसहस्राणि भ्रांत्या संभ्रांतमानसः ॥ नालं बभूव तन्मूलं लीलाक्रोडो विलोकितुम् ॥
॥ १८ ॥ अवरुग्णखुरः क्षुण्णदंष्ट्रो विध्वस्तविग्रहः ॥ भग्नपोत्रः स भूदारो जगाहे बहलं श्रमम् ॥ १९ ॥ श्रांत्या निश्वसतस्तस्य तादृग्दर्पो विशृं

१ कुहनाकिटिः--मायाधृतवराहवेषः--इत्यर्थः । २ वसुंधराकूले- इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

खलः ॥ ननाश तत्क्षणात्साकं तन्मूलावेक्षणेच्छया ॥ २० ॥ अनिर्व्यूढप्रतिज्ञोऽपि प्रत्यावर्तितुमुत्सुकः ॥ न चक्षमे सरोजाक्षश्चलितुं च पदात्प
दम् ॥ २१ ॥ श्रमांधचक्षुषस्तस्य पातालांतरवर्त्तिनः ॥ तत्तेज एव पंथानं पुनरप्युदभावयत् ॥ २२ ॥ कथंकथंचिदुत्तीर्णोऽप्यकूपारादपारतः ॥
स्वेदांभःसागरस्रावे मग्नोऽभूच्छद्मशूकरः ॥ २३ ॥ रज्ज्वेव तेजःस्तंभस्य प्रभया सानुबद्धया ॥ लब्ध्वाचलं वनं कष्टं न्यवर्त्तिष्ट जनार्दनः ॥ २४ ॥
ततः स्रष्ट्रापि नो दृष्टः शिरोभागः कथंचन ॥ २५ ॥ अमुष्य महसां राशेः प्रागभूद्यत्र संभवः ॥ ततो
नावेक्षि यन्मया मूलममुष्य महसां निधेः ॥ ततः स्रष्ट्रापि नो दृष्टः शिरोभागः कथंचन ॥ २५ ॥ अमुष्य महसां राशेः प्रागभूद्यत्र संभवः ॥ ततो
निवृत्त्य यास्यामि शरणं शिवमीश्वरम् ॥२६॥ स हि विश्वाधिको देवश्चिरं मोहांधचक्षुषा ॥ यद्विस्मृतो मया तस्माद्दुर्विपाकोऽजनीदृशः ॥ २७ ॥
एवं विनिर्धार्य विमुक्तदर्पो निवृत्तवानाशु सरोरुहाक्षः ॥ तमेव देशं प्रबभूव यत्र स्तंभः स तेजोमयतां दधानः ॥ २८ ॥ ॥ इति श्रीस्कांदे महा
पुराण एकाशीतिसाहस्र्यां संहितायां प्रथमे माहेश्वरखण्डेऽरुणाचलमाहात्म्य उत्तरार्धे विष्णुना लिंगाधोभागशोधनवर्णनंनामैकादशोऽध्यायः ॥
॥ ११ ॥ ॥ छ ॥ ॥ नंदिकेश्वर उवाच ॥ ॥ ततस्तेजोमयं स्तंभमनुसृत्य पितामहः ॥ उत्पपातोन्मुखो वेगान्निरालंबे नभस्तले ॥१॥ द्रुतमु
त्पततस्तस्य पक्षवेगेन वारिताः ॥ व्यशीर्यंत समुद्वर्त्ताः प्रणुन्ना इव वायुभिः॥२॥स वेगादुत्पतन्दूरं नाक्ष्णोर्विषयतामगात् ॥ केवलं दीर्घदीर्घैव रेखा
व्योम्नि व्यभाव्यत॥३॥ मायामरालो ददृशे तेजःस्तंभस्य पार्श्वतः॥ संध्यापयोधराभ्यर्णचारीव रजनीकरः॥४॥प्रागत्यगादुत्पततां ततोऽध्वानं पयोमु
चाम्॥विमानपदवीं पश्चात्तारावर्तं ततः परम् ॥५॥ तेजसां यानि धामानि ह्यत्युच्चान्यूर्ध्वचारिणाम् ॥ अतिचक्राम वेगेन तान्यसौ कुहनाखगः ॥
॥ ६ ॥ मरुतो मनसो वापि जवः सूक्ष्मतराकृतेः ॥ सोऽभूदधःकृतस्तेन हंसेन गमनादिना ॥ ७ ॥ यथायथा चोत्पपात सुदूरं श्रमितच्छदः ॥
तथातथा च ददृशे तेजःस्तंभः समुन्नतः ॥ ८ ॥ अतीत्य मरुतां स्कंधान्सत संप्राप्तविस्मयः ॥ बिभेदांडकटाहं च ज्वलंतं तमुदैक्षत ॥ ९ ॥
कथं वाऽदृष्टमूलस्य स्थातव्यं पुरतो हरेः ॥ अविमोचयतः शौरेरसमासमशीर्षताम् ॥ १० ॥ अनिर्व्यूढप्रतिज्ञस्य दीर्घैः किं वा ममासुभिः ॥ तद
त्रौपयिकं किं स्यात्कार्यं का वा गतिर्मम ॥११॥ अतिसंधित्सतो विष्णुं कस्सहायो भविष्यति ॥ आर्जवं नैव निर्जेतुं प्रतिवादिनमक्षमः ॥ १२ ॥
छद्मना वा तिरस्कुर्यान्मानो हि महतां धनम् ॥ इति संचिंतयत्येव विरिंचौ व्याकुलात्मनि ॥ १३ ॥ आकाशे ददृशे नातिदूरे किमपि निर्मलम् ॥

१ तन्मूलावेक्षणेच्छया—साकम्--इति योजना। २ मायामरालः--मायाधृतहंसरूपः। ३ उत्पततां पक्षिणाम्--अध्वानम्--अत्यगात्--ततः पयोमुचाम्--मेघानाम्--अध्वानम्--अत्यगात्। ४ कुहनाखगः--मायाधृतहंसरूपः। ५ असमासमशीर्षताम्--वक्रातिवक्रशिरस्कताम् (गर्वात्) अविमोचयतः अनिर्व्यूढप्रतिज्ञस्य मम असुभिः किं वा प्रयोजनम् इति योजना।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एंदवी किमियं रेखा तस्याः कथमिहागमः ॥ १४ ॥ यद्वा मृणालं तत्सिधौ वियत्यस्यां कुतस्तु सः ॥ इति तस्मिन्ससंदेहे नेदीयस्तं तदाग
तम् ॥ १५ ॥ अबोधि केतकीबर्हमिति राजीवजन्मना ॥ तत्पर्युषितमप्युद्यत्सौरभं वस्तुशक्तितः ॥ १६ ॥ हिरण्यगर्भो विमलमगृह्णात्केतक
च्छदम् ॥ गृहीतमात्रं तेनैतत्सचैतन्यं किलाब्रवीत् ॥ १७ ॥ ॥ केतक उवाच ॥ ॥ भो गृह्णासि किमर्थं त्वं मुंच मां विश्रमोद्यतम् ॥ वर्षाणां
शतसाहस्रमुत्पत्यैवं विहायसा ॥ १८ ॥ ॥ नंदीश उवाच ॥ ॥ तथा समेधमानं तं दृष्ट्वा श्रममखिद्यत ॥ अचिंतयत्पंद्मसूतिरत्यंतं विहता
शयः ॥ १९ ॥ अनिर्व्यूढप्रतिज्ञावान्नीचतामपि संश्रितः ॥ आक्रांतरोदोविवरः क्व राशिस्तेजसामसौ ॥ २० ॥ अहमेतत्परीक्षायां क्व परिच्छिन्न
पौरुषः ॥ भज्येते इव मे पक्षौ दृशा चांधायते इव ॥ प्रध्वंसंत इवांगानि पतामीवाहमप्यधः ॥ २१ ॥ किं वान्यद्बहुनोक्तेन सह निश्वासवायुभिः ॥
मम प्राणाश्च नियतं निर्गच्छंतीव सांप्रतम् ॥ २२ ॥ अहंकारमदग्रंथिरयं त्रुटतु चित्ततः ॥ मुकुंदेन सह स्पर्धा सा च शीघ्रं प्रणश्यतु ॥ २३ ॥
यदेष रोदःकुहरपरिणाहाधिकोद्यमः ॥ औन्नत्यमयतेऽद्यापि तेजःस्तंभो यथा पुरा ॥ २४ ॥ तदस्य तेजसां राशेर्नाहं नारायणोऽथवा ॥ कारणं
दूरतश्चान्ये महेंद्रप्रमुखाः सुराः ॥ २५ ॥ इतो नोत्पतितुं शक्तिरस्ति मे तन्निवर्त्तये ॥ इति निश्चित्य मनसा विधाता जातविस्मयः ॥ २६ ॥ प्रत्य
भाषत तं कस्त्वं कुतो वा प्राप्तवानिति ॥ स च प्रत्यब्रवीदेनं वेधसं केतकच्छदः ॥ २७ ॥ केतकच्छद एवासं सचैतन्यः शिवाज्ञया ॥ तेजःस्तंभा
त्मनः शंभोरस्य मूर्ध्नि चिरं स्थितः ॥ २८ ॥ भूलोक इच्छया वस्तुं ततः संप्राप्तवानहम् ॥२९॥ इत्थं श्रुत्वा केतकीबर्हवाचं लब्ध्वाश्वासं तं किलां
भोजभूतिः ॥ ब्रूहि त्वं मे तत्कियत्यंतरे वा तेजःस्तंभस्याग्रमित्याबभाषे ॥ ३० ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां प्रथमे
माहेश्वरखण्डेऽरुणाचलमाहात्म्य उत्तरार्धे ब्रह्मणा लिंगोपरिभागशोधनवर्णनंनाम द्वादशोऽध्यायः ॥ १२ ॥ ॥ नंदिकेश्वर उवाच ॥ ॥ केतकीबर्हम
प्येनं विहस्य पुनरब्रवीत् ॥ ॥ केतक्युवाच ॥ ॥ अपि मूढ न किंचित्त्वं वेत्सि कस्त्वं कुतो न तत् ॥ १ ॥ ईदृश्यः परितो लग्ना यस्मिन्ब्रह्मांड
कोटयः ॥ तस्य प्रमाणमेतावदिति को वेदितुं क्षमः ॥२॥ चतुर्युगायुतैर्यातं ततो निपततो मम ॥ इदानीमपि नाप्नोति तन्मध्यं किल भूतलम् ॥३॥ इति
ब्रुवाणमेनं च नमस्कृत्य सरोजभूः ॥ हित्वा निजमहंकारमभाषत कृतांजलिः ॥४॥ ॥ ब्रह्मोवाच ॥ ॥ महात्मन्सत्यमेवास्मि मूढोऽहं केतकच्छद ॥
ब्रह्मणा हि मया स्पर्द्धा विष्णुना सह निर्मिता ॥५॥ द्वाभ्यामपीदमावाभ्यां विस्मृतं शिववैभवम् ॥ यन्नौ महानभूद्गर्वस्सर्गसंत्राणमात्रतः ॥६॥ ह्रेपणी

१ पद्मसूतिः–ब्रह्मा–इत्यर्थः। २ ह्रेपणी–लज्जाकरी–इत्यर्थः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संकथा तावदास्तामद्याप्यहं यतः ॥ स्पर्द्धया न विमुक्तोऽस्मि बद्धया गरुडध्वजे ॥ ७ ॥ सख्यं सातपदीनं हि कथ्यते तद्भवान्मयि ॥ ८ ॥ अस्तुतधियं हित्वा कर्तुमर्हस्यनुग्रहम् ॥ अहं विष्णुश्च मोहांधौ तेजःस्तंभस्य वीक्षणात् ॥ ९ ॥ हंसकोलाकृती दध्वो मिथः साम्यं व्यपोहितुम् ॥ मूलं दिदृक्षुः स दशां कीदृशीं यातवानिति ॥ १० ॥ न जाने मम चास्याग्रं दिदृक्षोरीदृशी दशा ॥ गतमुड्डीयमानस्य मे सहस्रेण हायनैः ॥ ११ ॥ जातश्रमोऽस्मि नितरां वियुज्य इव चासुभिः ॥ दिष्ट्याद्य भद्र लब्धस्त्वं मयाऽऽलंबोवसीदताम् ॥ १२ ॥ तन्मे कुरुष्व मित्रस्य सफलां याचनामिमाम् ॥ सखाहं सहसंजल्पादस्मि दासोनुषंजनात् ॥ १३ ॥ तत्त्वया करणीयैवं प्रार्थनैषा कृतांजलिः ॥ यदि पश्यति मूलं स जितोऽहममुना तदा ॥ १४ ॥ यद्वा न पश्यति तदाप्यस्मि साम्यमुपेयिवान् ॥ इदं द्वयमपि प्रायो ममातिक्षेपणं सखे ॥ १५ ॥ त्वयैव परिहार्यत्वमिदानीं समुपागतम् ॥ अनृतामभिभाष त्वमुचितां च सुहृत्कृते ॥ १६ ॥ गिरमेकामिमामग्रे चक्रपाणेरुदीरय ॥ एष हंसाकृतिर्ब्रह्मा तेजःस्तंभस्वरूपिणः ॥ १७ ॥ अत्युच्चं दृष्टवानग्रमत्र साक्ष्ये स्थितोऽस्म्यहम् ॥ तेनापि तेजःस्तम्भत्वमेयुषा चन्द्रमौलिना ॥ १८ ॥ संभावितोयं सुतरां पित्रेव हि पितामहः ॥ अतोऽयमेवाभ्यधिको भवतो विष्टरश्रवाः ॥ १९ ॥ इत्युक्त्वा मम साहाय्यं सुमहत्क्रियतां त्वया ॥ २० ॥ ॥ नंदिकेश्वर उवाच ॥ ॥ एवं भूयः प्रार्थितोऽयं विधात्रा दाक्षिण्यार्द्रः केतकीबर्हकोपि ॥ तेजःस्तंभाभ्यर्णभाजे तथैव प्राहाशेषं विष्णवे ब्रह्मवाक्यम् ॥ २१ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां प्रथमे माहेश्वरखण्डेऽरुणाचलमाहात्म्य उत्तरार्धे ब्रह्मणाऽसत्यसाक्ष्यार्थं केतकच्छदप्रार्थनावर्णनंनाम त्रयोदशोऽध्यायः ॥ १३ ॥ ॥ छ ॥ ॥ नंदिकेश्वर उवाच ॥ ॥ सोऽपि ब्रह्माणमुद्वीक्ष्य तावता द्विगुणं स्मयन् ॥ नाग्रं दृष्टमनेनेति निश्चिकाय विवेकवान् ॥ १ ॥ अनुग्रहीतुं मां मुग्धं हंतुं चास्य विधेर्मदम् ॥ देवदेवः स एवालं भूतभर्तेत्यमन्यत ॥ २ ॥ मूलसंदर्शनाशक्त्या तेजःस्तम्भस्य मे मदः ॥ व्यपेत एव मन्येऽद्य यद्भक्तिरुर्यंबकेऽजनि ॥ ३ ॥ स्तूयते वीतगर्वत्वात्स इदानीं महेश्वरः ॥ यस्य दक्षिणवामाभ्यामंगाभ्यां नौ समुद्भवौ ॥ ४ ॥ अद्याप्यवीतगर्वत्वाल्लब्ध्वासौ कूटसाक्षिणम् ॥ हिरण्यगर्भो मामेवमतिसंधातुमिच्छति ॥ ५ ॥ तदद्य सकलस्यापि दुःखस्यापनये क्षमः ॥ स एव शरणत्वेन प्राप्तव्यः शंकरो मया ॥ ६ ॥ तथा कृतापराधस्य कृतघ्नस्य गुरुद्रुहः ॥ तमृते रक्षिता कोऽन्यस्तमेव स्तौमि शंकरम् ॥ ७ ॥ ॥ विष्णुरुवाच ॥ ॥ जय पृथ्वीमयाकार जय चापोमयाकृते ॥ जय प्रभाकराकार जयामृतकराकृते ॥ ८ ॥ जय वैश्वानराकार जय गन्धवहाकृते ॥ जय होतृमयाकार जयाकाशमयाकृते ॥ ९ ॥ रक्ष मां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्रिगुणातीत रक्ष मां कालविग्रह ॥ रक्ष मामक्षयैश्वर्य रक्ष मां करुणाकर ॥ १० ॥ स्रष्टा त्वं सर्वजगतां रक्षिता सर्वदेहिनाम् ॥ हर्ता
च सर्वभूतानां त्वां विनैवास्ति कोऽपरः ॥ ११ ॥ अणूनामप्यणीयांस्त्वं महांस्त्वं महतामपि ॥ अन्तर्बहिस्त्वमेवैतज्जगदाक्रम्य वर्तसे
॥ १२ ॥ निगमास्तव निश्वासा विश्वं ते शिल्पवैभवम् ॥ स त्वं त्वदीय एवासि ज्ञानमात्मा तव प्रभो ॥ १३ ॥ अमरा दानवा दैत्याः
सिद्धा विद्याधरा नरा[1]ः ॥ प्राणिनः पक्षिणः शैलाः शिखिनोऽपि त्वमेव हि ॥ १४ ॥ स्वर्गस्त्वमपवर्गस्त्वं त्वमोंकारस्त्वमध्वरः ॥ त्वं योग
स्त्वं परा संवित्किं त्वं न भवसीश्वर ॥ १५ ॥ त्वमादिर्मध्यमंतश्च तस्थुषां जग्मुषामपि ॥ कालस्वरूपतां प्राप्य कलयस्यखिलं जगत् ॥ १६ ॥
परेशः परतः शास्ता सर्वानुग्राहकः शिवः ॥ स एष मे कथंकारं साक्षाद्भवति धूर्जटिः ॥ १७ ॥ यं दृष्ट्वा शरणं प्राप्तो निःश्रेयसमवाप्नुयात् ॥ अथ
वा स्तौमि तद्धाम जातमात्रं यथामिति ॥ १८ ॥ तच्छ्रुत्वैष कृपां कुर्यादवश्यं सर्वतःश्रुतिः ॥ इति निश्चित्य वैकुंठः स्तोतुं समुपचक्रमे ॥ १९ ॥
तमेव तैजसं स्तंभं प्रणम्य परमेश्वरम् ॥ आदिमध्यांतरहितं मत्वा तं जगदीश्वरम् ॥ हठात्तेन विरंचेन वार्यमाणोपि सस्मितम् ॥ २० ॥ ॥ श्रीविष्णु
रुवाच ॥ ॥ जय देव महादेव वामदेव वृषध्वज ॥ कालांतक क्रतुध्वंसिन्नीलकंठेंदुशेखर ॥ २१ ॥ जय शंभो शिवेशान शर्व त्र्यंबक धूर्जटे ॥
स्मरवैरिन्पुराराते स्थाणो भव महेश्वर ॥ २२ ॥ जयेश खंडपरशो शूलिन्पशुपते हर ॥ सर्वज्ञ भर्ग भूतेश कपालिन्नीललोहित ॥ २३ ॥ जय
रुद्र मखाराते पिनाकिन्प्रमथाधिप ॥ गंगाधर व्योमकेश गिरीश परमेश्वर ॥ २४ ॥ जय भीम मृगव्याध कृत्तिवासः कृपानिधे ॥ कृशानुरेतः
कैलासे नित्यमेव हि वर्तसे ॥ २५ ॥ त्वदाज्ञया मरुद्वाति फणी वहति भूभरम् ॥ दीप्यतः सूर्यशशिनौ ब्रह्मांडं प्लवतेऽम्बुधौ ॥ २६ ॥ ज्योतींषि
संचरंते खे सर्वं त्वच्छासनात्प्रभो ॥ अहं ब्रह्मा च जगतां सर्गसंत्राणयोरलम् ॥ २७ ॥ विधाय कल्पसे पुष्ट्यै सूते सस्यानि मेदिनी ॥ नाक्रामं
त्यब्धयः सीमां यच्च त्वन्महिरेव सः ॥ २८ ॥ अणिमादिमहासिद्धिनिःसाधारणवैभवः ॥ कथं त्वाममरैरन्यैरुपेक्षे समभिष्टुतम् ॥ २९ ॥ विशुक्त्वे[2]
विस्मरामस्त्वां स्मरामः संकटेपि च ॥ न रोषो जातु भक्तेषु प्रसादः सर्वदैव ते ॥ ३० ॥ यदा विधित्सेर्भक्तिं त्वं यदा च प्रावृणोषि ताम् ॥
मोहबोधौ तदा पुंसां कल्पेते बंधमोक्षयोः ॥ ३१ ॥ इति स्तुतस्सांजलिबद्धपाणिना पतिः पशूनामथ चक्रपाणिना ॥ कृतापहासे च सरोजसंभवे
मदोद्धते प्रादुरभूद्दयानिधिः ॥ ३२ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां प्रथमे माहेश्वरखण्डेऽरुणाचलमाहात्म्य उत्तरार्धे शंकर

१ नगाः—इ० पा० । २ विशुक्त्वे—शोकराहित्यदशायाम्—इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रादुर्भाववर्णनंनाम चतुर्दशोऽध्यायः ॥ १४ ॥ ॥ छ ॥ ॥ नंदिकेश्वर उवाच ॥ ॥ तेजःस्तंभं विनिर्भिद्य संध्याभ्रमिव चंद्रमाः ॥ कैलासकूटधवलं
वृषेन्द्रमधितास्थिवान् ॥ १ ॥ जटाजूटवता बालचंद्रचूडेन मौलिना ॥ कपालमालिकां वैधीं स्रजं चारग्वधीं दधत् ॥ २ ॥ नागकुंडलिभिः फालफ
लकोद्भासिलोचनैः ॥ पंचभिर्वदनैर्दीप्तैः क्ष्वेडकल्माषकंधरैः ॥ ३ ॥ शूलं कपालं डमरुं सारंगं परशुं धनुः ॥ खट्वांगममलं खड्गं दोर्भिर्नागं च धार
यन् ॥ ४ ॥ श्वसितोद्धूलिताकारो गजचर्मोत्तरीयवान् ॥ सर्वालंकारसंपन्नः सर्वदेवैरभिष्टुतः ॥ ५ ॥ परिधानीकृतव्याघ्रचर्मा ताभ्यामदर्शि सः ॥
रूपं दृष्ट्वा स आनंदं ननर्त्त नलिनेक्षणः ॥ ६ ॥ न किंचिदपि जानानो मुमोह च सरोजभूः ॥ ७ ॥ दृशाभिनंद्य माधवं प्रसन्नया महेश्वरः ॥
अथोदतिष्ठिपच्च तं सहुंक्रियश्चतुर्मुखम् ॥ ८ ॥ जगाद चाधिकारितामदाद्युवां समुद्धतौ ॥ न लज्जितव्यमत्र वामयं क्रमोऽधिकारिणाम् ॥ ९ ॥
परीक्ष्य वैभवं मम प्रबोधवानभूद्धरिः ॥ अयं न जातु पद्मभूश्छलन्मनो दुरात्मवान् ॥ १० ॥ अशासि पंचवक्त्रता यदोपहासितो ह्यहम् ॥ पुनःस्वपु
त्रिकारतिर्मयैष शिक्षितोऽभवत् ॥ ११ ॥ तृतीय एष मंतुरप्यहो कथं नु सह्यते ॥ तदस्य तु प्रतिष्ठया क्वचिन्न भूयतां विधेः ॥ १२ ॥ अयं च
केतकच्छदो यदाप कूटसाक्षिताम् ॥ अतः परं न जातु तन्ममैतु मूर्ध्नि संस्थितिम् ॥ १३ ॥ शप्त्वैवमेतौ गिरिशः प्रीत्या विष्णुमभाषत ॥
॥ १४ ॥ ॥ श्रीमहेश्वर उवाच ॥ ॥ वत्स मा भैः प्रसन्नोऽस्मि भवते भक्तिशालिने ॥ ननु त्वमंगान्मे जातस्सात्त्विकोऽसि विशेषतः ॥ माहे
श्वराग्रगण्योऽसि जगत्यां हि यथा पुरा ॥ १५ ॥ न तवातः परं जातु भक्तिहानिर्भवेन्मयि ॥ प्रतिक्षणं वर्द्धमाना कल्पते च विमुक्तये ॥
॥ १६ ॥ इत्यनुग्रहकृतं त्रिलोचनं भक्तिभाजि निरहंक्रिये हरौ ॥ भीतिमानवनतः स्वयं विधिः स्तोतुमारभत कृतवंदनः ॥ १७ ॥ इति
श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां प्रथमे माहेश्वरखण्डेऽरुणाचलमाहात्म्ये उत्तरार्धे ब्रह्मकृतशिवस्तुत्युद्यमवर्णनंनाम पञ्चदशोऽ
ध्यायः ॥ १५ ॥ ॥ छ ॥ ॥ ब्रह्मोवाच ॥ ॥ देवदेव तवैश्वर्यं केन शक्येत वेदितुम् ॥ विना भाग्यैक्यसुलभं भवदीयमनुग्रहम् ॥ १ ॥ अक
र्तृकाणि वाक्यानि ऐश्वर्यं ते निरत्ययम् ॥ न स्तोतुं शक्यते किं तु नमस्कुर्वंति दूरतः ॥ २ ॥ को विष्णुः कोऽहमेते वा दिक्पाला वासवादयः ॥
त्वमेव देव कर्त्तासि जगत्सृजनरक्षयोः ॥ ३ ॥ पतिस्त्वं पार्वतीनाथ पशवो वयमप्यमी ॥ बद्धुं पाशेन मोक्तुं वा त्वमेवास्मान्प्रगल्भसे ॥ ४[1] ॥
षड्विंशत्तत्त्वरूपस्त्वमभितश्चाभिवर्त्तसे ॥ कोविदः को विनिर्णेतुं तव याथात्म्यमीश्वरः ॥५॥ किरातः किल देवस्त्वं सारमेयैः किलागमैः ॥ षड्वर्गहिं

: १ कामक्रोधाद्यरिषड्वर्गरूपान् हिंस्रान् पशून्—इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्रान्संहर्तुं करोष्याखेटकौतुकम् ॥६॥ देव दक्षाध्वरे पूर्वं वीरभद्रस्त्वदाज्ञया ॥ कांकां शिक्षामकार्षीन्न इति कापि विडम्बना ॥ ७ ॥ तव कालाग्निरू
पस्य सर्वब्रह्मांडदाहिनः ॥ पोषणात्पुष्पचापस्य प्रायो जिह्रेति शेमुषी ॥ ८ ॥ कृतापराधः शूलेन त्वया दीर्णो जलंधरः ॥ अन्तकोंधकदैत्यश्च प्रति
वीरश्च कोऽस्ति ते ॥९॥ अधारयिष्यत्कण्ठेन कालकूटं न चेद्भवान् ॥ कथं च धारयिष्यामो वयं सर्वेऽपि जीवितम् ॥ १० ॥ देवदारुवने पूर्वं मुनी
न्केवलकर्मठान् ॥ प्रक्षोभ्य धूर्तवेषस्त्वं दययान्वग्रहीस्तथा ॥ ११ ॥ अंघ्रिणाक्रांतवान्नो चेदत्युग्रां त्वमपस्मृतिम् ॥ तयाक्रांतमिदं कृत्स्नमंधकारायते
जगत् ॥ १२ ॥ अर्धनारीश्वरं रूपं त्वया चेन्न प्रकाशितम् ॥ प्रभवामि कथं स्रष्टुं जगदेतच्चराचरम् ॥ १३ ॥ भवता स्तंभितः शम्भो संरंभाज्जंभ
जिद्भुजः॥ कियंतं हंत कालं ते जयस्तंभ इव स्थितः॥१४॥ भिक्षोः कपालमापूर्य रुधिरेणात्मनो हरिः॥ शूलेनोत्क्षिप्य मुमुहे ह्येतत्त्वमवधारय॥१५॥
न चेदशिक्षयः सर्वशस्त्रास्त्राण्यनुकंपया ॥ निर्वापयेत्कथं वैरं क्रुद्धोपि जमदग्निभूः ॥ १६ ॥ नृहरिं शरभाकारः समहार्षीन्न चेद्भवान् ॥ स एव संहरे
द्विश्वं हिरण्यकशिपोरपि ॥ १७ ॥ त्वमाचकृक्षः कल्पाब्धौ कैवर्त्तौ मत्स्यकच्छपौ ॥ हरिं बद्धाहिराट्सूत्रैर्नृसिंहमथ सूकरम् ॥ १८ ॥ एकोने पद्म
साहस्रे स्वनेत्रेण कृतार्चनम् ॥ शूलिन्सुदर्शनं दत्त्वा दैत्यद्विषमतूतुषः ॥ १९ ॥ ॥ नंदिकेश्वर उवाच ॥ ॥ स्तुत्यैवमस्य विष्णोश्च प्रार्थनेन प्रसे
दिवान् ॥ धूर्जटिः सृष्टिकर्तृत्वं पुनरस्याभ्यमन्यत ॥ २० ॥ समज्यासु द्विजानां च पूजनं चानुशिष्टवान् ॥ उभावप्यब्रवीदेतौ वात्सल्याच्चंद्रशेखरः
॥ २१ ॥ ॥ श्रीशिव उवाच ॥ ॥ वत्सौ युवां न ज्ञात्वैवं भूयो भवतमुद्धतौ ॥ गुरुं स्मरंतौ मामेव जाग्रतं सृष्टिरक्षयोः ॥ २२ ॥ इह प्रदेशे युवयोर्य
न्मयानुग्रहः कृतः ॥ पुण्यक्षेत्रमिदं पुंसां ततो मोक्षाय कल्पताम् ॥ २३ ॥ योजनत्रयमात्रेऽस्मिन्क्षेत्रे निवसतां नृणाम् ॥ दीक्षादिकं विनाप्यस्तु
मत्सायुज्यं ममाज्ञया ॥ २४ ॥ यद्वा तिरश्चामप्यत्र स्थावराणां च देहिनाम् ॥ अबुद्धिपूर्विका बुद्धिरपवर्गस्य जायताम् ॥ २५ ॥ नृणां च दर्श
नादूरे कैवल्यं स्मरणेन वा ॥ अस्तु वेदांतविज्ञानं न साध्यं निष्प्रयासतः ॥ २६ ॥ शुभाय तैजसी मूर्तिः स्थावरा मम शाश्वती ॥ अरुणाद्रि
रिति ख्याता नित्यमेवात्र वर्त्तताम् ॥ २७ ॥ युगात्ययेपि नैनं तु मज्जयेयुर्महाब्धयः ॥ न चालयेयुर्मरुतो न दहेयुश्च वह्नयः ॥ २८ ॥ ज्योतिर्म
यमिदं लिंगं ज्योतिःष्वपि न जातुचित् ॥ क्रमंतां निर्गमागत्या खेचराणि समंततः ॥ २९ ॥ यस्यानुग्रहमिच्छामि जंतोस्तस्यात्र संभवः ॥
देहांते कल्पतां मुक्त्यै विनौपनिषदीर्गिरः ॥ ३० ॥ एष दूरात्प्रणामेन निकर्षाच्च प्रदक्षिणात् ॥ अपि पापात्मनां पुंसामस्तु निश्रेयस

१ नृसिंहं–सूकरं–हरिम्–अर्थात्–नृसिंहसूकररूपधारिणं विष्णुम्–इत्यर्थः । २ समज्यासु–सभासु–गोष्ठीषु–यज्ञियसमारंभेषु–इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रदः ॥ ३१ ॥ अत्रैव नियतं वासाः संभवंति महात्मनाम् ॥ तस्मात्स्थलमिदं हित्वा न गंतव्यं कदाचन ॥ ३२ ॥ शोणाचलमनाहत्य क्वचित्स्थित्वापि मुक्तये ॥ तस्माद्युवां विधिहरी वसतं चात्र नित्यशः ॥ ३३ ॥ ॥ नंदिकेश्वर उवाच ॥ ॥ इत्युक्तवंतं कामारिं प्रणम्य विधिमाधवौ ॥ तौ व्यज्ञापयतां देवं दूरीभवदहंक्रियौ ॥ ३४ ॥ ॥ विधिमाधवावूचतुः ॥ ॥ एवमेतज्जगदाधार जगदाधारतां गतः ॥ आस्तां गिरिरसौ किं तु तेजो ह्यस्य सुदुस्सहम् ॥ ३५ ॥ अतोयमुत्तमो रुद्र तेजः सामान्यशैलवत् ॥ तिष्ठत्वमेयमहिमा निश्रेयसमहाखनिः ॥ ३६ ॥ विवृणोति निजं ज्योतिर्विश्वस्यास्य समृद्धये ॥ प्रत्यब्दं कार्त्तिके मासि कृत्तिकासु दिनात्यये ॥ ३७ ॥ शर्मदोपि नृणां देव शोणाद्रिस्तव शासनात् ॥ महत्त्वादर्चितुं शक्यो न स्याद्भक्तस्य कस्यचित् ॥३८॥ एतस्यो पत्यकायां तदद्यारभ्यास्मदर्थनात् ॥ देवेन सन्निधातव्यमवन्यां लिंगरूपिणा ॥३९॥ तच्चारुणगिरीशानमावामाराधयावहे ॥ अभिषेकानुलेपाद्यैरुपचारैर्यथाविधि ॥४०॥ संत्यत्र केशराश्चूता नागपुंनागकेसराः ॥ आरग्वधाः कुरबका मालूराः पाटला अपि ॥ ४१ ॥ अत्रैव सन्निधातव्यं देवदेव दयानिधे ॥ यतस्त्वद्भक्तिदाढर्यं नौ भवतात्त्वदुपासनात्॥४२॥नान्यथा चित्तशुद्धिर्नौ देवेऽप्येवं प्रसेदुषि ॥ अनाद्यविद्यावृतये यो भविष्यति नित्यशः ॥ ४३ ॥ शोणाद्रेः पूर्वदिग्भागे स एष भृशमुन्नतः ॥ स एवालं निवासाय देवस्य हृदयंगमः ॥ ॥४४॥ सांगवेदा धर्मशास्त्रं पुराणानि शिवागमाः ॥ कृत्वा च सकलाः प्रोक्ता भवतैव भवावयोः ॥४५॥ निश्रेयसाय भक्तानां त्वयैव गुरुरूपिणा॥ अष्टाविंशतिराख्याता आगमाः शैवसंज्ञिताः ॥ ४६ ॥ तेषु कस्य प्रकारेण कुर्वाणौ त्वदुपासनाम् ॥ कदाप्यज्ञानजामार्तिं नाधिगच्छाव शंकर ॥ ४७ ॥ ॥ नंदिकेश्वर उवाच ॥ ॥ इति तौ धातृगोविंदौ पादपद्मावलंबिनौ ॥ जगाद करुणामूर्त्तिर्जगतीभृत्सुतापतिः ॥ ४८ ॥ ॥ श्रीमहादेव उवाच ॥ ॥ युक्तमुक्तमिदं भद्रौ मयाप्येवं मनीषितम् ॥ कामिकोक्तेन मार्गेण मामर्चयितुमर्हथः ॥ ४९ ॥ मोहतो विस्मृता मन्ये भवद्भ्यां शैवसंहिता ॥ अधुना मत्प्रसादेन पुनरुद्भासतां हृदि ॥ ५० ॥ ॥ नन्दीश उवाच ॥ ॥ इत्युक्त्वा श्रीशवागीशौ गिरिशोऽन्तरधादथ ॥ तदा प्रादुरभूत्तत्र लिंगं किमपि मंगलम् ॥ ५१ ॥ तच्चावलोक्य साश्चर्यौ मुकुन्दकमलासनौ ॥ मुहुः प्रणम्य सानंदं प्राच्यं तुष्टुवतुश्चिरम् ॥ ५२ ॥ तावकारयतां शोणगिरिनाथस्य चालयम् ॥ नानाशिल्पाद्भुतं विश्वकर्मणा प्रचयेन च ॥ ५३ ॥ खानयामासतुस्तत्र सरः किमपि पावनम् ॥ अभिषेकाय देवस्य सर्वतीर्थमयं नवम् ॥ ५४ ॥ अरुणाख्यं पुरं चारात्कल्पयामासतुश्चिरम् ॥ सिद्धचै नोत्कंठते लब्ध्वा कैलासायापि धूर्जटिः ॥ ५५ ॥

१ तेजः तेजोरूपः । २ सिद्धः–इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीकांतः परितोषितः ॥ पार्श्वस्थां वल्लकीहस्तां नेत्रांतेनादिशच्छ्रियम् ॥ ३१ ॥ तेन संभाविता लक्ष्मीर्भवदुःखविनाशिनी ॥ शुभाय सर्वलो
कानां यमं प्रोवाच लीलया ३२ ॥ ॥ लक्ष्मीरुवाच ॥ ॥ यदर्थमावां संस्तौषि क्षेत्रेस्मिन्दुर्लभं हि तत् ॥ अत्याज्यमावयोरेतत्क्षेत्रं श्रीपुरुषो
त्तमम् ॥ ३३ ॥ कल्पावसानेप्यावां वै ध्रियेते परमेष्ठिना ॥ ब्रह्मादिदिक्प्रभूणां हि स्वामित्वं नेह विद्यते ॥ ३४ ॥ नेह कर्मपरीपाकाः संभवंति
कदाचन ॥ अत्र प्रवसतां नृणां तिरश्चामपि दुष्कृताम् ॥ ३५ ॥ दह्यते ज्वलिताग्नौ हि तूलराशिर्यथा भृशम् ॥ ये बद्धा पापपुण्याभ्यां निगडा
भ्यामहर्निशम् ॥ ३६ ॥ तेषां संयमिता त्वं हि यमः पूर्वं विनिर्मितः ॥ अत्र साक्षाद्वपुष्मंतं नीलेन्द्रमणिमंजुलम् ॥ ३७ ॥ दृष्ट्वा नारायणं देवं
मुच्यते कर्मबन्धनात् ॥ अतोऽन्यतः कर्मभूमौ प्रभुत्वं सूर्यसंभव ॥ ३८ ॥ वैक्लव्यं क्षेत्रराजेस्मिन्मा गास्त्वं यम संयमे ॥ तवापि भगवानेष
विधाता प्रपितामहः ॥ ३९ ॥ तिर्यंचं विष्णुसारूप्यं प्राप्तं पश्यति कौतुकात् ॥ एष कर्मपरीपाकं सर्वेषां वेत्ति कंजजः ॥ ४० ॥ ज्ञात्वा क्षेत्रस्य
माहात्म्यं स्तौति देवं गदाधरम् ॥ त्वद्वशं गंतुमुचिता नेह तिष्ठंति जंतवः ॥ ४१ ॥ वैवस्वत वसंत्यत्र जीवन्मुक्ता मुमुक्षवः ॥ तया संबोधितस्त्वेवं
विष्णुना स्त्रीस्वरूपिणा ॥ ततोऽहंकारलज्जाभ्यां विनीतः प्राब्रवीद्यमः ॥ ४२ ॥ ॥ यम उवाच ॥ ॥ मातस्त्वया यदाज्ञप्तं पुरा नैतन्मया
श्रुतम् ॥ ४३ ॥ अज्ञानोपहतो वेद्मि रहस्यं कथमुत्तमम् ॥ यस्य स्वरूपं वेदाश्च न च वेत्ति पितामहः ॥ ४४ ॥ महिमानं कथं तस्य वेद्म्यहंकार
मोहितः ॥ यदादिष्टं सुरेशानि क्षेत्रमेतद्विमुक्तिदम् ॥ ४५ ॥ सान्निध्याद्वासुदेवस्य ईश्वरेच्छा निरंकुशा ॥ अन्यत्र बन्धदो विष्णुरत्र मोक्षं ददाति
यत् ॥ ४६ ॥ ममापि निरयाणां च स्रष्टासौ त्रिदिवस्य च ॥ मृतानामत्र मुक्तिश्चेत्तन्मामंब सुविस्तरम् ॥ ४७ ॥ क्षेत्रसंस्थाप्रमाणं हि तत्र स्थिति
फलं हि यत् ॥ तीर्थानि कानि संत्यत्र किमन्यद्वा रहस्यकम् ॥ ४८ ॥ किमधिष्ठातृकं क्षेत्रं तत्सर्वं कथयस्व मे ॥ तदहं संपरित्यज्य निर्भयः
संचरे यथा ॥ ४९ ॥ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे पुरुषोत्तमक्षेत्रमाहात्म्ये जैमिनिऋषिसं
वादे द्वितीयोऽध्यायः ॥ २ ॥ ॥ छ ॥ ॥ श्रीरुवाच ॥ ॥ साधु ते बुद्धिरुत्पन्ना विष्णोः संनिधिमाश्रिता ॥ अद्भुतं कथयाम्येतक्षेत्रस्य
रविनंदन ॥ १ ॥ यथाहं भगवद्वक्षःस्थलस्था ददृशे पुरा ॥ चराचरे जगत्यस्मिन्प्रलीने प्रलये यम ॥ २ ॥ एतत्क्षेत्रमहं चैव द्वे एवोपस्थिते तदा ॥
स तदा सप्तकल्पायुर्मृकंडोरात्मजो मुनिः ॥ ३ ॥ प्रणष्टे स्थावरचरे निमग्नः प्रलयार्णवे ॥ नावस्थानमवाप्यैव शर्म लेभे न कुत्रचित् ॥ ४ ॥ जला
र्णवे भ्राम्यमाणः प्रलये स इतस्ततः ॥ पुरुषोत्तमसादृश्ये क्षेत्रे स वटमैक्षत ॥ ५ ॥ उत्प्लुत्योत्प्लुत्य मूलं तु न्यग्रोधस्य समीपतः ॥ शुश्राव बाल

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लुठमानो मुहुः क्षितौ ॥ शंखचक्रगदापाणिस्तस्य पार्श्वे व्यवस्थितः ॥ ५ ॥ तिरश्चस्तां गतिं दृष्ट्वा योगींद्राणां सुदुर्लभाम् ॥ मेनेऽसौ मुनयः सृष्टिः क्रमात्क्षीणा भविष्यति ॥ ६ ॥ मनुष्याधिकृते मुक्तौ वेदांते संशयोऽभवत्॥ न किंचिद्दुर्लभं चेह विष्णुभक्तस्य विद्यते ॥ ७ ॥ प्रत्यक्षोऽभूद्द्विजश्रेष्ठाः पुराणपुरुषोदिते ॥ संकीर्त्य यन्नाम नरः सर्वपापैः प्रमुच्यते ॥ ८ ॥ तस्य संदर्शने विप्रा मुक्तिः किं खलु दुर्लभा ॥ मनसा ध्याययन्विष्णुं त्यजन्प्राणान्विमुच्यते ॥ ९ ॥ साक्षात्कृतो भगवतः किं चित्रं मुक्तिमेति यत् ॥ पुरुषोत्तमसंज्ञस्य क्षेत्रस्य महिमाद्भुतः ॥ १० ॥ यत्र काकोऽपि च हरिं साक्षात्पश्यति भो द्विजाः ॥ सुदुर्लभं क्षेत्रमिदमज्ञानां च विमोचनम् ॥ अहो क्षेत्रस्य माहात्म्यं काकस्यापि विमुक्तिदम् ॥ किं पुनः सततं शांतिवैराग्यज्ञानसंयुजाम् ॥ ११ ॥ ॥ ऋषय ऊचुः ॥ ॥ नीलाख्यं माधवं दृष्ट्वा किं चकार पितामहः ॥ १२ ॥ तद्दर्शने क्षणान्नष्टदेहबन्धं च वायसम् ॥ १३ ॥ ॥ जैमिनिरुवाच ॥ ॥ अत्यद्भुतमयं दृष्ट्वा यावद्ध्यायति माधवम् ॥ तावत्पितृपतिः स्वाधिकारसंयमनाकुलः ॥ १४ ॥ दीनाननो निःश्वसन्वै तत्र यातस्त्वरान्वितः ॥ नीलाद्रौ माधवं दृष्ट्वा साऽष्टांगं प्रणिपत्य च ॥ १५ ॥ तुष्टाव स जगन्नाथं स्वाधिकारदृढस्थितौ ॥ ॥ ॥ यम उवाच ॥ ॥ नमस्ते देवदेवेश सृष्टिस्थित्यन्तकारण ॥ १६ ॥ त्वयि प्रोतमिदं सर्वं सूत्रे मणिगणा यथा ॥ त्वया धृतं त्वया सृष्टं त्वया चाप्यायितं जगत् ॥ १७ ॥ चन्द्रसूर्यादिरूपेण नित्यं भासयसेऽखिलम् ॥ विश्वेश्वरं जगद्योनिं विश्वावासं जगद्गुरुम् ॥ ॥ १८ ॥ विश्वसाक्षिणमाद्यन्तवर्जितं प्रणमाम्यहम् ॥ नमः परमकारुण्यजलसंभृतसिन्धवे ॥ १९ ॥ परापरपरातीतविभवे विश्वसंभवे ॥ ॥ २० ॥ भवसंतापनीहारभानवे दीनबन्धवे ॥ स्वमायारचिताशेषविभवे गुणरज्जवे ॥ २१ ॥ नमः कमलकिंजल्कपीतनिर्मलवाससे ॥ महाहवरिपुस्कन्धकृंतचक्राय चक्रिणे ॥ २२ ॥ दंष्ट्रोद्धृतक्षितिभृते त्रयीमूर्तिमते नमः ॥ नमो यज्ञवराहाय चन्द्रसूर्याग्निचक्षुषे ॥ २३ ॥ नरसिंहाय दंष्ट्रोग्रमूर्तिद्रावितशत्रवे ॥ यदपांगविलासैकसृष्टिस्थित्युपसंहृतिः ॥ २४ ॥ उच्चावचात्मको ह्येष भवः संभवते मुहुः ॥ तममुं नीलमेघाभं नीलाश्ममणिविग्रहम् ॥ २५ ॥ नीलाचलगुहावासं प्रणमामि कृपानिधिम् ॥ शंखचक्रगदापद्मधारिणं शुभदायिनम् ॥ २६ ॥ प्रणताशेषपापौघदारिणं मुरवैरिणम् ॥ नमस्ते कमलापांगसंगसंस्कारचक्षुषे ॥ २७ ॥ श्रीवत्सकौस्तुभोद्भासिमनोहृद्व्यूढवक्षसे ॥ यत्पादपंकजद्वंद्वसंश्रयैश्वर्यभागिनी ॥ ॥ २८ ॥ श्रीः संश्रिता जनैः शश्वत्पृथगैश्वर्यदायिनी ॥ या परापरसंभिन्ना प्रकृतिस्ते सिसृक्षया ॥ २९ ॥ निर्विकारं परं ब्रह्म विकारि ससृजेऽजसा सर्वलक्षणसंपूर्णां लक्षितां शुभलक्षणैः ॥ लक्ष्मीशोरसि नित्यस्थां लक्ष्मीं तां प्रणमाम्यहम् ॥ ३० ॥ ॥ जैमिनिरुवाच ॥ ॥ तदेवं धर्मराजेन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दिचिह्नितः ॥ २५ ॥ पतगेंद्रसमारूढः स्फुरद्वदनपंकजः ॥ आविरासीद्द्विजश्रेष्ठा विवक्षुः स्फुरिताधरः ॥ २६ ॥ ॥ श्रीभगवानुवाच ॥ ॥ यदर्थं मां
स्तुषे ब्रह्मन्न शक्यः प्रतिभाति सः ॥ २७ ॥ अनाद्यविद्या सुदृढा सुश्छेद्या कर्मबंधनैः ॥ प्रभवंत्यां कथं तस्यां ह्रीयेते मृतिजन्मनी ॥२८॥ तथापि
चेदत्र कृते व्यवसायस्तवानघ ॥ क्रमेण येन हि भवेत्तत्ते वक्ष्यामि कारणम् ॥ २९ ॥ अहं त्वं त्वमहं ब्रह्मन्मन्मयं चाखिलं जगत् ॥ रुचिस्ते यत्र
मे तत्र नान्यथेति विचारय ॥ ३० ॥ सागरस्योत्तरे तीरे महानद्यास्तु दक्षिणे ॥ स प्रदेशः पृथिव्यां हि सर्वतीर्थफलप्रदः ॥३१॥ तत्र ये मनुजा ब्रह्म
न्निवसंति सुबुद्धयः ॥ जन्मांतरकृतानां च पुण्यानां फलभागिनः ॥ ३२ ॥ नाल्पपुण्याः प्रजायंते नाभक्ता मयि पद्मज ॥ एकाम्रकाननाद्यावद्दक्षिणो
दधितीरभूः ॥ ३३ ॥ पदात्पदाच्छ्रेष्ठतमः क्रमात्परमपावनः ॥ सिन्धुतीरे तु यो ब्रह्मन्राजते नीलपर्वतः ॥३४॥ पृथिव्यां गोपितं स्थानं तव चापि
सुदुर्लभम् ॥ सुरासुराणां दुर्ज्ञेयं माययाच्छादितं मम ॥ ३५ ॥ सर्वसंगपरित्यक्तस्तत्र तिष्ठामि देहभृत् ॥ क्षराक्षरावतिक्रम्य वर्त्तेऽहं पुरुषोत्तमे ॥३६॥
सृष्ट्या लयेन नाक्रान्तं क्षेत्रं मे पुरुषोत्तमम् ॥ यथा मां पश्यसि ब्रह्मन्रूपं चक्रादिचिह्नितम् ॥ ३७ ॥ ईदृशं तत्र गत्वैव द्रक्ष्यसे मां पितामह ॥
नीलाद्रेरंतरभुवि कल्पन्यग्रोधमूलतः ॥ ३८ ॥ वारुण्यां दिशि यत्कुण्डं रौहिणंनाम विश्रुतम् ॥ तत्तीरे निवसन्तं मां पश्यन्तश्चर्मचक्षुषा ॥ ३९ ॥
तदम्भसा क्षीणपापा मम सायुज्यमाप्नुयुः ॥ तत्र व्रज महाभाग दृष्ट्वा मां ध्यायतस्तव ॥ ४० ॥ प्रकाशं यास्यते तस्य क्षेत्रस्य महिमाऽपरः ॥
आश्चर्यभूतः परमस्तवापि च भविष्यति ॥ ४१ ॥ श्रुतिस्मृतीहां[1]सपुराणगोपितं मन्मायया तन्न हि कस्य गोचरम् ॥ प्रसादतो मे स्तुवतस्तवाधुना
प्रकाशमायास्यति सर्वगोचरम् ॥ ४२ ॥ व्रतेषु तीर्थेषु च यज्ञदानयोः पुण्यं यदुक्तं विमलात्मनां हि तत् ॥ अहर्निवासाल्लभतेऽत्र सर्वं निःश्वास
वासात्खलु चाश्वमेधिकम् ॥ ४३ ॥ इत्यादिश्य विधिं विप्रास्तदासौ पुरुषोत्तमः ॥ पश्यतस्तस्य तत्रैव प्रभुरन्तरधीयत ॥ ४४ ॥ ॥ इति
श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे पुरुषोत्तमक्षेत्रमाहात्म्ये जैमिनिऋषिसंवादे प्रथमोऽध्यायः ॥ १ ॥ छ ॥
॥ ॥ जैमिनिरुवाच ॥ ॥ ततो ब्रह्मागमत्तूर्णं यत्रास्ते भगवान्स्वयम् ॥ स्तवान्तेऽसौ यथा दृष्टस्तथाद्राक्षीत्प्रभुं तदा ॥ १ ॥ प्रत्यभिज्ञानसं
हृष्टस्तं दृष्ट्वा परमेश्वरम् ॥ अत्यद्भुतज्ञाननिधिर्बभूवासौ द्विजोत्तमाः ॥ २ ॥ यावत्स्तोतुं समारेभे हर्षसंफुल्ललोचनः ॥ तावदेव समागत्य कुतश्चि
द्वायसोत्तमः ॥ ३ ॥ कारुण्योदकसंपूर्णे तस्मिन्कुण्डे निमज्य तम् ॥ विलोक्य माधवं नीलरत्नकांतिं कृपानिधिम् ॥ ४ ॥ काकदेहं समुत्सृज्य

१ इतिहास–शब्दे–'ति' इत्यक्षरलोप आर्षः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लुठमानो मुहुः क्षितौ ॥ शंखचक्रगदापाणिस्तस्य पार्श्वे व्यवस्थितः ॥ ५ ॥ तिरश्चस्तां गतिं दृष्ट्वा योगींद्राणां सुदुर्लभाम् ॥ मेनेऽसौ मुनयः सृष्टिः क्रमात्क्षीणा भविष्यति ॥ ६ ॥ मनुष्याधिकृते मुक्तौ वेदांते संशयोऽभवत्॥ न किंचिद्दुर्लभं चेह विष्णुभक्तस्य विद्यते ॥ ७ ॥ प्रत्यक्षोऽभूद्द्विजश्रेष्ठाः पुराणपुरुषोदिते ॥ संकीर्त्य यन्नाम नरः सर्वपापैः प्रमुच्यते ॥ ८ ॥ तस्य संदर्शने विप्रा मुक्तिः किं खलु दुर्लभा ॥ मनसा ध्याययन्विष्णुं त्यजन्प्राणान्विमुच्यते ॥ ९ ॥ साक्षात्कृतो भगवतः किं चित्रं मुक्तिमेति यत् ॥ पुरुषोत्तमसंज्ञस्य क्षेत्रस्य महिमाद्भुतः ॥ १० ॥ यत्र काकोऽपि च हरिं साक्षात्पश्यति भो द्विजाः ॥ सुदुर्लभं क्षेत्रमिदमज्ञानां च विमोचनम् ॥ अहो क्षेत्रस्य माहात्म्यं काकस्यापि विमुक्तिदम् ॥ किं पुनः सततं शांति वैराग्यज्ञानसंयुजाम् ॥ ११ ॥ ॥ ऋषय ऊचुः ॥ ॥ नीलाख्यं माधवं दृष्ट्वा किं चकार पितामहः ॥ १२ ॥ तद्दर्शने क्षणान्नष्टदेहबन्धं च वायसम् ॥ १३ ॥ ॥ जैमिनिरुवाच ॥ ॥ अत्यद्भुतमयं दृष्ट्वा यावद्ध्यायति माधवम् ॥ तावत्पितृपतिः स्वाधिकारसंयमनाकुलः ॥ १४ ॥ दीनाननो निःश्वसन्वै तत्र यातस्त्वरान्वितः ॥ नीलाद्रौ माधवं दृष्ट्वा साऽष्टांगं प्रणिपत्य च ॥ १५ ॥ तुष्टाव स जगन्नाथं स्वाधिकारदृढस्थितौ ॥ ॥ ॥ यम उवाच ॥ ॥ नमस्ते देवदेवेश सृष्टिस्थित्यन्तकारण ॥ १६ ॥ त्वयि प्रोतमिदं सर्वं सूत्रे मणिगणा यथा ॥ त्वया धृतं त्वया सृष्टं त्वया चाप्यायितं जगत् ॥ १७ ॥ चन्द्रसूर्यादिरूपेण नित्यं भासयसेऽखिलम् ॥ विश्वेश्वरं जगद्योनिं विश्वावासं जगद्गुरुम् ॥ ॥ १८ ॥ विश्वसाक्षिणमाद्यन्तवर्जितं प्रणमाम्यहम् ॥ नमः परमकारुण्यजलसंभृतसिन्धवे ॥ १९ ॥ परापरपरातीतविभवे विश्वसंभवे ॥ ॥ २० ॥ भवसंतापनीहारभानवे दीनबन्धवे ॥ स्वमायारचिताशेषविभवे गुणरज्जवे ॥ २१ ॥ नमः कमलकिंजल्कपीतनिर्मलवाससे ॥ महाहवरिपुस्कन्धकृंतचक्राय चक्रिणे ॥ २२ ॥ दंष्ट्रोद्धृतक्षितिभृते त्रयीमूर्तिमते नमः ॥ नमो यज्ञवराहाय चन्द्रसूर्याग्निचक्षुषे ॥ २३ ॥ नरसिंहाय दंष्ट्रोग्रमूर्तिद्रावितशत्रवे ॥ यदपांगविलासैकसृष्टिस्थित्युपसंहृतिः ॥ २४ ॥ उच्चावचात्मको ह्येष भवः संभवते मुहुः ॥ तममुं नीलमेघाभं नीलाश्ममणिविग्रहम् ॥ २५ ॥ नीलाचलगुहावासं प्रणमामि कृपानिधिम् ॥ शंखचक्रगदापद्मधारिणं शुभदायिनम् ॥ २६ ॥ प्रणताशेषपापौघदारिणं मुरवैरिणम् ॥ नमस्ते कमलापांगसंगसंस्कारचक्षुषे ॥ २७ ॥ श्रीवत्सकौस्तुभोद्भासिमनोहृद्व्यूढवक्षसे ॥ यत्पादपंकजद्वंद्वसंश्रयैश्वर्यभागिनी ॥ ॥ २८ ॥ श्रीः संश्रिता जनैः शश्वत्पृथगैश्वर्यदायिनी ॥ या परापरसंभिन्ना प्रकृतिस्ते सिसृक्षया ॥ २९ ॥ निर्विकारं परं ब्रह्म विकारि ससृजेऽजसा सर्वलक्षणसंपूर्णा लक्षितां शुभलक्षणैः ॥ लक्ष्मीशोरसि नित्यस्थां लक्ष्मीं तां प्रणमाम्यहम् ॥ ३० ॥ ॥ जैमिनिरुवाच ॥ ॥ तदेवं धर्मराजेन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ अथ श्रीस्कांदे महापुराणे द्वितीये वैष्णवखंडे पुरुषोत्तम (जगन्नाथ) क्षेत्र-
माहात्म्यप्रारंभः ॥ (२-२) ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ॥ श्रीगणेशाय नमः ॥ ॥ अथ पुरुषोत्तम (जगन्नाथ) क्षेत्रमाहात्म्य प्रारम्भः ॥ नारायणं नमस्कृत्य नरं चैव नरोत्तमम् ॥ देवीं सरस्वतीं व्यासं ततो जयमुदीरयेत् ॥ १ ॥ ॥ मुनय ऊचुः ॥ ॥ भगवन्सर्वशास्त्रज्ञ सर्वतीर्थमहत्त्ववित् ॥ कथितं यत्त्वया पूर्वं प्रस्तुते तीर्थकीर्तने ॥ पुरुषोत्तमाख्यं सुमहत्क्षेत्रं परमपावनम् ॥२॥ यत्रास्ते दारवतनुः श्रीशो मानुषलीलया ॥ दर्शनान्मुक्तिदः साक्षात्सर्वतीर्थफलप्रदः ॥३॥ तन्नो विस्तरतो ब्रूहि तत्क्षेत्रं केन निर्मितम् ॥ ज्योतिःप्रकाशो भगवान्साक्षान्नारायणः प्रभुः ॥ ४ ॥ कथं दारुमयस्तस्मिन्नास्ते परमपूरुषः ॥ वद त्वं वदतां श्रेष्ठ सर्वलोकगुरो मुने ॥ ५ ॥ श्रोतुमिच्छामहे ब्रह्मन्परं कौतूहलं हि नः ॥ ॥ जैमिनिरुवाच ॥ ॥ शृणुध्वं मुनयः सर्वे रहस्यं परमं हि तत् ॥ ६ ॥ अवैष्णवानां श्रवणे भक्तिस्तत्र न जायते ॥ यस्य संकीर्तनादेव सकलं लीयते तमः ॥ ७ ॥ यद्यप्येष जगन्नाथः सर्वगः सर्वभावनः ॥ स्कन्देन कथितं पूर्वं श्रुत्वा शंभोर्मुखाम्बुजात् ॥ संति क्षेत्राणि चान्यानि सर्वपापहराणि वै ॥ ८ ॥ एतत्क्षेत्रं परं चास्य वपुर्भूतं महात्मनः ॥ स्वयं वपुष्मांस्तत्रास्ते स्वनाम्ना ख्यापितं हि तत् ॥९॥ तत्र ये स्थातुमिच्छंति तेपि सर्वे हतांहसः ॥ किं पुनस्तत्र तिष्ठंतो ये पश्यन्ति गदाधरम् ॥१०॥ अहो तत्परमं क्षेत्रं विस्तृतं दशयोजनम् ॥ तीर्थराजस्य सलिलादुत्थितं वालुकाचितम् ॥ ११ ॥ नीलाचलेन महता मध्यस्थेन विराजितम् ॥ एकस्तनमिव पृथ्व्याः सुदूरात्परिभावितम् ॥ १२ ॥ वराहरूपिणा पूर्वं समुद्धृत्य वसुन्धराम् ॥ सर्वतः सुसमां कृत्वा पर्वतैः सुस्थिरीकृताम् ॥ १३ ॥ सृष्ट्वा चराचरं सर्वं तीर्थानि सरिदब्धिकान् ॥ क्षेत्राणि चं यथास्थानं संनिवेश्य यथा पुरा ॥ १४ ॥ ब्रह्मा विचिन्तयामास सृष्टिभारनिपीडितः ॥ पुनरेतां क्रियां गुर्वीं नारभेय कथं त्विति ॥ १५ ॥ तापत्रयाभिभूता हि मुच्यंते जंतवः कथम् ॥ एवं चिन्तयमानस्य मतिरासीत्प्रजापतेः ॥१६॥ मुक्त्येककारणं विष्णुं स्तोष्येऽहं परमेश्वरम् ॥ ॥ ब्रह्मोवाच ॥ ॥ नमस्ते जगदाधार शङ्खचक्रगदाधर ॥ १७ ॥ यन्नाभिपंकजादेव जातोऽहं विश्वसृष्टिकृत् ॥ परमार्थस्वरूपं ते त्वं वै वेत्सि जगन्मय ॥ १८ ॥ यन्मायया जगत्सर्वं निर्मितं महदादिकम् ॥ यन्निःश्वाससमुद्भूतं शब्दब्रह्म त्रिधाऽभवत् ॥ १९ ॥ उपजीव्य तदेवाहमसृजं भुवनानि वै ॥ त्वत्तो नान्यः स्थूलसूक्ष्मदीर्घह्रस्वादि किंचन ॥ २० ॥ विकारभेदैर्भगवंस्त्वमेवेदं चराचरम् ॥ कटकादि यथा स्वर्णं गुणत्रयविभागशः ॥२१॥ स्रष्टा सृज्यं त्वमेवात्र पोष्टा पोष्यं जगत्प्रभो ॥ आधारो ध्रियमाणं च धर्त्ता त्वं परमेश्वर ॥ २२ ॥ त्वत्प्रेरितमतिः सर्वश्चरते च शुभाऽशुभम् ॥ ततः प्राप्नोति सदृशीं त्वयैव विहितां गतिम् ॥ २३ ॥ जगतोऽस्य गतिर्भर्त्ता साक्षी त्वं परमेश्वर ॥ चराचरगुरो सर्वजीवभूत कृपामय ॥ प्रसीदाद्य जगन्नाथ नित्यं त्वच्छरण्यस्य मे ॥२४॥ ॥ जैमिनिरुवाच ॥ ॥ एवं संस्तूयमानश्च ब्रह्मणा गरुडध्वजः ॥ नीलजीमूतसंकाशः शंखचक्रा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दिचिह्नितः ॥ २५ ॥ पतगेंद्रसमारूढः स्फुरद्वदनपंकजः ॥ आविरासीद्द्विजश्रेष्ठा विवक्षुः स्फुरिताधरः ॥ २६ ॥ ॥ श्रीभगवानुवाच ॥ ॥ यदर्थं मां
स्तुषे ब्रह्मन्न शक्यः प्रतिभाति सः ॥ २७ ॥ अनाद्यविद्या सुदृढा सुश्छेद्या कर्मबंधनैः ॥ प्रभवंत्यां कथं तस्यां ह्रीयेते मृतिजन्मनी ॥२८॥ तथापि
चेदत्र कृते व्यवसायस्तवानघ ॥ क्रमेण येन हि भवेत्तत्ते वक्ष्यामि कारणम् ॥ २९ ॥ अहं त्वं त्वमहं ब्रह्मन्मन्मयं चाखिलं जगत् ॥ रुचिस्ते यत्र
मे तत्र नान्यथेति विचारय ॥ ३० ॥ सागरस्योत्तरे तीरे महानद्यास्तु दक्षिणे ॥ स प्रदेशः पृथिव्यां हि सर्वतीर्थफलप्रदः ॥३१॥ तत्र ये मनुजा ब्रह्म
न्निवसंति सुबुद्धयः ॥ जन्मांतरकृतानां च पुण्यानां फलभागिनः ॥ ३२ ॥ नाल्पपुण्याः प्रजायंते नाभक्ता मयि पद्मज ॥ एकाम्रकाननाद्यावद्दक्षिणो
दधितीरभूः ॥ ३३ ॥ पदात्पदाच्छ्रेष्ठतमः क्रमात्परमपावनः ॥ सिन्धुतीरे तु यो ब्रह्मन्राजते नीलपर्वतः ॥३४॥ पृथिव्यां गोपितं स्थानं तव चापि
सुदुर्लभम् ॥ सुरासुराणां दुर्ज्ञेयं माययाच्छादितं मम ॥ ३५ ॥ सर्वसंगपरित्यक्तस्तत्र तिष्ठामि देहभृत् ॥ क्षराक्षरावतिक्रम्य वर्त्तेऽहं पुरुषोत्तमे ॥३६॥
सृष्ट्या लयेन नाक्रान्तं क्षेत्रं मे पुरुषोत्तमम् ॥ यथा मां पश्यसि ब्रह्मन्रूपं चक्रादिचिह्नितम् ॥ ३७ ॥ ईदृशं तत्र गत्वैव द्रक्ष्यसे मां पितामह ॥
नीलाद्रेरंतरभुवि कल्पन्यग्रोधमूलतः ॥ ३८ ॥ वारुण्यां दिशि यत्कुण्डं रौहिणंनाम विश्रुतम् ॥ तत्तीरे निवसन्तं मां पश्यन्तश्चर्मचक्षुषा ॥ ३९ ॥
तदम्भसा क्षीणपापा मम सायुज्यमाप्नुयुः ॥ तत्र व्रज महाभाग दृष्ट्वा मां ध्यायतस्तव ॥ ४० ॥ प्रकाशं यास्यते तस्य क्षेत्रस्य महिमाऽपरः ॥
आश्चर्यभूतः परमस्तवापि च भविष्यति ॥ ४१ ॥ श्रुतिस्मृतीहा[1]सपुराणगोपितं मन्मायया तन्न हि कस्य गोचरम् ॥ प्रसादतो मे स्तुवतस्तवाधुना
प्रकाशमायास्यति सर्वगोचरम् ॥ ४२ ॥ व्रतेषु तीर्थेषु च यज्ञदानयोः पुण्यं यदुक्तं विमलात्मनां हि तत् ॥ अहर्निवासाल्लभतेऽत्र सर्वं निःश्वास
वासात्खलु चाश्वमेधिकम् ॥ ४३ ॥ इत्यादिश्य विधिं विप्रास्तदासौ पुरुषोत्तमः ॥ पश्यतस्तस्य तत्रैव प्रभुरन्तरधीयत ॥ ४४ ॥ ॥ इति
श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे पुरुषोत्तमक्षेत्रमाहात्म्ये जैमिनिऋषिसंवादे प्रथमोऽध्यायः ॥ १ ॥ छ ॥
॥ ॥ जैमिनिरुवाच ॥ ॥ ततो ब्रह्मागमत्तूर्णं यत्रास्ते भगवान्स्वयम् ॥ स्तवान्तेऽसौ यथा दृष्टस्तथाद्राक्षीत्प्रभुं तदा ॥ १ ॥ प्रत्यभिज्ञानसं
हृष्टस्तं दृष्ट्वा परमेश्वरम् ॥ अत्यद्भुतज्ञाननिधिर्बभूवासौ द्विजोत्तमाः ॥ २ ॥ यावत्स्तोतुं समारेभे हर्षसंफुल्ललोचनः ॥ तावदेव समागत्य कुतश्चि
द्वायसोत्तमः ॥ ३ ॥ कारुण्योदकसंपूर्णे तस्मिन्कुण्डे निमज्य तम् ॥ विलोक्य माधवं नीलरत्नकांतिं कृपानिधिम् ॥ ४ ॥ काकदेहं समुत्सृज्य

१ इतिहास-शब्दे-'ति' इत्यक्षरलोप आर्षः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ इति श्रीस्कांदे महापुराणे द्वितीये वैष्णवखंडे वेंकटाचलमाहात्म्यं समाप्तम् ॥ (२-१)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ततोऽधिकमिदं तीर्थं प्रत्यक्षं दिवसे तव ॥ स्नानार्थं ये समायांति चित्राऋक्षसमन्विते ॥ ८ ॥ मेषं पूषणि संप्राप्ते पूर्णिमायां शुभे दिने ॥ शृणु तेषां फलं देवि वक्ष्यामि तव सुव्रते ॥ ९ ॥ गंगादिसर्वतीर्थेषु द्वादशाब्दं वरानने ॥ यत्फलं विद्यते देवि तत्फलं भवति ध्रुवम् ॥ १० ॥ दानानि कुर्वतां पुंसां तेषां शृणु फलोन्नतिम् ॥ स्थाने तूक्तं फलं देवि विद्धि तेषां वरानने ॥ ११ ॥ ॥ अञ्जनोवाच ॥ ॥ कार्याणि यानि दानानि वेंकटाद्रौ नगोत्तमे ॥ तानि सर्वाणि विप्रेन्द्र वद वेदविदां वर ॥ १२ ॥ ॥ अथ व्यासप्रोक्तश्रीवेंकटाचलकरणीयदानप्रशंसा ॥ ॥ व्यास उवाच ॥ अन्नदानं वस्त्रदानं द्वयमेतत्प्रशस्यते ॥ पितुः श्राद्धं विशेषेण वेंकटाद्रौ नगोत्तमे ॥ १३ ॥ सुवर्णं ये प्रयच्छन्ति प्रीतये मधुघातिनः ॥ सर्वलोकं समासाद्य मोदन्ते मुनिसत्तमाः ॥ १४ ॥ शालग्रामशिलादानं ये कुर्वन्ति नगोत्तमे ॥ अंगभंगमवाप्नोति स्वानुभूतिं च विन्दति ॥ १५ ॥ यो ददाति द्विजेन्द्राय गोदानं च कुटुम्बिने ॥ रोमसंख्याप्रमाणेन विष्णुलोके विराजते ॥ १६ ॥ भूमिं ददाति यो देवि ब्राह्मणाय कुटुम्बिने ॥ तस्य पुण्यफलं वक्तुं कः शक्तो दिवि वा भुवि ॥ १७ ॥ कन्यां ददाति यो देवि श्रोत्रियाय द्विजातये ॥ विष्णुलोकं समासाद्य मोदते पितृभिः सह ॥ १८ ॥ प्रपां कुर्वन्ति ये देवि शीतलोदकसंयुताम् ॥ तेषां पुण्यफलं वक्तुं शेषेणापि न शक्यते ॥ १९ ॥ तिलं ददाति विप्राय श्रोत्रियाय कुटुम्बिने ॥ सर्वपापविनिर्मुक्तो विष्णुलोकं स गच्छति ॥ २० ॥ धान्यदानं प्रशंसन्ति विप्रा वेदविदां वराः ॥ बहुपुत्रा भविष्यन्ति धान्यदानं प्रकुर्वताम् ॥ २१ ॥ गन्धचम्पकपुष्पादीञ्छत्रव्यजनचामरान् ॥ ताम्बूलघनसारादीन्यो ददाति द्विजातये ॥ २२ ॥ भुक्त्वा भोगं चिरं कालं स्वर्गलोकं ततो व्रजेत् ॥ दिव्यवर्षसहस्रं च भुक्त्वा भोगाननेकशः ॥ २३ ॥ सार्वभौमस्ततो भूत्वा तत्र भुक्त्वा चिरं महीम् ॥ ततो विप्रत्वमासाद्य वेदवेदान्तपारगः ॥ २४ ॥ ततो मुक्तिं समायाति प्रसादाच्चक्रपाणिनः ॥ इत्येतत्कथितं देवि वेंकटाचलवैभवम् ॥ २५ ॥ य एतच्छृणुयान्नित्यं यश्चापि परिकीर्तयेत् ॥ सर्वपापविनिर्मुक्तो विष्णुलोकं स गच्छति ॥ २६ ॥ इत्येतत्कथितं पूर्वं व्यासेनैव महात्मना ॥ शृणुयाद्वा पठेद्वापि कृतकृत्यो भविष्यति ॥ २७ ॥ तस्यैव वंशजाः सर्वे मुक्तिं यान्ति न संशयः ॥ २८ ॥ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे श्रीवेंकटाचलमाहात्म्येऽञ्जनावरलब्ध्याकाशगंगास्नानकालनिर्णयादिवर्णनंनाम चत्वारिंशोऽध्यायः ॥ ४० ॥

॥ समाप्तमिदं स्कान्दपुराणान्तर्गतं श्रीवेंकटाचलमाहात्म्यम् ॥

१ लभते—इ०पा० । २ अंगभंगम्—इत्यनेन—पुनर्जन्माभावः सूच्यते लिंगभंगम्—इति पाठान्तरेऽपि वासनामयलिंगशरीरविलये वासनाया अभावेन—पुनर्जन्माभाव एव सूचितः इति सुधीभिरवधेयम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इदं पुस्तकं मुम्बय्यां श्रीकृष्णदासात्मजक्षेमराजश्रेष्ठिना
स्वकीये "श्रीवेङ्कटेश्वर" (स्टीम्) मुद्रणालये मुद्रितम्।
संवत् १९६६, शके १८३१.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विप्रैर्मनुजैर्मुनिसत्तमैः ॥ ३४ ॥ भृङ्गैः पक्षिभिरस्त्रैश्च शस्त्रैश्च विविधैः शुभैः ॥ अवध्यो भविता पुत्रस्तपसा ते न संशयः ॥ ३५ ॥ ॥ श्रीसूत उवाच ॥ ॥ इति प्रोक्ताञ्जना देवी तं प्रणम्य पुनःपुनः ॥ भर्त्रा साकं ययावाशु वेंकटाचलसंज्ञकम् ॥ ३६ ॥ कापिलं तीर्थमासाद्य स्नात्वा निर्मलमानसा ॥ वेंकटाद्रिं समारुह्य स्वामिपुष्करिणीं ययौ ॥ ३७ ॥ स्नात्वा वराहमानम्य वेंकटेशकृतानतिः ॥ मतंगस्य ऋषेर्वाक्यं स्मरन्ती च मुहुर्मुहुः ॥ ३८ ॥ वियद्गङ्गां ययावाशु चाञ्जना मंजुभाषिणी ॥ स्नात्वा पीत्वा शुभं तोयं तीरे तस्य तदुन्मुखी ॥ ३९ ॥ प्राणवायुं समुद्दिश्य तपश्चक्रे यतव्रता ॥ फलाहारा जलाहारा निराहारा ततः परम् ॥ ४० ॥ सहस्राब्दं तपश्चक्रे न्यस्तनासाग्रदृष्टिका ॥ वयस्या विपुला नाम शुश्रूषामकरोच्छुभा ॥ ४१ ॥ वर्षाणां च सहस्रान्ते वायुर्देवो महामतिः ॥ प्रादुरासीत्तदा तां वै भाषमाणो महामतिः ॥ ४२ ॥ मेषसंक्रमणं भानौ संप्राते मुनिसत्तमाः ॥ पूर्णिमाख्ये तिथौ पुण्ये चित्रानक्षत्रसंयुते ॥ ४३ ॥ तवेप्सितमहं दास्ये वरं वरय सुव्रते ॥ इति तद्वचनं श्रुत्वा ततः प्राहाञ्जना सती ॥ ४४ ॥ पुत्रं देहि महाभाग वायो देव महामते ॥ तस्यास्तद्वचनं श्रुत्वा मातरिश्वाब्रवीत्ततः ॥ ४५ ॥ पुत्रस्तेऽहं भविष्यामि ख्यातिं दास्ये शुभानने ॥ इति तस्यै वरं दत्त्वा तत्रैवास्त महाबलः ॥ ४६ ॥ तदा ब्रह्मादयो देवा इन्द्राद्या लोकपालकाः ॥ वसिष्ठाद्या महात्मानः सनकाद्याश्च योगिनः ॥ ४७ ॥ व्यासादयश्च विप्रेंद्रा लक्ष्म्या साकं जगत्पतिः ॥ मुनिपत्न्यो देवपत्न्य ऋषिपत्न्यस्तथैव च ॥ ४८ ॥ स्वं स्वं वाहनमारुह्य दारभृत्यसुतादिभिः ॥ आगतास्ते महात्मानो द्रष्टुं तां तपसि स्थिताम् ॥ ४९ ॥ आश्चर्यमाश्चर्यमिति ब्रुवाणा ब्रह्मादयो देवगणाश्च सर्वे ॥ आलोकयन्तो दिवि दूरतस्ते स्थितास्तदा ब्रह्ममहेशमुख्याः ॥ ५० ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे श्रीवेंकटाचलमाहात्म्ये अंजनातपःकरणप्रकारादिवर्णनं नामैकोनचत्वारिंशोऽध्यायः ॥ ३९ ॥ ॥ छ ॥ ॥ अथ व्यासप्रोक्ताकाशगंगास्नानकालनिर्णयः ॥ ॥ श्रीसूत उवाच ॥ ॥ अंजनापि वरं लब्ध्वा भर्त्रा साकं मुमोद ह ॥ ब्रह्मादीनागतान्दृष्ट्वा विस्मयाविष्टमानसा ॥ १ ॥ पत्या साकं ततः स्वस्था चांजना मंजुभाषिणी ॥ ब्रह्मादिभिरनुज्ञातो व्यासो वेदविदां वरः ॥ २ ॥ अञ्जनां तामुवाचेदं मेघगम्भीरया गिरा ॥ ३ ॥ ॥ व्यास उवाच ॥ ॥ अञ्जने शृणु मद्वाक्यं सर्वलोकोपकारकम् ॥ मतङ्गस्य ऋषेर्वाक्यं श्रुत्वा निर्मलचेतसा ॥ ४ ॥ यस्मात्तु वेंकटं गत्वा तपः कृत्वा सुदुष्करम् ॥ प्रसूयते त्वया पुत्रः शूरस्त्रैलोक्यविक्रमः ॥ ५ ॥ इदं तीर्थोत्तमं तस्मात्प्रत्यक्षदिवसे तव ॥ गंगाद्यानि च तीर्थानि समायांति जगत्त्रये ॥ ६ ॥ वेंकटाद्रिसमं तीर्थं ब्रह्माण्डे नास्ति किञ्चन ॥ तत्राप्यत्यन्तपुण्या वै स्वामिपुष्करिणी शुभा ॥ ७ ॥

१ पतिव्रता--इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

विश्रुता सर्वलोकेषु पुत्री तव भविष्यति ॥ तस्याः पुत्रो महाबुद्धिस्तव प्रीतिं करिष्यति ॥ ८ ॥ इति तस्मै वरं दत्त्वा तत्रैवान्तर्दधे हरः ॥ मां
लब्ध्वा मत्पिता विप्रः कृतकृत्यो बभूव ह ॥ ९ ॥ ततः कालान्तरे विप्रः केसर्याख्यो महाकपिः ॥ ययाचेमां ददस्वेति पितरं मे ततः पिता ॥
॥ १० ॥ तस्मै मां दत्तवांश्चैव पारिबर्हं ददौ च सः ॥ गवां लक्षसहस्राणि गजलक्षं महामनाः ॥ ११ ॥ वाजिनामर्बुदं चैव रथानामर्बुदं तथा ॥
वस्त्ररत्नान्यनेकानि दासदासीसहस्रकम् ॥ १२ ॥ अन्तःपुरचरीर्नारीर्नृत्यगीतविशारदाः ॥ ददौ वासःसहस्रं च मया साकं महामते ॥ १३ ॥ पत्या
मे रममाणाया भूयान्कालो गतो मुने ॥ अपुत्रा दुःखिता विप्र व्रतानि विविधानि च ॥ १४ ॥ कृतानि च मया तत्र किष्किन्धायां महापुरि ॥
माघे मासि च विप्रेन्द्र वैशाखे कार्तिके तथा ॥ १५ ॥ स्नानदानव्रतादीनि चातुर्मास्यव्रतं तथा ॥ नमस्कारस्तथा विप्र प्रदक्षिणमनुत्तमम् ॥
॥ १६ ॥ शालग्रामान्नदानानि दीपदानं तथैव च ॥ गोदानं तिलदानं च वस्त्रदानं महामुने ॥ १७ ॥ भूदानं वारिदानं च दत्त्वा पुष्पादिकं
मुने ॥ यानि यानि च मुख्यानि वैष्णवानि व्रतानि च ॥ मया कृतानि सर्वाणि सत्पुत्रफलकांक्षया ॥ १८ ॥ श्रवणादिषु यत्प्रोक्तं व्रतं विप्रैर्महा
त्मभिः ॥ मया कृतं च विप्रेंद्र तुष्ट्यर्थं मधुविद्विषः ॥ १९ ॥ यानि यानि च मुख्यानि फलानि विविधानि च ॥ मया दत्तानि सर्वाणि सत्पुत्र
फलकांक्षया ॥ २० ॥ मया कृतान्यसंख्यानि व्रतानि विविधानि च ॥ पुत्रं तथाप्यलब्ध्वाहं दुःखिता तपसि स्थिता ॥ २१ ॥ भविष्यति कथं
विप्र पुत्रस्त्रैलोक्यविश्रुतः ॥ याचेऽहं तु मुनिश्रेष्ठ प्रणता च तवाग्रतः ॥ २२ ॥ वद त्वं मुनिशार्दूल दीनाहं तपसि स्थिता ॥ २३ ॥ ॥ श्रीसूत
उवाच ॥ ॥ एवं वदन्तीं तां प्राह मतङ्गो मुनिसत्तमः ॥ शृणु मद्वचनं देवि पुत्रपौत्रप्रदायकम् ॥ २४ ॥ इतो दक्षिणदिग्भागे दशयोजनदूरतः ॥
घनाचल इति ख्यातो नृसिंहस्य निवासभूः ॥ २५ ॥ तस्योपरि महाभागे ब्रह्मतीर्थं मनोहरम् ॥ तस्यापि पूर्वदिग्भागे दशयोजनमात्रतः ॥ २६ ॥
सुवर्णमुखरी नाम नदीनां प्रवरा नदी ॥ तस्या एवोत्तरे भागे वृषभाचलनामतः ॥ २७ ॥ तस्याग्रे सरसी नाम्ना स्वामिपुष्करिणी शुभा ॥ गत्वा
दृष्ट्वा शुभं तोयं मनःशुद्धिं गमिष्यसि ॥ २८ ॥ तत्र स्नात्वा विधानेन वराहं तं प्रणम्य च ॥ वेङ्कटेशं नमस्कृत्य ततो गच्छ वरानने ॥ २९ ॥ उत्तरे
स्वामितीर्थस्य सिंहशार्दूलसंयुते ॥ चूतपुन्नागपनसैर्बकुलामलकैः शुभैः ॥ ३० ॥ चन्दनागुरुनिम्बैश्च तालहिन्तालकिंशुकैः ॥ कपित्थाश्वत्थबिल्वै
श्च इङ्गुदैश्च वरानने ॥ ३१ ॥ एतादृशैर्महापुण्यैर्वृक्षैश्च विविधैः शुभैः ॥ वियद्गंगेति विख्यातं तीर्थमेकं विराजते ॥ ३२ ॥ तस्मिंस्तीर्थेऽञ्जने
देवि संकल्पविधिपूर्वकम् ॥ स्नात्वा पीत्वा शुभं तीर्थं तीर्थस्याभिमुखी स्थिता ॥ ३३ ॥ वायुमुद्दिश्य हे देवि तपः कुरु वरानने ॥ देवैश्च राक्षसै

१ एतेन—अंजनायाः पिता—केसरीनाम राक्षस, अंजनायाः पतिः केसरीनाम वानरश्च इति केसरीत्यभिधाश्वशुरजामात्रोः राक्षसवानरयोः समानैवासीत् । २ चक्रपाणिनः—इ० पा० ।

CC-0. In Public Domain. Digitization by eGangotri

याचेऽन्यन्महाबाहो त्वत्पादाम्बुजसेवनात् ॥ यां प्राप्नुवंति त्वद्भक्तास्तां याचे गतिमुत्तमाम् ॥ ६२ ॥ ॥ श्रीभगवानुवाच ॥ ॥ यत्प्रार्थितं त्वया शंख तत्तथैव भविष्यति ॥ मत्सेवायोगभव्यानामलभ्यं किमु विद्यते ॥ ६३ ॥ आकल्पमिन्द्रलोकस्थो ह्यप्सरोगणसेवितः ॥ भुक्त्वा बहुविधान्भोगांस्ततो मल्लोकमेष्यसि ॥ ६४ ॥ एवं ददौ वरानिष्टाञ्छङ्खाय पृथिवीपते ॥ नारायणो जगद्योनिर्भजतां कल्पभूरुहः ॥ ६५ ॥ ततो ब्रह्मादिकान्सर्वान्विसृज्य कमलेक्षणः ॥ संस्तूय मानसैर्भक्त्या तत्रैवांतर्दधे प्रभुः ॥ ६६ ॥ ॥ अथ भरद्वाजवर्णितश्रीवेंकटाचलमाहात्म्यनिगमनम् ॥ ॥ ॥ ॥ भरद्वाज उवाच ॥ ॥ वेंकटाद्रेः प्रभावोऽयमाख्यातो भवतेऽर्जुन ॥ नराः पापैः प्रमुच्यंते श्रुत्वेमां पावनीं कथाम् ॥६७॥ वाराहं रूपमुत्सृज्य ब्रह्मणाभ्यर्थितो हरिः ॥ मुमोदात्राद्भुताकारो मायया मोहयञ्जगत् ॥ ६८ ॥ पश्चादगस्त्यशंखाभ्यां प्रार्थितः सुखदर्शनम् ॥ ददौ नितान्तसुभगं शान्तं भोगात्मकं वपुः ॥ ६९ ॥ नारायणं वेंकटाद्रिं स्वामिपुष्करिणीं तथा ॥ इमामाख्यां च संस्मृत्य मुच्यंते पातकैर्जनाः ॥ ७० ॥ वेंकटाद्रिसमं स्थानं ब्रह्माण्डे नास्ति किञ्चन ॥ वेंकटेशसमो देवो न भूतो न भविष्यति ॥ ७१ ॥ वेंकटाद्रिसमं स्थानं न भूतं न भविष्यति ॥ स्वामितीर्थसरस्तुल्यं न कुत्रापि च विद्यते ॥ ७२ ॥ प्रातरुत्थाय ये नित्यं वेंकटेशं स्मरंति वै ॥ तेषां करस्था मोक्षश्रीर्नात्र कार्या विचारणा ॥ ७३ ॥ स्वामिपुष्करिणीतीर्थे स्नात्वा सर्वात्मकं हरिम् ॥ ये वा पश्यंति नियता वराहाचलवासिनम् ॥७४॥ तेऽश्वमेधसहस्रस्य वाजपेयशतस्य च ॥ प्राप्नुवंति फलं पूर्णं नात्र कार्या विचारणा ॥ ७५ ॥ वेंकटाचलमाहात्म्यं ये शृण्वंति नरोत्तमाः ॥ तेषां मुक्तिश्च भुक्तिश्च इह लोके परत्र च ॥ ७६ ॥ वेंकटाचलमाहात्म्यं संक्षिप्य कथितं तव ॥ अतः परं महानद्याः प्रभावः कथ्यतेऽर्जुन ॥७७॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे श्रीवेंकटाचलमाहात्म्ये सुवर्णमुखरीमाहात्म्यप्रशंसायामगस्त्यशङ्खादितपस्तुष्टश्रीवेंकटेशाविर्भावादिमाहात्म्यवर्णनं नामाष्टत्रिंशोऽध्यायः ॥ ३८ ॥ छ ॥ ॥ ॥ अथ पुत्रार्थमञ्जनाकृततपःप्रकारः ॥ ॥ श्रीसूत उवाच ॥ ॥ पुत्रहीनाञ्जना पूर्वं दुःखिता तपसि स्थिता ॥ तां दृष्ट्वा मुनिशार्दूलो मतङ्गो विष्णुतत्परः ॥ १ ॥ अञ्जनाख्यामुवाचेदमत्युग्रे तपसि स्थिताम् ॥ २ ॥ ॥ मतंग उवाच ॥ ॥ समुत्तिष्ठाञ्जने देवि किमर्थं तपसि स्थिता ॥ वद देवि महाभागे कार्यं तव वरानने ॥ ३ ॥ ॥ अंजनोवाच ॥ ॥ मतंग मुनिशार्दूल वचनं मे शृणुष्व ह ॥ पिता मे केसरी नाम राक्षसः शिवतत्परः ॥ ४ ॥ शैवं घोरं तपश्चक्रे पुत्रार्थं तु सुदुष्करम् ॥ पार्वतीसहितः शंभुर्वृषभोपरि संस्थितः ॥ ५ ॥ प्रादुरासीत्तदा देवो ददौ तस्मै वरं शुभम् ॥ ६ ॥ ॥ शम्भुरुवाच ॥ ॥ शृणु राजन्प्रवक्ष्यामि विधिना निर्मितं तव ॥ अस्मिञ्जन्मन्यपुत्रत्वं तथाप्यन्यद्ददामि ते ॥ ७ ॥

१ शम्भुः—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ऽब्रवीत् ॥ ३८ ॥ ॥ अथागस्त्यप्रार्थनया स्वर्णमुखरीनद्या भगवद्दत्तसर्वाधिकत्वप्राप्तिः ॥ ॥ अगस्त्य उवाच ॥ ॥ यद्धुतं यत्तपस्तप्तं यदधीतं श्रुतं मया ॥ तत्सर्वं सफलं जातमाहतोऽस्मि यतस्त्वया ॥ ३९ ॥ एषोऽहमेव धर्मात्मा त्रिषु लोकेष्वपि प्रभो ॥ त्वां विचिन्वन्तम धुना मामन्विष्यागतोऽसि यत् ॥ ४० ॥ त्वत्प्रसादात्पुरैवाहं प्राप्ताखिलमनोरथः ॥ न पश्यामि विचिन्त्यापि प्राप्यं संप्रति माधव ॥ ४१ ॥ तथापि चापलादेतत्तव विज्ञाप्यते प्रभो ॥ त्वत्पादाम्बुजयोर्भक्तिमेवं कुरु निरन्तरम् ॥ ४२ ॥ अवधारय चैतत्त्वं सुरप्रार्थनया मया ॥ नदी सुवर्णमुखरी स्नाताघौघविनाशिनी ॥ ४३ ॥ सा भवच्छैलकटकसमासन्ना समागता ॥ तां कृतार्थय लोकेश त्वदनुग्रहवृत्तिभिः ॥ ४४ ॥ सुवर्ण मुखरीतोये स्नात्वा ये वेंकटे स्थितम् ॥ पश्यंति भुक्तिमुक्त्योस्तु भूयासुर्भाजनानि ते ॥ ४५ ॥ अल्पायुषो नरा मूढा ज्ञानयोगपरिच्युताः ॥ न शक्नुवंति त्वां द्रष्टुं व्रताध्ययनकर्मभिः ॥ ४६ ॥ सदास्मिन्नास्थितः शैले सर्वेषां च जगद्गुरो ॥ प्रसादसुमुखो देव कांक्षितार्थ प्रदोभव ॥ ॥ ४७ ॥ ॥ श्रीभगवानुवाच ॥ ॥ यत्प्रार्थितं त्वया विप्र तत्तथैव भविष्यति ॥ नूनमप्रतिमा लोके मयि भक्तिः कृता त्वया ॥ ४८ ॥ जाह्नवीव नदी सेयं सुवर्णमुखरी मुने ॥ स्यादाशास्या सुराणां च वांछितश्रीविधायिनी ॥ ४९ ॥ स्वामिपुष्करिणी चेयं नदी मूर्त्या समन्विता ॥ संक्रमिष्यति तां दिव्यां नदीं तीर्थौघसंश्रयाम् ॥ ५० ॥ वैकुण्ठनाम्नि शैलेऽस्मिन्नद्यप्रभृति सर्वदा ॥ कृतावासो भविष्यामि मुने प्रार्थनया तव ॥ ॥ ५१ ॥ सुवर्णमुखरीस्नानक्षालिताघौघकर्दमाः ॥ अस्मिन्वैकुण्ठशैले मां ये पश्यंति समाहिताः ॥ ५२ ॥ भुवि पुत्रादिसंपन्नाः सर्वैश्वर्यसमन्वि ताः ॥ मृतास्त्रिविष्टपे भोगानाकल्पमनुभूय च ॥ ५३ ॥ पुनरावृत्तिरहितं केवलानन्दभासुरम् ॥ मत्पदं समवाप्स्यन्ति नात्र कार्या विचारणा ॥ ॥ ५४ ॥ मां द्रष्टुमागतान्सर्वान्प्रतीक्ष्याभीप्सितैः शुभैः ॥ योजयिष्यामि सततं त्वद्वचोगौरवान्मुने ॥ ५५ ॥ पुत्रार्थिनां बहून्पुत्रान्धनानि च धनार्थिनाम् ॥ तथैवारोग्यकामानां रोगशांतिं गरीयसीम् ॥ ५६ ॥ तीव्रापत्परिभूतानां तथैवापन्निवारणम् ॥ दास्याम्यभीप्सितान्भोगान्दुर्ल भानपि सर्वदा ॥ ५७ ॥ ये यान्कामानपेक्ष्येह प्रेक्षन्ते मां समागताः ॥ अवाप्नुवन्ति ते सर्वे तांस्तान्कामान्न संशयः ॥ ५८ ॥ स्थिता वा यत्र कुत्रापि मां स्मरन्ति नरोत्तमाः ॥ ते सर्वे वाञ्छितां सिद्धिं लभन्ते मत्प्रसादतः ॥ ५९ ॥ ॥ अथ शङ्खनृपवरप्रदानपूर्वकं भगवदन्तर्धानम् ॥ ॥ भरद्वाज उवाच ॥ ॥ इत्युक्त्वा तं मुनिं देवः शंखमालोक्य भूपतिम् ॥ शृण्वतां ब्रह्ममुख्यानामिदं वचनमब्रवीत् ॥ ६० ॥ ॥ श्रीभगवानु वाच ॥ ॥ प्रीतोऽस्मि शंख भक्त्या ते वृणीष्वाभीप्सितं वरम् ॥ ददामि वरदोऽहं ते कृशिष्ठस्य तपस्यतः ॥ ६१ ॥ ॥ शंख उवाच ॥ ॥ न

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नोहरम् ॥ दंष्ट्राकरालं दुर्दर्शं वमन्तं दहनच्छटाः ॥ १३ ॥ कौस्तुभेन विराजन्तं दधानमुरसि श्रियम् ॥ अविचिन्त्यमनाद्यन्तमत्यन्तभयदायकम् ॥
॥ १४ ॥ प्रकाशयन्तं ब्रह्माण्डं सर्वमात्मनि सर्वगम् ॥ अगस्त्यशंखप्रमुखास्ते सर्वे हृष्टचेतसः ॥ १५ ॥ तमालोक्य जगन्नाथं भूयोभूयो ववन्दिरे
भ्रमन्ति लोकरक्षार्थमायुधानि तदा हरेः ॥ १६ ॥ निजतेजोबलोपेतान्याजग्मुस्तं निषेवितुम् ॥ चक्रमर्कप्रभं दिव्या गदा खड्गश्च नन्दकः ॥
॥ १७ ॥ पुण्डरीकं चोग्ररवः पाञ्चजन्यः शशिप्रभः ॥ तदा ब्रह्माण्डमखिलं पूरयामास निर्भरः ॥ १८ ॥ पाञ्चजन्यस्य निनदः सर्वासुरभयंकरः ॥
पाञ्चजन्यध्वनिं श्रुत्वा नितान्ताश्चर्यभीषणम् ॥ १९ ॥ आययुर्देवताः सर्वाः स्वंस्वं वाहनमास्थिताः ॥ ब्रह्मा रुद्रः शतमखः सनकाद्याश्च योगिनः॥
॥ २० ॥ वसिष्ठमुख्या मुनयो गन्धर्वोरगकिन्नराः ॥ विष्वक्सेनो गरुत्मांश्च विष्णुभृत्या जयादयः ॥ २१ ॥ सरूपाश्चैव ये नित्याः श्वेतद्वीपनिवासि
नः ॥ सुमनोद्रुमसंभूता सुमनोवृष्टिरद्भुता ॥२२॥ पपात मेदुरामोदमोदिताशेषमानसा ॥ ननृतुर्दिव्यसुदृशो जगुः किन्नरपुङ्गवाः ॥ २३ ॥ तुष्टुवुर्हर्ष
तरलाः सुरगन्धर्वचारणाः ॥ दृष्ट्वा ते पुण्डरीकाक्षं प्रसन्नं भक्तवत्सलम् ॥ २४ ॥ प्रणम्य तोषयामासुः साष्टांगं विविधैस्तवैः ॥ २५ ॥ ॥ ब्रह्मादय
ऊचुः ॥ ॥ जय विष्णो कृपासिन्धो जय तामरसेक्षण ॥ जय लोकैकवरद जय भक्तार्तिभञ्जन ॥ २६ ॥ अनन्तमक्षरं शान्तमवाङ्मनसगोचरम् ॥
को वा भवन्तं जानाति चिदानन्दमयात्मकम् ॥ २७ ॥ अणोरणुतरं स्थूलात्स्थूलं सर्वान्तरस्थितम् ॥ त्वामामनन्ति पुरुषं प्रकृतेः परमच्युतम् ॥
॥ २८ ॥ वेदान्तसाररूपं त्वां सर्वान्तर्बाह्यवर्तिनम् ॥ को हि वर्णयितुं शक्तो मायायत्तेषु देहिषु ॥ २९ ॥ भवदीयमिदं रूपं दृष्ट्वातिभयदायकम् ॥
भयोद्विग्ना वयं सर्वे शान्तं रूपं भजस्व ह ॥ ३० ॥ ॥ भरद्वाज उवाच ॥ ॥ इति स्तुतो विरिञ्चाद्यैः प्रसन्नो गरुडध्वजः ॥ मेघघोषप्रति
मया वाचा सादरमब्रवीत् ॥ ३१ ॥ ॥ अथ ब्रह्मादिप्रार्थनया भगवद्गृहीतसौम्यरूपप्रकारः ॥ ॥ श्रीभगवानुवाच ॥ ॥ भयावहामिमां मूर्ति
मुत्सृज्याहं प्रियावहम् ॥ शान्तं रूपं भजिष्यामि मां पश्यत निराकुलाः ॥ ३२ ॥ इत्युक्त्वान्तर्हितो भूत्वा तस्मिन्नेव क्षणांतरे ॥
विमाने रत्नखचिते बभूव सुखदर्शनः ॥ ३३ ॥ चन्द्रबिम्बाननः शान्तो नीलोत्पलदलद्युतिः ॥ सुवर्णवर्णवसनो रत्नभूषणभूषितः ॥ ३४ ॥
शंखचक्रगदापद्मलसत्करचतुष्टयः ॥ तमालोक्य रमाकान्तं भूयो भूयो ववंदिरे ॥ ३५ ॥ सन्तोषयित्वा ब्रह्मादीनभीष्टप्रतिपादनैः ॥ अवोचद्विनया
नम्रमगस्त्यं मुनिपुंगवम् ॥ ३६ ॥ ॥ श्रीभगवानुवाच ॥ ॥ त्वं मुनीन्द्र व्रतैर्घोरैश्चीर्णैर्मां प्रति संप्रति ॥ परिक्लिष्टोऽसि दास्यामि वरांस्ते
ऽभीप्सितान्वद ॥ ३७ ॥ ॥ भरद्वाज उवाच ॥ ॥ निशम्य वाक्यं श्रीभर्तुः प्रणम्य च पुनःपुनः ॥ स रोमाञ्चितसर्वांगः कुम्भजन्मा वचो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ॥ भरद्वाज उवाच ॥ ॥ गीष्पतिप्रमुखैरित्थमादिष्टः कुम्भसंभवः ॥ शोकजालं परित्यज्य ययौ तैः सहितो द्रुतम् ॥ ५० ॥ स ददर्श महा
वृक्षान्फलपुष्पभरानतात् ॥ प्ररूढशाखानिकरच्छायाच्छादितदिक्तटान् ॥ ५१ ॥ सिंहदंतावलव्याघ्रवराहमहिषादिकान् ॥ मृगानालोकयामास पंथा
नंचांतरांतरा ॥ ५२ ॥ तैस्तदानीं ददृशिरे सानवोऽप्यम्बुभृद्भृतः ॥ सुवर्णरौप्यताम्रादिशोभितास्तत्र तत्र तु ॥ ५३ ॥ उच्चलच्छीकरासारनिर्वाहि
तदिवौकसः ॥ वेगोद्धृतशिला दृष्टाः शतशो गिरिनिर्झराः ॥ ५४ ॥ तेषामापादयामास प्रमोदं मंदमारुतः ॥ कमलामोदसंवाही विचरन्गिरिसानु
षु ॥ ५५ ॥ शुकानां कोकिलानां च तदा शुश्रुविरे गिरः ॥ ५६ ॥ तत्र तत्र समासीनान्विस्तीर्णासु दृषत्सु ते ॥ सिद्धानपश्यन्कृष्णस्य गाय
तो गुणवैभवम् ॥ ५७ ॥ अगस्त्यप्रमुखाः सर्वे परिक्रम्य मुनीश्वराः ॥ स्वामिपुष्करिणीं दिव्यां ददृशुर्विमलोदकाम् ॥ ५८ ॥ तत्तीरे विहितावास
मपश्यच्छङ्खभूपतिम् ॥ वाङ्मनःकायजं कर्म सन्निवेश्य स्थितं हरौ ॥ ५९ ॥ स तानालोक्य सहसा मुनीन्द्रान्संशितव्रतान् ॥ यथोक्तमकरो
त्पूजां प्रणामस्तुतिपूर्विकाम् ॥ ६० ॥ आसीनास्तत्र ते सर्वे संभाव्यान्योऽन्यमुत्सुकाः ॥ गोविन्दकीर्तनपराः कृतार्थत्वं प्रपेदिरे ॥ ६१ ॥ इति
श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे श्रीवेंकटाचलमाहात्म्ये सुवर्णमुखरीमाहात्म्यप्रशंसायां श्रीवेंकटाचलं प्रति
शंखागस्त्याद्यागमनवर्णनंनाम सप्तत्रिंशोऽध्यायः ॥ ३७ ॥ ॥ अथाऽगस्त्यशङ्खादितपस्तुष्टस्य भगवत आविर्भावः ॥ ॥ भरद्वाज उवाच ॥
तेषां हरौ जगन्नाथे समावेशितचेतसाम् ॥ दिनत्रयं गतं तत्र पूजास्तोत्रपरात्मनाम् ॥ १ ॥ तृतीये दिवसे प्राप्ते ते सर्वे निद्रिता निशि ॥ अन्ते च
तुर्थयामस्य ददृशुः स्वप्नमुत्तमम् ॥ २ ॥ शङ्खचक्रगदापाणिं प्रसन्नं पुरुषोत्तमम् ॥ वरदानाय संप्राप्तमपश्यन्स्मेरलोचनम् ॥ ३ ॥ उत्थाय मुदिता
त्मानो गृहान्निर्गत्य पावने ॥ स्वामिपुष्करिणीतोये सस्नुर्विधिवदादरात् ॥ ४ ॥ विधाय विधिवत्कर्म सर्वे दिनमुखोचितम् ॥ गृहान्प्रत्याययुर्देव
माराधयितुमच्युतम् ॥ ५ ॥ सद्यः श्रेयस्करं मार्गे निमित्तं पक्षिसूचितम् ॥ दृष्ट्वा प्रसादं देवस्य करस्थं मेनिरे तदा ॥ ६ ॥ ततस्त्रिलोककर्तारं
पूजयित्वा जनार्दनम् ॥ तुष्टुवुर्विविधैः स्तोत्रैः पवित्रैर्वेदवर्णितैः ॥ ७ ॥ स्तोत्रावसाने कौन्तेय मुनीन्द्रः कुम्भसंभवः ॥ जजाप शंखसहितो मन्त्रम
ष्टाक्षरं हरेः ॥ ८ ॥ इत्थं तेषां जगत्स्वामिन्यच्युतेऽर्पितचेतसाम् ॥ अग्रभागे प्रादुरभूदेकं तेजो महाद्भुतम् ॥ ९ ॥ अनेककोटिसंख्यानामादित्येन्दु
हविर्भुजाम् ॥ एकीभूयाम्बरतले ज्योतिर्जालमिव स्थितम् ॥ १० ॥ तत्तेजो वीक्ष्य ते सर्वेऽमितान्ताश्चर्यगोचराः ॥ दध्युर्नारायणं दिव्यं परमान
न्दविग्रहम् ॥ ११ ॥ वाङ्मानसपथातीतं विश्रुतैश्वर्यभासुरम् ॥ सहस्रनेत्रं साहस्रबाहुपादैः समन्वितम् ॥ १२ ॥ तप्तकार्तस्वरनिभस्फुरत्कांतिम

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ॥ अथ शंखाभिधाननृपवृत्तान्तः ॥ ॥ भारद्वाज उवाच ॥ ॥ शृणु पार्थ प्रवक्ष्यामि कथामाश्चर्यकारिणीम् ॥ यथाऽसौ भगवानस्मिञ्छैले प्राप
प्रकाशताम् ॥ १ ॥ श्रुताभिधानो नृपतिरस्ति हैहयवंशजः ॥ यः प्रजाः स्वा इव चिरं शशास धरणीं शुभाम् ॥ २ ॥ तस्य पुत्रो गुणनिधिः शंखो
नाम महीपतिः ॥ पालयामास वसुधां सर्वशास्त्रविशारदः ॥ ३ ॥ तस्य विष्णौ जगन्नाथे पुण्डरीकायतेक्षणे ॥ बभूव निश्चला भक्तिः परित्यक्ता
न्यसंश्रया ॥ ४ ॥ देव वं जगन्नाथमनन्तं पुरुषोत्तमम् ॥ प्रगाढनिश्चयो नित्यं ध्यायन्नद्भुतवैभवम् ॥ ५ ॥ चक्रे व्रतानि दानानि पुण्यानि विवि
धानि च ॥ वेदवेद्यस्य नियतं प्रीत्यर्थं मधुविद्विषः ॥ ६ ॥ तमुद्दिश्यैव विदधे वाजिमेधादिकान्क्रतून् ॥ यथोक्तदक्षिणायोगात्प्रीणिताशेषभूसुरः ॥
॥ ७ ॥ इष्टापूर्त्तात्मकं चक्रे कर्मजातमतन्द्रितः ॥ विन्यस्तहृदयो नित्यं केशवे भक्तवत्सले ॥ ८ ॥ स्मरत्यजस्रं गोविन्दं जपत्यच्युतमव्ययम् ॥ पूज
यत्यब्जनयनं संकीर्तयति शार्ङ्गिणम् ॥ ९ ॥ शृणोति सततं राजा संसारार्णवतारिणीः ॥ पौराणिकैः समाख्याताः पवित्रा वैष्णवीः कथाः ॥१०॥
ब्राह्मणानर्चति स्मायं हरिप्रीत्यर्थमेव च ॥ इत्थं सर्वात्मना युक्तोऽप्यश्रान्तः पृथिवीपतिः ॥ ११ ॥ नापश्यच्छाश्वतैश्वर्यं स्वतन्त्रं पुरुषोत्तमम् ॥
अप्राप्य दर्शनं विष्णोः सर्वयज्ञमयात्मनः ॥ १२ ॥ सशोकाक्रान्तहृदयः परां चिन्तामुपागमत् ॥ १३ ॥ ॥ शंख उवाच ॥ ॥ परः सहस्रै
र्जननैरतीतैर्दुष्कृतं बहु ॥ कृतं मया यदप्राप्तं हृषीकेशस्य दर्शनम् ॥ १४ ॥ उपार्जितानां तपसामनेकैः पूर्वजन्मभिः ॥ अखण्डं हि फलं विष्णो
र्दर्शनं मधुघातिनः ॥ १५ ॥ कथं नु यायाद्भगवान्विषयं मम नेत्रयोः ॥ कदा वा लभ्यते श्रेयस्तद्वाक्याकर्णनात्मकम् ॥ १६ ॥ हा धिङ्मां
विहितागस्कं क्रियासाफल्यवर्जितम् ॥ नारायणकृपादूरं संसारक्लेशगोचरम् ॥ १७ ॥ ॥ भरद्वाज उवाच ॥ ॥ इति चिन्ताकुले तस्मिन्राज्ञि
जीवितनिःस्पृहे ॥ अदृश्यमूर्तिः सर्वेषां शृण्वतामाह केशवः ॥ १८ ॥ ॥ श्रीभगवानुवाच ॥ ॥ मा शोकस्य वशं यायाः शृणु वक्ष्यामि ते
हितम् ॥ मदेकशरणं साधुं त्वां त्यक्ष्यामि कथं नृप ॥ १९ ॥ अयं वेंकटनामाद्रिस्त्रिषु लोकेषु विश्रुतः ॥ वैकुण्ठादपि मे राजन्नावासोऽतिप्रियावहः ॥
॥२०॥ तं गत्वा भूधरवरं तव भक्त्या तपस्यतः ॥ गते सहस्रे वर्षाणां यास्याम्यालोकनीयताम् ॥२१॥ भवानिवोद्यतोऽगस्त्यो मम दर्शनमञ्जसा ॥
क्व वा संदृश्यते विष्णुरेवमाह चतुर्मुखम् ॥ २२ ॥ वृषभाद्रौ हरिर्द्रष्टुं लभ्यते नियतात्मभिः ॥ गच्छ तत्रेति मुनये कथयामास पद्मभूः ॥ २३ ॥
अम्भोजसंभवेनेत्थमादिष्टः कुम्भसम्भवः ॥ अञ्जनाद्रौ महावासे तपस्तप्तुं समेष्यति ॥ २४ ॥ तस्मिन्महीधरे पुण्ये कृतवासो भवानपि ॥ आराध्य

१ सुदृढा—इ० पा० । २ च नर्षभ—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गां तपोनिष्ठो मम दर्शनमाप्स्यसि ॥ २५ ॥ ॥ अथ भगवदुक्त्या शंखनृपस्य श्रीवेंकटाचलागमनम् ॥ ॥ भरद्वाज उवाच ॥ ॥ इत्याज्ञप्तो भगवता शंखो दानववैरिणा ॥ जगाम प्रीतिमतुलां धन्योस्मीति स्वचेतसि ॥ २६ ॥ विन्यस्य तनयं वक्त्रं प्रजापालनकर्मणि ॥ गोविन्ददर्शनापेक्षी नारायणगिरिं ययौ ॥ २७ ॥ तस्य शृंगे समुत्तुंगे स्वामिपुष्करिणीं शुभाम् ॥ दिव्यैः पयोभिरापूर्णामपश्यदमृतोपमैः ॥ २८ ॥ अनेकसिद्धगन्धर्वदेवर्षिगणसेविताम् ॥ भवतापप्रशमनीं सर्वतीर्थसमाश्रयाम् ॥ २९ ॥ जलकाकबकक्रौञ्चहंसकारण्डवाकुलाम् ॥ कुमुदोत्पलराजीवसौगन्धिकमनोहराम् ॥ ३० ॥ तां दृष्ट्वा पद्मिनीं दिव्यां तत्तीरे विहितोटजः ॥ तोषितः स्नानपानाद्यैर्निर्विकल्पमनोगतिः ॥ ३१ ॥ सर्वकर्माणि विन्यस्य जगदीशे जनार्दने ॥ ३२ ॥ ॥ अथभगवद्दर्शनार्थमगस्त्यस्य वेंकटाचलागमनम् ॥ ॥ जपध्यानपरो नित्यं तपस्तेपे सुदारुणम् ॥ तस्मिन्नेव मुनिः काले शासनात्परमेष्ठिनः ॥ ३३ ॥ अगस्त्योऽप्यासप्तादायं शैलं मुनिशतावृतः ॥ प्रतीचीं दिशमारभ्य कृतयत्नः प्रदक्षिणे ॥ ३४ ॥ पश्यंस्तीर्थानि पुण्यानि बभ्राम सुचिरं गिरौ ॥ तत्र तत्र ददर्शासौ हरिदर्शनलालसान् ॥ ३५ ॥ विरिंचिगुहशक्रेशविष्वक्सेनादिकान्क्रमात् ॥ सनकाद्यांश्च योगीन्द्रान्नारदप्रमुखानृषीन् ॥ ३६ ॥ सिद्धगन्धर्वदैतेययक्षराक्षसपन्नगान् ॥ तैस्तैः संमान्यमानोऽसौ प्रश्रयप्रियभाषणैः ॥ ३७ ॥ पश्यन्नाश्चर्यभूतानि सर्वाणि विचचार ह ॥ स्नात्वा तीर्थेषु सर्वेषु स्कन्दधारादिकेषु च ॥ ३८ ॥ तत्र तत्रार्चयामास गोविन्दं जगतां पतिम् ॥ एवं भ्रान्त्वा गतेऽब्दानां सहस्रे मुनिसत्तमः ॥ ३९ ॥ नापश्यत्पुण्डरीकाक्षं चिन्ताशोकपरोऽभवत् ॥ ४० ॥ ॥ अथागस्त्यं प्रति गुरुवस्वाद्युक्तिः ॥ ॥ तस्मिन्काले समाजग्मुर्धिषणोशनसौ पुनः ॥ राजोपरिचरो नाम वसुश्च तमृषीश्वरम् ॥ ४१ ॥ अस्माकं सफलं जातं जीवितं मुनिसत्तम ॥ दृष्टो भवान्यदस्माभिर्नारायण इवापरः ॥ ४२ ॥ ब्रह्मणा लोकनाथेन यदादिष्टा वयं मुने ॥ अच्युतालोकनपरास्तदिदं कथ्यते तव ॥ ४३ ॥ अस्ति दक्षिणदिग्भागे वेंकटोनाम भूधरः ॥ श्वेतद्वीपादपि हरेरावासोऽयमभीप्सितः ॥ ४४ ॥ तस्मिन्गिरावगस्त्यस्य शंखस्य च महीपतेः ॥ दर्शयिष्यति गोविन्दो निजरूपं जगद्गुरुः ॥ ४५ ॥ तदानीं सर्वदेवानामृषीणां यक्षरक्षसाम् ॥ अस्माकं देवदेवस्य दर्शनं संभविष्यति ॥ ४६ ॥ अचिरेणैव तद्भावि ततः संत्यक्तकल्मषाः ॥ अन्वेष्टुं गच्छतागस्त्यं तस्मिन्नारायणाचले ॥ ४७ ॥ इत्याज्ञप्ता वयं धात्रा समागम्यात्र भाग्यतः ॥ दृष्टवन्तो महाभागं भवंतं भूरितेजसम् ॥ ४८ ॥ भवता सहिता गत्वा स्वामिपुष्करिणीतटे ॥ तमप्यालोकयिष्यामः शंखं भागवतोत्तमम् ॥ ४९ ॥ ॥ अथागस्त्यादिकृतश्रीवेंकटाचलस्थरम्यवस्तुदर्शनम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पृथिव्यां शतवार्षिकः ॥ ४२ ॥ तस्मिन्नवग्रहे पृथ्व्यां नीरसायां धनञ्जय ॥ चतुर्विधानि भूतानि समायान्ति परिक्षयम् ॥ ४३ ॥ तदा तत्तशिखाका रैरुपेतो घर्मदीधितिः ॥ मयूखैरग्निसदृशैर्वमद्भिः पावकच्छटाः ॥ ४४ ॥ विनष्टग्रामनगरशैलवृक्षादिकानना ॥ कूर्मपृष्ठोपमोर्वी स्यात्तप्तायःपिण्ड सन्निभा ॥ ४५ ॥ ततो विधातुर्गात्रेभ्यः समुत्पन्ना महाघनाः ॥ आच्छादयन्तो गगनं गर्जितध्वानबन्धुराः ॥ ४६ ॥ सितपीतारुणश्यामाश्चित्र वर्णाश्च भीषणाः ॥ शैलेभसौधवृक्षादिनानारूपसमन्विताः ॥ ४७ ॥ ते शताब्दमितं कालं महावृष्टिं वितन्वते ॥ तेनाम्भसा शमं याति सूर्योद्भूतो महानलः ॥ ४८ ॥ भूयश्च शतवर्षाणि वर्षन्त्युग्रं महाघनाः ॥ तदम्भसा समुद्वेला विकृतिं यान्ति वार्द्धयः ॥ ४९ ॥ कल्पान्ताम्बुदनिर्मुक्तं लोका न्व्याप्नोति तज्जलम् ॥ भूर्भुवःस्वर्महर्लोकानावृणोति तमो महत् ॥ तदा निमग्ना सलिले मही पातालमूलगा ॥ ५० ॥ अनष्टा कथमप्यास्ते ब्रह्म शक्त्यवलम्बिता ॥ अथ निःश्वाससंभूतो मारुतो ब्रह्मणोऽर्जुन ॥ ५१ ॥ उत्सारयति तान्सर्वान्कल्पान्तोत्थान्महाघनान् ॥ एवं प्रवृद्धः पवनः शतसंवत्सरात्मकम् ॥ ५२ ॥ कालं निरन्तरं वाति दुर्निवाररयोत्थितः ॥ तमुग्रमनिल हित्वा हरेर्नाभिसरोरुहे ॥ ५३ ॥ योगनिद्रामवाप्नोति तस्मि न्पाथसि पद्मभूः ॥ योगनिद्रानुषक्तस्य याति तस्य जगद्विभोः ॥ ५४ ॥ तावती शर्वरी पार्थ दिनं यावत्प्रमाणकम् ॥ निशायां समतीतायामुत्थितो वेगवान्पुनः ॥ ५५ ॥ सृजत्यखिलजन्तून्वै पूर्ववच्छासनाद्धरेः ॥ कल्पेकल्पे समुचितै रूपैः पाति जगद्धरिः ॥ ५६ ॥ अस्मिन्कल्पे श्वेतवर्णां प्राप्त वान्यज्ञपोत्रिताम् ॥ वराहवपुषा देवो विहरन्नवनीतले ॥५७॥ स्वपूर्वनियतावासं प्रपेदे वेंकटाचलम् ॥ स्वामिपुष्करिणीतीरे चरंश्चिरमधोक्षजः॥५८॥ भक्त्या परमया युक्तमपश्यज्जलजासनम् ॥ संपूज्य प्रार्थयामास ब्रह्मा तं भूतभावनम् ॥ ५९ ॥ पुरातनीं निजां स्वामिन्भज दिव्यां तनूमिति ॥ गृही त्वानुनयं तस्य त्यक्त्वा तां सूकराकृतिम् ॥ ६० ॥ अनन्यभजनीयां स्वां प्राप विश्वात्मिकां तनुम् ॥ तथा स्थितं गिरौ तत्र कृत्वाप्युत्साहमूर्जितम् ॥ ॥ ६१ ॥ द्रष्टुं न शेकुः सर्वेऽपि कालेन बहुनाऽपि च ॥ ६२ ॥ ॥ अर्जुन उवाच ॥ ॥ दर्शनस्मरणादीनां हरिरित्थमगोचरः ॥ कथं प्रत्यक्षतां प्राप मानुषाणां महामुने ॥ ६३ ॥ भाग्यभूतोऽथ जगतां यः को वाऽऽराध्य तं विभुम् ॥ इदं प्रकाशयामास कथामेतां निवेदय ॥ ६४ ॥ हरिकथाश्रवणं दुरितापहं कथयतां सकलागमविद्वरान् ॥ सुकृतिनां ननु संप्रति धुर्यता मुनिवरेण्य ममाद्य समागता ॥ ६५ ॥ इति श्रीस्कांदे महापुराण एकाशीति साहस्र्यां संहितायां द्वितीये वैष्णवखण्डे श्रीवेंकटाचलमाहात्म्ये सुवर्णमुखरीमाहात्म्यप्रशंसायां वराहावतारकीर्तनं नाम षट्त्रिंशोऽध्यायः ॥ ३६ ॥

१ वातो धातुर्जगत्पतेः–इ० पा० । २ एवम्–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मंगलाक्षतविभ्रमम् ॥ उदूढा तेन देवेन सा बभौ सलिलाप्लुता ॥ १९ ॥ गाढरागसमुत्पन्नस्वेदक्लिन्नतनूरिव ॥ इत्थमुद्धृत्य भगवान्महीं पाताल
मूलतः ॥ २० ॥ सुदृढं स्थापयामास मध्येऽम्बुनिधिपाथसाम् ॥ तेनोद्धृतायां मेदिन्यां पूर्णं तद्धनभोन्तरे ॥ २१ ॥ जलं तत्कृतमर्यादाऽव्यवच्छि
न्नमभूत्तदा ॥ संस्थाप्य पृथिवीमित्थं तदीयांधारसिद्धये ॥ २२ ॥ दिग्गजानहिराजं च कमठं च न्यवेशयत् ॥ तेषामपि च सर्वेषामाधारत्वेन
सादरम् ॥ २३ ॥ अव्यक्तरूपां स्वां शक्तिं युयोज च दयानिधिः ॥ ततो धरां समुद्धृत्य स्थितं किटितनुं हरिम् ॥ २४ ॥ तुष्टुवुः सनकाद्यास्तं
जनलोकनिवासिनः ॥ तदा वराहवपुषमाराध्य पुरुषोत्तमम् ॥ २५ ॥ तदाज्ञया जगद्ब्रह्मा यथापूर्वमकल्पयत् ॥ २६ ॥ ॥ अर्जुन
उवाच ॥ ॥ कल्पान्तसलिले मग्ना कथं तिष्ठति भूरियम् ॥ सप्तपाताललोकाधः किमाधारा महामुने ॥ २७ ॥ कल्पकालः किया
नेष स्यात्तद्वृत्तिश्च कीदृशी ॥ २८ ॥ ॥ अथ कल्पवृत्तांतवर्णनपूर्वकं श्वेतवराहावतारवर्णनम् ॥ ॥ एतद्विस्तार्य सकलं मम ब्रह्मन्मुने
वद ॥ २९ ॥ ॥ भरद्वाज उवाच ॥ ॥ विनाडिकानां षष्ट्या स्यान्नाडिकैका दिनं भवेत् ॥ तत्षष्ट्या दिवसास्त्रिंशन्मासः पक्षद्वयात्म
कः ॥ ३० ॥ मासौ द्वावृतुरित्युक्तस्तैः षड्भिर्वत्सरो भवेत् ॥ अयनद्वितयाकारः शीतवर्षोष्णसंश्रयः ॥ ३१ ॥ देवासुराणामन्योन्यमहोरात्रं
विपर्ययात् ॥ उत्तरं दक्षिणं भानोरयने ते यथाक्रमम् ॥ ३२ ॥ मांनुषाब्दैःखंखंव्योमखांक्षिपावकसांगरैः ॥ महायुगं भवेत्पार्थ कृताद्याकारसंयुतम् ॥
॥ ३३ ॥ सप्तत्या सैकया कालो युगानामन्तरं मनोः ॥ अस्मिञ्छ्वेतवराहाख्ये कल्पे जातान्मनूञ्छृणु ॥ ३४ ॥ स्वायंभुवः स्यात्प्रथमस्ततः
स्वारोचिषो मनुः ॥ उत्तमस्तामसाख्यश्च रैवतश्चाक्षुषाह्वयः ॥ ३५ ॥ एते गताः प्राङ्मनवः षट् सेन्द्रसुरतापसाः ॥ वैवस्वतो वर्ततेऽद्य सप्तमो
मनुरर्जुन ॥ ३६ ॥ आदित्यवसुरुद्राद्यास्तत्काले देवतागणाः ॥ इष्ट्वाश्वमेधशतकं तेजस्वी प्राप शक्रताम् ॥ ३७ ॥ विश्वामित्रो
ऽहंमत्रिश्च जमदग्निश्च कश्यपः ॥ वसिष्ठो गौतमश्चैव ते वै सप्तर्षयोऽर्जुन ॥ ३८ ॥ इक्ष्वाकुप्रमुखाः शूरा मनुपुत्रा महाबलाः ॥ अवनिं पालयामा
सुर्नित्यं धर्मपरायणाः ॥ ३९ ॥ सूर्यदक्षब्रह्मधर्मरुद्राणां पञ्च सूनवः ॥ सावर्णिरौच्यभौमाद्या भविष्यन्मनुसप्तकम् ॥ ४० ॥ चतुर्दश विधातुस्ते
भवन्ति मनवोऽहनि ॥ तत्कल्पसंज्ञं तस्यान्ते निशा स्यात्तत्समा शृणु ॥ ४१ ॥ दिनावसानसमये ब्रह्मणः पाण्डुनन्दन ॥ जायतेऽवग्रहो घोरः

१ तदुर्व्याधारसिद्धये–इ०पा०। २ अंकानां धामततो गतिः इति प्रमाण्येन ४३२०००० इयं विंशतिसहस्राधिकत्रिचत्वारिंशल्लक्षरूपा संख्या भवति। ३ अहम्–भरद्वाजः–इत्यर्थः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्य स्वरूपं मुनयो मृगयन्ते समाहिताः ॥ सङ्कर्षणो वासुदेवः प्रद्युम्नश्च तथा पुनः ॥ ४३ ॥ अनिरुद्ध इति ख्यातं तन्मूर्तीनां चतुष्टयम् ॥
कीर्तितः प्रणवः पश्चाद्धृदयं तस्य भास्वरम् ॥ ४४ ॥ भगवान्वासुदेवश्च मन्त्रोऽयं तत्प्रकाशकः ॥ ४५ ॥ मन्त्रराजमिमं नित्यं प्रजपेद्यः समा
हितः ॥ स विष्णोः करुणायोगात्सिद्धीनां भाजनं भवेत् ॥ ४६ ॥ ॥ अथ भगवत्कृतभूतसृष्ट्यादिवर्णनम् ॥ ॥ आपन्निवारकः संपत्प्रापको
भुक्तिमुक्तिदः ॥ यथा ससर्ज भूतानि कल्पादावेष माधवः ॥ ४७ ॥ तत्सर्वं कथयिष्यामि समाहितमनाः शृणु ॥ तस्य चिन्तयतः
सर्गं तेजोरूपं परं हरेः ॥ ४८ ॥ विरिंच इति विख्यातं राजसं गुणमाश्रितम् ॥ तस्य देवस्य वदनाच्छक्रो देवः सपावकः ॥
जज्ञे यश्च त्रिलोकेशः पाककर्मणि यः प्रभुः ॥ ४९ ॥ मनसश्चाभवच्चन्द्रः करुणानित्यशीतलात् ॥ अपां सर्वौषधीनां च विप्राणां रक्षकः सदा ॥
॥ ५० ॥ नेत्राभ्यामुदभूत्सूर्यस्तस्य विश्वप्रकाशकः ॥ शीतोष्णवर्षकृत्कालकारणं तेजसां निधिः ॥ ५१ ॥ प्राणेभ्योऽस्य जगत्प्राणः समीरः
समजायत ॥ धर्ता ग्रहर्क्षस्वर्गंगाविमानानां महाबलः ॥ ५२ ॥ नाभिदेशात्समुत्पन्नमन्तरिक्षं महात्मनः ॥ तस्यासीच्छिरसो व्योम भूतसंभव
कारणम् ॥ ५३ ॥ पादाम्बुजाभ्यामुदभूद्भूमिर्भूतगणाश्रया ॥ विनिःसृता दिशः सर्वाः श्रोत्राभ्यां परमात्मनः ॥ ५४ ॥ भूर्भुवाद्यास्तथा लोकाः
स्मरणात्तस्य जज्ञिरे ॥ रसातलादिलोकाश्च यक्षरक्षोगणादयः ॥ ५५ ॥ मुखबाहूरुपादेभ्यो जनयामास स क्रमात् ॥ ब्राह्मणान्क्षत्रियान्वैश्याञ्छूद्रा
ंश्च कुरूद्वह ॥ ५६ ॥ छन्दांसि यज्ञस्तुरगा गावो मेषाविकादयः ॥ अतर्क्यप्रभवां तस्मादुत्पत्तिं प्रतिपेदिरे ॥ ५७ ॥ संकल्पाद्देवदेवस्य तस्य
स्थावरजंगमम् ॥ भूतजातमभूत्कालो भूतो भावी भवंस्तथा ॥ ५८ ॥ पिबत्यम्बु समुद्राणां वडवानलरूपधृक् ॥ कल्पान्तकाले तत्सर्वं विसृज
त्यात्मनि स्थितम् ॥ ५९ ॥ सञ्चारयति भूतानां वृत्तिं सूर्येन्दुरूपधृक् ॥ तमोनिरसनाच्चापि कालधर्मप्रवर्तनात् ॥ ६० ॥ जगन्ति कल्पविरमे
विन्यस्य स्वोदरान्तरे ॥ लीलाबालाकृतिः शेते वटपत्रे महाम्बुधौ ॥ ६१ ॥ अथ चोदग्रभोगीन्द्रभोगतल्पे सुखोचिते ॥ योगनिद्रामवाप्नोति
सद्वितीयोऽब्जवासया ॥ ६२ ॥ नाभिकासारसंभूताज्जनयामास पंकजात् ॥ ६३ ॥ सर्वेषां जगतां नाथो विधातारं चतुर्मुखम् ॥ ६३ ॥ लीला
ह्येषा मुकुन्दस्य स्वेच्छायोगप्रवर्तिनः ॥ विज्ञायते न केनाऽपि याथार्थ्येन स ईश्वरः ॥ ६४ ॥ यदा धर्मस्य हानिः स्यादधर्मो वर्धते यदा ॥
यदा वा महतीं पीडां भजन्ते देवतागणाः ॥ ६५ ॥ यदावलेपदुर्वारा यांति वृद्धिं सुरद्रुहः ॥ भूमेर्भूमिजनानां च यदोदेति महद्भयम् ॥ ६६ ॥
यदा वा निजभक्तानां साधूनामनिवारिता ॥ दुरन्तातंकजननी विपत्समुपजायते ॥ ६७ ॥ तदा तदनुरूपाणि रूपाण्यास्थाय कौतुकात् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अधर्ममवधूयाशु कुरुते जगतो हितम् ॥ ६८ ॥ सृजति विधिसमाख्यो राजसेनात्मनाऽसौ वहति हरिसमाख्यः सत्त्वनिष्ठः प्रपञ्चम् ॥ हरति हरसमाख्यस्तामसीमेत्य वृत्तिं मधुमथनमहिम्नामस्ति वेत्ता न कोऽपि ॥ ६९ ॥ यज्ञांगैः कृतसकलांगसंधिबंधं वाराहं वपुरधिगम्य लोकनाथः ॥ शैलेऽस्मिन्नभजदसौ यथा निवासं तद्वक्ष्ये शृणु विबुधाधिनाथसूनो ॥ ७० ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे श्रीवेंकटाचलमाहात्म्ये सुवर्णमुखरीमाहात्म्ये विष्णुमाहात्म्यप्रस्तावे सृष्ट्यादिवर्णनंनाम पञ्चत्रिंशोऽध्यायः ॥ ३५ ॥

॥ ॥ अथ वराहकृतधरण्युद्धरणक्रमः ॥ ॥ भरद्वाज उवाच ॥ ॥ पुरा निशात्यये धातुः प्रबुद्धो मधुसूदनः ॥ पुनः प्रवृत्तिं भूतानामन्वियेष धिया भृशम् ॥१॥ विना वसुमतीमन्ये भूतौघधरणक्षमाः ॥ न भवन्तीति हृदये तर्कस्तस्याजनिष्ट च ॥ २ ॥ अपश्यत्प्रणिधानेन महीं पातालगोचराम् ॥ अतिमात्रभयोद्विग्नां परीतां महताम्बुना ॥ ३ ॥ प्रतिपेदे तदा रूपं भूसमुद्धरणोचितम् ॥ उपकर्मोष्ठमनलजिह्वं प्रणवघोषणम् ॥४॥ चतुराम्नायचरणं प्रायश्चित्तखुरांचितम् ॥ प्राग्वंशकायं विलसद्दर्भरोमावलीयुतम् ॥ ५ ॥ प्रवर्ग्यावर्तसंपन्नं दक्षिणाग्न्युदरान्वितम् ॥ स्रुक्तुण्डमखिलैः सर्वैः संविभक्तांगसन्धिकम् ॥ ६ ॥ दिव्यसूक्तसटाजालं परब्रह्मशिरस्तथा ॥ हव्यकव्यरयोपेतं विशुद्धपशुजानुकम् ॥ ७ ॥ उक्तात्युक्तादिकच्छन्दोमार्गमंत्रबलान्वितम् ॥ सर्वयज्ञमयं दिव्यं वाराहं रूपमास्थितः ॥ ८ ॥ अन्वेष्टुं धरणीमब्धेर्विवेश सलिलांतरम् ॥ दंष्ट्राबालशशांकोत्थलसत्कांतिचयैर्हठात् ॥ ९ ॥ कल्पांतसमयस्फीतं तमिस्रमपसारयन् ॥ अभिभूतांबुभृद्घोषैर्मुहुर्ब्रह्माण्डकन्दराम् ॥ १० ॥ निनादमुखरां कुर्वन्गाढैर्घुरुघुरुस्वनैः ॥ खुरप्रखुरविन्यासैर्जर्जरीकृतविग्रहम् ॥ ११ ॥ इतस्ततो विलुठयन्तुरगाणामधीश्वरम् ॥ तीव्रैर्निःश्वासपवनैरापातालं सरित्पतेः ॥ १२ ॥ प्रापयन्नतलस्पर्शमन्तरं दर्शनीयताम् ॥ अतिदीर्घेण पात्रेण मग्नोन्मग्नेन वारिधेः ॥ १३ ॥ संक्षोभितानि पाथांसि कुर्वन्नन्तर्ययौ तदा ॥ सप्तपातालमूलाधःस्थितां तोये भयाकुलाम् ॥ १४ ॥ वेपमानां समालोक्य धरणीं हृष्टमानसः ॥ तामारोप्य स्वदंष्ट्राग्रमुन्ममज्ज सरित्पतेः ॥ १५ ॥ संस्तूयमानो मुनिभिर्जनलोकनिवासिभिः ॥ तस्मिन्नुद्वहति प्रेम्णा देवे वसुमतीं क्षणम् ॥ १६ ॥ प्रतिसारा बभूवाधो वारिधेर्मङ्गलोचिता ॥ तदुत्तारणवेलायां वराहवपुषोऽर्जुन ॥ १७ ॥ गम्भीरघोषैरम्भोधिः प्राप मंगलतूर्यताम् ॥ उद्वृत्तवीचिविक्षिप्तशीकरासारसंगतः ॥ १८ ॥ भेजे मुक्ताफलचयो

१ अंजनि ध्रुवः इ०पा० । २ ऋक्षरोमावलीयुतम्–इ० पा० । ३ दक्षिणाहृदयान्वितम्–इ० पा० । ४ विशुद्धपशुनासिकम्–इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ॥ अर्जुन उवाच ॥ ॥ वेंकटाद्रौ महापुण्ये सुरासुरनमस्कृतः ॥ कथं प्रादुरभूद्देवो भगवान्कमलापतिः ॥ २० ॥ कस्य वा कृतिनस्तत्र प्रसन्नो
निजमद्भुतम् ॥ रूपं प्रकाशयांचक्रे भुक्तिमुक्तिफलप्रदम् ॥ २१ ॥ विष्णोर्देवादिदेवस्य महिमानं महामुने ॥ श्रोतुमिच्छामि तत्त्वेन तन्मे
कथय विस्तरात् ॥ २२ ॥ ॥ अथ श्रीवेंकटाचलवासिभगवद्वैभववर्णनम् ॥ ॥ भरद्वाज उवाच ॥ ॥ शृणु वेंकटनाथस्य महिमानं
समाहितः ॥ विस्तरेण समाख्यातुं ब्रह्मणापि न शक्यते ॥ २३ ॥ धन्योऽसि देवदेवस्य माहात्म्यं मधुविद्विषः ॥ यद्भक्तियुक्ताभूत्तात श्रोतुं
मतिररिन्दम ॥ २४ ॥ कृतपुण्योऽस्म्यहं पार्थ सर्वभूतपतेर्हरेः ॥ पवित्राणि चरित्राणि स्तोष्यन्ते यन्मयाऽधुना ॥ २५ ॥ पुरा भागी
रथीतीरे जनकाय महात्मने ॥ क्रतुदीक्षाप्रसक्ताय विशुद्धज्ञानशालिने ॥ २६ ॥ वामदेवेन कथितां कथां पापप्रणाशिनीम् ॥ कथयिष्यामि
ते पार्थ विष्णुकीर्तनपावनीम् ॥ २७ ॥ सर्वेषामेव भूतानामाद्यो नारायणः प्रभुः ॥ जगन्मयो जगत्कर्ता चित्स्वरूपो[1] निरंजनः ॥
॥ २८ ॥ सहस्रशीर्षा भगवान्सहस्राक्षः सहस्रपात् ॥ यस्य भासा जगदिदं विभाति सचराचरम् ॥ २९ ॥ तस्मात्परतरं तेजस्तस्मात्पर
तरं तपः ॥ तस्मात्परतरं ज्ञानं योगस्तस्मात्परो न च ॥ ३० ॥ विद्या तस्मादपि परा नास्ति[3] पार्थ नरर्षभ ॥ सर्वेष्वपि च भूतेषु सदा सन्निहितः
प्रभुः ॥ ३१ ॥ सर्वाण्यपि च भूतानि तस्मिन्नेवासते सुखम् ॥ स एव यज्ञो यज्वा च साधनं स्रुक्स्रुवादिकम् ॥ ३२ ॥ फलं फलप्रदाता च तत्सं
प्राप्या गतिस्तथा ॥ वह्नौ प्रणीते पशुना प्रोक्षितेन प्रजुह्वति ॥ ये तं प्रयांति ते यांति गतिं तत्प्रतिपादिताम् ॥ ३३ ॥ कर्मबन्धं पशुं कृत्वा
ज्ञानाग्नौ संप्रवर्तिते ॥ ये जुह्वते तमुद्दिश्य ते तत्सायुज्यभागिनः ॥ ३४ ॥ हरिः सदाशिवो ब्रह्मा महेन्द्रः परमः स्वराट् ॥ सर्वेश्वरस्य तस्यैते
पर्यायाः परिकीर्तिताः ॥ ३५ ॥ समाहितोऽनुसंधत्ते य इदं परमात्मनः ॥ नारायणस्य माहात्म्यं स न याति पुनर्भवम् ॥ ३६ ॥ चिदानन्दमयः
साक्षी निर्गुणो निरुपाधिकः ॥ नित्योऽपि भजते तांतामवस्थां स यदृच्छया ॥ ३७ ॥ पवित्राणां पवित्रं यो ह्यगतीनां परा गतिः ॥ दैवतं देव
तानां च श्रेयसां श्रेय उत्तमम् ॥ ३८ ॥ बोध्यानां बोध्य एकोऽसौ ध्येयानां ध्येय उत्तमः ॥ विनयानां समधिको विनयो नयसंयुतः ॥ ३९ ॥
तेजसां जनकं तेजः प्रकृष्टं तपसां तपः ॥ आधारः सर्वभूतानामनाद्यन्तो जनार्दनः ॥ ४० ॥ तस्येदंभावविज्ञाने[4] मूढा ब्रह्मादयोऽपि च ॥ अजो
गृह्णाति जननं सर्वात्मा हन्ति विद्विषः ॥ ४१ ॥ स्वतन्त्रोऽपि स्वभक्तानां परतन्त्रः प्रवर्तते ॥ स साक्षी कर्मणां देवः सर्वज्ञो गरुडध्वजः ॥ ४२ ॥

१ विश्वरूपः–इ० पा० । २ पुरुषः–इ० पा० । ३ नरर्षभ न विद्यते–इ० पा० । ४ तस्मात्–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अनघं सर्वपापघ्नं शंखतीर्थं विराजते ॥ ४२ ॥ ब्रह्मर्षिनियतावासं सुरगन्धर्वसेवितम् ॥ दर्शनस्नानपानाद्यैरमितानन्ददायकम् ॥ ४३ ॥ तत्रास्ते भगवानीशः शंखेशोनाम फाल्गुन ॥ शंखनाम्ना मुनींद्रेण लिंगरूपं प्रतिष्ठितम् ॥ ४४ ॥ ये तत्र तीर्थे सुस्नाताः पश्यन्ति वृषवाहनम् ॥ दशाश्वमेधजं पुण्यं लब्ध्वा यांति सुरालयम् ॥ ४५ ॥ युक्ता तया व्याघ्रपदाभिधानया गत्वा ततो योजनसंमितां भुवम् ॥ ययौ मुनीन्द्रैर्वृषभाचलांतिकं संसेव्यमाना शुभनिर्मलोदका ॥ ४६ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे श्रीवेंकटाचलमाहात्म्येऽगस्त्यतीर्थादिविविधतीर्थमाहात्म्यवर्णनंनाम चतुस्त्रिंशोऽध्यायः ॥ ३४ ॥ ॥ अथ सुवर्णमुखर्यां कल्यानदीसंगमः ॥ ॥ भरद्वाज उवाच ॥ ॥ सुवर्णमुखरीं तत्र संगता मंगलप्रदा[1] ॥ कल्यानाम नदी पुण्या कालिन्दी जाह्नवीमिव ॥ १ ॥ वृषभाचलसंभूता तीर्थराजविराजिता[2] ॥ नदीनामुत्तमा कल्या कलुषौघविनाशिनी ॥ २ ॥ नानातरुलताव्रातविभूषिततटद्वया ॥ मुनिसंघसुखावासा पुण्याश्रमसमुत्कटा ॥ ३ ॥ द्विजदत्तार्घ्यविलसत्कुशाक्षतलसत्तटा ॥ अप्सरःकुचकस्तूरीपंकक्षालनपंकिला ॥ ४ ॥ दन्तावलकटच्योतन्मदाम्बुसुरभीकृता ॥ विप्रभूपालविततमखयूपशतावृता ॥ ५ ॥ अनाविलजलापूरतोषिताशेषमानवा ॥ एकैवालं परा कर्तुं महानद्योस्तु पातकम् ॥ ६ ॥ तयोः संगतयोः स्तोतुं महिमानं क ईशते ॥ यत्र ब्रह्मशिलानाम सरिन्मध्ये च वर्तते ॥ ७ ॥ अगस्त्यतपसा पश्चाद्गया सांनिध्यमेति च ॥ नदीद्वयजले तत्र स्नाताः पुण्ये कुरूद्वह ॥८॥ मखानां पौण्डरीकाणां शतस्य फलमाप्नुयुः ॥ ब्रह्महत्यादिपापानि समायांति परिक्षयम् ॥ ९ ॥ तत्राभिषेकपूतानां नदीद्वितयसंगमे ॥ सङ्गताभवनाशिन्या कृष्णवेणीव पावनी ॥ १० ॥ ॥ अथ सुवर्णमुखरीतीरस्थितश्रीवेंकटाचलवर्णनम् ॥ ॥ राजते स्वर्णमुखरी कल्यया संगता तदा ॥ ११ ॥ अथोदीच्यां महानद्या योजनार्द्धे विराजते ॥ योजनोत्सेधसहितो विख्यातो वेंकटाचलः ॥ १२ ॥ सर्वेषामेव तीर्थानामाश्रयोऽयं[3] नगोत्तमः ॥ अन्जनानन्तवृषभनीलकेसरिपोत्रिणः ॥ १३ ॥ एतान्युपवनान्यद्रेः स्युर्नारायणवेंकटौ ॥ वराहवपुषा पूर्वं स्वीकृतत्वान्मधुद्विषा ॥ ॥ १४ ॥ वराहक्षेत्रमित्यार्यैः कीर्तितोऽयं महीधरः ॥ सुवर्णमुखरीतीरे विख्याते वेंकटाचले ॥ १५ ॥ निवसत्यच्युतो नित्यमब्धीन्द्रतनयान्वितः॥ तस्मिन्गिरौ श्रिया सार्द्धं वसन्तं वेंकटाधिपम्॥१६॥ सेवन्ते सिद्धगन्धर्वमुनिमानवदानवाः ॥ तस्मिन्विन्यस्तचित्तानां भक्तानां पुरुषोत्तमे ॥१७॥ वांछितान्याशु सिध्यंति नश्यंति विपदोऽर्जुन ॥ ये स्मरंति जगन्नाथं वेंकटाद्रिनिवासिनम् ॥१८॥ निरस्तदोषांस्ते[4] यांति शाश्वतं पदमव्ययम्॥१९॥

१ मंगलास्पदा–इ०पा० । २ तीर्थराजसमाश्रया–इ०पा० । ३ रत्नानामिव संश्रयः–इ०पा० । ४ निरस्तदोषप्रसरा भाजनं ते सुखश्रियाम्–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यदा मकरमंशुमान् ॥ विशेत्तदयनं पुण्यमुत्तरं परिकीर्तितम् ॥ १७ ॥ तस्मिन्दिने ये नियता नद्यां स्नात्वा समाहिताः ॥ पश्यन्ति पार्वतीनाथम
गस्त्येशं सुरार्चितम् ॥ १८ ॥ अग्निष्टोमसहस्रस्य वाजपेयशतस्य च ॥ फलं संप्राप्य मोदन्ते दिवि देवगणार्चिताः ॥ १९ ॥ मृगसंक्रमवेलायां पुरु
षैर्मंगलार्थिभिः ॥ अवश्यमेव कर्तव्यमगस्त्येशस्य दर्शनम् ॥ २० ॥ ॥ अथ देवर्षिपितृतीर्थमाहात्म्यम् ॥ ॥ ऐशान्यां तस्य तीर्थस्य देशे क्रोश
मितेऽर्जुन ॥ अस्ति तीर्थत्रयं ख्यातं देवर्षिपितृनामभिः ॥ २१ ॥ देवर्षिपितरस्तत्र मुनिना तेन पूजिताः ॥ प्रददुर्हृष्टमनसः सर्वान्समभिवाञ्छि
तान् ॥ २२ ॥ तदा देवर्षिपितृभिरिदं तीर्थत्रयं क्रमात् ॥ अस्मन्नामभिरीडयं स्यादित्युक्तं तस्य सन्निधौ ॥ २३ ॥ तस्मिंस्तीर्थत्रये ये तु स्नात्वा
विहिततर्पणाः ॥ ऋणत्रयविनिर्मुक्तास्ते यान्ति दिवमक्षयाम् ॥ २४ ॥ ॥ अथ वेणासुवर्णमुखरीसंगमवर्णनम् ॥ ॥ ततः प्रागुत्तरक्षोण्यां
योजनद्वयसीमनि ॥ प्राप्ता सुवर्णमुखरीं वेणानाम महानदी ॥ २५ ॥ समुदग्ररयाघातनिपातिततटद्रुमा ॥ कुल्यानिर्गतवाःपूरसमाप्लावितकानना
॥ २६ ॥ उत्तुङ्गपुलिनोत्संगखेलत्कोककुलाकुला ॥ अम्बुजामोदलोलालिमालालीलारवान्विता ॥ २७ ॥ अतिक्रम्य समुत्तुंगाननेकान्धरणीध
रान् ॥ प्रभूततोयरुचिरा सुवर्णमुखरीं गता ॥ २८ ॥ नदीद्वयव्यतिकरे कृतस्नाना यथाविधि ॥ दशानामश्वमेधानामखण्डं प्राप्नुयुः फलम् ॥ २९ ॥
संगता वेणया पुण्या सुवर्णमुखरी नदी ॥ गिरिदुर्गममार्गेण ययावुत्तरवाहिनी ॥ ३० ॥ मध्यगेन महीध्राणां मार्गेण विषमेण सा ॥ गत्वा विरेजे
तटिनी योजनानां चतुष्टयम् ॥ ३१ ॥ पूर्वतस्तस्य देशस्य विषये सार्धयोजने ॥ उदक्कूले महानद्याः प्राग्वाहिन्या मनोहरे ॥ ३२ ॥ अगस्त्येश्वर
नामास्ते ख्यातं लिंगं पुरद्विषः ॥ स्मरणं देवमर्त्यानां समस्ताघनिवारणम् ॥ ३३ ॥ तत्र स्नात्वा महानद्यां ये नरा नियतेन्द्रियाः ॥
पश्यन्ति पार्वतीनाथमगस्त्येन प्रतिष्ठितम् ॥ ३४ ॥ अनेकैः पूर्वजननैरर्जितं पापसञ्चयम् ॥ ते निरस्य सुरावासे मोदन्ते कालमक्षयम् ॥
॥ ३५ ॥ ततः सोदङ्मुखी भूत्वा सुवर्णमुखरी ययौ ॥ योजनार्धमिदं देशं तीर्थसंघसमन्विता ॥ ३६ ॥ ॥ अथ सुवर्णमुखर्या व्याघ्रपदाह्वय
नदीसंगमः ॥ ॥ तस्मिन्देशे तु हिन्तालतालसालमनोरमे ॥ गता सुवर्णमुखरीं नदी व्याघ्रपदाह्वया ॥ ३७ ॥ दुर्वारभूरिदुरितविनिवारणपे
शला ॥ नीरंध्रतीरवानीरवनमण्डलमंडिता ॥ ३८ ॥ सिद्धगंधर्वललनालीलागाहनशालिनी ॥ तपस्विकन्यानिःक्षिप्तबलिपुष्पविराजिता ॥
॥ ३९ ॥ हंसकारण्डवक्रौञ्चकुलकोलाहलाकुला ॥ प्राक्प्रवाहा समागत्य शैलान्तरगताध्वना ॥ ४० ॥ संगमे सरितोस्तत्र कृतस्नाना
नरोत्तमाः ॥ समग्रमश्वमेधानां दशानां प्राप्नुयुः फलम् ॥ ४१ ॥ ॥ अथ शंखतीर्थवर्णनम् ॥ ॥ तत्र व्याघ्रपदाख्यायास्तटे लोकमलापहे ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पापेभ्यो याति ब्रह्म सनातनम् ॥ ६७ ॥ जन्मान्तरकृतैर्नूनमिह जन्मकृतैरपि ॥ महापापोपपापौघैर्मुच्यते नात्र संशयः ॥ ६८ ॥ ब्रह्माद्याः सकला
देवाः सनकाद्या महर्षयः ॥ चराचराणि भूतानि प्रीतिं यांति न संशयः ॥ ६९ ॥ कृत्वा व्रतमिदं पुण्यमगस्त्यस्य च सन्मुनेः ॥ प्रीत्यर्थं भोजये
द्विप्रान्यथाशक्ति सदक्षिणम् ॥ ७० ॥ तस्मिन्कर्मणि चाशक्तो यथाशक्ति महीसुरान् ॥ स्वर्णधान्यादिदानेन तोषयेद्भक्तिसंयुतः ॥ ७१ ॥ तिथिं
न वितथीकुर्यात्तां यत्नेन समाचरेत् ॥ यत्किञ्चिदपि चावश्यं कर्म कुर्याच्च पूरुषः ॥ ७२ ॥ महामुनेरगस्त्यस्य परिपक्वं तपःफलम् ॥ नदी सुवर्ण
मुखरी कीर्तनीया सुरासुरैः ॥ ७३ ॥ एवं ते कथितः सम्यङ्महानद्याः समुद्भवः ॥ प्रभावश्च तदाचक्ष्व यद्भूयः श्रोतुमिच्छसि ॥ ७४ ॥
इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे वेंकटाचलमाहात्म्ये सुवर्णमुखरीप्रभावप्रशंसानाम त्रयस्त्रिंशो
ऽध्यायः ॥ ३३ ॥ ॥ अथागस्त्यतीर्थागस्त्येश्वरयोः प्रभावः ॥ ॥ अर्जुन उवाच ॥ ॥ श्रोत्राञ्जलिभ्यां पीत्वापि भवद्वाक्यामृतं मुहुः ॥
मनो नोपैति मे तृप्तिं भूयः श्रवणकाङ्क्षया ॥ १ ॥ क्रियासमभिहारो मे त्वद्वाक्याकर्णनैषिणः ॥ मनः खेदाय मा भूत्ते करुणाभरितात्मनः ॥ २ ॥
इदानीं श्रोतुमिच्छामि नद्यामस्यां महामुने ॥ कुत्र कुत्र समर्थानि तीर्थान्यघनिबर्हणे ॥ ३ ॥ काःकाः पुण्यतरंगिण्यः सङ्गता अनयामुने ॥ कुत्र
स्नानेन कृत्ताघा नोपयांति यमाद्भयम् ॥ ४ ॥ हराच्युतादिदेवानां पुण्यान्यायतनानि च ॥ यानियानि च पुण्यानि तिष्ठन्त्यस्यास्तटद्वये ॥
॥ ५ ॥ तेषु क्षेत्रेषु मनुजैर्यत्फलं समवाप्यते ॥ विहितैर्विधिवत्स्नानदानादिशुभकर्मभिः ॥ ६ ॥ सोपाख्यानमिदं सर्वं वेदितं वेदवित्तम ॥ संजाता
महती प्रीतिर्विस्तार्याचक्ष्व मे क्रमात् ॥ ७ ॥ ॥ भरद्वाज उवाच ॥ ॥ यत्पृष्टं भवता पार्थ क्रमाद्विस्तार्य कथ्यते ॥ आरभ्यागस्त्यतीर्थन्द्वादस्या
स्तीर्थौघवैभवम् ॥ ८ ॥ अखण्डज्ञानरूपेण सर्वलोकहितैषिणा ॥ सुरासुराणां संभाव्येनागस्त्येन महात्मना ॥ ९ ॥ वसुधामवतीर्णायां प्रथमं तद्ध
राधरात् ॥ स्नात्वा यत्र महानद्यां संप्राप्नोति कृतार्थताम् ॥ १० ॥ अगस्त्यतीर्थमित्युक्तं पावनं तज्जगत्त्रये ॥ तत्र स्नानेन शुद्धिः स्यान्महापातकि
नामपि ॥ ११ ॥ अनेकजन्माचरितमहापातकसंहतिम् ॥ निरस्य दिवि मोदन्ते तत्र स्नानरता जनाः ॥ १२ ॥ ये तत्र तीर्थे यतिनः कृतस्नाना
यतेन्द्रियाः ॥ गोभूतिलहिरण्यादिमहादानानि कुर्वते ॥ १३ ॥ ते प्राप्नुवन्ति संपूर्णं गंगाद्वारे समाहितैः ॥ विहितानां शतगुणं दानानां फलमर्जुन॥
॥ १४ ॥ अत्रास्ति भगवानीशः ख्यातोऽगस्त्येशसंज्ञया ॥ स्थापितोऽगस्त्यमुनिना लोकानन्दविधायिना ॥ १५ ॥ स्नात्वा तस्यां महानद्यां
तल्लिंगं पूजयन्ति ये ॥ दशानामश्वमेधानां फलं संप्राप्नुवंति ते ॥ १६ ॥ ॥ अथ सुवर्णमुखरीस्नानकालनिर्णयः ॥ ॥ धनूराशिं परित्यज्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शिवापेक्षी सुवर्णमुखरीं शुभाम् ॥ ४१ ॥ अगस्त्याचलसंभूतां दक्षिणोदधिगामिनीम् ॥ समस्तपापहन्त्रीं त्वां सुवर्णमुखरीं श्रये ॥ ४२ ॥ महा पातकविप्लुष्टं गात्रं मम तवोदकैः ॥ क्षालयामि जगद्धात्रि श्रेयसा योजयस्व माम् ॥ ४३ ॥ इति सूक्तद्वयं सम्यगुच्चार्य नियतो नरः ॥ सुवर्ण मुखरीतोये स्नात्वा शुद्धः प्रमोदते ॥ ४४ ॥ ब्रह्मणा निर्मिता पूर्वमगस्त्येन समाहृता ॥ स्वयं मन्दाकिनी मूर्ता सुवर्णमुखरी वरा ॥ ४५ ॥ एवंप्रभावा दिव्येयं कीर्तनीया शुभार्थिभिः ॥ मनसा भक्तियुक्तेन स्नातव्या शुभकांक्षिभिः ॥ ४६ ॥ सोमसूर्योपरागेषु स्नानदानादिकं कृतम् ॥ स्यादमेयफलं पार्थ सुवर्णमुखरीतटे ॥ ४७ ॥ संक्रान्तावयने पुण्ये व्यतीपातेऽथ वासरे ॥ सुवर्णमुखरीस्नानं कुलकोटिं समुद्धरेत् ॥ ४८ ॥ जन्मर्क्षे जन्मदिवसे सुवर्णमुखरीजले ॥ स्नात्वा विधिवदाप्नोति क्षेमारोग्यसुखश्रियः ॥ ४९ ॥ दुःस्वप्नविघ्नजं भूतग्रहदुःस्थानजं तथा ॥ सुवर्ण मुखरीतोये स्नात्वा तरति किल्बिषम् ॥ ५० ॥ सुवर्णमुखरीतीरे गोपादप्रमितां भुवम् ॥ दत्त्वा सर्वमहीदानाद्यत्फलं तदवाप्नुयात् ॥ ५१ ॥ धेनुं सवस्त्रालंकारां सुवर्णमुखरीतटे ॥ दत्त्वा विप्राय विधिवद्याति ब्रह्म सनातनम् ॥ ५२ ॥ पुण्यकालेषु दानानि विधेयान्यखिलान्यपि ॥ इहामुत्र फलप्राप्त्यै सुवर्णमुखरीतटे ॥ ५३ ॥ जपो होमस्तपो दानं पितृकर्म सुरार्चनम् ॥ कृतं भवेच्छतगुणं सुवर्णमुखरीतटे ॥ ५४ ॥ अन्यत्ते कथयिष्यामि विधेयं व्रतमुत्तमम् ॥ सुवर्णमुखरीतीरे प्रतिवर्षं सुखार्थिभिः ॥ ५५ ॥ मेघकाले रविकरैस्तिरोधानमुपागतः ॥ यदोदेति मुनिः श्रीमान्मित्रावरुणनन्दनः॥ ५६ ॥ तस्मिन्दिने ये नियताः स्नानमस्यां प्रकुर्वते ॥ तैः कल्पं च सुरावासे स्थीयते कुरुनन्दन ॥ ५७ ॥ तदा गस्त्यस्य यद्रूपं सुवर्णेन विनिर्मितम् ॥ विधिना ददते पार्थ ते यांति ब्रह्म शाश्वतम् ॥ ५८ ॥ ॥ अर्जुन उवाच ॥ ॥ विधिना केन कर्तव्यं व्रतमेतन्महामुने ॥ तन्ममाचक्ष्व सकलं जिज्ञासोस्तु महात्मनः ॥ ५९ ॥ ॥ अथागस्त्यप्रतिमादानविधिः ॥ ॥ भरद्वाज उवाच ॥ ॥ अग स्त्यस्योदयदिनं ज्ञात्वा नियतमानसः ॥ स्वशक्त्या कारयेद्रूपं तस्य हेम्ना महामुनेः ॥ ६० ॥ सुवर्णभास्वरच्छायं जटाबन्धमनोहरम् ॥ दधानं करपद्माभ्यामक्षमालां कमण्डलुम् ॥ ६१ ॥ वसानं मृदुलं वल्कं मृगचर्मोत्तरीयकम् ॥ सौम्यं भस्मांकरुचिरं रुद्राक्षकृतभूषणम् ॥ ६२ ॥ एवं विधाय तद्रूपं स्नात्वा नियतमानसः ॥ आचार्यं गन्धपुष्पाद्यैरलङ्कृत्य यथाविधि ॥ ६३ ॥ शालेयतण्डुलानां तामाढकस्योपरि स्थिताम् ॥ वस्त्र द्वयसमायुक्तां प्रतिमां प्रतिपूजयेत् ॥ ६४ ॥ विन्ध्यसंस्तम्भनो वार्धिचुलकीकृतिपेशलः ॥ ब्रह्मादिसर्वदेवानां तेजसा सुप्रकाशितः ॥ ६५ ॥ अग स्त्यः कुम्भसंभूतो देवासुरनमस्कृतः ॥ प्रीतिमाप्नोतु महतीं दानेनानेन मे प्रभुः ॥ ६६ ॥ इमं मन्त्रं समुच्चार्य धारापूर्वं सदक्षिणम् ॥ दत्त्वा विमुक्तः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बिभ्रती संभृतमंगलानि स्वादून्यपंकान्यतिनिर्मलानि ॥ सुधोपमानानि सुरेन्द्रसूनोः पयांसि पापप्रतिघातुकानि ॥ १७ ॥ अगस्त्यशैलात्सम
वाप्तजन्मा नीता भुवं कुम्भसमुद्भवेन ॥ प्रशस्ततीर्थौघविराजमाना समाययौ दक्षिणवारिराशिम् ॥ १८ ॥ शीकराक्षतविन्यासै रत्नदीपार्पणैरपि ॥
प्रत्युद्ययुस्तामम्भोधेर्वीचयोऽभिमुखागताः ॥ १९ ॥ तरंगहस्तैरालिंग्य संभाव्यैनां समागताम् ॥ चकार सरितां नाथः प्रियमाघोषभाषणैः ॥
॥ २० ॥ प्राप्तायामनुकूलायां तदा तस्यामपांनिधेः ॥ प्रहृष्टेन तरंगेण जीवनं ववृधेतराम् ॥ २१ ॥ इत्थं संसृज्य सरितमगस्त्यस्ता
मुदन्वता ॥ स्तुत्वा ययौ समामन्त्र्य कृतकृत्यो यदृच्छया ॥ २२ ॥ ॥ अर्जुन उवाच ॥ ॥ त्वयैष कथितो ब्रह्मन्महानद्याः समुद्भवः ॥
अस्याः प्रभावं भगवन्निदानीं श्रोतुमुत्सहे ॥ २३ ॥ ॥ अथ भरद्वाजवर्णितसुवर्णमुखरीमाहात्म्यम् ॥ ॥ भरद्वाज उवाच ॥ ॥
अहो निबर्हणं सर्वश्रेयसामेककारणम् ॥ शृणु माहात्म्यमस्यास्ते कथयिष्यामि पाण्डव ॥ २४ ॥ पाश्चात्त्यं जन्म संप्राप्य ज्ञानिनां कर्मणः क्षये ॥
सुवर्णमुखरीस्नानं सिद्ध्येद्ब्रह्मत्वकारणम् ॥ २५ ॥ एतां सुवर्णमुखरीं योजनानां शतैरपि ॥ स्मृत्वा मनुष्यः पापेभ्यो मुच्यते नात्र संशयः ॥
॥ २६ ॥ निःक्षिप्तमस्थि जन्तूनां सुवर्णमुखरीजले ॥ सोपानतां समायाति ब्रह्मलोकाधिरोहणे ॥ २७ ॥ स्मरन्तः स्वर्णमुखरीं यत्र कुत्रापि
मानवाः ॥ तोयान्तरेषु स्नात्वापि लभन्ते फलमुत्तमम् ॥ २८ ॥ तावदेवाभिभूयन्ते नराः पातककोटिभिः॥ सुवर्णमुखरीस्नानं यावत्तल्लभ्यते शुभ
म् ॥ २९ ॥ दिव्यान्तरिक्षभौमानि तीर्थानि निजसिद्धये ॥ स्मरन्त्यहरहः प्रातः सुवर्णमुखरीं नदीम् ॥ ३० ॥ अगस्त्याचलसंभूता दक्षिणोदधि
गामिनी ॥ पापानि स्वर्णमुखरी स्मरणादेव नाशयेत् ॥ ३१ ॥ सुवर्णमुखरीस्नानलोलुपेनान्तरात्मना ॥ वाञ्छंति मर्त्यतामेव देवाः
शक्रपुरोगमाः ॥ ३२ ॥ सुवर्णमुखरीतोयपुष्टसस्यान्नभोजिनः ॥ न लिप्यन्ते महापापैर्दुर्भोजनशतोद्भवैः ॥ ३३ ॥ अपि निष्कमितं पीतं
सुवर्णमुखरीजलम् ॥ नाशयेदद्रितुल्यानि ह्याशु पापानि देहिनाम् ॥ ३४ ॥ प्राप्याऽपि मानुषं जन्म सुवर्णमुखरीजले ॥ ये वा स्नानं न
कुर्वन्ति तेषां जन्म निरर्थकम् ॥ ३५ ॥ सुवर्णमुखरीस्नानं यदेकं विधिना कृतम् ॥ जाह्नवीस्नानकोटीनां समं भवति पर्वसु ॥ ३६ ॥ गोविंद
इव देवेषु नक्षत्रेष्विव चन्द्रमाः ॥ नरेष्विव महीपालो भूरुहेष्विव कल्पकः ॥ ३७ ॥ महाभूतेष्विव वियन्मायेवाखिलशक्तिषु ॥ गायत्रीव च
मन्त्रेषु वज्रं देवायुधेष्विव ॥ ३८ ॥ तत्त्वेष्विवात्मनस्तत्त्वं रुद्राध्यायो यजुष्ष्विव ॥ अनन्त इव नागेषु हिमाचल इवाद्रिषु ॥ ३९ ॥ पोत्रिक्षेत्र
मिव क्षेत्रेष्विन्द्रियेष्विव मानसम् ॥ नदीष्वपि च सर्वासु सुवर्णमुखरी वरा ॥ ४० ॥ नित्यं स्मरेन्नमस्कुर्यात्कीर्तयेन्मनसार्चयेत् ॥ शुद्धिक्षेम

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

म्बमवलोक्य सः ॥ पुनर्गाढतरां निष्ठां प्रपेदे लोकभीषणाम् ॥ ३० ॥ निगृह्य मानसीं वृत्तिं निराहारो जितेन्द्रियः ॥ अविज्ञातबहिर्वृत्तिस्तस्थौ पाषाणवत्तदा ॥ ३१ ॥ एवं तपस्यतस्तस्य सर्वाङ्गेषु हुताशनः ॥ अभ्रंलिहो ज्वलज्ज्योतिर्निश्चक्राम भयङ्करः ॥३२॥ ततोऽद्भुतशिखाजालैरावृताः सर्वतो दिशः ॥ समुदग्रभयोद्विग्ना जनौघाः परिचुकुशुः ॥ ३३ ॥ तदा तथाविधं घोरं जगत्संक्षोभमागतम् ॥ देवा विज्ञापयामासुर्नमस्कृत्याब्जजन्मने ॥ ३४ ॥ ॥ अथागस्त्याश्रमं प्रति चतुर्मुखागमनम् ॥ ॥ तानाश्वास्य ततो ब्रह्मा सिद्धगन्धर्वसेवितः ॥ प्रादुरासीत्कुम्भभुवः पुरोभागे तपस्यतः ॥ ३५ ॥ तमागतं समालोक्य ब्रह्माणं परमं द्विजः ॥ प्रणम्य विविधैः स्तोत्रैस्तोषयामास तन्मनाः ॥ ३६ ॥ ततस्तं विनयानम्रमगस्त्यं वीक्ष्य पद्मभूः ॥ प्रसादसुमुखो भूत्वा पूतां गिरमुपाददे ॥ ३७ ॥ ॥ ब्रह्मोवाच ॥ ॥ परितुष्टोऽस्मि तपसा दुश्चरेण तवानघ ॥ वृणीष्व यद्यदिष्टं ते तत्तद्दास्यामि सुव्रत ॥ ३८ ॥ ॥ अगस्त्य उवाच ॥ ॥ तव प्रसादात्सकलमुपपन्नं मम प्रभो ॥ संप्रयच्छसि चेत्कामं याचे निःशंकया धिया ॥ ३९ ॥ नदीहीनमिमं देशं दृष्ट्वा खिद्यति मे मनः ॥ अर्थावबोधरहितं श्रुतिपाठमिवाधिकम् ॥ ४० ॥ उर्वीं पावयितुं दक्षां रक्षितुं च महानदीम् ॥ प्रसादं कुरु देवेश ममेष्टमिदमेव हि ॥ ४१ ॥ ॥ अथागस्त्यप्रार्थनया गङ्गां प्रति चतुर्मुखचोदना ॥ ॥ श्रीभरद्वाज उवाच ॥ ॥ अगस्त्यस्य वचः श्रुत्वा भूयादेवमिति ब्रुवन् ॥ सस्मार मनसा ब्रह्मा सुरवर्त्माश्रयां नदीम् ॥ ४२ ॥ अथोपेत्य वियद्गङ्गा पुरस्तात्परमेष्ठिनः ॥ अतिष्ठन्मुकुटन्यस्तप्रशस्ताञ्जलिभासुरा ॥ ४३ ॥ स्वशासनात्समायातां विनयानतमस्तकाम् ॥ तां सर्वजगतां धात्रीमिदं वचनमब्रवीत् ॥ ४४ ॥ ॥ ॥ ब्रह्मोवाच ॥ ॥ गंगे मयानुशास्यासि कार्ये लोकोपकारके ॥ तवापि लोकरक्षायां ममेव नियता स्थितिः ॥ ४५ ॥ देशे नदीविहीनेऽत्र प्रवर्तयितुमापगाम् ॥ हितार्थं सर्वलोकानां कुम्भजन्मा समीहते ॥ ४६ ॥ तस्मात्त्वमवतीर्योर्वीं स्वांशेनैकेन भूजनान् ॥ पुनीहि गच्छ वसुधामेतद्दर्शितवर्त्मना ॥ ४७ ॥ भूलोके संप्रवृत्ते तु प्रवाहे सिद्धिकांक्षिणः ॥ सेविष्यन्ते सुरवरा मुनिवर्याश्च संततम् ॥ ४८ ॥ नदीषूत्तमतां याहि त्राहि त्वत्संश्रयाज्जनान् ॥ कुरु प्रियमगस्त्यस्य गच्छ भद्रे यथासुखम् ॥ ४९ ॥ ॥ भरद्वाज उवाच ॥ ॥ इत्युक्त्वान्तर्दधे ब्रह्मा तया नद्या च तेन च ॥ प्रणामपूजनस्तोत्रैर्विशेषैरभिनन्दितः ॥ ५० ॥ ॥ अथागस्त्यसमीपे स्वांशत्वेन गंगाकृतनद्युत्पत्त्यभ्युपगमः ॥ ॥ अथ गंगा मुनिपतेः पुरस्तात्स्वांशसंभवाम् ॥ दिव्यतेजोमयीं मूर्तिं दर्शयित्वा वचोऽब्रवीत् ॥ ५१ ॥ ॥ गंगोवाच ॥ ॥ मदीयांशोऽयमवनीं संप्राप्य मुनिवल्लभ ॥ पूरयिष्यति तेऽभीष्टं नदीरूपं समाश्रितः ॥ ५२ ॥ ॥ भरद्वाज उवाच ॥ ॥ इत्युक्त्वा सिद्धवाहिन्यां गतायां तत्प्रयुक्तया ॥ गन्तव्यं वर्त्मना केने

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्युक्तो मुनिरुवाच ताम् ॥ ९३ ॥ ॥ अगस्त्य उवाच ॥ ॥ गच्छन्पुरस्तात्कल्याणि त्वदीयगमनोचितम् ॥ अहं प्रदर्शयिष्यामि मार्गं त्वं मामनुव्रज ॥ ९४ ॥ इत्युक्ता मुनिना तेन संप्रहृष्टा तवानघ ॥ यदिष्टं तत्करिष्येऽहमिति प्रोवाच सा शुभा ॥ ९५ ॥ ॥ अथ मुनिरवतार्य तां नगेन्द्राद्धृततटिनीतनुमभ्रसंगिशृङ्गात् ॥ मुदिततरमना ययौ पुरस्तात्तदभिमतां पदवीं प्रदर्शयन्सः ॥ ९६ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे श्रीवेंकटाचलमाहात्म्ये श्रीसुवर्णमुखरीमाहात्म्यप्रशंसायां सुवर्णमुखर्या विर्भाववर्णनंनाम द्वात्रिंशोऽध्यायः ॥ ३२ ॥ ॥ छ ॥ ॥ अथ सुवर्णमुखरीं प्रति शक्रादिस्तुतिः ॥ ॥ भरद्वाज उवाच ॥ ॥ तदा दिव्यविमानस्थाः शक्रमुख्या दिवौकसः ॥ अगस्त्यमनुयान्तीं तामनुजग्मुर्महापगाम् ॥ १ ॥ नवावतारां तां दिव्यां सर्वे च मुनिपुंगवाः ॥ कृताञ्जलिपुटाः स्तोत्रैरनुयाताः सिषेविरे ॥ २ ॥ सिद्धचारणगन्धर्वाः संभूताश्च सहस्रशः ॥ तां नदीं तं मुनीन्द्रं च प्रशशंसुः शुभैः स्तवैः ॥ ३ ॥ सुधोपमानममलं दिष्ट्या लब्धमिदं जलम् ॥ इत्यौत्सुक्यरसायत्ता ननन्दुर्धरणीजनाः ॥ ४ ॥ तदा निदेशाद्देवस्य पद्मयोनेः समीरणः ॥ शृण्वतां सर्वदेवानामिदं वचनमब्रवीत् ॥ ५ ॥ ॥ अथ वायुकथितसुवर्णमुखरीनामनिष्पत्तिः ॥ ॥ वायुरुवाच ॥ ॥ सुवर्णमिव लोकानां भागधेयादियं नदी ॥ नीता भुवमगस्त्येन मुखरीकृतदिङ्मुखा ॥ ६ ॥ तस्माद्यास्यति विख्यातिं सर्वलोकाभिनन्दिताम् ॥ सुवर्णमुखरीनाम्ना धाम्नि कैवल्यसंपदः ॥ ७ ॥ एषा सुवर्णमुखरी सरित्सु सकलास्वपि ॥ विशिष्टा सेवनीया च ब्रह्मणो वचनं त्विदम् ॥ ८ ॥ ॥ अथागस्त्यकृतस्वानीतसुवर्णमुखरीमहिमानुवर्णनम् ॥ ॥ भरद्वाज उवाच ॥ ॥ श्रुत्वेत्थं पवनेनोक्तं वचनं कुम्भसम्भवः ॥ तुतोष विस्मयाक्रान्तः स्वान्तःपुलकितांगकः ॥ ९ ॥ एवमेषा दिव्यनदी स्नानपानादिकल्पनैः ॥ सौख्यावहा मनुष्याणां प्रतिष्ठामगमद्भुवि ॥ ॥ १० ॥ आज्ञया पद्मगर्भस्य तटिन्याकाशवाहिनी ॥ सुवर्णमुखरीनाम्ना पुनात्यात्मैकसंश्रयान् ॥ ११ ॥ बहून्गिरीन्द्रान्वनमण्डलं च देशानने कान्सरिदुत्तमेयम् ॥ क्रमादतिक्रम्य निषेव्यमाणा महानदीभिर्गिरिसंभवाभिः ॥ १२ ॥ रोगाहतानामधिकातुराणामनामयैकप्रतिपादकानि ॥ अन्तर्बहिः संभृतभूरितापनिवारणानि प्रियकारणानि ॥ १३ ॥ विहारलोलद्विरदप्रकाण्डशुण्डामहाघातरयोत्थितेन ॥ पुष्पोपहारं पृषतोत्करेण हर्षाद्ददातीव दिवाकरस्य ॥ १४ ॥ सौगंधिकाम्भोरुहकैरवाणां सौरभ्यसंवासितदिङ्मुखानाम् ॥ द्विरेफभाग्यैकनिकेतनानामाधारभूतान्प्रतिनिर्मलानि ॥ १५ ॥ लीलावगाहोत्सुकनाकनारीसीमन्तसिन्दूररजोऽरुणानि ॥ तत्केशपाशच्युतपारिजातप्रसूनगन्धैरधिवासितानि ॥ १६ ॥ सा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दक्षिणाहीना ज्योत्स्नाहीनेव शर्वरी ॥ ४ ॥ न विभाति नदीहीना पृथ्वीयं भूसुरोत्तम ॥ प्रवर्तय नदीं काञ्चिल्लोकानां हितकाम्यया ॥ ५ ॥
अगाधदुरितोद्भूतभीतिमोचनशालिनीम् ॥ हितमेतत्सुरौघानामेतन्मुनिवरार्थितम् ॥ ६ ॥ भद्रमेतन्मनुष्याणामेतदाचर सुव्रत ॥ देवानामृषि
वर्याणां भूजनानां हितावहाम् ॥ ७ ॥ पापपंकप्रशमनीं प्रवर्तय महानदीम् ॥ ८ ॥ ॥ श्रीभरद्वाज उवाच ॥ ॥ तदाकर्ण्य वचो विप्रः क्षणं
चिन्तापरायणः ॥ समाप्य देवतापूजां बहिर्वेद्यामुपाविशत् ॥ ९ ॥ आनाययामास तदा तदाश्रमगतान्मुनीन् ॥ तेषामकथयच्चासौ दिव्यवाणीरितं
वचः ॥ १० ॥ तदद्भुतमुपश्रुत्य मुनयो हृष्टमानसाः ॥ ११ ॥ अभिवन्द्य मुनिश्रेष्ठं मैत्रावरुणिमब्रुवन् ॥ १२ ॥ ॥ अथ सुवर्णमुखर्युत्पाद
नायागस्त्यं प्रति महर्षिप्रार्थना ॥ ॥ मुनय ऊचुः ॥ ॥ आश्चर्याणां महाश्चर्यं मंगलानां च मंगलम् ॥ तवैव शोभते दिव्यं त्वच्चरित्रं कृपानिधे ॥
॥ १३ ॥ तव हुंकारमात्रेण भ्रष्टो देवाधिराज्यतः ॥ नहुषः कीटतां प्राप ततश्चित्रं न विद्यते ॥ १४ ॥ समावृतधराचक्रः कल्लोलाताडिताम्बरः ॥
किं न्वतो विद्यते चित्रं यदब्धिश्चुलकीकृतः ॥ १५ ॥ सूर्यमार्गनिरोधार्थं प्रवृत्तो विन्ध्यभूधरः ॥ त्वया प्रशांतिं गमितः किं न्वतो विद्यते
परम् ॥ १६ ॥ तवाद्भुतानि कर्माणि कः स्तोतुं प्रभवेद्भुवि ॥ मन्महाभाग्ययोगात्त्वं प्राप्तोऽसीति शरीरिताम् ॥ १७ ॥ वयं कृतार्थाः संजातास्त्रै
लोक्ये यन्महामुने ॥ निवसामोऽत्र भवता सनाथा ह्याश्रमस्थले ॥ १८ ॥ वर्ण्यो हि याम्यतो दूरे विषयोऽयं द्विजोत्तम ॥ समस्तवस्तुपूर्णोऽपि
नदीहीनो न राजते ॥ १९ ॥ किमलब्धनदीस्नानेनाऽमुना हतजन्मना ॥ अनदीके जनपदे वासादजननं वरम् ॥ २० ॥ परिपाकस्तु भाग्यानाम
स्माकं समुपस्थितः ॥ यदादिष्टोसि विबुधैः प्रवर्तय महानदीम् ॥ २१ ॥ प्रवर्तितायां देशेस्मिन्महानद्यां तवानघ ॥ कदा नु खलु यास्यामः
कृतस्नानाः कृतार्थताम् ॥ २२ ॥ किं वितर्केण बहुना प्रयत्नः क्रियतां ध्रुवम् ॥ समानेतुं जगद्वन्द्यां शरण्यां सरिदुत्तमाम् ॥ २३ ॥
॥ ॥ श्रीभरद्वाज उवाच ॥ ॥ स तेषां वचनं हृद्यं मानयित्वा महाद्विजः ॥ समानेष्यामि सरितमिति चक्रे विनिश्चयम् ॥ २४ ॥
॥ ॥ अथ सुवर्णमुखर्याविर्भावायागस्त्यकृततपःप्रकारः ॥ ॥ मुनीश्वरैरनुज्ञातस्तानभ्यर्च्य सुरानपि ॥ विशेषपूजां विधिवद्विधाय पुरवि
द्विषः ॥ २५ ॥ अंगीकृत्य व्रतं गाढं बहुलक्लेशदुःसहम् ॥ अनन्यसुलभं यत्नात्स चकार महत्तपः ॥ २६ ॥ घोरेषु घर्मदिवसेष्वन्तरस्थो
हविर्भुजाम् ॥ चतुर्णां सवितृन्यस्तदृष्टिर्नापययौ क्रमम् ॥ २७ ॥ वार्षिकेषु दिनेषूग्रवायुसम्पातदुःसहैः ॥ आसारैस्ताड्यमानोऽपि नो
द्वेगमगमद्धृदि ॥ २८ ॥ हेमन्ते समये तिष्ठन्कण्ठदघ्नेषु वारिषु ॥ जपध्यानपरो भूत्वा न किञ्चिद्विकृतिं ययौ ॥ २९ ॥ ततः समीहितार्थस्य विल

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

तावद्यावत्पातालमास्थिता ॥१८॥ निर्भारलाघवादस्माद्भृशं दक्षिणगामिनी ॥ ऊर्ध्वं गता च तं दृष्ट्वा सर्वेषामभवद्भयम् ॥१९॥ ज्ञात्वा तां विकृतिं
भूमेर्दृष्ट्वागस्त्यं महेश्वरः ॥ इत एहि महाप्राज्ञेत्युक्त्वा वचनमब्रवीत् ॥ २० ॥ आगतेषु समस्तेषु भूतेष्वत्र वसुन्धरा ॥ तद्भारेण समाक्रान्ता विकृतिं
समुपागता ॥ २१ ॥ तद्भुवः साम्यकरणे त्वमर्हसि महामते ॥ ऋते त्वामत्र हि त्वत्तः परेणैतत्कथं भवेत् ॥ २२ ॥ मत्तेजःसंभवो हि त्वं लोकसंर
क्षणोद्यतः ॥ तस्मान्मद्वचनाद्वत्स भुवमेतां समीकुरु ॥ २३ ॥ मत्पाणिग्रहणाल्लोककौतुकायत्तबुद्धिषु ॥ आगतेषु समस्तेषु स्थातव्यं भवताऽपि च
॥ २४ ॥ त्वं न तिष्ठसि चेदत्र न कश्चिद्विकृतिं भुवः ॥ अपनेतुं हि शक्नोति तद्गन्तव्यं त्वयानघ ॥ २५ ॥ इमां गिरिसुतापाणिग्रहकल्याणभासु
राम् ॥ मूर्तिं प्रदर्शयिष्यामि यत्र तिष्ठसि तत्र ते ॥ २६ ॥ ॥ अथ भूसाम्यकरणायागस्त्यस्य हिमाद्रेर्दक्षिणदिग्गमनम् ॥ ॥ इत्युक्त्वा तं परि
ष्वज्य विससर्ज महेश्वरः ॥ तथेति तं प्रणम्यासौ ययौ याम्यां दिशं मुनिः ॥ २७ ॥ विन्ध्याद्रिं समतिक्रम्य दक्षिणामागते दिशम् ॥ अगस्त्ये
मुनिशार्दूले मही साम्यमुपाययौ ॥ २८ ॥ भुवोऽपनीय विकृतिं स्थितं कलशजं मुनिम् ॥ तुष्टुवुर्हर्षतरलाः सुरगन्धर्वकिन्नराः ॥ २९ ॥ स ददर्श
ततो गत्वा कश्चिच्छैलं समुन्नतम् ॥ विततैर्धरणीं पादैर्धृत्वा संस्थितमग्रतः ॥ ३० ॥ महौषधीनां रत्नानामशेषाणां स्वयंभुवा ॥ अखण्डतेजोदी
प्तानां विनिर्मितमिवाकरम् ॥ ३१ ॥ समुन्नतैर्यः शिखरैर्निपतद्व्योम भूतले ॥ उदारधारासंपन्नैर्दधातीव निरन्तरम् ॥ ३२ ॥ शनैरारुह्य तं शैलमग
स्त्यो मुनिपुंगवः ॥ निवासाय मतिं चक्रे रम्ये तच्छिखरस्थले ॥ ३३ ॥ तस्यामृतोपमेयस्य पद्मोत्पलकुलश्रियः ॥ नानाद्रुमपरीतस्य कासार
स्योत्तरे तटे ॥ ३४ ॥ मनोहरे महीभागे विधायाश्रममुत्तमम् ॥ आराध्य पितृदेवर्षीन्विधिवद्वास्तुदेवताम् ॥ ३५ ॥ उवास सुचिरं तत्र मुनिसङ्घसम
न्वितः ॥ देवतासिद्धगन्धर्वाप्सरोजुष्टमहीधरे ॥ ३६ ॥ तपः समावेशितचित्तवृत्तौ तपोवने तिष्ठति कुम्भजाते ॥ प्रशस्तसौभाग्यसमन्वितोऽ
द्रिरगस्त्यशैलाह्वयमाससाद ॥ ३७ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे वेंकटाचलमाहात्म्ये
सुवर्णमुखरीमाहात्म्यप्रशंसायामर्जुनभरद्वाजसंवादे शंकरविवाहागस्त्यदक्षिणदिग्गमनवर्णनंनामैकत्रिंशोऽध्यायः ॥ ३१ ॥ ॥ छ ॥ ॥
॥ ॥ अथ नद्युत्पादनायागस्त्यं प्रति अशरीर्युक्तिः ॥ ॥ भरद्वाज उवाज ॥ ॥ स कदाचिन्मुनिवरः कृतपौर्वाह्णिकक्रियः ॥ विवेश ॥ ४२ ॥
देवतागारं समाराधयितुं शिवम् ॥ १ ॥ अदृश्यरूपा वाग्देवी तत्राश्रावि महात्मना ॥ तेनाद्भुतोपपन्नेन व्यक्तवर्णसमुज्ज्वला ॥ २ ॥ आकाश
वाण्युवाचैनमगस्त्यं जपतां वरम् ॥ नदीहीनो ह्ययं देशः प्रसिद्धोऽपि न शोभते ॥ ३ ॥ ज्ञानविज्ञानविमुखः साकार इव भूसुरः ॥ दीक्षेव

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कामोदसंवासितदिगन्तराः ॥ २१ ॥ मृगयासंभृतधियश्चरतोऽधिज्यकार्मुकान् ॥ २२ ॥ ॥ अथाऽर्जुनस्य सुवर्णमुखरीतीरस्थभरद्वाजाश्रम
गमनम् ॥ ॥ ददर्शान्वेषितमृगान्किरातान्वनितायुतान् ॥ ततो दक्षिणदिग्भागे चरन्नद्रेर्मनोहरे ॥ २३ ॥ पुण्यमाश्रममद्राक्षीद्भरद्वाजस्य
कौरवः ॥ कदलीनारिकेलाम्रकोलचंपकचंदनैः ॥ २४ ॥ तक्कोलाशोकहिन्तालतालकेतकिदाडिमैः ॥ जंबूकदम्बकतकखदिरार्जुनपाटलैः ॥
॥ २५ ॥ नागपुन्नागसरलदेवदारुकरञ्जकैः ॥ लवंगलुंगलवलीप्रियंगूतिलकैरपि ॥ २६ ॥ विभीतश्रीफलाश्वत्थमधूकप्लक्षकेसरैः ॥ पूग
जम्बीरनारंगनिम्बामलककौशिकैः ॥ २७ ॥ अन्यैश्च फलपुष्पाढ्यैः शोभितं धरणीरुहैः ॥ वासन्तीकुन्दजात्यादिलताभिः परिवेष्टि
तम् ॥ २८ ॥ अपूर्वसौरभाकृष्टभ्रमरीभिः समन्ततः ॥ चक्रवाकबकक्रौञ्चहंसकारण्डवाश्रयैः ॥ २९ ॥ सौगन्धिकोत्पलांभोजकैर
वौघविराजितैः ॥ सरोभिरमृतस्यंदिमधुरस्फारवारिभिः ॥ ३० ॥ समापादितलक्ष्मीकं कौतुकैकनिकेतनम् ॥ सिंहदन्तावलव्याघ्रतरक्षु
रुरुरङ्कुभिः ॥ ३१ ॥ मृगैरन्यैः समाकीर्णमन्योऽन्यहितकारिभिः ॥ जितचैत्ररथोद्यानमधरीकृतनन्दनम् ॥ ३२ ॥ अतिवाङ्मनसोदारं
परमानन्दकारणम् ॥ शिवागमानां दिव्यानामर्थजातमनुत्तमम् ॥ ३३ ॥ प्रकाशयन्ति शावानां यत्र मञ्जुगिरः शुकाः ॥ यस्मिन्हुताशनो
दारधूमश्यामलितं नभः ॥ ३४ ॥ अकालजलदभ्रांतिमाप्नोति शिखण्डिनाम् ॥ यस्मिन्विहारश्रान्तानां सिंहानां स्वेच्छयागताः ॥ ३५ ॥
निर्वापयन्ति गात्राणि करिणः करशीकरैः ॥ तदाश्रमपदं पश्यन्विस्मयाक्रांतमानसः ॥ ३६ ॥ प्रभावं पाण्डुतनयः प्रशशंस तपस्विनाम् ॥
निवार्य तत्र तत्रैव सकलाननुजीविनः ॥ ३७ ॥ ॥ अथार्जुनकृतभरद्वाजसेवाक्रमः ॥ ॥ मित्रैर्विप्रवरैः सार्धं प्रविवेश तमाश्रमम् ॥ अग्रे
ददर्श कौन्तेयः स्फुरत्पावकतेजसम् ॥ ३८ ॥ भरद्वाजं मुनिवरैरनेकैः परिवारितम् ॥ भस्मानुलिप्तसर्वांगं मृगचर्मोत्तरीयकम् ॥ ३९ ॥ नववारिद
संवीतं कैलासमिव भास्वरम् ॥ जटाभिर्लम्बमानाभिर्भास्वन्तं स्वर्णकांतिभिः ॥ ४० ॥ स्थिरविद्युल्लताकीर्णमिव शारदनीरदम् ॥ श्रुतिस्मृति
पुराणार्थैरेकीभूय समागतैः ॥ ४१ ॥ अङ्गीकृतमिवाकारं दिव्यज्ञानशुभास्पदम् ॥ धृतिक्षांतिदयातुष्टिशांतिभिर्नित्यसेवितम् ॥ ४२ ॥ प्रियाभि
रिव रक्ताभिरखंडब्रह्मवर्चसम् ॥ उपगम्य शनैः पार्थस्तत्पादांबुजयोः पुरः ॥ ४३ ॥ चक्रे प्रणामं साष्टांगं समालिंगितभूतलम् ॥ ४४ ॥ ॥ अथा
र्जुनं प्रति भरद्वाजकृतातिथ्यप्रकारः ॥ ॥ तमागतं पृथापुत्रमुत्थाप्य मुनिपुङ्गवः ॥ आशीर्भिरेधयाञ्चक्रे प्रहर्षोत्फुल्लमानसः ॥ ४५ ॥ संपूज्य
च यथान्यायं तमर्घ्याद्यैः प्रियातिथिम् ॥ विनिर्दिष्टासनासीनं तमपृच्छदनामयम् ॥ ४६ ॥ संमाननमवाप्यास्मान्मुनेः पाण्डवमध्यमः ॥ प्रिये

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वाक्यैर्मुनिपतेरकरोन्मनसो मुदम् ॥ ४७ ॥ सस्माराथ भरद्वाजः स्वर्धेनुं कामदोहिनीम् ॥ सा वितेनेऽतिमहतीं भक्ष्यभोज्यादिकल्पनाम् ॥ ४८ ॥
भुक्त्वा पार्थः सानुचरस्तमुपास्य तपोनिधिम् ॥ दिनशेषं कथालापकौतुकेनात्यवाहयत् ॥ ४९ ॥ ततः सायन्तनीं संध्यामुपास्य हुतपावकः ॥ विप्रै
रमात्यैः सहितो ययौ तस्य कुटीगृहान् ॥ ५० ॥ तत्रासीनो मुनिपतेराशीर्भिरभिनन्दितः ॥ आनन्द्यमानो मुमुदे तन्नदीशीतलानिलैः ॥ ५१ ॥
संप्रापिता केन भुवः प्रभूता कस्मान्महीध्रादधिकप्रभावा ॥ इति प्रभावं परिपृच्छ्य नद्याः श्रोतुं मुनीन्द्रान्मतिरस्य जज्ञे ॥ ५२ ॥ इति श्रीस्कांदे
महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे श्रीवेंकटाचलमाहात्म्ये सुवर्णमुखरीमाहात्म्यप्रशंसायां भरद्वाजाश्रमवर्णनंनाम त्रिंशो
ऽध्यायः ॥ ३० ॥ ॥ अथ सुवर्णमुखरीप्रभावशुश्रूषया भरद्वाजं प्रत्यर्जुनप्रश्नः ॥ ॥ श्रीसूत उवाच ॥ ॥ कृतसायन्तनविधिं हुताशनसमद्यु
तिम् ॥ सुखासीनं मुनिपतिं प्रणम्य भरतर्षभः ॥ १ ॥ तदीयशीतलामोदसुधापूरानुमोदितः ॥ गम्भीरं प्रश्रयोपेतमिदं वचनमब्रवीत् ॥ २ ॥
॥ ॥ अर्जुन उवाच ॥ ॥ मुनिपुंगव लोकेऽस्मिन्धन्य एकोऽहमेव हि ॥ पुत्राविशेषं भवता यदेवं सम्यगादृतः ॥ ३ ॥ भवदादरसञ्जातकौतुकं मम
मानसम् ॥ भवद्वाक्यामृतं दिव्यं पातुं त्वरयतीव माम् ॥४॥ कस्माच्छैलादियं जाता केनानीता महानदी ॥ किं पुण्यं स्नानदानाद्यैः कृतैस्तत्रोपल
भ्यते ॥५॥ अस्याः प्रभावं प्रभवं प्रह्वस्य मम सन्मुने ॥ वक्तुमर्हसि कार्यो हि भक्तानुग्रह एव ते ॥६॥ अर्जुनस्य वचः श्रुत्वा भरद्वाजो द्विजोत्तमः ॥
तदाननं समालोक्य वाक्यं वाक्यविदब्रवीत् ॥ ७ ॥ ॥ भरद्वाज उवाच ॥ ॥ त्वमर्जुन महाबाहो कौरवान्वयपावनः ॥ विशेषान्मम मान्योऽसि
धर्मपुत्रानुजो यतः ॥ ८ ॥ अनेके भूमिपा दृष्टा न ते त्वमिव फाल्गुन ॥ लीलार्जवदयौदार्यधैर्यगाम्भीर्यशालिनः ॥ ९ ॥ कुलं विद्या धनं चैव
बलिनां मदकारणम् ॥ भवादृशानां भव्यानां तानि प्रश्रयकारणम् ॥ १० ॥ प्राज्येषु राज्यभोगेषु विद्यमानेषु कौरव ॥ ऋते भवन्तं को वान्यो
नोपैति विकृतेर्वशम् ॥ ११ ॥ परवानस्मि कौन्तेय गुणैर्लोकोत्तरैस्तव ॥ किमस्त्यकथनीयं ते कौतुकोपेतमानस ॥ १२ ॥ शृणु राजन्कथां
दिव्यां मया मुनिमुखाच्छ्रुताम् ॥ यां श्रुत्वा पातकातङ्कान्मुच्यन्ते सर्वजन्तवः ॥ १३ ॥ ॥ अथ भरद्वाजकथितशंकरविवाहप्रक्रिया ॥ ॥ पूर्वं
दाक्षायणी देवी जनकेनावमानिता ॥ त्यक्त्वा तनुं तां नीहारगिरेरभवदात्मजा ॥ १४ ॥ सप्तर्षिभिरुपागम्य प्रार्थितो धरणीधरः ॥ मृत्युंजयाय स्वां
पुत्रीं विवाहे दातुमुद्यतः ॥ १५ ॥ वृषभांको जगत्स्वामी विवोढुं सर्वमंगलाम् ॥ प्राप्तो हिमवदावासमोषधीप्रस्थनामकम् ॥ १६ ॥ तच्छासनात्स
माजग्मुः स्थावराणि चराणि च ॥ भूतानि भूतनाथस्य कल्याणमभिनंदितुम् ॥ १७ ॥ तद्भूरिभारसंभग्ना भूमिरुत्तरसंश्रया ॥ निम्नतामाययौ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शृङ्गेऽस्य भूभृतस्तुंगे स्थितं लोकैकनायकम् ॥ अपूजयद्धरिं भक्त्या प्रसिद्धं शुभसिद्धये ॥ ४७ ॥ अवरुह्य वेंकटमहाद्रिशृङ्गतः स
ददर्श सिद्धमुनिसंघसेविताम् ॥ कलशोद्भवेन मुनिना समाहृतां तटिनीं सुवर्णमुखरीसमाह्वयाम् ॥ ४८ ॥ इति श्रीस्कांदे महापुराण
एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे श्रीवेंकटाचलमाहात्म्ये सुवर्णमुखरीमाहात्म्ये अर्जुनतीर्थयात्रागमनवर्णनंनामैकोनत्रिंशोऽध्या
यः ॥ २९ ॥ ॥ छ ॥ ॥ अथ सुवर्णमुखरीवर्णनम् ॥ ॥ सूत उवाच ॥ ॥ तथा सर्वाणि तीर्थानि समालोक्यागतस्य च ॥ मुदं
प्रगुणयाञ्चक्रे सा पार्थस्य महापगा ॥ १ ॥ यस्यास्तटनिकुञ्जेषु मोदन्ते वनिताः सुखाः ॥ सिद्धाः संसेविता वातैः शीकरासारशीतलैः ॥
॥ २ ॥ या समुद्यतहस्तेव गङ्गामाकाशवाहिनीम् ॥ आलिंगितुं समुत्तुंगैः कल्लोलैरभ्रसंगिभिः ॥ ३ ॥ धूमैराहुतिसंभूतैस्तरुशाखोपलंभि
भिः ॥ वल्कलैश्च विराजन्ते यत्तटाश्रमभूमयः ॥ ४ ॥ मुनीन्द्रैः सुरवर्यैश्च स्थापितानि समन्ततः ॥ यत्तटद्वितये भांति दिव्यलिंगानि
शूलिनः ॥ ५ ॥ यदीयसैकतावासविश्रान्ता मानसं सरः ॥ न स्मरंति निजावासं मराला विहगोत्तमाः ॥ ६ ॥ शमितावग्रहातंकैः कुल्यामुख
विनिर्गतैः ॥ पुष्णाति तोयैः सस्यानि लोकरक्षाक्षमाणि या ॥ ७ ॥ चक्रवाककुचोत्तुंगवीचिवल्लीविभूषिता ॥ आवर्तनाभिविलसत्सैकतश्रोणि
मण्डला ॥ ८ ॥ प्रफुल्लपद्मवदना चलन्मीनयुगेक्षणा ॥ विलसत्फेनवसना हंसयानमनोहरा ॥ ९ ॥ जलपक्षिरवालापा नयनानन्दकारिणी ॥
अपूर्वकामिनीरूपा या विभात्यम्बुधिप्रिया ॥ १० ॥ रोधस्यन्तरवाहिन्या नद्याः प्राच्यां धनञ्जयः ॥ ददर्श शैलमुत्तुंगं कालहस्तिसमाह्वयम् ॥ ११ ॥
उदग्रशिखराभोगोल्लिखिताकाशमण्डलम् ॥ सप्तपातालमूलाधोरूढमूलोपलांचितम् ॥ १२ ॥ ॥ अथ अर्जुनस्य स्वर्णमुखरीतीरस्थकालहस्ती
श्वरादिसेवाप्राप्तिः ॥ ॥ स्नात्वा तस्यां महानद्यां तस्मिञ्छैले सुरार्चितम् ॥ अपश्यदर्जुनो देवं कालहस्तीशनामकम् ॥ १३ ॥ संपूज्य च
महादेवं नगेन्द्रतनयासखम् ॥ मनसा भक्तियुक्तेन कृतार्थत्वमुपेयिवान् ॥ १४ ॥ ततो महागिरौ तस्मिन्नद्भुतैकनिकेतने ॥ चचाराभूतपूर्वाणां
विशेषाणां दिदृक्षया ॥ १५ ॥ सिद्धानालोकयामास वसतो गिरिसानुषु ॥ गायतो देवदेवस्य चरित्राण्यबलायुतान् ॥ १६ ॥ अप्सरोललना
जुष्टान्पुष्पासवमदाकुलान् ॥ निकुञ्जेषु समासीनान्गंधर्वानैक्षतादरात् ॥ १७ ॥ विविक्तेषु प्रदेशेषु शिवध्यानपरायणान् ॥ अपश्यद्योगिनो
दिव्यानादरानन्दशालिनः ॥ १८ ॥ प्रशान्तान्याश्रमपदान्यवैक्षत समंततः ॥ बलिनीवारविलसद्द्वारभूमीश्च पाण्डवः ॥ १९ ॥ निराहारान्वायु
भुजः पर्णादानातपाशनान् ॥ शान्तानालोकयामास मुनीन्नियमितेन्द्रियान् ॥ २० ॥ मुदं वितेनिरे तस्य नेत्रयोः कमलाकराः ॥ फुल्लसौगन्धि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दिति ॥ २१ ॥ अनुजस्य वचः श्रुत्वा सर्वधर्मविदां वरः ॥ उवाच वचनं धीरः सादरं धर्मनंदनः ॥ २२ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ गवार्थं ब्राह्मणार्थं च यद्वदेदनृतं वचः ॥ यदाचरेदसत्कर्म तत्सत्यं तत्ससंजसम् ॥ २३ ॥ ब्राह्मणार्थं गवार्थं च त्वया कर्मेदृशं कृतम् ॥ तदसद्भावमाप्नोति कथं कथय सुव्रत ॥ २४ ॥ प्रजापालनकृत्यस्य चोरोपेक्षणशिक्षणैः ॥ नूनं फलं भवेद्राज्ञो ब्रह्महत्याश्वमेधजम् ॥ २५ ॥ असाध्यान्वैरिणो ज्ञात्वाऽप्यवनीशो न भद्रभाक् ॥ स्वदेशोपप्लवकरास्तस्करा यद्यशिक्षिताः ॥ २६ ॥ अस्माकं भूभुजां लोकजालस्य च हितं हि यत् ॥ त्वयेदृशं कृतं कर्म नास्ति दोषो ह्यतस्तव ॥ २७ ॥ ॥ श्रीसूत उवाच ॥ ॥ धर्मपुत्रस्य वचनमाकर्ण्य रचितांजलिः ॥ पुनर्विज्ञापयामास धर्मनित्यो धनंजयः ॥ ॥ २८ ॥ ॥ अर्जुन उवाच ॥ ॥ मैवं भूपाल वादीस्त्वं स्वप्रतिज्ञातिलंघनम् ॥ जानता धर्मसर्वस्वमुल्लसद्धर्ममूर्तिना ॥ २९ ॥ कृत्याकृत्यविदा दक्षेणात्मना प्राक्समीरिता ॥ नोल्लंघनीया सततं प्रतिज्ञा पुरुषेण हि ॥ ३० ॥ अशक्तानां गतिः सेयं यद्बंधुगुरुवाक्यतः ॥ धर्मं त्यजंति समयं त्यक्त्वा प्राक्स्वं समीरितम् ॥ ३१ ॥ कृपया तीर्थगमनादार्यो यदि निवर्तयेत् ॥ हतप्रतिज्ञं मां लोकाञ्जल्पतः को निवारयेत् ॥ ३२ ॥ ममापि तीर्थयात्रायां कौतुकोत्तरलं मनः ॥ कर्तव्यं च स्मृतं राजन्नारदादिष्टशासनम् ॥ ३३ ॥ तत्प्रसीद महाराज यत्तीर्थगमनोद्यमे ॥ संमाननीयः प्रभुभिः समयो ह्यनुजीविनाम् ॥ ३४ ॥ तथेति भ्रातृभिः सार्द्धं कृतानुमतिरर्जुनः ॥ अग्रजं तोषयामास प्रणामप्रश्रयादिभिः ॥ ३५ ॥ यथार्हं भीमसेनादीन्भ्रातॄनामन्त्र्य पाण्डवः ॥ कृतस्वस्त्ययनो सर्व्यैर्निर्ययौ धरणीसुरैः ॥ ३६ ॥ पौराणिका ज्यौतिषिका भिषजो धरणीसुराः ॥ अनुजग्मुर्भृत्यगणाः शिलिपनः सूतमागधाः ॥ ३७ ॥ युधिष्ठिराज्ञया तस्य भोगत्यागक्षमं धनम् ॥ गृहीत्वानुययुः स्निग्धाः सभ्याः कोशाधिकारिणः ॥ ३८ ॥ ॥ अथ अर्जुनस्य गंगादितीर्थावगाहनपूर्वकं सुवर्णमुखर्यागमनम् ॥ ॥ स राजपुत्रः प्रथमं प्राप्य भागीरथीं नदीम् ॥ गंगाद्वारं प्रयागं च सिषेवे काशिकामपि ॥ ३९ ॥ पश्यंस्तीर्थानि जाह्नव्यास्तत्तीरोपान्तवर्त्मना ॥ आससाद समुत्तुङ्गकल्लोलं दक्षिणोदधिम् ॥ ४० ॥ महानदीं महापुण्यां प्रसिद्धं पुरुषोत्तमम् ॥ सिंहाचलं च संवीक्ष्य प्रातवान्कृतकृत्यताम् ॥ ४१ ॥ ततो ददर्श कौन्तेयः पुण्यां गोदावरीं नदीम् ॥ समस्तदुरितव्रातशातनोत्तीर्णगौरवाम् ॥ ४२ ॥ कृताभिषेकस्तत्तोयैर्विधिवत्पाण्डुनन्दनः ॥ प्रमोदं विविधैर्दानैरकरोद्भूसुवर्णकैः ॥ ४३ ॥ नदीं मलापहाख्यां च दृष्ट्वा मोदं ययौ शुभम् ॥ ततः समाससादासौ कृष्णवेणीं सरिद्वराम् ॥ ४४ ॥ शिवस्य नियतावासं चतुर्द्वारसमन्वितम् ॥ नानातीर्थगणाकीर्णं श्रीपर्वतमवैक्षत ॥ ४५ ॥ नदीं पिनाकिनीं तीर्त्वा गत्वा देवर्षिसेवितम् ॥ नारायणप्रियावासमपश्यद्वेंकटाचलम् ॥ ४६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ९५ ॥ इत्युक्त्वा वेंकटेशोऽसावन्तर्धानं गतस्ततः ॥ ९६ ॥ ॥
कृतार्थाः स्युः सत्यं सत्यं न संशयः ॥ मामकं लोकमागत्य सुखी भव महामते
श्रीसूत उवाच ॥ ॥ तस्मात्तपोधनाः सर्वे शौनकाद्या महौजसः ॥ कटाहतीर्थमाहात्म्यमितिहाससमन्वितम् ॥ ९७ ॥ यथाश्रुतं मया सम्यक्तथोक्तं
भवतां द्विजाः ॥ ९८ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे श्रीवेंकटाचलमाहात्म्ये सूतशौनक
संवादे कटाहतीर्थप्रशंसनंनामाष्टाविंशोऽध्यायः ॥ २८ ॥ ॥ छ ॥ ॥ ऋषय ऊचुः ॥ ॥ तीर्थानामिह सर्वेषां प्रभावः कथितस्त्वया ॥
नदीनां पर्वतानां च क्षेत्राणां सरसामपि ॥ १ ॥ निदेशात्पद्मगर्भस्य सुवर्णमुखरी नदी ॥ नीता भुवमगस्त्येन व्याख्याता भवतानघ ॥ २ ॥
तदुत्पत्तिप्रभावं च तीर्थौघांस्तत्समाश्रयान् ॥ श्रोतुं संप्रीतिरुत्पन्ना तन्नो वक्तुं त्वमर्हसि ॥ ३ ॥ प्रणम्य शम्भुं नन्दीशं षडास्यं व्यासमेव च ॥
मुनिभिः प्रार्थितः सूतस्तदा वक्तुं प्रचक्रमे ॥ ४ ॥ ॥ श्रीसूत उवाच ॥ ॥ साधु पृष्टं महाभाग भवद्भिर्मंगलावहम् ॥ आख्यानमेतदाम्नाय
श्रवणोद्भूतसिद्धिदम् ॥ ५ ॥ शृणुतावहिता दिव्यां कथां कल्मषनाशिनीम् ॥ भरद्वाजेन कथितां पार्थाय कथयामि वः ॥ ६ ॥ अवाप्य द्रुपदात्प्रा
ज्ञाद्याज्ञसेनीं पृथासुताः ॥ धृतराष्ट्रनिदेशेन जग्मुः करिपुरं शुभम् ॥ ७ ॥ भीष्मेण चांबिकेयेन तत्र संमानितास्तदा ॥ दुर्योधनादिभिः सार्द्धं
न्यवसन्पञ्च वत्सरान् ॥ ८ ॥ ततोऽनुशिष्टो भीष्माद्यैर्धृतराष्ट्रो महायशाः ॥ सर्वेषां कुलवृद्धानां वासुदेवस्य चाग्रतः ॥ ९ ॥ प्रददौ पांडुपुत्रेभ्य
स्तत्सेवाहृष्टमानसः ॥ सार्धराज्यं पुरवरं खाण्डवप्रस्थसंज्ञिकम् ॥ १० ॥ आमंत्र्य पाण्डुतनया धृतराष्ट्रादिकान्कुरून् ॥ जग्मुस्तत्खाण्डवप्रस्थं पुरं
कृष्णसमन्विताः ॥ ११ ॥ इन्द्रप्रस्थाह्वये तत्र रक्षिते विश्वकर्मणा ॥ वसन्पुरेऽशिषत्पृथ्वीं सानुजो धर्मनंदनः ॥१२॥ गते कृष्णे निजपुरं नारदस्या
नुशासनात् ॥ प्रतिज्ञां चक्रिरे पार्था धर्मज्ञा द्रौपदीं प्रति ॥ १३ ॥ ॥ अथार्जुनतीर्थयात्रोपोद्घातः ॥ ॥ यथाक्रमेण सा कृष्णा वर्षमेकैकमादरात् ॥
एकैकस्य गृहे तिष्ठेत्प्रतिनिर्णयपूर्वकम् ॥ १४ ॥ यः पश्येत्तां परगृहे स्थितां पांचालनंदिनीम् ॥ तेनैकहायनमितं विधेयं तीर्थसेवनम् ॥ १५ ॥
एवं कृतप्रतिज्ञास्ते पाण्डुभूपालनंदनाः ॥ व्यापारैर्लोकसामान्यैर्निन्युः कालमतंद्रिताः ॥ १६ ॥ अथ जानपदो विप्रो राजगेहांगणे स्थितः ॥
चुक्रोश बहुधा धेनुर्हृता मे तस्करैरिति ॥ १७ ॥ समाश्वास्य च तं विप्रं प्रविवेश धनंजयः ॥ आयुधानि समानेतुं त्वरया शस्त्रमंदिरम् ॥ १८ ॥
तत्रापश्यत्समासीनौ पांचालीधर्मनन्दनौ ॥ जानन्नपि प्रतिज्ञां स धनुर्जग्राह सेषुधि ॥ १९ ॥ स गत्वा तस्करानाजौ निहत्य नृपनन्दनः ॥
निवर्त्य धेनुं तां तस्मै ददौ विप्राय सादरम् ॥ २० ॥ अथ विज्ञापयामास फाल्गुनो धर्मनन्दनम् ॥ तीर्थयात्रा मया कार्या समयोल्लंघना

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

घोरेयं ब्रह्महत्या च यथा शीघ्रं लयं व्रजेत् ॥ ७० ॥ तमुपायं
याता ब्रह्महत्या भयंकरी ॥ ६९ ॥ भूयाद्यथा मे पुत्रोयं महापातकमोचितः ॥
वदस्वाद्य मम पुत्रे दयां कुरु ॥ एक एव हि पुत्रो मे नान्योऽस्ति तनयो मुने ॥ ७१ ॥ सुते मृते तु वंशो मे समुच्छिद्येत मूलतः ॥ ततः पितृ
भ्यः पिण्डानां दाताऽपि न भवेद्धुवम् ॥ ७२ ॥ ततः कृपां कुरुष्व त्वमस्मासु भगवन्मुने ॥ इत्युक्तः स भरद्वाजः साक्षान्नारायणांशकः ॥ ७३ ॥
ध्यात्वा तु सुचिरं कालं पद्मनाभं वचोऽब्रवीत् ॥ ७४ ॥ ॥ भरद्वाज उवाच ॥ ॥ पद्मनाभ कृतं पापमतिक्रूरं सुतेन ते ॥ नास्य पापस्य
शान्तिः स्यात्प्रायश्चित्तायुतैरपि ॥ ७५ ॥ तथाऽपि ते सुतस्याहमस्य पापस्य शान्तये ॥ प्रायश्चित्तं वदिष्यामि पद्मनाभ शृणु द्विज ॥ ७६ ॥
गङ्गाया दक्षिणे भागे द्विशतीयोजने द्विज ॥ पूर्वाम्भोधेः पश्चिमे तु पञ्चभिर्योजनैर्मिते ॥ ७७ ॥ सुवर्णमुखरीतीरे चोत्तरे क्रोशमात्रके ॥ वेंकटा
द्रिरिति ख्यातः सर्वलोकनमस्कृतः ॥ ७८ ॥ मेरुपुत्रो महापुण्यः सर्वदेवाभिवन्दितः ॥ वैकुण्ठलोकादानीतो विष्णोः क्रीडाचलो महान् ॥ ७९ ॥
गरुत्मता वेगवता स्वर्णमुख्यास्तटे शुभे ॥ वर्तते देवसंघैश्च ऋषिसंघैश्च पूजितः ॥ ८० ॥ तस्मिन्वेंकटशैलेन्द्रे साक्षान्नारायणः स्वयम् ॥
लक्ष्मीदेव्या च भूदेव्या नीलादेव्या समागतः ॥ ८१ ॥ वर्तते वेंकटेशः स साक्षान्मोक्षप्रदायकः ॥ तस्य वेंकटनाथस्य
ह्यालयस्य तथोत्तरे ॥ ८२ ॥ कटाहतीर्थं विप्रेन्द्र वर्तते मङ्गलप्रदम् ॥ ब्रह्महत्यादिपापघ्नं वाञ्छितार्थप्रदायकम् ॥ ८३ ॥
सुतेन साकं विप्रेंद्र पिब तीर्थं मनोहरम् ॥ भरद्वाजस्य वाक्यं तच्छ्रुत्वा वै वेदसंमितम् ॥ ८४ ॥ शिरसा तं प्रणम्याऽथ ययौ वेंकटपर्वतम् ॥
॥ ८५ ॥ ॥ अथ भरद्वाजोक्त्या कटाहतीर्थपानेन केशवस्य ब्रह्महत्याविमुक्तिः ॥ ॥ तं गत्वा वेंकटं शैलं स्वामिपुष्करिणीजले ॥ सुतेन साकं
विप्रेंद्रः सस्नौ नियमपूर्वकम् ॥ ८६ ॥ वराहस्वामिनं नत्वा श्रीनिवासालयं गतः ॥ प्रदक्षिणं ततः कृत्वा विमानं संप्रणम्य च ॥ ८७ ॥ पद्मनाभो
ऽथ पुत्रेण केशवेन दुरात्मना ॥ पपौ कटाहतीर्थं तद्ब्रह्महत्याविनाशकम् ॥ ८८ ॥ तदानीं ब्रह्महत्या सा शीघ्रमेव लयं गता ॥ अनन्तरं ततो
गत्वा वेंकटेशं कृपानिधिम् ॥ ८९ ॥ पुत्रेण सह विप्रेन्द्रः पद्मनाभो ददर्श सः ॥ तदा प्रादुरभूद्देवो वेङ्कटेशो दयानिधिः ॥ ९० ॥ कटाहतीर्थ
पानेन तोषितो वाक्यमब्रवीत् ॥ ९१ ॥ ॥ अथ ब्रह्महत्याविमुक्तसुतेन सहितं पद्मनाभं प्रति भगवदुक्तिः ॥ ॥ श्रीभगवानुवाच ॥ ॥ पद्मनाभ
महाबुद्धे वेदवेदान्तपारग ॥ भरद्वाजस्य वाक्येन प्राप्य वेंकटपर्वतम् ॥ ९२ ॥ कटाहतीर्थं त्वं पीत्वा कृतार्थोऽसि न संशयः ॥ तव पुत्रः केशवा
ख्यो विमुक्तो ब्रह्महत्यया ॥ ९३ ॥ तस्मात्कटाहतीर्थं तु सेवनीयं प्रयत्नतः ॥ तास्मिंस्तीर्थे महाभाग पीत्वा जलमनुत्तमम् ॥ ९४ ॥ पापिनोऽपि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पितरं त्यक्त्वा भार्यामपि पतिव्रताम् ॥ ४४ ॥ सर्वदा गणिकासक्तो वेश्यागारं विवेश ह ॥ दिनद्वये च तां वेश्यामनुभूय द्विजस्ततः ॥ ४५ ॥
निष्कद्वयं प्रदातव्यं हस्ते दत्त्वा गतः सुखम् ॥ वेश्यया चाधनस्त्यक्तस्तत्संयोगैकतत्परः ॥ ४६ ॥ इतस्ततश्चोरयित्वा बहुद्रव्याणि सन्ततम् ॥
दत्त्वा तया चिरं रेमे तद्गृहे बुभुजे च सः ॥ ४७ ॥ एकेन चषकेणासौ तया सह सुरां पपौ ॥ स कदाचित्किरातैस्तु द्रव्यं हर्तुं ययौ द्विजः ॥
॥ ४८ ॥ विप्रस्य कस्यचिद्गेहे सोऽपि कैरातवेषधृक् ॥ केशवो विप्रबन्धुर्वै साहसी खड्गहस्तवान् ॥ ४९ ॥ तद्गृहस्वामिनं विप्रं हत्वा खड्गेन साह
सात् ॥ समादाय बहु द्रव्यं वेश्यागारं विवेश ह ॥ ५० ॥ तं यान्तमनुयाति स्म ब्रह्महत्या भयंकरी ॥ नीलवस्त्रधरा भीमा भृशं रक्तशिरोरुहा ॥
॥ ५१ ॥ गर्जन्ती साट्टहासं सा कम्पयन्ती च रोदसी ॥ अनुद्रुतस्तया विप्रो बभ्राम जगतीतले ॥ ५२ ॥ एवं भ्रमन्धरां सर्वां विप्रबन्धुर्दुरात्मवान् ॥
स्वग्रामं प्रययौ भीत्या शौनकाद्या महौजसः ॥ ५३ ॥ अनुद्रुतस्तया भीतः प्रययौ स्वनिकेतनम् ॥ ब्रह्महत्याप्यनुद्रुत्य तेन साकं गृहं ययौ ॥५४॥
जनकं रक्ष रक्षेति केशवः शरणं ययौ ॥ मा भैषीरिति स प्रोच्य पिता रक्षितुमुद्यतः ॥ ५५ ॥ ॥ अथ स्वसुतरक्षणोद्युक्ते पद्मनाभे ब्रह्महत्योक्तिः ॥
क्रूरैनं ब्रह्महत्या सा जनकं प्रत्यभाषत ॥ ५६ ॥ ॥ ब्रह्महत्योवाच ॥ ॥ मैनं त्वं प्रतिगृह्णीष्व पद्मनाभ द्विजोत्तम ॥ अयं सुरापी स्तेयी च
ब्रह्महा चातिपातकी ॥ ५७ ॥ मातृद्रोही पितृद्रोही भार्यात्यागी च दुष्टधीः ॥ गणिकासक्तचित्तश्च ह्येनं मुञ्च दुरात्मकम् ॥ ५८ ॥ गृह्णासि चेत्सुतं
विप्र महापातकिनं वृथा ॥ त्वद्भार्यामस्य भार्यां च त्वां च पुत्रमिमं द्विज ॥ ५९ ॥ भक्षयिष्यामि वंशं च तस्मान्मुञ्च दुरात्मकम् ॥ इमं त्यजसि
चेत्पुत्रं युष्मान्मुञ्चामि सांप्रतम् ॥ ६० ॥ नैकस्यार्थे कुलं हन्तुमर्हसि त्वं महामते ॥ इत्युक्तः स तया तत्र पद्मनाभोऽब्रवीच्च ताम् ॥ ६१ ॥
॥ ॥ पद्मनाभ उवाच ॥ ॥ बाधते मां सुतस्नेहः कथं पुत्रं परित्यजे ॥ ब्रह्महत्या तदाकर्ण्य पद्मनाभं तमब्रवीत् ॥ ६२ ॥ ॥ ब्रह्महत्योवाच ॥ ॥
पुत्रोऽयं पतितोऽभूत्ते वर्णाश्रमबहिष्कृतः ॥ पुत्रेऽस्मिन्मा कुरु स्नेहं निंदितं तस्य दर्शनम् ॥ ६३ ॥ इत्युक्त्वा ब्रह्महत्या सा पद्मनाभस्य पश्यतः ॥
हस्तेन प्रजहारास्य सुतं केशवनामकम् ॥ ६४ ॥ रुरोद तातताेति जनकं प्रब्रुवन्मुहुः ॥ रुरुदुर्जनको माता भार्या तस्य दुरात्मनः ॥ ६५ ॥
॥ अथ पद्मनाभं प्रति भरद्वाजकथितो ब्रह्महत्याविमुक्त्युपायः ॥ ॥ तस्मिन्काले महाभागो भरद्वाजो महामुनिः ॥ दिष्ट्या समाययौ योगी शौन
काद्या महौजसः ॥ ६६ ॥ पद्मनाभोऽथ तं दृष्ट्वा भरद्वाजं महामुनिम् ॥ स्तुत्वा प्रणम्य शरणं ययाचे पुत्रकारणात् ॥ ६७ ॥ भरद्वाज महाभाग
साक्षाद्विष्णवंशको भवान् ॥ त्वद्दर्शनमपुण्यानां भविता न कदाचन ॥ ६८ ॥ ब्रह्महा च सुरापी च स्तेयी चाभूत्सुतो मम ॥ पुत्रं प्रहर्तुमा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ २२ ॥ जिह्वाग्रे परशुं तप्तं प्रक्षिपन्ति च किंकराः ॥ तस्मात्कटा
मिति च न वक्तव्यं कदाचन ॥ येऽर्थवादमिदं ब्रूयुस्तेषां वै नास्तिकात्मनाम्
हतीर्थं तु सेवनीयं प्रयत्नतः ॥२३॥ सर्वदुःखप्रशमनमपवर्गफलप्रदम् ॥ यत्र पीत्वा नरो भक्त्या सर्वान्कामानवाप्नुयात्॥२४॥ एवमुक्का महाभागः
काशीं त्रैलोक्यपावनीम् ॥ संप्राप्तो नारदः श्रीमान्सूत पौराणिकोत्तम ॥ २५ ॥ संक्षेपतश्च भगवान्नैमिषे ह्युक्तवान्खलु ॥ इदानीं श्रोतुमिच्छामः
कटाहस्य च वैभवम् ॥ २६ ॥ सुविस्तरेण चास्माकं वद सूत कृपावशात् ॥ २७ ॥ ॥ अथ कटाहतीर्थपानक्रमः ॥ ॥ श्रीसूत उवाच ॥ ॥
भोभोस्तपोधनाः सर्वे नैमिषारण्यवासिनः ॥ कटाहतीर्थमाहात्म्यं शृणुध्वं द्विजसत्तमाः ॥ २८ ॥ कटाहतीर्थं भो विप्राःसर्व लोकेषु विश्रुतम् ॥ सर्व
सम्पत्करं शुद्धं सर्वपापप्रणाशनम् ॥ २९ ॥ दुःस्वप्ननाशनं ह्येतन्महापातकनाशनम् ॥ महाविघ्नप्रशमनं महाशान्तिकरं नृणाम् ॥ ३० ॥ स्मृ
तिमात्रेण यत्पुंसां सर्वपापनिषूदनम् ॥ मन्त्रेणाष्टाक्षरेणैव पिबेत्तीर्थं मनोहरम् ॥ ३१ ॥ अथवा केशवाद्यैश्च नामभिर्वा पिबेज्जलम् ॥ यद्वा नामत्र
येणाऽपि पिबेत्तीर्थं शुभप्रदम् ॥ ३२ ॥ आहोस्विद्वेंकटेशस्य मन्त्रेणाष्टाक्षरेण वै ॥ पिबेत्कटाहतीर्थं तद्भुक्तिमुक्तिप्रदायकम् ॥ ३३ ॥ विना मंत्रेण
यो विप्रः संपिबेत्तीर्थमुत्तमम् ॥ पापं मे नाशय क्षिप्रं जन्मान्तरकृतं महत् ॥ ३४ ॥ इत्युक्त्वा स पिबेन्नित्यं मोक्षमार्गैकसाधनम् ॥ स्वामिपुष्करि
णीस्नानं वराहश्रीशदर्शनम् ॥ ३५ ॥ कटाहतीर्थपानं च त्रयं त्रैलोक्यदुर्लभम् ॥ बहुना किमिहोक्तेन ब्रह्महत्यादिनाशनम् ॥ ३६ ॥ ॥ अथ
केशवाख्यद्विजवृत्तान्तः ॥ ॥ पुरा कश्चिद्द्विजो मोहात्केशवाख्यो बहुश्रुतम् ॥ हत्वा खड्गेन दुर्बुद्ध्या ब्रह्महत्यामवाप्तवान् ॥ ३७ ॥ सोऽपि तस्मि
न्महातीर्थे पीत्वा जलमनुत्तमम् ॥ केशवाख्यो महापापी विमुक्तो ब्रह्महत्यया ॥ ३८ ॥ ॥ ऋषय ऊचुः ॥ ॥ कस्य पुत्रः केशवाख्यः कथं प्राप्तो
भयंकरीम् ॥ ब्रह्महत्यामतिक्रूरामस्माकं वक्तुमर्हसि ॥ ३९ ॥ ॥ श्रीसूत उवाच ॥ ॥ तुङ्गभद्रातटे रम्ये गन्धर्वैरुपसेविते ॥ अग्रहारो महानासी
द्वेदाढ्य इति नामतः ॥ ४० ॥ तस्मिन्वेदपुरे रम्ये ब्राह्मणा वेदपारगाः ॥ शब्दशास्त्रपराः सर्वे ज्योतिःशास्त्रप्रवर्तकाः ॥ ४१ ॥ मीमांसातर्कशास्त्र
ज्ञाः सर्वे वेदान्तवादिनः ॥ धर्मशास्त्रेषु निरता अन्नदानपराः सदा ॥ ४२ ॥ पुत्रवन्तश्च ते सर्वे ह्यग्रहारे महाजनाः ॥ वेदाढ्येऽप्यग्रहारे वै पद्मनाभ
इति श्रुतः ॥ ४३ ॥ ॥ अथ गणिकालंपटस्य केशवद्विजस्य ब्रह्महत्याप्रातिक्रमः ॥ ॥ तस्य पुत्रः केशवाख्यः[1] सर्वकर्मबहिष्कृतः ॥ मातरं

१ एतत्कथासमानानुपूर्वीका कथेतः प्रागप्यामता सुमत्याख्यद्विजस्य–तत्र दुर्वाससः उपदेशेन तस्य सुमतिद्विजस्य स्वामिपुष्करिणीतीर्थस्नानेन मुक्तिः–अस्य च केशवद्विजस्य भरद्वाजोपदेशेन कटाहतीर्थपानेन मुक्ति-
रिति विषयभेदमात्रं कथाविभिन्नताबीजम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विष्णोः कथामृतं कुर्यात्कुलमेवाजरामरम् ॥ ३० ॥ ॥ अथ पुराणवक्तुः सर्वपूजनीयत्ववर्णनम् ॥ ॥ बालो युवाथ वृद्धो वा दरिद्रो दुर्भगोऽपि वा ॥ पुराणज्ञः सदा वन्द्यः स पूज्यः सुकृतात्मभिः ॥ ३१ ॥ नीचबुद्धिं न कुर्वीत पुराणज्ञे कदाचन ॥ यस्य वक्रोद्गता वाणी कामधेनुः शरीरिणाम् ॥ ३२ ॥ भवकोटिसहस्रेषु भूत्वा भूत्वावसीदताम् ॥ यो ददात्यपुनर्वृत्तिं कोऽन्यस्तस्मात्परो गुरुः ॥ ३३ ॥ व्यासासनसमारूढो यदा पौराणिको द्विजः ॥ आ समाप्तेः प्रसंगस्य नमस्कुर्यान्न कस्यचित् ॥ ३४ ॥ न दुर्जनसमाकीर्णे न शूद्रश्वापदावृते ॥ देशे न द्यूतसदने वदेत्पुण्यकथां सुधीः ॥ ३५ ॥ सुग्रामे सुजनाकीर्णे सुक्षेत्रे देवतालये ॥ पुण्ये वाथ नदीतीरे वदेत्पुण्यकथां सुधीः ॥३६॥ श्रद्धाभक्तिसमायुक्ता नान्यकार्येषु लालसाः ॥ वाग्यताः शुचयोऽव्यग्राः श्रोतारः पुण्यभागिनः ॥ ३७ ॥ अभक्त्या ये कथां पुण्यां शृण्वंति मनुजाधमाः ॥ तेषां पुण्यफलं नास्ति दुःखं जन्मनि जन्मनि ॥ ३८ ॥ पुराणं ये तु संपूज्य ताम्बूलाद्यैरुपायनैः ॥ शृण्वंति च कथां भक्त्या न दरिद्रा न पापिनः ॥ ३९ ॥ कथायां कथ्यमानायां ये गच्छन्त्यन्यतो नराः॥ भोगान्तरे प्रणश्यन्ति तेषां दाराश्च संपदः ॥४०॥ सोष्णीषमस्तका ये च कथां शृण्वंति पावनीम् ॥ ते बालकाः प्रजायन्ते पापिनो मनुजाधमाः॥४१॥तांबूलं भक्षयन्तो ये कथां शृण्वंति पावनीम् ॥ श्वविष्ठां भक्षयन्त्येते नरके च पतंति हि॥४२॥ये च तुंगासनारूढाः कथां शृण्वन्ति दांभिकाः ॥ अक्षय्यान्नरकान्भुक्त्वा ते भवन्त्येव वायसाः ॥४३॥ ये च वीरासनारूढा ये च सिंहासनस्थिताः॥ शृण्वन्ति सत्कथां ते वै भवन्त्यर्जुनपादपाः ॥४४॥ असंप्रणम्य शृण्वन्तो विषवृक्षा भवन्ति हि ॥ तथा शयानाः शृण्वन्तो भवन्त्यजगरा हि ते ॥ ४५ ॥ यः शृणोति कथां वक्तुः समानासनसंस्थितः॥ गुरुतल्पसमं पापं संप्राप्य नरकं व्रजेत् ॥ ४६ ॥ ये निन्दंति पुराणज्ञं सत्कथां पापहारिणीम् ॥ ते वै जन्मशतं मर्त्याः शुनकाश्च भवंति हि ॥ ४७ ॥ कथायां कीर्त्यमानायां ये वदंति दुरुत्तरम् ॥ ते गर्दभाः प्रजायन्ते कृकलासास्ततःपरम् ॥ ४८ ॥ कदाचिदपि ये पुण्यां न शृण्वंति कथां नराः ॥ ते भुक्त्वा नरकान्घोरान्भवन्ति वनसूकराः ॥ ४९ ॥ कथायां कीर्त्यमानायां विघ्नं कुर्वंति ये नराः ॥ कोट्यब्दं नरकान्भुक्त्वा भवति ग्रामसूकराः ॥ ५० ॥ ये कथामनुमोदन्ते कीर्त्यमानां नरोत्तमाः ॥ अशृण्वन्तोऽपि ते यान्ति शाश्वतं पदमव्ययम् ॥ ॥ ५१ ॥ ये श्रावयन्ति मनुजाः पुण्यां पौराणिकीं कथाम् ॥ कल्पकोटिशतं साग्रं तिष्ठन्ति ब्रह्मणः पदे ॥ ५२ ॥ आसनार्थं प्रयच्छन्ति पुराणज्ञस्य ये नराः ॥ कम्बलाजिनवासांसि तथा मंचकमेव वा ॥ ५३ ॥ स्वर्गलोकं समासाद्य भुक्त्वा भोगान्यथेप्सितान् ॥ स्थित्वा ब्रह्मादिलोकेषु पदं यांति निरामयम् ॥ ५४ ॥ पुराणस्य प्रयच्छन्ति ये च सूत्रं नवं वरम् ॥ भोगिनो ज्ञानसंपन्नास्ते भवंति भवे भवे ॥ ५५ ॥ ये महापात

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कैर्युक्त ह्युपपातकिनश्च ये ॥ पुराणश्रवणादेव ते यांति परमं पदम् ॥ ९६ ॥ वेंकटाद्रेस्तु माहात्म्यं श्रुत्वा त ऋषयस्ततः ॥ व्यासप्रसादसंपन्नं
सूतं पौराणिकोत्तमम् ॥ पूजयित्वा यथान्यायं प्रहर्षमतुलं गताः ॥ ९७ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये
वैष्णवखण्डे श्रीवेंकटाचलमाहात्म्ये सर्वतीर्थमहिमोपसंहारपूर्वकपुराणश्रवणप्रक्रियाद्यनुवर्णनंनाम सप्तविंशोऽध्यायः ॥ २७ ॥ ॥ छ ॥
॥ ॥ अथ कटाहतीर्थमाहात्म्यम् ॥ ॥ ऋषय ऊचुः ॥ ॥ सूत सर्वार्थतत्त्वज्ञ वेदवेदान्तपारग ॥ श्रीवेंकटाचले तीर्थं कटाहाख्यं सुपावनम् ॥
॥ १ ॥ श्रूयते तस्य माहात्म्यं घुष्यते च जगत्त्रये ॥ अस्माकमेतद्ब्रूहि त्वं कृपया व्यासशासित ॥ २ ॥ पुरा वै नारदः श्रीमान्ब्रह्मपुत्रो महानृषिः ॥
दृष्ट्वा वै नैमिषारण्यं संप्राप्तो द्विजसत्तमः ॥ ३ ॥ तदानीं ब्रह्मपुत्रं तमर्घ्यपाद्यादिभिः शुभैः ॥ पूजयित्वा यथान्यायं पवित्रे च कुशासने ॥
॥ ४ ॥ सन्निवेश्य महाभक्त्या विनयानतकन्धराः ॥ प्रणम्य प्रार्थयामासुरिमे सर्वे महर्षयः ॥ ५ ॥ त्वां विना नारद श्रीमन्नस्माकं भुवनत्रये ॥
धर्मोपदेशकः कश्चिन्नास्ति नास्ति महर्षिषु ॥ ६ ॥ वेंकटाद्रौ महापुण्ये सर्वदेवनिषेविते ॥ वैकुण्ठादागते दिव्ये सिद्धगन्धर्वसेविते ॥ ७ ॥ कटाह
तीर्थमाहात्म्यं वर्णयाद्य वनौकसाम् ॥ ८ ॥ ॥ श्रीनारद उवाच ॥ ॥ शृणुध्वमृषयः सर्वे शौनकाद्या महौजसः ॥ कटाहतीर्थमाहात्म्यं
को वेत्ति भुवनत्रये ॥ ९ ॥ महादेवो विजानाति तस्य तीर्थस्य वैभवम् ॥ यानि कानि च पुण्यानि ब्रह्माण्डान्तर्गतानि वै ॥ १० ॥ तानि
गंगादितीर्थानि स्वपापपरिशुद्धये ॥ कटाहतीर्थसेवां च कुर्वन्ति द्विजसत्तमाः ॥ ११ ॥ ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्चेतरजातयः ॥ स्पृशन्ति
तज्जलमिति न पिबेद्यो विमूढधीः ॥ १२ ॥ स हि चण्डालतां प्राप्य कुम्भीपाके पतिष्यति ॥ ब्रह्मचारी गृहस्थो वा वानप्रस्थो यतीश्वरः ॥ १३ ॥
सेवया तस्य तीर्थस्य प्राप्नोति परमं पदम् ॥ श्रुतिस्मृतिपुराणेषु तत्तीर्थस्य प्रशंसनम् ॥ १४ ॥ बहुधा वर्ण्यते पंचमहापातकनाशनम् ॥ अत्य
द्भुततरं विप्राः सर्वलोकैकपावनम् ॥ १५ ॥ ब्रह्महत्यायुतं चापि सुरापानायुतं तथा ॥ अयुतं गुरुदाराणां गमनं पापकारणम् ॥ १६ ॥ स्तेयायुतं
सुवर्णानां तत्संसर्गाश्च कोटयः ॥ शीघ्रं विलयमायांति तस्य तीर्थस्य सेवया ॥ १७ ॥ यानि निष्कृतिहीनानि पापानि विविधानि च ॥ तानि
सर्वाणि नश्यंति तीर्थस्यास्य निषेवणात् ॥ १८ ॥ इदं तीर्थं महापुण्यं भगवत्पादनिस्सृतम् ॥ कुष्ठादिरोगयुक्तो यः प्रत्यहं च पिबेदिदम् ॥ १९ ॥
॥ ॥ अथ कटाहतीर्थमहिमश्रद्धाशून्यानां महानरकप्राप्तिः ॥ ॥ सोऽपि रोगविहीनः सन्विष्णुलोकं च गच्छति ॥ भगवाञ्छंकरो देवो
रहस्यानुभवे पुरा ॥ २० ॥ पार्वत्यै कथयामास तस्य तीर्थस्य वैभवम् ॥ उक्तेष्वेतेषु सन्देहो न कर्तव्यः कदाचन ॥ २१ ॥ अर्थवादोऽय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सन्ति चाष्टोत्तरं शतम् ॥ सहस्रेभ्यश्च मुख्यानि पृथक्तेभ्यश्च तानि च ॥६॥ भक्तिवैराग्यदान्यत्र षष्टिरष्टोत्तरे शते ॥ ७ ॥ ॥ अथ स्वामिपुष्करिण्यादिषट्तीर्थस्नानकालनिर्णयः ॥ ॥ मुक्तिदान्यत्र षट् चैव वेंकटाचलमूर्धनि ॥ स्वामिपुष्करिणी चैव वियद्गङ्गा ततः परम् ॥ ८ ॥ पश्चात्पापविनाशं च पाण्डुतीर्थमतःपरम् ॥ कुमारधारिकातीर्थं तुम्बोस्तीर्थमतः परम् ॥ ९ ॥ कुम्भमासे पौर्णमास्यां मघायोगो यदा भवेत् ॥ कुमारधारिकां यान्ति सर्वतीर्थानि हे द्विजाः ॥ १० ॥ तत्र यः स्नाति विप्रेन्द्रा राजसूयफलं लभेत् ॥ मुक्तिश्च भविता तत्र नात्र कार्या विचारणा ॥ ११ ॥ अन्नदानविधिस्तत्र सार्धं दक्षिणया द्विजाः ॥ उत्तराफल्गुनीयुक्तशुक्लपक्षीयपर्वणि ॥ १२ ॥ तुम्बोस्तीर्थं मीनसंस्थे रवौ तीर्थानि सर्वशः ॥ अपराह्णे समायान्ति तत्र स्नातो न जायते ॥ १३ ॥ मौञ्जीबन्धं विवाहं च कारयेद्द्रव्यदानतः ॥ मेषसंक्रमणे भानौ चित्रानक्षत्रसंयुते ॥ ॥ १४ ॥ पौर्णमास्यां समायान्ति वियद्गङ्गां तथैव च ॥ तत्र स्नात्वा नरः सद्यः शतक्रतुफलं लभेत् ॥ १५॥ सुवर्णं तत्र दातव्यं कन्यादानं विशेषतः ॥ वृषभस्थे रवौ विप्रा द्वादश्यां हरिवासरे ॥ १६ ॥ शुक्ले वाप्यथ कृष्णे वा भौमेनापि समन्विते ॥ पाण्डुतीर्थं समायान्ति गङ्गादीनि जगत्त्रये ॥ १७ ॥ तत्र स्नात्वा च गां दत्त्वा मुच्यते प्रतिबन्धकात् ॥ आश्वयुक्छुक्लपक्षे च सप्तम्यां भानुवासरे ॥ १८ ॥ उत्तराषाढयुक्तायां तथा पापविनाशनम् ॥ उत्तराभाद्रयुक्तायां द्वादश्यां वा समागतः ॥ १९ ॥ शालग्रामशिलां दत्त्वा स्नात्वा च विधिपूर्वकम् ॥ मुच्यते सर्वपापैश्च जन्मकोटिशतोद्भवैः ॥ २० ॥ धनुर्मासे सिते पक्षे द्वादश्यामरुणोदये ॥ आयान्ति सर्वतीर्थानि स्वामिपुष्करिणीजले ॥ २१ ॥ तत्र स्नात्वा नरः सद्यो मुक्तिमेति न संशयः ॥ यस्य जन्मसहस्रेषु पुण्यमेवार्जितं पुरा ॥ २२ ॥ तस्य स्नानं भवेद्विप्रा नान्यस्य त्वकृतात्मनः ॥ विभवानुगुणं दानं कार्यं तत्र यथाविधि ॥ २३ ॥ शालिग्रामशिलादानं गां दद्याच्च विशेषतः ॥ २४ ॥ ॥ अथ पुराणश्रवणस्य विशेषतः प्राशस्त्यवर्णनम् ॥ ॥ ये शृण्वंति कथां विष्णोः सदा भुवनपावनीम् ॥ ते वै मनुष्यलोकेऽस्मिन्विष्णुभक्ता भवन्ति हि ॥ २५ ॥ यद्यशक्तः सदा श्रोतुं कथां भुवनपावनीम् ॥ मुहूर्तं वा तदर्धं वा क्षणं वा विष्णुसत्कथाम् ॥ यः शृणोति नरो भक्त्या दुर्गतिर्नास्ति तस्य हि ॥ २६ ॥ यत्फलं सर्वयज्ञेषु सर्वदानेषु यत्फलम् ॥ सकृत्पुराणश्रवणात्तत्फलं विन्दते नरः ॥ २७ ॥ कलौ युगे विशेषेण पुराणश्रवणादृते ॥ नास्ति धर्मः परः पुंसां नास्ति मुक्तिप्रदं परम् ॥ २८ ॥ पुराणश्रवणं विष्णोर्नामसंकीर्तनं परम् ॥ उभे एव मनुष्याणां पुण्यद्रुममहाफले ॥ २९ ॥ पिबन्नेवामृतं यत्नादेकः स्यादजरामरः ॥

१ पुनः—इति शेषः, मुक्तो भवतीत्यर्थः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्त्रीणां विदुर्बुधाः ॥ पतिवाक्यमपाकृत्य या नारी सुकृतैः परैः ॥ ८५ ॥ सदैव युज्यते सापि नैव शुद्धा भवेत्सकृत् ॥ पतिहीना तु या नारी गुरु
भिर्धर्मवित्तमैः ॥ ८६ ॥ सा कृतज्ञा विदध्यात्तु व्रतं धर्मफलप्रदम् ॥ पतिना प्रेरिता सैव पतिबुद्धिपरायणा ॥ ८७ ॥ पतिपादाब्जतीर्थेन या स्नाता
सा हरिप्रिया ॥ सा स्नाता सर्वतीर्थेषु गङ्गादिषु न संशयः ॥ ८८ ॥ तस्मात्त्वत्कृतदोषस्तु त्वामायातीति तत्फलम् ॥ भुञ्जन्त्यास्तेऽत्र शृण्वन्त्या
घोणतीर्थस्य वैभवम् ॥ ८९ ॥ मुक्तिरासीच्छुभांगं तन्नारीरूपं पुनर्यथा ॥ ॥ तस्माद्घोणस्य तीर्थस्य तुम्बुतीर्थमितीह वै ॥ ९० ॥ लोके
प्रसिद्धिरभवदहो तीर्थस्य वैभवम् ॥ ९१ ॥ ॥ अथ घोणतीर्थस्नातॄणां नानाविधफलप्राप्तिः ॥ ॥ श्रीसूत उवाच ॥ ॥ घोणतीर्थे महापुण्ये सर्व
पापविनाशिनि ॥ स्नान्ति ये पौर्णमास्यां वै शौनकाद्या महौजसः ॥ ९२ ॥ तेषां क्रतुफलं पुण्यं तीर्थायुतफलं भवेत् ॥ कपिलागोसहस्रं तु यो
ददाति दिनेदिने ॥ ९३ ॥ तत्फलं समवाप्नोति स्नानात्तुम्बुरुतीर्थके ॥ रत्नकोटिसहस्राणि यो ददाति दिनेदिने ॥ ९४ ॥ मत्तेभानां सहस्राणि
तथैवाश्वायुतान्यपि ॥ तत्फलं समवाप्नोति घोणतीर्थावगाहनात् ॥ ९५ ॥ कन्याकोटिप्रदानेन यत्फलं चर्षिभिः स्मृतम् ॥ तत्फलं समवाप्नोति
घोणतीर्थाच्च पावनात् ॥ ९६ ॥ हेमांबरसहस्रं यः कुरुक्षेत्रे प्रयच्छति ॥ तत्फलं समवाप्नोति घोणतीर्थस्य वैभवात् ॥ ९७ ॥ गुर्वर्थे ब्राह्मणार्थे च
स्वाम्यर्थे यस्त्यजेत्तनुम् ॥ तत्फलं समवाप्नोति घोणतीर्थस्य वैभवात् ॥ ९८ ॥ आपन्नार्तिहराणां च तीर्थसेवापरात्मनाम् ॥ सत्यव्रतानां यत्पुण्यं
घोणतीर्थाच्च तद्भवेत् ॥ ९९ ॥ यत्फलं श्राद्धकर्तॄणां पितॄणामिन्दुसंक्षये ॥ तत्फलं समवाप्नोति घोणतीर्थाद्धि पावनात् ॥ १०० ॥ गङ्गायां नर्म
दायां च सरयूचन्द्रभागयोः ॥ सर्वेषु पुण्यतीर्थेषु यः स्नानं कुरुते नरः ॥ तत्फलं समवाप्नोति घोणतीर्थाद्धि पावनात् ॥ १०१ ॥ तस्मात्पुण्य
तमं तीर्थं घोणतीर्थं विदुर्बुधाः ॥ १०२ ॥ य इमं शृणुतेऽध्यायं सर्वपापनिबर्हणम् ॥ वाजपेयफलं तस्य विष्णुलोकश्च शाश्वतः ॥ १०३ ॥ इति
श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखंडे श्रीवेङ्कटाचलमाहात्म्ये तुम्बुरुतीर्थमाहात्म्यवर्णनंनाम षड्विंशोऽध्यायः ॥
॥ २६ ॥ ॥ अथ श्रीवेंकटाचलस्य सर्वपुण्यतीर्थाधारत्ववर्णनम् ॥ ॥ ऋषय ऊचुः ॥ ॥ वेंकटाद्रौ महापुण्ये सर्वसंकटनाशने ॥ सन्ति
वै कति तीर्थानि सूत पौराणिकोत्तम ॥ १ ॥ तेषां संख्यां च मे ब्रूहि कति मुख्यानि तत्र वै ॥ तत्राप्यत्यन्तमुख्यानि वद मे मुनिसत्तम ॥ २ ॥
सद्धर्मरतिदान्यत्र कति मुख्यानि तानि च ॥ कानि ज्ञानप्रदान्यत्र भक्तिवैराग्यदानि च ॥ ३ ॥ मुक्तिप्रदानि कान्यत्र तानि मे वद सुव्रत ॥ ४ ॥
॥ ॥ श्रीसूत उवाच ॥ ॥ षट्षष्टिकोटितीर्थानि पुण्यान्यत्र नगोत्तमे ॥ अष्टोत्तरसहस्राणि तेषु मुख्यानि सुव्रत ॥ ५ ॥ सद्धर्मरतिदान्यत्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

देवलं च महात्मानं नमस्कृत्य प्रसन्नधीः ॥ कथयस्व महाभाग मयि कारुणिको भव ॥ घोणतीर्थस्य माहात्म्यं सर्वपापहरं शुभम् ॥
॥ ३९ ॥ ॥ देवल उवाच ॥ ॥ तुम्बुरुर्नाम गन्धर्वो भार्यां शप्त्वा पतिव्रताम् ॥ अत्र स्नात्वा समभ्यर्च्य वेंकटेशं दयानिधिम् ॥ ४० ॥
प्राप्तवान्विष्णुलोकं वै पुनरावृत्तिवार्जितम् ॥ ४१ ॥ ॥ गार्ग्य उवाच ॥ ॥ किमर्थं देवल ऋषे भार्यां रूपवतीं स्त्रियम् ॥ तुम्बुरुर्नाम गन्धर्वः
सर्वविद्याविशारदः ॥ ४२ ॥ शप्तवान्केन दोषेण भार्यां सर्वगुणान्विताम् ॥ तद्वदस्व महाभाग श्रोतुं कौतूहलं हि मे ॥ ४३ ॥ ॥ अथ स्वभा
र्यायै तुम्बुरूपदिष्टमाघस्नानविधिप्रकारः ॥ ॥ तुम्बुरुर्नाम गन्धर्वो भार्यां प्रीत्या ह्युवाच ह ॥ माघत्रये मया साकं स्नानं कुरु मलापहम् ॥
॥ ४४ ॥ माघमास्युदिते सूर्ये सर्वकल्मषनाशने ॥ तीरेऽस्मिन्विष्णुपूजार्थं गोमयालेपनं कुरु ॥ ४५ ॥ रंगवल्ल्यादिभिः शुभ्रपद्मस्वस्तिक
धातुभिः ॥ शुश्रूषां कुरु मे विष्णोर्मासेऽस्मिन्मंगलप्रदे ॥ ४६ ॥ माघेऽस्मिन्माधवस्यास्य कुरु त्वं दीपवर्तिकाम् ॥ सधूपं पावकं भक्त्या
समर्पय हरेः पुरः ॥ ४७ ॥ कुरु पाकं शुचिर्भूत्वा माधवाय महात्मने ॥ प्रदक्षिणानमस्कारैर्भक्त्या माघे मया सह ॥ ४८ ॥ कुरुष्व देवदेवस्य
सपर्यां विष्णवेऽन्वहम् ॥ पुराणश्रवणं विष्णोः कुरु नित्यमतंद्रिता ॥ ४९ ॥ नित्यं स्नात्वा प्रयत्नेन पिब पादोदकं हरेः ॥ कृष्ण विष्णो मुकुन्देति
नारायण जनार्दन ॥ ५० ॥ अच्युतानन्त विश्वात्मन्निति कीर्तय सन्ततम् ॥ क्रोधमात्सर्यलोभादींस्त्यक्त्वा त्वं व्रतमाचर ॥ ५१ ॥ तेन ते जायते
मुक्तिर्विष्णुलोकश्च शाश्वतः ॥ ॥ अथ भार्यां प्रति तुम्बुरुदत्तशापतद्विमुक्तिप्रकारौ ॥ ॥ इत्थं सा भर्तृगदितं श्रुत्वा गंधर्ववल्लभा ॥ भर्तारमब्रवी
त्कोपादसह्यं दुर्गतिप्रदम् ॥ ५२ ॥ माघे चोद्भूतशीते तु प्रातर्मन्दोदिते रवौ ॥ कथं निमज्जयेदस्मिन्माघे शीतार्तिदेऽनघ ॥ ५३ ॥ यत्त्वयोक्ता
नि कर्माणि न शक्यानि मयाऽसकृत् ॥ न करोमि पते स्नानं प्रातःकाले त्वया सह ॥ ५४ ॥ मृतौ शीतातिपातेन न च मे रक्षको भवान् ॥ इत्येव
मुदितं श्रुत्वा पतिर्गन्धर्ववल्लभः ॥ ५५ ॥ स शान्तोऽपि शशापाथ भार्यां चाप्रियवादिनीम् ॥ पुत्रं च धर्मविमुखं भार्यां चाप्रियभाषिणीम् ॥५६॥
अब्रह्मण्यं च राजानं सद्यः शापेन दण्डयेत् ॥ इति न्यायं विचिंत्यासौ शशापेत्थं सतीं तदा ॥ ५७ ॥ वेंकटाद्रौ महापुण्ये सर्वपातकनाशने ॥ घोण
तीर्थसमीपे च पिप्पलद्रुमकोटरे ॥ ५८ ॥ तत्राम्बुरहिते मूढे मण्डूका भव केवलम् ॥ इत्येवं भर्तृवाक्यं तच्छ्रुत्वा गंधर्ववल्लभा ॥ ५९ ॥ पतित्वा पा
दयोस्तस्य तुम्बरुं प्रार्थयत्सती ॥ विशापमवदत्पश्चाद्भर्ता वै तुम्बुरुस्तदा ॥ ६० ॥ अगस्त्यो वै महाभागस्तपस्वी विजितेन्द्रियः ॥ घोणतीर्थवरे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्नात्वा पौर्णमास्यां महातिथौ ॥ ६१ ॥ शिष्येभ्यो वै यदा तस्मिन्नश्वत्थद्रुमसंनिधौ ॥ घोणतीर्थस्य माहात्म्यं वक्ति वै ब्राह्मणोत्तमः ॥ ६२ ॥ तदा पिप्पलवृक्षस्य कोटरे त्वं समाहिता ॥ श्रुत्वा वै घोणतीर्थस्य माहात्म्यं मोक्षदायकम् ॥ ६३ ॥ विधूय सर्वपापानि मया साकं रमिष्यसि ॥ इत्युक्ता विरराामाथ धर्मपत्नी पतिव्रता ॥ ६४ ॥ भर्तृशापान्महाघोरां मंडूकतनुमाश्रिता ॥ शेषाद्रिशिखरे तस्मिन्घोणतीर्थस्य दक्षिणे ॥ ॥ ६५ ॥ शनैःशनैर्गता नारी पिप्पलद्रुमकोटरम् ॥ अब्दायुतं गतं तस्या अश्वत्थद्रुमकोटरे ॥ ६६ ॥ ततः कालांतरेऽगस्त्यो वेंकटाद्रिं मनोहरम् ॥ गत्वा श्रीस्वामितीर्थे च स्नात्वा नियमपूर्वकम् ॥ ६७ ॥ वराहस्वामिनं देवं नत्वा तीर्थस्य दक्षिणे ॥ वेंकटेशालयं गत्वा श्रीनिवासं कृपानिधिम् ॥ ६८ ॥ वेदवेद्यं विशालाक्षं देवदेवं सनातनम् ॥ नत्वाऽगस्त्यो महाभागो घोणतीर्थं ततो ययौ ॥ ६९ ॥ तत्र स्नात्वा तीर्थवर्ये स्वशिष्यैर्योगिनां वरः ॥ पिप्पलद्रुमच्छायायां शिष्येभ्यो भक्तिपूर्वकम् ॥ ७० ॥ घोणतीर्थस्य माहात्म्यं ब्रह्महत्याविनाशकम् ॥ सर्वमंगलदं पुण्यं सर्वसम्पत्प्रदायकम् ॥ ७१ ॥ उक्तवान्योगिनां श्रेष्ठो ह्यगस्त्यो भगवानृषिः ॥ ७२ ॥ ॥ अथ घोणतीर्थे अगस्त्यदर्शनेन तुम्बुरुपत्न्या वर्षाभूत्वनिवृत्तिः ॥ ॥ तदा श्रुत्वा तु वर्षाभूः पादयोस्तस्य योगिनः ॥ पतित्वा ज्ञानदीपेन विदित्वा वैभवं मुनेः ॥ ७३ ॥ पूर्वरूपं समासाद्य नारी रूपं मनोहरम् ॥ अगस्त्य योगिनां श्रेष्ठ रक्षरक्ष दयानिधे ॥ ७४ ॥ मां रक्ष दयया ब्रह्मन्पतिवाक्यविरोधिनीम् ॥ इत्युक्त्वा तं विशालाक्षी विरराम ततः परम् ॥ ७५ ॥ ॥ अगस्त्य उवाच ॥ ॥ का त्वं सुश्रोणि भद्रं ते भेकजन्मप्रदायकम् ॥ पापं पूर्वभवे चासीत्तद्वदस्व च मा चिरम् ॥७६॥ ॥ ॥ नार्युवाच ॥ ॥ तुम्बुरुर्नाम गन्धर्वः सर्वविद्याविशारदः ॥ तस्य भार्यास्म्यहं विप्र ह्यगस्त्य मुनिसेवित ॥ ७७ ॥ भर्ता मे सर्वधर्मज्ञस्तुम्बुरुर्मुनिसत्तमः ॥ सर्वधर्मान्मनोज्ञा त्वं कुरु नित्यं मया सह ॥ ७८ ॥ पतिवाक्यं तदा श्रुत्वा परलोकोपकारकम् ॥ असह्यं वाक्यमत्युग्रं दुर्गतिप्रदमेव हि ॥ ७९ ॥ मया चोक्तं हि दुर्बुद्ध्या हे तात मुनिसत्तम ॥ ८० ॥ ॥ अथागस्त्यकथितपतिव्रताधर्माः ॥ ॥ अगस्त्य उवाच ॥ ॥ कुशाग्रबुद्धिस्ते भर्ता शशाप त्वां रुषान्वितः ॥ एवं शापो युक्त एव पतिवाक्यविरोधिनीम् ॥ ८१ ॥ पतिवाक्यमनादृत्य स्वेच्छया वर्तते तु या ॥ सा नारी निरये घोरे पतत्याचन्द्रतारकम् ॥ ८२ ॥ न स्वातन्त्र्यं तु नारीणां नोल्लंघ्यं पतिभाषणम् ॥ पातिव्रत्येन पुण्येन पतिशुश्रूषणेन च ॥ ८३ ॥ स्त्रियो विष्णुपदं यान्ति न चान्यैरपि सुव्रतैः ॥ पतिर्माता[1] पतिर्विष्णुः पतिर्ब्रह्मा पतिः शिवः ॥ ८४ ॥ पतिर्गुरुः पतिस्तीर्थमिति

१ माता–जगदम्बा–इत्यर्थः–उपासनया–सकलैश्वर्यप्रदानसाम्यात् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्तमाः ॥१२॥ आरामोच्छेदकं क्रूरं कन्यातुरगविक्रयम् ॥ घोणस्नानपरित्यक्तं तमाहुर्ब्रह्मघातुकम् ॥ १३ ॥ देवद्रव्यापहन्तारं तथा दत्तापहारकम् ॥
घोणस्नानपरित्यक्तं तमाहुर्ब्रह्मघातुकम् ॥ १४ ॥ तटाकसेतुभेत्तारं परस्त्रीसंगलोलुपम् ॥ घोणस्नानपरित्यक्तं तमाहुः स्तेयिनं बुधाः ॥ १५ ॥
ददामीति द्विजायोक्त्वा पश्चाद्यो नास्तिकोऽधमः ॥ घोणस्नानपरित्यक्तं सुरापं तं विदुर्बुधाः ॥ १६ ॥ गुरुविप्रजनद्वेष्यमात्मस्तुतिपरायणम् ॥
घोणस्नानपरित्यक्तं तमाहुः स्तेयिनं बुधाः ॥ १७ ॥ असंस्कृतान्नभोक्तारं पितृशेषान्नभोजिनम् ॥ घोणस्नानपरित्यक्तं तमाहुः स्तेयिनं द्विजाः
॥ १८ ॥ पितृशेषान्नदातारं मातापितृविरोधिनम् ॥ घोणस्नानपरित्यक्तं तमाहुः स्तेयिनं बुधाः ॥ १९ ॥ परस्त्रीसंगनिरतं भ्रातृभार्यारतिप्रियम् ॥
घोणस्नानपरित्यक्तं तमाहुर्गुरुतल्पगम् ॥ २० ॥ चण्डालभाषिणं विप्रं सदैवादर्भपाणिकम् ॥ घोणस्नानपरित्यक्तं तत्संसर्गं तु पञ्चमम् ॥ २१ ॥
रजस्वलाश्वचण्डालध्वनिं श्रुत्वान्नभोजिनम् ॥ घोणस्नानपरित्यक्तं तत्संसर्गं तु पञ्चमम् ॥ २२ ॥ पुराणोद्वाहमौञ्ज्यादिधर्माणां विघ्नकारकम् ॥
घोणस्नानपरित्यक्तं तमाहुः पशुघातुकम् ॥ २३ ॥ शरणागतहन्तारं सर्वतीर्थपराङ्मुखम् ॥ घोणस्नानपरित्यक्तं तमाहुर्भ्रूणहं बुधाः ॥ २४ ॥ पितृयज्ञ
परित्यक्तं त्यक्तभार्यं कुलाधमम् ॥ घोणस्नानपरित्यक्तं तमाहुर्गोविघातुकम् ॥ २५ ॥ महापापसमानानि क्षुद्रपापानि यानि च ॥ घोणस्नान
परित्यक्तमाश्रयन्ति द्विजोत्तमाः ॥ २६ ॥ ॥ अथ घोणस्नानस्य सर्वपापापनोदकत्ववर्णनम् ॥ ॥ महापापरतं विप्राः श्वपचं वा कुलाधमम् ॥ क्रूरं
कुलान्तकं कष्टमदत्तं कर्मवर्जितम् ॥ २७ ॥ पशुघ्नं च परद्रोहमाश्रितं पिशुनं तथा ॥ असत्यभाषिणं दम्भपरदाररतं तथा ॥ २८ ॥ मित्रद्रोहं
कृतघ्नं च भ्रूणहं चातिपातकम् ॥ परदाररतं पापं पराणामर्थसूचकम् ॥ २९ ॥ अनृतं कृषिकर्माणं स्वामिद्रोहं च वञ्चकम् ॥
सलोभं पितृहन्तारं सर्वदेवपराङ्मुखम् ॥ ३० ॥ आत्मप्रशंसां कुर्वाणं धर्मविघ्नकरं शठम् ॥ अपात्रव्ययकर्तारं सानुकूल्यविभेदकम् ॥ ३१ ॥
सुपल्लवफलोपेतवृक्षविच्छेदकारकम् ॥ विश्वासघातुकं चैव वीरहत्यापरायणम् ॥ ३२ ॥ अनग्निकमपुत्रं च विषकर्मप्रयोगिणम् ॥ गुरुद्वेषकरं
पापं दम्पत्योर्विरसावहम् ॥ ३३ ॥ ग्रामाधिपत्यं कुर्वाणं तथा देवालयस्य च ॥ भृतकाध्यापकं विप्रं क्रूरकर्मपरायणम् ॥ ३४ ॥ प्रकृतीकृत
पापौघं गुह्यघौघपरायणम् ॥ अज्ञानादघकर्तारं ज्ञानाद्दुष्कर्मकारकम् ॥ ३५ ॥ एतान्सर्वांश्च विप्रेंद्रा घोणतीर्थं मनोहरम् ॥ पुनाति स्नानपानाद्यै
रहो तीर्थस्य वैभवम् ॥ ३६ ॥ ॥ अथ तुम्बुर्वाख्यगंधर्वचरितम् ॥ ॥ श्रीसूत उवाच ॥ ॥ अत्रेतिहासं वक्ष्यामि पुराणं पापनाशनम् ॥
सर्वपापप्रशमनमपवर्गफलप्रदम् ॥ ३७ ॥ पुरा गार्ग्यो महातेजाः सर्वविद्याविशारदः ॥ सर्वज्ञो नीतिमान्विप्रः प्राह चेत्थं जितेन्द्रियः ॥ ३८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पुण्यतीर्थेऽस्मिन्स्नानमात्रतः ॥ २८ ॥ महापातकिसंसर्गदोषस्ते विलयं गतः ॥ त्वामग्रहीद्यो वेतालः पुरायं ब्राह्मणोऽभवत् ॥ २९ ॥ मृतेऽहनि
पितृश्राद्धं नाकरोत्पार्वणेन वै ॥ तेन स्वपितृभिः शप्तो वेतालत्वमगादयम् ॥ ३० ॥ सोऽपि जाबालितीर्थस्य जले स्नानप्रभावतः ॥ वेतालत्वं
विहायैव विष्णुलोकमवाप्तवान् ॥ ३१ ॥ न कुर्याद्यो नरः श्राद्धं मातापित्रोर्मृतेऽहनि ॥ वेतालत्वमवाप्याशु पश्चान्नरकमश्नुते ॥ ३२ ॥ ॥ श्रीसूत
उवाच ॥ ॥ दुराचारो महापापी तीर्थेऽस्मिन्स्नानमात्रतः ॥ प्राप्तवान्विष्णुलोकं वै पुनरावृत्तिवर्जितम् ॥ ३३ ॥ एवं वः कथितं पुण्यं दुराचार
विमोक्षणम् ॥ तस्मात्पुण्यतमं तीर्थं सर्वपापहरं शुभम् ॥ ३४ ॥ यत्र हि स्नानमात्रेण दुराचारो विमोचितः ॥ यानि निष्कृतिहीनानि पापान्यपि
विनाशयेत् ॥ ३५ ॥ शूद्रेण पूजितं लिङ्गं विष्णुं वा यो नमेद्द्विजः ॥ प्रायश्चित्तं न स्मृतिषु तस्योक्तं परमर्षिभिः ॥ ३६ ॥ नश्येत्तस्यापि तत्पापं
तीर्थे जाबालिसंज्ञके ॥ विप्रनिन्दाकृतां चैव प्रायश्चित्तं न विद्यते ॥ ३७ ॥ विश्वासघातुकानां च कृतघ्नानां च निष्कृतिः ॥ भ्रातृभार्यारतानां च
प्रायश्चित्तं न विद्यते ॥ ३८ ॥ तेषां जाबालितीर्थे वै स्नानाच्छुद्धिर्भविष्यति ॥ एवं वः कथितं विप्रा जाबालेस्तीर्थवैभवम् ॥ ३९ ॥ यच्छ्रुत्वा
सर्वपापेभ्यो मुच्यते मानवो भुवि ॥ ४० ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे श्रीवेंकटाचलमाहात्म्ये
जाबालितीर्थमहिमानुवर्णनंनाम पञ्चविंशोऽध्यायः ॥ २५ ॥ ॥ अथ तुम्बुरु(घोण)तीर्थमाहात्म्यम् ॥ ॥ श्रीसूत उवाच ॥ ॥ अत्राहं संप्रवक्ष्यामि
शौनकाद्या महौजसः ॥ घोणतीर्थस्य माहात्म्यं सर्वपातकनाशनम् ॥ १ ॥ तत्र स्नानं जनानां तु जन्मान्तरतपःफलम् ॥ उत्तराफल्गुनीयुक्तशु
क्लपक्षीयपर्वणि ॥ २ ॥ तुम्बोस्तीर्थं मीनसंस्थे रवौ तीर्थानि सर्वशः ॥ अपराह्णे समायान्ति गंगादीनि जगत्त्रये ॥ ३ ॥ ॥ ऋषय ऊचुः ॥ ॥
भगवन्सूत सर्वज्ञ सर्वशास्त्रार्थपारग ॥ गंगाद्याः सरितः सर्वा घोणतीर्थेऽतिपावने ॥ ४ ॥ किमर्थं स्नांति वै तत्र मीनसंस्थे प्रभाकरे ॥ ५ ॥
॥ ॥ श्रीसूत उवाच ॥ ॥ पापिनो मनुजाः सर्वे ह्यस्मासु स्नान्ति यत्नतः ॥ विसृज्य पापजालानि कृतार्था यांति वै जनाः ॥ ६ ॥ अस्माकं पाप
जालं तत्कथं नश्यति सर्वतः ॥ एवमालोच्य तीर्थानि गंगादीनि प्रयत्नतः ॥ ७ ॥ संस्मृत्य ब्रह्मपुत्रस्य नारदस्य महात्मनः ॥ वाक्यं मनोहरं
दिव्यं सर्वपापनिषूदनम् ॥ ८ ॥ गत्वा श्रीवेंकटं शैलं ब्रह्महत्यादिशोधकम् ॥ तत्र स्नात्वा तीर्थवर्ये स्वामिपुष्करिणीजले ॥ ९ ॥ अनन्तरं ततो
विप्रा घोणतीर्थेऽतिपावने ॥ उत्तराफल्गुनीयुक्तशुक्लपक्षीयपर्वणि ॥ १० ॥ स्नांति तीर्थानि सर्वाणि मीनसंस्थे प्रभाकरे ॥ तस्य तीर्थस्य
माहात्म्यं को वेत्ति भुवनत्रये ॥ ११ ॥ ॥ अथ घोणतीर्थस्नानविमुखानां महादोषवर्णनम् ॥ ॥ तस्मात्पुण्यतमं तीर्थं घोणतीर्थं द्विजो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

माणानां विस्तराद्वद नो मुने ॥ ४ ॥ ॥ अथ कावेरीतीरवासिदुराचाराख्यद्विजोदन्तः ॥ ॥ श्रीसूत उवाच ॥ ॥ मुनयः श्रूयतां तस्य दुराचारस्य
पातकम् ॥ जाबालितीर्थस्नानेन यथा मुक्तश्च पातकात् ॥ ५ ॥ दुराचाराभिधो विप्रः कावेरीतीरमाश्रितः ॥ कश्चिदास्ते द्विजः पापी क्रूरकर्मरतः
सदा ॥ ६ ॥ ब्रह्मघ्नैश्च सुरापैश्च स्तेयिभिर्गुरुतल्पगैः ॥ सदा संसर्गदुष्टोऽसौ तैः साकं न्यवसद्द्विजाः ॥ ७ ॥ महापातकसंसर्गदोषेणास्य
द्विजस्य वै ॥ ब्राह्मण्यं सकलं नष्टं निःशेषेण द्विजोत्तमाः ॥ ८ ॥ महापातकिभिः सार्धं दिनमेकं तु यो द्विजः ॥ निवसेत्सादरं तस्य
तत्क्षणाद्वै द्विजन्मनः ॥ ९ ॥ ब्राह्मणस्य तु चैकांशो नश्यत्येव न संशयः ॥ द्विदिनं सेवनात्स्पर्शाद्दर्शनाच्छयनात्तथा ॥ १० ॥
भोजनात्सह पंक्तौ च महापातकिभिर्द्विजाः ॥ द्वितीयभागो नश्येत ब्राह्मण्यस्य न संशयः ॥ ११ ॥ त्रिदिनाच्च तृतीयांशो नश्यत्येव
न संशयः ॥ चतुर्दिनाच्चतुर्थांशो विलयं याति हि ध्रुवम् ॥ १२ ॥ अतः परं च तैः साकं शयनासनभोजनैः ॥ तत्तुल्यपातकी भूया
न्महापातकिसंगवान् ॥ १३ ॥ तेन ब्राह्मण्यहीनोऽयं दुराचाराभिधो द्विजः ॥ ग्रस्तोऽभवद्भीषणेन व्यालेनेव बलीयसा ॥ १४ ॥
असौ परवशस्तेन वेतालेनातिपीडितः ॥ देशाद्देशं भ्रमन्विप्रो वनाच्चैव वनान्तरम् ॥ १५ ॥ पूर्वपुण्यविपाकेन दैवयोगेन स द्विजः ॥ वेंक
टाद्रिं महापुण्यं सर्वपातकनाशनम् ॥ १६ ॥ ॥ अथ जाबालितीर्थस्नानाद्दुराचारवेतालयोर्महापातकादिनिवृत्तिः ॥ ॥ अनुद्रुतः पिशाचेन
वेतालेन द्विजो ययौ ॥ न्यमज्जयत्स वेतालो महापातकनाशने ॥ १७ ॥ जाबालितीर्थे विप्रेन्द्रा महापातकिसंगिनम् ॥ उदतिष्ठत्क्षणादेव
वेतालेन विमोचितः ॥ १८ ॥ उत्थितोऽसौ द्विजो विप्रास्तस्मात्तीर्थात्तु पावनात् ॥ स्वस्थो व्यचिन्तयत्कोऽयं स्वर्णमुख्याः समीपतः ॥ १९ ॥
कथं मयागतमहो कावेरीतीरवासिना ॥ इति चिन्ताकुलः सोऽयं जाबालेस्तीर्थमुत्तमम् ॥ २० ॥ जाबालिं च महात्मानं योगीन्द्रवरमुत्तमम् ॥
समागम्य प्रणम्यासौ दुराचारोऽभ्यभाषत ॥ २१ ॥ न जाने भगवन्विप्र पर्वतोऽयं वदाधुना ॥ कावेरीतीरनिलयो दुराचाराभिधो ह्यहम् ॥ २२ ॥
कृपया ब्रूहि मे ब्रह्मन्मयात्र कथमागतम् ॥ इति पृष्टो मुनिस्तेन दुराचारेण सुव्रतः ॥ २३ ॥ ध्यात्वा मुहूर्तमवदद्दुराचारं कृपानिधिः ॥ २४ ॥
॥ ॥ अथ जाबालिवर्णितपार्वणश्राद्धाकरणदोषकथनम् ॥ ॥ जाबालिरुवाच ॥ ॥ महापातकिसंसर्गाद्दुराचारस्य ते पुरा ॥ ब्राह्मण्यं नष्टमभवद्वे
तालस्त्वां ततोऽग्रहीत् ॥ २५ ॥ तेनाविष्टस्त्वमायातो विवशोऽत्र विमूढधीः ॥ न्यमज्जयत्त्वां वेतालस्तीर्थेऽस्मिन्नतिपावने ॥ २६ ॥ अत्र मज्जनमा
त्रेण विमुक्तः पातकाद्भवान् ॥ जाबालितीर्थे ये स्नानं पुण्यं कुर्वन्ति मानवाः ॥ २७ ॥ तेषां नश्यंति वै सत्यं पञ्चपातकसंचयाः ॥ सत्कर्मसाधने

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

षोडशाब्दान्ते राक्षसोऽयं मुनीश्वराः ॥ भक्षितुं पद्मनाभं तं चक्रतीर्थनिवासिनम् ॥ ३१ ॥ उपाद्रवद्वायुवेगः स चास्तौषीज्जनार्दनम् ॥ योगिना च
स्तुतो विष्णुस्तदा चक्रमचोदयत् ॥ ३२ ॥ रक्षितुं पद्मनाभं तं राक्षसेन प्रपीडितम् ॥ अथागत्य हरेश्चक्रं राक्षसस्य शिरोऽहरत् ॥
॥ ३३ ॥ ॥ अथ सुन्दराख्यस्य राक्षसत्वविमुक्तिपूर्वकं स्वस्वरूपप्राप्तिः ॥ ॥ ततोऽयं राक्षसं देहं त्यक्त्वा दिव्यकलेवरः ॥ विमानवरमारुह्य
सुन्दरः पुष्पवर्षितः ॥ ३४ ॥ प्राञ्जलिः प्रणतो भूत्वा ववंदे तत्सुदर्शनम् ॥ तुष्टाव श्रुतिरम्याभिर्वाग्भिरग्र्याभिरादरात् ॥ ३५ ॥ ॥ सुन्दर
उवाच ॥ ॥ सुदर्शन नमस्तेऽस्तु विष्णुहस्तैकभूषण ॥ नमस्तेऽसुरसंहर्त्रे सहस्रादित्यतेजसे ॥ ३६ ॥ कृपावेशेन भवतस्त्यक्त्वाहं राक्षसीं
तनुम् ॥ स्वं रूपमभजं विष्णोश्चक्रायुध नमोऽस्तु ते ॥ ३७ ॥ अनुजानीहि मां गंतुं त्रिदिवं विष्णुवल्लभ ॥ भार्या मे परिशोचन्ति विर
हातुरचेतसः ॥ ३८ ॥ त्वन्मनस्को भविष्यामि यावज्जीवं यथा ह्यहम् ॥ तथा रूपं कुरुष्व त्वं मयि चक्र नमोऽस्तु ते ॥ ३९ ॥ एवं स्तुतं
विष्णुचक्रं सुन्दरेण सभक्तिकम् ॥ अनुजग्राह सहसा तथास्त्विति मुनीश्वराः ॥ ४० ॥ चक्रायुधाभ्यनुज्ञातः सुन्दरो ब्राह्मणोत्तमम् ॥
प्रणम्य तेनानुज्ञातो गन्धर्वस्त्रिदिवं ययौ ॥ ४१ ॥ सुन्दरे तु गते स्वर्गं पद्मनाभो मुनीश्वरः ॥ तच्चक्रं प्रार्थयामास विष्ण्वायुध नमोऽस्तु ते ॥
॥ ४२ ॥ चक्रायुध नमामि त्वां महासुरविमर्दन ॥ सन्निधानं कुरुष्व त्वं चक्रतीर्थेऽमले शुभे ॥४३॥ त्वत्सन्निधानात्सर्वेषां स्नातानां पापिनामिह ॥
पापनाशं कुरुष्व त्वं मोक्षं च कुरु शाश्वतम् ॥ ४४ ॥ चक्रतीर्थमिति ख्यातिं लोकेऽस्य परिकल्पय ॥ त्वत्सन्निधानादत्रत्यमुनीनां भयनाश
नम् ॥ ४५ ॥ इतः परं भवत्वार्य चक्रायुध नमोऽस्तु ते ॥ भूतप्रेतपिशाचेभ्यो भयं मा भवतु प्रभो ॥ ४६ ॥ इति सम्प्रार्थितं चक्रं पद्मनाभेन
योगिना ॥ तथैवास्त्विति सम्भाष्य तस्मिंस्तीर्थे तिरोहितम् ॥ ४७ ॥ ॥ श्रीसूत उवाच ॥ ॥ एवं वः कथितं विप्रा राक्षसस्योद्भवे मया ॥
माहात्म्यं चक्रतीर्थस्य कथितं च मलापहम् ॥ ४८ ॥ यच्छ्रुत्वा सर्वपापेभ्यो मुच्यते मानवो भुवि ॥ ४९ ॥ इति श्रीस्कांदे महापुराण एका
शीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे श्रीवेंकटाचलमाहात्म्ये चक्रतीर्थमहिमानुवर्णनंनाम चतुर्विंशोऽध्यायः ॥ २४ ॥ ॥ अथ जाबालि
तीर्थमाहात्म्यवर्णनम् ॥ ॥ श्रीसूत उवाच ॥ ॥ भोभोस्तपोधनाः सर्वे नैमिषारण्यवासिनः ॥ वेंकटाद्रौ महापुण्ये सर्वपातकनाशने ॥ १ ॥
ततो जाबालितीर्थस्य माहात्म्यं वर्णयाम्यहम् ॥ दुराचाराभिधो यत्र स्नात्वा मुक्तोऽभवद्द्विजाः ॥ २ ॥ ॥ मुनय ऊचुः ॥ ॥ दुराचाराभिधः
कोऽसौ सूत तत्त्वार्थकोविद ॥ किञ्च पापं कृतं तेन दुराचारेण वै मुने ॥ ३ ॥ कथं वा पातकान्मुक्तस्तीर्थेऽस्मिन्स्नानवैभवात् ॥ एतच्छुश्रूष

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नाम विप्रेंद्रा विटगोष्ठीपरायणः ॥ ५ ॥ ललनाशतसंयुक्तो विवस्त्रः सलिलाशये ॥ चिक्रीड स विवस्त्राभिः साकं युवतिभिर्मुदा ॥ ६ ॥ कवेर
जायास्तीर्थे तु वसिष्ठो मुनिभिः सह ॥ माध्याह्निकं कर्तुमना ययौ श्रीरंगमंदिरात् ॥ ७ ॥ तानृषीनवलोक्याथ रामास्ता भयकातराः ॥ वासां
स्याच्छादयामासुः सुन्दरो न तु साहसी ॥ ८ ॥ ततो वसिष्ठः कुपितः शशापैनं गतत्रपम् ॥ ९ ॥ ॥ वसिष्ठ उवाच ॥ ॥ यस्मात्सुन्दर
गन्धर्व दृष्ट्वाऽस्माँल्लज्जया त्वया ॥ वासो नाच्छादितं शीघ्रं याहि राक्षसतां ततः ॥ १० ॥ एवमुक्ते वसिष्ठेन रामाः प्राञ्जलयस्तदा ॥ प्रणिपत्य
वसिष्ठं तं भक्तिनम्रेण चेतसा ॥११॥ मुनिमण्डलमध्ये तु वसिष्ठमिदमब्रुवन् ॥ १२ ॥ ॥ रामा ऊचुः ॥ ॥ भगवन्सर्वधर्मज्ञ चतुराननवन्दन ॥
दयासिन्धोऽवलोक्यास्मान्न कोपं कर्तुमर्हसि ॥ १३ ॥ पतिरेव हि नारीणां भूषणं परमुच्यते ॥ पतिहीना तु या नारी शतपुत्रापि सा मुने ॥
॥ १४ ॥ विधवेत्युच्यते लोके तासां जन्म निरर्थकम् ॥ तत्प्रसादं कुरु मुने पत्यावस्माकमादरात् ॥ १५ ॥ एकोऽपराधः क्षंतव्यो मुनिभिस्तत्त्वद
र्शिभिः ॥ क्षमां कुरु दयासिन्धो युष्मच्छिष्येऽत्र सुन्दरे ॥ १६ ॥ ॥ श्रीसूत उवाच ॥ ॥ वसिष्ठः प्रार्थितस्त्वेवं सुन्दरस्यांगनाजनैः ॥
प्रोवाच वचनं भूयः प्रसन्नः स द्विजोत्तमः ॥ १७ ॥ ॥ अथ सुन्दराख्यस्य वसिष्ठोक्तराक्षसत्वनिवृत्त्युपायः ॥ ॥ वसिष्ठ उवाच ॥ ॥
न मे स्याद्वचनं मिथ्या कदाचिदपि सुभ्रुवः ॥ उपायं वः प्रवक्ष्यामि शृणुध्वं श्रद्धया सह ॥ १८ ॥ षोडशाब्दावधिः शापो भर्तुर्वै भविता ध्रुवम् ॥
षोडशाब्दावधौ चैव सुन्दरो राक्षसाकृतिः ॥ १९ ॥ यदृच्छया वेंकटाद्रिं सर्वपापहरं शुभम् ॥ गत्वासौ चक्रतीर्थं तद्गमिष्यति सुरांगनाः ॥ २० ॥
आस्ते तत्र महायोगी पद्मनाभो मुनीश्वरः ॥ भक्षार्थं तं मुनिं सोऽयं राक्षसोऽभिगमिष्यति ॥ २१ ॥ ततो ब्राह्मणरक्षार्थं प्रेरितं चक्रमुत्तमम् ॥
विष्णुनास्य शिरः कायाद्धरिष्यति न संशयः ॥ २२ ॥ ततः स्वं रूपमासाद्य शापान्मुक्तः स सुन्दरः ॥ पतिर्वस्त्रिदिवं भूयो गन्ता नास्त्यत्र
संशयः ॥ २३ ॥ ततस्त्रिदिवमासाद्य सुन्दरोऽयं पतिर्हि वः ॥ रमयिष्यति सुन्दर्यो युष्मान्सुन्दरवेषभृत् ॥ २४ ॥ ॥ श्रीसूत उवाच ॥ ॥
इत्युक्त्वा तु वसिष्ठस्ताः सुन्दरस्य वरांगनाः ॥ स्वाश्रमं प्रययौ तूर्णं श्रीरंगेश्वरभक्तिमान् ॥ २५ ॥ अथ रामास्तमालिंग्य सुन्दरं पतिमात्मनः ॥
रुरुदुः शोकसन्तप्ता दुःखसागरमध्यगाः ॥ २६ ॥ दृश्यमानासु तास्वेवं सुन्दरो राक्षसोऽभवत् ॥ महादंष्ट्रो महाकायो रक्तश्मश्रुशिरोरुहः ॥ २७ ॥
तं दृष्ट्वा भयसंविग्ना जग्मू रामास्त्रिविष्टपम् ॥ ततो राक्षसवेषोऽयं सुंदरो भैरवाकृतिः ॥ २८ ॥ भक्षयन्प्राणिनः सर्वान्देशाद्देशं वनाद्वनम् ॥ भ्रमन्न
निलवेगोऽयं वेंकटाद्रिं नगोत्तमम् ॥ २९ ॥ प्रविश्यासौ महापापी चक्रतीर्थं ततो ययौ ॥ एवं षोडशवर्षाणि भ्रमतोऽस्य ययुस्तदा ॥ ३० ॥ ततस्तु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

राक्षसस्य सुदर्शनम् ॥ शिरश्चकर्त सहसा ज्वालामालादुरासदम् ॥ ३५ ॥ ततो विप्रवरो दृष्ट्वा राक्षसं पतितं भुवि ॥ मुदा परमया युक्तस्तुष्टाव च सुदर्शनम् ॥ ३६ ॥ ॥ पद्मनाभ उवाच ॥ ॥ विष्णुचक्र नमस्तेऽस्तु विश्वरक्षणदीक्षित ॥ नारायणकराम्भोजभूषणाय नमोऽस्तु ते ॥ ३७ ॥ युद्धेष्वसुरसंहारकुशलाय महारव ॥ सुदर्शन नमस्तुभ्यं भक्तानामार्तिनाशन ॥ ३८ ॥ रक्ष मां भयसंविग्नं सर्वस्मादपि कल्मषात् ॥ स्वामिन्सुदर्शन विभो चक्रतीर्थे सदा भवान् ॥ ३९ ॥ सन्निधेहि हिताय त्वं जगतो मुक्तिकांक्षिणः ॥ ब्राह्मणेनैवमुक्तं तद्विष्णुचक्रं मुनीश्वराः ॥ ४० ॥ तं प्राह पद्मनाभाख्यं प्रीणयन्निव सौहृदात् ॥ ४१ ॥ ॥ अथ द्विजप्रार्थनया चक्रकृतवरदानादिः ॥ ॥ सुदर्शन उवाच ॥ ॥ पद्मनाभ महापुण्यं चक्रतीर्थमनुत्तमम् ॥ अस्मिन्वसामि सततं लोकानां हितकाम्यया ॥ ४२ ॥ त्वत्पीडां परिचिन्त्याहं राक्षसेन दुरात्मना ॥ ४३ ॥ प्रेरितो विष्णुना विप्र त्वरया समुपागतः ॥ त्वत्पीडकोऽपि निहतो मयाऽयं राक्षसाधमः ॥ ४४ ॥ मोचितस्त्वं भयादस्मात्त्वं हि भक्तो हरेः सदा ॥ चक्रतीर्थे महापुण्ये सर्वपापहरे द्विज ॥ ४५ ॥ सततं लोकरक्षार्थं सन्निधानं करोमि ते ॥ अस्मिन्मत्सन्निधानात्ते तथान्येषामपि द्विज ॥ ४६ ॥ इतः परं न पीडा स्याद्भूतराक्षससम्भवा ॥ अस्मिन्मत्सन्निधानात्स्याच्चक्रतीर्थमिति प्रथा ॥ ४७ ॥ स्नानं येऽत्र प्रकुर्वन्ति चक्रतीर्थे विमुक्तिदे ॥ तेषां पुत्राश्च पौत्राश्च वंशजाः सर्व एव हि ॥ ४८ ॥ विधूतपापा यास्यन्ति तद्विष्णोः परमं पदम् ॥ इत्युक्त्वा विष्णुचक्रं तत्पद्मनाभस्य पश्यतः ॥ ४९ ॥ अन्येषामपि विप्राणां पश्यतां सहसा द्विजाः ॥ चक्रपुष्करिणीं तां तु प्राविशत्पापनाशिनीम् ॥ ५० ॥ ॥ श्रीसूत उवाच ॥ ॥ चक्रतीर्थस्य माहात्म्यं विप्रेन्द्राः पापनाशनम् ॥ युष्माकं कथितं सर्वं शौनकाद्या महौजसः ॥ ५१ ॥ चक्रतीर्थसमं तीर्थं न भूतं न भविष्यति ॥ अत्र स्नात्वा नरा विप्रा मोक्षभाजो न संशयः ॥ ५२ ॥ कीर्तयेदिममध्यायं शृणुयाद्वा समाहितः ॥ चक्रतीर्थाभिषेकस्य प्राप्नोति फलमुत्तमम् ॥ ५३ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे श्रीवेंकटाचलमाहात्म्ये चक्रतीर्थमहिमानुवर्णनंनाम त्रयोविंशतितमोऽध्यायः ॥ २३ ॥ ॥ छ ॥ अथ सुन्दराख्यगन्धर्वस्य राक्षसत्वप्राप्तिनिवृत्त्योरुपोद्घातः ॥ ॥ ऋषय ऊचुः ॥ ॥ भगवन्राक्षसः कोऽसौ सूत पौराणिकोत्तम ॥ विष्णुभक्तं महात्मानं यो ब्राह्मणमबाधत ॥ १ ॥ ॥ श्रीसूत उवाच ॥ ॥ वक्ष्यामि राक्षसं क्रूरं तं विप्राः शृणुतादरात् ॥ यथा च राक्षसो जातो मुनीनां शापवैभवात् ॥ २ ॥ पुरा वैकुण्ठसदृशे श्रीरङ्गे विष्णुमंदिरे ॥ वसिष्ठात्रिमुखाः सर्वे विष्णुभक्ता महौजसः ॥ ३ ॥ श्रीरङ्गनाथं देवेशं भक्तानामभयप्रदम् ॥ उपासांचक्रिरे मुक्त्यै श्रीरङ्गपुरवासिनः ॥ ४ ॥ कदाचित्तत्र गन्धर्वो वीरबाहुसुतो बली ॥ सुन्दरो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

च तपःसु च ॥ ४५ ॥ समर्थोऽपि द्विजश्रेष्ठः श्राद्धे वन्ध्यापतिं त्यजेत् ॥ अलभ्ये तु द्विजे पात्रे तन्तुमात्रोपजीविनम् ॥ ४६ ॥ पुत्रवन्तं सदा
चारं श्राद्धार्थं तु निमन्त्रयेत् ॥ तदभावे द्विजश्रेष्ठ पुत्रं वाऽनुजमेव वा ॥ ४७ ॥ आत्मानं वा नियुञ्जीत श्राद्धे वन्ध्यापतिं त्यजेत् ॥ पुण्यशील
महाभाग चोद्धृत्य भुजमुच्यते ॥ ४८ ॥ सर्वथा पुत्रहीनं तु श्राद्धार्थं न नियोजयेत् ॥ वन्ध्यापतिं द्विजं यस्तु श्राद्धकर्ता नियोक्ष्यति ॥ ४९ ॥
तच्छ्राद्धमासुरं ज्ञेयं कर्ता च नरकं व्रजेत् ॥ ५० ॥ ॥ अथाकाशगंगास्नानेन पुण्यशीलस्य तद्विकृतिनिवृत्तिः ॥ ॥ बहुनात्र किमुक्तेन तद्दोषवि
निवृत्तये ॥ उपायं ते प्रवक्ष्यामि स्वर्णमुख्यास्तटे शुभे ॥ ५१ ॥ वर्तते देवसंघैश्च सेवितो वेंकटाचलः ॥ मेरुपुत्रो महापुण्यः सर्वकामफलप्रदः ॥
॥ ५२ ॥ तस्मिन्वेंकटशैलेन्द्रे सुरासुरनमस्कृते ॥ वियद्गंगेति नाम्ना वै तीर्थमस्ति महत्तरम् ॥ ५३ ॥ सर्वपापप्रशमनमायुरारोग्यवर्धनम् ॥ त्वं
गत्वा वेंकटं शैलं स्वामिपुष्करिणीजले ॥ ५४ ॥ स्नात्वा संकल्पपूर्वं तु गंगातीर्थमनन्तरम् ॥ गत्वा तीर्थविधानेन स्नानं कुरु महामते ॥ ५५ ॥
स्नानमात्रात्ततः सद्यो मुखस्यास्य महामते ॥ वैरूप्यं तत्क्षणादेव नंक्ष्यत्येव न संशयः ॥५६॥ एवमुक्तः पुण्यशीलो ह्यगस्त्येन महात्मना ॥ तं प्रणम्य
महात्मानं वेंकटाद्रिं ततो ययौ ॥५७॥ तत्र गत्वा महाभागः स्वामिपुष्करिणीजले ॥ स्नात्वा नियमपूर्वं तु वियद्गंगासमीपगः ॥ ५८ ॥ तत्र स्नानेन
धर्मात्मा कामवक्रोपमं मुखम् ॥ प्राप्तवान्पुण्यशीलस्तु अहो तीर्थस्य वैभवम् ॥ ५९ ॥ ॥ श्रीसूत उवाच ॥ ॥ एवं वः कथितं विप्रा नारदेन प्रभाषि
तम् ॥ सनत्कुमारमुनये शौनकाद्या महौजसः ॥ ६० ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे श्रीवेंकटाचल
माहात्म्य आकाशगंगामाहात्म्यवर्णनंनाम द्वाविंशतितमोऽध्यायः ॥ २२ ॥ ॥ छ ॥ ॥ अथ चक्रतीर्थमाहात्म्यम् ॥ ॥ श्रीसूत उवाच ॥ ॥ अथाहं
संप्रवक्ष्यामि द्विजेन्द्राः सत्यवादिनः॥ चक्रतीर्थस्य माहात्म्यं सर्वपापप्रणाशनम् ॥१॥ ये शृण्वन्ति महापुण्यं चक्रतीर्थस्य वैभवम् ॥ ते यांति विष्णु
भवनं पुनरावृत्तिवर्जितम् ॥२॥ अन्नदाने च विमुखा जलदाने तथैव च ॥ गोदानविमुखा ये च शुद्धास्तेऽत्र निमज्जनात् ॥३॥ तस्मात्पुण्यतमं तीर्थं
चक्रतीर्थमनुत्तमम् ॥ ४ ॥ ॥ अथ पद्मनाभाख्यद्विजकृततपःप्रकारः ॥ ॥ श्रीसूत उवाच ॥ ॥ पुरा श्रीवत्सगोत्रीयः पद्मनाभो जितेन्द्रियः ॥ चक्रपु
ष्करिणीतीरे सोऽतप्यत महत्तपः ॥ ५ ॥ दयायुक्तो निराहारः सत्यवादी जितेन्द्रियः ॥ आत्मवत्सर्वभूतानि पश्यन्विषयनिःस्पृहः ॥ ६ ॥ सर्वभूत
हितो दान्तः सर्वद्वन्द्वविवर्जितः ॥ वर्षाणि कतिचित्सोऽयं जीर्णपर्णाशनोऽभवत् ॥ ७ ॥ कश्चित्कालं जलाहारो वायुभक्षः कियत्समाः ॥ एवं द्वादश
वर्षाणि पद्मनाभो महामुनिः ॥ ८ ॥ ॥ अथ चक्रतीर्थे पद्मनाभाख्यद्विजकृततपस्तुष्टभगवदाविर्भावः ॥ ॥ अतप्यत तपो घोरं देवैरपि सुदुष्करम्॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ तत्तपसा तुष्टो भगवान्कमलापतिः ॥ ९ ॥ प्रत्यक्षतामगात्तस्य शङ्खचक्रगदाधरः ॥ विकचाम्बुजपत्राक्षः सूर्यकोटिसमप्रभः ॥ १० ॥ उन्मील्य
चक्षुषी तत्र दृष्टवान्वेंकटेश्वरम् ॥ शंखचक्रधरं शांतं श्रीनिवासं कृपानिधिम् ॥ दृष्ट्वा देवं महात्मानं स्तोतुं समुपचक्रमे ॥ ११ ॥ ॥ अथ पद्मनाभा
ख्यद्विजकृतश्रीनिवासस्तुतिः ॥ ॥ नमो देवाधिदेवाय वेंकटेशाय शार्ङ्गिणे ॥ नारायणाद्रिवासाय श्रीनिवासाय ते नमः ॥ १२ ॥ नमः कल्मष
नाशाय वासुदेवाय विष्णवे ॥ शेषाचलनिवासाय श्रीनिवासाय ते नमः ॥ १३ ॥ नमस्त्रैलोक्यनाथाय विश्वरूपाय साक्षिणे ॥ शिवब्रह्मादिवंद्याय
श्रीनिवासाय ते नमः ॥ १४ ॥ नमः कमलनेत्राय क्षीराब्धिशयनाय ते ॥ दुष्टराक्षससंहर्त्रे श्रीनिवासाय ते नमः ॥ १५ ॥ भक्तप्रियाय देवाय
देवानां पतये नमः ॥ १६ ॥ प्रणतार्तिविनाशाय श्रीनिवासाय ते नमः ॥ १७ ॥ योगिनां पतये नित्यं वेदवेद्याय विष्णवे ॥ भक्तानां पापसंहर्त्रे
श्रीनिवासाय ते नमः ॥ १८ ॥ एवं स्तुतो महाभागः श्रीनिवासो जगन्मयः ॥ पद्मनाभाख्यऋषिणा चक्रतीर्थनिवासिना ॥ १९ ॥ ॥ अथ
पद्मनाभस्य चक्रतीर्थे निरंतरवासाय भगवन्नियमनम् ॥ ॥ संतोषं परमं प्राप्य वेंकटेशो दयानिधिः ॥ २० ॥ पद्मनाभं द्विजवरं शांतं धर्मपराय
णम् ॥ सुधाधारोपमं वाक्यमब्रवीत्पुरुषोत्तमः ॥ २१ ॥ ॥ श्रीनिवास उवाच ॥ ॥ द्विजवर्य महाभाग मत्पादकमलार्चक ॥ चक्रतीर्थस्य
तीरे त्वमाकल्पं पूजयन्वस ॥ २२ ॥ इत्युक्त्वा भगवान्विष्णुस्तत्रैवांतरधीयत ॥ अन्तर्धानं गते देवे श्रीनिवासे जगद्गुरौ ॥ २३ ॥ चक्रतीर्थस्य तीरे
तु वासं चक्रे महामतिः ॥ ततः कालांतरे कश्चिद्राक्षसो भीमदर्शनः ॥ २४ ॥ मुनिं तं पद्मनाभाख्यं नारायणपरायणम् ॥ आययौ भक्षितुं क्रूरः
क्षुधया परिपीडतः ॥ २५ ॥ ब्राह्मणं तरसा सोऽयं राक्षसो जगृहे तदा ॥ गृहीतस्तरसा तेन विप्रो वेदांगपारगः ॥ २६ ॥ प्रचुक्रोश दयाम्भोधिमा
पन्नानां परायणम् ॥ नारायणं चक्रपाणिं रक्ष रक्षेति वै मुहुः ॥ २७ ॥ वेंकटेश दयासिन्धो शरणागतपालक ॥ त्राहि मां पुरुषव्याघ्र रक्षोवश
मुपागतम् ॥ २८ ॥ लक्ष्मीकांत हरे विष्णो वैकुण्ठ गरुडध्वज ॥ मां रक्ष राक्षसाक्रांतं ग्राहाक्रांतं गजं यथा ॥ २९ ॥ दामोदर जगन्नाथ हिरण्या
सुरमर्दन ॥ प्रह्लादमिव मां रक्ष राक्षसेनातिपीडितम् ॥ ३० ॥ ॥ अथ पद्मनाभहननोद्युक्तासुरवधाय भगवत्कृतचक्रप्रेषणम् ॥ ॥ इत्येवं स्तुव
तस्तस्य पद्मनाभस्य हे द्विजाः ॥ स्वभक्तस्य भयं ज्ञात्वा चक्रपाणिर्दयानिधिः ॥ ३१ ॥ स्वचक्रं प्रेषयामास भक्तरक्षणकारणात् ॥ प्रेरितं विष्णुचक्रं
तद्विष्णुना प्रभविष्णुना ॥ ३२ ॥ आजगामाथ वेगेन चक्रपुष्करिणीतटम् ॥ अनन्तादित्यसंकाशमनन्ताग्निसमप्रभम् ॥ ३३ ॥ महाज्वालं महा
नादं महासुरविमर्दनम् ॥ दृष्ट्वा सुदर्शनं विष्णो राक्षसोऽथ प्रदुद्रुवे ॥ ३४ ॥ ॥ अथ भगवत्प्रेषितचक्रकृतासुरवधः ॥ ॥ द्रवमाणस्य तस्याशु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

व्रतघ्नीश्च तथा चण्डीं कदाचिन्नाभिवादयेत् ॥ १९ ॥ सभायां यज्ञशालायां देवतायतनेष्वपि ॥ प्रत्येकं तु नमस्कारो हन्ति पुण्यं पुरातनम् ॥
॥ २० ॥ श्राद्धव्रते नियुक्तश्च देवताभ्यर्चकं तथा ॥ यज्ञं च तर्पणञ्चैव कुर्वन्तं नाभिवादयेत् ॥ २१ ॥ कुर्वते वन्दनं यस्तु न कुर्यात्प्रतिवन्दनम् ॥
नाभिवाद्यः स विज्ञेयो यथा शूद्रस्तथैव च ॥ २२ ॥ तस्मात्सर्वेषु कालेषु बुद्धिमान्ब्राह्मणोत्तमः ॥ वन्ध्यापतिं द्विजं क्रूरं कदाचिन्नाभिवादयेत् ॥
॥ २३ ॥ ॥ अथाकाशगंगामाहात्म्यम् ॥ ॥ श्रीसूत उवाच ॥ ॥ अत्रेतिहासं वक्ष्यामि पुण्यशीलस्य धीमतः ॥ सनत्कुमारमुनये नारदेन
प्रभाषितम् ॥ २४ ॥ तद्वक्ष्यामि मुनिश्रेष्ठाः शृणुध्वं सुसमाहिताः ॥ पुरा गोदावरीतीरे सर्वधर्मपरायणः ॥ २५ ॥ पुण्यशीलो द्विजवरः सत्यवादी
जितेन्द्रियः ॥ दयावान्सर्वभूतेषु देवाग्निद्विजपूजकः ॥२६॥ कर्मणा जन्मशुद्धश्च मातापितृहिते रतः ॥ गुरुभक्तिः सदाक्षिण्यो ब्रह्मण्यः साधुसंमतः
॥ २७ ॥ एतादृशगुणैर्युक्तः पुण्यशीलस्य धीमतः ॥ २८ ॥ ॥ अथ पुण्यशीलस्य वन्ध्यापतिनिमन्त्रणेन गर्दभमुखत्वप्राप्तिः ॥ ॥ गृहं सम्प्राप्तवा
न्विप्रो वेदवेदांगपारगः ॥ प्रार्थितः पुण्यशीलेन पितृश्राद्धेऽतिवेगतः ॥ २९ ॥ तं विप्रं श्रोत्रियं शान्तं पितृश्राद्धे नियोज्य वै ॥ श्राद्धं चकार धर्मा
त्मा प्रत्याब्दिकमनुत्तमम् ॥ ३० ॥ ततः कालान्तरे तस्य पुण्यशीलस्य चानने ॥ वैरूप्यं प्राप्तमत्युग्रं रासभाननवत्तदा ॥ ३१ ॥ ततः खिन्नमना
भूत्वा पुण्यशीलोऽतिधार्मिकः ॥ निःश्वस्य बहुधा खिन्नः प्रपेदेऽगस्त्ययोगिनः ॥ ३२ ॥ सुवर्णमुखरीतीरे ऋषिसंघनिषेविते ॥ आश्रमं परमं
दिव्यं सर्वकामफलप्रदम् ॥ ३३ ॥ तत्राश्रमे मुनिवरैः सेव्यमानमहर्निशम् ॥ दृष्ट्वागस्त्यं महात्मानं सर्वलोकहितैषिणम् ॥ ३४ ॥ प्रणाममकरो
त्तस्मै गार्दभास्योऽतिदुःखितः ॥ ३५ ॥ ॥ पुण्यशील उवाच ॥ ॥ तपोनिधे नमस्तुभ्यमगस्त्य मुनिसेवित ॥ कुत्सितास्यं महापापं रक्षरक्ष दया
निधे ॥ ३६ ॥ केन दोषेण मे चात्र मुखस्यासीत्कुरूपता ॥ ३७ ॥ मयि प्रीत्या महाभाग वदस्व मुनिसत्तम ॥ ३८ ॥ ॥ अगस्त्य उवाच ॥ ॥
विप्रवर्य महाभाग पुण्यशील महामते ॥ आननस्य विरूपं वै शृणु नान्यमना द्विज ॥३९॥ ॥ अथ वन्ध्यापतेः श्राद्धनिमन्त्रणानर्हत्वकथनम् ॥ ॥
कश्चिद्विप्रं गुणनिधिं वेदवेदांगपारगम् ॥ श्रोत्रियं पुत्ररहितं श्राद्धे त्वं विनियुक्तवान् ॥ ४० ॥ तेन दोषेण महता मुखे तव विरूपता ॥ ये लोके
हव्यकव्यादौ वन्ध्यायाः स्वामिनं द्विजम् ॥ ४१ ॥ नियोजयन्ति ते यान्ति मुखे गर्दभरूपताम् ॥ शुभकर्मणि वा विप्र पैतृके वापि कर्मणि ॥
॥ ४२ ॥ वन्ध्यापतिं महापापं कदाचिन्न निमन्त्रयेत् ॥ वन्ध्यापतिं महाक्रूरं वृषलीपतिमेव वा ॥ ४३ ॥ श्रेयस्कामी हि विप्रेंद्र श्राद्धे तु न
निमन्त्रयेत् ॥ वेदशास्त्रादियुक्तोऽपि कुलीनः कर्मठोऽपि वा ॥ ४४ ॥ वन्ध्याभर्ता द्विजश्रेष्ठ श्राद्धे त्याज्यः कथञ्चन ॥ ज्योतिष्टोमादियज्ञेषु व्रतेषु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ये ॥ मदर्थं कर्मकर्तारस्ते वै भागवतोत्तमाः ॥ ५९ ॥ मन्मानसाश्च मद्भक्ता ये मद्भजनलोलुपाः ॥ मन्नामस्मरणासक्तास्ते वै भागवतोत्तमाः ॥
॥ ६० ॥ बहुनात्र किमुक्तेन संक्षेपात्ते ब्रवीम्यहम् ॥ सद्गुणाय प्रवर्तंते ते वै भागवतोत्तमाः ॥ ६१ ॥ एते भागवता विप्राः केचिदत्र प्रकीर्तिताः ॥
ममापि गदितुं शक्या नाब्दकोटिशतैरपि ॥ ६२ ॥ रामानुज महाभाग मद्भक्तानां च लक्षणम् ॥ मयि भक्ते त्वयि प्रीत्या युक्तं किल
महामते ॥ ६३ ॥ ॥ श्रीसूत उवाच ॥ ॥ एवं वः कथितं विप्राः शौनकाद्या महौजसः ॥ वृषाद्रौ च वियद्गंगातीर्थमाहात्म्यमुत्तमम् ॥
॥ ६४ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे श्रीवेंकटाचलमाहात्म्ये आकाशगंगामाहात्म्यरामानुज
विप्रव्रतचर्यादिवर्णनंनामैकविंशतितमोऽध्यायः ॥ २१ ॥ ॥ छ ॥ ॥ अथ दानार्हसत्पात्रनिर्णयः ॥ ॥ ऋषय ऊचुः ॥ ॥ भगवन्सूत सर्वज्ञ
वेदवेदान्तकोविद ॥ दानानि कस्मै देयानि दानकालश्च कीदृशः ॥ १ ॥ कश्च तत्प्रतिगृह्णीयात्सर्वं नो वक्तुमर्हसि ॥ २ ॥ ॥ श्रीसूत उवाच ॥ ॥
महापुण्यप्रदे क्षेत्रे वेंकटाख्ये द्विजोत्तमाः ॥ सर्वेषामेव वर्णानां ब्राह्मणः परमो गुरुः ॥ ३ ॥ तस्मै दानानि देयानि स तारयति पंडितः ॥
ब्राह्मणः प्रतिगृह्णीयाद्वर्जयित्वा त्ववर्णकम् ॥ ४ ॥ षण्डस्य पुत्रहीनस्य दंभाचाररतस्य च ॥ वेदविद्वेषिणश्चैव द्विजविद्वेषिणस्तथा ॥ ५ ॥
स्वकर्मत्यागिनश्चापि दत्तं भवति निष्फलम् ॥ परदाररतस्यापि परद्रव्यरतस्य च ॥ ६ ॥ गायकस्यापि विप्रस्य दत्तं भवति निष्फलम् ॥
असूयाविष्टमनसः कृतघ्नस्य च मायिनः ॥ ७ ॥ ज्ञानशून्यस्य विप्रस्य दत्तं भवति निष्फलम् ॥ नित्यं याञ्चापरस्यापि हिंसकस्या
बलस्य च ॥ ८ ॥ नामविक्रयिणश्चैव वेदविक्रयिणस्तथा ॥ स्मृतिविक्रयिणश्चैव धर्मविक्रयिणस्तथा ॥ ९ ॥ परोपतापशीलस्य दत्तं भवति
निष्फलम् ॥ ये केचित्पापनिरता निन्दिताः सुकृतैस्तथा ॥ १० ॥ न तेभ्यः प्रतिगृह्णीयान्न देयं वापि किञ्चन ॥ सत्कर्मनिरतायैव श्रोत्रि
यायाहिताग्नये ॥ ११ ॥ वृत्तिहीनाय वै देयं दरिद्राय कुटुम्बिने ॥ देवपूजासु सक्ताय पुराणकथकाय च ॥ १२ ॥ देयं प्रयत्नतो विप्रा दरिद्रस्य
विशेषतः ॥ बहुना किमिहोक्तेन शृणुध्वं द्विजसत्तमाः ॥ १३ ॥ सर्वेषां ब्राह्मणानां च प्रदातुं शक्यते सदा ॥ वन्ध्याभर्त्रे प्रदत्तश्चेद्रासभो जायते
नरः ॥ १४ ॥ नास्तिकं भिन्नमर्यादं पुत्रहीनं जडं खलम् ॥ स्तेयिनं कितवं चैव कदाचिन्नाभिवादयेत् ॥ १५ ॥ पाषण्डं पतितं व्रात्यं वेदविक्रयिणं
तथा ॥ कृतघ्नं पापनिरतं कदाचिन्नाभिवादयेत् ॥ १६ ॥ तथा स्नानं प्रकुर्वन्तं समित्पुष्पकरं तथा ॥ उदपात्रधरश्चैव भुंजन्तं नाभिवादयेत् ॥ १७ ॥
विवादशालिनं चण्डं वमन्तं जनमध्यगम् ॥ भिक्षान्नधारिणं चैव शयानं नाभिवादयेत् ॥ १८ ॥ वन्ध्याश्च पुष्पिणीं जारां सूतिकां गर्भपातिनीम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कटकादिविभूषितः ॥ विष्वक्सेनसुनन्दादिकिङ्करैः परिवारितः ॥ ९ ॥ वीणावेणुमृदंगादिवादकैर्नारदादिभिः ॥ गीयमानः सुविभवः पीताम्बरविरा
जितः ॥१०॥ लक्ष्मीविराजितोरस्को नीलमेघनिभच्छविः ॥ सनकादिमहायोगिसेवितः पार्श्वयोर्द्वयोः ॥ ११ ॥ मन्दस्मितेन सकलं मोहयन्भुवन
त्रयम् ॥ स्वभासा मानयन्सर्वा दिशो दश विराजयन् ॥ १२ ॥ सुभक्तसुलभो देवो वेंकटेशो दयानिधिः ॥ पुनः सन्निदधे तस्य रामानुजमहा
मुनेः ॥ १३ ॥ आविर्भूतं तदा दृष्ट्वा श्रीनिवासं कृपानिधिम् ॥ पीताम्बरधरं देवं तुष्टिं प्राप महामुनिः ॥ १४ ॥ भक्त्या परमया युक्तस्तुष्टाव जगदी
श्वरम् ॥१५॥ ॥ अथ रामानुजाख्यविप्रकृतभगवत्स्तुतिः ॥ ॥ रामानुज उवाच ॥ ॥ नमो देवाधिदेवाय शङ्खचक्रगदाभृते ॥ नमो नित्याय शुद्धाय
वेंकटेशाय ते नमः ॥ १६ ॥ नमो भक्तार्तिहंत्रे ते हव्यकव्यस्वरूपिणे ॥ नमस्त्रिमूर्तये तुभ्यं सृष्टिस्थित्यन्तकारिणे ॥ १७ ॥ नमः परेशाय नमोऽति
भूम्ने नमोऽस्तु लक्ष्मीपतये विधात्रे ॥ नमोऽस्तु सूर्येन्दुविलोचनाय नमो विरिञ्चाद्यभिवन्दिताय ॥ १८ ॥ यो नाम जात्यादिविकल्पहीनः समस्त
दोषैरपि वर्जितो यः ॥ समस्तसंसारभयापहारिणे तस्मै नमो दैत्यविनाशकाय॥१९॥ वेदांतवेद्याय रमेश्वराय वृषादिवासाय विधातृपित्रे ॥ नमोनमः
सर्वजनार्तिहारिणे नारायणायामितविक्रमाय ॥ २० ॥ नमस्तुभ्यं भगवते वासुदेवाय शार्ङ्गिणे ॥ भूयोभूयो नमस्तुभ्यं वेंकटाद्रिनिवासिने ॥ २१ ॥
इति स्तुत्वा वेंकटेशं श्रीनिवासं जगद्गुरुम् ॥ रामानुजो मुनिस्तूष्णीमास्ते विप्रवरोत्तमः ॥ २२ ॥ श्रुत्वा स्तुतिं श्रुतिसुखां स्तुतस्तस्य महात्मनः ॥
अवाप परमं तोषं वेंकटाचलनायकः ॥ २३ ॥ अथालिङ्ग्य मुनिं शौरिश्चतुर्भिर्बाहुभिस्तदा ॥ बभाषे प्रीतिसंयुक्तो वरं वै व्रियतामिति ॥ २४ ॥
तुष्टोऽस्मि तपसा तेऽद्य स्तोत्रेणापि महामुने ॥ नमस्कारेण च प्रीतो वरदोऽहं तवागतः ॥ २५ ॥ ॥ अथ रामानुजाख्यविप्रकृतभगवत्प्रार्थना ॥ ॥
॥ ॥ रामानुज उवाच ॥ ॥ नारायण रमानाथ श्रीनिवास जगन्मय ॥ जनार्दन जगद्धाम गोविन्द नरकान्तक ॥ २६ ॥ त्वद्दर्शनात्कृतार्थोऽस्मि
वेंकटाद्रिशिरोमणे ॥ त्वां नमस्यंति धर्मिष्ठा यतस्त्वं धर्मपालकः ॥ २७ ॥ यं न वेत्ति भवो ब्रह्मा यं न वेत्ति त्रयी तथा ॥ त्वां वेद्मि परमात्मानं
किमस्मादधिकं परम् ॥ २८ ॥ योगिनो यं न पश्यंति यं न पश्यंति कर्मठाः ॥ पश्यामि परमात्मानं किमस्मादधिकं परम् ॥ २९ ॥ एतेन च कृता
र्थोऽस्मि वेंकटेश जगत्पते ॥ यन्नामस्मृतिमात्रेण महापातकिनोऽपि च ॥ ३० ॥ मुक्तिं प्रयांति मनुजास्तं पश्यामि जनार्दनम् ॥ त्वत्पादपद्म
युगले निश्चला भक्तिरस्तु मे ॥ ३१ ॥ ॥ अथ भगवद्वर्णिताकाशगंगातीर्थस्नानकालः ॥ ॥ श्रीभगवानुवाच ॥ ॥ मयि भक्तिर्दृढा तेस्तु रामा
नुज महामते ॥ शृणु चाप्यपरं वाक्यमुच्यते ते मया द्विज ॥ ३२ ॥ मेषसंक्रमणे भानोश्चित्रानक्षत्रसंयुते ॥ पौर्णमास्यां च गंगायां स्नानं कुर्व

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्ति ये जनाः ॥ ३३ ॥ ते यांति परमं धाम पुनरावृत्तिवर्जितम् ॥ वियद्गंगासमीपे त्वं वस रामानुज द्विज ॥ ३४ ॥ एतत्प्रारब्धदेहांते मत्स्वरूप मवाप्स्यसि ॥ बहुना किमिहोक्तेन वियद्गंगाजले शुभे ॥ ३५ ॥ स्नान्ति ये वै जनाः सर्वे ते वै भागवतोत्तमाः ॥ भवन्ति मुनिशार्दूल नात्र कार्या विचारणा ॥ ३६ ॥ ॥ रामानुज उवाच ॥ ॥ किंलक्षणा भागवता ज्ञायन्ते केन कर्मणा ॥ एतदिच्छाम्यहं श्रोतुं कौतूहलपरो यतः ॥ ३७ ॥ ॥ ॥ अथ भगवद्वर्णितभागवतलक्षणानि ॥ ॥ श्रीवेंकटेश उवाच ॥ लक्ष्म भागवतानां तु शृणुष्व मुनिसत्तम ॥ ३८ ॥ वक्तुं तेषां प्रभावं तु शक्यते नाब्दकोटिभिः ॥ ३९ ॥ ये हिताः सर्वजन्तूनां गतासूया विमत्सराः ॥ ज्ञानिनो निःस्पृहाः शान्तास्ते वै भागवतोत्तमाः ॥ ४० ॥ कर्मणा मनसा वाचा परपीडां न कुर्वते ॥ अपरिग्रहशीलाश्च ते वै भागवतोत्तमाः ॥ ४१ ॥ सत्कथाश्रवणे येषां वर्तते सात्त्विकी मतिः ॥ मत्पादाम्बुज भक्ता ये ते वै भागवतोत्तमाः ॥ ४२ ॥ मातापित्रोश्च शुश्रूषां कुर्वते ये नरोत्तमाः ॥ ये तु देवार्चनरता ये तु तत्साधका नराः ॥ पूजां दृष्ट्वा तु मोदन्ते ते वै भागवतोत्तमाः ॥ ४३ ॥ वर्णिनां च यतीनां च परिचर्यापराश्च ये ॥ परनिन्दामकुर्वाणास्ते वै भागवतोत्तमाः ॥ ४४ ॥ सर्वेषां हित वाक्यानि ये वदन्ति नरोत्तमाः ॥ ये गुणग्राहिणो लोके ते वै भागवतोत्तमाः ॥ ४५ ॥ आत्मवत्सर्वभूतानि ये पश्यन्ति नरोत्तमाः ॥ तुल्याः शत्रुषु मित्रेषु ते वै भागवताः स्मृताः ॥ ४६ ॥ धर्मशास्त्रप्रवक्तारः सत्यवाक्यरताश्च ये ॥ तेषां शुश्रूषवो ये च ते वै भागवतोत्तमाः ॥ ४७ ॥ व्याकुर्वन्ति पुराणानि तानि शृण्वन्ति ये तथा ॥ तद्वक्तरि च भक्ता ये ते वै भागवतोत्तमाः ॥ ४८ ॥ ये गोब्राह्मणशुश्रूषां कुर्वन्ति सततं नराः ॥ तीर्थयात्रापरा ये च ते वै भागवतोत्तमाः ॥ ४९ ॥ अन्येषामुदयं दृष्ट्वा येऽभिनन्दंति मानवाः ॥ हरिनामपरा ये च ते वै भागवतोत्तमाः ॥ ५० ॥ आरामारोपणरतास्तटाकपरिरक्षकाः ॥ कासारकूपकर्तारस्ते वै भागवतोत्तमाः ॥ ५१ ॥ ये वै तटाककर्तारो देव सद्मानि कुर्वते ॥ गायत्रीनिरता ये च ते वै भागवतोत्तमाः ॥ ५२ ॥ येऽभिनन्दंति नामानि हरेः श्रुत्वाऽतिहर्षिताः ॥ रोमाञ्चित शरीराश्च ते वै भागवतोत्तमाः ॥ ५३ ॥ तुलसीकाननं दृष्ट्वा ये नमस्कुर्वते नराः ॥ तत्काष्ठांकितकर्णा ये ते वै भागवतोत्तमाः ॥ ॥ ५४ ॥ तुलसीगन्धमाघ्राय सन्तोषं कुर्वते तु ये ॥ तन्मूलमृद्धरा ये च ते वै भागवतोत्तमाः ॥ ५५ ॥ स्वाश्रमाचारनिरतास्तथैवा तिथिपूजकाः ॥ ये च वेदार्थवक्तारस्ते वै भागवतोत्तमाः ॥ ५६ ॥ विदितानि च शास्त्राणि परार्थं प्रवदन्ति ये ॥ सर्वत्र गुणभाजो ये ते वै भागवतोत्तमाः ॥ ५७ ॥ पानीयदाननिरता ह्यन्नदानरताश्च ये ॥ एकादशीव्रतपरास्ते वै भागवतोत्तमाः ॥ ५८ ॥ गोदाननिरता ये च कन्यादानरताश्च

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

नमोऽस्तु लक्ष्मीपतयेऽव्ययाय ॥ नमोऽस्तु सूर्याद्यमितप्रभाय नमोनमः पुण्यगतागताय ॥ ७८ ॥ नमोनमोऽर्केन्दुविलोचनाय नमोऽस्तु ते
यज्ञफलप्रदाय ॥ नमोस्तु यज्ञांगविराजिताय नमोऽस्तु ते सज्जनवल्लभाय ॥ ७९ ॥ नमोनमः कारणकारणाय नमोऽस्तु शब्दादिविवर्जिताय ॥
नमोऽस्तुतेऽभीष्टसुखप्रदाय नमोनमो भक्तमनोरमाय ॥ ८० ॥ नमोनमस्तेऽद्भुतकारणाय नमोऽस्तु ते मन्दरधारकाय ॥ नमोऽस्तु ते यज्ञवराहना
म्ने नमो हिरण्यांक्षविदारकाय ॥ ८१ ॥ नमोऽस्तु ते वामनरूपभाजे नमोऽस्तु ते क्षत्रकुलान्तकाय ॥ नमोऽस्तु ते रावणमर्दनाय नमोऽस्तु ते
नन्दसुताग्रजाय ॥ ८२ ॥ नमस्ते कमलाकान्त नमस्ते सुखदायिने ॥ श्रितार्तिनाशिने तुभ्यं भूयोभूयो नमोनमः ॥ ८३ ॥ विप्रेण संस्तुतो
देवो भगवान्भक्तवत्सलः ॥ वात्सल्येनाब्रवीद्वाक्यं श्रीनिवासो दयानिधिः ॥ ८४ ॥ तात तुष्टोऽस्मि भद्रं ते स्तोत्रेण महता द्विज ॥ सर्वभोग
समायुक्तः पुत्रपौत्रादिभिर्युतः ॥ ८५ ॥ इह लोके सुखं प्राप्य देहान्ते मुक्तिमाप्नुहि ॥ इत्युक्त्वा भगवान्विष्णुस्तत्रैवान्तरधीयत ॥ ८६ ॥ एवं वः
कथितं विप्राः पापनाशनवैभवम् ॥ तत्तीरे भूप्रदानस्य माहात्म्यं चापि वर्णितम् ॥ ८७ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां
संहितायां द्वितीये वैष्णवखण्डे श्रीवेंकटाचलमाहात्म्ये पापविनाशनतीर्थे भूदानफलानुवर्णनंनाम विंशतितमोऽध्यायः ॥ २० ॥ ॥ छ ॥
॥ ॥ अथ रामानुजाख्य[2]द्विजवृत्तान्तः ॥ ॥ श्रीसूत उवाच ॥ ॥ भोभोस्तपोधनाः सर्वे नैमिषारण्यवासिनः ॥ आकाशगंगातीर्थस्य
माहात्म्यं प्रवदाम्यहम् ॥ १ ॥ आकाशगंगानिकटे सर्वशास्त्रार्थपारगः ॥ रामानुज इति ख्यातो विष्णुभक्तो जितेन्द्रियः ॥ २ ॥ तपश्चकार
धर्मात्मा वैखानसमते स्थितः ॥ ग्रीष्मे पंचाग्निमध्यस्थो विष्णुध्यानपरायणः ॥ ३ ॥ जपन्नष्टाक्षरं मंत्रं ध्यायन्हृदि जनार्दनम् ॥ वर्षास्वाकाशगो
नित्यं हेमन्तेषु जलेशयः ॥ ४ ॥ सर्वभूतहितो दान्तः सर्वद्वन्द्वविवर्जितः ॥ वर्षाणि कतिचित्सोऽयं जीर्णपर्णाशनोभवत् ॥ ५ ॥ कंचित्कालं जला
हारो वायुभक्षः कियत्समाः ॥६॥ ॥ अथाकाशगंगातीरे रामानुजतपस्तुष्टभगवदाविर्भावः ॥ ॥ अथ तत्तपसा तुष्टो भगवान्भक्तवत्सलः ॥ प्रत्यक्ष
तामगात्तस्य शंखचक्रगदाधरः ॥ ७ ॥ विकचाम्बुजपत्राक्षः सूर्यकोटिसमप्रभः ॥ विनतानन्दनारूढश्छत्रचामरशोभितः ॥ ८ ॥ हारकेयूरमुकुटः

१ हिरण्याक्षविदारकाय–इत्यनेन–वाराहावतारस्मरणमधिकृत्य–'यज्ञवराहनाम्ने' इत्यस्य विशेषणम्–श्रीनृसिंहावतारस्मरणमधिकृत्य तु–'हिरण्याक्ष' शब्देन 'हिरण्यकशिपुः' बोध्यः । यद्वा 'हिरण्याख्यविदारकाय' इति तु पाठः साधुः । इति सुधीभिर्विवेक्तव्यम् । २ अयं रामानुजाख्यविप्रः कोऽपि प्राचीनोऽन्य एव । न तु विशिष्टाद्वैतसिद्धान्ताचार्यः, तस्याधुनिकत्वात् । अन्यथा पुराणस्यास्याप्याधुनिकत्वप्रसंगो दुर्वारः इति विचक्षणैः सुष्ठु वेदितव्यम् ।

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दानं महादानमतिदानं प्रकीर्तितम् ॥ सर्वपापप्रशमनमपवर्गफलप्रदम् ॥ ५२ ॥ यच्छ्रुत्वा श्रद्धया युक्तो भूमिदानफलं लभेत् ॥ भार्याया वचनं
श्रुत्वा त्वितिहाससमन्वितम् ॥ ५३ ॥ सन्तुष्टो मनसि ध्यात्वा शेषाचलनिवासिनम् ॥ ५४ ॥ ॥ अथ भद्रमतये भूप्रदानात्सुघोषस्य सद्गतिः ॥ ॥
गन्तुं प्रचक्रमे बुद्ध्या क्रीडाचलमनुत्तमम् ॥ ततो भद्रमतिः सौम्यः सर्वधर्मपरायणः ॥ ५५ ॥ सुशालिंनाम नगरीं कलत्रसहितो ययौ ॥
गत्वा याचितवान्भूमिं पञ्चहस्तायतां द्विजः ॥ सुघोषो धर्मनिरतस्तं निरीक्ष्य कुटुम्बिनम् ॥
सुघोषंनाम विप्रेन्द्रं सर्वैश्वर्यसमन्वितम् ॥ ५६ ॥ गत्वा याचितवान्भूमिं पञ्चहस्तायतां द्विजः ॥ सुघोषो धर्मनिरतस्तं निरीक्ष्य कुटुम्बिनम् ॥
॥ ५७ ॥ मनसा प्रीतिमापन्नः समभ्यर्च्यैनमब्रवीत् ॥ कृतार्थोऽहं भद्रमते सफलं मम जन्म च ॥ मत्कुलं चानघं जातं त्वं हि ग्राह्योऽसि मे यतः॥
॥ ५८ ॥ इत्युक्त्वा तं समभ्यर्च्य सुघोषो धर्मतत्परः ॥ पञ्चहस्तप्रमाणां तां ददौ तस्मै महामतिः ॥ ५९ ॥ पृथिवी वैष्णवी पुण्या पृथिवी
विष्णुपालिता ॥ पृथिव्यास्तु प्रदानेन प्रीयतां मे जनार्दनः ॥ ६० ॥ मन्त्रेणानेन विप्रेन्द्राः सुघोषस्तं द्विजेश्वरम् ॥ विष्णुबुद्ध्या समभ्यर्च्य
तावतीं पृथिवीं ददौ ॥ ६१ ॥ स भद्रमतये विप्रा धीमांस्तां याचितां भुवम् ॥ दत्तवान्हरिभक्ताय श्रोत्रियाय कुटुंबिने ॥ ६२ ॥ सुघोषो भूमिदाने
न कोटिवंशसमन्वितः ॥ प्रपेदे विष्णुभवनं यत्र गत्वा न शोचति ॥ ६३ ॥ ॥ अथ भद्रमतेः पापनाशनतीरे भूदानार्थं वेंकटाद्रिगमनम् ॥ ॥ विप्रो
भद्रमतिश्चापि पुत्रदारसमन्वितः ॥ गतो वेंकटशैलेन्द्रं सुरासुरनमस्कृतम् ॥६४॥ गन्धर्वयक्षशैलादिसेवितं मेरुपुत्रकम् ॥ वैकुण्ठादागतं दिव्यं क्रीडा
चलमनुत्तमम् ॥ ६५ ॥ तत्र स्वामिसरस्तोये निर्मले पावने शुभे ॥ दारपुत्रादिसंयुक्तः स्नात्वा संकल्पपूर्वकम् ॥ ६६ ॥ तत्पश्चिमतटे श्वेतसूकरं वसु
धाधरम् ॥ नत्वा तत्र विधानेन श्रीनिवासालयं गतः ॥६७॥ तत्र ब्रह्मादिदेवैश्च सेवितं वेंकटेश्वरम् ॥ दृष्टवान्सह पुत्राद्यैर्विष्णुभक्तो महामतिः॥६८॥
भक्त्या प्रणम्य देवेशं श्रीनिवासं कृपानिधिम् ॥ पुत्रदारादिसंयुक्तः पापनाशनमाययौ ॥ ६९ ॥ तत्र स्नात्वा विधानेन कृतधर्मादिसत्क्रियः ॥ कस्मै
चिद्विष्णुभक्ताय श्रोत्रियाय महामतिः ॥७०॥ विष्णुबुद्ध्या स प्रददौ भूदानं मोक्षदं शुभम्॥७१॥ ॥ अथ भूदानप्रभावेण भद्रमतेर्भगवत्साक्षात्कारः॥
तदा प्रादुरभूद्देवः शंखचक्रगदाधरः ॥ ७२ ॥ विनतानन्दनारूढो वनमालाविभूषितः ॥ पापनाशस्य तीरे तु भूदानस्य प्रभावतः ॥७३॥ तदा भद्रम
तिः सौम्यः स्तोतुं समुपचक्रमे ॥ ७४ ॥ नमोनमस्तेऽखिलकारणाय नमोनमस्तेऽखिलपालकाय ॥ नमोनमस्तेऽमरनायकाय नमोनमो दैत्यवि
मर्दनाय ॥ ७५ ॥ नमोनमो भक्तजनप्रियाय नमोनमः पापविदारणाय ॥ नमोनमो दुर्जननाशकाय नमोऽस्तु तस्मै जगदीश्वराय ॥ ७६ ॥ नमो
नमः कारणवामनाय नारायणायामितविक्रमाय ॥ श्रीशार्ङ्गचक्रासिगदाधराय नमोऽस्तु तस्मै पुरुषोत्तमाय ॥ ७७ ॥ नमः पयोराशिनिवासकाय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्वेंकटशैलेन्द्रे सुरासुरनमस्कृते ॥ वर्तते पावनं तीर्थं पापानां दाहकं शुभम् ॥ २६ ॥ तत्र गत्वा महाभाग पापनाशे महामते ॥ कुरु स्नानं प्रय
त्नेन भार्यापुत्रसमन्वितः ॥ २७ ॥ तस्य तीर्थस्य माहात्म्यं नारदाच्च श्रुतं मया ॥ बालभावे मम पितुरंतिके प्रोक्तवान्मुनिः ॥ २८ ॥ वेंकटाद्रौ
महापुण्ये सर्वपातकनाशने ॥ सर्वदुःखप्रशमने सर्वसंपत्प्रदायके ॥ २९ ॥ पापनाशे महातीर्थे स्नात्वा संकल्पपूर्वकम् ॥ अत्यैश्वर्यप्रदं धर्मं मनसा
चिन्तयंस्तदा ॥ ३० ॥ भूमिदानं विनिश्चित्य सर्वदानोत्तमोत्तमम् ॥ प्रापकं परलोकस्य सर्वकामफलप्रदम् ॥ ३१ ॥ दानानामुत्तमं दानं भूदानं
परिकीर्तितम् ॥ तद्दत्त्वा समवाप्नोति यद्यदिष्टतमं नरः ॥ ३२ ॥ इत्येवं नारदेनोक्तं श्रुत्वा मे जनको द्विजः ॥ संप्रहृष्टमना भूत्वा शेषाद्रिं प्राप्तवां
स्तदा ॥ ३३ ॥ तत्र गत्वा महाभागः सर्वसंपत्प्रदायकम् ॥ भूदानं विप्रवर्याय श्रोत्रियाय प्रदत्तवान् ॥ ३४ ॥ ततो मे जनको विद्वन्सर्वभाग्य
समन्वितः ॥ इहलोके सुखं प्राप्य चान्ते विष्णुपुरं ययौ ॥ ३५ ॥ त्वं च गत्वा महाभाग वेंकटाद्रिं नगोत्तमम् ॥ कुरु दानं प्रयत्नेन भूदानं सर्व
कामदम् ॥ ३६ ॥ ॥ अथ कामिनीकथितभूदानप्रशंसा ॥ ॥ भूमिदानस्य माहात्म्यं शृणुष्व सुसमाहितः ॥ न कोऽपि गदितुं शक्तो लोके
ऽस्मिन्भगवन्प्रभो ॥ ३७ ॥ भूमिदानात्परं दानं न भूतं न भविष्यति ॥ परं निर्वाणमाप्नोति भूमिदो नात्र संशयः ॥ ३८ ॥ स्वल्पामपि
महीं दत्त्वा श्रोत्रियायाहिताग्नये ॥ ब्रह्मलोकमवाप्नोति पुनरावृत्तिवर्जितम् ॥ ३९ ॥ भूमिदः सर्वदः प्रोक्तो भूमिदो मोक्षभाग्भवेत् ॥
भूमिदानं वृषाद्रौ च सर्वपापप्रणाशनम् ॥ ४० ॥ महापातकयुक्तो वा युक्तो वा सर्वपातकैः ॥ दशहस्तां महीं दत्त्वा सर्वपापैः प्रमु
च्यते ॥ ४१ ॥ सत्पात्रे भूमिदाता यः सर्वदानफलं लभेत् ॥ भूमिदस्य समो नान्यस्त्रिषु लोकेषु विद्यते ॥ ४२ ॥ द्विजस्य
वृत्तिहीनस्य यः प्रदद्यान्महीं शुभाम् ॥ तस्य पुण्यफलं वक्तुं शेषो नार्हः कदाचन ॥ ४३ ॥ विप्रस्य वृत्तिहीनस्य सदाचारस्य कस्यचित् ॥ यो
ऽल्पामपि महीं दद्यात्स विष्णुर्नात्र संशयः ॥ ४४ ॥ इक्षुगोधूमकेदारपूगवृक्षादिसंयुता ॥ पृथ्वी प्रदीयते येन स विष्णुर्नात्र संशयः ॥ ४५ ॥
वृत्तिहीनस्य विप्रस्य दरिद्रस्य कुटुम्बिनः ॥ स्वल्पामपि महीं दत्त्वा विष्णुसायुज्यमश्नुते ॥ ४६ ॥ सक्तस्य देवपूजासु विप्रस्याटविका मही ॥
दत्ता भवति गंगायां त्रिरात्रस्नानजं फलम् ॥ ४७ ॥ विप्रस्य वृत्तिहीनस्य सदाचाररतस्य च ॥ द्रोणिकां पृथिवीं दत्त्वा यत्फलं लभते शृणु ॥ ४८ ॥
गंगातीरेऽश्वमेधानां शतानि विधिवन्नरः ॥ कृत्वा यत्फलमाप्नोति तदाप्नोति महत्फलम् ॥ ४९ ॥ ददाति भारिकां भूमिं दरिद्राय द्विजातये ॥ तस्य
पुण्यं प्रवक्ष्यामि मन्नाथ भगवन्प्रभो ॥ ५० ॥ अश्वमेधसहस्राणि वाजपेयशतानि च ॥ विधाय जाह्नवीतीरे यत्फलं तल्लभेत सः ॥ ५१ ॥ भूमि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ॥ श्रीसूत उवाच ॥ ॥ पुनश्चाहं प्रवक्ष्यामि पापनाशनवैभवम् ॥ भगवद्भक्तिभावेन शृणुध्वं सुसमाहिताः ॥ १ ॥ इतिहासं प्रवक्ष्यामि
सर्वपापविनाशनम् ॥ यच्छ्रुत्वा सर्वपापेभ्यो मुच्यते नात्र संशयः ॥ २ ॥ ॥ अथ भद्रमत्याख्यदरिद्रद्विजवृत्तान्तः ॥ ॥ आसीत्पुरा द्विज
वरो वेदवेदांगपारगः ॥ दरिद्रो वृत्तिहीनश्च नाम्ना भद्रमतिर्द्विजः ॥ ३ ॥ श्रुतानि सर्वशास्त्राणि तेन विप्रेण धीमता ॥ श्रुतानि च पुराणानि
धर्मशास्त्राणि सर्वशः ॥ ४ ॥ अभवंस्तस्य षट् पत्न्यः कृता सिंधुर्यशोवती ॥ कामिनी मालिनी चैव शोभा चैव प्रकीर्तिताः ॥ ५ ॥
तासु पत्नीषु तस्यासीत्पुत्राणां च शतद्वयम् ॥ ते सर्वे तस्य पुत्राद्याः क्षुधया परिपीडिताः ॥ ६ ॥ अकिञ्चनो भद्रमतिः क्षुधार्तानात्म
जान्प्रियान् ॥ पश्यन्प्रियाः क्षुधार्तांश्च विललापाकुलेन्द्रियः ॥ ७ ॥ धिग्जन्म भाग्यरहितं धिग्जन्म धनवर्जितम् ॥ धिग्जन्म कीर्ति
रहितं धिग्जन्मातिथ्यवर्जितम् ॥ ८ ॥ धिग्जन्माचाररहितं धिग्जन्म ज्ञानवर्जितम् ॥ धिग्जन्म यत्नरहितं धिग्जन्म सुखवर्जितम् ॥
॥ ९ ॥ धिग्जन्म बन्धुरहितं धिग्जन्म ख्यातिवर्जितम् ॥ नरस्य बह्वपत्यस्य धिग्जन्मैश्वर्यवर्जितम् ॥ १० ॥ अहो गुणाः सौम्यता
च विद्वत्ता जन्म सत्कुले ॥ दारिद्र्याम्बुधिमग्नस्य सर्वमेतन्न शोभते ॥ ११ ॥ विप्राः पुत्राश्च पौत्राश्च बान्धवा भ्रातरस्तथा ॥ शिष्याश्च
सर्वे मनुजास्त्यजन्त्यैश्वर्यवर्जितम् ॥ १२ ॥ इति निश्चित्य मतिमान्धीरो भद्रमतिर्द्विजः ॥ चण्डालो वा द्विजो वापि भाग्यवानेव पूज्यते ॥ १३ ॥
दरिद्रः पुरुषो लोके शववल्लोकनिन्दितः ॥ अहो सम्पत्समायुक्तो निष्ठुरो वाप्यनिष्ठुरः ॥ १४ ॥ गुणहीनोऽपि गुणवान्मूर्खो वापि स पण्डितः ॥
निष्ठुरो वा गुणी वापि धर्महीनोऽथ वा नरः ॥ १५ ॥ ऐश्वर्यगुणयुक्तश्चेत्पूज्य एव न संशयः ॥ अहो दरिद्रता दुःखं तत्राप्याशातिदुःखदा ॥ १६ ॥
आशाभिभूताः पुरुषा दुःखमश्नुवते क्षणात् ॥ १७ ॥ आशाया ये दासा दासास्ते सर्वलोकस्य ॥ आशा दासी येषां तेषां दासायते लोकः ॥
॥ १८ ॥ सर्वशास्त्रार्थवेत्तापि दरिद्रो भाति मूर्खवत् ॥ आकिञ्चन्यमहाग्राहग्रस्तानां नास्ति मोचकः ॥ १९ ॥ अहो दुःखमहो दुःखमहो दुःखं
दरिद्रता ॥ तत्रापि पुत्रदाराणां बाहुल्यमतिदुःखदम् ॥ २० ॥ एवमुक्त्वा भद्रमतिः सर्वशास्त्रार्थपारगः ॥ अत्यैश्वर्यप्रदं धर्मं मनसा चिन्तयंस्तदा ॥
तूष्णीं स्थितो भद्रमतिर्महाक्लेशसमन्वितः ॥ २१ ॥ ॥ अथ भद्रमतेः कामिनीकृतवेंकटाद्रिगमनप्रोत्साहनम् ॥ ॥ तदानीं तासु भार्यासु का
मिनी पतिदेवता ॥ २२ ॥ भार्या साधुगुणैर्युक्ता पतिं तं प्रत्यभाषत ॥ २३ ॥ ॥ कामिन्युवाच ॥ ॥ भगवन्सर्वधर्मज्ञ सर्वशास्त्रार्थपारग ॥ मम
नाथ महाभाग वाक्यं शृणु महामते ॥ २४ ॥ सुवर्णमुखरीतीर ऋषिसंघनिषेविते ॥ वर्तते दैवतैः सेव्यः पावनो वेंकटाचलः ॥ २५ ॥ तस्मि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पूर्वजन्मनि ते पुत्रो ब्राह्मणोऽयं महामते ॥ सुमतिर्नाम विप्रोऽयं मतिं शूद्राय वै ददौ ॥ ७३ ॥ कर्माणि वैदिकान्येष सर्वाण्युपदिदेश वै ॥ अतोऽयं नरकान्भुक्त्वा कल्पकोटिसहस्रकम् ॥ ७४ ॥ जातो भुवि तदन्तेषु स्थावरादिषु योनिषु ॥ इदानीं ब्राह्मणो जातः कर्मशेषेण ते सुतः ॥ ७५ ॥ यमेन प्रेषितेनात्र गृहीतो ब्रह्मरक्षसा ॥ क्रूरेण पातकेनाद्य पूर्वजन्मकृतेन वै ॥ ७६ ॥ उपायं ते प्रवक्ष्यामि ब्रह्मरक्षोविनाशने ॥ शृणुष्व श्रद्धया युक्तः समाधाय च मानसम् ॥ ७७ ॥ सुवर्णमुखरीतीरे ऋषिसंघनिषेविते ॥ वर्तते दैवतैः सेव्यः पावनो वेंकटाचलः ॥ ७८ ॥ तस्योपरि महातीर्थं नाम्ना पापविनाशनम् ॥ अस्ति पुण्यं प्रसिद्धं च महापातकनाशनम् ॥ ७९ ॥ भूतप्रेतपिशाचानां वेतालब्रह्मरक्षसाम् ॥ महतां चैव रोगाणां तीर्थं तन्नाशकं स्मृतम् ॥ ८० ॥ सुतमादाय गच्छ त्वं तत्तीर्थं गिरिमध्यगम् ॥ प्रयतः स्नापय सुतं तीर्थे पापविनाशने ॥ ८१ ॥ स्नानेन त्रिदिनं तत्र ब्रह्मरक्षो विनश्यति ॥ नैवोपायान्तरं तस्य विनाशे विद्यते भुवि ॥ ८२ ॥ तस्माच्छीघ्रं प्रयाहि त्वं वेंकटाह्वयपर्वतम् ॥ तत्र पापविनाशाख्यतीर्थे स्नापय ते सुतम् ॥ ८३ ॥ मा विलम्बं कुरुष्वात्र त्वरया याहि वै द्विज ॥ इत्युक्तः स द्विजोऽगस्त्यं प्रणम्य भुवि दण्डवत् ॥ ८४ ॥ अनुज्ञातश्च तेनासौ प्रययौ वेंकटाचलम् ॥ सुतेन साकं विप्रोऽसौ गत्वा पापविनाशनम् ॥ ८५ ॥ ॥ अथ सुमतेः पापनाशनस्नानेन दुर्गत्यपनोदनम् ॥ ॥ संकल्पपूर्वं संस्नाप्य दिनत्रयमसौ सुतम् ॥ सस्नौ स्वयं च विप्रेन्द्रः पिता पापविनाशने ॥ ८६ ॥ समागतः पपौ तोयं कृत्वा चाप्याह्निकक्रमम् ॥ अथ तस्य सुतस्तत्र विमुक्तो ब्रह्मरक्षसा ॥ ८७ ॥ समजायत नीरोगः स्वस्थः सुन्दररूपधृक् ॥ सर्वसंपत्समृद्धोऽसौ भुक्त्वा भोगाननेकशः ॥ ८८ ॥ देहान्ते प्रययौ मुक्तिं स्नानात्पापविनाशने ॥ पितापि तत्र स्नानेन देहान्ते मुक्तिमाप्तवान् ॥ ८९ ॥ ॥ अथ वैदिककर्मानुष्ठातुर्दृढमतेर्दुर्गतिप्राप्त्यपनोदनम् ॥ ॥ तेनोपदिष्टोऽयं शूद्रः स भुक्त्वा नरकान्क्रमात् ॥ अनेकासु जनित्वा च कुत्सितास्वपि योनिषु ॥ ९० ॥ गृध्रजन्माभवत्पश्चाद्वेंकटाचलभूधरे ॥ स कदाचिज्जलं पातुं तीर्थे पापविनाशने ॥ ९१ ॥ समागतः पपौ तोयं सिषिचे चात्मनस्तनुम् ॥ तदैव दिव्यदेहः सन्सर्वाभरणभूषितः ॥ ९२ ॥ दिव्यं विमानमारुह्य प्रययावमरालयम् ॥ ९३ ॥ ॥ श्रीसूत उवाच ॥ ॥ एवम्प्रभावमेतद्वै तीर्थं पापविनाशनम् ॥ पापानां नाशनाद्विप्राः पापनाशाभिधं हि तत् ॥ ९४ ॥ इत्थं रहस्यं कथितं मुनीन्द्रास्तद्वैभवं पापविनाशनस्य ॥ यत्राभिषेकात्सहसा विमुक्तौ द्विजश्च शूद्रश्च विनिन्द्यकृत्यौ ॥ ९५ ॥ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे श्रीवेंकटाचलमाहात्म्ये पापविनाशनतीर्थमहिमानुवर्णनंनामैकोनविंशतितमोऽध्यायः ॥ १९ ॥ ॥ छ ॥ ॥ अथ पापविनाशनतीर्थमाहात्म्यवर्णनम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हारो जितेंद्रियः ॥ ४७ ॥ नित्यं कन्दैश्च मूलैश्च पुष्पैरपि तथा फलैः ॥ अतिथीन्पूजयामास यथावत्समुपागतान् ॥ ४८ ॥ एवं हि सुमहान्कालो
व्यतिचक्राम तस्य वै ॥ ४९ ॥ ॥ अथ दृढमतये सुमत्याख्यविप्रप्रकाशितकर्मानुष्ठानक्रमः ॥ ॥ अथाश्रममगात्तस्य सुमतिर्नाम नामतः ॥ द्विजो
गर्गकुलोद्भूतः सत्यवादी जितेंद्रियः ॥ ५० ॥ स्वागतैर्मुनिमाराध्य तोषयित्वा फलादिकैः ॥ कथयन्वै कथाः पुण्याः कुशलं पर्यपृच्छत ॥ ५१ ॥
इत्थं विप्रः स पाद्याद्यैरुपचारैस्तु पूजितः ॥ आशीर्भिरभिनन्द्यैनं प्रतिगृह्य च सत्क्रियाम् ॥ ५२ ॥ तमापृच्छत्प्रहृष्टात्मा स्वाश्रमं पुनराययौ ॥ एवं
दिनेदिने विप्रः शूद्रेऽस्मिन्पक्षपातवान् ॥ ५३ ॥ आगच्छदाश्रमं तस्य द्रष्टुं तं शूद्रयोनिजम् ॥ बहुकालं द्विजस्याभूत्संसर्गः शूद्रयोनिना ॥ ५४ ॥
स्नेहस्य वशमापन्नः शूद्रोक्तं नातिचक्रमे ॥ अथागतं द्विजं शूद्रः प्राह स्नेहवशीकृतम् ॥ ५५ ॥ हव्यकव्यविधानं मे ब्रूहि त्वं तु गुरुर्मतः ॥ एवमुक्तः
स शूद्रेण सर्वमेतदुपादिशत् ॥५६॥ कारयामास शूद्रस्य पितृकार्यादिकं तदा ॥ पितृकार्ये कृते तेन विसृष्टः स द्विजोत्तमः ॥ ५७ ॥ ॥ अथ शूद्रस्य
वैदिककर्मोपदेशेन सुमत्यनुभूतदुर्गतिः ॥ ॥ अथ दीर्घेण कालेन पोषितः शूद्रयोनिना ॥ त्यक्तो विप्रगणैः सोऽयं पञ्चत्वमगमद्द्विजः ॥ ५८ ॥ वैव
स्वतभटैर्नीत्वा पातितो नरकेष्वपि ॥ कल्पकोटिसहस्राणि कल्पकोटिशतानि च ॥ ५९ ॥ भुक्त्वा क्रमेण नरकांस्तदन्ते स्थावरोऽभवत् ॥ गर्दभस्तु
ततो जज्ञे विड्वराहस्ततः परम् ॥ ६० ॥ जज्ञेऽथ सारमेयोऽसौ पश्चाद्वायसतां गतः ॥ अथ चण्डालतां प्राप्य शूद्रयोनिमगात्ततः ॥ ६१ ॥ गत
वान्वैश्यतां पश्चात्क्षत्रियस्तदनन्तरम् ॥ प्रबलैर्बाध्यमानोऽसौ ब्राह्मणो वै तदाभवत् ॥ ६२ ॥ उपनीतः स पित्रा तु वर्षे गर्भाष्टमे द्विजः ॥ वर्तमानः
पितुर्गेहे स्वाचाराभ्यासतत्परः ॥ ६३ ॥ गच्छन्कदाचिद्गहने गृहीतो ब्रह्मरक्षसा ॥ रुदन्भ्रमन्स्खलन्मूढः प्रलपन्प्रहसन्नसौ ॥ ६४ ॥ शश्वद्धाहेति च
वदन्वैदिकं कर्म सोऽत्यजत् ॥ दृष्ट्वा सुतं तथाभूतं पिता दुःखेन पीडितः ॥ ६५ ॥ सुतमादाय च स्नेहादगस्त्यं शरणं ययौ ॥ सुवर्णमुखरीतीरे
तपस्यन्तं शिवाग्रतः ॥६६॥ भक्त्या मुनिं प्रणम्यासौ पिता तस्य सुतस्य वै ॥ तस्मै निवेदयामास स्वपुत्रस्य विचेष्टितम् ॥६७॥ ॥ अथागस्त्यो
क्त्या दुर्गत्यपनोदनार्थं सुमतेर्वेंकटाद्रिगमनम् ॥ ॥ अब्रवीच्च तदा विप्रः कुम्भजं मुनिपुंगवम् ॥ एष मे तनयो ब्रह्मन्गृहीतो ब्रह्मरक्षसा ॥६८॥ सुखं
न लभते ब्रह्मन्रक्ष तं करुणादृशा ॥ नास्ति मे तनयोऽप्यन्यः पितॄणामृणमुक्तये ॥ ६९ ॥ तस्य पीडाविनाशार्थमुपायं ब्रूहि कुम्भज ॥ त्वत्समस्त्रिषु
लोकेषु तपःशीलो न विद्यते ॥ ७० ॥ त्वां विनास्य परित्राता न मे पुत्रस्य विद्यते ॥ पुत्रे दयां कुरु गुरो दयाशीला हि साधवः ॥ ७१ ॥ ॥
॥ ॥ श्रीसूत उवाच ॥ ॥ एवमुक्तस्तदा तेन कुम्भजो ध्यानमास्थितः ॥ ध्यात्वा तु सुचिरं कालमब्रवीद्ब्राह्मणं ततः ॥७२॥ ॥ अगस्त्य उवाच ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न पितुर्बीजसंभवः ॥ तस्मात्सर्वप्रयत्नेन वेंकटेशो दयानिधिः ॥ ४३ ॥ द्रष्टव्योऽतिप्रयत्नेन परलोकेच्छया द्विजाः ॥ एवं वः कथितं विप्रा वेंक
टेशस्य वैभवम् ॥ ४४ ॥ यस्त्वेतच्छृणुयान्नित्यं पठते च सभक्तिकम् ॥ स वै वेंकटनाथस्य सेवाफलमवाप्नुयात् ॥ ४५ ॥ इति श्रीस्कांदे
महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे श्रीवेंकटाचलमाहात्म्ये वेंकटेश्वरवैभवानुवर्णनं नामाष्टादशोऽध्यायः ॥ १८ ॥ ॥
अथ ब्रह्मादीनां नैरंतर्येण श्रीवेंकटाचले स्थितिवर्णनम् ॥ ॥ श्रीसूत उवाच ॥ ॥ अथातः संप्रवक्ष्यामि वेंकटाचलवैभवम् ॥ युष्माकं साव
धानेन शृणुध्वं सुसमाहिताः ॥ १ ॥ लक्षकोटिसहस्राणि सरांसि सरितस्तथा ॥ समुद्राश्च महापुण्या वनान्यप्याश्रमा अपि ॥ २ ॥ पुण्यानि
क्षेत्रजातानि वेदारण्यादिकानि च ॥ मुनयश्च वसिष्ठाद्याः सिद्धचारणकिंनराः ॥ ३ ॥ लक्ष्म्या सह धरण्या च भगवान्मधुसूदनः ॥ सावित्र्या च
सरस्वत्या सहैव चतुराननः ॥ ४ ॥ पार्वत्या सह देवेशस्त्र्यम्बकस्त्रिपुरांतकः ॥ हेरम्बषण्मुखाद्याश्च देवाः सेन्द्रपुरोगमाः ॥ ५ ॥ आदित्यादि
ग्रहाश्चैव तथाष्टवसवो द्विजाः ॥ पितरो लोकपालाश्च तथान्ये देवतागणाः ॥ ६ ॥ महापातकसंघानां नाशने लोकपावने ॥ दिवानिशं वसन्त्यं
तर्वेंकटाचलमूर्धनि ॥ ७ ॥ तस्य दर्शनमात्रेण बुद्धिसौख्यं नृणां भवेत् ॥ तन्मूर्धनि कृतावासाः सिद्धचारणयोषितः ॥ ८ ॥ पूजयंति सदाकालं
वेंकटेशं कृपानिधिम् ॥ कोटयो ब्रह्महत्यानामगम्यागमकोटयः ॥ ९ ॥ अङ्गलग्ना विनश्यंति वेंकटाचलमारुतैः ॥ १० ॥ ॥ अथ श्रीवेंकटाचला
रोहणसमयानुसंध्यानक्रमः ॥ ॥ वेंकटाद्रिं गिरिं तं तु प्रार्थयेत्पुण्यवर्धनम् ॥ स्वर्णाचल महापुण्य सर्वदेवनिषेवित ॥ ११ ॥ ब्रह्मादयोऽपि यं
देवाः सेवन्ते श्रद्धया सह ॥ तं भवन्तमहं पद्भ्यामाक्रमेयं नगोत्तम ॥ १२ ॥ क्षमस्व तदघं मेऽद्य दयया पापचेतसः ॥ त्वन्मूर्धनि कृतावासं
माधवं दर्शयस्व मे ॥ १३ ॥ प्रार्थयित्वा नरस्त्वेवं वेंकटाद्रिं नगोत्तमम् ॥ ततो मृदुपदं गच्छेत्पावनं वेंकटाचलम् ॥ १४ ॥ वेंकटाद्रौ महापुण्ये सर्व
पातकनाशने ॥ स्वामिपुष्करिणीतीर्थे स्नात्वा नियमपूर्वकम् ॥ १५ ॥ पिण्डदानं ततः कुर्यादपि सर्षपमात्रकम् ॥ शमीदलसमानान्वा दद्यात्पिंडा
न्पितॄन्प्रति ॥ १६ ॥ स्वर्गस्था मोक्षमायांति स्वर्गं नरकवासिनः ॥ १७ ॥ ॥ अथ पापविनाशनाख्यतीर्थमाहात्म्यम् ॥ ॥ ततस्तस्योपरि
महत्सर्वलोकेषु विश्रुतम् ॥ सर्वतीर्थोत्तमं पुण्यं नाम्ना पापविनाशनम् ॥ १८ ॥ अस्ति पुण्यतमे विप्राः पवित्रे वेंकटाचले ॥ यस्य संस्मरणादेव
गर्भवासो न विद्यते ॥ १९ ॥ तत्प्राप्य तु नरः स्नायात्स्वामितीर्थस्य चोत्तरे ॥ तत्र स्नानान्नरा यांति वैकुण्ठं नात्र संशयः ॥ २० ॥ ॥ ऋषय
ऊचुः ॥ ॥ सूत पापविनाशाख्यतीर्थस्य ब्रूहि वैभवम् ॥ व्यासेन बोधितस्त्वं हि वेत्सि सर्वं महामुने ॥ २१ ॥ ॥ श्रीसूत उवाच ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ब्रह्माश्रमपदे वृत्तां पार्श्वे हिमवतः शुभे ॥ वक्ष्यामि ब्राह्मणश्रेष्ठा युष्माकं तु कथां शुभाम् ॥ २२ ॥ तदाश्रमपदं पुण्यं ब्रह्माश्रमपदं शुभम् ॥ नानावृक्षसमाकीर्णं पार्श्वे हिमवतः शुभे ॥ २३ ॥ बहुगुल्मलताकीर्णं मृगद्विपनिषेवितम् ॥ सिद्धचारणसंघुष्टं रम्यं पुष्पितकाननम् ॥ ॥ २४ ॥ यतिभिर्बहुभिः कीर्णं तापसैरुपशोभितम् ॥ ब्राह्मणैश्च महाभागैः सूर्यज्वलनसन्निभैः ॥ २५ ॥ नियमव्रतसम्पन्नैः समाकीर्णं तपस्विभिः ॥ दीक्षितैर्यागशीलैश्च यताहारैः कृतात्मभिः ॥२६॥ वेदाध्ययनसंपन्नैर्वैदिकैः परिवेष्टितम् ॥ वर्णिभिश्च गृहस्थैश्च वानप्रस्थैश्च भिक्षुभिः ॥ २७ ॥ स्वाश्रमाचारनिरतैः स्ववर्णोक्तविधायिभिः ॥ वालखिल्यैश्च ऋषिभिः समंतात्परिवेष्टितम् ॥ २८ ॥ ॥ अथ दृढमत्याख्यशूद्रवृत्तान्तः ॥ ॥ तत्राश्रमे पुरा कश्चिच्छूद्रो दृढमतिर्द्विजाः ॥ साहसी ब्राह्मणाभ्याशमाजगाम मुदान्वितः ॥ २९ ॥ आगतो ह्याश्रमपदं पूजितश्च तपस्विभिः ॥ नाम्ना दृढमतिः शूद्रः साष्टांगं प्रणनाम वै ॥ ३० ॥ तान्स दृष्ट्वा मुनिगणान्देवकल्पान्महौजसः ॥ कुर्वतो विविधान्यज्ञान्संप्राहृष्यत शूद्रकः ॥ ३१ ॥ अथास्य बुद्धिरभवत्तपः कर्तुमनुत्तमम् ॥ ततोऽब्रवीत्कुलपतिं मुनिमागत्य तापसम् ॥ ३२ ॥ ॥ दृढमतिरुवाच ॥ ॥ तपोधन नमस्तेऽस्तु रक्ष मां करुणानिधे ॥ तव प्रसादादिच्छामि यागं कर्तुं प्रसीद मे ॥ ३३ ॥ ॥ अथ दृढमतिं प्रति कुलपत्याख्यमुन्युपदिष्टशूद्रधर्माः ॥ ॥ एवमुक्तस्तु शूद्रेण तमाह ब्राह्मणस्तदा ॥ ३४ ॥ ॥ कुलपतिरुवाच ॥ ॥ यागे दीक्षयितुं शक्यो न शूद्रो हीनजन्मभाक् ॥ श्रूयते यदि ते बुद्धिः शुश्रूषानिरतो भव ॥ ३५ ॥ उपदेशो न कर्तव्यो जातिहीनस्य कर्हिचित् ॥ उपदेशे महान्दोष उपाध्यायस्य विद्यते ॥ ३६ ॥ नाध्यापयेद्बुधः शूद्रं तथा नैव च याजयेत् ॥ न पाठयेत्तथा शूद्रं शास्त्रं व्याकरणादिकम् ॥ ३७ ॥ काव्यं वा नाटकं वापि तथालंकारमेव वा ॥ पुराणमितिहासं च शूद्रं नैव तु पाठयेत् ॥ ३८ ॥ यदि चोपदिशेद्विप्रः शूद्रस्यैतानि कर्हिचित् ॥ त्यजेयुर्ब्राह्मणा विप्रं तं ग्रामाद्ब्रह्मसंकुलात् ॥ ३९ ॥ शूद्राय चोपदेष्टारं द्विजं चण्डालवत्त्यजेत् ॥ शूद्रं चाक्षरसंयुक्तं दूरतः परिवर्जयेत् ॥ ४० ॥ तच्छुश्रूषस्व भद्रं ते ब्राह्मणाञ्छ्रद्धया सह ॥ शूद्रस्य द्विजशुश्रूषा मन्वादिभिरुदीरिता ॥ ४१ ॥ न हि नैसर्गिकं कर्म परित्यक्तुं त्वमर्हसि ॥ एवमुक्तः स मुनिना स शूद्रोऽचिन्तयत्तदा ॥ ४२ ॥ किं कर्तव्यं मया त्वद्य व्रते श्रद्धा हि मे परा ॥ यथा स्यान्मम सुज्ञानं यतिष्येऽहं तथाद्य वै ॥ ४३ ॥ इति निश्चित्य मनसा शूद्रो दृढमतिस्तदा ॥ गत्वाश्रमपदाद्दूरं कृतवानुटजं शुभम् ॥ ४४ ॥ तत्र वै देवतागारं पुण्यान्यायतनानि च ॥ पुष्पारामादिकं चापि तटाकखननादिकम् ॥ ४५ ॥ श्रद्धया कारयामास तपःसिद्ध्यर्थमात्मनः ॥ अभिषेकांश्च नियमानुपवासादिकानपि ॥ ४६ ॥ बलिं कृत्वा च हुत्वा च दैवतान्यभ्यपूजयत् ॥ संकल्पनियमोपेतः फला

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सुरापानायुतानि च ॥ दृष्टे नारायणे देवे विलयं यांति कृत्स्नशः ॥ १७ ॥ ये वाञ्छंति सदा भोगं राज्यं च त्रिदशालये ॥ वेंकटाद्रिनिवासं ते
प्रणमन्तु सकृन्मुदा ॥ १८ ॥ यानि कानि च पापानि जन्मकोटिकृतानि च ॥ तानि सर्वाणि नश्यन्ति वेंकटेश्वरदर्शनात् ॥ १९ ॥ संपर्कात्कौ
तुकाल्लोभाद्भयाद्वापि च संस्मरन् ॥ वेंकटेशं महादेवं नेहामुत्र च दुःखभाक् ॥ २० ॥ वेंकटाचलदेवेशं कीर्तयन्नर्चयन्नपि ॥ अवश्यं विष्णुसारूप्यं
लभते नात्र संशयः ॥ २१ ॥ यथैधांसि समिद्धोऽग्निर्भस्मसात्कुरुते क्षणात् ॥ तथा पापानि सर्वाणि वेंकटेश्वरदर्शनम् ॥ २२ ॥ वेंकटेश्वरदेवस्य
भक्तिरष्टविधा स्मृता ॥ तद्भक्तजनवात्सल्यं तत्पूजापरितोषणम् ॥ २३ ॥ स्वयं तत्पूजनं भक्त्या तदर्थे देहचेष्टितम् ॥ तन्माहात्म्यकथावांछाश्रव
णेष्वादरस्तथा ॥ २४ ॥ स्वरनेत्रशरीरेषु विकारस्फुरणं तथा ॥ श्रीनिवासस्य देवस्य स्मरणं सततं तथा ॥ २५ ॥ वेंकटाद्रिनिवासं तमाश्रित्यैवोप
जीवनम् ॥ एवमष्टविधा भक्तिर्यस्मिन्म्लेच्छेऽपि वर्तते ॥ २६ ॥ स एव मुक्तिमाप्नोति शौनकाद्या महौजसः ॥ भक्त्या त्वनन्यया मुक्तिर्ब्रह्म
ज्ञानेन निश्चिता ॥ २७ ॥ वेदान्तशास्त्रश्रवणाद्यतीनामूर्ध्वरेतसाम् ॥ सा च मुक्तिर्विना ज्ञानं वेदान्तश्रवणोद्भवम् ॥ यत्याश्रमं विना विप्रा
विरक्तिं च विना तथा ॥ २८ ॥ सर्वेषां चैव वर्णानामखिलाश्रमिणामपि ॥ वेंकटेश्वरदेवस्य दर्शनादेव केवलम् ॥ २९ ॥ अपुनर्भवदा मुक्ति
र्भविष्यत्यविलंबितम् ॥ कृमिकीटाश्च देवाश्च मुनयश्च तपोधनाः ॥ ३० ॥ तुल्या वेंकटशैलेन्द्रे श्रीनिवासप्रसादतः ॥ पापं कृतं मयानेकमिति मा
क्रियतां भयम् ॥ ३१ ॥ मा गर्वः क्रियतां पुण्यं मयाऽकारीति वा जनैः ॥ वेंकटेशे महादेवे श्रीनिवासे विलोकिते ॥ ३२ ॥ न न्यूना नाधिकाश्च
स्युः किन्तु सर्वे महाजनाः ॥ वेंकटाख्ये महापुण्ये सर्वपातकनाशने ॥ ३३ ॥ श्रीनिवासं परं देवं यः पश्यति सभक्तिकम् ॥ न तेन
तुल्यतामेति चतुर्वेद्यपि भूतले ॥ ३४ ॥ वेंकटेश्वरदेवेशं यः पूजयति भक्तितः ॥ स कोटिकुलसंयुक्तः प्रयाति हरिमंदिरम् ॥ ३५ ॥
श्रीनिवासाच्च न समं नाधिकं पुण्यमस्ति वै ॥ वेंकटाद्रिनिवासं तं द्वेष्टि यो मोहमास्थितः ॥ ३६ ॥ ब्रह्महत्यायुतं तेन कृतं नरक
कारणम् ॥ तत्संभाषणमात्रेण मानवो नरकं व्रजेत् ॥ ३७ ॥ श्रीनिवासपरा वेदाः श्रीनिवासपरा मखाः ॥ श्रीनिवासपराः सर्वे तस्मा
दन्यत्र विद्यते ॥ ३८ ॥ अन्यत्सर्वं परित्यज्य श्रीनिवासं समाश्रयेत् ॥ सर्वयज्ञतपोदानतीर्थस्नाने तु यत्फलम् ॥ ३९ ॥ तत्फलं कोटिगुणितं
श्रीनिवासस्य सेवया ॥ वेंकटाद्रिनिवासं तं चिंतयन्घटिकाद्वयम् ॥ ४० ॥ कुलैकविंशतिं धृत्वा विष्णुलोके महीयते ॥ स्वामिपुष्करिणीतीर्थे स्नानं
देवस्य दर्शनम् ॥ ४१ ॥ यदि लभ्येत वै पुंसां किं गङ्गाजलसेवया ॥ वेंकटेशं परं देवं यः कदापि न पश्यति ॥ ४२ ॥ संकरः स तु विज्ञेयो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्तु दयातुल्यो न ज्योतिश्चक्षुषा समम् ॥ १९ ॥ न तृप्तिरशनातुल्या न वाणिज्यं कृषेः समम् ॥ न धर्मेण समं मित्रं न सत्येन समं यशः ॥ २० ॥ यथा तथा भगवतः स्थानेन सदृशं न हि ॥ २१ ॥ यत्कीर्तनं सकलपापहरं मुनीन्द्रा यद्वन्दनं सकलसौख्यदमेव लोके ॥ यात्रापि यं प्रति सुरैरपि पूजनीया तादृङ् महान्भवति वेंकटशैलमुख्यः ॥ २२ ॥ तस्यानुभावं प्रवदामि भूयः समस्ततीर्थानि वसंति यत्र ॥ एवं समस्तेषु च मुख्यतीर्थं श्रीस्वामिनामास्ति सरोवरं तत् ॥ २३ ॥ माहात्म्यमेतस्य मयोच्यते कथं यत्पश्चिमे रोधसि भूवराहः ॥ आलिंग्य कान्तामति सौम्यमूर्तिर्विराजते विश्वजनोपकारी ॥ २४ ॥ श्रीस्वामिपुष्करिण्यां च दक्षिणे वेंकटेश्वरः ॥ आलिंगितवपुर्लक्ष्म्या वरदो वर्तते चिरम् ॥ २५ ॥ एवं वः कथितं विप्राः क्षेत्रमाहात्म्यमुत्तमम् ॥ यः शृणोति सदा भक्त्या विष्णुलोके महीयते ॥ २६ ॥ इति श्रीस्कांदे महापुराण एकाशीति साहस्र्यां संहितायां द्वितीये वैष्णवखण्डे श्रीवेंकटाचलमाहात्म्ये क्षेत्रमहिमानुवर्णनंनाम सप्तदशोऽध्यायः ॥ १७ ॥ ॥ अथ श्रीवेंकटेश्वरवैभववर्णनम् ॥ ॥ श्रीसूत उवाच ॥ ॥ अथेदानीं प्रवक्ष्यामि वेंकटेश्वरवैभवम् ॥ यच्छ्रुत्वा सर्वपापेभ्यो मुच्यते नात्र संशयः ॥ १ ॥ श्रीवेंकटेश्वरं देवं यः पश्यति सकृन्नरः ॥ स नरो मुक्तिमाप्नोति विष्णुसायुज्यमाप्नुयात् ॥ २ ॥ दशवर्षैस्तु यत्पुण्यं क्रियते तु कृते युगे ॥ त्रेतायामेकवर्षेण तत्पुण्यं साध्यते नृभिः ॥ ३ ॥ द्वापरे पञ्चमासेन तद्दिनेन कलौ युगे ॥ तत्फलं कोटिगुणितं निमिषेनिमिषे नृणाम् ॥ ४ ॥ निःसंदेहं भवेदेवं श्रीनिवासविलोकिनाम् ॥ श्रीवेंकटेश्वरे देवे तीर्थानि सकलान्यपि ॥ ५ ॥ विद्यन्ते सर्वदेवाश्च मुनयः पितरस्तथा ॥ एककालं द्विकालं वा त्रिकालं सर्वदैव वा ॥ ६ ॥ ये स्मरन्ति महादेवं श्रीनिवासं विमुक्तिदम् ॥ कीर्तयन्त्यथवा विप्रास्ते मुक्ताः पापपञ्जरात् ॥ ७ ॥ नारायणं परं देवं वेंकटेशं प्रयान्ति वै ॥ पूजितं शङ्कराजेन सच्चिदानंदविग्रहम् ॥ ८ ॥ तस्य स्मरणमात्रेण यमपीडाऽपि नो भवेत् ॥ श्रीनिवासं महादेवं येऽर्चयंति सकृन्नराः ॥ ९ ॥ किं दानैः किं व्रतैस्तेषां किं तपोभिः किमध्वरैः ॥ वेंकटेशं परं देवं यो न चिन्तयति क्षणम् ॥ १० ॥ अज्ञानी स च पापी स्यात्स मूको बधिरस्तथा ॥ स जडोऽन्धश्च विज्ञेयश्छिद्रं तस्य सदा भवेत् ॥ ११ ॥ श्रीनिवासे महादेवे सकृद्दृष्टे मुनीश्वराः ॥ किं काश्या गयया चैव प्रयागे नापि किं फलम् ॥ १२ ॥ दुर्लभं प्राप्य मानुष्यं मानवा इह भूतले ॥ वेंकटेशं परं देवं ये पश्यन्त्यर्चयन्ति वा ॥ १३ ॥ जन्म तेषां हि सफलं ते कृतार्थाश्च नेतरे ॥ वेंकटेशे परे देवे दृष्टे वा पूजितेऽपि वा ॥ १४ ॥ शम्भुना ब्रह्मणा किं वा शक्रेणाप्यखिलामरैः ॥ वेंकटेशे महादेवे भक्तियुक्ताश्च ये नराः ॥ १५ ॥ तेषां प्रणामस्मरणपूजायुक्तास्तु ये नराः ॥ न ते पश्यंति दुःखानि नैव यांति यमालयम् ॥ १६ ॥ ब्रह्महत्यासहस्राणि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्य पादावनेजनीः ॥ १७ ॥ अपो मूर्ध्नावहत्क्षिप्रं तदोत्क्षिप्तैश्च बिन्दुभिः ॥ दैवोपदिष्टकालेन प्रोक्षिता गृहगोधिका ॥ १८ ॥ सद्यो जातिस्मृति
रभूत्कृतकर्मातिदुःखिता ॥ त्राहि त्राहीति चुक्रोश ब्राह्मणं गृहमागतम् ॥ १९ ॥ तिर्यग्जन्तुरवं श्रुत्वा ब्राह्मणो विस्मितोऽभवत् ॥ कुतः क्रोशसि
गोधे त्वं दशेयं केन कर्मणा ॥ २० ॥ उपदेवोऽथ देवो वा त्वं नृपोऽथ द्विजोत्तमः ॥ कस्त्वं ब्रूहि महाभाग त्वामद्याहं समुद्धरे ॥ २१ ॥ इत्युक्तः
स नृपः प्राह श्रुतदेवं महाप्रभुः ॥ अहमिक्ष्वाकुकुलजः शस्त्रविद्याविशारदः ॥ २२ ॥ यावन्तो भूमिकणिका यावन्तस्तोयबिन्दवः ॥
यावन्त्युडूनि गगने तावतीर्गा अदामहम् ॥ २३ ॥ सर्वैर्यज्ञैर्मया चेष्टं पूर्तान्याचरितानि मे ॥ दानान्यपि च दत्तानि धर्मजातं स्वनुष्ठितम् ॥
॥ २४ ॥ तथापि दुर्गतिर्जाता न मे चोर्ध्वगतिर्विभो ॥ त्रिवारं चातकत्वं मे गृध्रत्वं चैकजन्मनि ॥२५॥ सप्तजन्मसु च श्वत्वं प्राप्तं पूर्वं मया द्विज ॥
धरतानेन भूपेन चापः पादावनेजनीः ॥ २६ ॥ बिन्दवो दूरमुत्क्षिप्तास्तैः सिक्तोऽहं कथंचन ॥ तदा जन्मस्मृतिरभूत्तेन मे हतपाप्मनः ॥ २७ ॥
गोधाजन्मानि भाव्यानीत्यष्टाविंशति मे द्विज ॥ दृश्यन्ते दैवदिष्टानि बिभ्यते जन्मभिर्भृशम् ॥ २८ ॥ न कारणं प्रपश्यामि तन्मे विस्तरतो
वद ॥ इत्युक्तः स द्विजः प्राह ज्ञातं विज्ञानचक्षुषा ॥ २९ ॥ ॥ अथ श्रुतदेवदत्तपुण्येन हेमांगस्य गोधिकात्वविमुक्तिः ॥ ॥ शृणु भूप प्रवक्ष्यामि
तव दुर्गतिकारणम् ॥ न जलं तु त्वया दत्तं वेंकटाह्वयभूधरे ॥ ३० ॥ तज्जलं सुलभं मत्वा न मौल्यमिति निश्चितः ॥ नाध्वगानां द्विजादीनां
धर्मकालेऽप्यजानता ॥ ३१ ॥ तथा पात्रं समुत्सृज्य ह्यपात्रे प्रतिपादितम् ॥ ज्वलन्तमग्निमुत्सृज्य न हि भस्मनि हूयते ॥ ३२ ॥ तुलसीं तु समु
त्सृज्य बृहती पूज्यते नु किम् ॥ अनाथव्यंगपंगुत्वं न प्रयोजकतामियात् ॥ ३३ ॥ पंग्वाद्या येऽप्यनाथा हि दयापात्रं हि केवलम् ॥ तपोनिष्ठा
ज्ञाननिष्ठाः श्रुतिशास्त्रपरायणाः ॥ ३४ ॥ विष्णुरूपाः सदा पूज्या नेतरे तु कदाचन ॥ तत्रापि ज्ञानिनोऽत्यर्थं प्रिया विष्णोः सदैव हि ॥ ३५ ॥
ज्ञानिनामपि भूपाल विष्णुरेव सदा प्रियः ॥ तस्माज्ज्ञानी सदा पूज्यः पूज्यात्पूज्यतरः स्मृतः ॥ ३६ ॥ न जलं तु त्वया दत्तं साधवो वा न
सेविताः ॥ तेन ते दुर्गतिश्चेयं प्राप्ता चेक्ष्वाकुनन्दन ॥ ३७ ॥ वेंकटाद्रौ कृतं पुण्यं तुभ्यं दास्यामि शान्तये ॥ भूतं भव्यं भवत्तेन कर्मजातं
विजेष्यसि ॥ ३८ ॥ इत्युक्त्वाप उपस्पृश्य ददौ पुण्यमनुत्तमम् ॥ यद्दत्तं ब्राह्मणेनापि स्नानं चैकदिने कृतम् ॥ ३९ ॥ तेन ध्वस्ताखिलाऽऽगास्तु
त्यक्त्वा च गृहगोधिका ॥ रूपं कर्मोचितं घोरं सद्योऽदृश्यत पूरुषः ॥ ४० ॥ दिव्यं विमानमारूढो दिव्यस्रग्वस्त्रभूषणः ॥ पश्यतामेव साधूनां
मैथिलस्य गृहान्तरे ॥ ४१ ॥ बद्धाञ्जलिपुटो भूत्वा परिक्रम्य प्रणम्य च ॥ अनुज्ञातो ययौ राजा स्तूयमानोऽमरैर्दिवम् ॥ ४२ ॥ तत्र भुक्त्वा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

महाभोगान्वर्षायुतमतन्द्रितः ॥ स एव चेक्ष्वाकुकुले ककुत्स्थोऽभून्महारथः ॥ ४३ ॥ सप्तद्वीपप्रतीपालो ब्रह्मण्यः साधुसंमतः ॥ देवेन्द्रस्य समो विष्णोरंश एवं महाप्रभुः ॥ ४४ ॥ बोधितस्तु वसिष्ठेन सर्वान्धर्मान्मनोहरान् ॥ अनुष्ठायाखिलान्राजा तेन ध्वस्ताशुभादिकः ॥ ४५ ॥ दिव्यं ज्ञानं समासाद्य विष्णोः सायुज्यमाप्तवान् ॥ तस्माद्वेंकटशैलेन्द्रः पुण्यः पापविनाशनः ॥ ४६ ॥ तस्मिंश्च जलदानं तु विष्णुलोकप्रदायकम् ॥ एवं वः कथितं विप्रा जलदानस्य वैभवम् ॥ वेंकटाद्रौ महापुण्ये सर्वपातकनाशने ॥ ४७ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे श्रीवेंकटाचलमाहात्म्ये जलदानवैभववर्णनंनाम षोडशोऽध्यायः ॥ १६ ॥ ॥ अथ श्रीवेंकटाचलक्षेत्रादिवर्णनम् ॥ ॥ श्रीसूत उवाच ॥ ॥ वेंकटाद्रेस्तु माहात्म्यं भूयोऽपि प्रवदाम्यहम् ॥ युष्माकं सावधानेन शृणुध्वं सुसमाहिताः ॥ १ ॥ पृथिव्यां यानि तीर्थानि ब्रह्माण्डान्तर्गतानि च ॥ तानि सर्वाणि वर्तंते वेंकटाह्वयभूधरे ॥ २ ॥ तस्मिन्नगोत्तमे पुण्ये वसन्तं पुरुषोत्तमम् ॥ शंखचक्रधरं देवं पीताम्बरधरं शुभम् ॥ ३ ॥ कौस्तुभालंकृतोरस्कं भक्तानामभयप्रदम् ॥ देवदेवं विशालाक्षं वेदवेद्यं सनातनम् ॥ ४ ॥ अंगकोसलकर्णाटकाशीगुर्जरदेशगाः ॥ चोलकेरलपाण्ड्यादिसर्वदेशसमुद्भवाः ॥ ५ ॥ सकुटुंबाश्च सेवार्थमायान्ति प्रतिवत्सरम् ॥ देवाश्च ऋषयः सिद्धा योगिनः सनकादयः ॥ ६ ॥ ये भाद्रपदमासे तु वेंकटेशमहोत्सवे ॥ सेवां कुर्वन्ति ते सर्वे निष्पापा उत्तमोत्तमाः ॥ ७ ॥ तत्र श्रीवेंकटेशस्य ब्रह्मा लोकपितामहः ॥ चकार कन्यामासे तु ध्वजारोपमहोत्सवम् ॥ ८ ॥ प्रतिवर्षं च तत्सेवानिमित्तं सर्वमानवाः ॥ सर्वे देवाश्च गंधर्वाः सिद्धाः साध्या महौजसः ॥ ९ ॥ ब्रह्मोत्सवे भगवतः समायांति द्विजोत्तमाः ॥ विद्यानां वेदविद्येव मंत्राणां प्रणवो यथा ॥ १० ॥ प्राणवत्प्रियवस्तूनां धेनूनां कामधेनुवत् ॥ तथा वेंकटशैलेन्द्रः क्षेत्राणामुत्तमोत्तमः ॥ ११ ॥ शेषवत्सर्वनागानां पक्षिणां गरुडो यथा ॥ देवानां तु यथा विष्णुर्वर्णानां ब्राह्मणो यथा ॥ १२ ॥ तथा वेंकटशैलेन्द्रः क्षेत्राणामुत्तमोत्तमः ॥ भूरुहाणां सुरतरुर्भार्येव सुहृदां यथा ॥ १३ ॥ तीर्थानां तु यथा गंगा तेजसां तु रविर्यथा ॥ तथा वेंकटशैलेन्द्रः क्षेत्राणामुत्तमोत्तमः ॥१४॥ आयुधानां यथा वज्रं लोहानां कांचनं यथा ॥ वैष्णवानां यथा रुद्रो रत्नानां कौस्तुभो यथा ॥ १५ ॥ तथा वेंकटशैलेन्द्रः क्षेत्राणामुत्तमोत्तमः ॥ नानेन सदृशो लोके विष्णुप्रीतिविवर्धनः ॥ १६ ॥ न माधवसमो मासो न कृतेन समं युगम् ॥ न च वेदसमं शास्त्रं न तीर्थं गंगया समम् ॥ १७ ॥ न जलेन समं दानं न सुखं भार्यया समम् ॥ न कृषेस्तु समं वित्तं न लाभो जीवितात्परः ॥ १८ ॥ न तपोऽनशनादन्यत्र दानात्परमं सुखम् ॥ न धर्म

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यो मर्त्यः कृष्णतीर्थे महामतिः ॥ २१ ॥ सर्वपापविनिर्मुक्तः सर्वान्कामाँल्लभेत सः ॥ मदाविर्भावदिवसे कृष्णतीर्थजले शुभे ॥ २२ ॥ स्नातुं तत्र समायांति स्वपापपरिशुद्धये ॥ देवा मनुष्याः सर्वे च दिक्पालाश्च महौजसः ॥ २३ ॥ एते सर्वे महात्मानः कोटिसूर्यसमप्रभाः ॥ ते सर्वे कृष्णतीर्थेस्मिन्स्नानात्पूता भवंति हि ॥ २४ ॥ त्वन्नाम्नेदं महातीर्थं लोके प्रख्यातिमेष्यति ॥ इत्युक्त्वा श्रीनिवासश्च तत्रैवान्तरधीयत ॥ २५ ॥ एवं प्रभावं तत्तीर्थं महापापविशोधनम् ॥ बुद्धिशुद्धिप्रदं पुंसां सर्वैश्वर्यप्रदायकम् ॥ २६ ॥ एवं वः कथितं विप्राः कृष्णतीर्थस्य वैभवम् ॥ शृण्वतां पठतां चैव विष्णुलोकप्रदायकम् ॥ २७ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे श्रीवेंकटाचलमाहात्म्ये रामकृष्णतीर्थमहिमानुवर्णननाम पञ्चदशोऽध्यायः ॥ १५ ॥ ॥ छ ॥ ॥ अथ श्रीवेंकटाद्रौ जलदानप्रशंसा ॥ ॥ श्रीसूत उवाच ॥ ॥ वेंकटाख्ये महापुण्ये तृषार्तानां विशेषतः ॥ जलदानमकुर्वाणस्तिर्यग्योनिमवाप्नुयात् ॥१॥ तस्माद्वेंकटशैलेन्द्रे यथाशक्त्यनुसारतः ॥ जलदानं हि कर्तव्यं सर्वेषां जीवनं महत् ॥ २ ॥ अत्रैवोदाहरन्तीममितिहासं पुरातनम् ॥ विप्रस्य गृहगोधायाः संवादं परमाद्भुतम् ॥ ३ ॥ ॥ अथ हेमांगस्य जलदानाकरणेन गृहगोधिकात्वप्राप्तिः ॥ ॥ पुरा चेक्ष्वाकुवंशेऽभूद्धेमांग इति भूमिपः ॥ ब्रह्मण्यो ब्रह्मभूयिष्ठो जितामित्रो जितेंद्रियः ॥४॥ यावन्तो भूमिकणिका यावन्तस्तोयबिन्दवः ॥ यावन्त्युडूनि गगने तावतीर्गा ददात्यसौ ॥ ५ ॥ येनेष्टयज्ञदर्भैश्च भूमिर्बर्हिष्मती स्मृता ॥ गोभूतिलहिरण्याद्यैस्तोषिता बहवो द्विजाः ॥ ६ ॥ तेनादत्तानि दानानि न विद्यन्त इति श्रुतम् ॥ तेनादत्तं जलं चैकं सुखलभ्यधिया द्विजाः ॥ ७ ॥ बोधितो ब्रह्मपुत्रेण वसिष्ठेन महात्मना ॥ अमूल्यं सर्वतोलभ्यं तद्दातुः किं फलं लभेत् ॥ ८ ॥ इति दुर्बोधहेतुवादैर्न जलं दत्तवान्विभुः ॥ अलभ्यदाने पुण्यं स्यादित्यवादीत्सयुक्तिकम् ॥ ९ ॥ स आनर्च द्विजान्व्यङ्गान्दरिद्रान्वृत्तिकर्शितान् ॥ नानर्च श्रोत्रियान्विप्रान्ब्रह्मज्ञान्ब्रह्मवादिनः ॥ १० ॥ प्रख्यातान्पूजयिष्यन्ति सर्वलोकाः सहार्हणैः ॥ अनाथानामविद्यानां व्यङ्गानां च कुटुंबिनाम् ॥ ११ ॥ दरिद्राणां गतिः का वा तस्मात्ते मद्यास्पदाः ॥ इति दुष्टेषु पात्रेषु दत्तवान्किमपि स्वकम् ॥ १२ ॥ तेन दोषेण महता चातकत्वं त्रिजन्मसु ॥ एकजन्मनि गृध्रत्वं श्वत्वं वा सप्तजन्मसु ॥ १३ ॥ प्राप्य पश्चाद्गृहे जातो भूपोऽयं गृहगोधिका ॥ श्रुतकीर्तेस्तु भूपस्य मिथिलाधिपतेर्द्विजाः ॥ १४ ॥ गृहद्वारप्रतोल्यां स्म वर्तते कीटकाशनः ॥ अष्टाशीतिषु वर्षेषु स्थितं तेन दुरात्मना ॥ १५ ॥ ॥ अथ श्रुतदेवपादोदकसेवनेन हेमांगस्य जातिस्मरणम् ॥ ॥ विदेहाधिपतेर्गेहं कदाचिदृषिसत्तमः ॥ श्रुतदेव इति ख्यातः श्रान्तो मध्याह्न आगमत् ॥ १६ ॥ तं दृष्ट्वा सहसोत्थाय जातहर्षो नराधिपः ॥ मधुपर्कैः सुसंपूज्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वामिपुष्करिणीं गतः ॥ स्नापयामास सुमतिं हत्यया पीडितं सुतम् ॥ ४३ ॥ आकाशवाणी तं विप्रमुवाच मधुरस्वरा ॥ यज्ञदेव महाभाग स्नाने नानेन सुव्रत ॥ ४४ ॥ पूतोऽभवत्तव सुतः संशयं मा कृथा द्विज ॥ एवंप्रभावं तत्तीर्थं पापवृक्षकुठारकम् ॥ ४५ ॥ एवं वः कथितं विप्रा इतिहासं पुरातनम् ॥ शृण्वतां पठतां चापि वाजपेयफलं लभेत् ॥ ४६ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे श्रीवेंकटाचलमाहात्म्ये स्वामिपुष्करिणीतीर्थमहिमानुवर्णनंनाम चतुर्दशोऽध्यायः ॥ १४ ॥ ॥ अथ रामकृष्णतीर्थमाहात्म्यम् ॥ ॥ श्रीसूत उवाच ॥ ॥ वेंकटाख्ये महापुण्ये सर्वपातकनाशने ॥ कृष्णतीर्थस्य माहात्म्यं शृणुध्वं सुसमाहिताः ॥ १ ॥ यत्र मज्जनमात्रेण कृतघ्नोऽपि विमुच्यते ॥ पितॄन्मातॄर्गुरूंश्चावमन्यंते मोहमोहिताः ॥ २ ॥ ये चाप्यन्ये दुरात्मानः कृतघ्ना निरपत्रपाः ॥ ते सर्वे कृष्णतीर्थेऽस्मिञ्छुद्ध्यन्ति स्नानमात्रतः ॥ ३ ॥ कृष्णनामा मुनिः पूर्वं वेंकटाह्वयभूधरे ॥ अवर्तत तपः कुर्वन्विष्णुं ध्यायन्समाहितः ॥ ४ ॥ स तत्र कल्पयामास स्नानार्थं तीर्थमुत्तमम् ॥ तत्र स्नात्वा सकृन्मर्त्यः कृतघ्नोऽपि विमुच्यते ॥ ५ ॥ अत्रेतिहासं वक्ष्यामि पुराणं पापनाशनम् ॥ यस्य श्रवणमात्रेण नरो मुक्तिमवाप्नुयात् ॥ ६ ॥ पुरा बभूव विप्रेन्द्रो रामकृष्णो महामुनिः ॥ सत्यवाञ्छीलवान्वाग्मी सर्वभूतदयान्वितः ॥ ७ ॥ शत्रुमित्रसमो दान्तस्तपस्वी विजितेंद्रियः ॥ परे ब्रह्मणि निष्णातो ब्रह्मतत्त्वैकसंश्रयः ॥ ८ ॥ एवंप्रभावः स मुनिस्तपस्तेपे सुदारुणम् ॥ स वै निश्चलसर्वांगस्तिष्ठन्सर्वत्र भूतले ॥ ९ ॥ परमाण्वन्तरं वापि न स्वस्थानाच्चचाल सः ॥ स्थित्वा तत्र तपस्यंतमनेकशतवत्सरान् ॥ १० ॥ तं चाक्रमत वल्मीकं छादितांगं चकार वै ॥ वल्मीकाक्रान्तदेहोऽपि रामकृष्णो महामुनिः ॥११॥ अकरोत्तप एवासौ वल्मीकं न त्वबुध्यत ॥ तस्मिंश्च तप्यति तपो वासवो मुनिपुंगवे ॥ १२ ॥ विसृज्य मेघजालानि वर्षयामास वेगवान् ॥ एवं दिनानि सप्तायं ववर्ष च निरन्तरम् ॥ १३ ॥ धारावर्षेण महता वृष्यमाणोऽपि वै मुनिः ॥ तद्वर्षं प्रतिजग्राह निमीलितविलोचनः ॥ १४ ॥ महता स्तनितेनाशु तदा बधिरयञ्छ्रुतीः ॥ वल्मीकस्योपरिष्टाद्वै निपपात महाशनिः ॥ १५ ॥ तस्मिन्वर्षति पर्जन्ये शीतवातादिदुःसहे ॥ १६ ॥ ॥ अथ रामकृष्णाख्यमहर्षितपःप्रसन्नभगवदाविर्भावः ॥ ॥ वल्मीकशिखरं ध्वस्तं बभूवाशनिताडितम् ॥ तदा प्रादुरभूद्देवः शङ्खचक्रगदाधरः ॥ १७ ॥ विनतानन्दनारूढो वनमालाविभूषितः ॥ रामकृष्णस्य तपसा तोषितो वाक्यमब्रवीत् ॥ १८ ॥ तपोनिधे रामकृष्ण वेदशास्त्रार्थपारग ॥ मदाविर्भावदिवसे यः स्नाति मनुजोत्तमः ॥ १९ ॥ तस्य पुण्यफलं वक्तुं शेषेणापि न शक्यते ॥ मकरस्थे रवौ विप्र पौर्णमास्यां महातिथौ ॥ २० ॥ पुष्यनक्षत्रयुक्तायां स्नानकालो विधीयते ॥ तद्दिने स्नाति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्याप्यनुद्रुत्य तेन साकं गृहं ययौ ॥ पितरं रक्षरक्षेति सुमतिः शरणं ययौ ॥ १९ ॥ मा भैषीरिति तं प्रोच्य पिता रक्षितुमुद्यतः ॥ तदानीं ब्रह्महत्येयं तत्तातं प्रत्यभाषत ॥ २० ॥ ॥ ब्रह्महत्योवाच ॥ ॥ मैव त्वं प्रतिगृह्णीष्व यज्ञदेव द्विजोत्तम ॥ असौ सुरापी स्तेयी च ब्रह्महा चातिपातकी ॥२१॥ मातृद्रोही पितृद्रोही भार्यात्यागी च पातकी ॥ किरातीसंगदुष्टश्च ह्येनं मुंच दुरात्मकम् ॥ २२ ॥ गृह्णासि चेदिमं विप्र महापातकिनं सुतम् ॥ त्वद्भार्यामस्य भार्यां च त्वां च पुत्रमिमं द्विज ॥ २३ ॥ भक्षयिष्यामि वंशं च तस्मान्मुञ्च सुतं त्विमम् ॥ इमं त्यजसि चेत्पुत्रं युष्मान्मुंचामि सांप्रतम्॥ ॥ २४ ॥ नैकस्यार्थे कुलं हन्तुमर्हसि त्वं महामते ॥ इत्युक्तः स तया तत्र यज्ञदेवोऽब्रवीच्च ताम् ॥ २५ ॥ ॥ यज्ञदेव उवाच ॥ ॥ बाधते मां सुतस्नेहः कथमेनं परित्यजे ॥ ब्रह्महत्या तदाकर्ण्य द्विजोक्तं तमभाषत ॥ २६ ॥ ॥ ब्रह्महत्योवाच ॥ ॥ अयं हि पतितो भूत्वा वर्णाश्रमबहिष्कृतः ॥ पुत्रेऽस्मिन्मा कुरु स्नेहं निन्दितं चास्य दर्शनम् ॥ २७ ॥ इत्युक्त्वा ब्रह्महत्या सा यज्ञदेवस्य पश्यतः ॥ तलेन प्रजहारास्य पुत्रं सुमतिनामकम् ॥ २८ ॥ रुरोद तातततेति पितरं प्रब्रुवन्मुहुः ॥ २९ ॥ ॥ अथ सुमतिं प्रति दुर्वासःकथितब्रह्महत्यामुक्त्युपायः ॥ ॥ रुरुदुर्जनको माता भार्यापि सुमतेस्तदा ॥ एतस्मिन्नंतरे तत्र दुर्वासाः शंकरांशकः ॥ ३० ॥ दिष्ट्या समाययौ योगी धार्मिको मुनिसत्तमः ॥ यज्ञदेवोऽथ तं दृष्ट्वा मुनिं रुद्रावतारकम् ॥ ३१ ॥ स्तुत्वा प्रणम्य शरणं ययाचे पुत्रकारणात् ॥ दुर्वासास्त्वं महायोगिन्साक्षाद्वै शंकरांशकः ॥ ॥ ३२ ॥ त्वद्दर्शनमपुण्यानां भविता न कदाचन ॥ ब्रह्महा च सुरापी च स्तेयी चाभूत्सुतो मम ॥ ३३ ॥ एनं प्रहर्तुमायाता ब्रह्महत्यापि वर्तते ॥ भूयाद्यथा मे पुत्रोऽयं महापातकमोचितः ॥ ३४ ॥ घोरा च ब्रह्महत्येयं यथा शीघ्रं लयं व्रजेत् ॥ तमुपायं वदस्वाद्य मम पुत्रे दयां कुरु ॥ ३५ ॥ अयमेव हि पुत्रो मे नान्योऽस्ति तनयो मुने ॥ अस्मिन्मृते तु वंशो मे समुच्छिद्येत मूलतः ॥ ३६ ॥ ततः पितृभ्यः पिण्डानां दातापि न भवेद्ध्रुवम् ॥ ततः कृपां कुरुष्व त्वमस्मासु भगवन्मुने ॥ ३७ ॥ इत्युक्तः स तदोवाच दुर्वासाः शंकरांशकः ॥ ध्यात्वाथ सुचिरं कालं यज्ञदेवं द्विजोत्तमम् ॥ ३८ ॥ ॥ दुर्वासा उवाच ॥ ॥ यज्ञदेवकृतं पापमतिक्रूरं सुतेन ते ॥ नास्य पापस्य शांतिः स्यात्प्रायश्चित्तायुतैरपि ॥ ॥ ३९ ॥ तथापि ते सुतस्याहं तस्य पापस्य शान्तये ॥ प्रायश्चित्तं वदिष्यामि शृणु नान्यमना द्विज ॥ ४० ॥ वेंकटाद्रौ महापुण्ये सर्वपातकनाशने ॥ स्वामिपुष्करिणी चेति वर्तते मंगलप्रदा ॥ ४१ ॥ ॥ अथ सुमतेः स्वामिपुष्करिणीस्नानाद्ब्रह्महत्याविमुक्तिः ॥ ॥ स्नाति चेत्तव पुत्रोऽयं पातकान्मुच्यते क्षणात् ॥ एवं श्रुत्वा मुनेर्वाक्यं यज्ञदेवो महामतिः ॥ ४२ ॥ पुत्रमादाय सुमतिं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कम् ॥ ५८ ॥ पितृपैतामहं विप्रा धर्मगुप्तोतिधार्मिकः ॥ उन्मादैरप्यपस्मारैर्ग्रहैर्दुष्टैश्च ये नराः ॥ ५९ ॥ ग्रस्ता भवन्ति विप्रेन्द्रास्तेऽपि चात्र
निमज्जनात् ॥ पुष्करिण्यां विमुक्ताः स्युः सत्यं सत्यं वदाम्यहम् ॥ ६० ॥ स्वामिपुष्करिणीं त्यक्त्वा तीर्थमन्यद्व्रजेत्तु यः ॥ स्निग्धं स गोपयस्त्यक्त्वा
स्नुहीक्षीरं प्रयाचते ॥ ६१ ॥ स्वामितीर्थं स्वामितीर्थं स्वामितीर्थमिति द्विजाः ॥ त्रिःपठन्तो नरा एवं यत्र क्वापि जलाशये ॥ ६२ ॥ स्नांति
सर्वे नरास्ते वै यास्यन्ति ब्रह्मणः पदम् ॥ एवं वः कथिता विप्रा धर्मगुप्तकथा शुभा ॥ ६३ ॥ यस्याः श्रवणमात्रेण ब्रह्महत्या विनश्यति ॥
॥ ६४ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे श्रीवेंकटाचलमाहात्म्ये स्वामिपुष्करिणीमहिमानु
वर्णनंनाम त्रयोदशोऽध्यायः ॥ १३ ॥ छ ॥ ॥ अथ सुमत्याख्यद्विजवृत्तान्तः ॥ ॥ श्रीसूत उवाच ॥ ॥ भोभोस्तपोधनाः सर्वे नैमिषा
रण्यवासिनः ॥ स्वामितीर्थस्य माहात्म्यं भूयोऽपि प्रवदाम्यहम् ॥ १ ॥ पुरा किरातीसंसर्गात्सुमतिर्ब्राह्मणः सुराम् ॥ पीतवान्पुष्करिण्यां स
स्नात्वा पापाद्विमोचितः ॥ २ ॥ ॥ ऋषय ऊचुः ॥ ॥ सुमतिः कस्य पुत्रोऽसौ कथं स च सुरां पपौ ॥ कथं किरात्यासक्तोऽभूत्सूत पौराणिको
त्तम ॥ ३ ॥ सर्वेषां विस्तरादेतद्वद त्वं कृपयाधुना ॥ ४ ॥ ॥ श्रीसूत उवाच ॥ ॥ महाराष्ट्राभिधे देशे ब्राह्मणः कश्चिदास्तिकः ॥ यज्ञदेव इतिख्यातो
वेदवेदांगपारगः ॥ ५ ॥ दयालुरातिथेयश्च शिवनारायणार्चकः ॥ सुमतिर्नाम पुत्रोऽभूद्यज्ञदेवस्य तस्य वै ॥ ६ ॥ पितरं स परित्यज्य भार्यामपि पति
व्रताम् ॥ प्रययावुत्कले देशे विटगोष्ठीपरायणः ॥७॥ काचित्किराती तद्देशे वसन्ती युवमोहनी ॥ यूनां समस्तद्रव्याणि प्रलोभ्य जगृहे चिरम् ॥८॥
तस्या गृहं स प्रययौ सुमतिर्ब्राह्मणाधमः ॥ सुमतिं सा च जग्राह किराती निर्धनं द्विजम् ॥ ९ ॥ ॥ अथ सुमत्याख्यद्विजस्य किरातीसङ्गान्महापात
कप्राप्तिः ॥ तया युक्तोऽथ सुमतिस्तत्संयोगैकतत्परः ॥ इतस्ततश्चोरयित्वा बहुद्रव्याणि सन्ततम् ॥१०॥ दत्त्वा तया चिरं रेमे तद्गृहे बुभुजे च सः॥
एकेन चषकेणासौ तया सह सुरां पपौ ॥ ११ ॥ एवं स बहुकालं वै रममाणस्तया सह ॥ पितरौ निजपत्नीं च नास्मरद्विषयातुरः ॥ १२ ॥ स
कदाचित्किरातैस्तु चौर्यं कर्तुं ययौ सह ॥ विप्रस्य कस्यचिद्गेहे सोऽपि कैरातवेषभृत् ॥ १३ ॥ ययौ चोरयितुं द्रव्यं साहसी खड्गहस्तवान् ॥ तद्गृह
स्वामिनं विप्रं हत्वा खड्गेन साहसात् ॥१४॥ समादाय बहु द्रव्यं किरातीभवनं ययौ ॥ तं यान्तमनुयाति स्म ब्रह्महत्या भयंकरी ॥ १५ ॥ नील
वस्त्रधरा भीमा भृशं रक्तशिरोरुहा ॥ गर्जन्ती साट्टहासं सा कम्पयन्ती च रोदसी ॥ १६ ॥ अनुद्रुतस्तया सोऽयं बभ्राम जगतीतले ॥ एवं भ्रमन्भुवं
सर्वां कदाचित्सुमतिः स्वयम् ॥ १७ ॥ स्वग्रामं प्रययौ भीत्या विप्रबन्धुर्दुरात्मवान् ॥ अनुद्रुतस्तया भीतः प्रययौ स्वगृहं प्रति ॥ १८ ॥ ब्रह्मह

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्त्वां विवसनं दृष्ट्वा शापमुदाहरत् ॥ ३२ ॥ यस्मान्ममाश्रमेऽद्य त्वं विवस्त्रः स्थितवानसि ॥ अतः सिंहत्वमद्यैव भविता ते न संशयः ॥ ३३ ॥
इति गौतमशापेन सिंहत्वमगमत्पुरा ॥ कुबेरसचिवो यक्षो भद्रनामा भवान्पुरा ॥ ३४ ॥ कुबेरो धर्मशीलो हि तद्भृत्याश्च तथैव हि ॥ अतः
किमर्थं त्वं हंसि मामृषिं वनगोचरम् ॥ ३५ ॥ एतत्सर्वमहं ध्यानाज्जानामि हि मृगाधिप ॥ इत्युक्तो ध्यानकाष्ठेन त्यक्त्वा सिंहत्वमाशु सः ॥
॥ ३६ ॥ यक्षरूपं गतो दिव्यं कुबेरसचिवात्मकम् ॥ ध्यानकाष्ठमसावाह प्रांजलिः प्रणतो मुनिम् ॥ ३७ ॥ अद्य ज्ञातं मया सर्वं पूर्ववृत्तं महा
मुने ॥ गौतमः शापकाले मे शापान्तमपि चोक्तवान् ॥ ३८ ॥ ध्यानकाष्ठेन संवाद ऋक्षरूपेण ते यदा ॥ तदा निर्धूय सिंहत्वं यक्षरूपमवाप्स्यसि
॥ ३९ ॥ इति मामब्रवीद्ब्रह्मन्गौतमो मुनिपुङ्गवः ॥ अद्य सिंहत्वनाशान्मे जानामि त्वां महामुने ॥ ४० ॥ ध्यानकाष्ठाभिधं शुद्धं कामरूपधरं
सदा ॥ इत्युक्त्वा तं प्रणम्याथ ध्यानकाष्ठं स यक्षराट् ॥ ४१ ॥ विमानवरमारुह्य प्रययावलकापुरीम् ॥ उन्मत्तरूपं तं दृष्ट्वा मन्त्रिणस्तु नृपोत्तमम् ॥
॥ ४२ ॥ पितुः सकाशमानिन्यू रेवातीरे नृपोत्तमम् ॥ तस्मै निवेदयामासुर्मतिभ्रंशं सुतस्य च ॥ ४३ ॥ ज्ञात्वा तु पुत्रवृत्तान्तं पिता वै नंदनस्तदा
॥ ४४ ॥ ॥ अथ जैमिनिवाक्यात्स्वामितीर्थस्नातस्य धर्मगुप्तस्योन्मादनिवृत्तिः ॥ ॥ पुत्रमादाय सहसा जैमिनेरन्तिकं ययौ ॥ तस्मै निवेदया
मास पुत्रवृत्तान्तमादितः ॥ ४५ ॥ भगवञ्जैमिने पुत्रो ममाद्योन्मत्ततां गतः ॥ अस्योन्मादविनाशाय ब्रूह्युपायं महामुने ॥ ४६ ॥ इति पृष्टश्चिरं
दध्यौ जैमिनिर्मुनिपुंगवः ॥ ध्यात्वा तु सुचिरं कालं नृपनन्दनमब्रवीत् ॥ ४७ ॥ ध्यानकाष्ठस्य शापेन ह्युन्मत्तस्ते सुतोऽभवत् ॥ तस्य शापस्य
मोक्षार्थमुपायं प्रब्रवीमि ते ॥ ४८ ॥ सुवर्णमुखरीतीरे वेंकटेनाम पर्वते ॥ सर्वपापहरे पुण्ये नानाधातुविनिर्मिते ॥ ४९ ॥ स्वामिपुष्करिणी चेति
तीर्थमस्ति महत्तरम् ॥ पवित्राणां पवित्रं हि मंगलानां च मंगलम् ॥ ५० ॥ श्रुतिसिद्धं महापुण्यं ब्रह्महत्यादिशोधकम् ॥ नीत्वा तत्र सुतं तेऽद्य
स्नापयस्व महामते ॥ ५१ ॥ उन्मादस्ततत्क्षणादेव तस्य नश्येन्न संशयः ॥ इत्युक्तस्तं प्रणम्यासौ जैमिनिं मुनिपुंगवम् ॥ ५२ ॥ नन्दः पुत्रं समा
दाय स्वामिपुष्करिणीं ययौ ॥ तत्र च स्नापयामास पुत्रं नियमपूर्वकम् ॥ ५३ ॥ स्नानमात्रात्ततः सद्यो नष्टोन्मादोऽभवत्सुतः ॥ स्वयं सस्नौ स
नन्दोऽपि स्वामिपुष्करिणीजले ॥ ५४ ॥ उषित्वा दिनमेकं तु सहपुत्रः पिता तदा ॥ सेवित्वा वेंकटेशं च श्रीनिवासं कृपानिधिम् ॥ ५५ ॥ पुत्र
मापृच्छ्य नन्दस्तं प्रययौ तपसे वनम् ॥ गते पितरि पुत्रोऽपि धर्मगुप्तो नृपो द्विजाः ॥ ५६ ॥ प्रददौ वेंकटेशस्य बहुवित्तानि भक्तितः ॥
ब्राह्मणेभ्यो धनं धान्यं क्षेत्राणि च ददौ तदा ॥ ५७ ॥ प्रययौ मन्त्रिभिः सार्धं स्वां पुरीं तदनन्तरम् ॥ धर्मेण पालयामास राज्यं निहतकण्ट

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पुरोगमान् ॥ ५ ॥ ब्राह्मणानां ददौ वित्तं क्षेत्राणि च बहूनि सः ॥ सर्वे स्वधर्मनिरतास्तस्मिन्राजनि शासति ॥ ६ ॥ कदाचिन्नाभवन्पीडास्तस्मि
श्चोरादिसंभवाः ॥ कदाचिद्धर्मगुप्तोऽयमारुह्य तुरगोत्तमम् ॥ ७ ॥ वनं विवेश विप्रेंद्रा मृगयारसकौतुकी ॥ तमालतालहिन्तालकुरबाकुलदिङ्
मुखे ॥ ८ ॥ विचचार वने तस्मिन्सिंहव्याघ्रभयानके ॥ मत्तालिकुलसन्नादसंमूर्च्छितदिगन्तरे ॥ ९ ॥ पद्मकल्हारकुमुदनीलोत्पलवनाकुले ॥
तटाके रससंपूर्णे तपस्विजनमण्डिते ॥ १० ॥ तस्मिन्वने सञ्चरतो धर्मगुप्तस्य भूपतेः ॥ अभूद्विभावरी विप्रास्तमसावृतदिङ्मुखा ॥ ११ ॥ राजा
ऽपि पश्चिमां सन्ध्यामुपास्य विनयान्वितः ॥ जजाप च वने तत्र गायत्रीं वेदमातरम् ॥ १२ ॥ सिंहव्याघ्रादिभीत्यास्मिन्वृक्षमेकं समाश्रिते ॥
राजपुत्रे तदभ्याशमृक्षः सिंहभयार्दितः ॥ १३ ॥ अन्वधावत वृक्षं तमेकः सिंहो वनेचरः ॥ अनुद्रुतः स सिंहेन ऋक्षो वृक्षमुपारुहत् ॥ १४ ॥ आरुह्य
ऋक्षो वृक्षं तं ददर्श जगतीपतिम् ॥ वृक्षस्थितं महात्मानं महाबलपराक्रमम् ॥ १५ ॥ उवाच भूपतिं दृष्ट्वा ऋक्षोयं वनगोचरः ॥ मा भीतिं कुरु
राजेंद्र वत्स्यावो रजनीमिह ॥ १६ ॥ महासत्त्वो महाकायो महादंष्ट्रसमाकुलः ॥ वृक्षमूलं समायातः सिंहोऽयमतिभीषणः ॥ १७ ॥ रात्र्यर्धं
भज निद्रां त्वं रक्ष्यमाणो मयोद्यतः ॥ ततः प्रसुप्तं मां रक्ष शर्वर्यर्धं महामते ॥ १८ ॥ इति तद्वाक्यमाकर्ण्य सुप्ते नन्दसुते हरिः ॥
प्रोवाच ऋक्षं सुप्तोऽयं नृपो मे त्यज्यतामिति ॥ १९ ॥ तं सिंहमब्रवीदृक्षो धर्मज्ञो द्विजसत्तमाः ॥ भवान्धर्मं न जानीते मृगराज वने
चर ॥ २० ॥ विश्वासघातिनां लोके महाकष्टं भवत्यहो ॥ न हि मित्रद्रुहां पापं नश्येद्यज्ञायुतैरपि ॥ २१ ॥ ब्रह्महत्यादिपापानां
कथञ्चिन्निष्कृतिर्भवेत् ॥ विश्वासघातिनां पापं न नश्येज्जन्मकोटिभिः ॥ २२ ॥ नाहं मेरुं महाभारं मन्ये पञ्चास्य भूतले ॥ महाभार
मिमं मन्ये लोकविश्वासघातकम् ॥ २३ ॥ एवमुक्तोऽथ ऋक्षेण सिंहस्तूष्णीं बभूव ह ॥ धर्मगुप्ते प्रबुद्धे तु ऋक्षः सुष्वाप भूरुहे ॥ २४ ॥
ततः सिंहोऽब्रवीद्भूपमेनमृक्षं त्यजस्व मे ॥ एवमुक्तोऽथ सिंहेन राजा सुप्तमशंकितः ॥ २५ ॥ स्वांकन्यस्तशिरस्कं तमृक्षं तत्याज भूतले ॥ पात्य
मानस्ततो राज्ञा समालम्बितपादपः ॥ २६ ॥ ऋक्षः पुण्यवशाद्वृक्षान्न पपात महीतले ॥ स ऋक्षो नृपमभ्येत्य कोपाद्वाक्यमभाषत ॥ २७ ॥
कामरूपधरो राजन्नहं भृगुकुलोद्भवः ॥ ध्यानकाष्ठाभिधो नाम्ना ऋक्षरूपमधारयम् ॥ २८ ॥ कस्मादनागसं सुप्तमत्याक्षीन्मां भवान्नृप ॥
मच्छापादतिशीघ्रं त्वमुन्मत्तश्चर भूतले ॥ २९ ॥ इति शप्त्वा मुनिर्भूपं ततः सिंहमभाषत ॥ न सिंहस्त्वं महायक्षः कुबेरसचिवः पुरा ॥ ३० ॥
हिमवद्गिरिमासाद्य कदाचित्त्वं वधूसखः ॥ अज्ञानाद्गौतमाभ्याशे विहारमतनोर्मुदा ॥ ३१ ॥ गौतमोऽप्युटजाद्दैवात्समिदाहरणाय वै ॥ निर्गत

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विप्राः पात्यते क्षुधयार्दितः ॥ १२ ॥ स्नाति चेत्पुष्करिण्यां वै तस्मिन्नाऽसौ निपात्यते ॥ यो वेदमार्गमुल्लंघ्य वर्तते कुपथे नरः ॥
॥ १३ ॥ सोऽसिपत्रवने घोरे पात्यते यमकिंकरैः ॥ स्नाति चेत्स्वामितीर्थे तु तस्मिन्नाऽसौ निपात्यते ॥ १४ ॥ योऽश्नाति
पंक्तिभेदेन पक्कं सूपादिकं नरः ॥ अकृत्वा पंचयज्ञान्वा भुंक्ते मोहेन स द्विजाः ॥ १५ ॥ पात्यतेऽयं यमभटैर्नरके कृमिभोजने ॥
भक्ष्यमाणः कृमिशतैर्भक्षयन्कृमिसंचयान् ॥ १६ ॥ स्वयं च कृमिभूतः संस्तिष्ठेद्यावदघक्षयम् ॥ स्नाति चेत्स्वामितीर्थे वै तस्मि
न्नाऽसौ निपात्यते ॥ १७ ॥ यो हरेद्विप्रवित्तानि स्नेहेन बलतोऽपि वा ॥ अन्येषामपि वित्तानि राजा तत्पुरुषोऽपि वा ॥ १८ ॥
अयोमयाग्निकुंडेषु संदंशैः सोऽपि पीडितः ॥ संदंशे नरके घोरे पात्यते यमपूरुषैः ॥ १९ ॥ स्नाति चेत्स्वामितीर्थे तु तस्मिन्नासौ निपा
त्यते ॥ अगम्यां योभिगच्छेत स्त्रियं वै पुरुषाधमः ॥ २० ॥ अगम्यं पुरुषं योषिदभिगच्छेत वा द्विजाः ॥ तावयोमयनारीं च पुरुषं चाप्य
योमयम् ॥ २१ ॥ तप्तावालिङ्ग्य तिष्ठन्तौ यावच्चन्द्रदिवाकरम् ॥ सूच्याख्ये नरके घोरे पात्येते यमकिंकरैः ॥ २२ ॥ स्नाति चेत्स्वामितीर्थे
च तस्मिन्नासौ निपात्यते ॥ बाधते सर्वजन्तून्यो नानोपायैरुपद्रवैः ॥ २३ ॥ शाल्मलीनरके घोरे पात्यते बहुकण्टके ॥ स्नाति चेत्स्वामितीर्थे
तु तस्मिन्नासौ निपात्यते ॥ २४ ॥ राजा वा राजभृत्यो वा यः पाषण्डमनुद्रुतः ॥ भेदको धर्मसेतूनां वैतरण्यां निपात्यते ॥ २५ ॥ स्नाति चेत्स्वा
मितीर्थे तु तस्मिन्नासौ निपात्यते ॥ वृषलीसङ्गदुष्टो वा शौचाद्याचारवर्जितः ॥ २६ ॥ त्यक्तलज्जस्त्यक्तवेदः पशुचर्यारतः सदा ॥ स पूयविष्ठा
मूत्रासृक्छ्लेष्मपित्तादिपूरिते ॥ २७ ॥ अतिबीभत्सनरके पात्यते यमकिंकरैः ॥ स्नाति चेत्स्वामितीर्थे तु तस्मिन्नासौ निपात्यते ॥ २८ ॥ यः
श्वभिर्मृगयुर्वन्यान्बाणैर्वा बाधते मृगान् ॥ स विध्यमानो बाणौघैः परत्र यमकिंकरैः ॥ २९ ॥ प्राणरोधाख्यनरके पात्यते यमकिंकरैः ॥ स्नाति
चेत्स्वामितीर्थे तु तस्मिन्नासौ निपात्यते ॥ ३० ॥ दाम्भिको यः पशून्यज्ञे विध्यनुष्ठानवर्जितः ॥ हन्त्यसौ परलोकेषु वैशसे नरके द्विजाः ॥ ३१ ॥
कर्त्यमानो यमभटैः पात्यते यमकिंकरैः ॥ स्नाति चेत्पुष्करिण्यां वै तस्मिन्नासौ निपात्यते ॥ ३२ ॥ आत्मभार्यां सवर्णां यो रेतः पाययते यदि ॥
परत्र रेतःपायी स रेतःकुण्डे निपात्यते ॥ ३३ ॥ स्नाति चेत्पुष्करिण्यां वै तस्मिन्नासौ निपात्यते ॥ यो दस्युमार्गमाश्रित्य गरदो ग्रामदाहकः ॥
॥ ३४ ॥ वणिग्द्रव्यापहारी च स परत्र द्विजोत्तमाः ॥ वज्रदंष्ट्राभिधे घोरे पात्यते नरके चिरम् ॥ ३५ ॥ स्नाति चेत्स्वामितीर्थे तु तस्मिन्नासौ निपा
त्यते ॥ विद्यन्ते यानि चान्यानि नरकाणि परत्र वै ॥ ३६ ॥ तानि नाप्नोति मनुजः स्वामितीर्थनिमज्जनात् ॥ पुष्करिण्यां सकृत्स्नानादश्वमेध

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

फलं लभेत् ॥ ३७ ॥ आत्मविद्या भवेत्साक्षान्मुक्तिश्चापि चतुर्विधा ॥ न पापे रमते बुद्धिर्न भवेद्दुःखमेव वा ॥ ३८ ॥ तुलापुरुषदानेन यत्फलं लभ्यते नरैः ॥ तत्फलं लभ्यते पुम्भिः स्वामितीर्थनिमज्जनात् ॥ ३९ ॥ गोसहस्रप्रदानेन यत्पुण्यं हि भवेन्नृणाम् ॥ तत्पुण्यं लभते मर्त्यः स्वामितीर्थनिमज्जनात् ॥ ४० ॥ धर्मार्थकाममोक्षाणां यं यमिच्छति पूरुषः ॥ तं तं सद्यः समाप्नोति स्वामितीर्थनिमज्जनात् ॥ ४१ ॥ महापातकयुक्तो वा युक्तो वा सर्वपातकैः ॥ सद्यः पूतो भवेद्विप्राः स्वामितीर्थनिमज्जनात् ॥ ४२ ॥ प्रज्ञा लक्ष्मीर्यशः संपज्ज्ञानं धर्मो विरक्तता ॥ मनःशुद्धिर्भवेन्नृणां स्वामितीर्थनिषेवणात् ॥ ४३ ॥ ब्रह्महत्याऽयुतं चापि सुरापानायुतं तथा ॥ अयुतं गुरुदाराणां गमनं पापकारिणाम् ॥ ॥ ४४ ॥ स्तेयायुतं सुवर्णानां तत्संसर्गाश्च कोटिशः ॥ शीघ्रं विलयमायान्ति स्वामितीर्थनिमज्जनात् ॥ ४५ ॥ ब्रह्महत्यासमानानि सुरापानसमानि च ॥ गुरुस्त्रीगमनेनापि यानि तुल्यानि चास्तिकाः ॥ ४६ ॥ सुवर्णस्तेयतुल्यानि तत्संसर्गसमानि च ॥ तानि सर्वाणि नश्यन्ति स्वामितीर्थनिमज्जनात् ॥ ४७ ॥ ॥ अथ स्वामितीर्थमहिमाश्रद्धालूनां महानरकप्राप्तिः ॥ ॥ उक्तेष्वेतेषु सन्देहो न कर्त्तव्यः कदाचन ॥ जिह्वाग्रे परशुं तप्तं प्रक्षिपंति च किंकराः ॥ ४८ ॥ अर्थवादमिमं सर्वं ब्रुवन्वै नरकं व्रजेत् ॥ सूकरः स हि विज्ञेयः सर्वकर्मबहिष्कृतः ॥ ४९ ॥ अहो मौर्ख्यमहो मौर्ख्यमहो मौर्ख्यं द्विजोत्तमाः ॥ स्वामितीर्थाभिधे तीर्थे सर्वपातकनाशने ॥ ५० ॥ अद्वैतज्ञानदे पुंसां भुक्तिमुक्तिप्रदायिनि ॥ इष्टकामप्रदे नित्यं तथैवाज्ञाननाशने ॥ ५१ ॥ स्थितेऽपि तद्विहायायं रमतेन्यत्र वै जनः ॥ अहो मोहस्य माहात्म्यं मया वक्तुं न शक्यते ॥ ५२ ॥ स्नातस्य स्वामितीर्थे तु नान्तकाद्भयमस्ति वै ॥ स्वामितीर्थं च पश्यंति तत्र स्नांति च ये नराः ॥ ५३ ॥ स्तुवन्ति च प्रशंसंति स्पृशंति च नमन्ति च ॥ न पिबन्ति हि ते स्तन्यं मातॄणां द्विजपुंगवाः ॥ ५४ ॥ एवं वः कथितं विप्राः स्वामितीर्थस्य वैभवम् ॥ भुक्तिमुक्तिप्रदं नृणां सर्वपापनिबर्हणम् ॥५५॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे श्रीवेंकटाचलमाहात्म्ये श्रीस्वामिपुष्करिणीतीर्थमहिमानुवर्णनंनाम द्वादशोऽध्यायः ॥ १२ ॥ ॥ अथ धर्मगुप्तचरित्रवर्णनम् ॥ ॥ श्रीसूत उवाच ॥ ॥ भूयोपि संप्रवक्ष्यामि स्वामितीर्थस्य वैभवम् ॥ युष्माकमादरेणाऽहं नैमिषारण्यवासिनः ॥ १ ॥ नन्दोनाम महाराजः सोमवंशसमुद्भवः ॥ धर्मेण पालयामास सागरान्तां धरामिमाम् ॥ २ ॥ तस्य पुत्रः समभवद्धर्मगुप्त इति स्मृतः ॥ राज्यरक्षाधुरं नन्दो निजपुत्रे निधाय सः ॥ ३ ॥ जितेंद्रियो जिताहारः प्रविवेश तपोवनम् ॥ ताते तपोवनं याते धर्मगुप्ताभिधो नृपः ॥ ४ ॥ मेदिनीं पालयामास धर्मज्ञो नीतितत्परः ॥ ईजे बहुविधैर्यज्ञैर्देवानिन्द्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

काश्यपं कृपया तदा ॥ ८४ ॥ ॥ शाकल्य उवाच ॥ ॥ अस्य पापस्य शान्त्यर्थमुपायं प्रवदामि ते ॥ तत्कर्तव्यं त्वया शीघ्रं विलम्बं मा कृथा द्विज ॥ ८५ ॥ सुवर्णमुखरीतीरे लक्ष्मीपतिनिवासभूः ॥ वेंकटाद्रिरिति ख्यातः सर्वलोकेषु पूजितः ॥ ८६ ॥ तस्मिञ्छेषगिरौ पुण्ये सुरासुरनमस्कृते ॥ ब्रह्महत्यासुरापानस्वर्णस्तेयादिनाशके ॥ ८७ ॥ स्वामिपुष्करिणी चेति सर्वपापापनोदिनी ॥ उत्तरे श्रीनिवासस्य वर्तते मंगलप्रदा ॥ ८८ ॥ तं गत्वा वेंकटं शैलं स्वामिपुष्करिणीं शुभाम् ॥ स्नात्वा संकल्पपूर्वं तु वराहस्वामिनं हरिम् ॥ ८९ ॥ सेवित्वा पश्चिमे तीरे निर्गत्य हरिमन्दिरम् ॥ गत्वा तत्र विधानेन स्वर्णाचलनिवासिनम् ॥ ९० ॥ श्रीनिवासं परं देवं भक्तानामभयप्रदम् ॥ शङ्खचक्रधरं देवं वनमालाविभूषितम् ॥ ९१ ॥ दृष्ट्वा निर्धूतपापोऽसि संशयं मा कृथा द्विज ॥ शाकल्येनैवमुक्तस्तु काश्यपो मुनिपुंगवः ॥ ९२ ॥ गत्वा वेंकटशैलेन्द्रं सुरासुरनमस्कृतम् ॥ पुष्करिण्यां शुभायां तु स्नातो नियमपूर्वकम् ॥ ९३ ॥ स्वस्थोऽभूत्काश्यपो विप्रो भिषग्विद्याब्धिपारगः ॥ सर्वे बंधुजना विप्राः काश्यपं ब्राह्मणोत्तमम् ॥ ९४ ॥ पूजयित्वा विधानेन पूज्योऽसि न च संशयः ॥ एवं वः कथितं विप्रा वेंकटाचलवैभवम् ॥ ९५ ॥ यः शृणोति नरो भक्त्या विष्णुलोके महीयते ॥ ९६ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखंडे श्रीवेङ्कटाचलस्थस्वामिपुष्करिणीमाहात्म्ये काश्यपदोषनिवृत्तिर्नामैकादशोऽध्यायः ॥ ११ ॥ ॥ अथ स्वामिपुष्करिणीस्नानात्तामिस्रादिनरकनिस्तारः ॥ ॥ ऋषय ऊचुः ॥ ॥ सूत सर्वार्थतत्त्वज्ञ वेदवेदांगपारग ॥ श्रीस्वामिपुष्करिण्याश्च वैभवं वद नः प्रभो ॥ ॥ १ ॥ यस्याः स्मरणमात्रेण मुक्तः स्यान्मानवो भुवि ॥ २ ॥ ॥ श्रीसूत उवाच ॥ ॥ स्वामितीर्थं प्रशंसन्ति स्नांति वा कथयंति ये ॥ अष्टाविंशतिभेदांस्ते नरकान्नोपभुञ्जते ॥ ३ ॥ तामिस्रमन्धतामिस्रं महारौरवरौरवौ ॥ कुम्भीपाकं कालसूत्रमसिपत्रवनं तथा ॥ ४ ॥ कृमिभक्षोऽन्धकूपश्च संदंशः शाल्मली तथा ॥ लालाभक्षो ह्यवीचिश्च सारमेयादनं तथा ॥ ५ ॥ तथैव वज्रकणकः क्षारकर्दमपातनम् ॥ रक्षोगणाशनं चापि शूलप्रोतनिरोधनम् ॥ ६ ॥ तिरोधानाभिधं विप्रास्तथा सूचीमुखाभिधम् ॥ पूयशोणितभक्षं च विषाग्निपरिपीडनम् ॥ ७ ॥ अष्टाविंशतिसंख्यातमेतन्नरकसंचयम् ॥ न याति मनुजो विप्राः स्वामितीर्थनिमज्जनात् ॥ ८ ॥ वित्तापत्यकलत्राणां योऽन्येषामपहारकः ॥ स कालपाशबद्धोऽयं यमदूतैर्भयानकैः ॥ ९ ॥ तामिस्रे नरके घोरे पात्यते बहुवत्सरम् ॥ स्नाति चेत्स्वामितीर्थे स तस्मिन्नासौ निपात्यते ॥ १० ॥ मातरं पितरं विप्रान्यो द्वेष्टि पुरुषाधमः ॥ स कालसूत्रनरके विस्तृतायुतयोजने ॥ ११ ॥ अधस्तादग्निसन्तप्ते उपर्यर्कमरीचिभिः ॥ खले ताम्रमये

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बभ्राम सकलान्देशाञ्छिष्टैः सर्वैश्च दूषितः ॥ अवस्थानं न लेभे स ग्रामे वाप्याश्रमेऽपि वा ॥ ६० ॥ यान्यान्देशानसौ यातस्तत्र तत्र महाजनैः ॥
तत्तद्देशान्निरस्तः सञ्छाकल्यं शरणं ययौ ॥ ६१ ॥ प्रणम्य शाकल्यमुनिं काश्यपो निन्दितो जनैः ॥ इदं विज्ञापयामास शाकल्याय महात्मने॥
॥ ६२ ॥ ॥ काश्यप उवाच ॥ ॥ भगवन्सर्वधर्मज्ञ शाकल्य हरिवल्लभ ॥ मुनयो ब्राह्मणाश्चान्ये मां निन्दंति सुहृज्जनाः ॥ ६३ ॥ नास्याहं कारणं
जाने किं मां निन्दंति मानवाः ॥ ब्रह्महत्या सुरापानं गुरुस्त्रीगमनं तथा ॥ ६४ ॥ स्तेयं संसर्गदोषो वा मया नाचरितं क्वचित् ॥ अन्यान्यपि च
पापानि न कृतानि मया मुने ॥ ६५ ॥ तथाऽपि निन्दंति जना वृथा मां बान्धवादयः ॥ जानासि चेत्त्वं शाकल्य मया दोषं कृतं वद ॥
॥ ६६ ॥ उक्तोऽथ काश्यपेनैव शाकल्याख्यो महामुनिः ॥ क्षणं ध्यात्वा बभाषे तं काश्यपं द्विजसत्तमाः ॥ ६७ ॥ ॥ अथ शाक
ल्योक्तधर्माः ॥ ॥ शाकल्य उवाच ॥ ॥ परीक्षितं महाराजं तक्षकाद्रक्षितुं भवान् ॥ आयासीदर्धमार्गे तु तक्षकेण निवारितः ॥ ६८ ॥
चिकित्सितुं समर्थोऽपि विषरोगादिपीडितम् ॥ यो न रक्षति लोकेस्मिंस्तमाहुर्ब्रह्मघातकम् ॥ ६९ ॥ क्रोधात्कामाद्भयाल्लोभान्मात्सर्या
न्मोहतोऽपि वा ॥ यो न रक्षति विप्रेंद्र विषरोगातुरं नरम् ॥ ७० ॥ ब्रह्महा च सुरापी वा स्तेयी च गुरुतल्पगः ॥ संसर्गदोषदुष्टश्च नापि तस्य
विनिष्कृतिः ॥ ७१ ॥ कन्याविक्रयिणश्चापि हयविक्रयिणस्तथा ॥ कृतघ्नस्याऽपि शास्त्रेषु प्रायश्चित्तं तु विद्यते ॥ ७२ ॥ विषरोगातुरं
यस्तु समर्थोऽपि न रक्षति ॥ न तस्य निष्कृतिः प्रोक्ता प्रायश्चित्तायुतैरपि ॥ ७३ ॥ न तेन सह पङ्क्तौ च भुञ्जीत सुकृती जनः ॥ न तेन सह
भाषेत न पश्येत्तं नरं क्वचित् ॥ ७४ ॥ तत्संभाषणमात्रेण महापातकभाग्भवेत् ॥ परीक्षित्स महाराजः पुण्यश्लोकश्च धार्मिकः ॥ ७५ ॥
विष्णुभक्तो महायोगी चातुर्वर्ण्यस्य रक्षिता ॥ व्यासपुत्राद्धरिकथां श्रुतवान्भक्तिपूर्वकम् ॥ ७६ ॥ अरक्षित्वा नृपं तं तु वचसा तक्षकस्य यत् ॥
निवृत्तस्तेन विप्रेन्द्रैर्बान्धवैरपि दूष्यसे ॥ ७७ ॥ स परीक्षिन्महाराजो यद्यपि क्षणजीवितः ॥ तथापि यावन्मरणं बुधैः कार्यं चिकित्सितम् ॥७८॥
यावत्कण्ठगताः प्राणा मुमूर्षोर्मानवस्य हि ॥ तावच्चिकित्सा कर्तव्या कालस्य कुटिला गतिः ॥ ७९ ॥ इति प्राहुः पुरा श्लोकं भिषग्विद्याब्धि
पारगाः ॥ ततश्चिकित्साशक्तोऽपि यस्मादकृतभेषजः ॥ ८० ॥ अर्धमार्गनिवृत्तश्च तेन त्वं गर्हितो ह्यसि ॥ शाकल्येनैवमुदितः काश्यपः प्रत्य
भाषत ॥ ८१ ॥ ॥ काश्यप उवाच ॥ ॥ ममैतद्दोषशांत्यर्थमुपायं वद सुव्रत ॥ येन मां प्रतिगृह्णीयुर्बान्धवाः ससुहृज्जनाः ॥ ८२ ॥
कृपां मयि कुरुष्व त्वं शाकल्य हरिवल्लभ ॥ काश्यपेनैवमुक्तस्तु शाकल्योऽपि मुनीश्वरः ॥ ८३ ॥ क्षणं ध्यात्वा जगादैवं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नष्टमेकं स विपिने मार्गयन्मृगमादरात् ॥ ध्यानारूढं मुनिं दृष्ट्वा प्राह भूपालकोत्तमः ॥ ८ ॥ मया बाणेन विपिने मृगो विद्धोऽधुना
मुने ॥ दृष्टः स किं त्वया विद्धन्विद्रुतो भयकातरः ॥ ९ ॥ समाधिनिष्ठो मौनित्वान्न किंचिदपि सोऽब्रवीत् ॥ ततो धनुरटन्या स स्कन्धे
तस्य महामुनेः ॥ १० ॥ निधाय मृतसर्पं तु कुपितः स्वपुरं ययौ ॥ मुनेस्तस्य सुतः कश्चिच्छृंगीनाम बभूव वै ॥ ११ ॥ सखा तस्य कृशा
ख्योऽभूच्छृंगिणो द्विजसत्तमः ॥ सखायं शृंगिणं प्राह कृशाख्यः स सखा ततः ॥ १२ ॥ पिता तव मृतं सर्पं स्कन्धेन वहतेऽधुना ॥ मा
भूद्दर्पस्तव सखे मा कुध्यस्त्वमिदं वृथा ॥ १३ ॥ सोऽभवत्कुपितः शृंगी दित्सुः शापं नृपाय वै ॥ मत्ताते शवसर्पं यो न्यस्तवान्मूढचेतनः ॥
॥ १४ ॥ स सप्तरात्रान्म्रियतां संदष्टस्तक्षकाहिना ॥ शशापैवं मुनिसुतः सौभद्रेयं परीक्षितम् ॥ १५ ॥ शमीकाख्यः पिता तस्य शप्तं श्रुत्वा
सुतेन तम् ॥ नृपं प्रोवाच तनयं शृङ्गिणं मुनिपुंगवः ॥ १६ ॥ रक्षकं सर्वलोकानां नृपं किं शप्तवानसि ॥ अराजके वयं लोके स्थास्यामः
कथमञ्जसा ॥ १७ ॥ क्रोधेन पातकं भूयाद्दयया प्राप्यते सुखम् ॥ यः समुत्पादितं कोपं क्षमयैव निरस्यति ॥ १८ ॥ इह लोके परत्रासावत्यंतं
सुखमश्नुते ॥ क्षमायुक्ता हि पुरुषा लभंते श्रेय उत्तमम् ॥ १९ ॥ ततः शमीकः स्वं शिष्यं प्राह गौरमुखाभिधम् ॥ भो गौरमुख गत्वा त्वं वद
भूपं परीक्षितम् ॥ २० ॥ इमं शापं मत्सुतोक्तं तक्षकाधिपदंशनम् ॥ पुनरायाहि शीघ्रं त्वं मत्समीपं महामते ॥ २१ ॥ एवमुक्तः शमीकेन ययौ
गौरमुखो नृपम् ॥ समेत्य चाब्रवीद्भूपं सौभद्रेयं परीक्षितम् ॥ २२ ॥ दृष्ट्वा सर्पं पितुः स्कंधे त्वया विनिहितं मृतम् ॥ शमीकस्य सुतः
शृङ्गी शशाप त्वां रुषान्वितः ॥ २३ ॥ एतद्दिनात्सप्तमेऽह्नि तक्षकेण महाहिना ॥ दष्टो विषाग्निना दग्धो भूयादाश्वभिमन्युजः ॥ २४ ॥ एवं
शशाप त्वां राजञ्छृंगी तस्य मुनेः सुतः ॥ एतद्वक्तुं पिता तस्य प्राहिणोन्मां त्वदंतिकम् ॥ २५ ॥ इतीरयित्वा तं भूपमाशु गौरमुखो ययौ ॥
गते गौरमुखे पश्चाद्राजा शोकपरायणः ॥ २६ ॥ अभ्रंलिहमथोत्तुङ्गमेकस्तंभं सुविस्तृतम् ॥ मध्येगङ्गं व्यतनुत मण्डपं नृपपुङ्गवः ॥ २७ ॥
महागारुडमन्त्रज्ञैरोषधिज्ञैश्चिकित्सकैः ॥ तक्षकस्य विषं हन्तुं यत्नं कुर्वन्समाहितः ॥ २८ ॥ अनेकदेवब्रह्मर्षिराजर्षिप्रवरान्वितः ॥ आस्ते तस्मि
न्नृपस्तुङ्गे मण्डपे विष्णुभक्तिमान् ॥ २९ ॥ तस्मिन्नवसरे विप्रः काश्यपो मान्त्रिकोत्तमः ॥ राजानं रक्षितुं प्रायात्तक्षकस्य महाविषात् ॥
॥ ३० ॥ सप्तमेऽहनि विप्रेन्द्रो दरिद्रो धनकामुकः ॥ अत्रांतरे तक्षकोऽपि विप्ररूपी समाययौ ॥ ३१ ॥ मध्येमार्गं विलोक्याथ काश्यपं प्रत्य
भाषत ॥ ब्राह्मण त्वं कुत्र यासि वद मेऽद्य महामुने ॥ ३२ ॥ इति पृष्टस्तदाऽवादीत्काश्यपस्तक्षकं द्विजः ॥ परीक्षितं महाराजं तक्षकोऽद्य विषा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ग्निना ॥ ३३ ॥ धक्ष्यते तं शमयितुं तत्समीपमुपैम्यहम् ॥ इत्युक्तः स च तं विप्रं तक्षकः पुनरब्रवीत् ॥ ३४ ॥ तक्षकोऽहं द्विजश्रेष्ठ मया दष्टश्चि
कित्सितुम् ॥ न शक्योऽब्दशतेनाऽपि महामन्त्रायुतैरपि ॥ ३५ ॥ चिकित्सितुं चेन्मद्दष्टं शक्तिरस्ति तवाधुना ॥ अनेकयोजनोच्छ्रायं दशाम्युज्जी
वय द्रुमम् ॥ ३६ ॥ ततो भवान्समर्थो हीत्येवं मे भाति हे द्विज ॥ इतीरयित्वा तं वृक्षमदशत्तक्षकस्तदा ॥ ३७ ॥ अभवद्भस्मसात्सोऽपि वृक्षोत्य
न्तसमुच्छ्रितः ॥ पूर्वमेव नरः कश्चित्तं वृक्षमधिरूढवान् ॥ ३८ ॥ तक्षकस्य विषोल्काभिः सोऽपि दग्धोऽभवत्तदा ॥ तन्नरं न विजज्ञाते तौ च
काश्यपतक्षकौ ॥ ३९ ॥ काश्यपः प्रतिजज्ञेऽथ तक्षकस्यापि शृण्वतः ॥ मन्मन्त्रशक्तिं पश्यन्तु सर्वे विप्रादयोऽधुना ॥ ४० ॥ इतीरयित्वा तं
वृक्षं भस्मीभूतं विषाग्निना ॥ आजीवयन्मन्त्रशक्त्या काश्यपो मान्त्रिकोत्तमः ॥ ४१ ॥ स नरस्तेन वृक्षेण साकमुज्जीवितोऽभवत् ॥ अथाब्रवी
त्तक्षकस्तं काश्यपं मन्त्रकोविदम् ॥ ४२ ॥ यथा न मुनिवाङ्मिथ्या भवेदेवं कुरु द्विज ॥ यत्ते राजा धनं दद्यात्ततोऽपि द्विगुणं धनम् ॥ ४३ ॥
ददाम्यहं निवर्तस्व शीघ्रमेव द्विजोत्तम ॥ इत्युक्त्वानर्घरत्नानि तस्मै दत्त्वा स तक्षकः ॥ ४४ ॥ न्यवर्तयत्काश्यपं तं ब्राह्मणं मन्त्रकोविदम् ॥
अल्पायुषं नृपं मत्वा ज्ञानदृष्ट्या स काश्यपः ॥ ४५ ॥ स्वाश्रमं प्रययौ तूष्णीं लब्धरत्नश्च तक्षकात् ॥ सोऽब्रवीत्तक्षकः सर्पान्सर्वानाहूय तत्क्षणे
॥ ४६ ॥ यूयं तं नृपतिं प्राप्य मुनीनां वेषधारिणः ॥ उपहारफलान्याशु प्रयच्छत परीक्षिते ॥ ४७ ॥ तथेत्युक्त्वा सर्वसर्पा ददू राज्ञे फलान्यमी ॥
तक्षकोऽपि तथा तत्र कस्मिंश्चिद्बदरीफले ॥ ४८ ॥ कृमिवेषधरो भूत्वा व्यतिष्ठद्दंशितुं नृपम् ॥ अथ राजा प्रदत्तानि सर्वैर्ब्राह्मण
रूपकैः ॥ ४९ ॥ परीक्षिन्मन्त्रिवृद्धेभ्यो दत्त्वा सर्वफलान्यपि ॥ ५० ॥ कौतूहलेन जग्राह स्थूलमेकं करे फलम् ॥ तस्मिन्नवसरे
सूर्योऽप्यस्ताचलमगाहत ॥ ५१ ॥ मिथ्या ऋषिवचो माभूदिति तत्रत्यमानवाः ॥ अन्योऽन्यमवदन्सर्वे ब्राह्मणाश्च नृपास्तदा ॥ ५२ ॥
एवं वदत्सु सर्वेषु फले तस्मिन्नदृश्यत ॥ साधु रक्तः कृमिः सर्वै राज्ञा चापि परीक्षिता ॥ ५३ ॥ अयं किं मां दशेदद्य क्रिमिरित्युक्तवान्नृपः ॥
निदधे तत्फलं कण्ठे सकृमि द्विजसत्तमाः ॥ ५४ ॥ तक्षकोऽस्मिन्स्थितः कण्ठे कृमिरूपी फले तदा ॥ निर्गत्य तत्फलादाशु
नृपदेहमवेष्टयत् ॥ ५५ ॥ तक्षकावेष्टिते भूपे पार्श्वस्था दुद्रुवुर्भयात् ॥ अनन्तरं नृपो विप्रास्तक्षकस्य विषाग्निना ॥ ५६ ॥ दग्धो
भूद्भस्मसादाशु सप्रासादो बलीयसा ॥ कृत्वौर्ध्वदेहिकं तस्य नृपस्य सपुरोहिताः ॥ ५७ ॥ मंत्रिणस्तत्सुतं राज्ये जनमेजयनामकम् ॥ राजान
मभ्यषिञ्चन्वै जगद्रक्षणवाञ्छया ॥ ५८ ॥ तक्षकाद्रक्षितुं भूपमायातः काश्यपाभिधः ॥ यो ब्राह्मणो मुनिश्रेष्ठः स सर्वैर्निंदितो जनैः ॥ ५९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्तस्य पत्न्या सह वैकुण्ठप्राप्तिः ॥ ॥ इत्युक्त्वाथ कुलालोऽपि पत्न्या सार्धं तथैव च ॥ विमानमागतं दृष्ट्वा देवं दृष्ट्वा जनार्दनम् ॥९५॥ प्रणमन्प्रजहौ
प्राणान्सदारो भक्तसत्तमः ॥ पश्यतो राजराजस्य विमानमधिरुह्य च ॥९६॥ दिव्यरूपधरो देव्या सार्धं विष्णुपदं ययौ ॥ दृष्ट्वा राजाद्भुतं तत्र स्वपुरं
प्राप्य हर्षितः ॥ ९७ ॥ स्वपुत्रं श्रीनिवासाख्यमभिषिच्य विधानतः ॥ परिपालय धर्मेण मानवांश्च वसुन्धराम् ॥ ९८ ॥ इत्याज्ञाप्य सुतं धीमां
स्तताप परमं तपः ॥ तप्यतस्तस्य देवोऽपि प्रत्यक्षमभवद्धरिः ॥ ९९ ॥ ॥ अथ श्रीनिवासकृपया तोण्डमन्नृपस्य सारूप्यप्राप्तिः ॥ ॥ आरुह्य
गरुडं देवो रमाभूमिसमन्वितः ॥ १०० ॥ ॥ श्रीभगवानुवाच ॥ ॥ किं करोमि नृपश्रेष्ठ तपसा तोषितस्तव ॥ इत्युक्तो देवदेवेन तोण्डमा
नपि राजराट् ॥ १०१ ॥ प्रीतिमान्प्राञ्जलिर्भूत्वा सगद्गदमुवाच ह ॥ त्वल्लोके वस्तुमिच्छामि जरामरणवर्जिते ॥ १०२ ॥ इदमेव वरं देहि माधवे
तन्ममेप्सितम् ॥ १०३ ॥ ॥ श्रीवराह उवाच ॥ ॥ इत्युक्त्वा निपपातोर्व्यां साष्टांगं देवसन्निधौ ॥ तदा कलेवरं मुक्त्वा विमानं त्वारुरोह च ॥
॥ १०४ ॥ गन्धर्वैः स्तूयमानोऽसौ सारूप्यं प्राप्य शार्ङ्गिणः ॥ यच्छोकमोहरहितं जरामरणवर्जितम् ॥ १०५ ॥ पुनरावृत्तिरहितं तद्विष्णोः पदमा
ययौ ॥ १०६ ॥ ॥ अथैतन्माहात्म्यश्रवणपठनफलश्रुतिः ॥ ॥ एतद्भविष्यं देवेशि मयोक्तं वरवर्णिनि ॥ यः श्रावयेद्यः शृणुयाद्विष्णु
लोकं स गच्छति ॥ १०७ ॥ ॥ श्रीसूत उवाच ॥ ॥ इत्युक्तं देवदेवेन सभविष्यं सहोत्तरम् ॥ शृणुयाद्यः पठेद्भक्त्या कथां पुण्यां पुरा
तनीम् ॥ १०८ ॥ स तु भुक्त्वाखिलान्कामानन्ते विष्णुपदं व्रजेत् ॥ १०९ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये
वैष्णवखण्डे श्रीवेंकटाचलमाहात्म्ये धरणीवराहसंवादे भविष्यद्वर्णने तोण्डमांश्चक्रवर्तिवृत्तवर्णनंनाम दशमोऽध्यायः ॥ १० ॥ ॥ छ ॥
॥ ॥ श्रीसूत उवाच ॥ ॥ अथ काश्यपस्य स्वामिपुष्करिणीस्नानेन महापातकनाशः ॥ ॥ अथातः संप्रवक्ष्यामि स्वामिपुष्करिणीं शुभाम् ॥
लक्षीकृत्य कथामेकां पवित्रां द्विजसत्तमाः ॥ १ ॥ काश्यपाख्यो द्विजः पूर्वमस्मिंस्तीर्थवरे शुभे ॥ स्नात्वातिमहतः पापाद्विमुक्तो नरकप्रदात् ॥ २ ॥
॥ ॥ ऋषय ऊचुः ॥ ॥ मुने काश्यपनामासावकरोत्किं हि पातकम् ॥ स्नात्वा तीर्थवरे ह्यत्र यस्मान्मुक्तोऽभवत्क्षणात् ॥ ३ ॥ एतन्नः श्रद्दधानानां
ब्रूहि सूत कृपाबलात् ॥ त्वद्वचोऽमृततृप्तानां न पिपासापि विद्यते ॥ ४ ॥ ॥ श्रीसूत उवाच ॥ ॥ श्रीस्वामिपुष्करिण्याश्च माहात्म्यप्रति
पादकम् ॥ इतिहासं प्रवक्ष्यामि पठतां पापनाशनम् ॥ ५ ॥ ॥ अथ परीक्षिद्वृत्तान्तः ॥ ॥ अभिमन्युसुतो राजा परीक्षिन्नाम नामतः ॥
अध्यास्त हास्तिनपुरं पालयन्धर्मतो महीम् ॥ ६ ॥ स राजा जातु विपिने चचार मृगयारतः ॥ षष्टिवर्षवया भूपः क्षुत्तृष्णापरिपीडितः ॥ ७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वाभिः समन्विताम् ॥ ७१ ॥ मदालयात्पूर्वभागे द्वादश्यां स्नापय प्रभो ॥ अस्थिनाम्नि सरस्यस्मिन्नपमृत्युनिवारणे ॥ ७२ ॥ प्राप्तजीवा समं स्त्रीभिर्ब्राह्मणेन च योक्ष्यते ॥ शीघ्रं याहि नृपश्रेष्ठ यथोक्तं वचनं कुरु ॥ ७३ ॥ इति देववचः श्रुत्वा प्रययौ स्वपुरं नृपः ॥ आन्दोलिकासु रम्यासु स्त्रिय आरोप्य तामपि ॥ ७४ ॥ ब्राह्मणं च पुरस्कृत्य द्रष्टुं देवं ययौ नृपः ॥ अस्थिकूटसरः प्राप्य स्नापयामास ताः स्त्रियः ॥ ७५ ॥ त्वगस्थिरूपा सा चापि ताभिः क्षिप्ता सरोवरे ॥ प्राप्तजीवा यथापूर्वं सुव्यंजितशरीरजा ॥ ७६ ॥ उत्थिता सरसः स्नात्वा राज्ञीभिः सहमंगला ॥ प्राप्ता च ब्राह्मणं प्रीता भर्तारं पुनरागतम् ॥ ७७ ॥ राजा हरिं पूजयित्वा ब्राह्मणाय धनं ददौ ॥ सहस्रनिष्कपर्यंतं वस्त्राणि विविधानि च ॥ ७८ ॥ स्वदेशगमनायैव सादरं विससर्ज ह ॥ विप्रः श्रुत्वा स्त्रियो वृत्तं प्रभावं वेंकटेशितुः ॥ ७९ ॥ आशीः प्रयुज्य राज्ञेऽथ स्वदेशं प्रययौ द्विजः ॥ विप्रे गते श्रीनिवासो राजानं पुनरब्रवीत् ॥ ८० ॥ दिनेदिने च मध्याह्ने नैवेद्यानंतरं नृप ॥ आगत्य मामर्चयित्वा यथेष्टं स्वर्णपंकजैः ॥ ८१ ॥ गत्वा पुरीं स्वधर्मेण राज्यं कुरु नराधिप ॥ यद्यदिष्टं तव नृप भविष्यति न संशयः ॥ ८२ ॥ नागंतव्यमकाले तु त्वया नृप कदाचन ॥ एवं कालार्चनं कृत्वा गत्वा त्वं स्वपुरे वस ॥ ८३ ॥ ॥ राजोवाच ॥ ॥ तथा करिष्ये देवेश मध्याह्ने चार्चयाम्यहम् ॥ इति देवाज्ञया नित्यमर्चयन्स्वर्णपंकजैः ॥ ८४ ॥ तदूर्ध्वं तुलसीपुष्पं जात्वपश्यत्स मृण्मयम् ॥ ८५ ॥ ॥ अथ कुर्वग्रामस्थकुलालवंशजभीमाख्यभक्तोदन्तः ॥ ॥ विस्मितो देवदेवेशमपृच्छन्नृपसत्तमः ॥ ॥ राजोवाच ॥ ॥ केनार्च्यसे मृन्मयैश्च कमलैस्तुलसीसमैः ॥ ८६ ॥ राज्ञा पृष्टो देवदेवः स्मृत्वा राजानमब्रवीत् ॥ कश्चित्कुलालो मद्भक्तः कुर्वग्रामे वसत्यसौ ॥ ८७ ॥ स्वगृहेऽर्चयते राजंस्तदंगीक्रियते मया ॥ इति देववचः श्रुत्वा तं द्रष्टुं प्रययौ नृपः ॥ ८८ ॥ गत्वा कुर्वपुरं तस्य कुलालस्य गृहं ययौ ॥ राजानमागतं दृष्ट्वा प्रणम्यैवाग्रतः स्थितः ॥ ८९ ॥ स्थितं तं भीमनामानं पप्रच्छ नृपसत्तमः ॥ ॥ तोण्डमानुवाच ॥ ॥ भीम पूजयसे देवं कथं वद कुलोत्तम ॥ ९० ॥ ॥ श्रीवराह उवाच ॥ ॥ पृष्टः प्राह कुलालोऽपि जातु जाने न चार्चनम् ॥ केनोक्तं नृपतिश्रेष्ठ कुलालोऽर्चयतीति हि ॥ ९१ ॥ ॥ तोण्डमानुवाच ॥ ॥ देवेन श्रीनिवासेन ममोक्तं हि त्वदर्चनम् ॥ स तु श्रुत्वा नृपवचः स्मृत्वा देववरं पुरा ॥ ९२ ॥ ॥ भीम उवाच ॥ ॥ यदा प्रकाशिता पूजा यदा राजा समागतः ॥ तोण्डमांस्तेन संवादस्तदा मोक्षं गमिष्यसि ॥ ९३ ॥ इति पूर्वं वरं देवो दत्तवान्वेंकटेश्वरः ॥ ९४ ॥ ॥ अथ कुर्वग्रामस्थभीमाख्यभ

१ समस्तं तुलसीपत्रमपश्यत्पादपङ्कजे–इ० पा० । २ समग्रैः–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विमानं तु भवद्वंश्यो नाम्ना नारायणो नृपः ॥ कारयिष्यति मद्भक्तः स्वर्णेनालंकरिष्यति ॥ ४७ ॥ ॥ श्रीवराह उवाच ॥ ॥ एवमुक्त्वा तोण्ड
मानं विरराम श्रियः पतिः ॥ ४८ ॥ एवं देववचः श्रुत्वा कृत्वा प्राकारमेव च ॥ पूजयामास मुनिभिर्वैखानसकुलोद्भवैः ॥ ४९ ॥ नित्यं बिलेन
चागत्य देवं नत्वा नृपोत्तमः ॥ राज्यं चकार धर्मेण भुंजानो भोगमुत्तमम् ॥ ५० ॥ ॥ अथ गंगास्नानागतवीरशर्माख्यविप्रचरित्रम् ॥ ॥
एतस्मिन्नेव काले तु दाक्षिणात्यो द्विजोत्तमः ॥ ५१ ॥ गंगास्नानाय गच्छन्वै सदारः प्रययौ पुरात् ॥ मार्गेऽथ गर्भिणी जाता ब्राह्मणी ब्राह्मणः स
च ॥ ५२ ॥ तां तु गर्भवतीं दृष्ट्वा स्वात्मानुगमनेऽक्षमाम् ॥ राजानं द्रष्टुकामोऽसौ राजद्वारमुपागमत् ॥ ५३ ॥ द्वाःस्थेनाज्ञापितो राजा तमाहूय
द्विजोत्तमम् ॥ पूजयित्वा तु विधिवत्पप्रच्छ कुशलं द्विजम् ॥ ५४ ॥ ॥ राजोवाच ॥ ॥ किमागमनकृत्यं ते किं करिष्याम्यहं द्विज ॥ ॥
ब्राह्मण उवाच ॥ ॥ वासिष्ठो वीरशर्माहं सामवेदी नृपोत्तम ॥ ५५ ॥ सदारो निर्गतो राजन्गंगास्नानाय सादरः ॥ मार्गे च गर्भिणी चेयं
कौशिकी पुण्यशालिनी ॥ ५६ ॥ नाम्ना लक्ष्मीरिति ख्याता सुशीला च पतिव्रता ॥ संस्थाप्यैनां तव गृहे व्रतं निर्वर्तयाम्यहम् ॥ ५७ ॥ तस्मा
द्राजन्प्रयच्छास्यै यथेष्टं भक्तवेतने ॥ तावच्च रक्ष्यतां लक्ष्मीर्यावदागमनं मम ॥ ५८ ॥ ॥ श्रीवराह उवाच ॥ ॥ राजा तस्य वचः श्रुत्वा
तंडुलानि धनान्यपि ॥ दत्त्वा षण्मासपर्यन्तं गृहमंतःपुरे ददौ ॥ ५९ ॥ तां न्यस्य ब्राह्मणः प्रीतो गंगास्नानाय निर्ययौ ॥ गत्वा भागीरथीं गंगां
प्रयागे क्षेत्र उत्तमे ॥ ६० ॥ स्नात्वा काशीं ततो गत्वा तत्रोषित्वा दिनत्रयम् ॥ गयां प्राप्य पितृश्राद्धमकरोद्ब्राह्मणोत्तमः ॥ ६१ ॥ गत्वायोध्या
मपि पुरीं प्रययौ बदरीवनम् ॥ सालग्रामं ततो गत्वा स्वदेशं प्रति निर्ययौ ॥ ६२ ॥ संवत्सरद्वयेऽतीते चैत्रे मासि शुभे दिने ॥ निवृत्तोऽसौ
द्विजश्रेष्ठः शनैरागत्य माधवे ॥ ६३ ॥ एकादश्यां शुक्लपक्षे पुना राजानमाययौ ॥ राजा तु विस्मृत्य तदा ब्राह्मणीं नास्मरन्नृपः ॥ ६४ ॥
ब्राह्मणी मानिनी गेहे मृता शुष्का बभूव ह ॥ वीरशर्मा ततो विप्रो गंगातोयकरंडकम् ॥ ६५ ॥ विमुच्य बन्धनं त्वेकं गंगांभःकरकं शुभम् ॥
प्रादाय राज्ञे पप्रच्छ पत्नी कुशलिनीति मे ॥ ६६ ॥ स्मृत्वाथ राजा विप्रं तं स्थीयतामिति चाब्रवीत् ॥ अन्तःपुरं ततो गत्वा तामपश्यन्मृतां
गृहे ॥ ६७ ॥ अनुक्त्वा ब्रह्मणे तस्मै प्रविश्य बिलमुत्तमम् ॥ श्रीनृसिंहं नमस्कृत्य पुनः प्राप्य बिलोत्तमम् ॥ ६८ ॥ श्रीनिवासं ययौ द्रष्टुं
श्रीभूमिसहितं परम् ॥ तं दृष्ट्वा सहसायांतं जुगूहाते धरारमे ॥ ६९ ॥ प्रणमन्तमवोचत्तं किमकाले नृपागतः॥ नृपोऽवदत्प्रणम्येशं भीतोऽथ ब्राह्मणीं
मृताम् ॥ ७० ॥ ॥ अथ अस्थिसरोवरमाहात्म्यम् ॥ ॥ तच्छ्रुत्वा देवदेवोऽपि मा भै राजन्द्विजोत्तमात् ॥ आन्दोलिकां तामारोप्य स्त्रीभिः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ॥ वसुरुवाच ॥ ॥ राजन्मम वने दृष्टमाश्चर्यं शृणु भूपते ॥ २३ ॥ कश्चिच्छ्वेतवराहस्तु श्यामाकमचरन्निशि ॥ ॥ तं वराहं धनुष्पाणि रन्वधावमहं नृप ॥ २४ ॥ अनुद्रुतो वायुवेगो गत्वा वल्मीकमाविशत् ॥ स्वामिपुष्करिणीतीरे पश्यतो मम भूपते ॥ २५ ॥ वल्मीकमखनं क्रोधा न्मूर्च्छितो न्यपतं भुवि ॥ मत्पुत्रोऽयं समागत्य मां दृष्ट्वा मूर्च्छितं भुवि ॥ २६ ॥ शुचिर्भूत्वा देवदेवं तुष्टाव मधुसूदनम् ॥ ततो मयि समा विश्य वराहोऽध्यवदत्सुतम् ॥ २७ ॥ राज्ञे निवेदय क्षिप्रं मच्चरित्रं निषादप ॥ कृष्णगोक्षीरसेकेन वल्मीकं क्षालयेन्नृपः ॥ २८ ॥ दृश्यते च शिला काचिद्वल्मीकस्था सुशोभना ॥ वामांकस्थभुवं मां च वराहवदनं स्थितम् ॥ २९ ॥ कारयित्वा शिलिपनाथ प्रतिष्ठाप्य मुनीश्वरैः ॥ वैखानसैर्मुनिवरैरर्चयेत्तोण्डमानपि ॥ ३० ॥ अथ गत्वा श्रीनिवासं वल्मीकावृतपद्दयम् ॥ कपिलाकृष्णगोक्षीरसेचनैः क्षालयेच्छनैः ॥ ॥ ३१ ॥ आपादपीठपर्यंतं क्षालयित्वा दिनेदिने ॥ कुर्यात्प्राकारमुभयोरुत्तरे दक्षिणे तथा ॥ ३२ ॥ इत्युक्त्वा चैव माऽमुंचद्देवः स्वस्थो ऽभवं नृप ॥ इदं ते वक्तुमायातो देवदेवचिकीर्षितम् ॥ ३३ ॥ ॥ अथ नृपस्य निषादवाक्यस्वप्नाभ्यां बिलमार्गेण शेषाचलगमनम् ॥ ॥ ॥ ॥ श्रीवराह उवाच ॥ ॥ तोण्डमानपि तच्छ्रुत्वा सुप्रीतो विस्मितोऽभवत् ॥ ततः कार्यं विनिश्चित्य मन्त्रिभिः पुष्करादिभिः ॥ ३४ ॥ वेंकटाद्रिं जिगमिषुर्गोपानाहूय सर्वशः ॥ कृष्णाश्च कपिला गावो याः काश्चित्संति मामिकाः ॥ ३५ ॥ ताः सवत्सा आनयध्वं वेंकटाद्रिस मीपतः ॥ इत्याज्ञाप्य नृपो गोपान्स्त्वो यात्रेति च मन्त्रिणः ॥ ३६ ॥ विसृज्य प्रकृतीः सर्वा विवेशांतःपुरं वशी ॥ उक्त्वा कथां तां पत्नी भ्यः सुष्वाप निशि पार्थिवः ॥ ३७ ॥ तं स्वप्ने श्रीनिवासोऽपि बिलमार्गं ह्यदर्शयत् ॥ स्वपुरादाबिलं मार्गे पल्लवानसृजद्धरिः ॥ ३८ ॥ एवं स्वप्नं नृपो दृष्ट्वा प्रातरुत्थाय सत्वरः ॥ आहूय मन्त्रिणः सर्वान्प्रकृतीर्ब्राह्मणानपि ॥ ३९ ॥ स्वप्नं तथाविधं चोक्त्वाऽपश्यद्द्वारेऽथ पल्लवान् ॥ युक्ते मुहूर्ते प्रययौ हयमारुह्य तोण्डमान् ॥ ४० ॥ पश्यन्पल्लवभंगांश्च शनैः प्रीतो ययौ बिलम् ॥ दृष्ट्वा विस्मयमापन्नो निर्ममे तत्र पत्तनम् ॥ ॥ ४१ ॥ ॥ अथ भगवदुक्त्या तोण्डमन्नृपकृतक्षीराभिषेकवप्रनिर्माणादिकम् ॥ ॥ बिलमंतःपुरे कृत्वा प्राकारं चाप्यकारयत् ॥ वसंस्तत्र नृपे न्द्रोऽसौ निर्जित्य पृथिवीमिमाम् ॥ ४२ ॥ यथोक्तं देवदेवेन क्षीरप्रक्षालनादिकम् ॥ कृत्वा प्राकारनिर्माणं कर्तुमुद्योगमाययौ ॥ ४३ ॥ तदानीं देवदेवेन स्वयमाज्ञापितो नृपः ॥ तिंतिणीं चंपकं चोभौ पालयैतौ नगोत्तमौ ॥ ४४ ॥ मम चास्थानिकी चिंचा लक्ष्म्याः स्थानं च चंपकः ॥ नमस्कार्यौ नृपैस्तौ हि ऋषिदेवनरैः सदा ॥ ४५ ॥ संस्थाप्यैतौ नृपश्रेष्ठ च्छेदयान्यान्नगोत्तमान् ॥ प्राकारमात्रं कुरु मे द्वारगोपुरसंयुतम् ॥ ४६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नामकनिषादवृत्तान्तपद्मसरोमाहात्म्यादिवर्णनंनाम नवमोऽध्यायः ॥ ९ ॥ ॥ ६९ ॥ ॥ अथ तोण्डमान्नृपस्य स्वपितुः सकाशाद्रा
ज्यप्राप्तिः ॥ ॥ श्रीशुक उवाच ॥ ॥ इदं पद्मसरोनाम राजन्पापप्रणाशनम् ॥ कीर्तनात्स्मरणात्स्नानान्नृणां लक्ष्मीप्रदं भुवि ॥ कृत्वा
स्नानं त्वमप्यस्मिन्व्रज स्वपितुरंतिकम् ॥ १ ॥ ॥ श्रीवराह उवाच ॥ ॥ एतच्छुकवचः श्रुत्वा स्नात्वा पद्मसरोवरे ॥ २ ॥ तं नत्वा
हयमारुह्य तोण्डमान्स्वपुरं ययौ ॥ तं पिता युवराजानं कृत्वा त्रीन्वत्सरानथ ॥ ३ ॥ रंजकत्वं च सामर्थ्यं शौर्यं वीर्यं सुशीलताम् ॥
भक्तिं विप्रेषु पुत्रस्य वीक्ष्य राजा स्वमंत्रिभिः ॥ ४ ॥ स्वपदे स्थापयामास स्वभिषिच्य विधानतः ॥ अनुनीय सुतं पत्न्या सार्धं राजा
वनं ययौ ॥ ५ ॥ ॥ अथ वसोर्वल्मीके श्रीवराहसन्दर्शनम् ॥ ॥ तोण्डमानपि साम्राज्यं लब्ध्वा राज्यं चकार ह ॥ निषादस्य
वने देवो वाराहं रूपमास्थितः ॥ ६ ॥ श्यामाकपक्कं भक्षित्वा रात्रौरात्रौ चचार ह ॥ पदानि स वराहस्य चान्वियेष दिवादिवा ॥ ७ ॥
अदृष्ट्वा तं वराहं स रात्रौ जाग्रद्धनुर्धरः ॥ स्थितोऽपश्यच्चरन्तं तं चंद्रकोटिसमप्रभम् ॥ ८ ॥ वराहं सुभगाकारं श्यामाकवनमध्यतः ॥ तं दृष्ट्वा
धनुरादाय सिंहनादं चकार ह ॥ ९ ॥ वराहस्तद्ध्वनिं श्रुत्वा वनान्निष्क्रम्य सत्वरम् ॥ ययौ तं चाप्यनुययौ वराहं स निषादपः ॥ १० ॥
रात्रिशेषमनुद्रुत्य वने चंद्रसमप्रभम् ॥ वल्मीकं प्रविशन्तं च ददर्श स निषादपः ॥ ११ ॥ गच्छंतं पूर्णिमाचन्द्रमस्तं गिरिवरं यथा ॥
विस्मितोऽखानयत्कोपाद्वल्मीकं स निषादपः ॥ १२ ॥ धरावराहो ददृशे मूर्च्छितोऽयं पपात ह ॥ पितरं मूर्च्छितं दृष्ट्वा तत्पुत्रो भक्तिमांस्तदा ॥
॥ १३ ॥ वराहदेवं तुष्टाव तेन प्रीतोऽभवद्धरिः ॥ आविश्य पितरं तस्य प्रोवाच मधुसूदनः ॥ १४ ॥ ॥ श्रीभगवानुवाच ॥ ॥ अहं वराह
देवेशो नित्यमस्मिन्वसाम्यहम् ॥ राज्ञे त्वमुक्त्वा मामत्र प्रतिष्ठाप्यैव पूजय ॥ १५ ॥ वल्मीकं कृष्णगोक्षीरैः क्षालयित्वा तदुत्थिते ॥ शिलातले च
वाराहमुद्धृत्य धरणीस्थितम् ॥ १६ ॥ कारयित्वा प्रतिष्ठाप्य विप्रैर्वैखानसैश्च माम् ॥ पूजयेद्विविधैर्भोगैस्तोण्डमान्राजसत्तमः ॥ १७ ॥ इत्युक्त्वा तं
जहौ देवः स च स्वस्थो बभूव ह ॥ सुखासीनं तु पितरं नमस्कृत्य निषादजः ॥ १८ ॥ न्यवेदयद्देववचः पित्रे सर्वं यथातथम् ॥ स श्रुत्वा विस्मि
तो भूत्वा कृत्स्नं पुत्रवचः शुभम् ॥ १९ ॥ ॥ अथ तोण्डमन्नृपाय वसुनिवेदितवाराहोदंतः ॥ ॥ राज्ञे वक्तुं ययौ शीघ्रं निषादः स्वानुगैः
सह ॥ वसुर्निषादाधिपती राजद्वारमुपागमत् ॥ २० ॥ निषादाधिपमाज्ञाय द्वारपालैर्नृपोत्तमः ॥ आहूय तं निषादेशं सभायां मंत्रिभिः सह ॥
॥ २१ ॥ सत्कृत्य तं वसुं राजा सपुत्रं सपरिच्छदम् ॥ पप्रच्छ प्रीतिमान्राजा वसुं तं वनगोचरम् ॥ किमागमनकृत्यं ते वद त्वं वनगोचर ॥२२॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्मा आविष्टः प्रकृतिं ययौ ॥ ९२ ॥ ततो लब्धवरो राजा ययौ शुकमुनिं पुनः ॥ ९३ ॥ ॥ अथ शुकवर्णितपद्मसरोवरमाहात्म्यम् ॥ ॥ अभि
वाद्य मुनिं तेन पूजितो मुदितोऽभवत् ॥ माहात्म्यं सरसो ब्रूहि कमलाख्यस्य मे मुने ॥ ९४ ॥ ॥ श्रीशुक उवाच ॥ ॥ पुरा दुर्वाससः शापाद
वतीर्णा सुरालयात् ॥ पद्मा पद्माक्षदयिता विष्णुना सहिता नृप ॥ ९५ ॥ सरः कांचनपद्माढ्यमिदं प्राप्य महेश्वरी ॥ तपश्चकार वर्षाणां दिव्या
नामयुतं रमा ॥ ९६ ॥ ततो देवा विचिन्वन्तः श्रियं विष्णुसमन्विताम् ॥ पुरंदरेण संयुक्ता राजन्नस्मिन्सरोवरे ॥ ९७ ॥ स्थितां
सुवर्णकमले पुण्डरीकाक्षसंयुताम् ॥ दृष्ट्वा प्रीतिसमायुक्ताः प्रणम्यांबुजधारिणीम्[1] ॥ कृताञ्जलिपुटाः सेन्द्रास्तुष्टुवुर्लोकमातरम् ॥
॥ ९८ ॥ ॥ अथ देवादिकृतश्रीलक्ष्मीस्तुतिः ॥ ॥ देवा ऊचुः ॥ ॥ नमः श्रियै लोकधात्र्यै ब्रह्ममात्रे नमोनमः ॥ नमस्ते पद्म
नेत्रायै पद्ममुख्यै नमोनमः ॥ ९९ ॥ प्रसन्नमुखपद्मायै पद्मकान्त्यै नमोनमः ॥ नमो बिल्ववनस्थायै विष्णुपत्न्यै नमोनमः ॥ १०० ॥ विचि
त्रक्षौमधारिण्यै पृथुश्रोण्यै नमोनमः ॥ पक्वबिल्वफलापीनतुंगस्तन्यै नमोनमः ॥ १०१ ॥ सुरक्तपद्मपत्राभकरपादतले शुभे ॥ सुरत्नांगदकेयूर
कांचीनूपुरशोभिते ॥ यक्षकर्दमसंलिप्तसर्वांगे कटकोज्ज्वले ॥ १०२ ॥ मांगल्याभरणैश्चित्रैर्मुक्ताहारैर्विभूषिते ॥ ताटंकैरवतंसैश्च शोभमानमुखां
बुजे ॥ १०३ ॥ पद्महस्ते नमस्तुभ्यं प्रसीद हरिवल्लभे ॥ ऋग्यजुःसामरूपायै विद्यायै ते नमोनमः ॥ १०४ ॥ प्रसीदास्मान्कृपादृष्टिपातैरालो
कयाब्धिजे ॥ ये दृष्टास्ते त्वया ब्रह्मरुद्रेंद्रत्वं समाप्नुयुः ॥ १०५ ॥ ॥ अथ इंद्रादीन्प्रति स्तुतिप्रसन्नलक्ष्मीवचनम् ॥ ॥ श्रीशुक उवाच ॥ ॥
इति स्तुता तदा देवैर्विष्णुवक्षःस्थलालया ॥ विष्णुना सह संदृश्या रमा प्रीतावदत्सुरान् ॥ १०६ ॥ ॥ श्रीरुवाच ॥ ॥ सुरारीन्सहसा हत्वा
स्वपदानि गमिष्यथ ॥ ये स्थानहीनाः स्वस्थानाद्भ्रंशिता ये नरा भुवि ॥ १०७ ॥ ते मामनेन स्तोत्रेण स्तुत्वा स्थानमवाप्नुयुः ॥ अखंडैर्बिल्व
पत्रैर्मामर्चयंति नरा भुवि ॥ १०८ ॥ स्तोत्रेणानेन ये देवा नरा युष्मत्कृतेन वै ॥ धर्मार्थकाममोक्षाणामाकरास्ते भवन्ति वै ॥ १०९ ॥ इदं पद्म
सरो देवा ये केचन नरा भुवि ॥ प्राप्य स्नानं करिष्यन्ति मां स्तुत्वा विष्णुवल्लभाम् ॥ ११० ॥ तेऽपि श्रियं दीर्घमायुर्विद्यां पुत्रान्सुवर्चसः ॥
लब्ध्वा भोगांश्च भुक्त्वाऽन्ते नरा मोक्षमवाप्नुयुः ॥ १११ ॥ इति दत्त्वा वरं देवी देवेन सह विष्णुना ॥ आरुह्य गरुडेशानं वैकुण्ठस्थानमाययौ ॥
॥ ११२ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे श्रीवेंकटाचलमाहात्म्ये धरणीवराहसंवादे वसु

[1] प्रणम्य च पुनःपुनः—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आगतं किमिति प्राह सखेऽतिक्रम्य चागतः ॥ ४५ ॥ न बद्धा मालिकाश्चापि त्वयाऽऽरामे च किं कृतम् ॥ ४६ ॥ ॥
श्रीवराह उवाच ॥ ॥ इत्थं पृष्टो रंगदासो नावदल्लज्जया ततः ॥ लज्जितं रंगदासं तं प्रोवाच मधुसूदनः ॥ ४७ ॥ ॥ अथ स्वरूपानु
सन्धानेन लज्जितं रंगदासं प्रति श्रीनिवासवचनम् ॥ ॥ श्रीभगवानुवाच ॥ ॥ लज्जया किं रंगदास मया त्वं मोहितो ह्यसि ॥ त्वं तावज्जि
तकामोऽसि धीरो भव महामते ॥ ४८ ॥ गन्धर्वराजवद्राजा भवितासि महीतले ॥ तत्र भुक्त्वा महाभोगान्भक्तिमान्मयि सर्वदा ॥ ४९ ॥
प्राकारं च विमानं च कारयिष्यसि मे तदा ॥ तत्र मुक्तिं प्रदास्यामि प्रीत्या परमया युतः ॥ ५० ॥ अत्रैव कुरु सेवां त्वमाशरीरविमोक्षणात् ॥
मद्भक्तानां सकामानामेवं मुक्तिर्भविष्यति ॥ ५१ ॥ इत्युक्त्वा भगवान्विष्णुः पुनर्नोवाच किंचन ॥ श्रुत्वा तद्रंगदासोऽपि चकारारामसुत्तमम् ॥
॥ ५२ ॥ ॥ अथ तोण्डमान्नामकनृपवृत्तान्तः ॥ ॥ साग्रं शताब्दं सेवित्वा गतः स्वर्गममन्दधीः ॥ जातः सोमकुले तुंगे तोण्डमानिति
विश्रुतः ॥ ५३ ॥ सुवीरतनयो वीरो नन्दिनीगर्भसंभवः ॥ स पंचवर्षादुद्भूतविष्णुभक्तिः स्वयं सुधीः ॥ सौशील्यशौर्यवीर्यादिगुणानामा
करो महान् ॥ ५४ ॥ पाण्ड्यस्य तनयां पद्मामुपयेमे मनोहराम् ॥ ततो राजा शतं कन्या नानादेश्याः स्वयंवराः ॥ ५५ ॥ रेमे देवेंद्रवद्भूमौ[1]
नारायणपुरे वसन् ॥ अनुज्ञां प्राप्य पितृतः पुत्रः पंचास्यविक्रमः॥ ५६ ॥ उद्दिश्य मृगयां वीरो वेङ्कटाद्रेः समीपतः ॥ ५७ ॥ ॥ अथ तोण्डमान्नृ
पस्य मृगयार्थं श्रीशेषाचलगमनम् ॥ ॥ पादचारेण विचरन्परिवारैः समन्वितः ॥ मदधारां विमुंचतं ददर्श गजयूथपम् ॥ ५८ ॥ तं दृष्ट्वा
विस्मितो भूत्वा ग्रहीतुं तमनुद्रुतः ॥ सुवर्णमुखरीं तीर्त्वा ब्रह्माप शुकमुत्तमम् ॥ ५९ ॥ नमस्कृत्याभ्यनुज्ञातस्ततोऽगच्छद्वनाद्वनम् ॥ ददर्श
रेणुकां देवीं वल्मीकाकारसंस्थिताम् ॥ ६० ॥ इष्टदामिष्टभक्तानां दिव्यारामनिवासिनीम् ॥ परिवारैः सदोपेतां पूजितां त्रिदशैरपि ॥ ६१ ॥
तोण्डमानपि तां नत्वा ततः पश्चान्मुखो ययौ ॥ ६२ ॥ ॥ अथ श्रीनिवाससमीपस्थपंचवर्णशुकवृत्तांतः ॥ ॥ पंचवर्णं शुकं दृष्ट्वा तं जिघृक्षुरनु
द्रुतः ॥ स वदञ्छ्रीनिवासेति गिरिं शीघ्रतरं ययौ ॥ ६३ ॥ अनुद्रवन्स राजापि गिरिराजं समारुहत् ॥ दरीश्च विविधाः पश्यञ्छिखराणि समंततः॥
॥ ६४ ॥ शुकमन्वेषमाणोऽसौ श्यामाकवनमेयिवान् ॥ तमदृष्ट्वा शुकवरं वनपालं ददर्श ह ॥ ६५ ॥ तं तु राजानमायांतं प्रत्युद्गच्छन्स सत्वरः ॥
प्रणम्य विनयोपेतः कृताञ्जलिपुटः स्थितः ॥ ६६ ॥ तोण्डमानपि संपूज्य तं पप्रच्छ वनेचरम् ॥ पंचवर्णः शुकः कश्चिद्दृष्टश्चात्रागतस्त्वया ॥ ६७ ॥

१ विचिक्रीडेन्द्रवत्-इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीनिवासेति च वदन्क्क गतोऽसौ वनेचर ॥ ६८ ॥ ॥ वनेचर उवाच ॥ ॥ स पंचवर्णो राजेंद्र श्रीनिवासप्रियः सदा ॥ पार्श्ववर्ती सदा तस्य श्रीभूमिभ्यां विवर्धितः ॥ ६९ ॥ स्वामिपुष्करिणीतीरे सदास्ते देवसन्निधौ ॥ ग्रहीतुं स शुकः श्रीमान्न तु केनापि शक्यते ॥ ७० ॥ विहृत्य स्वेच्छया नित्यमस्मिन्गिरिवरे शुभे ॥ दिनांते देवमासाद्य तत्समीपे वसत्ययम् ॥ ७१ ॥ तं देवमाराधयितुं गमिष्यामि नृपात्मज ॥ विश्र म्यतां वृक्षमूले यावदागमनं मम ॥ ७२ ॥ पुत्रेणानेन सहितो विहर त्वं यथासुखम् ॥ ७३ ॥ ॥ राजोवाच ॥ ॥ त्वया सहागमिष्यामि द्रष्टुं देवं जनार्दनम् ॥ त्वं मे दर्शय देवेशं वेंकटाद्रिनिवासिनम् ॥ ७४ ॥ तस्य राज्ञो वचः श्रुत्वा श्यामाकं मधुमिश्रितम् ॥ चूतपत्रपुटे क्षिप्त्वा राज्ञा सह ययौ हरिम् ॥ ७५ ॥ ॥ अथ तोण्डमान्नृपस्य निषादेन सह श्रीनिवाससमीपागमनम् ॥ ॥ गत्वा सुदूरमध्वानं पश्यन्तौ तौ शिलात लम् ॥ मुहूर्तादेव संप्राप्तौ स्वामिपुष्करिणीं शुभाम् ॥ ७६ ॥ स्नात्वा तत्र विधानेन राज्ञा सह निषादपः ॥ दर्शयामास देवेशं राज्ञस्तस्य महात्मनः ॥ ७७ ॥ स्वामिपुष्करिणीतीरे स्थितं श्रीवृक्षमूलके ॥ अतसीपुष्पसंकाशमंबुजायतलोचनम् ॥ ७८ ॥ चतुर्भुजमुदाराङ्गमीषत्स्मितमुखांबुजम् ॥ दिव्यपीतांबरधरं किरीटकटकोज्ज्वलम् ॥ ७९ ॥ पार्श्वस्थाभ्यां सुरूपाभ्यां श्रीभूमिभ्यां समन्वितम् ॥ परितः शंखचक्रासिगदाशार्ङ्गेषुसेवितम् ॥ ॥ ८० ॥ अन्यैर्दिव्यायुधैश्चापि दिव्यमाल्यैर्निषेवितम् ॥ स्कन्देनाराध्यमानं तं त्रिसन्ध्यं पुरुषोत्तमम् ॥ ८१ ॥ वल्मीकगूढपादाब्जमाजानुपुरुषो त्तमम् ॥ ततो दृष्ट्वा मुदा देवं प्रणेमतुरुभौ तदा ॥ ८२ ॥ राजा तु प्रांजलिर्भूत्वा विस्मयोत्फुल्ललोचनः ॥ आनंदलहरीं प्राप्य न प्राज्ञायत किंचन ॥ ८३ ॥ निषादोऽपि निवेद्यैव श्यामाकं मधुमिश्रितम् ॥ राज्ञे तदर्धं दत्त्वैव शिष्टार्धं भुक्तवान्स्वयम् ॥ ८४ ॥ पीत्वा पुष्करिणीतोयं तेन राज्ञा समन्वितः ॥ स पुनः श्यामकवने पुण्यां पर्णकुटीं ययौ ॥ ८५ ॥ उषित्वा चैकरात्रं तु प्रातरुत्थाय भूमिपः ॥ स्वसैन्येन समायुक्तो निवृत्तः स्वपुरं ययौ ॥ ८६ ॥ ॥ अथ तोण्डमान्नृपं प्रति रेणुकोक्तिः ॥ ॥ पुनर्देवीवनं गत्वा हयादवततार ह ॥ चैत्रशुद्धनवम्यां तु पूजयामास रेणुकाम् ॥ ८७ ॥ हविष्यं परमान्नं च सोपस्करमनेकशः ॥ पशूपहारसहितं धूपदीपसमन्वितम् ॥ ८८ ॥ सुराघटीशतं दत्त्वा जातीकेसरवासितम् ॥ एवं संपूजिता देवी प्रीता राज्ञे वरं ददौ ॥ ८९ ॥ आविष्टः पुरुषः कश्चिदवदन्नृपसत्तमम् ॥ शृणु राजन्भविष्यं ते राज्यं निहतकंटकम् ॥ ९० ॥ राजंस्तवैव नाम्नात्र राजधानी भविष्यति ॥ मत्समीपे महाराज चिरं राज्यं करिष्यसि ॥ ९१ ॥ देवदेवप्रसादश्च भविष्यति तवानघ ॥ इति दत्त्वा वरं

१ सुखम्—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

र्यं तत्तटे ॥ १९॥ कमलाख्ये सरसि च स्नात्वा पुण्यप्रदायिनि ॥ तत्तीरवासिनं देवं कृष्णं रामेण संयुतम् ॥ २० ॥ नमस्कृत्य ततः प्रायाद्वनं गज
घटायुतम् ॥ शनैः संप्राप्य शेषाद्रिं निर्झरं संददर्श ह ॥ २१ ॥ तत्समीपं समासाद्य कपिलापूजितं शिवम् ॥ तत्पुरश्चक्रतीर्थं तदगाधं पापनाशनम्
॥ २२ ॥ तत्र स्नात्वा ततोऽगच्छद्वेंकटाद्रिं शनैःशनैः ॥ आरोढुं गच्छता मार्गे युक्तो वैखानसेन च ॥ २३ ॥ रंगदासस्त्वारुरोह बालो द्वादशवार्षि
कः ॥ स्वामिपुष्करिणीं प्राप्य स्नात्वा भक्तिसमन्वितः ॥२४॥ वैखानसेन मुनिना गोपीनाथेन पूजितम् ॥ वनमध्ये तरोर्मूले स्वामिपुष्करिणीतटे
॥२५॥तिष्ठन्तं पुण्डरीकाक्षं श्रीभूमिसहितं हरिम् ॥ आकाशस्थं संददर्श पीतनीलाकृतिं शुभम् ॥ २६ ॥ पार्श्वस्थशंखचक्राभ्यां गदासिभ्यां निषेवि
तम् ॥ पक्षौ विस्तार्य चाकाशे देवमूर्ध्नि वितानवत् ॥२७॥ स्थितं च गरुडेशानं पश्चाच्छार्ङ्गशरं तथा ॥२८॥ ॥ अथ श्रीनिवासार्थं रंगदासकृतदिव्यो
द्यानमण्डपादिनिर्माणानि ॥ ॥ एवं दृष्ट्वा श्रीनिवासं विस्मितो रंगदासकः ॥ अस्य देवस्य चारामं करिष्यामीत्यचिन्तयत् ॥ २९ ॥ निश्चित्य
मनसा सर्वं तरुमूलेऽवसत्सुधीः ॥ कृत्वा वैखानसाद्विष्णोर्नैवेद्यं च दिनेदिने ॥ ३० ॥ शनैश्छित्त्वा वनं घोरं वृक्षांश्चिच्छेद पार्श्वगान् ॥ आस्थानचि
ञ्चां देवस्य रमायाश्चम्पकं तरुम् ॥३१॥ देवाज्ञतो वर्जयित्वा तावुभौ देवसेवितौ ॥ देवस्य परितो भूमौ शिलाकुड्यं तदाकरोत् ॥३२॥ तत्कुड्यस्यैव
परितः पुष्पारामांश्चकार ह ॥ मल्लिकाकरवीराब्जकुन्दमंदारमालतीः ॥३३॥ तुलसीचम्पकानां तु वनान्येव चकार ह ॥ खनित्वा तत्र कूपं तु वर्धयं
स्तज्जलैर्वनम् ॥ ३४ ॥ आरामपुष्पाण्यादाय स्वयं दामान्यथाकरोत् ॥ विचित्राणि तदा बद्ध्वा पूजकस्य करे ददौ ॥ ३५ ॥ आदाय पूजकस्तानि
स्कन्धे मूर्ध्नि बबन्ध च ॥ श्रीनिवासस्य देवस्य श्रीभूमिसहितस्य च ॥ ३६ ॥ एवं देवस्य कैंकर्यं कुर्वंस्तस्थावुदारधीः ॥ तस्यैवं वर्तमानस्य समा
स्त्वा सप्ततेर्गताः ॥ ३७ ॥ कुर्वाणे पुष्पावचयं रंगदासे महात्मनि ॥ ३८ ॥ ॥ अथ रंगदासस्य गन्धर्वक्रीडादर्शनेन भगवत्कैंकर्यविस्मृतिः ॥ ॥
आरामे सरसि स्नातुं गन्धर्वः कश्चिदाययौ ॥ गन्धर्वराजकन्याभिस्तरुणीभिः समन्वितः ॥ ३९ ॥ जलक्रीडां करोति स्म दिवि स्थाप्य
विमानकम् ॥ सुरूपाभिश्च सहितं क्रीडन्तं कमलाकरे ॥ ४० ॥ पश्यञ्छ्रीरंगदासोऽयं व्यस्मरन्माल्यसञ्चयम् ॥ जितेन्द्रियोऽपि तत्क्रीडां पश्य
न्रेतः ससर्ज ह ॥ ४१ ॥ पश्यतस्तस्य सरसः समुत्तीर्य मनोहरम् ॥ दिव्यवस्त्राणि चाच्छाद्य कान्ताभिः सह सस्मितम् ॥
॥ ४२ ॥ अधिरुह्य विमानं तु ययौ स धनदालयम् ॥ गते गन्धर्वराजे तु रंगदासो विमोहितः ॥ ४३ ॥ त्यक्त्वा च तानि
माल्यानि स्नात्वा सरसि लज्जितः ॥ पुनराहृत्य पुष्पाणि शनैर्देवालयं ययौ ॥ ४४ ॥ वैखानसस्तु तं दृष्ट्वा पूजाकालमतीत्य च ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वानुवाच ॥ ॥ त्वया यदुक्तं राजेन्द्र सर्वमेतद्भविष्यति ॥ इति दत्त्वा वरं तस्मै संमान्यैव यथोचितम् ॥ ४० ॥ ॥ अथ विवाहार्थमागतानां ब्रह्मा दीनां स्वावासगमनम् ॥ ॥ ब्रह्मेशादिसुरान्सर्वान्समभ्यर्च्य यथोचितम् ॥ स्वर्लोकगमनायैवमनुमेने मुदा हरिः ॥ गतेषु तेषु सर्वेषु श्रिया भूमि जया युतः ॥ ४१ ॥ विहरन्स यथापूर्वं स्वामिपुष्करिणीतटे ॥ आस्ते दिव्यालये देवोप्यर्च्यमानो गुहेन वै ॥ ४२ ॥ इति श्रीस्कांदे महा पुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे श्रीवेंकटाचलमाहात्म्ये धरणीवराहसंवादे ब्रह्मादिभिः साकं श्रीनिवासस्य विय द्राजपुरगमनकमलालयापरिणयादिवर्णनंनामाष्टमोऽध्यायः ॥ ८ ॥ ॥ अथ वसुनामकनिषादवृत्तांतः ॥ ॥ धरण्युवाच ॥ ॥ कलौ युगे भूमिधर केन त्वं द्रक्ष्यसे प्रिय ॥ विमानं केन ते देव कार्यतेऽस्मिन्महीधरे ॥ १ ॥ श्रीनिवासोऽपि केनैव द्रक्ष्यते सुभगाकृतिः ॥ एतद्ब्रूहि मम प्रीत्या श्रोतुं कौतूहलं विभो ॥ २ ॥ ॥ श्रीवराह उवाच ॥ ॥ वक्ष्यामि शृणु हे देवि भविष्यद्यद्वदामि ते ॥ अस्मिन्महीधरे पुण्ये निषादो वसुनामकः ॥ ३ ॥ श्यामाकवनपालोऽभूद्भक्तिमान्पुरुषोत्तमे ॥ श्यामाकतंडुलान्पक्त्वा मधुना परिषिच्य च ॥ ४ ॥ निवेद्य देवदेवाय श्रीभूमि सहिताय च ॥ एवं भक्तिमतस्तस्य भार्या चित्रवती शुभा ॥ ५ ॥ असूत तनयं बाला वीरनामानमुत्तमम् ॥ वसुः पुत्रेण सहितो भार्यया पति भक्तया ॥ ६ ॥ कस्मिंश्चिद्दिवसे पुत्रं श्यामाकं पालयेति च ॥ विसृज्य पत्न्या सहितो मध्वन्वेषणतत्परः ॥ ७ ॥ गतो वनान्तरं शीघ्रं मधु च्छत्रदिदृक्षया ॥ बालः श्यामाकपक्वानि गृहीत्वाग्नौ निधाय च ॥ ८ ॥ पिष्ट्वा निवेदयामास वृक्षमूले श्रियः पतेः ॥ नैवेद्यं भक्षयित्वैव वीरस्त्वास सुखेन वै ॥ ९ ॥ तदन्तरे वसुश्चापि मध्वादाय समागतः ॥ श्यामाकान्भक्षितान्दृष्ट्वा संतर्ज्य सुतमात्मनः ॥ १० ॥ खड्गमादाय तं हन्तुं त्वरया हस्तमुद्दधौ ॥ ११ ॥ ॥ अथ सुतहननोद्युक्तं वसुं प्रति भगवदुक्तिः ॥ ॥ तद्वृक्षस्थस्तदा विष्णुः खड्गं जग्राह पाणिना ॥ खड्गो गृहीतः केनेति पश्यन्वृक्षं ददर्श सः ॥ १२ ॥ शङ्खचक्रगदापाणिं वृक्षारूढार्धविग्रहम् ॥ मुक्त्वा वसुश्च तं खड्गं प्रणम्योवाच केशवम् ॥ १३ ॥ किमिदं देवदेवेश चेष्टितं क्रियते त्वया ॥ १४ ॥ ॥ श्रीभगवानुवाच ॥ ॥ वसो शृणु वचो मे त्वं पुत्रस्ते भक्तिमान्मयि ॥ त्वत्तोऽपि मे प्रियतमस्तस्मात्प्रत्यक्ष मागतः ॥१५॥ अस्य सर्वत्र तिष्ठामि तव स्वामिसरस्तटे ॥ इति देववचः श्रुत्वा प्रीतिमानभवद्वसुः ॥ १६ ॥ एतस्मिन्नेव काले तु पांड्यदेशात्समाग तः ॥ बाल्यात्प्रभृति शूद्रोऽपि विष्णुभक्तिसमन्वितः ॥ १७ ॥ ॥ अथ रंगदासस्य श्रीनिवाससेवार्थं श्रीशेषाचलागमनम् ॥ ॥ नारायणपुरीं प्राप्य श्रीवराहं प्रणम्य च ॥ तत्र श्रुत्वा श्रीनिवासं वेंकटाद्रिनिवासिनम् ॥ १८ ॥ स्वयंभुवं देवदेवसेवितं प्रययौ ततः ॥ सुवर्णमुखरीं प्राप्य स्नात्वा चोत्ती

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रणम्य देवीमवदच्छुको देववचः शुभम् ॥ ६७ ॥ श्रुत्वा तन्मालिकां गृह्य भूमिजा शिरसा दधौ ॥ चक्रेऽलंकारमुचितं देवागमनकांक्षिणी ॥
॥ ६८ ॥ वियद्राजोऽपि सानन्दमिन्दुमाहूय सादरम् ॥ अन्नं विधीयतां राजन्विविधं रससंयुतम् ॥ ६९ ॥ विष्णोर्नैवेद्ययोग्यं यत्परमान्नं विधी
यताम् ॥ देवानां च ऋषीणां च नराणामपि संमतम् ॥ ७० ॥ चतुर्विधं सुगन्धाढ्यममृतांशैः सुधाकर ॥ एवं कृत्वा संविधानं प्रतीक्ष्यागमनं
विभोः ॥ ७१ ॥ सभायां मंत्रिसहितः समास्त प्रीतमानसः ॥ पुत्रीमलंकृतां कृत्वा धरणीसहितो नृपः ॥ ७२ ॥ इति श्रीस्कांदे महा
पुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे श्रीवेंकटाचलमाहात्म्ये धरणीवराहसंवादे धरणीदेव्यै बकुलमालिकानिवेदित
श्रीनिवासोदन्तकमलालयाकल्याणविध्यादिवृत्तांतवर्णनंनाम सप्तमोऽध्यायः ॥ ७ ॥ ॥ अथ श्रीनिवासस्य लक्ष्म्यादिकृतपरिणयालंकारः ॥
॥ ॥ श्रीवराह उवाच ॥ ॥ ततो देवाधिदेवोऽपि लक्ष्मीमाहूय भामिनीम् ॥ किं कार्यं वद कल्याणि विवाहार्थं सुलोचने ॥ १ ॥
आज्ञापयस्व स्वसखी रमे कार्यं कुरु प्रियम् ॥ श्रीस्तु कृष्णवचः श्रुत्वा सखीराहूय[1] चोदयत् ॥ २ ॥ श्रियाज्ञप्ता ततः प्रीतिः सुगंधं
तैलमाददौ ॥ श्रुतिः क्षौमं समादाय तस्थौ देवस्य सन्निधौ ॥ ३ ॥ भूषणानि समादाय स्मृतिरप्यााययौ मुदा ॥ धृतिरादर्श
माधत्त शा[2]न्तिर्मृगमदं दधौ ॥ ४ ॥ यक्षकर्दममादाय ह्रीः स्थिता पुरतो हरेः ॥ कीर्तिः कनकपट्टं च सरत्नं मुकुटं दधौ ॥ ५ ॥ छत्रं
दधौ तदेंद्राणी चामरं तु सरस्वती ॥ द्वितीयं चामरं गौरी व्यजने विजयाजये ॥ ६ ॥ आगतास्ताः समालोक्य श्रीरुत्थायाथ सत्वरा ॥ सुगंधं
तैलमादाय देवमभ्यज्य शीर्षतः ॥ ७ ॥ उद्वर्तितं गंधचूर्णैर्देवांगं परिमृज्य च ॥ आ[3]नीतान्करिभिस्तोयकलशान्कांचनाञ्छतम् ॥ ८ ॥ वियद्गंगा
दितीर्थेभ्यः कर्पूरादिसुवासितान् ॥ एकमेकं समादाय त्वभ्यषिंचद्रमा हरिम् ॥ ९ ॥ संधूप्य केशान्धूपेन तानाश्यामान्बबंध च ॥ सुगंधेनानु
लिप्यांगं स्वर्णवर्णेन तद्विभोः ॥ १० ॥ पीतकौशेयकं बद्ध्वा कट्यां कांचीसमन्वितम् ॥ मुकुटादिविभूषाभिर्भूषयामास चेन्दिरा ॥ ११ ॥
अंगुलीयकरत्नानि सर्वास्वेवांगुलीषु च ॥ आदर्शं दर्शयामास धृतिर्देवस्य सन्निधौ ॥ १२ ॥ दृष्ट्वादर्शं देवदेवो ह्यूर्ध्वपुंड्रं स्वयं दधौ ॥ आरुह्य
गरुडं पश्चात्स्वयं लक्ष्मीसमन्वितः ॥ १३ ॥ ॥ अथ ब्रह्मादिभिस्साकं श्रीनिवासस्य वियद्राजपुरगमनम् ॥ ॥ ब्रह्मेशवज्रिवरुणयमयक्षेशसे
वितः ॥ वसिष्ठाद्यैर्मुनींद्रैश्च सनकाद्यैश्च योगिभिः ॥ १४ ॥ भक्तैर्भागवतैर्युक्तो नारायणपुरीं ययौ ॥ जगुर्गन्धर्वपतयो ननृतुश्चाप्सरोगणाः ॥१५॥

१ अडभाव आर्षः । २ कान्तिः–इ० पा० । ३ आनिन्युः किंकरास्तोयकलशान्काञ्चनाञ्छतम्–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

देवदुंदुभयो नेदुस्तदा देवस्य सन्निधौ ॥ जपन्तः स्वस्तिसूक्तानि मुनयस्तं समन्वयुः ॥ १६ ॥ देवो देवगणैर्युक्तो[1] विष्वक्सेनादिपार्षदैः ॥
सखीभिस्स्यंदनस्थाभिर्बकुलाद्याभिरन्वितः ॥ आकाशराजस्य पुरमाससाद स्वलंकृतम् ॥ १७ ॥ ॥ अथ पद्मावतीपरिणयघट्टः ॥ ॥ देव
मागतमालोक्य कन्यामैरावतस्थिताम् ॥ पुरीं प्रदक्षणीकृत्य गोपुरद्वारमागताम् ॥ १८ ॥ आलोक्याकाशराजोऽपि समानीय वधूवरौ ॥
बन्धुभिः सहितस्तस्थौ देवमालोक्य केशवम् ॥ १९ ॥ विष्णुर्मालां स्वकंठस्थां हस्तेनादाय सस्मितः ॥ कमलायाः स्कन्धदेशे मुमोच सुमन
श्रिताम् ॥ २० ॥ आदाय मल्लिकामालां साऽस्य कंठे समर्पयत् ॥ एवं त्रिवारं तौ कृत्वा वाहनादवरुह्य च ॥ २१ ॥ स्थित्वा पीठे क्षणं पश्चाद्गृहं
विविशतुः शुभम् ॥ ब्रह्मादिदेवयूथैश्च सहितौ भूमिजाहरी ॥ २२ ॥ मांगल्यसूत्रबंधादि सांकुरार्पणमब्जजः ॥ वैवाहिकं कारयित्वा लाजहोमान्त
मेव च ॥ २३ ॥ व्रतादेशं समाज्ञाय शयितौ कमलाहरी ॥ चतुर्थे दिवसे सर्वं समापय्य चतुर्मुखः ॥ २४ ॥ अनुज्ञाप्य वियद्राजमारोप्य गरुडे
हरिम् ॥ देवीभ्यां सहितं देवं देवैर्गन्तुं प्रचक्रमे ॥ २५ ॥ दिव्यदुन्दुभिनिर्घोषैः संप्राप्य वृषभाचलम् ॥ तुष्टुवुर्देवदेवेशं ब्रह्माद्या देवतागणाः ॥ २६ ॥
शुकादयो मुनिगणास्तुष्टुवुः पुरुषोत्तमम् ॥ स्तूयमानोऽथ देवोऽपि विवेश मणिमंडपम् ॥ २७ ॥ रमाधरणिजाभ्यां च तत्र सिंहासनं ययौ ॥ २८ ॥
॥ अथ वधूवरयोर्वियद्राजवितीर्णप्राभृतादिकम् ॥ ॥ आकाशराजोऽपि तदा महेन्द्रादिसुरैः सह ॥ पुत्रीविष्णवोः प्रियार्थं तु प्राभृतं कर्तुमुद्यतः ॥२९॥
सौवर्णेषु कटाहेषु तंडुलाञ्छालिसंभवान् ॥ [2]मुद्गपात्राण्यनेकानि घृतकुम्भशतानि च ॥ ३० ॥ पयोघटसहस्राणि दधिभाण्डान्यनेकशः ॥ दिव्यानि
चूतकदलीनारिकेलफलानि च ॥ ३१ ॥ धात्रीफलानि कूष्मांडराजरंभाफलानि च ॥ पनसान्मातुलुंगांश्च शर्करापूरितान्घटान् ॥ ३२ ॥
सुवर्णमणिमुक्ताश्च क्षौमकोट्यंबराणि च ॥ दासीदाससहस्राणि कोटिशो गास्तथैव च ॥ ३३ ॥ हंसेन्दुशुक्लवर्णानां हयानामयुतं ददौ ॥ तुंगानां
नित्यमत्तानां गजानामधिकं शतात् ॥ ३४ ॥ अंतःपुरचरा नारीर्नृत्तगीतविशारदाः ॥ ददौ चतुःसहस्राणि श्रीनिवासाय विष्णवे ॥ दत्त्वा
चैतानि सर्वाणि तस्थौ देवपुरो विभुः ॥ ३५ ॥ ॥ अथ श्रीनिवासकृपया वियद्राजस्य भक्तिरूपवरप्राप्तिः ॥ ॥ दृष्ट्वा देवोऽपि तत्सर्वं
देवीभ्यां सहितो हरिः ॥ ३६ ॥ सुप्रीतः प्राह राजानं श्वशुरं वेंकटेश्वरः ॥ वरं वृणीष्व हे राजन्गुरो मत्तो यदीच्छसि ॥ ३७ ॥ इति श्रीशवचः
श्रुत्वा वियद्राजोऽवदद्विभुम् ॥ त्वत्सेवैवेह देवैवं भूयादव्यभिचारिणी ॥ ३८ ॥ मनस्त्वत्पादकमले त्वयि भक्तिर्ममास्तु वै ॥ ३९ ॥ ॥ श्रीभग

१ देवसमायुक्तः–इ० पा० । २ मापामात्राद्यनेकानि–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

परमात्मने ॥ ४३ ॥ अयं वसन्तः श्रीमांश्च शुभं शीघ्रं विधीयताम् ॥ ४४ ॥ ॥ अथ बृहस्पत्युक्त्या विवाहलग्नस्थिरीकरणम् ॥ ॥ आहूय
धिषणं लग्नं विवाहार्थं विधीयताम् ॥ ४५ ॥ तथास्त्वित्याह्वयामास सुरलोकाद्बृहस्पतिम् ॥ पप्रच्छ कन्यावरयोर्विवाहार्थं नरेश्वरः ॥ ४६ ॥ ॥
राजोवाच ॥ ॥ कन्याया जन्मनक्षत्रं मृगशीर्षमिति स्मृतम् ॥ देवस्य श्रवणर्क्षन्तु तयोर्योगो विचार्यताम् ॥ ४७ ॥ श्रुत्वाऽब्रवीत्स धिषणस्त
योरुत्तरफल्गुनी ॥ संमता सुखवृद्ध्यर्थं प्रोच्यते दैवचिंतकैः ॥ ४८ ॥ तयोरुत्तरफल्गुन्यां विवाहः क्रियतामिति ॥ वैशाखमासे विधिवत्क्रियता
मिति सोऽब्रवीत् ॥ ४९ ॥ ॥ श्रीवराह उवाच ॥ ॥ राजा तु धिषणं तत्र संपूज्याथ विसृज्य च ॥ देवस्य दूतिकामाह गच्छ देवालयं शुभे ॥
॥ ५० ॥ वैशाखे देवदेवाय कल्याणं वद सुव्रते ॥ वैवाहिकविधानं तु कृत्वा चागम्यतामिति ॥ ५१ ॥ ततो देव्याः प्रियकरं शुकं दूतं तया सह ॥
विसृज्य वायुं स्वसुतमिन्द्राद्यानयनेऽसृजत् ॥ ५२ ॥ ॥ अथ विश्वकर्मादिकृतपुरालंकारादिक्रमः ॥ ॥ आहूय विश्वकर्माणं पुरालंकारकर्मणि ॥
नियोजयामास सोऽपि निर्ममे निमिषांतरात् ॥ ५३ ॥ इन्द्रोऽसृजत्पुष्पवृष्टिं ननृतुश्चाप्सरोगणाः ॥ धनदो धनधान्याद्यैः पूरयामास वेश्म तत् ॥
॥ ५४ ॥ यमस्तु रोगरहितांश्चकार मनुजान्भुवि ॥ वरुणो रत्नजालानि मौक्तिकादीन्यपूरयत् ॥ ५५ ॥ एवं संपाद्य सर्वाणि ययुर्देवा वृषाचलम् ॥
॥ ५६ ॥ ॥ अथ शुकेन सह बकुलायाः श्रीनिवाससमीपे गमनम् ॥ ॥ श्रीवराह उवाच ॥ ॥ ततः सा हयमारुह्य शुकेन सहिता
ययौ ॥ श्रीवेंकटाद्रिमासाद्य देवालयसमीपतः ॥ ५७ ॥ अवरुह्य तुरंगात्सा सशुकाऽभ्यन्तरं ययौ ॥ दृष्ट्वा देवं रत्नपीठे श्रिया सह सुलोचनम् ॥
॥ ५८ ॥ प्रणम्य ह्यवदत्प्रीता कृत्यं तत्र कृतं विभो ॥ मांगल्यवार्तां वक्तुं वै शुक एष समागतः ॥ ५९ ॥ ॥ अथ श्रीनिवासाय शुकावेदित
पद्मावतीपरिणयवृत्तान्तः ॥ ॥ वदेति देवेनाज्ञप्तः शुको नत्वा तमब्रवीत् ॥ ॥ शुक उवाच ॥ ॥ त्वां प्रत्याह सुता भूमेर्मामंगीकुरु माधव ॥ ६० ॥
वदामि तव नामानि स्मरामि त्वद्वपुस्सदा ॥ ध्रियन्ते तव चिह्नानि भुजाद्यंगे रमापते ॥ ६१ ॥ त्वद्भक्तानर्चयामीह पंचसंस्कारसंयुतान् ॥
त्वत्प्रीतये हि कर्माणि करोमि मधुसूदन ॥ ६२ ॥ एवं सदैवाचरंत्याः पित्रोरनुमते मम ॥ कुरु प्रसादं देवेश मामंगीकुरु माधव ॥ ६३ ॥
इति विज्ञापयामास कमलस्था धरासुता ॥ शुकस्य वचनं श्रुत्वा सुप्रियं त्वात्मनो हरिः ॥ ६४ ॥ ॥ अथ पद्मावत्याः शुकदत्तश्रीनिवासमाला
धारणम् ॥ ॥ श्रीभगवानुवाच ॥ ॥ कर्तुं कल्याणमुद्वाहमागमिष्यामि चाऽमरैः ॥ शुक गच्छ वदैवं तामित्थं देवोऽब्रवीदिति ॥ ६५ ॥ शुकः
श्रुत्वा देववाक्यमादाय वनमालिकाम् ॥ देवदत्तां ययौ शीघ्रं वियद्राजसुतां प्रति ॥ ६६ ॥ तुलसीमालिकां दत्त्वा मृगनाभिसुगंधिनीम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अत्र देवं नृपार्चित्यं प्रतिष्ठाप्य श्रियः पतिम् ॥ २० ॥ अगस्त्यानुग्रहान्नित्यमर्चयामि विधानतः ॥ इति तस्य वचः श्रुत्वा सोत्प्रासं प्राह तं विभुः
॥ २१ ॥ गच्छ नारायणाद्रिं त्वमस्य पादे किमास्यते ॥ आरुह्यानेन मार्गेण पश्चिमे शिखरे स्थितम् ॥ २२ ॥ प्रणम्य विष्वक्सेनं त्वं बालं
न्यग्रोधमूलतः ॥ स्वामिपुष्करिणीं गत्वा स्नात्वा तीरेऽथ पश्चिमे ॥ २३ ॥ अश्वत्थं तत्र वल्मीकं द्रक्ष्यसे नृपनन्दन ॥ तयोर्मध्यं
समासाद्य तपः कुर्वित्यचोदयत् ॥ २४ ॥ कश्चिच्छ्वेतो वराहोऽस्मिन्वल्मीके चरति ध्रुवम् ॥ स तु पुण्यवतामेव दर्शनं याति भूपते ॥ २५ ॥
॥ ॥ श्रीवराह उवाच ॥ ॥ इत्यादिश्य हयारूढो जगाम मृगयां विभुः ॥ चरन्वनाद्वनं सुभ्रूः समासाद्यारणीं नदीम् ॥ २६ ॥ अवरुह्य हयात्तत्र
विचचार तटे शुभे ॥ वनान्तादागतो वायुः पद्मकह्लारशीतलः ॥ श्रमापनयनो मन्दं सिषेवे पुरुषोत्तमम् ॥ २७ ॥ तरवः पुष्पवर्षाणि विकिरन्तः
सिषेविरे ॥ एवं स विचरन्देवः पुष्पभारानतांस्तरून् ॥ २८ ॥ विचिन्वन्गजराजं तं पुष्पलावीर्ददर्श ह ॥ कन्याः सुवेषा रुचिरा मेवेष्विव
शतह्रदाः ॥ २९ ॥ तासां मध्यगतां तन्वीं ददर्शातिमनोहराम् ॥ लक्ष्मीसमां हेमवर्णां तस्यां सक्तमना अभूत् ॥ ३० ॥ तां पृच्छनुराह ताः कन्याः
केयमित्येव पूरुषः ॥ उक्तस्ताभिरियं कन्या वियद्राज्ञो महाबल ॥ ३१ ॥ इदं श्रुत्वा वचस्तासां हयमारुह्य वेगवान् ॥ आजगामाशु भगवान्स्वा
लयं रुचिरं गिरिम् ॥ ३२ ॥ तत्र स्वालयमासाद्य स्वामिपुष्करिणीतटे ॥ मामाहूयावदद्देवो हला बकुलमालिके ॥ ३३ ॥ वियद्राजपुरं गत्वा
प्रविश्यान्तःपुरं सखि ॥ तत्पत्नीं धरणीं प्राप्य पृष्ट्वा कुशलमेव च ॥ ३४ ॥ याचस्व तनयां तस्या रुचिरां कमलालयाम् ॥ राज्ञोभिमतमा
ज्ञाय शीघ्रमागच्छ भामिनि ॥ ३५ ॥ इत्थं देवेन चाज्ञप्ता देवि त्वद्गृहमागता ॥ यथोचितं कुरुष्वेह राज्ञा मंत्रियुतेन च ॥ ३६ ॥ ॥ अथ बकुल
मालिकोक्त्या धरण्यादिकृतविवाहनिश्चयः ॥ ॥ कन्यया च विचार्यैव प्रोच्यतामुत्तरं वचः ॥ ३७ ॥ ॥ श्रीवराह उवाच ॥ ॥ अथ तस्या वचः
श्रुत्वा प्रीता राज्ञी बभूव ह ॥ आहूयाकाशराजं तमुपेत्य कमलालयाम् ॥ ३८ ॥ मंत्रिमध्येऽवदद्देवी वचनं बकुलस्रजः ॥ श्रुत्वा प्रीतोऽवदद्राजा
मंत्रिणः सपुरोहितान् ॥ ३९ ॥ ॥ आकाशराज उवाच ॥ ॥ कन्या त्वयोनिजा दिव्या सुभगा कमलालया ॥ अर्थिता देवदेवेन वेंकटाद्रि
निवासिना ॥ ४० ॥ पूर्णो मनोरथो मेऽद्य ब्रूत किं संमतं तु वः ॥ श्रुत्वा मंत्रिगणाः सर्वे राज्ञो वचनमुत्तमम् ॥ ४१ ॥ प्रोचुः सुप्रीतमनसो
वियद्राजं महीपतिम् ॥ वयं कृतार्था राजेन्द्र कुलं सर्वोन्नतं भवेत् ॥ ४२ ॥ भवत्कन्येयमतुला श्रिया सह रमिष्यति ॥ दीयतां देवदेवाय शार्ङ्गिणे

१ सेवां यच्छति—इ० पा० । २ महात्मनः—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अगस्त्येशं समर्च्य च ॥ आगता धरणीं द्रष्टुं सहैव बकुलस्रजा ॥ ७० ॥ आगतान्ब्राह्मणान्साथ पूजयित्वा सुभोजनैः ॥ दत्त्वाथ दक्षिणाः पूर्णा वस्त्रालंकारसंयुताः ॥ ७१ ॥ आशिषौ वाचयित्वाथ वांछितार्थस्य सिद्धये ॥ विसृज्य ब्राह्मणान्सर्वानथापृच्छ त्स्वयोषितः ॥ ७२ ॥ पूजयित्वा ह्यगस्त्येशमागतास्ता मनस्विनीः ॥ ७३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे श्रीवेंकटाचलमाहात्म्ये धरणीवराहसंवादे बकुलमालिकां प्रति सखीविनिवेदितपद्मावत्युदन्तविष्णुभक्तलक्षणादिवर्णनंनाम षष्ठो ऽध्यायः ॥ ६ ॥ ॥ अथ धरणीदेव्यै बकुलमालिकानिवेदितश्रीनिवासोदन्तः ॥ ॥ धरण्युवाच ॥ ॥ कैषा ब्रूत वरा कन्या युष्माभिः संगता कुतः ॥ किमर्थमागता चेह पूज्यैषा प्रतिभाति मे ॥ १ ॥ ॥ कन्यका ऊचुः ॥ ॥ एषा दिव्याङ्गना देवी त्वयि कार्यार्थमागता ॥ देवालये सङ्गतेयम स्माभिः शिवसन्निधौ ॥ २ ॥ पृष्टावदच्च भवतीं द्रष्टुमेवागतेति वै ॥ शक्या द्रष्टुं राजगृहे मया राज्ञी सुखेन वा ॥ ३ ॥ एवं पृष्टास्ततो ब्रूमः सहास्मा भिश्च गम्यताम् ॥ वयं तु धरणीदास्यो गमिष्यामो नृपालयम् ॥ ४ ॥ इत्युक्तास्माभिरायाता त्वत्समीपं वसुन्धरे ॥ भवत्या पृच्छयतामेषा किमि त्यागमनं तव ॥ ५ ॥ ॥ श्रीवराह उवाच ॥ ॥ इति तासां वचः श्रुत्वा तामपृच्छद्वसुन्धरा ॥ ६ ॥ ॥ धरण्युवाच ॥ ॥ कुतस्त्वमागता देवि किं वा कार्यं मया तव ॥ ब्रूहि सत्यं करिष्यामि त्वदागमनकारणम् ॥ ७ ॥ ॥ बकुलमालिकोवाच ॥ ॥ वेङ्कटाद्रेः समायाता नाम्ना बकु लमालिका ॥ ८ ॥ स्वामी नारायणोऽस्माकमास्ते श्रीवेंकटाचले ॥ कदाचिद्धयमारुह्य हंसशुक्लं मनोजवम् ॥ ९ ॥ मृगयार्थं गतो राज्ञो वेंकटाद्रेः समीपतः ॥ वनानि विचरन्काले शोभने कुसुमाकरे ॥ १० ॥ पश्यन्मृगान्गजान्सिंहान्गवयाञ्छरभान्रुरून् ॥ शुकान्पारावतान्हंसान्पत्रिणोऽन्या न्वनान्तरे ॥ ११ ॥ गजराजं तत्र कञ्चिद्यूथपं मदवर्षिणम् ॥ करेणुसहितं तुंगमन्वगच्छत्सुरोत्तमः ॥ १२ ॥ ॥ अथ श्रीनिवासोक्त्या शंखनृपस्य स्वामितीर्थे तपःकरणम् ॥ ॥ वनाद्वनान्तरं गत्वा नृपं शंखमुपागमत् ॥ तपस्यन्तं बृहच्छैले प्रतिष्ठाप्य जनार्दनम् ॥ १३ ॥ श्रीभूमिसहितं नित्य मर्चयन्तं च भक्तितः ॥ शंखनागबिलंनाम सरः पावनमुत्तमम् ॥ १४ ॥ तत्सरस्तीरमासाद्य तुरंगादवरुह्य च ॥ राजवेषं समासाद्य तमपृच्छन्नृपोत्त मम् ॥ १५ ॥ क्रियते किं नृपश्रेष्ठ पादेऽस्मिञ्छेषभूभृतः ॥ १६ ॥ ॥ शंख उवाच ॥ ॥ अहं हैहयदेशीयः पुत्रः श्वेतस्य भूभृतः ॥ महाविष्णोः प्रीतयेऽत्र कृतवानखिलान्क्रतून् ॥ १७ ॥ अदर्शनान्महाविष्णोर्निर्विण्णोहं नृपात्मज ॥ तदानीमवदद्दिव्या वाणी सर्वार्त्तिनाशिनी ॥ १८ ॥ राजन्नात्र भविष्यामि प्रत्यक्षस्ते वचः शृणु ॥ गच्छ नारायणाद्रिं त्वं तपः कुर्विति मां स्फुटम् ॥ १९ ॥ ततो देशमहं त्यक्त्वा तपसाऽऽराधयाम्यहम्॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निवेदितभगवद्भागवतयोर्लक्षणानि ॥ ॥ नेत्राभिरामं यल्लोके सतामपि मनःप्रियम् ॥ यद्द्रष्टुकामा ब्रह्माद्या यत्तु सर्वगतं महत् ॥ ४७ ॥ तेजसामपि तेजस्वि देवानामपि दैवतम् ॥ [1]भक्तैस्सद्भिरिह प्राप्यमभक्तैर्न कदाचन ॥ ४८ ॥ तस्मिन्नेव मनो मेऽम्ब वस्तुनीह प्रवर्तते ॥ तदेवान्विष्यतां मातर्भक्तानां सर्वकामदम् ॥ ४९ ॥ ॥ श्रीवराह उवाच ॥ ॥ एतच्छ्रुत्वाथ धरणी तामपृच्छत्पुनः सुताम् ॥ तद्भक्तलक्षणं ब्रूहि यैः प्राप्यं तत्सुलोचने ॥ ५० ॥ ॥ पद्मालयोवाच ॥ ॥ भक्तानां लक्षणं मातः शृणु गुह्यं समाहिता ॥ शंखचक्रांकिता नित्यं भुजयुग्मे वसुन्धरे॥ ॥ ५१ ॥ ऊर्ध्वपुंड्रं सान्तरालं तेषामेव विशेषतः ॥ पुण्ड्राणि द्वादश पुनर्धारयंति तथापरे ॥ ५२ ॥ ललाटोदरहृत्कण्ठे जठरे पार्श्वयोरपि ॥ कूर्परयोर्भुजद्वन्द्वे पृष्ठे च गलपृष्ठके ॥ ५३ ॥ केशवादीनि नामानि द्वादशांगेषु द्वादश ॥ वासुदेवेति तन्मूर्ध्नि धारयंति नमोऽस्त्विति ॥ ५४ ॥ तेषां तु नियमान्वक्ष्ये मातः शृणु मनोरमान् ॥ वेदपारायणरताः कर्म कुर्वंति वैदिकम् ॥ ५५ ॥ सत्यं वदन्ति ये देवि नासूयंति परान्क्वचित् ॥ परनिंदां न कुर्वंति परस्वं न हरंति च ॥ ५६ ॥ न स्मरंति न पश्यन्ति न स्पृशंति कदाचन ॥ परदारान्सुरूपांश्च ये च तान्विद्धि वैष्णवान् ॥५७॥ सर्वभूतदयावंतः सर्वभूतहिते रताः ॥ सदा गायंति देवेशमेतान्भक्तानवेहि वै ॥ ५८ ॥ येन केन च सन्तुष्टाः स्वदारनिरताश्च ये ॥ वीतरागभयक्रोधास्तान्भक्तान्विद्धि वैष्णवान् ॥ ५९ ॥ एवंविधैर्गुणैर्युक्ताः पंचायुधधरा अपि ॥ पित्रा चाचार्यरूपेण शिष्टेनान्येन वा पुनः ॥ ६० ॥ स्वगृह्योक्तविधानेन वह्निमादाय वै बुधः ॥ चक्राद्यायुधमंत्रेण जुहुयात्षोडशाहुतीः ॥ ६१ ॥ मूलमंत्रेण सूक्तेन पौरुषेण ततः परम् ॥ जातवेदःसुमंत्रेण पश्चादष्टोत्तरं शतम् ॥ ६२ ॥ हुत्वा महाव्याहृतिभिश्चक्रादींस्तत्र तापयेत् ॥ सद्यान्सुततान्गुरुणा मंत्रवद्धारयेद्बुधः ॥ ६३ ॥ भुजद्वये शंखचक्रे मूर्ध्नि शार्ङ्गशरौ तथा ॥ ललाटे तु गदा धार्या हृदये खड्गमेव च ॥ ६४ ॥ एवं धार्याणि पञ्चैव विष्णुभक्तैर्मुमुक्षुभिः ॥ अथवा भुजयोश्चक्रशंखौ चैव सुलक्षणौ ॥ ६५ ॥ एवं लाञ्छनयुक्ता ये भक्तास्ते वैष्णवाः स्मृताः ॥ तैरेव लभ्यं तद्ब्रह्म सदाचारसमन्वितैः ॥ ६६ ॥ तस्मिन्नेव मम प्रीतिस्तत्प्राप्तिं कांक्षते मनः ॥ मातर्विष्णुं विनान्येषु वाञ्छा काचिन्न जायते ॥ ६७ ॥ स्मरामि श्यामलं विष्णुं वदामि हरिमच्युतम् ॥ तेनैव मातर्जीवामि तद्योगे चिन्त्यतां विधिः ॥ ६८ ॥ ॥ श्रीवराह उवाच ॥ ॥ इत्युक्त्वा मातरं दीना विररामाम्बुजानना ॥ तच्छ्रुत्वा चिन्तयामास विष्णुः प्रीतः कथं भवेत् ॥ ६९ ॥ ॥ अथ बकुलमालिकया सार्द्धं सखीनां धरणीसमीप आगमनम् ॥ ॥ एतस्मिन्नंतरे कन्या

१ वरमूर्द्धनि–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वार्थेन क्व वा जिगमिषा हि ते ॥ २१ ॥ दिव्याश्वमधिरुह्येमं देवलोकादिवागता ॥ २२ ॥ ॥ श्रीवराह उवाच ॥ ॥ इति ताभिस्तदा पृष्टा दृष्टा बकुलमालिका ॥ प्रोवाच वाचं मधुरां हर्षयन्तीव बालिकाः ॥ २३ ॥ ॥ बकुलमालिकोवाच ॥ ॥ श्रीवेंकटाद्रेः प्राप्ताहं नाम्ना बकुलमालिका ॥ धरणीं द्रष्टुकामाहमारुह्येमं तुरंगमम् ॥ २४ ॥ द्रष्टुं शक्या भवेद्देवी किमु तत्र नृपालये ॥ इति तस्या वचः श्रुत्वा ताः प्रोचुर्नृपकन्यकाः ॥ २५ ॥ अस्माभिः सहिता त्वं वै द्रक्ष्यसे धरणीं शुभे ॥ इत्युक्ता सा ततस्ताभिरागता नृपमंदिरम् ॥२६॥ आगच्छन्तीषु तास्वेवं धरणी तु पुलिन्दिनीम् ॥ २७ ॥ ॥ अथ धरणीकृतप्रश्नस्य पुलिन्दिनीप्रतिवचनम् ॥ ॥ आयान्तीं वीथिकायां सा सगुंजाशंखभूषिताम् ॥ शिशुं स्तनंधयं पृष्ठे बद्ध्वा वस्त्रांचलेन वै ॥ २८ ॥ वदामि सत्यं शृणुत भूतं भव्यं भविष्यकम् ॥ वदन्ती वीथिवीथीषु तामाहूय शुचिस्मिता ॥ २९ ॥ स्वर्णशूर्पं समादाय तस्मिन्मुक्ता निधाय च ॥ त्रिप्रस्थमात्रांस्त्रीन्राशीन्कृत्वा तस्यै निधाय च ॥ ३० ॥ वद सत्यं पुलिंदे त्वमेष्यद्वा भूतमेव वा ॥ इत्येवं धरणी देवी पृच्छंती तां स्थिताऽभवत् ॥ ३१ ॥ पृष्टा सावददस्यास्तु मनसा यद्विचिन्तितम् ॥ मध्यराशौ चिन्तितं ते वद कल्याणि मे ऋजु ॥ ३२ ॥ ओमित्याहाथ धरणी पुलिंदां राजवल्लभा ॥ ॥ धरण्युवाच ॥ ॥ राशिरुक्तः फलं ब्रूहि धनराशिं ददामि ते ॥ ३३ ॥ ॥ पुलिन्दोवाच ॥ ॥ सत्यं वदामि ते सुभ्रु शिशोरन्नं प्रयच्छ मे ॥ इत्युक्ता सा तु धरणी स्वर्णपात्रेऽन्नमाददे ॥ ३४ ॥ दत्त्वा तस्यै पुलिंदिन्यै सत्यं ब्रूहीति सावदत् ॥ सक्षीरमन्नमादाय दत्त्वा पुत्राय भामिनी ॥ ३५ ॥ सा सत्यमवदत्सुभ्रूर्दुहितुर्देहशोषणम् ॥ पुरुषादागतं भीरु तद्रूपाऽदर्शनादियम् ॥ ३६ ॥ अंगतापं समापन्ना ह्यनंगशरपीडिता ॥ स तु देवादिदेवो वै वैकुण्ठादागतः स्वयम् ॥ ३७ ॥ श्रीवेंकटाद्रिशिखरे स्वामिपुष्करिणीतटे ॥ मायावी परमानंदः श्रिया सह रमापतिः ॥ ३८ ॥ कामरूपी विहरते भक्ताभीष्टप्रदो हरिः ॥ स तुरंगं समारुह्य विहरन्काननान्तरे ॥ ३९ ॥ आगत्योपवनं राज्ञि तव कन्यां स दृष्टवान् ॥ रमासमामिमां दृष्ट्वा स्वयं कामवशं गतः ॥ ४० ॥ स्वसखीं ललितां देवः प्रेषयिष्यति तेंतिकम् ॥ रमेव तं समेत्यैषा रमिष्यति सुखं चिरम् ॥ ४१ ॥ एतत्सत्यं मम वचः पश्याद्यैव नृपात्मजे ॥ पुत्रस्यान्नं प्रयच्छेति तूष्णीमास पुलिन्दिनी ॥ ४२ ॥ अन्नं दत्त्वा पुनर्भूरि तस्यै तां विससर्ज ह ॥ तस्यां विनिर्गतायां तु पुलिंदिन्यामनिन्दिता ॥ ४३ ॥ उत्थाय चांगणात्तस्माद्विवेशांतःपुरं शुभम् ॥ यत्र पद्मालया कन्या समास्ते स्वसखीवृता ॥ ४४ ॥ गत्वा पुत्रीसमीपस्था कन्यां कामातुरां सुताम् ॥ पुत्रि किं ते करिष्यामि वस्तु किं वा प्रियं शुभे ॥ ४५ ॥ इति मात्राभिपृष्टा सा मन्दमाह मनस्विनी ॥ ४६ ॥ ॥ अथ पद्मावती

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वक्ष्यामहेऽधुना ॥ ६८ ॥ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे श्रीवेंकटाचलमाहात्म्ये धरणीवराहसं
वादे पद्मावतीदर्शनेन श्रीनिवासस्य मोहप्राप्त्यादिवर्णनंनाम पञ्चमोऽध्यायः ॥ ५ ॥ ॥ छ ॥ ॥ अथ बकुलमालिकां प्रति सखीविनिवेदितपद्माव
त्युदन्तः ॥ ॥ योषित ऊचुः ॥ ॥ वयमाकाशराजस्य शुद्धान्तनिलयाः स्त्रियः ॥ सख्यः पद्मालयाया वै दुहितुर्वसुधापतेः ॥ १ ॥ राजपुत्रीं
पुरस्कृत्य गताः पूर्वं वनांतरम् ॥ कुर्वंत्यः पुष्पावचयं राजपुत्र्यर्थमाकुलाः ॥ २ ॥ वृक्षमूले समासीनास्तत्र पश्याम पूरुषम् ॥ इन्द्रनीलमणिश्याम
मिन्दिरामन्दिरोरसम् ॥ ३ ॥ ईषत्स्मितमुखं चारुपीनदीर्घभुजद्वयम् ॥ मृष्टपीतांबरं हेमबाणबाणासनोज्ज्वलम् ॥ ४ ॥ सुवर्णमुकुटं हारकेयूरादिवि
भूषितम् ॥ तं तु पद्मालया दृष्ट्वा सखी कमललोचना[1] ॥ ५ ॥ द्रुतहेमनिभाकारा[2] पश्य पश्येति साब्रवीत् ॥ पश्यन्तीनां तदास्माकं गतोऽन्तर्धान
माशु सः ॥ ६ ॥ सा सखी मूर्च्छितास्माभिर्नीता राजगृहं ततः॥ ७ ॥ ॥ अथ पद्मावतीमुद्दिश्य दैवज्ञं प्रति वियद्राजकृतप्रश्नादिः ॥ ॥ दृष्ट्वाऽ
स्वस्थां नृपः पुत्रीमपृच्छद्दैवचिन्तकम् ॥ वद विप्रेन्द्र पुत्र्या मे ग्रहचारफलं मुने ॥ ८ ॥ बृहस्पतिसमो विप्रो विचार्यात्मनि खेचरान् ॥ अनु
कूला ग्रहाः सर्वे तव पुत्र्या नृपोत्तम ॥ ९ ॥ किन्तु नित्यं ग्रहफलं किंचिद्भ्रांतिकरं नृप ॥ तमुवाच पुनर्धीमान्प्रश्नकालं विचार्य च ॥ १० ॥
छायां गुणित्वा लग्नं च तत्फलानि विचार्य च ॥ लग्ने लग्नाधिपश्चन्द्रः केंद्रे चैव बृहस्पतिः ॥ ११ ॥ निद्राति दिनपक्षी तु प्रश्नपक्षी तु राज्यगः ॥
शृणु राजन्फलं तस्य स्वास्थ्यमेव भविष्यति ॥ १२ ॥ उत्तमः पुरुषः कश्चिदागतः कन्यकां प्रति ॥ तं दृष्ट्वा मूर्च्छिता पुत्री
तेन योगं समेष्यति ॥ १३ ॥ तेनैव प्रेषिता काचिदागमिष्यति कन्यका ॥ सा तु वक्ष्यति यद्वाक्यं तद्धितं ते भविष्यति
॥ १४ ॥ तत्कुरुष्व महाराज सत्यंसत्यं वदाम्यहम् ॥ किं च सर्वार्थदं यत्तु सर्वव्याधिविनाशनम् ॥ १५ ॥ वक्ष्यामि तत्कु
रुष्वाद्य पुत्र्यास्तव सुखावहम् ॥ कारयागस्त्यलिंगस्य ब्राह्मणैरभिषेचनम् ॥ १६ ॥ इत्युक्त्वाथ गृहं यातो राजानं दैवचिंतकः ॥
॥ १७ ॥ ॥ अथ दैवज्ञोक्त्यागस्त्यलिंगार्चनाय विप्रादिप्रेषणम् ॥ ॥ आकाशराजोऽपि तदा विप्रानाहूय वैदिकान् ॥ अभ्यर्च्याज्ञा
पयामास गत्वा देवालयं द्विजाः ॥ १८ ॥ महाभिषेकं शम्भोश्च कुरुध्वं मंत्रपूर्वकम् ॥ इत्यनुज्ञाप्य तानस्मानाहूयाभ्यवदच्छुभे ॥ १९ ॥ महा
भिषेकसम्भारान्सम्पादयत कन्यकाः ॥ इत्याज्ञता नृपेणैव वयं देवालयं गताः ॥ २० ॥ ब्रूहि त्वं सुभगेऽस्माकं त्वदागमनमंजसा ॥ कुतोसि कस्य

१ कमललोचनम्–इ० पा० । २ तप्तहेमनिभाकारा–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मामेव सीतया चोदितोन्वयात् ॥ तदन्तरे राक्षसेन्द्रो हर्तुं सीतामुपाययौ ॥ २० ॥ अग्निहोत्रगतो वह्निस्तं ज्ञात्वा रावणोद्यमम् ॥ आदाय सीतां पाताले स्वाहायां सन्निवेश्य च ॥ २१ ॥ तेनैव रक्षसा स्पृष्टां पुरा वेदवतीं शुभाम् ॥ अग्नौ विसृष्टदेहां तां संहर्तुं रावणं पुनः ॥ २२ ॥ सीताया रूपसदृशीं कृत्वा चैवोत्ससर्ज ह ॥ सा रावणहृता भूत्वा लंकायां च निवेशिता ॥ २३ ॥ हते तु रावणे पश्चात्पुनरग्निं विवेश सा ॥ अग्निस्तु रक्षितां लक्ष्मीं स्वाहायां मम जानकीम् ॥ २४ ॥ दत्त्वा हस्ते च मामाह सीतया सहितां सखीम् ॥ इयं वेदवती देव सीतायाः प्रियकारिणी ॥ २५ ॥ सीतार्थं राक्षसपुरे तेन बन्दीकृता स्थिता ॥ तस्मादेनां वरेणैव प्रीणय त्वं श्रिया सह ॥ २६ ॥ इति वह्निवचः श्रुत्वा सीता मामवदच्छुभा ॥ मम प्रीतिकरी नित्यमियं वेदवती विभो ॥ २७ ॥ तस्मात्परं भागवतीं देवैनां वरय प्रभो ॥ २८ ॥ ॥ श्रीभगवानुवाच ॥ ॥ तथा देवि करिष्यामि ह्यष्टाविंशे कलौ युगे ॥ तावदेषा ब्रह्मलोके वसत्वमर पूजिता ॥ २९ ॥ पश्चात्तु भूमितनया भविष्यति वियत्सुता ॥ इति दत्तवरा पूर्वं मया लक्ष्म्या च सुन्दरी ॥ ३० ॥ अद्य नारायणपुरे सम्भूता धरणीतलात् ॥ पद्मासमा पद्मनेत्री पद्मादत्तवरा सती ॥ ३१ ॥ सखीभिरनुरूपाभिर्वने पुष्पाणि चिन्वती ॥ मृगयामटता तत्र मया दृष्टा मनोरमा ॥ ३२ ॥ तस्या रूपं मया वक्तुं न शक्यं शतहायनैः ॥ लक्ष्म्येव च तया मेऽद्य संगमो भविता यदि ॥ ३३॥ प्राणाः स्थिरा भविष्यन्ति सत्यमित्यवधारय ॥ ३४ ॥ ॥ अथ वियद्राजपुरं प्रति बकुलमालिकागमनम् ॥ ॥ त्वं तत्र गत्वा तां कन्यां दृष्ट्वा बकुलमालिके ॥ जानीहि रूपलावण्यादियं योग्येति चास्य वै ॥ अनवद्या विशालाक्षी पद्मेन्दीवरलोचना ॥ ३५ ॥ इत्युक्ता मोहमापन्नं तं प्राह बकुला पुनः ॥ इतो गच्छामि देवेश मनोज्ञा तव यत्र सा ॥ ३६ ॥ मार्गं वद रमाधीश गमिष्ये येन तां प्रति ॥ एवमुक्तो रमाधीशस्तां प्राह बकुलस्रजम् ॥ ३७ ॥ इतो गच्छ महाभागे श्रीनृसिंहगुहा यतः ॥ तन्मार्गेणावतीर्यास्माद्भूधरेन्द्रान्मनोरमात् ॥ ३८ ॥ अगस्त्याश्रममासाद्य दृष्ट्वा लिंगं तदर्चितम् ॥ अगस्त्येश इति ख्यातं सुवर्णमुखरीतटे ॥ ३९ ॥ तीरेणैव ततो गच्छ शुकब्रह्मऋषेर्वनम् ॥ पश्यन्ती स्वर्णमुखरीं तत्र कल्लोलमालिनीम् ॥ ४० ॥ तत्र पद्मसरोनाम पावनं पद्मसंयुतम् ॥ तत्र स्नात्वाऽथ तत्तीरे तपन्तं मुनिसत्तमम् ॥ ४१ ॥ छायाशुकं नमस्कृत्य कृष्णं च बलसंयुतम् ॥ आराध्यमानं मुनिना शुकेन सततं शुभे ॥ ४२ ॥ इन्द्रनीलमणिश्यामं पीतनिर्मलवाससम् ॥ तीर्थयात्रां गमिष्यन्तं बलभद्रं सिताकृतिम् ॥ ४३ ॥ उपास

१ शप्त्वा तम्-इ०पा० । २ सहितां शिखी-इ० पा० । ३ चतुर्विंशतिके-इ० पा० । ४ मन्यसे-इ० पा० । ५ गत्वा-इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यन्तं मंत्राणि मुक्तान्वितकरद्वयम् ॥ उद्यन्तं पादुकायुक्तं बलभद्रं प्रणम्य च ॥ ४४ ॥ आदाय स्वर्णकमलं सरसोऽस्माद्वरानने ॥ तीर्त्वा सुवर्णमुखरीं वनान्युपवनानि च ॥ ४५ ॥ अरणीतीरमासाद्य विश्रम्य च वनान्तरे ॥ नारायणपुरीं दृष्ट्वा विस्मयं च गमिष्यसि ॥ ४६ ॥ तस्या श्चोपवने वृक्षान्पुष्पाढ्यान्फलसंयुतान् ॥ पनसाम्रशिरीषांश्च कुन्दतिन्दुकपाटलान् ॥ ४७ ॥ पुन्नागनागवरणरसालांकोलचंपकान् ॥ बकुलामलका न्सालांस्तालहिंतालपद्मकान् ॥ ४८ ॥ जम्बूनिम्बकदम्बैलापिप्पलीमधुकार्जुनान् ॥ प्रियंगुहिंगुखर्जूरमायूराशोकलोध्रकान् ॥ ४९ ॥ अश्वत्थो दुम्बरप्लक्षबदरीभूर्जकीचकान् ॥ चिञ्चाकिंशुकमन्दारशाल्मलीबीजपूरकान् ॥ ५० ॥ पूगनारंगलिकुचनारिकेलवनाकुलान् ॥ मल्लिकामालतीकुन्द यूथिकाकेतकीयुतान् ॥ ५१ ॥ करवीराब्जसंपन्नान्राजरंभाविराजितान् ॥ मयूरकीरगरुडशुकसारससंकुलान् ॥ ५२ ॥ भृंगझंकारनिबिडानारामा न्सुमनोहरान् ॥ पश्यन्तीं परमं हर्षमवाप्य च नदीतटे ॥ ५३ ॥ गत्वा पूर्वोत्तरे मार्गे पुरीमिन्द्रपुरीसमाम् ॥ गङ्गयेवावृतां नित्यं सरितारणि नामया ॥ ५४ ॥ आकाशराजनगरीं गत्वा तत्रोचितं कुरु ॥ ५५ ॥ ॥ श्रीवराह उवाच ॥ ॥ इत्यादिश्य सुराधीशः सखीं तां बकुला भिधाम् ॥ विसृज्य शयने शुभ्रे स शिश्ये श्रीसमन्वितः ॥ ५६ ॥ प्रणम्य देवदेवेशं सखी बकुलमालिका ॥ गुञ्जामणिसमाकारं रक्ताश्वमधिरुह्य सा ॥ ५७ ॥ यथोक्तमार्गेण ययौ पश्यन्ती विविधान्मृगान् ॥ मत्तेभान्पर्वताकाराञ्श्वेतदन्तविभूषितान् ॥ ५८ ॥ कारिणीयूथसहिताञ्जलदादानतत्परान् ॥ सिंहाञ्छतघनप्रख्यान्सिंहीयूथैरनुद्रुतान् ॥ ५९ ॥ शार्दूलर्क्षांश्च खड्गांश्च शरभान्गवयान्मृगान् ॥ कृष्णसारांश्च गोमायूञ्छशांश्च प्रियकानपि ॥ ६० ॥ सारसांश्च मयूरांश्च मार्जारान्वनगोचरान् ॥ वृकाञ्छु कान्सूकरांश्च सुवाचः पक्षिणस्तथा ॥ ६१ ॥ पश्यन्ती विविधाकारांस्तुष्यन्ती च मुहुर्मुहुः ॥ आससादारणीतीरं पश्चिमं पादपाकुलम् ॥ ६२ ॥ अवतीर्यारुणादश्वादगस्त्येशसमीपतः ॥ दृष्ट्वागस्त्येश्वरं लिङ्गमगस्त्येन सुपूजितम् ॥ ६३ ॥ तत्र स्नात्वा च पीत्वा च विशश्राम नदीतटे ॥ ६४ ॥ ॥ ॥ अथ दिव्योद्यानस्थपद्मावतीसखीः प्रति बकुलमालिकोक्तिः ॥ ॥ तत्रागता राजगृहाद्योषितो देवसंनिधौ ॥ सखीः पद्मालयायास्ता दृष्ट्वा बकुल मालिका ॥ ६५ ॥ गत्वा समीपे तासां सा किंवदन्तीं स्म पृच्छति ॥ ६६ ॥ ॥ बकुलमालिकोवाच ॥ ॥ का यूयं योषितो ब्रूत विचि त्राभरणस्रजः ॥ कुतः समागता ह्यत्र किं कार्यं वोऽमलाननाः ॥ ६७ ॥ तास्तु तस्या वचः श्रुत्वा स्मितपूर्वमथाब्रुवन् ॥ शृणुष्वावहिता देवि वयं

१ वरदम्—इ० पा० । २ मधुकान्ववान्—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तर्जितस्ताभिरेवं स हयमारुह्य शीघ्रगम् ॥ युक्तः स्वानुचरैः सर्वैर्ययौ द्रुततरं गिरिम् ॥ ५४ ॥ इति श्रीस्कांदे महापुराण एकाशीति साहस्र्यां संहितायां द्वितीये वैष्णवखण्डे श्रीवेंकटाचलमाहात्म्ये धरणीवराहसंवाद उद्यानवासिन्याः पद्मावत्यास्समीपे नारदागमन श्रीनिवासमृगयादिवर्णनंनाम चतुर्थोऽध्यायः ॥ ४ ॥ ॥ छ ॥ ॥ अथ पद्मावतीदर्शनेन श्रीनिवासस्य मोहप्राप्तिः ॥ ॥ ॥ ॥ श्रीवराह उवाच ॥ ॥ सम्प्राप्य चालयं दिव्यमवतीर्य हयोत्तमात् ॥ विसृज्य सानुगान्सर्वान्देवान्कैरातरूपकान् ॥ १ ॥ विश्रम ध्वमिति प्रोच्य विवेश मणिमण्डपम् ॥ आरुह्य मणिसोपानं पंचकक्षा अतीत्य च ॥ २ ॥ मुक्तागृहं समासाद्य तस्मिँल्लोलायिते शुभे ॥ नवरत्न मये मंचे संविवेशावशो हरिः ॥ ३ ॥ संस्मरन्पद्मगर्भाभां तामेवायतलोचनाम् ॥ तनुमध्यां पीनकुचां मन्दस्मितमुखांबुजाम् ॥ ४ ॥ क्षीराब्धि तनयामेव मेने पद्मोद्भवां शुभाम् ॥ तस्यां गतमना देवः श्रीनिवासो मुमोह च ॥ ५ ॥ ॥ अथ मुह्यमानं श्रीनिवासं प्रति बकुलमालि कोक्तिः ॥ ॥ ततो मध्याह्नसमये कृत्वान्नं दिव्यमुत्तमम् ॥ सूपदंशं सुगन्धं च देवार्हमतिशोभनम् ॥ ६ ॥ शुद्धान्नं पायसान्नं च गौडं मुद्गान्नमेव च ॥ कृत्वा पञ्चविधापूपान्पूरिकावटकानपि ॥ ७ ॥ देवं द्रष्टुं ययौ शीघ्रं सखी बकुलमालिका ॥ पद्मावतीपद्मपत्राचित्ररेखासमन्विता ॥ ८ ॥ निवेश्य द्वारि देवस्य ताः सर्वाः प्रमदोत्तमाः ॥ विवेश तत्समीपं सा स्वयं बकुलमालिका ॥९॥ गत्वा समीपं देवस्य ववन्दे भक्तिभावतः ॥ दृष्ट्वाथ देवं विवशं पर्यंके रत्नभूषिते ॥ १० ॥ पादसंवाहनं कृत्वा निमीलितविलोचनम् ॥ तं ध्यायन्तं च किमपि व्याजहार शुचिस्मिता ॥ ११ ॥ उत्तिष्ठ देवदेवेश किं शेषे पुरुषोत्तम ॥ परमान्नं कृतं देव भोक्तुमागच्छ माधव ॥ १२ ॥ किं वा त्वमार्तवच्छेषे सर्वलोकार्तिनाशन ॥ मृगया मटता देव किं दृष्टं भवता वने ॥ १३ ॥ अवस्था ते विशालाक्ष कामुकस्येव दृश्यते ॥ का दृष्टा देवकन्या वा मानुषी वाऽहिकन्यका ॥ ॥ १४ ॥ ब्रूहि मे त्वमचिन्त्यात्मन्कन्यां तां चित्तहारिणीम् ॥ १५ ॥ ॥ श्रीवराह उवाच ॥ ॥ तस्यास्तद्वचनं श्रुत्वा निःश्वासमकरोद्विभुः ॥ निःश्वसंतं पुनः प्राह प्रीता बकुलमालिका ॥ १६ ॥ एवं मनोहरा का सा तवापि पुरुषोत्तम ॥ तामवोचद्धृषीकेशो वक्ष्यामि शृणु तत्त्वतः ॥ १७ ॥ ॥ ॥ अथ श्रीनिवासोक्तपद्मावतीपरिणयकारणानि ॥ ॥ श्रीभगवानुवाच ॥ ॥ पुरा त्रेतायुगे पुण्ये रावणं हतवानहम् ॥ तदा वेदवती कन्या साहाय्यमकरोच्छ्रियः ॥१८॥ सीतारूपाभवल्लक्ष्मीर्जनकस्य महीतलात् ॥ गते मयि तु मारीचं हन्तुं पञ्चवटीवने ॥ १९ ॥ ममानुजोऽपि

१ पूरिकामण्डकानपि–इ० पा० । २ तत्र–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चनम् ॥ ३० ॥ सुसूक्ष्मक्षौमसंवीतनीलचूलिकयोज्ज्वलम् ॥ पद्मरागमणिद्योतिस्फुरत्कुंडलमण्डितम् ॥ ३१ ॥ सुवर्णरत्नखचितशार्ङ्गदिव्यधनुर्धरम् ॥ अपरेण करेणैव वहन्तं काञ्चनं शरम् ॥३२॥ पीतकक्षौमसंवीतकटिदेशं सुमध्यमम् ॥ रत्नकंकणकेयूरकटिसूत्रविराजितम्॥३३॥ विशालवक्षःसंशोभिदक्षिणावर्तसंयुतम् ॥ स्वर्णयज्ञोपवीतेन स्फुरत्स्कन्धं मनोहरम्॥३४॥ईहामृगं समुद्दिश्य महावेगादनुद्रुतम् ॥ तं दृष्ट्वा विस्मिता नार्यः सस्मितास्तस्थुरत्र वै ॥३५॥ तं दृष्ट्वा हयमारूढं गजेन्द्रो नम्रमस्तकः ॥ तुण्डमुद्धृत्य गर्जन्वै विनिर्वृत्य ययौ वनम् ॥३६॥ तस्मिन्गते गजे तत्र हयारूढः समाययौ ॥ ईहामृगं विचिन्वानः पुष्पलावीसमीपतः॥३७॥ ॥ अथ भगवतः कन्यकानां चान्योन्यसंवादः॥ ॥ ताः समेत्य स चोवाच तुरगोपरि संस्थितः॥अत्रागतो मृगः कश्चिदीहामृग इतीरितः ॥३८॥ दृष्टो वा भवतीभिः स ब्रूत मे कन्यका इति ॥३९॥ ॥ श्रीवराह उवाच ॥ ॥ प्रत्यूचुस्तास्तु तं कन्या दृष्टोस्माभिर्न कश्चन ॥४०॥ किमर्थमागतोस्माकं वनं वरधनुर्धरः ॥ अत्रावध्या मृगाः सर्वे वर्तमाना निषादप ॥४१॥ आशु गच्छ वनादस्मादाकाश[1]नृपपालितात् ॥ इति तासां वचः श्रुत्वा हयादवरुरोह सः ॥ ४२ ॥ कास्तु यूयमियं चापि क[2]न्यकांबुजसन्निभा ॥ सुभगा चारुसर्वांगी पीनोन्नतपयोधरा ॥ ब्रूत मेऽहं गमिष्यामि श्रुत्वा स्वस्यालयं गिरिम् ॥ ४३ ॥ इति तस्या वचः श्रुत्वा धरण्यात्मजयेरिता ॥ सखी पद्मावती प्राह निषादं पर्वतालयम् ॥ ४४ ॥ आकाशराजतनया वसुधातलसंभवा ॥ अस्माकं नायिका शूर पद्मिनीनाम नामतः ॥ ४५ ॥ ब्रूहि त्वं सुभगाकार किन्नामा कस्य वा सुतः ॥ जातिः का कुत्र ते वासः किमर्थं त्वमिहागतः ॥ इति पृष्टः स ताः प्राह मन्दस्मितमुखांबुजः ॥ ४६ ॥ दिवाकरकुलं प्राहुरस्माकं तु पुराविदः ॥ यस्य नामान्यनंतानि पावनानि मनीषिणाम् ॥ ४७ ॥ वर्णतो नामतश्चापि कृष्णं प्राहुस्तपस्विनः ॥ ब्रह्मद्विषां सुरारीणां यस्य चक्रं भयावहम् ॥ ४८ ॥ यस्य शंखध्वनिं श्रुत्वा मोहमीयुर्हि वैरिणः ॥ यस्य वै धनुषस्तुल्यं धनुर्नैवामरेष्वपि ॥ ४९ ॥ तं मां वीरपतिं प्राहुर्वेंकटाद्रिनिवासिनम् ॥ तस्मादद्रितटात्सोऽहं निषादैरनुगैर्वृतः ॥ ५० ॥ मृगयार्थं हयारूढो युष्माकं वनमागतः ॥ मयाप्यनुद्रुतः कश्चिन्मृगो वायुगतिर्ययौ ॥ ५१ ॥ तमदृष्ट्वा वनं पश्यन्दृष्टवान्सुभगामिमाम् ॥ कामादिहागतोऽहं वो मया किं लभ्यते त्वियम् ॥ ५२ ॥ इति कृष्णवचः श्रुत्वा क्रु[3]द्धास्ताः पुनरब्रुवन् ॥ आकाशराजो दृष्ट्वा त्वां कृत्वा निगडबन्धनम् ॥ यावन्नयति तावत्त्वं गच्छ शीघ्रं स्वमालयम् ॥५३॥

१ आकाशात्मजपालितात्–इ० पा० । २ कनकाम्बुजसन्निभाः–इ० पा० । ३ कन्याः–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पुत्रिकेव विराजती ॥ तां दृष्ट्वा स महीपालो विस्मयोत्फुल्ललोचनः ॥ २४ ॥ आदाय तनया चेयं ममैवेति पुनःपुनः ॥ जहर्ष मंत्रिभिश्चैनं
प्राह वागशरीरिणी ॥ २५ ॥ सत्यं तवैवं[1] तनया वर्धयस्व सुलोचनाम् ॥ ततः प्रीतमना राजा स्वपुरं प्रविवेश ह ॥ २६ ॥ आहूय धरणीं
देवीमिदमाह महीपतिः ॥ देवदत्तामिमां पश्य भूतलादुत्थितां मम ॥ २७ ॥ आवाभ्यां तदपुत्राभ्यां पुत्रीयं भविता ध्रुवम् ॥ इत्युक्त्वा प्रददौ
देव्या हस्ते प्रीत्या वियन्नृपः ॥ २८ ॥ ॥ अथ आकाशराजस्य धरण्याख्यपत्न्यां वसुदानाख्यसुतोत्पत्तिः ॥ ॥ तस्यां गृहं प्रविष्टायां
धरणी गर्भमादधौ ॥ वियन्नृपश्च सुप्रीतो वीक्ष्य स्निग्धविलोचनाम् ॥ २९ ॥ उवाच फलिता सुभ्रूर्लता सान्तानिकी च मे ॥ ३० ॥ अथ सा
धरणी देवी काले कमललोचना ॥ सुप्रशस्ते मुहूर्ते च स्वोच्चसंस्थेषु पञ्चसु ॥ ग्रहेषु सुषुवे पुत्रं मेषस्थे च दिवाकरे ॥ ३१ ॥ देवदुन्दुभयो नेदुः
पुष्पवृष्टिर्गृहेऽपतत् ॥ ववौ वायुः सुखस्पर्शस्तज्जन्मदिवसे तदा ॥ ३२ ॥ पुत्रसूतिप्रवक्तॄणां सुप्रीतः पुत्रजन्मनि ॥ सर्वस्वदानमकरोच्छत्रचामर
वर्जितम् ॥ ३३ ॥ कपिलाकोटिदानं च वृषभाणां शताधिकम् ॥ दिवसे द्वादशे पुण्ये जातकर्मादिकाः क्रियाः ॥ चकार नामधेयं च वसुदान
इति स्वयम् ॥ ३४ ॥ ॥ श्रीवराह उवाच ॥ ॥ आकाशतनयो देवि वसुदानो मनोरमः ॥ ववृधे दिवसैर्बालः शुक्लपक्ष इवोडुराट् ॥ ३५ ॥
उपनीतो विनीतोऽसौ गुरुभिर्ब्रह्मपारगैः ॥ पितुरस्त्राणि शस्त्राणि मन्त्रवत्सोऽप्यशिक्षत ॥ ३६ ॥ चतुष्पादं धनुर्वेदं सांगोपांगमधीतवान् ॥ पिता
तेनातिबलिना दुराधर्षः परैरभूत् ॥ ३७ ॥ आकाश इव निष्पंको ग्रीष्मे भानुमता युतः ॥ वैशाख इव मध्याह्ने दुःसहो दुर्निरीक्षकः ॥ ३८ ॥
इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे श्रीवेंकटाचलमाहात्म्ये धरणीवराहसंवादेऽगस्त्यप्रार्थनयाभगवतः
सर्वजनदृग्गोचरत्वादिवर्णनंनाम तृतीयोऽध्यायः ॥ ३ ॥ ॥ ७ ॥ ॥ अथ उद्यानवासिन्याः पद्मावत्याः समीपे नारदागमनम् ॥ ॥ धरण्यु
वाच ॥ ॥ उक्तं भगवता तस्य वियत्पुत्रस्य नाम च ॥ अयोनिजायास्तत्पुत्र्याः किं नाम च तदाऽकरोत् ॥ १ ॥ ॥ श्रीसूत उवाच ॥ ॥ इति पृष्टः पुनः
प्राह श्रीवराहो जगत्पतिः ॥ २ ॥ ॥ श्रीवराह उवाच ॥ ॥ आकाशराजो मतिमांस्तां दृष्ट्वा कमलेशयाम् ॥ ३ ॥ पद्मिनीति च नाम्ना
वै चकार वसुधासुताम् ॥ तां तु यौवनसम्पन्नां सखीभिः परिवारिताम् ॥ ४ ॥ आरामे विहरंतीं च शुककोकिलनादिते ॥ यदृच्छयाऽऽगतस्तत्र
नारदो मुनिसत्तमः ॥ ५ ॥ वनलक्ष्मीमिवालोक्य विस्मयादिदमब्रवीत् ॥ ६ ॥ ॥ नारद उवाच ॥ ॥ कासि कस्य सुता भीरु हस्तं दर्शय

[1] तवेयम्–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मे तव ॥ इत्युक्ता सा सुचार्वंगी स्वात्मानं मुनयेऽब्रवीत् ॥ ७ ॥ वियद्राजसुता ब्रह्मँल्लक्षणानि वदस्व मे ॥ इत्युक्तः स तदा प्राह नारदो मुनि सत्तमः ॥ ८ ॥ ॥ अथ नारदोदीरितपद्मावतीशरीरलक्षणानि ॥ ॥ नारद उवाच ॥ शृणु त्वं चारुवदने लक्षणानि वदामि ते ॥ पादौ प्रतिष्ठितौ सुभ्रु रक्तपद्मदलान्वितौ ॥ ९ ॥ पादांगुल्यः समा रक्ता रक्ततुंगनखान्विताः ॥ गुल्फौ गूढौ समावेतौ जंघे चारोमशे शुभे ॥ १० ॥ जानुनी समसुस्निग्धे समावूरू क्रमादुरू ॥ नितंबौ पृथुलौ पीनौ जघनं चिंत्यमेव हि ॥ ११ ॥ नाभिमंडलवन्निम्नः पार्श्वौ ते मेदुरावुभौ ॥ त्रिवलीलक्षितं मध्यं रोमराजिविराजितम् ॥ १२ ॥ स्तनौ पीनौ घनौ स्निग्धावुन्नतौ मग्नचूचुकौ ॥ करौ ते रक्तपद्माभौ पद्मरेखासमन्वितौ ॥ सुसूक्ष्मौ रक्तसत्पर्व निरन्तरसमांगुली ॥ १३ ॥ शुकतुंडसमाकारनखपंक्तिविराजितौ ॥ दीर्घौ च कोमलौ भद्रे भुजौ ते पुष्पदंडवत् ॥ १४ ॥ पृष्ठं ते वेदिवद्भाति विलग्नमृजु मध्यमम् ॥ कंठस्तु रक्तो दीर्घश्च स्कन्धौ चावनतौ शुभे ॥ १५ ॥ मुखं प्रसन्नं सततमकलंकशशिप्रभम् ॥ कपोलौ कनकादर्शसदृशौ कुंडलोज्ज्वलौ ॥ १६ ॥ तिलपुष्पसमाकारा नासिका ते शुभानने ॥ अकलंकाष्टमीचंद्रसदृशोऽतिमनोहरः ॥ १७ ॥ दृश्यतेऽयं ललाटस्ते नीला लकसुशोभितः ॥ मूर्धा ते समवृत्तश्च स्निग्धायतकचान्वितः ॥ १८ ॥ स्मितसंशोभिदशनं बिंबाधरसमन्वितम् ॥ मुखं ते विष्णुयोग्यं स्यादिति मे निश्चिता मतिः ॥१९॥ नाभिस्ते दक्षिणावर्त आवर्त इव गांगजः ॥ त्वं हि क्षीराब्धिसम्भूता लक्ष्मीरिव हि दृश्यसे ॥ २० ॥ ॥ श्रीवराह उवाच ॥ इत्युक्त्वा पूजितस्ताभिर्नारदोऽन्तर्दधे तदा ॥ एतच्छ्रुत्वाऽथ तत्सख्यस्तामूचुः पद्मिनीं सखीम् ॥२१॥ अथ पद्मावत्याः स्वसखीभिः साकं पुष्पाटवी गमनम् ॥ ॥ वनं गच्छाम पुष्पार्थं वसन्तः समुपागतः ॥ कर्णिकाराश्च चूताश्च चंपकाः पारिभद्रकाः ॥२२॥ पलाशाः पाटलाः कुन्दा रक्ताशोकाश्च पुष्पिताः॥ पद्मिन्यः सिन्धुवाराश्च मालत्यो यूथिकालताः॥२३॥ कह्लारकरवीराश्च संघर्षादिव पुष्पिताः ॥ पुष्पावचयनं कुर्मो वनेऽस्मिन्सुमनोहरे ॥२४॥ इत्युक्त्वा ता वनं जग्मुराकाशतनयायुताः ॥ पुष्पाण्याहरमाणास्तु विचरन्त्यस्ततस्ततः ॥ २५ ॥ कंचिद्गजेंद्रं ददृशुः शुभ्रदन्तद्वयोज्ज्वलम् ॥ गण्डभित्तितलोद्भूतमदधाराद्वयोज्ज्वलम्॥२६॥ उन्नतं करिणीयूथैः समुपेतं रजोज्ज्वलम् ॥ फूत्कारिपुष्करप्रोद्यच्छीकरापूरिताननम् ॥ २७ ॥ दृष्ट्वा चोद्विग्नहृदया वनस्पतिमुपाश्रिताः॥एतस्मिन्नंतरे चाशु ददृशुर्हयमुत्तमम्॥२८॥अथ मृगयार्थं पुष्पाटवींप्रति श्रीनिवासागमनम् ॥ अकलंकेन्दुधवलं जाम्बूनदपरिष्कृतम् ॥ स्फुरद्विद्युल्लतायुक्तशरन्मेघमिवोन्नतम् ॥ २९ ॥ तस्मिंस्तु पुरुषं कृष्णं मदनाकारवर्चसम् ॥ पुंडरीकदलाकारकर्णान्तायतलो

१ स्निग्धमेव हि–इ० पा० । २ मेचकौ–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पुरावृत्तं वरानने ॥ शृणु पुण्यं महादेवि सभविष्यं सहोत्तरम् ॥ १ ॥ वैवस्वतेऽन्तरे देवि पूर्वे कृतयुगेऽतरे ॥ वायोस्तपो महद्दृष्ट्वा श्रीभूमिसहितो ऽनघे ॥ आगच्छच्छ्रीनिवासश्च स्वामिपुष्करिणीतटे ॥ २ ॥ दक्षिणेऽस्मिन्पुण्यतम आनन्दाख्यविमानके ॥ वसिष्यति च श्रीकांतो वायोः प्रियकरो हरिः ॥ ३ ॥ तदारभ्य हृषीकेशः सेनान्याराधितोऽनिशम् ॥ आकल्पांतमदृश्योऽस्मिन्विमानेऽसौ वसिष्यति ॥ ४ ॥ ॥ धरण्युवाच ॥ ॥ अदृश्यो भगवान्मर्त्यैः कथ दृश्यो भविष्यति ॥ ५ ॥ श्रीनिवासोऽपि देवेशो भवदक्षिणपार्श्वगः ॥ एतद्वद सुराधीश जनैराराध्यते कथम् ॥ ६ ॥ ॥ ॥ श्रीवराह उवाच ॥ ॥ अगस्त्योऽस्मिन्समासाद्य दृष्ट्वा देवं सनातनम् ॥ आराध्य द्वादशाब्दं तं प्रीणयित्वा पुनःपुनः ॥ ७ ॥ ययाचे तत्र सान्निध्यं भवान्दृश्यो भवत्विति ॥ एवमुक्तो हृषीकेशः श्रीभूमिसहितो धरे ॥ ८ ॥ ॥ श्रीभगवानुवाच ॥ ॥ अहं दृश्यो भविष्यामि त्वत्कृते सर्वदेहिनाम् ॥ एतद्विमानं देवर्षे न दृश्यं स्यात्कदाचन ॥ ९ ॥ आकल्पान्तं मुनीन्द्रास्मिन्दृश्योऽहं नात्र संशयः ॥ मुनिस्तद्वचनं श्रुत्वा प्रीतः प्रायात्स्वमाश्रमम् ॥ १० ॥ ततश्चतुर्भुजो देवः स दृश्योऽभून्नरादिभिः ॥ विमाने मुनिचिन्त्येऽस्मिन्नासिता च तथोत्तरम् ॥ ११ ॥ आराध्यमानः स्कंदेन वायुना सेवितः सदा ॥ एवं गते महाकाले चतुर्युगसमन्विते ॥ १२ ॥ अथ मित्रवर्मण ॥ आकाशराजाख्यसुतोत्पत्तिवर्णनम् ॥ अष्टाविंशे तु संजाते द्वापरान्ते वसुन्धरे ॥ युद्धे च भारतेऽतीते तिष्ये सति युगे तथा ॥ १३ ॥ विक्रमार्कादयो भूपाः शकाः शूद्रादयस्तथा ॥ गमिष्यंति स्वर्गलोकं मामज्ञात्वा वरानने ॥ १४ ॥ ततः सोमकुलोद्भूतो मित्रवर्मा महारथः ॥ तुण्डीरमण्डले राजा नारायणपुरे वसन् ॥ १५ ॥ भविष्यति वरारोहे महाभाग्योदयो महान् ॥ तस्मिञ्छासति भूलोकं धर्मेण पृथिवीपतौ ॥ १६ ॥ अकृष्टपच्या पृथिवी सर्वसस्यविभूषणा ॥ निरीतिकोऽभवत्सर्वो जनो धर्मसमन्वितः ॥ १७ ॥ तस्य पत्नी समभवत्पांड्यकन्या मनोरमा ॥ तस्य जज्ञे कुलोत्तंसो वियन्नामा सुतोऽस्य वै ॥ १८ ॥ तस्य पत्नी तु धरणी नाम्नासीच्छकवंशजा ॥ तस्मिन्राज्यं विनिक्षिप्य मित्रवर्मा नृपोत्तमः ॥ १९ ॥ ययौ तपोवनं पुण्यं वेंकटाद्रेः समीपतः ॥ २० ॥ ॥ अथ धरणीतलात्पद्मावत्युत्पत्तिक्रमः ॥ ॥ आकाशनामा तु महान्राजाभूत्सार्वभौमकः ॥ एकदारव्रतो राजा धरणीसक्तचेतनः ॥ २१ ॥ यज्ञार्थं शोधयामास भुवमारणितीरतः ॥ कांचनेन हलेनैव कृष्यमाणे धरातले ॥ २२ ॥ बीजमुष्टिं विकिरता दृष्टा कन्या धरोद्गता ॥ पद्मशय्यागता रम्या सर्वलक्षणलक्षिता ॥ २३ ॥ तप्तजांबूनदमयी

१ पश्चिमे–इ० पा० । २ श्रियः–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्तया भूम्या प्राह प्रीतिस्मिताननः ॥ ७ ॥ ॥ श्रीवराह उवाच ॥ ॥ शृणु देवि परं गुह्यं सद्यः संपत्तिकारकम् ॥ भूमिदं पुत्रदं गोप्यमप्रकाश्यं कदाचन ॥ ८ ॥ किं च शुश्रूषवे वाच्यं भक्ताय नियतात्मने ॥ ९ ॥ ॐ नमः श्रीवराहाय धरण्युद्धरणाय च ॥ वह्निजायासमायुक्तः सदा जप्यो मुमुक्षुभिः ॥ १० ॥ अयं मंत्रो धरादेवि सर्वसिद्धिप्रदायकः ॥ ऋषिः संकर्षणः प्रोक्तो देवता त्वहमेव हि ॥ ११ ॥ छन्दः पंक्तिः समाख्याता श्रींबीजं समुदाहृतम् ॥ चतुर्लक्षं जपेन्मंत्रं सद्गुरोर्लब्धतन्मनुः ॥ १२ ॥ जुहुयात्पायसान्नं वै क्षौद्रसर्पिःसमन्वितम् ॥ अथ ध्यानं प्रवक्ष्यामि मनःशुद्धिप्रदायकम् ॥ १३ ॥ शुद्धस्फटिकशैलाभं रक्तपद्मदलेक्षणम् ॥ वराहवदनं सौम्यं चतुर्बाहुं किरीटिनम् ॥ १४ ॥ श्रीवत्सवक्षसं चक्रशंखाभयकरांबुजम् ॥ वामोरुस्थितया युक्तं त्वया मां सागरांबरे ॥ १५ ॥ रक्तपीतांबरधरं रक्ता[1]भरणभूषितम् ॥ श्रीकूर्मपृष्ठमध्यस्थशेषमूर्त्यब्जसंस्थितम् ॥ १६ ॥ एवं ध्यात्वा जपेन्मंत्रं सदा चाष्टोत्तरं शतम् ॥ सर्वान्कामानवाप्नोति मोक्षं चान्ते व्रजेद्ध्रुवम् ॥ १७ ॥ प्रोक्तं मया ते धरणि यत्पृष्टोऽहं त्वयाऽमले ॥ अतः किं ते व्यवसितं ब्रूहि तद्वि[2]मलानने ॥ १८ ॥ ॥ ॥ अथ श्रीवराहमंत्रेण धर्मादीनां स्वाभीष्टसिद्धिवर्णनम् ॥ ॥ श्रीसूत उवाच ॥ ॥ एतच्छ्रुत्वा ततो भूमिः पप्रच्छ पुनरेव तम् ॥ केनैवानुष्ठितं देव पुरा प्राप्तं फलं च किम् ॥ १९ ॥ इति पृष्टः पुनर्देवः श्रीवराहोऽब्रवीदिदम् ॥ पुरा कृतयुगे देवि धर्मोनाम मनुर्महान् ॥ २० ॥ ब्रह्मणोऽमुं मनुं लब्ध्वा जप्त्वास्मिन्धरणीधरे ॥ मां च दृष्ट्वा वरं लब्ध्वा प्राप्तोऽभून्मामकं पदम् ॥ २१ ॥ इंद्रो दुर्वाससः शापात्पुरा भ्रष्टस्त्रिविष्टपात् ॥ अनेनेष्ट्वाऽत्र मां देवि पुनः प्राप्तस्त्रिविष्टपम् ॥ २२ ॥ अन्येऽपि मुनयो भूमे जप्त्वा प्राप्ताः परां गतिम् ॥ अनंतः पन्नगाधीशो ह्यमुं लब्ध्वाथ कश्यपात् ॥ २३ ॥ श्वेतद्वीपे जपित्वैव बभूव धरणीधरः ॥ तस्माज्जप्यः सदा चेह मनुष्यैश्च धरार्थिभिः ॥ २४ ॥ ॥ श्रीसूत उवाच ॥ ॥ एतच्छ्रुत्वाथ सुप्रीता पुनः प्राह धराधरम् ॥ २५ ॥ ॥ धरण्युवाच ॥ ॥ वेंकटाख्ये महाशैले श्रीनिवासो जगत्पतिः ॥ कदा ह्यायाति देवेशः श्रीभूमिसहितोऽमलः ॥ २६ ॥ कथं कल्पान्तरस्थायी भविष्यति जनार्दनः ॥ एतद्ब्रूहि वराहात्मन्महत्कौतूहलं मम ॥ २७ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे श्रीवेंकटाचलमाहात्म्ये धरणीवराहसंवादे श्रीवराहमंत्राराधनविध्यादिवर्णनंनाम द्वितीयोऽध्यायः ॥ २ ॥ ॥ छ ॥ ॥ अथ अगस्त्यप्रार्थनया भगवतः सर्वजनदृग्गोचरत्ववर्णनम् ॥ ॥ श्रीवराह उवाच ॥ ॥ हन्त ते कथयिष्यामि ॥ ४ ॥

१ रत्नाभरणभूषितम्-इ० पा० । २ तद्वि वरानने-इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नमः ॥ आनंदविग्रहाऽनन्त कालकाल नमोनमः ॥ ९२ ॥ इति स्तुत्वाऽचला देवी ववन्दे पादयोर्विभुम् ॥ वन्दमानां समुद्वीक्ष्य देवः फुल्लवि
लोचनः ॥ ९३ ॥ उद्धृत्य धरणीं देवीमालिलिंगेऽथ बाहुभिः ॥ आघ्राय धरणीवक्त्रं वामांके सन्निवेश्य च ॥ ९४ ॥ अथ वराहस्य भगवतो
धरण्या साकं शेषाचलागमनम् ॥ ॥ आरुह्य गरुडेशानं जगाम वृषभाचलम् ॥ मुनींद्रैर्नारदाद्यैश्च स्तूयमानो महीपतिः ॥ ९५ ॥
स्वामिपुष्करिणीतीरे पश्चिमे लोकपूजिते ॥ आस्ते वराहवदनो मुनीन्द्रैस्तत्र पूजितः ॥ वैखानसैर्महाभागैर्ब्रह्मतुल्यैर्महात्मभिः ॥ ९६ ॥
॥ अथ वेंकटाचलमाहात्म्यश्रवणावसरः ॥ ॥ व्यास उवाच ॥ ॥ तं दृष्ट्वा नारदः सूत मुनीनामुक्तवान्पुरा ॥ तदेतदहमश्रौषं तत्र वै मुनिसं
सदि ॥ ९७ ॥ यत्पृष्टोऽहं त्वया सूत माहात्म्यं धरणीभृताम् ॥ मया तूक्तं यथावद्धि नारदाच्च पुरा श्रुतम् ॥ ९८ ॥ ॥ अथाध्यायफलश्रुतिः ॥ ॥
य इदं धर्मसंवादमावयोः सूत पावनम् ॥ पठेद्वा देवपुरतो ब्राह्मणानां पुरस्तथा ॥ ९९ ॥ सर्वेषामपि वर्णानां शृण्वतां भक्तिपूर्वकम् ॥ स प्रतिष्ठा
मवाप्नोति पुत्रपौत्रैः समन्वितः ॥ १०० ॥ शृण्वतामपि सर्वेषां यदिष्टं तद्भविष्यति ॥ १०१ ॥ ॥ सूत उवाच ॥ ॥ इति मे भगवान्व्यासः प्रोवाच
मुनिसेवितः ॥ यथाश्रुतं मया पूर्वं कृष्णद्वैपायनाद्गुरोः ॥ १०२ ॥ तत्तथा सर्वमेवात्र मयाप्युक्तं मुनीश्वराः ॥ श्रुत्वा सूतवचस्त्वित्थं ते प्रीतमनसो
ऽभवन् ॥ १०३ ॥ ॥ ऋषय ऊचुः ॥ ॥ सूत त्वयोक्तं भुवि पर्वतेषु पुण्येषु पुण्यस्य महीधरस्य ॥ माहात्म्यमस्माकमहीन्द्रनाम्नः पापापहं
मोक्षफलप्रदायकम् ॥ १०४ ॥ ततो वृषाद्रिं संप्राप्य वराहो धरणीयुतः ॥ किमुक्तवान्धरण्यै स तन्नो ब्रूहि महामते ॥ १०५ ॥ ॥
इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे श्रीवेंकटाचलमाहात्म्ये धरणीवराहसंवादे नारदस्य सुमेरुशिखरस्थ
यज्ञवराहदर्शनप्राप्त्यादिवर्णनंनाम प्रथमोऽध्यायः ॥ १ ॥ ॥ छ ॥ ॥ अथ श्रीवराहमंत्राराधनविधिः ॥ ॥ श्रीसूत उवाच ॥ ॥ शृणुध्वं
मुनयः सर्वे कथां पुण्यां पुरातनीम् ॥ वैवस्वतेंऽतरे पूर्वं कृते पुण्यतमे युगे ॥ १ ॥ नारायणाद्रौ देवेशं निवसन्तं क्षमापतिम् ॥ वराहरूपिणं देवं
धरणी सखिभिर्वृता ॥ २ ॥ प्रणम्य परिपप्रच्छ रक्तपद्मायतेक्षणम् ॥ ३ ॥ ॥ धरण्युवाच ॥ ॥ आराध्यः केन मंत्रेण भवान्प्रीतो भवि
ष्यति ॥ तं मे वद त्वं देवेश यः प्रियो भवतः सदा ॥ ४ ॥ जपतां सर्वसंपत्तिकारकं पुत्रपौत्रदम् ॥ सार्वभौमत्वदं चैव कामिनां कामदं सदा ॥
॥ ५ ॥ अन्ते यस्त्वत्पदप्राप्तिं ददाति नियमात्मनाम् ॥ एवंभूतं वद प्रीत्या मयि वाराह मानद ॥ ६ ॥ ॥ श्रीसूत उवाच ॥ ॥ इति पृष्ट

१ स्तुत्वा च सा–इ० पा० । २ प्रीत्युत्फुल्लविलोचनः–इ० पा० । ३ इत्युक्त्वा भगवान्व्यासस्तत्रास्ते मुनिसेवितः–इ० पा० । ४ मुनिवराः सर्वे–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ आकाशगंगामाहात्म्यम् ॥ अग्निर्वाहस्थिते भानौ चित्रानक्षत्रसंयुते ॥ पूर्णिमाख्ये तिथौ पुण्ये प्रातःकाले तथैव च ॥ आकाशगंगासरिति स्नातो मोक्षमवाप्नुयात् ॥ ७१ ॥ ॥ अथ पाण्डवतीर्थमाहात्म्यम् ॥ ॥ वृषभस्थे रवौ राधे द्वादश्यां रविवासरे ॥ शुक्ले वाप्यऽथ वा कृष्णे पक्षे भौमसमन्विते ॥ ७२ ॥ शुक्ले वाप्यथवा कृष्णे भानुवारेण संयुते ॥ पुष्यनक्षत्रसंयुक्त हस्तर्क्षेण युतेऽपि वा ॥ ७३ ॥ तीर्थे पांडवनाम्न्यत्र संगवे स्नाति यो नरः ॥ नेह दुःखमवाप्नोति परत्र सुखमश्नुते ॥ ७४ ॥ अथ पापनाशनतीर्थमाहात्म्यम् ॥ शुक्ले पक्षेऽथ वा कृष्णे यार्कवारेण सप्तमी ॥ पुष्यनक्षत्रसंयुक्ता हस्तर्क्षेण युतापि वा ॥ ७५ ॥ तस्यां तिथौ महाभागे पापनाशनसंज्ञके ॥ तीर्थे यः स्नाति नियमाद्भूधरेन्द्रस्य मस्तके ॥ ७६ ॥ कोटिजन्मार्जितैः पापैर्मुच्यते स नरोत्तमः ॥ ७७ ॥ ॥ अथ देवतीर्थमाहात्म्यम् ॥ ॥ शृणु देवि परं गुह्यमनन्ताख्ये महागिरौ ॥ मद्दिव्यालयवायव्ये शिखरे गिरिगह्वरे ॥ देवतीर्थमिति ख्यातं तटाकमतिशोभनम् ॥ ७८ ॥ तस्मिन्पुण्यतमे देवि स्नानकालं वदामि ते ॥ ७९ ॥ गुरुपुष्ये व्यतीपाते सोमश्रवणके तथा ॥ दिनेष्वेतेषु यः स्नाति तस्य पुण्यफलं शृणु ॥ ८० ॥ यानि कानीह पापानि ज्ञानाज्ञानकृतानि च ॥ तानि सर्वाणि नश्यंति देवतीर्थेऽतिपावने ॥ ८१ ॥ पुण्यान्यपि च वर्धंते देवतीर्थनिमज्जनात् ॥ दीर्घमायुरवाप्नोति पुत्रपौत्रसमन्वितः ॥ अन्ते स्वर्गं समासाद्य चन्द्रलोके महीयते ॥ ८२ ॥ तद्दिनेष्वन्नदो देवि यावज्जीवान्नदो भवेत् ॥ अतिगुह्यतमं देवि प्रोक्तं तुभ्यं वसुन्धरे ॥ ॥ ८३ ॥ ॥ व्यास उवाच ॥ ॥ श्रुत्वाथ पृथिवी देवी प्रीतिप्रवणमानसा ॥ इष्टाभिर्वाग्भिरतुलं तुष्टाव धरणीधरम् ॥ ८४ ॥ ॥ अथ धरणीकृत वराहस्तुतिः ॥ ॥ धरण्युवाच ॥ ॥ नमस्ते देवदेवेश वराहवदनाच्युत ॥ क्षीरसागरसंकाश वज्रशृंग महाभुज ॥ ८५ ॥ उद्धृतास्मि त्वया देव कल्पादौ सागरांभसः ॥ सहस्रबाहुना विष्णो धारयामि जगन्त्यहम् ॥ ८६ ॥ अनेकदिव्याभरणयज्ञसूत्रविराजित ॥ अरुणारुणांबरधर दिव्यरत्नविभूषित ॥ ८७ ॥ उद्यद्भानुप्रतीकाशपादपद्म नमोनमः ॥ बालचंद्राभदंष्ट्राग्रमहाबलपराक्रम ॥ ८८ ॥ दिव्यचन्दनलिप्तांग तप्तकांचनकुण्डल ॥ इन्द्रनीलमणिद्योतिहेमांगदविभूषित ॥ ८९ ॥ वज्रदंष्ट्राग्रनिर्भिन्नहिरण्याक्ष महाबल ॥ पुण्डरीकाभिरामाक्ष सामस्वनमनोहर ॥ ९० ॥ श्रुतिसीमन्तभूषात्मन्सर्वात्मंश्चारुविक्रम ॥ चतुराननशंभुभ्यां वन्दिताऽऽयतलोचन ॥ ९१ ॥ सर्वविद्यामयाकार शब्दातीत नमो

१ मेषस्थे-इत्यर्थः । २ प्रेतः स्वर्गमवाप्नोति इन्द्रलोके महीयते-इ०पा० । ३ पूर्णेन्दुवदनाच्युत-इ०पा० । ४ यक्षकर्दमलिप्ताङ्ग-इ०पा० । ५ पुण्डरीकाभिताम्राक्ष-इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एतैरधिष्ठितास्तत्र सरितः पुण्यदर्शनाः ॥ सरांसि विविधान्यत्र संति दिव्यानि माधवि ॥ ४९ ॥ ॥ अथ स्वामिपुष्करिण्याः सर्वतीर्थातिशायित्वव
र्णनम् ॥ ॥ तीर्थानां चैव सर्वेषां शृणुष्व प्रवराणि वै ॥५०॥ चक्रतीर्थं देवतीर्थं वियद्गंगा तथैव च ॥ कुमारधारिकातीर्थं पापनाशनमेव च ॥ पाण्डवं
नाम तीर्थं च स्वामिपुष्करिणी तथा ॥ ५१ ॥ सप्तैतानि वराण्याहुर्नारायणगिरौ शुभे ॥ एतेषु प्रवरा देवि स्वामिपुष्करिणी शुभा ॥ ५२ ॥ अस्या
स्तु पश्चिमे तीरे निवसामि त्वया सह ॥ आस्तेऽस्या दक्षिणे तीरे श्रीनिवासो जगत्पतिः ॥ ५३ ॥ गंगाद्यैः सकलैस्तीर्थैः समा सा सागराम्बरे ॥
त्रैलोक्ये यानि तीर्थानि सरांसि सरितस्तथा ॥ तेषां स्वामित्वमापन्नं धरे स्वामिसरोवरे ॥ ५४ ॥ स्वामिपुष्करिणीं पुण्यां सेवितुं दिव्यभूधरे ॥
वसन्ति सर्वतीर्थानि तेषां संख्यां वदामि ते ॥ ५५ ॥ षट्षष्टिकोटितीर्थानि पुण्येऽस्मिन्भूधरोत्तमे ॥ तेषु चात्यंतमुख्यानि षट् तीर्थानि वसुन्धरे
॥ ५६ ॥ पञ्चानां तीर्थराजानां तुम्बो गर्भसमो महान् ॥ गर्भवासभयध्वंसी स्नातानां भूधरोत्तमे ॥ ५७ ॥ ॥ धरण्युवाच ॥ ॥ षट् तीर्थानि
महाबाहो त्वयोक्तानि महीधरे ॥ माहात्म्यं वद तेषां मे यथाकालं यथाविधि ॥ फलानि तेषु स्नातानां नराणां वद भूधर ॥ ५८ ॥
॥ ॥ श्रीवराह उवाच ॥ ॥ नारायणाद्रिमाहात्म्यं वदामि शृणु माधवि ॥ ५९ ॥ देवाश्च ऋषयश्चैव योगिनः सनकादयः ॥ कृतेऽजनाद्रिं त्रेतायां
नारायणगिरिं तथा ॥ ६० ॥ द्वापरे सिंहशैलं च कलौ श्रीवेङ्कटाचलम् ॥ प्रवदन्तीह विद्वांसः परमात्मालयं गिरिम् ॥ ६१ ॥ योजनानां सहस्रा
न्ते द्वीपांतरगतोऽपि वा ॥ यो नमेद्भूधरेन्द्रं तद्दिशमुद्दिश्य भक्तितः ॥ सर्वपापविनिर्मुक्तो विष्णुलोकं स गच्छति ॥ ६२ ॥ तस्मिन्षट्तीर्थमाहात्म्यं
यथाकालं वदामि ते ॥ ६३ ॥ ॥ अथ कुमारधारामाहात्म्यम् ॥ ॥ शृणुष्वावहिता भद्रे सर्वपापप्रणाशनम् ॥ कुंभसंस्थे रवौ माघे पौर्णमास्यां महा
तिथौ ॥ ६४ ॥ मघानक्षत्रयुक्तायां भूधरेन्द्रे वसुन्धरे ॥ कुमारधारिकानाम सरसी लोकपावनी ॥ ६५ ॥ यत्रास्ते पार्वतीसूनुः कार्तिके
योऽग्निसंभवः ॥ देवसेनासमायुक्तः श्रीनिवासार्चकोऽमले ॥ ६६ ॥ तस्यां यः स्नाति मध्याह्ने तस्य पुण्यफलं शृणु ॥ गंगादिसर्वती
र्थेषु यः स्नाति नियमाद्धरे ॥ द्वादशाब्दं जगद्धात्रि तत्फलं समवाप्नुयात् ॥ ६७ ॥ योऽन्नं ददाति तत्तीर्थे शक्त्या दक्षिणयान्वितम् ॥
स तावत्फलमाप्नोति स्नाने तूक्तं फलं यथा ॥ ६८ ॥ ॥ अथ तुंबतीर्थमाहात्म्यम् ॥ ॥ मीनसंस्थे सवितरि पौर्णमासीतिथौ धरे ॥ उत्तरा
फाल्गुनीयुक्ते चतुर्थे काल उत्तमे ॥ ६९ ॥ पंचानामपि तीर्थानां तुंबेऽथ गिरिगह्वरे ॥ यः स्नाति मनुजो देवि पुनर्गर्भे न जायते ॥ ७० ॥

१ दिव्याम्–इ० पा० । २ तुम्भः–इ० पा० । ३ तिष्ये–इ० पा० । ४ समस्ततीर्थमाहात्म्यम्–इ० पा० । ५ शुभे–इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भृग्वादिभिरनेकैश्च सेव्यमानमहर्निशम् ॥ २४ ॥ इन्द्रादिलोकपालैश्च गन्धर्वाप्सरसां गणैः ॥ सेवितं देवदेवेशं प्रणिपत्याभिगम्य च ॥ २५ ॥
दिव्यैरुपनिषद्भागैरभिष्टूय धराधरम् ॥ नारदः परमप्रीतः स्थितो देवस्य सन्निधौ ॥ २६ ॥ ॥ अथ वराहसन्निधिं प्रति धरण्यागमनम् ॥ ॥ एतस्मि
न्नंतरेचाभूद्दिव्यदुन्दुभिनिःस्वनः ॥ २७ ॥ ततस्समागता देवी धरणी सखिसंयुता ॥ सरत्नसागराकारदिव्यांबरसमुज्ज्वला ॥ २८ ॥ सुमेरुमन्दरा
कारस्तनभारावनामिता ॥ नवदूर्वादलश्यामा सर्वाभरणभूषिता ॥ २९ ॥ इलया वै पिंगलया सखीभ्यां च समन्विता ॥ ततस्ताभ्यां समानीतं
पुष्पाणां निचयं मही ॥ ३० ॥ श्रीमद्वराहदेवस्य पादमूले विकीर्य च ॥ प्रणम्य देवदेवेशं कृताञ्जलिपुटा स्थिता ॥ ३१ ॥ तां देवीं श्रीवराहोऽपि
ह्यालिंग्यांके निधाय च ॥ ३२ ॥ ॥ अथ धरणिवराहसंवादः ॥ ॥ पप्रच्छ कुशलं पृथ्वीं प्रीतिप्रवणमानसः ॥ ३३ ॥ ॥ श्रीवराह
उवाच ॥ ॥ त्वां निवेश्य महीदेवि शेषशीर्षे सुखावहे ॥ लोकं त्वयि निवेश्यैव त्वत्सहायान्धराधरान् ॥ इहागतोऽस्म्यहं देवि किमर्थं त्वमिहा
गता ॥ ३४ ॥ ॥ पृथिव्युवाच ॥ ॥ मां समुद्धृत्य पातालात्सहस्रफणशोभिते ॥ रत्नपीठ इवोत्तुंगे सरत्नेऽनन्तमूर्धनि ॥ कृत्वा मां सुस्थिरां
देव भूधरान्संनिवेश्य च ॥ ३५ ॥ मद्धारणक्षमान्पुण्यांस्त्वन्मयान्पुरुषोत्तम ॥ तेषु मुख्यान्महाबाहो मदाधारान्वदस्व मे ॥ ३६ ॥ ॥ अथ शेषा
चलस्यसर्वपर्वतातिशायित्ववर्णनम् ॥ ॥ श्रीवराह उवाच ॥ ॥ सुमेरुर्हिमवान्विंध्यो मन्दरो गंधमादनः ॥ सालग्रामश्चित्रकूटो माल्यवान्पारि
यात्रकः ॥ ३७ ॥ महेंद्रो मलयः सह्यः सिंहाद्रिरपि रैवतः ॥ मेरुपुत्रोऽञ्जनो नाम शैलः स्वर्णमयो महान् ॥ ३८ ॥ एते शैलवराः सर्वे त्वदाधारा
वसुन्धरे ॥ ये मया देवसंघैश्च ऋषिसंघैश्च सेविताः ॥३९॥ एतेषु प्रवरान्वक्ष्ये तत्त्वतः शृणु माधवि ॥ सालग्रामश्च सिंहाद्रिश्शैलेंद्रो गन्धमादनः॥
॥४०॥ एते शैलवरा देवि दिशं हैमवतीं श्रिताः ॥ दक्षिणस्यां प्रतीतांस्तु वक्ष्ये शैलान्वसुन्धरे ॥४१॥ अरुणाद्रिर्हस्तिशैलो गृध्राद्रिर्घटिकाचलः ॥
एते शैलवराः सर्वे क्षीरनद्यास्समीपगाः ॥ ४२ ॥ हस्तिशैलादुत्तरतः पंचयोजनमात्रतः ॥ सुवर्णमुखरीनाम नदीनां प्रवरा नदी ॥ ४३ ॥ तस्या एवो
त्तरे तीरे कमलाख्यं सरोवरम् ॥ तत्तीरे भगवानास्ते शुकस्य वरदो हरिः॥४४॥ बलभद्रेण संयुक्तः कृष्णो भक्तार्तिनाशनः॥ वैखानसैर्मुनिगणैर्नित्य
माराधितोऽमलैः ॥४५॥ कमलाख्यस्य सरस उत्तरे काननोत्तमे ॥ क्रोशद्वयार्धमात्रे तु हरिचंदनशोभिते ॥ श्रीवेंकटाचलोनाम वासुदेवालयो महान्
॥४६॥ सप्तयोजनविस्तीर्णः शैलेन्द्रो योजनोच्छ्रितः ॥ अस्ति स्वर्णमयो देवि रत्नसानुभृदायतः ॥४७॥ इन्द्राद्या दैवतगणा वसिष्ठाद्या मुनीश्वराः॥
सिद्धाः साध्याश्च मरुतो दानवा दैत्यराक्षसाः ॥ रम्भाद्या अप्सरःसंघा वसन्ति नियतं धरे ॥ ४८ ॥ तपश्चरंति नागाश्च गरुडाः किन्नरास्तथा ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ श्रीगणेशाय नमः॥ अथ द्वितीयवैष्णवखण्डं प्रारभ्यते ॥ तत्रादौ वेंकटाचलमाहात्म्यम् ॥ अथ नारदस्य सुमेरुशिखरस्थयज्ञवराहदर्शनम् ॥ व्यास उवाच ॥ पावनेनैमिषारण्ये शौनकाद्या महर्षयः॥ चक्रिरे लोकरक्षार्थं सत्रं द्वादशवार्षिकम् ॥ १ ॥ तानभ्यगच्छत्कथको व्यासशिष्यो महामतिः॥ मुनिरुग्रश्रवानाम रोमहर्षणसंभवः ॥ २ ॥ सम्यगभ्यर्चितस्तेषां सूतः पौराणिकोत्तमः ॥ कथयामास तद्दिव्यं पुराणं स्कान्दनामकम् ॥ ३ ॥ सृष्टिसंहारवंशानां वंशानुचरितस्य च ॥ कथां मन्वन्तराणां च विस्तरात्स न्यवेदयत् ॥ ४ ॥ कथास्तीर्थप्रभावाणां श्रुत्वा ते मुनिपुंगवाः॥ ऊचिरे वशिनं सूतं कथाश्रवणकाङ्क्षया ॥ ५ ॥ ॥ ऋषय ऊचुः ॥ ॥ रोमहर्षण सर्वज्ञ पुराणार्थविशारद ॥ माहात्म्यं श्रोतुमिच्छामो गिरीन्द्राणां महीतले ॥ ब्रूहि त्वं नो महाभाग के प्रधाना महीधराः ॥ ६ ॥ ॥ श्रीसूत उवाच ॥ ॥ एतमेव पुरा प्रश्नमपृच्छं जाह्नवीतटे ॥ व्यासं मुनिवरश्रेष्ठं सोऽब्रवीन्मे गुरूत्तमः ॥ ७ ॥ ॥ व्यास उवाच ॥ ॥ पुरा देवयुगे सूत नारदो मुनिसत्तमः[1] ॥ सुमेरुशिखरं गत्वा नानारत्नसुशोभितम् ॥८ ॥ तन्मध्ये विपुलं दीप्तं ब्रह्मणो दिव्यमालयम् ॥ दृष्ट्वा तस्योत्तरे देशे पिप्पलद्रुममुत्तमम् ॥ ९ ॥ सहस्रयोजनोच्छ्रायं विस्तीर्णं द्विगुणं तथा ॥ तन्मूले मण्डपं दिव्यं नानारत्नसमन्वितम् ॥ १० ॥ पद्मरागमणिस्तम्भैः सहस्रैः समलंकृतम् ॥ वैडूर्यमुक्तामणिभिः कृतस्वस्तिकमालिकम् ॥ ११ ॥ नवरत्नसमाकीर्णं दिव्यतोरणशोभितम् ॥ मृगपक्षिभिराकीर्णं नवरत्नमयैः शुभैः ॥ १२ ॥ पुष्परागमहाद्वारं सप्तभूमिकगोपुरम् ॥ संदीप्तवज्रसुकृतकवाटद्वयशोभितम् ॥ १३ ॥ प्रविश्यासौ ददर्शान्तर्दिव्यमौक्तिकमण्डपम् ॥ वैडूर्यवेदिकं तुंगमारुरोह महामुनिः ॥ १४ ॥ तन्मध्ये तुंगमतुलं वसुपादविराजितम् ॥ ददर्श[2] मुक्तासंकीर्णं सिंहासनं महाद्युति ॥ १५ ॥ तन्मध्ये पुष्करं दिव्यं सहस्रदलशोभितम्[3] ॥ श्वेतं चन्द्रसहस्राभं कर्णिकाकेसरोज्ज्वलम् ॥ १६ ॥ तस्य मध्ये समासीनं पूर्णचन्द्रायुतप्रभम् ॥ कैलासपर्वताकारं सुन्दरं पुरुषाकृतिम् ॥ १७ ॥ चतुर्बाहुमुदारांगं वराहवदनं शुभम् ॥ शंखचक्राभयवरान्बिभ्राणं पुरुषोत्तमम् ॥ १८ ॥ पीताम्बरधरं देवं पुंडरीकायतेक्षणम् ॥ पूर्णेंदुसौम्यवदनं धूपगंधिमुखांबुजम्[4] ॥ १९ ॥ सामध्वनिं यज्ञमूर्तिं स्रुक्तुण्डं स्रुवनासिकम् ॥ क्षीरसागरसंकाशं किरीटोज्ज्वलिताननम् ॥ २० ॥ श्रीवत्सवक्षसं शुभ्रयज्ञसूत्रविराजितम् ॥ कौस्तुभश्रीसमुद्द्योतं समुन्नतमहोरसम् ॥ २१ ॥ जांबूनदमयैर्दिव्यैः सुरत्नाभरणैर्युतम् ॥ विद्युन्मालापरिक्षिप्तशरन्मेघमिवोज्ज्वलम् ॥ २२ ॥ वामपादतलाक्रांतपादपीठविराजितम् ॥ कटकांगदकेयूरकुण्डलोज्ज्वलितं सदा ॥ २३ ॥ चतुर्मुखवसिष्ठात्रिमार्कण्डेयैर्मुनीश्वरैः ॥

१ मुनिसत्तमः–इ० पा० । २ मुक्तामणिसमाकीर्णं सिंहासनं महोज्ज्वलम्–इ० पा० । ३ सहस्रदलसंयुतम्–इ०पा० । ४ वपागन्धिमुखाम्बुजम्–इति पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ अथ श्रीस्कांदे महापुराणे द्वितीये वैष्णवखंडे वेंकटाचलमाहात्म्यप्रारंभः॥ (२–१)॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ इति श्रीस्कांदे महापुराणे प्रथमो माहेश्वरखण्डः समाप्तः ॥ १ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इति श्रीस्कान्दे महापुराणे प्रथमे माहेश्वरखण्डेऽरुणाचलमाहात्म्ये
उत्तरार्धं समाप्तम् ॥ (३।२) ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इदं पुस्तकं मुम्बय्यां श्रीकृष्णदासात्मजक्षेमराजश्रेष्ठिना
स्वकीये "श्रीवेङ्कटेश्वर" (स्टीम्) मुद्रणालये मुद्रितम्।
संवत् १९६५, शके १८३०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

परं मयि ॥ ३७ ॥ अधुनातिसपर्याभिस्त्वत्कृताभिरहर्निशम् ॥ परितुष्टोस्म्यहं राजन्नतस्त्वां बोधयाम्यहम् ॥ ३८ ॥ खं वायुरनलो वारि भूः सूर्यशशिनौ पुमान् ॥ इति मन्मूर्त्तिभिर्विश्वं भासते सचराचरम् ॥ ३९ ॥ कालो हि कालयाम्यर्थान्सत्त्वानध्वन एव च ॥ तत्त्वातीतः शिवश्चाहं न मत्तोस्तीह किंचन ॥ ४० ॥ अपर्यंतचिदानंदसिंधोर्मे केचिदूर्मयः ॥ वेधोमुकुन्दरुद्रेंद्रमुखानाहुरुदित्वराः ॥ ४१ ॥ वाणीलक्ष्मीक्षमाश्रद्धाप्रज्ञास्वाहास्वधादयः ॥ असंख्येयमहाशक्तेर्मम विसृष्टिशक्तयः ॥ ४२ ॥ इयं मम महाशक्तिर्गौरी माया जगत्प्रसूः ॥ अनयाच्छाद्यते विश्वं शश्वद्विस्तार्यतेऽपि च ॥ ४३ ॥ शक्त्यानयान्वितः सर्गरक्षासंहृतिविभ्रमः ॥ विचित्रमेतत्पश्यामि जगच्चित्रं निजेच्छया ॥४४॥ अपवाहितमोहस्त्वं महिम्ना मे विचारय ॥ आत्मानमविभिन्नं मे तरंगमिव वारिधेः ॥ ४५ ॥ ततो मद्रूपशालिन्या आधिपत्यं क्षितेर्गतः ॥ मत्प्रसादेन राजेंद्र भुंक्ष्व भोगान्यथासुखम् ॥ ४६ ॥ पुनः पुरंदरत्वेन भुक्तदिव्यसुखश्चिरम् ॥ मदेकरूपतां राजन्निश्चयात्त्वमवाप्स्यसि ॥ ४७ ॥ ॥ नंदिकेश्वर उवाच ॥ ॥ इत्युक्त्वांतर्हिते देवे राजा वज्रांगदः कृती ॥ शोणेशं पूजयन्नेव सर्वान्भोगानवाप्तवान् ॥४८॥ इत्थं ते कथितं साधो शिवभक्तविजृंभणम् ॥ प्रदक्षिणाफलं चैव शोणशैलस्य शाश्वतम् ॥ ४९ ॥ किं वाचां विस्तरेणात्र शोणशैलप्रदक्षिणा ॥ महतामश्वमेधानां शतादपि विशिष्यते ॥ ५० ॥ विषुवायनसंक्रांतिव्यतीपातादिपर्वसु ॥ प्रदक्षिणाच्छोणगिरेरसंख्येयं फलं लभेत् ॥ ५१ ॥ न क्षेत्रमरुणादस्ति नास्ति देवोऽरुणेश्वरात् ॥ नापि प्रदक्षिणादन्यद्विद्यतेऽभ्यधिकं तपः ॥ ५२ ॥ इति कथयति नंदिकेश्वरेस्मिन्पुलकितसर्ववपुर्मृकण्डुपुत्रः ॥ मुहुरधिगतहर्षबाष्पवृष्टिर्महति निमग्न इवाभवत्सुधाब्धौ ॥ ५३ ॥ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां प्रथमे माहेश्वरखण्डेऽरुणाचलमाहात्म्य उत्तरार्धे वज्रांगदसद्गतिवर्णनंनाम चतुर्विंशतितमोऽध्यायः ॥ २४ ॥ ॥ छ ॥ ॥ इत्यरुणाचलमाहात्म्य उत्तरार्धः समाप्तः ॥ (३।२)

इत्यरुणाचलमाहात्म्यं संपूर्णम् ॥ (३) ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दर्शनः ॥ १२ ॥ अथागतेनागस्त्येन लोपामुद्रासखेन सः ॥ अभ्यनंद्यत शोणाद्रिनाथपूजापरायणः ॥ १३ ॥ प्रत्यहं नवतीर्थाख्ये सरसि स्नान
माचरन् ॥ पापनाशप्रवालेशौ प्रयतः पर्यपूजयत् ॥ १४ ॥ महिषासुरसंहारकारिणीं मानवेश्वरः ॥ नित्यमाराधयामास दुर्गां दुर्गार्तिहारिणीम् ॥
॥ १५ ॥ प्रतिक्षणं ब्रह्मविष्णुपूज्यस्य लिंगरूपिणः ॥ आदिदेवस्य विविधाः सपर्याः पर्यकल्पयत् ॥ १६ ॥ प्रत्युषस्युत्थितः स्नातः पादाभ्यामेव
पार्थिवः ॥ जपन्पंचाक्षरीमंत्रमकार्षीत्त्रिः प्रदक्षिणाम् ॥ १७ ॥ पौर्णमास्यां स कार्त्तिक्यां पार्वतीवल्लभप्रियम् ॥ महादीपोत्सवं चक्रे महितं भुवन
त्रये ॥ १८ ॥ सुगंधसारकह्लारकर्पूरजलपूरितैः ॥ सहस्रैः स्वर्णकुंभानामभ्यषिंचत्त्रियंत्रकम् ॥ १९ ॥ प्रतिमासध्वजारोहपूर्वं तीर्थोत्सवादिकम् ॥
त्रैलोक्याभ्यर्हितं चक्रे रथारोहं महोत्सवम् ॥ २० ॥ अंगं प्रदक्षिणं चास्य विदधे विशदाशयः ॥ योजनत्रितयायामव्यापिनः शोणभूभृतः ॥ २१ ॥
अरुणाचलनाथेति करुणामृतसागरः ॥ अरुणांबासनाथेति तुष्टाव च मुहुर्मुहुः ॥ २२ ॥ संलिप्य विविधैर्द्रव्यैर्नित्यं पंचामृतादिभिः ॥ आचर्च
यद्गंधसारपंकैः कर्पूरपांडुरैः ॥ २३ ॥ अपूजयत कल्हारैः स्रवन्मृगमदद्रवैः ॥ प्रातरारभ्य शोणाद्रिनायकं गणरूपिणम् ॥ २४ ॥ इति वर्षत्रयं
तस्य वशिनो वरिवस्यया ॥ अरुणाद्रीश्वरस्तुष्टः प्रत्यक्षत्वमगाहत[1] ॥ २५ ॥ नीहाराचलसंकाशमारूढो वृषपुंगवम् ॥ अन्वगासीनया देव्या
कृतगाढोपगूहनः ॥ २६ ॥ ब्रह्मर्षिभिर्वसिष्ठाद्यैर्नारदाद्यैर्महर्षिभिः ॥ गणैर्निकुंभकुंभाद्यैः क्रियमाणजयस्तुतिः ॥ २७ ॥ करुणासिंधुक
ल्लोलैः कमलावासवेश्मभिः ॥ कटाक्षपातैर्जगतां कालुष्यमिव वारयन् ॥ २८ ॥ दृष्ट्वा च देवदेवं तमष्टांगं न्यस्य भूतले ॥ प्रणनाम
परं हृष्टो वज्रांगदमहीपतिः ॥ २९ ॥ व्यज्ञापयच्च भूपालो मौलीकृतशतांजलिः ॥ क्षालयन्निव दंतांशुजालैस्तत्पादपंकजे ॥ ३० ॥
॥ ॥ वज्रांगद उवाच ॥ ॥ देवेश यदहं मोहाद्बहुपातकसंचयम् ॥ अचारिषं स एकोऽयं क्षम्यतां मे व्यतिक्रमः ॥ ३१ ॥ इतिवादिनमत्यंतं
दीनमेव दयानिधिः ॥ जगाद जगतीनाथो देवः शोणाचलेश्वरः ॥ ३२ ॥ ॥ श्रीमहेश्वर उवाच ॥ ॥ मा भैषीर्वत्स भद्रं ते संत्यष्टौ मम
मूर्त्तयः ॥ ताः सर्वाः सर्वजंतूनामत्यर्थं परिकल्पिताः ॥ ३३ ॥ पुरा पुरंदरस्त्वं हि कैलासशिखरे स्थितम् ॥ गर्वितो मामवामंस्थाः स्तंभितश्च तदा
मया ॥ ३४ ॥ क्षणं गलितगर्वस्त्वं स्तंभनाव्रीडितस्तदा ॥ अयाचिष्टाः शिवज्ञानमखिलैश्वर्यकारणम् ॥ ३५ ॥ आदिष्टस्त्वं मया वज्रिन्नवतीर्यावनिं
भवान् ॥ राजा वज्रांगदो भूत्वा लप्स्यसे मत्कृपामिति ॥ ३६ ॥ जातं ततः प्रभावेण क्षेत्रमेतन्मदास्पदम् ॥ शिक्षितोतीव मुग्धस्त्वं भक्तोसि च

१ प्रत्यक्षत्वमगाहत—इति पूर्वेण संबंधः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संबंधादस्मात्तिर्यक्त्वबंधनात् ॥ मुक्तावावां स्वकं धाम प्राप्तौ स्वस्त्यस्तु ते सदा ॥ ५ ॥ इत्युदीर्य निजं धाम यियासंतं कलाधरम् ॥ कांतिशालिनं च राजा जगाद रचितांजलिः ॥ ६ ॥ एवं युवां शोणशैलशंकरस्य प्रभावतः ॥ शापार्णवं समुत्तीर्णौ कथं मे पुनरुच्छ्रयः ॥७॥ भ्राम्यतीव मम स्वांतमाधाय तदवेक्षणम् ॥ निर्यांतीव मम प्राणास्तत्र दैवं बलोत्तरम् ॥ ८ ॥ ॥ कलाधरकांतिशालिनावूचतुः ॥ ॥ अवधारय निस्तारं कथयाव तवास्पदम् ॥ समाहितेन मनसा निर्धूतनिखिलाधिना ॥ ९ ॥ जगत्सर्गस्थितिध्वंसविधानानुग्रहेश्वरे ॥ अरुणाद्रीश्वरे चित्तं निधेहि करुणानिधौ ॥१०॥ प्रत्यक्षितं त्वयेदानीमस्य देवस्य वैभवम् ॥ तिरश्चोरावयोरेतदीदृशत्वं वितन्वतः ॥ ११ ॥ कुरु प्रदक्षिणां पादचारी मृगमदाद्दतैः ॥ कल्हारैः पूजयेशानं देवं मृगमदप्रियम् ॥ १२ ॥ यावती तव संपत्तिस्तावतीमखिलां विभो ॥ प्राकारगोपुरागारनवीकाराय कल्पय ॥ १३ ॥ अचिरादेव सिद्धिस्ते भविष्यति गरीयसी ॥ मनुमांधातृनाभागभगीरथवदाधिका ॥ १४ ॥ ॥ नंदिकेश्वर उवाच ॥ ॥ इत्थं निशम्य च तयोर्निजमेव धाम विद्याभृतोः सपदि संश्रुतयोर्नरेन्द्रः ॥ निःसंशयेन मनसा निरतस्तदानीं भक्तिं बबंध भगवत्यरुणाद्रिनाथे ॥१५॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां प्रथमे माहेश्वरखण्डेऽरुणाचलमाहात्म्य उत्तरार्धे कलाधरकांतिशालिवृत्तांतवर्णनंनाम त्रयोविंशतितमोऽध्यायः ॥२३॥ ॥छ॥ मार्कंडेय उवाच ॥ ॥ भगवन्भवमाहात्म्यरत्नाकरसुधाकरम् ॥ नंदीश चित्रं चारित्रं श्रुतं विद्याभृतोर्द्वयोः ॥ १ ॥ कदा वज्रांगदः सिद्धः कथं देवमपूजयत् ॥ कथं चान्वग्रहीत्प्रह्वं देवस्तमरुणेश्वरः ॥ २ ॥ ॥ नंदिकेश्वर उवाच ॥ ॥ निवर्त्तनेच्छां हित्वाथ नृपो निजपुरं प्रति ॥ तस्यैव पादपर्यन्तेस्वस्य वासमरोचयत् ॥ ३ ॥ अथास्य महती सेना वाहमार्गानुसारिणी ॥ प्राप्ता शतांगमातंगतुरंगभटसंकुला ॥ ४ ॥ समदृश्यत भूपालस्तादृशो धैर्यसागरः ॥ पुरोधोमंत्रिसामंतसेनापतिसुहृत्तमैः ॥ ५ ॥ ततस्तामागतां सेनामवनीपतिरादृतः ॥ अरुणाद्रेश्च सीमाया बहिरेव न्यवेशयत् ॥ ६ ॥ स्वकीयमखिलं कोशं देशानपि महाफलान् ॥ शोणाद्रिनाथपूजार्थे कल्पयामास भक्तिमान् ॥ ७ ॥ गौतमस्याश्रमाभ्याशे स्वयं कृततपोवनः ॥ पुरोधोक्तः ससचिवः शिवार्चनरतोऽभवत् ॥ ८ ॥ रत्नांगदाख्यं तनयं स्थापयित्वा निजे पदे ॥ तत्प्रेषितैरपर्याप्तैः शोणेशं पर्यतर्पयत् ॥ ९ ॥ परितः शोणशैलस्य परिपूर्णजलाशयान् ॥ अग्रहारान्बहुफलान्ब्राह्मणेभ्योऽतिसृष्टवान् ॥ १० ॥ तेजसारुणनाथस्य ज्वलनस्तंभरूपिणः ॥ धन्वप्रायेऽपि देशेऽस्मिन्दीर्घिकाः शतशो व्यधात् ॥ ११ ॥ सौंदर्यशालिनीरात्मपरिवारवरांगनाः ॥ सेवार्थं शोणनाथस्य दत्तवान्दीर्घ

१ आधिका—आर्षमेतत्—अधिकेत्येवार्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इति तेनोग्ररोषेण शापवज्रे निपातिते ॥ तत्क्षणाद्विगलद्दर्पावावां तं शरणं गतौ ॥ ३७ ॥ अभिधाय च तं देवमाहितांत्रिपरिग्रहैः ॥
अमोघ एष त्वच्छापस्तदस्यांतो निवेद्यताम् ॥ ३८ ॥ अथातिदीनमनसावावामालोक्य पार्थिव ॥ सानुग्रहोऽभून्मुनिराट् कारुण्यादतिशीतलः
॥ ३९ ॥ अभाषत च मैवं भो भवतोः क्वापि दुर्धियोः ॥ शापस्य भविता शांतिररुणाद्रेः प्रदक्षिणात् ॥ ४० ॥ पुरा खलु पुरारातिरध्यतिष्ठच्छुभां
सभाम् ॥ पर्युपास्यत दिक्पालैरिंद्रोपेंद्रयमादिभिः ॥ ४१ ॥ तदा च देवदेवाय नंदनारण्यदेवता ॥ उपायनीकृतवती फलं किमपि पाटलम्
॥ ४२ ॥ बाल्यात्कुतूहलाक्रान्तौ गजाननषडाननौ ॥ पितरं तदयाचेतां लोभनीयतरं फलम् ॥ ४३ ॥ अथ तावददेवस्तनयौ फलतार्पितौ ॥
गोपयित्वा फलं पाणिसंपुटेन कुमारकौ ॥ ४४ ॥ इमां समस्तां पृथिवीं लोकालोकेन वेष्टिताम् ॥ यो वां प्रदक्षिणीकर्तुमीष्टे तस्मै ददाम्यहम्
॥ ४५ ॥ इत्युक्ते पार्वतीशेन स्मयमानमुखेंदुना ॥ स्कंदः प्रदक्षिणीकर्तुं मेदिनीमुपचक्रमे ॥ ४६ ॥ लंबोदरस्तु देवस्य शोणशैलाकृतेः पितुः ॥
प्रदक्षिणं ततः कृत्वा पुरस्तादेव तत्क्षणात् ॥ ४७ ॥ तद्दृष्ट्वा तस्य चातुर्यं हेरंबाय त्रियंबकः ॥ फलं वितीर्णवानस्मै प्रणयाघ्रातमस्तकः ॥ ४८ ॥
अद्यप्रभृति सर्वेषां फलानामधिनायकः ॥ भवेत्यस्मै वरं दत्त्वा ह्येकदंताय शंकरः ॥ ४९ ॥ बभाषे च सभास्तारान्सर्वानपि सुरासुरान् ॥
प्रसरद्दशनज्योत्स्नाकर्बुरीकृतमंदिरः ॥ ५० ॥ स्थावरोयं ममाकारः शोणाद्रिर्योऽस्य भक्तितः ॥ प्रदक्षिणां वितनुते स मे सारूप्यभाग्भवेत् ॥ ५१ ॥
गिरेः प्रदक्षिणेनास्य यस्य धत्तः पदे रुजम् ॥ स सम्राट् सकलोत्कृष्टं लभते शाश्वतं पदम् ॥ ५२ ॥ इति शासनतः शंभोः शोणशैलप्रदक्षिणम् ॥
विधाय सर्वगीर्वाणा लेभिरे स्वं स्वमीप्सितम् ॥ ५३ ॥ युवामपि मदोद्भूतमालिन्यौ शिक्षितौ मया ॥ प्रदक्षिणेन शोणाद्रेः शापांतो वां भविष्यति
॥ ५४ ॥ तिरश्चोरपि वां सिध्येदरुणाद्रेः प्रदक्षिणा ॥ वज्रांगदस्य पांड्यस्य नृपतेरनुबंधतः ॥ ५५ ॥ इत्यमर्षणमहर्षिमहाब्धेः शापहालहल
शोषितगात्रौ ॥ पातितौ बहुलपातकभारात्क्षिप्रमश्वमृगजातिषु जातौ ॥ ५६ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां
प्रथमे माहेश्वरखण्डेऽरुणाचलमाहात्म्य उत्तरार्धे ऽरुणाचलप्रदक्षिणामाहात्म्ये वज्रांगद वृत्तांतवर्णनं नाम द्वाविंशतितमोऽध्यायः ॥ २२ ॥ ॥
॥ ॥ छ ॥ ॥ कलाधर उवाच ॥ ॥ कांबोजेषु हयो भूत्वा कांतिशाली सुहृन्मम ॥ अयासीदौपवाह्यत्वं भवतो राजपुंगव ॥ १ ॥ अहं च
गंधमृगतां गतः स्वांगप्रसूतिना ॥ सुगंधिना मदेनास्य संचारं चाचरं गिरेः ॥ २ ॥ धर्मात्मन्मृगयाव्याजादागतेन त्वयाधुना ॥ आवां शोणाद्रि
नाथस्य प्रापितौ हि प्रदक्षिणाम् ॥ ३ ॥ वाहारोहणदोषेण तवासीदीदृशी दशा ॥ पादप्रचारपुण्येन प्राप्तं नौ प्राक्तनं पदम् ॥ ४ ॥ राजेंद्र तव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स मृगोऽनुद्रुतस्तेन अभितः शोणपर्वतम् ॥ प्रादक्षिण्यात्परीयाय पपात च मनोजवः ॥ ११ ॥ ततः स भग्नसारोपि राजा जातश्र मश्वरन् ॥ पपात वाहाद्विच्छायः क्षीणपुण्य इव च्युतः ॥ १२ ॥ अज्ञातकारणेनैवं मातंगेनेव पीडितः ॥ नाज्ञासीत्क्षणमात्मानं राजा ग्रहगृहीतवत् ॥ १३ ॥ अचिंतयच्च कोयं मे निर्हेतुः सत्त्वविप्लवः ॥ क्व गतः स ह्यकस्मान्मे उपवाह्यस्तुरंगमः ॥ १४ ॥ इति चिंताकुले तस्मिंस्त ज्ज्ञानेप्यपटीयसि ॥ तडित्तटजटालेव सहसा द्यौरदृश्यत ॥ १५ ॥ निरीक्षमाण एवास्मिन्हित्वा तिर्यक्कलेवरम् ॥ तूर्णं तुरंगसारंगो खेचरत्वमुपाग तौ ॥ १६ ॥ किरीटिनौ कुण्डलिनौ हारकेयूरधारिणौ ॥ क्षौमांतरीयोत्तरीयौ स्रग्विणौ च विरेजतुः ॥ १७ ॥ अवोचतां च नृपतिमाश्चर्याकृष्टमा नसम् ॥ हरंताविव दन्तांशुजालैस्त्वस्यार्त्तिजं तमः ॥ १८ ॥ राजन्नलं विषादेन शोणाद्रीशप्रभावतः ॥ एतां जानीहि संजातां नवां नौ चेदृशीं दशाम् ॥ १९ ॥ तदोवाच तयोः किंचिदाश्वस्त इव पार्थिवः ॥ कृतांजलिरभाषिष्ट तावुभौ विनयान्वितः ॥२०॥ कौ युवां निर्मितो याभ्यामभिषंगो ममेदृशः ॥ भद्रौ [1]भणतमार्त्तानां त्राणं हि महतां गुणः ॥ २१ ॥ इति तेन कृते प्रश्ने तमुवाच कलाधरः ॥ राजानं जनिताश्चर्यं निर्दिष्टः कांतिशा लिना ॥ २२ ॥ अवेहि राजन्नावां हि पुरा विद्याधरेश्वरौ ॥ परस्परातिसौहार्दौ वसंतमदनाविव ॥ २३ ॥ एकदा तु सुवर्णाद्रेः पार्श्वे दुर्वाससो मुनेः ॥ तपोवनमगच्छाव मनसोऽपि दुरासदम् ॥२४॥ क्रोशेद्धां तपसस्तस्य शिवाराधनसाधनीम् ॥ पुष्पोज्ज्वलामपश्याव पुण्यामारामवाटिकाम् ॥ २५ ॥ विनीतावप्यसंजातौ तत्त्वोचितसुधीगणौ ॥ प्राविशाव तदुद्यानं प्रसूनावचयोत्सुकौ ॥ २६ ॥ स्थलस्य तस्य सौहार्दात्कांतिशाल्यतिगर्वितः ॥ संचचार मुहुः पादन्यासैराघट्टयन्महीम् ॥ २७ ॥ अहं तु तत्र पुष्पाणां गंधातिशयमोहितः ॥ विकस्वरेषु पुष्पेषु न्यस्तहस्तो दुराशयः ॥ २८ ॥ ततः शांडिल्यमूलस्थो व्याघ्रचर्मासने स्थितः ॥ दुर्वासास्तपसां राशिर्ज्वलन्निव हुताशनः ॥ २९ ॥ अमर्षोत्कर्षनीरंध्रस्पंदमानाधरच्छदः ॥ कराल भृकुटीबंधसारालितविशालभ्रूः ॥ ३० ॥ सरोषोऽभूत्तेजसाढ्यो घर्मदंतुरविग्रहः ॥ दहन्निव दृशा पश्यन्नभर्त्सयत नौ मुनिः ॥ ३१ ॥ आः पापौ प्रच्युताचारौ कौ युवामतिगर्वितौ ॥ ज्वलतः कोपवह्नेर्मे शलभत्वमुपागतौ ॥ ३२ ॥ तपोवनमिदं मत्कं पावनं भूतभावनम् ॥ पादैर्न स्पृशतः क्वापि सूर्याचंद्रमसावपि ॥३३॥ पुरवैरिसपर्यायाः पर्यायकमिदं वनम् ॥ न स्पंदतेऽत्र वातोपि न लिप्यंतेऽत्र षट्पदाः ॥ ३४ ॥ तदेतत्पादसंचारैर्दूषयन्नेष पातकी ॥ हयो भवतु भूलोके परवाह्यत्वपीडितः ॥ ३५ ॥ अपरोप्ययमत्युग्रे पतत्वचलकंदरे ॥ प्रसूनगंधलोभाद्यो गंधसारंगतां गतः ॥ ३६ ॥

१ भणतम्—वदतम—इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ज्वलदाकृतिम् ॥ कालदंडप्रतीकाशां दुर्गां प्रति विमुक्तवान् ॥ ६९ ॥ हाहाकुर्वत्सु देवेषु विद्राणे मातृमंडले ॥ तामापतंतीमादाय दुर्गा जग्राह लीलया ॥ ७० ॥ कृपाणमंकुशं पाशं भुशुंडीं करवालिकाम् ॥ शंकुं शक्तिं गदां चक्रं तोमरं फलकं सृणिम् ॥ ७१ ॥ परश्वधं भिंडिपालं पट्टिशं लगुडं च सः ॥ दुर्गां प्रति विचिक्षेप क्षयांभोद इवाशनिम् ॥ ७२ ॥ आपतंत्येव शस्त्राणि क्षिप्तान्यादाय वैरिणाम् ॥ बभंज पाणिभिः स्वैरं करिणीवेक्षुकांडकम् ॥ ७३ ॥ दुर्गोपवाह्यः सिंहोऽपि लांगूलाग्रेण मुद्रितम् ॥ दंष्ट्रया दारयामास प्रहरन्नखपंकजैः ॥ ७४ ॥ क्षणं सिंहः क्षणं क्रोडः क्षणं व्याघ्रः क्षणं गजः ॥ क्षणं च महिषो भूत्वा दैत्यो दुर्गामयोधयत् ॥ ७५ ॥ महिषोऽथ विषाणाभ्यां तीक्ष्णाभ्यामत्यमर्षितः ॥ ताडयामास सिंहं च देवीमपि मुहुर्मुहुः ॥ ७६ ॥ क्षणं गगनमध्यस्थः क्षणं प्राप्तो महीतले ॥ क्षणं दिक्षु भ्रमन्प्राप्तः क्षणं चादृश्यतां गतः ॥ ७७ ॥ प्रार्थिता मातृचक्रेण दुर्गा महिषदानवम् ॥ अमोघेन त्रिशूलेन दारयामास सस्मिता ॥ ७८ ॥ मुक्तघर्घरनिर्घोषो यावत्पतति दानवः ॥ तावदस्य हठेनांघ्रिं स्कंधपीठे न्यवेशयत् ॥ ७९ ॥ कंठपीडनतो यातजीवितस्यामरद्रुहः ॥ छिन्नं मूर्द्धानमादाय पाणिनाथ ननर्त्त सा ॥ ८० ॥ इति दुर्गया समिति कांसरासुरे दलिते समस्तभुवनैककंटके ॥ ननृतुः सुराः प्रजहृषुर्महर्षयो ववृषुश्च दिव्यकुसुमानि वारिदाः ॥ ८१ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां प्रथमे माहेश्वरखण्डेऽरुणाचलमाहात्म्य उत्तरार्धे देव्यास्तपश्चर्यायां दुर्गाकृत महिषासुरवधवर्णनंनामैकोनविंशोऽध्यायः ॥ १९ ॥ ॥ छ ॥ ॥ मार्कंडेय उवाच ॥ ॥ अहो महिषदैत्यस्य दुराचारत्वमीदृशम् ॥ अहो दुरितहारिण्या दुर्गायाश्च पराक्रमः ॥ १ ॥ एवं तया भद्रकाल्या निहते महिषासुरे ॥ किं चकार गिरींद्रस्य नंदिनी तपसि स्थिता ॥ २ ॥ ॥ नंदिकेश्वर उवाच ॥ ॥ अनंतरं सा हस्तेन दधती दैत्यमस्तकम् ॥ ननाम गौरीमन्येन पाणिना खड्गधारिणा ॥ ३ ॥ अथ हर्षेण नृत्यंतीं तामालोक्य दयार्द्रया ॥ दृष्ट्या देवी जगादैनां दंतांशुद्योतितांबरा ॥ ४ ॥ त्वयातिदुष्करं कर्म निर्मितं विंध्यवासिनि ॥ जातं तव प्रभावेन निष्प्रत्यूहं च मे तपः ॥ ५ ॥ अथैतन्माहिषं शीर्षमपवित्रं भयंकरम् ॥ जगत्पवित्रचारित्रे त्यक्तुमर्हसि हस्ततः ॥ ६ ॥ इति गौर्योदिता दुर्गा जुगुप्साकुलमानसा ॥ मूर्ध्नस्तस्य निपाताय व्यधुनोद्बहुशः करम् ॥ ७ ॥ तीर्थमुत्पाद्यतां देवि नवं पापविनाशनम् ॥ तस्मिन्निमज्जनाद्दुर्गे प्रायश्चित्तं भविष्यति ॥ ८ ॥ इतीरिता गौतमेन दुर्गा दुरितशंकिनी ॥ पाटयामास खड्गेन शिलापट्टं पटीयसा ॥ ९ ॥ पातालावधि निर्भिन्नात्पाषाणतलतस्ततः ॥ उदजृंभत्तरंगांभः सच्चित्तमिव निर्मलम् ॥ १० ॥ ममज्ज सापि गंभीरे तस्मिन्नंभसि

१ कासरासुरे—महिषासुरे ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पावने ॥ नमः शोणाद्रिनाथायेत्युक्का मंत्रमनुत्तमम् ॥ ११ ॥ तावन्महिषकंठस्थं लिंगं तद्गलितं तले ॥ तटे प्रतिष्ठितं जातं पापनाशनसंज्ञया
॥ १२ ॥ उन्ममज्ज ततो दुर्गा तीर्थांभोधूतकल्मषा ॥ निपपाताथ तत्पाणेर्महिषासुरमस्तकम् ॥ १३ ॥ कृतप्रदक्षिणा नत्वा पापनाशनमीश्वरम् ॥
पुरस्तादस्ति सा गौर्या गौतमेनाभिनंदिता॥ १४॥एवं प्रत्यक्षनिरतपापां तां वीक्ष्य पार्वती॥जगाद दीर्घतपसं जगतीधरनंदिनी॥ १५॥महिषासुरसंहारें
ऽजसा स्वनुमतिः कृता ॥ विंध्यवासिनीयमहो दुष्टमाहिषविग्रहम् ॥ १६ ॥ गृहीत्वा भक्षयामास तस्य लिंगमिदं शिवम् ॥ प्रायश्चित्तं ततो ब्रूहि म
मापि मुनिसत्तम ॥ १७ ॥ ॥ गौतम उवाच ॥ ॥ देवि सर्वजगत्सर्गस्थितिसंहारकारिणि ॥ त्वद्ध्यानमेव जगतां सर्वपातकनाशनम् ॥
॥ १८ ॥ अथापि लौकिकं वृत्तमवलंब्य त्वयेरितम् ॥ स्वकृतापि हि मर्यादा न महद्भिर्विलंघ्यते ॥ १९ ॥ अन्तःकरणकालुष्यक्षालिनी काचन
क्रिया ॥ कथ्यतेऽद्य मया मातरवधानं विधीयताम् ॥ २० ॥ अरुणाद्रिरयं साक्षादनलाद्रिस्तिरोहितः ॥ ज्वलतिज्योतिषा स्वेन कृत्तिकापूर्णिमा
निशि ॥ २१ ॥ तत्सपर्यातपश्चर्या कार्या कात्यायनि त्वया ॥ तज्ज्योतिर्दर्शनात्सर्वमभीष्टं तव सिध्यति ॥ २२ ॥ इत्युक्ता गौतमेनांबा तदाप्र
भृति दारुणा ॥ इयं च शिवभक्ता हि शि वपूजारता तदा ॥ २३ ॥ तपश्चचार पंचानामग्नीनां मध्यमाश्रिता ॥ चतुर्णां शिखिनां मध्ये स्थिता
सूर्यनिविष्टदृक् ॥ २४ ॥ रेजे हैमी शलाकेव द्योतमाना गिरींद्रजा ॥ अथाकृष्टेवपार्वत्याः प्रेमपाशैर्निरायतैः ॥ २५ ॥ सा कार्त्तिकी पौर्ण
मासी समापेदे शुभा तिथिः ॥ ततस्तस्य दिनस्यांते शृंगे शोणमहीभृतः ॥ २६ ॥ अदर्शि किमपि ज्योतिरनुपाधिकवैभवम् ॥ तदर्थोपगतैर्ब्रह्मम
धुभिद्वासवादिभिः ॥ २७ ॥ उपास्यमानमभितो देवैर्दिव्यर्षिसंगतैः ॥ तदनिंधनमस्नेहमदशावर्तिसम्भवम् ॥ २८ ॥ महाप्रदीपमालोक्य विस्मयं
प्राप पार्वती ॥ कृतप्रदक्षिणा साथ प्रणमंती पदेपदे ॥ अरुणाद्रीश्वरं नाथं तुष्टा तुष्टाव शैलजा ॥ २९ ॥ नमस्ते मेरुचापाय कैलासाचलवा
सिने ॥ नीहारशैलजामात्रे शोणक्ष्माधररूपिणे ॥ ३० ॥ वरुणादिसुराच्यार्य तरुणादित्यवर्चसे ॥ अरुणाचलनाथाय करुणामूर्त्तयेनमः ॥
॥ ३१ ॥ जय जह्नुसुताचन्द्रलेखालंकृतशेखर ॥ सौंदर्यमोहिताशेषमुनिपत्नीजनाशय ॥ ३२ ॥ जय शैलसुतासंगसंभृतानंगवैभव ॥ माया
नारायणाभोगक्रीडाम्रेडनपंडित ॥ ३३ ॥ जय संध्यासमोपेतसंभृतानंदतांडव ॥ जय गीर्वाणगंधर्वसिद्धविद्याधरार्चित ॥ ३४ ॥ जय हेरंबजनक
जय षण्मुखवत्सल ॥ जय हैमवतीप्रार्थ्य जय पार्थिवदुर्लभ ॥ ३५ ॥ इति स्तुत्वा मुहुस्तस्मिञ्ज्योतिषि न्यस्तलोचनाम् ॥ दृष्ट्वा देवीं दयाव्या
जाद्विलिल्ये वृषभध्वजः ॥ ३६ ॥ लयित्वा निजमास्थाय रूपमुत्कटसुन्दरम् ॥ आस्थाय वृषभं दिव्यममूं दृष्ट्वा शिवां शुभाम् ॥ ३७ ॥ माना

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तिरेकादपहाय सर्वमैश्वर्यमेवं तपसि प्रवृत्ताम् ॥ मुग्धां पुनः सांत्वयितुं गिरीशः प्रचक्रमे पर्वतराजपुत्रीम् ॥ ३८ ॥ इति श्रीस्कान्दे महापुराण एका शीतिसाहस्र्यां संहितायां प्रथमे माहेश्वरखण्डेऽरुणाचलमाहात्म्य उत्तरार्धे पार्वतीकृतारुणाचलेश्वरस्तुतिवर्णनंनाम विंशतितमोऽध्यायः ॥२०॥छ॥ ॥ ॥ नंदिकेश्वर उवाच ॥ ॥ तदा ब्रह्मा सरस्वत्या महाविष्णुश्च पद्मया ॥ शक्रः पुलोमसुतया परे दिक्पालका अपि ॥ १ ॥ गंधर्वाप्सरसां संघा वसवोऽपि सुरा अपि ॥ त्रयस्त्रिंशत्कोटिगणाः परे मुनि गणा अपि ॥ २ ॥ एकादशमहारुद्रा आदित्या द्वादशापि च ॥ भैरवाश्च पिशाचाश्च वेतालाः कटपूतनाः ॥ ३ ॥ यक्षरक्षोरगा भूता ये चान्ये शिवकिंकराः ॥ संतोषभाजः सर्वेऽपि विकटाकारवेष्टिताः ॥ ४ ॥ परिवार्य महेशानं समाजग्मुः सहस्रशः ॥ तद्वीराशंसनं दृष्ट्वा योगिनीदानवैः कृतम् ॥ ५ ॥ अतीव विस्मयं भेजुः सर्वे कल्पांतभीषणम् ॥ कृतसांनिध्यमालोक्य देवमानंदयंत्युमा ॥ ६ ॥ चिररात्रप्ररूढां च तद्वियोगव्यथां जहौ ॥ रोमांचिता स्विन्नमुखी वेपमाना घनस्तनी ॥ ७ ॥ पादांगुलीषु नयने विनिवेशयति स्म सा[1] ॥ वृषभादवरुह्याथ गृहीत्वैनां करे शिवः ॥ स्मितशारीरकंठश्रीप्रणयेनैवमब्रवीत् ॥ ८ ॥ ॥ शिव उवाच ॥ ॥ व्याकुलीक्रियते देवि किमेवं कारणं विना ॥ ९ ॥ सर्वैराराधनीयेति मयापि घटितांजलिः ॥ किं न वेत्स्यावयोरैक्यं ज्योत्स्नाचंद्रमसोरिव ॥ १० ॥ अनादिसिद्धं देवेशि तवेदं मौग्ध्यमीदृशम् ॥ क्वेदं शिरीषमृद्वंगि शरीरं ते गिरीन्द्रजे ॥ ११ ॥ तपः समाधयश्चेति क्व कर्कशजनोचिताः ॥ नारायणोहं लक्ष्मीस्त्वं ब्रह्मास्मि त्वं सरस्वती ॥ १२ ॥ वारुणी त्वं फणींद्रोहं रोहिणी त्वमहं शशी ॥ स्वाहा त्वं हव्यवाहोऽहं सूर्योऽहं त्वं सुवर्चला ॥१३॥ जाह्नवी त्वं समुद्रोऽहं मेरुरस्मि त्वमुर्वरा ॥ पुलोमजा त्वं शक्रोहं त्वं रतिश्चित्तभूरहम् ॥ १४ ॥ बुद्धिस्त्वं राजराजोहं त्वं शर्मा[2]ऽहं समीरणः ॥ पाथोधिपोऽहं वीचिस्त्वं प्रकृतिस्त्वं पुमानहम् ॥ १५ ॥ विद्या त्वं वेदितव्योऽहं वाक्त्वमर्थोपि पार्वती ॥ ईश्वरोऽहं मदंशासि त्वयैवाज्ञास्वरूपया ॥ १६ ॥ सृष्टिस्थित्युपसंहारविधानानुग्रहेश्वरे ॥ न भेदोऽतस्त्वया कार्यः पृथग्जनवदावयोः ॥ १७ ॥ चित्प्रकाशात्मनोर्देवि स्वेच्छाधृतशरीरया ॥ व्याकुली कुरुषे शश्वद्वृथैवेर्ष्यायसे[3] हि माम् ॥ १८ ॥ दृष्टाप्रतिक्रिया तस्य क्रियते याधुना मया ॥ इत्युक्त्वेशो निषण्णस्तां पार्श्वदेशे न्यवेशयत् ॥ १९ ॥ गौरीं स्वकीय एवांगे गूहमानामिव ह्रिया ॥ अंगद्वयं तयोरैक्यमगात्प्रेम्णा च लीनयोः ॥ २० ॥ अर्थद्वयमिवाह्लाय संनिकर्षोपलंभतः ॥ अर्धे कर्पूरधवलमर्धे सिंधूरपाटलम् ॥ २१ ॥ तद्विचित्रमभूदंगं शिवयोरेकतां गतम् ॥ अर्धे कुंतलदामार्धहारमध्ये तु कंचिका ॥ २२ ॥ अंगादर्धेंदु

---

१ पादांगुलीपु नयने विनिवेशयति स्म सा—लज्जया—इति शेषः । लज्जया अधोदृष्टिरित्यर्थः । २ शिवा—इ० पा० । ३ ईर्ष्यायते—इ० पा० त्वयेति शेषः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चूडस्य वपुरर्धेन्दुकूलितम् ॥ एकनूपुरताटंकपरिहार्यमनोहरम् ॥ २३ ॥ एकपिंगलसध्रीचो गात्रमेकस्तनं बभौ ॥ देव्यै दत्त्वा च धामार्थं वामदेवो जगाद ताम् ॥ २४ ॥ अवकाशो रुषो देवि मा भूरतः परं तव ॥ स्तन्यार्थिनं गुहं हित्वा यातासि तपसे यतः ॥ २५ ॥ तदपीतस्तनीनाम्ना निवसात्र ममांतिके ॥ त्वामपीतस्तनीं देवीं शोणाद्रीशं च मामपि ॥ २६ ॥ जनाः सर्वे समाराध्य रमंतां भोगमोक्षयोः ॥ इयं त्वदंशजा देवी दुर्गा महिषसूदिनी ॥ २७ ॥ अत्रैव सन्निधत्तां तु मंत्रसिद्धिप्रदा नृणाम् ॥ खड्गतीर्थमिदं पुण्यं सकृदेव निमज्जनात् ॥ २८ ॥ सर्वरोगहरं पुंसामस्तु सर्वाघनाशनम्॥ प्रवालगिरिनाथश्च[1] देवोऽयं पापनाशनः॥२९॥ भक्तिश्रद्धावतां नृणां भूयास्तां भूतये भृशम्॥ अयं च गौतमो देवि त्वदनुग्रहभाजनम्॥ ॥३०॥ तपोनुरूपं भजतां लोकेष्वाचंद्रतारकम् ॥ इमाश्च मातरः सप्त सप्तलोकैकमातरः ॥३१॥ अद्यप्रभृति कुर्वंतु सान्निध्यं जगतां श्रियै ॥ शास्तारो भैरवाः क्षेत्रपालका बटुका अपि ॥ ३२ ॥ अरुणक्षेत्र एवात्र नित्यं कुर्वंतु संनिधिम् ॥ अत्राहमरुणक्षेत्रे निवसाम्यरुणाह्वयः ॥ ३३ ॥ त्वयाप्यरुणया देव्या स्थातव्यं करुणार्द्रया ॥ ईप्सितामरुणादेवौ सान्निध्यं कुरुतो यतः ॥ ३४ ॥ तदस्मिन्नरुणक्षेत्रे सुलभाः सर्वसिद्धयः॥ ३५ ॥ इदं कृतं पर्वतराजपुत्र्या प्रसादनं शोणगिरीश्वरस्य ॥ शृणोति यः स द्विषतो[2] विधूय स्वर्गापवर्गौ सुलभावुपेयात् ॥ ३६ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां प्रथमे माहेश्वरखण्डेऽरुणाचलमाहात्म्य उत्तरार्धे शिवकृतपार्वतीप्रशंसावर्णनंनामैकविंशतितमोऽध्यायः ॥ २१ ॥ ॥ छ ॥

॥ ॥ मार्कंडेय उवाच ॥ ॥ स्वामिन्नित्यशिवानन्द भगवन्नंदिकेश्वर ॥ आह्लादितोऽस्मि शोणेशमाहात्म्यसुधया त्वया ॥ १ ॥ कथं वज्रांगदः पांड्यराजः शोणव्यतिक्रमम् ॥ चक्रे कथं तद्भक्त्यैव प्राप्तवान्संपदं पुनः ॥ २ ॥ कथं विद्याधराधीशौ कांतिशालिकलाधरौ ॥ दुर्वासःशापनिर्विद्धाववितौ शोणशंभुना ॥ ३ ॥ ॥ नंदिकेश्वर उवाच ॥ ॥ दीर्घायुष्यत्वसाफल्यं लब्धवांस्त्वं मृकण्डुज ॥ यदियं स्थेयसी भक्तिर्भवतो भूतनायके ॥ ४ ॥ वक्ष्ये वज्रांगदोदंतं वृत्तं विद्याभृतोरपि ॥ यतोऽभून्महितो लोके शोणाद्रीश्वरवैभवः ॥ ५ ॥ आसीद्वज्रांगदोनाम पुरा पांड्येषु पार्थिवः ॥ आस्ते यस्य भुजस्तम्भे वसुधा सालभंजिका ॥ ६ ॥ धार्मिको न्यायविज्ज्ञाता गंभीरो दक्षिणम् क्षमः ॥ शांतो विनयवान्धीमानेकदारव्रतः कृती ॥ ७ ॥ शिवपूजार्चनरतः श्रीमाञ्छीलवतां वरः ॥ पृथ्वीमासेतुकेदाराच्छशास जितशात्रवः ॥ ८ ॥ कदाचिन्मृगयाव्याजात्स चरन्सुतुरंगमः ॥ अरुणाचलपर्यंतं कांतारं समगाहत ॥ ९ ॥ स तत्र बहलामोदं कंचित्कस्तूरिकामृगम् ॥ दृष्ट्वा तमन्वक्तुरगं प्रावर्तयत कौतुकात् ॥ १० ॥

१ प्रवालगिरिनाथत्वम्–इ० पा० । २ द्विषतः कामक्रोधादिरिपून्–इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

माहेश्वरी त्रिशूलेन सुचिरं कृतसंगरा ॥ चकर्त दुर्द्धरस्याशु मूर्द्धानमतिरोषणा ॥ ४३ ॥ शक्त्या लुलाव कौमारी चिक्षुरासुरमस्तकम् ॥
चक्रेण चालुनान्मौलिं विकरालस्य वैष्णवी ॥ ४४ ॥ बाष्कलस्याशु वाराही मुसलेनालुनाच्छिरः ॥ दुर्मुखं चाशु वज्रेण व्यधा
दैन्द्री गतायुषम् ॥ ४५ ॥ ख्यातं यस्याश्च नामेदं तयोरेव निदूषनात् ॥ चामुण्डा चण्डमुण्डौ च मण्डलाग्रेण चिच्छिदे ॥ ४६ ॥ प्रचण्डचा
मरौ वीरौ महामौलिं महाहनुम् ॥ उग्रास्यविकटाक्षौ च ज्वालास्यदहनावपि ॥ ४७ ॥ अनुजग्मुः क्रुधा यान्तं युद्धाय महिषासुरम् ॥ कालने
मिप्रभृतयो विप्रचित्तिमिवासुराः ॥ ४८ ॥ शिरस्त्रवंतो रथिनः सुनिषंगा धनुर्धराः ॥ उद्धूतकटकाः प्रापुर्युद्धभूमिं चलद्ध्वजाः ॥ ४९ ॥ समंतात्पू
रितदिशः सिंहनादैर्भयंकरैः ॥ पृषत्कवर्षिणो मातृमंडलान्यभिदुद्रुवुः ॥ ५० ॥ ताश्च तैर्बलिभिः कृत्वा संग्रामं निस्सहत्वतः ॥ दुर्गां प्रपेदिरे
देवीं शरणं सिंहवाहनाम् ॥ ५१ ॥ उक्ता मायालुलायस्य दुर्जयत्वं दुरात्मनः ॥ देवीं तां तुष्टुवुर्दुर्गामेवं सप्तापि मातरः ॥ ५२ ॥ योगनिद्रेति
रूपेण विष्णोर्नयनपद्मयोः ॥ त्वया निलीयते देवि मधुकार्येव लीलया ॥ ५३ ॥ अमूमुहस्तं न तथा मातश्च मधुकैटभौ ॥ कथं जघान तौ विष्णु
स्तयोरेवाभ्यनुज्ञया ॥ ५४ ॥ त्वं कौशिकी न चेज्जाता मृत्युः शुंभनिशुंभयोः ॥ कथं तु लोकपालानामैश्वर्यं देवि एष्यति ॥ ५५ ॥ विंध्यवा
सिनि विंध्येन किमवंध्यं कृतं तपः ॥ यत्र मैत्री किरातीभिरपि लभ्या त्वया समम् ॥ ५६ ॥ कापिशायनमापीतं धनदोपायनीकृतम् ॥
त्वयांब नीतं दैत्यानां रसैर्नियतमानवैः ॥ ५७ ॥ ब्रह्मणः सृष्टिशक्तिस्त्वं स्थितिशक्तिर्मधुद्विषः ॥ अंब संहारशक्तिश्च रुद्रस्यापि प्रगल्भसे ॥ ५८ ॥
यशोदानंदजाता त्वमेकानंशेति नामतः ॥ कंसाद्यसुरसंहारे हरेः साह्यं करिष्यसि ॥ ५९ ॥ त्वं विद्या त्वं महामाया त्वं लक्ष्मीस्त्वं सरस्वती ॥
त्वं देवी पार्वतीशापि दुर्गे किं वा न जायसे ॥ ६० ॥ ॥ नन्दिकेश्वर उवाच ॥ ॥ स्तोत्रेणानेन मातृभ्यो दुर्गा दत्ताभया स्वयम् ॥ महिषा
सुरयुद्धाय संतुष्टा निर्ययौ तदा ॥ ६१ ॥ प्रचंडमंडलाग्रेण भिंडिपालेन चामरम् ॥ महामौलिं क्षुरिकया कर्परेण महाहनुम् ॥ ६२ ॥ उग्रवक्त्रं
कुठारेण शक्त्या विकटचक्षुषम् ॥ ज्वालामुखं मुद्गरेण दहनं मुसलेन च ॥ ६३ ॥ निहत्य महिषस्याग्रे सरोषं युध्यती स्वयम् ॥ सिंहनादं महाघोरं
चक्रेण मुदिताशया ॥ ६४ ॥ अथात्यमर्षितो दुर्गां विशिखैर्महिषासुरः ॥ विव्याध फालफलके स्तनयोर्गंडयोरपि ॥ ६५ ॥ ततो दुर्गाथ संरंभात्प्र
जहारासुरेश्वरम् ॥ बाह्वोर्वक्षसि वक्त्रे च क्षुरप्रैः प्रज्वलत्फलैः ॥६६॥ ततो दैत्यस्त्रिभिर्दुर्गां जघान विशिखैर्मुखे ॥ पंचभिः पंचभिर्बाह्वोर्द्वाभ्यां द्वाभ्यां
च नेत्रयोः ॥ ६७ ॥ एकेन सारथिं रथ्यानष्टभिः कार्मुकं त्रिभिः॥ चतुर्भिश्च ध्वजं तस्य दुर्गा चिच्छेद सायकैः ॥ ६८ ॥ पदातिरथ दैत्येंद्रः शतघ्नीं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सा मृगानप्यपोषयत् ॥ अज्ञातहिंसाभिभवानाश्रमोपांतवर्तिनः ॥ ७४ ॥ कृतालवालसलिलैः सुबालाकलशाहृतैः ॥ वात्सल्याद्वर्द्धयामास पूर्णा नाश्रमपादपान् ॥ ७५ ॥ प्रदक्षिणां कृतवती शोणशैलं गिरींद्रजा ॥ सा मनोरथसंसिद्ध्यै नित्यं सह सखीजनैः ॥ ७६ ॥ पंचाक्षरीं जजापैषा शिवस्तोत्राण्युदैरयत् ॥ दध्यौ च देवं मनसा शोणपर्वतरूपिणम् ॥ ७७ ॥ अनुदिनमरुणाचलेश्वरं सा प्रणतवती विहितप्रदक्षिणाद्यैः ॥ शिवनिगमविधानवेदिनी सा व्यरचयदद्रिसुता चिरं तपस्याम् ॥ ७८ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां प्रथमे माहेश्वरखण्डेऽरुणाचलमाहात्म्य उत्तरार्धे पार्वतीकृतारुणाचलेश्वरपरिचरणवर्णनंनामाऽष्टादशोऽध्यायः ॥ १८ ॥ ॥ छ ॥ ॥ नंदिकेश्वर उवाच ॥ ॥ तावत्कुतश्चिदाकर्ण्य तत्रस्थां महिषासुरः ॥ अवज्ञातसुराराातिर्विध्वंसितपुरंदरः ॥ १ ॥ सर्वलोकजयी सिद्धविद्याधरभयावहः ॥ दुर्निग्रहो वरादासीच्छस्त्रास्त्रैरखिलैरपि ॥ २ ॥ तीक्ष्णानामपि शापानामप्यगोचरतां गतः ॥ दर्पद्धिर्दानवैर्दैत्यैः कौणपैश्च निषेवितः ॥ ३ ॥ दूषको मुनिपत्नीनां धर्ममार्गोपघातकः ॥ बलात्पुलोम्नो नमुचेर्वृत्रादपि बलाधिकः ॥ ४ ॥ हिरण्यकशिपोर्वंश्यो हिरण्याक्ष इवापरः ॥ तां विलोभयितुं कांचित्प्राहिणोत्किल दूतिकाम् ॥ ५ ॥ ततः सा तापसीवेषधारिणी गिरिजां प्रति ॥ सखीसमक्ष एवेदमुवाचानुचितं वचः ॥ ६ ॥ अरारु[1] भीषणे भीरो निवसस्यत्र किं वने ॥ विहर्तुमुचिता रम्येष्ववरोधनवेश्मसु ॥ ७ ॥ किमर्थं वाद्य चित्तं ते यौवने भोगनिःस्पृहम् ॥ निवेशितं तपसि च दैवतैरपि दुष्करे ॥ ८ ॥ हंसतूलमयीं शय्यां मुक्तामयवितानिकाम् ॥ हित्वा किमिति मृद्वंगि सुप्यते परुषाश्मसु ॥ ९ ॥ तपोजडो मृडो दिष्ट्या प्रागेवास्ति त्वयोज्झितः ॥ तवानुरूपो नैवान्यो विद्यते दिविषत्सु च ॥ १० ॥ किं तु त्रैलोक्यनाथोऽस्ति महिषो दानवेश्वरः ॥ यदि द्रक्ष्यसि तं सुभ्रु त्यक्ष्यस्येव क्षणात्तपः ॥ ११ ॥ किं निह्नवेन नन्वेष श्रुत्वा सर्वं चिरात्प्रभुः ॥ स प्राहिणोदुपानेतुं दूतिकां मां स्मरातुरः ॥ १२ ॥ इत्यत्यंतविरुद्धं तां ब्रुवाणामसमंजसम् ॥ देव्याश्चित्तस्थितिं ज्ञात्वा विजया निरकासयत् ॥ १३ ॥ सा चातिरोषेण कृतप्रतिज्ञा दैत्यरूपिका ॥ गत्वा विदितवृत्तांतमकरोन्महिषासुरम् ॥ १४ ॥ सोऽपि तत्सर्वमाकर्ण्य रुषातीवारुणेक्षणः ॥ देवीं जिघृक्षुरभ्यागाद्वृतो दैतेयकोटिभिः ॥ ॥ १५ ॥ स्यन्दनैर्द्विरदैरश्वैः पत्तिभिश्च समंततः ॥ भुवमाच्छादयामास ध्वजैश्च गगनांतरम् ॥ १६ ॥ क्ष्वेलितैर्वाद्यघोषैश्च नभः स्फुटदिवाभवत् ॥ पादाघातैश्च दैत्यानां विदद्रे वसुधातलम् ॥ १७ ॥ करालो दुर्द्धरस्तस्य विचक्षणुर्[2]विकरालकः ॥ बाष्कलो दुर्मुखश्चंडः प्रचंडश्चा

१ अरारु इति विस्मयकरसंबोधनेऽव्ययम् । २ विचष्णुः—इति नामकः तस्य सेनानीः—इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मरासुरः ॥ १८ ॥ महाहनुर्महामौलिरुग्रास्यो विकटेक्षणः ॥ ज्वालास्यो दहनश्चेमे सेनान्योपि प्रतस्थिरे ॥ १९ ॥ कोलाहलमिमं श्रुत्वा देवी निय मविघ्नतः ॥ शंकिता दैत्यसंहत्यै दुर्गामादिशति स्म सा ॥ २० ॥ सारुणाद्रिरहोद्रोण्यामधिरूढा मृगाधिपम् ॥ दीप्तायुधधरैर्दोर्भिः कालिकेव म हीं गता ॥ २१ ॥ घनाघनरवोदग्रं सिंहनादमचीकरत् ॥ स्फुरदंतच्छदोपांतं वलगदंगुलिपल्लवा ॥ २२ ॥ स्वांगेभ्यो योगिनीचक्रं मातरोऽप्यसृज त्रुषा ॥ देव्याः प्रियाय दैतेयसंहारार्हाः सहस्रशः ॥ २३ ॥ काश्चित्तत्रारुणच्छाया दंडिन्यो हंसवाहनाः ॥ मुखैश्चतुर्भिराजग्मुः कोपप्रस्फुरिताधरैः ॥ ॥ २४ ॥ निर्ययुः काश्चन क्रुद्धा ज्वलत्त्रिशिखपाणयः ॥ निस्वनद्भूषणाः पंसल्ललाटा वृषवाहनाः ॥ २५ ॥ निर्जग्मुरपराः सेनासहिताः शिखिवा हनैः ॥ शक्तिदंडाभयकराः शतशः षड्भिराननैः ॥ २६ ॥ निश्चक्रमुः परास्तार्क्ष्यमधिरुह्याधिकक्रुधा ॥ शंखचक्रधराः सूर्यचंद्रमोभ्यां दिवो यथा ॥ ॥ २७ ॥ प्रतिष्ठंते तथा व्याघ्रवाहाः कुवलयत्विषः ॥ पोत्रैः सद्धर्धराराविर्बिभ्रत्यो मुसलं हलम् ॥ २८ ॥ रोषारुणसहस्राक्ष्यो वलक्षद्विपवाहनाः ॥ प्रतस्थिरे शातकोटिशतकोटिधराः पराः ॥ २९ ॥ अश्वारूढाः समापेतुरेकाः सौदामिनीनिभाः ॥ खड्गखेटकधारिण्यः कोपेन कपिलाननाः ॥ ॥ ३० ॥ ताश्च कोटिचतुःषष्टिमसुरानाश्रमाद्बहिः ॥ अरुन्धन्प्रसभं ध्वांतराशीनिव खेस्त्विषः ॥ ३१ ॥ ततश्च योगिनीचक्रदानवानीकयोर्मिथः ॥ प्रावर्त्तत रणं घोरं मुष्टामुष्टि कचाकचि ॥ ३२ ॥ सायकैर्योगिनीमुक्तैर्दलिता दैत्यमौलयः ॥ आच्छादयन्महीपृष्ठं स्थलजानीव सर्वतः ॥ ३३ ॥ प्रसस्रू रक्तसरितो लगत्कैशिकशैवलाः ॥ लुठद्द्विपाठपाठीनाः स्मेरैर्देवीमुखांबुजैः ॥ ३४ ॥ वेतण्डतुण्डान्यारुह्य सौधानिव पिशाचिकाः ॥ प्रचण्ड तांडवाः पीतरक्तमद्याश्चकाशिरे ॥ ३५ ॥ कपालैर्दैत्यवीराणामघासुरसृगासवान् ॥ क्रीडड्डमरुकाकारैर्डामरैर्योगिनीगणाः ॥ ३६ ॥ परिजह्रुस्तथां त्राणि कंकौघाः पाशशंकया ॥ क्षुधिता अपि मांसानि सशल्यान्यजहुः शिवाः ॥ ३७ ॥ सिद्धविद्याधरोन्मुक्तमंदारप्रसवासवैः ॥ इयाय शांतिं भूरेणुः संग्रामे क्षोभसम्भवः ॥ ३८ ॥ विरेजुर्योगिनीमुक्तैर्देहलग्नैर्द्विषां हयाः ॥ अमर्षातिशयोत्क्षिप्तैः शल्यैः शल्यमृगा इव ॥ ३९ ॥ दंडैः केचि त्परे शूलैर्निशितैः केऽपि शक्तिभिः ॥ चक्रैरन्ये हलैरेके कतिचिच्छतकोटिभिः ॥ ४० ॥ योगिनीनां परे खड्गैर्दलिता दानवेश्वराः ॥ निःशेषतासु पाजग्मुर्विना सेनाधिपान्निजान् ॥ ४१ ॥ ब्राह्मी स्वयमुपागम्य विहितायोधनावधीत् ॥ करालं विकरालेन दण्डेन ज्वलिता चिरात् ॥ ४२ ॥

१ पंसल्ललाटाः—संकुच्यमानललाटाः—इत्यर्थः । पडिपसि नाशने धातुः । पंसंन्ति तानि पंसति । पंसंति संकुच्यमानानि (क्रोधवशेन) ललाटानि यासां ताः—इति व्युत्पत्तिर्बोद्धव्या । २ वलक्षद्विपवा हनाः—श्वेतगजारूढाः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्चिरम् ॥ ४८ ॥ मुनेरेवमनुज्ञानात्कृताश्रमपरिग्रहा ॥ उदयुंक्त तपः कर्त्तुं सुमहत्पर्वतात्मजा ॥ ४९ ॥ आश्रमं रक्षितुं सत्यवतीं काननवासिनीम् ॥ शुभगां धुंधुमारिं च प्रागाद्याशास्वतिष्ठिपत् ॥ ५० ॥ तपोवनस्य सर्वस्य रक्षार्थं सा समादिशत् ॥ दुर्गामनर्गलस्फूर्तिमाज्ञानिर्वाहणक्षमाम् ॥ ॥ ५१ ॥ अनंतरं सा धम्मिल्लं मंदारप्रसवोचितम् ॥ जटाभरत्वं तपसे गमयामास पार्वती ॥ ५२ ॥ हंसचिह्नदशं हित्वा दुकूलं मिहकालघु ॥ परुषं सुकुमारांगी परिधत्तेस्म वल्कलम् ॥ ५३ ॥ अपि प्रसूनावचयनिस्सहांगुलिपल्लवा ॥ अलावीदतितीक्ष्णाग्राण्यविकारं कुशानि सा ॥ ५४ ॥ वज्रसूचिनिर्भरांगैरवच्छिन्नानि कंटकैः ॥ शिरीषमृद्वी शांडिल्यपल्लवान्युच्चिकाय या ॥ ५५ ॥ पावन्यां कमलानद्यां प्रातर्विहितमज्जना ॥ अर्चया मास रक्ताब्जैर्यथाविधि विभाकरम् ॥ ५६ ॥ दर्भाक्षततिलोन्मिश्रैर्गौरी श्रीनदिवारिभिः ॥ देवी निर्वर्त्तयामास देवर्षिपितृतर्पणम् ॥ ५७ ॥ वालुका मंडले सूर्यमावाह्याभ्यर्च्य पंकजैः ॥ कृतप्रदक्षिणा गौरी प्रणनाम सहस्रशः ॥ ५८ ॥ स्वयमेव प्रतिष्ठाप्य लिंगं किमपि शंकरम् ॥ आगमोक्तेन विधिना पूजयामास पार्वती ॥ ५९ ॥ आसनेन च मूर्त्त्या च मूलेनांगैश्च सा रविम् ॥ दंडिपिंगलमुख्यांश्च शक्तीर्दीप्तादिका अपि ॥ ६० ॥ तत्तद्दिक्षु च सोमादीन्ग्रहान्धेन्वादिमुद्रया ॥ तेजश्चंडे चार्चयित्वा निर्माल्यं च न्यवेदयत् ॥ ६१ ॥ अर्घेणातीव शुद्धेन संप्रोक्ष्य च समंततः ॥ द्वारवास्तु समभ्यर्च्य न्यासानपि चकार सा ॥ ६२ ॥ भूतशुद्धिं विधायान्वगंतर्यागं चकार सा ॥ हृदि पद्मासने चार्च्य ज्ञानधर्मादिकान्क्रमात् ॥ ॥ ६३ ॥ शक्तीर्दलेषु वामादीर्दलाग्रे सूर्यवेधसौ ॥ केसराग्रे सोमविष्णू कर्णिकाग्रेऽग्निधूर्जटी ॥ ६४ ॥ तदूर्ध्वे शक्तिचक्रं च विन्यस्तब्रह्मपंचका ॥ अंगैर्दत्त्वा च पाद्यादीनुपचर्याभिषिच्य सा ॥ ६५ ॥ प्रादाच्चंदनपुष्पादि धूपदीपप्रदायिनी ॥ भूयोपि पंचब्रह्माणि षडंगान्यप्यपूजयत् ॥ ६६ ॥ तत्तद्दिक्षु च शक्रादीन्वज्रादींश्च विधानतः ॥ कृत्वा सर्वोपचारांश्च वितताराष्ट्रपुष्पिकाम् ॥ ६७ ॥ पंचवक्त्राणि चाभ्यर्च्य कृतचंडेश्वरार्चना ॥ प्रदक्षिणा प्रणामाद्यैर्नित्यं शिवमपूजयत् ॥ ६८ ॥ शिवागमोक्तविधिना द्रव्यैः सौभाग्यदायिभिः ॥ सा जुहाव च पूजांते प्रणीते जातवेदसि ॥ ६९ ॥ परि कल्पितोपचारा च कंदमूलफलादिकैः ॥ स्वयं कृतोपचारेयमतिथीनभ्यपूजयत् ॥ ७० ॥ अंगुष्ठाग्रेण तिष्ठंती ग्रीष्मे पंचाग्निमध्यतः ॥ ह्रदे च शिशिरे चंद्रपीयूषाप्यायिताऽभवत् ॥ ७१ ॥ वर्षरात्रीषु धाराभिः सह वारिधरा पुनः ॥ सौदामिनीव दहशे तमसि स्तिमिता कृतिः ॥ ७२ ॥ पाणिपादेन पद्मानि मुखेन च कलानिधिम् ॥ प्रदर्शयत्यनायासान्निन्ये सा हैमनीर्निशाः ॥ ७३ ॥ नीवारबीजदानेन

१ आर्षं ह्रस्वत्वम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रमम् ॥ २५ ॥ लूतास्तंतून्नयंत्यत्र कुम्भीरा[1]ः शैवलान्यपि ॥ शिशून्पुष्णंति नीवारैः सफरान्भूरिमायवः ॥ २६ ॥ हरंत्यवकरान्वालैश्चमराः
स्फीतरोमभिः ॥ समीकुर्वंति चोद्धूतैर्विषाणैर्यत्र सैरिभाः ॥ २७ ॥ वानराः फलपुष्पाणि मधुपत्राणि भल्लुकाः ॥ क्रोडाः स्नानीयमृत्स्नां च यत्र
र्षिभ्यो नयंत्यहो ॥ २८ ॥ काकोलूकैः शुकश्येनैर्मृगव्याघ्रैर्हरिद्विपैः ॥ कलापिसर्पैर्यत्राखुमार्जारैः सौहृदं श्रितम् ॥ २९ ॥ हूयमानपुरोडा
शद्रव्यसौरभ्यहारिणी ॥ यत्र द्रुमांतरालेभ्यो धूम्या निर्याति पावनी ॥ ३० ॥ पठंति शतरुद्रीयं यत्र वायसवैरिण[2]ः ॥ गृणंति काकाः
स्तोत्राणि साम गायंति सारिका[3]ः ॥ ३१ ॥ शाकशालिषु शार्दूलाश्चरंति च तथैव गाः ॥ सिंचंति पुष्करांभोभिः कुम्भिनो यत्र पादपान् ॥
॥ ३२ ॥ क्वचिच्च शोभने देशे पुण्ये पुण्यमनोहरे ॥ ददर्श सा तपस्यन्तं यं कंचिदृषिसत्तमम् ॥ ३३ ॥ अधस्तात्सप्तपर्णस्य चित्रव्या
घ्रत्वगासने ॥ बद्धवीरासनं सम्यक्पावने कुशविष्टरे ॥ ३४ ॥ शालिशूकारुणाभाभिर्जटाभिर्भस्मपांडुरम् ॥ अचंचलाभिर्विद्युद्भिरिव शारद
वारिदम् ॥ ३५ ॥ नासाग्रनिश्चलदृशं समप्रस्फुरिताधरम् ॥ आवर्त्तयन्तं रुद्राक्षमालिकामग्रपाणिना ॥ ३६ ॥ प्रत्यग्र[4]निर्णेजनतो ह्यत्य[5]
श्यानदशांचले ॥ वसानं वल्कलयुगे संध्याभ्रे भूभृतां यथा ॥ ३७ ॥ षड्वर्गहिंस्रबंधाय स्थापितां वागुरामिव ॥ उपवीतत्रयीमारादुरोगर्तस्य
बिभ्रतम् ॥ कृतोचितोपचारा सा तमप्राक्षीत्तपोधनम् ॥ ३८ ॥ ॥ पार्वत्युवाच ॥ ॥ कस्त्वं कोऽयं गिरिवरो यत्र त्वं कुरुषे तपः ॥ ३९ ॥
स चाहारुणशैलोऽयं पुण्यक्षेत्रेषु पूजितः ॥ गौतमोऽहं मुनिर्मुक्त्यै तपसाराधये शिवम् ॥ ४० ॥ इत्युक्त्वा विजयादीनां मुखेनैनाममुं विदन् ॥ प्रणम्य
भक्त्या बहुशो नीतवानुटजं निजम् ॥ ४१ ॥ कन्दमूलफलाद्यैश्च कृतातिथ्यामिमां मुनिः ॥ जगन्मंगलमूलाय तपसे चान्वमन्यत ॥ ४२ ॥
ज्योतिःस्तम्भस्य संभूतिमारभ्यानुक्रमेण सः ॥ जगाद चास्यै शोणाद्रेर्महिमानमशेषतः ॥ ४३ ॥ शोणाद्रेः पूर्वदिग्भागे स्थलीश्वरमिति
स्थलम् ॥ यत्र संनिहितः शंभुर्ज्योतिर्लिंगात्मतां गतः ॥ ४४ ॥ वैकुण्ठपरमेष्ठ्यादिगीर्वाणनिबिडीकृते ॥ न तत्रेमे तपः कर्तुमव्याक्षेपेण शक्यते
॥ ४५ ॥ अयं शोणगिरेः पादः प्रवालाचलनामवान् ॥ पुण्यारण्योपरुद्धत्वाद्रहस्यत्वं विगाहते ॥ ४६ ॥ तत एवाहमत्रैव प्रतिष्ठाप्य त्रिलोचनम् ॥
आराधये यथाशक्ति तपोभिः कल्पितात्मभिः ॥ ४७ ॥ ममाश्रमसमीपेऽस्मिन्पुण्यक्षेत्रमिदं महत् ॥ क्रियतामाश्रमो देव्या कर्त्तव्यं हि तप

१ कुम्भीराः—जलजन्तुविशेषाः नक्रादयः—शैवलानि शैवालानि नयंति—तेन—स्नानपानाद्युपयुक्तोदकशुद्धिं कुर्वन्तीत्यर्थः । २ वायसवैरिणः—कोकिलाः । ३ कारकाः—इ० पा० । ४ प्रत्यग्रं—नवीनम् ।
५ अत्यश्यानदशांचले—अशुष्काग्रे ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्र पर्य्यंतर्पयत प्रजाः ॥ १ ॥ जातु संध्यानुसंधानमुकुलीकृतलोचनम् ॥ बद्धांजलिपुटं देवमद्राक्षीदद्रिनंदिनी ॥ २ ॥ ध्यायते नूनमधुना कापि सौभाग्यशालिनी ॥ क्रियते यन्मयि प्रेम तन्मन्ये वंचनं महत् ॥ ३ ॥ कथं विज्ञायते पुंसां कुटिला मानसी स्थितिः ॥ मिथ्योपचाराद्दक्षेण वंचितास्म्यमुना भृशम् ॥ ४ ॥ मयि दाक्षिण्यमेवास्य मन्ये मनसि चेद्दृढः ॥ जनः सौभाग्यवान्यस्माद्भवति स्नेहभाजनम् ॥ ५ ॥ अद्यप्रभृति ते दासस्तपोभिः क्रीत इत्यपि ॥ मुग्धेंदुशेखरेणास्मि विप्रलब्धा स्मरारिणा ॥ ६ ॥ असमानानुरागेषु नारीणां मूढचेतसाम् ॥ सौभाग्यगर्वो लोकेषु परिहासाय केवलम् ॥ ७ ॥ इति प्रणयरोषेण देव्याः कलुषचेतसः ॥ हव्यवाहातपालीढमिवाननमलक्ष्यत ॥ ८ ॥ बाष्पवारिप्लुवे तस्या आताम्रे च विलोचने ॥ नीलोत्पले जलापूर्णे इव भृन्ना विरेजतुः ॥ ९ ॥ यत्तस्याधीनतिलकं भ्रुवोर्युगमभज्यत ॥ द्वेधाकृतमिवादर्शि मन्मथस्य शरासनम् ॥ १० ॥ अंतर्मन्युभरेणास्याः कंपते स्माधरच्छदः ॥ मुहुः प्रवालस्थायीव रक्ताशोकस्य पल्लवः ॥११॥ अतीव रज्यमानं तत्पार्वत्या गंडमंडलम् ॥ शाणावघर्षमाणिक्यदर्पणप्रतिमं बभौ ॥ १२ ॥ अंतर्वेपधुतौ तस्याश्चकंपाते पयोधरौ ॥ पद्मकोशाविवांतःस्थचंचरीकप्रचालितौ ॥ १३ ॥ अचिंत यच्च संभूय सौभाग्याभावतो ननु ॥ ममायमन्यस्त्रीचिंतां कुरुते चंद्रभूषणः ॥ १४ ॥ तदैषा क्वापि यास्यामि किमत्रास्त्येकया मम तपस्यंते च सौभाग्यमर्जनीयं मयाधुना ॥ १५ ॥ निमीलिताक्षिण्येवास्य गंतव्यं निभृतं मया ॥ न चेन्मां वारयत्येष कंठादुपरि भाषितैः ॥ १६ ॥ वत्सौ तु वर्धयत्येव गंगेयमतिवत्सला ॥ देवस्तु न स्मरत्येव मामन्यस्त्रीपरायणः ॥ १७ ॥ इति निश्चित्य देवस्य पार्श्वादाशु निवृत्त्य सा ॥ अनिर्दिश्य दिशं कांचिद्यातुं व्यग्रा प्रचक्रमे ॥ १८ ॥ चलावती माल्यवती मालिनी विजया जया ॥ वारिता अपि संरंभात्स्वामिनीमन्वयुः स्वयम् ॥ १९ ॥ तत्र सापि गिरीन्पुण्यान्वनानि नगराणि च ॥ सरांसि सरितश्चैषा विचचार समंततः ॥ २० ॥ भ्रमंती सह्यपादेषु द्राविडाख्ये सुनीवृति[1] ॥ तीर्त्वा शक्त्यापगां देवी विजयां समभाषत ॥ २१ ॥ दृश्योऽयं नातिदूरेण पुरस्तात्सकलारुणः ॥ शृंगैस्संलक्ष्यतेऽद्याभिर्नूनं माहात्म्यवान्गिरिः ॥ २२ ॥ उपत्यकासु चैतस्य दृश्यंते तापसाश्रमाः ॥ अतीव पावनाः शांताः पुण्यारण्यमनोहराः ॥ २३ ॥ गत्वा निरूपयामस्तानिमान्पुण्याश्रमान्वयम् ॥ प्रसीदतितरां चेत एषां संदर्शनेन मे ॥ २४ ॥ एवमाह्लादयत्यालिं क्रमेण गिरिनंदिनी ॥ तस्याद्रेर्जग्मुषी पार्श्वमपश्यत्कंचिदा

१ द्राविडाख्ये सुनीवृति—द्राविडाख्य उत्तमदेशे—इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अरुरोचयिषुः काममधाक्षीत्कालवह्निना ॥ १० ॥ जितेंद्रियं च तं देवं क्वापि यातं गणैः सह ॥ तपोभिस्तोषयामास गौरी शिखरवासिनी ॥ ११ ॥ उपयम्याथ तां देवो वृत्तांतैश्चित्त[1]खंडिभिः ॥ रमयामास चैकांते मोदस्वेति विलासिनीम् ॥ १२ ॥ वैधव्यखिन्नया रत्या प्रार्थिता शैलनंदिनी ॥ कामपीठे तपस्यंती कामं प्रत्युददीपयत् ॥ १३ ॥ पुनश्च मेनया मात्रा पित्रा च हिमभूभृता ॥ आनीता भवनं भर्त्रा साकं चिरमरंस्त सा ॥ १४ ॥ तदा शुंभनिशुंभाख्यौ लेभाते वेधसो वरम् ॥ देवदानवमर्त्येषु मास्तु नौ पुरुषान्मृतिः ॥ १५ ॥ इति तद्वचनं श्रुत्वा जातत्रासैः सुपर्वभिः ॥ अभ्यर्थितोऽवदद्देवो रहश्चक्रधरादिभिः ॥ १६ ॥ माभैष्ट भद्र कालेन तथा प्रतिविधीयते ॥ यथा निषूदितौ स्यातां तादृशौ दानवाविति ॥ १७ ॥ दत्ताभयान्मुकुंदादीन्विसृज्यांधकसूदनः ॥ अंतःपुरगतो रेमे देव्या सह यथा पुरा ॥ १८ ॥ कदाचिन्मर्मलक्ष्येण प्रीत्या कालीति निंदिता ॥ तस्य प्रीत्यै कालिका च त्वचमेवाजहान्निजाम् ॥ १९ ॥ यत्रोत्क्षिप्तवती चर्म स्वेच्छया परमेश्वरी ॥ महाकाशीप्रपाताख्यं तदभूत्क्षेत्रमुत्तमम् ॥ २० ॥ सा च त्वक्कौशिकी नाम्ना काली विंध्याद्रिवासिनी ॥ तपस्यंती वृषस्यंतौ[2] तौ जघान महासुरौ ॥ २१ ॥ देवी च गौरी शिखरे तस्मिन्नेव मनोहरे ॥ तपोभिर्लब्धगौरीत्वाद्भर्त्तारं समतोषयत् ॥ २२ ॥ क्रमेण दौर्हृदवती भूत्वा प्रासूत पार्वती ॥ गजाननं च हेरंबं सेनान्यं च षडाननम् ॥ २३ ॥ तौ चागमविदः प्राहुर्नारायणचतुर्मुखौ ॥ पूर्वापराधशुद्ध्यर्थं देवीगर्भसमुद्भवौ ॥ २४ ॥ वर्धमानौ च तौ बालौ पित्रोरालोकमानयोः ॥ मग्नयोरिव वर्षाब्धौ प्रेमग्रंथिरभूद्दृढा ॥ २५ ॥ जातु वीणानिनादेन कदाचिच्चित्रलेखनैः ॥ विजह्रतुश्शिवौ स्वैरमेकदा मंडनैर्मिथः ॥ २६ ॥ जातु विद्या[3]गमालापैः कदाचिच्चित्रवस्तुभिः ॥ एकदा लोकवृत्तांतैर्दंपतिभ्यां विनोदितम् ॥ २७ ॥ पुष्पावचयनैर्जातु कदाचिद्वारिखेलनैः ॥ अदीव्यतां च रागाद्रौ दोलाकेलिभिरेकदा ॥ २८ ॥ मैनाकेनार्चितौ जातु मेनया जातु पूजितौ ॥ जात्वर्हितौ हिमवता दंपती तौ विनोदितौ ॥२९॥ जातु द्यूतविनोदेन गीतगोष्ठ्या कदाचन ॥ एकदा दानलीलाभिः शिवौ चिक्रीडतुश्चिरम् ॥ ३० ॥ द्यूतनिर्जितमाच्छिद्य पत्युरुत्संगतां गतम् ॥ वलयीकृतमेणांकं[4] ताटंकीकृतवत्युमा ॥ ३१ ॥ इति तौ पितरौ चराचराणां निवसंतौ कनकाचलादिकेषु ॥ रुचिरेषु पदेषु कामभोगानतिहृद्यान्सुचिरं किलान्वभूताम् ॥ ३२ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां प्रथमे माहेश्वरखण्डेऽरुणाचलमाहात्म्य उत्तरार्धे शिवपार्वतीविहारवर्णनंनाम सप्तदशोऽध्यायः ॥ १७ ॥ ॥ छ ॥ ॥ नंदिकेश्वर उवाच ॥ ॥ गार्हस्थ्यं बिभ्रती भर्तुरेकाम्रतलवासिनः ॥ पक्वान्नपानैस्सा

१ चित्तखण्डिभिः—प्रणयवशतो मानखण्डनैः वृत्तांतैः—नर्मकेलिभिः—इत्यर्थः। २ वृषस्यन्तौ—कामुकौ—इत्यर्थः। ३ दिव्यागमालापैः—इ०पा०। ४ एणांकम्—चन्द्रम्—इत्यर्थः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्यां ब्रह्मर्षयो देवा गंधर्वा दिव्ययोषितः ॥ सिद्धविद्याधरा यक्षाः पौरत्वं समुपाययुः ॥ ५६ ॥ तीर्थानि धार्य कूपत्वं गंगाद्याः सरितस्तथा ॥
नंदनादीनि च वनान्यभवन्निष्कुटत्वतः[1] ॥५७॥ गोलोको गोगोष्ठतया नैगमत्वं किलागमाः ॥ शैलाश्च गोपुरादित्वं स्मृतयो विधितां ययुः ॥५८॥
भूताः प्रेताः पिशाचाश्च वेतालाः कटपूतनाः ॥ प्रपन्ना मानुषं देहं तस्यां किल पृथग्जनाः ॥ ५९ ॥ देवोपि धूर्जटिस्तस्यां कौतुकी सिद्धरूपधृक् ॥
योगित्वं समुपास्थाय मात्राकौपीनमुण्डधृक् ॥६०॥ न केनचिद्विज्ञातः सदा सर्वत्र दीप्यति ॥ तौ च केशवलोकेशौ जटिलौ भस्मगुण्ठितौ ॥६१॥
दांतौ शोणाद्रिनाथं तमर्चयामासतुश्चिरम् ॥ तत्रत्यानां च सर्वेषां वर्णानामानुगुण्यतः ॥ ६२ ॥ दीक्षादिकानि चक्राते स्वयमाचार्यतां गतौ ॥
क्रमेण हृतनिर्माल्यौ सर्वागमरहोविदौ ॥ ६३ ॥ प्रातः स्नात्वा समाहृत्य पुष्पपत्रादिकं फलम् ॥ मंत्रं चारुणनाथस्य तत एव रहः श्रुतम् ॥ ६४ ॥
जंजलपाकौ जजपतुः सर्वमंत्राधिकं सदा ॥ धूपप्रदीपनैवेद्यैर्गीतवादित्रनर्तनैः ॥ ६५ ॥ प्रदक्षिणानमस्कारैर्मुद्राबंधैर्नवैर्नवैः ॥ आसनेन च मूर्त्या
च मूलेन च यथाविधि ॥ ६६ ॥ पंचब्रह्मषडंगाद्यैरर्चयामासतुः शिवम् ॥ एवं वर्षसहस्राणि षोडशारुणशंकरम् ॥ ६७ ॥ वेधोविष्णू समाराध्य
शिवज्ञानमवापतुः ॥ ६८ ॥ इतीदमश्रावि मया रहस्यं पितुः शिलादस्य मुखात्पुरा यत् ॥ निवेदितं चाद्य तदेव तुभ्यं किमन्यदाकर्णयितुं मनीषा
॥ ६९ ॥ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां प्रथमे माहेश्वरखण्डेऽरुणाचलमाहात्म्य उत्तरार्धे ब्रह्मविष्णुकृतारुणाचलेश
मंदिरवर्णनंनाम षोडशोऽध्यायः ॥ १६ ॥ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ इति श्रुत्वास्य वचनं मार्कंडेयोऽभ्यभाषत ॥ ॥ मार्कंडेय उवाच ॥ ॥
श्रुतमेव मया देव श्रोतव्यं भवतो मुखात् ॥ १ ॥ तथापि कौतुकेनाहमाक्रांतो मुनयोऽप्यमी ॥ गौर्या कथं तपस्तप्तं महादेव्यात्र कथ्यताम् ॥ २ ॥
॥ ॥ नंदिकेश्वर उवाच ॥ ॥ कथयामि तदप्येतद्यथाऽधिगतमात्मना ॥ शृणु त्वमवधानेन मार्कंडेय महांमते[2] ॥ ३ ॥ ननु जानासि तत्पूर्वं
यथा दाक्षायणीं शिवः ॥ उपयेमे सतींनाम सतीनामधिदेवताम् ॥ ४ ॥ यथा च सा क्रुधा भर्तुर्द्रुहि दक्षप्रजापतौ ॥ योगादहासीदात्मीयं वपुरित्यपि
ते श्रुतम् ॥ ५ ॥ तदा हराज्ञानिघ्नेन वीरभद्रेण यत्कृतम् ॥ अध्वरध्वंसनं दक्षस्यापि ते विदितं महत् ॥ ६ ॥ अश्रौषीस्तस्य दक्षस्य गणैः शीर्षास
खंडनम् ॥ ब्रह्माच्युतेंद्रमुख्यानां देवानामपि शिक्षणम् ॥ ७ ॥ दंतघातं रवेः पाणिपाटनं जातवेदसः ॥ अदितिप्रभृतीनां च दिव्यस्त्रीणां पराभवम् ॥
॥ ८ ॥ सा च देवी पुनर्जन्म लेभे हिमवतो गृहे ॥ उमेति पार्वतीत्याख्यां द्वितीयां बिभ्रती पुनः ॥ ९ ॥ देवः स्थाणुवने तां च परिचर्यापरां रहः ॥

१ 'गृहारामास्तु निष्कुटाः'--इति कोशः । २ महामुने--इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वचनं मार्कंडेय ममांतिकम् ॥ ६ ॥ प्रविश्य दुःखमतुलं जहीहि खलु मा शुचः ॥ तच्छ्रुत्वा चित्रवचनमप्रतर्क्यं तदा मुनिः ॥ ७ ॥ विस्मयं परमं लेभे स्वदुःखं नाप्यचिन्तयत् ॥ वारिभिः शीर्यते नैतद्दह्यते कालवह्निना ॥ ८ ॥ संवर्तकादिभिर्नैतच्छोष्यते नापि चाल्यते ॥ एकार्णवे महाघोरे नौरिव क्षेत्रमीक्ष्यते ॥ ९ ॥ तत्रायं यूपसदृशो न्यग्रोधस्तिष्ठते महान् ॥ यं गृहीत्वा क्षेत्रमिदं न्यग्रोध ईशितुस्तनुः ॥ १० ॥ महाप्रलय वातेन शाखा नास्य हि कम्पते ॥ तस्याधस्तात्स हि मुनिः स्थित्वा चैतदचिंतयत् ॥ ११ ॥ एकार्णवेऽस्मिन्प्रलये नष्टे स्थावरजंगमे ॥ भूप्रदेशः स्थिरतरः कथमेष विभाव्यते ॥ १२ ॥ यत्रायं शाखिप्रवरः कोमलः परिदृश्यते ॥ मार्कंडेयागच्छ मुहुरिति सप्रश्रयं वचः ॥ १३ ॥ कुतो निरा श्रमियदं चिन्तयन्निति स प्लवन् ॥ शंखचक्रगदापाणिं नारायणमलोकयत् ॥ १४ ॥ तदंगपद्मासनगां मां च वैवस्वतैक्षत ॥ विवशो जलत्राता भ्यां तदा सुस्थो व्यवस्थितः ॥ १५ ॥ हृष्टांतरात्मा स मुनिरावां साष्टांगमानतः ॥ प्रसादनाय देवस्य स्तोत्रमेतदुदाहरत् ॥ १६ ॥ ॥ मार्कंडेय उवाच ॥ ॥ त्वत्पादपद्मानुसरानुषंगं रुद्रेंद्रपद्मासनसम्पदाढ्यम् ॥ त्वद्भक्तिहीनं परितः प्रतप्तं दीनं परित्राहि कृपांबुधे माम् ॥ १७ ॥ ब्रह्मादि भिर्यत्परिचर्यमाणं पदाम्बुजद्वन्द्वमचिंत्यशक्ति ॥ श्वःश्रेयसप्राप्तिनिदानतत्त्वं दीनं परित्राहि कृपाम्बुधे माम् ॥ १८ ॥ यदंगभूतं जगदण्डमेतदने ककोटिप्रगुणं विभाति ॥ लीलाविलासस्थितिसृष्टिलीनं तन्मां सुदीनं परिरक्ष विष्णो ॥ १९ ॥ एकं सुवर्णं कटकादिभेदैर्नाना यथा वा नभ सोदितोऽर्कः ॥ आधारवैषम्यजलेषु तादृग्विभाव्यसे निर्गुण एक एव ॥ २० ॥ अशेषसंपूर्णरुचिप्रहीणोपादानसंकल्पविवर्जितोऽपि ॥ दीनानुकं पानुगुणं बिभर्षि युगे युगे देहमपारशक्ते ॥ २१ ॥ त्वत्पादपद्मं जगदीश पूर्वमसेव्यतानात्मधिया मया यत् ॥ तत्कर्मणा दारुणपाकभाजं दीनं परित्राहि कृपांबुधे माम् ॥ २२ ॥ अशेषलोकस्थितिसृष्टिलीनविलासि यत्ते त्रिगुणं विभाति ॥ वपुर्महात्मन्महदादिहेतुर्हेतोर्नमस्ते प्रकृतेः परस्य ॥ ॥ २३ ॥ सर्वत्र गत्वा बृहदप्रमेयं प्रवर्द्धमानं त्वयि बृंहितं च ॥ तद्ब्रह्मरूपं परिणामहेतुं स्वाध्यात्मविश्वात्मकमाश्रयामि ॥ २४ ॥ एकार्णवे महाघोरे नावस्थातुं प्रदेशभूः ॥ अस्ति लक्ष्मीपते मेघवारिवातप्रकंपनात् ॥ २५ ॥ त्राहि विष्णो जगन्नाथ मग्नं संसारसागरे ॥ मामुद्धरास्माद्गो विंद कृपापांगविलोकनात् ॥ २६ ॥ ॥ श्रीरुवाच ॥ ॥ स्तुवंतमेवं ब्रह्मर्षिं साक्षान्नारायणो विभुः ॥ विलोक्यानुग्रहदृशा वाक्यं चेदमुवाच ह ॥ २७ ॥ ॥ श्रीभगवानुवाच ॥ ॥ मार्कंडेय सुदीनोऽसि मामज्ञाय द्विजोत्तम ॥ दुश्चरं तु तपस्तप्तं दीर्घायुस्तेन केवलम् ॥ २८ ॥ शयानं पत्रपुटके पश्य कल्पवटोर्ध्वगम् ॥ बालस्वरूपं सर्वेषां कालात्मानं महामुने ॥ प्रविश्य विस्तृतं वक्त्रं तत्रावस्थातुमर्हसि ॥ २९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ॥ श्रीरुवाच ॥ ॥ एवमुक्तो भगवता स मुनिर्विस्मिताननः ॥ ३० ॥ आरुह्य ददृशे बालरूपं तस्याविशन्मुखे ॥ प्रविष्टः कंठमार्गेण महायामं महोदरम् ॥ ३१ ॥ तत्रासौ ददृशे विप्रो भुवनानि चतुर्दश ॥ ब्रह्मादिदिक्पालसुरान्सिद्धगंधर्वराक्षसान् ॥ ३२ ॥ ऋषीन्दिव्य ऋषींश्चैव भूतलं सागरांकितम् ॥ नानातीर्थैर्नदीभिश्च पर्वतैः काननैस्तथा ॥ ३३ ॥ लक्षितं पत्तनपुरं ग्रामखर्वटकैर्युतम् ॥ पातालानि तथा सप्त नागकन्याः सहस्रशः ॥ ३४ ॥ महार्घ्यमणिसौधैश्च सुधापात्रैः समुज्ज्वलैः ॥ अनर्घ्यमणिभिर्नागैः सेवितं परमाद्भुतम् ॥ ॥ ३५ ॥ जगतां धारिणं शेषं सहस्रफणमंडितम् ॥ व्याकर्तारमशेषाणां शास्त्राणां शिष्यमध्यगम् ॥ ३६ ॥ ब्रह्मांडोदरगं वस्तु यत्किंचित्परमेष्ठिना ॥ सृष्टं सर्वं ददृशेऽसौ तत्कुक्षौ स महामुनिः ॥ ३७ ॥ नापश्यदंतं कुक्षेस्तु भ्रममाण इतस्ततः ॥ ततो विनिष्क्रम्य पुनर्ददृशे च मया सह ॥ ३८ ॥ पूर्वमालक्षितं यद्वदास्थितं पुरुषोत्तमम् ॥ विस्मयोत्फुल्लनयनः प्रणिपत्येदमब्रवीत् ॥ ३९ ॥ ॥ मार्कंडेय उवाच ॥ ॥ भगवन्देवदेवेश किमद्भुतमिदं प्रभो ॥ महाप्रलयसंरोधे सृष्टिरत्र विभाव्यते ॥ ४० ॥ त्वन्माया दुरवच्छेद्या कथं वै ज्ञायते मया ॥ ॥ ४१ ॥ ॥ श्रीभगवानुवाच ॥ ॥ मुने क्षेत्रमिदं चित्रं शाश्वतं मे विभावय ॥ न सृष्टिप्रलयावत्र विद्येते न च संसृतिः ॥ ४२ ॥ सदैकरूपं पुरुषोत्तमाख्यं मुक्तिप्रदं मामिह संप्रबुध्य ॥ अत्र प्रविष्टो न पुनः प्रयाति गर्भस्थितिं सांद्रसुखस्वरूपः ॥ ४३ ॥ इत्याज्ञप्तो भगवता मार्कंडेयो महामुनिः ॥ अत्र वासं करिष्यामीत्यन्यतीर्थपराङ्मुखः ॥ प्रहृष्टवदनः प्राह प्रणिपत्य जगद्गुरुम् ॥ ४४ ॥ ॥ मार्कंडेय उवाच ॥ ॥ उवाच स तथा विष्णुं भक्तिश्रद्धासमन्वितः ॥ अनुगृह्णीष्व भगवन्क्षेत्रेऽस्मिन्पुरुषोत्तमे ॥ यथा स्थितो मृत्युवशं न व्रजे पुरुषोत्तम ॥ ४५ ॥ ॥ श्रीभगवानुवाच ॥ ॥ अत्र स्थितिं मे विप्रर्षे क्षेत्रे मोक्षप्रसाधके ॥ ४६ ॥ करिष्यामि न संदेहो यावदाभूतसंप्लवम् ॥ प्रलयावसाने तीर्थं ते रचयिष्यामि शाश्वतम् ॥ ४७ ॥ यत्तीरे तप आस्थाय मद्द्वितीयतनुं शिवम् ॥ आराध्य मदनुक्रोशान्मृत्युं जेष्यसि निश्चितम् ॥ ४८ ॥ ॥ जैमिनिरुवाच ॥ ॥ एवं पुरा दत्तवरो मार्कंडेयो महामुनिः ॥ न्यग्रोधवायव्यकोणे खातं चक्रेण वै हरेः ॥ ४९ ॥ पावनं गर्तमास्थाय पूजयित्वा महेश्वरम् ॥ महता तपसा विप्रो जितवान्मृत्युमंजसा ॥ ५० ॥ मुनेस्तस्यैव नाम्नायं प्रख्यातो गर्त्त उत्तमः ॥ यत्र स्नात्वा शिवं दृष्ट्वा वाजिमेधफलं लभेत् ॥ ५१ ॥ ॥ ॥ श्रीरुवाच ॥ ॥ पञ्चक्रोशमिदं क्षेत्रं समुद्रांतर्व्यवस्थितम् ॥ द्विक्रोशं तीर्थराजस्य तटभूमौ सुनिर्मलम् ॥ ५२ ॥ सुवर्णवालुकाकीर्णं नीलपर्वतशोभितम् ॥ योऽसौ विश्वेश्वरो देवः साक्षान्नारायणात्मकः ॥ ५३ ॥ संयम्य विषयग्रामं समुद्रतटमास्थितः ॥ उपासितुं जगन्नाथं चतुः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

षष्टितमः प्रभुः ॥ ६४ ॥ यमेश्वर इति ख्यातो यमसंयमनाशनः ॥ यं दृष्ट्वा पूजयित्वा तु कोटिलिंगफलं लभेत् ॥ ६५ ॥ इति श्रीस्कांदे महा
पुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे पुरुषोत्तमक्षेत्रमाहात्म्ये जैमिनिऋषिसंवादे तृतीयोऽध्यायः ॥ ३ ॥ ॥ श्रीरुवाच ॥ ॥
सीमाप्रतीची क्षेत्रस्य शंखाकारस्य मूर्द्धनि ॥ सर्वकामप्रदो देवः स आस्ते वृषभध्वजः ॥ १ ॥ शंखाग्रे नीलकण्ठः स्यादेतत्क्रोशं सुदुर्लभम् ॥
परमं पावनं क्षेत्रं साक्षान्नारायणस्य वै ॥ २ ॥ सिंधुराजस्य सलिलाद्यावन्मूलं वटस्य वै ॥ शंखस्योदरभागस्तु समुद्रोदकसंप्लुतः ॥ ३ ॥ यत्संप
र्कात्समुद्रोऽत्र तीर्थराजत्वमागतः ॥ यथायं भगवान्मुक्तिप्रदोदृष्टिपथं गतः ॥ ४ ॥ तथेदं मरणात्क्षेत्रं सिंधुः स्नानाद्विमुक्तिदः ॥ चिच्छेद ब्रह्मणः
पूर्वं रुद्रः क्रोधात्तु पञ्चमम् ॥ ५ ॥ तच्छिरो दुस्त्यजं गृह्णन्ब्रह्मांडं परिबभ्रमे ॥ अत्रागतो यदा ब्रह्मकपालं परिमुक्तवान् ॥ ६ ॥ कपालमोचनं लिंगं
द्वितीयावर्तसंस्थितम् ॥ कपालमोचनं पश्येत्पूजयेत्प्रणमेच्च यः ॥ ७ ॥ ब्रह्महत्यादिपापानां कंचुकं विजहात्यसौ ॥ तस्य दक्षिणपार्श्वे तु मरणं
भवमोचनम् ॥ ८ ॥ तृतीयावर्तगामाद्यां शक्तिं मे विमलाह्वयाम् ॥ जानीहि धर्मराज त्वं भुक्तिमुक्तिफलप्रदाम् ॥ ९ ॥ य इमां पूजयेद्भक्त्या प्रण
मेत्कीर्तयेत्तु वा ॥ सर्वान्कामानवाप्नोति मुक्तिं चांते च विंदति ॥ १० ॥ नाभिदेशे स्थितं ह्येतत्त्रयं कुंडं वटो विभुः ॥ कपालमोचनाद्यावदर्द्धा
शिनी प्रतिष्ठिता ॥ ११ ॥ मध्यं शंखस्य जानीयात्सुगुप्तं चक्रपाणिना ॥ अर्द्धमश्नाति सलिलं महाप्रलयवर्द्धितम् ॥ १२ ॥ सृष्ट्यादौ धर्मरा
जेयं शक्तिर्मेऽर्द्धांशिनी स्मृता ॥ तां दृष्ट्वा प्रणमेद्यस्तु भोगान्सोऽश्नाति शाश्वतान् ॥ १३ ॥ सिन्धुराजस्य सलिलाद्यावन्मूलं वटस्य वै ॥ कीटपक्षि
मनुष्याणां मरणान्मुक्तिदो मतः ॥१४॥ अन्तर्वेदी त्वियं पुण्या वांछ्यते त्रिदशैरपि ॥ यत्र स्थितां हि पश्यंति सर्वांश्चक्राब्जधारिणः ॥१५॥ पृथिव्यां
यानि तीर्थानि गगने च त्रिविष्टपे ॥ सार्द्धत्रिकोटिसंख्यानि स्वर्गमोक्षप्रदानि वै ॥ १६ ॥ तेषामयं तीर्थराजः कीर्तितः पुरुषोत्तमः ॥ सर्वेषां
मुक्तिक्षेत्राणामिदं सायुज्यदं मतम् ॥ १७ ॥ अत्र स्थिता न शोचंति जराजन्ममृतिष्वपि ॥ कुण्डं ह्येतद्रोहिणाख्यं कारुण्याख्यजलेन वै ॥ १८ ॥
संभृतं तिष्ठते नित्यं स्पर्शनाद्बंधमुक्तिदम् ॥ अत्र प्रतिष्ठितं वारि प्रलये यत्प्रवर्द्धते ॥ १९ ॥ अत्रैव लीयते पश्चात्तस्माद्रोहिणसंज्ञितम् ॥ तस्मात्ते
माऽत्र चिंतास्तु स्वाधिकारविपर्यये ॥ २० ॥ मोक्षाधिकारिणामत्र नेश्वरस्त्वं परेतराट् ॥ धर्मराजं समादिश्य लक्ष्मीरेवं पुरः स्थितम् ॥ २१ ॥
ब्रह्माणमाह जगतामंबा सप्रश्रया गिरा ॥ पितामह जगन्नाथ विदितं सर्वमेव यत् ॥ २२ ॥ मोक्षदं सर्वजंतूनामेतत्क्षेत्रं समादिश ॥ कामाख्यं
क्षेत्रपालं च विमलं वा तपास्थिता ॥ २३ ॥ साक्षाद्ब्रह्मस्वरूपोऽसौ नृसिंहो दक्षिणे विभोः ॥ हिरण्यकशिपोर्वक्षो विदार्यायं प्रभोज्ज्वलः ॥ २४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दर्शनादस्य नश्यंति पातकानि न संशयः ॥ भुक्तेर्मुक्तेश्च योग्यः स्यान्नात्र कार्या विचारणा ॥ २५ ॥ अस्याग्रे संत्यजन्प्राणान्ब्रह्मसायुज्यमाप्नु
यात् ॥ यत्किंचित्कुरुते कर्म कोटिकोटिगुणं भवेत् ॥ २६ ॥ छायैषा कल्पवृक्षस्य नृसिंहार्केण भासिता ॥ तस्यां नश्यत्यविद्या हि ज्ञानतोऽ
ज्ञानतो मृतौ ॥ २७ ॥ वेदांतेषु प्रसिद्धैस्तैर्विज्ञानैः श्रवणादिभिः ॥ मूढानां दुर्लभैर्विप्रा विनाप्यत्र विमोचनम् ॥ २८ ॥ अविमुक्ते मुमुक्षोस्तु
कर्णमूले महेश्वरः ॥ दिशति ब्रह्मसंज्ञानं बोधोपायं कृपानिधिः ॥ २९ ॥ तेन बुद्ध्या समभ्यस्य क्रमान्मोक्षमवाप्नुयात् ॥ उपदेष्टुर्महिम्ना हि
तस्य ज्ञानं न हीयते ॥ ३० ॥ अत्र त्यजंति ये प्राणांस्तेषां तत्क्षण एव हि ॥ स्वरूपाज्जायते मुक्तिः संशयो माऽस्तु ते यम ॥ ३१ ॥ गतागत
प्रसक्तानां कर्मिणां मूढचेतसाम् ॥ वैवस्वत कदाचिन्नो विश्वासो ह्यत्र जायते ॥ ३२ ॥ उत्सृज्य वारि गांगेयं स्वादु शीतं सुनिर्मलम् ॥ पिपासुः
पल्वलं याति तद्वत्ते मूढचेतसः ॥ ३३ ॥ भ्रमंति तीर्थान्यन्यानि त्यक्त्वैतत्क्षेत्रमुत्तमम् ॥ पलाशामोदकैस्तृप्ता लभंते श्रमजं फलम् ॥ ३४ ॥
स्नानादब्धिर्दृशा देवश्छायया कल्पपादपः ॥ यत्र कुत्रापि च क्षेत्रं मरणान्मुक्तिदं नृणाम् ॥ ३५ ॥ यो यत्र विषये भक्त्या विश्वासं कुरुते नरः ॥
स तु तेनैव मुच्येत नेदृशं तीर्थमस्ति वै ॥ ३६ ॥ एतत्त्यक्त्वान्यतीर्थे वै विदधाति रुचिं तु यः ॥ नूनं स मायया विष्णोर्वंचितो लोभलालसः ॥
॥ ३७ ॥ उपदेशेन बहुना न प्रयोजनमस्ति ते ॥ प्रत्यक्षो ह्यनुभूतोऽयं करटो विष्णुरूपधृक् ॥ ३८ ॥ अन्तर्वेदीरक्षणार्थं शक्तयोऽष्टौ प्रकीर्तिताः ॥
उग्रेण तपसा पूर्वमहं रुद्रेण भाविता ॥ ३९ ॥ पत्न्यर्थं सा मया सृष्टा गौरी तस्याथ भाविनी ॥ सर्वसौंदर्यवसतिर्वपुषो मे विनिर्गता ॥ ४० ॥
तदादिष्टा मया भद्रे वचनं मे प्रियं कुरु ॥ अन्तर्वेदीं रक्ष मम परितस्त्वं स्वमूर्तिभिः ॥ ४१ ॥ सा तु तिष्ठति मत्प्रीत्या अष्टधा दिक्षु
संस्थिता ॥ मंगला वटमूले तु पश्चिमे विमला तथा ॥ ४२ ॥ शंखस्य पृष्ठभागे तु संस्थिता सर्वमंगला ॥ अर्द्धांशिनी तथा लंबा
कुबेरदिशि संस्थिता ॥ ४३ ॥ कालरात्रिर्दक्षिणस्यां पूर्वस्यां तु मरीचिका ॥ कालरात्र्यास्तथा पश्चाच्चंडरूपा व्यवस्थिता ॥ ४४ ॥ एताभिरु
ग्ररूपाभिः शक्तिभिः परिरक्षितम् ॥ अल्पपुण्यस्य पुंसो हि स्थानमेतत्सुदुर्लभम् ॥ ४५ ॥ एतासामष्टशक्तीनां दर्शनात्कीर्तनात्तथा ॥
नश्यंति सर्वपापानि हयमेधफलं लभेत् ॥ ४६ ॥ रुद्राण्याश्चाष्टधा भेदं दृष्ट्वा रुद्रोऽपि शंकरः ॥ आत्मानमष्टधा भित्त्वा उपास्ते परमेश्वरम् ॥४७॥
आराध्य तपसा विष्णुं प्रार्थयद्वरमुत्तमम् ॥ यत्र त्वं देव तत्राहं वसेयं हि यथासुखम् ॥ ४८ ॥ त्वामृते कमलाकांत नान्यन्निर्वाणकारणम् ॥
अंतर्यामिन्प्रभो मे त्वं त्वां विना विग्रहः कुतः ॥४९॥ मूढा ये त्वां न जानंति हृष्यंति विषयेऽशुचौ ॥ निर्मलांबरसंकाशं त्वामहं शरणं गतः॥५०॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ॥ जैमिनिरुवाच ॥ ॥ भगवानपि रुद्रं तं क्षेत्रपालं तथा विभुः ॥ स्थापयामास परितः स्वयं मध्ये व्यवस्थितः ॥ ५१ ॥ कपालमोचनं
नाम क्षेत्रपालं यमेश्वरम् ॥ मार्कंडेयं तथेशानं बिल्वेशं नीलकंठकम् ॥ ५२ ॥ वटमूले वटेशं च लिंगान्यष्टौ महेशितुः ॥ यानि दृष्ट्वा तथा
स्पृष्ट्वा पूजयित्वा विमुच्यते ॥ ५३ ॥ अत्र क्षेत्रे मृता ये च न तेषां तु प्रभुर्यमः ॥ यदर्थमागतस्त्वं हि तदन्यत्र प्रसाधय ॥ ५४ ॥ तथाप्यसौ जग
न्नाथो भक्तायात्मसमर्पकः ॥ यमेन तोषितो भक्त्या प्रपन्नार्तिहरः प्रभुः ॥ ५५ ॥ सुदर्शनेन चक्रेण मायां च व्यवधास्यति ॥ अत्याज्येऽस्मिन्क्षेत्र
वरे स्वर्णवालुकया वृते ॥ ५६ ॥ तं यमं वंचयित्वा तु प्रस्थापय्य यमालयम् ॥ साधु मत्वा ततः प्राह ब्रह्माणं पुरतः स्थितम् ॥ ५७ ॥ ॥
श्रीरुवाच ॥ ॥ इंद्रद्युम्नोनाम राजा युगे सत्ये भविष्यति ॥ वैष्णवः सर्वयज्ञानामाहर्त्ता शास्त्रकोविदः ॥ ५८ ॥ अत्रागत्य महाभक्तिं करिष्यति
नृपोत्तमः ॥ भगवत्प्रीतये येन वाजिमेधसहस्रकम् ॥ ५९ ॥ करिष्यते प्रजानाथ तदनुग्रहकारणात् ॥ एकदारुसमुत्पन्नश्चतुर्द्धा संभविष्यति ॥
॥ ६० ॥ दारवप्रतिमानानि विश्वकर्मा घटिष्यति ॥ प्रतिष्ठापयिता त्वं हि इंद्रद्युम्नप्रसादितः ॥ ६१ ॥ अस्माकं सदृशानां च प्रतिमानां पिता
मह ॥ तद्रूपका प्रतिष्ठा हि घटना च भविष्यति ॥ ६२ ॥ इति श्रुत्वा श्रियो वाक्यं चतुर्वक्त्रो यमश्च सः ॥ स्वंस्वं पुरं जग्मतुस्तौ मुदा परमया
युतौ ॥ ६३ ॥ क्षेत्रस्य महिमानं तं संस्मृत्य च मुहुर्मुहुः ॥ विस्मयेन च हर्षेण रोमांचांचितविग्रहौ ॥ ६४ ॥ सांप्रतं मुनयस्तस्मिन्निंद्रद्युम्नप्रसा
दितः ॥ शंखचक्रधरः श्रीमान्नीलजीमूतसंनिभः ॥ ६५ ॥ नीलाचलगुहांतःस्थो बिभ्रद्दारुमयं वपुः ॥ आस्ते लोकोपकाराय बलेन च सुभद्रया ॥
॥ ६६ ॥ सुदर्शनेन चक्रेण दारुणा निर्मितेन च ॥ सहितः प्रणतार्त्तीनां नाशनः करुणार्णवः ॥ ६७ ॥ यं दृष्ट्वा पापबंधेन सुदृढेन विमुच्यते ॥
सुकर्मौघपरीपाको युगपत्समुपस्थितः ॥ ६८ ॥ पश्यतां भो मुनिश्रेष्ठास्तापत्रयसुधानिधिम् ॥ बहवो ह्यवतारा हि विष्णोर्दिव्याश्च मानुषाः ॥
॥ ६९ ॥ अत्यद्भुतानि कर्माणि माहात्म्यं चापि वर्णितम् ॥ पारिचित्यान्मनुष्यांस्तु न मन्यंते सुरा अपि ॥ ७० ॥ देवासुरमनुष्याणां गंधर्वोरग
रक्षसाम् ॥ तिरश्चामपि भो विप्रास्तस्मिन्दारुमये हरौ ॥ ७१ ॥ सर्वात्मभूते वसति चित्तं सर्वसुखावहे ॥ उपजीवंत्यस्य सुखं यस्यानन्यस्वरूपिणः
॥ ७२ ॥ ब्रह्मणः श्रुतिवागाहेत्येतदत्रानुभूयते ॥ द्यति संसारदुःखानि ददाति सुखमव्ययम् ॥ ७३ ॥ तस्माद्दारुमयं ब्रह्म वेदांतेषु प्रगीयते ॥ न हि
काष्ठमयी मोक्षं ददाति प्रतिमा क्वचित् ॥ ७४ ॥ कृतेनाकृतता विप्राः कदाचिन्नोपलभ्यते ॥ अकृतो ह्यपवर्गस्तु कृताद्वा दारुणः कथम् ॥ ७५ ॥
अधिष्ठानं विना ब्राह्म्यमैश्वर्यं नोपलभ्यते ॥ रहस्यमेतत्परमं विष्णोः स्थानमनुत्तमम् ॥ ७६ ॥ अलौकिकी सा प्रतिमा लौकिकीति प्रकाशिता ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

षष्टितमः प्रभुः ॥ ९४ ॥ यमेश्वर इति ख्यातो यमसंयमनाशनः ॥ यं दृष्ट्वा पूजयित्वा तु कोटिलिंगफलं लभेत् ॥ ९५ ॥ इति श्रीस्कांदे महा
पुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे पुरुषोत्तमक्षेत्रमाहात्म्ये जैमिनिऋषिसंवादे तृतीयोऽध्यायः ॥ ३ ॥ ॥ श्रीरुवाच ॥ ॥
सीमाप्रतीची क्षेत्रस्य शंखाकारस्य मूर्द्धनि ॥ सर्वकामप्रदो देवः स आस्ते वृषभध्वजः ॥ १ ॥ शंखाग्रे नीलकण्ठः स्यादेतत्क्रोशं सुदुर्लभम् ॥
परमं पावनं क्षेत्रं साक्षान्नारायणस्य वै ॥ २ ॥ सिंधुराजस्य सलिलाद्यावन्मूलं वटस्य वै ॥ शंखस्योदरभागस्तु समुद्रोदकसंप्लुतः ॥ ३ ॥ यत्संप
र्कात्समुद्रोऽत्र तीर्थराजत्वमागतः ॥ यथायं भगवान्मुक्तिप्रदोदृष्टिपथं गतः ॥ ४ ॥ तथेदं मरणात्क्षेत्रं सिंधुः स्नानाद्विमुक्तिदः ॥ चिच्छेद ब्रह्मणः
पूर्वं रुद्रः क्रोधात्तु पञ्चमम् ॥ ५ ॥ तच्छिरो दुस्त्यजं गृह्णन्ब्रह्मांडं परिबभ्रमे ॥ अत्रागतो यदा ब्रह्मकपालं परिमुक्तवान् ॥ ६ ॥ कपालमोचनं लिंगं
द्वितीयावर्तसंस्थितम् ॥ कपालमोचनं पश्येत्पूजयेत्प्रणमेच्च यः ॥ ७ ॥ ब्रह्महत्यादिपापानां कंचुकं विजहात्यसौ ॥ तस्य दक्षिणपार्श्वे तु मरणं
भवमोचनम् ॥ ८ ॥ तृतीयावर्तगामाद्यां शक्तिं मे विमलाह्वयाम् ॥ जानीहि धर्मराज त्वं भुक्तिमुक्तिफलप्रदाम् ॥ ९ ॥ य इमां पूजयेद्भक्त्या प्रण
मेत्कीर्तयेत्तु वा ॥ सर्वान्कामानवाप्नोति मुक्तिं चांते च विंदति ॥ १० ॥ नाभिदेशे स्थितं ह्येतत्रयं कुंडं वटो विभुः ॥ कपालमोचनाद्यावदर्द्धा
शिनी प्रतिष्ठिता ॥ ११ ॥ मध्यं शंखस्य जानीयात्सुगुप्तं चक्रपाणिना ॥ अर्द्धमश्नाति सलिलं महाप्रलयवर्द्धितम् ॥ १२ ॥ सृष्ट्यादौ धर्मरा
जेयं शक्तिर्मेऽर्द्धाशिनी स्मृता ॥ तां दृष्ट्वा प्रणमेद्यस्तु भोगान्सोऽश्नाति शाश्वतान् ॥ १३ ॥ सिन्धुराजस्य सलिलाद्यावन्मूलं वटस्य वै ॥ कीटपक्षि
मनुष्याणां मरणान्मुक्तिदो मतः ॥१४॥ अन्तर्वेदी त्वियं पुण्या वांछयते त्रिदशैरपि ॥ यत्र स्थितां हि पश्यंति सर्वांश्चक्राब्जधारिणः ॥१५॥ पृथिव्यां
यानि तीर्थानि गगने च त्रिविष्टपे ॥ सार्द्धत्रिकोटिसंख्यानि स्वर्गमोक्षप्रदानि वै ॥ १६ ॥ तेषामयं तीर्थराजः कीर्तितः पुरुषोत्तमः ॥ सर्वेषां
मुक्तिक्षेत्राणामिदं सायुज्यदं मतम् ॥ १७ ॥ अत्र स्थिता न शोचंति जराजन्ममृतिष्वपि ॥ कुण्डं ह्येतद्रोहिणाख्यं कारुण्याख्यजलेन वै ॥ १८ ॥
संभृतं तिष्ठते नित्यं स्पर्शनाद्बंधमुक्तिदम् ॥ अत्र प्रतिष्ठितं वारि प्रलये यत्प्रवर्द्धते ॥ १९ ॥ अत्रैव लीयते पश्चात्तस्माद्रोहिणसंज्ञितम् ॥ तस्मात्ते
माऽत्र चिंतास्तु स्वाधिकारविपर्यये ॥ २० ॥ मोक्षाधिकारिणामत्र नेश्वरस्त्वं परेतराट् ॥ धर्मराजं समादिश्य लक्ष्मीरेवं पुरः स्थितम् ॥ २१ ॥
ब्रह्माणमाह जगतामंबा सप्रश्रया गिरा ॥ पितामह जगन्नाथ विदितं सर्वमेव यत् ॥ २२ ॥ मोक्षदं सर्वजंतूनामेतत्क्षेत्रं समादिश ॥ कामाख्यं
क्षेत्रपालं च विमलं वा तपास्थिता ॥ २३ ॥ साक्षाद्ब्रह्मस्वरूपोऽसौ नृसिंहो दक्षिणे विभोः ॥ हिरण्यकशिपोर्वक्षो विदार्यायं प्रभोज्ज्वलः ॥ २४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तपसैतत्क्षयं नेतुं न शक्यं जन्मकोटिभिः ॥ १०३ ॥ युगपत्संक्षयं याति यं दृष्ट्वा सर्वकिल्बिषम् ॥ तन्मा विलंबं कुरुतं प्रयातं तत्र सत्वरम् ॥ १०४ ॥ सुपुण्ये चोत्कले देशे दक्षिणार्णवतीरगे ॥ नीलाद्रिशिखरावासं व्रजतं शरणं विभुम् ॥ १०५ ॥ सोऽभीष्टसिद्धिं वां देवः प्रदास्यति कृपानिधिः ॥ इत्यादिष्टौ ततो विप्रक्षत्रियौ हर्षसंयुतौ ॥ १०६ ॥ तेनैव वर्त्मना विप्राः प्रयातौ पुरुषोत्तमे ॥ १०७ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे पुरुषोत्तमक्षेत्रमाहात्म्ये जैमिनिऋषिसंवादे चतुर्थोऽध्यायः ॥ ४ ॥ ॥ छ ॥ ॥ जैमिनिरुवाच ॥ ॥ निर्विण्णचेतसौ तौ तु त्यक्त्वा वेश्यादिसंगतिम् ॥ ध्यायंतौ मनसा विष्णुं शुद्धाहारव्रतावुभौ ॥ १ ॥ कालेन कियता प्राप्तौ नीलाद्रिनिलयं हरेः ॥ तीर्थराजजले स्नात्वा यथावद्विधिचोदितम् ॥ २ ॥ प्रासादद्वारि तिष्ठंतौ साष्टांगं प्रणिपत्य च ॥ भगवंतं निरीक्षंतौ नापश्यतां तदा द्विजाः ॥ ३ ॥ विवर्णवदनौ देवमदृष्ट्वा चिंतयाकुलौ ॥ आरभेते ह्यनशनं भगवद्दर्शनावधि ॥ ४ ॥ कीर्तयंतौ भगवतो नाम कल्मषनाशनम् ॥ तृतीयस्यां त्रियामायां ज्योतिरेकमपश्यताम् ॥ ५ ॥ त्रीण्यहानि पुनस्तौ च तदोपावसतां स्थिरौ ॥ मध्ये सप्तमरात्रेस्तु भगवंतमपश्यताम् ॥ ६ ॥ त्रिदशानां स्तुतीः श्रुत्वा दिव्यज्ञानौ बभूवतुः ॥ अपास्तपापनिर्मोकौ साक्षाद्देवमपश्यताम् ॥ ७ ॥ शंखचक्रगदापाणिं दिव्यालंकारभूषितम् ॥ रत्नपादुकयोः पृष्ठे विन्यस्तचरणांबुजम् ॥ ८ ॥ व्याकोशपुंडरीकाक्षं प्रसन्नवदनं विभुम् ॥ वामपार्श्वे स्थितां लक्ष्मीं वामेनालिंग्य बाहुना ॥ ९ ॥ नागवल्लीदलं बद्धमाददानं श्रिया हृतम् ॥ रत्नवेत्रकराः काश्चित्काश्चिच्चामरपाणयः ॥ १० ॥ गंधतैलप्रदीपास्तु रत्नवर्तिप्रदीपिकाः ॥ काश्चिद्दधानाः स्वकरैर्यौवनाढ्याः सुभूषिताः ॥ ११ ॥ पश्चाद्रत्नमयं छत्रं बिभ्रती काचिदुज्ज्वला ॥ धूपपात्रं मुखाभ्याशे कृष्णागुरुसुधूपितम् ॥ १२ ॥ काचिद्दधाना प्रम्लोचां हसंतीं विग्रहश्रिया ॥ लीलालकदृशा देवाननुगृह्णंतमग्रतः ॥ १३ ॥ बद्धांजलिपुटान्नम्रकन्धरान्स्तुवतः पृथक् ॥ सिद्धान्मुनिगणान्दिव्यान्सनकादीन्स्मितेन च ॥ १४ ॥ नारदादींश्च गंधर्वान्दिव्यगानमनोहरान् ॥ दत्तावधानं श्रवणे लीलयैवानुकम्पिनम् ॥ १५ ॥ प्रह्लादादीन्वैष्णवाग्र्यान्स्वरूपं ध्यायतोऽग्रतः ॥ चित्ताकर्षणसंलीनां विदधानं स्वविग्रहे ॥ १६ ॥ वक्षःस्थलप्रविलसत्कौस्तुभप्रतिबिंबितैः ॥ देवादिभिर्विश्वरूपमूर्त्तेः स्वस्याः प्रकाशकम् ॥ १७ ॥ उपर्युपरि दिव्यायाः पुष्पवृष्टेरधः स्थितम् ॥ श्रीसन्निधानविगतश्रियमप्सरसां गणम् ॥ ॥ १८ ॥ पश्यंतं विविधं नित्यमङ्गहारमनोहरम् ॥ दिव्यलीलाविलासं तं दृष्ट्वा तौ द्विजबाहुजौ ॥ १९ ॥ बभूवतुः क्षणात्सर्वविद्यानां पारगौ द्विजाः ॥ त्रिः परिक्रम्य देवेशं कृतांजलिपुटावुभौ ॥ साष्टांगपातप्रणतौ तुष्टुवाते मुदान्वितौ ॥ २० ॥ ॥ पुण्डरीक उवाच ॥ ॥ नमस्ते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जगदाधार सर्गस्थित्यंतकारण ॥ नारायण नमस्तेऽस्तु परमात्मन्परायण ॥ २१ ॥ परमार्थस्त्वमेवैको भवाप्ययविवर्जितः ॥ नित्यानन्दस्वरूपं त्वां विदन्ति ध्यानचक्षुषः ॥ २२ ॥ चिन्मात्रं जगतामीशमधिष्ठानं परात्परम् ॥ कथं नु मूढहृदयास्त्वां जानंति सुनिर्मलम् ॥ २३ ॥ कामार्थलिप्सासंभ्रांतचेतसोऽत्यंतदुःखिनः ॥ गतागतपथे श्रांताः सुखभाजः कदाचन ॥ २४ ॥ अनुकंपय मां नाथ सुदीनं शरणागतम् ॥ मूढं दुष्कृतकर्माणं पतितं भवसागरे ॥ २५ ॥ कोऽन्यस्त्वत्सदृशो बन्धुर्ब्रह्मांडे नाथ वर्त्तते ॥ स्वकर्त्तव्यानपेक्षो यो दीनानाथदयालुकः ॥ २६ ॥ उच्चावचभ्रमाद्दुःखं जलयंत्रघटीमिव ॥ अजस्रमधिकर्त्तारं परित्राहि कृपांबुधे ॥ २७ ॥ योगक्षेमाभिसंधाना ये मूढास्त्वामुपासते ॥ लीलाविमुक्तिदं ते वै त्वन्मायापरिमोहिताः ॥ २८ ॥ नारायणेति त्वन्नाम कीर्तितं तु यदृच्छया ॥ त्वत्तोऽधिकं जगन्नाथ चतुर्वर्गैकसाधनम् ॥ २९ ॥ त्वं तु तैस्तैः पृथग्यज्ञैस्तास्ताः सिद्धीः प्रयच्छसि ॥ त्वमेकः शरणं नाथ पतितानां भवार्णवे ॥ ३० ॥ ज्ञाननौकासमारूढः करुणाक्षेपणीकरः ॥ परं पारं प्रभो नेतुं संसाराब्धेर्विचेतनम् ॥ ३१ ॥ त्वमेक ईशिषे भक्त्यानन्यया परिचिंतितः ॥ येऽन्ये मुक्तिप्रदा देवाः शास्त्रेषु परिनिष्ठिताः ॥ ३२ ॥ दुःखाब्धिकुम्भयोनिं ते त्वद्भक्तिं प्रापयंति वै ॥ ३३ ॥ तन्मे प्रसीद भगवन्पदपंकजे ते भक्तिं दृढां वितर नाथ भवाब्धिमुच्चैः ॥ घोरं सुदुस्तरममुं हि यया तरेयमष्टांगयोगजनितश्रमवर्जितोऽपि ॥ ३४ ॥ धर्मार्थकामनिचयैः कुमतिप्रगृह्यैः क्षुद्रैरमीभिरहितालपसुखैर्न कार्यम् ॥ आज्ञापयांघ्रिनलिनद्वयचिंतनेद्ध सांद्रानुवर्धितसुखार्णवमज्जनं मे ॥ ३५ ॥ स्तुत्वेत्थं जगदीशस्य पादपद्मांतिके द्विजः ॥ पपात त्राहि कृष्णेति वदन्बाष्पार्द्रया गिरा ॥ तस्थौ स पुनरुत्थाय कृतांजलिपुटः स्तुवन् ॥ ३६ ॥ ॥ अम्बरीष उवाच ॥ ॥ प्रसीद देव सर्वात्मन्नसंख्येयशिरोभुज ॥ असंख्यघ्राणनयनपाणिपाद नमोऽस्तु ते ॥ ३७ ॥ षट्त्रिंशत्तत्त्वातीतोऽसि निष्प्रपंचप्रपंचकः ॥ चतुर्विधजगद्धाम विश्वमूर्त्ते नमोऽस्तु ते ॥ ३८ ॥ एकपादस्त्रिपादश्च तीर्थपादोंऽतरिक्षपात् ॥ यस्य पादोद्भवा गंगा पुनाति भुवनत्रयम् ॥ ३९ ॥ ब्रह्महत्यादिपापानां शोधकं यस्य नाम वै ॥ कीर्तितं सर्वशुभदं नमस्तस्मै शुभात्मने ॥ ४० ॥ देव त्वन्नामकीर्त्यापि जायंते सर्वसिद्धयः ॥ कौतुकात्त्वां हि मृग्यंति विद्वांसो बुद्धिशालिनः ॥ ४१ ॥ नाथ त्वत्पादसलिलं संश्रयात्तापहारकम् ॥ तापत्रयाभिभूतस्य भक्तिं मेऽत्र दृढां कुरु ॥ ४२ ॥ अनन्यस्वामिनो मेऽद्य नास्त्यन्यत्प्रार्थनीयकम् ॥ प्रणिपत्य जगन्नाथ त्वां प्रयाचे सहस्रधा ॥ ४३ ॥ समस्तपुरुषार्थस्य बीजं त्वत्पादपंकजे ॥ यावत्प्राणान्धारयामि तावद्भक्तिर्दृढास्तु मे ॥ ४४ ॥ सृष्टिं विनिर्ममे चेमां यया भक्त्या पितामहः ॥ संहरत्यखिलं रुद्रो लक्ष्मीश्चैश्वर्यदायिनी ॥ ४५ ॥ दीनानुकंपिंस्तां भक्तिं प्रार्थये नान्यमानसः ॥ अनाद्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विद्यापंकेस्मिन्सुदृढे दुस्तरे भृशम् ॥ ४६ ॥ निमग्नस्य जगन्नाथ निरालंबं प्रणश्यतः ॥ महामहिम्नस्त्वद्भक्तेर्नान्यदस्ति परायणम् ॥ ४७ ॥
श्रुतिस्मृत्यादिसंभिन्नमार्गाः संमोहहेतवः ॥ त्वद्भक्तिमपहायैते न प्रवर्त्तितुमीश्वराः ॥ ४८ ॥ अनन्यशरणं स्वामिन्ननुकम्पय मां विभो ॥ इति
स्तुवञ्जगन्नाथपादपद्मांतिके मुदा ॥ ४९ ॥ पपात दण्डवद्भूमौ प्रसीदेति वदन्मुहुः ॥ ततस्ते देवताः सर्वे स्तुत्वा संपूज्य केशवम् ॥ ५० ॥ तल्ली
लापांगसंतुष्टाः प्रयातास्त्रिदिवं पुनः ॥ तत उन्मीलितदृशौ पुण्डरीकांबरीषकौ ॥ ५१ ॥ मायया मोहितौ विष्णोः स्वप्नदृष्टमबुध्यताम् ॥ यां
दृष्ट्वा दिव्यलीलां हि साक्षात्पललचक्षुषा ॥ ५२ ॥ पुनर्मानुषभावौ तौ दिव्यसिंहासनस्थितम् ॥ नीलजीमूतसंकाशं फुल्लपद्मायतेक्षणम् ॥ ५३ ॥
शोणाधरं चारुनासं दिव्यकुण्डलभूषितम् ॥ शंखचक्रगदापद्मधारिणं वनमालिनम् ॥ ५४ ॥ पीनोरस्कं चारुहारमनर्घ्यमुकुटोज्ज्वलम् ॥
श्रीवत्सकौस्तुभोरस्कं दिव्यांगदविभूषितम् ॥ ५५ ॥ प्रलंबबाहुं दीनार्तपरित्राणसमुद्यतम् ॥ सुवर्णसूत्रसंनद्धमध्यग्रंथिमणीयुतम् ॥ ५६ ॥ दिव्य
पीतांबरधरं दिव्यस्रग्गन्धभूषितम् ॥ स्वर्णपद्मासनासीनं सर्वांगालिंगितश्रियम् ॥ ५७ ॥ प्रपन्नसंतापहरं सुधासागरसुलक्षणम् ॥ अशेषवांछा
फलदं कल्पवृक्षं सुपुष्पितम् ॥ ५८ ॥ दक्षपार्श्वस्थितं तस्य ददृशाते हलायुधम् ॥ बिभर्त्ति येन ब्रह्मांडं बलेन महता विभुः ॥ ५९ ॥
तं बलं नागराजानं फणासप्तकमंडितम् ॥ कैलासशिखरोत्तुंगं धवलं कुण्डलोज्ज्वलम् ॥ ६० ॥ विचित्रवनमालाढ्यं दिव्यनीलनिचो
लिनम् ॥ सततं वारुणीक्षीबघूर्णोन्नयनपंकजम् ॥ ६१ ॥ निम्नपृष्ठोन्नतोरस्कं कुण्डलीकृतविग्रहम् ॥ शंखचक्रगदापद्मसमुज्ज्वलचतुर्भु
जम् ॥ ६२ ॥ नानालंकाररुचिरं नतकल्मषनाशनम् ॥ तयोर्मध्ये स्थितां भद्रां सुभद्रां कुंकुमारुणाम् ॥ ६३ ॥ सर्वलावण्यवसतिं सर्वदेव
नमस्कृताम् ॥ लक्ष्मीं लक्ष्मीशहृदयपंकजस्थां पृथक्स्थिताम् ॥ ६४ ॥ वराब्जधारिणीं देवीं दिव्यनेपथ्यभूषणाम् ॥ प्रपन्नकल्पलतिकां
सर्वकल्मषनाशिनीम् ॥ ६५ ॥ संसारार्णवमग्नानां तारिणीं देवतारणीम् ॥ वामपार्श्वस्थितं विष्णोरद्राष्टां चक्रमुत्तमम् ॥ ६६ ॥ दार्वग्रनिर्मितं
विप्राः स्वर्णभक्तिसमुज्ज्वलम् ॥ चतुर्द्धावस्थितं विष्णुं दृष्ट्वा तौ द्विजबाहुजौ ॥ ६७ ॥ अरुणोदयवेलायां श्रमं सार्थममन्यताम् ॥ संस्मृत्य तां
स्वप्नलीलां विस्मयं जग्मतुस्तदा ॥ ६८ ॥ न दारुप्रतिमा चेयं साक्षाद्ब्रह्म प्रकाशते ॥ सदोगतानां विप्राणां वाक्यं श्रद्दधतुश्च तौ ॥ ६९ ॥
क्वावां महापातकिनौ यातनाक्रमभागिनौ ॥ क्वेदं सुरसमाक्रांतस्थितं विष्णोः प्रदर्शनम् ॥ ७० ॥ मूर्खयोरावयोरष्टादशविद्याप्रवीणता ॥ यस्मा
त्तस्मान्न च भ्रांतिर्ज्ञानं तत्समवादिनः ॥ ७१ ॥ यद्रूचुर्दारवं ब्रह्म तीर्थराजतटे स्थितम् ॥ वटमूले प्रकाशंतं दृष्ट्वा जंतुर्विमुच्यते ॥ ७२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तपसैतत्क्षयं नेतुं न शक्यं जन्मकोटिभिः ॥ १०३ ॥ युगपत्संक्षयं याति यं दृष्ट्वा सर्वकिल्बिषम् ॥ तन्मा विलंबं कुरुतं प्रयातं तत्र सत्वरम्
॥ १०४ ॥ सुपुण्ये चोत्कले देशे दक्षिणार्णवतीरगे ॥ नीलाद्रिशिखरावासं व्रजतं शरणं विभुम् ॥ १०५ ॥ सोऽभीष्टसिद्धिं वां देवः प्रदास्यति
कृपानिधिः ॥ इत्यादिष्टौ ततो विप्रक्षत्रियौ हर्षसंयुतौ ॥ १०६ ॥ तेनैव वर्त्मना विप्राः प्रयातौ पुरुषोत्तमे ॥ १०७ ॥ इति श्रीस्कांदे महापुराण
एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे पुरुषोत्तमक्षेत्रमाहात्म्ये जैमिनिऋषिसंवादे चतुर्थोऽध्यायः ॥ ४ ॥ ॥ छ ॥ ॥ जैमिनि
रुवाच ॥ ॥ निर्विण्णचेतसौ तौ तु त्यक्त्वा वेश्यादिसंगतिम् ॥ ध्यायंतौ मनसा विष्णुं शुद्धाहारव्रतावुभौ ॥ १ ॥ कालेन कियता प्राप्तौ
नीलाद्रिनिलयं हरेः ॥ तीर्थराजजले स्नात्वा यथावद्विधिचोदितम् ॥ २ ॥ प्रासादद्वारि तिष्ठंतौ साष्टांगं प्रणिपत्य च ॥ भगवंतं निरीक्षंतौ
नापश्यतां तदा द्विजाः ॥ ३ ॥ विवर्णवदनौ देवमदृष्ट्वा चिंतयाकुलौ ॥ आरभेते ह्यनशनं भगवद्दर्शनावधि ॥ ४ ॥ कीर्तयंतै भगवतो नाम
कल्मषनाशनम् ॥ तृतीयस्यां त्रियामायां ज्योतिरेकमपश्यताम् ॥ ५ ॥ त्रीण्यहानि पुनस्तौ च तदोपावसतां स्थिरौ ॥ मध्ये सप्तमरात्रेस्तु भगवं
तमपश्यताम् ॥ ६ ॥ त्रिदशानां स्तुतीः श्रुत्वा दिव्यज्ञानौ बभूवतुः ॥ अपास्तपापनिर्मोकौ साक्षाद्देवमपश्यताम् ॥ ७ ॥ शंखचक्रगदापाणिं
दिव्यालंकारभूषितम् ॥ रत्नपादुकयोः पृष्ठे विन्यस्तचरणांबुजम् ॥ ८ ॥ व्याकोशपुंडरीकाक्षं प्रसन्नवदनं विभुम् ॥ वामपार्श्वे स्थितां लक्ष्मीं वामेना
लिंग्य बाहुना ॥ ९ ॥ नागवल्लीदलं बद्धमाददानं श्रिया हृतम् ॥ रत्नवेत्रकराः काश्चित्काश्चिच्चामरपाणयः ॥ १० ॥ गंधतैलप्रदीपास्तु रत्नवर्तिप्रदी
पिकाः ॥ काश्चिद्दधानाः स्वकरैर्यौवनाढ्याः सुभूषिताः ॥११॥ पश्चाद्रत्नमयं छत्रं बिभ्रती काचिदुज्ज्वला॥ धूपपात्रं मुखाभ्याशे कृष्णागुरुसुधूपितम्
॥ १२ ॥ काचिद्दधाना प्रम्लोचां हसंतीं विग्रहश्रिया ॥ लीलालकदृशा देवाननुगृह्णंतमग्रतः ॥ १३ ॥ बद्धांजलिपुटान्नम्रकन्धरान्स्तुवतः पृथक् ॥
सिद्धान्मुनिगणान्दिव्यान्सनकादीन्स्मितेन च ॥ १४ ॥ नारदादींश्च गंधर्वान्दिव्यगानमनोहरान् ॥ दत्तावधानं श्रवणे लीलयैवानुकम्पिनम्॥ १५॥
प्रह्लादादीन्वैष्णवाग्र्यान्स्वरूपं ध्यायतोऽग्रतः ॥ चित्ताकर्षणसंलीनां विदधानं स्वविग्रहे ॥ १६ ॥ वक्षःस्थलप्रविलसत्कौस्तुभप्रतिबिंबितैः ॥
देवादिभिर्विश्वरूपमूर्तेः स्वस्याः प्रकाशकम् ॥ १७ ॥ उपर्युपरि दिव्यायाः पुष्पवृष्टेरधः स्थितम् ॥ श्रीसन्निधानविगतश्रियमप्सरसां गणम् ॥
॥ १८ ॥ पश्यंतं विविधं नित्यमङ्गहारमनोहरम् ॥ दिव्यलीलाविलासं तं दृष्ट्वा तौ द्विजबाहुजौ ॥ १९ ॥ बभूवतुः क्षणात्सर्वविद्यानां पारगौ
द्विजाः ॥ त्रिः परिक्रम्य देवेशं कृतांजलिपुटावुभौ ॥ साष्टांगपातप्रणतौ तुष्टुवाते मुदान्वितौ ॥ २० ॥ ॥ पुण्डरीक उवाच ॥ ॥ नमस्ते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लताकुलः ॥ अर्जुनाशोकपुन्नागतालहिंतालशालकैः ॥ १८ ॥ प्राचीनामलकैर्लोध्रैर्बकुलैर्नागकेशरैः ॥ नारिकेलैः प्रियालैश्च सरलैर्देवदारुभिः ॥
॥ १९ ॥ धवैश्च खदिरैर्बिल्वैः पनसैश्च कपित्थकैः ॥ चंपकैः कर्णिकारैश्च कोविदारैः सपाटलैः ॥ २० ॥ कदंबनिंबनिचुलरसालामलकैस्तथा ॥
नागरंगैश्च जंबीरैर्नीपकैर्मातुलुंगकैः ॥ २१ ॥ मंदारैः पारिजातैश्च न्यग्रोधागुरुचंदनैः ॥ खर्जूराम्रातकैः सिद्धैर्मुचुकुंदैः सकिंशुकैः ॥ २२ ॥ तिंदुकैः
सप्तपर्णैश्च अश्वत्थैश्च बिभीतकैः ॥ अन्यैश्च विविधैर्वृक्षैः प्रकीर्णः सुमनोहरैः ॥ २३ ॥ मालतीकुंदबाणैश्च करवीरैः सितेतरैः ॥ केतकीवनषंडैश्च
अतिमुक्तैः सकुब्जकैः ॥ २४ ॥ एलालवंगकंकोलदाडिमैर्बीजपूरकैः ॥ श्रेणीकृतैः पूगवनैरुद्यानैः शतशो वृतः ॥ २५ ॥ नानाद्रुमलताकीर्णः
पर्वतैः सिंधुभिर्वृतः ॥ स एष देशप्रवर उत्कलाख्यो द्विजोत्तमाः ॥ २६ ॥ ऋषिकुल्यां समासाद्य दक्षिणोदधिगामिनीम् ॥ स्वर्णरेखामहानद्यो
र्मध्ये देशः प्रतिष्ठितः ॥ २७ ॥ सन्त्यत्र पुण्यायतने क्षेत्राणि सुबहून्यपि ॥ पूर्वं वस्तीर्थयात्रायां वर्णितानि मया द्विजाः ॥ भूस्वर्गः सांप्रतं ह्येष
कथितः पुरुषोत्तमः ॥ २८ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे पुरुषोत्तमक्षेत्रमाहात्म्य ओढ्रदेशवर्णनं
नाम षष्ठोऽध्यायः ॥ ६ ॥ ॥ मुनय ऊचुः ॥ ॥ कस्मिन्युगे स तु नृप इन्द्रद्युम्नोऽभवन्मुने ॥ कस्मिन्देशेऽस्य नगरं कथं वा पुरुषोत्तमम् ॥
॥ १ ॥ गत्वा च विष्णोः प्रतिमां कारयामास वा कथम् ॥ एतत्सर्वं विस्तरतः कथयस्व महामुने ॥ २ ॥ याथातथ्येन सर्वज्ञ परं कौतूहलं
हि नः ॥ ३ ॥ ॥ जैमिनिरुवाच ॥ ॥ साधु साधु द्विजश्रेष्ठा यत्पृच्छध्वं पुरातनम् ॥ सर्वपापहरं पुण्यं भुक्तिमुक्तिप्रदं शुभम् ॥
॥ ४ ॥ चरितं तस्य वक्ष्यामि तथावृत्तं कृते युगे ॥ शृणुध्वं मुनयः सर्वे सावधाना जितेन्द्रियाः ॥ ५ ॥ आसीत्कृतयुगे विप्रा
इन्द्रद्युम्नो महानृपः ॥ सूर्यवंशे स धर्मात्मा स्रष्टुः पंचमपूरुषः ॥ ६ ॥ सत्यवादी सदाचारोऽवदातः सात्त्विकाग्रणीः ॥ न्यायात्सदा
पालयति प्रजाः स्वा इव स प्रजाः ॥ ७ ॥ अध्यात्मविज्ञानशौंडः शूरः संग्रामवर्द्धनः ॥ सदोद्यतः सदा विप्रपूजकः पितृभक्तिमान् ॥ ८ ॥ अष्टाद
शसु विद्यासु बृहस्पतिरिवापरः ॥ ऐश्वर्येण सुराधीशः कुबेरः कोषसंचये ॥ ९ ॥ रूपवान्सुभगः शीली दाता भोक्ता प्रियंवदः ॥ यष्टा समस्तय
ज्ञानां ब्रह्मण्यः सत्यसंगरः ॥ १० ॥ वल्लभो नरनारीणां पौर्णमास्यां यथा शशी ॥ आदित्य इव दुष्प्रेक्ष्यः शत्रुपक्षक्षयंकरः ॥ ११ ॥ वैष्णवः सत्य
संपन्नो जितक्रोधो जितेंद्रियः ॥ राजसूयं क्रतुवरं वाजिमेधसहस्रकम् ॥ १२ ॥ इयाज परमः श्रीमान्मुमुक्षुर्धर्मतत्परः ॥ एवं सर्वगुणोपेतः स पृथ्वीं
पालयन्नृपः ॥ १३ ॥ अवंतींनाम नगरीं मालवे भुवि विश्रुताम् ॥ उवास सर्वरत्नाढ्यां द्वितीयाममरावतीम् ॥ १४ ॥ तत्र स्थितो नरपतिर्विष्णौ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भक्तिमनुत्तमाम् ॥ चकार मनसा वाचा कर्मणा परमाद्भुताम् ॥ १५ ॥ एवं प्रवर्तमानोऽसौ कदाचिच्छ्रीपतेर्विभोः ॥ पूजासमयमासाद्य देवार्चनगृहांतरे ॥ १६ ॥ विद्वद्भिः कविभिश्चैव तीर्थयात्राप्रसिद्धिभिः ॥ देवज्ञैः श्रोत्रियैः सार्द्धं पुरोहितमवस्थितम् ॥ १७ ॥ आहूतो व्याजहारेदं ज्ञायतां क्षेत्रमुत्तमम् ॥ यत्र साक्षाज्जगन्नाथं पश्यामोऽनेन चक्षुषा ॥ १८ ॥ एवमुक्तो नृपाग्र्येण वैष्णवेन पुरोहितः ॥ तीर्थयातृव्रजं पश्यन्नुवाच प्रश्रितं वचः ॥ १९ ॥ भोभोस्तीर्थाटनव्यग्रा धार्मिकास्तीर्थकोविदाः ॥ यदादिशाति देवोऽयं युष्माभिस्तच्छ्रुतं किल ॥ २० ॥ विज्ञाय तस्याभिप्रायं कश्चित्सुबहुतीर्थगः ॥ उवाच वाग्मी राजानं बद्धांजलिपुटं मुदा ॥२१॥ राजन्ननेकतीर्थानि व्यचारिषमहं प्रभो ॥ आशैशवात्क्षितितले श्रुतान्यन्यैस्तु यानि वै ॥ २२ ॥ ओढ्रदेश इति ख्यातो वर्षे भारतसंज्ञिते ॥ दक्षिणस्योदधेस्तीरे क्षेत्रं श्रीपुरुषोत्तमम् ॥ २३ ॥ यत्र नीलगिरिर्नाम समंतात्काननावृतः॥ तस्योत्संगे कल्पवृक्षः समंतात्क्रोशसंमितः ॥ २४ ॥ तस्य छायां समाक्रम्य ब्रह्महत्यां व्यपोहति ॥ तस्य पश्चादिशि ख्यातं कुंडं रौहिणसंज्ञितम् ॥ ॥ २५ ॥ तत्पूर्णं कारणांभोभिः स्पर्शनादेव मुक्तिदम् ॥ तस्य प्राक्तटमास्थाय नीलेंद्रमणिनिर्मिता ॥ २६ ॥ तनुः श्रीवासुदेवस्य साक्षान्मुक्तिप्रदायिनी ॥ तत्र कुंडे तु यः स्नात्वा दृष्ट्वा तु पुरुषोत्तमम् ॥ २७ ॥ अश्वमेधसहस्रस्य फलं प्राप्य विमुच्यते ॥ तत्रास्त आश्रमश्रेष्ठः ख्यातः शबरदीपकः ॥ २८ ॥ पश्चिमस्यां दिशि विभोर्वेष्टितः शबरालयैः ॥ यस्मादेकपदीमार्गो येन विष्ण्वालयं व्रजेत् ॥ २९ ॥ यत्र साक्षाज्जगन्नाथः शंखचक्रगदाधरः ॥ जंतूनां दर्शनान्मुक्तिं यो ददाति कृपानिधिः ॥ ३० ॥ तत्रोषितं मया राजन्वर्षं श्रीपुरुषोत्तमे ॥ तुष्ट्यर्थं देवदेवस्य व्रतिना वनवासिना ॥ ३१ ॥ प्रतिरात्रं भगवतो दर्शनाय दिवौकसाम् ॥ आगतानां महाराज दिव्यगंधो ह्यमानुषः ॥ ३२ ॥ नानास्तुतिवचःकल्पपुष्पवृष्टिश्च लभ्यते ॥ महिमैष न कुत्रापि विष्णोः स्थाने प्रकाशते ॥ ३३ ॥ पौराणिकी प्रवृत्तिश्च श्रुता तत्र महीपते ॥ वायसो माधवं दृष्ट्वा तिर्यग्देहोऽपि मुच्यते ॥ ३४ ॥ नाधिकारी पुण्यकृत्ये ज्ञानहीनोऽपि पार्थिव ॥ तृषार्त्तो रौहिणे कुंडे जलं पातुं समागतः ॥ ३५ ॥ त्यक्त्वा कालवशात्प्राणान्विष्णुसारूप्यमातवान् ॥ अहमासं पुरा मूर्खस्तत्प्रसादात्तु सांप्रतम् ॥ ३६ ॥ अष्टादशसु विद्यासु शेषो वा स्यान्ममापरः ॥ मतिश्च निर्मला जाता विष्णोः पश्यामि नापरम् ॥ ३७ ॥ त्वं यस्माद्विष्णुभक्तोऽसि सततं च दृढव्रतः ॥ अतस्तवोपदेशार्थमागतोऽहं तवांतिकम् ॥ ३८ ॥ नो धनं न च भूमिं च त्वत्तः संप्रार्थ्यतेऽधुना ॥ व्यलीकमेतन्मा बुद्धा तत्रस्थं श्रीधरं भज ॥ ३९ ॥ एवमुक्त्वा तु जटिलः सर्वेषां पश्यतां तदा ॥ अंतर्द्धानं जगामाशु राजा परमविस्मयम् ॥ ४० ॥ अवाप्य व्याकुलमतिः कथं मे निर्वहेदिति ॥ पुरोहितमु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वाचेदं तस्यैवार्थस्य साधने ॥ ४१ ॥ ॥ इन्द्रद्युम्न उवाच ॥ ॥ अमानुषमिदं वृत्तं श्रुत्वेदानीममानुषात् ॥ बुद्धिस्त्वरयते तत्र यत्रास्तेऽसौ गदा
धरः ॥ ४२ ॥ मम धर्मार्थकामा हि त्वदायत्ता द्विजोत्तम ॥ अविरुद्धास्त्वत्प्रसादात्त्रिवर्गः साधितो मया ॥ ४३ ॥ इदानीं चेद्द्विजश्रेष्ठ त्वमत्रार्थे
गमिष्यसि ॥ चतुर्वर्गस्तु संपूर्णः प्राप्तः स्यात्सांप्रतं मया ॥ ४४ ॥ ॥ पुरोहित उवाच ॥ ॥ बाढमेतत्करिष्यामि यथा द्रक्ष्यसि केशवम् ॥
चर्माच्छादितचक्षुर्भ्यां साक्षान्मुक्तिप्रदं विभुम् ॥ ४५ ॥ एवमत्र यतिष्यामि तत्र सर्वे यथा वयम् ॥ वत्स्यामः ससहायाश्च क्षेत्रे श्रीपुरुषोत्तमे ॥४६॥
साफल्यं किमतो राजञ्जन्मिनो जन्मनो भवेत् ॥ पुरुषं तमसः पारं साक्षाद्द्रक्ष्यसि माधवम् ॥ ४७ ॥ भ्राता विद्यापतिर्नाम कनीयान्मे व्रजि
ष्यति ॥ देशभ्रमणशीलैश्च चारैः सह तवाधुना ॥ ४८ ॥ तत्र गत्वा जगन्नाथं दृष्ट्वा स हि गिरौ यथा ॥ कंटकावाससंस्थानं भूप्रदेशं प्रमीय च ॥
॥ ४९ ॥ तूर्णं प्रवृत्तिमानेता श्रेयोऽस्माकं भविष्यति ॥ तस्य तद्वचनं श्रुत्वा राजा पुनरुवाच ह ॥ ५० ॥ ॥ इन्द्रद्युम्न उवाच ॥ ॥ साधु ब्रह्म
न्समाधाय व्यवसायो विचारितः ॥ अहं प्रथमतोप्येतच्छ्रुत्वैव कृतनिश्चयः ॥ ५१ ॥ तत्र क्षेत्रे भगवतः सन्निधौ निवसाम्यहम् ॥ तद्गच्छतु तव
भ्राता यथेष्टं साधयिष्यति ॥ ५२ ॥ इत्युक्त्वांतःपुरं राजा प्रविवेश मुदान्वितः ॥ पुरोहितोऽपि तान्सर्वान्यथावदनुपूर्वशः ॥५३॥ राजाज्ञया पूजयित्वा
प्राहिणोत्स्वं स्वमाश्रमम् ॥ भ्रातरं सुमुहूर्ते च दैवज्ञकृतनिश्चये ॥ ५४ ॥ प्रस्थापयामास तदा कृतस्वस्त्ययनं द्विजैः ॥ अपसर्पैः प्रत्ययिकैः पुष्प
स्यन्दनमास्थितः ॥ ५५ ॥ ततः संप्रस्थितो विप्रः स तु विद्यापतिर्द्विजः ॥ मनसा चिन्तयामास मध्येस्यन्दनमास्थितः ॥ ५६ ॥ अहो मे
सफलं जन्म सुकल्या शर्वरी च मे ॥ द्रक्ष्यामि यद्भगवतो मुखपद्ममघापहम् ॥ ५७ ॥ श्रवणाद्यैरुपायैर्यं यतमाना अहर्निशम् ॥ पश्यंति यतयः
चेतःपुंडरीके व्यवस्थितम् ॥ ५८ ॥ तमद्य नीलशिखरिशृंगस्थं बिभ्रतं वपुः ॥ वपुःसंबन्धहरणं साक्षाद्द्रक्ष्यामि चक्रिणम् ॥ ५९ ॥ श्रुति
स्मृतीहासपुराणवाक्यैर्यद्रूपमास्थापयितुं न शक्यम् ॥ तच्छ्रीनिधे रूपमदृष्टपूर्वं दृष्ट्वा तरिष्यामि भवांबुराशिम् ॥ ६० ॥ यन्नामसंकीर्तनतस्त्रिरंहः
संघः प्रणाशं स्मरतां प्रयाति ॥ तमद्य विश्वेश्वरमप्रमेयं साक्षात्करिष्यामि गिरौ वसन्तम् ॥ ६१ ॥ यत्पादपद्मानुसंहितस्य पदेपदे दुःख
मुपार्जितस्य ॥ तमः प्रकांडप्रभवं कदाचिन्नात्माश्रितं कर्मभिरेति नाशम् ॥ ६२ ॥ आराध्य सूक्ष्मं स्वगुहानिवासं यं पञ्चकोषावृतमात्मसंस्थम् ॥
वेदांतगीराह न चापि वेद वंदे स्वविद्यैकनिवेद्यमाद्यम् ॥ ६३ ॥ ब्रह्मांडमालाकलितानुरोमं सहस्रमूर्द्धांघ्रिदृशं पुराणम् ॥ निःश्वासवातोत्थित
वेदराशिं सर्वप्रपंचेशमहं प्रपद्ये ॥ ६४ ॥ यन्मायया निर्मितकूटमेतत्सृष्टिक्षयस्थानविलासि रूपम् ॥ निरूपितारोपितहेयरूपस्वरूपहीनं प्रणव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वरूपम् ॥ ६५ ॥ तिर्यक्तृषाशांतिनिमित्ततोऽपि यदृच्छया यत्सविधं प्रयातः ॥ देहेन तेनैव सरूपमुक्तिमवाप तं दृष्टिपथं करिष्ये ॥ ६६ ॥ अहो अहो मे खलु भाग्यशंसी यत्कोटिजन्मार्जितपुण्य एकः ॥ समुत्थितो मे खलु चर्मदृग्भ्यां विलोकयिष्ये जगदादिकंदम् ॥ ६७ ॥ इत्थं संचिन्त यन्विप्रः प्रहृष्टेनांतरात्मना ॥ अतीतं बहुमध्वानं नाबुध्यद्रथवेगतः ॥ ६८ ॥ दिनमध्ये व्यतिक्रांते लंबिते बहुवासरे ॥ वर्त्मन्यदृश्यताग्रे तु देशो भुवनमंडनः ॥ ६९ ॥ ओढ्रसंज्ञस्तु भो विप्राः क्षितिमंडलपावनः ॥ इत्थं पश्यन्वनांतानि गिरिदुर्गांश्च मार्गगान् ॥ सूर्यास्तमनवेलायां महानद्यास्तटेऽभवत् ॥ ७० ॥ अवरुह्य रथाद्विप्रः कृत्वा चाह्निकमादृतः ॥ उपास्य पश्चिमां सन्ध्यां दध्यौ स मधुसूदनम् ॥ ७१ ॥ रथपृष्ठे स्थितो रात्रिं गमयित्वा त्वरान्वितः ॥ महानदीं समुत्तीर्य प्रातःकृत्यं समाप्य सः ॥ ७२ ॥ चिंतयन्नेव गोविंदं प्रतस्थे रथमास्थितः ॥ पश्यन्भगवतो मार्गं श्रोत्रियाणां हि यज्वनाम् ॥ ७३ ॥ वह्निवर्चस्विनां विप्रा ग्रामान्पूगैरलंकृतान् ॥ विलंघ्यैकाम्रकवनं यावदायाति स द्विजः ॥ ७४ ॥ शंखचक्रगदापद्मधारिणो ददृशे जनान् ॥ जन्मांतरितमात्मानं बुबुधे दिव्यरूपिणम् ॥ ७५ ॥ अवरुह्य रथात्तूर्णं साष्टांगं प्रणिपत्य च ॥ हर्षाश्रुपूर्णनयनो नान्यत्किंचिदपश्यत ॥ ७६ ॥ केवलं मनसा विष्णुं पश्यन्बाह्ये च भो द्विजाः ॥ एवं व्रजन्यदा विप्रो ध्यायन्पश्यन्स्तुवन्हरिम् ॥ ७७ ॥ अपश्यत्काननाकीर्णं कल्पन्यग्रोधभूषितम् ॥ नीलाचलं लिखंतं खं पश्यतां पापनाशनम् ॥ ७८ ॥ अत्यद्भुतं निवसतिं साक्षात्तनुभृतो हरेः ॥ उपत्यकायामारूढः समंतान्मार्गयन्द्विजः ॥ ७९ ॥ मार्गं न लेभे विप्रोऽसौ मुकुंदालोकनोत्सुकः ॥ अस्वप्यत ततो भूमौ कुशानास्तीर्य वाग्यतः ॥ ८० ॥ दर्शने तस्य देवस्य तमेव शरणं ययौ ॥ ततः शुश्राव वचनं गिरेः पश्चादमानुषम् ॥ ८१ ॥ भगवद्भक्तिविषयं संलापं कुर्वतां मिथः ॥ ततो विद्यापतिर्हृष्टोऽनुसरंस्तं जगाम वै ॥ ८२ ॥ ददर्श शबरागारैर्वेष्टितं परितो द्विजाः ॥ क्षेत्रस्य दीपसंस्थानं ख्यातं शबरदीपकम् ॥ ८३ ॥ तत्र गत्वा शनैर्विप्रः प्रविश्य विनयान्वितः ॥ ददर्श विष्णुभक्तांस्तान्छंखचक्रगदाधरान् ॥ ८४ ॥ प्रणम्य शिरसा विप्रस्तस्थौ बद्धांजलिस्तदा ॥ ततो विश्वावसुर्नाम शबरः पलितांगकः ॥ ८५ ॥ अवसाय हरेः पूजां पूजाशेषोपशोभितः ॥ संप्राप्तो गिरिमध्यात्तु तस्मिन्नेव क्षणे द्विजाः ॥ ८६ ॥ आलोक्य तं द्विजो हर्षमुपयातो व्यचिंतयत् ॥ एष प्राप्तो हरेः स्थानाच्छ्रांतो निर्माल्य भूषितः ॥ ८७ ॥ वैष्णवाग्र्य इतो वार्त्तां विष्णोः प्राप्स्यामि दुर्लभाम् ॥ चिंतयन्नेव विप्रोऽसौ शबरेणाभ्यभाषत ॥ ८८ ॥ ॥ शबर उवाच ॥ ॥ कुतः समागतो विप्र काननांतं सुदुस्तरम् ॥ क्षुत्तृड्भिरतिश्रांतश्च सुखमत्रास्यतां चिरम् ॥ ८९ ॥ पाद्यमासनमर्घं च दत्त्वा विश्वावसुर्द्विजम् ॥ उवाच

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रश्रयगिरा प्रस्तुतं प्रतिपादयन् ॥ ९० ॥ फलैः पाकेन वा विप्र प्राणयात्रा भवेत्तव ॥ यत्तुभ्यं रोचते तद्वै दीयतेऽत्र मया द्विज ॥ ९१ ॥ भाग्यं ममाद्य भगवञ्जीवितं सफलं च मे ॥ प्राप्तोऽसि मद्गृहं विप्र साक्षाद्विष्णुरिवापरः ॥ ९२ ॥ इति ब्रुवाणं शबरं प्रोवाच द्विजपुंगवः ॥ न मे फलैर्न पाकेन कार्यं वैष्णवपुंगव ॥ ९३ ॥ यदर्थमागतं दूरात्साधो तत्सफलं कुरु ॥ इन्द्रद्युम्नस्य नृपतेरवंतिपुरवासिनः ॥ ९४ ॥ पुरोहितोऽहं संप्राप्तो विष्णोर्दर्शनलालसः ॥ राज्ञाग्रे तैर्थिकानां हि समाजावसरे श्रुतम् ॥ ९५ ॥ तीर्थक्षेत्रप्रसंगेन केनचित्प्रस्तुतं तदा ॥ तथा निवेदितं क्षेत्रं राजाग्रे जटिलेन वै ॥ ९६ ॥ आनुपूर्व्याच्च तत्सर्वं कथयामास स द्विजः ॥ एतदर्थमहं साधो राज्ञा चोत्कण्ठितेन वै ॥ ९७ ॥ प्रेषितोऽहं हरिं द्रष्टुमत्रस्थं नीलमाधवम् ॥ दृष्ट्वा यावन्नरपतेर्वार्त्तां नेष्यामि सोऽप्यहम् ॥ ९८ ॥ निराहारो ध्रुवं साधो तन्मां विष्णुं प्रदर्शय ॥ ९९ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे पुरुषोत्तमक्षेत्रमाहात्म्ये जैमिनिऋषिसंवादे सप्तमोऽध्यायः ॥ ७ ॥

॥ ॥ जैमिनिरुवाच ॥ ॥ इत्युक्तस्तेन विप्रेण शबरश्चिंतयाकुलः ॥ अस्माकमुपजीव्योऽसौ रहस्यस्थो जनार्दनः ॥ १ ॥ उपस्थितं नो दुर्दैवं येन स्यात्सार्वलौकिकः ॥ न दर्शयामि चेद्विप्रं शापं मेऽसौ प्रदास्यति ॥ २ ॥ सर्वेषां ब्राह्मणो मान्यो विशेषादतिथिस्त्वयम् ॥ यस्मिन्विफलकामे तु द्वौ लोकौ विफलौ मम ॥ ३ ॥ एवं विचारयन्विश्वावसुः शबरपुंगवः ॥ जनप्रवादं सस्मार पुराणं शबरालये ॥ ४ ॥ अस्मिन्नंतर्हिते देवे भूम्यंतर्लीनमाधवे ॥ इन्द्रद्युम्नो नरपतिः शक्रतुल्यपराक्रमः ॥ ५ ॥ मनुष्यवपुषा यो वै ब्रह्मलोकं व्रजेदपि ॥ सोऽस्मिन्प्रजाभिरागत्य वाजिमेधशतेन च ॥ ६ ॥ इष्ट्वा दारुमयं विष्णुं चतुर्द्धा स्थापयिष्यति ॥ अस्य चेद्भाग्यमुत्पन्नं ब्राह्मणस्यातिथेर्भृशम् ॥ ७ ॥ अंतर्द्धानं भगवतः सन्निधानमथो भवेत् ॥ तदेनं दर्शयिष्यामि नीलेंद्रमणिमच्युतम् ॥ ८ ॥ न पौरुषेयं कस्यापि कर्तव्ये दैवनिर्मिते ॥ इत्थं विचार्य मनसा शबरश्च पुनःपुनः ॥ ९ ॥ उवाच विप्रं पुरतो ध्यायंतं विष्णुमव्ययम् ॥ १० ॥ ॥ शबर उवाच ॥ ॥ अस्माभिः पूर्वतोऽप्येष उदंतः श्रुत एव हि ॥ इंद्रद्युम्नो नरपतिरत्र वासं करिष्यति ॥ ११ ॥ ततोऽपि भाग्यवांस्त्वं हि यदग्रे नीलमाधवम् ॥ चक्षुषा पश्यसे ब्रह्मन्नेहि यामो ह्यधित्यकाम् ॥ १२ ॥ इत्युक्त्वा तं करे धृत्वा वर्त्मना गहनं ययौ ॥ उपर्युपर्युपारुह्य शिलाविषमवर्त्मनि ॥ १३ ॥ एकैकनरगम्ये च कंटकाचितदुर्गमे ॥ तमःप्राये पथि गतं बोधयन्वचसा द्विजम् ॥ १४ ॥ मुहूर्ताभ्यां रौहिणस्य कुंडस्याविशतां तटे ॥ तं दृष्ट्वा सोऽब्रवीद्विप्रं कुंडमेतद्द्विजोत्तम ॥ १५ ॥ रौहिणाख्यं महत्तीर्थं कारणं सर्वपाथसाम् ॥ अत्र स्नात्वा नरो याति वैकुंठभवनं द्विज ॥ १६ ॥ एत

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्य पूर्वभागेऽसौ कल्पच्छायावटो महान् ॥ छायां यस्य समाक्रम्य ब्रह्महत्यां व्यपोहति ॥ १७ ॥ एतयोरंतरे ब्रह्मत्रिकुंजाभ्यंतरे स्थितम् ॥ पश्य साक्षाज्जगन्नाथं वेदांतप्रतिपादितम् ॥ १८ ॥ दृष्ट्वा जहीहि सकलं विविधं पापसंचयम् ॥ इत ऊर्ध्वं न शोचस्व पतितो भवसागरे ॥ १९ ॥ ॥ ॥ जैमिनिरुवाच ॥ ॥ स तु कुंडे द्विजः स्नात्वा संप्रहृष्टमनाः सुधीः ॥ दूरात्प्रणम्य शिरसा मनसा वचसा हरिम् ॥ २० ॥ तुष्टाव चैकाग्रमनां हर्षगद्गदया गिरा ॥ २१ ॥ ॥ विद्यापतिरुवाच ॥ ॥ प्रधानपुरुषातीत सर्वव्यापिन्परात्पर ॥ चराचरपरीणाम परमार्थ नमोऽस्तु ते ॥ ॥ २२ ॥ श्रुतिस्मृतिपुराणेतिहाससंप्रतिपादितैः ॥ कर्मभिस्त्वं समाराध्य एक एव जगत्पते ॥ २३ ॥ त्वत्त एतज्जगत्सर्वं सृष्टौ संपद्यते विभो ॥ त्वदाधारमिदं देव त्वयैव परिपाल्यते ॥ २४ ॥ कल्पांते संहृतं सर्वं त्वत्कुक्षौ सावकाशकम् ॥ सुखं वसति सर्वात्मन्नंतर्यामिन्नमोऽस्तु ते ॥ २५ ॥ नमस्ते देवदेवाय त्रयीरूपाय ते नमः ॥ चंद्रसूर्यादिरूपेण जगद्भासयते सदा ॥ २६ ॥ सर्वतीर्थमयी गंगा यस्य पादाब्जसंगमात् ॥ पुनाति सकलाँल्लोकांस्तस्मै पावयते नमः ॥ २७ ॥ हवींषि मंत्रपूतानि सम्यग्दत्तानि वह्निषु ॥ परिणामकृते तुभ्यं जगज्जीवयते नमः ॥ २८ ॥ यदंशमुपजीवंति जगंत्यानंदरूपिणः ॥ सर्वकल्मषहीनाय तस्मै ब्रह्मात्मने नमः ॥ २९ ॥ निर्मलाय स्वरूपाय शुभरूपाय मायिने ॥ सर्वसंगविहीनाय नमस्ते विश्वसाक्षिणे ॥ ३० ॥ बहुपादाक्षिशीर्षास्यबाहवे सर्वजिष्णवे ॥ सर्वजीवस्वरूपाय नमस्ते सर्वरूपिणे ॥ ३१ ॥ नमस्ते कमलाकांत नमस्ते कमलासन ॥ नमः कमलपत्राक्ष त्राहि मां पुरुषोत्तम ॥ ३२ ॥ असारसंसारपरिभ्रमेण निपीड्यमानं खलु रोगशोकैः ॥ मामुद्धरास्माद्भवदुःखजातात्पादाब्जयोस्ते शरणं प्रपन्नम् ॥ ३३ ॥ ॥ जैमिनिरुवाच ॥ ॥ इति स्तुत्वा सुरेशानं देवं प्रणवरूपिणम् ॥ प्रणतः प्रणवं मंत्रं जजाप पुरतो हरेः ॥ ३४ ॥ जपांते शांतमनसं कृतांजलिमुपस्थितम् ॥ मन्यमानं कृतार्थं स्वं प्रोवाच शबरो द्विजम् ॥ ३५ ॥ ॥ विश्वावसुरुवाच ॥ ॥ कृतार्थस्त्वं प्रभुं दृष्ट्वा सांप्रतं द्विजपुंगव ॥ दिनांतोऽभूद्गृहं यावः क्षुधितोऽसि श्रमान्वितः ॥ ३६ ॥ वासोऽप्यरण्ये हिंस्राणां नास्माकमुचिता स्थितिः ॥ यावद्भानोर्भाति भासस्तावद्यामो निजालयम् ॥ ३७ ॥ इत्युक्त्वा ब्राह्मणं पाणौ गृहीत्वा शबरः पुनः ॥ आजगाम द्विजश्रेष्ठाः स्वाश्रमं त्वरयान्वितः ॥ ३८ ॥ ब्राह्मणोऽपि जगन्नाथं ध्यायन्नानंदसागरम् ॥ क्षुत्तृषाश्रमजातानि दुःखानि बुबुधे न हि ॥ ३९ ॥ शिलाविषममार्गेऽपि कंटकोत्करदुर्गमे ॥ व्रजन्न दुःखं लेभेऽसौ शरीरानास्थया मुदा ॥ ४० ॥ एवं व्रजंतौ तौ विप्रशबरौ शबरालयम् ॥ सायाह्ने तमनुप्राप्तौ वैष्णवाग्र्यौ तु भो द्विजाः ॥ ४१ ॥ तत्रातिथिमनुप्राप्तं ब्राह्मणं शबरोत्तमः ॥ भक्ष्यभोज्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विधानैश्च विविधैः समपूजयत् ॥ ४२ ॥ ततोऽभितृप्तस्तद्दत्तैरुपचारैर्नृपोचितैः ॥ विस्मयं परमं लेभे शबरस्य सुदुर्लभैः ॥ ४३ ॥ शबरोऽयं
निवसति विषमे काननांतरे ॥ आरण्यकैर्वर्त्तमानः कथमस्य गृहांतरे ॥ ४४ ॥ राजार्हभक्ष्यभोज्यानि सुलभान्यद्भुतं महत् ॥ इति विस्मय
मापन्नं ब्राह्मणं शबरस्तदा ॥ ४५ ॥ प्रोवाच स्निग्धवचसा विनयावनतो भृशम् ॥ ४६ ॥ ॥ शबर उवाच ॥ ॥ भो विप्र श्रमहीनोऽसि कच्चि
त्क्षुत्तृड्विवर्जितः ॥ आरण्यकानां भवने नागराणां कुतः सुखम् ॥ ४७ ॥ अज्ञाता नागरी वृत्तिः शबरैस्तु विशेषतः ॥ राजोपजीविनां श्रेष्ठौ
राजामात्यपुरोहितौ ॥ ४८ ॥ तयो राजसमः पूज्यः पुरोधाः शास्त्रसंमतः ॥ इन्द्रद्युम्नो नरपतिः सार्वभौमः प्रतापवान् ॥ ४९ ॥ त्वयि तुष्टे
स संतुष्टो ध्रुवं विप्र भविष्यति ॥ इत्युक्तवत्यरण्यस्थे स तु प्रीततरो द्विजः ॥ उवाच शबरं प्रीत्या विनयाद्भुतवादिनम् ॥ ५० ॥ ॥ विद्यापति
रुवाच ॥ ॥ साधो मदुपचाराय हृतान्येतानि यानि ते ॥ वस्तून्यमानुषाणीह यान्यदृष्टानि राजभिः ॥ ५१ ॥ चित्रमेतद्दिव्यवस्तुसंचयः
शबरालये ॥ एतत्ख्यातुं कौतुकं मे साधो संवर्द्धते महत् ॥ ५२ ॥ ॥ शबर उवाच ॥ ॥ एतत्प्रकाशितुं विप्र मतिर्नोत्सहते मम ॥ तथापि
ते द्विजश्रेष्ठाऽतिथिभक्त्या वदाम्यहम् ॥ ५३ ॥ शक्रादयो देवगणाः समायान्त्यन्वहं द्विज ॥ दिव्योपचारानादाय पूजनाय जगत्पतेः ॥ ५४ ॥
पूजयित्वा जगन्नाथं स्तुत्वा नत्वा च भक्तितः ॥ गीतवादित्रनृत्यैश्च संतोष्य पुरुषोत्तमम् ॥ ५५ ॥ पुनः प्रयांति सततं त्रिदिवं सुरसत्तमाः ॥
दिव्यान्येतानि वस्तूनि निर्माल्यानि जगत्पतेः ॥ ५६ ॥ दत्तानि तुभ्यं विदुषे कथं विस्मयते भवान् ॥ विष्णोर्निर्माल्यभोगेन क्षीणरोगजरा
वयम् ॥ ५७ ॥ सपुत्रबांधवाः सर्वे निवसामोऽयुतायुषः ॥ विष्णुनिर्माल्यभोगेन क्षीयते पापसंहतिः ॥ ५८ ॥ न तच्चित्रं द्विजश्रेष्ठ येन स्यान्मुक्ति
भाजनम् ॥ श्रुत्वैतद्दुर्लभं कर्म ब्राह्मणो रोमहर्षणः ॥ ५९ ॥ आनंदाश्रुविलुप्ताक्षः स्वं कृतार्थममन्यत ॥ अहो शबरजन्मासौ पश्यत्यव्ययमी
श्वरम् ॥ ६० ॥ तदुच्छिष्टं दिव्यभोगमुपभुंक्ते दिवानिशम् ॥ नान्योऽस्य सदृशो लोके पृथिव्यां सचराचरे ॥ ६१ ॥ यादृशो विष्णुभक्तोऽयं
शबरो नीलपर्वते ॥ किं गत्वा स्वगृहे मेऽद्य कुटुंबेनाऽसुखात्मना ॥ ६२ ॥ अनेन सख्यं निष्पाद्य स्थास्याम्यत्र वनांतरे ॥ चिन्तयित्वा चिरं
विप्रः श्रीकृष्णासक्तमानसः ॥ ६३ ॥ पुनः प्रोवाच शबरं मयि ते चेदनुग्रहः ॥ साधो सख्यं त्वया कार्यमिति मे निश्चयो महान् ॥ ६४ ॥ किं
गत्वा सेवया राज्ञः परत्रासुखहेतुना ॥ अत्र स्थित्वा त्वया सार्धमुपास्य मधुसूदनम् ॥ ६५ ॥ यथा पुनर्देहबंधो यतिष्ये न भवेन्मम ॥ साधु
मित्र त्वया सार्द्धं भाग्यान्मे संगमोऽभवत् ॥ ६६ ॥ दुस्तारं भवसंसारं तरिष्ये त्वत्प्रसादतः ॥ सारमेतत्प्रशंसंति संसारे भवसागरे ॥ ६७ ॥ यद्वै

CC-0. In Public Domain. Digitization by eGangotri

ष्णवेन मित्रत्वं दुःखसंसारपारदम् ॥ मित्रस्य सहवासेन पुनः प्रत्यक्षमेष्यति ॥ ६८ ॥ भगवान्पुण्डरीकाक्षः शंखचक्रगदाधरः ॥ इंद्रद्युम्नो नरपति र्मयि प्रत्यागते सखे ॥ ६९ ॥ भगवंतं समाराद्धुमिहैव स निवत्स्यति ॥ प्रासादं विपुलं :चात्र चिकीर्षुर्भगवत्प्रियम् ॥ ७० ॥ सहस्र मुपचाराणां पूजनाय जगत्पतेः ॥ रचयिष्यामीति महत्प्रतिज्ञासीन्महीपतेः ॥ ७१ ॥ प्रतिश्रुतं तत्पुरतः प्रीतस्तन्मेऽनुमन्यताम् ॥ ७२ ॥ ॥ ॥ शबर उवाच ॥ ॥ सखे पुरातनी वार्त्ता प्रसिद्धैवात्र तादृशी ॥ ७३ ॥ त्वया यथैव कथित इन्द्रद्युम्नसमागमः ॥ केवलं माधवं तत्र न द्रक्ष्यति महीपतिः ॥ ७४ ॥ अचिरादेव भगवान्स्वर्णवालुकयावृतः ॥ प्रतिजज्ञे यमायैतदन्तर्द्धानं गमिष्यति ॥ ७५ ॥ महा भाग्यपरीपाकात्प्रत्यक्षोऽयं त्वया कृतः ॥ इन्द्रद्युम्नागमाभ्यासे ध्रुवं स व्यवधास्यति ॥ ७६ ॥ एषोऽर्थस्तु त्वया मित्र न वक्तव्यो नृपाग्रतः ॥ आगत्य सोऽत्र नृपतिरदृष्ट्वा परमेश्वरम् ॥ ७७ ॥ प्रायोपवेशव्रतवान्स्वप्ने दृष्ट्वा गदाधरम् ॥ तदादेशाद्दारुमयं प्रभोर्लिंगचतुष्टयम् ॥ ७८ ॥ पूज यिष्यति भक्त्या च प्रतिष्ठाप्य स्वयंभुवा ॥ स्थितिरत्र हरेर्यावदावयोर्वंशसंस्थितिः ॥ ७९ ॥ अनुग्रहाद्भगवतो नात्र कार्या विचारणा ॥ तदत्रार्थे सखे खेदं मा व्रज क्षिप्रमेव हि ॥ ८० ॥ निर्वर्त्स्यतेऽचिरादेव मित्रेदानीं सुखं स्वप ॥ प्रातर्दृष्ट्वा पुनर्देवं नीलेन्द्राश्ममयं विभुम् ॥ ८१ ॥ सिंधौ स्नात्वा तस्य तटे निवासाय महीपतेः ॥ द्रक्ष्यामः साधु संस्थानं यथाभिलषितं सखे ॥ ८२ ॥ इत्यन्याश्च कथाः पुण्याः कृत्वा तौ च परस्परम् ॥ शुभस्थाने चास्वपतां शयने पल्लवास्तृते ॥ ८३ ॥ प्रभातायां तु शर्वर्यां तीर्थराजोदकेन तौ ॥ स्नानं निर्वर्त्य विधिवन्माधवं प्रणि पत्य च ॥ ८४ ॥ राजार्हस्थानं निर्णीय निवासाय गतौ पुनः ॥ तत्र मित्रेणाभिमन्त्र्य राज्ञो निर्देशकारणात् ॥ ८५ ॥ रथमारुह्य विप्रः स त्ववंती पुरमाययौ ॥ ८६ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे पुरुषोत्तमक्षेत्रमाहात्म्ये जैमिनिऋषिसंवादेऽष्टमो ऽध्यायः ॥ ८ ॥ ॥ जैमिनिरुवाच ॥ ॥ प्रत्यागते ततो विप्रे सायाह्ने सुरसंकुले ॥ माधवार्चनवेलायां वातश्चंडगतिर्ववौ ॥ १ ॥ सुवर्णवालुकाश्चासौ विचकार च सर्वशः ॥ तेनाकुलदृशो देवा न शेकुरवलोकने ॥ २ ॥ श्रीकांतस्य तदा विप्रा दध्युस्ते पुरुषोत्तमम् ॥ यावद्ध्यानस्थिरदृशो मुहूर्तं ते दिवौकसः ॥ ३ ॥ ध्यानांते वालुकाराशिं ददृशुस्ते न माधवम् ॥ रौहिणं च तथा कुंडं बभूवुर्व्याकुलेन्द्रियाः ॥ ४ ॥ चिंतामवापुर्महतीं हाहेति रुरुदुर्भृशम् ॥ किमेतन्नो हि दुर्दैवमेकदा समुपस्थितम् ॥ ५ ॥ दृशां सेचनकः श्रीशः क्षणाद्यन्नोपलभ्यते ॥ अपराधं किमस्माकं लक्षितं पुरुषो त्तम ॥ ६ ॥ युगपत्सेवकान्सर्वानपहाय न दृश्यसे ॥ येषामर्थे जगन्नाथ स्वीचकर्थ कलेवरम् ॥ ७ ॥ताननाथान्परित्यज्य कानने किमुपेक्षसे ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वशरीरविभूतीर्नो विहाय कमलेक्षण ॥ ८ ॥ किमकांडं रचयसि कथाशेषान्दिवौकसः ॥ तवांशभूतान्नः सर्वान्यज्ञानः प्रयजंति वै ॥ ९ ॥
त्वत्प्रीत्यै यज्ञपुरुष त्वदादिष्टफलप्रदान् ॥ त्वदहंकारवर्ष्माणस्त्वदनुग्रहजीवनाः ॥ १० ॥ कांदिशीकाः कुत्र यामः सांप्रतं त्वदुपेक्षिताः॥ दिवि स्था
नैश्च किं कार्यं त्वामनालोक्य माधव ॥ ११ ॥ अकृतार्थास्त्वया हीना भविष्यामो वनेचराः ॥ निष्कलंकसुधाभानुं सुषमापरिभावुकम् ॥ १२ ॥
त्वदास्यं चेन्न पश्यामो न यास्यामः सुरालयम् ॥ तप आस्थाय परममत्रैव संशितव्रताः ॥ १३ ॥ वर्त्तामहे वन्यवृत्त्या जटावल्कलधारिणः ॥
यावत्त्वां पुंडरीकाक्ष विलोकिष्यामहे वयम् ॥ १४ ॥ निसर्गकरुणांभोधे दीनान्नस्त्रातुमर्हसि ॥ अनाथान्दीनहृदयांस्त्वामेव शरणं गतान् ॥ १५ ॥
त्वदनालोकशोकैकपारावारे निमज्जतः ॥ शुभदृष्टितरण्या नः समुद्धर जगत्पते ॥ १६ ॥ एवं प्रलपतां तत्र सर्वेषां त्रिदिवौकसाम् ॥ अशरीरा
तदा वाणी पुनः प्रादुर्बभूव ह ॥ १७ ॥ अत्रार्थे भोः सुरा यत्नं कर्तुमर्हथ नो वृथा ॥ अद्यप्रभृति देवस्य दर्शनं दुर्लभं भुवि ॥ १८ ॥ अत्र
स्थानेऽपि तं नत्वा तद्दर्शनफलं लभेत् ॥ स्वयंभुवोंऽतिकं गत्वा हेतुं ज्ञास्यथ निश्चितम् ॥ १९ ॥ तच्छ्रुत्वा त्रिदशाः सर्वे ब्रह्मणोंऽतिकमागताः ॥
यमानुग्रहवृत्तांतमवतारं च दारुणः ॥ २० ॥ श्रुत्वा संतुष्टमनसः सर्वे ते त्रिदिवं गताः ॥ स तु विद्यापतिर्विप्रो रथारूढोऽभ्यचिंतयत् ॥ २१ ॥
मम कार्यं तु निष्पन्नं यद्दृष्टो नीलमाधवः ॥ आसमंतात्क्षेत्रमिदं परिभ्रम्यावलोकये ॥ २२ ॥ अदृष्टपूर्वं परमं सुपुण्यं संकीर्तनं यस्य मलापहारि ॥
क्षेत्रोत्तमं श्रीपुरुषोत्तमाख्यं प्रदक्षिणीकृत्य व्रजामि तूर्णम् ॥ २३ ॥ पृथ्वीप्रदक्षिणफलं शतधा भजंते पर्यंति ये सकलकल्मषदार्यरण्यम् ॥ नीलाद्रि
मण्डिमिदं पुरुषोत्तमाख्यं मित्रं समोपदिशति स्म समुद्रतीरे ॥ २४ ॥ विचिंत्येत्थं द्विजश्रेष्ठः परिबभ्राम वै तदा ॥ क्षेत्रं पश्यन्वनं चैव नानाद्रुमग
णान्वितम् ॥ २५ ॥ नानापक्षिगणाघुष्टं कूजद्भ्रमरगुंफितम् ॥ अप्रविष्टार्ककिरणं छायातरुगणावृतम् ॥ २६ ॥ सर्वर्तुकुसुमोपेतं लतागुल्मोपशोभि
तम् ॥ नानाजलाशयाधारकूजत्सारससंकुलम् ॥ २७ ॥ पद्मकह्लारकुमुदविकचोत्पलराजितम् ॥ न जलं तत्र कुसुमपरिहीनं लतादिकम् ॥ २८ ॥
परीत्य वेगात्तत्क्षेत्रं जगामाथ द्विजोत्तमः ॥ ध्यायन्निरशनः प्राज्ञः प्राप्यावन्तीं दिनात्यये ॥ २९ ॥ दूतैरावेदितं पूर्वं दूरस्थस्यागतं द्विजाः ॥
श्रुत्वेंद्रद्युम्नो नृपतिः प्रहर्षं परमं ययौ ॥ ३० ॥ तदागमनमाकांक्षन्पूजयित्वा जनार्दनम् ॥ विद्वद्भिर्ब्राह्मणैः सार्द्धं तस्थौ संहृष्टमानसः ॥ ३१ ॥
एतस्मिन्नंतरे विप्राः स तु विद्यापतिर्द्विजः ॥ प्रावेशिकैर्वेत्रहस्तैर्दौवारिकपुरःसरैः ॥ ३२ ॥ निर्दिष्टमार्गः पौरैश्चाऽनुमतः कौतुकान्वितैः ॥ निर्मा
ल्यमालां नीलाख्यमाधवस्य सुशोभनाम् ॥ ३३ ॥ निधाय पाणौ राजाग्रे प्रविवेश त्वरान्वितः ॥ तं दृष्ट्वा नृपतिः सोऽथ समुत्थाय वरास

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नात् ॥ प्रसीद जगदीशेति वदन्नंतिकमभ्यगात् ॥ ३४ ॥ अद्य मे जीवितं जातं सफलं जन्मकर्मणा ॥ निर्माल्यमालावपुषं यत्पश्यामीहमाध
वम् ॥ ३५ ॥ मालां मुकुन्दशिरसोऽनुपमप्रमोदलाभाधरीकृतसुरद्रुमकांतगन्धाम् ॥ अन्धीकृतालिनिचयां पवनप्रसारिगन्धप्रणाशितजगत्कलुषां
नमामि ॥ ३६ ॥ यत्पादपंकजगलद्रजसोनुषंगा ब्रह्मादयः परमसंपदमापुरस्य ॥ विष्णोः कलेवरसमुज्ज्वलितांगरागसंसक्तपुष्पनिलयां प्रण
तोस्मि मालाम् ॥ ३७ ॥ पद्मां हृत्पद्मवसतिं सपत्नीं या हसत्यसौ ॥ विकस्वरैः सुकुसुमैर्विष्णवंकस्थितिगर्विताम् ॥ ३८ ॥ कुत्र स्थितेयमा
हार्षीन्महिमानं स्रगुज्वला ॥ या श्रीनिधेः शरीरेऽऽभूत्सर्वांगव्यापिनी चिरम् ॥ ३९ ॥ जय नीलाद्रिशिखरभूषणाघप्रदूषण ॥ प्रणतार्त्तिहर
श्रीमंस्त्राहि मां शरणागतम् ॥ ४० ॥ इति ब्रुवाणः क्षितिपो बाष्पगद्गदया गिरा ॥ जगाम शिरसा भूमिं स्फुरद्रोमांचकंचुकः ॥ ४१ ॥ सोऽपि
विद्यापतिर्विप्रः क्षपिताशेषकल्मषः ॥ दिव्यदेहो नृपस्याग्रे ध्यायन्माधवमास्थितः ॥ ४२ ॥ तेजसा सर्वलोकानां पापानि क्षालयन्सुधीः ॥
अनुगृह्णातु देवस्त्वां नीलाद्रिशिखरालयः ॥ ४३ ॥ श्रीपतेरियमाज्ञा ते मालारूपा प्रकाशिता ॥ द्रष्टुं क्षेत्रोत्तमगतं स्वं साक्षान्मुक्तिदायकम् ॥
॥ ४४ ॥ इत्युच्चरन्नरपतेरामुमोच गले स्रजम् ॥ सोऽप्युत्थाय क्षितिपतिर्मालां हृदयलंबिनीम् ॥ ४५ ॥ दृष्ट्वा मेने श्रियः कांतं साक्षाद्धृदय
गामिनम् ॥ निधाय पाणी शिरसि दरमीलितलोचनः ॥ ४६ ॥ आनंदाश्रुजलक्लिन्नवदनस्तुष्टुवे हरिम् ॥ ४७ ॥ ॥ इन्द्रद्युम्न उवाच ॥ ॥
जयाखिलजगत्सृष्टिस्थितिसंहारशिल्पकृत् ॥ लीलाविश्ववपुर्लोमसंख्यब्रह्मांडभारभृत् ॥ ४८ ॥ अंतर्यामिन्नशेषाणां प्रणतार्तिहर प्रभो ॥ ब्रह्मेंद्र
रुद्रमुकुटकिर्मीरितपदांबुज ॥ ४९ ॥ दीनानाथविपन्नैकसततत्राणतत्पर ॥ निर्व्याजकरुणावारिपारावार परात्पर ॥ ५० ॥ त्वदेकशरणं दीनमना
दिभ्रमनिर्भरम् ॥ परित्राहि जगन्नाथ भक्ताविरतवत्सल ॥ ५१ ॥ इति स्तुवन्नरपतिः स्वासने समुपाविशत् ॥ गृहमेधिब्रह्मचारियतिवैखानसैर्वृतः ॥
॥ ५२ ॥ अष्टादशसु विद्यासु कुशलैर्यज्वभिर्द्विजैः ॥ मौनैः स्थविरभृत्यैश्च सार्द्धं मंत्रिपुरःसरैः ॥ ५३ ॥ विद्यापतिं पूजयित्वा बहु
मानपुरःसरम् ॥ उपवेश्याग्रतः पीठे पृष्ट्वा कुशलमादितः ॥ ५४ ॥ पुरुषोत्तमक्षेत्रस्य विष्णोर्नीलाश्मवर्ष्मणः ॥ महिमानं स्वरूपं च
पप्रच्छावहितो मुदा ॥ ५५ ॥ ब्राह्मणः क्षत्रियेणासौ पृष्टोनुभवमात्मनः ॥ भिल्लद्वीपप्रवेशादिमज्जनांतं सरित्पतेः ॥ ५६ ॥ क्षेत्रोत्तमस्य वृत्तांतं
कथयामास विस्तरात् ॥ नीलाद्रिरोहणं नीलमाधवस्य च दर्शनम् ॥ ५७ ॥ स्नानं च रौहिणे कुण्डे महिमानं वटस्य च ॥ नृसिंहाद्यष्टशंभून
शक्तीनामष्टसंस्थितिम् ॥ ५८ ॥ रथेनाक्रमणाद्दृष्टौ क्षेत्रस्यायामविस्तरौ ॥ तत्सर्वं वर्णयामास यथावदनुपूर्वशः ॥ ५९ ॥ तच्छ्रुत्वा चित्रमतुलं ते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

र्थिकावेदितं पुरा ॥ संप्रतीतो हृष्टमनाः पुनस्तं क्षितिपोऽब्रवीत् ॥ ६० ॥ ॥ इन्द्रद्युम्न उवाच ॥ ॥ श्रुतपूर्वं तु भगवंस्त्वत्तोऽश्रौषं सुदुर्लभम् ॥
क्षेत्रोत्तमं द्विजश्रेष्ठ सांप्रतं वर्णयस्व मे ॥ ६१ ॥ नीलेन्द्रमणिमूर्तेस्तु विष्णो रूपं यथातथम् ॥ ॥ विद्यापतिरुवाच ॥ ॥ हंत ते कथयिष्यामि
दिव्यां मूर्तिं जगत्पतेः ॥ ६२ ॥ यां चर्मचक्षुषा दृष्ट्वा जायते मुक्तिभाजनम् ॥ नीलेन्द्रमणिपाषाणमयी मूर्तिः पुरातनी ॥ ६३ ॥ यान्वहं
ब्रह्मरुद्रेंद्रपुरोगैरर्चिता सुरैः ॥ आरोपितेयं दिव्या स्रक्पूजायां हि सुपर्वभिः ॥ ६४ ॥ सेयं न म्लायति नृप न च गन्धेन रिच्यते ॥ दिने बहुतिथे
यातेऽपीदृशी स्रग्धरोद्भवा ॥ ६५ ॥ दिव्योपहारनिर्माल्यभक्षणात्क्षीणकल्मषम् ॥ मां न पश्यसि किं राजन्नतिमानुषवर्चसम् ॥ ६६ ॥ सकृदप्यश
नाद्यस्य क्षुत्पिपासाबलक्षयाः ॥ न बाधन्ते नृपश्रेष्ठ दृष्टेनादृष्टकल्पनम् ॥ ६७ ॥ भुक्तिर्मुक्तिश्च वै राजन्द्वे तत्र युगपत्स्थिते ॥ न जरारोगशोका
दिदुःखं तत्र हि विद्यते ॥ ६८ ॥ यत्र साक्षाज्जगन्नाथः प्रसन्नवदनो विभुः ॥ फुल्लेंदीवरपत्राक्षः प्रपन्नामृतमुक्तिदः ॥ ६९ ॥ इति श्रीस्कांदे
महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे श्रीपुरुषोत्तममाहात्म्ये जैमिनिऋषिसंवादे नवमोऽध्यायः ॥ ९ ॥ ॥ इन्द्रद्युम्न
उवाच ॥ ॥ जन्मप्रभृति तत्र त्वं न प्रयातो द्विजोत्तम ॥ कथं विद्याद्भवान्दिव्यवृत्तांतं पुरुषोत्तमे ॥ १ ॥ ॥ विद्यापतिरुवाच ॥ ॥ तत्र
स्थितोऽहं सायाह्ने भगवंतमुपागमम् ॥ तस्मिन्काले दिव्यगन्धो ववौ च शिशिरो मरुत् ॥ २ ॥ उद्यतः संकुलः शब्दः श्रूयते स्म वियत्पथे ॥
क्रमाद्याहि प्रयाहीति स तु वर्णमयः स्वनः ॥ ३ ॥ दिविष्ठानां पतत्पुष्पवृष्ट्याच्छादितपर्वतः ॥ समागमोऽभूत्सान्निध्ये वैकुंठस्य महीपते ॥ ४ ॥
वीणावेणुमृदंगानां चर्चरीणां च निःस्वनः ॥ अभूतपूर्वस्तत्रासीद्दिव्यगानविमिश्रितः ॥ ५ ॥ सहस्रमुपचाराणां प्रीतये परमेशितुः ॥ देवैः समर्पितं
तत्र मनुष्यादृष्टपूर्वकम् ॥ ६ ॥ संपूज्य विधिवद्देवं करमात्रोपलक्षिताः ॥ जयपूर्वैश्च तं स्तोत्रैः संतोष्य मधुसूदनम् ॥ ७ ॥ यथागतं ते त्रिदशाः
प्रययुस्त्रिदशालयम् ॥ तेषु यातेषु शबरः सखा विश्वावसुर्मम ॥ ८ ॥ दिव्योपहारभोज्यानि माल्यं चेदं ददौ मम ॥ अनर्घ्यमेतदम्लानं
श्रीराज्यसुखदायकम् ॥ ९ ॥ अलक्ष्मीपापरक्षोघ्नं योग्यं तेनाहृतं मया ॥ शृणुष्व तस्य संस्थानं विष्णोर्यत्क्षेत्रमुत्तमम् ॥ १० ॥ अपूर्वशिल्पनै
पुण्यं रूपं चास्य मनोहरम् ॥ न भूमिजन्मना पुंसा शक्यते गदितुं हि तत् ॥ ११ ॥ त्वद्भाग्यपौरुषाभ्यां तल्लक्षितं कथयामि ते ॥ समंताद्गहनाकीर्णं
क्षेत्रं नीलाद्रिनाभिकम् ॥ १२ ॥ आयामविस्तृतिभ्यां च विख्यातं क्रोशपंचकम् ॥ तीर्थराजस्य वेलायां स्वर्णवालुकयावृतम् ॥ १३ ॥ अद्रेः
शृंगे महानुच्चः कल्पस्थायी वटो महान् ॥ क्रोशायतः पुष्पफलवर्जितः पल्लवोज्ज्वलः ॥ १४ ॥ सूर्यापक्रमणे तस्य छायां नापक्रमेत वै ॥ तस्य

CC-0. In Public Domain. Digitization by eGangotri

पश्चात्प्रदेशे हि कुंडं रोहिणसंज्ञकम् ॥ १५ ॥ जलोद्गमान्नीलदृषदारोहणविभूषितम् ॥ बहिः स्फटिकवेदीभिश्चतुर्दिक्षु परीवृतम् ॥ १६ ॥ अघसं
घातहारीभिरद्भिः पूर्णं मनोरमम् ॥ तत्पूर्ववेदिकामध्ये न्यग्रोधच्छायशीतले ॥ १७ ॥ इन्द्रनीलमयो देव आस्ते चक्रगदाधरः ॥ एकाशीत्यंगुलमितः
स्वर्णपद्मोपरि स्थितः ॥ १८ ॥ अष्टमीचन्द्रशकलशोभाविजयिभालभूः ॥ स्मेरेंदीवरयुग्मश्रीधिक्कारोद्यतलोचनः ॥ १९ ॥ आननामृतभानूद्यत्सं
तापत्रयमोचनः ॥ नासापुटद्वयोद्भासितिलपुष्पप्रशोभनः ॥ २० ॥ वपुषोऽश्ममयत्वेऽपि सुस्मितस्नपिताधरः ॥ हाससंफुल्लगंडाभ्यां रुचिरं
चिबुकं हनुः ॥ २१ ॥ अनन्यपूर्वघटितं सृक्किणीयुगमंजसा ॥ हासनिम्नाधरौ गंडौ चिबुकं सृक्किणी शुभे ॥ २२ ॥ वहन्निदर्शनं देवो विश्वकर्मादिशि
लिपनाम् ॥ मकरास्यकर्णभूषाशोभिश्रुतियुगेन सः ॥ २३ ॥ गुरुभार्गवयोर्मध्ये पूर्णचंद्रोपहासकः ॥ ग्रैवेयशोभाजनककंठदेशेन पश्यताम् ॥ २४ ॥
दक्षिणावर्त्तशंखस्य मुक्ताजन्माभिशंककृत् ॥ पीनायतस्कंधयुगजानुदीर्घचतुर्भुजः ॥ २५ ॥ स्वच्छनिर्मलहारोपशोभकोरःस्थलो विभुः ॥ धत्ते चतु
र्दशजगद्दिव्यकौस्तुभाबिंबितम् ॥ २६ ॥ निम्ननाभिह्रदाविष्टतनुरोमालिमंजुलः ॥ हारं त्रिवलिमध्येन स्थाणुत्वपरिणामकः ॥ २७ ॥ सुरत्नमेख
लादाम्ना किंकिणीमौक्तिकस्रजा ॥ जगल्लावण्यपुटके स्फिचौ देवस्य शोभतः ॥ २८ ॥ जघनालंबिमुक्तास्रक्पीतचैलोपशोभितम् ॥ जंघास्तंभयुगं
मोक्षमांगल्यतोरणाश्रयम् ॥ २९ ॥ वृत्तानुपूर्वजानुभ्यां मालया प्रपदीनया ॥ रत्नाढ्यवलयाभ्यां च शोभेते चरणौ विभोः ॥ ३० ॥ हारकंकणके
यूरमुकुटाद्यैरलंकृतम् ॥ ज्ञानाहंकारकैश्वर्यशब्दब्रह्मणि केशवः ॥ ३१ ॥ चक्रपद्मगदाशंखपरिणामानि धारयन् ॥ सर्वाशाद्योतको देवो नीलाद्रेरु
परि स्थितः ॥ ३२ ॥ भक्त्या प्रणम्य दृष्ट्वा यं देहबंधात्प्रमुच्यते ॥ वामपार्श्वगता लक्ष्मीराश्लिष्टा पद्मपाणिना ॥ ३३ ॥ वल्लकीवादनपरा भगवन्मु
खलोचना ॥ सर्वलावण्यवसतिः सर्वालंकारभूषिता ॥ ३४ ॥ तावपश्यं हि जगतः पितरावचलस्थितौ ॥ तूष्णींभूतौ स्मेरदृशाऽनुगृह्णंतौ च पश्यतः
॥ ३५ ॥ सजीवौ तावबुधं भो दीनानुग्रहकारणात् ॥ छत्रीभूतफणावृंदः शेषः पश्चादवस्थितः ॥ ३६ ॥ अग्रे व्यवस्थितं दृष्टं वपुर्बिभ्रत्सुदर्शनम् ॥
कृतांजलिपुटं तस्य पश्चाद्गरुडमास्थितम् ॥ ३७ ॥ एवमद्भुतरूपं तं दृष्ट्वा साक्षाच्छ्रियः पतिम् ॥ चेतोरज्जुभिराकृष्टमिव तत्रैव धावति ॥ ३८ ॥
अनेकजन्मसाहस्रैः सुकर्माण्यर्जितानि चेत् ॥ युगपत्परिपक्वानि यस्यासौ तं हि पश्यति ॥ ३९ ॥ तीर्थस्नानतपोदानदेवयज्ञव्रतैरपि ॥ नालमालो
कितुं मर्त्यस्तादृशं पुरुषोत्तमम् ॥ ४० ॥ ये नीलमूर्तिं विमलांबराभं ध्यायंति विष्णुं पुरुषोत्तमस्थम् ॥ ते क्षीणबंधाः प्रविशंति विष्णोः पुरं हि
यत्प्राप्य न शोचतीह ॥ ४१ ॥ विद्याभिरष्टादशभिः प्रणीतं नानाविधं कर्मफलं नृणां यत् ॥ एकत्र तत्सर्वममुष्य विष्णोः संदर्शनस्यैति शतांशमा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नम् ॥ ४२ ॥ किमत्र वाच्यं त्वधिकं क्षितींद्र पुंसो मतिर्यावदुपैति कामान् ॥ लभेत नीलाद्रिपतिं प्रणम्य ततोऽधिकं क्षेत्रभुवो महिम्ना ॥ ४३ ॥
स एव दाता क्रतुभिः स यष्टा सत्यप्रवक्ता स तु धर्मशीलः ॥ सर्वैर्गुणैः सर्वभवैर्वरिष्ठो नीलाद्रिनाथः खलु येन दृष्टः ॥ ४४ ॥ तत्र ये सेवकाः संति
माधवस्य जगत्पतेः ॥ तेभ्यः सकाशान्माहात्म्यमिदं ज्ञातं मया नृप ॥ ४५ ॥ तस्मिन्परंपरायातमादिसृष्टेः पुरातनम् ॥ प्रसिद्धमिदमाख्यानं
श्रुत्वा तत्रागतो ह्यहम् ॥ ४६ ॥ त्वदाज्ञया तत्र गत्वा दृष्ट्वा श्रीपुरुषोत्तमम् ॥ निवेदितं ते राजेंद्र यथेच्छसि तथा कुरु ॥ ४७ ॥ ॥ इंद्रद्युम्न
उवाच ॥ ॥ आप्तवाक्याद्भगवतः श्रुत्वा रूपमघापहम् ॥ कृतकृत्योऽस्मि भगवन्दिव्यनिर्माल्यसंगमात् ॥ ४८ ॥ बहुजन्मस्वर्जितानि
क्षीणानि दुरितानि मे ॥ अधिकारी त्वहं जातो दर्शने श्रीपतेरिह ॥ ४९ ॥ सर्वात्मनाहं यास्यामि राज्येन सुसमृद्धिना ॥ तत्रा
वासं करिष्यामि पुरदुर्गाणि चैव हि ॥ ५० ॥ क्रतुना हयमेधेन यक्ष्ये प्रीत्यै सुरद्विषः ॥ शतोपचारैः श्रीनाथं पूजयिष्ये दिनेदिने ॥ ५१ ॥
व्रतोपवासनियमैः प्रीणयिष्ये जगद्गुरुम् ॥ वाक्यामृतेन संतप्तं यथा मामभिषेक्ष्यति ॥ ५२ ॥ दीनानुकंपी भगवान्साक्षान्नारायणो विभुः ॥
एवं स श्रद्धया भक्त्या संस्तुते यावदीश्वरम् ॥ ५३ ॥ नारदस्तत्र संप्राप्तो भुवनालोककौतुकी ॥ तमायांतमृषिं दृष्ट्वा वैष्णवाग्र्यं
विधेः सुतम् ॥ ५४ ॥ आशशंस स्वकार्यस्य सिद्धिं नरपतिस्तदा ॥ उत्थाय सहसा विप्राः पाद्यार्घ्याचमनीयकैः ॥ वरासनस्थं प्रणतः
प्रोवाचेदं कृतांजलिः ॥ ५५ ॥ ॥ इन्द्रद्युम्न उवाच ॥ ॥ अद्य मे सफला यज्ञा दानमध्ययनं तपः ॥ ५६ ॥ यन्मे गृहं समागच्छद्द्वितीया
ब्रह्मणस्तनुः ॥ कृतार्थो यद्यपि मुने आगमानुग्रहात्तव ॥ ५७ ॥ तथापि त्वत्प्रसादाय किमाज्ञां करवाणि ते ॥ किं प्रयोजनमुद्दिश्य भवनं मे
पवित्रितम् ॥ ५८ ॥ ॥ जैमिनिरुवाच ॥ ॥ तच्छ्रुत्वा नृपतेर्वाक्यं भक्तिप्रश्रयकोमलम् ॥ उवाच ब्रह्मणः पुत्रः स्मितपूर्वं महीपतिम् ॥ ५९ ॥
॥ ॥ नारद उवाच ॥ ॥ इंद्रद्युम्न नृपश्रेष्ठ विमलैस्त्वद्गुणोत्करैः ॥ प्रीणिता देवताः सिद्धा मुनयो ब्रह्मणा सह ॥ ६० ॥ स्वप्रतिष्ठा पृथग्योग्या गुणा
एकैकशस्तव ॥ ब्रह्मणः सदने स्थित्यै पर्याप्तास्तु समीहिताः ॥ ६१ ॥ अवतीर्णो नरं द्रष्टुं तिष्ठंतं बदराश्रमे ॥ तद्ध्यानावसरे ज्ञातो व्यवसाय
स्तवेदृशः ॥ ६२ ॥ साधु व्यवसितं राजन्याभूत्ते बुद्धिरीदृशी ॥ सहस्रजन्मस्वभ्यासाद्भक्तिर्भवति भूपते ॥ ६३ ॥ नीलाचलगुहावासे माधवे जगतां
धवे ॥ पितामहो महाप्राज्ञो यमाराध्य जगत्पतिम् ॥ ६४ ॥ विनिर्ममे सृष्टिमिमां लेभे पैतामहं पदम् ॥ तदन्वयप्रसूतोऽसि युक्ता ते भक्तिरीदृशी ॥
॥६५॥ चतुर्वर्गफला भक्तिर्विष्णौ नाल्पतपःफलम् ॥ अनाद्यविद्या सुदृढपञ्चक्लेशविवर्द्धिनी ॥६६॥ एकैवेयं विष्णुभक्तिस्तदुच्छेदाय जायते ॥ भवा

CC-0. In Public Domain. Digitization by eGangotri

रण्ये प्रतिपदं दुःखसंकटसंकुले ॥ ६७ ॥ नराणां भ्रमतां विष्णुभक्तिरेका सुखप्रदा ॥ निरालंबे द्वंद्ववातप्रोद्यतेस्मिन्सुदुस्तरे ॥६८॥ निमग्नानां भवांभोधौ विष्णुभक्तिस्तरिः स्मृता ॥ आश्रित्यैकां भगवतीं विष्णुभक्तिं तु मातरम् ॥ ६९ ॥ सन्तः सन्तुष्टमनसो न तु शोचन्ति जातुचित् ॥ विष्णुभक्तिसुधापानसंहृष्टानां महात्मनाम् ॥७०॥ ब्राह्म्यं पदं स्वल्पलाभो भाजनानां विमुक्तये ॥ त्रिविधो योंऽहसां राशिः सुमहाञ्जन्मिनां नृप ॥ ७१ ॥ विष्णुभक्तिमहादाववह्नौ स शलभायते ॥ प्रयागगंगाप्रमुखतीर्थानि च तपांसि च ॥ ७२ ॥ अश्वमेधः क्रतुवरो दानानि सुमहांति च ॥ व्रतोपवासनियमाः सहस्राण्यर्जिता अपि ॥ ७३ ॥ समूह एषामेकत्र गुणितः कोटिकोटिभिः ॥ विष्णुभक्तेः सहस्रांशसमोऽसौ न हि कीर्तितः ॥ ॥ ७४ ॥ ॥ जैमिनिरुवाच ॥ ॥ विष्णुभक्तेस्तु माहात्म्यं श्रुत्वा ब्रह्मर्षिणोदितम् ॥ विष्णुभक्तेः स्वरूपं हि ज्ञातुकामः क्षितीश्वरः ॥ ७५ ॥ नारदं पुनराहेदं वाक्यं सत्कारयुक्तिमान् ॥ ७६ ॥ ॥ इन्द्रद्युम्न उवाच ॥ ॥ महिमा विष्णुभक्तेस्तु साधु प्रोक्तो महामुने ॥ तस्याः स्वरूपजिज्ञासा चिरान्मे हृदि वर्त्तते ॥ ७७ ॥ लक्षणं वर्णयेदानीं भक्तेर्वैष्णवपुंगव ॥ त्वदन्यो न हि वक्ता स्याद्विज्ञातो मे महीतले ॥ ७८ ॥ ॥ नारद उवाच ॥ ॥ साधु राजंस्त्वया पृष्टं भक्तिलक्षणमुत्तमम् ॥ कथयिष्ये यथार्थं त्वां भक्तिभाजनमुत्तमम् ॥ ७९ ॥ अपात्रे न हि वाच्येयं नरेंऽधे मलिनांतरे ॥ शृणुष्वावहितो राजन्प्रोच्यमानां मयानघ ॥ ८० ॥ सामान्यतो विशेषाच्च विष्णोर्भक्तिं सनातनीम् ॥ अत्यन्तसुखसंप्राप्तौ विच्छेदे दुःखसंततेः ॥ ८१ ॥ हेतुरेकोऽयमेवेति संश्रयाद्भक्तिरुच्यते ॥ त्रिधा सा गुणभेदेन तुरीया निर्गुणा मता ॥ ८२ ॥ कामक्रोधाभिभूतानां दृष्ट्वा यान्यं न पश्यताम् ॥ लब्धये चाभिचाराय भक्तिः स्यान्नृप तामसी ॥ ८३ ॥ यशसे चातिरिक्ताय परस्य स्पर्द्धयापि वा ॥ प्रसंगात्परलोकाय भक्तिः सा राजसी स्मृता ॥ ८४ ॥ आमुष्मिकं स्थिरतरं दृष्ट्वा भावान्विनश्वरान् ॥ पश्यताश्रमवर्णोक्तान्धर्मान्नैव जिहासता ॥ ८५ ॥ आत्मज्ञानाय या भक्तिः क्रियते सा तु सात्त्विकी ॥ जगच्चेदं जगन्नाथो नान्यं चापि च कारणम् ॥ ८६ ॥ अहं च न ततो भिन्नो मत्तोसौ न पृथक्स्थितः ॥ हीनं बहिरुपाधीनां प्रेमोत्कर्षेण भावनम् ॥ ८७ ॥ दुर्लभा भक्तिरेषा हि मुक्तयेऽद्वैतसंज्ञिता ॥ सात्त्विक्या ब्रह्मणः स्थानं राजस्या शक्रलोकताम् ॥ ८८ ॥ प्रयांति भुक्त्वा भोगान्हि तामस्या पितृलोकताम् ॥ पुनरागत्य भूर्लोकंभक्तिं तां वैपरीत्यतः ॥ ८९ ॥ तामसो राजसीं कुर्याद्राजसः सात्त्विकीं तथा ॥ सात्त्विको मुक्तिमाप्नोति कृत्वा चाद्वैतभावनाम् ॥ ९० ॥ एकामपि समाश्रित्य क्रमान्मुक्तिपथं व्रजेत् ॥ विष्णुभक्तिविहीनस्य श्रौतस्मार्ताश्च याः क्रियाः ॥ ९१ ॥ प्रायश्चित्तादिकं तीर्थं यात्रा कृच्छ्रादिकं तपः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कुले प्रसूतिः शिल्पानि सर्वं लौकिकभूषणम् ॥ ९२ ॥ कायक्लेशः फलं तेषां स्वैरिणीव्यभिचारवत् ॥ कुलाचारविहीनोऽपि दृढभक्तिर्जितेंद्रियः ॥ ॥ ९३ ॥ प्रशस्यः सर्वलोकानां न त्वष्टादशविद्यकः ॥ भक्तिहीनो नृपश्रेष्ठ सज्जातिर्द्धार्मिकस्तथा ॥ ९४ ॥ नाल्पभाग्यस्य पुंसो हि विष्णौ भक्तिः प्रजायते ॥ यां तु संपाद्य यत्नेन कृतकृत्यो न सीदति ॥ ९५ ॥ यया वेत्ति जगन्नाथं सा विद्या परिकीर्तिता ॥ येन प्रीणाति भगवां स्तत्कर्माशुभनाशनम् ॥ ९६ ॥ विष्णुभक्तश्च संप्रोक्तस्ताभ्यां युक्तो दृढव्रतः ॥ यत्पादपांसुना विश्वं पूयते सचराचरम् ॥ ९७ ॥ सृष्टिस्थिति विनाशानां स्वेच्छया प्रभवत्यसौ ॥ किं पुनः क्षुद्रकामानां भूमिस्वर्गादिसंपदाम् ॥ ९८ ॥ वासुदेवस्य भक्तस्य न भेदो विद्यतेऽनयोः ॥ वासुदेवस्य ये भक्तास्तेषां वक्ष्यामि लक्षणम् ॥ ९९ ॥ प्रशांतचित्ताः सर्वेषां सौम्याः कामजितेंद्रियाः ॥ कर्मणा मनसा वाचा परद्रोहमनिच्छवः ॥ ॥ १०० ॥ दयार्द्रमनसो नित्यं स्तेयहिंसापराङ्मुखाः ॥ गुणेषु परकार्येषु पक्षपातमुदान्विताः ॥ १ ॥ सदाचारावदाताश्च परोत्सवनिजोत्सवाः ॥ पश्यंतः सर्वभूतस्थं वासुदेवममत्सराः ॥ २ ॥ दीनानुकंपिनो नित्यं भृशं परहितैषिणः ॥ राजोपचारपूजायां लालनाः स्वकुमारवत् ॥ ३ ॥ कृष्णसर्पादिव भयं बाह्ये परिचरंति ते ॥ विषयेष्वविवेकानां या प्रीतिरुपजायते ॥ ४ ॥ वितन्वते तु तां प्रीतिं शतकोटिगुणां हरौ ॥ नित्यकर्तव्यताबुद्ध्या यजंतः शंकरादिकान् ॥ ५ ॥ विष्णुस्वरूपान्ध्यायंति भक्त्या पितृगणेष्वपि ॥ विष्णोरन्यं न पश्यंति विष्णुं नान्यत्पृथग्गतम् ॥ ६ ॥ पार्थक्यं न च पार्थक्यं समष्टिव्यष्टिरूपिणः ॥ जगन्नाथ तवास्मीति दासस्त्वं चास्मि नो पृथक् ॥ ७ ॥ अन्तर्यामी यदा देवः सर्वेषां हृदि संस्थितः ॥ सेव्यो वा सेवको वापि त्वत्तो नान्योऽस्ति कश्चन ॥ ८ ॥ इति भावनया कृतावधानाः प्रणमंतः सततं च कीर्त्तयंतः ॥ हरिमब्जजवन्द्यपादपद्मं प्रभजंतस्तृणवज्जगज्जनेषु ॥ ९ ॥ उपकृतिकुशला जगत्स्वजस्रं परकुशलानि निजानि मन्यमानाः ॥ अपि परपरिभावने दयार्द्राः शिवमनसः खलु वैष्णवाः प्रसिद्धाः ॥ १० ॥ दृषदि परधने च लोष्टखंडे परवनितासु च कूटशालमलीषु ॥ सखिरिपुसहजेषु बन्धुवर्गे सममतयः खलु वैष्णवाः प्रसिद्धाः ॥ ११ ॥ गुणगणसुमुखाः परस्य मर्मच्छदनपराः परिणामसौख्यदा हि ॥ भगवति सततं प्रदत्तचित्ताः प्रियवचसः खलु वैष्णवाः प्रसिद्धाः ॥ १२ ॥ स्फुटमधुरपदं हि कंसहंतुः कलुषमुषं शुभनाम चामनंतः ॥ जयजयपरिघोषणां रटंतः किमु विभवाः खलु वैष्णवाः प्रसिद्धाः ॥ १३ ॥ हरिचरणसरोजयुग्मचित्ता जडिमधियः सुखदुःखसाम्यरूपाः ॥ अपचितिचतुरा हरौ निजात्मनतवचसः खलु वैष्णवाः प्रसिद्धाः ॥ १४ ॥ रथचरणगदाब्जशंखमुद्राकृतितिलकांकितबाहुमूलमध्याः ॥ मुररिपुचरणप्रणामधूलीधूतकवचाः खलु वैष्णवा

CC-0. In Public Domain. Digitization by eGangotri

जयंति ॥ १५ ॥ मुरजिदप[१]घनापकृष्टगन्धोत्तमतुलसीदलमाल्यचंदनैर्ये ॥ वरयितुमिव मुक्तिमाप्तभूषाकृतिरुचिराः खलु वैष्णवा जयंति ॥ १६ ॥
विगलितमदमानशुद्धचित्ताः प्रसभविनश्यदहंकृतिप्रशांताः ॥ नरहरिममराप्तबंधुमिष्ट्वा क्षयितशुचः खलु वैष्णवा जयंति ॥ १७ ॥ भगवति
सततं प्रभक्तिभाजां शुभचरितं तव लक्ष्म नोभ्यधायि ॥ श्रुतिपथमवतीर्णमाशु पुंसां हरति मलं चिरसंचितं यदेतत् ॥ १८ ॥ न हि धनमपि
मृग्यते कदाचिन्न खलु शरीरजखेदसंप्रयोगः ॥ मृदुलघुवचसाभिधानकीर्तिं भजनमहं तव दास्य एव चिंता ॥ १९ ॥ शुभचरितमपि द्विषंति पुंसां
स्वयमिह दुश्चरितानुबंधचित्ताः ॥ महदकुशलमप्यवाप्य सुस्था भगरसरसिका अवैष्णवास्ते ॥ २० ॥ परमसुखपदं हृदंबुजस्थं क्षणमपि नानुस
ज्जंति मत्तभावाः ॥ वितथवचनजालकैरजस्रं पिदधति नाम हरेरवैष्णवास्ते ॥२१॥ परयुवतिधनेषु नित्यलुब्धाः कृपणधियो निजकुक्षिभारपूर्णाः॥
नियतपरमहत्त्वमन्यमाना नरपशवः खलु विष्णुभक्तिहीनाः ॥२२॥ अनवरतमनार्यसंगरक्ताः परपरिभावकहिंसकाऽतिरौद्राः ॥ नरहरिचरणस्मृतौ
विरक्ता नरमलिनाः खलु दूरतो हि वर्ज्याः ॥ १२३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे पुरुषोत्तमक्षेत्र
माहात्म्ये जैमिनिऋषिसंवादे दशमोऽध्यायः ॥ १० ॥ ॥ जैमिनिरुवाच ॥ ॥ नारदाद्ब्रह्मणः पुत्राद्भगवद्भक्तिमुत्तमाम् ॥ श्रुत्वेत्थं परमप्रीत
इंद्रद्युम्नोऽप्युवाच तम् ॥ १ ॥ ॥ इंद्रद्युम्न उवाच ॥ ॥ साधुसंगस्तु विद्वद्भिर्भवव्याधिविनाशनः ॥ ममोपदिष्टो भगवन्सोऽभूत्सांप्रतमेव मे ॥
॥ २ ॥ येन साक्षात्कृतो विष्णुः परमात्मा परात्परः ॥ स त्वं यन्मंदिरायातस्त्वदन्यः साधुरत्र कः ॥ ३ ॥ त्वत्संनिधानाद्भगवंस्तमो मे नाशमभ्य
गात् ॥ यन्मे त्वरयते चित्तमर्चितुं नीलमाधवम् ॥ ४ ॥ वेत्सि ब्रह्मांडवृत्तांतं पर्यटन्सार्वलौकिकः ॥ तदावां रथमास्थाय पश्यावो नीलमाधवम् ॥
॥ ५ ॥ पुरुषोत्तमसंज्ञस्य क्षेत्रस्यालंकृतं शुभम् ॥ तत्र तीर्थानि संतीति बहुभिः कथितानि मे ॥ त्वद्वाक्याद्यदि जानामि भवेयुः सफलानि मे ॥६॥
॥ ॥ नारद उवाच ॥ ॥ हंत ते दर्शयिष्यामि क्षेत्रं क्षेत्रस्थितानि च ॥ तीर्थानि शक्तिशंभूंश्च क्षेत्रमाहात्म्यमेव च ॥ ७ ॥ साक्षाद्द्रक्ष्यसि देवेशं
भक्तस्यात्मसमर्पकम् ॥ तवानुग्रहतः शीघ्रं चतुर्द्धा संव्यवस्थितम्॥८॥ यस्य संदर्शनान्मर्त्यो जायते भक्तिभाजनम् ॥ एवं कथांते तौ प्रीतावहःकृत्यं
समाप्य च ॥ ९ ॥ यात्रानुकूलं निर्णीय पंचम्यां बुधवासरे ॥ ज्येष्ठकृष्णेतरे पक्षे पुष्यर्क्षे लग्न उत्तमे ॥ एकत्र शयितौ रात्रिं निन्यतुर्नृपनारदौ ॥१०॥
ततः प्रभाते विमल इंद्रद्युम्नो नृपोत्तमः ॥ घोषणां कारयामास राज्यस्य सह बंधुभिः ॥ ११ ॥ यथाविभवतः सैन्यैर्नीलाद्रिगमनं प्रति ॥ यावज्जीवं

१ अपघनः—अंगम्—इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्र वासं करिष्यामो विनिश्चितम् ॥१२॥ या वृत्तिः कल्पिता यस्य स तया तत्र जीवतु ॥ राजानः सावरोधाश्च सामात्याः सपरिच्छदाः ॥ १३ ॥
रथैर्गजैस्तुरंगैश्च कोषैः सह पदातिभिः ॥१४॥ व्रजंतु सज्जितास्तत्र ब्राह्मणाः साग्निहोत्रिणः ॥ वणिजः सह भांडैश्च सपण्याः पण्यजीविनः॥ १५ ॥
राष्ट्रकर्मणि निष्णाताः कुशला राजवर्त्मसु ॥ ज्योतिर्विदो नृत्यविदो दंडनीतौ प्रवीणकाः ॥ १६ ॥ नृत्यगायनवादित्रचतुर्विधसुबुद्धयः ॥ गजवाजि
नराणां च भैषज्ये शास्त्र उत्तमे ॥ १७ ॥ कुशला दृष्टकर्माणो विद्यास्वष्टादशस्वपि ॥ उपांगविद्यासु तथा कुहकार्थकुतूहलाः ॥ १८ ॥ वाटसाहसि
काश्चोरास्तथान्ये पश्यतोहराः ॥ विचित्रकथनाजीवाश्चाटुकाराश्च मागधाः ॥ १९ ॥ शास्त्रोपजीविनश्चैव तथान्ये शल्यहारकाः ॥ द्यूतकाराश्च
पुंश्चल्यो वेश्या वेशानुगा विटाः॥ २० ॥ कृषीवलाश्च गोमेषच्छागोष्ट्रखररक्षकाः ॥ शकुंतपालाश्च कपिव्याघ्रशार्दूलरक्षकाः ॥२१॥ आहितुंडिकगो
रक्ष्यशबरा म्लेच्छजातयः ॥२२॥अन्ये च ये मालवदेशजाता आज्ञां मदीयामनुपालयंति ॥ ते यांतु सर्वे वसतौ हि नीलाचले यथास्वं कृतवास्तु
भागाः ॥ २३ ॥ एवमाज्ञाप्य नृपतिर्यात्रायां च कृतक्षणः ॥ नारदेन समागम्य दैवज्ञमिदमाह सः ॥ २४ ॥ सांवत्सर मुहूर्त्तं मे निर्णीतं ते यथा
पुरा ॥ तावन्मांगलिकं वस्तुजातं सम्यगुपानय ॥ २५ ॥ पुरोहितमतेनास्मिन्क्षणे यावद्विमृग्यते ॥ तेनादिष्टः स गणकः पुरोहितसहायवान् ॥
॥ २६ ॥ आजहार समस्तानि मांगल्यानि द्विजोत्तमाः ॥ अत्रांतरे स राजर्षिर्दिव्यसिंहासनस्थितः ॥ २७ ॥ यात्राभिषेकमांगल्यं विप्रैः प्रागनुभा
वितम् ॥ श्रीसूक्तवह्निसूक्ताभ्यां सूक्तेनाब्दैवतेन च ॥ २८ ॥ पावमान्याब्धिसूक्तेन पृथङ्मांगल्यवर्द्धकैः ॥ तीर्थाद्भिरौषधीभिश्च सर्वगन्धैः पृथ
क्पृथक् ॥ २९ ॥ अभिषिक्तस्ततो राजा चीनांशुकहृतांभसा ॥ रराज वपुषा दीप्तो निर्धूमः पावको यथा ॥ ३० ॥ आमुक्तशुक्लवसनः स्वाचांतः
सपवित्रकः ॥ नांदीमुखान्पितृगणान्पूजयित्वा यथाविधि ॥ ३१ ॥ जयाराष्ट्रभृतो हुत्वा गणहोमांश्च यत्नतः ॥ शंखध्वनिसुगंधाढ्यं श्वेतवर्णं विधूम
कम् ॥ ३२ ॥ वह्निं प्रदक्षिणं चक्रे दक्षिणावर्त्तगार्चिषा ॥ साक्षात्कारेण ददतं जयं राज्ञे जयार्थिने ॥ ३३ ॥ नवग्रहमखांते च ग्रहकुंभेन सेवितः ॥
ग्रहाणां दौष्टयनाशाय सौस्थ्यस्यापि विवृद्धये ॥ ३४ ॥ ज्योतिःशास्त्रोदितैर्मंत्रैर्दैवज्ञविधिचोदितैः ॥ ततो मांगल्यनेपथ्यविधानमुपचक्रमे ॥३५॥
चीनांशुकप्रावरणे विधाय कवचं निजम् ॥ शिरोवेष्टनकं शुभ्रं सुरत्नमुकुटोज्ज्वलम् ॥ ३६ ॥ सावतंसे श्रुतियुगे रत्नकुंडलभूषिते ॥ ग्रैवेयकं महार्घं
तु हारं तरलभूषितम् ॥ ३७ ॥ दधाराथ नृपश्रेष्ठः केयूरांगदमुद्रिकाः ॥ मध्येन त्रिवलीसक्तं स्वर्णसूत्रं त्रिवृद्दधौ ॥ ३८ ॥ हिरण्यकिंकिणीयुक्त
मुक्तातोरणमालिकम् ॥ नानारत्नैः सुघटितां दधाराथ सुमेखलाम् ॥ ३९ ॥ अनर्घ्ये पादकटके पादयोः संन्यवेशयत् ॥ सम्मुखादर्शितादर्शे

CC-0. In Public Domain. Digitization by eGangotri

दद्दशे स्वं विभूषितम् ॥ ४० ॥ मंगलारोपणार्थाय हैमपीठमुपाविशत् ॥ प्राङ्मुखः श्रीधरं देवं संस्मरन्मधुसूदनम् ॥ ४१ ॥ मंगलायतनं विष्णुं
सर्वमांगल्यकारणम् ॥ स्मरणादस्य नश्यंति पातकानि बहून्यपि ॥ ४२ ॥ सौमनस्यामथो मालामार्त्तवीं गंधवर्णिताम् ॥ दधार प्रथमं राजा
मंत्रितां स्वपुरोधसा ॥ ४३ ॥ मृदं दीपं फलं दूर्वा दधि गोरोचनां ततः ॥ मन्त्राभिमंत्रितान्सर्वान्सिद्धार्थैरभिरक्षितः ॥४४॥ आत्मानं दद्दशे राजा
सौरभेये हविष्यथ ॥ मुकुरे मंत्रिते पश्चात्स्वं दृष्ट्वा नृपकेसरी ॥ ४५ ॥ बह्वृचैः शांतिघोषेण समुदीर्णशुभायतिः ॥ याजुष्कैः पथिसूक्तेन व्रजन्मार्गे
ऽभिरक्षितः ॥ ४६ ॥ पौराणैर्मंगलैर्वाक्यैः कृतवीर्यधृतिर्नृपः ॥ मागधैः स्तुतिपाठेन प्रादुर्भूतपराक्रमः ॥ ४७ ॥ पारिजातहरं सत्यासहितं गरुड
ध्वजम् ॥ ध्यायन्हृत्पंकजे राजा दक्षिणं पादमुद्दधौ ॥ ४८ ॥ प्रदक्षिणीकृत्य मुनिं नारदं पुरतः स्थितम् ॥ मध्यद्वारमुपागच्छद्वेत्रपाणिभिरावृतः ॥
॥ ४९ ॥ आदिष्टपदमार्गोऽसावग्निहोत्रपुरःसरः ॥ तत्रापश्यत्स्थितान्विप्रानात्मनो दक्षिणेन वै ॥ ५० ॥ मांगल्यसूक्तं पठतः शुभ्राभान्पांडुरांशु
कान् ॥ लाजाः सपुष्पा राजाग्रे क्षिपतः शंसतः शुभम् ॥ ५१ ॥ वामपार्श्वस्थिता वेश्याश्चामरव्यग्रपाणयः ॥ शुभ्रालंकारवसनाः स्मेरपद्मानना:
शुभाः ॥ ५२ ॥ ब्राह्मणान्पूजयामास भक्तिनम्रो द्विजोत्तमाः ॥ वस्त्रालंकारमाल्यैश्च सुगन्धैरनुलेपनैः ॥ ५३ ॥ तोषयामास तान्विप्रान्भगवद्बुद्धि
भावितान् ॥ वेश्याभ्यो मागधेभ्यश्च दीनानाथेभ्य एव च ॥ ५४ ॥ राजानुमत्या सचिवो यथार्हं प्रददौ धनम् ॥ श्वेतान्पारावतान्हंसाञ्छ्वेताश्वं
श्वेतकुंजरम् ॥ ५५ ॥ सचूतपल्लवं श्वेतमालाफलविभूषितम् ॥ कदलीकांडसन्नद्धतोरणाधःस्थितं नृपः ॥ पूर्णकुंभं स पश्यन्वै मंगलानि बहून्यपि॥
सितातपत्रेण शिरःप्रदेशे वारितातपः ॥५६॥ युगपत्पूर्यमाणैस्तु कंबुभिः शतसंख्यकैः॥ संमिश्रितानि शुश्राव वादित्राणि बहूनि सः॥५७॥तथा मंग
लगीतानि जयशब्दांश्च भूपतिः॥ततो विवेश प्रासादं नृसिंहमवलोकितुम्॥५८॥ यं स्मृत्वा जायते मर्त्यः सर्वकल्याणभाजनम् ॥ दृष्ट्वा स दूरान्नृहरिं
दिव्यसिंहासनस्थितम् ॥ ५९ ॥ प्रणम्य साष्टावयवं सन्तोष्योपनिषद्गिरा ॥ दक्षपार्श्वस्थितां दुर्गां सर्वदुर्गतिमोचिनीम् ॥ ६० ॥ ववंदे चरणाभ्याशे
पश्यंतीं कृपया नृपः ॥ ततः पुरोधा देवांगादवरोप्य शुभां स्रजम् ॥ ६१ ॥ आसञ्जयामास गले सुगंधेनान्वलेपयत् ॥ नीराजयामास राज्ञः शिर
श्चावेष्टयन्मुदा ॥ ६२ ॥ पुनः प्रदक्षिणीकृत्य तौ देवौ नृपसत्तमः ॥ शिबिकायां समारोप्य प्रतस्थे च पुरस्कृतौ ॥ ६३ ॥ प्रादुर्भूय बहिर्द्वारे रथं
दृष्ट्वा सुसज्जितम् ॥ तुरंगमैर्वातजवैर्दशभिः परयोजितम् ॥ ६४ ॥ प्रदक्षिणीकृत्य नृपो नारदेन समाविशत् ॥ ढक्कामृदंगनिःसाणभेरीपणव
गोमुखाः ॥ ६५ ॥ मधुरीचर्चरीशंखा अवाद्यंत सहस्रशः ॥ स्यन्दनाः कोटिशस्तत्र नृपाणामनुजीविनाम् ॥ ६६ ॥ चकाशिरे श्रेणिकृता इन्द्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्युम्नरथाभितः ॥ नानाप्रहरणोपेताः पताकाभिरलंकृताः ॥ ६७ ॥ ध्वजोच्छ्रिताः स्वर्णरौप्यैः किंकिणीजालदर्पणैः ॥ यन्त्रैर्नानाविधैर्युक्ता गंभीर स्निग्धनिःस्वनाः ॥ ६८ ॥ पदातीनां कुञ्जराणां हयानां वातरंहसाम् ॥ पत्तिसंस्फोटनैर्हस्तिबृंहितैर्हयहेषितैः ॥ ६९ ॥ बहुले रथनिर्घोषैर्मिश्रिता वाद्यनिःस्वनाः ॥ युगांतार्णवनिस्वानतुल्याः शुश्रुविरे जनैः ॥ ७० ॥ तस्मिन्क्षणे पौरजनाः स्वस्वसंभारसज्जिताः ॥ अश्वकै रासभैरुष्ट्रै र्वाहकैः प्रतितस्थिरे ॥ ७१ ॥ आंदोलिकाश्च पल्यंकाः कोटिशश्च तुरंगकाः ॥ श्रेणीभूताश्च दृश्यंते राष्ट्रप्रस्थानसंकुले ॥ ७२ ॥ राजावरोधाः शतशो वृता वर्षवरैस्ततः ॥ नानायानसमारूढाः पालिताश्चाधिकारिभिः ॥ ७३ ॥ महासैन्यैश्च संरुद्धा राजागाराद्विनिर्ययुः ॥ यज्वानश्चाग्निहोत्राणि शम्यारूढानि वृन्दशः ॥ ७४ ॥ शकटेषु समारोप्य सपत्नीकाः प्रतस्थिरे ॥ तथा पुस्तकभारांश्च देवतार्चाकरंडकान् ॥ ७५ ॥ इध्मबर्हि कुशान्पात्रीः संभारान्होमसंभृतान् ॥ वाहयामासुरन्यैश्च शकटावाहकद्विजैः ॥ ७६ ॥ सामन्तामात्यभृत्याश्च पुरोधा ऋत्विजश्च ये ॥ राज्ञः प्रकृतदासाश्च उपचारनियोगिनः ॥ ७७ ॥ सर्वोपचारसंभारानासतेऽन्ये प्रयायिनः ॥ कोषागारनियुक्ताश्च कोषजातमशेषतः ॥ ७८ ॥ समादाय ययुस्तूर्णं राज्ञोऽवसरसेवकाः ॥ मालाकारादयः सर्वे पण्यजीवादयस्तथा ॥ ७९ ॥ स्वं स्वं पण्यं समादाय ययू राजनियोगिनः ॥ श्रेष्ठश्रेण्यादयः सर्वे पुरखर्वटवासिभिः ॥ ८० ॥ समं विनिर्ययुः स्वस्वव्यवहारविलासकाः ॥ इन्द्रद्युम्नस्य नृपतेर्यात्रासमयवादितान् ॥ ८१ ॥ भेरीमृदंगपटहान्व्यश्नुवानान्दिगंतरम् ॥ श्रुत्वा जनपदावासिजनाः सर्वे ससंभ्रमाः ॥ ८२ ॥ राजाज्ञां मूर्ध्नि संमान्य निर्गता नीलपर्वतम् ॥ यस्य यश्च ऋजुः पंथाः स च तेनैव जग्मिवान् ॥ ८३ ॥ न राजमार्गं प्रजवाद्व्यमृग्यंत नृपाज्ञया ॥ नीलाद्रिप्राप्तिमार्गेण दुर्गमेणापि ते ययुः ॥ ८४ ॥ इन्द्रद्युम्नोऽपि राजेन्द्रः समस्तपुरवासिभिः ॥ चतुरंगानीकिनीभिः सहर्षाभिश्च वेष्टितः ॥ ८५ ॥ श्रेणीभूतक्षितिपतिस्यन्दनावलिमध्यगे ॥ रथे रराज राजर्षिः शक्रतुल्यपरिच्छदः ॥ ८६ ॥ पुरस्त्रीमङ्गलाचारगीतलाजप्रसूनकैः ॥ मङ्गलाचारशोभाभिः प्रसन्नशुभचेतनः ॥ ८७ ॥ वातरंहैर्हयैर्युक्तरथेन प्रययौ मुदा ॥ अनुकूलानिलप्रोद्यद्घनच्छायसुशीतले ॥ ८८ ॥ नीरजस्के महीपृष्ठे समीकृतचतुष्पथे ॥ देशाध्वनीनैः पुरुषैः काननांतरवेदिभिः ॥ ८९ ॥ आदिष्टवर्त्मा नृपतिर्मार्गस्योभयपार्श्वगान् ॥ देशानरण्यानि मुहुःपश्यन्नानन्दलोचनः ॥ ९० ॥ सीमामुत्कलदेशस्य विभजंतीं वनांतरे ॥ मार्गस्थां चर्चिकां प्राप चर्चितां मुंडमालया ॥ ९१ ॥ अवतीर्य रथाद्राजा विनतो नारदाज्ञया ॥ साष्टांगपातं तां नत्वा तुष्टावानंदचेतनः ॥९२ ॥ ॥ इन्द्रद्युम्न उवाच ॥ ॥ नमस्ते त्रिदशेशानि सर्वापद्विनिवारिणि ॥ ब्रह्मविष्णुशिवाद्याभिः कल्पनाभिरुदीरिते ॥९३॥ कारणं जगतामाद्ये प्रसीद परमेश्वरि ॥ त्व

CC-0. In Public Domain. Digitization by eGangotri

या विना जगन्नैतत्क्षणमुत्सहते शिवे ॥ ९४ ॥ सिद्धयः सर्वकार्याणां मंगलानि च शाश्वते ॥ त्वत्पादाराधनफलं मर्त्यलोके हि नान्यथा ॥९५ ॥
चराचरपतेर्विष्णोः शक्तिस्त्वं परमेश्वरि ॥ यया सृजत्यवति च जगत्संहरते विभुः ॥ ९६ ॥ चराचरगुरुं देवं नीलाचलनिवासिनम् ॥ अनुगृह्णीष्व
मां देवि यथा पश्ये स्वचक्षुषा ॥ ९७ ॥ ॥ जैमिनिरुवाच ॥ ॥ नारदस्योपदेशेन स्तुत्वा देवीं नराधिपः ॥ आरुरोह रथं तूर्णं विवस्वानुदयं
यथा ॥ ९८ ॥ ततः प्रतस्थे तरसा स राजा श्रांतवाहनः ॥ चित्रोत्पलमहानद्यास्तीरे विरलकानने ॥ ९९ ॥ धातुकन्दरविख्याते न्यवेशयदनीकि
नीम् ॥ अपराह्णक्रियां कर्तुं यावदाह्निकमादृतः ॥१००॥ जलावतरणे नद्यां विवेश स्वपुरोधसा ॥ पूर्वं संशोधिते प्राज्ञैर्विषकण्टकवर्जिते ॥१॥ स्ना
त्वा संतर्प्य देवांश्च पितॄनथ विशांपतिः ॥ संपूज्य विधिवद्विष्णुं नृपतीन्प्रकृतीस्ततः ॥ २ ॥ संमानयामास नृपः संनिवेशासनादिभिः॥ नारदेन सह
श्रीमान्प्रविश्यांतःपुरं ततः॥३॥सुधारसानि भोज्यानि बुभुजे प्रीतमानसः ॥ पश्चिमाद्रिं ततो याते विवस्वति विशांपतिः ॥४॥सायंविधिं समाप्याशु
शीतभानौ समुद्यते॥अनुजीविविशां नाथः सभामध्य उपाविशत् ॥५॥ तत्र तस्मिन्नरपतिर्बभौ साम्राज्यलक्षणः ॥ संपूर्णमंडलश्चन्द्रो ज्योतिषामिव
शारदः॥६॥कवयःकवयांचक्रुः कीर्तिं तस्य सुधामलाम् ॥ जगुर्गाथां सुग्रथितां गायकाः कलसुस्वराः॥७॥रूपयौवनलावण्यगर्विता गणिकास्ततः ॥
लयतानांगहारैश्च सुशुद्धैर्ननृतुः पुरः ॥ ८ ॥ मागधास्तुष्टुवुश्चैनं लोकोत्तरशुभाकृतिम् ॥ गद्यपद्यप्रबन्धाद्यैश्चित्रैः पदकदम्बकैः ॥ ९ ॥ ततः स राजा
प्रानर्च वैष्णवाग्र्यान्सभासदः ॥ सुसंमतैर्गंधमाल्यतांबूलैरतिशोभनैः ॥ ११० ॥ नृपांश्च शतशस्तत्र सुखासीनान्नृपाज्ञया ॥ संभावयामास
यथायोग्यं नृपतिभाजनैः ॥ ११ ॥ अथापृच्छन्मुनिवरं नारदं भगवत्प्रियम् ॥ सिंहासनार्हे स्वासीनं बहुमानपुरःसरम् ॥ भगवच्चरितं श्रोतुं सर्व
पापापनोदनम् ॥ १२ ॥ ॥ इन्द्रद्युम्न उवाच ॥ ॥ भगवन्वेदवेदांगनिधान भगवत्प्रिय ॥ त्वमेव चरितं विष्णोर्जानासि ज्ञानचक्षुषा ॥ १३ ॥
हरेश्चारित्रसुधया दृढपंकमलीमसम् ॥ क्षालयांतर्मम मुने यद्यनुक्रोशको मयि ॥ १४ ॥ इत्थमालापसंमिश्रे मुनिराज्ञोः कथांतरे ॥ प्रविवेश नृपं
द्वाःस्थ उत्कलेशप्रसेवकः ॥ १५ ॥ उवाच देवद्वारांते तिष्ठत्युत्कलभूमिपः ॥ सोपायनो देवपादपद्मं द्रष्टुं समौलिकः ॥ १६ ॥ विज्ञापितः स राजर्षि
द्वाःस्थेनैवं ससंभ्रमः ॥ उवाच तं हि भो विप्राः श्रुत्वा तद्देशमण्डनम् ॥ १७ ॥ क्षेत्रं श्रीपुरुषेशस्य तद्वार्त्ताकर्णनोत्सुकः ॥ प्रवेशयाविलंबं तं ॥ ७२ ॥
श्रीमदोड्रमहीपतिम् ॥ १८ ॥ स हि नीलगिरौ विष्णुं समाराध्य सुनिर्मलः ॥ यस्य संदर्शनात्सर्वे भविष्यामो हतांहसः ॥ १९ ॥ श्रुत्वा
तद्वचनं सद्यो द्वारपालो महीपतिम् ॥ प्रवेशयामास सभामिंद्रद्युम्नस्य भूपतेः ॥ १२० ॥ विवेशोड्रपतिस्तूर्णं सचिवैर्वैष्णवैः सह ॥ ननामांघ्रि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

युगं वन्द्यमिन्द्रद्युम्नस्यसादरम् ॥ २१ ॥ तमुत्थाप्य च राजेंद्रः पुरस्कृत्य स वैष्णवम् ॥ स्वासनांते निवेश्याथ प्रोचे सप्रश्रयंवचः ॥ २२ ॥ राजन्सर्वत्र कुशली भवानोढ्रपते किल ॥ अपि देवो विजयते नीलाद्रिशिखरालयः ॥ २३ ॥ कच्चित्ते निर्मला बुद्धिर्भगवत्पादपद्मयोः ॥ उपैति समचित्तस्य सर्वभूतेषु ते हरौ ॥ २४ ॥ ओढ्राधीशस्तदा तस्य वचः श्रुत्वा कृतांजलिः ॥ उवाच प्रश्रितं वाक्यं हर्षविस्मयचंचुकः ॥ २५ ॥ स्वामिन्सर्वत्र कुशलं त्वत्पादानुग्रहान्मम ॥ सूर्ये तपत्यंधकारः कथं वा प्रभविष्यति ॥ २६ ॥ निसर्गगुणसंसर्गवशीकृतमहीभुजा ॥ त्वया सनाथा पृथिवी जिष्णुनेवामरावती ॥ २७ ॥ सदा धर्मश्चतुष्पादस्त्वयि शासति मेदिनीम् ॥ निषेधाचरणं राजन्केवलं श्रूयते श्रुतौ ॥ २८ ॥ राजनीतिषु ये राज्ञां गुणाः समुदितास्त्वयि ॥ त एकैकं क्षितिभुजां गता दार्ष्टांतिकं विभो ॥ २९ ॥ एतावदपि साम्राज्यं दुर्लभं ते नृपोत्तम ॥ अष्टादशद्वीपवती क्षितिरेकगृहोपमा ॥ १३० ॥ यदि त्वां नासृजद्ब्रह्मा वत्सलं सर्वजंतुषु ॥ कथं शोकविहीनाः स्युर्धृतेष्वात्मजबंधुषु ॥ ३१ ॥ साधारणा नृपतयो विष्णोरंशा इति श्रुतिः ॥ भवान्साक्षात्तु भगवान्कोऽन्य ईदृग्गुणाकरः ॥ ३२ ॥ दक्षिणोदधितीरेऽस्ति नीलाद्रिः काननावृतः ॥ न तत्र लोकसंचारस्तत्रास्ते साऽपि देवता ॥ ३३ ॥ वात्यया वालुकाकीर्णः सांप्रतं श्रूयते तु सः ॥ तद्वशान्मम राज्येऽपि दुर्भिक्षमरकादिकम् ॥ ३४ ॥ त्वय्यागते तु सर्वस्मिन्कुशलं मे भविष्यति ॥ इत्युक्तवंतं नृपतिरुत्कलेशं द्विजोत्तमाः ॥ ३५ ॥ विसर्जयामास तदा संनिवेशाय मानयन् ॥ नारदं प्रेक्ष्य निर्विण्णः किमेतादिति भो मुने ॥ ३६ ॥ यदर्थं मे श्रमस्तं च विफलं हि वितर्कये ॥ इत्युक्तवंतं तं प्राह नारदस्तु त्रिकालवित् ॥ ३७ ॥ न कार्यो विस्मयस्तेऽत्र भाग्यवान्वैष्णवोत्तमः ॥ वैष्णवानां न वांछा हि विफला जायते क्वचित् ॥ ३८ ॥ अवश्यं प्रेक्षसे राजन्बिभ्रतं पार्थिवं वपुः ॥ कारणं जगतामादिं नारायणमनामयम् ॥ ३९ ॥ त्वदनुग्रहहेतोर्वै क्षिताववतरिष्यति ॥ जगच्चराचरं सर्वं विष्णोर्वशमुपागतम् ॥१४०॥ न कस्यापि वशे सोऽपि परमात्मा सनातनः ॥ केवलं भक्तिवशगो भगवान्भक्तवत्सलः ॥ ४१ ॥ ब्रह्मादिकीटपर्यंतं सुगुप्तं यस्य मायया ॥ स कथं परतंत्रः स्यादृते भक्तजनान्नृप ॥ ४२ ॥ धर्मार्थकाममोक्षाणां मूलं भक्तिर्सुरद्विषः ॥ सैव तद्ग्रहणोपायस्तामृते नास्ति किंचन ॥ ४३ ॥ एक एव यदा विष्णुर्बहुधा स्वस्य मायया ॥ तमृते परमात्मानं सुखहेतुर्न विद्यते ॥ ४४ ॥ येऽप्यन्ये शिवदुर्गाद्यास्तैस्तैः कर्मभिरावृताः ॥ यच्छंति पूजिताः कामं तेऽपि विष्णुपरायणाः ॥ ४५ ॥ अन्तर्यामी स भगवान्देवानामपि हृत्स्थितः ॥ यावत्फलं प्रेरयति तावदेव ददत्यमी ॥ ४६ ॥ वैष्णवस्त्वं च राजेंद्र पद्मयोनेश्च पंचमः ॥ अष्टादशानां विद्यानां पारगो वृत्तसंस्थितः ॥ ४७ ॥ न्यायेन रक्षिता पृथ्वीं विशेषा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 ब्राह्मणार्चकः ॥ अवश्यं द्रक्ष्यसि क्षेत्रे वैकुण्ठं चर्मचक्षुषा ॥ ४८ ॥ पितामहोऽप्यत्र कार्ये भवतो मां नियुक्तवान् ॥ सर्वं ते कथयिष्यामि प्राप्ते
 क्षेत्रोत्तमे नृप ॥ ४९ ॥ सांप्रतं रात्रिशेषो हि तृतीयं याममृच्छति ॥ स्वान्स्वान्निवेशान्निर्गंतुं राज्ञ आज्ञापयाधुना ॥ १५० ॥ त्वमप्यंतर्गृहं याहि
निद्राया वशमागतः ॥ १५१ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे पुरुषोत्तमक्षेत्रमाहात्म्ये जैमिनिऋषि
संवाद एकादशोऽध्यायः ॥११॥ ॥ जैमिनिरुवाच ॥ ॥ उक्ते ब्रह्मसुतेनेत्थमिंद्रद्युम्नो महीपतिः॥ मुनेस्तु वचनं श्रुत्वा प्रहृष्टेनांतरात्मना ॥ विचार्य पर
या बुद्ध्या श्रमं मेने फलावहम् ॥१॥ अहो मे परमं भाग्यं बहुजन्मांतरार्जितम्॥ व्यवसाये ममोद्युक्तः सर्वलोकपितामहः॥२॥ जीवन्मुक्तं स्वं तनुजं
मत्सहायमकारयत् ॥ सहायो यादृशः पुंसां भवेत्कार्यं हि तादृशम्॥३॥श्रुतं सभासु सर्वासु इति वृद्धानुशासनम् ॥ स इत्थं चिंतयन्राजा विसृज्य च
सभासदः ॥४॥ ततो मुनिं करे धृत्वा विवेशांतःपुरे द्विजाः ॥ तमर्चयित्वा विधिवत्पल्यंके सह तेन वै ॥५॥ निशावशेषं नृपतिर्निनाय संलपन्मिथः ॥
ततः प्रभाते विमले नित्यं कर्म समाप्य वै ॥ ६ ॥ पूजयित्वा जगन्नाथं संततार महानदीम् ॥ ओढ्रदेशाधिपेनाग्रे गच्छतादिष्टपद्धतिः॥ ७ ॥ एकाम्र
वनकं क्षेत्रमभियातो बलान्वितः ॥ स गत्वा किंचिदध्वानं प्राप्य गंधवहाभिधाम् ॥८॥ नदीं वेगवतीं शीततोयामाक्रम्य वेगवान् ॥ पूर्वाह्णपूजासमये
कोटिलिंगेश्वरस्य वै ॥ ९ ॥ चर्चरीशंखकाहालमृदंगमुरजध्वनिम् ॥ व्यश्नुवानं महारण्यं दूराच्छुश्राव भूपतिः॥१०॥ मन्यमानो भगवतो नीलाचल
निवासिनः ॥ उवाच नारदं प्रीतो ध्वनिः कुत्र महामुने ॥ ११ ॥ नीलाद्रिशिखरावासः प्राप्तः किं परमेश्वरः ॥ यदर्चासमये ह्येष श्रूयते संकुलध्वनिः
॥ १२ ॥ उताहोप्यन्यदेवो वा निकटे वर्त्तते मुने ॥ इति पृष्टस्तदा राज्ञा प्रोवाच मुनिपुंगवः ॥ १३ ॥ राजन्सुदुर्लभं क्षेत्रं गोपितं मुरवैरिणा ॥ न
तत्रास्तीति भगवान्कैरपि ज्ञायते नृभिः ॥ १४ ॥ त्वं हि भाग्यवतां श्रेष्ठस्त्वद्भाग्यात्ते पुरोधसा ॥ दृष्टः कथंचिद्भगवान्संयतेंद्रियवर्त्मना ॥ १५ ॥
त्वं हि तावद्बलैर्युक्तः षडंगैर्नृपसत्तम ॥ साहसेऽतिप्रवृत्तोऽसि संशयो मे महीपते ॥ १६ ॥ संवर्त्तते नीलगिरिर्योजने तु तृतीयके ॥ इदं त्वेकाम्रक
वनं क्षेत्रं गौरीपतेर्विभोः ॥ नातिदूरे महीपाल भीतः स शरणागतः ॥ १७ ॥ ॥ इंद्रद्युम्न उवाच ॥ ॥ कथं स भीतो गौरीशः कं वा शरणमा
गतः ॥ १८ ॥ ददाह त्रिपुरं घोरं शरेणैकेन यः पुरा ॥ अत्र मे विस्मयो जातः श्रोतुमिच्छामि दुर्लभम् ॥ १९ ॥ रक्षिता भवभीतानां भवः परम
पावनः ॥ किमर्थं भयभीतोऽसौ कः समर्थोऽस्य वै जये ॥ २० ॥ ॥ नारद उवाच ॥ ॥ अत्र ते कथयिष्यामि पुरावृत्तं महीपते ॥ उपयेमे
पुरा गौरीं तपसा वशमागतः ॥ २१ ॥ ब्रह्मचारी हिमगिरौ भगवान्नीललोहितः ॥ उत्सृज्य ब्रह्मचर्यं तु सोऽनंगशरपीडितः ॥ २२ ॥ तया रेमे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रुचिरया यौवनोन्मत्तया नृप ॥ तत्पितुर्विषये भोगान्बुभुजे देवकांक्षितान् ॥ २३ ॥ कदाचिदथ निर्याती स्ववासभवनात्सती ॥ सामपूर्वं कुलस्त्रीभि
र्मात्रोक्ता सस्मितं वचः ॥ २४ ॥ आर्ये महत्तपस्तप्तं वरार्थं गहने वने ॥ निष्कुलो निर्गुणो वृद्धो वरः प्राप्तो वरानने ॥ २५ ॥ दिवारात्रिं न त्य
जसि सन्निधिं तादृशस्य वै ॥ को गुणः कथ्यतां वत्से किं वा पत्युः प्रसादजम् ॥ २६ ॥ भूषणाच्छादनं प्राप्तं ममैव गृहवासिनी ॥ चिरं तिष्ठसि
भद्रे त्वं पितृभोगोपलालिता ॥ २७ ॥ त्रैलोक्ये यास्तु कन्या वै परिणीताः पितुर्गृहात् ॥ प्रयांत्यलंकृता भर्त्रा भर्तृवेश्मनि शुश्रुम ॥ २८ ॥ अहं
तु मानसी कन्या पितॄणां पितृलोकतः ॥ आगता तु महाभागे परिणीता हिमाद्रिणा ॥ २९ ॥ इत्थमुक्ता मया हास्यान्न क्रोधाच्चललोचने ॥ जामा
तुरग्रे नो वाच्यं स हि विष्णुसमो मतः ॥ ३० ॥ ॥ नारद उवाच ॥ ॥ मातुरित्थं वचः श्रुत्वा भर्तृनिंदाप्रपीडिता ॥ कोपप्रस्फुरदोष्ठी सा
वाचं नोचे मनागपि ॥ ३१ ॥ प्रययावंतिकं भर्तुर्निह्नुवानांऽबिकावचः ॥ जगाद परुषं वाक्यं स्नेहगर्भं मिताक्षरम् ॥ ३२ ॥ स्वामिन्न सांप्रतं चैतद्व
द्वासः श्वशुरालये ॥ क्षौद्रीयसामपि गुरोस्त्रैलोक्यस्य कथं नु ते ॥ ३३ ॥ तदावयोर्नात्र योग्या वसतिर्मे प्रिया विभो ॥ न संति किं ते वासाय
योग्या वै भूमयः प्रभोः ॥ ३४ ॥ इत्युक्तः शिवया सोऽथ भगवान्वृषभध्वजः ॥ तया सार्द्धं वृषारूढो मध्यदेशं ययौ त्वरन् ॥ ३५ ॥ विलंध्य सर्व
तीर्थानि प्रयागं पावनं महत् ॥ पूर्वसागरगामिन्या गंगाया उत्तरे तटे ॥ ३६ ॥ वाराणसींनाम पुरीं गौर्या वासाय निर्ममे ॥ पंचक्रोशमितां रम्यां
वरप्रासादशोभिताम् ॥ ३७ ॥ अट्टालकशतैर्युक्तामसंख्योपवनैर्युताम् ॥ नानातीर्थसमायुक्तां नानाजनसमाकुलाम् ॥ ३८ ॥ आज्ञया धूर्जटेः शुभ्रां
निर्मितां विश्वकर्मणा ॥ पावनैः शीतलैर्गंगातरंगैः क्षपितांहसाम् ॥ ३९ ॥ तत्र मध्ये पुरे स्वर्णप्राकाराट्टालशोभिते ॥ रत्नस्तंभैः सुघटिते सर्वाशा
परिपूरके ॥ ४० ॥ तया रेमे पशुपतिः श्रियेव मधुसूदनः ॥ सा पुरी विश्वनाथेन कदाचिन्नैव मुच्यते ॥ ४१ ॥ अविमुक्तेति सा ख्याता नृणां
मुक्तिप्रदायिनी॥पुरासीन्मनुजाधीश सेविता भवभीरुभिः ॥४२॥ तत्रोषिता तदा गौरी तेन भर्त्रा स्वलंकृता॥मातरं पितरं चापि न सस्मार महीपते ॥
॥४३॥एवं बहुयुगेऽतीते कैलासाद्रिं स जग्मिवान्॥आत्मनः कोटिलिंगानि तत्र संस्थाप्य वै प्रभुः॥४४॥राजानः पालयामासुस्तां पुरीं बहुशो नृप॥
तत्रासीत्काशिराजाख्यः पुरा द्वापरके युगे ॥४५॥ शंभुं संतोषयामास तपसोग्रेण वै प्रभुम्॥ जरासन्धपुरोगाणां राज्ञां जेतारमच्युतम् ॥४६॥ संग्रामे
प्रभविष्यामीत्यभिसंधाय पार्थिवः ॥ प्रादात्तस्मै वरं सोऽपि पिनाकी पारितोषितः ॥ ४७ ॥ जेतासि कंसहंतारं संग्रामे त्वमरिंदम ॥ तवार्थे प्रमथैः
सार्द्धमहं योत्स्ये वृषे स्थितः ॥ ४८ ॥ शंभोरिति वरं लब्ध्वा प्रमत्तः स नराधिपः ॥ शंखचक्रधरं संख्ये हरिमाह्वत वीर्यवान् ॥ ४९ ॥ अन्तर्यामी

CC-0. In Public Domain. Digitization by eGangotri

स भगवाञ्ज्ञात्वा वृत्तांतमीदृशम् ॥ चक्रं प्रस्थापयामास काशिराजस्य सूदने ॥ ५० ॥ तदुग्रदर्शनं चक्रं सहस्रादित्यवर्चसम् ॥ काशिराजशिर श्छित्त्वा तद्बलं तां पुरीं ततः ॥ ५१ ॥ ददाह कुपितं राजन्विष्णोराशयवीर्यवित् ॥ तद्दृष्ट्वा सुमहत्कर्म क्रुद्धः पशुपतिस्तदा ॥ ५२ ॥ गणैर्वृतो वृषा रूढः पिनाकी तदुपाद्रवत् ॥ ततः सुदर्शनं चक्रं दृष्ट्वा तं प्रथमं पुरः ॥ ५३ ॥ शंभुः पाशुपतास्त्रं तच्चकारोत्पातसन्निभम् ॥ पुरा विष्णोर्वरं प्राप्तं शंभुना भक्तितोषितात् ॥ ५४ ॥ बलेनाप्याययिष्यामि तवास्त्रं संस्मृतस्त्वया ॥ मयि चेत्प्रतिकूलस्त्वं भविष्यति च निष्प्रभम् ॥ ५५ ॥ घोरे पाशुपते चास्मिन्नस्त्रे च विफलीकृते ॥ वाराणस्यां च दग्धायां भयत्रस्तो वृषध्वजः ॥ ५६ ॥ तुष्टाव जगतामदिमनादिं पुरुषोत्तमम् ॥ ५७ ॥ ॥ ॥ महादेव उवाच ॥ ॥ नारायण परंधाम परमात्मन्परात्पर ॥ सच्चिदानन्दविभव निरञ्जन नमोऽस्तु ते ॥ ५८ ॥ जगत्कारणसृष्ट्यादिकर्म कृद्गुणभेदतः ॥ मायया निजया गुप्त स्वप्रकाश नमोऽस्तु ते ॥ ५९ ॥ नांतर्बहिर्बहिश्चांतर्दूरस्थो निकटाश्रयः ॥ गुरुर्लघुः स्थिरोऽणीयान्स्थवीयांश्च नमोऽस्तु ते ॥ ६० ॥ कोटयश्चतुरास्यस्य पलार्द्धं मम चातुल ॥ यदपांगविलासोत्थं तस्मै कालात्मने नमः ॥ ६१ ॥ एकैकरोमाकलितब्रह्माण्ड गणसंवृतम् ॥ मानातीतं वपुर्यस्य तस्मै विश्वात्मने नमः ॥ ६२ ॥ स्वकालपरिमाणेन वेधसः प्रलयोद्भवौ ॥ मन्वंतरादिघटनाकलनाय नमो ऽस्तु ते ॥ ६३ ॥ सृष्टोऽहं तमसा नाथ त्वत्प्रभावानभिज्ञकः ॥ तत्क्षमस्वापराधं मे त्राहि मां शरणागतम् ॥ ६४ ॥ स्तुतिमित्थं प्रकुर्वाणे तस्मिंस्त्रि पुरदाहिनि ॥ चक्ररूपं परित्यज्य आविरासीदधोक्षजः ॥ ६५ ॥ प्रसन्नवदनः श्रीमाञ्छंखचक्रगदाधरः ॥ तार्क्ष्यपद्मासनगतो वनमालाविभू षणः ॥ ६६ ॥ हारकुण्डलकेयूरमुकुटादिभिरुज्ज्वलः ॥ वामोत्संगगतां लक्ष्मीं सत्यां दक्षिणपार्श्वगाम् ॥ ६७ ॥ बिभ्राणः कृष्णजीमूतकांतदेहं कृपा म्बुधिः ॥ क्रोधाविष्ट इवोवाच बिभ्यतं गिरिजापतिम् ॥ ६८ ॥ ॥ श्रीभगवानुवाच ॥ ॥ कालेनैतावता शंभो दुर्बुद्धिः कथमागता ॥ हेतो र्नृपतिकीटस्य मया योद्धुमुपस्थितः ॥ ६९ ॥ कति वा मत्प्रभावास्ते नो ज्ञाता धूर्जटे त्वया ॥ सत्यं पाशुपतं तेऽस्त्रं दुर्जयं ससुरासुरैः ॥ ७० ॥ मत्क्रोधरूपं तच्चक्रं त्वामपि क्षमते न यत् ॥ मामवज्ञाय जगति भ्रमति त्वामृते हि कः ॥ ७१ ॥ तपोभिर्बहुभिः पूर्वं मच्छरीरतयोर्जितः ॥ सांप्रतं चेच्चिरं रंतुं गौर्या सार्द्धमिहेच्छसि ॥ ७२ ॥ पुरीं वाराणसीं चेमां यदीच्छसि चिरस्थिताम् ॥ मन्नाम्ना भुवि विख्यातं क्षेत्रं श्रीपुरुषोत्तमम् ॥ ७३ ॥ दक्षिणस्योदधेस्तीरे नीलाचलविभूषितम् ॥ दशयोजनविस्तीर्णं यावद्विरजमण्डलम् ॥७४॥ क्रमशः पावनं क्षेत्रं यावच्चित्रोत्पला नदी ॥ ततःप्रभृति यो देशो यावत्स्याद्दक्षिणार्णवः ॥ ७५ ॥ पदात्पदाच्छ्रेष्ठतमो नीलाद्रिरपवर्गदः ॥ चतुर्देहस्थितोऽहं वै यत्र नीलमणीमयः ॥ ७६ ॥ तस्योत्तरस्यां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विख्यातं वनमेकाम्रकाह्वयम् ॥ पार्वत्या तत्र निवस निर्भयस्त्रिपुरांतक ॥ ७७ ॥ सृजता सर्वलोकानां मन्निदेशात्स्वयंभुवा ॥ तत्रापि कोटिलिंगानां
राजा त्वमभिषेक्ष्यसे ॥७८॥ सर्वतीर्थमयं चेदं तीर्थं यन्मणिकर्णिकम् ॥ इहाहंकारमुत्सृज्य व्रज त्वं सपरिच्छेदः ॥ ७९ ॥ ॥ नारद उवाच ॥ ॥
इत्युक्तो वासुदेवेन त्र्यंबको नतकन्धरः ॥ कृतांजलिपुटो भूत्वा प्रोवाच मधुसूदनम् ॥ ८० ॥ ॥ महादेव उवाच ॥ ॥ देवदेव जगन्नाथ प्रणता
र्तिहर प्रभो ॥ त्वदाज्ञापालनं श्रेयःकारणं मे जगत्पते ॥ ८१ ॥ यत्तु मूढतया देव अवलेपः कृतो मया ॥ तवैवानुग्रहस्तत्र प्रभो चांचल्यकारणम् ॥
॥ ८२ ॥ यदादिशसि देवेश प्रयाणं पुरुषोत्तमम् ॥ तन्मूर्ध्नि कृत्वा यास्यामि क्षेत्रं मुक्तिप्रदं शिवम् ॥ ८३ ॥ अभिसंधिं कुरुष्वाद्य ममानुग्रहकार
णम् ॥पुरुषोत्तमं मम क्षेत्रं त्वमेव परिपालय ॥ ८४ ॥ यथा पुनर्नेदृशं तद्विनाशमुपयास्यति ॥ इत्थमेतत्पुरा क्षेत्रं महादेवेन निर्मितम् ॥ ८५ ॥
बलश्रीसहितं देवमर्चयन्पुरुषोत्तमम् ॥ अत्र साक्षादुमाकांतः स्थापितः परमेष्ठिना ॥ ८६ ॥ वयं तत्र व्रजिष्यामो द्रक्ष्यामः पुरनाशनम् ॥ सुदृढां
तस्तमःस्तोमभास्वंतं गिरिजापतिम् ॥८७॥ यदेतच्छांभवं क्षेत्रं तमसो नाशनं परम् ॥ रजःप्रक्षालनं श्रेयः ख्यातं विरजमण्डलम् ॥ ८८ ॥ सत्त्वो
द्रिक्ततया ख्यातं मुक्तिदं पुरुषोत्तमम्॥यावंत्यन्यानि क्षेत्राणि मुक्तिदानि श्रुतानि ते॥८९॥ तानि सर्वाणि राजेंद्र ददते मुक्तिमत्र वै ॥ एतत्क्षेत्रं महारा
ज दुष्कृताविलचेतसाम् ॥९०॥ न विश्वासपथं याति रहस्यं चक्रपाणिनः ॥ ९१ ॥ ॥ जैमिनिरुवाच ॥ ॥ नारदस्य वचः श्रुत्वा प्रहृष्टहृदयो नृपः॥
उवाच मुनिशार्दूलं विस्मयोत्फुल्ललोचनः ॥ साधु मे कथितं ब्रह्मन्क्षेत्रं परमपावनम् ॥ ९२ ॥ यत्रोमापतिरास्तेऽसौ पालकः पुरुषोत्तमः ॥ अवश्यं
तत्र गच्छामः पन्था यद्यपि वक्रभूः ॥ उद्दिष्टेष्टपरिप्राप्तौ यदिदं कारणं महत् ॥ ९३ ॥ ॥ जैमिनिरुवाच ॥ ॥ ततस्तौ मुनिभूपालौ मध्याह्नस
मये द्विजाः ॥ प्रापतुः सबलौ क्षेत्रमेकाम्रवनसंज्ञकम् ॥ ९४ ॥ बिंदुतीर्थे नृपः स्नात्वा तीरस्थं पुरुषोत्तमम् ॥ संपूज्य विधिवद्यातः कोटीश्वरमहाल
यम् ॥ ९५ ॥ तद्द्वारि सम्यगाचांतस्तत्प्रीत्यै सुबहूनि सः ॥ गजाश्वधनरत्नानि वस्त्रालंकरणानि च ॥ ९६ ॥ द्विजेभ्यः प्रददौ राजा सात्त्विकं धर्म
मास्थितः ॥ लिंगं त्रिभुवनेशं तं महास्नानेन पूजयन् ॥ ९७ ॥ अतुलां प्रीतिमालेभे विष्णोरद्वैतदर्शनः ॥ स्तुत्वा प्रणम्य भक्त्यासौ वीणया
चोपगाय्य च ॥ ९८ ॥ कृतांजलिपुटो देवप्रसादनकृतोद्यमः ॥ अनन्यमनसा तस्थौ चिंतयन्वृषभध्वजम् ॥ ९९ ॥ ततः प्रसन्नो भगवांस्त्र्यंबकः
परमेश्वरः ॥ साक्षान्नृपमुवाचेदं स्पष्टाक्षरपदं द्विजाः ॥ १०० ॥ ॥ कोटिलिंगेश उवाच ॥ ॥ इन्द्रद्युम्न महाराज वैष्णवस्त्वादृशो भुवि ॥
दुर्लभः खलु ते वांछा चिरात्सम्यग्भविष्यति ॥१॥ इत्युक्त्वांतर्दधे शंभुः पश्यतस्तु महीक्षितः॥ नारदं पुनराहेदं यदादिष्टं स्वयंभुवा ॥ २ ॥ तत्कल्पय

CC-0. In Public Domain. Digitization by eGangotri

महाभाग वाजिमेधपुरःसरम् ॥ विष्णोः कलेवरे तस्मिन्क्षेत्रे श्रीपुरुषोत्तमे ॥ ३ ॥ अंतर्वेदी महापुण्या विष्णोर्हृदयसंनिभा ॥ तस्याः संरक्षणायाहं स्थापितो विष्णुनाष्टधा ॥ ४ ॥ शंखाकृतेरग्रभागे नीलकण्ठोऽहमास्थितः ॥ दुर्गया सह विप्रेंद्र तत्रेमं भूपतिं नय ॥ ५ ॥ अन्तर्हितः खलिवदानीं नीलरत्नतनुर्हरिः ॥ तत्र श्रीनरसिंहस्य क्षेत्रं कुरु मदाज्ञया ॥ ६ ॥ तत्र नः सन्निधौ वाजिमेधेन यजतामयम् ॥ सहस्रेण नृपश्रेष्ठ तदन्ते तरुमद्भुतम् ॥ ७ ॥ दर्शयेनं द्विजश्रेष्ठ ब्रह्मरूपमकल्मषम् ॥ चतस्रः प्रतिमास्तेन विश्वकर्मा घटिष्यति ॥ ८ ॥ तासां प्रतिष्ठितौ ब्रह्मा स्वयमेवागमिष्यति ॥ यथायं क्षीणपापः स्याद्वाजिमेधैर्यजन्हरिम् ॥ ९ ॥ तिष्ठत्वब्दसहस्रं वै तदंते लोकयिष्यति ॥ समस्तजगदाधारं सर्वकल्मषनाशनम् ॥ ११० ॥ दारवीं तनुमास्थाय दर्शनादपवर्गदम् ॥ न तस्य चरितं वेत्ति ब्रह्माऽहं त्वं च नारद ॥ ११ ॥ आज्ञानुष्ठानतो भक्त्या प्रसीदति स केवलम् ॥ नारदोऽपि महादेवं प्रणिपत्य जगद्गुरुम् ॥ उवाच प्रांजलिर्भूत्वा यदादिष्टं त्वया विभो ॥ १२ ॥ पितामहोऽपि मामित्थं निर्दिदेशास्य कल्पनम् ॥ पितामहश्च त्वं नाथ नो भिन्नौ परमात्मनः ॥ १३ ॥ नृपतेरस्य भाग्यर्द्धिरीदृशी यत्कृते विभो ॥ अगोचरोऽसौ मनसस्त्रयाणामप्यनुग्रहः ॥ १४ ॥ यत्प्रसंगेन तरणं भवाब्धेरपि दुष्कृताम् ॥ अचिंत्यमहिमा ह्येष भगवान्भूतभावनः ॥ १५ ॥ न बुद्धिगोचरे भक्तिर्यावत्या प्रीयते ह्यसौ ॥ चिरं यतंतस्तिष्ठंति वेदानुवचनादिभिः ॥ क्षुद्रोऽपि लभते मुक्तिमनायासेन कर्मणा ॥१६॥ गव्योपजीव्या गोप्यस्तु वनचारगृहोषिताः ॥ अरण्यजीवनाः प्रापुर्मुक्तिं कामोपभोगतः ॥ १७ ॥ द्रुहन्निरंतरं प्राप शिशुपालः संभांतरे ॥ व्याधो हृदयमाविध्य गतिं प्राप सुदुर्लभाम् ॥ १८ ॥ वस्त्राकर्षं गृहं नीत्वा कुब्जैनं बुभुजे पुरा ॥ यं ध्यानलयमापन्ना लभंते न सुरस्त्रियः ॥ १९ ॥ चंडालाय ददौ मुक्तिं दूरस्थायापि नो पुनः ॥ आसन्नायातिभक्ताय श्रोत्रियाय पुरा विभुः ॥१२०॥ मायाभिर्वंचयेत्त्वां हि पितामहमपि प्रभुः ॥ तिष्ठंति दुःखबहुलास्तपोभिर्देहबंधनाः ॥ ॥ २१ ॥ गौतमाद्या ब्रह्मचर्यनिष्ठाः कल्पान्तवासिनः ॥ ईदृक्ताद्दृक्परिच्छेदगोचरं नास्य चेष्टितम् ॥ २२ ॥ व्यवसायेन बहुना कालेन महता तथा ॥ निर्णेतुं शक्यते नास्य चरितं वा सुमेधसः ॥ २३ ॥ उपाया बहवः संति ये शास्त्रपरिनिष्ठिताः ॥ विदुषां मोचनायेह बहुशस्तैर्यजंति वै ॥ ॥ २४ ॥ सर्वेषामुत्तमोपायो वसतिः पुरुषोत्तमे ॥ याऽवश्यं स्वामिसायुज्यं प्रापयेत्सुसखा यथा ॥ २५ ॥ तदेनं मायिनं प्राप्तुमुपायो नांतरीयकः॥ स्वयं निधाय हरिणा यत्र वासः सुरक्षितः ॥ २६ ॥ इंद्रद्युम्नप्रसंगेन जायते सार्वलौकिकः ॥ तदाज्ञापय देवेश गृहीत्वैनं बलान्वितम् ॥२७॥ उपत्यकायां संस्थाप्य दीक्षयित्वा महाक्रतौ ॥ आगमिष्यामि पादाब्जसमीपं ते वृषध्वज ॥ २८ ॥ ॥ जैमिनिरुवाच ॥ ॥ तथेत्युक्त्वा महादेवः क्षणादं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तर्दंधे मुनेः ॥ सोऽपि राज्ञो रथे तिष्ठन्प्रययौ क्षेत्रमुत्तमम् ॥२९॥ द्वितीयेऽह्नि कपोतेशस्थलीमासेदिवान्नृपः ॥ दैर्घ्यायामसमायुक्तां जलाशयद्रुमाकुलाम् ॥१३०॥ बिल्वेशः पूर्वसीमायां समुद्रतटमास्थितः ॥ सेनानिवेशयोग्यां तां मंत्रिणा संनिवेदिताम् ॥३१॥ यथायोग्यं यथास्थानं स्थापयित्वा नृपोत्तमः ॥ बिल्वेश्वरकपोतेशं नमस्कृत्य प्रपूज्य च ॥ ३२ ॥ रथमास्थाय मतिमान्सहितो ब्रह्मसूनुना ॥ मनसा वचसा विष्णुं नीलाचलनिवासिनम् ॥ चिंतयन्कीर्तयन्विप्रा जगाम संनिधिं हरेः ॥१३३॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे पुरुषोत्तमक्षेत्रमाहात्म्ये जैमिनिऋषिसंवादे द्वादशोऽध्यायः ॥१२॥छ॥ ॥ मुनय ऊचुः ॥ ॥ कपोतेशस्थली चापि कथं ख्याता महामुने ॥ को वा कपोतः कश्चेश एतन्नो वक्तुमर्हसि ॥१॥ ॥ जैमिनिरुवाच ॥ ॥ पुरा कुशस्थली सा वै असेव्या सर्वजंतुभिः ॥ तीक्ष्णधारैः कुशाग्रैस्तु परितः कंटकैश्चिता ॥२॥ निस्तरुर्निर्जलाधारा पिशाचवसतिर्यथा ॥ यदा पूर्वं भगवतो नान्यो देवोऽपि पूज्यते ॥३॥ पूज्यः स्यामहमप्येवं स्पर्धासीद्धूर्जटेस्तदा ॥ चिंतयन्निति तस्यैव विष्णोर्भक्तौ मनोऽदधत् ॥ ४ ॥ सर्वनिर्विषये देशे स्थित्वाऽहं निष्परिग्रहः ॥ सुमहत्तप आस्थाय तोषयिष्यामि तं हरिम् ॥ ५ ॥ किं वदेयं रमेशाय का स्तुतिः शारदापतेः ॥ सर्वब्रह्मांडनाथस्य किं वान्यत्तुष्टिकारकम् ॥ ६ ॥ तस्मान्न बाह्यं वस्त्वन्यदुपयोगाय तस्य वै ॥ अंतर्यागं[1] समास्थाय निर्व्यलीकेन चेतसा ॥ ७ ॥ भक्तेभ्य आत्मप्रददं चराचरगुरुं हरिम् ॥ आराधयिष्ये सर्वेषां पूज्यः स्यां तत्प्रसादतः ॥ ८ ॥ तत इत्यभिसंधाय ययौ पुण्यां कुशस्थलीम् ॥ समीपे नीलगोत्रस्य सर्वद्वंद्वविवर्जितः ॥ ९ ॥ ततस्तेपे तपस्तीव्रं वायुभक्षो महेश्वरः ॥ कपोत इव सूक्ष्मोऽभूदष्टमूर्तिरपि प्रभुः ॥ १० ॥ ततः प्रसन्नो भगवानैश्वर्यं प्रददौ तदा ॥ येनात्मतुल्यः संजातः पूजासंमाननादिषु ॥ ११ ॥ तपःप्रभावात्तस्यासीत्स्थली वृन्दावनोपमा ॥ सरस्तडागसरसीनदीभिः शोभितांतरा ॥ १२ ॥ नानाद्रुमैर्लताभिश्च सर्वर्तुफलपुष्पकैः ॥ मधुमत्तद्विरेफाणां झंकारैर्मुखराशया ॥ १३ ॥ नानापक्षिगणाकीर्णा सर्वजंतुसुखाश्रया ॥ कपोतसदृशो जातो यतः स तपसा शिवः ॥ १४ ॥ मुरारेराज्ञया सोऽत्र कपोतेश्वरतां गतः ॥ तदाज्ञयाऽत्र वसति मृडान्या त्र्यंबकः सदा ॥ १५ ॥ येऽर्चयन्ति कपोतेशं स्तुवन्ति प्रणमंति वा ॥ निर्धूतकल्मषास्ते वै प्रयांति पुरुषोत्तमम् ॥ १६ ॥ अतः परं प्रवक्ष्यामि बिल्वेशमहिमां द्विजाः ॥ पातालवासिनः पूर्वं दैत्या भित्त्वा महीतलम् ॥ १७ ॥ उपद्रवंति भूर्लोकं भक्षयन्ति जनांस्तथा ॥ भारावतरणार्थाय देवकीगर्भसंभवः ॥ १८ ॥ पालयामास पृथिवीं यदा स भगवान्प्रभुः ॥ यादवैः पांडवैः सार्द्धं तदा

१ अंतर्यागम्–मातृकान्यासादिकम्।

CC-0. In Public Domain. Digitization by eGangotri

तत्स्थानमागतः ॥ १९ ॥ तीर्थराजस्य सलिले स्नात्वा तं नीलमाधवम् ॥ दूरात्प्रणम्य मनसा दैत्यद्वारमुपागतः ॥ २० ॥ दृष्ट्वा तद्विवरं घोरम प्रवेश्यं तु मानवैः ॥ भ्रांत्या संमोहयँल्लोकान्प्रथयञ्छिवपूज्यताम् ॥ २१ ॥ बैल्वं फलं समादाय तत्रावाह्य त्रिलोचनम् ॥ पूजयित्वा पुरारातिं तुष्टावासुरसूदनः ॥ २२ ॥ ॥श्री भगवानुवाच ॥ ॥ नमस्ते त्रिगुणातीत गुणत्रयविभागकृत् ॥ त्रयीमय त्रयातीत त्रिकालज्ञानिने नमः ॥ ॥ २३ ॥ शशिसूर्याग्निनेत्राय ब्रह्मण्याय वरात्मने ॥ अष्टैश्वर्यनिधानाय तुभ्यमष्टात्मने नमः ॥ २४ ॥ यस्य रूपं तमःपारे तमोनाशनमव्ययम् ॥ अज्ञानानां तमश्छिन्नं तस्मै वितमसे नमः ॥ २५ ॥ एवं स्वमात्मनात्मानं स्तुत्वा स भगवान्प्रभुः ॥ तस्य प्रसादाद्विवरं सुप्रवेशमपश्यत ॥ २६ ॥ तेन मार्गेण पातालं ससैन्योऽभ्यगमत्प्रभुः ॥ हत्वा तत्र बलोदग्रान्दैत्यान्भारावतारणः ॥ २७ ॥ पुनरागम्य तत्रैव स्थित्वा स वृषभध्वजम् ॥ संपूज्य भगवान्द्वाररोधाय स्थापयञ्छिवम् ॥ २८ ॥ इदमाह महाबुद्धिर्भक्तिवश्यो गदाधरः ॥ धूर्जटे तिष्ठ प्रासादे रुन्धानोऽसुरनिर्गमम् ॥ २९ ॥ त्वदन्यः कः क्षमः शंभो कर्बूरबलनाशने ॥ स्थापयित्वा महादेवं ततो द्वारावतीं ययौ ॥ ३० ॥ ततःप्रभृति बिल्वेशः पृथिव्यां ख्यातिमागतः ॥ पूर्वविधिः[1] स बिल्वेशः क्षेत्रराजस्य भो द्विजाः ॥ ३१ ॥ तं दृष्ट्वा पापहंतारं मृडानीपतिमव्ययम् ॥ सर्वान्कामानवाप्नोति विपत्तिं दुस्तरां जयेत् ॥ ३२ ॥ कपोतबिल्वेश्वरयोर्माहात्म्यं कथितं तु वः ॥ अतः परं भो मुनयः किमन्यच्छ्रोतुमिच्छथ ॥ ३३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे पुरुषोत्तमक्षेत्रमाहात्म्ये जैमिनिऋषिसंवादे त्रयोदशोऽध्यायः ॥ १३ ॥ ॥छ॥ ॥ ॥ ॥ मुनय ऊचुः ॥ ॥ रथमारुह्य तौ यातौ यदा नारदपार्थिवौ ॥ क्व यातौ चक्रतुः किं वा तन्नो वद महामुने ॥१॥ ॥ जैमिनिरुवाच ॥ ॥ सार्द्धं च विद्यापतिना पुरोहितकनीयसा ॥ क्षेत्रांते नीलकण्ठस्य समीपमुपजग्मतुः ॥ २ ॥ दुर्निमित्तमभून्मार्गे व्रजतोऽस्य महीक्षितः ॥ वामाक्षिभुजयोः स्पन्दः स्फुरणं च मुहुर्मुहुः ॥ ३ ॥ तद्दृष्ट्वा नृपशार्दूलो विषादमुपसेदिवान् ॥ पप्रच्छ कारणं चास्य सर्वज्ञाननिधिं मुनिम् ॥ ४ ॥ अव्याहतं मे साम्राज्यं प्राप्तं क्षेत्रोत्तमं त्विदम् ॥ दर्शनार्थं माधवस्य यात्रेयं तु शुभावहा ॥ ५ ॥ अकार्यं मे भवेदद्य किं मुने ब्रूहि तत्त्वतः ॥ स्पन्दते वामनेत्रं तु स्फुरते च भुजोऽसकृत् ॥ ६ ॥ तच्छ्रुत्वा नारदः प्राह भावि कार्यं च सूचयन् ॥ श्रावयन्कुशलं वाक्यं यदुक्तं पद्मयोनिना ॥ ७ ॥ ॥ नारद उवाच ॥ ॥ मा भूद्विषादस्ते भूप सविघ्नं प्रायशः शुभम् ॥ विघ्नांते च शुभं पुंसां पुनर्भाग्यवतां नृप ॥ ८ ॥ सत्यं त्वं सार्वभौमोऽसि क्षेत्रं विष्णोर्वै

१ पूर्वविधिः—प्रथमस्रष्टा—इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पुस्त्विदम् ॥ यात्रा तेऽत्र यदर्थेयं सोंऽतर्द्धानमुपागमत् ॥ ९ ॥ एष विद्यापतिर्विप्रो दिने यस्मिन्ददर्श तम् ॥ सायंकाले ततोऽन्येद्युः स्वर्णवालुकया वृतः ॥ ययौ पातालनिलयं मर्त्यलोके सुदुर्लभः ॥ १० ॥ ॥ जैमिनिरुवाच ॥ ॥ तच्छ्रुत्वा घोरवचनं वज्रपातसमं नृपः ॥ पपात धरणीपृष्ठे निःसंज्ञः स द्विजोत्तमाः ॥ ११ ॥ तं तथा पतितं दृष्ट्वा पुरोहितपुरोगमाः ॥ स्निग्धाः सखायः सर्वे ते हाहाकारमुपाद्रवन् ॥१२॥ कर्पूरशीतलं वारि मुखे सिक्त्वा पुनःपुनः ॥ चन्दनागुरुकर्पूरैः सर्वांगं लिलिपुश्च ते ॥ १३ ॥ चामरैस्तालवृंतैश्च वीजयामासुराशु तम् ॥ नारदोऽपि च संभ्रांतो धारयन्योगधारणाम् ॥ १४ ॥ प्राणानरक्षन्नृपतेर्जानंस्तत्र शुभायतिम् ॥ सोऽपि राजा चिरात्संज्ञां लेभे यत्नैरनुत्तमैः ॥ १५ ॥ उत्थाय पादयोर्विप्रा नारदस्यापतत्पुनः ॥ किमकार्षं मुने पापं कस्मिञ्जन्मांतरे दृढम् ॥ १६ ॥ यस्य पाकदशायां वै दुःखमासीत्सुदारुणम् ॥ कर्मणा मनसा वाचा नो द्विजानां गवामपि ॥ अपराधः कृतः कश्चित्स्वप्नेऽपि मुनिपुंगव ॥ १७ ॥ नित्यं नैमित्तिकं काम्यं कर्म यत्परिकीर्तितम् ॥ राज्ञस्तन्मुनिशार्दूल न त्यक्तं वै मया क्वचित् ॥ १८ ॥ देवतातिथिभृत्यानां पितृणां च महामुने ॥ तथाश्रितानां बंधूनां नापमानः कृतो मया ॥ १९ ॥ पंचाशदपराधा ये विष्णोर्वैष्णवपुंगव ॥ त्यक्ताः प्रयत्नात्ते सर्वे क्रुद्धा इव महोरगाः ॥ २० ॥ किं भाग्यं चरितं तेन पुरोहितकनीयसा ॥ यच्चर्मचक्षुषा दृष्टो भगवान्नीलमाधवः ॥ २१ ॥ किमर्थं राज्यविभ्रंशो जानतैष त्वया कृतः ॥ यात्रासमय एवैतत्कथं वा न प्रकीर्तितम् ॥ २२ ॥ किमर्थं वा श्रोत्रियाणां स्थानभ्रंशो मया कृतः ॥ कथमेतैः परित्यक्ताश्चिरात्संस्कृतभूमयः ॥ २३ ॥ आवंशभूतेर्वृत्तिर्या प्रजाभिः परिपालिता ॥ सदर्थं सा परित्यक्ता जीविष्यंति कथं नु ताः ॥ २४ ॥ प्राणान्न धारयिष्यामि न द्रक्ष्यामि यदा हरिम् ॥ एष मे निश्चयो ब्रह्मन्मयि नष्टे कुतः प्रजाः ॥ ॥ २५ ॥ मुने सदा सकरुणस्त्वं मां शास्सि शुभाशुभम् ॥ सांप्रतं मत्सुतं नीत्वा मालवेष्वभिषेचय ॥ २६ ॥ स पालयतु न्यायेन न शोचंतु इमाः प्रजाः ॥ राजानो ये समायातास्ते सर्वे मन्निदेशतः ॥ २७ ॥ मत्सूनोर्मालवेशस्य प्रयांतु वचने स्थिताः ॥ प्रायोपवेशविधिना चिंतयन्नीलमाधवम् ॥ २८ ॥ आयुःशेषं करिष्यामि सफलं क्षेत्रसंस्थितः ॥ २९ ॥ ॥ जैमिनिरुवाच ॥ ॥ विलपंतमिंद्रद्युम्नं राजानं ब्रह्मणः सुतः ॥ उत्थाप्य प्रश्रयगिरा सांत्वयन्निदमब्रवीत् ॥ ३० ॥ ॥ नारद उवाच ॥ ॥ राजन्पंडितमूर्द्धन्यो वैष्णवो धैर्यसागरः ॥ श्रेयः सविघ्नं सततं कथं वा नावधारयेः ॥ ३१ ॥ इदं तु परमं श्रेयः पुंसो जन्मशतार्जितम् ॥ शरीरधारिणं पश्येच्चर्मचक्षुर्गदाधरम् ॥ ३२ ॥ निरंकुशा हरेर्लीला केन वाप्यवधार्यते ॥ जीवन्मुक्तोऽप्यहं राजंस्तल्लीलां नातिवर्तये ॥ ३३ ॥ कियता वंचितो नाहं दृढभक्तोऽन्तिकस्थितः ॥

CC-0. In Public Domain. Digitization by eGangotri

दुरत्यया तस्य माया बहुजन्मशतैरपि ॥ ३४ ॥ अनन्ता तस्य मायेयं दुर्ज्ञेया पद्मयोनिना ॥ नाभिपद्मास्थितेनापि नित्यं च स्तुतिशालिना
॥ ३५ ॥ स्वभाव एवं कथितस्तस्य मायाविनो नृप ॥ विशेषं कथयाम्येवं त्वं तु भाग्यवतां वरः ॥ ३६ ॥ तिस्रोऽपि मूर्तयस्तस्य त्वदनुग्रह
बुद्धयः ॥ चराचराणां स्रष्टा यः साक्षाल्लोकपितामहः ॥ मामुवाच व्रजाशु त्वमिंद्रद्युम्नस्य चांतिकम् ॥ ३७ ॥ नीलाचलं प्रयात्येष दिदृक्षुर्नील
माधवम् ॥ अन्तर्द्धानं गतो ह्येष यमेन प्रार्थितो विभुः ॥ ३८ ॥ न तत्र शोकः कर्तव्यः शक्यते तत्र नान्यथा ॥ वाच्यो मद्वचनाद्राजा
पंचमी मम संततिः ॥ ३९ ॥ तत्कृते परमात्मानं प्रसाद्य पुरुषोत्तमम् ॥ श्वेतद्वीपान्नयिष्यामि सहस्रांते महाक्रतोः ॥ ४० ॥ इन्द्रद्युम्नः स
इदानीं क्षेत्रे श्रीपुरुषोत्तमे ॥ अश्वमेधसहस्रैस्तु यजन्विष्णुं स तिष्ठतु ॥ ४१ ॥ तदंते दारवतनुं विष्णुं द्रक्ष्यति चक्षुषा ॥ सोऽवतारो हरेः ख्यातिं
तस्य द्वारा गमिष्यति ॥ ४२ ॥ तदा तु तनवो विष्णोः प्रतिष्ठाप्या मया ध्रुवम् ॥ पुरा स्म मणिमूर्तिस्तु चतुर्द्धावस्थितो हरिः ॥४३॥ दृष्ट्वा पुरोधसा
तस्य साक्षादग्रे निवेदितः ॥ दिव्यदारुवपुर्भूयश्चतुर्द्धावतरिष्यति ॥ ४४ ॥ तस्मान्मा व्यथ राजेंद्र वांछा ते सफला ध्रुवम् ॥ भविष्यति न संदेहो
निर्व्यलीको वसेह वै ॥ ४५ ॥ ॥ जैमिनिरुवाच ॥ ॥ सांत्वयित्वा निनायेत्थं राजानं नारदस्तदा ॥ विश्वासपदवीं विप्राः पुनर्वाक्यमुवाच
ह ॥ ४६ ॥ ॥ नारद उवाच ॥ ॥ शंखाकृतेः क्षेत्रवरस्य चाग्रे यो नीलकण्ठः खलु दुर्गयाऽऽस्ते ॥ यामो वयं तत्र च वाजिमेधक्रतूपयोग्या
सुसमा स्थली सा ॥ ४७ ॥ तस्यां विनिर्माय सहस्रवर्षस्थिरां सुशालां हयमेधनाय ॥ नीलाद्रिवासस्य नृसिंहमूर्तिं दृष्ट्वा कृतार्थं विरचय्य
जन्म ॥ ४८ ॥ तस्यैव मूर्तिं प्रतियातनां ते नित्यार्चनीयां तव पूजनीयाम् ॥ प्रत्यक्प्रतिष्ठाप्य समस्तविघ्नविनाशहेतोः फलबृंहणाय ॥ ४९ ॥
आरप्स्यामः क्रतुवरं मुनिवर्यैर्यथोचितम् ॥ विलम्बोऽत्र न हि श्रेयानिति पैतामहं वचः ॥ ५० ॥ इति श्रीस्कांदे महापुराण एकाशीति
साहस्र्यां संहितायां द्वितीये वैष्णवखण्डे पुरुषोत्तमक्षेत्रमाहात्म्ये जैमिनिऋषिसंवादे चतुर्दशोऽध्यायः ॥ १४ ॥ ॥ जैमिनिरुवाच ॥ ॥
ततस्ते प्रस्थिता विप्रा नीलकण्ठांतिकं मुदा ॥ प्रपूज्य तं महादेवं श्रीदुर्गां प्रणिपत्य च ॥ १ ॥ विमुच्य स्यंदनवरं पादचाराः सहानुगाः ॥
आरोढुं नीलभूमिध्रं प्रयाताः संयतेंद्रियाः ॥ २ ॥ नानाद्रुमलताकीर्णं नानापक्षिगणाकुलम् ॥ शिलाविषमसंरोधमभितः परिवेषकम् ॥ ३ ॥
भ्रमद्भ्रमरसंभूतभ्रमत्कुद्दंडशैलकम् ॥ दक्षिणांभोधिकल्लोलजलावृतनितंबकम् ॥ ४ ॥ अप्रतर्क्यं सदा मर्त्यैर्दुष्प्रवेश्यं महोरगैः ॥ मत्तमातंगकघटा
बृंहितैर्भीषणांतरम् ॥ ५ ॥ श्वापदैश्चिरसंवासैः शस्त्राघातमवेदिभिः ॥ निर्भयैः परितः कीर्णं मृगयूथैरनेकशः ॥ ६ ॥ प्रवेष्टुकामा न प्रापुर्यदा ते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मार्गमंतरम् ॥ तदा नारदसंसर्गाद्विदित्वा तु गिरेः शिरः ॥ ७ ॥ आसेदुर्यत्र वसति कृष्णागुरुतरोरधः ॥ सर्वापद्भयसंहर्ता दिव्यसिंहवपुर्विभुः ॥
॥ ८ ॥ यं दृष्ट्वा ब्रह्महत्याया लीयन्ते कोटयो नृणाम् ॥ व्यात्तास्यं भीमदशनमापिंगलसटाकुलम् ॥ ९ ॥ उग्रं त्रिनेत्रं दैत्यस्य स्वोरावुत्तान
शायिनः ॥ वक्षःस्थलं दारयंतं नखरैर्वज्रदारुणैः ॥ १० ॥ अरुणाभं लसज्जिह्वं[1] साट्टहासमुखं विभुम् ॥ शंखचक्रलसद्बाहुं किरीटमुकुटोज्ज्वलम् ॥
॥ ११ ॥ नेत्रोच्छलद्वह्निकणसंत्रासितदिगन्तरम् ॥ प्रचंडाघातभूम्यंतप्रविष्टपदपंकजम् ॥ १२ ॥ तमादिमूर्तिं ते दृष्ट्वा नारदाग्रे तदा हरिम् ॥
निर्भया ददृशुर्दूरात्प्रणेमुर्विगतज्वराः ॥ १३ ॥ इन्द्रद्युम्नोऽपि तं दृष्ट्वा नारदोक्तौ विशस्वसे ॥ भाविकार्ये प्रत्ययवानिदमाह महामुनिम् ॥ १४ ॥
महर्षे कृतकृत्योऽस्मि त्वं हि ज्ञाननिधिः परम् ॥ दुराराध्यो नृसिंहोऽयं दर्शनेऽपि भयावहः ॥१५॥ भवादृशैः सुसेव्योयं मादृशैर्दूरतोऽपि सः ॥ दर्श
नात्कृतकृत्योऽस्मि संलीनाशेषपातकः ॥ १६ ॥ त्वत्सन्निधानादेवात्र तिष्ठामो निर्भया मुने ॥ अत्युग्रमूर्तिर्भगवान्स्वल्पवीर्यैर्नरैः कथम् ॥ १७ ॥
आराध्यते दैत्यराजं त्रिलोकेशं विदारयन् ॥ यस्य नीलमयी मूर्तिः कृपासिंधोः स्थिता तु वै ॥ १८ ॥ कस्मिन्स्थले मुनिश्रेष्ठ दर्शनाद्या
विमुक्तिदा ॥ तन्मे दर्शय विप्रेंद्र यन्मे मुक्तिप्रदं मतम् ॥ १९ ॥ इत्युक्तो नारदस्तस्मै दर्शयामास पावनम् ॥ स्थानं यत्र स्थितो देवः स्वर्णसैकत
संवृतः ॥ २० ॥ पश्यैतं योजनायामं योजनद्वयमुच्छ्रितम् ॥ कल्पांतस्थायिनं भूप न्यग्रोधं मुक्तिदं नृणाम् ॥ २१ ॥ छायायाः क्रमणाद्यस्य मुच्यते
पापकंचुकात् ॥ अस्य मूले नरः प्राणांस्त्यजन्मुक्तिमवाप्नुयात् ॥२२॥ न्यग्रोधरूपं दृष्ट्वापि नारायणमकल्मषम् ॥ निष्पापो जायते मर्त्यः किमु तं
पूजयन्स्तुवन् ॥ २३ ॥ अस्य मूलात्प्रतीच्यां हि नृसिंहस्योत्तरे नृप ॥ अतिष्ठन्माधवो यत्र चतुर्मूर्तिधरो विभुः ॥ २४ ॥ अनुग्रहीतुं त्वामेव
पुनरत्रोद्भविष्यति ॥ श्वेतद्वीपे यथा विष्णुर्भोगभूमौ निजालयः ॥ २५ ॥ जंबूद्वीपे कर्मभूमौ निजं स्थानमिदं स्मृतम् ॥ स्वस्यैवाति
रहस्यत्वान्न प्रकाशोस्य संमतः ॥ २६ ॥ मोक्षाधिकारी जानाति स्थलमेतन्महीपते ॥ अविश्वासपदं नृणां दुष्कृतां हि विशेषतः ॥ २७ ॥
अत्र याऽन्या प्रतिकृतिः पौरैर्विष्णोः प्रतिष्ठिता ॥ सापि मुक्तिप्रदा भूप किं पुनः सा स्वयंभुवा ॥ २८ ॥ अंतर्द्धानतिरोधाने सनिमित्ते जगत्प्रभोः ॥
अनुग्रहार्थं साधूनां जायते च युगेयुगे ॥ २९ ॥ नानावतारैर्भगवान्मत्स्यकूर्मादिकैर्नृप ॥ निमित्तनाशे च तिरोदधाति परमेश्वरः ॥ ३० ॥
निर्निमित्तं स्थितो नित्यमिह कारुण्यसागरः ॥ श्वेतद्वीपाद्यथा विष्णुरन्यत्रावतरेत्प्रभुः ॥ ३१ ॥ अत्र स्थितोऽपि स द्वारकाकांचीपुष्करा

१ ललजिह्वम्–इ॰पा॰ ।

CC-0. In Public Domain. Digitization by eGangotri

दिषु ॥ प्रकाशं याति कृपया तरुमूलप्ररोहवत् ॥ ३२ ॥ नानातीर्थेषु देशेषु क्षेत्रेष्वायतनेषु च ॥ अंशावतारास्तस्यैव मा भूत्ते संशयो नृप ॥३३॥
क्षणं न त्यजतीशानः क्षेत्रं क्षेत्रमिव स्वकम् ॥ त्वदुपज्ञस्तु भूपाल प्रकाशोऽन्यो भविष्यति ॥ ३४ ॥ इति संदर्शितं स्थानं नारदेन महात्मना ॥
साष्टांगपातं भूमौ तदिंद्रद्युम्नो ननाम ह ॥ ३५ ॥ मन्वानस्तु स्थितं देवं प्रकाशमिव तुष्टुवे ॥ ३६ ॥ ॥ इंद्रद्युम्न उवाच ॥ ॥ देवदेव जगन्नाथ
प्रणतार्तिविनाशन ॥ त्राहि मां पुंडरीकाक्ष पतितं भवसागरे ॥ ३७ ॥ त्वमेक एव दुःखौघध्वंसकः परमेश्वर ॥ क्षुद्राः क्षुद्रान्हि सेवंते सुखलेशस्य
लिप्सया ॥ ३८ ॥ अनादित्रिविधौघस्य राशेः स्वस्य महांहसः ॥ दुरुच्छेद्यस्य सततं पूर्यमाणस्य जन्मनः ॥ ३९ ॥ किं पुनर्भक्तिभावेन साक्षा
न्मुक्तिप्रदं नृणाम् ॥ कर्माधीनं तु ये मूढा वदंति त्वां कृपानिधिम् ॥ ४० ॥ ते न जानंति भगवन्कर्मैवं प्रेरितं त्वया ॥ अजामिलेन विप्रेण त्य
क्त्वा वर्णाश्रमोदितम् ॥ ४१ ॥ किं न पापं कृतं स्वामिन्सोऽपि त्वन्नामकीर्तनात् ॥ मुक्तोऽभूत्स्मरणादेव पाशहस्तैर्विमोचितः ॥ ४२ ॥ सर्वेऽप्यु
पाया देवेश कीर्तितास्तव दर्शने ॥ त्वयि दृष्टे हि भिद्यंते संशया हृदि संस्थिताः ॥ ४३ ॥ निःसंशयो भवेत्सद्यः पापपुण्यक्षयो ध्रुवम् ॥ त्वमेव
शरणं दीनमनुगृह्णीष्व मां विभो ॥ ४४ ॥ निश्चितानि त्वया देव गर्भस्थस्य च यानि मे ॥ तैरेव मे जनिर्जातु याचे त्वां केवलं त्विदम् ॥ ४५ ॥
तिरश्चो मुक्तिदा मूर्तिः स्थिता ते याऽत्र तां पुनः ॥ अनेन चक्षुषा पश्यामीश नान्यत्प्रयोजनम् ॥४६॥ कृतांजलिपुटो राजा स्तुत्वैवं मधुसूदनम्॥
पुनर्ननाम धरणीपृष्ठे साश्रुविलोचनः ॥ ४७ ॥ ततोंऽरिक्षगा वाणी सामसुस्वरभाषिणी ॥ उच्चचार नभोमध्ये इन्द्रद्युम्नस्य शृण्वतः ॥ ४८ ॥ मा
चिंतां व्रज भूपाल व्रजिष्ये त्वदृशोः पथम् ॥ पैतामहं वचः प्राह नारदो यत्कुरुष्व तत् ॥ ४९ ॥ तच्छ्रुत्वा दिव्यवचनं नारदस्य च भाषितम् ॥
श्रद्दधे वाजिमेधाय भगवत्प्रीतिकारकः ॥ ५० ॥ नारदं च पुनः प्राह हर्षगद्गदया गिरा ॥ मुने त्वया यदादिष्टं चतुर्मुखनिदेशतः ॥ ५१ ॥ अशरीरा
त्वियं वाणी अनुजज्ञे तदेव हि ॥ पितामहो जगन्नाथो भेदो वै नाऽनयोः क्वचित् ॥ ५२ ॥ पद्मयोनेः सुतस्त्वं हि वचस्ते भगवद्वचः ॥ तत्कर्त
व्यं प्रयत्नेन यच्छ्रेयउपपादकम् ॥ ५३ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे पुरुषोत्तमक्षेत्रमाहात्म्ये
जैमिनिऋषिसंवादे पंचदशोऽध्यायः ॥ १५ ॥ ॥ जैमिनिरुवाच ॥ ॥ नृपं सुमनसं दृष्ट्वा श्रद्दधानं महाक्रतौ ॥ उवाच परमप्रीत्या नारदो
लोकहर्षणः ॥ १ ॥ व्यवसाये सुकृतिनां देवा यांति सहायताम् ॥ तत्रोदाहरणं त्वं हि यत्सहायश्चतुर्मुखः ॥ २ ॥ तदेहि यामस्तत्रैव नीलकंठस्य
सन्निधौ ॥ सर्वराक्षससंहारं सर्वविघ्ननिवारणम् ॥३॥ स्थापयाम्यग्रतो राजन्नृसिंहं वारुणीमुखम् ॥ अंतर्हितो हि भगवान्प्रत्यक्षोऽसौ नृकेसरी ॥४॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सन्निधावस्य यागस्तु फलातिशयवान्भवेत् ॥ त्वमग्रतो गच्छ शीघ्रं प्रासादं तत्र कारय ॥ ५ ॥ स्मरणान्मम चागत्य सुतो वै विश्वकर्मणः ॥
प्रत्यङ्मुखं तु प्रासादं स तूर्णं घटयिष्यति ॥ ६ ॥ दक्षिणे नीलकंठस्य यो महांश्चंदनद्रुमः ॥ धनुःशतांतरे राजंश्चिररूढस्तु
तिष्ठति ॥ ७ ॥ तस्य पश्चिमदेशस्थं क्षेत्रं राजन्भविष्यति ॥ वाजिमेधसहस्रेण तस्याग्रे यजतां भवान् ॥ ८ ॥ गच्छ त्वमहमत्रैव
स्थास्यामि दिनपञ्चकम् ॥ आराध्यैनं दिव्यसिंहं ज्योतीरूपमनन्तकम् ॥ ९ ॥ प्रत्यर्चायां प्रतिष्ठाप्य प्राणेंद्रियमनोयुतम् ॥ दीपाद्दीपं यथा
राजन्नयिष्ये शोभनाकृतिम् ॥ १० ॥ नारदस्येति वचनं प्रतिश्रुत्य नृपोत्तमः ॥ जगाम तत्र वेगेन चन्दनद्रुमसंनिधिम् ॥ ११ ॥ तत्रापश्य
त्सुघटकं शिल्पशास्त्रविशारदम् ॥ नारदस्याज्ञया प्राप्तं पुत्रं वै देवशिल्पिनः ॥ १२ ॥ मनुष्यरूपमास्थाय शस्त्रसूत्रधरं स्थितम् ॥ राजानं स
तु दृष्ट्वा वै चिकीर्षंतं सुरालयम् ॥ १३ ॥ कृतांजलिपुटः प्रोचे देवाहं शिल्पशास्त्रवित् ॥ नरसिंहालयं तेऽद्य घटयिष्यामि शोभनम् ॥ राजापि
तमुवाचेदं प्रहसन्भो द्विजोत्तमाः ॥ १४ ॥ ॥ इन्द्रद्युम्न उवाच ॥ ॥ न शिल्पी त्वं हि सामान्यः शिल्पशास्त्रप्रणेतृकः ॥ कथितो नारदेनैव
त्वष्टुः पुत्रो महायशाः ॥ १५ ॥ निर्जनेऽस्मिन्महारण्ये नेतः पूर्वं जनाश्रयः ॥ वयमद्यागताः शिल्पिन्सम्बन्धः किंनिमित्तकः ॥ १६ ॥ देवशिल्पी
भवानेव विष्णोरमिततेजसः ॥ सदानुध्यायिनस्तस्य निदेशवशवर्तिनः ॥ १७ ॥ येन स्मृतस्त्वं मुनिना स एवात्रागमिष्यति ॥ प्रत्यर्चां नरसिंहस्य
गृहीत्वा तु दिनांतरे ॥ १८ ॥ तदाशु घटयस्वाद्य सप्राकारं सतोरणम् ॥ प्रासादं नरसिंहस्य प्रतीचीवदनं शुभम् ॥ १९ ॥ तं पूजयित्वा विधिव
न्नियोज्य घटने नृपः ॥ शिलासंचयकान्भृत्यान्बहुवित्तैरयोजयत् ॥ २० ॥ चतुर्थे दिवसे विप्राः प्रासादोऽभूदनुत्तमः ॥ बहुकालप्रसाध्योऽपि
महिम्ना देवशिल्पिनः ॥ २१ ॥ ततः प्रभाते विमले नित्यकर्मावसानतः ॥ प्रतिष्ठाविधिसंभारं गृहीत्वा सपरिच्छदः ॥ २२ ॥ नारदागमनं प्रेक्ष्य
यावत्तिष्ठति भूपतिः ॥ तावच्छुश्रुविरे शङ्खा मृदङ्गा मुरजास्तथा ॥ २३ ॥ गीतमङ्गलवाद्यानि घंटानां करिणां स्वनाः ॥ तथा जय जयेत्युच्चैः
शब्दा आकाशमण्डले ॥ २४ ॥ तान्छुत्वा विस्मयापन्ना इंद्रद्युम्नपुरोगमाः ॥ राजानः श्रोत्रिया विप्रा वैष्णवाश्च सहस्रशः ॥ २५ ॥ निराधारा
स्त्विमे शब्दा अद्भुतानि न संशयः ॥ विचारयंतस्ते यावत्तावद्दक्षिणतो मरुत् ॥ २६ ॥ गन्धान्वितद्विरेफौघशब्दिताः पुष्पवृष्टयः ॥ आविर्भूतास्त्रि
पथगावारिणार्द्रीकृता द्विजाः ॥ २७ ॥ तदनंतरमेवासौ नारदो ब्रह्मणः सुतः ॥ तपःप्रभावनिर्व्यूढविमानवरशायिनीम् ॥ २८ ॥ रत्नचामरहस्ताभि
र्दिव्यस्त्रीभिः सुशोभिताम् ॥ अलंकृतां बहुविधैर्मणिरत्नप्रसाधनैः ॥ २९ ॥ दिव्यमाल्यांबरधरां दिव्यगन्धानुलेपनाम् ॥ रम्यां प्रतिष्ठितप्राणां

CC-0. In Public Domain. Digitization by eGangotri

स्कां.म.पु. घटितां विश्वकर्मणा ॥ ३० ॥ तेजोमण्डलसंवीतां परितो हर्षदामपि ॥ आदाय नरसिंहस्य प्रत्यर्चां प्रत्युपस्थितः ॥ ३१ ॥ तां दृष्ट्वा हर्षिताः सर्वे वै०खं०२
॥ ७९ ॥ राजा राजानुयायिनः ॥ अन्तर्द्धानं गतो देवो नारदेनोद्धृतः किमु ॥ ३२ ॥ मेनिरे हर्षितात्मानः प्रशशंसुश्च तं मुनिम् ॥ निरूप्य संनिधिस्थां (पु.मा. २)
तु नरसिंहाकृतिं द्विजाः ॥ आद्यमूर्तेर्नृसिंहस्य प्रतिमामथ मेनिरे ॥ ३३ ॥ प्रत्युत्थाय ततो राजा प्रहृष्टेनांतरात्मना ॥ प्रदक्षिणीकृत्य हरिं जगाम
शिरसा महीम् ॥ ३४ ॥ श्रद्धासंपत्तियोग्येन संभारेण नृपाज्ञया ॥ प्रस्थापयामास मुनिः प्रासादं शुभलक्षणम् ॥ ३५ ॥ प्रतिमां देवदेवस्य सुमुहूर्ते अ० १६
द्विजोत्तमाः ॥ धरारमाभ्यां सहितां रत्नवेद्यां प्रतिष्ठिताम् ॥ योगारूढतनुं राजा इन्द्रद्युम्नोऽथ तुष्टुवे ॥ ३६ ॥ वैष्णवैर्ब्राह्मणैर्भूपैर्नारदेन च धीमता ॥
गुह्योपनिषदैः स्मार्तैः स्तोत्रैः शास्त्रैर्मुदान्वितैः ॥ ३७ ॥ ॥ इन्द्रद्युम्न उवाच ॥ ॥ एकानेकस्थूलसूक्ष्माणुमूर्ते व्योमातीत व्योमरूपैकरूप ॥
व्योमाकार व्यापक व्योमसंस्थ व्योमारूढ व्योमकेशाब्जयोने ॥ ३८ ॥ दुःखांभोधेस्त्राहि मां दिव्यसिंह प्रादुर्भूतानेककोट्यर्कधामन् ॥ नित्या
सन्नो दूरसंस्थो न दूरो नासन्नो वा बोध्यबोधात्मभाव ॥ ३९ ॥ ज्ञेयज्ञेयो ज्ञानगम्योऽप्यगम्यो मायातीतो मानमेयोऽनुमानात् ॥
कृत्स्नस्यादिः कृत्स्नकर्त्तानुमंता पाता हर्त्ता विश्वसाक्षिन्नमस्ते ॥ ४० ॥ दुःखध्वंसस्यैकहेतुं न हेतुं भेत्तुं छेत्तुं संशयानग्रजातम् ॥ ज्योतीरूप
ज्ञानरूप प्रकाश स्तोमव्यूहाकार निर्माणहेतो ॥ ४१ ॥ त्वत्पादाब्जे भक्तिमग्र्यां सदा मे देहि स्वामिन्मूलभूतां चतुर्णाम् ॥ श्रौतैः स्मार्तैर्नित्ययुक्ता
जनास्ते दीनास्तिष्ठन्त्यत्र बद्धा भवाब्धौ ॥ ४२ ॥ अनन्तपादं बहुहस्तनेत्रमनंतकर्णं ककुभौघवस्त्रम् ॥ दिवानिशानाथसुकुण्डलाढ्यं नक्षत्रमाला
कृतचारुहारम् ॥ ४३ ॥ त्वामद्भुतं दिव्यनृसिंहमूर्तिं भक्तेष्टपूर्तिं शरणं प्रपद्ये ॥ यत्पादपद्मं हि पितामहस्य किरीटरत्नैर्विकचत्वमेति ॥ ४४ ॥
यदीयपादाब्जयुगांतभूमौ लुठेच्छिरो यस्य हि पांचभौतम् ॥ तद्दिव्यपादं शिरसा वहंति सुरेन्द्रनार्यः खलु तं नमामि ॥ ४५ ॥ तद्दिव्यसिंहं हत
पापसंघं पादाश्रितानां करुणाब्धिसिंहम् ॥ पादाऽब्जसंघट्टविघट्टमानब्रह्मांडभांडं प्रणमामि चण्डम् ॥ ४६ ॥ सटाच्छटाकंपनशीर्यमाणघनौघवि
द्रावितपापसंघम् ॥ चंडाट्टहासांतरिताब्दशब्दं त्रिलोकगर्भं नृहरिं नमामि ॥ ४७ ॥ नमस्ते नमस्ते नमस्तेऽद्य विष्णो परित्राहि दीनानुकंपिन्नना
थम् ॥ भवंतं समासाद्य मे देहबन्धो मुरारे न संसारकारागृहेऽस्तु ॥ ४८ ॥ हयमेधसहस्रांते यथा त्वां चर्मचक्षुषा ॥ दिव्यरूपं प्रपश्यामि तथानुक्रो ॥ ७९ ॥
शय प्रभो ॥ ४९ ॥ यथा चेज्यासहस्रं मे निर्विघ्नं तत्समाप्यते ॥ यज्ञेश त्वत्प्रसादान्मे तथा सान्निध्यमस्तु ते ॥ ५० ॥ कोटयः पापराशीनां क्षयं
यांति यथा प्रभो ॥ धर्मार्थकामा हस्तस्था नैषां चित्रं स्तुवंति ये ॥ मोक्षस्य भाजनं विष्णो ते नरा ये तवाश्रयाः ॥ ५१ ॥ स्तुत्वेत्थं दिव्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सिंहं तं भूपतिर्हृष्टमानसः ॥ दण्डपातप्रणामेन जगाम धरणीं मुहुः ॥ ५२ ॥ ॥ जैमिनिरुवाच ॥ ॥ क्षेत्रं तन्नरसिंहस्य ब्रह्मणा निर्मितं पुरा ॥ इन्द्रद्युम्नानुग्रहाय सर्वलोकहिताय च ॥ ५३ ॥ पश्यंति ये नृसिंहं तं शंभुना सह संस्थितम् ॥ न देहबन्धं ते विप्राः प्राप्नुवंति न संशयः ॥ ॥ ५४ ॥ मनसा वांछितं यद्यत्प्राप्नुवंति ततोऽधिकम् ॥ स्तोत्रेणानेन ये दिव्यसिंहरूपं स्तुवंति वै ॥ ५५ ॥ सर्वकामप्रदो देवस्तस्य मुक्तिं प्रयच्छति ॥ ज्येष्ठशुक्लद्वादशी या स्वातीनक्षत्रसंयुता ॥ ५६ ॥ तस्यां प्रतिष्ठितः क्षेत्रे दिव्यसिंहो महर्षिणा ॥ सुतेन ब्रह्मणः साक्षात्तत्र पश्यंति तं च ये ॥ ५७ ॥ वाजिमेधसहस्रस्य फलं साग्रं लभंति ते ॥ पञ्चामृतैर्वा क्षीरेण नारिकेलरसेन वा ॥ ५८ ॥ स्नापयंति नरा ये वै अथवा गन्धवारिणा ॥ पूजयित्वा महासिंहमुपचारैः सपायसैः ॥ ५९ ॥ जपाकुसुममाल्यैश्च गन्धमाल्यैः सुशोभनैः ॥ धूपैर्दीपैः सकर्पूरैस्तांबूलैरति शोभनैः ॥ ६० ॥ सुगीर्भिः स्तुतिपाठैश्च जयशब्दैस्तथोच्चकैः ॥ प्रदक्षिणप्रणामैश्च दानैर्ब्राह्मणतर्पणैः ॥ सन्तोष्य नरसिंहं तं ब्रह्मलोकमवाप्नुयात् ॥ ६१ ॥ वैशाखस्य चतुर्दश्यां सौरिवारेऽनिलर्क्षके ॥ आद्यावतारः सिंहस्य प्रदोषसमये द्विजाः ॥६२॥ तस्यां संपूज्य विधिवन्नरसिंहं समाहितः ॥ जन्मकोटिसहस्रैस्तु पापराशिः सुसंचितः ॥ दह्यते तत्क्षणादेव तूलराशिरिवाग्निना ॥ ६३ ॥ दृष्ट्वा स्पृष्ट्वा नमस्कृत्वा प्रणिपत्य च भक्तितः ॥ स्तुत्वा विमुच्यते पापैर्निर्मोकेन भुजंगवत् ॥ ६४ ॥ न तस्य व्याधयः संति न शोका नाधयस्तथा ॥ सर्वान्कामानवाप्नोति हयमेधफलं तथा ॥ ६५ ॥ समीपे तस्य भो विप्रा यजनं दानमेव च ॥ अन्यानि पुण्यकर्माणि कृतानि च सकृन्नरैः ॥ कोटिकोटिगुणानि स्युर्नरसिंहप्रसादतः ॥ ६६ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे पुरुषोत्तमक्षेत्रमाहात्म्ये जैमिनिऋषिसंवादे षोडशोऽध्यायः ॥ १६ ॥ ॥ मुनय ऊचुः ॥ ॥ प्रतिष्ठिते नारसिंहे क्षेत्रे तस्मिन्नराधिपः ॥ किं चकार मुने ब्रूहि परं कौतूहलं तु तत् ॥ १ ॥ ॥ जैमिनिरुवाच ॥ ॥ इन्द्रादींस्त्रिदशान्सर्वान्त्यमन्त्रयत पूर्वतः ॥ ततः स मन्त्रयामास ऋषीन्विप्रान्सहस्रशः ॥ २ ॥ अध्येतॄंश्चतुरो वेदान्सषडंगपदक्रमैः ॥ यज्ञविद्यासु कुशलान्मीमांसापरिनिष्ठितान् ॥ ३ ॥ सभाष्यकल्पसूत्रैस्तु परिनिष्ठितकर्मिणः ॥ अष्टादशसु विद्यासु कुशलान्धर्मकोविदान् ॥ ४ ॥ सदाचारावदातांश्च कुलीनान्सत्यवादिनः ॥ वैष्णवांश्च विशेषेण मंत्रयामास सादरम् ॥ ५ ॥ त्रैलोक्ये ये च राजानः सिद्धाः सप्तर्षयो द्विजाः ॥ सच्छूद्रा वणिजो द्वीपपतयश्च निमंत्रिताः ॥ ६ ॥ क्रोशद्वयमिता विप्राः सभासीत्तस्य भूपतेः ॥ पाषाणघटिता सोच्चा सुधया सानुलेपिता ॥ ७ ॥ क्वचिद्रत्नमयी भूमिः क्वचित्कांचननिर्मिता ॥ स्फाटिकी राजती चैव यथायोग्यं कृतस्थली ॥ ८ ॥ स्तंभै रत्नमयैः

CC-0. In Public Domain. Digitization by eGangotri

प्रोच्चैर्दुकूलपरिवेष्टितैः ॥ चारुचंद्रातपाढ्या तु गन्धमाल्यैः सचामरैः ॥ ९ ॥ मुक्तादामांतरस्थैश्च चारुवातायना शुभा ॥ कृष्णागुरुस्नेहसिक्ता श्रीखण्डसलिलोक्षिता ॥ १० ॥ सर्वर्त्तुकुसुमाकीर्णा प्रांतोपवनसंवृता ॥ वाप्यः स्फटिकसोपानाः पद्मकह्लारमंडिताः ॥ ११ ॥ चक्रवाकैः प्लवैर्हंसैः सारसैर्मधुरस्वनैः ॥ व्याप्तांतराः स्वच्छशीतसुगंधमधुरांभसः ॥ १२ ॥ परितः शतशस्तस्याः सुखावतरणा द्विजाः ॥ उपच्छायाविरचनाः शोभमानाः समंततः ॥ १३ ॥ यज्ञशाला मरुत्तस्य यथासीद्वो द्विजोत्तमाः ॥ तथेंद्रद्युम्नभूपस्य रचिता विश्वकर्मणा ॥ १४ ॥ शुभेऽह्नि शुभनक्षत्रे वासयित्वा सभासदः ॥ राज्ञः सिंहासनासीनान्दृष्ट्वासीनानृषीनपि ॥ १५ ॥ ससिद्धान्ब्रह्मर्षिगणान्बहुमूल्यकुथस्थितान् ॥ देवान्कांचनपीठस्थान्यथायोग्यमथ द्विजान् ॥ १६ ॥ वरासनस्थानन्यांश्च यथादेशं सुखस्थितान् ॥ मध्ये नृपाणां देवानामृषीणां च शचीपतिम् ॥ १७ ॥ साम्राज्यलक्षणे स्वस्य रत्नसिंहासने स्थितम् ॥ दिव्यैर्माल्यैस्तथा गंधैर्वासोभिर्विष्टरादिभिः ॥ १८ ॥ पुरोधसा समं पूर्वमर्चयामास ऋद्धिमत् ॥ विनीतो दीनवत्तस्य चक्रे पूजां तथा नृपः ॥ १९ ॥ आश्चर्यं मन्यतेऽस्यासौ त्रैलोक्येशोऽपि तद्यथा ॥ ततः सिद्धान्देवमुनीनचर्यन्निंद्रवत्तदा ॥ २० ॥ विस्मयं जनयामास कुबेरस्याप्यधिश्रियः ॥ ततो देवान्समानर्च प्रभूतस्वस्वसंपदः ॥ २१ ॥ उपचारैर्महीनाथः सम्यगव्यग्रमानसः ॥ राज्ञः संपूजयामास राजयोग्यैः परिच्छदैः ॥ २२ ॥ यथा ते मेनिरे भूपा भवामः सांप्रतं वयम् ॥ सत्यं राज्यं क्रमात्प्राप्तं नेदृशश्च परिच्छदः ॥ २३ ॥ आनर्च वैष्णवान्भूय उपचारैः समानयन् ॥ शांता अपि यथा चित्रं मेनिरे विषयागमम् ॥ २४ ॥ ततो विप्रान्बाहुजातान्वैश्यान्मुनिपुरःसरम् ॥ सम्यक्प्रपूजयामास सत्त्वोद्रिक्तो महीपतिः ॥ २५ ॥ अन्यांश्च सचिवद्वारा पूजयित्वा ससंभ्रमः ॥ दृष्टः स विनयान्नम्रः कृतांजलिपुटस्तथा ॥ २६ ॥ महेंद्रमुच्चैराहेदं नारदेन पुरोधसा ॥ २७ ॥ ॥ इन्द्रद्युम्न उवाच ॥ ॥ तव प्रसादाद्देवेश इच्छामीदं प्रसीद मे ॥ क्रतुना हयमेधेन प्रयक्ष्ये यज्ञपुरुषम् ॥ २८ ॥ अनुजानीहि मां देव क्रतूनामीश्वरो भवान् ॥ त्वदाज्ञापालकाः सर्वे त्रैलोक्ये निवसंति ये ॥ २९ ॥ यावत्क्रतुसहस्रस्य संस्था च भवति प्रभो ॥ तावत्त्वं त्रिदशैः सार्द्धं सदोमध्यगतो वस ॥ ३० ॥ यष्टुमिच्छामि देवेश नाहं त्वत्पदलिप्सया ॥ सर्वेषां वेत्सि देवेश मनोवृत्तिं सदा प्रभो ॥ ३१ ॥ युष्माकं पूर्वदृष्टोऽत्र वपुष्मान्माधवः प्रभुः ॥ उपासनायां सोऽयं यो वालुकाभिस्तिरोदधे ॥ ३२ ॥ तस्य भूयः प्रकाशार्थं वाजिमेधसहस्रकम् ॥ करिष्ये वचनादिंद्र चतुरास्यस्य शासनात् ॥ पुनः प्रकाशिते तस्मिञ्छ्रेयो वोऽपि भविष्यति ॥ ३३ ॥ इति विज्ञापिते राज्ञा महेंद्रप्रमुखाः सुराः ॥ अन्तर्द्धानोतरं या च श्रुता पूर्वं सरस्वती ॥ ३४ ॥ अशरीरां स्मरंतस्तामिदं प्रोचुः प्रहर्षिताः ॥ इन्द्रद्युम्न महा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्मासि सत्यं सत्यव्रतो भुवि ॥ ३५ ॥ त्वच्चेष्टितं पुरास्माभिरन्वभावि भविष्यकम् ॥ सहायास्ते भविष्यामः कार्ये त्रैलोक्यपावने ॥३६॥ स्रष्टा स
जगतां यत्र उद्युक्तः स्वयमेव हि ॥ अत्रैवोवाच भगवानस्माकमपि भूतले ॥ ३७ ॥ प्रविशंस्तदनुक्रोशवशाद्भूयः प्रकाशनम् ॥ करिष्ये दारवं देहमि
त्येतत्परिनिष्ठितम् ॥ ३८ ॥ नात्रास्माकं व्यलीकं तु नेंद्रस्य च महीपते ॥ अस्मद्दिष्टसमुद्योगस्तव नः प्रीतिकारकः ॥ ३९ ॥ सुखं यजस्व राजेंद्र
वैकुंठं भक्तवत्सलम् ॥ क्रतुना हयमेधेन सहस्रपरिवर्तिना ॥ ४० ॥ दुराराध्यो हि भगवानस्माकं भक्तवत्सलः ॥ वयमप्यत्र देवत्वं त्यक्त्वा भक्ति
परायणाः ॥ ४१ ॥ आराधयामः क्षेत्रेस्मिन्विनीता नररूपिणः ॥ प्रियं हि मानुषे लोके कर्म सिद्ध्यति वै कृतम् ॥ ४२ ॥ ॥ जैमिनिरुवाच ॥ ॥
इत्युक्ते त्रिदशैः सेंद्रैः परितुष्टांतरात्मना ॥ आरंभार्थं क्रतो राजा भगवंतमपूजयत् ॥ ४३ ॥ उपचारसहस्रैस्तु यथावत्प्रतिपादितैः ॥ ततःपितृगणा
न्राजा निरूप्य श्रद्धयान्वितः ॥ ४४ ॥ सदोगृहगतान्विप्रान्याज्ञिकान्समलंकृतान् ॥ कृत्वेष्टदेवं पुरतो वैकुंठं साग्निहोत्रकम् ॥ ४५ ॥ आकांक्षन्क
लिपतं लग्नं संवृत्ते स्वस्तिवाचने ॥ उपस्थितः सपत्नीकः शुद्धमांगल्यवेषधृक् ॥ ४६ ॥ स्वस्ति वाच्य द्विजाञ्छुद्धान्पुण्याहं वृद्धिकर्म च ॥ ततः
संभृतसंभारो वरयामास ऋत्विजः ॥ ४७ ॥ वृतास्ते तु सपत्नीकं दीक्षयंतो नृपोत्तमम् ॥ विहृत्य दीक्षणायेष्टाश्च्ययजन्सभ्यचोदिताः ॥ ४८ ॥
प्रणीय तं प्रज्वलंतं वेद्यामाहवनीयकम् ॥ त्रैलोक्यमंगलकरं किं साक्षाद्वैष्णवं महः ॥ ४९ ॥ सुप्रोक्षितं चाभिमंत्र्य अनुज्ञाप्य दिगीश्वरान् ॥ मुमु
चुस्ते हयं मुख्यमंगेषु शुभलक्षणम् ॥ ५० ॥ ततः स दीक्षितो राजा वाग्यतो रौरवीं त्वचम् ॥ अधिष्ठाय सदोमध्ये मृत्युंजय इव स्थितः ॥ ५१ ॥
निमंत्रितानां भुक्त्यर्थं चक्षुषा संदिदेश वै ॥ सुराणां रत्नपात्राणि महार्घाणि नृपाज्ञया ॥ ५२ ॥ सचिवः कारयामास भोजनाय समृद्धिमत् ॥
शुद्धसौवर्णपात्राणि मुनीनां च महीक्षिताम् ॥ ५३ ॥ द्विजानां भोजनार्थाय नवानि प्रत्यहं द्विजाः ॥ क्षत्रियाणां विशां विप्रा राजतानि शुभानि
च ॥ ५४ ॥ कांस्यनिर्मलपात्राणि शूद्राणां भोजनाय वै ॥ अहन्यहनि पात्राणि भोजनांते द्विजोत्तमाः ॥ ५५ ॥ आकरेषु प्रपात्यंते प्रोच्छिष्टदल
वर्जनैः ॥ तत्र यज्ञोत्सवे ये वै भोजनाय निमंत्रिताः ॥ ५६ ॥ तेषां पुत्राश्च पौत्राश्च प्रपौत्राश्चैव संततिः ॥ नित्यं पंचरसान्नानि बहुमानपुरःसरम् ॥
॥ ५७ ॥ आहृतैर्भोजिता राज्ञ इंद्रद्युम्नस्य शासनात् ॥ कुटुंबवत्स्थितास्तत्र संस्था यावन्महाक्रतोः ॥ ५८ ॥ यद्देशीया जनास्तेषामधिष्ठाता च
तान्नृपः ॥ नृपाणामनुसंधाता इंद्रद्युम्नप्रयाचितः ॥ ५९ ॥ नारदः समदर्शी तु परोपकृतिलोलुपः ॥ इंद्रादीनां सुरेंद्राणां देवर्षीणां नृपोत्तमः ॥६०॥
स्वयं नरपतिश्चर्यां चकार क्रतुपूर्त्तये ॥ षड्विधान्यन्नपानानि संस्कृतानि द्विधा नरैः ॥ ६१ ॥ देवानां भोजने तत्र मंत्रतंत्रविशारदैः ॥ मर्त्यानां नल

CC-0. In Public Domain. Digitization by eGangotri

विद्यायां कुशलैः संस्कृतानि वै ॥ ६२ ॥ क्षुत्पिपासानभिज्ञा हि सुधाहारा दिवौकसः ॥ तेषामपि अपूर्वत्वादाश्चर्यं तद्धि भोजनम् ॥ ६३ ॥
नराणां दुर्लभं मर्त्य इंद्रद्युम्नगृहेऽशनम् ॥ इन्द्रद्युम्नस्य चेंद्रस्य विशेषो मर्त्यवासिता ॥ ६४ ॥ अत्यद्भुतकरं ह्येतत्प्रत्यहं च नवं नवम् ॥ संमान
नादरावृद्धिर्भोज्यस्य द्विजसत्तमाः ॥ ६५ ॥ अन्योन्यस्पर्द्धयैवात्र प्रवर्द्धंते परस्परम् ॥ सुगंधसुमनोमाल्यकस्तूर्यादिप्रलेपनम् ॥ ६६ ॥ चित्रसू
क्ष्मदुकूलानि सोपधानासनानि च ॥ रत्नपर्यंकिकाशय्या रत्नदंडप्रकीर्णकम् ॥ ६७ ॥ जातीलवंगकर्पूरैर्नागवल्लीदलानि च ॥ मनोहराणि गीतानि
नृत्यानि विविधानि च ॥ ६८॥ भरतस्य मुनेः शिक्षापंडितै रचितानि च ॥ स्वस्ववंशयशोऽभिज्ञाः शतशः सूतमागधाः ॥ ६९ ॥ एतान्यन्यानि
वस्तूनि दुर्लभान्यपि यानि वै ॥ त्रिदशाश्चापि मर्त्याश्चान्वभुज्यंत सुसादरम् ॥ ७० ॥ एकतोऽन्यत्र चित्राणि न च हीनानि कुत्रचित् ॥
पातालवासिनां चापि भोजनं वै सुधाधिकम् ॥ ७१ ॥ यद्भुक्त्वा नानुवाञ्छन्ति पातालगमनं हि ते ॥ पुराणि यानि पाताले रत्नौघालोकितानि
च ॥ ७२ ॥ विना सूर्यप्रकाशेन तादृशान्येव भूपतिः ॥ ददौ तेषां निवासाय येषु पातालबुद्धयः ॥ ७३ ॥ सुखासीनाश्च क्रीडंतो भुंजानाः शेरते
मुदा ॥ देवानामपि नान्यत्र भूमिस्पर्शनमस्ति वै ॥ ७४ ॥ इन्द्रद्युम्नपुरे तत्र स्वर्गादपि मनोहरे ॥ यदृच्छया सुखक्रीडासक्ता नो तत्यजुर्भुवम् ॥
॥ ७५ ॥ अभिलाषोपजातं तु सुखं स्वर्गे वदंति हि ॥ अनिच्छयापि भो विप्राः सुखं सर्वत्र तत्र वै ॥ ७६ ॥ आदृत्य यत्नान्मन्यंते भोज्यं ते सादरं
नराः ॥ न याचितः कोपि जनः कुतो वा स्यात्पराङ्मुखः ॥ ७७ ॥ राजाधिराजवेश्मानि जनानां स्वगृहैः समम् ॥ तदासीत्स्वगृहे तेषां न सदा
सर्वसंभवः ॥ ७८ ॥ तत्र यत्कामनातीतं तद्वस्तु सुलभं बहु ॥ इत्थं प्रवर्तिते यज्ञे यज्ञेशप्रीतये मुदा ॥ ७९ ॥ पृथिवी हृतसर्वस्वा वाजिमेधेस्य
भूपतेः ॥ या पूर्वं साभवद्भूयः स्वर्णवृष्टिसुभूषिता ॥ ८० ॥ इत्थं प्रवृत्ते लोकानां तत्र त्रैलोक्यवासिनाम् ॥ दानसंमानभोज्यानां विधौ विधिवतो
ऽन्वहम् ॥ ८१ ॥ अश्वमेधं प्रति जना जगुर्गाथाः परस्परम् ॥ नेदृग्यागस्य संभारो विधेः शास्त्रप्रचोदितः ॥ ८२ ॥ इंद्रद्युम्नस्य राजर्षेर्न भूतो न
भविष्यति ॥ न याचितारोऽदातारो मिथो यत्र निमंत्रिताः ॥ ८३ ॥ न कामभंगो यत्रासीद्देवानामपि भो द्विजाः ॥ ईदृक्समृद्धिः क्रतुराट् प्रवृत्तो
भूपतेस्तदा ॥ ८४ ॥ अधिश्रद्धः सुसंपन्नः पूर्वस्मादपरोऽभवत् ॥ स्मृतिकाराः कल्पकारास्तथा शास्त्रप्रणेतृकाः ॥ ८५ ॥ यज्ञानुष्ठानकुशलाः
सदाचारावतंसकाः ॥ अग्न्याधानाद्यवभृथप्रचारमनुपूर्वशः ॥ ८६ ॥ क्रतुः सदस्यानुमते नृपतेः प्रीतये द्विजाः ॥ न मंत्राः स्वरतो हीना वर्णतो
वापि कर्हिचित् ॥ ८७ ॥ ये वै विधिविधातारस्ते वै कर्मप्रचारकाः ॥ प्रायश्चित्तनिमित्तेन प्रायश्चित्तनिबंधनात् ॥ ८८ ॥ कर्मोपघातो नो तत्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

योगिनःकर्मयोगिनः ॥ यत्र सप्तर्षयो दिव्याः सदस्याः क्रतुसाक्षिणः ॥८९॥ प्रचारयंति कर्माणि गुणदोषविभागिनः ॥ याज्ञवल्क्यादयस्तेऽत्र मुन
यस्त्वृत्विजो वृताः ॥ ९० ॥ सदोगतास्ते मुनयः परस्परकथांतरे ॥ वाकोवाक्यानि सूक्तानि गुह्योपनिषदानि च ॥ ९१ ॥ गाथाः पौराणिकीर्विप्रा
विष्णुभक्तिपुरःसराः ॥ चरितानि हरेः सर्वकल्मषौघहराणि च ॥ ९२ ॥ तत्र संवर्तयामासुस्ते सभायां महीक्षितः ॥ तस्य यज्ञे हविः प्राशुः प्रत्यक्षं
वह्निमध्यगाः ॥ ९३ ॥ मुदितास्त्रिदशा विप्रा महेंद्रप्रमुखा मखे ॥ चिरप्रवासिनो देवा नास्मरंतामरावतीम् ॥ ९४ ॥ अमृतं हि हविस्तेषां कल्पितं
ब्रह्मणा पुरा ॥ तत्प्राश्य मुदिता देवा वीर्यवन्तश्चिरायुषः ॥ ९५ ॥ यागानुष्ठानविषयादन्यत्र विषयान्बहून् ॥ इन्द्रद्युम्नेन रचितान्समस्तानुपभुंजते
॥ ९६ ॥ तत्र ये नागराजानः पातालतलवासिनः ॥ ततोऽधिकान्मर्त्यलोके विषयानुपभुंजते ॥ ९७ ॥ पातालगमनं ते वै नेहंते मनसा ध्रुवम् ॥
इत्थं प्रवर्तितो यज्ञस्त्रैलोक्यप्रीतिकारकः ॥ ९८ ॥ इन्द्रद्युम्नस्य नृपतेः क्षेत्रेऽस्मिन्पुरुषोत्तमे ॥ जगदीशप्रसादाय पितामहनिदेशतः ॥ ९९ ॥
एकोनं क्रमतः संस्थामवाप पृथिवीपतिः ॥ सहस्रं हयमेधस्य यथावद्विधिचोदितम् ॥ १०० ॥ ततः साहस्रिके यज्ञे वाजिमेधे महीपतिः ॥ दिनेदिने
दिव्यगतिर्बभूव नृपतिस्तदा ॥ १ ॥ सुत्यायाः सप्त दिवसाद्या रात्रिरभवत्पुरा ॥ तस्यास्तुरीयप्रहरे दध्यौ स विष्णुमव्ययम् ॥ २ ॥ ध्याने तस्मि
न्ददर्शासौ महाभाग्यवशान्नृपः ॥ प्रत्यक्षमिव स श्वेतद्वीपं स्फटिकनिर्मितम् ॥ ३ ॥ समंतात्परिवार्यैनं तिष्ठंतं क्षीरसागरम् ॥ महाकल्पद्रुमैः पुष्प
गंधामोदिदिगंतरैः ॥ ४ ॥ फलपल्लववल्केषु बहिरंतश्च सर्वशः ॥ शंखचक्रांकितैः शुभ्रैः सर्वालंकारभूषितः ॥ ५ ॥ महामंजिष्ठवर्णैश्च मूर्तिभिरतैर्मु
रद्विषः ॥ तन्मध्ये घटितं दिव्यमणिभिर्मंडपोत्तमम् ॥ ६ ॥ मध्यस्थसूर्यवद्भासिरत्नसिंहासनोज्ज्वलम् ॥ क्षीराब्धिशीतकल्लोलमंदवातमनोहरम् ॥
॥ ७ ॥ तन्मध्ये ददृशे देवं शंखचक्रगदाधरम् ॥ नीलजीमूतसंकाशं वनमालाविभूषितम् ॥ ८ ॥ सर्वलावण्यभवनं सौंदर्यश्रीनिकेतनम् ॥ निर्भ
र्त्सयंतं वपुषा पिनद्धं दिव्यभूषणम् ॥ ९ ॥ दक्षपार्श्वे स्थितं तत्र अनंतं धरणीधरम् ॥ कोटिचन्द्रप्रतीकाशं हिमाद्रिसदृशप्रभम् ॥ ११० ॥
फणामुकुटविस्तारच्छत्रीभूतं मनोहरम् ॥ मणिकुंडलयुग्मांकं चारुनीलनिचोलकम् ॥ ११ ॥ हललांगलशंखारिस्फुरद्बाहुचतुष्टयम् ॥ हारकेयूरवलय
मुद्रिकाभिरलंकृतम् ॥ १२ ॥ मेखलाकटिसूत्राढ्यं दिव्यरत्नप्रसाधनम् ॥ दिव्यहालाक्षीबमूर्तिं चारुहासं सुनेत्रकम् ॥ १३ ॥ दक्षपार्श्वस्थितां
चास्य लक्ष्मीं तां शुभलक्षणाम् ॥ वराभयाब्जहस्तां वै कुंकुमाभां सुलोचनाम् ॥ १४ ॥ त्रैलोक्ययुवतीवृन्ददृष्टांताद्भुतविग्रहाम् ॥ ददर्श पद्मा
सनगां लावण्यांबुधिपुत्रिकाम् ॥ १५ ॥ पितामहं च ददृशे पुरतोऽस्य कृतांजलिम् ॥ वामपार्श्वस्थितं चक्रं नानामणिमयं विभोः ॥ १६ ॥

CC-0. In Public Domain. Digitization by eGangotri

सनकाद्यैर्मुनींद्रैस्तं स्तूयमानं जगद्गुरुम् ॥ दृष्ट्वा स्वप्ने स राजा वै प्रहृष्टो द्विजसत्तमाः ॥ १७ ॥ अदृष्टपूर्वरूपं तं ज्योतिर्मयमनंतकम् ॥
तुष्टाव तत्र ध्यानस्थो हर्षगद्गदया गिरा ॥ १८ ॥ ॥ इन्द्रद्युम्न उवाच ॥ ॥ नमस्ते जगदाधार जगदात्मन्नमोऽस्तु ते ॥ कैवल्यत्रिगुणातीत
गुणांजन नमोऽस्तु ते ॥ १९ ॥ सुशुद्धनिर्मलज्ञानस्वरूपाय नमोऽस्तु ते ॥ शब्दब्रह्माभिधानाय जगद्रूपाय ते नमः ॥ १२० ॥ संसारपतितश्रांत
दुःखध्वंस नमोऽस्तु ते ॥ दुर्भेद्यहृदयग्रंथिभेदकाय नमोऽस्तु ते ॥ २१ ॥ द्विसप्तभुवनागारमूलस्तंभाय ते नमः ॥ ब्रह्मांडकोटिघटनाशिल्पिने
चक्रिणे नमः ॥२२॥ करुणामृतपाथोधिसुधाधाम्ने नमो नमः ॥ दीनोद्धारैकगुह्याय कृपापाथोधये नमः ॥ २३ ॥ प्रकाशकानां सूर्यादिज्योतिषां
ज्योतिषे नमः ॥ प्रतिस्वस्वनदीप्ताय अन्तःपापाग्नये नमः ॥ २४ ॥ पावकाय पवित्राय पवित्राणां नमो नमः ॥ गरिष्ठाय वरिष्ठाय द्राघिष्ठाय
नमो नमः ॥ २५ ॥ नेदिष्ठाय दविष्ठाय क्षोदिष्ठाय नमो नमः ॥ वरेण्याय सुपुण्याय नारायण नमोऽस्तु ते ॥ २६ ॥ परित्राहि जगन्नाथ दीन
बन्धो नमोऽस्तु ते ॥ निस्तीर्णोऽहं भवांभोधिं प्राप्य त्वां तरणिं सुखाम् ॥ २७ ॥ त्वयि दृष्टे रमानाथ क्लेशा व्यपगता मम ॥ चिदानंदस्वरूपं
त्वां प्राप्तानां दुःखसंक्षयः ॥ २८ ॥ ध्रुवं नाथ समुत्पन्नपरमानंदहेतुकम् ॥ त्राहि त्राहि भवांभोधिमग्नं मां दीनचेतसम् ॥ २९ ॥ मध्याह्नार्को
दिते व्योम्नि कुतः संतमसोदयः ॥ ध्यानस्थितः स्तुवन्नेवं प्रणम्य जगदीश्वरम् ॥ १३० ॥ ध्यानावसाने स पुनः स्वयं जाग्रदबुध्यत ॥ स्वप्नांत
इन्द्रद्युम्नोऽपि सस्मारात्मानमात्मना ॥ ३१ ॥ अत्यद्भुतमिदं स्वप्नं दृष्ट्वा च नृपकुंजरः ॥ मेने कृतार्थमात्मानं हयमेधक्रतोस्तथा ॥ ३२ ॥
सहस्रं सफलं चैव स्वभाग्यं समुपस्थितम् ॥ न हि देवर्षिवचनं वृथा भवति कर्हिचित् ॥ ३३ ॥ प्रत्यक्षं मे कथं नाथः स्वयमत्र भविष्यति ॥ इति
चिंताकुलो रात्रिशेषं नीत्वा विशांपतिः ॥ ३४ ॥ शशंस नारदस्याग्रे यथा स्वप्नोऽन्वभूयत ॥ स चापि नारदः प्राह शोकस्ते विगतो नृप ॥ ३५ ॥
अरुणोदयकाले हि भगवंतं ददर्श यत् ॥ दशाहात्फलदः स्वप्नस्तस्मिन्काले नृपोत्तम ॥ ३६ ॥ क्रत्वंते भगवानत्र प्रत्यक्षस्ते भविष्यति ॥ यदाह
मद्गिरा त्वां हि चराचरगुरुर्विधिः ॥ ३७ ॥ सोऽपि त्वया जगत्स्रष्टा स्वप्नेऽस्मिन्नवलोकितः ॥ तदनुष्ठीयतां यज्ञः पराग्रे न प्रकाशय ॥ ३८ ॥
स्वप्नोऽयं नृपशार्दूल दुर्बोधाचरितो हरेः ॥ किंतु भाग्यवतस्त्वेव स्वप्नस्तादृक्प्रजायते ॥ १३९ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां
संहितायां द्वितीये वैष्णवखण्डे पुरुषोत्तमक्षेत्रमाहात्म्ये जैमिनिऋषिसंवादे सप्तदशोऽध्यायः ॥ १७ ॥ छ ॥ ॥ जैमिनिरुवाच ॥ ॥
ततः प्रववृते सुत्या नृपतेर्वाजिमेधिका ॥ तस्यां त्रैलोक्यमभवदेकसद्मनिभं द्विजाः ॥ १ ॥ शास्त्रैः स्तोत्रैर्दिवस्पृग्भिर्वर्णक्रमसमुज्ज्व

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लैः ॥ यथापदस्वरन्यासैरन्ये शब्दास्तिरोहिताः ॥ २ ॥ दीनेभ्योऽवारितं तत्र दीयन्ते वाञ्छितानि वै ॥ नटनर्त्तकसूतानां साभूत्क
ल्पद्रुमोपमा ॥ ३ ॥ तन्मध्येऽवभृथे स्नातुं कृता यत्रोपकारिका ॥ दक्षिणे तटभूदेशे बिल्वेश्वरसमीपतः ॥ ४ ॥ नियुक्ताः सेवका राज्ञा
ससंभ्रममुपस्थिताः ॥ न्यवेदयन्त नृपतिं कृतांजलिपुटा द्विजाः ॥ ५ ॥ देव दृष्टो महान्वृक्षस्तटभूमौ महोदधेः ॥ प्रविष्टाग्रसमुद्रांतःकल्लोल
प्लुतमूलकः ॥ ६ ॥ मंजिष्ठवर्णः सर्वत्र शंखचक्रांकितः प्लवन् ॥ स्नानवेश्मसमीपेऽसौ दृष्टोऽस्माभिः परोऽद्भुतः ॥ ७ ॥ न दृष्टपूर्वो वृक्षोऽयमुद्य
त्सूर्यनिभोंऽशुना ॥ गंधेन वासयन्सर्वां तटभूमिं सुगंधिना ॥ ८ ॥ द्रुमः साधारणो नायं लक्ष्यते देवभूरुहः ॥ कश्चिद्देवस्तरुव्याजादागतो लक्ष्यते
ध्रुवम् ॥ ९ ॥ नियुक्तानां वचः श्रुत्वा राजा नारदमब्रवीत् ॥ तत्किं निमित्तं यद्दृष्टं तरुश्रेष्ठं वदंति ते ॥ १० ॥ नारदः प्रहसन्वाक्यमुवाच नृपसत्त
मम् ॥ पूर्णाहुतिः समाप्नोतु यथा स्यात्सफलः क्रतुः ॥ ११ ॥ उपस्थितं ते तद्भाग्यं स्वप्ने यद्दृष्टवान्पुरा ॥ श्वेतद्वीपे विश्वमूर्तिर्दृष्टो यो विष्णुर
व्ययः ॥ १२ ॥ तदंगस्खलितं रोम तरुत्वमुपपद्यते ॥ अंशावतारः स्थास्नुर्यः पृथिव्यां परमेष्ठिनः ॥ १३ ॥ तद्रूपावतरं याति भगवान्भक्त
वत्सलः ॥ द्रुमो ह्यपौरुषो योसौ भाजनं नास्य दर्शने ॥ १४ ॥ त्वामृते पुरुषव्याघ्र पृथिव्यां नृपसत्तम ॥ त्वद्भाग्यवशतः सर्वलोकानां नयना
तिथिः ॥ १५ ॥ भविष्यति महाराज सर्वकल्मषनाशनः ॥ समाप्यावभृथस्नानं तटांते सरितां पतेः ॥ १६ ॥ उत्सवं सुमहत्कृत्वा कृतकौतुकमंग
लम् ॥ महावेद्यां स्थापयात्र यज्ञेशं तरुरूपिणम् ॥ १७ ॥ विचार्येत्थं मुदा युक्तौ तावुभौ नृपनारदौ ॥ सुसमृद्धौ तत्र यातौ यत्रासौ भगवद्द्रुमः ॥
॥ १८ ॥ तं दृष्ट्वा हर्षिताः सर्वे ब्रह्म साक्षादुपस्थितम् ॥ मेनिरे जन्मसाफल्यं जीवन्मुक्ता महोदयाः ॥ १९ ॥ इन्द्रद्युम्नोऽपि नृपतिर्ममज्जामृत
सागरे ॥ स्वप्ने दृष्ट्वा जगन्नाथं यथासौ भगवत्प्रियः ॥ २० ॥ तथा ददर्श तं वृक्षं चक्षुःशाखं चतुर्भुजम् ॥ स्वकं श्रमं मन्यमानः सफलं नृपसत्तमः ॥
॥ २१ ॥ जहौ शोकं नीलमणिमाधवांतर्धिजं द्विजाः ॥ पुनः पुनः प्रणम्यैनं हर्षाश्रुनयनो नृपः ॥ २२ ॥ द्विजैराहारयामास तरुं कल्लोललोलि
तम् ॥ शंखकाहालमुरजढक्कापटहनिःस्वनैः ॥ २३ ॥ गीतवादित्रनिनदैर्जयशब्दैः सहस्रशः ॥ सुगंधिपुष्पांजलिभिराकाशात्पतितैर्मुहुः ॥ २४ ॥
परितो धूपपात्रैश्च कृष्णागुरुसुधूपितैः ॥ वेश्याभिर्यौवनोन्मत्तसुरूपाभिः प्रचालितैः ॥ २५ ॥ रत्नदण्डप्रकीर्णैश्च वीज्यमानं समंततः ॥ पताकाभि
र्दिव्यपट्टदुकूलाभिः सुशोभितम् ॥ २६ ॥ राजर्षिराजवृन्दैश्च तुरंगैः पत्तिभिर्वृतम् ॥ मागधैर्वंद्यमानं तु स्तूयमानं महर्षिभिः ॥२७॥ ऋत्विग्भिर्ब्राह्म
णैश्चैव विद्वद्भिः श्रोत्रियैस्तथा ॥ राजन्यैर्वैश्यकुलजैः सच्छूद्रैः परिचारितम् ॥ २८ ॥ स्तोत्रैर्बहुविधैः श्रौतैः स्मार्तैः पौराणिकैस्तथा ॥ स्तूयमानं

CC-0. In Public Domain. Digitization by eGangotri

तरुं विष्णोर्भूर्लोके परिवेष्टितम् ॥२९॥ स्रग्गन्धालंकृतं दिव्यं महावेदीं विनिन्यतुः॥ वितानवरचित्रायां वेष्टितायां निरंतरम् ॥३०॥ वेद्यां तं स्थाप
यामासुरिंद्रद्युम्नस्य शासनात् ॥ वचसा नारदस्यैनं पूजयामास पार्थिवः ॥ ३१ ॥ सहस्रैरुपचाराणां दिव्यरूपैर्नृपोत्तमः ॥ पूजावसाने पप्रच्छ नारदं
मुनिसत्तमम् ॥३२॥ कीदृश्यः प्रतिमा विष्णोर्घटयिष्यति कः पुनः ॥ तच्छ्रुत्वा तं मुनिः प्राह अचिंत्यमहिमा गुरुः ॥ ३३ ॥ को वेद तस्य चेष्टां
वै सर्वलोकोत्तरां नृप ॥ स्रष्टा यो जगतां तस्याप्येषा संशयगोचरा ॥ ३४ ॥ विचारयंतौ तावित्थं यावन्नारदपार्थिवौ ॥ अशरीरा ततो वाणी शुश्रुवे
चांतरिक्षतः ॥ ३५ ॥ तत्र विस्मयमानानां सर्वेषामेव शृण्वताम् ॥ अपौरुषेयो भगवानविचारपथे स्थितः ॥ ३६ ॥ सुगुप्तायां महावेद्यां स्वयं सोऽ
वतरिष्यति ॥ प्रच्छाद्यतां दिनान्येषा यावत्पंचदशानि वै ॥ ३७ ॥ उपस्थितोऽयं यो वृद्धः शस्त्रपाणिस्तु वर्द्धकिः ॥ एनमंतः प्रवेश्यैव द्वारं बध्नंतु
यत्नतः ॥ ३८ ॥ बहिर्वाद्यानि कुर्वंतु यावत्तु घटना भवेत् ॥ श्रुतो हि घटनाशब्दो बाधिर्यांधत्वदायकः ॥ ३९ ॥ नरके वसतिं चैव कुर्यात्संतानना
शनम् ॥ नांतःप्रवेशनं कुर्यान्न पश्येच्च कदाचन ॥४०॥ नियुक्तादन्यः पश्येच्चेद्राज्ञो राष्ट्रस्य चैव ह ॥ द्रष्टुश्चापि महाभीतिरंधता चक्षुषोर्युगे ॥ ४१ ॥
तस्मान्नावेक्षणं कार्यं यावत्प्रतिमनिर्मितिः ॥ निर्व्यूढस्तु स्वयं देवः कृत्यांते तु वदिष्यति ॥ ४२ ॥ यद्यत्कार्यं प्रयत्नेन सर्वलोकसुखावहम् ॥ तच्छ्रु
त्वा नारदाद्यास्ते यथोक्तं विष्णुना स्वयम् ॥ ४३ ॥ चिकीर्षंति तथा कर्त्तुं तत्रायातश्च वर्द्धकिः ॥ प्रोवाच नृपतिं सोऽथ स्वप्ने दृष्टास्तु यास्त्वया ॥
॥ ४४ ॥ ता एवाहं घटिष्यामि दारुणा दिव्यरूपिणा ॥ इत्युक्त्वांतर्दधे वेद्यां वृद्धवर्द्धकिरूपधृक् ॥ ४५ ॥ वंचनार्थं मनुष्याणां साक्षान्नारायणो
विभुः ॥ ४६ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे पुरुषोत्तमक्षेत्रमाहात्म्ये जैमिनिऋषिसंवादेऽष्टादशोऽ
ध्यायः ॥ १८ ॥ ॥ जैमिनिरुवाच ॥ ॥ ततः स पृथिवीपालस्तथा कृत्वांऽतरिक्षगा ॥ यदुवाच गिरां देवी तद्वत्परिचचार ह ॥ १ ॥ एवं
दिनेदिने याते दिव्यगंधोऽनुभूयते ॥ पारिजातप्रसूनानां वृष्टिर्मर्त्येषु दुर्लभा ॥ २ ॥ दिव्यसंगीतनादश्च गीतानि रुचिराणि च ॥ स्वर्गंगाजलवृ
ष्टिश्च सूक्ष्मबिंदुसुशोभना ॥ ३ ॥ ऐरावतादिनागानां मदगंधो वनद्विपैः ॥ दुःसहः सर्वभूतानां सुखकार्यनुभूयते ॥ ४ ॥ यज्ञार्थमागता देवास्ते
सर्वे विगतज्वराः ॥ आविर्भूतं हरिं दृष्ट्वा उपासांचक्रिरे द्विजाः ॥ ५ ॥ यथा हि माधवं पूर्वं तथा तं विष्णुशाखिनम् ॥ उपासनासु देवानां दिव्यचि
ह्नानि जज्ञिरे ॥ ६ ॥ निर्ववाह स्वयं देवः क्रमात्पंचदशे दिने ॥ चतुर्मूर्तिः स भगवान्यथा पूर्वं मयोदितः ॥ ७ ॥ तादृगाविर्बभूवासौ युष्माकं
वर्णितः पुरा ॥ दिव्यसिंहासनगतो बलभद्रासुदर्शनैः ॥ ८ ॥ शंखचक्रगदापद्मलसद्बाहुर्जनार्दनः ॥ गदामुसलचक्राब्जं धारयन्पन्नगाकृतिः ॥ ९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

छत्राकृतिफणासप्तमुकुटोज्ज्वलकुंडलः ॥ सुभद्रा चारुवदना वराब्जाभयधारिणी ॥ १० ॥ लक्ष्मीः प्रादुर्बभूवेयं सर्वचैतन्यरूपिणी ॥ इयं कृष्णाव
तारे हि रोहिणीगर्भसंभवा ॥ ११ ॥ बलभद्राकृतिर्जाता बलरूपस्य चिंतनात् ॥ क्षणं न सहते सा हि मोक्तुं लीलावतारिणम् ॥ १२ ॥ न भेदोऽ
स्तीह को विप्राः कृष्णस्य च बलस्य च ॥ एकगर्भप्रसूतत्वाद्व्यवहारोऽथ लौकिकः ॥ १३ ॥ भगिनी बलदेवस्येत्येषा पौराणिकी कथा ॥ पुंरूपे
स्त्रीस्वरूपेण लक्ष्मीः सर्वत्र तिष्ठति ॥ १४ ॥ पुंनाम्ना भगवान्विष्णुः स्त्रीनाम्ना कमलालया ॥ देवतिर्यङ्मनुष्यादौ विद्यते न तयोः परम् ॥ १५॥
को ह्यन्यः पुंडरीकाक्षाद्भुवनानि चतुर्दश ॥ धारयेत्तु फणाग्रेण सोऽनंतो बलसंज्ञितः ॥ १६ ॥ तस्य शक्तिस्वरूपेयं भगिनी श्रीः प्रकीर्तिता ॥ सुद
र्शनं तु यच्चक्रं सदा विष्णोः करे स्थितम् ॥ १७ ॥ शाखाग्रस्तंभमध्यस्थं तद्रूपं तत्तुरीयकम् ॥ एवं तु मूर्त्तयस्तेन चतस्रो वै प्रकाशिताः ॥१८॥
निर्वृत्ते भगवद्रूपे चतुर्द्धा दिव्यरूपिणि ॥ लोकानामुपकाराय पुनराहांतरिक्षगा ॥ १९ ॥ पटैराच्छाद्य सुदृढं नृपते प्रतिमास्त्विमाः ॥ स्वं स्वं
वर्णं प्रापयाशु वर्णकैश्चित्रकर्मणा ॥ २० ॥ नीलाभ्रश्यामलं विष्णुं शंखेंदुधवलं बलम् ॥ रक्तं सुदर्शनं चक्रं सुभद्रां कुंकुमारुणाम् ॥ २१ ॥ नाना
लंकाररुचिरां नानाभंगिविभागशः ॥ अमी दारुस्वरूपेण दृष्टाः पापाय हेतवे ॥ २२ ॥ गोपनीयाः प्रयत्नेन पटनिर्यासवल्कलैः ॥
तस्मात्प्रथममेवैतांस्तरोरेवास्य वल्कलैः ॥ २३ ॥ शिल्पिभिः कर्मकुशलैर्दृढमाच्छादयाग्रतः ॥ वर्षे वर्षे च संस्कार्याः पूर्वसंस्कार
मोचनात् ॥ २४ ॥ ऋते वल्कललेपं तु स तु दिव्यश्चिरंतनः ॥ प्रमादाद्य इमं लेपमपनीयेत कश्चन ॥ २५ ॥ दुर्भिक्षं मरकं राष्ट्रे संतति
श्चास्य हीयते ॥ नेक्षितव्यास्त्वया राजन्कदाचिदपवारणाः ॥ २६ ॥ मनुष्यैश्चापि राजेंद्र दृष्टाः स्युर्भयहेतवः ॥ तस्मात्सचित्रा द्रष्टव्या बहुलेप
विलेपिताः ॥ २७ ॥ सुचित्रं पुण्डरीकाक्षं सविलासं सविभ्रमम् ॥ दृष्ट्वा विमुच्यते पापैः कल्पकोटिसमुद्भवैः ॥ २८ ॥ सुचित्रान्कुरु राजेंद्र चित्रा
न्कामानवाप्स्यति ॥ आविर्बभूव भगवांस्तवानुग्रहकाम्यया ॥ २९ ॥ तव प्रसादाज्जंतूनां चतुर्वर्गं प्रदास्यति ॥ नीलाद्रौ कल्पवृक्षस्य वायव्यां
शतहस्ततः ॥ ३० ॥ प्रदेशे सुमहत्स्थाने प्रासादं सुदृढायतम् ॥ उत्तरे नरसिंहस्य सहस्रकरमुच्छ्रितम् ॥ ३१ ॥ कारयित्वा प्रतिष्ठाप्य तत्रैनं
विनिवेशय ॥ पुरा स्थितं पर्वतेऽस्मिन्योऽभ्यर्चयति माधवम् ॥ ३२ ॥ नाम्ना विश्वावसुर्नाम शबरो वैष्णवोत्तमः ॥ पुरोधसः सख्यमासीत्तेन
सार्द्धं पुरा च ते ॥ ३३ ॥ तयोः संततिरेवास्य लेपसंस्कारकर्मणि ॥ नियुज्यतां महाराज भविष्यत्सूत्सवेषु च ॥ ३४ ॥ विररामैतदाभाष्य सा
तु दिव्या सरस्वती ॥ तयोपदिष्टमाकर्ण्य प्रहृष्टेनांतरात्मना ॥ ३५ ॥ वेष्टनं मोचयामास महावेद्यां नृपोत्तमः ॥ ददृशुस्ते तदा सर्वे रत्नसिंहासने

CC-0. In Public Domain. Digitization by eGangotri

स्थितम् ॥ ३६ ॥ रामं कृष्णं सुभद्रां च वासुदेवं सुदर्शनम् ॥ यथोपदिष्टलेप्यादिसंस्कारे रुचिराकृतिम् ॥ ३७ ॥ कृपया स्मेरवदनमुन्नतायतवक्षसम् ॥ दीनानामुद्धृतौ नाथं प्रलंबभुजपंजरम् ॥ ३८ ॥ प्रबुद्धपुण्डरीकाक्षं हासशोणायताधरम् ॥ पश्यतां दृष्टिमात्रेण हर्तारं पापसंचयम् ॥ ३९ ॥ पद्मासनस्थितं कृष्णं दिव्यालंकारभूषितम् ॥ स्वतेजसा परिवृतं दारुदेहेऽपि निर्मलम् ॥ ४० ॥ नीलजीमूतसंकाशं सर्वसंतापनाशनम् ॥ ददर्श बलदेवं च साट्टहासमुखांबुजम् ॥ ४१ ॥ फणामण्डलविस्तीर्णं वारुणीघूर्णितेक्षणम् ॥ प्रोत्थितं नागराजानं पीनोन्नतसुवक्षसम् ॥ ४२ ॥ किंचिन्नतं पृष्ठदेशे कुण्डलीकृतविग्रहम् ॥ अग्रसंफुल्लककुभं कैलासशिखरं यथा ॥ ४३ ॥ हलचक्राब्जमुसलधारिणं वनमालिनम् ॥ हारकुण्डलकेयूरकिरीटमुकुटोज्ज्वलम् ॥ ४४ ॥ तयोर्मध्ये स्थितां लक्ष्मीं सुभद्रां भद्ररूपिणीम् ॥ ४५ ॥ सर्वदेवारणीं पापसागरोत्तारकारिणीम् ॥ विकचांभोजवदनां वराब्जाभयधारिणीम् ॥ ४६ ॥ रूपलावण्यवसतिं शोभमानां प्रसाधनैः ॥ कुंकुमारुणदेहां तां साक्षाल्लक्ष्मीमिवापराम् ॥ ४७ ॥ ददर्श विष्णोर्वामस्थां चक्रशाखाग्रनिर्मिताम् ॥ बालार्कसदृशीं तीक्ष्णधारां तेजोमयीं द्विजाः ॥ ४८ ॥ तां दृष्ट्वानन्दपाथोधिनिमग्नः पृथिवीपतिः ॥ कर्तव्यमूढः स्वतनौ स्वयं न प्रबभूव ह ॥ ४९ ॥ दरमीलितनेत्रः सन्सृजन्बाष्पांबु केवलम् ॥ कृतांजलिपुटस्तस्थौ स्थूणाकारो नृपोत्तमः ॥ ५० ॥ उवाच तं मुनिवरः स्मितवक्त्रः क्षितीश्वरम् ॥ यदर्थं श्रममापन्नस्तत्सांप्रतमभूत्तव ॥ ५१ ॥ प्रत्यक्षं नृपशार्दूल एकस्त्वं भाग्यवान्भुवि ॥ अमुं पश्य जगन्नाथं पुण्डरीकायतेक्षणम् ॥ ५२ ॥ भक्तानुग्रहपाथोधिं सर्वज्ञाननिधिं हरिम् ॥ यं द्रष्टुं योगिनो नित्यं यतंति यतमानसाः ॥ ५३ ॥ अवधानेन महता क्षणं पश्यन्ति मानवाः ॥ सोऽयं दारुमयं देहं समास्थाय जनार्दनः ॥ ५४ ॥ अनुग्रहीतुं त्वां भूप प्रत्यक्षत्वमुपागतः ॥ भजैनं धरणीनाथं स्तुहि कारुण्यसागरम् ॥ ५५ ॥ ददाति संस्तुतः कामान्सर्वान्नृप मनोगतान् ॥ ५६ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे पुरुषोत्तमक्षेत्रमाहात्म्ये जैमिनिऋषिसंवाद एकोनविंशोऽध्यायः ॥ १९ ॥ ॥ जैमिनिरुवाच ॥ ॥ इत्थं प्रबोधितस्तेन नारदेन क्षितीश्वरः ॥ तुष्टाव जगतां नाथं वचोभिः करुणान्वितम् ॥ १ ॥ ॥ इन्द्रद्युम्न उवाच ॥ ॥ त्वदंघ्रिपाथोजयुगं मुरारे नोपासितं जन्मसु पूर्वजेषु ॥ तत्कर्मणां दारुणपाकभाजं दीनं परित्राहि कृपांबुधे माम् ॥ २ ॥ क्व निर्मलं त्वच्चरणाब्जयुग्मं विरिंचिरुद्रेंद्रकिरीटमग्रम् ॥ क्वाहं कुदीनः शकृदस्रमांसमूत्रास्थिसंघैः पिहितस्त्वचा वै ॥ ३ ॥ असारसंसारपरिभ्रमेण श्रमातुरस्त्वां कथमीश जाने ॥ जानंति ते त्वां खलु देवदेव येषां भवो दुःखभवप्रकाशः ॥ ४ ॥ प्रभो मया दुःखमनेकजन्मपापार्जितं भुक्तमनेकभावम् ॥ शुभार्जितो यः सुखलेशभावो निदर्शनं यन्मधुपृक्ततिक्ते ॥ ५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यदेव सौख्यानुभवाय देव कर्मार्जितो मे विषयोपभोगः ॥ स एव दुःखं परिणामतो मे न मद्विधो दुःखिजनोऽस्ति चान्यः ॥ ६ ॥ विभो यदि त्वां मनसापि पूर्वमुपास्तमन्यद्विषमेक्षणोऽहम् ॥ कथं तदालप्स्यमनेकजन्म पुनः पुनर्भोग्यमशेषदुःखम् ॥ ७ ॥ विभुत्वदासत्वपितृत्वपुत्रप्रियत्वमातृत्व धनित्वभावैः ॥ वध्यत्वहिंस्रत्वपतित्वजायाभावैश्च तिर्यक्त्वसुरादिभावैः ॥ ८ ॥ नीचोर्द्ध्वभावं बहुशः सकृद्वा भवांगणेऽस्मिँल्लुठतानुभूतम् ॥ न वा मुरारे तव पादपद्मदूरीभवस्येष्टफलं हि चैतत् ॥ ९ ॥ कोशं बलं चैतदशेषपृथ्वीधनैर्वृतं यौवनरूपरूप्यः ॥ मनोऽनुकूलाः शतशः स्त्रियश्च निष्कंटकं मे नृपमंडलं च ॥ १० ॥ साम्राज्यता चापि भरो महान्मे त्वज्ज्ञानहीनस्य पशोरिवायम् ॥ भारावतारं कुरु मे कृपाब्धे सदैव तत्रोदित खेदयोगः ॥ ११ ॥ दीनानुकंपिन्कारिणो विमुक्तिः कृता विभो त्वत्स्मृतिमात्रकेण ॥ भ्रांतं घटीयंत्रवदत्र नाथ मां त्रातुमर्हस्यनुकंपिभावात् ॥१२॥ न मे त्वदन्यः खलु बन्धुरत्र प्रवाहविभ्रष्टतरुस्वभावे ॥ पापीयसी बुद्धिरुपेतभावा स्नेहानुबन्धा विषयेऽभिभेद्या ॥ १३ ॥ अहर्निशं मे तव पादपद्मा न्नापैतु मत्प्रार्थितमेतदेव ॥ त्वां सच्चिदानंदसुपूर्णसिंधुं प्राप्तास्तु ये जन्मसहस्रभाग्यैः ॥ १४ ॥ किं ते हि पश्यंति लवैकसौख्यमनेकदुःखं विषयेन्द्र जालम् ॥ क्व बन्धनं कर्मभिरिष्टलेशदुःखाकरग्रंथिशतैरभेद्यम् ॥ १५ ॥ अनंतमाद्यंतविहीनमेकमानंददं त्वत्पदपंकजं क्व ॥ मायांबुधौ ते ममता भ्रमौ च कुकर्मनक्रायितगर्तमध्ये ॥ १६ ॥ निराश्रयं मे पतितं विलासकटाक्षपातेन नयाद्य तीरम् ॥ स्वकार्यसंसाधनयाश्रितानां संपादनायेष्ट विधेरजस्रम् ॥ १७ ॥ भ्राम्यंतमात्मीयहितं विसृज्य मां त्राहि मूढं सहजानुकंपिन् ॥ क्षुद्राय कार्याय बहु भ्रमंतमप्राप्य मूलं परमेश्वरं त्वाम्॥ १८ ॥ आयासपात्रं परमं सुदीनं मां त्राहि विष्णो जगदेकवंद्य ॥ वेदांतवेद्याव्यय विश्वनाथ त्वमीशिषे हंतुमघौघराशीन् ॥ १९ ॥ तं त्वां परित्यज्य सुखैकहेतुं क्षुद्राशयं मां परिपाहि विष्णो ॥ प्रसुप्त एषोऽखिलभूतसंघश्चतुर्विधो यत्कृतमोहरात्रौ ॥ २० ॥ त्वज्ज्ञानभानूदयमेत्य चांते प्रबोध्यते त्वां शरणं प्रपद्ये ॥ त्वमेक एवाखिललोककर्त्ता फणासहस्रैः परिवीतमूर्तिः ॥ २१ ॥ पर्यायवृत्त्या बलिनां वरिष्ठ त्वामीशितारं शरणं प्रपद्ये ॥ यया सृजस्यत्सि जगंति नाथ वक्षःसरोजासनया स्वशक्त्या ॥ २२ ॥ तां भद्ररूपां जगदाश्रयां ते देवारणिं पादयुगे नतोऽस्मि ॥ यदंशुजालप्रतिसृष्टमे तद्ब्रह्मांडजालं करसंगि नाथ ॥ २३ ॥ सुदर्शनं दैत्यबलस्य हंतृ चक्राभिधं त्वां प्रणतः सुदर्शनम् ॥ स्तुत्वेत्थं नृपतिश्रेष्ठः साष्टांग प्रणनाम सः ॥ ॥ २४ ॥ परित्राहि जगन्नाथ मग्नं संसारसागरे ॥ अनाथबन्धो कृपया दीनं मां तमसाकुलम् ॥ २५ ॥ ॥ नारद उवाच ॥ ॥ जय जय नारायण अपारभवसागरोत्तारपरायण सनकसनंदनसनातनप्रभृतियोगिवरविचिंत्यमानदिव्यतत्त्व स्वमायाविलसिताध्यासपरिण

CC-0. In Public Domain. Digitization by eGangotri

मिताशेषभूततत्त्व त्रितत्त्व त्रिदण्डधर त्रिणाचिकेतत्रिमधुत्रिसुपर्णोपगीयमानदिव्यज्ञान च्छन्दोमय स्वासनसुपर्णप्रिय भक्तप्रिय भक्तजनैकव
त्सल स्वमायाजालव्यवहितस्वरूप विश्वरूप विश्वप्रकाश विश्वतोमुख विश्वतोक्षि विश्वतःश्रवण विश्वतःपादशिरोग्रीव विश्वहस्तनासारस
नात्वक्केशलोमलिंग सर्वलोकात्मक सर्वलोकसुखावह सर्वलोकोपकारक सर्वलोकनमस्कृत लीलाविलसितकोटिपद्मोद्भवरुद्रेंद्रमरुदश्विसाध्यसि
द्धगणप्रणताशेषसुरासुरत्रिभुवनगुरो न कस्यापि ज्ञानगोचर नमस्ते नमस्ते ॥ २६ ॥ ॥ जैमिनिरुवाच ॥ ॥ अन्ये च ये नृपतयः
श्रोत्रिया वेदपारगाः ॥ मुनयो द्विजाः क्षत्रियाश्च विद्वांसो वैश्यजातयः ॥ २७ ॥ अस्तुवन्पुण्डरीकाक्षं बलिनं भद्रया सह ॥ सूक्तैः स्तो
त्रैः पुराणैश्च कविताभिर्यथा तथा ॥ २८ ॥ अथेंद्रद्युम्नः प्रोवाच पुरोधसमकल्मषम् ॥ पूजार्थं वासुदेवस्य उपचारोपसंस्कृतम् ॥ २९ ॥
स्वयं स नृपतिश्रेष्ठः पूजयामास तान्क्रमात् ॥ नारदस्योपदेशेन विधिना मंत्रतस्तथा ॥ ३० ॥ द्वादशाक्षरमंत्रेण बलभद्रमपूजयत् ॥ यमु
पास्य ध्रुवः स्थानं प्राप्तवानुत्तमोत्तमम् ॥ ३१ ॥ त्रयीप्रसिद्धं यत्सूक्तं पावनं पौरुषं महत् ॥ तेन नारायणं भूपः पूजयामास शक्तितः ॥ ३२ ॥
देव्याः सूक्तेन भद्रां तां सौदर्शन्या सुदर्शनम् ॥ यथासमृद्धि भक्त्या तान्पूजयित्वा नृपोत्तमः ॥ ३३ ॥ तत्प्रीत्यै द्विजमुख्येभ्यो ददौ दानानि
भक्तितः ॥ तुलापुरुषदानानि महादानानि पार्थिवः ॥ ३४ ॥ अश्वमेधांगभूताश्च कोटिशो गा ददौ तदा ॥ अलंकृतास्तथान्याश्च ददौ गा बहु
दक्षिणाः ॥ ३५ ॥ तासां खुरोद्धृतेर्योगाद्गर्तोभूद्द्विजसत्तमाः ॥ दानांबुना स पूर्णो वै तीर्थमासीन्महाफलम् ॥ ३६ ॥ तस्मिन्स्नात्वा पितॄन्देवा
न्संतर्प्य विधिवन्नरः ॥ अश्वमेधसहस्रस्य फलमाप्नोत्यसंशयः ॥ ३७ ॥ नाम्ना ख्यातं सरस्तस्य इन्द्रद्युम्नस्य भूपतेः ॥ निर्वपत्यत्र पिंडांश्च पितॄनु
द्दिश्य मानवः ॥ ३८ ॥ कुलैकविंशमुद्धृत्य ब्रह्मलोके महीयते ॥ नातः परतरं तीर्थं हयमेधांगसंभवात् ॥ ३९ ॥ इन्द्रद्युम्नस्य सरसः स्याद्रा
त्रिपथगा समा ॥ ततः प्रासादघटनामुपचक्राम भूपतिः ॥ ४० ॥ शुभे काले सुनक्षत्रे दैवज्ञविधिचोदिते ॥ समुहूर्ते नारदादीन्ब्राह्मणाग्र्यान्प्रपूज्य
च ॥ ४१ ॥ स्वस्तिवाचं च कर्मर्द्धिं वाचयित्वा नृपोत्तमः ॥ अर्घ्यं ददौ जगन्नाथं स्मरन्प्रासादवेश्मनि ॥ ४२ ॥ वसुधां प्रार्थयित्वा तु स्थान
माचंद्रतारकम् ॥ शिल्पिनः पूजयामास वास्तुयागपुरःसरम् ॥ ४३ ॥ महोत्सवं तथा चक्रे गीतवाद्यैः प्रभूतकैः ॥ दीनानाथविपन्नेभ्यो ददौ
वस्तु यथेप्सितम् ॥ ४४ ॥ राज्ञो विसर्जयामास बहुमानपुरःसरम् ॥ कृतार्थानवतारं तं हरेर्दृष्ट्वा हतांहसः ॥ ४५ ॥ ततः स कोटिशो वित्तं ददौ
पाषाणदारके ॥ आहृतौ बहुदेशेभ्यो दृषदां पार्थिवोत्तमः ॥ ४६ ॥ उवाचेदं मुदा युक्तः सभायां पृथिवीश्वरः ॥ अष्टादशभ्यो द्वीपेभ्यो यन्मया

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पौरुषार्जितम् ॥ ४७ ॥ तत्सर्वं जगदीशस्य प्रासादायापवर्जितम् ॥ जैत्रयात्राप्रसंगेन श्रमो लब्धस्तु यो मया ॥ ४८ ॥ सफलोऽस्तु स मे विष्णोः
प्रासादायार्थयोगतः ॥ अतः परं मे किं भाग्यं चराचरगुरुं हरिम् ॥ ४९ ॥ प्रसादयिष्ये संपत्त्या भुजद्वंद्वार्जितश्रिया ॥ श्रीः सदा पुण्डरीकाक्षे
श्रियोनुग्रहजा मम ॥ ५० ॥ किं कर्तुमीशस्तस्यां वै देवदेवस्य चक्रिणः ॥ कटाक्षपातो यस्य स्यात्तस्य श्रीः सर्वतोमुखी ॥ ५१ ॥ अष्टादशा
त्मिका देवी जिह्वाग्रे चास्य नृत्यति ॥ यमाराध्य जगन्नाथं ब्रह्मत्वं प्राप्तवान्विधिः ॥ ५२ ॥ रुद्रो महेश्वरत्वं च शक्रस्त्रिदिवराजताम् ॥ लेभे
तमर्च्यं जगतामर्चयिष्यामि शाश्वतम् ॥ ५३ ॥ जितं तेन त्रिधा राशीभूतमंहो महात्मना ॥ सांगोपांगेन विधिना येन कृष्णः समर्चितः ॥ ५४ ॥
कलेवरमिदं क्षेत्रं यत्राहंकारवान्विभुः ॥ आविर्भावतिरोभावौ स्थितिर्नित्या हि यत्प्रभुः ॥ ५५ ॥ अत्र साक्षाद्रपुष्मन्तं संपूज्य जगतां
गुरुम् ॥ साक्षात्कृतार्थो भवति चतुर्वर्गस्य भाजनम् ॥ ५६ ॥ बहुव्ययाऽऽयासतो या राज्यऋद्धिर्मयार्जिता ॥ अस्यैवानुग्रहात्सा तु
सफलास्तु पदांबुजे ॥ ५७ ॥ सर्वोपचारैः परिपूज्य देवं द्रव्यैर्हृतैः सागरमेखलायाः ॥ यावत्समाप्नोति हि कर्मपाकः साम्राज्ययात्रा
सफला हि मास्तु ॥ ५८ ॥ किं द्रव्यजातं खलु येन विष्णुं नोपाहरेत्सांगमपेतकल्मषः ॥ किं पौरुषेयं यदि वासुदेवपरिच्छदो येन
न साधितो मे ॥ ५९ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे पुरुषोत्तमक्षेत्रमाहात्म्ये जैमिनि
ऋषिसंवादे विंशोऽध्यायः ॥ २० ॥ ॥ जैमिनिरुवाच ॥ ॥ इति ब्रुवाणं राजर्षिं कश्चिदृग्वेदपारगः ॥ वेदांतविज्ञानशीलो द्विजो
वाक्यं मुदा जगौ ॥ १ ॥ अहो तवायं खलु भाग्यराशिर्येनाविरासीद्भुवि दारुमूर्तिः ॥ यस्यात्युपास्तिं श्रुतिराह मुक्तिप्रदामनात्मज्ञविमोहिता
नाम् ॥ २ ॥ य एष प्लवते दारुः सिंधोः पारे ह्यपौरुषम् ॥ तमुपास्य दुराराध्यं मुक्तिं यांति सुदुर्लभाम् ॥ ३ ॥ ब्रह्मज्ञाननिधिः साक्षान्नारदः प्रत्यु
वाच यत् ॥ न हि वेदांतवचसोऽपरस्माज्ज्ञानमस्य वै ॥ ४ ॥ न हि प्रवृत्तिर्विष्णोस्तु विना वेदं प्रवर्त्तते ॥ परेषां स्वस्य वा सृष्टौ श्रुतिप्रामाण्यवा
न्प्रभुः ॥ ५ ॥ विना श्रुतिं प्रवर्तेंचेत्कस्तत्प्रामाण्यमृच्छति ॥ तस्माच्छ्रुतिप्रसिद्धोऽयमवतारोऽत्र भूपते ॥६॥ वेदांतवेद्यं पुरुषं गीतं तं सामगीतिषु ॥
प्रतिमां न तु जानीहि निःश्रेयसकरं नृणाम् ॥ ७ ॥ दर्शनादेव नः शांतं सुदृढं तम उत्तमम् ॥ संत्येव श्रुतयः पूर्वमेतदर्चाप्रकाशिकाः ॥ ८ ॥ एत
दर्चा प्रशस्ता वै सदर्थे विनियोजिता ॥ अहो भारतवर्षस्था मनुष्याः क्षीणकल्मषाः ॥ ९ ॥ अपवर्गप्रदो येषामाविरासीज्जनार्दनः ॥ तत्राप्ययं
चोद्भूदेशः सर्वेषामुत्तमोत्तमः ॥ १० ॥ यत्रस्थाश्चर्मनेत्रेण पश्यंति ब्रह्मरूपिणम् ॥ श्रुतिस्मृतीनां गहनः पंथाः कर्मभिराकुलः ॥ ११ ॥ येन याता

CC-0. In Public Domain. Digitization by eGangotri

भ्रमंतीह घटीयंत्रवदाकुलाः ॥ निर्व्यलीकपदप्राप्तिहेतुरेष स चिन्मयः ॥ १२ ॥ श्रुत्यादिभिर्विनोपायैः परमानंदमुक्तिदः ॥ निरंतरगतायातदुःस्थि
तानां दुरात्मनाम् ॥ १३ ॥ एष दारुवपुर्विष्णुः सुखदाता सुबांधवः ॥ श्रुतिस्मृत्युक्तनियमा वर्तंते नेह पार्थिव ॥ १४ ॥ यथा तथा दृष्टिपथमाचां
डालाद्विमुक्तिदः ॥ अभक्तश्चेदमुं पश्येद्व्रतानुगतिको नरः ॥ १५ ॥ अश्वमेधसहस्राणां फलं ह्यविकलं लभेत् ॥ भजेच्चेन्नियमस्थो हि भक्तिमान्दृढ
मानसः ॥ १६ ॥ असंशयं स सायुज्यं ब्रह्मणा लभते नरः ॥ क्व दुःखायासबहुलमनायासविनश्वरम् ॥ १७ ॥ अचिरस्थं क्षुद्रफलं पुनरावृत्तिलक्ष
णम् ॥ क्वेदं दारुमयं ब्रह्म पापराशिदवानलम् ॥ १८ ॥ सच्चिदानंदकैवल्यमुक्तिदं दर्शनादपि ॥ वेदानुवचनादीनि दुष्कराणि दुरात्मनाम् ॥ १९ ॥
महात्मभिस्तैर्यत्प्राप्यं तदव्यग्रमयं ददेत् ॥ अन्यक्षेत्रेषु भगवान्सुदूरो मर्त्यवासिनाम् ॥ २० ॥ स्वक्षेत्रेऽस्मिन्निवसति नित्यं मुक्तिप्रदो विभुः ॥ अस्मा
दत्र महाभाग तिष्ठ स्वबलपौरुषः ॥ २१ ॥ विद्वत्तमोऽसि भक्तश्च सांगोपांगममुं भज ॥ २२ ॥ ॥ जैमिनिरुवाच ॥ ॥ द्विजस्य तद्वचः श्रुत्वा
नारदो हृष्टमानसः ॥ साधूक्तं द्विजवर्येण श्रौतमार्गानुसारिणा ॥ २३ ॥ सृष्ट्यादौ ब्रह्मनिश्वासैरभवद्वेदसंहतिः ॥ तत्रोपनिषदर्थोऽयं सांप्रतं व्यक्ति
मागतः ॥ २४ ॥ वेत्त्येतदर्थं भगवान्पद्मयोनिः प्रजापतिः ॥ अज्ञासिषं च भूपाल सांप्रतं तन्मुखादहम् ॥ २५ ॥ तस्याज्ञया कृतं सर्वं यथाभिल
षितं तव ॥ एनमाराध्य तिष्ठात्र याम्यहं ब्रह्मणोऽतिकम् ॥ २६ ॥ कृतं निवेदयिष्यामि प्रकाशं च मुरद्विषः ॥ प्रासादं कुरु भूपाल धनेन महता
तथा ॥ २७ ॥ प्रासादे नरसिंहं तु प्रतिष्ठाप्य विमुच्यसे ॥ २८ ॥ ॥ जैमिनिरुवाच ॥ ॥ तच्छ्रुत्वा स तु भूमींद्रः प्रत्युवाच मुनिं तदा ॥ महर्षेऽहं
त्वया सार्द्धं यियासुर्ब्रह्मणोऽतिकम् ॥ २९ ॥ यत्प्रसादाज्जगन्नाथश्चक्रेऽयं लोचनातिथिः ॥ निवेद्य तं च प्रासादं प्रतिष्ठार्थं मुरद्विषः ॥ ३० ॥ विज्ञा
पयिष्ये सान्निध्ये प्रासादस्थापनोत्सवम् ॥ यथा स्वयं समागम्य ब्रह्मलोकात्पितामहः ॥ ३१ ॥ महोत्सवं भगवतः प्रासादेऽत्र करिष्यति ॥ तन्मुने
मामपि विधेः संनिधिं प्रापयस्व च ॥ ३२ ॥ गर्भप्रतिष्ठां प्रासादे समाप्येह स्थितो मुने ॥ पश्चादावां गमिष्यावः कंचित्कालं प्रतीक्ष मे ॥
॥ ३३ ॥ ततः स नृपतिः सर्वाञ्छिल्पशास्त्रविशारदान् ॥ पाषाणखंडघटनाकर्मण्येकैकयोगतः ॥ ३४ ॥ सत्कारैर्दानमानैश्च योज
यामास सादरम् ॥ दिने दिने सुघटितः प्रासादो ववृधे द्विजाः ॥ ३५ ॥ परितः पूर्यमाणस्तु शुक्लपक्षे यथा शशी ॥ एवं संवर्ध्यमानोऽपि
प्रासादः परिवर्द्धितः ॥ ३६ ॥ महोच्छ्रयत्वादल्पेन न कालेनाभिलक्ष्यते ॥ पाषाणसंख्या शक्या वा कथंचिद्घटनाक्रमात् ॥ ३७ ॥ वित्तव्ययस्तु
कोटीनां न संख्यातुं च शक्यते ॥ यावन्तो भारते वर्षे लोकाः समयवर्तिनः ॥ ३८ ॥ इन्द्रद्युम्नस्य नृपतेर्नियुक्तास्ते महीभृतः ॥ एकैकशो नियुक्ता

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ये परस्परसमन्विताः ॥३९॥ तेऽपि चान्यैर्नियुक्तास्ते सर्वे तत्र प्रवर्तिताः ॥ अजस्रं तन्नियुक्तानां यो हर्षोत्थो महारवः ॥ ४० ॥ आकाशमश्नुवानो ऽसौ दिशां भागानपूरयत् ॥ नृपतेः श्रद्धया भक्त्या सात्त्विकेन प्रसादिता ॥ ४१ ॥ श्रीः समृद्धाभवद्विप्राः कीर्त्या सह महीपतेः ॥ क्वचित्कांचनविन्यस्तनानारत्नमहोज्ज्वलः ॥ ४२ ॥ क्वचित्स्फटिकभागांतशारदाभ्रनिभच्छविः ॥ क्वचिन्नीलाश्मघटिता भित्तिः कालाभ्रमेदुरा ॥ ४३ ॥ एवं सुघटिते विष्णोः प्रासादे सुमनोहरे ॥ गर्भप्रतिष्ठां विधिवत्कृत्वा स नृपसत्तमः ॥ ४४ ॥ वज्रपातादिभंगादिवारणार्थं यथोचितम् ॥ शिल्पशास्त्रेषु मण्यादि विन्यस्य पौरुषाह्वतम् ॥ ४५ ॥ पुनः प्रासादघटनासंभारोचितमेव वै ॥ बहुमूल्यं वस्तुजातं यत्नात्तत्र न्यवेशयत् ॥ ४६ ॥ ततो विरच्यमानेऽस्मिन्प्रासादे कीर्तिवर्द्धने ॥ मनसापि न संभाव्ये त्रिषु लोकेषु भूभुजाम् ॥ ४७ ॥ देवानामपि नो लक्ष्ये द्विजाः कल्पांतवासिनाम् ॥ प्रासाद ईदृशो भूमौ क्वचिच्च घटितो न हि ॥ ४८ ॥ स्वर्गे वा इत्थमादित्या आलपंति परस्परम् ॥ अहो सुबुद्धिरस्योच्चैर्येयमीदृक्परीणता ॥ ४९ ॥ श्रद्धया भगवत्पादपद्मयोः साभिलाषिणी ॥ अलौकिकानि कर्माणि पश्यंति हि रचंत्यपि ॥ ५० ॥ के वात्र भूमौ राजानो बभूवुर्नीतिशालिनः ॥ सार्वभौमास्तु साम्राज्यजेतारः सर्वविद्विषाम् ॥ ५१ ॥ वित्तानि यैः संचितानि सुबहूनि च कोटिशः ॥ अश्वमेधसहस्रं तु यत्कृतं त्रिदिवेशितुः ॥ ॥ ५२ ॥ शक्यं वा स्याद्भूभुजां तु नातः पूर्वमनुष्ठितम् ॥ न दृष्टं न श्रुतं वापि वाजिमेधसहस्रकम् ॥ ५३ ॥ महीक्षितानुष्ठितं वै यत्र त्रैलोक्यवासिनः ॥ पृथिव्यामस्य नृपतेः सहस्था भोगभोगिनः ॥ ५४ ॥ ब्रह्मलोक इवाभाति सभा यस्य च यज्विनः ॥ मूर्तिमंतस्त्रयो वेदाश्चतुष्पादो वृषस्तथा ॥ ५५ ॥ सुराः संकल्पकामास्तु यत्राद्भुतधियोऽभवन् ॥ अयं प्रासादवर्यो वै बुद्धेर्विषयतां गतः ॥ ५६ ॥ मनोऽपि यत्र भवति न वा त्रैलोक्यवासिनाम् ॥ भूपतेर्दुर्लभं किं स्यात्सहायो यस्य नारदः ॥ ५७ ॥ पितामहश्च जगतां स्रष्टा सर्वामरेश्वरः ॥ अथवा विष्णुभक्तस्य नातिदूरं चिकीर्षितम् ॥ ५८ ॥ विष्णोस्तद्भक्तलोकस्य नांतरं विद्यते द्विजाः ॥ ततः स नारदं प्राह प्रासादांते मुनीश्वरम् ॥ ५९ ॥ सर्वं संपन्नमासीन्मे यदशक्यं सुरासुरैः ॥ साक्षाद्भगवतो विष्णोरद्वैतोपासनारतः ॥ ६० ॥ भगवद्भपुराभाषि प्रासादस्तु चिरं मयि ॥ इत्युक्त्वा पादयोर्मूर्ध्ना प्रणनाम स नारदम् ॥ ६१ ॥ नारदोऽपि तमुत्थाप्य परिपूज्य नृपोत्तमम् ॥ त्वत्तो न भेदो नृपते ममास्ति खलु तत्त्वतः ॥ ६२ ॥ यस्तु साक्षाज्जगन्नाथ आविर्भूतः कृतेन वा ॥ अवश्यमर्चयस्वैनं जीवन्मुक्तोऽसि सांप्रतम् ॥ ६३ ॥ तत्पादपद्मे यादृक्के चेतः प्रवणतान्वितम् ॥ भक्त्या ह्यनन्यया पुंसः किमतः परमस्ति वै ॥ ६४ ॥ तीर्थैर्मंत्रैर्जपैर्दानैः क्रतुभिर्भूरिदक्षिणैः ॥ व्रतैरध्ययनैर्भूप तपोभिश्च यदर्जितम् ॥ ६५ ॥ न शक्यं तव राजेन्द्र भक्त्या तत्क

CC-0. In Public Domain. Digitization by eGangotri

रमागतम् ॥ अतः परं न शोचस्व भक्तियोगे नमोऽस्तु ते ॥ ६६ ॥ प्रकर्षं बहुराजेंद्र स्थित्वा चास्मिंश्चिरं भुवि ॥ आराधय जगन्नाथ मुपचारैर्महोत्सवैः ॥ ६७ ॥ पितामहं द्रष्टुकामो गंता चेदंतिकं विभोः ॥ उपदेक्ष्यति सोऽप्यस्य यात्रास्तास्ता महोत्सवाः ॥ ६८ ॥ स्वयं च भगवानेव वरं तुभ्यं प्रदास्यति ॥ प्रतिष्ठापिते प्रासादे तस्मिन्काले स्वयंभुवा ॥ ६९ ॥ अहमप्यागमिष्यामि तदा सप्तर्षिभिः सह ॥ तदावां तत्र गच्छावो ब्रह्मलोकमकल्मषम् ॥ ७० ॥ त्वां विना भुवि कः शक्तो ब्रह्मलोकगतिं प्रति ॥ इत्युक्त्वा नारदो भूपं समुत्तस्थौ नभस्तलम् ॥ ७० ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे पुरुषोत्तमक्षेत्रमाहात्म्ये जैमिनिऋषिसंवाद एकविंशोऽध्यायः ॥ २१ ॥ ॥ ॥ जैमिनिरुवाच ॥ ॥ राजाथ तमुवाचेदं निर्लक्ष्य गमनं कथम् ॥ अयं पुष्परथोऽस्त्येव मनसो वेगवान्मुने ॥ १ ॥ एनमारुह्य यास्यावः क्षणं तावत्प्रतीक्ष्यताम् ॥ यावदेताननुज्ञाप्य प्रासादे ह्यधिकारिणः ॥ २ ॥ प्रदक्षिणीकृत्य विभुमायामि मुनिसत्तम ॥ नारदोऽपि वचः श्रुत्वा श्रद्दधानो नृपोक्तिषु ॥ ३ ॥ करेण धृत्वा राजानं महावेदीं प्रविश्य च ॥ सहितं रामभद्राभ्यां नत्वा कृष्णं मुहुर्मुहुः ॥ अनुज्ञां प्रार्थयामास ब्रह्मलोकगतिं प्रति ॥ ४ ॥ इन्द्रद्युम्नोऽपि वचसा मनसा वपुषा हरिम् ॥ प्रदक्षिणीकृत्य पुनर्नत्वा साष्टांगमुन्मनाः ॥ ब्रह्मलोकगतिं विप्रा याचते स्म कृतांजलिः ॥ ५ ॥ उभौ तौ दिव्ययानेन जग्मतुर्मुनिभूभृतौ ॥ प्रदक्षिणीकृत्य रविं व्योममण्डलमध्यगम् ॥ उपर्युपरि जग्माते व्यतीत्य ध्रुव मंडलम् ॥ ६ ॥ जनलोकगतैः सिद्धैः सत्वरावनतोन्मुखैः ॥ वीक्ष्यमाणौ मुदा युक्तौ संलपंतौ परस्परम् ॥ ७ ॥ भगवच्चरितं विप्रा मनोमलविशो धनम् ॥ जीवन्मुक्तो मुनिश्रेष्ठः सर्वलोकान्भ्रमन्नयम् ॥ यथानुपहतव्रज्यस्तथायं मर्त्यवास्यपि ॥ ८ ॥ भूपतिः प्रययौ शीघ्रं विष्णुभक्तिप्रसादतः ॥ ब्रह्मांडविषये नैतद्दुष्प्राप्यं वस्तु विद्यते ॥ ९ ॥ विष्णुभक्तेन यल्लभ्यमथवा मुक्तिमेति सः ॥ महर्लोकगतैः सिद्धैः सादराभ्यर्चितौ च तौ ॥ १० ॥ इन्द्रद्युम्नो न सस्मार पार्थिवं वासमात्मनः ॥ क्रमादूर्ध्वगतिर्गच्छन्पश्यन्सौख्यैकभाजनान् ॥ ११ ॥ निर्द्वंद्वानभिलाषोत्थतत्क्षणानेकपौरुषान् ॥ केवलं भगवत्प्रीत्यै कर्मभूमौ चकार यत् ॥ १२ ॥ प्रासादं चिंतयामास संपूर्णो वा न वा भवेत् ॥ मय्यागते ब्रह्मलोकं शत्रुभिर्वाभिभूयते ॥ १३ ॥ श्लथादरा वा भूयासुः सेवका द्रव्यलोभतः ॥ गृहीतवेतनाः शिल्पिवृंदा मंदक्रियास्तथा ॥ न शीघ्रं घटयिष्यंति मयि ब्रह्मक्षयागते ॥ १४ ॥ यावद्गमिष्ये धातारं गृहीत्वाहं चतुर्मुखम् ॥ तावन्न पुनरेव स्यात्प्रासादो मयि दूरगे ॥ १५ ॥ इहायातास्तु ये पूर्वे न पुनस्ते क्षितिं गताः ॥ मन्वाना मम सामंता इत्थं वा दुष्टमानसाः ॥ राज्यं ममाहरिष्यंति द्विषंतः किमु सांप्रतम् ॥ १६ ॥ इत्थं सुविग्नमनसा चिंतयानं महीपतिम् ॥ अतीता

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नागतज्ञाननिधिर्मुनिरुवाच तम् ॥ १७ ॥ किं चिंतयसि राजेंद्र त्वमेवं दीनमानसः ॥ यत्र चाभ्यागतावावां न चिंताविषयो ह्ययम् ॥१८॥ नाधयो
व्याधयश्चात्र प्रभवंति कदाचन ॥ न जरा न च वा मृत्युः किमन्यद्दुःखहेतुकम् ॥ १९ ॥ कृतार्थोऽसि महाभाग यन्मानुषवपुः स्वयम् ॥ ब्रह्मलो
कमिहायातः प्रत्यक्षं दृष्टवान्हरिम् ॥ २० ॥ इहायाता न शोचंति हेये संसारकल्पके ॥ ब्रुवाणमित्थं भूपालस्तमुवाच मुनीश्वरम् ॥ २१ ॥ न हि
शोचामि भगवन्नाज्ञः स्वजनबन्धुषु ॥ समारब्धो भगवतः प्रासादो यो मयाधुना ॥ २२ ॥ अत्रागतं मां ते ज्ञात्वा नानुतिष्ठंति सेवकाः ॥ आर
ब्धस्य प्रतिष्ठा हि कर्तव्या निश्चिता मुने ॥ २३ ॥ तस्यांतरायं संभाव्य दुःखितं मे मनः प्रभो ॥ तस्य तद्वचनं श्रुत्वा प्रहस्य मुनिरब्रवीत् ॥
॥ २४ ॥ प्रजापतिसमस्त्वं हि न तु सामान्यभूपतिः ॥ केनाप्यपकृतं नैव भूमौ पूर्वैरनुष्ठितम् ॥ २५ ॥ किं पुनस्तव कृत्यं तु यः सृष्टिस्थितिहा
निकृत् ॥ ब्रह्मलोकं गतस्याद्य प्रतापयशसा तव ॥ २६ ॥ त्रैलोक्ये भ्रमतो नित्यं यथा सूर्यनिशाकरौ ॥ यस्य कार्येषु भगवान्सहायोऽसौ
चतुर्मुखः ॥ २७ ॥ तेषु किं राजशार्दूल विघ्नशंकापि जायते ॥ एष दूरेऽस्ति राजेंद्र प्रत्यक्षं यस्तव द्विषाम् ॥ २८ ॥ सदोमध्य
गतः शक्रः साक्षात्त्रिजगतीपतिः ॥ विशेषतो जगन्नाथप्रासादे कः पुमान्नृप ॥ २९ ॥ निहंतुं मनसापीच्छेत्तत्र शंकास्तु मा तव ॥ तद
ग्रतः पश्य भूप चंद्रकोटिसमत्विषा ॥ ३० ॥ परितो ह्लादजनकः सुधासागरकोटिवत् ॥ यश्चायं तेजसां राशिर्जानीहि ब्रह्मसद्मनः ॥ ३१ ॥ इत्थ
मालपतस्तौ तु ब्रह्मलोकांतिकं गतौ ॥ शुश्रुवाते सुदूरात्तौ ब्रह्मर्षीणां मुखोद्गतम् ॥ ३२ ॥ स्वाध्यायशब्दं सुपदं स्पष्टवर्णक्रमस्वरम् ॥ इतिहास
पुराणानि च्छंदः कल्पानि गाथिकाः ॥ ३३ ॥ असंकीर्णोज्ज्वलपदं श्रूयते प्रविभागशः ॥ अत्रैतद्राजशार्दूल जानीहि ब्रह्मणः पुरम् ॥ ३४ ॥
सभा हि दृश्यते चैषा यत्र लोकपितामहः ॥ सार्द्धं ब्रह्मर्षिमुख्यैश्चसुखा सीनश्चतुर्मुखः ॥ ३५ ॥ नानाचैतन्यशबलैर्जीवन्मुक्तैरुपासितः ॥ यत्रा
गतानि वर्त्तंते न संसाराब्धिसंकटे ॥ ३६ ॥ सदिति ब्रह्मणो नाम तस्यायं भुवनोत्तमः ॥ सत्यलोक इति ख्यातस्तदूर्ध्वं नास्ति किंचन ॥ ३७ ॥
अस्यैव किंचिदुपरि अधश्चांडकपालतः ॥ वैकुण्ठभुवनं राजन्मुक्ता यत्र वसंति वै ॥ ३८ ॥ यत्र योगीश्वरः साक्षाद्योगिचिंत्यो जनार्दनः ॥
चैतन्यवपुरास्ते वै सांद्रानंदात्मकः प्रभुः ॥ ३९ ॥ यं प्राप्य न निवर्त्तंते मृत्युसंसारवर्त्मनि ॥ यमुपास्ते सदा ब्रह्मा जीवन्मुक्तैः स्वमुक्तये ॥ ४० ॥
कल्पितस्यायुषोन्तेऽसावेभिः सार्द्धं प्रपद्यते ॥ स एष स्रष्टा लोकानां मत्स्यकूर्मादिरूपधृक् ॥ ४१ ॥ रक्षिता रौद्ररूपेण संहर्त्ता लोकभावनः ॥
इन्द्रद्युम्नं वदन्नित्थं प्राप ब्रह्मनिकेतनम् ॥ ४२ ॥ क्षणेन च सभाद्वारि प्रकोष्ठे स न्यवर्तत ॥ यत्र तिष्ठन्ति दिक्पालाः शक्राद्याः परितस्तथा ॥ ४३ ॥

CC-0. In Public Domain. Digitization by eGangotri

चिरकालं ध्यानपरास्तथा मन्वंतराधिपाः ॥ पृथग्जननिभा द्वाःस्थनिषिद्धांतःप्रवेशनाः ॥ ४४ ॥ इन्द्रद्युम्नेन सहितं नारदं प्रविलोक्य सः ॥ द्वारपालः सविनयं ननामानतकन्धरः ॥ ४५ ॥ चतुर्दशानां लोकानां भ्रमणे रसिक प्रभो ॥ त्वया विना शोभते नो स्वामिंस्तव पितुः सभा ॥ ४६ ॥ संत्येव मुनयः श्रेष्ठा ब्राह्मणा ब्रह्मविद्वराः ॥ गौतमाद्यास्तथाप्येषा न रम्या ब्रह्मणः सभा ॥ ४७ ॥ बहुतारा सुरजनी चंद्रेणेव प्रकाशते ॥ इति स्तुवन्ददौ तस्य प्रवेशं विनयान्वितः ॥ ४८ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे पुरुषोत्तमक्षेत्रमाहात्म्ये जैमिनिऋषिसंवादे द्वाविंशोऽध्यायः ॥ २२ ॥ ॥ नारद उवाच ॥ ॥ दौवारिकायं राजर्षिरिंद्रद्युम्नो महायशाः ॥ सार्वभौमो वैष्णवाग्र्यो धातारं द्रष्टुमागतः ॥ १ ॥ यात्वयं पुरतस्तस्य यदि त्वमनुमन्यसे ॥ इत्युक्तस्तं पुनः प्राह नारदं मणिकोदरः ॥ २ ॥ स्वामिंस्त्वयागतो योऽसौ न सामान्यो हि बुध्यते ॥ यत्र पश्यसि दिक्पालान्पितॄन्मन्वंतराधिपान् ॥ ३ ॥ तत्रायं मर्त्त्यनिलयस्तिष्ठेदपि हि पौरुषम् ॥ भवान्गत्वा पद्मयोनिं विज्ञाप्यैनं प्रवेशय ॥ ४ ॥ सभाद्वारगतो योऽसौ दिक्पालैः सह यास्यति ॥ एकाग्रचित्तो भगवान्गायने चतुराननः ॥ ५ ॥ अस्माकं द्वारि युक्तानां प्रतीक्ष्योऽवसरो ध्रुवम् ॥ न क्रोधो मयि कर्त्तव्यो दासे तव पितुश्च ते ॥६॥ इत्युक्तो नारदो गत्वा ब्रह्माणं जगतां पतिम् ॥ नत्वा साष्टांगपतनं विज्ञप्तो वसुधाधिपः ॥ ७ ॥ कटाक्षेणादिशत्सोऽथ इन्द्रद्युम्नप्रवेशनम् ॥ नोवाच किंचिद्भगवान्गाने दत्तावधानतः ॥ ८ ॥ दिव्यगायनसंगीते कौतुकाविष्टमानसः ॥ ज्ञात्वेंगितं नारदोऽथ इंद्रद्युम्नं नृपोत्तमम् ॥ प्रवेशयामास ततः शक्राद्यैः सुनिरीक्षितः ॥ ९ ॥ दृष्ट्वा पितामहं दूरात्स्रष्टारं जगतां नृपः ॥ अमन्यत द्विजश्रेष्ठाः साक्षाद्दारुमयं हरिम् ॥ १० ॥ शनैः शनैर्ययौ भूपः प्रणमंश्च कृतांजलिः ॥ स्तुवन्नमन्प्रणिपतन्साध्वसस्खलितं व्रजन् ॥ किंचिद्दूरे स्थितो भूपो नारदस्य निदेशतः ॥ ११ ॥ ततः पुण्यं गीयमानं चरितं सिंधुजापतेः ॥ शृण्वंश्चतुर्मुखस्तस्थौ मुहूर्त्तं द्विजपुंगवाः ॥ १२ ॥ सावित्रीशारदाभ्यां च वीज्यमानस्तु पार्श्वयोः ॥ शुद्धदेहधरैर्वेदैः स्तूयमानः स्वयंभुवः ॥ १३ ॥ कलाकाष्ठानिमेषादि कल्पयन्युगपर्ययम् ॥ न जराजन्ममरणं रूपादिपरिणामनम् ॥ १४ ॥ यस्य लोकगतानां वै नाधयो व्याधयस्तथा ॥ मन्वंतरादयो यत्र युगावर्त्तादयस्तथा ॥ १५ ॥ कल्पांताद्या न विद्यंते स साक्षात्परमेश्वरः ॥ गीतावसाने तं भूपमुवाच प्रहसन्निव ॥ १६ ॥ इंद्रद्युम्न महासत्त्व साक्षात्त्वं भगवत्प्रियः ॥ अन्यस्य दुर्लभो लोकः सत्याख्यो विदितस्तव ॥ १७ ॥ अत्रागतिं हि वांछंतो मुनयः क्षीणकल्मषाः ॥ तपोनिष्ठाश्च तिष्ठंति यावदाभूतसंप्लवम् ॥ १८ ॥ चतुर्दशसु लोकेषु सृष्टानां प्राणिनां हि यत् ॥ चैतन्यादिविचि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्राणि सर्वेषामाश्रयो ह्यसौ ॥ १९ ॥ जानन्नपि हि तत्कार्यं मानयन्नृपसत्तमम् ॥ उवाच परमप्रीत इंद्रद्युम्नं पितामहः ॥ २० ॥ किमर्थमागतोस्य
त्र तद्ब्रूहि हृदयस्थितम् ॥ मयि दृष्टे न दुष्प्रापममृतं किन्तु वांछितम् ॥ २१ ॥ ॥ इन्द्रद्युम्न उवाच ॥ ॥ अंतर्यामिन्हि भगवंस्त्वदज्ञातं कुतो
भवेत् ॥ तथापि प्रश्नो यो नाथ मय्यनुक्रोश एव सः ॥ २२ ॥ मूर्ध्न्याधाय तवानुज्ञां कथितं तव सूनुना ॥ इष्टाः सहस्रं क्रतवस्तदंते दारुदेह
भृत् ॥ २३ ॥ आविर्बभूव भगवान्भूतभव्यभवत्प्रभुः ॥ त्वदनुग्रहसंपत्तिवशादेवावलोकयन् ॥ २४ ॥ तादृशं पुंडरीकाक्षं येन त्वल्लोकमागतः ॥
यस्यारब्धो मया देव प्रासादस्तत्र चेत्स्वयम् ॥ २५ ॥ गत्वा देवं जगन्नाथं स्थापयिष्यसि चेत्प्रभो ॥ त्वदनुग्रहस्तु सफलो भवेन्मे लोकभावन ॥
॥ २६ ॥ एतदर्थं जगत्स्वामिन्नारदेन सहाधुना ॥ त्वत्पादपद्मयुगलं द्रष्टुं त्वल्लोकमागतः ॥ २७ ॥ प्रसीद मां कुरुष्वेदं जगन्नाथस्त्वमेव हि ॥
त्वमेव स जगन्नाथो न भेदो युवयोर्विभो ॥ २८ ॥ स्थाप्यः स्थापयिता चासि वेद्यो वेदयिता भवान् ॥ २९ ॥ ॥ जैमिनिरुवाच ॥ ॥ एवं
विज्ञापनांते तु दुर्वासाः स महामुनिः ॥ प्रणम्य साष्टांगपातं कृतांजलिरुपस्थितः ॥ प्रोवाच विनयान्नीचो धातारं जगतां गुरुम् ॥ ३० ॥ विभो द्वार
प्रवेशेऽत्र दौवारिकनिवारिताः ॥ लोकपालाः सपितरस्तथा मन्वंतराधिपाः ॥ ३१ ॥ तिष्ठंति दीनजनवत्सुचिराल्लोकभावन ॥ तदाज्ञापय पश्यंतु
तव पादसरोरुहम् ॥ ३२ ॥ तच्छ्रुत्वा देवदेवस्तु तदा दुर्वाससो वचः ॥ प्रहस्य वचनं प्राह नैषां प्रस्ताव एव हि ॥ ३३ ॥ इंद्रद्युम्नेन स्पर्द्धंते किं
तु मोहवशानुगाः ॥ जीवन्मुक्तोऽयं नृपतिः क्षीणकर्मौघसंहतिः ॥ ३४ ॥ मत्संततेः पंचमोऽयं वैष्णवो विष्णुतत्परः ॥ एते हि सुखभोगाय
कर्मणा प्राप्तपौरुषाः ॥ ३५ ॥ अत्रागतिं प्रार्थयंतस्तपस्तप्त्वा हि देवताः ॥ ममानुग्रहत एते आयाता मदुपासने ॥ ३६ ॥ तथापि त्वदनुज्ञाता
आयांतु मम दर्शने ॥ ततः प्रविष्टास्ते देवा दुर्वासोवचनेन वै ॥ ३७ ॥ दूरात्प्रणेमुर्ब्रह्माणं गायनानां समीपतः ॥ इंद्रद्युम्नं नरपतिं संलपंतं कृतांज
लिम् ॥ ३८ ॥ ताँल्लोकपालान्प्रणतान्कटाक्षेण जगत्प्रभुः ॥ अनुजग्राह कथयन्निंद्रद्युम्नं ससादरम् ॥ ३९ ॥ राजन्कृतस्त्वया सत्यं प्रासादो भगव
त्स्थितौ ॥ नायं कालस्तथा राज्यं न वा त्वत्संततिर्नृप ॥ ४० ॥ गीतगानावसरतो भूयान्कालो गतस्तव ॥ मन्वंतरो हि दिव्यानां युगानामेकस
प्ततिः ॥ ४१ ॥ तव वंशोऽपि विच्छिन्नः कोटिशः क्षितिपा गताः ॥ देवोऽतिमश्च प्रासादो द्वयमत्रावशिष्यते ॥ ४२ ॥ द्वितीयस्य मनोरादियुगं
स्वारोचिषस्य तु ॥ ममांतिकेऽत्र वसतो मृत्युर्वा न जरा तथा ॥ ४३ ॥ विपर्ययमृतूनां वा न कालपरिणामता ॥ तद्गच्छ भूमौ राजेंद्र देवं प्रासा
दमेव च ॥ ४४ ॥ आत्मसंबंधिनं कृत्वा पुनरायाहि वेगवान् ॥ अथवाहं प्रयास्यामि तवानुपदमेव हि ॥ ४५ ॥ त्वमग्रतो धरां गत्वा यावत्संभार

CC-0. In Public Domain. Digitization by eGangotri

मृद्धिमत् ॥ करिष्यसि महाभाग तावदेव व्रजाम्यहम् ॥ ४६ ॥ इत्याज्ञाप्येंद्रद्युम्नं तं भगवान्स पितामहः ॥ देवान्पुरःस्थितानाह
विनयानतकंधरान् ॥ ४७ ॥ बद्धांजलीन्साध्वसांस्तांस्तत्पादन्यस्तवीक्षणान् ॥ उवाच भगवान्स्निग्धगंभीरवचसा द्विजाः ॥ ४८ ॥
किमर्थमागताः सर्वे युगपत्तु दिवौकसः ॥ यत्कार्यं वो मया कार्यं विज्ञापयत मा चिरम् ॥ ४९ ॥ ॥ जैमिनिरुवाच ॥ ॥
इति श्रुत्वा वचो धातुस्त्रिदशा विगतज्वराः ॥ प्रत्यूचुर्हर्षिताः सर्वे भगवंतं पितामहम् ॥ ५० ॥ ॥ देवा ऊचुः ॥ ॥ उपासितः
पुरास्माभिर्यो नीलाद्रौ मणीमयः ॥ अन्तर्हितः कथं देव इदानीं दारुदेहधृक् ॥ ५१ ॥ आविर्भूतः क्रतोरंत इन्द्रद्युम्नस्य भूपतेः ॥ एतस्य
कारणं ज्ञातुं भवतः पादपंकजम् ॥ ५२ ॥ आराधितुमिहायाताः प्रसीद कथयस्व तत् ॥ इत्युक्ते त्रिदशैर्देवो भगवान्पंकजासनः ॥ ५३ ॥
रहस्यमेतद्भो देवाः कस्यचिन्नोदितं पुरा ॥ सर्वे समुदिता यस्मादपृच्छत चिरागताः ॥ ५४ ॥ ततो वः कथयिष्यामि सुराणां गुह्यमुत्तमम् ॥ पूर्वे
परार्द्धे भो देवाः क्षेत्रं श्रीपुरुषोत्तमम् ॥ ५५ ॥ नीलाश्मवपुरास्थाय न तत्याज जनार्दनः ॥ सांप्रतं मे द्वितीयं तु परार्द्धं समुपस्थितम् ॥ ५६ ॥ मनुः
स्वायम्भुवो नाम श्वेतवाराहकल्पके ॥ प्रवर्त्ततेऽयं कालो वै प्रातराद्यदिनस्य च ॥ ५७ ॥ दारुमूर्तिरयं देवो भुवनानां हि मध्यमे ॥ ममायुषः प्रमाणं
तु स्थास्यते मानयन्प्रभुः ॥ ५८ ॥ ममात्मा एष भगवानहमेतन्मयः सुराः ॥ नावयोर्विद्यते किंचिदस्मिन्स्थावरजंगमे ॥ ५९ ॥ क्षीरोदार्णवमध्ये
हि श्वेतद्वीपे हिं तल्पके ॥ यः शेते योगनिद्रां तां मानयन्पुरुषोत्तमः ॥ ६१ ॥ स मूलं जगतामादिस्तस्य रोमाणि यानि वै ॥ तानि कल्पद्रुमा
ख्यानि शंखचक्रांकितानि वै ॥ ६१ ॥ तन्मध्यस्थो ह्ययं वृक्षश्चैतन्याधिष्ठितः सुराः ॥ स्वयमुत्पतितः सिंधोः सलिले सत्यपूरुषः ॥ ६२ ॥ भोगा
न्भोक्तुं त्रिलोकस्थान्दारुवर्ष्मा जनार्दनः ॥ अनेकजन्मसाहस्रैर्भक्तियोगेन भावितः ॥ ६३ ॥ घोरसंसारनाशाय मया पूर्वं प्रयाचितः ॥ पुनःपुनः
सृष्टिलीनपालनोद्विग्नचेतसा ॥ ६४ ॥ अशेषकर्मनाशाय जगतां सर्वमुक्तये ॥ धारणाध्यानयोगानां दुष्कराणां विनापि सः ॥ ६५ ॥ मोक्षाय
भगवानाविर्बभूव पुरुषोत्तमः ॥ प्रच्छन्नं वपुरेतस्य क्षेत्रं नास्य विचारयेत् ॥ ६६ ॥ धर्मिग्राहप्रमाणेन यादृग्दृष्टः स एव सः ॥ चतुर्वर्गप्रदो देवो
यो यथा तं विभावयेत् ॥ ६७ ॥ तद्दर्शनपरिक्षीणपापसंघाः क्रमाद्भुवि ॥ भवन्ति निर्मलात्मानः पुरुषा मुक्तिभाजनम् ॥ ६८ ॥ ॥ जैमिनि
रुवाच ॥ ॥ एतच्छ्रुत्वा तु ते देवाः पद्मयोनेर्वचोऽमृतम् ॥ हृष्टाः संचिंतयामासुः प्रहृष्टेनांतरात्मना ॥ ६९ ॥ अचिरस्थायि देवत्वं विहायैतद्ध्रुवं
गताः ॥ अस्मिन्क्षेत्रवरे देवमाराध्यामः सुसंयताः ॥ ७० ॥ हर्षप्रफुल्लवदनान्सुरान्दृष्ट्वा पितामहः ॥ इन्द्रद्युम्नानुग्रहाय यः प्रकाशं गतः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रभुः ॥ ७१ ॥ याताऽत्र प्रतिमा त्वस्य स्वयमेव वदिष्यति ॥ वरान्प्रदास्यति बहून्भगवान्भक्तवत्सलः ॥ ७२ ॥ प्रासादमिन्द्रद्युम्नस्य प्रतिष्ठापयितुं विभुम् ॥ अहं चापि गमिष्यामि यूयं तत्र प्रयात वै ॥ ७३ ॥ इन्द्रद्युम्नोऽग्रतो यातु प्रतिष्ठावस्तुसंभृतो ॥ सहायास्तत्र भवत यूयं क्षीणाधिकारिणः ॥ ७४ ॥ मन्वन्तरं व्यतीतं वै प्रथमं सांप्रतं सुराः ॥ इन्द्रद्युम्नेन सहितास्तत्र गत्वा सुरोत्तमाः ॥ ७५ ॥ प्रासादप्रतिमानां च विधर्ता स्वाम्यमस्य वै ॥ तस्मात्संभृतसंभारः ससहायोऽधुना ह्यसौ ॥ ७६ ॥ अस्य संततिसंबन्धस्मरणादपि भूतले ॥ मदाज्ञया पद्मनिधिः सह यास्यति भूतलम् ॥ ७७ ॥ प्रतिष्ठायै भगवतः संयतौ सर्ववस्तुनः ॥ इन्द्रद्युम्नोऽपि हृष्टात्मा दृष्ट्वा ब्राह्मीं श्रियं द्विजाः ॥ ७८ ॥ महदाश्चर्यसंपन्नः प्रणिपत्य जगद्गुरुम् ॥ तदाज्ञां शिरसा धृत्वा देवैः क्षीणाधिकारिभिः ॥ ७९ ॥ आजगाम भुवं विप्रा विधिना चानुमोदिताः ॥ ८० ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे पुरुषोत्तमक्षेत्रमाहात्म्ये जैमिनिऋषिसंवादे त्रयोविंशोऽध्यायः ॥ २३ ॥ ॥ जैमिनिरुवाच ॥ ॥ आगत्य च जगन्नाथं चिरादुत्कंठमानसः ॥ दंडवत्प्रणनामासौ घनरोमांचकंचुकः ॥ १ ॥ नमो ब्रह्मण्यदेवाय गोब्राह्मणहिताय च ॥ प्रणतार्तिविनाशाय चतुर्वर्गैकहेतवे ॥ २ ॥ हिरण्यगर्भपुरुषप्रधानव्यक्तरूपिणे ॥ ॐ नमो वासुदेवाय शुद्धज्ञानस्वरूपिणे ॥ ३ ॥ इत्युच्चरन्स्तुतिं भूपः सानंदाश्रुविलोचनः ॥ प्रदक्षिणं पुनः कुर्वन्ननाम च पुनःपुनः ॥ ४ ॥ ततोऽन्या देवता या वै तत्रागच्छन्मुदान्विताः ॥ तुष्टुवुः प्रणता देवं कृतांजलिपुटा मुदा ॥ ५ ॥ ॥ देवा ऊचुः ॥ ॥ सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् ॥ स भूमिं सर्वतो व्याप्य अध्यतिष्ठद्दशांगुलम् ॥ ॥ ६ ॥ यः पुमान्परमं ब्रह्म परमात्मेति गीयते ॥ भूतं भव्यं भविष्यं च सर्वं पुरुष एव तत् ॥ ७ ॥ एतावानस्य महिमा ज्यायानेष पुमान्प्रभुः ॥ पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि ॥ ८ ॥ छन्दांसि जज्ञिरे त्वत्तस्त्वत्तो यज्ञपुमानपि ॥ त्वत्तोऽश्वाश्च व्यजायंत गावो मेषादयस्तथा ॥ ९ ॥ ब्राह्मणा मुखतो जाता बाहुजाः क्षत्रियास्तव ॥ विशस्तवोरुजा पद्भ्यां तथा शूद्राः समागताः ॥ १० ॥ मनसश्चंद्रमा जातश्चक्षुषस्ते दिवाकरः॥ कर्णाभ्यां श्वसनः प्राणैर्जिह्वाया हव्यवाडपि ॥ ११ ॥ नाभितो गगनं द्यौश्च मूर्ध्नस्ते समवर्त्तत ॥ पादाभ्यां ते धरा जाता दिशश्चाष्टौ श्रुतेर्गताः ॥ १२ ॥ सप्तासन्परिधयस्त्वत्त एकविंशत्समिच्च वै ॥ चराचराः सर्वभावास्त्वत्त एव हि जज्ञिरे ॥ १३ ॥ त्वमेव जगतां नाथस्त्वमेव परिपालकः ॥ उग्ररूपश्च संहर्ता त्वमेव परमेश्वर ॥ १४ ॥ त्वमेव यज्ञो यज्ञांशस्त्वं यज्ञेशः परात्परः ॥ शब्दब्रह्मपरं त्वं हि शब्दब्रह्मासि विश्वराट् ॥ १५ ॥ स्वराट् सम्राड्जगन्नाथ विराडसि जगत्पते ॥ अधश्चोर्ध्वं च तिर्यक्त्वं त्वया व्याप्तं जगन्मय ॥ १६ ॥ प्राप्नुवंति परं स्थानं त्वां यजंतश्च याज्ञिकाः॥

CC-0. In Public Domain. Digitization by eGangotri

भोज्यं भोक्ता हविर्होता हवनं त्वं फलप्रदः ॥ १७ ॥ समस्तकर्मभोक्ता त्वं सर्वकर्मात्मकः प्रभो ॥ सर्वकर्मोपकरणं सर्वकर्मफलप्रदः ॥ १८ ॥
कर्मप्रेरयिता त्वं हि धर्मकामार्थसिद्धिदः ॥ त्वामृते मुक्तिदः कोऽन्यो हृषीकेश नमोऽस्तु ते ॥ १९ ॥ नमोऽस्त्वनन्ताय सहस्रमूर्त्तये सहस्रपादा
क्षिशिरोरुबाहवे ॥ सहस्रनाम्ने पुरुषाय शाश्वते सहस्रकोटीयुगधारिणे नमः ॥ २० ॥ वयं च्युताधिकारास्त्वां प्रपन्नाः शरणं प्रभो ॥ त्राहि नः
पुंडरीकाक्ष अगतीनां गतिर्भव ॥ २१ ॥ संसारपतितस्यैको जन्तोस्त्वं शरणं प्रभो ॥ त्वत्सृष्टौ त्वादृशो नास्ति यो दीनपरिपालकः ॥ २२ ॥
दीनानाथैकशरणं पिता त्वं जगतः प्रभो ॥ पाता पोष्टा त्वमेवेश सर्वापद्विनिवारकः ॥ २३ ॥ त्राहि विष्णो जगन्नाथ त्राहि नः परमेश्वर ॥
त्वामृते कमलाकांत कः शक्तः परिरक्षणे ॥ २४ ॥ अन्तर्यामिन्नमस्तेऽस्तु सर्वतेजोनिधे नमः ॥ २५ ॥ इति स्तुवंतस्ते देवाः प्रणिपत्य पुनःपुनः॥
इंद्रद्युम्नेन सहिता बहिर्भूय द्विजोत्तमाः ॥ २६ ॥ क्षेत्रं श्रीनरसिंहस्य गत्वा तं प्रणिपत्य च ॥ नमस्कृत्य परां भक्तिं कृत्वाभ्यर्च्य नृकेसरिम् ॥
॥२७॥ नीलाचलाद्रेः शिखरं यत्र प्रासाद उत्तमः ॥ ययुस्ते पद्मनिधिना सार्द्धं संभारकारणात् ॥ २८ ॥ ददृशुस्ते महाप्रांशुं व्याप्तं गगनमण्डले ॥
उत्तिष्ठंतं विंध्यगिरिं रोद्धुं भानोर्गतिं किमु ॥ २९ ॥ व्यश्नुवानं दिशः सर्वा विचित्रघटनोज्ज्वलम् ॥ बहुकालव्यतिक्रांतस्वस्तिभंगिविचित्रकम् ॥
॥ ३० ॥ ततश्च चिंतयामास इन्द्रद्युम्नः स वैष्णवः ॥ घटनार्थे मया यातः सत्यलोकमितः पुरा ॥ ३१ ॥ सुचिराद्दृष्टिपथगः पूर्णः प्रासाद
उत्तमः ॥ अनुग्रहाद्धि देवस्य नात्र मानुषपौरुषम् ॥ ३२ ॥ मन्वंतरसमाप्तिः क्व सूर्यचन्द्रेंद्ररोधिका ॥ तथापि तिष्ठते चायं प्रासादो ह्येष दुर्लभः
॥ ३३ ॥ वल्मीकसदृशा ह्येते प्रासादा मानुषैः कृताः ॥ शीर्यंति रोहणैर्वृक्षैः स्वल्पकालगतायुषः ॥ ३४ ॥ मदनुक्रोशबुद्ध्या तु रक्षितं भवनं
हरेः ॥ ततस्तान्स सहायान्वै जगाद प्रश्रयं वचः ॥ ३५ ॥ जानीत जगदीशस्य प्रासादं कारितं मया ॥ आविर्बभूव भगवान्दारुरूपवपुः
स्वयम् ॥ तदांतरिक्षगा वाणी मामुवाचाशरीरिणी ॥ ३६ ॥ सहस्रपाणिसंमितं नीलाद्रेः शिखरोपरि ॥ प्रासादं कारयस्वेति स्थितये जगदी
शितुः ॥ ३७ ॥ एतत्प्रतिष्ठानविधौ स्वयमत्रागमिष्यति ॥ पद्मयोनिः स्वयं सार्द्धं सिद्धब्रह्मर्षिदैवतैः ॥ ३८ ॥ तदत्र क्रियते को वा संभारो ज्ञायते
कथम् ॥ इत्युक्तवंतं ते प्रोचुर्देवा भग्नाधिकारिणः ॥ ३९ ॥ ॥ देवा ऊचुः ॥ ॥ न जानीमो वयमपि तदस्माकं गुरुर्गुरुः ॥ इदानीं न वशेऽ
स्माकं स हि स्वर्गपरो हितः ॥ ४० ॥ ॥ पद्मनिधिरुवाच ॥ ॥ स्वामिन्विधेरनुज्ञानादागतोऽस्मि त्वया सह ॥ कर्त्तव्यं किं मया चात्र किं वा
वस्तु प्रतीक्ष्यते ॥ ४१ ॥ ॥ जैमिनिरुवाच ॥ ॥ इति ह्यालप्यमानानां नारदः पुरतः स्थितः ॥ ब्रह्मणा प्रेषितः पूर्वं सर्वशास्त्रविशारदः ॥ ४२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सर्वसंभारवस्तूनि यथाशास्त्रं मुने कुरु ॥ संपादयिष्यति तव शासनात्पद्मको निधिः ॥ ४३ ॥ तं दृष्ट्वा ते मुदा युक्ता उत्तस्थुर्ब्रह्मणः सुतम् ॥ षडर्घ्यपूजया तस्य पूजां चक्रे नृपोत्तमः ॥ ४४ ॥ प्रणेमुस्तेऽपि तं देवा मनुष्याकारधारिणः ॥ ऊचे तामिंद्रद्युम्नोऽपि प्रतिष्ठाविधिवस्तुनि ॥ ॥ ४५ ॥ नाहं वेद्मि मुनिश्रेष्ठ चिरात्त्यक्तः पुरोधसा ॥ आदेशय क्रमाद्ब्रह्मन्संपाद्यं यद्यदेव हि ॥ ४६ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे पुरुषोत्तमक्षेत्रमाहात्म्ये जैमिनिऋषिसंवादे चतुर्विंशोऽध्यायः ॥ २४ ॥ ॥ जैमिनिरुवाच ॥ ॥ इत्युक्ते नारदः सोऽथ यथाशास्त्रं विचार्य वै ॥ आलेख्य क्रमशः पत्रे राज्ञे तस्मै न्यवेदयत् ॥ १ ॥ राजापि पत्रं तच्छ्रुत्वा सोऽवधार्य पुनःपुनः ॥ प्रददौ पद्मनिधये लिखितान्यत्र यानि वै ॥ २ ॥ संपादय पद्मनिधे शालां स्वर्णमयीं कुरु ॥ ब्रह्मणः सदनं दिव्यं ब्रह्मर्षीणां च निर्मलम् ॥ ३ ॥ इंद्रादीनां सुराणां च सिद्धानां मर्त्यवासिनाम् ॥ मुनींद्राणां निवासाय राज्ञां पातालवासिनाम् ॥ ४ ॥ तथा च नागराजानां निधे त्रैलोक्यवासिनाम् ॥ यथायोग्यासनैर्युक्तं गृहं गृहमतंद्रितः ॥ ५ ॥ कारयाशु निधे द्रव्यसंभारं यावदेव तु ॥ विश्वकर्मापि च तव साहाय्यं रचयिष्यति ॥ ६ ॥ इत्यादिशंतं स मुनिरिंद्रद्युम्नमुवाच वै ॥ संभारान्पृथगेतद्धि कर्त्तव्यं व्यवधानतः ॥ ७ ॥ स्वर्णैः सुघटितं साधुरथत्रयमलंकृतम् ॥ दुकूलरत्नमालाद्यैर्बहुमूल्यैर्दृढं महत् ॥ ८ ॥ श्रीवासुदेवस्य रथो गरुडध्वजचिह्नितः ॥ पद्मध्वजः सुभद्राया रथमूर्द्धनि धार्यताम् ॥ ९ ॥ रथः षोडशचक्रस्तु विष्णोः कार्यः प्रयत्नतः ॥ चतुर्दश बलस्यैव सुभद्रायास्तु द्वादश ॥ १० ॥ हस्तषोडशविस्तारो रथश्चक्रधरस्य तु ॥ चतुर्दश बलस्यैव सुभद्रायास्तु द्वादश ॥ ११ ॥ आसनं जगतां भूयः स्वयं स्वासनविग्रहः ॥ तद्याने जगतां नाशस्ततो यानं न विद्यते ॥ १२ ॥ पश्येच्चराचरं विश्वं ज्ञानादश सुनिर्मले ॥ स्थितो हस्ततले नित्यं निर्मलस्तस्य दर्पणः ॥ १३ ॥ तलस्थत्वादसौ तालः सदा तेनांकितः प्रभुः ॥ ततः स एव शेषस्य बलभद्रावतारिणः ॥ १४ ॥ अथवा सीरिणः कार्यं सीरमेव ध्वजोत्तमम् ॥ ध्वजः सुनिर्मलः कार्यस्तस्मात्तालध्वजो मतः ॥ १५ ॥ न वासितव्यो देवोऽसावप्रतिष्ठे रथे नृप ॥ प्रासादे मंडपे वापि पुरे तन्निष्फलं भवेत् ॥ १६ ॥ तस्मात्प्रतिष्ठा प्रथमं हरेः कार्या रथस्य वै ॥ संभारः क्रियतां तस्य ह्यनुष्ठेया मया तु सा ॥ १७ ॥ इत्याज्ञां मत्पितुर्लब्ध्वा शीघ्रमायाम्यहं नृप ॥ तस्य तद्वचनं श्रुत्वा घटितं स्यंदनत्रयम् ॥ १८ ॥ निधिसंपादितैर्द्रव्यैरेकाह्नाद्विश्वकर्मणा ॥ स्वक्षं सुचक्रं सुस्तंभं सुविस्तीर्णं सुतोरणम् ॥ १९ ॥ सुध्वजं सुपताकं च नानाचित्रमनोहरम् ॥ विचित्रबंधमिथुनपुत्तलीवलयान्वितम् ॥ २० ॥ अर्द्धहाटकनिर्व्यूढं साक्षाद्रविरथोपमम् ॥ मेघगंभीरनिर्घोषं दृष्ट्वा कर्षगुणैर्युतम् ॥ वातरंहोहयैर्युक्तं शतसंख्यैः सितप्रभैः ॥ २१ ॥

CC-0. In Public Domain. Digitization by eGangotri

यथाशास्त्रविधानेन नारदेन प्रतिष्ठितम् ॥ सुलग्ने सुमुहूर्त्ते च सुतिथौ ज्योतिषोदिते ॥ २२ ॥ ॥ मुनय ऊचुः ॥ ॥ भगवञ्जैमिने ब्रूहि सर्वज्ञोसि
मतो हि नः ॥२३॥ विधिना केन हि रथः प्रतिष्ठाप्यो हरेरयम् ॥ यथावद्वद नो येन जानीमो विधिविस्तरम् ॥ २४ ॥ ॥ जैमिनिरुवाच ॥ ॥ यथा
प्रतिष्ठितं तेन नारदेन महात्मना ॥ तद्वो वदिष्यामि विधिं यथा दृष्टं पुरा मया ॥ २५ ॥ रथस्येशानदिग्भागे शालां कृत्वा सुशोभनाम् ॥ तन्मध्ये
मण्डपं कृत्वा वेदिं तत्र सुनिर्मलाम् ॥२६॥ चतुरस्रां चतुर्हस्तमितां हस्तोच्छ्रितां द्विजाः ॥ प्रतिष्ठापूर्वदिवसे रात्रावुत्तरतः शुभे ॥२७॥ मुहूर्ते स्वस्ति
वाच्याथ कारयेदंकुरार्पणम् ॥ द्वात्रिंशद्देवताभ्यश्च बलिं दत्त्वा यथाविधि ॥२८॥ प्रातस्ततो वेदिकायां मध्ये मण्डलमालिखेत् ॥ पद्मं वा स्वस्तिकं
वापि कुम्भं तत्र निधापयेत् ॥ २९ ॥ पञ्चद्रुमकषायं च तन्मध्ये पूरयेत्सुधीः ॥ गंगादिपुण्यतोयानि पल्लवान्स समृत्तिकाः ॥ ३० ॥ सर्वगंधा
न्पञ्चरत्नसर्वौषधिगणं तथा ॥ पूरयित्वा विधानेन आचार्यः प्राङ्मुखः शुचिः ॥ ३१ ॥ विष्णुं स्मरन्पंचगव्यं पश्चादपि प्रपूरयेत् ॥ दुकूलवेष्टितं
कण्ठे माल्यैर्गंधैः सुशोभनैः ॥ ३२ ॥ फलपल्लवसंयुक्तं कृतकौतुकमंगलम् ॥ पूरयेत्तत्र देवेशं नरसिंहमनामयम् ॥ ३३ ॥ मंत्रराजेन विधिवदुप
चारैस्तथांतरैः ॥ प्रार्थयित्वा प्रसादाय तस्मिन्नावाह्य तं हरिम् ॥ ३४ ॥ बाह्योपचारैर्विविधैः पूजयेद्विधिवद्द्विजाः ॥ वायव्यां तस्य कुम्भस्य समि
दाज्यचरुं तथा ॥ ३५ ॥ अष्टोत्तरसहस्रं च जुहुयाद्विधिवद्गुरुः ॥ संपातान्प्रापयेत्तत्र कुम्भमध्ये तदन्ततः ॥ ३६ ॥ रथं सुशोभनं कृत्वा पताकागंध
माल्यकैः ॥ सर्वांगं सेचयेत्तस्य गंधचन्दनवारिभिः ॥ ३७ ॥ धूपयेत्कालागुरुणा शंखकाहालनिस्वनैः ॥ ध्वजे तस्य नृसिंहस्य प्रतिष्ठाप्य समी
रणम् ॥ ३८ ॥ पूजयित्वा विधानेन रक्तस्रग्गंधमाल्यकैः ॥ इमं मंत्रं समुच्चार्य सुपर्णं प्रार्थयेत्ततः ॥ ३९ ॥ यो विश्वप्राणहेतुस्तनुरपि च हरेर्यानकेतु
स्वरूपो यं संचिंत्यैव सद्यः स्वयमुरगवधूवर्गगर्भाः पतंति ॥ चंचच्चण्डोरुतुंडत्रुटितफणिवसारक्तपंकांकितास्यं वन्दे छन्दोमयं तं खगपतिममलं
स्वर्णवर्णं सुपर्णम् ॥ ४० ॥ ब्रह्मघोषैः शंखनादैर्नानावाद्यसुविस्तरैः ॥ रथमूर्ध्नि स्थापयेत्तं चारुसूक्तं समुच्चरन् ॥ ४१ ॥ तस्योपरिष्टात्तं कुम्भं समंता
त्प्लावयन्नथम् ॥ त्रिरुच्चरन्मंत्रराजं सेचयेद्ब्रह्मणा सह ॥ ४२ ॥ ततः पूर्णाहुतिं दत्त्वा ब्रह्मणे दक्षिणां ददेत् ॥ आचार्यं दक्षिणां दद्याद्येन तुष्यति
तद्गुरुः ॥ ४३ ॥ ब्राह्मणान्भोजयेदन्ते पायसैर्मधुसर्पिषा ॥ द्वादशाक्षरमंत्रेण बलभद्रस्य कारयेत् ॥ ४४ ॥ लांगलं च पविरवन्मंत्रः स्याल्लांगल
ध्वजे ॥ अथवाद्विषड्वर्णोपि मूलमन्त्रः प्रकीर्तितः ॥ ४५ ॥ लक्ष्मीसूक्तेन भद्रायाः प्रतिष्ठाप्यो रथस्तथा ॥ नाभिह्रदान्मुरारेस्त्वं ब्रह्मांडावलि
रूपधृक् ॥ ४६ ॥ आसनं चतुरास्यस्य श्रियो वास स्थिरो भव ॥ इमं मन्त्रं समुच्चार्य ध्वजपद्मं समुच्छ्रयेत् ॥ ४७ ॥ इयान्विशेषो हविषा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्रयाणां च पृथक्पृथक् ॥ पंचपंचभिर्होतव्यमेकैकं तु विभागशः ॥ ४८ ॥ इत्थं रथान्प्रतिष्ठाप्य सुवर्णं गां च वस्त्रकम् ॥ धान्यं च दक्षिणां दद्यात्सम्यग्देवस्य भक्तितः ॥ ४९ ॥ एवं प्रतिष्ठिते तत्र स्यंदनेऽथ सुभूषिते ॥ आरोप्य देवं विधिवद्ब्रह्मघोषपुरःसरम् ॥ ५० ॥ जयमंगलशब्दैश्च नानावाद्यपुरःसरैः ॥ चामरांदोलनैर्धूपैः पुष्पवृष्टिभिरेव च ॥ ५१ ॥ ब्राह्मणैः क्षत्रियैर्वैश्यैर्नीयते स्म रथं प्रति ॥ हयैः सुलक्षणैर्दांतैर्बलीवर्दैरथापि वा ॥ ५२ ॥ पुरुषैर्विष्णुभक्तैर्वा नेतव्या ह्यप्रमादतः ॥ प्रीणयित्वा जनं सर्वं भक्ष्यभोज्यादिलेपनैः ॥ ५३ ॥ रथस्योपरि देवेभ्यो बलिमन्त्रेण भो द्विजाः ॥ बलिं गृह्णन्तु भो देवा आदित्या वसवस्तथा ॥ ५४ ॥ मरुतश्चाश्विनौ रुद्राः सुपर्णाः पन्नगा ग्रहाः ॥ असुरा यातुधानाश्च रथस्थाश्चैव देवताः ॥ ५५ ॥ दिक्पाला लोकपालाश्च ये च विघ्नविनायकाः ॥ जगतः स्वस्ति कुर्वंतु दिव्या महर्षयस्तथा ॥ ५६ ॥ अविघ्नमाचरंत्वेते मा संतु परिपंथिनः ॥ सौम्या भवंतु तृप्ताश्च दैत्या भूतगणास्तथा ॥ ५७ ॥ ततस्तु नीयते देवः समभूमौ समुच्चरन् ॥ मंत्रं वैष्णवगायत्रीं विष्णोः सूक्तं पवित्रकम् ॥ ५८ ॥ वामदेव्यैः पवित्रैश्च मानस्तोक्यै रथंतरैः ॥ ततः पुण्याहघोषेण कृतवादित्रनिःस्वनम् ॥ ५९ ॥ शनैः शनैरथो नेयो रथः स्नेहात्तु चक्रिणः ॥ तत्रोत्पातान्प्रवक्ष्यामि रथेत्र द्विजसत्तमाः ॥ ६० ॥ ईषाभंगे द्विजभयं भग्नेऽक्षे क्षत्रियक्षयः ॥ तुलाभंगे वैश्यनाशः शम्या शूद्रभयं भवेत् ॥६१॥ धुराभंगे त्वनावृष्टिः पीठभंगे प्रजाभयम् ॥ परचक्रागमं विद्याच्चक्रभंगे रथस्य तु ॥ ६२ ॥ ध्वजस्य पतने विप्रा नृपोऽन्यो जायते ध्रुवम् ॥ प्रतिमाभंगतायां तु राज्ञो मरणमादिशेत् ॥ ६३ ॥ पर्यस्ते तु रथे विप्राः सर्वजानपदक्षयः ॥ उत्पन्नेष्वेवमाद्येषु उत्पातेष्वशुभेषु च ॥६४॥ बलिकर्म पुनः कुर्याच्छांतिहोमं तथैव च ॥ ब्राह्मणान्भोजयेद्भूयो दद्याद्दानानि चैव हि ॥ ६५ ॥ पूर्वोत्तरे च दिग्भागे रथस्याग्निं प्रकल्पयेत् ॥ समिद्भिर्घृतमध्वाज्यमूलाग्राभिश्च होमयेत् ॥ ६६ ॥ पालाशाभिर्द्विजश्रेष्ठा मंत्रराजेन दीक्षितः ॥ सोमायाग्नये प्रजाभ्यः प्रजानां पतये तथा ॥ ६७ ॥ ग्रहेभ्यश्च ब्रह्मणे च दिक्पालेभ्यस्तदंततः ॥ यत्र यत्र रथे दोषास्तत्र तत्र च दीक्षितः ॥ ६८ ॥ जुहुयात्प्रतिष्ठामंत्रेण विशेषः सर्वतो भवेत् ॥ ब्राह्मणैः सहितः कुर्याद्धोमांते शांतिवाचनम् ॥६९॥ स्वस्ति भवतु विप्रेभ्यः स्वस्ति राज्ञेऽस्तु नित्यशः ॥ गोभ्यः स्वस्ति प्रजाभ्यस्तु जगतः शांतिरस्तु वै ॥ ७० ॥ स्वस्त्यस्तु द्विपदे नित्यं शांतिरस्तु चतुष्पदे ॥ शं प्रजाभ्यस्तथैवास्तु शं तथात्मनि चास्तु नः ॥७१॥ शांतिरस्तु च देवस्य भूर्भुवः स्वः शिवं तथा ॥ शांतिरस्तु शिवं चास्तु सर्वतः स्वस्तिरस्तु नः ॥ ७२ ॥ त्वं देव जगतः स्रष्टा पोष्टा चैव त्वमेव हि ॥ प्रजाः पालय देवेश

CC-0. In Public Domain. Digitization by eGangotri

शांतिं कुरु जगत्पते ॥७३॥ यात्राकारणभूतस्य पुरुषस्य च भूपते ॥ दुष्टान्ग्रहांस्तु विज्ञाय ग्रहशांतिं समाचरेत् ॥ ७४ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे पुरुषोत्तमक्षेत्रमाहात्म्ये पञ्चविंशोऽध्यायः ॥ २५ ॥ ॥ जैमिनिरुवाच ॥ ॥ निरुत्पातं स मे देशे विधिवर्त्तनयापि च ॥ प्रासादनिकटं देवाः प्रापिताः सुमुहूर्त्तके ॥ १ ॥ ततः शालासुमहती रत्नवर्णविनिर्मिता ॥ निदेशादिंद्रद्युम्नस्य निर्मिता विश्वकर्मणा ॥ २ ॥ सभार्चनायां वस्तूनि हवींषि च समित्कुशाः ॥ भोज्यं नानाविधं गीतनृत्यांश्च विविधांस्तथा ॥ ३ ॥ साम्राज्ये यादृशी पूर्वं संपत्तिरभवत्क्षितौ ॥ ततः श्रेष्ठतरा विप्राः प्रतिष्ठायां बभूव ह ॥ ४ ॥ गालोनाम महीपालस्तदा क्षितितलेऽभवत् ॥ सोप्यत्र प्रतिमां कृत्वा माधवाख्यां दृषन्मयीम् ॥ ५ ॥ स्थापयित्वात्र प्रासादे पूजयामास ऋद्धिमत् ॥ कनीयांसं च प्रासादं निर्माय नृपसत्तमः ॥ ६ ॥ तत्र तां स्थापयामास ततो निष्कृष्य सादरम् ॥ ततोऽस्य नृपतिर्दूतमुखाच्छ्रुत्वास्य कर्म तत् ॥ ७ ॥ गालोऽभ्यागात्ससैन्यः सन्क्रुद्धस्तं नीलपर्वतम् ॥ दृष्ट्वा प्रतिष्ठासंभारं मर्त्यैः स्वप्नेऽपि दुर्लभम् ॥ ८ ॥ विस्मयाविष्टचेताः स तस्थौ गालो नराधिपः ॥ किमेतदिति वृत्तान्तं को वा कारयतीदृशम् ॥ ॥ ९ ॥ यत्नादिव्यं स विज्ञाय इन्द्रद्युम्नं नराधिपम् ॥ ब्रह्मलोकादागतं तं कर्त्तारं देववेश्मनः ॥ १० ॥ प्रतिष्ठापयितुं देवैः सार्द्धं संभारकारकम् ॥ सहितं पद्मनिधिना गुरुणा नारदेन च ॥ ११ ॥ ब्रह्माणं चागमिष्यन्तं प्रतिष्ठायै सुरोत्तमम् ॥ श्रुत्वा सर्वं च वृत्तान्तं तद्राजा दिव्यचेष्टितम् ॥ ॥ १२ ॥ मेने कृतार्थमात्मानं तद्राज्ये परमाद्भुतम् ॥ इतः श्रेयस्करं कर्म न भूतं न भविष्यति ॥ १३ ॥ तदस्य निकटे स्थित्वा ज्ञात्वा कर्मक्रमं विधिम् ॥ उत्सवांश्चापि विज्ञाय करिष्ये प्रतिवत्सरम् ॥ १४ ॥ अमुं दारुमयं साक्षाद्ब्रह्मरूपं जनार्दनम् ॥ अभाग्योपचयादेतावंतं कालं न जानता ॥ १५ ॥ असेव्यमानेन कृतं जन्मैव विफलं मया ॥ तदेनमिंद्रद्युम्नं वै प्रणिपत्य जगद्गुरुम् ॥ १६ ॥ महाभागवतश्रेष्ठं ब्रह्मलोकादिहागतम् ॥ उपेत्य शरणं साक्षाद्दृष्ट्वा नारायणं विभुम् ॥ १७ ॥ प्रतिष्ठितं वै प्रासादे मुक्तिमेष्यामि निश्चयम् ॥ वैकुण्ठं स प्रतिष्ठाप्य मय्येवारोपयिष्यति ॥ १८ ॥ ब्रह्मलोकं गतो यो वै किं क्षितौ सोऽवतिष्ठते ॥ उपचारान्समादिश्य कोषं संभृत्य च प्रभोः॥ ॥ १९ ॥ ब्रह्मणा सहितोऽवश्यं पुनर्यास्यति तत्क्षयम् ॥ विचार्य मंत्रिभिः सार्द्धं ततो गालोऽपि वैष्णवः ॥ २० ॥ इन्द्रद्युम्नस्य निकटं विनीतः प्रययौ मुदा ॥ गत्वा तं दूरतो दृष्ट्वा प्रणिपातपुरःसरम् ॥ २१ ॥ बद्धांजलिपुटो राजा मूर्ध्नि वीक्षन्ससाध्वसम् ॥ शनैः शनैर्ययौ तस्य निकटं गालपार्थिवः ॥ २२ ॥ देव त्वं राजराजोऽसि मर्त्योऽसि ब्रह्मलोकगः ॥ किं स्तौमि नृपकीटोऽहं त्वां जीवन्मुक्तमीश्वरम् ॥ २३ ॥ अज्ञा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्वा महिमानं ते सचिवैर्मंत्रयन्मुहुः ॥ योद्धुमभ्यागतो देव दृष्ट्वा ते पौरुषं महत् ॥ २४ ॥ अतिमानुषमाश्चर्यं पदं चापि शचीपतेः ॥ दृष्टं
तन्निश्चितं देव ब्रह्मलोकागतस्य हि ॥ २५ ॥ ईदृशं हि महत्कर्म यदाज्ञाकृन्महानिधिः ॥ चेतः प्रसादप्रवणं मयि धेहि सुरोत्तम ॥ २६ ॥ त्रैलोक्य
वासिनो देवा यदाज्ञावशवर्तिनः ॥ २७ ॥ ॥ जैमिनिरुवाच ॥ ॥ इत्थं विज्ञापयंतं तं गालं नृपतिकुंजरम् ॥ स्मयमान उवाचेदं राजन्किं बहु
भाषसे ॥ २८ ॥ भवानपि हरेर्भक्तः सार्वभौमो महीपतिः ॥ सामान्यमेतद्राज्ञा वै भूस्वाम्यं भुवि वर्त्तताम् ॥ २९ ॥ सांप्रतं हि भवानत्र पृथिव्यामे
कपार्थिवः ॥ नृपायत्ताः क्रियाः सर्वा मर्त्यानां मरुतामपि॥३०॥अष्टदिक्पालकांशैस्तु ब्रह्मणा निर्मितो नृपः॥ न ह्यल्पपुण्यकृद्राजा प्रजापालनतत्पर
॥ ३१ ॥ इह कीर्तिं च धर्मं च यत्र गच्छन्सुवर्त्मनि ॥ प्राप्नोति राजशार्दूल विशेषात्त्वं तु वैष्णवः ॥३२॥ प्रासादे स्थापयेद्यस्तु हरेरर्चां विधानतः॥
न देहबन्धमाप्नोति याति विष्णोः परं पदम् ॥३३॥ माधवप्रतिमामेतां दारवीं शुभलक्षणाम् ॥ साक्षान्मुक्तिप्रदां भूप स्वयं स्थापितवानसि ॥३४॥
निर्विघ्नं कर्म ते जातं मम मन्वंतरं गतम् ॥ भवेद्वा संशयो मेऽत्र न स्वतंत्रश्चतुर्मुखः ॥ ३५ ॥ प्रतिष्ठायै प्रार्थितोऽयं तदन्यः स्थापयेत्कथम् ॥
साक्षाद्दार्ववतारस्य प्रासादस्य नृपोत्तम ॥ ३६ ॥ संनिधानेन चेदत्र विधातानुग्रहिष्यति ॥ तदेनं स्थापयित्वा तु चतूरूपं जनार्दनम् ॥ ३७ ॥
समर्प्य त्वां गमिष्यामि त्वमेवोपचरिष्यसि ॥ नित्योपहारं यात्राश्च उत्सवांश्च जगत्पतेः ॥ ३८ ॥ यानेवोपदिशेद्देवः स्वयं वा प्रपितामहः ॥ तांस्ता
न्प्रयत्नात्कुर्वीत राजा वै धर्मपालकः ॥ ३९ ॥ ततः स गालो नृपतिः श्रुत्वाः ताच्चिंतितं स्वयम् ॥ इन्द्रद्युम्नादिष्टमेतदिति प्राप परां मुदम् ॥ ४० ॥
तस्थौ तस्यांतिके गाल आज्ञाकार इव स्वयम् ॥ तत्तदाशु करोत्येष इन्द्रद्युम्नो यदादिशत् ॥ ४१ ॥ एवं संभृतसंभारः सिंहासनगतः प्रभुः ॥ देवैः
परिवृतश्चेंद्रद्युम्नः शक्र इवाबभौ ॥ ४२ ॥ ततोऽश्रूयंत निनदा दिव्यदुंदुभिजाः शुभाः ॥ मृदंगवेणुवीणादितालकाहालनिःस्वनाः ॥ ४३ ॥
ऐरावतादिकरिणां बृंहितानि बहूनि खे ॥ समंताज्जयशब्दाश्च पुष्पवृष्टिविमिश्रिताः ॥ ४४ ॥ आकाशगंगासलिलकणा मन्दारमिश्रिताः ॥ दिव्य
स्रग्लेपधूपानां गन्धा दिग्व्यापिनस्तथा ॥ वैमानिकानां देवानां किंकिणीजालनिःस्वनाः ॥ ४५ ॥ ततश्च तेजसां राशी रोदसीमध्यपूरकः ॥
आविरासीत्क्षितिगतनयनाच्छादको द्विजाः ॥ ४६ ॥ उत्तोलिताक्षिमालाभिः प्रजाभिर्वीक्षितः पुरः ॥ ततः क्रमात्संददृशे विमानाग्र्यं प्रजापतेः ॥
॥ ४७ ॥ स्वर्णहंसशतैः स्कंधेनोह्यमानः समंततः ॥ दिक्पालैश्चामरव्यग्रहस्तैरासेवितः पुरः ॥ ४८ ॥ जाह्नवीयमुनानीरप्रकीर्णककरे
ऽभितः ॥ पार्श्वयोश्चन्द्रसूर्याभ्यामुभाभ्यामातपत्रके ॥ ४९ ॥ धार्यमाणे शनैर्वायोर्गतिचंचलचोलके ॥ ब्रह्मर्षिभिर्गौतमाद्यैः स्तूयमानो

CC-0. In Public Domain. Digitization by eGangotri

रहस्यकैः ॥ ५० ॥ तन्मध्यस्थः प्रजानाथ इंद्रद्युम्नादिभिः स्तुतः ॥ आलुलोके देवगणैर्जयशब्दैरभिष्टुतः ॥ ५१ ॥ रंभादिकाभिर्वेश्या
भिर्नृत्यते स्म ससाध्वसम् ॥ हाहाहूहूप्रभृतिभिर्गीयमानश्च गायकैः ॥ ५२ ॥ सिद्धविद्याधरगणैः सादरं चोपवीणितः ॥ कृतांजलिपुटै
र्दूरात्तपस्विभिरुपासितः ॥ ५३ ॥ सावित्रीशारदे तस्य वाक्प्रबंधैर्विचित्रकैः ॥ तोषमासादयंत्यौ च कोऽन्यस्तत्तोषणे क्षमः ॥ ५४ ॥ जाह्नवीय
मुनानीरप्रकीर्णितकलेवरः ॥ ये च गंधर्वसिद्धाद्या नारदप्रमुखा द्विजाः ॥ ५५ ॥ वेत्रहस्ताः सविनया दिव्यसोपानदर्शनाः ॥ संमर्दः स महाना
सीद्देवानां दिवि गच्छताम् ॥ ५६ ॥ न कोऽपि गण्यते देवः को वा केन पथा व्रजेत् ॥ अहंपूर्विकया तेषां व्रजतां त्रिदिवौकसाम् ॥ ५७ ॥ संम
र्दातिशयात्तेषां विभ्रंशोऽभूत्स्ववाहनैः ॥ स्रष्टा पाता च संहर्त्ता जगतां यो जगन्मयः ॥ ५८ ॥ साक्षाद्व्रजति तत्रैषां सुराणां महिमा कुतः ॥ तं
दृष्ट्वा साध्वसान्नम्रो भक्त्या बद्धांजलिर्नृपः ॥ ५९ ॥ तैर्देवैर्गालराजेन नारदप्रमुखेन च ॥ सहितो धरणीं प्रायात्साष्टांगं प्रणिपत्य च ॥ ६० ॥
उत्थाय परया भक्त्या प्रहृष्टेनांतरात्मना ॥ पुलकांकितसर्वांगं स्वं मन्वानः कृतार्थकम् ॥ ६१ ॥ पुरतो जगदीशस्य पश्यञ्छुद्धं पितामहम् ॥
कृतांजलिपुटो राजा ममज्जानंदसागरे ॥ ६२ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे पुरुषोत्तमक्षेत्रमाहा
त्म्ये जैमिनिऋषिसंवादे षड्विंशोऽध्यायः ॥ २६ ॥ ॥ जैमिनिरुवाच ॥ ॥ अथांतरिक्षान्निःश्रेणी रत्नकांचननिर्मिता ॥ संलग्ना पादसंपीठे
पद्मयोनेर्विमानगा ॥ १ ॥ सा क्षितिस्पृष्टमूला वै विधातुरवरोहणे ॥ चतुर्व्यायामतापीनसोपानश्रेणिसंयुता ॥ २ ॥ रथप्रासादयोर्मध्ये शक्रचाप
इवांशुमान् ॥ आविर्बभूव सहसा साद्भुतं वीक्षितो जनैः ॥ ३ ॥ ततो गंधर्वराजैस्तु रत्नवेत्रकरैर्द्विजाः ॥ एष पंथाः प्रभो ह्येहि इत्यादेशितमार्गकैः ॥
॥ ४ ॥ दुर्वाससो नारदस्य करयोर्दत्तहस्तकः ॥ सोपानैरवतीर्णोऽथ पुनानश्चक्षुषा जगत् ॥ ५ ॥ स्मयमानो रथान्दृष्ट्वा प्रासादं समलंकृतम् ॥
दिगंतव्यापिनीं शालां रत्नस्तंभोपशोभिताम् ॥ ६ ॥ शक्रस्याप्यद्भुतकरीं सर्वसंभारसंभृताम् ॥ अवातरद्विमानात्स देवब्रह्मर्षिराजभिः ॥ ७ ॥ किरी
टदत्तांजलिभिः स्तूयमानः समंततः ॥ कटाक्षेणानुगृह्णाति यां दिशं स पितामहः ॥ ८ ॥ तत्रांजलीनां संमर्दाः कोटयः शिरसा धृताः ॥ पादाब्ज
प्रणतं दृष्ट्वा इंद्रद्युम्नं प्रजापतिः ॥ ९ ॥ उवाच प्रश्रयगिरा स्मितभिन्नोष्ठसंपुटः ॥ अंगुल्या निर्दिशन्देवान्पितॄन्ब्रह्मर्षितापसान् ॥
॥ १० ॥ सिद्धविद्याधरान्यक्षगंधर्वाप्सरसस्तथा ॥ एकत्र मिलितान्सर्वान्युगपन्मोदनिर्भरान् ॥ ११ ॥ पश्येंद्रद्युम्न भाग्यं ते सर्वलोकवशी
करम् ॥ त्वदर्थमेकदा सर्वे मां पुरस्कृत्य संगताः ॥ १२ ॥ इत्युक्त्वा प्रययौ शीघ्रं नारायणरथं ततः ॥ प्रणिपत्य जगन्नाथं त्रिः परीत्य पिता

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

महः ॥ १३ ॥ आनंदसिंधुसंमग्नः सरोमांचवपुः स्वयम् ॥ स्वमात्मानं तुनावाथ प्रत्यक्षं स्वरगद्गदम् ॥ १४ ॥ ॥ ब्रह्मोवाच ॥ ॥ नमस्तुभ्यं नमो मह्यं तुभ्यं मह्यं नमोनमः ॥ अहं त्वं त्वमहं सर्वं जगदेतच्चराचरम् ॥ १५ ॥ महदादि जगत्सर्वं मायाविलसितं तव ॥ अध्यस्तं त्वयि विश्वात्मं स्त्वयैव परिणामितम् ॥ १६ ॥ यदेतदखिलाभासं तत्त्वदज्ञानसंभवम् ॥ ज्ञाते त्वयि विलीयेत रज्जुसर्पादिबोधवत् ॥ १७ ॥ अनिर्वक्तव्यमेवेदं सत्त्वात्सत्त्वविवेकतः ॥ अद्वितीय जगद्वास स्वप्रकाश नमोऽस्तु ते ॥ १८ ॥ विषयानंदमखिलं सहजानंदरूपिणः ॥ अंशं तवोपजीवंति येन जीवंति जंतवः ॥ १९ ॥ निष्प्रपंच निराकार निर्विकार निराश्रय ॥ स्थूलसूक्ष्माणुमहिमन्स्थौल्यसूक्ष्मविवर्जित ॥ २० ॥ गुणातीत गुणाधार त्रिगुणात्मन्नमोऽस्तु ते ॥ २१ ॥ त्वन्मायया मोहितोऽहं सृष्टिमात्रपरायणः ॥ अद्यापि न लभे शर्म अंतर्यामिन्नमोस्तु ते ॥ २२ ॥ त्वन्नाभिपंकजाज्जातो नित्यं तत्रैव संस्तुवन् ॥ नातिक्रमितुमीशोऽस्मि मायां ते कोऽन्य ईश्वरः ॥ २३ ॥ अहं यथांडमध्येऽस्मिन्नचितः सृष्टि कर्मणि ॥ तथानुलोमकलिता ब्रह्मांडे ब्रह्मकोटयः ॥ २४ ॥ सार्द्धत्रिकोटिसंख्यानां विरिंचीनामपि प्रभो ॥ नैकोऽपि तत्त्वतो वेत्ति यथाहं त्वत्पुरः स्थितः ॥ २५ ॥ नमोचिंत्यमहिम्ने ते चिद्रूपाय नमो नमः ॥ नमो देवाधिदेवाय देवदेवाय ते नमः ॥ २६ ॥ दिव्यादिव्यस्वरूपाय दिव्य रूपाय ते नमः ॥ जरामृत्युविहीनाय मृत्युरूपाय ते नमः ॥ २७ ॥ ज्वलदग्निस्वरूपाय मृत्योरपि च मृत्यवे ॥ प्रपन्नमृत्युनशाय सहजानंदरूपिणे ॥ भक्तिप्रियाय जगतां मात्रे पित्रे नमो नमः ॥ २८ ॥ प्रणतार्तिविनाशाय नित्योद्योगिन्नमोऽस्तु ते ॥ नमोनमस्ते दीनानां कृपासहजसिंधवे ॥ २९ ॥ पराय पररूपाय परंपाराय ते नमः ॥ अपारपारभूताय ब्रह्मरूपाय ते नमः ॥ ३० ॥ परमार्थस्वरूपाय नमस्ते परहेतवे ॥ परंपरापरिव्याप्तपरतत्त्वपराय ते ॥ ३१ ॥ प्रणतार्तिविनाशाय नमः स्वात्मैकभानवे ॥ पुरा यत्प्रार्थितं स्वास्मिन्सृष्टिभाराव तारणे ॥ ३२ ॥ तत्कुरुष्व जगन्नाथ सहजानन्दरूपभाक् ॥ त्वयि प्रसन्ने किं नाथ दुर्लभं मयि विद्यते ॥ ३३ ॥ त्वयैवाहं पृथग्लीलाभेदाद्भिन्नः कृपांबुधे ॥ अज्ञानतिमिरच्छन्ने जगत्कारागृहांतरे ॥ ३४ ॥ भ्राम्यन्न द्वारमाप्नोति त्वामृते मुक्तिहेतवे ॥ ३५ ॥ नमोनमस्ते जगदेकवन्द्य सुरासुराभ्यर्चितपादपद्म ॥ नमोनमस्तापहरैकचंद्र नमोनमः शर्मसुबोधसांद्र ॥ ३६ ॥ नमो नमः कल्पकदूरभूत दुष्प्राप्यकामप्रद कल्पवृक्ष ॥ दीनाशरण्यप्रणतैकदुःखसंघोद्धृतौ नित्यसुबद्धपक्ष ॥ ३७ ॥ प्रसीद जगतां नाथ मग्नानां दुःखसागरे ॥ कटाक्षलीलापातेन त्रायस्व करुणाकर ॥ ॥ ३८ ॥ स्तुत्वेत्थं श्रीजगन्नाथं वेदार्थैः स पितामहः ॥ जगाम सीरिणं द्रष्टुमवतीर्णं धराधरम् ॥ ३९ ॥ प्रणम्य परया भक्त्या तुष्टाव बलिनं

CC-0. In Public Domain. Digitization by eGangotri

मुदा ॥ नभः शिरस्ते देवेश आपस्ते विग्रहः प्रभो ॥ ४० ॥ पादौ क्षितिर्मुखं वह्निः श्वसितानि समीरणः ॥ मनस्ते ह्योषधीनाथश्चक्षुषी ते दिवा
करः ॥ ४१ ॥ बाहवः ककुभो नाथ नमस्ते ज्ञानदर्पण ॥ चतुर्दशानां लोकानां मूलस्तंभाय सीरिणे ॥ ४२ ॥ पदांभोजप्रपन्नानां नमः पापौघ
दारिणे ॥ अनन्तवक्त्रनयनश्रोत्रपादाक्षिबाहवे ॥ ४३ ॥ नमोनादिमहामूलतमःस्तोमौघभानवे ॥ त्रयीमय त्रिधादोषनाशाय त्र्यवतारिणे ॥४४॥
फणामणिफणाकारक्षितिमण्डलधारिणे ॥ नमः कालाग्निरुद्राय महारुद्राय ते नमः ॥ ४५ ॥ भोगतल्पफणाच्छत्रमध्यसुप्ताय ते नमः ॥ महार्ण
वजले वृद्ध एकीभूते जगत्त्रये ॥ ४६ ॥ त्वमेव शेषो भगवन्सहस्रफणमंडितः ॥ फणामणिगणव्याजसंभृताखिलभौतिकः ॥ ४७ ॥ त्वमेव नाथः
सर्वेषां स्रष्टा पालयिता विभो ॥ अत्ता धारयिता नित्यं मदाद्यास्त्वन्निमित्तकाः ॥ ४८ ॥ एष नारायणो देवो वेदांतेषूपगीयते ॥ त्वत्तो न भिन्नो
भगवन्कारणाद्भेदभागसि ॥ ४९ ॥ शय्या त्वं शयिता ह्येष छाद्यः संछादको भवान् ॥ यो वै विष्णुः स वै रामो यो रामः कृष्ण एव सः ॥ ५० ॥
युवयोरंतरं नास्ति प्रसीद त्वं जगन्मय ॥ इति स्तवांते बलिनं प्रणम्य परमेश्वरम् ॥ ५१ ॥ ईश्वरीं जगतां द्रष्टुं सुभद्रास्यन्दनं ययौ ॥ जय देवि
जगन्मातः प्रसीद परमेश्वरि ॥ ५२ ॥ कार्यकारणकर्त्री त्वं सर्वशक्त्यै नमोऽस्तु ते ॥ सर्वस्य हृदि संविष्टे ज्ञानमोहात्मिके सदा ॥ ५३ ॥ कैवल्य
मुक्तिदे भद्रे त्वां नमामि सुरारणिम् ॥ देवि त्वं विष्णुमायासि मोहयन्ती चराचरम् ॥ ५४ ॥ हृत्पद्मासनसंस्थासि विष्णुभावानुसारिणी ॥ त्वमेव
लक्ष्मीर्गौरी च शची कात्यायनी तथा ॥५५॥ यच्च किंचित्क्वचिद्वस्तु सदसद्वाखिलात्मिके ॥ तस्य सर्वस्य शक्तिस्त्वं स्तोतुं त्वां कस्तु शक्तिमान् ॥
॥५६॥ जय भद्रे सुभद्रे त्वं सर्वेषां भद्रदायिनि ॥ भद्राभद्रस्वरूपे त्वं भद्रकालि नमोऽस्तु ते॥५७॥ त्वं माता जगतां देवि पिता नारायणो हि सः॥
स्त्रीरूपं त्वं सर्वमेव पुंरूपो जगदीश्वरः ॥ ५८ ॥ युवयोर्न हि भेदोऽस्ति नास्त्यन्यत्परमेव हि ॥ यथा वयं नियुक्ता हि त्वया वै विष्णुमा
यया ॥ ५९ ॥ निदेशकारिणो नित्यं भ्रमामः परमेश्वरि ॥ वृत्तिः प्रवृत्तिः परमा क्षुधा निद्रा त्वमेव च ॥ ६० ॥ आशा त्वमाशापूर्णा च सर्वाशा
परिपूरिका ॥ मुक्तिहेतुस्त्वमेवेशि बंधहेतुस्त्वमेव हि ॥ ६१ ॥ सर्वज्ञानप्रदे नित्ये भक्तानां कल्पवल्लरी ॥ त्राहि पादाब्जनम्रं मां कृपापांगविलो
कनैः ॥ ६२ ॥ स्तुत्वेत्थं भद्ररूपां तां तत्समीपस्थितं रथे ॥ चक्रं सुदर्शनं विष्णोश्चतुर्थं वपुरास्थितम् ॥ ६३ ॥ प्रणम्य परया भक्त्या इमां
स्तुतिमुदाहरत् ॥ सुदर्शन महाज्वाल कोटिसूर्यसमप्रभ ॥ ६४ ॥ अज्ञानतिमिरांधानां वैकुण्ठाध्वप्रदर्शक ॥ नमस्ते नित्यविलसद्वैष्णववस्वनि
केतन ॥ ६५ ॥ अवार्यवीर्यं यद्रूपं विष्णोस्तत्प्रणमाम्यहम् ॥ प्रणम्य स्तुत्वा देवान्स रथेभ्यः परिवृत्य च ॥ ६६ ॥ इन्द्रद्युम्ननारदाभ्यामादिष्टपद

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पद्धतिः ॥ नीलाचलमथारोहत्प्रासादं द्रष्टुमुत्सुकः ॥ ६७ ॥ ततः स गत्वा प्रासादसमीपं दैवतैः सह ॥ ददर्श शालां रुचिरां स्वचित्ताभिमतां द्विजाः ॥ ६८ ॥ तन्मध्ये स्थापयामास दैवतोरगभूपतीन् ॥ ब्रह्मर्षीन्योगिनो विप्रान्वैष्णवांश्च तपस्विनः ॥ ६९ ॥ दिव्यसिंहासनवरे नृपेण प्रतिपादिते ॥ स पादपीठे भगवानुपविष्टः स्वयं विभुः ॥ ७० ॥ शांतिकं पौष्टिकं कर्तुं भारद्वाजं महामुनिम् ॥ पितामहाज्ञया भूपो वरयामास ऋद्धिमत् ॥७१॥ प्रतिष्ठायां तु ये देवा बलिपूजाविधौ मताः ॥ होमेषु च तथा ते वै ध्यानरूपमुपाश्रिताः॥७२॥ आज्ञया पद्मयोनेस्तु चतुर्दिग्भागमाश्रिताः ॥ सुपूजिता गंधपुष्पमालालंकारभूषणैः ॥ ७३ ॥ ततः कर्म प्रववृते भारद्वाजेन धीमता ॥ प्रत्यक्षं देवदेवस्य सर्वेषां च दिवौकसाम् ॥ ७४ ॥ त्रैलोक्यवासिनां पूजां चकार नृपतिर्मुदा ॥ सांगोपांगं समभ्यर्च्य जगत्स्रष्टारमग्रतः ॥ ७५ ॥ ततः संपूजिताः सर्वे तेन त्रैलोक्यवासिनः ॥ पश्यन्तोऽवस्थितं मध्ये साक्षाद्ब्रह्माणमव्ययम् ॥ ७६ ॥ वपुष्मंतं जगन्नाथं प्रत्यक्षं ब्रह्मरूपिणम् ॥ इन्द्रद्युम्नप्रसादेन जीवन्मुक्तत्वमाप्नुवन् ॥ ७७ ॥ कलेवरं भगवतः प्रासादं सुमनोहरम् ॥ प्रतिष्ठाय भरद्वाजः समुच्छ्रितमहाध्वजम् ॥ ७८ ॥ व्यज्ञापयतत्प्रतिष्ठायै जीवस्याथ पितामहम् ॥ समुत्तस्थौ ततो ब्रह्मा कृतस्वस्त्ययनः स्वयम् ॥ ७९ ॥ ऋषिभिर्नारदाद्यैश्च विद्वद्भिर्ब्राह्मणैस्तथा ॥ राजभिः क्षत्रियैर्नागैः सहितः परमर्षिभिः ॥ ८०॥ गन्धर्वैर्गायमानेषु दिव्यगानेषु सुस्वरम् ॥ मांगल्योचितरागेषु नृत्यन्तीष्वप्सरःसु च ॥ ८१ ॥ शाकुनेषु च सूक्तेषु पठ्यमानेषु च द्विजैः ॥ शंखकाहालमुरजभेरीवादित्रवैणवे ॥ ८२ ॥ शब्दे प्रमूर्च्छति ततः सर्वे ते स्यन्दनोपरि ॥ गत्वावतारयामासू रथात्सोपानवर्त्मनि ॥ ८३ ॥ सावधानाः समाधिस्था भक्त्या संयमितात्मकाः ॥ पार्श्वयोर्भुजयोर्मूर्ध्नि पादयोर्न्यस्तपाणयः ॥ ८४ ॥ शनैः शनैः सलीलं ते नारायणमनामयम् ॥ वासं वासं तूलिकासु निन्युः प्रासादसन्निधिम् ॥ ८५ ॥ उपर्युपरि संतानवृष्टिषूत्पतितासु च ॥ जय कृष्ण जगन्नाथ जय सर्वाऽघनाशन ॥ ८६ ॥ जय लीलादारुतनो जय वांछाफलप्रद ॥ जय संसारसंमग्नलीलोद्धार जयाव्यय ॥ ८७ ॥ जयानुकंपापाथोधे जय दीनपरायण ॥ जयाच्युत जयानन्त जयेशान नमोऽस्तु ते ॥८८॥ एभिः स्तवैः स्तूयमानो ब्रह्मणा च स्वयंभुवा ॥ तुष्टाव स मुदा युक्तो नारदश्चोपवीणयन् ॥ ८९ ॥ रत्नच्छत्रयुगे मूर्ध्नि धार्यमाणेऽथ पृष्ठतः ॥ शशिना भास्वता भक्त्या दिव्यधूपेन धूपिताः ॥९०॥ श्रेणीकृता ह्युभयतः पार्श्वयोश्चामरग्रहाः ॥ सलीलांदोलनव्यग्रा यौवनालंकृतास्तथा ॥ ९१ ॥ एवं च सहिताः सर्वे कौतूहलसमन्विताः ॥ सुदर्शनं सुभद्रां च बलभद्रमनैषिषुः ॥ ९२ ॥ प्रासादद्वारि रचिते रत्नस्तंभेऽथ मण्डपे ॥ वासयित्वाभिषेकाय संमुखादर्शमण्डले ॥ ९३ ॥ अधिवासिते रत्नकुंभैस्तीर्थवार्युपसंभृतैः ॥ सूक्ताभ्यां श्रीपुरुषयोरभिषेकं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पितामहः ॥ चकार भगवाँल्लोकसंग्रहार्थं द्विजोत्तमाः ॥ ९४ ॥ ततो ह्यलंकृतान्देवान्गंधमाल्योपशोभितान् ॥ नीराजयित्वा भगवान्स स्वयं लोकभावनः ॥ रत्नसिंहासने रम्ये स्थापयामास मन्त्रतः ॥ ९५ ॥ ॥ ब्रह्मोवाच ॥ ॥ अशेषजगदाधार सर्वलोकप्रतिष्ठित ॥ सुप्रतिष्ठाखिलव्यापिन्प्रासादे सुस्थिरो भव ॥ ९६ ॥ त्वयि प्रतिष्ठिते नाथ वयं सर्वे प्रतिष्ठिताः ॥ त्वदाज्ञया प्रतिष्ठेयं पूर्णाऽऽस्तां त्वत्प्रसादतः ॥ ९७ ॥ स्थापयित्वा जगन्नाथं स्पृष्ट्वा तस्य हृदंबुजम् ॥ आनुष्टुभं मंत्रराजं सहस्रं स जजाप ह ॥ ९८ ॥ वैशाखस्यामले पक्षे अष्टम्यां पुष्ययोगतः ॥ कृता प्रतिष्ठा भो विप्राः शोभने गुरुवासरे ॥ ९९ ॥ तद्दिनं सुमहत्पुण्यं सर्वपापप्रणाशनम् ॥ स्नानं दानं तपो होमः सर्वमक्षय्यमश्नुते ॥ १०० ॥ तस्मिन्दिने ये पश्यंति मानवा भक्तिभाविताः ॥ कृष्णं रामं सुभद्रां च मुक्तिभाजो न संशयः ॥ १०१ ॥ शुक्लाष्टमी या वैशाखे गुरुपुष्ययुता यदा ॥ तस्यामभ्यर्चनं विष्णोः कोटिजन्माघनाशनम् ॥ १०२ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे पुरुषोत्तमक्षेत्रमाहात्म्ये सप्तविंशोऽध्यायः ॥ २७ ॥ ॥ जैमिनिरुवाच ॥ ॥ ततः स भगवान्मन्त्रमहिम्ना नरकेसरी ॥ इन्द्रद्युम्नादिभिः सर्वैर्ददृशेऽद्भुतदर्शनः ॥ १ ॥ लेलिहानो जगत्सर्वं समंताज्ज्वलजिह्वया ॥ कालाग्निरुद्रं सकलं ग्रसंतमिव चोत्थितम् ॥ २ ॥ रोदसीकंदरं व्याप्य तेजसा तपता भृशम् ॥ अनेकाक्षिमुखग्रीवाकरपादश्रुतिर्विभुः ॥ ३ ॥ सर्वाश्चर्यमयो देवः केवलं तेजसो निधिः ॥ भयत्रस्ताः समुद्विग्ना नेशाः स्तोतुमपि प्रभुम् ॥ ४ ॥ तं तथाविधमालोक्य नारदः पितरं तदा ॥ पप्रच्छ भगवन्नित्थं कथमेष प्रकाशते ॥ ५ ॥ ॥ नारद उवाच ॥ ॥ अनुग्रहायावतरत्प्रत्युतैष भयप्रदः ॥ सर्वे भयात्स्थिरतराः प्रलयाशंकिनोऽधुना ॥ ६ ॥ त्वमेव भगवल्लीलां जानासि जगतां पते ॥ ७ ॥ तच्छ्रुत्वा नारदवचः पद्मयोनिः स्मिताननः ॥ उवाच कौतुकं वाक्यं सर्वेषामुपकारकम् ॥ ८ ॥ ॥ ब्रह्मोवाच ॥ ॥ अवतीर्णं जगन्नाथं दृष्ट्वा दारुवपुर्धरम् ॥ ९ ॥ अवज्ञास्यंति वै लोकाः साक्षाद्ब्रह्मस्वरूपिणम् ॥ अतत्त्ववेदिनो मूढा महिमानं विदंत्विति ॥ १० ॥ मंत्रितो मन्त्रराजेन येनासौ परमेष्ठिना ॥ पुराभिमंत्रितो येन विददार महासुरम् ॥ ११ ॥ तादृग्रूपं सुदुर्दर्शं प्राप्यमेति भयप्रदम् ॥ मूर्तिरेषा परा काष्ठा विष्णोरमिततेजसः ॥ ॥ १२ ॥ यामभ्यर्च्य गतिं यांति पुनरावृत्तिदुर्लभाम् ॥ नृसिंहाभिमुखः स्तोत्रमिदमाह मुदान्वितः ॥ १३ ॥ नमोऽस्तु ते देववरैकसिंह नमोऽस्तु पापौघगजैकसिंह ॥ नमोऽस्तु दुःखार्णवपारसिंह नमोऽस्तु तेजोमय दिव्यसिंह ॥ १४ ॥ नमोऽस्तु सर्वाकृतिचित्रसिंह नमोऽस्तु ते क्लेशविमुक्तिसिंह ॥ नमोऽस्तु ते दिव्यवपुर्नृसिंह नमोऽस्तु ते वीरवरैकसिंह ॥ १५ ॥ नमोऽस्तु ते दैत्यविदारसिंह नमोऽस्तु देवेष्वधि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

देवसिंह ॥ नमोऽस्तु वेदांतवनैकसिंह नमोऽस्तु ते योगिगुहैकसिंह ॥ १६ ॥ नमोऽस्तु ते सिंह वृषैकसिंह नमोऽस्तु नीलाचलशृंगसिंह ॥ १७ ॥ ॥ जैमिनिरुवाच ॥ ॥ स्तुत्वेत्थं दिव्यसिंहं तमिंद्रद्युम्नं प्रजापतिः ॥ सिंहयंत्रं समालेख्य तस्योपरि निवेश्य च ॥ १८ ॥ दीक्षयित्वा मन्त्रराजं साक्षादाथर्वणोदितम् ॥ आहुर्वैष्णवनिर्वाणं यं वेदांतपरायणाः ॥ १९ ॥ यत्र वेदाश्च चत्वारः साक्षान्नित्यं प्रतिष्ठिताः ॥ यमधीत्य महामन्त्रं मनुः स्वायंभुवः पुरा ॥ २० ॥ सृष्टिं चकार भगवान्प्राप्तमस्माच्चतुर्मुखात् ॥ अणिमादिगुणा यस्य फलं स्यादानुषंगिकम् ॥ २१ ॥ एक एव महामन्त्रः पुरुषार्थचतुष्टयम् ॥ प्राप्तुं कारणभूतो हि किं पुनः क्षुद्रकामनाम् ॥ २२ ॥ एक एव महामंत्रः सर्वक्रतुफलप्रदः ॥ सर्वतीर्थप्रदः सर्वदानव्रतफलप्रदः ॥ २३ ॥ यथायं सर्वपापौघतूलराशेर्दवानलः ॥ दिव्यसिंहाकृतिर्देवो मंत्रराजस्तथा ह्ययम् ॥ २४ ॥ एनमभ्यस्य यतयो भवरोगं त्यजंति हि ॥ यस्य ग्रहणमात्रेण ग्रहापस्माररराक्षसाः ॥ २५ ॥ डाकिन्यो भूतवेतालपिशाचा उरगा ग्रहाः ॥ दूरादेव पलायंते नेशते वीक्षितुं च तम् ॥ २६ ॥ मंत्रराजं ततो लब्ध्वा इन्द्रद्युम्नश्चतुर्मुखात् ॥ नृसिंहं शांतवपुषं लक्ष्मीसंश्रितवक्षसम् ॥ २७ ॥ चक्रं पिनाकं दधतं चंद्रसूर्याग्निचक्षुषम् ॥ जानुप्रसारितकरसरोजद्वंद्वमुन्नसम् ॥ २८ ॥ योगपट्टासनारूढद्वात्रिंशद्दलपद्मके ॥ मंत्रवर्णमये मध्ये कर्णिकाप्रणवोज्ज्वले ॥ २९ ॥ सुखासीनं साट्टहासं वीक्षंतं श्रीमुखांबुजम् ॥ सटामंडितवक्त्राब्जं दिव्यरत्नोज्ज्वलाकृति ॥ ३० ॥ फणासहस्रं विस्तार्य पश्चाच्छत्राकृतिं विभोः ॥ ददर्श बलभद्रं तं हललांगलधारिणम् ॥ ३१ ॥ प्रजहर्ष नृपो दृष्ट्वा तादृशं पुरुषोत्तमम् ॥ विस्मयाविष्टचेताश्च पप्रच्छ कमलासनम् ॥ ३२ ॥ भगवंश्चित्रमेतद्वै चरितं मधुघातिनः ॥ विज्ञातुं कथमस्माभिः शक्यः स्याल्लोकभावन ॥ ३३ ॥ यज्ञांते तादृशं रूपं बभार दारुनिर्मितम् ॥ रथस्थं भगवानेव प्रासादांतर्न्यवेशयत् ॥ ३४ ॥ मामाह पूर्वं वाणी सा गगनांतरिता तदा ॥ अपौरुषेयतरुणा चतुर्मूर्तिर्भविष्यति ॥ ३५ ॥ इदानीमेक एवासौ दृश्यते सुप्रतिष्ठितः ॥ माया वा तत्त्वमथ वा तत्त्वतो मे वद प्रभो ॥ ३६ ॥ श्रवणे यदि मां वेत्सि भाजनं भवभावन ॥ श्रुत्वैतत्प्रत्युवाचाथ संशयानं नृपोत्तमम् ॥ ३७ ॥ ॥ ब्रह्मोवाच ॥ ॥ आद्या मूर्तिर्भगवतो नारसिंहाकृतिर्नृप ॥ नारायणेन प्रथिता मदनुग्रहतस्त्वयि ॥ ३८ ॥ दारवी मूर्तिरेषेति प्रतिमाबुद्धिरत्र वै ॥ मा भूत्ते नृपशार्दूल परं ब्रह्माकृतिस्त्वियम् ॥ ३९ ॥ खंडनात्सर्वदुःखानामखंडानंददानतः ॥ स्वभावाद्दारुरेषो हि परं ब्रह्माभिधीयते ॥ ४० ॥ इत्थं दारुमयो देवश्चतुर्वेदानुसारतः ॥ स्रष्टा स जगतां तस्माद्दात्मानं चापि सृष्टवान् ॥ ४१ ॥ शब्दब्रह्म परंब्रह्म नानयोर्भेद इष्यते ॥ लये तु एकमेवेदं सृष्टौ भेदः प्रवर्त्तते ॥ ४२ ॥ अन्योन्यापेक्षिणौ भूप श

CC-0. In Public Domain. Digitization by eGangotri

ब्दार्थौ हि परस्परम् ॥ अर्थाभावेन शब्दोऽस्ति शब्दाभावे न बुद्ध्यते ॥ ४३ ॥ अर्थस्तस्माच्चतुर्वेदाः शब्दा ह्यर्थाश्च तादृशाः ॥ ऋग्वेदरूपी हल
धृक्सामवेदो नृकेसरी ॥ ४४ ॥ यजुर्मूर्त्तिस्त्वियं भद्रा चक्रमाथर्वणं स्मृतम् ॥ वेदश्चतुर्द्धा भेदोऽयमेकराशिरभेदतः ॥ ४५ ॥ अतस्ते संशयो मा
भूदेकस्तु बहुधा विभुः ॥ अवतारेषु चान्येषु न्यायेनैतेन वर्त्तते ॥ ४६ ॥ भेदाभेदौ तथा ख्यातौ जगन्नाथस्य ते नृप ॥ येन ते मनसस्तुष्टिस्तेन
भक्त्या समाचर ॥ ४७ ॥ सर्वरूपमयो ह्येष सर्वमंत्रमयः प्रभुः ॥ आराध्यते यथा येन तथा तस्य फलप्रदः ॥ ४८ ॥ यथा सुशुद्धं कनकं स्वे
च्छया घटितं नृप ॥ तत्तत्संज्ञामवाप्येह तत्तत्संतोषकारकम् ॥ ४९ ॥ एवं महिम्ना भगवानत्राविरभवन्नृप ॥ यस्य यावांस्तु विश्वासस्तस्य सिद्धि
स्तु तावती ॥ ५० ॥ कर्मणा मनसा वाचा विशुद्धेनांतरात्मना ॥ समाराधय गोविंदमत्र दारुवपुर्द्धरम् ॥ ५१ ॥ चतुर्वर्गफलावाप्त्यै यथाभिलषितं
तव ॥ अनेन मंत्रराजेन विष्णुमेनं समर्चय ॥ ५२ ॥ नातः परतरो मंत्रो न भूतो न भविष्यति ॥ अनेनाभ्यर्चितो विष्णुः प्रीतो भवति तत्क्षणात्
॥ ५३ ॥ ददाति स्वपुरं चापि भगवान्भक्तवत्सलः ॥ यज्ञैस्तीर्थैर्व्रतैर्दानैस्तपोभिश्चापि तस्य किम् ॥ ५४ ॥ नीलाचलस्थं यो विष्णुं दारुमूर्तिमुपा
स्ति वै ॥ तत्त्वं ब्रवीमि ते भूप श्रुत्वैतदवधारय ॥ ५५ ॥ न्यग्रोधमूले कूलेऽस्य सिंधोर्नीलाचले स्थितम् ॥ दारुव्याजामृतं ब्रह्म दृष्ट्वा मुच्येन्न संशयः
॥ ५६ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे पुरुषोत्तमक्षेत्रमाहात्म्ये जैमिनिऋषिसंवादेऽष्टाविंशो
ऽध्यायः ॥ २८ ॥ ॥ जैमिनिरुवाच ॥ ॥ इत्युक्त्वा नृपशार्दूलं लोकसंग्रहणाय वै ॥ सिंहाकृतिं स हृदये उद्भास्य कमलासनः ॥१॥ पूर्वं प्रकाशरूपं
यद्विष्णोस्तु प्रकटीकृतम् ॥ रथावरोहणे दृष्टाश्चतस्रो मूर्त्तयः पुरा ॥ २ ॥ ता एव सिंहासनगाः सर्वे ते ददृशुः पुनः ॥ द्विषडक्षरमन्त्रेण बलभद्रम
पूजयत् ॥ ३ ॥ सूक्तेन पौरुषेणैनं नारायणमनामयम् ॥ देवीसूक्तेन चक्रं च द्वादशाक्षरकेण च ॥ पूजयित्वानुग्रहाय पार्थिवस्य न्यवेदयत् ॥ ४ ॥
॥ ॥ ब्रह्मोवाच ॥ ॥ भगवन्देवदेवेश भक्तानुग्रहकारक ॥ इन्द्रद्युम्नस्य जन्मानि त्वयि भक्तिं प्रकुर्वतः ॥ सहस्रं समतीतानि तदन्ते त्वामलो
कयत् ॥ ५ ॥ त्वद्दर्शनं हि भगवंस्त्वयि सायुज्यकारणम् ॥ यद्यप्ययं भक्तियोगेनेच्छति त्वां समर्चितुम् ॥ ६ ॥ तदाज्ञापय येन त्वां भक्तियोगेन
भावयेत् ॥ देशकालव्रताद्यैस्तु तथा नानोपचारकैः ॥ ७ ॥ त्वन्मुखांभोजगलितमाज्ञामृतरसं नृपः ॥ पिपासुस्त्वां जगन्नाथ पश्यत्येषोऽनिमेष
कम् ॥ ८ ॥ ॥ जैमिनिरुवाच ॥ ॥ इति विज्ञापितो देवः साक्षात्कमलयोनिना ॥ दारुदेहोऽपि विहसन्प्राह गंभीरया गिरा ॥ ९ ॥ ॥ श्रीप्रति
मोवाच ॥ ॥ इन्द्रद्युम्न प्रसन्नस्ते भक्त्या निष्कामकर्मभिः ॥ त्वदन्येनेदृशी संपन्न केनाप्यपवर्जिता ॥ १० ॥ वरं ददामि ते भूप मयि भक्तिः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्थिराऽस्तु ते ॥ उत्सृज्य वित्तकोटीस्तु यन्ममायतनं कृतम् ॥ ११ ॥ भंगेप्येतस्य राजेंद्र स्थानं न त्यज्यते मया ॥ कालांतरेऽपि योऽप्यन्यः प्रासादं कारयिष्यति ॥ १२ ॥ तवैव कीर्त्तिः सा नूनं त्वत्प्रीत्या तत्र मे स्थितिः ॥ सत्यं सत्यं पुनः सत्यं सत्यमेव ब्रवीमि ते ॥ १३ ॥ प्रासाद भंगे तत्स्थानं न त्यक्ष्यामि कदाचन ॥ अनेन दारुवपुषा स्थास्याम्यत्र परार्द्धकम् ॥ १४ ॥ द्वितीयं पद्मयोनेस्तु यावत्परिसमाप्यते ॥ मनोः स्वायंभुवस्यास्य द्वितीये च चतुर्युगे ॥ १५ ॥ कृतस्य प्रथमे ज्येष्ठे दशेति ऋतुसंस्थितिः ॥ ज्यैष्ठ्यामहं चावतीर्णस्तत्पुण्यजन्मवासरम् ॥ १६ ॥ तस्यां मे स्नपनं कुर्यान्महास्नानविधानतः ॥ प्रत्यर्चायां महाराज साधिवासं समृद्धिमत् ॥१७॥ पापं विनाशयिष्यामि कोटिजन्मभिरर्जितम् ॥ सर्व तीर्थक्रतुफलं सर्वदानफलं तथा ॥ १८ ॥ पश्यतां चापि राजेंद्र फलं तावत्प्रपद्यते ॥ न्यग्रोधादुत्तरे कूपः सर्वतीर्थमयोऽस्ति हि ॥ १९ ॥ स्नानाय पूर्व निर्माय किंचिदाच्छादितं भुवा ॥ अवतीर्णस्त्वहं पश्चात्तं विविच्य प्रकाशय ॥ २० ॥ संस्कार्यः स चतुर्दश्यां बलिं दत्त्वा विधानतः ॥ रक्षकक्षेत्रपालाय दिशां पालेभ्य एव च ॥ २१ ॥ कम्बुकाहालमुरजध्वनिषु सुस्वरेषु च ॥ द्विजातयः स्वर्णकुम्भैरुद्धरेयुस्ततो जलम् ॥२२॥ ज्यैष्ठ्यां प्रातस्तने काले ब्रह्मणा सहितं च माम् ॥ रामं सुभद्रां संस्नाप्य मम लोकमवाप्नुयात् ॥ २३ ॥ स्नाप्यमानं तु यः पश्येन्मां तदा नृप सत्तम ॥ देहबन्धं च नाप्नोति स पुनर्न तु पूरुषः ॥ २४ ॥ कारयित्वा दृढं मंचमैशान्यां दिशि मंडितम् ॥ वितानशोभारचितं चंदनांभःसमुक्षितम् ॥ २५ ॥ तत्र मां रामभद्राभ्यां स्नापयित्वा पुनर्नयेत् ॥ २६ ॥ दक्षिणाभिमुखं यांतं यो मां पश्यति भक्तितः ॥ तत्तद्धवमवाप्नोति मनसा यद्यदिच्छति ॥ २७ ॥ ततः पंचदशाहानि स्थापयित्वा तु मां नृप ॥ विरूपमभिरूपं वा न पश्येत्तु कदाचन ॥ २८ ॥ ज्येष्ठस्नानमिदं कृत्वा सर्व पापैः प्रमुच्यते ॥ २९ ॥ गुंडिचाख्यां महायात्रां प्रकुर्वीथाः क्षितीश्वर ॥ यस्याः संकीर्तनादेव नरः पापाद्विमुच्यते ॥ ३० ॥ माघमासस्य पंचम्या मष्टम्यां चैत्रशुक्लके ॥ एते कालाः प्रशस्ता हि गुंडिचाख्यमहोत्सवे ॥ ३१ ॥ विशेषान्मोक्षदाषाढद्वितीया पुष्यसंयुता ॥ ऋक्षाभावे तिथौ कार्या सदा सा प्रीतये मम ॥ ३२ ॥ आषाढस्य सिते पक्षे द्वितीया पुष्यसंयुता ॥ तस्यां रथे समारोप्य रामं मां भद्रया सह ॥ ३३ ॥ महोत्सवप्रवृत्त्यर्थं प्रीणयित्वा द्विजान्बहून् ॥ गुंडिचामण्डपंनाम यत्राहमजनं पुरा ॥ ३४ ॥ अश्वमेधसहस्रस्य महावेदी तदाभवत् ॥ तस्याः पुण्यतमं स्थानं पृथिव्यां नेह विद्यते ॥ ३५ ॥ यत्राजुहोः पंचशतवर्षाणि प्रीतये मम ॥ मम प्रीतिकरं स्थानं तस्मान्नान्यद्धरागतम् ॥ ३६ ॥ यथेयं नीलशिखरी प्रासादेन तवाधुना ॥ चतुर्मुखानुरोधेन महाप्रीतिकरी मम ॥ ३७ ॥ तथा नृसिंहक्षेत्रे वै महा

CC-0. In Public Domain. Digitization by eGangotri

वेदी तव क्रतोः ॥ ममोत्पत्तेश्च निलयं प्रीतिकृन्मम शाश्वतम् ॥ ३८ ॥ बहुकालं स्थितश्चाहं तस्यां मे प्रीतिरुत्तमा ॥ आत्मा मे पद्मभूरेष प्रासादे
स्थापितोऽमुना ॥ ३९ ॥ अस्यानुरोधात्त्वद्भक्त्या ह्यवतिष्ठेऽत्र नित्यदा ॥ दिनानि नव यास्यामि तथा तस्मादिहागतः ॥ ४० ॥ तत्रास्ति ते महा
राज सर्वतीर्थमयं सरः ॥ तत्तीरे सप्त दिवसान्स्थास्याम्यनुजिघृक्षया ॥ ४१ ॥ तत्र स्थितं मां पश्यंतो यांति मर्त्या ममालयम् ॥ तिस्रः कोट्यो
ऽर्द्धकोटी च तीर्थानां भुवनत्रये ॥ ४२ ॥ तानि सर्वाणि सरसि मत्सान्निध्याद्व्रजंति ते ॥ तत्र स्नात्वा च विधिवद्दृष्ट्वा मां भक्तिभावतः ॥ ४३ ॥
जननीजठरे क्लेशं पुनर्नानुभवंति हि ॥ नवमेऽह्नि समायांतं दक्षिणाशामुखं तदा ॥ ४४ ॥ ये पश्यन्ति प्रतिपदमश्वमेधक्रतोः फलम् ॥ प्राप्य भोगा
न्निंद्रसमान्भुक्त्वान्ते मां विशंति ते ॥ ४५ ॥ ममोत्थानं मम स्वापं मत्पार्श्वपरिवर्त्तनम् ॥ मार्गप्रावरणं चैव पुष्यस्नानमहोत्सवम् ॥ ४६ ॥ फाल्गुन्यां
क्रीडनं कुर्याद्दोलायां मम भूमिप ॥ दोलायां येऽपि पश्यंति दक्षिणामुखपूजितम् ॥ ४७ ॥ ब्रह्महत्यादिभिः पापैर्मुच्यते नात्र संशयः ॥ ४८ ॥ अन
योर्मां समभ्यर्च्य दृष्ट्वा मां प्रणिपत्य च ॥ प्रत्येकमष्टसाहस्रं वाजिमेधफलं लभेत् ॥ ४९ ॥ चैत्रे सितत्रयोदश्यां कुर्यात्कर्मप्रपूरणम् ॥ चैत्रे मासि
चतुर्दश्यां दमनैर्मे प्रपूजनम् ॥ शुक्लपक्षे तु ये लोकाः सर्वपापक्षयो भवेत् ॥ ५० ॥ वैशाखस्य सिते पक्षे तृतीयाऽक्षयसंज्ञिता ॥ तत्र मां लेपयेद्गन्ध
लेपनैरतिशोभनैः ॥ ५१ ॥ प्रीतये मम ये कुर्युरुत्सवान्मम शाश्वतान् ॥ चतुर्वर्गप्रदा ह्येते प्रत्येकं परिकीर्तिताः ॥ ५२ ॥ ॥ जैमिनिरुवाच ॥ ॥
इति दत्त्वा वरं तस्मा इन्द्रद्युम्नाय भो द्विजाः ॥ ब्रह्माणमाह भगवान्स्मेरांभोरुहसन्मुखः ॥ ५३ ॥ चतुर्मुख तव प्रीत्यै सर्वं संपादितं मया ॥ त्वदिच्छा
हि ममैवेच्छा न भेदो ह्यावयोर्ध्रुवम् ॥ ५४ ॥ यन्मां माधवमूर्तिं त्वं पुरा प्रार्थितवानसि ॥ तस्यैव परिपाकोऽयमवतारः कृतो मया ॥ ५५ ॥ मामत्र
दृष्ट्वा त्वभ्यर्च्य प्राणान्संत्यज्य मुच्यते ॥ क्रमात्सर्वे त्वया सार्द्धं भूयः सायुज्यमेव च ॥ ५६ ॥ यद्वाचाभिलपन्मर्त्यो मामत्र हि निषेवते ॥ अवश्यं
तदवाप्नोति संगत्या चात्र भूपतिः ॥ ५७ ॥ व्रजेदानीं सत्यलोकं त्रिदिवं यांतु देवताः ॥ तवायुःपूर्णिपर्यंतमहमत्र स्थितो ध्रुवम् ॥ ५८ ॥ ततस्ते
हर्षिताः सर्वे ब्रह्मर्षिसुरसत्तमाः ॥ प्रणम्य शिरसा देवं जग्मुस्ते निलयं स्वकम् ॥ ५९ ॥ देवोऽपि च जगन्नाथः प्रतिमारूपधृक्तदा ॥ तूष्णीं तिष्ठति
सर्वेषां हर्षमापादयन्नृणाम् ॥ ६० ॥ इन्द्रद्युम्नोऽपि धर्मात्मा विष्णुभक्तो दृढव्रतः ॥ अनुव्रजन्पद्मयोनिं तेनादिष्टो न्यवर्तत ॥ ६१ ॥ यात्राः सर्वा
भगवता आज्ञप्ताः साधु कारय ॥ अस्मिंस्तुष्टे जगन्नाथे सन्तुष्टं वै चराचरम् ॥६२॥ इत्याज्ञां पद्मयोनेस्तु मूर्ध्न्याधाय क्षितीश्वरः ॥ नारदेन सह

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीमान्निधिना च समृद्धिमत् ॥ ज्येष्ठस्नानादिकं सर्वमुत्सवं निरवर्तयत् ॥ ६३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे पुरुषोत्तमक्षेत्रमाहात्म्य एकोनत्रिंशोऽध्यायः ॥ २९ ॥ ॥ मुनय ऊचुः ॥ ॥ चकार केन विधिना जन्मस्नानं श्रियः पतेः ॥ अन्यानप्युत्सवान्सर्वान्विधिवद्ब्रूहि नो मुने ॥ १ ॥ नारदेन पुरा प्रोक्तं सर्वं ते मुनिसत्तम ॥ स हि वेद तमःपारे ब्रह्म ब्रह्मसुतो मुनिः ॥ २ ॥ तत्सर्वं ब्रूहि तत्त्वेन मुने कौतूहलं हि नः ॥ अहो भाग्यं नरपतेरिंद्रद्युम्नस्य भो मुने ॥ ३ ॥ तस्य तावति कर्मांते अत्यद्भुतमिदं महत् ॥ न श्रुता हि न दृष्टा हि प्रतिमा दारुनिर्मिता ॥ ४ ॥ सजीवतनुवत्साक्षाद्वारं दद्यान्मनुष्यवत् ॥ स्मारंस्मारं भगवतश्चरितं पापनाशनम् ॥ ५ ॥ चरितं तस्य नृपतेर्दुर्लभं मर्त्यवासिनाम् ॥ न सन्तोषोऽस्ति भगवञ्शृण्वतां नो महामुने ॥ ६ ॥ तद्वदानुक्रमेणास्मान्यात्राः सर्वाघनाशनाः ॥ यासां संदर्शनाद्वासो वैकुण्ठ इति निश्चितम् ॥ ७ ॥ यात्रामाहात्म्यवक्तासौ यत्साक्षान्मधुसूदनः ॥ तन्नो वद महाभाग जगतां हितकाम्यया ॥ ८ ॥ ॥ ॥ जैमिनिरुवाच ॥ ॥ ज्येष्ठस्नानं प्रवक्ष्यामि शृणुध्वं मुनयोऽधुना ॥ ज्येष्ठशुक्लदशम्यां तु व्रतं संकल्प्य वाग्यतः ॥ ९ ॥ प्रातरुत्थाय कुर्वीत पंचतीर्थविधानतः ॥ मार्कंडेयावटं गत्वा आचम्य प्रयतः पुमान् ॥ १० ॥ प्रार्थयेच्छंकरं नत्वा कृतांजलिपुटोऽग्रतः ॥ ११ ॥ अतितीक्ष्ण महाकाय कल्पांतदहनोपम ॥ भैरवाय नमस्तुभ्यमनुज्ञां दातुमर्हसि ॥ १२ ॥ ततः प्रविश्य तीर्थं तु वैदिकैः पंच वारुणैः ॥ अघमर्षणसूक्तेन त्रिरावृत्तेन वा द्विजाः ॥ स्नात्वा यथावत्स्नायीत मन्त्रेणानेन चांततः ॥ १३ ॥ नमः शिवाय शांताय सर्वपापहराय च ॥ स्नानं करोमि देवेश मम नश्यतु पातकम् ॥ १४ ॥ संसारसागरे मग्नं पापग्रस्तमचेतनम् ॥ त्राहि मां भगनेत्रघ्न त्रिपुरारे नमोऽस्तु ते ॥ १५ ॥ एवं स्नात्वा बहिर्गत्वा धौतवासाः सपुण्ड्रकः ॥ देवानृषीन्पितॄंश्चैव तर्पयित्वा यथाविधि ॥ १६ ॥ प्रविश्य शंकरागारं स्पृष्ट्वा वृषणयोर्वृषम् ॥ मन्त्रेणानेन भो विप्राः सर्वक्रतुफलं लभेत् ॥ १७ ॥ धर्मस्त्वंतुष्पाद्यज्ञस्त्वं स्वर्णशृंगस्त्रयीवपुः ॥ गोपते वाहरूपस्त्वं शूलिनं त्वां नमाम्यहम् ॥ १८ ॥ अघोरमन्त्रेण ततः पूजयेद्वृषवाहनम् ॥ पञ्चब्रह्मभिर्ऋग्भिस्तु संस्पृशेल्लिंगमुत्तमम् ॥ १९ ॥ अंगुष्ठेन स्पृशेल्लिंगं मुष्टिना शक्तिमेव च ॥ पूजयित्वा तु विधिवत्स्तुत्वा देवं पुरद्विषम् ॥ २० ॥ दशानामश्वमेधानां फलं प्राप्नोत्यनुत्तमम् ॥ मार्कंडेयावटे स्नात्वा दृष्ट्वा देवं तु शंकरम् ॥ २१ ॥ फलं प्राप्नोत्य विकलं राजसूयाश्वमेधयोः ॥ अन्ते शिवस्य सालोक्यं प्राप्य ज्ञानं ततो नरः ॥ २२ ॥ क्रमाच्च लभते मुक्तिं जगन्नाथप्रसादतः ॥ ततो मौनी

१ तीक्ष्णदंष्ट्र-इ० पा० ।

CC-0. In Public Domain. Digitization by eGangotri

व्रजेदेवं नारायणमनामयम् ॥ २३ ॥ तद्दक्षिणस्थितं विष्णुरूपं न्यग्रोधमुत्तमम् ॥ दर्शनादपि पापानां पापसंहतिनाशनम् ॥ २४ ॥ तं दृष्ट्वा प्रण
मेद्दूराद्भावयन्पुरुषोत्तमम् ॥ प्रदक्षिणं ततः कुर्यादिमं मन्त्रमुदीरयन् ॥ २५ ॥ अमरस्त्वं सदा कल्प विष्णोरायतनं महत् ॥ न्यग्रोध हर मे पापं
विष्णुरूप नमोऽस्तु ते ॥ २६ ॥ नमोऽस्त्वव्यक्तरूपाय महाप्रलयस्थायिने ॥ एकाश्रयाय जगतां कल्पवृक्षाय ते नमः ॥ २७ ॥ स्तुवञ्जपेत्तु तद्भ
क्त्या मूले तस्य जनार्दनम् ॥ कोटिजन्मशतोद्भूतपापादेव विमुच्यते ॥ २८ ॥ तच्छायाक्रमणेनापि निष्पापो जायते नरः ॥ ततः सुपर्णं प्रणमेद्या
नरूपं हरेः पुरः ॥ २९ ॥ स्थितो भक्तिनतो विष्णोः कृतांजलिपुटो मुदा ॥ छन्दोमय जगद्धामन्यानरूप त्रिवृद्वपुः ॥ ३० ॥ यज्ञरूप जगद्व्यापि
न्प्रीयमाणाय ते नमः ॥ स्तुत्वेत्थं गरुडं पापान्मुच्यतेऽनेकजन्मजात् ॥ ३१ ॥ वाङ्मनःकर्मनियतो गच्छेदेवं विचिंतयन् ॥ प्रविश्य देवतागारं
कृत्वा तं त्रिः प्रदक्षिणम् ॥ ३२ ॥ पूजयेन्मन्त्रराजेन सूक्तेन पुरुषस्य वा ॥ द्वादशाक्षरमंत्रेण यत्र वा जायते रुचिः ॥ ३३ ॥ पूजाधिकारिणः सर्वे
ब्रह्मक्षत्रविशस्ततः ॥ अन्येषां दर्शनं भक्त्या तयोर्नामानुकीर्तनात् ॥ ३४ ॥ पंचोपचारविधिना पूजयेत्परमेश्वरम् ॥ कृतांजलिपुटो भूत्वा इदं स्तो
त्रमुदीरयेत् ॥ ३५ ॥ देवदेव जगन्नाथ संसारार्णवतारक ॥ भक्तानुग्राहक सदा रक्ष मां पादयोर्नतम् ॥ ३६ ॥ जय कृष्ण जगन्नाथ जय सर्वाघना
शन ॥ जयाशेषजगद्वंद्यपादांभोज नमोऽस्तु ते ॥ ३७ ॥ जय ब्रह्मांडकोटीश वेदनिःश्वासवातक ॥ अशेषजगदाधार परमात्मन्नमोऽस्तु ते ॥३८॥
जय ब्रह्मेंद्ररुद्रादिदेवौघप्रणतार्तिनुत् ॥ जयाखिलजगद्धामन्नंतर्यामिन्नमोऽस्तु ते ॥ ३९ ॥ जय निर्व्याजकरुणापाथोधे दीनवत्सल ॥ दीनानाथैक
शरण विश्वसाक्षिन्नमोऽस्तु ते ॥ ४० ॥ संसारसिंधुसलिले मोहावर्त्ते सुदुस्तरे ॥ षडूर्मिकुलदुष्पारे कुकर्मग्राहदारुणे ॥ ४१ ॥ निराश्रये निरालंबे
निःसारे दुःखफेनिले ॥ तव मायागुणैर्बद्धमवशं पतितं ततः ॥ ४२ ॥ मां समुद्धर देवेश कृपापांगविलोकनैः ॥ तत्र मग्नं सुरश्रेष्ठ सुप्रसादप्रका
शक ॥ ४३ ॥ एक एव जगन्नाथ बन्धुस्त्वं भवभीरुणाम् ॥ बुभुक्षा च पिपासा च प्राणस्य मनसः स्मृतौ ॥ ४४ ॥ शोकमोहौ शरीरस्य जरा मृत्युर्व
पुर्भवः ॥ त्वत्सृष्टौ तादृशो नास्ति यो दीनपरिपालकः ॥ ४५ ॥ अवतीर्णोसि लोकानामनुग्रहधिया विभो ॥ पूर्णकामस्य ते नाथ किमन्यत्कारणं
क्षितौ ॥ ४६ ॥ त्वत्पादपद्ममासाद्य न चिंतास्ति जगत्पते ॥ यतस्ते चरणांभोजं चतुर्वर्गैकसाधनम् ॥ ४७ ॥ दर्शनात्सर्वलोकानां सर्ववांछा
फलप्रदम् ॥ ततः सीरध्वजं शेषमन्त्रेण परिपूजयेत् ॥ ४८ ॥ द्वादशाक्षरमन्त्रेण नाम्ना वा प्रणवादिना ॥ एकाग्रमानसो भूत्वा प्रणिपत्य प्रसाद
येत् ॥ ४९ ॥ जय राम सदाराम सच्चिदानंदविग्रह ॥ अविद्यापंकरहित निर्मलाकृतये नमः ॥ ५० ॥ जयाखिलजगद्भारधारणश्रमवर्जित ॥ तापत्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यविकर्षाय हलं कलयसे सदा ॥ ५१ ॥ प्रपन्नदीनत्राणाय स्फुटनेत्रसरोरुह ॥ त्वमेवेश पराशेषकलुषक्षालनप्रभुः ॥ ५२ ॥ प्रसन्नकरुणासिंधो
दीनबन्धो नमोऽस्तु ते ॥ चराचराफणाग्रेण धृता येनं वसुन्धरा ॥ ५३ ॥ मामुद्धरास्माद्दुष्पाराद्भवांभोधेरपारतः ॥ परापराणां परम परमेश नमो
ऽस्तु ते ॥ ५४ ॥ स्तुत्वैवं नागराजानं बलं मुसलधारिणम् ॥ पूजयेज्जगतामादिकारणां भद्रलोचनाम् ॥ ५५ ॥ स्तुत्वा जयां तां भो विप्राः
प्रणिपत्य प्रसादयेत् ॥ जय देवि महादेवि प्रसीद भवतारिणि ॥ ५६ ॥ सुखारणि श्रितवतां जय संतुष्टिकारिणि ॥ कार्यं कार्यस्वरूपाणां कारणानां
च कारणम् ॥ ५७ ॥ धारणां धार्यमाणानां त्वामादिं प्रणमाम्यहम् ॥ वक्षःस्थलस्थितां विष्णोः शंभोरर्द्धांगधारिणीम् ॥ ५८ ॥ पद्मयोनि
मुखाब्जस्थां प्रणमामि जगत्प्रियाम् ॥ सृष्टिस्थितिविनाशादिकर्मणां परमात्मनः ॥ ५९ ॥ त्वमेका शक्तिरतुला त्वां विना सोऽपि नेश्वरः ॥ त्वां
सर्वलोकजननीं विष्णुमायां तपस्विनीम् ॥ ६० ॥ सुभद्रां भद्ररूपां तां मूलभूतां नमाम्यहम् ॥ ततः सागरस्नानाय प्रार्थयेत्पुरुषोत्तमम् ॥ ६१ ॥
नमस्ते भगवन्विष्णो जगद्व्यापिश्वराचर ॥ निर्विघ्नं सिद्धिमायातु सिंधुस्नानं मम प्रभो ॥ ६२ ॥ नमस्ते जगतामीश शंखचक्रगदाधर ॥ देहि
देव ममानुज्ञां तव तीर्थनिषेवणात् ॥ ६३ ॥ ततो मौनं व्रजेद्विष्णुं चिंतयन्सरितां पतिम् ॥ उग्रसेनं स्थितं मार्गे अनुज्ञाप्य समाहितः ॥ ६४ ॥
उग्रसेन महाबाहो बलवन्नुग्रविक्रम ॥ लब्ध्वा वरं सुप्रसन्नात्समुद्रतटमास्थितः ॥ ६५ ॥ तीर्थराजकृतस्नानसुसंपूर्णफलप्रद ॥ सिंधुस्नानं करि
ष्यामि अनुज्ञां दातुमर्हसि ॥ ६६ ॥ ततो गच्छेद्द्विजश्रेष्ठाः स्वर्गद्वारं ततः परम् ॥ येन देवाः समायांति क्षेत्रेऽस्मिन्पुरुषोत्तमे ॥ ६७ ॥ भूस्वर्गे
जगदीशस्य दर्शनाय दिने दिने ॥ स्वर्गावतारमार्गेण तत्रस्थौ वां नमाम्यहम् ॥ ६८ ॥ मामप्यूर्ध्वं नयेतां वै साक्षिणौ कर्मणां सताम् ॥ सागरांभः
समुत्पन्नौ श्रेष्ठौ सर्वगुणान्वितौ ॥ ६९ ॥ मध्येन युवयोर्यामि स्वर्गद्वारमपावृतम् ॥ प्रार्थयित्वा ततो गच्छेत्तीर्थराजस्य संनिधिम् ॥ ७० ॥ यं दृष्ट्वा
दूरतः पापान्मुच्यते महतो ध्रुवम् ॥ प्रक्षालितकरांघ्रिक आचांतः शुचिविष्टरे ॥ ७१ ॥ आसीनः प्राङ्मुखो भूत्वा लिखेन्मंडलमग्रतः ॥ चतुरस्रं च
तुर्द्वारं चतुःस्वस्तिककोणकम् ॥ ७२ ॥ तन्मध्ये विलिखेत्पद्ममष्टपत्रं सुशोभनम् ॥ ततोऽष्टाक्षरमंत्रं तु करयोश्च तनौ न्यसेत् ॥ ७३ ॥ षड्भिर्वर्णैः षडंगानां
न्यासः प्रोक्तो मनीषिभिः ॥ शेषौ कुक्षौ च पृष्ठे च न्यस्तव्यौ च ततः पुनः ॥ ७४ ॥ पादयोर्जंघयोरूर्वोः स्फिचोश्च पार्श्वयोः पुनः ॥ नाभौ पृष्ठे बाहुयुग्मे
हृदि कण्ठे च कक्षयोः ॥ ७५ ॥ ओष्ठयोः कर्णयोरक्ष्णोर्गंडयोर्नासयोस्तथा ॥ भ्रुवोर्ललाटे शिरसि मंत्रवर्णान्यथाक्रमम् ॥ ७६ ॥ विन्यस्य व्यापकं
सर्वैर्न्यासं कुर्यात्समाहितः ॥ प्राणायामत्रयं कुर्यान्मूलेन पंचविंशतिम् ॥ ७७ ॥ बध्नीयात्कवचं दिव्यं सर्वपापापनोदनम् ॥ पूर्वे मां पातु गोविंदो

CC-0. In Public Domain. Digitization by eGangotri

वारिजाक्षस्तु दक्षिणे ॥ ७८ ॥ प्रद्युम्नः पश्चिमे पातु हृषीकेशस्तथोत्तरे ॥ आग्नेय्यां नरसिंहस्तु नैर्ऋत्यां मधुसूदनः ॥ ७९ ॥ वायव्यां श्रीधरः पातु ऐशान्यां च गदाधरः ॥ ऊर्ध्वं त्रिविक्रमः पातु अधो वाराहरूपधृक् ॥ ८० ॥ सर्वत्र पातु मां देवः शंखचक्रगदाधरः ॥ नारायणो मनः पातु चैतन्यं गरुडध्वजः ॥ ८१ ॥ पातु मे बुद्ध्यहंकारौ त्रिगुणात्मा जनार्दनः ॥ इंद्रियाणि सदा पातु दैत्यवर्गनिकृन्तनः ॥ ८२ ॥ एवं बद्ध्वा च कवचं निष्पापो जायते पुमान् ॥ षोडशैरुपचारैश्च मनसा कल्पितैर्नरः ॥ ८३ ॥ पुरुषोत्तमं पूजयित्वा यथावद्विधितो द्विजाः ॥ आवाह्य मण्डले तस्मिन्देवदेवमनामयम् ॥ ८४ ॥ पूजयित्वा विधानेन यथाशक्त्युपबृंहितैः ॥ आत्मानं तीर्थराजस्य देवदेवस्य चिंतयन् ॥ ८५ ॥ एवं बद्धांजलिपुटमिमं मन्त्रमुदीरयेत् ॥ सुदर्शन नमस्तेऽस्तु कोटिसूर्यसमप्रभ ॥ ८६ ॥ अज्ञानतिमिरांधस्य विष्णोर्मार्गं प्रदर्शय ॥ एवं संप्रार्थ्य भो विप्रास्तीर्थराजजलांतिके ॥ ८७ ॥ जानुभ्यामवनिं गत्वा प्रणमेद्भक्तिभावितः ॥ तीर्थराज नमस्तुभ्यं जलरूपाय विष्णवे ॥ ८८ ॥ जीवनाय च जंतूनां परं निर्वाणहेतवे ॥ ८९ ॥ अग्निश्च ते योनिरिला च देहे रेतोधा विष्णोरमृतस्य नाभिः ॥ उपैमि ते रूपमनन्यहेतुमानंदसंपन्नम नुप्रविश्य ॥ ९० ॥ इति मन्त्रं पठन्विप्राः प्रविशेज्जलमध्यतः ॥ आवाहयेत्तीर्थराजं भावयञ्जगतां पतिम् ॥ ९१ ॥ जलाधीशं कृतस्नानफलदानेऽतः स्थितम् ॥ अघमर्षणसूक्तेन नारायणयुतेन च ॥ ९२ ॥ त्रिरावृत्तेन कुर्वीत पञ्चवारुणकेन च ॥ सकृदावाहनादीनि षडंगान्यभिषेचने ॥ ॥ ९३ ॥ आवाहनं पुर प्रोक्तं सन्निधानमथोच्यते ॥ स्नातुरिष्टफलप्राप्तौ सान्निध्यपरिकल्पनम् ॥ ९४ ॥ अन्तःशुद्ध्यर्थमाचामेत्पीत्वा तदभिमंत्रितम् ॥ बाह्यावयवशुद्ध्यर्थं मार्जयेत्कुशवारिणा ॥ ९५ ॥ अंतर्बहिर्विशुद्ध्यर्थं मन्त्रपूतेन वारिणा ॥ त्रीनंजलीन्मूर्ध्नि सिंचेत्सिंधौ नांतर्जले जपः ॥ ९६ ॥ त्रिः स्नायात्स्वकृताघानि कोटिजन्मकृतानि च ॥ प्लावितानि जले तस्मिन्भावयन्नघनाशनम् ॥ ९७ ॥ उत्थायाचम्य विधिवत्प्रार्थयेन्मन्त्रमुच्चरन् ॥ त्वमग्निर्जगतां नाथ रेतोधाः कामदीपनः ॥ ९८ ॥ प्रधानं सर्वभूतानां जीवानां प्रभुरव्यय ॥ अमृतस्यारणिस्त्वं हि देव योनिरपांपते ॥ ९९ ॥ वृजिनं हर मे सर्वं तीर्थराज नमोस्तु ते ॥ जन्मकोटिसहस्रेषु यत्पापं पूर्वमर्जितम् ॥ १०० ॥ तदशेषं लयं यातु देहि मे ब्रह्म शाश्वतम् ॥ स्नात्वापि च ततस्तीरमुत्तीर्याचम्य वाग्यतः ॥ १०१ ॥ धारयेद्वाससी शुक्ले पुंड्रकानुज्ज्वलाकृतीन् ॥ शंखचक्रगदापद्मतिलकानि च भक्तितः ॥ २ ॥ देवान्पितॄन्यथान्यायं चिंतयन्भगवद्धिया ॥ तर्प्पयेद्विधिवद्विप्राः सम्यगव्यग्रमानसः ॥ ३ ॥ ततः पूर्ववदालिख्य मण्डलं चोत्तरामुखः ॥ पूजयेन्मूलमन्त्रेण मन्त्रैरेभिश्च भक्तितः ॥ ४ ॥ नारायणं चतुर्बाहुं शंखचक्रगदाधरम् ॥ धरारमाभ्यां सहितं केवलं वा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्विजोत्तमाः ॥ ध्यात्वांतर्यागसंतुष्टं बहिरावाहयेत्ततः ॥ ५ ॥ आगच्छ परमानंद जगद्व्यापिञ्जगन्मय ॥ अनुग्रहाय देवेश मण्डले सन्निधिं कुरु ॥ ६ ॥ चराचरमिदं सर्वं जगदत्र प्रतिष्ठितम् ॥ तदन्तस्थस्त्वमेवेश आसनं कल्पयामि ते ॥ ७ ॥ यस्य पादांबुजे धौते धर्मेण ब्रह्मरूपिणा ॥ पुनाति तद्भवा गंगा जगत्पाद्यं ददाम्यहम् ॥ ८ ॥ अनर्घ्यरत्नघटितचूडामणिकरोत्करैः ॥ ब्रह्मादयः पादपद्मं चिन्तयंति दिने दिने ॥ अनर्घ्याय जगद्धाम्ने अर्घ्यमेतद्ददाम्यहम् ॥ ९ ॥ आचांतस्तीर्थराजो वै येनागस्त्यस्वरूपिणा ॥ तस्मै सुवासितं वारि ददाम्याचमनीयकम् ॥ ११० ॥ यः प्राप्य मधुसंपर्कं चकर्ष जलरूपिणम् ॥ अशेषाघविकर्षाय मधुपर्कं ददाम्यहम् ॥ ११ ॥ यः क्रोडरूपमास्थाय प्रलयार्णवविप्लुताम् ॥ उज्जहार धरामेतां स्नपयामि तमंभसा ॥ १२ ॥ ब्रह्मांडकोट्यो यस्य विश्वरूपस्य संवृतिः ॥ आच्छादनाय सर्वेषां प्रददे वाससी शुभे ॥ ॥ १३ ॥ विना येनानुष्ठितोऽपि यज्ञः स्यादकृतो ध्रुवः ॥ तस्मै यज्ञेश्वरायेदमुपवीतं प्रकल्पये ॥ १४ ॥ यदंगसंगमासाद्य शोभंते भूषणानि वै ॥ विश्वालंकृतये तस्मै भूषणानि प्रकल्पये ॥ १५ ॥ यदंगसंस्पर्शिमरुत्संगान्मलयजा द्रुमाः ॥ सुगंधरससंपन्नास्तस्मै गंधानुलेपनम् ॥ १६ ॥ यस्य संचिंतनादेव सौमनस्यं हतांहसाम् ॥ तस्मै सुमनसां मालां सुगंधां परिकल्पये ॥ १७ ॥ यं चिंत्ते स्थिरमादाय भवाग्निपरिधूपनम् ॥ जहाति तस्मै प्रददे सुगंधं धूपमुत्तमम् ॥ १८ ॥ स्वतेजसाखिलमिदं दीपितं यस्य भासतः ॥ तस्मै दीपप्रदीताय दीपमेतं ददाम्यहम् ॥ १९ ॥ चराचरं जगत्सर्वमत्ति यो यश्च भावयेत् ॥ अनेन च पुनः पुष्टौ तस्मादन्नं निवेदये ॥ २० ॥ यदीयमुखरागेण सहजावासितेन च ॥ मोहिताः सुरसुंदर्यस्तस्मै तांबूलमुत्तमम् ॥ २१ ॥ प्रदक्षिणप्रक्रमणाद्ब्रह्मांगणविवर्त्तनम् ॥ हंति यः करुणांभोधिस्तं नमामि जगद्गुरुम् ॥ २२ ॥ मंत्रास्तु कथिता ह्येत उपचारैः पृथक्पृथक् ॥ आवाह्य चिंतयेद्देवं बहिःसंस्थितमात्मनः ॥ २३ ॥ रत्नसिंहासनं दत्त्वा तत्रासीनं त्रिचिंतयेत् ॥ पादपद्मद्वये दद्यात्पाद्यं श्यामाकपंकजैः ॥ २४ ॥ दूर्वापराजिताभ्यां च संस्कृतं मूलमंत्रणात् ॥ सौवर्णे राजते वापि ताम्रे वा शंख एव वा ॥ २५ ॥ अर्घ्यं संस्कृत्य विधिवद्वारिचंदनपुष्पकैः ॥ यवदूर्वांकुशाग्रैश्च फलसिद्धार्थकैस्तिलैः ॥ २६ ॥ दूर्वांकुशाग्रैर्देवस्य मूर्ध्नि सिंचेत्तदग्रतः ॥ सावशेषं क्षिपेद्भूमावेषोऽर्घविधिरीरितः ॥ २७ ॥ जातीफलैर्वा कंकोलैर्लवंगैः संस्कृतं जलम् ॥ दद्यादाचमनार्थं तु मधुपर्कं ततो ददेत् ॥ ॥ २८ ॥ मधुसर्पिर्युतं गव्यं दधि कांस्ये हि निर्मले ॥ पात्रे स्थितं च पिहितं पात्रेणान्येन तादृशा ॥ सुसंस्कृतं फलयुतं स्नपने जलमुच्यते ॥ ॥ २९ पट्टकौशेयकार्पासनिर्मिते वाससी शुभे ॥ यथाशक्ति प्रदेये च वित्तशाठ्यं न कारयेत् ॥ १३० ॥ हारकेयूरमुकुटग्रैवेयादिकभूषणम् ॥

Nepal Sanskrit University, Balmeeki Campus

CC-0. In Public Domain. Digitization by eGangotri

यथाशक्ति यथास्थानं देवस्यांगे निवेशयेत् ॥ ३१ ॥ उपवीतं हरेर्दद्यात्पट्टसूत्रविनिर्मितम् ॥ कार्पासमथवा विप्रा गंधचंदनसंस्कृतम् ॥ ३२ ॥
चंद्रचंदनकस्तूरीकुंकुमैरनुलेपनम् ॥ ३३ ॥ तुलसीदलमालां च जातीपंकजचंपकैः ॥ अशोकच्छुरपुन्नागनागकेसरकेसरैः ॥ ३४ ॥ अन्यैः सुगंधैः
कुसुमैर्मालां माल्यमथापि वा ॥ मुक्तकानि च पुष्पाणि दद्याद्देवस्य मूर्द्धनि ॥ ३५ ॥ माला सा प्रपदीना तु माल्यं कंठोरुसंमितम् ॥ गर्भकं केशम
ध्ये तु मूर्ध्नि पुष्पांजलिं क्षिपेत् ॥ ३६ ॥ सगुग्गुल्वगुरूशीरसिताज्यमधुचंदनैः ॥ धूपं दद्यात्सुगंधाढ्यं दीपं गोसर्पिषा शुभम् ॥ कर्पूरगर्भया
वर्त्या तिलतैलेन वा ददेत् ॥ ३७ ॥ अखंडितसमुद्धौतं शालितंडुलनिर्मितम् ॥ सुपक्कमन्नं सुरभि सर्पिषा च सुवासितम् ॥ ३८ ॥ सौरभेयदधिक्षी
रपक्करंभासितायुतम् ॥ नानाव्यंजनसंकीर्णं सोपदंशं सपूपकम् ॥ ३९ ॥ नानाफलयुतं हृद्यं सुगंधं सुरसं नवम् ॥ नैवेद्यं देवदेवस्य प्रस्थादूनं न
शस्यते ॥ १४० ॥ धूपे दीपे च नैवेद्ये स्नानेऽर्घे मधुपर्कके ॥ वस्त्रे यज्ञोपवीते च दद्यादाचमनीयकम् ॥ ४१ ॥ अन्यत्र केवलं वारि संस्कृतं त्वौप
चारिकम्॥नैवेद्यांते त्वाचमनं दद्याच्च करघृष्टिकम्॥४२॥सगंधचंदनं विप्रास्तांबूलं च ददेत्ततः॥सकर्पूरलवंगैलाजातीक्रमुकसंयुतम्॥४३॥अष्टोत्तरशतं
जप्त्वा मूलमंत्रमनन्यधीः ॥ स्तुत्वा प्रदक्षिणं कृत्वा प्रार्थयेत्पुरुषोत्तमम् ॥ ४४ ॥ देवदेव जगन्नाथ सर्वतीर्थप्रवर्त्तक ॥ सर्वतीर्थमयश्चासि सर्वदेवमय
प्रभो ॥४५॥ त्वत्प्रसादान्मया तीर्थराजे स्नानं हि यत्कृतम् ॥ तदस्तु सफलं देव यथोक्तफलदो भव ॥४६॥ सिंधुराजस्त्वं च विभो द्रवरूपोऽस्यसंश
यम् ॥ पापालये निमग्नं मां परित्राहि नमोऽस्तु ते ॥ ४७ ॥ इत्थं प्रपूज्य देवेशं नारायणमनामयम् ॥ तीर्थराजकृतस्नानः सर्वतीर्थफलं लभेत् ॥४८॥
गवां कोटिप्रदानेन क्रतुकोटिकृतेन च ॥ कोटिब्राह्मणभोज्येन महादानैश्च कोटिशः ॥ यत्पुण्यं कर्मिणां प्रोक्तं तदनेन हि लभ्यते ॥ ४९ ॥ ध्यानं
दानं तपो जाप्यं श्राद्धं च सुरपूजनम् ॥ सिंधुराजे कृतं सर्वं कोटिकोटिगुणं भवेत् ॥ १५० ॥ अपि नः स कुले कश्चित्सिंधुस्नायी भविष्यति ॥
देवेभ्यश्च पितृभ्यश्च दास्यते च तिलोदकम् ॥ ५१ ॥ क्रंदंति सर्वपापानि संभ्रांताः सर्वपातकाः ॥ अनिष्टानि पलायन्ते सिंधुस्नानोद्यतस्य
वै ॥ ५२ ॥ अन्यतीर्थे कृतं पापं सिंधुतीरे विनश्यति ॥ सिंधुतीरे कृतं पापं सिंधुस्नाने विनश्यति ॥ ५३ ॥ सिंधुस्नानरतं नित्यं दृष्ट्वैव यमकि
ङ्कराः ॥ दिशो दश पलायन्ते सिंहं दृष्ट्वा यथा मृगाः ॥ ५४ ॥ यमोऽपि भीतस्तं दृष्ट्वा प्रणिपत्य प्रपूज्य च ॥ न शक्नोति तदा स्थातुं तस्याग्रे
पुण्यकर्मिणः ॥ ५५ ॥ वांछंति देवता नित्यं मानुष्यं प्राप्नुयामहे ॥ सम्यक्छुद्धतन्वो भूत्वा सिंधुस्नानं लभेमहि ॥ ५६ ॥ मेरुमन्दरमात्रोऽपि राशिः
पापस्य कर्मणः ॥ सिंधुस्नानेन दग्धः स्यात्तूलराशिरिवानलात् ॥ ५७ ॥ अप्सु नारायणं देवं स्नानकाले स्मरेत्सदा ॥ साक्षाद्विष्णुस्वरूपेऽत्र सिंधौ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चैव विशेषतः ॥ ५८ ॥ ब्रह्मघ्नो वा सुरापो वा गोघ्नो वा पञ्चपातकी ॥ सर्वे ते निष्कृतिं यांति सिंधुस्नानान्न संशयः ॥ ५९ ॥ कपिलाकोटिदानाच्च सिन्धुस्नानं विशिष्यते ॥ सकृत्सिंध्ववगाहेन कुलकोटिं समुद्धरेत् ॥१६०॥ सर्वतीर्थेषु यत्पुण्यं सर्वेष्वायतनेषु च ॥ तत्फलं लभते सर्वं सिन्धुस्नानान्न संशयः ॥ ६१ ॥ य इच्छेत्सफलं जन्म जीवितं श्रुतमेव वा ॥ स पितॄंस्तर्पयेत्सिंधुमभिगम्य सुरांस्तथा ॥ ६२ ॥ चत्वारः सुलभा वेदाः सषडंग पदक्रमाः ॥ सुलभानि कुरुक्षेत्रे दानानि विविधानि च ॥ ६३ ॥ चांद्रायणानि कृच्छ्राणि तपांसि सुलभान्यपि ॥ अग्निष्टोमादयो यज्ञाः सुलभा बहुदक्षिणाः ॥ ६४ ॥ सिन्धुतोयैश्च सलिलैर्दुर्लभं पितृतर्पणम् ॥ मासं तर्पणमात्रेण पिंडानां पातनेन च ॥ ६५ ॥ सिन्धौ वै पितरः सर्वे विमानान्सूर्यवर्चसः ॥ सिन्धुतर्पणसंतुष्टाः श्राद्धपिंडसुतर्पिताः ॥ आरुह्य सहसा यांति ब्रह्मलोकं सनातनम् ॥ ६६ ॥ आद्यंतयोर्जगन्नाथं पूजयित्वा यथाविधि ॥ तीर्थराजेऽभिषिच्य स्वं नरः स्यान्मुक्तिभाजनम् ॥ ६७ ॥ ततस्तीर्थविसर्गं च कृत्वा शुद्धमनाः पुमान् ॥ रामं कृष्णं सुभद्रां च नत्वा रूपं विचिन्तयेत् ॥ १६८ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे पुरुषोत्तमक्षेत्रमाहात्म्ये त्रिंशोऽध्यायः ॥ ३० ॥ ॥ जैमिनिरुवाच ॥ ॥ कृतकृत्यं तदात्मानं मन्यमानस्ततो व्रजेत् ॥ अश्वमेधांगसंभूतमिंद्रद्युम्नसरः प्रति ॥ १ ॥ यस्य तीरे निवसति नरसिंहाकृतिर्हरिः ॥ नरसिंहमनुप्रार्थ्य तत्र स्नायाद्यथाविधि ॥ २ ॥ नरसिंह नमस्तुभ्यं यस्य ते क्षेत्र उत्तमे ॥ सहस्रं वाजिमेधस्य क्रतोश्चक्रे नृपोत्तमः ॥ ३ ॥ इन्द्रद्युम्नः प्रसादात्ते तस्य क्रत्वंगसंभवे ॥ सरसि स्नातुमायातो मामनुज्ञापय प्रभो ॥ ४ ॥ ततस्तीर्थतटं गत्वा कृतशौचाचमक्रियः ॥ प्रार्थयेदंजलिं कृत्वा इमं मंत्रमुदीरयेत् ॥ ५ ॥ अश्वमेधांगगोकोटिखुरक्षुण्णमहीतलः ॥ तन्मूत्रफेनादानांभःपूरिताखिलपावनः ॥६॥ स्नातुं तवागतः पुण्ये सर्वतीर्थमये जले ॥ पूर्वजन्मसहस्रोत्थं पापं स्नानाद्विमोचय ॥ ७ ॥ अन्तः प्रविश्य च ततो वारुणैः पंचभिर्द्विजाः ॥ स्नायादन्तर्जले जप्यात्त्रिरावृत्त्याघमर्षणम् ॥ ८ ॥ अश्वमेधांगसंभूत तीर्थ सर्वाघनाशन ॥ जन्मकोटिभवं पापं त्वयि स्नानाद्विनश्यतु ॥ ९ ॥ इमं मन्त्रं त्रिरुच्चार्य त्रिः स्नायात्तज्जले द्विजाः ॥ संस्मरेद्विष्णुगायत्र्या नरसिंहाकृतिं हरिम् ॥ १० ॥ आपो नारा इति प्रोक्ता यस्मात्ता नरसूनवः ॥ अयनं प्रथमं चास्य तस्मादप्सु हरिं स्मरेत् ॥११॥ देवानृषीन्पितॄंश्चैव तर्पयेद्विधिवन्नरः ॥ नरसिंहं ततो गच्छेत्पश्चिमाभिमुखं स्थितम् ॥ १२ ॥ सिद्धं शंभुं कृत्रिमं वा पश्चिमाभिमुखं हरिम् ॥ दृष्ट्वा विमुच्यते पापैर्जन्मकोटिसमुद्भवैः ॥ १३ ॥ तमाथर्वणमंत्रेण यजेच्च नरकेसरिम् ॥ नारदेन पुरा ह्येष मंत्रराजः प्रतिष्ठितः ॥ १४ ॥ इन्द्रद्युम्नेन तेनैव चिरादेष उपासितः ॥ नरसिंहाकृतौ नान्यो मंत्रस्तत्सदृशो द्विजाः ॥ १५ ॥ यस्योच्चारणमात्रेण तुष्टो भवति

CC-0. In Public Domain. Digitization by eGangotri

केसरी ॥ अनेन दारुवर्ष्मापि ब्रह्मणा संप्रतिष्ठितः ॥ १६ ॥ पूर्वोक्तैरुपचारैस्तु पूजयेन्नरकेसरिम् ॥ जपाप्रसूनैररुणैरन्यैश्चैव सुगंधिभिः ॥ १७ ॥ चंदनागरुकर्पूरैर्लेपयेन्नरकेसरिम् ॥ पायसं सितया युक्तं सौरभेयेण सर्पिषा ॥ १८ ॥ कर्पूरखण्डसंयुक्तान्मोदकान्घृतपाचितान् ॥ संयावान्घृतपूपांश्च फलं नानाविधं तथा ॥ १९ ॥ शर्करादधिसंयुक्तं शाल्यन्नं विनिवेदयेत् ॥ दृष्ट्वा स्पृष्ट्वा नमस्कृत्वा संपूज्य नरकेसरिम् ॥ २० ॥ स्वान्स्वानभीष्टानाप्नोति नरो वै नात्र संशयः ॥ देवत्वममरेशत्वं गंधर्वत्वं च भो द्विजाः ॥२१॥ ईशित्वं च वशित्वं च सार्वभौमत्वमेव वा ॥ यद्यत्कामयते चित्ते तत्तदाप्नोत्यसंशयम् ॥ २२ ॥ पंचतीर्थीविधानं च कथितं पृच्छतां द्विजाः ॥ दिनानि पंच कृत्वैतां पञ्चभूतमये पुनः ॥२३॥ न देहे प्रविशेन्मर्त्यो व्रती विष्णुपरायणः ॥ पौर्णमास्यां प्रत्युषसि तीर्थराजजले पुनः ॥ २४ ॥ पूर्वोक्तविधिना स्नात्वा शुद्धाहारो जितेंद्रियः ॥ एकभक्तव्रतेनैव वर्त्तते प्रीतये नरः ॥ यावत्पंच दिनानि स्युस्तावत्कालं द्विजोत्तमाः ॥ २५ ॥ ततः प्रविश्य प्रासादं मंचस्थं पुरुषोत्तमम् ॥ रामं सुभद्रां दृष्ट्वा च मुच्यते पापकंचुकैः ॥ २६ ॥ सर्वतीर्थमयात्कूपादुद्धृतेन सुगन्धिना ॥ वारिणा स्नाप्यमानं तु यो ज्यैष्ठ्यां पश्यते हरिम् ॥ २७ ॥ न तस्य पापसंबंध आत्मनि प्रभविष्यति ॥ यात्राकर्तृविधिं वक्ष्ये शृणुध्वं मुनयः परम् ॥ २८ ॥ चतुर्दश्यां दृढं मंचं कारयित्वा सुशोभनम् ॥ तृणकाष्ठमयं लिप्तं सुधया बहुलं शुभम् ॥ २९ ॥ अथवा दार्षदं कुर्याच्चिरस्थायि द्विजोत्तमाः ॥ स्नानार्थं देवदेवस्य वित्तशाठ्यं न कारयेत् ॥ ३० ॥ नानाद्रुमगणाकीर्णं दक्षिणानिलशीतलम् ॥ उल्लसत्सिंधुकल्लोलशाड्वलोपरि संस्कृतम् ॥ ३१ ॥ समुच्छ्रितमहामूल्यवितानवरशोभितम् ॥ विरलाच्छादनं कुर्याद्देवानां दर्शनाय वै ॥ ३२ ॥ आयांति ब्रह्मणा सार्द्धं स्नपनाय जगत्पतेः ॥ स्वर्गंगांभः समादाय पारिजातविभूषितम् ॥ ३३ ॥ ब्रह्मर्षयश्च त्रिदशा ब्रह्मणा सहिता विभुम् ॥ मंचस्थं स्नापयन्तीह वचनात्परमेष्ठिनः ॥ ३४ ॥ जयशब्दैश्च स्तुतिभिर्वंद्योऽयं त्रिदिवौकसाम् ॥ तस्मान्मंचस्तु कर्तव्यो मंडितो माल्यचामरैः ॥ ३५ ॥ नानामणिस्रजा हारिदुकूलकृततोरणम् ॥ सुगंधधूपसुरभिचंदनांभःसमुक्षितम् ॥ ३६ ॥ एवं मंचं प्रतिष्ठाप्य तस्य दक्षिणतो द्विजाः ॥ कूपाद्वारि समुद्धृत्य कलशान्स्वर्णनिर्मितान् ॥ ३७ ॥ शालायां शास्त्रदृष्टेन विधिना त्वधिवासयेत् ॥ ३८ ॥ सुवासितं जलं तेषु पावमान्या प्रपूरयेत् ॥ चतुर्दशीनिशामध्ये कर्मैतत्समुदाहृतम् ॥ ३९ ॥ शनैः शनैश्च नीयासुर्हरिं हलिपुरःसरम् ॥ ब्राह्मणाः क्षत्रिया वैश्या राज्ञा संमानितादृताः ॥ ४० ॥ चामरैस्तालवृन्तैश्च वीज्यमानं निरंतरम् ॥ पुराकृतामलेपं तं विष्णोरंगान्न हापयेत् ॥ ४१ ॥ यथा सुगंधलेपेन सुपुष्टांगो दिने दिने ॥ तथा प्रयत्नतः कार्यः कृशांगो न हि पुष्टिकृत् ॥ ४२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नयेयुरप्रमाद्यंतो भगवंतमानदिताः ॥ प्रमादतो यदि भवेत्पतनं मुरवैरिणः ॥ ४३ ॥ बलस्य वा सुभद्राया राज्ञो राज्यस्य भीतिकृत् ॥
अपि पातयतां हानिः संततेर्बहुदुःखिता ॥ ४४ ॥ नरके नियतं वासो भवेत्तेषां दुरात्मनाम् ॥ विमुह्यंतश्चिराद्दारुमयीयं प्रतिमा कथम् ॥ ४५ ॥
तिष्ठदविश्वसंतो ये भगवद्द्रोहिणस्तु ते ॥ नरकं प्रतिपद्यंते सर्वकर्मबहिष्कृताः ॥४६॥ मूढानां नास्तिकानां च कृतघ्नानां हतात्मनाम् ॥ धर्मकृत्येषु
जायंते अविश्वासस्य युक्तयः॥४७॥ अदृष्टं यस्य यावद्धि स तु तेन विनिर्मितः ॥ तदंते तस्य क्षीयंते प्रासादप्रतिमादयः ॥४८॥ न चायं निर्मितः
केन द्रुमः सोऽपि प्रवर्द्धितः ॥ वरं ददाति या नूनं न चासौ प्रतिमा मता ॥ ४९ ॥ निर्मितायां प्रतिकृतौ पुरा मन्वंतरादिषु ॥ व्यतीतेष्वपि वर्द्धते
जनानां च सुपर्वणाम् ॥ ५० ॥ भक्तयस्तादृशो विप्राः सर्वेषां पृथिवीक्षिताम् ॥ स्वारोचिषेंऽतरे चैव आविर्भूतः कृपानिधिः ॥ ५१ ॥ वैवस्वतें
ऽतरे सप्तविंशे चैव चतुर्युगे ॥ द्वापरांते समायातौ तदा कृष्णार्जुनावुभौ ॥ ५२ ॥ त्रिदिनानि स्थितावत्र व्रतस्थौ मधुसूदनम् ॥ भक्त्या संपूज्य तं
स्तुत्वा जग्मतुर्द्वारकां पुनः ॥ ५३ ॥ न केऽपि तत्त्वं जानंति मानुषीं तनुमास्थिताः ॥ अवताराः प्रवर्त्तंते विष्णोरस्य युगेयुगे ॥ ५४ ॥ धर्मस्था
पनया विप्रा लीयंते स्वपदे पुनः ॥ पूर्वं च ब्रह्मणा प्रोक्तः स चानेन परस्परम् ॥ ५५ ॥ स्थाता परार्द्धपर्यंतं भगवान्दारुरूपधृक् ॥ सदायं वरदो
विष्णुः शुद्धसत्त्वेन भावितः ॥ ५६ ॥ यस्य यावांस्तु विश्वासस्तस्य सिद्धिस्तु तावती ॥ प्रमादीकृतविश्वासो भक्तो दृढमतिः पुमान् ॥ ५७ ॥
यत्नानुरूपं लभते फलमस्मात्सुदुर्लभम् ॥ पुरा वः कथितं सर्वमंबरीषविमोचनम् ॥ ५८ ॥ ततस्तस्मिञ्जगन्नाथे परमात्मस्वरूपिणि ॥ विधाय
सुदृढां भक्तिं वसध्वं पुरुषोत्तमे ॥५९॥ अतोऽयं भक्तितो नेयः श्रीकृष्णमंच उत्तमः ॥ सुभद्राबलभद्रौ च राजवत्परिचर्य वै ॥ ६० ॥ उत्तोलितेषु
च्छत्रेषु चामरैर्वीजितेषु च ॥ कालागुरुसुधूपासु दिक्षु गंभीरनादिषु ॥ ६१ ॥ नानाविधेषु वाद्येषु त्वगारे परिपूरिते ॥ तौर्यत्रिके साधुवृत्ते दीपिका
श्रेणिराजिते ॥ ६२ ॥ अंधकारेऽथ सर्वेषां वर्द्धमाने महोत्सवे ॥ आच्छन्ने श्रीपतेरंगे प्रमादपरिशंकया ॥ ६३ ॥ पट्टपट्टदुकूलेषु नीयमानेषु दूरतः ॥
गतेर्वेगात्तदोत्तानीकृतास्ये जगतां गुरौ ॥ ६४ ॥ आवर्त्तदृष्टयो देवा दिवारोहणशंकिनः ॥ जयस्व राम कृष्णेति जय भद्रेति चोचिरे ॥ ६५ ॥
एवं सलीलं भगवाञ्जन्मज्यैष्ठ्याभिषेचने ॥ नीयते मंचदेशं तु निशीथे ब्राह्मणादिभिः ॥ ६६ ॥ अहंपूर्विकशब्दस्तु देवानां श्रूयते दिवि ॥ देवदुं
दुभयश्चैव जयशब्दविमिश्रिताः ॥ ६७ ॥ ततो मंचस्थितं ब्रह्मरूपं प्रत्यर्चया सह ॥ आच्छाद्य सर्वाण्यंगानि मुखवर्जं सुचेलकैः ॥ ६८ ॥ विना
निवेद्यं संपूज्य उपचारैः पुरोदितैः ॥ अधिवासितकुंभैश्च शांतिघोषपुरःसरम् ॥ ६९ ॥ समुद्रज्येष्ठामंत्रेण स्नापयेत्सुरपुंगवान् ॥ पश्यतामभिषेक्तॄणां

CC-0. In Public Domain. Digitization by eGangotri

कृतकृत्यत्वहेतवे ॥ ७० ॥ स्नाप्यमानं तु पश्यंति ये नरास्तत्र संस्थिताः ॥ गर्भोदकेन स्नपनं न ते पुनरवाप्नुयुः ॥ ७१ ॥ ज्येष्ठस्नानं भगवतो
ये पश्यंति मुदान्विताः ॥ न ते भवाब्धौ मज्जंति यात्रामुत्कंठमानसाः ॥ ७२ ॥ बुद्ध्यबुद्धिकृतः पुंसामनादिः पापसंचयः ॥ तत्क्षणान्नाश
मायाति पश्यतां स्नपनं हरेः ॥ ७३ ॥ सत्यं सत्यं पुनः सत्यं ब्रवीमि द्विजपुंगवाः ॥ सर्वसंतापशमनमशेषमलनाशनम् ॥ ७४ ॥ स्नपनं
श्रीपतेर्ज्यैष्ठ्यां यदि भक्त्या विलोकनम् ॥ प्रायश्चित्तनिमित्तानि यानि पापानि संति वै ॥ ७५ ॥ तानि सर्वाणि क्षीयंते पश्यतां स्नपनं हरेः ॥
नातः परतरं कर्म ह्यनायासेन मोचनम् ॥ ७६ ॥ ज्येष्ठजन्मदिने स्नानं हरेर्यदवलोकितम् ॥ स्नानदानतपःश्राद्धजपयज्ञादयस्तु ये ॥ ७७ ॥
विधयः कोटिगुणिताः कोटिजन्मोपपादिताः ॥ स्नानदर्शनपुण्यस्य हरेस्ते न तुलां गताः ॥ ७८ ॥ भक्त्या यः स्नपनं विष्णोरेकस्मिन्वत्सरेऽपि
वा ॥ पश्येन्न शोचते विप्रा इह संसारमोचने ॥ ७९ ॥ तेनेष्टं क्रतुभिः पुण्यैः श्रद्धाविपुलदक्षिणैः ॥ महादानानि दत्तानि भोजिताः कोटिशो
द्विजाः ॥ ८० ॥ श्राद्धानि गयशीर्षादौ कोटिशश्च कृतानि वै ॥ पुण्यकाले च तीर्थादौ तपांसि चरितानि च ॥ ८१ ॥ अर्धोदयादियोगेषु कोटि
तीर्थेषु कोटिशः ॥ स्नातानि तेन भो विप्रा यः पश्येत्स्नपनं हरेः ॥ ८२ ॥ सत्यं सत्यं पुनः सत्यं ब्रवीमि द्विजपुंगवाः ॥ नातः श्रेयस्करं कर्म
शास्त्रदृष्टपथिस्थितम् ॥ ८३ ॥ मञ्चस्थं स्नाप्यमानं हि यः पश्येत्पुरुषोत्तमम् ॥ स्नानाच्छतगुणं पुण्यं लभते वै न संशयः ॥ ८४ ॥ मञ्चस्थितं
जगन्नाथं स्नानार्द्रं यस्तु पश्यति ॥ सांद्रानन्दार्द्रचित्तोऽसौ न किंचित्पापमश्नुते ॥ ८५ ॥ यदेव पुण्यमुदितं स्नानदर्शनकर्मणि ॥ तत्तत्फलमवा
प्नोति दृष्ट्वा मञ्चस्थमच्युतम् ॥ ८६ ॥ एक एव जगन्नाथस्त्रिधा तत्र स्थितो द्विजाः ॥ एकैकस्यापि स्नपनदर्शनं भुक्तिमुक्तिदम् ॥ ८७ ॥ जयस्व
रामभद्रेति जय भद्रेति यो वदेत् ॥ जय कृष्ण जगन्नाथ जयेत्युच्चारयेन्मुदा ॥ ८८ ॥ स्नानकाले स वै मुक्तिं प्रयाति द्विजसत्तमाः ॥ अधिवा
सादिकं तत्र यैः कृतं स्नानकर्मणि ॥ ८९ ॥ तेषां श्रद्धामुदायुक्तः प्रदद्याद्दक्षिणाः पृथक् ॥ ब्राह्मणेभ्यश्च मिष्टान्नं वस्त्रालंकरणानि च ॥ ९० ॥ प्रदद्या
च्छ्रद्धया युक्तो दीनानाथांश्च तर्पयेत् ॥ ये द्रष्टुमागताः स्नानं जीवन्मुक्तास्तु ते ध्रुवम् ॥ ९१ ॥ तान्यथाशक्ति वै राजा मानयेत्प्रीतये हरेः ॥ स्नाना
वशेषतोयेन स्नायाद्भद्रासनस्थितः ॥ ९२ ॥ नारी वा पुरुषो वापि तस्य पुण्यं वदामि वः ॥ कल्पः स्याच्चिररोगार्तो ह्यपमृत्युं जयेदसौ ॥ ९३ ॥
अपुत्रा मृतवत्सा वा वन्ध्या वापि लभेत्सुतम् ॥ सुभगः सर्वलोकानां निर्धनो धनवान्भवेत् ॥ ९४ ॥ गुर्विणी लभते पुत्रं दीर्घायुर्गुणवत्तरम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गंगादिसर्वतीर्थानां स्नानजं फलमुच्यते ॥ ९५ ॥ स्नानदर्शनजं पुण्यं धर्मात्मा लभते ध्रुवम् ॥९६॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां
संहितायां द्वितीये वैष्णवखण्डे पुरुषोत्तमक्षेत्रमाहात्म्ये एकत्रिंशोऽध्यायः ॥ ३१ ॥ ॥ जैमिनिरुवाच ॥ ॥ अतः परं प्रवक्ष्यामि दक्षिणामूर्ति
दर्शनम् ॥ पदेपदेऽश्वमेधस्य फलं यत्रोपलभ्यते ॥ १ ॥ ततो नानाविधैर्दिव्यैर्भक्ष्यभोज्यादिकैस्तथा ॥ यथाशक्त्युपचारैस्तु गंधैर्माल्यैश्च पूज
येत् ॥ २ ॥ रामं कृष्णं सुभद्रां च गीतनृत्यादिकैस्तथा ॥ प्रेक्षणीयैश्च विविधैः श्रद्धया चोपपादितैः ॥ ३ ॥ वस्त्रचंदनमाल्याद्यैः पूजयित्वा द्विजो
त्तमान् ॥ भगवद्ब्राह्मणांश्चैतान्महाभागवतांस्तथा ॥ ४ ॥ ततो नयेद्दक्षिणाभिमुखांस्तांस्त्रिदशेश्वरान् ॥ उत्सवं च महत्कृत्वा पूर्वानयनवद्वरैः ॥ ५ ॥
तस्मिन्काले हरिं पश्येद्व्रजंतं दक्षिणामुखम् ॥ [1]समं सुभद्रां यो मर्त्यो न स प्राकृतमानुषः ॥ ६ ॥ स्नानार्थमागता देवाः स्नापयित्वा जगद्गुरुम् ॥
आकाशेऽपि ससंबाधास्तावत्कालं स्थिता हरिम् ॥ द्रष्टुं व्रजंतं याम्याशावदनं भवनाशनम् ॥ ७ ॥ धर्मशास्त्रेषु यावंति धर्मकर्माणि संति वै ॥
तानि सर्वाणि संद्रष्टुं व्रजंतं दक्षिणामुखम् ॥ ८ ॥ स्नानदर्शनजं पुण्यं समग्रं लभते तु सः ॥ स्नातं मुरारिं यः पश्येद्व्रजंतं दक्षिणामुखम् ॥ ९ ॥
नीराजयित्वा देवेशं रामेण सह भद्रया ॥ प्रासादांतः प्रवेश्याथ न पश्येद्वै कथंचन ॥ १० ॥ एतत्तु विस्तरेणोक्तं पूर्वमेव मया द्विजाः ॥ ११ ॥
॥ ॥ मुनय ऊचुः ॥ ॥ भगवन्यत्त्वया प्रोक्तं ज्येष्ठास्नानप्रदर्शनात्॥फलं प्राप्नोति नियतं तन्नो ब्रूहि विदांवर॥१२॥ ॥ जैमिनिरुवाच ॥ ॥ हंत वः कथ
यिष्यामि तद्व्रतं ज्येष्ठपंचकम् ॥नातः परतरं प्रोक्तमृषिभिः शास्त्रपारगैः ॥१३॥ श्रौतस्मार्तपुराणोक्तव्रतानामिदमुत्तमम् ॥ इदं प्रथमतः प्रोक्तं ब्रह्मणा
परमेष्ठिना ॥ १४ ॥ ज्येष्ठत्वाद्व्रतमुख्यानां ख्यातं तज्ज्येष्ठपंचकम् ॥ समुद्रो ज्येष्ठफलदः प्रभुर्ज्येष्ठफलप्रदः ॥ १५ ॥ वर्षसंदर्शनात्पुण्यं मञ्चकेनैव
लभ्यते ॥ मंचकेन तु यल्लभ्यं महाज्यैष्ठ्यां तु तल्लभेत् ॥ १६ ॥ यन्मयोक्तं पुरा विप्राः स्नानदर्शनजं फलम् ॥ समग्रं तदवाप्नोति महाज्यैष्ठ्यां न
संशयः ॥ १७ ॥ ॥ मुनय ऊचुः ॥ ॥ महाज्यैष्ठीं समाचक्ष्व यत्र स्नानं महाफलम् ॥ तत्र नः कौतुकं ब्रह्मन्महद्वै संप्रवर्त्तते ॥ १८ ॥
॥ ॥ जैमिनिरुवाच ॥ ॥ ज्येष्ठस्य विमले पक्षे या वै पंचदशी भवेत् ॥ शक्रर्क्षैकांशगौ चन्द्रगुरू च गुरुवासरे ॥ १९ ॥ शुभे योगे महा
ज्यैष्ठी सर्वपापप्रणाशिनी ॥ सर्वक्षेत्रं सर्वतीर्थं सप्त वै सागरास्तथा ॥ २० ॥ क्रतवश्च महादानसमूहश्च तपांसि च ॥ विद्याश्चाष्टादशविधा व्रतानि
विविधानि च ॥ २१ ॥ शांतिपौष्टिककर्माणि सांख्ययोगस्तथैव च ॥ सर्वे संभूय गच्छंति क्षेत्रं श्रीपुरुषोत्तमम् ॥ २२ ॥ वृन्दशः प्रविभक्तास्त

[1] समं सुभद्रां--हरिणा इति शेषः हरिणा समं सह सुभद्रां गच्छंतीं यः पश्येत्--इति योजना ।

CC-0. In Public Domain. Digitization by eGangotri

एकैकं क्षेत्रगं प्रति ॥ कस्मै वयं भाग्यवते ज्येष्ठस्नानावलोकने ॥ २३ ॥ महाज्यैष्ठ्यां प्रवेक्ष्यामः परस्परमहंमया ॥ तत्र यांति महायोगे भगवत्क्षेत्रमुत्तमम् ॥ २४ ॥ महाज्यैष्ठी महापुण्या भगवत्प्रीतिवर्द्धनी ॥ तस्यां संपूज्य देवेशं जगन्नाथं कृपार्णवम् ॥ दृष्ट्वा च स्नाप्यमानं तं पापकोशाद्विमुच्यते ॥ २५ ॥ अत ऊर्ध्वं प्रवक्ष्यामि व्रतं तज्ज्येष्ठपञ्चकम् ॥ व्रतेनानेन लभ्यं यत्तत्तदेवं ब्रवीमि वः ॥ २६ ॥ दशम्यां नियमं कुर्यात्प्रातः स्नात्वा यथाविधि ॥ आचार्यं वृणुयात्तत्र वैष्णवं द्विजपुंगवम् ॥ २७ ॥ इत्थं संकल्पममलं गृह्णीयाद्व्रतमुत्तमम् ॥ २८ ॥ देवदेव जगन्नाथ संसारार्णवतारक ॥ अद्यारभ्य व्रतं देव यावज्ज्यैष्ठी च सा तिथिः ॥ तावद्व्रतं करिष्यामि प्रीतये तव केशव ॥२९॥ सर्वतीर्थाभिषेकं च प्रत्यहं व्रतभोजनम् ॥ मूर्तीनां तव पंचानामेकस्यापि प्रपूजनम् ॥ ३० ॥ एकस्मिन्दिवसे देव त्रिसंध्यं त्वत्प्रसादतः ॥ समाप्यतां व्रतमिदं सफलं चास्तु ते प्रभो ॥ ॥ ३१ ॥ ततः पंचसु तीर्थेषु स्नात्वा च गृहमेत्य च ॥ स्थंडिले विलिखेत्पद्ममष्टपत्रं सकर्णिकम् ॥ ३२ ॥ तन्मध्ये स्थापयेत्कुंभं तीर्थांभोभिः प्रपूरितम् ॥ सचंदनफलैर्युक्तं तन्मुखे ताम्रभाजनम् ॥ ३३ ॥ वाससा वेष्टितं कण्ठे पात्रं चाक्षतपूरितम् ॥ तन्मध्ये स्थापयेद्देवं सौवर्णं मधुसूदनम् ॥ ॥ ३४ ॥ शुभांगावयवं शांतं वामे श्रीयुतमीश्वरम् ॥ ३५ ॥ दक्षिणे च गरुत्मंतं स्पृशंतं पृष्ठदेशतः ॥ शंखचक्रधरं चोर्ध्वे पद्मासनगतं विभुम् ॥ ॥ ३६ ॥ पूजयेदुपचारैस्तमाचार्यो वापि भो द्विजाः ॥ नीलोत्पलानां मालां तु भक्त्या देवाय दापयेत् ॥ ३७ ॥ दशम्यां पूजयित्वैवं दशकोट्यघनाशनम् ॥ प्रार्थयेत्प्रांजलिर्भूत्वा मन्त्रमेतं समुच्चरन् ॥ ३८ ॥ ॥ मधुसूदन देवेश नमस्ते माधवीप्रिय ॥ कृपावारांनिधे पाहि पतितं मां भवार्णवे ॥ ३९ ॥ एकादश्यां चतुर्बाहुं शंखचक्रगदाधरम् ॥ नारायणं पद्मसंस्थं पंचनिष्कविनिर्मितम् ॥ तदर्द्धं निर्मितं वापि पूजयेत्पद्ममालया ॥ ४० ॥ नैवेद्यं पायसं दद्यात्सितां रंभाफलानि च ॥ नानाविधं च नैवेद्यं दत्त्वा संप्रार्थयेन्मुदा ॥ ४१ ॥ नारायण नमस्तेऽस्तु भवसागरतारण ॥ त्राहि मां पुंडरीकाक्ष शरणागतवत्सल ॥ ४२ ॥ एकादशेंद्रियकृतं पापराशिमनुत्तमम् ॥ अनादिभवनिर्व्यूढं नाशयेत्पूजितः प्रभुः ॥ ४३ ॥ द्वादश्यां यज्ञवाराहं पूजयेत्स्वर्णनिर्मितम् ॥ चंदनागुरुकर्पूरलेपनैश्चंपकस्रजा ॥ ४४ ॥ नानाविधापूपसारा भक्ष्यभोज्यफलान्विताः ॥ निवेद्य प्रार्थयेद्देवं स्तुतिमेतां समुच्चरन् ॥ ४५ ॥ प्रलयार्णवसंमग्नां धरणीं धृतवानसि ॥ किन्न शक्तो ममोद्धारे पतितस्यांघ्रिपंकजे ॥ तन्मामुद्धर गोविंद निमग्नं शोकसागरे ॥ ४६ ॥ अब्दो द्वादशमासो वै यावदब्दकृतानि तु ॥ पापानि महदल्पानि इतः पूर्वेषु जन्मसु ॥ तद्विनाशयते देवो द्वादश्यामर्चितो नृणाम् ॥ ४७ ॥ त्रयोदश्यां तु प्रद्युम्नं शंखचक्रवराभयान् ॥ धारयन्तं पद्मगतं चतुर्निष्कविनिर्मितम् ॥ ४८ ॥ उपचारैर्यथा

१अहंमया—अहमहमिकया—इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रोक्तैः पूजयेद्भक्तितो नरः ॥ अशोकपाटलीमालां चंद्रपूर्णां समुज्ज्वलाम् ॥ ४९ ॥ नैवेद्यं चैव पक्वान्नं फलं पक्वं मनोहरम् ॥ दत्त्वा नमस्कृतिं कुर्व
न्प्रार्थयेत्प्रांजलिः शुचिः ॥ ५० ॥ देव प्रद्युम्न कामानां पूरक कामरूपधृक् ॥ कामाश्च सफलाः संतु कामपाल नमोऽस्तु ते ॥ ५१ ॥ चतुर्दश्यां
नरहरिं पूजयेत्कनकाकृतिम् ॥ वक्षःस्थलस्थया लक्ष्म्या प्रीयमाणं सटोज्ज्वलम् ॥ ५२ ॥ व्यात्ताननं साट्टहासं योगपट्टाब्जसंस्थितम् ॥ सुती
क्ष्णनखरं देवं सर्वापद्विनिवारणम् ॥ ५३ ॥ चतुर्भिर्हेमनिष्कैश्च घटितं शुभलक्षणम् ॥ पूजयेत्पूर्ववद्देवं सोपहारं सुभक्तितः ॥ ५४ ॥ जपाकुसुम
मालां च जातीपुष्पस्रजं तथा ॥ दत्त्वा पुष्पांजलीन्पादे प्रणम्य सप्रदक्षिणम् ॥ ५५ ॥ यथा हिरण्यकशिपुं लोकानां हितकाम्यया ॥ व्यदारय
स्तथा पापसंघं नाशय पूजितः ॥ ५६ ॥ एवं संप्रार्थ्य नृहरिं प्रणम्य दण्डवत्क्षितौ ॥ निर्वर्त्य व्रतमेवं तद्व्रती पंचदिनात्मकम् ॥ पंच पंच प्रदी
पांस्तु दिवारात्रौ प्रदापयेत् ॥ ५७ ॥ वस्त्रयुग्मान्पंच पञ्च च्छत्रोपानद्युगं तथा ॥ सयज्ञसूत्रान्कलशान्पञ्च पञ्च फलान्वितान् ॥ ५८ ॥ भोजनांते
द्विजेभ्यश्च प्रदद्याच्छ्रद्धयान्वितः ॥ ५९ ॥ रात्रौ जागरगीताद्यैस्तथा नानोपहारकैः ॥ तोषयेद्वासुदेवं तु पुराणपठनेन तु ॥ ६० ॥ पौर्णमास्युषसि
स्नात्वा श्रीकृष्णस्यांतिकं व्रजेत् ॥ ६१ ॥ रामं कृष्णं सुभद्रां च पूजयित्वा यथाविधि ॥ स्नपनं कारयित्वाथ दृष्ट्वा वा शास्त्रचोदितम् ॥ ६२ ॥
स्नानं कृत्वा पुनः सिंधौ गृहमागत्य तत्र वै ॥ यत्र विष्णोर्मूर्त्तयस्ताः कुम्भस्था मन्त्रपूजिताः ॥ ६३ ॥ तासां पश्चिमतो वह्निं समाधाय यथा
विधि ॥ अग्निकार्यं प्रकुर्वीत स्वैः स्वैर्मंत्रैः पुरोहितः ॥६४॥ प्रणवादिचतुर्थ्यंतं नमोंतं नाम ईरयेत् ॥ देवानां मूलमंत्रस्तु स्वाहांतो होमकर्मणि ॥
॥ ६५ ॥ चरोराज्यस्य समिधां पलाशानां पृथक्पृथक् ॥ एकैकं देवमुद्दिश्य जुहुयाच्च शतं शतम् ॥ ६६ ॥ तस्य पुष्पशतं चैव जुहुयात्तदनं
तरम् ॥ पूर्णाहुतिं ततो हुत्वा ब्रह्मणे दक्षिणां ददेत् ॥ ६७ ॥ आचार्ये दक्षिणां दद्यात्सुवर्णं धेनुमेव च ॥ स्वर्णशृंगीं रौप्यखुरां नानोपकरणैर्युताम् ॥
॥ ६८ ॥ महार्घ्यवस्त्रदानानि येन तुष्यति वा गुरुः ॥ सर्वोपकरणैर्युक्ताः प्रतिमाश्च निवेदयेत् ॥ ६९ ॥ ब्राह्मणान्भोजयेत्सर्पिःखण्डयुक्तैश्च
पायसैः ॥ एतद्व्रतं समाख्यातं ज्येष्ठपंचकमुत्तमम् ॥ ७० ॥ अनुष्ठाय नरो भक्त्या स्नानदर्शनजं फलम् ॥ समग्रं लभते विप्रास्तदा नैवात्र
संशयः ॥ ७१ ॥ एकादशी या तु मध्ये निर्जला सा प्रकीर्तिता ॥ एकां तां भक्तियुक्ता ये यथाविधि उपासते ॥ ७२ ॥ यावज्जीवकृताः सर्वा एका
दश्यो न संशयः ॥ व्रतराजमिमं कृत्वा सर्वव्रतफलं लभेत् ॥ ७३ ॥ यान्यान्समीहते कामांस्तांस्तानाप्नोत्यसंशयः ॥ ७४ ॥ इति श्रीस्कांदे
महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे पुरुषोत्तमक्षेत्रमाहात्म्ये ज्येष्ठपंचकव्रतवर्णनंनाम द्वात्रिंशोऽध्यायः ॥ ३२ ॥

CC-0. In Public Domain. Digitization by eGangotri

॥ ॥ जैमिनिरुवाच ॥ ॥ अत ऊर्ध्वं प्रवक्ष्यामि महावेदीमहोत्सवम् ॥ अज्ञानतिमिरांधोऽपि येन भास्वत्पदं व्रजेत् ॥१॥ वैशाखस्यामले पक्षे
तृतीया पापनाशिनी ॥ स्वयमाविष्कृता चैषा प्राजापत्यर्क्षसंयुता ॥ २ ॥ तस्यां संकल्प्य नृपतिराचार्यं वरयेच्छुचिः ॥ एकं त्रीनथ तक्षाणं दृष्टकर्मा
णमादरात् ॥३॥ वृणुयाद्धनयागाय वस्त्रालंकरणादिभिः ॥ तक्ष्णा सार्द्धं वनं गत्वा साधुवृक्षगणाकुलम् ॥४॥ तन्मध्ये वह्निमाधाय मंत्रराजेन मंत्रवित् ॥
अष्टोत्तरशतं हुत्वा संपाताज्यविमिश्रितम् ॥ ५ ॥ आज्यं तरूणां मूले तु प्रत्येकमभिघारयेत् ॥ दिक्पालेभ्यो बलिं दत्त्वा क्षेत्रपालपशूंस्तथा ॥ ६ ॥
वनस्पतये जुहुयात्क्षीरोदनशताहुतिम् ॥ ततः परशुमादाय वृक्षमूलेषु दिक्षु वै ॥ ७ ॥ आज्यसंस्कृतिदेशेषु आचार्यो मंत्रमुच्चरन् ॥ किंचिंत्किंचि
च्छेदयेद्द्वै चिंतयन्गरुडध्वजम् ॥ ८ ॥ नदत्सु तूर्यघोषेषु गीतमंगलवादिषु ॥ नियोज्य वर्द्धकिं तत्र आचार्यः स्वगृहं व्रजेत् ॥ ९ ॥ अथवा स्थान
लब्धानि दारूणि रथकर्मणि ॥ उक्तसंस्कारविधिना संस्कुर्यात्कल्पितेनले ॥ १० ॥ आरभेत रथं कृत्वा विघ्नराजमहोत्सवम् ॥ षोडशारैः षोडश
भिश्चक्रैर्लोहमयैर्दृढैः ॥ ११ ॥ युक्तं विष्णो रथं कुर्याद्दृढाक्षं दृढकूबरम् ॥ विचित्रघटनाकक्षपुत्तलीपरिवेष्टितम् ॥ १२ ॥ नानाविचित्रबहुलमि
क्षुखण्डविराजितम् ॥ चतुस्तोरणसंयुक्तं चतुर्द्वारं सुशोभनम् ॥ १३ ॥ नानाविचित्रबहुलं हेमपट्टविराजितम् ॥ द्वाविंशतिकरोच्छ्रायं पताकाभिरलं
कृतम् ॥ १४ ॥ गारुडं च ध्वजं कुर्याद्रक्तचंदननिर्मितम् ॥ दीर्घनासं स्थूलदेहं कुण्डलाभ्यां विभूषितम् ॥ १५ ॥ चंच्वग्रदष्टभुजगं सर्वालंकार
भूषितम् ॥ वितत्य पक्षती व्योम्नि उड्डीयंतमिवोदितम् ॥ १६ ॥ दैत्यदानवसंघस्य बलदर्पविनाशनम् ॥ सर्वांगं तस्य कनकैराच्छाद्य परिशोभ
येत् ॥ १७ ॥ रथमेवं हरेः कुर्यात्स्वासनं सुपरिष्कृतम् ॥ चतुर्दशरथांगैस्तं रथं कुर्याच्च सीरिणः ॥ १८ ॥ चक्रैर्द्वादशभिः कुर्यात्सुभद्राया रथो
त्तमम् ॥ सप्तच्छदमयं कुर्यात्सीरिणो लांगलध्वजम् ॥ १९ ॥ देव्याः पद्मध्वजं कुर्यात्पद्मकाष्ठविनिर्मितम् ॥ विरचय्य रथान्राजा प्रतिष्ठां पूर्वव
च्चरेत् ॥ २० ॥ यथामन्त्रं यथाशास्त्रं विश्वसेद्ब्राह्मणेषु च ॥ ब्राह्मणा जगदीशस्य जंगमास्तनवः स्मृताः ॥ २१ ॥ इत्थं सुघटितं चक्रित्रयं देवत्र
यस्य वै ॥ आषाढस्य सिते पक्षे दिने विष्णोः शुभप्रदे ॥ २२ ॥ प्रतिष्ठाप्य समृद्धेन विधिना पूर्ववद्द्विजाः ॥ रक्षणीयं तथा तत्र नारोहेत्कश्चना
शुभः ॥ २३ ॥ पक्षी वा मानुषो वापि मार्जारनकुलादयः ॥ ततो दिनत्रयादर्वाग्रथानामुत्तरे कृते ॥ २४ ॥ मण्डपे उत्सवांगे वा प्रकुर्यादंकुरा
र्पणम् ॥ अद्भुतेष्वथ जातेषु शांतिं कुर्यात्पुरोदिताम् ॥ २५ ॥ रथ्या सुसंस्कृता कार्या महावेदीं यथा व्रजेत् ॥ पार्श्वयोर्मंडलं कुर्यात्पथि गुल्मा
दिभिः फलैः ॥ २६ ॥ सुमनःस्तबकैर्माल्यैर्दुकूलैश्चामरैस्तथा ॥ यथा सुपुष्पितारण्यराजी तत्र विराजते ॥ २७ ॥ भूमिः समा च कार्या वै

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निष्पंका सुखचारणा ॥ निर्मला च सुगन्धा च सुदूराद्वर्जितोत्करा ॥ २८ ॥ धूपपात्राण्यनुपदं दिगामोदकराणि च ॥ चंदनांभःपरिक्षेपो यंत्रपातो
त्करस्तथा ॥ २९ ॥ बहूनि ऋतुपुष्पाणि पुष्पवृष्ट्यर्थमेव हि ॥ नटनर्त्तकमुख्याश्च गायना बहवस्तथा ॥ ३० ॥ वेश्या यौवनगर्वाढ्या रूपालंकार
भूषिताः ॥ मृदंगाः पणवाश्चैव भेरीढक्कादयस्तथा ॥ ३१ ॥ बहवो बहुधा तत्र पताकाश्चित्रितांतराः ॥ ध्वजाश्च बहवस्तत्र स्वर्णराजतनिर्मिताः ॥
॥ ३२ ॥ वैजयंत्यो बहुविधा भूमिगा वाहनास्तथा ॥ हस्तिनश्च हयाश्चैव सुसन्नद्धाः स्वलंकृताः ॥ ३३ ॥ एवं संभृतसंभारः क्षितिपालः शुचि
व्रतः ॥ मुदा भक्त्या च परया युक्तः कुर्यान्महोत्सवम् ॥ ३४ ॥ आषाढस्य सिते पक्षे द्वितीया पुष्यसंयुता ॥ अरुणोदयवेलायां तस्यां देवं
प्रपूजयेत् ॥ ३५ ॥ ब्राह्मणैर्वैष्णवैः सार्द्धं यतिभिश्च तपस्विभिः ॥ विज्ञापयेद्देवदेवं यात्रायै संस्कृतांजलिः ॥ ३६ ॥ इन्द्रद्युम्नं क्षितिभुजं
यथाज्ञासीः पुरा विभो ॥ विजयस्व रथे नाथ गुंडिचामण्डपं प्रति ॥ ३७ ॥ तवापांगविलोकेन प्रपुनंतु दिशो दश ॥ निःश्रेयसपदं यांतु
स्थावराणि चराणि च ॥ ३८ ॥ अवतारः कृतो ह्येष लोकानुग्रहकाम्यया ॥ तदेहि भगवन्प्रीत्या चरणं न्यस्य भूतले ॥ ३९ ॥
ततः कर्पूरचूर्णैश्च सुमनोभिरवाकिरेत् ॥ पथि शाकुनसूक्तानि प्रपठंति द्विजातयः ॥ ४० ॥ केचिन्मंगलगाथाश्च केचिज्जय जयेति च ॥
जितं त इति मन्त्रं वै केचिदुच्चैर्जपंति च ॥ ४१ ॥ सूतमागधमुख्याश्च कीर्तिं पुण्यां मुदा जगुः ॥ स्वर्णदंडप्रकीर्णानां श्रेणी चोभय
पार्श्वयोः ॥ ४२ ॥ लीलयांदोलयंति स्म रणत्कंकणमंजुलम् ॥ स्वर्णपात्रपरिक्षिप्तकृष्णागुरुसुधूपितैः ॥ ४३ ॥ सुरभीकृतसर्वाशा
मुखे व्योमांगणे तथा ॥ चर्चरीझर्झरीवेणुवीणामाधुरिकादयः ॥ शब्दायंते सुमधुरं गोविंदविजयांतरे ॥ ४४ ॥ एवं प्रवृत्ते समये कृष्णं
रामपुरःसरम् ॥ नयंति विप्रा भद्रां च क्षत्रियाश्च विशस्तथा ॥ ४५ ॥ छत्रमाला समुदिता मुक्तास्रक्चीनतोरणा ॥ रत्नध्वजा हेमदंडाः पार्श्व
योर्मुरवैरिणः ॥ ४६ ॥ राजा चतुर्विधा वर्णा अन्ये ये च पृथग्जनाः ॥ दीना महांतश्च तदा समानास्तत्र भांति वै ॥ ४७ ॥ सलीलचरणन्यासं
तूलिकास्तरणेषु तान् ॥ वासयंतः क्वचिच्छांता देवांस्ते रथमन्वियुः ॥ ४८ ॥ महोत्सवं समासाद्य गीतकोलाहलानि च ॥ करे कृत्वा जगन्नाथं भ्राम
यित्वा रथोत्तमम् ॥ ४९ ॥ रामं कृष्णं सुभद्रां च रथमध्ये निवेशयेत् ॥ चारुचंद्रातपाढ्येन मंडपेन विराजिते ॥ ५० ॥ किंकिणीमालिकाभिश्च
माल्यचामरभूषिते ॥ ससारकृष्णागुरुजधूपपूरितगर्भके ॥ ५१ ॥ ततस्तान्वासयित्वा तु तूलिकासु सुरोत्तमान् ॥ भूषयेद्विविधैर्भक्त्या वस्त्रालंकार
माल्यकैः ॥ ५२ ॥ पूजयेदुपचारैस्तैः समृद्धैर्भक्तिभावितैः ॥ नातः परतरं विष्णोर्यात्रांतरमवेक्ष्यते ॥ ५३ ॥ यत्र स्वयं त्रिलोकेशः स्यंदनेन कुतू

Nepal Sanskrit University, Balmeeki Campus

CC-0. In Public Domain. Digitization by eGangotri

हलात् ॥ मानयन्पूर्वमाज्ञां तां वर्षे वर्षे व्रजेदसौ ॥ ५४ ॥ रथस्थितं व्रजंतं तं महावेदीमहोत्सवे ॥ ये पश्यंति मुदा भक्त्या वासस्तेषां हरेः पदे ॥ ॥ ५५ ॥ सत्यं सत्यं पुनः सत्यं प्रतिजाने द्विजोत्तमाः ॥ नातः श्रेयः परं विष्णोरुत्सवः शास्त्रसंमतः ॥ ५६ ॥ यथा रथविहारोऽयं महावेदीमहो त्सवः ॥ यत्रागत्य दिवो देवाः स्वर्गं यांत्यधिकारिणः ॥ ५७ ॥ किं वच्मि तस्य माहात्म्यमुत्सवस्य मुरद्विषः ॥ यस्य संकीर्तनात्पापं नश्येजन्म शतोद्भवम् ॥ ५८ ॥ महावेदीं व्रजंतं तं रथस्थं पुरुषोत्तमम् ॥ बलभद्रं सुभद्रां च जन्मकोटिसमुद्भवम् ॥ ५९ ॥ दृष्ट्वा पापं नाशयति नात्र कार्या विचारणा ॥ रथच्छायां समाक्रम्य ब्रह्महत्या व्यपोहति ॥ ६० ॥ तद्रेणुसंसक्तवपुस्त्रिविधां पापसंहतिम् ॥ नाशयेत्स्वर्गगंगायाः स्नानजं फलमाप्नु यात् ॥ ६१ ॥ घनांबुवृष्टियोगेन रथमार्गे तु पंकिले ॥ दिव्यदृष्ट्या च कृष्णस्य समस्तमलहारिणि ॥ ६२ ॥ तत्र ये प्रणिपातांस्तु कुर्वते वैष्ण वोत्तमाः ॥ अनादिव्यूढपंकांस्ते हित्वा मोक्षमवाप्नुयुः ॥ ६३ ॥ गवां कोटिप्रदानस्य कन्यानामयुतस्य च ॥ वाजिमेधसहस्रस्य फलं प्राप्नोत्यसं शयः ॥ ६४ ॥ अनुगच्छंति कृष्णं ये यात्राकौतूहलादपि ॥ अनुव्रजंति नित्यं वै देवाः शक्रपुरोगमाः ॥ ६५ ॥ पश्यंति ये रथं यांतं दारुब्रह्म सना तनम् ॥ पदे पदेऽश्वमेधस्य फलं तेषां प्रकीर्तितम् ॥ ६६ ॥ वेदैः स्तुवंति वेदानां वक्तारो मोक्षदायिनम् ॥ इतिहासपुराणाद्यैः स्तोत्रैर्वापि स्वयंकृतैः ॥ ६७ ॥ स्तुवंति पुंडरीकाक्षं ये वै विगतकल्मषाः ॥ वैष्णवं योगमास्थाय मोदंते नारदादिभिः ॥ ६८ ॥ कुर्वंति वासुदेवाग्रे जयशब्देन वा स्तु तिम् ॥ ते वै जयंति पापानि विविधानि न संशयः ॥ ६९ ॥ लयतालानभिज्ञोपि गीतमाधुर्यवर्जितः ॥ नर्त्तनं कुरुते वापि गायत्यथ नरोत्तमः ॥ वैष्णवोत्तमसंसर्गान्मुक्तिं प्राप्नोत्यसंशयः ॥७०॥ नामानि कीर्तयन्नस्य तेन याति सहैव यः ॥ अनुव्रज्यात्तत्फलं वै प्राप्नोत्यत्र न संशयः ॥ ७१ ॥ जय कृष्ण जय कृष्ण जय कृष्णेति यो वदेत् ॥ गुंडिचानगरं यांतं कृष्णं भक्तिसमन्वितः ॥ न मातृगर्भवासस्य स च दुःखमवाप्नुयात् ॥७२॥ चामरैर्व्यजनैः पुष्पस्तबकैर्नीलचोलकैः॥ रथस्याग्रस्थितो यो वै वीजयेत्पुरुषोत्तमम्॥७३॥स वीज्यमानोप्सरोभिर्गंधर्वैरुपशोभितः॥अनुव्रजद्भिस्त्रि दशैर्महेंद्रासनसंस्थितः ॥ ७४ ॥ भुनक्ति भोगानतुलान्यावदाभूतसंप्लवम् ॥ तदंते च ब्रह्मलोकं प्राप्य मुक्तिमवाप्नुयात् ॥ ७५ ॥ कृष्णस्य पुरतो ये वै पुष्पवृष्टिं प्रकुर्वते ॥ ते वै मनोगतान्सर्वान्प्राप्नुवंति मनोरथान् ॥ ७६ ॥ सहस्रनामभिः पुण्यैः पर्यटंति रथं तु ये ॥ तेषां प्रदक्षिणं कुर्युस्त्रिदशा नतकंधराः ॥ ७७ ॥ वसंति वैकुण्ठगृहे विष्णुतुल्यपराक्रमाः ॥ ७८ ॥ तस्मिन्काले महापुण्ये देवर्षिपितृसेविते ॥ एकं ब्रह्म त्रिधाभूतं माययानुगतं स्वया ॥ ७९ ॥ साक्षाद्दारुस्वरूपेण महावेदीमहोत्सवम् ॥८०॥ रथारूढः कौतुकवान्यत्र याति जगत्प्रभुः ॥ तस्मिन्काले पृथिव्यां तु चरेत्तत्र महो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्सवम् ॥ ८१ ॥ देवा अप्युत्सवे तस्मिन्पुरुहूतपुरोगमाः ॥ अभिमानं परित्यज्य श्रेणीभूता हि पार्श्वयोः ॥ ८२ ॥ प्रकुर्वते महायात्रां तैस्तैर्दिव्यैः परिच्छदैः ॥ ८३ ॥ तेषामग्रेसरस्तत्र देवोपि प्रपितामहः ॥ चतुर्दशानां जगतां कर्त्ता यः परमेश्वरः ॥ ८४ ॥ सोऽपि तत्र जगन्नाथं रथे यांतं महोत्सवे ॥ ब्रह्मलोकात्परावृत्य स्तुवन्वेदमयैः स्तवैः ॥ पदे पदे प्रणमति भगवंतं सनातनम् ॥ ८५ ॥ यद्यप्यब्जनिधेः कृष्णान्न भेदोऽस्ति तथा प्ययम् ॥ महोत्सवस्य महिमा यत्र सर्वेऽनुयायिनः ॥ ८६ ॥ नातः परतरो लोके महावेदीमहोत्सवात् ॥ सर्वपापहरो योगः सर्वतीर्थफलप्रदः ॥ ८७ ॥ कृष्णमुद्दिश्य यस्तत्र दानं ददाति वै नरः ॥ यत्किंचिदक्षयफलं मेरुदानेन तत्समम् ॥८८॥ तस्याग्रे देवदेवस्य व्रजतो गुंडिचालयम् ॥ यत्किंचित्कुरुते कर्म तत्तदक्षयमश्नुते ॥ ८९ ॥ उपायनानि नाना वै भक्ष्यभोज्यानि चैव हि ॥ समर्पयंति देवाय तत्प्रीत्यै वा द्विजन्मने ॥ तेषा मक्षयपुण्यानि सर्वकामप्रदानि च ॥ ९० ॥ हरेरग्रेसरा ये वै पश्यंतस्तन्मुखांबुजम् ॥ पदे पदे नमंतश्च पंकधूलिपरिप्लुताः ॥ ९१ ॥ विहाय पाप कवचमभेद्यं कोटिजन्मभिः ॥ क्षणान्मुक्तिफलं प्राप्य यांति विष्णोः शुभालयम् ॥ ९२ ॥ सर्वक्रतूनां तीर्थानां दानानां यांति ते फलम् ॥ भगव द्भक्तिभावानां नातः पुण्यतमो महः ॥ ९३ ॥ एवं स भगवान्कृष्णः सुभद्रारामसंगतः ॥ व्रजन्स्यंदनश्रेष्ठस्थो द्योतयंश्च चतुर्दिशः ॥ ९४ ॥ श्रीम दंगोपसृष्टेन मरुता सर्वदेहिनाम् ॥ पापानि नाशयञ्छ्रीमान्दयालुर्भक्तभावनः ॥ ९५ ॥ अज्ञानामप्यविश्वासभाजां विश्वासहेतवे ॥ निसर्गमुक्तिदोऽप्येष यात्रारंभान्करोति वै ॥ ९६ ॥ व्रजन्समृद्ध्या देवानां मर्त्यानां च जनार्दनः ॥ सूर्ये ललाटं तपति मध्याह्ने मार्गमध्यतः ॥ ९७ ॥ श्रांता कर्षजनस्तस्थौ म्लायन्वै तद्रजोवृतः ॥ तत्रातपस्य शांत्यर्थं दर्पणेष्वभिषेचयेत् ॥ ९८ ॥ पंचामृतैः शीततोयैः पुष्पकर्पूरवासितैः ॥ चामरैश्च जलार्द्रांतैः शीतलैर्व्यजनैस्तथा ॥ ९९ ॥ वीजयेत्पुण्डरीकाक्षं सुभद्रां राममेव च ॥ शीतैश्च पानकैर्हृद्यैस्तथा खण्डविकारकैः ॥ १०० ॥ खर्जूरैर्ना रिकेलैश्च नानारंभाफलैस्तथा ॥ तथा क्षीरविकारैश्च पनसैस्तृणराजकैः ॥ १ ॥ इक्षुभिः स्वादुहृद्यैश्च फलैर्नानाविधैस्तथा ॥ वासितैः शीततोयैश्च पक्वतांबूलपत्रकैः ॥ २ ॥ सकर्पूरलवंगाद्यैः पूजयेत्पुरुषोत्तमम् ॥ ३ ॥ तस्मिन्काले द्विजश्रेष्ठा ये पश्यंति जनार्दनम् ॥ पूजयंति यथाशक्ति न ते संसारजं श्रमम् ॥ ४ ॥ प्राप्नुवंति द्विजश्रेष्ठा ब्रह्मलोकनिवासिनः ॥ ५ ॥ रथत्रयस्थितं देवत्रयं ये पुरुषर्षभाः ॥ प्रदक्षिणं प्रकुर्वंति त्रिश्चतुः सप्त एव वा ॥ ६ ॥ दशप्रणामान्कृत्वांते स्थिताः प्रांजलयोऽग्रतः ॥ पुरा रथस्थितान्ब्रह्मा स्तुतिभिर्याभिरब्जभूः ॥७॥ तुष्टाव ताभिर्देवेशं स्तुवंति परमेश्वरम् ॥ ये नरा ब्रह्मलोकं ते प्रयांति नियतं द्विजाः ॥ ८ ॥ ततोऽपराह्णे देवेशं दक्षिणानिलवीजितम् ॥ शनैः शनैर्नयेद्गीतैर्वेणुवीणादिनादितैः ॥ ९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बंदिनः स्तुतिपाठैश्च कलैर्मधुरिकास्वनैः ॥ निरंतरैः पुष्पवर्षैश्चामरांदोलनैस्तथा ॥ ११० ॥ एवं व्रजति देवेशे सूर्यश्चास्तंगतो भवेत् ॥ दीपिकानां सहस्राणि ज्वालितानि सहस्रशः ॥ १११ ॥ तदालोकप्रकाशेन मार्गशेषश्च नीयते ॥ रथावरोहणेनैषां मण्डपारोहणेन च ॥ ११२ ॥ संमर्दः सुमहांस्तत्र दिदृक्षूणां कुतूहलात् ॥ मण्डपे वासयेद्देवं गुण्डिचाख्ये मनोहरे ॥ ११३ ॥ चारुचंद्रातपे चारुमाल्यचामरभूषिते ॥ रत्नस्तंभमये स्वर्णवेदिकोपस्कृतांतरे ॥ ११४ ॥ प्राचीरवलयावीते सुधालेपसमुज्ज्वले ॥ साधुसोपानघटिते चतुर्द्वारोपशोभिते ॥ ११५ ॥ त्रैलोक्याडंबरयुते महावेद्यां महाक्रतोः ॥ प्रादुर्भावो महेशस्य यत्राभूद्दारुवर्ष्मणः ॥ ११६ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे पुरुषोत्तमक्षेत्रमाहात्म्ये गुंडिचायात्राकथनंनाम त्रयस्त्रिंशोऽध्यायः ॥ ३३ ॥ ॥ जैमिनिरुवाच ॥ ॥ अश्वमेधांगसरसो नृसिंहस्य च दक्षिणे ॥ तत्रासीनश्च भगवान्पुनश्चावतरन्निव ॥ १ ॥ बभासे दिव्यरूपोऽसौ दुर्विभाव्यः सुरासुरैः ॥ तदा पूजोपहारैश्च भक्ष्यभोज्यादिकैस्तथा ॥ ॥ २ ॥ पूजयित्वा जगन्नाथं तोषयेद्गीतनृत्यकैः ॥ पुष्पोपहारैर्विविधैः सुगंधैरनुलेपनैः ॥ ३ ॥ कृष्णागुरुजधूपैश्च गंधतैलप्रदीपकैः ॥ तोषयेज्जगतां नाथमनेकैरुपहारकैः ॥ ४ ॥ बिन्दुतीर्थतटे तस्मिन्सप्ताहानि जनार्दनः ॥ तिष्ठेत्पुरा स्वयं राज्ञे वरमेतत्समादिशत् ॥ ५ ॥ त्वत्तीर्थतीरे राजेंद्र स्थास्यामि प्रतिवत्सरम् ॥ सर्वतीर्थानि तस्मिंश्च स्थास्यंति मयि तिष्ठति ॥ ६ ॥ तत्र स्नात्वा विधानेन तीर्थे तीर्थौघपावने ॥ सप्ताहं ये प्रपश्यंति गुण्डिचामण्डपे स्थितम् ॥ ७ ॥ मां च रामं सुभद्रां च मत्सायुज्यमवाप्नुयुः ॥ ततस्तस्मिन्महापुण्ये सर्वपापप्रणाशने ॥ ८ ॥ सर्वतीर्थैकफलदे विष्णुप्रीतिकरे शुभे ॥ स्नात्वा संतर्प्य विधिवत्पितॄन्देवानतंद्रितः ॥ ९ ॥ तटस्थं नरसिंहं तं पूजयित्वा प्रणम्य च ॥ महावेदीं नरो गत्वा कृतशौचाचमक्रियः ॥ १० ॥ पूजयेत्पूर्ववद्विप्राः प्रणमेद्वापि भक्तितः ॥ सप्ताहं यो नरो नारी न सा प्राकृतमानुषी ॥ ११ ॥ विष्णुसायुज्यमाप्नोति शासनान्मुरवैरिणः ॥ दिवा तद्दर्शनं पुण्यं रात्रौ दशगुणं भवेत् ॥ १२ ॥ यत्किंचित्क्रियते कर्म संनिधौ जगदीशितुः ॥ स्वल्पं वाप्यथवा भूरि कोटिकोटिगुणं भवेत् ॥ १३ ॥ तुलापुरुषदानानि महादानानि यो ददेत् ॥ एके प्रदत्ते दानेपि सर्वं दत्तं भवेद्द्विजाः ॥ १४ ॥ सर्वं मेरुसमं दानं सर्वे व्याससमा द्विजाः ॥ महावेद्यां गते कृष्णे योगोऽयं खलु दुर्लभः ॥ १५ ॥ अर्द्धोदयादिका योगाः स्कन्देन परिभाषिताः ॥ महावेद्याख्ययोगस्य कलां नार्हंति षोडशीम् ॥ १६ ॥ अतः परं प्रवक्ष्यामि पितॄणां कार्यमुत्तमम् ॥ यावज्जीवं गयाश्राद्धैरलभ्यं भुवि यत्फलम् ॥ १७ ॥ दिविस्था नरकस्था वा तिर्यग्योनिगतास्तथा ॥ तथा मनुष्यजातिस्थाः सर्वे पितृपितामहाः ॥ १८ ॥ शतं पुरुषविख्याता यं वांछंति सुतैः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कृतम् ॥ तं वो विधिं प्रवक्ष्यामि शृणुध्वं मुनयो वरम् ॥ १९ ॥ मघा वै पितृनक्षत्रं पितॄणां प्रीतिदं परम् ॥ तत्र श्राद्धं तु प्रीणाति दत्तं पुत्रैर्मुदान्वितैः ॥ २० ॥ पंचमी च तिथिः श्रेष्ठा श्राद्धेऽभ्युदयकारिणी ॥ उभयोर्यदि संयोगो महापुण्यतमा तिथिः ॥ २१ ॥ यस्यां श्राद्धे कृते पुत्रैः पितॄणामुद्धृतिर्भवेत् ॥ सर्वतीर्थमये तस्मिन्संनिधौ मुरवैरिणः ॥ २२ ॥ श्राद्धं चेच्छ्रद्धया कुर्यान्नीलकण्ठनृसिंहयोः ॥ मध्ये मेध्यतमे देशे योगे परमदुर्लभे ॥ २३ ॥ पुरुषाञ्छतमुद्धृत्य ब्रह्मलोके महीयते ॥ प्रशस्यः कुतपः कालो मन्दीभूतदिवाकरः ॥ २४ ॥ पितॄनुद्दिश्य वा दद्यादशक्तः कनकं शुचिः ॥ तर्पयित्वा तिलैः सम्यक्पैतृकीं प्रीतिमुत्तमाम् ॥ २५ ॥ अथवा भोजयेद्विप्रान्भोज्यमूल्यानि वा ददेत् ॥ एकस्मै वा गुणवते सहस्रं भोजनं ददेत् ॥ २६ ॥ गुणागुणविवेकस्तु नात्र योगे विधीयते ॥ तस्मिन्सुदुर्लभे योगे सर्वे मुनिसमा द्विजाः ॥ २७ ॥ आषाढस्य सिते पक्षे पंचमी पितृदैवतम् ॥ नक्षत्रं जगदीशस्य महावेदीसमागमः ॥ २८ ॥ एते यदा त्रयः स्युश्चेदिंद्रद्युम्नसरोवरे ॥ चतुष्पादः स्मृतो योगः पितॄणामक्षयप्रदः ॥२९॥ पितृकार्ये न सीदंति निरूप्य श्राद्धमत्र वै ॥ शृणुध्वमन्यद्विप्रा वै प्रसंगाच्च ब्रवीमि वः ॥ ३० ॥ नभस्यदर्शे यः कुर्याच्चतुर्ष्वपि युगादिषु ॥ श्राद्धं पितॄन्समुद्दिश्याऽश्वमेधांगसंभवे ॥ ३१ ॥ गयाश्राद्धसहस्रस्य श्रद्धया विहितस्य वै ॥ फलं यद्धि समंत्वस्य नात्र कार्या विचारणा ॥ ३२ ॥ दानं होमो जपश्चापि सर्वपापापनोदनः ॥ दिनानि सप्त यान्यत्र कृष्णे वसति मंडपे ॥ ३३ ॥ एकस्मादुत्तरं श्रेयो यत्तस्मादुत्तरोत्तरम् ॥ आषाढशुक्लतृतीयायां प्रातःस्नानं समाचरेत् ॥ ३४ ॥ इंद्रद्युम्नतटे देशे नृसिंहक्षेत्र उत्तमे ॥ व्रतमेतत्तु गृह्णीयात्संकल्प्य विधिवन्नरः ॥ ३५ ॥ वनजागरणं नाम भगवत्प्रीतिवर्द्धनम् ॥ सर्वपापप्रशमनं सर्वव्रतफलप्रदम् ॥ ३६ ॥ दिनानि सप्त मौनी स्यात्कृतत्रिषवणक्रियः ॥ कुंभे च पूजयेद्देवं त्रिसंध्यं भक्तिभावितः ॥ ३७ ॥ गोघृतेनाथ तैलेन तिलजेन प्रदीपयेत् ॥ अहर्निशं हरेरग्रे रक्षेत्तं यत्नतो व्रती ॥ ॥ ३८ ॥ दिवा दिवा वसेन्मौनी रात्रौ रात्रौ च जागृयात् ॥ मंत्रं भागवतं जप्यान्नित्यकृत्यांतरे व्रती ॥ ३९ ॥ उपवासपरो भूत्वा सप्ताहानि नयेद्व्रती ॥ अष्टमे प्रातरुत्थाय प्रतिष्ठां कारयेद्दिने ॥ ४० ॥ तस्मिन्नेव तीर्थवरे स्नात्वागत्य गृहं पुनः ॥ मंडले सर्वतोभद्रे पूर्वं कुंभं निवेशयेत् ॥ ४१ ॥ तत्रावाह्य हृषीकेशं पूजयेदुपचारकैः ॥ तस्य पश्चिमदेशे च स्थंडिले विधिसंस्कृते ॥ ४२ ॥ अग्निं प्रणीय गृह्योक्तविधिना ब्राह्मणावृतः ॥ अग्निकार्यं प्रकुर्वीत समिदाज्यचरूंस्तथा ॥ ४३ ॥ सहस्रं जुहुयादग्नौ प्रत्येकं वा शतं शतम् ॥ गायत्री वैष्णवी या वै तया होमविधिः स्मृतः ॥ ॥ ४४ ॥ संप्राश्य दक्षिणां दद्याद्धेनुं वस्त्रं हिरण्यकम् ॥ विप्रांश्च भोजयेदंते प्रीतये विश्वसाक्षिणः ॥ ४५ ॥ व्रतराजमिमं कृत्वा विधिनानेन भो

CC-0. In Public Domain. Digitization by eGangotri

द्विजाः ॥ चतुर्वर्गानवाप्नोति यो यः कामानभीप्सति ॥ ४६ ॥ नारी वा श्रद्धया युक्ता कुर्याद्वेदीमहोत्सवम् ॥ सापि तत्फलमाप्नोति या कुर्याद्व्रतमुत्तमम् ॥ ४७ ॥ यात्राकर्तुः फलं यादृग्व्रतकर्तुश्च तत्फलम् ॥ भवते वै द्विजश्रेष्ठाः कथितं वो मुदान्विताः ॥ ४८ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे पुरुषोत्तमक्षेत्रमाहात्म्ये जैमिनिऋषिसंवादे चतुस्त्रिंशोऽध्यायः ॥ ३४ ॥ ॥ छ ॥ ॥

जैमिनिरुवाच ॥ ॥ अतः परं प्रवक्ष्यामि रथरक्षाकरं विधिम् ॥ भूतप्रेतादयो घोरा दारुणान्यद्भुतानि च ॥ १ ॥ न बाधंते रथान्येन मुनयो वश्च यन्मतम् ॥ प्रत्यहं पूजयेद्देवान्कृष्णादीन्ध्वजसंस्थितान् ॥ २ ॥ गंधपुष्पाक्षतैर्माल्यैरुपहारैरनुत्तमैः ॥ गीतनृत्तादिकैश्चैव धूपदीपनिवेदनैः ॥ ॥ ३ ॥ दिक्पालेभ्यो बलिं दद्यात्पायसान्नेन चान्वहम् ॥ भूतप्रेतपिशाचेभ्यो दद्याच्च बलिमुत्तमम् ॥ ४ ॥ रक्षेच्च यत्नतस्तान्वै रथानारोहणोचितान् ॥ यथा न कश्चिदारोहेन्नरो ग्राम्यपशुस्तथा ॥ पक्षिणश्च विशेषेण येषां वासो न शोभनः ॥ ५ ॥ अष्टमेऽह्नि पुनः कृत्वा दक्षिणाभिमुखान्रथान् ॥ विभूषयेद्वस्त्रमाल्यपताकैश्चामरादिभिः ॥ ६ ॥ नवम्यां वासयेद्देवांस्तेषु प्रातः समृद्धिमत् ॥ ७ ॥ दक्षिणाभिमुखा यात्रा विष्णोरेषा सुदुर्लभा ॥ यात्रा प्रयत्नतः सा हि भक्तिश्रद्धासमन्वितैः ॥ ८ ॥ यथा पूर्वा तथा चेयं द्वे च मुक्तिप्रदायिके ॥ यात्राप्रवेशौ देवस्य एक एवोत्सवो मतः ॥ ९ ॥ पुराविदो वदंत्येतां यात्रां नवदिनात्मिकाम् ॥ एषा त्र्यवयवा यात्रा संपूर्णा यैरुपासिता ॥ १० ॥ सुसंपूर्णफलस्तेषां महावेदीमहोत्सवः ॥ ११ ॥ गुंडिचामंडपात्कृष्णमायांतं दक्षिणामुखम् ॥ रथस्थं बलिनं भद्रां पश्यंतो मुक्तिभागिनः ॥ १२ ॥ उत्तराभिमुखान्दृष्ट्वा लभंते यादृशं फलम् ॥ रामादीन्स्यंदनस्थान्ये पश्यंत्येवं महोदयान् ॥ यादृशं फलमाप्नुयुस्तादृशं दक्षिणामुखान् ॥ ॥ १३ ॥ पदा यांतं रथे यांतं यः पश्येद्दक्षिणामुखम् ॥ तस्य जन्म कृतार्थं स्याद्वाजिमेधः पदे पदे ॥ १४ ॥ स्तुतिभिः प्रणिपातैश्च पुष्पवृष्टिभिरेव च ॥ नानानृत्तोपहारैश्च व्यजनच्छत्रचामरैः ॥ उपायनैर्बहुविधैरुपतिष्ठेद्रथाग्रतः ॥ १५ ॥ नीलाचलं समायांतं रथस्थं दक्षिणामुखम् ॥ ये पश्यंति हृषीकेशं सुभद्रां लांगलायुधम् ॥ १६ ॥ कामकल्पतरुं पुंसां दर्शनादेव मुक्तिदम् ॥ ते व्रजंति महात्मानो वैकुण्ठभवनं हरेः ॥ १७ ॥ रथेन विचरंतं तं सिन्धुतीरे जनार्दनम् ॥ पश्यन्तं करुणापांगैः प्रणतान्पुरतो नरान् ॥ १८ ॥ दक्षिणाभिमुखं यांतं प्रासादं नीलभूधरे ॥ सर्वतीर्थनिधिं सर्वदानकल्पतरुं हरिम् ॥ १९ ॥ स्तुवंतः प्रणमंतश्च श्रद्दधानाश्च ये नराः ॥ न ते पुनरिहायांति ब्रह्मलोकस्थिता ध्रुवम् ॥ २० ॥ मुनयः कथितो वोऽयं महावेदीमहोत्सवः ॥ यस्य संकीर्त्तनादेव निर्मलो जायते नरः ॥ २१ ॥ यश्चेदं कीर्तयेन्नित्यं प्रातरुत्थाय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मानवः ॥ शृणुयादपि बुद्धिस्थः शक्रलोकं व्रजेदसौ ॥ २२ ॥ प्रत्यर्चारूपमपि वा रथमास्थाप्य यो हरेः ॥ कुर्याद्यात्रामिमां श्रद्धाभक्तिभावेन मानवः ॥ २३ ॥ सोऽपि विष्णोः प्रसादेन गुंडिचोत्सवजं फलम् ॥ प्राप्य वैकुण्ठभवनं याति नात्र विचारणा ॥ २४ ॥ पश्य श्रीर्यावती विप्रा भक्तिर्वा श्रद्धयान्विता ॥ तावतीयं महायात्रा यो यथा कर्तुमिच्छति ॥ २५ ॥ इदं पवित्रं परमं रहस्यं वेधसोदितम् ॥ कारयित्वाथवा दृष्ट्वा यन्नरो नावसीदति ॥ २६ ॥ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे पुरुषोत्तमक्षेत्रमाहात्म्ये पञ्चत्रिंशोऽध्यायः ॥ ३५ ॥ ॥ जैमिनिरुवाच ॥ ॥ अतः परं प्रवक्ष्यामि शयनोत्सवमुत्तमम् ॥ आषाढीमवधिं कृत्वा हरेः स्वापस्तु कर्कटे ॥ १ ॥ वार्षिकांश्चतुरो मासान्यावत्स्यात्कार्त्तिकी द्विजाः ॥ अयं पुण्यतमः कालो हरेराराधनं प्रति ॥ २ ॥ काश्यां बहुयुगं वासान्नियमव्रतसंस्थितेः ॥ फलं यदुक्तं तद्विद्यात्क्षेत्रे श्रीपुरुषोत्तमे ॥ ३ ॥ चातुर्मास्यदिनैकेन वसतः सन्निधौ हरेः ॥ वार्षिकाणां चतुर्णां तु यान्यहानि वसन्नयेत् ॥ ४ ॥ पुण्यक्षेत्रे जगन्नाथसन्निधौ निर्मलांतरे ॥ प्रत्यक्षं वाजिमेधस्य सहस्रस्य लभेत्फलम् ॥ ५ ॥ स्नात्वा सिंधुजले पुण्ये दृष्ट्वा श्रीपुरुषोत्तमम् ॥ चातुर्मास्यव्रते तिष्ठन्न शोचति कुतश्चन ॥ ६ ॥ चातुर्मास्ये निवसति क्षेत्रे श्रीपुरुषोत्तमे ॥ साक्षाद्दृष्टिर्भगवतस्तद्वयं मुक्तिसाधनम् ॥ ७ ॥ तस्मात्सर्वाणि संत्यज्य श्रौतस्मार्त्तानि मानवः ॥ प्रयत्नान्निवसेत्पुण्ये क्षेत्रे श्रीपुरुषोत्तमे ॥ ८ ॥ भोगिभोगासने सुप्तश्चातुर्मास्येषु वै प्रभुः ॥ सर्वक्षेत्रेषु सान्निध्यं न करोति जगद्गुरुः ॥ ९ ॥ अत्र साक्षान्निवसति यथा वैकुण्ठवेश्मनि ॥ द्वादशस्वपि मासेषु भगवानत्र मूर्तिमान् ॥ मुक्तिदश्चक्षुषा दृष्टश्चातुर्मास्ये विशेषतः ॥ १० ॥ अष्टमासनिवासेन दृष्ट्वा विष्णुं दिने दिने ॥ यदाप्नोति फलं तद्धि चातुर्मास्यदिनैकतः ॥ ११ ॥ चातुर्मास्यनिवासेन क्षेत्रे श्रीपुरुषोत्तमे ॥ दिनं दिनं महापुण्यं सर्वक्षेत्रनिवासजम् ॥ फलं ददाति भगवान्क्षेत्रे वर्षनिवासतः ॥ १२ ॥ सर्वपापप्रसक्तोऽपि सर्वाचारच्युतोऽपि च ॥ सर्वधर्मबहिर्भूतो निवसेत्पुरुषोत्तमे ॥ १३ ॥ चातुर्मास्यमथैकं यः कुर्याद्वै पापकृन्नरः ॥ विहाय सर्वपापानि बहिरंतश्च निर्मलः ॥ १४ ॥ नरसिंहप्रसादेन वैकुण्ठभवनं व्रजेत् ॥ १५ ॥ तस्मान्नरः सर्वभावैर्विष्णोः शयनभावितान् ॥ वार्षिकांश्चतुरो मासान्निवसेत्पुरुषोत्तमे ॥ १६ ॥ कुर्यादन्यत्र वा कुर्याज्जन्मसाफल्यमृच्छति ॥ १७ ॥ आषाढशुक्लैकादश्यां कुर्यात्स्वापमहोत्सवम् ॥ मण्डपं रचयेत्तत्र शयनागारमुत्तमम् ॥ १८ ॥ देवस्य पुरतः शय्यां रत्नपल्यंकिकोपरि ॥ स्वास्तीर्य सोपधानां तु मृदुचीनोत्तरच्छदाम् ॥ १९ ॥ कर्पूरधूलिविक्षिप्तां साधुचंद्रातपां शुभाम् ॥ सर्वतो वेष्टितां छिद्ररहितां चंदनोक्षिताम् ॥ २० ॥ साधुद्वारां समां स्निग्धां नानाचित्रोपशो

भिताम् ॥ एकं स्वापगृहं कृत्वा निशीथे प्रतिमात्रयम् ॥ २१ ॥ सौवर्णं राजतं वापि रीतिजं दार्षदं तथा ॥ यथाश्रद्धं प्रकुर्वीत प्रशस्तं
चोत्तरोत्तरम् ॥ २२ ॥ तत्त्रयाणां सुराणां वै पादमूले यथातथम् ॥ निधाय पूजयेद्देवांस्तच्छेषं तेषु निक्षिपेत् ॥ २३ ॥ पूजांते भावयेदैक्यं तेषां
कृष्णादिभिः सह ॥ एह्येहि भगवन्देव सर्वलोकैकजीवन ॥ २४ ॥ स्वापार्थं चतुरो मासान्सर्वकल्याणवृद्धये ॥ इति संप्रार्थ्य देवेशांस्तदंगात्त
त्स्रजां त्रयम् ॥ २५ ॥ प्रत्यर्चासु विनिक्षिप्य मांगल्यस्तुतिगीतिभिः ॥ नयेच्छय्यागृहद्वारं वासयेद्धटिकात्रये ॥२६॥ पंचामृतैः स्नापयेत्तान्पृथक्प
लशताधिकैः ॥ सुगन्धचंदनैर्लिप्तान्वस्त्रालंकरणादिभिः ॥ २७ ॥ पूजयित्वा यथान्यायं प्रांजलिर्मंत्रमुच्चरेत् ॥ जगद्वन्द्य जगन्नाथ जगत्त्राणपरायण
॥ २८ ॥ हिताय जगतामीश चातुर्मास्यान्घनागमान् ॥ सुप्त्वा प्रशमयारिष्टान्छक्रेण सह पूजितः ॥ २९ ॥ एह्येहि शयनागारं सुखमत्र स्वप
प्रभो ॥ इति संप्रार्थ्य देवेशं स्वापयेत्पुरुषोत्तमम् ॥ ३० ॥ सुदृढं बन्धयेद्द्वारं विष्णोः शयनवेश्मनः ॥ स्वापयित्वा जगन्नाथं लभते सुखमुत्तमम् ॥
॥ ३१ ॥ वार्षिकांश्चतुरो मासान्प्रसुप्ते वै जनार्दने ॥ व्रतैरनेकैर्नियमैर्मासान्वै चतुरः क्षिपेत् ॥ ३२ ॥ कल्पस्थायी विष्णुलोके नरो भक्तो भवे
द्ध्रुवम् ॥ नियमव्रतानि गदतः शृणुध्वं मुनयो मम ॥ ३३ ॥ मंचखट्वादिशयनं वर्जयेद्भक्तिमान्नरः ॥ अनृतौ न व्रजेद्भार्यां मासं मधु परौदनम् ॥
॥ ३४ ॥ पटोलं मूलकं चैव वार्त्ताकं च न भक्षयेत् ॥ अभक्ष्यं वर्जयेद्दूरान्मसूरं सितसर्षपम् ॥ ३५ ॥ राजमाषान्कुलत्थांश्च आशुधान्यं च
संत्यजेत् ॥ शाकं दधि पयो माषाञ्छ्रावणादौ क्रमादिमान् ॥ ३६ ॥ राजगोपयतींस्त्यक्त्वा नारोहेच्चर्मपादुके ॥ वार्षिकांश्चतुरो मासानव्रतेन
नयेद्यदि ॥ तस्य पापस्य शांत्यर्थं कार्तिके वा व्रती भवेत् ॥ ३७ ॥ नमः कृष्णाय हरये केशवाय नमोनमः ॥ नमोऽस्तु नारसिंहाय विष्णवे
पापजिष्णवे ॥ ३८ ॥ सायं प्रातर्दिवामध्ये कर्मांतेषु च योजयेत् ॥ ३९ ॥ तस्य पापानि घोराणि चितानि बहुजन्मसु ॥ निर्दहत्येव सर्वाणि
तूलराशिमिवानलः ॥ ४० ॥ एकाहारो यताहारो विष्णुनिर्माल्यभोजनः ॥ आषाढीमवधिं कृत्वा कार्तिक्यवधि यो भवेत् ॥ नक्तभोजी भवेद्वापि
स्वर्गस्तस्याल्पकं फलम् ॥ ४१ ॥ तैलाभ्यंगं दिवा स्वापं मृषावादं च वर्जयेत् ॥ आषाढशुक्लैकादश्यां संक्रांतौ कर्कटस्य वा ॥ ४२ ॥ आषाढ्यां
वा नरो भक्त्या गृह्णीयान्नियमं व्रती ॥ सर्वपापहरं देवं प्रपूज्य मधुसूदनम् ॥ ४३ ॥ तदग्रे प्रतिसंकल्प्य व्रतार्चनजपादिकम् ॥ प्रार्थयेत्परमानन्दं
कृतांजलिपुटो व्रती ॥ ४४ ॥ चातुर्मास्यव्रतं देव गृहीतं त्वत्प्रसादतः ॥ तव प्रसादान्निर्विघ्नं सिद्धिमायातु केशव ॥ ४५ ॥ व्रतेस्मिन्यद्यसंपूर्णे पर
लोकगतिर्भवेत् ॥ तन्मे भवतु संपूर्णं त्वत्प्रसादादधोक्षज ॥ ४६ ॥ इति संप्रार्थ्य देवेशं पूर्वोक्तनियमे स्थितः ॥ यापयेच्चतुरो मासान्विष्णवर्पित

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मतिर्व्रती॥४७॥पारणं प्रतिमासांते प्रीत्यै कृष्णस्य कारयेत् ॥४८॥मिष्टान्नैर्भोजयेद्विप्रान्पूजयित्वा जगत्पतिम् ॥ असमर्थस्तु कार्तिक्यां पारयेद्व्रतमुत्तमम् ॥४९॥ तस्यां पूज्य जगन्नाथं वह्निस्थं तर्पयेत्ततः ॥ द्विजाग्र्यान्पायसैर्मिष्टैर्विष्णुभक्त्या प्रपूजयेत् ॥५०॥ यथाशक्त्या प्रदद्याद्वै कनकं वस्त्रमेव च ॥ अशक्तः कार्तिके मासि व्रतं कुर्यात्पुरोदितम् ॥५१॥ व्रतं च विविधं विष्णोः कृच्छ्रचांद्रायणं तथा ॥५२॥ पयः पीत्वा नयेद्यस्तु शाकाहारेण वा पुनः ॥ भुक्त्वात्र विपुलान्भोगान्परं निर्वाणमृच्छति॥५३॥तत्रापि चेदशक्तः स्याद्भीष्मपंचकमुत्तमम्॥प्रीतये देवदेवस्य वन्यवृत्तिर्भवेद्व्रती ॥५४॥ एतद्व्रतं समाख्यातं भगवत्प्रीतिकारकम् ॥ सर्वपापप्रशमनं विष्णुलोकगतिप्रदम् ॥ धन्यं यशस्यमायुष्यं सर्वकामप्रसाधनम् ॥५५॥ मुनयः प्रोक्तमेतद्वो रहस्यं शृणुतापरम् ॥ एतद्व्रतानि चान्यानि व्रतानि सबहूनि च ॥ ५६ ॥ भगवद्भक्तिहीनानां जानीध्वं विफलानि वै ॥ फलं महाक्रतूनां यत्तीर्थानां फलमुत्तमम् ॥ ५७ ॥ दानानां तपसां चैव सात्त्विकानां च यत्फलम् ॥ एकया विष्णुभक्त्या तत्समग्रं फलमश्नुते ॥ ५८ ॥ ये पश्यंति महात्मानः शयनोत्सवमुत्तमम् ॥ मातुर्गर्भे न स्वपंति कारयंति च ये महम् ॥ ५९ ॥ उत्सवांते व्रतं चेदं प्रतिज्ञाय तदग्रतः ॥ पर्याप्तं पारयित्वा तु ब्रह्मलोके महीयते ॥ ६० ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे पुरुषोत्तमक्षेत्रमाहात्म्ये षट्त्रिंशोऽध्यायः ॥ ३६ ॥ ॥ जैमिनिरुवाच ॥ ॥ अतः परं प्रवक्ष्यामि दक्षिणायनमुत्तमम् ॥ संक्रांतेः पूर्वकाले याः कला वै विंशतिर्मताः ॥ १ ॥ अयनं पुण्यकालोऽयं पुण्यकर्मसु कर्मिणाम् ॥ पंचामृतैस्तत्र देवं स्नापयेत्स्वापवद्विजाः ॥ २ ॥ सर्वांगं लेपयेदस्यागुरुकर्पूरचंदनैः ॥ सुगन्धमाल्यालंकारैश्चारुवस्त्रैश्च दीपकैः ॥ ३ ॥ नानाभक्ष्योपहारैश्च पूजयेत्परमेश्वरम् ॥ कर्पूरालतिकामुच्चैर्मुखाभ्याशे हरेर्ददेत् ॥ ४ ॥ दूर्वांकुराक्षतैर्नीराजनेनाथ प्रवन्दयेत् ॥ मांगल्यगीतनृत्ताद्यैर्नारी हुलुहुलां वदेत् ॥ ५ ॥ पूजितं पूज्यमानं च यः पश्येत्पुरुषोत्तमम् ॥ पूजाशतगुणं पुण्यं तस्मै दद्याज्जनार्दनः ॥ ६ ॥ अयने दक्षिणे तस्मिन्नर्च्यमानं श्रियः पतिम् ॥ विहाय सर्वपापानि विष्णुलोकं व्रजंति ते ॥ ७ ॥ स्वल्पा वा महती यात्रा सर्वा मुक्तिप्रदा हरेः ॥ तस्मिंस्तस्मिन्दिने दृष्टो भगवान्मुक्तिदो ध्रुवम् ॥ ८ ॥ विश्वासहेतोर्मूर्खाणां यात्रा ह्येताः कृपावता ॥ विष्णुना कथिता विप्राः पापिनां किल्बिषापहाः ॥ ९ ॥ आयासजनितं पुण्यं मन्यन्ते ये नराधमाः ॥ लक्ष्मीपतेर्भोजनाय संस्कार्योऽत्र महानसः ॥ १० ॥ वैष्णवाग्निं समाधाय निरुप्य चरुमुत्तमम् ॥ वैश्वदेवं प्रकुर्वीत भगवत्पाकसाधनम् ॥११॥ ब्रह्मणे वास्तुपतये प्रजानांपतये तथा ॥ विष्णवे विश्वकर्त्रे च शुच्यग्नौ जुहुयाच्छुचिः ॥ १२ ॥ राज्ञा नियुक्त आचार्यः श्रौतस्मार्तक्रियापरः ॥ द्वारपालप्रचंडाभ्यामैशान्यां क्षेत्रपालिने ॥ १३ ॥ दक्षिणे च

CC-0. In Public Domain. Digitization by eGangotri

विरूपाय खगानां पतये तथा ॥ दुर्गासरस्वतीभ्यां च नैर्ऋत्यां विनिवेदयेत् ॥ १४ ॥ महालक्ष्मीमहेंद्राभ्यां प्राच्यां दिशि बलिः स्मृतः ॥ विष्णु
पारिषदेभ्योऽथ पशूनां पतये तथा ॥ १५ ॥ उदीच्यां बलिदानं तु नारदायाथ पश्चिमे ॥ आग्नेय्यामग्नये दद्याद्वायव्यां विश्वसाक्षिणे ॥ १६ ॥
पञ्चश्वसनरूपेभ्यो विश्वकर्त्रेऽथ मध्यतः ॥ आद्यंतयोर्जलं दद्यात्प्रत्येकं बलिकर्मणि ॥ १७ ॥ दत्त्वा बलिं तदग्नौ तु कारयेत्पाकमुत्तमम् ॥
संध्यात्रये भगवतः पूजायै चरुकारणात् ॥ १८ ॥ चरुसंस्कारकांगानि भक्ष्यभोज्यादिकानि वै ॥ न दीप्तान्योजयेत्तत्र लोके त्रैवर्णिको नृपः ॥
॥ १९ ॥ आर्यान्पवित्राञ्छूद्रान्वा वर्णांश्च परिसेवकान् ॥ लौकिकव्यवहारोऽयं पचति श्रीः स्वयं ध्रुवम् ॥ २० ॥ भुंक्ते नारायणो नित्यं तया पक्वं
शरीरवान् ॥ अमृतं तद्धि नैवेद्यं पापघ्नं मूर्ध्नि धारणात् ॥ २१ ॥ भक्षणान्मद्यपानादिमहादुरितनाशनम् ॥ आघ्राणान्मानसं पापं दर्शनाद्दृष्टिजं
तथा ॥ २२ ॥ आस्वादात्तु कृतं पापं श्रावणं च व्यपोहति ॥ स्पर्शनात्त्वक्कृतं पापं मिथ्याभाषणजं तथा ॥ २३ ॥ गात्रलेपाद्दहेत्पापं शारीरं
वै न संशयः ॥ २४ ॥ महापवित्रं हि हरेर्निवेदितं नियोजयेद्यः पितृदेवकर्मसु ॥ तृप्यंति तस्मै पितरः सुरास्तथा प्रयांति लोकं मधुसूदनस्य ते
॥ २५ ॥ नातः पवित्रं वस्त्वस्ति हव्यकव्येषु भो द्विजाः ॥ नराणां रूपमास्थाय तदश्नंति दिवौकसः ॥ २६ ॥ अभिमानो महांस्तत्र देवदेवस्य
चक्रिणः ॥ श्वेतोनाम महाराजः पुरा त्रेतायुगेऽभवत् ॥ २७ ॥ व्रतस्थोऽपि महाभक्तिं चकार पुरुषोत्तमे ॥ इन्द्रद्युम्नेन रचितभोगमात्रा
नुसारतः ॥ २८ ॥ भोगान्प्रकल्पयामास प्रत्यहं श्रीपतेर्मुदा ॥ भक्ष्यभोज्यान्यनेकानि षड्रसांश्च सुसंस्कृतान् ॥ २९ ॥ माल्यानि च
विचित्राणि सुगंधमनुलेपनम् ॥ गीतवादित्रनृत्यानि दिव्यानि सुबहूनि च ॥ ३० ॥ राजोपचारा बहुशोऽवसरेऽवसरे हरेः ॥ बहुवित्तव्ययायास
भक्तिभावनिरूपकाः ॥ ३१ ॥ तत्तद्वैष्णवशास्त्रोक्तचित्रभोगाः पृथग्विधाः ॥ कल्पितास्तेन भूपेन विद्वत्पंकजभानुना ॥ ३२ ॥ प्रातः पूजन
वेलायां हरिं द्रष्टुं जगाम सः ॥ कस्मिंश्चिद्दिवसे राजा पूज्यमानं ददर्श तम् ॥ ३३ ॥ प्रणम्य देवदेवं तु बद्धांजलिपुटो मुदा ॥ प्रासादद्वारनिकटे
तस्थिवान्नृपसत्तमः ॥ ३४ ॥ दृष्ट्वा स्वयं विरचितानुपचारानुत्तमान् ॥ उपायनसहस्रं च हरेरग्रे प्रकल्पितम् ॥ ३५ ॥ चिंतयामास मनसा
किंचिद्ध्यानावलंबितः ॥ मनुष्यकल्पितं भोगं ग्रहीष्यति हरिः किमु ॥ ३६ ॥ देवैर्दिव्योपचारैर्यो शक्यते नार्चनाविधौ ॥ मानसैरुपहारैर्यं पूज
यंति यतव्रताः ॥ ३७ ॥ भावदुष्टो बहिर्यागो न मुदे तस्य निश्चितम् ॥ इत्थं संचिंतयन्राजा दिव्यासनगतं विभुम् ॥ ३८ ॥ भुंजानमन्नपानाढ्यं
श्रिया सुपरिवेषितम् ॥ दिव्यस्रजालंकृतया दिव्यगंधदुकूलया ॥ ३९ ॥ अनर्घ्यरत्नमंजीरसिंजितेन सुरालयम् ॥ पूरयंत्या स्वर्णदर्व्या ददत्या

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सादरं रसान् ॥ ४० ॥ भगवत्प्रतिरूपैश्च भुंजानैः परिवेष्टितम् ॥ दृष्ट्वा कृतार्थमात्मानं मन्यमानस्तदद्भुतम् ॥ ४१ ॥ प्रोन्मीलिताक्षः स पुनः प्राग्दृष्टं समवैक्षत ॥ अतःप्रभृति राजासौ परां निर्वृतिमाप्तवान् ॥ ४२ ॥ निवेदिताशीर्व्रतवांश्चचार सुमहत्तपः ॥ अकालमृत्युनाशाय स्वराज्ये मृतमुक्तये ॥ ४३ ॥ मंत्रराजं जपन्नित्यं श्रितानां कल्पपादपम् ॥ ददर्श शतवर्षांते नृहरिं दुरितापहम् ॥ ४४ ॥ योगासनाब्जनिलयं वामांगावस्थितश्रियम् ॥ दिव्यालंकृतसर्वांगं स्फटिकामलविग्रहम् ॥ ४५ ॥ त्रिदशैः सिद्धमुक्तैश्च स्तूयमानं स्मिताननम् ॥ भ्रांतो विस्मयभीतिभ्यां हर्षगद्गदया गिरा ॥ प्रसीद नाथेति लपन्पपात धरणीतले ॥ ४६ ॥ तपःकृशं तं प्रणतं दृष्ट्वा मनुजकेसरी ॥ अकल्मषं क्षितिपतिं विवक्षुर्भक्तवत्सलः ॥ ४७ ॥ ॥ श्रीभगवानुवाच ॥ ॥ उत्तिष्ठ वत्स भक्त्या ते प्रसन्नं विद्धि मां प्रभुम् ॥ मयि प्रसन्ने नालभ्यं वरं तत्प्रार्थ्यतां भवान् ॥४८॥ श्रुत्वेत्थं भगवद्वाक्यं समुत्तस्थौ ततो नृपः ॥ बद्धांजलिपुटो नम्रो भक्त्योवाच जनार्दनम् ॥ ४९ ॥ ॥ श्वेत उवाच ॥ ॥ स्वामिन्यदि प्रसादस्ते मयि जातः सुदुर्लभः ॥ सारूप्यमथ संप्राप्य स्थास्यामि तव सन्निधौ ॥ ५० ॥ स्थास्ये यावन्नृपत्वेऽहं मद्राज्ये नो जनः क्वचित् ॥ अकाले म्रियतां जंतुःकाले चेन्मुक्तिमाप्नुयात् ॥५१॥ तच्छ्रुत्वा भगवान्प्राह श्वेतराजानमुत्तमम् ॥५२॥ श्वेत ते वांछितं भूयात्तिष्ठ त्वं मम दक्षिणे ॥ भुक्त्वा वर्षसहस्रं तु स्वराज्यं सुसमृद्धिमत् ॥५३॥ मम निर्माल्यभोगेन क्षीणशेषाघसंचयः ॥ सुनिर्मलांतःकरणो मत्सायुज्यमवाप्स्यसि ॥ ५४ ॥ वटसागरयोर्मध्ये मुक्तिस्थाने सुदुर्लभे ॥ मदीयाऽऽद्यावतारस्य विष्णोर्मत्स्यस्वरूपिणः॥५५॥संमुखीनो वस त्वं हि स्फटिकामलविग्रहः ॥ ख्यातिं यास्यसि भूलोके श्वेतमाधवसंज्ञया ॥५६॥ युवयोरंतराले ये प्राणांस्त्यक्ष्यंति मानवाः ॥ तिर्यंचोऽपि च कीटा वा ध्रुवं ते मुक्तिमाप्नुयुः ॥५७॥ अमरा यत्र मरणमिच्छंति किमु मानवाः ॥ तवोत्तरस्यां दिशि यत्सरः पापनिबर्हणम् ॥५८॥ तत्र स्नात्वा उपस्पृश्य तदीये दक्षिणे तटे ॥ उभयोर्दृष्टिपूतःसंस्त्यक्त्वा प्राणान्विमुच्यते ॥ ॥५९॥आसमंतादिदं क्षेत्रं यत्र तत्रापि मुक्तिदम् ॥ मूढात्मनां विश्वसितुं प्रधानं स्थानमीरितम्॥६०॥तव राज्ये तु ये लोका मम निर्माल्यभोजिनः॥ मृतिराकालिकी तेषां न कदाचिद्भविष्यति ॥ ६१ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे पुरुषोत्तमक्षेत्रमाहात्म्ये सप्तत्रिंशोऽध्यायः॥३७॥ ॥ जैमिनिरुवाच ॥ ॥ इति दत्त्वा वरं तस्मै श्वेतराजाय वै पुरा ॥ जगामांतर्हितो विप्राः प्रासादांतःस्थितो हरिः॥१॥ समस्तजगतां या श्रीः सृष्टिस्थितिविनाशकृत् ॥ वैष्णवीशक्तिरतुला परिवेषणकारिणी ॥ २ ॥ सुधोपमं सुपक्वान्नं भुंक्ते नारायणः प्रभुः ॥ तदुच्छिष्टोपभोगो हि सर्वाघक्षयकारकः ॥ ३ ॥ न तादृशसमं पुण्यं वस्त्वस्ति पृथिवीतले ॥ पापसंस्कारकर्तॄणां संपर्कात्तु न दुष्यति ॥ ४ ॥ पक्वायाः

CC-0. In Public Domain. Digitization by eGangotri

सन्निधानेन सर्वे ते शुचयः स्मृताः ॥ विष्णवालयगतं तद्धि निर्माल्यं पतितादयः ॥ ५ ॥ स्पृशंति चेन्न दुष्टं तद्यथा विष्णुस्तथैव तत् ॥ व्रतस्था
विधवाश्चैव सर्वे वर्णाश्रमास्तथा ॥ ६ ॥ तत्प्राशनेन पूयन्ते दीक्षिताश्चाग्निहोत्रिणः ॥ दरिद्रः कृपणो वापि गृहस्थः प्रभुरेव वा ॥७॥ स्वदेश्याः पर
देश्या वा सर्वे तत्र समागताः ॥ नाभिमानं प्रकुर्वीरन्विष्णोर्निर्माल्यभक्षणे ॥ ८ ॥ भक्त्या लोभात्कौतुकाद्वा क्षुधासंशमनेन वा ॥ आकंठभक्षितं
तद्धि पुनाति सकलांहसः ॥ ९ ॥ सर्वरोगोपशमनं पुत्रपौत्रप्रवर्द्धनम् ॥ दारिद्र्यहरणं श्रेष्ठं विद्यायुःश्रीप्रदं शुभम् ॥ १० ॥ पक्षपातो महांस्तत्र
विष्णोरमिततेजसः ॥ निन्दन्ति ये तदमृतं मूढाः पंडितमानिनः ॥ ११ ॥ स्वयं दंडधरस्तेषु सहते नापराधिनः ॥ येषामत्र स दण्डश्चेद्ध्रुवा तेषां
हि दुर्गतिः ॥ १२ ॥ कुम्भीपाके महाघोरे पच्यन्ते तेऽतिदारुणे ॥ न विक्रयः क्रयो वापि प्रशस्तस्तस्य भो द्विजाः ॥ १३ ॥ निर्माल्यं जगदी
शस्य नाशित्वाश्नामि किञ्चन ॥ इति सत्यप्रतिज्ञो यः प्रत्यहं तच्च भक्षयेत् ॥ १४ ॥ सर्वपापविनिर्मुक्तः शुद्धांतःकरणो नरः ॥ स शुद्धं वैष्णव
स्थानं क्रमाद्याति न संशयः ॥ १५ ॥ चिरस्थमपि संशुष्कं नीतं वा दूरदेशतः ॥ यथातथोपयुक्तं तत्सर्वं पापापनोदनम् ॥ १६ ॥ कुक्कुरस्य
मुखाद्भ्रष्टं तदन्नं पतितं यदि ॥ ब्राह्मणेनापि भोक्तव्यमितरेषां तु का कथा ॥ १७ ॥ उपोष्य तिष्ठता वापि नोपवासं च कुर्वता ॥ अशुचिर्वाप्य
नाचारो मनसा पापमाचरन् ॥ प्राप्तमात्रेण भोक्तव्यं नात्र कार्या विचारणा ॥ १८ ॥ नैवेद्यान्नं जगद्भर्त्तुर्गांगं वारि समं द्वयम् ॥ दृष्टेः स्वर्गादि
संप्राप्तिर्भक्षणाच्चाघनाशनम् ॥ १९ ॥ जगद्धात्र्या हि यत्पक्वं वैष्णवेऽग्नौ सुसंस्कृते ॥ भुक्तेऽन्वहं चक्रपाणिर्युगमन्वंतरादिषु ॥ २० ॥ सप्तद्वीप
धरामध्ये सान्निध्यं नेदृशं हरेः ॥ यादृशं नीलगोत्रेऽस्मिन्व्याजमानुषचेष्टितम् ॥ २१ ॥ दारुरूपं परं ब्रह्म सर्वचाक्षुषगोचरम् ॥ प्रकाशते भो मुनयो
न दृष्टं न श्रुतं क्वचित् ॥ २२ ॥ तस्मै प्रवृत्तिरूपाय ब्रह्मणे परमात्मने ॥ प्रवृत्तिरूपा शक्तिः श्रीः प्रवर्तयति यद्धविः ॥ २३ ॥ तदश्नाति जग
न्नाथस्तच्छेषं दुरितापहम् ॥ किमत्र चित्रं भो विप्रा यदुक्तं मुक्तिकारणम् ॥ २४ ॥ नाल्पपुण्यवतां तत्र विश्वासश्च प्रजायते ॥ वेदाचारप्रधानेषु युगे
ष्वेतत्प्रकीर्तितम् ॥ २५ ॥ महिमानं न वेदास्य विशेषाच्छ्रूयतां कलौ ॥ घोरे कलियुगे तस्मिंस्त्रिपादो धर्मविप्लवः ॥ २६ ॥ धर्मः स्यादेकपादस्तु
क्वचित्तस्य भयाच्चरेत् ॥ सर्वेऽनृतप्रधाना हि दांभिकाः शठवृत्तयः ॥ २७ ॥ प्रायश्च धर्मविमुखा जिह्वोपस्थपरायणाः ॥ न ध्यायंति तपस्यन्ति
व्रतयंति कदाचन ॥ २८ ॥ अधर्मबहुलाः सर्वे हिंसका लोलुपाः परम् ॥ परेषां परिवादेन तुष्यन्ति स्वकृतं विना ॥ २९ ॥ प्रसंगात्कौतुका
द्वापि निघ्नंति परकर्म वै ॥ क्षुद्रकार्याशयात्स्वस्य परकार्यप्रबाधकाः ॥ ३० ॥ धर्मलब्धां स्त्रियं रम्यामवज्ञाय स्ववेश्मनि ॥ परयोषिति निंद्यायां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रसक्ताः पशुचेष्टिताः ॥ ३१ ॥ अग्निहोत्रादिकं वापि व्रतं नान्यत्कचित्कचित् ॥ जीविका तद्द्विजातीनां येषां वा पारलौकिकम् ॥३२॥ अव्रताधीत
वेदेन अन्यायाप्तधनेन च ॥ वित्तशाठ्येन च कृतं न तथा फलदायि तत् ॥ ३३ ॥ प्रायः कलियुगे भूपाः प्रजावनपराङ्मुखाः ॥ करादानपरा
नित्यं पापिष्ठाश्चौर्यवृत्तयः ॥ ३४ ॥ वर्णसंकरिणः सर्वे शूद्रप्रायाः कलौ युगे ॥ हर्तारः पार्थिवा एव शूद्राश्च नृपसेवकाः ॥ ३५ ॥ श्रौतस्मार्तादिकं
कर्म न तथा सदनुष्ठितम् ॥ युगे चतुर्थे भो विप्राः परलोकाय कल्पिते ॥ ३६ ॥ दानधर्मः परो ह्येष नान्यो धर्मः प्रशस्यते ॥ कर्मणा मनसा
वाचा हितमिच्छेद्द्विजन्मनाम् ॥ ३७ ॥ इति होवाच भगवान्ब्राह्मणो मामकी तनुः ॥ ब्राह्मणा यस्य संतुष्टाः सन्तुष्टस्तस्य चाप्यहम् ॥ ३८ ॥
उभयत्र समो भूयाद्ब्राह्मणे च जनार्दने ॥ यद्वदंति द्विजा वाक्यं तत्स्वयं भगवान्वदेत् ॥ ३९ ॥ यथातथा वर्तमानो वर्णानां ब्राह्मणो गुरुः ॥ भग
वानपि देवेशः स साक्षाद्ब्राह्मणप्रियः ॥ ४० ॥ सदावतारं कुरुते ब्राह्मणार्थं जनार्दनः ॥ तत्पालनार्थं दुष्टान्वै निगृह्णाति युगे युगे ॥ ४१ ॥
ससर्ज ब्राह्मणानग्रे सृष्ट्यादौ स चतुर्मुखः ॥ सर्वे वर्णाः पृथक्पश्चात्तेषां वंशेषु जज्ञिरे ॥ ४२ ॥ तस्मात्कलियुगे तस्मिन्ब्राह्मणो विष्णुरेव
च ॥ उभौ गतिश्च सर्वेषां ब्राह्मणानां हरिर्गतिः ॥ ४३ ॥ हरिरेवात्र सर्वेषां गतिः प्राप्ते कलौ युगे ॥ शालग्रामादिके क्षेत्रे स्मर्यते कीर्त्यतेऽपि च ॥
॥ ४४ ॥ तस्मिन्नीलाचले पुण्ये क्षेत्रे क्षेत्रज्ञवर्ष्मणि ॥ जीवभूतः स सर्वेषां दारुव्याजशरीरभृत् ॥ ४५ ॥ कलिकल्मषनाशाय प्रायो दुष्कृतकर्म
णाम् ॥ दर्शनस्तवनोच्छिष्टभोजनैर्मुक्तिदायकः ॥ ४६ ॥ उच्छिष्टेन सुरेशस्य व्याप्तं यस्य कलेवरम् ॥ तदाहारस्तदात्मा हि लिप्यते न स पातकैः
॥ ४७ ॥ निवेदनीयमन्यासु मूर्तिष्वीशस्य वर्तते ॥ पावनं तदपि प्रोक्तमुच्छिष्टं तु विमोचकम् ॥ ४८ ॥ भुंक्ते त्वत्रैव भगवान्पश्यत्यन्यत्र
चक्षुषा ॥ पुरायं प्रार्थितो देवो योगिभिः परिवेष्टितैः ॥ ४९ ॥ निर्माल्योच्छिष्टभोगेन तव मायां जयेमहि ॥ अत्यंतस्तिमिताक्षाणामनायासेन
मुक्तिदः ॥ ५० ॥ शयनासनभोगाद्यै रमते च श्रिया सह ॥ अत्र चेष्टा भगवतो वेदार्थ इति धार्यताम् ॥ ५१ ॥ समतिक्रांतवेदो हि न कदाचित्प्रव
र्तते ॥ वेदरक्षार्थमेवास्य संभवो हि युगे युगे ॥ ५२ ॥ प्रमाणभूतो भगवान्विरुद्धं कथमाचरेत् ॥ तस्मिन्विरुद्धं चरति जगदेव तथा भवेत् ॥ ५३ ॥
आचारेण हि वेदार्थो नियतो धामतां गतः ॥ मध्यदेशभवः पूर्वमत्रागच्छद्द्विजोत्तमः ॥ ५४ ॥ शिष्टाचारैः सुविमलः शास्त्रार्थपरिनिष्ठितः ॥
सदा शांतः सदा दांतः कायवाङ्मनसैर्गृही ॥ ५५ ॥ स तीर्थविधिना देवं समभ्यर्च्य च साग्निकः ॥ त्रिरात्रमत्रोषितवान्विष्णवर्चनपरः शुचिः ॥
॥ ५६ ॥ यज्ञशेषं गृहस्थानां भोक्तव्यमिति शास्त्रतः ॥ देवोच्छिष्टं न जग्राह अन्यपाकाभिशंकया ॥ ५७ ॥ दैवतैरत्र संस्कार्यो देवयोग्यः कथं

CC-0. In Public Domain. Digitization by eGangotri

भवेत् ॥ अयोग्यत्वाच्च नैवेद्यमग्राह्यं च भवेद्ध्रुवम् ॥५८॥ अगृहीते च नैवेद्ये श्रोत्रियेण तदा द्विजाः ॥ सर्वे च तस्यानुचरा नाभुंजंत निवेदितम् ॥
॥ ५९ ॥ ततः स व्याधिसंमग्नो विह्वलीभूतविग्रहः ॥ सकुटुंबोऽभवन्मूको भगवद्द्रोहसंयुतः ॥ ६० ॥ मनसा चिन्तयत्येवं निर्निमित्तं कथं नु
मे ॥ कुटुम्बसहितस्याभूत्पीडा सर्वांगभंजिनी ॥ ६१ ॥ एवं चिन्तयमानस्य त्रिरात्रांतेऽभवन्मतिः ॥ नेदृशी व्याधिपीडा च सर्वेषामेकदा भवेत् ॥
॥ ६२ ॥ को वा द्रोहः कृतोऽस्माभिरेतस्मिन्पुरुषोत्तमे ॥ न बुद्धिपूर्वकः किं स्यात्ततो मे व्याधिकारणम् ॥ ६३ ॥ मुहुरित्थं चिन्तयित्वा दध्यौ
नारायणं प्रभुम् ॥ ध्यानावसाने तुष्टाव शास्त्रतत्त्वार्थदर्शकः ॥ ६४ ॥ ॥ शांडिल्य उवाच ॥ ॥ चतुर्दशापि या विद्या धर्मनिर्णयहेतवः ॥ ताः
सर्वास्तव वाक्यानि मुखपद्मविनिर्गताः ॥ ६५ ॥ ताभिरेवाचरेद्धर्ममिति शास्त्रार्थनिश्चयः ॥ तस्य धर्मस्य रक्षार्थमवतारो युगे युगे ॥ ६६ ॥
तमुल्लंघ्य वर्त्तमानो भवद्द्रोहकरो ध्रुवम् ॥ अहं ते देवदेवेश कर्मणा मनसा गिरा ॥ ६७ ॥ धर्मशास्त्रमतिक्रम्य न वर्त्तेऽप्यर्थकामयोः ॥ अनेक
जन्मसाहस्रैः संचितं पापसंचयम् ॥ ६८ ॥ दग्धुमत्रागतो देव त्वद्दर्शनदवाग्निना ॥ कोऽपराधः कृतो देव त्वच्छास्त्रपथि वर्तिना ॥
सर्वांगं बाधते यस्मादुग्रो व्याधिरहेतुकः ॥ ६९ ॥ ज्ञानतोऽज्ञानतो वापि त्वत्पादसरसीरुहे ॥ कृतोऽपराधो यो देव तं क्षमस्व कृपांबुधे ॥ भूमौ
स्खलितपादानां भूमिरेवावलंबनम् ॥ ७० ॥ त्वयि जातापराधानां त्वमेव शरणं प्रभो ॥ तवापराधजं पापं त्वमेव च क्षमस्व मे ॥ ७१ ॥ वह्नि
संतापतो नश्येद्वह्निसंतापजो व्रणः ॥ तदिमां दुर्दशां देव प्रारब्धां पापबीजजाम् ॥ ७२ ॥ लीलापांगेन शमय अपवर्गैकहेतुना ॥ मामुद्धर जगन्नाथ
पतितं शोकसागरे ॥ ७३ ॥ त्वद्दर्शनपथं यातः किं नु शोच्यो भवेन्नरः ॥ निसर्गकरुणांभोधे यस्त्वद्दृष्टिपथं गतः ॥ ७४ ॥ सदानन्दाब्धिसंमग्नो
न शोचति न कांक्षति ॥ नाल्पभाग्यो ह्यहं देव त्वामद्राक्षं स्वचक्षुषा ॥ ७५ ॥ अपवर्गांतरायो मे ध्रुवमेषा विभीषिका ॥ तत्प्रसीद जगन्नाथ
सेवकं द्रोहिणं सदा ॥ ७६ ॥ सेव्यसेवकसंबंधादपराधं क्षमस्व मे ॥ इति स्तवांते तस्याशु देहपीडागमत्तदा ॥ ७७ ॥ ददर्श सोथ गोविन्दं नृसिंहं
भक्तवत्सलम् ॥ दिव्यसिंहासनारूढं दिव्यालंकारभूषितम् ॥ ७८ ॥ आददानं श्रिया दत्तं परमान्नं करांबुजे ॥ ग्रासावशेषं पात्रेषु क्षिपंतं च मुहु
र्मुहुः ॥ ७९ ॥ यावद्दत्तं वस्तुजातं तावदश्नंतमत्वरम् ॥ विलाससस्मितापांगं हस्ते लक्ष्म्यापवर्जितम् ॥ ८० ॥ तं दृष्ट्वा विस्मयाविष्टः शांडिल्यः
स द्विजोत्तमः ॥ सस्मारात्मकृतं द्रोहं नैवेद्याग्रहणे स्थितम् ॥ ८१ ॥ क्वाहं प्रादेशिकः प्राज्ञः सर्वज्ञाननिधिर्भवान् ॥ क्व त्वं महदहंकारभूततत्त्व
विसर्जकः ॥ ८२ ॥ त्वन्मायामूढमनसो जानीयुः कथमीश ते ॥ निरंकुशामनिर्वाच्यामिच्छां सृष्टिलयात्मिकाम् ॥ ८३ ॥ इति स्तुवंतं नृहरि
स्तेनैवोच्छिष्टपाणिना ॥ सिषेच ग्रासशिष्टांश्च सर्वांगे द्विजसत्तमम् ॥ ८४ ॥ तैः सिक्तैर्ब्राह्मणः सद्यः सुधासेकोपमैर्मुदा ॥ बभौ दिव्यवपुः श्रीमां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्जीवन्मुक्तो यथा मुनिः ॥ ८५ ॥ महिमानं हि भक्तेस्तु भक्ता एव विजानते ॥ महतीं सूतिपीडां तु वन्ध्या नानुभवेत्कचित् ॥ ८६ ॥ इत्युदीर्य स्वयं गात्रादुच्छिष्टं परमात्मनः ॥ भुक्त्वा कृतार्थमात्मानं मेने श्रोत्रियपुंगवः ॥ ८७ ॥ साधारणं धर्मशास्त्रं क्षेत्रेऽस्मिन्न विचार्यते ॥ अयं तु परमो धर्मो यो देवेन प्रकीर्तितः ॥ ८८ ॥ आचारप्रभवो धर्मो धर्मस्य प्रभुरच्युतः ॥ इत्थं संचिंतयन्विप्रः कुटुम्बार्थेऽवशेषितम् ॥ ८९ ॥ आजहार स्वयं सुप्त्या ध्यानभङ्गमवाप च ॥ प्रबुद्धश्चिंतयामास स्वप्नं तं विस्मिताशयः ॥ ९० ॥ अयमेव मम द्रोहो ह्यवज्ञासिषमीश्वरम् ॥ नैवेद्याशन माहात्म्यमजानन्परमाद्भुतम् ॥ ९१ ॥ अष्टादश चतुर्दश ब्रह्मांडं यत्पदांबुजम् ॥ धर्मद्रवेण प्रक्षाल्य अपुनात्स्वं तदंबुना ॥ ९२ ॥ यमर्चयंति शक्राद्या दिव्यभोगैरनुत्तमैः ॥ स मानुष्यकृतं भुंक्ते क्षेत्रेस्मिन्महदद्भुतम् ॥ ९३ ॥ इत्याश्चर्यपरस्तेन स्वप्नलब्धेन वै द्विजाः ॥ नैवेद्येन कुटुम्बं स्वं मार्जयामास सादरम् ॥ ९४ ॥ ततः सर्वे नीरुजास्ते सुवाक्याद्दृष्टमानसाः ॥ पुनर्जन्म मन्यमानाः शशंसुः क्षेत्रमुत्तमम् ॥ ९५ ॥ नास्त्यस्य सदृशं क्षेत्रं सप्तद्वीपावनीतले ॥ यत्र स्वोच्छिष्टदानेन पापान्मोचयते नरान् ॥ ९६ ॥ पुरुषोत्तममाहात्म्यं क्षेत्रं परमदुर्लभम् ॥ यतः स्वर्गश्च भोगश्च मुक्तिश्चैव करे स्थिता ॥९७ ॥ आर्तानां भवकांतारे भाग्यादत्र समीयुषाम् ॥ नानाभोगोपतृप्तानां मुक्तिमार्गः सुखं भवेत् ॥ ९८ ॥ इत्थं ते हर्षमापन्नाः प्रलपंतः परस्परम् ॥ यथेष्टं भोजयामासुरन्योन्यं च निवेदितम् ॥९९॥ ततस्ते निर्मला विप्रास्तरुणादित्यवर्चसः॥ देवा इव बभुः सर्वे निष्पापा निर्गतज्वराः ॥१००॥ नैवेद्याशनमाहात्म्यं कथितं वो द्विजोत्तमाः ॥ श्रुत्वापि महतः पापान्मुच्यते पापकृत्तमः॥१॥ निर्माल्यग्रहणस्यास्य फलं वक्तुं न शक्नुमः ॥ साक्षाद्ब्रह्मस्वरूपेण ध्रियते वपुषा हि तत् ॥ २ ॥ पुष्पचंदनमाल्यादि यदंगैरुपधार्यते ॥ अपनीतं यथाकाले निर्माल्यं तत्प्रकीर्तितम् ॥३॥ धारणं शिरसा तस्य तेनांगे चापि मार्जनम् ॥ सार्द्धानां कोटितीर्थानामभिषेकफलप्रदम् ॥ भक्षणं गुरुतल्पादिपातकौघविनाशनम् ॥ ४ ॥ लेप्या मूर्त्तिरियं विष्णोरन्येभ्यो लेप उत्तमः ॥ श्रीखंडागुरुकर्पूरकस्तूरीकुंकुमादिभिः ॥ ५ ॥ प्रपिष्टलेपस्नेहेन चंदनागुरुदारुणा ॥ शरीरे वासुदेवस्य इंद्रद्युम्नेन कारितः ॥ ६ ॥ प्रत्यहं भो द्विजश्रेष्ठा वर्षांते चापनीयते ॥ लेप्यानां लेपनिर्मोके दर्शनं न प्रशस्यते ॥ ७ ॥ अंतरा चेत्पतेल्लेपः पिष्टं लिंपेत्पुनश्च तम् ॥ नान्यलेपः प्रशस्यो हि स विष्णोरंगसंमतः ॥ ८ ॥ चंदनार्द्रशरीरं च दृष्ट्वा विष्णुं पुरा किल ॥ सौगंध्याल्लोभयामास नृपपुत्रः स मूढधीः ॥ ९ ॥ तस्य प्रीत्यै नियुक्तस्तु आकृष्यांगात्प्रलेपनम् ॥ ददौ नृपकुमाराय स लिलिंपे हृदि स्वके ॥ ११० ॥ तावत्प्रदेशं कुष्ठं वै श्वेतं तस्याभवत्क्षणात् ॥ स आसीत्कुष्ठपाणिस्तु तस्मै यो दत्तवान्किल ॥ ११ ॥ ततो वर्षावधिष्ठायी लेपः पुण्यतमः स्मृतः ॥ निर्माल्यानां प्रधानं

CC-0. In Public Domain. Digitization by eGangotri

तद्घ्राणाद्‌दंहोविनाशनम् ॥१२॥ पुरा दमनकं दैत्यं समुद्रोदकचारिणम् ॥ बाधितारं जनानां वै मायाबलपराक्रमम् ॥१३॥ भगवानपि मायावी पिता महनिदेशतः ॥ मत्स्यावतारेण विभुः प्रविश्य वरुणालयम् ॥ १४ ॥ अन्विष्याकृष्य वेलायां निष्पिपेष महीतले ॥ मधोः शुक्लचतुर्दश्यां पतितो दानवोत्तमः ॥ १५ ॥ भगवत्करसंपर्कात्सुगंधिरभवत्तृणम् ॥ तस्यैव नाम्ना त सम्यग्जग्राहाश्चर्यमोनसः ॥ १६ ॥ मालां कृत्वा हृत्प्रदेश मिलितं वनमालया ॥ अचिंतयत्तस्य गंधं यावद्वस्तु चिरस्थितम् ॥ १७ ॥ तस्यापि गंधः सर्वेषां पुष्पाणां सौरभापहः ॥ वर्णस्तु भगवन्मूर्तेस्तुल्योऽभूत्स सुशोभनः ॥ १८ ॥ तस्य माला भगवतः परमप्रीतिकारिणी ॥ शुष्का पर्युषिता वापि न दुष्टा भवति क्वचित् ॥ १९ ॥ तस्य सुग्रथितां मालां दत्त्वा दमनकारये ॥ उत्पादयेन्महाप्रीतिं विष्णोर्या मुक्तिदायिनी ॥ १२० ॥ अंगापकर्षितां मालां भक्त्या यो धारयेन्नरः ॥ हयमेधसहस्रस्य फलं प्राप्नोत्यसंशयम् ॥ २१ ॥ तुलसीकलिपतां मालां विष्णोरंगापकर्षिताम् ॥ धारयेन्मूर्ध्नि कंठे च भक्तो यो विन्यसेद्धृदि ॥ तावत्संख्यं वाजिमेधफलमव्ययमश्नुते ॥ २२ ॥ निर्माल्यतुलसीपत्रं यावद्भक्षयते हरेः ॥ तावज्जन्मसहस्रं तु विष्णुलोके महीयते ॥ २३ ॥ हरेर्नैवेद्यमन्नं च तुलसीदलमिश्रितम् ॥ प्रतिग्रासं सोमपानं फलं तत्सममश्नुते ॥२४॥ यावज्जीवं तु भुंजानो ध्रुवं मोक्षमवाप्नुयात् ॥२५॥ अर्घ्यशेषादिकं विष्णोस्तथा चाचमनोदकम् ॥ पादोदकं स्नानवारि प्रत्येकं पापनाशनम् ॥ २६ ॥ सर्वतीर्थाभिषेकाणां फलदं ग्रहनाशनम् ॥ अलक्ष्मीपापरक्षोघ्नं भूतवेतालनाशनम् ॥ ॥ २७ ॥ शवाद्यमेध्यसंस्पर्शदोषनाशनमुत्तमम् ॥ सर्वदीक्षाव्रतफलप्रदमैश्वर्यवर्द्धनम् ॥ २८ ॥ अकालमृत्युहरणं व्याधिव्यूहनिबर्हणम् ॥ सुरोपमां सभक्ष्यादिपापसंघविनाशनम् ॥ २९ ॥ एतैराप्लुतदेहस्तु शृणुयाद्यदि सूतकम् ॥ नाशौचं विद्यते तस्य सर्वकर्माधिकारिणः ॥ १३० ॥ यावज्जीवं प्रतिज्ञाय यस्त्वेतान्येकमेव वा ॥ गृह्णीयाद्भूरि वा स्वल्पं मुच्येद्विष्णोः प्रसादतः ॥ ३१ ॥ एवं तत्र वसन्देवो लोकानुग्रहकांक्षया ॥ रममाणः श्रिया सार्द्धमनायासविमोचकः ॥ ३२ ॥ निर्माल्यपादांबुनिवेदनीयदानैस्तदालोकनतत्प्रणामैः ॥ पूजोपहारैश्च विमुक्तिदाता क्षेत्रोत्तमेस्मिन्पुरुषोत्तमाख्ये ॥ १३३ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे पुरुषोत्तमक्षेत्रमाहात्म्ये जैमिनिऋषिसंवादे दमनकचरितंनामाष्टत्रिंशोऽध्यायः ॥ ३८ ॥ ॥ छ ॥ ॥ मुनय ऊचुः ॥ ॥ मुने त्वत्तः श्रुतं सम्यङ्माहात्म्यं जगदीशितुः ॥ निर्माल्यप्रभृतीनां च यथावदनुपूर्वशः ॥ १ ॥ श्रोतुमिच्छामहे ब्रह्मन्यात्रां तत्फलानि वै ॥ शृण्वतां तत्त्वतो ब्रूहि यथोद्देशः कृतः पुरा ॥ २ ॥ ॥ जैमिनिरुवाच ॥ सर्वथा वर्त्तते लोकहिताय पुरुषोत्तमः ॥ नानागुणविकासैश्च नानारूपविचेष्टितैः ॥ ३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नानारूपविलासेन नानात्मा च जगन्मयः॥ अहंकारं विना कर्मफलं नो द्विजसत्तमाः॥४॥ अहंकारेण बध्यन्ते कारागारे भवाभिधे ॥ बुद्ध्यहंकार युक्तस्तु यत्कर्मारभते नरः ॥ ५ ॥ तस्य सद्गुणमाप्नोति फलं शुभमथापरम् ॥ बुद्धिस्तु त्रिविधा तेषां गुणभेदेन भाविता ॥ ६ ॥ तत्र ये सात्त्विकाः संतः फलावाप्तिपराङ्मुखाः ॥ भगवत्प्रीतये कर्म कुर्वते ते मुमुक्षवः ॥ ७ ॥ परस्य स्पर्द्धया कीर्त्यै फलमुद्दिश्य वा पुनः॥ बहुवित्तव्ययायासै राजसं कर्म तन्वते ॥ ८ ॥ गतानुगतिका ये च दृष्टार्थैकपरायणाः ॥ प्रसंगात्फलमिच्छंतस्तामसं कर्म कुर्वते ॥ ९ ॥ सात्त्विकानां जगन्नाथः सर्वदा सर्व भावनः ॥ ध्यातो दृष्टः स्मृतो वापि मुक्तिदाता न संशयः ॥ १० ॥ राजसास्तामसा ये वै मूढात्मानः फलैषिणः ॥ उत्सवादिकृतं कर्म मन्यंते फलदायि ते ॥ ११ ॥ संभूय बहवो विप्रा आरभंतेऽल्पकं विधिम् ॥ बहुलायासदुःखं यत्कर्म तेषां फलप्रदम् ॥ १२ ॥ तेषामुद्धरणार्थाय विश्वा साय दुरात्मनाम् ॥ यात्रा नानाविधा विप्रा वर्षे वर्षे प्रवर्तयेत् ॥ १३ ॥ जन्मस्नानं महावेद्या उत्सवश्च प्रकीर्तितः ॥ महायात्राद्वयं पुंसां कीर्तनात्पा पनाशनम् ॥ १४ ॥ दर्शनं दक्षिणामूर्तेस्तथा च शयनोत्सवः ॥ सर्वपापहरश्चैषामुत्सवो दक्षिणायने ॥ १५ ॥ अतः परं प्रवक्ष्यामि पार्श्वस्य परिव र्तनम् ॥ शयितस्य जगद्भर्तुः परिवर्तयितुर्युगम् ॥१६॥ नभस्यविमले पक्षे संप्राप्ते हरिवासरे ॥ विष्णोः स्वापगृहद्वारि शनैर्गत्वा प्रविश्य च ॥१७॥ नमस्कृत्वा जगन्नाथं पर्यंके शयितं मुदा ॥ अवच्छाद्य शनैर्गत्वा पूजयेदुपचारकैः ॥ १८ ॥ प्रणम्य भक्त्या तत्पादौ गुह्योपनिषदैः स्तुवन् ॥ मन्त्रं चेमं पठन्देवं स्वापयेदुत्तरामुखम् ॥ १९ ॥ देवदेव जगन्नाथ कल्पानां परिवर्तक ॥ परिवृत्तमिदं सर्वं येन स्थावरजंगमम् ॥ २० ॥ यदि च्छाचेष्टितैरेव जाग्रत्स्वप्नसुषुप्तिभिः ॥ जगद्धिताय सुप्तोऽसि पार्श्वेन परिवर्त्तय ॥ २१ ॥ परिवर्त्तनकालोऽयं जगतः पालनाय ते ॥ तवाज्ञयाऽयं शक्रोऽपि ध्वजे तिष्ठन्समुत्सुकः ॥ २२ ॥ द्रष्टुं त्वत्पादकमलं विमुंचन्जलदैर्जलम् ॥ महीतलं प्लावयति प्रजापालनहेतुकम् ॥ २३ ॥ इति संप्रार्थ्य देवेशं वीप्सया तोषयेत्ततः ॥ व्यजनैश्चामरैश्चैव वीजयेदनुकल्पकृत् ॥ २४ ॥ सुगन्धचन्दनैरस्य सर्वांगं परिलेपयेत् ॥ स्वादूनिक्षुविकारांश्च विकृतैः पायसैस्तथा ॥ २५ ॥ यावकानि च हृद्यानि फलानि विविधानि वै ॥ स्वादूपदंशानन्यांश्च घृतपूपान्सपायसान् ॥ २६ ॥ पक्वतांबूल पत्राणि सोपस्काराणि च द्विजाः ॥ शय्यागृहद्वारि विभोः शनैर्भक्त्या निवेदयेत् ॥ २७ ॥ तस्मिन्दिने हरे रूपं भवेद्यदि महाफलम् ॥ देवमु द्दिश्य यः कुर्यात्सर्वमक्षयतां व्रजेत् ॥ २८ ॥ स्नानं दानं जपो होमस्तपो जागरणं तथा ॥ उपवासश्च नियमो व्रतांते द्विजतर्पणम् ॥ २९ ॥ सांगं व्रतमिदं कृत्वा विष्णुलोकमवाप्नुयात् ॥ यं यं कामयते चित्ते तं तमाप्नोत्यसंशयम् ॥ ३० ॥ अयं वः कथितो विप्राः पार्श्वपर्यायणोत्सवः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अनायासेन लोकानामक्षयः सुखदायकः ॥ ३१ ॥ अतः परं वै शृणुत उत्थापनमहोत्सवम् ॥ पूजयित्वा जगन्नाथं कौमुद्याख्ये महोत्सवे ॥ ३२ ॥
अक्षक्रीडादिभिः पुष्पवस्त्रमाल्यानुलेपनैः ॥ ततोस्मिन्पौर्णमास्यायां रात्रावुत्सवसंयुतम् ॥ ३३ ॥ नारिकेलादिभिर्द्रव्यैः पिष्टकैरर्चयेद्धरिम् ॥
ततः प्रभाते संकल्प्य कार्त्तिके व्रतमुत्तमम् ॥ ३४ ॥ व्रतेन तेनैव नयेद्यावदेकादशी सिता ॥ तस्यामुत्थापयेद्देवं सुसुप्तं जगदीश्वरम् ॥ ३५ ॥
पूर्ववत्पूजयित्वा तु निशामध्ये जगद्गुरुम् ॥ उत्थापयेदिमं मंत्रमाह्वयन्छनकैर्मुदा ॥ ३६ ॥ उत्तिष्ठ देवदेवेश तेजोराशे जगत्पते ॥ वीक्षस्व स
कलं देव प्रसुप्तं तव मायया ॥ ३७ ॥ प्रफुल्लपुंडरीकश्रीहारिणा नयनेन वै ॥ त्वया दृष्टं जगदिदं पावित्र्यं परमेष्यति ॥ ३८ ॥ श्रौतस्मार्त्ताः
क्रियाः सर्वाः प्रवर्त्तंते ततो ध्रुवम् ॥ इत्युत्थाप्य जगन्नाथं वेणुवीणादिकस्वनैः ॥ ३९ ॥ बंदिमागधसूतानां स्तुतिभिर्मंगलस्वनैः ॥ शंखकाहाल
मुरजवादनैर्नृत्यगीतकैः ॥ ४० ॥ जयशब्दैस्तथा स्तोत्रैर्नयेत्तं नृत्यमण्डपम् ॥ सुगन्धतैलेनाभ्यज्य स्नापयेत्पुरुषोत्तमम् ॥ ४१ ॥ पञ्चामृतै
र्नारिकेलरसैः फलरसैस्तथा ॥ सुगन्धामलकेनाथ यवकल्केन लेपयेत् ॥ ४२ ॥ घर्षयेत्तुलसीचूर्णैर्लेपयेद्गन्धचन्दनैः ॥ पुष्पाधिवासितैस्तोयै
स्तथा कर्पूरवासितैः ॥ ४३ ॥ कुशोदकै रत्नतोयैस्तथा गंधोदकैस्तथा ॥ स्नाप्यमानं तथा देवं ये पश्यंति मुदान्विताः ॥ ४४ ॥ क्षालयन्ति दृढं पंकं
बहुजन्मोपपादितम् ॥ ततः श्रीजगदीशस्य क्रोडे संवासयेद्द्विजाः ॥४५॥ आपादान्मूर्धपर्यंतं सर्वांगं परिलेपयेत् ॥ कुंकुमागुरुकस्तूरीकर्पूरैश्चंदना
न्वितैः ॥ ४६ ॥ पाटलोदकसंपिष्टैः कालागुरुरसाप्लुतैः ॥ दत्त्वा च मालतीमालां चन्द्रचूर्णेन संयुताम् ॥ ४७ ॥ महोपचारैः संपूज्य विष्णुं नीरा
जयेत्ततः ॥ कृतांजलिपुटो भूत्वा प्रार्थयेत्परया मुदा ॥ ४८ ॥ चराचरमिदं सर्वं त्वदेकशरणं विभो ॥ अनुग्रहामृतालोकैः पावयस्व जगद्गुरो ॥
॥ ४९ ॥ नृत्यगीतैः प्रेक्षणकै रात्रिशेषं समापयेत् ॥ शयनादुत्थितं देवं यः पश्यति गदाधरम् ॥ ५० ॥ निद्रां मोहमयीं भित्त्वा ज्योतिः शांतं
व्रजंति ते ॥ सर्वान्कामानवाप्नोति यान्यान्कामयते हृदि ॥ ५१ ॥ अश्वमेधसहस्रस्य फलं साग्रं लभेत वै ॥ कपिलालंकृताधेनुकोटिदानफलं
तथा ॥ ५२ ॥ पुण्यं चाप्नोति परमं सर्वतीर्थाभिषेकजम् ॥ कार्त्तिक्यां पारणं कुर्याच्चातुर्मास्यव्रतस्य वै ॥ ५३ ॥ दामोदरस्य प्रतिमां स्वर्णनिष्केण
निर्मिताम् ॥ यथाशक्तिकृतां वापि शालग्रामशिलास्थिताम् ॥५४॥ चक्रमूर्तिं भगवतः पूजयेत्प्रयतात्मवान् ॥ रचयेन्मण्डपं शुभ्रमेकदेशं गृहस्य वा
॥ ५५ ॥ अलंकुर्यात्पुष्पदामचामरैः सवितानकैः ॥ भूमिभित्तीः सुधालेपैः स्तंभैश्चित्रदुकूलकैः ॥ ५६ ॥ कालागुरूणां धूपैश्च धूपयेत्तद्गृहं शुभम् ॥
तन्मध्ये मण्डलं कुर्यात्स्वस्तिकं वर्णकैः शुभैः ॥५७॥ तदन्तःस्थापयेत्खट्वां करिदन्तमयीं शुभाम् ॥ पट्टतूलीं तदुपरि वासयेत्पुरुषोत्तमम् ॥५८॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दामोदराकृतिं शंखपद्मपाणिं चतुर्भुजम् ॥ लक्ष्मीमालिंग्य पद्मस्थां क्रोडस्थां वामपाणिना ॥५९॥ भक्तेभ्यो दातुमुद्यंतं वरं दक्षिणपाणिना ॥ सुनासं सुललाटं च सुनेत्रं सुश्रुतिद्वयम् ॥ ६० ॥ विशालवक्षसं देवं सर्वलावण्यसंयुतम् ॥ सर्वालंकाररुचिरं दिव्यपीतनिचोलिनम् ॥ ६१ ॥ लक्ष्मीं पद्मकरां वापि तांबूलं ददतीं तथा ॥ पञ्चामृतैः स्नापयित्वा वासोयुग्मेन वेष्टयेत् ॥ ६२ ॥ पूजयेदुपचारैस्तं यथाविभवविस्तरैः ॥ ताम्रदीपान्मृन्मयान्वा ज्वालयेद्गव्यसर्पिषा ॥६३॥ तैलेन वा शतं दीपवृक्षांश्चैव प्रदापयेत् ॥ ब्रह्माणं नारदादींश्च देवर्षींस्तत्र पूजयेत् ॥६४॥ दामोदरस्वरूपान्वै ब्राह्मणानपि पूजयेत् ॥ वस्त्रयुग्मैर्माल्यगन्धैर्भक्ष्यभोज्यफलैस्तथा ॥६५॥ तीर्थराजाभिषेकांगं पूजाकर्म यथोचितम् ॥ दामोदरस्य तेनैव विधिनेहार्चनं भवेत् ॥ ॥ ६६ ॥ तद्विष्णोरिति मन्त्रेण ब्रह्मादीनपि पूजयेत् ॥ वेणुवीणादिकैर्गीतैः पुराणपठनेन च ॥ ६७ ॥ महोत्सवं प्रकुर्वीत ततो जागरणेन च ॥ ततः प्रभाते विमलेऽग्निकार्यं च समाचरेत् ॥ ६८ ॥ अष्टाक्षरेण मंत्रेण समिदाज्यचरूनपि ॥ लाजान्मधुसमिन्मिश्राञ्जुहुयाच्च ततः श्रियै ॥६९॥ सूक्तेनाष्टोत्तरशतं ब्रह्मादीनां तदन्ततः ॥ अष्टाहुतीर्वै जुहुयात्क्रमादेकैकशस्तिलैः ॥ ७० ॥ ब्रह्माणं नारदं दक्षं वसिष्ठं गौतमं तथा ॥ सनत्कुमारमत्रिं च भरद्वाजं च कश्यपम् ॥७१॥ दुर्वाससमगस्त्यं च महादेवं ततः परम् ॥ विख्याता वैष्णवा ह्येते विष्णुरूपा न संशयः ॥७२॥ एतान्संपूजयन्विप्रान्विष्णुः प्रीणाति तत्क्षणात् ॥ होमांते प्राशनं कृत्वा दद्यादाचार्यदक्षिणाम् ॥७३॥ सुवर्णभूषितां धेनुं वस्त्रं धान्यं च भक्तितः ॥ प्रीतये वासुदेवस्य भोजयेद्द्विजपुंगवान् ॥ ७४ ॥ सर्वोपचारसहितं दद्याद्दामोदरं ततः ॥ ७५ ॥ ॐ दामोदर जगन्नाथ त्वन्मयं विश्वमेव हि ॥ त्वदाधारमिदं सर्वं त्वं धर्मः सर्वभावनः॥ त्वत्प्रसादाद्व्रतं चीर्णं सुसंपूर्णं तदस्तु मे ॥७६॥ दामोदरः प्रदाता च गृहीता च वृषध्वजः॥ प्रदीयते जगन्नाथः प्रीयतां मे जगद्गुरुः॥७७॥ इति मंत्रं जपन्दद्यादाचार्याय सुरोत्तमम् ॥ समाप्य पूजयेद्भक्त्या स्तूयात्तं च प्रसादयेत् ॥ ७८ ॥ आचार्ये परितुष्टे तु तुष्टो भवति माधवः ॥ तत्तद्द्रव्याणि च ततो दद्याद्विप्रेभ्य एव हि ॥ ७९ ॥ ततः स्वयं वै भुंजीत इष्टैः शिष्टैः स्वबंधुभिः ॥ चातुर्मास्यव्रतं चेदं प्रतिष्ठाप्य विधानतः ॥ ८० ॥ यथोक्तफलसंपन्नो विष्णुलोकमवाप्नुयात् ॥ श्रुतिस्मृतिपुराणेषु नातः परतरं व्रतम् ॥ ८१ ॥ येनानुष्ठितमात्रेण कृतकृत्यो भवेन्नरः ॥ विष्णोः प्रीतिकरं यादृङ्न तथान्यद्व्रतं द्विजाः ॥ ८२ ॥ तिलपात्रसहस्रैस्तु गवां चैवायुतायुतैः ॥ कृष्णाजिनशतेनापि कन्यानामयुतेन च ॥ ८३ ॥ दत्त्वा यत्फलमाप्नोति कृत्वैतद्व्रतमुत्तमम् ॥ सार्द्धत्रिकोटितीर्थानामभिषेकफलं तथा ॥८४॥ प्राप्नोति तत्फलं विप्रा यं यं कामयते नरः ॥ ८५ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे पुरुषोत्तमक्षेत्रमाहात्म्ये चातुर्मास्यव्रतविधिर्नामैकोनचत्वारिंशोऽध्यायः ॥३९॥

CC-0. In Public Domain. Digitization by eGangotri

॥ ॥ जैमिनिरुवाच ॥ ॥ मार्गशीर्षे सिते पक्षे षष्ठ्यां प्रावरणोत्सवम् ॥ कृत्वा दृष्ट्वा नरो भक्त्या वैष्णवं लोकमाप्नुयात् ॥ १ ॥ विधानं तस्य वक्ष्यामि शृणुध्वं मुनयोऽधुना ॥ वासोधिवासं कुर्वीत पंचम्यां निशि कर्मवित् ॥ २ ॥ देवाग्रे मंडपे कुर्यात्पद्ममष्टदलान्वितम् ॥ दिक्पालान्पूजयेद्दिक्षु क्षेत्रपालं गणाधिपम् ॥ ३ ॥ चंडप्रचंडौ च बहिश्चतुर्दिक्षु प्रपूजयेत् ॥ मध्ये पात्रं समाधाय प्रोक्षयेद्वस्त्रवारिणा ॥ ४ ॥ द्युतानस्त्वेति मंत्रेणच्छादयेद्दिव्यवाससा ॥ सुधूपितं वस्त्रजातमेकविंशतिसंख्यकम् ॥ ५ ॥ तन्मध्ये स्थापयेन्मंत्रं वैष्णवं च समुच्चरन् ॥ अन्येन वाससा तद्धि समाच्छाद्य प्रयत्नतः ॥६॥ स्पृष्ट्वा जपेन्मंत्रमिमं संस्मरन्पुरुषोत्तमम् ॥ आच्छादको यो जगतां तेजसा विष्णुरव्ययः ॥ ७ ॥ वसनात्तस्य वस्त्र त्वं वस वासे जगत्पतेः ॥ इन्द्रघोषस्त्वेति रक्षां विदध्यात्तस्य सर्वतः ॥ ८ ॥ पूजयेद्गंधपुष्पाभ्यां ततो देवं प्रपूजयेत् ॥ सर्वलेपं प्रकुर्वीत नृत्यगीतैर्नयेन्निशाम् ॥ ९ ॥ ततोऽरुणोदये काले प्रातःसंध्यासमीपतः ॥ पुनः प्रपूजयेद्देवं पूर्ववत्सुसमाहितः ॥ १० ॥ ततस्तं पूजितं वस्त्रसमूहं बहिरानयेत् ॥ कार्पासपट्टक्षौमाढ्यं तथैवाच्छादितं द्विजाः ॥ ११ ॥ छत्रध्वजपताकाभिश्चामरांदोलनैस्तथा ॥ गीतवादित्रनृत्यैश्च प्रसूनोत्किरणेन च ॥ १२ ॥ प्रासादं त्रिःपरिभ्रम्य देवं त्रिर्भ्रामयेत्ततः ॥ आच्छादितं तदाकृष्य संस्कुर्याद्वीक्षणादिभिः ॥ १३ ॥ सप्तभिः सप्तभिर्देवान्वासोभिः परिवेष्टयेत् ॥ मुखवर्जं तु सर्वांगं शीतप्रावरणैर्द्विजाः ॥ १४ ॥ तांबूलं च निवेद्याथ कर्पूरलतिकां तथा ॥ दूर्वाक्षतैः प्रपूज्याथ कुर्यान्नीराजनं विभोः ॥ १५ ॥ हिमागमे नृसिंहं ये प्रावृण्वंति सुचेलकैः ॥ पश्यंति प्रावृतिं ये वा न तेषां मोहसंवृतिः ॥ १६ ॥ ते द्वंद्ववातशीतोत्थभयं नाप्नुवते क्वचित् ॥ विष्णोर्देवाधिदेवस्य इमं प्रावरणोत्सवम् ॥ १७ ॥ भक्त्या ये वै प्रपश्यंति सर्वान्कामानवाप्नुयुः ॥ भगवंतं समुद्दिश्य ब्राह्मणेभ्यः प्रदापयेत् ॥ ॥ १८ ॥ गुरुभ्यश्चान्यदेवेभ्यो दीनानाथेभ्य एव च ॥ शीतप्रावरणं दद्यात्सत्कृत्य परया मुदा ॥ ददाति भगवान्प्रीतस्तस्मै वरमनुत्तमम् ॥ ॥ १९ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे पुरुषोत्तमक्षेत्रमाहात्म्ये प्रावरणोत्सववर्णनंनाम चत्वारिंशोऽध्यायः ॥ ४० ॥ ॥छ॥

॥ जैमिनिरुवाच ॥ ॥ पुष्यस्नानोत्सवं वक्ष्ये यथोक्तं ब्रह्मणा पुरा ॥ पुष्यर्क्षेण च संयुक्ता पौर्णमासी यदा भवेत् ॥ १ ॥ पौषे मासि तथा कुर्यात्पुष्यस्नानोत्सवं हरेः ॥ एकादश्यां प्रकुर्वीत ऐशान्यामंकुरार्पणम् ॥ २ ॥ ततः प्रतिदिनं कुर्यात्प्रतिमायां हरेर्गृहे ॥ नृत्यगीतोपहारैश्च प्रतिरात्रं बलिं हरेत् ॥ ३ ॥ चतुर्दशीनिशायां तु कुंभानामधिवासनम् ॥ एकाशीतिप्रमाणानां तथा स्वर्णमयाञ्छुभान् ॥ ४ ॥ गव्यसर्पिःप्रपूर्णांश्च स्थापयेदेकविंशतिम् ॥ कारयेत्सर्वतोभद्रं मंडलं पुरतो हरेः ॥ ५ ॥ तन्मध्ये बृहदा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धारं स्थापयेद्दर्पणं शुभम् ॥ रात्रौ जागरणं कुर्याद्गीतनृत्यादिविस्तरैः ॥ ६ ॥ प्रभाते वह्निकार्यं च कुर्यात्तद्दैवतं द्विजाः ॥ पालाशीभिः समिद्भिस्तु चरुणा सर्पिषा तथा ॥ ७ ॥ ब्रह्मविष्णुशिवेभ्यस्तु प्रत्येकं तु सहस्रकम् ॥ स्वलिंगमन्त्रैर्जुहुयात्तदंते पुरुषोत्तमम् ॥ ८ ॥ पूजयेदुपचारैस्तैरादर्श प्रतिबिंबितम् ॥ ततः पुरुषसूक्तेन कुम्भांस्तानभिमन्त्रयेत् ॥ ९ ॥ तेनैवाच्छिद्रधारेण स्नापयेत्पुरुषोत्तमम् ॥ पावमानीयकैर्देवान्छ्रीसूक्तेन ततः परम् ॥ १० ॥ सर्पिःकुंभैः स्नापयेच्च गायत्र्या च ततः परम् ॥ वैष्णव्या गन्धतोयेन श्रीसूक्तेन समर्चयेत् ॥ ११ ॥ सहस्रधारया देवं ततो निर्माल्यमुत्सृजेत् ॥ देवांगं लेपयेद्गन्धैश्चंदनेन च विग्रहे ॥ १२ ॥ यथास्थानं यथाशोभमलंकारांश्च योजयेत् ॥ सुगन्धसुमनोमाल्यैर्भूषयेत्तद नंतरम् ॥ १३ ॥ अष्टायुधानि देवस्य चक्रादीनि न्यसेत्पुरः ॥ रत्नच्छत्रं समुच्छ्रित्य पूजयेत्पुरुषोत्तमम् ॥ १४ ॥ लक्ष्म्या युक्तं पुनर्विप्रा उपहारैः समृद्धिमत् ॥ शंखेषु पूर्यमाणेषु स्निग्धगंभीरनादिषु ॥ १५ ॥ चामरांदोलव्यग्रासु वेश्यासु रुचिरासु च ॥ मांगल्यगीतनृत्याद्यैः स्तुतिपाठेषु बन्दि नाम् ॥ १६ ॥ जयशब्दं प्रकुर्वत्सु द्विजातिषु मुहुर्मुहुः ॥ दूर्वाक्षतांजलिभिस्त्रिभिः संपूज्य केशवम् ॥ १७ ॥ गोसर्पिर्दीपकैः स्वर्णपात्रकैरतिनि र्मलैः ॥ नीराजयेज्जगन्नाथं कर्पूरयुतवर्तिभिः ॥ १८ ॥ स्वर्णपात्रस्थितं चारु तांबूलं सुपरिष्कृतम् ॥ शनैःशनैर्मुखाभ्याशे प्रत्येकं विनिवेदयेत् ॥ ॥ १९ ॥ आचार्ये दक्षिणां दद्याद्ब्राह्मणांश्चैव पूजयेत् ॥ २० ॥ पुष्यस्नानोत्सवं पुण्यं ये पश्यंति मुदान्विताः ॥ संपूर्णसर्वकामास्ते व्रजेयुर्वैष्णवं पदम् ॥ २१ ॥ राज्यभ्रष्टो लभेद्राज्यं सार्वभौमं च विंदति ॥ अपुत्रा मृतवत्सा वा पुत्रं दीर्घायुषं लभेत् ॥ २२ ॥ दारिद्र्यनाशनं धन्यं ब्रह्मवर्चस कारणम् ॥ पुष्यस्नानं कीर्तितं वः शृणुध्वं चोत्तरायणम् ॥ २३ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे पुरुषोत्तमक्षेत्रमाहात्म्ये पुष्याभिषेकविधिवर्णनं नामैकचत्वारिंशोऽध्यायः ॥ ४१ ॥ ॥ जैमिनिरुवाच ॥ ॥ मृगराशिं संक्रमति यदा भास्वान्द्विजो त्तमाः ॥ उत्तराशां जिगमिषुस्तदा स्यादुत्तरायणम् ॥ १ ॥ तस्य संक्रमणार्द्धं च यावत्स्युर्विंशतिः कलाः ॥ महापुण्यतमः कालः पितृदेवद्विजप्रियः ॥ २ ॥ तत्र स्नात्वा विधानेन तीर्थराजजले नरः ॥ नारायणं समभ्यर्च्य कल्पवृक्षं प्रणम्य च ॥ ३ ॥ प्रविश्य देवतागारं कृत्वा तं त्रिः प्रदक्षिणा म् ॥ मन्त्रराजेन संपूज्य देवं श्रीपुरुषोत्तमम् ॥ ४ ॥ तथा बलं सुभद्रां च स्वमन्त्रेण प्रपूजयेत् ॥ दृष्ट्वोत्तरायणे देवं मुच्यते देहबन्धनात् ॥ ५ ॥ विधानं तस्य वक्ष्यामि शृणुध्वं पावनं महत् ॥ संक्रांतेः पूर्वदिवसे नवां शालिं सुकुट्टिताम् ॥ ६ ॥ प्रासादपूर्वदेशे च स्थापयित्वाधि वासयेत् ॥ नवेन वाससावेष्टय दूर्वासर्षपपुष्पकैः ॥ ७ ॥ पूजयित्वा मन्त्रयेद्वै कृष्णस्त्वामभिरक्षतु ॥ तस्मिन्नेव निशायामे व्यतीते जग

CC-0. In Public Domain. Digitization by eGangotri

दीशितुः ॥ ८ ॥ प्रत्यर्चां सन्निधौ नीत्वा भावयेदेकताधिये ॥ उपचारावशिष्टाभ्यां पूजयेद्वै समाहितः ॥ ९ ॥ ततो निर्माल्यवसनमा
लामस्यां निधापयेत् ॥ महासमृद्ध्या तामर्चां त्रिर्देवान्भ्रामयेत्ततः ॥ १० ॥ आंदोलिकायामारोप्य प्रासादद्वारमानयेत् ॥ त्रिविक्रमं
त्रिक्रमेण त्रैलोक्यक्रमणं विभुम् ॥ ११ ॥ विडंबयंतं तां लीलां प्रासादं भ्रामयेच्च तम् ॥ त्रिरंते पुनरंके च सुसमृद्ध्या शनैःशनैः ॥ १२ ॥
दीपिकाशतसंरुद्धतमसोवरणांतरे ॥ छत्रध्वजपताकाभिर्नृत्यवादित्रगीतकैः ॥ १३ ॥ तद्दर्शनपरिक्षीणपातकानां महात्मनाम् ॥ न च चिह्नं शरी
रेऽस्य नवांगे भ्रमणं ततः ॥ १४ ॥ अनुयांति तदा ये तं महे यांतं त्रिविक्रमम् ॥ लभंते वाजिमेधस्य फलं ते वै पदे पदे ॥ १५ ॥ प्रथमभ्रमणं
दृष्ट्वा मुच्यते पञ्चपातकैः ॥ मलिनीकरणैर्मुच्येद्द्वितीयं भ्रमणं द्विजाः ॥ १६ ॥ अपात्रीकरणैर्दृष्ट्वा तृतीयं भ्रमणं ध्रुवम् ॥ उपपातकपापैश्च चतुर्थं
मुच्यते ततः ॥ १७ ॥ पुनः प्रभाते देवेशं प्रलिंपेद्गन्धचन्दनैः ॥ वस्त्रालंकारमाल्यैश्च भूषयित्वा यथाविधि ॥ १८ ॥ पूजयेदुपचारैस्तं यथाशक्ति
समृद्धिमत् ॥ नीराजयित्वा देवेशं तंदुलानधिवासितान् ॥ १९ ॥ स्थालीषु शातकुंभासु दधिखंडाज्यमिश्रितान् ॥ सनारिकेलशकलाञ्छृंगबेर
दलान्वितान् ॥ २० ॥ प्रासादं त्रिः परिभ्रम्य नयेद्देवसमीपतः ॥ पंक्तिशः स्थापयेदग्रे गन्धपुष्पाक्षतान्वितान् ॥ २१ ॥ जीवनं सर्वभूतानां जन
कस्त्वं जगत्प्रभो ॥ त्वन्मयाः शालयो ह्येते त्वयैव जनिताः प्रभो ॥ २२ ॥ लोकानुग्रहणार्थाय गृहीतोचितविग्रह ॥ तव प्रीत्यै कृतानेतान्गृहाण
परमेश्वर ॥ २३ ॥ त्वयि तुष्टे जगत्सर्वमनेन प्रभविष्यति ॥ स्वाहाकारस्वधाकारवषट्कारा दिवौकसाम् ॥ २४ ॥ आप्यायना भविष्यंति तैरेवा
प्यायितं जगत् ॥ रक्ष सर्वं जगन्नाथ त्वन्मयं सचराचरम् ॥ २५ ॥ इति संप्रार्थ्य देवेशं शालिस्तंबान्निवेदयेत् ॥ तन्मयान्भक्षभोज्यांश्च दधिकुंभा
न्सुगंधिनः ॥ २६ ॥ कर्पूरखंडमरिचचूर्णयुक्तान्निवेदयेत् ॥ ब्राह्मणान्पूजयेद्भक्त्या देवदेवपुरःस्थितान् ॥ २७ ॥ तेभ्यः प्रदद्याद्भक्त्या ताञ्छाल्यादी
न्भगवद्धिया ॥ इमं महोत्सवं विप्राः पुरा कल्पे च कश्यपः ॥ २८ ॥ स च सृष्टिं विनिर्माय भगवत्प्रीतयेऽकरोत् ॥ ये पश्यन्त्युत्सवं चैनं कश्य
पेन विनिर्मितम् ॥ २९ ॥ सर्वदा सर्वकामैस्ते पूर्णाः शोचंति न द्विजाः ॥ उषित्वा त्रिदशैः सार्द्धं कल्पांते मोक्षमाप्नुयुः ॥ ३० ॥ महानसस्य
संस्कारं वह्नेः संस्कारमेव च ॥ अत्रापि कुर्यान्मुनयो वैश्वदेवं दिनेदिने ॥ ३१ ॥ आधानसंस्कृते वह्नौ भगवद्भुक्तये रमा ॥ प्रत्यहं पाकमाधत्ते दिव्य
रूपा तिरोहिता ॥ ३२ ॥ अस्मिन्महापुण्यतम उत्सवे परमात्मनः ॥ तुलापुरुषदानादि कोटिकोटिगुणं भवेत् ॥ ३३ ॥ स्नानं दानं तपो होमः स्वा

१ हे मुनयः—इति संबोधनम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ध्यायः पितृतर्पणम् ॥ सर्वमक्षयतां याति ह्युत्सवे चोत्तरायणे ॥ ३४ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे पुरुषोत्तमक्षेत्रमाहात्म्ये मकरसंक्रमविधिवर्णनंनाम द्विचत्वारिंशोऽध्यायः॥ ४२ ॥ ॥ जैमिनिरुवाच ॥ ॥ फाल्गुने मासि कुर्वीत दोलारोहणमुत्तमम् ॥ यत्र क्रीडति गोविंदो लोकानुग्रहणाय वै ॥ १ ॥ प्रत्यर्चां देवदेवस्य गोविंदाख्यां तु कारयेत् ॥ प्रासादपुरतः कुर्यात्षोडश स्तंभमुच्छ्रितम् ॥ २ ॥ चतुरस्रं चतुर्द्वारं मण्डपं वेदिकान्वितम् ॥ चारुचंद्रातपं माल्यचामरध्वजशोभितम् ॥ ३ ॥ भद्रासनं वेदिकायां श्रीपर्णीकाष्ठनिर्मितम् ॥ फल्गूत्सवं प्रकुर्वीत पञ्चाहानि त्र्यहाणि वा ॥ ४ ॥ फाल्गुन्यां पूर्वतो विप्राश्चतुर्दश्यां निशामुखे ॥ वह्न्युत्सवं प्रकुर्वीत दोलामण्डपपूर्वतः ॥ ५ ॥ गोविंदानुगृहीतं तु यात्रांगं तत्प्रकीर्तितम् ॥ आचार्यवरणं कृत्वा वह्निं निर्मथनोद्भवम् ॥ ६ ॥ भूमिं संस्कृत्य विधिवत्तृणराशिं महोच्छ्रयम् ॥ सुसमं कारयित्वा तु वह्निं तत्र विनिक्षिपेत् ॥ ७ ॥ पूजयित्वा विधानेन कूष्मांडविधिना हुनेत् ॥ गोविंदं पूजयित्वा तु भ्रामयेत्सप्त विभुम् ॥ ८ ॥ यत्नात्तं रक्षयेद्वह्निं यावद्यात्रा समाप्यते ॥ प्रातर्यामे चतुर्दश्यां गोविंदप्रतिमां शुभाम् ॥ ९ ॥ वासयित्वा हरेरग्रे पूजयेत्पुरुषोत्तमम् ॥ उपचारावशिष्टैस्तु प्रत्यर्चामपि पूजयेत् ॥ १० ॥ ततोऽवरोप्य वसनं मालां च द्विजसत्तमाः ॥ अर्चायां विन्यसेन्मंत्री परं ज्योतिर्विभावयन् ॥ ११ ॥ ततः सा प्रतिमा साक्षाज्जायते पुरुषोत्तमः ॥ रत्नांदोलिकया तां वै नयेत्स्नानस्य मंडपम् ॥ ॥ १२ ॥ तत्र नानातूर्यनादैः शंखध्वनिपुरःसरम् ॥ जयशब्दैस्तथा स्तोत्रैः पुष्पवृष्टिभिरेव च ॥ १३ ॥ छत्रध्वजपताकाभिश्चामरैर्व्यजनैस्तथा ॥ निरंतरं दीपिकाभिस्तदा कुर्यान्महोत्सवम् ॥ १४ ॥ आगच्छंति तदा देवाः पितामहपुरोगमाः ॥ द्रष्टुं चर्षिगणैः सार्द्धं गोविंदस्य महोत्सवम् ॥ ॥ १५ ॥ भद्रासनेऽधिवास्यैव पूजयेदुपचारकैः ॥ महास्नानस्य विधिना स्नपनं तस्य कारयेत् ॥ १६ ॥ पंचामृतैश्च सर्वैश्च तेषामन्यतमेन वा ॥ स्नानांते गंधतोयेन श्रीसूक्तेनाभिषेचयेत् ॥ १७ ॥ संप्रोक्ष्य भूषयेद्देवं वस्त्रालंकारमाल्यकैः ॥ नीराजयित्वा संपूज्य प्रासादं परिवेष्टयेत् ॥ १८ ॥ सप्तकृत्वस्ततो देवं दोलामंडपमानयेत् ॥ सुसंस्कृतायां रथ्यायां पताकातोरणादिभिः ॥ अधोदेशे मंडपं तं सप्तशो भ्रामयेत्पुनः ॥ १९ ॥ ऊर्द्ध्वदेशे पुनः सप्त स्तंभवेद्यां च सप्त वै ॥ यात्रावसाने च पुनर्भ्रामयेदेकविंशतिम् ॥ २० ॥ इयं लीला भगवतः पितामहमुखेरिता ॥ राजर्षिणेंद्रद्युम्नेन कारिता पूर्वमेव हि ॥ २१ ॥ फलपुष्पोपपन्नैश्च शाखिभिः परिकल्पिते ॥ वृंदावनांतरे रम्ये मत्तभ्रमरराविणि ॥ २२ ॥ कोकिलारावमधुरे नानापक्षिगणाकुले ॥ नानोपशोभारचितनानागुरुसुधूपिते ॥ २३ ॥ प्रफुल्लकेतकीषंडगंधामोदिदिगंतरे ॥ मल्लिकाशोकपुन्नागचंपकैरुपशोभिते ॥ २४ ॥

CC-0. In Public Domain. Digitization by eGangotri

तत्काननांतर्घटिते मंडपे चारुतोरणे ॥ भूषिते माल्यवसनचामरैरुपशोभिते ॥ २५ ॥ रत्नखट्वांदोलिकायां तन्मध्ये वासयेत्प्रभुम् ॥ सद्रत्नमुकुटं तारहारशोभितवक्षसम् ॥ २६ ॥ अनर्घ्यरत्नघटितकुंडलोद्भासितश्रुतिम् ॥ यथास्थानं यथाशोभं दिव्यालंकारमंजुलम् ॥ २७ ॥ विकचांबुजमध्यस्थं विश्वधात्र्या श्रिया युतम् ॥ २८ ॥ शंखचक्रगदापद्मधारिणं वनमालिनम् ॥ सुप्रसन्नं सुनासं तं पीनवक्षःस्थलोज्ज्वलम् ॥ २९ ॥ पुरो व्योमस्थितैर्देवैर्ब्रह्माद्यैर्नतमस्तकैः ॥ कृतांजलिपुटैर्भक्त्या जयशब्दैरभिष्टुतम् ॥ ३० ॥ गंधर्वैरप्सरोभिश्च किन्नरैः सिद्धचारणैः ॥ हाहाहूहूप्रभृतिभिः सत्वरं दिव्यगायनैः ॥ ३१ ॥ अहंपूर्विकया नृत्यगीतवादित्रकारिभिः ॥ नेत्रांबुजसहस्रैश्च पूज्यमानं मुदान्वितैः ॥ ३२ ॥ किरद्भिः सर्वतो दिक्षु गंधचंदनजं रजः ॥ उपवेश्याथ गोविंदं पूजयेदुपचारकैः ॥ ३३ ॥ बल्लवीवृंदमध्यस्थं कदंबतरुमूलगम् ॥ हावहास्यविलासैश्च क्रीडमानं वनांतरे ॥ ३४ ॥ गोपीभिश्चैव गोपालैर्लीलांदोलितयानगम् ॥ चिंतयित्वा जगन्नाथं विकिरेद्गंधचूर्णकैः ॥ ३५ ॥ सकर्पूरै रक्तपीतशुक्लैर्दिक्षु समंततः ॥ दिव्यैर्वस्त्रैर्दिव्यमाल्यैर्दिव्यैर्गंधैः सुधूपकैः ॥ ३६ ॥ चामरांदोलनैर्गीतैः स्तुतिभिश्च समर्चितम् ॥ आंदोलयेद्दोलिकास्थं सप्तवाराञ्छनैः शनैः ॥ ॥३७॥ तदा पश्यंति ये कृष्णं मुक्तिस्तेषां न संशयः ॥ ब्रह्महत्यादिपापानां पंचकानां क्षयो भवेत् ॥ ३८ ॥ त्रिरेवं दोलयेद्देवं सर्वपापापनोदनम् ॥ भक्त्यानुग्राहकं पुंसां भुक्तिमुक्त्येककारणम् ॥ ३९ ॥ लीलाविचेष्टितं यस्य कृत्रिमं सहजं तथा ॥ अंहःसंघक्षयकरं मूलाविद्यानिवर्त्तकम् ॥ ४० ॥ पश्यन्द्वितीयं हरति गोहत्याद्युपपातकम् ॥ हरत्यशेषपापानि तृतीये नात्र संशयः ॥४१॥ दृष्ट्वा दोलायितं देवं सर्वपापैः प्रमुच्यते ॥ आध्यात्मिकैराधिभौतैराधिदैवैर्विमुच्यते ॥ ४२ ॥ इमां यात्रां कारयित्वा चक्रवर्ती भवेन्नृपः ॥ ब्राह्मणस्तु चतुर्वेदी ज्ञानवाञ्जायते ध्रुवम् ॥४३॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे पुरुषोत्तमक्षेत्रमाहात्म्ये दोलारोहणंनाम त्रयश्चत्वारिंशोऽध्यायः ॥४३॥ ॥ जैमिनिरुवाच ॥ ॥ अत्र वः कथयिष्यामि व्रतं सांवत्सरं परम्॥संवत्सरस्यादिदिने पौर्णमास्यां तु फाल्गुने॥१॥ अनादिदेवस्य हरेर्मूर्त्तयो द्वादशैव याः॥ विष्णवादिनामप्रथिताः प्रतिमासं प्रपूजयेत्॥२॥एकैकां मूर्तिमेतासां मासेषु द्वादशस्वपि ॥ प्रत्यहं पूजयेत्पुष्पैः फलैर्द्वादशभिस्तथा ॥३॥ अशोको मल्लिका चैव पाटलं च कदंबकम् ॥ करवीरं जातिपुष्पं मालती शतपत्रकम् ॥४ ॥ उत्पलं चैव वासंती कुंदं पुन्नागकं तथा॥एतानि क्रमशो दद्यात्कुसुमानि हरेर्मुदा ॥ ५ ॥ दाडिमं नारिकेलं च आम्रं च पनसं तथा ॥ खर्जूरं तृणराजं च प्राचीनामलकं तथा ॥ ६ ॥ श्रीफलं नागरंगं च क्रमुकं करमर्द्दकम् ॥ जातीफलं च क्रमशः फलान्येतानि वै ददेत् ॥ ७ ॥ भक्ष्यभोज्यानि चोष्याणि लेह्यानि मधुराणि च ॥ आसनाद्युपचारांश्च दत्त्वा स्तुत्वा जगद्गु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रुम् ॥ ८ ॥ सर्वव्यापिञ्जगन्नाथ भूतभव्यभवत्प्रभो ॥ त्राहि मां पुंडरीकाक्ष विष्णो संसारसागरात् ॥ ९ ॥ एकार्णवजले रौद्रे निरालंबे पुरा मधुम्॥
अवधीर्विश्वरक्षार्थं मधुसूदन रक्ष माम् ॥१०॥ त्रीन्विक्रमान्क्रमित्वा यो हत्वा दैत्यबलं महत् ॥ त्रैलोक्यं पालयामास त्रिविक्रम नमोस्तु ते ॥११॥
कृत्वा वामनकं रूपमृग्यजुःसामगर्भकम् ॥ मोहयित्वाद्भुतं रूपं तस्मै मायाविने नमः ॥ १२ ॥ यः श्रियं धारयेन्नित्यं हृदि भक्तेभ्य एव च ॥ ददा
त्यपि श्रियं तस्मै श्रीधराय नमोऽस्तु ते ॥ १३ ॥ इंद्रियाणामधिष्ठाता यः सर्वेषां सदा प्रभुः ॥ सुखैकहेतुर्भक्तानां हृषीकेश नमोऽस्तु ते ॥ १४ ॥
यन्नाभिपद्मसंभूतं जगदेतच्चराचरम् ॥ विधातुरासनं नित्यं पद्मनाभ नमोऽस्तु ते ॥ १५ ॥ यस्यैतत्त्रिगुणैर्बद्धं जगदेतच्चराचरम् ॥ दाम्ना बद्धः स
गोप्या तु दामोदर नमोऽस्तु ते ॥ १६ ॥ त्रैलोक्यविप्लवकरं हतवान्केशिदानवम् ॥ ईशिता सर्वसौख्यानां त्राहि केशव मां प्रभो ॥ १७ ॥ स्रष्टा स
सर्ज भूतानि जगतामादिकारणम् ॥ अचिंत्यमहिमन्विष्णो नारायण नमोऽस्तु ते ॥१८॥ मायया यस्य विश्वं वै मोहितं यदनाद्यया ॥ सर्वधर्मस्व
रूपाय माधवाय नमो नमः ॥ १९ ॥ ज्ञानिनां ज्ञानगम्यस्त्वमगतीनां गतिप्रदः ॥ संपूर्णमस्तु गोविंद त्वत्प्रसादाद्व्रतं मम ॥ २० ॥ प्रतिमासं
पूजनांते मंत्रैरेतैः कृतांजलिः ॥ प्रार्थयेत्परया भक्त्या भजनांतं जनार्दनम् ॥ २१ ॥ एवं संवत्सरं नीत्वा व्रतं वै मूर्तिपंजरम् ॥ संपूर्णफलसिद्ध्यर्थं
प्रतिष्ठाविधिमाचरेत् ॥ २२ ॥ सुवर्णनिर्मिता विष्णोर्मूर्तयो द्वादशैव तु ॥ यथाशक्ति कृताः स्थाप्याः कुंभेषु द्वादशस्वपि ॥ २३ ॥ आम्रपात्राच्छा
दितेषु साक्षात्तेषु पृथक्पृथक् ॥ श्वेतवस्त्रावनद्धेषु गंधपल्लववारिषु ॥ २४ ॥ अष्टदिक्षु चतुर्दिक्षु सर्वतोभद्रमंडले ॥ स्थापनीयाश्च ते कुंभास्तेषु
पूज्याश्च मूर्तयः ॥ २५ ॥ द्वादशाक्षरमंत्रेण उपचारैः पृथक्पृथक् ॥ पंचामृतैश्च स्नपनं सर्वेषामादितो द्विजाः ॥२६॥ गीतवादित्रनृत्याद्यैस्तथा ब्राह्मण
पूजनैः ॥ वस्त्रयुग्मैर्द्वादशभिश्छत्रोपानद्युगैस्तथा ॥२७॥ व्यजनैरुदकुंभैश्च शयनीयैः सपीठकैः ॥ गंधैर्माल्यैः सुतांबूलैर्मुद्रिकाकुंडलैस्तथा ॥ २८ ॥
प्रदीपाः सर्पिषा ज्वाल्या द्वादशद्वादश क्रमात् ॥ नीत्वा त्रियामामित्थं वै प्रभाते वह्निकर्म च ॥ २९ ॥ समिदाज्यचरूणां वै प्रतिदेवं शतत्रयम् ॥
अष्टोत्तरसहस्रं तु तिलैर्व्याहृतिभिस्ततः ॥ ३० ॥ होमांते प्राशनं कृत्वा दद्यादाचार्यदक्षिणाम् ॥ कपिला धेनवो देयाः सालंकाराश्च द्वादश ॥३१॥
शतं चतुश्चत्वारिंशद्ब्राह्मणान्भोजयेत्ततः ॥ तदेववृंदं सघटं सवितानं सचामरम् ॥ ३२ ॥ सर्वोपचारसहितमाचार्याय निवेदयेत् ॥ व्रतराजमिमं
कृत्वा सर्वान्कामानवाप्नुयात् ॥३३॥ गुंडिचाद्यास्तु या यात्रा विष्णोर्द्वादश कीर्तिताः ॥ तासां दर्शनजं पुण्यं व्रतेनानेन लभ्यते ॥ ३४ ॥ ऐंद्रं पदं
सार्वभौमं चक्रवर्तित्वमेव च ॥ अष्टैश्वर्यमवाप्नोति देवदेवप्रसादतः ॥ ३५ ॥ एतन्महापुण्यतमं नारदः कृतवान्व्रतम् ॥ कृत्वा द्वादश वर्षाणि जीवन्मु

Nepal Sanskrit University, Balmiki Campus

CC-0. In Public Domain. Digitization by eGangotri

क्तोऽभवन्मुनिः ॥ ३६ ॥ अन्ये च वैष्णवा ये वै चक्रुस्ते बहुशः पुरा ॥ व्रतं नातः परतरं भगवत्प्रीतिकारकम् ॥ ३७ ॥ धर्म्यं यशस्यमायुष्य ब्राह्मण्यं वंशवर्द्धनम् ॥ भवंतोऽपि यतात्मानः कुर्वंति व्रतमुत्तमम् ॥ ३८ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे पुरुषोत्तमक्षेत्रमाहात्म्ये ज्येष्ठपंचकव्रतवर्णनंनाम चतुश्चत्वारिंशोऽध्यायः ॥ ४४ ॥ ॥ मुनय ऊचुः ॥ ॥ मुने व्रतमिदं पुण्यं श्रुतं वै मूर्तिपंजरम् ॥ अन्तःप्रमोदजननं महिम्ना च महत्तरम् ॥ १ ॥ यात्रा द्वादश पुण्या या उद्दिष्टा भगवत्प्रियाः ॥ तासां द्वे अवशिष्टे नः कथयस्व महामुने ॥ २ ॥ ॥ जैमिनिरुवाच ॥ ॥ वासंतिकां समाख्यास्ये यात्रां दमनभंजिकाम् ॥ यस्यां कृतायां दृष्टायां प्रीणाति पुरुषोत्तमः ॥ ३ ॥ पुरा यत्कथितं विप्रास्तृणं दमनकाह्वयम् ॥ चैत्रशुक्लत्रयोदश्यामाहरेत्तत्समूलकम् ॥ ४ ॥ तन्मध्ये मंडलं कुर्यात्सुशुभं पद्मसंज्ञितम् ॥ तदंतर्वासयेद्देवप्रत्यर्चां प्रतिपूजिताम् ॥ ५ ॥ युक्तां श्रीसत्यभामाभ्यां पूजयेद्विधिवच्च ताः ॥ अर्द्धरात्रे तु कर्मेदं देवदेवस्य कारयेत ॥ ६ ॥ पुरा निशीथेऽपि विभुर्बभंज दमनासुरम् ॥ भंक्त्वा लेभे परां प्रीतिं तदंगोत्थं च तत्तृणम् ॥७॥ तस्यामेव त्रयोदश्यां तृणं दैत्यं विभावयेत् ॥ कृतांजलिपुटो भूत्वा वाक्यं चेदमुदाहरेत् ॥ ८ ॥ अवधीर्दमनं दैत्यं पुरा त्रैलोक्यकंटकम् ॥ स एवेत्थं परिणतः पुरतस्तव तिष्ठति ॥ ९ ॥ अस्योत्पत्तौ तदा प्रीतिरासीद्या तव माधव ॥ अधुनापि तथैवास्तां प्रीतिर्दमनभंजने ॥ १० ॥ इत्युक्त्वा तृणमेके तु करे देवस्य दापयेत् ॥ ततोऽवशिष्टां रात्रिं च नृत्यगीतादिभिर्नयेत् ॥ ११ ॥ ततश्चाभ्युदिते सूर्ये देवं तृणपुरःसरम् ॥ नयेच्च जगदीशस्य समीपं द्विजसत्तमाः ॥ १२ ॥ उपचारैर्जगन्नाथं पूजयेत्पूर्ववत्ततः ॥ हिरण्यकशिपुं हत्वा ह्यन्त्रमालां तदंगजाम् ॥ १३ ॥ कृत्वा कण्ठे यथाऽप्रीणास्तथेदं दमनं तृणम् ॥ तव प्रीत्यै तु भगवन्मया दत्तं तवांगके ॥ १४ ॥ इत्युच्चार्य हरेर्मूर्ध्नि दद्याद्गंधतृणं शुभम् ॥ तदा दृष्ट्वा हरेर्वक्त्रपद्मं प्रीतिकरं मुदा ॥ भवदुःखपरिक्षीणः सुखमाप्नोत्यनुत्तमम् ॥ १५ ॥ गृहीत्वा मूर्ध्नि तच्छाखां विष्णुमूर्ध्नोऽपकाषताम् ॥ सर्वपापविनिर्मुक्तो वसेद्विष्णुपुरे ध्रुवम् ॥ १६ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे पुरुषोत्तमक्षेत्रमाहात्म्ये दमनकभंजनविधिवर्णनंनाम पञ्चचत्वारिंशोऽध्यायः ॥ ४५ ॥ ॥ जैमिनिरुवाच ॥ ॥ अतः परं प्रवक्ष्यामि यात्रामक्षयमोक्षदाम् ॥ अनायासेन मूढानां वासनाबद्धचेतसाम् ॥ १ ॥ वैशाखस्यामले पक्षे द्वितीयारात्रिमध्यतः ॥ मण्डपं च चतुष्कोणं सुधालिप्तं सवेदिकम् ॥ २ ॥ सुधौतवाससा कुर्यात्प्रतिसीरासमं ततः ॥ साधुसोपानसंयुक्तं चारुचंद्रातपान्वितम् ॥ ३ ॥ तन्मध्ये विन्यसेन्नूनं साधु भद्रासनोत्तमम् ॥ तस्मिन्निचोलसंछन्ने विन्यसेत्स्वर्णं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भाजनम् ॥ ४ ॥ तस्य पश्चिमभागे वै स्वासीनो ब्राह्मणः शुचिः ॥ पात्रांतरे तु गृह्णीयाच्चंदनं पंचविंशतिम् ॥ ५ ॥ सुपिष्टं कृष्णस्नेहस्य गृह्णी याच्च पलाधिकम् ॥ अगुर्वर्द्धं कुंकुमं स्यात्कुंकुमार्द्धं च सिह्लकम् ॥ ६ ॥ कस्तूरिकाकर्पुरयोः प्रमाणं सिह्लसंमितम् ॥ सर्वमेकत्र संपिष्यात्पाटलो द्रववारिणा ॥ ७ ॥ पलद्वयं ततो दद्यादगुरुस्नेहमुत्तमम् ॥ एकत्र लोडितां कृत्वा पूर्वपात्रे निधापयेत् ॥ ८ ॥ आच्छाद्य केतकीपत्रैर्वेष्टयेच्चीन वाससा ॥ गन्धस्ते सोममंत्रेण रक्षेद्गरुडमुद्रया ॥ ९ ॥ एवं तु मण्डपे तस्मिन्साधिवासं निधापयेत् ॥ अरुणोदयकालेऽथ नयेत्कृष्णस्य सन्नि धिम् ॥ १० ॥ शंखचामरछत्राद्यैर्भ्रामयित्वा सुरालयम् ॥ देवाग्रे स्थापयित्वा च पूजयेत्पुरुषोत्तमम् ॥ ११ ॥ उद्घाटयेत्ततो वस्त्रं दिव्यदृष्ट्यावलो कयेत् ॥ प्रोक्षितं मंत्रराजेन संकुर्यात्ताडनादिभिः ॥ १२ ॥ गंधपुष्पाक्षतैः पूज्यः श्रियः सूक्तेन लेपयेत् ॥ श्रीशस्य सर्वगात्रेषु मृदुस्पर्शं शनैः शनैः ॥ १३ ॥ वैष्णवा जयशब्दैस्तं वर्द्धयंति तदा हरिम् ॥ नानासूक्तोपनिषदैर्विद्वांसस्तं स्तुवंति वै ॥ १४ ॥ वेणुवीणादिकैर्नृत्यगीतवाद्यैर नेकशः ॥ व्यजनैश्चामरैश्छत्रैरन्यैर्नानोपहारकैः ॥ १५ ॥ संतोषयन्जगन्नाथं तृतीयादौ विलेपयेत् ॥ यस्य चिंतनमात्रेण तापा नश्यंति देहिनाम् ॥ ॥ १६ ॥ सोऽसौ संदर्शनात्तापान्नृणां हंति तदा द्विजाः ॥ अचिन्त्यो महिमा विष्णोरीदृक्ताद्दक्तया सदा ॥ १७ ॥ ततः सूक्ष्मांबरैर्माल्यैर्भक्ष्यभो ज्यादिपानकैः ॥ द्रव्यैर्नानाविधैर्हृद्यैर्गव्यैरावर्तितैः शुभैः ॥ १८ ॥ ततः संपूजयेद्देवं तांबूलैश्च सुसंस्कृतैः ॥ तस्मिन्काले तु ये कृष्णं भक्त्या पश्यंति मानवाः ॥ १९ ॥ न तेषां पुनरावृत्तिः कल्पकोटिशतैरपि ॥ विष्णोः स्वरूपमासाद्य विष्णुलोके वसंति वै ॥ २० ॥ पुरा कलियुगे विप्रा दक्षोनाम प्रजापतिः ॥ आध्यात्मिकादिसंतापैः सुदीनान्वीक्ष्य मानवान् ॥ २१ ॥ तत्र गत्वा कृपायुक्तो महिमानं चकार वै ॥ यथाविधि मया प्रोक्तं स एव प्रथमं द्विजाः ॥ २२ ॥ प्रलिप्य चन्दनेनांगे माधवामलपक्षके ॥ तृतीयायां जगन्नाथं स्तुतिमेतां मुदा जगौ ॥२३॥ ॥ दक्ष उवाच ॥ ॥ देवदेव जगन्नाथ सहजानंद निर्मल ॥ संसारार्णवसंमग्नांस्त्राहि नः परमेश्वर ॥ २४ ॥ नानाविधैश्च संतापैः संतप्तान्मानवानिमान् ॥ ममानुक्रोश बुद्ध्या वै शुभदृष्ट्याऽमृतेन च ॥२५॥ संतर्पय तृणाञ्छुष्कान्कृष्णमेऽद्य नमोऽस्तु ते ॥ कलिकल्मषसंमूढानुद्धर्तुं जगतां पते ॥ २६ ॥ अवतारो ऽयमेतस्मिन्नीलाचलगुहांतरे ॥ चिरकालप्ररूढानां दुस्त्यजानां महांहसाम् ॥२७॥ राशिं दग्धुं त्वमेवेशो दीनानाथकृपाकर ॥ त्वद्दर्शनमहायोगे यमाद्यष्टांगवर्जिते ॥ २८ ॥ येषां मतिः समुत्पन्ना चतुर्वर्गैकसाधने ॥ न ते शोचंति दुष्पारे भवारण्ये महाभये ॥ २९ ॥ कर्मानपेक्षं देवेश नात्म ज्ञानं विमोचकम् ॥ इदं ते दर्शनं नाथ विना कर्मापि मोचयेत् ॥ ३० ॥ जय कृष्ण जयेशान जयाक्षर जयाव्यय ॥ प्रसीदानुगृहाणेमान्दीनान्मूढा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्विचेतसः ॥ ३१ ॥ इति स्तुत्वा दंडपातं पपात चरणांबुजे ॥ प्रसीदेश प्रसीदेश प्रसीदेशेति घोषयन् ॥ ३२ ॥ ततो जगाद भगवान्सुस्वरेण प्रजापतिम् ॥ उत्तिष्ठ वत्स ते दत्तं दुर्लभं यद्वरं त्वया ॥ ३३ ॥ कांक्षितं मत्प्रसादेन भविष्यति न संशयः ॥ मदनुग्रहोऽल्पपुण्यानां दुर्लभो विदितस्तव ॥ ॥ ३४ ॥ मदंगजातोऽस्ति भवान्मां त्वं प्रार्थितवानसि ॥ ममोत्सवेन सन्तोष्यं[1] ततस्ते प्रददाम्यहम् ॥ ३५ ॥ इमामक्षययात्रां ये भक्त्या पश्यंति हर्षिताः ॥ तस्मिन्काले यदिच्छंति मनसा तदवाप्नुयुः ॥ ३६ ॥ यथा संतापहरणं चन्दनेनानुलेपनम् ॥ तथोत्सवोऽयं मे दक्ष संतापत्रयनाशनः ॥ ३७ ॥ मत्प्रेरितमतिस्त्वं हि उत्सवं कृतवानसि ॥ संकल्पितोऽयं मनसा दीनोद्धृत्यै मया ध्रुवम् ॥ ३८ ॥ त्वयाभिकांक्षितं सर्वं दास्याम्येव प्रजापते ॥ द्वादशैता महायात्रा गुण्डिचाद्यास्तु पावनाः ॥ ३९ ॥ एकैका मुक्तिदा सर्वा धर्मकामार्थवर्द्धनाः ॥ ४० ॥ तासामेकतमां वापि यो भक्त्या चावलोकयेत् ॥ एकयापि भवाब्धिं स तीर्त्वा विष्णुपदं व्रजेत् ॥ ४१ ॥ ॥ जैमिनिरुवाच ॥ ॥ इत्युदीर्य प्रजानाथं भगवान्स तिरोदधे ॥ ४२ ॥ दक्षः प्रजापतिः सोऽपि श्रद्दधानस्तदाज्ञया ॥ संवत्सरं गिरौ स्थित्वा संददर्श महोत्सवान् ॥ ४३ ॥ सर्वज्ञो ब्राह्मणो भूत्वा कौशिकस्य कुलोत्तमे ॥ लोकान्प्रवर्तयामास यथाविधि महेषु सः ॥ ४४ ॥ विश्वासायाल्पबुद्धीनां यात्रा वै परिकीर्तिताः ॥ अयं च साक्षात्परमब्रह्मरूपी जगद्गुरुः ॥ प्रसादितः सुरेशेन लोकानुग्रहणाय वै ॥ ४५ ॥ यथा तथा दृष्टिपथं यातो मुक्तिप्रदो ध्रुवम् ॥ सर्वान्कामान्ददात्येव नारीणां नात्र संशयः ॥ ४६ ॥ सत्यप्रतिज्ञो भगवांस्तत्रास्ते मधुसूदनः ॥ शोकं तरति यं दृष्ट्वा भवपाथोधिसंभवम् ॥ किं व्रतैः किं तपोदानैः किं कृच्छ्रैः क्रतुभिस्तथा ॥ ४७ ॥ किमष्टांगेन योगेन किं सांख्येन परेण च ॥ ४८ ॥ तीर्थराजजले स्नात्वा क्षेत्रे श्रीपुरुषोत्तमे ॥ न्यग्रोधमूलवसतौ वसन्तं चर्मचक्षुषा ॥ दृष्ट्वा दारुमयं ब्रह्म देहबंधात्प्रमुच्यते ॥ ४९ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे पुरुषोत्तमक्षेत्रमाहात्म्ये षट्चत्वारिंशोऽध्यायः ॥ ४६ ॥ ॥ मुनय ऊचुः ॥ ॥ भगवन्सर्वशास्त्रज्ञ श्रुतं परमद्भुतम् ॥ यात्रारूपं भगवतो माहात्म्यं पापनाशनम् ॥ १ ॥ यथाहं पूजितो देवः कामिभिः सर्वकामदः ॥ भूत्युपासनया भूतिप्रदो ब्रूहि तथा हि नः ॥ २ ॥ ॥ जैमिनिरुवाच ॥ ॥ सर्वा विभूतयो विष्णोर्जगत्यस्मिंश्चराचराः ॥ भूतिप्रदो विभूतिश्च स एकः परमेश्वरः ॥ ३ ॥ यथायथोपचरति तथा वै जायते नरः ॥ एतावदस्य महिमा परिमातुं न शक्यते ॥ ४ ॥ यो यथा समुपास्ते तं तथा वै फलमाप्नुयात् ॥ एकः पंथाश्चतुर्णां वै

१ संतोष्यं—पारितोषिकम्—इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धर्मादीनां स दारवः ॥ ५ ॥ धर्मस्य पंथा गहनः संकीर्णो बहुशासनैः ॥ तत्त्वावधारणे नास्य क्षमः कोऽपि द्विजोत्तमाः ॥ ६ ॥ अर्थकामौ हि तन्मूलावित्थं स्थूलगती सदा ॥ तेषां त्रयाणां भगवाननायासेन वृद्धिकृत् ॥ ७ ॥ धर्मो हि भगवान्विष्णुर्धर्ममूलमिदं जगत् ॥ धर्मस्य जगतश्चापि प्रभुरेष जनार्दनः ॥ ८ ॥ पुरुषार्थमये तस्मिन्भक्तिर्यस्य प्रतिष्ठिता ॥ स सर्वकामतृप्तात्मा न शोचति न कांक्षति ॥ ९ ॥ त्रैलोक्यैश्वर्यदातासौ शक्ररूपो ह्युपासितः ॥ भावितो धातृरूपेण वंशवृद्धिकरो हरिः ॥ १० ॥ सनत्कुमाररूपेण दीर्घमायुः प्रयच्छति ॥ वृत्तिसंपत्प्रदो ह्येष पृथुरूपेण भावितः ॥ ११ ॥ गङ्गादितीर्थफलदो वाचस्पतिरुपासितः ॥ अंतस्तमः प्रणुदति भास्वद्रूपेण भावितः ॥ १२ ॥ सौभाग्यमतुलं दद्यादमृतांशुरुपासितः ॥ विद्याष्टादशतत्त्वज्ञो वाक्पतित्वेन भावयन् ॥ १३ ॥ वाजिमेधादियज्ञानां फलदोऽयं सनातनः ॥ यज्ञेश्वरस्वरूपेण भावितोऽयं जगन्मयः ॥ १४ ॥ ध्यातः कुबेररूपेण समृद्धिमतुलां ददेत् ॥ १५ ॥ एवं दयांबुधिरसौ तस्मिन्नीलाचले वसन् ॥ दीनानाथानुग्रहाय दारुव्याजशरीरवान् ॥ १६ ॥ प्रयात तत्र भो विप्रा वसध्वं सुसमाहिताः ॥ श्रीशपादाब्जयुगलं शरणं तत्प्रपद्यत ॥ १७ ॥ ऐहिकामुष्मिकान्भोगान्वाञ्छध्वं यदि शाश्वतान् ॥ अन्ते मुक्तिं च कैवल्यां यथेच्छं तत्र प्राप्नुत ॥ १८ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे पुरुषोत्तमक्षेत्रमाहात्म्ये सप्तचत्वारिंशोऽध्यायः ॥ ४७ ॥ ॥ मुनय ऊचुः ॥ ॥ प्रासादस्य प्रतिष्ठांत इन्द्रद्युम्नाय यद्वरान् ॥ आज्ञापयामास हरिर्यात्रास्ता द्वादशापि च ॥ १ ॥ त्वत्सकाशाच्छ्रुतं सर्वं ततः स पृथिवीपतिः ॥ किं चकार महाबुद्धिर्विष्णुभक्तोऽप्यवस्थितः ॥ ॥ २ ॥ ॥ जैमिनिरुवाच ॥ ॥ वराल्लँब्ध्वा जगन्नाथात्साक्षाद्ब्रह्मस्वरूपिणः ॥ कृतकृत्यं स मेने वा आत्मानं नरपुंगवः ॥ ३ ॥ यथाज्ञं कारयित्वा वै यात्रास्ताः पुण्यमोक्षदाः ॥ बहूपचारैर्बहुधा समभ्यर्च्य जगद्गुरुम् ॥ ४ ॥ गालराजं समादिश्य देवस्याज्ञां यथाविधि ॥ इदं प्रोवाच मधुरं धर्मन्यायसमायुतम् ॥ ५ ॥ ॥ इन्द्रद्युम्न उवाच ॥ ॥ राजन्बहुश्रुतोऽसि त्वं धर्मनिष्ठामुपागतः ॥ भगवत्यपि भक्तिस्ते कर्मणा मनसा गिरा ॥ ॥ ६ ॥ न ह्येकस्योपदेशाय भगवाननुशास्ति वै ॥ चराचरगुरुर्ह्येष विश्वं तच्छिष्यतां गतम् ॥ ७ ॥ ममानुग्रहलक्ष्येण अवतीर्णो जगत्पतिः ॥ उद्धृत्यै दीनमनसामत्रापि स्थास्यते चिरात् ॥ ८ ॥ भक्त्या च श्रद्धया युक्त एतदाज्ञां प्रवर्त्तय ॥ प्रतिमाव्यवहारेण नैनं जानीहि भूमिप ॥ ९ ॥ प्रत्यक्षं ते यथा जातं त्रैलोक्यं भूमिमागतम् ॥ प्रासादांतःप्रवेशे हि यस्यास्य जगदीशितुः ॥ १० ॥ पितामहाद्यास्त्रिदशाः सर्वे युगपदागताः ॥ विश्वमूर्त्या वयं सर्वे जाता वै नष्टचेतनाः ॥ ११ ॥ चराचरमयो ह्येष साक्षाद्दारुस्वरूपधृक् ॥ कल्पवृक्षमिमं विद्धि भूगतं सर्वकामदम् ॥ १२ ॥

CC-0. In Public Domain. Digitization by eGangotri

उपास्यैनं हि लभते यो यथा कामनाफलम् ॥ यतंतो बहुधा यं हि यतयो न विदन्ति वै ॥ तमःपारे प्रतिष्ठंतं किंस्विज्ज्योतिः स्वरूपिणम् ॥ १३ ॥ यतीनां धर्मनिष्ठानां शुद्धानामूर्ध्वरेतसाम् ॥ अनन्यभक्तियुक्तानामेकः पंथास्तु योगिनाम् ॥ १४ ॥ ग्रीष्मे शीते गभीरे वै निमज्य सलिलाशये ॥ परां निर्वृतिमाप्नोति तथास्मिन्करुणांबुधौ ॥ १५ ॥ त्रितापदुःखं त्यजति संप्राप्ते पुरुषोत्तमे ॥ १६ ॥ न माता न पिता मित्रं न पत्नी न सुतस्तथा ॥ शरणागतदीनानां यथायमुपकारकः ॥ १७ ॥ तदेनं परिसेवस्व भुक्तिमुक्तिफलप्रदम् ॥ पौरैः प्रजाभिर्यात्रास्ताः समृद्धं परिवर्त्तय ॥ १८ ॥ साधारणो धर्मपंथा नृपाणां नृपसत्तम ॥ प्रवर्तितश्च पूर्वेण पाल्यतेऽनंतरेण सः ॥ १९ ॥ नृसिंहं भज राजेंद्र उपचारैर्महर्द्धिभिः ॥ पूजयस्व त्रिसंध्यं तं परं निर्वाणमाप्नुहि ॥ २० ॥ स्वकृताद्युत्तमं प्राहुः परकृत्योपरक्षणम् ॥ पालयेत्परदत्तं यः स्वदत्ताद्युत्तमं हि तत् ॥ २१ ॥ ॥ जमिनिरुवाच ॥ ॥ कृतांजलिपुटः सोऽथ श्वेतो नृपतिसत्तमः ॥ मूर्ध्नि जग्राह तद्वाक्यं मालामिव गुणान्विताम् ॥ २२ ॥ इंद्रद्युम्नोऽपि राजर्षिः प्रसाद्य पुरुषोत्तमम् ॥ नारदेन सह श्रीमान्ब्रह्मलोकं जगाम ह ॥ ॥ २३ ॥ एतद्वः कथितं पुण्यं क्षेत्रमाहात्म्यमुत्तमम् ॥ तत्र नित्योषितस्यापि माहात्म्यं ब्रह्मदारुणः ॥ २४ ॥ यश्चैतच्छृणुयाद्भक्त्या वाच्यमानं द्विजोत्तमाः ॥ अश्वमेधसहस्रस्य फलं सोऽविकलं लभेत् ॥ २५ ॥ अर्द्धोदयस्तु यो योगः स्कंदेन परिकीर्तितः ॥ तत्कोटिगुणितं पुण्यं विष्णोर्माहात्म्यकीर्त्तनात् ॥ २६ ॥ प्रातः प्रातर्यः शृणुयात्कपिलाशतदो भवेत् ॥ गांगैः पुष्करजैस्तोयैरभिषेकफलं लभेत् ॥ २७ ॥ धन्यं यशस्यमायुष्यं पुण्यं संतानवर्द्धनम् ॥ स्वर्गप्रतिष्ठागतिदं सर्वपापापनोदनम् ॥ २८ ॥ एतद्रहस्यमाख्यातं पुराणेषु सुगोपितम् ॥ वैष्णवेभ्यो विनाऽन्येषु न तु वाच्यं कदाचन ॥२९॥ कुतर्कोपहता ये च दुरधीतश्रुतागमाः ॥ नास्तिका दांभिका नित्यं परदोषोपदर्शिनः ॥ अवैष्णवा मोघजीवास्तेभ्यो गोप्यं सदैव हि ॥ ३० ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे पुरुषोत्तमक्षेत्रमाहात्म्येऽष्टचत्वारिंशोऽध्यायः ॥ ४८ ॥

॥ ॥ मुनय ऊचुः ॥ ॥ भगवञ्जैमिने सर्वं वेदवेदांगपारग ॥ त्वदनुग्रहतोऽस्माभिर्माहात्म्यं जगदीशितुः ॥ १ ॥ क्षेत्रराजस्य तस्यैव यात्राणां चैव सर्वशः ॥ भगवद्भोजनोच्छिष्टप्राशनादिफलं तथा ॥ २ ॥ इंद्रद्युम्नस्य राज्ञो वै वृत्तांतमतिदुर्लभम् ॥ नीलमाधवरूपं तु दारुब्रह्मप्रकाशनम् ॥ ॥ ३ ॥ श्रुतं त्वद्वदनांभोजाद्गलितं तद्यथाविधि ॥ इदानीं श्रोतुमिच्छामस्त्वत्तो हि वदतां वर ॥ ४ ॥ सर्वं विस्तरतो ब्रह्मन्वयं सर्वे मुदान्विताः ॥ पुराणश्रवणस्यैव यदुक्तं फलमेव तत् ॥ ५ ॥ को वा तस्य विधिश्चैव केन वा स्यात्तु सांगकम् ॥ अस्मासु चेदनुक्रोशो यथावद्वक्तुमर्हसि ॥ ६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ॥ जैमिनिरुवाच ॥ ॥ साधु साधु मुनिश्रेष्ठा यत्पृष्टं परया मुदा ॥ तत्र मे प्रीतिरतुला जाता रोमांचकारिणी ॥ ७ ॥ तद्वः सर्वं प्रवक्ष्यामि शृणुध्वं सावधानतः ॥ पुराणश्रवणारंभे यथाविभवमात्मनः ॥ ८ ॥ आदौ संकल्प्य विधिवद्ब्राह्मणं शुद्धवंशजम् ॥ अव्यंगावयवं शांतं स्वशाखं स्वपुरोधसम् ॥ ९ ॥ सर्वशास्त्रार्थतत्त्वज्ञं भूषणैरतिशोभनैः ॥ वस्त्रचंदनमाल्याद्यैर्वृणुयात्पाठसंश्रुतौ ॥ १० ॥ कृतांजलिपुटो भूत्वा ततः संप्रार्थयेद्द्विजम् ॥ त्वं विष्णुर्विष्णुरेव त्वं न तु भेदः कदाचन ॥ ११ ॥ निर्विघ्नं मे भवत्वेव त्वत्प्रसादात्प्रसीद च ॥ ततो वृतं ब्राह्मणं च बहुमूल्यासने शुभे ॥ ॥ १२ ॥ वासयित्वा च तस्यैव गले मालां विनिक्षिपेत् ॥ मस्तके पुष्पगर्भं च चंदनैरनुलेपयेत् ॥ १३ ॥ यस्मात्तस्मिंश्च समये विप्रो व्याससमो मतः ॥ तेनैव ब्राह्मणेनैव पुस्तके विष्णुरूपके ॥ १४ ॥ कारयेद्व्यासपूजां च श्रीखण्डागुरुपुष्पकैः ॥ नानोपचारै रुचिरैर्भक्ष्यभोज्यादिकैरपि ॥ १५ ॥ भक्त्या चासनदानादिविधिः कार्यो दिने दिने ॥ सांप्रतं कथयाम्येवं श्रूयतां श्रोतृलक्षणम् ॥ १६ ॥ गतानुगतिकानां च निवासार्थं तथा द्विजाः ॥ आसनानि यथायोग्यं रचयित्वा स्वयं तथा ॥ १७ ॥ शुभासनांतरस्थो हि भवेदुत्कण्ठमानसः ॥ अथवा संस्कृते देशे सर्वैः सह वसेद्भुवि ॥ १८ ॥ व्यासस्याग्रे निवसतिरासने नोच्च एव च ॥ कृतस्नानो मुदा युक्तो धारयञ्छुक्लवाससी ॥ १९ ॥ आचांतः शंखचक्रादितिलकान्वितविग्रहः ॥ मनसा भावयेद्विष्णुं विश्वासं कारयेद्दृशम् ॥ २० ॥ पुराणे ब्राह्मणे चैव देवे च मंत्रकर्मणि ॥ तीर्थे वृद्धस्य वचने विश्वासः फलदायकः ॥ २१ ॥ अतो मुनिवराः सर्वं पुण्यं विश्वासकारणम् ॥ पाषंडादिकसंभाषं वृथालापं प्रयत्नतः ॥ २२ ॥ पुराणश्रवणे काले सर्वचिंतां च वर्जयेत् ॥ अनेन विधिना विप्राः प्रत्यहं शृणुयान्मुदा ॥ २३ ॥ ततः पाठे समाप्ते च करतालादिकैर्मुहुः ॥ जय कृष्ण जगन्नाथ हर इत्यादिनामभिः ॥ २४ ॥ विस्तारयेद्यथाकाशे श्रूयते शब्द एव सः ॥ एवं च प्रत्यहं कुर्यात्प्रीतये मुरवैरिणः ॥ २५ ॥ ततो ग्रंथसमाप्तौ च विष्णुप्रीणनतत्परः ॥ विशेषाद्वस्त्रमाल्यादिचंदनैर्भूषणैस्तथा ॥ भूषयेत्परया भक्त्या विप्रं व्याससमं द्विजाः ॥ २६ ॥ आत्मशक्त्या प्रदद्याच्च दक्षिणां वै यथाविधि ॥ ये ये प्रदद्युर्यद्यच्च मत्तस्तच्छृणुताधुना ॥ २७ ॥ राजानः करिणो दद्युः सालंकारान्सुलक्षणान् ॥ क्षत्रिया एवमेवं च ते वै राजसमा मताः ॥ २८ ॥ ब्राह्मणाः पुस्तकांश्चैव विष्णोरर्चाकरंडिकाः ॥ कनकं रजतं चैव धान्यं वस्त्रं स्वभक्तितः ॥ २९ ॥ विशश्च रत्नभूषाढ्यान्सिन्धुदेशोद्भवानपि[1] ॥ गाश्च लक्षणसंयुक्ताः सवत्साश्च पयस्विनीः ॥ ३० ॥ अन्यच्च कनकाद्यं च त्यजे[2]

१ सिन्धुदेशोद्भवान्--अश्वान्--इत्यर्थः । २ त्यजेयुः--दद्युः--इत्यर्थः ।

र्युर्धर्मतत्पराः ॥ शूद्राः प्रदद्युः परया मुदा संयुक्तमानसाः ॥ ३१ ॥ वासांसि च सुवर्णं च धान्यं रत्नानि गास्तथा ॥ नानालंकार
युक्ताश्च घटोघ्नीर्बालगर्भिणीः ॥ ३२ ॥ एवं वै दक्षिणां दद्याद्येन संतुष्यते गुरुः ॥ आत्मनः शक्तितो विप्रा वित्तशाठ्यं न कारयेत् ॥ ३३ ॥
शांतिकं पौष्टिकं चैव व्रतोद्वाहादि कर्म च ॥ मोक्षस्य साधकं कर्म पुराणश्रवणं तथा ॥ ३४ ॥ यज्ञादिकं च दानं च व्रतं नानाविधं तथा ॥ यदि
चेद्दक्षिणाहीनं तदा भवति निष्फलम् ॥३५॥ असुराः कर्मणस्तस्य हरंति फलमेव तत् ॥ यथा स्त्रीणां च लावण्यं भर्तृस्नेहविवर्जितम् ॥ ३६ ॥ युद्धा
त्पलायितानां च पृष्ठं कृत्वा धनुष्मताम् ॥ विना धावनमश्वानां दुष्टत्वं हि यथा द्विजाः ॥ ३७ ॥ मूकत्वेनेव पांडित्यं सर्वशास्त्रविपश्चिताम् ॥ हीनं
दक्षिणया यद्यत्कर्म तद्वच्च निष्फलम् ॥३८॥ दानेन क्षीयते यस्माद्दुरितानां कदंबकम् ॥ दक्षिणेति तथा विप्रा गीयते शास्त्रवेदिभिः ॥ ३९ ॥ ततो
विप्रान्भोजयेद्वै यथाशक्तिप्रकल्पितैः ॥ कर्पूरेण च खंडेन सर्पिषा पायसैर्युतैः ॥४०॥ षड्विधैरन्नपानाद्यैः सुस्वादैरमृतोपमैः ॥ तेभ्योपि स्वर्णवस्त्रादि
यथाशक्त्या प्रदापयेत् ॥ ४१ ॥ एतद्वः कथितं सर्वं पुराणश्रवणस्य च ॥ सांगोपांगविधानं च येन स्यात्सफलं त्विदम् ॥ इदानीं भो मुनिश्रेष्ठाः
किमन्यज्ज्ञातुमिच्छथ ॥४२॥ ॥ मुनय ऊचुः ॥ ॥ अहोऽस्माकं महाभाग्यं यत्पापौघविनाशनम् ॥ पुराणश्रवणस्यैव फलमस्माभिरेव च ॥ ४३ ॥
सांगोपांगविधानं च श्रुतं त्वन्मुखपंकजात् ॥ धन्याः स्म कृतपुण्याः स्म संसारे विगतज्वराः ॥ ४४ ॥ इदानीमात्मशक्त्या वै दीयते भवते मुने ॥
दक्षिणा फलसंप्राप्त्यै प्रसन्नस्त्वं गृहाण च ॥ ४५ ॥ इत्युक्तवंतो मुनयो ह्यकिंचनाः समित्कुशं पुष्पफलाक्षतादिकम् ॥ कृत्वा च तस्मै मुनयः
सुमुक्ताः क्षेत्रोत्तमं जग्मुरतिप्रहर्षिताः ॥ ४६ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे पुरुषोत्तमक्षेत्र
माहात्म्ये जैमिनिऋषिसंवाद एकोनपंचाशत्तमोऽध्यायः ॥ ४९ ॥ ॥ ॥ ॥ ॥

॥ इति वैष्णवखण्डे द्वितीयं श्रीपुरुषोत्त (जगन्नाथ) क्षेत्रमाहात्म्यं समाप्तम् ॥ (२–२) ॥

CC-0. In Public Domain. Digitization by eGangotri

इदं पुस्तकं मुम्बय्यां श्रीकृष्णदासात्मजक्षेमराजश्रेष्ठिना
स्वकीये "श्रीवेङ्कटेश्वर" (स्टीम्) मुद्रणालये मुद्रितम् ।
संवत् १९६६, शके १८३१.

CC-0. In Public Domain. Digitization by eGangotri

॥ इति श्रीस्कांदे महापुराणे द्वितीये वैष्णवखंडे पुरुषोत्तम (जगन्नाथ) क्षेत्र-
माहात्म्यं समाप्तम् ॥ (२–२) ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥अथ श्रीस्कांदे महापुराणे द्वितीये वैष्णवखण्डे बदरिकाश्रममाहात्म्यप्रारंभः(२-३)॥

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीगणेशाय नमः ॥ अथ श्रीबदरिकाश्रममाहात्म्यप्रारम्भः ॥ श्रीबदरीनाथाय नमः ॥ ॥ शौनक उवाच ॥ ॥ सूतसूत महाभाग सर्वधर्मविदां वर ॥ सर्वशास्त्रार्थतत्त्वज्ञ पुराणे परिनिष्ठित ॥ १ ॥ व्यासः सत्यवतीपुत्रो भगवान्विष्णुरव्ययः ॥ तस्य यत्प्रियशिष्यस्त्वं त्वत्तो वेत्ता न कश्चन ॥ २ ॥ प्राप्ते कलियुगे घोरे सर्वधर्मबहिष्कृते ॥ जना वै दुष्टकर्माणः सर्वधर्मविवर्जिताः ॥३॥ क्षुद्रायुषः क्षुद्रप्राणबलवीर्यतपःक्रियाः ॥ अधर्मनिरताः सर्वे वेद शास्त्रविवर्जिताः ॥ ४ ॥ तीर्थाटनतपोदानहरिभक्तिविवर्जिताः ॥ कथमेषामल्पकानामुद्धारोऽल्पप्रयत्नतः ॥ ५ ॥ तीर्थानामुत्तमं तीर्थं क्षेत्राणामुत्तमं तथा ॥ मुमुक्षूणां कुतः सिद्धिः कुत्र वा ऋषिसंचयः ॥ ६ ॥ कुत्र वाल्पप्रयत्नेन तपो मन्त्राश्च सिद्धिदाः ॥ कुत्र वा वसति श्रीमाञ्जगतामीश्वरेश्वरः ॥ भक्तानामनुरक्तानामनुग्रहकृपालयः॥ ७ ॥ एतदन्यच्च सर्वं मे परार्थैकप्रयोजनम् ॥ ब्रूहि भद्राय लोकानामनुग्रहविचक्षण ॥ ८ ॥ ॥ सूत उवाच ॥ ॥ साधु साधु महाभाग भवान्परहिते रतः ॥ हरिभक्तिकृतासक्तिप्रक्षालितमनोमलः ॥ ९ ॥ अथ मे देवकीपुत्रो हृत्पद्ममधिरोहति ॥ प्रसंगात्तव विप्रर्षे दुर्लभः साधुसंगमः ॥ १० ॥ हरति दुष्कृतसंचयमुत्तमां गतिमलं तनुते तनुमानिनाम् ॥ अधिकपुण्यवशादवशात्मनां जगति दुर्लभ साधुसमागमः ॥ ११ ॥ हरति हृदयबन्धं कर्मपाशार्दितानां वितरति पदमुच्चैरल्पजल्पैकभाजाम् ॥ जननमरणकर्मश्रांतविश्रांतिहेतुस्त्रिजगति मनुजानां दुर्लभः सत्प्रसंगः ॥ १२ ॥ ॥ सूत उवाच ॥ ॥ अयं प्रश्नः पुरा साधो स्कन्देनाकारि सर्वतः ॥ कैलासशिखरे रम्य ऋषीणां परिशृण्व ताम् ॥ पुरतो गिरिजाभर्तुः कर्तुं निःश्रेयसं सताम्॥१३॥ ॥ स्कंद उवाच ॥ ॥ भगवन्सर्वलोकानां कर्त्ता हर्त्ता पिता गुरुः ॥ क्षेमाय सर्वजंतूनां तपसे कृतनिश्चयः ॥ १४ ॥ कलिकाले ह्यनुप्राप्ते वेदशास्त्रविवर्जिते ॥ कुत्र वा वसति श्रीमान्भगवान्सात्वतां पतिः ॥ १५ ॥ क्षेत्राणि कानि पुण्यानि तीर्थानि सरितस्तथा ॥ केन वा प्राप्यते साक्षाद्भगवान्मधुसूदनः ॥ श्रद्दधानाय भगवन्कृपया वद मे पितः ॥ १६ ॥ ॥ श्रीमहादेव उवाच ॥ ॥ बहूनिसंति तीर्थानि क्षेत्राणि च षडानन ॥ हरिवासनिवासैकपराणि परमार्थिनाम् ॥ १७ ॥ काम्यानि कानिचित्संति कानिचिन्मुक्तिदान्यपि ॥ इहामुत्रार्थदान्येव बहुपुण्यप्रदानि वै ॥ १८ ॥ गंगा गोदावरी रेवा तपती यमुना सरित् ॥ क्षिप्रा सरस्वती पुण्या गौतमी कौशिकी तथा ॥ १९ ॥ कावेरी ताम्रपर्णी च चंद्रभागा महेंद्रजा ॥ चित्रोत्पला वेत्रवती सरयूः पुण्यवाहिनी ॥ २० ॥ चर्मण्वती शतद्रूश्च पयस्विन्यत्रिसंभवा ॥ गंडिका बाहुदा सर्वाः पुण्याः सिंधुः सरस्वती ॥ २१ ॥ भुक्तिमुक्तिप्रदाश्चैताः सेव्यमाना मुहुर्मुहुः ॥ अयोध्या द्वारिका काशी मथुरावंतिका तथा ॥ ॥२२॥ कुरुक्षेत्रं रामतीर्थं कांची च पुरुषोत्तमम् ॥ पुष्करं दर्दुरं क्षेत्रं वाराहं विधिनिर्मितम् ॥ बदर्य्याख्यं महापुण्यं क्षेत्रं सर्वार्थसाधनम् ॥ २३ ॥

CC-0. In Public Domain. Digitization by eGangotri

अयोध्यां विधिवद्दृष्ट्वा पुरीं मुक्त्येकसाधनीम् ॥ सर्वपापविनिर्मुक्ताः प्रयांति हरिमंदिरम् ॥ २४ ॥ विविधविष्णुनिषेवणपूर्वकाचरितपूजननर्तनकी
र्तनाः ॥ गृहमपास्य हरेरनुचिंतनाज्जितगृहार्जितमृत्युपराक्रमाः ॥ २५ ॥ स्वर्गद्वारे नरः स्नात्वा दृष्ट्वा रामालयं शुचिः ॥ न तस्य कृत्यं पश्यामि
कृतकृत्यो भवेद्यतः ॥ २६ ॥ द्वारिकायां हरिः साक्षात्स्वालयं नैव मुंचति ॥ अद्यापि भवनं कैश्चित्पुण्यवद्भिः प्रदृश्यते ॥ २७ ॥ गोमत्यां तु नरः
स्नात्वा दृष्ट्वा कृष्णमुखांबुजम् ॥ मुक्तिः प्रजायते पुंसो विना सांख्यं षडानन ॥ २८ ॥ असीवरुणयोर्मध्ये पंचक्रोश्यां महाफलम् ॥ अमरा मृत्यु
मिच्छंति का कथा इतरे जनाः ॥ २९ ॥ मणिकर्ण्यां ज्ञानवाप्यां विष्णुपादोदके तथा ॥ ह्रदे पंचनदे स्नात्वा न मातुः स्तनपो भवेत् ॥ ३० ॥
प्रसंगेनापि विश्वेशं दृष्ट्वा काश्यां षडानन ॥ मुक्तिः प्रजायते पुंसां जन्ममृत्युविवर्जिता ॥ ३१ ॥ बहुना किमिहोक्तेन नैतत्क्षेत्रसमं क्वचित् ॥ तपो
पवासनिरतो मथुरायां षडानन ॥ जन्मस्थानं समासाद्य सर्वपापैः प्रमुच्यते ॥ ३२ ॥ विश्रांतितीर्थे विधिवत्स्नात्वा कृत्वा तिलोदकम् ॥ पितॄनुद्धृ
त्य नरकाद्विष्णुलोकं प्रगच्छति ॥ ३३ ॥ यदि कुर्यात्प्रमादेन पातकं तत्र मानवः ॥ विश्रांते स्नानमासाद्य भस्मीभवति तत्क्षणात् ॥ ३४ ॥ अवं
त्यां विधिवत्स्नात्वा शिप्रायां माधवे नराः ॥ पिशाचत्वं न पश्यंति जन्मांतरशतैरपि ॥ ३५ ॥ कोटितीर्थे नरः स्नात्वा भोजयित्वा द्विजोत्तमान् ॥
महाकालं हरं दृष्ट्वा सर्वपापैः प्रमुच्यते ॥ ३६ ॥ मुक्तिक्षेत्रमिदं साक्षान्मम लोकैकसाधनम् ॥ दानाद्दरिद्रताहानिरिह लोके परत्र च ॥ ३७ ॥ कुरु
क्षेत्रे रामतीर्थे स्वर्णं दत्त्वा स्वशक्तितः ॥ सूर्योपरागे विधिवत्स नरो मुक्तिभाग्भवेत् ॥ ३८ ॥ ये तत्र प्रतिगृह्णंति नरा लोभवशंगताः ॥ पुरुषत्वं
न तेषां वै कल्पकोटिशतैरपि ॥ ३९ ॥ हरिक्षेत्रे हरिं दृष्ट्वा स्नात्वा पादोदके जनः ॥ सर्वपापविनिर्मुक्तो हरिणा सह मोदते ॥ ४० ॥ खगगणा
विविधा निवसंत्यहो ऋषिगणाः फलमूलदलाशनाः ॥ पवनसंयमनक्रमनिर्जितेंद्रियपराक्रमणा मुनयस्त्विह ॥ ४१ ॥ विष्णुकांच्यां हरिः साक्षा
च्छिवकांच्यां शिवः स्वयम् ॥ अभेदादुभयोर्भक्त्या मुक्तिः करतले स्थिता ॥ विभेदजननात्पुंसां जायते कुत्सिता गतिः ॥ ४२ ॥ सकृद्दृष्ट्वा
जगन्नाथं मार्कंडेयह्रदे प्लुतः ॥ विना ज्ञानेन योगेन न मातुः स्तनपो भवेत् ॥ ४३ ॥ रोहिण्यामुदधौ स्नात्वा इंद्रद्युम्नह्रदे तथा ॥
भुक्त्वा निर्वेदितं विष्णोर्वैकुंठे वसतिं लभेत् ॥ ४४ ॥ दशयोजनविस्तीर्णं क्षेत्रं शंखोपरि स्थितम् ॥ चतुर्भुजत्वमायांति कीटा
अपि न संशयः ॥ ४५ ॥ कार्त्तिक्यां पुष्करे स्नात्वा श्राद्धं कृत्वा सदक्षिणम् ॥ भोजयित्वा द्विजान्भक्त्या ब्रह्मलोके महीयते ॥ ४६ ॥ सकृ

१ भवन्ति-इति शेषः । २ सन्धिश्छान्दसः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्नात्वा ह्रदे तस्मिन्यूपं दृष्ट्वा समाहितः ॥ सर्वपापविनिर्मुक्तो जायते द्विजसत्तमः ॥ ४७ ॥ षष्टिवर्षसहस्राणि योगाभ्यासेन यत्फलम् ॥ सौकरे विधिवत्स्नात्वा पूजयित्वा हरिं शुचिः ॥४८ ॥ सप्तजन्मकृतं पापं तत्क्षणादेव नश्यति ॥ तीर्थराजं महापुण्यं सर्वतीर्थनिषेवितम् ॥ ४९ ॥ कामिनां सर्वजंतूनामीप्सितं कर्मभिर्भवेत् ॥ वेण्यां स्नात्वा शुचिर्भूत्वा कृत्वा माधवदर्शनम् ॥ भुक्त्वा पुण्यवतां भोगानन्ते माधवतां व्रजेत् ॥ ॥ ५० ॥ माघे मासि नरः स्नात्वा त्रिवेण्यां भक्तिभावितः ॥ बदरीकीर्तनात्पुण्यं तत्समाप्नोति मानवः ॥ ५१ ॥ दशाश्वमेधिकं तीर्थं दशयज्ञफलप्रदम् ॥ संक्षेपात्कथितं पुत्र किं भूयः श्रोतुमिच्छसि ॥ ५२ ॥ ॥ स्कंद उवाच ॥ ॥ बदर्य्याख्यं हरेः क्षेत्रं त्रिषु लोकेषु दुर्लभम् ॥ क्षेत्रस्य स्मरणादेव महापातकिनो नराः ॥ विमुक्तकिल्बिषाः सद्यो मरणान्मुक्तिभागिनः ॥ ५३ ॥ अन्यतीर्थे कृतं येन तपः परमदारुणम् ॥ तत्समा बदरीयात्रा मनसापि प्रजायते ॥ ५४ ॥ बहूनि संति तीर्थानि दिवि भूमौ रसातले ॥ बदरीसदृशं तीर्थं न भूतं न भविष्यति ॥ ५५ ॥ अश्वमेध सहस्राणि वायुभोज्ये च यत्फलम् ॥ क्षेत्रांतरे विशालायां तत्फलं क्षणमात्रतः ॥ ५६ ॥ कृते मुक्तिप्रदा प्रोक्ता त्रेतायां योगसिद्धिदा ॥ विशाला द्वापरे प्रोक्ता कलौ बदरिकाश्रमः ॥ ५७ ॥ स्थूलसूक्ष्मशरीरं तु जीवस्य वसतिस्थलम् ॥ तद्विनाशयति ज्ञानाद्विशाला तेन कथ्यते ॥ ५८ ॥ अमृतं स्रवते या हि बदरीतरुयोगतः ॥ बदरी कथ्यते प्राज्ञैर्ऋषीणां यत्र संचयः ॥ ५९ ॥ त्यजेत्सर्वाणि तीर्थानि कालेकाले युगेयुगे ॥ बदरीं भगवान्विष्णुर्न मुञ्चति कदाचन ॥ ६० ॥ सर्वतीर्थावगाहेन तपोयोगसमाधितः ॥ तत्फलं प्राप्यते सम्यग्बदरीदर्शनाद्बुध ॥ ६१ ॥ षष्टिवर्षसहस्राणि योगाभ्यासेन यत्फलम् ॥ वाराणस्यां दिनैकेन तत्फलं बदरीं गतौ ॥ ६२ ॥ तीर्थानां वसतिर्यत्र देवानां वसतिस्तथा ॥ ऋषीणां वसतिर्यत्र विशाला तेन कथ्यते ॥ ६३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे बदरिकाश्रममाहात्म्ये शिवकार्त्तिकेयसंवादे बदरिकाश्रमस्य सर्वतीर्थाधिकत्ववर्णनंनाम प्रथमोऽध्यायः ॥ १ ॥ ॥ स्कंद उवाच ॥ ॥ कथमेतत्समुत्पन्नं कैर्वा क्षेत्रं निषेवितम् ॥ को वा तस्याप्यधीशः स्यादेतद्विस्तरतो वद ॥ १ ॥ ॥ शिव उवाच ॥ ॥ अनादिसिद्धमेतत्तु यथा वेदा हरेस्तनूः ॥ अधिष्ठाता हरिः साक्षान्नारदाद्यैर्निषेवितम् ॥ २ ॥ पुरा कृतयुगस्यादौ स्वीयां दुहितरं विधिः ॥ रूपयौवनसंपन्नां स तां यभितुमुद्यतः ॥ ३ ॥ तं दृष्ट्वा तादृशं रोषाच्छिरः खड्गेन पञ्चधा ॥ चिच्छेदाऽहं कपालं तद्ब्रह्महत्यासमुद्यते ॥ ४ ॥ हस्ते कृत्वा जगामाशु तत्र तीर्थानि सेवितुम् ॥ दिवि भूमौ च पाताले तपश्चरणपूर्वकम् ॥ ५ ॥ न गता ब्रह्महत्या मे कपालं तादृशं करे ॥ तदा वैकुण्ठमगमं द्रष्टुं लक्ष्मीपतिं हरिम् ॥ ६ ॥ विनयावनतो भूत्वा नमस्कृत्य पुनः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पुनः ॥ सर्वमाख्यातवांस्तस्मै व्यसनं करुणात्मने ॥ ७ ॥ तस्योपदिष्टमादाय बदरीं समुपागतः ॥ तत्क्षणाद्ब्रह्महत्या मे वेपमाना मुहुर्मुहुः ॥ ८ ॥ अंतर्हितं कपालं तत्कराद्विगलितं मम ॥ ततःप्रभृति तत्क्षेत्रं पार्वत्या सह सादरम् ॥९॥ तिष्ठामि तप आस्थाय ऋषीणां प्रीतिमावहन् ॥ वाराणस्यां यथा प्रीतिः श्रीशैलशिखरे तथा ॥ १० ॥ कैलासे शिवया सार्द्धं ततोनंतगुणाधिका ॥ अन्यत्र मरणान्मुक्तिः स्वधर्मविधिपूर्वकात् ॥ ११ ॥ बदरी दर्शनादेव मुक्तिः पुंसां करे स्थिता ॥ हरेश्वरणसान्निध्यं यत्र वैश्वानरः स्वयम् ॥१२॥ तत्र केदाररूपेण मम लिंगं प्रतिष्ठितम् ॥ केदारदर्शनात्स्पर्शा दर्चनाद्भक्तिभावतः॥१३॥कोटिजन्मकृतं पापं भस्मीभवति तत्क्षणात्॥कलामात्रेण तिष्ठामि तत्र क्षेत्रे विशेषतः ॥१४॥ कला पंचदशैवात्र मूर्तिमध्ये ह्यवस्थितम् ॥१५॥ जितकृतांतभयाः शिवयोगिनः कृतमृगाजिनकृत्तिसुवाससः ॥ वरविभूतिजटान्वितभूषणाः स्वयमुपासत एव जटाधरम् ॥१६॥ फलदलांबुसमीरणतोषिताः शिवमनोजितमृत्युपरिश्रमाः ॥ गिरिवरस्थितनिर्जितमानसाः प्रसरनिर्म्मलबुद्धिमहोदयाः ॥ १७ ॥ कमलकोमलकांतिमुखांबुजाः शिवकृपाजितनिर्भरवैरिणः ॥ करधृतांजलिमौलिशिवेक्षणाः शिवमुपासत एव निशामुखे ॥ १८ ॥ करधृतजपमालाः शांतिसंतोषभाजः कृतनतिपरनित्यप्रार्थनाश्चन्द्रमौलौ ॥ हरचरणसरोजध्यानविज्ञानमूर्तिव्यथितजनमनोजाः सर्वभावान्नितांतम् ॥ १९ ॥ वाराणस्यां मृतानां च तारकं ब्रह्मसंज्ञकम् ॥ जनानां पूजनात्तत्र मम लिंगस्य जायते ॥ २० ॥ वह्नितीर्थं परिभ्राजद्भगवच्चरणांतिके ॥ केदाराख्यं महालिंगं दृष्ट्वा नो जन्म भाग्भवेत् ॥ २१ ॥ ॥ स्कन्द उवाच ॥ ॥ कथं वैश्वानरः श्रीमान्सर्वलोकैककारणम् ॥ बदरीमनुसंतस्थौ तन्मे वद महामते ॥ २२ ॥ ॥ ॥ शिव उवाच ॥ ॥ पुरा समाजः समभूदृषीणामूर्ध्वरेतसाम् ॥ गंगा भगवती यत्र कालिंद्या सह संगता ॥२३॥ दशाश्वमेधिकं नाम तीर्थं त्रैलोक्यविश्रुतम् ॥ बभूव तत्र भगवान्हुतभुक्प्रश्रयानतः ॥ ऋषीणामग्रतः स्थित्वा प्रष्टुं समुपचक्रमे ॥ २४ ॥ ॥ वैश्वानर उवाच ॥ ॥ दृष्ट्वा दृष्टैकदृग्ज्ञाना भवन्तो ब्रह्मवित्तमाः ॥ दीनार्थे करुणापूर्णा हृदयार्द्रा दयालवः ॥ २५ ॥ सर्वदुर्लक्षणोद्भूतपातकालितचेतसः ॥ कथं स्यान्निरयान्मुक्तिर्मम ब्रह्मविदुत्तमाः ॥ २६ ॥ सर्वेषामृषिवर्य्याणामाजगाम मुनीश्वरः[१] ॥ गंगांभसि समाप्लुत्य वाक्यं चेदमुवाच ह ॥ २७ ॥ ॥ व्यास उवाच ॥ ॥ अस्त्येकः परमोपायो भवतः पापनिष्कृतौ ॥ सर्वभक्षाख्यदोषस्य बदरीं शरणं श्रय ॥ २८ ॥ यत्रास्ते भगवान्साक्षाद्देवदेवो जनार्दनः ॥ भक्तानामप्यभक्तानामघहा मधुसूदनः ॥ २९ ॥ तत्र गंगांभसि स्नात्वा कृत्वा प्रदक्षिणां हरेः ॥ दंडवत्प्रणिपातेन सर्वपापक्षयो भवेत् ॥ ३० ॥ ततो

१ मुनीश्वरः—व्यासः—इति शेषः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

व्यासमुखाच्छ्रुत्वा ऋषीणामनुवादतः ॥ उत्तराभिमुखो वह्निर्गंधमादनमाययौ ॥ ३१ ॥ ततो बदरिकां प्राप्य स्नात्वा गंगांभसि स्वयम् ॥ नारायणाश्रमं गत्वा नत्वा प्रोवाच भक्तिमान् ॥ ३२ ॥ ॥ अग्निरुवाच ॥ ॥ विशुद्धविज्ञानघनं पुराणं सनातनं विश्वसृजां पतिं गुरुम् ॥ अनेकमेकं जगदेकनाथं नमाम्यनंताश्रितशुद्धबुद्धिम् ॥ ३३ ॥ मायामयीं शक्तिमुपेत्य विश्वकर्त्तारमुद्दिश्य रजोपयुक्तम्[1] ॥ सत्त्वेन चास्य स्थितिहेतुमुग्रमथो तमोभिग्रसितारमीडे ॥३४॥ अविद्यया विश्वविमोहितात्मा विद्यैकरूपं विततं त्रिलोक्याम् ॥ विद्याश्रितत्वात्सकलज्ञमीशं त्वविद्यया जीवमहं प्रपद्ये ॥ ३५ ॥ भक्तेच्छयाविष्कृतदेहयोगमाभोगभोगार्पितयोगयोगम् ॥ कौशेयपीताम्बरजुष्टशक्तिं विचित्रशत्त्यष्टमयेष्टमीडे ॥ ३६ ॥ अथ प्रसन्नो भगवान्स्तुतः सर्वैर्हृदि स्थितः ॥ प्रोवाच मधुरं वाक्यं पावकं पावनार्थिनम् ॥ ३७ ॥ ॥ श्रीनारायण उवाच ॥ वरं वरय भद्रं ते वरदोऽहमुपागतः ॥ स्तवेनानेन तुष्टोऽस्मि विनयेन तवानघ ॥ ३८ ॥ ॥ अग्निरुवाच ॥ ॥ ज्ञातं भगवता सर्वं यदर्थमहमागतः ॥ तथापि कथयाम्येतदीश्वराज्ञानुपालनम् ॥ ३९ ॥ सर्वभक्षो भवाम्येव निष्कृतिस्तु कथं भवेत् ॥ अत्यन्तभयसंपत्तिरेतस्माज्जायते मम ॥ ४० ॥ ॥ श्रीनारायण उवाच ॥ ॥ क्षेत्रदर्शनमात्रेण प्राणिनां नास्ति पातकम् ॥ मत्प्रसादात्पातकं तु त्वयि मास्तु कदाचन ॥ ४१ ॥ ततः प्रभृति भूतात्मा पावकः सर्वतो भृशम् ॥ कलयावस्थितश्चात्र सर्वदोषविवर्जितः ॥ ४२ ॥ य एतत्प्रातरुत्थाय शृणोति श्रावयेच्छुचिः ॥ अग्नितीर्थकृतस्नानं फलं प्राप्नोत्यसंशयम् ॥ ४३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे श्रीबदरिकाश्रममाहात्म्येऽग्निकृतभगवत्स्तुतिवर्णनंनाम द्वितीयोऽध्यायः ॥ २ ॥ ॥ स्कन्द उवाच ॥ ॥ भगवन्सर्वभूतेषु सर्वधर्मविशारद ॥ अग्नितीर्थस्य माहात्म्यं कृपया वद मे पितः ॥ १ ॥ ॥ शिव उवाच ॥ ॥ अतिगुह्यतमं तीर्थं सर्वतीर्थनिषेवितम् ॥ संक्षेपात्कथयाम्येतत्तवादरवशादहम् ॥ २ ॥ महापातकिनो ये च अतिपातकिनस्तथा ॥ स्नानमात्रेण शुद्ध्यंति विनायासेन पुत्रक ॥ ३ ॥ प्रायश्चित्तेन यत्पापं न गच्छेन्मरणांतिकम् ॥ स्नानमात्रेण तीर्थस्य पावकस्य विशुद्ध्यति ॥ ४ ॥ अत्यंतमलसंबद्धं यथा शुद्ध्यति हाटकम् ॥ तथाग्नितीर्थमासाद्य देही पापैर्विशुद्ध्यति ॥ ५ ॥ कुशाग्रेणोदबिंदुं च पीत्वा वर्षत्रयं नरः ॥ अन्यक्षेत्रे तपः कृत्वा तदत्र स्नानमात्रतः ॥ ६ ॥ ब्राह्मणान्भोजयित्वास्मिन्यथाविभवसंभवैः ॥ दरिद्रता कुले तेषां न कदाचित्प्रजायते ॥ ७ ॥ उपवासेन यः प्राणान्वह्नितीर्थे त्यजेन्नरः ॥ स भित्त्वा सूर्यलोकादीन्विष्णुलोकं प्रपद्यते ॥८॥ चांद्रायणसहस्रैस्तु

१ रजोपयुक्तम्—रजसा रजोगुणेन उपयुक्तं युक्तम्। सन्धिस्त्वार्षः।

Nepal Sanskrit University, Beljhundi Campus, Dang

CC-0. In Public Domain. Digitization by eGangotri

कृच्छ्रैः कोटिभिरेव च ॥ यत्फलं लभते मर्त्यस्तत्स्नानाद्वह्नितीर्थतः ॥ ९ ॥ पंचधा ये प्रकुर्वंति पापमस्मिन्षडानन ॥ जपेन पवनायामैर्विशुद्धिरिति मे मतिः ॥ १० ॥ ज्ञानेन मोहवशतः पापं कुर्वन्ति येऽधमाः ॥ पैशाचीं योनिमायांति यावदिंद्राश्चतुर्दश ॥ ११ ॥ अनाश्रमी चाश्रमी वा यावद्देहस्य धारणम् ॥ न तीर्थे पावके कुर्यात्पातकं बुद्धिपूर्वकम् ॥ १२ ॥ स्नानं दानं जपो होमः संध्या देवार्चनं तथा ॥ अत्रानंतगुणं प्रोक्तमन्यतीर्थात्षडानन ॥ १३ ॥ बहूनि संति तीर्थानि पावनानि महांत्यपि ॥ वह्नितीर्थसमं तीर्थं न भूतं न भविष्यति ॥ १४ ॥ न ब्रह्मा न शिवः शेषो न देवा न च तापसाः ॥ शक्नुवंति फलं नालं वक्तुं पावकतीर्थजम् ॥१५॥ किं तेषां बहुभिर्यज्ञैः किं दानैर्नियमैर्यमैः॥ येषां पावकतीर्थेऽस्मिन्स्नानं दशदिनं भवेत् ॥ १६ ॥ उपवासेन यः प्राणान्वह्नितीर्थे जयेन्नरः ॥ उपवासत्रयं कृत्वा पूजयित्वा जनार्दनम् ॥ नरः पावकतीर्थेऽस्मिन्स भवेत्पावकोपमः ॥ १७ ॥ शिलापंचकमध्यस्थं सान्निध्यं नित्यदा हरेः ॥ तत्रैव पावकं तीर्थं सर्वपापप्रणाशनम् ॥ १८ ॥ ॥ स्कंद उवाच ॥ ॥ कथं तत्र शिलाः पंच केन वा तत्र निर्मिताः ॥ किं पुण्यं किं फलं तासां वक्तुमर्हस्यशेषतः ॥ १९ ॥ ॥ शिव उवाच ॥ ॥ नारदी नारसिंही च वाराही गारुडी तथा ॥ मार्कंडेयीति विख्याताः शिलाः सर्वार्थसिद्धिदाः ॥ २० ॥ नारदो भगवांस्तेपे तपः परमदारुणम् ॥ दर्शनार्थं महाविष्णोः शिलायां वायुभोजनः ॥ २१ ॥षष्टिवर्षसहस्राणि शिलायां वृक्षवृत्तिमान् ॥ तदासौ भगवान्विष्णुस्तत्र ब्राह्मणरूपधृक् ॥ २२ ॥ जगाम पुरतस्तस्य कृपया मुनिसत्तमम् ॥ उवाच वचनं चारु किमिति क्लिश्यते ह्यृषे ॥ किं वा तवेप्सितं ब्रूहि तपसा क्षीणकल्मष ॥ २३ ॥ ॥ नारद उवाच ॥ ॥ को भवान्विजनेऽरण्ये ममानुग्रहतत्परः ॥ मनः प्रसन्नतामेति दर्शनात्ते द्विजोत्तम ॥ २४ ॥ इत्युक्तो नारदेनासौ शंखचक्रगदाधरः ॥ पीतांबरलसत्पद्मवनमालाविभूषणः ॥ २५ ॥ श्रीवत्सकौस्तुभभ्राजत्कमलाविमलालयः ॥ सुनंदनप्रमुख्यैः स स्तूयमानो जनार्दनः ॥ २६ ॥ दर्शयामास रूपं स्वं नारदाय कृपार्दितः ॥ तं दृष्ट्वा सहसोत्थाय ततुं प्राण इवागतः ॥ २७ ॥ कृतांजलिपुटो भूत्वा नमस्कृत्य पुनः पुनः ॥ तुष्टाव प्रणतो भूत्वा जगतामीश्वरेश्वरम् ॥ २८ ॥ ॥ नारद उवाच ॥ ॥ यः सर्वसाक्षी जगतामधीश्वरो भक्तेच्छया जातशरीरसंपदः ॥ कृपामहांभोनिधिराश्रितानां प्रसीदतां पावनदिव्यमूर्तिः ॥ २९ ॥ हिताय लोकस्य सतां पुनर्मनःसुतोषणायाचिरमुत्कलादिभिः ॥ प्रसन्नलीलाहसितावलोकनः प्रसीदतां सत्त्वनिकायमूर्तिमान् ॥ ३० ॥ कंदर्प्पलावण्यविलाससुंदरः प्रसन्नगंभीरगिरेंदिरोत्सवः ॥ स्वमाश्रितानां वरकल्पपादपः प्रसीदतां दीनदयार्द्रमानसः ॥ ३१ ॥ यदंघ्रिपद्मार्चननिर्मलांतरा ज्ञानासिना शातितबंधहेतवः ॥ विंदंति यद्ब्रह्मसुखं गतक्लमाः प्रसीदतां दीनदयार्द्रमानसः ॥३२॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संसारवारांनिधिबद्धसेतुर्यः सृष्टिपालांतविधानहेतुः ॥ उपांतनामा गुणलब्धमूर्तिः प्रसीदतां ब्रह्मसुखानुभूतिः ॥ ३३ ॥ य इंद्रियाधिष्ठि तभूतसूक्ष्माद्रिकासहेतुर्द्युतिमद्वरिष्ठः ॥ जीवात्मतां गच्छति मायया स्वया स एक ईशो भगवान्प्रसीदताम् ॥ ३४ ॥ स्वदृग्गुणैर्येन विलिप्यते महान्गुणाश्रयं येन च पाञ्चभौतिकम् ॥ एकोऽपि नानागुणसंप्रयुक्तः प्रसीदतां दीनदयालुवर्यः ॥ ३५ ॥ यस्यानुवर्तिनो देवा विपदां पदमंबुधिम् ॥ कृत्वा वत्सपदं स्वर्गे निरातंका वसंति हि ॥३६॥ नमस्ते वासुदेवाय नमः संकर्षणाय च ॥ प्रद्युम्नायानिरुद्धाय सर्वभूतात्मने नमः ॥ ३७ ॥ अद्य मे जीवितं धन्यमद्य मे सफलं तपः ॥ अद्य मे सफलं ज्ञानं दर्शनात्ते जनार्दन ॥ ३८ ॥ ॥ श्रीभगवानुवाच ॥ ॥ तुष्टोऽहं तपसानेन स्तोत्रेण तव नारद ॥ त्वत्तो भक्तो न मे कश्चित्त्रिषु लोकेषु विद्यते ॥ ३९ ॥ वरं वरय भद्रं ते वरदोऽहं तवाग्रतः ॥ मद्दर्शनात्ते कामः स्यात्संसिद्धो विद्धि नारद ॥ ४० ॥ ॥ नारद उवाच ॥ ॥ वरदो यदि मे देव वरार्हो यदि वाप्यहम् ॥ भक्तिं तव पदांभोजे निश्चलां देहि मे विभो ॥ ४१ ॥ मच्छि लासन्निधानं च न त्याज्यं ते कदाचन ॥ मत्तीर्थदर्शनात्स्पर्शात्स्नानादाचमनात्तथा ॥ देहैर्न युज्यते देयस्तृतीयस्तु वरो मम ॥ ४२ ॥ ॥ श्रीभ गवानुवाच॥ ॥ एवमस्तु तव स्नेहात्तव तीर्थे वसाम्यहम् ॥ चराचराणां जंतूनां विदेहाय न संशयः ॥ ४३ ॥ एवमुक्त्वा हरिः साक्षात्तत्रैवांतरधीयत ॥ नारदोऽपि महातेजा दिनानि कतिचित्सह ॥ बदरीमावसन्हृष्टो ययौ मधुपुरीं ततः ॥ ४४ ॥ ॥ स्कंद उवाच ॥ ॥ मार्कंडेयशिलायास्तु महि मानं वदस्व मे ॥ किं पुण्यं किं फलं तस्याः संज्ञा च तादृशी कथम् ॥४५॥ ॥शिव उवाच ॥ ॥ पुरा त्रेतायुगस्यांते मृकंडुतनयो महान् ॥ स्वल्पा युषं निजं ज्ञात्वा जजाप परमं जपम् ॥ ४६ ॥ द्वादशाक्षरमंत्रेण पूजितो हरिरव्ययः ॥ सप्तकल्पायुषं ज्ञात्वा तत्रैवांतरतो ययौ ॥ ४७ ॥ मार्कंडेय स्ततः श्रुत्वा तीर्थाटनपरिश्रमम् ॥ दर्शनं नारदस्यासीन्मथुरायां षडानन ॥ ४८ ॥ पूजितो वंदितस्तेन नारदो मुनिसत्तमः ॥ कथयामास माहा त्म्यं बदर्यां यत्र केशवः ॥ ४९ ॥ ॥ नारद उवाच ॥ ॥ किमिति क्लिश्यते साधो तीर्थाटनपरिश्रमैः ॥ बदर्याख्यं महाक्षेत्रं सान्निध्यं नित्यदा हरेः ॥ ५० ॥ तत्र याहि यत्र साक्षाद्धरिं पश्यसि चक्षुषा ॥ तच्छ्रुत्वा विस्मयोपेतो विशालामाययावृषिः ॥ ५१ ॥ स्नात्वा शिलामुपविशञ्ज जापाष्टाक्षरं परम् ॥ ततः प्रसन्नो भगवाँस्त्रिरात्र्यंते जनार्दनः ॥ ५२ ॥ शंखचक्रगदापद्मवनमालाविभूषणम् ॥ तं दृष्ट्वा सहसोत्थाय प्रेमगद्गदया गिरा ॥ तुष्टाव प्रणतो भूत्वा मार्कंडेयो जनार्दनम् ॥ ५३ ॥ ॥ मार्कंडेय उवाच ॥ ॥ अशाश्वते च संसारे सारे ते चरणांबुजे ॥ समुद्धारः कथं नृणां त्राहि मां परमेश्वर ॥५४॥ तापत्रयपरिश्रांतमनेकाज्ञानजृंभितम् ॥ संसारकुहरे भ्रांतं त्राहि मां कृपयाऽच्युत ॥ ५५ ॥ अनेकयोनियंत्रेषु निःसृते

CC-0. In Public Domain. Digitization by eGangotri

स्तनुवेदनाम् ॥ गर्भवासकृतां प्राप्तं त्राहि मां करुणांबुधे ॥५६॥ कृमिभक्षितसर्वांगं क्षुत्पिपासाकुलं च हि ॥ आंत्रमालाकुले गर्भे त्राहि मां मधुसूदन ॥ ५७॥ अमेध्यादिभिरालिप्तं निश्चेष्टश्रममाकुलम् ॥ स्मरंतं निजकर्मोत्थं त्राहि मां मधुसूदन ॥ ५८ वचनादाननिःश्वासाशक्तं भयमुपागतम्॥ गर्भवासमहादुःखं त्राहि मां मधुसूदन ॥ ५९ ॥ जरामरणबाल्यादिदुःखसंसारपीडितम् ॥ दुःखाब्धौ सुखबुद्धिं मां कृपासिंधो प्रपालय ॥ ६० ॥ कदाचित्कृमितां प्राप्तं कदाचित्स्वेदजन्मिताम्॥कदाचिदुद्भिज्जत्वं च कदाचिन्नरतां गतम् ॥६१॥ सर्वयोनिसमापन्नं विपन्नं विगतप्रभम्॥ अनाथं त्वां समापन्नं त्राहि मां कृपयाऽच्युत॥६२॥एवं स्तुतस्ततः कृष्णो मार्कंडेयेन धीमता ॥ प्रीतस्तमाह विप्रर्षे वरं मे व्रियतामिति ॥६३॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ यदि तुष्टो भवान्मह्यं भगवन्दीनवत्सल ॥ निश्चलां देहि मे भक्तिं पूजायां दर्शने तव ॥ शिलायां तव सान्निध्यमेष एव वरो मम ॥ ६४ ॥ ॥ सूत उवाच ॥ ॥ तथेत्युक्त्वा महाविष्णुर्ययावंतर्हितं द्विज ॥ मार्कंडेयस्ततस्तुष्टो जगाम पितुराश्रमम् ॥ ६५ ॥ उपस्थानमिदं पुण्यं सर्वपापप्रणाशनम् ॥ शृणुयाच्छ्रावयेन्मर्त्यो गोविन्दे लभते गतिम् ॥ ६६ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे शिवकार्त्तिकेयसंवादे अग्नितीर्थनारदशिलामार्कण्डेयशिलामाहात्म्यवर्णनंनाम तृतीयोऽध्यायः ॥ ३ ॥ ॥ स्कन्द उवाच ॥ वैनतेयशिलायास्तु माहात्म्यं वद मे पितः ॥ किं पुण्यं किं फलं चास्य अनुभावं च किं भवेत् ॥ १ ॥ ॥ शिव उवाच ॥ ॥ कश्यपाद्विनतागर्भे महाबलपराक्रमौ ॥ गरुडारुणौ प्रजातौ द्वावरुणः सूर्यसारथिः ॥ २ ॥ बदर्य्यां दक्षिणे भागे गन्धमादनशृङ्गके ॥ गरुडस्तप आतेपे हरिवाहनकाम्यया ॥ ३ ॥ फलमूलजलाहारो निर्द्वंद्वो जपतांवरः ॥ पदैकेनोपसंक्रम्य भुवि जेपे निरामयः ॥ ४ ॥ त्रिंशद्वर्षसहस्राणि हरिदर्शनलालसः ॥ ततस्तु भगवान्साक्षात्पीतवासा निजायुधः ॥ ५ ॥ आविरासीद्यथा प्राच्यां दिशींदुरिव पुष्कलः ॥ उवाच वचनं सम्यङ्मेघगंभीरनिस्वनः ॥ ६ ॥ तथापि न बहिर्वृत्तिर्दध्मौ दरवरं ततः ॥ तथापि न बहिर्वृत्तिर्गरुडस्य महात्मनः ॥ ७ ॥ ततः प्रविश्य भगवानंतरं पवनक्रमात् ॥ बहिरुन्मुखतां चैव रचयन्बहिराबभौ ॥ ८ ॥ भगवंतं हरिं दृष्ट्वा गरुडो गतसाध्वसः ॥ पुलकांकितसर्वांगस्तुष्टाव विहितांजलिः ॥ ९ ॥ ॥ गरुड उवाच ॥ ॥ जयजय त्रिभुवनजनमनोभवन विदलिताघगुण सकलगीर्वाणवंदितचरणकमलयुगलपरिमलबहलरिपुवनविभंजन विद्योतमान सकलसुरासुरमुकुटकोटिविलसितनिजपीठकमल निरसितनिजजनहृदयतिमिरपटलबहल हिमकर इव त्रिविधसंतापसंदोहहरणचरण जग

१ अनुभावम्–प्रभावः । क्लैव्यमार्षम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दुदयस्थितिलयविलासविलसितत्रिविधमूर्तिकीर्तिविस्फूर्जितजगदुदयसंदोह दिनकर इव निजजनमानससरोजषट्पदविदितसकलवेदविद्योतमान मानस निजजनमुनिजनवन्दितपदनखनीरपवित्रीकृतगीर्वाणमुनिमानसवंदितचरणरजःप्रसादसारभूत जगतामधीश नमस्ते नमस्ते ॥ ॥ १० ॥ अपि च ॥ अष्टशक्तिसहितो वनमाली पीतचैलकुसुमावलिशोभः ॥ पंकजाकरविराजितपादः पातु मामवहितेन्द्रियवर्गः ॥ ११ ॥ भक्त हृत्कमलराजितमूर्तिर्दुष्टदैत्यदलनोत्थितकीर्तिः ॥ बद्धसेतुरविताश्रितलोकः पातु मामनुदिनं भुवनेशः ॥ १२ ॥ स्थिरचलत्रिविधतापहिमांशुर्भासमानतरणिप्रतिभासः ॥ एक एव बहुधा कृतवेषो माययावतु महामतिरीशः ॥ १३ ॥ भक्तचिंतनकृते कृतरूपः शैशवेन बहुशासितभूपः ॥ वेदमार्ग उरुधा हितकारी रीतिरीशितुरियं गुणशाली ॥ १४ ॥ यज्ञभुग्धृदयबंधनधारी विश्वमूर्तिरबलांशुकहारी ॥ पालनेऽपि महतां बहुदेहो रास एष तनुमानवतान्नः ॥१५॥ प्रेमभक्तिपुरुषैरुपलभ्यः पूरुषः कृतसमस्तनिवासः ॥ दास्यवृंदहृषितो निजदासः प्रेक्षणैककरुणोवतु विश्वम् ॥ १६ ॥ कंठलंबिततरक्षुनखाग्रकृष्टगोपरमणीकुचभारः॥ लीलया युवतिभिः कृतवेषः शेष एष भवतादुपशांत्यै॥१७॥दंडपाणिरयमेव जनानां शासितात्मनियमोक्तहितानाम्॥ पावनाय महतामनुशाली विश्वदुःखशमनो भवतान्नः ॥१८॥ एवं स्तुतस्ततः साक्षाद्गरुडेन महात्मना ॥ पूजार्थमाजुहावैनां गंगां त्रिपथगामिनीम् ॥१९॥ ततः पंचमुखी साक्षादाविरासीन्नगोपरि ॥ तेनोदकेन पादार्घं चकार विनतासुतः ॥२०॥ व्रियतां वर इत्युक्तो गरुडो हरिणा ततः ॥ तवैकवाहनः श्रीमान्बलवीर्यपराक्रमः ॥ अजेयो देवदैत्यानां स्यामहं ते प्रसादतः ॥ २१ ॥ इयं मन्नामविख्याता सर्वपापहरा शिला ॥ एतस्याः स्मरणात्पुंसां विषव्याधिर्न जायताम् ॥२२॥ एवमुक्त्वा ततस्तूष्णीं बभूव विनतासुतः ॥ ओमित्युक्त्वा ततो विष्णुरुवाचेदं वचो हितम् ॥२३॥ बदरीं त्वं प्रयाहीति नारदेन निषेविताम् ॥ स्नानं नारदतीर्थादावुपवासत्रयं शुचिः ॥ कृत्वा मद्दर्शनं तत्र सुलभं ते भविष्यति ॥ २४ ॥ इत्युक्त्वांतर्दधे विष्णुस्तडित्सौदामनी यथा ॥ गरुडस्तु ततः शीघ्रमागत्य बदरीं मुदा ॥ २५ ॥ वह्नितीर्थं समासाद्य शिलामाश्रित्य तत्परः ॥ स्नात्वा नारदतीर्थेषु व्रतचर्यामथाकरोत् ॥ २६ ॥ ततस्तु नारदे तीर्थे दृष्ट्वा भगवतः स्थितिम् ॥ नमस्कृत्य विधानेन तदाज्ञातः पुरं ययौ ॥ २७ ॥ ततः प्रभृति त्रैलोक्ये गारुडीति शिलोच्यते ॥ २८ ॥ ॥ स्कंद उवाच ॥ ॥ वाराह्या वद माहात्म्यं कीदृशं हीश्वरेश्वर ॥ किं पुण्यं किं फलं तस्या अभिधानं तथा कथम् ॥ २९ ॥ ॥ शिव उवाच ॥ ॥ रसातलात्समुद्धृत्य महीं दैवतवैरिणम् ॥ हिरण्याक्षं रणे हत्वा बदरीं समुपागतः ॥ ३० ॥ आकल्पांतं महादेवो योगधारणया स्थितः ॥ बदर्याः सौष्ठवादेव विदधे स्थितिमात्मनः ॥ ३१ ॥ शिलारूपेण भगवान्स्थितिं तत्र चकार ह ॥ तत्र गत्वा तु मनुजः

CC-0. In Public Domain. Digitization by eGangotri

स्नात्वा गंगाजलेऽमले ॥ ३२ ॥ दानं दत्त्वा स्वशक्त्या वै गंगांभःशांतमानसः ॥ अहोरात्रे स्थितो भूत्वा जपेदेकाग्रमानसः ॥ ३३ ॥ शिलायां देवदृष्टिश्च तस्य पुंसः प्रजायते ॥ बहुना किमिहोक्तेन यद्वदिष्यति साधकः ॥ ३४ ॥ तत्तस्य सिध्यति क्षिप्रं यद्यपि स्यात्सुदुष्करम् ॥ ३५ ॥ ॥ ॥ स्कंदउवाच ॥ ॥ नारसिंही शिलायास्तु माहात्म्यं वद मे प्रभो ॥ त्वत्प्रसादान्महादेव दुर्लभं श्रुतवानहम् ॥३६॥ ॥ शिव उवाच ॥ ॥ हिरण्यकशिपुं हत्वा नखाग्रेणैव लीलया ॥ क्रोधाग्निना प्रदीप्तांगः प्रलयानलसन्निभः ॥ ३७ ॥ तदा देवैः समागत्य स्थित्वा दूरे दयालुभिः ॥ स्तुतोऽसौ भगवान्देवो लीलया धृतविग्रहः ॥ ३८ ॥ तदा प्रसन्नो हरिरुग्रविक्रमः स्वतेजसा व्याप्तसुरासुरोत्तमः ॥ उवाच मत्तो वरमाँवृणीध्वं गीर्वाणनिर्वाणसुखैकहेतुम् ॥ ३९ ॥ तदा सुराणामधिपः स्वयंभूरुवाच वाक्यं स्मितशोभिताननः ॥ रूपं तवात्युग्रमशेषदेहिनां भयावहं संहर नारसिंह ॥ ४० ॥ अनेकधैतद्द्विधिवद्विधाय निधाय शैलादिषु दिव्यमूर्तिम् ॥ उवाच किं वः प्रकरोमि कृत्यमहं प्रसन्नस्त्रिदशाः परंतपाः ॥ ४१ ॥ ततोमरा ऊचुरनेन चैव रूपेण संक्षोभितविश्वमूर्ते ॥ प्रशांतमंतःसुखहेतुबंधि चतुर्भुजत्वं वरमीप्सितं नः ॥ ४२ ॥ ततो हरिर्वीक्ष्य निरीक्षणेन दिव्येन विश्वं प्रययौ विशालाम् ॥ गंगाजले क्रीडति विष्टचेताः सुरासुरेभ्यो भगवानुवाच ॥ ४३ ॥ ततोऽमराः शांतभया अथैनं निरीक्ष्य देवं जलमध्यसंस्थम् ॥ नत्वा परिक्रम्य तदा समाययुर्निरूढभावाः स्वपुरं ततः क्रमात् ॥ ४४ ॥ ततः समस्ता ऋषयस्तपोधनाः समाययुर्भक्तिभरावनम्राः ॥ नृसिंहमत्यद्भुतविक्रमं हरिं समीडिरे बद्धकरा वचोभिः ॥ ४५ ॥ ॥ ऋषय ऊचुः ॥ ॥ नमोनमस्ते जगतामधीश विश्वेश विश्वाभय विश्वमूर्ते ॥ कृपांबुराशे भजनीयतीर्थपादांबुज श्रीश दयां विधेहि ॥ ४६ ॥ एकोऽसि नाना निजमायया स्वया घटे पयो यद्वदुपाधिभिन्नम् ॥ भक्तेच्छयोपात्तविचित्रविग्रह प्रसीद विश्वानन विश्वभावन ॥ ४७ ॥ ततः प्रसन्नो भगवान्नृसिंहः सिंहविक्रमः ॥ उवाच वचनं चारु वरं मे व्रियतामिति ॥ ४८ ॥ ॥ ऋषय ऊचुः ॥ ॥ यदि प्रसन्नो भगवन्कृपया जगतां पते ॥ विशाला न परित्याज्या वरोऽस्माकमभीप्सितः ॥ ४९ ॥ एवमस्तु ततः सर्वे स्वाश्रमं ह्यृषयो ययुः ॥ नृसिंहोऽपि शिलारूपी जलक्रीडापरोऽभवत् ॥ ५० ॥ उपवासत्रयं कृत्वा जपध्यानपरायणः ॥ नृसिंहरूपिणं साक्षात्पश्यत्येव न संशयः ॥ ५१ ॥ य एतच्छ्रद्धया मर्त्यः शृणोति श्रावयन्छुचिः ॥ सर्वपापविनिर्मुक्तो वैकुंठे वसतिं लभेत् ॥५२॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे बदरिकाश्रममाहात्म्ये शिवकार्त्तिकेयसंवादे गरुडशिलावाराहीशिलानारसिंहीशिलामाहात्म्यवर्णनंनाम चतुर्थोऽध्यायः ॥ ४ ॥ ॥ स्कंद उवाच ॥ ॥ किमर्थं भगवांस्तत्र वसति श्रद्धया पुनः ॥ किं पुण्यं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

किं फलं तस्य दर्शनस्पर्शनादिभिः ॥ १ ॥ नैवेद्यभक्षणं चापि महापूजाकृतेस्तथा ॥ प्रदक्षिणस्य च फलं ब्रूहि मे कृपया पितः ॥ २ ॥ ॥ शिव उवाच ॥ ॥ पुरा कृतयुगस्यादौ सर्वभूतहिताय च ॥ मूर्तिमान्भगवांस्तत्र तपोयोगसमाश्रितः ॥ ३ ॥ त्रेतायुगे ह्यृषिगणैर्योगाभ्यासैकतत्परः ॥ द्वापरे समनुप्राप्ते ज्ञाननिष्ठो हि दुर्लभः ॥ ४ ॥ ऋषीणां देवतानां च दुर्दर्शो भगवानभूत् ॥ ततो ह्यृषिगणा देवा अलभ्य भगवद्गतिम् ॥ ५ ॥ स्वायंभुवं पदं याता विस्मयाकुलचेतसः ॥ तत्र गत्वा नमस्कृत्य ऊचुर्लोकेश्वरं मुदा ॥ बृहस्पतिं पुरस्कृत्य ऋषयश्च तपोधनाः ॥ ६ ॥ ॥ देवा ऊचुः ॥ ॥ नमस्ते सर्वलोकानामाश्रयः शरणार्तिहा ॥ वृत्तिदः करुणापूर्णः पितामह सुरेश्वर ॥ निवेदनीया विपदः समुद्धर्ता पितासि नः ॥ ७ ॥ ॥ ब्रह्मोवाच ॥ ॥ किमर्थमागता यूयं विस्मयाकुलमानसाः ॥ मिलिता ऋषिभिः साकं ब्रूतागमनकारणम् ॥ ८ ॥ ॥ देवा ऊचुः ॥ ॥ द्वापरे समनुप्राप्ते विशालायां विशालधीः ॥ भगवान्दृश्यते नैव तत्र किं कारणं वद ॥ ९ ॥ विशाला किं परित्यक्ता ततो वा क्व गतः स्वयम् ॥ अपराधादुतास्माकं कथं चासौ प्रसीदति ॥ १० ॥ ॥ ब्रह्मोवाच ॥ ॥ नाहमेतद्विजानामि श्रुतं चाद्य मुखाद्धि वः ॥ को हेतुर्दृक्पथातीतो भगवान्भवतां सुराः ॥ आगच्छत वयं यामस्तीरं क्षीरपयोनिधेः ॥ ११ ॥ इत्युक्तास्ते पुरोधाय ब्रह्माणं त्रिदिवौकसः ॥ ययुः क्षीरांबुधेस्तीरमृषयश्च तपोधनाः ॥ १२ ॥ तत्र गत्वा जगन्नाथं देवदेवं वृषाकपिम् ॥ गीर्भिश्चित्रपदार्थाभिस्तुष्टुवुर्जगदीश्वरम् ॥ १३ ॥ ॥ ब्रह्मोवाच ॥ ॥ नमस्ते पुरुषाध्यक्ष सर्वभूतगुहाशय ॥ वासुदेवाखिलाधार जगद्धेतो जगन्मय ॥ १४ ॥ त्वमेव सर्वभूतानां हेतुः पतिरुताश्रयः ॥ मायाशक्तिमुपाश्रित्य विचरस्येकसुन्दर ॥ १५ ॥ एको नानायते योऽसौ नटवज्जायतेऽव्ययः ॥ व्यापकोऽपि कृपालुत्वाद्भक्तहृत्पद्मषट्पदः ॥ ददाति विविधानंदं तं वंदे जगतां पतिम् ॥ १६ ॥ ॥ ॥ देवा ऊचुः ॥ ॥ विपद्धनांते हुतभुग्जनानां गृहीतसत्त्वस्त्रिदशावनीशः ॥ चराचरात्मा भगवाननंतः कृपाकटाक्षैरवलोकतां नः ॥ १७ ॥ सकृद्यन्नामपीयूषरसपानपरः पुमान् ॥ निःश्रेयसं तृणमिव मन्यते तं हरिं भजे ॥ १८ ॥ अविद्याप्रतिबिंबत्वाज्जीवभावमुपागतः ॥ विज्ञत्वादुपशांतात्मा स पुनातु जगत्त्रयम् ॥ १९ ॥ ॥ गंधर्वा ऊचुः ॥ ॥ पिबंति ये हरेः पदांबुसंगलेशतः पयः पयो न ते पुनःपुनः पिबंति मातुरंकतः ॥ प्रसंगतो यदाभिधासुधां निपीय मानवा मृताऽमृतं[1] व्रजंत्यधो न जातु यांत्यशंकिताः ॥ २० ॥ ततः स्तुतो हरिः साक्षात्सिंधोरुत्थाय चाब्रवीत् ॥ अलक्षितोऽपरैर्ब्रह्मा परं तद्वेद नापरः ॥ २१ ॥ ब्रह्मा तदुपधार्याथ नत्वा तस्मै दिवौकसः ॥ बोधयामास सकलं सुराः शृणुत सादरम् ॥ २२ ॥ अंतर्हितोऽसौ

१ मृताः अमृतम्-इति पदच्छेदः। आर्षः सन्धिः ।

CC-0. In Public Domain. Digitization by eGangotri

भगवान्दृष्ट्वा लोकान्कुमेधसः ॥ श्रुत्वेत्थं वचनं तस्य सर्वे देवा दिवं ययुः ॥२३॥ ततोऽहं यतिरूपेण तीर्थान्नारदसंज्ञकात् ॥ उद्धृत्य स्थापयिष्यामि हरिं लोकहितेच्छया ॥ २४ ॥ यस्य दर्शनमात्रेण पातकानि महान्त्यपि ॥ विलीयंते क्षणादेव सिंहं दृष्ट्वा मृगा इव ॥ २५ ॥ धर्माधर्मान्विजित्याथ बदरीशं विभुं हरिम् ॥ दृष्ट्वा मुक्तिमुपायांति विनाऽऽयासं षडानन ॥ २६ ॥ त्यक्तप्रायाणि तीर्थानि हरिणा कलिकालतः ॥ बदरीं समनुप्राप्य साक्षादेवावतिष्ठते ॥ २७ ॥ कलिकालमनुप्राप्य मुक्तिर्येषामभीप्सिता ॥ द्रष्टव्या बदरी तैस्तु हित्वा तीर्थान्यशेषतः ॥ २८ ॥ विना ज्ञानेन योगेन तीर्थाटनपरिश्रमैः ॥ एकेन जन्मना जंतुः कैवल्यं पदमश्नुते ॥ २९ ॥ जन्मांतरसहस्रैस्तु येन चाराधितो हरिः ॥ स गच्छेद्बदरीं द्रष्टुं यत्र जंतुर्न शोचति ॥ ३० ॥ बदरीबदरीत्युक्त्वा प्रसंगान्मनुजोत्तमः ॥ संसारतिमिराबाधे दीपमुज्ज्वालयत्यसौ ॥ ३१ ॥ यथा दीपावलोकेन तमोबाधा न जायते ॥ तथैव बदरीं दृष्ट्वा पुंसो मृत्युभयं कुतः ॥३२॥ दर्शनाद्यस्य पापानि रुदंत्यव्याहतानि च ॥ मुक्तिमार्गमुपालक्ष्य तं वंदे बदरीपतिम् ॥ ॥३३॥ सशैलकानना भूमिर्दशधा दक्षिणीकृता ॥ हरेः प्रदक्षिणं तद्वद्बदर्यां तत्पदेपदे ॥ ३४ ॥ अश्वमेधे तु यत्पुण्यं वाजपेयशतेन च ॥ हरेः प्रदक्षिणात्तद्वद्बदर्यां तत्पदेपदे ॥ ३५ ॥ चतुर्मासे तु यत्पुण्यं ब्रह्मांडदानतस्तथा ॥ हरेः प्रदक्षिणं तद्वद्बदर्यां तत्पदेपदे ॥ ३६ ॥ अतिकृच्छ्रैर्महाकृच्छ्रैश्चांद्रसैः सुकृतं भवेत् ॥ हरेः प्रदक्षिणं तद्वद्बदर्यां तत्पदेपदे ॥ ३७ ॥ बदर्यां विष्णुनैवेद्यं सिक्थमात्रं षडानन ॥ अशनाच्छोधयेत्पापं तुषाग्निरिव कांचनम् ॥ ३८ ॥ यदन्नं भगवानत्ति ऋषिभिर्नारदादिभिः ॥ तत्सत्त्वशुद्धये सर्वैर्भोक्तव्यमविचारितम् ॥ ३९ ॥ अमरा अपि यन्नूनं व्याजेनेच्छन्ति सर्वतः ॥ भोक्तुं बदरिकां विष्णोर्नैवेद्यं यांति तत्पराः ॥ ४० ॥ भोजनानंतरं विष्णोः प्रगच्छन्ति स्वमालयम् ॥ प्रह्लादप्रमुखा भक्ताः प्रविशंति हरेः पदम् ॥ ४१ ॥ बाल्ययौवनवार्द्धक्ये यत्पापं ज्ञानतः कृतम् ॥ नैवेद्यभक्षणाद्विष्णोर्बदर्यां तद्विलीयते ॥ ४२ ॥ प्राणांतं यस्य पापस्य प्रायश्चित्तं प्रकीर्तितम् ॥ विष्णोर्निवेदितं भुक्त्वा बदर्यां तन्निवर्त्तते ॥४३॥ तीर्थांतरेषु यत्नेन मुक्तिं गच्छति मानवः ॥ नैवेद्यभक्षणाद्विष्णोः सालोक्यं लभते नरः ॥४४॥ हृदि रूपं मुखे नाम नैवेद्यमुदरे हरेः ॥ पादोदकं सनिर्माल्यं मस्तके यस्य सोऽच्युतः ॥४५॥ ब्रह्महत्या सुरापानं स्तेयं गुर्वंगनागमः ॥ नैवेद्यभक्षणाद्विष्णोर्बदर्यां यांति संक्षयम् ॥ ४६ ॥ बदरीसदृशं क्षेत्रं नैवेद्यसदृशं वसु ॥ नारदीयसमं क्षेत्रं न भूतं न भविष्यति ॥४७॥ बदरी यत्नतो गम्या भोक्तव्यं तन्निवेदितम् ॥ द्रष्टव्यो भगवान्वह्नितीर्थे स्नानं सुदुर्लभम् ॥ ४८ ॥ पृथिव्यां यानि तीर्थानि व्रतानि नियमास्तथा ॥

१ अहं शंकरः—इति षडाननं प्रति शंकरोक्तिः । इदमेव यतिरूपं श्रीशंकरेण आद्यजगद्गुरुश्रीशंकराचार्यरूपेण प्रादुष्कृतं बोद्धव्यम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पादोदकं विशालायां पावनं पुरतो भवेत् ॥ ४९ ॥ किं तस्य दानैस्तपसा तीर्थाटनपरिश्रमैः ॥ बदर्यां विष्णुपादोदबिंदुमात्रं लभेद्यदि ॥ ५० ॥ प्रायश्चित्तानि जल्पंति तावदेव षडानन ॥ यावन्न लभ्यते विष्णोर्बदर्यां चरणोदकम् ॥ ५१ ॥ अनायासेन येषां वा इच्छा मुक्तिपथे नृणाम् ॥ कर्त्तव्यं तैः प्रयत्नेन विष्णोर्नैवेद्यभक्षणम् ॥ ५२ ॥ ये नराः प्रतिगृह्णंति पापाः संसारभागिनः ॥ यात्राकृतं फलं तेषां न कदाचित्प्रजायते ॥ ॥ ५३ ॥ नैवेद्यनिंदनाद्विष्णोर्निंद्यंते ते तमोगताः ॥ नैवेद्यभक्षणात्सत्त्वशुद्धिरेव न संशयः ॥ ५४ ॥ नैवेद्यं स्वयमानीय ब्राह्मणान्भोजयंति ये ॥ तुलापुरुषदानेन किं फलं ते कृतार्थिनः ॥ ५५ ॥ कुरुक्षेत्रे समासाद्य राहुग्रस्ते दिवाकरे ॥ महादानेन यत्पुण्यं बदर्य्यां ग्रासमात्रतः ॥ ५६ ॥ बदरीक्षेत्रमासाद्य ग्रासमात्रं प्रयत्नतः ॥ उपायोऽयं महांस्तत्र बदर्यां हरितोषणे ॥ यतिभ्यो भोजनाद्विष्णोरपराध्यपि वल्लभः ॥ ५७ ॥ न विष्णोः सदृशो देवो न विशालासमा पुरी ॥ न भिक्षुसदृशं पात्रमृषितीर्थसमं न हि ॥ ५८ ॥ चातुर्मास्यं प्रकुर्वंति ये नराः पुण्यशालिनः॥ तेषां पुण्यफलं वक्तुं ब्रह्मणापि न शक्यते ॥ ५९ ॥ भिक्षुकाणां फलावाप्तिर्विशेषादिह कीर्त्यते ॥ वेदांतश्रवणात्पुण्यं दशधा यत्प्रकीर्तितम् ॥ ६० ॥ बदरी दृष्टिमात्रेण भिक्षुकाणां तदिष्यते ॥ चातुर्मास्ये विशेषेण कैवल्यफलभागिनः ॥ ६१ ॥ न्यासिनो बदरीस्थाने विनायासेन पुत्रक ॥ ये मूर्खा जाड्यमापन्ना दम्भकाषायवाससः ॥ बदरीदर्शनात्तेषां मुक्तिः करतले स्थिता ॥ ६२ ॥ ज्ञानिनोऽज्ञानिनो वापि न्यासिनो नियत व्रताः ॥ द्रष्टव्या बदरी तैस्तु फलानि समभीप्सुभिः ॥ ६३ ॥ श्रुत्वाऽध्यायमिमं पुण्यं प्रसंगेनापि मानवः ॥ सर्वपापविनिर्मुक्तो विष्णुलोके महीयते ॥ ६४ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे बदरिकाश्रममाहात्म्ये शिवकार्त्तिकेयसंवादे पंचमोऽध्यायः ॥ ५ ॥ ॥ स्कंद उवाच ॥ ॥ कराद्विगलितं यत्र कपालं ते महेश्वर ॥ तस्य तीर्थस्य माहात्म्यं कृपया वद मे पितः ॥ १ ॥ ॥ ॥ शिव उवाच ॥ ॥ अतिगुह्यमिदं तीर्थं सुरासुरनमस्कृतम् ॥ ब्रह्महाऽपि नरो यत्र स्नानमात्रेण शुद्ध्यति ॥ २ ॥ पंच तीर्थानि तिष्ठंति कपाले पापमोचने ॥ तत्र स्नानं तपो दानं सर्वमक्षयमिष्यते ॥ ३ ॥ पिंडं विधाय विधिवन्नरकात्तारयेत्पितॄन् ॥ पितृतीर्थमिदं प्रोक्तं गयातोऽष्टगुणाधिकम् ॥ ४ ॥ तिलतर्प्पणतो यांति पितरः स्वर्गमुत्तमम् ॥ ५ ॥ अहोरात्रं स्थिरो भूत्वा जपनिष्ठः समाहितः ॥ तस्येष्टसिद्धिर्महती तत्क्षणादेव जायते ॥ ६ ॥ पारलौकिककर्माणि सर्वाण्यव्याहतानि च ॥ कपालमोचने तीर्थे नाधिकं पितृकर्मणि ॥ ७ ॥ ॥ स्कंद उवाच ॥ ॥ कुत्र वा

१ ये बदरिकाश्रमं गत्वा तत्र प्रतिग्रहं गृह्णन्ति ते पापाः संसारभागिनः स्युः।

CC-0. In Public Domain. Digitization by eGangotri

ब्रह्मतीर्थं वै फलं वा कीदृशं भवेत् ॥ के वा तत्र वसंतीह कृपया वद मे पितः ॥ ८ ॥ ॥ शिव उवाच ॥ ॥ एकदा विष्णुनाभ्यम्भोरुहस्थस्य प्रजापतेः ॥ वेदान्मुखांबुजाद्धृत्वा जग्मतुर्मधुकैटभौ ॥ ९ ॥ ततो ह्युत्थाय शयनात्सिसृक्षुरब्जसंभवः ॥ स्रष्टुं विनाऽऽगमं लोके न शशाक हतस्मृतिः ॥ १० ॥ तदा बदरिकामेत्य हरिणा प्रतिपालिताम् ॥ तुष्टाव प्रणतो भूत्वा भगवंतं सनातनम् ॥ ११ ॥ ततः कुंडात्समुद्भूतो हयशीर्षो निजायुधः ॥ पीतांबरधरः शुक्लश्चतुर्बाहुः सुदृत्तदृक् ॥ १२ ॥ अत्यद्भुतः प्रकटकठोरलोचनश्चलच्छटाविच्छुरितमेघडंबरः ॥ स्वतेजसा हतनिखिलप्रभाकुलः कृपान्वितो द्रुहिणपुरःसरोऽभवत् ॥ १३ ॥ निरीक्ष्य तं विधिरपि विस्मयाकुलः प्रणम्य च स्तुतिमकरोत्प्रसन्नदृक् ॥ १४ ॥ ॥ ब्रह्मोवाच ॥ ॥ नमः कमलनाभाय नमस्ते कमलाश्रय ॥ नमस्ते कमलावास विशालवनमालिने ॥ १५ ॥ नमो विज्ञानमात्राय गुहावासनिवासिने ॥ हृषीकेशाय शांताय तुभ्यं भगवते नमः ॥ १६ ॥ स्वभक्तरक्षणकृते धृतदेहाय शार्ङ्गिणे ॥ अनंतक्लेशनाशाय गदिने ब्रह्मणे नमः ॥ ॥ १७ ॥ संसारविविधासारनिवृत्तिकृतकर्मणे ॥ रक्षित्रे सर्वजंतूनां विष्णवे जिष्णवे नमः ॥ १८ ॥ नमो विश्वंभराशेषनिवृत्तगुणवृत्तये ॥ सुरासुरवरस्तंभनिवृत्तिस्थितिकीर्तये ॥१९॥ इतीरितः सुरपतिना महेश्वरो हृदि स्थितोऽखिलविदशेषकर्मभिः ॥ ततोऽन्तरं सपदि गतो निबध्य तौ सुरद्रुहौ किल निजघान लीलया ॥ २० ॥ ततो निगममादाय ब्रह्मणोऽतिकमाययौ ॥ दत्त्वा स्वनिगमं तस्मै स्वस्थोऽभूत्स समीडितः ॥ २१ ॥ ततः प्रभृति तत्तीर्थं ब्रह्मणा प्रकटीकृतम् ॥ ब्रह्मकुंडमिति ख्यातं त्रिषु लोकेषु विश्रुतम् ॥ २२ ॥ यस्य दर्शनमात्रेण महापातकिनो जनाः ॥ विमुक्तकिल्बिषाः सद्यो ब्रह्मलोकं व्रजंति ते ॥ २३ ॥ स्नानं कुर्वंति ये लोका व्रतचर्यामथापि वा ॥ ब्रह्मलोकमतिक्रम्य विष्णुलोकं व्रजंति ते ॥ २४ ॥ ॥ स्कंद उवाच ॥ ॥ ततः किमकरोद्धाता लब्ध्वा वेदाञ्जनार्दनात् ॥ एतदन्यच्च सर्वं मे कृपया वद सांप्रतम् ॥ २५ ॥ ॥ महादेव उवाच ॥ ॥ चतुर्णामपि वेदानां दृष्ट्वा बदरिकाश्रमम् ॥ मतिर्न जायते गंतुं ब्रह्मणा सह पुत्रक ॥ २६ ॥ ततस्तु विकलं दृष्ट्वा ब्रह्माणं जनवासिनः ॥ सिद्धास्तु विधिवत्स्तुत्वा प्रणिपत्येदमब्रुवन् ॥ २७ ॥ ॥ सिद्धा ऊचुः ॥ ॥ आज्ञा भगवतः कार्या सर्वैः स्थावरजंगमैः ॥ भगवान्सर्वजंतूनां कर्त्ता हर्ता पिता गुरुः ॥ २८ ॥ स्थितिर्ब्रह्मांतिके वश्च हरिणैवानुकल्पिता ॥ निवृत्तिर्वर्तते चैषा तथाप्येतन्निरामयम् ॥२९॥ एकांते द्रवरूपेण मूर्तिर्वोऽत्रावतिष्ठताम् ॥ द्वितीया ब्रह्मणा सार्द्धं ब्रह्मलोकं व्रजेत्पुनः ॥ ३० ॥ ततः सहृदया वेदा द्वैधीकृतात्मरूपकाः ॥ ब्रह्मणा ब्रह्मलोकं ते ययुः सार्द्धं प्रहर्षिताः ॥ ३१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ततस्त्रिलोकं विधिवत्ससर्ज चतुराननः ॥ द्रवरूपेषु वेदेषु स्नानदानतपःक्रियाः ॥ कृता विच्छेदिता न स्युर्यावदाभूतसंप्लवम्[1] ॥ ३२ ॥ फलमुद्दिश्य कुर्वंति उपवासत्रयं नराः ॥ चतुर्णामपि वेदानां व्याख्यातारो न संशयः ॥ ३३ ॥ अनुक्रमेण तिष्ठंति वेदाश्चत्वार एव च ॥ ऋग्यजुःसामाथर्वाख्या भगवत्पार्श्ववर्तिनः ॥ ३४ ॥ ये पुण्यवंतोऽकलुषा वेदवेदांगपारगाः ॥ ते वेदघोषं विरलाः शृण्वंत्यपि कलौ युगे ॥ ३५ ॥ चतुर्णामपि वेदानामुद्गस्ति सरस्वती ॥ जत्ताथ सा नृणां हंति जडतां जलरूपिणी ॥ ३६ ॥ सरस्वत्या जले स्थित्वा जपं कृत्वा समाहितः ॥ मनोस्तस्य न विच्छेदः कदाचिदपि जायते ॥ ३७ ॥ वेदव्यासोऽपि भगवान्यत्प्रसादादुदारधीः ॥ पुराणसंहितार्थज्ञोऽभवदत्र न संशयः ॥ ३८ ॥ त्रयाणामपि लोकानां हिताय जगतां पतिः ॥ स्थापयामास विधिना वाणीं वाग्विभवप्रदाम् ॥ ३९ ॥ दर्शनस्पर्शनस्नानपूजास्तुत्यभिवन्दनैः ॥ सरस्वत्या न विच्छेदः कुले तस्य कदाचन ॥ ४० ॥ मन्त्रसिद्धिर्विशेषेण सरस्वत्यास्तटे नृणाम् ॥ जपतामचिरेणैव जायते नात्र संशयः ॥४१॥ बहुना किमिहोक्तेन वाणी वाग्विभवप्रदा ॥ द्रवरूपधरा नृणां दर्शनात्पूतिरुज्ज्वला ॥ ४२ ॥ ततोऽर्वाग्दक्षिणे भागे द्रवधारेति विश्रुतम् ॥ तीर्थमिंद्रपदं यत्र तपश्चक्रे पुरंदरः ॥ ४३ ॥ सुदारुणं तपः कृत्वा परितोष्य जनार्दनम् ॥ पदमैंद्रं समालेभे सुरासुरनमस्कृतम् ॥ ४४ ॥ तपो दानं जपो होमो व्रतानि नियमा यमाः ॥ तत्रानन्तगुणं प्रोक्तं तत्तीर्थमतिदुर्लभम् ॥ ४५ ॥ प्रतिमासे त्रयोदश्यां शुक्लायां हरितोषणे ॥ स्नात्वा सुतीर्थे सुत्रामाच्छन्दं चोपेत्य संगतः ॥ ४६ ॥ उपवासद्वयं कृत्वा पूजयित्वा जनार्दनम् ॥ सर्वपापविनिर्मुक्तः शक्रलोके महीयते ॥ ४७ ॥ तत्रैव मानसोद्भेदः सर्वपापप्रणाशनः ॥ दुर्लभः सर्वजंतूनां यत्र ते स्युर्महर्षयः ॥ ४८ ॥ मानसं चिदचिद्ग्रन्थिमुद्ग्रथ्नंति च सर्वतः ॥ मानसोद्भेद इत्याख्या ऋषिभिः परिगीयते ॥ ४९ ॥ भिंदंति हृदयग्रंथींश्छिंदन्ति बहुसंशयम् ॥ कर्माणि क्षपयन्त्यस्मान्मानसोद्भेद इत्यभूत् ॥ ५० ॥ यदि भाग्यवशादत्र बिंदुमात्रं लभेन्नरः ॥ तत्क्षणान्मुक्तिमाप्नोति किमतस्त्वधिकं भवेत् ॥ ५१ ॥ गिरिदरीनिलये निवसंत्यमी ऋषिगणाः फलमूलजलाशनाः ॥ जितमनोविषयाः शितबुद्धयः कलिभयादिव पापभयाकुलाः ॥ ५२ ॥ फलसमीरणगह्वरनिर्झराश्रमभराद्रुपलब्धपटोत्तमाः ॥ त्रिषवणक्रमनिर्जितदुर्जयेन्द्रियपराक्रमणा मुनयस्त्वमी ॥ ५३ ॥ साधनानि बहून्येव कायक्लेशकराण्यहो ॥ सुलभं साधनं लोके मानसोद्भेददर्शनम् ॥ ५४ ॥ यस्मिन्दिने जलं चैतल्लभते पुण्यवान्नरः ॥ भवति व्याससदृशो यमपितृसमः क्रमात् ॥ ५५ ॥ काम्यतीर्थमिदं नृणां कामनावशक्

१ यावदाहूतसंप्लवम्–इ० पा० ।

CC-0. In Public Domain. Digitization by eGangotri

त्पुनः ॥ अकामतस्तु मुक्तिः स्यादुभयोरेष निश्चयः ॥ ५६ ॥ यदि कश्चित्प्रमादेन कामनां कुरुते नरः ॥ फलं भुक्त्वा पुनर्मुक्तिर्भवत्येव न संशयः
॥५७॥ महरादिषु लोकेषु भुक्त्वा भोगान्यथेप्सितान् ॥ भोगे भुक्ते पुनर्याति कामनावशतो जनः ॥५८॥ पुरुषार्थसमावाप्त्यै यतनीयं मनीषिभिः ॥
मानसोद्भेदने तीर्थे नापेत्यत्रेति मे मतिः ॥ ५९ ॥ मानसोद्भेदनात्प्रत्यग्दिशि सर्वमनोहरम् ॥ वसुधारेति विख्यातं तीर्थं त्रैलोक्यदुर्लभम् ॥
॥ ६० ॥ त्रिलोक्यां सर्वतीर्थेभ्यः श्रेष्ठो बदरिकाश्रमः ॥ श्रुत्वा तन्नारदात्सर्वे वसवः समुपागताः ॥ ६१ ॥ त्रिंशद्वर्षसहस्राणि तपः परमदारुणम् ॥
दलांबुप्राशनाश्चक्रुस्ततः सिद्धिमुपाययुः ॥ ६२ ॥ भगवद्दर्शनात्प्राप्तानंदनिर्वृत्तविक्रमाः ॥ हृदयानन्दसंदोहप्रफुल्लितमुखांबुजाः ॥ ६३ ॥ दृष्ट्वा नारा
यणं देवं वरं लब्ध्वा मनोरमम्॥ हरिभक्तिसुखैश्वर्य्यं परं लब्ध्वा मुदं ययुः॥६४॥अत्र स्नात्वा जलं पीत्वा पूजयित्वा जनार्दनम्॥इह लोके सुखं भुक्त्वा
यात्यंते परमं पदम् ॥६५॥ अत्र पुण्यवतां ज्योतिर्दृश्यते जलमध्यतः॥ यद्दृष्ट्वा न पुनर्भूयो गर्भवासं प्रपद्यते ॥ ६६ ॥ येऽशुद्धपितृजाः पापाः पाषंडम
तिवृत्तयः ॥ न तेषां शिरसि प्रायः पतंत्यापः कदाचन ॥ ६७ ॥ दिनत्रयं शुचिर्भूत्वा पूजयित्वा जनार्दनम् ॥ उपोष्य भगवद्भक्त्या सिद्धान्पश्यंति
साधवः ॥६८॥ ये तत्र चपलास्तथ्यं न वदंति च लोलुपाः ॥ परिहासपरद्रव्यपरस्त्रीकपटाग्रहाः ॥६९॥ मलचैलावृताऽशांताऽशुचयस्त्यक्तसत्क्रियाः॥
तेषां मलिनचित्तानां फलमत्र न जायते ॥ ७० ॥ ये तत्र साधकाः शांता विरला विधिवर्त्मगाः ॥ तेषां जपस्तपो होमो दानव्रतजपक्रियाः ॥
॥ ७१ ॥ क्रियमाणा यथाशक्त्या ह्यक्षय्यफलदायकाः ॥ ७२ ॥ यत्किंचिच्छुभकर्माणि क्रियमाणानि देहिनाम् ॥ महदादिफलं दद्युर्निःश्रेयसमनु
त्तमम् ॥ ७३ ॥ श्रावणीयमिह किं फलाधिकं यत्र यांति विबुधाः फलार्थिनः ॥ पूजितादनु हरेः प्रियार्थिनः स्वर्गमार्गनिरताः प्रमोदिनः ॥ ७४ ॥
यत्र संति न च विघ्नकारिणः कर्मणां हरिभयात्सुसिध्यति ॥ निर्विशंति च फलं विवेकिनः कर्ममार्गनिरताः सुदेहिनः ॥ ७५ ॥ ये पठंत्यथ च
पाठयंत्यहो पुण्यतीर्थविषयं प्रकाशितम् ॥ भक्तिभावसमलंकृताश्च ते संप्रयान्ति हरिमंदिरं शुभम् ॥ ७६ ॥ इति श्रीस्कान्दे महापुराण एका
शीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे बदरिकाश्रममाहात्म्ये शिवकार्त्तिकेयसंवादे वसुधारातीर्थमाहात्म्यवर्णनंनाम षष्ठोऽध्यायः ॥ ६ ॥
॥ ॥ शिव उवाच ॥ ॥ ततो नैर्ऋत्यदिग्भागे पंचधाराः पतंत्यधः ॥ प्रभासं पुष्करं चैव गयां नैमिषमेव च ॥ कुरुक्षेत्रं विजानीहि द्रवरूपं षडानन
॥ १ ॥ पुरा ते ब्रह्मणः स्थानं गता मलिनरूपिणः ॥ पापिनां पापदोषेण विकृताः कृतबुद्धयः ॥ २ ॥ तत्र गत्वा नमस्कृत्य ब्रह्माणं लोकभावनम् ॥
ऊचुः प्रांजलयः सर्वे निजागमनकारणम् ॥ ३ ॥ तच्छ्रुत्वा ध्यानमालंब्य प्रहस्य जगदीश्वरः ॥ उवाच वचनं चारु स्मृत्वा बदरीकाश्रमम् ॥ ४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मा भैष्ट गच्छत क्षिप्रं हरेर्बदरिकाश्रमम् ॥ यस्य निर्वेशमात्रेण सद्यः पुण्यं भविष्यति ॥५॥ ततस्ते हर्षवेगेन नमस्कृत्य पितामहम् ॥ जग्मुरुत्फुल्लन यना विशालाममितप्रभाम् ॥ ६ ॥ यस्य निर्वेशमात्रेण तत्क्षणाद्विगतैनसः ॥ ततो द्विरूपमास्थाय स्वस्थानं ययुरुत्सुकाः ॥ ७ ॥ द्रवरूपेण चान्येन पंच तिष्ठंति निर्मलाः ॥ तेषु स्नात्वा विधानेन कृत्वा नित्यक्रियां शुचिः ॥ ८ ॥ तत्तत्तीर्थफलं लब्ध्वा यात्यंते परमं पदम् ॥ पंचोपवास निरतः पूजयित्वा जनार्दनम् ॥ ९ ॥ इह भोगान्बहून्भुक्त्वा हरेः सालोक्यमाप्नुयात् ॥ १० ॥ ततस्तु विमलं तीर्थं सोमकुंडाभिधं परम् ॥ तपश्च कार भगवान्सोमो यत्र कलानिधिः ॥ ११ ॥ ॥ स्कन्द उवाच ॥ ॥ सोमकुण्डस्य माहात्म्यं वद मे वदतां वर ॥ त्वत्प्रसादादहं श्रोतुमिच्छामि परमेश्वर ॥ १२ ॥ ॥ शिव उवाच ॥ ॥ पुरात्रितनयः श्रीमान्सोमः संप्राप्य यौवनम् ॥ श्रुत्वा स्वर्वासिनां सौख्यं गंधर्वेभ्यो मुहुर्मुहुः ॥ तदा स्वपितरं प्रायात्प्रष्टुं तल्लभते कथम् ॥ १३ ॥ ॥ सोम उवाच ॥ ॥ भगवन्सर्वधर्मज्ञ करुणामृतसागर ॥ कथं वा लभ्यते स्वर्गः सर्वे षामुत्तमोत्तमः ॥ १४ ॥ ग्रहनक्षत्रताराणामोषधीनां पतिः प्रभो ॥ स्यामहं येन तं यत्नं कृपया वद मे पितः ॥ १५ ॥ ॥ अत्रिरुवाच ॥ ॥ तपसा राध्य गोविंदं यमैर्वा नियमैः सुत ॥ किं दुर्ल्लभं तु साधूनामिह लोके परत्र च ॥ १६ ॥ ततस्तु नारदाच्छ्रुत्वा क्षेत्रं परमनिर्मलम् ॥ जगाम बदरीं नत्वा पितरं दिशमुत्तराम् ॥ १७ ॥ तत्र गत्वा फलैर्मेध्यैर्विष्णोः पूजामकल्पयत् ॥ जजाप परमं जाप्यमष्टाक्षरं मनोहरम् ॥ १८ ॥ अष्टाशीति सहस्राणि वर्षाणि भगवत्परम् ॥ तपस्तेपेऽतिपरमं सर्वलोकभयावहम् ॥ १९ ॥ ततस्तुष्टः समागत्य भगवान्भक्तवत्सलः ॥ उवाच सोमं विधिवद्वरं वरय सुव्रत ॥२०॥ ततः सोमः समुत्थाय नमस्कृत्य पुनःपुनः ॥ ग्रहनक्षत्रताराणामोषधीनामहं पतिः ॥ द्विजानामपि सर्वेषां भूयासं ते प्रसादतः ॥ २१ ॥ ॥ हरिरुवाच ॥ ॥ वरमन्यं वृणुष्वातो दुर्ल्लभं त्वं भवादृशाम् ॥ वरान्नो वरयामास तदा तं हिमजात्मज ॥ २२ ॥ ततोऽतिविमनाः सोमः पुनस्तेपे तपो महत् ॥ त्रिंशद्वर्षसहस्राणि देवमानेन पुत्रक ॥२३॥ तदासौ करुणापूर्णहृदयो भगवानगात् ॥ वरं वरय भद्रं ते वरदोऽहं तवाग्रतः ॥ सोमस्तु तादृशं वव्रे तच्छ्रुत्वान्तर्दधे हरिः॥२४॥ततोऽतिविमनाः सोमःपुनस्तेपे तपो महत्॥ चत्वारिंशत्सहस्राणि तपस्तप्तं सुदुष्करम्॥२५॥ततस्तुष्टो हरिः साक्षाच्छंखचक्रगदाधरः ॥ उवाच वचनं चारु सोमं श्रांतं तपोनिधिम् ॥२६॥ उत्तिष्ठोत्तिष्ठ भद्रं ते वरं वरय सुव्रत ॥ तपसाराधितो नूनं त्वयाहं तपसां निधिः ॥ २७ ॥ ॥ सोम उवाच ॥ ॥ यदि तुष्टो भवान्मह्यं भगवान्वरदर्षभः ॥ ग्रहनक्षत्रताराणामाधिपत्यं प्रयच्छ मे ॥ तथौषधीनां विप्राणां यामिन्याश्च जगत्पते ॥ २८ ॥ ॥ श्रीभगवानुवाच ॥ ॥ दुर्ल्लभं प्रार्थितं वत्स वितरामि तथाप्यहम् ॥ एवमस्तु ततः सर्वे समागत्य दिवौ

CC-0. In Public Domain. Digitization by eGangotri

कसः ॥ अभिषिक्तवंतो विधिवत्सोमं राजानमादृताः ॥ २९ ॥ ततो विमानमारूढो रथेन शुभ्रवाससा ॥अभिष्टुतः सुरैरभूद्दिवं गतो निशाकरः ॥
॥ ३० ॥ ततः प्रभृति तीर्थं तत्सोमकुंडेति दुर्लभम् ॥ यद्दृष्टिमात्रान्मनुजा गतदोषा भवंति हि ॥ ३१ ॥ यदुपस्पर्शनाद्यांति सोमलोकं विनिं
दिताः ॥ यत्र स्नात्वा विधानेन संतर्प्य पितृदेवताः ॥३२॥ सोमलोकं विनिर्भिद्य विष्णुलोकं प्रपद्यते ॥ उपवासत्रयं कृत्वा पूजयित्वा जनार्दनम् ॥
॥ ३३ ॥ न तेषां पुनरावृत्तिः कल्पकोटिशतैरपि ॥ त्रिरात्रेण स्थितो भूत्वा पूजयित्वा जनार्दनम् ॥ जपं कुर्वन्विशेषेण मंत्रसिद्धिः प्रजायते ॥
॥ ३४ ॥ कर्मणा मनसा वाचा यत्कृतं पातकं नृभिः ॥ तत्सर्वं क्षयमायाति सोमकुंडेक्षणादिह ॥ ३५ ॥ ततस्तु द्वादशादित्यतीर्थं पापहरं परम् ॥
यत्र तप्त्वा पुनः कृच्छ्रं काश्यपः सूर्यतां ययौ ॥ ३६ ॥ दुर्लभं त्रिषु लोकेषु तपःसिद्ध्येककारणम् ॥ रविवारेषु सप्तम्यां संक्रांत्यां विधिवन्नरः ॥
सप्तजन्मकृतात्पापात्स्नानमात्रेण शुद्ध्यति ॥ ३७ ॥ पाराकं विधिवत्कृत्वा पूजनीयो जनार्दनः ॥ सूर्यलोके सुखं भुक्त्वा विष्णुलोके महीयते ॥
॥ ३८ ॥ महारोगाभिभूतस्तु स्नात्वा पीत्वा जलं शुचिः ॥ रोगमुक्तोऽचिरादेव नात्र कार्या विचारणा ॥ ३९ ॥ चतुःस्रोतं परं तीर्थं विलोचनमनो
हरम् ॥ धर्मार्थकाममोक्षास्ते तिष्ठंति द्रवरूपिणः ॥ ४० ॥ हरेराज्ञानुसारेण क्षेत्रेऽस्मिन्वैष्णवे स्वयम् ॥ पुरुषार्था द्रवीभूता भूतानां मुक्तिहेतवः ॥
॥ ४१ ॥ पूर्वादिदिक्षु क्रमसन्निविष्टा धर्मप्रधाना इव रूपभाजः ॥ भजंति ये तान्क्रमसन्निविष्टान्प्रसन्नतैषां सततं भवेद्धि ॥ ४२ ॥ नान्यत्र क्षेत्रे
मिलिताः कथंचिच्चत्वार एते त्रिदशैरलभ्याः ॥ तानग्रिमं जन्म जवेन लब्ध्वा पश्यंति पूर्वार्जितपुण्यपुंजाः ॥ ४३ ॥ ये दुर्जना दुर्जनसंगभाजः
क्षमार्जवप्राणजयप्रधानाः॥ क्रीडामृगा ग्राम्यवधूजनानां न ते प्रपश्यंत्यचिरात्पुमर्थान् ॥४४॥ तथैव पश्यंत्यचिरेण तत्त्वज्ञानैकहेतूनपि तान्पुमर्थान्
॥ ४५ ॥ अत्र ब्रह्मादयो देवा ऋषयश्च तपोधनाः ॥ पर्वणि प्रयताः स्नातुं समायांति षडानन ॥ ४६ ॥ ततः सत्यपदंनाम तीर्थं सर्वमनोहरम् ॥
त्रिकोणाकारमेवैतत्कुंडं कल्मषनाशनम् ॥ एकादश्यां हरिस्तत्र स्वयमायाति पावने ॥४७॥ तत्पश्चादृषयः सर्वे मुनयश्च तपोधनाः ॥ स्नातुमायांति
विधिवत्कुंडे सत्यपदाभिधे ॥४८॥ गंधर्वाप्सरसां यत्र मध्याह्ने हरिवासरे ॥ गानं शृण्वंति विरलाः सत्यव्रतपरायणाः ॥ ४९ ॥ दर्शनादस्य तीर्थस्य
पातकानि महांत्यपि ॥ पलायंते भयेनैव सिंहं दृष्ट्वा मृगा इव ॥५०॥ स्वशाखोक्तविधानेन स्नानं कृत्वा विचक्षणः ॥ सत्यलोकमवाप्नोति ततो नैः
श्रेयसं पदम् ॥ ५१ ॥ अहोरात्रं शुचिर्भूत्वा उपोष्य च जनार्दनम् ॥ पूजयित्वा यथाशक्त्या स जीवन्मुक्तिभाजनः ॥ ५२ ॥ ब्रह्मा विष्णुश्च रुद्रश्च

१ अपि–इति शेषः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

त्रिकोणस्थाः समाहिताः ॥ तपःकुर्वत्यनुदिनं सर्वलोकादितोषणम् ॥ ५३ ॥ त्रिकोणमंडितं तीर्थं नाम्ना सत्यपदप्रदम् ॥ दर्शनीयं प्रयत्नेन सर्वपापमुमुक्षुभिः ॥ ५४ ॥ जपं तपो हरिस्तोत्रं पूजां स्तुत्यभिवंदनम् ॥ माहात्म्यं कुर्वतां वक्तुं ब्रह्मणापि न शक्यते ॥ ५५ ॥ ततोऽतिविमलं नाम नरनारायणाश्रमम् ॥ द्विविधं दृश्यते तत्र पाथः परमनिर्मलम् ॥ ५६ ॥ उभाभ्यामुभयोः प्रीतिर्भवतीति विनिश्चितम् ॥ तत्र स्नात्वा प्रयत्नेन पूजयित्वा जनार्दनम् ॥ सर्वपापविनिर्मुक्तस्तत्क्षणान्नात्र संशयः ॥ ५७ ॥ ततो नारायणावासशिखरे विमलाकृति ॥ तीर्थं पवित्रमुर्वश्या अभिव्यक्तिकरं भवेत् ॥ ५८ ॥ ॥ स्कन्द उवाच ॥ ॥ अभिव्यक्तिः कथं तस्या उर्वश्याः शिखरे पितः ॥ किं पुण्यं किं फलं तत्र परं कौतूहलं वद ॥५९॥ ॥ ॥ शिव उवाच ॥ ॥ धर्मस्य पत्नी मूर्त्यासीत्तस्यां जातौ षडानन ॥ नरनारायणौ साक्षाद्भगवानेव केवलम् ॥ ६० ॥ पित्रोराज्ञामनुप्राप्य तपोऽर्थं कृतमानसौ ॥ उभयोर्नगयोस्तौ तु तपोमूर्ती इव स्थितौ ॥ ६१ ॥ तौ दृष्ट्वा विस्मितः शक्रः प्रेषयामास मन्मथम् ॥ सगणं तपसो ध्वंसो यथा स्याद्गन्धमादनम् ॥ ६२ ॥ विक्रम्य विधिवत्ते तु नारायणबलोदयम् ॥ ज्ञात्वा हतमनस्कास्तानुवाच जगतीपतिः ॥ ६३ ॥ ॥ हरिरुवाच ॥ ॥ किमर्थमागता यूयमातिथ्यं गृह्यतामिति ॥ ६४ ॥ इत्युक्त्वा फलमूलानि तेभ्यो दत्त्वोर्वशीं तथा ॥ दत्त्वान्तर्धिमगादेव पश्यतां विघ्नकारिणीम् ॥ ६५ ॥ ते तु गत्वा दिवं भीते शक्रायोचुर्बलं हरेः ॥ शक्रस्तामुर्वशीं प्राप्य हर्षणैकयुतोऽभवत् ॥ ६६ ॥ ततः प्रभृति तत्तीर्थमुर्वशी नामतः पृथक् ॥ प्रसिद्धं यत्र भगवान्स्वयमास्ते तपोमयः ॥ ६७ ॥ तत्र स्नात्वा विधानेन उपोष्य रजनिद्वयम् ॥ पूजयित्वा हरिस्तत्र नरो नारायणो भवेत् ॥ ६८ ॥ उर्वशीकुण्डमासाद्य कामनावशतो नरः ॥ उर्वशीलोकमाप्नोति स्नानमात्रेण पुत्रक ॥ ६९ ॥ सदैव भगवांस्तत्र उर्वशीकुंडसन्निधौ ॥ भूतानां भावयन्भव्यं तपोमूर्तिर्व्यवस्थितः ॥ ७० ॥ आमोदं तदुपरि वै प्रभञ्जनोऽपि श्रीभर्तुर्वहति पदांबुजैकलब्धम् ॥ यत्संगात्कलियुगकल्मषातुराणामुत्संगे न भवति पापभारपाकः[1] ॥ ७१ ॥ यत्संगाद्धर्षमुपावहत्पदश्रीनिर्विण्णो गिरिविवरेच्युतैकसेवी ॥ श्रीभर्तुश्चरणयुगं वहन्समन्तादभ्येति प्रशममहस्तपःसमीरे ॥७२॥ गीर्वाणानुपहसति स्वघेन[2] पूर्णः कीटोऽपि प्रशमितदुर्नयो निरीहः॥ यत्रस्थः कुसुमनिवेदमात्मयोगपर्युष्टं जहदुपयास्यते पदं तत् ॥ ७३ ॥ यत्रेत्था मुनिमतयो बहिःपदार्थान्नापश्यन्निहितपदांबुजैकभाजः ॥ यत्रस्थः स्वयमपि गोपतिर्जनानामाधत्ते स्वपदमनुक्रमागतानाम् ॥ ७४ ॥ बहूनि संति तीर्थानि गिरौ नारायणाश्रिते ॥ सर्वपापहराण्याशु तान्यहं वेद नो जनः ॥ ७५ ॥ संसारकुहरे घोरे यत्र

१ पापभारपाकः—पापौघफलम्—इत्यर्थः । २ स्वघेन—सुतरामघेन—अतिपापेन—इत्यर्थः ।

CC-0. In Public Domain. Digitization by eGangotri

स्थगितमात्मनः ॥ उर्वशीकुण्डमासाद्य दिनमेकं वसेन्नरः ॥ ७६ ॥ उर्वशीदक्षिणे भागे आयुधानि जगत्पतेः ॥ विद्यंते दर्शनात्तेषां न शस्त्रभयभा
ग्भवेत् ॥ ७७ ॥ य इदं शृणुयाद्भक्त्या श्रावयेद्वा समाहितः ॥ सर्वपापविनिर्मुक्तः सालोक्यं लभते हरेः ॥७८॥ इति श्रीस्कांदे महापुराण एकाशीति
साहस्र्यां संहितायां द्वितीये वैष्णवखण्डे बदरिकाश्रममाहात्म्ये शिवकार्त्तिकेयसंवादे पञ्चधारादितीर्थमाहात्म्यवर्णनंनाम सप्तमोध्यायः ॥ ७ ॥ ॥
॥ ॥ शिव उवाच ॥ ॥ ब्रह्मकुण्डाद्दक्षिणतो नरावासगिरिर्महान् ॥ यत्र भगवता मेरुः स्थापितो लोकसुन्दरः ॥ १ ॥ ॥ स्कन्द उवाच ॥ ॥ कथं भग
वता मेरुः स्थापितो नरसन्निधौ ॥ महत्कौतूहलं तात कथ्यतां यदि रोचते ॥ २ ॥ ॥ महादेव उवाच ॥ ॥ यदा भगवतो वासो विशालायां समाग
तः ॥ देवा महर्षयः सिद्धाः सविद्याधरचारणाः ॥३॥ विहाय मेरुशृंगाणि भगवद्दर्शनोत्सुकाः॥ भगवद्दर्शनाह्लादतिरस्कृतसुरालयाः ॥ ४ ॥ तदा तु
भगवांस्तेषां सुखहेतोः षडानन ॥ उत्पाट्य मेरुशृंगाणि करेणैकेन लीलया ॥ स्थापयामास सर्वेषां भगवान्प्रीतिवर्द्धनः ॥५॥ ततः सर्वे समालोक्य
गिरिं कांचननिर्मितम् ॥ प्रसन्नास्तुष्टुवुः सर्वे नारायणमनामयम्॥६॥ ॥देवा ऊचुः॥ ॥ योस्मत्सुखाय भवविश्रमणाय बिभ्रल्लीलातनूः कनकशैलमि
हानिनाय ॥ जेता सुरार्द्दनशतं त्रिदशैकपक्षस्तस्मै विधेम नम उग्रतपःश्रियाय॥७॥ यद्यत्करोति कृपया कृपणार्तितूलशैलाग्निराश्रितकृदेकविदां वरि
ष्ठः॥स्वेनैव तेन करणेन स तुष्यतां नो यस्यान्वकारि पुरुषेण न केनचिद्वै ॥८॥ अस्माकमुन्नतधियां विदधाति सम्यक्छिक्षां पितेव करुणो निजला
भपूर्णः॥ त्रैलोक्यरक्षणविचक्षणदृष्टिपातपूर्णामृतांबुधिरसौ विपदः प्रपायात् ॥ ९ ॥ ॥ ऋषय ऊचुः ॥ ॥ येनाध्यस्तं भाति समस्तं जगदेकं क्रीडा
भांडं सत्यतयाऽजस्य विभूम्नः ॥ भानां वृंदं यद्वदनेप्याश्रितमूर्तिस्तस्मै नित्यं शाश्वत तुभ्यं प्रणमाम ॥ १० ॥ ॥ सिद्धा ऊचुः ॥ ॥ यत्कृपालवत
एव महांतः सिद्धिमीयुरितरे भवभाजः॥तेऽचिरेण भवभीमपयोधिं तीर्णवंत इति नः सुमनीषा ॥११॥ ॥ विद्याधरा ऊचुः॥ ॥ विभो सद्गुणग्राम कल्या
णमूर्ते परेशान संमानसंतानहेतो ॥ भवत्पादपद्मासवस्वादमत्ताः कृतार्था न चित्रं भवत्यत्र किंचित् ॥१२॥ ततस्तुष्टोऽथ भगवांस्तेषामासीद्दिवौक
साम् ॥ वरं वृणुध्वमित्युक्तास्ते प्रोचुर्वरदर्षभम्॥१३॥ परितुष्टो भवान्साक्षाद्देवदेवो रमापतिः॥ बदरी नत्वया त्याज्या न च मेरुः कदाचन॥१४॥मेरु
शृंगं प्रपश्यंति ये जनाः पुण्यभागिनः॥तेषां वै त्वत्प्रसादेन मेरौ वासः प्रजायताम्॥१५॥तत्र भुक्त्वा चिराद्भोगान्भूयादन्ते लयस्त्वयि॥एवमस्त्विति
चाभाष्य तत्रैवांतर्हितो हरिः ॥ १६ ॥ ततः प्रभृति ते सर्वे मेरुशृंगविहारिणः ॥ नरनारायणस्यांते पाल्यमाना मुहुर्मुहुः॥१७॥ कदाचिद्दिवि तिष्ठंति
कदाचिन्मेरुमध्यतः॥ निर्विशंका निरुद्वेगा ऋषयश्च तपोधनाः॥१८॥भगवानपि तत्रैव नररूपेण तिष्ठति॥धनुर्बाणधरः श्रीमांस्तपसा पावकोपमः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आनंदमृषिवृंदस्य जनयंस्तप आस्थितः ॥ १९ ॥ ततस्तु परमं तीर्थं लोकपालाभिवंदितम् ॥ यत्र संस्थापयामास लोकपालान्हरिः स्वयम् ॥२०॥ ॥ स्कंद उवाच ॥ ॥ कथं भगवता तत्र लोकपालाश्च स्थापिताः ॥ महत्कौतूहलं तात कथयस्व महामते ॥ २१ ॥ ॥ शिव उवाच ॥ ॥ एकदा मेरुमध्यस्थाश्रयानिह हरन्हरिः॥ देवानामृषिमुख्यानां चरितं द्रष्टुमुद्यतः ॥२१॥ तं दृष्ट्वा सहसोत्थाय नमस्कृत्य दिवौकसः॥ऊचुस्ते विनयात्सर्वे प्रसीद भगवन्विभो ॥ २३ ॥ क्षणं विश्राम्य विधिवद्दृष्ट्वा तां विरलां भुवम् ॥ सान्निध्यमृषिदेवानामयुक्तं भावयन्मिथः ॥ २४ ॥ ततः प्रहस्य भगवानुवाच मधुसूदनः ॥ लोकपालान्समाहूय नात्र स्थेयं भवद्भिर्वैः ॥ २५ ॥ ऋषयस्तापसाः सिद्धाः सस्त्रीका निवसंति हि ॥ भवद्विधानामास्थानं पुरैव कल्पितं मया ॥२६॥ ततःस त्वरितो गत्वा रम्ये गिरिवरे हरिः ॥ लोकपालान्समाहूय स्थापयामास तान्गुह ॥ २७ ॥ तत्रैव शैलदंडेन हत्वाद्रिं जलकांक्षया ॥ क्रीडापुष्करणीं तेषां निर्ममे सुमनोहराम् ॥ २८ ॥ सस्त्रीका यत्र गीर्वाणा विचरंति निजेच्छया ॥ गायंति स्वनुमोदंति गंधर्वाश्च दिवौकसाम् ॥ २९ ॥ वनानि कुसुमामोदरम्याणि परितोषतः ॥ दिनानि यत्र गच्छंति क्षणप्रायाणि देहिनाम् ॥ ३० ॥ भगवानपि तत्रैव तेषामानंदमावहन्॥द्वादश्यां पौर्णमास्यां च स्वयमायाति मज्जने ॥ ३१ ॥ तत्पश्चादृषयः सर्वे मुनयश्च तपोधनाः ॥ यत्र स्नात्वा विधानेन गुह मध्याह्नकालतः ॥ असंगं परमं ज्योतिर्जले पश्यंति चक्षुषा ॥ ३२ ॥ सर्वतीर्थावगाहेन यत्फलं परिकीर्तितम् ॥ तत्फलं तत्क्षणादेव दंडपुष्करिणीक्षणात् ॥ ॥ ३३ ॥ यत्र काम्यानि कर्माणि सफलानि मनीषिणाम् ॥ यत्र पिंडप्रदानेन गयातोऽष्टगुणं फलम् ॥३४॥ यज्ञो दानं तपः कर्म सर्वमक्षयमुच्यते॥ द्वादश्यां शुक्लपक्षस्य ज्येष्ठे मासि षडानन ॥ ३५ ॥ तत्र स्नात्वा विधानेन कृतकृत्यो भवेद्यतः ॥ बदरीतीर्थमध्ये तु गुप्तमेतत्सुरोत्तमैः ॥ न वाच्यं यत्र कुत्रापि तव प्रीत्या मयोदितम् ॥३६॥ वक्तव्यं किमिह बहु प्रभूतपुण्याः पश्यंति प्रथितमिदं सुरैकगुप्तम् ॥नान्येषां कथमपि चेतसि प्रसंगाद्दैवैः स्यादनुदिनचिंतितं गुहैतत् ॥ ३७ ॥ येषां वै भगवति चेत्समग्रकर्म स्वाध्यायाभ्यसनविधिक्रमेण जातम् ॥ पश्यंति त्रिभुवनदुर्लभं सुतीर्थं दंडोदं न भवति चान्यथा सुदृष्टम् ॥३८॥ दंडोदकात्परं तीर्थं न विष्णोः सदृशोऽमरः ॥ विशालासदृशं क्षेत्रं न भूतं न भविष्यति ॥३९॥ सेवनीया प्रयत्नेन विशाला च विचक्षणैः ॥ य इच्छेत्सततं धाम भगवत्पार्श्ववर्ति वै ॥ ४० ॥ ॥ स्कंद उवाच ॥ ॥ गंगामाश्रित्य तीर्थानि कानि संतीह सत्पदे ॥ श्रेयस्कराणि भूरीणि संक्षेपात्तानि मे वद ॥ ४१ ॥ ॥ महादेव उवाच ॥ ॥ गंगायां यत्र संयोगो मानसोद्भेदसन्निधौ ॥ तत्तीर्थं विमलं पुण्यं प्रयागादधिकं महत् ॥ ४२ ॥ त्रिंशद्वर्षसहस्राणि वायुभोजनतो भवेत् ॥ तत्फलं स्नानमात्रेण गंगायाः संगमे नृणाम् ॥ ४३ ॥ संगमाद्दक्षिणे भागे

CC-0. In Public Domain. Digitization by eGangotri

धर्मक्षेत्रं प्रकीर्तितम् ॥ यत्र मूर्त्या श्रुतौ जातौ नरनारायणावृषी ॥४४॥ तत्क्षेत्रं पावनं मर्त्ये सर्वेषामुत्तमोत्तमम् ॥ धर्मस्तत्रैव भगवांश्चतुष्पादवति
ष्ठति ॥ ४५ ॥ यत्र यज्ञास्तपो दानं यत्किंचित्क्रियते नृभिः ॥ तत्पुण्यस्य क्षयो नास्ति कल्पकोटिशतैरपि ॥ ४६ ॥ ततो दक्षिणदिग्भाग उर्वशी
संगमाभिधम् ॥ सर्वपापहरं पुंसां स्नानमात्रेण देहिनाम् ॥ ४७ ॥ कूर्मोद्धारस्ततः साक्षाद्धरिभक्त्येकसाधनम् ॥ स्नानमात्रेण भूतानां सत्त्वशुद्धिः
प्रजायते ॥ ४८ ॥ ब्रह्मावर्त्तस्ततः साक्षाद्ब्रह्मलोकैककारणम् ॥ दर्शनादेव तीर्थस्य सर्वपापक्षयो भवेत् ॥ ४९ ॥ बहूनि संति तीर्थानि दुर्गम्यानीह
देहिनाम् ॥ संक्षेपात्कथितं वत्स तवादरवशादिदम् ॥ ५० ॥ य इदं शृणुयान्नित्यं श्रावयेद्वा समाहितः ॥ सर्वपापविनिर्मुक्तः पदं विष्णोः प्रपद्यते ॥
॥ ५१ ॥ राजा विजयमाप्नोति सुतार्थी लभते सुतम् ॥ कन्यार्थी लभते कन्यां कन्या विंदति सत्पतिम् ॥ ५२ ॥ धनार्थी धनमाप्नोति सर्वकामै
कसाधनम् ॥ ५३ ॥ मासमात्रं नरो भक्त्या शृणुयाद्यः समाहितः ॥ तस्याभीष्टसमावाप्तिर्दुर्लभापि[1] न संशयः ॥ ५४ ॥ आधिव्याधिभयं घोरं दारि
द्र्यं कलहं तथा ॥ यस्य गेहेषु माहात्म्यं तत्रैतानि न कर्हिचित् ॥ ५५ ॥ नापमृत्युर्न सर्पादि दौर्भाग्यं चापि वर्तते ॥ दुःस्वप्नग्रहपीडा च परराष्ट्र
भयं तथा ॥ ५६ ॥ युद्धे यात्राप्रयाणे च पठनीयं प्रयत्नतः ॥ विवाहे च विवादे च शुभकर्मणि यत्नतः ॥ ५७ ॥ पूर्णं वाऽध्यायमात्रं वा तदर्धं वा
विचक्षणैः ॥ सर्वकार्यप्रसिद्धिः स्यान्नात्र कार्या विचारणा ॥ ५८ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे
बदरिकाश्रममाहात्म्ये शिवकार्त्तिकेयसंवादे बदरिकाश्रमे मेरुसंस्थापनतीर्थलोकपालतीर्थदंडपुष्करिणीतीर्थधर्मक्षेत्रादिविविधतीर्थक्षेत्रमाहात्म्य
वर्णनंनामाष्टमोऽध्यायः ॥ ८ ॥ ॥ छ ॥ इति श्रीस्कांदे द्वितीये वैष्णवखण्डे तृतीयं बदरिकाश्रममाहात्म्यं समाप्तम् ॥ २-३) ॥ ॥

१ दुर्लभापि अभीष्टसमावाप्तिर्भवति इत्यर्थसाङ्गत्यं-'भवति'-इत्यध्याहारेण बोद्धव्यम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समस्तविदुषामग्रतोऽभ्यर्थना.

एतस्मादग्रे–"मदनालसमाहात्म्यं" "धूम्रकोशाख्यानं" चेति ग्रंथभागः–अस्मभ्यमद्य यावल्लब्धेषु दशस्वादर्शपुस्तकेषु नोपलभ्यते, परं स ग्रंथभागः–"श्रीनारदीय" पुराणोक्त"श्रीस्कान्द"महापुराणानुक्रमणिकायां निर्ग्रथितोऽस्ति, अतस्तदलाभात्तावान्ग्रंथभागः प्रकाशयितुमशक्य एव । अतः सविनयं सुज्ञनिपुणपंडितजनेषु संप्रार्थ्यते–यदि केषांचित्समीपे "मदनालसमाहात्म्यं" "धूम्रकोशाख्यानं" चैतावान्ग्रंथभाग उपलभ्येत, तेऽत्युदारचरिता विद्वज्जना अवश्यमेव तत्प्रेषणेन मां कृतार्थीकुर्युः । तल्लब्ध्युत्तरमहं तमिदानीमपूर्णं ग्रंथं संमुद्र्यैतन्महापुराणमखंडीकरिष्यामि–इति ।

समस्तविद्वज्जन प्रार्थयिता–

खेमराज श्रीकृष्णदास,

"श्रीवेङ्कटेश्वर" मुद्रणालयाध्यक्षः–मुंबई.

CC-0. In Public Domain. Digitization by eGangotri

॥ इति श्रीस्कांदे महापुराणे द्वितीये वैष्णवखंडे बदरिकाश्रममाहात्म्यं समाप्तम् ॥ (२-३) ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥अथ श्रीस्कांदे महापुराणे द्वितीये वैष्णवखंडे कार्तिकमासमाहात्म्यप्रारंभः॥(२-४)॥

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ श्रीगणेशाय नमः ॥ ॥ अथ कार्तिकमासमाहात्म्यं सटीकं प्रारभ्यते ॥ इह खलु भगवाच्छ्रीवेदव्यासः सकलपुरुषार्थसाधनप्रकाशकं श्रीकार्त्तिकमासमाहात्म्यप्रतिपादकं प्रकरणं सुधामयं सर इव पृथिव्यां प्रतिष्ठापयामास, तत्र ग्रंथारंभेऽशेषप्रत्यूहोपशांतयेऽभिमतदेवतानमस्कारलक्षणं मंगलमाचरणीयमित्यन्यान्पौराणिकानुपशिक्षयन्स्वयमाचरति—नारायणमिति । अत्र नारायणपदेनांतर्यामिजलशायिश्रीकृष्णग्रहणात्, "नारो जीवसमूहः स्यादयनं तत्प्रवर्तनम् ॥" इत्यंतर्यामिणो ग्रहणम्, तथा "आपो नारा इति प्रोक्ता आपो वै नरसूनवः ॥ अयनं तस्य ताः पूर्वं तेन नारायणः स्मृतः ॥" इति जलशायिनो ग्रहणम् ॥ इतरयोस्तु प्रसिद्धम्, यथा हि श्रीभागवते "ताविमौ वै भगवतो हरेरंशाविहाऽऽगतौ ॥ भारव्ययाय च भुवः कृष्णौ यदुकुरूद्वहौ ॥" इति । तन्त्रे च—" अर्जुनेति नरो वेशः कृष्णो नारायणः स्वयम् ॥" इति

॥ ॥ श्रीगणेशाय नमः ॥ ॥ अथ कार्त्तिकमासमाहात्म्यप्रारम्भः ॥ नारायणं नमस्कृत्य नरं चैव नरोत्तमम् ॥ देवीं सरस्वतीं चैव ततो जयमुदीरयेत् ॥ १ ॥ ॥ ऋषय ऊचुः ॥ ॥ सूत नः कथितं पुण्यं माहात्म्यमाश्विनस्य च ॥ भूयोऽन्यच्छ्रोतुमिच्छामः कार्तिकस्य च वैभवम् ॥ २ ॥ कलौ कलुषचित्तानां नराणां पापकर्मणाम् ॥ संसाराब्धौ निमग्नानामनायासेन का गतिः ॥ ३ ॥ को धर्मः सर्वधर्माणामधिको मोक्षसाधकः ॥ इहाऽपि मुक्तिदो नृणामेतत्त्वं कथय प्रभो ॥ ४ ॥ ॥ सूत उवाच ॥ ॥ भवद्भिर्यदहं पृष्टस्तदेतत्पृष्टवान्मुनिः ॥ नारदो ब्रह्मणः पुत्रो ब्रह्माणं तु जगद्गुरुम् ॥ ५ ॥ तथैव सत्यभामा च श्रीकृष्णं जगदीश्वरम् ॥ अपृच्छत्कार्तिकस्यैव वैभवं श्रवणोत्सुका ॥६॥ वालखिल्यैश्च ऋषिभिर्यदुक्तमृषिसंसदि ॥ श्रीसूर्यारुणसंवादरूपेणाऽतिमनोहरम् ॥ ७ ॥ कैलासे शंकरेणैव कार्तिकस्य च वैभवम् ॥ वर्णितं षण्मुखस्याग्रे नानाख्यानसमन्वितम् ॥ ८ ॥ पृथुं प्रति नारदेन कथितं च महात्म्यकम् ॥ कार्तिकस्य च विप्रेंद्रा श्रुत्वा ब्रह्ममुखात्पुरा ॥ ९ ॥

नरपदेन हिरण्यगर्भव्यष्टिजीवमुन्यर्जुनानां ग्रहणम्, 'नरोऽजे मनुजेऽर्जुने' इति मेदिनी ॥ नरोत्तमं नॄन् उत्तमयति श्रवणादिना श्रेष्ठत्वं गमयतीति नरोत्तमो व्यासः, तत्संप्रदायप्रवर्तकत्वात्तं च नमस्कृत्य, देवीं सरस्वतीं तदुपदेशाढ्यां सरस्वतीं वाचं देवीं द्योतनात्मिकां च नमस्कृत्य, व्यासमिति पाठे नरोत्तममिति प्रत्येकं संबंधनीयम् , जयमित्यनेनाऽविद्यां तत्कार्यं संसारं च जयतीति जयो ग्रन्थस्तमुदीरयेत्, इति शिक्षा, जयशब्देनेतिहासपुराणादीनां ग्रहणमिति ॥ १ ॥ सूतेति ॥ २ ॥ कलुषं पापं चित्ते येषां ते कलुषचित्ताः "कलुषं वृजिनैनोघमंहो दुरितदुष्कृतम् ॥ " इत्यमरः ॥ कलुषं मलमिश्रं चित्तं येषां ते 'कलुषोऽनच्छ आविलः' इत्यमरः ॥ ३ ॥ ४ ॥ ५ ॥ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥

CC-0. In Public Domain. Digitization by eGangotri

॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ अथ कार्तिकव्रतप्रशंसामाह—वैभवमित्यादिना ॥ २० ॥ २१ ॥

एकदा नारदो योगी सत्यलोकमुपागतः ॥ पप्रच्छ विनयेनैव सर्वलोकपितामहम् ॥ १० ॥ ॥ श्रीनारद उवाच ॥ ॥ पापेंधनस्य घोरस्य शुष्कार्द्रस्य च भूरिशः ॥ को वह्निर्दहते ब्रह्मंस्तद्भवान्वक्तुमर्हति ॥ ११ ॥ नाज्ञातं त्रिषु लोकेषु ब्रह्मांडांतर्गतस्य यत् ॥ विद्यते तव देवेश त्रिविधस्य सुनिश्चितम् ॥ १२ ॥ मासानां प्रवरो मासो देवानामुत्तमोत्तमः ॥ तीर्थानि तद्विशेषेण कथयस्व पितामह ॥ १३ ॥ ॥ ब्रह्मोवाच ॥ ॥ मासानां कार्तिकः श्रेष्ठो देवानां मधुसूदनः ॥ तीर्थं नारायणाख्यं हि त्रितयं दुर्लभं कलौ ॥ १४ ॥ ॥ नारद उवाच ॥ ॥ भगवंस्तव दासोऽस्मि भक्तोऽस्मि हरिवल्लभ ॥ वैष्णवान्ब्रूहि मे धर्मान्सर्वज्ञोऽसि पितामह ॥ १५ ॥ आदौ कार्तिकमाहात्म्यं वक्तुमर्हसि मे प्रभो ॥ दीपदानस्य माहात्म्यं व्रतिनां नियमांस्तथा ॥ १६ ॥ गोपीचंदनमाहात्म्यं तुलस्याश्च तथा विभो ॥ धात्र्याश्चैव च माहात्म्यं विधिं स्नानादिकस्य च ॥ व्रतारंभः कदा कार्य उद्यापनविधिं तथा ॥ १७ ॥ यत्किंचिद्वैष्णवं धर्मं तत्सर्वं वक्तुमर्हसि ॥ येनाऽहं त्वत्प्रसादेन पदं यास्याम्यनामयम् ॥ ॥ १८ ॥ ॥ सूत उवाच ॥ ॥ इति पुत्रवचः श्रुत्वा ब्रह्मा हर्षसमन्वितः ॥ राधादामोदरं स्मृत्वा प्रोवाच तनुजं प्रति ॥ १९ ॥ ॥ ब्रह्मोवाच ॥ ॥ साधु पृष्टं त्वया पुत्र लोकोद्धरणहेतवे ॥ कथयामि न संदेहः कार्तिकस्य च वैभवम् ॥ २० ॥ एकतः सर्वतीर्थानि सर्वे यज्ञाः सदक्षिणाः ॥ कार्तिकस्य तु मासस्य कलां नार्हंति षोडशीम् ॥ २१ ॥ एकतः पुष्करे वासः कुरुक्षेत्रे हिमालये ॥ एकतः कार्तिकः पुत्र सर्वपुण्याधिको मतः ॥ ॥ २२ ॥ स्वर्णानि मेरुतुल्यानि सर्वदानानि चैकतः ॥ एकतः कार्तिको वत्स सर्वदा केशवप्रियः ॥ २३ ॥ यत्किंचित्क्रियते पुण्यं विष्णुमुद्दिश्य कार्तिके ॥ तस्य क्षयं न पश्यामि मयोक्तं तव नारद ॥ २४ ॥ सोपानभूतं स्वर्गस्य मानुष्यं प्राप्य दुर्लभम् ॥ तथात्मानं समादध्यान्न भ्रश्येत यथा पुनः ॥ २५ ॥ दुष्प्राप्यं प्राप्य मानुष्यं कार्तिकोक्तं चरेन्न यः ॥ धर्मं धर्मभृतां श्रेष्ठ स मातापितृघातकः ॥ २६ ॥ कार्तिकः खलु वै मासः सर्वमासेषु चोत्तमः ॥ पुण्यानां परमं पुण्यं पावनानां च पावनम् ॥ २७ ॥ अस्मिन्मासे त्रयस्त्रिंशद्देवाः सन्निहिता मुने ॥ अत्र स्नानानि दानानि भोजनानि व्रतानि च ॥ २८ ॥ तिलधेनुं हिरण्यं च रजतं भूमिवाससी ॥ गोप्रदानानि कुर्वंति सर्वभावेन नारद ॥ २९ ॥ तानि दानानि दत्तानि गृह्णंति विधिवत्सुराः ॥ यत्किंच दत्तं विप्रेंद्र तपश्चैव तथा कृतम् ॥ ३० ॥ तदक्षय्यफलं प्रोक्तं विष्णुना प्रभविष्णुना ॥ पापानां मोक्षणं चैव कार्तिके मासि शस्यते ॥ ३१ ॥

॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥ अथ स्वतः स्नानार्चनं कर्तुमशक्तस्य धनिनः कार्तिकव्रताचरणप्रकारमाह—अशक्त इति ॥ ४२ ॥ अथ निर्धनस्याऽशक्तस्य व्रताचरणमाह—द्रव्यदान इति ॥ ४३ ॥ ४४ ॥ नियमपूर्वकम् आश्विनीपूर्णिमामारभ्य कार्तिकीपूर्णिमापर्यंतं प्रत्यहं

तस्माद्यत्नेन विप्रेंद्र कार्तिके मासि दीयते ॥ यत्किंचित्कार्तिके दत्तं विष्णुमुद्दिश्य मानवैः ॥ ३२ ॥ तदक्षयं हि लभते अन्नदानं विशेषतः ॥ यथा नदीनां विप्रेंद्र शैलानां चैव नारद ॥ ३३ ॥ उदधीनां च विप्रर्षे क्षयो नैवोपपद्यते ॥ दानं कार्तिकमासे तु यत्किंचिद्दीयते मुने ॥ ॥ ३४ ॥ न तस्याऽस्ति क्षयो विप्र पापं याति सहस्रधा ॥ संप्राप्तं कार्तिकं दृष्ट्वा परान्नं यस्तु वर्जयेत् ॥३५॥ दिनेदिनेऽतिकृच्छ्रस्य फलं प्राप्नोत्ययत्नतः ॥ न कार्तिकसमो मासो न कृतेन समं युगम् ॥३६॥ न वेदसदृशं शास्त्रं न तीर्थं गंगया समम् ॥ न चान्नसदृशं दानं न सुखं भार्यया समम् ॥ ३७ ॥ न्यायेनोपार्जितं द्रव्यं दुर्लभं दानकारिणाम् ॥ दुर्लभं मर्त्यधर्माणां तीर्थे च प्रतिपादनम् ॥ ३८ ॥ कार्तिके मुनिशार्दूल शालिग्रामशिलार्चनम् ॥ स्मरणं वासुदेवस्य कर्तव्यं पापभीरुणा ॥ ३९ ॥ एतादृशं कार्तिकं च अकृतेनैव यो नयेत् ॥ पूर्वं कृतस्य पुण्यस्य क्षयमाप्नोत्यसंशयम् ॥ ४० ॥ ॥ नारद उवाच ॥ ॥ अशक्तेन कथं कार्यं कार्तिकव्रतमुत्तमम् ॥ येन तत्फलमाप्नोति तन्मे वद पितामह ॥ ४१ ॥ ॥ ब्रह्मोवाच ॥ ॥ अशक्तस्तु यदा मर्त्यस्तदैवं व्रतमाचरेत् ॥ अन्यस्मै द्रविणं दत्त्वा कारयेत्कार्तिकव्रतम् ॥ ४२ ॥ तस्मात्पुण्यं प्रगृह्णीत दानसंकल्पपूर्वकम् ॥ द्रव्यदानेऽप्यशक्तश्चेद्यदा देवर्षिसत्तम ॥ ४३ ॥ तदा तेन प्रकर्तव्यं पानं तीर्थजलस्य च ॥ तत्राप्यशक्तो यो मर्त्यस्तेन नित्यं हरेर्मुदा ॥ ४४ ॥ स्मरणं च प्रकर्तव्यं नाम्ना नियमपूर्वकम् ॥ अखंडितं तदा तेन कार्तिकव्रतजं फलम् ॥ ४५ ॥ विष्णोः शिवस्य वा कुर्यादालये हरिजागरम् ॥ शिवविष्ण्वोर्गृहाभावे सर्वदेवालयेष्वपि ॥४६॥ दुर्गाटव्यां स्थितो वाऽथ यदि वाऽऽपद्गतो भवेत् ॥ कुर्यादश्वत्थमूले तु तुलसीनां वनेष्वपि ॥ ४७ ॥ विष्णुनामप्रबंधानां गायनं विष्णुसन्निधौ ॥ गोसहस्रप्रदानस्य फलमाप्नोति मानवः ॥ ४८ ॥ वाद्यकृत्पुरुषश्चापि वाजपेयफलं लभेत् ॥ सर्वतीर्थावगाहोत्थं नर्तकः फलमाप्नुयात् ॥ ४९ ॥ सर्वमेतल्लभेत्पुण्यमेतेषां द्रव्यदः पुमान् ॥ श्रवणाद्दर्शनाद्वापि षडंशं फलमाप्नुयात् ॥ ५० ॥ आपद्गतो यदाप्यंभो न लभेत्कुत्रचिन्नरः ॥ व्याधितो वाथवा कुर्याद्विष्णोर्नाम्नाऽपि मार्जनम् ॥ ५१ ॥

यावत्संख्याकं नामस्मरणं क्रियते तथैव कर्तव्यं न न्यूनाधिक्यमिति प्रत्यहं न्यूनाधिकजपस्य निष्फलत्वस्मरणात्, तेन नामस्मरणेन भवतीति शेषः ॥ ४५ ॥ ४६ ॥ ॥ ४७ ॥ ४८ ॥ ४९ ॥ ५० ॥ ५१ ॥

CC-0. In Public Domain. Digitization by eGangotri

॥५२॥५३॥ ५४ ॥ ५५ ॥ इति कार्तिकमासमाहात्म्यटीकायां प्रथमोऽध्यायः ॥ १ ॥ ॥ अथ कार्तिके कर्तव्यधर्मानाह—अथेति ॥ १ ॥ २ ॥ वासव इन्द्रः ॥
॥ ३ ॥ ४ ॥ गुरुसेवाऽकरणेऽनिष्टफलमाह—अकृत्वेति ॥५॥६॥७॥ गुरुसेवाप्रसादात्सर्वं प्राप्नोतीत्यत्र दृष्टांतमाह—मेधावी कपिलः सुमतिः इति त्रयः शिष्याः गौतमस्य
गुरोः उत्तमसेवया देवत्वं प्राप्ताः ॥ अत्रप्रसिद्धा कथा सारोद्धारोक्तकार्तिकमाहात्म्ये—पुरा भागीरथीतीरे सिद्धाश्रमे गौतमऋषेस्त्रयः शिष्याः मेधावी कपिलः सुमतिरिति, ते
बाल्यादेव गुरुसेवातत्परा आसन्, एकदा गौतमस्तानाहूय उवाच—हे शिष्याः वने शीघ्रं गत्वा समित्पुष्पफलकुशा आनीयंताम्, ते च फलादिकं स्वल्पं गृहीत्वा मध्याह्ने गुरु

उद्यापनविधिं कर्तुमशक्तो यो व्रतस्थितः ॥ ब्राह्मणान्भोजयेत्पश्चाद्व्रतसंपूर्तिहेतवे ॥ ५२ ॥ अशक्तो दीपदानाय परदीपं प्रबोधयेत् ॥ तस्य वा रक्षणं कुर्याद्वातादिभ्यः प्रयत्नतः ॥ ५३ ॥ श्रीविष्णोः पूजनाऽभावे तुलसीधात्रिपूजनम् ॥ सर्वाऽभावे व्रती कुर्याद्ब्राह्मणानां गवामपि ॥ तस्याप्यभावे मनसि विष्णोर्नामानुकीर्तनम् ॥ ५४ ॥ ॥ नारद उवाच ॥ ॥ ब्रह्मन्ब्रूहि विशेषेण धर्मान्कार्तिकसंभवान् ॥ ५५ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे कार्तिकमासमाहात्म्ये कार्तिकव्रतप्रशंसावर्णनंनाम प्रथमोऽध्यायः ॥ १ ॥ छ ॥
॥ ॥ ब्रह्मोवाच ॥ ॥ अथ कार्तिकमासस्य धर्मान्वक्ष्यामि नारद ॥ संप्राप्तं कार्तिकं दृष्ट्वा परान्नं यस्तु वर्जयेत् ॥ १ ॥ स तु मोक्षमवाप्नोति नात्र कार्या विचारणा ॥ सर्वेषामेव धर्माणां गुरुपूजा परा मता ॥ गुरुशुश्रूषया सर्वं प्राप्नोति ऋषिसत्तम ॥२॥ गुरौ तुष्टे च तुष्टाः स्युर्देवाः सर्वे सवासवाः ॥ गुरौ रुष्टे च रुष्टाः स्युर्देवाः सर्वे सवासवाः ॥ ३ ॥ कार्तिके मासि संप्राप्ते कृत्वा कर्माणि भूरिशः ॥ ४ ॥ अकृत्वा गुरुशुश्रूषां नरकानेव विंदति ॥ ४ ॥ यत्किंचिद्वा समादिष्टो गुरुणा तत्समाचरेत् ॥५॥ आज्ञप्तो गुरुणा विप्र न तद्वाक्यं तु लंघयेत् ॥ यदि दुःखादिकं प्राप्तं गुरुं तु शरणं व्रजेत् ॥ ६ ॥ मातृत्वे च पितृत्वे च गुरुमेव स्मरेद्बुधः ॥ गुरौ न प्राप्यते यत्तन्नान्यत्राऽपि हि लभ्यते ॥ ७ ॥ गुरुप्रसादात्सर्वं तु प्राप्नोत्येव न संशयः ॥ मेधावी कपिलश्चैव सुमतिश्च महातपाः ॥ गौतमस्य गुरोः सम्यक्सेवयाऽमरतां गताः ॥ ८ ॥

निकटं प्राप्ताः, तदा गौतमोऽतिक्रुद्धः सन्नुवाच—हे शिष्याः यूयं प्रातरेव गताः अधुना तु मध्याह्नो जातः । फलादिकमपि स्वल्पमानीतं तर्हि एतावता कालेन किं कृतम्, हे दुर्वृत्ताः यदि जीवितुमिच्छथ तदा पुनः वनं गत्वा फलादीनि बहून्यादाय सत्वराः समागच्छत, तच्छ्रुत्वा भीताः क्षुत्क्षामकंठाः पुनरेव वनं ययुः, तत्र वनाद्वनं गच्छंतः पश्चिमाभिमुखाः तृषया परिपीडिताः एकस्मिन्सरोवरे स्नानं संध्यां च कृत्वा जलं पीत्वा फलादीनि विचिन्वंतोऽतिभयंकरं वनं विविशुः, तदानीं रात्रिश्च जाता। सिंहव्याघ्रादीनां नादाश्च बभूवुः, तदा भीता मिथः प्रोचुः, अहो कष्टं महांधकारयुक्तेऽस्मिन्वने फलादीनि न पश्यामः, दिशो न जानीमः, किं गृहीत्वा गुरु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सन्निधिं गच्छामः नः कथं भवेदिति भयातुरा इतस्ततो भ्रमंतस्तृणगुल्मसमावृते कूपे पतिताः, तत्र सर्पैर्दष्टा मृत्युं प्रापुः । अथ गौतमस्ताननागताञ्ज्ञात्वा स्वात्मानं बहु विनिंद्य प्रातर्भार्यया साकं वने तान्मृगयन्नेकस्मिन्कूपे मृतान्दृष्ट्वा विललाप, तदा सर्वाः स्वपापेनैवैते मृताः किमर्थं शोकः कार्य इति गौतमं सांत्वयांचक्रुः, अथ गौतम उवाच—"कर्मणा मनसा वाचा पापमेभिः कदाचन ॥ न कृतं शिष्यवर्यैस्तैर्भवाद्भिर्लोकनिष्ठुरैः ॥ वृथा संघातितास्ते तु कालमृत्युर्न चागतः ॥ तस्मान्न दोषो युष्माकं न चैषामपि पन्नगाः ॥ कर्तैषां यम एवाऽत्र यमं तस्माच्छपाम्यहम्॥ इत्युक्त्वा जलमादाय यमं शप्तुं समुद्यतः ॥" इति । तदा यमः सहसैव तत्रागत्योवाच—हे ऋषे एषामकालमरणं न किंतु सर्पदंशनिमित्तेन महामृत्युकाल एवोपस्थितस्तस्माद्विचार्य शापं देहि नात्र ममापराधः । तदा गौतम उवाच—एवं सति एतैः सच्छिष्यैर्विना मम जीवितेन किं प्रयोजनम्, अतः मया यत्पुण्यमुपार्जितं यच्च तपस्तप्तं तेन पुण्येन तव कृपया च एते जीवनं प्राप्नुवंतु, एवमुक्ते ते सहसोत्थाय संहृष्टा अग्रतः गुरुं यमं च

तस्मात्सर्वप्रयत्नेन कार्तिके विष्णुतत्परः ॥ गुरुसेवां प्रकुर्वीत ततो मोक्षमवाप्नुयात् ॥ ९ ॥ नरेभ्यो वैष्णवं धर्मं यो ददाति द्विजोत्तमः ॥ ससागरमहीदाने तत्पुण्यं लभते हि सः ॥ १० ॥ तिलधेनुं हिरण्यं च रजतं भूमिवाससी ॥ गोप्रदानानि दास्यंति सर्वभावेन सुव्रत ॥ ११ ॥ सर्वेषामेव दानानां कन्यादानं विशिष्यते ॥ सहस्रमेव धेनूनां शतं चानडुहां समम् ॥ १२ ॥ दशानडुत्समं यानं दशयानसमो हयः ॥ हयदानसहस्रेभ्यो गजदानं विशिष्यते ॥ १३ ॥ गजदानसहस्राणां स्वर्णदानं च तत्समम् ॥ स्वर्णदानसहस्राणां विद्यादानं च तत्समम् ॥ १४ ॥ विद्यादानात्कोटिगुणं भूमिदानं विशिष्यते ॥ भूमिदानसहस्रेण गोप्रदानं विशिष्यते ॥ १५ ॥ गोप्रदानसहस्रेभ्यो ह्यन्नदानं विशिष्यते ॥ अन्नाधारमिदं प्रोक्तं तस्मादेयं तु कार्तिके ॥ १६ ॥ परान्नवर्जनादेव लभेच्चांद्रायणं फलम् ॥ दिनेदिनेऽतिकृच्छ्रस्य फलं प्राप्नोति मानवः ॥ १७ ॥

दृष्ट्वा ववंदिरे, गौतमः प्रीत्या तानालिंग्यातितुष्टः युष्माकं वरं दास्यामीत्युवाच—"सर्वान्वेदांश्च शास्त्राणि समस्तांगानि सुव्रताः ॥ इतिहासपुराणानि मत्प्रसादादवाप्स्यथ ॥ गुरुणैवं वरे दत्ते सेंद्रो गुरुरगात्ततः ॥ गौतमं प्रेतराजं च तांश्च विप्रानुवाच ह ॥ इन्द्रोहमस्मि भद्रं वः शृणुध्वं वचनं मम ॥ एतैर्द्विजैरतीवेह जिता लोकाश्च सर्वशः ॥ मम लोकमितस्तस्माद्गंतुमर्हथ सुव्रताः ॥ गौतमस्य प्रसादेन सदेहा एव गच्छत॥सामर्थ्यमेषां लोके च तव कीर्तिस्तथा मम ॥ कीर्तिश्च लोके ख्याता स्याद्गुरुपूजाफलं तथा॥" इत्युक्त्वा तान्विमाने चाऽऽरोप्य दिवं ययौ, यमः स्वपुरं गौतमश्च स्वाश्रमं ययाविति ॥ ८ ॥ ९ ॥ यत्पुण्यमिति शेषः ॥१०॥११॥ कन्यादानफलमुक्तम्-"अष्टवर्षा भवेद्गौरी नववर्षा च रोहिणी ॥ दशवर्षा भवेत्कन्या अत ऊर्ध्वं रजस्वला ॥गौरीं ददद्ब्रह्मलोकं रोहिणीं सूर्यलोकं कन्यां स्वर्गलोकं रजस्वलां यमलोकं गच्छति ॥ यावंति चैव रोमाणि कन्यायास्तु तनौ सुत ॥ तावद्वर्षसहस्राणि रुद्रलोके महीयते॥" इति । अनडुहां वृषभाणां समं तुल्यम् ॥ १२ ॥ यानं रथं, हयः अश्वः ॥१३॥१४॥१५॥१६॥१७॥

CC-0. In Public Domain. Digitization by eGangotri

संधानं मद्योत्पादनम् मांसं पशुपक्षिमांसम् एतत्क्षत्रियादिविषयम् ॥ १८ ॥ प्रवृत्तानामनिषिद्धानाम् ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ कार्तिके पुष्करे वासो महाफलदायक इति कैमुतिकन्यायेनाह–पुष्करमिति । यः स्मरेत् तस्य लक्षकोटिगुणं पुण्यं भवेत्तर्हि निवासकरणेनातिफलं भवेदिति किं वक्तव्यम् । पुष्करं तदाख्यं क्षेत्रम् ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ श्वेतः श्वेतनृपः पुष्करार्चनयोगेन कमलपूजनेन मुक्तिं प्राप ॥ अत्र प्रसिद्धा

कार्तिके वर्जयेन्मांसं सन्धानं च विशेषतः ॥ राक्षसीं योनिमाप्नोति सकृन्मांसस्य भक्षणात् ॥ १८ ॥ प्रवृत्तानां तु भक्ष्याणां कार्तिके नियमे कृते ॥ अवश्यं विष्णुरूपत्वं प्राप्यते मोक्षदं पदम् ॥ १९ ॥ ब्राह्मणेभ्यो महीं दत्त्वा ग्रहणे सूर्यचंद्रयोः ॥ यत्फलं लभते वत्स तत्फलं भूमिशायिनः ॥ २० ॥ भोजनं द्विजदंपत्योः पूजनं च विलेपनैः ॥ कंबलानि च रत्नानि वासांसि विविधानि च ॥ २१ ॥ तूलिकाश्च प्रदातव्याः प्रच्छादनपटैः सह ॥ उपानहावातपत्रं कार्तिके देहि सुव्रत ॥ २२ ॥ कार्तिके क्षितिशायी च हन्यात्पापं युगार्जितम् ॥ जागरं कार्तिके मासि यः करोत्यरुणोदये ॥ २३ ॥ दामोदराग्रे देवर्षे गोसहस्रफलं लभेत् ॥ नदीस्नानं कथा विष्णोर्वैष्णवानां च दर्शनम् ॥ २४ ॥ न भवेत्कार्तिके यस्य हरेत्पुण्यं दशाब्दिकम् ॥ पुष्करं यः स्मरेत्प्राज्ञः कर्मणा मनसा गिरा ॥ २५ ॥ कार्तिके मुनिशार्दूल लक्षकोटिगुणं भवेत् ॥ प्रयागो माघमासे तु पुष्करं कार्तिके तथा ॥ २६ ॥ अवन्ती माधवे मासि हन्यात्पापं युगार्जितम् ॥ धन्यास्ते मानवा लोके कलिकाले विशेषतः ॥ २७ ॥ ये कुर्वंति नरा नित्यं प्रीत्यर्थं हरिपूजनम् ॥ तारितास्तैश्च पितरो नरकाच्च न संशयः ॥ २८ ॥ क्षीरादिस्नपनं विष्णोः क्रियते पितृकारणात् ॥ कल्पकोटिं दिवं प्राप्य वसन्ति त्रिदिवैः सह ॥ २९ ॥ कार्तिके नार्चितो यैस्तु कृष्णस्तु कमलेक्षणः ॥ जन्मकोटिषु विप्रेन्द्र न तेषां कमला गृहे ॥ ३० ॥ अहो मुष्टा विनष्टास्ते पतिताः कलिकन्दरे ॥ यैर्नार्चितो हरिर्भक्त्या कमलैरसितैः सितैः ॥ ३१ ॥ पद्मेनैकेन देवेशं योऽर्चयेत्कमलापतिम् ॥ वर्षायुतसहस्रस्य पापस्य कुरुते क्षयम् ॥ पुष्करार्चनयोगेन श्वेतो मुक्तिमवाप ह ॥ ३२ ॥

कथा ब्राह्मे–पुरा काश्मीरदेशे श्वेतोनाम नृपः इष्टापूर्तकर्मनिष्ठः महावैष्णवः राज्ये पुत्रमभिषिच्य पुष्करक्षेत्रं गत्वा अतितीव्रेण तपसा स्वशरीरं शोषयन्नस्तौत् स्तुत्यंते स्वदेहान्निर्गतं महाभयंकरं पुरुषं दृष्ट्वा त्वं कोऽसि कुत आगतोऽसीत्यपृच्छत्, तदा व्याध उवाच–हे राजन् त्वं पूर्वजन्मनि जनस्थानीयो नृपः मृगयायां मृगरूपधरं मुनिं हतवान् तेन ब्रह्महा जातः, एकदा रात्रौ ब्रह्महत्याभयान्मुक्तो भवामीति विचिंत्य परमभक्त्या कार्तिके कमलैर्विष्णुं पूजयामासिथ, तदैव उदरव्याधितः कंठगतेन प्राणेन नारायणी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नाम्नीं स्वपत्नीं संस्मरन्मृतः, तेन पुण्येन त्वं स्वर्गं गतः, अहमपि स्वेन तेजसा कल्पपर्यंतं तत्र तव निकटे स्थितः, ततः कल्पांते इदानीं स त्वं काश्मीरदेशे सुमनसः राज्ञः गृहे श्वेतनाम्ना जातः, अत्राऽपि विष्णोराराधनस्तोत्रपाठेन त्वं शुद्धः । अतः व्याधरूपेण तव देहादहं निर्गतः, शुद्धश्च जातः, तच्छ्रुत्वा विस्मितो राजा व्याधमुवाच, हे व्याध यत स्त्वया मम जन्मांतरं स्मारितं तस्मान्मत्प्रसादेन त्वं धर्मव्याधो भविष्यसि, इत्युक्त्वा विमानमारुह्य परं स्थानमवाप, तस्मात्—"सहस्रकमलैः पूजा कार्तिके मधुसूदने ॥ न तेषां पुनरावृत्तिः कल्पकोटिशतैरपि" इति ॥ ३२ ॥ ३३ ॥ ३४ ॥ विष्णोर्निर्माल्यमाहात्म्यमाह—मुख इति ॥ ३५ ॥ ३६ ॥ अन्नदानप्रशंसामाह—कार्तिक इति ॥ ३७ ॥ ॥ ३८ ॥ ३९ ॥ ४० ॥ सत्यकेतुविषये कथामाह सारोद्धारे—पुरा सत्यजिन्नामा ब्राह्मणः धर्मशीलः सर्वकामेभ्यो निःस्पृहः सदा तीर्थयात्रापरः—"नान्येषु रमते

अपराधसहस्राणि तथा सप्तशतानि च ॥ पद्मेनैकेन देवेशः क्षमते प्रणतोऽर्चितः ॥३३॥ तुलसीपत्रलक्षेण कार्तिके योऽर्चयेद्धरिम् ॥ पत्रेपत्रे मुनिश्रेष्ठ मौक्तिकं लभते फलम् ॥ ३४ ॥ मुखे शिरसि देहे तु कृष्णोत्तीर्णां तु यो वहेत् ॥ तुलसीं कृष्णनिर्माल्यैर्यो गात्रं परिमार्जयेत् ॥ सर्वरोगैस्तथा पापैर्मुक्तो भवति मानवः ॥ ३५ ॥ शंखोदकं हरेर्भक्तिर्निर्माल्यं पादयोर्जलम् ॥ चन्दनं धूपशेषं च ब्रह्महत्यापहारकम् ॥ ३६ ॥ कार्तिके मासि विप्रेन्द्र प्रातःस्नानपरायणः ॥ विप्रेभ्यश्चान्नदानं तु कुर्याच्छक्त्यनुसारतः ॥ ३७ ॥ सर्वेषामेव दानानामन्नदानं विशिष्यते ॥ अन्नेन जायते लोको ह्यन्नेनैवाऽभिवर्द्धते ॥ ३८ ॥ अन्नं हि सर्वभूतानां प्राणभूतं परं विदुः ॥ अन्नदः सर्वदो लोके सर्वयज्ञादिकृद्भवेत् ॥ ३९ ॥ तीर्थस्नानेन किं तस्य देवयात्रादिनाऽपि किम् ॥ सर्वं संपाद्यते ब्रह्मन्नन्नदानान्न संशयः ॥ ४० ॥ सत्यकेतुर्द्विजः पूर्वं चान्नदानेन केवलम् ॥ सर्वपुण्यफलं प्राप्य मोक्षं प्राप सुदुर्लभम् ॥ ४१ ॥

चित्तं गंगां नित्यं स्मरत्यसौ ॥ भागीरथीं सुनिष्णातो विशेषेण महामुनिः ॥" स तीर्थयात्रां कुर्वन्नेकदा विशालानगरीं गत्वा जनैर्दर्शितं सत्यकेतुगृहं प्रविवेश, तदा सत्यकेतुः तृट्परीतं क्षुधाविष्टं भोजनमिच्छंतं सत्यजितं दृष्ट्वा उत्थाय अर्घपाद्यपूजां कृत्वोवाच—हे द्विजोत्तम तवागमनेनाऽद्य मम जन्मनः साफल्यं जातम् । पितरस्तृप्ताः, देवाश्च सुप्रीता जाताः, हे द्विजेन्द्र इच्छितं भोजनं कुरु, त्वयि भुक्ते मे किंचित्कर्तव्यं नावशिष्यते, तव दर्शनादप्राप्यं न हि विद्यते, तदा सत्यजिदुवाच—हे सत्यकेतो तव शुश्रूषया वाक्येन च तृप्तोऽस्मि । किं च, अन्नदातारः लोके बहवः संति तत्र त्वया सदृशः कोपि न दृष्टः त्वं गृहस्थाश्रमिणां मध्ये श्रेष्ठोऽसि । त्वया गंगायात्रा कृता न वा, तदा सत्यकेतुरुवाच—हे द्विज, मद्गृहे अतिथीनामन्नदाता अन्यः कोऽपि नास्ति तेनाऽद्यापि भागीरथीस्नानं न जातं तच्छ्रुत्वा सत्यजितं विनिंदंस्त्वया भागीरथीस्नानं न कृतम् अतः

CC-0. In Public Domain. Digitization by eGangotri

त्वद्गृहेऽद्य न भोक्ष्यामीत्युक्त्वा गृहान्निर्गत्य स्नानार्थं भागीरथीं गतः, तदैव गंगा अंतर्हिताऽभवत्, स यदा जलं नापश्यत्तदा कृतांजलिर्गंगां तुष्टाव, हे देवि मया अणुमात्रोऽप्यपराधो न कृतः, मे दर्शनं देहि, अन्यायं क्षंतुमर्हसि, इति स्तुता गंगा प्रत्यक्षमूर्त्या द्विजमाह--हे सत्यजित् त्वं सत्यकेतुगृहं गत्वा तं प्रसाद्य अन्नं भुक्त्वा पुनरागच्छ तदन्नभोजनेन बहवो मोक्षं गताः, इति गंगावचः श्रुत्वा सत्यकेतुगृहे भोजनं कृत्वा, तदनुज्ञातः गंगामागतः गंगां दृष्ट्वा स्नानं चकार एवं सत्यकेतुः केवलमन्नदानपुण्येन सद्गतिं प्राप इति ॥ ४१ ॥ ४२ ॥ कश्चित्सुशर्मनाम ब्राह्मणः वेदवेदांगपारगः शांतो जितेंद्रियः सर्वयज्ञकर्ता धनी नित्यदानपरः सर्वेषां हिते रतः पुराणवक्ता बंधूनां हितकृत् बहुपुत्रवान् आसीत्, स च उत्तरे वयसि गृहभारं पुत्रेषु समर्प्य वनं गत्वा श्रीविष्णुमाराधयन् स्वोग्रतपसा स्वर्गं प्राप, तत्रैकदा यमदूतैः पराजितान्देवदूतान्प्रति इंद्रः प्रोवाच--हे दूताः धर्मिष्ठाः, ममाऽऽज्ञया दिवं यांतु पापिष्ठाः नरकं यांतु तत्राऽपि ये गोप्रदातारः ते पापिनोऽपि दिवं यांतु, गोदानेन पापराशिर्नश्यति, एतदिंद्रवचः श्रुत्वा सुशर्मा ब्राह्मणः स्वपुत्रानुपदेष्टुमंतरिक्षमार्गेण पुत्रान्संबोध्य प्रोवाच--हे पुत्राः यूयं यदि स्वर्गमीप्सथ तदा मद्वाक्याद्गोदानं कर्तव्यं, गोदानात्परमन्यद्दानं त्रिलोके नास्तीति उक्त्वा गतः, ते पुत्राश्च अशरीरवाचं श्रुत्वा

कार्तिकव्रतनिष्ठस्तु कुर्याद्गोदानमुत्तमम् ॥ व्रतं संपूर्णतां याति गोदानेन न संशयः ॥ ४२ ॥ गोदानात्परमं दानं संसारार्णवतारकम् ॥ नास्ति नारद लोकेऽस्मिन्सुशर्मा ब्राह्मणो यथा ॥ ४३ ॥ कार्तिके मासि विप्रेंद्र दत्त्वा दानान्यनेकशः ॥ हरिस्मृतिविहीनश्चेन्न पुनंति कदाचन ॥ ४४ ॥ नामस्मरणमाहात्म्यं मया वक्तुं न शक्यते ॥ पुष्करेण यथा पूर्वं नारकीयाश्च मोचिताः ॥ ४५ ॥

विस्मिताः संतः सर्वेऽपि विधिना गोप्रदानं चक्रुः, तेन सद्गतिं प्राप्ताः ॥४३॥४४॥ पुष्करविषये प्रसिद्धा कथा सारोद्धारे–पुरा नंदिग्रामे पुष्करनामानौ द्वौ ब्राह्मणौ निवसतः तत्रैकः पुण्यात्मा, अपरः पापी, अथैकदा यमः पापिपुष्करानयने दूतानाज्ञापयत्, ते च तं विहाय पुण्यवंतं पुष्करमानीतवंतः, तदा यमः दूतान्निर्भर्त्स्य बहुसंमानपूर्वकं पुष्करमुवाच–हे पुष्कर तवाऽऽनयने ममाज्ञा न त्वं पुनर्गच्छ तदा पुष्कर उवाच–हे यम अहं नरकान्द्रष्टुमिच्छामि, यत्र पापिभिर्यातना अनुभूयंते, ततो यमदर्शितं हाहाकाररवाकुलमतिदुःखितं नारकीयगणं दृष्ट्वाऽतिसंत्रस्तो दयापरः पुष्करस्तानुवाच--हे नारकाः पूर्वं किमपि न विचारितम् अधुना हाहाकारेण किं प्रयोजनं सर्वपापक्षयकरं भगवन्नामापि न गृहीतम् नारका ऊचुः–हे पुष्कर त्वयोक्तं सत्यं क्षणं तिष्ठ तवांगस्पर्शवायुनाऽस्माकं सुखं भविष्यति, तदा एतैः किं प्रयोजनं त्वं गच्छेति यमेनोक्तः पुष्कर उवाच--हे यम एतानमोचयित्वाऽहं गंतुं नोत्सहे अतो मया सर्वभूतात्मा भगवान्गोविंद आराधितश्चेत्तेन पुण्येन एते नारका मुक्ता भवंतु एवमुक्त्वा गोविंदगोविंदेति विष्णोर्नामस्मरणमकरोत् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तदैव सर्वे नारकाः मुक्ताः दिव्यरूपधराः तव कीर्तिरतुला भविष्यतीति पुष्करमुक्तवंतो वैकुंठं ययुः, पुष्करोऽपि यममामंत्र्य नाममहिम्नैव परं पदं गतवानिति ॥४५॥ नामस्मरण मंत्रमाह—गोविंदेति ॥४६॥ कार्तिके भागवतपारायणमाह—श्लोकार्द्धमिति ॥ ४७ ॥ ४८ ॥ ४९ ॥ ५० ॥ यथा जडोनाम ब्राह्मणः गीताध्यायश्रवणेन मुक्तोऽभूत् । अत्र प्रसिद्धा कथा सारोद्धारे—विदर्भनगरे कौशिकान्वयः जडोनाम ब्राह्मणः स्वधर्मं विहाय परस्त्रीगामी, मद्यपश्चौर्यकर्मरतः आसीत् ॥ स एकदा उत्तरदिक्तः चौर्येणाऽतीव धनं गृहीत्वा आगच्छन्मार्गे तरोर्मूले चौरैर्घातितः, ततस्तत्पुत्रः पितरं नित्यमन्वेषयन्वार्तामपि नोपलब्धवान् ततः पितुः पारलौकिकं कर्म कर्तुं संभारान्गृहीत्वा वाराणसीं गंतुमुपचक्रमे, मार्गे सप्ताऽष्टौ निवासान्नीत्वा एकस्मिंस्तरोर्मूले यत्र पूर्वं पिता निहतः तत्र संध्यां कृत्वा गीतायास्तृतीयाऽध्यायं जजाप, तदैव घोरशब्दं श्रुत्वा आकाशादुत्पततं

गोविंद गोविंद हरे मुरारे गोविंद गोविंद मुकुंद कृष्ण ॥ गोविंद गोविंद रथांगपाणे गोविंद दामोदर माधवेति ॥ ४६ ॥ श्लोकार्द्धं श्लोकपादं वा नित्यं भागवतोद्भवम् ॥ कार्तिके यः पठेन्मर्त्यः श्रद्धाभक्तिसमन्वितः ॥ ४७ ॥ यैर्न श्रुतं भागवतं पुराणं नाराधितो वै पुरुषः पुराणः ॥ हुतं मुखे नैव धरामराणां तेषां वृथा जन्म गतं नराणाम् ॥ ४८ ॥ कार्तिके मासि विप्रेंद्र यस्तु गीतां पठेन्नरः ॥ तस्य पुण्यफलं वक्तुं मम शक्तिर्न विद्यते ॥ ४९ ॥ गीतायास्तु समं शास्त्रं न भूतं न भविष्यति ॥ सर्वपापहरा नित्यं गीतैका मोक्षदायिनी ॥ ५० ॥ एकेनाऽध्यायपाठेन सर्वपापकृतोऽपि च ॥ मुच्यंते नरकाद्घोराज्जडो वै ब्राह्मणो यथा ॥ ५१ ॥ शालिग्रामशिलादानं यः कुर्यात्कार्तिके मुने ॥ तस्य पुण्यस्य विश्रांति र्विष्णुना न निरूपिता ॥ ५२ ॥ शालिग्रामं समभ्यर्च्य श्रोत्रियाय महामुने ॥ दानं यः कुरुते विप्र तस्य पुण्यफलं शृणु ॥ ५३ ॥ सप्तसागरपर्यंतं भूदानाद्यत्फलं भवेत् ॥ शालिग्रामशिलादानात्तत्फलं समवाप्नुयात् ॥ ५४ ॥ शालिग्रामशिलादानात्कार्तिके ब्राह्मणी यथा ॥ विधवा सधवा जाता विवाहे पंचमेऽहनि ॥ ५५ ॥

विमानवरसंस्थितं दिव्यरूपधरं पितरं दृष्ट्वा प्रणम्य वृत्तांतमपृच्छत् । स च पिता आह—हे पुत्र यदर्थं वाराणसीं गंतव्यं, तत्सर्वमद्य कृतं; त्वं कृतकार्योऽसि निवर्तस्व गीताध्यायपठनेन त्वयाऽहं मोचितः, किंच—हे पुत्र मम भ्राता अन्ये मदन्वयाश्च नरकं प्रतिपेदिरे, ते सर्वे त्वया गीतापठनपुण्यदानेन मोचितव्याः, इत्युक्त्वा आशिषं दत्त्वा विष्णुपदं ययौ ॥ पुत्रोऽपि कालेन यमलोकं गत्वा गीतापाठजं पुण्यं दत्त्वा नारकीयान्मोचयित्वा स्वयमपि परं पदं ययाविति ॥ ५१ ॥ अथ कार्तिके शालिग्राम शिलादानप्रशंसामाह—शालिग्रामेति ॥ ५२ ॥ ५३ ॥ ५४ ॥ यथा ब्राह्मणी विवाहात्पंचमदिवसे भर्तृमरणयोगेन विधवा जाता, परंतु शालिग्रामशिलादानेन भर्ता जीव

CC-0. In Public Domain. Digitization by eGangotri

नं प्राप तेन सधवा जाता, अत्र प्रसिद्धा कथा सारोद्धारे—गोदातीरे कश्चिद्वैश्यः महापापरतः दुराचारः आसीत्, स कदाचिद्दणग्राहिणं ब्राह्मणं खड्गेनाघातयत्, ततः मरणांते रौरवनरके पतितः अथ धर्मचारोनाम तत्पुत्रः पित्रार्जितं धनं यज्ञदानव्रतजपतपइष्टापूर्तपरोपकारादिसन्मार्गेण व्ययीचकार, एकदा धर्मचारवैश्यगृहे लोमशमुनिरागत्य त्वं शालिग्रामशिलादानपुण्येन पितरं रौरवान्मोचयेत्युपदिदेश, तदा सः शिलादानं व्यर्थमिति मत्वा ऋषिवचनमनादृत्य तूष्णीं स्थितः कालेन ममार च लोमशोऽपि तूष्णीं ययौ, स धर्मचारवैश्यः शिलाया अनादराद्दिवाक्यस्य लंघनान्मन्वंतरं नरकयातनां भुक्त्वा कर्मशेषेणाऽनेकपशुयोनिं भुक्त्वा स्त्रीजन्मानि च भुक्त्वा एकादशे जन्मनि याजकब्राह्मणस्य कन्या अभवत्, तदा पिता प्राप्तयौवनां कन्यां दृष्ट्वा समानकुलगोत्राय दत्त्वा विवाहमकरोत् अथ तद्भर्ता पंचमेऽहनि वमनरोगतः मृतः, तदा याजकः जामातरं मृतं दृष्ट्वा जामाता केन जीवदिति क्षणमात्रं विचार्य कार्तिके शालिग्रामस्य दानं जीवने कारणमिति मत्वा सुलक्षणं मनोहरं शालिग्रामं पुत्र्या हस्तेन विप्राय दापयामास, तदा तत्क्षणादेव पतिः जीवनं प्राप, ततः तौ दंपती चिरकालं चिक्रीडतुः, कालांतरे सा याजकसुता शालग्रामदानपुण्येन स्त्रीजन्मतो विनिर्मुक्ता सती विष्णुयशोनामकब्राह्मणजन्म लब्ध्वा प्रतिवर्षे

तस्मात्तु कार्तिके मासि स्नानदानपुरःसरम् ॥ शालिग्रामशिलादानं कर्तव्यं नाऽत्र संशयः ॥ ५६ ॥ इति श्रीस्कांदे महापुराण एकाशीति साहस्र्यां संहितायां द्वितीये वैष्णवखण्डे कार्तिकमासमाहात्म्ये कार्तिकव्रतधर्मनिरूपणंनाम द्वितीयोऽध्यायः ॥ २ ॥ ॥ छ ॥ ॥

कार्तिके शालिग्रामदानपुण्येन मोक्षं प्रापेति ॥ ५५ ॥ शिलादानप्रसंगेन शिलालक्षणमाहपाद्मे—"चक्रांकितं हिरण्यांगं रश्मिजालं विनिर्दिशेत् ॥ सुवर्णरेखाबहुलं स्फटिकद्युतिशोभितम् ॥ अतिस्निग्धा सिद्धिकरी कृष्णा कीर्तिं ददाति च ॥ पांडुरा पापदहनी पीता पुत्रफलप्रदा ॥ नीला प्रयच्छते लक्ष्मीं रक्ता रोगप्रदायिनी ॥ रूक्षा उद्वेगजननी वक्रा दारिद्र्यभागिनी ॥ एकं सुदर्शनं ज्ञेयं लक्ष्मीनारायणं द्वयम् ॥ तृतीयं चाऽच्युतं विद्याच्चतुर्थं तु जनार्दनम् ॥ पंचमं वासुदेवं च षष्ठं प्रद्युम्नमेव च ॥ संकर्षणं सप्तमं च अष्टमं पुरुषोत्तमम् ॥ नवमं च नवव्यूहं दशमं तु दशात्मकम् ॥ एकादशं चाऽनिरुद्धं द्वादशं द्वादशात्मकम् ॥ अत ऊर्ध्वं तु चक्राणि दृश्यंतेऽनंतसंज्ञके ॥ खंडिते त्रुटिते भग्ने शालिग्रामे न दोषभाक् ॥" इति । एवं दामोदरादिमूर्तीनां लक्षणं वर्तते ग्रंथविस्तरभयान्नोच्यते इति ॥ ५६ ॥ इति कार्तिकमासमाहात्म्यटीकायां द्वितीयोऽध्यायः ॥ २ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ कार्तिकमासव्रतं कदा आरंभणीयं कदा च समापनीयमित्यपेक्षायामाह–भूय इत्यादिना । आश्विनस्येति शेषः ॥ १ ॥ २ ॥ ३ ॥४॥ अनूरुं गरुडाग्रजं, मया ब्रह्मणा

॥ ॥ ब्रह्मोवाच ॥ ॥ भूयः शृणुष्व विप्रेंद्र कार्तिकस्य च वैभवम् ॥ दशमीदिनमारभ्य दशम्यां तु समापयेत् ॥ १ ॥ पौर्णमासीं समारभ्य पौर्णमास्यां समापयेत् ॥ आश्विनस्य हरिदिनीं समारभ्य तु भक्तिमान् ॥ २ ॥ दामोदरं नमस्कृत्य कुर्यात्संकल्पमादितः ॥ दामोदर नमस्तेऽस्तु सर्वपापविनाशन ॥ ३ ॥ कार्तिकस्य व्रतं कर्तुमनुज्ञां दातुमर्हसि ॥ निर्विघ्नं कुरु देवेश आमासं पुरुषोत्तम ॥ ४ ॥ इति संप्रार्थ्य विधिना कार्तिकव्रतमाचरेत् ॥ अनूरुं वदता प्रोक्तं भास्करेण श्रुतं मया ॥ कलौ च स्वर्गगमनकारणं श्रूयतां हि तत् ॥ ५ ॥ ॥ सूर्य उवाच ॥ ॥ द्वादशानां तु मासानां मार्गशीर्षोऽतिपुण्यदः ॥ ६ ॥ तस्मात्पुण्यफलः प्रोक्तो वैशाखो नर्मदातटे ॥ ततो लक्षगुणः प्रोक्तः प्रयागे माघमासकः ॥ ॥ ७ ॥ तस्मान्महाफलः प्रोक्तः कार्तिको जलमात्रके ॥ एकतः सर्वदानानि व्रतानि नियमास्तथा ॥ ८ ॥ एकतः कार्तिकस्नानं ब्रह्मणा तुलया धृतम् ॥ संततिश्चैव संपत्तिः कलौ येषां प्रजायते ॥ ९ ॥ अवश्यं तैः कृतं विद्धि कार्तिकस्नानमादरात् ॥ स्नानं च दीपदानं च तुलसीवनपालनम् ॥ १० ॥ भूमिशय्या ब्रह्मचर्य्यं तथा द्विदलवर्जनम् ॥ विष्णुसंकीर्तनं सत्यं पुराणश्रवणं तथा ॥ ११ ॥ कार्तिके मासि कुर्वंति जीवन्मुक्तास्त एव हि ॥ न कार्तिकसमं धर्म्यमर्थ्यं नो कार्तिकात्परम् ॥ १२ ॥ न कार्तिकसमं काम्यं मोक्षदानं न कार्तिकात् ॥ युधिष्ठिरेण धर्मार्थमर्थार्थं च ध्रुवेण च ॥१३॥ श्रीकृष्णेन तु कामार्थं मोक्षार्थं नारदेन च ॥ कृतमेतद्व्रतं तस्माच्छ्रेष्ठं कृष्णप्रियं च हि ॥ १४ ॥ ॥ ॥ अरुण उवाच ॥ ॥ ब्रूहि भास्कर सर्वात्मन्कदाऽऽरभ्य व्रतं कृतम्॥ सफलं जायते सम्यक्का च पूज्याऽत्र देवता ॥१५॥ ॥ भास्कर उवाच ॥ अहं विष्णुश्च शर्वश्च देवी विघ्नेश्वरस्तथा ॥ एकोऽहं पंचधा जातो नाट्ये सूत्रधरो यथा ॥ १६ ॥ अस्माकं सर्व एवैते भेदा विद्धि खगेश्वर ॥ तस्मात्सौरैश्च गाणेशैः शाक्तैः शैवैश्च वैष्णवैः ॥ १७ ॥ कर्तव्यं कार्तिकस्नानं सर्वपापापनुत्तये ॥ सूर्यस्य प्रीतये कार्यं तुलासंस्थे दिवाकरे॥१८॥ इषपूर्णां समारभ्य यावत्कार्तिकपूर्णिमा ॥ तावत्स्नानं विधातव्यं शिवसंतुष्टये नरैः ॥ १९॥ देवीपक्षं समारभ्य महारात्रिचतुर्दशी ॥ तावत्स्नानं विधातव्यं देवी संप्रीयतामिति ॥ २० ॥ गणपक्षं समारभ्य कृष्णा या कार्तिके भवेत् ॥ चतुर्थी तावदेव स्यात्स्नानं गणपतुष्टये ॥ २१ ॥

॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ सामान्यतो व्रतारंभसमाप्तिकालमुक्त्वा उपासनापरत्वेन विशेषमाह–ब्रूहीत्यादिना ॥ १५ ॥ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥

CC-0. In Public Domain. Digitization by eGangotri

॥ २२ ॥ २३ ॥ २४ ॥ अशक्तस्य कार्तिकस्नानफलग्रहणप्रकारमाह—स्नानार्थमिति द्वाभ्याम् ॥ २५ ॥ प्रावरणं हिमानिलनिवारणवस्त्रम् ॥ रजाई दुलाई, लेप, इति प्रसिद्धम् । "नीशारः स्यात्प्रावरणे हिमानिलनिवारणे" इत्यमरः ॥ २६ ॥ २७ ॥ शुल्बजां ताम्रजाम् "शुल्बं ताम्रे यज्ञकर्मण्याचारे जलसन्निधौ" इति मेदिनी मृज्जां मृन्मयीं, चित्रजातां कागदोपरि चित्रितां, पिष्टविचित्रितां रंगवल्ल्यादिना भूमौ निर्मिताम् ॥ २८ ॥ २९ ॥ आढ्यः युक्तः ॥ ३० ॥ ३१ ॥ ३२ ॥ ब्राह्मणमाहात्म्यमाह—सनत्कुमारसंहितायाम् "अविद्यो वा सविद्यो वा ब्राह्मणो मामकी तनुः ॥ प्रायः कलियुगे विप्राः शूद्राचारपरायणाः ॥

एकादशीं समारभ्य आश्विनस्याऽसितेतराम् ॥ एकादश्यां कार्तिकस्य शुक्लायां परिपूर्यते ॥ कृतं येन तु तस्य स्यात्परितुष्टो जनार्दनः ॥ २२ ॥ न कार्तिकसमो मासो न काशीसदृशी पुरी ॥ न प्रयागसमं तीर्थं न देवः केशवात्परः ॥ २३ ॥ प्रसंगाद्वा बलात्कारैर्ज्ञात्वाज्ञात्वा कृतं भवेत् ॥ स्नानं कार्तिकमासस्य न पश्येद्यमयातनाम् ॥ २४ ॥ स्नानार्थं चेन्न सामर्थ्यं दत्वान्यस्मै धनादिकम् ॥ स्नातस्य तस्य हस्तस्य ग्रहणापुण्यभाग्भवेत् ॥ २५ ॥ अथवा कार्तिकस्नानं ये कुर्वंति द्विजातयः ॥ तेषां प्रावरणं दत्त्वा स्नानजं फलमाप्नुयात् ॥२६॥ राधादामोदरः पूज्यः कार्तिके तु विशेषतः ॥ २७ ॥ स्वर्णस्य वाथ रौप्यस्याऽप्यभावे शुल्बजामपि ॥ मृज्जां वा चित्रजातां वाऽथ वा पिष्टविचित्रिताम् ॥ २८ ॥ दामोदरस्य राधायास्तुलस्यधोऽर्चयंति ये ॥ मूर्तिं ते तु नरा ज्ञेया जीवन्मुक्ता न संशयः ॥२९॥ अपि पापसहस्राढ्यः कार्तिकस्नानतो नरः ॥ मुक्तोऽवश्यं स भवति नाऽत्र कार्या विचारणा ॥ ३० ॥ तुलस्यभावे कर्तव्या पूजा धात्रीतले खग ॥ मुख्यपूजाविधानं तु कर्तव्यं सूर्यमंडले ॥ ३१ ॥ अप्रत्यक्षाः सर्वदेवाः प्रत्यक्षो भगवानयम् ॥ सर्वे देवाः कालवशाः कालकालो दिवाकरः ॥३२॥ एतदाराधनेऽशक्तः प्रतिमां पूजयेन्नरः ॥ प्रतिमातोऽधिकं पुण्यं ब्राह्मणस्य तु पूजने ॥ ३३ ॥

वाममार्गरताः प्रायः संध्यास्नानविवर्जिताः ॥ ईदृशा अपि संपूज्या ब्रह्मबीजसमुद्भवाः ॥ ब्रह्मबीजेष्वपि श्रेष्ठः कृतोपनयनस्तु यः ॥ संध्याकर्ता ततः श्रेष्ठः स्नानकर्ता ततोऽधिकः ॥ उत्कृष्टस्तु ततो ज्ञेयः स्यात्स्वाचारेण संयुतः ॥ ततोऽप्यधीतशास्त्रस्तु वेदवेत्ता ततोऽपि च ॥ वेदार्थवित्ततः श्रेष्ठः सदाचारपरायणः ॥ अपरान्नरुचिः स्वस्त्रीनिरतः क्रोधवर्जितः ॥ मध्याह्ने प्रयतः संध्यां यः करोति द्विजोत्तमः ॥ अयाचितव्रतो होमी देवब्राह्मणपूजकः ॥ विभज्याऽऽशी सत्यवादी द्विजो यत्र तु तिष्ठति ॥ कलिकालोपसर्गायास्तत्स्थले न विशंति हि ॥ तस्मात्सर्वप्रयत्नेन कार्तिके द्विजमर्चयेत् ॥" इति ॥ ३३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दानपात्रमाहसनत्कुमारसंहितायाम्—"मोक्षायैकाकिने दद्याद्दानं द्रव्यच्युताय च ॥ सपत्नीकाय धर्मार्थं विशेषेण कुटुंबिने ॥ यत्सेवाकारिणे दत्तं दत्तं वार्धुषिकाय च ॥ दासीशाय च यद्दत्तं यद्दत्तं छद्मकारिणे ॥ तीर्थप्रतिग्राहिणे च यद्दत्तं तीर्थभोजिने ॥ धनुर्धराय यद्दत्तं दत्तं यत्प्रेतभोजिने ॥ वैद्यविद्याजीविने च तथा नक्षत्रसूचिने ॥ ईदृशे दीयते दानं येनाऽसौ नरके व्रजेत्" इति ॥ गोलक्षणमाह—"कपिला गोषु च श्रेष्ठा तदभावे तु पिंगला ॥ तदभावे सिता तस्या अभावे च सितेतरा ॥ तदभावे च या काचिद्दोग्ध्री वत्सेन संयुता ॥" इति ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ अश्वत्थवटयोरुत्पत्तिमाह सनत्कुमारसंहितायाम्—"ब्रह्मणा च पुरा सृष्टाः सर्वे देवाः सवासवाः ॥ मिलित्वा सर्व एवैते ब्रह्माणं वाक्यमब्रुवन् ॥ ब्रह्मन्सर्वाधिको रुद्रः सर्वदेवेषु पठ्यते ॥ कर्तुं तद्दर्शनं देव गच्छामो भवता सह ॥ इत्युक्त्वा देवताः सर्वे कैलासं जग्मुरादरात् ॥ न दृश्यते द्वारपालः शिवश्चाभ्यंतरे स्थितः ॥ गंतव्यं वा न गंतव्यमस्माभिः शिवसन्निधौ ॥ एवं चिंतयमानैस्तैर्नारदो मुनिसत्तमः ॥ पुरो दृष्टो देववृंदैस्तं प्रणम्योचुरुत्तमम् ॥ देवा ऊचुः ॥ मुने वेदविदां श्रेष्ठ ब्रूहि प्रश्नं सुशोभनम् ॥ किं करोति महादेवो गंतव्यं वा न वांऽतरे ॥ ॥ नारद उवाच ॥ चंद्रनाशदशायां तु देवाः संप्रस्थिता गृहात् ॥

दरिद्रो दानपात्रं स्याद्विद्यावांस्तु विशेषतः ॥ विप्राभावे पूजनीया गावः कृष्णा मनोहराः ॥ ३४ ॥ विष्णोर्मूर्तिर्जंगमतः स्थावरा तु प्रशस्यते ॥ शूद्रस्थापितमूर्तीनां नमस्कारं करोति यः ॥ पितृभिर्निरयं याति दशपूर्वैर्दशापरैः ॥ ३५ ॥ शूद्रार्चितस्य संस्पर्शाद्दहेदासप्तमं कुलम् ॥ ३६ ॥ तस्माद्विचार्य्य विप्रैर्या स्थापिता तां समर्चयेत् ॥ ततोऽपि या देवताभिः कृता सा भुक्तिमुक्तिदा ॥ ३७ ॥ मूर्त्यभावे पूजनीयोऽश्वत्थो वाऽथ वटोऽथ वा ॥ अश्वत्थरूपी विष्णुः स्याद्वटरूपी शिवो यतः ॥ ३८ ॥

तस्मात्कश्चिन्महान्विघ्नो भवतां संभविष्यति ॥ किं करोति शिवश्चेति प्रश्ने रतिदशा विभोः ॥ तस्मात्संभोगकार्येऽयं वर्तते त्रिपुरान्तकः ॥ इन्द्र उवाच ॥ सर्वेषामेव दुःखानां नाशकर्त्ता दिवस्पतिः ॥ मध्यागते कथं नाशो देवतानां भविष्यति ॥ विभीषणाय देवानां वल्गनं कुरुते मुनिः ॥ इतींद्रस्य वचः श्रुत्वा व्याकुलोऽभून्मुनिस्तदा ॥ कथं मद्वचनं सत्यं भविष्यत्यद्य वज्रिणि ॥ अद्य मद्वचनं शीघ्रं यदि सत्यं भविष्यति ॥ राधादामोदरमुदे करिष्ये कार्तिकव्रतम् ॥ एवं संचिंत्य मनसा तूष्णींभूतो मुनीश्वरः ॥ इंद्रो व्यचारयद्देवैः किमिदानीं विधीयताम् ॥ तत इंद्र उवाचेदं वह्ने मद्वचनं शृणु ॥ गृहीत्वा विप्ररूपं त्वं शिवस्याऽभ्यंतरे व्रज ॥ यदि प्रसंगोऽस्त्यस्माकं तदा वार्ता निगद्य ताम् ॥ यदि नास्ति प्रसंगश्चेद्याचकत्वेन याहि च ॥ अवध्यत्वादताड्यत्वाद्भिक्षुकत्वेन तं व्रज ॥ इति देवेंद्रवचनं श्रुत्वा वह्निस्तथाऽकरोत् ॥ अभ्यंतरं ददर्शेशं शिवया सह संगतम् ॥ शिवयाऽपि च दृष्टः स लज्जिता भोगमत्यजत् ॥ कोऽसि कोऽसीति संपृष्टो भिक्षुकोऽहं क्षुधातुरः ॥ वृद्धोऽस्म्यंधोऽस्मि दीनोऽस्मि भोजनं दीयतां मम ॥ तेनाऽदृष्ट

१ चन्द्रनाशः—चन्द्रं नाशयतीति चन्द्रनाशो राहुः—ग्रहणकाले सम्पीडनात् ।

CC-0. In Public Domain. Digitization by eGangotri

मिति ज्ञात्वा पार्वती तमभोजयत् ॥ सोऽपि भुक्त्वा समाचारं वक्तुं संप्रस्थितो बहिः ॥ तस्मिन्नेव क्षणे गतो नारदः पार्वतीं ययौ ॥ शिरो निधाय पार्वत्याः पादयोः स रुरोदह॥ अहो बालक किं जातं तच्छीघ्रमभिधीयताम् ॥ करोमि निष्कृतिं तस्य साध्यासाध्यस्य वाऽन्यथा ॥ नारद उवाच ॥ मातर्वक्तुं न शक्नोमि उपहासस्य कारणम् ॥ कृतं यथें द्रादि देवैस्तथा कोऽन्यः करिष्यति ॥ इति श्रुत्वा वचस्तस्य पुनः पुनरपृच्छत ॥ मुद्रयित्वा ततो नेत्रे कराभ्यां स मुनीश्वरः ॥ उवाच वचनं नीचं मूर्खोऽसौ गद्गदाक्षरम् ॥ इंद्रोऽयं युवयोर्भोगं देवताभ्यो ह्यवर्णयत् ॥ युवयोश्च कृता निन्दा तां श्रुत्वा दुःखितोऽस्म्यहम् ॥ भोगविच्छित्तये वह्निः प्रेषितो द्विजरूपकः ॥ जगन्माताऽसि देवि त्वं का ते स्यादुपहास्यता ॥ इति तस्या वचः श्रुत्वा पार्वती क्रुद्धमानसा ॥ स्फुरदोष्ठा रक्तनेत्रा दृष्ट्वा तां नारदो ययौ ॥ गत्वा देवानुवाचेदं संभोगाद्विरतो हरः ॥ आगम्यतां दर्शनार्थं दूरतोऽसौ विलोकितः ॥ वह्नेर्मुनेर्वचः श्रुत्वा देवेंद्रः सगणो ययौ ॥ प्रणिपत्य महादेवं कृतांजलिपुटोऽभवत् ॥ दृष्ट्वा तथाविधं शक्रं पार्वती वाक्यमब्रवीत् ॥ यावंतः संति देवानां ज्ञातयः सर्व एव ते ॥ अजानंतः स्त्रीसुखानि शाखिनः संतु सस्त्रियः ॥ इति देवीवचः श्रुत्वा कंपिताः सर्वदेवताः ॥ ब्रह्मविष्णुमहेशाद्यास्तुष्टुवुर्जगदं

कार्तिके तुलसीशाकं तांबूलं वा नराधमः ॥ अज्ञानाज्ज्ञानतो वाऽपि भुञ्जानो निरयं व्रजेत् ॥ ३९ ॥
शालिग्रामशिलाचक्रे नित्यं सन्निहितो हरिः ॥ तस्मात्सर्वप्रयत्नेन शालिग्रामं प्रपूजयेत् ॥ ४० ॥
रुद्रशापवशाद्गावो विष्ठाभक्षणतत्पराः ॥ तथाऽपि ताः पूजनीया लोकद्वयफलप्रदाः ॥ ४१ ॥

बिकाम् ॥ ततो देवी प्रसन्नाऽभूद्देवेंद्रं वाक्यमब्रवीत् ॥ देवा मद्वचनं मिथ्या त्रिलोकेऽपि न जायते ॥ तस्मादेकांशतो वृक्षा यूयं सर्वे भवंतु वै ॥ इति देव्या वचः श्रुत्वा जाता देवास्तु पादपाः ॥ अश्वत्थरूपी भगवान्वटरूपी सदाशिवः ॥ पालाशोऽभूद्विधाता च आम्रः शक्रो बभूव ह ॥ इन्द्राण्याद्या लता ज्ञेया देवानां योषितस्तथा ॥ मालत्याद्याः पुष्पलता उर्वश्याद्यप्सरोगणाः ॥" इति ॥ ३८ ॥ तुलसीशाकं क्वचिद्देशे प्रसिद्धम् ॥ ३९ ॥ ४० ॥ ननु विष्ठाभक्षणतत्पराः गावः कथं जाता इत्य पेक्षायामाह सनत्कुमारसंहितायाम्—एकदा ब्रह्मा गंगाद्वारमागत्य कार्तिकस्नानतत्परान्विष्णुभक्तिरतानृषीन्दृष्ट्वा अतिकोपसंततः सन् जगत्कर्तारं मां विहाय विष्णुः कथमा राध्यते तद्वदत नो चेच्छापं ददामीत्युवाच, तदा त्रस्तैर्ऋषिभिः ध्यातो विष्णुः प्रत्यक्षीभूय ब्रह्माणमुवाच, हे ब्रह्मन् त्वं निमित्तमात्रं, विश्वपालको नारायण एव, अतः कार्ति के विप्रैः पूज्यः, ब्रह्मा वदति—अहं जगद्गुरुः एवं द्वयोर्विवदतोः कस्याऽपि पराजयः न जातः, तदा विष्णुः आवयोः सामर्थ्यं शिवः वेत्ति तत्र निर्णयो भविष्यति, तथेत्युक्त्वा ब्रह्मा विष्णुश्च काशिकां जग्मतुः । तत्र शिवं प्रणम्य आवयोर्मध्ये कः श्रेष्ठः हे प्रभो त्वं सत्यं ब्रूहि इत्यूचतुः, तदा शिव उवाच—"एतन्मम महालिंगं कियदूर्ध्वं तले कियत्॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यो ज्ञास्यत्येतदंतं स लोके पूज्यो भविष्यति ॥ तस्मादेकत्र याहि त्वं ब्रह्मन्विष्णो त्वमेकतः ॥ एतद्वचः समाकर्ण्य वेधाश्चोपरि संययौ ॥ अधस्ताच्च गतो विष्णुर्ययौ पंचशतं समाः ॥ विश्रांतः खेदखिन्नश्च न प्राप्तोंऽतस्तु तस्य च ॥ पुनः परावृत्य ययौ प्राणमद्रुद्रमादरात् ॥" रुद्र उवाच ॥ हे विष्णो किं दृष्टम् ॥ विष्णुरुवाच ॥ हे शिव पंचशतं समाः भ्रमन्नपि तवांऽतो न दृष्टः, अत एव त्वन्निकटे तूष्णीं स्थितोऽस्मि॥ "ब्रह्मा वर्षसहस्राणि ययावूर्ध्वं सुदुःखितः ॥ विचारयन्मनस्येव किं कर्तव्यं मयाऽधुना॥ विष्णुनांऽतो यदा प्राप्तस्तदा श्रेष्ठो भविष्यति ॥ न प्राप्तश्चेत्तदा तुल्यौ जायेतां तौ शिवाऽऽज्ञया ॥ तस्माच्छद्म करिष्यामि यथा स्यां लोकपूजितः" इति निश्चित्य कामधेनुं केतकं चाह--युवाभ्यां शिवलिंगस्यांऽतो मया दृष्टः इति शिवसमीपे साक्ष्यं दातव्यम्, युवयोर्मनोरथं करिष्यामि, इत्युक्त्वा ताभ्यां सह शिवसमीपमेत्य हास्यं कृत्वोवाच"सहस्रशैलिंगांतो मया दृष्टस्तवाऽखिलः ॥ एषा धेनुः केतकोऽप्यमुभौ तत्रैव संस्थितौ ॥ प्रष्टव्यौ तौ महादेव त्वया शपथपूर्वकम् ॥ शिव उवाच ॥ कृतघ्नानां तु यत्पापं युवयोर्मस्तके पतेत् ॥ यद्यसत्यं प्रभाषेत लिंगांऽतो वीक्षितोऽमुना ॥" धेनुकेतकावूचतुः—हे शिव ब्रह्मा ते लिंगांतं गतः तच्चास्माभिर्विलोकितम् ॥ शिव उवाच ॥ "मिथ्या ब्रूते योऽ

ब्रह्मांऽशकसमुद्भूते पालाशे यस्तु भोजनम् ॥ कुर्यात्कार्तिकमासेऽसौ विष्णुलोकं प्रयास्यति ॥ ४२ ॥ अश्वत्थरूपी भगवान्वटरूपी सदाशिवः ॥ तस्मात्सर्वप्रयत्नेन कार्तिकेऽश्वत्थमर्चयेत् ॥ ४३ ॥ या नारी कार्तिके मासि लक्षं कुर्यात्प्रदक्षिणाः ॥ राधादामोदरं पूज्य मन्दवारे च तत्तले ॥ ४४ ॥ दम्पती भोजयेद्राधादामोदरस्वरूपिणौ ॥ भोजयित्वा सपत्नीकान्पश्चाद्भुंजीत वाग्यतः ॥ ४५ ॥ वन्ध्याऽपि लभते पुत्रमितरासां तु का कथा ॥ सदा सन्निहितो विष्णुर्द्विपत्सु ब्राह्मणे यथा ॥ ४६ ॥

धमो मां विष्ठा पतति तन्मुखे ॥ अपवित्रं मुखं तस्मात्तद्भविष्यत्यसंशयम् ॥ शृणु केतक ते पुष्पैर्नरो मामर्चयिष्यति ॥ लक्ष्मीसंपात्तिहीनोऽसौ रौरवं नरकं व्रजेत् ॥ शृणु ब्रह्मन्क्षितौ यस्तु जनस्त्वां पूजयिष्यति ॥ सद्यो भवत्यसौ कुष्ठी दरिद्रो मृतसंततिः ॥ शृणु विष्णो महाभाग कार्तिकेऽस्मिञ्जितं त्वया ॥ तस्मात्त्वत्प्रीतये लोकैः कृतं भवति चाक्षयम् ॥" इति ॥ ४१ ॥ पालाशे पालाशपत्रे । अत्र विशेषः पाद्मे—"यः करोति नरो नित्यं कार्तिके पत्रभोजनम् ॥ न दुर्गतिमवाप्नोति यावदिंद्राश्चतुर्दश ॥ सर्वकामफलं तस्य सर्वतीर्थफलं लभेत् ॥ न चाऽपि नरकं पश्येद्ब्रह्मपत्रेषु भोजनात् ॥ ब्रह्मा एष स्मृतः साक्षात्पालाशः सर्वकामदः ॥ मध्यमं वर्जयेत्पत्रं कार्तिके शिखिवाहन ॥ ब्रह्मा विष्णुश्च रुद्रश्च त्रयो देवास्त्रिपत्रके ॥ ऐश्वरं वर्जयेत्पत्रं ब्रह्मा विष्णुरनुत्तमम् ॥ सर्वं पुण्यमवाप्नोति शेषपत्रेषु भोजनात्॥भोजनान्मध्यपत्रेषु कपिलापयसस्तथा॥ प्राशनान्मुनिशार्दूल नरो नरकमाप्नुयात् ॥ भोजनं ब्रह्मपत्रेषु कार्तिके मुक्तिदायकम्॥मौनी पालाशभोजी च हन्यात्पापं युगार्जितम्॥" इति ॥४२॥४३॥४४॥४५॥ द्विपत्सु द्विपदेषु,

CC-0. In Public Domain. Digitization by eGangotri

मनुष्यमात्रेषु ब्राह्मणे विष्णोर्वासः ॥ ४६ ॥ बोधिद्रुमेऽश्वत्थवृक्षे ॥ ४७ ॥ शनिवासरे अश्वत्थपूजा स्पर्शेन कर्तव्या अन्यवारे शनिव्यतिरिक्तरव्यादिषड्वारे अश्वत्थस्पर्शं यदि कुर्यात्तदा दरिद्रः स्यात् । अत्र प्रसिद्धां कथामाह—यदा समुद्रमथनाज्ज्येष्ठा लक्ष्मीश्चोत्पन्ने लक्ष्मीर्विष्णवे दत्ता ज्येष्ठा उद्दालकाय दत्ता सा उद्दालकस्य वेदध्वनिनिनादितमतिपवित्रमाश्रमं विलोक्य अतिदुःखिता सती पतिमुवाच—हे स्वामिन्, तवाऽऽश्रमे मम शिरःपीडा भवति, अत्र न वसामि यत्र द्यूतमद्यव्यसनिनः परदाराभिगामिनः कलहकारिणः वसंति तादृशं स्थलं मे देहि, इति ज्येष्ठावचः श्रुत्वा उद्दालकः भृशं दुःखितः सन् अस्याः त्यागेनैव मम सुखं भवेदिति विचार्य भार्यामुवाच, हे कांते मद्वचनं शृणु, अद्य अश्वत्थाधः स्थिरा भव, तव यथायोग्यं स्थलं विलोक्य तत्र त्वां नयामि, मा शुचः, इत्थमाश्वास्य पलायनमचीकरत्, साऽपि सायंकालपर्यंतं स्थि

बोधिद्रुमे पादपेषु शालिग्रामे शिलासु च ॥ तस्मादश्वत्थमूले वै कर्तव्यं विष्णुपूजनम् ॥ ४७ ॥ अश्वत्थपूजा स्पर्शेन कर्त्तव्या शनिवासरे ॥ अन्यवारेऽश्वत्थसंगाद्दारिद्रो जायते नरः ॥४८॥ स्नानं जागरणं दीपं तुलसीवनपालनम् ॥ कार्तिके मासि कुर्वंति ते नरा विष्णुमूर्तयः ॥ ४९ ॥ संमार्जनं विष्णुगृहे स्वस्तिकादिनिवेदनम् ॥ विष्णोः पूजां च ये कुर्युर्जीवन्मुक्तास्तु ते नराः ॥ ५० ॥ स्नानकालं प्रवक्ष्यामि तीर्थादिषु च यत्फलम् ॥ स्नानधर्मांश्च ये केचित्तान्सर्वान्मे निबोधत ॥ ५१ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे कार्तिकमासमाहात्म्ये कार्तिकवैभववर्णनंनाम तृतीयोऽध्यायः ॥ ३ ॥ ॥छ॥ ॥ ॥ब्रह्मोवाच ॥ ॥ नाडीद्वयावशिष्टायां रात्र्यां गच्छे ज्जलाशयम् ॥ तुलसीमृत्तिकायुक्तः सवस्त्रकलशो मुने ॥ १ ॥ आगत्य तोयनिकटे तीरे संस्थाप्य पात्रकम् ॥ पादप्रक्षालनं कृत्वा देशकालादि चोच्चरेत् ॥ २ ॥ स्मरेद्गंगादिका नद्यो विष्णुशर्वादिदेवताः ॥ नाभिमात्रे जले स्थित्वा मंत्रमेतमुदीरयेत् ॥ ३ ॥

त्वा निराशा सती करुणं रुरोद तदा श्रुत्वा तद्रोदनं विष्णुः श्रिया सह समाययौ, हे ज्येष्ठे अलक्ष्मीः अद्य शनिवासरोऽस्ति अतः सप्तमे सप्तमेऽहनि तव भगिनी मेलनायागमिष्यति अन्यवारेषु यैः पिप्पलः स्पृश्यते तद्गृहं व्रज शनिवारे यैः अश्वत्थः स्पृष्टः तत्र मत्प्रिया यास्यति एवमाश्वास्य हरिः वैकुंठं जगाम, तस्मान्मंदवारं विनाऽश्वत्थः न स्पृश्य इति ॥ ४८ ॥ ४९ ॥ आदिशब्देन लेपनादि ॥ ५० ॥ मे मत्तः ॥ ५१ ॥ इति कार्तिकमासमाहात्म्यटीकायां तृतीयोऽध्यायः ॥ ३ ॥ ॥छ॥ ॥ अथ स्नानकालनिरूपणपूर्वकं स्नानकर्तव्यविधानमाह—नाडीति । नाडी घटिका ॥ १ ॥ २ ॥ ३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मया सह लक्ष्म्या सह ॥ ४ ॥ ५ ॥ अर्घ्यमंत्रानाह—गृहाणेति ॥ ६ ॥ ७ ॥ ८ ॥ काशीस्थपंचनदीसंगमस्मरणमाह—किरणा इति ॥ कथंभूता सरस्वती पुण्यतोया ॥

कार्तिकेऽहं करिष्यामि प्रातःस्नानं जनार्दन ॥ प्रीत्यर्थं तव देवेश दामोदर मया सह ॥ ४ ॥ नित्ये नैमित्तिके कृत्वा कार्तिके पापनाशन ॥ स्नानं चार्घं प्रदास्यामि निर्विघ्नं कुरु केशव ॥ ५ ॥ तीर्थादिदेवताभ्यश्च क्रमादर्घ्यादि दापयेत् ॥ गृहाणार्घ्यं मया दत्तं राधया सहितो हरे ॥ ६ ॥ नमः कमलनाभाय नमस्ते जलशायिने ॥ नमस्तेऽस्तु हृषीकेश गृहाणार्घ्यं नमोऽस्तु ते ॥ ७ ॥ व्रतिनः कार्तिके मासि स्नातस्य विधिवन्मम ॥ गृहाणार्घ्यं मया दत्तं दनुजेंद्रनिषूदन ॥ ८ ॥ किरणा धूतपापा च पुण्यतोया सरस्वती ॥ गंगा च यमुना चैव पंचनद्यः पुनंतु माम् ॥ ९ ॥ अन्यासां च नदीनां च दद्यादर्घ्यं यथाविधि ॥ जाह्नवीस्मरणं कुर्यात्सर्वतीर्थेषु मानवः ॥ १० ॥ नान्यत्तीर्थे तु जाह्नव्यां स्मरणीयं कदाचन ॥ एतान्मंत्रान्समुच्चार्य मलस्नानं समाचरेत् ॥ ११ ॥ मृत्स्नानं च पितृस्नानं गुरुस्नानं ततः परम् ॥ ततस्तु पावमानीभिरभिषिंचेत्स्वमस्तकम् ॥ १२ ॥ अघमर्षणकं कृत्वा स्नानांगं तर्पणं तथा ॥ ततः पुरुषसूक्तेन जलं शिरसि सिंचयेत् ॥ १३ ॥ ततस्तु बहिरागत्य तीर्थं शिरसि निक्षिपेत् ॥ तीर्थं पीत्वा त्रिवारं तु तुलसीं गृह्य पाणिना ॥ १४ ॥ ततो जलाद्विनिष्क्रम्य चांचलं पीडयेद्बहिः ॥ यन्मया दूषितं तोयं शारीरमलसंचयैः ॥ १५ ॥ तद्दोषपरिहारार्थं यक्ष्मणं तर्पयाम्यहम् ॥ वस्त्रनिष्पीडनं कृत्वा कुर्याच्च तिलकादिकम् ॥ ॥ १६ ॥ ॥ सूत उवाच ॥ ॥ शृणुध्वमृषयः सर्वे कार्तिकस्नानजं फलम् ॥ अरुणं प्रति सूर्येण यदुक्तं च सविस्तरम् ॥ १७ ॥ ॥ अरुण उवाच ॥ ॥ कस्मिंस्तीर्थे विशेषेण फलं कार्तिकसंभवम् ॥ क्षेत्रे वा एतदाऽऽख्याहि भगवन्स्नानयोगतः ॥ १८ ॥ ॥ सूर्य उवाच ॥ यत्र कुत्राऽपि कर्तव्यं जले स्नानं तु कार्तिके ॥ उष्णोदकेन कर्तव्यं स्नानं कुत्राऽपि कार्तिके ॥ १९ ॥ ततो दशगुणं पुण्यं शीततोयनिमज्जनात् ॥ ततः शतगुणं पुण्यं बहिः कूपोदके कृतम् ॥ २० ॥ कूपात्सहस्रगुणितं फलं वापीनिषेकतः ॥ ततोऽयुतगुणं पुण्यं तडागस्नानतो भवेत् ॥ २१ ॥ ततो दशगुणं पुण्यं निर्झरेषु निमज्जनात् ॥ ततोऽधिकतरं पुण्यं नदीस्नानस्य कार्तिके ॥ २२ ॥

॥ ९ ॥ १० ॥ मलस्नानं प्रथमस्नानम् ॥ ११ ॥ मृत्स्नानं मृत्तिकालेपनपूर्वकं स्नानं, पितृस्नानं पितृसूक्तेन स्नानं, गुरुस्नानं गुर्वाज्ञया स्नानम् ॥ १२ ॥ १३ ॥ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ अत्रोष्णोदकग्रहणं क्रमेण फलप्रदर्शनार्थं न तु विधिरशक्तविषयश्च ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥

CC-0. In Public Domain. Digitization by eGangotri

॥ २३ ॥ २४ ॥ २५ ॥ सरोवरं मानससरोवरं नारायणसरोवरं वा ॥ २६ ॥ २७ ॥ कांचीद्वयं शिवकांची विष्णुकांची तीर्थम् ॥ २८ ॥ वराहक्षेत्रं वेंकटस्थ

नद्या दशगुणं प्रोक्तं तीर्थस्नानं खगोत्तम ॥ ततो दशगुणं पुण्यं नद्योर्यत्र च संगमः ॥२३॥ नदीत्रयस्य संयोगे पुण्यस्यांऽतो न विद्यते ॥ सिंधुः कृष्णा च वेणी च यमुना च सरस्वती ॥ २४ ॥ गोदावरी विपाशा च नर्मदा तमसा मही ॥ कावेरी शरयूः शिप्रा तथा चर्मण्वती नदी ॥ २५ ॥ वितस्ता वेदिका शोणो वेत्रवत्यपराजिता ॥ गंडकी गोमती पूर्णा ब्रह्मपुत्रा सरोवरम् ॥ २६ ॥ वाग्मती च शतद्रुश्च तथा बदरिकाश्रमः ॥ दुर्लभाः कार्तिके त्वेते तीर्थान्यथ निबोध मे ॥ २७ ॥ सर्वेभ्यश्च स्थलेभ्यश्च आर्यावर्तं तु पुण्यदम् ॥ कोल्हापुरी ततः श्रेष्ठा ततः कांचीद्वयं स्मृतम् ॥ ॥ २८ ॥ अनंतसेनवसतिर्वराहक्षेत्रमेव च ॥ चक्रक्षेत्रं ततः पुण्यं मुक्तिक्षेत्रं ततोऽधिकम् ॥ २९ ॥ अवंतिका ततः श्रेष्ठा ततो बदरिकाश्रमः ॥ अयोध्या च ततः श्रेष्ठा गंगाद्वारं ततोऽधिकम् ॥ ३० ॥ ततः कनखलं तीर्थं ततो मधुपुरी वरा ॥ एकोऽपि कार्तिको मासो मथुरायमुनाजले ॥ ॥ ३१ ॥ यैः स्नातस्ते तु वैकुंठे बहुकालं वसंति हि ॥ राधादामोदरस्तत्र स्वयं स्नातस्तु कार्तिके ॥ ३२ ॥ अतो मधुपुरी श्रेष्ठा यमुना च विशेषतः ॥ ३३ ॥ द्वारावती ततः श्रेष्ठा प्रत्यहं स्नाति केशवः ॥ षोडशस्त्रीसहस्रेण सार्द्धं यादवसंयुतः ॥ ३४ ॥ द्वारकायां मृत्तिकायास्तिलको येन मस्तके ॥ धार्यतेऽसौ नरो ज्ञेयो जीवन्मुक्तो न संशयः ॥ द्वारकास्नानमाहात्म्यं न वक्तुं शक्यते मया ॥ ३५ ॥ गोविंदार्पितचित्तानां जायते पुण्यभास्करा ॥ ततो भागीरथी श्रेष्ठा यत्र विंध्येन संगता ॥ ३६ ॥ तस्माद्दशगुणं पुण्यं तीर्थराजेऽत्र जायते ॥ ३७ ॥ कलौ दशसहस्रांऽते विष्णुस्त्यक्ष्यति मेदिनीम् ॥ तदर्द्धं जाह्नवीतोयं तदर्धं देवतागणाः ॥ ३८ ॥ यावत्तिष्ठति गंगाऽत्र तावत्तीर्थानि संति च ॥ स्वस्वस्थाने नृणां पापं तावदेव हरंति च ॥ ३९ ॥ यदैव गंगा नष्टा स्यात्को वा तत्पापमाहरेत् ॥ विचार्यैवं सुतीर्थानि गमिष्यंति धरातले ॥ ४० ॥ तस्मान्मुनीश्वराः सर्वे यावत्तिष्ठति जाह्नवी ॥ तावच्च क्रियतां धर्मस्ततो भूमौ निलीयताम् ॥ ४१ ॥ समाधिं गृह्य सुदृढां यावत्कृतयुगं भवेत् ॥ अन्यथा कलिकालेन भ्रंशनीयो भवेत्सुधीः ॥ ४२ ॥ ततः श्रेष्ठतरा काशी यस्या नाशो न जायते ॥ यदाश्रयेण गंगापि सर्वपापं व्यपोहति ॥ ४३ ॥

लम् ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ गोपीचंदनमाहात्म्यमाह—द्वारकायामिति ॥ ३५ ॥ यत्र विंध्येन संगता विंध्याचलनिवासिनीस्थलसमीपवाहिनीत्यर्थः ॥३६॥ तीर्थराजे प्रयागराजे ॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥ ४२ ॥ काशीप्रशंसामाह—तत इति ॥ ४३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्यां गंगायां पंचनदं तीर्थम् । पंचनदमाहात्म्यमरुणं प्रति सूर्य उवाच—"मया तत्र तपस्तप्तं प्रस्वेदात्किरणा नदी॥गभस्तीशादधोभागे गंगया सह संगता ॥ धूतपापाऽपि तत्रैव चंद्रांशकसमुद्भवा ॥ रुद्रांशकसमुद्भूता स्वयं भागीरथी स्थिता ॥ विष्णोरंशसमुद्भूता यमुना यत्र संगता ॥ ब्रह्मांशसंभवा यत्र दृश्यते तु सरस्वती ॥ तीर्थं पंचनदं नाम भूमावेकं विराजते ॥ सर्वतीर्थानि गच्छंति तत्तत्तीर्थं दिने खलु ॥ यात्रार्थं काशिकास्थानि न यांति क्काऽपि सारथे ॥ तानि सर्वाणि चायांति स्नातुं पंचनदे शुभे ॥ मणिकर्ण्यपि

काशिकाया नैव नाशो ब्रह्मण्यपि मृते सति ॥ यद्दर्शनार्थं गंगाऽपि जाता चोत्तरवाहिनी ॥ तस्यां पंचनदं तीर्थं त्रिषु लोकेषु विश्रुतम् ॥ ४४ ॥ आगते कार्तिके मासि रौरवं नरकं गताः ॥ आक्रोशंते तु पितरो वंशेऽस्माकं भविष्यति ॥ ४५ ॥ कश्चिद्भाग्यवतां श्रेष्ठो गत्वा पंचनदे शुभे ॥ अस्माकं तर्पणं कुर्यान्नरकार्णवतारकम् ॥ ४६ ॥ तीर्थराजादितीर्थानि प्राप्ते कार्तिकमासके ॥ स्नानार्थं पञ्चगंगं तु समायांति न संशयः ॥ ४७ ॥ कृत्वा तु लक्षपापानि स्नात्वा पंचनदे शुभे ॥ बिंदुमाधवमभ्यर्च्य विलयं यांति तत्क्षणात् ॥ ४८ ॥ यैः स्नातं कार्तिके मासि सकृत्पंचनदे शुभे ॥ सर्वतीर्थकृतास्नानात्फलं कोटिगुणं भवेत् ॥ ४९ ॥ ॥ ब्रह्मोवाच ॥ ॥ कार्तिके मासि कावेर्यां यः स्नानं कर्तुमिच्छति ॥ तावता वै विमुक्ताऽघो विष्णुसायुज्यमाप्नुयात् ॥ ५० ॥ कावेर्याश्चैव माहात्म्यं को वदेत्परमुत्तमम् ॥ अत्र ते वर्णयिष्यामि इतिहासं पुरातनम् ॥ ५१ ॥ कावेर्या विषये ब्रह्मन्सावधानमनाः शृणु ॥ गौतम्या उत्तरे तीरे विष्णुपादाब्जसंभवा ॥ ५२ ॥ गंगा त्रैलोक्यपापघ्नी वर्तते लोकपूजिता ॥ सा गंगा चिंतयामास कदाचित्पापशंकिता ॥ ५३ ॥ सर्वलोकाः समागत्य मयि पापं त्यजंति हि ॥ तत्पापं तु कथं गच्छेदिति चिन्तापरा तदा ॥ ५४ ॥ प्रष्टुं जगाम कैलासं गिरिजावल्लभं भवम् ॥ तत्र दृष्ट्वा महारुद्रं प्रोवाच हरिपादजा ॥ ५५ ॥ ॥ गङ्गोवाच ॥ ॥ महारुद्र नमस्तेऽस्तु त्वां प्रष्टुमहमागता ॥ सर्वे लोकाः समागत्य मयि पापं त्यजंति हि ॥ ५६ ॥ तत्पापं तु मया सोढुं न शक्यं पार्वतीपते ॥ येनोपायेन तत्पापं नाऽऽगच्छेन्मम तद्वद ॥ ५७ ॥

चाऽऽयाति पुर्यादीनां च का कथा ॥ दुर्लभो मानुषो देहो दुर्लभा काशिका पुरी ॥ तत्राऽपि कार्तिके मासि पंचगांगं सुदुर्लभम् ॥" इति ॥४४॥ ४५ ॥ ४६ ॥ ४७ ॥ ॥ ४८ ॥ अत्र सर्वत्र पंचनदशब्देन काशीस्थपंचगंगातीर्थं ग्राह्यं न तु कावेरीतटस्थमिति ॥ ४९ ॥ कार्तिके कावेरीस्नानमाहात्म्यमाह—ब्रह्मोवाचेत्यादिना ॥ ५० ॥ ॥ ५१ ॥ ५२ ॥ ५३ ॥ ५४ ॥ भवं शिवम् ॥ ५५ ॥ ५६ ॥ ५७ ॥

CC-0. In Public Domain. Digitization by eGangotri

॥ ५८ ॥ ५९ ॥ ६० ॥ तत्र तस्याम् ॥ ६१ ॥ ६२ ॥ ६३ ॥ ६४ ॥ ६५ ॥ ६६ ॥ तुलास्नानं तुलासंक्रांतिप्रवेशकालमारभ्य वृश्चिकार्क
प्रवेशकालपर्यंतं स्नानम् ॥ ६७ ॥ ६८ ॥ अन्यतीर्थक्षेत्रस्थितपुरुषस्य कावेरीस्नानजपुण्यप्राप्त्युपायमाह–इतिहासमिति ॥ ६९ ॥ अथ कार्तिकस्नान उत्तमा

एवं गंगावचः श्रुत्वा प्रत्याह परमेश्वरः ॥ ॥ रुद्र उवाच ॥ ॥ पापनिर्हरणायादौ पद्मनाभांघ्रिपंकजात् ॥५८॥ प्रादुर्भूताऽसि त्वं देवि किमर्थं
तप्यते त्वया ॥ पापप्रहाराऽऽधिपत्यं कल्पितं तव विष्णुना ॥ ५९ ॥ तथाऽपि पापनिर्हार उपायं ते ब्रवीम्यहम् ॥ कवेश्च तनया देवी कावेरी
सरितां वरा ॥ ६० ॥ सर्वोत्कृष्टा च सर्वेषां हरेर्बलवशात्तु सा ॥ सर्वपापप्रहरणे सामर्थ्यं तत्र वर्तते ॥ ६१ ॥ कार्तिके मासि कावेर्यां यः स्नानं
कुरुते नरः ॥ स तु पापविनिर्मुक्तो याति विष्णोः परं पदम् ॥ ६२ ॥ तस्मात्त्वं गच्छ देवि त्वं ततः पापाद्विमोक्ष्यसे ॥ इत्युक्ता सा तदागच्छ
त्कावेरीं पापहारिणीम् ॥६३॥ तज्जलस्पर्शमात्रेण कार्तिके विष्णुपादजा ॥ निर्धूतपातका गंगा जगाम स्वनिकेतनम् ॥६४॥ कार्तिके प्रतिवर्षं तु
गंगा त्रैलोक्यपावनीम् ॥ स्नातुं भक्त्या समायाति कावेरीं पापहारिणीम् ॥६५॥ तज्जलस्पर्शमात्रेण कार्तिके विष्णुपादजा ॥ निर्धूतपातका गंगा
जगाम स्वनिकेतनम् ॥६६॥ तस्माच्छस्तं तुलास्नानं कावेर्यां शस्यते बुधैः ॥ यः कावेर्यां तुलास्नानं भक्त्या तु कुरुते मुने ॥६७॥ विमुक्तदुरितः
सद्यस्ततो याति परां गतिम् ॥ तस्मात्स्नानं तु कावेर्यां कार्तिके मासि शस्यते ॥ ६८ ॥ इतिहासमिमं श्रुत्वा कार्तिकव्रततत्परः ॥ स कावेरी
स्नानफलं प्राप्नोति च परां गतिम् ॥ ६९ ॥ रात्रिशेषे भवेत्स्नानमुत्तमं विष्णुतुष्टिकृत् ॥ सूर्योदये मध्यमं स्याद्यावन्नाऽऽस्ता तु कृत्तिका ॥ ७० ॥
तावदेव भवेत्स्नानमन्यथा तन्न कार्तिकम् ॥ स्नानं स्त्रीभिर्विधातव्यं गृहीत्वाऽऽज्ञां धवस्य च ॥७१॥ अपृष्ट्वा यत्कृतं धर्म्यं भर्तारं तत्क्षयं नयेत् ॥
स्त्रीणां नास्त्यपरो धर्मो भर्तारं प्रोज्झ्य कश्चन ॥ ७२ ॥ कुर्यात्सहस्रपापानि भर्त्राऽऽज्ञां या समाचरेत् ॥ सैषा धर्मवती लोके न जायेत व्रता
दिना ॥ ७३ ॥ दरिद्रः पतितो मूर्खो दीनोऽपि यदि चेत्पतिः ॥ तादृशः शरणं स्त्रीणां तत्त्यागान्निरयं व्रजेत् ॥ ७४ ॥ कलौ वत्स मनुष्याणां
शैथिल्यं स्नानकर्मणि ॥ तथापि कथयिष्यामि स्नानं कार्तिकमाघयोः ॥ ७५ ॥ यस्य हस्तौ च पादौ च वाङ्मनश्च सुसंयतम् ॥ विद्या तपश्च
कीर्तिश्च स तीर्थफलभाङ्नरः ॥ ७६ ॥ अश्रद्दधानः पापात्मा नास्तिकश्छिन्नमानसः ॥ हेतुवादी च पंचैते न तीर्थफलभागिनः ॥ ७७ ॥ प्रातरु
त्थाय यो विप्रस्तीर्थस्नायी सदा भवेत् ॥ सर्वपापविनिर्मुक्तः परं ब्रह्माऽधिगच्छति ॥ ७८ ॥

दिकाललक्षणमाह–रात्रिशेष इति ॥ ७० ॥ धवस्य स्वभर्तुः ॥ ७१ ॥ प्रोज्झ्य त्यक्त्वा ॥ ७२ ॥ ७३ ॥ ७४ ॥ ७५ ॥ ७६ ॥ ७७ ॥ ७८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्नानभेदानाह—स्नानमिति ॥ ७९ ॥ मेघांबु भास्करं मेघांबु मेघधाराजलं तत्र स्नानं भास्करं सूर्यतापोद्भवम् ॥८०॥८१॥८२॥८३॥ पुरा प्रभंजनोनाम नृपः मृगयायां गुल्मांतरे स्थितां वत्सं पाययंतीं मृगीं विव्याध; तदा मृगी उवाच—हे नृप तनयस्य स्तनं प्रयच्छंती त्वया हता । अतस्त्वं व्याघ्ररूपत्वमाप्नुहि । तदा शापेन त्रस्तो राजा प्रांजलिः सन्नुवाच—हे मृगि व्याघ्ररूपं मुक्त्वा मानुषं कदा प्राप्स्यामि, तद्वद।मृग्युवाच—हे नृप, कार्तिके पुष्करे यदा नंदया सह तव संवादो भविष्यति तदा मुक्तो भविष्यसि एवमुक्त्वा सा मृता, नृपोऽपि वर्षशतं व्याघ्ररूपेण वने परिभ्रमन् कदा मुक्तिर्भविष्यतीति चिंतयन्नेकदा नंदानामिकां गां दृष्ट्वा खादितुमारेभे तदा नंदा अनेकविधसत्यप्रतिज्ञां कृत्वा वत्सं पाययित्वा पुनः व्याघ्रसमीपमागत्य अनेकविधधर्मभाषणेनोपदेशं चकार । तदा व्याघ्र उवाच—हे नंदं, अहं पूर्वं मृग्या शप्तः व्याघ्ररूपो जातः, परं त्वद्य त्वत्संपर्कोपदेशेन

स्नानं चतुर्विधं प्रोक्तं स्नानविद्भिर्मनीषिभिः॥ वायव्यं वारुणं दिव्यं ब्राह्मं चेति तथा स्मृतम् ॥७९॥ वायव्यं गोरजःस्नानं वारुणं सागरादिषु ॥ ब्राह्मं ब्राह्मणमंत्रोक्तं दिव्यं मेघांऽबु भास्करम् ॥ ८० ॥ स्नानानां चैव सर्वेषां विशिष्टं तत्र वारुणम् ॥ ब्राह्मणः क्षत्रियो वैश्यो मंत्रवत्स्नानमाचरेत् ॥ ८१ ॥ तूष्णीमेव हि शूद्रस्य स्त्रीणां चैव तथा स्मृतम् ॥ बाला च तरुणी वृद्धा नरनारीनपुंसकाः ॥ ८२ ॥ पापैः सर्वैः प्रमुच्यंते स्नानात्कार्तिकमाघयोः ॥ स्नाता वै कार्तिके लोकाः प्राप्नुवंतीप्सितं फलम् ॥ ८३ ॥ पुष्करे तीर्थवर्ये तु नंदायाः संगमे पुरा ॥ प्रभंजनश्च मुक्तोभूत्तदैव व्याघ्रजन्मतः ॥ ८४ ॥ नंदाया वचनेनैव कार्तिके सा परं ययौ ॥ एवं स्नानविधिः प्रोक्तः किं भूयः श्रोतुमिच्छसि ॥ ८५ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे कार्तिकमासमाहात्म्ये कार्तिकस्नानविधिनिरूपणंनाम चतुर्थोऽध्यायः ॥ ४ ॥ ॥ छ ॥ ॥ नारद उवाच ॥ ॥ कदा स्नानं प्रकर्तव्यं कथं स्थेयं दिनावधि ॥ आह्निकं तत्समाचक्ष्व विशेषेण पितामह ॥१॥ ॥ ॥ ब्रह्मोवाच ॥ ॥ रात्र्यां तुर्यांशशेषायामुत्तिष्ठेत्सर्वदा व्रती ॥ विष्णुं स्तुत्वा बहुस्तोत्रैर्दिनकार्यं विचारयेत् ॥ २ ॥

जातस्मरणः पुनर्नृपत्वमापन्नः, नाहं व्याघ्रः, एतस्मिन्नंतरे धर्मस्तत्रागत्य नंदामुवाच—हे नंदे त्वं नंदानाम सरस्वती नदी भविष्यसि, किंच ऊर्जे पुष्करे मासमात्रं स्नानं कुरु ततो मुक्तिर्भविष्यति इत्युक्त्वांऽतर्हितः । प्रभंजनोऽपि वसिष्ठोपदेशेन कार्तिकसेवनान्मुक्तिं प्रापेति ॥८४॥८५॥ इति कार्तिकमासमाहात्म्यटीकायां चतुर्थोऽध्यायः ॥४॥छ॥ अथ कार्तिकव्रतिनामाह्निकं परिपृच्छति—नारद उवाच ॥ १ ॥ स्तोत्रैः प्रातःस्मरणाख्यैः । तथा च सनत्कुमारसंहितायाम्—"ब्रह्मा मुरारिस्त्रिपुरांतकारी भानुः शशी भूमिसुतो बुधश्च ॥ गुरुश्च शुक्रः शनिराहुकेतवः कुर्वंतु सर्वे मम सुप्रभातम् ॥ पृथ्वी सगंधा सरसास्तथाऽऽपः स्पर्शी च वायुर्ज्वलितं च तेजः ॥ नभश्च शब्दं महता सहैव कुर्वं

CC-0. In Public Domain. Digitization by eGangotri

तु सर्वे मम सुप्रभातम् ॥ भृगुर्वसिष्ठः क्रतुरंगिराश्च मनुः पुलस्त्यः पुलहश्च गौतमः ॥ रैभ्यो मरीचिश्च्यवनश्च दक्षः कुर्वंतु सर्वे मम सुप्रभातम् ॥ सनत्कुमारः सनकः सनंदनः सनातनोऽप्यासुरिपिंगलौ च ॥ सप्त स्वराः सप्त रसातलानि कुर्वंतु सर्वे मम सुप्रभातम् ॥ सप्तार्णवाः सप्त कुलाचलाश्च सप्तर्षयो द्वीपवनानि सप्त ॥ भूरादि कृत्वा भुवनानि सप्त कुर्वंतु सर्वे मम सुप्रभातम् ॥ इत्थं प्रभाते परमं पवित्रं पठेत्स्मरेद्यः शृणुयाच्च तद्वत् ॥ दुःस्वप्ननाशस्त्विह सुप्रभातं भवेच्च नित्यं भगवत्प्रसादात्॥" इति ॥२॥ दिङ्नि

ग्रामनैर्ऋत्यदिग्भागे मलोत्सर्गं यथाविधि ॥ ब्रह्मसूत्रं दक्षकर्णे स्थाप्य तत्र उदङ्मुखः ॥ ३ ॥ अंतर्धाय तृणं भूमौ शिरः प्रावृत्य वाससा॥वक्त्रं नियम्य वस्त्रेणाऽसंगः सोदकभाजनः ॥ ४ ॥ कुर्यान्मूत्रपुरीषं तु रात्रौ चेद्दक्षिणामुखः ॥ तत उत्थाय चाऽऽगच्छेत्समीपं कलशस्य हि ॥ ५ ॥ गंधलेपक्षयकरं मृत्तिकाशौचमाचरेत् ॥ एका लिंगे करे तिस्र उभयोर्मृद्द्वयं स्मृतम् ॥६॥ मूत्रशौचे त्विदं ज्ञेयं विष्ठाशौचमतः शृणु ॥ पंचापाने ऽथवा सप्त दश वामकरे तथा ॥ ७ ॥ उभयोः सप्त दातव्याः पादयोर्मृत्तिकात्रयम् ॥ एतच्छौचं गृहस्थस्य द्विगुणं ब्रह्मचारिणः ॥ ८ ॥ वानप्रस्थस्य त्रिगुणं यतीनां च चतुर्गुणम् ॥ एतच्छौचं दिवा प्रोक्तं रात्रावर्द्धं समाचरेत् ॥ ९ ॥ मार्गस्थस्य तदर्धं स्यात्स्त्रीशूद्राणां तदर्धकम् ॥ शौचकर्मविहीनस्य समस्ता निष्फलाः क्रियाः ॥ १० ॥ दंतजिह्वाविशुद्धिं च ततः कुर्यादतंद्रितः ॥ आयुर्बलं यशो वर्चः प्रजाः पशुवसूनि च ॥ ॥ ११ ॥ ब्रह्म प्रज्ञां च मेधां च त्वं नो देहि वनस्पते ॥ दंतकाष्ठं तु गृह्णीयाद्द्वादशांगुलसंमितम् ॥ १२ ॥ क्षीरवृक्षस्य न ग्राह्यं कार्पासस्य तथैव च ॥ कंटकस्य च वृक्षस्य दग्धवृक्षस्य चैव हि ॥ १३ ॥ सद्वासनं मृदुतरं दंतधावनमादितः ॥ १४ ॥ उपवासे नवम्यां च षष्ठ्यां श्राद्धदिने रवौ ॥ ग्रहणे प्रतिपद्दर्शे न कुर्याद्दंतधावनम् ॥ कुर्याद्द्वादशगंडूषाननुक्ते दंतधावने ॥ १५ ॥ दंतान्विशोध्य विधिवन्मुखं संमार्ज्य वारिणा ॥ ललाटे चोर्ध्वपुंड्रं तु धृत्वा चाचम्य वारिणा ॥ १६ ॥ देवालये नदीतीरे राजमार्गे विशेषतः ॥ दत्त्वा चाकाशदीपं तु तुलसीसन्निधावथ ॥ १७ ॥ गृहीत्वार्चनसामग्रीमिष्टदेवगृहं व्रजेत् ॥ ततो गायेत नृत्येत पूजां कृत्वा तु बुद्धिमान् ॥ १८ ॥

यमे विकल्पः पाद्मे–'प्रागुदीचीं व्रजेद्ग्रामाद्बहिः' इति ॥३॥ असंगः एकाकी ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥१५॥ ॥१६॥१७॥ इष्टदेवगृहं स्वोपास्यदेवतामंदिरम् । तथा च सनत्कुमारः–"गृहीत्वाऽर्चनसामग्रीं ततो हरिगृहं व्रजेत् ॥ तदभावे शिवगृहे देव्या वा भास्करस्य च ॥ अथवा तु गणेशस्य स्थाने पिप्पलसन्निधौ ॥ गोष्ठे वाऽथ नदीतीरे गत्वा पूजां समाचरेत् ॥" इति । नृत्येत सविधि नृत्यं कुर्यात् । अथवा–"तांडवेनाऽपि नृत्यंति कार्तिके विष्णु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सन्निधौ ॥ यद्वा तद्वाऽपि गायंति यांति ते वैष्णवं पदम् '' इति ॥ १८ ॥ १९ ॥ उक्तविधिना पूर्वं चतुर्थाध्यायोक्तविधिना तिलकं यथोक्तम् ऊर्ध्वपुंड्रं कार्यम् । तद्विधि माह ब्राह्मे—"ऊर्ध्वपुंड्रप्रमाणं च नरस्यांऽगुलिभेदनम् ॥ तत्तत्स्थानेषु मंत्रांश्च कथयामि फलानि च ॥ पर्वताग्रे नदीतीरे विष्णुक्षेत्रे विशेषतः ॥ गोमत्यां द्वारकायां च मृत्सु पुण्यप्रदाऽमला ॥ सिंधुतीरे तु वल्मीके तुलसीमूलमृत्तिका ॥ एता मृदः सदा ग्राह्या वर्जनीयाऽन्यमृत्तिका ॥ अंगुष्ठः पुष्टिदः प्रोक्तस्तर्जन्यायुर्विवर्द्धिनी ॥ अनामिका कामदा च मुक्तिदा च प्रदेशिनी ॥ एतैरंगुलिभेदैश्च कारयेन्न नखैः स्पृशेत् ॥ श्यामः शांतिकरः प्रोक्तो रक्तो वश्यकरस्तथा ॥ ऐश्वर्यं पीतमित्याहुर्वैष्णवं श्वेतमुच्यते ॥ वर्तिदीपाऽकृतिर्वाऽपि वेणुपत्राकृतिस्तथा ॥ पद्मस्य मुकुलाकारः कुमुदस्य यथा भवेत् ॥ मत्स्यकूर्माकृतिर्वाऽपि शंखाकारमतः परम् ॥ नवांगुलं मध्यमाहुरष्टांगुलमतः परम् ॥ षट्सप्तपंचभिर्वाऽपि कुर्यादंगुलसंख्यया ॥ ललाटे केशवं विद्यान्नाभौ नारायणं न्यसेत् ॥ माधवं हृदि विन्यस्य गोविंदं कंठकूपके ॥ उदरे दक्षिणे पार्श्वे विष्णुरित्यभिधीयते ॥

पठित्वा विष्णुनामानि कुर्य्यान्नीराजनं हरेः ॥ नाडीद्वयावशिष्टायां रात्र्यां गच्छेज्जलाशयम् ॥ १९ ॥ तत्रोक्तविधिना स्नानं कुर्याद्वै कार्तिकव्रती ॥ वस्त्रनिष्पीडनं कृत्वा कुर्याच्च तिलकं तथा ॥ २० ॥ ततः संध्यामुपासीत स्वसूत्रोक्तेन वर्त्मना ॥ ततः कार्यो जपो देव्या यावदर्कोदयो भवेत् ॥ २१ ॥ एतत्प्रोक्तं रात्रिशेषकृत्यं दैनमथोच्यते ॥ यस्मिन्कृते कार्तिकोऽयं सकलः सफलो भवेत् ॥ २२ ॥ विष्णोः सहस्रनामाऽऽद्यं संध्यांते च पठेत्ततः ॥ देवालये समागत्य पुनः पूजनमारभेत् ॥ २३ ॥ नृत्यगानादिकार्येषु प्रहरं दिवसं नयेत् ॥ ततः पुराणश्रवणं यामार्धं सम्यगाचरेत् ॥ २४ ॥

तत्पार्श्वे बाहुमध्ये च संस्मरेन्मधुसूदनम् ॥ त्रिविक्रमं कर्णमूले वामकुक्षौ तु वामनम् ॥ श्रीधरं बाहुके वामे हृषीकेशं तु कंधरे ॥ अधरे पद्मनाभं तु त्रिके दामोदरं न्यसेत् ॥ द्वादशैतानि नामानि वासुदेवं च मूर्धनि ॥ दंडाकारं सुशोभं च मध्ये सच्छिद्रमंदिरम् ॥ अच्छिद्रमूर्ध्वपुंड्रं तु ये कुर्वंति द्विजाधमाः ॥ बाह्वोर्दशांगुलं प्रोक्तं नवाष्टं हृदि विन्यसेत् ॥ नाभ्यादौ सप्तषट्कं वा भाले नासाऽऽदि केशवम् ॥ न तद्धोमं न तद्दानं न तज्जाप्यं सुरार्चनम् ॥ विना चैवोर्ध्वपुण्ड्रेण विप्रेण यदनुष्ठितम् ॥ द्वे चक्रे दक्षिणे बाहौ शंखमेकं तथाऽधरे ॥ मध्ये पद्मद्वयं धार्यं नारायणचतुष्टयम् ॥ शंखद्वयं वामबाहौ चक्रमेकं तथाऽधरे ॥ मध्ये गदाद्वयं धार्यं नारायणचतुष्टयम् ॥ गोपीचंदनपुंड्रं तु स्त्रीणां धर्मः सनातनः ॥ पुंड्रं विना तु या नारी भर्तुरायुःक्षयो भवेत् ॥ तस्मात्सर्वप्रयत्नेन कारयेदूर्ध्वपुंड्रकम् '' इति ॥ २० ॥ देव्याः गायत्र्याः ॥ २१ ॥ २२ ॥ संध्यांते प्रातःसंध्यांते ॥ २३ ॥ २४ ॥

॥२५॥ अतिथिविषये विशेषः ॥ "वैश्वदेवस्यांऽतरेषु य आगच्छति भिक्षुकः ॥ चंडालो वाऽथ चोरो वा विष्णुरूपी न संशयः ॥ सायंकाल उषःकाले वैश्वदेवस्य चांतरे ॥ अतिथिर्विमुखो याति सोऽतिदुःखस्य भाजनम्॥" इति ॥२६॥ हविष्यभोजनं हविष्यान्नभोजनं कुर्यात् । हविष्यान्नमाह सनत्कुमारसंहितायाम्—"हैमंतिकं सितास्विन्नं धान्यं मुद्गा यवास्तिलाः ॥ कलायकंगुनीवारा वास्तुकं हिलमोचिका ॥ षष्टिकाः कालशाकं च मूलकं क्रमुकेतरत् ॥ कंदः सैंधवसामुद्रे गव्ये च दधिसर्पिषी ॥ पयोऽनुद्धृतसारं च पनसाम्रहरीतकी ॥ पिप्पली जीरकं चैव नारिंगं चैव तिंतिणी ॥ कदली लवली धात्री फलान्यगुडमैक्षवम् ॥ अतैलपक्वं मुनयो हविष्याणि प्रचक्षते ॥" इति ॥ आमिषान्नमाह तत्रैव—"सर्वथैव न भोक्तव्यमामिषान्नं तु कार्तिके ॥ दग्धमन्नं द्विपक्वं च मसूरान्नं सवल्कलम् ॥ उद्दालकाः पर्युषितमन्नमामिषमुच्यते ॥ वृंताकानि पटोलानि

पौराणिकस्य पूजां तु तुलसीपूजनं तथा ॥ कृत्वा माध्याह्निकं कर्म भुंजीत द्विदलोज्झितम् ॥ २५ ॥ बलिदानं वैश्वदेवमतिथीनां समर्पणम् ॥ कृत्वा भुंक्ते तु यो मर्त्यः केवलं चाऽमृतं हि तत् ॥ २६ ॥ यथाशक्ति द्विजा भोज्याः प्रत्यहं वाऽथ पर्वणि ॥ हविष्यभोजनं कुर्यादामिषं परिवर्जयेत् ॥ २७ ॥ भक्षयेत्तुलसीं वक्त्रशुद्ध्यर्थं तीर्थवारिणा ॥ संसारव्यवहारेण दिनशेषं समापयेत् ॥२८॥ सायंकाले पुनर्गच्छेद्विष्णोर्देवालयं प्रति ॥ संध्यां कृत्वा प्रयुंजीत तत्र दीपान्यथाबलम् ॥ २९ ॥ विष्णुं प्रणम्य हरये कृत्वा नीराजनं शुभम् ॥ स्तोत्रपाठादिकं कुर्वन्नाद्ययामे तु जागरम् ॥ ॥ ३० ॥ यामे तु प्रथमेऽतीते निद्रां कुर्याद्विचक्षणः ॥ ब्रह्मचर्यव्रतं कुर्याद्भार्यामीयादृतौ तथा ॥ ३१ ॥ तया कामयमानो वा भार्यां गच्छेन्न दोषभाक् ॥ एवं प्रतिदिनं कुर्यादामासं तु यथाविधि ॥ ३२ ॥

तुंबिका च कलिंगकम् ॥ बिंबीफलानि त्रपुषं फलं शाकेषु चाऽऽमिषम् ॥ दोरका तुलसी चिल्ली छत्राकं पोस्तपत्रकम् ॥ चक्रवर्ती राजगिरिः पत्रशाकेषु चामिषम् ॥ गृंजरं रक्तमूलं च पलांडुं लशुनं तथा ॥ सर्वदैवाऽऽमिषाणि स्युः कार्तिके सूरणं त्यजेत् ॥" पाद्मे—"प्राण्यंगमामिषं चूर्णं फले जंबीरमामिषम् ॥ धान्ये मसूरिकाः प्रोक्ता अन्ने पर्युषितं तथा ॥ अजागोमहिषीक्षीरादन्यदुग्धादि चाऽऽमिषम् ॥ द्विजक्रीता रसाः सर्वे लवणं भूमिजं तथा ॥ ताम्रस्थितं पंचगव्यं जलं पल्वलसंस्थितम् ॥ आत्मार्थं पाचितं चान्नमामिषं चोच्यते बुधैः॥" इति ॥ २७ ॥ मुखशुद्धये विशेषः ! "दंतोच्छिष्टं शलाकाभिर्निर्हरेन्नैव पीडयेत् ॥ दृढं यद्दंतसंलग्नमुच्छिष्टं तत्तु दंतवत् ॥ तन्निष्कासनतश्चेत्स्यात्कदाचिद्रुधिरागमः ॥ चांद्रायणत्रयं कुर्यात्तस्य संशुद्धिहेतवे ॥"इति ॥ २८ ॥ २९ ॥ ३० ॥ ऋतौ ईयाद्गच्छेत् ॥ ३१ ॥ अनृतावपि तया कामय

CC-0. In Public Domain. Digitization by eGangotri

मानः यदि भार्यां गच्छेत्तदा दोषभाङ्न भवति ॥ ३२ ॥ ३३ ॥ ३४ ॥ इति कार्तिकमासमाहात्म्यटीकायां पंचमोऽध्यायः ॥५॥छ॥ अथ कार्तिकव्रतिनां कर्तव्यव्रत दानधर्मानाह—शृण्विति ॥१॥२॥३॥अलाबुं भाषायां दुधैय्या वा दुध्या भोपळा इति प्रसिद्धम्, बृहतीफलं डोरलीफलम्, भिस्सटं दग्धान्नं, 'भिःसटा दग्धिका'इत्यमरः॥४॥

एवं तु कार्तिके मासि यः कुर्यात्परमं व्रतम् ॥ सर्वपापविनिर्मुक्तो याति विष्णोः सलोकताम् ॥ ३३ ॥ रोगापहं पातकनाशकृत्परं सद्बुद्धिदं पुत्रधनादिसाधकम् ॥ मुक्तेर्निदानं नहि कार्तिकव्रताद्विष्णुप्रियादन्यदिहाऽस्ति भूतले ॥ ३४ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे कार्तिकमासमाहात्म्ये नित्यकर्मकथनंनाम पंचमोऽध्यायः ॥ ५ ॥ ॥ छ ॥ ॥ ब्रह्मोवाच ॥ ॥ शृणु नारद वक्ष्यामि कार्तिकस्य व्रतं महत् ॥ यच्छ्रुत्वा सर्वपापेभ्यो मुक्तो मोक्षमवाप्स्यसि ॥ १ ॥ कार्तिके मासि संप्राप्ते निषिद्धानि च वर्जयेत् ॥ तैलाभ्यंगं परान्नं च तथा वै तैलभोजनम् ॥ २ ॥ फलानि बहुबीजानि धान्यानि द्विदलान्यपि ॥ वर्जयेत्कार्तिके मासि नाऽत्र कार्या विचारणा ॥ ३ ॥ अलाबुं गृंजरं चैव वृंताकं बृहतीफलम् ॥ अन्नं पर्युषितं वाऽपि भिस्सटं च मसूरिकम् ॥ ४ ॥ पुनर्भोजनं माध्वं च परान्नं कांस्यभोजनम् ॥ नखं चर्म च छत्राकं कांजि दुर्गंधमेव च ॥ ५ ॥ गणान्नं गणिकान्नं च तथा वै ग्रामयाजिनः ॥ शूद्रान्नं शूद्रसंपर्कं सूतकान्नं तथैव च ॥ ६ ॥ श्राद्धान्नमृतुशांत्याश्च जातकं नामकं तथा ॥ श्लेष्मातकफलं चैव वर्जयेत्कार्तिकव्रती ॥ ७ ॥ निषिद्धेषु च पत्रेषु भोजनं नैव कारयेत् ॥ मधुपालाशकदलीजंबूप्लक्षमकूटिकाः ॥ एतत्पत्रेषु भोक्तव्यं पुष्करे न कदाचन ॥ ८ ॥ कार्तिके मासि संप्राप्ते यः कुर्याद्वनभोजनम् ॥ स याति परमं लोकं विष्णोर्देवस्य चक्रिणः ॥ ९ ॥ प्रातःस्नानं तु कर्तव्यं तथैव हरिपूजनम् ॥ कथायाः श्रवणं चैव कार्तिके शस्यते मुने ॥ १० ॥ गोपीचंदनदानं तु गोदानं श्रोत्रियाय च ॥ कर्तव्यं कार्तिके मासि तेन मोक्षमवाप्नुयात् ॥ ११ ॥ कदलीफलदानं तु दानं धात्रीफलस्य च ॥ वस्त्रदानं तथा कुर्याच्छीतार्ताय द्विजन्मने ॥ १२ ॥ शाकादिदानं कुर्वीत चान्नदानं विशेषतः ॥ शालिग्रामस्य दानं च कर्तव्यं तु द्विजन्मने ॥ १३ ॥

माध्वं मधु, कांस्यभोजनं कांस्यपात्रे भोजनं, नखं नखलाख्यं गंधद्रव्यं, चर्म मसूरिका ॥५॥६ ॥ श्लेष्मातकं भोकर इति प्रसिद्धम् ॥ ७ ॥ ८ ॥ वनभोजनम् उद्यानस्थितधात्रीच्छायायां भोजनम् ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥

CC-0. In Public Domain. Digitization by eGangotri

॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ चक्रांकितस्य गोमतीचक्रस्य ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥

पौराणिकाय यो दद्यादामान्नं घृतपायसम् ॥ स चैश्वर्यमवाप्नोति शतब्राह्मणभोजनात् ॥ १४ ॥ कमलैः पूजयेद्यस्तु कार्तिके कमलाप्रियम् ॥ स तु पुण्यमवाप्नोति नाऽत्र कार्या विचारणा ॥ १५ ॥ कार्तिके तुलसीपत्रं यो भक्त्या विष्णवेऽर्पयेत् ॥ संसाराच्च विनिर्मुक्तो याति विष्णोः परं पदम् ॥ १६ ॥ कार्तिके केतकीपुष्पैरर्चयेद्गरुडध्वजम् ॥ पूजितो जन्मसाहस्रं नाऽत्र कार्या विचारणा ॥ १७ ॥ शंखदानं तु यः कुर्यात्तथा चक्रांकितस्य च ॥ तस्य पापानि नश्यंति दानमात्रान्न संशयः ॥ १८ ॥ गीतापाठं तु यः कुर्यात्कार्तिके विष्णुवल्लभे ॥ तस्य पुण्यफलं वक्तुं नाऽलं वर्षशतैरपि ॥ १९ ॥ श्रीमद्भागवतस्याऽपि श्रवणं यः समाचरेत् ॥ सर्वपापविनिर्मुक्तः परं निर्वाणमृच्छति ॥ २० ॥ एकादश्यां निराहारमुपवासं करोति यः ॥ पूर्वजन्मकृतात्पापान्मुच्यते नाऽत्र संशयः ॥ २१ ॥ शालिग्रामस्य नैवेद्यं कोटियज्ञफलं लभेत् ॥ अन्यदेवस्य नैवेद्यं भुक्त्वा चांद्रायणं चरेत् ॥ २२ ॥ पूजाकाले तु देवस्य घण्टानादं करोति यः ॥ हरेस्तृप्तिं परां याति मनुजो नाऽत्र संशयः ॥ २३ ॥ परान्नं वर्जयेद्यस्तु कार्तिके विष्णुतुष्टये ॥ दामोदरस्य प्रीतिं स सम्यक्प्राप्नोति मानवः ॥ २४ ॥ अध्वगं तु परिश्रांतं काले च गृहमागतम् ॥ योऽतिथिं पूजयेद्भक्त्या जन्मसाहस्रनाशनम् ॥ २५ ॥ निंदां कुर्वंति ये मूढा वैष्णवानां महात्मनाम् ॥ पतंति पितृभिः सार्द्धं महारौरव संज्ञके ॥ २६ ॥ दृष्ट्वा भागवतान्विप्रान्सम्मुखो न च याति हि ॥ न गृह्णाति हरिस्तस्य पूजां द्वादशवार्षिकीम् ॥ २७ ॥ निंदां भगवतः शृण्वंस्तत्परस्य जनस्य च ॥ ततो नाऽपैति यः सोऽपि हरेः प्रियतमो नहि ॥ २८ ॥ प्रदक्षिणां तु यः कुर्यात्कार्तिके केशवस्य हि ॥ पदेपदेऽश्वमेधस्य फलं प्राप्नोत्यसंशयः ॥ २९ ॥ दंडप्रणामं यः कुर्यात्कार्तिके केशवाऽग्रतः ॥ राजसूयाऽश्वमेधानां फलं प्राप्नोत्यसंशयः ॥ ३० ॥ कुटुम्बभोजनं चैव कार्तिके भक्तिसंयुतः ॥ कारयेद्विप्रशार्दूल तस्य पुण्यमनंतकम् ॥ ३१ ॥ परस्त्रीसंगमं यस्तु कार्तिके कुरुते नरः ॥ तस्य पापस्य विश्रांतिर्यावद्वक्तुं न शक्यते ॥ ३२ ॥ तुलसीमृत्तिकापुंड्रं ललाटे यस्य दृश्यते ॥ यमस्तं नेक्षितुं शक्तः किमु दूता भयंकराः ॥ ३३ ॥ शाकं वा लवणं वाऽपि यत्किंचिद्वा भविष्यति ॥ तद्देयं कार्तिके मासि प्रीत्यर्थं शार्ङ्गधन्वनः ॥ ३४ ॥

॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥ धर्मकाष्ठानि धर्मार्थं काष्ठानि ॥ ४१ ॥ ४२ ॥ ४३ ॥ गभस्तीश्वरश्च काशीस्थो विज्ञेयः ॥ ४४ ॥ उपांगानि वत्सद्वादशी यमत्रयोदशी नरकचतुर्दशी दीपोत्सवी बलिप्रतिपद्यमद्वितीया कूष्मांडनवमी प्रबोधोत्सवः तुलसीमंगलद्वादशी वैकुण्ठचतुर्दशी त्रिपुरीपूर्णिमा व्रतांनि, अंगानि

इत्याद्या बहवो धर्माः कार्तिके विष्णुवल्लभाः ॥ यथाशक्त्या प्रकुर्वीत धर्मं देवस्य तुष्टिदम् ॥ ३५ ॥ हरिसंतुष्टये कार्यस्त्यागो वा स्वेष्टवस्तुनः॥ मासांते द्विजवर्याय दद्यात्तद्व्रतपूर्तये ॥ ३६॥ सर्वव्रतानि चैकत्र सत्यव्रतमथैकतः॥ तस्मात्सर्वप्रयत्नेन सत्यं भाषेत सर्वदा ॥ ३७॥ अन्यधर्मे ष्वधिकृतिः कुलजातिविभागतः ॥ अधिकारी कार्तिके तु सर्व एव जनो भवेत् ॥ ३८ ॥ गोग्रासः कार्तिके मासि विशेषाद्यैस्तु दीयते ॥ तेषां पुण्यफलं वक्तुं न शक्नोति पितामहः ॥ ३९ ॥ विष्णुदेवालयं प्रातः संमार्जयति कार्तिके ॥ तस्य वैकुंठभवने जायते सुदृढं गृहम् ॥ ४० ॥ दद्या त्कार्तिकमासे तु धर्मकाष्ठानि भूरिशः ॥ न तत्पुण्यस्य नाशोस्ति कल्पकोटिशतैरपि ॥४१॥ सुधादि लेपयेद्यस्तु कार्तिके विष्णुमंदिरे ॥ चित्रा दिकं लिखेद्वाऽपि मोदते विष्णुसन्निधौ ॥४२॥ देवालये वा तीर्थे वा कृतो दुष्टैर्नृपैः करः ॥ तं मोचयंति ये लोकास्तेषां धर्मः सनातनः॥ ४३ ॥ कार्तिके मासि यो विप्रो गभस्तीश्वरसन्निधौ ॥ शतरुद्रीजपं कुर्यान्मंत्रसिद्धिः प्रजायते ॥४४॥ वाराणस्यां तु यैः स्थित्वा त्रिवर्षं कार्तिकव्रतम् ॥ सोपांगं सांगं यैर्मर्त्यैः कृतं भक्त्येकतत्परैः ॥४५॥ इह लोके फलं तेषां प्रत्यक्षं जायते किल ॥ संपत्त्या चैव संतत्या यशोभिर्धर्मबुद्धिभिः ॥४६॥ पलांडुं शृंगं मांसं च शय्यां सौवीरकं तथा ॥ राजिकोन्मादिकं चाऽपि चिपिटान्नं च वर्जयेत् ॥ ४७ ॥ धात्रीफलं भानुवारे परदेशागमं तथा ॥ तीर्थं विना सदैवेह वर्जयेत्कार्तिकव्रती ॥ ४८ ॥ देववेदद्विजातीनां गुरुगोव्रतिनां तथा ॥ स्त्रीराजमहतां निंदां वर्जयेत्कार्तिकव्रती ॥ ४९ ॥ नरकस्य चतुर्दश्यां तैलाभ्यंगं च कारयेत् ॥ अन्यत्र कार्तिके मासि तैलस्नानं विवर्जयेत् ॥ नालिकां मूलकं चैव कूष्मांडं च कपित्थकम् ॥ ॥ ५० ॥ रजस्वलांत्यजम्लेच्छपतिताऽव्रतिकैस्तथा ॥ द्विजद्विड्वेदबाह्यैश्च न वदेत्सर्वदा व्रती॥५१॥ एभिर्दृष्टं च काकैश्च सूतिकान्नं च यद्भवेत् ॥ द्विःपाचितं च दग्धान्नं नैवाद्याद्वैष्णवव्रती ॥ ५२ ॥ क्रमात्कूष्मांडबृहतीतरुणीमूलकं तथा ॥ श्रीफलं च कलिंगं च फलं धात्रीभवं तथा ॥ ५३ ॥

स्नानदीपजागरव्रतपूजादानादीनि ॥ ४५ ॥ ४६ ॥ शृंगं जीवकनामकं वनस्पतिविशेषं, "कूर्चशीर्षो मधुरकः शृंगं ह्रस्वांगजीवकः" इत्यमरः ॥ सौवीरकं बदरीफलम्, उन्मादिकम् उन्मादसमुत्पादकं वस्तु ॥ ४७ ॥ ४८ ॥ ४९ ॥ नालिकां कमलनालिकासदृशदंडशाकं, विवर्जयेदिति पूर्वेण संबंधः ॥ ५० ॥ ५१ ॥ ५२ ॥ ५३ ॥

CC-0. In Public Domain. Digitization by eGangotri

॥५४॥५५॥५६॥ इति कार्तिकमासमाहात्म्यटीकायां षष्ठोऽध्यायः ॥६॥ ७॥ अथ कार्तिकमासंव्रतधर्मश्रवणेनाऽत्युत्सुको नारदो दीपमाहात्म्यं विज्ञातुं ब्रह्माणमुवाच—

नारिकेलमलाबुं च पटोलं बृहतीफलम् ॥ चर्मवृंताकचवलीशाकं तुलसिजं तथा ॥ ५४ ॥ शाकान्येतानि वर्ज्यानि क्रमात्प्रतिपदादिषु ॥ एव मेव हि माघेऽपि कुर्य्याच्च नियमान्व्रती ॥ ५५ ॥ कार्तिकव्रतिनः पुण्यं यथोक्तव्रतकारिणः ॥ न समर्थो भवेद्वक्तुं ब्रह्माऽपीह चतुर्मुखः ॥ ५६ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे कार्तिकमासमाहात्म्ये कार्तिकव्रतनिरूपणंनाम षष्ठोऽध्यायः ॥६॥

॥ ॥ नारद उवाच ॥ ॥ भगवन्कृतकृत्योऽस्मि तव पादसमाश्रयात् ॥ श्रोतव्यं नेह भूयो मे विद्यते देवसत्तम ॥ १ ॥ तथापि भगवन्किंचित्प्रष्टव्यं मे हृदि स्थितम् ॥ त्वद्वाक्यामृतपीतस्य न मे तृप्तिर्हि जायते ॥२॥ दीपदानस्य माहात्म्यं श्रोतुमिच्छामि ते प्रभो ॥ येन चाऽपि पुरा दत्तस्तद्वदस्व चतुर्मुख ॥३॥ ॥ ब्रह्मोवाच ॥ ॥ प्रातः स्नात्वा शुचिर्भूत्वा दीपं दद्यात्प्रयत्नतः ॥ तेन पापानि नश्येयुस्तमांसीव भगोदये ॥४॥ आजन्म यत्कृतं पापं स्त्रिया वा पुरुषेण च ॥ तत्सर्वं नाशमायाति कार्तिके दीपदानतः ॥ ५ ॥ अत्र ते वर्णयिष्यामि इतिहासं पुरातनम् ॥ श्रवणात्सर्वपापघ्नं दीपदानफलप्रदम् ॥ ६ ॥ पुरा द्रविडदेशे तु ब्राह्मणो बुद्धनामकः ॥ तस्य भार्याऽभवद्दुष्टा अनाचाररता मुने ॥ ७ ॥ तस्याः संसर्गदोषेण क्षीणाऽऽयुर्मृतिमाप्तवान् ॥ पत्यौ मृतेऽपि सा पत्नी अनाचारे विशेषतः ॥ ८ ॥ रताभून्न हि तस्यास्तु लज्जा लोकापवादतः ॥ सुतबंधुविहीना सा सदा भिक्षान्नभोजना ॥ ९ ॥ न संस्कारान्नमल्पं वा भुक्त्वा पर्युषिताशिनी ॥ परपाकरता नित्यं तीर्थयात्रादिवर्जिता ॥ ॥ १० ॥ कथायाः श्रवणं चैव न श्रुतं तु तया द्विज ॥ एकदा ब्राह्मणः कश्चित्तीर्थयात्रापरायणः ॥ ११ ॥ तस्या गृहं समागच्छद्विद्वान्वै कुत्सनामकः ॥ अनाचाररतां तां तु दृष्ट्वा ब्रह्मर्षिसत्तमः ॥ कोपेन रक्तचक्षुः संस्तामुवाचाऽसतीं स्त्रियम् ॥ १२ ॥ ॥ कुत्स उवाच ॥ ॥ वक्ष्यामि सांप्रतं मूढे मद्वाक्यमवधारय ॥ १३ ॥ दुःखहेतुमिमं देहं पूयशोणितपूरितम् ॥ पंचभूतात्मकं चैव किं च पुष्णासि दूतिके ॥ १४ ॥ जलबुद्बुदवद्देहो नाशमायाति निश्चितम् ॥ अनित्यं देहमाश्रित्य नित्यं त्वं मन्यसे हृदि ॥ १५ ॥

भगवन्निति ॥ १ ॥ २ ॥ ते त्वत्तः ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ हे विधवे द्यूते द्यूतकर्मणि ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ पतंगः

तस्मादंतःस्थितं मोहं त्यज मूढे विचारतः ॥ स्मर सर्वोत्तमं देवं कुरु श्रवणमादरात् ॥ १६ ॥ कार्तिके मासि संप्राप्ते स्नानदानादिकं कुरु ॥
दामोदरस्य प्रीत्यर्थं दीपदानं तथा कुरु ॥ १७ ॥ लक्षवर्त्यादिकं चैव लक्षपद्मादिकं तथा ॥ प्रदक्षिणां तु देवस्य नमस्कारं तथैव च ॥ १८ ॥
धारणं पारणं चैव कुरु भक्त्या हि कार्तिके ॥ विधवानां व्रतमिदं सधवानां तथैव च ॥ १९ ॥ सर्वपापप्रशमनं सर्वोपद्रवनाशनम् ॥ तत्राऽपि
कार्तिके मासि दीयतां दीप उत्तमः ॥ २० ॥ दीपो हरेः प्रियकरः कार्तिके मासि निश्चितम् ॥ महापातककृद्वापि दीपदानात्प्रमुच्यते ॥ २१ ॥
पुरा कश्चिद्द्विजवरो नाम्ना हरिकरो ह्यभूत् ॥ अधर्मविषयासक्तः शश्वद्वेश्यारतो द्विजः ॥ २२ ॥ पितृवित्तक्षयकरो वंशच्छेदे कुठारकः ॥ कदाचि
त्तेन विधवे द्यूते पितृधनं महत् ॥ २३ ॥ हारितं दुष्टसंसर्गात्ततो दुःखी स चाऽभवत् ॥ कदाचित्साधुसंसर्गात्तीर्थयात्राप्रसंगतः ॥ २४ ॥ अयो
ध्यामागतो वत्से महापापकरो द्विजः ॥ कार्तिके मासि संप्राप्तः श्रीमद्द्विजगृहे सदा ॥२५॥ द्यूतव्याजेन तेनाऽऽशु दीपो दत्तो हरेः पुरः ॥ ततः
कालांतरे विप्रो मृतो मोक्षमवाप्तवान् ॥ २६ ॥ महापातककृद्वाऽपि गतवानभयं हरिम् ॥ तस्मात्त्वं कार्तिके मासि दीपदानं तथा कुरु ॥ २७ ॥
तथाऽन्यान्यपि दानानि कुरु भक्तिसमन्विता ॥ इत्यादिश्याथ तां कुत्सो जगामाऽन्यगृहं द्विजः ॥ २८ ॥ साऽपि कुत्सवचः श्रुत्वा पश्चात्ता
पेन संयुता ॥ व्रतं तु कार्तिके मासि करिष्यामीति निश्चिता ॥ २९ ॥ पतंगोदयवेलायां कार्तिके स्नानमंभसि ॥ दीपदानं व्रतं चैव मासमेकं
चकार सा ॥ ३० ॥ ततः कालांतरे चैव गतायुर्मृतिमागता ॥ दीपदानस्य माहात्म्यान्महापापकृदप्यसौ ॥ ३१ ॥ स्वर्गमार्गं गता सा स्त्री काले
मोक्षमवाप ह ॥ तस्मान्नारद माहात्म्यं दीपदानस्य को वदेत् ॥ ३२ ॥ कार्तिके दीपदानं तु महापुण्यफलप्रदम् ॥ कार्तिकव्रतनिष्ठो यो दीप
दानादिकृन्नरः ॥ ३३ ॥ दीपदानस्येतिहासं शृण्वन्वै मोक्षमाप्नुयात् ॥ ३४ ॥ दीपदानस्य माहात्म्यं वक्तुं केनेह शक्यते ॥ परदीपप्रबोधस्य मा
हात्म्यं शृणु नारद ॥ ३५ ॥ स्वस्याऽपि शक्तिराहित्ये परस्याऽपि प्रबोधनम् ॥ यः कुर्याल्लभते सोऽपि नाऽत्र कार्या विचारणा ॥ ३६ ॥
दीपार्थं वर्तिकां तैलं पात्रं वा यो ददाति हि ॥ सहायं वाऽथ कुरुते ददतां दीपमुत्तमम् ॥ ३७ ॥

सूर्यः ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ एवं स्वदीपदानमाहात्म्यमुक्त्वा परदीपप्रबोधमाहात्म्यं प्रस्तौति परदीपप्रबोधस्येति॥ ३५ ॥ ३६ ॥ ३७ ॥

CC-0. In Public Domain. Digitization by eGangotri

॥ ३८ ॥ अत्र प्रसिद्धां कथामाह सारोद्धारे—"पुरा इंदुमतीनाम वेश्या पुरस्थानां सदाप्रिया चाऽऽसीत् । एकदाऽलंकृता सा गृहद्वारमासाद्य रात्रौ प्रहरपर्यंतं स्थिता ह्यभूत, तत्रैकोऽपि धनिको जारो नाऽऽगतः । तदा सा चिंताव्याकुलमानसा सती गृहमध्ये चागत्य देवस्य दीपं दत्त्वा सुष्वाप, एतस्मिन्नंतरे तैलपानार्थं चैका मूषिका

स तु मोक्षमवाप्नोति नाऽत्र कार्या विचारणा ॥ कार्तिके दीपदानस्य माहात्म्यं को नु वर्णयेत् ॥ ३८ ॥ स्वस्याऽपि शक्तिराहित्ये परदीपं प्रबोधयेत ॥ सोऽपि तत्फलमाप्नोति नाऽत्र कार्या विचारणा ॥ ३९ ॥ वेश्या चेन्दुमतीनाम तस्या गेहेऽथ मूषिका ॥ परदीपप्रबोधेन मोक्षं प्राप सुदुर्लभम् ॥ ४० ॥ तस्मात्सर्वप्रयत्नेन परदीपं प्रबोधयेत् ॥ तेन मोक्षमवाप्नोति मूषिकावन्न संशयः ॥ ४१ ॥ परदीपप्रबोधस्य फलमीदृग्विधं मुने ॥ साक्षाद्दीपप्रदानस्य माहात्म्यं केन वर्ण्यते ॥ ४२ ॥ ॥ नारद उवाच ॥ ॥ कार्तिके दीपदानस्य माहात्म्यं च मया श्रुतम् ॥ परदीपप्रबोधस्य माहात्म्यमपि वै श्रुतम् ॥ इदानीं श्रोतुमिच्छामि व्योमदीपस्य वैभवम् ॥ ४३ ॥ ॥ ब्रह्मोवाच ॥ ॥ आकाशदीपमाहात्म्यं शृणु पुत्र समाहितः ॥ यस्य श्रवणमात्रेण दीपदाने मतिर्भवेत् ॥ ४४ ॥ संप्राप्ते कार्तिके मासि प्रातःस्नानपरायणः ॥ आकाशदीपं यो दद्यात्तस्य पुण्यं वदाम्यहम् ॥ ४५ ॥ सर्वलोकाधिपो भूत्वा सर्वसंपत्समन्वितः ॥ इह लोके सुखं भुक्त्वा चांते मोक्षमवाप्नुयात् ॥ ४६ ॥ स्नानदानक्रियापूर्वं हरिमंदिरमस्तके ॥ आकाशदीपो दातव्यो मासमेकं तु कार्तिके ॥ कार्तिके शुद्धपूर्णायां विधिनोत्सर्जयेच्च तम् ॥ ४७ ॥ यः करोति विधानेन कार्तिके व्योम्नि दीपकम् ॥ न तस्य पुनरावृत्तिः कल्पकोटिशतैरपि ॥ ४८ ॥ अत्र ते वर्णयिष्यामि इतिहासं पुरातनम् ॥ यस्य श्रवणमात्रेण व्योमदीपफलं लभेत् ॥ ४९ ॥ पुरा तु निष्ठुरोनाम लुब्धको लोककंटकः ॥ यमुनातीरवासी च कालमृत्युरिवाऽपरः ॥ ५० ॥ वने चरन्मृगान्सर्वान्हत्वा वृत्तिमकल्पयत् ॥ पथिकान्बाधते नित्यं चोरवृत्त्या धनुर्धरः ॥ ५१ ॥

तत्राऽऽगत्य तैलं पीत्वा प्रहृष्टात्मा जाता, तदा दैवयोगात् तैलपानप्रसंगेन दीपस्य प्रबोधनं जातं, देवस्य प्रदक्षिणाऽपि कृता, तेन पुण्यप्रभावेन मूषिका देहं विसृज्य मनुष्यजन्म प्राप्य पुत्रपौत्रादिसुखं भुक्त्वा चांऽते मोक्षं प्राप" इति ॥ ३९ ॥ ४० ॥ ४१ ॥ ४२ ॥ व्योमदीपस्य आकाशदीपस्य ॥ ४३ ॥ ४४ ॥ ४५ ॥ ४६ ॥ ॥ ४७ ॥ ४८ ॥ ४९ ॥ ५० ॥ ५१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ५२ ॥ ५३ ॥ लुब्धक इति शेषः ॥ ५४ ॥ जवो वेगः ॥ ५५ ॥ ५६ ॥ ५७ ॥ ५८ ॥ ५९ ॥ ६० ॥ ६१ ॥ ६२ ॥ ६३ ॥ ६४ ॥ ६५ ॥

कंचिद्ग्रामंज गामाशु चौर्यार्थं कार्तिके मुने ॥ तस्मिन्विदर्भनगरे राजा सुकृतिनामकः ॥ ५२ ॥ चन्द्रशर्माख्यविप्रस्य वचनात्कार्तिके सुधीः ॥ चकार व्योमदीपं तु हरिमंदिरमस्तके ॥ ५३ ॥ दीपं दत्त्वा महाभक्त्या अशृणोच्च कथां निशि ॥ एतस्मिन्नेव काले तु चौर्यार्थं समुपागतः ॥ ॥ ५४ ॥ राज्ञा दत्तं व्योमदीपं पश्यन्क्षणमतिष्ठत ॥ तदानीं दैवयोगेन गृध्रो जवसमन्वितः ॥ ५५ ॥ शीघ्रमागत्य जग्राह तैलपात्रं सदीपकम् ॥ स्वमुखेनैव संगृह्य वृक्षाग्रं च समाश्रयत् ॥ ५६ ॥ तत्र पीत्वा तु तैलं च दीपं स्थाप्य स पक्षिराट् ॥ वृक्षाग्रं तु समास्थाय क्षणमात्रमतिष्ठत ॥ ५७ ॥ तदानीं दैवयोगेन ग्रहीतुं पक्षिसत्तमम् ॥ मार्जारोऽप्यारुरुहद्वृक्षं पक्षिणाऽधिष्ठितं तु तम् ॥ ५८ ॥ तदग्रे सुखदीपं च पश्यन्क्षणमतिष्ठत ॥ आकाशदीपमाहात्म्यं कथितं चन्द्रशर्मणा ॥ ५९ ॥ राज्ञे सुकृतिनाम्ने च तौ वै शुश्रुवतुः क्षणम् ॥ खगमार्जारकौ तत्र स्वस्वचांचल्यदोषतः ॥ ६० ॥ मार्जारो जगृहे तत्र शाखांतरगतं खगम् ॥ दैवेन चोदितौ वृक्षाच्छिलायां पतितौ तदा ॥ ६१ ॥ भग्नगात्रौ मृतौ तत्र पक्षिमार्जारकौ भुवि ॥ दिव्यदेहसमायुक्तौ यानारूढौ दिवं गतौ ॥ ६२ ॥ तत्सर्वं लुब्धको दृष्ट्वा चौर्यार्थं समुपागतः ॥ निवृत्तो दुष्टभावेन कथयंतं कथां मुनिम् ॥ ६३ ॥ चंद्रशर्माणमाभाष्य इदं वचनमब्रवीत् ॥ चंद्रशर्मन्मया दृष्टं चौर्यार्थं ह्यागतेन च ॥ ६४ ॥ राज्ञा सुकृतिना दत्तं व्योमदीपं मनोहरम् ॥ तदानीं दैवयोगेन खगः पात्रं प्रगृह्य च ॥ ६५ ॥ तैलं पीत्वा तु तत्पात्रं सदीपं तु मनोहरम् ॥ वृक्षाग्रेस्थापयित्वा च तत्र क्षणमतिष्ठत ॥ ६६ ॥ मार्जारोऽप्यागतस्तत्र ग्रहीतुं पक्षिपुंगवम् ॥ दैवेन प्रेरितौ तौ च उभे शाखे समाश्रितौ ॥ ॥ ६७ ॥ त्वन्मुखात्कथ्यमानां हि कथां शुश्रुवतुः क्षणम् ॥ पश्चाच्चांचल्यदोषेण मार्जारो ह्यग्रहीत्खगम् ॥ ६८ ॥ तौ वृक्षात्पतितौ मृत्युं प्राप्तौ च क्षणमात्रतः ॥ उभौ तौ दिव्यरूपौ च यानारूढौ दिवं गतौ ॥ ६९ ॥ तदाश्चर्यमहं दृष्ट्वा त्वां प्रष्टुं समुपागतः ॥ तौ कौ पुरा च मार्जारखगौ तद्वद भो द्विज ॥ ७० ॥ तिर्यग्योनिसमापन्नौ मुक्तौ केन च कर्मणा ॥ इति लुब्धवचः श्रुत्वा चंद्रशर्माऽब्रवीत्तदा ॥ ७१ ॥ शृणु लुब्ध प्रवक्ष्यामि तयोर्वृत्तांतमंजसा ॥ मार्जारोऽपि पुरा पापी तथा श्रीवत्सगोत्रजः ॥ ७२ ॥

॥ ६६ ॥ ६७ ॥ ६८ ॥ ६९ ॥ ७० ॥ लुब्धवचः लुब्धकवचः ॥ ७१ ॥ ७२ ॥

CC-0. In Public Domain. Digitization by eGangotri

॥ ७३ ॥ ७४ ॥ ७५ ॥ ७६ ॥ ७७ ॥ ७८ ॥ ७९ ॥ ८० ॥ ८१ ॥ ८२ ॥ ८३ ॥ ८४ ॥ ८५ ॥ सुनंदः सुकृतिनामकः ॥ ८६ ॥ ८७ ॥ ८८ ॥

देवशर्मा इति प्रोक्तो देवद्रव्याऽपहारकः ॥ अहोबलनृसिंहस्य पूजाकर्तृत्वमाप सः ॥ ७३ ॥ तस्मिन्देवालये प्राप्तं तैलं द्रव्यादिकं तथा ॥ अपहृत्य च तेनैव कुटुंबं पोषयत्यसौ ॥ ७४ ॥ आयुर्नीत्वैवमेवाऽसौ ततः पंचत्वमागतः ॥ तस्मात्पापात्कालसूत्रं महारौरवरौरवम् ॥ ७५ ॥ निरुच्छ्वासं तथा प्राप्य असिपत्रवनं क्रमात् ॥ छिद्यमानो महाकायैर्यमदूतैर्भयंकरैः ॥ ७६ ॥ अनुभूय च तान्सर्वान्ब्रह्मराक्षसतां गतः ॥ ततस्तु श्वानयोनौ च चंडालोऽभूत्कुकर्मतः ॥ ७७ ॥ एवं जन्मशतं प्राप्य भूमौ मार्जारतां गतः ॥ आकाशदीपमाहात्म्यं श्रुत्वेदानीं तु दैवतः ॥ निर्मुक्ताऽखिलपापस्तु अगमद्धरिमंदिरम् ॥ ७८ ॥ गृध्रोऽयं तु पुरा विप्रो मिथिले वेदपारगः ॥ शर्यातिरिति विख्यातो नाम्ना लोके महाप्रभुः ॥ ॥ ७९॥दासीसंगं चकारासौ वेश्यासंगं तथैव च ॥ तेन दोषेण महता पंचत्वमगमत्तदा ॥ ८० ॥ कुंभीपाके महाघोरे स्थित्वा युगचतुष्टयम् ॥ कर्मशेषेण भूमौ च गृध्रत्वमगमत्तदा ॥ ८१ ॥ दैवेन चोदितो गृध्रस्तैलपानार्थमागतः ॥८२॥ दत्त्वा चाकाशदीपं च श्रुत्वा चैव हरेः कथाम् ॥ विध्वस्ताऽखिलपापस्तु जगाम हरिमंदिरम् ॥ ८३ ॥ इत्येतत्सर्वमाख्यातं लुब्ध गच्छ यथासुखम् ॥ व्याधोऽप्यस्य वचः श्रुत्वा गत्वा चैव स्वमंदिरम् ॥ ८४ ॥ व्रतं चाकाशदीपस्य चकार विधिवन्मुने ॥ आयुःशेषं तदा नीत्वा जगाम हरिमंदिरम् ॥ ८५ ॥ सुनंदोपि महाराज आश्चर्यं समुपागतः ॥ चकार विधिना मासं चंद्रशर्मोक्तमार्गतः ॥ ८६ ॥ प्रातः स्नात्वा शुचिर्भूत्वा कार्तिके मासि वै नृपः ॥ कोमलैस्तुलसीपत्रैःसमभ्यर्च्य जनार्दनम् ॥ ८७ ॥ रात्रौ दद्याद्व्योमदीपं मंत्रेणानेन वै नृपः॥ ८८ ॥ दामोदराय विश्वाय विश्वरूपधराय च ॥ नमस्कृत्वा प्रदास्यामि व्योमदीपं हरिप्रियम् ॥ निर्विघ्नं कुरु देवेश यावन्मासः समाप्यते ॥ ८९ ॥ व्रतेनाऽनेन देवेश त्वयि भक्तिः प्रवर्द्धताम् ॥ इति मंत्रेण राजाऽसौ दीपदानं चकार ह ॥ ९० ॥ ब्राह्मे मुहूर्ते च पुनर्व्योमदीपं ददाति हि ॥ विष्णोः पूजा कृता प्रातः प्रातःस्नानं चकार ह ॥ ९१ ॥ उत्सर्गस्य विधिं कृत्वा व्योम्नि दीपं समाप्य च ॥ ब्राह्मणान्भोजयित्वा च व्रतं विष्णोः समार्पयत् ॥ ९२ ॥ तेन पुण्यप्रभावेन स राजा मुनिसत्तम ॥ शरदां शतसाहस्रमिह भोगान्मनोहरान् ॥ ९३ ॥

॥ ८९ ॥ ९० ॥ ९१ ॥ उत्सर्गस्य दीपोत्सर्गस्य ॥ ९२ ॥ ९३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्विजवर नारद ॥ ९४ ॥ ९५ ॥ ९६ ॥ मनुजैरिति शेषः ॥ ९७ ॥ ९८ ॥ अथाऽऽकाशदीपस्य वैभवं वक्तुं पुनरितिहासांतरमाह—अथेति ॥ ९९ ॥ १०० ॥ ॥ १०१ ॥ २ ॥ ३ ॥ अभ्रादिकरंडेषु अभ्रककागदकाचानामन्यतमनिर्मितेषु करण्डेषु लोके कंदिल इति ख्यातेषु ॥ ४ ॥५॥ वा पूर्णिमातः लोलया लक्ष्म्या ॥ ६ ॥ अन्यदिति शेषः ॥ ७ ॥ अत्र प्रसिद्धा कथा सनत्कुमारसंहितायाम्—"पुरा विंध्याद्रौ हेलिकोनाम द्विजवर्य आसीत्, तस्य चित्रभानुमनोजवाख्यौ द्वौ पुत्रौ धर्मपरायणा

सुपुत्रपौत्रस्वजनैर्बुभुजे सह भार्यया ॥ ततश्चांऽते द्विजवर विमानं सुमनोहरम् ॥ ९४ ॥ स्त्रीभिः सह समारुह्य मोक्षमार्गं गतो मुने ॥ चतुर्भुजः पीतवासाः शंखचक्रगदाधरः ॥ ९५ ॥ विष्णुलोके विष्णुरिव प्रोच्यमानः सदाऽमरैः ॥ क्रीडयामास राजाऽसौ यथाकामं महामनाः ॥ ९६ ॥ तस्मात्तु कार्तिके मासि मानुष्यं प्राप्य दुर्लभम् ॥ आकाशदीपो दातव्यो विधानेन हरेः प्रियः ॥९७॥ दास्यंति ये कार्तिकमासि मर्त्या व्योम प्रदीपं हरितुष्टयेऽत्र ॥ पश्यंति ते नैव कदाऽपि देवं यमं महाक्रूरमुखं मुनींद्र ॥ ९८ ॥ अथाऽन्यच्च प्रवक्ष्यामि व्योमदीपस्य वैभवम् ॥ वाल खिल्यैः पुरा प्रोक्तं तच्छृणुष्व द्विजोत्तम ॥ ९९ ॥ ॥ वालखिल्या ऊचुः ॥ ॥ कृष्णादिमासक्रमतः कार्तिकस्यादिमासतः ॥ आकाशादीपदानं तु कुर्वंतु ऋषिसत्तमाः ॥ १०० ॥ तुलायां तिलतैलेन सायंसंध्यासमागमे ॥ आकाशदीपं यो दद्यान्मासमेकं निरंतरम् ॥ १ ॥ सश्रीकाय श्रीपतये श्रिया न स वियुज्यते ॥ आकाशदीपवंशस्तु विंशद्धस्तोत्तमो भवेत् ॥ २ ॥ मध्यमो नवहस्तः स्यात्कनिष्ठः पंचहस्तकः ॥ यथा दूरस्थितैर्लोकैर्दृश्यते तत्तथाऽऽचरेत् ॥ ३ ॥ तथाऽभ्रादिकरंडेषु दीपदानं विशिष्यते ॥ वंशस्य नवमांशेन लंबा कार्या पताकिका ॥ ४ ॥ मयूर पिच्छमुष्टिं वा कलशं चोपरि न्यसेत् ॥ विष्णुप्रीतिकरो दीपः पित्रुद्धारस्य कारकः ॥ ५ ॥ एकादश्यास्तुलार्काद्वा दीपदानमतोऽपि वा ॥ दामो दराय नभसि तुलायां लोलया सह ॥६॥ प्रदीपं ते प्रयच्छामि नमोऽनंताय वेधसे ॥ आकाशदीपसदृशं पितुरुद्धारकं नहि ॥ ७ ॥ हेलिकस्य च द्वौ पुत्रौ तत्रैकस्तु पिशाचकः ॥ व्योमदीपपुण्यदानान्मोक्षं प्राप सुदुर्लभम् ॥ ८ ॥

वपि दैवेन द्यूतवेश्यारतौ अभूतां, तेन व्यसनेन पितृद्रव्ये व्ययीभूते चौर्यं चक्रतुः । तत्राऽपि लोकैर्ज्ञातौ तदा तं देशं त्यक्त्वा घोरं वनं ययतुः तस्मिन्वने एका भिल्लकन्या नना नीनाम्नी तौ तरुणौ द्विजपुत्रौ दृष्ट्वा स्वगृहे स्थापितवती, पितृद्रव्यं च समर्पितवती, सा ननानी पितृनिमित्तं दीपदानं चक्रे । एकदा तया स्वपितुः श्राद्धे परमान्नेन द्वौ भ्रातरौ भोजितौ । तत्र मनोजवः अतिभोजनदोषेण मृत्युं प्राप्य तामिस्रनरके निक्षितोऽपि ननान्याः दीपदानसाहाय्यकरणपुण्ययोगान्निर्गतः सन् पिशाचयोनिं प्राप्तः स पिशाचः

तत्रैव निवसन् ननानीदेहमाससाद तदा ननानी वस्त्रालंकारांस्त्यक्त्वा नग्ना बभ्राम तदा चित्रभानुः तां गृहीत्वा काश्यां गत्वा आकाशदीपदानपुण्येन मनोजवाख्यं भ्रातरं पिशाचयोनितः मुक्तमकरोत्, तदा सः ननान्याः पुत्रोऽभूत्, ततस्त्रयः सुखेन काशीवासं कृत्वा मोक्षमवाप्नुवन्निति ॥ १०८ ॥ १०९ ॥ ११० ॥ ११ ॥ १२ ॥ कूटागारेषु धान्यराशिगृहेषु, "स्यान्निकायः पुंजराशी तूत्करः कूटमस्त्रियाम्" इत्यमरः ॥ अथवा—"मायानिश्चलयंत्रेषु कैतवाऽनृतराशिषु ॥ आयोधने शैलशृंगे सीरांगे

नमः पितृभ्यः प्रेतेभ्यो नमो धर्माय विष्णवे ॥ नमो यमाय रुद्राय कांतारपतये नमः ॥ ९ ॥ मन्त्रेणाऽनेन ये मर्त्याः पितृभ्यः खे तु दीपकम् ॥ प्रयच्छंति गता ये स्युर्नरके यांति तेऽपि वै ॥ उत्तमां गतिमित्थं ते दीपदानं मयेरितम् ॥ ११० ॥ लक्ष्मीसंततिसिद्ध्यर्थमारोग्याय प्रदीपयेत् ॥ ११ ॥ कार्तिके कृष्णपक्षे तु द्वादश्यादिषु पंचसु ॥ तिथीषूक्तः पूर्वरात्रे नृणां नीराजनाविधिः ॥ १२ ॥ ब्रह्मविष्णुशिवादीनां भवनेषु विशेषतः ॥ कूटागारेषु चैत्येषु सभासु च नदीषु च ॥ १३ ॥ प्राकारोद्यानवापीषु प्रतोलीनिष्कुटेषु च ॥ मन्दुरासु विविक्तासु हस्तिशालासु चैव हि ॥ १४ ॥ प्रदोषसमये दीपान्दद्यादेवं मनोहरान् ॥ कृतं यैः कार्तिके मासि दीपदानं विधानतः ॥ १५ ॥ दृश्यंते ये रत्नभाजस्तेऽत एव प्रकीर्तिताः ॥ दीपदानासमर्थश्चेत्परदीपं तु रक्षयेत् ॥ १६ ॥ यो वेदाभ्यासिने दद्याद्दीपार्थं तैलमादरात् ॥ को वा तस्य फलं वक्तुं भुवि तिष्ठति मानवः ॥ १७ ॥ दीपान्दद्याद्बहुविधान्कार्तिके विष्णुसंनिधौ ॥ कार्तिके मासि संप्राप्ते गगने स्वच्छतारके ॥१८॥ रात्रौ लक्ष्मीः समायाति द्रष्टुं भुवनकौतुकम् ॥ यत्रयत्र च दीपान्सा पश्यत्यब्धिसमुद्भवा ॥ १९ ॥ तत्रतत्र रतिं कुर्यान्नांधकारे कदाचन ॥ तस्माद्दीपः स्थापनीयः कार्तिके मासि वै सदा ॥ १२० ॥ लक्ष्मीरूपार्थिनां प्रोक्तं दीपदानं विशेषतः ॥ देवाऽऽलये नदीतीरे राजमार्गे विशेषतः ॥ २१ ॥ निद्रास्थले दीपदाता तस्य श्रीः सर्वतोमुखी ॥ दुर्बलस्याऽऽलयं वीक्ष्य दीपशून्यं तु यो ददेत् ॥ २२ ॥ विप्रस्य वाऽऽन्यवर्णस्य विष्णुलोके महीयते॥ कीटकंटकसंकीर्णे दुर्गमे विषमस्थले ॥ २३ ॥ कुर्याद्यो दीपदानानि नरकं स न गच्छति ॥ दद्याद्रात्रौ पंचनदे दीपं यो विधिपूर्वकम् ॥ २४ ॥

कूटमस्त्रियाम् ॥" इत्यमरः । चैत्येषु यज्ञायतनेषु ॥ १३ ॥ प्रतोली ग्रामाभ्यंतरमार्गः, निष्कुटेषु गृहारामेषु 'गृहारामास्तु निष्कुटाः' इत्यमरः ॥ मंदुरासु अश्वशालासु ॥ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ बहुविधान् घृततैलादिना कृतान् ॥ १८ ॥ १९ ॥ १२० ॥ २१ ॥ दीपमिति शेषः ॥ २२ ॥ २३ ॥ पंचनदे पंचनद

CC-0. In Public Domain. Digitization by eGangotri

क्षेत्रे, काशीस्थे दक्षिणदेशे कावेरीतटस्थितकुंभकोणनिकटस्थे वा ॥ २४ ॥ २५ ॥ २६ ॥ पांचालदेशे सिंहविक्रमराज्ञः नगरे हरिकरोनाम द्विजः ॥ २७ ॥ अयोध्यायां कार्तिके हरेर्मंदिरे द्यूतप्रसंगेन दीपः कृतः ॥ २८ ॥ विदर्भदेशे धर्मनंदनो नृपः ॥२९॥ १३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ १३४ ॥ इति कार्तिकमासमाहात्म्य

तस्य वंशे प्रजायन्ते बालकाः कुलदीपकाः ॥ पितृपक्षेऽन्नदानेन ज्येष्ठाऽऽषाढे च वारिणा ॥ २५ ॥ कार्तिके तत्फलं तेषां परदीपप्रबोधनात् ॥ बोधनात्परदीपस्य वैष्णवानां च सेवनात् ॥२६॥ कार्तिके फलमाप्नोति राजसूयाश्वमेधयोः ॥ पुरा हरिकरोनाम द्विजः पापरतः सदा ॥२७॥ कृतं द्यूतप्रसंगेन दीपदानं हि कार्तिके ॥ तेन पुण्यप्रभावेन स्वर्गं प्राप द्विजोत्तमः ॥ २८ ॥ आकाशदीपदानेन पुरा वै धर्मनन्दनः ॥ विमानवरमारुह्य विष्णुलोकं ययौ नृपः ॥२९॥ यः कुर्यात्कार्तिके विष्णोः पुरः कर्पूरदीपकम् ॥ प्रबोधिन्यां विशेषेण तस्य पुण्यं वदाम्यहम् ॥१३०॥ कुले तस्य प्रसूता ये पुरुषास्ते हरिप्रियाः ॥ क्रीडित्वा सुचिरं कालमन्ते मुक्तिं व्रजंति च ॥ ३१ ॥ दीपको ज्वलते यस्य दिवा रात्रौ हरेर्गृहे ॥ एकादश्यां विशेषेण स याति हरिमन्दिरम् ॥३२॥ लुब्धकोऽपि चतुर्दश्यां दीपं दत्त्वा शिवालये ॥ भक्त्या विना परे लिंगे शिवलोकं जगाम सः ॥ ३३ ॥ गोपः कश्चिदमावास्यां दीपं प्रज्वाल्य शार्ङ्गिणः ॥ मुहुर्जयजयेत्युक्त्वा स च राजेश्वरोऽभवत् ॥ १३४ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे कार्तिकमासमाहात्म्ये दीपदानमाहात्म्यवर्णनंनाम सप्तमोऽध्यायः ॥ ७ ॥ ॥ छ ॥ ॥ ॥ नारद उवाच ॥ ॥ भूयः कथय तृप्तिर्हि नास्ति मे कमलासन ॥ त्वद्वागमृतपानेन तृषा भूयः प्रवर्धते ॥ १ ॥ ॥ ब्रह्मोवाच ॥ ॥ प्रातः स्नात्वा शुचिर्भूत्वा कार्तिके विष्णुतत्परः ॥ देवं दामोदरं पूज्य कोमलैस्तुलसीदलैः ॥ स तु मोक्षमवाप्नोति नाऽत्र कार्या विचारणा ॥ २ ॥ भक्त्या विरहितो यस्तु सुवर्णादिभिरर्चयेत् ॥ तस्य पूजां न गृह्णाति नाऽत्र कार्या विचारणा ॥ ३ ॥ सर्वेषामपि वर्णानां भक्तिरेषा परा स्मृता ॥ भक्त्या विरहितं कर्म न विष्णोः प्रियकारणम् ॥ ४ ॥ भक्त्या संपूजितो नित्यं तुलस्यास्तु दलार्धतः ॥ स्वयं प्रत्यक्षमायाति भगवान्हरिरीश्वरः ॥ ५ ॥ विष्णुदासः पुरा भक्त्या तुलसीपूजनेन च ॥ विष्णुलोकं गतः शीघ्रं चोलो गौणत्वमागतः ॥ ६ ॥

टीकायां सप्तमोऽध्यायः ॥ ७ ॥ अथ तुलसीमाहात्म्यमाह—नारद उवाचेति ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ विष्णुदासः ब्राह्मणः चोलनृपः इयं कथा विस्तरतोऽग्रे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तुलस्याः शृणु माहात्म्यं पापघ्नं पुण्यवर्द्धनम् ॥ यत्पुरा विष्णुना प्रोक्तं रमायै तद्वदाम्यहम् ॥ ७ ॥ संप्राप्ते कार्तिके मासि तुलस्याः पूजनं हरेः ॥ ये कुर्वंति नरा भक्त्या ते यांति परमं पदम् ॥८॥ तस्मात्सर्वप्रयत्नेन तुलस्याः कोमलैर्दलैः ॥ पूजनीयो महाभक्त्या सर्वक्लेशविनाशनः ॥ ९ ॥ रोपिता तुलसी यावत्कुरुते मूलविस्तरम् ॥ तावद्युगसहस्राणि ब्रह्मलोके महीयते ॥ १० ॥ तुलसीपत्रसंयुक्तजले स्नानं चरेद्यदि ॥ सर्वपापविनिर्मुक्तो मोदते विष्णुमंदिरे ॥ ११ ॥ वृन्दावनं च कुरुते रोपणार्थं महामुने ॥ तावतैव विमुक्ताऽघो ब्रह्मभूयाय कल्पते ॥ १२ ॥ तुलसीकाननं ब्रह्मन्गृहे यस्याऽवतिष्ठते ॥ तद्गृहं तीर्थभूतं तु न यांति यमकिंकराः ॥ १३ ॥ सर्वपापहरं पुण्यं कामदं तुलसीवनम् ॥ रोपयंति नराः श्रेष्ठास्ते न पश्यंति भास्करिम् ॥ १४ ॥ तुलसीकाष्ठसंयुक्तं गन्धं यो धारयेन्नरः ॥ तद्देहं न स्पृशेत्पापं क्रियमाणं तथैव च ॥ ॥ १५ ॥ तुलसीविपिनच्छाया यत्र चैव भवेद्द्विज ॥ तत्र श्राद्धं प्रकर्तव्यं पितणां तृप्तिहेतवे ॥ १६ ॥ यन्मुखे तुलसीपत्रं कर्णे शिरसि दृश्यते ॥ यमस्तं नेक्षितुं शक्तः किमु दूता भयंकराः ॥ १७ ॥ तुलस्या महिमां यस्तु शृणुयान्नित्यमादृतः ॥ सर्वपापविमुक्तात्मा ब्रह्मलोकं स गच्छति ॥ १८ ॥ अत्रैवोदाहरंतीममितिहासं पुरातनम् ॥ तुलस्या विषये ब्रह्मञ्छ्रवणात्पापनाशनम् ॥ १९ ॥ पुरा काश्मीरदेशे तु ब्राह्मणौ संबभूवतुः ॥ हरिमेधःसुमेधाख्यौ विष्णुभक्तिपरायणौ ॥२०॥ सर्वभूतदयायुक्तौ सर्वतत्त्वार्थवेदिनौ ॥ कदाचित्तौ द्विजवरौ तीर्थयात्रापरायणौ ॥२१॥ गच्छंतावेकतो विप्रौ कांतारे श्रमविह्वलौ ॥ तुलसीकाननं तत्र ददर्शतुररिंदमौ ॥ २२ ॥ तयोः सुमेधास्तद्दृष्ट्वा तुलसीकाननं महत् ॥ प्रदक्षिणीकृत्य तदा ववंदे भक्तिसंयुतः ॥ २३ ॥ दृष्ट्वैतद्धरिमेधास्तु उवाच परया मुदा ॥ ज्ञातुं तुलस्या माहात्म्यं तत्फलं च पुनःपुनः ॥ २४ ॥ ॥ ॥ हरिमेधा उवाच ॥ ॥ किमर्थं विप्र देवेषु तीर्थेषु च व्रतेषु च ॥ स्थितेषु विप्रमुख्येषु प्रणामं कृतवानसि ॥ २५ ॥ ॥ सुमेधा उवाच ॥ ॥ शृणु विप्र महाभाग साधु वाक्यमुदीरितम् ॥ आतपो बाधते ह्यावां गत्वैतद्वटसन्निधौ ॥ २६ ॥ तस्य च्छायां समाश्रित्य वक्ष्यामि ते यथार्थतः ॥ एवमुक्तः सुमेधास्तु हरिमेधेन संयुतः ॥ २७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ मंडला मंडलाकृतिः ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ विप्र हे हरिमेधः ॥ ३९ ॥ ४० ॥ ४१ ॥

वटं जगाम धर्मज्ञो महत्कोटरसंयुतम् ॥ तत्र विश्राम्य विप्रोसौ हरिमेधमुवाच ह ॥ २८ ॥ श्रूयतां विप्रशार्दूल तुलस्यास्तूत्तमां कथाम् ॥ परमेशप्रसादेन संजाता या पयोनिधौ ॥ २९ ॥ पुरा दुर्वाससः शापाद्गतैश्वर्ये पुरंदरे ॥ ममंथुः क्षीरजलधिं ब्रह्माद्याः ससुराऽसुराः ॥ ३० ॥ ऐरावतः कल्पतरुश्चन्द्रमाः कमला तथा ॥ उच्चैःश्रवाः कौस्तुभश्च तथा धन्वन्तरिर्हरिः ॥ ३१ ॥ हरीतक्यादयश्चाऽपि दिव्या ओषधयस्तथा ॥ अजायन्त द्विजश्रेष्ठ लोकश्रेयोविधायकाः ॥ ३२ ॥ ततः पीयूषकलशमजरामरदायकम् ॥ कराभ्यां कलशं विष्णुर्धारयन्सुतलं परम् ॥ अवेक्ष्य मनसा सद्यः परां निर्वृतिमाप ह ॥ ३३ ॥ तस्मिन्पीयूषकलश आनन्दास्रोदबिन्दवः ॥ व्यपतंस्तुलसी सद्यः समजायत मण्डला ॥ ३४ ॥ सर्व लक्षणसंपन्ना सर्वाभरणभूषिता ॥ ३५ ॥ तत्रोत्पन्नां तथा लक्ष्मीं तुलसीं च ददृशुर्हरेः ॥ देवा ब्रह्मादयस्ते हि जगृहे भगवान्हरिः ॥ ३६ ॥ ततोऽतीव प्रियकरा तुलसी जगतां पतेः॥३७॥ सा तु देवगणैः सर्वैर्विष्णुवत्पूज्यते प्रिया ॥ नारायणो जगत्राता तुलसी तस्य वल्लभा ॥३८॥ तस्मात्तस्या नमस्कारो मया विप्र कृतस्ततः ॥ इत्येवं वदतस्तस्य सुमेधस्य महात्मनः ॥ ३९ ॥ आराददृश्यत महद्विमानं सूर्यवर्चसम् ॥ तदानीं वटवृक्षस्तु पपात पुरतो मुने ॥४०॥ तथैव तस्माद्वृक्षाच्च पुरुषौ द्वौ विनिर्गतौ ॥ द्योतयंतौ दिशः सर्वास्तेजसा सूर्यसन्निभौ ॥ ४१ ॥ प्रणामं चक्रतुस्तौ हि हरिमेधसुमेधयोः ॥ हरिमेधसुमेधौ तौ तौ दृष्ट्वा भयविह्वलौ ॥ ४२ ॥ ऊचतुर्विस्मयाविष्टौ तावुभौ देवसन्निभौ ॥४३॥ हरिमेधसुमेधसावूचतुः ॥ युवां कौ देवसंकाशौ भवंतौ सर्वमंगलौ ॥ मंदारमालां तरुणां धारयंतौ तथाऽमरौ ॥ नमस्कार्यौ तथाऽऽवाभ्यां पूज्यौ च सुररूपिणौ ॥ ४४ ॥ इत्युक्तौ ब्राह्मणाभ्यां तावूचतुर्वृक्षनिर्गतौ ॥ युवामेव पिता माता आवयोश्च तथा गुरुः ॥४५॥ बंध्वादयस्तथा चैव युवामेव न संशयः ॥ ज्येष्ठ उवाच ॥ ॥ अहं तु देवलोकस्थ आस्तीकोनाम नामतः ॥ ४६ ॥ अप्सरोगणसंवीतः कदाचिन्नंदनं वनम् ॥ क्रीडार्थमगमं चाद्रौ विषयासक्त चेतनः ॥ ४७ ॥ रेमिरे देववनिता यथाकामं मया सह ॥ मुक्तामल्लिकमाल्यानि निपेतुस्तानि योषिताम् ॥ ४८ ॥

तौ वृक्षनिर्गतौ दृष्ट्वा ॥ ४२ ॥ ४३ ॥ ४४ ॥ ४५ ॥ ४६ ॥ ४७ ॥ रेमिरे आलिंगितवत्यः ॥ ४८ ॥

१–'ये सान्तास्तेऽदन्ताः' इति शास्त्रीयवचनेन 'हरिमेधस् सुमेधस्' एतच्छब्दद्वयमत्र अदन्तरामशब्दवज्ज्ञेयम् । तेन 'हरिमेधम्' इत्यपि भवति, तथैवाऽन्यत्राऽपि ।

CC-0. In Public Domain. Digitization by eGangotri

तपतः तपश्चर्यां कुर्वतः रोमशस्योपारि इति शेषः ॥ ४९ ॥ ५० ॥ ५१ ॥ ५२ ॥ ५३ ॥ ५४ ॥ ५५ ॥ ५६ ॥ ५७ ॥ ५८ ॥ ५९ ॥ व्रतानीति शेषः ॥ ॥ ६० ॥ इति श्रीकार्तिकमासमाहात्म्यटीकायामष्टमोऽध्यायः ॥ ८ ॥ ॥ छ ॥ अथ वत्सद्वादशीविधानमाह—कृष्ण इति ॥ १ ॥ वटे वटवृक्षच्छायायाम् ॥ २ ॥

तपतो रोमशस्यैव तद्दृष्ट्वा कुपितो मुनिः ॥ योषितां नाऽपराधोयं यासां वै परतंत्रता ॥ ४९ ॥ अयमेव दुराचारः शापार्ह इति चाऽब्रवीत् ॥ त्वं ब्रह्मराक्षसो भूत्वा वटवृक्षे चरेति माम् ॥ ५० ॥ प्रसादितो मया सोऽथ विशापमपि दत्तवान् ॥ तुलसीपत्रमाहात्म्यं विष्णोर्नाम तथा द्विजात् ॥ ॥५१॥ यदा शृणोषि सद्यस्त्वं विमुक्तिं यास्यसे पराम् ॥ इति शप्तस्तु मुनिना चिरकालं सुदुःखितः ॥ ५२ ॥ वसाम्यत्र वटे दैवाद्भवद्दर्शनतो ध्रुवम् ॥ मुक्तिर्जाता विप्रशापाद्द्वितीयस्य कथां शृणु ॥ ५३ ॥ अयं मुनिवरः पूर्वं गुरुशुश्रूषणे रतः ॥ गुरोराज्ञामनादृत्य ब्रह्मराक्षसतां गतः ॥ ॥ ५४ ॥ युष्मत्प्रसादादधुना ब्रह्मशापाद्विमोचितः ॥ तीर्थयात्राफलं चैव युवाभ्यामिह साधितम् ॥५५॥ उत्तरोत्तरपुण्यानि वर्धंते च दिनेदिने ॥ इत्युक्त्वा तौ मुनिवरौ प्रणम्य च पुनःपुनः ॥ ५६ ॥ तावनुज्ञाप्य तौ धाम जग्मतुः परया मुदा ॥ ततस्तौ तीर्थयात्रार्थं परमौ मुनिपुंगवौ ॥ ॥ ५७ ॥ शंसंतौ तुलसीं पुण्यां जग्मतुर्मुनिपुंगव ॥ एवं नारद माहात्म्यं तुलस्याः को नु वर्णयेत् ॥ ५८ ॥ तस्मान्नारद मासेऽस्मिन्कार्तिके हरितुष्टिदे ॥ कर्तव्या तुलसीपूजा नाऽत्र कार्या विचारणा ॥ ५९ ॥ एवमंगव्रतान्येव प्रोक्तानि मुनिसत्तम ॥ उपांगानि प्रवक्ष्यामि वालखिल्योदितानि च ॥ ६० ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे कार्तिकमासमाहात्म्ये तुलसीमाहात्म्यवर्णनं नामाऽष्टमोऽध्यायः ॥८॥ ॥ वालखिल्या ऊचुः ॥ ॥ कृष्णःप्रोवाच धर्माय द्वादशीं वत्ससंज्ञिताम् ॥ गोधूलिकालसंयुक्ता द्वादशी वत्सपूजने ॥१॥ वत्सपूजा वटे चैव कर्तव्या प्रथमेऽहनि ॥ सवत्सां तुल्यवर्णां च शालिनीं गां पयस्विनीम् ॥ चंदनादिभिरालिप्य पुष्पमालाभिरर्चयेत् ॥ २ ॥ तद्दिने तैलपक्कं च स्थालीपक्कं युधिष्ठिर ॥ गोक्षीरं गोघृतं चैव दधिक्षीरं च वर्जयेत् ॥ ३ ॥ दिनांते सूर्यबिंबार्धादुभयत्र घटीदलम् ॥ ततो नीराजनं कार्य्यं निरीक्षेच्च शुभाऽशुभम् ॥ ४ ॥ नानादीपान्प्रकल्प्याऽऽदौ स्वर्णपात्रादिसंस्थितान् ॥ नीराजयेद्दीपपूर्वं निरीक्षेत शुभाऽशुभम् ॥५॥ लापयित्वा सर्वदीपानुत्तराभिमुखान्न्यसेत् ॥ मुख्या दीपा नव प्रोक्ता अन्यानपि च कल्पयेत् ॥ ६ ॥

॥ ३ ॥ शकुनावलोकनमाह—दिनांत इति ॥ ४ ॥ ५ ॥ ६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ७ ॥ ८ ॥ पंचदीपेषु विशेषतः शुभाऽशुभानिरीक्षणमाह—पक्षमिति । आदौ प्रथमदीपम् ॥ ९ ॥ दीपाभिमंत्रणे मंत्रः—सूर्यांशसंभवा इति ॥ १० ॥ ११ ॥ १२ ॥ ॥ १३ ॥ अत्र प्रसिद्धा कथा सनत्कुमारसंहितायाम्—पुरा हृषीकेशोनाम आभीरः अष्टसहस्रगवां पालकः आसीत्तस्य एकांगीनाम कन्या जाता । पुत्राऽभावे पुत्रोत्पत्तये दानधर्मादिकमतीव चकार, तेन पुत्रो जातः । तदा तत्पुरोहितः दुंदुभिनामकः काणः लोभी तत्रागत्य लोभेच्छया अयं मूलजात इति मिथ्यैवाऽवदत् । तदा भीतः पिता कन्यामवदत्, हे एकांगि "नयेमं बालकं शीघ्रं मुखे दत्त्वा घृतं मधु ॥ क्षिपस्व तूर्णं गंगायामस्माकं सुखवृद्धये ॥ " इति । तदा एकांगी तमादाय दयया महावृक्षस्य कोटरे ऽस्थापयत् "वारंवारं समागत्य दिवसेषु निशासु च ॥ तस्मै पयः पाययित्वा पुनर्याति स्वकं गृहम् ॥ जातोऽसौ वर्षमात्रेण कलभाषी स बालकः ॥ एकांग्यपि च संजाता यौवनाक्रांतदेहिका ॥" इति । एकदा दुंदुभिः पुरोहितः एकांगीं कामवासनया प्राऽर्थयत्, तदा सा धिक्कारं कृतवती, तेन द्वेषेण दुंदुभिः तत्पितरमुवाच, हे हृषीकेश इयं तव

ज्वाला चेद्दक्षिणासंस्था सतेजस्का शिखान्विता ॥ स्थिरा चेत्सौख्यदा प्रोक्ता विपरीता तु दुःखदा ॥ ७ ॥ कार्तिके कृष्णपक्षे तु द्वादश्यादिषु पंचसु ॥ तिथिषूक्तः पूर्वरात्रे नृणां नीराजनाविधिः ॥ ८ ॥ पक्षं संसूचयत्यादिर्द्वितीयो मासमेव च ॥ तृतीय ऋतुमेवेह चतुर्थस्त्वयनं तथा ॥ वर्षं तु पंचमो दीपः शुभाशुभं विनिर्णयेत् ॥ ९ ॥ सूर्यांशसंभवा दीपा अंधकारविनाशकाः ॥ त्रिकाले मां दीपयंतु दिशंतु च शुभाऽशुभम् ॥ ॥ १० ॥ अभिमंत्र्य च मंत्रेण ततो नीराजयेत्क्रमात् ॥ ११ ॥ आदौ देवांस्ततो विप्रान्हस्तिनश्च तुरंगमान् ॥ ज्येष्ठाञ्छ्रेष्ठाञ्जघन्यांश्च मातृमुख्याश्च योषितः ॥ १२ ॥ ततो नीराजितान्दीपान्स्वस्वस्थानेषु विन्यसेत् ॥ रूक्षैर्लक्ष्मीविनाशः स्याच्छ्वेतैरन्नक्षयो भवेत् ॥ अतिरक्तेषु युद्धानि मृत्युः कृष्णशिखेषु च ॥ १३ ॥ एकांगीनाम गोपाला तयैतच्च व्रतं कृतम् ॥ धनधान्यसमायुक्ता जाता वर्षत्रयेण सा ॥ १४ ॥

कन्या यवनैः सह क्रीडंती मया दृष्टा यवनाद्बालको जातः स च कोटरे स्थापितः, गत्वा पश्य, अहो तव कुलं नष्टम् अस्याः त्याग एव उचितः, अन्यथा बहिष्कारो भवेत् । एवं श्रुत्वा हृषीकेशः पुरोहितोक्तप्रकारेण एकांगीं तत्पुत्रं च वृषस्य पृष्ठे बद्ध्वा वने अत्यजत्, स वृषोऽपि दैवयोगेन तामादाय हरिद्वारं ययौ, बंधश्च शिथिलतां प्राप्तः तदा एकांगी तत्र कुटिं बद्ध्वा तृणविक्रयं कृत्वा तेन द्रव्येण पुत्रं वृषभं च पुष्णाति, कार्तिके मास आगते स्नानार्थं देशदेशतः लोकाः आययुः, ते इमां गोपालिकां ज्ञात्वा दानार्थमानीताः गावः रक्षणाय ददुः, अनयाऽपि गवां सेवा भूयसी आरब्धा ततः वैष्णवैः तया च द्वादश्यां गोपूजा कृता एवं वर्षत्रयमकरोत्, तत्र दैवयोगाद्धृषीकेशः पुरोहितेन दुंदुभिना सह आगतः, तत्र स्वकन्यां दृष्ट्वाऽतिविस्मितो भूत्वा तया ज्ञातवृत्तांतः तस्याः विवाहमकरोत्, दुंदुभिश्च धिक्कृतः साऽपि शापं ददौ । अद्यप्रभृति ये काणे विश्वासकारकाः ते अवश्यं विलयं यांतु, इति शप्त्वा बालकं पित्रे दत्त्वा गोव्रतमुपादिश्य भर्त्रा सह स्वयं जगामेति ॥ १४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥१५॥१६॥१७॥ अथ त्रयोदशीविधानमाह—प्रातरिति ॥ १८ ॥ १९ ॥ यमदीपं बहिर्दद्यादिति वा पाठः ॥ २० ॥ हेमनकस्येतिहासः सनत्कुमारसंहितायां विशेषतः वर्णितोऽस्ति ॥ २१ ॥ एकदेति शेषः ॥२२॥२३॥ सः पुरुषः न समानेयः नानेतव्यः, अपमृत्यौ प्राप्तेऽपि ॥२४ ॥ मंत्रमाह—मृत्युना इति ॥२५॥२६॥ अथ चतु

तस्माद्गोपूजनं कार्यं द्वादश्यां कार्तिकस्य तु ॥ एतद्गोव्रतमाहात्म्यं श्रुत्वा कुर्वंति ये नराः ॥ १५ ॥ ते गोव्रतप्रभावेन न गोभिर्विच्युता भुवि ॥ गोऽपराधः कृतो यः स्यात्स व्रताद्विलयं व्रजेत् ॥ १६ ॥ ॥ वालखिल्या ऊचुः ॥ ॥ कृष्णपक्षे चतुर्दश्यां मासि चाऽऽश्वयुजे तथा ॥ दीपोत्सव समीपे तु व्रतमेतत्समाचरेत् ॥ १७ ॥ प्रातः स्नात्वा त्रयोदश्यां कृत्वा वै दंतधावनम् ॥ त्रिरात्रनियमं कृत्वा गोविंदे भक्तितत्परः ॥ १८ ॥ कार्य एतद्व्रतस्यांते तथा गोवर्द्धनोत्सवः ॥ त्रिमुहूर्ताऽधिका ग्राह्या परवेधो न दोषभाक् ॥ १९ ॥ आश्विनस्याऽसिते पक्षे त्रयोदश्यां निशामुखे ॥ यमदीपं बलिं दद्यादपमृत्युर्विनश्यति ॥ २० ॥ पुरा हेमनकस्यैव बालकश्चाऽपमृत्युतः ॥ मुक्तोभूदाश्विने कृष्णत्रयोदश्यां दयावशात् ॥ २१ ॥ ॥ ॥ दूता ऊचुः ॥ ॥ यथा न जीविताद्भ्रश्येदीदृशे तु महोत्सवे ॥ तथोपायं ब्रूहि यम कृपां कृत्वाऽस्मदग्रतः ॥ २२ ॥ ॥ यम उवाच ॥ आश्विनस्याऽसिते पक्षे त्रयोदश्यां निशामुखे ॥ प्रतिवर्षं तु यो दद्याद्गृहद्वारे सुदीपकम् ॥ २३ ॥ मन्त्रेणाऽनेन भो दूताः समानेयः स नोत्सवे ॥ प्राप्तेऽपमृत्यावपि च शासनं क्रियतां मम ॥ २४ ॥ मृत्युना पाशदंडाभ्यां कालेन च मया सह ॥ त्रयोदश्यां दीपदानात्सूर्यजः प्रीयतामिति ॥ २५ ॥ मन्त्रेणाऽनेन यो दीपं द्वारदेशे प्रयच्छति ॥ उत्सवे चाऽपमृत्योश्च भयं तस्य न जायते ॥ २६ ॥ ॥ वालखिल्या ऊचुः ॥ ॥ पूर्वविद्धचतुर्दश्यामाश्विनस्य सितेतरे ॥ पक्षे प्रत्यूषसमये स्नानं कुर्यात्प्रयत्नतः ॥ २७ ॥ अरुणोदयतोऽन्यत्र रिक्तायां स्नाति यो नरः ॥ तस्याऽब्दिकभवो धर्मो नश्यत्येव न संशयः ॥ २८ ॥ तथा कृष्णचतुर्दश्यामाश्विनेऽर्कोदये सुराः ॥ यामिन्याः पश्चिमे यामे तैलाभ्यंगो विशिष्यते ॥ २९ ॥ यदा चतुर्दशी न स्याद्विदिने चेद्विधूदये ॥ दिनद्वये भवेच्चाऽपि तदा पूर्वैव गृह्यते ॥ ३० ॥ बलात्काराद्धठाद्वाऽपि शिष्टत्वान्न करोति चेत् ॥ तैलाभ्यंगं चतुर्दश्यां रौरवं नरकं व्रजेत् ॥३१॥ तैले लक्ष्मीर्जले गंगा दीपावल्याश्चतुर्दशीम् ॥ प्रातःस्नानं हि यः कुर्याद्यमलोकं न पश्यति ॥ ३२ ॥ अपामार्गमथो तुंबीं प्रपुन्नाडमथाऽपरम् ॥ भ्रामयेत्स्नानमध्ये तु नरकस्य क्षयाय वै ॥ ३३ ॥

र्दशीविधानमाह—पूर्वविद्धचतुर्दश्यामिति ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ प्रपुन्नाडं टाकळा इति ख्यातम् "प्रपुन्नाडस्त्वेडगजो दद्रुघ्नश्चक्रमर्दकः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पश्चाट उरणाख्यश्च'' इत्यमरः ॥ ३३ ॥ त्रिवारं मंत्रपठनं कृत्वा स्नानमध्ये स्नानजलमध्ये भ्रामयेत्, एवं पुनर्द्विः मंत्रपठनं नववारमित्यर्थः ॥३४॥ मत्रमाह—सीता इति। सीता हलरचिता रेखा तस्याः लोष्टं मृत्तिकापिंडः तेन समायुक्तं, 'सीता लांगलपद्धतिः' इत्यमरः ॥ 'लोष्टानि लेष्टवःपुंसि' इत्यमरः ॥ ३५ ॥ श्वानबलिमाह—स्नात्वेति ॥ ॥ ३६ ॥ स्नानांगतर्पणं स्वस्वशाखाप्रसिद्धम् ॥ ३७ ॥ अथ यमतर्पणमंत्रानाह—ॐ यमाय नमः इत्यादि ॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥ यमतर्पणं तु पूर्वमेवोक्तं भीष्मतर्पणं चाग्रे भीष्मपंचकव्रते कथयिष्यति। नरकाय नरकासुराय दीपः प्रदातव्यः। अत्र विशेषः सारोद्धारे—''पुरा सौवीरदेशे तु वेश्याऽभूद्द्विजनप्रिया ॥ नाम्ना लीलावती पुण्या हरिभक्तिपरायणा ॥ कदाचित्सा समायाता वसिष्ठस्याऽऽश्रमं मुदा ॥ चतुर्दशीमाहात्म्यं सा पप्रच्छ विनयान्विता ॥ वसिष्ठ उवाच ॥ एवं व्रतं त्रयोदश्यां कृत्वा

वारत्रयं त्रिवारं च पठित्वा मन्त्रमुत्तमम् ॥ ३४ ॥ सीतालोष्टसमायुक्त सकंटकदलान्वित ॥ हर पापमपामार्ग भ्राम्यमाणः पुनः पुनः ॥ अपामार्गं प्रपुन्नाडं भ्रामयेच्छिरसोपरि ॥ ३५ ॥ स्नात्वार्द्रवाससा दद्याद्दीपकं मृत्युपुत्रयोः ॥ शुनकौ श्यामशबलौ भ्रातरौ यमसेवकौ ॥ तुष्टौ स्यातां चतुर्दश्यां दीपदानेन मृत्युजौ ॥ ३६ ॥ इष्टबंधुजनैः सार्द्धमेतत्स्नानं समाचरेत् ॥ स्नानांगतर्पणं कृत्वा यमं संतर्पयेत्ततः॥ ३७ ॥ यमाय धर्मराजाय मृत्यवे चाऽन्तकाय च ॥ वैवस्वताय कालाय सर्वभूतक्षयाय च ॥ ३८ ॥ औदुंबराय दध्नाय नीलाय परमेष्ठिने ॥ वृकोदराय चित्राय चित्रगुप्ताय ते नमः ॥ ३९ ॥ चतुर्दशैते मन्त्राः स्युः प्रत्येकं च नमोऽन्विताः ॥ एकैकेन तिलैर्मिश्रान्दद्यात्त्रीनुदकाञ्जलीन् ॥ ४० ॥ यज्ञोपवीतिना कार्यं प्राचीनावीतिनाऽथवा ॥ देवत्वं च पितृत्वं च यमस्याऽस्ति द्विरूपता ॥ ४१ ॥ जीवत्पिताऽपि कुर्वीत तर्पणं यमभीष्मयोः ॥ नरकाय प्रदातव्यो दीपः संपूज्य देवताः ॥ ४२ ॥

रात्रौ विधूदये ॥ स्नातव्यं तिलतैलेन नरैर्नरकभीरुभिः ॥ नारकीति च सा प्रोक्ता तिथिर्लोकेषु विश्रुता ॥ पूर्वं वराहदेवाच्च जातो नरकनामकः ॥ धरण्यां स तु पापात्मा देवान्सर्वाञ्जिगाय च ॥ ऐश्वर्यं चैव देवानां हृतवान्पापचेतनः ॥ तदानीं देवताः सर्वे कृष्णं शरणमाययुः ॥ तैः प्रार्थितश्च श्रीकृष्णो वधार्थं नरकस्य च ॥ जगाम यत्र पापात्मा नरको धरणीसुतः ॥ साऽमात्यं नरकं हत्वा चतुर्दश्यां तु कार्तिके ॥ सर्वोत्तमस्तदा कृष्णश्चतुर्दश्या वरं ददौ ॥ ये करिष्यंति चाभ्यंगं वस्त्रदानादिकं च यत् ॥ तेषां यशश्च कीर्तिं च पुत्रैश्वर्यं ददाम्यहम् ॥ इति तस्यै वरान्दत्त्वा प्रसिद्धा सा ततो भुवि ॥ तस्मिन्दिने महालक्ष्मीस्तैले सन्निहिता यतः ॥ विष्णुपादाब्जसंभूता गंगा लोकमलापहा ॥ तस्मिन्नुष्णोदके देवी सन्निधानं करोति वै ॥ विधूदये त्रयोदश्यां भवेद्यदि चतुर्दशी ॥ नारकीति च सा प्रोक्ता आश्विनस्य सितेतरे ॥ व्यतीपाते च वैधृत्यां माता

Nepal Sanskrit University, Balmeeki Campus, Kathmandu.

CC-0. In Public Domain. Digitization by eGangotri

पित्रोर्दिनेऽपि वा ॥ नारकी चतुर्दशी चेत्स्यात्स्नातव्यं तिलतैलतः ॥ स्नातव्यं तिलतैलेन नारीभिश्च नरैरपि ॥ यतिभिर्विधवाभिश्च निष्कामैर्वा विधानतः ॥ कार्यमभ्यंजनं तत्र चाऽन्यथा निरयं व्रजेत् ॥" इति ॥ ४२ ॥ लक्ष्मीकामस्य स्नानकालमाह—अत्रैवेति ॥ ४३ ॥ ४४ ॥ ४५ ॥ ४६ ॥ माषपत्रस्य शाकं माषपर्णिशाकं महाराष्ट्र

अत्रैव लक्ष्मीकामस्य विधिः स्नाने मयोच्यते ॥ इषे भूते च दर्शे च कार्तिके प्रथमे दिने ॥ ४३ ॥ यदा स्नाति तदाऽभ्यंगस्नानं कुर्याद्विधूदये॥ ऊर्जशुक्लद्वितीयायां तिथौ च स्वातियुग्मगे ॥ ४४ ॥ मानवो मंगलस्नायी नैव लक्ष्म्या वियुज्यते ॥ दीपैर्नीराजनादत्र सैषा दीपावलिः स्मृता ॥ ४५ ॥ इंदुक्षयेऽपि संक्रांतौ रवौ पाते दिनक्षये ॥ अत्राऽभ्यंगो न दोषाय प्रातः पापाऽपनुत्तये ॥ ४६ ॥ माषपत्रस्य शाकं वै भुक्त्वा तस्मिन्दिने नरः ॥ प्रेताख्यायां चतुर्दश्यां सर्वपापैः प्रमुच्यते ॥४७॥ इषासितचतुर्दश्यामिन्दुक्षयतिथावपि ॥ दर्शादौ स्वातिसंयुक्ते तदा दीपावलिर्भवेत् ॥ ४८ ॥ कुर्यात्संलग्नमेतच्च दीपोत्सवदिनत्रयम् ॥ महाराजो बलिः प्रोक्तस्तुष्टेन हरिणा तथा ॥ ४९ ॥ वरं याचस्व भद्रं ते यद्यन्मनसि वर्तते ॥ इति विष्णुवचः श्रुत्वा बलिर्वचनमब्रवीत् ॥ ५० ॥ आत्मार्थं किं याचनीयं सर्वं दत्तं मया तथा ॥ लोकार्थं याचयिष्यामि शक्तश्चेद्देहि तच्च मे ॥ ५१ ॥ मयाऽद्य ते धरा दत्ता वामनच्छद्मरूपिणे ॥ त्रिभिः पदैस्त्रिदिवसैः सा चाऽऽक्रांता यतस्त्वया ॥ ५२ ॥ तस्माद्भूमितले राज्यमस्तु घस्रत्रये हरे ॥ ५३ ॥ मद्राज्ये ये दीपदानं भुवि कुर्वंति मानवाः ॥ तेषां गृहे तव स्त्रीयं सदा तिष्ठतु सुस्थिरा ॥ ५४ ॥ मम राज्ये गृहे येषामंधकारः पतिष्यति ॥ लक्ष्मीसंतानांधकारः सदा पततु तद्गृहे ॥ ५५ ॥ चतुर्दश्यां च ये दीपान्नरकाय ददंति च ॥ तेषां पितृगणाः सर्वे नरके न वसंति च ॥ ५६ ॥ बलिराज्यं समासाद्य यैर्न दीपावलिः कृता ॥ तेषां गृहे कथं दीपाः प्रज्वलिष्यंति केशव ॥ ५७ ॥ बलिराज्ये तु ये लोकाः शोकाऽनुत्साहकारिणः ॥ तेषां गृहे सदा शोकः पतेदिति न संशयः ॥ ५८ ॥ चतुर्दशीत्रये राज्यं बलेरस्त्विति याचयेत् ॥ पुरा वामनरूपेण प्रार्थयित्वा धरामिमाम् ॥ ददावतिथयेंद्राय बलिं पातालवासिनम् ॥ ५९ ॥ दत्तं दैत्यपतेरित्थं हरिणा तद्दिनत्रयम् ॥ तस्मान्महोत्सवं चात्र सर्वथैव हि कारयेत् ॥ ६० ॥ महारात्रिः समुत्पन्ना चतुर्दश्यां मुनीश्वराः ॥ अतस्तदुत्सवः कार्यः शक्तिपूजापरायणैः ॥ ६१ ॥

भाषायां रानउडीद इति ख्यातम् ॥ "हयपुच्छी तु कांबोजी माषपर्णी महासहा ॥" इत्यमरः ॥ ४७ ॥ दीपोत्सवीदिनत्रयमाह—इषेति ॥ ४८ ॥ ४९ ॥५०॥ ५१ ॥ ॥ ५२ ॥ ५३ ॥ इयं स्त्री लक्ष्मीः ॥ ५४ ॥ ५५ ॥ ५६ ॥ दीपावलिः दीपानां पंक्तिः ॥ ५७ ॥ ५८ ॥ ५९ ॥ ६० ॥ महारात्रिरिति महारात्रिनामिका देवी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यामलतंत्रप्रसिद्धा ॥ ६१ ॥ ६२ ॥ ६३ ॥ ६४ ॥ उल्काहस्ताः तेजःपुंजहस्ताः ॥ ६५ ॥ ६६ ॥ ६७ ॥ ६८ ॥ अथ दीपोत्सवीविधानप्रसंगमाह—कौमोदिनीति । द्विजाः वालखिल्याः कौमोदिनीशब्दार्थमाह पाद्मे—"विष्णुना च स्वयं वत्स तुष्टेन बलये पुनः ॥ उपकारकरं दत्तमसुराणां महोत्सवम् ॥ तदाप्रभृति सेनानीः प्रवृत्ता कौमुदी सदा ॥ कुशब्देन मही ज्ञेया मुद हर्षे ततो द्वयम् ॥ धातुज्ञैर्निगमज्ञैश्च तेनैषा कौमुदी स्मृता ॥ कौ मोदंते जना यस्मान्नानाभावैः परस्परम्॥ हृष्टास्तुष्टाः सुखापन्नास्ते

बलिराज्यं समासाद्य यक्षगंधर्वकिन्नराः ॥ औषध्यश्च पिशाचाश्च मंत्राश्च मणयस्तथा ॥ ६२ ॥ सर्व एव प्रहृष्यंति नृत्यंति च निशामुखे ॥ तत्तन्मंत्राश्च सिद्ध्यंति बलिराज्ये न संशयः ॥ ६३ ॥ बलिराज्यं समासाद्य यथा लोकाः सुहर्षिताः ॥ तथा तद्दिनमध्ये तु लोकाः स्युर्हर्षिता भृशम् ॥ ६४ ॥ तुलासंस्थे सहस्रांशौ प्रदोषे भूतदर्शयोः ॥ उल्काहस्ता नराः कुर्युः पितॄणां मार्गदर्शनम् ॥ ६५ ॥ नरकस्थास्तु ये प्रेतास्ते मार्गं तु व्रतात्सदा ॥ पश्यंत्येव न संदेहः कार्योऽत्र मुनिपुंगवैः ॥ ६६ ॥ आश्विने मासि भूतादितिथयः कीर्तितास्त्रयः॥ दीपदानादिकार्येषु ग्राह्या मध्याह्नकालिकाः ॥ ६७ ॥ यदि स्युः संगवादर्वागेताश्च तिथयस्त्रयः ॥ दीपदानादिकार्येषु कर्तव्याः पूर्वसंयुताः ॥ ६८ ॥ ॥ ऋषय ऊचुः ॥ कौमोदिन्यास्तु माहात्म्यं प्रष्टुमिच्छामहे द्विजाः ॥ तस्मिन्दिने तु किं भोज्यं कस्य पूजां तु कारयेत् ॥ ६९ ॥ किमर्थं क्रियते सा तु तस्याः का देवता भवेत् ॥ किं च तत्र भवेद्देयं किं न देयं विशेषतः॥७०॥प्रहर्षः कोऽत्र निर्दिष्टः क्रीडा काऽत्र प्रकीर्तिता ॥ दीपावल्याः फलं सर्वं वदन्तु ऋषिसत्तमाः ॥ ७१ ॥ ॥ वालखिल्या ऊचुः ॥ ॥ ततः प्रभात समये त्वमायां तु मुनीश्वराः ॥ स्नात्वा देवान्पितॄन्भक्त्या संपूज्याऽथ प्रणम्य च ॥ ७२ ॥ कृत्वा तु पार्वणश्राद्धं दधिक्षीरघृतादिभिः ॥ दिवा तत्र न भोक्तव्यमृते बालातुराज्जनात् ॥ ७३ ॥ ततः प्रदोषसमये पूजयेदिंदिरां शुभाम् ॥ कुर्यान्नानाविधैर्वस्त्रैः स्वच्छं लक्ष्म्याश्च मण्डपम् ॥ ७४ ॥ नानापुष्पैः पल्लवैश्च चित्रैश्चाऽपि विचित्रितम् ॥ तत्र संपूजयेल्लक्ष्मीं देवांश्चाऽपि प्रपूजयेत् ॥ ७५ ॥ संपूज्या देवनार्योऽपि बहुभिश्चोपचारकैः ॥ पादसंवाहनं कुर्याल्लक्ष्म्यादीनां तु भक्तितः ॥ ७६ ॥ अस्मिन्नहनि सर्वेऽपि विष्णुना मोचिताः पुरा ॥ बलिकारागृहाद्देवा लक्ष्मीश्चाऽपि विमोचिता ॥ ७७ ॥

नैषा कौमुदी स्मृता ॥ कुमुदानि बलेर्यस्माद्दीयंते तेन षण्मुख ॥ अर्थाय पार्थिवैः पुत्र तेनैषा कौमुदी स्मृता ॥" इति ॥ ६९ ॥ ७० ॥ ७१ ॥ ७२ ॥ ७३ ॥ इंदिरां लक्ष्मीम् ॥ ७४ ॥ ७५ ॥ देवनार्यः सरस्वतीकालीगौर्याद्याः ॥ ७६ ॥ ७७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥७८॥ कथंभूताः पर्यंकाः सूत्रगर्भाः ॥७९॥८०॥ अथ लक्ष्मीप्रबोधोत्सवप्रसंगमाह—अत इत्यादिना ॥८१॥८२॥८३॥८४॥८५॥८६॥८७॥८८॥ दीपोत्सवी

लक्ष्म्या सार्द्धं ततो देवा जग्मुः क्षीरोदधौ पुनः ॥ प्रसुप्ता बहुकालं ते सुखं तस्मान्मुनीश्वराः॥७८॥रचनीयाः सूत्रगर्भाः पर्यंकाश्च सुतूलिकाः ॥ दुग्धफेनोपमैर्वस्त्रैरास्तृताश्च यथादिशम् ॥ ७९ ॥ स्थापयेत्तान्सुराँल्लक्ष्मीं वेदघोषसमन्वितः ॥ लक्ष्मीर्दैत्यभयान्मुक्ता सुखं सुप्तांबुजोदरे ॥८०॥ अतोऽत्र विधिवत्कार्या तुष्ट्यै तु सुखसुप्तिका ॥ तदह्नि पद्मशय्यां यः पद्मासौख्यविवृद्धये ॥ ८१ ॥ कुर्यात्तस्य गृहं मुक्त्वा तत्पद्मा क्वाऽपि न व्रजेत् ॥ न कुर्वंति नरा इत्थं लक्ष्म्या ये सुखसुप्तिकाम् ॥ ८२ ॥ धनचिन्ता विहीनास्ते कथं रात्रौ स्वपंति हि ॥ तस्मात्सर्वप्रयत्नेन लक्ष्मीं संपूजयेन्नरः ॥ ८३ ॥ स तु दारिद्र्यनिर्मुक्तः स्वजातौ स्यात्प्रतिष्ठितः ॥ जातिपत्रलवंगैलात्वक्कर्पूरसमन्वितम् ॥ ८४ ॥ पाचयित्वा गव्यदुग्धं सितां दत्त्वा यथोचिताम् ॥ लड्डुकांस्तस्य कुर्वीत तांश्च लक्ष्म्यै समर्पयेत् ॥ ८५ ॥ अन्यच्चतुर्विधं भक्ष्यं दद्याच्छ्रीः प्रीयतामिति ॥ अप्रबुद्धे हरौ पूर्वं स्त्रीभिर्लक्ष्मीं प्रबोधयेत् ॥ ८६ ॥ प्रबोधसमये लक्ष्मीं बोधयित्वा भुनक्ति या ॥ पुमान्वा वत्सरं यावल्लक्ष्मीस्तं नैव मुञ्चति ॥ ८७ ॥ अभयं प्राप्य विप्रेभ्यो विष्णुभीताः सुरद्विषः ॥ क्षीराब्धौ तुष्टुवुर्ज्ञात्वा सुप्तां पद्माश्रितां श्रियम् ॥ ८८ ॥ त्वं ज्योतिः श्रीरवीन्द्वग्निविद्युत्सौवर्णतारकाः ॥ सर्वेषां ज्योतिषां ज्योतिर्दीपज्योतिःस्थिते नमः ॥ ८९ ॥ या लक्ष्मीर्दिवसे पुण्ये दीपावल्यां च भूतले ॥ गवां गोष्ठे तु कार्तिक्यां सा लक्ष्मीर्वरदा मम ॥ ९० ॥ दीपदानं ततः कुर्यात्प्रदोषे च तथोल्मुकम् ॥ भ्रामयेत्स्वस्य शिरसि सर्वाऽरिष्टनिवारणम् ॥ ९१ ॥ दीपवृक्षास्तथा कार्याः शक्त्या देवगृहादिषु ॥ चतुष्पथे श्मशाने च नदीपर्वतवेश्मसु ॥ ९२ ॥ वृक्षमूलेषु गोष्ठेषु चत्वरेषु गृहेषु च ॥ वस्त्रैः पुष्पैः शोभितव्या राजमार्गस्य भूमयः ॥ ९३ ॥ सर्वं पुरमलंकृत्य प्रदोषे तदनन्तरम् ॥ ब्राह्मणान्भोजयित्वाऽऽदौ संभोज्य च बुभुक्षितान् ॥ ९४ ॥ अलंकृतेन भोक्तव्यं नववस्त्रोपशोभिना ॥ ततोऽपराह्णसमये घोषयेन्नगरं नृपः ॥ ९५ ॥ अद्य राज्यं बलेर्लोका यथेच्छं क्रीडयतामिति ॥ यथेच्छं क्रीडयतां बाला इत्याज्ञाप्य नृपेण तु ॥ ९६ ॥ तेभ्यो दद्यात्क्रीडनकं ततः पश्येच्छुभाशुभम् ॥ बलिराज्ये प्रकर्तव्यं यद्यन्मनसि वर्तते ॥ ९७ ॥

प्रार्थना—त्वं ज्योतिरिति द्वाभ्याम् ॥८९॥९०॥ उल्मुकं प्रज्वलत्काष्ठम् ॥९१॥९२॥९३॥९४॥९५॥९६॥ शुभाऽशुभं पश्येदिति—तत्रावलोकनप्रकारमाह—"बालरुष्टौ राजशोकस्तेषां तुष्टौ नृपे सुखम् ॥ बालयुद्धे राजयुद्धं रोदने राज्यनाशनम् ॥ यष्टिकादिकृतानश्वान्यदाऽऽरोहंति बालकाः ॥ तदा राज्ञो जयो वाच्यः परराष्ट्रविमर्दनम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लिंगं धृत्वा क्रीडने तु व्यभिचारो महान्भवेत् ॥ अन्नं यदा गोपयंति दुर्भिक्षं तत्र चाऽऽदिशेत् ॥ एवं बालकृतां चेष्टां बुद्ध्वा चाऽस्य फलं वदेत् ॥" इति ॥ ९७ ॥ ॥ ९८ ॥ ९९ ॥ १०० ॥ सुखरात्रिका कर्तव्या इति शेषः । अत्र विशेषः ब्राह्मे—"नारद उवाच ॥ येन स्त्रियः सुरूपाः स्युः सुभगाः सुप्रजास्तथा ॥ पतिव्रतपरा ब्रह्मंस्तद्व्रतं ब्रूहि मे प्रभो ॥ श्रीब्रह्मोवाच ॥ श्रूयतां ब्राह्मणश्रेष्ठ सुखरात्रि शुभं व्रतम् ॥ यन्मया कस्यचिन्नोक्तं रहस्यं शिवशर्मदम् ॥ ऊर्जे मासि चतुर्दश्यां कृष्णायां व्रतमुत्तमम् ॥ यस्याऽऽचरणमात्रेण स्त्रियः सौभाग्यवर्द्धनाः ॥ श्रिया सार्द्धं जगद्योनिः शेते विष्णुः सुखान्वितः ॥ तस्यां रात्रौ जनैस्तस्मात्संप्रोक्ता जनसुप्तिका ॥ तस्यां धातुमयैर्वर्ण्यैर्भगवत्पंचरंगकैः॥ निजाऽऽलये जीवरात्रीं लिखित्वा सुखरात्रिकाम् ॥ ब्रह्मविष्णुशिवादीनां मूर्तीश्च विलिखेत्ततः॥ सौभाग्यहेतवे भर्तुरनुज्ञां प्रतिगृह्य च ॥ व्रतार्थं कल्पयेत्तस्याः पूजोपकरणानि च ॥ ततः सुगंधद्रव्येण गात्रमुद्वर्त्य यत्नतः ॥ स्त्रीभिः सुखोदकस्नानं कर्तव्यं द्विजसत्तम ॥ स्नात्वा वस्त्रं मनोहारि परिधाय यथाविधि ॥

जीवहिंसा सुरापानमगम्यागमनं तथा ॥ चौर्यं विश्वासघातश्च पंचैतानि मुनीश्वराः ॥ बलिराज्ये तु नरकद्वाराण्युक्तानि संत्यजेत् ॥ ९८ ॥ ततोऽर्द्धरात्रसमये स्वयं राजा व्रजेत्पुरम् ॥ अवलोकयितुं रम्यं पद्भ्यामेव शनैःशनैः ॥ बलिराज्यप्रमोदं च दृष्ट्वा स्वगृहमाव्रजेत् ॥ ९९ ॥ एवं गते निशीथे च जने निद्रार्द्धलोचने ॥ एवं नगरनारीभिः शूर्पडिंडिमवादनैः ॥ निष्कास्यते प्रहृष्टाभिरलक्ष्मीः स्वगृहांऽगणात् ॥ १०० ॥ दंडैकरजनीयोगे दर्शः स्यात्तु परेऽहनि ॥ तदा विहाय पूर्वेद्युः परेऽह्नि सुखरात्रिका ॥ १०१ ॥ ये वैष्णवाऽवैष्णवाश्च बलिराज्योत्सवं नराः ॥ न कुर्वंति वृथा तेषां धर्माः स्युर्नात्र संशयः ॥ १०२ ॥

सुखराज्याः सुप्रतिष्ठां कारयित्वा द्विजन्मना ॥ पूजनीया विधानेन गंधपुष्पाक्षतादिभिः ॥ स्त्रीभिः सखीसंयुताभिः सुखराज्यादिदेवताः ॥ सुखरात्री गृहस्था या देवता लिखिता मया ॥ पूजां गृह्णातु मद्दत्तां साः प्रयच्छतु मे सुखम् ॥ सुखरात्रि नमस्तुभ्यं जीवदात्रि सुखप्रदे ॥ शिवप्रिये गृहाणेमां पूजां वै रक्ष बालकान् ॥ रूपं देहि जयं देहि विद्यां देहि सुखं धनम् ॥ प्रज्ञां प्रयच्छ मे कामान्समस्तान्सुखमादरात् ॥ इति संप्रार्थ्य तां देवीं गीतवादित्रनिस्वनैः ॥ लक्ष्मीपूजा ततः कार्या धवयुक्ताभिरादरात् ॥ त्रिभिः पूजोपहारेण मंत्रैरेभिर्हरिप्रियाम् ॥ जय देवि जगन्मातर्विष्णोर्वक्षसि संस्थिते ॥ रमे नमोऽस्तु ते मेऽत्र सौभाग्यं देहि निश्चलम् ॥ जागर्ति या महालक्ष्मीर्दीपमाला सुभूतले ॥ हरिवक्षःस्थिता रम्या सा देवी वरदाऽस्तु मे ॥ इति स्तुत्वा भगवतीं महालक्ष्मीं सुखप्रदाम् ॥ भर्त्रा सह क्रीडनीयं दीपावल्यां जयेच्छया ॥ द्यूतं पत्याश्रितं स्त्रीभिरित्याह पुरुषोत्तमः ॥ इत्थं विधानेन पतिव्रता या करोति हृद्यं सुखरात्रिकाख्यम् ॥ व्रतं सपुत्रा धनधान्ययुक्ता सभर्तृका सा भवतीह सत्यम् ॥" इति ॥ १०१ ॥ १०२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ १०३ ॥ इति कार्तिकमासमाहात्म्यटीकायां नवमोऽध्यायः ॥९॥ अथ द्यूतप्रतिपदाबलिराज्यप्राप्तिप्रसंगमाह—प्रतिपदीति ॥१ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥
॥ ८ ॥ प्रतिपद्वेधनिर्णयमाह—प्रतिपदीति ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ मूर्तिं कुर्यादित्यत्र का मूर्तिः कीदृशी वेत्यपेक्षायामाह ब्राह्मे—" ब्रह्मोवाच ॥

रात्रौ जागरणं कुर्यात्पुराणपठनादिभिः ॥ द्यूतेन वा हरेरग्रे गीतया वा तथैव च ॥१०३॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे कार्तिकमासमाहात्म्ये वत्सद्वादशीयमत्रयोदशीनरकचतुर्दशीदीपावलीकृत्यवर्णनंनाम नवमोऽध्यायः ॥ ९ ॥ छ ॥
॥ ब्रह्मोवाच ॥ ॥ प्रतिपद्यथ चाऽभ्यंगं कृत्वा नीराजनं ततः ॥ सुवेषः सत्कथागीतैर्दानैश्च दिवसं नयेत् ॥ १ ॥ शंकरस्तु पुरा द्यूतं ससर्ज सुमनोहरम् ॥ कार्तिके शुक्लपक्षे तु प्रथमेऽहनि सत्यवत् ॥ २ ॥ बलिराज्यदिनस्याऽपि माहात्म्यं शृणु तत्त्वतः ॥ स्नातव्यं तिलतैलेन नरैर्नारीभिरेव च ॥ ३ ॥ यदि मोहान्न कुर्वीत स याति यमसादनम् ॥ पुरा कृतयुगस्यादौ दानवेंद्रो बलिर्महान् ॥ ४ ॥ तेन दत्ता वामनाय भूमिः स्वमस्तकान्विता ॥ तदानीं भगवान्साक्षात्तुष्टो बलिमुवाच ह ॥ ५॥ कार्तिके मासि शुक्लायां प्रतिपद्यां यतो भवान् ॥ भूमिं मे दत्तवान्भक्त्या तेन तुष्टोऽस्मि तेऽनघ ॥ ६ ॥ वरं ददामि ते राजन्नित्युक्त्वाऽदाद्वरं तदा ॥ त्वन्नाम्नैव भवेद्राजन्कार्तिकी प्रतिपत्तिथिः॥ ७ ॥ एतस्यां ये करिष्यंति तैलस्नानादिकार्चनम् ॥ तदक्षयं भवेद्राजन्नात्र कार्या विचारणा ॥ ८ ॥ तदाप्रभृति लोकेऽस्मिन्प्रसिद्धा प्रतिपत्तिथिः ॥ प्रतिपत्पूर्वविद्धा नो कर्तव्या तु कथंचन ॥ ९ ॥ तत्राभ्यंगं न कुर्वीत अन्यथा मृतिमाप्नुयात् ॥ प्रतिपद्यां यदा दर्शो मुहूर्तप्रमितो भवेत ॥ ॥ १० ॥ मांगल्यं तद्दिने चेत्स्याद्वित्तादिस्तस्य नश्यति ॥ बलेश्च प्रतिपद्दर्शाद्यदि विद्धं भविष्यति ॥ ११ ॥ तस्यां यद्यथ चाऽऽर्तिक्यं नारी मोहात्करिष्यति ॥ नारीणां तत्र वैधव्यं प्रजानां मरणं ध्रुवम् ॥ १२ ॥ अविद्धा प्रतिपच्चेत्स्यान्मुहूर्तमपरेऽहनि ॥ उत्सवादिककृत्येषु सैव प्रोक्ता मनीषिभिः ॥ १३ ॥ प्रतिपत्स्वल्पमात्राऽपि यदि न स्यात्परेऽहनि ॥ पूर्वविद्धा तदा कार्या कृता नो दोषभाग्भवेत् ॥ १४ ॥ तद्दिने गृहमध्ये तु कुर्यान्मूर्तिं तदांगणे ॥ गोमयेन च तत्राऽपि दधि तत्पुरतः क्षिपेत् ॥ १५ ॥

अस्मिन्दिनेऽन्यदपि यत्कृत्यं वेदविदां वर ॥ तत्सर्वं संप्रवक्ष्यामि शृणु भागवतोत्तम ॥ ततो बलेर्गृहद्वारे स्थाप्यो गोमयमूर्तिभृत् ॥ मुने श्रीबालगोपालस्तथा गोवर्द्धनो महान्॥ बलिराजस्य राज्येऽथ द्वारपालो भव प्रभो॥स्वबालकपालनार्थं त्वं गोवर्द्धन गोपते ॥ इति संस्थाप्य गोपालं गोवर्द्धनसमन्वितम् ॥ प्रतिष्ठापूर्वकं ध्यानं भक्त्या संपूजयेन्मुने॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गोपालमूर्ते विश्वेश शक्रोत्सवविभेदक ॥ गोवर्द्धनकृतच्छत्र पीडां मे हर गोकुले ॥" इति संपूज्य भक्ष्यभोज्यैः बांधवादीन्भोजयित्वा स्वयं भुंजीतेति । दधि तत्पुरतः इत्यत्र दध्नं तत्पुरतः इति पाठांतरम् ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ गोवर्द्धनपूजाप्रसंगमाह—भवान्या इति ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥

आर्तिक्यं तत्र संस्थाप्य एवं कुर्याद्विधानतः ॥ अभ्यंगं ये न कुर्वंति तस्यां तु मुनिपुंगव ॥ १६ ॥ न मांगल्यं भवेत्तेषां यावत्स्याद्वत्सरं ध्रुवम् ॥ यो यादृशेन रूपेण तस्यां तिष्ठेच्छुभे दिने ॥ १७ ॥ आवर्षं तद्भवेत्तस्य तस्मान्मंगलमाचरेत् ॥ यदीच्छेत्स्वशुभान्भोगान्भोक्तुं दिव्यान्मनोहरान् ॥ १८ ॥ कुरु दीपोत्सवं रम्यं त्रयोदश्यादिकेषु च ॥ शंकरश्च भवानी च क्रीडया द्यूतमास्थिते ॥ १९ ॥ गौर्या जित्वा पुरा शंभुर्नग्नो द्यूते विसर्जितः ॥ अतोऽर्थं शंकरो दुःखी गौरी नित्यं सुखस्थिता ॥ २० ॥ द्यूतं निषिद्धं सर्वत्र हित्वा प्रतिपदं बुधाः ॥ प्रथमं विजयो यस्य तस्य संवत्सरं सुखम् ॥ २१ ॥ भवान्याऽभ्यर्थिता लक्ष्मीर्धेनुरूपेण संस्थिता ॥ प्रातर्गोवर्द्धनः पूज्यो द्यूतं रात्रौ समाचरेत् ॥ २२ ॥ भूषणीयास्तदा गावो वर्ज्या वहनदोहनात् ॥ २३ ॥ गोवर्द्धन धराऽऽधार गोकुलत्राणकारक ॥ विष्णुबाहुकृतोच्छ्राय गवां कोटिप्रदो भव ॥ २४ ॥ या लक्ष्मीर्लोकपालानां धेनुरूपेण संस्थिता ॥ घृतं वहति यज्ञार्थे मम पापं व्यपोहतु ॥ २५ ॥ अग्रतः संतु मे गावो गावो मे संतु पृष्ठतः ॥ गावो मे हृदये संतु गवां मध्ये वसाम्यहम् ॥ २६ ॥ ॥ इति गोवर्द्धनपूजा ॥ ॥ सद्भावेनैव संतोष्य देवान्सत्पुरुषान्नरान् ॥ इतरेषामन्नपानैर्वाक्यदानेन पंडितान् ॥ २७ ॥ वस्त्रैस्तांबूलधूपैश्च पुष्पकर्पूरकुंकुमैः ॥ भक्ष्यैरुच्चावचैर्भोज्यैरंतःपुरनिवासिनः ॥२८॥ ग्राम्यान्वृषभदानैश्च सामंतान्नृपतिर्धनैः ॥ पदातिजनसंघांश्च ग्रैवेयैः कटकैः शुभैः ॥ स्वनामांकैश्च ताम्राजा तोषयेत्सज्जनान्पृथक् ॥ २९ ॥ यथार्थं तोषयित्वा तु ततो मल्लान्नरांस्तथा ॥ वृषभान्महिषांश्चैव युध्यमानान्परैः सह ॥ ३० ॥ राज्ञस्तथैव योधांश्च पदातीन्समलंकृतान् ॥ मंचाऽऽरूढः स्वयं पश्येन्नटनर्तकचारणान् ॥ ३१ ॥ युद्धापयेद्वासयेच्च गोमहिष्यादिकं च यत् ॥ वत्सानाकर्षयेद्गोभिरुक्तिप्रत्युक्तिवादनात् ॥ ३२ ॥ ततोऽपराह्णसमये पूर्वस्यां दिशि सुव्रत ॥ मार्गपालीं प्रबध्नाति दुर्गस्तंभेऽथ पादपे ॥३३॥ कुशकाशमयीं दिव्यां लंबकैर्बहुभिः प्रिये ॥ वीक्षयित्वा गजानश्वान्मार्गपाल्यास्तले नयेत् ॥ ३४ ॥ गावो वृषांश्च महिषान्महिषीर्घंटकोत्कटान् ॥ कृतहोमैर्द्विजेंद्रैस्तु बध्नीयान्मार्गपालिकाम् ॥ ३५ ॥

॥ २६ ॥ २७ ॥२८॥२९॥ अथ युद्धक्रीडादर्शनप्रसंगमाह—यथार्थमिति ॥ ३० ॥ ३१ ॥ ३२ ॥ अथ मार्गपालीविधानमाह—तत इति ॥ ३३ ॥ ३४ ॥ ३५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ३६ ॥ ३७ ॥ अथ बलिपूजाप्रसंगमाह—कृत्वेति ॥ ३८ ॥ पंचरंगैः कर्तव्यतामाह—"जिह्वा ताल्वक्षिणी प्रांते करयोः पादयोस्तले ॥ रक्तवर्णेनाऽस्य केशाः कृष्णेनैव समालिखेत् ॥ सर्वांगं पीतवर्णेन शस्त्रायं नीलवर्णतः ॥ वस्त्रायं श्वेतवर्णेन यथाशोभं प्रकल्पयेत् ॥ सर्वाऽऽभरणशोभाढ्यं द्विभुजं नृपचिह्नितम् ॥ लोको लिखेद्गृहस्यांतः

नमस्कारं ततः कुर्यान्मन्त्रेणानेन सुव्रत ॥ मार्गपालि नमस्तुभ्यं सर्वलोकसुखप्रदे ॥ तले तव सुखेनाश्वा गजा गावश्च संतु मे ॥ ३६ ॥ मार्गपालीतले पुत्र यांति गावो महावृषाः ॥ राजानो राजपुत्राश्च ब्राह्मणाश्च विशेषतः ॥ ३७ ॥ मार्गपालीं समुल्लंघ्य नीरुजः सुखिनो हि ते ॥ कृत्वैतत्सर्वमेवेह रात्रौ दैत्यपतेर्बलेः ॥ ३८ ॥ पूजां कुर्यात्ततः साक्षाद्भूमौ मंडलके कृते ॥ बलिमालिख्य दैत्येंद्रं वर्णकैः पंचरंगकैः ॥ ३९ ॥ सर्वाभरणसंपूर्णं विंध्यावलिसमन्वितम् ॥ कूष्मांडमयजंभोरुमधुदानवसंवृतम् ॥ ४० ॥ संपूर्णं कृष्टवदनं किरीटोत्कटकुण्डलम् ॥ द्विभुजं दैत्यराजानं कारयित्वा स्वके पुनः ॥ ४१ ॥ गृहस्य मध्ये शालायां विशालायां ततोऽर्चयेत् ॥ मातृभ्रातृजनैः सार्द्धं संतुष्टो बन्धुभिः सह ॥ ४२ ॥ कमलैः कुमुदैः पुष्पैः कह्लारै रक्तकोत्पलैः ॥ गन्धपुष्पान्ननैवेद्यैः सक्षीरैर्गुडपायसैः ॥ ४३ ॥ मद्यमांससुरालेह्यचोष्यभक्ष्योपहारकैः ॥ मन्त्रेणाऽनेन राजेंद्रः समन्त्री सपुरोहितः ॥ पूजां करिष्यते यो वै सौख्यं स्यात्तस्य वत्सरम् ॥ ४४ ॥ बलिराज नमतुभ्यं विरोचनसुत प्रभो ॥ भविष्येंद्र सुराराते पूजेयं प्रतिगृह्यताम् ॥ ४५ ॥ एवं पूजाविधानेन रात्रौ जागरणं ततः ॥ कारयेद्वै क्षणं रात्रौ नटनृत्यकथानकैः ॥ ४६ ॥ लोकश्चापि गृहस्यांते सपर्यां शुक्लतंदुलैः ॥ संस्थाप्य बलिराजानं फलैः पुष्पैः प्रपूजयेत् ॥ ४७ ॥ बलिमुद्दिश्य वै तत्र कार्यं सर्वं च सुव्रत ॥ यानि यान्यक्षयाण्याहुर्मुनयस्तत्त्वदर्शिनः ॥ ४८ ॥ यदत्र दीयते दानं स्वल्पं वा यदि वा बहु ॥ तदक्षयं भवेत्सर्वं विष्णोः प्रीतिकरं शुभम् ॥ ॥ ४९ ॥ रात्रौ ये न करिष्यंति तव पूजां बले नराः ॥ तेषां च श्रोत्रियो धर्मः सर्वस्त्वामुपतिष्ठतु ॥ ५० ॥ विष्णुना च स्वयं वत्स तुष्टेन बलये पुनः ॥ उपकारकरं दत्तमसुराणां महोत्सवम् ॥५१॥ एकमेवमहोरात्रं वर्षेवर्षे च कार्तिके ॥ दत्तं दानवराजस्य आदर्शमिव भूतले ॥५२॥

शय्यायां शुक्लतंदुलैः ॥" इति ॥ ३९ ॥ ४० ॥ ४१ ॥ ४२ ॥ ४३ ॥ ४४ ॥ ४५ ॥ ४६ ॥ नृपकृत्यमुक्त्वा जनकृत्यमाह—लोकश्चापीति ॥ ४७ ॥ ॥ ४८ ॥ ४९ ॥ ५० ॥ ५१ ॥ ५२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ५३ ॥ ५४ ॥ ५५ ॥ ५६ ॥ ५७ ॥ ५८ ॥ अथ गोक्रीडनप्रसंगमाह—बलिपूजामिति ॥ ५९ ॥ परविद्धायामनिष्टफलमाह—बलिपूजामित्यादिना ॥

यः करोति नृपो राज्ये तस्य व्याधिभयं कुतः ॥ सुभिक्षं क्षेममारोग्यं तस्य संपदनुत्तमा ॥ ५३ ॥ नीरुजश्च जनाः सर्वे सर्वोपद्रववर्जिताः ॥
॥ ५४ ॥ कौमुदी क्रियते यस्माद्भावं कर्तुं महीतले ॥ यो यादृशेन भावेन तिष्ठत्यस्यां च सुव्रत ॥ हर्षदुःखादिभावेन तस्य वर्षं प्रयाति हि ॥
॥५५॥ रुदिते रोदितं वर्षं प्रहृष्टे तु प्रहर्षितम् ॥ भुक्तौ भोग्यं भवेद्वर्षं स्वस्थे स्वस्थं भविष्यति ॥ ५६ ॥ वैष्णवी दानवी चेयं तिथिः प्रोक्ता च
कार्तिके ॥ ५७ ॥ दीपोत्सवं जनितसर्वजनप्रमोदं कुर्वंति ये शुभतया बलिराजपूजाम् ॥ दानोपभोगसुखबुद्धिमतां कुलानां हर्षं प्रयाति सकलं
प्रमुदा च वर्षम् ॥५८॥ बलिपूजां विधायैवं पश्चाद्गोक्रीडनं चरेत् ॥ ५९ ॥ गवां क्रीडादिने यत्र रात्रौ दृश्येत चन्द्रमाः ॥ सोमो राजा पशून्हंति
सुरभीपूजकांस्तथा ॥ ६० ॥ प्रतिपद्दर्शसंयोगे क्रीडनं तु गवां मतम् ॥ परविद्धासु यः कुर्यात्पुत्रदारधनक्षयः ॥ ६१ ॥ अलंकार्यास्तदा गावो
गोग्रासादिभिरर्चिताः ॥ गीतवादित्रनिर्घोषैर्नयेन्नगरबाह्यतः ॥ आनीय च ततः पश्चात्कुर्यान्नीराजनाविधिम् ॥ ६२ ॥ अथ चेत्प्रतिपत्स्वल्पा
नारी नीराजनं चरेत् ॥ द्वितीयायां ततः कुर्यात्सायं मंगलमालिकाः ॥ ६३ ॥ एवं नीराजनं कृत्वा सर्वपापैः प्रमुच्यते ॥ प्रतिपत्पूर्वविद्धैव
यष्टिकाकर्षणे भवेत् ॥ ६४ ॥ कुशकाशमयीं कुर्याद्यष्टिकां सुदृढां नवाम् ॥ देवद्वारे नृपद्वारेऽथवाऽऽनेया चतुष्पथे ॥ ६५ ॥ तामेकतो राजपुत्रा
हीनवर्णास्तथैकतः ॥ गृहीत्वा कर्षयेयुस्ते यथासारं मुहुर्मुहुः ॥ ६६ ॥ समसंख्या द्वयोः कार्या सर्वेऽपि बलवत्तराः ॥ जयोऽत्र हीनजातीनां
जयो राज्ञस्तु वत्सरम् ॥ ६७ ॥ उभयोः पृष्ठतः कार्या रेखा तत्कर्षकोपरि ॥ रेखांते यो नयेत्तस्य जयो भवति नाऽन्यथा ॥ ६८ ॥ जयचिह्न
मिदं राजा निदधीत प्रयत्नतः ॥ ६९ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे कार्तिकमाससमाहात्म्ये
कार्तिकशुक्लप्रतिपन्माहात्म्यवर्णनंनाम दशमोऽध्यायः ॥ १० ॥

॥ ६० ॥ ६१ ॥ ६२ ॥ ६३ ॥ अथ यष्टिकाकर्षणेन जयाजयज्ञानप्रसंगमाह—प्रतिपदिति ॥ ६४ ॥ ६५ ॥ ६६ ॥ ६७ ॥ ६८ ॥ ६९ ॥ इति कार्तिकमास
माहात्म्यटीकायां दशमोऽध्यायः ॥ १० ॥

॥ नारद उवाच ॥ १ ॥ अथ यमद्वितीयाविधानमाह—यदीति । यमद्वितीयाख्यायाः प्रयोजनं वक्तुमन्यासामप्याहपाद्मे—"स्कंदैतास्तिथयो नूनं द्वितीयायाश्च विश्रुताः ॥ मासैश्चतुर्भिश्च ततः प्रावृट्काले सुखावहाः ॥ प्रथमा श्रावणे मासि तथा भाद्रपदेऽपरा ॥ तृतीयाऽश्वयुजे मासि चतुर्थी कार्तिके भवेत् ॥ कलुषा श्रावणे मासि तथा भाद्रपदेऽमला ॥ आश्विने प्रेतसंचारा कार्तिके याम्यका मता ॥ पुरा वृत्रवधे वृत्ते प्राप्तराज्ये पुरंदरे ॥ ब्रह्महत्यापनोदार्थमश्वमेधः प्रकीर्तितः ॥ क्रोधादिंद्रेण वज्रेण ब्रह्महत्या निषूदिता ॥ षड्विधा सा क्षितौ क्षिप्ता वृक्षतोयमहीतले ॥ नार्यां भ्रूणहने वह्नौ संविभज्य यथाक्रमम् ॥ तत्पापश्रवणात्पूर्वं द्वितीयाया दिनेऽनघ ॥ नारीवृक्षनदीभूमिवह्निभ्रूणहनस्तथा ॥ कलुषीभवनं जाता ह्यतोऽर्थं कलुषा स्मृता ॥ मधुकैटभयो रक्ते पुरा मग्ना तु मेदिनी ॥ अष्टांगुला पवित्रा सा नारीणां तु रजो मलम् ॥ नद्यः प्रावृण्मलाः सर्वा वह्नेरूर्ध्वं मषी मलः ॥ निर्यासमलिनो वृक्षाः संगाद्भ्रूणहनो मलाः ॥ कलुषाणि चरंत्यस्यां तेनैषा कलुषा मता ॥ देवर्षिपितृधर्माणां निंदका नास्तिकाः शठाः ॥ तेषां सा वाङ्मलात्पूता द्वितीया तेन निर्मला ॥ अनध्यायेषु शास्त्राणि पाठयंति पठंति च ॥ सांख्यकास्तार्किकाः श्रौतास्तेषां शब्दाऽपशब्दजात् ॥ मलात्पूता द्वितीयायां ततोऽर्थे

॥ नारद उवाच ॥ ॥ भगवन्प्रष्टुमिच्छामि त्वामहं विनयान्वितः ॥ तद्व्रतं ब्रूहि मे मर्त्यो मृत्युं येन न पश्यति ॥ १ ॥ ॥ ब्रह्मोवाच ॥ ॥ यदि पृच्छसि विप्रेन्द्र व्रतानामुत्तमं व्रतम् ॥ व्रतं यमद्वितीयाख्यं शृणु त्वं मृत्युनाशनम् ॥ २ ॥ कार्तिके मासि शुक्लायां द्वितीयायां मुनीश्वर ॥ कर्तव्यं तद्विधानेन सर्वमृत्युनिवारणम् ॥ ३ ॥ ब्राह्मे मुहूर्ते चोत्थाय द्वितीयायां मुनीश्वर ॥ मनसा चिंतयेदात्महितं नैवाऽहितं स्मरेत् ॥ ४ ॥ प्रातःस्नानं ततः कुर्याद्दन्तधावनपूर्वकम् ॥ ततः शुक्लांबरधरः शुक्लमाल्यानुलेपनः ॥ ५ ॥ कृतनित्यक्रियो हृष्टः कुण्डलांगदभूषितः ॥ औदुम्बरतरुं गत्वा कृत्वा मण्डलमुत्तमम् ॥ ६ ॥ पद्ममष्टदलं कृत्वा तस्मिन्नौदुम्बरे शुभे ॥ विधिं विष्णुं च रुद्रं च वरदां च सरस्वतीम् ॥ ७ ॥

निर्मला च सा ॥ कृष्णस्य जन्मना वत्स त्रैलोक्यं पावितं भवेत् ॥ नभस्येतेन निर्दिष्टा निर्मला सा तिथिर्बुधैः ॥ अग्निष्वात्ता बर्हिषद आज्यपाः सोमपास्तथा ॥ पितॄन्पितामहान्प्रेतसंचरात्प्रेतसंचरा ॥ प्रेतास्तु पितरः प्रोक्तास्तेषां तस्यां तु संचरः ॥ पुत्रपौत्रैस्तु दौहित्रैः स्वधामंत्रैस्तु पूजिताः ॥ श्राद्धदानमखैस्तृप्ता यांत्यतः प्रेतसंचरा ॥ महालये तु प्रेतानां संचारो भुवि दृश्यते ॥ तेनैषा प्रेतसंचारा कीर्तिता शिखिवाहन ॥ यमस्य क्रियते पूजा यतोऽस्यां पावके नरैः ॥ तेनैषा याम्यका प्रोक्ता सत्यंसत्यं मयोदितम् ॥" इति । सनत्कुमारसंहितायाम्—"अस्यां निजगृहे देवि न भोक्तव्यं कदाचन ॥ ये भुंजते दुराचारा नरके ते पतंति च ॥ श्रावणे तु पितृव्यस्य कन्याहस्तेन भोजनम् ॥ मातुलस्य सुताहस्ताद्भोक्तव्यं भाद्रमासके ॥ पितुर्भ्रातुः स्वसुः कन्ये आश्विने तु तयोः क्रमात् ॥ अवश्यं कार्तिके मासि भोक्तव्यं भगिनीकरात् ॥" इति ॥ २ ॥ ३ ॥ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥

CC-0. In Public Domain. Digitization by eGangotri

॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ गोदानाऽभावे ब्राह्मे कार्तिकमाहात्म्ये विशेषः । "तदलाभे चोदकुंभं सहिरण्यं सदक्षिणम् ॥ औदुंबरविधानेन संप्रदद्याद्द्विजन्मने ॥"

वीणापुस्तकसंयुक्तां पूजयेत्स्वस्थमानसः ॥ चन्दनागरुकस्तूरीकुंकुमैर्द्विजसत्तम ॥ ८ ॥ पुष्पैर्धूपैश्च नैवेद्यैर्नारिकेलफलादिभिः ॥ ततो मृत्युविनाशार्थं सालंकारां पयस्विनीम् ॥ ९ ॥ विप्राय वेदविदुषे गां दद्याच्च सवत्सकाम् ॥ अपमृत्युविनाशार्थं संसारार्णवतारकाम् ॥ १० ॥ हे विप्र ते त्विमां सौम्यां धेनुं संप्रददाम्यहम् ॥ इति मंत्रेण गां दद्याद्विप्राय ब्रह्मवादिने ॥ ११ ॥ तदलाभे तु विप्राय भक्त्या दद्यादुपानहौ ॥ ततः पूजां समाप्याऽथ भक्तिमान्पुरुषोत्तमे ॥ १२ ॥ ज्ञातिश्रेष्ठान्वयोवृद्धान्सम्यग्भक्त्याऽभिवादयेत् ॥ नानाविधैः फलै रम्यैस्तर्प्पयेत्स्वजनानपि ॥१३॥ ततः सोदरसंपन्ना भगिनी या भवेन्मुने ॥ तस्या गृहं समागत्य सम्यग्भक्त्याऽभिवादयेत् ॥ १४ ॥ भगिनि सुभगे भद्रे त्वदंघ्रिसरसीरुहम् ॥ श्रेयसेऽथ नमस्कर्तुमागतोऽस्मि तवालयम् ॥ १५ ॥ इत्युक्त्वा भगिनीं तां तु विष्णुबुद्ध्याऽभिवादयेत् ॥ तदा तु भगिनी श्रुत्वा भ्रातुर्वचनमुत्तमम् ॥ १६ ॥ भगिन्या भ्रातरं वाक्यं वक्तव्यं प्रति नारद ॥ अद्य भ्रातरहं जाता त्वत्तो धन्याऽस्मि मंगला ॥ १७ ॥ भोक्तव्यं तेऽद्य मद्गेहे स्वायुषे कुलदीपक ॥ कार्तिके शुक्लपक्षस्य द्वितीयायां सहोदर ॥ १८ ॥ यमो यमुनया पूर्वं भोजितः स्वगृहेऽर्चितः ॥ अस्मिन्दिने यमेनाऽपि नारकीयाश्च मोचिताः ॥ अपि बद्धाः कर्मपाशैः स्वेच्छया पर्यटंति ते ॥ १९ ॥ स्वसुर्नरो वेश्मनि यो न भुंक्ते यमद्वितीयादिनमत्र लब्ध्वा ॥ तं पापिनं प्राप्य वयं सुहृष्टाः प्रभक्षयामोऽद्य च भक्ष्यहीनाः॥ २० ॥ इति पापा रटंतीह ब्रह्महत्यादयस्तथा ॥ तस्माद्भ्रातर्मद्गृहे तु भोजनं कुरु कार्तिके ॥ २१ ॥ शुक्लायां तु द्वितीयायां विश्रुतायां जगत्रये ॥ अस्यां निजगृहे पुत्र भुज्यते न बुधैरपि ॥ २२ ॥ इत्युक्तः स तथेत्युक्त्वा भगिनीं पूजयेद्व्रती ॥ प्रहर्षात्सुमहाभाग वस्त्रालंकारभूषणैः ॥ २३ ॥ अग्रजामभिवंद्याऽथ आशिषं च प्रगृह्य च ॥ सर्वा भगिन्यः संतोष्या वस्त्रालंकारदानतः ॥ २४ ॥ अभावे स्वस्य तु स्वसुः पितृव्याः स्वपितुः स्वसा ॥ तस्या गृहं समागत्य कुर्याद्भोजनमादरात् ॥ २५ ॥ एवं यः कुरुते पुत्र द्वितीयां यमनामिकाम् ॥ अपमृत्युविनिर्मुक्तः पुत्रपौत्रादिभिर्वृतः ॥ २६ ॥

इति ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥

CC-0. In Public Domain. Digitization by eGangotri

इह भुक्त्वा तु विपुलान्भोगानन्यान्यथेप्सितान् ॥ अंते मोक्षमवाप्नोति नान्यथा मद्वचो भवेत् ॥ २७ ॥ व्रतान्येतानि सर्वाणि दानानि विविधानि च ॥ गृहस्थस्यैव युज्यंते तस्माद्गार्हस्थ्यमाश्रयेत् ॥ २८ ॥ कथां यमद्वितीयाया व्रतस्थः शृणुयान्नरः ॥ तस्य सर्वाणि पापानि नश्यंतीत्याह माधवः ॥ २९ ॥ ॥ सूत उवाच ॥ ॥ कार्तिके च द्वितीयायां पूर्वाह्णे यममर्चयेत् ॥ भानुजायां नरः स्नात्वा यमलोकं न पश्यति ॥ ॥ ३० ॥ कार्तिके शुक्लपक्षे तु द्वितीयायां तु शौनक ॥ यमो यमुनया पूर्वं भोजितः स्वगृहेऽर्चितः ॥ ३१ ॥ द्वितीयायां महोत्सर्गो नारकीयाश्च तर्पिताः ॥ पापेभ्यो विप्रयुक्तास्ते मुक्ताः सर्वे निबंधनात् ॥ ३२ ॥ अत्राऽऽशिताश्च संतुष्टाः स्थिताः सर्वे यदृच्छया ॥ तेषां महोत्सवो वृत्तो यमराष्ट्रसुखावहः ॥ ३३ ॥ अतो यमद्वितीयेयं त्रिषु लोकेषु विश्रुता ॥ तस्मान्निजगृहे विप्र न भोक्तव्यं ततो बुधैः ॥ ३४ ॥ स्नेहेन भगिनीहस्ताद्भोक्तव्यं बलवर्द्धनम् ॥ ऊर्जे शुक्लद्वितीयायां पूजितस्तर्पितो यमः ॥ ३५ ॥ महिषासनमारूढो दंडमुद्गरभृत्प्रभुः ॥ वेष्टितः किंकरैर्हृष्टैस्तस्मै याम्यात्मने नमः ॥ ३६ ॥ यैर्भगिन्यः सुवासिन्यो वस्त्रदानादितोषिताः ॥ न तेषां वत्सरं यावत्कलहो न रिपोर्भयम् ॥ ३७ ॥ धन्यं यशस्यमायुष्यं धर्मकामार्थसाधनम् ॥ व्याख्यातं सकलं पुत्र सरहस्यं मयाऽनघ ॥ ३८ ॥ यस्यां तिथौ यमुनया यमराजदेवः संभोजितः प्रतितिथौ स्वसृसौहृदेन ॥ तस्मात्स्वसुः करतलादिह यो भुनक्ति प्राप्नोति वित्तशुभसंपदमुत्तमां सः ॥ ३९ ॥ ॥ सूत उवाच ॥ ॥ विशेषश्चात्र संप्रोक्तो वालखिल्यैर्महर्षिभिः ॥ तदहं संप्रवक्ष्यामि शृणुध्वं मुनिसत्तमाः ॥ ४० ॥ ॥ वालखिल्या ऊचुः ॥ ॥ कार्तिकस्य सिते पक्षे द्वितीया यमसंज्ञिता ॥ तत्राऽपराह्णे कर्तव्यं सर्वथैव यमार्चनम् ॥ ४१ ॥ प्रत्यहं यमुनाऽऽगत्य यमं संप्रार्थयत्पुरा ॥ भ्रातर्मम गृहे याहि भोजनार्थं गणावृतः ॥ ४२ ॥ अद्य श्वो वा परश्वो वा प्रत्यहं वदते यमः ॥ कार्यव्याकुलचित्तानामवकाशो न जायते ॥ ४३ ॥ तदैकदा यमुनया बलात्कारान्निमंत्रितः ॥ स गतः कार्तिके मासि द्वितीयायां मुनीश्वराः ॥ ४४ ॥ नारकीयजनान्मुक्त्वा गणैः सह रवेः सुतः ॥ कृताऽऽतिथ्यो यमुनया नानापाकाः कृताः खग ॥ ४५ ॥ कृताभ्यंगो यमुनया तैलैर्गंधमनोहरैः ॥ उद्वर्तनं लापयित्वा स्नापितः सूर्यनंदनः ॥ ४६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ४७ ॥ ४८ ॥ ४९ ॥ ५० ॥ ५१ ॥ ५२ ॥ वीरेशः काशीक्षेत्रस्थः ॥ ५३ ॥ ५४ ॥ ५५ ॥ पितृधर्मराजः—पितृराजः धर्मराजः इति नामद्वयम्—एवं दत्तकृतानुसारी—दत्तानुसारी कृतानुसारी इति नामद्वयम् । एवं दश नामानि भवंति ॥ ५६ ॥ ५७ ॥ ५८ ॥ ५९ ॥ ६० ॥ ६१ ॥ भगिन्यभाव उपायमाह—

ततोऽलंकारकं दत्तं नानावस्त्राणि चंदनम् ॥ माल्यानि च प्रदत्तानि मंचोपरि उपाविशत् ॥ ४७ ॥ पक्वान्नानि विचित्राणि कृत्वा सा स्वर्णभाजने ॥ यमायाभोजयद्देवी यमुना प्रीतमानसा ॥४८॥ भुक्त्वा यमोऽपि भगिनीमलंकारैः समर्चयत् ॥ नानावस्त्रैस्ततः प्राह वरं वरय भामिनि ॥ इति तद्वचनं श्रुत्वा यमुना वाक्यमब्रवीत् ॥ ४९ ॥ ॥यमुनोवाच ॥ ॥ प्रतिवर्षं समागच्छ भोजनार्थं तु मद्गृहे ॥ ५० ॥ अद्य सर्वे मोचनीयाः पापिनो नरकाद्यम ॥ येऽद्यैव भगिनीहस्तात्करिष्यंति च भोजनम् ॥ तेषां सौख्यं प्रदेहि त्वमेतदेव वृणोम्यहम् ॥ ५१ ॥ ॥ यम उवाच ॥ ॥ यमुनायां तु यः स्नात्वा संतर्प्य पितृदेवताः ॥ ५२ ॥ भुंक्ते च भगिनीगेहे भगिनीं पूजयेदपि ॥ कदाचिदपि मद्द्वारं न स पश्यति भानुजे ॥ ५३ ॥ वीरेशैशानदिग्भागे यमतीर्थं प्रकीर्तितम् ॥ तत्र स्नात्वा च विधिवत्संतर्प्य पितृदेवताः ॥ ५४ ॥ पठेदेतानि नामानि आमध्याह्नं नरोत्तमः ॥ सूर्यस्याभिमुखो मौनी हतचित्तः स्थिरासनः ॥ ५५ ॥ यमो निहंता पितृधर्मराजो वैवस्वतो दंडधरश्च कालः ॥ भूताधिपो दत्तकृतानुसारी कृतांतमेतद्दशभिर्जपंति ॥५६॥ ततो यमेश्वरं पूज्य भगिनीगृहमाव्रजेत् ॥ मंत्रेणाऽनेन च तया भोजितः पूर्वमादरात् ॥५७॥ भ्रातस्तवानुजाताऽहं भुंक्ष्व भक्तमिदं शुभम् ॥ प्रीतये यमराजस्य यमुनाया विशेषतः ॥ ५८ ॥ ततः संतोष्य भगिनीं वस्त्रालंकरणादिभिः ॥ स्वप्नेऽपि यमलोकस्य भविष्यति न दर्शनम् ॥ ५९ ॥ नृपैः कारागृहे ये च स्थापिता मम वासरे ॥ अवश्यं ते प्रेषणीया भोजनार्थं स्वसुर्गृहे ॥ ६० ॥ विमोक्तव्या मया पापा नरकेभ्योऽद्य वासरे ॥ येऽद्य बंदीं करिष्यंति ते ताड्या मम सर्वथा ॥ ६१ ॥ कनीयसी स्वसा नास्ति तदा ज्येष्ठागृहं व्रजेत् ॥ तदभावे सपत्यायाः पितृव्यजागृहे ततः ॥ ६२ ॥ तदभावे मातृष्वसुर्मातुलस्याऽऽत्मजा तथा ॥ सापत्नगोत्रसंबंधैः कल्पयेदथवा क्रमम् ॥ ६३ ॥ सर्वाऽभावे माननीया भगिनी काचिदेव हि ॥ गोनद्याद्यथवा तस्या अभावे सति कारयेत् ॥ ६४ ॥ तदभावेप्यरण्यानीं कल्पयित्वा सहोदराम् ॥ अस्यां निजगृहे देवि न भोक्तव्यं कदाचन ॥ ६५ ॥

तदभाव इति ॥ ६२ ॥ ६३ ॥ गोनद्यादीति । तस्या भगिन्या अभावे गौर्वा नदी वा स्वस्य भगिनीयमेवेति मानयेत् ॥ ६४ ॥ ६५ ॥

CC-0. In Public Domain. Digitization by eGangotri

॥ ६६ ॥ ६७ ॥ ६८ ॥ ६९ ॥ ७० ॥ ७१ ॥ ७२ ॥ ७३ ॥ इति कार्तिकमाससमाहात्म्यटीकायामेकादशोऽध्यायः ॥ ११ ॥ ॥ छ ॥ अथ धात्रीछायाभोजनमाहात्म्यश्रवणेनात्युत्सुको मुनिस्तद्विशेषमाहात्म्यं परिपृच्छति—शौनक उवाचेति ॥ १ ॥ आसमंतात्पापं मर्दयतीति आमर्दकी ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ अष्टोत्तरं शतं

ये भुंजते दुराचारा नरके ते पतंति च ॥ एवमुक्त्वा धर्मराजो ययौ संयमिनीं ततः ॥ ६६ ॥ तस्मादृषिवराः सर्वे कार्तिकव्रतकारिणः ॥ भुंजते भगिनीहस्तात्सत्यं सत्यं न संशयः ॥ ६७ ॥ यमद्वितीयां यः प्राप्य भगिनीगृहभोजनम् ॥ न कुर्याद्वर्षजं पुण्यं नश्यतीति रवेः श्रुतिः ॥ ६८ ॥ या तु भोजयते नारी भ्रातरं भ्रातृके तिथौ ॥ अर्चयेच्चाऽपि तांबूलैर्न सा वैधव्यमाप्नुयात् ॥ ६९ ॥ भ्रातुरायुःक्षयो नूनं न भवेत्तत्र कर्हिचित् ॥ अपराह्णव्यापिनी सा द्वितीया भ्रातृभोजने ॥ ७० ॥ अज्ञानाद्यदि वा मोहान्न भुक्तं भगिनीगृहे ॥ प्रवासिना ह्यभावाद्वा ज्वरितेनाऽथ बंदिना ॥ ॥ ७१ ॥ एतदाख्यानकं श्रुत्वा भोजनस्य फलं भवेत् ॥ कार्तिके तु विशेषेण धात्रीछायां समाश्रितः ॥ ७२ ॥ भोजनं कुरुते यस्तु स वैकुंठमवाप्नुयात् ॥ ७३ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे कार्तिकमाससमाहत्म्ये यमद्वितीयामाहात्म्यवर्णनं नामैकादशोऽध्यायः ॥ ११ ॥ छ ॥ ॥ शौनक उवाच ॥ ॥ कार्तिकस्य च माहात्म्यं महत्पुण्यफलप्रदम् ॥ कदा धात्री समुत्पन्ना कथं सा ख्यातिमागता ॥ १ ॥ कस्मादियं पवित्रा च कस्मात्पापप्रणाशिनी ॥ आमर्दकी कृता केन कथयस्वात्र विस्तरात् ॥ २ ॥ ॥ सूत उवाच ॥ ॥ कथयामि द्विजश्रेष्ठ यथा चेयं हि पुण्यदा ॥ ऊर्जशुक्लचतुर्दश्यां धात्रीपूजां समाचरेत् ॥ ३ ॥ आमर्दकीमहावृक्षः सर्वपापप्रणाशनः ॥ वैकुण्ठाख्यचतुर्दश्यां धात्रीछायां गतो नरः ॥ ४ ॥ पूजयेत्तत्र देवेशं राधया सहितं हरिम् ॥ प्रदक्षिणां ततः कुर्याच्छतमष्टोत्तरं तथा ॥ ५ ॥ सुवर्णरजतैर्वापि फलैरामलकैस्तथा ॥ शतमष्टोत्तरं कुर्यादेकैकेन प्रदक्षिणाम् ॥ ६ ॥ साष्टांगं प्रणतो भूत्वा प्रार्थयेत्परमेश्वरम् ॥ धात्रीछायां समाश्रित्य शृणुयाच्च कथामिमाम् ॥ ७ ॥ ब्राह्मणान्भोजयेत्पश्चाद्यथाशक्त्या च दक्षिणाम् ॥ ब्राह्मणेषु च तुष्टेषु तुष्टो मोक्षप्रदो हरिः ॥ ८ ॥ अत्र ते कथयिष्यामि कथां पुण्यफलप्रदाम् ॥ आमर्दकीफलं वक्तुं ब्रह्मा चाऽपि न पार्यते ॥ ९ ॥ एकार्णवे पुरा जाते नष्टे स्थावरजंगमे ॥ नष्टे देवाऽसुरगणे प्रणष्टोरगराक्षसे ॥ १० ॥ तत्र देवाधिदेवेशः परमात्मा सनातनः ॥ जजाप ब्रह्म परममात्मनः परमाव्ययम् ॥ ११ ॥

यथा भवति तथा ॥ ६ ॥ ७ ॥ दद्यादिति शेषः । भवतीति च शेषः ॥ ८ ॥ कथामिति शेषः ॥ ९ ॥ १० ॥ देवाधिदेवेशः ब्रह्मा, ब्रह्म ब्रह्मरूपं महाविष्णुम् ॥ ११ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ १२ ॥ धात्रीनगः धात्रीवृक्षः ॥ १३ ॥ पीडितः अतिभारेण नम्र इत्यर्थः । आदिरोहः आदिवृक्षः ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ ॥ २० ॥ स्कंधो मूलाच्छाखावधिभागः, "अस्त्री प्रकांडः स्कंधः स्यान्मूलाच्छाखावधिस्तरोः ॥" इत्यमरः ॥२१॥ सवितारः द्वादशसूर्याः, प्रशाखासु इंद्रादिलोकपालाः,

ततोऽस्य ब्रह्म जपतो निरगाच्छ्वसितं पुरः ॥ तद्दर्शनाऽनुरागेण नेत्राभ्यामगमज्जलम् ॥ १२ ॥ प्रेमाश्रुभरनिर्भिन्नो भूमौ बिंदुः पपात सः ॥ तस्माद्बिंदोः समुत्पन्नः स्वयं धात्रीनगो महान् ॥ १३ ॥ शाखाप्रशाखाबहुलः फलभारेण पीडितः ॥ सर्वेषामेव वृक्षाणामादिरोहः प्रकीर्तितः ॥ १४ ॥ ब्रह्मा तमसृजत्पूर्वं तत्पश्चाच्चाऽसृजत्प्रजाः ॥ देवदानवगन्धर्वयक्षराक्षसपन्नगान् ॥ १५ ॥ असृजद्भगवान्देवो मानुषांश्च तथामलान् ॥ आजग्मुस्तत्र देवास्ते यत्र धात्री हरिप्रिया ॥ १६ ॥ तां दृष्ट्वा ते महाभागाः परमं विस्मयं गताः ॥ न जानीम इमं वृक्षं चिंतयन्तो मुहुर्मुहुः ॥ १७ ॥ एवं चिंतयतां तेषां वागुवाचाऽशरीरिणी ॥ आमर्दकी नगो ह्येष प्रवरो वैष्णवो यतः ॥ १८ ॥ अस्य वै स्मरणादेव लभेद्गोदानजं फलम् ॥ दर्शनाद्द्विगुणं पुण्यं त्रिगुणं भक्षणात्तथा ॥ १९ ॥ तस्मात्सर्वप्रयत्नेन सेव्या आमर्दकी सदा ॥ सर्वपापहरा प्रोक्ता वैष्णवी पापनाशिनी ॥ २० ॥ तस्या मूले स्थितो विष्णुस्तदूर्ध्वं च पितामहः ॥ स्कन्धे च भगवान्रुद्रः संस्थितः परमेश्वरः ॥ २१ ॥ शाखासु सवितारश्च प्रशाखासु च देवताः ॥ पर्णेषु देवताः संति पुष्पेषु मरुतस्तथा ॥ २२ ॥ प्रजानां पतयः सर्वे फलेष्वेवं व्यवस्थिताः ॥ सर्वदेवमयी ह्येषा धात्री वै कथिता मया ॥ २३ ॥ अतः सा पूजनीया च सर्वकामार्थसिद्धये ॥ एकदा नारदो योगी ब्रह्मणः पुरतः स्थितः ॥ नमस्कृत्वा जगन्नाथं पप्रच्छातीव विस्मितः ॥ २४ ॥ ॥ श्रीनारद उवाच ॥ ॥ यथा प्रियं सुतुलसीकाननं सर्वदा हरेः ॥ तथा धात्रीवनं मासे कार्तिके श्रीहरिप्रियम् ॥ २५ ॥ ॥ ब्रह्मोवाच ॥ ॥ धात्रीवने हरेः पूजा धात्री छायासु भोजनम् ॥ कार्तिके मासि यः कुर्यात्तस्य पापं विनश्यति ॥ २६ ॥ तीर्थानि मुनयो देवा यज्ञाः सर्वेऽपि कार्तिके ॥ नित्यं धात्रीं समाश्रित्य तिष्ठंत्यर्के तुलास्थिते ॥ २७ ॥ यत्किंचित्कुरुते पुण्यं धात्रीछायासु मानवः ॥ तत्कोटिगुणितं भूयान्नाऽत्र कार्या विचारणा ॥ २८ ॥ अत्रैवोदाहरन्तीममितिहासं पुरातनम् ॥ ॥ २९ ॥ अयोध्यानगरे कश्चिद्वैश्यश्चासीद्द्विजोत्तम ॥ पुत्रदारविहीनश्च दैवाद्दारिद्र्यपीडितः ॥ ३० ॥

पर्णेषु त्रयस्त्रिंशत्कोटयः देवताः, पुष्पेषु मरुतः मरुद्गणाः ॥ २२ ॥ प्रजानां पतयः दक्षादयः ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भिक्षया चोदराग्निं स शमयामास नारद ॥ कदाचिद्वणिजो वैश्यो ययाचे क्षुत्प्रपीडितः ॥ ३१ ॥ भिक्षात्तचणकान्गृह्य धात्रीछायामगा
त्किल ॥ तत्र तान्भक्षयामास कार्तिके मासि नारद ॥ ३२ ॥ केचिदुर्वरितास्तेषु चणकास्तत्र नारद ॥ वैश्येन तेन दत्ता हि क्षुत्क्षामाय
द्विजातये ॥ ३३ ॥ तेन पुण्यप्रभावेन राजाऽऽसीद्धनिकः क्षितौ ॥ तस्माद्दानं प्रकर्तव्यं कार्तिके मासि सर्वदा ॥ ३४ ॥ धात्रीवने
मुनिश्रेष्ठ सर्वकामार्थसिद्धये ॥ धात्रीछायां समाश्रित्य कार्तिके च हरेः कथाम् ॥ यः शृणोति स पापेभ्यो मुच्यते द्विजसूनुवत् ॥ ३५ ॥
॥ ॥ नारद उवाच ॥ ॥ कोऽभूद्द्विजसुतो ब्रह्मन्किं पापं कृतवान्पुरा ॥ तस्य जाता कथं मुक्तिरेतद्विस्तरतो वद ॥ ३६ ॥ ॥ ब्रह्मो
वाच ॥ ॥ पुरा द्विजवरश्चासीत्कावेर्या उत्तरे तटे ॥ ३७ ॥ देवशर्मेति विख्यातो वेदवेदांगपारगः ॥ तस्य पुत्रो दुराचारस्तमाह च पिता
हितम् ॥ ३८ ॥ इदानीं कार्तिको मासो वर्तते हरिवल्लभः ॥ तत्र स्नानं च दानं च व्रतानि नियमान्कुरु ॥ ३९ ॥ तुलसीपुष्पसहितां कुरु
पूजां हरेः सुत ॥ दीपदानं च विविधं नमकारं प्रदक्षिणाम् ॥ ४० ॥ एवं पितुर्वचः श्रुत्वा पुत्रः क्रोधसमन्वितः ॥ पितरं प्राह दुष्टात्मा चलदोष्ठो
विनिंदयन् ॥ ४१ ॥ ॥ पुत्र उवाच ॥ ॥ न करिष्याम्यहं तात कार्तिके पुण्यसंग्रहम् ॥ इति पुत्रवचः श्रुत्वा सक्रोधः प्राह तं सुतम् ॥ ४२ ॥
मूषको भव दुर्बुद्धे वने वृक्षस्य कोटरे ॥ इति शापभयाद्भीतो नत्वा पितरमब्रवीत् ॥ ४३ ॥ दुर्योनेर्मम मुक्तिः स्यात्कथं तद्वद मे गुरो ॥ इति
प्रसादितो विप्रः प्राह निष्कृतिकारणम् ॥ ४४ ॥ यदोर्ज्जव्रतजं पुण्यं शृणोषि हरिवल्लभम् ॥ तदा ते भविता मुक्तिस्तत्कथाश्रवणात्सुत ॥ ४५ ॥
स पित्रा चैवमुक्तस्तु तत्क्षणान्मूषकोऽभवत् ॥ बहुवर्षसहस्राणि गह्वरे विपिने वसन् ॥ ४६ ॥ एकदा कार्तिके मासि विश्वामित्रः सशिष्यकः ॥
स्नात्वा नद्यां हरिं चार्च्य धात्रीछायां समाश्रितः ॥ ४७ ॥ कथयामास माहात्म्यं शिष्येभ्यश्चोर्ज्जसंभवम् ॥ तदा कश्चिद्दुराचारो व्याधो
ऽगान्मृगयां चरन् ॥ ४८ ॥ दृष्ट्वा ऋषिगणान्हंतुं कृतेच्छः प्राणिघातकः ॥ तेषां दर्शनमात्रेण सुबुद्धिरभवत्तदा ॥ ४९ ॥ अथोवाच द्विजान्नत्वा
भवद्भिः क्रियतेऽत्र किम् ॥ तेनैवमुक्तो विप्रेंद्रो विश्वामित्रस्तमब्रवीत् ॥ ५० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ५१ ॥ ५२ ॥ ५३ ॥ ५४ ॥ ५५ ॥ ५६ ॥ ५७ ॥ ५८ ॥ ५९ ॥ ६० ॥ ६१ ॥ ६२ ॥ ६३ ॥ ६४ ॥ ६५ ॥

॥ ॥ विश्वामित्र उवाच ॥ ॥ सर्वेषामेव मासानां कार्तिकः श्रेष्ठ उच्यते ॥ तस्मिन्यत्क्रियते कर्म वर्धते वटबीजवत् ॥ ५१ ॥ कार्तिके मासि यः कुर्यात्स्नानं दानं च पूजनम् ॥ विप्राणां भोजनं चैव तदक्षय्यफलं भवेत् ॥ ५२ ॥ व्याधप्रयुक्तमाकर्ण्य धर्मं च ऋषिणा द्विजः ॥ मौषकं देहमुत्सृज्य दिव्यदेहोऽभवत्तदा ॥ ५३ ॥ विश्वामित्रं प्रणम्याऽथ स्ववृत्तांतं निवेद्य च ॥ अनुज्ञातोऽथ ऋषिणा विमानस्थो दिवं ययौ ॥ ५४ ॥ विस्मितो गाधिपुत्रस्तु व्याधश्चैव विशेषतः ॥ व्याधोऽप्यूर्जव्रतं कृत्वा जगाम हरिमंदिरम् ॥ ५५ ॥ तस्मात्सर्वप्रयत्नेन कार्तिके केशवाऽग्रतः ॥ धात्रीछायां समाश्रित्य कथाश्रवणमाचरेत् ॥ ५६ ॥ मूषकोऽपि च दुर्योनेर्मुक्त ऊर्जकथाश्रुतेः ॥ शृणुयाच्छ्रावयेद्यो वा मुक्तिभागी न संशयः ॥ ॥ ५७ ॥ धात्रीछायां समाश्रित्य वनभोजनमाचरेत् ॥ आदौ कृत्वा तथा स्नानमुदके वनसंस्थिते ॥ कृत्वा कर्माणि नित्यानि माधवं पूजयेत्ततः ॥ ५८ ॥ धात्रीछायां समाश्रित्य हरौ भक्तिसमन्वितः ॥ शृणुयाच्च कथां दिव्यां मासमाहात्म्यशंसनीम् ॥ ५९ ॥ ततस्तु ब्राह्मणान्भक्त्या भोजयेद्ब्रह्मवित्तमान् ॥ ततो भुंजीत विप्रेंद्र स्वयं हरिमनुस्मरन् ॥ ६० ॥ एवं कृते व्रते विप्र कार्तिके हरिवल्लभे ॥ यत्पापं नश्यते पुत्र सावधान मनाः शृणु ॥ ६१ ॥ हरेर्नार्पितभोगाच्च भोजने सूर्यदर्शनात् ॥ रजस्वलावाक्छ्रवणपापाद्भोजनके तथा ॥ ६२ ॥ भोजनावसरे चान्यस्पर्शदोषस्तु यद्भवेत् ॥ निषिद्धभोजनात्तस्माद्भोजने चाऽन्नदूषणात् ॥ ६३ ॥ शुद्रस्यापि तथा त्यागात्पुण्यकाले हरिप्रिये ॥ एतैर्यत्साधितं पापं तत्सर्वं नश्यति ध्रुवम् ॥ ६४ ॥ तस्मात्सर्वप्रयत्नेन धात्र्यां भोजनमाचरेत् ॥ ६५ ॥ कार्तिके मासि वै विप्रो धात्रीमालां तु यो वहेत् ॥ तथैव तुलसीमालां तस्य पुण्यमनंतकम् ॥ ६६ ॥ धात्रीछायां समाश्रित्य दीपमालार्पणं नरः ॥ करिष्यति विशेषेण तस्य पुण्यमनंतकम् ॥ ६७ ॥ राधादामोदरौ पूज्यौ तुलस्यधो विशेषतः ॥ तुलस्यभावे कर्तव्या पूजा धात्रीतले शुभा ॥ ६८ ॥ धात्रीछायातले येन सकृद्भुक्तं तु कार्तिके ॥ दंपत्योर्भोजनं दत्तमन्नदोषात्प्रमुच्यते ॥ ६९ ॥ संपूर्णे कार्तिके यस्तु संपूज्यामलकीं शुभाम् ॥ राधादामोदरप्रीत्यै भोजयित्वा च दंपती ॥ पश्चात्स्वयं तु भुंजीत न श्रीस्तस्य क्षयं व्रजेत् ॥ ७० ॥

॥ ६६ ॥ ६७ ॥ ६८ ॥ ६९ ॥ ७० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ७१ ॥ ७२ ॥ ७३ ॥ ७४ ॥ ७५ ॥ ७६ ॥ अंते वैकुंठं यातीत्यर्थः ॥ ७७ ॥ ७८ ॥ ७९ ॥ ८० ॥ ८१ ॥ ८२ ॥ ८३ ॥ ८४ ॥ ८५ ॥ धर्मदत्तकथां

यः कश्चिद्वैष्णवो लोके धत्ते धात्रीफलं मुने ॥ प्रियो भवति देवानां मनुष्याणां च का कथा ॥ ७१ ॥ धात्रीफलविलिप्तांगो धात्रीफलसमन्वितः॥
धात्रीफलकृताहारो नरो नारायणो भवेत् ॥ ७२ ॥ धात्रीफलानि यो नित्यं वहते करसंपुटे ॥ तस्य नारायणो देवो वरमिष्टं प्रयच्छति ॥ ७३ ॥
श्रीकामः सर्वदा स्नानं कुर्यादामलकैर्नरः ॥ तुष्यत्यामलकैर्विष्णुरेकादश्यां विशेषतः ॥ ७४ ॥ नवम्यां दर्शे सप्तम्यां संक्रांतौ रविवासरे ॥ चन्द्र
सूर्योपरागे च स्नानमामलकैस्त्यजेत् ॥ ७५ ॥ धात्रीछायां समाश्रित्य कुर्य्यात्पिंडं तु यो नरः ॥ प्रयांति पितरो मुक्तिं प्रसादान्माधवस्य तु ॥
॥ ७६ ॥ मूर्ध्नि पाणौ मुखे चैव बाह्वोः कंठे तु यो नरः ॥ धत्ते धात्रीफलं वत्स धात्रीफलविभूषितः ॥७७ ॥ यावल्लुठति कण्ठस्था धात्रीमाला
नरस्य हि ॥ तावत्तस्य शरीरे तु प्रीत्या लुंठति केशवः॥ ७८ ॥ धात्रीफलं च तुलसी मृत्तिका द्वारकोद्भवा ॥ सफलं जीवितं तस्य त्रितयं यस्य
वेश्मनि ॥ ७९ ॥ यावद्दिनानि वहते धात्रीमालां कलौ नरः ॥ तावद्युगसहस्राणि वैकुण्ठे वसतिर्भवेत् ॥ ८० ॥ मालायुग्मं वहेद्यस्तु धात्रीतुल
सिसंभवम् ॥ यो नरः कंठदेशे तु कल्पकोटिं दिवं वसेत् ॥ ८१ ॥ धात्रीछायां गतो यस्तु द्वादश्यां पूजयेद्धरिम् ॥ तत्रैव भोजनं यस्तु ब्राह्मणानां
च कारयेत् ॥ ८२ ॥ स्वयं च तत्र भुंक्ते यः सूपभक्षादिकं तथा ॥ न तस्य पुनरावृत्तिः कल्पकोटिशतैरपि ॥ ८३ ॥ तुलस्याश्चैव धात्र्याश्च फलैः
पत्रैर्हरिं यजेत् ॥ ८४ ॥ तुलसी धात्रीयुक्ता हि सिक्ते सति च कार्तिके ॥ विलयं यांति पापानि ब्रह्महत्यादिकानि च ॥ ८५ ॥ धर्मदत्तो द्विजः
पूर्वं यथा मुक्तिमवाप ह ॥ ८६ ॥ ॥ नारद उवाच ॥ ॥ कार्तिके मासि सा सेव्या पूजनीया सदा नरैः ॥ चातुर्मास्ये न सेव्या सा इत्युक्तं
भवता पुरा ॥ तस्मात्सर्वमशेषेण कथयस्व ममाग्रतः ॥ ८७ ॥ ॥ ब्रह्मोवाच ॥ ॥ कार्तिके मासि विप्रर्षे शुक्ला या दशमी शुभा ॥
तद्दिनाऽऽरभ्य सा सेव्या दैवे पित्र्ये च कर्मणि ॥ दशम्यारभ्य तत्पत्रैः फलकैर्मधुसूदनम् ॥ ८८ ॥ पूजयंति नरा ये वै ते वै वैकुण्ठगामिनः ॥
समाप्ते कार्तिकव्रते वनभोजनमाचरेत् ॥ ८९ ॥ दशम्यां वाऽथ द्वादश्यां पौर्णमास्यामथाऽपि वा ॥ पंचम्यां वा महाभाग वनभोजनमाचरेत् ॥
॥ ९० ॥ सर्वोपस्करसंयुक्तो वृद्धबालैश्च संयुतः ॥ वनं प्रवेशयेद्धीमान्धात्रीवृक्षैः सुशोभितम् ॥ ९१ ॥

चाग्ने विस्तरेण वक्ष्यति ॥ ८६ ॥ ८७ ॥ ८८ ॥ अथ वनभोजनविधानमाह—समाप्त इति ॥ ८९ ॥ ९० ॥ ९१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ९२ ॥ ९३ ॥ ९४ ॥ ९५ ॥ पिप्पलच्छदसंयुतं योनिसहितम् । हे सौम्य नारद ॥ ९६ ॥ ९७ ॥ ९८ ॥ अथ धात्रीनामानि—धात्रीति ॥ ९९ ॥ १०० ॥

चूतैर्बकैस्तथाऽश्वत्थैः पिचुमंदैः कदंबकैः ॥ न्यग्रोधतितिंणीवृक्षैः समंतात्परिशोभितम् ॥ ९२ ॥ तत्र गत्वा महाप्राज्ञ पुण्याऽहं कारयेत्पुरा ॥ वास्तुपीठं तथा पूज्यं धात्रीमूले तु कारयेत् ॥ ९३ ॥ वेदिकां चतुरस्रां च हस्तमात्रायतां शुभाम् ॥ तथोपवेदिकां कृत्वा वेदिकाग्रे महामते ॥ ९४ ॥ उपवेशाय देवस्य ह्यलं कार्यं तु धातुभिः ॥ वेदिकापश्चिमे भागे कारयेत्कुण्डमंडपम् ॥ ९५ ॥ मेखलात्रयसंयुक्तं पिप्पलच्छदसंयुतम् ॥ हस्तमात्रायतं सौम्य एवं कुण्डं तु कारयेत् ॥ ९६ ॥ पश्चात्स्नात्वा ततो जप्त्वा देवपूजां समाचरेत् ॥ पश्चादग्निं समाधाय होमं कुर्याद्यथाविधि ॥ ९७ ॥ पायसाऽऽज्यगुडसूपपालाशसमिधा तथा ॥ ग्रहाणां वास्तुदेवेभ्यश्चरुं कृत्वा प्रयत्नतः ॥ ९८ ॥ धात्री शांतिस्तथा कांतिर्माया प्रकृतिरेव च ॥ विष्णुपत्नी महालक्ष्मी रमा मा कमला तथा ॥ ९९ ॥ इंदिरा लोकमाता च कल्याणी कमला तथा ॥ सावित्री च जगद्धात्री गायत्री सुधृतिस्तथा ॥ १०० ॥ अंतज्ञा विश्वरूपा च सुरूपा ह्यब्धिसंभवा ॥ प्रधानदेवताभिस्तु रक्षाहोमं समारभेत् ॥ १ ॥ संसृष्टेति च मंत्रेण ऋषभं मेति मंत्रतः ॥ अपूपं गुडसूपाभ्यां संयुतं जुहुयाद्धविः ॥ २ ॥ अष्टोत्तरशतं हुत्वा मूलमंत्रेण पायसम् ॥ ततो ग्रहादिदेवांस्तु यथासंख्येन होमयेत् ॥ ३ ॥ धात्रीहोमे महाप्राज्ञ रक्षाहोमे तु पायसम् ॥ ततः स्विष्टकृतं हुत्वा बलिदानं समाचरेत् ॥ ४ ॥ इंद्रादिलोकपालांश्च रक्षा पूज्या प्रयत्नतः ॥ धात्रीवृक्षस्य सर्वत्र वेदिकासंयुतस्य च ॥ ५ ॥ सूपेन गुडमिश्रेण बलिं पश्चान्निवेदयेत् ॥ देवि धात्रि नमस्तुभ्यं गृहाण बलिमुत्तमम् ॥ ६ ॥ मिश्रितं गुडसूपाभ्यां सर्वमंगलदायिनि ॥ पुत्रान्देहि महाप्राज्ञान्यशो देहि शुभप्रदम् ॥ ७ ॥ प्रज्ञां मेधां च सौभाग्यं विष्णुभक्तिं च देहि मे ॥ नीरोगं कुरु मे नित्यं निष्पापं कुरु सर्वदा ॥ ८ ॥ वर्चस्कं कुरु मां देवि धनवंतं तथा कुरु ॥ इति तां प्रार्थयेद्देवीं प्रादक्षिण्याद्बलिं न्यसेत् ॥ ९ ॥ बलिप्रदानकाले तु ये कुर्वंति प्रदक्षिणम् ॥ ते यांति विष्णुसालोक्यं पितृभिः सार्द्धमेव च ॥ ११० ॥ ततः पूर्णाहुतिं कृत्वा होमशेषं समापयेत् ॥ ११ ॥ धात्रीवृक्षस्य मूलस्थं मंदस्मितरमापतिम् ॥ ते यांति विष्णुसायुज्यं ये पश्यंतीह चक्षुषा ॥ १२ ॥ वैश्वदेवं ततः कृत्वा पूजयेद्वनदेवताः ॥ गंधाक्षतांस्ततो दत्त्वा विप्रेभ्यः पद्मसंभव ॥ १३ ॥

॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ बलिप्रदानमंत्रानाह—देवीत्यादिना ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ ११० ॥ अथ पूर्णाहुत्यादिकृत्यमाह—तत इति ॥ ११ ॥ १२ ॥ १३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ १४ ॥ १५ ॥ अथ वनभोजनकर्मणः फलश्रुतिमाह—कृत्वेति ॥ १६ ॥ १७ ॥ १८ ॥ अथ धात्रीस्नानफलमाह—स्नानादित्यादिना ॥ १९ ॥ २० ॥ ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ अथ धात्रीस्पर्शफलमाह—संस्पृशन्निति ॥ २७ ॥ २८ ॥ अथ धात्रीवृक्षरोपणफलमाह—यस्मिन्निति ॥ २९ ॥

ब्राह्मणान्भोजयेत्पश्चात्स्वयं भुंजीत बंधुभिः ॥ गृहं प्रवेशयेत्पश्चाद्वृद्धान्बालादिकैः सह ॥ १४ ॥ ब्रह्मचारी भवेद्रात्रौ क्षितिशायी भवे ततः ॥ ग्रामस्थैश्च मिलित्वाच स्वयं वा कारयेद्बुधः ॥ १५ ॥ सर्वपापविमुक्त्यर्थं वनभोजनमुत्तमम् ॥ कृत्वैवं सकलं कर्म कृष्णाय च समर्पयेत् ॥ १६ ॥ अश्वमेधसहस्रस्य राजसूयशतस्य च ॥ यत्फलं समवाप्नोति तत्फलं वनभोजने ॥ १७ ॥ अतो धात्री महाभाग पवित्रा पापनाशनी ॥ धात्री चैव नृणां धात्री धात्रीवत्कुरुते क्रियाम् ॥ १८ ॥ ददात्यायुः पयःपानात्स्नानाद्धर्मसंचयम् ॥ अलक्ष्मीनाशनं स्नानमात्रैर्निर्वाणमाप्नुयात् ॥ विघ्नानि नैव जायंते धात्रीस्नानेन वै नृणाम् ॥ १९ ॥ तस्मात्त्वं कुरु विप्रेंद्र धात्रीस्नानं हि यत्नतः ॥ प्रयास्यसि हरेर्धाम देवत्वं प्राप्य नारद ॥ १२० ॥ यत्रयत्र मुनिश्रेष्ठ धात्रीस्नानं समाचरेत् ॥ तीर्थे वाऽपि गृहे वाऽपि तत्रतत्र हरिः स्थितः ॥ २१ ॥ धात्रीस्नानेन विप्रर्षे यस्यास्थीनि कलेवरे ॥ प्रक्षाल्यंते मुनिश्रेष्ठ न स गर्भगृहं वसेत् ॥ २२ ॥ धात्रीजलेन विप्रेंद्र येषां केशाश्च रंजिताः ॥ ते नराः केशवं यांति नाशयित्वा कलेर्मलम् ॥ २३ ॥ धात्रीफलं महापुण्यं स्नानं पुण्यतमं स्मृतम् ॥ पुण्यात्पुण्यतरं वत्स भक्षणे मुनिसत्तम ॥ ॥ २४ ॥ न गंगा न गया काशी न वेणी न च पुष्करम् ॥ एकैव हि यथा पुण्या धात्री माधववासरे ॥ २५ ॥ धात्रीस्नानं हरेर्नाम तथैवैकादशी सुत ॥ गयाश्राद्धं तथा वत्स समानि मुनयो विदुः ॥ २६ ॥ संस्पृशन्यस्तु वै धात्रीमहन्यहनि मानवः ॥ मुच्यते पातकैः सर्वैर्मनोवाक्कायसंभवैः ॥ २७ ॥ धात्रीफलैरमावास्यासप्तमीनवमीषु च ॥ रविवारे च संक्रांतौ न स्नायान्मुनिसत्तम ॥ २८ ॥ यस्मिन्गृहे मुनिवर धात्री तिष्ठति सर्वदा ॥ तस्मिन्गृहे न गच्छंति प्रेतकूष्मांडराक्षसाः ॥ २९ ॥ धात्रीफलकृतां मालां कंठस्थां यो वहेन्नहि ॥ स वैष्णवो न विज्ञेयो विष्णोर्भक्तिपरो यदि ॥ १३० ॥ न त्याज्या तुलसीमाला धात्रीमाला विशेषतः ॥ तथा पद्माक्षमालाऽपि धर्मकामार्थमीप्सुभिः ॥ ३१ ॥

अथ धात्रीफलधारणमाहात्म्यमाह—धात्रीफलकृतामिति ॥ १३० ॥ ३१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ३२ ॥ ३३ ॥ ३४ ॥ १३५ ॥ इति श्रीकार्तिकमासमाहात्म्यटीकायां द्वादशोऽध्यायः ॥ १२ ॥ ॥ छ ॥ अथ कार्तिकमाहात्म्यं वक्तुमितिहासं प्रस्तौति—श्रिय इति ॥ एकदेति शेषः ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ कारुण्यमाह—"हा नाथ हा पितस्त्यक्त्वा गतस्त्वं क्व मया विना ॥ बालाऽहं किं

यावद्दिनानि वहते धात्रीमालां कलौ नरः ॥ तावद्युगसहस्राणि वैकुण्ठे वसतिर्भवेत् ॥ ३२ ॥ सर्वदेवमयी धात्री वासुदेवमनःप्रिया ॥ आरोपणीया सेव्या च पूजनीया सदा नरैः ॥ ३३ ॥ एतत्ते सर्वमाख्यातं धात्रीमाहात्म्यमुत्तमम् ॥ श्रोतव्यं च सदा भक्तैश्चतुर्वर्गफलप्रदम् ॥ ३४ ॥ धात्रीछायां समाश्रित्य कार्तिकेऽन्नं भुनक्ति यः ॥ अन्नसंसर्गजं पापमावर्षं तस्य नश्यति ॥ १३५ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे कार्तिकमासमाहात्म्ये धात्रीमाहात्म्यवर्णनंनाम द्वादशोऽध्यायः ॥ १२ ॥ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ श्रियः पतिमथामंत्र्य गते देवर्षिसत्तमे ॥ हर्षोत्फुल्लाऽऽनना सत्या वासुदेवमथाऽब्रवीत् ॥ १ ॥ ॥ सत्यभामोवाच ॥ ॥ धन्यास्मि कृतकृत्याऽस्मि सफलं जीवितं मम ॥ दानं व्रतं तपो वाऽपि किं नु पूर्वं कृतं मया ॥ २॥ येनाऽहं मर्त्यजा देव तवांगार्द्धहराऽभवम् ॥ भवांतरे च किंशीला का चाऽहं कस्य कन्यका ॥ तवाऽहं वल्लभा जाता तद्वदस्व ममाऽखिलम् ॥ ३ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ शृणुष्वैकमनाः कांते यथा त्वं पूर्वजन्मनि ॥ ४ ॥ पुण्यव्रतं कृतवती तत्सर्वं कथयामि ते ॥ आसीत्कृतयुगस्यांते मायापुर्यां द्विजोत्तमः ॥ ५ ॥ आत्रेयो देवशर्मेति वेदवेदांगपारगः ॥ तस्यातिवयसश्चाऽऽसीन्नाम्ना गुणवती सुता ॥ ६ ॥ अपुत्रः स स्वशिष्याय चंद्रनाम्ने ददौ सुताम् ॥ तमेव पुत्रवन्मेने स च तं पितृवद्वशी ॥ ७॥ तौ कदाचिद्वनं यातौ कुशेध्माहरणार्थिनौ ॥ निहतौ रक्षसा तौ च कृतांतसमरूपिणा ॥ ८ ॥ स्वस्वपुण्यप्रभावेन विष्णुलोकं गतावुभौ ॥ ततो गुणवती श्रुत्वा रक्षसा निहतावुभौ ॥ ९ ॥ पितृभर्तृजदुःखार्ता कारुण्यं पर्यदेवयत् ॥ सा गृहोपस्करान्सर्वान्विक्रीयाशु च कर्म तत् ॥ १० ॥ तयोश्चक्रे यथाशक्ति पारलौकीं ततः क्रियाम् ॥ तस्मिन्नेव पुरे चक्रे वासं सा मृतजीविनी ॥ ११ ॥

करोम्यद्य ह्यनाथा भवतोर्विना ॥ को नु मामास्थितां गेहे भोजनाच्छादनादिभिः ॥ अकिंचित्कुशलां स्नेहात्पालयेत्पतिदूषिताम् ॥ हतभाग्या हतसुखा हताशा हतजीविता ॥ शरणं कं प्रयाम्यद्य यो मे दुःखं प्रमार्जति ॥" इति ॥ १० ॥ ११ ॥

CC-0. In Public Domain. Digitization by eGangotri

॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥

व्रतद्वयं तया सम्यगाजन्ममरणात्कृतम् ॥ एकादशीव्रतं सम्यक्सेवनं कार्तिकस्य च ॥ १२ ॥ इत्थं गुणवती सम्यक्प्रत्यब्दं व्रतिनी ह्यभूत् ॥ कदा
चित्सरुजा साऽथ कृशांगी ज्वरपीडिता ॥ १३ ॥ स्नातुं गंगां गता कांते कथंचिच्छनकैस्तदा ॥ यावज्जलांतरगता कंपिता शीतपीडिता ॥
॥ १४ ॥ तावत्सा विह्वलाऽपश्यद्विमानं यातमंबरात् ॥ अथ सा तद्विमानस्था वैकुण्ठभुवनं ययौ ॥ १५ ॥ कार्तिकव्रतपुण्येन मत्सान्निध्यं
गताऽभवत् ॥ अथ ब्रह्मादिदेवानां यदा प्रार्थनया भुवम् ॥ १६ ॥ आगतोऽहं गणाः सर्वे यातास्तेऽपि मया सह ॥ एते हि यादवाः सर्वे मद्गणा
एव भामिनि ॥ १७ ॥ पिता ते देवशर्माऽभूत्सत्राजिदभिधो ह्ययम् ॥ यश्चंद्रनामाऽसोऽक्रूरस्त्वं सा गुणवती शुभा ॥ १८ ॥ कार्तिकव्रतपुण्येन
बहु मत्प्रीतिदायिनी ॥ मद्द्वारि यत्त्वया पूर्वं तुलसीवाटिका कृता ॥ १९ ॥ तस्मादयं कल्पवृक्षस्तवांगणगतः शुभे ॥ आजन्ममरणात्पूर्वं यत्कृतं
कार्तिकव्रतम् ॥ २० ॥ कदाचिदपि तेन त्वं मद्वियोगं न यास्यसि ॥ ॥ सत्योवाच ॥ ॥ मासानां तु कथं नाम स मासः कार्तिको
वरः ॥ २१ ॥ प्रियस्ते देवदेवेश कारणं तत्र कथ्यताम् ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ साधु पृष्टं त्वया कांते शृणुष्वैकाग्रमानसा ॥ २२ ॥
पृथोर्वैन्यस्य संवादं महर्षेर्नारदस्य च ॥ एवमेव पुरा पृष्टो नारदः पृथुनाब्रवीत् ॥ २३ ॥ ॥ नारद उवाच ॥ ॥ शंखनामाऽभवत्पूर्वमसुरः
सागरात्मजः ॥ इन्द्रादिलोकपालानामधिकाराञ्जहार ह ॥ २४ ॥ सुवर्णाद्रिगुहादुर्गसंस्थितास्त्रिदशादयः ॥ तद्वीक्षयांबभूवुस्ते तदा दैत्यो
व्यचारयत् ॥ २५ ॥ हृताधिकारास्त्रिदशा मया यद्यपि निर्जिताः ॥ लक्ष्यंते बलयुक्तास्ते करणीयं मयाऽत्र किम् ॥ २६ ॥ ज्ञातं तत्तु मया
देवा वेदमन्त्रबलान्विताः ॥ तान्हरिष्ये ततः सर्वे बलहीना भवंति वै ॥ २७ ॥ इति मत्वा ततो दैत्यो विष्णुमालक्ष्य निद्रितम् ॥ सत्यलोका
ज्जहाराऽऽशु वेदानादिस्वयंभुवः ॥ २८ ॥ नीतास्तु तेन ते वेदास्तद्भयात्ते निराक्रमन् ॥ तोयानि विविशुर्यज्ञमंत्रबीजसमन्विताः ॥ २९ ॥
तान्मार्गमाणः शंखोऽपि समुद्रांतर्गतो भ्रमन् ॥ न ददर्श तदा दैत्यः क्वचिदेकत्र संस्थितान् ॥ अथ देवैः स्तुतो विष्णुर्बोधितस्तानुवाच ह ॥
॥ ३० ॥ ॥ विष्णुरुवाच ॥ ॥ वरदोऽहं सुरगणा गीतवाद्यादिमंगलैः ॥ ३१ ॥ ऊर्जस्य शुक्लैकादश्यां भवद्भिः प्रतिबोधितः ॥ अतश्चैषा
तिथिर्मान्या साऽतीव प्रीतिदा मम ॥ ३२ ॥ वेदाः शंखहृताः सर्वे तिष्ठंत्युदकसंस्थिताः ॥ तानानयाम्यहं देवा हत्वा सागरनंदनम् ॥ ३३ ॥

॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥ ४२ ॥ ४३ ॥ ४४ ॥ ४५ ॥ ४६ ॥ ४७ ॥ ४८ ॥ ४९ ॥ ५० ॥

अद्यप्रभृति वेदास्तु मंत्रबीजसमन्विताः ॥ प्रत्यब्दं कार्तिके मासि विश्रमंत्वप्सु सर्वदा ॥ ३४ ॥ कालेऽस्मिन्ये प्रकुर्वंति प्रातःस्नानं नरोत्तमाः ॥ ते सर्वे यज्ञाऽवभृथैः सुस्नाताः स्युर्न संशयः ॥ ३५ ॥ अद्यप्रभृत्यहमपि भवामि जलमध्यगः ॥ भवन्तोऽपि मया सार्द्धं मायांतु समुनीश्वराः ॥ ३६ ॥ कार्तिकव्रतिनां चेंद्र रक्षा कार्या त्वया सदा ॥ इत्युक्त्वा भगवान्विष्णुः शफरीतुल्यरूपधृक् ॥ खात्पपात जले विंध्यवासिनः कस्य पश्यतः ॥ ३७ ॥ हत्वा शंखासुरं विष्णुर्बदरीवनमागमत् ॥ तत्राऽऽहूय ऋषीन्सर्वानिदमाज्ञापयत्प्रभुः ॥ ३८ ॥ ॥ विष्णुरुवाच ॥ ॥ जलांतरविशीर्णांस्तान्यूयं वेदान्प्रमार्गथ ॥ आनयध्वं च त्वरिताः सागरस्य जलांतरात् ॥ तावत्प्रयागं तिष्ठामि देवतागणसंयुतः ॥ ३९ ॥ ॥ नारद उवाच ॥ ॥ ततस्तैस्सर्वमुनिभिस्तपोबलसमन्वितैः ॥ ४० ॥ उद्धृताश्च सबीजास्ते वेदा यज्ञसमन्विताः ॥ तेषु यावन्मितं येन लब्धं तावद्धि तस्य तत् ॥ ४१ ॥ स स एव ऋषिर्जातस्तत्तत्प्रभृति पार्थिव ॥ अथ सर्वेऽपि संगम्य प्रयागं मुनयो ययुः ॥ ४२ ॥ विष्णवे सविधात्रे ते लब्धान्वेदान्न्यवेदयन् ॥ लब्ध्वा वेदान्समग्रांस्तु ब्रह्मा हर्षसमन्वितः ॥ ४३ ॥ अयजद्वाजिमेधेन देवर्षिगणसंयुतः ॥ यज्ञांऽते देवताः सर्वे विज्ञप्तिं चक्रुरंजसा ॥ ४४ ॥ ॥ देवा ऊचुः ॥ ॥ देवदेव जगन्नाथ विज्ञप्तिं शृणु नः प्रभो ॥ हर्षकालोऽयमस्माकं तस्मात्त्वं वरदो भव ॥ ४५ ॥ स्थानेऽस्मिन्द्रुहिणो वेदान्नष्टान्प्राप पुनस्त्वयम् ॥ यज्ञभागान्वयं प्राप्तास्त्वत्प्रसादाद्रमापते ॥ ४६ ॥ स्थानमेतद्धि नः श्रेष्ठं पृथिव्यां पुण्यवर्धनम् ॥ भुक्तिमुक्तिप्रदं चाऽस्तु प्रसादाद्भवतः सदा ॥ ४७ ॥ कालोऽप्ययं महापुण्यो ब्रह्मघ्नाऽऽदिविशुद्धिकृत् ॥ दत्ताऽक्षयकरं चाऽस्तु वरमेवं ददस्व नः ॥ ४८ ॥ ॥ विष्णुरुवाच ॥ ॥ ममाप्येतद्भूतं देवा यद्भवद्भिरुदाहृतम् ॥ तथास्तु सुलभं त्वेतद्ब्रह्मक्षेत्रमितिप्रथम् ॥ ४९ ॥ सूर्यवंशोद्भवो राजा गंगामत्रानयिष्यति ॥ सा सूर्यकन्यया चाऽत्र कालिंद्या योगमेष्यति ॥ ५० ॥ यूयं च सर्वे ब्रह्माद्या निवसंतु मया सह ॥ तीर्थराजेति विख्यातं तीर्थमेतद्भविष्यति ॥ ५१ ॥ सर्वपापानि नश्यंति तीर्थराजस्य दर्शनात् ॥ सूर्ये मकरगे प्राप्ते स्नायिनां पापनाशनः ॥ ५२ ॥ कालोऽप्येष महापुण्यफलदोऽस्तु सदा नृणाम् ॥ सालोक्यादिफलं स्नानैर्माघे मकरगे रवौ ॥ ५३ ॥ ॥ नारद उवाच ॥ ॥ एवं देवान्देवदेवस्तदुक्त्वा तत्रैवांतर्धानमागात्सवेधाः ॥ देवाः सर्वेऽप्यंशकैस्तेऽप्यतिष्ठंश्चांतर्धानं प्रापुरिंद्रादयस्ते ॥ ५४ ॥

॥ ५१ ॥ ५२ ॥ ५३ ॥ ५४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥५५॥ इति कार्तिकमासमाहात्म्यटीकायां त्रयोदशोऽध्यायः॥ १३ ॥ ॥ अथ तुलसीमाहात्म्यं वक्तुमितिहासं प्रस्तौति—यत्त्वयेति ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥

कार्तिके तुलसीमूले योऽर्चयेद्धरिमीश्वरम् ॥ भुक्त्वेह निखिलान्भोगानंते विष्णुपुरं व्रजेत् ॥ ५६ ॥ इति श्रीस्कांदे महापुराण एकाशीति साहस्र्यां संहितायां द्वितीये वैष्णवखण्डे कार्तिकमासमाहात्म्ये सत्यभामापूर्वजन्मवृत्तांतकथनपूर्वकप्रयागतीर्थप्रशंसाप्रसंगवर्णनंनाम त्रयोदशो ऽध्यायः ॥ १३ ॥ ॥ छ ॥ ॥ पृथुरुवाच ॥ ॥ यत्त्वया कथितं ब्रह्मन्व्रतमूर्जस्य विस्तरात् ॥ तत्र या तुलसीमूले विष्णोः पूजा त्वयोदिता ॥ १ ॥ तेनाऽहं प्रष्टुमिच्छामि माहात्म्यं तुलसीभवम् ॥ कथं साऽतिप्रिया तस्य देवदेवस्य शार्ङ्गिणः ॥ २ ॥ कथमेषा समुत्पन्ना कस्मिन्स्थाने च नारद ॥ एवं ब्रूहि समासेन सर्वज्ञोऽसि मतो मम ॥ ३ ॥ ॥ नारद उवाच ॥ ॥ शृणु राजन्नवहितो माहात्म्यं तुलसीभवम् ॥ सेतिहासं पुरावृत्तं तत्सर्वं कथयामि ते ॥ ४ ॥ पुरा शक्रः शिवं द्रष्टुमगात्कैलासपर्वतम् ॥ सर्वदेवैः परिवृतो ह्यप्सरोगणसेवितः ॥ ५ ॥ यावद्गतः शिव गृहं तावत्तत्र स दृष्टवान् ॥ पुरुषं भीमकर्माणं दंष्ट्राऽऽननविभीषणम् ॥ ६ ॥ स पृष्टस्तेन कस्त्वं भोः क्व गतो जगदीश्वरः ॥ एवं पुनः पुनः पृष्टः स तदा नोक्तवान्नृप ॥ ७ ॥ ततः क्रुद्धो वज्रपाणिस्तं निर्भर्त्स्य वचोऽब्रवीत् ॥ रे मया पृच्छ्यमानोऽपि नोत्तरं दत्तवानसि ॥ ८ ॥ अतस्त्वां हन्मि वज्रेण कस्ते त्राताऽस्ति दुर्मते ॥ इत्युदीर्य ततो वज्री वज्रेणाऽभ्यहनद्दृढम् ॥ ९ ॥ तेनास्य कण्ठो नीलत्वमगाद्वज्रं च भस्म ताम् ॥ ततो रुद्रः प्रजज्वाल तेजसा प्रदहन्निव ॥ १० ॥ दृष्ट्वा बृहस्पतिस्तूर्णं कृतांजलिपुटोऽभवत् ॥ इन्द्रं च दंडवद्भूमौ कृत्वा स्तोतुं प्रचक्रमे ॥ ११ ॥ ॥ बृहस्पतिरुवाच ॥ ॥ नमो देवाधिपतये त्र्यंबकाय कपर्दिने ॥ त्रिपुरघ्नाय शर्वाय नमोऽधकनिषूदिने ॥ १२ ॥ विरूपाया ऽतिरूपाय बहुरूपाय शंभवे ॥ यज्ञविध्वंसकर्त्रे च यज्ञानां फलदायिने ॥ १३ ॥ कालांतकाय कालाय कालभोगिधराय च ॥ नमो ब्रह्म शिरोहंत्रे ब्राह्मणाय नमो नमः ॥ १४ ॥ ॥ नारद उवाच ॥ ॥ एवं स्तुतस्तदा शंभुर्धिषणेन जगाद तम् ॥ संहरन्नयनज्वालां त्रिलोकीदहन क्षमाम् ॥ १५ ॥ वरं वरय भो ब्रह्मन्प्रीतः स्तुत्याऽनया तव ॥ इन्द्रस्य जीवदानेन जीवेति त्वं प्रथां व्रज ॥ १६ ॥ ॥ बृहस्पतिरुवाच ॥ ॥ यदि तुष्टोऽसि देव त्वं पाहींद्रं शरणागतम् ॥ अग्निरेष शमं यातु भालनेत्रसमुद्भवः ॥ १७ ॥

॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ जलंधरोत्पत्तिप्रसंगमाह—ईश्वर उवाचेति ॥ १८ ॥ सिंधुगंगायाः सिंधुनामनद्याः ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ कूर्चे श्मश्रुणि ॥ २५ ॥ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ इति कार्तिकमासमाहात्म्यटीकायां चतुर्दशोऽध्यायः ॥ १४ ॥ ॥ छ ॥ अथ जलंधरस्य दिग्विजयप्रसंगमाह—य

॥ ॥ ईश्वर उवाच ॥ ॥ पुनः प्रवेशमायाति भालनेत्रे कथं शिखी ॥ एनं त्यक्ष्याम्यहं दूरे यथेंद्रं नैव पीडयेत् ॥ १८ ॥ ॥ नारद उवाच ॥ ॥ इत्युक्त्वा तं करे धृत्वा प्राक्षिपल्लवणार्णवे ॥ सोऽपतत्सिंधुगंगायाः सागरस्य च संगमे ॥ १९ ॥ तावत्स बालरूपत्वमगात्तत्र रुरोद च ॥ रुदत स्तस्य शब्देन प्राकंपद्धरणी मुहुः ॥ २० ॥ स्वर्गाद्याः सत्यलोकांतास्तत्स्वनाद्बधिरीकृताः ॥ श्रुत्वा ब्रह्मा ययौ तत्र किमेतदिति विस्मितः ॥ ॥ २१ ॥ तावत्समुद्रस्योत्संगे तं बालं स ददर्श ह ॥ दृष्ट्वा ब्रह्माणमायांतं समुद्रोऽपि कृतांजलिः ॥ २२ ॥ प्रणम्य शिरसा बालं तस्योत्संगे न्यवे शयत् ॥ भो ब्रह्मन्सिंधुगंगायां जातोऽयं मम पुत्रकः ॥ जातकर्मादिसंस्कारान्कुरुष्वाऽद्य जगद्गुरो ॥ २३ ॥ ॥ नारद उवाच ॥ ॥ इत्थं वदति पाथोधौ स बालः सागरात्मजः ॥ २४ ॥ ब्रह्माणमग्रहीत्कूर्चे विधुन्वंस्तं मुहुर्मुहुः ॥ धुन्वतस्तस्य कूर्चे तु नेत्राभ्यामगमज्जलम् ॥ कथंचिन्मुक्त कूर्चोऽथ ब्रह्मा प्रोवाच सागरम् ॥ २५ ॥ ॥ ब्रह्मोवाच ॥ ॥ नेत्राभ्यां विधृतं यस्मादनेनैतज्जलं मम ॥ तस्माज्जलंधर इति ख्यातो नाम्ना भवि ष्यति ॥ २६ ॥ अनेनैवैष तरुणः सर्वशास्त्रास्त्रपारगः ॥ अवध्यः सर्वभूतानां विना रुद्रं भविष्यति ॥ २७ ॥ यत एष समुद्भूतस्तत्रैवांतं गमि ष्यति ॥ २८ ॥ ॥ नारद उवाच ॥ ॥ इत्युक्त्वा शुक्रमाहूय राज्ये तं चाभ्यषेचयत् ॥ आमंत्र्य सरितां नाथं ब्रह्मांतर्धानमागमत् ॥ २९ ॥ अथ तद्दर्शनोत्फुल्लनयनः सागरस्तदा ॥ कालनेमिसुतां वृंदां तद्भार्यार्थमयाचत ॥ ३० ॥ ते कालनेमिप्रमुखास्ततोऽसुरास्तस्मै सुतां तां प्रददुः प्रहर्षिताः ॥ स चाऽपि तां प्राप्य सुहृद्वरां वशां शशास गां शुक्रसहायवान्बली ॥ ३१ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे कार्तिकमासमाहात्म्ये जलंधरोत्पत्तिवर्णनंनाम चतुर्दशोऽध्यायः ॥ १४ ॥ ॥ छ ॥ ॥ नारद उवाच ॥ ॥ ये देवै र्निर्जिताः पूर्वं दैत्याः पातालसंस्थिताः ॥ तेऽपि भूमंडलं याता निर्भयास्तमुपाश्रिताः ॥ १ ॥ कदाचिच्छिन्नशिरसं राहुं दृष्ट्वा स दैत्यराट् ॥ पप्रच्छ भार्गवं तत्र तच्छिरश्छेदकारणम् ॥ २ ॥ स शशंस समुद्रस्य मथनं देवकारितम् ॥ रत्नापहरणं चैव दैत्यानां च पराभवम् ॥ ३ ॥

इति ॥ १ ॥ २ ॥ ३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ४ ॥ न खर्वः अखर्वः मौलिर्यस्य उच्चमुकुट इत्यर्थः । यद्वा अखर्वमौलिः अत्युच्चदेहवानित्यर्थः, "खर्वो ह्रस्वश्च वामनः" इत्यमरः ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥

स श्रुत्वा क्रोधरक्ताक्षः स्वपितुर्मथनं तदा ॥ दूतं संप्रेषयामास घस्मरं शक्रसन्निधौ ॥४॥ दूतस्त्रिविष्टपं गत्वा सुधर्मां प्राविशद्वराम् ॥ जगादाखर्व मौलिस्तु देवेंद्रं वाक्यमद्भुतम् ॥ ५ ॥ ॥ घस्मर उवाच ॥ ॥ जलंधरोऽब्धितनयः सर्वदैत्यजनेश्वरः ॥ दूतोऽहं प्रेषितस्तेन स यदाह शृणुष्व तत् ॥ ६ ॥ कस्मात्त्वया मम पिता मथितः सागरोऽद्रिणा ॥ नीतानि सर्वरत्नानि तानि शीघ्रं प्रयच्छ मे ॥ ७ ॥ इति दूतवचः श्रुत्वा विस्मि तस्त्रिदशाधिपः॥ उवाच घस्मरं रौद्रं भयरोषसमन्वितः ॥ ८ ॥ ॥ इंद्र उवाच ॥ ॥ शृणु दूत मया पूर्वं मथितः सागरो यथा॥ अद्रयो मद्भया त्रस्ताः स्वकुक्षिस्थाः कृतास्तथा ॥९॥ अन्येऽपि मद्विषस्तेन रक्षिता दितिजाः पुरा ॥ तस्माद्यत्तत्प्रजातं तु मयाऽप्यपहृतं किल ॥१०॥ शंखो ऽप्येवं पुरा देवानद्विषत्सागरात्मजः ॥ ममाऽनुजेन निहतः प्रविष्टः सागरोदरम् ॥ ११ ॥ तद्गच्छ कथयस्वाऽस्य सर्वं मथनकारणम् ॥ ॥ नारद उवाच ॥ ॥ इत्थं विसर्जितो दूतस्तदेंद्रेणाऽगमद्ध्रुवम् ॥१२॥ तदिदं वचनं सर्वं दैत्यायाकथयत्तदा ॥ तन्निशम्य तदा दैत्यो रोषात्प्रस्फुरिताऽधरः ॥ १३ ॥ दैत्यसेनासमायुक्तो ययौ योद्धुं त्रिविष्टपम् ॥ ततो युद्धे महाञ्जातो देवदानवसंक्षयः ॥ १४ ॥ तत्र युद्धे मृतान्दैत्यान्भार्गवस्तूदतिष्ठपत् ॥ विद्यया मृतजीविन्या मंत्रितैस्तोयबिंदुभिः ॥ १५ ॥ देवानपि तथा युद्धे तत्राऽजीवयदंगिराः ॥ दिव्यौषधीः समानीय द्रोणाद्रेः स पुनःपुनः ॥१६॥ दृष्ट्वा देवांस्तथा युद्धे पुनरेव समुत्थितान् ॥ जलंधरः क्रोधवशो भार्गवं वाक्यमब्रवीत् ॥१७॥ ॥ जलंधर उवाच ॥ ॥ मया युद्धे हता देवा उत्तिष्ठंति कथं पुनः ॥ तव संजीविनी विद्या नवाऽन्यत्रेति विश्रुतम् ॥१८॥ ॥ शुक्र उवाच ॥ ॥ दिव्यौषधीः समानीय द्रोणाद्रेरंगिराः सुरान्॥ जीवयत्येव तच्छीघ्रं द्रोणाद्रिं त्वमपाहर ॥ १९ ॥ ॥ नारद उवाच ॥ ॥ इत्युक्तः स तु दैत्येंद्रो नीत्वा द्रोणाचलं तदा ॥ प्राक्षिपत्सागरे तूर्णं पुनरागान्महाहवम् ॥ २० ॥ अथ देवान्हतान्दृष्ट्वा द्रोणाद्रिमगमद्गुरुः ॥ तावत्तत्र गिरींद्रं तु न ददर्श सुरार्चितः ॥ २१ ॥ ज्ञात्वा दैत्यहृतं द्रोणं धिषणो भयविह्वलः ॥ आगत्य दूराद्व्याजह्रे श्वासाऽऽकुलितविग्रहः ॥ २२ ॥ पलायध्वं हवा देवा नाऽयं जेतुं क्षमो यतः ॥ रुद्रांशसंभवो ह्येष स्मरध्वं शक्रचेष्टितम् ॥ २३ ॥

॥ १० ॥ ममानुजेन विष्णुना ॥११॥१२॥१३॥१४॥१५॥१६॥१७॥१८॥१९॥२०॥२१॥ २२ ॥ शक्रचेष्टितं कैलासे वज्रेण भीमपुरुषहननादि ॥ २३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ इति कार्तिकमासमाहात्म्यटीकायां पंचदशोऽध्यायः ॥ १५ ॥ ॥ छ ॥ नारद उवाच ॥ १ ॥ २ ॥ भुजंगारियानाय गरुडवाहनाय,

श्रुत्वा तद्वचनं देवा भयविह्वलितास्तदा ॥ दैत्येन वध्यमानास्ते पलायंते दिशो दश ॥ २४ ॥ देवान्विद्रावितान्दृष्ट्वा दैत्यैः सागरनंदनः ॥ शंखभेरीजयरवैः प्रविवेशाऽमरावतीम् ॥ २५ ॥ प्रविष्टे नगरीं दैत्ये देवाः शक्रपुरोगमाः ॥ सुवर्णाद्रिगुहां प्राप्ता न्यवसन्दैत्यतापिताः॥ २६ ॥ ततश्च सर्वेष्वसुरोऽधिकारेष्विंद्रादिकानां विनिवेशयत्तदा ॥ शुंभादिकान्दैत्यवरान्पृथक्पृथक्स्वयं सुवर्णाद्रिगुहामगात्पुनः ॥ २७ ॥ इति श्री स्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे कार्तिकमासमाहात्म्ये जलंधरविजयप्राप्तिर्नाम पञ्चदशोऽध्यायः ॥१५॥ ॥ ॥ नारद उवाच ॥ ॥ पुनर्दैत्यं समायांतं दृष्ट्वा देवाः सवासवाः ॥ भयप्रकंपिताः सर्वे विष्णुं स्तोतुं प्रचक्रमुः ॥ १ ॥ नमो मत्स्यकूर्मादिनानास्वरूपैः सदा भक्तकार्योद्यतायाऽर्तिहंत्रे ॥ विधात्रादिसर्गस्थितिध्वंसकर्त्रे गदाशंखपद्मारिहस्ताय तेऽस्तु ॥ २ ॥ रमा वल्लभायाऽसुराणां निहंत्रे भुजंगारियानाय पीतांबराय ॥ मखादिक्रियापाककर्त्रे विकर्त्रे शरण्याय तस्मै नताः स्मो नताः स्मः ॥ ३ ॥ नमो दैत्यसंतापितामर्त्यदुःखाचलध्वंसदंभोलये विष्णवे ते ॥ भुजंगेशतल्पेशयायार्कचंद्रद्विनेत्राय तस्मै नताः स्मो नताः स्मः ॥ ४ ॥ ॥ ॥ नारद उवाच ॥ ॥ संकष्टनाशनंनाम स्तोत्रमेतत्पठेन्नरः ॥ स कदाचिन्न संकष्टैः पीड्यते कृपया हरेः ॥ ५ ॥ इति देवाः स्तुतिं याव त्कुर्वंति दनुजद्विषः ॥ तावत्सुराणामापत्तिर्विज्ञाता विष्णुना तदा ॥ ६ ॥ सहसोत्थाय दैत्यारिः सक्रोधः खिन्नमानसः ॥ आरूढो गरुडं वेगा ल्लक्ष्मीं वचनमब्रवीत् ॥ ७ ॥ ॥ श्रीभगवानुवाच ॥ ॥ जलंधरेण ते भ्रात्रा देवानां कदनं कृतम् ॥ तैराहूतो गमिष्यामि युद्धायाद्य त्वरा न्वितः ॥ ८ ॥ ॥ श्रीरुवाच ॥ ॥ अहं ते वल्लभा नाथ भक्त्या च यदि सर्वदा ॥ तत्कथं ते मम भ्राता युद्धे वध्यः कृपानिधे ॥ ९ ॥ श्री भगवानुवाच ॥ ॥ रुद्रांशसंभवत्वाच्च ब्रह्मणो वचनादपि ॥ प्रीत्या च तव नैवायं मम वध्यो जलंधरः ॥ १० ॥ ॥ नारद उवाच ॥ ॥ इत्युक्त्वा गरुडारूढः शंखचक्रगदासिभृत् ॥ विष्णुर्वेगाद्ययौ योद्धुं यत्र देवाः स्तुवंति ते ॥ ११ ॥

॥ ३ ॥ दैत्येन संतापिता ये अमर्त्याः देवास्तेषां दुःखमेवाऽचलः पर्वतः तस्य ध्वंसने छेदने दंभोलिर्वज्रं तस्मै ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥

CC-0. In Public Domain. Digitization by eGangotri

अरुणानुजो गरुडः ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ भावुक भगिनीभर्तः ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ शेषादीन्

अथाऽरुणानुजात्युग्रपक्षवातप्रपीडिताः ॥ वात्याविमर्दिता दैत्या बभ्रमुः खे यथा घनाः ॥ १२ ॥ ततो जलंधरो दृष्ट्वा दैत्यान्वात्याप्रपीडितान् ॥ उद्वृत्तनयनः क्रोधात्ततो विष्णुं समभ्ययात् ॥ १३ ॥ ततः समभवद्युद्धं विष्णुदैत्येंद्रयोर्महत् ॥ आकाशं कुर्वतोर्बाणैस्तदा निरवकाशवत् ॥१४॥ विष्णुर्दैत्यस्य बाणौघैर्ध्वजं छत्रं धनुर्हयान् ॥ चिच्छेद तं च हृदये बाणेनैकेन ताडयत् ॥ १५ ॥ ततो दैत्यः समुत्पत्य गदापाणिस्त्वरान्वितः ॥ आहत्य गरुडं मूर्ध्नि पातयामास भूतले ॥ १६ ॥ विष्णुर्गदां स्वखड्गेन चिच्छेद प्रहसन्निव ॥ तावत्स हृदये विष्णुं जघान दृढमुष्टिना ॥ १७ ॥ ततस्तौ बाहुयुद्धेन युयुधाते महाबलौ ॥ बाहुभिर्मुष्टिभिश्चैव जानुभिर्नादयन्महीम् ॥ १८ ॥ एवं तौ सुचिरं युद्धं कृत्वा विष्णुः प्रतापवान् ॥ उवाच दैत्यराजानं मेघगंभीरनिस्वनः ॥ १९ ॥ ॥ विष्णुरुवाच ॥ ॥ वरं वरय दैत्येंद्र प्रीतोऽस्मि तव विक्रमात् ॥ अदेयमपि ते दद्मि यत्ते मनसि वर्तते ॥ २० ॥ ॥ ॥ जलंधर उवाच ॥ ॥ यदि भावुक तुष्टोऽसि वरमेनं ददस्व मे ॥ मद्भगिन्या सहाऽद्य त्वं मद्गृहे सगणो वस ॥ २१ ॥ ॥ नारद उवाच ॥ ॥ तथेत्युक्त्वा स भगवान्सर्वदेवगणैः सह ॥ तदा जलंधरपुरमगमद्रमया सह ॥ २२ ॥ जलंधरस्तु देवाना मधिकारेषु दानवान् ॥ स्थापयित्वा महाबाहुः पुनरागान्महीतलम् ॥ २३ ॥ देवगंधर्वसिद्धेषु यत्किंचिद्रत्नसंयुतम् ॥ तदात्मवशगं कृत्वाऽति ष्ठत्सागरनंदनः ॥ २४ ॥ पातालभुवने दैत्यं निशुंभं स महाबलम् ॥ स्थापयित्वा स शेषादीनानयद्भूतलं बली ॥ २५ ॥ देवगंधर्वसिद्धाऽऽद्या न्सर्पराक्षसमानुषान् ॥ स्वपुरे नागरान्कृत्वा शशास भुवनत्रयम् ॥ २६ ॥ एवं जलंधरः कृत्वा देवान्स्ववशवर्तिनः ॥ धर्मेण पालयामास प्रजाः पुत्रानिवौरसान् ॥२७॥ न कश्चिद्व्याधितो नैव दुःखी नैव कृशस्तथा ॥ न दीनो दृश्यते तस्मिन्धर्माद्राज्यं प्रशासति ॥२८॥ एवं महीं शासति दानवेंद्रे धर्मेण सम्यक्च दिदृक्षयाऽहम् ॥ कदाचिदागामथ तस्य लक्ष्मीं विलोकितुं श्रीरमणं च सेवितुम् ॥ २९ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे कार्तिकमासमाहात्म्ये जलंधरसभायां नारदागमनंनाम षोडशोऽध्यायः ॥ १६ ॥ छ ॥ ॥ ॥ नारद उवाच ॥ ॥ स मां प्रोवाच विधिवत्संपूज्यातीव भक्तिमान् ॥ संप्रहस्य तदा वाक्यं स्नेहपूर्वं च वै नृप ॥ १ ॥

संकर्षणादीन् ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ इति कार्तिकमासमाहात्म्यटीकायां षोडशोऽध्यायः ॥ १६ ॥ ॥ छ ॥ नारद उवाच—स मामिति ॥१॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ अथ कीर्तिमुखोत्पत्तिप्रसंग

कुत आगम्यते ब्रह्मन्किंचिद्दृष्टं त्वया प्रभो ॥ यदर्थमिह चाऽऽयातस्तदाऽऽज्ञापय मां मुने ॥२॥ ॥ नारद उवाच ॥ ॥ गतः कैलासशिखरं दैत्यें
द्राहं यदृच्छया ॥ तत्रोमया समासीनं दृष्टवानस्मि शंकरम्॥३॥ योजनायुतविस्तीर्णे कल्पवृक्षमहावने ॥ कामधेनुशताकीर्णे चिंतामणिसुदीपिते
॥४॥ तद्दृष्ट्वा महदाश्चर्यं विस्मयो मेऽभवत्तदा ॥ क्काऽपीदृशी भवेदृद्धिस्त्रैलोक्ये वा न वेति च ॥५॥ तदा तवाऽपि दैत्येंद्र समृद्धिः संस्मृता मया ॥
तद्विलोकनकामोऽस्मि त्वत्सान्निध्यमिहाऽऽगतः ॥ ६ ॥ त्वत्समृद्धिमिमां पश्यन्स्त्रीरत्नरहितां ध्रुवम् ॥ तर्कयामि शिवादन्यस्त्रिलोक्यां न समृ
द्धिमान् ॥ ७ ॥ अप्सरोनागकन्याद्या यद्यपि त्वद्वशे स्थिताः ॥ तथाऽपि ता न पार्वत्या रूपेण सदृशा ध्रुवम् ॥ ८ ॥ यस्या लावण्यजलधौ
निमग्नश्चतुराननः ॥ स्वधैर्यममुचत्पूर्वं तया काऽन्योपमीयते ॥ ९ ॥ वीतरागोऽपि हि यथा मदनारिः स्वलीलया ॥ सौंदर्यगहनेऽभ्रामि
शफरीरूपया पुरा ॥ १० ॥ यस्याः पुनः पुनः पश्यन्रूपं धाताऽपि सर्जने ॥ ससर्जाऽप्सरसस्तासां तत्समैकाऽपि नाभवत् ॥ ११ ॥ अतः
स्त्रीरत्नसंभोक्तुः समृद्धिस्तस्य सा वरा ॥ तथा न तव दैत्येंद्र सर्वरत्नाऽधिपस्य च ॥ १२ ॥ एवमुक्त्वा तमामंत्र्य गते सति स दैत्यराट् ॥ तद्रूप
श्रवणादासीदनंगज्वरपीडितः ॥ १३ ॥ अथ संप्रेषयामास स दूतं सिंहिकासुतम् ॥ त्र्यंबकायाऽपि च तदा विष्णुमायाविमोहितः ॥ १४ ॥
कैलासमगमद्राहुः कुर्वञ्छुक्लेंदुवर्चसम् ॥ कार्ष्ण्येन कृष्णपक्षेन्दुवर्चसं स्वांगजेन तम् ॥ १५ ॥ निवेदितस्तदेशाय नंदिना प्रविवेश सः ॥
त्र्यंबकभ्रूलतासंज्ञाप्रेरितो वाक्यमब्रवीत् ॥ १६ ॥ ॥ राहुरुवाच ॥ ॥ देवपन्नगसेव्यस्य त्रैलोक्याधिपतेः प्रभोः ॥ सर्वरत्नेश्वरस्य त्वमाज्ञां
शृणु वृषध्वज ॥ १७ ॥ श्मशानवासिनो नित्यमस्थिभारवहस्य च ॥ दिगंबरस्य ते भार्या कथं हैमवती शुभा ॥ १८ ॥ अहं रत्नाधिनाथोऽ
स्मि सा च स्त्रीरत्नसंज्ञिका ॥ तस्मान्ममैव सा योग्या नैव भिक्षाशिनस्तव ॥ १९ ॥ ॥ नारद उवाच ॥ ॥ वदत्येवं तदा राहौ भ्रूमध्या
च्छूलपाणिनः ॥ अभवत्पुरुषो रौद्रस्तीव्राशनिसमस्वनः ॥ २० ॥ सिंहास्यः प्रललज्जिह्वः स ज्वलन्नयनो महान् ॥ ऊर्ध्वकेशः शुष्कतनुर्नृ
सिंह इव चाऽपरः ॥ २१ ॥ स तं खादितुमायांतं दृष्ट्वा राहुर्भयातुरः ॥ अधावत स वेगेन बहिः स च दधार तम् ॥ २२ ॥

माह—वदतीति ॥ २० ॥ २१ ॥ २२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ बर्बरे स्थले भारंगौषध्युत्पत्तिमूलप्रदेशस्थले, "अंगारवल्लीबालेयशाकबर्बरवर्द्धकाः"

स च राहुर्महाबाहो मेघगम्भीरया गिरा ॥ उवाच देवदेव त्वं पाहि मां शरणागतम् ॥२३॥ ब्राह्मणं मां महादेव खादितुं समुपागतः ॥ महादेवो वचः श्रुत्वा ब्राह्मणस्य तदाऽब्रवीत् ॥२४॥ नैवाऽसौ वध्यतामेति दूतोऽयं परवान्यतः ॥ मुंचेति पुरुषः श्रुत्वा राहुं तत्याज्य सोंऽबरे ॥२५॥ राहुं त्यक्त्वाऽथ पुरुषस्तदा रुद्रं व्यजिज्ञपत् ॥ ॥ पुरुष उवाच ॥ ॥ क्षुधा मां बाधतेऽत्यंतं क्षुत्क्षामश्चाऽस्मि सर्वथा ॥ २६ ॥ किं भक्षयामि देवेश तदाज्ञापय मां प्रभो ॥ ॥ ईश्वर उवाच ॥ ॥ भक्षयस्वात्मनः शीघ्रं मांसं त्वं हस्तपादयोः ॥ २७ ॥ ॥ नारद उवाच ॥ ॥ स शिवेनैव माज्ञप्तश्चखाद पुरुषः स्वकम् ॥ हस्तपादोद्भवं मांसं शिरःशेषो यथाऽभवत् ॥ २८ ॥ दृष्ट्वा शिरोऽवशेषं तं सुप्रसन्नस्तदा शिवः ॥ उवाच भीम कर्माणं पुरुषं जातविस्मयः ॥ २९ ॥ ॥ ईश्वर उवाच ॥ ॥ त्वं कीर्तिमुखसंज्ञो हि भव मद्वारिगः सदा ॥ त्वदर्चां ये न कुर्वंति नैव ते मे प्रियंकराः ॥ ३० ॥ ॥ नारद उवाच ॥ ॥ तदाप्रभृति देवस्य द्वारि कीर्तिमुखः स्थितः ॥ नार्चयन्तीह ये पूर्वं तेषामर्चा वृथा भवेत् ॥३१॥ राहुर्विमुक्तो यस्तेन सोऽपि तद्बर्बरे स्थले ॥ अतः स बर्बरोद्भूत इति भूमौ प्रथां गतः ॥ ३२ ॥ ततः स राहुः पुनरेव जातमात्मानमस्मिन्निति मन्यमानः ॥ समेत्य सर्वं कथयांबभूव जलंधरायैव विचेष्टितं तत् ॥ ३३ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे कार्तिकमासमाहात्म्ये जलंधरोपाख्याने दूतवाक्यकथनंनाम सप्तदशोऽध्यायः ॥ १७ ॥ ॥ छ ॥ ॥ नारद उवाच ॥ ॥ जलंधरस्तु तच्छ्रुत्वा कोपाकुलितविग्रहः ॥ निर्जगामाऽऽशु दैत्यानां कोटिभिः परिवारितः ॥ १ ॥ गच्छतोऽस्याऽग्रतः शुक्रो राहुर्दृष्टिपथेऽभवत् ॥ मुकुटश्चाऽपतद्भूमौ वेगात्प्रस्खलितस्तदा ॥ २ ॥ दैत्यसैन्याऽऽवृतैस्तस्य विमानानां शतैस्तदा ॥ व्यराजत नभःपूर्णं प्रावृषीव यथा घनैः ॥ ॥ ३ ॥ तस्योद्योगं तदा दृष्ट्वा देवाः शक्रपुरोगमाः ॥ अलक्षितास्तदा जग्मुः शूलिनं तं व्यजिज्ञपुः ॥ ४ ॥ ॥ देवा ऊचुः ॥ ॥ न जानासि कथं स्वामिन्देवापत्तिमिमां विभो ॥ तदस्मद्रक्षणार्थाय जहि सागरनंदनम् ॥ ५ ॥

इत्यमरः ॥ ३२ ॥ ३३ ॥ इति कार्तिकमासमाहात्म्यटीकायां सप्तदशोऽध्यायः ॥ १७ ॥ ॥ छ ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ चक्रनिर्मितावशेषेण ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ अद्रेरधः संनिहिता भूमिरुपत्यकेत्युच्यते ॥ "उपत्यकाद्रेरासन्ना भूमि

॥ ॥ नारद उवाच ॥ ॥ इति देववचः श्रुत्वा प्रहस्य वृषभध्वजः ॥ महाविष्णुं समाहूय वचनं चेदमब्रवीत् ॥६॥ ॥ ईश्वर उवाच ॥ ॥ जलंधरः कथं विष्णो न हतः संगरे त्वया ॥ तद्वहं चाऽपि यातोऽसि त्यक्त्वा वैकुंठमात्मनः ॥ ७ ॥ ॥ विष्णुरुवाच ॥ ॥ तवांशसंभवत्वाच्च भ्रातृत्वाच्च तथा श्रियः ॥ न मया निहतः संख्ये त्वमेनं जहि दानवम् ॥ ८ ॥ ॥ ईश्वर उवाच ॥ नायमेभिर्महातेजाः शस्त्रास्त्रैर्वध्यते मया ॥ देवैः सह स्वतेजोंशं शस्त्रार्थं दीयतां मम ॥ ९ ॥ ॥ नारद उवाच ॥ ॥ अथ विष्णुमुखा देवाः स्वतेजांसि ददुस्तदा ॥ तान्यैक्यमागतानीशो दृष्ट्वा स्वं चामुचन्महः ॥ १० ॥ तेनाकरोन्महादेवो महसा शस्त्रमुत्तमम् ॥ चक्रं सुदर्शनंनाम ज्वालामालातिभीषणम् ॥ ११ ॥ ततः शेषेण च तदा वज्रं च कृतवान्हरिः ॥ तावज्जलंधरो दृष्टः कैलासतलभूमिषु ॥ १२ ॥ हस्त्यश्वरथपत्तीनां कोटिभिः परिवारितः ॥ तं दृष्ट्वा लक्षिता जग्मुर्देवाः सर्वे यथागताः ॥१३॥ गणाश्च समसज्जंत युद्धायाऽतित्वरान्विताः ॥ नन्दीभवक्रसेनानीमुखाः सर्वे शिवाज्ञया ॥ १४ ॥ अवतेरुर्गणा वेगात्कैलासाद्युद्धदुर्मदाः ॥ ततः समभवद्युद्धं कैलासोपत्यकाभुवि ॥ १५ ॥ प्रमथाधिपदैत्यानां घोरशस्त्रास्त्रसंकुलम् ॥ भेरीमृदंगशंखौघनिःस्वनैर्वीरहर्षणैः ॥ १६ ॥ गजाश्वरथशब्दैश्च नादिता भूर्व्यकंपत ॥ शक्तितोमरबाणौघमुसलप्रासपट्टिशैः ॥१७॥ व्यराजत नभः पूर्णमुल्काभिरिव संवृतम् ॥ निहतैरथनागाश्वपत्तिभिर्भूर्व्यराजत ॥ १८ ॥ वज्राहताचलशिरःशकलैरिव संवृता ॥ प्रमथाहतदैत्यौघैर्दैत्याहतगणैस्तथा ॥ १९ ॥ वसासृङ्मांसपंकाढ्या भूरगम्याऽभवत्तदा ॥ प्रमथाहतदैत्यौघान्भार्गवः समजीवयत् ॥२०॥ युद्धे पुनः पुनस्तत्र मृतसंजीविनीबलात् ॥ तं दृष्ट्वा व्याकुलीभूता गणाः सर्वे भयान्विताः ॥ शशंसुर्देवदेवाय तत्सर्वं शुक्रचेष्टितम् ॥ २१ ॥ अथ रुद्रमुखात्कृत्या बभूवाऽतीवभीषणा ॥ तालजंघा दरीवक्त्रा स्तनापीडितभूरुहा ॥२२॥ सा युद्धभूमिमासाद्य भक्षयंती महासुरान् ॥ भार्गवं स्वभगे धृत्वा जगामांतर्हिता नभः ॥२३॥ विधृतं भार्गवं दृष्ट्वा दैत्यसैन्यं गणास्तदा ॥ अम्लानवदना हर्षान्निजघ्नुर्युद्धदुर्मदाः ॥ २४ ॥ अथाभज्यत दैत्यानां सेना गणभयार्दिता ॥ वायुवेगेनाहतेव प्रकीर्णा तृणसंततिः ॥ २५ ॥ भग्नां गणभयात्सेनां दृष्ट्वामर्षयुता ययुः ॥ निशुंभशुंभौ सेनान्यौ कालनेमिश्च वीर्यवान् ॥ २६ ॥

रूर्ध्वमधित्यका ॥" इत्यमरः ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥

CC-0. In Public Domain. Digitization by eGangotri

॥ २७ ॥ व्रजाः समूहाः ॥ २८ ॥ २९ ॥ ३० ॥ शैलादिर्नंदिकेश्वरः ॥ ३१ ॥ इति श्रीकार्तिकमासमाहात्म्य टीकायामष्टादशोऽध्यायः ॥ १८ ॥ छ ॥ १ ॥ २ ॥

त्रयस्ते वारयामासुर्गणसेनां महाबलाः ॥ मुञ्चंतः शरवर्षाणि प्रावृषीव बलाहकाः ॥ २७ ॥ ततो दैत्यशरौघास्ते शलभानामिव व्रजाः ॥ रुरुधुः खं दिशः सर्वा गणसेनामकंपयन् ॥ २८ ॥ गणाः शरशतैर्भिन्ना रुधिरासारवर्षिणः ॥ वसंते किंशुकाभासा न प्राज्ञायत किंचन ॥ ॥ २९ ॥ पतिताः पात्यमानाश्च भिन्नाश्छिन्नास्तदा गणाः ॥ त्यक्त्वा संग्रामभूमिं ते सर्वेपि विमुखाऽभवन् ॥ ३० ॥ ततः प्रभग्नं स्वबलं विलोक्य शैलादिलंबोदरकार्तिकेयाः ॥ त्वरान्विता दैत्यवरान्प्रसह्य निवारयामासुरमर्षिणस्ते ॥ ३१ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे कार्तिकमासमाहात्म्ये जलंधरोपाख्याने रुद्रसेनापराभवोनामाऽष्टादशोऽध्यायः ॥ १८ ॥ ॥ छ ॥

॥ ॥ नारद उवाच ॥ ॥ ते गणाधिपतीन्दृष्ट्वा नंदीभमुखषण्मुखान् ॥ अमर्षादभ्यधावंत द्वंद्वयुद्धाय दानवाः ॥ १ ॥ नंदिनं कालनेमिश्च शुम्भो लंबोदरं तथा ॥ निशुम्भः षण्मुखं वेगादभ्यधावत दंशितः ॥ २ ॥ निशुम्भः कार्तिकेयस्य मयूरं पंचभिः शरैः ॥ हृदि विव्याध वेगेन मूर्च्छितः स पपात च ॥ ३ ॥ ततः शक्तिधरः शक्तिं यावज्जग्राह रोषितः ॥ तावन्निशुंभो वेगेन स्वशक्त्या तमपातयत् ॥ ४ ॥ नंदीश्वरः शरव्रातैः कालनेमिमवध्यत ॥ सप्तभिश्च हयान्केतुं त्रिभिः सारथिमच्छिनत् ॥ ५ ॥ कालनेमिस्तु संक्रुद्धो धनुश्चिच्छेद नंदिनः ॥ तदपास्य स शूलेन तं वक्षस्यहनद्बली ॥ ६ ॥ स शूलभिन्नहृदयो हताश्वो हतसारथिः ॥ अद्रेः शिखरमामुच्य शैलादिं सोऽप्यपातयत् ॥ ७ ॥ अथ शुम्भो गणेशश्च रथमूषकवाहनौ ॥ युध्यमानौ शरव्रातैः परस्परमविध्यताम् ॥ ८ ॥ गणेशस्तु तदा शुम्भं हृदि विव्याध पत्रिणा ॥ सारथिं च त्रिभिर्बाणैः पातयामास भूतले ॥ ९ ॥ ततोऽतिक्रुद्धः शुम्भोऽपि बाणषष्ट्या गणाधिपम् ॥ मूषकं च त्रिभिर्विद्ध्वा ननाद जलदस्वनः ॥ १० ॥ मूषकः शरभिन्नांगश्चचाल दृढवेदनः ॥ लंबोदरश्च पतितः पदातिरभवन्नृप ॥ ११ ॥ ततो लंबोदरः शुम्भं हत्वा परशुना हृदि ॥ अपातयत्तथा भूमौ मूषकं चारुहत्पुनः ॥ १२ ॥ कालनेमिर्निशुंभश्चाऽप्युभौ लंबोदरं शरैः ॥ युगपज्जघ्नतुः क्रोधात्तोत्रैरिव महाद्विपम् ॥ १३ ॥

॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ शैलादिं नंदिनम् ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥

तं पीड्यमानमालोक्य वीरभद्रो महाबलः ॥ अभ्यधावत वेगेन भूतकोटियुतस्तदा ॥ १४ ॥ कूष्मांडभैरवाश्चाऽपि वेताला योगिनीगणाः ॥ पिशाचयोगिनीसंघा गणाश्चाऽपि तमन्वयुः ॥ १५ ॥ ततः किलकिलाशब्दैः सिंहनादैः सुघर्घरैः ॥ भेरीतालमृदंगैश्च पृथिवी समकंपत ॥ १६ ॥ ततो भूतान्यधावंत भक्षयंतिस्म दानवान् ॥ उत्पतंत्यापतंति स्म ननृतुश्च रणांगणे ॥ १७ ॥ नन्दी च कार्तिकेयश्च समाश्वस्य त्वरान्वितौ ॥ निजघ्नतू रणे दैत्यान्निरंतरशरव्रजैः ॥ १८ ॥ छिन्नभिन्ना हतैर्दैत्यैः पतितैर्भक्षितैस्तदा ॥ व्याकुला साऽभवत्सेना विषण्णवदना तदा ॥ १९ ॥ प्रविध्वस्तां तदा सेनां दृष्ट्वा सागरनंदनः ॥ रथेनाऽतिपताकेन गणानभिययौ बली ॥ २० ॥ हस्त्यश्वरथसंह्रादाः शंखभेरीस्वनास्तथा ॥ अभवन्सिंहनादाश्च सेनयोरुभयोस्तदा ॥ २१ ॥ जलंधरशरव्रातैर्नीहारपटलैरिव ॥ द्यावापृथिव्योराच्छिन्नमंतरं समपद्यत ॥ २२ ॥ गणेशं पंचभिर्विद्ध्वा शैलादिं नवभिः शरैः ॥ वीरभद्रं च विंशत्या ननाद जलदस्वनः ॥ २३ ॥ कार्तिकेयस्तदा दैत्यं शक्त्या विव्याध सत्वरः ॥ युयुधे शक्तिनिर्भिन्नः किंचिद्व्याकुलमानसः ॥ २४ ॥ ततः क्रोधपरीताक्षः कार्तिकेयं जलंधरः ॥ गदया ताडयामास स च भूमितलेऽपतत् ॥ २५ ॥ तथैव नंदिनं वेगादपातयत भूतले ॥ ततो गणेश्वरः क्रुद्धो गदां परशुनाऽहनत् ॥ २६ ॥ वीरभद्रस्त्रिभिर्बाणैर्हृदि विव्याध दानवम् ॥ सप्तभिश्च हयान्केतुं धनुश्छत्रं च चिच्छिदे ॥ २७ ॥ ततोऽतिक्रुद्धो दैत्येंद्रः शक्तिमुद्यम्य दारुणाम् ॥ गणेशं पातयामास रथं चाऽन्यमथाऽऽरुहत् ॥२८॥ अभ्ययादथ वेगेन वीरभद्रं रुषान्वितः ॥ ततस्तौ सूर्यसंकाशौ युयुधाते परस्परम् ॥ २९ ॥ वीरभद्रः पुनस्तस्य हयान्बाणैरपातयत् ॥ धनुश्चिच्छेद दैत्येंद्रः पुप्लुवे परिघायुधः ॥ ३० ॥ स वीरभद्रं त्वरयाऽभिगम्य जघान दैत्यः परिघेण मूर्ध्नि ॥ स चाऽपि वीरः प्रविभिन्नमूर्द्धा पपात भूमौ रुधिरं समुद्गिरन् ॥ ३१ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे कार्तिकमासमाहात्म्ये जलंधरोपाख्याने वीरभद्रपतनंनामैकोनविंशोऽध्यायः ॥ १९ ॥ ॥ छ ॥

इति श्रीकार्तिकमासमाहात्म्यटीकायामेकोनविंशोऽध्यायः ॥ १९ ॥ ॥ छ ॥

CC-0. In Public Domain. Digitization by eGangotri

|| || नारद उवाच || || पतितं वीरभद्रं तु दृष्ट्वा रुद्रगणा भयात् || अगमंस्ते रणं हित्वा क्रोशमाना महेश्वरम् || १ || अथ कोलाहलं श्रुत्वा
गणानां चंद्रशेखरः || अभ्ययाद्वृषभारूढः संग्रामं प्रहसन्निव || २ || रुद्रमायांतमालोक्य सिंहनादैर्गणाः पुनः || निवृत्ताः संगरे दैत्यान्निर्जघ्नुः
शरवृष्टिभिः || ३ || दैत्याश्च भीषणं दृष्ट्वा सर्वे चैव विदुद्रुवुः || कार्तिकव्रतिनं दृष्ट्वा पातकानीव तद्भयात् ||४|| जलंधरोथ तान्दैत्यान्निवृत्तान्प्रे
क्ष्य संगरे || रोषादधावच्चंडीशं मुंचन्बाणान्सहस्रशः || ५ || शुंभो निशुंभोऽश्वमुखः कालनेमिर्बलाहकः || खड्गरोमा प्रचंडश्च घस्मराद्याः
शिवं ययुः || ६ || बाणांधकारसंछन्नं दृष्ट्वा गणबलं शिवः || बाणजालमवाच्छिद्य स्वबाणैरावृणोन्नभः || ७ || दैत्यांश्च बाणवात्याभिः पीडि
तानकरोत्तदा || प्रचंडबाणजालौघैरपातयत भूतले || ८ || खड्गरोम्णः शिरः कायात्तदा परशुनाऽच्छिनत् || बलाहकस्य च शिरः खट्वांगेनाऽक
रोद्द्विधा || ९ || बद्ध्वा च घस्मरं दैत्यं पाशेनाऽभ्यहनद्भुवि || वृषभेण हताः केचित्केचिद्बाणैर्निपातिताः || १० || न शेकुरसुराः स्थातुं गजाः
सिंहार्दिता इव || ततः क्रोधपरीतात्मा वेगाद्रुद्रं जलंधरः ||११|| आह्वयामास समरे तीव्राशनिसमस्वनः || || जलंधर उवाच || || युध्यस्व
च मया सार्द्धं किमेभिर्निहतैस्तव || १२ || यच्च किंचिद्बलं तेऽस्ति तद्दर्शय जटाधर || इत्युक्त्वा बाणसप्तत्या जघान वृषभध्वजम् || १३ ||
तान्प्राप्तान्निशितैर्बाणैश्चिच्छेद प्रहसन्निव||ततो हयान्ध्वजं छत्रं धनुश्चिच्छेद शक्तिभिः||१४||स च्छिन्नधन्वा विरथो गदामुद्यम्य वेगवान् || अभ्य
धावच्छिवस्तावद्गदां बाणैर्द्विधाऽच्छिनत् ||१५|| तथाऽपि मुष्टिमुद्यम्य ययौ रुद्रं जिघांसया || तावच्छिवेन बाणौघैः क्रोशमात्रमपाकृतः||१६||
ततो जलंधरो दैत्यो मत्वा रुद्रं बलाधिकम् || ससर्ज मायां गांधर्वीमद्भुतां रुद्रमोहिनीम् || १७ || ततो जगुश्च ननृतुर्गंधर्वाप्सरसां गणाः ||
तालवेणुमृदंगाद्यान्वादयंति स्म चाऽपरे || १८ || तद्दृष्ट्वा महदाश्चर्यं रुद्रो नादविमोहितः || पतितान्यपि शस्त्राणि करेभ्यो न विवेद सः ||
||१९|| एकाग्रीभूतमालोक्य रुद्रं दैत्यो जलंधरः || कामार्तः स जगामाऽशु यत्र गौरी स्थिताऽभवत् ||२०|| युद्धे शुंभनिशुंभाख्यौ स्थापयित्वा
महाबलौ || दशदोर्दंडपंचास्यस्त्रिनेत्रश्च जटाधरः ||२१|| महावृषभमारूढः स बभूव जलंधरः || अथो रुद्रं समायांतमालोक्य भववल्लभा ||२२||

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ इति कार्तिकमासमाहात्म्यटीकायां विंशोऽध्यायः॥ २० ॥ ॥छ ॥ १ ॥ २ ॥ ३ ॥

अभ्याययौ सखीमध्यात्तद्दर्शनपथेऽभवत् ॥ यावद्ददर्श चार्वंगीं पार्वतीं दनुजेश्वरः ॥ २३ ॥ तावत्स्ववीर्यं मुमुचे जडांगश्चाऽभवत्तदा ॥ अथ ज्ञात्वा तदा गौरी दानवं भयविह्वला ॥ २४ ॥ जगामाऽन्तर्हिता वेगात्सा तदोत्तरमानसे ॥ तामदृष्ट्वा ततो दैत्यः क्षणाद्विद्युल्लतामिव ॥ २५ ॥ जवेनाऽऽगात्पुनर्युद्धं यत्र देवो वृषध्वजः ॥ पार्वत्यपि भयाद्विष्णुं सस्मार मनसा तदा ॥ २६ ॥ तावद्ददर्श तं देवं सूपविष्टं समीपगम् ॥ ॥ पार्वत्युवाच॥ ॥ विष्णो जलंधरो दैत्यः कृतवान्परमाद्भुतम् ॥२७॥ तत्किं न विदितं तेऽस्ति चेष्टितं तस्य दुर्मतेः ॥ ॥ विष्णुरुवाच ॥ ॥ तेनैव दर्शितः पंथा वयमप्यन्वयामहे ॥ २८ ॥ नाऽन्यथा स भवेद्वध्यः पातिव्रत्यसुरक्षितः ॥ ॥ नारद उवाच ॥ ॥ जगाम विष्णुरित्युक्त्वा पुनर्जालंधरं पुरम् ॥ २९ ॥ अथ रुद्रश्च गंधर्वाऽनुगतः संगरे स्थितः ॥ अंतर्धानं गतां मायां दृष्ट्वा स बुबुधे तदा ॥ ३० ॥ ततो भवो विस्मितमानसः पुनर्जगाम युद्धाय जलंधरं रुषा ॥ स चाऽपि दैत्यः पुनरागतं शिवं दृष्ट्वा शरौघैः समवाकिरद्रणे ॥ ३१ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे कार्तिकमासमाहात्म्ये जलंधरोपाख्याने शिवजलंधरयुद्धवर्णनंनाम विंशोऽध्यायः ॥२०॥

॥ ॥ नारद उवाच ॥ ॥ विष्णुर्जलंधरं गत्वा तद्दैत्यपुटभेदनम् ॥ पातिव्रत्यस्य भंगाय वृंदायाश्चाऽकरोन्मतिम् ॥ १ ॥ अथ वृंदारका देवी स्वप्नमध्ये ददर्श ह ॥ भर्तारं महिषाऽऽरूढं तैलाभ्यक्तं दिगम्बरम् ॥ २॥ कृष्णप्रसूनभूषाढ्यं क्रव्यादगणसेवितम् ॥ दक्षिणाशागतं मुण्डं तमसा प्याऽऽवृतं तदा ॥ ३ ॥ स्वपुरं सागरे मग्नं सहसैवाऽऽत्मना सह ॥ ततः प्रबुद्धा सा बाला तत्स्वप्नं प्रविचिन्वती ॥ ४ ॥ ददर्शोदितमादित्यं सच्छिद्रं निष्प्रभं मुहुः ॥ तदनिष्टमिति ज्ञात्वा रुदती भयविह्वला ॥ ५ ॥ कुत्रचिन्नाऽलभच्छर्म गोपुराट्टालभूमिषु ॥ ततः सखीद्वययुता नगरोद्यानमागमत् ॥ ६ ॥ तत्राऽपि साऽभ्रमद्बाला नाऽलभत्कुत्रचित्सुखम् ॥ वनाद्वनांतरं याता नैव वेदात्मनस्तदा ॥ ७ ॥ ततः सा भ्रमती बाला ददर्शाऽतीवभीषणौ ॥ राक्षसौ सिंहवदनौ दंष्ट्राऽऽननविभीषणौ ॥ ८ ॥ तौ दृष्ट्वा विह्वलाऽतीव पलायनपराऽभवत् ॥ ददर्श तापसं शांतं सशिष्यं मौनमास्थितम् ॥ ९ ॥

॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ वृंदामोहनाय विष्णुमायाप्रदर्शनप्रसंगमाह—तत इत्यादिना ॥ ८ ॥ ९ ॥

CC-0. In Public Domain. Digitization by eGangotri

ततस्तत्कण्ठमावृत्य निजां बाहुलतां भयात् ॥ मुने मां रक्ष शरणमागताऽस्मीत्यभाषत ॥ १० ॥ मुनिस्तां विह्वलां दृष्ट्वा राक्षसाऽनु
गतां तदा ॥ हुंकारेणैव तौ घोरौ चकार विमुखौ रुषा ॥ ११ ॥ तौ हुंकारभयत्रस्तौ दृष्ट्वा च विमुखौ गतौ ॥ प्रणम्य दंडवद्भूमौ वृन्दा
वचनमब्रवीत् ॥ १२ ॥ ॥ वृन्दोवाच ॥ ॥ रक्षिताहं त्वया घोराद्भयादस्मात्कृपानिधे ॥ किंचिद्विज्ञप्तुमिच्छामि कृपया तन्निशा
मय ॥ १३ ॥ जलंधरो हि मद्भर्ता रुद्रं योद्धुं गतः प्रभो ॥ स तत्राऽस्ते कथं युद्धे तन्मे कथय सुव्रत ॥ १४ ॥ ॥ नारद उवाच ॥ ॥
मुनिस्तद्वाक्यमाकर्ण्य कृपयोर्ध्वमवैक्षत ॥ तावत्कपी समायातौ प्रणम्य चाग्रतः स्थितौ ॥ १५ ॥ ततस्तद्भ्रूलतासंज्ञानियुक्तौ गगनं गतौ ॥
गत्वा क्षणार्द्धादागत्य प्रणतावग्रतः स्थितौ ॥ शिरःकबन्धे हस्तौ च गृहीत्वा समुपस्थितौ ॥ १६ ॥ शिरःकबंधे हस्तौ च दृष्ट्वाऽब्धितनयस्य
सा ॥ पपात मूर्छिता भूमौ भर्तृव्यसनदुःखिता ॥ १७ ॥ कमंडलूदकैः सिक्ता मुनिनाऽऽश्वासिता तदा ॥ स्वभर्तृभाले सा भालं कृत्वा दीना
रुरोद ह ॥ १८ ॥ ॥ वृन्दोवाच ॥ ॥ यः पुरा सुखसंवादे विनोदयसि मां प्रभो ॥ स कथं न वदस्यद्य वल्लभां मामनागसम् ॥ १९ ॥
येन देवाः सगंधर्वा निर्जिता विष्णुना सह ॥ स कथं तापसेनाऽद्य त्रैलोक्यविजयी हतः ॥ २० ॥ ॥ नारद उवाच ॥ ॥ रुदित्वेति तदा
वृन्दा तं मुनिं वाक्यमब्रवीत् ॥ ॥ वृन्दोवाच ॥ ॥ कृपानिधे मुनिश्रेष्ठ जीवयैनं मम प्रियम् ॥२१॥ त्वमेवास्य मुने शक्तो जीवनाय मतो मम ॥
नारद उवाच ॥ ॥ इति तद्वाक्यमाकर्ण्य प्रहसन्मुनिरब्रवीत् ॥ २२ ॥ ॥ मुनिरुवाच ॥ ॥ नाऽयं जीवयितुं शक्तो रुद्रेण निहतो युधि ॥
तथाऽपि त्वत्कृपाविष्ट एनं संजीवयाम्यहम् ॥ २३ ॥ ॥ नारद उवाच ॥ ॥ इत्युक्त्वांतर्दधे विप्रस्तावत्सागरनंदनः ॥ वृंदामालिंग्य तद्वक्त्रं
चुचुंब प्रीतमानसः ॥ २४ ॥ अथ वृन्दाऽपि भर्तारं दृष्ट्वा हर्षितमानसा ॥ रेमे तद्वनमध्यस्था तद्युक्ता बहुवासरम् ॥ २५ ॥ कदाचित्सुरतस्यांते
दृष्ट्वा विष्णुं तमेव च ॥ निर्भर्त्स्य क्रोधसंयुक्ता वृन्दा वचनमब्रवीत् ॥ २६ ॥ ॥ वृंदोवाच ॥ ॥ धिक्त्वदीयं हरे शीलं परदाराभिगामिनः ॥
ज्ञातोऽसि त्वं मया सम्यङ्मायाप्रच्छन्नतापसः ॥ २७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यौ त्वया मायया द्वाःस्थौ स्वकीयौ दर्शितौ मम ॥ तावेव राक्षसौ भूत्वा भार्यां तव हरिष्यतः ॥२८॥ त्वं चाऽपि भार्यादुःखार्तो वने कपिसहायवान् ॥ भ्रम सर्पेश्वरेणाऽयं यस्ते शिष्यत्वमागतः ॥ २९ ॥ इत्युक्त्वा सा तदा वृन्दा प्राविशद्धव्यवाहनम् ॥ विष्णुना वार्यमाणाऽपि तस्यामासक्तचेतसा ॥३०॥ ततो हरिस्तामनुसंस्मरन्मुहुर्वृंदान्वितो भस्मरजोवगुंठितः ॥ तत्रैव तस्थौ सुरसिद्धसंघैः प्रबोध्यमानोऽपि ययौ न शांतिम् ॥३१॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे कार्तिकमासमाहात्म्ये जलंधरोपाख्याने वृन्दाग्निप्रवेशवर्णनंनामैकविंशोऽध्यायः ॥ २१ ॥ ॥ छ ॥ ॥ नारद उवाच ॥ ॥ ततो जलंधरो दृष्ट्वा रुद्रमद्भुतविक्रमम् ॥ चकार मायया गौरीं त्र्यंबकं मोहयन्निव ॥ १ ॥ रथोपरि च तां बद्धां रुदन्तीं पार्वतीं शिवः ॥ निशुंभप्रमुखाद्यैश्च वध्यमानां ददर्श सः ॥ २ ॥ गौरीं तथाविधां दृष्ट्वा शिवोऽप्युद्विग्नमानसः ॥ अवाङ्मुखः स्थितस्तूष्णीं विस्मृत्य स्वपराक्रमम् ॥ ३ ॥ ततो जलंधरो वेगात्त्रिभिर्विव्याध सायकैः ॥ आपुंखमग्नैस्तं रुद्रं शिरस्युरसि चोदरे ॥ ४ ॥ ततो जज्ञे स तां मायां विष्णुना च प्रबोधितः ॥ रौद्ररूपधरो जातो ज्वालामालाऽतिभीषणः ॥ ५ ॥ तस्याऽतीव महारौद्रं रूपं दृष्ट्वा महासुराः ॥ न शेकुः संमुखे स्थातुं भेजिरे ते दिशो दश ॥६॥ ततः शापं ददौ रुद्रस्तयोः शुंभनिशुंभयोः ॥ मम युद्धादपक्रांतौ गौर्या बध्यौ भविष्यथः ॥ ७ ॥ पुनर्जलंधरो वेगाद्ववर्ष निशितैः शरैः ॥ बाणांधकारैः संछन्नं तदा भूमितलं महत् ॥ ८ ॥ यावद्रुद्रश्च चिच्छेद तस्य बाणगणं जवात् ॥ तावत्स परिघेणाऽऽशु जघान वृषभं बली ॥ ९ ॥ वृषस्तेन प्रहारेण परावृत्तो रणांगणात् ॥ रुद्रेणाऽऽकृष्यमाणोऽपि न तस्थौ रणभूमिषु ॥ १० ॥ ततः परमसंक्रुद्धो रुद्रो रौद्रवपुर्धरः ॥ चक्रं सुदर्शनं वेगाच्चिक्षेपाऽऽदित्यवर्चसम् ॥ ११ ॥ प्रदहद्रोदसी वेगात्पपात वसुधातले ॥ जहार तच्छिरः कायान्महदायतलोचनम् ॥ १२ ॥ रथात्कायः पपाताऽस्य नादयन्वसुधातलम् ॥ तेजश्च निर्गतं देहात्तद्रुद्रे लयमागमत् ॥ १३ ॥ वृन्दादेहोद्भवं तेजस्तद्गौर्यां विलयं गतम् ॥ अथ ब्रह्मादयो देवा हर्षादुत्फुल्ललोचनाः ॥ १४ ॥ प्रणम्य शिरसा रुद्रं शशंसुर्विष्णुचेष्टितम् ॥ ॥ देवा ऊचुः ॥ ॥ महादेव त्वया देवा रक्षिताः शत्रुजाद्भयात् ॥ १५ ॥

CC-0. In Public Domain. Digitization by eGangotri

किंचिदन्यत्समुद्भूतं तत्र किं करवामहे ॥ वृन्दालावण्यसंभ्रांतो विष्णुस्तिष्ठति मोहितः ॥ १६ ॥ ॥ ईश्वर उवाच ॥ ॥ गच्छध्वं शरणं देवा विष्णोर्मोहापनुत्तये ॥ शरण्यां मोहिनीं मायां सा वः कार्यं करिष्यति ॥ १७ ॥ ॥ नारद उवाच ॥ ॥ इत्युक्त्वांतर्दधे देवः सर्वभूत गणैस्तदा ॥ देवाश्च तुष्टुवुर्मूलप्रकृतिं भक्तवत्सलाम् ॥ १८ ॥ ॥ देवा ऊचुः ॥ ॥ यदुद्भवाः सत्त्वरजस्तमोगुणाः सर्गस्थितिध्वंसनिदान कारिणः ॥ यदिच्छया विश्वमिदं भवाऽभवौ तनोति मूलप्रकृतिं नताः स्म ताम् ॥ १९ ॥ या हि त्रयोविंशतिभेदशब्दिता जगत्यशेषे समधिष्ठिता परा ॥ यद्रूपकर्माणि जडास्त्रयोऽपि देवा न विद्युः प्रकृतिं नताः स्म ताम् ॥ २० ॥ यद्भक्तियुक्ताः पुरुषास्तु नित्यं दारिद्र्यभी मोहपराभवादीन् ॥ न प्राप्नुवंत्येव हि भक्तवत्सलां सदैव मूलप्रकृतिं नताः स्म ताम् ॥ २१ ॥ ॥ नारद उवाच ॥ ॥ स्तोत्रमेत त्रिसंध्यं यः पठेदेकाग्रमानसः ॥ दारिद्र्यमोहदुःखानि न कदाचित्स्पृशंति तम् ॥२२॥ इत्थं स्तुवंतस्ते देवास्तेजोमण्डलमास्थितम् ॥ ददृशुर्गगनं तत्र ज्वाला व्याप्तदिगंतरम् ॥ २३ ॥ तन्मध्याद्भारतीं सर्वे शुश्रुवुर्व्योमचारिणीम् ॥ ॥ शक्तिरुवाच ॥ ॥ अहमेव त्रिधा भिन्ना तिष्ठामि त्रिविधैर्गुणैः ॥ ॥ २४ ॥ गौरी लक्ष्मी स्वरा चेति रजःसत्त्वतमोगुणैः ॥ तत्र गच्छत ताः कार्यं विधास्यंति च वः सुराः ॥ २५ ॥ ॥ नारद उवाच ॥ ॥ शृण्वतामिति तां वाचमंतर्धानमगान्महः ॥ देवानां विस्मयोत्फुल्लनेत्राणां तत्तदा नृप ॥ २६ ॥ ततः सर्वेऽपि ते देवा गत्वा तद्वाक्यनोदिताः ॥ गौरीं लक्ष्मीं स्वरां चैव प्रणेमुर्भक्तितत्पराः ॥ २७ ॥ ततस्तास्तान्सुरान्दृष्ट्वा प्रणतान्भक्तवत्सलाः ॥ बीजानि प्रददुस्तेभ्यो वाक्यान्यूचुश्च भूमिप ॥ २८ ॥ ॥ देव्य ऊचुः ॥ ॥ इमानि तत्र बीजानि विष्णुर्यत्राऽवतिष्ठते ॥ निर्वपध्वं ततः कार्यं भवतां सिद्धिमेष्यति ॥ २९ ॥ ॥ ॥ नारद उवाच ॥ ॥ ततस्तु हृष्टाः सुरसिद्धसंघाः प्रगृह्य बीजानि विचिक्षिपुस्ते ॥ वृंदान्वितो भूमितले स यत्र विष्णुः सदा तिष्ठति सौख्यहीनः ॥ ३० ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे कार्तिकमासमाहात्म्ये जलंधरमुक्तिकथनं नाम द्वाविंशोऽध्यायः ॥ २२ ॥ छ ॥

टीकायां द्वाविंशोऽध्यायः ॥ २२ ॥ छ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ तुलसीमाहात्म्यं वक्तुं तुलस्याद्युत्पत्तिप्रसंगमाह—क्षितेभ्य इति । वनस्पत्यः वनस्पतय इत्यर्थः । आर्षं दीर्घान्तत्वम् ॥ १ ॥२॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥

॥ ॥ नारद उवाच ॥ ॥ क्षितेभ्यस्तत्र बीजेभ्यो वनस्पत्यस्त्रयोऽभवन् ॥ धात्री च मालती चैव तुलसी च नृपोत्तम ॥ १ ॥ धात्र्युद्भवा स्मृता धात्री माभवा मालती स्मृता ॥ गौरीभवा च तुलसी तमःसत्त्वरजोगुणाः ॥ २ ॥ स्त्रीरूपिण्यौ वनस्पत्यौ दृष्ट्वा विष्णुस्तदा नृप ॥ उत्तस्थौ संभ्रमाद्वृंदारूपातिशयविभ्रमः ॥३॥ दृष्ट्वा च याचते मोहात्कामासक्तेन चेतसा ॥ तं चाऽपि तुलसीधात्र्यौ रागेणैव व्यलोकताम् ॥४॥ यच्च लक्ष्म्या पुरा बीजमीर्ष्ययैव समर्पितम् ॥ तस्मात्तदुद्भवा नारी तस्मिन्नीर्ष्यापराऽभवत् ॥ ५ ॥ अतः सा बर्बरीत्याख्यामवापाऽध विगर्हिताम् ॥ धात्रीतुलस्यौ तद्रागात्तस्य प्रीतिप्रदे सदा ॥ ६ ॥ ततो विस्मृतदुःखोऽसौ विष्णुस्ताभ्यां सहैव तु ॥ वैकुण्ठमगमद्धृष्टः सर्वदेवनमस्कृतः ॥ ७ ॥ कार्तिकोद्यापने विष्णोस्तस्मात्पूजा विधीयते ॥ तुलसीमूलदेशेऽस्य प्रीतिदा सा यतः स्मृता ॥ ८ ॥ तुलसीकाननं राजन्गृहे यस्याऽवतिष्ठते ॥ तद्गृहं तीर्थरूपं तु नाऽऽयांति यमकिंकराः ॥ ९ ॥ सर्वपापहरं नित्यं कामदं तुलसीवनम् ॥ रोपयंति नराः श्रेष्ठास्ते न पश्यंति भास्करिम् ॥ १० ॥ दर्शनं नर्मदायास्तु गंगास्नानं तथैव च ॥ तुलसीवनसंसर्गः सममेव त्रयं स्मृतम् ॥ ११ ॥ रोपणात्पालनात्सेकाद्दर्शनात्स्पर्शनान्नृणाम् ॥ तुलसी दहते पापं वाङ्मनःकायसंचितम् ॥ १२ ॥ तुलसीमंजरीभिर्यः कुर्याद्धरिहराऽर्चनम् ॥ न स गर्भगृहं याति मुक्तिभागी न संशयः ॥ १३ ॥ पुष्कराद्यानि तीर्थानि गंगाद्याः सरितस्तथा ॥ वासुदेवादयो देवास्तिष्ठंति तुलसीदले ॥ १४ ॥ तुलसीमंजरीयुक्तो यस्तु प्राणान्विमुंचति ॥ यमोऽपि नेक्षितुं शक्तो युक्तं पापशतैरपि ॥ १५ ॥ विष्णोः सायुज्यमाप्नोति सत्यं सत्यं नृपोत्तम ॥ तुलसीकाष्ठजं यस्तु चंदनं धारयेन्नरः ॥ १६ ॥ तद्देहं न स्पृशेत्पापं क्रियमाणमपीह यत् ॥ तुलसीविपिनच्छाया यत्रयत्र भवेन्नृप ॥ १७ ॥ तत्र श्राद्धं प्रकर्तव्यं पितॄणां दत्तमक्षयम् ॥ धात्रीफलविमिश्रैश्च तुलसीपत्रमिश्रितैः ॥ १८ ॥ जलैः स्नाति नरस्तस्य गंगास्नानफलं स्मृतम् ॥ देवार्चनं नरः कुर्याद्धात्रीपत्रैः फलैस्तथा ॥ १९ ॥ सुवर्णमणिमुक्तौघैरर्चनस्याप्नुयात्फलम् ॥ तीर्थानि मुनयो देवा यज्ञाः सर्वेऽपि कार्तिके ॥ २० ॥ नित्यं धात्रीं समाश्रित्य तिष्ठंत्यर्के तुलास्थिते ॥ द्वादश्यां तुलसीपत्रं धात्रीपत्रं तु कार्तिके ॥ २१ ॥

॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥

CC-0. In Public Domain. Digitization by eGangotri

॥ २२ ॥ २३ ॥ इति कार्तिकमासमाहात्म्यटीकायां त्रयोविंशोऽध्यायः ॥ २३ ॥ ॥ छ ॥ ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥

लुनाति स नरो गच्छेन्निरयानतिगर्हितान् ॥ धात्रीतुलस्योर्माहात्म्यमपि देवश्चतुर्मुखः ॥ न समर्थो भवेद्वक्तुं यथा देवस्य शार्ङ्गिणः ॥ २२ ॥
धात्रीतुलस्युद्भवकारणं यः शृणोति यः श्रावयते च भक्त्या ॥ विधूतपाप्मा सह पूर्वजैः स्वैः स्वर्गं व्रजत्यग्र्यविमानसंस्थैः ॥२३॥ इति श्रीस्कांदे
महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे कार्तिकमासमाहात्म्ये धात्रीतुलस्युत्पत्तिवर्णनंनाम त्रयोविंशोऽध्यायः॥ २३ ॥
॥ छ ॥ ॥ पृथुरुवाच ॥ ॥ यदूर्जव्रतिनः पुंसः फलं महदुदाहृतम् ॥ तत्पुनर्ब्रूहि माहात्म्यं केन चीर्णमिदं शुभम् ॥ १ ॥ ॥ नारद
उवाच ॥ ॥ आसीत्सह्याद्रिविषये करवीरपुरे पुरा ॥ ब्राह्मणो धर्मवित्कश्चिद्धर्मदत्तेति विश्रुतः ॥ २ ॥ विष्णुव्रतकरः सम्यग्विष्णुपूजारतः
सदा ॥ कदाचित्कार्तिके मासि हरिजागरणाय सः ॥ ३ ॥ रात्र्यां तुर्यावशेषायां जगाम हरिमंदिरम्॥ हरिपूजोपकरणान्प्रगृह्य व्रजता तदा ॥४॥
तेन दृष्टा समायाता राक्षसी भीमदर्शना ॥ तां दृष्ट्वा भयवित्रस्तः कंपितावयवस्तदा ॥ ५ ॥ पूजोपकरणैः सर्वैः पयोभिश्चाहनद्भयात् ॥
संस्मृत्य तद्धरेर्नाम तुलसीयुक्तवारिणा ॥ तेन वै हतमात्रे तु पापं तस्या ह्यगात्क्षयम् ॥ ६ ॥ अथ संस्मृत्य सा पूर्वजन्मकर्मविपाकजाम् ॥ स्वां
दशामब्रवीद्विप्रं दंडवच्च प्रणम्य वै ॥ ७ ॥ ॥ कलहोवाच ॥ ॥ पूर्वकर्मविपाकेन दशामेतां गतास्म्यहम् ॥ तत्कथं नु पुनर्विप्र प्रयास्याम्यु
त्तमां गतिम् ॥ ८ ॥ ॥ नारद उवाच ॥ ॥ तां दृष्ट्वा प्रणतां सम्यग्वदमानां स्वकर्म तत् ॥ अतीवविस्मितो विप्रस्तदा वचनमब्रवीत् ॥ ९ ॥
॥ ॥ धर्मदत्त उवाच ॥ ॥ केन कर्मविपाकेन त्वं दशामीदृशीं गता ॥ कुत्रत्या का च किंशीला तत्सर्वं कथयस्व मे ॥१०॥ ॥ कलहोवाच ॥ ॥
सौराष्ट्रनगरे ब्रह्मन्भिक्षुर्नामाऽभवद्द्विजः ॥ तस्याहं गृहिणी पूर्वं कलहाख्याऽतिनिष्ठुरा ॥ ११ ॥ न कदाचिन्मया भर्तुर्वचसाऽपि शुभं कृतम् ॥
नाऽर्पितं तस्य मिष्टान्नं भर्तुर्वंचनशीलया ॥१२॥ कलहप्रियया नित्यं मयोद्विग्नमना यदा ॥ परिणेतुं यदाऽन्यां स मतिं चक्रे पतिर्मम ॥ १३ ॥
ततो गरं समादाय प्राणास्त्यक्ता मया द्विज ॥ अथ बद्ध्वा वध्यमानां मां निन्युर्यमकिंकराः ॥ १४ ॥ यमश्च मां तदा दृष्ट्वा चित्रगुप्तमपृच्छत ॥
॥ १५ ॥ ॥ यम उवाच ॥ ॥ अनया किं कृतं कर्म चित्रगुप्त विलोकय ॥ प्राप्नोत्वेषा च तत्कर्म शुभं वा यदि वाऽशुभम् ॥ १६ ॥

॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥१७॥१८॥१९॥२०॥२१॥२२॥२३॥ सह्याद्रिशिखरे ब्रह्मणो यज्ञे स्वराशापादेवा नदीरूपा अभवन्, तत्र—"कृष्णा कृष्णतनुः साक्षाद्वेणा देवो महेश्वरः । तत्संग

॥ ॥ कलहोवाच ॥ ॥ चित्रगुप्तस्तदा वाक्यं भर्त्सयन्मामुवाच सः ॥ ॥ चित्रगुप्त उवाच ॥ ॥ अनया तु कृतं कर्म शुभं किंचिन्न विद्यते ॥ १७ ॥ मिष्टान्नं भुंजमानेयं न भर्तारि तदर्पितम् ॥ अतश्च वल्गुलीयोन्यां स्वविष्ठादाऽवतिष्ठतु ॥ १८ ॥ भर्तुर्द्वेषात्तदाप्येषा नित्यं कलहकारिणी ॥ विष्ठादां सूकरीं योनिं तस्मात्तिष्ठत्वियं हरे ॥ १९ ॥ पाकभांडे सदा भुंक्ते भुंक्ते चैका यतस्ततः ॥ तस्मादेषा बिडाल्यस्तु स्वजाताऽपत्यभक्षिणी ॥ २० ॥ भर्तारमपि चोद्दिश्य ह्यात्मघातः कृतोऽनया ॥ तस्मात्प्रेतशरीरेऽपि तिष्ठत्वेकाऽतिनिंदिता ॥ २१ ॥ अतश्चैषा मरुदेशं प्रापितव्या भटैरियम् ॥ तत्र प्रेतशरीरस्था चिरं तिष्ठत्वियं ततः ॥ २२ ॥ ऊर्ध्वं योनित्रयं चैषा भुनक्त्व शुभकारिणी॥२३॥ ॥ कलहोवाच ॥ ॥ साहं पंचशताब्दानि प्रेतदेहे स्थिता किल॥क्षुत्तृड्भ्यां पीडिताऽऽविश्य शरीरं वणिजस्य च॥आयाता दक्षिणं देशं कृष्णावेण्योश्च संगमम् ॥ २४ ॥ तत्तीरं संश्रिता यावत्तावत्तस्य शरीरतः ॥ शिवविष्णुगणैर्दूरमपकृष्टा बलादहम् ॥ २५ ॥ ततः क्षुत्क्षामया दृष्टो मया हि त्वं द्विजोत्तम ॥ त्वद्धस्ततुलसीवारिसंसर्गगतपापया ॥२६॥ तत्कृत्यं कुरु विप्रेंद्र कथं मुक्तिमियाम्यहम् ॥ योनित्रयादग्रभवादस्माच्च प्रेतदेहतः ॥२७॥ इत्थं विचिंत्य कलहावचनं द्विजाग्र्यस्तत्कर्मपाकभयविस्मयदुःखयुक्तः ॥ तद्ग्लानिदर्शनकृपाचलचित्तवृत्तिर्ध्यात्वा चिरं स वचनं निजगाद दुःखात् ॥ २८ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे कार्तिकमासमाहात्म्ये धर्मदत्तेतिहासकथनंनाम चतुर्विंशोऽध्यायः ॥ २४ ॥ छ ॥ ॥ धर्मदत्त उवाच ॥ ॥ विलयं यांति पापानि तीर्थे दानव्रतादिभिः ॥ प्रेतदेहस्थितायास्ते तेषु नैवाऽधिकारिता ॥ १ ॥ त्वद्ग्लानिदर्शनादस्मात्खिन्नं च मम मानसम् ॥ न वै निर्वृतिमायाति त्वामनुद्धृत्य दुःखिताम् ॥ २ ॥ तस्मादाजन्मचरितं यन्मया कार्तिकव्रतम् ॥ तत्पुण्यस्यार्द्धभागेन सद्गतिं त्वमवाप्नुहि ॥ ३ ॥ ॥ नारद उवाच ॥ इत्युक्त्वा धर्मदत्तोऽसौ यावत्तामभ्यषेचयत् ॥ तुलसीमिश्रतोयेन श्रावयन्द्वादशाक्षरम् ॥ ४ ॥ तावत्प्रेतत्वनिर्मुक्ता ज्वलदग्निशिखोपमा ॥ दिव्यरूपधरा जाता लावण्येन यथेंदिरा ॥ ५ ॥ ततः सा दंडवद्भूमौ प्रणनामाऽथ तं द्विजम् ॥ उवाच सा तदा वाक्यैर्हर्षगद्गदभाषिणी ॥ ६ ॥

मत्प्रभावं तु नालं वक्तुं चतुर्मुखः" इति ॥२४॥२५॥२६॥ २७ ॥ २८ ॥ इति कार्तिकमासमाहात्म्यटीकायां चतुर्विंशोऽध्यायः ॥२४॥छ॥१॥२॥३॥४॥५॥६॥

CC-0. In Public Domain. Digitization by eGangotri

नौभूतो नौकारूपः ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥

॥ ॥ कलहोवाच ॥ ॥ त्वत्प्रसादाद्द्विजश्रेष्ठ विमुक्ता निरयादहम् ॥ पापाब्धौ मज्जमानायास्त्वं नौभूतोऽसि मे ध्रुवम् ॥ ७ ॥ ॥ नारद
उवाच ॥ ॥ इत्थं वदन्ती सा विप्रं ददर्शाऽऽयातमंबरात् ॥ विमानं भास्वरं युक्तं विष्णुरूपधरैर्गणैः ॥ ८ ॥ अथ सा तद्विमानाऽग्र्यं द्वाःस्था
भ्यामवरोपिता ॥ पुण्यशीलसुशीलाभ्यामप्सरोगणसेविता ॥ ९ ॥ तद्विमानं तदाऽपश्यद्धर्मदत्तः सविस्मयः॥ पपात दण्डवद्भूमौ दृष्ट्वा तौ विष्णु
रूपिणौ ॥ १० ॥ पुण्यशीलसुशीलौ च तमुत्थाप्याऽऽनतं द्विजम् ॥ अभिनन्द्य ततो वाक्यमूचतुर्धर्मसंयुतम् ॥ ११ ॥ ॥ गणावूचतुः ॥ ॥
साधुसाधु द्विजश्रेष्ठ यस्त्वं विष्णुरतः सदा ॥ दीनाऽनुकम्पी सर्वज्ञो विष्णुव्रतपरायणः ॥१२॥ आ बालत्वाच्छुभं त्वेतद्यत्त्वया कार्तिकव्रतम् ॥
कृतं तस्याऽर्द्धदानेन पुण्यं द्वैगुण्यमागमत्॥१३॥जन्मांतरशतोद्भूतं पापं तद्विलयं गतम्॥ स्नानैरेव गतं पापं यदस्याः पूर्वकर्मजम् ॥१४॥ हरिजा
गरणाद्यैश्च विमानमिदमास्थिता॥ वैकुण्ठं नीयते साधो नानाभोगयुता त्वियम् ॥१५॥ दीपदानभवैः पुण्यैस्तेजःसारूप्यमास्थिता ॥ तुलसीपूज
नाद्यैश्च कार्तिकव्रतकैः शुभैः ॥ विष्णुसान्निध्यगा जाता त्वया दत्तैः कृपानिधे ॥१६॥ त्वमप्यस्य भवस्यांते भार्याभ्यां सह यास्यसि ॥ वैकुण्ठ
भुवनं विष्णोः सान्निध्यं च सरूपताम् ॥ १७ ॥ ते धन्याः कृतकृत्यास्ते तेषां च सफलो भवः॥ यैर्भक्त्या राधितो विष्णुर्धर्मदत्त यथा त्वया ॥
॥ १८॥ सम्यगाराधितो विष्णुः किं न यच्छति देहिनाम् ॥ औत्तानचरणिर्येन ध्रुवत्वे स्थापितः पुरा ॥ १९॥ यन्नामस्मरणादेव देहिनो यांति
सद्गतिम् ॥ २० ॥ ग्राहग्रस्तो हि नागेंद्रो यन्नामस्मरणात्पुरा ॥ विमुक्तः संनिधिं प्राप्तो जातोऽयं जयसंज्ञकः ॥ २१ ॥ यतस्त्वयाऽर्चितो विष्णु
स्तत्सान्निध्यं प्रयास्यसि ॥ बहून्यब्दसहस्राणि भार्याद्वययुतः किल ॥ २२ ॥ ततः पुण्यक्षये जाते यदा यास्यसि भूतलम् ॥ सूर्यवंशोद्भवो राजा
विख्यातस्त्वं भविष्यसि ॥ २३ ॥ नाम्ना दशरथस्तत्र भार्याद्वययुतः पुनः ॥ तृतीयया ऽनया चाऽपि या ते पुण्यार्द्धभागिनी ॥ २४ ॥ तत्राऽपि
तव सान्निध्यं विष्णुर्यास्यति भूतले ॥ आत्मानं तव पुत्रत्वे प्रकल्प्याऽमरकार्यकृत् ॥ २५ ॥ तव जन्मव्रतादस्माद्विष्णुसंतुष्टिकारकात् ॥ न
यज्ञा न च दानानि न तीर्थान्यधिकानि वै ॥ २६ ॥

॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ २७ ॥ इति कार्तिकमासमाहात्म्यटीकायां पंचविंशोऽध्यायः ॥ २५ ॥ ॥ छ ॥ अथ भक्तिमाहात्म्यं वक्तुमितिहासं प्रस्तौति—इत्थमित्यादिना ॥ १ ॥ २ ॥ ३ ॥

धन्योऽसि विप्राग्र्य यतस्त्वयैतद्व्रतं कृतं तुष्टिकरं जगद्गुरोः॥ यदर्धभागात्सफला मुरारेः प्रणीयतेऽस्माभिरियं सलोकताम् ॥२७॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे कार्तिकमासमाहात्म्ये धर्मदत्तोपाख्याने कलहामोक्षकथनं नाम पञ्चविंशोऽध्यायः ॥ २५ ॥ ॥ छ ॥ ॥ नारद उवाच ॥ ॥ इत्थं तद्वचनं श्रुत्वा धर्मदत्तः सविस्मयः ॥ प्रणम्य दण्डवद्भूमौ वाक्यमेतदुवाच ह ॥ १ ॥ ॥ ॥ धर्मदत्त उवाच ॥ ॥ आराधयंति सर्वेऽपि विष्णुं भक्तार्तिनाशनम् ॥ यज्ञैर्दानैर्व्रतैस्तीर्थैस्तपोभिश्च यथाविधि ॥२॥ विष्णुप्रीतिकरं तेषां किंचित्सान्निध्यकारकम् ॥ यत्कृत्वा तानि चीर्णानि सर्वाण्यपि भवंति हि ॥ ३ ॥ ॥ गणावूचतुः ॥ ॥ साधु पृष्टं त्वया विप्र शृणुष्वैकाग्रमानसः ॥ सेतिहासकथां पुण्यां कथ्यमानां पुराभवाम् ॥ ४ ॥ कांचिपुर्यां पुरा चोलश्चक्रवर्ती नृपोऽभवत् ॥ यस्याख्ययैव ते देशाश्चोला इति प्रथां गताः ॥ ५ ॥ यस्मिञ्छासति भूचक्रं दरिद्रो वाऽपि दुःखितः॥ पापबुद्धिः सरुग्वापि नैव कश्चिदभून्नरः ॥६॥ यस्याप्युन्नतयज्ञस्य ताम्रपर्ण्यास्तटावुभौ ॥ सुवर्णयूपैः शोभाढ्यावास्तां चैत्ररथोपमौ ॥ ७ ॥ स कदाचिदगाद्राजा ह्यनंतशयनं द्विज ॥ यत्राऽसौ जगतां नाथो योगनिद्रामुपाश्रितः ॥ ८ ॥ तत्र श्रीरमणं देवं संपूज्य विधिवन्नृपः ॥ मणिमुक्ताफलैर्दिव्यैः स्वर्णपुष्पैश्च शोभनैः ॥ ९ ॥ प्रणम्य दण्डवद्भूमावुपविष्टः स तत्र वै ॥ तावद्ब्राह्मणमायातमपश्यद्देवसन्निधौ ॥ १० ॥ देवार्चनार्थं पाणौ तु तुलस्युदकधारिणम् ॥ स्वपुरीवासिनं तत्र विष्णुदासाह्वय द्विजम् ॥ ११ ॥ स तत्राभ्येत्य विप्रर्षिर्देवदेवमपूजयत् ॥ विष्णुसूक्तेन संस्नाप्य तुलसीमंजरीदलैः ॥ १२ ॥ तुलसीपूजया तस्य रत्नपूजां पुरा कृताम् ॥ आच्छादितां समालोक्य राजा क्रुद्धोऽब्रवीदिदम् ॥ १३ ॥ ॥ चोल उवाच ॥ ॥ माणिक्यस्वर्णपूजाऽत्र शोभाढ्या या कृता मया ॥ विष्णुदास कथं सेयमाच्छन्ना तुलसीदलैः ॥ १४ ॥ विष्णुभक्तिं न जानासि वराकोऽसि मतो मम ॥ यस्त्विमामतिशोभाढ्यां पूजामाच्छादयस्यहो ॥ ॥ १५ ॥ इति तद्वचनं श्रुत्वा सक्रोधः स द्विजोत्तमः ॥ राज्ञो गौरवमुल्लंघ्य जगाद वचनं तदा ॥ १६ ॥ ॥ विष्णुदास उवाच ॥ ॥ राजन्भक्तिं न जानासि गर्वितोऽसि नृपश्रिया ॥ कियद्विष्णुव्रतं पूर्वं त्वया चीर्णं वदस्व तत् ॥ १७ ॥

॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ वराकोऽसि दरिद्रोऽसि ॥ १५ ॥ १६ ॥ १७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥१८॥१९॥२०॥२१॥२२॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ इति श्रीकार्तिकमासमाहात्म्यटीकायां षड्विंशोऽध्यायः ॥ २६ ॥

॥ ॥ गणावूचतुः ॥ ॥ तद्ब्राह्मणवचः श्रुत्वा प्रहस्य स नृपोत्तमः ॥ विष्णुदासं तदा गर्वादुवाच वचनं द्विजम् ॥ १८ ॥ ॥ राजोवाच ॥ ॥ इत्थं चेद्वदसे विप्र विष्णुभक्त्याऽतिगर्वितः॥ भक्तिस्ते कियती विष्णोर्दरिद्रस्याऽधनस्य च ॥१९॥ यज्ञदानादिकं नैव विष्णोस्तुष्टिकरं कृतम् ॥ नाऽपि देवालयं पूर्वं कृतं विप्र त्वया क्वचित् ॥ २० ॥ ईदृशस्याऽपि ते गर्व एष तिष्ठति भक्तितः ॥ तच्छृण्वंतु वचो मेऽद्य सर्वेऽप्येते द्विजातयः ॥ २१ ॥ साक्षात्कारमहं विष्णोरेष वादौ गमिष्यति ॥ पश्यंतु सर्वेऽपि ततो भक्तिं ज्ञास्यंति चावयोः ॥ २२ ॥ ॥ गणावूचतुः ॥ ॥ इत्युक्त्वा स नृपोऽगच्छन्निजराजगृहं तदा ॥ आरभद्वैष्णवं सत्रं कृत्वाऽऽचार्यं तु मुद्गलम् ॥ २३ ॥ ऋषिसंघसमाजुष्टं बह्वन्नं बहुदक्षिणम् ॥ यच्च ब्रह्मकृतं पूर्वं गयाक्षेत्रे समृद्धिमत् ॥ २४ ॥ विष्णुदासोऽपि तत्रैव तस्थौ देवालये व्रती ॥ यथोक्तनियमान्कुर्वन्विष्णोस्तुष्टिकरान्सदा ॥ २५ ॥ माघोर्जयोर्व्रतं सम्यक्तुलसीवनपालनम् ॥ एकादश्यां हरेर्जाप्यं द्वादशाक्षरविद्यया ॥ २६ ॥ उपचारैः षोडशभिर्नृत्यगीतादिमंगलैः ॥ नित्यं विष्णोस्तथा पूजां व्रतान्येतानि सोऽकरोत् ॥ २७ ॥ नित्यं संस्मरणं विष्णोर्गच्छन्भुवि स्वपन्नपि ॥ सर्वभूतस्थितं विष्णुमपश्यत्समदर्शनः ॥ ॥ २८ ॥ माघकार्तिकयोर्नित्यं विशेषनियमानपि ॥ अकरोद्विष्णुतुष्ट्यर्थं सोद्यापनविधिं तथा ॥ २९ ॥ एवं समाराधयतोः श्रियः पतिं तयोश्च चोलेश्वरविष्णुदासयोः ॥ अगाद्धि कालः सुमहान्व्रतस्थयोस्तन्निष्ठसर्वेंद्रियकर्मणोस्तदा ॥ ३० ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे कार्तिकमासमाहात्म्ये चोलराजविष्णुदासब्राह्मणविवादकथनंनाम षड्विंशोऽध्यायः ॥ २६ ॥ ॥ नारद उवाच ॥ ॥ कदाचिद्विष्णुदासोऽथ कृत्वा नित्यविधिं द्विज ॥ स पाकमकरोत्तावदहरत्कोऽप्यलक्षितः ॥ १ ॥ तमदृष्ट्वाऽप्यसौ पाकं पुनर्नैवा ऽकरोत्तदा ॥ सायंकालाऽर्चनस्याऽसौ व्रतभंगभयाद्द्विजः ॥ २ ॥ द्वितीयेऽह्नि पुनः पाकं कृत्वा यावत्स विष्णवे ॥ उपहारार्पणं कर्तुं गतः कोऽप्यहरत्पुनः ॥ ३ ॥ एवं सप्तदिनं तस्य पाकं कोऽप्यहरन्नृप ॥ ततः सविस्मयश्चाथ मनस्येवमधारयत् ॥ ४ ॥ अहो नित्यं समभ्येत्य कः पाकं हरते मम ॥ क्षेत्रसंन्यासिनः स्थानं न त्याज्यं मम सर्वथा ॥ ५ ॥

॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥

पुनः पाकं विधायाऽत्र भुज्यते यदि चेन्मया ॥ सायंकालाऽर्चनं चैव परित्याज्यं कथं भवेत् ॥६॥ यदि पाकं विधायैव भोक्तव्यं तु मया न तत्॥
अनिवेद्य हरौ सर्वं वैष्णवैर्नैव भुज्यते ॥ ७ ॥ उपोषितोऽहं सप्ताऽहं तिष्ठाम्यत्र व्रतस्थितः ॥ अद्य संरक्षणं सम्यक्पाकस्याऽत्र करोम्यहम् ॥ ८ ॥
इति पाकं विधायाऽसौ तत्रैवाऽलक्षितः स्थितः ॥ तावद्ददर्श चंडालं पाकान्नहरणे स्थितम् ॥९॥ क्षुत्क्षामं दीनवदनमस्थिचर्माऽवशेषितम् ॥
तमालोक्य द्विजाग्र्योऽभूत्कृपयाऽन्वितमानसः ॥१०॥ विलोक्याऽन्नहरं विप्रस्तिष्ठतिष्ठेत्यभाषत ॥ कथमश्नासि तद्रूक्षं घृतमेतद्गृहाण भोः ॥११॥
इत्थं वदंतं विप्राग्र्यमायांतं स विलोक्य च ॥ वेगाद्धावत्तद्भीत्या मूर्च्छितश्च पपात ह ॥१२॥ भीतं संमूर्च्छितं दृष्ट्वा चंडालं स द्विजाग्रणीः ॥
वेगादभ्येत्य कृपया स्ववस्त्रांतैरवीजयत् ॥ १३ ॥ अथोत्थितं तमेवासौ विष्णुदासो व्यलोकयत् ॥ साक्षान्नारायणं देवं शंखचक्रगदाधरम् ॥
॥ १४ ॥ तं दृष्ट्वा सात्त्विकैर्भावैरावृतो द्विजसत्तमः ॥ स्तोतुं चैव नमस्कर्तुं तदा नाऽलं बभूव सः ॥ १५ ॥ अथ शक्रादयो देवास्तत्रैवाभ्याय
युस्तदा ॥ गंधर्वाप्सरसश्चाऽपि जगुश्च ननृतुर्मुदा ॥ १६ ॥ विमानशतसंकीर्णं देवर्षिशतसंकुलम् ॥ गीतवादित्रनिर्घोषं स्थानं तदभवत्तदा ॥
॥ १७ ॥ ततो विष्णुः समालिंग्य स्वभक्तं सात्त्विकव्रतम् ॥ सारूप्यमात्मनो दत्त्वाऽनयद्वैकुण्ठमंदिरम् ॥ १८ ॥ विमानवरसंस्थं तं गच्छंतं
विष्णुसन्निधिम् ॥ दीक्षितश्चोलनृपतिर्विष्णुदासं ददर्श सः ॥ १९ ॥ वैकुण्ठभुवनं यांतं विष्णुदासं विलोक्य सः ॥ स्वगुरुं मुद्गलं वेगादाहूयेत्थं
वचोऽब्रवीत् ॥ २० ॥ ॥ चोल उवाच ॥ ॥ यत्स्पर्द्धया मया चैव यज्ञदानादिकं कृतम् ॥ स विष्णुरूपधृग्विप्रो याति वैकुण्ठमंदिरम् ॥
॥ २१ ॥ दीक्षितेन मया सम्यक्सत्रेऽस्मिन्वैष्णवे त्वया ॥ हुतमग्नौ कृता विप्रा दानाद्यैः पूर्णमानसाः ॥ २२ ॥ नैवाऽद्यापि स मे देवः प्रसन्नो
जायते ध्रुवम् ॥ विष्णुदासस्य भक्त्यैव साक्षात्कारं ददौ हरिः ॥ २३ ॥ तस्माद्दानैश्च यज्ञैश्च नैव विष्णुः प्रसीदति ॥ भक्तिरेव परं तस्य निदानं
दर्शने विभोः ॥ २४ ॥ ॥ गणावूचतुः ॥ ॥ इत्युक्त्वा भागिनेयं स्वमभ्यषिंचन्नृपासने ॥ आबाल्याद्दीक्षितो यज्ञे ह्यपुत्रत्वमगाद्यतः ॥ २५ ॥
तस्मादद्याऽपि तद्देशे सदा राज्यांऽशभागिनः ॥ स्वस्रेया एव जायंते तत्कृतावधिवर्तिनः ॥ २६ ॥

॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥

CC-0. In Public Domain. Digitization by eGangotri

॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ इति कार्तिकमासमाहात्म्यटीकायां सप्तविंशोऽध्यायः ॥ २७ ॥ छ ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥

यज्ञवाटं ततोऽभ्येत्य यज्ञकुण्डाग्रतः स्थितः ॥ त्रिरुच्चैर्व्याजहाराऽऽशु विष्णुं संबोधयंस्तदा ॥ २७ ॥ विष्णो भक्तिं स्थिरां देहि मनोवाक्काय कर्मभिः ॥ इत्युक्त्वा सोऽपतद्वह्नौ सर्वेषामेव पश्यताम् ॥ २८ ॥ मुद्गलस्तु तदा क्रोधाच्छिखामुत्पाटयत्स्वकाम् ॥ ततस्त्वद्यापि तद्गोत्रे मुद्गला विशिखा बभुः ॥ २९ ॥ तावदाविरभूद्विष्णुः कुण्डाग्नौ भक्तवत्सलः ॥ तमालिंग्य विमानाग्र्यं समारोहयदच्युतः ॥ ३० ॥ तमालिंग्या ऽऽत्मसारूप्यं दत्त्वा वैकुण्ठमंदिरम् ॥ तेनैव सह देवेशो जगाम त्रिदशैर्वृतः ॥ ३१ ॥ ॥ नारद उवाच ॥ ॥ यो विष्णुदासः स तु पुण्य शीलो यश्चोलभूपः स सुशीलनामा ॥ एतावुभौ तत्समरूपभाजौ द्वाःस्थौ कृतौ तेन रमाप्रियेण ॥ ३२ ॥ इति श्रीस्कांदे महापुराण एका शीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे कार्तिकमासमाहात्म्ये चोलविष्णुदासमुक्तिकथनंनाम सप्तविंशोऽध्यायः ॥ २७ ॥ ॥ छ ॥
॥ ॥ धर्मदत्त उवाच ॥ ॥ जयश्च विजयश्चैव विष्णोर्द्वाःस्थौ श्रुतौ मया ॥ किं नु ताभ्यां पुरा चीर्णं तस्मात्तद्रूपधारिणौ ॥ १ ॥ ॥ ॥ गणावूचतुः ॥ ॥ तृणबिंदोस्तु कन्यायां देवहूत्यां पुरा द्विज ॥ कर्दमस्य तु दृष्ट्यैव पुत्रौ द्वौ संबभूवतुः ॥ २ ॥ ज्येष्ठो जयः कनिष्ठोऽभूद्विजयश्चैव नामतः ॥ तस्यामेवाऽभवत्पश्चात्कपिलो योगधर्मवित् ॥ ३ ॥ जयश्च विजयश्चैव विष्णुभक्तिरतौ सदा ॥ तौ तन्निष्ठे न्द्रियग्रामौ धर्मशीलौ बभूवतुः ॥ ४ ॥ नित्यमष्टाक्षरीजाप्यौ विष्णुव्रतकरावुभौ ॥ साक्षात्कारं ददौ विष्णुस्तयोर्नित्यार्चने सदा ॥ ५ ॥ मरुत्तेन कदाचित्तावाहूतौ यज्ञकर्मणि ॥ जग्मतुर्यज्ञकुशलौ देवर्षिगणपूजितौ ॥ ६ ॥ जयस्तत्राभवद्ब्रह्मा याजको विजयोऽभवत ॥ ततो यज्ञ विधिं कृत्स्नं परिपूर्णं च चक्रतुः ॥ ७ ॥ मरुत्तोऽवभृथस्नातस्ताभ्यां वित्तं ददौ बहु ॥ तत्समादाय तौ वित्तं जग्मतुः स्वाश्रमं प्रति ॥ ८ ॥ यज नाय पृथग्विष्णोस्तुष्ट्यर्थं तौ ततो मुनी ॥ तद्धनं विभजंतौ तु पस्पर्धाते परस्परम् ॥ ९ ॥ जयोऽब्रवीत्समो भागः क्रियतामिति तत्र सः ॥ विजयश्चाब्रवीन्नैतद्यल्लब्धं येन तस्य तत् ॥ १० ॥ ततोऽशपज्जयः क्रोधाद्विजयं लुब्धमानसम् ॥ गृहीत्वा न ददास्येतत्तस्माद्ग्राहो भवेति तम् ॥ ॥ ११ ॥ विजयस्तस्य तं शापं श्रुत्वा सोऽप्यशपच्च तम् ॥ मदभ्रांतोऽशपस्त्वं मां तस्मान्मातंगतां व्रज ॥ १२ ॥

॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ आरनालं कांजिकाम् ॥ २६ ॥

तत्तदाचख्यतुर्विष्णुं दृष्ट्वा नित्यार्चने विभुम् ॥ शापयोश्च निर्वृत्तिं तौ ययाचाते रमापतिम् ॥ १३ ॥ ॥ जयविजयावूचतुः ॥ ॥ भक्तावावां कथं देव ग्राहमातंगयोनिगौ ॥ भविष्यावः कृपासिंधो तच्छापो विनिवर्त्यताम् ॥ १४ ॥ ॥ श्रीभगवानुवाच ॥ ॥ मद्भक्तयोर्वचोऽसत्यं न कदाचिद्भविष्यति ॥ मयाऽपि नान्यथा कर्तुं शक्यते तत्कदाचन ॥ १५ ॥ प्रह्लादवचसा स्तंभेऽप्याविर्भूतो ह्यहं पुरा ॥ तथांऽबरीषवाक्येन जातो गर्भे स्वयं किल ॥ १६ ॥ तस्माद्युवामिमौ शापावनुभूय स्वयंकृतौ ॥ लभेथां मत्पदं नित्यमित्युक्त्वांऽतर्दधे हरिः ॥ १७ ॥ ॥ ॥ गणावूचतुः ॥ ॥ ततस्तौ ग्राहमातंगावभूतां गंडकीतटे ॥ जातिस्मरौ तु तद्योन्यामपि विष्णुव्रते स्थितौ ॥ १८ ॥ कदाचित्स गजः स्नातुं कार्तिके गंडकीं गतः ॥ तावज्जग्राह तं ग्राहः संस्मरञ्छापकारणम् ॥ १९ ॥ ग्राहग्रस्तो ह्यसौ नागः सस्मार श्रीपतिं तदा ॥ तावदाविरभूद्विष्णुश्चक्रशंखगदाधरः ॥ २० ॥ ततस्तौ ग्राहमातंगौ चक्रं क्षिप्त्वा समुद्धृतौ ॥ दत्त्वैव निजसारूप्यं वैकुण्ठमनयद्विभुः ॥ २१ ॥ ततःप्रभृति तत्स्थानं हरिक्षेत्रमितिस्मृतम् ॥ चक्रसंघर्षणाद्यस्मिन्ग्रावाणोऽपि हि लांछिताः ॥ २२ ॥ तावुभौ विश्रुतौ लोके जयश्च विजयस्तथा ॥ नित्यं विष्णुप्रियौ द्वाःस्थौ पृष्टौ यौ हि त्वया द्विज ॥ २३ ॥ अतस्त्वमपि धर्मज्ञ नित्यं विष्णुव्रते स्थितः ॥ त्यक्तमात्सर्यदंभोऽपि भवस्व समदर्शनः ॥ ॥ २४ ॥ तुलामकरमेषेषु प्रातःस्नायी सदा भव ॥ एकादशीव्रते तिष्ठ तुलसीवनपालकः ॥ २५ ॥ ब्राह्मणानथ गाश्चाऽपि वैष्णवांश्च सदा भज ॥ मसूरिकामारनालं वृंताकान्यपि खाद मा ॥ २६ ॥ एवं त्वमपि देहांते तद्विष्णोः परमं पदम् ॥ प्राप्नोषि धर्मदत्त त्वं तद्भक्त्यैव यथा वयम् ॥ २७ ॥ तावज्जन्म व्रतादस्माद्विष्णुसंतुष्टिकारकात् ॥ न यज्ञा न च दानानि न तीर्थान्यधिकानि वै ॥ २८ ॥ धन्योऽसि विप्राग्र्य यतस्त्वयैतद्व्रतं कृतं तुष्टिकरं जगद्गुरोः ॥ यदर्धभागाऽऽप्तफला मुरारेः प्रणीयतेऽस्माभिरियं सलोकताम् ॥ २९ ॥ ॥ नारद उवाच ॥ ॥ इत्थं तौ धर्मदत्तं तमुपदिश्य विमानगौ ॥ तया कलहया सार्द्धं वैकुण्ठभवनं गतौ ॥ ३० ॥ धर्मदत्तो ह्यसौ जातप्रत्ययस्तद्व्रते स्थितः ॥ देहांऽते तद्विभोः स्थानं भार्याभ्यां संयुतोऽभ्ययात् ॥ ३१ ॥

प्राप्नोषि प्राप्स्यसि वर्तमानसामीप्ये लट् ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥

CC-0. In Public Domain. Digitization by eGangotri

॥ ३२ ॥ इति कार्तिकमासमाहात्म्यटीकायामष्टाविंशोऽध्यायः ॥ २८ ॥ छ ॥ १ ॥ अथ संसर्गेण पुण्यप्राप्तिर्भवतीति तामितिहासेन प्रकटीकरोति—पुरेति ॥ २ ॥

इतिहासमिमं पुराभवं शृणुते श्रावयते च यः पुमान् ॥ हरिसन्निधिकारणीं मतिं लभतेऽसौ कृपया जगद्गुरोः ॥ ३२ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे कार्तिकमासमाहात्म्ये धर्मदत्तमोक्षप्राप्तिकथनंनामाऽष्टाविंशोऽध्यायः ॥ २८ ॥ छ ॥ ॥ ॥ श्रीकृष्ण उवाच ॥ इति तद्वचनं श्रुत्वा पृथुर्विस्मितमानसः ॥ संपूज्य नारदं सम्यग्विससर्ज तदा प्रिये ॥१॥ पुराऽवंतीपुरे कश्चिद्विप्र आसी द्धनेश्वरः ॥ ब्रह्मकर्मपरिभ्रष्टः पापकर्मा सुदुर्मतिः ॥२॥ देशाद्देशांतरं गच्छन्क्रयविक्रयकारणात् ॥ माहिष्मतीं पुरीमागात्कदाचित्स धनेश्वरः॥३॥ महिषेण कृता पूर्वं तस्मान्माहिष्मतीति सा ॥ यस्या वप्रगता भाति नर्मदा पापनाशिनी ॥ ४ ॥ कार्तिकव्रतिनस्तत्र नानादेशाऽऽगतान्नरान् ॥ स दृष्ट्वा विक्रयं कुर्वन्मासमेकमुवास सः ॥ ५ ॥ स नित्यं नर्मदातीरे भ्रमन्विक्रयकारणात् ॥ ददर्श ब्राह्मणान्स्नानजपदेवार्चने स्थितान् ॥ ६ ॥ कांश्चित्पुराणं पठतः कांश्चिच्च श्रवणे रतान् ॥ नृत्यगायनवादित्रविष्णुश्रवणतत्परान् ॥७॥ उद्यापनविधौ सक्तान्कांश्चिज्जागरणे रतान् ॥ विप्रगोपूजनरतान्दीपदानरतांस्तथा ॥ ८ ॥ ददर्श कौतुकाविष्टस्तत्रतत्र धनेश्वरः ॥ नित्यं परिभ्रमंस्तत्र दर्शनस्पर्शभाषणात् ॥ ९ ॥ वैष्णवानां तथा विष्णोर्नामश्रावादि सोऽलभत् ॥ एवं मासं स्थितस्तस्या नर्मदायास्तटे द्विजः ॥ १० ॥ तावत्कृष्णाऽहिना दष्टो विह्वलः स पपात ह ॥ अथ देहपरित्यक्तं तं बद्ध्वा यमकिंकराः ॥ ११ ॥ यमाज्ञया कुंभिपाके चिक्षिपुस्तं धनेश्वरम् ॥ यावत्क्षिप्तश्च तत्रासौ तावच्छीतलतां ययौ ॥ ॥ १२ ॥ कुंभीपाको यथा वह्निः प्रह्लादक्षेपणात्पुरा ॥ यमस्तु कौतुकं दृष्ट्वा पप्रच्छानीय तं ततः ॥ १३ ॥ तावदभ्यागतस्तत्र नारदः प्राह सत्व रम् ॥ ॥ नारद उवाच ॥ ॥ नैवाऽयं निरयान्भोक्तुमर्हो ह्यरुणनंदन ॥ १४ ॥ यस्मादंतेऽस्य संजातं कर्म यन्निरयापहम् ॥ यः पुण्यकर्मिणां कुर्याद्दर्शनस्पर्शभाषणम् ॥ १५ ॥ ततः षडंशमाप्नोति पुण्यस्य नियतं नरः ॥ सख्यं तु तैस्तु संसर्गं कृतवान्वै धनेश्वरः ॥ १६ ॥ कार्तिकव्रति भिर्मासं तेषां पुण्यांशभागयम् ॥ १७ ॥ तस्मादकामपुण्यो हि यक्षयोनिस्थितो ह्ययम् ॥ विलोक्य निरयान्सर्वान्पापभोगप्रदर्शकान् ॥ १८ ॥

॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ॥ श्रीकृष्ण उवाच ॥ ॥ इत्युक्त्वा गतवति नारदे स सौरिस्तद्वाक्यश्रवणविबुद्धतत्सुकर्मा ॥ तं विप्रं पुनरनयत्स्वकिंकरेण तान्सर्वान्निरय गणान्प्रदर्शयिष्यन् ॥ १९ ॥ ततो धनेश्वरं नीत्वा निरयान्प्रेतपोऽब्रवीत् ॥ दर्शयिष्यंस्तु तान्सर्वान्यमानुज्ञाकरस्तदा ॥ २० ॥ ॥ प्रेतप उवाच ॥ ॥ पश्येमान्निरयान्घोरान्धनेश्वर महाभयान् ॥ एषु पापकरा नित्यं पच्यंते यमकिंकरैः ॥२१॥ अकामात्पातकं शुष्कं कामादार्द्रमुदा हृतम् ॥ आर्द्रशुष्कादिभिः पापैर्द्विप्रकारानवस्थितान् ॥ २२ ॥ चतुराशीतिसंख्याकैः पृथग्भेदैरवस्थितान् ॥ यत्प्रकीर्णमपांक्तेयं मलिनीकरणं तथा ॥ २३ ॥ जातिभ्रंशकरं तद्वदुपपातकसंज्ञकम् ॥ अतिपापं महापापं सप्तधा पातकं स्मृतम् ॥ २४ ॥ एभिः सप्तसु पच्यंते निरयेषु यथा क्रमम् ॥ कार्तिकव्रतिभिर्यस्मात्संसर्गो ह्यभवत्तव ॥ २५ ॥ तत्पुण्योपचयादेते निर्हृता निरयाः खलु ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ दर्शयित्वेति निरयान्प्रेतपस्तमथाहरत् ॥ २६ ॥ धनेश्वरं यक्षलोकं यक्षश्चाऽभूत्स तत्र हि ॥ धनदस्याऽनुगः सोऽयं धनयक्षेति विश्रुतः ॥ २७ ॥ ॥ सूत उवाच ॥ ॥ इत्युक्त्वा वासुदेवोऽसौ सत्यभामामतिप्रियम् ॥ सायंसंध्याविधिं कर्तुं जगाम जननीगृहम् ॥ २८ ॥ ॥ ब्रह्मोवाच ॥ ॥ एवंप्रभावः खलु कार्तिकोऽयं मुक्तिप्रदो भुक्तिकरश्च यस्मात् ॥ प्रयांत्यनेकार्ऽजितपातकानि व्रतस्य संदर्शयतोऽपि मुक्तिम् ॥ २९ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे कार्तिकमासमाहात्म्ये धनेश्वरयक्षजन्मप्राप्तिवर्णनंनामैकोनत्रिंशो ऽध्यायः ॥ २९ ॥ ॥ छ ॥ ॥ नारद उवाच ॥ ॥ अद्भुतोऽयं त्वया प्रोक्तो महिमा कार्तिकस्य तु ॥ स्वस्य कर्तुमसामर्थ्यं कथमेतत्कृतं भवेत् ॥ १ ॥ ॥ ब्रह्मोवाच ॥ ॥ नास्ति कर्तुं स्वसामर्थ्यमुपायात्प्राप्यते फलम् ॥ द्रव्यं दत्त्वा ब्राह्मणाय गृह्णीयात्फलमुत्तमम् ॥ २ ॥ शिष्याद्वा भृत्यवर्गाद्वा स्त्रीभ्यो वाऽऽप्ताच्च कारयेत् ॥ तस्मादपि फलं गृह्णन्फलभाग्जायते नरः ॥ ३ ॥ ॥ नारद उवाच ॥ ॥ अदत्तान्यपि पुण्यानि प्राप्यंते केनचित्क्वचित् ॥ एतदिच्छाम्यहं श्रोतुं कौतुकं मम वर्तते ॥ ४ ॥ ॥ ब्रह्मोवाच ॥ ॥ अदत्तान्यपि पुण्यानि लभंते पातकान्यपि ॥ येनोपायेन तद्वच्मि शृणुष्वैकमना द्विज ॥ ५ ॥

॥ १ ॥ २ ॥ आप्तान् आप्तवर्गान् ॥ ३ ॥ ४ ॥ ५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

यत् यस्य राष्ट्रे कृतं तत्फलं तस्य राष्ट्रे जायते, पुरो नगरस्य ॥६॥ लिप्यत इति शेषः ॥७॥ कर्मणः फलपाककालमाह—अज्ञानादिति ॥ ८ ॥ अथ पापपुण्ययोर्विभागांश माह—षण्मासमिति ॥९॥१०॥११॥ षष्ठांश इत्यत्र फलार्ध इति वा पाठः ॥ १२ ॥ १३ ॥ वृषं धर्मम् ॥१४॥१५॥१६॥१७॥१८॥१९॥ अत्र प्रसिद्धा कथा सनत्कुमारीये—पुरा वाराणस्यां भरद्वाजकुले कर्मदत्तोनाम द्विजस्तस्य एकदंतोनाम पुत्र आसीत्, स विद्वानपि दैवयोगात्पतिव्रतां स्वां भार्यां त्यक्त्वा वेश्यायामहर्निशमासक्तमनाः

सुकृतं वा दुष्कृतं वा कृतमेकेन यत्कृते ॥ जायते तस्य तद्राष्ट्रे त्रेतायां तु पुरो भवेत् ॥ ६ ॥ द्वापरे वंशमध्ये तु कलौ कर्तैव केवलम् ॥ आज्ञानाद्यत्कृतं कर्म बाल्ये स्वप्ने तु तत्फलम् ॥ ७ ॥ अज्ञानाद्यच्च तारुण्ये बाल्ये तस्य फलं भवेत् ॥ ज्ञानपूर्वं कृतं कर्म आजन्मांतं च तत्फलम् ॥ ८ ॥ षण्मासं पापिसंगेन नरः पापी प्रजायते ॥ पापिनां वा धर्मिणां वा संसर्गाद्दशमासिकम् ॥ ९ ॥ भोजनादेकपंक्तौ च विंशांशः पुण्यपापयोः ॥ एकासने द्वयोर्वासात्सहस्रांशेन लिप्यते ॥ १० ॥ यो वै यस्यान्नमश्नाति स भुंक्ते तस्य किल्बिषम् ॥ जपादौ पापिसंसर्गात्षोडशांऽशो विनश्यति ॥ ११ ॥ परस्य स्तवनाद्यानादेकपात्रस्थभोजनात् ॥ एकशय्याप्रावरणात्षष्ठांशः पुण्यपापयोः ॥ १२ ॥ पुरुषो हरते सर्वं भार्याया औरसस्य च ॥ अर्द्धं शिष्याच्चतुर्थांशं पापं पुण्यं तथैव च ॥ १३ ॥ भर्तुराज्ञाकरी नारी भर्तुरर्द्धं वृषं हरेत् ॥ यद्धस्त पक्कं भुंजीयाद्दशांशं तदघं हरेत् ॥ १४ ॥ वर्षाऽशनं तु यो दत्ते तदर्द्धांवस्य भागयम् ॥ वर्षाशनार्द्धं पुण्यं तु भुंक्ते वर्षाशनी नरः ॥ १५ ॥ पुरोहितस्य षष्ठांशं पापं वा पुण्यमेव वा ॥ यजमानो भुनक्त्येव तद्दशांशं पुरोहितः ॥ १६ ॥ उद्योगी चानुमन्ता च यश्चोपकरणप्रदः ॥ षष्ठांशं पुण्यपापानामुपद्रष्टा दशांशकम् ॥ १७ ॥ यद्धस्तात्कार्यते कर्म नान्नमस्मै प्रयच्छति ॥ विना भृतकशिष्याभ्यां षष्ठांशं पुण्यमाहरेत् ॥ १८ ॥ व्यवहारात्तथा प्रीत्या नित्यं संभाषणादिभिः ॥ दशांशं पुण्यपापानां लभते नात्र संशयः ॥ १९ ॥ संसर्गपुण्ययोगेन एकदन्तो द्विजाधमः ॥ नरकान्विविधान्दृष्ट्वा स्वर्गं प्राप तदैव हि ॥ २० ॥

सन्पितृद्रव्याऽभावे चौर्यकर्माऽकरोत् । एवं दुष्टकर्मणा क्षीणवित्तः देशाद्देशांतरं भ्रमन्कदाचिद्यमुनामागतः । तत्र कार्तिकस्नानार्थमागतान्दानधर्मव्रतपूजाकथाश्रवणपठनरतान्ब्रा ह्मणादीन्पश्यन्मासं निन्ये, ततः कदाचित्सर्पदंशेन मृतः सन्यमलोकं गतः, तत्र तप्तकटाहके कुंभीपाके निक्षिप्तोऽपि शीतलजलह्रदवत्सुखं मेने, तदा यमः कस्य कर्मणा इदं फलमिति विचारयति, तदैव नारद आगत्योवाच—अनेन सज्जनैः सार्द्धं स्नानादिना कालिंद्यां कार्तिको मासो नीतः, तेन संसर्गजनितपुण्येनायं स्वर्गफलमर्हति, तच्छ्रुत्वा यमस्तं नर

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कान्दर्शयित्वा स्वर्गं प्रेषयदिति ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ अथ कामक्रोधलोभानां तनयानाह—गुरुतल्पादय इति ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥

॥ ॥ नारद उवाच ॥ ॥ ईदृशं कार्तिकव्रतमल्पायासं महत्फलम् ॥ न कुर्वंति जनाः केचित्किमर्थं वै पितामह ॥ २१ ॥ ॥ ब्रह्मोवाच ॥ ॥ स्वसृष्टिवृद्धये वेधा धर्माऽधर्मौ ससर्ज ह ॥ धर्ममेवाऽनुतिष्ठंतः प्राप्नुवंति शुभां गतिम् ॥ २२ ॥ अधर्ममनुतिष्ठंतो यांति तेऽधोगतिं नराः ॥ पुण्य कर्मफलं नाको नरकस्तद्विपर्ययः ॥ २३ ॥ तयोः पालनकर्तारौ द्वावेव विधिना कृतौ ॥ शतक्रतुयमौ तौ च पुण्यपापानुसारिणौ ॥ २४ ॥ गुरुतल्पादयः पुत्राः कामस्य प्रथिता भुवि ॥ क्रोधस्य पितृघाताद्या लोभस्य तनयाञ्छृणु ॥ २५ ॥ ब्रह्मस्वहरणाद्याश्च एते नरकनायकाः ॥ कृता यमेन तैर्व्याप्ता मनुजा न हि कुर्वते ॥ २६ ॥ व्रतादिधर्मकृत्यं यैस्तैर्मुक्तास्ते हि कुर्वते ॥ २७ ॥ श्रद्धा मेधा विघातिन्यौ वर्तेते भुवि सर्वदा ॥ ताभ्यां व्याप्तस्तु मनुजः श्रीविष्णोः श्रवणादिकम् ॥ २८ ॥ न करोति सुदुर्मेधा येनांधं याति वै तमः ॥ कृष्णेन सत्यभामायै यदुक्तं तद्वदामि ते ॥ २९ ॥ अध्यापनाद्याजनाद्वाऽप्येकपंक्त्यशनादपि ॥ तुर्यांश पुण्यपापानां परोक्षं लभते नरः ॥ ३० ॥ एकासनादेक यानान्निश्वासस्यांगसंगतः ॥ षडंशं फलभागी स्यान्नियतं पुण्यपापयोः ॥ ३१ ॥ स्पर्शनाद्भाषणाद्वाऽपि परस्य स्तवनादपि ॥ दशांशं पुण्य पापानां नित्यं प्राप्नोति मानवः ॥ ३२ ॥ दर्शनश्रवणाभ्यां च मनोध्यानात्तथैव च ॥ परस्य पुण्यपापानां शतांशं प्राप्नुयान्नरः ॥ ३३ ॥ परस्य निंदां पैशुन्यं धिक्कारं च करोति यः ॥ तत्कृतं पातकं प्राप्य स्वपुण्यं प्रददाति सः ॥ ३४ ॥ कुर्वंतः पुण्यकर्माणि सेवां यः कुरुते नरः ॥ पत्नीभृतकशिष्येभ्यो यदन्यः कोऽपि मानवः ॥ ३५ ॥ तस्य सेवाऽनुरूपं च द्रव्यं किंचिन्न दीयते ॥ सोऽपि सेवानुरूपेण तत्पुण्यफलभाग्भवेत् ॥ ३६ ॥ एकपंक्तिस्थितं यस्तु लंघयेत्परिवेषणम् ॥ तत्पुण्यस्य षडंशं च लभेद्यस्तु विलंघितः ॥ ३७ ॥ स्नानसंध्यादिकं कुर्वन्यः स्पृशेद्वाऽथ भाषते ॥ स कर्मपुण्यषष्ठांशं दद्यात्तस्मै विनिश्चितम् ॥ ३८ ॥ धर्मोद्देशेन यो द्रव्यमपरं याचते नरः ॥ तत्पुण्यकर्मजं तस्य धनदस्त्वाप्नुयात्फलम् ॥ ३९ ॥ अपहृत्य परद्रव्यं पुण्यकर्म करोति यः ॥ कर्मकृत्पापभाक्तत्र धनिनस्तद्भवं फलम् ॥ ४० ॥ नापकृत्य ऋणं यस्तु परस्य म्रियते नरः ॥ धनी तत्पुण्यमादत्ते तद्धनस्याऽनुरूपतः ॥ ४१ ॥ बुद्धिदाताऽनुमन्ता च यश्चोपकरणप्रदः ॥ बलकृच्चापि षष्ठांशं प्राप्नुयात्पुण्य पापयोः ॥ ४२ ॥ प्रजाभ्यः पुण्यपापानां राजा षष्ठांशमुद्धरेत् ॥ शिष्याद्गुरुः स्त्रियो भर्ता पिता पुत्रात्तथैव च ॥ ४३ ॥

मतांतरमाह—कृष्णेनेति ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥ ४२ ॥ ४३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वपतेरपि पुण्यस्य योषिदर्धमवाप्नुयात् ॥ चित्तस्याऽनुव्रता शश्वद्वर्तते तुष्टिकारिणी ॥ ४४ ॥ परहस्तेन दानादि कुर्वतः पुण्यकर्मणः ॥ विना भृतकपुत्राभ्यां कर्ता षष्ठांशमुद्धरेत् ॥४५॥ वृत्तिदो वृत्तिसंभोक्तुः पुण्यं षष्ठांशमुद्धरेत् ॥ आत्मनो वा परस्याऽपि यदि सेवां न कारयेत् ॥ ॥ ४६ ॥ इत्थं ह्यदत्तान्यपि पुण्यपापान्यायांति नित्यं परसंचितानि ॥ कलौ त्वयं वै नियमो न कार्यः कर्तैव भोक्ता खलु पुण्यपापयोः ॥ ॥ ४७ ॥ कलौ ज्ञानं दृढं नास्ति कलौ गर्वेण सत्क्रिया ॥ कलौ दम्भाऽन्वितो योगो नश्यत्येव न संशयः ॥४८॥ तपोनिष्ठः पुरा दम्भी सती शुद्धप्रभावतः ॥ पित्रोः पूजादर्शनेन चोर्जसेवी परं गतः ॥ ४९ ॥

॥४४॥ ४५ ॥ ४६ ॥ ४७ ॥ ४८ ॥ तपोनिष्ठ इति । अत्र प्रसिद्धा कथा ब्राह्मे—त्रेतायुगे तपोनिष्ठनामा ब्राह्मणः दंभी द्वन्द्वसहश्चासीत्, एकदा भिक्षार्थं सञ्चरतस्तस्य बलाका व्योम्नि गच्छंती "पुरीषं पातयामास तस्य पात्रेऽन्नमध्यतः ॥ वियन्मार्गात्पपाताऽथ बलाका तेन वीक्षिता ॥ कोपदृष्ट्या बलाकी सा गतप्राणाऽभवत्क्षणात् ॥ तदालोक्य प्रदुष्टोऽसौ स्वप्रभावेन गर्वितः ॥ स एकदा चरन्भिक्षां जगामैकं निवेशनम् ॥ पतिव्रतायाः कस्याश्चिद्भिक्षां देहीति चाऽब्रवीत् ॥ सा तापसं समालोक्य भर्तुः शुश्रूषणे रता ॥ भिक्षार्थं नांतरं लेभे नित्यकर्मक्रियाकुला ॥ भोजयामास भर्तारं विनीता तत्प्रियैषिणी ॥ वस्त्रांतरेण सा चक्रे क्षुद्रजंतुनिवारणम् ॥ स तापसोऽपि क्रोधेन तस्थौ स्थाणुरिवाऽचलः ॥ साऽपि तं भोजयित्वाऽथ कृतशौचं निजं पतिम् ॥ शय्यासमाश्रितं दृष्ट्वा व्यधात्पादाऽनुमार्जनम् ॥ पादसंवाहनं वाक्यं साऽनुकूलं प्रियं हितम् ॥ प्रेमभावेन सम्बन्धमुवाच प्रहसन्मुखी ॥ ततो निद्रामुपगते सा भर्तारि निजे सती ॥ देवी चान्नस्य पात्रं वै गृहीत्वा निर्ययौ बहिः ॥ तापसोऽदित्सतीं भिक्षां निरीक्ष्य कुपितेक्षणः ॥ हुंकारोच्चारणं कृत्वा न जग्राह तदर्पितम् ॥ तदा तमाह सा साध्वी स्वपदन्यस्तलोचना ॥ ॥ पतिव्रतोवाच ॥ ॥ नाऽहं बलाका या दग्धा त्वया रम्या सुतापस ॥ न भविष्यति तेऽभीष्टं मनसोऽन्नं प्रगृह्यताम् ॥ ॥ ब्रह्मोवाच ॥ ॥ ततः सुविस्मितो विप्रो भिक्षापात्रं विहाय तत् ॥ रोमांचितांगो वचनमाह बद्धांजलिः सतीम् ॥ ॥ तापस उवाच ॥ ॥ बलाकां पततीमद्य वियन्मार्गान्निपातिताम् ॥ मातः कथं नु जानीषे तन्ममाचक्ष्व कारणम् ॥ ॥ पतिव्रतोवाच ॥ ॥ न मंत्रादिकृतो विप्र न च नैसर्गिको मम ॥ प्रभाव एष सामान्यो यस्ययस्याऽच्युतो हृदि ॥ अग्नौ क्रियावतां विष्णुः पुत्राणां पितरौ हरिः ॥ स्त्रीणां भर्तृषु संस्थो हि आचार्ये पाठशालिनाम् ॥ ब्राह्मणे सर्ववर्णानां विष्णुरुक्तो मनीषिभिः ॥ प्रतिमास्वल्पबुद्धीनां योगिनां हृदये हरिः ॥ सोऽयं पुराणपुरुषः प्रत्यक्षं दैवतं मम ॥ पिता माता गुरुर्गोप्ता बांधवाः सुहृदात्मभूः ॥ सर्वः सर्वमयो भूमौ ब्रह्मन्भर्तरि मे स्फुटम् ॥ तस्य शुश्रूषया ज्ञानमिदं लोकद्वयं च मे ॥ नारी भर्तृवशा चाऽहमसंभाष्येतरा द्विज ॥ नाधिकार

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्त्वया वक्तुमेतावदपि सांप्रतम् ॥ प्रसंगादेतदुदितं तन्मे विष्णुः प्रसीदतु ॥ शुश्रूषा यदि ते धर्मं प्रति संप्रवि तापस ॥ गत्वा वाराणसीं पृच्छ मांसविक्रयकारिणम् ॥ सूनागारस्थितं व्याधं स ते धर्मं प्रवक्ष्यति ॥" इति एवावदुक्त्वा सा अंतर्गृहं गता तापसोऽपि वाराणसीं गत्वा व्याधगृहं गतवान्, "समालोक्य तमायांतं तापसं सोऽभ्यधावत ॥ व्याध आगत्य तं विप्रं नमश्चक्रे विनीतवत् ॥ निनाय स्वगृहं पश्चात्संपूज्य विधिवच्च तम् ॥ प्रोवाच प्रहिता यूयं सत्या मम गृहेऽधुना ॥ ॥ ब्रह्मोवाच ॥ ॥ तस्य वाक्यमथाऽऽकर्ण्य विस्मितोऽतीव तापसः ॥ प्रोवाच जानासि कथं धर्मव्याध पतिव्रताम् ॥ ॥ धर्मव्याध उवाच ॥ ॥ न मन्त्रादिकृतः सोऽयं न च नैसर्गिको मम ॥ प्रभावोऽयं नमस्यामि पितरौ तन्ममेदृशः ॥ ज्ञानमप्रतिमं सम्यक्त्रैकालिकमविप्लुवम् ॥ तथा धर्मरहस्यं च जानामि पितृसेवया॥" इति । इत्युक्त्वा उपदेशमिच्छंतं तापसं पुनरुवाच ॥ "वर्णानामुत्तमो विप्रः सर्ववर्णैरभिष्टुतः ॥ तस्मान्नैवोपदेष्टव्या अधमैः कर्हिचिद्द्विज ॥ तस्मात्त्वं गच्छ भो विप्र बिन्दुनामकऋषिं प्रति ॥ ज्ञानवान्धर्मशीलश्च स ते

॥ ॥ नारद उवाच ॥ ॥ भगवञ्छ्रोतुमिच्छामि व्रतानामुत्तमं व्रतम् ॥ विधिं मासोपवासस्य फलं चाऽस्य यथोचितम् ॥ ५० ॥ ॥ ॥ ब्रह्मोवाच ॥ ॥ साधु नारद सर्वं ते यत्पृष्टं प्रब्रुवेऽनघ ॥ भक्त्या मतिमतां श्रेष्ठ शृणुष्व गदतो मम ॥ ५१ ॥ सुराणां च यथा विष्णुस्तपतां च यथा रविः ॥ मेरुः शिखरिणां यद्वद्वैनतेयश्च पक्षिणाम् ॥ ५२ ॥ श्रेष्ठं सर्वव्रतानां तु तद्वन्मासोपवासनम् ॥ सर्वव्रतेषु यत्पुण्यं सर्वतीर्थेषु चैव हि ॥ ५३ ॥ सर्वदानोद्भवं चैव यज्ञैश्च भूरिदक्षिणैः ॥ न तत्पुण्यमवाप्नोति यन्मासपरिलंघनात् ॥ ५४ ॥ गुरोराज्ञां ततो लब्ध्वा कुर्यान्मासोपवासनम् ॥ अतिकृच्छ्रं च पाराकं कृत्वा चांद्रायणं ततः ॥ ५५ ॥ मासोपवासं कुर्वीत ज्ञात्वा देहबलाऽबलम् ॥ वानप्रस्थो यतिर्वापि नारी वा विधवा मुने ॥ ५६ ॥ मासोपवासं कुर्वीत गुरोर्विप्राज्ञया ततः ॥ आश्विनस्याऽमले पक्षे एकादश्यामुपोषितः ॥ ५७ ॥ व्रतमेतत्तु गृह्णीयाद्यावत्त्रिंशद्दिनानि तु ॥ अच्युतस्याऽऽलये भक्त्या त्रिकालं पूजयेद्धरिम् ॥ ५८ ॥

ज्ञानं प्रदास्यति ॥ इत्याकर्ण्य वचस्तस्य नमस्कृत्वा निमंत्र्य च ॥ ययौ पंचनदं तीर्थं मुनींद्रं प्रत्यभाषत ॥ ॥ तापस उवाच ॥ ॥ मया क्रोधेन विप्रर्षे ध्वंसितं पूर्वसंचितम् ॥ इदानीं कृपया ब्रूहि येन मोक्षमवाप्नुयाम् ॥ ॥ बिंदुऋषिरुवाच ॥ ॥ सर्वेषामेव धर्माणां कार्तिकः प्रवरः स्मृतः ॥" तथा हे तापस प्राणिनां पापानि सर्वतीर्थानि हरंति, सर्वतीर्थानां पातकं मकरेऽर्के प्रयागराजो हरति, प्रयागराजपापं कार्तिके पंचनदं तीर्थं हरति, तस्मात्त्वं पंचनदं गत्वा कार्तिकव्रतं कुरु, तच्छ्रुत्वा तापसस्तत्र गत्वा सविधि व्रतं कृत्वा विमानेन विष्णुलोकं ययाविति ॥ ४९ ॥ अथ मासोपवासव्रतविधानप्रसंगमाह—नारद उवाचेत्यादिना यावत्समाप्ति ॥ ५० ॥ ५१ ॥ ५२ ॥ ॥ ५३ ॥ ५४ ॥ ५५ ॥ ५६ ॥ ५७ ॥ ५८ ॥

Nepal Sanskrit University, Balmeeki Campus

CC-0. In Public Domain. Digitization by eGangotri

॥ ५९ ॥ ६० ॥ अन्यस्य ग्रासं वर्जयेत् परान्नं वर्जयेदित्यर्थः । ग्रासानां संप्रमोक्षणं यथाशक्ति अन्नदानं कुर्यादिति शेषः ॥ ६१ ॥ ६२ ॥ ६३ ॥ ६४ ॥६५॥

नैवेद्यधूपदीपाद्यैः पुष्पैर्नानाविधैरपि ॥ मनसा कर्मणा वाचा पूजयेद्गरुडध्वजम् ॥ ५९ ॥ नरः स्वधर्मनिरतः सधवा च जितेन्द्रिया ॥ नारी वा विधवा साध्वी वासुदेवं समर्चयेत् ॥ ६० ॥ वस्त्वालोकनगन्धादिस्वादितं परिकीर्तितम् ॥ अन्यस्य वर्जयेद्ग्रासं ग्रासानां संप्रमोक्षणम् ॥६१॥ गात्राभ्यंगं शिरोभ्यंगं तांबूलं सविलेपनम् ॥ व्रतस्थो वर्जयेत्सर्वं यच्चाऽन्यच्च निराकृतम् ॥ ६२ ॥ न व्रतस्थः स्पृशेत्कंचिद्विकर्मस्थं न चालपेत् ॥ देवतायतने तिष्ठन्गृहस्थश्चाऽऽचरेद्व्रतम् ॥६३॥ कृत्वा मासोपवासं तु यथोक्तविधिना नरः ॥ अन्यूनाधिकमेवं तु व्रतं त्रिंशद्दिनैरिति ॥ ॥ ६४ ॥ ततोऽर्चयेदेव पुण्यं द्वादश्यां गरुडध्वजम् ॥ वस्त्रदानादिभिश्चैव भोजयित्वा द्विजोत्तमान् ॥६५॥ दद्याच्च दक्षिणां तेभ्यः प्रणिपत्य क्षमापयेत् ॥ विप्रान्क्षमापयित्वा तु विसृज्याऽभ्यर्च्य पूज्य च ॥ ६६ ॥ एवं मासोपवासांते वृत्वा विप्रांस्त्रयोदश ॥ कारयेद्वैष्णवं यज्ञमेकादश्यामुपोषितः ॥ ६७ ॥ ततोऽनुभोजयेद्विप्रान्नमस्कारपुरःसरम् ॥ तांबूलवस्त्रयुग्मानि भोजनाऽऽच्छादनानि च ॥ ६८ ॥ योगपट्टानि सूत्राणि शय्यां सोपस्करां तथा ॥ दत्त्वा चैव द्विजाग्र्येभ्यः पूजयित्वा विसर्जयेत् ॥ ६९ ॥ विधिर्मासोपवासस्य यथावत्परिकीर्तितः ॥ अतःपरं प्रवक्ष्यामि नवम्यादितिथौ विधि ॥ ७० ॥ ऋषिभ्यो वालखिल्यैश्च प्रोक्तं तं शृणु नारद ॥ ७१ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे कार्तिकमासमाहात्म्ये दत्तपुण्यपापफलप्राप्तिवर्णनपूर्बकमासोपवासव्रतविधिकथनंनाम त्रिंशोऽध्यायः ॥ ३० ॥

॥ वालखिल्या ऊचुः ॥ ॥ कार्तिके शुक्लनवमी तत्राऽभूद्द्वापरं युगम् ॥ पूर्वाऽपराह्णगा ग्राह्या क्रमाद्दानोपवासयोः ॥ १ ॥ अत्र कूष्मांडकोनाम हतो दैत्यस्तु विष्णुना ॥ तद्रोमभिः समुद्भूता वल्लयः कूष्मांडसंभवाः ॥ २ ॥ तस्मात्कूष्मांडदानेन फलमाप्नोति निश्चितम् ॥ अस्यामेव नवम्यां तु कुर्यात्कृष्णोत्सवं नरः ॥ ३ ॥ स्वशाखोक्तेन विधिना तुलस्याः करपीडनम् ॥ कन्यादानफलं तस्य जायते नात्र संशयः ॥ ४ ॥ कार्तिके शुक्लनवमीमवाप्य विजितेंद्रियः॥ हरिं विधाय सौवर्णं तुलस्या सहितं शुभम् ॥ ५॥ पूजयेद्विधिवद्भक्त्या व्रती तत्र दिनत्रयम् ॥ एवं यथोक्तविधिना कुर्याद्वैवाहिकं विधिम् ॥ ६ ॥ ग्राह्यं त्रिरात्रमत्रैव नवम्याद्यनुरोधतः ॥ मध्याह्नव्यापिनी ग्राह्या नवमी पूर्ववेधिता ॥ ७ ॥

॥ ६६ ॥ ६७ ॥ ६८ ॥ ६९ ॥ ७० ॥ ७१ ॥ इति कार्तिकमासमाहात्म्यटीकायां त्रिंशोऽध्यायः ॥ ३० ॥ छ ॥ अथ कूष्मांडनवमीविधानं तुलसीविवाहविधानं चाह– कार्तिक इति ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ उत्थापयेदित्यत्र "उत्तिष्ठोत्तिष्ठ गोविंद" इति वक्ष्यमाणमंत्रेणोत्थापयेदिति ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥

धात्र्यश्वत्थौ य एकत्र पालयित्वा समुद्वहेत्॥ न नश्यते तस्य पुण्यं कल्पकोटिशतैरपि ॥८॥ कनकस्य सुता पूर्वमेकादश्यां किशोरिका ॥ चकार भक्तितः सायं तुलस्युद्वाहजं विधिम्॥९॥ तेन वैधव्यदोषेण निर्मुक्ताऽऽसीत्सुलोचना॥तस्मात्सायं प्रकर्तव्यस्तुलस्युद्वाहजो विधिः ॥१०॥ अवश्यमेव कर्तव्यः प्रतिवर्षं तु वैष्णवैः॥ विधिं तस्य प्रवक्ष्यामि यथा सांगा क्रिया भवेत्॥११॥ विष्णोस्तु प्रतिमां कुर्यात्पलस्य स्वर्णजां शुभाम्॥ तदर्द्धार्द्धं तदर्द्धार्द्धं यथाशक्त्या प्रकल्पयेत् ॥ १२ ॥ प्राणप्रतिष्ठां कृत्वैव तुलसीविष्णुरूपयोः ॥ तत उत्थापयेद्देवं पूर्वोक्तैश्च स्तवादिभिः ॥१३॥ उपचारैः षोडशभिः पूजयेत्पुरुषोक्तिभिः ॥ देशकालौ ततः स्मृत्वा गणेशं तत्र पूजयेत् ॥ १४ ॥ पुण्याहं वाचयित्वाथ नांदीश्राद्धं समाचरेत् ॥ वेदवाद्यादिनिर्घोषैर्विष्णुमूर्तिं समानयेत् ॥ १५ ॥ तुलसीनिकटे सा तु स्थाप्या चांऽतर्हिता पटैः ॥ आगच्छ भगवन्देव अर्चयिष्यामि केशव ॥ ॥१६॥ तुभ्यं दास्यामि तुलसीं सर्वकामप्रदो भव॥ दद्यात्त्रिवारमर्घ्यं च पाद्यं विष्टरमेव च॥१७॥ तत आचमनीयं च त्रिरुक्त्वा च प्रदापयेत्॥ ततो दधि घृतं क्षीरं कांस्यपात्रपुटीकृतम् ॥ १८ ॥ मधुपर्कं गृहाण त्वं वासुदेव नमोस्तु ते॥ हरिद्रालेपानाभ्यंगकार्यं सर्वं विधाय च ॥ १९ ॥ गोधूलिसमये पूज्यौ तुलसीकेशवौ पुनः॥ पृथक्पृथक्तथा कार्यौ संमुखौ मंगलं पठेत् ॥ २० ॥ ईषद्दृश्ये भास्करे तु संकल्पं तु समुच्चरेत् ॥ स्वगोत्रप्रवरानुक्त्वा तथा त्रिपुरुषादिकम् ॥ २१ ॥ अनादिमध्यनिधन त्रैलोक्यप्रतिपालक ॥ इमां गृहाण तुलसीं विवाहविधिनेश्वर ॥ २२ ॥ पार्वतीबीजसंभूतां वृंदाभस्मनि संस्थिताम् ॥ अनादिमध्यनिधनां वल्लभां ते ददाम्यहम् ॥२३॥ पयोघटैश्च सेवाभिः कन्यावद्वर्धिता मया ॥ त्वत्प्रियां तुलसीं तुभ्यं ददामि त्वं गृहाण भोः ॥ २४ ॥ एवं दत्त्वा च तुलसीं पश्चात्तौ पूजयेत्ततः॥ रात्रौ जागरणं कुर्याद्विवाहोत्सवपूर्वकम् ॥२५॥ ततः प्रभातसमये तुलसीं विष्णुमर्चयेत् ॥ वह्निसंस्थापनं कृत्वा द्वादशाक्षरविद्यया ॥ २६ ॥ पायसाऽऽज्यक्षौद्रतिलैर्जुह्यादष्टोत्तरं शतम् ॥ ततः स्विष्टकृतं हुत्वा दद्यात्पूर्णाहुतिं ततः ॥ आचार्यं च समभ्यर्च्य होमशेषं समापयेत् ॥ २७ ॥ चतुरो वार्षिकान्मासान्नियमो येन यः कृतः ॥ कथयित्वा द्विजेभ्यस्तत्तथाऽन्यत्परिपूरयेत् ॥ २८ ॥

॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ जुह्यादिति प्रयोग आर्षः जुहुयादिति ॥ २७ ॥ २८ ॥

CC-0. In Public Domain. Digitization by eGangotri

॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ कोलिफलं बदरीफलं "कर्कंधूर्बदरी कोलिः" इत्यमरः ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥

इदं व्रतं मया देव कृतं प्रीत्यै तव प्रभो ॥ न्यूनं संपूर्णतां यातु त्वत्प्रसादाज्जनार्दन ॥ २९ ॥ रेवतीतुर्यचरणे द्वादशीसंयुते नरः ॥ न कुर्यात्पारणं कुर्वन्व्रतं निष्फलतां नयेत् ॥ ३० ॥ ततो येषां पदार्थानां वर्जनं तु कृतं भवेत् ॥ चातुर्मास्येऽथवा चोर्जे ब्राह्मणेभ्यः समर्पयेत् ॥ ततः सर्वं समश्रीयाद्यद्यत्त्यक्तं व्रते स्थितम् ॥ ३१ ॥ दंपतिभ्यां सहैवाऽत्र भोक्तव्यं च द्विजैः सह ॥३२॥ ततो भुक्त्युत्तरं यानि गलितानि दलानि च ॥ तानि भुक्त्वा तुलस्याश्च स्वयं पापैः प्रमुच्यते ॥ ३३ ॥ इक्षुदण्डं तथा धात्रीफलं कोलिफलं तथा ॥ भुक्त्वा तु भोजनस्यांऽते तस्योच्छिष्टं विनश्यति ॥ ३४ ॥ एषु त्रिषु न भुक्तं चेदेकैकमपि येन तु ॥ ज्ञेय उच्छिष्ट आवर्षं नरोऽसौ नाऽत्र संशयः ॥ ३५ ॥ ततः सायं पुनः पूज्याविक्षुदण्डैश्च शोभितैः ॥ तुलसीवासुदेवौ च कृतकृत्यो भवेत्ततः ॥ ३६ ॥ ततो विसर्जनं कृत्वा दत्त्वा दायादिकं हरेः ॥ वैकुण्ठं गच्छ भगवँस्तुलसीसहितः प्रभो ॥ मत्कृतं पूजनं गृह्य संतुष्टो भव सर्वदा ॥ ३७ ॥ गच्छगच्छ सुरश्रेष्ठ स्वस्थाने परमेश्वर ॥ यत्र ब्रह्मादयो देवास्तत्र गच्छ जनार्दन ॥ ३८ ॥ एवं विसृज्य देवेशमाचार्याय प्रदापयेत् ॥ मूर्त्यादिकं सर्वमेव कृतकृत्यो भवेन्नरः ॥ ३९ ॥ प्रतिवर्षं तु यः कुर्यात्तुलसीकरपीडनम् ॥ भक्तिमान्धनधान्यैः स युक्तो भवति निश्चितम् ॥ इह लोके परत्राऽपि विपुलं च यशो लभेत् ॥ ४० ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे कार्तिकमाससमाहात्म्ये कूष्मांडनवमीतुलसीविवाहविधिवर्णनंनामैकत्रिंशोऽध्यायः ॥ ३१ ॥

॥ ॥ वालखिल्या ऊचुः ॥ ॥ कार्तिकस्याऽमले पक्षे स्नात्वा सम्यग्यतव्रतः ॥ एकादश्यां तु गृह्णीयाद्व्रतं पंचदिनात्मकम् ॥ १ ॥ शरपंजरसुप्तेन भीष्मेण तु महात्मना ॥ राजधर्मा मोक्षधर्मा दानधर्मास्ततः परम् ॥ कथिताः पांडुदायादैः कृष्णेनाऽपि श्रुतास्तदा ॥ २ ॥ ततः प्रीतेन मनसा वासुदेवेन भाषितम् ॥ धन्यधन्योऽसि भीष्म त्वं धर्माः संश्राविताास्त्वया ॥ ३ ॥ एकादश्यां कार्तिकस्य याचितं च जलं त्वया ॥ अर्जुनेन समानीतं गांगं बाणस्य वेगतः ॥ ४ ॥ तुष्टानि तव गात्राणि तस्माद्द्यदिनावधि ॥ पूर्णांतं सर्वलोकास्त्वां तर्पयंत्वर्घ्यदानतः ॥ ५ ॥ तस्मात्सर्वप्रयत्नेन मम संतुष्टिकारकम् ॥ एतद्व्रतं प्रकुर्वंतु भीष्मपंचकसंज्ञितम् ॥ ६ ॥

इति कार्तिकमासमाहात्म्यटीकायामेकत्रिंशोऽध्यायः ॥३१॥ ॥छ॥ ॥ अथ भीष्मपंचकव्रतमाह—कार्तिकस्येति ॥१॥२॥३॥४॥ पूर्णांतं पूर्णिमान्तम् ॥५॥६॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ पापपुरुषो देयः । पापपुरुषदानविधिमाह पाद्मे—"पापस्य प्रतिमा कार्या रौद्रवक्त्राऽतिभीषणा ॥ खड्गहस्ताऽतिविक्रांता लोहदंष्ट्रा करालिनी ॥ तिलप्रस्थोपरि स्थाप्य कृष्णवस्त्राऽभिवेष्टिता ॥ रक्तपुष्पकृताऽऽपीडा ज्वलत्कांचनकुंडला ॥ संपूज्य परया भक्त्या धर्मराजस्य नामभिः ॥ इममुच्चारयेन्मंत्रं गृहीतकुसुमां

कार्तिकस्य व्रतं कृत्वा न कुर्याद्भीष्मपंचकम् ॥ समग्रं कार्तिकव्रतं वृथा तस्य भविष्यति ॥ ७ ॥ अशक्तश्चेन्नरो भूयादसमर्थश्च कार्तिके ॥ भीष्मस्य पंचकं कृत्वा कार्तिकस्य फलं लभेत् ॥ ८ ॥ सत्यव्रताय शुचये गांगेयाय महात्मने ॥ भीष्मायैतद्ददाम्यर्घ्यमाजन्मब्रह्मचारिणे ॥ ॥ ९ ॥ सव्येनाऽनेन मंत्रेण तर्पणं सार्ववर्णिकम् ॥ १० ॥ व्रतांगत्वात्पूर्णिमायां प्रदेयः पापपूरुषः ॥ अपुत्रेण प्रकर्तव्यं सर्वथा भीष्मपञ्चकम् ॥ ११ ॥ यः पुत्रार्थं व्रतं कुर्यात्सस्त्रीको भीष्मपञ्चकम् ॥ प्रदत्त्वा पापपुरुषं वर्षमध्ये सुतं लभेत् ॥ १२ ॥ अवश्यमेव कर्तव्यं तस्माद्भीष्मस्य पंचकम् ॥ विष्णुप्रीतिकरं प्रोक्तं मया भीष्मस्य पञ्चकम् ॥ १३ ॥ ॥ सूत उवाच ॥ ॥ शृण्वंतु ऋषयः सर्वे विशेषो भीष्मपञ्चके ॥ कार्तिकेयाय रुद्रेण पुरा प्रोक्तः सविस्तरात् ॥ १४ ॥ ॥ ईश्वर उवाच ॥ ॥ प्रवक्ष्यामि महापुण्यं व्रतं व्रतवतां वर ॥ भीष्मेणैतद्यतः प्राप्तं व्रतं पञ्चदिनात्मकम् ॥ १५ ॥ सकाशाद्वासुदेवस्य तेनोक्तं भीष्मपञ्चकम् ॥ व्रतस्याऽस्य गुणान्वक्तुं कः शक्तः केशवादृते ॥ ॥ १६ ॥ कार्तिके शुक्लपक्षे तु शृणु धर्मं पुरातनम् ॥ वसिष्ठभृगुगर्गाद्यैश्चीर्णं कृतयुगादिषु ॥ १७ ॥ अम्बरीषेण भोगाद्यैश्चीर्णं त्रेतायुगादिषु ॥ ब्राह्मणैर्ब्रह्मचर्येण जपहोमक्रियादिभिः ॥ १८ ॥ क्षत्रियैश्च तथा वैश्यैः सत्यशौचपरायणैः ॥ दुष्करं सत्यहीनानामशक्यं बालचेतसाम् ॥ १९ ॥ दुष्करं भीष्ममित्याहुर्न शक्यं प्राकृतैर्नरैः ॥ यस्मात्करोति विप्रेंद्र तेन सर्वं कृतं भवेत् ॥ २० ॥ व्रतं चैतन्महापुण्यं महापातकनाशनम् ॥ अतो नरैः प्रयत्नेन कर्तव्यं भीष्मपञ्चकम् ॥ २१ ॥ कार्तिकस्याऽमले पक्षे स्नात्वा सम्यग्विधानतः ॥ एकादश्यां तु गृह्णीयाद्व्रतं पंचदिनात्मकम् ॥ २२ ॥ प्रातः स्नात्वा विशेषेण मध्याह्ने च तथा व्रती ॥ नद्यां निर्झरतोये वा समालभ्य च गोमयम् ॥ २३ ॥ यवव्रीहितिलैः सम्यक्पितॄन्संतर्पयेत्क्रमात् ॥ स्नात्वा मौनं नरः कृत्वा धौतवासा दृढव्रतः ॥ २४ ॥ भीष्मायोदकदानं च अर्घ्यं चैव प्रयत्नतः ॥ पूजा भीष्मस्य कर्तव्या दानं दद्यात्प्रयत्नतः ॥ २५ ॥ पंचरत्नं विशेषेण दत्त्वा विप्राय यत्नतः ॥ वासुदेवोऽपि संपूज्यो लक्ष्मीयुक्तः सदा प्रभुः ॥ २६ ॥

जलिः ॥ यदन्यजन्मनि कृतमिह जन्मनि वा पुनः ॥ पापं प्रशममायातु तव पाप प्रसादतः ॥ एवं संपूज्य विधिवत्प्रतिमां तां च कांचनीम् ॥ कृत्वा पूजां यथाशक्त्या ब्राह्मणाय निवेदयेत्" इति ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥

CC-0. In Public Domain. Digitization by eGangotri

॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥ 'ॐ नमो विष्णवे स्वाहा' इति च होममंत्रः

पञ्चके पूजयित्वा तु कोटिजन्मानि तुष्यति ॥ २७ ॥ यत्किंचिद्ददते मर्त्यः पंचधातुप्रकल्पितम् ॥ संवत्सरव्रतानां स लभते सकलं फलम् ॥ ॥ २८ ॥ कृत्वा तूदकदानं तु तथाऽर्घ्यस्य च दापनम् ॥ मन्त्रेणाऽनेन यः कुर्यान्मुक्तिभागी भवेन्नरः ॥ २९ ॥ वैयाघ्रपादगोत्राय सांकृत्य प्रवराय च ॥ अनपत्याय भीष्माय उदकं भीष्मवर्मणे ॥ ३० ॥ वसूनामवताराय शंतनोरात्मजाय च ॥ अर्घ्यं ददामि भीष्माय आजन्मब्रह्म चारिणे ॥ ३१ ॥ ॥ इत्यर्घ्यमंत्रः ॥ ॥ अनेन विधिना यस्तु पंचकं तु समापयेत् ॥ अश्वमेधसमं पुण्यं प्राप्नोत्यत्र न संशयः ॥ ३२ ॥ पंचाऽहमपि कर्तव्यं नियमं च प्रयत्नतः ॥ नियमेन विना यत्र न भाव्यं वरवर्णिना ॥ ३३ ॥ उत्तरायणहीनाय भीष्माय प्रददौ हरिः ॥ उत्तरा यणहीनेऽपि शुद्धलग्नं सुतोक्षितः ॥ ३४ ॥ ततः संपूजयेद्देवं सर्वपापहरं हरिम् ॥ अनंतरं प्रयत्नेन कर्तव्यं भीष्मपंचकम् ॥ ३५ ॥ स्नापयेत जलैर्भक्त्या मधुक्षीरघृतेन च ॥ तथैव पंचगव्येन गन्धचंदनवारिणा ॥ ३६ ॥ चन्दनेन सुगन्धेन कुंकुमेनाऽथ केशवम् ॥ कर्पूरोशीरमिश्रेण ले पयेद्गरुडध्वजम् ॥ ३७ ॥ अर्चयेद्रुचिरैः पुष्पैर्गंधधूपसमन्वितैः ॥ गुग्गुलुं घृतसंयुक्तं ददेत्कृष्णाय भक्तिमान् ॥ ३८ ॥ दीपकं तु दिवा रात्रौ दद्यात्पंच दिनानि तु ॥ नैवेद्यं देवदेवस्य परमान्नं निवेदयेत् ॥ ३९ ॥ एवमभ्यर्चयेद्देवं संस्मृत्य च प्रणम्य च ॥ ॐ नमो वासुदेवायेति जपेदष्टो त्तरं शतम् ॥ ४० ॥ जुहुयाच्च घृताऽभ्यक्तैस्तिलव्रीहियवादिभिः ॥ षडक्षरेण मन्त्रेण स्वाहाकाराऽन्वितेन च ॥ ४१ ॥ उपास्य पश्चिमां संध्यां प्रणम्य गरुडध्वजम् ॥ जपित्वा पूर्ववन्मन्त्रं क्षितिशायी भवेत्सदा ॥४२॥ सर्वमेतद्विधानं तु कार्यं पञ्च दिनानि तु ॥ विशेषोऽत्र व्रते ह्यस्मिन्य दन्यूनं शृणुष्व तत् ॥ ४३ ॥ प्रथमेऽह्नि हरेः पादौ पूजयेत्कमलैर्व्रती ॥ द्वितीये बिल्वपत्रेण जानुदेशं समर्चयेत् ॥४४॥ ततोऽनुपूजयेच्छीर्षं माल त्या चक्रपाणिनः ॥ कार्तिक्यां देवदेवस्य भक्त्या तद्गतमानसः ॥ ४५ ॥ अर्चित्वा तं हृषीकेशमेकादश्यां समासतः ॥ निःप्राश्य गोमयं सम्यगेकादश्यामुपावसेत् ॥ ४६ ॥ गोमूत्रं मन्त्रवद्भूमौ द्वादश्यां प्राशयेद्व्रती ॥ क्षीरं चैव त्रयोदश्यां चतुर्दश्यां तथा दधि ॥ ४७ ॥ संप्राश्य कायशुद्ध्यर्थं लंघयित्वा चतुर्दिनम् ॥ पंचमे दिवसे स्नात्वा विधिवत्पूज्य केशवम् ॥ भोजयेद्ब्राह्मणान्भक्त्या तेभ्यो दद्याच्च दक्षिणाम्॥ ४८ ॥

॥ ४१ ॥ ४२ ॥ ४३ ॥ प्रत्येकदिने पृथक्कृत्यमाह—प्रथमेह्नीति पंचभिः ॥ ४४ ॥ ४५ ॥ ४६ ॥ ४७ ॥ ४८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

व्रतनियमानाह–पापबुद्धिमिति ॥४९॥५०॥५१॥५२॥५३॥५४॥ ५५ ॥ ५६ ॥ भोजनपरस्य इदं व्रतं नोक्तम् । तदा यदि भोजनपरः स्यात्तर्हि निषेध उक्तः । अनेन पंचगव्यान्तःपातिपदार्थभक्षणं यावत्परिमाणं व्रतराजादावुक्तं तावत्कर्तव्यम् । यद्यत्यन्तं ग्लानिश्चेच्छाकमूलादिभक्षणं कर्तव्यम्, नान्नभक्षणं कर्तव्यमित्यर्थः ॥५७॥

पापबुद्धिं परित्यज्य ब्रह्मचर्येण धीमता ॥ मद्यं मांसं परित्याज्यं मैथुनं पापकारणम् ॥ ४९ ॥ शाकाहारेण मुन्यन्नैः कृष्णार्चनपरो नरः ॥ ततो नक्तं समश्नीयात्पंचगव्यपुरःसरम् ॥ ५० ॥ एवं सम्यक्समाप्यं स्याद्यथोक्तं फलमाप्नुयात् ॥ ५१ ॥ मद्यपो यः पिबेन्मद्यं जन्मनो मरणांऽतिकम् ॥ एतद्भीष्मव्रतं कृत्वा प्राप्नोति परमं पदम् ॥ ५२ ॥ स्त्रीभिर्वा भर्तृवाक्येन कर्तव्यं धर्मवर्धनम् ॥ विधवाभिश्च कर्तव्यं मोक्षसौख्याऽतिवृद्धये ॥ ५३ ॥ अयोध्यायां पुरा कश्चिदतिथिर्नाम वै नृपः ॥ वसिष्ठवचनात्कृत्वा व्रतमेतत्सुदुर्लभम् ॥ भुक्त्वेह निखिलान्भोगानंते विष्णुपुरं ययौ ॥ ५४ ॥ इत्थं कुर्याद्व्रतं नित्यं पञ्चकं भीष्मसंज्ञितम् ॥ नियमेनोपवासेन पञ्चगव्येन वा पुनः ॥ पयोमूलफलाऽऽहारैर्हविष्यैर्व्रततत्परः ॥ ५५ ॥ पौर्णमासीदिने प्राप्ते पूजां कृत्वा तु पूर्ववत् ॥ ब्राह्मणान्भोजयेद्भक्त्या गां च दद्यात्सवत्सकाम् ॥ ५६ ॥ यद्भीष्मपञ्चकमिति प्रथितं पृथिव्यामेकादशीप्रभृति पंचदशीनिरुद्धम् ॥ उक्तं न भोजनपरस्य तदा निषेधस्तस्मिन्व्रते शुभफलं प्रददाति विष्णुः ॥ ५७ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे कार्तिकमासमाहात्म्ये भीष्मपञ्चकव्रतमाहात्म्यवर्णनंनाम द्वात्रिंशोऽध्यायः ॥ ३२ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ प्रबोधिन्याश्च माहात्म्यं पापघ्नं पुण्यवर्धनम् ॥ मुक्तिदं तत्त्वबुद्धीनां शृणुष्व सुरसत्तम ॥ १ ॥ तावद्गर्जति सेनानीर्गंगा भागीरथी क्षितौ ॥ यावत्प्रयाति पापघ्नी कार्तिके हरिबोधिनी ॥ २ ॥ तावद्गर्जंति तीर्थानि आसमुद्रसरांसि वै ॥ यावत्प्रबोधिनी विष्णोस्तिथिर्नाऽऽयाति कार्तिके ॥ ३ ॥ अश्वमेधसहस्राणि राजसूयशतानि च ॥ एकेनैवोपवासेन प्रबोधिन्या यथाऽभवत् ॥ ४ ॥ दुर्लभं चैव दुष्प्राप्यं त्रैलोक्ये सचराचरे ॥ तदपि प्रार्थितं विप्र ददाति प्रतिबोधिनी ॥ ५ ॥ ऐश्वर्यं संततिं ज्ञानं राज्यं च सुखसंपदः ॥ ददात्युपोषिता विप्र हेलया हरिबोधिनी ॥ ६ ॥ मेरुमंदरतुल्यानि पापान्युपार्जितानि च ॥ एकेनैवोपवासेन दहते हरिबोधिनी ॥ ७ ॥ उपवासं प्रबोधिन्यां यः करोति स्वभावतः ॥ विधिना नरशार्दूल यथोक्तं लभते फलम् ॥ ८ ॥

इति कार्तिकमासमाहात्म्यटीकायां द्वात्रिंशोऽध्यायः ॥३२॥ ॥ छ ॥ ॥ अथ प्रबोधोत्सवविधानमाह–प्रबोधिन्या इति ॥१॥२॥३॥४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥

CC-0. In Public Domain. Digitization by eGangotri

पूर्वजन्मसहस्रेषु पापं यत्समुपार्जितम् ॥ जागरेण प्रबोधिन्यां दह्यते तूलराशिवत् ॥ ९ ॥ शृणु षण्मुख वक्ष्यामि जागरस्य च लक्षणम् ॥ तस्य विज्ञानमात्रेण दुर्लभो न जनार्दनः ॥१०॥गीतं वाद्यं च नृत्यं च पुराणपठनं तथा ॥ धूपं दीपं च नैवेद्यं पुष्पगंधाऽनुलेपनम् ॥११॥ फलमर्घ्यं च श्रद्धा च दानमिंद्रियसंयमम् ॥ सत्याऽन्वितं विनिंदं च मुदा युक्तं क्रियान्वितम् ॥ १२ ॥ साश्चर्यं चैव प्रोत्साहमालस्यादिविवर्जितम् ॥ प्रदक्षिणादिसंयुक्तं नमस्कारपुरःसरम् ॥ १३ ॥ नीराजनसमायुक्तमनिर्विण्णेन चेतसा ॥ यामेयामे महाभाग कुर्वन्नीराजनं हरेः ॥ १४ ॥ एतै र्गुणैः समायुक्तं कुर्याज्जागरणं विभोः ॥ एकाग्रमनसा यस्तु न पुनर्जायते भुवि ॥ १५ ॥ य एवं कुरुते भक्त्या वित्तशाठ्यविवर्जितः ॥ जागरं वासरे विष्णोर्लीयते परमात्मनि ॥ १६ ॥ पुरुषसूक्तेन यो नित्यं कार्तिकेऽथार्चयेद्धरिम् ॥ वर्षकोटिसहस्राणि पूजितस्तेन केशवः ॥ १७ ॥ यथोक्तेन विधानेन पंचरात्रोदितेन वै ॥ कार्तिके त्वर्चयेन्नित्यं मुक्तिभागी भवेन्नरः ॥ १८ ॥ नमो नारायणायेति कार्तिके योर्चयेद्धरिम् ॥ स मुक्तो नारकैर्दुःखैः पदं गच्छत्यनामयम् ॥ १९ ॥ हरेर्नामसहस्रं च गजराजस्य मोक्षणम् ॥ कार्तिके पठते यस्तु पुनर्जन्म न विंदति ॥ २० ॥ युगकोटिसहस्राणि मन्वंतरशतानि च ॥ द्वादश्यां कार्तिके मासि जागरी वसते दिवि ॥ २१ ॥ कुले तस्य च ये जाताः शतशोथ सहस्रशः ॥ प्राप्नुवंति पदं विष्णोस्तस्मात्कुर्वीत जागरम् ॥ २२ ॥ कार्तिके पश्चिमे यामे स्तवं गानं करोति यः ॥ श्वेत द्वीपे तु वसते पितृभिः सह सुव्रत ॥ २३ ॥ नैवेद्यदानं हरये कार्तिके दिनसंक्षये ॥ युगानि वसते स्वर्गे तावंति मुनिसत्तमाः ॥ २४ ॥ अक्षयं मुनिशार्दूल मालतीकमलार्चनम् ॥ अर्चयेद्देवदेवेशं स याति परमं पदम् ॥ २५ ॥ कार्तिके शुक्लपक्षे तु कृत्वा ह्येकादशीं नरः ॥ प्रातर्दत्त्वा शुभान्कुंभान्स याति मम मंदिरम् ॥ २६ ॥ अत्रैव तु प्रकर्तव्यः प्रबोधस्तु हरेः खग ॥ हतः शंखासुरो दैत्यो नभसः शुक्लपक्षके ॥ २७ ॥ एकादश्यां ततो विष्णुश्च तुर्मास्ये प्रसुप्तवान् ॥ क्षीरांभोधौ जागृतोऽसावेकादश्यां तु कार्तिके ॥ २८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ ब्रह्मांशभूतायाः मोहिन्याः । अत्र प्रसिद्धा कथा सारोद्धारे—पुरा रुक्मांगदो नृपः परमं वैष्णव आसीत् तस्य दृढशासनादेकादशीव्रतेन सर्वजनाः वैकुंठं ययुः, यमलोकश्च शून्यः अभूत्तदा यमः क्रुद्धः सन् रुक्मांगदेन सह युद्धमकरोत्, तत्र युद्धे पराजितो यमः ब्रह्मलोकं गत्वा रुक्मांगदमेकादशीव्रतभ्रष्टं कुरु नो चेत्प्राणांस्त्यक्ष्यामीति ब्रह्माणं प्रार्थयामास, तदा ब्रह्मा यममाश्वास्य सर्वमोहकारिणीमेकां स्त्रियं निर्माय तामुवाच, त्वं

अतः प्रबोधनं कार्यमेकादश्यां तु वैष्णवैः ॥ उत्तिष्ठोत्तिष्ठ गोविंद उत्तिष्ठ गरुडध्वज ॥ उत्तिष्ठ कमलाकांत त्रैलोक्यं मंगलं कुरु ॥ २९ ॥ इत्युक्त्वा शंखभेर्यादि प्रातःकाले तु वादयेत् ॥ वीणावेणुमृदंगादि नृत्यगीतादि कारयेत् ॥३०॥ उत्थापयित्वा देवेशं पूजां तस्य विधाय च ॥ सायंकाले प्रकर्तव्यस्तुलस्युद्वाहजो विधिः ॥ ३१ ॥ सर्वदैकादशी पुण्या विशेषात्कार्तिकी स्मृता ॥ यानि कानि च पापानि ब्रह्महत्यादिकानि च ॥ ॥३२॥ अन्नमाश्रित्य तिष्ठंति संप्राप्ते हरिवासरे ॥ स केवलमघं भुंक्ते यो भुंक्ते हरिवासरे ॥३३॥ तस्मात्सर्वप्रयत्नेन कुर्यादेकादशीव्रतम् ॥ न कुर्याद्यदि मोहेन उपवासं नराधमः ॥३४॥ नरके नियतं वासः पितृभिः सह तस्य वै ॥ सूतके मृतके वाऽपि नोपवासं त्यजेद्बुधः॥३५॥ दशमीवेधसंयुक्ता त्याज्या चैकादशी व्रते ॥ गांधार्याऽपि पुरा तस्यामुपवासः कृतो गृह ॥ ३६ ॥ तस्याः पुत्रशतं नष्टं तस्मात्तां वधजां त्यजेत् ॥ एकादशीमुपवसेत्स्नानदानपुरःसरम् ॥ ३७ ॥ रुक्मांगदोऽपि राजर्षिर्मोहिन्याः संगमेन च ॥ इह लोके सुखं भुक्त्वा चांऽते विष्णुपुरं ययौ ॥ ३८ ॥ ॥ ॥ इति प्रबोधोत्सवः ॥ ॥ अथ द्वादशीमाहात्म्यम् ॥ ॥ द्वादशी पुण्यदा प्रोक्ता सर्वाऽघौघविनाशिनी ॥ किं दानैः किं तपोभिश्च किमु पोष्यैर्व्रतैश्च किम् ॥ ३९ ॥ किमिष्टैश्चैव पुत्रैश्च द्वादशी येन सेविता ॥ गंगायां चैव दुर्भिक्षे प्रत्यहं कोटिभोजनात् ॥ ४० ॥ यत्फलं तदवाप्नोति द्वादश्यामेकभोजनात् ॥ यद्दत्तं चार्हते दानं द्वादश्यां तु सिते शुभे ॥ ४१ ॥ सिक्थेसिक्थे च वैकस्य कतिब्राह्मणभोजनम् ॥ तदहं नैव जानामि महिमानं हि सुव्रत ॥ ४२ ॥

रुक्मांगदं गत्वा तं मोहयित्वा पुनर्ममांतिकमागच्छ, सा तथेत्युक्त्वा राजानं गत्वा मोहयामास, राजाऽपि तया सह अहर्निशं क्रीडन् हरिदिनमपि न स्मृतवान्, तदा शिक्षकाऽभावाल्लोका अपि विसस्मरुः । एकदा कार्तिके हरिदिनीव्रतं सस्मार, तदा पश्चात्तापं कुर्वन्मोहिनीकृपया विष्णुलोकं ययाविति ॥ ३८ ॥ अथ द्वादशीव्रतविधानमाह—द्वादशीति ॥ ३९ ॥ ४० ॥ ४१ ॥ सिक्थे सिक्थ एकैकस्मिन्पक्वतण्डुल इत्यर्थः । कतिब्राह्मणभोजनं कियद्ब्राह्मणभोजनम् ॥ ४२ ॥

CC-0. In Public Domain. Digitization by eGangotri

शालिग्रामशिलादानं यः कुर्याद्द्वादशीदिने ॥ सप्तद्वीपवतीं भूमिं गंगायां च रविग्रहे ॥ दत्त्वा यत्फलमाप्नोति तत्फलं लभते नरः ॥
॥ ४३ ॥ पंचामृतैस्तु यो विष्णुं भक्त्या संस्नापयेद्द्विज ॥ स सर्वकुलमुद्धृत्य विष्णुलोके महीयते ॥ ४४ ॥ शुक्ले कार्तिकमासस्य
द्वादश्यां परमोत्सवे ॥ प्रातरारभ्य यः कुर्यात्स्नानदानादिकं तथा ॥ स तु मोक्षमवाप्नोति नाऽत्र कार्या विचारणा ॥ ४५ ॥ द्वादश्यां
कार्तिके मासि स्नानसंध्यादिकर्म च ॥ कृत्वा दामोदरं पूज्य भक्तिश्रद्धासमन्वितः ॥ ४६ ॥ यस्तस्यां सूपनैवेद्यं न ददाति नराधमः ॥ नरके
नियतं वासो भवतीत्यनुशुश्रुम ॥ ४७ ॥ तस्मात्सूपस्य नैवेद्यं द्वादश्यां कार्तिके शुभे ॥ दद्याद्भक्तियुतो ब्रह्मंश्चान्यथा नरकं व्रजेत् ॥ ४८ ॥
यस्तस्यां दंपतीनां तु भोजनं कुरुते नरः ॥ न तस्य फलविश्रांतिर्मया वक्तुं तु शक्यते ॥४९॥ धात्रीच्छायां गतो यस्तु द्वादश्यां पूजयेद्धरिम् ॥
तत्रैव भोजनं यस्तु ब्राह्मणानां तु कारयेत् ॥ ५० ॥ स्वयं च तत्र भुंक्ते यः सूपभक्ष्यादिकं तथा ॥ न तस्य पुनरावृत्तिः कल्पकोटिशतैरपि ॥
॥ ५१ ॥ एवं प्रातर्विधायाऽथ पूजां दामोदरस्य हि ॥ रात्रौ पुनः प्रकर्तव्यं पूजाकर्म हरेर्द्विज ॥ ५२ ॥ तुलसीसन्निधौ कृत्वा पताकाध्वजशोभि
तम् ॥ पुष्पमालासमाकीर्णं नानारत्नोपशोभितम् ॥ ५३ ॥ मुक्तादामभिराच्छन्नं कृत्वा मंडपमुत्तमम् ॥ पूजयेद्विष्णुमव्यग्रस्तद्गतैकाग्रमानसः ॥
॥ ५४ ॥ पंचरात्रोक्तमार्गेण गन्धपुष्पाक्षतादिभिः ॥ नवनीतं दधिक्षीरं तथैव च घनं घृतम् ॥ ५५ ॥ विविधैः खाद्यनैवेद्यैर्जलेन च सुगंधिना ॥
युक्तं निवेदयेद्विष्णोस्तांबूलं सलवंगकम् ॥ ५६ ॥ पुष्पाणि च विचित्राणि सुगन्धीनि बहूनि च ॥ प्रोक्षयित्वा च विधिवदर्पयित्वा दलैः शुभैः
॥ ५७ ॥ तुलस्याश्चापि धात्र्याश्च फलैश्चाऽपि प्रपूजयेत् ॥ नीराजनं ततः कृत्वा मंत्रपुष्पं समर्पयेत् ॥ ५८ ॥ अभिषेकं विना सर्वपूजां कृत्वा
विधानतः ॥ विष्णोः पूजां समाप्याऽथ ब्राह्मणानां प्रपूजनम् ॥ ५९ ॥ कुर्याद्भक्तियुतो विप्र दद्याच्चैव फलादिकम् ॥ तांबूलं च ततो दत्त्वा दक्षिणां
शक्तितोऽर्पयेत् ॥ ६० ॥ ततो वृद्धान्पितॄन्मातॄः पूजयित्वा विधानतः ॥ ततः स्वयं स्वभार्याभिर्नैवेद्यं भक्षयेत्सुधीः ॥ ६१ ॥ इत्येवं तु विधानेन
यः कुर्याद्द्वादशीव्रतम् ॥ न तस्य लोकाः क्षीयंते कल्पकोटिशतैरपि ॥ ६२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पुत्रपौत्रैः परिवृतो भुक्त्वा भोगान्मनोहरान् ॥ भोगांते च व्रजेन्मोक्षमतीतकुलसप्तकैः ॥ ६३ ॥ तस्मान्नारद माहात्म्यं द्वादश्याः कार्तिकस्य च ॥ न मया शक्यते वक्तुं किमन्यैर्मनुजैरपि ॥ ६४ ॥ द्वादश्या ह्युत्तमं पुण्यं माहात्म्यं यः पठेन्नरः ॥ शृणुयाद्वा मुनिश्रेष्ठ स याति परमां गतिम् ॥ ६५ ॥ राजर्षिरम्बरीषोऽपि चकारैतद्व्रतं शुभम् ॥ यथाविधि तपोनिष्ठस्तेन मोक्षमवाप्तवान् ॥ ६६ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे कार्तिकमासमाहात्म्ये प्रबोधोत्सवद्वादशीतिथिकृत्यवर्णनंनाम त्रयस्त्रिंशोऽध्यायः ॥ ३३ ॥ ॥ छ ॥ ॥ नारद उवाच ॥ ॥ व्रतानामपि सर्वेषां ब्रह्मन्नुद्यापनं श्रुतम् ॥ अभावे तूद्यापनस्य फलं नैवाऽऽप्नुयात्क्वचित् ॥ १ ॥ कृतव्रतफलाप्त्यर्थं कुर्यादुद्यापनं बुधः ॥ अन्यथा निष्फलं याति कृतं व्रतमनुत्तमम् ॥ २ ॥ कार्तिकेऽपि कृतं देव व्रतानामुत्तमं व्रतम् ॥ न तस्योद्यापनाऽभावे व्रतोक्तफलमाप्नुयात् ॥ ३ ॥ तस्मात्कार्तिकमासस्य चोद्यापनविधिं प्रभो ॥ वद मे शिष्यवर्याय प्रपन्नायाऽनुवर्तिने ॥ ४ ॥ ॥ ब्रह्मोवाच ॥ ॥ अथोर्जोद्यापनं वक्ष्ये सर्वपापप्रणाशनम् ॥ तच्छृणुष्व महाभक्त्या सविधानं समासतः ॥ ५ ॥ ऊर्जे शुक्लचतुर्दश्यां कुर्यादुद्यापनं व्रती॥ व्रतसंपूरणार्थाय विष्णुप्रीत्यर्थहेतवे ॥ ६ ॥ तुलस्या उपरिष्टात्तु कुर्यान्मंडपिकां शुभाम् ॥ कदलीस्तंभसंयुक्तां नानाधातुविचित्रिताम् ॥७॥ दीपमाला चतुर्दिक्षु कार्या तत्र सुशोभना ॥ सुतोरणाश्चतुर्द्वारः पुष्पचामरशोभिताः॥८॥ द्वारेषु द्वारपालांश्च पूजयेन्मृन्मयान्पृथक् ॥ जयश्च विजयश्चैव चण्डश्चैव प्रचंडकः ॥ ९ ॥ नन्दश्चैव सुनंदश्च कुमुदः कुमुदाक्षकः ॥ एतांश्चतुर्षु द्वारेषु पूजयेद्भक्तिसंयुतः ॥ १० ॥ तुलसीमूलदेशे तु सर्वतोभद्रसंज्ञितम् ॥ चतुर्भिर्वर्णकैः सम्यक्छोभाढ्यं समलंकृतम् ॥ ११ ॥ तस्योपरिष्टात्कलशं पूर्णरत्नसमन्वितम् ॥ तत्र संपूजयेद्देवं शंखचक्रगदाधरम् ॥ १२ ॥ कौशेयपीतवसनं लक्ष्म्या युक्तं प्रपूजयेत् ॥ इन्द्रादिलोकपालांश्च मंडपे पूजयेद्व्रती ॥ ॥ १३ ॥ तस्यामुपवसेद्भक्त्या शांतः प्रणतमानसः ॥ रात्रौ जागरणं कुर्याद्गीतवाद्यादिमंगलैः ॥ १४ ॥

CC-0. In Public Domain. Digitization by eGangotri

 ॥ १५ ॥ त्रिंशन्मितानथैकं वा इत्यत्र तदर्द्धं वा इति पाठः तदा पंचदश ब्राह्मणानित्यर्थः ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥

गीतं कुर्वंति ये भक्त्या जागरे चक्रपाणिनः ॥ जन्मांतरशतोद्भूतैस्ते मुक्ताः पापसंचयैः ॥१५॥ ततस्तु पूर्णिमायां तु सपत्नीकान्द्विजोत्तमान् ॥
त्रिंशन्मितानथैकं वा ब्राह्मणांश्च निमंत्रयेत् ॥ १६ ॥ प्रातःस्नानं ततः कृत्वा देवपूजां तथैव च ॥ स्थंडिलं च ततः कृत्वा समाधायाऽग्निमत्र हि
॥ १७ ॥ अतो देवेति मंत्रेण जुहुयात्तिलपायसम् ॥ प्रीत्यर्थं देवदेवस्य देवानां च पृथक्पृथक् ॥ १८ ॥ होमशेषं समाप्याऽथ ब्राह्मणान्पूज्य
भक्तितः ॥ ब्राह्मणेभ्यो यथाशक्त्या प्रदद्याद्दक्षिणां नरः ॥ १९ ॥ ततो गां कपिलां तत्र पूजयेद्विधिवद्व्रती ॥ सवत्सां गां तथा दद्याद्विप्राय च कुटु
म्बिने ॥ २० ॥ गुरुं व्रतोपदेष्टारं वस्त्रालंकारभूषणैः ॥ सपत्नीकं समभ्यर्च्य तांश्च विप्रान्क्षमापयेत् ॥ २१ ॥ युष्मत्प्रसादाद्देवेशः प्रसन्नोऽस्तु सदा
मम ॥ व्रतादस्माच्च यत्पापं सप्तजन्मकृतं मया ॥ २२ ॥ तत्सर्वं नाशमायातु स्थिरा मे चाऽस्तु संततिः ॥ मनोरथास्तु सफलाः संतु भक्तिर्हरौ
भवेत् ॥ २३ ॥ सतां समागमो भूयान्मम जन्मनिजन्मनि ॥ इति क्षमाप्य तान्विप्रान्प्रसाद्य च विसर्जयेत् ॥ २४ ॥ प्रतिमां तां गुरोर्दद्यात्स
वस्त्रां मुनिपुंगव ॥ ततः सुहृद्बन्धुयुतः स्वयं भुंजीत भक्तिमान् ॥ २५ ॥ द्वादश्यां प्रतिबुद्धोऽसौ त्रयोदश्यां युतः सुरैः ॥ दृष्टोऽर्चितश्चतुर्दश्यां
तस्मात्पूज्यस्तिथाविह ॥ २६ ॥ पूजयेद्देवदेवेशं सौवर्णं गुर्वनुज्ञया ॥ पराऽत्र पौर्णमास्यां तु यात्रा स्यात्पुष्करस्य तु ॥ २७ ॥ वरान्दत्त्वा यतो
विष्णुर्मत्स्यरूपोऽभवत्ततः ॥ तस्यां दत्तं हुतं जप्तं तदक्षय्यफलं भवेत् ॥ २८ ॥ कार्तिके मासि कर्तव्यो विधिरेष हि नारद ॥ एवं यः कुरुते
सम्यक्कार्तिकस्य व्रतं नरः ॥ २९ ॥ यत्फलं तदवाप्नोति व्रतं कृत्वा तु कार्तिके ॥ ते धन्यास्ते सदा पूज्यास्तेषां वै सफलोदयः ॥ ३० ॥ विष्णु
भक्तिरता ये स्युः कार्तिके व्रतचारिणः ॥ देहस्थितानि पापानि विलयं यांति तत्क्षणात् ॥ ३१ ॥ क्व यामोऽद्य भवत्येष यदूर्जव्रतकृन्नरः ॥
इति सर्वाणि पापानि रटन्तीह पुनःपुनः ॥ ३२ ॥ तस्मात्कार्तिकमासस्य सदृशं नहि विद्यते ॥ सर्वपापस्य दहने अग्नेः सदृश उच्यते ॥३३॥
ऊर्जोद्यापनमाहात्म्यं शृणुयाच्छ्रद्धयाऽन्वितः ॥ श्रावयेद्वा पुमान्यस्तु विष्णुसायुज्यमाप्नुयात् ॥ ३४ ॥ ॥ नारद उवाच ॥ ॥ ऊर्जे व्रतो
द्यापनादावशक्तः सिद्धिभाक्कथम् ॥ कथं विमुच्यते जंतुर्दुःखसंसारसागरात् ॥ ३५ ॥

॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ॥ ब्रह्मोवाच ॥ ॥ शृणुयादूर्जमाहात्म्यं नियमेन शुचिः पुमान् ॥ उद्यापनफलं प्राप्य विष्णुलोके वसेच्च सः ॥ ३६ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे कार्तिकमासमाहात्म्ये व्रतोद्यापनविधिकथनंनाम चतुस्त्रिंशोऽध्यायः ॥ ३४ ॥ ॥ ॥ ब्रह्मोवाच ॥ ॥ वैकुण्ठाख्यचतुर्दश्या माहात्म्यं ते वदाम्यहम् ॥ वालखिल्यैः पुरा प्रोक्तं संक्षेपेण शृणुष्व तत् ॥ १ ॥ ॥ वालखिल्या ऊचुः ॥ ॥ कार्तिकस्य सिते पक्षे चतुर्दश्यां समागमत् ॥ वैकुण्ठेशस्तु वैकुण्ठाद्वाराणस्यां कृते युगे ॥ २ ॥ रात्र्यां तुर्यांशशेषायां स्नात्वाऽसौ मणिकर्णिके ॥ गृहीत्वा हेमपद्मानां सहस्रं वै ततोऽव्रजत् ॥ ३ ॥ अतिभक्त्या पूजयितुं शिवया सहितं शिवम् ॥ विधाय पूजां वैश्वेशीं ततः पद्मैरपूजयत् ॥ ४ ॥ सहस्रसंख्यां कृत्वादावेकनाम्ना ततः परम् ॥ आरब्धं पूजनं तेन शिवस्तद्भक्तिमैक्षत ॥ ५ ॥ एकं पद्मं पद्ममध्यान्निलीयाऽऽत्तं हरेण तु ॥ ततः पूजितवान्विष्णुरेकोनं कमलं त्वभूत् ॥ ६ ॥ इतस्ततस्तेन दृष्टं पद्मं तिष्ठति न क्वचित् ॥ कमलेषु भ्रमो जातोऽथवा नामसु मे भ्रमः ॥ ७ ॥ क्षणं विचार्य स हरिर्न मे नामभ्रमोऽभवत् ॥ पद्मे चैव भ्रमो जातो विचार्यैवं पुनःपुनः ॥ ८ ॥ सहस्रपद्मसंकल्पः पूजार्थं तु कृतो मया ॥ अर्च्यः कथं महादेव एकोनकमलैर्मया ॥ ९ ॥ यद्यानेतुं गमिष्यामि भंगः स्यादासनस्य तु ॥ अतः परं किं विधेयं चिन्तोद्विग्नो हरिस्तदा ॥ १० ॥ एकः प्रकार उत्पन्नो हृदयेऽस्य मुनीश्वराः ॥ पुण्डरीकाक्ष इत्येवं मां वदंति मुनीश्वराः ॥ ११ ॥ नेत्रं मे पद्मसदृशं पद्मार्थे त्वर्पयाम्यहम् ॥ इति निश्चित्य मनसा दत्त्वा तर्जनिकां स तु ॥ १२ ॥ नेत्रमध्यात्तदुत्पाद्य महादेवस्तु पूजितः ॥ ततो महेश्वरस्तुष्टो वाक्यमेतदुवाच ह ॥ १३ ॥ ॥ महादेव उवाच ॥ ॥ त्वत्समो नास्ति मद्भक्तस्त्रैलोक्ये सचराचरे ॥ राज्यं दत्तं त्रिलोक्यास्ते भव त्वं लोकपालकः ॥ १४ ॥ अन्यं वरय भद्रं ते वरं यन्मनसेप्सितम् ॥ अवश्यमेव दास्यामि नात्र कार्या विचारणा ॥ १५ ॥ मद्भक्तिं तु समालंब्य ये द्विषंति जनार्दनम् ॥ ते मद्द्वेष्या नरा विष्णो व्रजेयुर्नरकं ध्रुवम् ॥ १६ ॥

॥ २ ॥ असौ विष्णुः ॥ ३ ॥ शिवया पार्वत्या ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ महादेवतिथौ चतुर्दश्याम् ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ कमलप्रसंगेन अन्येषां पुष्पाणामपि पूजामाहात्म्यमाहपाद्मे–"सरोरुहाणि तुलसी केतकी मुनिपुष्पकम् ॥ मालती दमनकं चैव कार्त्तिके केशवार्चने ॥ केतकीपुष्पकेणैव पूजितो गरुडध्वजः ॥ समाः सहस्रं सुप्रीतो जायते नात्र संशयः ॥ विहाय सर्वपुष्पाणि मुनिपुष्पेण केशवम् ॥ कार्त्तिके योऽर्चयेद्भक्त्या वाजिमेधफलं लभेत् ॥ मालतीमालया येन कार्तिके पुष्पमंड

॥ ॥ विष्णुरुवाच ॥ ॥ त्रैलोक्यरक्षाकरणं ममादिष्टं महेश्वर ॥ दुर्मदाश्च महासत्त्वा दैत्या मार्याः कथं मया ॥१७॥ ॥ शिव उवाच ॥ ॥ एतत्सुदर्शनं चक्रं महादैत्यनिकृंतनम् ॥ गृहाण भगवन्विष्णो मया तुभ्यं निवेदितम् ॥१८॥ अनेन सर्वदैत्यानां भगवन्कदनं कुरु ॥ एवं चक्रं हरेर्दत्वा ततो वचनमब्रवीत् ॥ १९ ॥ ॥ शिव उवाच ॥ ॥ वर्षे च हेमलंबाख्ये मासे श्रीमति कार्तिके ॥ शुक्लपक्षे चतुर्दश्यामरुणाभ्युदयं प्रति ॥२०॥ महादेवतिथौ ब्राह्मे मुहूर्ते मणिकर्णिके ॥ स्नात्वा वैश्वेश्वरं लिंगं वैकुण्ठादेत्य पूजितम् ॥२१॥ सहस्रकमलैस्तस्माद्भविष्यति मम प्रिया ॥ विख्याता सर्वलोकेषु वैकुंठाख्या चतुर्दशी ॥२२॥ अन्यं वरं प्रयच्छामि शृणु विष्णो वचो मम ॥ पूर्वरात्रेषु ते पूजा कर्तव्या सर्वजातिभिः ॥२३॥ उपवासं दिवा कुर्यात्सायंकाले तवार्चनम् ॥ पश्चान्ममार्चनं कार्यमन्यथा निष्फलं भवेत् ॥ २४ ॥ ग्राह्या तु हरिपूजायां रात्रिव्याप्ता चतुर्दशी ॥ अरुणोदयवेलायां शिवपूजां समाचरेत् ॥ २५ ॥ सहस्रकमलैर्विष्णुरादौ यैः पूजितो नरैः॥ पश्चाच्छिवः पूजितश्चेज्जीवन्मुक्तास्त एव हि ॥ २६ ॥ सायं स्नात्वा पंचनदे बिंदुमाधवमर्चयेत् ॥ स्नात्वा यो विष्णुकांच्यां वाऽनंतसेनं समर्चयेत् ॥ २७ ॥ रुद्रकांच्यां ततः स्नात्वा प्रणवेशं समर्चयेत् ॥ आदौ स्नात्वा वह्नितीर्थे यजेन्नारायणं ततः ॥ २८ ॥ रेतोदके ततः स्नात्वा केदारेशं समर्चयेत् ॥ आदौ स्नात्वा सूर्यपुत्र्यां वेणीमाधवमर्चयेत् ॥ २९ ॥ जाह्नव्यां च ततः स्नात्वा संगमेशं प्रपूजयेत् ॥ सर्वाः श्रियस्तस्य वश्याः सत्यं विष्णो मयोदितम् ॥ ३० ॥ एवं तस्मै वरान्दत्त्वा ह्यंतर्धानं ययौ शिवः ॥ तस्मात्सर्वप्रयत्नेन पूज्यौ हरिहरावुभौ ॥ ३१ ॥ कलौ दशसहस्राणि विष्णुस्त्यजति मेदिनीम् ॥ तदर्द्धं जाह्नवीतोयं तदर्द्धं ग्रामदेवताः ॥ ३२ ॥

पम् ॥ केशवस्य कृतं वत्स वसतिर्दिवि तस्य च ॥ दमनकेनापि देवेशं संप्राप्ते मधुमाधवे ॥ गोशतस्य मुनिश्रेष्ठ अर्चनाल्लभते फलम् ॥" इति ॥ २६ ॥ २७ ॥ २८ ॥ ॥ २९ ॥ ३० ॥ ३१ ॥ अथ गंगालोपे विशेषःसनत्कुमारसंहितायाम्–"चतुर्दशाब्दं दुर्भिक्षं महामारीसमुद्भवः ॥ गोवधश्चाऽपि सर्वत्र मृत्तिका भस्मसन्निभा ॥ गांग

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तोयस्य या धारा पतेद्भगीरथाश्रमे ॥ हरिद्वाराच्च वायव्ये तस्या लोपो भविष्यति ॥ भागीरथ्यां गतायां तु मर्कटीतंतुसन्निभाः ॥ भविष्यंति जले कीटास्तोयं नीलीनिभं तथा ॥" इति ॥ ३२ ॥ अथ त्रैपुरोत्सवप्रसंगमाह—कार्तिक्यामिति ॥ ३३॥३४॥३५॥३६॥३७॥३८॥३९॥४०॥४१॥४२ ॥ नक्तात् नक्तव्रतात् ॥ ४३ ॥

कार्तिक्यां पूर्णिमायां तु कुर्यात्त्रैपुरमुत्सवम् ॥ दीपो देयोऽवश्यमेव सायंकाले शिवालये ॥ ३३ ॥ त्रिपुरोनाम दैत्येंद्रः प्रयागे तप आस्थितः ॥ तपसा तस्य संतुष्टो ददौ ब्रह्मा वरं परम् ॥ ३४ ॥ देवासुरमनुष्येभ्यो न ते मृत्युर्भविष्यति ॥ इति लब्धवरो दैत्यो विश्वकर्मविनिर्मितम् ॥ ३५ ॥ त्रिपुराख्यं विमानं तमारुह्य भुवनत्रयम् ॥ यदा वै पीडयामास तदा देवैः स्तुतो हरः ॥ ३६ ॥ त्रिपुरं घातयामास बाणेनैकेन शत्रुहा ॥ कार्तिक्यां पूर्णिमायां तु सर्वे देवाः प्रतुष्टुवुः ॥ ३७ ॥ तस्मिन्दिने सर्वदेवैर्दीपा दत्ता हराय च ॥ सर्वथैव प्रदेयाश्च दीपास्तु हरतुष्टये ॥ ३८ ॥ विंशतिः सप्तशतकाः सहिता दीपवर्तयः ॥ ददद्दीपं पूर्णिमायां सर्वपापैः प्रमुच्यते ॥ ३९ ॥ पौर्णमास्यां तु संध्यायां कर्तव्यस्त्रिपुरोत्सवः ॥ दद्यादनेन मन्त्रेण प्रदीपांश्च सुरालये ॥ ४० ॥ कीटाः पतंगा मशकाश्च वृक्षा जले स्थले ये विचरंति जीवाः ॥ दृष्ट्वा प्रदीपं न च जन्मभागिनो भवंतु नित्यं श्वपचा हि विप्राः ॥ ४१ ॥ कार्यस्तस्मात्पौर्णमास्यां त्रिपुराय महोत्सवः ॥ कार्तिक्यां कृत्तिकायोगे यः कुर्यात्स्वामिदर्शनम् ॥ ॥ ४२ ॥ सप्त जन्म भवेद्विप्रो धनाढ्यो वेदपारगः ॥ अत्र कृत्वा वृषोत्सर्गं नक्ताच्छैवपुरं व्रजेत् ॥ ४३ ॥ इति श्रीस्कांदे महापुराण एकाशीति साहस्र्यां संहितायां द्वितीये वैष्णवखण्डे कार्तिकमासमाहात्म्ये वैकुण्ठचतुर्दशीत्रिपुरीपूर्णिमाव्रतविधानकथनंनाम पंचत्रिंशोऽध्यायः ॥ ३५ ॥ ॥ ॥ ब्रह्मोवाच ॥ ॥ यास्तिस्रस्तिथयः पुण्या अंतिके शुक्लपक्षके ॥ कार्तिके मासि विप्रेंद्र पूर्णिमांताः शुभावहाः ॥ १ ॥ अंतिपुष्करिणी संज्ञा सर्वपापक्षयावहा ॥ कार्त्तिके मासि संपूर्णं यो वै स्नानं करोति ह ॥ २ ॥ तिथिष्वेतासु सः स्नानात्पूर्णमेव फलं लभेत् ॥ सर्वे वेदास्त्रयो दश्यां गत्वा जन्तून्पुनंति हि ॥ ३ ॥ चतुर्दश्यां सयज्ञाश्च देवा जंतून्पुनंति हि ॥ पूर्णिमायां सुतीर्थानि विष्णुना संस्थितानि हि ॥ ४ ॥ ब्रह्मघ्नान्वा सुरापान्वा सर्वाञ्जंतून्पुनंति हि ॥ उष्णोदकेन यः स्नायात्कार्त्तिक्यादिदिनत्रये ॥ ५ ॥

इति कार्तिकमासमाहात्म्यटीकायां पंचत्रिंशोऽध्यायः ॥ ३५ ॥ ॥ छ ॥ ॥ अथ अंतिपुष्करिणीमाहात्म्यमाह—या इति । पूर्णिमांताः त्रयोदशीमारभ्य पूर्णिमापर्यंतमित्यर्थः ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ संपूर्णकार्त्तिकमासे उष्णोदकस्नाननिषेधोऽस्ति तत्राऽपि दिनत्रयं त्ववश्यं वर्जयेदित्याह—उष्णोदकेनेति ॥ ५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ कैश्चिन्मनुजैः दिनत्रये गीतासहस्रनामपठनेन कमलपूजादिना च देवत्वं प्राप्तं कैश्चित्सिद्धत्वमिति ॥ ११ ॥ तस्मादिति शेषः । तस्य दिनत्रयस्य ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ अथाऽशक्तस्य एकदिनात्मकमपि कार्तिकव्रतमाह—पुण्यमिति ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥

रौरवं नरकं याति यावदिंद्राश्चतुर्दश ॥ आमासनियमाशक्तः कुर्यादेतद्दिनत्रये ॥ ६ ॥ तेन पूर्णफलं प्राप्य मोदते विष्णुमंदिरे ॥ यो वै देवान्पितॄन्विष्णुं गुरुमुद्दिश्य मानवः ॥ ७ ॥ न स्नानादि करोत्यद्धा स याति नरकं ध्रुवम् ॥ कुटुंबभोजनं यस्तु गृहस्थस्तु दिनत्रये ॥ ॥ ८ ॥ सर्वान्पितॄन्समुद्धृत्य स याति परमं पदम् ॥ गीतापाठं तु यः कुर्याद्दतिमे च दिनत्रये ॥ ९ ॥ दिनेदिनेऽश्वमेधानां फलमेति न संशयः ॥ सहस्रनामपठनं यः कुर्यात्तु दिनत्रये ॥ १० ॥ न पापैर्लिप्यते क्वाऽपि पद्मपत्रमिवांऽभसा ॥ देवत्वं मनुजैः कैश्चित्कैश्चित्सिद्धत्वमेव च ॥ ११ ॥ तस्य पुण्यफलं वक्तुं कः शक्तो दिवि वा भुवि ॥ यो वै भागवतं शास्त्रं शृणोति च दिनत्रयम् ॥ १२ ॥ कैश्चित्प्राप्तो ब्रह्मभावो दिनत्रयनिषेवणात् ॥ ब्रह्मज्ञानेन वा मुक्तिः प्रयागमरणेन वा ॥ १३ ॥ अथ वा कार्त्तिके मासि दिनत्रयनिषेवणात् ॥ कार्त्तिके हरिपूजां तु यः करोति दिनत्रये ॥ १४ ॥ न तस्य पुनरावृत्तिः कल्पकोटिशतैरपि ॥ कार्त्तिके मासि विप्रेंद्र सर्वमंत्यदिनत्रये ॥ १५ ॥ पुण्यं तत्राऽपि वैशेष्यं राकायां[1] वर्ततेऽनघ ॥ प्रातःकाले समुत्थाय शौचं स्नानादिकं चरेत् ॥ १६ ॥ समाप्य सर्वकर्माणि विष्णुपूजां समाचरेत् ॥ उद्याने वा गृहे वाऽपि कार्त्तिक्यां विष्णुतत्परः ॥ १७ ॥ मंडपं तत्र कुर्वीत कदलीस्तंभमंडितम् ॥ चूतपल्लवसंवीतमिक्षुदंडैः सुमंडितम् ॥ १८ ॥ चित्रवस्त्रैः स्वलंकृत्य तत्र देवं प्रपूजयेत् ॥ चूतपल्लवपुष्पाढ्यैः फलाद्यैः पूजयेद्धरिम् ॥ १९ ॥ शृणुयादूर्जमाहात्म्यं नियमेन शुचिः पुमान् ॥ संपूर्णमथ वाऽध्यायमेकश्लोकमथाऽपि वा ॥ २० ॥ मुहूर्तं वाऽपि शृणुयात्कथां पुण्यां दिनेदिने ॥ यदि प्रतिदिनं श्रोतुमशक्तः स्यात्तु मानवः ॥ २१ ॥ पुण्यमासेऽथवा पुण्यतिथौ संशृणुयादपि ॥ तेन पुण्यप्रभावेन पापान्मुक्तो भवेन्नरः ॥ २२ ॥ पुराणज्ञः शुचिर्दक्षः शांतो विगतमत्सरः ॥ साधुः कारुणिको वाग्मी वदेत्पुण्यां कथां सुधीः ॥ २३ ॥

॥ २१ ॥ २२ ॥ अथ पुराणश्रवणफलं वक्तुं पुराणज्ञलक्षणं तद्धर्मांश्चाह—पुराणज्ञ इति ॥ २३ ॥

१ राकायां पूर्णिमायाम् "कलाहीने सानुमतिः पूर्णे राका निशाकरे" इत्यमरः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ २४ ॥ २५ ॥ अथ श्रोतॄणां लक्षणानि तद्धर्मांश्चाह—श्रद्धाभक्तिसमायुक्ता इत्यादिना ॥ २६ ॥ २७ ॥ २८ ॥ भवंतीति शेषः । अन्यतः भोगांतरे—इति उत्तरेण सम्बन्धः ॥ २९ ॥ ३० ॥ व्यासधर्ममाह—उच्चासने समारूढ इति उच्चासनसमारूढः नरः प्रणतः नम्रः न भवेत्तर्हि जन्मांतरे विषवृक्षः भवेत् । स्वापे शयने कृते

व्यासासनं समारूढो यदा पौराणिको भवेत् ॥ आसमाप्तेः प्रसंगस्य नमस्कुर्यान्न कस्यचित् ॥ २४ ॥ न दुर्जनसमाकीर्णे न शूद्रश्वापदावृते ॥ देशे न द्यूतसदने वदेत्पुण्यकथां सुधीः ॥२५॥ श्रद्धाभक्तिसमायुक्ता नाऽन्यकार्येषु लालसाः ॥ वाग्यताः शुचयो दक्षाः श्रोतारः पुण्यभागिनः ॥ २६ ॥ अभक्ता ये कथां पुण्यां शृण्वंति मनुजाऽधमाः ॥ तेषां पुण्यफलं नाऽस्ति दुःखं स्याज्जन्मजन्मनि ॥ २७ ॥ पौराणिकं च मासांते पूजयेद्भक्तितत्परः ॥ गन्धमाल्यैस्तथा वस्त्रैरलंकारैर्धनेन च ॥ २८ ॥ शृण्वंति च कथां भक्त्या न दरिद्रा न पापिनः ॥ २९ ॥ कथायां कीर्त्यमानायां ये गच्छंत्यन्यतो नराः ॥ भोगांतरे प्रणश्यंति तेषां दाराश्च संपदः ॥ ३० ॥ उच्चासनसमारूढो न नरः प्रणतो भवेत् ॥ विषवृक्षस्तथा स्वापे वने चाऽजगरो भवेत् ॥ ३१ ॥ कथायां कीर्त्यमानायां विघ्नं कुर्वंति ये नराः ॥ कोट्यब्दनरकान्भुक्त्वा भवंति ग्रामसूकराः ॥ ३२ ॥ ये श्रावयंति मनुजाः कथां पौराणिकीं शुभाम् ॥ कल्पकोटिशतं साग्रं तिष्ठंति ब्रह्मणः पदे ॥ ३३ ॥ आसनार्थे प्रयच्छंति पुराणज्ञस्य ये नराः ॥ कम्बलाजिनवासांसि मंचं फलकमेव वा ॥ ३४ ॥ परिधानीयवस्त्राणि प्रयच्छंति च ये नराः ॥ भूषणादि प्रयच्छंति वसेयुर्ब्रह्मसद्मनि ॥ ३५ ॥ वाचके परितुष्टे तु तुष्टाः स्युः सर्वदेवताः ॥ अतः संतोषयेद्भक्त्या भक्तिश्रद्धान्वितः पुमान् ॥ तस्य पुण्यफलं पूर्णं भवत्येव न संशयः ॥ ३६ ॥ यत्फलं सर्वयज्ञेषु सर्वदानेषु यत्फलम् ॥ सकृत्पुराणश्रवणात्तत्फलं विंदते नरः ॥३७॥ कलौ युगे विशेषेण पुराणश्रवणादृते ॥ नास्ति धर्मः परः पुंसां नास्ति मुक्तिपथः परः ॥ पुराणश्रवणाद्विष्णोर्नास्ति संकीर्तनात्परम् ॥ ३८ ॥ य एतदूर्जमाहात्म्यं शृणुयाच्छ्रावयेदपि ॥ स तीर्थराजबदरीगमनस्य फलं लभेत् ॥ ३९ ॥ सर्वरोगापहं सर्वपापनाशकरं शुभम् ॥ ४० ॥ श्रुत्वा चैकपदे यो वै अगम्यागमने रतः ॥ कन्यास्वस्त्रोर्विक्रयिणमुभयं तु विमोचयेत् ॥ ४१ ॥ माहात्म्यमेतदाकर्ण्य पूजयेद्यस्तु पाठकम् ॥ गोभूहिरण्यवस्त्रैश्च विष्णुतुल्यो यतो हि सः ॥ ४२ ॥

अजगरः भवेत् ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ पुराणश्रवणफलप्रशंसामाह—यत्फलमिति ॥ ३७ ॥ ३८ ॥ अथ कार्तिकमाहात्म्यश्रवणफलमाह—य एतदित्यादिना ॥ ३९ ॥ ४० ॥ ४१ ॥ ४२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ४३ ॥ ४४ ॥ ४५ ॥ ४६ ॥ ४७ ॥ ४८ ॥ ४९ ॥ ५० ॥ ५१ ॥ आसीदिति शेषः ॥ ५२ ॥ ५३ ॥ ५४ ॥ ५५ ॥ ५६ ॥ ५७ ॥ ५८ ॥

धर्मशास्त्रं पुराणं च वेदविद्यादिकं च यत् ॥ पुस्तकं वाचकायैव दातव्यं धर्ममिच्छता ॥ पुराणविद्यादातारो ह्यनंतफलभोगिनः ॥
॥ ४३ ॥ इदं यः पठते भक्त्या श्रुत्वा चैवाऽवधारयेत् ॥ मुच्यते सर्वपापेभ्यो विष्णुलोकं स गच्छति ॥ ४४ ॥ न कस्याऽपीद
माख्येयं श्रद्धाहीनाय दुर्मतेः ॥ ४५ ॥ अपूजयित्वा गुरुमग्रबुद्ध्या धर्मप्रवक्तारमनन्यबुद्धिः ॥ भुक्त्वा तु भोगान्नरकेषु चैव ततो हि जन्मान्तर
दुःखभोगी ॥ ४६ ॥ तस्मात्संपूजयेद्भक्त्या गुरुं तत्त्वाववबोधकम् ॥ माहात्म्यस्य च लेशोऽयं तव चोक्तो मयाऽनघ ॥ ४७ ॥ न शक्यते हि
संपूर्णं वक्तुं वर्षशतैरपि ॥ पुरा कैलासशिखरे पार्वत्यै प्रोक्तवाञ्छिवः ॥ ४८ ॥ कार्तिकस्य तु माहात्म्यं यावद्वर्षशतं वदन् ॥ तथापि नांत
मगमदशक्तो विरराम ह ॥ ४९ ॥ पुत्रार्थी च धनार्थी च राज्यार्थी स्वफलं लभेत् ॥ किमत्र बहुनोक्तेन मोक्षार्थी मोक्षमाप्नुयात् ॥ ५० ॥
॥ सूत उवाच ॥ ॥ इत्युक्तो ब्रह्मणा चैव नारदः प्रेमनिर्भरः ॥ भूयोभूयो नमस्कृत्य ययौ याद्दच्छिको मुनिः ॥ ५१ ॥ कथितं शंकरेणाऽपि
पुत्राय हितकाम्यया ॥ पितुस्तद्वाक्यमाकर्ण्य षण्मुखो हर्षनिर्भरः ॥ ५२ ॥ कृष्णेन सत्यभामायै कार्तिकस्य च वैभवः ॥ कथितस्तेन संतुष्टा
सत्या व्रतमथाऽकरोत् ॥५३॥ ऋषयो वालखिल्येभ्यः श्रुत्वा माहात्म्यमुत्तमम् ॥ ऊर्जव्रतपरा जातास्तस्मादूर्जोऽतिवल्लभः ॥ ५४ ॥ अधीत्य
सर्वशास्त्राणि पयःसारमिवोद्धृतम् ॥ नाऽनेन सद्दशं शास्त्रं विष्णुप्रीतिकरं शुभम् ॥ ५५ ॥ ॥ व्यास उवाच ॥ ॥ इत्युक्त्वा तानृषीन्सर्वा
न्सूतो वै धर्मवित्तमः ॥ विरराम ततस्ते तु पूजां चक्रुस्तदास्य च ॥ ५६ ॥ ते पुनः स्वाश्रमं गत्वा हृष्टास्ते परमर्षयः ॥ यथा सूतेनोपदिष्टं
तथा चक्रुर्व्रतं शुभम् ॥ ५७ ॥ अनेन विधिना ये वै कुर्वंति कार्तिकव्रतम् ॥ ते सर्वपापनिर्मुक्ता गच्छंति विष्णुमंदिरम् ॥ ५८ ॥ इति श्रीस्कान्दे
महापुराणं एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे कार्तिकमासमाहात्म्ये पुष्करिणीसंज्ञिकांतिमतिथित्रयमाहात्म्यकथनपूर्वकपुराण
श्रवणमहिमवर्णनंनाम षट्त्रिंशोऽध्यायः ॥ ३६ ॥छ॥ इति श्रीस्कान्दे महापुराणे द्वितीये वैष्णवखण्डे सटीकं कार्तिकमासमाहात्म्यं समाप्तम् ॥

इति श्रीज्योतिर्वित्कुलावतंसव्यंकटरामात्मजहरिकृष्णशास्त्रिविरचितायां कार्त्तिकमाससमाहात्म्यटीकायां पुराणश्रवणमहिमवर्णनंनाम षट्त्रिंशोऽध्यायः ॥ ३६ ॥ ॥ छ ॥
समाप्तमिदं सटीकं कार्त्तिकमाससमाहात्म्यम् ॥ (२–४) श्रीदामोदरार्पणमस्तु ॥ छ ॥ श्रीरस्तु शुभम् ॥ छ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इदं पुस्तकं मुम्बय्यां श्रीकृष्णदासात्मजक्षेमराजश्रेष्ठिना
स्वकीये "श्रीवेङ्कटेश्वर" (स्टीम्) मुद्रणालये मुद्रितम्।
संवत् १९६६, शके १८३१.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इति श्रीस्कान्दे महापुराणे द्वितीये वैष्णवखण्डे सटीकं कार्तिकमासमाहात्म्यं स० (२–४)॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ श्रीस्कान्देमहापुराणे द्वितीये वैष्णवखण्डे मार्गशीर्षमासमाहात्म्यं प्रारभ्यते (२-५)॥

Nepal Sanskrit University, Balmiki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ॥ श्रीगणेशाय नमः ॥ ॥ अथ मार्गशीर्षमासमाहात्म्यप्रारम्भः ॥ ॥ सूत उवाच ॥ ॥ देवकीनन्दनं कृष्णं जगदानन्दकारकम् ॥
भुक्तिमुक्तिप्रदं वन्दे माधवं भक्तवत्सलम् ॥ १ ॥ श्वेतद्वीपे सुखासीनं देवदेवं रमापतिम् ॥ चतुर्वक्त्रो नमस्कृत्य पप्रच्छ पितरं तदा ॥ २ ॥ ॥ ब्रह्मो
वाच ॥ ॥ हृषीकेश जगद्धातः पुण्यश्रवणकीर्तन ॥ पृष्टं यद्ब्रूहि देवेश सर्वज्ञ सकलेश्वर ॥ ३ ॥ मासानां मार्गशीर्षोऽहमित्युक्तं भवता पुरा ॥
तस्य मासस्य माहात्म्यं ज्ञातुमिच्छामि तत्त्वतः ॥ ४ ॥ को देवस्तस्य किं दानं कथं स्नानं विधिश्च कः ॥ पुरुषैस्तत्र किं कार्यं भोक्तव्यं किं रमा
पते ॥ ५ ॥ वक्तव्यं किं तथा पूजाध्यानमंत्रादिकं च यत् ॥ तत्र यत्क्रियते कर्म तत्सर्वं ब्रूहि मेऽच्युत ॥ ६ ॥ ॥ श्रीभगवानुवाच ॥ ॥ साधु
पृष्टं त्वया ब्रह्मन्सर्वलोकोपकारिणा ॥ यस्मिन्कृते कृतं सर्वमिष्टापूर्तादिकं भवेत् ॥ ७ ॥ सर्वयज्ञेषु यत्पुण्यं सर्वतीर्थेषु यत्फलम् ॥ तत्फलं समवा
प्नोति मार्गशीर्षे कृते सुत ॥ ८ ॥ तुलापुरुषदानाद्यैर्यत्फलं लभते नरः ॥ तत्फलं प्राप्यते पुत्र माहात्म्यश्रवणात्किल ॥ ९ ॥ यज्ञाध्ययनदानाद्यैः
सर्वतीर्थावगाहनैः ॥ संन्यासेन च योगेन नाऽहं वश्योऽभवं नृणाम् ॥ १० ॥ स्नानेन दानेन च पूजनेन ध्यानेन मौनेन जपादिभिश्च ॥ वश्यो
यथा मार्गशिरे च मासि तथा न चान्येषु च गुह्यमुक्तम् ॥ ११ ॥ अन्यैर्धर्मादिभिः कृत्वा गोपितं मार्गशीर्षकम् ॥ मत्प्राप्तेः कारणं मत्वा देवैः स्वर्ग
निवासिभिः ॥ १२ ॥ ये केचित्पुण्यकर्माणो मम भक्तिपरायणाः ॥ तेषामवश्यं कर्तव्यो मार्गशीर्षो मदापनः[1] ॥ १३ ॥ मार्गशीर्षं न कुर्वंति ये
नरा भारताऽजिरे ॥ पापरूपाश्च ते ज्ञेयाः कलिकालविमोहिताः ॥ १४ ॥ अष्टस्वपि च मासेषु यत्फलं लभते नरः ॥ तत्फलं प्राप्यते वत्स माघे
मकरगे रवौ ॥ १५ ॥ माघाच्छतगुणं पुण्यं वैशाखे मासि लभ्यते ॥ तस्मात्सहस्रगुणितं तुलासंस्थे दिवाकरे ॥ १६ ॥ तस्मात्कोटिगुणं पुण्यं वृश्चि
कस्थे दिवाकरे ॥ मार्गशीर्षोऽधिकस्तस्मात्सर्वदा च मम प्रियः ॥ १७ ॥ उषस्युत्थाय यो मर्त्यः स्नानं विधिवदाचरेत् ॥ तुष्टोऽहं तस्य यच्छामि
स्वात्मानमपि पुत्रक ॥ १८ ॥ अत्राप्युदाहरन्तीदं शृणु पुत्र कथानकम् ॥ नन्दगोपो महात्मा वै ख्यातो यो भूतलेऽभवत् ॥ १९ ॥ तस्य वै गोकुले
रम्ये गोपकन्याः सहस्रशः ॥ तासां चित्तं च मद्रूपे लग्नमासीत्पुराऽनघ ॥ २० ॥ तासां बुद्धिर्मया दत्ता मार्गशीर्षावगाहने ॥ ततस्ताभिः कृतं
स्नानं प्रातःकाले यथाविधि ॥ २१ ॥ पूजा कृता हविष्यान्नं भुक्तं ताभिः कृता नतिः ॥ एवं कृतेन विधिना प्रसन्नोऽहं ततोऽनघ ॥ २२ ॥ वरो

१ मामापयतीति मदापनः मत्प्रापकः—इत्यर्थः ।

CC-0. In Public Domain. Digitization by eGangotri

दत्तो मयाऽऽत्मा हि तासां तुष्टेन वै किल ॥ तस्मान्नरैस्तु कर्तव्यो मार्गशीर्षो यथाविधि ॥ २३ ॥ इति श्रीस्कान्दे महापुराण एका
शीति साहस्र्यां संहितायां द्वितीये वैष्णवखण्डे ब्रह्मविष्णुसंवादे मार्गशीर्षमाहात्म्ये गोपीकृतमार्गशीर्षस्नानफलकथनंनाम प्रथमोऽध्यायः ॥
॥ १ ॥ ॥ छ ॥ ॥ ब्रह्मोवाच ॥ ॥ त्वयोक्तो विधिसंयुक्तो मार्गशीर्षो मदापनः ॥ को विधिस्तस्य देवेश सर्वं मे ब्रूहि केशव ॥ १ ॥
॥ ॥ श्रीभगवानुवाच ॥ ॥ रात्रावन्ते समुत्थाय उपस्पृश्य यथाविधि ॥ नमस्कृत्या गुरुं स्वीयं संस्मरेन्मामतंद्रितः ॥ २ ॥ सहस्रनामभिर्भक्त्या
कीर्तयेद्वाग्यतः शुचिः ॥ बहिर्ग्रामात्समुत्सृज्य मलमूत्रं यथाविधि ॥ ३ ॥ शौचं कृत्वा यथान्यायमाचम्य प्रयतः शुचिः ॥ दंतधावनपूर्वं च
स्नानं कृत्वा यथाविधि ॥ ४ ॥ आदाय तुलसीमूलमृदं तत्पत्रसंयुताम् ॥ मूलमंत्रेणाऽभिमंत्र्य गायत्र्या वा महामते ॥ ५ ॥ मंत्रेणैवाऽनुलिप्तांगः
स्नायादप्स्वघमर्षणम् ॥ अनुद्धृतैरुद्धृतैर्वा जलैः स्नानं विधीयते ॥ ६ ॥ तीर्थं प्रकल्पयेद्विद्वान्मन्त्रेणाऽनेन मन्त्रवित् ॥ ॐनमो नारायणायेति
मूलमन्त्र उदाहृतः ॥ ७ ॥ दर्भपाणिस्तु विधिना आचांतः पुरतः शुचिः ॥ चतुर्हस्तसमायुक्तं चतुरस्रं समंततः ॥ प्रकल्प्याऽऽवाहयेद्गंगामेभिर्मंत्रैर्वि
चक्षणः ॥ ८ ॥ विष्णुपादप्रसूताऽसि वैष्णवी विष्णुदेवता ॥ त्राहि नस्त्वमघादस्मादाजन्ममरणांतिकात् ॥ ९ ॥ तिस्रः कोट्योऽर्धकोटी च
तीर्थानां वायुरब्रवीत् ॥ दिवि भुव्यंतरिक्षे च तानि ते संति जाह्नवि ॥ १० ॥ नंदिनीत्येव ते नाम देवेषु नलिनीति च ॥ दक्षपुत्री च विहगा
विश्वगा योगिनां मता ॥ ११ ॥ विद्याधरी सुप्रसन्ना तथा लोकप्रसादिनी ॥ क्षेमा च जाह्नवी चैव शांता शांतिप्रदायिनी ॥१२॥ एतानि पुण्यना
मानि स्नानकाले सदा पठेत् ॥ सदा संनिहिता तत्र गंगा त्रिपथगामिनी ॥ १३ ॥ सप्तवाराभिजप्तेन करसंपुटयोजितम् ॥ मूर्ध्नां कृतांजलिर्भूयस्त्रि
चतुः पंच सप्त वा ॥ स्नानं कुर्यान्मृदा तद्वदामंत्र्याऽनुविधानतः ॥ १४ ॥ अश्वक्रांते रथक्रांते विष्णुक्रांते वसुन्धरे ॥ मृत्तिके हर मे पापं यन्मया
दुष्कृतं कृतम् ॥ १५ ॥ उद्धृताऽसि वराहेण कृष्णेन शतबाहुना ॥ नमस्ते सर्वभूतानां प्रभवाऽरणि सुव्रते ॥ १६ ॥ एवं स्नात्वा ततः पश्चादाचम्य
च विधानतः॥ उत्थाय वाससी शुक्ले कूले वै परिधाय च ॥ १७ ॥ आचम्य तर्पयेद्देवान्पितॄंश्चैव ऋषींस्तथा ॥ निष्पीड्य वस्त्रमाचम्य धौतवस्त्रेण
वेष्टितः ॥ १८ ॥ विमलां मृत्तिकां रम्यामादाय द्विजसत्तम ॥ मन्त्रेणैवाऽभिमंत्र्याऽथ ललाटादिषु वैष्णवः ॥ धारयेदूर्ध्वपुण्ड्राणि यथासंख्यमतं
द्रितः ॥ १९ ॥ ब्रह्मन्द्वादशपुण्ड्राणि ब्राह्मणः सततं वहेत् ॥ चत्वारि भूभृतां पुत्र पुण्ड्राणि द्वे विशां स्मृते ॥ एकं पुंड्रं च नारीणां शूद्राणां च विधी
यते ॥ २० ॥ ललाट उदरे चैव वक्षो वै कण्ठकूबरे ॥ कुक्ष्योर्बाह्वोः कर्णयोश्च पृष्ठे त्रिके च वै शिरः ॥ तिलका द्वादश प्रोक्ता ब्राह्मणस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सदाऽनघ ॥२१॥ ललाटे हृदि बाह्वोश्च क्षात्रः पुंड्राणि धारयेत् ॥ ललाटे हृदये वैश्यो भाले वै शूद्रयोषिताम्॥२२॥ ललाटे केशवं ध्यायेन्नारायणम
थोदरे॥वक्षःस्थले माधवं च गोविंदं कण्ठकूबरे॥२३॥विष्णुं च दक्षिणे कुक्षौ बाहौ च मधुसूदनम् ॥ त्रिविक्रमं कर्णमूले वामनं वामपार्श्वके ॥२४॥
श्रीधरं वामबाहौ च हृषीकेशं च कर्णके ॥ पृष्ठे तु पद्मनाभः स्यात्रिके दामोदरं न्यसेत्॥२५॥तत्प्रक्षालनतोयेन वासुदेवं तु मूर्धनि॥एवं कार्यं ब्राह्म
णस्य क्षत्रियस्योपधारयेत्॥२६॥ ललाटे केशवं ध्यायेद्धृदये माधवं तथा ॥ बाह्वोश्च उभयोर्वत्स स्मरेद्वै मधुसूदनम् ॥२७॥ क्षत्रियस्य विधिः प्रोक्तो
वैश्यकृत्यं निशामय ॥ ललाटे केशवं ध्यायेद्धृदये माधवं तथा ॥ २८ ॥ योषिच्छूद्रौ स्मरेतां च केशवं भालदेशके ॥ अनेन विधिना कुर्यात्पुंड्रा
णि मम तुष्टये ॥ २९ ॥ श्यामं शांतिकरं प्रोक्तं रक्तं वश्यकरं तथा ॥ श्रीकरं पीतमित्याहुः श्वेतं मोक्षकरं शुभम्॥३०॥ एकांतिनो महाभागाः सर्व
लोकहिते रताः ॥ सांऽतरालं प्रकुर्वंति पुंड्रं हरिपदाकृतिम् ॥३१॥ मध्ये छिद्रेण संयुक्तमेतद्धि हरिमंदिरम् ॥ ऊर्ध्वं सौम्यमृजुं सूक्ष्मं सुपार्श्वं सुमनो
हरम् ॥ ३२ ॥ निरंतरालं यः कुर्यादूर्ध्वपुंड्रं द्विजाऽधमः ॥ स हि तत्र स्थितं लक्ष्म्या सह मां च व्यपोहति ॥ ३३ ॥ अच्छिद्रमूर्ध्वपुंड्रं तु ये कुर्वंति
द्विजाधमाः ॥ तैर्ललाटे शुनः पादं निक्षिप्तं वै न संशयः ॥ ३४ ॥ तस्माच्छिद्रान्वितं पुंड्रं महच्छिद्रं शुभान्वितम् ॥ धारयेद्ब्राह्मणो नित्यं हरि
सालोक्यसिद्धये ॥ ३५ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे ब्रह्मविष्णुसंवादे मार्गशीर्षमाहात्म्ये त्रिपुंड्र
धारणविधिकथनंनाम द्वितीयोऽध्यायः ॥ २ ॥ ॥ ब्रह्मोवाच ॥ ॥ पुंड्रं कतिविधं कार्यं प्रब्रूहि मम केशव ॥ पुंड्राणां श्रवणेऽतीव कौतुकं मम
जायते ॥ १ ॥ ॥ श्रीभगवानुवाच ॥ ॥ शृणु पुत्र प्रवक्ष्यामि पुंड्रं च त्रिविधं स्मृतम् ॥ तुलसीमृत्स्नया सार्धं श्रीगोपीचंदनेन च ॥ २ ॥
हरिचंदनतः कार्यं पुंड्रं तत्र विचक्षणैः ॥ श्रीकृष्णतुलसीमूलमृदमादाय भक्तिमान् ॥ धारयेदूर्ध्वपुंड्राणि हरिस्तत्र प्रसीदति ॥ ३ ॥ गोपीचंदन
माहात्म्यं निबोध गदतो मम ॥ ४ ॥ यो मृत्तिकां द्वारवतीसमुद्भवां करे समादाय ललाटपट्टके ॥ करोति नित्यं नर ऊर्ध्वपुंड्रं क्रियाफलं कोटि
गुणं तदा भवेत् ॥ ५ ॥ क्रियाविहीनं यदि मन्त्रहीनं श्रद्धाविहीनं यदि कालवर्जितम् ॥ कृत्वा ललाटे यदि गोपिचंदनं प्राप्नोति तत्कर्मफलं सदा
ऽव्ययम् ॥ ६ ॥ गोपीचंदनसंभवं सुरुचिरं पुंड्रं ललाटे द्विजो नित्यं धारयते यदि प्रतिदिनं रात्रौ दिवा सर्वदा ॥ यत्पुण्यं कुरुजांगले रविग्रहे
माघे प्रयागे तथा तत्प्राप्नोति ततोऽधिकं मम गृहे संतिष्ठते देवरत ॥ ७ ॥ यस्मिन्गृहे तिष्ठति गोपिचंदनं भक्त्या ललाटे मनुजो बिभर्ति चेत् ॥
तस्मिन्गृहेऽहं निवसामि सर्वदा श्रियान्वितः कंसनिहा चतुर्मुख ॥ ८ ॥ यो धारयेद्द्वारवतीसमुद्भवां मृत्स्नां पवित्रां कलिकल्मषापहाम् ॥ नित्यं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ललाटे मम मन्त्रसंयुतां यमं न पश्येदपि पापसंयुतः ॥ ९ ॥ यस्यांऽतकाले सुत गोपिचंदनं बाह्वोर्ललाटे हृदि मस्तके च ॥ प्रयाति लोके कमला
पतेर्मम गोबालघाती यदि ब्रह्महा स्यात् ॥ १० ॥ ग्रहा न पीडयंति न रक्षसां गणा यक्षाः पिशाचोरगभूतनायकाः ॥ ललाटपट्टे सुत गोपि
चंदनं संतिष्ठते यस्य मम प्रभावात् ॥ ११ ॥ ऊर्ध्वपुंड्रमृजुं सौम्यं ललाटे यस्य दृश्यते ॥ स चंडालोऽपि शुद्धात्मा पूज्य एव न संशयः ॥१२॥
अस्नातो यः क्रियाः कुर्यादशुचिः पापसंयुतः ॥ गोपीचंदनसंपर्कात्पूतो भवति तत्क्षणात् ॥ १३ ॥ अशुचिर्वाप्यनाचारो महापापं समाचरेत् ॥
शुचिरेव भवेन्नित्यमूर्ध्वपुंड्रांऽकितो नरः ॥१४॥ मत्प्रियार्थं शुभार्थं वा रक्षार्थं चतुरानन ॥ मत्पूजाहोमके चैव सायं प्रातः समाहितः॥ मद्भक्तो धारये
न्नित्यमूर्ध्वपुंड्रं भवापहम् ॥ १५ ॥ ऊर्ध्वपुंड्रधरो मर्त्यो म्रियते यदि कुत्रचित् ॥ श्वपाकोऽपि विमानस्थो मम लोके महीयते ॥ १६ ॥ ऊर्ध्वपुंड्र
धरो मर्त्यो यदा यस्यान्नमश्नुते ॥ तदा विंशत्कुलं तस्य नरकादुद्धराम्यहम् ॥ १७ ॥ वीक्ष्याऽऽदर्शे जले वाऽपि यो विदध्यात्प्रयत्नतः ॥ ऊर्ध्व
पुण्ड्रं महाभाग स याति परमां गतिम् ॥ १८ ॥ अनामिका शांतिदोक्ता मध्यमाऽऽयुष्करी भवेत् ॥ अंगुष्ठः पुष्टिदः प्रोक्तस्तर्जनी मोक्षदायिनी ॥
॥ १९ ॥ गोपीचंदनखंडं तु यो ददाति च वैष्णवे ॥ कुलमष्टोत्तरं तेन तारितं वै भवेच्छतम् ॥ २० ॥ यज्ञो दानं तपो होमः स्वाध्यायः पितृतर्प
णम् ॥ व्यर्थं भवति तत्सर्वमूर्ध्वपुण्ड्रविनाकृतम् ॥ २१ ॥ यच्छरीरं मनुष्याणामूर्ध्वपुण्ड्रविनाकृतम् ॥ तन्मुखं नैव पश्यामि श्मशानसदृशं हि
तत् ॥ २२ ॥ ऊर्ध्वपुण्ड्रं प्रकुर्वीत मत्स्यकूर्मादिधारणम् ॥ कुर्याद्विष्णुप्रसादार्थं महाविष्णोरतिप्रियम् ॥ २३ ॥ यत्पुनः कलिकाले तु मत्पुरीसंभ
वां मृदम् ॥ मत्स्यकूर्माऽकितं चिह्नं गृहीत्वा कुरुते नरः ॥ २४ ॥ देहे तस्य प्रविष्टं मां जानीहि त्रिदशोत्तम ॥ तस्य मे नांतरं किंचित्कर्तव्यं श्रेय
इच्छता ॥ २५ ॥ ममावतारचिह्नानि दृश्यंते यस्य विग्रहे ॥ मर्त्यो मर्त्यो न विज्ञेयः स नूनं मामकी तनुः ॥ २६ ॥ पापं सुकृतरूपं तु जायते
तस्य देहिनः ॥ ममाऽऽयुधानि दृश्यंते लिखितानि कलौ युगे ॥ २७ ॥ उभाभ्यामपि चिह्नाभ्यां योंऽकितो मत्स्यमुद्रया ॥ कूर्मया मामकं तेजो
विक्षिप्तं तस्य विग्रहे ॥ २८ ॥ शंख च पद्मं च गदां रथांगं मत्स्यं च कूर्मं रचितं स्वदेहे ॥ करोति नित्यं सुकृतस्य वृद्धिं पापक्षयं जन्मशतार्जि
तस्य ॥ २९ ॥ नारायणायुधैर्नित्यं चिह्नितो यस्य विग्रहः ॥ पापकोटिप्रयुक्तस्य तस्य किं कुरुते यमः ॥ ३० ॥ शंखोद्धारे च यत्प्रोक्तं वसता
कोटिजन्मभिः ॥ तत्फलं लभते शंखे प्रत्यहं दक्षिणे भुजे ॥ ३१ ॥ यत्फलं पुष्करे प्रोक्तं पुण्डरीकाक्षदर्शनात् ॥ शंखोपरि कृते पद्मे तत्फलं कोटि
संमितम् ॥ ३२ ॥ वामे भुजे गदा यस्य लिखिता दृश्यते कलौ ॥ गदाधरो गयापुण्यं प्रत्यहं तस्य यच्छति ॥ ३३ ॥ यच्चानंदपुरे प्रोक्तं चक्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वामिसमीपतः ॥ गदाचक्रे च लिखिते तत्फलं लिंगदर्शने ॥ ३४ ॥ ममायुधांऽकितं देहं गोपीचन्दनमृत्स्नया ॥ प्रयागादिषु तीर्थेषु स गत्वा किं करिष्यति ॥ ३५ ॥ यदायदा प्रपश्येत देहं शंखादिचिह्नितम् ॥ तदातदा प्रसन्नोहं पापं तस्य दहामि वै ॥ ३६ ॥ तिष्ठते यस्य देहे तु अहोरात्रं दिने दिने ॥ शंखचक्रगदापद्मलिखितं स मदात्मकः ॥३७॥ नारायणायुधैर्युक्तं कृत्वात्मानं कलौ युगे ॥ यत्पुण्यं कर्म कुरुते मेरुतुल्यं न संशयः॥३८॥ शंखायुधांऽकितो भक्त्या यः श्राद्धं कुरुते सुत ॥ विधिहीनं तु संपूर्णं पितृणां दत्तमक्षयम् ॥३९॥ यथाऽग्निर्दहते काष्ठं वायुना प्रेषितो भृशम् ॥ तथा दह्यंति पापानि दृष्ट्वा म आयुधानि वै ॥ ४० ॥ मम नामांकितां मुद्रामष्टाक्षरसमन्वितम् ॥ शंखादिस्वायुधैर्युक्तां स्वर्णरौप्यमयीमपि ॥४१॥ धत्ते भगवतो यस्तु कलिकाले विशेषतः ॥ प्रह्लादस्य समो ज्ञेयो नान्यथा मम वल्लभः ॥४२॥ यस्य नारायणी मुद्रा देहं शंखादिचिह्नितम् ॥ धात्रीफलैः कृता माला तुलसीकाष्ठसंभवा ॥४३॥ द्वादशाक्षरमंत्रस्तु नियुक्तानि कलेवरे ॥ आयुधानि च विप्रस्य मत्समः स च वैष्णवः ॥४४॥ शंखांकिततनुर्विप्रो भुंक्ते वै यस्य वेश्मनि ॥ तदन्नं स्वयमश्नामि पितृभिः सह पुत्रक ॥४५॥ कृष्णायुधांऽकितं दृष्ट्वा सन्मानं न करोति यः॥द्वादशाब्दार्जितं पुण्यं बाष्कलेयाय गच्छति ॥ ४६ ॥ कृष्णायुधांऽकितो यस्तु श्मशाने म्रियते यदि ॥ प्रयागे या गतिः प्रोक्ता सा गतिस्तस्य मानद ॥४७॥ ममाऽऽयुधैः कलौ नित्यं मंडितो यस्य विग्रहः ॥ तत्राऽऽश्रमं प्रकुर्वंति विबुधा वासवादयः ॥ ४८ ॥ यः करोति च मे पूजां मम शस्त्रांकितो नरः ॥ अपराध सहस्राणि नित्यं तस्य हराम्यहम् ॥ ४९ ॥ कृत्वा काष्ठमयं बिंबं मम शस्त्रैः सुचिह्नितम् ॥ यो वा अंकयते देहं तत्समो नास्ति वैष्णवः ॥ ५० ॥ अष्टाक्षरांऽकिता मुद्रा यस्य धातुमयी करे ॥ शंखपद्मादिभिर्युक्ता पूज्यतेऽसौ सुरासुरैः ॥५१॥ धृता नारायणी मुद्रा प्रह्लादेन पुरा करे ॥ विभीषणेन बलिना ध्रुवेण च शुकेन च ॥ मांधात्रा ह्यंबरीषेण मार्कंडेयमुखैर्द्विजैः ॥ ५२ ॥ शंखादिचिह्नितैः शस्त्रैर्देहं कृत्वा च मानद ॥ एवमाराध्य मां प्राप्तं समीहितफलं महत् ॥ ५३ ॥ गोपीचंदनमृत्स्नया लिखितो यस्य विग्रहः ॥ शंखचक्रादिपद्मांऽको देहे तस्य वसाम्यहम् ॥ ५४ ॥ सौवर्णं राजतं ताम्रं कांस्यमायसमेव च ॥ चक्रं कृत्वा तु मेधावी धारयीत विचक्षणः ॥ द्वादशारं तु षट्कोणं वलित्रयविभूषितम् ॥ ५५ ॥ एवं सुदर्शनं चक्रं कारयीत विचक्षणः ॥ उपवीतादिवद्धार्याः शंखचक्रगदाः सदा ॥ ५६ ॥ ब्राह्मणैश्च विशेषेण वैष्णवैश्च विशेषतः ॥ उपवीतं शिखा यद्वच्चक्रं लांछन संयुतम् ॥ ५७ ॥ चक्रलांछनहीनस्य विप्रस्य विफलं भवेत् ॥ मम चक्रांऽकितो देहः पवित्र इति वै श्रुतिः ॥ ५८ ॥ चक्रांऽकिताय दातव्यं हव्यं कव्यं विचक्षणैः ॥ मम चक्रांऽककवचमभेद्यं देवदानवैः ॥ अजेयः सर्वभूतानां शत्रूणां रक्षसामपि ॥ ५९ ॥ मम चक्रांऽककवचं शरीरे यस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तिष्ठति ॥ नाऽशुभं विद्यते तस्य गृहपुत्रादिकस्य हि ॥ ६० ॥ दक्षिणे च भुजे विप्रो बिभृयाद्वै सुदर्शनम् ॥ सव्ये च शंखं बिभृयादिति वेदविदो
विदुः ॥ ६१ ॥ तत्तन्मंत्रेण मंत्रज्ञः प्रतिष्ठाप्य पृथक्पृथक् ॥ ६२ ॥ ललाटे च गदा धार्या मूर्ध्नि चापं शरस्तथा ॥ नंदकं चैव हृन्मध्ये शंखचक्रे
भुजद्वये ॥ ६३ ॥ तस्मात्सर्वप्रयत्नेन चक्रादीन्धारयेत्सदा ॥ धारणानन्तरं ब्रूयात्तत्र चैवं द्विजोत्तमः ॥ ६४ ॥ पुत्रमित्रकलत्रादिर्यः कश्चिन्मत्परि
ग्रहः ॥ सह देहेन सर्वोऽसौ विष्णुप्रीत्यै मयाऽर्पितः ॥ ६५ ॥ पश्चात्स्वधर्ममास्थाय तिष्ठेदाजीवनं मम ॥ भक्त्या चाव्यभिचारिण्या सर्वदाऽऽ
प्तमनोरथः ॥ ६६ ॥ शंखचक्रांकितं दृष्ट्वा ये निंदंति नराधमाः ॥ अवलोक्य मुखं तेषामादित्यमवलोकयेत् ॥ श्रीकृष्णनाम चोच्चार्य शुद्धो
भवति नान्यथा ॥ ६७ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे ब्रह्मविष्णुसंवादे गोपीचन्दनादिशंख
चक्राद्यायुधधारणतत्तन्मुद्राधारणप्रकारकथनंनाम तृतीयोऽध्यायः ॥ ३ ॥ ॥ छ ॥ ॥ ब्रह्मोवाच ॥ ॥ तप्तचक्रांकितं कृत्वा ह्यात्मान
मथ दीक्षितम् ॥ पद्माक्षतुलसीमालं किं फलं ब्रूहि केशव ॥ १ ॥ ॥ श्रीभगवानुवाच ॥ ॥ तुलसीकाष्ठसंभूतां यो मालां वहते द्विजः ॥ अप्यऽ
शौचोऽप्यनाचारो मामेवैति न संशयः ॥ २ ॥ धात्रीफलकृता माला तुलसीकाष्ठसंभवा ॥ दृश्यते यस्य देहे तु स वै भागवतो नरः ॥ ३ ॥
तुलसीदलजां मालां कण्ठस्थां वहते तु यः ॥ ममोत्तीर्णां विशेषेण स नमस्यो दिवौकसाम् ॥ ४ ॥ तुलसीदलजां मालां धात्रीफलकृतामपि ॥
ददाति पापिनां मुक्तिं किं पुनर्मम सेविनाम् ॥ ५ ॥ तुलसीदलजां मालां ममोत्तीर्णां वहेत्तु यः ॥ पत्रेपत्रेऽश्वमेधानां दशानां लभते फलम् ॥ ६ ॥
तुलसीकाष्ठसंभूतां यो मालां वहते नरः॥ फलं यच्छाम्यहं वत्स प्रत्यहं द्वारकोद्भवम् ॥ ७ ॥ निवेद्य भक्त्या मां मालां तुलसीकाष्ठसंभवाम् ॥ वहते
यो नरो भक्त्या तस्य वै नास्ति पातकम् ॥ ८ ॥ सदा प्रीतमनास्तस्य अहं प्राणवरो हि सः ॥ तुलसीकाष्ठसंभूतां यो मालां वहते नरः ॥ प्राय
श्चित्तं न तस्याऽस्ति नाऽशौचं तस्य विग्रहे ॥९॥ तुलसीकाष्ठसंभूतं शिरसः काष्ठभूषणम् ॥ बाहौ करे च मर्त्यस्य देहे यस्य स मे प्रियः ॥ १० ॥
तुलसीकाष्ठमालाभिर्भूषितः पुण्यमाचरेत् ॥ पितणां देवतानां च पुण्यं कोटिगुणं भवेत् ॥ ११ ॥ तुलसीकाष्ठमालां तु प्रेतराजस्य दूतकाः ॥ दृष्ट्वा
नश्यंति दूरेण वातोद्धूतं यथा दलम् ॥ १२ ॥ यद्गृहे तुलसीकाष्ठं पत्रं शुष्कमथाऽऽर्द्रकम् ॥ भवंति तद्गृहे नैव पापं संक्रमते कलौ ॥ १३ ॥ तुलसी
काष्ठमालाभिर्भूषितो भ्रमते भुवि ॥ दुःस्वप्नं दुर्निमित्तं च न भयं शात्रवं क्वचित् ॥१४॥ धारयंति न ये मालां हैतुकाः पापबुद्धयः ॥ नरकान्न निव
र्तंते दग्धाः कोपाग्निना मम ॥ १५ ॥ तस्माद्धार्या प्रयत्नेन माला तुलसिसंभवा ॥ पद्माक्षनिर्मिता भक्त्या फलैर्धात्र्या सुपुण्यदा ॥ १६ ॥ तदूर्ध्वं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पुंड्रशंखाद्यैर्युक्तस्तुलसिमूलके ॥ सन्ध्योपास्त्यादिकं कुर्यात्कुशपाणिर्हि मां स्मरन् ॥ १७ ॥ कृतसन्ध्यादिको भक्तस्ततः संपूजयेच्च माम् ॥ गुरु
श्चेत्तत्र वर्तेत आदौ गत्वा नमेद्गुरुम् ॥ १८ ॥ किंचिद्दत्त्वोपायनं च दण्डवत्प्रणमेन्मुदा ॥ आचम्यैकाग्रमनसा पूजामण्डपमाविशेत् ॥ १९ ॥उप
विश्याऽऽसने रम्ये कृष्णाजिनकुशोत्तरे ॥ सम्यक्पद्मासनासीनो भूतशुद्धिं समाचरेत् ॥ २० ॥ प्राणायामत्रयं कृत्वा मन्त्रेण च जितेंद्रियः ॥ उद
ङ्मुखस्ततः कृत्वा हृत्पंकजमनुत्तमम् ॥ विकासं तस्य कुर्वीत विज्ञानरविणा हृदि ॥ २१ ॥ कार्णिकायां न्यसेच्चार्कं शशिनं चाग्निमेव च ॥ त्रयं
त्रयात्मके तस्मिंश्चिंतयेद्वैष्णवो नरः ॥ नानारत्नमयं पीठं तेषामुपरि विन्यसेत् ॥ २२ ॥ तस्मिन्मृदुश्लक्ष्णतरं बालार्कसदृशद्युति ॥ अष्टैश्वर्यदलं
पद्मं मन्त्राक्षरमयं न्यसेत् ॥ २३ ॥ तस्मिन्देवं समासीनं कोटिशीतांशुसन्निभम् ॥ चतुर्भुजं महापद्मशंखचक्रगदाधरम् ॥ २४ ॥ पद्मपत्रविशालाक्षं
सर्वलक्षणलक्षितम् ॥ श्रीवत्सकौस्तुभोरस्कं पीतवस्त्रान्वितं च माम् ॥ २५ ॥ विचित्राभरणैर्युक्तं दिव्यमंडनमंडितम् ॥ दिव्यचन्दनलिप्तांगं दिव्य
पुष्पोपशोभितम् ॥ २६ ॥ तुलसीकोमलदलवनमालाविभूषितम् ॥ कोटिबालार्कसदृशं कान्तं दिव्यश्रिया सह ॥ २७ ॥ सर्वलक्षणलक्षिण्या समा
श्लिष्टतनुं शिवम् ॥ एवं ध्यात्वा जपेन्मंत्रं समाहितमनाः शुचिः ॥ २८ ॥ सहस्रं शतवारं वा यथाशक्ति जपेन्मनुम् ॥ मनसैवाऽर्चनं कृत्वा ततो
विधिवदाचरेत् ॥ २९ ॥ संप्रदायाऽनुरोधेन शंखं स्थाप्य ममाग्रतः ॥ दूर्वांकुरैश्च पुष्पैश्च गंधोदेन च पूरितम् ॥ ३० ॥ दक्षिणे गंधपुष्पाणां पात्रं
स्थाप्यं च देशिकैः ॥ वामभागे न्यसेत्कुंभं वस्त्रपूतं सुवासितम् ॥ ३१ ॥ पुरतो मम घंटां च दिक्षु दीपान्नियोजयेत् ॥ अन्यत्सर्वं साधनं च यथा
स्थानेषु विन्यसेत् ॥३२॥ अर्घ्यपाद्याऽऽचमनीयमधुपर्कस्य कारणात् ॥ विन्यसेत्पुरतो मह्यं चत्वार्यमत्रकाणि वै ॥ ३३ ॥ सिद्धार्थाऽक्षतपुष्पाणि
कुशाग्रं तिलचंदनम् ॥ फलं यवाश्चतुर्वक्त्र अर्घ्यपात्रे विनिःक्षिपेत् ॥३४॥ दूर्वा विष्णुपदी श्यामा पद्मं चैव चतुर्थकम् ॥ पाद्यपात्रे न्यसेत्पुत्र देशिको
मम तुष्टये ॥ ३५ ॥ कंकोलं च लवंगं च फलं मालतिसंभवम् ॥ कुर्याद्वै श्रद्धया पुत्र पात्र आचमनीयके ॥ ३६ ॥ गव्यं पयो दधि मधु घृतं खंड
समन्वितम् ॥ मधुपर्कस्य पात्रे वै दद्याद्वै श्रद्धयाऽर्चकः ॥ ३७ ॥ उक्तानां द्रव्यजातीनामलाभे पत्रपुष्पयोः ॥ तत्तद्भावनया कुर्यात्सर्वदा विधि
कोविदः ॥ ३८ ॥ करन्यासं ततः कुर्यादंगन्यासं तथैव च ॥ पंचांगं वा षडंगं वा विन्यसेत्संप्रदायतः ॥ ३९ ॥ ममाऽनुस्मरणं कार्यमात्मानं
मत्समं स्मरेत् ॥ पूजारंभे चतुर्वक्त्र मंगलं तु पठेन्नरः ॥ ४० ॥ अथ संपूजयेच्छंखं पांचजन्यं मम प्रियम् ॥ यस्य संपूजनाद्वत्स आनंदः परमो मम ॥
शंखस्य पूजने वत्स मंत्रानेतानुदीरयेत् ॥ ४१ ॥ त्वं पुरा सागरोत्पन्नो विष्णुना विधृतः करे ॥ निर्मितः सर्वदेवैश्च पांचजन्य नमोऽस्तु ते ॥ ४२ ॥

CC-0. In Public Domain. Digitization by eGangotri

तव नादेन जीमूता वित्रसंति सुराऽसुराः ॥ शशांकाऽयुतदीप्ताभ पांचजन्य नमोऽस्तु ते ॥४३॥ गर्भा देवारिनारीणां विलीयंते सहस्रधा ॥ तव नादेन पाताले पांचजन्य नमोऽस्तु ते ॥ ४४ ॥ दर्शनेनैव शंखस्य किं पुनः स्पर्शने कृते ॥ विलयं यांति पापानि हिमवद्भास्करोदये ॥ ४५ ॥ नत्वा शंखं करे धृत्वा मंत्रैरेभिस्तु वैष्णवः ॥ यः स्नापयति मां भक्त्या तस्य पुण्यमनंतकम् ॥ ४६ ॥ सुवासितेन तैलेन कुर्यादभ्यंजनं ततः ॥ कस्तूर्या चंदनेनैव कुर्यादुद्वर्तनादिकम् ॥४७॥ सुगंधवासितैस्तोयैः स्नाप्य मंत्रयुतैः शुभैः ॥ अर्घ्यं दत्त्वा ततो वत्स पाद्यमाचमनीयकम् ॥ मधुपर्कं ततो दद्या दथ सर्वोपचारकान् ॥ ४८ ॥ वस्त्रैराभरणैर्दिव्यैरलंकृत्य यथाविधि ॥ पुष्पैः संपूजयेत्पीठं तत्र देवं निधाय च ॥४९॥ वस्त्राऽलंकारगंधादीनर्पयेच्छ्रद्धया मम ॥ नैवेद्यं विविधं दद्यात्पायसाऽपूपमिश्रितम् ॥ सकर्पूरं च तांबूलं भक्त्या चैव निवेदयेत् ॥ ५० ॥ सुरभीणि च पुष्पाणि भक्त्या सम्यङ्निवेदयेत् ॥ धूपं दशांगमष्टांगं दीपं च सुमनोहरम् ॥ ५१ ॥ परिणीय प्रणम्याऽथ स्तुत्वा स्तुतिभिरादरात् ॥ शाययित्वा तु पर्यंके मंगलार्घ्यं निवेदयेत् ॥ ५२ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे ब्रह्मविष्णुसंवादे मार्गशीर्षमाहात्म्ये शंखपूजाविधिकथनंनाम चतुर्थोऽध्यायः ॥ ४ ॥ ॥ ब्रह्मोवाच ॥ ॥ पंचामृतस्य स्नपनाद्यत्फलं लभते हरेः ॥ शंखोदकेन यत्किंचित्तन्मे ब्रूह्यजिताऽच्युत ॥१॥ ॥ ॥ श्रीभगवानुवाच ॥ ॥ क्षीरस्नानं प्रकुर्वंति ये नरा मम मूर्द्धनि ॥ शताश्वमेधजं पुण्यं बिंदुना बिंदुना स्मृतम् ॥२॥ क्षीराद्दशगुणं दध्ना घृतेनैव दशोत्तरम् ॥ मधुना तद्दशगुणं सितया तु ततोऽधिकम् ॥ गंधपुष्पोदके मंत्रं सर्वोत्कृष्टं प्रशस्यते ॥३॥ द्वादश्यां पंचदश्यां वा गव्येन पयसा मम ॥ स्नापनं देवशार्दूल महापातकनाशनम् ॥ ४ ॥ दध्यादीनां विकाराणां क्षीरतः संभवो यथा ॥ तथैव शेषकामानां क्षीरस्नपनतो मम ॥ ५ ॥ क्षीरस्नानेन सौभाग्यं दध्ना मिष्टान्नभोजनम् ॥ घृतेन स्नापयेद्यो मां नरो मम पुरं व्रजेत् ॥ ६ ॥ मधुना सितया यस्तु कारयेन्मार्गशीर्षके ॥ स राजा जायते लोके पुनः स्वर्गादिहागतः ॥ ७ ॥ गजाश्वरथसंपूर्णं स राज्यं लभते भुवि ॥ कारयेन्मार्गशीर्षे वै यः क्षीरस्नापनं मम ॥ ८ ॥ स्वर्गे लोके स जयति चंद्रेंद्ररुद्रमारुतान् ॥ क्षीरस्नानं परं श्रेष्ठं मार्गशीर्षे च पुत्रक ॥ ९ ॥ क्षीरस्नपनमाहात्म्यं वर्चस्कं पुष्टिवर्धनम् ॥ दौर्भाग्यं विलयं याति क्षीरस्नानेन मे सुत ॥ १० ॥ स्नापयेन्मार्गशीर्षे मां यो वै पंचाऽमृतेन तु ॥ स न शोच्यो भवेज्जंतुर्बंधुना भुवि मानद ॥ ११ ॥ कपिलाक्षीरमादाय यः स्नापयति मां सुत ॥ कपिलाशतदानस्य फलं प्राप्नोति मानवः ॥ १२ ॥ शंखे तीर्थोदकं कृत्वा यः स्नापयति देशिकः ॥ बिंदुनाऽपि सहोमासे स्वकुलं तारयेद्धि सः ॥१३॥ कापिलं क्षीरमादाय शंखे कृत्वा च मानवः ॥ यः स्नापयति मां भक्त्या सर्वतीर्थफलं लभेत् ॥१४॥ शंखे कृत्वा तु पानीयं साक्षतं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कुशसंयुतम् ॥ यः स्नापयेत्सहोमासे सर्वतीर्थफलं लभेत् ॥ १५ ॥ शंखाष्टकेन यः स्नानं कारयेन्मार्गशीर्षके ॥ भक्त्या भगवतः श्रेष्ठो मम लोके महीयते ॥ १६ ॥ शंखषोडशकेनाथ यः स्नापयति मे सुत ॥ स पापमुक्तः सुचिरं स्वर्गलोके महीयते ॥ १७ ॥ चतुर्विंशतिसंख्याकैः शंखैर्यः स्नापयेच्च माम् ॥ इंद्रलोके चिरं स्थित्वा स राजा भुवि जायते ॥ १८ ॥ शंखाऽष्टोत्तरशतेनैव स्नापयेन्मार्गशीर्षके ॥ शंखेशंखे सुवर्णस्य फलं प्राप्नोति मानवः ॥ १९ ॥ मार्गशीर्षे भक्तिमान्यः कृत्वा शंखध्वनिं हि माम् ॥ स्नापयेत्पितरस्तस्य स्वर्गं तावत्प्रतिष्ठिताः ॥ २० ॥ अष्टोत्तरसहस्रं तु शंखस्नानं तु यश्चरेत् ॥ स गणो मुक्तिमाप्नोति यावदाभूतसंप्लवम् ॥ २१ ॥ नित्यं संस्नापयेद्यो मां शंखेन सुरसत्तम ॥ गंगास्नानफलं प्राप्य नित्यं नंदति देववत् ॥ २२ ॥ शंखे तोयं समादाय यः स्नापयति मां सुत ॥ नमो नारायणेत्युक्त्वा मुच्यते सर्वकिल्बिषैः ॥ २३ ॥ कृत्वा पादोदकं शंखे वैष्णवानां महात्मनाम् ॥ यो ददाति तिलोन्मिश्रं चांद्रायणफलं लभेत् ॥ २४ ॥ नाद्यं तडागजं वाऽपि वापीकूपादिकं च यत् ॥ गांगेयं जायते सर्वं जलं शंखकृतं च यत् ॥२५॥ गृहीत्वा मम पादांबु शंखे कृत्वा तु वैष्णवः ॥ यो वहेच्छिरसा नित्यं स मुनिस्तपतां वरः ॥२६॥ त्रैलोक्ये यानि तीर्थानि मम चैवाज्ञया सुत ॥ शंखे तानि वसंतीह तस्माच्छंखो वरः स्मृतः ॥ २७ ॥ सांबु शंखं करे धृत्वा मंत्रैरेतैस्तु वैष्णवः ॥ यः स्नापयेन्मार्गशीर्षे तुष्टस्तस्य भवाम्यहम् ॥ २८ ॥ शंखादौ चंद्रदैवत्यं कुक्षौ वरुणदेवता ॥ पृष्ठे प्रजापतिश्चैव अग्रे गंगा सरस्वती ॥ २९ ॥ तेषामुच्चारपूर्वं तु स्नापयेन्मामतंद्रितः ॥ तस्य पुण्यस्य संख्यां वै कर्तुं नैव सुराः क्षमाः॥ ३० ॥ पुरतो मम देवेश सपुष्पः सजलाक्षतः॥ शंखस्त्वभ्यर्चितस्तिष्ठेत्तस्य श्रीः सर्वतोमुखी ॥ ३१ ॥ विलेपनेन संपूर्णं शंखं कृत्वा तु मां भजेत् ॥ तदा मे परमा प्रीतिर्भवेद्वै शतवार्षिकी ॥ ३२ ॥ शंखे कृत्वा तु पानीयं सपुष्पं सजलाक्षतम् ॥ अर्घ्यं ददाति यो मां वै तस्य पुण्यमनंतकम् ॥ ३३ ॥ अर्घ्यं कृत्वा स्वयं शंखे यः करोति प्रदक्षिणाम् ॥ प्रदक्षिणीकृता तेन सप्तद्वीपा वसुंधरा ॥ ३४ ॥ भ्रामयित्वा च मे मूर्ध्नि मंदिरं शंखवारिणा ॥ प्रोक्षयेद्वैष्णवो यस्तु नाशुभं तद्गृहे भवेत् ॥ ३५ ॥ नाधयो न क्रमस्तस्य नारकं न भयं क्वचित् ॥ यस्य पादोदकं शंखे कृतं मूर्धानमालभेत् ॥ ३६ ॥ ग्रहा रक्षांसि कूष्मांडपिशाचोरगदानवाः ॥ दृष्ट्वा शंखोदकं मूर्ध्नि विद्रवंति दिशो दश ॥ ३७ ॥ वादित्रनिनदैरुच्चैर्गीतमंगलनिःस्वनैः ॥ यः स्नापयति मां भक्त्या जीवन्मुक्तो भवेद्धि सः ॥ ३८ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे ब्रह्मविष्णुसंवादे मार्गशीर्षमाहात्म्ये शंखपूजनफलकथनंनाम पंचमोऽध्यायः ॥ ५ ॥

॥ ॥ ब्रह्मोवाच ॥ ॥ घण्टानादस्य माहात्म्यं चंदनस्य तथाऽच्युत ॥ यत्फलं लभते स्वामिंस्तत्सर्वं ब्रूहि तत्त्वतः ॥ १ ॥ ॥ श्रीभगवा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नुवाच ॥ ॥ स्नानार्चनक्रियाकाले घंटानादं करोति यः ॥ पुरतो मम देवेश तस्य पुण्यफलं शृणु ॥ २ ॥ वर्षकोटिसहस्राणि वर्षकोटिशतानि
च ॥ वसते मामके लोके अप्सरोगणसेवितः ॥ ३ ॥ सर्ववाद्यमयी घण्टा सर्वदेवमयी यतः ॥ तस्मात्सर्वप्रयत्नेन घण्टानादं तु कारयेत् ॥ ४ ॥
सर्ववाद्यमयी घण्टा सर्वदा मम वल्लभा ॥ वादनाल्लभते पुण्यं यज्ञकोटिशतोद्भवम् ॥ ५ ॥ घंटानादः सदा कार्यः पूजाकाले विशेषतः ॥ मन्वं
तरसहस्राणि मन्वंतरशतानि च ॥ ६ ॥ प्रीतो भवामि सततं घंटानादेन पुत्रक ॥ भेरीशंखनिनादेन घंटानादान्वितेन च ॥ ७ ॥ मृदंगशंखेन
युतं प्रणवेन समन्वितम् ॥ अर्चनं मम देवेश सततं मोक्षदं नृणाम् ॥ ८ ॥ यत्र तिष्ठेत पुरतो घंटा नादान्विता मम ॥ अर्चिता वैष्णवैर्यत्र तत्र
मां विद्धि पुत्रक ॥ ९ ॥ वैनतेयांऽकिता घंटा सुदर्शनयुताऽथवा ॥ ममाग्रे स्थापयेद्यस्तु तस्य पापं हराम्यहम् ॥ १० ॥ मदीयार्चनवेलायां घंटा
नादं करोति यः ॥ नश्यंति तस्य पापानि शतजन्मार्जितान्यपि ॥ ११ ॥ स्वापकाले प्रकुर्वीत घण्टानादं स्वभक्तितः ॥ ममैवार्चनवेलायां
फलं कोटिगुणोद्भवम् ॥ १२ ॥ ये मामर्चंति देवेशं सुपर्णोपरिसंस्थितम् ॥ शंखपद्मगदायुक्तं सचक्रं च श्रिया युतम् ॥ १३ ॥ किं करिष्यंति ते
तीर्थैर्देवतानां च दर्शनैः ॥ किं यज्ञैः किं व्रतैर्वापि किं दानैः किमुपोषणैः ॥१४॥ मूर्तिर्नारायणी यैश्च मामकी गरुडोपरि ॥ स्थापिता ते कलौ यांति
कल्पकोटिं पदं मम ॥ १५॥ म माऽग्रे स्थापयेद्यस्तु प्रासादेऽथ गृहेऽथवा ॥ तीर्थकोटिसहस्राणि तत्र तिष्ठंति देवताः ॥ १६ ॥ यस्तु पूजयते. धन्यो
गरुडोपरिसंस्थितम् ॥ एकादश्यां तथा रात्रौ वासनासंयुतो मम ॥ कृत्वा गीतं च नृत्यं च तारयेन्नरकात्पितॄन् ॥ १७ ॥ पुनश्च कथयिष्यामि शृणु
घंटामहं सुत ॥ १८ ॥ मम नामांकिता घण्टा पुरतो या च तिष्ठति ॥ अर्चिता वैष्णवी यत्र तत्र मां विद्धि पुत्रक ॥ १९ ॥ यस्तु वादयते घंटां
वैनतेयविचिह्निताम् ॥ धूपे नीराजने स्नाने पूजाकाले विलेपने ॥ २० ॥ ममाग्रे प्रत्यहं वत्स प्रत्येकं लभते फलम् ॥ मखायुतं गोऽयुतं च चांद्रा
यणशतोद्भवम् ॥ २१ ॥ विधिबाह्यकृता पूजा सफला जायते नृणाम् ॥ घण्टानादेन तुष्टोऽहं प्रयच्छामि स्वकं पदम् ॥ २२ ॥ नागाऽरिचिह्निता
घंटा रथांगेन समन्विता ॥ वादनात्कुरुते नाशं जन्मकोटिभयस्य वै ॥ २३ ॥ गरुडेनांऽकितां घंटां दृष्ट्वाऽहं प्रत्यहं मुदा ॥ प्रीतिं करोमि देवेश
लक्ष्मीं प्राप्य यथाऽधनः ॥ २४ ॥ घंटादण्डस्य शिरसि सुचक्रं स्थापयेत्तु यः ॥ मत्प्रियं वैनतेयं वा स्थापितं भुवनत्रयम् ॥ २५ ॥ घंटानादं
सचक्रं च अंतकाले शृणोति यः ॥ पापकोटियुतस्याऽपि नश्यंति यमकिंकराः ॥ २६ ॥ सर्वदोषाः प्रणश्यंति घंटानादेन वै सुत ॥ देवतानां स
रुद्राणां पितॄणामुत्सवो भवेत् ॥ २७ ॥ अभावे वैनतेयस्य चक्रस्याऽपि न संशयः ॥ घंटानादेन भक्तानां प्रसादं प्रकरोम्यहम् ॥ २८ ॥ गृहे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यस्मिन्भवेन्नित्यं घण्टा नागारिसंयुता ॥ सर्पाणां न भयं तत्र नाग्निविद्युत्समुद्भवम् ॥ २९ ॥ यस्य घंटा गृहे नास्ति शंखो न पुरतो मम ॥
कथं भागवतो ज्ञेयः कथं भवति वल्लभः ॥ ३० ॥ चंदनस्य प्रवक्ष्यामि माहात्म्यं तव पुत्रक ॥ यस्मिन्कृते भवेत्प्रीतिर्ममात्यंतं न संशयः ॥
॥ ३१ ॥ सचंदनं सकुसुमं कर्पूरागरुमिश्रितम् ॥ मृगनाभिसमायुक्तं जातीफलसमन्वितम् ॥ ३२ ॥ तुलसीचंदनोपेतं ममात्यंतसुखावहम् ॥ यो
ददाति हि मां नित्यं तुलसीकाष्ठसंभवम् ॥ ३३ ॥ युगानि वसते स्वर्गे ह्यनंतानि नरोत्तमः ॥ महाविष्णोः कलौ भक्त्या दत्त्वा तुलसिचंदनम् ॥
॥३४॥ अर्चयेन्मालतीपुष्पैर्न भूयः स्तनपो भवेत् ॥ तुलसीकाष्ठसंभूतं चंदनं यच्छते मम ॥३५॥ दहामि पातकं सर्वं पूर्वजन्मशतैः कृतम् ॥ सर्वेषा
मेव देवानां तुलसीकाष्ठचंदनम् ॥३६॥ पितॄणां च विशेषेण सदाऽभीष्टं यथा मम ॥३७॥ श्रीखंडं चंदनं तावच्छ्रेष्ठं कृष्णागुरुं तथा ॥ यावन्न दीयते
मह्यं तुलसीकाष्ठचंदनम् ॥ ३८ ॥ तावत्कस्तूरिकाऽऽमोदः कर्पूरस्य सुगंधिता ॥ यावन्न दीयते मह्यं तुलसीकाष्ठचंदनम् ॥३९॥ कलौ यच्छंति ये मह्यं
तुलसीकाष्ठचंदनम् ॥ मार्गशीर्षशुभे मासे ते कृतार्था न संशयः ॥ ४० ॥ यो हि भागवतो भूत्वा कलौ तुलसिचंदनम् ॥ नार्पयेद्वै सहोमासे नाऽसौ
भागवतो नरः ॥४१॥ कुंकुमागुरुश्रीखण्डकर्दमैर्मम विग्रहम् ॥ आलिंपेद्वै सहोमासे कल्पकोटिं वसेद्दिवि ॥४२॥ कर्पूरागुरुमिश्रेण चंदनेनाऽनुलिंप
येत् ॥ मृगदर्पं विशेषेण अभीष्टं च सदा मम ॥४३॥ विलेपयति यो मां वै शंखे कृत्वा तु चंदनम् ॥ मार्गशीर्षे तदा प्रीतिं करोमि शतवार्षिकीम् ॥४४॥
सेवते तुलसीपत्रैर्नित्यमामलकैश्च यः ॥ मार्गशीर्षे सदा भक्त्या स लभेद्वांछितं फलम् ॥ ४५ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां
संहितायां द्वितीये वैष्णवखण्डे ब्रह्मविष्णुसंवादे मार्गशीर्षमाहात्म्ये भगवते तुलसीकाष्ठचंदनार्पणफलकथनंनाम षष्ठोऽध्यायः ॥ ६ ॥ ॥ ब्रह्मो
वाच ॥ ॥ माहात्म्यं वद देवेश पुष्पजातिसमुद्भवम् ॥ येनयेन च पुष्पेण यत्फलं लभते नरः ॥ १ ॥ ॥ श्रीभगवानुवाच ॥ ॥ शृणु पुत्र
प्रवक्ष्यामि माहात्म्यं पुष्पसंभवम् ॥ येन पुष्पेण मे प्रीतिर्भवेत्सम्यङ्न संशयः ॥ २ ॥ मल्लिका मालती चैव यूथिका चातिमुक्तका ॥ पाटला कर
वीरं च जयन्ती विजया तथा ॥ ३ ॥ कुब्जकस्तबकश्चैव कर्णिकारं कुरंटकः ॥ चंपकश्चातकः कुन्दो बाणः कर्चूरमल्लिका ॥ ४ ॥ अशोकस्तिल
कश्चैव तथैवाऽपरयूथिकः ॥ अमी पुष्पप्रकारास्तु शस्ता मे पूजने सुत ॥ ५ ॥ केतकीपत्रपुष्पं च भृंगराजस्तथैव च ॥ तुलसीपत्रपुष्पं च सद्यः
प्रीतिकरं मम ॥ ६ ॥ पद्मान्यंबुसमुत्थानि रक्तनीलोत्पले तथा ॥ सितोत्पलं सहोमासे ममाऽत्यन्तं हि वल्लभम् ॥ ७ ॥ तान्येव च प्रशस्तानि
कुसुमानि च मे सुत ॥ यानि स्युर्वर्णयुक्तानि रसगन्धयुतानि च ॥ ८ ॥ निर्गंधान्यपि शस्तानि कुसुमानि मतानि मे ॥ सुरभीणि तथाऽन्यानि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वर्जयित्वा तु केतकीम् ॥ ९ ॥ बाणं च चंपकाऽशोकं करवीरं च यूथिका ॥ पारिभद्रं पाटला च बकुलं गिरिशालिनी ॥ १० ॥ बिल्वपत्रं शमीपत्रं
पत्रं भृंगिरजस्य च ॥ तमालामलकीपत्रं शस्तं मे पूजने सुत ॥ ११ ॥ पुष्पैररण्यसंभूतैः पत्रैर्वा गिरिसंभवैः ॥ अपर्युषितनिश्छिद्रैः प्रोक्षितैर्जंतुव
र्जितैः॥ १२ ॥ अथारामोद्भवैर्वापि पुष्पैः संपूजयेच्च माम् ॥ पुष्पजातिविशेषेण भवेत्पुण्यं विशेषतः ॥१३॥ तपःशीलगुणोपेते पात्रे वेदस्य पारगे ॥
दश दत्त्वा सुवर्णानि यत्फलं लभते नरः ॥ तत्फलं लभते मर्त्यः सहे कुसुमदानतः ॥ १४ ॥ द्रोणपुष्पे तथैकस्मिन्मह्यं च विनिवेदिते ॥ दश
दत्त्वा सुवर्णानि फलं तदधिकं सुत ॥ १५ ॥ पुष्पात्पुष्पांतरे भेदो यथाऽऽसीत्तन्निबोध मे ॥ १६ ॥ द्रोणपुष्पसहस्रेभ्यः खादिरं तु विशिष्यते ॥
खादिरात्पुष्पसाहस्राच्छमीपुष्पं विशिष्यते ॥ १७ ॥ शमीपुष्पसहस्रेभ्यो बिल्वपुष्पं विशिष्यते ॥ बिल्वपुष्पसहस्रेभ्यो बकपुष्पं विशिष्यते ॥१८॥
बकपुष्पसहस्रेभ्यो नंद्यावर्तं विशिष्यते ॥ नंद्यावर्तसहस्राद्धि करवीरं विशिष्यते ॥ १९ ॥ करवीरसहस्रस्य कुसुमं श्वेतमुत्तमम् ॥ करवीरश्वेत
पुष्पा त्पालाशं पुष्पमुत्तमम् ॥ २० ॥ पालाशपुष्पसाहस्रात्कुशपुष्पं विशिष्यते ॥ कुशपुष्पसहस्राद्धि वनमाला विशिष्यते ॥ २१ ॥ वनमाला
सहस्राद्धि चंपकं च विशिष्यते ॥ चंपकस्य पुष्पशतादशोकं पुष्पमुत्तमम् ॥ २२ ॥ अशोकपुष्पसाहस्राच्छेवन्तीपुष्पमुत्तमम् ॥ शेवन्तीपुष्प
साहस्रात्कुजकं पुष्पमुत्तमम् ॥ २३ ॥ कुजपुष्पसहस्राद्धि मालतीपुष्पमुत्तमम् ॥ मालतीपुष्पसाहस्रात्सन्ध्यापुष्पं विशिष्यते ॥ २४ ॥ सन्ध्या
पुष्पसहस्राद्धि त्रिसंध्यापुष्पमुत्तमम् ॥ २५ ॥ त्रिसंध्यारक्तसाहस्रात्त्रिसंध्याश्वेतमुत्तमम् ॥ त्रिसन्ध्याश्वेतसाहस्रात्कुन्दपुष्पं विशिष्यते ॥
॥ २६ ॥ कुन्दपुष्पसहस्राद्धि जातीपुष्पं विशिष्यते ॥ सर्वासां पुष्पजातीनां जातीपुष्पमिहोत्तमम् ॥ २७ ॥ जातीपुष्पसहस्रेण यच्छेन्मालां
सुशोभनाम् ॥ मह्यं यो विधिवद्दद्यात्तस्य पुण्यफलं शृणु ॥ २८ ॥ कल्पकोटिसहस्राणि कल्पकोटिशतानि च ॥ मत्पुरे वसते नित्यं ममतुल्य
पराक्रमः ॥ २९ ॥ येषां संति च पुष्पाणि प्रशस्तानि ममाऽर्चने ॥ तेषां पत्राणि शस्तानि तदभावे फलानि च ॥ ३० ॥ एतैः पत्रैश्च पुष्पैश्च
फलैश्चाऽपि तथाहि माम् ॥ अर्चन्दशसुवर्णस्य प्रत्येकं फलमाप्नुयात् ॥ ३१ ॥ एताभिः पुष्पजातीभिः सहोमासेऽर्चयंति ये ॥ भक्तिं ददामि तेषां वै
तुष्टः सन्नात्र संशयः ॥ ३२ ॥ धनं पुत्रांस्तथा दारान्यत्किंचिद्वांछते हि सः ॥ तत्तद्ददामि देवेश पुष्पैरेभिः प्रतोषितः ॥ ३३ ॥ इति श्रीस्कांदे
महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे ब्रह्मविष्णुसंवादे मार्गशीर्षमाहात्म्ये जातीपुष्पश्रैष्ठ्यकथनंपूर्वकं विष्णुकण्ठे तत्सह
स्रपुष्पांकितमालास्थापनफलयोर्वर्णनंनाम सप्तमोऽध्यायः ॥ ७ ॥ ॥ छ ॥ ॥ ब्रह्मोवाच॥ ॥ श्रीमत्तुलसिमाहात्म्यं यथावद्वर्णय प्रभो ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यस्याः सन्निधिमात्रेण प्रीतिर्भवति तेऽधिका ॥ १ ॥ ॥ श्रीभगवानुवाच ॥ ॥ मणिकांचनपुष्पाणि तथा मुक्तामयानि च ॥ तुलसीपत्रदानस्य कलां नार्हंति षोडशीम् ॥ २ ॥ तुलसीमंजरीभिर्यः कुर्याद्वै मम पूजनम् ॥ न स गर्भगृहं यायान्मुक्तिभागी भवेन्नरः ॥ ३ ॥ आरोप्य तुलसीं वत्स पूजयेत्तद्दलैश्च माम् ॥ दिवि संमोदमानः स श्वेतद्वीपे च मे गृहे ॥ ४ ॥ श्रीमत्तुलस्यार्चयते सकृद्धि मां पत्रैः सुगन्धैर्विमलैरखंडितैः ॥ यस्तस्य पापं पटसंस्थितं तदा निरीक्षयित्वा परिमार्जयेद्यमः ॥ ५ ॥ तुलसी न येषां मम पूजनार्थं संपादितैकादशिपुण्यवासरे ॥ धिग्यौवनं जीवितमर्थसन्ततिस्तेषां सुखं नेह च दृश्यते परे ॥ ६ ॥ लिंगमभ्यर्चितं दृष्ट्वा सहोमासे च मामकम् ॥ तुलसीपत्रनिकरैर्मुच्यते ब्रह्महत्यया ॥ ७ ॥ नित्यमभ्यर्चयेद्यो वै तुलस्या मां रमेश्वरम् ॥ महापापानि नश्यंति किं पुनश्चोपपातकम् ॥८॥ वर्ज्यं पर्युषितं पुष्पं वर्ज्यं पर्युषितं जलम् ॥ न वर्ज्यं तुलसीपत्रं न वर्ज्यं जाह्नवीजलम् ॥ ९ ॥ तावद्गर्जंति पुष्पाणि मालत्यादीनि भोः सुत ॥ यावन्न प्राप्यते पुण्या तुलसी मम वल्लभा ॥ १० ॥ सकृदभ्यर्चयेद्यो मां बिल्वपत्रेण मानवः॥मुक्तिभागी निरातंको मम पार्श्वगतो भवेत् ॥ ११ ॥ बिल्वपत्राच्छमीपत्राज्जातीपत्रात्सरोरुहात् ॥ वल्लभं तुलसीपत्रं कौस्तुभादधिकं मम ॥१२॥ अभिन्नपत्रा तुलसी हृद्या मंजरिसंयुता ॥ क्षीरोदार्णवसंभूता पद्मेवेयं सदा मम ॥१३॥ अकृष्णाऽप्यथवा कृष्णा तुलसी मम वल्लभा ॥ सिता वाऽप्यसिता वापि द्वादशी वल्लभा यथा ॥ १४ ॥ गृहीत्वा तुलसीपत्रं भक्त्या यो मां समर्चयेत् ॥ अर्चितं तेन सकलं सदेवासुरमानुषम् ॥ ॥ १५ ॥ तावद्गर्जंति रत्नानि कौस्तुभादीन्यनन्तशः ॥ यावन्न प्राप्यते कृष्ण तुलसीकृष्णमंजरी ॥ १६ ॥ कृष्णं कृष्णतुलस्या हि यो भक्त्या पूजयेन्नरः ॥ स याति भुवनं शुभ्रं यत्र विष्णुः श्रिया सह ॥ १७ ॥ ममाऽर्चनार्थं भिक्षूणां यच्छंति तुलसीदलम् ॥ अन्येषामपि भक्तानां यांति ते पदमव्ययम् ॥ १८ ॥ तुलसी कृष्णगौरा या तया यो मां समर्चयेत् ॥ नरो याति तनुं त्यक्त्वा वैष्णवीं शाश्वतीं गतिम् ॥ १९ ॥ ॥ ब्रह्मोवाच ॥ ॥ धूपदानस्य माहात्म्यं दीपस्याऽपि च केशव ॥ यत्फलं लभते मर्त्यस्तन्मे ब्रूहि यथाऽर्थतः ॥ २० ॥ ॥ श्रीभगवानुवाच ॥ ॥ शृणु पुत्र प्रवक्ष्यामि धूपदानस्य यत्फलम् ॥ दीपदानस्य माहात्म्यं मम प्रीतिकरं परम् ॥२१॥ अगुरुं च सकर्पूरं दिव्यचंदनसौरभम् ॥ दत्त्वा मां वै सहोमासे कुलानां तारयेच्छतम् ॥ २२ ॥ कृष्णागुरुसमुत्थेन धूपेन च समाऽलयम् ॥ धूपयेद्वैष्णवो यस्तु स मुक्तो नरकाऽर्णवात् ॥ २३ ॥ माहिषं गुग्गुलं यस्तु आज्ययुक्तं सशर्करम् ॥ धूपं ददाति यो वै मां तस्येच्छां प्रददाम्यहम् ॥ २४ ॥ गुग्गुलो हंत्यशेषाणि अरिष्टानि च धूपितः ॥ कामान्नानाविधांश्चैव अगुरुः संप्रयच्छति ॥ २५ ॥ देहं गेहं पुनात्येव धूपस्त्वगुरुसंभवः ॥ नाशयेद्यक्षरक्षांसि धूपः सर्जरसोद्भवः ॥ २६ ॥ जातिपुष्पसमैला

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

च गुग्गुलश्च हरीतकी ॥ कूटः सर्जरसश्चैव गुडःसैलाच्छडस्तथा ॥ नखयुक्तानि चैतानि दशांगो धूप उच्यते ॥ २७ ॥ धूपं दशांगं यदि चेत्करोति
मासे सहे मे अतिवल्लभे च ॥ ददामि कामानतिदुर्लभानपि बलं च पुष्टिं सुतदारभक्तिम् ॥ २८ ॥ मुस्ताधूपे मानुषाणां प्रियत्वं मांगल्यकं
वश्यकरं गुडस्य ॥ कुर्यात्सहोमासि ममाग्रतो यो विहाय पापानि स मां समाप्नुयात् ॥ २९ ॥ न भयं विद्यते तस्य दिव्यभौमांतरिक्षजम् ॥ मम
धूपावशेषेण यस्यांऽगं परिमार्जितम् ॥ ३० ॥ न चापद्विद्यते तस्य भवंति संपदोऽखिलाः ॥ धूपे कृते सहोमासे ममाग्रे श्रद्धयाऽनिशम् ॥३१॥
धूपः सुरूपतां धत्ते धूपः पावनमुत्तमम् ॥ वनस्पतिरसो दिव्यः परमः पावनः शुचिः ॥ ३२ ॥ अतः परं प्रवक्ष्यामि दीपमाहात्म्यमुत्तमम् ॥
यस्मिन्कृते नरो याति वैकुण्ठं नात्र संशयः ॥ ३३ ॥ बहुवर्तिसमायुक्तं घृतपूरसमन्वितम् ॥ कुर्यादारार्तिकं यो वै कल्पकोटिं दिवं वसेत् ॥ ३४ ॥
नीराजनं तु यः पश्येत्सहोमासे ममाऽग्रतः ॥ सप्तजन्म भवेद्विप्रो ह्यंते च परमं पदम् ॥ ३५ ॥ कर्पूरेण तु यः कुर्याद्भक्त्या चैव ममाग्रतः ॥ आरा
र्तिकं द्विजश्रेष्ठ प्रविशेन्मामनंतकम् ॥ ३६ ॥ मन्त्रहीनं क्रियाहीनं यत्कृतं पूजनं मम ॥ सर्वं संपूर्णतामेति कृते नीराजने सुत ॥ ३७ ॥ यः
करोति सहोमासे कर्पूरेण च दीपकम् ॥ अश्वमेधमवाप्नोति कुलं चैव समुद्धरेत् ॥ ३८ ॥ ममाऽग्रे वै द्विजानां च दीपं दद्याच्चतुष्पथे ॥ मेधावी
ज्ञानसंपन्नश्चक्षुष्मान्जायते नरः ॥ ३९ ॥ घृतेन वाऽथ तैलेन दीपं प्रज्वालयेन्नरः ॥ सहोमासे ममाऽग्रे च तस्य पुण्यफलं शृणु ॥ ४० ॥ विहाय
सकलं पापं सहस्रादित्यसन्निभः ॥ ज्योतिष्मता विमानेन मम लोके महीयते ॥ ४१ ॥ तस्मात्सर्वप्रयत्नेन दीपं दद्याद्विचक्षणः ॥ तं च दत्त्वा
विहिंसेद्यः स पतेन्नरके ध्रुवम् ॥ ४२ ॥ दीपं यो वै हरेत्पापी लोभाद्द्वेषाद्द्विजोत्तम ॥ तद्दीपहरणात्सोऽपि मूकोंऽधश्च प्रजायते ॥ ४३ ॥
इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे ब्रह्मविष्णुसंवादे मार्गशीर्षमाहात्म्ये दीपमाहात्म्यवर्णनंनाम अष्टमो
ऽध्यायः ॥ ८ ॥ ॥ ब्रह्मोवाच ॥ ॥ नैवेद्यस्य विधिं ब्रूहि देव मे तत्त्वतः प्रभो ॥ अन्नं कतिविधं चेष्टं व्यंजनादीन्यशेषतः ॥ १ ॥ ॥
श्रीभगवानुवाच ॥ ॥ साधु पृष्टं त्वया वत्स मम प्रीतिकरं परम् ॥ वक्ष्यामि तेऽन्नपानादिव्यंजनादीन्यशेषतः ॥ २ ॥ आदौ हिरण्मयं पात्रं
तदभावे च राजतम् ॥ तदभावे च पालाशं विस्तीर्णं बहुसुन्दरम् ॥ ३ ॥ कचोलाः शतशः कार्याः पात्रे वै परितोऽनघ ॥ तन्मध्ये व्यंजना देया
नानाफलमयाः शुभाः ॥ ४ ॥ पायसं चन्द्रसंकाशं पात्रे वै शर्करायुतम् ॥ भक्तं कुमुदसंकाशं मुद्गान्काचप्रभान्छुभान् ॥ ५ ॥ नानाव्यंजनसंरुद्धं
त्रिभिः पंक्तिभिरेव च ॥ निंबूरसेन चंद्रेण फलमूलयुतेन च ॥ ६ ॥ वैकृताश्च तदा कार्याः शतशो भोजने मम ॥ द्राक्षास्तु मिश्रिताश्चूतकरमर्द

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कृताः शुभाः ॥ ७ ॥ मरीचपिप्पलीसार्द्रकैलाचंद्रकसंयुताः ॥ क्वथिताः कथिकाः कार्याः शतशो भोजने मम ॥ ८ ॥ प्रलेहनास्तथा कार्याः कचो
लशतसंकुलाः ॥ नानाकुसुमसंमोदयुक्ताः सहसि मे प्रियाः ॥ ९ ॥ मंडका वर्तुला रम्याः समाः सर्वत्र बिंदुवत् ॥ सितया सहितेनाऽथ दुग्धेन
क्वथितेन च ॥ १० ॥ मधुवर्णेन गव्येन युक्ते तस्मिन्सुभोजने ॥ कचोले सुप्रभे वत्स स्थितं कांचनसुप्रभम् ॥ ११ ॥ घृतं सुवासितं प्रीत्या देयं
हि मम भोजने ॥ तत्र गोधूमपात्रेण चंद्रकेण हि चोज्ज्वलम् ॥ १२ ॥ सौबाह्निकाः पूरिकास्तु शतच्छिद्राः सवेष्टिकाः ॥ अपूपाश्च तथा क्षीर
प्रकारांस्तु प्रकारयेत् ॥ १३ ॥ मणयः सूत्रसंज्ञाश्च मालतीकुसुमादयः ॥ पर्पटा वर्पटा रम्या माषकूष्मांडसंभवाः ॥ १४ ॥ वटकान्नवधा रम्या
न्कुर्यान्मासे सहे मम ॥ द्विधा जातीमरीचैश्च पूरिता द्रोणके शुभाः ॥ १५ ॥ युक्तेन लवणेनाऽतिशुद्धतैलेन पूरिताः ॥ कुंकुमाभाः स्नेहहीनाः
सक्षता इव दुर्जनाः ॥ १६ ॥ दधिदुग्धयुताः केचिच्चिंचिणीचूतसंभवाः ॥ द्राक्षारसयुताः केचित्तथैवेक्षुरसैर्युताः ॥ १७ ॥ राजिका जलमध्य
स्थास्तथाऽन्ये सितया सह ॥ रसैश्चतुर्विधैश्चान्यैर्वटका नवधा मताः ॥ १८ ॥ वज्रप्रभाऽनुकणिकाचारबीजसुखारिकैः ॥ शकलैर्नारिकेलस्य लवंग
शतसंयुताः ॥ १९ ॥ घृतक्षीरसिताद्यास्ताः कटाहे सुप्रलोडिताः ॥ लब्धासितादिकृसररम्याः स्निग्धाश्च फेणिकाः ॥ २० ॥ पराकिकासु वै पक्वाः
कृताश्चंद्रेण पोलिकाः ॥ मोदकास्तत्र वै कार्याश्चारबीजभवाः परे ॥ २१ ॥ सितया सहिताः कार्या अन्ये दुग्धेन निर्मिताः ॥ नारिकेलफलैश्चा
ऽन्ये वृक्षनिर्यासनिर्मिताः ॥ २२ ॥ बदामैश्च शुभाश्चाऽन्ये तिलैश्च कणबीजकैः ॥ ईदृशान्मोदकांश्चान्यांस्तुष्ट्यर्थं मम कारयेत् ॥ २३ ॥
अर्शोघ्नं मोचनीकंदं तथाऽऽर्द्रं करमर्दकम् ॥ नारिंगं चिंचिणीकं च कंकोलफलमेव च ॥ २४ ॥ दशारं त्रिपुरीजातं शुभं निंबफलं बिसम् ॥
तिंदूफलं लवंगं च श्रीफलं तिलकं लुति ॥ २५ ॥ वल्कलं वंशकारीरं तथा कायफलं बलम् ॥ द्राक्षाफलं चूतफलं
रम्यं कंटकिनीफलम् ॥ २६ ॥ धात्रीफलं शुक्तिभवं फलमंबाडवं तथा ॥ रंभाफलं पिप्पली च मरीचाश्च मनोहराः ॥ २७ ॥
शुद्धसर्षपतैलेन लवणेन सुवेधितम् ॥ तथा राजिकया विद्धं त्रिभिर्वर्षैर्घटे स्थितम् ॥ २८ ॥ एवंविधानि जातानि व्यंजनानि च मानद ॥ कर्त
व्यानि सहोमासे मम प्रीतिकराणि वै ॥ २९ ॥ एतादृशे भोजने चेदसामर्थ्यं भवेद्यदि ॥ एवं कार्यं तदा तेन संक्षेपेण शृणुष्व मे ॥ ३० ॥ लड्डूक
मेकं घृतपूरमेकं फेनद्वयं कोकरसत्रयं च ॥ घृतप्लुतं मंडकषोडशानां वटाष्टदायी नरकं न पश्येत् ॥ ३१ ॥ अर्द्धाढकं सुचिरपर्युषितं च दुग्धं खंड
स्य षोडशपलानि शशिप्रभस्य ॥ सर्पिष्पलं मधुपलं मरिचं द्विकर्षं शुंठ्याः पलार्धमथवाऽर्धपलं चतुर्णाम ॥ ३२ ॥ श्लक्ष्णे पटे ललनया मृदुपाणि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

घृष्टां कर्पूरधूलिधवलीकृतभांडसंस्थाम् ॥ एतां शुभां रसवतीं प्रकरोति यो वै कामान्ददामि सकलान्मनुजस्य तस्य ॥ ३३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे ब्रह्मविष्णुसंवादे मार्गशीर्षमाहात्म्ये नैवेद्यविधिकथनंनाम नवमोऽध्यायः ॥ ९ ॥ ॥

ब्रह्मोवाच ॥ ॥ नैवेद्यानंतरं तात किं कर्तव्यं नृभिः प्रभो ॥ यत्कर्तव्यं सहोमासे तत्सर्वं ब्रूहि तत्त्वतः ॥ १ ॥ श्रीभगवानुवाच ॥ ॥ अथ भुक्तवते दत्त्वा जलैः कर्पूरवासितैः ॥ आचमनं च तांबूलं चंदनं करमार्जनम् ॥ २ ॥ पुष्पांजलिं ततः कुर्याद्भक्त्याऽऽदर्शं प्रदर्शयेत् ॥ नीराजनं ततः कार्यं कार्पूरं विभवे सति ॥ ३ ॥ समर्प्य मुकुटादीनि भूषणानि विचक्षणः ॥ ततः पश्चान्महाभाग प्रकल्प्य च्छत्रचामरे ॥४॥ प्रसादसुमुखं ध्यात्वा श्यामसुंदरविग्रहम् ॥ जपेदष्टोत्तरशतं स्तुवीत स्तुतिभिः प्रभुम् ॥५॥ शंखरौप्यमयी माला कांचनी च विशेषतः ॥ पद्माक्षैश्चैव सुभगैर्विद्रुमैर्मणिमौक्तिकैः ॥ ६ ॥ रचितेंद्राक्षकैर्माला तथैवांगुलिपर्वभिः ॥ पुत्रजीवमयी माला शस्ता वै जपकर्मणि ॥ ७ ॥ न च क्रमन्न च हसन्न पार्श्वमवलोकयन् ॥ न पदा पदमाक्राम्य करप्रावृतशिरास्तथा ॥८॥ नोत्तिष्ठन्मन्मत्तं विद्वान्न जपेद्व्यग्रमानसः ॥ जपकाले न भाषेत व्रतहोमार्चनादिषु ॥९॥ गृहेष्वेकगुणं जाप्यं गोष्ठे दशगुणं भवेत् ॥ नदीतीरे शतं विद्यादग्न्यगारे दशाऽधिकम् ॥ १० ॥ तीर्थादिषु सहस्रं स्यादनंतं मम सन्निधौ ॥ एवं कृत्वा सहोमासे यः कुर्याच्च प्रदक्षिणाम् ॥ ११ ॥ सप्तद्वीपवतीपुण्यं लभते स पदेपदे ॥ पठन्नामसहस्रं तु अथवा नाम केवलम् ॥ १२ ॥ एका प्रदक्षिणा भक्त्या दहेत्पापं सदाऽऽह्निकम् ॥ प्रदक्षिणीकृता तेन सप्तद्वीपा वसुन्धरा ॥ १३ ॥ दिनसप्तोद्भवं पापं मम तिस्रः प्रदक्षिणाः ॥ तत्क्षणान्नाशयंत्येव पापं देहे दशाऽऽह्निकम् ॥ १४ ॥ कृताः प्रदक्षिणा येन एकविंशति भक्तितः ॥ भ्रूणहत्यादिपापानि नाशमायांति तत्क्षणात् ॥ १५ ॥ अष्टोत्तरशतं येन कृता भक्त्या प्रदक्षिणाः ॥ तेनेष्टं क्रतुभिः सर्वैः समाप्तवरदक्षिणैः ॥ १६ ॥ प्रदक्षिणीकृता तेन तावद्वारं वसुन्धरा ॥ मातुः प्रदक्षिणास्तद्वद्भूतधात्रीप्रदक्षिणाः ॥ १७ ॥ शालिग्रामशिलायाश्च सममेतत्त्रयं स्मृतम् ॥ एको दंडप्रपातश्च सहे सप्तप्रदक्षिणाः ॥ १८ ॥ सममेतद्द्वयं नो वा दंडपातो विशिष्यते ॥ प्रदक्षिणे दंडपातं यः करोति सदा मम ॥ १९ ॥ सहोमासे विशेषेण आकल्पं स वसेद्दिवि ॥ कल्पादनंतरं तात चक्रवर्ती प्रजायते ॥ २० ॥ चिरायुर्धनवान्भोगी दानवान्धर्मवत्सलः ॥ सहस्रनामपठनात्पापं नश्येत्त्रिधा कृतम् ॥ २१ ॥ अथ किं बहुनोक्तेन शृणु गुह्यं च मे सुत ॥ दामोदरेति नाम्ना वै भवेत्प्रीतिर्ममाऽतुला ॥ २२ ॥ गुणसंबंधि मन्नाम कृतं मात्रा यशोदया ॥ यदा मे दधिभांडस्य

१ सप्तद्वीपवतीभूमिदानजं पुण्यमित्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्फोटनं गोकुले कृतम् ॥ २३ ॥ तदा यशोदया गाढं बद्धो दाम्ना ह्युलूखले ॥ ततः प्रभृति मे नाम ख्यातं दामोदरेति च ॥२४॥ नमो दामोदरायेति जपेद्यः सुसमाहितः ॥ सूर्योदये शुचिर्भूत्वा त्रिसहस्रं दिनेदिने ॥ २५ ॥ सार्द्धलक्षत्रयं यावत्तत उद्यापयेद्बुधः ॥ तर्पणं हवनं चैव ब्रह्मभोज्यं दशांशतः ॥ २६ ॥ एवं यः कुरुते भक्त्या तस्य यच्छामि वांछितम् ॥ धनं धान्यं तथा दारान्पुत्रांश्चान्यच्च वांछितम् ॥ २७ ॥ त्रिसत्येन मया चोक्तं श्रद्धत्स्व त्वं महामते ॥ मंत्रराजमिमं पुत्र कृपया मे प्रकाशितम् ॥ २८ ॥ दामोदरायेति पठन्नित्यं कुर्यात्प्रदक्षिणम्॥ दंडपातं तथा पुत्र अष्टांगेन समन्वितम् ॥ २९ ॥ पद्भ्यां कराभ्यां जानुभ्यामुरसा शिरसा तथा ॥ मनसा वचसा दृष्ट्या प्रणामोऽष्टांग उच्यते ॥ ३० ॥ शिरो मत्पादयोः कृत्वा बाहुभ्यां च परस्परम् ॥ प्रपन्नं पाहि मामीश भीतं मृत्युग्रहाऽर्णवात् ॥ ३१ ॥ पश्चाच्छेषां मया दत्तां शिरस्याधाय सादरम् ॥ एवं ब्रूयात्ततो वत्स मम पूजाप्रपूर्त्तये ॥ ३२ ॥ मंत्रहीनं क्रियाहीनं भक्तिहीनं जनार्दन ॥ यत्पूजितं मया देव परिपूर्णं तदस्तु मे ॥ ३३ ॥ मृदंगवाद्येन समं प्रणवेन सुसंयुतम् ॥ एवं कार्यं सहोमासे नृत्यं पुयण्प्रदं नृणाम् ॥ ३४ ॥ गीतं वाद्यं च नृत्यं च तथा पुस्तकवाचनम् ॥ पूजाकाले चतुर्वक्र सर्वदा मम च प्रियम् ॥३५॥ गीतवाद्याद्यभावे च मम नामसहस्रकम् ॥ स्तवराजं तथा पुत्र गजेंद्रस्य च मोक्षणम् ॥३६॥ अनुस्मृतिश्च गीता च स्तवनं पंचधा मतम् ॥ पंचस्तवं महाभाग मम प्रीतिकरं परम्॥३७॥ पादोदकं पिबेद्यो वै शालिग्रामसमुद्भवम् ॥ पंचगव्यसहस्रैस्तु प्राशितैः किं प्रयोजनम्॥३८॥ शालिग्रामशिलातोयं यः पिबेद्बिंदुना समम् ॥ मातुः स्तन्यं पुनर्नैव स पिबेन्मुक्तिभाङ्नरः॥ ३९ ॥ आशौचं नैव विद्येत सूतके मृतकेऽपि च ॥ येषां पादोदकं मूर्ध्नि प्राशनं ये प्रकुर्वते ॥ ४० ॥ अंतकालेऽपि यस्येदं दीयते पादयोर्जलम् ॥ सोऽपि सद्गतिमाप्नोति सदाचारबहिष्कृतः॥ ४१ ॥ अपेयं पिबते यस्तु भुंक्ते यद्यप्यभोजनम् ॥ अगम्यागमनो यो वै पापाचारश्च यो नरः ॥ ४२ ॥ सोऽपि पूतो भवत्याशु सद्यः पादांबुधारणात् ॥ चांद्रायणात्पादकृच्छ्रादधिकं पादयोर्जलम् ॥४३॥ अगुरुं कुंकुमं वाऽपि कर्पूरं चाऽनुलेपनम् ॥ मम पादांबुसंस्पृष्टं तद्वै पावनपावनम् ॥४४॥ दृष्टिपूतं तु यत्तोयं भवेद्वै विप्रसत्तम ॥ तद्वै पापहरं नृणां किं पुनः पादयोर्जलम् ॥ ४५ ॥ प्रियस्त्वं मेऽग्रजः पुत्रो विशेषेण च मत्प्रियः ॥ तदर्थं कथितं सर्वं रहस्यं यच्च मे स्थितम् ॥४६॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखंडे ब्रह्मविष्णुसंवादे मार्गशीर्षमाहात्म्ये पूजाविधिसमापनंतदुद्यापनंतत्फलकथनयोगो नाम दशमोऽध्यायः ॥ १० ॥ ॥ ब्रह्मोवाच ॥ ॥ एकादश्याश्च माहात्म्यं मूर्तीनां च मूविधानकम् ॥ सर्वं ब्रूहि मम स्वामिन्कृपया भूतभावन ॥ १ ॥ ॥ श्रीभगवानुवाच ॥ ॥ शृणुष्व द्विजशार्दूल कथां पापप्रणाशिनीम् ॥ यां श्रुत्वा याति विलयं पापं ब्रह्मवधा

CC-0. In Public Domain. Digitization by eGangotri

दिकम् ॥ २ ॥ कांपिल्ये नगरे राजा वीरबाहुरिति स्मृतः ॥ सत्यवादी जितक्रोधो ब्रह्मज्ञो मम तत्परः ॥ ३ ॥ भाववान्स दयाशीलो रूपवान्बलवा
न्नरः ॥ भक्तो भागवतानां च सदा मम कथारुचिः ॥ ४ ॥ सदा मम कथाऽऽसक्तः सदा जागरणप्रियः ॥ दाता विद्वान्क्षमाशीलो विक्रमी विजितेंद्रि
यः ॥ ५ ॥ विजयी रणशीलश्च ऋद्धया च धनदोपमः ॥ पुत्रवान्पशुमांश्चैव स्वदारनिरतस्तथा ॥६॥ तस्य भार्या कांतिमती रूपेणाऽप्रतिमा भुवि ॥
पतिव्रता महासाध्वी मम भक्तिरता सदा ॥ ७ ॥ तया सह विशालाक्षो बुभुजे मेदिनीं युवा ॥ मुक्त्वैकं मां महाबाहो नान्यज्जानाति दैवतम् ॥
॥ ८ ॥ एकस्मिन्दिवसे पुत्र भारद्वाजो महामुनिः ॥ समागतो गृहे तस्य वीरबाहोर्महात्मनः ॥ ९ ॥ दृष्ट्वा समागतं दूराद्भारद्वाजं महामुनिम् ॥
स्वागतं कारयामास दत्त्वार्घ्यं विधिवत्तदा ॥ १० ॥ आसनं कल्पयामास स्वयमेव महीपतिः ॥ प्रणम्य परया भक्त्या तस्थौ मुनिवराग्रतः ॥
॥ ११ ॥ ॥ राजोवाच ॥ ॥ अद्य मे सफलं जन्म अद्य मे सफलं दिनम् ॥ अद्य मे सफलं राज्यमद्य मे सफलं गृहम् ॥ १२ ॥ प्रसन्नो
मम विप्रर्षे परमात्मा जनार्दनः ॥ यत्त्वं समागतो ह्यद्य गृहे योगिवरस्तथा ॥ १३ ॥ मुक्तोऽहं पापकोट्याद्य यत्त्वयाऽहं निरीक्षितः ॥ राज्यं
लक्ष्मीर्गजाऽश्वाश्च मया तुभ्यं निवेदिताः ॥ १४ ॥ वैष्णवोऽसि मुनिश्रेष्ठ नास्त्यदेयं मया तव ॥ मेरुतुल्यं भवेत्सर्वं वैष्णवस्य वराटिका ॥
॥ १५ ॥ नाऽऽयाति हि गृहे यस्य वैष्णवो वै द्विजोत्तमः ॥ तद्दिनं विफलं तस्य कथितं ब्राह्मणैर्मम ॥१६॥ विष्णुभक्ताश्च ये केचित्सर्वे वर्णा द्विजा
तयः ॥ कथितं मम गार्ग्येण गौतमेन सुमंतुना ॥ १७ ॥ ये त्वभक्ता हृषीकेशे पिशाचास्ते हि मानवाः ॥ महापातकलिप्तास्ते ये भुंजंति हरेर्दिने ॥
॥ १८ ॥ शिवव्रतसहस्रैस्तु सौरैर्ब्राह्मैश्च कोटिभिः ॥ यत्फलं कविभिः प्रोक्तं वासरैकेन तद्धरेः ॥ १९ ॥ गर्वमुद्वहते तावत्तिथिर्ब्राह्मी च
शांकरी ॥ यावन्नायाति विप्रेंद्र द्वादशी च मम प्रिया ॥ २० ॥ तावत्प्रभावस्ताराणां यावन्नोदयते शशी ॥ तिथिस्तथा च विप्रेंद्र यावन्नायाति
द्वादशी ॥ २१ ॥ नारदेन पुरा प्रोक्तं वसिष्ठेन ममाग्रतः ॥ त्वं वेत्ता सर्वधर्माणां वैष्णवानां महामुने ॥ २२ ॥ ॥ भारद्वाज उवाच ॥ ॥
साधु पृष्टं महाभाग यत्त्वं भक्तोऽसि वैष्णवः ॥ सा सुप्रजा मही धन्या यत्त्वं रक्षसि भूमिप ॥ २३ ॥ तस्मिन्राष्ट्रे न वस्तव्यं यत्र
राजा न वैष्णवः ॥ वरं वासो वने तीर्थे न तु राष्ट्रे त्ववैष्णवे ॥ २४ ॥ यत्र भागवतो राजा संप्रशास्ति च मेदिनीम् ॥ वैकुण्ठमिति
मंतव्यं तद्राष्ट्रं पापवर्जितम् ॥ २५ ॥ चक्षुर्हीनं यथा देह पतिहीना यथा स्त्रियः ॥ द्वादशी दशमीयुक्ता तथा राष्ट्रमवैष्णवम् ॥ २६ ॥
यथा पुत्रो महीपाल मातापित्रोरपोषकः ॥ द्वादशी दशमीयुक्ता तथा राष्ट्रमवैष्णवम् ॥ २७ ॥ दानहीनो यथा राजा ब्राह्मणो रसविक्रयी ॥ द्वादशी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.

दशमीयुक्ता तथा राष्ट्रमवैष्णवम् ॥ २८ ॥ दंतहीनो यथा हस्ती पक्षहीनो यथा खगः ॥ द्वादशी दशमीयुक्ता तथा राष्ट्रमवैष्णवम् ॥ २९ ॥ प्रति
ग्रहार्थं वेदादि द्रव्यार्थं सुकृतं यथा ॥ द्वादशी दशमीयुक्ता तथा राष्ट्रमवैष्णवम् ॥ ३० ॥ दर्भहीना यथा संध्या यथा श्राद्धमदक्षिणम् ॥ द्वादशी
दशमीयुक्ता तथा राष्ट्रमवैष्णवम् ॥ ३१ ॥ सशिखश्च यथा शूद्रा कपिलाक्षीरपायकः ॥ द्वादशी दशमीयुक्ता तथा राष्ट्रमवैष्णवम् ॥ ३२ ॥ शूद्रश्च
ब्राह्मणीगामी हेमघ्नो धर्मदूषकः ॥ द्वादशी दशमीयुक्ता तथा राष्ट्रमवैष्णवम् ॥ ३३ ॥ हरिसूर्यादिवृक्षाणां यथा छेदो नरोत्तम ॥ द्वादशी दशमी
युक्ता तथा राष्ट्रमवैष्णवम् ॥ ३४ ॥ यथाऽऽहुतिर्मंत्रहीना मृतवत्सापयो यथा ॥ द्वादशी दशमीयुक्ता तथा राष्ट्रमवैष्णवम् ॥ ३५ ॥ सकेशा विधवा
यद्वद्व्रतं स्नानविवर्जितम् ॥ द्वादशी दशमीयुक्ता तथा राष्ट्रमवैष्णवम् ॥ ३६ ॥ स राजा प्रोच्यते सद्भिर्यो भक्तो मधुसूदने ॥ तद्रा वर्धते नित्यं
सुखी भवति सप्रजः ॥ ३७ ॥ दृष्टिर्मे सफला राजन्यन्मया त्वं निरीक्षितः ॥ अद्य मे सफला वाणी जल्पते या त्वया सह ॥ ३८ ॥ दूरमेव हि
गंतव्यं श्रूयते यत्र वैष्णवः ॥ दर्शनात्तु भवेत्पुण्यं तीर्थस्नानसमुद्भवम् ॥ ३९ ॥ स त्वं राजन्मया दृष्टो विष्णुभक्तिरतः शुचिः ॥ स्वस्ति तेऽस्तु
गमिष्यामि सुखी भव नराधिप ॥ ४० ॥ एतस्मिन्नंतरे राज्ञ्या कांतिमत्या नमस्कृतः ॥ भारद्वाजो मुनिश्रेष्ठः प्रवरः सर्वयोगिनाम् ॥ ४१ ॥ अवै
धव्यं वरारोहे भक्ता भव स्वभर्त्तरि ॥ निश्चला केशवे भक्तिः सदा भवतु ते शुभे ॥ ४२ ॥ एतस्मिन्नंतरे राजा भारद्वाजं महामुनिम् ॥ उवाच
प्रीणयन्वाचा मेघनादगभीरया ॥ ४३ ॥ ॥ राजोवाच ॥ ॥ विपुला मे कथं लक्ष्मीः किं कृतं पूर्वजन्मनि ॥ सर्वं ब्रूहि मुनिश्रेष्ठ कृपा यदि
ममोपरि ॥ ४४ ॥ एतन्मया कथं प्राप्तं राज्यं निहतकण्टकम् ॥ पुत्रो वै गुणवाञ्च्छ्रेष्ठः प्रिया च सुमनोहरा ॥ ४५ ॥ मच्चित्ता मद्गतप्राणा
चिंतयन्ती जनार्दनम् ॥ कोऽहं मुने कथं चैषा कश्च धर्मो मया कृतः ॥ ४६ ॥ किं चाऽनयाऽपि चार्वंग्या मम पत्न्या कृतं मुने ॥ केन पुण्येन
मे लक्ष्मीर्मृत्युलोके सुदुर्लभा ॥ ४७ ॥ अशेषा भूमिपाला वै वर्तंते यस्य मे वशे ॥ विक्रमं चाऽप्रतिहतं शरीरारोग्यता तथा ॥ ४८ ॥ ममाऽपि
विपुलं तेजो न कश्चित्सहते मुने ॥ इच्छाम्यद्य प्रतिज्ञातुं यथा चेयमनिंदिता ॥ ४९ ॥ मयाऽपि सुकृतं विप्र किं कृतं पूर्वजन्मनि ॥
इति पृष्टो नरेंद्रेण पूर्वजन्मविचेष्टितम् ॥ ५० ॥ स्वपत्न्याश्चेष्टितं चैव संपदां चैव कारणम् ॥ योगोत्थं सुचिरं कालं तथाविंदत
मानसे ॥ ५१ ॥ विज्ञातमेतन्नृपते पूर्वजन्मविचेष्टितम् ॥ तव पत्न्याश्च राजर्षे शृणुष्व कथयाम्यहम् ॥ ५२ ॥ ॥ भारद्वाज उवाच ॥ ॥
शृणु भूपाल सकलं यस्येदं कर्मणः फलम् ॥ त्वमासीः शूद्रजातीयो जीवहिंसापरायणः ॥ ५३ ॥ नास्तिको दुष्टचारित्रः परदारप्रध

Nepal Sanskrit University, Balmeeki Campus Library

CC-0. In Public Domain. Digitization by eGangotri

र्षकः ॥ कृतघ्नो दुर्विनीतश्च दुष्टाचारविवर्जितः ॥ ५४ ॥ इयं या भवतो भार्या पूर्वमप्यायतेक्षणा ॥ कर्मणा मनसा वाचा नान्यदस्यास्त्वया विना ॥
॥ ५५ ॥ पतिव्रता महाभागा भजमाना निरन्तरम् ॥ भावं न कुरुते दुष्टं तवोपरि तथा सति ॥ ५६ ॥ सखिभिस्त्वं परित्यक्तो बन्धुभिः पापकर्म
कृत् ॥ क्षयं जगाम चाऽर्थो यः सञ्चितस्तव पूर्वजैः ॥ ५७ ॥ नष्टे द्रव्ये फलाऽऽकांक्षी त्वमासीर्जगतीपते ॥ पूर्वकर्मविपाकेन कृषिश्च विफला गता ॥
॥ ५८ ॥ ततो वित्ते परिक्षीणे परित्यक्तश्च बांधवैः ॥ क्षीयमाणाऽपि साध्वीयमत्यजत्त्वां न भामिनी ॥ ५९ ॥ त्वं भग्नः सर्वकामेभ्यो गतवान्निर्जने
वने ॥ हत्वा जीवाननेकांश्च चकारात्मविपोषणम् ॥६० ॥ एवं प्रवृत्तस्य तव सह पत्न्या तदा नृप ॥ गतानि बहुवर्षाणि पापवृत्त्या महीतले॥६१॥
अन्यस्मिन्वासरे राजन्मार्गभ्रष्टो महामुनिः ॥ न दिशं विदिशं वेत्ति देवशर्मा द्विजोत्तमः ॥ ६२ ॥ क्षुत्तृषापीडितोऽत्यर्थं मध्याह्नगदिवाकरे ॥
पतितो वनमध्ये तु मार्गभ्रष्टो महीपते ॥ ६३ ॥ दया जाता च ते भूप दृष्ट्वा दुःखेन पीडितम् ॥ ब्राह्मणं वृद्धमज्ञातं गृहीत्वा तु करेण वै ॥ ६४ ॥
उत्थाप्य पतितं भूमौ त्वयोक्तं हि तदा नृप ॥ प्रसादं कुरु विप्रर्ष आगच्छ त्वं ममाऽऽश्रमम् ॥ ६५ ॥ जलपूर्णं तडागं च पद्मिनीखण्डमण्डितम् ॥
वृक्षैर्मनोहरैर्युक्तं फलैः पुष्पैर्मनोरमैः ॥ ६६ ॥ स्नात्वा सुशीतले तोये कृत्वा कर्म च नैत्यकम् ॥ कुरु विप्र फलाहारं पिब वारि सुशीतलम् ॥ ६७ ॥
सुखेन कुरु विश्रामं मया संरक्षितः स्वयम् ॥ विप्रेन्द्र तृप्तिपर्यंतं वस त्वं च ममाश्रमे ॥ ६८ ॥ उत्तिष्ठ त्वं द्विजश्रेष्ठ प्रसादं कर्तुमर्हसि ॥ लब्धसंज्ञ
स्तदा विप्रः श्रुत्वा शूद्रस्य भाषितम् ॥ ६९ ॥ करे जग्राह तं शूद्रं गतो यत्र जलाशयः ॥ उपविष्टो महाबाहो छायामाश्रित्य तत्तटे ॥ ७० ॥ स्नानं
चकार विधिवत्पूजयामास केशवम् ॥ तर्पयित्वा पितॄन्देवान्पपौ नीरं सुशीतलम् ॥ ७१ ॥ विश्रांतो वृक्षमूलेऽभूद्देवशर्मा द्विजोत्तमः ॥ साष्टांगं
मुनये कृत्वा नमस्कारं सह स्त्रिया ॥ ७२ ॥ शूद्रस्तु परया भक्त्या प्रोवाच मुनिसन्निधौ ॥ आवयोस्तरणार्थाय अतिथिस्त्वं समागतः ॥ ७३ ॥
दर्शनात्तव विप्रर्षे जातः पापस्य संक्षयः ॥ प्रिये फलानि स्वादूनि प्रयच्छास्मै द्विजातये ॥ मृदूनि रसयुक्तानि सुपक्वानि प्रियाणि च ॥ ७४ ॥
॥ ॥ ब्राह्मण उवाच ॥ ॥ त्वामहं नैव जानामि स्वज्ञातिं कथयस्व मे ॥ नाज्ञातस्य हि भोक्तव्यं ब्राह्मणस्याऽपि पुत्रक ॥ ७५ ॥ ॥ शूद्र
उवाच ॥ ॥ शूद्रोऽहं द्विजशार्दूल न कार्यः संशयस्त्वया ॥ आत्मजैर्दुर्जनैर्विप्र परित्यक्तः स्वबन्धुभिः ॥ ७६ ॥ तयोः संवदतोरेवं शूद्रपत्न्या
फलानि च ॥ दत्तानि तस्मै विप्राय तेन भुक्तानि तानि वै ॥ ७७ ॥ अभूत्प्रीतमना विप्रः पीत्वा नीरं सुशीतलम् ॥ सुखं संप्राप्य स मुनिर्विश्रांत
स्तरुमूलके ॥ ७८ ॥ स च शूद्रः सपत्नीको भुक्त्वा च पुनरागतः ॥ स्वागतं ते मुनिश्रेष्ठ कुतस्त्वमिह चाऽऽगतः ॥ ७९ ॥ शून्याटवीं द्विजश्रेष्ठ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दुष्टसत्त्वभयाकुलाम् ॥ निर्मनुष्यां दुःखयुक्तां दिवारात्रं भयानकाम् ॥ ८० ॥ ॥ ब्राह्मण उवाच ॥ ॥ ब्राह्मणोऽहं महाभाग प्रयागगमनं प्रति ॥
अहमज्ञातमार्गेण प्रविष्टो दारुणे वने ॥ ८१ ॥ मम पुण्यप्रभावेण जातोसि वरबांधवः ॥ जीवितं मे त्वया दत्तं ब्रूहि किं करवाणि ते ॥ ८२ ॥ भवा
नपि कुतः प्राप्तो निर्मनुष्ये वने खलु ॥ को भवान्कारणं किंस्वित्कथयस्व ममाऽग्रतः ॥ ८३ ॥ ॥ शूद्र उवाच ॥ ॥ विदर्भनगरी राज्ञा भीम
सेनेन रक्षिता ॥ वासो मम महाराष्ट्रे शूद्रोऽहं पापलंपटः ॥ ८४ ॥ स्वकर्मविहितो धर्मो मया त्यक्तो द्विजोत्तम ॥ त्यक्तोऽहं बन्धुवर्गेण ततोऽहं वन
मागतः ॥ ८५ ॥ कृत्वा जीववधं नित्यं जीवेऽहं भार्यया सह ॥ सांप्रतं पातकात्सम्यङ् निर्विण्णोस्मि महामुने ॥ ८६ ॥ कुरुष्वाऽनुग्रहं किञ्चित्पा
पयुक्तस्य मे प्रभो ॥ मम पुण्यप्रभावेण आगतस्त्वं द्विजोत्तम ॥ ८७ ॥ न पश्यामि यथा सौरिं पत्न्या सह महामुने ॥ उपदेशप्रभावेण प्रसादं कर्तु
मर्हसि ॥ ८८ ॥ नान्यदिच्छाम्यहं किञ्चिन्मुक्त्वा देवं जनार्दनम् ॥ कुरुष्वाऽनुग्रहं मेऽद्य प्रसादमृषिसत्तम ॥ ८९ ॥ ॥ भारद्वाज उवाच ॥ ॥ इति
तेन समापृष्टो देवशर्मा द्विजाग्रणीः ॥ शूद्रेण परया भक्त्या प्रहसन्वाक्यमब्रवीत् ॥ ९० ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहि
तायां द्वितीये वैष्णवखण्डे ब्रह्मविष्णुसंवादे मार्गशीर्षमाहात्म्य एकादश्याख्यानंनामैकादशोऽध्यायः ॥ ११ ॥ ॥ छ ॥ ॥ देवशर्मोवाच ॥
॥ ॥ तवेदृशी मतिर्जाता सहसा केशवोपरि ॥ एतस्मान्मे गतं पापं पूर्वजन्मशतोद्भवम् ॥ १ ॥ विना व्रतैर्विना तीर्थैर्मुक्तस्त्वं पापकोटिभिः ॥
ममातिथ्येन भक्त्या च जातं तव हरेः पदम् ॥ २ ॥ तेन पुण्यप्रभावेण मतिर्जाता तवेदृशी ॥ ध्यात्वा संचिंत्य मनसा ज्ञातं पूर्वविचेष्टितम् ॥ ३॥
पूर्वजन्मनि विप्रस्त्वमवंत्यां धर्मतत्परः ॥ सदाऽध्ययनशीलश्च सुशीलश्च सदा व्रती ॥ ४ ॥ एका तु द्वादशी विष्णोः कृता च दशमीयुता ॥ तत्पा
पस्य प्रभावेण समस्तं सुकृतं गतम् ॥ ५ ॥ सर्वं तद्विफलं जातं यथा शूद्रापतिर्द्विजः ॥ बहुवर्षसहस्राणि प्राप्ता नरकयातनाः॥ ६ ॥ तस्मादेवं त्वया
पूर्वं कृतं दुष्टं चिरं बहु ॥ कृता तु दशमीमिश्रा तिथिर्विष्णोर्महात्मनः ॥ ७ ॥ तेन शूद्रो भवाञ्जातः पापे तव मतिस्तथा ॥ धर्मे न रमते चित्तं
दशमीवेधदूषितम् ॥ ८ ॥ विदर्भनगरे वत्स अस्ति ते पुत्रिकासुतः ॥ कृतं तेन विधानोक्तं हरेरेकादशीव्रतम् ॥ ९ ॥ प्रदत्तं तेन तत्पुण्यमखण्डैका
दशीव्रतम् ॥ धर्मोपरि मतिर्जाता जातः पापस्य संक्षयः ॥ १० ॥ तेन पुण्यप्रभावेण एकादश्या व्रतेन च ॥ दशमीवेधजं पापं यमेन परिमार्जि
तम् ॥ ११ ॥ इह जन्मनि यत्पापं जन्मायुतकृतानि च ॥ मार्जितानि यमेनैव पापानि तव सांप्रतम् ॥ १२ ॥ तयोर्विवदतोरेवं विष्वक्सेनः समा
गतः ॥ वर्णावर स्वागतं ते तुष्टस्तेहं जनार्दनः ॥ १३ ॥ विप्रस्याऽऽतिथ्यहेतुत्वाज्जातः पापस्य संक्षयः ॥ परदत्तेन पुण्येन एकादश्या व्रतेन

CC-0. In Public Domain. Digitization by eGangotri

च ॥ १४ ॥ दशमीवेधजं पापं तव शूद्र लयं गतम् ॥ व्रतं कृत्वा ददौ पुण्यं दौहित्रस्तेन तारितः ॥ १५ ॥ पत्न्या सह महाभाग वैनतेयं समारुह ॥
इत्युक्त्वा देवदेवेन विमाने स्थापितस्तदा ॥ १६ ॥ स्वर्गं ततः सपत्नीकः शूद्रत्वेन नृपोत्तम ॥ देवशर्मा तु विप्रो वै तीर्थराजं ययौ पुनः ॥ १७ ॥
एतत्ते सर्वमाख्यातं यत्त्वया परिपृच्छितम् ॥ अखण्डैकादशीपुण्यात्प्राप्तस्याऽऽतिथ्यकारणात् ॥ विष्णुभक्तिमती भार्या राज्यं निहतकण्टकम् ॥
॥ १८ ॥ ॥ राजोवाच ॥ ॥ ब्रह्मन्नखण्डैकादश्या विधिं सम्यक्समादिश ॥ विष्णोः सम्प्रीणनार्थाय प्रसादं कर्तुमर्हसि ॥ १९ ॥ ॥ ऋषिरु
वाच ॥ ॥ शृणुष्व नृपशार्दूल एकादश्या विधिं शुभम् ॥ पुराऽऽसीद्भगवान्विष्णुर्नारदाय यदुक्तवान् ॥ २० ॥ तत्तेऽहं संप्रवक्ष्यामि उद्यापनविधिं
शुभम् ॥ मार्गशीर्षादिमासेषु द्वादशीषु नरोत्तम ॥ २१ ॥ व्रतं शुभमिदं कार्यमखण्डैकादशीव्रतम् ॥ दशम्यां चैव नक्तं च एकादश्यामुपोषणम् ॥
॥ २२ ॥ द्वादश्यामेकभुक्तं च अखंडा इति कथ्यते ॥ दिवसस्याष्टमे भागे मन्दीभूते दिवाकरे ॥ २३ ॥ तद्धि नक्तं विजानीयान्न नक्तं निशि
भोजनम् ॥ कांस्यं मांसं मसूरांश्च चणकान्कोद्रवांस्तथा ॥ २४ ॥ शाकं मधु परान्नं च पुनर्भोजनमैथुने ॥ विष्णुभक्तो नरो वाऽपि दशम्यां दश
वर्जयेत् ॥ २५ ॥ दशम्या विधिरुक्तोऽयमेकादश्यास्तथा शृणु ॥ असकृज्जलपानं च हिंसा शौचमसत्यता ॥ २६ ॥ तांबूलं दन्तकाष्ठं च दिवा
शयनमैथुने ॥ द्यूतं क्रीडा निशि स्वापः पतितैः सह भाषणम् ॥ एकादश्यां दशैतानि विष्णुभक्तस्तु वर्जयेत् ॥ २७ ॥ अद्य मे स्त्रीसुखं नास्ति
भोजनं नास्ति केशव ॥ प्रीत्यर्थं तव देवेश नियमस्तु दिवानिशि ॥ २८ ॥ सुप्तेन्द्रियैस्तु वैक्लव्यं भोजनं यच्च मैथुनम् ॥ दन्तांतरविलग्नान्नं क्षमस्व
पुरुषोत्तम ॥ २९ ॥ उपावृत्तस्तु पापेभ्यो यस्तु वासो गुणैः सह ॥ उपवासः स विज्ञेयो न शरीरस्य शोषणम् ॥ ३० ॥ पूर्वोक्तानि दशैतानि परान्नं
च तथा मधु ॥ द्वादश्यां विष्णुभक्तो वै वर्जयेन्मर्दनादिकम् ॥ ३१ ॥ अद्य मे द्वादशी पुण्या पवित्रा पापनाशिनी ॥ पारणं च करिष्यामि प्रसीद गरुड
ध्वज ॥ ३२ ॥ विष्णोः संतोषणार्थाय यो मया नियमः कृतः ॥ अद्याहं भोजयिष्यामि त्वत्प्रसादाद्द्विजोत्तमम् ॥ ३३ ॥ अनेन विधिना कुर्याद्याव
द्वर्षं समाप्यते ॥ संपूर्णे तु ततो वर्षे कुर्यादुद्यापनं बुधः ॥ ३४ ॥ आदौ मध्ये तथा चांते व्रतस्योद्यापनं स्मृतम् ॥ उद्यापनं न कुर्याद्यः कुष्ठी चांधश्च
जायते ॥ ३५ ॥ तस्मादुद्यापनं कुर्याद्यथाविभवसारतः ॥ क्रियते शुक्लपक्षे च मासे मार्गशिरे शुभे ॥ ३६ ॥ आमंत्र्य द्वादशमितान्ब्राह्मणान्विधि
कोविदान् ॥ त्रयोदशं सपत्नीकमाचार्यं विधिकोविदम् ॥ ३७ ॥ यजमानः शुचिः स्नात्वा श्रद्धायुक्तो जितेन्द्रियः ॥ पादशौचार्घवस्त्राद्यैराचार्यां

१ च प्राप्तम्–इति वाक्यशेषः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दींस्ततोऽर्चयेत् ॥ ३८ ॥ आचार्यस्तु ततः कृत्वा मण्डलं वर्णकैः शुभैः ॥ चक्राब्जं सर्वतोभद्रं श्वेतवस्त्रेण वेष्टितम् ॥ ३९ ॥ जलपूर्णं च कुम्भं तु पञ्चरत्नसमन्वितम् ॥ पञ्चपल्लवसंयुक्तं कर्पूरागुरुवासितम् ॥ ४० ॥ वेष्टितं रक्तवस्त्रेण ताम्रपात्रेण संयुतम् ॥ वेष्टितं पुष्पमालाभिर्मंडलोपरि विन्यसेत् ॥ ४१ ॥ तस्योपरि न्यसेद्देवं लक्ष्मीनारायणं नृप ॥ सौवर्णी प्रतिमा कार्या एककर्षप्रमाणतः ॥ ४२ ॥ वाहनाऽऽयुधसंयुक्ता प्रमाणं चतुरंगुलम् ॥ किंवा शक्त्या प्रकुर्वीत वित्तशाठ्यं विवर्जयेत् ॥ ४३ ॥ ततः संस्थापयेन्मूर्तिं मंडले द्वादशैव हि ॥ मासानामधिपः पूज्यश्चाखंडव्रतहेतवे ॥४४॥ मंडलात्पूर्वदिग्भागे शंखं संस्थापयेच्छुभम् ॥ त्वं पुरा सागरोत्पन्नो विष्णुना विधृतः करे ॥ निर्मितः सर्वदेवैस्त्वं पांचजन्य नमोऽस्तु ते ॥ ४५ ॥ ततस्तु स्थंडिलं कार्यं मंडलादुत्तरां दिशम् ॥ संकल्प्य हवनं कार्यं मन्त्रैर्वेदोक्तवैष्णवैः ॥ ४६ ॥ स्वस्थाने स्थापयेद्विष्णुं स्थापयेच्च हरिं प्रति ॥ पूजयेत्पुरुषसूक्तेन मन्त्रैः पौराणिकैः शुभैः ॥ ४७ ॥ नैवेद्यार्थं च वै कार्या मोदका बहवोऽपि च ॥ धूपदीपोपहाराणि कृत्वा नीराजनं ततः ॥ ४८ ॥ यक्षकर्दमेन संपूज्य ततः कुर्यात्प्रदक्षिणाम् ॥ स्वस्तिवाचनकैर्विप्रैर्नमस्कारं ततो नृप ॥ ४९ ॥ ततस्तु ब्राह्मणैः कार्य आचार्यक्रमशो जपः ॥ जपश्च पावमानीयो मंडलब्राह्मणं मधु ॥ ५०॥ तेजोऽसि शुक्रजं वाचं ब्रह्मसामादनंतरम् ॥ पवित्रवंतं सूर्यस्य विष्णोर्महसि संहिताम् ॥ ५१ ॥ जपांते कलशे विष्णुं सोपांगमुपरि न्यसेत् ॥ दिवसस्योदये चैव होमं कुर्यादनुक्रमम् ॥ ५२ ॥ संस्थाप्य प्रथमं पात्रं पूजयित्वा विधानतः ॥ स्तवनं च ततो होमः कर्तव्यश्चरुपूर्वकः ॥ ५३ ॥ स्वगृह्योक्तविधानेन यजनाग्निक्रियापरः ॥ चरुद्वयं च कुर्वीत पायसं वैष्णवं चरुम् ॥ ५४ ॥ जुहुयात्पुरुषसूक्तेन चरोः षोडश चाहुतीः ॥ तथा चतुर्गृहीतेन घृतयुक्तावराहुतिम् ॥ ५५ ॥ प्रादेशमात्राः पालाशसमिधश्च घृतप्लुताः॥ इदं विष्णिवति मंत्रेण होतव्याः कर्मसिद्धये ॥५६॥ शतमेकं तु जुहुयाद्द्विगुणाश्च तिलाऽऽहुतीः ॥ कृते च वैष्णवे होमे ग्रहयज्ञं समारभेत् ॥ ५७ ॥ समिद्भिश्चरुहोमं च तिलहोमं क्रमेण तु ॥ उभयोः स्वस्तिकं वाच्यं ततः पूजां समाचरेत् ॥ ५८ ॥ ऋत्विजां च ततो दद्याद्धेन्वादिग्रहदक्षिणाः ॥ देवस्य तृप्त्यै दद्याच्च ब्राह्मणाय यथाविधि ॥ ५९ ॥ गां वै पयस्विनीं दद्यादृषभं च सुशोभनम् ॥ ब्राह्मणानां ततो दद्यात्रयोदश पदानि च ॥६०॥ आचार्यं तु सपत्नीकं वस्त्रैश्च परितोषयेत् ॥ तोषयित्वा महादानैस्तं सार्थं च समर्पयेत् ॥ ६१ ॥ पञ्चविंशतिकुम्भांश्च सोदकान्वस्त्रवेष्टितान् ॥ ब्राह्मणांश्च ततो दद्यात्कृते पारणके निशि ॥ ६२ ॥ भूरिदानं च दातव्यं बंधूनामिष्टभोजनम् ॥ पूर्णपात्रं ततो दद्यादाचार्याय सदक्षिणम् ॥ ६३ ॥ पूर्णपात्रप्रदानेन कार्यं संपूरितं भवेत् ॥ उपवासव्रतं चैव स्नानं तीर्थफलं भवेत् ॥ ६४ ॥ विप्रैः संभाषितं तस्य संपूर्णं तद्भवेत्फलम् ॥ वित्त

CC-0. In Public Domain. Digitization by eGangotri

शक्तिर्गृहे नास्ति कृतं चैकादशीव्रतम् ॥ ६५ ॥ स्वशक्त्या चैव कर्तव्यं तथा चोद्यापनादिकम् ॥ एतत्ते सर्वमाख्यातमखण्डैकादशीव्रतम् ॥ ६६ ॥
इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे ब्रह्मविष्णुसंवादे मार्गशीर्षमासमाहात्म्येऽखण्डैकादशीव्रतकथनं
नाम द्वादशोऽध्यायः ॥ १२ ॥ ॥ छ ॥ ॥ श्रीभगवानुवाच ॥ ॥ शृणु पुत्र प्रवक्ष्यामि जागरस्य च लक्षणम् ॥ येन विज्ञातमात्रेण
सुलभोऽहं सदा कलौ ॥ १ ॥ गीतं वाद्यं च नृत्यं च पुराणपठनं तथा ॥ धूपं दीपं च नैवेद्यं पुष्पं गन्धानुलेपनम् ॥ २ ॥ फलार्पणं च श्रद्धा
च दानमिंद्रियसंयमम् ॥ सत्यान्वितं विनिद्रं च मुदा मद्यजनान्वितम् ॥ ३ ॥ साश्चर्यं चैव सोत्साहं पापालस्यादिवर्जनम् ॥ प्रदक्षिणासमायुक्तं
नमस्कारपुरःसरम् ॥ ४ ॥ नीराजनसमायुक्तमतिहृष्टेन चेतसा ॥ यामेयामे महाभाग कुर्यादारार्तिकं मम ॥ ५ ॥ षड्विंशद्गुणसंयुक्तमेकादश्यां
च जागरम् ॥ यः करोति नरो भक्त्या न पुनर्जायते भुवि ॥ ६ ॥ य एवं कुरुते भक्त्या वित्तशाठ्यविवर्जितः ॥ जागरं परया भक्त्या स लीनो
जायते मयि ॥ ७ ॥ दष्टाः कलिभुजंगेन स्वपन्ते ये दिने मम ॥ कुर्वंति जागरं नैव मायापाशविमोहिताः ॥ ८ ॥ प्राप्ताप्येकादशी येषां कलौ
जागरणं विना ॥ ते विनष्टा न संदेहो यस्माज्जीवितमध्रुवम् ॥ ९ ॥ उद्धृतं नेत्रयुग्मं च दत्त्वा वै हृदये पदम् ॥ कृतं ये नैव पश्यंति पापिनो मम
जागरम् ॥ १० ॥ अभावे वाचकस्याऽथ गीतं नृत्यं च कारयेत् ॥ वाचके सति देवेश पुराणं प्रथमं पठेत् ॥ ११ ॥ अश्वमेधसहस्रस्य वाजपेय
शतस्य च ॥ पुण्यं कोटिगुणं पुत्र मम जागरणे कृते ॥ १२ ॥ पितृपक्षे मातृपक्षे भार्यापक्षे च मानद ॥ कुलान्युद्धरते चैतन्मम जागरणे कृते ॥
॥ १३ ॥ उपोषणदिने विघ्ने प्रारब्धे जागरे सति ॥ विहाय स्थानं तत्राहं शापं दत्त्वा व्रजाम्यहम् ॥ १४ ॥ अविद्धवासरे ये मे प्रकुर्वंति हि जाग
रम् ॥ तेषां मध्ये प्रहृष्टः सन्नृत्यं वै प्रकरोम्यहम् ॥ १५ ॥ यावद्दिनानि कुरुते जागरं मम सन्निधौ ॥ युगाऽयुतानि तावंति वसते मम वेश्मनि ॥
॥ १६ ॥ न गयापिंडदानेन न तीर्थैर्बहुभिर्मखैः ॥ पूर्वजा मुक्तिमायांति विनैकादशिजागरात् ॥ १७ ॥ यः कुर्याज्जागरे पूजां कुसुमैर्मम वासरे ॥
पुष्पेपुष्पेऽश्वमेधस्य फलमाप्नोति मानवः ॥१८॥ यः कुर्याद्दीपदानं च रात्रौ जागरणे मम ॥ निमिषे निमिषे पुत्र लभते गोऽयुतं फलम् ॥ १९ ॥
यो दद्याज्जागरे पुत्र हविष्यान्नसमुद्भवम् ॥ नैवेद्यं लभते पुण्यं शालिशैलसमुद्भवम् ॥ २० ॥ पक्वान्नानि च यो दद्यात्फलानि विविधानि च ॥
जागरे मे चतुर्वक्त्र लभते गोशतं फलम् ॥ २१ ॥ कर्पूरेण च तांबूलं ददाति मम जागरे ॥ मद्भक्तो मत्प्रसादेन सप्तद्वीपाऽधिपो भवेत् ॥ २२ ॥
जागरे मम देवेश यः कुर्यात्पुष्पमण्डपम् ॥ स पुष्पकविमानेन क्रीडते मम सद्मनि ॥ २३ ॥ जागरे मे तु यो धूपं सकर्पूरं सगुग्गुलम् ॥ ददाति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दहते पापं जन्मलक्षसमुद्भवम् ॥ २४ ॥ स्नापयेज्जागरे यो मां दधिक्षीरघृताम्बुकैः ॥ भोगानिह लभेद्दै स ह्यन्ते च परमां गतिम् ॥ २५ ॥ दिव्यांऽ
बराणि यो दद्यात्फलानि विविधानि च ॥ स चिरं वसते स्वर्गे तं तु संख्यासमानि वै ॥ २६ ॥ दद्यादाभरणं यो मे हेमजं रत्नसंभवम् ॥ सप्त
कल्पानि वसते सोत्संगे मत्प्रियो मम ॥ २७ ॥ घृतेन दीपकं यो मे गव्येन च विशेषतः ॥ ज्वालयेज्जागरे रात्रौ निमिषे गोयुतं
फलम् ॥ २८ ॥ जागरे मे चतुर्वक्त्र कर्पूरेण च दीपकम् ॥ यो ज्वालयेत नीराजं कपिलादानजं फलम् ॥ २९ ॥ यः पुनः कुरुते दीपं गीतं
नृत्यं च पूजनम् ॥ शतक्रतुसमं पुण्यं व्रतैर्दानशतैरपि ॥ ३० ॥ स्वयं यः कुरुते गीतं विलज्जो नृत्यते यदि ॥ स लभेन्निमिषार्धेन कोटियज्ञ
कृतं फलम् ॥ ३१ ॥ निवारयति यो गीतं नृत्यं जागरणे मम ॥ षष्टियुगसहस्राणि पच्यते रौरवादिषु ॥ ३२ ॥ नृत्यमानस्य मर्त्यस्य ये केचिन्निकटे
गताः ॥ विमुक्ता धर्मराजेन मुक्ता यांति च मत्पदम् ॥३३॥ नृत्यमानस्य मर्त्यस्य उपहासं करोति यः ॥ जागरे यांति निरयं यावदिंद्राश्चतुर्दश ॥
॥ ३४ ॥ जागरे मम यः कुर्याद्भक्त्या पुस्तकवाचनम् ॥ श्लोकसंख्यायुगान्येव स वसेन्मम सन्निधौ ॥ ३५ ॥ प्रदक्षिणाप्रदानेन यत्फलं कथितं
बुधैः ॥ न तत्कोटिमखैः पुण्यं युगसंख्यैरवाप्यते ॥ ३६ ॥ दीपमाला ममाग्रे वै यः कुर्याज्जागरे सुत ॥ विमानकोटिसंयुक्त आकल्पं वसते दिवि ॥
॥ ३७ ॥ मम बालचरित्राणि जागरे पठते हि यः ॥ युगकोटिसहस्राणि श्वेतद्वीपे वसेन्नरः ॥ ३८ ॥ तस्माज्जागरणं कार्यं पक्षयोः शुक्लकृष्णयोः ॥
॥ ३९ ॥ यो गीतां पठते रात्रौ मम नामसहस्रकम् ॥ वेदोक्तानां पुराणानां जागरात्पुण्यमाप्नुयात् ॥ ४० ॥ धेनुदानं तु यः कुर्याज्जागरे मम
पुत्रक ॥ लभते नात्र संदेहः सप्तद्वीपवतीफलम् ॥ ४१ ॥ सर्वेषामेव पुण्यानां महत्पुण्यं महीतले ॥ द्वादशीजागरं पुत्र प्रसिद्धं भुवनत्रये ॥ ४२ ॥
जागरं ये च कुर्वंति कर्मणा मनसा गिरा ॥ न तेषां पुनरावृत्तिर्मम लोकात्कथंचन ॥ ४३ ॥ प्रोत्साहयित्वा लोकान्यः कुरुते जागरं निशि ॥
प्राप्नोति चक्रवर्तित्वं सत्यं मे व्याहृतं सुत ॥ ४४ ॥ संमानिताः ककुत्स्थेन रात्रौ जागरकारिणः ॥ स्वशक्त्या चैव दानेन प्राप्तं राज्यं सुदुर्लभम् ॥
॥ ४५ ॥ ये केचिद्गायका विप्रा वादका नर्तकाश्च ये ॥ नर्तकीसहिता यांति मम लोके सनातने॥४६॥ दुर्योनिषु गतैः सर्वैः कृत्वा जागरणं मम ॥
संप्राप्तं पृथिवीशत्वं कार्मुकैर्मुनिसत्तम ॥ ४७ ॥ निष्कामा मुक्तिमापन्नाः श्वपचाद्याश्च जागरात् ॥ विवेको नास्ति वर्णानां मम जागरकारिणाम् ॥
॥ ४८ ॥ न कलौ पावनं ध्यानं न कलौ जाह्नवीजलम् ॥ न कलौ पावनं जाप्यं मुक्त्वैकं जागरं मम ॥ ४९ ॥ द्वादशीदिवसे प्राप्ते ये कुर्वंति
हि जागरम् ॥ ते धन्यास्ते कृतार्था वै कलिकाले न संशयः ॥ ५० ॥ न भूयान्मानुषे लोके द्वादशीविमुखो नरः ॥ अतीतानागतान्वाऽपि

CC-0. In Public Domain. Digitization by eGangotri

पातयेन्नरके हि सः ॥ ९१ ॥ वरमेको गुणैर्युक्तः किं जातैर्बहुभिः सुतैः ॥ द्वादशीजागरात्सर्वांस्तारयेद्यो हि पूर्वजान् ॥ ९२ ॥ माहात्म्यं पठते भक्त्या मयोक्तं जागरोद्भवम् ॥ द्वादशीसंभवः पुत्रः कुलानां तारयेच्छतम् ॥ ९३ ॥ अगम्यागमने पापमभक्ष्यस्यापि भक्षणे ॥ पापं विलयमायाति कृते जागरणे सुत ॥ ९४ ॥ अज्ञानाद्यत्कृतं पापं ज्ञात्वा यत्पातकं कृतम् ॥ पूर्वजन्मार्जितं पापमिह जन्मनि यत्कृतम् ॥ ॥ ९५ ॥ सिद्ध्यंति सर्वकार्याणि मनसा चिंतितान्यपि ॥ द्वादश्यां वै चतुर्वक्त्र रात्रौ जागरणे कृते ॥ ९६ ॥ द्वादशीजागरेणैव मुक्तिं गच्छंति मानवाः ॥ ९७ ॥ न तत्पुण्यं कुरुक्षेत्रे प्रयागे वसतां कलौ ॥ माहात्म्यं वसतां पुंसां यत्फलं द्वादशीषु च ॥ ९८ ॥ नाऽश्वमेधसहस्रैस्तु तीर्थकोट्यवगाहनात् ॥ तत्फलं प्राप्यते पुत्र द्वादशीजागरे कृते ॥ ९९ ॥ पठेद्वा शृणुयाद्वाऽपि माहात्म्यं द्वादशीभवम् ॥ सर्वपापविशुद्धात्मा स लभेच्छाश्वतीं गतिम् ॥ ६० ॥ सर्वे दुष्टाः समस्ताश्च सौम्यास्तस्य सदा ग्रहाः ॥ संततेर्न वियोगस्तु द्वादशी यस्य कारणम् ॥ ६१ ॥ मम कीर्तिरुचिर्नित्यं न विपद्येत कर्हिचित् ॥ रणे राजकुले चैव सर्वदा विजयी भवेत् ॥ ६२ ॥ धर्मोपरि मतिर्नित्यं भक्तिर्मयि सुनिर्मला ॥ पातकं नैव लिप्येत द्वादशीभक्तितो नरम् ॥ ६३ ॥ प्रेतत्वं नैव तस्याऽस्ति कृते जागरणे मम ॥ एकादश्या विहीनस्य परलोकगतिर्नहि ॥ तस्मात्सर्वप्रयत्नेन कलौ कार्यं हि तद्दिनम् ॥ ६४ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे ब्रह्मविष्णु संवादे मार्गशीर्षमासमाहात्म्य एकादशीव्रतजागरणफलकथनंनाम त्रयोदशोऽध्यायः ॥ १३ ॥ ॥ श्रीभगवानुवाच ॥ ॥ ततः प्रभाते द्वादश्यां कार्यो मत्स्योत्सवो बुधैः ॥ मार्गशीर्षे शुक्लपक्षे यथाविध्युपचारतः ॥ १ ॥ अथ मार्गशिरे मासे दशम्यां नियतात्मवान् ॥ कृत्वा देवार्चनं धीमानग्निकार्यं यथाविधि ॥ २ ॥ शुचिवासाः प्रसन्नात्मा हव्यमन्नं सुसंस्कृतम् ॥ पक्त्वा पंचपदे गत्वा पुनः शौचं तु पादयोः ॥ ३ ॥ कृत्वाऽष्टांगुलमानं तु क्षीरवृक्षसमुद्भवम् ॥ भक्षयेद्दंतकाष्ठं तु ततश्चाचम्य यत्नतः ॥ ४ ॥ दृष्ट्वाऽऽकाशानि सर्वाणि ध्यात्वा वै मां गदाधरम् ॥ शंखचक्रगदापाणिं किरीटं पीतवाससम् ॥ ५ ॥ प्रसन्नवदनांऽभोजं सर्वलक्षणलक्षितम् ॥ ध्यात्वा पुनर्जलं हस्ते गृहीत्वा भानुमध्यगम् ॥ ६ ॥ ध्यात्वाऽर्घ्यं दापयेत्तत्र करतोयेन मानवः ॥ एवमुच्चारयेद्वाचं तस्मिन्काले चतुर्मुख ॥७॥ एकादश्यां निराहारः स्थित्वाऽहनि परे ह्यहम् ॥ भोक्ष्यामि पुंडरीकाक्ष शरणं मे भवाऽच्युत ॥ ८ ॥ एवमुक्त्वा ततो रात्रौ मम मूर्तेश्च सन्निधौ ॥ जपेन्नारायणायेति स्वयं तत्र विधानतः ॥ ९ ॥ ततः प्रभाते विमलां नदीं गत्वा समुद्रगाम् ॥ इतरां वा तडागं वा गृहे वा नियतात्मवान् ॥१०॥ आनीय मृत्तिकां शुद्धां मंत्रेणाऽनेन मानवः॥ वंदयेद्देवदेवेशं तदा शुद्धो भवेन्नरः ॥ ११ ॥ धारणं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पोषणं त्वत्तो भूतानां देवि सर्वदा ॥ तेन सत्येन मे पापं यावन्मोचय सुव्रते ॥१२॥ ब्रह्मांडोदरतीर्थानि करैः स्पृष्टानि दैवतैः ॥ तेनेमां मृत्तिकां स्पृष्ट्वा माऽऽलभामि त्वयोद्धृताम् ॥ १३ ॥ त्वयि नित्यं रसाः सर्वे स्थिता वरुण सर्वदा ॥ तेनेमां मृत्तिकां प्लाव्य पूतां कुरुष्व माचिरम् ॥१४॥ एवं मृदं तथा तोयं प्रसाद्याऽऽत्मानमालभेत् ॥ त्रिःकृत्वाऽशेषमृदया पिंडमालिप्य वै जले ॥ १५ ॥ तस्मिन्नरः सदा सम्यङ्ङ्कच्छपदूरतः ॥ स्नात्वा चावश्यकं कृत्वा पुनर्मम गृहं व्रजेत् ॥ १६ ॥ तत्राऽऽराध्य महायोगिन्देवं नारायणं हरिम् ॥ केशवाय नमः पादौ कटिं दामोदराय च ॥१७॥ जानुयुग्मं नृसिंहाय उरः श्रीवत्सधारिणे ॥ कंठे कौस्तुभनाभाय वक्षः श्रीपतये तथा ॥ १८ ॥ त्रैलोक्यविजयायेति बाहुं सर्वात्मने शिरः ॥ रथांगधारिणे वक्रं श्रीकरायेति वारिजम् ॥ १९ ॥ गंभीरायेति च गदामंभोजं शांतमूर्तये एवमभ्यर्च्य ॥ देवेशं देवं नारायणं प्रभुम् ॥ २० ॥ पुनस्तस्याऽग्रतः कुंभांश्चतुरः स्थापयेद्बुधः ॥ जलपूर्णान्समाल्यांश्च सितचंदनलेपितान् ॥ २१ ॥ चूतपल्लवसंयुक्तान्सितवस्त्रावगुंठितान् ॥ छादितांस्ताम्रपात्रैश्च तिलपूर्णैः सकांचनैः ॥२२॥ चत्वारस्तु समुद्राश्च कलशाः संप्रकीर्तिताः ॥ तेषां मध्ये शुभं पीठं स्थापयेद्वस्त्रगर्भितम् ॥२३॥ तस्मिन्सुवर्णं रौप्यं वा ताम्रं वा दारवं तथा ॥ अलाभे सर्वपात्राणां पालाशं पात्रमिष्यते ॥ २४ ॥ तोयपूर्णं च तत्कृत्वा तस्मिन्पात्रे ततो न्यसेत् ॥ सौवर्णं मत्स्यरूपं च कृत्वा देवं जनार्दनम् ॥२५॥ देवदेवांगसंयुक्तं श्रुतिस्मृतिविभूषितम् ॥ तत्राऽनेकविधैर्भक्ष्यैः फलैः पुष्पैश्च शोभितम् ॥२६॥ गन्धैर्धूपैश्च वस्त्रैश्च अर्चयित्वा यथाविधि ॥ रसातलगता वेदा यथा देव त्वयोद्धृताः ॥ २७ ॥ मत्स्यरूपेण तद्वन्मां भवाद्दुद्धर केशव ॥ एवमुच्चार्य तस्याग्रे जागरं तत्र कारयेत् ॥ ॥ २८ ॥ यथाविभवसारेण प्रभाते विमले तथा ॥ चतुर्णां ब्राह्मणानां च चतुरो दापयेद्घटान् ॥ २९ ॥ पूर्वं च बह्वृचे दद्याच्छांदोग्ये दक्षिणं तथा ॥ यजुःशाखान्विते दद्यात्पश्चिमं घटमुत्तमम् ॥ ३० ॥ उत्तरं कामतो दद्यादेष एव विधिः स्मृतः ॥ ऋग्वेदः प्रीयतां पूर्वे सामवेदस्तु दक्षिणे ॥ ३१ ॥ यजुर्वेदः पश्चिमतो ह्यथर्वश्चोत्तरेण तु ॥ अनेन क्रमयोगेन प्रीयतामिति वाचयेत् ॥ ३२ ॥ मत्स्यरूपं तु सौवर्णमाचार्याय निवेदयेत् ॥ गन्धधूपादिवस्त्रैस्तु संपूज्य विधिवत्क्रमात् ॥ ३३ ॥ यस्त्विमं सरहस्यं च मन्त्रेणैवोपपादयेत् ॥ विधानं विधिवद्दत्त्वा दाता कोटिगुणोत्तरम् ॥ ३४ ॥ प्रतिपद्य गुरुं यस्तु मोहाद्विप्रतिपद्यते ॥ स जन्मकोटिं नरके पच्यते पुरुषाधमः ॥ ३५ ॥ विधानस्य प्रदाता यो गुरुरित्युच्यते बुधैः ॥ एवं दत्त्वा विधानेनं द्वादश्यां मां समर्चयेत् ॥ ३६ ॥ विप्राणां भोजनं दद्याद्यथाशक्त्या च दक्षिणाम् ॥ भूरिणा परमान्नेन ततः पश्चात्स्वयं नरः ॥ ३७ ॥ भुञ्जीत सहितो विप्रैर्वाग्यतः संयतेन्द्रियः ॥ अनेन विधिना यस्तु कुर्यान्मत्स्योत्सवं नरः ॥ ३८ ॥ तस्य पुण्यफलं चाग्रे शृणु सत्यव्रता वर ॥ यदि वक्र

CC-0. In Public Domain. Digitization by eGangotri

सहस्राणां सहस्राणि भवंति हि ॥ ३९ ॥ आयुश्च ब्रह्मणा तुल्यं लभेद्यदि महाव्रत ॥ तदा वै ह्यस्य धर्मस्य फलं कथयितुं भवेत् ॥ ४० ॥ य इमं श्रावयेद्भक्त्या द्वादशीकल्पमुत्तमम् ॥ शृणोति वा स पापैस्तु सर्वैरेव विमुच्यते ॥ ४१ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे ब्रह्मविष्णुसंवादे मार्गशीर्षमसामाहात्म्ये मत्स्योत्सवकथनंनाम चतुर्दशोऽध्यायः ॥ १४ ॥ ॥ छ ॥ ॥ श्रीभगवानुवाच ॥ ॥ ये त्वया वै कृताः प्रश्नाः पूर्वं प्रश्नविदां वर ॥ तान्वर्णयिष्ये क्रमशो निशामय सुनिश्चितम् ॥ १ ॥ सहोमासे च देवो वै कीर्तियुक्तो हि केशवः ॥ तस्य पूजा प्रकर्तव्या यथापूर्वं प्रभाषितम् ॥ २ ॥ ब्राह्मणं केशवं स्मृत्वा तत्पत्नीं कीर्तिमेव च ॥ दंपती विधिवत्पूज्यौ वस्त्राभरणधेनुभिः ॥ ३ ॥ दम्पती पूजितौ वत्स पूजितोऽहं न संशयः॥ तस्मादवश्यं संपूज्यौ दंपती मम तुष्टिदौ ॥४॥ दानं च विविधं कार्यं मम तुष्टिकरं परम् ॥ गोदानं भूमिदानं च स्वर्णदानं विशेषतः ॥५॥ वस्त्रदानं तथा शय्या तथाऽलंकरणानि च ॥ सन्नदानं प्रकर्तव्यं मम सन्तोषकारकम् ॥ ६ ॥ सर्वेषामेव दानानां विशेषं च त्रिकं स्मृतम् ॥ वसुन्धरा तथा धेनुर्विद्यादानं तथैव च ॥७॥ दत्ते दानत्रिके वत्स भवेत्प्रीतिर्ममाऽतुला ॥ तस्मान्नरैस्तु कर्तव्यं सहोमासे त्रिकं शुभम् ॥ ८ ॥ स्नानस्य च विधिः सम्यक्पुरैवोक्तो मयाऽनघ ॥ पूजास्नानं च दानं च विधिरेष न संशयः ॥ ९ ॥ मार्गशीर्षं समग्रं तु एकभक्तेन यः क्षिपेत् ॥ भोजयेद्यो द्विजान्भक्त्या स मुच्येद्व्याधिकिल्बिषैः॥१०॥कृषिभागी बहुधनो बहुधान्यश्च जायते ॥ किमत्र बहुनोक्तेन शृणु गुह्यं परं मम ॥ ११ ॥ हुतभुग्ब्राह्मणश्चैव वदनं मम मानद ॥ ब्राह्मणाख्यं मुखं श्रेष्ठं न तथा हव्यवाहनः ॥ १२ ॥ ब्राह्मणाख्ये मुखे पुत्र हुतं कोटिगुणं भवेत् ॥ अग्न्याख्यं ब्राह्मणाधीनं स्वतंत्रा ब्राह्मणाः किल ॥ १३ ॥ सशर्करं घृतयुतं पायसं शशिसन्निभम् ॥ होतव्यं ब्राह्मणमुखे मम तुष्टिकरं सुत ॥ १४ ॥ शुभमंडलमोदककोकरसं सुत फेनिकया घृतपूरयुतम् ॥ यज विप्रमुखे मम तुष्टिकरं यदि चेच्छसि दारसुतादिसुखम् ॥१५॥ कुमुदेन समप्रभसौरभदं शुभभक्तयुतं त्वथ मुद्गयुतम् ॥ सुरभीकृतपुष्कलसर्पिसमं कुरु विप्रमुखे हवनं हि सहे ॥ १६ ॥ पयसा सह सर्पिषि च क्वथितं बहुखारिकचारफलैः सितया ॥ सह कर्पुरनारिफलेन समं युतसीकरकं सुत शुभ्रकरम् ॥ १७ ॥ व्यंजनानि च शुभ्राणि मनोज्ञानि प्रियाणि च ॥ कर्तव्यानि सहोमासे ब्राह्मणार्थे चतुर्मुख ॥ १८ ॥ प्रिया शिखरिणी कार्या चान्यत्तेषां प्रियं च यत् ॥ कृत्वैवं भोजयेद्विप्रान्श्रद्धया परया सुत ॥ १९ ॥ रसास्वादनपूर्वं हि भुञ्जते वै यथायथा ॥ तथातथा मम प्रीतिर्जायते भुवि दुर्लभा ॥२०॥ तस्मात्तत्तथा कार्यं यथा तुष्यंति ब्राह्मणाः ॥ तुष्टैस्तैश्चाऽप्यहं तुष्टो भवामीह न संशयः ॥ २१ ॥ श्रद्धत्स्व त्वं चतुर्वक्त्र न ते मिथ्या ब्रवीम्यहम् ॥ एतद्गुह्यं मया प्रोक्तं श्रेयोर्थं तव मानद ॥ २२ ॥ आक्रोश

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यंति यदि ते अथवा प्रहरंति चेत् ॥ तथापि ते नमस्या वै मम प्रीत्या हि मानद ॥ २३ ॥ एवं कार्यं सदा पुत्र मार्गशीर्षे विशेषतः ॥ यदुक्तं भवता ब्रह्मन्भोक्तव्यं किं शृणुष्व तत् ॥ २४ ॥ भोक्तव्यं मम चोच्छिष्टं मम भक्तिपरायणैः ॥ पवित्रकरणं पुत्र पापिनामपि मुक्तिदम् ॥ २५ ॥ ममाशनस्य शेषं च यो भुनक्ति दिनेदिने ॥ सिक्थेसिक्थे भवेत्पुण्यं चांद्रायणशतोद्भवम् ॥ २६ ॥ अवशिष्टं तथोच्छिष्टं भक्तानां भोजनद्वयम् ॥ नाऽन्यद्वै भोजनं तेषां भुक्त्वा चांद्रायणं चरेत् ॥ २७ ॥ अनर्पयित्वा यो भुंक्ते अन्नपानादिकं च यत् ॥ श्वानविष्ठासमं चान्नं पानं च मदिरासमम् ॥ ॥ २८ ॥ तस्मान्मामर्पयेत्पुत्र अन्नपानादि चौषधम् ॥ भक्षयेत्परया भक्त्या अशुचेः शुचिकारकम् ॥ २९ ॥ तीर्थयज्ञादिकफलं कलिदोषविनाशनम् ॥ ममोच्छिष्टं सुगतिदमपि दुष्कृतकर्मणाम् ॥ ३० ॥ अन्येषां दैवतानां च न गृह्णीयाच्च भक्षितम् ॥ अभक्तानां च पक्वान्नं भुक्त्वा च नरकं व्रजेत् ॥ ३१ ॥ वक्तव्यमेव यत्प्रोक्तं तच्छृणुष्व समाहितः ॥ कथयिष्ये तव प्रीत्या अपि गुह्यतरं मम ॥ ३२ ॥ मम नाम प्रवक्तव्यं सहे चैव विशेषतः ॥ कृष्णकृष्णेति वक्तव्यं मम प्रीतिकरं परम् ॥३३॥ प्रतिज्ञैषा च मे पुत्र न जानंति सुरासुराः ॥ मनसा कर्मणा वाचा यो मे शरणमागतः ॥ ॥ ३४ ॥ स हि सर्वामवाप्नोति कामनामिह लौकिकीम् ॥ सर्वोत्कृष्टं च वैकुण्ठं मत्प्रियां कमलामपि ॥ ३५ ॥ कृष्णकृष्णेति कृष्णेति यो मां स्मरति नित्यशः ॥ जलं भित्त्वा यथा पद्मं नरकादुद्धराम्यहम् ॥३६॥ विनोदेनाऽपि दंभेन मौढ्याल्लोभाच्छलादपि ॥ यो मां भजत्यसौ वत्स मद्भक्तो नाऽवसीदति ॥ ३७ ॥ ये वै पठंति कृष्णेति मरणे पर्युपस्थिते ॥ यदि पापयुताः पुत्र न पश्यंति यमं क्वचित् ॥ ३८ ॥ पूर्वे वयसि पापानि कृतान्यपि च कृत्स्नशः ॥ अंतकाले च कृष्णेति स्मृत्वा मामेत्यसंशयम् ॥ ३९ ॥ नमः कृष्णाय महते विवशोऽपि वदेद्यदि ॥ ध्रुवं पदमवाप्नोति मरणे पर्युपस्थिते ॥ ४० ॥ श्रीकृष्णेति कृतोच्चारैः प्राणैर्यदि वियुज्यते ॥ दूरस्थः पश्यति च तं स्वर्गतं प्रेतनायकः ॥ ४१ ॥ श्मशाने यदि रथ्यायां कृष्णकृष्णेति जल्पति ॥ म्रियते यदि चेत्पुत्र मामेवैति न संशयः ॥ ४२ ॥ दर्शनान्मम भक्तानां मृत्युमाप्नोति यः क्वचित् ॥ विना मत्स्मरणात्पुत्र मुक्तिमेति स मानवः ॥ ४३ ॥ पापानलस्य दीप्तस्य भयं मा कुरु पुत्रक ॥ श्रीकृष्णनाममेघोत्थैः सिच्यते नीरबिंदुभिः ॥ ४४ ॥ कलिकालभुजंगस्य तीक्ष्णदंष्ट्रस्य किं भयम् ॥ श्रीकृष्णनामदारूत्थवह्निदग्धः स नश्यति ॥ ४५ ॥ पापपावकदग्धानां कर्मचेष्टावियोगिनाम् ॥ भेषजं नास्ति मर्त्यानां श्रीकृष्णस्मरणं विना ॥४६॥ प्रयाग वै यथा गंगा शुक्लतीर्थे च नर्मदा ॥ सरस्वती कुरुक्षेत्रे तद्वच्छ्रीकृष्णकीर्तनम् ॥४७॥

CC-0. In Public Domain. Digitization by eGangotri

भवांभोधिनिमग्नानां महापापोर्मिपातिनाम् ॥ न गतिर्मानवानां च श्रीकृष्णस्मरणं विना ॥ ४८ ॥ मृत्युकालेऽपि मर्त्यानां पापिनां तद निच्छताम् ॥ गच्छतां नाऽस्ति पाथेयं श्रीकृष्णस्मरणं विना ॥ ४९ ॥ तत्र पुत्र गया काशी पुष्करं कुरुजांगलम् ॥ प्रत्यहं मंदिरे यस्य कृष्णकृष्णेति कीर्तनम् ॥ ५० ॥ जीवितं जन्मसाफल्यं सुखं तस्यैव सार्थकम् ॥ सततं रसना यस्य कृष्णकृष्णेति जल्पति ॥ ५१ ॥ सकृदुच्चरितं येन हरिरित्यक्षरद्वयम् ॥ बद्धः परिकरस्तेन मोक्षाय गमनं प्रति ॥ ५२ ॥ नाम्नोऽस्य यावती शक्तिः पापनिर्दहने मम ॥ तावत्कर्तुं न शक्नोति पातकं पातकी जनः ॥ ५३ ॥ नाऽपविद्धं भवेत्तस्य शरीरं नैव मानसम् ॥ न पापं न च वैक्लव्यं कृष्णकृष्णेति कीर्तनात् ॥ ५४ ॥ श्रीकृष्णेति वचः पथ्यं न त्यजेद्यः कलौ नरः ॥ पापामयो वै न भवेत्कलौ तस्यैव मानसे ॥ ५५ ॥ श्रीकृष्णेति प्रजल्पंतं दक्षिणाशापतिर्नरम् ॥ श्रुत्वा मार्जयते पापं तस्य जन्मशतार्जितम् ॥ ५६ ॥ चांद्रायणशतैः पापं पराकाणां सहस्रकैः ॥ यन्नापयाति तद्याति कृष्णकृष्णेति कीर्तनात् ॥ ॥ ५७ ॥ नान्याभिर्नामकोटीभिस्तोषो मम भवेत्क्वचित् ॥ श्रीकृष्णेति कृतोच्चारे प्रीतिरेवाऽधिकाधिका ॥ ५८ ॥ चंद्रसूर्योपरागैस्तु कोटीभिर्यत्फलं स्मृतम् ॥ तत्फलं समवाप्नोति कृष्णकृष्णेति कीर्तनात् ॥ ५९ ॥ गुरुदाराभिगमनं हेमस्तेयादि पातकम् ॥ श्रीकृष्णकीर्तनाद्याति घर्मतप्तं हिमं यथा ॥ ६० ॥ युक्तो यदि महापापैरगम्यागमनादिभिः ॥ मुच्यते चांतकालेऽपि सकृच्छ्रीकृष्णकीर्तनात् ॥ ॥ ६१ ॥ अविशुद्धमना यस्तु विनाप्याचारवर्तनात् ॥ प्रेतत्वं सोऽपि नाप्नोति अन्ते श्रीकृष्णकीर्तनात् ॥ ६२ ॥ मुखे भवतु मा जिह्वाऽसती या तु रसातलम् ॥ न सा चेत्कलिकाले या श्रीकृष्णगुणवादिनी ॥ ६३ ॥ स्ववक्त्रे परवक्त्रे च वंद्या जिह्वा प्रयत्नतः ॥ कुरुते या कलौ पुत्र श्रीकृष्णगुणकीर्तनम् ॥ ६४ ॥ पापवल्ली मुखे तस्य जिह्वारूपेण कीर्त्यते ॥ या न वक्ति दिवारात्रौ श्रीकृष्णगुणकीर्तनम् ॥ ६५ ॥ पततां शतखण्डा तु सा जिह्वा रोगरूपिणी ॥ श्रीकृष्णकृष्णकृष्णेति श्रीकृष्णेति न जल्पति ॥ ६६ ॥ श्रीकृष्णनाममाहात्म्यं प्रातरुत्थाय यः पठेत् ॥ तस्याऽहं श्रेयसां दाता भवाम्येव न संशयः ॥ ६७ ॥ श्रीकृष्णनाममाहात्म्यं त्रिसंध्यं हि पठेत्तु यः ॥ सर्वान्कामानवाप्नोति स मृतः परमां गतिम् ॥ ६८ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे ब्रह्मविष्णुसंवादे मार्गशीर्षमासमाहात्म्ये श्रीकृष्णनाममाहात्म्यवर्णनंनाम पंचदशोऽध्यायः ॥१५॥ ॥छ॥ ॥ श्रीभगवानुवाच ॥ ॥ शृणु ध्यानं चतुर्वक्त्र वक्ष्यामि प्रीतमानसः ॥ श्रुतेनैव च सौभाग्यं लभते मानवो भुवि ॥१॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ श्रीमदुद्यानसंवीतहैमस्थलोद्भासिरत्नस्फुरन्मंडपांतः ॥ लसत्कल्पवृक्षोदितोद्दीप्तरत्नस्थलाधिष्ठितांभोजपीठाऽधिरूढम् ॥ २ ॥ महानीलनीला भमत्यंतबालं गुडस्निग्धवक्रांतविस्रस्तकेशम् ॥ अलिव्रातपर्याकुलोत्फुल्लपद्मप्रमुग्धाननं श्रीमदिंदीवराक्षम् ॥ ३ ॥ चलत्कुंडलोल्लासितोत्फुल्लगल्लं सुघोणं सुशोणाधरं सुस्मितास्यम् ॥ अनेकोल्लसत्कंठभूषालसंतं वहंतं नखं पौंडरीकं सुनेत्रम् ॥ ४ ॥ समुद्भूसरोरःस्थलं धेनुधूल्या सुपुष्टांगमष्टापदाकल्पदीतम् ॥ कटीरस्थले चारुजंघोरुयुग्मे पिनद्धं क्वणत्किंकिणीजालदाम्ना ॥ ५ ॥ हसंतं लसद्बंधुजीवप्रसूनप्रभापाणिपादांबुजोदारकांत्या ॥ करे दक्षिणे पायसं वामहस्ते दधानं नवं शुद्धहैयंगवीनम् ॥ ६ ॥ महीभारभूताऽमरारातियूथाऽनलं पूतनादीन्निहंतुं प्रवृत्तम् ॥ प्रभुं गोपिकागोपवृंदेन वीतं सुरेन्द्रादिभिर्वंदितं देवदेवम् ॥ ७ ॥ प्रगे पूजयित्वा त्वनुस्मृत्य कृष्णं भुजंगेंद्रवज्रादिभिर्भक्तिनम्रः ॥ सितांभोजहैयंगवीनैश्च दध्ना विमिश्रेण दुग्धेन संप्रीणयेत्तम् ॥ ८ ॥ इति प्रातरेवाऽर्चयेदच्युतं यो नरः प्रत्यहं शश्वदास्तिक्ययुक्तः ॥ लभेत्सोऽचिरेणैव लक्ष्मीं समग्रामिह प्रेत्य शुद्धं परं धाम भूयात् ॥ ९ ॥ मन्त्रश्चोक्तः पुरा पुत्र आदौ लोकमनोहरः ॥ श्रीमद्दामोदराख्यो हि शृणु तस्याधिकारिणः ॥ १० ॥ अयोग्याय न दातव्यो मंत्रराजस्त्वया सुत ॥ यत्नेन गोपनीयं च रहस्यं शीघ्रसिद्धिदम् ॥ ११ ॥ अलसं मलिनं क्लिष्टं दंभमोहसमन्वितम् ॥ दरिद्रं रोगिणं क्रुद्धं रागिणं भोगलालसम् ॥ १२ ॥ असूयामत्सरग्रस्तं शठं परुषवादिनम् ॥ अन्यायेनाऽर्जितधनं परदाररतं सदा ॥ १३ ॥ विदुषां वैरिणं नित्यमज्ञं पंडितमानिनम् ॥ भ्रष्टव्रतं क्लिष्टवृत्तिं पिशुनं दुष्टमानसम् ॥ १४ ॥ बह्वाशिनं क्रूरचेष्टमग्रगण्यं दुरात्मनाम् ॥ कृपणं पापिनं रौद्रमाश्रितानां भयंकरम् ॥ १५ ॥ एवमादिगुणैर्युक्तं शिष्यं नैव परिग्रहेत् ॥ गृह्णीयाद्यदि तद्दोषः प्रायो गुरुमुपस्पृशेत् ॥ १६ ॥ अमात्यदोषो राजानं जायादोषः पतिं यथा ॥ तथा शिष्यकृतो दोषो गुरुं प्राप्नोत्यसंशयम् ॥ १७ ॥ तस्माच्छिष्यं गुरुर्नित्यं परीक्ष्यैव परिग्रहेत् ॥ कायेन मनसा वाचा गुरुशुश्रूषणे रतम् ॥ १८ ॥ अस्तेयवृत्तिमास्तिक्ययुक्तं मोक्षकृतोद्यमम् ॥ ब्रह्मचर्यरतं नित्यं दृढव्रतमकल्मषम् ॥ १९ ॥ प्रसन्नहृदयं शुद्धमशठं विमलाशयम् ॥ परोपकारनिरतं स्वार्थे च विगतस्पृहम् ॥ २० ॥ स्वचित्तवित्तदेहैस्तु परितोषकरं गुरोः ॥ आश्रितानां तथा पुत्र परितोषकरं शुचिम् ॥ २१ ॥ ईदृग्विधाय शिष्याय मंत्रं दद्यात्तु नान्यथा ॥ यद्यन्यथा वदेत्तस्मिन्देवताशाप आपतेत् ॥ २२ ॥ शृणु पुत्र प्रवक्ष्यामि गुरोरपि च लक्षणम् ॥ एभिस्तु लक्षणैर्युक्तो गुरुरेव भवेन्नृणाम् ॥ २३ ॥ समचेताः प्रशांतात्मा विमन्युश्च सुहृन्नृणाम् ॥ साधुर्महान्समो लोके

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स गुरुः परिकीर्तितः ॥ २४ ॥ मम व्रतधरो नित्यं वैष्णवानां सुसंमतः ॥ मदाश्रयकथासक्तो ममोत्सवरतः सदा ॥ २५ ॥ कृपासिन्धुः सुपूर्णार्थः सर्वसत्त्वोपकारकः ॥ निःस्पृहः सर्वतः सिद्धः सर्वविद्याविशारदः ॥ २६ ॥ सर्वसंशयसंछेत्ताऽनलसो गुरुराहृतः ॥ ब्राह्मणः सर्वकालज्ञः कुर्यात्सर्वेष्वनुग्रहम् ॥ २७ ॥ पूर्वोक्तलक्षणैर्युक्तः शिष्य ईदृग्विधाद्गुरोः ॥ गृह्णीयात्पुत्र तन्मत्रं मार्गशीर्षे मदायने ॥ २८ ॥ वैष्णवानां व्रतानां च कुर्यात्स्वीकरणं बुधः ॥ मत्प्रियं शृणुयाच्छश्वच्छ्रीमद्भागवत परम् ॥२९॥ श्रीमद्भागवतंनाम पुराणं लोकविश्रुतम् ॥ शृणुयाच्छ्रद्धया युक्तो मम सन्तोषकारणम् ॥ ३० ॥ नित्यं भागवतं यस्तु पुराणं पठते नरः ॥ प्रत्यक्षरं भवेत्तस्य कपिलादानजं फलम् ॥ ३१ ॥ श्लोकार्धं श्लोकपादं वा नित्यं भागवतोद्भवम् ॥ पठते शृणुयाद्यस्तु गोसहस्रफलं लभेत् ॥ ३२ ॥ यः पठेत्प्रयतो नित्यं श्लोकं भागवतं सुत ॥ अष्टादशपुराणानां फलमाप्नोति मानवः ॥ ३३ ॥ नित्यं मम कथा यत्र तत्र तिष्ठन्ति वैष्णवाः ॥ कलिबाह्या नरास्ते वै येऽर्चयन्ति सदा मम ॥ ३४ ॥ वैष्णवानां तु शास्त्राणि येऽर्चयन्ति गृहे नराः ॥ सर्वपापविनिर्मुक्ता भवंति सुरवन्दिताः ॥ ३५ ॥ येऽर्चयन्ति गृहे नित्यं शास्त्रं भागवतं कलौ ॥ आस्फोटयंति वल्गन्ति तेषां प्रीतो भवाम्यहम् ॥ ३६ ॥ यावद्दिनानि हे पुत्र शास्त्रं भागवतं गृहे ॥ तावत्पिबंति पितरः क्षीरं सर्पिर्मधूदकम् ॥ ३७ ॥ यच्छंति वैष्णवे भक्त्या शास्त्रं भागवतं हि ये ॥ कल्पकोटिसहस्राणि मम लोके वसंति ते ॥ ३८ ॥ येऽर्चयन्ति सदा गेहे शास्त्रं भागवतं नराः ॥ प्रीणितास्तैश्च विबुधा यावदाऽऽभूतसंप्लवम् ॥ ३९ ॥ श्लोकार्धं श्लोकपादं वा वरं भागवतं गृहे ॥ शतशोऽथ सहस्रैश्च किमन्यैः शास्त्रसंग्रहैः ॥ ४० ॥ न यस्य तिष्ठते शास्त्रं गृहे भागवतं कलौ ॥ न तस्य पुनरावृत्तिर्याम्यपाशात्कदाचन ॥ ४१ ॥ कथं स वैष्णवो ज्ञेयः शास्त्रं भागवतं कलौ ॥ गृहे न तिष्ठते यस्य श्वपचादधिको हि सः ॥ ४२ ॥ सर्वस्वेनाऽपि लोकेश कर्तव्यः शास्त्रसंग्रहः ॥ वैष्णवस्तु सदा भक्त्या तुष्टयर्थं मम पुत्रक ॥ ४३ ॥ यत्र यत्र भवेत्पुण्यं शास्त्रं भागवतं कलौ ॥ तत्रतत्र सदैवाऽहं भवामि त्रिदशैः सह ॥ ४४ ॥ तत्र सर्वाणि तीर्थानि नदीनदसरांसि च ॥ यज्ञाः सप्तपुरी नित्यं पुण्याः सर्वे शिलोच्चयाः ॥ ४५ ॥ श्रोतव्यं मम शास्त्रं हि यशोधर्मजयार्थिना ॥ पापक्षयार्थं लोकेश मोक्षार्थं धर्मबुद्धिना ॥ ४६ ॥ श्रीमद्भागवतं पुण्यमायुरारोग्यपुष्टिदम् ॥ पठनाच्छ्रवणाद्वाऽपि सर्वपापैः प्रमुच्यते ॥ ४७ ॥ न शृण्वंति न हृष्यंति श्रीमद्भागवतं परम् ॥ सत्यंसत्यं हि लोकेश तेषां स्वामी सदा यमः ॥ ४८ ॥ न गच्छति यदा मर्त्यः श्रोतुं भागवतं सुत ॥ एकादश्यां विशेषेण नाऽस्ति पापरतस्ततः ॥ ४९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्लोकं भागवतं चाऽपि श्लोकार्धं पादमेव वा ॥ लिखितं तिष्ठते यस्य गृहे तस्य वसाम्यहम् ॥ ५० ॥ सर्वाऽऽश्रमाऽभिगमनं सर्वतीर्थाऽवगाहनम् ॥
न तथा पावनं नृणां श्रीमद्भागवतं यथा ॥ ५१ ॥ यत्रयत्र चतुर्वक्त्र श्रीमद्भागवतं भवेत् ॥ गच्छामि तत्रतत्राऽहं गौर्यथा सुतवत्सला ॥ ५२ ॥
मत्कथावाचकं नित्यं मत्कथाश्रवणे रतम् ॥ मत्कथाप्रीतमनसं नाऽहं त्यक्ष्यामि तं नरम् ॥ ५३ ॥ श्रीमद्भागवतं पुण्यं दृष्ट्वा नोत्तिष्ठते हि यः ॥
सांवत्सरं तस्य पुण्यं विलयं याति पुत्रक ॥ ५४ ॥ श्रीमद्भागवतं दृष्ट्वा प्रत्युत्थानाभिवादनैः ॥ सन्मानयेत तं दृष्ट्वा भवेत्प्रीतिर्ममाऽतुला ॥ ५५ ॥
दृष्ट्वा भागवतं दूरात्प्रक्रमेत्संमुखं हि यः ॥ पदेपदेऽश्वमेधस्य फलं प्राप्नोत्यसंशयम् ॥ ५६ ॥ उत्थाय प्रणमेद्यो वै श्रीमद्भागवतं नरः ॥ धनं पुत्रां
स्तथा दारान्भक्तिं च प्रददाम्यहम् ॥ ५७ ॥ महाराजोपचारैस्तु श्रीमद्भागवतं सुत ॥ शृण्वंति ये नरा भक्त्या तेषां वश्यो भवाम्यहम् ॥ ५८ ॥
ममोत्सवेषु सर्वेषु श्रीमद्भागवतं परम् ॥ शृण्वंति ये नरा भक्त्या मम प्रीत्यै च सुव्रत ॥ ५९ ॥ वस्त्रालंकरणैः पुष्पैर्धूपदीपोपहारकैः ॥ वशीकृतो ह्यहं
तैश्च सत्स्त्रिया सत्पतिर्यथा ॥ ६० ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे ब्रह्मविष्णुसंवादे मार्गशीर्षमा
समाहात्म्ये भागवतश्रैष्ठ्यमाहात्म्यवर्णनंनाम षोडशोऽध्यायः ॥ १६ ॥ ॥ छ ॥ ॥ ब्रह्मोवाच ॥ ॥ कस्मिन्क्षेत्रे हि देवेश मार्गशीर्षोऽधिकः
स्मृतः ॥ किं फलं च भवेत्तस्मिन्नेतत्सर्वं वद प्रभो ॥ १ ॥ ॥ श्रीभगवानुवाच ॥ ॥ मथुरेति सुविख्यातमस्ति क्षेत्रं परं मम ॥ सुरम्या च
प्रशस्ता च जन्मभूमिः प्रिया मम ॥ २ ॥ पदेपदे तीर्थफलं मथुरायां चतुर्मुख ॥ यत्रयत्र नरः स्नातो मुच्यते घोरकिल्बिषात् ॥ ३ ॥ सर्वधर्म
विहीनानां पुरुषाणां दुरात्मनाम् ॥ नरकार्तिहरा पुत्र मथुरा पापनाशिनी ॥ ४ ॥ कृतघ्नश्च सुरापश्च चौरो भग्नव्रतस्तथा ॥ मथुरां प्राप्य मनुजो
मुच्यते घोरपातकात् ॥ ५ ॥ सूर्योदये तमो नश्येद्यथा वज्रभयान्नगाः ॥ तार्क्ष्यं दृष्ट्वा यथा सर्पा मेघा वातहता यथा ॥ ६ ॥ तत्त्वज्ञानाद्यथा दुःखं
हरिं दृष्ट्वा यथा गजाः ॥ तथा पापानि नश्यंति मथुरादर्शनात्सुत ॥ ७ ॥ श्रद्धया भक्तियुक्तस्तु दृष्ट्वा मधुपुरीं नरः ॥ ब्रह्महाऽपि विशुध्येत किं
पुनस्त्वन्यपातकी ॥ ८ ॥ मथुरां स्नातुकामस्य गच्छतस्तु पदेपदे ॥ निराशानि व्रजंत्येव पापानि च शरीरतः ॥ ९ ॥ अनुषंगेण गच्छंति वाणि
ज्येनाऽपि सेवया ॥ मथुरास्नानमात्रेण दिवं यांति गतांहसः ॥ १० ॥ नामाऽपि गृह्णतामस्याः सदा मुक्तिर्न संशयः ॥ सदा कृतयुगं तत्र सदा
चैवोत्तरायणम् ॥ ११ ॥ यः शृणोति चतुर्वक्त्र माथुरं मम मंदिरम् ॥ अन्येनोच्चारिते सद्यः सोऽपि पापात्प्रमुच्यते ॥ १२ ॥ त्रिरात्रमपि ये तत्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वसंति मनुजाः सुत ॥ तेषां पुनंति संदृष्टाःस्पृष्टाश्चरणरेणवः ॥ १३ ॥ यथा तृणसमूहं तु ज्वलयंति स्फुलिंगकाः ॥ तथा महांति पापानि दहते मथुरा पुरी ॥ १४ ॥ स्नानेन सर्वतीर्थानां यः स्यात्सुकृतसंचयः ॥ ततोऽधिकतरं प्रोक्ता मथुरा सर्वमंडले ॥ १५ ॥ चतुर्णामपि वेदानां पुण्यमध्ययनाच्च यत् ॥ तत्पुण्यं जायते तत्र मथुरां स्मरतां नृणाम् ॥ १६ ॥ अन्यत्र हि कृतं पापं तीर्थमासाद्य नश्यति ॥ तीर्थेषु यत्कृतं पापं वज्रलेपो भविष्यति ॥ १७ ॥ मथुरायां कृतं पापं मथुरायां प्रणश्यति ॥ धर्मार्थकाममोक्षाख्यं स्थित्वा तत्र लभेन्नरः ॥ १८ ॥ अन्यत्र दशभिर्वर्षैः प्रारब्धं भुज्यते हि यत् ॥ किल्बिषं च चतुर्वक्त्र माथुरे दशभिर्दिनैः ॥१९॥ दिवि नैव न पाताले नांतरिक्षे न मानुषे ॥ समं तु मथुरायां हि प्रियं मम सदैव हि ॥ २० ॥ सर्वेषामेव तीर्थानां माथुरं परमं महत् ॥ बालक्रीडनरूपाणि कृतानि सह गोपकैः ॥ २१ ॥ त्रिंशद्वर्षसहस्राणि त्रिंशद्वर्षशतानि च ॥ यत्फलं भारते वर्षे तत्फलं मथुरां स्मरन् ॥ २२ ॥ सन्निहत्यां तु यत्पुण्यं राहुग्रस्ते दिवाकरे ॥ ततोधिकं लभेत्पुत्र मथुरायां दिनेदिने ॥ २३ ॥ पूर्णे वर्षसहस्रे तु तीर्थराजे तु यत्फलम् ॥ तत्फलं लभते पुत्र सहोमासे मधोः पुरे ॥ २४ ॥ पूर्णे वर्षसहस्रे तु वाराणस्यां च यत्फलम् ॥ तत्फलं लभते पुत्र मथुरायां सहोदिने ॥ २५ ॥ गोदावरीद्वारकयोर्नरो यः क्षेत्रे कुरूणां क्षितिदायको यः ॥ षण्मासकात्साधयते गयायां समं भवेन्नो दिनमेकमाथुरम् ॥ २६ ॥ न द्वारका काशिकांची न माया गदाधरो यस्य समं न तीर्थम् ॥ संतर्पिता यद्यमुनाजलेन वांछंति नो वै पितरः पिंडदानम् ॥ २७ ॥ मथुरायां प्रकुर्वंति पुरीसाधारणीदृशम् ॥ ये नरास्तेऽपि विज्ञेयाः पापराशिभिरन्विताः ॥ २८ ॥ न दृष्टा मथुरा येन दिदृक्षा यस्य जायते ॥ यत्र तत्र मृतस्याऽपि माथुरे जन्म जायते ॥ २९ ॥ भूमे रजांसि गणयेत्कालेनाऽपि चतुर्मुख ॥ माथुरे यानि तीर्थानि तेषां संख्या न विद्यते ॥ ३० ॥ कुरु भोः कुरु भो वासं मथुराख्यां पुरीं प्रति ॥ वसामि सततं तस्यां गोपकन्याभिरावृतः ॥ ३१ ॥ रेरे संसारमग्नाश्च शिष्या मे शृणुताऽपरे ॥ यदीच्छथ सुखं सांद्रं वासं कुरुत मत्पुरीम् ॥ ३२ ॥ अहो लोको महानंदो नेत्रयुक्तो न पश्यति ॥ माथुरे विद्यमानेऽपि संसृतिं भजते सदा ॥ ३३ ॥ मानुषीं योनिमतुलां लब्ध्वा भाग्यस्य योगतः ॥ वृथैवायुर्गतं तेषां न दृष्टा मथुरापुरी ॥ ३४ ॥ अहो मतेः सुदौर्बल्यमहो भाग्यस्य दुर्विधिः ॥ अहो मोहस्य महिमा मथुरा नैव सेव्यते ॥ ३५ ॥ मथुरां तु परित्यज्य योऽन्यत्र कुरुते मतिम् ॥ मूढो भ्रमति संसारे मोहितो मम मायया ॥ ३६ ॥ मथुरामपि संप्राप्य योऽन्यत्र कुरुते स्पृहाम् ॥ दुर्बुद्धेस्तस्य किं ज्ञानं सोऽज्ञानेन विजृंभितः ॥ ॥ ३७ ॥ मात्रा पित्रा परित्यक्ता ये त्यक्ता निजबंधुभिः ॥ येषां क्वापि गतिर्नास्ति तेषां मम पुरी गतिः ॥ ३८ ॥ पापराशिभिराक्रांता ये दारिद्र्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पराजिताः ॥ येषां क्वापि गतिर्नास्ति तेषां मम पुरी गतिः ॥ ३९ ॥ सारात्सारतरं स्थानं गुह्याद्गुह्यतरं परम् ॥ गतिमन्वेषमाणानां मथुरा परमा गतिः ॥ ४० ॥ न तत्पुण्यैर्न तद्दानैर्न तपोभिर्न तु स्तवैः ॥ न लभ्यं विविधैर्योगैर्लभ्यं मदनुभावतः ॥ ४१ ॥ मयि येषां स्थिरा भक्तिर्भूयसी येषु मत्कृपा ॥ तेषामेव हि धन्यानां मथुरायां भवेद्गतिः ॥ ४२ ॥ या गतिर्योगयुक्तस्य ब्रह्मज्ञस्य मनीषिणः ॥ सा गतिस्त्यजतः प्राणान्मथुरायां नरस्य च ॥ ४३ ॥ काश्यादिपुर्यो यदि संति लोके तासां तु मध्ये मथुरैव धन्या ॥ या जन्ममौंजीव्रतमुक्तिदानैर्नृणां चतुर्धा विदधाति मुक्तिम् ॥ ॥ ४४ ॥ न योगैर्या गतिर्लभ्या मन्वंतरशतैरपि ॥ अन्यत्र हेलया साऽत्र लभ्यते मत्प्रसादतः ॥४५॥ न पापेभ्यो भयं यत्र न भयं यत्र वै यमात् ॥ न गर्भवासभीर्यत्र तत्क्षेत्रं को न संश्रयेत् ॥ ४६ ॥ मथुरायां च यत्पुण्यं तत्पुण्यस्य फलं शृणु ॥ मथुरायां समासाद्य मथुरायां मृता हि ये ॥ ४७ ॥ अपि कीटपतंगाद्या जायंते ते चतुर्भुजाः ॥ कूलात्पतंति ये वृक्षास्तेऽपि यांति परां गतिम् ॥ ४८ ॥ मूका जडांधबधिरास्तपोनियमवर्जिताः ॥ काले नैव मृता ये च मम लोकं व्रजंति ते ॥ ४९ ॥ सर्पदष्टाः पशुहताः पावकांबुविनाशिताः॥ लब्धाऽपमृत्यवो ये च माथुरे मम लोकगाः ॥ ५० ॥ सत्यं सत्यं मुनिश्रेष्ठ ब्रुवे शपथपूर्वकम् ॥ सर्वाऽभीष्टप्रदं नान्यन्मथुरायाः समं क्वचित् ॥ ५१ ॥ त्रिवर्गदा कामिनां या मुमुक्षूणां च मुक्तिदा ॥ भक्तीच्छो र्भक्तिदा कस्तां मथुरां नाऽऽश्रयेद्बुधः ॥ ५२ ॥ एतादृशी मधुपुरी कर्त्तव्या मार्गशीर्षके ॥ तदभावे पुष्करं हि कर्तव्यं विधिपूर्वकम् ॥ ५३ ॥ ज्येष्ठं हि ब्रह्मणः कुण्डं मध्यं कुण्डं च वैष्णवम् ॥ कनिष्ठं रुद्रदैवत्यमिति जानीहि बुद्धिमन् ॥५४॥ एषु स्नानं च दानं च श्राद्धं च विधिपूर्वकम् ॥ पूजा च महती कार्या मम प्रीतिकरा सुत ॥ ५५ ॥ पूर्णा या तु भवेत्पुत्र सहोमासे मम प्रिया ॥ तस्यां यत्क्रियते पुण्यं मम प्रीतिकरं भवेत् ॥ ५६ ॥ गोदानमन्नदानं च हेमदानं च पुत्रक ॥ धरादानं च कर्तव्यं पूर्णायां विधिपूर्वकम् ॥ ५७ ॥ सहोमासे हि पूर्णायां सन्नदानं च कारयेत् ॥ यत्किंचित्क्रियते पूर्णं तदक्षय्यफलं भवेत् ॥ ५८ ॥ ब्रह्मभोज्यं हि कर्तव्यं यथाविभवसारतः ॥ पूर्णायामेव कर्तव्य उत्सवो व्रतपूर्त्तये ॥ ५९ ॥ यादृशी मथुरा पुत्र सहोमासे मम प्रिया ॥ न तथा तीर्थराजाद्यास्तदभावे च पुष्करम् ॥ ६० ॥ पुष्करे मथुरायां वै पूर्णा कार्या विचक्षणैः ॥ यत्र कुत्रापि वा कार्या विधियुक्ता च पूर्णिमा ॥ ६१ ॥ स्नानं दानं तथा पूजां पूर्णायां न करोति यः ॥ षष्टिवर्षसहस्राणि पच्यते रौरवादिषु ॥ ६२ ॥ तस्मात्सर्वप्रयत्नेन मान्या पूर्णा विचक्षणैः ॥ मार्गशीर्षेण संयुक्ता अनंतफलदायिनी ॥ ६३ ॥ यथा मे कथितं वत्स मार्गशीर्ष मम प्रियम् ॥ करोति यो नरो भक्त्या तस्य पुण्यफलं शृणु ॥ ६४ ॥ तीर्थायुतेषु यत्पुण्यं यत्पुण्यं व्रतकोटिभिः ॥ सर्वयज्ञेषु यत्पुण्यं तत्पुण्यं समवाप्नुयात् ॥ ६५ ॥ अपुत्रो

CC-0. In Public Domain. Digitization by eGangotri

लभते पुत्रं निर्धनो धनमेव च ॥ विद्यार्थी च तथा विद्यां रूपार्थी रूपमाप्नुयात् ॥ ६६ ॥ ब्राह्मणो ब्रह्मवर्चस्वी क्षत्रियो विजयी भवेत् ॥ वैश्यो निधिपतित्वं च शूद्रः शुद्ध्येत पातकात् ॥ ६७ ॥ यद्दुर्लभं च दुष्प्राप्यं त्रिषु लोकेषु मानद ॥ तत्सर्वं प्राप्नुयान्मर्त्यः सहोमासे न संशयः ॥ ६८ ॥ यद्यप्येतेषु कामेषु सक्ता ये मानवाः सुत ॥ तुष्टा ह्यंते चतुर्वक्त्र न कामार्हा महाभुज ॥ ६९ ॥ सुदुर्लभा हि सद्भक्तिर्मम वश्यकरी शुभा ॥ सा वै संप्राप्यते पुत्र सहोमासे श्रुते तथा ॥ ७० ॥ मम प्रीतिकरं मासं सर्वदा मम वल्लभम् ॥ सर्वं संप्राप्यतेऽमुष्मान्मत्प्रसादाच्चतुर्मुख ॥ ७१ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे ब्रह्मविष्णुसंवादे मार्गशीर्षमासमाहात्म्ये मथुरामाहात्म्यवर्णनं नाम सप्तदशोऽध्यायः ॥ १७ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

॥ ॥ इति श्रीस्कांदे महापुराणे द्वितीये वैष्णवखण्डे पंचमं श्रीमार्गशीर्षमासमाहात्म्यं संपूर्णम् ॥ (२–५) ॥ ॥ श्रीकृष्णार्पणमस्तु ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समस्तविद्वत्प्रार्थना ।

एतदग्रे–"द्वादशवनमाहात्म्यम्" अस्ति । परन्तु–अस्मभ्यमद्ययावदुपलब्धपुस्तकेषु तन्न लब्धमतः संप्रार्थये विद्वज्जनान्–यदि केषांचित्समीपे स्कान्दमहापुराणीयं द्वादशवनमाहात्म्यं स्यात्ते मुद्रणार्थं प्रेषणेनावश्यमुपकुर्युरिति ।

समस्तविद्वज्जनप्रार्थयिता–
खेमराज श्रीकृष्णदास,
"श्रीवेङ्कटेश्वर"मुद्रणालयाध्यक्षः–मुंबई.

CC-0. In Public Domain. Digitization by eGangotri

इदं पुस्तकं मुम्बय्यां श्रीकृष्णदासात्मजक्षेमराजश्रेष्ठिना
स्वकीये "श्रीवेङ्कटेश्वर" (स्टीम्) मुद्रणालये मुद्रितम्।
संवत् १९६६, शके १८३१.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

CC-0. In Public Domain. Digitization by eGangotri

इति श्रीस्कान्देमहापुराणे द्वितीये वैष्णवखण्डे मार्गशीर्षमासमाहात्म्यं समाप्तम् (२-३)॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ श्रीस्कंदे महापुराणे द्वितीये वैष्णवखंडे श्रीभागवतमाहात्म्यं प्रारभ्यते ॥(२-६)॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ॥ श्रीगणेशाय नमः ॥ ॥ अथ श्रीमद्भागवतमाहात्म्यं प्रारभ्यते ॥ ॥ व्यास उवाच ॥ ॥ श्रीसच्चिदानन्दघनस्वरूपिणे कृष्णाय चानन्तसुखाभिवर्षिणे ॥ विश्वोद्भवस्थाननिरोधहेतवे नुमो वयं भक्तिरसाप्तयेऽनिशम् ॥ १ ॥ नैमिषे सूतमासीनमभिवाद्य महामतिम् ॥ कथामृतरसास्वादकुशला ऋषयोऽब्रुवन् ॥ २ ॥ ॥ ऋषय ऊचुः ॥ ॥ वज्रं श्रीमाथुरे देशे स्वपौत्रं हस्तिनापुरे ॥ अभिषिच्य गते राज्ञि तौ कथं किं च चक्रतुः ॥ ३ ॥ ॥ सूत उवाच ॥ ॥ नारायणं नमस्कृत्य नरं चैव नरोत्तमम् ॥ देवीं सरस्वतीं व्यासं ततो जयमुदीरयेत् ॥ ४ ॥ महापथं गते राज्ञि परीक्षित्पृथिवीपतिः ॥ जगाम मथुरां विप्रा वज्रनाभदिदृक्षया ॥ ५ ॥ पितृव्यमागतं ज्ञात्वा वज्रः प्रेमपरिप्लुतः ॥ अभिगम्याभिवाद्याथ निनाय निजमन्दिरम् ॥ ६ ॥ परिष्वज्य स तं वीरः कृष्णैकगतमानसः ॥ रोहिण्याद्या हरेः पत्नीर्ववन्दायतनागतः ॥ ७ ॥ ताभिः सम्मानितोऽत्यर्थं परीक्षित्पृथिवीपतिः ॥ विश्रान्तः सुखमासीनो वज्रनाभमुवाच ह ॥ ८ ॥ ॥ श्रीपरीक्षिदुवाच ॥ ॥ तात त्वत्पितृभिर्नूनमस्मत्पितृपितामहाः ॥ उद्धृता भूरिदुःखौघादहं च परिरक्षितः ॥ ९ ॥ न पारयाम्यहं तात साधु कृत्वोपकारतः ॥ त्वामतः प्रार्थयाम्यङ्ग सुखं राज्येऽनुयुज्यताम् ॥ १० ॥ कोशसैन्यादिजा चिन्ता तथारिदमनादिजा ॥ मनागपि न कार्या ते सुसेव्याः किन्तु मातरः ॥ ११ ॥ निवेद्य मयि कर्तव्यं सर्वाधिपरिवर्ज्जनम् ॥ श्रुत्वैतत्परमप्रीतो वज्रस्तं प्रत्युवाच ह ॥ १२ ॥ ॥ श्रीवज्रनाभ उवाच ॥ ॥ राजन्नुचितमेतत्ते यदस्मासु प्रभाषते ॥ त्वत्पित्रोपकृतश्चाहं धनुर्विद्याप्रदानतः ॥ १३ ॥ तस्मान्नाल्पापि मे चिन्ता क्षात्रं दृढमुपेयुषः ॥ किन्त्वेका परमा चिन्ता तत्र किञ्चिद्विचार्य्यताम् ॥ १४ ॥ माथुरे त्वभिषिक्तोऽपि स्थितोऽहं निर्जने वने ॥ क्व गता वै प्रजाऽत्रत्या यत्र राज्यं प्ररोचते ॥ १५ ॥ इत्युक्तो विष्णुरातस्तु नन्दादीनां पुरोहितम् ॥ शांडिल्यमाजुहावाशु वज्रसंदेहनुत्तये ॥ १६ ॥ अथोटजं विहायाशु शांडिल्यः समुपागतः ॥ पूजितो वज्रनाभेन निषसादासनोत्तमे ॥ १७ ॥ उपोद्घातं विष्णुरातश्चकाराशु ततस्त्वसौ ॥ उवाच परमप्रीतस्तावुभौ परिसान्त्वयन् ॥ १८ ॥ ॥ श्रीशांडिल्य उवाच ॥ ॥ शृणुतं दत्तचित्तौ मे रहस्यं व्रजभूमिजम् ॥ व्रजनं व्याप्तिरित्युक्त्या व्यापनाद्व्रज उच्यते ॥ १९ ॥ गुणातीतं परं ब्रह्म व्यापकं व्रज उच्यते ॥ सदानन्दं परं ज्योतिर्मुक्तानां पदमव्ययम् ॥ २० ॥ तस्मिन्नन्दात्मजः कृष्णः सदानन्दांगविग्रहः ॥ आत्मारामश्चाप्तकामः प्रेमाक्तैरनुभूयते ॥ २१ ॥ आत्मा तु राधिका तस्य तयैव रमणादसौ ॥ आत्मारामतया प्राज्ञैः प्रोच्यते गूढवेदिभिः ॥ २२ ॥ कामास्तु वाञ्छितास्तस्य गावो गोपाश्च गोपिकाः ॥ नित्याः सर्वे विहाराद्या आप्तकामस्ततस्त्वयम् ॥ २३ ॥ रहस्यं त्विदमेतस्य प्रकृतेः परमुच्यते ॥ प्रकृत्या खेलत

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्तस्य लीलाऽन्यैरनुभूयते ॥ २४ ॥ सर्गस्थित्यप्यया यत्र रजःसत्त्वतमोगुणैः ॥ लीलैवं द्विविधा तस्य वास्तवी व्यावहारिकी ॥ २५ ॥ वास्तवी तत्स्वसंवेद्या जीवानां व्यावहारिकी ॥ आद्यां विना द्वितीया न द्वितीया नाद्यगा क्वचित् ॥ २६ ॥ आवयोर्गोचरेयं तु तल्लीला व्यावहारिकी ॥ यत्र भूरादयो लोका भुवि माथुरमण्डलम् ॥ २७ ॥ अत्रैव व्रजभूमिः सा यत्र तत्त्वं सुगोपितम् ॥ भासते प्रेमपूर्णानां कदाचिदपि सर्वतः ॥ ॥ २८ ॥ कदाचिद्द्वापरस्यान्ते रहोलीलाधिकारिणः ॥ समवेता यदाऽत्र स्युर्यथेदानीं तदा हरिः ॥ २९ ॥ स्वैः सहावतरेत्स्वेषु समावेशार्थमीप्सिताः ॥ तदा देवादयोऽप्यन्येऽवतरन्ति समन्ततः ॥ ३० ॥ सर्वेषां वाञ्छितं कृत्वा हरिरन्तर्हितोऽभवत् ॥ तेनात्र त्रिविधा लोकाः स्थिताः पूर्वं न संशयः ॥ ३१ ॥ नित्यास्तल्लिप्सवश्चैव देवाद्याश्चेति भेदतः ॥ देवाद्यास्तेषु कृष्णेन द्वारिकां प्रापिताः पुरा ॥ ३२ ॥ पुनर्मौशलमार्गेण स्वाधिकारेषु चापिताः ॥ तल्लिप्सूंश्च सदा कृष्णः प्रेमानन्दैकरूपिणः ॥ ३३ ॥ विधाय स्वीयनित्येषु समावेशितवांस्तदा ॥ नित्याः सर्वेऽप्ययोग्येषु दर्शनाभावतां गताः ॥ ३४ ॥ व्यावहारिकलीलास्थास्तत्र यन्नाधिकारिणः ॥ पश्यन्त्यत्रागतास्तस्मान्निर्जनत्वं समन्ततः ॥ ३५ ॥ तस्माच्चिन्ता न ते कार्या वज्रनाभ मदाज्ञया ॥ वासयात्र बहून्ग्रामान्संसिद्धिस्ते भविष्यति ॥ ३६ ॥ कृष्णलीलानुसारेण कृत्वा नामानि सर्वतः ॥ त्वया वासयता ग्रामान्संसेव्या भूरियं परा ॥ ३७ ॥ गोवर्द्धने दीर्घपुरे मथुरायां महावने ॥ नन्दिग्रामे बृहत्सानौ कार्या राज्यस्थितिस्त्वया ॥ ३८ ॥ नद्यद्रिद्रोणिकुण्डादिकुञ्जान्संसेवतस्तव ॥ राज्ये प्रजाः सुसंपन्नास्त्वं च प्रीतो भविष्यसि ॥ ३९ ॥ सच्चिदानन्दभूरेषा त्वया सेव्या प्रयत्नतः ॥ तव कृष्णस्थलान्यत्र स्फुरन्तु मदनुग्रहात् ॥ ४० ॥ वज्र संसेवनादस्या उद्धवस्त्वां मिलिष्यति ॥ ततो रहस्यमेतस्मात्प्राप्स्यसि त्वं समातृकः ॥४१॥ एवमुक्त्वा तु शाण्डिल्यो गतः कृष्णमनुस्मरन् ॥ विष्णुरातोऽथ वज्रश्च परां प्रीतिमवापतुः ॥ ४२ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे श्रीमद्भागवतमाहात्म्ये शांडिल्योपदिष्टव्रजभूमिमाहात्म्यवर्णनंनाम प्रथमोऽध्यायः ॥ १ ॥ ॥ छ ॥ ॥ ॥ श्रीऋषय ऊचुः ॥ ॥ शांडिल्ये तौ समादिश्य परावृत्ते स्वमाश्रमम् ॥ किं कथं चक्रतुस्तौ तु राजानौ सूत तद्वद ॥ १ ॥ ॥ ॥ श्रीसूत उवाच ॥ ॥ ततस्तु विष्णुरातेन श्रेणीमुख्याः सहस्रशः ॥ इन्द्रप्रस्थात्समानाय्य मथुरास्थानमापिताः ॥ २ ॥ माथुरान्ब्राह्मणांस्तत्र वानरांश्च पुरातनान् ॥ विज्ञाय माननीयत्वं तेषु स्थापितवान्स्वराट् ॥ ३ ॥ वज्रस्तु तत्सहायेन शाण्डिल्यस्याऽप्यनुग्रहात् ॥ गोविन्दगोपगोपीनां लीलास्थानान्यनुक्रमात् ॥ ४ ॥ विज्ञायाऽभिधयाऽऽस्थाप्य ग्रामानावासयद्बहून् ॥ कुण्डकूपादिपूर्तेन शिवादिस्थापनेन च ॥ ५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गोविन्दहरिदेवादिस्वरूपाऽऽरोपणेन च ॥ कृष्णैकभक्तिं स्वे राज्ये ततान च मुमोद ह ॥ ६ ॥ प्रजास्तु मुदितास्तस्य कृष्णकीर्तनतत्पराः ॥ परमा
नन्दसम्पन्ना राज्यं तस्यैव तुष्टुवुः ॥ ७ ॥ एकदा कृष्णपत्न्यस्तु श्रीकृष्णविरहातुराः ॥ कालिन्दीं मुदितां वीक्ष्य पप्रच्छुर्गतमत्सराः ॥ ८ ॥
॥ ॥ श्रीकृष्णपत्न्य ऊचुः ॥ ॥ यथा वयं कृष्णपत्न्यस्तथा त्वमपि शोभने ॥ वयं विरहदुःखार्तास्त्वं न कालिन्दि तद्वद ॥ ९ ॥ तच्छ्रुत्वा स्मय
माना सा कालिन्दी वाक्यमब्रवीत् ॥ सापत्न्यं वीक्ष्य तत्तासां करुणापरमानसा ॥ १० ॥ ॥ श्रीकालिन्द्युवाच ॥ ॥ आत्मारामस्य कृष्णस्य
ध्रुवमात्मास्ति राधिका ॥ तस्या दास्यप्रभावेण विरहोऽस्मान्न संस्पृशेत् ॥ ११ ॥ तस्या एवांशविस्ताराः सर्वाः श्रीकृष्णनायिकाः ॥ नित्यसंभोग
एवास्ति तस्याः साम्मुख्ययोगतः ॥ १२ ॥ स एव सा स सैवास्ति वंशी तत्प्रेमरूपिका ॥ श्रीकृष्णनखचन्द्रालिसंगाच्चन्द्रावली स्मृता ॥ १३ ॥
रूपान्तरं च गृह्णाना तयोः सेवातिलालसा ॥ रुक्मिण्यादिसमावेशो मयाऽत्रैव विलोकितः ॥ १४ ॥ युष्माकमपि कृष्णेन विरहो नैव सर्वतः ॥
किन्तु एवं न जानीथ तस्माद्व्याकुलतामिताः ॥ १५ ॥ एवमेवात्र गोपीनामक्रूरावसरे पुरा ॥ विरहाभास एवासीदुद्धवेन समाहितः ॥ १६ ॥
तेनैव भवतीनां चेदुद्धवेदत्र समागमः ॥ तर्हि नित्यं स्वकान्तेन विहारमपि लप्स्यथ ॥ १७ ॥ ॥ श्रीसूत उवाच ॥ ॥ एवमुक्तास्तु ताः पत्न्यः
प्रसन्नां पुनरब्रुवन् ॥ उद्धवालोकनेनात्मप्रेष्ठसंगमलालसाः ॥ १८ ॥ ॥ श्रीकृष्णपत्न्य ऊचुः ॥ ॥ धन्यासि सखि कान्तेन यस्या नैवास्ति
विच्युतिः ॥ यतस्ते स्वार्थसंसिद्धिस्तस्या दास्यो बभूविम ॥ १९ ॥ परन्तूद्धवलाभे स्यादस्मत्सर्वार्थसाधनम् ॥ तथा वदस्व कालिन्दि तल्लाभोऽपि
यथा भवेत् ॥ २० ॥ ॥ श्रीसूत उवाच ॥ ॥ एवमुक्ता तु कालिन्दी प्रत्युवाचाथ तास्तथा ॥ स्मरन्ती कृष्णचन्द्रस्य कलाषोडशरू
पिणी ॥ २१ ॥ साधनभूमिर्बदरी व्रजता कृष्णेन मंत्रिणे प्रोक्ता ॥ तत्रास्ते स तु साक्षात्तद्वयुनं ग्राहयँल्लोकान् ॥ २२ ॥ फलभूमिर्व्रजभूमि
र्दत्ता तस्मै पुरैव सरहस्यम् ॥ फलमिह तिरोहितं सत्तदिहेदानीं स उद्धवोऽलक्ष्यः ॥ २३ ॥ गोवर्द्धनगिरिनिकटे सखीस्थले तद्रजःकामः ॥ तत्र
त्याङ्कुरवल्लीरूपेणास्ते स उद्धवो नूनम् ॥ २४ ॥ आत्मोत्सवरूपत्वं हरिणा तस्मै समर्पितं नियतम् ॥ तस्मात्तत्र स्थित्वा कुसुमसरःपरिसरे
सवज्राभिः ॥ २५ ॥ वीणावेणुमृदंगैः कीर्तनकाव्यादिसरससंगीतैः ॥ उत्सव आरब्धव्यो हरिरतलोकान्समानाय्य ॥ २६ ॥ तत्रोद्धवावलोको
भविता नियतं महोत्सवे वितते ॥ यौष्माकीणामभिमतसिद्धिं सविता स एव सवितानाम् ॥ २७ ॥ ॥ श्रीसूत उवाच ॥ ॥ इति श्रुत्वा प्रस
न्नास्ताः कालिन्दीमभिवन्द्य तत् ॥ कथयामासुरागत्य वज्रं प्रति परीक्षितम् ॥ २८ ॥ विष्णुरातस्तु तच्छ्रुत्वा प्रसन्नस्तद्युतस्तदा ॥ तत्रैवागत्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्सर्वं कारयामास सत्वरम् ॥ २९ ॥ गोवर्धनाददूरेण वृन्दारण्ये सखीस्थले ॥ प्रवृत्तः कुसुमाम्भोधौ कृष्णसंकीर्तनोत्सवः ॥ ३० ॥ वृषभानुसुताकान्तविहारे कीर्तनश्रिया ॥ साक्षादिव समावृत्ते सर्वेऽनन्यदृशोऽभवन् ॥ ३१ ॥ ततः पश्यत्सु सर्वेषु तृणगुल्मलताचयात् ॥ आजगामोद्धवः स्रग्वी श्यामः पीताम्बरावृतः ॥ ३२ ॥ गुञ्जामालाधरो गायन्बल्लवीवल्लभं मुहुः ॥ तदागमनतो रेजे भृशं संकीर्तनोत्सवः ॥ ३३ ॥ चन्द्रिकागमतो यद्वत्स्फाटिकाट्टालभूमणिः ॥ अथ सर्वे सुखाम्भोधौ मग्नाः सर्वं विसस्मरुः ॥ ३४ ॥ क्षणेनागतविज्ञाना दृष्ट्वा श्रीकृष्णरूपिणम् ॥ उद्धवं पूजयांचक्रुः प्रतिलब्धमनोरथाः ॥ ३५ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे श्रीमद्भागवतमाहात्म्ये गोवर्द्धनपर्वतसमीपे परीक्षिदादीनामुद्धवदर्शनवर्णनोनाम द्वितीयोऽध्यायः ॥ २ ॥ ॥ श्रीसूत उवाच ॥ ॥ अथोद्धवस्तु तान्दृष्ट्वा कृष्णकीर्तनतत्परान् ॥ सत्कृत्याथ परिष्वज्य परीक्षितमुवाच ह ॥ १ ॥ ॥ उद्धव उवाच ॥ ॥ धन्योऽसि राजन्कृष्णैकभक्त्या पूर्णोऽसि नित्यदा ॥ यस्त्वं निमग्नचित्तोऽसि कृष्णसंकीर्तनोत्सवे ॥ २ ॥ कृष्णपत्नीषु वज्रे च दिष्ट्या प्रीतिः प्रवर्तिता ॥ तवोचितमिदं तात कृष्णदत्तांगवैभव ॥ ३ ॥ द्वारकास्थेषु सर्वेषु धन्या एते न संशयः ॥ येषां व्रजनिवासाय पार्थमादिष्टवान्प्रभुः ॥ ४ ॥ श्रीकृष्णस्य मनश्चंद्रो राधास्यप्रभयान्वितः ॥ तद्विहारवनं गोभिर्मण्डयन्रोचते सदा ॥ ५ ॥ कृष्णचन्द्रः सदा पूर्णस्तस्य षोडश याः कलाः ॥ चित्सहस्रप्रभाभिन्ना अत्रास्ते तत्स्वरूपता ॥ ६ ॥ एवं वज्रस्तु राजेन्द्र प्रपन्नभयभञ्जकः ॥ श्रीकृष्णदक्षिणे पादे स्थानमेतस्य वर्तते ॥ ७ ॥ अवतारेऽत्र कृष्णेन योगमायाऽतिभाविता ॥ तद्बलेनात्मविस्मृत्या सीदन्त्येते न संशयः ॥ ८ ॥ ऋते कृष्णप्रकाशं तु स्वात्मबोधो न कस्यचित् ॥ तत्प्रकाशस्तु जीवानां मायया पिहितः सदा ॥ ९ ॥ अष्टाविंशे द्वापरान्ते स्वयमेव यदा हरिः ॥ उत्सारयेन्निजां मायां तत्प्रकाशो भवेत्तदा ॥ १० ॥ स तु कालो व्यतिक्रांतस्तेनेदमपरं शृणु ॥ अन्यदा तत्प्रकाशस्तु श्रीमद्भागवताद्भवेत् ॥ ११ ॥ श्रीमद्भागवतं शास्त्रं यत्र भागवतैर्यदा ॥ कीर्त्यते श्रूयते चापि श्रीकृष्णस्तत्र निश्चितम् ॥ १२ ॥ श्रीमद्भागवतं यत्र श्लोकं श्लोकार्द्धमेव च ॥ तत्रापि भगवान्कृष्णो बल्लवीभिर्विराजते ॥ १३ ॥ भारते मानवं जन्म प्राप्य भागवतं न यैः ॥ श्रुतं पापपराधीनैरात्मघातस्तु तैः कृतः ॥ १४ ॥ श्रीमद्भागवतं शास्त्रं नित्यं यैः परिसेवितम् ॥ पितुर्मातुश्च भार्यायाः कुलपंक्तिः सुतारिता ॥ १५ ॥ विद्याप्रकाशो विप्राणां राज्ञां शत्रुजयो विशाम् ॥ धनं स्वास्थ्यं च शूद्राणां श्रीमद्भागवताद्भवेत् ॥ १६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गोविन्दहरिदेवादिस्वरूपाऽऽरोपणेन च ॥ कृष्णैकभक्तिं स्वे राज्ये ततान च मुमोद ह ॥ ६ ॥ प्रजास्तु मुदितास्तस्य कृष्णकीर्तनतत्पराः ॥ परमा
नन्दसम्पन्ना राज्यं तस्यैव तुष्टुवुः ॥ ७ ॥ एकदा कृष्णपत्न्यस्तु श्रीकृष्णविरहातुराः ॥ कालिन्दीं मुदितां वीक्ष्य पप्रच्छुर्गतमत्सराः ॥ ८ ॥
॥ ॥ श्रीकृष्णपत्न्य ऊचुः ॥ ॥ यथा वयं कृष्णपत्न्यस्तथा त्वमपि शोभने ॥ वयं विरहदुःखार्तास्त्वं न कालिन्दि तद्वद ॥ ९ ॥ तच्छ्रुत्वा स्मय
माना सा कालिन्दी वाक्यमब्रवीत् ॥ सापत्न्यं वीक्ष्य तत्तासां करुणापरमानसा ॥ १० ॥ ॥ श्रीकालिन्द्युवाच ॥ ॥ आत्मारामस्य कृष्णस्य
ध्रुवमात्मास्ति राधिका ॥ तस्या दास्यप्रभावेण विरहोऽस्मान्न संस्पृशेत् ॥ ११ ॥ तस्या एवांशविस्ताराः सर्वाः श्रीकृष्णनायिकाः ॥ नित्यसंभोग
एवास्ति तस्याः साम्मुख्ययोगतः ॥ १२ ॥ स एव सा स सैवास्ति वंशी तत्प्रेमरूपिका ॥ श्रीकृष्णनखचन्द्रालिसंगाच्चन्द्रावली स्मृता ॥ १३ ॥
रूपान्तरं च गृह्णाना तयोः सेवातिलालसा ॥ रुक्मिण्यादिसमावेशो मयाऽत्रैव विलोकितः ॥ १४ ॥ युष्माकमपि कृष्णेन विरहो नैव सर्वतः ॥
किन्तु एवं न जानीथ तस्माद्व्याकुलतामिताः ॥ १५ ॥ एवमेवात्र गोपीनामक्रूरावसरे पुरा ॥ विरहाभास एवासीदुद्धवेन समाहितः ॥ १६ ॥
तेनैव भवतीनां चेद्धवेदत्र समागमः ॥ तर्हि नित्यं स्वकान्तेन विहारमपि लप्स्यथ ॥ १७ ॥ ॥ श्रीसूत उवाच ॥ ॥ एवमुक्तास्तु ताः पत्न्यः
प्रसन्नां पुनरब्रुवन् ॥ उद्धवालोकनेनात्मप्रेष्ठसंगमलालसाः ॥ १८ ॥ ॥ श्रीकृष्णपत्न्य ऊचुः ॥ ॥ धन्यासि सखि कान्तेन यस्या नैवास्ति
विच्युतिः ॥ यतस्ते स्वार्थसंसिद्धिस्तस्या दास्यो बभूविम ॥ १९ ॥ परन्तूद्धवलाभे स्यादस्मत्सर्वार्थसाधनम् ॥ तथा वदस्व कालिन्दि तल्लाभोऽपि
यथा भवेत् ॥ २० ॥ ॥ श्रीसूत उवाच ॥ ॥ एवमुक्ता तु कालिन्दी प्रत्युवाचाथ तास्तथा ॥ स्मरन्ती कृष्णचन्द्रस्य कलाषोडशरू
पिणी ॥ २१ ॥ साधनभूमिर्बदरी व्रजता कृष्णेन मंत्रिणे प्रोक्ता ॥ तत्रास्ते स तु साक्षात्तद्वयुनं ग्राहयँल्लोकान् ॥ २२ ॥ फलभूमिर्व्रजभूमि
र्दत्ता तस्मै पुरैव सरहस्यम् ॥ फलमिह तिरोहितं सत्तदिहेदानीं स उद्धवोऽलक्ष्यः ॥ २३ ॥ गोवर्द्धनगिरिनिकटे सखीस्थले तद्रजःकामः ॥ तत्र
त्याङ्कुरवल्लीरूपेणास्ते स उद्धवो नूनम् ॥ २४ ॥ आत्मोत्सवरूपत्वं हरिणा तस्मै समर्पितं नियतम् ॥ तस्मात्तत्र स्थित्वा कुसुमसरःपरिसरे
सवज्राभिः ॥ २५ ॥ वीणावेणुमृदंगैः कीर्तनकाव्यादिसरससंगीतैः ॥ उत्सव आरब्धव्यो हरिरतलोकान्समानाय्य ॥ २६ ॥ तत्रोद्धवावलोको
भविता नियतं महोत्सवे वितते ॥ यौष्माकीणामभिमतसिद्धिं सविता स एव सवितानाम् ॥ २७ ॥ ॥ श्रीसूत उवाच ॥ ॥ इति श्रुत्वा प्रस
न्नास्ताः कालिन्दीमभिवन्द्य तत् ॥ कथयामासुरागत्य वज्रं प्रति परीक्षितम् ॥ २८ ॥ विष्णुरातस्तु तच्छ्रुत्वा प्रसन्नस्तद्युतस्तदा ॥ तत्रैवागत्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्सर्वं कारयामास सत्वरम् ॥ २९ ॥ गोवर्धनाददूरेण वृन्दारण्ये सखीस्थले ॥ प्रवृत्तः कुसुमाम्भोधौ कृष्णसंकीर्तनोत्सवः ॥ ३० ॥ वृषभा
नुसुताकान्तविहारे कीर्तनश्रिया ॥ साक्षादिव समावृत्ते सर्वेऽनन्यदृशोऽभवन् ॥ ३१ ॥ ततः पश्यत्सु सर्वेषु तृणगुल्मलताचयात् ॥ आजगा
मोद्धवः स्रग्वी श्यामः पीताम्बरावृतः ॥ ३२ ॥ गुञ्जामालाधरो गायन्बल्लवीवल्लभं मुहुः ॥ तदागमनतो रेजे भृशं संकीर्तनोत्सवः ॥ ३३ ॥
चन्द्रिकागमतो यद्वत्स्फाटिकाट्टालभूमणिः ॥ अथ सर्वे सुखाम्भोधौ मग्नाः सर्वं विसस्मरुः ॥ ३४ ॥ क्षणेनागतविज्ञाना दृष्ट्वा श्रीकृष्णरूपिणम् ॥
उद्धवं पूजयांचक्रुः प्रतिलब्धमनोरथाः ॥ ३५ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे श्रीमद्भागवतमा
हात्म्ये गोवर्द्धनपर्वतसमीपे परीक्षिदादीनामुद्धवदर्शनवर्णनोनाम द्वितीयोऽध्यायः ॥ २ ॥ ॥ श्रीसूत उवाच ॥ ॥ अथोद्धवस्तु तान्दृष्ट्वा कृष्ण
कीर्तनतत्परान् ॥ सत्कृत्याथ परिष्वज्य परीक्षितमुवाच ह ॥ १ ॥ ॥ उद्धव उवाच ॥ ॥ धन्योऽसि राजन्कृष्णैकभक्त्या पूर्णोऽसि
नित्यदा ॥ यस्त्वं निमग्नचित्तोऽसि कृष्णसंकीर्तनोत्सवे ॥ २ ॥ कृष्णपत्नीषु वज्रे च दिष्ट्या प्रीतिः प्रवर्तिता ॥ तवोचितमिदं तात कृष्णदत्तांग
वैभव ॥ ३ ॥ द्वारकास्थेषु सर्वेषु धन्या एते न संशयः ॥ येषां व्रजनिवासाय पार्थमादिष्टवान्प्रभुः ॥ ४ ॥ श्रीकृष्णस्य मनश्चंद्रो राधास्यप्रभया
न्वितः ॥ तद्विहारवनं गोभिर्मण्डयन्रोचते सदा ॥ ५ ॥ कृष्णचन्द्रः सदा पूर्णस्तस्य षोड़श याः कलाः ॥ चित्सहस्रप्रभाभिन्ना अत्रास्ते तत्स्व
रूपता ॥ ६ ॥ एवं वज्रस्तु राजेन्द्र प्रपन्नभयभञ्जकः ॥ श्रीकृष्णदक्षिणे पादे स्थानमेतस्य वर्तते ॥ ७ ॥ अवतारेऽत्र कृष्णेन योगमायाऽति
भाविता ॥ तद्बलेनात्मविस्मृत्या सीदन्त्येते न संशयः ॥ ८ ॥ ऋते कृष्णप्रकाशं तु स्वात्मबोधो न कस्यचित् ॥ तत्प्रकाशस्तु जीवानां मायया
पिहितः सदा ॥ ९ ॥ अष्टाविंशे द्वापरान्ते स्वयमेव यदा हरिः ॥ उत्सारयेन्निजां मायां तत्प्रकाशो भवेत्तदा ॥ १० ॥ स तु कालो व्यतिक्रांतस्ते
नेदमपरं शृणु ॥ अन्यदा तत्प्रकाशस्तु श्रीमद्भागवताद्भवेत् ॥ ११ ॥ श्रीमद्भागवतं शास्त्रं यत्र भागवतैर्यदा ॥ कीर्त्यते श्रूयते चापि श्रीकृष्णस्तत्र
निश्चितम् ॥ १२ ॥ श्रीमद्भागवतं यत्र श्लोकं श्लोकार्द्धमेव च ॥ तत्रापि भगवान्कृष्णो बल्लवीभिर्विराजते ॥ १३ ॥ भारते मानवं जन्म प्राप्य
भागवतं न यैः ॥ श्रुतं पापपराधीनैरात्मघातस्तु तैः कृतः ॥ १४ ॥ श्रीमद्भागवतं शास्त्रं नित्यं यैः परिसेवितम् ॥ पितुर्मातुश्च भार्यायाः कुल
पंक्तिः सुतारिता ॥ १५ ॥ विद्याप्रकाशो विप्राणां राज्ञां शत्रुजयो विशाम् ॥ धनं स्वास्थ्यं च शूद्राणां श्रीमद्भागवताद्भवेत् ॥ १६ ॥

CC-0. In Public Domain. Digitization by eGangotri

योषितामपरेषां च सर्ववांछितपूरणम् ॥ अतो भागवतं नित्यं को न सेवेत भाग्यवान् ॥ १७ ॥ अनेकजन्मसंसिद्धैः श्रीमद्भागवतं लभेत् ॥ प्रकाशो
भगवद्भक्तेरुद्धवस्तत्र जायते ॥ १८ ॥ सांख्यायनप्रसादात्तं श्रीमद्भागवतं पुरा ॥ बृहस्पतिर्दत्तवान्मे तेनाहं कृष्णवल्लभः ॥ १९ ॥ आख्यायिकां च
तेनोक्तां विष्णुरात निबोध ताम् ॥ ज्ञायते संप्रदायोऽपि यत्र भागवतश्रुतेः ॥ २० ॥ ॥ श्रीबृहस्पतिरुवाच ॥ ॥ ईक्षांचक्रे यदा कृष्णो माया
पुरुषरूपधृक् ॥ ब्रह्मा विष्णुः शिवश्चापि रजःसत्त्वतमोगुणैः ॥२१॥ पुरुषास्त्रय उत्तस्थुरधिकारांस्तदादिशत् ॥ उत्पत्तौ पालने चैव संहारे प्रक्रमेण
तान् ॥ २२ ॥ ब्रह्मा तु नाभिकमलादुत्पन्नस्तं व्यजिज्ञपत् ॥ ॥ श्रीब्रह्मोवाच ॥ ॥ नारायणादिपुरुष परमात्मन्नमोऽस्तु ते ॥ २३ ॥ त्वया
सर्गे नियुक्तोऽस्मि पापीयान्मां रजोगुणः ॥ त्वत्स्मृतौ नैव बाधेत तथैव कृपया प्रभो ॥ २४ ॥ ॥ श्रीबृहस्पतिरुवाच ॥ ॥ यदा तु भगवांस्तस्मै
श्रीमद्भागवतं पुरा ॥ उपदिश्याब्रवीद्ब्रह्मन्सेवस्वैनत्स्वसिद्धये ॥ २५ ॥ ब्रह्मा तु परमप्रीतस्तेन कृष्णाप्तयेऽनिशम् ॥ सप्तावरणभंगाय सप्ताहं सम
वर्तयत् ॥ २६ ॥ श्रीभागवतसप्ताहसेवनाप्तमनोरथः ॥ सृष्टिं वितनुते नित्यं ससप्ताहः पुनःपुनः ॥२७॥ विष्णुरप्यर्थयामास पुमांसं स्वार्थसिद्धये ॥
प्रजानां पालने पुंसा यदनेनापि कल्पितः ॥ २८ ॥ ॥ श्रीविष्णुरुवाच ॥ ॥ प्रजानां पालनं देव करिष्यामि यथोचितम् ॥ प्रवृत्त्या च निवृ
त्त्या च कर्मज्ञानप्रयोजनात् ॥२९॥ यदायदैव कालेन धर्मग्लानिर्भविष्यति ॥ धर्मं संस्थापयिष्यामि ह्यवतारैस्तदा तदा ॥ ३० ॥ भोगार्थिभ्यस्तु
यज्ञादिफलं दास्यामि निश्चितम् ॥ मोक्षार्थिभ्यो विरक्तेभ्यो मुक्तिं पञ्चविधां तथा ॥ ३१ ॥ येऽपि मोक्षं न वाञ्छन्ति तान्कथं पालयाम्यहम् ॥
आत्मानं च श्रियं चापि पालयामि कथं वद ॥ ३२ ॥ तस्मा अपि पुमानाद्यः श्रीभागवतमादिशत् ॥ उवाच च पठस्वैनत्तव सर्वार्थसिद्धये ॥
॥ ३३ ॥ ततो विष्णुः प्रसन्नात्मा परमार्थकपालने ॥ समर्थोऽभूच्छ्रिया मासिमासि भागवतं स्मरन् ॥ ३४ ॥ यदा विष्णुः स्वयं वक्ता लक्ष्मीश्च
श्रवणे रता ॥ तदा भागवतश्रावो मासेनैव पुनःपुनः ॥ ३५ ॥ यदा लक्ष्मीः स्वयं वक्त्री विष्णुश्च श्रवणे रतः ॥ मासद्वयं रसास्वादस्तदातीव सुशो
भते ॥ ३६ ॥ अधिकारे स्थितो विष्णुर्लक्ष्मीर्निश्चिन्तमानसा ॥ तेन भागवतास्वादस्तस्या भूरि प्रकाशते ॥ ३७ ॥ अथ रुद्रोऽपि तं देवं संहा
राधिकृतः पुरा ॥ पुमांसं प्रार्थयामास स्वसामर्थ्यविवृद्धये ॥ ३८ ॥ ॥ श्रीरुद्र उवाच ॥ ॥ नित्ये नैमित्तिके चैव संहारे प्राकृते तथा ॥ शक्तयो
मम विद्यन्ते देवदेव मम प्रभो ॥ ३९ ॥ आत्यंतिके तु संहारे मम शक्तिर्न विद्यते ॥ महद्दुःखं ममैतत्तु तेन त्वां प्रार्थयाम्यहम् ॥ ४० ॥ ॥ श्रीबृह

१ जनः इत्यध्याहार्यम् । २ एतेन—एतद्भागवतं पूर्वं सांख्यायनेन बृहस्पतय उपदिष्टम्, तेन बृहस्पतिनोद्धवाय—इति परंपरा सूचिता ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्पतिरुवाच ॥ ॥ श्रीमद्भागवतं तस्मा अपि नारायणो ददौ ॥ स तु संसेवनादस्य जिग्ये चापि तमोगुणम् ॥ ४१ ॥ कथा भागवती तेन सेविता
वर्षमात्रतः ॥ लये त्वात्यंतिके तेनावाप शक्तिं सदाशिवः ॥ ४२ ॥ ॥ उद्धव उवाच ॥ ॥ श्रीभागवतमाहात्म्य इमामाख्यायिकां गुरोः ॥ श्रुत्वा
भागवतं लब्ध्वा मुमुदेऽहं प्रणम्य तम् ॥ ४३ ॥ ततस्तु वैष्णवीं रीतिं गृहीत्वा मासमात्रतः ॥ श्रीमद्भागवतास्वादो मया सम्यङ्निषेवितः ॥ ४४ ॥
तावतैव बभूवाहं कृष्णस्य दयितः सखा ॥ कृष्णेनाथ नियुक्तोऽहं व्रजे स्वप्रेयसीगणे ॥४५॥ विरहार्त्तासु गोपीषु स्वयं नित्यविहारिणा ॥ श्रीभाग
वतसंदेशो मन्मुखेन प्रयोजितः ॥ ४६ ॥ तं यथामति लब्ध्वा ता आसन्विरहवर्ज्जिताः ॥ नाज्ञासिषं रहस्यं तच्चमत्कारस्तु लोकितः ॥ ४७ ॥ स्व
र्वासं प्रार्थ्य कृष्णं च ब्रह्माद्येषु गतेषु मे ॥ श्रीमद्भागवते कृष्णस्तद्रहस्यं स्वयं ददौ ॥४८॥ पुरतोऽश्वत्थमूलस्य चकार मयि तद्दृढम् ॥ तेनात्र व्रज
वल्लीषु वसामि बदरीं गतः ॥ ४९ ॥ तस्मान्नारदकुण्डेऽत्र तिष्ठामि स्वेच्छया सदा ॥ कृष्णप्रकाशो भक्तानां श्रीमद्भागवताद्भवेत् ॥५०॥ तदेषामपिका
र्य्यार्थं श्रीमद्भागवतं त्वहम् ॥ प्रवक्ष्यामि सहायोऽत्र त्वयैवानुष्ठितो भवेत् ॥५१॥ ॥ श्रीसूत उवाच ॥ ॥ विष्णुरातस्तु श्रुत्वा तदुद्धवं प्रणतोऽब्रवीत्॥
॥ ॥ श्रीपरीक्षिदुवाच ॥ ॥ हरिदास त्वया कार्य्यं श्रीभागवतकीर्तनम् ॥५२॥ आज्ञाप्योऽहं यथाकार्य्यं सहायोऽत्र मया तथा ॥ ॥श्रीसूत उवाच ॥
श्रुत्वैतदुद्धवो वाक्यमुवाच प्रीतमानसः ॥ ५३ ॥ ॥ उद्धव उवाच ॥ ॥ श्रीकृष्णेन परित्यक्ते भूतले बलवान्कलिः ॥ करिष्यति परं विघ्नं स ःकार्ये
समुपस्थिते ॥ ५४ ॥ तस्माद्दिग्विजयं याहि कलिनिग्रहमाचर ॥ अहं तु मासमात्रेण वैष्णवीं रीतिमास्थितः ॥ ५५ ॥ श्रीमद्भागवतास्वादं प्रचार्य
त्वत्सहायतः ॥ एतान्सम्प्रापयिष्यामि नित्यधाम्नि मधुद्विषः ॥ ५६ ॥ ॥ श्रीसूत उवाच ॥ ॥ श्रुत्वैवं तद्वचो राजा मुदितश्चिन्तयातुरः॥ तदा
विज्ञापयामास स्वाभिप्रायं तमुद्धवम् ॥ ५७ ॥ ॥ श्रीपरीक्षिदुवाच ॥ ॥ कलिं तु निग्रहीष्यामि तात ते वचसि स्थितः ॥ श्रीभागवतसंप्राप्तिः
कथं मम भविष्यति ॥ ५८ ॥ अहं तु समनुग्राह्यस्तव पादतले श्रितः ॥ ॥ श्रीसूत उवाच ॥ ॥ श्रुत्वैतद्वचनं भूयोऽप्युद्धवस्तमुवाच ह ॥ ५९ ॥
॥ ॥ उद्धव उवाच ॥ ॥ राजंश्चिन्ता तु ते काऽपि नैव कार्य्या कथंचन ॥ तवैव भगवच्छास्त्रे यतो मुख्याधिकारिता ॥ ६० ॥ एतावत्कालपर्य्यन्तं
प्रायो भागवतश्रुतेः ॥ वार्तामपि न जानन्ति मनुष्याः कर्मतत्पराः ॥ ६१ ॥ त्वत्प्रसादेन बहवो मनुष्या भारताजिरे ॥ श्रीमद्भागवतप्राप्तौ सुखं
प्राप्स्यन्ति शाश्वतम् ॥ ६२ ॥ नन्दनन्दनरूपस्तु श्रीशुको भगवानृषिः ॥ श्रीमद्भागवतं तुभ्यं श्रावयिष्यत्यसंशयः ॥६३॥ तेन प्राप्स्यसि राजंस्त्वं
नित्यं धाम व्रजेशितुः ॥ श्रीभागवतसंचारस्ततो भुवि भविष्यति ॥ ६४ ॥ तस्मात्त्वं गच्छ राजेन्द्र कलिनिग्रहमाचर ॥ ॥ श्रीसूत उवाच ॥ ॥

CC-0. In Public Domain. Digitization by eGangotri

इत्युक्तस्तं परिक्रम्य गतो राजा दिशां जये ॥६५॥ वज्रस्तु निजराज्येशं प्रतिबाहुं विधाय च ॥ तत्रैव मातृभिः साकं तस्थौ भागवताशया ॥६६॥
अथ वृन्दावने मासं गोवर्द्धनसमीपतः ॥ श्रीमद्भागवतास्वादस्तूद्धवेन प्रवर्तितः ॥ ६७ ॥ तस्मिन्नास्वाद्यमाने तु सच्चिदानन्दरूपिणी ॥ प्रचकाशे हरे
र्लीला सर्वतः कृष्ण एव च ॥ ६८ ॥ आत्मानं च तदन्तःस्थं सर्वेऽपि ददृशुस्तदा ॥ वज्रस्तु दक्षिणे दृष्ट्वा कृष्णपादसरोरुहे ॥ ६९ ॥ स्वात्मानं
कृष्णवैधुर्य्यान्मुक्तस्तद्भुव्यशोभत ॥ ताश्च तन्मातरः कृष्णे रासरात्रिप्रकाशिनि ॥ ७० ॥ चंद्रे कलाप्रभारूपमात्मानं वीक्ष्य विस्मिताः ॥ स्वप्रेष्ठ
विरहव्याधिविमुक्ताः स्वपदं ययुः ॥ ७१ ॥ येऽन्ये च तत्र ते सर्वे नित्यलीलान्तरं गताः ॥ व्यावहारिकलोकेभ्यः सद्योऽदर्शनमागताः ॥ ७२ ॥
गोवर्द्धननिकुञ्जेषु गोषु वृन्दावनादिषु ॥ नित्यं कृष्णेन मोदन्ते दृश्यन्ते प्रेमतत्परैः ॥ ७३ ॥ ॥ श्रीसूत उवाच ॥ ॥ य एतां भगवत्प्राप्तिं
शृणुयाच्चापि कीर्तयेत् ॥ तस्य वै भगवत्प्राप्तिर्दुःखहानिश्च जायते ॥ ७४ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये
वैष्णवखण्डे परीक्षिदुद्धवसंवादे श्रीभागवतमाहात्म्ये तृतीयोऽध्यायः ॥ ३ ॥ ॥ छ ॥ ॥ श्रीऋषय ऊचुः ॥ ॥ साधु सूत चिरं जीव चिर
मेवं प्रशाधि नः ॥ श्रीभागवतमाहात्म्यमपूर्वं त्वन्मुखाच्छ्रुतम् ॥ १ ॥ तत्स्वरूपप्रमाणं च विधिं च श्रवणे वद ॥ तद्वक्तुर्लक्षणं सूत श्रोतुश्चापि
वदाधुना ॥ २ ॥ ॥ श्रीसूत उवाच ॥ ॥ श्रीमद्भागवतस्याथ श्रीमद्भगवतः सदा ॥ स्वरूपमेकमेवास्ति सच्चिदानन्दलक्षणम् ॥ ३ ॥ श्रीकृष्णा
सक्तभक्तानां तन्माधुर्य्यप्रकाशकम् ॥ समुज्जृम्भति यद्वाक्यं विद्धि भागवतं हि तत् ॥ ४ ॥ ज्ञानविज्ञानभक्त्यङ्गचतुष्टयपरं वचः ॥ मायामर्दन
दक्षं च विद्धि भागवतं च तत् ॥ ५ ॥ प्रमाणं तस्य को वेद ह्यनंतस्याक्षरात्मनः ॥ ब्रह्मणे हरिणा तद्दिक्चतुःश्लोक्या प्रदर्शिता ॥ ६ ॥ तदानं
त्यावगाहेन स्वेप्सितावहनक्षमाः ॥ त एव संति भो विप्रा ब्रह्मविष्णुशिवादयः ॥ ७ ॥ मितबुद्ध्यादिवृत्तीनां मनुष्याणां हिताय च ॥ परीक्षिच्छु
कसंवादो योऽसौ व्यासेन कीर्तितः ॥ ८ ॥ ग्रन्थोऽष्टादशसाहस्रो योऽसौ भागवताभिधः ॥ कलिग्राहगृहीतानां स एव परमाश्रयः ॥ ९ ॥ श्रोतारो
ऽथ निरूप्यन्ते श्रीमद्विष्णुकथाश्रयाः ॥ प्रवरा अवराश्चेति श्रोतारो द्विविधा मताः ॥ १० ॥ प्रवराश्चातको हंसः शुको मीनादयस्तथा ॥ अवरा
वृकभूरुण्डवृषोष्ट्राद्याः प्रकीर्तिताः ॥ ११ ॥ अखिलोपेक्षया यस्तु कृष्णशास्त्रश्रुतौ व्रती ॥ स चातको यथाम्भोदमुक्ते पाथसि चातकः ॥ १२ ॥
हंसः स्यात्सारमादत्ते यः श्रोता विविधाच्छ्रुतात् ॥ दुग्धेनैक्यं गतात्तोयाद्यथा हंसोऽमलं पयः ॥ १३ ॥ शुकः सुष्ठु मितं वक्ति व्यासं श्रोतॄंश्च ॥२१६॥
हर्षयन् ॥ सुपाठितः शुको यद्वच्छिक्षकं पार्श्वगानपि ॥ १४ ॥ शब्दं नानिमिषो जातु करोत्यास्वादयन्रसम् ॥ श्रोता स्निग्धो भवेन्मीनो मीनः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्षीरनिधौ यथा ॥ १५ ॥ यस्तुदन्त्रसिकाञ्छ्रोतॄन्विरौत्यज्ञो वृको हि सः ॥ वेणुस्वनरसासक्तान्वृकोऽरण्ये मृगान्यथा ॥ १६ ॥ भूरुण्डः शिक्षये दन्याञ्छ्रुत्वा न स्वयमाचरेत् ॥ यथा हिमवतः शृंगे भूरुण्डाख्यो विहंगमः ॥ १७ ॥ सर्वं श्रुतमुपादत्ते सारासारान्धधीर्वृषः ॥ स्वादुद्राक्षां खलिं चापि निर्विशेषं यथा वृषः ॥ १८ ॥ स उष्ट्रो मधुरं मुञ्चन्विपरीते रमेत यः ॥ यथा निम्बं चरत्युष्ट्रो हित्वाऽऽम्रमपि तद्युतम् ॥ १९ ॥ अन्येऽपि बहवो भेदा द्वयोर्भृंगखरादयः ॥ विज्ञेयास्तत्तदाचारैस्तत्तत्प्रकृतिसंभवैः ॥ २० ॥ यः स्थित्वाऽभिमुखं प्रणम्य विधिवत्त्यक्तान्यवादो हरेर्लीलाः श्रोतुमभीप्सतेऽतिनिपुणो नम्रो ऽथ कृताञ्जलिः ॥ शिष्यो विश्वसितोऽनुचिन्तनपरः प्रश्नेऽनुरक्तः शुचिर्नित्यं कृष्णजनप्रियो निगदितः श्रोता स वै वक्तृभिः ॥ २१ ॥ भगवन्मतिरनपेक्षः सुहृदो दीनेषु सानुकम्पो यः ॥ बहुधाबोधनचतुरो वक्ता संमानितो मुनिभिः ॥ २२ ॥ अथ भारतभूस्थाने श्रीभागवतसेवने ॥ विधिं शृणुत भो विप्रा येन स्यात्सुखसंततिः ॥ २३ ॥ राजसं सात्त्विकं चापि तामसं निर्गुणं तथा ॥ चतुर्विधं तु विज्ञेयं श्रीभागवतसेवनम् ॥ २४ ॥ सप्ताहं यज्ञवद्यत्तु सश्रमं सत्वरं मुदा ॥ सेवितं राजसं तत्तु बहु पूजादिशोभनम् ॥२५॥ मासेन ऋतुना वापि श्रवणं स्वादसंयुतम्॥ सात्त्विकं यदनायासं समस्तानन्दवर्द्धनम् ॥ २६ ॥ तामसं यत्तु वर्षेण सालसं श्रद्धयाऽयुतम् ॥ विस्मृतिस्मृतिसंयुक्तं सेवनं तच्च सौख्यदम् ॥ २७ ॥ वर्षमासदिनानां तु विमुच्य नियमाग्रहम् ॥ सर्वदा प्रेमभक्त्यैव सेवनं निर्गुणं मतम् ॥ २८ ॥ पारीक्षितेऽपि संवादे निर्गुणं तत्प्रकीर्तितम् ॥ तत्र सप्तदिनाख्यानं तदायुर्दिनसंख्यया ॥ २९ ॥ अन्यत्र त्रिगुणं चापि निर्गुणं च यथेच्छया ॥ यथा कथंचित्कर्तव्यं सेवनं भगवच्छ्रुतेः ॥ ३० ॥ ये श्रीकृष्णविहारैकभजनास्वादलोलुपाः ॥ मुक्तावपि निराकांक्षास्तेषां भागवतं धनम् ॥ ३१ ॥ येऽपि संसारसंतापनिर्विण्णा मोक्षकांक्षिणः ॥ तेषां भवौषधं चैतत्कलौ सेव्यं प्रयत्नतः ॥ ३२ ॥ ये चापि विषयारामाः सांसारिकसुखस्पृहाः ॥ तेषां तु कर्ममार्गेण या सिद्धिः साऽधुना कलौ ॥ ॥ ३३ ॥ सामर्थ्यधनविज्ञानाभावादत्यन्तदुर्लभा ॥ तस्मात्तैरपि संसेव्या श्रीमद्भागवती कथा ॥ ३४ ॥ धनं पुत्रांस्तथा दारान्वाहनादि यशो गृहान् ॥ असापत्न्यं च राज्यं च दद्याद्भागवती कथा ॥ ३५ ॥ इह लोके वरान्भुक्त्वा भोगान्वै मनसेप्सितान् ॥ श्रीभागवतसंगेन यात्यन्ते श्रीहरेः पदम् ॥ ३६ ॥ यत्र भागवती वार्ता ये च तच्छ्रवणे रताः ॥ तेषां संसेवनं कुर्याद्देहेन च धनेन च ॥ ३७ ॥ तदनुग्रहतोऽस्यापि श्रीभागवतसेवनम् ॥ श्रीकृष्णव्यतिरिक्तं यत्तत्सर्वं धनसंज्ञितम् ॥ ३८ ॥ कृष्णार्थीति धनार्थीति श्रोता वक्ता द्विधा मतः ॥ यथा वक्ता तथा श्रोता तत्र सौख्यं विवर्द्धते ॥ ३९ ॥ उभयोर्वैपरीत्ये तु रसाभासे फलच्युतिः॥ किन्तु कृष्णार्थिनां सिद्धिर्विलम्बेनापि जायते ॥ ४० ॥ धनार्थिनस्तु संसिद्धि

CC-0. In Public Domain. Digitization by eGangotri

विधिसंपूर्णतावशात् ॥ कृष्णार्थिनोऽगुणस्यापि प्रेमैव विधिरुत्तमः ॥ ४१ ॥ आसमाप्ति सकामेन कर्तव्यो हि विधिः स्वयम् ॥ स्नातो नित्य
क्रियां कृत्वा प्राश्य पादोदकं हरेः ॥ ४२ ॥ पुस्तकं च गुरुं चैव पूजयित्वोपचारतः ॥ ब्रूयाद्वा शृणुयाद्वापि श्रीमद्भागवतं मुदा ॥ ४३ ॥ पयसा
वा हविष्येण मौनं भोजनमाचरेत् ॥ ब्रह्मचर्य्यमधःसुप्तिं क्रोधलोभादिवर्ज्जनम् ॥ ४४ ॥ कथान्ते कीर्तनं नित्यं समाप्तौ जागरं चरेत् ॥ ब्राह्मणा
न्भोजयित्वा तु दक्षिणाभिः प्रतोषयेत् ॥ ४५ ॥ गुरवे वस्त्रभूषादि दत्त्वा गां च समर्पयेत् ॥ एवं कृते विधाने तु लभते वाञ्छितं फलम् ॥ ४६ ॥
दारागारसुताराज्यं धनादि च यदीप्सितम् ॥ परन्तु शोभते नात्र सकामत्वं विडम्बनम् ॥ ४७ ॥ कृष्णप्राप्तिकरं शश्वत्प्रेमानन्दफलप्रदम् ॥
श्रीमद्भागवतं शास्त्रं कलौ कीरेण भाषितम् ॥ ४८ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे श्रीमद्भाग
वतमाहात्म्ये चतुर्थोऽध्यायः ॥ ४ ॥ छ ॥ ॥ इति श्रीस्कान्दे महापुराणे द्वितीये वैष्णवखण्डे श्रीभागवतमहापुराणमाहात्म्यं समाप्तम् ॥ (२-६)॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समस्तविद्वत्प्रार्थना ।

एतदग्रे–"माघमासमाहात्म्यम्" अस्ति । परन्तु–अस्मभ्यमद्ययावदुपलब्धपुस्तकेषु तन्न लब्धमतः संप्रार्थये विद्वज्जनान्–यदि केषांचित्समीपे स्कान्दमहापुराणीयं माघमासमाहात्म्यं स्यात्ते मुद्रणार्थं प्रेषणेनावश्यमुपकुर्युरिति ।

समस्तविद्वज्जनप्रार्थयिता–
खेमराज श्रीकृष्णदास,
"श्रीवेङ्कटेश्वर" मुद्रणालयाध्यक्षः–मुंबई.

CC-0. In Public Domain. Digitization by eGangotri

॥ इति श्रीस्कान्दे महापुराणे द्वितीये वैष्णवखंडे श्रीभागवतमाहात्म्यं समाप्तम् ॥(२–६)॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ श्रीस्कांदे महापुराणे द्वितीये वैष्णवखंडे वैशाखमासमाहात्म्यं प्रारभ्यते ॥(२–७)॥

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ॥ श्रीगणेशाय नमः ॥ ॥ नत्वा श्रीगोकुलाधीशपादपंकजमाधुरीम् ॥ कुर्वे माधवमासस्य माहात्म्यविशदीक्रियाम् ॥ १ ॥ अथ तत्र भगवान्सकलनिगमागमपारंगतः परमेष्ठिसुतो नारदोऽम्बरीषराजपृष्टः सन् पुरा ब्रह्मणा स्वस्मै प्रोक्तं वैशाखमासमाहात्म्यमंबरीषराज्ञे कथयाम्बभूव ॥ तथा च पाद्मे—"एकदा नारदो लोकान्पर्यटन्भगवत्प्रियः ॥ मथुरायामम्बरीषं कृष्णाराधनमानसम् ॥ महाभागं व्रतपरं ददर्श मुनिसत्तमः ॥ स आगतं मुनिवरं सत्कृत्य नृपसत्तमः ॥ भवंत इव पप्रच्छ श्रद्धया हृष्टमानसः" इति । तत्राऽऽम्बरीषो माधवमासविषये परमेष्ठिनो ब्रह्मणः अंगभुवं तनयं नारदं प्रति पप्रच्छ ॥ १ ॥ अंजसा अनायासेन ॥ २ ॥ ३ ॥ ४ ॥ वैशाखमासे कर्तव्यध

॥ ॥ श्रीगणेशाय नमः ॥ ॥ अथ वैशाखमासमाहात्म्यप्रारंभः ॥ ॥ नारायणं नमस्कृत्य नरं चैव नरोत्तमम् ॥ देवीं सरस्वतीं व्यासं ततो जयमुदीरयेत् ॥ १ ॥ ॥ सूत उवाच ॥ ॥ भूयोऽप्यंगभुवं राजा ब्रह्मणः परमेष्ठिनः ॥ पुण्यं माधवमाहात्म्यं नारदं पर्यपृच्छत ॥ १ ॥ ॥ ॥ अंबरीष उवाच ॥ ॥ सर्वेषामपि मासानां त्वत्तो माहात्म्यमंजसा ॥ श्रुतं मया पुरा ब्रह्मन्यदा चोक्तं तदा त्वया ॥ २ ॥ वैशाखः प्रवरो मासो मासेष्वेतेषु निश्चितम् ॥ इति तस्माद्विस्तरेण माहात्म्यं माधवस्य च ॥ ३ ॥ श्रोतुं कौतूहलं ब्रह्मन्कथं विष्णुप्रियो ह्यसौ ॥ के च विष्णुप्रिया धर्मा मासे माधववल्लभे ॥ ४ ॥ तत्राप्यस्य तु कर्तव्याः के धर्मा विष्णुवल्लभाः ॥ किं दानं किं फलं तस्य कमुद्दिश्याऽऽचरेदिमान् ॥ ॥ ५ ॥ कैर्द्रव्यैः पूजनीयोऽसौ माधवो माधवागमे ॥ एतन्नारद विस्तार्य मह्यं श्रद्धावते वद ॥ ६ ॥ ॥ श्रीनारद उवाच ॥ ॥ मया पृष्टः पुरा ब्रह्मा मासधर्मान्पुरातनान् ॥ व्याजहार पुरा प्रोक्तं यच्छ्रियै परमात्मना ॥ ७ ॥ ततो मासा विशिष्योक्ताः कार्तिको माघ एव च ॥ माधवस्तेषु वैशाखं मासानामुत्तमं व्यधात् ॥ ८ ॥ मातेव सर्वजीवानां सदैवेष्ट प्रदायकः ॥ दानयज्ञव्रतस्नानैः सर्वपापविनाशनः ॥ ९ ॥ धर्मयज्ञक्रियासारस्तपःसारः सुरार्चितः ॥ विद्यानां वेदविद्येव मंत्राणां प्रणवो यथा ॥ १० ॥

र्मान्पृच्छति—तत्रापीति । कं देवम् उद्दिश्य अधिकृत्य ॥ ५ ॥ व्रताचरणद्रव्याणि पृच्छति—कैर्द्रव्यैरिति । द्रव्यैः सामग्रीभिः माधवागमे वैशाखमाससंप्राप्तौ विस्तार्य शब्दप्रपंचेन । कृष्णभक्तिजिज्ञासाविषये विशेषप्रश्नः पाद्मे—"कथमाराध्यते सोऽयं केशवः क्लेशनाशनः ॥ भक्तिप्रियोऽसौ भगवान्कया भक्त्या प्रसीदति ॥ कथं भक्तिर्भवेदस्मिन्सर्वैराराध्यते कथम् ॥ वैष्णवोऽसि हरेस्तस्य प्रियोऽसि परमार्थवित् ॥ तेन त्वामेव पृच्छामि ब्रह्मन्ब्रह्मविदुत्तम" इति ॥ ६ ॥ यत्पुरा परमात्मना श्रियै प्रोक्तं तन्मह्यं व्याजहार प्रोक्तवान् ॥ ७ ॥ विशिष्य मुख्यत्वेन उक्ताः । माधवः वैशाखः । व्यधादकरोत् ॥ ८ ॥ माधवपदनिरुक्तिमाह—मातेवेति ॥ ९ ॥ सर्वश्रेष्ठवस्तूनां मध्ये श्रेष्ठतरत्वमस्य वैशा

CC-0. In Public Domain. Digitization by eGangotri

भूरुहाणां सुरतरुर्धेनूनां कामधेनुवत् ॥ शेषवत्सर्वनागानां पक्षिणां गरुडो यथा ॥ ११ ॥ देवानां तु यथा विष्णुर्वर्णानां ब्राह्मणो यथा ॥
प्राणवत्प्रियवस्तूनां भार्येव सुहृदां यथा ॥ १२ ॥ आपगानां यथा गंगा तेजसां तु रविर्यथा ॥ आयुधानां यथा चक्रं धातूनां कांचनं
यथा ॥ १३ ॥ वैष्णवानां यथा रुद्रो रत्नानां कौस्तुभो यथा ॥ मासानां धर्महेतूनां वैशाखश्चोत्तमस्तथा ॥ १४ ॥ नानेन सदृशो लोके
विष्णुप्रीतिविधायकः ॥ वैशाखस्नाननिरते मेषे प्रागर्यमोदयात् ॥ १५ ॥

खस्य नियमयति—धर्मेति ॥ १० ॥ ११ ॥ १२ ॥ आपगानां नदीनाम् ॥ १३ ॥ धर्महेतूनां धर्मकार्यनिमित्तभूतानाम् ॥ १४ ॥ वैशाखस्नाननिरते मनुष्ये विष्णुः प्रीतिं करोतीत्युत्तरेणान्वयः । तत्र स्नाननिरतः कीदृग्विधियुक्तो भाव्य इत्याकांक्षायामाह पाद्मे—"अंबरीष उवाच ॥ को विधिः किं तपो दानं स्नानं केशवपूजनम् ॥ कृपया वद विप्रर्षे तदा स नारदोऽब्रवीत् ॥ मेषसंक्रमणे भानोर्माधवे मासि सत्तम ॥ महानद्यां नदीतीर्थे नदे सरसि निर्झरे ॥ देवखाते वापिकूपे यथाप्राप्तजलाशये ॥ मधुमासस्य शुक्लायामेकादश्यामुपोषयेत् ॥ पंचदश्यां ततो धीरो मेषसंक्रमणेऽपि वा ॥ वैशाखस्नाननियमं ब्राह्मणानामनुज्ञया ॥ मधुसूदनमभ्यर्च्य कुर्यात्सुस्नानपूर्वकम् ॥" इत्यादिः । स्नानसमये दर्भपाणिराचांतः नारायणं स्मरन्, प्रत्यक्षगंगाऽभावे चतुर्हस्तात्मकं स्थलं प्रकल्प्य, तत्र गंगामावाह्य नमस्कृत्य सविधि मृत्तिकास्नानं कृत्वा तीर्थस्नानं कुर्यात् ॥ तत आचम्य शुक्ले वाससी परिधाय देवऋषिमनुष्यपितृतर्पणं कृत्वा सूर्यायार्घ्यं दत्त्वा नमस्कृत्य द्विजं गां कांचनं स्पृष्ट्वा पश्चाच्च स्वगृहं व्रजेत् ॥ "आश्रमस्थांश्च संपूज्य प्रतिमां चापि पूजयेत् ॥ पूर्वं भक्त्या च गोविंदं गृहे च नियतात्मवाम् ॥ वैशाखं सकलं मासं नित्यस्नायी जितेंद्रियः ॥ जपन्हविष्यं भुञ्जानो भूशय्यानियमस्थितः ॥ एकभुक्तमथो नक्तमयाचितमतंद्रितः ॥ वैशाखे विधिवत्स्नानद्वयं नद्यादिके बहिः ॥ व्रतं दानं जपो होमो मधुसूदनपूजनम् ॥ अपि जन्मसहस्रोत्थं पापं हरति दारुणम् ॥ त्रिसन्ध्यं पूजयेदीशं लक्ष्म्या च मधुसूदनम् ॥ सुवर्णं तिलपात्राणि दुग्धपात्राणि शक्तितः ॥ पादत्राणातपत्राब्जकुम्भान्दद्याद्द्विजातिषु ॥ सर्वपापविनिर्मुक्तो याति सोऽपि परं पदम् ॥ वैदिकस्तांत्रिको मिश्रः श्रीविष्णोस्त्रिविधो मखः ॥ वैदिको मिश्रको वाऽपि विप्रादीनामुदाहृतः ॥ तांत्रिको विष्णुभक्तस्य शूद्रस्यापि प्रकीर्तितः ॥ कृतन्यासः कृतन्यासां हर्यर्चां विधिनार्ऽर्चयेत् ॥ सुदर्शनं पांचजन्यं गदाऽसीषुधनुर्हलान् ॥ मुशलं कौस्तुभं मालां श्रीवत्सं चाऽपि पूजयेत् ॥ नंदोपनंदं गरुडं प्रचण्डं चण्डमेव च ॥ बलं महाबलं चैव कुमुदं कुमुदेक्षणम् ॥ दुर्गां विनायकं व्यासं विष्वक्सेनं गुरून्सुरान् ॥ स्वस्वस्थानेष्वभिमुखान्पूजयेत्प्रोक्षणादिभिः ॥ सूक्तादिनाऽभिषेकं च कुर्याद्वै विभवे सति ॥ होमादिकं प्रकुर्वीत कथाश्रवणमाचरेत् ॥" इति ॥ १५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ क्रतुशतं क्रतुशतजन्यम् ॥ २१ ॥ २२ ॥ बाह्ये निर्झररूपे अल्पके अल्पकुण्डरूपे लिखितपापानि यमशासने लिखितानि पापानीत्यर्थः ॥ २३ ॥ अंभसि शीतोदके ॥ २४ ॥ बहिर्जलं नदीतडागादिषु स्थितं जलमित्यर्थः ॥ २५ ॥ "तावत्षड्घटिकामध्ये तस्मात्स्नानं समाचरेत्" इत्यनेन स्नानस्यैव महाफलदायकत्वं सूचितं महापातकहानिश्च भवति । अत्र प्रसिद्धा पंचपातकीकथा पाद्मे—"पुरा मुनिशर्मानाम कश्चिद्ब्राह्मणः माधवे मासि तीर्थप्रसंगेन रेवायां स्नानार्थं प्रतिसञ्चरन्सन्नग्रतोऽतिविकृतिरूपान्पञ्च पुरुषान्दृष्ट्वा इमे क इति यावद्विचारयति तावत्ते तद्दर्शनेन शुद्धांतःकरणाः बद्धां

लक्ष्मीसहायो भगवान्प्रीतिं तस्मिन्करोत्यलम् ॥ जंतूनां प्रीणनं यद्वदन्नेनैव हि जायते ॥ १६ ॥ तद्वद्वैशाखस्नानेन विष्णुः प्रीणात्यसंशयम् ॥ वैशाखस्नाननिरताञ्जनान्दृष्ट्वाऽनुमोदते ॥ १७॥ तावतापि विमुक्तोऽघैर्विष्णुलोके महीयते ॥ सकृत्स्नात्वा मेषसंस्थे सूर्ये प्रातः कृताह्निकः ॥ ॥ १८ ॥ महापापैर्विमुक्तोऽसौ विष्णोः सायुज्यमाप्नुयात् ॥ स्नानार्थं मासि वैशाखे पादमेकं चरेद्यदि ॥ १९ ॥ सोऽश्वमेधायुतानां च फलमाप्नोत्यसंशयम् ॥ अथवा कूटचित्तस्तु कुर्यात्संकल्पमात्रकम् ॥ २० ॥ सोऽपि क्रतुशतं पुण्यं लभेदेव न संशयः ॥ यो गच्छेद्धनुरायामं स्नातुं मेषगते रवौ ॥ २१ ॥ सर्वबंधविनिर्मुक्तो विष्णोः सायुज्यमाप्नुयात् ॥ त्रैलोक्ये यानि तीर्थानि ब्रह्मांडांतर्गतानि च ॥ २२ ॥ तानि सर्वाणि राजेन्द्र संति बाह्येऽल्पके जले ॥ तावल्लिखितपापानि गर्जंति यमशासने ॥ २३ ॥ यावन्न कुरुते जंतुर्वैशाखे स्नानमंभसि ॥ तीर्थादिदेवताः सर्वा वैशाखे मासि भूमिप ॥ २४ ॥ बहिर्जलं समाश्रित्य सदा सन्निहिता नृप ॥ सूर्योदयं समारभ्य यावत्षड्घटिकावधि ॥ २५ ॥ तिष्ठंति चाऽऽज्ञया विष्णोर्नराणां हितकाम्यया ॥ तावन्नागच्छतां पुंसां शापं दत्त्वा सुदारुणम् ॥ स्वस्थानं यांति राजेन्द्र तस्मात्स्नानं समाचरेत् ॥ ॥ २६ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे वैशाखमासमाहात्म्ये नारदाम्बरीषसंवादे वैशाखमासप्रशंसापूर्वकवैशाखस्नानमाहात्म्यवर्णनंनाम प्रथमोऽध्यायः ॥ १ ॥

जलिपुटाः संतः स्वस्ववृत्तांतं प्रोचुः । हे द्विजवर्य भवंतं पुरुषोत्तमं मन्यामहे, त्वं प्रसीद, आत्मदुःखमावेदयामः, यतः युष्मत्सदृशाः साधवः दुःखहंतारः संति । तत्रैक आह—अहं पंचालदेशीयो नरवाहनोनाम क्षत्रियः मार्गे ब्राह्मणहननेनेदृशीं दशां प्राप्तः, अयं द्वितीयः चन्द्रशर्मानाम द्विजः मगधदेशीयः गुरुघातपातकेनेदृशीं दशां प्राप्तः, तृतीयोऽयं देवशर्मा ब्राह्मणः सुरापानवेश्यागमनदोषेणेदृशीं दशां प्राप्तः, अयं चतुर्थः विधुरोनाम वैश्यः मोहान्मासत्रयं मातृगमनदोषेणेदृशीं दशां प्राप्तः, अयं पञ्चमः नंदनामा वैश्यः

धनलोभेन महापातकिनां संसर्गकरणेन चौर्यादिकर्मणा चेदृशीं दशां प्राप्तः—एवं वयं पञ्च पापिष्ठाः अनेकतीर्थेषु भ्रमंतस्तथाऽपि शुद्धा न जाताः दुःखं च न गतमतः पापनाशनोपायं वद ॥ ॥ मुनिशर्मोवाच ॥ ॥ हे पुरुषाः यूयमज्ञानतः पापकारिणोऽपि सत्यभाषिणः अनुतापयुक्ताश्च जाताः अतः मया अनुग्राह्याः ॥ "मासे तु वै माधवसंज्ञकेऽस्मिन्यः स्नाति पापैः स विमुच्यते हि ॥ मेषस्थिते भास्वति नर्मदायाः शर्मप्रदे वारिणि वारिताऽघे ॥ तस्मादहो सह मया सुकृतैकसारवैशाखमासि च भवंत उपेत्य रेवाम् ॥ मज्जन्तु पातककृतो मुनिवृंदजुष्टे रेवाजले निखिलपापभयापहत्यै" एवमुक्तास्ते सर्वे मुनिना सह रेवां गत्वा पापप्रशमनं स्तोत्रं जपंतः विधिना स्नानं चक्रुः तेन पापनिर्मुक्ताः दिव्यदेहाश्च जाताः" इति ॥ २६ ॥ इति वैशाखमासमाहात्म्यटीकायां प्रथमोऽध्यायः ॥ १ ॥ ॥ छ ॥ माधवसमो मासो नास्ति वैशाख एव मुख्यः अग्रे सर्वत्र

॥ ॥ नारद उवाच ॥ ॥ न माधवसमो मासो न कृतेन युगं समम् ॥ न च वेदसमं शास्त्रं न तीर्थं गंगया समम् ॥ १ ॥ न जलेन समं दानं न सुखं भार्यया समम् ॥ न कृषेस्तु समं वित्तं न लाभो जीवितात्परः ॥ २ ॥ न तपोऽनशनात्तुल्यं न दानात्परमं सुखम् ॥ न धर्मस्तु दयातुल्यो न ज्योतिश्चक्षुषा समम् ॥ ३ ॥ न तृप्तिरशनात्तुल्या न वाणिज्यं कृषेः समम् ॥ न धर्मेण समं मित्रं न सत्येन समं यशः ॥ ४ ॥ नारोग्यसमसुत्थानं न त्राता केशवात्परः ॥ न माधवसमं लोके पवित्रं कवयो विदुः ॥ ५ ॥ माधवः परमो मासः शेषशायिप्रियः सदा ॥ अव्रतेन क्षिपेद्यस्तु मासं माधववल्लभम् ॥ ६ ॥ तिर्यग्योनिं स यात्याशु सर्वधर्मबहिष्कृतः ॥ अव्रतेन गतो येषां माधवो मर्त्यधर्मिणाम् ॥ ७ ॥ इष्टापूर्ते वृथा तेषां धर्मो धर्मभृतां वरः ॥ प्रवृत्तानां तु भक्ष्याणां माधवेऽनियमे कृते ॥ ८ ॥ अवश्यं विष्णुसायुज्यं प्राप्नोत्येव न संशयः ॥ संतीह बहुवित्तानि व्रतानि विविधानि च ॥ ९ ॥ देहाऽऽयासकराण्येव पुनर्जन्मप्रदानि च ॥ वैशाखस्नानमात्रेण न पुनर्जायते भुवि ॥ १० ॥ सर्वदानेषु यत्पुण्यं सर्वतीर्थेषु यत्फलम् ॥ तत्फलं समवाप्नोति माधवे जलदानतः ॥ ११ ॥ जलदानासमर्थेन परस्यापि प्रबोधनम् ॥ कर्तव्यं भूतिकामेन सर्वदानाधिकं हितम् ॥ १२ ॥

एवमेव योज्यम् ॥ १ ॥ न जलेन समं दानं जलेन तुल्यमन्यद्दानं नास्ति, जलस्यैव मुख्यदानत्वात् । भार्यया सममन्यत्सुखं नास्ति, भार्यैव परमं सुखमित्यर्थः । कृषेरन्यत्तुल्यं वित्तं नास्ति कृषिरेव मुख्यं धनम् ॥२॥ अनशनादुपोषणादन्यत्तपो नास्ति, उपोषणमेव तपः ॥ चक्षुषा सममन्यज्ज्योतिर्नास्ति, चक्षुरेव ज्योतिः ॥३॥ अशनात्तुल्या भोजनेन तुल्या ॥ ४ ॥ उत्थानं प्राप्तिः । विदुः जानंति ॥ ५ ॥ अव्रतेन व्रतमकृत्वा ॥ ६ ॥ तिर्यग्योनिं पशुपक्ष्यादियोनिम् ॥ ७ ॥ इष्टापूर्ते जलवट्टादिबंधने तेषां धर्मभृतामपि पुरुषाणां माधवे मासि भक्ष्याणां भक्षणीयपदार्थानामनियमे कृते सति वृथा धर्मो भवति ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ स्वयं जलदानासमर्थेन परस्य

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जलदाने प्रबोधनं 'त्वं जलं देहि' इत्याकारकं भूतिकामेनैश्वर्यंच्छावता कर्तव्यम् ॥ १२ ॥ १३ ॥ प्रपा—'पाणपोही' इति प्रसिद्धं स्थानम् "प्रपा पानीय शालिका" इत्यमरः तस्य दानमुत्सर्जनं मार्गे पानीयशालिकाबन्धनमित्यर्थः ॥ १४ ॥ १५ ॥ १६ ॥ सलिलं, छत्रं, व्यजनं, देयं ब्राह्मणायेति वक्ष्यमाणसंबंधः ॥ १७ ॥ १८ ॥ माधवे जलदानादियथोक्तदानाकरणेऽनिष्टं फलमाह—अदत्त्वेत्यनेन । उदककुम्भमुदकविशिष्टमक्षय्यतृतीयायां दीयमानं कुम्भम् ॥ १९ ॥ २० ॥ विहगाधिपतिः दैवं

एकतः सर्वदानानि जलदानं हि चैकतः ॥ तुलामारोपितं पूर्वं जलदानं विशिष्यते ॥ १३ ॥ मार्गेऽध्वगानां यो मर्त्यः प्रपादानं करोति हि ॥ स कोटिकुलमुद्धृत्य विष्णुलोके महीयते ॥ १४ ॥ देवानां च पितॄणां च ऋषीणां राजसत्तम ॥ अत्यंतप्रीतिदं सत्यं प्रपादानं न संशयः ॥ १५ ॥ प्रपादानेन संतुष्टा येनाऽध्वश्रमकर्षिताः ॥ तोषितास्तेन देवाश्च ब्रह्मविष्णुशिवादयः ॥ १६ ॥ सलिलं सलिलेच्छूनां छत्रं छायामपीच्छताम् ॥ व्यजनं व्यजनेच्छूनां वैशाखे मासि भूमिप ॥ १७ ॥ जलं छत्रं च व्यजनं दानं येषां विशिष्यते ॥ माधवे मासि संप्राप्ते ब्राह्मणाय कुटुम्बिने ॥ १८ ॥ अदत्त्वोदककुम्भं च चातको जायते भुवि ॥ १९ ॥ यो दद्याच्छीतलं तोयं तृषार्ताय महात्मने ॥ तावन्मात्रेण राजेंद्र राजसूयायुतं लभेत् ॥ २० ॥ घर्मश्रमार्तविप्राय वीजयेद्व्यजनेन यः ॥ तावन्मात्रेण निष्पापो विहगाधिपतिर्भवेत् ॥ २१ ॥ अदत्त्वा व्यजनं भूप वैशाखे तु द्विजातये ॥ वातरोगशताकीर्णो नरकानेव विंदति ॥ २२ ॥ यो वीजयेत्पटेनाऽपि पथि श्रांतं द्विजोत्तमम् ॥ तावताथ विमुक्तोऽसौ विष्णुसायुज्यमाप्नुयात् ॥२३॥ यस्तालव्यजनं वाऽपि दत्त्वा शुद्धेन चेतसा ॥ विधूय सर्वपापानि ब्रह्मलोकं स गच्छति ॥ २४ ॥ सद्यः श्रमहरं पुण्यं न दद्याद्व्यजनं नरः ॥ नारकीं यातनां भुक्त्वा कश्मलो जायते भुवि ॥ २५ ॥ आध्यात्मिकादिदुःखानां शांतये मनुजेश्वर ॥ छत्रं दद्यात्प्रयत्नेन वैशाखे मासि वा सकृत् ॥ २६ ॥ अच्छत्रदो नरो यस्तु वैशाखे माधवप्रिये ॥ छायाहीनो महाक्रूरः पिशाचो भुवि जायते ॥ २७ ॥ यो दद्यात्पादुके दिव्ये माधवे माधवप्रिये ॥ यमदूतौ तिरस्कृत्य विष्णुलोकं स गच्छति ॥ २८ ॥ पादत्राणं तु यो दद्याद्वैशाखे माधवागमे ॥ न तस्य नारको लोको न क्लेशा ऐहिकाश्च ये ॥२९॥ पादुके याचमानाय यो दद्याद्ब्राह्मणाय च ॥ स भूपालो भवेद्भूमौ कोटिजन्मस्वसंशयम् ॥३०॥ अनाथमंडपं मार्गे श्रमहारि करोति यः ॥ तस्य पुण्यफलं वक्तुं ब्रह्मणाऽपि न शक्यते ॥३१॥

राजः ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ कश्मलः कुष्ठवान् ॥ २५ ॥ आध्यात्मिकादिदुःखानामाध्यात्मिकाधिदैविकाधिभौतिकदुःखानां शांत्यर्थं छत्रं दद्यात् ॥ २६ ॥ छायाहीनो मरुस्थल्यादिनिर्वृक्षदेशेषु जायमान इत्यर्थः ॥ २७ ॥ २८ ॥ पादत्राणमुपानहम् । इह भवा ऐहिका आध्यात्मिकादयः ॥ २९ ॥ ३० ॥ अनाथमण्डपं

CC-0. In Public Domain. Digitization by eGangotri

मार्गे वर्तमानमनाथविश्रांत्यर्थं छायामण्डपम् । अनाथस्य भग्नं पतितं वा गृहम् । यः करोति सम्यक्कृत्वा ददाति इत्यर्थः ॥३१॥ फलविश्रांतिः फलानामियत्तया गणनम्॥ ॥ ३२ ॥ सद्यः स्वाप्यायनं सद्यस्तृप्तिकरम् ॥ ३३ ॥ ३४ ॥ ३५ ॥ अन्नदानाकरणे प्रत्यवायमाह–वैशाख इति । भूसुरे द्विजायेत्यर्थः । चतुर्थ्यर्थे सप्तमी ॥ ३६ ॥ यथाविभूति स्वसामर्थ्यानुरोधेन ॥ ३७ ॥ विस्मारयति, अयमत्र निष्कर्षः–यस्मै अन्नं ददाति स याचकः स्वमातापित्रादीन्विस्मृत्यान्नदातारमेव स्मरतीति ॥ ३८ ॥

मध्याह्ने ब्राह्मणं प्राप्तमतिथिं भोजयेद्यदि ॥ न तस्य फलविश्रांतिर्ब्रह्मणाऽपि निरूपिता ॥ ३२ ॥ सद्यः स्वाप्यायनं नृणामन्नदानं नराधिप ॥ तस्मान्नान्नेन सदृशं दानं लोकेषु विद्यते ॥ ३३ ॥ मार्गश्रांताय विप्राय प्रश्रयं प्रददाति यः ॥ तस्य पुण्यफलं वक्तुं ब्रह्मणाऽपि न शक्यते ॥ ॥ ३४ ॥ दारापत्यगृहादीनि वासोऽलंकारभूषणम् ॥ असह्यं नाश्नतः पुंसः सह्यं भुक्तवतो ध्रुवम् ॥ ३५ ॥ तस्मादन्नसमं दानं न भूतं न भविष्यति ॥ वैशाखे येन चादत्तं मार्गश्रांते च भूसुरे॥३६॥ स पिशाचो भवेद्भूमौ स्वमांसान्येव खादति ॥ यथाविभूति दातव्यं तस्मादन्नं द्विजातये ॥ ३७ ॥ अन्नदो मातृपित्रादीन्विस्मारयति भूमिप ॥ तस्मादन्नं प्रशंसंति लोकास्त्रैलोक्यवर्तिनः ॥ ३८ ॥ मातरः पितरश्चापि केवलं जन्महेतवः ॥ अन्नदं पितरं लोके वदन्ति च मनीषिणः ॥३९॥ अन्नदे सर्वतीर्थानि अन्नदे सर्वदेवताः ॥ अन्नदे सर्वधर्माश्च तिष्ठंत्यरिधराजय ॥४०॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे वैशाखमासमाहात्म्ये नारदाम्बरीषसंवादे दाननिरूपणंनाम द्वितीयोऽध्यायः ॥ २ ॥ ॥छ॥ ॥ नारद उवाच ॥ ॥ यो मर्त्यो द्विजवर्याय पर्यंकं तु ददाति हि ॥ यत्र स्वस्थः सुखं शेते शीतानिलनिषेवितः ॥ १ ॥ धर्मसाधनभूते हि देहे नैरुज्यमाप्नुते ॥ तं दत्त्वा सकलं तापं निरस्य गतकल्मषः ॥ २ ॥ अखण्डपदवीं याति योगिनामपि दुर्लभाम् ॥ वैशाखे घर्मतप्तानां श्रान्तानां तु द्विजन्मनाम् ॥३॥ दत्त्वा श्रमापहं दिव्यं पर्यंकं मनुजेश्वर ॥ न जातु सीदते लोके जन्ममृत्युजरादिभिः॥४॥ गृहीत्वा ब्राह्मणो यत्र शेते चाजीवमास्थितः ॥ आसीने सकलं पापं ज्ञानतोऽज्ञानतः कृतम् ॥ ५ ॥ विलयं याति राजेंद्र कर्पूर इव चाग्निना ॥ शयने ब्रह्मनिर्वाणं स नरो याति निश्चितम् ॥ ६ ॥

अन्नदातुः सर्वाधिक्यमनुवदति–मातर इति ॥ ३९ ॥ अरिधराजय शत्रुनगरविध्वंसक ॥ ४० ॥ इति वैशाखमासमाहात्म्यटीकायां द्वितीयोऽध्यायः ॥ २ ॥ ॥ छ ॥ अथ वैशाखमासे दानधर्माननुवदन्पर्यंकदानं प्रस्तौति–य इति ॥१॥ नैरुज्यमारोग्यम् ॥२॥ अखंडपदवीम् अव्युच्छिन्नं मुक्तिमार्गम्॥ ३ ॥ ४ ॥ ५ ॥ निर्वाणम् अपुन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रावृत्तिम् ॥ ६ ॥ स्नानं वल्लभं प्रियं यस्मिन् हरेरिति शेषः तस्मिन् ॥ ७ ॥ ८ ॥ शतपौरुषम् आत्मानमारभ्य भविष्यच्छतपुरुषपर्यंतम् ॥ ९ ॥ उपबर्हणम् उच्छीर्षकम् ॥ १० ॥ उपबर्हणं विशिनष्टि—सुखमिति ॥ ११ ॥ १२ ॥ ब्रह्मभूयाय ब्रह्मलोकं प्रति गंतुं कल्पते समर्थो भवति । तार्णं तृणैर्निर्मितं कटम् अथवा अन्यत्कटं

यो दद्यात्कशिपुं मासे वैशाखे स्नानवल्लभे ॥ सर्वभोगसमायुक्तस्तस्मिन्नेव हि जन्मनि ॥ ७ ॥ सान्वयो वर्तते नूनं रोगादिभिरनाहतः ॥ आयुष्यं परमारोग्यं यशो धैर्यं च विंदति ॥ ८ ॥ नाधार्मिकः कुले तस्य जायते शतपौरुषम् ॥ भुक्त्वा तु सकलान्भोगांस्ततः पञ्चत्वमेष्यति ॥ ९ ॥ निर्धूताखिलपापस्तु ब्रह्मनिर्वाणमृच्छति ॥ श्रोत्रियाय द्विजेंद्राय यो दद्यादुपबर्हणम् ॥ १० ॥ सुखं निद्रा विना येन न नृणां जायते क्वचित् ॥ सर्वेषामाश्रयो भूत्वा भुवि साम्राज्यमश्नुते ॥ ११ ॥ पुनः सुखी पुनर्भोगी पुनर्धर्मपरायणः ॥ आसप्तजन्म राजेंद्र जायते सर्वतो जयी ॥ १२ ॥ पश्चात्सप्तकुलैर्युक्तो ब्रह्मभूयाय कल्पते ॥ तार्णं कटं तु यो दद्यात्कटमन्यदथापि वा ॥ १३ ॥ तत्र शेते स्वयं विष्णुर्यत्रस्थः परमेश्वरः ॥ यथा जलगता चोर्णा न जलैर्भिद्यते क्वचित् ॥ १४ ॥ तथा संसारगो जन्तुः संसारे न च बध्यते ॥ आसने शयने सक्तः कटदः सर्वतः सुखी ॥ १५ ॥ प्रश्रये शयनार्थाय यो दद्यात्कटकंबलम् ॥ तावन्मात्रेण मुक्तः स्यान्नात्र कार्या विचारणा ॥ १६ ॥ निद्रया हीयते दुःखं निद्रया हीयते श्रमः ॥ सा निद्रा कटसंस्थस्य सुखं संजायते ध्रुवम् ॥ १७ ॥ यो दद्यात्कंबलं राजन्वैशाखे माधवाऽऽगमे ॥ अपमृत्योः कालमृत्योर्मुक्तो जीवति वै शतम् ॥ १८ ॥ दद्याद्वस्त्रं सूक्ष्मतरं द्विजेंद्रे घर्मकर्शिते ॥ पूर्णमायुः समाप्नोति परत्र च परां गतिम् ॥ १९ ॥ अतस्तापहरं दिव्यं कर्पूरं तु द्विजातये ॥ दत्त्वा मोक्षमवाप्नोति दुःखशांतिं च विंदति ॥ २० ॥ कुसुमानि च यो दद्यात्कुंकुमं च द्विजातये ॥ सार्वभौमो भवेद्राजा सर्वलोकवशंकरः ॥ २१ ॥ पुत्रपौत्रादिभोगांश्च भुक्त्वा मोक्षमवाप्नुयात् ॥ त्वगस्थिगतसंतापं सद्यो हरति चन्दनम् ॥ २२ ॥ तापत्रयविनिर्मुक्तस्तद्दत्त्वा मोक्षमाप्नुयात् ॥ औशीरं चाषकं कौशं यो दद्याज्जलवासितम् ॥ २३ ॥

खर्जूरादिपत्रविनिर्मितम् ॥ १३ ॥ तृणविनिर्मितकटदानप्रभावं वर्णयति—यथेति ॥ १४ ॥ १५ ॥ प्रश्रये विश्रांतिस्थाने धर्मशालादौ पांथायेति शेषः ॥ १६ ॥ १७ ॥ कम्बलदानप्रशंसामाह—यो दद्यादिति । माधवाऽऽगमे माधवस्य आगमः यस्मिन् ॥ १८ ॥ १९ ॥ २० ॥ कुंकुमं केशरमित्यर्थः ॥ २१ ॥ २२ ॥ कौशं सुगन्धवि

CC-0. In Public Domain. Digitization by eGangotri

शिष्टकुशसंस्कृतं केवलकुशैर्वा संस्कृतम् ॥ २३ ॥ निर्वृतिं मोक्षमानंदं वा ॥ २४ ॥ २५ ॥ २६ ॥ शतपत्रीं नीलकमलिनीम् । यूथीं मालतीम् ॥ २७ ॥ मधुशासनो विष्णुस्तस्य शासनादाज्ञया ॥ २८ ॥ २९ ॥ ३० ॥ विश्राममण्डपं विश्रामस्य विहारस्य मंडपम् ॥ ३१ ॥ सुच्छायाविशिष्टं मण्डपं प्रपया पानीयशालिकया सहितम् ॥ ३२ ॥ पुत्रैः किं फलमित्युक्त्या पुत्रेण यथा पुन्नामनरकादिनिरासः स्वर्लोकप्राप्तिर्भवति तद्वदनेन सुकर्मणाऽपि फलं लभ्यत इति सूचितम् ॥ ३३ ॥ तदेव विशद

सर्वभोगेषु राजेंद्र स तु देवसहायवान् ॥ पापहानिं दुःखहानिं प्राप्य निर्वृतिमाप्नुयात् ॥ २४ ॥ गोरोचं मृगनाभिं च दद्याद्वैशाखधर्मवित् ॥ तापत्रयविनिर्मुक्तः परं निर्वाणमृच्छति ॥ २५ ॥ तांबूलं च सकर्पूरं यो दद्यान्मेषगे रवौ ॥ सार्वभौमसुखं भुक्त्वा परं निर्वाणमृच्छति ॥ २६ ॥ शतपत्रीं च यूथीं च मेषमासे ददन्नरः ॥ स सार्वभौमो भवति पश्चान्मोक्षं च विंदति ॥२७॥ केतकीं मल्लिकां वाऽपि यो दद्यान्माधवाऽऽगमे ॥ स तु मोक्षमवाप्नोति मधुशासनशासनात् ॥ २८ ॥ पूगीफलं तु यो दद्यात्सुगन्धं तु द्विजातये ॥ नारिकेलफलं राजंस्तस्य पुण्यफलं शृणु ॥ ॥ २९ ॥ सप्त जन्म भवेद्विप्रो धनाढयो वेदपारगः ॥ पश्चात्सप्तकुलैर्युक्तो विष्णुलोकं स गच्छति ॥ ३० ॥ विश्राममण्डपं यस्तु कृत्वा दद्याद्विजन्मने ॥ तस्य पुण्यफलं वक्तुं नाहं शक्नोमि भूपते ॥ ३१ ॥ सुच्छायामण्डपं यस्तु सिकताऽऽकीर्णमञ्जसा ॥ सप्रपं कारयेद्यस्तु स तु लोकाधिपो भवेत् ॥ ३२ ॥ मार्गोद्यानं तडागं वा कूपं मण्डपमेव च ॥ यः करोति स धर्मात्मा तस्य पुत्रैस्तु किं फलम् ॥ ३३ ॥ कूपस्तडागमुद्यानं मण्डपं च प्रपा तथा ॥ सद्धर्मकरणं पुत्रः संतानं सप्तधोच्यते ॥ ३४ ॥ एतेष्वन्यतमाभावे नोर्ध्वं गच्छंति मानवाः ॥ सच्छास्त्रश्रवणं तीर्थयात्रा सज्जनसंगतिः ॥ ३५ ॥ जलदानं चान्नदानमश्वत्थारोपणं तथा ॥ पुत्रश्चेति च संतानं सप्तमेऽतिविदो विदुः ॥ ३६ ॥ नासंततिर्लभेल्लोकान्कृत्वा धर्मशतान्यपि ॥ तस्मात्संतानमन्विच्छेत्संतानेष्वेकतो व्रजेत् ॥ ३७ ॥ पशूनां पक्षिणां चैव मृगाणां चैव भूरुहाम् ॥ नोर्ध्वलोकं सुखं याति मनुष्याणां तु का कथा ॥ ३८ ॥ पूगीफलसमायुक्तं नागवल्लीदलैर्युतम् ॥ कर्पूरागुरुसंयुक्तं दद्यत्तांबूलमुत्तमम् ॥ ३९ ॥ शारीरैः सकलैः पापैर्मुच्यते नात्र संशयः ॥ तांबूलदो यशो धैर्यं श्रियमाप्नोति निश्चितम् ॥ ४० ॥

यति—कूप इति ॥ ३४ ॥ ३५ ॥ अतिविदोऽतिनिपुणा इमे पूर्वोक्ताः सप्त संतानमेवंति विदुर्जानंति ॥ ३६ ॥ संतानप्राप्त्यर्थमुपायान्वदिष्यन्संतानं प्रस्तौति—नासंततिरिति ॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ४१ ॥ घर्मकालेषु उष्णकाल इत्यर्थः ॥ ४२ ॥ अध्वश्रांतद्विजन्मने पांथाय ब्राह्मणायेत्यर्थः ॥ ४३ ॥ ४४ ॥ अहं ब्रह्मा ॥ ४५ ॥ गव्यं गोसंबंधि, तेसो रूरूपं तेजस्वि ॥ ४६ ॥ उर्वारुकं कर्कटीफलविशेषं 'फूट' इति गुर्जरभाषायां प्रसिद्धम् ॥ ४७ ॥ ४८ ॥ ४९ ॥ पानकं बिंबदाडिमी रसपानकं शर्करामिश्रितजलं वा । फलेन खर्बुजाख्येन सहितं शर्कराजलम् । सुधापानम् अमृतपानम्, भवेदिति शेषः ॥ ५० ॥ चूतसुपक्कफलसंयुतं पानकं गुर्जरभाषायां

रोगी दत्त्वा विरोगः स्यादरोगी मोक्षमाप्नुयात् ॥ वैशाखे मासि यो दद्यात्तक्रं तापविनाशनम् ॥ ४१ ॥ विद्यावान्धनवान्भूमौ जायते नात्र संशयः ॥ न तक्रसदृशं दानं घर्मकालेषु विद्यते ॥ ४२ ॥ तस्मात्तक्रं प्रदातव्यमध्वश्रांतद्विजातये ॥ जंबीररसुरसोपेतं लसल्लवणमिश्रितम् ॥४३॥ यस्तक्रमरुचिघ्नं तु दत्त्वा मोक्षमवाप्नुयात् ॥ यो दद्याद्दधिखंडं तु वैशाखे घर्मशांतये ॥ ४४ ॥ तस्य पुण्यफलं वक्तुं नाहं शक्नोमि भूमिप ॥ यो दद्यात्तंडुलान्दिव्यान्मधुसूदनवल्लभे ॥ ४५ ॥ स लभेत्पूर्णमायुष्यं सर्वयज्ञफलं लभेत् ॥ यो घृतं तेजसो रूपं गव्यं दद्याद्विजातये ॥ सोऽश्वमेधफलं प्राप्य मोदते विष्णुमंदिरे ॥ ४६ ॥ उर्वारुगुडसंमिश्रं वैशाखे मेषगे रवौ ॥ सर्वपापविनिर्मुक्तः श्वेतद्वीपे वसेद्ध्रुवम् ॥ ४७ ॥ यश्चेक्षुदंडं सायाह्ने दिवा तापोपशान्तये ॥ ब्राह्मणाय च यो दद्यात्तस्य पुण्यमनंतकम् ॥ ४८ ॥ वैशाखे पानकं दत्त्वा सायाह्ने श्रमशान्तये ॥ सर्वपापविनिर्मुक्तो विष्णोः सायुज्यमाप्नुयात् ॥४९॥ सफलं पानकं मेषमासे सायं द्विजातये ॥ दद्यात्तेन पितॄणां तु सुधापानं न संशयः॥५०॥ वैशाखे पानकं चूतसुपक्कफलसंयुतम् ॥ तस्य सर्वाणि पापानि विनाशं यांति निश्चितम् ॥ ५१ ॥ यो दद्याच्चैत्रदर्शे तु कुम्भं पूर्णं तु पानकैः ॥ गयाश्राद्धशतं तेन कृतमेव न संशयः ॥ ५२ ॥ कस्तूरीकर्पुरोपेतं मल्लिकोशीरसंयुतम् ॥ कलशं पानकैः पूर्णं चैत्रदर्शे तु मानवः ॥ दद्यात्पितॄन्समुद्दिश्य स षण्णवतिदो भवेत् ॥ ५३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे वैशाखमासमाहात्म्ये नारदाम्बरीषसंवादे दाननिरूपणंनाम तृतीयोऽध्यायः ॥ ३ ॥ ॥ छ ॥ ॥ नारद उवाच ॥ ॥ तैलाभ्यङ्गं दिवा स्वापं तथा वै कांस्य भोजनम् ॥ खट्वानिद्रां गृहे स्नानं निषिद्धस्य च भक्षणम् ॥ १ ॥

'गोलकेरी' महाराष्ट्रभाषायां 'गुळांबा' इति प्रसिद्धम् । वा अपक्कं चूतफलं भर्जयित्वा तद्रसं शर्कराजीरकमिश्रितम् ॥ ५१ ॥ चैत्रदर्शे चैत्रामावस्यायाम् ॥ ५२ ॥ षण्णवतिदः षण्णवतिश्राद्धप्रद इत्यर्थः ॥ ५३ ॥ ५४ ॥ इति वैशाखमासमाहात्म्यटीकायां तृतीयोऽध्यायः ॥ ३ ॥ ॥ छ ॥ ॥ अथ वैशाखमासे व्रताचरणं

CC-0. In Public Domain. Digitization by eGangotri

प्रस्तौति–तैलाभ्यंगमिति । कांस्यभोजनं कांस्यपात्रभोजनम् । निषिद्धस्य मसूरादेः ॥ १ ॥ द्विभुक्तं द्विवारं भोजनम् ॥ २ ॥ श्रांतानाम् अध्वपरिश्रमखिन्नानाम् । द्विजन्मनां ब्राह्मणानाम् ॥ पादावनेजनं पादप्रक्षालनम्, यदिति शेषः । तत् तदेव व्रतम्, अस्मादधिकं व्रतमन्यत्किंचिन्नास्तीति ध्वनिः ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ अस्नायी शीतोदकस्नानरहितः, अपत्राशी पलाशादिपत्रेषु भोजनविरहितः ॥ ७ ॥ गृहे स्नानं यः करोति स इति शेषः ॥ ८ ॥ ९ ॥ अवैशाखाद्वैशाखनियमानामकरणात् ॥ १० ॥

वैशाखे वर्जयेदष्टौ द्विभुक्तं नक्तभोजनम् ॥ पद्मपत्रे तु यो भुंक्ते वैशाखे व्रतसंस्थितः ॥ २ ॥ स तु पापविनिर्मुक्तो विष्णुलोकं च गच्छति ॥ वैशाखे मासि मध्याह्ने श्रांतानां तु द्विजन्मनाम् ॥ पादावनेजनं कुर्यात्तद्व्रतं सुव्रतोत्तमम् ॥ ३ ॥ अध्वश्रान्तं द्विजं यस्तु मध्याह्ने स्वगृहागतम् ॥ उपवेश्यासने रम्ये कृत्वा पादावनेजनम् ॥ ५ ॥ धृत्वा शिरसि ताश्चापो विध्वस्ताखिलबंधनः ॥ गंगादिसर्वतीर्थेषु स्नातो भवति निश्चितम् ॥ ६ ॥ अस्नायी वाऽप्यपत्राशी वैशाखं तु नयेद्यदि ॥ रासभीं योनिमासाद्य पश्चादश्वतरो भवेत् ॥ ७ ॥ दृढाङ्गो रोगहीनश्च तथा स्वस्थोऽपि मानवः ॥ वैशाखे तु गृहे स्नात्वा चांडालीं योनिमाप्नुयात् ॥ ८ ॥ वैशाखे मासि राजेन्द्र मेषसंस्थे दिवाकरे ॥ न करोति बहिःस्नानं श्वानयोनिशतं व्रजेत् ॥ ९ ॥ अस्नात्वा चाप्यदत्त्वा च वैशाखो येन नीयते ॥ स पिशाचो भवेन्नूनमवैशाखादधो व्रजेत् ॥ १० ॥ यो न दद्याज्जलं चान्नं वैशाखे लोभमानसः ॥ पापहानिं दुःखहानिं नैवाप्नोति न संशयः ॥ ११ ॥ नदीस्नानं तु यः कुर्याद्वैशाखे विष्णुतत्परः ॥ जन्मत्रयार्जितात्पापान्मुच्यते नात्र संशयः ॥ १२ ॥ समुद्रगनदीस्नानं कुर्यात्प्रातर्भगोदये ॥ सप्तजन्मार्जितैः पापैस्तत्क्षणादेव मुच्यते ॥ १३ ॥ कुर्यादुषसि यः स्नानं सप्तगङ्गासु मानवः ॥ कोटिजन्मार्जितात्पापान्मुच्यते नात्र संशयः ॥ १४ ॥ जाह्नवी वृद्धगङ्गा च कालिंदी च सरस्वती ॥ कावेरी नर्मदा वेणी सप्तगंगाः प्रकीर्तिताः ॥ १५ ॥ देवखातेषु यः कुर्यात्प्रातर्वैशाखमज्जनम् ॥ जन्मारभ्य कृतात्पापान्मुच्यते नात्र संशयः ॥ १६ ॥ वैशाखे मासि संप्राप्ते यो वापीष्ववगाहनम् ॥ प्रातः कुर्यान्महाराज महापातकनाशनम् ॥ १७ ॥ अपि गोष्पदमात्रेषु बहिःस्थेषु जलेषु च ॥ तिष्ठंति सरितः सर्वा गंगाद्या इति निश्चयः ॥ इति जानन्समाप्नोति सर्वतीर्थाधिकं फलम् ॥ १८ ॥ क्षीरं रसाधिकं क्षीरादधिकं दधि भूमिप ॥ दध्नोऽधिकं घृतं यद्वदूर्जो मासोऽधिकस्तथा ॥ १९ ॥

॥ ११ ॥ १२ ॥ भगोदये सूर्योदये ॥ १३ ॥ सप्तगंगासु जाह्नवीवृद्धगंगेत्यादिश्लोकोक्तसप्तगंगांतर्गतायां कस्यांचिन्नद्याम् ॥ १४ ॥ १५ ॥ देवखातेषु देवालयसमीपवर्तिदेवनामप्रसिद्धकुण्डेषु ॥ १६ ॥ १७ ॥ गोष्पदमात्रेषु अत्यल्पेषु ॥ १८ ॥ वैशाखमासस्याधिक्येन श्रैष्ठ्यं क्रमेण प्रतिपादयति–क्षीरमित्यादि ॥ १९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धर्मः वटबीजवद्वर्द्धते परंत्वत्र धर्मगतिः अतिसूक्ष्माऽस्ति, कुत्रचिन्महता प्रयासेन स्वल्पो धर्मो भवति, कुत्रचिदल्पायासेन महद्धर्मसाधनं भवति, अत्र दृष्टांतमाहपाद्मे– "धर्मस्य गतयः सूक्ष्मा दुर्ज्ञेया हीश्वरैरपि ॥ मुह्यंते चात्र विद्वांसोऽचिंत्यशक्तिहरेः कृतौ ॥ स्वल्पायासमहायासौ यथल्पत्वमहत्त्वयोः ॥ महापुण्यास्ततस्ते स्युः सततं कर्षकादयः ॥ मूत्रोत्सर्गे च सिंहादेरायासबहुलत्वतः ॥ पंचगव्यात्प्रशस्तं वै व्रतांगत्वेन नो भवेत् ॥ इति कर्तव्यबाहुल्यं महत्त्वं च तदल्पता ॥ यथाऽल्पनाशो महता महन्नाशस्तथाऽल्पतः ॥ किं नाल्पविस्फुलिंगेन तृणराशिः प्रदह्यते ॥ विष्णुभक्तिमता वीर यत्किञ्चित्क्रियतेऽल्पकम् ॥ सुकृतं माधवे मासि तदक्षय्यफलं भवेत् ॥ एवं शास्त्रोक्तविधिना स्वल्पेनापि

कार्तिकादधिको माघो माघाद्वैशाख उत्तमः ॥ तस्मिन्मासे कृतो धर्मो वर्द्धते वटबीजवत् ॥ २० ॥ आढ्यो वाऽतिदरिद्रो वा परतंत्रोऽथ वा नरः ॥ यद्वस्तु लभते तेन तद्दातव्यं द्विजातये ॥ २१ ॥ कन्दमूलफलं शाकं लवणं गुडमेव च ॥ कोलं पत्रं जलं तक्रमानंत्यायोपकल्पते ॥ ॥ २२ ॥ नादत्तं लभते क्वापि ब्रह्माद्यैस्त्रिदशैरपि ॥ २३ ॥ दानेन हीनो हि भवेदकिंचनो निष्किञ्चनत्वाच्च करोति पापम् ॥ पापादवश्यं नरकं प्रयाति दातव्यमस्मात्सुखमिच्छता तदा ॥ २४ ॥ यथा गृहं सर्वगुणोपपन्नं परिच्छदैर्हीनमशोभनं तथा ॥ मासेषु धर्मः सकलेष्वनुष्ठितो वैशाखहीनस्तु वृथैव याति ॥ २५ ॥ यथैव कन्या सकलैश्च लक्षणैर्युक्ताऽपि जीवत्पतिलक्षणा न हि ॥ क्रियाऽपि सांगा सकलाऽपि राजन्वैशाखहीना तु वृथैव तां विदुः ॥ २६ ॥ दयाविहीनास्तु यथा गुणा वृथा वैशाखधर्मेण विना तथा क्रियाः ॥ शाकं तु यद्वल्लवणेन हीनं न रोचते सर्वगुणोपपन्नम् ॥ २७ ॥ वैशाखहीनं तु तथैव पुण्यं न साधुसेव्यं न फलाप्तिहेतुः ॥ यद्वन्न भूषासहिताऽपि शोभते वस्त्रेण हीना ललना सुरूपा ॥ क्रियाकलापः सुकृतोऽपि पुंभिर्न भासते तन्मधुमासहीनम् ॥ २८ ॥ तस्मात्सर्वप्रयत्नेन येन केनाऽपि जन्तुना ॥ धर्मो वैशाखमासे तु कर्तव्य इति निश्चयः ॥ २९ ॥ मधुसूदनमुद्दिश्य मेषसंस्थे दिवाकरे ॥ प्रातः स्नात्वाऽर्चयेद्विष्णुमन्यथा नरकं व्रजेत् ॥ ३० ॥

न संशयः ॥ पापस्य महतो वापि क्षयो वृद्धिः सुकर्मणः ॥ फलाधिक्यं भवेद्भूय आधिक्याद्भाविकर्मणोः ॥ सूक्ष्मा धर्मस्य विज्ञेया गतिस्तु विबुधैरपि ॥" इति ॥ २० ॥ ॥ २१ ॥ कोलं बदरीफलम् ॥ २२ ॥ २३ ॥ दानप्राशस्त्यमुपवर्णयति–दानेनेति । आकिंचनो दरिद्रः ॥ २४ ॥ परिच्छदैर्गृहोपस्करणैः हीनं गृहं यथा अशोभनं तथेति समन्वयः ॥ २५ ॥ अपरान्दृष्टांतानाह–यथैवेति । जीवत्पतिलक्षणा जीवत्पतित्वलक्षणविशिष्टा ॥ २६ ॥ २७ ॥ मधुमासहीनं वैशाखमासहीनमित्यर्थः ॥ २८ ॥ २९ ॥ ३० ॥

CC-0. In Public Domain. Digitization by eGangotri

पुनरपि स्नानमाहात्म्यं कथयति—कश्चिदिति। स्पष्टार्थः। अत्र प्रसिद्धा कथा पाद्मे—"कश्चिन्महीरथनामा नृपः पूर्वपुण्यवशात्प्राप्तराज्यैश्वर्यो मन्त्रिणि राज्यं विन्यस्य स्वयं केवलं महर्निशं कामिनीविलासासक्तो बभूव, तेन कर्मणा गतायुःखण्डान्न बुबुधे, तदा तत्कुलगुरुः कश्यपः—"निवारयति नो मोहादधर्मान्नृपतिं गुरुः ॥ सोऽपि तत्पापभाग्यस्मात्" इति शास्त्रं विचिंत्यानेकमार्गोपदेशैर्महीरथं बोधयामास। तद्यथा—"अनर्थे किं प्रसक्तस्त्वं स्वधर्मं नानुतिष्ठसि॥अविश्राममभक्ष्याम्बु ह्यपाथेयमदेशिकम्॥ मृतःकांतारमध्वानं कथमेको गमिष्यसि ॥ कामो हि बलवान्राजञ्छरीरस्थो रिपुर्महान् ॥ न तस्य वशगो भूयाज्जनः श्रेयोऽभिलाषुकः ॥ पुरोहितो यतस्तेऽहं सदसत्कर्मभागपि ॥ तस्मात्त्वां बोधयिष्यामि सर्वपापविनाशने ॥ वैशाखस्य व्रतं सर्वं समाचर विधानतः ॥ आ जन्मतोऽपि विहितानि महांति राजन्घोराणि तानि दुरितानि विहाय मर्त्यः ॥ वैशाखमासविहिताऽऽचरणप्रभावपुण्येन तेन हरिमंदिरमेति चांते" इत्युक्तो नृपः स्वमनसि अतीव पश्चात्तापं कृत्वा गुरूपदिष्टमार्गेण आमरणं वैशाखधर्मानाचरन्नंते विमानमारुह्य विष्णुलोकं जगाम। "स गच्छन्पथि शुश्राव जीवानां क्रन्दतां पुनः ॥ निरये पच्यमानानामारावं विविधं तदा" श्रुत्वाऽतिदुःखितो राजा किमेतदिति दूतानपृच्छत्, दूताश्चास्मिन्यमलोके नानापातकिनः स्वस्वपातकानुरूपं नानायातनाः भुञ्जाना आक्रन्दंते, हे राजन् वैशाखे प्रातःस्नातस्य तव वपुषो वायुस्पर्शात्क्षणं लब्धसौख्याः आक्रन्दरहिताः जाताः तदाऽतिवि

कश्चिन्महीरथोराजा कामासक्तो जितेन्द्रियः ॥ वैशाखस्नानयोगेन वैकुण्ठं गतवान्स्वयम् ॥ ३१ ॥
वैशाखः सफलो मासो मधुसूदनदैवतः ॥ तीर्थयात्रातपोयज्ञदानहोमफलाधिकः ॥ ३२ ॥

स्मितः करुणानिधिः महीरथो राजा विष्णुदूतानुवाच "नार्तजन्तूनहं हित्वा पीडितो गंतुमुत्सहे ॥ स पापिष्ठो य आर्तानां शोकं नापहरेत्क्षमः ॥ मदङ्गसङ्गमोत्सृष्टवायुस्पर्शे न ते यदि ॥ जंतवः सुखिनो जातास्तस्मात्तत्र नयंतु माम् ॥ संतस्त एव ये लोके परदुःखनिवारणाः॥" तदा विष्णुदूतैस्तत्र नीतो राजा वदति "यद्यस्ति सुकृतं किंचिन्मम तेनैव जंतवः। स्वर्गं गच्छन्तु मुक्ताङ्गाः स्थानं चैषां वसाम्यहम् ॥ एवं भूपवचः श्रुत्वा दूताः प्रोचुर्नृपोत्तमम् ॥ अनेन तव कारुण्यधर्मेण वचसा नृप ॥ बभूव वृद्धिर्धर्मस्य संचितस्य विशेषतः ॥ माधवे मासि पूर्णायां स्नानदानादिकं त्वया ॥ यत्तीर्थे विहितं वीर सर्वाघविनिषूदनम् ॥ तदेभ्यो देहि विधिवत्कृत्वा साक्ष्ये हरिं प्रभुम् ॥ इत्युक्तः स तदा देवं कृत्वा साक्ष्ये गदाधरम् ॥ तेभ्यस्त्रिवाचिकं पुण्यं दयावान्विधिना ददौ ॥ दत्ते माधवमासस्य तस्मिन्नेकदिनोद्भवे ॥ सुकृते जंतवो याम्ययातनादुःखवर्जिताः ॥ विमानवरमारूढास्ते सर्वे त्रिदिवं ययुः ॥ प्रणमंतः स्तुवंतस्तं पश्यंतः संप्रहर्षिताः ॥ संस्तूयमानो मुनिदेवसंघैर्यत्तद्विशेषेण च लब्धपुण्यः ॥ परं पदं योगिवरैरलभ्यं ययौ जगन्नाथगणाभिवन्द्यः" इति ॥३१॥ ३२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वैशाखस्नानविधिं प्रत्याह—मधुसूदनेति ॥ ३३ ॥ ३४ ॥ ३५ ॥ यथोक्तफलं शास्त्रोक्तं फलं ददातीति तथा ॥ ३६ ॥ ३७ ॥ माधवोद्भवैर्वैशाख समुद्भवैः, प्रसूनैः पुष्पैः। अत्र पुष्पप्रसङ्गेन बाह्याभ्यंतरपुष्पाण्याह पाद्मे—"अहिंसा प्रथमं पुष्पं द्वितीयं करणग्रहः ॥ तृतीयकं भूतदया चतुर्थं क्षांतिरेव च ॥ शमस्तु पंचमं पुष्पं ध्यानं चैव तु षष्ठकम् ॥ सत्यं च सप्तमं पुष्पमेतैस्तुष्यति केशवः ॥ पुष्पांतराणि सन्त्येव बाह्यानि नृपसत्तम ॥ आंतरैरेव तुष्येत यतो भक्तिप्रियोऽच्युतः॥ वारुणं सलिलं पुष्पं सौम्यं घृतपयोदधि ॥ प्राजापत्यं तथाऽन्नादि आग्नेयं धूपदीपकम् ॥ फलपुष्पादिकं चैव वानस्पत्यं तु पंचमम् ॥ पार्थिवं कुशमूलाद्यं वायव्यं गंधचंदनम्॥

॥ ॥ प्रार्थनामंत्रः ॥ ॥ मधुसूदन देवेश वैशाखे मेषगे रवौ ॥ प्रातः स्नानं करिष्यामि निर्विघ्नं कुरु माधव ॥३३॥ ॥ अर्घ्यमंत्राः ॥ ॥ वैशाखे मेषगे भानौ प्रातःस्नानपरायणः ॥ अर्घ्यं तेऽहं प्रदास्यामि गृहाण मधुसूदन ॥ ३४ ॥ गंगाद्याः सरितः सर्वास्तीर्थानि च ह्रदाश्च ये ॥ प्रगृह्णीत मया दत्तमर्घ्यं सम्यक्प्रसीदथ ॥ ३५ ॥ ऋषभः पापिनां शास्ता त्वं यमः समदर्शनः ॥ गृहाणार्घ्यं मया दत्तं यथोक्तफलदो भव ॥ ३६ ॥ इति चार्घ्यं समर्प्याथ पश्चात्स्नानं समाचरेत् ॥ वाससी परिधायाथ कृत्वा कर्माणि सर्वशः ॥ ३७ ॥ मधुसूदनमभ्यर्च्य प्रसूनैर्माधवोद्भवैः ॥ श्रुत्वा विष्णुकथां दिव्यामेतन्मासप्रशंसिनीम् ॥ ३८ ॥ कोटिजन्मार्जितात्पापान्मुक्तो मोक्षमवाप्नुयात् ॥ ३९ ॥ न जातु खिद्यते भूमौ न स्वर्गे न रसातले ॥ न गर्भे जायते क्वापि न भूयः स्तनपो भवेत् ॥ ४० ॥ वैशाखे कांस्यभोजी यस्तथा चाश्रुतसत्कथः ॥ न स्नातो नापि दाता च नरकानेव गच्छति ॥ ४१ ॥ ब्रह्महत्यासहस्रस्य पापं शाम्येत्कथंचन ॥ वैशाखे येन न स्नातं तत्पापं नैव गच्छति ॥ ४२ ॥ स्वाधीनेन स्वकायेन जले स्वातंत्र्य वर्तिनि ॥ स्वाधीनजिह्वयोच्चार्यं हरिरित्यक्षरद्वयम् ॥ ४३ ॥ न कुर्याद्यदि वैशाखे प्रातःस्नानं नराधमः ॥ जीवन्नेव स पंचत्वमागतो नात्र संशयः ॥ ४४ ॥ येन केनाप्युपायेन माधवे मधुसूदनम् ॥ नार्चयेद्यदि मूढात्मा शौकरीं योनिमाप्नुयात् ॥ ४५ ॥

शुद्धाख्यं विष्णुपुष्पं च वाद्यं विष्णुपदं स्मृतम् ॥ एभिस्तु पूजितः पुष्पैः सद्यो विष्णुः प्रसीदति ॥" इति ॥ ३८ ॥ जातु कदाचिदपि ॥ ३९ ॥ श्रुतसत्कथः श्रुताः सत्कथा येन सः ॥ ४० ॥ वैशाखनियमाचरणहीनानां गत्यन्तराभाव इति तावदनुवदति—ब्रह्महत्यासहस्रस्येत्यादि ॥ ४१ ॥ ४२ ॥ जीवन्नेव पंचत्वमागतः जीवन्मृत इत्यर्थः ॥ ४३ ॥ ४४ ॥ ४५ ॥

CC-0. In Public Domain. Digitization by eGangotri

॥ ४६ ॥ अथ भक्तिभेदान् व्रतभेदांश्चाह–विविधैरिति । वैशाखमासे मानसिकादिभक्तिमार्गैः च परं मानसिकादिव्रतैः यः विष्णुं नित्यमनन्यबुद्धिः सन् आराधयन् सगुणं निर्गुणं वा ध्यायेत्स मुक्तिं यातीति । तत्र भक्तिभेदानाह पाद्मे–".ध्यानधारणया बुद्ध्या वेदानां स्मरणेन च ॥ विष्णुप्रीतिकरी चैषा मानसी भक्तिरुच्यते ॥ वेदमंत्रसमुच्चारैरविश्रान्तं दिवानिशम् ॥ जप्यैश्चारण्यकैश्चैव वाचिकी भक्तिरिष्यते ॥ व्रतोपवासनियमैः पञ्चेंद्रियजयेन च ॥ कायिकी भक्तिरुद्दिष्टा सर्वसिद्धिविधायिनी ॥ पाद्यार्घ्याद्युपचारैश्च नृत्यवादित्रगीतकैः ॥ बलिभिर्जागरार्चाभिर्लौकिकी भक्तिरीरिता ॥ ऋग्यजुःसामजप्यैश्च संहिताऽध्ययनादिभिः ॥ हविर्होमक्रियाभिश्च या भक्तिः सा तु वैदिकी ॥" इति । अथ व्रतभेदानाह तत्रैव–"अहिंसा सत्यमस्तेयं ब्रह्मचर्यमकल्पता ॥ एतानि मानसान्याहुर्व्रतानि हरितुष्टये ॥ एकभक्तं तथा नक्तमुपवासमयाचितम् ॥ इत्येवं कायिकं पुंसां व्रतमुक्तं नरेश्वर ॥ वेदस्याध्ययनं विष्णोः कीर्तनं सत्यभाषणम् ॥ अपैशुन्यमिदं राजन्वाचिकं व्रतमुच्यते ॥ पतिरूपो हिताचारैर्मनोवाक्कायसंयमैः ॥ व्रतैराराध्यते स्त्रीभिर्वासुदेवो दयानिधिः ॥" इति । विष्णोराराधनं ध्यानं च कुर्यादित्युक्तम्, तत्र हरेः पूजास्थानान्याह तत्रैव–"सूर्योग्निर्ब्राह्मणो

योऽर्चयेत्तुलसीपत्रैर्वैशाखे मधुसूदनम् ॥ नृपो भूत्वा सार्वभौमः कोटिजन्मसु भोगवान् ॥ पश्चात्कोटिकुलैर्युक्तो विष्णोः सायुज्यमाप्नुयात् ॥
॥ ४६ ॥ विविधैर्भक्तिमार्गैश्च विष्णुं सेवेत यो व्रतैः ॥ सगुणं निर्गुणं वाऽपि नित्यं ध्यायेदनन्यधीः ॥ ४७ ॥ इति श्रीस्कान्दे महापुराण
एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे वैशाखमासमाहात्म्ये नारदाम्बरीषसंवादे वैशाखधर्मप्रशंसानाम चतुर्थोऽध्यायः ॥ ४ ॥

गावो वैष्णवः खं मरुज्जलम् ॥ भूरात्मा सर्वभूतानि पूजास्थानानि वै हरेः ॥ धिष्ण्येष्वेतेषु श्रीविष्णुं ध्यायन्नर्चेत्समाहितः ॥" इति । ध्यानभेदमाह तत्रैव–"यथा ध्यानप्रसङ्गेन कर्मणोऽपि क्षयो भवेत् । तद्ध्यानं द्विविधं तस्य प्रोक्तं शंकरपूर्वकैः ॥ निर्गुणं सगुणं वाऽपि तत्राद्यं शृणु मानद ॥ केवलो ज्ञानदृष्ट्याऽसौ दृश्यते योगयुक्तिभिः ॥ परमात्मपरै राजन्सततं ध्यानतत्परैः ॥ हस्तपादविहीनश्च सर्वं गृह्णाति गच्छति॥मुखनासाविहीनश्च भुंक्ते जिघ्रति भूपते ॥ अकर्णः शृणुते सर्वं सर्वसाक्षी जगत्पतिः ॥ अरूपो रूपसंबद्धः पंचवर्गवशं गतः ॥ सर्वलोकस्य यः प्राणः पूज्यते सचराचरैः ॥ अजिह्वो वदते सर्वं वेदशास्त्रानुगं तथा ॥ त्वग्विहीनः स्पृशेत्सर्वं शीतोष्णादि नराधिप ॥ सदानंदो विविक्तात्म एकरूपो निराश्रयः॥ निर्गुणो निर्ममो व्यापी सगुणो निर्मलो जनः॥अवश्यः सर्ववश्यात्मा सर्वदः सर्ववित्तमः॥तस्य माता न चैवान्यः स वै सर्वमयो विभुः॥ एवं सर्वमयं ध्यानं यश्च पश्यत्यनन्यधीः ॥ स याति परमं स्थानममूर्तममृतोपमम् ॥ द्वितीयं तु प्रवक्ष्यामि तच्छृणुष्व महामते ॥ मूर्ताऽऽकारं तु साकारं निरालम्बं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निरामयम् ॥ यस्य वासनया सर्वं ब्रह्माण्डं वासितं नृप ॥ स तस्माद्वासुदेवोऽपि प्रोच्यते विधिपूर्वकैः ॥ स्निग्धप्रावृड्घनश्यामं सूर्यतेजःसमप्रभम् ॥ शङ्खचक्रगदापद्मधारिणं कमलार्पितम् ॥ कंबुग्रीवं चतुर्बाहुं सुरेशानं च शार्ङ्गिणम् ॥ केयूरहारकटककटिसूत्राङ्गुलीयकैः । विराजितं कुण्डलाभ्यां वपुषाऽलंकृतेन च ॥ वाससा हेमवर्णेन प्रावृतं गरुडासनम् ॥ ध्यायेच्च सगुणं राजन्भक्त्याऽघौघहरं हरिम् ॥ एवं ते ध्यानमुद्दिष्टं द्विविधं नृपसत्तम ॥ यत्कृत्वा मुच्यते पापैर्मनोवाक्कायसंभवैः ॥ " इत्यादि । अनन्यधीः न विद्यते अन्याश्रया धीर्बुद्धिर्यस्य ॥ ४७ ॥ इति वैशाखमासमाहात्म्यटीकायां चतुर्थोऽध्यायः ॥ ४ ॥ ॥ ४ ॥ ॥ अथ सर्वेभ्योऽपि दानधर्ममासेभ्यो वैशाखस्यैव मुख्यतानि

॥ ॥ अम्बरीष उवाच ॥ ॥ वैशाखः सर्वधर्मेभ्यस्तपोधर्मेभ्य एव च ॥ स कथं सर्वमासेभ्यो दानेभ्योऽप्यधिकोऽभवत् ॥ १ ॥ ॥ नारद उवाच ॥ ॥ तद्वक्ष्यामि महाप्राज्ञ शृणु चैकमना भव ॥ कल्पांते देवराड्विष्णुः शेषशायी महाप्रभुः ॥ २ ॥ कुक्षिस्थलोकसङ्घोऽयं स शेते प्रलयार्णवे ॥ अनेको ह्येकतां प्राप्य भूतिभिर्योगमायया ॥ ३ ॥ निमेषस्यावसाने तु श्रुतिभिर्बोधितस्ततः ॥ कुक्षिस्थजीवसंघानां रक्षां चक्रे दयानिधिः ॥ ४ ॥ तत्तत्कर्मफलप्राप्त्यै सृष्टिं स्रष्टुं मनो दधे ॥ तस्य नाभेरभूत्पद्मं सौवर्णं भुवनाश्रयम् ॥ ५ ॥ ब्रह्माणं जनयामास वैराजं पुरुषाह्वयम् ॥ तस्मिन्ससर्ज भगवान्भुवनानि चतुर्दश ॥ ६ ॥ भिन्नकर्माशयान्प्राणिसङ्घांश्च विविधान्बहून् ॥ त्रिगुणान्प्रकृतिं लोके मर्यादाश्चाधिपांस्तथा ॥ ७ ॥ वर्णाश्रमविभागांश्च धर्मक्लृप्तिं च सोऽकरोत् ॥ वेदैश्चतुर्भिस्तंत्रैश्च सहितान्स्मृतिभिस्तथा ॥ ८ ॥ पुराणैरितिहासैश्च स्वाज्ञारूपैर्महेश्वरः ॥ ऋषीन्प्रवर्तकांश्चक्रे धर्मगुप्त्यै महाप्रभुः ॥ ९ ॥ तैः प्रवर्तितधर्मास्तु वर्णाश्रमविभागजाः ॥ प्रजाः श्रद्दधिरे सर्वाः स्वोचितान्विष्णुतोषदान् ॥ १० ॥ तांस्तु प्रवर्तमानांस्तु स्वाश्रमान्द्रष्टुमीश्वरः ॥ हृदिस्थोऽप्यव्ययः साक्षाद्विभीषार्थं परीक्षया ॥ ११ ॥

दानं विशदयितुं पृच्छति राजाम्बरीषः—वैशाख इति ॥ १ ॥ देवराट् देवराजः, कल्पान्ते महाप्रलये ॥ २ ॥ कुक्षिस्थः सामीप्याज्जठरस्थः लोकानां संघः समूहो यस्य सः परमात्मा अनेकोऽपि सन् भूतिभिर्योगमायया चैकतां प्राप्य प्रलयार्णवे शेते इत्यभिसंधिः ॥ ३ ॥ निमेषस्य नेत्रनिमीलनस्य निद्राया इत्यर्थः । श्रुतिभिर्वेदवाक्यैः ॥ ४ ॥ तत्तदित्यादि । तादृशतादृशपुण्यपापादिरूपफलप्राप्त्यर्थं स परमेश्वरः । यदेति शेषः । मनो दधे मनसि कृतवान् । तदेत्यप्यध्याहारेणोत्तरार्धाभिसंधिः ॥ ५ ॥ तस्मिन् विराड्रूपे ब्रह्माणि ॥ ६ ॥ सृष्टपदार्थान्परिगणयति—भिन्नेत्यादि । भिन्नाः कर्माणि आशयाश्च येषां तेषां प्राणिनां समूहान् ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ विभीषार्थम् अयमधर्मः

CC-0. In Public Domain. Digitization by eGangotri

अस्मिन्नाचरिते विष्णुः कुप्यति इति भयदानाय ॥ ११॥ अनूनान्प्रशस्तान् संचिन्तयत् अडभाव आर्षः समचिंतयत् ॥१२॥१३॥१४॥ कर्षणादितश्चेतश्च व्यग्रत्वात् ॥ ॥ १५ ॥ १६ ॥ प्रातः प्रातःकाले शीतबाहुल्यादिति भावः ॥ १७ ॥ अनिशं निरंतरम्, अंजसा साहजिकमेव ॥ १८ ॥ १९ ॥ प्रेक्षाया भगवद्दर्शनस्य ॥ २० ॥

अनूनान्कुशलान्यत्र धर्मान्कुर्वंति वै प्रजाः ॥ स कालः को भवेद्विद्वानिति सांचिंतयत्प्रभुः ॥ १२ ॥ वर्षाकालो मया सृष्टः सीदंत्यस्ता इमाः प्रजाः ॥ तत्रानूनान्न कुर्वंति धर्मान्पंकाद्युपद्रुताः ॥१३॥ तान्दृष्ट्वा कोप एव स्यात्तेषु तुष्टिर्न मे भवेत् ॥ मयेक्षिता न सीदंतु तस्मात्तानवलोकये ॥१४॥ शरद्यपि तथा पूर्तिः कर्षणान्नैव जायते ॥ केचित्पक्वफलासक्ताः केचिद्वृष्टिभिरर्दिताः ॥१५॥ केचिच्छीतार्दिताश्चैव तान्दृष्ट्वा रोष एव मे ॥ वैगुण्यं पश्यतश्चैव न मे तोषोऽभिजायते ॥ १६ ॥ उत्थापनं तु नेच्छंति प्रातर्हेमंत आगते ॥ कोपो मेऽनुत्थितान्दृष्ट्वा प्रातः सूर्योदये सति ॥ ॥ १७ ॥ शिशिरेऽपि तथैवार्ताः प्रातःकाल इमाः प्रजाः ॥ तथा पक्वफलादानाशक्ता ह्यनिशमंजसा ॥ १८ ॥ पुनः शीतार्दिताः प्रातःस्नानार्थमिति चिंतिताः ॥ तेषां तु कर्मलोपः स्यान्नैव पूर्तिः कथंचन ॥ १९ ॥ प्रेक्षायाः समयो नाऽय मिति चिंताऽऽकुलो विभुः ॥ वसंतसमयं मेने सर्वापत्तिनिवारकम् ॥ २० ॥ स्नाने दाने तथा यागे क्रियायां भोग एव च ॥ नानाधर्मविधाने च ह्यनुकूलस्त्वयं ह्यृतुः ॥ २१ ॥ अप्रयासेन लभ्यानि द्रव्याण्यसुभृतां ध्रुवम् ॥ येन केनापि द्रव्येण तुष्टिस्तनुभृतां भवेत् ॥ २२ ॥ विष्णोराधारभूतानां तद्द्रव्यं धर्मसाधनम् ॥ वसंते सकलं द्रव्यं प्राणिनां तु सुखावहम् ॥ २३ ॥ दानयोग्यं धर्मयोग्यं भोगयोग्यं तु सर्वशः ॥ निर्धनानां तु पङ्ग्वादिविकलानां महात्मनाम् ॥ २४ ॥ द्रव्याणि च सुलभ्यानि जलादीनि न संशयः ॥ द्रव्यैरेतैः स्वात्महितं धर्मं कुर्वंति मत्प्रियाः ॥ २५ ॥ पत्रैः पुष्पैः फलैरन्यैः शाकैश्चापि प्रियोक्तिभिः ॥ स्रक्तांबूलैश्चन्दनाद्यैः पादप्रक्षालनादिभिः ॥ २६ ॥ प्रश्रयाद्यैरहो तेषां वरदोऽहमितीरयन् ॥ संचिंत्य भगवान्विष्णुः प्रतस्थे रमया सह ॥ २७ ॥

भोगे यथासांगभगवदाराधने ॥ २१ ॥ असुभृतां प्राणिनाम् ॥ २२ ॥ विष्णोराधारभूतानां विष्णुभक्तियुतत्वाद्विष्णुरेव आधारभूतो येषामित्यर्थः । प्राणिनां धर्मसाधनं तद्द्रव्यं पूजनानुष्ठानसामग्रीभूतं सकलं कृत्स्नं सुखावहं भवति ॥ २३ ॥ २४ ॥ मत्प्रियाः अहं प्रियो येषाम् ॥ २५ ॥ २६ ॥ प्रश्रयाद्यैः प्रणामप्रभृतिभिः, ईरयन् वदन्,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भगवान् रमया सह प्रतस्थे ॥ २७ ॥ वसंतशोभां वर्णयति—वनानीति । विकसंति कुसुमानि येषु तानि ॥ २८ ॥ २९ ॥ ३० ॥ मीनादिकर्कटान्तं मीनसंक्रांतिमारभ्य यावत्कर्कसंक्रांतिपर्यन्तम् ॥ ३१ ॥ कृताकृतसपर्यया क्वचित्कृता क्वचिदकृता च सपर्या पूजा यस्याः सा तया रमयेति पूर्वेणान्वयः । तत्र मुन्याश्रमादिषु इष्टान् मनोरथान् ददाति विष्णुरिति अनुवृत्तिः ॥ ३२ ॥ ३३ ॥ ३४ ॥ देशागतं देशस्थितिपर्यालोचनायागतम्, महार्हणैरुपायनपुरःसरपूजनैः ॥ ३५ ॥ करादिकं राजदेयकरादि

वनानि सर्वतः पश्यन्विकसत्कुसुमानि च ॥ हृष्टपुष्टजनाकीर्णं मत्तालिद्विजसेवितम् ॥ २८ ॥ आश्रमाणां महार्हाणां वनग्रामनिवासिनाम् ॥ प्रांगणादीनि रम्याणि ह्युद्यानानि स्थलानि च ॥ २९ ॥ रमायै दर्शयन्विष्णुः सह देवैर्मुनीश्वरैः ॥ सिद्धचारणगन्धर्वकिन्नरोरगराक्षसैः ॥ ३० ॥ स्तूयमानोऽभ्यगाद्गेहान्वर्णाश्रमनिवासिनाम् ॥ मीनादिकर्कटांतं वै स तिष्ठन्रमया सुरैः ॥ ३१ ॥ सार्द्धं प्रतीक्ष्यपुरुषान्कृताकृतसपर्यया ॥ तत्र धर्मवतां पुंसां ददातीष्टान्मनोरथान् ॥ ३२ ॥ मत्तान्न सहते पुंसो हरत्यायुर्धनादिकम् ॥ यदि कुर्वंति वैशाखे सपर्यां परमात्मनः ॥ ३३ ॥ तत्रापि चलमूर्तीनां साधूनां यत्र वै विभुः ॥ मासेष्वन्येषु यज्जातं कर्मलोपं सहिष्यति ॥ ३४ ॥ यथा देशागतं भूपं दृष्ट्वा जानपदाः प्रजाः ॥ यदि तं चोपतिष्ठन्ति प्रश्रयाद्यैर्महार्हणैः ॥ ३५ ॥ तदा करादिकं न्यूनं पूर्णं जानाति पार्थिवः ॥ पुनरप्यधिकं चेष्टं तुष्टो दास्यति निश्चितम् ॥ ३६ ॥ तदा त्वकृतपूजानां दण्डं तेषां करोति च ॥ तथा विष्णुः स्वकीयानां वैशाखे माधवागमे ॥ ३७ ॥ सपर्यां कुर्वतां पुंसां ददातीष्टान्मनोरथान् ॥ अकुर्वतां तथा पुंसां धनादीनि हरत्यलम् ॥ ३८ ॥ धर्मगोप्तुर्महाविष्णोर्देवदेवस्य शार्ङ्गिणः ॥ परीक्षाकाल एवाऽयं तस्मान्मासोत्तमो ह्ययम् ॥ ३९ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे वैशाखमासमाहात्म्ये नारदांबरीषसंवादे वैशाखश्रेष्ठत्वनिरूपणंनाम पञ्चमोध्यायः ॥ ५ ॥ ॥ छ ॥ ॥

कम् ॥ ३६ ॥ अकृतपूजानां राजपूजनविमुखानां स राजा दण्डं करोति यथा तथा विष्णुरित्यादि ॥ ३७ ॥ ३८ ॥ अयं वसंतकालः धर्मं करोति नवेति परीक्षाकालोऽस्ति, अतः अयं वैशाखमासः सर्वेभ्यूत्तमः । अनेन अस्मिन्मासे धर्मकार्यमवश्यं कर्तव्यमेवेति ध्वनिः सूचितः ॥ ३९ ॥ इति वैशाखमासमाहात्म्यटीकायां पंचमोऽध्यायः ॥ ५ ॥ ॥ छ ॥

CC-0. In Public Domain. Digitization by eGangotri

अध्वगाश्च ते तप्ताश्चेति कर्मधारयः । तिर्यग्योनिं पशुपक्ष्यादिजन्म ॥ १ ॥ गृहगोधायाः पल्ल्याः ॥ २ ॥ ब्रह्मण्यः ब्राह्मणहितकारी, वदान्यः अतिदाता, जितामित्रः जितशत्रुः ॥ ३ ॥ यावत्यो यावत्संख्याकाः तावतीस्तावत्संख्याकाः ॥४॥ येन हेमाङ्गेन इष्टे सति यज्ञे कृते सति तत्रोपयुज्यमानैर्दर्भैर्भूमिर्बर्हिष्मती यत्र तत्र दर्भपुंजमयी कृतेति भावः ॥ ५ ॥ सुखलभ्यधिया जलं तु सुखेन लभ्यते तस्य दानेन किमिति बुद्ध्या ॥ ६॥ बोधितः जलदानं कुर्वित्युपदिष्टः ॥ ७ ॥ हेतुवादैस्तर्कवादैः ॥ ८ ॥

॥ ॥ नारद उवाच ॥ ॥ वैशाखेऽध्वगतप्तानां तृषार्तानां महीपते ॥ जलदानमकुर्वाणस्तिर्यग्योनिमवाप्नुयात् ॥ १ ॥ अत्रैवोदाहरन्तीममितिहासं पुरातनम् ॥ विप्रस्य गृहगोधायाः संवादं परमाद्भुतम् ॥ २ ॥ पुरा चेक्ष्वाकुवंशेऽभूद्धेमांग इति भूमिपः ॥ ब्रह्मण्यश्च वदान्यश्च जितामित्रो जितेन्द्रियः ॥ ३ ॥ यावत्यो भूमिकणिका यावन्तो जलबिंदवः ॥ यावन्त्युडूनि गगने तावतीरददात्स गाः ॥ ४ ॥ येनेष्टयज्ञदर्भैश्च भूमिर्बर्हिष्मती शुभा ॥ गोभूतिलहिरण्याद्यैस्तोषिता बहवो द्विजाः ॥ ५ ॥ तेनादत्तानि दानानि न विद्यन्त इति श्रुतम् ॥ तेनादत्तं जलं चैकं सुखलभ्यधिया नृप ॥ ६ ॥ बोधितो ब्रह्मपुत्रेण वसिष्ठेन महात्मना ॥ अमौल्यं सर्वतो लभ्यं तद्दाता किं फलं लभेत् ॥ ७ ॥ दुर्बुद्ध्या हेतुवादैश्च न जलं दत्तवान्द्विजे ॥ अलभ्यदाने पुण्यं स्यादिति वाक्यं सुयुक्तिमत् ॥ ८ ॥ स आनर्च द्विजान्व्यङ्गान्दरिद्रान्वृत्तिकर्शितान् ॥ नार्चयच्छ्रोत्रियान्विप्रांस्तत्त्वज्ञान्ब्रह्मवादिनः ॥ ९ ॥ प्रख्यातान्पूजयिष्यंति सर्वे लोका महार्हणाः ॥ अनाथानामविद्यानां व्यंगानां च द्विजन्मनाम् ॥१०॥ दरिद्राणां गतिः का वा तस्मात्ते मे दयास्पदम् ॥ इति दुर्धीरपात्रेषु दत्तवान्किमपि स्वयम् ॥ ११ ॥ तेन दोषेण महता चातकत्वं त्रिजन्मसु ॥ एकजन्मनि गृध्रत्वं श्वाऽभवत्सप्तजन्मसु ॥१२॥ पश्चान्नृपगृहे जातो भूपोऽयं गृहगोधिका ॥ श्रुतकीर्त्याख्यभूपस्य मिथिलाधिपते नृप ॥१३॥ गृहद्वारप्रतोल्यां च वर्तते कीटकाशना ॥ सप्ताशीतिषु वर्षेषु स्थितं तेन दुरात्मना ॥ १४ ॥ विदेहाधिपतेर्गेहे कदाचिद्दषिसत्तमः ॥ श्रुतदेव इति ख्यातः श्रौतो मध्याह्न आगतः ॥ १५ ॥

व्यंगान् काणांधबधिरकुब्जान्, वृत्तिकर्शितान् वृत्तिहीनान्, आनर्च पूजितवान्; श्रोत्रियादीन् द्विजान्नार्चयत् ॥ ९ ॥ १० ॥ दुर्धीर्दुर्बुद्धिः, अपात्रेषु अयोग्येषु, किमपि द्रव्यं स्वयं वसिष्ठाज्ञामगृहीत्वैव ॥ ११ ॥ १२ ॥ १३ ॥ गृहद्वारप्रतोल्यां गृहद्वाराभ्यन्तरोपरितनप्रदेशे, कीटकाशना कीटकानश्नातीति तथा, दुरात्मना दुराचारप्रवृत्तमनसा ॥ १४ ॥ १५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पादावनेजनीः पादप्रक्षालनसम्बन्धिनीः ॥ १६ ॥ उत्सिक्तैरूर्ध्वमुत्सारितैः दैवेनोपदिष्टेन गृहगोधिकात्वमोक्षव्यकालेन ॥ १७ ॥ जातस्मृतिः उत्पन्नपूर्वजन्मकर्मस्मरणः, ब्राह्मणं श्रुतदेवम् ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ पूर्तानि देवालयतीर्थघट्टादिबन्धनादीनि, धर्मराजः वैशाखमासः ॥ २३ ॥ २४ ॥ अलर्कत्वं भ्रान्त

तं दृष्ट्वा सहसोत्थाय जातहर्षो नराधिपः ॥ मधुपर्कादिभिः पूज्य तस्य पादावनेजनीः ॥ १६ ॥ अपो मूर्ध्ना वहन्क्षिप्रं तदोत्सिक्तैश्च बिंदुभिः ॥ दैवोपदिष्टकालेन प्रोक्षिता गृहगोधिका ॥ १७ ॥ सद्यो जातस्मृतिरभूत्स्मृतकर्मादिदुःखिता ॥ त्राहित्राहीति चुक्रोश ब्राह्मणं गृहमागतम् ॥ १८ ॥ तिर्यग्जंतुरवं श्रुत्वा ब्राह्मणो विस्मितोऽवदत् ॥ कुतः क्रोशसि गोधे त्वं दशेयं केन कर्मणा ॥ १९ ॥ त्वं देवः पुरुषः कश्चिन्नृपो वाऽथ द्विजोऽथ वा ॥ कस्त्वं ब्रूहि महाभाग त्वामद्याहं समुद्धरे ॥ २० ॥ इत्युक्तः स नृपः प्राह श्रुतदेवं महामतिम् ॥ अहमिक्ष्वा कुकुलजो वेदशास्त्रविशारदः ॥ २१ ॥ यावत्यो भूमिकणिका यावन्तस्तोयबिंदवः ॥ यावंत्युडूनि गगने तावतीरददं स्म गाः ॥ २२ ॥ सर्वे यज्ञा मया चेष्टाः पूर्तान्याचरितानि मे ॥ दानान्यपि च दत्तानि धर्मराजस्त्वनुष्ठितः ॥ २३ ॥ तथापि दुर्गतिर्जाता मम चोर्ध्वगतिं विना ॥ त्रिवारं चातकत्वं मे गृध्रत्वं चैकजन्मनि ॥ २४ ॥ सप्तजन्मस्वलर्कत्वं प्राप्तं पूर्वं मया द्विज ॥ सिंचताऽनेन भूपेन त्वपः पादावनेजनीः ॥ २५ ॥ बिंदवो दूरमुत्क्षिप्तास्तैः सिक्तोऽहं कथंचन ॥ तेन जन्मस्मृतिरभूत्सर्वपाप्मा हतश्च मे ॥ २६ ॥ गोधाजन्मानि भाव्यानि ह्यष्टाविंशतिकानि मे ॥ दृश्यन्ते दैवसृष्टानि बिभ्ये तैर्जन्मभिर्भृशम् ॥ २७ ॥ न कारणं प्रपश्यामि तन्मे विस्तरतो वद ॥ इत्युक्तः स ऋषिः प्राह ज्ञात्वा विज्ञानचक्षुषा ॥२८॥ शृणु भूप प्रवक्ष्यामि तव दुर्योनिकारणम् ॥ न जलं तु त्वया दत्तं वैशाखे माधवप्रिये ॥२९॥ तज्जलं सुलभं मत्वा ह्यमूल्यमिति निश्चितम् ॥ नाध्वगानां द्विजातीनां घर्मकालेऽप्यजानता ॥ ३० ॥ तथा पात्रं समुत्सृज्य ह्यपात्रे प्रतिदत्तवान् ॥ ज्वलन्तमग्निमुत्सृज्य नहि भस्मनि हूयते ॥ ३१ ॥

श्त्वम् ॥ २५ ॥ सर्वपाप्मा सर्वपापम् ॥२६॥ अष्टाविंशतिकानि गोधाजन्मानि गोधायोनौ दैवसृष्टानि अष्टाविंशतिर्जन्मानि भविष्यंतीति दृश्यंते तैर्जन्मभिरहं बिभ्ये इति श्लोकार्थः ॥ २७ ॥ २८ ॥ २९ ॥ अमूल्यम् अतीव जघन्यमिति त्वया मत्वा घर्मकाले उष्णकाले, अजानता अविदुषा ॥ ३० ॥ पात्रं योग्यम्, अपात्रे प्रतिग्रहा

CC-0. In Public Domain. Digitization by eGangotri

नर्हे, अर्थांतरमुपन्यस्यति–ज्वलन्तमिति ॥ ३१ ॥ ३२ ॥ ३३ ॥ पूज्यतायां पूजनीयत्वे अनाथत्वं प्रयोजकतां कारणताम् न इयाद्गच्छेत्, अनाथ इति मत्वा पूजनीयो भवतीति न युक्तमिति तात्पर्यम् । तद्रक्षणमात्रमेवोचितमिति वदति–पंग्वाद्या य इति ॥ ३४ ॥ ३५ ॥ अत्यर्थमत्यंतम् ॥ ३६ ॥ साधु सुष्ठु वृत्तं येषां तेषां ज्ञानिनामित्यर्थः । पुमर्थानां धर्मार्थकाममोक्षाणाम् ॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥ तैः साधुभिः, सुशिक्षिताः सम्यगुपदिष्टाः, जन्ममृत्युजराद्यैरिति । सुधया अमृतेन, आप्या

बहुधा वर्णितस्याऽपि सौगन्ध्यादियुतस्य च ॥ कण्टकान्वितवृक्षस्य न कुर्वंति समर्चनम् ॥३२॥ विशिष्टानां पादपानामश्वत्थः सेव्यतां गतः ॥ तुलसीं तु समुत्सृज्य बृहती पूज्यते नु किम् ॥ ३३ ॥ अनाथत्वं पूज्यतायां न प्रयोजकतामियात् ॥ पंग्वाद्या येऽप्यनाथा हि दयापात्रं हि केवलम् ॥ ३४ ॥ तपोनिष्ठा ज्ञाननिष्ठाः श्रुतिशास्त्रविशारदाः ॥ विष्णुरूपाः सदा पूज्या नेतरे तु कदाचन ॥ ३५ ॥ तत्रापि ज्ञानिनोऽत्यर्थं विप्रा विष्णोः सदैव हि ॥ ज्ञानिनामपि भूपाल विष्णुरेव सदा प्रियः ॥ तस्माज्ज्ञानी सदा पूज्यः पूज्यात्पूज्यतरः स्मृतः॥ ३६ ॥ अवज्ञा साधुवृत्तानामिहाऽमुत्र च दुःखदा ॥ सेवा वै महतां पुंसां पुमर्थानां हि कारणम् ॥ ३७ ॥ कोट्योऽप्यन्धजातीनां न पश्यंति यथाऽयथम् ॥ एवं मन्दायुतानां तु संगतिर्नार्थदा भवेत् ॥ ३८ ॥ नह्यम्मयानि तीर्थानि न देवा मृच्छिलामयाः ॥ ते पुनंत्युरुकालेन दर्शनादेव साधवः ॥ ३९ ॥ न साधुसेवनात्क्वापि सीदन्ते तैः सुशिक्षिताः ॥ जन्ममृत्युजराद्यैर्वा सुधयाऽऽप्यायिता यथा ॥ ४० ॥ न जलं तु त्वया दत्तं साधवो वा न सेविताः ॥ तेन ते दुर्गतिश्चेयं प्राप्ता चेक्ष्वाकुनंदन ॥ ४१ ॥ वैशाखे मत्कृतं पुण्यं तुभ्यं दास्यामि शान्तये ॥ भूतं भव्यं भवद्येन कर्मजातं विजेष्यसि ॥ ४२ ॥ इत्युक्त्वाऽप उपस्पृश्य ददौ पुण्यमनुत्तमम् ॥ ४३ ॥ यदा दत्तं ब्राह्मणेन स्नानं चैकदिने कृतम् ॥ तेन ध्वस्ताऽखिलाघस्तु त्यक्त्वा तां गृहगोधिकाम् ॥ ४४ ॥ दिव्यं विमानमारुह्य दिव्यस्रग्वस्त्रभूषणः ॥ पश्यतामेव भूतानां मैथिलस्य गृहांतरे ॥ ४५ ॥ बद्धाञ्जलिपुटो भूत्वा परिक्रम्य प्रणम्य च ॥ अनुज्ञातो ययौ राजा स्तूयमानोऽमरैर्दिवम् ॥ ४६ ॥ तत्र भुक्त्वा महाभोगान्वर्षायुतमतन्द्रितः ॥ स एव चेक्ष्वाकुकुले काकुत्स्थोऽभून्महाप्रभुः ॥ ४७ ॥ सप्तद्वीपवतीपालो ब्रह्मण्यः साधुसंमतः ॥ देवेन्द्रस्य सखा विष्णोरंश एव महाप्रभुः ॥ ४८ ॥ बोधितस्तु वसिष्ठेन वैशाखोक्तान्मनोरमान् ॥ अनुष्ठायाखिलान्धर्मांस्तेन ध्वस्ताखिलाऽशुभः ॥ ४९ ॥

यितास्तर्पिताः, सीदन्त इत्यत्राऽन्वेति ॥ ४१ ॥ शान्तये पूर्वजन्मकृतपापनिरासाय ॥ ४२ ॥ हे अनुत्तम हे सकलश्रेष्ठ अंबरीष ॥ ४३ ॥ गृहगोधिकां गृहगोधिकादेहम् ॥ ४४ ॥ मैथिलस्य जनकस्य ॥ ४५ ॥ अनुज्ञातः गृहीतमुन्यनुज्ञः ॥ ४६ ॥ अतन्द्रितो निरलसः ॥ ४७ ॥ ४८ ॥ वसिष्ठेन बोधित उपदिष्टः ॥ ४९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समासाद्य प्राप्य इत्थमितिहासं प्रोच्य वर्णनीयकथांशमुपसंहरति—वैशाख इति ॥ ५० ॥ प्रीणाति प्रीतो भवति ॥ ५१ ॥ चातुर्वर्ण्यनरैर्ब्राह्मणक्षत्रियविट्शूद्रैः, चतुराश्रम वर्तिभिर्ब्रह्मचारिगृहस्थवानप्रस्थसंन्यासिभिः, माधवस्यागमः प्राप्तिर्यस्मिन्वैशाखे महाधर्मोऽनुष्ठेयः करणीयः ॥ ५२ ॥ इति वैशाखमासमाहात्म्यटीकायां षष्ठोऽध्यायः ॥६॥
अथ वैशाखधर्मान्प्रति जनकपृष्टः श्रुतदेवः सविस्तरमाहेति कथाप्रसंगमनुसंधत्ते—राजेति । अद्भुतं कीटदेहस्य सायुज्यप्राप्तिरूपम् ॥ १ ॥ २ ॥ ३ ॥ व्याजहारो

दिव्यं ज्ञानं समासाद्य विष्णोः सायुज्यमाप्तवान् ॥ वैशाखः शुभदस्तस्मात्पुंभिः सर्वैरनुष्ठितः ॥५०॥ आयुर्यशःपुष्टिदोऽयं महापापौघनाशनः ॥ पुमर्थानां निदानं च विष्णुः प्रीणात्यनेन तु ॥ ५१ ॥ चातुर्वर्ण्यनरैः सर्वैश्चतुराश्रमवर्तिभिः ॥ अनुष्ठेयो महाधर्मो वैशाखे माधवागमे ॥ ५२ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे वैशाखमासमाहात्म्ये नारदाम्बरीषसंवादे गृहगोधिकाख्यानंनाम षष्ठोऽध्यायः ॥ ६ ॥ ॥७॥ ॥ नारद उवाच ॥ ॥ राजा तदद्भुतं दृष्ट्वा मैथिलो धर्मवित्तमः ॥ कृताञ्जलिः सुखासीनं विस्मितो वाक्यमब्रवीत् ॥ ॥१॥ ॥ मैथिल उवाच ॥ ॥ दृष्टमेतन्महाश्चर्यं साधूनां चरितं तथा ॥ येन धर्मेण मुक्तोऽभूद्राजा चेक्ष्वाकुनन्दनः ॥ २ ॥ तं धर्मं विस्तरेणैव श्रोतुं कौतूहलं हि मे ॥ मह्यं श्रद्धावते विद्वन्कृपया विस्तराद्वद ॥ ३ ॥ इति राज्ञा सुसंपृष्टः श्रुतदेवो महामनाः ॥ साधुसाध्विति संभाष्य व्याजहार नृपोत्तमम् ॥ ४ ॥ ॥ श्रुतदेव उवाच ॥ ॥ सम्यग्व्यवसिता बुद्धिस्तव राजर्षिसत्तम ॥ वासुदेवप्रियान्धर्मांञ्छ्रोतुं यस्मान्मतिस्तव ॥ ५ ॥ बहुजन्मार्जितं पुण्यं विना कस्यापि देहिनः ॥ वासुदेवकथालापे मतिर्नैवोपजायते ॥ ६ ॥ यूने राजाधिराजाय जातेयं मतिरीदृशी ॥ शुद्धं भागवतं मन्ये तेन त्वां साधुसत्तमम् ॥ ७ ॥ तस्मात्तुभ्यं ब्रुवे सौम्य धर्मान्भागवताञ्छुभान् ॥ याञ्ज्ञात्वा मुच्यते जंतुर्जन्मसंसारबन्धनात् ॥ ८ ॥ यथा शौचं यथा स्नानं यथा सन्ध्या च तर्पणम् ॥ अग्निहोत्रं यथा श्राद्धं तथा वैशाखसत्क्रियाः ॥ ९ ॥ वैशाखे माधवे धर्मानकृत्वा नोर्ध्वगो भवेत् ॥ न वैशाखसमो धर्मो धर्मजातेषु विद्यते ॥ १० ॥

क्तवान् ॥ ४ ॥ व्यवसिता निश्चिता ॥ ५ ॥ वासुदेवकथानामालापे संकीर्तने ॥ ६ ॥ यूने तरुणायापि तुभ्यमिति शेषः । एतेन तारुण्ये धर्मे मतिः प्रायः सुकृतिनामेव जायत इति ध्वनिः ॥ भागवतं भगवद्भक्तम् ॥७॥८॥ यथा शौचमित्यादि वैशाखधर्माणां नित्यत्वं वदति ॥९॥ ऊर्ध्वगः स्वर्गादिलोकगः, धर्मजातेषु धर्मसमूहेषु ॥१०॥

CC-0. In Public Domain. Digitization by eGangotri

अराजकाः राजशासनविहीनाः प्रजा इव ये बहवो धर्माः सन्ति ते उपद्रवैर्लुप्यन्ति ॥ ११ ॥ पथि मार्गे छायादीनाम् आदिशब्देन अन्नच्छत्रादिसंग्रहः। निर्मितिः निर्माणम् ॥ १२ ॥ गोतिलयुक्तमधोर्दानम्—मधुशब्दस्य पुंस्त्वमार्षम्। गोरसानां दधिक्षीरतक्रघृतानाम् ॥ १३ ॥ १४ ॥ चूतफलमाम्रफलम्। उर्वारुकरसायनं निम्ब फलरसायनम् ॥ १५ ॥ चित्राणि नित्यंनित्यं नवनवानि ॥ १६ ॥ करीरकम् उदकुम्भदानं लोके करवा इति प्रसिद्धम् ॥ १७ ॥ १८ ॥ १९ ॥ वृषपत्नीनां धेनू

संत्येव बहवो धर्माः प्रजाश्चाराजका इव ॥ उपद्रवैश्च लुप्यंति नात्र कार्या विचारणा ॥ ११ ॥ सुलभाः सकला धर्माः कर्तुं वैशाखचोदिताः ॥ उदकुम्भं प्रपादानं पथिच्छायादिनिर्मितिः ॥ १२ ॥ उपानत्पादुकादानं छत्रव्यजनयोस्तथा ॥ तिलयुक्तमधोर्दानं गोरसानां श्रमापहम् ॥ १३ ॥ वापीकूपतडागादिकरणं पथिकाश्रयम् ॥ नारिकेलेक्षुकर्पूरकस्तूरीदानमेव च ॥१४॥ गन्धानुलेपनं शय्याखट्वादानं तथैव च ॥ तथा चूतफलं रम्य सुर्वारुकरसायनम् ॥ १५ ॥ दानं दमनपुष्पाणां तथा सायं गुडोदकम् ॥ चित्राण्यन्नानि पूर्णायां दध्यन्नं प्रत्यहं तथा ॥ १६ ॥ तांबूलस्य सदा दानं चैत्रदर्शे करीरकम् ॥ रवावनुदिते सूर्ये प्रातः स्नानं दिनेदिने ॥ १७ ॥ मधुसूदनपूजा च कथायाः श्रवणं तथा ॥ अभ्यंगवर्जने चैव तथा वै पत्रभोजनम् ॥१८॥ मध्येमध्ये श्रमार्तानां वीजनं व्यजनेन च ॥ सुगंधैः कोमलैः पुष्पैः प्रत्यहं पूजनं हरेः ॥१९॥ फलं दध्यन्ननैवेद्यं धूपदीपौ दिनेदिने ॥ गोग्रासं वृषपत्नीनां द्विजपादावनेजनम् ॥ २० ॥ गुडनागरदानं च धात्रीपिष्टप्रदापनम् ॥ पथिकानां प्रश्रयं च दानं तन्दुल शाकयोः ॥ एते धर्माः प्रशस्ता हि वैशाखे माधवप्रिये ॥ २१ ॥ तथा च विष्णोः कुसुमार्पणं हरेः पूजा च कालोचितपल्लवाद्यैः ॥ दध्यन्ननैवेद्यनिवेदनं च समस्तपापौघविनाशहेतुः ॥ २२ ॥ नारी पुष्पैर्माधवं नार्चयेद्या कालोत्पन्नैर्मन्दिरे वा गृहे वा ॥ पुत्रं सौख्यं क्वाऽपि नाप्नोति हंति चायुर्भर्तुः स्वात्मनो वा महात्मन् ॥ २३ ॥ रमासहाये माधवे मासि विष्णौ परीक्षायै धर्मसेतोः प्रजानाम् ॥ गृहं याते मुनिभिर्दैवतैश्च काले पुष्पैर्नार्चयेद्यस्तु मूढः ॥ २४ ॥ स मूढात्मा रौरवं प्राप्य पश्चाद्यायाद्योनिं राक्षसीं पञ्चवारम् ॥ जलं चान्नं सर्वदा देयमस्मिन्क्षुधार्तानां प्राणिनां प्राणहेतुः ॥ २५ ॥ तिर्यग्जंतुर्जायते वार्यदानादन्नादानाज्जायते वै पिशाचः ॥ अन्नादाने चानुभूतां कथां ते ह्यहं वक्ष्ये चाद्भुतां भूमिपाल ॥२६॥

नाम् ॥ २० ॥ गुडनागरदानं गुडमिश्रशुण्ठीप्रदानम्; धात्रीपिष्टम् आमलकीचूर्णम् ॥ २१ ॥ कालोचितपल्लवाद्यैः वसन्तकालोत्पन्नपत्रपुष्पफलादिभिः ॥ २२ ॥ या च नारी माधवं श्रीकृष्णं पुष्पैर्नार्चयेदित्याद्यभिसन्धिः ॥ २३ ॥ मुनिभिर्दैवतैश्च सह धर्मसेतोः परीक्षार्थं रमासहाये विष्णौ गृहं समायाते इत्यभिसंधिः ॥ २४ ॥ प्राणहेतु र्जीवनस्य साधनमिति जलान्नयोर्विशेषणम् ॥ २५ ॥ वार्यदानाज्जलादानात्, अन्नादाने जायमानां मया अनुभूताम् इति सत्यतानिर्बंधनम् ॥ २६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रेवातीरे नर्मदातीरे स्वं मांसमश्नातीति तथा नष्टं चैतन्यं चलनवलनादिसामर्थ्यं यस्य सः ॥२७॥ कर्मणा दैवयोगेन यस्य क्षुधा तृषा च बह्वीत्यभिसंधिः, प्राणपर्यंतं प्राणस्यापि ॥२८॥ जलं दृष्ट्वा दृष्टिमात्रेणैव कालकूटविषसदृशं भवति ॥ २९ ॥ त्रुट्वात्रुट्वा त्रोटयित्वात्रोटयित्वा, क्षुधातृषाभ्यां व्यथितं पीडितम् ॥ ३० ॥ स राक्षसो मां हन्तुं प्राद्रवत्, मम तेजसा निहतः कृतप्रतीकारो दुद्रुवे पलायांचकार, कृपया क्लिन्नमार्द्रीभूतं चेतो यस्य सः । मे मया तृतीयार्थे षष्ठी ॥ ३१ ॥ कृच्छ्रात्कष्टात्, मा विषीद मा

रेवातीरे मत्पिताऽभूत्पिशाचः स्वमांसाशी क्षुत्तृषाश्रांतगात्रः ॥ छायाहीने शाल्मलीवृक्षमूले ह्यन्नाभावान्नष्टचैतन्य एषः ॥ २७ ॥ क्षुधा तृषा कर्मणा यस्य बह्वी सूक्ष्मं छिद्रं कण्ठनालस्य चाऽऽसीत् ॥ मांसं चान्तःकण्ठमध्ये निषण्णं कुर्यात्पीडां प्राणपर्यन्तमेव ॥ २८ ॥ जलं दृष्ट्वा कालकूटप्रकल्पं कौप्यं शीतं वाऽपि कासारसंस्थम् ॥ तस्यास्तीरे चागतं दैवयोगाद्गङ्गायात्राकारणान्मार्गमध्ये ॥ २९ ॥ दृष्ट्वाऽद्भुतं शाल्मली वृक्षमूले त्रुट्वा त्रुट्वा भक्षयन्तं स्वमांसम् ॥ क्रोशन्तं तं बहुधा शोचमानं क्षुधातृषाव्याधितं कर्मभिःस्वैः ॥ ३० ॥ स मां हन्तुं प्राद्रवत्पापकर्मा मत्तेजसा निहतो दुद्रुवे च ॥ तं चाऽब्रवं कृपया क्लिन्नचित्तो मा भैष्ट त्वं ह्यभयं मे हि दत्तम् ॥ ३१ ॥ कस्त्वं तात ब्रूहि सद्योऽत्र हेतुं कृच्छ्राद स्मान्मोचये मा विषीद ॥ इत्युक्तो मां प्राह पुत्रं त्वजानन्पुरानर्ते भूवराख्ये पुरे च ॥ ३२ ॥ नाम्ना मैत्रः सांकृतेर्गोत्रजोऽहं तपोविद्यादानयज्ञादि निष्ठः ॥ मयाऽधीताध्यापिताः सर्वविद्याः कृतो मया सर्वतीर्थाऽवगाहः ॥ ३३ ॥ दत्तं नाऽन्नं मासि वैशाखसंज्ञे लोभाद्भिक्षामात्रमप्येव काले ॥ शोचे चाऽहं प्राप्य पैशाचयोनिं नाऽन्यो हेतुः सत्यमेवोक्तमङ्ग ॥ ३४ ॥ पुत्रोऽधुना वर्तते मद्गृहे च भूरिख्यातिः श्रुतदेवाऽभिधानः ॥ वाच्या तस्मै मद्दशा चाऽऽत्मजाय वैशाखान्नादानतोऽभूत्पिशाचः ॥ ३५ ॥ दृष्टस्तीरे ते पिता नर्मदाया नोर्ध्वं गतो वर्तते वृक्षमूले ॥ खादन्मांसं स्वीय मेवाऽन्वखिद्यत्पितुर्मुक्त्यै मासि वैशाखसंज्ञे ॥ ३६ ॥ प्रातः स्नात्वा पूजयित्वा च विष्णुं निर्व्याजान्मां तर्पयित्वा जलैश्च ॥ देयं चाऽन्नं द्विज वर्ये गुणाढ्ये मुक्तो यो वै याति विष्णोः पदं च ॥३७॥ इत्थं चोक्तं त्वत्पुरस्ताद्ददेति दया चैषा मत्कृते नाऽत्र शंका ॥ भद्रं भूयात्सर्वतो मंगलं ते श्रुत्वा चाऽहं भाषितं मे पितुश्च ॥ ३८ ॥

खेदं प्राप्नुहि, पुरानर्ताख्ये देशे भूवराख्ये नगरे ॥३२॥३३॥ अङ्ग हे श्रुतदेव ॥३४॥ वैशाखे अन्नस्याप्रदानात् ॥ ३५ ॥ अचखिद्यत् मांसं खादित्वा पश्चात्खेदं प्राप्त वान् ॥ ३६ ॥ निर्व्याजादकपटेन, अनेन सुकर्मणाऽहमेव मोक्ष्ये इति न, अपि तु त्वमपि मोक्ष्यस इत्याह—मुक्तो यो वै इति ॥ ३७ ॥ मत्कृते मदर्थम्, दया कर्तव्येति

CC-0. In Public Domain. Digitization by eGangotri

शेषः । अहं श्रुतदेवः ॥ ३८ ॥ कायं देहं दण्डवत्पातयित्वा साष्टांगं प्रणिपत्येत्यर्थः । निंदन्निंदन् सन् स्वयमेवात्मानं निंदन्, अहं ते तव पुत्रः दैवेन इहाऽऽगतः ॥ ३९ ॥ भूसुराणां ब्राह्मणानाम्, विनिंद्यः कर्मभ्रष्टश्चाऽहमस्मि यतः पितॄणां क्लेशमोक्षो नाऽभूत्, आख्याहि कथय ॥ ४० ॥ प्रीतः सर्वांतरात्मा अन्तःकरणं यस्य सः ॥ ४१ ॥ सान्वयस्य सवंशस्य, पित्रा पिशाचरूपेण, आदिष्टः कृतानुज्ञः, कृतयात्रः कृतगयावर्जनादिः, माधवे वैशाखे, अन्नदानमकरमकरवम् ॥ ४२ ॥ मां प्रति समेत्य

दुःखात्कायं दंडवत्पातयित्वा भृशार्तोऽहं पादयोर्भूरिकालम् ॥ निंदन्निंदन्भूर्यहं बाष्पनेत्रः पुत्रोऽहं ते तात दैवाऽऽगतोऽहम् ॥ ३९ ॥ कर्मभ्रष्टो भूसुराणां विनिन्द्यो नाऽभूद्यस्मात्क्लेशमोक्षः पितॄणाम् ॥ आख्याहि त्वं कर्मणा केन मुक्तो भविता वै तत्करोमि द्विजेंद्र ॥ ४० ॥ ततः प्राह प्रीतसर्वान्तरात्मा यात्रां कृत्वा शीघ्रमागत्य गेहम् ॥ प्राप्ते मासे मेषसंस्थे च भानौ निवेद्याऽन्नं विष्णवे त्वं गुणाढ्यम् ॥ ४१ ॥ दानं देहि द्विजवर्ये महात्मंस्तस्मान्मोक्षो भविता सान्वयस्य ॥ पित्राऽऽदिष्टः कृतयात्रः स्वगेहे प्राप्याऽकरं माधवे चाऽन्नदानम् ॥४२॥ तस्मान्मुक्तो मत्पिता मां समेत्य यानारूढो ह्यभिनंद्याऽऽशिषा च ॥ गतो लोकं श्रीपतेर्दुर्विभाव्यं यस्मिन्गता न निवर्तंति भूयः ॥४३॥ तस्माद्दानं सर्वशास्त्रेषु चोक्तं तुभ्यं प्रोक्तं धर्मसारं सुधर्म्यम् ॥ किमन्यत्ते श्रोतुमिच्छा वदस्व श्रुत्वा सर्वं ते वदामीति सत्यम् ॥ ४४ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे वैशाखमासमाहात्म्ये नारदाम्बरीषसंवादे पिशाचमोक्षप्राप्तिर्नाम सप्तमोऽध्यायः ॥ ७ ॥ ॥ छ ॥

॥ ॥ मैथिल उवाच ॥ ॥ ब्रह्मन्निक्ष्वाकुतनयो जलाऽदानाच्च चातकः ॥ त्रिवारमभवत्पश्चान्मद्गेहेगोधिका तथा ॥ १ ॥ कर्मानुगुणमेतद्धि युक्तं तस्याकृतात्मनः ॥ सतामसेवनात्तस्य गृध्रत्वं सारमेयता ॥ २ ॥ सप्तवारमिति प्रोक्तं तन्मे भाति च नोचितम् ॥ संतो न दूषितास्तेन न तथा कृपणा अपि ॥ ३ ॥ तस्मादसेविनस्तस्य फलाऽभावो भवेद्ध्रुवम् ॥ नानर्थकरणाभावादिदं हि परपीडनम् ॥ ४ ॥

यानाऽऽरूढो विमानाऽऽरूढः श्रीपतेर्लोकं वैकुण्ठम् ॥ ४३ ॥ सुधर्म्यं सुष्ठुधर्मादनपेतम् ॥ ४४ ॥ इति वैशाखमासमाहात्म्यटीकायां सप्तमोऽध्यायः ॥ ७ ॥ ॥ छ ॥
इक्ष्वाकुतनयः काकुत्स्थः ॥ १ ॥ अकृतात्मनः सम्यगसम्पादितपुण्यकर्मणः, सारमेयता श्वानयोनिः ॥ २ ॥ सप्तवारमिति । यत्त्वया सप्तवारमेवमभूदिति प्रोक्तं तन्म उचितं विश्वसनीयं न भाति, यतः—तेन काकुत्स्थेन, सन्तः साधवो न दूषिताः तथा कृपणा अपि न दूषिताः ॥ ३ ॥ अनर्थानां करणस्याऽभावात्परपीडनं न भवति,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अनेन तन्न कृतमिति ध्वनिः ॥ ४ ॥ आत्मप्रियस्य तव प्रियस्य ममेत्यर्थः ॥ ५ ॥ व्याहर्तुं वक्तुम् ॥ ६ ॥ शिवायै पार्वत्यै ॥ ७ ॥ स्थितिं रक्षाम्, आमुष्मिकीं पारलौकिकीम्, ऐहिकीमेतल्लोकसंबंधिनीम्, पर्यकल्पयत् कृतवान् ॥ ८ ॥ ९ ॥ श्रुतौ वेदे त्रय एव पूर्वश्लोकोक्तास्त्रयो हेतवः जलसेवाऽन्नसेवौषधसेवारूपास्त्रयो हेतवः, ऐहिकस्थितावपि भवंति ॥ १० ॥ तथा पारलौकिकस्थितावपि साधुसेवा, विष्णुसेवा, धर्मपथस्य धर्ममार्गस्य सेवा, एते हेतवो भवन्ति ॥ ११ ॥ पाथेयं मार्गनिर्वाहार्थमन्नं

अनिमित्तमिदं कस्मात्कुयोनित्वमवाप्तवान् ॥ तदेतं संशयं छिंधि शिष्यस्याऽऽत्मप्रियस्य च ॥ ५ ॥ इति राज्ञा सुसंपृष्टः श्रुतदेवो महायशाः ॥ साधुसाध्विति संभाष्य वचो व्याहर्तुमादधे ॥ ६ ॥ ॥ श्रुतदेव उवाच ॥ ॥ शृणु राजन्प्रवक्ष्यामि यत्पृष्टं तु त्वयाऽनघ ॥ शिवायै च शिवेनोक्तं कैलासशिखरेऽमले ॥ ७ ॥ सृष्ट्वेमान्सकलाँल्लोकान्पश्चात्तेषामवस्थितिम् ॥ आमुष्मिकीमैहिकीं च द्विविधां पर्यकल्पयत् ॥ ८ ॥ हेतुत्रयं च प्रत्येकं हेतुस्थित्यै महाप्रभुः ॥ जलसेवा चान्नसेवा सेवा चैवौषधस्य च ॥ ९ ॥ यत्र चैते महाभाग ह्यैहिकस्थितिहेतवः ॥ एवमामुष्मिके राजंस्त्रय एवेरिताः श्रुतौ ॥ १० ॥ साधुसेवा विष्णुसेवा सेवा धर्मपथस्य च ॥ पुरा संम्पादिता ह्येते परलोकस्य हेतवः ॥ ११ ॥ गृहे संपादितं यद्वत्पाथेयं पद्धतौ यथा ॥ ऐहिका हेतवो राजन्सद्यः सपादितार्थदाः ॥ १२ ॥ किं चेष्टमपि साधूनां मनसो यदि दुस्सहम् ॥ कुतश्चित्कारणाद्राजंस्तच्चानर्थाय कल्पते ॥ १३ ॥ अप्रियं किमु वक्तव्यं दुःखहेतुरिति स्फुटम् ॥ अत्रैवोदाहरन्तीममितिहासं पुरातनम् ॥१४॥ पापघ्नं महदाश्चर्यं शृण्वतां रोमहर्षणम् ॥ यज्ञदीक्षामुपगतः पुरा दक्षः प्रजापतिः ॥ १५ ॥ आह्वानार्थं भूतपतेरगमद्रजताचलम् ॥ तं दृष्ट्वा नोत्थितः शंभुस्तस्यैव हितकाम्यया ॥ १६ ॥ सर्वामरगुरुश्चाऽहं छन्दोगम्यः सनातनः ॥ भृत्या ह्येते बलिहराश्चन्द्रेन्द्राद्याः सुरेश्वराः ॥ १७ ॥ स्वामी भृत्याय नोत्तिष्ठेत्स्वभार्यायै पतिस्तथा ॥ गुरुः शिष्याय नोत्तिष्ठेदिति शास्त्रविदां मतम् ॥१८॥ न संबन्धो गुरुत्वे च कारणं त्विति वै श्रुतिः ॥ बलं ज्ञानं तपः शांतिर्यत्र चैवाऽधिकं भवेत् ॥ १९ ॥

पद्धतौ मार्गे, सम्पादितार्थदा आचरितार्थदाः ॥ १२ ॥ १३ ॥ १४ ॥ रोमहर्षणं यस्य श्रवणे नाङ्गे पुलका उद्भवंति, यज्ञदीक्षामुपगतः यज्ञे दीक्षितः ॥ १५ ॥ भूतपतेः शंकरस्य, रजताचलं कैलासम् ॥१६॥ छन्दोगम्यः वेदेऽपि यस्य कथाऽस्ति एवंरूपः, बलिहराः करप्रदातारः ॥१७॥ प्रासंगिकं धर्मं वदति—स्वामीति ॥१८॥१९॥

CC-0. In Public Domain. Digitization by eGangotri

 नीचा अधमाः प्रेष्यतां दास्यम् ईयुः प्राप्नुयुः, आग्रहादतिशयप्रीत्या ॥ २० ॥ २१ ॥ मृडं शिवं, प्रजापतिर्दक्षः ॥ २२ ॥ अकृतात्मनः अशिक्षितस्य ॥ २३ ॥ बहुवयाः वृद्धः, चर्मावशेषितः अस्थिपंजरो वृषः, इत्थं यस्य वित्तम् ऐश्वर्यमिति पाखंडानां गोचरो दृश्यः, न तु सरलबुद्धीनाम् ॥ २४ ॥ वृथाऽहंकारिणः अस्य शिवस्य, दैवं भागधेयम्, मंगलं कुतो दास्यति ॥ २५ ॥ गजाजिनं गजचर्म ॥ २६ ॥ वृकाद्वृकसदृशात्, तस्माज्ज्ञानं धीरता च पलायिते ॥ २७ ॥ साधुसंमतः सज्जन

स गुरुश्चेतरेषां च नीचा ईयुश्च प्रेष्यताम् ॥ उत्तिष्ठन्ति च स्वाम्याद्या भृत्यादीन्यदि चाऽऽग्रहात् ॥ २० ॥ आयुर्वित्तं यशस्तेषां सद्यो नश्यति सन्ततिः ॥ तस्मादहं तु नोत्तिष्ठे प्रियोऽयं श्वशुरो मम ॥ २१ ॥ इति तस्य हितान्वेषी नोच्चचालाऽऽसनाद्विभुः ॥ नोत्थितं तु मृडं दृष्ट्वा कुपितोऽभूत्प्रजापतिः ॥ २२ ॥ अनिंदद्बहुधा तस्मै पुरतो गिरिजापतेः ॥ अहो दर्पमहो दर्पं दरिद्रस्याऽकृतात्मनः ॥ २३ ॥ यस्य वित्तं बहुवया वृषश्चर्मावशेषितः ॥ अत एव कपालास्थिधरः पाखण्डगोचरः ॥ २४ ॥ वृथाऽहंकारिणो दैवं कुतो दास्यति मंगलम् ॥ लोके कृत्येन कर्माणि शुचीनीति विदो विदुः ॥ २५ ॥ धत्ते दरिद्रः शीतार्तः पवित्रं च गजाजिनम् ॥ वेश्म श्मशानं यस्य स्याद्भुजंगः किल भूषणम् ॥ २६ ॥ न धीरताऽपि च ज्ञानं वृकात्तस्मात्पलायिते ॥ भूतप्रेतपिशाचादि दुर्जनैः संगतोऽनिशम् ॥ २७ ॥ न कुलं श्रूयते क्वाऽपि नाऽसौ वै साधुसम्मतः ॥ वृथा विश्रंभितः पूर्वं नारदेन दुरात्मना ॥ २८ ॥ येनाऽहं बोधितः प्रादां कन्यां चैतां सतीं मम ॥ पृथग्धर्मगता चैषा सुखं वसतु तद्गृहे ॥ २९ ॥ नास्माभिः श्लाघनीयोऽसौ मत्सुताऽपि कथंचन ॥ यथा कुलालकलशश्चंडालस्य वशं गतः ॥ ३० ॥ इति दक्षो विमूढात्मा ह्युमां नाहूय तं मृडम्॥ बहुधा तं विनिर्भर्त्स्य तूष्णीमेव गृहं ययौ ॥ ३१ ॥ यज्ञवाटं ततो गत्वा ऋत्विग्भिर्मुनिभिः सह ॥ ईजे यज्ञविधानेन निंदन्नेव महाप्रभुम् ॥ ३२ ॥ ब्रह्मविष्णू विहायैव सर्वे देवाः समागताः ॥ सिद्धचारणगन्धर्वा यक्षराक्षसकिन्नराः ॥ ३३ ॥ तदा देवी सती पुण्या स्त्रीचाञ्चल्यात्प्रलोभिता ॥ उत्सुका चोत्सवं द्रष्टुं बन्धूंस्तत्र समागतान् ॥ ३४ ॥ निवार्यमाणा रुद्रेण तरला स्त्रीस्वभावतः ॥ प्रत्युक्ताऽपि पुनश्चैव गन्तव्यमिति निश्चिता ॥ ३५ ॥

मान्यः, दुरात्मना दुष्टेन नारदेन, वृथा व्यर्थं, विश्रम्भितः विश्वासपात्रीकृतः ॥ २८ ॥ पृथग्धर्मगता अन्यधर्मानुचारिणी, सुखं सुखेन, तद्गृहे वसतु ॥ २९ ॥ ३० ॥ नाहूयाऽऽह्वानमकृत्वा, विनिर्भर्त्स्य विनिन्द्य ॥ ३१ ॥ महाप्रभुं शंकरम् ॥ ३२ ॥ ३३ ॥ स्त्रीचांचल्यात्स्त्रीनिष्ठचंचलतास्वभावात्, प्रलोभिता लुब्धा ॥ ३४ ॥ प्रत्युक्ता निषिद्धा ॥ ३५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वरवर्णिनि हे प्रिये असह्यं तद्दुःसहं तं प्रकारं कार्यं प्रहास्यसि मरिष्यसि ॥ ३६ ॥ ३७ ॥ शालां यज्ञशालाम्, मा गच्छ गमनं मा कुरु ॥ ३८ ॥ सती एकाकी पादचारिणी च भूत्वा गृहान्निश्चक्राम निर्गतवती, तां निर्गच्छन्तीं दृष्ट्वा वृषभः तूष्णीमेव पृष्ठे उवाह ॥ ३९ ॥ ४० ॥ सतीं दृष्ट्वा खेदा त्तूष्णीमासन्, सर्वा यज्ञवाटस्थास्तत्सम्बंधिन्यः स्वस्त्रादय इति शेषः ॥ ४१ ॥ हताशिषः अदत्ताऽऽशीर्वचनाः ॥ रुद्रं त्यक्त्वा रुद्राहुतिं विहाय, जुह्वन्तं पितरं दृष्ट्वाऽश्रुभि

स निन्दति सभामध्ये सदा मां वरवर्णिनि ॥ तच्चासह्यं च त्वं श्रुत्वा कार्यं सत्यं प्रहास्यसि ॥ ३६ ॥ असह्यमपि सोढव्यं मयाऽपि गृहमि च्छता ॥ मया यथा कृतं देवि तथा त्वं नैव वर्तसे ॥३७॥ तस्मान्मा गच्छ शालां वै न शुभं तु भवेद्ध्रुवम् ॥ इत्येवं बोधिता देवी चापल्यं पुनरा गमत् ॥ ३८ ॥ निश्चक्राम सती गेहादेकाकी पादचारिणी ॥ तां दृष्ट्वा वृषभस्तूष्णीं पृष्ठे देवीमुवाह सः ॥ ३९ ॥ कोटिशो भूतसंघाश्च ह्यनुजग्मुः सतीं तदा ॥ यज्ञवाटं तु सा गत्वा पत्नीशालां ययौ पुरा ॥ ४० ॥ तूष्णीमास सतीं दृष्ट्वा खेदात्तस्माद्विनिर्गता ॥ पतिवाक्यं तु संस्मृत्य जगा मोत्तरवेदिकाम् ॥ ४१ ॥ पिता सभ्याश्च तां दृष्ट्वा स्थितास्तूष्णीं हताशिषः ॥ सा रुद्राहुतिपर्यंतं पश्यन्ती पितृचेष्टितम् ॥ त्यक्त्वा रुद्रं च जुह्वंतमुवाचाऽश्रुकुलेक्षणा ॥ ४२ ॥ ॥ देव्युवाच ॥ ॥ महदुल्लंघनं पुंसां न प्रायः श्रेयसे भवेत् ॥ लोककर्ता लोकभर्ता सर्वेषां प्रभुर व्ययः ॥ ४३ ॥ एवंभूतस्य रुद्रस्य कथं नो दीयते हविः ॥ जातां न किं ते दुर्बुद्धिं हरंत्यन्ये समागताः ॥ ४४ ॥ न चेदृशा महात्मानः किमे षां विमुखो विधिः ॥ ४५ ॥ इत्येवं भाषमाणां तां पूषा देवो जहास ह ॥ श्मश्रूणां चालनं चक्रे भृगुर्हतशुभस्तथा ॥ ४६ ॥ भुजपादोरुकक्षा णां स्फालनं चक्रिरे परे ॥ बहुधा निन्दनं चक्रे तत्पिता हतभाग्यवान् ॥ ४७ ॥ तच्छ्रुत्वा रुद्रभार्या सा कोपाकुलितमानसा ॥ प्रायश्चित्तं श्रुतेः कर्तुं देहं तत्याज सा सती ॥ होमाग्नौ वेदिकामध्ये सर्वेषामेव पश्यताम् ॥ ४८ ॥ हाहाकारो महानासीद्दुद्रुवुः प्रमथा द्रुतम् ॥ आचख्यु र्देवदेवाय वृत्तान्तमखिलं तदा ॥ ४९ ॥ तच्छ्रुत्वा सहसोत्थाय रुद्रः कालांतकोपमः ॥ जटामुत्पाट्य हस्तेन भूतले तामताडयत् ॥ ५० ॥ ततो ऽभवन्महाकायो वीरभद्रो महाबलः ॥ सहस्रबाहुरभवत्कालांतकसमप्रभः ॥ ५१ ॥

राकुले ईक्षणे यस्याः सा सती उवाच ॥ ४२ ॥ ४३ ॥ हविर्हविर्भागः ते तव जातां दुर्बुद्धिमन्ये समागता इमे ऋत्विजः न हरंति किम् ॥ ४४ ॥ विधिर्दैवम् ॥ ॥ ४५ ॥ हतशुभः अमंगलः ॥ ४६ ॥ स्फालनं ताडनम्, परे सभासदः, तत्पिता दक्षः ॥ ४७ ॥ श्रुतेः भर्तृनिंदाश्रवणस्य प्रायश्चित्तं कर्तुं देहं होमाग्नौ तत्याज ॥४८॥ दुद्रुवः पलायांचक्रिरे, देवदेवाय महेश्वराय, आचख्युः कथयांबभूवुः ॥ ४९ ॥ तां जटाम् ॥ ५० ॥ ततो जटाताडनात्, कालान्तकसमा प्रभा यस्य सः ॥ ५१ ॥

CC-0. In Public Domain. Digitization by eGangotri

मत्सृष्टिः ममोत्पादनम्, मा मां नियोजयाऽऽज्ञापय ॥ ५२ ॥ ५३ ॥ हन मारय, मत्प्रिया सती, एतेन वीरभद्रेण सह गच्छन्तु ॥ ५४ ॥ ५५ ॥ जटाभूर्वीरभद्रः ॥ ५६ ॥ यद्यदंगं पूर्वं येन येन ताडितं तत्तच्चिच्छेद ॥ ५७ ॥ मुनीनां मन्त्रैः प्रगुप्तमभिरक्षितं तद्दक्षशिरः बलादपि न कृन्तति ॥ ५८ ॥ ५९ ॥ ६० ॥

बद्धांजलिपुटो भूत्वा व्याजहार हरं तदा ॥ मत्सृष्टिस्तु यदर्थं ते तदर्थं मा नियोजय ॥ ५२ ॥ इत्युक्तः प्राह तं क्रुद्धो धूर्जटिश्च पुरः स्थितम् ॥ ॥५३॥ हन त्वं निन्दकं दक्षं यदर्थे मत्प्रिया हता ॥ भूतसंघास्तु गच्छन्तु सहैतेन महाबलाः ॥ ५४ ॥ इत्यादिष्टा भगवता ययुर्यज्ञसभां तदा ॥ जघ्नुः सर्वान्महावीरान्देवासुरनरादिकान् ॥५५॥ पूष्णश्च हसतो दंतान्जटाभूश्च बभञ्ज ह ॥ श्मश्रूण्युत्पाटयांचक्रे भृगोस्तस्य दुरात्मनः ॥५६॥ यद्यदास्फालितं पूर्वं तत्तच्चिच्छेद वीर्यवान् ॥ ततो दक्षशिरो हर्तुं बहूद्योगं चकार ह ॥ ५७ ॥ मुनिमंत्रप्रगुप्तं तु नैव कृंतति तद्बलात् ॥ हरो ज्ञात्वा तु चिच्छेद स्वयमेत्य दुरात्मनः ॥ ५८ ॥ एवं मखगतान्हत्वा साऽनुगः स्वालयं ययौ ॥ हतावशिष्टाः केचित्तु ब्रह्माणं शरणं ययुः ॥ ॥ ५९ ॥ तैरन्वितो ययौ ब्रह्मा कैलासं तु शिवालयम् ॥ ततो रुद्रं सान्त्वयित्वा वचोभिर्विविधैरपि ॥ ६० ॥ तेनैव सहितः प्रागाद्यज्ञवाटं महाप्रभुः ॥ तेनैवोज्जीवयामास सर्वान्यज्ञसमागतान् ॥ ६१ ॥ ख्यात्यै प्रादादजमुखं दक्षस्य तु तदा शिवः ॥ अजश्मश्रूण्यदाच्छंभुर्भृगवे तु महात्मने ॥ ६२ ॥ पूष्णश्च दंतान्न प्रादात्पिष्टादं च चकार ह ॥ तदङ्गानां व्यतिकरं केषांचिदपि वै शिवः ॥ ६३ ॥ शिवमापुश्च ते सर्वे ब्रह्मणा च शिवेन च ॥ पुनः प्रवर्तितो यज्ञो यथापूर्वं महात्मनः ॥ ६४ ॥ यज्ञान्ते सर्वदेवाश्च जग्मुस्ते स्वंस्वमालयम् ॥ नैष्ठिकं ब्रह्मचर्यं तु कृत्वा रुद्रो महातपाः ॥ ६५ ॥ तेपे गंगातटे रुद्रः पुन्नागतरुमूलगः ॥ दक्षात्मजा सती देवी त्यक्तदेहा पतिव्रता ॥ ६६ ॥ जज्ञे हिमाद्रेर्मेनक्यां ववृधे तस्य वेश्मनि ॥ एतस्मिन्नेव काले तु तारकाख्यो महासुरः ॥ ६७ ॥ स तीव्रतपसाऽऽराध्य ब्रह्माणं परमेष्ठिनम् ॥ अवध्यत्वं वरं वव्रे देवासुरनरोरगैः ॥ ६८ ॥ आयुधैरस्त्रसंघैश्च सर्वैरेव महाबलैः ॥ रुद्रपुत्रं विना दैत्य ह्यवध्यः सकलैरपि ॥ ६९ ॥

तेनैव ब्रह्मणैव सह ॥ ६१ ॥ ६२ ॥ दन्तान्विनैव पिष्टभक्षणशक्तिं चकार, व्यतिकरम् अंगवैकल्यं समीचकारेति शेषः ॥ ६३ ॥ शिवं कल्याणम् ॥ ६४ ॥ नैष्ठिकं तीव्रम् ॥ ६५ ॥ गंगातटे मायापुरीसमीपवर्तिगंगातीरे ॥ ६६ ॥ हिमाद्रेर्हिमालयान्मेनक्यांनाम तत्पत्न्यां जाता सती ववृधे ॥ ६७ ॥ ६८ ॥ रुद्रपुत्रं भविष्यमाणं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्कन्दम् ॥ ६९ ॥ ७० ॥ लोकबाधनप्रकारमाह—दासा इति । देव्यो देवपत्न्यः ॥ ७१ ॥ वेधा ब्रह्मा ॥ ७२ ॥ तस्मै तारकासुराय ॥ ७३ ॥ सत्रे दक्षयज्ञे, त्यक्तकलेवरा कृतदेहत्यागा ॥ ७४ ॥ योजयध्वं पार्वत्या सह संयोजनं करुत ॥ ७५ ॥ धिषणेन बृहस्पतिना, सम्मन्त्र्य विचारं कृत्वा, पाकशासनः देवेन्द्र इन्द्रः ॥ ७६ ॥ तं स्मरन् मदनं बलिभिदिंद्रः ॥ ७७ ॥ तद्दक्षयज्ञवृत्तांतम् ॥ ७८ ॥ दशकन्यया दशभिः कन्याभिः सह, वियुक्ता हरेण सह जातविरहा तव कन्या, मृडः शिवश्च, तं

इति तस्मै वरं प्रादाद्ब्रह्मा लोकपितामहः ॥ अस्त्रीकत्वादपुत्रत्वाद्रुद्रस्येति तथास्त्विति ॥ ७० ॥ वरं गृहीत्वा स्वगृहं प्राप्य लोकान्बबाध ह ॥ दासा देवा मार्जनादौ दास्यो देव्यश्च तद्गृहे ॥ ७१ ॥ ततस्तत्पीडिता देवा ब्रह्माणं शरणं ययुः ॥ तैः पीडां वर्णितां श्रुत्वा वेधाः प्राह सुरानिदम् ॥ ७२ ॥ वरप्रदानकालेऽहं रुद्रपुत्रं विना सुराः ॥ नान्यैर्वध्य इति प्रादां वरं तस्मै दुरात्मने ॥ ७३ ॥ पुरा सती रुद्रपत्नी सत्रे त्यक्तकलेवरा ॥ जाता हिमवतः पुत्री पार्वतीति च यां विदुः ॥७४॥ रुद्रो हिमवतः पृष्ठे तपश्चरति दुश्चरम् ॥ योजयध्वं च पार्वत्या रुद्रं लोकेश्वरं प्रभुम् ॥ ॥ ७५ ॥ पुनर्देवेन्द्रसदने संगतैरमरेश्वरैः ॥ धिषणेनाऽपि सम्मंत्र्य देवेंद्रः पाकशासनः ॥ ७६ ॥ सस्मार च स कार्यार्थं नारदं स्मरमेव च ॥ तत्राऽऽगतौ ततस्तौ तु बलभिद्वाक्यमब्रवीत् ॥ ७७ ॥ हिमवन्तं भवान्गत्वा वचसा तं निबोधय ॥ पुत्री तव प्राग्दक्षस्य हरपत्नी सुता सती ॥ ॥ ७८॥ तपश्चरति ते शृंगे वियुक्ता दशकन्यया ॥ मृडस्तस्य सपर्यायै विनियोजय तत्प्रियाम् ॥ ७९ ॥ तस्यैव पत्नी भविता स एव भविता पतिः ॥ इत्याऽऽदिष्टो मघोना च नारदोपेत्य तं गिरिम् ॥ ८० ॥ तथैव कारयामास देवेन्द्रेणोदितं यथा ॥ पश्चात्कामं समाहूय मघवानिदमाह च ॥ ८१ ॥ देवानां च हितार्थाय तथा मृडहिताय च ॥ वसन्तेन समायुक्तो गत्वा रुद्रतपोवनम् ॥ ८२ ॥ गुणान्विजृम्भयित्वा तु वासंतान्हृच्छयावहान् ॥ यदा सन्निहिता देवी पार्वती तु मृडस्य च ॥ ८३ ॥ तदा प्रयुज्य त्वं बाणान्मोहयस्व महाप्रभुम् ॥ तयोस्तु संगमे जाते कार्यं नोऽद्धा भविष्यति ॥ ८४ ॥ इत्यादिष्टः स्मरस्तूर्णं प्रतस्थे बाढमित्यथ ॥ सवसंतः सरतिकः सानुगस्तद्वनं ययौ ॥ ८५ ॥

शृंगे दुश्चरं तपश्चरतीत्युभयत्राऽपि सम्बध्यते । विनियोजय देहि ॥७९॥ मघोना इन्द्रेण, नारदः उपेत्य संधिरार्षः ॥ ८० ॥ ८१ ॥ ८२ ॥ वासंतान्वसंततुसम्बन्धिनः, हृच्छ यावहान्मदनोद्दीपकान्गुणान्विजृंभयित्वा प्रकाशयित्वा ॥ ८३ ॥ नोऽस्माकं कार्यम् अद्धा प्रत्यक्षं तदैवेत्यर्थः ॥ ८४ ॥ आदिष्ट आज्ञापितः, स्मरः कामः, बाढमिति

CC-0. In Public Domain. Digitization by eGangotri

स्वीकारार्थेऽव्ययम्, तूर्णं झटिति, प्रतस्थे सानुगः रंभादिगणसमन्वितः, सद्वनं रुद्रतपोवनम् ॥ ८५ ॥८६॥ स्वाङ्कं समारोप्य पार्वतीमिति शेषः, व्याहर्तुं वक्तुम् ॥८७॥ स मदनः, प्राणप्रियासंगमस्य पार्वतीसमागमस्य, अयं काल इति निश्चितो जातनिश्चयः सन्, पेशलम् अतिचपलम् ॥ ८८ ॥ वृक्षजवनिकाम् आच्छादकं कृत्वा ॥८९॥ कश्मलीकृतं कष्टीकृतम् ॥९०॥ क्रुद्धः ललाटाक्षं भालस्थवह्निनेत्रमुन्मील्य संधिरार्षः, अपास्य त्यक्त्वा ॥९१॥ सशरासनः सधनुष्कः ॥ ९२ ॥ दुद्रुवुः पलायाञ्चक्रिरे

अकाले तु वसंतर्तुं जृंभयित्वा स्वशक्तितः ॥ तद्वने सर्वतो रम्ये मन्दाऽनिलनिषेविते ॥ ८६ ॥ कदाचिद्देवदेवोऽपि पार्वत्याश्च सपर्यया ॥ प्रीतः स्वाङ्कं समारोप्य किंचिद्व्याहर्तुमारभत् ॥ ८७ ॥ प्राणप्रियासङ्गमस्य कालोऽयमिति निश्चितः ॥ पेशलं धनुरादाय स तस्थौ हरपृष्ठतः ॥ ॥ ८८ ॥ कृत्वा जवनिकां वृक्षं बाणमेकं मुमोच ह ॥ द्वितीयमपि संधाय चक्रे मोक्तुं महोद्यमम् ॥ ८९ ॥ अथ क्षुब्धमना भूत्वा मृडश्चिंता मवाप ह ॥ न मे मनश्चलेत्क्वापि केन वा कश्मलीकृतम् ॥ ९० ॥ इति चिन्ताकुलो वामे पार्श्वे कामं ददर्श ह ॥ क्रुद्धोन्मील्य ललाटाक्षं स्वाङ्कादेवीमपास्य च ॥ ९१ ॥ तस्याक्ष्णः समभूदग्निस्तीक्ष्णो लोकविभीषणः ॥ तेन दग्धोऽभवत्सद्यो मन्मथः सशरासनः ॥ ९२ ॥ कार्य सिद्धिं च पश्यंतो दुद्रुवुश्चामरा दिवम् ॥ शंकमानाः स्वदण्डं च वसन्तो रतिरेव च ॥ ९३ ॥ निमील्य लोचने भीता देवी दूरं प्रदुद्रुवे ॥ सन्नि धानं स्त्रियो हर्तुं मृडोप्यंतरधीयत ॥ ९४ ॥ रुद्रस्येष्टं प्रकुर्वाणो देवश्च मनसो हितम् ॥ लेभेऽनर्थमनिर्वृत्तं विप्रियं कुर्वतस्तु किम् ॥ ९५ ॥ तस्मादिक्ष्वाकुतनयः साधूनामप्रियः सदा ॥ तस्मादात्महितां सेवां नाऽकरोन्मन्दधीः सताम् ॥ ९६ ॥ अनुभूतं महद्दुःखं तस्माद्दुर्योनिरेव च ॥ तस्मात्कुर्यात्तु साधूनां सेवां सर्वार्थसाधिनीम् ॥ ९७ ॥ रुद्रस्याऽप्रियकारित्वात्स्मरो भाविनि जन्मनि ॥ दुःखं तु बहुलं लेभे जन्मकाले महा प्रभुः ॥ ९८ ॥ इतिहासमिमं पुण्यं ये शृण्वन्ति दिवानिशम् ॥ जन्ममृत्युजरादिभ्यो मुच्यंते नाऽत्र संशयः ॥ ९९ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे वैशाखमासमाहात्म्ये नारदाम्बरीषसंवादे दाक्षायण्यपमाने दक्षयज्ञविध्वंसपूर्वकपार्वती जन्मादिकामदहनवर्णनंनामाष्टमोऽध्यायः ॥ ८॥ ॥ छ ॥

दिवं स्वर्गं, रतिः कामपत्नी ॥ ९३ ॥ देवी पार्वती ॥ ९४ ॥ देव इन्द्रः मनसो हितं हिताय; रुद्रस्य इष्टं प्रियं कुर्वाणः सन्ननर्थं लेभे, तद्विप्रियम् अनिष्टं कुर्वाणः अनर्थं न लभेत किम् ॥ ९५ ॥ ९६ ॥ ९७ ॥ अप्रियकारित्वादनिष्टकरणात्, भाविनि भविष्यमाणे ॥ ९८ ॥ ९९ ॥ इति वैशाखमासमाहात्म्यटीकायामष्टमोऽध्यायः ॥८॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कस्मात्पुरुषात्, तस्मिन् जन्मनि, कर्मणः सह लंघनात् रुद्रदेवापकारकरणात् ॥ १ ॥ कुमारजन्म स्कंदजन्म ॥ २ ॥ तत्पत्नी कामपत्नी ॥ ३ ॥ भस्मावशेषितं पतिं पुरतो दृष्ट्वा मुमोह मुमूर्च्छ मुहूर्तेन वटिद्वयावच्छिन्नसमयेन, सजातसंज्ञा लब्धचेतना, चित्रधा अनेकप्रकारेण, विललाप विलापं कृतवती ॥ ४ ॥ तच्चिताग्नौ कामचिताग्नौ त्यक्तुकामा मोक्तुकामा; माधवं वसंतम् ॥ ५ ॥ तात्कालिकीं चिताविरचनादिरूपां क्रियां कर्तुं सस्मार स्मृतवती, वीरपत्न्याः वीरस्य मदनस्य पत्न्याः रत्याः

॥ ॥ मैथिल उवाच ॥ ॥ तस्य दग्धस्य कामस्य कस्माज्जन्माऽभवद्विभो ॥ किं दुःखमभवत्तस्मिन्कर्मणः सह लंघनात् ॥ १ ॥ एतदाचक्ष्व मे ब्रह्मञ्छ्रोतुं कौतूहलं हि मे ॥ ॥ श्रुतदेव उवाच ॥ ॥ कुमारजन्म वक्ष्यामि श्रवणात्पापनाशनम् ॥ २ ॥ यशस्यं पुत्रदं धर्म्यं सर्वरोगविनाशनम् ॥ शंभुना तु हते कामे तत्पत्नी रतिसंज्ञिका ॥३॥ मुमोह पुरतो दृष्ट्वा पतिं भस्मावशेषितम् ॥ जातसंज्ञा मुहूर्तेन विललाप च चित्रधा ॥ ४ ॥ यद्विलापाद्रुदनं चापि समदुःखमभूत्तदा ॥ तच्चिताग्नौ स्वकायं तु त्यक्तुकामा च माधवम् ॥ ५ ॥ पत्युः सखायं सस्मार कर्तुं तात्कालिकीं क्रियाम् ॥ स आगतश्चितिं कर्त्तुं वीरपत्न्या महाप्रभुः ॥ ६ ॥ स तु त्रस्तः सखीं दृष्ट्वा क्षणं मूर्च्छापरोऽभवत् ॥ रतिं तु सान्त्वयामास सान्त्वैर्बहुविधैरपि ॥ ७ ॥ पुत्रतुल्योऽस्मि ते भद्रे स्थिते मयि च नाऽर्हसि ॥ कायं त्यक्तुं धर्महेतुमित्याद्यैर्बहुधाऽपि सा ॥ ८ ॥ नैव स्थातुं मनश्चक्रे तेन संस्तम्भिता रतिः ॥ दृष्ट्वा दार्ढ्यं वसन्तोऽपि चितिं चक्रे सरित्तटे ॥ ९ ॥ साऽवगाह्य द्युनद्यां च कृत्वा कार्याणि सर्वशः ॥ सन्नियम्येन्द्रियग्रामं निवेश्यात्मनि वै मनः ॥ १० ॥ चितिमारोढुमारेभे ततो जाताऽशरीरवाक् ॥ मा प्रवेशय कल्याणि वह्निं पतिपरायणा ॥ ॥ ११ ॥ भविष्यति च ते पत्युर्हराद्विष्णोश्च यादवात् ॥ जन्मद्वयं क्रमेणैव तत्र चोत्तरजन्मनि ॥ १२ ॥ भैष्म्यां कृष्णान्महाविष्णोः प्रद्युम्नाख्यो भविष्यति ॥ वसिष्यसि त्वं च शापाद्ब्रह्मणः शंबरालये ॥ १३ ॥ प्रद्युम्नाख्येन ते पत्या संगतिश्च भविष्यति ॥ इत्युक्त्वा विरराामाऽथ वाणी चाऽऽकाशगोचरा ॥ १४ ॥ श्रुत्वा तां तु निवृत्ताऽभून्मरणे कृतनिश्चया ॥ ततो देवाः समाजग्मुः स्वार्थे कामे हते हरात् ॥ १५ ॥

॥ ६ ॥ त्रस्तः खिन्नः; सांत्वैः शांतिवचनैः ॥ ७ ॥ धर्महेतुं धर्मकारणीभूतम् ॥ ८ ॥ संस्तम्भिता कृतप्रतिरोधा ॥ ९ ॥ द्युनद्यां भागीरथ्याम्, अवगाह्य स्नानं कृत्वा, कार्याणि शवपिंडप्रदानादीनि ॥ १० ॥ अशरीरवाक् आकाशवाणी ॥ ११ ॥ हरात् शंकरात्, यादवात् यादवरूपधारिणो विष्णोश्च सकाशात्ते पत्युर्जन्मद्वयं भविष्यति ॥ १२ ॥ भैष्म्यां रुक्मिण्याम्, त्वं च ब्रह्मणः शापाच्छम्बराऽऽलये वसिष्यसि ॥ १३ ॥ १४ ॥ मरणे कृतनिश्चया रतिः ताम् आकाशवाणीं श्रुत्वा निवृत्ताऽभूत्,

CC-0. In Public Domain. Digitization by eGangotri

स्वार्थे स्वकार्याय, कामे हते मृते सति हरात्सकाशात् समाजग्मुः, स्वं स्वमालयमिति शेषः॥ १५ ॥१६॥ अनंगोऽपि भस्मीभूतांगोऽपि ॥ १७ ॥ रतिदोषमाविष्कुर्वति—पूर्वकल्प इति ॥ १८ ॥ निष्कृतिं प्रायश्चित्तम् ॥ १९ ॥ २० ॥ उपलब्धिः प्राप्तिः, भविता भविष्यति ॥ २१ ॥ २२ ॥ दिवाकरे सूर्ये, मेषसंस्थे वैशाखमासे ॥ ॥ २३ ॥ अवार्यवीर्यवान् अनुल्लंघ्यपराक्रमः ॥ २४ ॥ कामदोषमाविष्करोति—पूर्वकल्प इति । तेन कारणेन ॥ २५ ॥ प्रपेदे प्राप, परमात्मनः पुत्रोऽपि इत्यनेन वैशाख

रत्या कृतं प्रपश्यन्तो गुर्विन्द्राग्निपुरोगमाः ॥ तां ते निवर्तयामासुर्वरेण महता सतीम् ॥ १६ ॥ अनंगोऽपि भवेत्साऽङ्गो मृत एवाऽक्षिगो भवेत् ॥ इति तां तु विनिर्वर्त्य धर्मं चोपदिदेशिरे ॥ १७ ॥ पूर्वकल्पे त्वयं राजा सुंदराख्यो महाप्रभुः ॥ त्वमेव पत्नी तत्राऽपि रजःसंकरकारिणी ॥ १८ ॥ तेनेयञ्च दशाभूत्ते कुर्विदानीं च निष्कृतीम् ॥ मंदाकिन्यां तु वैशाखे प्रातःस्नानं तदा कुरु ॥ १९ ॥ मधुसूदनमभ्यर्च्य कथां दिव्यां तथा शृणु ॥ अशून्यशयनंनाम व्रतमारभ भामिनि ॥ २० ॥ धर्मेणाऽनेन ते भद्रे व्रतेनाऽपि च माधवे ॥ नूनं ते भविता पत्युरुपलब्धिर्न संशयः ॥ २१ ॥ इति तस्यै वरं दत्त्वा देवा जग्मुर्यथाऽऽगताः ॥ तथा कृच्छ्रान्निवृत्ता सा देवी कामसती तथा ॥ २२ ॥ गंगाऽवगाहनं चक्रे मेषसंस्थे दिवाकरे ॥ अशून्यशयनंनाम व्रतं चाऽपि महामनाः ॥ २३ ॥ तेन पुण्यप्रभावेन सद्यः कामोऽक्षिगोचरः ॥ अभूत्तस्यै महाराज लोके चावार्यवीर्यवान् ॥ २४ ॥ पूर्वकल्पेऽप्ययमपि राजा धर्मपरायणः ॥ वैशाखोक्तान्महाधर्मान्नाकरोत्तेन वै स्मरः॥२५॥ देहहानिं प्रपेदेऽसौ पुत्रोऽपि परमात्मनः ॥ वृथा नीते तु वैशाखे मेषसंस्थे दिवाकरे ॥ २६ ॥ अवस्थेयं च देवानां मनुष्याणां तु का कथा ॥ त्र्यंबकेंऽतर्हिते पश्चान्निराशा गिरिकन्यका ॥ २७ ॥ तूष्णीं स्थितां तदा भ्रांतां तां दृष्ट्वा हिमवान्गिरिः ॥ चकितः स्वगृहं निन्ये दोर्भ्यां तां परिरभ्य च ॥ २८ ॥ रूपौदार्यगुणान्दृष्ट्वा हरस्यैव महात्मनः ॥ स एव मे पतिर्भूयादिति तन्निष्ठमानसा ॥ २९ ॥ गंगोपकूलमापेदे तपस्तप्तुं धृतव्रता ॥ निवारिताऽपि सा देवी पित्रा मात्रा स्वकैर्जनैः ॥ ३० ॥ अर्चयन्ती महालिंगं निराहारा जटाधरा ॥ दिव्यवर्षसहस्रान्ते प्रत्यक्षोऽभून्महेश्वरः ॥ ३१ ॥

धर्माणामत्याधिक्यं प्रदर्शितम् ॥ २६ ॥ गिरिकन्यका पार्वती, निराशा हतेच्छा ॥ २७ ॥ दोर्भ्यां बाहुभ्यां, परिरभ्याऽऽलिंग्य ॥ २८ ॥ तन्निष्ठमानसा शिवनिमग्नांतःकरणा ॥ २९ ॥ गंगाया उपकूलं तीरसमीपे, धृतव्रता कृतव्रतनिश्चया, पित्रा हिमालयेन, निवारिताऽपि पार्वती तपस्तप्तुम् आपेदे प्राप ॥ ३० ॥ जटाधरा अनेन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तापसी वृत्तिरुदीरिता, न तु अव्रतावल्केशसंस्कारोपभोगवती । महालिंगम् अर्चयन्ती पूजयन्ती, आसीदिति शेषः । उत्तरार्द्धे च तत इति शेषः ॥ ३१ ॥ वर्णी ब्रह्मचारी, पर्णशालामुखे गत्वेति शेषः । विभुः शम्भुः, पार्वत्या इति शेषः । तस्मिन्नात्मनि शिव एवेत्यर्थः । निष्ठा एकांतस्थितिर्यस्य तच्च तन्मनश्च दाढर्यं दृढतां नानाविधैरपि व्यस्ताप व्यस्तैरपि वाक्यैर्ज्ञात्वा ॥ ३२ ॥ वरानना पार्वती रुद्रं प्रति त्वं पतिर्भव इति वरं वव्रे ॥ ३३ ॥ ३४ ॥ कन्यां प्रष्टुं कन्या कस्मै दीयते इति विचारयितुम् ॥ ३५ ॥

भूत्वा वर्ण्यपि सायाह्ने पर्णशालामुखे विभुः ॥ स्वनिष्ठमनसो दाढर्यं वाक्यैर्नानाविधैरपि ॥ ३२ ॥ ज्ञात्वा वरादरं भद्रे वरयेति महाप्रभुः ॥ सा वव्रेऽथ पतिं रुद्रं त्वं भवेति वरानना ॥३३॥ स तथैव वरं दत्त्वा ऋषीन्सस्मार सप्त च ॥ आजग्मुस्तेऽपि मुनयः स्थिताः प्राञ्जलयः पुरः ॥३४॥ ऋषीणां ज्ञापयामास कन्यां प्रष्टुं हिमालयम् ॥ तथाऽऽदिष्टा भगवता कन्यार्थं हिमवद्गृहम् ॥३५॥ प्रापुर्विहायसा सर्वे द्योतयन्तो दिशो दश ॥ प्रत्युज्जगाम स गिरिः सप्तैतान्ब्रह्मवित्तमान् ॥ ३६ ॥ संपूज्य विधिवत्सर्वान्सुखासीनानपृच्छत ॥ धन्योऽस्मि कृतकृत्योऽस्मि यद्भवंतो गृहा ऽऽगताः ॥ ३७ ॥ भवदागमनं मन्ये मम जन्मफलं त्विति ॥ न कृत्यं विद्यतेऽस्माभिः पूर्णार्थानां महात्मनाम् ॥ ३८ ॥ तथाऽपि ब्रूत कार्यं वो यत्कर्तव्यं मयाऽधुना ॥ इत्युक्तास्ते तथा प्रोचुर्हिमवंतं महागिरिम् ॥ ३९ ॥ त्वया स्वसदृशं वाक्यमुक्तं गिरिपते दृढम् ॥ अस्मदागमने हेतुं वक्ष्यामस्ते महोदये ॥ ४० ॥ कन्या ते पार्वतीनाम पूर्वं दक्षात्मजा सती ॥ जाता तव कुमारी या यज्ञे त्यक्तकलेवरा ॥ ४१ ॥ अस्याः पाणिग्रहे दक्षः शंभुर्नाऽन्यो जगत्त्रये ॥ देया सा शंभवे देवी भवताऽऽनंत्यमिच्छता ॥ ४२ ॥ पूर्वजन्मसहस्रेषु भवता सुकृतं कृतम् ॥ इदानीं तव दिष्ट्या तु परिपाकमुपागतम् ॥ ४३ ॥ तेषां तद्वचनं श्रुत्वा संहृष्टाऽऽत्मा महागिरिः ॥ व्याजहार पुनर्वाक्यं पुत्री वल्कलधारिणी ॥ ४४ ॥

विहायसा आकाशमार्गेण, प्रत्युज्जगामाभिमुखं गतवान् ॥ ३६ ॥ ३७ ॥ कृत्यं कर्तव्यं कार्यम् ॥ ३८ ॥ ३९ ॥ ते तव, सदृशं योग्यं, महत्त्वयोग्यमित्यर्थः । ते तव, महोदये महोत्कर्षार्थं, निमित्ते सप्तमी ॥ ४० ॥ ४१ ॥ अस्यास्तव कन्यायाः, दक्षः समर्थः, आनंत्यम् अनंतपुण्यफलम् ॥ ४२ ॥ दिष्ट्या भाग्यवशात्, परिपाकं पूर्णावस्थाम् ॥ ४३ ॥ हिमवतोऽपि तदेवेष्टं कन्याया अपि तदेवेष्टमिति हिमवांस्तदेव वर्णयति—तेषामिति ॥ ४४ ॥

॥ ४५ ॥ ४६ ॥ ४७ ॥ ४८ ॥ षण्मातरः ब्राह्मी, कौमारी, वैष्णवी, वाराही, इन्द्राणी, चामुंडा, कृत्तिकादयोऽपि वा ॥ ४९ ॥ ५० ॥ ब्रह्मघोषैः "स्वस्ति न इन्द्र" इत्यादिपुण्याहवाचनिकैर्मंगलाशासकवेदमंत्रघोषैः ॥ ५१ ॥ त्रिलोक्यां प्राणिनां महोत्सवश्चासीत् हे नृप मैथिल ॥ ५२ ॥ लोकशंकरो लोकहितकरः, लोकधर्मानुयानक्रीडादिरूपान्, अनुव्रतो अनुसृतः ॥ ५३ ॥ नंदिनीतीरे नन्दिनीनदीतटे, वनराजिषूद्यानपंक्तिषु रेम इति वक्ष्यमाणेन सम्बंधः ॥ ५४ ॥ मत्तालिद्वि

गंगातीरे निराहारा तपस्तपति दुश्चरम् ॥ काङ्क्षमाणा पतिं शंभुं तस्या इष्टमिदं त्विति ॥ ४५ ॥ दत्ता कन्या मया तस्मै त्र्यंबकाय महात्मने ॥ शीघ्रं गत्वा भवंतस्तु यत्र शम्भुर्महाप्रभुः ॥ ४६ ॥ प्रीत्या हिमवता दत्तां गृहाणेति निवेद्य च ॥ भवंत एव कुर्वंतु चैतद्वैवाहिकीं क्रियाम् ॥ ४७ ॥ इत्युक्तास्ते हिमवता तमामंत्र्य शिवं ययुः ॥ लक्ष्म्याद्या योषितः सर्वा विष्ण्वाद्या देवता अपि ॥ ४८ ॥ षण्मातरोऽथ मुनयो द्रष्टुं जग्मुर्महोत्सवम् ॥ शिवः सर्वामरगणैर्मुनिभिर्मातृभिस्तथा ॥ ४९ ॥ अन्वितो वृषभारूढः प्रमथानां गणैर्वृतः ॥ भेरीशंखमृदंगाद्यैः काहलीपटहादिकैः ॥ ॥ ५० ॥ ब्रह्मघोषैर्बंदिभिश्च प्राविशद्धिमवत्पुरीम् ॥ सुमुहूर्ते शुभे लग्ने शुभग्रहनिरीक्षिते ॥ ५१ ॥ विवाहमकरोच्छैलः प्रहृष्टेनांतरात्मना ॥ महोत्सवस्तदा चाऽऽसीत्त्रिलोक्यां प्राणिनां नृप ॥ ५२ ॥ महोत्सवे निवृत्ते तु शंकरो लोकशंकरः ॥ रेमे स्वच्छंदया देव्या लोकधर्माननुव्रतः ॥ ॥ ५३ ॥ ऋद्धिमद्धिमवद्गेहे देवेंद्रभवनोपमे ॥ शर्वर्यां नंदिनीतीरे वनराजिषु शंकरः ॥ ५४ ॥ मत्तालिद्विजसन्नादमयूररवमंडिते ॥ दिव्यवर्षसहस्राणि रेमे स्वच्छंदया विभुः ॥ ५५ ॥ स्त्रीणामिंद्रवराभावात्तस्मिन्काले नृपोत्तम ॥ पुंसः संगात्पुनर्गर्भो नारीणां स्रवति ध्रुवम् ॥ ५६ ॥ प्रत्यहं रमणाद्देव्यां नाभूद्गर्भो हराद्व्रत ॥ देवानामभवच्चिन्ता पुत्रालाभाद्धराद्विभो ॥ ५७ ॥ सर्वे संगत्य संमंत्र्य मिथ एवं बभाषिरे ॥ कामीवाऽभूद्व्रतौ नित्यं सक्तो देव्या हरः स्वराट् ॥ ५८ ॥ नाऽस्माकं सिद्ध्यते कार्यं नित्यं गर्भस्य संस्रवात् ॥ पुना रतिर्यथा नाऽभूत्तथाऽस्माभिर्विधीयताम् ॥ ५९ ॥ मिथ एवं तु संभाष्य व्यचिन्वन्क्षणमत्र ते ॥ अग्निं कृत्ये विनिश्चित्य ह्यूचुर्मानपुरःसरम् ॥ ६० ॥

जसन्नादमयूररवमंडिते मत्तभ्रमरकोकिलादिकूजनशिखंडिशब्दसंशोभिते ॥ ५५ ॥ तस्मिन्काले शिवपार्वतीविवाहसमये, स्त्रीणां यावत्स्त्रीत्वजात्यवच्छिन्नानामिन्द्रस्य गर्भधारणे वराभावात्पुनः द्वितीयमैथुनसमये स्त्रीणां पूर्वगर्भः स्रवति अस्रावीत् ॥ ५६ ॥ अतो हेतोः शंकरस्य पार्वत्या सह प्रत्यहं रमणात्पूर्वगर्भनाशोऽभवत् तेन हरात्पार्वत्यां गर्भो नाऽभून्न ववृधे ॥ ५७ ॥ रतौ सुरते, कामी इव अत्यंतकामुक इव, देव्या सह सक्तोऽभूत ॥ ५८ ॥ ५९ ॥ व्यचिन्वन् कार्यदक्षं शोधयामासुः ॥ ६० ॥

॥ ६१ ॥ रत्यंते सुरतांते, पुनः यथा रतिर्न भवेत् अन्यपुरुषदर्शनेन लज्जया सुरतप्रवृत्त्यवष्टम्भसम्भवात् ॥ ६२ ॥ स्मरांतकं शिवम्, तत्त्वसंप्रश्नव्याजेन तत्त्वविचारण मिषेण ॥ ६३ ॥ ओमिति स्वीकारार्थे निपातः ॥ ६४ ॥ वीर्योत्सर्गाच्छुक्रनिर्मोकादादावेव रतांतरे सुरतमध्ये, विवस्त्रा नग्ना, विमनाः खिन्ना, ययौ अंतःपुरं ययौ ॥ ६५ ॥ अविसृष्टं पार्वतीयोनौ न निक्षिप्तम् ॥ ६६ ॥ त्वया करणभूतेन ॥ ६७ ॥ तदुल्बणम् अतिजाज्वल्यमानं शिवस्य वीर्यम् उदरे धृत्वा दह्यमानोऽग्निः ॥६८॥

अग्ने मुखं त्वं देवानां त्वं बन्धुर्गतिरेव च ॥ इदानीमपि गच्छ त्वं रमते यत्र वै हरः ॥ ६१ ॥ रत्यन्ते दर्शयाऽऽत्मानं पुना रतिर्यथा न वै ॥ त्वां दृष्ट्वा व्रीडिता देवी ततश्चापसरेद्ध्रुवम् ॥ ६२ ॥ शिष्यो भूत्वा तु रत्यन्ते पृच्छ तत्त्वं स्मरान्तकम् ॥ तत्त्वसम्प्रश्नव्याजेन कालं बहु नय प्रभो ॥ ६३ ॥ बहुकाले गते देवी कुमारं प्रसविष्यति ॥ देवैरेवं प्रार्थितोऽग्निरोमित्युक्त्वा हरं ययौ ॥ ६४ ॥ वीर्योत्सर्गात्पूर्वमेव गतो वह्नी रतांतरे ॥ तं दृष्ट्वा व्रीडिता देवी विवस्त्रा विमना ययौ ॥ ६५ ॥ रतिं विहाय त्वरया ततो रुद्रोऽतिकोपितः ॥ वह्निं प्राह गृहाणेदमविसृष्टं तु दुर्मते ॥ ६६ ॥ मद्वीर्यं दुःसहं पाप रतौ विघ्नस्त्वयाऽभवत् ॥ उत्सृजामि च मद्वीर्यं त्वन्मुखे हव्यवाहन ॥ ६७ ॥ इत्युक्त्वोत्सृष्टवान्वीर्यं हव्यवाहमुखे हरः ॥ तद्धृत्वा दह्यमानः सन्स्वोदरे वीर्यमुल्बणम् ॥ ६८ ॥ चिंतयानो ययौ धाम देवानां यज्ञपुरुषः ॥ कथंचित्प्राणतो मुक्तो देवेभ्यस्तन्न्यवेदयत् ॥ ६९ ॥ देवा वह्नीरितं श्रुत्वा हर्षशोकौ समाययुः ॥ स्थितं वीर्यमिति ह्यादं कथं तु प्रसवो भवेत् ॥ ७० ॥ इति दुःखं तदा चाऽऽसीद्वह्नेः कुक्षौ तु शांभवम् ॥ ववृधे तेज आक्षिप्तं दश मासा गतास्तदा ॥ ७१ ॥ नाऽपश्यत्प्रसवोपायं बहुदुःखपरायणः ॥ देवान्वै शरणं प्राप गर्भमोचनहेतवे ॥ ७२ ॥ ते देवा वह्निना साकं प्रापुर्गंगां यशस्विनीम् ॥ गंगां स्तोत्रेण ते स्तुत्या प्रार्थयामासुरंजसा ॥ ७३ ॥ त्वं माता सर्वदेवानां त्वमेव जगतां पतिः ॥ देवतार्थं तु त्वं भद्रे धत्स्व तेजस्तु शांभवम् ॥७४॥ तद्वह्नेर्वर्द्धते गर्भो नास्त्रीत्वात्प्रसवोऽस्य च ॥ तस्मादेनं च नः सर्वान्समुद्धर दयां कुरु ॥ ७५ ॥ इत्येवं प्रार्थिता देवी तथाऽस्त्विति वचोऽब्रवीत् ॥ देवास्तु वह्नये प्राहुर्मंत्रं गर्भविमोचनम् ॥ ७६ ॥ तन्मंत्राद्गर्भमाकृष्य व्यसृजद्धव्यवाहनः ॥ गंगायां शांभवं तेजो भास्वल्लोकसुदुःसहम् ॥ ७७ ॥

देवानां धाम स्वर्गं ययौ ॥ ६९ ॥ वह्नीरितमग्निवाक्यम्, हर्षशोकौ शिवसुतो भविष्यतीति हर्षम् अग्नेस्तापो भवतीति शोकम् । तदेवाह—स्थितमिति ॥७०॥ शिवेन आक्षिप्तं तेजः शुक्रम् ॥ ७१ ॥ ७२ ॥ गंगां भागीरथीं स्तोत्रेण वैभववर्णनेन स्तुत्या स्वकार्यप्रार्थनया ॥ ७३ ॥ पतिः पालनकर्त्री धत्स्व धारय ॥ ७४ ॥ एनं वह्निं, समुद्धर परिपालय ॥ ७५ ॥ प्राहुरुपदिदिशुः ॥ ७६ ॥ भास्वल्लोकसुदुःसहं तेजस्विनामप्यसह्यतेजस्कम् ॥ ७७ ॥

CC-0. In Public Domain. Digitization by eGangotri

सा गंगां कतिचिन्मासांस्तद्वीर्यमूढ्वा धारयित्वा तत्प्रभावेण शिववीर्यप्रभावेण, निर्जला वीर्यस्यात्युल्बणत्वात् ॥ ७८ ॥ ७९ ॥ शरकांडे नदीमध्ये जायमानतृणविशेषखंडे ॥ ८० ॥ चोदिताः प्रेरिताः षोढा षट्प्रकारेण, निर्भिन्नं शांभवं तेजः, संधाय संधितं कृत्वा ॥ ८१ ॥ तं षण्मुखं पुरुषम् ॥ ८२ ॥ ८३ ॥ शैलं कैलासं तत्स्थलं यत्र

सा चोढ्वा कतिचिन्मासान्न शशाक ततः परम् ॥ निर्जला तत्प्रभावेण स्फुटद्रक्तकलेवरा ॥ ७८ ॥ बहुदुःखाऽऽकुला देवी पातिव्रत्यप्रभावतः ॥ उज्जहार स्वोदरस्थं गर्भं लोकैकपावनी ॥ ७९ ॥ शरकांडे तु चिक्षेप दह्यमानं समन्ततः ॥ शरकांडैस्तु संभिन्नः षोढा भिन्नो बभूव ह ॥ ८० ॥ षट्कृत्तिकाः समाजग्मुर्ब्रह्मणा चोदितास्तदा ॥ शरकांडे विनिर्भिन्नं षोढा संधाय शांभवम् ॥ ८१ ॥ षण्मुखं पुरुषं कृत्वा त्वेकदेहमिति स्फुटम् ॥ कृत्तिका विधिनाऽऽज्ञप्तास्तं तथा चक्रिरे दृढम् ॥ ८२ ॥ तद्देहं पुरुषाकारं षण्मुखं शरकांडगम् ॥ अरक्ष्यमाणमेवासीच्छरकांडेषु वै चिरम् ॥ ८३ ॥ एकदा वृषभाऽरूढौ पार्वतीपरमेश्वरौ ॥ श्रीशैलं गंतुमनसौ तत्स्थलं परिजग्मतुः ॥ ८४ ॥ तदासीत्पार्वती देवी सद्यः स्नुतपयोधरा ॥ विस्मिता चावदद्रुद्रं स्नुतौ कस्मात्पयोधरौ ॥ ८५ ॥ कारणं ब्रूहि विश्वात्मन्नित्युक्तस्तु हरोऽब्रवीत् ॥ शृणु देवि प्रवक्ष्यामि पुत्रोऽधो वर्तते तव ॥ ८६ ॥ त्वयि वीर्यमनुत्सृष्टं प्रागेवाऽऽगाद्धविर्वहः ॥ तं दृष्ट्वा व्रीडिता त्वं वै प्रविष्टा च स्थलान्तरम् ॥ ८७ ॥ मया कोपाद्वह्नि मुखे विसृष्टं वीर्यमुल्बणम् ॥ देवानां च प्रसादेन गंगायां व्यसृजद्विभुः ॥ ८८ ॥ गंगा च दह्यमाना सा व्यक्षिपच्च शरान्तरं ॥ तत्र षोढा प्रभिन्नं तु मातृभिश्च दृढीकृतम् ॥ ८९ ॥ पुरुषाकृतिमापेदे तं दृष्ट्वा ते स्तनौ स्नुतौ ॥ पालनीयं महावीर्यं विष्णुना समविक्रमम् ॥ ९० ॥ अयमेवौरसः पुत्रस्तव भाति विनिश्चितम् ॥ तस्माद्गृहाण शीघ्रं त्वं तेनाऽऽख्यातिरतीव ते ॥ ९१ ॥ इत्याऽऽज्ञप्ता शंभुना सा तमादायाऽर्भकं द्रुतम् ॥ अंकमारोप्य तं देवी पाययामास सा स्तनौ ॥ ९२ ॥ देवेन मोहिता देवी पुत्रस्नेहपराऽभवत् ॥ पुनः कैलासमगमत्प्रभुणा सह शांकरी ॥ ९३ ॥ लालयंती सुतं देवी संतोषं परमं ययौ ॥ एवं कुमारजननं वर्णितं ते मयाऽद्भुतम् ॥ ९४ ॥

शरकांडे पुरुष आसीत्तदूर्ध्वम् ॥८४॥८५॥८६॥ हविर्वहो वह्निः ॥ ८७ ॥ ८८ ॥ मातृभिः षट्कृत्तिकाभिः, दृढीकृतं संहितम् ॥ ८९ ॥ पुरुषाकृतिं पुरुषाकारम्, आपेदे प्राप, तद्वीर्यमिति तं गर्भं विष्णुना समविक्रमं विष्णुतुल्यपराक्रमम् ॥ ९० ॥ ९१ ॥ ९२ ॥ ९३ ॥ ९४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ९५ ॥ अनु वारंवारम् ॥ ९६ ॥ ९७ ॥ यत्प्रभावात् वैशाखप्रभावात् ॥ ९८ ॥ ९९ ॥इति वैशाखमासमाहात्म्यटीकायां नवमोऽध्यायः ॥ ९ ॥ ॥छ॥ ॥
॥ अथाशून्यशयनव्रतविधानं प्रस्तौति—यदिति ॥ १ ॥ २ ॥ ३ ॥ जीमूताभः जीमूतो मेघस्तस्याभेवाऽऽभा यस्येति मेघश्याम इत्यर्थः ॥४॥५॥ ६ ॥ ७ ॥ चतुर्विधं

य इदं शृणुयान्नित्यं कुमारजननं शुभम् ॥ पुत्रपौत्राभिवृद्धिं तु लभते नाऽत्र संशयः ॥ ९५ ॥ महद्दुःखं तु जनने हरस्याऽपि यतोऽभवत् ॥ प्रीत्यानुश्रुतवैशाखधर्मोऽप्यप्रतिमो भवेत् ॥ ९६ ॥ तस्माद्वैशाखधर्मो हि सर्वाघौघविनाशनः ॥ अवैधव्यप्रदः पुण्यः सर्वसंपद्विधायकः ॥९७॥ अनंगोपि हि सांगत्वं यत्प्रभावात्समाप्तवान् ॥ अस्नात्वा चाप्यदत्त्वा च वैशाखो यस्य वै गतः ॥९८॥ अपि धर्मकृतो वाऽपि भवेद्दुःखपरंपरा ॥ सर्वधर्मो हितः स्याच्च यद्येकोऽयमनुष्ठितः॥ ९९ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे वैशाखमासमाहात्म्ये नारदांबरीषसंवादे कुमारोत्पत्तिकथनंनाम नवमोऽध्यायः ॥ ९ ॥ ॥छ॥ ॥ ॥ मैथिल उवाच ॥ ॥ यत्कामपत्नीचरितमशून्यशयनव्रतम् ॥ देवोपदिष्टं तस्याऽस्य विधानं ब्रूहि भूसुर ॥ १ ॥ किं दानं को विधिस्तस्य पूजनं किं फलं तथा ॥ एतदाचक्ष्व भूदेव श्रोतुं कौतूहलं हि मे ॥ २ ॥ ॥ श्रुतदेव उवाच ॥ ॥ शृणु भूयः प्रवक्ष्यामि व्रतं पापप्रणाशनम् ॥ अशून्यशयनं नाम रमायै हरिणोदितम् ॥ ३ ॥ येन चीर्णे न देवेशो जीमूताऽऽभः प्रसीदति ॥ लक्ष्मीभर्त्ता जगन्नाथः समस्ताऽघौघनाशनः ॥ ४ ॥ अकृत्वा यस्त्विदं राजन्व्रतं पातकनाशनम् ॥ गार्हस्थ्यमनुवर्तेत तस्येदं निष्फलं भवेत् ॥ ५ ॥ श्रावणे शुक्लपक्षे तु द्वितीयायां महीपते ॥ अशून्यशयनाख्यं तद्ग्राह्यं व्रतमनुत्तमम् ॥६॥ चातुर्मास्ये तु संप्राप्ते हविष्याशी भवेन्नरः ॥ चतुर्भिः पारणं मासैः सम्यङ्निष्पाद्यते प्रभो ॥७॥ लक्ष्मीयुक्तो जगन्नाथः पूजनीयो जनार्दनः ॥ पारणे दिवसे प्राप्ते भक्ष्यं चैव चतुर्विधम् ॥ ८ ॥ उपायनं च दातव्यं ब्राह्मणाय कुटुंबिने ॥ सौवर्णीं राजतीं चापि मूर्तिं कुर्यान्मनोरमाम् ॥ ९ ॥ पीताम्बरधरां दिव्यां वनमालाविभूषिताम् ॥ शुक्लपुष्पैः सुगंधैश्च पूजयेत्पुरुषोत्तमम् ॥ १० ॥ शय्यादानैर्वस्त्रदानैर्विप्राणां भोजनैस्तथा ॥ दम्पत्योर्भोजनैश्चैव दक्षिणाभिः प्रपूजयेत् ॥ ११ ॥ एवं तु चतुरो मासान्पूजयित्वा जनार्दनम् ॥ मार्गशीर्षादिमासेषु पूजयेत्पूर्ववद्धरिम् ॥ १२ ॥ रक्तवर्णं हरिं ध्यायेद्रुक्मिणीसहितं तथा ॥ चैत्रादींश्चतुरो मासानेवं संपूजयेत्ततः ॥ १३ ॥ भूम्या सह स्थितं देवमर्चयेद्भक्तिपूर्वकम् ॥ सनंदनाद्यैर्मुनिभिः स्तूयमानमकल्मषम् ॥ १४ ॥ आषाढस्य च मासस्य द्वितीयायां समापयेत् ॥ अष्टाक्षरेण मंत्रेण जुहुयादनले शुभे ॥ १५ ॥

लेह्यचोष्यपेयखाद्यभेदेनेति ॥ ८ ॥ ९ ॥ १० ॥ भाजनैः पात्रैः ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ अष्टाक्षरमंत्रो यथा—"ॐ नमो नारायणाय" इति ॥ १५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विष्णुगायत्री यथा "ॐ नारायणाय विद्महे वासुदेवाय धीमहि ॥ तन्नो विष्णुः प्रचोदयात्" इति ॥ १६ ॥ १७ ॥ श्रावणादिमासचतुष्टये लक्ष्मीनारायणस्य सौवर्णीं प्रतिमां दद्यात् ॥ १८॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ तस्यां शय्यायाम् अपूर्वैः उत्तमशय्योपस्करपदार्थैः ॥ २३ ॥ विशिष्टाय दानयोग्याय ॥ २४ ॥ २५ ॥ २६ ॥

मार्गशीर्षादिमासानां पारणे भूमिपालक ॥ जुहुयाद्विष्णुगायत्र्या चैत्रादीनां निबोधय ॥ १६ ॥ पौरुषेण च मंत्रेण जुहुयादनले शुभे ॥ पञ्चामृतं पायसं च ह्यपूपं घृतपाचितम् ॥ १७ ॥ एवं क्रमेण द्रव्याणि प्रतिमासु निबोधय ॥ सौवर्णीं प्रतिमां दद्याल्लक्ष्मीनारायणस्य च ॥ १८ ॥ सौवर्णीं मध्यमे दद्यात्कृष्णस्य परमात्मनः ॥ राजतीं त्वंतिमे दद्याद्वराहस्य महात्मनः ॥ १९ ॥ ब्राह्मणान्भोजयेत्पश्चान्नामभिः केशवादिभिः ॥ वस्त्रयुग्मैरलंकारैर्यथावित्तानुसारतः ॥ २० ॥ अर्चयित्वा ततो दद्यादपूपान्घृतपाचितान् ॥ उपायनार्थं विप्रेभ्यो द्वादशभ्यो निवेदयेत् ॥ २१ ॥ आचार्याय ततो दद्यात्प्रतिमां पूर्वकल्पिताम् ॥ शय्यां संकल्पितां पूर्णां सर्वालंकारभूषिताम् ॥ २२ ॥ तस्यामभ्यर्च्य विधिवल्लक्ष्मीनारायणं परम् ॥ कांस्यपात्रेण सहितामपूपैर्बहुभिस्तथा ॥ २३ ॥ वस्त्रालंकारसहितां दक्षिणाभिस्तथैव च ॥ ब्राह्मणाय विशिष्टाय वैष्णवाय कुटुंबिने ॥ ॥ २४ ॥ दातव्या विधिवत्पूज्य ब्राह्मणांश्चापि भोजयेत् ॥ ॥ दानमन्त्रः ॥ ॥ लक्ष्म्या अशून्यं शयनं यथा तव जनार्दन ॥२५॥ शय्या ममाप्यशून्या स्याद्दानेनाऽनेन केशव ॥ एवं सम्प्रार्थ्य देवेशं स्वयं भोजनमाचरेत् ॥ २६ ॥ पुरुषो वा सती वाऽपि विधवा वा समाचरेत् ॥ अशून्यशयनार्थं च कर्तव्यं व्रतमुत्तमम् ॥ २७ ॥ एवं तव मया ख्यातं विस्तरान्नृपसत्तम ॥ सुप्रसन्ने जगन्नाथे भवेयुर्विविधाः प्रजाः ॥ २८ ॥ तस्मिंस्तुष्टे तु देवेशे देवानामपि दुर्लभाः ॥ तस्मात्सर्वप्रयत्नेन व्रतमेतत्समाचरेत् ॥ २९ ॥ अवश्यं गन्तुकामेन तद्विष्णोः परमं पदम् ॥ एवमुक्तं मया सर्वं किमन्यच्छ्रोतुमिच्छसि ॥ ३० ॥ इत्युक्तस्तेन राजर्षिः पुनरप्याह तं मुनिम् ॥ वैशाखे छत्रदानस्य माहात्म्यं विस्तराद्वद ॥ ३१ ॥ शृण्वतोऽपि न तृप्तिर्मे वैशाखोक्तान्च्छुभावहान् ॥ ३२ ॥ इति तद्वचनं श्रुत्वा यशस्यं पुण्यवर्द्धनम् ॥ प्रत्युवाच महाभागं श्रुतदेवो महायशाः ॥३३ ॥ ॥ श्रुतदेव उवाच ॥ ॥ वैशाखे घर्मतप्तानां मानवानां महात्मनाम् ॥ ये कुर्वन्त्यातपत्राणं तेषां पुण्यमनंतकम् ॥ ३४ ॥ अत्रैवोदाहरन्तीममितिहासं पुरातनम् ॥ वैशाखधर्ममुद्दिश्य पुरा कृतयुगे कृतम् ॥ ३५ ॥

॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ धर्मानिति शेषः ॥ ३२ ॥ ३३ ॥ आतपत्राणम् उष्णाद्रक्षणम् ॥ ३४ ॥ कृतं जातम् ॥ ३५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥ कर्तुमिति शेषः ॥ ४० ॥ ४१ ॥ ४२ ॥ ४३ ॥ ४४ ॥ ४५ ॥ शरासनात् धनुष्यात् ॥ ४६ ॥ ४७ ॥ ४८ ॥

वङ्गदेशे पुरा कश्चिद्धेमकान्त इति श्रुतः॥ कुशकेतोः सुतो धीमान्राजा शस्त्रभृतां वरः ॥ एकदा मृगयाऽऽसक्तो गहनं वनमाविशत् ॥ ३६ ॥ तत्र नानाविधान्हत्वा मृगान्क्रोडादिकान्बहून् ॥ श्रांतो मध्याह्नवेलायां मुनीनामाश्रमं ययौ ॥ ३७ ॥ तदा शतर्चिनोनाम ऋषयः शंसितव्रताः ॥ समाधिस्था न जानन्ति बाह्यकृत्यं च किंचन ॥ ३८ ॥ तान्दृष्ट्वा निश्चलान्विप्रान्क्रुद्धो हंतुं मनो दधे ॥ भूपं निवारयामास शिष्याणामयुतं तदा ॥ ३९ ॥ दुर्बुद्ध शृणु नो वाक्यं गुरवस्तु समाधिगाः ॥ नो जानन्ति बहिःकृत्यं तस्मात्क्रोधं न चार्हसि ॥ ४० ॥ ततः शिष्यानुवाचेदं वचनं क्रोधविह्वलः ॥ यूयं कुरुध्वमातिथ्यमध्वश्रांतस्य मे द्विजाः॥ ४१ ॥ एवमुक्ताश्च भूपेन शिष्या ऊचुस्तदा नृपम् ॥ नाऽऽज्ञप्ता गुरुभिर्भूप वयं भिक्षाशिनः पुनः ॥ ४२ ॥ गुरुतन्त्राः कथं कर्तुमातिथ्यं ते वयं क्षमाः ॥ प्रत्याख्यातो नृपः शिष्यैस्तान्हंतुं धनुराददे ॥ ४३ ॥ मृगदस्यु भयादिभ्यो बहुधा रक्षिता मया ॥ ते मामेवोपशिक्षंति मया दत्तप्रतिग्रहाः ॥ ४४ ॥ एते मां न विजानंति कृतघ्ना भूरिमानिनः ॥ घ्नतोपि मे न दोषः स्यादेतान्वै ह्याततायिनः ॥ ४५ ॥ एवं विक्रुद्धमानः सञ्छरान्मुंचञ्च्छरासनात् ॥ तान्विद्रुताननुद्रुत्य जघ्ने शिष्यशतत्रयम् ॥४६॥ दुद्रुवुर्भयतः सर्वे विहायाऽऽश्रममञ्जसा ॥ विद्रावितेषु शिष्येषु बलादाश्रमसंस्थितान् ॥ ४७ ॥ संभाराञ्जगृहुः शीघ्रं सैनिकाः पापबुद्धयः ॥ यथेष्टं भोजनं चक्रुर्नृपेणैवानुमोदिताः ॥ ४८ ॥ ततः सेनाऽऽवृतो राजा पुरीमागाद्दिनात्यये ॥ कुशकेतुस्ततः श्रुत्वा तनयस्य विचेष्टितम् ॥ ४९ ॥ पुरान्निर्यातयामास गर्हयन्गर्हयन्सुतम् ॥ राज्यानर्हं क्षमाहीनं स्वदेशादपि भूमिप ॥ ५० ॥ पित्रा त्यक्तस्ततो राजा हेमकांतोऽतिविह्वलः ॥ वनं विवेश गहनं हत्याभिश्च सुपीडितः ॥ ५१ ॥ बहुकालमवासीच्च गह्वरे निर्जने वने ॥ आहारं कल्पयामास व्याधधर्मसुपाश्रितः ॥ ५२ ॥ न क्वाऽपि स्थितिमापेदे हत्ययाऽभिद्रुतो भृशम् ॥ अष्टाविंशतिवर्षाणि गतान्यस्य दुरात्मनः ॥ ५३ ॥ तीर्थयात्राप्रसंगेन त्रितोनाम महामुनिः ॥ तस्मिन्नरण्ये वैशाखे रवौ मध्यंदिने गते ॥ ५४ ॥

दिनात्यये सायंकाले ॥ ४९ ॥ ५० ॥ ५१ ॥ ५२ ॥ ५३ ॥ ५४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu.

CC-0. In Public Domain. Digitization by eGangotri

॥ ५५ ॥ ५६ ॥ ब्रह्मपत्रैः पलाशवृक्षपत्रैः, जग्राह दधारेत्यर्थः । अलाबुस्थं तुम्बीफलपात्रस्थम् ॥ ५७ ॥ ५८ ॥ ५९ ॥ ६० ॥ ६१ ॥ ६२ ॥

गच्छन्नातपविक्रांतस्तृषया चाऽपि पीडितः ॥ क्वचिद्वृक्षविहीने तु प्रदेशे मूर्च्छितोऽभवत् ॥ ५५ ॥ दैवाद्दृष्ट्वा हेमकांतस्त्रितंनाम महामुनिम् ॥ तृषार्तं मूर्छितं श्रांतं कृपां चक्रे नृपाधमः ॥५६॥ ब्रह्मपत्रैस्तदा छत्रं कृत्वा चाऽऽतपवारणम् ॥ मुनेर्जग्राह शिरसि ह्यलाबुस्थं जलं ददौ ॥ ५७ ॥ लब्धसंज्ञोऽभवत्तेन ह्युपचारेण वै मुनिः ॥ पत्रच्छत्रं क्षत्रदत्तं गृहीत्वा गतविक्लमः ॥ ५८ ॥ ग्रामं क्वचिच्छनैः प्राप्य किञ्चिदाप्यायितेन्द्रियः ॥ तेन पुण्यप्रभावेन ब्रह्महत्याशतत्रयम् ॥ ५९ ॥ विनष्टमभवत्तस्य क्षणादेव महात्मनः ॥ ततो विस्मयमापन्नो हेमकान्तो महारथः ॥६०॥ बहुधा पीड्यमानस्य ब्रह्महत्याः कथं गताः ॥ केनाऽपि निष्कृता ह्येताः क्व गताः केन हेतुना ॥६१॥ इत्येवं चिन्तयामास ब्रह्महत्याविमोचनम् ॥ एवं चाऽज्ञस्थिते राज्ञि यमदूता अथाऽऽगमन्॥६२॥ नेतुमेनं महात्मानं हेमकांतं वने स्थितम् ॥ ग्रहणीं जनयामासुः प्राणान्हर्तुं महात्मनः॥६३॥ तदा प्राणवियोगार्तः पुरुषांस्त्रीन्ददर्श ह ॥ यमदूतान्महाघोरानूर्ध्वकेशान्भयंकरान् ॥ ६४ ॥ चिन्तयानः स्वकर्माणि तूष्णीमासीत्तदा नृपः ॥ छत्रदानप्रभावेन जाता विष्णुस्मृतिर्नृप ॥ ६५ ॥ तेन स्मृतो महाविष्णुर्विष्वक्सेनं स्वमंत्रिणम् ॥ उवाच तूर्णं त्वं गच्छ यमदूतान्निवारय ॥६६॥ वैशाखधर्मनिरतं हेमकांतं तु पालय ॥ निष्पापमेनं मद्भक्तं पित्रे देहि पुरं गतः ॥ ६७ ॥ मदीरितेन वाक्येन कुशकेतुं च बोधय ॥ सर्वधर्म्मोज्झितो वापि ब्रह्मचर्यादिवर्जितः ॥ ६८ ॥ वैशाखधर्मनिरतो मत्प्रियः स्यान्न संशयः ॥ कृतागाश्चाऽपि त्वत्पुत्रो मुनित्राणपरायणः ॥ ६९ ॥ वैशाखे छत्रदानेन निष्पापो नाऽत्र संशयः ॥ तेन पुण्यप्रभावेन शांतो दान्तश्चिरायुषः ॥ ७० ॥ शौर्यौदार्यगुणोपेतस्त्वत्समोऽयं गुणैरपि ॥ तस्मादेनं राज्यभारे संस्थापय महाबलम् ॥ ७१ ॥ विष्णुनैवं समाज्ञप्तमित्यादिश्य नृपोत्तमम् ॥ पितुर्वशे हेमकांतं स्थाप्याऽऽयाहि च मां पुनः ॥ ७२ ॥ इत्यादिष्टो भगवता विष्वक्सेनो महाबलः ॥ हेमकान्तं समासाद्य यमदूतान्निवार्य च ॥ ७३ ॥ पाणिना शंतमेनैव परस्पर्शाङ्गेषु भूमिपम् ॥ भगवद्भक्तसंस्पर्शाद्धतव्याधिः क्षणादभूत् ॥ ७४ ॥

ग्रहणीं संग्रहणीरोगम् ॥ ६३ ॥ ६४ ॥ ६५ ॥ ६६ ॥ ६७ ॥ ६८ ॥ कृतागाः कृतापराधः ॥ ६९ ॥ ७० ॥ ७१ ॥ ७२ ॥ ७३ ॥ ७४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ७५॥७६॥७७॥७८॥७९॥८०॥८१॥८२॥ पुमर्थहेतून् धर्मार्थकाममोक्षप्रापकान् ॥८३॥ ८४ ॥ इति वैशाखमासमाहात्म्यटीकायां दशमोऽध्यायः ॥ १० ॥

विष्वक्सेनस्ततस्तेन सह तस्य पुरीं ययौ ॥ तं दृष्ट्वा विस्मितो भूत्वा कुशकेतुर्महाप्रभुः ॥ ७५ ॥ ननाम शिरसा भक्त्या दण्डवत्पतितो भुवि ॥ गृहं प्रवेशयामास पार्षदं परमात्मनः ॥ ७६ ॥ स्तुत्वा च विविधैः स्तोत्रैः पूजयामास वैभवैः ॥ तस्मै प्रीतमनाः प्राह विष्वक्सेनो महाबलः ॥ ॥ ७७ ॥ हेमकान्तं समुद्दिश्य यदुक्तं विष्णुना पुरा ॥ तच्छ्रुत्वा कुशकेतुश्च पुत्रं राज्ये निवेश्य च ॥ ७८ ॥ विष्वक्सेनाभ्यनुज्ञातः सभार्यो वनमाविशत् ॥ विष्वक्सेनो हेमकान्तमनुमंत्र्याभिपूज्य च ॥ ७९ ॥ श्वेतद्वीपं ययौ धीमान्विष्णुपार्श्वे महामनाः ॥ हेमकांतस्ततो राजा वैशाखोक्ताञ्छुभावहान्॥८०॥ विष्णुप्रीतिकरान्धर्मान्प्रतिवर्षं चकार ह ॥ ब्रह्मण्यो धर्ममार्गस्थः शान्तो दान्तो जितेन्द्रियः ॥ ८१ ॥ दयालुः सर्वभूतेषु सर्वयज्ञेषु दीक्षितः ॥ प्रवृद्धः सर्वसम्पद्भिः पुत्रपौत्रादिभिर्वृतः ॥ ८२ ॥ भुक्त्वा भोगान्समस्तांश्च विष्णुलोकमवाप्तवान् ॥ ८३ ॥ नेक्षे तु वैशाखसमांश्च धर्मान्सुखप्रयत्नान्बहुपुण्यहेतून् ॥ पापेन्धनाग्निनिभान्सुलभ्यान्धर्मादिमोक्षान्तपुमर्थहेतून् ॥ ८४ ॥ इति श्रीस्कान्दे महापुराण एकाशीति साहस्र्यां संहितायां द्वितीये वैष्णवखंडे वैशाखमासमाहात्म्ये नारदाम्बरीषसंवादे छत्रदानप्रशंसने हेमकांतस्य ब्रह्महत्यादि पापशमनवर्णनंनाम दशमोऽध्यायः ॥ १० ॥ ॥ छ ॥ ॥ मैथिल उवाच ॥ ॥ वैशाखधर्माः सुलभाः पुण्यराशिविधायकाः ॥ विष्णुप्रीतिकराः सद्यः पुमर्थानां तु हेतवः ॥ १ ॥ न प्रख्याताः कथं लोके शाश्वताः श्रुतिचोदिताः ॥ प्रख्याता राजसा धर्मास्तामसा अपि भूरिशः ॥ २ ॥ दुर्घटा बहुयत्नाश्च बहुद्रव्यव्ययावहाः ॥ केचिन्माघं प्रशंसन्ति चातुर्मास्यान्परे जगुः ॥ ३ ॥ व्यतीपातादिधर्मांश्च वर्णयन्तीह भूरिशः ॥ एतद्विवेकं विस्तार्य श्रोतुकामाय मे वद ॥ ४ ॥ ॥ श्रुतदेव उवाच ॥ ॥ शृणु भूप प्रवक्ष्यामि न प्रख्याता इमे कथम् ॥ इतरेषां च धर्माणां कथं ख्यातिश्च भूतले ॥ ५ ॥ राजसास्तामसा भूमौ बहवः कामुका जनाः ॥ इच्छंत्यैहिकभोगांस्ते पुत्रपौत्रादिसंपदः ॥ ६ ॥ क्वचित्कथंचन क्वाऽपि जनेष्वेकोऽतिकृच्छ्रतः ॥ स्वर्गाय यतते लोके तस्माद्यज्ञादिसत्क्रियाः ॥ ७ ॥ कुरुतेऽतिप्रयत्नेन मोक्षं नोपासते नरः ॥ क्षुद्राशा भूरिकर्माणो जनाः काम्यानुपासते ॥ ८ ॥

अथ वैशाखधर्माणां श्रेष्ठत्वं प्रतिपादयितुं मैथिलनृपस्य प्रश्नं प्रस्तौति—वैशाखेत्यादिना ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ९ ॥ १० ॥ तथा वैशाखधर्माऽऽचरणेन सर्वः मनोरथः सिद्धो भवति, अन्यदिति शेषः ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ वृक्षे वृक्षच्छायासु ॥

प्रख्याता राजसा धर्मास्तामसा अपि तेन वै ॥ न ख्याताः सात्त्विका धर्मा हरिप्रीतिकरा इमे ॥ ९ ॥ निष्कामिका इमे धर्मा ह्यैहि
काऽऽमुष्मिकप्रदाः ॥ न जानन्ति जना मूढा मोहिता देवमायया ॥ १० ॥ यथाऽऽधिपत्ये संप्राप्ते सर्वसिद्धो मनोरथः ॥ मोहनार्थं
स्थलं प्राप्तमाधिपत्येन हीयते ॥ ११ ॥ कारणं च प्रवक्ष्यामि गोपने भूतलेंऽजसा ॥ यद्वैशाखोक्तधर्माणां सात्त्विकानां नृणामिह ॥ १२ ॥
सार्वभौमः पुरा काश्यामिक्ष्वाकुकुलभूषणः ॥ कीर्तिमानितिविख्यातो नृगपुत्रो महायशाः ॥ १३ ॥ जितेंद्रियो जितक्रोधो ब्रह्मण्यो राज
सत्तमः ॥ एकदा मृगयासक्तो वसिष्ठाश्रममाययौ ॥ १४ ॥ गच्छन्मार्गे ददर्शाऽसौ वैशाखे धर्मनिष्ठुरे ॥ भूयोभूयः कार्यमाणाञ्छिष्यांस्तस्य
महात्मनः ॥ १५ ॥ क्वचित्प्रपां प्रकुर्वन्ति छायामण्डपमेव च ॥ तटप्रपातं निस्तीर्य वापीं कुर्वन्ति निर्मलाम् ॥ १६ ॥ सूपविष्टान्क्वचिद्वृक्षे व्यज
नैर्वीजयन्ति च ॥ क्वचिद्दधुर्हीक्षुदण्डान्क्वचिद्गन्धान्क्वचित्फलम्॥१७॥मध्याह्ने छत्रदानं च सायाह्ने पानकस्य च ॥ क्वचिद्यच्छंति ताम्बूलं नेत्रे
कर्पूरलेपनम् ॥ १८ ॥ सुच्छाये च वने केचित्सुसंमृष्टांऽगणेषु च ॥ केचिदास्तरयंत्यद्धा वालुकानि हितानि च ॥ १९ ॥ कुर्वन्त्यांदोलिकां राज
न्वृक्षशाखावलंबिनीम् ॥ के यूयमिति पप्रच्छ वासिष्ठा इति तेऽब्रुवन् ॥ २० ॥ किमेतदिति पप्रच्छ धर्मा वैशाखचोदिताः ॥ पुमर्थहेतव इमे
क्रियन्तेऽस्माभिरञ्जसा ॥ २१ ॥ वसिष्ठस्याऽऽज्ञया चेति तेऽब्रुवन्नृपसत्तमम् ॥ एतदाचरणे पुंसां किं फलं कस्तु तुष्यति ॥२२॥ एतद्विस्तार्य
मे ब्रूत यूयं सम्यग्यथाश्रुतम् ॥ इति राज्ञा तु संपृष्टाः प्रत्यूचुस्ते महीपतिम् ॥ २३ ॥ गुरोराज्ञाक्रमेणैव कुर्वतां पथि सत्क्रियाः ॥ नास्माक
मवकाशोऽत्र गुरुं पृच्छ यथोचितम् ॥ २४ ॥ स वेत्ति तत्त्वतो नूनं धर्मानेतान्महायशाः ॥ इति शिष्यैर्वसिष्ठस्य प्रत्युक्तस्तु द्रुतं ययौ ॥२५॥
वसिष्ठस्याऽश्रमं पुण्यं विद्यायोगोपबृंहितम् ॥ समायान्तं नृपं वीक्ष्य वसिष्ठः प्रीतमानसः ॥२६॥ आतिथ्यं विधिवच्चक्रे सानुगस्य महात्मनः॥
सूपविष्टः कृताऽतिथ्यः प्रीतः पप्रच्छ तं गुरुम् ॥ २७ ॥ ॥ राजोवाच ॥ ॥ मार्गे दृष्टं महाश्चर्यं त्वच्छिष्यैश्च कृतं शुभम् ॥ मया पृष्टं च
तैर्नोक्तं क्रियमाणं शुभावहम् ॥ २८ ॥ नास्माकमवकाशोऽत्र ह्येतद्धर्मप्रशंसने ॥ कर्तव्या च क्रियाऽस्माभिर्गुरुणा या च चोदिता ॥ २९ ॥

॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ उपबृंहितं वर्धितम् ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥ ४२ ॥ ४३ ॥ अथ कर्मणो महदल्पफलव्यवस्थामुपदर्शयति—महदिति सार्द्धेन । महत् महाप्रयासादिभिः साध्यं यत् कर्म तत् अल्पदम् अल्पफलदं भवति, अल्पम् अल्पप्रयासादिसाध्यं कर्म भूरिदं

गुरुं गच्छेति तैरुक्त आगतोऽहं तवांतिकम् ॥ मृगयाऽऽसक्तचित्तेन श्रांतेनातिथ्यमिच्छता ॥ ३० ॥ दृष्टं मार्गे त्विदं पुण्यं तव शिष्यैश्च कारितम् ॥ जिज्ञासाऽऽसीत्ततः श्रोतुं धर्मानेतान्मुनीश्वर ॥ ३१ ॥ त्वमादिरादिमान्धर्मान्समाचरसि वै यतः ॥ तान्धर्माञ्छ्रोतुकामाय शिष्याय प्रणताय च ॥ ३२ ॥ श्रद्दधानाय मे ब्रूहि विस्तरान्मुनिपुंगव ॥ इतीक्ष्वाकुकुलीनेन राज्ञा पृष्टो महायशाः ॥ ३३ ॥ मनसा तोषमापेदे सम्यक्पृष्टोऽधुनाऽमुना ॥ अहो व्यवसिता बुद्धी राजंस्तेऽद्य सुशिक्षिता ॥ ३४ ॥ यस्माद्विष्णुकथायां च तद्धर्माचरणेऽपि च ॥ मतिरात्यंतिकी जाता सुकृतं फलितं तव ॥ ३५ ॥ इति संभाष्य राजानं जातहर्षस्तमब्रवीत् ॥ शृणु भूप प्रवक्ष्यामि यत्पृष्टोऽहं त्वयाऽधुना ॥ ३६ ॥ यस्य श्रवणमात्रेण मुच्यते सर्वकिल्बिषैः ॥ सर्वधर्मान्परित्यज्य वर्तते विषयात्मकः ॥३७॥ वैशाखस्नाननिरतः स प्रियो मधुविद्विषः ॥ सांगान्धर्माननुष्ठाय वैशाखो येन नादृतः ॥ ३८ ॥ स्नानदानार्चनैः पुण्यैस्तस्य दूरतरो हरिः ॥ अस्नाप्य चाऽप्यदत्त्वा च वैशाखो येन नीयते ॥ ३९ ॥ कर्मणा स तु चण्डालो नाऽत्र कार्या विचारणा ॥ वैशाखोक्तैर्महाधर्मैर्येन चाऽऽराधितो हरिः ॥ ४० ॥ तैश्च तोषं समायाति प्रददाति समीहितम् ॥ लक्ष्मीभर्त्ता जगन्नाथो ह्यशेषाघौघनाशनः ॥ ४१ ॥ धर्मैः सूक्ष्मैश्च प्रीणाति न प्रयासैर्धनैरपि ॥ भक्त्या संपूजितो विष्णुः प्रददाति समीहितम् ॥ ४२ ॥ तस्माद्राजन्सदा भक्तिः कर्तव्या मधुविद्विषः ॥ जलेनाऽपि जगन्नाथः पूजितः क्लेशहा हरिः ॥ ४३ ॥ परितोषं व्रजत्याशु तृषार्तः सलिलैर्यथा ॥ महदप्यल्पदं कर्म तथा ह्यल्पं च भूरिदम् ॥ ४४ ॥ कर्मणाऽल्पत्वभूरित्वे न हेतू महदल्पके ॥ किन्तु कर्मस्वरूपं च गहना कर्मणो गतिः ॥ ४५ ॥ वैशाखोक्ता इमे धर्माः स्वल्पाऽऽयासकृता अपि ॥ बहुव्ययविनाशाश्च विष्णोः प्रीतिकराः शुभाः ॥ ४६ ॥

भूरिफलप्रदायकं भवति ॥ ४४ ॥ कर्मणः अल्पत्वभूरित्वे अल्पभूरिप्रदायकत्वे हेतू कारणे महदल्पके तत्तत्कर्मणः महत्त्वाल्पत्वेन किंतु कर्मस्वरूपमेव महदल्पफलप्रदत्वे हेतुः । गहना दुर्ज्ञेया ॥ ४५ ॥ ४६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वैशाखोक्तान् धर्मानिति शेषः ॥ ४७ ॥ ४८ ॥ ४९ ॥ ५० ॥ ५१ ॥ मतङ्ग एव मातङ्गस्तस्मिन् मातंगे गजे 'मतङ्गजो मजो नागः' इत्यमरः ॥ ५२ ॥ विषयात् देशात् ॥ ५३ ॥ ५४ ॥ ५५ ॥ ५६ ॥ ५७ ॥ ५८ ॥ ५९ ॥ ६० ॥ रविसूनुर्यमः वैलेख्यं लेखनकर्माभावम् अगमत् ॥ ६१ ॥

तस्मात्त्वमपि भूपाल वैशाखोक्तान्समाचर॥त्वद्राष्ट्रीयैर्जनैः सर्वैः कारयेमाञ्छुभावहान्॥४७॥न करोति च यो धर्मान्वैशाखोक्तान्नराधमः॥बहुधा शिष्यमाणोऽपि स दण्डयस्तव भूपते ॥४८॥ इत्यावश्यकतां सम्यक्छास्त्रैर्व्युत्पाद्य तस्य च ॥ पश्चाद्वैशाखनिर्दिष्टान्धर्मान्प्रोवाच सर्वशः॥४९॥ श्रुत्वा तान्सकलान्धर्मान्गुरुं संपूज्य भक्तितः ॥ स राजा गृहमागत्य सर्वान्धर्मांश्चकार ह ॥ ५० ॥ भक्तिमान्केशवे राजन्देवदेवे निरञ्जने ॥ नाऽन्यं पश्यति देवेशात्पद्मनाभान्महीपतिः ॥ ५१ ॥ भेरीमुद्राह्य मातंगं स्वराष्ट्रेऽघोषयद्भटैः ॥ अष्टवर्षाधिको मर्त्यो ह्यशीतिर्नहि पूर्यते ॥ ५२ ॥ प्रातर्न स्नाति मेषस्थे सूर्ये सर्वोऽपि यो जनः ॥ स मे दंडयश्च वध्यश्च निर्यास्यो विषयाद्धुवम् ॥ ५३ ॥ पिता वा यदि वा पुत्रो भार्या वाऽथ सुहृज्जनः ॥ वैशाखधर्महीनश्च निर्ग्राह्यो दस्युवन्मया ॥ ५४ ॥ दातव्यं विप्रमुख्येभ्यः स्नात्वा प्रातर्जले शुभे ॥ प्रपादानादिधर्मांश्च कुरुध्वं शक्तितोऽनघाः ॥ ५५ ॥ विप्रं च धर्मवक्तारं ग्रामेग्रामे न्यवेशयत् ॥ पञ्चानामपि ग्रामाणामकरोदधिकारिणम् ॥ ५६ ॥ दण्डार्थं त्यक्तधर्माणां दशवाजिनिषेवितम् ॥ एवं प्रवृत्तः सर्वत्र सार्वभौमस्य शासनात् ॥ ५७ ॥ प्रवृद्धो धर्मवृक्षोयं सर्वदेशेषु विस्तरात् ॥ ये केचिन्निधनं यांति भूपालविषये नराः ॥ ५८ ॥ प्रमादाच्च नृपश्रेष्ठ ते यांति हरिमन्दिरम् ॥ अवश्यं वैष्णवो लोकः प्राप्यते मानवैर्द्धतम् ॥ ५९ ॥ व्याजेनाऽपि सकृत्स्नातः प्रातर्मेषगते रवौ ॥ सर्वपापविनिर्मुक्तो याति विष्णोः परं पदम् ॥ ६० ॥ न प्राप्नोति यमं धर्मं सकृद्वैशाखस्नानतः ॥ वैलेख्यमगमद्राजा रविसूनुस्तदा नृप ॥ ६१ ॥ लेख्यकर्मणि विश्रान्तश्चित्रगुप्तोऽभवत्तदा ॥ मार्जितानि च लेख्यानि पुरा पापोद्भवानि च ॥ ६२ ॥ गच्छद्भिर्वैष्णवं लोकं स्वकर्मस्थैर्जनैः क्षणात् ॥ शून्यास्तु नरकाः सर्वे पापिप्राणिविवर्जिताः ॥ ६३ ॥ भग्नयानोऽभवन्मार्गो वैशाखस्य प्रभावतः ॥ सर्वेऽपि विमलाकारा जना यान्ति हरेः पदम् ॥ ६४ ॥ दिवौकसां तु ये लोकाः शून्याः सर्वे तथाऽभवन् ॥ शून्ये त्रिविष्टपे जाते शून्येषु नरकेषु च ॥ ६५ ॥ नारदो धर्मराजानं गत्वा चेदमुवाच ह ॥ नाक्रन्दः श्रूयते राजन्प्राक्च्छुतो नरके यथा ॥ ६६ ॥ तथा न क्रियते लेख्यं किंचिद्दुष्कृतकर्मणाम् ॥ चित्रगुप्तो मुनिरिव स्थितोऽयं मौनसंस्थितः ॥ ६७ ॥

॥ ६२ ॥ ६३ ॥ ६४ ॥ ६५ ॥ ६६ ॥ ६७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ६८ ॥ ६९ ॥ ७० ॥ ७१ ॥ ७२ ॥ ७३ ॥ ७४ ॥ ७५ ॥ ७६ ॥ सः पापदण्डाधिकार्यप्यहं काष्ठसमः काष्ठवन्निग्रहानुग्रहासमर्थः ॥ ७७ ॥ ७८ ॥ भवं भविष्यामीत्यर्थः ॥ ७९ ॥ ८० ॥ ८१ ॥ ८२ ॥ सज्जीकृतसर्वस्वः सज्जीकृताः सन्नद्धीकृताः सर्वस्वाः स्वकीयाः सेना इति यावत् येन सः ॥ ८३ ॥

कारणं ब्रूहि राजेंद्र न यान्ति तव मन्दिरम् ॥ मनुष्याः पापकर्माणो मायादम्भविवर्धिताः ॥ ६८ ॥ एवमुक्ते तु वचने नारदेन महात्मना ॥ प्राह वैवस्वतो राजा किंचिद्दैन्यसमन्वितः ॥ ६९ ॥ योऽयं नारद भूपालः पृथिव्यां सांप्रतं स्थितः ॥ सोऽतिभक्तो हृषीकेशे पुराणपुरुषोत्तमे ॥ ७० ॥ प्रबोधयति वैशाखधर्मे भेरीस्वनेन च ॥ अष्टवर्षाधिको मर्त्यो ह्यशीतिर्न हि पूर्यते ॥ ७१ ॥ यो वै ह्यकृतवैशाखः स मे दण्ड्यो न संशयः ॥ तद्भयाद्धि जनाः सर्वे नोल्लंघंति कदाचन ॥ ७२ ॥ गच्छंति वैष्णवं धाम कर्मणा तेन नारद ॥ वैशाखसेवनाल्लोका यास्यंति हरिमंदिरम् ॥ ७३ ॥ तेन राज्ञा मुनिश्रेष्ठ मार्गो लुप्तो ममाऽधुना ॥ कृता हि नरकाः शून्या लोकाश्चापि दिवौकसाम् ॥ ७४ ॥ विश्रांतो लेखको लेखे लिखितं मार्जितं जनैः ॥ वैशाखमासधर्मस्य माहात्म्यं त्वीदृशं मुने ॥ ७५ ॥ ब्रह्महत्यादिपापानि विमुक्तानि जनैर्द्विज ॥ कृत्वा वैशाखकृत्यानि यांति विष्णोः परं पदम् ॥ ७६ ॥ सोऽहं काष्ठसमो जातो न कश्चिन्मम गोचरः ॥ युद्धं कृत्वा तु तं हन्मि सर्वथाऽद्य महाबलम् ॥ ७७ ॥ अकृत्वा स्वामिकार्यं तु निर्व्यापारो यदि स्थितः ॥ तस्य वित्तं समश्नाति स याति नरकं ध्रुवम् ॥ ॥ ७८ ॥ यदि देवादवध्योऽयं तदा ब्रह्माणमेत्य च ॥ निवेद्य तस्मै तत्सर्वं पश्चात्स्वस्थस्थितिर्भवम् ॥ ७९ ॥ इत्युक्त्वा द्विजमामंत्र्य सानुगः प्रययौ भुवम् ॥ स कालो महिषारूढो दण्डमुद्यम्य भीषणम् ॥ ८० ॥ मृत्युरोगजराद्यैश्च पार्षदैश्च महोत्कटैः ॥ पञ्चाशत्कोटिसंख्याकैर्यमदूतैर्वृतस्ततः ॥ ८१ ॥ स तूर्णं तस्य राजर्षे रुरोध सकलां पुरीम् ॥ शंखं दध्मौ महाघोरं सर्वलोकभयंकरम् ॥ ८२ ॥ तच्छ्रुत्वा स तु राजर्षिर्ज्ञात्वा वैवस्वतं यमम् ॥ स सज्जीकृतसर्वस्वः पत्तनान्निर्ययौ रुषा ॥ ८३ ॥ तयोर्युद्धमभूत्तत्र भीषणं रोमहर्षणम् ॥ मृत्युं कालं तथा रोगं यमदूतपतिं तथा ॥ ८४ ॥ जित्वा क्षणेन राजर्षिर्द्रावयामास रोषतः ॥ ततः क्रुद्धो यमो राजा स्वयमभ्येत्य तं रुषा ॥ ८५ ॥ युयोध बहुभिर्बाणैः सिंहनादं चकार ह ॥ चकर्त राजा तस्याऽपि कार्मुकं विशिखैस्त्रिभिः ॥ ८६ ॥

॥ ८४ ॥ ८५ ॥ चकर्त चिच्छेद 'कृती—छेदने' इति धातोर्लिट्लकारस्य रूपम् ॥ ८६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

॥ ८७ ॥ निचखान विक्षेप ॥ ८८ ॥ अरि अराः सान्ति यस्य तदरि सुदर्शनचक्रम् ॥ ८९ ॥ ९० ॥ ९१ ॥ ९२ ॥ ९३ ॥ ९४ ॥ ९५ ॥ मूर्तामूर्तजनैः मूर्ता ब्रह्मोपासकाः, अमूर्ता जीवन्मुक्तास्तैर्वृतम् ॥ ९६ ॥ ९७ ॥ विग्रहसंस्थितैर्देहधरैः ॥ ९८ ॥ ९९ ॥ १०० ॥१०१॥१०२॥१०३॥ सूरस्यापत्यं सौरिः 'सूर

पुनश्चर्मासिमादाय यमो हंतुमथाऽऽगमत् ॥ तं दृष्ट्वा तु नृपः क्रुद्धः पुनश्छित्त्वाऽसिचर्मणी ॥ ८७ ॥ निचखान ललाटे च शरं कालोरग प्रभम् ॥ यमस्तेनाऽऽहतः क्रुद्धस्ततो दंडमुपाददे ॥ ब्रह्मास्त्रेण च संमंत्र्य दण्डं तस्मै मुमोच ह ॥ ८८ ॥ हाहाकारो महानासीज्जनानां पश्यतां तदा ॥ तदा विष्णुः स्वभक्तस्य रक्षायै प्राहिणोदरि ॥ ८९ ॥ विष्णुमुक्तं तदा चक्रं शीघ्रमागत्य तद्रणे ॥ यमदण्डेन संयुध्य तद्ब्रह्मास्त्रं निवार्य च ॥९०॥ यमं हंतुमथारेभे सहस्रारं महाद्भुतम् ॥ देवभक्तस्ततो भीतस्तदाऽस्तौच्चक्रमञ्जसा ॥९१॥ सहस्रार नमस्तेऽस्तु विष्णुपाणिविभूषण ॥ त्वं सर्वलोकरक्षायै हरिणा च धृतं पुरा ॥ ९२ ॥ त्वां याचेऽद्य यमं त्रातुं विष्णुभक्तं महाबलम् ॥ ९३ ॥ नृणां देवद्रुहां कालस्त्वमेव हि न चाऽपरः॥ तस्मादेनं यमं रक्ष कृपां कुरु जगत्पते ॥ ९४ ॥ नृपेणैवं स्तुतं चक्रं यमं हित्वा नृपांतिकम् ॥ पुनर्ययौ महाराज देवानां पश्यतां दिवि ॥ ९५ ॥ ततो यमोऽतिनिर्विण्णो ब्रह्मणः सदनं ययौ ॥ स ददर्श समासीनं मूर्तामूर्तजनैर्वृतम् ॥९६॥ ध्रुवाश्रयं जगद्बीजं सर्वलोकपितामहम्॥ उपास्यमानं विबुधैर्लोकपालैर्दिगीश्वरैः ॥ ९७ ॥ इतिहासपुराणाद्यैर्वेदैर्विग्रहसंस्थितैः ॥ मूर्तिमद्भिः समुद्रैश्च नदीभिश्च सरोवरैः ॥ ९८ ॥ देहवद्भिस्तथा वृक्षैरश्वत्थाद्यैरशेषितैः ॥ वापीकूपतडागैश्च मूर्तिमद्भिश्च पर्वतैः ॥ ९९ ॥ अहोरात्रैस्तथा पक्षैर्मासैः संवत्सरैस्तथा ॥ कलाकाष्ठा निमेषैश्च ऋतुभिश्चाऽयनैर्युगैः ॥ १०० ॥ संकल्पैश्च विकल्पैश्च निमिषोन्मेषणैस्तथा ॥ ऋक्षैर्योगैश्च करणैः पूर्णिमाभिः सुसंक्षयैः ॥ १०१ ॥ सुखैर्दुःखैर्भयैश्चैव लाभाऽलाभैर्जयाजयैः॥ सत्त्वेन रजसा चैव तमसा च समन्वितम्॥१०२॥ शांतमूढाऽतिप्रौढैश्च विकारैः प्राकृतैरपि ॥ वायुना देवदेवेन श्लेष्मपित्तादिभिर्वृतम् ॥ १०३ ॥ तेषां मध्येऽविशत्सौरिः सव्रीडा च वधूर्यथा ॥ विलोकयन्धरापृष्ठं म्लानवक्त्रं व्यदर्शयत् ॥१०४॥ संप्रविष्टं यमं दृष्ट्वा सकाशस्थं सहानुगम् ॥ विस्मितास्ते मिथः प्रोचुः किमर्थं भास्करिस्त्विह ॥ १०५ ॥ संप्राप्तो लोककर्तारं द्रष्टुं देवं पितामहम् ॥ निर्व्यापारः क्षणमपि योऽयं नास्ति रवेः सुतः ॥ १०६ ॥

सूर्यार्य मादित्य' इत्यमरः ॥ सूर्यपुत्रो यमः । वधूर्नवोढा स्त्रीः ॥ १०४ ॥ भास्करस्यापत्यं पुमान्भास्करिः 'अत इञ्' इत्यनेन इञ् । भास्करिर्यमः ॥ १०५ ॥१०६॥

CC-0. In Public Domain. Digitization by eGangotri

संमार्जितो मृष्टः वर्णरहित इति यावत्, पटो यस्य एवंभूतोऽयम् इति आश्चर्यातिशयः महदाश्चर्यमित्यर्थः ॥ १०७ ॥ १०८ ॥१०९॥ कृत्तमूलश्छिन्नमूलः ॥११०॥ ॥ १११ ॥ ११२ ॥ ११३ ॥ अशोभनं विपत्तिम् ॥ ११४ ॥ ११५ ॥ मार्तंडिं यमं, शालो वृक्षविशेषस्तद्वत्पीनानाम् ॥ ११६ ॥ व्योमसूनुर्वायुः तस्याकाशसम्भ

सोऽयमभ्यागतः कस्मात्कच्चित्क्षेमं दिवौकसाम् ॥ आश्चर्याऽतिशयोऽयं च संमार्जितपटस्त्वयम् ॥१०७॥ लेखकस्तमनुप्राप्तो दैन्येन महताऽन्वितः ॥ न कदाचित्पटो ह्यस्य मार्जितो धर्मभीरुणा ॥१०८॥ यन्न दृष्टं श्रुतं वाऽपि तदिहाऽद्य प्रपद्यते ॥ एवमुच्चरतां तेषां भूतानां भूतशासनः ॥ निष्पपाताऽग्रतो भूमौ ब्रह्मणो रविनंदनः ॥१०९॥ कृत्तमूलो यथा शाखी त्राहित्राहीति वै रुदन् ॥ परिभूतोऽस्मि देवेश संमार्जितपटःकृतः ॥११०॥ त्वयि नाथे न विफलं पश्यामि कमलासन ॥ १११ ॥ एवमुक्त्वा हि निश्चेष्टो बभूव नृपसत्तम ॥ ततः कोलाहलः शब्दः सभायां समजायत ॥ ॥ ११२ ॥ यो हि खेदयते मर्त्यान्सर्वान्स्थावरजंगमान् ॥ स वै रुदति दुःखार्तः कस्माद्वैवस्वतो यमः ॥ ११३ ॥ जनसंतापकर्त्ता यः सोचिराद्यात्यशोभनम् ॥ नहि दुष्कृतकर्त्ता हि नरः प्राप्नोति शोभनम् ॥ ११४ ॥ ततो निवारयामास वायुस्तेषां वचस्तदा ॥ लोकानां समवेतानां मतं ज्ञात्वा स वेधसः ॥ ११५ ॥ निवार्य लोकान्मार्तंडिं शनैरुत्थापयन्मरुत् ॥ भुजाभ्यां शालपीनाभ्यां लोकसूत्र उदारधीः ॥११६॥ विह्वलं तं परायत्तमासने संन्यवेशयत् ॥ आसनस्थमुवाचेदं व्योमसूनू रवेः सुतम् ॥ ११७ ॥ केन त्वमभिभूतोऽसि केन स्थानान्निवारितः ॥ केनाऽयं मार्जितो देव पटो लेखपटस्तव ॥११८॥ ब्रूहि सर्वमशेषेण कुतो हैतोस्त्वमागतः ॥ यः प्रभुस्तात सर्वेषां स ते कर्ता ममाऽपि च ॥ अपि कस्माच्च मार्तंडे दुःखं हृदयसंस्थितम् ॥११९॥ स एवमुक्तः श्वसनेन सत्यमादित्यसूनुर्वचनं बभाषे ॥ विलोक्य वक्त्रं कुशकेतुसूनोः सगद्गदं चेदमहोऽतिदीनम् ॥ १२० ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे वैशाखमासमाहात्म्ये नारदाम्बरीषसंवादे कीर्तिमद्विजयवर्णनंनामैकादशोऽध्यायः ॥ ११ ॥ ॥ छ ॥ ॥ यम उवाच ॥ ॥ शृणु मे वचनं नाथ लोपितोऽहं पितामह ॥ मरणादधिकं मन्ये मत्पदस्य च खण्डनम् ॥ १ ॥ नियोगी न नियोगं हि करोति कमलासन ॥ प्रभोर्वित्तं समश्नाति स भवेत्काष्ठकीटकः ॥ २ ॥

वत्वात् । तथा च श्रुतिः—"आकाशाद्वायुः वायोरग्निः" इत्यादिः ॥ ११७ ॥ हे पटो स्वकर्मदक्ष ॥ ११८ ॥ ११९ ॥ १२० ॥ इति वैशाखमासमाहात्म्यटीकायामेकादशोऽध्यायः ॥ ११ ॥ छ ॥ अथ यमः स्वदुःखं वर्णयति—शृणिवत्यादिना यावदध्यायसमाप्ति ॥ १ ॥ नियोगी दण्डाधिकारी नियोगं दण्डम् ॥ २ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ साधये प्रवर्तये ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ योगः कर्मकांडं, सांख्यं जीवब्रह्मतत्त्वनिर्णायकं शास्त्रम् ॥ १२ ॥ १३ ॥

योऽश्नाति लोभाद्वित्तानि प्रज्ञावांश्च महीपते ॥ स तिर्यग्योनिनरके याति कल्पशतत्रयम् ॥ ३ ॥ निःस्पृहो नाऽऽचरेद्यस्तु नियोगं पद्मसंभव ॥ भुक्त्वा तु नरकान्घोरान्स पुमान्वायसो भवेत् ॥ ४ ॥ आत्मकार्यपरो यस्तु स्वामिकार्यं विलुंपति ॥ भवेद्वेश्मनि पापात्मा आखुः कल्पशत त्रयम् ॥ ५ ॥ नियोगी यश्च भूत्वा वै तिष्ठन्नित्यं स्ववेश्मनि ॥ शक्तस्तु कार्यकरणे मार्जारो जायते नरः ॥ ६ ॥ सोऽहं देव तवादेशात्प्रजा धर्मेण साधये ॥ पुण्येन पुण्यकर्तारं पापं पापेन कर्मणा ॥ ७ ॥ सम्यग्विचार्य मुनिभिर्धर्मशास्त्रान्वितैः प्रभो ॥ कल्पादौ वर्तमानस्य यातना दापयन्मम ॥ ८ ॥ कर्तुं नियोगमेवं हि त्वदीयो नैव शक्नुयाम् ॥ राज्ञा कीर्तिमता प्रभो नियोगस्तव च क्षितौ ॥ ९ ॥ भयादस्य जगन्नाथ पृथिवीं सागराम्बराम् ॥ वैशाखधर्मसहितां पालयन्वर्तते क्वचित् ॥ १० ॥ विहाय सर्वधर्मांश्च विहाय पितृपूजनम् ॥ विहायाऽग्निसपर्यां तु तीर्थ यात्रादिसत्क्रियाः ॥ ११ ॥ योगसांख्यावुभौ त्यक्त्वा त्यक्त्वा प्राणनिरोधनम् ॥ त्यक्त्वा होमं च स्वाध्यायं कृत्वा पापानि भूरिशः ॥ १२ ॥ प्रयान्ति वैष्णवं लोकं कृत्वा वैशाखसत्क्रियाः ॥ मनुजाः पितृभिः सार्द्धं तथैव च पितामहैः ॥१३॥ तेषामतीतपितरः पितॄणां पितरस्तथा ॥ तथा मातामहा यांति तेषां वै जनकादयः ॥ १४ ॥ तेषामपि च नेतारो जनित्रीणां च पूर्वजाः ॥ एतद्दुःखं पुनर्देव मम मस्तकभेदनम् ॥१५॥ प्रियायाः पितरो यान्ति मार्जयित्वा लिपिं मम ॥ पितृणां बीजजो यस्तु धात्र्या कुक्षौ धृतो विभो ॥ १६ ॥ यदंकेन कृतं कर्म तदंकेनैव भुज्यते ॥ तन्निरस्य कृतं सर्वं जानंस्त्वेकः कुले तु यः ॥ १७ ॥ तारयेत्तावुभौ पक्षौ षड्विंशोपर्यलं विभो ॥ प्रियायाश्चाऽपि वै तात सर्वे वै कुक्षिसंभवाः ॥ १८ ॥ तेऽपि सर्वे जगन्नाथ यान्ति विष्णोः परं पदम् ॥ न मे प्रयोजनं देव नियोगेनेदृशेन वै ॥ १९ ॥ वैशाखधर्मनिरतः स मां त्यक्त्वा व्रजेद्धरिम् ॥ त्रिःसप्तकुलमुद्धृत्य त्यक्तपापोऽतिशोभनः ॥ २० ॥ स त्यक्त्वा मम मार्गं हि प्रयाति हरिमंदिरम् ॥ न यज्ञैस्ता दृशैर्देव गतिं प्राप्नोति मानवः ॥ २१ ॥ सर्वतीर्थैर्न दानाद्यैर्न तपोभिश्च न व्रतैः ॥ अपि वा सकलैर्धर्मैर्युक्तो नाऽऽप्नोति तां गतिम् ॥ २२ ॥

॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ त्रिःसप्तकुलम् एकविंशतिकुलानि ॥ २० ॥ २१ ॥ २२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रयागपाताद् प्रयागे देहत्यागात्, भृगोः पर्वतशिखरात् ॥ २३ ॥ २४ ॥ २५ ॥ विकर्मस्था निषिद्धकर्मकर्तारः अविकर्मस्थास्तद्भिन्ना विध्युक्तकर्मकर्तारः ॥ २६ ॥ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ प्रतीपः पराङ्मुखः ॥ ३४ ॥ ३५ ॥ ३६ ॥ व्यवसितं कर्तुं निश्चितम् ॥ ३७ ॥ ३८ ॥

प्रयागपाताद्रणमध्यपाताद्भृगोश्च पातान्मरणाच्च काश्याम् ॥ न तां गतिं यांति जनाश्च सर्वे वैशाखनिष्ठेन च या प्रपद्यते ॥ २३ ॥ प्रातः स्नात्वा देवपूजां च कृत्वा श्रुत्वा कथां माससमाहात्म्यसंज्ञाम् ॥ धर्मान्कृत्वा चोचितान्वैष्णवांश्च स वै भवेद्विष्णुलोकैकनाथः ॥ २४ ॥ अप्रमाण महं मन्ये लोकं विष्णोर्जगत्पतेः ॥ यो न पूर्येत कोट्योघैः सर्वतः कमलासन ॥ २५ ॥ माधवावसथेनेह समस्तेन पितामहम् ॥ विकर्मस्थाऽ विकर्मस्थाः शुचयोऽशुचयस्तथा ॥२६॥ कृत्वा वैशाखकृत्यानि लोका यान्ति नृपाऽऽज्ञया ॥ योऽस्माकं हि महच्छत्रुर्भवतां च विशेषतः॥२७॥ निग्राह्यो जगतां नाथ भवताऽसौ महीपतिः ॥ हित्वा हि सकलान्धर्मान्सकृद्वैशाखस्नानतः ॥ २८ ॥ असंस्कृतजना यांति वैकुण्ठं हरिमंदिरम् ॥ अस्माभिस्तु कृतोपेक्षो विष्णुपादैकसंश्रयः ॥ २९ ॥ समस्तं नेष्यते लोकं पार्थिवो नात्र संशयः ॥ एष दण्डपटो ह्यद्य तव पद्भ्यां निवेदितः ॥३०॥ लोकपालत्वमतुलमर्जितं तेन भूभुजा ॥ किमपत्येन जातेन मातुः क्लेशकरेण वै ॥३१॥ यो न पातयते शत्रुं ज्येष्ठमासीव भास्करः ॥ वृथासुता हि युवतिर्जाता चेद्धि कुपुत्रिणी ॥३२॥ न तस्याः स्फुरते कीर्तिर्घनस्येव शतह्रदा ॥ यत्पितुर्नोद्धरेत्पापाद्विद्यया वा बलेन वा ॥३३॥ मातुर्जठरजो रोगः स प्रसूतो धरातले ॥ धर्मे चाऽर्थे च कामे च यत्प्रतीपो भवेत्सुतः ॥ ३४ ॥ मातृहा ह्युच्यते सद्भिः स पुत्रः पुरुषाधमः ॥ तन्माता नृपपत्नी च लोकविख्यातसत्क्रिया ॥ ३५ ॥ एकैव वीरसूर्लोके वीरः स नात्र संशयः ॥ यथा वै कीर्तिमाञ्जातो मल्लिपेमार्जनाय वै ॥ ॥ ३६ ॥ नेदं व्यवसितं देव केनचित्क्षत्रियेण हि ॥ पुराणेषु जगन्नाथ न श्रुतं पटमार्जनम् ॥ ३७ ॥ सोऽहं न जानामि जगत्पतीश ऋते क्षितीशं हरितत्परं तम् ॥ प्रचोदयन्तं पटहं सुघोषाद्विलोपयानं मम वेश्ममार्गम् ॥ ३८ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे वैशाखमासमाहात्म्ये नारदाम्बरीषसंवादे यमदुःखनिरूपणंनाम द्वादशोऽध्यायः ॥ १२ ॥ ॥ छ ॥ ॥

इति वैशाखमासमाहात्म्यटीकायां द्वादशोऽध्यायः ॥ १२ ॥ ॥ छ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ अथ यमस्य वचनं श्रुत्वा ब्रह्मोत्तरं ददात्यस्मिंस्त्रयोदशे—किमाश्चर्यमित्यादिना । सतां गणेषु साधूनां समुदायेषु ॥ १ ॥ शासनात् वैशाखधर्माः सर्वैरनुष्ठेया इति नियोगात् ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ समीहते यत्नं करोति ॥ १२ ॥ शक्तिविनिष्क्रांते शक्तिमुल्लंघ्य वर्तमाने अशक्ये

॥ ॥ ब्रह्मोवाच ॥ ॥ किमाश्चर्यं त्वया दृष्टं किमर्थं खिद्यते भवान् ॥ सद्गणेषु कृतस्तापः स तापो मरणांतिकः ॥१॥ तस्योच्चारणमात्रेण प्राप्यते परमं पदम् ॥ न गच्छंति हरेर्लोकं कथं भूपस्य शासनात् ॥ २ ॥ एकोऽपि गोविन्दकृतः प्रणामः शताश्वमेधावभृथेन तुल्यः ॥ यज्ञस्य कर्त्ता पुनरेति जन्म हरेः प्रणामो न पुनर्भवाय ॥ ३ ॥ कुरुक्षेत्रेण किं तस्य सरस्वत्या च किं तथा ॥ जिह्वाग्रे वर्तते यस्य हरिरित्यक्षरद्वयम् ॥ ४ ॥ ब्राह्मणः श्वपचीं भुंजन्विशेषेण रजस्वलाम् ॥ यदि विष्णुं स मरणे स्मरेन्नाप्नोति तत्पदम् ॥ ५ ॥ अभक्ष्यभक्षणाज्जातं विहायाघस्य संचयम् ॥ प्रयाति विष्णुसायुज्यं यतो विष्णुप्रिया स्मृतिः ॥ ६ ॥ एवं विष्णुप्रियो मासो वैशाखो नाम वै यम ॥ यद्धर्मश्रवणादेव मुच्यते सर्वकिल्बिषैः ॥ ७ ॥ यातीति किमु वक्तव्यं तस्यानुष्ठानतत्परः ॥ यस्मिन्संगीयते यो हि प्रीयते पुरुषोत्तमः ॥ ८ ॥ कथं न याति च गतिं तस्याऽनुष्ठानतत्परः ॥ अस्माकं जगतां नाथो जनिता पुरुषोत्तमः ॥ ९ ॥ तस्येष्टान्माधवे मासि धर्मानेतान्करोत्ययम् ॥ तस्य विष्णुः प्रसन्नात्मा सहाये सर्वदा स्थितः ॥ १० ॥ न तस्य भूपतेः सौरे समर्थस्त्वं च शिक्षणे ॥ न वासुदेवभक्तानामशुभं विद्यते क्वचित् ॥ जन्ममृत्युजराव्याधिभयं नैवोपजायते ॥ ११ ॥ नियोगी स्वामिकार्येषु यावच्छक्ति समीहते ॥ तावता स कृतार्थः स्यान्नरकान्नैव गच्छति ॥ १२ ॥ कार्ये शक्तिविनिष्क्रान्ते स्वामिने च निवेदयेत् ॥ अनृणस्तावता भृत्यो नियोगी सुखमश्नुते ॥ १३ ॥ तस्मान्निवेदितार्थस्य न ऋणं न च पातकम् ॥ यत्ने कृते स्वकर्तव्ये नापराधोस्ति देहिनः ॥ १४ ॥ तस्मादशक्यकार्येऽस्मिन्न विशोचितुमर्हसि ॥ १५ ॥ इत्युक्तो ब्रह्मणा सौरिः पुनरत्यंतखिन्नधीः ॥ उवाच दीनया वाचा गलद्बाष्पाऽऽकुलेक्षणः ॥ १६ ॥ प्राप्तं तात मया सर्वं त्वदंघ्रिभजनेन वै ॥ नाऽहं यास्ये पुनः कर्तुं नियोगं पद्मसंभव ॥ १७ ॥

इति यावत् ॥ १३ ॥ नियोगी कार्ये नियुक्तः ॥ १५ ॥ १६ ॥ १७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ १८ ॥ १९ ॥ विज्वरः गततापः ॥ २० ॥ २१ ॥ पश्चात्तदीरितं विष्णुप्रोक्तं कर्म समाचर इति शेषः ॥ २२ ॥ २३ ॥ प्रत्युक्तिर्विरुद्धभाषणम् ॥
॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ कंजजः विष्णुनाभिकमलोत्पन्नो ब्रह्मा ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥

प्रशासति महावीर्ये भूपेऽस्मिन्भूमिमण्डले ॥ चालयित्वा स्वधर्मांश्च तमेकं भूपतिं विभो ॥१८॥ कृतकृत्योऽस्मि तनयो गयायां पिण्डदो यथा॥ कृपालो तदिदं कार्यं साधयस्व ममाव्ययम् ॥ १९ ॥ विज्वरस्तु ततो भूयः शासनं ते करोम्यहम् ॥ श्रुत्वा ब्रह्मा यमेनोक्तं पुनश्चिंतापरायणः ॥ ॥ २० ॥ तमुवाच पुनर्ब्रह्मा सांत्वयन्बहुधाप्यमुम् ॥ ॥ ब्रह्मोवाच ॥ ॥ न निग्राह्यस्त्वया राजा विष्णुधर्मपरायणः ॥ २१ ॥ यदि च्छल यसे कोपाद्गच्छामो ह्यंतिकं हरेः ॥ निवेद्य सकलं तस्मै कर्म पश्चात्तदीरितम् ॥ २२ ॥ स एव कर्त्ता लोकस्य धर्मस्य परिपालकः ॥ स च दण्ड धरोऽस्माकं शास्ता कर्त्ता नियामकः ॥२३॥ न तदुक्तेऽस्ति प्रत्युक्तिरस्माकं विहिता वृष ॥ न राजोक्तेस्तु प्रत्युक्तिर्दृश्यते क्काऽपि भूतले ॥ २४ ॥ इत्याश्वास्य यमं तेन साकं क्षीरांबुधिं ययौ ॥ ब्रह्मा तुष्टाव चिन्मात्रं निर्गुणं परमेश्वरम् ॥ २५ ॥ सांख्ययोगैरद्वितीयमेकं तं पुरुषोत्तमम् ॥ आविरासीत्तदा विष्णुर्ब्रह्मणा संस्तुतो हरिः ॥ २६ ॥ प्रणामं चक्रतुस्तस्मै यमो ब्रह्मा च सत्वरम् ॥ तावुवाच महाविष्णुर्मेघगंभीरया गिरा ॥ ॥ २७ ॥ कस्माद्युवामिहाऽऽयातौ किं दुःखं दनुजैरभूत् ॥ म्लानं यममुखं कस्मात्केन वा नतकंधरः ॥ २८ ॥ एतद्वदस्व मे ब्रह्मन्नित्युक्तश्चाह कंजजः ॥ त्वद्दासवर्ये भूपाले भूमिं शासति वै नराः ॥ २९ ॥ वैशाखधर्मनिरता यांति ते परमव्ययम् ॥ ततो यमपुरी शून्या तेन चाऽतीव दुः खितः ॥ ३० ॥ तेन युद्धं चकाराऽसौ हंतुं दंडमथाऽददे ॥ त्वच्चक्रेण पराभूतो ययावद्य ममान्तिकम् ॥ ३१ ॥ न च शक्तो वयं दंडं त्वद्भक्तानां महात्मनाम् ॥ तस्मात्त्वामेव शरणं वयं प्राप्ता महाविभो ॥ ३२ ॥ तस्माद्भूपं दंडयित्वा पालयैनं यमं स्वकम् ॥ इत्युक्तः प्रहसन्प्राह ब्रह्माणं यममेव च ॥ ३३ ॥ लक्ष्मीं वाऽपि परित्यक्ष्ये प्राणान्देहमथाऽपि वा ॥ श्रीवत्सं कौस्तुभं मालां वैजयंतीमथाऽपि वा ॥३४॥ श्वेतद्वीपं च वैकुंठं क्षीरसागरमेव च ॥ शेषं च गरुडं चैव न भक्तं त्यक्तुमुत्सहे ॥ ३५ ॥ विसृज्य सकलान्भोगान्मदर्थे त्यक्तजीवितान् ॥ मदात्मकान्महाभागा न्कथं तांस्त्यक्तुमुत्सहे ॥ ३६ ॥ तस्मात्त्वद्दुःखशमने ह्युपायं कल्पयाम्यहम् ॥ तस्य चायुर्मया दत्तमयुतं भूपतेर्भुवि ॥ ३७ ॥

अयुतं दशसहस्रसंख्यापरिमितम् ॥ ३७ ॥

CC-0. In Public Domain. Digitization by eGangotri

दुरात्मवान् दुष्टबुद्धिः ॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥ सहस्रे पुरुषाणां सहस्रे ॥ ४२ ॥ ४३ ॥ ४४ ॥ ४५ ॥ ४६ ॥ ४७ ॥ कुर्वंति आचरंति, वैशाखधर्मानिति शेषः ॥ ४८ ॥ ४९ ॥ ५० ॥ ५१ ॥ ५२ ॥ ५३ ॥ अतिविस्मयेत्यादिश्लोकार्द्धे ब्रह्मेति कर्तृपदमध्याहार्यम् ॥ ५४ ॥ ५५ ॥ ५६ ॥

गतान्यष्टौ सहस्राणि तत्रेदानीं नरांतक ॥ आयुःशेषे तेन नीते मत्सायुज्यं गतेऽपि च॥३८॥भविष्यति ततो राजा वेनोनाम दुरात्मवान्॥स लुंपति महाधर्मान्सर्वानेताञ्छ्रुतीरितान् ॥३९॥ तदा वैशाखधर्माश्च विच्छिन्नाःस्युर्न संशयः ॥ स्वकृतेनैव पापेन वेनो दग्धो भविष्यति ॥४०॥ पश्चादहं पृथुर्भूत्वा पुनर्धर्मान्प्रवर्तये ॥ तदा जनेषु प्रख्यातान्वैशाखोक्तान्करोम्यहम् ॥४१॥ मद्भक्तो मद्गतप्राणो यस्तु विन्यस्तसंग्रहः ॥ एकः सहस्रे भविता तस्य प्रख्यापयेद्धि तान् ॥ ४२ ॥ कश्चिदेव हि जानातु धर्मानेतान्क्षितौ मम ॥ ततस्ते भविता कार्यं मा विषीद नरांतक ॥ ४३ ॥ दापयिष्यामि ते भागं मासेऽस्मिन्माधवेऽपि च ॥ नरैः सर्वैश्च वैशाखधर्मनिष्ठैर्महात्मभिः ॥ ४४ ॥ भूपेनाऽपि च कालेन खेदं शमय तेन च ॥ वीर्यशुल्कं तु ते भागं शत्रोर्भुंक्ते बलाधिकात् ॥ ४५ ॥ गृह्णन्गृह्णन्स्वकं भागं न भागी दुःखमर्हति ॥ त्वामुद्दिश्य न कुर्वंति प्रत्यहं ये नरा भुवि ॥४६॥ स्नानं चार्घ्यं सोदकुंभं दध्यन्नं चांतिमे दिने ॥ वैशाखे सकलं कर्म तेषां च विफलं भवेत् ॥ ४७ ॥ तस्मात्क्रोधं त्यज नृपे भागदे मत्परायणे ॥ ये के चाऽपि च कुर्वंति लोके ते भागदा नराः ॥ ४८ ॥ वैशाखोक्ते महाधर्मे तेषां विघ्नं च मा कुरु ॥ मामेव ये यजंत्यद्धा त्वां हित्वा धर्मपालकम् ॥ ४९ ॥ मदाज्ञया महाभाग तदा दंडं च त्वं कुरु ॥ नृपाद्भागं दापयितुं सुनंदं प्रेषयामि च ॥५० ॥ मच्छासनात्स वै गत्वा भागं ते दापयिष्यति ॥ तिष्ठत्येवं यमे स्वस्य सन्निधौ गरुडासनः ॥ ५१ ॥ सुनन्दं प्रेषयामास नृपं बोधयितुं विभुः ॥ सोऽपि गत्वा बोधयित्वा पार्श्वं च पुनरागमत् ॥ ५२ ॥ इत्याश्वास्य यमं विष्णुस्तत्रैवान्तरधीयत ॥ यमं स्वयं सांत्वयित्वा समनुज्ञाप्य वेगतः ॥ ५३ ॥ अतिविस्मयमापन्नो ययौ धाम सहानुगैः ॥ यमोऽपि स्वपुरीं प्रायात्किंचित्संहृष्टमानसः ॥ ५४ ॥ पश्चाद्विष्णोर्निदेशेन सुनन्दपरिबोधितः ॥ भागदाः सकला लोका ये वैशाखपरायणाः ॥ ५५ ॥ धर्मराजं पुरस्कृत्य ये न कुर्वंति मानवाः ॥ तेषां हि स्वयमादत्ते पुण्यं वैशाखसंभवम् ॥ ५६ ॥ कुर्याच्च प्रत्यहं स्नानं दद्यादर्घ्यं यमाय वै ॥ वैशाखे सकलं पुण्यमन्यथा विफलं भवेत् ॥ ५७ ॥

अन्यथा यमायार्घ्यमदत्त्वा ॥ ५७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ५८ ॥ ५९ ॥ ६० ॥ सीदते वृत्तिहीनायेति यावत् ॥ ६१ ॥ ६२ ॥ ६३ ॥ ६४ ॥ ६५ ॥ ६६ ॥ ६७ ॥ वैवस्वतस्थः वैवस्वतमन्वन्तरोत्पन्नः ॥

सोदकुम्भं च दध्यन्नं पौर्णमास्यां च माधवे ॥ धर्मराजं समुद्दिश्य दातव्यं प्रथमं जनैः ॥ ५८ ॥ पश्चात्पितॄन्समुद्दिश्य गुरुमुद्दिश्य वै नरः ॥ मधुसूदनमुद्दिश्य पश्चादेवं जनार्दनम् ॥ ५९ ॥ शीतलोदकदध्यन्नं तांबूलं च सदक्षिणम् ॥ सफलं कांस्यपात्रस्थं ब्राह्मणाय निवेदयेत् ॥ ६० ॥ दद्याच्च प्रतिमां दिव्यां मधुसूदनदेवताम् ॥ मासधर्मप्रवक्त्रे च दद्याद्विप्राय सीदते ॥ ६१ ॥ तमेव धर्मवक्तारं पूजयेद्विभवैः स्वकैः ॥ इत्यादिष्टः सुनन्देन तथा राजा चकार ह ॥ ६२ ॥ स नीत्वा चायुषः शेषं भुक्त्वा भोगान्यथेप्सितान् ॥ पुत्रपौत्रादिभिर्युक्तो जगाम हरिमंदिरम् ॥ ६३ ॥ वैकुण्ठस्थे नृपे तस्मिन्वेनो राजाऽधर्मोऽभवत् ॥ सर्वे धर्माश्च वैशाखधर्मा अपि विशेषतः ॥ ६४ ॥ दुरात्मना च तेनैव लुप्ता एव बभूविरे ॥ न प्रख्याताः पुनर्भूमौ भूरिशो मोक्षहेतवः ॥ ६५ ॥ यः कश्चिन्नैव जानाति वैशाखोक्तानिमाञ्छुभान् ॥ बहुजन्मार्जिते पुण्यपरिपाक उपागते ॥ ॥ ६६ ॥ वैशाखोक्तेषु धर्मेषु मतिरात्यन्तिकी भवेत् ॥ ॥ मैथिल उवाच ॥ ॥ पूर्वमन्वंतरस्थो हि वेनो राजा दुरात्मवान् ॥ ६७ ॥ अयं वैवस्वतस्थो हि राजा चेक्ष्वाकुनंदनः ॥ इति श्रुतं मया पूर्वमिदानीं चोच्यते त्वया ॥ ६८ ॥ अयं वैकुण्ठगः पश्चाद्वेनो राजा भविष्यति ॥ इत्येतं संशयं छिंधि श्रुतदेव महामते ॥ ६९ ॥ ॥ श्रुतदेव उवाच ॥ ॥ पुराणेषु च वैषम्यं युगकल्पव्यवस्थया ॥ न चाप्रामाण्यशंका ते कथाप्रव्यत्यये क्वचित् ॥ ७० ॥ गते दैनंदिने कल्पे यथैषा शाश्वती शुभा ॥ मार्कंडेयेन मे प्रोक्ता सा चोक्ता तव भूपते ॥ ७१ ॥ तस्मान्न ख्याति मायान्ति धर्मा वैशाखसंभवाः ॥ कश्चिदेव हि जानाति विरक्तो विष्णुतत्परः ॥ ७२ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे वैशाखमासमाहात्म्ये नारदांबरीषसंवादे यमदुःखसांत्वनंनाम त्रयोदशोऽध्यायः ॥ १३ ॥ ॥ छ ॥ ॥ श्रुतदेव उवाच ॥ ॥ यः प्रातः स्नाति वैशाखे मेषसंस्थे दिवाकरे ॥ मधुसूदनमभ्यर्च्य कथां श्रुत्वा हरेरिमाम् ॥ १ ॥ स तु पापविनिर्मुक्तो याति विष्णोः परं पदम् ॥ वाच्यमानां कथां हित्वा योऽन्यां सेवेत मूढधीः ॥ २ ॥

॥ ६८ ॥ ६९ ॥ ७० ॥ ७१ ॥ ७२ ॥ इति वैशाखमासमाहात्म्यटीकायां त्रयोदशोऽध्यायः ॥ १३ ॥ ॥ छ ॥ ॥ अथ चतुर्दशे स्नानस्य कथायाश्च माहात्म्यं कथयति—यः प्रातरिति ॥ १ ॥ अन्याम् अन्यधर्मविषयाम् ॥ २ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu.

CC-0. In Public Domain. Digitization by eGangotri

॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ नीरजं रजोगुणरहितम् ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥

रौरवं नरकं प्राप्य पैशाचीं योनिमाप्नुयात् ॥ अत्रैवोदाहरन्तीममितिहासं पुरातनम् ॥ ३ ॥ पापघ्नं पावनं धर्म्यं सद्यो वंद्यं पुरातनम् ॥ पुरा
गोदावरीतीरे क्षेत्रे ब्रह्मेश्वरे शुभे ॥ ४ ॥ दुर्वासशिष्यौ परमहंसौ ब्रह्मैकनिष्ठितौ ॥ सदैवोपनिषद्विद्यानिष्ठितौ निरपेक्षितौ ॥ ५ ॥ भिक्षा
मात्राशिनौ पुण्यौ तौ गुहावासिनावुभौ ॥ सत्यनिष्ठतपोनिष्ठाविति ख्यातौ जगत्रये ॥ ६ ॥ तयोर्मध्ये सत्यनिष्ठः सदा विष्णुकथापरः ॥
श्रोतॄणामप्यभावे च व्याख्यातॄणां तथा नृप ॥ ७ ॥ तदा कर्मकला नित्याः कुरोत्यद्धा मुनीश्वरः ॥ श्रोता चेदस्ति यः कश्चित्तस्मै व्याख्या
त्यहर्निशम् ॥ ८ ॥ यदि व्याख्याति कश्चिद्वा पुण्यां विष्णुकथां शुभाम् ॥ तदा संकुच्य कर्माणि शृणोति श्रवणे रतः ॥ ९ ॥ अतिदूर
स्थतीर्थानि देवतायतनानि च ॥ हित्वा कथाविरोधीनि तथा कर्माणि भूरिशः ॥ १० ॥ शृणोति च कथां दिव्यां श्रोतृभ्यो वक्ति वै स्वयम् ॥
विना कथां न जानाति सेव्यमन्यन्नरेश्वर ॥ ११ ॥ व्याख्याति च गृहे स्वस्य वक्ता रोगाद्युपद्रुतः ॥ कूपस्नानपरो भूत्वा शृणोत्येव कथां
मुनिः ॥ १२ ॥ कथायाश्च विरामे तु स्वकृत्यं साधयत्यलम् ॥ कथां वै शृण्वतः पुंसो जन्मबन्धो न विद्यते ॥ १३ ॥ सत्त्वशुद्धिस्ततो
विष्णावरतिश्चैव गच्छति ॥ रतिश्च जायते विष्णौ सौहृदं चैव साधुषु ॥ १४ ॥ नीरजं निर्गुणं ब्रह्म सद्यो ह्यवरुध्यते ॥ ज्ञानहीनस्य वै
पुंसः कर्म वै निष्फलं भवेत् ॥ १५ ॥ बहुधाचरितं चाऽपि यथैवांधकदर्पणम् ॥ कर्माणि क्रियमाणानि बहुधा शोचितात्मभिः ॥ १६ ॥
सत्त्वशुद्ध्यै भवंत्येव सत्त्वशुद्ध्या श्रुतिं व्रजेत् ॥ श्रुतेस्तु ज्ञानमासाद्य ज्ञात्वा ध्यानाय कल्पते ॥ १७ ॥ बहुधा श्रवणं ध्यानं मननं श्रुतिचो
दितम् ॥ यत्र विष्णुकथा नास्ति यत्र साधुजना नहि ॥ १८ ॥ साक्षाद्गंगातटं वाऽपि त्याज्यमेव न संशयः ॥ यद्देशे तुलसी नास्ति वैष्णवं
धाम वा शुभम् ॥ १९ ॥ यत्र विष्णुकथा नास्ति मृतस्तत्र तमो व्रजेत् ॥ यद्ग्रामे वैष्णवं धाम नास्ति कृष्णमृगोऽपि वा ॥२०॥ यत्र विष्णुकथा
नास्ति साधवो वा तदाश्रयाः ॥ मृतस्तत्र पुमान्क्षिप्रं श्वानयोनिशतं व्रजेत् ॥२१॥ विचार्योपनिषद्विद्यामिति निश्चित्य वै मुनिः ॥ सदा विष्णु
कथाऽऽसक्तो विष्णुस्मृतिपरायणः ॥ २२ ॥ न किंचिदधिकं जातु मन्यते श्रवणात्परम् ॥ इतरस्तु तपोनिष्ठः कर्मनिष्ठो दुराग्रही ॥ २३ ॥

॥ २० ॥ २१ ॥ २२ ॥ २३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ २४ ॥ कर्मलोपभयात् आह्निकलोपभयात् ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ शुष्ककंठोष्ठतालुकः शुष्कं कण्ठोष्ठतालुकं यस्य ॥ २९ ॥ दिव्याः अयुताः इतिच्छेदः, संधिरार्षः। दिव्या देवसम्बन्धिनः, अयुताः दशसहस्रसंख्यापरिमिताः समाः वर्षाणि ॥३०॥ ३१ ॥ ३२ ॥ ३३ ॥ पैठिनसीं महाराष्ट्रभाषायां 'पैठण' नाम्ना प्रसिद्धाम्

न व्याख्याति स्वयं वाऽपि न शृणोति च सत्कथाम् ॥ वाच्यमानां कथां हित्वा तीर्थस्नानाय गच्छति ॥२४॥ तीर्थेऽपि च प्रवृत्तायां कथायां भूमिपालक ॥ कर्मलोपभयाद्दूरं याति चांचलयशक्तितः ॥२५॥ व्रजंति गृहकृत्यार्थं संगमात्परतो जनाः ॥ न श्रोतारो न वक्तारस्तस्य पार्श्वे तु कर्मिणः ॥२६॥ दुरात्मनस्तु दुर्बुद्धेः काल एवं क्षयं गते ॥ जिह्वां श्रुतिं च न क्वापि संप्राप्ता हि कथा विभोः ॥२७॥ अश्रोतृत्वादवक्तृत्वाद्दुर्बुद्धित्वाद्दुराग्रहात् ॥ पश्चात्पंचत्वमासाद्य सद्यो धर्मेण वै मुनिः ॥ २८ ॥ पिशाचोऽभूच्छमीवृक्षे च्छिन्नकर्णाह्वयोऽबलः ॥ निराश्रयो निराहारः शुष्ककण्ठोष्ठतालुकः ॥२९॥ एवं वै खिद्यमानस्य समा दिव्यायुतागताः ॥ नापश्यत्स्वस्य त्रातारं निराहारोऽतिदुःखितः ॥ ३० ॥ स्वकृतं चिंतयानश्च मत्तोन्मत्त इवाभ्रमत् ॥ क्षुधया पर्यटन्वाऽपि निर्वृतिं नाप मूढधीः ॥ ३१ ॥ कृशानुसदृशो वायुरंगं स्पृष्ट्वा कृतात्मनः ॥ कालाग्नितुल्या आपश्च फलपुष्पादिकं विषम् ॥ ३२ ॥ न क्वापि सुखमापेदे कर्मठो दीनधीरयम् ॥ एवं व्यवसिते तस्मिन्नरण्ये जनवर्जिते ॥ ३३ ॥ कथया रहिते क्षेत्रे स्वाश्रये साधुवर्जिते ॥ दैवादायात्सत्यनिष्ठस्तदा पैठिनसीं पुरीम् ॥ ३४ ॥ गच्छन्मार्गे ददर्शाऽसौ छिन्नकर्णं बहुव्यथम् ॥ दृष्ट्वाऽऽत्मानं द्रावयन्तं रुदंतं क्षुधयाऽऽतुरम् ॥ ३५ ॥ मा भैषीरिति चाभाष्य कोऽसीत्याह मुनीश्वरः ॥ दशेदृशी च कस्मात्ते न ते दुःखमतः परम् ॥ ॥ ३६ ॥ इत्याश्वस्तोऽमुना च्छिन्नकर्णः प्राहातिविह्वलः ॥ तपोनिष्ठो यतिरहं शिष्यो दुर्वाससः परम् ॥ ३७ ॥ ब्रह्मेश्वरक्षेत्रवासी कर्मनिष्ठो दुराग्रही ॥ कर्मलोपभयान्मौढ्यान्मया दुर्बुद्धिना मुने ॥ ३८ ॥ साधुभिर्वाच्यमानाऽपि नादृता विष्णुसत्कथा ॥ न व्याख्याता च श्रोतृभ्यः कथा कर्मनिकृंतनी ॥ ३९ ॥ तेन कर्मविपाकेन महताऽहं मृतिं गतः ॥ छिन्नकर्णोऽभवं नाम्ना पिशाचो दुःखविह्वलः ॥ ४० ॥ न पश्यामि च त्रातारं दुःखादस्मात्कथंचन ॥ तव दृष्टिपथं यातो दिष्ट्याऽहं गतकल्मषः ॥ ४१ ॥ अद्य मे देवतास्तुष्टा गुरवः साधवश्च ये ॥ हरिश्च मे प्रसन्नोऽभूद्यतस्ते दर्शनं मम ॥ ४२ ॥

॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ वाच्यमानां पठिताम् ॥ ३९ ॥ ४० ॥ ४१ ॥ ४२ ॥

CC-0. In Public Domain. Digitization by eGangotri

॥ ४३ ॥ ४४ ॥ सद्योध्वस्ताऽखिलाऽशुभः सद्यः तत्क्षणमेव ध्वस्तमखिलमशुभं पातकं यस्य ॥ ४५ ॥ ४६ ॥ ४७ ॥ माहात्म्यश्रवणस्य एवं चिंतयानः इत्यत्र प्रभावमिति शेषः ॥ ४८ ॥ ४९ ॥ ५० ॥ इति वैशाखमासमाहात्म्यटीकायां चतुर्दशोऽध्यायः ॥ १४ ॥ ॥ छ ॥ ॥ वैशाखे जलदानमाहात्म्यं प्रतिपादयितु

पपात पादयोर्भूमौ त्राहित्राहीति वै रुदन् ॥ ततस्तु कृपयाऽऽविष्टः सत्यनिष्ठो महायशाः ॥४३॥ दोर्भ्यामुत्थापयामास शंतमाभ्यां मुनीश्वरः ॥ ततस्त्वप उपस्पृश्य ददौ पुण्यमनुत्तमम् ॥४४॥ वैशाखमासमाहात्म्यश्रवणस्य मुहूर्तजम् ॥ तेन पुण्यप्रभावेन सद्योध्वस्ताखिलाशुभः ॥ ४५ ॥ पिशाचदेहनिर्मुक्तो दिव्यदेहधरोऽभवत् ॥ दिव्यं विमानमारुह्य तं प्रणम्य महामुनिम् ॥४६॥ आमंत्र्य च परिक्रम्य ययौ विष्णोः परं पदम् ॥ सत्यनिष्ठस्ततो धीमान्ययौ पैठिनसीं पुरीम् ॥ ४७ ॥ माहात्म्यश्रवणस्यैवं चिंतयानः पुनःपुनः ॥ ॥ श्रुतदेव उवाच ॥ ॥ यत्र विष्णुकथा पुण्या शुभा लोकमलाऽपहा ॥ ४८ ॥ तत्र सर्वाणि तीर्थानि क्षेत्राणि विविधानि च ॥ यत्र प्रवहते पुण्या शुभा विष्णुकथाऽऽपगा ॥ ४९ ॥ तद्देशवासिनां मुक्तिः करसंस्था न संशयः ॥ ५० ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे नारदाम्बरीषसंवादे कथाप्रशंसायां पिशाचमुक्तिप्राप्तिर्नाम चतुर्दशोऽध्यायः ॥ १४ ॥ ॥ छ ॥ ॥ श्रुतदेव उवाच ॥ ॥ भूयः शृणुष्व भूपाल माहात्म्यं पापनाशनम् ॥ वैशाखस्य च मासस्य वल्लभस्य मधुद्विषः ॥ १ ॥ पुरा पांचालदेशे तु राजा पुरुयशोऽभवत् ॥ तनयो भूरियशसः पुण्यशीलस्य धीमतः ॥ २ ॥ पितर्युपरते भूप राज्यस्थो धर्मलालसः ॥ शौर्यौदार्यगुणोपेतो धनुर्विद्याविशारदः ॥ ३ ॥ शशास पृथिवीं सर्वां स्वधर्मेण महामतिः ॥ पूर्वजन्मजलादानाद्दोषेण महता वृतः ॥ ४ ॥ संपद्धानिमवापाऽसौ कालेन कियताऽनघ ॥ हया गजा मृतिं याता महद्रोगेण पीडिताः ॥ ५ ॥ दुर्भिक्षमतुलं चासीन्निर्मानुष्यविधायकम् ॥ राज्यं कोशं तदा चाऽऽसीद्गजभुक्तकपित्थवत् ॥ ६ ॥ बलहीनं नृपं ज्ञात्वा कोशराष्ट्रविवर्जितम् ॥ तं जेतुमेष समय इति निश्चितमानसाः ॥ ७ ॥ आजग्मुः शतशो भूपा रिपवस्तस्य भूपतेः ॥ जिग्युर्युद्धेन तं भूपं पांचालविषयाधिपम् ॥ ८ ॥ पराजितस्ततो राजा विवेश गिरिगह्वरे ॥ शिखिन्या भार्यया साकं धात्र्यादिगणसंयुतः ॥ ९ ॥

मितिहासं प्रस्तौति–भूय इत्यादिना ॥ १ ॥ २ ॥ ३ ॥ पूर्वजन्मनि वैशाखमासे जलादानात् इत्यर्थः ॥ ४ ॥ ५ ॥ गजभुक्तकपित्थं यथा अन्तःशून्यं भवति तथा सर्वं शून्यं भूतमित्यर्थः ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ ब्राह्मणौ वदतं कथयतमित्यर्थः ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥

अज्ञातपद्धतिश्चान्यैर्बहुदुःखसमाकुलः ॥ त्रिपंचाशत्समाश्चैव नीतास्तेन विलीयता ॥ १० ॥ चिन्तयामास भूपालः किमेतदिति भूरिशः ॥ कर्मणा जन्मशुद्धोऽहं मातृपितृहिते रतः ॥ ११ ॥ गुरुभक्तः सदाक्षिण्यो ब्रह्मण्यो धर्मतत्परः ॥ दयावान्सर्वभूतेषु देवभक्तो जितेन्द्रियः॥ १२ ॥ न भ्राता मे न पुत्रो मे न च मे सुहृदो हिताः ॥ दयापौरुषविख्याताः कुलीनस्याऽपि मे कुतः ॥ १३ ॥ केन वा कर्मणा चात्तं दारिद्र्यं भूरि दुःखदम् ॥ केन वाऽपजयो मेऽद्य केन वा वनवासिता ॥ १४ ॥ इति चिन्ताकुलो राजा गुरुं संस्मार खिन्नधीः ॥ याजोपयाजकौनाम सर्वज्ञौ मुनिसत्तमौ ॥ १५ ॥ आजग्मतुर्मुनींद्रौ तौ राज्ञाहूतौ महामती ॥ तौ दृष्ट्वा सहसोत्थाय राजा पांचालवल्लभः ॥ १६ ॥ ननाम शिरसा भक्त्या प्रवासेनाऽतिपीडितः ॥ राजचिह्नविहीनश्च केनाप्यज्ञातपद्धतिः ॥ १७ ॥ तूष्णीं तस्थौ मुहूर्तं हि पतित्वा भुवि पादयोः ॥ दोर्भ्यांमुत्थापि तस्ताभ्यां परिमृष्टाऽश्रुलोचनः ॥ १८ ॥ विधिवत्पूजयामास वन्यैरेवाऽर्हणैः शुभैः ॥ सूपविष्टौ तु तौ विप्रौ पप्रच्छाऽऽनतकन्धरः ॥ १९ ॥ ब्राह्मणौ वदतं दुःखकारणं च क्षितीशितुः ॥ कर्मणा जन्मशुद्धस्य पितृदेवप्रियस्य च ॥ २० ॥ पापभीरोः कृपालोश्च गुरुभक्तस्य मे कुतः ॥ दारिद्र्यं कोशहानिश्च रिपुभिश्च पराभवः ॥ २१ ॥ कस्मादरण्यवासश्च कुत एकाकिता मम ॥ न पुत्रो न च मे भ्राता न हिताः सुहृदश्च मे ॥ ॥ २२ ॥ दुर्भिक्षं वा कुतश्चासीद्देशे मत्पालितेऽनघे ॥ एतद्विस्तार्य मे ब्रूतं कारणं मुनिपुंगवौ ॥ २३ ॥ इत्युक्तौ तौ मुनिश्रेष्ठौ भूतेनात्यन्त दुःखिना ॥ प्रत्यूचतुर्महात्मानौ किंचिद्ध्यानपरायणौ ॥ २४ ॥ ॥ याजोपयाजकावूचतुः ॥ ॥ शृणु भूप प्रवक्ष्यावस्तव दुःखस्य कारणम् ॥ पुरा भूप महापापी व्याधस्त्वं दशजन्मसु ॥२५॥ निष्ठुरः सर्वलोकानां सदा हिंसापरायणः ॥ धर्मलेशाकरः क्वापि न दमो न च वै शमः ॥२६॥ न जिह्वा वक्ति नामानि विष्णोर्वापि कथंचन ॥ चेतः स्मरति गोविन्दचरणांबुरुहद्वयम् ॥ २७ ॥ न प्रणामः कृतः क्वापि शिरसा परमात्मने ॥ नव जन्मानि ते भूप गतान्येवं दुरात्मनः ॥ २८ ॥ दशमे जन्मनि प्राप्ते व्याधस्त्वं सह्यभूधरे ॥ निष्ठुरः सर्वलोकानां नराणां त्वं नरांतकः ॥ २९ ॥ दयाहीनः शस्त्रजीवी सदा हिंसापरायणः ॥ निर्गुणः सकलत्रस्त्वं मार्गपीडाकरः शठः ॥ ३० ॥

॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गौडदेशस्थानां गौडदेशोद्भवानां नैजं स्वकीयम् ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥३६॥ ३७ ॥ सर्वभूतानामन्तके नाशकरे क्रूरप्राणिनिवासात् एतादृशे पथि मार्गे ॥ ३८ ॥ घर्मपीडितौ घर्मेण सूर्यकिरणतापेन पीडितौ दुःखितौ ॥ ३९ ॥ जटा प्रसिद्धा, चीरं वल्कलं तयोर्धरः धारकः ॥ ४० ॥ शरी शरो बाणः, सोऽस्यास्तीति

प्रजानां गौडदेश्यानां राक्षसो मानुषाशनः ॥ एवं चाब्दान्यतीतानि नैजं हितमजानतः ॥ ३१ ॥ बालापत्यमृगाणां च पक्षिणां च वधात्तव ॥ दयाहीनस्य दुर्बुद्धेर्जन्मन्यस्मिन्नपुत्रता ॥ ३२ ॥ विश्वासघातकत्वेन भ्रातरो नैव सोदराः ॥ मार्गपीडाकरत्वेन सुहृज्जनविवर्जितः ॥ ३३ ॥ साधूनां च तिरस्काराच्छत्रुभिस्ते पराजयः ॥ कदाप्यदत्तदोषेण दारिद्र्यं पतितं गृहे ॥ ३४ ॥ सदैवोद्वेगकारित्वात्प्रवासस्ते दुरासदः ॥ सर्वेषाम प्रियत्वाच्च दुःखमत्यंतदुःसहम् ॥ ३५ ॥ निराहारोप्यतः पूर्वं सदा क्रूरेण कर्मणा ॥ तस्माद्राज्यापहारस्ते जन्मन्यस्मिन्महामते ॥ ३६ ॥ अथ ते सत्कुलीनत्वे हेतूंश्चापि ब्रवीम्यहम् ॥ यदाऽभूर्गौडदेशीयो ह्यतिमे व्याधजन्मनि ॥ ३७ ॥ स्वकर्मनिरते क्रूरे विपिने कण्टकाविले ॥ तिष्ठ त्येवं दयाहीने सर्वभूतांतके पथि ॥ ३८ ॥ वैश्यावाजग्मतुर्दिव्यौ धनाढ्यौ घर्मपीडितौ ॥ मुनिश्च कर्षणोनाम वेदवेदांगपारगः ॥ ३९ ॥ जटाचीरधरः पुण्यः कमण्डलुपरिग्रहः ॥ तान्दृष्ट्वा धनुरादाय मार्गं रुद्ध्वा व्यवस्थितः ॥ ४० ॥ अनुद्रुत्य शरी वैश्यौ कृत्वा छिन्नशरीरकौ ॥ तयोरेकं च त्वं हत्वा गृहीत्वाऽखिलतत्पणम् ॥ ४१ ॥ अपरं हन्तुमुद्युक्ते स दुद्राव भयाद्द्रुतम् ॥ पणं गुल्मे विनिक्षिप्य भीतः प्राणपरीप्सकः ॥ ॥ ४२ ॥ कर्षणोऽपि मुनिः शीघ्रं व्याधान्मृतिविशंकया ॥ आतपे धावमानः संस्तृषाघर्मप्रपीडितः ॥ ४३ ॥ मूर्च्छामाप गलत्स्वेदः संज्ञामात्रा वशेषितः ॥ विहायैनं दुद्रुवे च वैश्यो जीवनतत्परः ॥ ४४ ॥ त्वं तावनुद्रुतौ दृष्ट्वा मूर्छितं पथि भूसुरम् ॥ पणं कुत्र विनिक्षिप्तं कियद्दूरं गतो वणिक् ॥ ४५ ॥ इति पृष्टं द्विजं श्रांतमुज्जीवयितुमुद्यतः ॥ फूत्कृत्वा कर्णयोस्तस्य नागरं स्मृतिकारणम् ॥ ४६ ॥ पल्वलस्थोदकेनैव कृमि कर्दमसंयुजा ॥ नेत्रे संमृज्य श्रांतस्य पर्णैः संवीज्य तन्मुखे ॥ ४७ ॥ ससंज्ञं च मुनिं कृत्वा त्वमात्थ स्वस्थमानसः ॥ मा शंका ते मुने कार्या मत्तः शस्त्रभृतो वने ॥ ४८ ॥ निष्किंचनः सुखी लोके कुतस्ते भयमुल्बणम् ॥ भिन्नपात्रेण जीर्णेन न मे किंचिद्भविष्यति ॥ ४९ ॥

बाणसहित इत्यर्थः । पणं भांडम् वित्तमित्यर्थः ॥ ४१ ॥ गुल्मे लतादीनां ग्रन्थिरूपे ॥ ४२ ॥ ४३ ॥ ४४ ॥ ४५ ॥ नागरं शुण्ठीचूर्णम् ॥ ४६ ॥ कृमिकर्दमाभ्यां संयुजा सहितेन ॥ ४७ ॥ ४८ ॥ उल्बणम् अतिदुःखदम् ॥ ४९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पलायता धावमानेन । परस्मैपदमार्षम् ॥ ५० ॥ ५१ ॥ ५२ ॥ ५३ ॥ आरावम् आक्रोशम् ॥ ५४ ॥ ५५ ॥ पलाशं पत्रम् ॥ ५६ ॥ ५७ ॥ ५८ ॥ ५९ ॥

एतावद्वद मे विद्वन्वणिक्कुत्र पलायितः ॥ कुत्र गुल्मे धनं क्षिप्तं तेन शीघ्रं पलायता ॥ ५० ॥ अन्यथा त्वां हनिष्यामि यदि मिथ्या वदिष्यसि ॥ ॥ ॥ कर्षण उवाच ॥ ॥ धनं गुल्मे विनिक्षिप्तं मार्गादस्मात्पलायितः ॥५१॥ इति प्राह भयात्सोपि पृष्टः प्राणपरीप्सया॥ गच्छ विप्र सुखं मार्गं मत्तो भीतिं विहाय च ॥ ५२ ॥ इतो विदूरे सलिलं तडागे वर्तते शुभम् ॥ तत्पीत्वा सलिलं पुण्यं गच्छ ग्रामं गतश्रमः ॥ ५३ ॥ अधुनैवा गमिष्यंति राजकीयाः पथा जनाः ॥ मत्पदान्वेषणे सक्ताः श्रुत्वा रावं वणिक्पतेः ॥ ५४ ॥ तृषार्तमनुगंतुं मे न शक्यं त्वां ततो द्विज ॥ वीज यानेन पर्णेन घर्मः किंचिद्गमिष्यति ॥ ५५ ॥ तस्मै दत्त्वा पलाशं च त्वमागा विपिनं पुनः ॥ तेन पुण्यप्रभावेन वैशाखे घर्मघर्वरे ॥ ५६ ॥ स्वकार्यार्थं कृतेनापि मुनेस्त्राणाय पद्धतौ ॥ जन्मासीत्ते महापुण्ये राजवंशेऽतिविस्तृते ॥ ५७ ॥ यदीच्छसि सुखं राज्यं धनधान्यादिसंपदः ॥ स्वर्गापवर्गौ यदि वा सायुज्यं वा हरेः पदम् ॥ ५८ ॥ कुरु वैशाखधर्मांस्त्वं सर्वसौख्यमवाप्स्यसि ॥ मासोऽयं माधवोनाम तृतीया चाक्षया ह्वया ॥ ५९ ॥ गां च सकृत्प्रसूताख्यां देहि विप्राय सीदते ॥ तेन ते कोशपूर्तिः स्याच्छय्यां देहि सुखं भवेत् ॥ ६० ॥ कुरु च्छत्रप्रदानं च साम्राज्यं ते भविष्यति ॥ स्नानं कुरु यथान्यायं तथैवार्चय माधवम् ॥ ६१ ॥ देहि त्वं प्रतिमां दिव्यां कृत्वा तेन जयो भवेत् ॥ आत्मतुल्यगुणान्पुत्रान्यदि कामयसे नृप ॥ ६२ ॥ सर्वभूतहितार्थाय प्रपादानं च त्वं कुरु ॥ वैशाखोक्तानिमान्धर्मान्सम्यगाचर भूमिप ॥ ६३ ॥ तेन ते सकला लोका वशं यांति न संशयः ॥ निष्कामकेन चित्तेन यदि धर्मान्करिष्यसि ॥ ६४ ॥ वैशाखे पुण्यमासेऽस्मिन्प्रीतये मधुघातिनः ॥ प्रत्यक्षो भविता विष्णुस्तव निर्मलचेतसः ॥ ६५ ॥ येन चाचरिताः पुंसा धर्मा ह्येते शुभावहाः ॥ तेषां च ह्यक्षया लोकाः पुराणे कवयो विदुः॥ ॥ ६६ ॥ एतत्सर्वं तव प्रोक्तं यथादृष्टं यथाश्रुतम् ॥ इति राजानमामंत्र्य ब्राह्मणौ च पुरोधसौ ॥ ६७ ॥ याजोपयाजकौनाम जग्मतुस्तौ यथागतौ ॥ ततो राजा महावीर्यः पुरोधोभ्यां च बोधितः ॥ ६८ ॥

॥ ६० ॥ ६१ ॥ ६२ ॥ ६३ ॥ ६४ ॥ ६५ ॥ ६६ ॥ राजानं कथयित्वा इति शेषः, आमंत्र्य आपृच्छय ॥ ६७ ॥ ६८ ॥

Nepal Sanskrit University, Balmiki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ६९ ॥ ७० ॥ ७१ ॥ ७२ ॥ ७३ ॥ अर्बुदं दशकोटिसंख्याकम्, दीर्घग्रीवा उष्ट्रा तेषामयुतं दशसहस्राणि ॥ ७४ ॥ ७५ ॥ ७६ ॥ ७७ ॥ ७८ ॥ ७९ ॥

वैशाखधर्मात्सकलांश्चकार श्रद्धयाऽन्वितः ॥ यथोपदिष्टं च तथा मधुसूदनमर्चयत् ॥ ६९ ॥ ततो लब्धप्रभावः सन्बंधुभिः सकलैर्वृतः ॥ पांचाल नगरीं प्राप हतशेषबलान्वितः ॥ ७० ॥ ततस्तु शत्रवो भूपा उपश्रुत्य च भूपतेः ॥ प्रवेशं च पुरस्याऽथ पुनराजग्मुरुद्धताः ॥ ७१ ॥ तदा पांचा लभूपेन नृपाणामभवद्रणम् ॥ जिग्ये सर्वान्महाबाहूनेक एव महारथः ॥ ७२ ॥ पलायितेषु भूपेषु नानादेशपथिष्वपि ॥ राज्ञां कोशगजानश्वा न्स्वयं जग्राह वीर्यवान् ॥ ७३ ॥ अश्वानां निर्बुदं चैव गजानां च त्रिकोटिकम् ॥ रथानामर्बुदं चैव दीर्घग्रीवायुतं तथा ॥ ७४ ॥ रासभाणां त्रिलक्षाणि प्रापयामास तां पुरीम् ॥ वैशाखधर्ममाहात्म्यात्क्षणात्सर्वे च भूभृतः ॥ ७५ ॥ करदा भग्नसंकल्पाः पादाक्रांता बभूविरे ॥ सुभिक्षम तुलं चासीत्पांचालविषयेषु च ॥ ७६ ॥ एकच्छत्रमभूद्राज्यं प्रसादान्मधुघातिनः ॥ पुत्राः पंचाऽपि तस्यासञ्छौर्यौदार्यगुणान्विताः ॥ ॥ ७७ ॥ धृष्टकीर्तिर्धृष्टकेतुर्धृष्टद्युम्नस्तथाऽपरे ॥ विजयश्चित्रकेतुश्च मयूरध्वजसन्निभाः ॥ ७८ ॥ अनुरक्ताः प्रजाश्चासन्धर्मेण प्रतिपालिताः ॥ वैशाखस्य प्रतापेन प्रत्ययस्तत्क्षणादभूत् ॥ ७९ ॥ पुनश्चकार तान्धर्मान्पांचालनगरीश्वरः ॥ अकामुकेन चित्तेन प्रीतये मधुघातिनः ॥ ८० ॥ धर्मेणानेन संतुष्टो भगवान्मधुसूदनः ॥ अक्षयायां तृतीयायां प्रत्यक्षः समजायत ॥ ८१ ॥ तं दृष्ट्वा विस्मितो भूत्वा परमात्मानमच्युतम् ॥ नारायणं चतुर्बाहुं शंखचक्रगदाधरम् ॥ ८२ ॥ पीतांबरधरं देवं वनमालाविभूषितम् ॥ सलक्ष्मीकं सानुगं च गरुडोपरि संस्थितम् ॥ ८३ ॥ निरीक्ष्य दुःसहं तेजः सद्यो मीलितलोचनः ॥ उत्पतन्संपतन्हर्षान्मत्तोन्मत्त इव भ्रमन् ॥ ॥ ८४ ॥ पुलकांकितसर्वांगो गलद्बाष्पाकुलेक्षणः ॥ तुष्टाव परया भक्त्या प्रांजलिः प्रणतो भुवि ॥ ८५ ॥ इति श्रीस्कांदे महा पुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे वैशाखमासमाहात्म्ये नारदाम्बरीषसंवादे पांचालदेशाधिपतेर्जयप्राप्तिदरिद्रनाशवर्णनं नाम पंचदशोऽध्यायः ॥ १५ ॥ ॥ छ ॥

॥ ८० ॥ ८१ ॥ ८२ ॥ ८३ ॥ मत्तोऽनवहितः उन्मत्तश्चित्तविक्षेपवान् ॥ ८४ ॥ इति वैशाखमासमाहात्म्यटीकायां पंचदशोऽध्यायः ॥ १५ ॥ ॥ छ ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पुरुयशसा कृता विष्णुस्तुतिः, तस्मै विष्णुना दत्तं वरप्रदानम्, पुरुयशसो विष्णुसायुज्यं च वर्ण्यते तद्दर्शनेत्यादिना ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ आत्मना स्वमायया ॥ ५ ॥

॥ ॥ श्रुतदेव उवाच ॥ ॥ तद्दर्शनाह्लादपरिप्लुताशयः सद्यः समुत्थाय ननाम मूर्ध्ना ॥ चिरं निरीक्ष्याऽऽकुललोचनो ह्यमुं विश्वा
त्मदेवं जगतामधीशम् ॥ १ ॥ दधार पादाववनिज्य तज्जलं यत्पादजाऽऽब्रह्म जगत्पुनाति ॥ समर्चयामास महाविभूतिभिर्महार्हवस्त्राभर
णानुलेपनैः ॥ २ ॥ स्रग्धूपदीपामृतभक्षणादिभिस्त्वग्गात्रवित्तात्मसमर्पणेन ॥ तुष्टाव विष्णुं पुरुषं पुराणं नारायणं निर्गुणमद्विती
यम् ॥ ३ ॥ निरंजनं विश्वसृजामधीशं वन्दे परं पद्मभवादिवंदितम् ॥ यन्मायया तत्त्वविदुत्तमा जना विमोहिता विश्वसृजामधीश्वरम् ॥
॥ ४ ॥ मुह्यंति मायाचरितेषु मूढा गुणेषु चित्रं भगवद्विचेष्टितम् ॥ अनीह एतद्बहुधैक आत्मना सृजत्यवत्यत्ति न सज्जतेऽप्यथ ॥ ५ ॥
समस्तदेवासुरसौख्यदुःखप्राप्त्यै भवान्पूर्णमनोरथोऽपि ॥ तत्राऽपि काले स्वजनाभिगुप्त्यै बिभर्षि सत्त्वं खलनिग्रहाय ॥ ६ ॥ तमोगुणं राक्षस
बन्धनाय रजोगुणं निर्गुण विश्वमूर्ते ॥ दिष्ट्या त्वदंघ्रिः प्रणताघनाशनस्तीर्थास्पदं हृदि धृतः सुविपक्वयोगैः ॥ ७ ॥ उत्सिक्तभक्त्युपहताशय
जीवभावाः प्रापुर्गतिं तव पदस्मृतिमात्रतो ये ॥ भवाख्यकालोरगपाशबन्धः पुनःपुनर्जन्मजरादिदुःखैः ॥ ८ ॥ भ्रमामि योनिष्वहमाखुभक्ष्य
वत्प्रवृद्धतर्षस्तव पादविस्मृतेः ॥ नूनं न दत्तं न च ते कथा श्रुता न साधवो जातु मयाऽपि सेविताः ॥ ९ ॥ तेनारिभिर्ध्वस्तपराध्र्यलक्ष्मीर्वनं
प्रविष्टः स्वगुरुद्वयं स्मरन् ॥ स्मृतौ च तौ मां समुपेत्य दुःखात्संबोधयांचक्रतुरार्तबंधू ॥ १० ॥ वैशाखधर्मैः श्रुतिचोदितैः शुभैः स्वर्गापवर्गादि
पुमर्थहेतुभिः ॥ तद्बोधतोऽहं कृतवान्समस्ताञ्छुभावहान्माधवमासधर्मान् ॥ ११ ॥ तस्मादभून्मे परमः प्रसादस्तेनाखिलाः संपद ऊर्जिता
इमाः ॥ नाग्निर्न सूर्यो न च चन्द्रतारका न भूर्जलं खं श्वसनोऽथ वाङ्मनः ॥ १२ ॥ उपासितास्तेऽपि हरंत्यघं चिराद्विपश्चितो घ्नन्ति मुहूर्तसे
वया ॥ यान्मन्यसे त्वं भविनोऽपि भूरिशस्त्यक्तेषणांस्त्वत्पदन्यस्तचित्तान् ॥ १३ ॥ नमः स्वतंत्राय विचित्रकर्मणे नमः परस्मै सदनुग्रहाय ॥
त्वन्मायया मोहितोऽहं गुणेषु दारार्थरूपेषु भ्रमाम्यनर्थदृक् ॥ १४ ॥

सत्त्वं तदाख्यं गुणम् ॥ ६ ॥ ७ ॥ ८ ॥ प्रवृद्धो वृद्धिं गतस्तर्षो वासना यस्य ९ ॥ १० ॥ पुमर्था धर्मार्थकाममोक्षाख्याः पुरुषार्थास्तेषां हेतवः साधनानि ॥
॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मूलं संसारकारणमविद्या तस्य नाशकम् ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ गच्छतु निर्गच्छतु नाशं प्राप्नोतु इति यावत् ॥ २३ ॥

त्वत्पादपद्मे सतिमूलनाशने समस्तपापापहरं सुनिर्मलम् ॥ सुखेच्छयानर्थनिदानभूतैः सुतात्मदारैर्ममताभियुक्तः ॥ १५ ॥ न क्वापि निद्रां लभते न शर्म प्रवृद्धतर्षः पुनरेव तस्मिन् ॥ लब्ध्वा दुरापं नरदेवजन्म त्वं यत्नतः सर्वपुमर्थहेतुः ॥१६॥ पदारविन्दं न भजामि देव संमूढचेता विषयेषु लालसः ॥ करोमि कर्माणि सुनिष्ठितः सन्प्रवृद्धतर्षस्तदपेक्षया ददत् ॥ १७ ॥ पुनश्च भूयामहमद्य भूयामित्येवं चिन्ताशतलोलमानसः॥ तदैव जीवस्य भवेत्कृपा विभो दुरंतशक्तेस्तव विश्वमूर्ते ॥ १८ ॥ समागमः स्यान्महतां हि पुंसां भवांबुधिर्येन हि गोष्पदायते ॥ सत्संगमो देव यदैव भूयात्तर्हीश देवे त्वयि जायते मतिः ॥१९॥ समस्तराज्यापगमं हि मन्ये ह्यनुग्रहं ते मयि जातमञ्जसा ॥ यथार्य ते ब्रह्मसुरासुराद्यैर्निवृत्ततर्षैरपि हंसयूथैः ॥ २० ॥ इतः स्मराम्यच्युतमेव सादरं भवापहं पादसरोरुहं विभो ॥ अकिंचनप्रार्थ्यममन्दभाग्यदं न कामयेऽन्यत्तव पादपद्मात् ॥ ॥ २१ ॥ अतो न राज्यं न सुतादिकोशं देहेन शश्वत्पतता रजोभुवा ॥ भजामि नित्यं तदुपासितव्यं पादारविंदं मुनिभिर्विचिन्त्यम् ॥ २२ ॥ प्रसीद देवेश जगन्निवास स्मृतिर्यथा स्यात्तव पादपद्मे ॥ सक्तिः सदा गच्छतु दारकोशपुत्रात्मचिह्नेषु गणेषु मे प्रभो॥ २३ ॥ भूयान्मनः कृष्ण पदारविन्दयोर्वचांसि ते दिव्यकथानुवर्णने ॥ नेत्रे ममेमे तव विग्रहेक्षणे श्रोत्रे कथायां रसना त्वदर्पिते ॥ २४ ॥ घ्राणं च त्वपादसरोजसौरभे त्वद्भक्तगन्धादिविलेपने सकृत् ॥ स्यातां च हस्तौ तव मन्दिरे विभो संमार्जनादौ मम नित्यदेव ॥ २५ ॥ पादौ विभोः क्षेत्रकथाऽनुसर्पणे मूर्धा च मे स्यात्तव वन्दनेऽनिशम् ॥ कामश्च मे स्यात्तव सत्कथायां बुद्धिश्च मे स्यात्तव चिंतनेऽनिशम् ॥ २६ ॥ दिनानि मे स्युस्तव सत्कथोदयैरुद्गीयमानैर्मुनिभिर्गृहागतैः ॥ हीनः प्रसंगस्तव मे न भूयात्क्षणं निमेषार्द्धमथाऽपि विष्णो ॥ २७ ॥ न पारमेष्ठ्यं न च सार्वभौमं न चापवर्गं स्पृहयामि विष्णो ॥ त्वत्पादसेवां च सदैव कामये प्रार्थ्यां श्रिया ब्रह्मभवादिभिः सुरैः ॥ २८ ॥ इति राज्ञा स्तुतो विष्णुः प्रसन्नः कमलेक्षणः ॥ मेघगम्भीरया वाचा तमुवाच क्षितीश्वरम् ॥ २९ ॥ ॥ श्रीभगवानुवाच ॥ ॥ जाने त्वां दासवर्यं मे निष्कामुकमकल्मषम् ॥ अथाऽपि ते प्रदास्यामि वरं दैवतदुर्लभम् ॥ ३० ॥

त्वदर्पिते अन्ने रुचिशीलेत्यर्थः ॥ २४ ॥ २५ ॥ २६ ॥ तव कथादिभिर्हीनः रहितः प्रसंगः कालः ॥ २७ ॥ पारमेष्ठ्यं ब्रह्मपदम् ॥ २८ ॥ २९ ॥ ३० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आयुष्यं चायुतं दिव्यं संपदश्च नरेश्वर ॥ भक्तिर्मयि दृढा भूयादन्ते सायुज्यमेव च ॥ ३१ ॥ त्वया कृतेन स्तोत्रेण मां स्तुवन्ति च ये भुवि ॥ तेषां तुष्टः प्रदास्यामि भुक्तिं मुक्तिं न संशयः ॥ ३२ ॥ तृतीयैषाऽक्षयानाम भुवि ख्याता भविष्यति ॥ यस्यां तव प्रसन्नोऽहं भुक्तिमुक्तिफलप्रदः ॥ ३३ ॥ ये कुर्वंति नरा मूढाः स्नानदानादिकाः क्रियाः ॥ व्याजेनाऽपि स्वभावाद्वा यांति मत्पदमव्ययम् ॥ ३४ ॥ ये चाऽक्षयतृतीयायां पितॄनुद्दिश्य मानवाः ॥ श्राद्धं कुर्वंति तेषां वै तदानंत्याय कल्पते ॥ ३५ ॥ न चानया तिथिर्लोके समा वा नाधिका भुवि ॥ अस्यां कृतं स्वल्पमपि तदक्षय्यफलं भवेत् ॥ ३६ ॥ यो गां दद्यान्नृपश्रेष्ठ ब्राह्मणाय कुटुंबिने ॥ सर्वसंपत्प्रवर्षाख्या भुक्तिमुक्तिः करे स्थिता ॥ ३७ ॥ यो हि दद्यादनड्वाहं सर्वपापविनाशनम् ॥ कालमृत्युविमुक्तः सन्दीर्घायुष्यमवाप्नुयात् ॥ ३८ ॥ वैशाखमासे यो धर्मान्कुरुते मत्प्रियावहान् ॥ तेषां मृत्युजराजन्मभयं पापं हराम्यहम् ॥ ३९ ॥ यथा वैशाखधर्मैस्तु तुष्टः स्यां सकलैरपि ॥ मासधर्मैर्न तुष्टः स्यां मासो मे माधवः प्रियः ॥ ॥ ४० ॥ सर्वधर्मोज्झिता वापि ब्रह्मचर्यविवर्जिताः ॥ वैशाखमासनिरता यांति मत्पदमव्ययम् ॥४१॥ यद्दुरापं तपोभिश्च सांख्ययोगैर्मखैरपि ॥ तद्धाम परमं यांति वैशाखनिरता नराः ॥ ४२ ॥ अपि पापसहस्रं वा मासोऽयं हरतेऽनघ ॥ प्रायश्चित्तविहीनं वा मत्पादस्मरणं यथा ॥४३॥ गुरूपदिष्टः कांतारे वैशाखे निरतो भवान् ॥ समाराध्य जगन्नाथं तेनाप्तमखिलं नृप ॥ ४४ ॥ धर्मेणानेन संप्रीतः प्रत्यक्षोऽहं भवामि ते ॥ भुक्त्वा भोगान्यथाकामान्देवैरपि सुदुर्लभान् ॥ ४५ ॥ इति तस्मै वरं दत्त्वा देवदेवो जनार्दनः ॥ पश्यतामेव सर्वेषां तत्रैवांतरधीयत ॥ ४६ ॥ ततो भूपालवर्योऽसौ बभूवात्यंतविस्मितः ॥ हृष्टपुष्टतनुर्भूप लब्धनष्टधनो यथा ॥ ४७ ॥ ततः शशास पृथिवीं तच्चित्तस्तत्परायणः ॥ महद्भिर्बोधितो नित्यं गुरुभिश्च निरंतरम् ॥ ४८ ॥ नान्यं प्रियतमं मेने वासुदेवमृते नृपः ॥ यत्संपर्कात्प्रिया आसन्दारामात्यसुतादयः ॥ ४९ ॥ सर्वान्धर्मांश्चकाराऽसौ वैशाखोक्तान्पुनःपुनः ॥ तेन पुण्यप्रभावेन पुत्रपौत्रादिभिर्वृतः ॥ ५० ॥ भुक्त्वा मनोरथान्सर्वान्देवानामपि दुर्लभान् ॥ अंते जगाम सायुज्यं विष्णोर्देवस्य चक्रिणः ॥ ५१ ॥

विहीनमन्वाद्युक्तप्रायश्चित्तरहितं यत्पापसहस्रम् ॥ ४३ ॥ कांतारं वनम् ॥ ४४ ॥ ४५ ॥ ४६ ॥ ४७ ॥ ४८ ॥ ४९ ॥ ५० ॥ ५१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ५२ ॥ इति वैशाखमासमाहात्म्यटीकायां षोडशोऽध्यायः ॥ १६ ॥ ॥ छ ॥ ॥ पुनश्च वैशाखधर्मान्वक्तुं प्रस्तौति—वैशाख इत्यादिना ॥ १ ॥ २ ॥ पारमंतं फलमिति यावत् ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ भावितां विचारितताम् ॥ ७ ॥ ८ ॥ तप उष्णं तेन कर्षितः ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ शर्कराभिर्वालुका

य इदं परमाख्यानं शृण्वन्ति श्रावयंति च ॥ ते सर्वे पापनिर्मुक्ता यांति विष्णोः परं पदम् ॥५२॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे वैशाखमासमाहात्म्ये नारदाम्बरीषसंवादे पांचालाधिपतेः सायुज्यप्राप्तिर्नाम षोडशोऽध्यायः ॥ १६ ॥ ॥ छ ॥ ॥ ॥ श्रुतकीर्तिरुवाच ॥ ॥ वैशाखधर्मानखिलानिहामुत्र फलप्रदान् ॥ भूयोऽपि शृण्वतश्चासीत्तृप्तिर्नाऽद्यापि मानद ॥१॥ यत्र चाकैतवो धर्मो यत्र विष्णुकथाः शुभाः ॥ तच्छास्त्रं शृण्वतो नैव तृप्तिः कर्णरसायनम् ॥ २ ॥ पूर्वजन्मकृतं पुण्यं दिष्ट्या पारमुपागतम् ॥ आतिथ्यव्यपदेशेन यद्भवान्गृहमागतः ॥ ३ ॥ वचोऽमृतं मुखांभोजनिःसृतं परमाद्भुतम् ॥ पीत्वा तृप्तः पारमेष्ठ्यं मोक्षं वा च न कामये ॥४॥ तस्मात्तानेव धर्मान्मे भुक्तिमुक्तिप्रदायकान् ॥ विष्णुप्रीतिकरान्दिव्यान्भूयो विस्तरतो वद ॥ ५ ॥ इत्युक्तस्तु पुरा राज्ञा श्रुतदेवो महायशाः॥ संहृष्टाऽऽत्मा शुभान्धर्मान्पुनर्व्याहर्तुमारभत् ॥ ६ ॥ ॥ श्रुतदेव उवाच ॥ ॥ शृणु राजन्प्रवक्ष्यामि कथां पापप्रणाशिनीम् ॥ वैशाखधर्मविषयां भाविता मुनिभिर्मुहुः॥७॥ पंपातीरे द्विजः कश्चिच्छंखोनाम महायशाः ॥ गुरौ सिंहगते चागान्नदीं गोदावरीं शुभाम् ॥८॥ तीर्त्वा भीमरथीं पुण्यां कांतारे कण्टकाचले ॥ निर्जले निर्जने घोरे वैशाखे तपकर्षितः ॥ ९ ॥ वृक्षे चोपविवेशाऽसौ मध्याह्नसमये द्विजः ॥ तदा कश्चिद्दुराचारो व्याधश्चापधरः शठः ॥१०॥ निर्घृणः सर्वभूतेषु कालांतक इवाऽपरः ॥ तं कुण्डलधरं विप्रं दीक्षितं भास्करोपमम् ॥ ११ ॥ दृष्ट्वा बद्ध्वा स जग्राह कुण्डलादिकमुग्रधीः ॥ उपानहौ च च्छत्रं च अक्षमालां कमण्डलुम् ॥ १२ ॥ पश्चाद्विसृज्य तं विप्रं गच्छेत्याह विमूढधीः ॥ १३ ॥ ततः स गच्छन्पथि शर्कराऽऽविले सूर्यांशुतप्ते जलवर्जिते खरे ॥ संतप्तपादस्तृणछादिते स्थले क्वचिच्चचारोपवसन्नूर्ध्वरेताः ॥ १४ ॥ स वै द्रुतं संपतन्क्वापि तुष्यन्हाहेति वादी स जगाम तूर्णम् ॥ दृष्ट्वा मुनिं खिद्यमानं पृथिव्यां मध्यं गते पूष्णि दया बभूव ॥ १५ ॥ व्याधस्य धर्मविमुखस्य च पापबुद्धेस्तस्मै ददामि सुखदां खलु पादरक्षाम् ॥ १६ ॥

भिराविले व्याप्ते इत्यर्थः ॥ १४ ॥ १५ ॥ १६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ १७ ॥ १८ ॥ सीदते दुःखिताय ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ सत्त्वशुद्धिरन्तःकरणशुद्धिः ॥ २९ ॥

चौर्येणैव स्वधर्मेण या गृहीता वनांतरे ॥ तदीयमेव तत्सर्वं व्याधानां धर्मनिर्णयः ॥ तस्मादुपानहौ दास्ये मुहुर्दुःखापनुत्तये ॥ १७ ॥
तेन श्रेयो भवेद्यच्च तद्भवेन्मम पापिनः ॥ जीर्णे चोपानहौ द्वे च वर्तेते पादयोर्मम ॥ न ताभ्यामस्ति मे कृत्यं तस्मात्ते वै ददाम्यहम् ॥
॥ १८ ॥ इति निश्चित्य मनसि तूर्णं गत्वा ददौ च ते ॥ शर्करातप्तपादाय द्विजवर्याय सीदते ॥ १९ ॥ उपानहौ गृहीत्वा ते
निर्वृतिं च परां ययौ ॥ सुखी भवेति तं व्याधमाशीर्भिरभिनन्द्य च ॥ २० ॥ नूनं सुपक्वपुण्योऽयं वैशाखे दत्तवानमू ॥ व्याध
स्यापि च दुर्बुद्धेः प्रायो विष्णुः प्रसीदति ॥ २१ ॥ सर्वस्याऽऽप्या च भूयोऽपि यत्सुखं तदभून्मम ॥ ततोऽभिश्रुत्य तद्वाक्यं किमेतदिति
विस्मितः ॥ २२ ॥ व्याजहार पुनर्विप्रं ब्रह्मिष्ठं ब्रह्मवादिनम् ॥ त्वदीयं तु मया दत्तं कथं पुण्यं भवेन्मम ॥ २३ ॥ प्रशंससि च वैशाखं हरिं
स्तुष्टो भवेदिति ॥ एतदाचक्ष्व मे ब्रह्मन्को वैशाखस्तु को हरिः ॥ २४ ॥ को धर्मः किं फलं तस्य शुश्रूषोर्मे दयानिधे ॥ इति व्याधवचः श्रुत्वा
शंखस्तुष्टमना अभूत् ॥ २५ ॥ प्रशंसन्स च वैशाखं पुनर्विस्मितमानसः ॥ इदानीं दत्तवान्पादत्राणे मे लुब्धकः शठः ॥२६॥ यद्दुर्बुद्धेश्च वैषम्यं
जातं चित्रमहो बत ॥ सर्वेषामेव धर्माणां फलं जन्मांतरेषु वै ॥ २७ ॥ वैशाखमासधर्माणां फलं सद्यः क्षणे नृणाम् ॥ पापाचारस्य दुर्बुद्धेर्व्या
धस्यापि दुरात्मनः ॥ २८ ॥ दैवादुपानहोर्दानात्सत्त्वशुद्धिरभूदहो ॥ यच्च विष्णोः प्रियं कर्म यत्तत्सन्तोषनिर्मलम् ॥ २९ ॥ तदेव धर्ममित्या
हुर्मन्वाद्या धर्मवित्तमाः ॥ धर्मा माधवमासीयाः प्रिया विष्णोरतीव ते ॥ ३० ॥ धर्मैर्माधवमासीयैर्यथा तुष्यति केशवः ॥ न तथा सर्वदानैश्च
तपोभिश्च महामखैः ॥ ३१ ॥ नानेन सदृशो धर्मः सर्वधर्मेषु विद्यते ॥ मा गयां यांतु मा गंगां मा प्रयागं तु पुष्करम् ॥ ३२ ॥ मा केदारं कुरु
क्षेत्रं मा प्रभासं स्यमन्तकम् ॥ मा गोदां मा च कृष्णां च मा सेतुं मा मरुद्वृधम् ॥ ३३ ॥ वैशाखधर्ममाहात्म्यं शंसंती च कथाऽऽपगा ॥
तत्र स्नातस्य वै विष्णुः सद्यो ह्यवरुध्यते ॥ ३४ ॥ मासे माधवसंज्ञेऽस्मिन्यस्त्वल्पेनैव साध्यते ॥ न तद्बहुव्ययैर्दानैर्न धर्मैर्वाऽपि वै मखैः ॥
॥ ३५ ॥ मासोऽयं माधवोनाम व्याध पुण्यविवर्द्धनः ॥ तस्मिन्मह्यं त्वया दत्ते पादुके तापनाशने ॥ ३६ ॥

॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥

CC-0. In Public Domain. Digitization by eGangotri

विधास्यति करिष्यति ॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥ निरीक्षं तावत्र परस्मैपदमार्षम् ॥ ४१ ॥ ४२ ॥ ४३ ॥ ४४ ॥ ४५ ॥ ४६ ॥ ४७ ॥ ४८ ॥

तेन ते पूर्वकालीनं पुण्यं पाकमुपागतम् ॥ तुष्टस्तु भगवान्प्रायः श्रेयो व्याध विधास्यति ॥ ३७ ॥ अन्यथा ते कथं भूयाद्बुद्धिरेतादृशी शुभा ॥ मुनावेवं ब्रुवाणे च मृत्युना प्रेरितो बली ॥ ३८ ॥ सिंहो व्याघ्रवधार्थाय प्राद्रवत्क्रोधविह्वलः ॥ मध्ये दृष्ट्वा च मातङ्गं दैवाद्देवेन कल्पितम् ॥ ३९ ॥ तं हंतुमुद्यतोऽगच्छत्पदाक्रांतं व्यवस्थितम् ॥ तयोर्युद्धमभूद्राजन्सिंहमातंगयोर्वने ॥ ४० ॥ श्रांतौ युद्धाच्च विरतौ निरीक्षंतौ च तस्थतुः ॥ व्याधमुद्दिश्य यच्चोक्तं मुनिना च महात्मना ॥ ४१ ॥ समस्तपातकध्वंसि दैवाच्छुश्रुवतुश्च तौ ॥ तेनैव मासमाहात्म्यश्रवणेनामलाशयौ ॥ ४२ ॥ शापान्मुक्तौ च तौ देहात्सद्यो मुक्तौ दिवं गतौ ॥ दिव्यरूपधरौ दिव्यौ दिव्यगंधानुलेपनौ ॥ ४३ ॥ दिव्यं विमानमारूढौ दिव्यनारीनिषेवितौ ॥ सद्योऽवनतमूर्द्धानौ प्रांजली चोपतस्थतुः ॥ ४४ ॥ मुनींद्रो धर्मवक्ता च व्याधमुद्दिश्य वै पथि ॥ तौ दृष्ट्वा विस्मितः प्राह कौ युवामिति निश्चलः ॥ ४५ ॥ दुर्योनौ तु कुतो जन्म युवयोर्वा कथं मृतिः ॥ अहेतोर्विपिने चाऽस्मिन्परस्परवधोद्यतौ ॥ ४६ ॥ एतत्सर्वं सुविस्तार्यं सम्यग्वदत मेऽनघौ ॥ इत्युक्तौ मुनिना तेन वचः प्रत्यूचतुः पुनः ॥ ४७ ॥ मतंगस्य मुनेः पुत्रौ दंतिलः कोहलोऽपरः ॥ शापदोषेण तौ जातौ नाम्ना दंतिलकोहलौ ॥ ४८ ॥ रूपयौवनसंपन्नौ सर्वविद्याविशारदौ ॥ आवामुद्दिश्य प्रोवाच पिता धर्मार्थकोविदः ॥ ४९ ॥ मतंगोनाम ब्रह्मर्षिः सर्वधर्मविदुत्तमः ॥ वैशाखे मासि तनयौ मधुसूदनवल्लभे ॥ ५० ॥ प्रपां कुरुत मार्गे च जनान्वीजयतं क्षणम् ॥ मार्गे छायां विधत्तां च भूयत्र शीतलांबु च ॥ ५१ ॥ कुरुतं स्नानमुषसि तथैवार्चयतं विभुम् ॥ कथां च शृणुतं नित्यं यया बन्धो निवर्तते ॥ ५२ ॥ एवं च बहुभिर्वाक्यैर्बोधितावपि दुर्मती ॥ क्रुद्धोऽभवं दंतिलोऽहं मत्तोऽहं कोहलाह्वयः ॥ ५३ ॥ क्रुद्धः शशाप तौ सद्यः पिता धर्मेषु लालसः ॥ ५४ ॥ पुत्रं च धर्मविमुखं भार्यां चाऽप्रियवादिनीम् ॥ अब्रह्मण्यं च राजानं त्यजेत्सद्यो न चेत्पतेत् ॥ ॥ ५५ ॥ दाक्षिण्यादर्थलोभाद्वा संसर्गं ये प्रकुर्वते ॥ ते सर्वे नरकं यांति यावदिंद्राश्चतुर्दश ॥ इति ज्ञात्वा शशापावां मदक्रोधपरिप्लुतौ ॥५६॥

॥ ४९ ॥ ५० ॥ ५१ ॥ ५२ ॥ ५३ ॥ ५४ ॥ अब्रह्मण्यं ब्रह्मणे ब्राह्मणाय वेदाय वा साधुर्ब्रह्मण्यस्तद्विपरीतोऽब्रह्मण्यस्तमित्यर्थः ॥ ५५ ॥ ५६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ५७ ॥ ५८ ॥ ५९ ॥ श्रवणे कर्णे ॥ ६० ॥६१॥६२॥६३॥६४॥६५॥६६॥६७॥ इति वैशाखमासमाहात्म्यटीकायां सप्तदशोऽध्यायः ॥१७॥ ॥छ॥

क्रुद्धोऽयं दंतिलो भूयात्सिंहः क्रोधपरिप्लुतः ॥ मत्तस्तु कोहलो भूयान्मत्तो मातंगयूथपः ॥ ५७॥ कृतानुतापौ पश्चात्तु प्रार्थयावो विमोचनम् ॥ आवाभ्यां प्रार्थितो भूयो विशापं च ददौ पिता ॥ ५८ ॥ युवां प्राप्य च दुर्योनिं कियत्कालांतरेऽपि च ॥ संगमो भविता तत्र परस्परवधैषिणोः ॥ ५९ ॥ तस्मिन्नेव हि समये संवादो व्याधशंखयोः ॥ वैशाखधर्मविषयो दैवाद्वां श्रवणेऽपि च ॥ ६० ॥ गमिष्यति क्षणादेव तस्मान्मुक्तिर्भविष्यति ॥ शापान्मुक्तौ पूर्वमेव रूपमास्थाय पुत्रकौ ॥ ६१ ॥ मामेव प्राप्य वसतं नान्यथा मे वचो भवेत् ॥ इति शप्तौ च गुरुणा दुर्योनिं प्राप्य दुर्मती ॥ ६२ ॥ प्राप्य दैवात्संगतिं च परस्परवधैषिणौ ॥ संवादं युवयोर्दिव्यं शुभं तं शुश्रुवावहे ॥ ६३ ॥ तेन सद्यो विमुक्तिश्च क्षणादेवाऽऽवयोरभूत् ॥ इति सर्वं समाख्याय प्रणम्य च मुनीश्वरम् ॥ ६४ ॥ समामंत्र्याभ्यनुज्ञातौ जग्मतुः पितुरंतिकम् ॥ तदेवं संप्रदृश्याह मुनिर्व्याधं दयानिधिः ॥ ६५ ॥ पश्य वैशाखमाहात्म्यश्रवणस्य फलं महत् ॥ मुहूर्तश्रवणादेव तयोर्मुक्तिः करे स्थिता ॥ ६६ ॥ इति ब्रुवाणं मुनिपुंगवं तं दयानिधिं निःस्पृहमग्र्यबुद्धिम् ॥ विशुद्धसत्त्वं सुकृतैकपात्रं स न्यस्तशस्त्रः पुनराह व्याधः ॥ ६७ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे वैशाखमासमाहात्म्ये नारदाम्बरीषसंवादे दंतिलकोहलमुक्तिप्राप्तिवृत्तान्तवर्णनं नाम सप्तदशोऽध्यायः ॥ १७ ॥ ॥ छ ॥ ॥ व्याध उवाच ॥ ॥ भवताऽनुगृहीतोऽस्मि मुने पापोऽतिदुष्टधीः ॥ दयालवो महांतो हि स्वभावादेव साधवः ॥ १ ॥ क्व व्याधश्चाऽकुलीनोऽहं क्व च वा मतिरीदृशी ॥ केवलं भवतामेव मन्येऽनुग्रहमुत्तमम् ॥२॥ अथ साधो च शिष्योस्मि कृपापात्रोस्मि मानद ॥ अनुग्राह्योऽस्मि पुत्रोऽस्मि कृपां कुरु दयानिधे ॥३॥ यथा मे न पुनर्भूयादसन्मतिरनर्थदा ॥ सद्भिस्तु संगतेः क्वापि न भूयो दुःखमश्नुते ॥४॥ तस्माद्बोधय मां विप्र सूक्तैस्तैर्वृजिनापहैः ॥ येन चाद्धा तरिष्यंति संसाराब्धिं मुमुक्षवः ॥५॥ साधूनां समचित्तानां तथा भूतदयावताम् ॥ न च हीनोत्तमः क्वापि नात्मीयो हि परस्तथा ॥६॥ ऐकाग्र्येण विचिंत्याथ चित्तशुद्धिं च पृच्छति ॥ सर्वदोषयुतो वापि सर्वधर्मोज्झितोऽपि वा ॥ ७ ॥ कृतानुतापश्च यदा यदा पृच्छति वै गुरून् ॥ तदैवोपदिशंत्यद्धा ज्ञानं संसारमोचकम् ॥ ८ ॥

॥ अथात्र पुनरपि वैशाखधर्मान्वक्तुं प्रस्तौति—भवतेत्यादिना ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ सूक्तैः सुवचनैः ॥ ५ ॥ ६ ॥ ७ ॥ उपदिशंति ते गुरवः इति शेषः ॥ ८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पापनाशस्य भाविनी कर्त्री ॥ ९ ॥ मम शुश्रूषुत्वात् नतत्वाच्च तव संगतेः शुद्धत्वाच्च इति योज्यम् ॥ १० ॥ ११ ॥ शं कल्याणमिच्छसि ॥ १२ ॥१३॥ १४ ॥ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ कलारावैर्मधुरशब्दैः, नयनोत्सवं नयनयोरुत्सवो यस्मात्तत् ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥

यथा गंगा मनुष्याणां पापनाशस्य भाविनी ॥ तथा मन्दसमुद्धारस्वभावाः साधवः स्मृताः ॥ ९ ॥ मा विचारय मां बोद्धुं दयालो भक्तव त्सल ॥ शुश्रूषुत्वान्नतत्वाच्च शुद्धत्वात्तव संगतेः ॥ १० ॥ इति व्याधवचः श्रुत्वा पुनर्विस्मितमानसः ॥ साधुसाध्विति संभाष्य धर्मानेतानु वाच ह ॥ ११ ॥ ॥ शंख उवाच ॥ ॥ विष्णुप्रीतिकरान्दिव्यान्संसाराब्धिविमोचकान् ॥ कुरु धर्मांश्च वैशाखे यदि व्याध शमिच्छसि ॥ ॥ १२ ॥ आतपो बाधते घोरो न च्छाया नांबु चात्र च ॥ तस्मात्स्थलांतरं यावो यत्र च्छाया तु वर्तते ॥ १३ ॥ तत्र गत्वा जलं पीत्वा सु च्छायां च समाश्रितः ॥ तत्र ते वर्णयिष्यामि माहात्म्यं पापनाशनम् ॥ १४ ॥ विष्णोर्माधवमासस्य यथादृष्टं यथाश्रुतम् ॥ इत्युक्तो मुनिना तेन व्याधः प्राह कृताञ्जलिः ॥ १५ ॥ इतो विदूरे सलिलं वर्तते च सरोवरे ॥ कपित्थास्तत्र वै संति फलभारेण पीडिताः ॥ १६ ॥ गच्छा वस्तत्र संतुष्टिर्भविता नात्र संशयः ॥ व्याधेनैवं समादिष्टस्तेन साकं ययौ मुनिः ॥ १७ ॥ कियद्दूरं ततो गत्वा ददर्शाग्रे सरोवरम् ॥ बक कारण्डवाकीर्णं चक्रवाकोपशोभितम् ॥ १८ ॥ हंससारसक्रौंचाद्यैः समंतात्परिशोभितम् ॥ कीचकैश्च सुघोषैश्च कूजितं भ्रमरैरपि ॥१९॥ नक्रक च्छपमीनाद्यैर्वगाह्यं सुमनोहरम् ॥ कुमुदोत्पलकह्लारपुंडरीकादिभिर्महत् ॥ २० ॥ शतपत्रैः कोकनदैः समन्तात्परिशोभितम् ॥ पक्षिणां च कलारावैर्मुखर नयनोत्सवम् ॥ २१ ॥ तटे कीचकगुल्मैश्च तथा वृक्षैश्च शोभितम् ॥ वटैः करंजैर्नीपैश्च चिंचिणीभिस्तथैव च ॥ २२ ॥ निम्बप्ल क्षप्रियालैश्च चंपकैर्बकुलैः शुभैः ॥ पुन्नागैस्तुंबरैश्चैव कपित्थामलकैरपि ॥ २३ ॥ निष्पेषणैश्च जंबूभिः समंतात्परिशोभितम् ॥ वन्यमातंगसारं गवराहमहिषादिभिः ॥ २४ ॥ शशैश्च शल्लकैश्चैव गवयैरुपशोभितम् ॥ खड्गनाभिमृगाद्यैश्च व्याघ्रैः सिंहैर्वृकैरपि ॥ २५ ॥ स्वरांतकैश्च शरभैश्च मरीभिः सुमंडितम् ॥ शाखाशाखांतरं शीघ्रं प्लवमानैः प्लवंगमैः ॥ २६ ॥

शाखाशाखान्तरैः एकशाखाया अन्यशाखां प्रति प्लवमानैः प्लवकर्तृभिः प्लवंगमैः कपिभिः ॥ २६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ इह मर्त्यलोके अमुत्र परलोके ॥ ३३ ॥ ३४ ॥ तमोमयम् अज्ञानबहुलम् ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥

मार्जारैश्चैव भल्लूकैर्भीषणं रुरुभिस्तथा ॥ झिल्लीशब्दैश्च कैंकारैः कीचकानां रवैस्तथा ॥२७॥ घोरवायुविनिर्घातदारुभारैः समन्वितम् ॥ एता
दृशं सरो दिव्यं व्याधेनैव प्रदर्शितम् ॥२८॥ ददर्श मुनिशार्दूलस्तृषया बाधितो भृशम् ॥ स्नात्वा मध्याह्नवेलायां सरस्यस्मिन्मनोरमे ॥२९॥
वाससी परिधायाऽथ कृत्वा माध्याह्निकीः क्रियाः ॥ देवपूजां ततः कृत्वा भुक्त्वा फलमतन्द्रितः ॥ ३० ॥ व्याधोपनीतं सुस्वादु कपित्थं श्रम
हारि च ॥ सुखोपविष्टः पप्रच्छ व्याधं धर्मरतं पुनः ॥ ३१ ॥ किं वक्तव्यं मया ह्यद्य तवादौ धर्मतत्पर ॥ धर्मांश्च बहवः संति नानामार्गाः
पृथग्विधाः ॥ ३२ ॥ तत्र वैशाखमासोक्ताः सूक्ष्मा अपि महार्थदाः ॥ सर्वेषामेव जंतूनामिहाऽमुत्र फलप्रदाः ॥ ३३ ॥ यत्प्रष्टव्यं मनसि ते
यच्चादौ तच्च पृच्छताम् ॥ इत्युक्तो मुनिना तेन व्याधः प्रांजलिरब्रवीत् ॥ ३४ ॥ ॥ व्याध उवाच ॥ ॥ केन वा कर्मणा चाऽऽसीद्व्याधजन्म
तमोमयम् ॥ केन वा चेदृशी बुद्धिः संगतिर्वा महात्मनः ॥ ३५ ॥ एतच्चान्यत्समाचक्ष्व यदि मां मन्यसे प्रभो ॥ इत्युक्तः पुनरप्याह शंखो
नाम महामुनिः ॥ ३६ ॥ मेघगंभीरया वाचा स्मयमानमुखांबुजः ॥ ॥ शंख उवाच ॥ ॥ शाकले नगरे पूर्वं द्विजस्त्वं वेदपारगः ॥ ३७ ॥
स्तंबोनाम महातेजास्तथा श्रीवत्सगोत्रजः ॥ तवेष्टा गणिका काचिदासीत्तत्संगदोषतः ॥ ३८ ॥ त्यक्ता नित्यक्रिया नित्यं शूद्रवद्वहमागतः ॥
शून्याचारस्य दुष्टस्य परित्यक्तक्रियस्य च ॥३९॥ ब्राह्मणी च तदा चाऽऽसीद्भार्या कांतिमती तव ॥ सा त्वां पर्यचरत्सुभ्रूः सवेश्यं ब्राह्मणाधमम्
॥ ४० ॥ उभयोः क्षालयंती च पादांस्त्वत्प्रियकारिणी ॥ उभयोरप्यधः शेते उभयोर्वचने रता ॥ ४१ ॥ वेश्यया वार्यमाणाऽपि पातिव्रत्यव्रत
स्थिता ॥ एवं शुश्रूषयंत्या हि भर्तारं वेश्यया सह ॥ ४२ ॥ जगाम सुमहान्कालो दुःखिताया महीतले ॥ अपरस्मिन्दिने भर्ता माषं च मूलका
न्वितम् ॥४३॥ अभक्षयच्छूद्रधर्मान्निष्पावांस्तिलमिश्रितान् ॥ तदपथ्यमशित्वा तु वमंश्चैव विरेचयन् ॥४४॥ अपथ्याद्दारुणो रोगो व्यजायत
भगंदरः ॥ स दह्यमानो रोगेण दिवारात्रं तु भूरिशः ॥ ४५ ॥ यावदास्ते गृहे वित्तं तावद्वेश्या च संस्थिता ॥ गृहीत्वा तस्य सा वित्तं पश्चान्नो
वास मंदिरे ॥ ४६ ॥ अन्यस्य पार्श्वमासाद्य गता घोरा सुनिर्घृणा ॥ ततः स दीनवचनो व्याधिबाधासुपीडितः ॥ ४७ ॥

॥ ३९ ॥ ४० ॥ ४१ ॥ ४२ ॥ माषम् उडीद इति महाराष्ट्रजनपदप्रसिद्धम् ॥ ४३ ॥ निष्पावान् पावटे इति नाम्ना प्रसिद्धान् ॥ ४४ ॥ ४५ ॥ ४६ ॥ ४७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ४८ ॥ पावनि पत्या सह धर्माचरणेन पातिव्रत्येन वा भर्तारं पावयति वत्संबुद्धिः ॥ ४९ ॥ ५० ॥ ५१॥५२ ॥ दग्धः इति एवं छेदः, अत्र संधिरार्षः ॥ ५३ ॥

उक्तवान्स रुदन्भार्यां रुजा व्याकुलमानसः ॥ परिपालय मां देवि वेश्याऽऽसक्तं सुनिष्ठुरम् ॥ ४८ ॥ न मयोपकृतं किंचित्त्वयि सुंदरि पावनि ॥ को भार्यां प्रणतां पापो नानुमन्येत गर्हितः ॥ ४९ ॥ स षंढो भविता भद्रे दश जन्मसु पंचसु ॥ दिवारात्रं महाभागे निंदितः साधुभिर्जनैः ॥ ॥ ५० ॥ पापयोनिमवाप्स्यामि त्वां साध्वीमवमन्य वै ॥ अहं क्रोधेन दग्धोऽस्मि तवापमानजेन वै ॥ ५१ ॥ एवं ब्रुवाणं भर्तारं कृताञ्जलि पुटाऽब्रवीत् ॥ न दैन्यं भवता कार्यं न व्रीडा कांत मां प्रति ॥ ५२ ॥ न चाऽपि त्वयि मे क्रोधो येन दग्धो वदस्यथ ॥ पुरा कृतानि पापानि दुःखानीह भवंति हि ॥ ५३ ॥ तानि या क्षमते साध्वी पुरुषो वा स उत्तमः ॥ यन्मया पापया पापं कृतं वै पूर्वजन्मनि ॥ ५४ ॥ तद्भुंजत्या न मे दुःखं न विषादः कथंचन ॥ इत्येवमुक्त्वा भर्तारं सा सुश्रूस्तमपालयत् ॥ ५५ ॥ आनीय जनकाद्वित्तं बंधुभ्यो वरवर्णिनी ॥ क्षीरोद वासिनं देवं भर्त्तारं सा त्वचिंतयत् ॥ ५६ ॥ शोधयन्ती दिवारात्रौ पुरीषं मूत्रमेव च ॥ नखेन कर्षती भर्त्तुः कृमीन्कष्टाच्छनैःशनैः ॥ ५७ ॥ न सा स्वपिति रात्रौ तु न दिवा वरवर्णिनी ॥ भर्त्तुर्दुःखेन संतप्ता दुःखितेदमवोचत ॥ ५८ ॥ देवाश्च पांतु भर्तारं पितरो ये च विश्रुताः ॥ कुर्वंतु रोगहीनं मे भर्त्तारं गतकल्मषम् ॥ ५९ ॥ चंडिकायै प्रदास्यामि रक्तमांससमुद्भवम् ॥ सुष्ठ्वन्नं माहिषोपेतं भर्त्तुरारोग्यहेतवे ॥ ६० ॥ मोदकान्कारयिष्यामि विघ्नेशाय महात्मने ॥ मन्दवारे करिष्यामि चोपवासान्दशैव तु ॥ ६१ ॥ नोपभुंजामि मधुरं नोपभुंजामि वै घृतम् ॥ तैलाभ्यंगविहीनाहं स्थास्ये नैवात्र संशयः ॥६२॥ जीवताद्रोगहीनोऽयं भर्त्ता मे शरदां शतम् ॥ एवं सा व्याहरद्देवी वासरे वासरे गते ॥६३॥ तदा चाऽऽगान्मुनिः कश्चिन्महात्मा देवलाह्वयः ॥ वैशाखे मासि घर्मार्तः सायाह्ने तस्य वै गृहम् ॥ ६४ ॥ तदा वै भार्यया चोक्तं भिषग्वै गृह मागतः ॥ तेन वै रोगहानिः स्यात्तस्याऽऽतिथ्यं करोम्यहम् ॥ ६५ ॥ ज्ञात्वा त्वां धर्मविमुखं भिषग्व्याजेन वंचितः ॥ पादावनेजनं कृत्वा तज्जलं मूर्ध्नि साक्षिपत् ॥ ६६ ॥ पानकं च ददौ तस्मै घर्मार्ताय महात्मने ॥ त्वयाऽनुमोदिता सायं घर्मतापनिवारकम् ॥ ६७ ॥

॥ ५४ ॥ ५५ ॥ ५६ ॥ ५७ ॥ ५८ ॥ ५९ ॥ महिष्या इदं माहिषं दध्यादि तेनोपेतम् ॥ ६० ॥ ६१ ॥ ६२ ॥ ६३ ॥ ६४ ॥ ६५ ॥ ६६ ॥ ६७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ६८ ॥ ६९ ॥ ७० ॥ ७१ ॥ ७२ ॥ अवगुह्य आलिंग्य ॥ ७३ ॥ ७४ ॥ ७५ ॥ व्याध्यं जन्म व्याधिजन्मेत्यर्थः ॥ ७६ ॥ साधुजाने साध्वी जाया यस्य स साधुजानिः सुभार्यस्तत्संबुद्धौ हे साधुजाने ॥ "जायाया निङ्" इति बहुव्रीहौ जायाशब्दस्य निङादेशः ॥ ७७ ॥ ७८ ॥ ७९ ॥ ८० ॥ इति वैशाख

स प्रातरुदिते सूर्ये मुनिः प्रायाद्यथाऽऽगतः ॥ अथ चाल्पेन कालेन सन्निपातोऽभवत्तव ॥६८॥ त्रिकट्वयां नीयमानायां भर्त्तांगुलिमखंडयत् ॥ उभयोर्दंतयोः श्लेषः सहसा समपद्यत ॥ ६९ ॥ तत्खंडमंगुलेर्वक्रे स्थितं भर्तुः सुकोमलम् ॥ खण्डयित्वांगुलिं भर्ता पंचत्वमगमत्तदा ॥ ७० ॥ शय्यायां सुमनोज्ञायां स्मरंस्तां पुंश्चलीं शुभाम् ॥ मृतं विज्ञाय भर्त्तारं भार्या कांतिमती तव ॥७१॥ विक्रीय चाऽपि वलयं गृहीत्वा चेंधनं बहु ॥ चक्रे चितिं तेन साध्वी मध्ये कृत्वा पतिं तदा ॥ ७२ ॥ अवगुह्य भुजाभ्यां च पादौ चाश्लिष्य पादयोः ॥ मुखे मुखं विनिक्षिप्य हृदयं हृदये तथा ॥ ७३ ॥ जघने जघनं देवी ह्यात्मानं सन्निवेश्य च ॥ दाहयामास कल्याणी भर्तृदेहं रुजान्वितम् ॥ आत्मना सह कल्याणी ज्वलिते जात वेदसि ॥७४॥ विमुच्य देहं सहसा जगाम पतिं समालिंग्य मुरारिलोकम् ॥ पानीयदानेन च माधवेऽस्मिन्पादावनेजादपि योगिगम्यम्॥७५॥ त्वमंतकाले गणिकाविचिंतया देहं त्यक्त्वा मुक्तसमस्तकिल्बिषः ॥ जन्म व्याध्यं प्राप्यसे घोररूपं हिंसासक्तः सर्वदोद्वेगकारी ॥ ७६ ॥ दत्ता त्वया पानकस्याऽपि दाने मासेऽनुज्ञा माधवे साधुजाने ॥ व्याधो जातस्तेन जाता सुबुद्धिर्धर्मान्प्रष्टुं सर्वसौख्यैकहेतून् ॥ ७७ ॥ धृतं मूर्ध्ना पाद शौचावशिष्टं जलं मुनेः सर्वपापापहारि ॥ तेनेयं ते संगतिर्मे वनेऽस्मिन्यया भूयः संपदः सन्ततिश्च ॥ ७८ ॥ इत्येतत्सर्वमाख्यातं पूर्वजन्मनि यत्कृतम् ॥ कर्म पुण्यं पापकं च दृष्टं दिव्येन चक्षुषा ॥ ७९ ॥ गोप्यं वा ते प्रवक्ष्यामि यद्भवाञ्छ्रोतुमिच्छति ॥ जाता ते चित्तशुद्धिर्वै स्वस्ति भूयान्महामते ॥ ८० ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे वैशाखमासमाहात्म्ये नारदांबरीष संवादे व्याधोपाख्याने व्याधस्य पूर्वजन्मकथनंनामाष्टादशोऽध्यायः ॥ १८ ॥ ॥ छ ॥ ॥ व्याध उवाच ॥ ॥ विष्णुमुद्दिश्य कर्तव्या धर्मा भागवताः शुभाः ॥ तत्राऽपि माधवीयाश्च इत्युक्तं तु त्वया पुरा ॥ १ ॥ स विष्णुः कीदृशो ब्रह्मन्किं वा तस्य हि लक्षणम् ॥ किंमानं तस्य सद्भावैः कैर्ज्ञेयो भगवान्विभुः ॥ २ ॥ कीदृशा वैष्णवा धर्माः केनाऽसौ प्रीयते हरिः ॥ एतदाचक्ष्व मे ब्रह्मन्किंकराय महामते ॥३॥

मासमाहात्म्यटीकायामष्टादशोऽध्यायः ॥ १८ ॥ छ ॥ वैशाखमासे विष्णुमुद्दिश्य धर्मानाचरेदित्युक्तम्, तच्छ्रुत्वा विष्णुस्वरूपं व्याधः पृच्छति ॥ १ ॥ २ ॥ ३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥४॥ भावितः ध्यानविषयीकृतः, आत्मा विष्णुस्वरूपैः अथवा भावितात्मभिः शुद्धांतःकरणैरिति व्याख्येयम् ॥ ५ ॥ ६॥७॥ आवृत्तिर्लोकान्तरम्, जन्मनो जन्मांतरं प्रति पुनः गमनम्, नियमः दंडधारणम् ॥ ८ ॥ प्रकाशो ज्ञानम्, वृत्तिराजीवनम् ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ अनुमया अनु

इति पृष्टस्तु व्याधेन पुनः प्राह स वै द्विजः ॥ प्रणम्य जगतामीशं नारायणमनामयम् ॥ ४ ॥ ॥ शंख उवाच ॥ ॥ शृणु व्याध प्रवक्ष्यामि विष्णुरूपमकल्मषम् ॥ यदचिन्त्यं विरिंच्याद्यैर्मुनिभिर्भावितात्मभिः ॥ ५ ॥ पूर्णशक्तिः पूर्णगुणो निर्दिष्टः सकलेश्वरः ॥ निर्गुणो निष्कलोऽनंतः सच्चिदानन्दविग्रहः ॥ ६ ॥ यदेतदखिलं विश्वं चराचरमनीदृशम् ॥ साधिशंसाऽऽश्रयं यच्च यद्वशे नियतं स्थितम् ॥ ७ ॥ अथ ते लक्षणं वच्मि ब्रह्मणः परमात्मनः ॥ उत्पत्तिस्थितिसंहारा ह्यावृत्तिर्नियमस्तथा ॥ ८ ॥ प्रकाशौ बन्धमोक्षौ च वृत्तिर्यस्माद्भवंत्यमी ॥ स विष्णुर्ब्रह्मसंज्ञोऽसौ कवीनां संमतो विभुः ॥ ९ ॥ साक्षाद्ब्रह्मेति तं प्राहुः पश्चाद्ब्रह्मादिकानपि ॥ ब्रह्मशब्दं सोपपदं ब्रह्मादिषु विदो विदुः ॥ ॥ १० ॥ नान्येषां ब्रह्मता क्वाऽपि तच्छक्त्येकांशभागिनाम् ॥ तदेतच्छास्त्रगम्यं हि जन्माद्यस्य महाविभोः ॥ ११ ॥ शास्त्रं च वेदाः स्मृतयः पुराणं वै तदात्मकम् ॥ इतिहासः पंचरात्रं भारतं च महामते ॥ १२ ॥ एतैरेव महाविष्णुर्ज्ञेयो नान्यैः कथंचन ॥ नावेदविदमुं विष्णुं मनुते च नरः क्वचित् ॥ १३ ॥ नेंद्रियैर्नानुमानैश्च न तर्कैः शक्यते विभुम् ॥ ज्ञातुं नारायणं देवं वेदवेद्यं सनातनम् ॥ १४ ॥ अस्यैव जन्मकर्माणि गुणाञ्ज्ञात्वा यथामति ॥ मुच्यंते जीवसंघाश्च सदा तद्वशवर्तिनः ॥ १५ ॥ क्रमाद्विष्णोश्च माहात्म्यं यथा सातिशयं भवेत् ॥ एकैकस्मिन्स्थिता शक्तिर्देवर्षिपितृमातृके ॥ १६ ॥ प्रत्यक्षेणाऽऽगमेनापि तथैवाऽनुमयाऽपि च ॥ आदौ नरोत्तमं विद्याद्बले ज्ञाने सुखे तथा ॥ १७ ॥ तस्माद्भूतं शतगुणं विद्याज्ज्ञानादिभिर्वृतम् ॥ भूतान्मनुष्यगंधर्वान्विद्याच्छतगुणाधिकान् ॥ १८ ॥ तत्त्वाभिमानिनो देवांस्तेभ्यो विद्याच्छताधिकान् ॥ तत्त्वाभिमानिदेवेभ्यः सप्तैव ऋषयो वराः ॥१९॥ सप्तर्षिभ्यो वरो ह्यग्निरग्नेः सूर्यादयस्तथा ॥ सूर्याद्गुरुर्गुरोः प्राणः प्राणादिंद्रो महाबलः ॥ २० ॥ इन्द्राच्च गिरिजा देवी देव्याः शंभुर्जगद्गुरुः ॥ शंभोर्बुद्धिर्महादेवी बुद्धेः प्राणो बलाधिकः ॥ २१ ॥ न प्राणात्परमं किंचित्प्राणे सर्वं प्रतिष्ठितम् ॥ प्राणाज्जातमिदं विश्वं प्राणात्मकमिदं जगत् ॥ २२ ॥

मानेन ॥ १७ ॥ १८ ॥ १९ ॥ प्राणः वाय्वात्मकः ॥ २० ॥ प्राणः मुख्यप्राणः ॥ २१ ॥ २२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सूत्रं चेष्टाप्रवर्तकम् ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ पद्मसृष्टौ पाद्मे कल्पे ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ निष्क्रामति निष्क्रान्ते सति ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥ काणमन्धमिति व्याख्येयं लोचनद्वयात्तद्देवतानिष्क्रान्तेरनंतरमेवोक्तत्वात्, अन्यथा

प्राणे प्रोतमिदं सर्वं प्राणादेव हि चेष्टते ॥ सर्वाधारमिमं प्राहुः सूत्रं नीलांबुदप्रभम् ॥२३॥ लक्ष्मीकटाक्षमात्रेण प्राणस्यास्य स्थितिर्भवेत् ॥ सा लक्ष्मीर्देवदेवस्य कृपालेशैकभाजिनी ॥ २४ ॥ न विष्णोः परमं किंचिन्न समो वा कथंचन ॥ ॥ व्याध उवाच ॥ ॥ कथं जीवेष्वयं प्राणः सूत्र नामाऽधिकोऽभवत्॥२५॥ निर्णयो वा कथं ह्यस्य प्राणाधिक्यं कथं विभो ॥ एतदाचक्ष्व मे ब्रह्मन्कथं प्राणाद्विभुः परः ॥२६॥ ॥ शंख उवाच ॥ शृणु व्याध प्रवक्ष्यामि यत्पृष्टो निर्णयस्त्वया ॥ प्राणाधिक्यं समुद्दिश्य जीवैश्च सकलैरपि॥२७॥पुरा नारायणो देवः पद्मसृष्टौ सनातनः ॥ सृष्ट्वा ब्रह्मादिकान्देवानिदं प्राह जनार्दनः ॥ २८ ॥ साम्राज्येऽहं स्थापयेयं ब्रह्माणं वः पतिं प्रभुम् ॥ यो युष्मास्वधिको देवो यौवराज्ये सुरेश्वराः ॥ ॥ २९ ॥ तं स्थापयत शीलाढ्यं शौर्यौदार्यगुणान्वितम् ॥ इत्युक्ता विभुना देवाः सर्वे शक्रपुरोगमाः ॥३०॥ एवं विवदिरेऽन्योन्यमहं भूयामहं त्विति ॥ सर्वे विवदमानाश्च सूर्यं केचित्परं विदुः ॥ ३१ ॥ शक्रं केचित्परं कामं केचित्तूष्णीं तु तस्थिरे ॥ ते निर्णयमपश्यंतः प्रष्टुं नारायणं ययुः ॥ ३२ ॥ नमस्कृत्य पुनः प्राहुः सर्वे प्रांजलयोऽमराः ॥ विचारितं महाविष्णो सर्वैरस्माभिरंजसा ॥ ३३ ॥ अस्मासु देवमधिकं नैव विद्मः कथंचन ॥ त्वमेव निर्णयं ब्रूहि देवाः संशयिनः खलु ॥ ३४ ॥ इति पृष्टोऽमरैः सर्वैः प्रहसन्निदमब्रवीत् ॥ देहादस्माच्च वैराजाद्यस्मिन्नि ष्क्रामति ह्ययम् ॥ ३५ ॥ पतिष्यति प्रविष्टे तु यस्मिन्वै ह्युत्थितो भवेत् ॥ स देवो ह्यधिको नूनं नापरस्तु कथंचन ॥ ३६ ॥ इत्युक्तास्ते ततः सर्वे तथास्त्विति वचोऽब्रुवन् ॥ निश्चक्राम जयंताह्वः पादात्पूर्वं सुरेश्वरः ॥ ३७ ॥ तदा पंगुममुं प्राहुर्न देहः पतितस्तदा ॥ शृण्वन्पिबन्वदज्जि घ्रन्पश्यन्नास्तेऽचलन्नपि ॥ ३८ ॥ पश्चाद्गुह्याद्विनिष्क्रांतो दक्षोनाम प्रजापतिः ॥ तदा षंढममुं प्राहुर्न देहः पतितस्तदा ॥ ३९ ॥ शृण्वन्पिबन्व दज्जिघ्रन्पश्यन्नास्ते चलन्नपि ॥ पश्चाद्धस्ताद्विनिष्क्रांत इन्द्रः सर्वामरेश्वरः ॥ ४० ॥ हस्तहीनममुं प्राहुर्न देहः पतितस्तदा ॥ शृण्वन्पिबन्व दज्जिघ्रन्पश्यन्नास्ते चलन्नपि ॥ ४१ ॥ लोचनाभ्यां विनिष्क्रांतः सूर्यस्तेजस्विनां वरः ॥ तदा काणममुं प्राहुर्न देहः पतितस्तदा ॥ ४२ ॥

एकेनाक्ष्णा हीन इति व्याख्याने विरोधः स्यात् ॥ ४२ ॥

Nepal Sanskrit University, Balmeeki Campus

CC-0. In Public Domain. Digitization by eGangotri

अजिघ्राणं गन्धग्रहणमकुर्वतम् ॥ ४३ ॥ मृतं न प्राहुः ॥ ४४ ॥ तदा अरसज्ञं मधुरादिरसज्ञानरहितम् ॥ ४५ ॥ वाचः वागाख्यज्ञानेंद्रियात् ॥ ४६ ॥

शृण्वन्पिबन्वदञ्जिघ्रन्पश्यन्नास्ते चलन्नपि ॥ घ्राणात्पश्चाद्विनिष्क्रांतौ नासत्यौ विश्वभेषजौ ॥ अजिघ्राणममुं प्राहुर्न देहः पतितस्तदा ॥
॥ ४३ ॥ शृण्वन्पिबन्वदन्नैव जिघ्रन्नास्तेऽचलन्नपि ॥ श्रोत्राद्दिशो विनिष्क्रांता न देहः पतितस्तदा ॥ तदामुं बधिरं प्राहुर्मृतं नैव कथंचन॥४४॥
पिबन्वदन्नपि तदा ह्यशृण्वन्नचलन्नपि ॥ वरुणो रसनायास्तु विनिष्क्रांतस्ततः परम् ॥ तदाऽरसज्ञमेवाहुर्न देहः पतितस्तदा ॥ ४५ ॥ जीवं
श्चलन्नदन्नास्ते तथा जानन्च्छ्वसन्नपि ॥ ततो वाचो विनिष्क्रांतो वह्निर्वागीश्वरो विभुः ॥ ४६ ॥ तदा मूकममुं प्राहुर्न देहः पतितस्तदा ॥ जीवंश्च
लन्नदन्नास्ते तथा जानन्च्छ्वसन्नपि ॥४७॥ पश्चाद्रुद्रो विनिष्क्रांतो मनसो बोधनात्मकः॥ तदा जडममुं प्राहुर्न देहः पतितस्तदा ॥४८॥ जीवंश्चल
न्नदन्नास्ते तथा जानन्च्छ्वसन्नपि ॥ पश्चात्प्राणो विनिष्क्रांतो मृतमेनं तदा विदुः ॥ पुनरेवं तदा प्राहुर्देवा विस्मितमानसाः ॥ ४९ ॥ देहमुत्था
पयेद्यस्तु पुनरेवं व्यवस्थितः ॥ स एव ह्यधिकोऽस्मासु युवराजा भविष्यति ॥ ५० ॥ इत्येवं तु प्रतिश्रुत्य विविशुश्च यथाक्रमम् ॥ जयंतः
प्राविशत्पादौ नोत्तस्थौ तत्कलेवरम् ॥ ५१ ॥ गुह्यं च प्राविशद्दक्षो नोत्तस्थौ तत्कलेवरम् ॥ इन्द्रो हस्तौ विवेशाऽथ नोत्तस्थौ तत्कलेवरम् ॥
॥ ५२ ॥ चक्षुः सूर्यः प्रविष्टोऽभून्नोत्तस्थौ तत्कलेवरम् ॥ दिशः श्रोत्रे प्रविविशुर्नोत्तस्थौ तत्कलेवरम् ॥ ५३ ॥ वरुणः प्राविशज्जिह्वां नोत्तस्थौ
तत्कलेवरम् ॥ नासां विविशतुर्दस्रौ नोत्तस्थौ तत्कलेवरम् ॥ ५४ ॥ वह्निश्च प्राविशद्वाचं नोत्तस्थौ तत्कलेवरम् ॥ मनश्च प्राविशद्रुद्रो नोत्त
स्थौ तत्कलेवरम् ॥ ५५ ॥ पश्चात्प्राणो विवेशासौ तदोत्तस्थौ कलेवरम् ॥ तदा देवा विनिश्चित्य प्राणं देवाधिकं विभुम् ॥ ५६ ॥ बले ज्ञाने च
धैर्ये च वैराग्ये प्राणनेऽपि च ॥ ततोऽभिषेचयांचक्रुर्यौवराज्ये महाप्रभुम् ॥५७ ॥ उत्कृष्टस्थितिहेतुत्वादुक्थमेकं तदा जगुः ॥ तस्मात्प्राणात्मकं
विश्वं सर्वं स्थावरजंगमम् ॥ ५८ ॥ अंशैः पूर्णैर्बलाढ्यैश्च पूर्णोऽयं जगतां पतिः ॥५९॥ न प्राणहीनं जगदस्ति किंचित्प्राणेन हीनं न च वै समे
धते ॥ न प्राणहीनं स्थितमत्र किंचित्प्राणेन हीनं न च किंचिदस्ति ॥ तस्मात्प्राणः सर्वजीवाधिकोऽभूद्बलाधिकः सर्वजीवांतरात्मा ॥ ६० ॥

॥ ४७ ॥ ४८ ॥ ४९ ॥ ५० ॥ प्रतिश्रुत्य प्रतिज्ञाय ॥ ५१ ॥ ५२ ॥ ५३ ॥ ५४ ॥ ५५ ॥ ५६ ॥ प्राणने जीवने ॥ ५७ ॥ उक्थम् एतन्नाम्ना प्रसिद्धं साम
॥ ५८ ॥ ५९ ॥ ६० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ६१ ॥ ६२ ॥ ६३ ॥ ६४ ॥ ६५ ॥ ६६ ॥ पूर्वबन्धानुगं पूर्वः अनादिर्यो बन्धोऽविद्यालक्षणस्तमनुगच्छति तादृशं लिंगं लिंगशरीरम् ॥ ६७ ॥ ॥ ६८ ॥

प्राणात्कोऽपि ह्यधिको वा समो वा शास्त्रे दृष्टः श्रुतपूर्वो न चाऽऽस्ते ॥ ६१ ॥ तत्तत्कार्यानुगः प्राणो ह्येको देवो ह्यनेकधा ॥ तस्मात्प्राणं वरं प्राहुः प्राणोपासनतत्पराः ॥ लीलयैव जगत्स्रष्टुं हन्तुं पालयितुं प्रभुः ॥ ६२ ॥ शेषाऽहिशिवशक्राद्याश्चेतनाश्च जडा अपि ॥ वासुदेवादृते कोऽपि नैनं परिभविष्यति ॥ ६३ ॥ सर्वदेवात्मकः प्राणः सर्वदेवमयो विभुः ॥ वासुदेवाऽनुगो नित्यं तथा विष्णुवशस्थितः ॥ ६४ ॥ वासुदेवप्रतीपं तु न शृणोति न पश्यति ॥ देवाः प्रतीपं कुर्वंति रुद्रेंद्राद्याः सुरेश्वराः ॥ ६५ ॥ प्रतीपं क्वाऽपि कुरुते न प्राणः सर्वगोचरः ॥ तस्मात्प्राणो महाविष्णोर्बलमाहुर्मनीषिणः॥६६॥एवं ज्ञात्वा महाविष्णोर्माहात्म्यं लक्षणं तथा ॥ पूर्वबन्धानुगं लिंगं जीर्णां त्वचमिवोरगः॥६७॥विसृज्य परमं याति नारायणमनामयम् ॥ श्रुत्वा शंखोदितं वाक्यं पुनर्व्याधः प्रसन्नधीः ॥ ६८ ॥ प्रश्रयाऽवनतो भूत्वा पुनः पप्रच्छ तं मुनिम् ॥ब्रह्मन्महानुभावस्य प्राणस्याऽस्य जगद्गुरोः ॥ ६९ ॥ न ख्यातो महिमा लोके कथं सर्वेश्वरस्य वै ॥ देवानां च मुनीनां च भूपानां च महात्मनाम् ॥ ७० ॥ महिमा श्रूयते लोके पुराणेषु सहस्रशः ॥ एतदाचक्ष्व मे ब्रह्मञ्छ्रोतुं कौतूहलं हि मे ॥ ७१ ॥ ॥ शंख उवाच ॥ ॥ पुरा प्राणो हरिं देवं नारायणमनामयम् ॥ अश्वमेधैर्यष्टुकामो गङ्गातीरं ययौ मुदा ॥ ७२ ॥ हलैश्चकार भूशुद्धिं नानामुनिगणैर्युतः ॥ अन्तर्वल्मीकलीनस्तु कण्वो नाम समाधिगः ॥ ७३ ॥ हलोत्कृष्टो विनिष्क्रांतः क्रोधादिदमुवाच ह ॥ दृष्ट्वा पुरः स्थितं प्राणं शशाप ह महाविभुम् ॥ ७४ ॥ अद्यप्रभृति न ख्यातिं महिमा भुवनत्रये ॥ तव प्राप्नोति देवेश भूलोके तु विशेषतः ॥ ७५ ॥ प्रख्यातास्ते भविष्यंति ह्यवतारा जगत्त्रये ॥ इत्युक्तो मुनिना तेन वायुः क्रोधात्तमब्रवीत् ॥ ७६ ॥ विनापराधं शप्तोऽस्मि तितिक्षुं मां निरागसम् ॥ तस्मात्कण्व महाबाहो गुरुद्रोही भवाऽऽशु च ॥ ७७ ॥ लोके निन्दितवृत्तिश्च भवेत्याह सदागतिः ॥ ततः प्रभृति लोकेऽस्मिन्प्राणस्याऽस्य महाप्रभो ॥ ७८ ॥ न ख्यातो महिमा लोके भूलोके तु विशेषतः ॥ शापात्कण्वो गुरुं जग्ध्वा सूर्यशिष्योऽभवत्तदा ॥ ७९ ॥

॥ ६९ ॥ ७० ॥ ७१ ॥ ७२ ॥ ७३ ॥ ७४ ॥ ७५ ॥ ७६ ॥ ७७ ॥ सदागतिः प्राणः ॥ ७८ ॥ ७९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इतः अस्मात्परम् ॥८०॥ इति वैशाखमासमाहात्म्यटीकायामेकोनविंशोऽध्यायः ॥१९॥ ॥छ॥ ॥ अथ विंशे व्याधः जीवविषयं प्रश्नं करोति—किं जीवा इत्यादिना ॥ ॥१॥२॥३॥४॥५॥६॥७॥८॥९ ॥ १० ॥ पुण्यादिति । पुण्यकर्मणा स्वर्गप्राप्तिः, पापकर्मणा नरकलोकप्राप्तिर्भवति, तत्र विशेषकथानकमस्ति पाद्मे, तदेवात्र किंचित्प्रदर्श्यते—''सर्वमासेषु वैशाखे एव कथमधिका प्रीतिरिति धरया पृष्टः श्रीवराहः प्रोवाच, हे पृथ्वि ! वैशाखे हिरण्याक्षं मधुदैत्यं च हत्वा, तवोद्धारः कृतः । वैशाखशुक्लतृतीयायां त्रेतायुगस्य त्रयीधर्मस्य ज्ञानवर्णव्यवस्थितेश्च प्रवृत्तिर्जाता तस्मादयं पवित्रो मासः, मम प्रियश्च, इत्युक्त्वा वैशाखधर्मान्वक्तुकामः इतिहासं प्रस्तौति—कदाचिद्यमः गंगा

इत्येतत्कथितं सर्वं यत्पृष्टं तु त्वयाऽधुना ॥ यच्छ्रोतव्यमितो व्याध पृच्छ मां मा विचारय ॥ ८० ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे वैशाखमासमाहात्म्ये नारदाम्बरीषसंवादे वायुशापकथनंनामैकोनविंशोऽध्यायः ॥ १९ ॥ ॥ छ ॥

॥ ॥ व्याध उवाच ॥ ॥ किं जीवा विभुना सृष्टाः कोटिशोऽथ सहस्रशः ॥ दृश्यंते भिन्नकर्माणो नानामार्गाः सनातनाः ॥ १ ॥ नैकस्वभावा एते हि कुत एव महामते ॥ सर्वं तत्पृच्छते मह्यं विस्तरात्तत्त्वतो वद ॥ २ ॥ ॥ शंख उवाच ॥ ॥ त्रिविधा जीवसंघा हि रजःसत्त्वतमोगुणाः ॥ राजसा राजसं कर्म तामसास्तामसं तथा ॥ ३ ॥ सात्त्विकाः सात्त्विकं कर्म कुर्वंत्येते यथाक्रमम् ॥ क्वचिच्च गुणवैषम्यमेतेषां संसृतौ भवेत् ॥ ४ ॥ तेनैवोच्चावचं कर्म कुर्वंतः फलभागिनः ॥ क्वचित्सुखं क्वचिद्दुःखं क्वचिच्चोभयमेव च॥५॥गुणानामेव वैषम्यात्प्राप्नुवन्ति नरा इमे॥ प्रकृतिस्था इमे जीवा बद्धा एतैर्गुणैस्त्रिभिः ॥ ६ ॥ गुणकर्माऽनुरूपेण कर्मणां व्यत्ययः फलम् ॥ गुणानुगुण्यं भूयस्ते प्रकृतिं यांत्यमी जनाः ॥ ॥ ७ ॥ प्रकृतिस्थाः प्राकृतिका गुणकर्माऽभिमूर्छिताः ॥ गतिं प्राकृतिकीं यांति व्यत्ययः प्रकृतेर्न हि ॥ ८ ॥ तामसा दुःखबहुलाः सदा तामसवृत्तयः ॥ निर्दया निष्ठुरा लोके सदा द्वेषैकजीविनः ॥ ९ ॥ राक्षसाद्याः पिशाचांतास्तामसीं यांति वै गतिम् ॥ राजसा मिश्रमतयः कर्तारः पुण्यपापयोः ॥ १० ॥ पुण्यात्स्वर्गं प्राप्नुवन्ति क्वचित्पापाच्च यातनाम् ॥ अत एते मन्दभाग्या आवर्तंते पुनः पुनः ॥ ११ ॥

यमुनयोर्मध्यदेशे महद्ग्रामस्थितं वसिष्ठगोत्रसंभूतं यज्ञदत्तनामकं ब्राह्मणमानय नाऽन्यं तत्पार्श्ववर्तिनं तद्गोत्रोत्पन्नं तन्नामानं तदनुरूपमानयेति दूतं प्रत्याह । दूतश्च तथेत्युक्त्वा यमनिर्दिष्टं ब्राह्मणं विहाय तत्पार्श्ववर्तिनं तदनुरूपं ब्राह्मणमानीय यमाग्रे निवेदयामास यमश्च प्रतिकूलं कर्म ज्ञात्वा तस्मै पूजां कृत्वा प्रोवाच, नीयतामेष सोऽन्यस्त्वानीयतामिति, एवमुक्ते तु वचने धर्मराजेन स द्विजः निर्विण्णः सन्नुवाच—हे धर्म ! 'कस्मादहमिहानीतः कस्मात्प्रेषयसे पुनः ॥ गन्तुं नैवोत्सहे तत्र मर्त्यलोके पुनः प्रभो ॥'

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यम उवाच ॥ हे द्विज क्षीणायुषामत्र वासः युक्तः तव तु दशवर्षात्मकं शेषमायुरस्ति तदंते लोकप्राप्तिर्भावि अतः तव प्रष्टव्यं चेत्पृच्छ तद्वदामि॥ब्राह्मण उवाच ॥ केन कर्मणा नरकलोकप्राप्तिः, केन कर्मणा स्वर्गलोकप्राप्तिः, मम च केन कर्मणा तव लोके गंतव्यं भविष्यति तद्वद ॥ यम उवाच ॥ "कर्मणा मनसा वाचा ये धर्मविमुखा नराः ॥विष्णुभक्तिविहीना ये ते वै निरयगामिनः॥पश्यंति भेदबुद्ध्या ये ब्राह्मणं शंकरं हरिम्॥क्षेत्रवृत्तिगृहच्छेदं प्रीतिच्छेदं च ये नराः॥आशाच्छेदं च कुर्वंति ते वै निरयगामिनः॥अनाथं वैष्णवं दीनं रोगार्तं वृद्धमेव च ॥ नाऽनुकम्पयते मूढः स ज्ञेयो नरकातिथिः ॥ नियमांस्तु समादाय यः पश्चादजितेंद्रियः ॥ विलोपयति मूढात्मा स वै निरयभाजनम् ॥ अभक्ष्यभक्षका ये च अगम्यागमतत्पराः ॥ हिंसका निंदकाः क्रूरास्ते वै निरयगामिनः ॥ शृणु विप्र यथा यांति नराः स्वर्गं दयालवः ॥ येऽर्चयंति हरं विष्णुं ध्यायंति च स्मरंति च ॥ लभंते ते हरिस्थानं श्रुतिरेषा सनातनी ॥ स्वधर्मकर्मनिरता वासुदेवपरायणाः ॥ त्यक्तदानफला ये च ते नराः स्वर्गगामिनः ॥ वर्जयंति दिवास्वापं नराः सर्वसहाश्च ये ॥ पर्वण्याश्रयभूता ये ते मर्त्याः स्वर्गगामिनः ॥ द्विषतामपि ये द्वेषान्न वदंत्यहितं कदा ॥ कीर्त्तयन्ति गुणांश्चैव ते नराः स्वर्गगामिनः ॥ प्रवृत्तौ च निवृत्तौ च श्रुतिशास्त्रोक्तमेव च ॥ आचरंति प्रतीता ये ते नराः स्वर्गगामिनः ॥ ये शांताः परदारेषु कर्मणा मनसा गिरा ॥ रमयंति न सत्त्वस्थास्ते नराः स्वर्गगामिनः ॥ यस्मिन्कस्मिन्कुले जाता दयावन्तो यशस्विनः ॥ सानुक्रोशाः सदाचारास्ते नराः स्वर्गगामिनः ॥ व्रतं रक्षंति ये कोपाच्छ्रियं रक्षंति मत्सरात् ॥ विद्यां मानापमानाभ्यां ह्यात्मानं तु प्रमादतः ॥ मतिं रक्षंति ये लोभान्मनो रक्षंति कामतः ॥ धर्मं रक्षंति दुःसंगात्ते नराः स्वर्गगामिनः ॥ एकादशीव्रतपरा मधुसूदनपूजकाः ॥ वेतसीं यमुनां सीतां पुण्यां गोदावरीं नदीम् ॥ सेवंते ये शुभाचारास्ते नराः स्वर्गगामिनः ॥ स्नाताश्चर्मण्वतीतीरे त्रिरात्रं नियता नराः ॥ व्यासाश्रमे नर्मदायां ते नराः स्वर्गगामिनः ॥ गंगाजले प्रयागे वा केदारे पुष्करेऽपि वा ॥ व्यासाश्रमे प्रभासे च मृतास्ते स्वर्गगामिनः ॥ द्वारावत्यां कुरुक्षेत्रे योगाभ्यासेन वा मृताः ॥ हरिरित्यर्णयुगलं वक्त्रे येषां हरिप्रियाः ॥ श्रोतारो धर्मशास्त्राणां धर्मप्रत्ययसंगताः ॥ प्रियंकराश्च बालानां स्वर्गलोके वसंति ते ॥ भोजनेषूपपन्नेषु भोज्यं पृच्छंति सादरम् ॥ अभिन्नमुखरागेण शिष्टास्ते स्वर्गगामिनः ॥ नरनारायणाऽऽवासे त्रिरात्रं ये समाश्रिताः ॥ मज्जन्त्यलकनन्दायां धन्यास्ते केशवप्रियाः ॥ काशीवासरता ये च विश्वेश्वरप्रपूजकाः ॥ दर्शश्राद्धरता ये च ते नराः स्वर्गगामिनः ॥ श्वेतकल्पोक्तविधिना मृता ये च नरोत्तमाः ॥ निर्ममा निरहंकारास्ते नराः स्वर्गगामिनः ॥ हेमंते दारुदो यश्च तथा ग्रीष्मे जलप्रदः ॥ वर्षास्वाश्रमदाता च स्वर्गलोके महीयते ॥ ॥ ब्राह्मण उवाच ॥ ॥ त्वयोक्तं सर्वमेवैतद्बहुधा दुष्करं कलौ ॥ तदेकं कथ्यतां धर्मं सर्वधर्मोत्तमोत्तमम् ॥ ॥ यम उवाच ॥ ॥ वैशाखे विधिना स्नानं नद्यां यः प्रातराचरेत् ॥ अर्धोदिते सहस्रांशौ व्रतधर्मपरायणः ॥ तस्य पुण्यं महीदेव किंचिद्वक्तुं न शक्यते ॥ वैशाखधर्माचरणं मधुसूदनपूजनम् ॥ त्रिरात्रमंतिमं वाऽपि व्रतं स्वर्गतिदायकम् ॥ एतन्माधवमासस्य समासात्किञ्चिदीरितम् ॥ अथ गच्छ महाभाग देवलोकादितो भवान् ॥ निपात्य भुवि ते देहं रुदंत्यद्याऽपि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बांधवाः ॥ विलप्यमानैरपि बन्धुभिस्ते न यावदग्नौ तव यच्छरीरम् ॥ प्रक्षिप्यते हंत जवेन तावद्याहि स्वयं सुप्त इव प्रबुद्धः ॥ मम प्रसादादिह पुण्ययोगः श्रुतो यथावत्त
मिमं विधेहि ॥ विधानतो वै समये समं ते समागमोऽन्ते भविता सुरैश्च ॥ ॥ सूत उवाच ॥ ॥ इति देववचः श्रुत्वा नत्वा धर्माधिपं ततः ॥ पुनः पपात स इह परि
तुष्टमना द्विजः ॥ धर्मराजप्रसादेन ततस्तत्र महीतले ॥ संसुप्त इव चोत्तस्थौ बन्धुवर्गसमान्वितः ॥ विधिमेनं द्विजो भूमौ वर्षेवर्षे च स स्वयम् ॥ चकार कारयामास माधव

धर्मशीला दयावन्तः श्रद्धावन्तोऽनसूयकाः ॥ सात्त्विकाः सात्त्विकीं वृत्तिमनुतिष्ठंत आसते ॥ १२ ॥ ते चोर्ध्वं यांति विमला गुणापाये
महौजसः ॥ विभिन्नकर्मणां चातः पृथग्भावाः पृथग्विधाः ॥ १३ ॥ गुणकर्मानुरूपेण तेषां विष्णुर्महाप्रभुः ॥ कर्माणि कारयत्यद्धा
स्वस्वरूपाप्तये विभुः ॥ १४ ॥ विष्णोर्वैषम्यनैर्घृण्ये पूर्णकामस्य वै नहि ॥ सृष्टिं स्थितिं हृतिं चैव समामेव करोत्ययम् ॥ १५ ॥
स्वगुणादेव ते सर्वे कर्मणः फलभागिनः ॥ आरामोत्तान्यथा सर्वान्समं वर्षयति द्रुमान् ॥ १६ ॥ एककुल्याजला ह्यंग द्रुमाश्च प्रकृतिं
गताः ॥ नारामोत्तरि वैषम्यं नैर्घृण्यं वा कथंचन ॥ १७ ॥ ॥ व्याध उवाच ॥ ॥ जनानां पूर्णभोगानां कदा मुक्तिर्भवेन्मुने ॥ सृष्टिकाले
ऽथवा ह्यंतकाले वा स्थापनस्य च ॥ १८ ॥ क्वचिच्च सृष्टिकालस्य संहारस्याऽपि वै स्थितेः ॥ एतद्विस्तार्य मे ब्रह्मन्भगवच्चेष्टितं वद ॥ १९ ॥
॥ ॥ शंख उवाच ॥ ॥ चतुर्युगसहस्राणि ब्रह्मणो दिनमुच्यते ॥ रात्रिश्च तावती तस्य ह्यहोरात्रं दिनं भवेत् ॥ २० ॥ दशपंचदिनान्याहुः
पक्षं मासो द्व्यात्मकः ॥ मासद्वयमृतुं प्राहुरयनं च ऋतुत्रयम् ॥ २१ ॥ अयने द्वे वत्सरः स्यात्ताद्दक्च्छतसमा यदि ॥ गच्छंति ब्रह्मणो ह्यस्य
ब्रह्मकल्पं तदा विदुः ॥ २२ ॥ तावान्हि प्रलयः काल इति वेदविदां मतम् ॥ प्रलयस्त्रिविधः प्रोक्तो मानवो मानवात्यये ॥ २३ ॥ दैनंदिनो
द्वितीयो हि ब्रह्मणो दिवसात्यये ॥ ब्रह्मणोऽथ लये पश्चाद्ब्राह्मं च प्रलयं विदुः ॥ २४ ॥ ब्रह्मणस्तु मुहूर्ते तु मनोस्तु प्रलयं विदुः ॥ प्रलयेषु
व्यतीतेषु चतुर्दशसु वै क्रमात् ॥ २५ ॥ दैनंदिनलयं प्राहुः प्रलयानां स्थितिं पुनः ॥ त्रयाणामेव लोकानां लयो मन्वंतरे भवेत् ॥ २६ ॥ चेतना
नां तदा नाशो न लोकानां क्षयो भवेत् ॥ उदकैरेव पूर्तिश्च यथा पूर्वं तथा पुनः ॥ २७ ॥ मन्वंतरांते भूयात्तु चेतनानां पुनर्भवः ॥ दैनंदिनलये
व्याध सर्वस्यापि क्षयो भवेत् ॥ २८ ॥ सत्यलोकं विना सर्वे लोका नश्यंति साधिपाः ॥ सचेतनाः साधिभूताः प्रसुप्ते चतुरानने ॥ २९ ॥

स्नपनं परात् ॥ तस्य पुण्यप्रभावेन परं पदमवाप्तवान्" इति ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ द्व्यात्मकः पक्षद्वय
प्रमाणः ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ चेतनानां प्राणिनाम् ॥ २७ ॥ २८ ॥ २९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥ ४२ ॥ ४३ ॥ चतुर्व्यूहात्मकः अनिरुद्धप्रद्युम्नसंकर्ष

तत्त्वाभिमानिनो देवाः केचिच्च मुनयस्तथा ॥ शिष्यंति सुप्ताः सर्वेऽपि सत्यलोकव्यवस्थिताः ॥ ३० ॥ तिष्ठंति सुप्तिमापन्ना यावत्कल्पमतीं द्रियाः ॥ पुनर्निशात्यये ब्रह्मा यथापूर्वमकल्पयत् ॥ ३१ ॥ ऋषीन्देवान्पितॄँल्लोकान्धर्मान्वर्णान्पृथक्पृथक् ॥ पुनर्दशावतारा हि विष्णोर्देवस्य चक्रिणः ॥ ३२ ॥ नियमेन भवंत्येते तथान्येऽपि च भूरिशः ॥ देवता ऋषयश्चैव आकल्पं च गिरां पतेः ॥ ३३ ॥ पुनरेवाऽभिवर्तंते ब्रह्मणा सह मुक्तिगाः ॥ भूपाश्च साधवो ये च सिद्धिं प्राप्ताः परं गताः ॥ ३४ ॥ तेनैव चाभिवर्तंते सत्यलोकव्यवस्थिताः ॥ तद्राशिगाः पुनर्यांति तन्नाम्ना श्रुतिसंस्थिताः ॥ ३५ ॥ तत्तद्गोत्रेषु जायंते तत्तत्कर्मरताः सदा ॥ दैत्यानामपि सर्वेषां यदा कलियुगात्ययः ॥ ३६ ॥ कलिना सह गच्छंति स्वां गतिं निरयालयाः ॥ तेषां च राशिसंस्था ये तन्नामानोऽपरेऽपि च ॥३७॥ जायंते कर्मणा स्वेन तत्तत्कर्मविधायकाः॥सृष्टिकालं प्रवक्ष्यामि मुक्तिकालं तथैव च ॥ ३८ ॥ ब्रह्मादीनां च देवानां समाहितमना भव ॥ निमेषो देवदेवस्य ब्रह्मकल्पसमो मतः ॥ ३९ ॥ तस्यावसाने चोन्मेषो देवदेवशिखामणेः ॥ निमेषांऽते भवेदिच्छा स्रष्टुं लोकांश्च कुक्षिगान् ॥ ४० ॥ सोऽपश्यत्स्वोदरे सर्वाञ्जीवसंघाननेकशः ॥ सृज्यान्मुक्तान् मून्सर्वाँल्लिंगभंगमुपागतान् ॥ ४१ ॥ सुप्ताः सृतिस्थाः सर्वेऽपि तमोगा अपि सर्वशः ॥ पूर्वकल्पे लिंगभंगमापन्ना विधिपूर्वकाः ॥ ४२ ॥ मानवांता जीवकोशा जीवन्मुक्ताश्च मुक्तिगाः ॥ पूर्वकल्पे विमुक्ताश्च ब्रह्माद्या मानवांतकाः ॥ ४३ ॥ ध्यानसंस्था हि तिष्ठंति विष्णुकुक्षिगता अपि ॥ उन्मेषस्यादिमे भागे चतुर्व्यूहात्मको विभुः ॥ ४४ ॥ भूत्वा तु पूर्वसाड्गुण्याद्वासुदेवाच्च व्यूहगात् ॥ दत्त्वा तु ब्रह्मणो मुक्तिं सायुज्याख्यां महाविभुः ॥ ४५ ॥ दत्त्वा तदनु सायुज्यं तत्त्वज्ञानं महात्मनाम् ॥ सारूप्यं चैव केषांचित्सामीप्यं च तथा विभुः ॥ ४६ ॥ सालोक्यं च तथाऽन्येषां दत्त्वा देवो जनार्दनः ॥ अनिरुद्धवशे सर्वान्स्थितांल्लोकानलोकयत् ॥ ४७ ॥ प्रद्युम्नस्य वशे दत्त्वा सृष्टिं कर्तुं मनो दधे ॥ मायां जयां कृतिं शांतिमुपयेमे स्वयं हरिः ॥ ४८ ॥ चतुर्व्यूहैः पूर्णगुणैर्वासुदेवादिकैः क्रमात् ॥ ताभिर्युक्तो महाविष्णुश्चतुर्व्यूहात्मको विभुः ॥ ४९ ॥ भिन्नकर्माशयं लोकं पूर्णकामो व्यजीजनत् ॥ उन्मेषांते पुनर्विष्णुर्योगमायां समाश्रितः ॥ ५० ॥

णवासुदेवाख्यस्वरूपचतुष्टययुतः ॥ ४४ ॥ सद्गुणानां समूहः साड्गुण्यं तस्मात् ॥ ४५ ॥ ४६ ॥ ४७ ॥ ४८ ॥ ४९ ॥ ५० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ५१ ॥ ५२ ॥ ५३ ॥ ५४ ॥ ५५ ॥ नित्याः प्रतिदिनं चित्तशुद्ध्यर्थमाचरणीयाः नैमित्तिका निमित्तं कालादिविशेषमुपलभ्य चित्तशुद्ध्यर्थं विहिताः काम्याः

संकर्षणाद्व्यूहगाच्च हरत्येतच्चराचरम् ॥ तदेतत्सर्वमाख्यातं कार्यं चिंत्यं महात्मनः ॥ ५१ ॥ यदचिंत्यं दुर्विभाव्यं ब्रह्माद्यैरपि योगिभिः ॥ ॥ व्याध उवाच ॥ ॥ के वा भागवता धर्माः कैर्विष्णुश्च प्रसीदति ॥ ५२ ॥ तानहं श्रोतुमिच्छामि सांप्रतं वद नो मुने ॥ ॥ शंख उवाच ॥ ॥ येन चित्तविशुद्धिः स्याद्यः सतामुपकारकः ॥ ५३ ॥ तं विद्धि सात्त्विकं धर्मं यश्च केनाप्यनिंदितः ॥ श्रुतिस्मृत्युदितो यस्तु यदि निष्कामिको भवेत् ॥ ५४ ॥ यस्तु लोकाऽविरुद्धोऽपि तं धर्मं सात्त्विकं विदुः ॥ चतुर्विधा हि ते धर्मा वर्णाश्रमविभागतः ॥ ५५ ॥ नित्यनैमित्तिकाः काम्या इति ते च त्रिधा मताः ॥ ते सर्वे स्वस्वधर्माश्च यदा विष्णोः समर्पिताः ॥ ५६ ॥ तदा वै सात्त्विका ज्ञेया धर्मा भागवताः शुभाः ॥ देवतांतरदैवत्याः सकामा राजसा मताः ॥ ५७ ॥ यक्षरक्षःपिशाचादिदैवत्या लोकनिष्ठुराः ॥ हिंसात्मका निंदिताश्च धर्मास्ते तामसाः स्मृताः ॥ ५८ ॥ सत्त्वस्थाः सात्त्विकान्धर्मान्विष्णुप्रीतिकराञ्छुभान् ॥ कुर्वंत्यनीहया नित्यं ते वै भागवताः स्मृताः ॥ ५९ ॥ येषां चित्तं सदा विष्णौ जिह्वायां नाम वै विभोः ॥ पादौ च हृदये येषां ते वै भागवताः स्मृताः ॥ ६० ॥ सदाचाररता ये च सर्वेषामुपकारकाः ॥ सदैव ममताहीनास्ते वै भागवताः स्मृताः ॥ ६१ ॥ येषां च शास्त्रे विश्वासो गुरौ साधुषु कर्मसु ॥ ये विष्णुभक्ताः सततं ते वै भागवताः स्मृताः ॥ ६२ ॥ येषां हि संमता धर्माः शाश्वता विष्णुवल्लभाः ॥ श्रुतिस्मृत्युदिता ये च ते धर्माः शाश्वता मताः ॥ ६३ ॥ अटनं सर्वदेशेषु वीक्षणं सर्वकर्मणाम् ॥ श्रवणं सर्वधर्माणां विषयाऽऽसक्तचेतसाम् ॥ ६४ ॥ अकिंचित्करमेतेषां षंढस्येव वरस्त्रियः ॥ साधूनां दर्शनेनैव मनो द्रवति वै सताम् ॥ ६५ ॥ चंद्रस्य कौमुदीसंगाच्चंद्रकांतशिला यथा ॥ क्वचित्सच्छास्त्रश्रवणाद्विषये रहितं मनः ॥ ६६ ॥ तिष्ठत्येव सतां पुंसां तेजोरूपं ह्यकल्मषम् ॥ पद्मबन्धोः प्रभासंगात्सूर्यकांतशिला यथा ॥ ६७ ॥ निष्कामैर्हि जनैर्यैस्तु श्रद्धया समुपाश्रितः ॥ यो विष्णुवल्लभो नित्यं धर्मो भागवतो मतः ॥ ६८ ॥ तैर्दृष्टा बहवो धर्मा इहाऽमुत्र फलप्रदाः ॥ विष्णुप्रीतिकराः सूक्ष्माः सर्वदुःखविमोचकाः ॥ ६९ ॥

प्रसिद्धाः ॥ ५६ ॥ भागवता विष्णुसंबंधिनः ॥ ५७ ॥ ५८ ॥ ५९ ॥ ६० ॥ ६१ ॥ ६२ ॥ ६३ ॥ ६४ ॥ ६५ ॥ ६६ ॥ ६७ ॥ ६८ ॥ ६९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ७० ॥ प्रश्रया गृहादौ आश्रयास्तेषाम् ॥ ७१ ॥ ७२ ॥ ७३ ॥ ७४ ॥ ७५ ॥ उर्वारुकस्य कर्कटीफलस्य रसायनस्य पूर्वोक्तपानकप्रमुखस्य प्रदानम् ॥७६॥ ॥ ७७ ॥ ७८ ॥ ७९ ॥ अलाबुं दुग्धतुंबी महाराष्ट्रभाषायां दुधा भोपळा इति प्रसिद्धम्, गृंजरं गाजर इति प्रसिद्धम्, तिलपिष्टकं तिलैः कृतं किमपि खाद्यम्, आरनालं कांजिकम्, भिःसटं कमलकंदः अथवा दग्धान्नम्, घृतकोशातकी घोसाळे गिलिका इति प्रसिद्धम् ॥८०॥ उपोदकी थोरमयाळ पूईशाक इति प्रसिद्धा, कलिंगं

दध्नः सारमिवोद्धृत्य धर्मं वैशाखसंभवम् ॥ रमायै भगवानाह क्षीराब्धौ हितकाम्यया ॥ ७० ॥ मार्गच्छायाविनिर्माणं प्रपादानं च वै तथा ॥ व्यजनैर्व्यजनं चैव प्रश्रयाणां समर्पणम् ॥ ७१ ॥ छत्रस्योपानहोर्दानं दानं कर्पूरगन्धयोः ॥ वापीकूपतडागानां निर्माणं विभवे सति ॥ ७२ ॥ सायाह्ने पानकस्यापि दानं तु कुसुमस्य च ॥ तांबूलदानं पापघ्नं गोरसानां विशेषतः ॥ ७३ ॥ लवणान्विततक्रस्य दानं श्रांताय वै पथि ॥ अभ्यंगकरणं चैव द्विजपादावनेजनम् ॥ ७४ ॥ कटकम्बलपर्यंकदानं गोदानमेव च ॥ मधुयुक्ततिलानां च दानं पापविनाशनम् ॥ ७५ ॥ सायाह्ने चेक्षुदण्डानां दानमुर्वारुकस्य च ॥ रसायनप्रदानं च पितृनिर्वापणं तथा ॥ ७६ ॥ एते धर्मा षिशिष्योक्ता मासेऽस्मिन्माधवप्रिये ॥ प्रातः सूर्योदये स्नात्वा शृण्वन्द्विजकुलेरितम् ॥७७॥ नित्यकर्माणि कृत्वैवं मधुसूदनमर्चयेत् ॥ कथां माधवमासीयां शृणुयाच्च समाहितः॥७८॥ तैलाभ्यंगं वर्जयेच्च कांस्यपात्रे तु भोजनम् ॥ निषिद्धभक्षणं चैव वृथाऽऽलापं तु वर्जयेत् ॥ ७९ ॥ अलाबुं गृंजरं चैव लशुनं तिलपिष्टकम् ॥ आरनालं भिस्सटं च घृतकोशातकीं तथा ॥८०॥ उपोदकीं कलिंगं च शिग्रुशाकं च वर्जयेत् ॥ निष्पावानि कुलित्थानि मसूराणि च वर्जयेत्॥ ॥ ८१ ॥ वृंताकानि कलिंगानि कोद्रवाणि च वर्जयेत् ॥ तंदुलीयकशाकं च कौसुम्भं मूलकं तथा ॥ ८२ ॥ औदुंबरं बिल्वफलं तथा श्लेष्मातकीफलम् ॥ सर्वथा वर्जयेद्विद्वान्मासेऽस्मिन्माधवप्रिये ॥ ८३ ॥ एतेष्वन्यतमं भुक्त्वा स चंडालो भवेद्ध्रुवम् ॥ तिर्यग्योनिशतं याति नात्र कार्या विचारणा ॥ ८४ ॥ एवं मासव्रतं कुर्यात्प्रीतये मधुघातिनः ॥ एवं व्रते समाप्ते तु प्रतिमां कारयेद्विभोः ॥ ८५ ॥

सर्षपम् इति प्रसिद्धम् अन्यत्सुगमम् ॥ ८१ ॥ कलिंगानि कलिंगडनाम्ना प्रसिद्धानि फलानि कौसुंभं करडई इति प्रसिद्धशाकम् ॥ ८२ ॥ श्लेष्मातकीफलं भोंकर इति प्रसिद्धम् ॥ ८३ ॥ ८४ ॥ अथ व्रतांते कर्तव्यतामाह–तत्र एवं मासव्रतं कुर्यात्, एवं व्रते समाप्ते तु इत्यनेन वचनेन व्रतारंभसमाप्तिरुक्ता, परं तत्र कस्मिन्दिने आरंभः कस्मिन्दिने समाप्तिः कार्येति जिज्ञासायामाहपाद्मे–"प्रारभेत व्रतमिदं पौर्णमास्यां मधोर्नृप ॥ यमैश्च नियमैर्युक्तः शक्त्या किंचित्प्रदाय च ॥ हविष्यभुग्भूमि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शायी ब्रह्मचर्यव्रते स्थितः॥ कृच्छ्रादितपसा क्षामो ध्यायन्नारायणं हृदि ॥ एवं प्राप्य च वैशाखीं दद्यान्मधुतिलादिकम् ॥ भोजनं द्विजमुख्येभ्यो भक्त्या धेनुं सदक्षिणाम् ॥ अच्छिद्रं प्रार्थयेच्चापि तस्य स्नानस्य भूसुरान् ॥ यथा लक्ष्मीः प्रिया भूप माधवस्य जगत्पतेः ॥ तथैव माधवो मासो मधुसूदनवल्लभः ॥ एवं विधियुतो मर्त्यः स्नात्वा द्वादश वत्सरम् ॥ उद्यापनं चरेच्छक्त्या मधुसूदनतुष्टये ॥ इदं माधवमासस्य माहात्म्यं कथितं तव॥" इति ॥ ८५ ॥ ८६ ॥ ८७ ॥ ८८ ॥ ८९ ॥ ९० ॥ ९१ ॥९२॥

मधुसूदनदैवत्यां सवस्त्रां च सदक्षिणाम् ॥ स्वर्चितां विभवैः सर्वैर्ब्राह्मणाय निवेदयेत् ॥ ८६ ॥ वैशाखसितद्वादश्यां दद्याद्दध्यन्नमंजसा ॥ सोद कुम्भं सतांबूलं सफलं च सदक्षिणम् ॥८७॥ ददामि धर्मराजाय तेन प्रीणातु वै यमः॥ अपसव्यात्समुच्चार्य नामगोत्रे पितुस्ततः॥८८॥ दद्याद्दध्य न्नमक्षय्यं पितॄणां तृप्तिहेतवे ॥ गुरुभ्यश्च तथा दद्यात्पश्चाद्दद्याच्च विष्णवे॥८९॥शीतलोदकदध्यन्नं कांस्यपात्रस्थमुत्तमम्॥सदक्षिणं सतांबूलं सभ क्ष्यं च फलान्वितम् ॥९०॥ ददामि विष्णवे तुभ्यं विष्णुलोकजिगीषया ॥ इति दत्त्वा यथाशक्त्या गां च दद्यात्कुटुंबिने ॥ ९१ ॥ एवं मासव्रतं कुर्याद्यो दंभेन विवर्जितः ॥ स सर्वैः पातकैर्हीनः कुलमुद्धृत्य वै शतम् ॥ ९२ ॥ पश्यतामेव भूतानां भित्त्वा वै सूर्यमंडलम् ॥ याति विष्णोः परं धाम योगिनामपि दुर्लभम् ॥९३॥ व्याख्यात्येवं द्विजकुलवरे माधवीयांश्च ॥ धर्मान्विष्णवादीष्टानतिमहितरान्व्याधपृष्टान्समस्तान् ॥९४॥ वटः सद्यः पश्यतामेव भूमौ पपाताहो पंचशाखी द्रुमोऽयम् ॥ वृक्षात्तस्मात्कोटरे संस्थितो हि व्यालः कश्चिद्दीर्घदेही करालः ॥ हित्वा देहं पाप योनिं च सद्यः स वै तस्थौ प्रांजलिर्नम्रमूर्धा ॥ ९५ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखंडे वैशाख माससमाहात्म्ये नारदाम्बरीषसंवादे भागवतधर्मकथनंनाम विंशोऽध्यायः ॥ २० ॥ ॥ छ ॥ ॥ श्रुतदेव उवाच ॥ ॥ ततस्तु विस्मितो भूत्वा शंखो व्याधसमन्वितः ॥ को भवानिति तं प्राह दशैषा च कुतस्तव ॥ १ ॥ केन वा कर्मणा सौम्य मतिस्तव शुभावहा ॥ अकस्मात्ते कथं मुक्तिरेतदाचक्ष्व विस्तरात् ॥ २ ॥ शंखेनैव तदा पृष्टो दण्डवत्पतितो भुवि ॥ प्रश्रयाऽवनतो भूत्वा प्रांजलिर्वाक्यमब्रवीत् ॥ ३ ॥ अहं पुरा द्विजः कश्चित्प्रयागे बहुभाषणः ॥ रूपयौवनसंपन्नो विद्यामदसुगर्वितः ॥ ४ ॥ धनाढ्यो बहुपुत्राढ्यः सदाऽहंकारदूषितः॥ कुसीदस्य मुनेः पुत्रो नाम्ना रोचन इत्यहम् ॥ ५ ॥ आसनं शयनं निद्रा व्यवायोऽक्षपरिक्रियाः ॥ लोकवार्ता कुसीदं वा व्यापारास्ते ममाऽभवन् ॥ ६ ॥

॥ ९३ ॥ ९४ ॥ ९५ ॥ इति वैशाखमासमाहात्म्यटीकायां विंशोऽध्यायः ॥ २० ॥ छ ॥ अथ सर्पदेहान्मुक्तस्य पुरुषस्य कथां विवक्षुः प्रश्नमुत्थापयति—तत इत्यादिना ॥ १ ॥२ ॥ ३ ॥ ४ ॥ ५ ॥ अक्षपरिक्रिया द्यूतक्रीडा ॥ ६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तंतुमात्राणि अतिसूक्ष्माण्यपि कर्माणि लोकपरंपरागतानि, कुर्वे अकरवम् ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ अचरम् अकरवं लोकवार्ता लौकिकी कथा तया अभिरंजनात् मनोरंजनात् ॥ १४ ॥ १५ ॥ पंचत्वं मरणम् ॥१६॥ तप्तानि यानि सीसजलानि सीसरसास्तैः पूर्णम् मन्वंतानि मन्वंतराणि ॥१७॥ १८ ॥

तंतुमात्राणि कर्माणि लोकनिन्दाविशंकितः ॥ सदंभश्च सदा कुर्वे न श्रद्धा मे कदाचन ॥ ७ ॥ दुर्बुद्धेर्मम दुष्टस्य कियत्कालो गतोऽभवत् ॥ तदा वैशाखमासेऽस्मिञ्जयंतोनाम वै द्विजः ॥ ८ ॥ श्रावयामास तन्मासधर्मान्भागवतप्रियान् ॥ तत्क्षेत्रे वासिनां पुण्यकर्मणां च द्विजन्मनाम् ॥ ९ ॥ नारीनराः क्षत्रियाश्च वैश्याः शूद्राः सहस्रशः ॥ प्रातः स्नात्वा समभ्यर्च्य मधुसूदनमव्ययम् ॥ १० ॥ कथां शृण्वंति सततं जयन्तेन समीरिताम् ॥ शुचिभूत्वा मौनधरा वासुदेवकथारताः ॥ ११ ॥ वैशाखधर्मनिरता दंभालस्यविवर्जिताः ॥ तां सभां च प्रविष्टोऽहं कौतुकाच्च दिदृक्षया ॥ १२ ॥ सोष्णीषेण मया मूर्ध्ना नमस्कारोऽपि न कृतः ॥ तांबूलं च मुखे कृत्वा कंचुकं च मया धृतम् ॥१३॥ कथाविक्षेपमचरं लोकवार्ताभिरंजनात् ॥ सर्वेषां चित्तचांचल्यमभूद्वै लोकवार्तया ॥ १४ ॥ क्वचिद्धासः प्रसार्याहं क्वचिन्निंदन्क्वचिद्धसन् ॥ एवं कालो मया नीतः कथा यावत्समाप्यते ॥ १५ ॥ पश्चात्तेनैव दोषेण सद्योऽल्पायुर्विनष्टधीः ॥ सन्निपातेन पञ्चत्वं प्राप्तोऽहं च परे दिने ॥१६॥ तप्तसीसजलैः पूर्णं निरयं च हलाहलम्॥ प्राप्य भुक्त्वा यातनां च मन्वन्तानि चतुर्दश ॥१७॥ युक्तेष्वथ च लक्षेषु तथा चतुरशीतिभिः ॥ क्रमाद्योनिषु जातोऽहमिदानीं चावसन्द्रुमे ॥१८॥ दशयोजनविस्तीर्णे शतयोजनमुन्नते ॥ व्यालोऽहं तामसः क्रूरः सप्तयोजनकोटरे ॥१९॥ भूत्वा वसामि विप्रर्षे कर्मणा बाधितः पुरा ॥ अयुतं च समा याता निराहारस्य कोटरे ॥ २० ॥ दैवात्तव मुखांभोजसमीरितकथामृतम् ॥ श्रुत्वा चक्षुर्द्वयेनाहं सद्यो ध्वस्ताशुभो मुने ॥२१॥ व्यालयोनिं विसृज्याऽहं दिव्यरूपधरः पुमान् ॥ प्रांजलिः प्रणतो भूत्वा पादौ ते शरणं गतः॥२२॥ कस्मिञ्जन्मनि त्वं बंधुर्न जाने मुनिसत्तम ॥ न मयोपकृतं क्वाऽपि सानुकम्पः कुतः सताम् ॥ २३ ॥ साधूनां समचित्तानां सदा भूतदयावताम् ॥ परोपकारप्रकृतिर्न चैषामन्यथा मतिः ॥ २४ ॥ मामद्यानुगृहाण त्वं यथा धर्मे मतिर्भवेत् ॥ न भूयाद्विस्मृतिः क्वाऽपि विष्णोर्देवस्य चक्रिणः ॥ २५ ॥ महतां साधुवृत्तानां संगतिश्च सदा भवेत् ॥ दारिद्र्यमेकमेव स्यान्मदांधपरमांजनम् ॥ २६ ॥

॥ १९ ॥ २० ॥ चक्षुर्द्वयेन श्रुत्वा सर्पस्य चक्षुःश्रवत्वात चक्षुर्भ्यां श्रवणम् ॥ २१ ॥ २२ ॥ सतां सानुकंपः कुतः कदापि साधूनामुपरि दया न कृतेत्यर्थः ॥ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ २७ ॥ गताध्वसः गतसाध्वसः ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥

इति तं बहुधा स्तुत्वा प्रणम्य च पुनः पुनः ॥ प्रांजलिः प्रणतस्तस्थौ तूष्णीमेव तदग्रतः ॥ २७ ॥ शंखो दोर्भ्यां समुत्थाप्य पूर्णप्रेमपरिप्लुतः ॥ पस्पर्श पाणिना चांगं शंतमेन गताध्वसः ॥ २८ ॥ चक्रे सोऽनुग्रहं तस्मिन्दिव्यरूपधरे द्विजे ॥ प्राह तं कृपयाऽऽविष्टो भाविवृत्तान्तमञ्जसा ॥ ॥ २९ ॥ द्विज त्वं मासमाहात्म्यश्रवणाच्च हरेरपि ॥ माहात्म्यश्रवणात्सद्यो विध्वस्ताऽखिलबंधनः ॥ ३० ॥ अतिहाय कलंकं च क्रमाद्गत्वा पुनर्भुवि ॥ दशार्णे विषमे पुण्ये भविता त्वं द्विजोत्तमः ॥ ३१ ॥ वेदशर्मेति विख्यातः सर्ववेदविशारदः ॥ तत्र ते भविता जातिस्मृतिरात्यंतिकी शुभा ॥३२॥ तथा स्मृतानुबन्धस्त्वं त्यक्तसर्वेषणः शुभः॥करोषि सकलान्धर्मान्वैशाखोक्तान्हरिप्रियान् ॥ ३३ ॥ निर्द्वन्द्वो निःस्पृहोऽसंगो गुरुभक्तो जितेन्द्रियः ॥ सदा विष्णुकथालापो भविता तत्र जन्मनि ॥३४॥ ततः सिद्धिं समाप्याथ विध्वस्ताऽखिलबन्धनः ॥ प्राप्नोषि परमं धाम योगैरपि दुरासदम् ॥३५॥ मा भैषीः पुत्र भद्रं ते भविता मत्प्रसादतः ॥ हास्याद्भयात्तथा क्रोधाद्द्वेषात्कामादथाऽपिवा ॥३६॥ स्नेहाद्वा सकृदुच्चार्य विष्णोर्नामाऽघहारि च ॥ पापिष्ठा अपि गच्छन्ति विष्णोर्धाम निरामयम् ॥३७॥ किमु तच्छ्रद्धया युक्ता जितक्रोधा जितेन्द्रियाः ॥ दयावन्तः कथां श्रुत्वा गच्छंतीति द्विजोत्तम ॥३८॥ केचित्केवलया भक्त्या कथालापैकतत्पराः ॥ सर्वधर्म्मोज्झिता वाऽपि यांति विष्णोः परं पदम्॥३९॥ द्वेषादिना च भक्त्या वा केचिद्विष्णुमुपासते ॥ तेऽपि यांति परं धाम पूतनेवासुहारिणी ॥ ४० ॥ महद्भिः संगतो नित्यं वाग्विसर्गस्तदाश्रयः ॥ मुमुक्षूणां च कर्तव्यः स विधिः श्रुतिचोदितः ॥ ४१ ॥ स वाग्विसर्गो जनताऽघविप्लवो यस्मिन्प्रतिश्लोकमबद्धवत्यपि ॥ नामान्यनंतस्य यशोंकितानि यच्छृण्वन्ति गायन्ति गृणंति साधवः ॥ ४२ ॥ यः कष्टसेवां न च कांक्षते विभुर्न वासनं भूरि न रूपयौवने ॥ स्मृतः सकृद्गच्छति धाम भास्वरं कं वा दयालुं शरणं व्रजेत ॥ ४३ ॥ तमेव शरणं याहि नारायणमनामयम् ॥ भक्तवत्सलमव्यक्तं चेतोगम्यं दयानिधिम् ॥ ४४ ॥ कुरु सर्वानिमान्धर्मान्वैशाखोक्तान्महामते ॥ तेन तुष्टो जगन्नाथः शर्म ते च विधास्यति ॥ ४५ ॥ इत्युक्त्वा विररामाथ व्याधं दृष्ट्वा सुविस्मितः॥ स दिव्यः पुरुषः प्राह पुनस्तं मुनिपुंगवम् ॥ ४६ ॥ ॥ दिव्यपुरुष उवाच ॥ ॥ धन्योस्म्यनुगृहीतोऽस्मि त्वया शंख दयालुना ॥ दिष्ट्या गता मे दुर्योनिर्यामि चैव परां गतिम् ॥ ४७ ॥ इति तं च परिक्रम्य ह्यनुज्ञातो दिवं ययौ ॥ ततः सायमभूद्राजञ्छंखो व्याधेन तोषितः ॥ ४८ ॥

अबद्धवत्यपि अशुद्धेऽपि ॥ ४२ ॥ ४३ ॥ ४४ ॥ ४५ ॥ ४६ ॥ ४७ ॥ ४८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ४९ ॥ ५० ॥ ५१ ॥ ५२ ॥ ५३ ॥ ५४ ॥ ५५ ॥ ५६ ॥ ५७ ॥ ५८ ॥ निववृते परावृत्तः ॥ ५९ ॥ चूतमाम्रफलम् ॥ ६० ॥ ६१ ॥ ६२ ॥

संध्यां सायन्तनीं कृत्वा रात्रिशेषं निनाय च ॥ नानाख्यानैश्च भूपानां देवानां च महात्मनाम् ॥ ४९ ॥ लीलाभिरवताराणां हृष्टगो
ष्ठिभिरेव च ॥ ब्राह्मे मुहूर्ते चोत्थाय पादौ प्रक्षाल्य वाग्यतः ॥ ५० ॥ ध्यायंश्च तारकं ब्रह्म कृत्वा शौचादिसत्क्रियाम् ॥ वैशाखे मेषगे सूर्ये
स्नात्वा प्राक्च भगोदयात् ॥ ५१ ॥ कृत्वा संध्यादिकं कर्म तथा संतर्प्य चाऽखिलान् ॥ व्याधमाहूय हृष्टात्मा मूर्ध्नि प्रोक्ष्य निरीक्ष्य च ॥ ५२ ॥
रामेति द्व्यक्षरं नाम ददौ वेदाधिकं शुभम् ॥ विष्णोरेकैकनामाऽपि सर्ववेदाधिकं मतम् ॥ ५३ ॥ तेभ्यश्चाऽनंतनामभ्योऽधिकं नाम्नां सहस्र
कम् ॥ तादृङ्नामसहस्रेण रामनाम समं मतम् ॥ ५४ ॥ तस्माद्रामेति तन्नाम जप व्याध निरंतरम् ॥ धर्मानेतान्कुरु व्याध यावदामरणांति
कम् ॥ ५५ ॥ ततस्ते भविता जन्म वल्मीकस्य ऋषेः कुले ॥ वाल्मीकिरिति नाम्ना च भूमौ ख्यातिमवाप्स्यसि ॥ ५६ ॥ इति व्याधं समा
दिश्य प्रतस्थे दक्षिणां दिशम् ॥ व्याधोऽपि तं परिक्रम्य प्रणम्य च पुनःपुनः ॥ ५७ ॥ किंचिद्दूरानुगो भूत्वा स रुदन्विरहातुरः ॥ यावद्दृष्टि
पथं तावत्पश्यंस्तस्य गतिं पुनः ॥ ५८ ॥ पुनर्निववृते कृच्छ्रात्तमेव हृदि चिंतयन् ॥ वनं निर्माय तन्मार्गे प्रपां कृत्वा सुनिर्मलाम् ॥ ५९ ॥
अतियोग्यानिमान्धर्मान्वैशाखोक्तांश्चकार ह ॥ वन्यैः कपित्थपनसैर्जंबूचूतादिभिः फलैः ॥ ६० ॥ मार्गगानां श्रमार्तानामाहारं परिकल्पयन् ॥
उपानद्भिश्चंदनैश्च छत्रैश्च व्यजनैरपि ॥६१॥ वालुकास्तरणोपेतच्छायाभिश्च क्वचित्क्वचित् ॥ आजहाराथ पांथानां श्रमं स्वेदोद्भवं तथा ॥६२॥
प्रातः स्नात्वा दिवारात्रं जपन्रामेति वै मनुम् ॥ व्याधजन्मनि नामाऽसौ वल्मीकस्य सुतोऽभवत् ॥ ६३ ॥ कृणुर्नाम मुनिः कश्चित्तस्मिन्नेव
सरोवरे ॥ तपो वै दुस्तरं तेपे बाह्यव्यापारवर्जितः ॥ ६४ ॥ वल्मीकमभवद्देहे तस्य कालेन भूयसा ॥ वल्मीक इति तं प्राहुरतो वै मुनिपुंग
वम् ॥ ६५ ॥ पश्चात्तपोविरामांते कृणौ स्मृतिपथं गते ॥ स्त्रियोऽनुस्मरतो राजन्स्खलितं चेंद्रियं मुनेः ॥ ६६ ॥ जग्राह शैलुषी काचित्तस्यां
जज्ञे वनेचरः ॥ वाल्मीकिरिति विख्यातो भुवनेषु महायशाः ॥ ६७ ॥ यो वै रामकथां दिव्यां स्वैः प्रबंधैर्मनोहरैः ॥ लोके प्रख्यापयामास
कर्मबन्धनिकृंतनीम् ॥ ६८ ॥

॥ ६३ ॥ ६४ ॥ ६५ ॥ ६६ ॥ ६७ ॥ ६८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ६९ ॥ ७० ॥ इति वैशाखमासमाहात्म्यटीकायामेकविंशोऽध्यायः ॥ २१ ॥ छ ॥ पुनर्मैथिलेयः श्रुतदेवं प्रति वैशाखधर्मान्पृच्छति—केत्यादिना ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ इमास्तिथयः ॥ ६ ॥ ७ ॥ सुगुणोत्तमः सुगुणः उत्तमश्च ॥ ८ ॥ ९ ॥ वैशाखे गोचरो वैशाखसंबंधी ॥ १० ॥ ११ ॥ नारका नरकस्थानभूताः ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥

॥ ॥ श्रुतदेव उवाच ॥ ॥ पश्य वैशाखमाहात्म्यं भूपालाद्याऽपि भूतिदम् ॥ व्याधोप्युपानहौ दत्त्वा ऋषित्वं प्राप दुर्लभम् ॥ ६९ ॥ य इदं परमाख्यानं पापघ्नं रोमहर्षणम् ॥ शृणुयाच्छ्रावयेद्वाऽपि न भूयः स्तनपो भवेत् ॥ ७० ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे वैशाखमासमाहात्म्ये नारदाम्बरीषसंवादे व्याधोपाख्याने वाल्मीकेर्जन्मकथनन्नामैकविंशोऽध्यायः ॥ २१ ॥ ॥ छ ॥ ॥ ॥ मैथिलेय उवाच ॥ ॥ का ह्यस्मिंस्तिथयः पुण्या मासे वैशाखसंज्ञके ॥ कानि दानानि शस्तानि तासुतासु विशेषतः ॥ १ ॥ काः प्रख्याताश्च वै लोक एतदाचक्ष्व विस्तरात् ॥ ॥ श्रुतदेव उवाच ॥ ॥ त्रिंशच्च तिथयः पुण्या वैशाखे मेषगे रवौ ॥ २ ॥ एकादश्यां कृतं पुण्यं कोटिकोटिगुणं भवेत् ॥ सर्वदानेषु यत्पुण्यं सर्वतीर्थेषु यत्फलम् ॥ ३ ॥ समवाप्नोति वैशाख एकादश्यां जलाप्लुतः ॥ स्नानं दानं तपो होमो देवतार्चनसत्क्रियाः ॥ ४ ॥ कथायाः श्रवणं चैव सद्यो मुक्तिविधायकम् ॥ रोगाद्युपहतो यस्तु दारिद्र्येणाऽपि पीडितः ॥ ५ ॥ श्रुत्वा कथामिमां पुण्यां कृतकृत्यो भवेन्नरः ॥ अस्नात्वा चाऽप्यदत्त्वा च येन नीता इमाः शुभाः ॥ ६ ॥ स गोघ्नश्च कृतघ्नश्च पितृघ्नश्च महान्स्मृतः ॥ जलाशयाश्च स्वाधीनाः स्वाधीनं च कलेवरम् ॥७॥ माधवो मनसा सेव्यः कालश्च सुगुणोत्तमः ॥ साधवश्च दयावंतः को न सेवेत माधवम् ॥ ८ ॥ दरिद्रैश्च धनाढ्यैश्च पंगुभिश्चांधकैस्तथा ॥ षंढैश्च विधवाभिश्च नारीभिश्च नरैस्तथा ॥ ९ ॥ कुमारयुववृद्धैश्च रोगार्तैरपि भूमिप ॥ अतीवसुखसाध्यो हि धर्मो वैशाखगोचरः ॥ १० ॥ मासमेनमनुप्राप्य धर्मान्कुरु इमाञ्छुभान् ॥ को न यत्नं च कुरुते तस्मात्को न्वपरः शुभः ॥ ११ ॥ योऽतीव सुलभान्धर्मान्न करोति नराऽधमः ॥ तस्यैव सुलभा लोका नारका नात्र संशयः ॥ १२ ॥ अथातः संप्रवक्ष्यामि तस्मिन्मासे च कोत्तमा ॥ तां तिथिं सर्वपापघ्नीं दध्नः सारमिवोद्धृताम् ॥१३॥ चैत्रे मासि महापुण्ये मेषसंस्थे दिवाकरे ॥ पापघ्नी पितृदैवत्या गयाकोटिफलप्रदा ॥ १४ ॥ अत्रैव श्रूयते पुण्या पितृगाथा पुरातनी ॥ शृणु तां सत्कथां राजन्सावर्णौ शासति क्षितिम् ॥ १५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ शिश्नस्य निग्रहः कामजय इत्यर्थः, जिह्वाया निग्रहः

त्रिंशत्कलियुगस्यांते सर्वधर्मविवार्जिते ॥ आनर्ते तु द्विजः कश्चिद्धर्मवर्ण इति श्रुतः ॥ १६ ॥ दृष्ट्वा कलियुगे राजञ्जनान्पापरतान्मुनिः ॥ तस्यैव प्रथमे पादे वर्णधर्मविवर्जिते ॥१७॥ स कदाचित्सत्रयागं मुनीनां तु महात्मनाम् ॥ अगमत्पुष्करे क्षेत्रे कुर्वतां मौनधारिणाम् ॥१८॥ तत्र चास न्पुण्यकथा ऋषीणां शास्त्रगोचराः॥ तत्र केचित्कलियुगं प्रशशंसुर्धृतव्रताः ॥१९॥ कृते यद्वत्सरात्साध्यं पुण्यं माधवतोषणम् ॥ त्रेतायां मासतः साध्यं द्वापरे पक्षतो नृप ॥ २० ॥ तस्माद्दशगुणं पुण्यं कलौ विष्णुस्मृतेर्भवेत् ॥ अत्यल्पमपि वै पुण्यं कलौ कोटिगुणं भवेत् ॥ २१ ॥ दया पुण्यविहीने तु दानधर्मविवर्जिते ॥ दयादानं च कुरुते सकृदुच्चार्य वै हरिम् ॥ २२ ॥ स एव चोर्ध्वगो नूनं दुर्भिक्षे चान्नदस्तथा ॥ एतत्प्रसं गावसरे नारदोऽभ्येत्य वै मुनिः ॥ २३ ॥ करेणैकेन शिश्नं च जिह्वां चैकेन वै हसन् ॥ प्रगृह्योन्मत्तवत्तत्र ननर्त मुनिसत्तमः ॥ २४ ॥ सभ्या स्तदा तमित्यूचुः किमेतदिति नारद ॥ प्रत्युवाच स तान्सर्वान्नृत्यं कुर्वन्हसन्सुधीः ॥ २५ ॥ संतोषाद्यदिह प्रोक्तं नृत्यद्भिर्भावितात्मभिः ॥ सिद्धा वयं न संदेहः पुण्योऽयं कलिरागतः ॥ २६ ॥ तत्सत्यं न च संदेहो बहु स्वल्पेन साध्यते ॥ स्मरणात्तोषमायाति केशवः क्लेशनाशनः ॥ २७ ॥ तथापि वः प्रवक्ष्यामि दुर्घटं च द्वयं ध्रुवम् ॥ शिश्नस्य निग्रहः पुत्रा जिह्वाया अपि नित्यशः ॥ २८ ॥ द्वयं यद्धि भवेद्यस्य स एव स्याज्जनार्दनः ॥ भवद्भिर्नात्र स्थातव्यं तस्मात्कलियुगागमे ॥ २९ ॥ पाखंडं भारतं हित्वा संचरध्वं यथासुखम् ॥ यत्र कुत्रापि देशेषु मनो यत्र प्रसीदति ॥ ३० ॥ इति तद्वचनं श्रुत्वा मुनयः शंसितव्रताः ॥ सत्रं समाप्य सहसा ययुस्ते च यथासुखम् ॥ ३१ ॥ धर्मवर्णोऽपि तच्छ्रुत्वा त्यक्तुं भूमिं मनो दधे ॥ स व्रतं चोर्ध्वतेजस्कं धृत्वा दण्डकमंडलू ॥ ३२ ॥ जटावल्कलधारी च भूत्वा चैवं ययौ पुनः ॥ कलौ युगे त्वनाचा रान्द्रष्टुं विस्मितमानसः ॥ ३३ ॥ तत्राऽपश्यज्जनान्घोरान्पापाचाररतान्खलान् ॥ पाखण्डिनो द्विजाः सर्वे शूद्राः प्रव्राजिनस्तथा ॥ ३४ ॥ भर्तारं द्वेष्टि भार्या च शिष्यो द्वेष्टि गुरुं तथा ॥ भृत्यश्च स्वामिहंता च पुत्रः पितृवधे रतः ॥ ३५ ॥

मधुरादिरसेषु रागद्वेषराहित्यम् ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ प्रव्रांजिनः संन्यासिनः ॥ ३४ ॥ ३५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शुभाः श्रुतिस्मृतिपुराणविहिताः क्रियाः कर्माणि क्रियासाम्याः लौकिकगमनागमनादिसदृशाः ॥ ३६ ॥ शिताः क्रूराः ॥ ३७ ॥ कूटसाक्ष्यं मत्साक्षिकमिदमिति
मिथ्याकथनम् ॥ ३८ ॥ एकम् अन्यत् । "एके मुख्यान्यकेवला" इत्यभिधानात् ॥ हैतुकी सहेतुका जीविकार्थं सकलं कर्मेति भावः ॥ ३९ ॥ ४० ॥ ४१ ॥

शूद्रप्राया द्विजाः सर्वे बस्तप्रायाश्च धेनवः ॥ गाथाप्रायास्तथा वेदाः क्रियासाम्याः शुभाः क्रियाः ॥ ३६ ॥ भूतप्रेतपिशाचाद्याः फलदास्तत्र
देवताः ॥ ता एव श्रद्धयाऽर्चंति जनाः पापरताः शिताः ॥ ३७ ॥ सर्वे व्यवायनिरतास्तदर्थे त्यक्तजीविताः ॥ कूटसाक्ष्यप्रवक्तारः सदा कैतवमा
नसाः ॥ ३८ ॥ मनस्येकं वचस्येकं कर्मण्येकं सदा कलौ ॥ सर्वेषां हैतुकी विद्या सा पूज्या नृपमंदिरे ॥ ३९ ॥ गीताद्याश्च कला विद्या नृपाणां
च प्रियावहाः ॥ हीनाश्च पूज्यतां यांति नोत्तमाश्च कलौ युगे ॥ ४० ॥ श्रोत्रियाश्च द्विजाः सर्वे दरिद्राः स्युः कलौ युगे ॥ विष्णुभक्तिर्नराणां तु
प्रायशो नैव वर्तते ॥४१॥ प्रायः पाखंडभूयिष्ठं पुण्यक्षेत्रं भविष्यति ॥ शूद्रा धर्मप्रवक्तारो जटिलास्तापसाः कलौ ॥४२॥ सर्वे चाल्पायुषो मर्त्या
दयाहीनाः शठा जनाः ॥ सर्वे धर्मप्रवक्तारः सर्वे च ग्रहणोत्सवाः ॥ ४३ ॥ स्वार्चनं चाऽपि हीच्छंति वृथा निन्दापरायणाः ॥ असूयानिरताः
सर्वे प्रभोः स्वगृहमागते ॥ ४४ ॥ भ्राता च भगिनीगंता पिता पुत्रीं च वै कलौ ॥ सर्वेऽपि शूद्रीनिरताः सर्वे वारांगनारताः ॥ ४५ ॥ साधून्नैव
विजानंति बहुपापांश्च मन्यते ॥ व्यक्तीकुर्वंति साधूनां दोषमेकं दुराग्रहाः ॥ ४६ ॥ पापानां दोषजातानि गुणत्वेन वदन्ति हि ॥ दोषमेव प्रगृह्णंति
कलौ तु विगुणा जनाः ॥४७॥ जलौका धर्मसंयुक्ता रक्तं पिबति नो पयः ॥ औषध्यः सत्त्वहीना हि ऋतून व्यत्ययास्तथा ॥ ४८ ॥ दुर्भिक्षं
सर्वराष्ट्रेषु कन्या काले न सूयते ॥ नटनर्तकविद्यासु प्रीतिमन्तो नराः कलौ ॥ ४९ ॥ वेदवेदांतविद्यासु निरता ये गुणाधिकाः ॥ भृत्यान्पश्यंति
तान्मूढास्ते भ्रष्टाश्चाखिला नृप ॥ ५० ॥ त्यक्तश्राद्धक्रियाः सर्वे त्यक्तवेदोदितक्रियाः ॥ जिह्वायां विष्णुनामानि न वर्तंते कदाचन ॥ शृंगाररस
निर्वाणास्तद्गीतान्येव ते जगुः ॥५१॥ न विष्णुसेवा न च शास्त्रवार्ता न यागदीक्षा न विचारलेशः ॥ न तीर्थयात्रा न च दानधर्माः कलौ जने
क्वाऽपि बभूव चित्रम् ॥ ५२ ॥ तान्दृष्ट्वा धर्मवर्णोऽपि सुभीतोऽत्यन्तविस्मितः ॥ वंशं पापात्क्षयं यांतं दृष्ट्वा द्वीपांतरं ययौ ॥ ५३ ॥ स चरन्स
र्वद्वीपेषु लोकेष्वेव तु सर्वशः ॥ पितृलोकं ययौ धीमान्कदाचित्कौतुकान्वितः ॥ ५४ ॥ तत्राऽपश्यन्महाघोराञ्छ्राम्यमाणांश्च कर्मभिः ॥५५॥

॥ ४२ ॥ ग्रहणं परद्रव्यादीनां तत्र उत्सवो हर्षो येषां तथाविधाः ॥ ४३ ॥ ४४ ॥ ४५ ॥ ४६ ॥ ४७ ॥ ४८ ॥ काले प्रसवदशायां न सूयते बालैव प्रसूते इत्यर्थः
॥ ४९ ॥ ५० ॥ शृंगाररस एव निर्वाणो मुक्तिसदृशो येषां ते ॥ ५१ ॥ ५२ ॥ ५३ ॥ ५४ ॥ ५५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पतितान् आसन्नपतनान् ॥ ५६ ॥ ५७ ॥ ५८ ॥ ५९ ॥ ६० ॥ ६१ ॥ तेन वचसा ॥ ६२ ॥ ६३ ॥ ६४ ॥ निस्तंतूनां संततिरहितानाम् ॥ ६५ ॥ ६६ ॥

धावतो रुदमानांश्च पततः पतितानपि ॥ तत्रापश्यच्चान्धकूपे पतितान्स्वान्पितॄनधः ॥ ५६ ॥ दूर्वाग्रलंबिनो दीनान्दूर्वाच्छेदे हि शंकितान् ॥
तदा प्राप्तः कोऽपि चाखुर्दूर्वामूलं तदाश्रयम् ॥ ५७ ॥ तेन भागत्रयं चात्तमेको भागोवशेषितः ॥ तं दृष्ट्वा ते क्षीयमाणं मूलं दुःखेन कर्षिणः ॥
॥ ५८ ॥ अधो दृष्ट्वा चांऽधकूपं तटपातादिभीषणम् ॥ दुरुत्तारं महाघोरं कर्मणाप्तं सुदुःखिताः ॥ ५९ ॥ अग्रे चाऽपि दुरुत्तारमवलंबविवर्जि
तम् ॥ तान्दृष्ट्वा विस्मितो भूत्वा दयालुर्वाक्यमब्रवीत् ॥६०॥ के यूयं पतिता ह्यस्मिन्केन दुस्तरकर्मणा ॥ कस्य गोत्रे समुत्पन्नाः कथं वो मुक्ति
रूर्जिता ॥ ६१ ॥ एतद्यूयं वदध्वं मे शर्म वोऽथ भविष्यति ॥ इत्येवमुदितास्तेन पितरोऽथ सुदुःखिताः ॥ ६२ ॥ तमूचुः करुणां वाचं धर्मश्रुति
पुरःसराः ॥ ॥ पितर ऊचुः ॥ ॥ वयं श्रीवत्सगोत्रीया भुवि सन्तानवर्जिताः ॥ ६३ ॥ पिंडश्राद्धविहीनाश्च तेन पच्यामहे वयम् ॥ निःसन्ता
नोऽपि नो वंशो जातः पापैः कलौ युगे ॥६४॥ नाऽस्माकं पिंडदश्चास्ति वंशे पापात्क्षयं गते ॥ तेनांऽधकूपे पतनं निस्तंतूनां दुरात्मनाम् ॥६५॥
एको हि वर्तते वंशे धर्मवर्णो महायशाः ॥ स विरक्तश्चरन्नेको न गार्हस्थ्यमुपेयिवान् ॥ ६६ ॥ तंतुना तेन विश्रामो दूर्वानालावलंबिताः ॥ निस्तंतु
त्वाच्च तन्मूलमाखुः खादति प्रत्यहम् ॥ ६७ ॥ एकस्यैवाऽवशिष्टत्वात्किंचिन्नलोऽवशेषितः ॥ आखुना खाद्यमानश्च वर्तते सौम्य पश्यताम् ॥
॥ ६८ ॥ तस्य चाऽऽयुःक्षये तात शेषमाखुर्हरिष्यति ॥ पश्चात्कूपे पतिष्यामो दुरुत्तारेंऽधतामसे ॥ ६९ ॥ तस्मात्त्वं च भुवं गत्वा धर्मवर्णं प्रबो
धय ॥ अस्मद्वाक्यैर्दयापात्रैर्गार्हस्थ्ये विमुखं मुनिम् ॥ ७० ॥ पितरस्ते भृशाऽर्ता हि नरके पतिता मया ॥ अन्धकूपे दुरुत्तारे दृष्टा दूर्वावलं
बिताः ॥ ७१ ॥ सा दूर्वा वंशरूपा हि तन्मूलं सततं मुने ॥ कालाख्यो मूषकस्तस्य मूलं खादति प्रत्यहम् ॥ ७२ ॥ वंशनाशोऽनुक्रमत
एकस्त्वं त्ववशेषितः ॥ तेन मूलस्य दूर्वाया नष्टं भागत्रयं मुने ॥७३॥ एको भागोऽवशिष्टोऽत्र यतस्त्वं वर्तसे भुवि ॥ किंचित्खादति वै त्वाऽऽखु
स्तव चाऽऽयुःक्षयक्रमात् ॥ ७४ ॥ परेते त्वयि चाऽस्माकं तवाऽपि पतनं भवेत् ॥ कूप एवान्धतामिस्रे संतानेऽपि क्षयं गते ॥ ७५ ॥

॥ ६७ ॥ ६८ ॥ ६९ ॥ ७० ॥ ७१ ॥ ७२ ॥ ७३ ॥ ७४ ॥ ७५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ७६ ॥ ७७ ॥ ७८ ॥ हरिवासरी एकादशीव्रतकर्ता ॥ ७९ ॥ ८० ॥ ८१ ॥ ८२ ॥ सूनृतैर्मधुरैः ॥ ८३ ॥ ८४ ॥ ८५ ॥ ८६ ॥ ८७ ॥ जनकाः पितरः ॥ ८८ ॥ ८९ ॥९० ॥ ९१ ॥ ९२ ॥ ९३ ॥ ९४ ॥ ९५ ॥ ९६ ॥

तस्माद्गार्हस्थ्यमासाद्य कुरु संततिवर्धनम् ॥ तेनाऽस्माकं तवाऽपि स्याद्गतिरूर्ध्वा न संशयः ॥ ७६ ॥ एष्टव्या बहवः पुत्रा यद्येकोऽपि गयां व्रजेत् ॥ यजेत वाऽश्वमेधं च नीलं वा वृषमुत्सृजेत् ॥ ७७ ॥ यद्येकोऽपि च वैशाखे माघे वा कार्तिकेऽपि च ॥ अस्मानुद्दिश्य वै स्नानं श्राद्धं दानं करिष्यति ॥ ७८ ॥ तेन चोर्ध्वगतिर्भूयान्नरकादुद्धृतिश्च नः ॥ एको वा विष्णुभक्तः स्यादेको वा हरिवासरी ॥ ७९ ॥ एको वा शृणुयाद्विष्णोः कथां पापविनाशनीम् ॥ तस्यातीतं कुलशतं भावि चाऽपि कुलं शतम् ॥ ८० ॥ अपि पापवृतं क्वाऽपि नरकं नैव पश्यति ॥ किमन्यैर्बहुभिः पुत्रैर्दयाधर्मविवर्जितैः ॥ ८१ ॥ ये जाता नार्चयंत्यद्धा विष्णुं नारायणं कुले ॥ नाऽपुत्रस्य हि लोकोऽस्ति सर्वमेतज्जना विदुः ॥८२॥ तत्राऽपि च दयायुक्तं तत्संतानं च दुर्लभम् ॥ इति तं बोधयित्वा तु वाक्यैरेतैश्च सूनृतैः ॥ ८३ ॥ विरक्तस्योर्ध्वरेतस्य गार्हस्थ्ये त्वं मतिं कुरु ॥ पितॄणां वचनं श्रुत्वा धर्मवर्णोऽतिविस्मितः ॥८४॥ प्रणम्य प्रांजलिः प्राह रुदन्वै जातवेपथुः ॥ नाम्नाहं धर्मवर्णश्च युष्मद्वंश्यो दुराग्रही ॥ ॥ ८५ ॥ सत्रे श्रुत्वा तु वचनं नारदस्य महात्मनः ॥ जिह्वादार्ढ्यं गुह्यदार्ढ्यं न कस्याऽपि कलौ युगे ॥ ८६ ॥ दृष्ट्वा भुवि च पापिष्ठांस्ताञ्जनानपि शंकितः ॥ भीतो दुर्जनसंगत्या चरन्द्वीपांतरे वसन् ॥ ८७ ॥ पादास्त्रयो गता ह्यस्य कलेः पादेंऽत्यकेऽपि च ॥ गताः सार्द्धत्रयो भागा इदानीं जनका इमे ॥ ८८ ॥ नाऽहं वेद्मि भवद्दुःखं वृथा जन्म गतं मम ॥ यस्मिन्कुले त्वहं जात ऋणं पित्रोर्न वै हृतम् ॥ ८९ ॥ किं तेन जातमात्रेण भूभारेणाऽत्र शत्रुणा ॥ यो जातो नार्चयेद्विष्णुं पितॄन्देवानृषींस्तथा ॥ ९० ॥ युष्मदाज्ञां करिष्यामि मामाऽऽज्ञापयत क्षितौ ॥ यथा न कलिबाधा स्यात्तत्र संसारतोऽपि वा ॥ ९१ ॥ कर्तव्यान्यपि कृत्यानि मया पुत्रेण भूतले ॥ इत्युक्तास्तेन वंश्येन धर्मवर्णेन धीमता ॥९२॥ किंचिदाश्वस्तमनस इदमूचुर्महीपते ॥ पुत्र पश्य दशामेतां पितॄणां ते महात्मनाम् ॥ ९३ ॥ संतत्यभावात्पततां दूर्वामात्रावलंबिनाम् ॥ त्वं गार्हस्थ्यमुपालभ्य संतत्यास्मान्समुद्धर ॥ ९४ ॥ ये च विष्णुकथारक्ता ये स्मरंत्यनिशं हरिम् ॥ ये सदाचारनिरता न तान्वै बाधते कलिः ॥ ॥ ९५ ॥ शालिग्रामशिला यस्य गृहे तिष्ठति मानद ॥ अथवा भारतं गेहे न तं वै बाधते कलिः ॥ ९६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यश्च वैशाखनिरतो माघस्नानपरश्च यः ॥ कार्तिके दीपदाता यो न तं वै बाधते कलिः ॥९७॥ प्रत्यहं शृणुयाद्यस्तु कथां विष्णोर्महात्मनः ॥ पापघ्नीं मोक्षदां दिव्यां न तं वै बाधते कलिः ॥९८॥ यद्गृहे वैश्वदेवश्च यद्गृहे तुलसी शुभा ॥ यदंगणे शुभा गौश्च न तं वै बाधते कलिः॥९९॥ तस्मान्नो भीतिरस्तीह युगे पापात्मकेऽपि च ॥ शीघ्रं गच्छ भुवं पुत्र मासोऽयं माधवाह्वयः ॥ १०० ॥ सर्वेषामुपकाराय मेषसंस्थे दिवाकरे ॥ त्रिंशच्च तिथयः पुण्या मेषसंस्थे दिवाकरे ॥ १०१ ॥ एकैकस्यां कृतं पुण्यं कोटिकोटिगुणं भवेत् ॥ तत्राऽपि चैत्रबहुलो दर्शो नृणां च मुक्तिदः ॥ २ ॥ प्रियश्च पितृदेवानां सद्यो मुक्तिविधायकः ॥ ये वै पितॄन्समुद्दिश्य श्राद्धं कुर्वंति तद्दिने ॥३॥ सोदकुभं पिंडदानं तदक्षय्यफलं लभेत् ॥ ये च कुर्वंति वै श्राद्धममायां च मधौ सुत ॥ ४ ॥ तैः कृतं तु गयाक्षेत्रे श्राद्धं कोटिगुणं भवेत् ॥ यदि श्राद्धं मधौ दर्शे शाकेनाऽपि करोति च ॥ ५ ॥ कोटिश्राद्धं गयायां तु कृतं तेन न संशयः ॥ कुंभं च पानकैः पूर्णं कर्पूरागुरुवासितम् ॥ ६ ॥ यो न दद्यान्मधौ दर्शे स पितृघ्नो न संशयः ॥ यो दद्याच्च मधौ दर्शे सपानीयं करीरकम् ॥ ७ ॥ श्राद्धं च भक्तिसंयुक्तः कुरुते च कुलोद्धृतिम् ॥ पितॄणां च तथा लोके नदी चाऽमृतवर्षिणी ॥ ८ ॥ कुंभदानात्प्रसरति श्राद्धदानादिदायिनाम् ॥ अन्नसूपघृतापूपलेह्यपायसकर्दमान् ॥ ९ ॥ तस्माज्झटिति त्वं गच्छ यदा वाऽमा भविष्यति ॥ कुरु श्राद्धं पिंडदानं सोदकुम्भं महामते ॥११०॥ सर्वेषामुपकाराय गार्हस्थ्यं च समाश्रय ॥ धर्मार्थकामैः संतुष्टः प्राप्य संतानमुत्तमम् ॥ ११ ॥ पुनश्च मुनिवृत्तिस्त्वं सुखं द्वीपे सुसंचर ॥ इत्यादिष्टः पितृभिश्च तूर्णं भूमिं ययौ मुनिः ॥ १२ ॥ चैत्रे मासे मेषसंस्थे पुण्ये मासि दिवाकरे ॥ प्रातः स्नात्वा च संतर्प्य पितॄन्देवानृषींस्तथा ॥ १३ ॥ सोदकुंभं तथा श्राद्धं कृत्वा पापविनाशनम् ॥ तेन दत्त्वा पितॄणां च मुक्तिमावृत्तिवर्जिताम् ॥ १४ ॥ स्वयं विवाहमकरोत्संततिं प्राप्य वै सतीम् ॥ लोके प्रख्यापयामास तां तिथिं पापनाशनीम् ॥१५॥ स्वयं पुनर्मुदा भक्त्या गन्धमादनमाययौ ॥ १६ ॥ तस्मात्पुण्यतमा चैषा मधोर्दर्शाह्वयातिथिः॥ नानया सदृशी लोके तिथिर्दृष्टा श्रुताऽपि वा ॥ ॥ ११७ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे वैशाखमासमाहात्म्ये नारदाम्बरीषसंवादे कलिधर्मनिरूपणे पितृमुक्तिर्नाम द्वाविंशोऽध्यायः ॥ २२ ॥ ॥ छ ॥

॥ १४ ॥ १५ ॥ १६ ॥ ११७ ॥ इति वैशाखमासमाहात्म्यटीकायां द्वाविंशोऽध्यायः ॥ २२ ॥ छ ॥

Nepal Sanskrit University, Baidyanath

CC-0. In Public Domain. Digitization by eGangotri

अथ अक्षय्यतृतीयामाहात्म्यं वर्णयति—अथेत्यादिना यावदध्यायसमाप्ति । माधवे वैशाखे सिते शुक्लपक्षे ॥ १ ॥ भगस्य रवेरुदये ॥ २ ॥ ३ ॥ ४ ॥ अक्षय्यम् अनश्वरम् ॥५॥६॥ त्रयाणां देवर्षिपितॄणाम् ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ रामां रमणीयाम् ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ चस्कंद गलितम् ॥ १६ ॥ मा माम् ।

॥ ॥ श्रुतदेव उवाच ॥ ॥ अथातः संप्रवक्ष्यामि माहात्म्यं पापनाशनम् ॥ अक्षय्यायास्तृतीयायाः सिते पक्षे च माधवे ॥ १ ॥ ये कुर्वंति च तस्यां वै प्रातः स्नानं भगोदये ॥ ते सर्वे पापनिर्मुक्ता यांति विष्णोः परं पदम् ॥ २ ॥ देवान्पितॄन्मुनीन्यस्तु कुर्यादुद्दिश्य तर्पणम् ॥ तेनाऽधीतं च तेनेष्टं तेन श्राद्धशतं कृतम् ॥ ३ ॥ मधुसूदनमभ्यर्च्य कथां शृण्वंति ये नराः ॥ अक्षय्यायां तृतीयायां ते नरा मुक्तिभागिनः ॥ ॥ ४ ॥ ये दानं तत्र कुर्वंति मधुद्विट्प्रीतये शुभम् ॥ तदक्षय्यं फलत्येव मधुशासनशासनात् ॥ ५ ॥ देवर्षिपितृदैवत्या तिथिरेषा महाशुभा ॥ त्रयाणां तृप्तिदात्री च कृते धर्मे सनातने ॥ ६ ॥ प्रख्यातिश्च तिथेरस्याः केन चास्ति तदप्यहम् ॥ वक्ष्यामि नृपशार्दूल सावधानमनाः शृणु ॥ ॥ ७ ॥ पुरा पुरंदरस्याऽऽसीद्युद्धं च बलिना सह ॥ देवानां चैव दैत्यानां द्वंद्वयुद्धमभूत्ततः ॥ ८ ॥ स निर्जित्य बलिं दैत्यं पातालतलवासिनम् ॥ पुनर्भुवं समासाद्य चोतथ्यस्याऽऽश्रमं ययौ ॥ ९ ॥ तत्रापश्यच्च तत्पत्नीं गुर्विणीं मंदगामिनीम् ॥ चलच्छ्रोणितटाबद्धकांचीदाम्ना सुमंडिताम् ॥ १० ॥ क्वणत्कंकणनिर्घोषजितमत्तालिकोकिलाम् ॥ वल्गुचित्रांबरां रामां मंजुवाचं शुचिस्मिताम् ॥ ११ ॥ लसत्कुंभस्थलाभ्यां च कुचाभ्यामुपशोभिताम् ॥ हसत्पद्ममुखां दिव्यां नीलोत्पलसुलोचनाम् ॥ १२ ॥ केतक्युदरपांडुभ्यां गंडाभ्यां च मनोरमाम् ॥ श्रमोच्छ्वसंतीं दीनाक्षीं पर्णशालामुखे स्थिताम् ॥ १३ ॥ स्वपतीं शयने क्वाऽपि तां दृष्ट्वा मोहमागतः ॥ बलात्कारेण बुभुजे गुर्विणीं पाकशासनः ॥ १४ ॥ गर्भस्थस्तु तदा पिंडः स्वस्य पातविशंकया ॥ छादयामास वै योनिं द्वारे पादेन दुःखितः ॥ १५ ॥ ततश्चस्कन्द वीर्यं तद्भूमावेव बलिद्विषः ॥ गर्भस्थाय चुकोपासौ भगवान्पाकशासनः ॥ १६ ॥ तं शशाप च गर्भस्थं रुषा ताम्रांतलोचनः ॥ जात्यन्धो भव दुर्बुद्धे माऽवमंस्था यतः पदा ॥ १७ ॥ प्रच्छाद्य योनिद्वारं च ततो दीर्घतपाह्वयः ॥ पदा प्रस्कंदिताद्वीर्याज्जालतः समजायत ॥ १८ ॥ पश्चादिंद्रो ययौ शीघ्रमृषेः शापविशंकितः ॥ पलायंतं हरिं दृष्ट्वा जहसुर्बटवोऽखिलाः ॥ १९ ॥ ततस्तु व्रीडितो भूत्वा ययौ मेरोर्गुहां शुभाम् ॥ तत्र लीनश्चचाराऽसौ दुस्तरं वै तपो महत् ॥ २० ॥ मेरौ विलीय वसति देवेन्द्रे लज्जयाऽन्विते ॥ गूढैर्विज्ञाय तां वार्तां दैतेया बलिपूर्वकाः ॥ २१ ॥

पादादावप्यार्षो मामित्यस्य स्थाने मादेशः ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ गूढैः चारैः ॥ २१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बलीयसः बलीयांसः ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ इति विचार्य तत्समीपं गत्वा च पृष्ट इत्यर्थः ॥ २६ ॥ रसातले पाताले ॥ २७ ॥ विभुरिंद्रः ॥ २८ ॥ ॥ २९ ॥ ३० ॥ ३१ ॥ जहि नाशय ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ दिष्टं शुभं सुखमिति यावत्, प्राप्नोतीति शेषः ॥ ३६ ॥ ३७ ॥ ३८ ॥ बलमित्यादि

सुरानाक्रम्य बुभुजुर्बलींद्रश्चामरावतीम् ॥ दिक्पालानां विभूतीश्च शंबराद्या बलीयसः ॥ २२ ॥ बलाद्बुभुजिरे हीननाथे राष्ट्रे दिवौकसाम् ॥ रक्षितारमजानंतो देवाश्चाग्निपुरोगमाः ॥ २३ ॥ पप्रच्छुर्धिषणं देवं देवाचार्यमकल्मषम् ॥ पप्रच्छुरिंद्रवृत्तांतं क्वस्वित्तिष्ठति नः प्रभुः ॥ २४ ॥ दैत्याक्रांतमिदं राष्ट्रं हीननाथं दिवौकसाम् ॥ कुतो नाऽऽयाति देवोऽसौ भूयान्कालो गतो विभो ॥ २५ ॥ तं यामो यत्र धिषण प्रार्थयामश्च तं विभुम् ॥ इति पृष्टस्तदा देवैर्धिषणस्तानुवाच ह ॥ २६ ॥ रसातले बलिं जित्वा चोतथ्यस्याऽऽश्रमं ययौ ॥ भुक्त्वा पत्नीं च दाढर्च्येन तच्छिष्यै रेव निन्दितः ॥ २७ ॥ व्रीडितस्तु दिवं यातुं गुहां मेरोर्विवेश ह ॥ तत्रैवाऽऽस्ते शचीयुक्तः स्वकृतं चिन्तयन्विभुः ॥ २८ ॥ इति तस्य वचः श्रुत्वा देवा अग्निपुरोगमाः ॥ गुहां मेरोर्ययुः शीघ्रं द्रष्टुं प्रार्थयितुं विभुम् ॥ २९ ॥ तत्र दृष्ट्वा गुहालीनं देवेन्द्रं पाकशासनम् ॥ तुष्टुवुर्विविधैः स्तोत्रैस्तद्वीर्यैर्लोकविश्रुतैः ॥ ३० ॥ इंद्र तुभ्यं नमस्तेऽस्तु सर्वदेवाऽधिपाय ते ॥ वयं दैत्यैरर्दिताश्च त्वया हीना भृशार्दिताः ॥ ३१ ॥ स्थान भ्रष्टाश्चरामोंऽग नानादेशेषु दुःखिताः ॥ तस्मादागत्य देवेन्द्र जहि शत्रूनरिंदम ॥ ३२ ॥ इति स्तुतस्तदा देवैर्निश्चक्राम गुहामुखात् ॥ लज्जयाऽवनतो भूत्वा पश्यन्भूमिं च चक्षुषा ॥ ३३ ॥ न किंचिदपि चोवाच दुःखाद्गद्गदभाषणः ॥ तऽऽज्ञात्वा धिषणः प्राह तं सुरेन्द्रं भयानकम् ॥३४॥ मा शंका ते सुरपते कर्माधीनमिदं जगत् ॥ मानामानौ सुखं दुःखं लाभालाभौ जयाजयौ ॥३५॥ पूर्वकर्मानुरोधेन भवंत्येते न संशयः ॥ जीवः कर्मानुगो दुःखं दिष्टं दैवन कालतः ॥ ३६ ॥ प्राज्ञाः प्रायो न शोचंति न प्रहृष्यंति वै सुखात् ॥ तस्मात्प्रारब्धतः प्राप्तं दुःखं चेदं तव प्रभो ॥ ॥ ३७ ॥ तत्प्राप्य मघवन्दुःखं नैव शोचितुमर्हसि ॥ इत्युक्तो गुरुणा चाह मघवानमराधिपान् ॥ ३८ ॥ ॥ इन्द्र उवाच ॥ ॥ परस्त्रीसंगदोषेण बलं वीर्यं यशोऽमलम् ॥ मंत्रशक्तिः शास्त्रशक्तिर्विद्याशक्तिश्च मानद ॥ ३९ ॥ अभवन्नष्टवीर्यं मे तूष्णीं तेन वसाम्यहम् ॥ पाकशासनवाक्यं तु श्रुत्वा स्वाचार्यसंयुताः ॥ ४० ॥ मंत्रयामासुरेकान्ते पुनस्तस्य बलाप्तये ॥ तदा गुरुश्च तान्प्राह करुणं च विदुत्तमः ॥ ४१ ॥ ॥ बृहस्पतिरुवाच ॥ ॥ मासो वैशाखनामाऽयं प्रियो वै मधुघातिनः ॥ सर्वाश्च तिथयः पुण्या मासेऽस्मिन्माधवप्रिये ॥ ४२ ॥

षट्पदेषु प्रतिपदं नाशं जगामेति पूरणीयम् ॥ ३९ ॥ स्वाचार्यो गुरुस्तेन संयुताः ॥ ४० ॥ तस्य शक्रस्य ॥ ४१ ॥ ४२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

॥ ४३ ॥ ४४ ॥४५॥४६॥ समाहितः सहित इत्यर्थः ॥ ४७ ॥ ४८ ॥ उडुपश्चंद्रः ॥ ४९ ॥ ५० ॥ ५१ ॥ ५२ ॥ स्वाध्यायं लेभिरे इत्यन्वयः ॥ ५३ ॥
इति वैशाखमासमाहात्म्यटीकायां त्रयोविंशोऽध्यायः ॥ २३ ॥ छ ॥ अथाऽस्मिन्नध्याये वैशाखशुक्लद्वादशीमाहात्म्यं वर्णयतियावदध्यायसंपूर्ति–तिथिष्वित्यादिना ।
सितपक्षिणी शुक्लपक्षसंबंधिनी, एतासु तिथिषु पुण्यासु इत्यनेन बहुवचनेन अमा, चैकादशी, तृतीया, सप्तमी, निर्दिष्टा तत्र त्रयाणां माहात्म्यमत्र प्रतिपादितं सप्तम्या
माहात्म्यमाहपाद्मे–“प्राप्तोऽयं माधवो मासो माधवस्याऽतिवल्लभः ॥ तस्याऽपि सप्तमी शुक्ला गंगायामतिदुर्लभा ॥ वैशाखशुक्लसप्तम्यां जाह्नवी जह्नुना पुरा ॥ क्रोधात्पीता

तत्राऽपि च सिते पक्षे मासेऽस्मिन्नक्षयाह्वया ॥ या तस्यां स्नानदानादि श्रद्धया च करोति वै ॥४३॥ तस्य पापसहस्राणि नश्यंत्येव न संशयः॥ अनवद्यं तथैश्वर्यं बलं धैर्यं भवंति च ॥४४॥ तस्मात्तस्यां तृतीयायां हरिणा बलविद्विषा ॥ स्नानदानादिसद्धर्मान्कारयामो हिताऽऽप्तये ॥४५॥ भविष्यति च सा शक्तिर्विद्याया मन्त्रशास्त्रयोः ॥ बलं धैर्यं यशश्चैव यथापूर्वं भविष्यति ॥ ४६ ॥ इत्येवं तु विचार्याऽथ गुरुर्देवैः समाहितः ॥ इन्द्रेण कारयामास धर्मानेतान्हरिप्रियान् ॥ ४७ ॥ अक्षय्यायां तृतीयायां भुक्तिमुक्तिफलप्रदान् ॥ तेन पूर्ववदेवाऽऽसीद्बलं धैर्यादिकं विभोः ॥ ॥ ४८ ॥ परस्त्रीसंगदोषोऽपि सद्य एव व्यलीयत ॥ पश्चाद्धताशुभः शक्रो राहोर्मुक्त इवोडुपः ॥ ४९ ॥ देवतानां तथा मध्ये शुशुभे च हरिर्यथा ॥ पश्चाद्देवैः समायुक्तो विनिर्जित्य तथाऽसुरान् ॥ ५० ॥ तृतीयायाश्च माहात्म्याद्भाग्ययुक्तोऽमरावतीम् ॥ विवेश विभवैः सार्द्धं शंखतूर्यादिनिःस्वनैः ॥ ५१ ॥ अनुज्ञाताश्च शक्रेण स्वधामानि ययुः सुराः ॥ ततस्ते यज्ञभागांश्च लेभिरे च यथा पुरा ॥ ५२ ॥ पिंडभागांश्च पितरो यथापूर्वं प्रपेदिरे ॥ स्वाध्याये मुनयस्तुष्टा दैत्यानां च पराजयः ॥ ५३ ॥ तदाप्रभृति लोकेऽस्मिंस्तृतीया चाऽक्षयाऽऽह्वया ॥ प्रख्याता सर्वलोकेषु देवर्षिपितृतुष्टिदा ॥५४॥ तस्मात्पुण्यतमा चैषा सर्वकर्मनिकृंतनी ॥ भुक्तिमुक्तिप्रदा नृणां तृतीया चाऽक्षयाऽऽह्वया ॥ ५५ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे वैशाखमासमाहात्म्ये नारदाम्बरीषसंवादेऽक्षय्यतृतीयायाः श्रेष्ठत्वकथनंनाम त्रयोविंशोऽध्यायः ॥२३॥ ॥छ॥ ॥ श्रुतदेव उवाच ॥ ॥ तिथिष्वेतासु पुण्यासु द्वादशी सितपक्षिणी ॥ वैशाखमासे राजेंद्र सर्वाघौघविनाशिनी ॥१॥

पुनस्त्यक्ता कर्णरंध्रात्तु दक्षिणात् ॥ तस्यां समर्चयेद्देवीं गंगां गगनमेखलाम् ॥ स्नात्वा सम्यग्विधानेन स धन्यः सुकृती नरः ॥ तस्यां यस्तर्पयेद्देवान्पितॄन्मर्त्यान्यथाविधि ॥ साक्षात्पश्यति तं गंगा स्नातकं गतपातकम् ॥ न माधवसमो मासो न गंगासदृशी नदी ॥ दुर्लभः खलु योगोऽयं हरिभक्त्यैव लभ्यते ॥ दर्शनस्पर्शनस्नानकीर्तनध्यानसेवनैः॥ पुण्यादपुण्यपुरुषान्पावयंति सहस्रशः ॥” इति ॥ १ ॥

CC-0. In Public Domain. Digitization by eGangotri

॥ २ ॥ ३ ॥ अर्हते योग्याय ॥ ४ ॥ ५ ॥ ६ ॥ तीर्थान्युत्प्लाव्य तीर्थेषु स्नात्वेत्यर्थः ॥ ७ ॥ ८ ॥ वैशाखे तुलसीपत्रपुष्पैः मधुसूदनं पूजयेत्, पत्रपुष्पाभावे गोधूमशालिधान्यादिभिर्वा पूजयेत् । तथा अश्वत्थवृक्षस्याऽपि वैशाखे पूजनं कार्यमिति शेषः । अत्र विशेषः पाद्मे—"माधवं सकलं मासं तुलस्या योऽर्चयेद्धरिम् ॥ त्रिसन्ध्यं मधुहंतारं नास्ति तस्य पुनर्भवः ॥ अलाभे पत्रपुष्पाणामन्नाद्येनाऽपि पूजयेत् ॥ शालिगोधूमतंदूलयवैर्वाऽपि हरिं सदा ॥ योऽश्वत्थमर्चयेद्देवमुदकेन समंततः ॥

किं दानैः किं तपोभिश्च किमुपोष्यैर्व्रतैश्च किम् ॥ किमिष्टैश्चैव पूर्तैश्च द्वादशी यैर्न सेविता ॥ २ ॥ गंगायामुपरागे तु यो दद्याद्गोसहस्रकम् ॥ तत्फलं समवाप्नोति प्रातः स्नात्वा हरेर्दिने ॥ ३ ॥ यद्दत्तं चाऽर्हते चाऽन्नं द्वादश्यां च सिते शुभे ॥ सिक्थे सिक्थे भवेत्तस्य कोटिब्राह्मणभोजनम्॥ ॥ ४ ॥ यो दद्यात्तिलपात्रं तु द्वादश्यां मधुसंयुतम् ॥ निर्धूताऽखिलबंधस्तु विष्णुलोके महीयते ॥ ५ ॥ एकादश्यां सिते पक्षे कुर्य्याज्जागरणं हरेः ॥ स जीवन्नेव मुक्तः स्यात्तुष्टाः स्युः सर्वदेवताः ॥ ६ ॥ कोटींदुसूर्यग्रहणे तीर्थान्युत्प्लाव्य यत्फलम् ॥ तत्फलं समवाप्नोति प्रातः स्नात्वा हरेर्दिने ॥ ७ ॥ तुलस्याः कोमलैः पत्रैर्द्वादश्यां विष्णुमर्चयेत् ॥ समस्तकुलमुद्धृत्य विष्णुलोकाऽधिपो भवेत् ॥ ८ ॥ (क्षेपकः—तुलसीपत्रपुष्पैश्च वैशाखेऽश्वत्थपूजनम् ॥ पुष्पाद्यभावे धान्यैर्वा पूजयेन्मधुसूदनम् ॥ १ ॥) यमं पितन्गुरून्देवान्विष्णुमुद्दिश्य मानवः ॥ माधवे शुक्लद्वादश्यां सोदकुंभं सदक्षिणम् ॥ ९ ॥ दध्यन्नं चैव यो दद्यात्तस्य पुण्यफलं शृणु ॥ प्रयागे प्रत्यहं चैव कुर्याद्यः कोटिभोजनम् ॥ १० ॥ यावत्संवत्सरं पुण्यं षड्रसान्नैर्मनोरमैः ॥ तत्फलं समवाप्नोति मधुशासनशासनात् ॥ ११ ॥ शालिग्रामशिलादानं यः कुर्याद्द्वादशीदिने ॥ वैशाखे शुक्लपक्षे तु सर्वपापैः प्रमुच्यते ॥ १२ ॥ द्वादश्यां पयसा यस्तु स्नापयेन्मधुसूदनम् ॥ राजसूयाऽश्वमेधाभ्यां यत्फलं परिजायते ॥ १३ ॥ त्रयोदश्यां यजेद्विष्णुं पयोदधिविमिश्रितैः ॥ शर्करामधुभिर्द्रव्यैर्मधुसूदनप्रीतये ॥ १४ ॥ तत्फलं समवाप्नोति गंगायां नाऽत्र संशयः ॥ पंचामृतैश्च यो विष्णुं भक्त्या संस्नापयेद्विभुम् ॥ ॥ १५ ॥ स सर्वकुलमुद्धृत्य विष्णुलोके महीयते ॥ यो दद्यात्पानकं ह्यस्यां सायाह्ने प्रीतये हरेः ॥ १६ ॥

कुलानामयुतं तेन तारितं स्यान्न संशयः ॥ अश्वत्थतर्पणात्तात सर्वदुःखं विनश्यति ॥ तर्पिताः पितरस्तेन तेन विष्णुः समर्चितः ॥ कृत्वा ह्यष्टांगयोगं तु स्नात्वा पिप्पलतर्पणम् ॥ कृत्वा गोविंदमभ्यर्च्य न स दुर्गतिमाप्नुयात् ॥ इति " ॥ (१) ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ राजसूयाश्वमेधाभ्यां यत्फलं जायते तदस्मादपि जायत इति भावः ॥ १३ ॥ यजेत् पूजयेत् ॥ १४ ॥ १५ ॥ १६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

उर्वारुकं फूट इति प्रसिद्धं तत्पानकम् ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ अत्रेतिहासं कथयति–पुरेत्यादिना ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥२६॥
प्रत्ययः प्रत्यक्षज्ञानम् अनुभव इत्यर्थः । अवमानिनाम् अवमानिनीनाम् ॥ २७ ॥ २८ ॥ २९ ॥ तस्याः योगिन्याः ॥ ३० ॥ अयातयामिकां नवीनाम् ॥ ३१ ॥

जीर्णपापं जहात्याशु जीर्णां त्वचमिवोरगः ॥ सायाह्ने चैव यो दद्यादुर्वारुकरसायनम् ॥१७॥ भवेन्मुक्तः कर्मबंधादुर्वारुकरसायनात् ॥ इक्षुदण्डं चूतफलं दद्याद्द्राक्षाफलानि च ॥१८॥ न विच्छित्तिः संततेः स्यात्तस्य वै शतपूरुषम् ॥ यो दद्याद्गंधलेपं तु सायाह्ने द्वादशीदिने ॥१९॥ बाह्यो पघातैः सकलैर्मुच्यते नाऽत्र संशयः ॥ यत्किंचित्कुरुते पुण्यं द्वादश्यां राजसत्तम॥२०॥माधवे तु सिते पक्षे तदक्षय्यफलं भवेत् ॥ प्रख्यातिमस्या वक्ष्यामि येन जातेति भूमिप ॥ २१ ॥ सर्वेषां सर्वपापघ्नीं सर्वमंगलदायिनीम् ॥ पुरा काश्मीरदेशे तु द्विजो देवव्रताऽऽह्वयः ॥ २२ ॥ तस्याऽऽसीन्मालिनीनाम तनया चारुरूपिणी ॥ ददौ तां सत्यशीलाय विप्रवर्याय धीमते ॥२३॥ तामुद्वाह्य ययौ धीमान्स्वदेशं यवनाऽऽह्वयम् ॥ रूप यौवनसंपन्ना तस्य नैव प्रियाऽभवत् ॥ २४ ॥ सदा विद्वेषसंयुक्तस्तस्यां तिष्ठति निष्ठुरः ॥ नाऽन्यस्य कस्यचिद्द्वेष्टि तां विना नृपते पतिः ॥ २५ ॥ तस्मिन्सा क्रोधसंयुक्ता वशीकरणलंपटा ॥ अपृच्छत्प्रमदा राजन्यास्त्यक्ताः पतिभिः पुरा ॥२६॥ ताभिरुक्ता तु सा भूप वश्यो भर्त्ता भविष्यति॥ अस्माकं प्रत्ययो जातो भर्तृत्यागावमानिनाम् ॥२७॥ प्रयुज्य भेषजं वश्यं नीता हि पतयः पुरा ॥ योगिनीं त्वं तु गच्छाऽद्य दास्यते भेषजं शुभम् ॥ ॥२८॥ न विकल्पस्त्वया कार्यो भविता दासवत्पतिः ॥ योगिनीमंदिरे गत्वा तासां वाक्येन भूपते ॥ २९ ॥ प्रसादमतुलं तस्या लेभे दुश्चारिणी सती ॥ शतस्तंभसमायुक्तां कुटीं भेजे त्वरान्विता ॥३०॥ सुविस्तृतां सुवर्चस्कां तथैवाऽयातयामिकाम् ॥ प्रावृता दीर्घवस्त्रेण सन्निधिं तेन योगिनी ॥ ३१ ॥ दीर्घाभिश्च सटाभिस्तु प्रावृता दीप्तिसंयुता ॥ परिचारसमोपेता वीक्षमाणा शनैःशनैः ॥ ३२ ॥ अक्षसूत्रकरा सा तु जपंती प्रार्थिता तया ॥ ददौ वश्यकरं मंत्रं क्षोभकं प्रत्ययात्मकम् ॥ ३३ ॥ ततः सा प्रणता भूत्वा दद्याद्द्रव्यांऽगुलीयकम् ॥ वज्रमाणिक्यसंयुक्तमतिरक्तप्रभान्वितम् ॥३४॥ मृदुकांचनसंयुक्तं भानुरश्मिसमद्युति ॥ ततो दृष्ट्वा तु संतुष्टा पादस्थं चांगुलीयकम् ॥३५॥ हृदयं च तया ज्ञातं तत्पतेरवमानजम् ॥ तदोक्ता हि तया भूप तापस्याहितयुक्तया ॥ ३६ ॥ चूर्णो रक्षान्वितो ह्येष सर्वभूतवशंकरः ॥ चूर्णं भर्तारि संयुज्य रक्षां ग्रीवाश्रयां कुरु ॥ ३७ ॥ भविष्यति पतिर्वश्यो नाऽन्यां यास्यति सुन्दरीम् ॥ नाऽप्रियं वदति क्वाऽपि दुश्चारिण्यास्तवाऽपि च ॥ ३८ ॥

॥ ३२ ॥ ३३ ॥ द्रव्यांगुलीयकं मूल्यवदंगुलीयकम् ॥ ३४ ॥ ३५ ॥ अहितयुक्तया वैरयुक्तया ॥ ३६ ॥ ३७ ॥ ३८ ॥

CC-0. In Public Domain. Digitization by eGangotri

॥ ३९ ॥ ४० ॥ ४१ ॥ ४२ ॥ ४३ ॥ ४४ ॥ अलंकारकृते अलंकारधारणार्थं पत्युर्जीवनेच्छुः पतिजीवनमिच्छति वस्तुतः न वै हिता नैव पत्युर्हितकारिणी

चूर्णरक्षां गृहीत्वा सा प्राप भर्तृगृहं पुनः ॥ प्रदोषे पयसा युक्तश्चूर्णो भर्तरि योजितः ॥ ३९ ॥ ग्रीवायां हि कृता रक्षा न विचारः कृतस्तया ॥ तदा स पीतचूर्णस्तु भर्त्ता नृपवरोत्तम ॥ ४० ॥ तच्चूर्णात्क्षयरोगोऽभूत्पतिः क्षीणो दिनेदिने ॥ गुह्ये तु कृमयो जाता घोरा दुष्टव्रणोद्भवाः ॥ ४१ ॥ दिनैः कतिपयै राजन्पत्युर्नैव व्यवस्थितिः ॥ उवास स्वेच्छया साऽपि पुंश्चली दुष्टचारिणी ॥ ४२ ॥ हततेजास्ततो भर्ता तामुवाचाऽऽकुलेन्द्रियः ॥ क्रन्दमानो दिवारात्रौ दासोऽस्मि तव शोभने ॥ ४३ ॥ त्राहि मां शरणं प्राप्तं नेच्छेऽहमपरां स्त्रियम् ॥ तत्तस्य विदितं ज्ञात्वा भीता सा मेदिनीपते ॥ ४४ ॥ अलंकारकृते पत्युर्जीवनेच्छुर्न वै हिता ॥ योगिनीं च ययौ शीघ्रं तस्यै सर्वं न्यवेदयत् ॥ ४५ ॥ तया च भेषजं दत्तं द्वितीयं दाहशांतये ॥ दत्ते च भेषजे तस्मिन्स्वस्थोऽभूत्तत्क्षणात्पतिः ॥ ४६ ॥ तिष्ठत्युपपतिर्गेहे गृहकृत्याऽपदेशतः ॥ सर्ववर्णसमुद्भूता जारास्तिष्ठंति वै गृहे ॥ ४७ ॥ न किंचिद्वचने शक्तिर्भर्तुर्जाता कथंचन ॥ ततस्तेनैव दोषेण सर्वांगेषु च जज्ञिरे ॥ ४८ ॥ कृमयश्चास्थिभेत्तारः कालांतकयमोपमाः ॥ तैर्नासाजिह्वयोश्चाऽऽसीच्छेदः कर्णद्वयस्य च ॥४९॥ स्तनयोश्चांगुलीनां च पंगुत्वं चाऽपि चाऽऽगतम् ॥ तेन पंचत्वमापन्ना गता नरकयातनाः ॥ ५० ॥ ताम्रभांडे च सा दग्धाऽयुतानि दश पंच च ॥ श्वानयोनिषु संजाता शतवारं पुनःपुनः ॥ ५१ ॥ छिन्ननासा छिन्नकर्णा कृमिमूर्द्धा निरंतरम् ॥ छिन्नपुच्छा भग्नपादा ताडिता च गृहेगृहे ॥ ५२ ॥ पश्चात्सौवीरदेशेषु पद्मबन्धोर्द्विजस्य च ॥ दास्या गृहे शुनी जाता बहुदुःखसमाकुला ॥ ५३ ॥ छिन्नकर्णा छिन्ननासा छिन्नपुच्छांघ्रिरातुरा ॥ कृमिपूर्णशिरा नित्यं कृमियोनिश्च तिष्ठति ॥ ५४ ॥ एवं त्रिंशद्गता वर्षा अस्मिन्जन्मनि भूमिप ॥ दैवात्कर्मविपाकेन वैशाखे मेषगे रवौ ॥ ५५ ॥ शुक्लपक्षे तु द्वादश्यां पद्मबंधोस्तनूद्भवः ॥ नद्यां स्नात्वा शुचिर्भूत्वा सार्द्रवस्त्रो गृहं ययौ ॥ ५६ ॥ तुलसीवेदिकां प्राप्य पादाववनिजे निजौ ॥ वेदिकायामधो देशे सा शुनी स्वापमागता ॥ ५७ ॥ प्राक्सूर्योदयवेलायां पादोदकपरिप्लुता ॥ सद्यो ध्वस्ताऽशुभा जाता जातिस्मृतिरभूत्क्षणात् ॥ ५८ ॥

॥ ४५ ॥ ४६ ॥ उपपतिर्जारः ॥ ४७ ॥ ४८ ॥ ४९ ॥ स्तनयोः अंगुलीनां च छेद इति पूर्वेणाऽन्वयः ॥ ५० ॥ ५१ ॥ ५२ ॥ ५३ ॥ ५४ ॥
॥ ५५ ॥ ५६ ॥ ५७ ॥ ५८ ॥

Nepal Sanskrit University, Balmeeki Campus

CC-0. In Public Domain. Digitization by eGangotri

॥ ५९ ॥ ६० ॥ ताम्रभाजने एतत्संज्ञके नरके ॥ ६१ ॥ ६२ ॥ ६३ ॥ ६४ ॥ ६५ ॥ ६६ ॥ ६७ ॥ ६८ ॥ ६९ ॥ ७० ॥ ७१ ॥ वैवस्वतो यमः तस्य

स्मृत्वा कर्म कृतं पूर्वं सा शुनी तापसं सदा ॥ चुक्रोश करुणा दीना मुने त्राहीति वै पुनः॥५९॥स्वकर्म च मुनींद्राय स्मृत्वाचख्यौ भयाऽऽकुला ॥ भर्तुर्विषप्रयोगं तु स्वस्य दुश्चरितं तथा ॥६०॥याऽन्यापि युवती ब्रह्मन्भर्तुर्वश्यं समाचरेत् ॥ वृथाधर्मा दुराचारा पच्यते ताम्रभाजने ॥६१॥ भर्ता नाथो गुरुर्भर्ता भर्ता दैवतमुत्तमम् ॥ विक्रियां कृत्य साध्वी सा कथं सुखमवाप्नुयात् ॥६२॥ तिर्यग्योनिशतं याति कृमिकोटिशतानि च ॥ तस्माद्भूसुर कर्तव्यं स्त्रीभिर्भर्तुर्वचः सदा ॥ ६३ ॥ साऽहं पश्ये पुनर्योनिं कुत्सितां यातनान्विताम् ॥ यदि नोद्धरसे ब्रह्मन्नद्य त्वद्दृष्टिसंमुखाम् ॥६४॥ तस्मादुद्धर मां ब्रह्मन्दुष्कृतां पापचारिणीम् ॥ सुकृतस्य प्रदानेन वैशाखे शुक्लपक्षके ॥ ६५ ॥ या कृता तु त्वया ब्रह्मन्द्वादशी पुण्यवर्द्धिनी ॥ तस्यां त्वया कृतं पुण्यं स्नानदानान्नभोजनैः ॥ ६६ ॥ दुश्चारिण्या अपि ब्रह्मंस्तेन मुक्तिर्भविष्यति ॥ यस्यां तु भूसुरः स्नातः स्वगृहे मनुजः किल ॥ ६७ ॥ सर्वतीर्थफलावाप्तिं लभते नाऽत्र संशयः ॥ तप्तं दत्तं हुतं यत्र कृतं देवार्चनादि यत् ॥६८॥ तदक्षय्यफलं ज्ञेयं यत्कृतं द्वादशीदिने ॥ एवंविधफलं यत्स्यात्तद्देहि सकलं मम ॥ ६९ ॥ द्वादश्यामुपवासेन त्रयोदश्यां तु पारणात् ॥ यत्फलं स्यात्तदप्यद्धा तेन मुक्तिर्भविष्यति॥ ॥ ७० ॥ दयां कुरु महाभाग दीनायां दीनवत्सल ॥ दीननाथो जगन्नाथो युष्मन्नाथो जनार्दनः ॥ ७१ ॥ तदीयास्तादृशा एव यथा राजा तथा प्रजाः ॥ वैवस्वतपदध्वंसिन्परित्राहि सुदुःखिताम् ॥ ७२ ॥ त्वद्द्वारवासिनीं दीनां शुनीं मां दीनवत्सल ॥ ब्रह्महत्यासहस्रं वा गोहत्यानां सहस्रकम् ॥ ७३ ॥ अगम्यानां च कोटीश्च दहत्येव शुभा तिथिः ॥ तस्यां कृतं महापुण्यं मह्यं दत्त्वा महामुने ॥ ७४ ॥ मामुद्धर समुद्विग्नां दीनां नाथ समुद्धर ॥ अन्ते तुभ्यं द्विजेंद्राय नमउक्तिं वदाम्यहम् ॥ ७५ ॥ इति तस्या वचः श्रुत्वा शुनीमाह मुनेः सुतः ॥ स्वकृतं जंतवोऽश्नंति सुखदुःखात्मकं शुनि ॥ ७६ ॥ तस्मात्किमु त्वया कार्यं क्षुद्रया पापशीलया ॥ यया भर्ता वशं नीतो रक्षाचूर्णादिभिर्द्विजः ॥ ७७ ॥ साधुभ्यो यत्कृतं पापं स्वस्य दुःखकरं भवेत् ॥ साधुभ्यो यत्कृतं पुण्यं स्वस्य दुःखहरं भवेत् ॥ ७८ ॥ उभयं भ्रंशतामेति पापेभ्यो यत्कृतं भवेत् ॥ शर्करामिश्रितं क्षीरं काद्रवेयनिवेदितम् ॥ ७९ ॥

यत्पदं स्थानं यमलोकस्थनरका इति यावत्, तेषां ध्वंसिन्नाशक ॥ ७२ ॥ ७३ ॥ ७४ ॥ ७५ ॥ ७६ ॥ ७७ ॥ ७८ ॥ ७९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विषवृद्धिकरं दृष्टमेवं पापकरं भवेत् ॥ वदत्येवं मुनिसुते शुनी दुःखैकरूपिणी ॥ ८० ॥ पुनश्चुक्रोशोर्ध्वस्वरं तत्पित्रे बहुभाषिणी ॥ पद्मबन्धो परित्राहि शुनीं त्वद्वारवासिनीम् ॥ ८१ ॥ त्वदुच्छिष्टाशिनीं नित्यं त्वं पाहीति पुनःपुनः ॥ स्वपोष्या ये हि वर्तंते गृहस्थस्य महात्मनः ॥ ॥ ८२ ॥ तेषामुद्धरणं कार्यमिति वेदविदां मतम् ॥ चण्डाला वायसाश्चैव सारमेयाश्च नित्यशः ॥ ८३ ॥ गृहस्थानां दयापात्रं प्रत्यहंबलि भोजिनः ॥ अशक्तं नोद्धरेत्पोष्यं रोगाद्युपहतं यदि ॥ ८४ ॥ सोऽधः पतेन्न संदेह इति वेदविदां मतम् ॥८५॥ कर्तारमेकं जगतां हि कर्ता कृत्वा त्मना पाति समस्तजंतून् ॥ दारादिरूपव्यपदेशतो हरिस्तस्मात्तदाज्ञा खलु पोष्यरक्षा ॥ ८६ ॥ स्वपोष्यरक्षां परिहृत्य जंतुर्दैवेन कृत्स्या यदि वर्ततेऽन्यधीः ॥ स देवद्रोग्धा सकलस्य हंता कीनाशलोकाननु संप्रयाति ॥ ८७ ॥ कर्तव्यत्वाद्दयालुत्वादेतामुद्धर दुर्मतिम् ॥ इति तस्या वचः श्रुत्वा दुःखार्तायां गृहे सुतः ॥ निश्चक्राम गृहात्तूर्णं पद्मबंधुर्दयानिधिः ॥ ८८ ॥ किमेतदिति तां प्राह पुत्रः सर्वं न्यवेदयत् ॥ स तु पुत्रवचः श्रुत्वा तमेवं प्राह विस्मितः ॥ ८९ ॥ ॥ पद्मबन्धुरुवाच ॥ ॥ ममात्मज कथं वाक्यमीदृशं व्याहृतं त्वया ॥ न साधूनामिदं वाक्यं भवतीह वरानन ॥ ९० ॥ आत्मसौख्यकराः पापा भवंति परिभाविताः ॥ पश्य पुत्र जनाः सर्वे परोपकरणाय वै ॥ ९१ ॥ शशी सूर्योऽथ पवनो रजनी हुतभुग्जलम् ॥ चंदनं पादपाः संतः परोपकरणे स्थिताः ॥ ९२ ॥ अस्थिदानं कृतं पुत्र कृपया हि दधीचिना ॥ देवा नामुपकाराय ज्ञात्वा दैत्यान्महाबलान् ॥ ९३ ॥ कपोतार्थे स्वमांसानि शिबिना भूभुजा पुरा ॥ प्रदत्तानि महाभाग श्येनाय क्षुधितानि वै ॥ ९४ ॥ जीमूतवाहनो राजा पुराऽऽसीत्क्षितिमंडले ॥ तेनाऽपि जीवितं दत्तं गरुडाय महात्मने ॥ ९५ ॥ तस्माद्दयालुना भाव्यं भूसुरेण विपश्चिता ॥ शुद्धे वर्षति देवस्तु किमशुद्धे न वर्षति ॥ ९६ ॥ किन्न दीपयते चन्द्रश्चंडालानां गृहे सदा ॥ तस्मादहं शुनीमेतां याचतीं च पुनः पुनः ॥ ९७ ॥ उद्धरिष्ये निजैः पुण्यैः पंकमग्नां च गां यथा ॥ इति पुत्रं निराकृत्य प्रतिजज्ञे महामतिः ॥ ९८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दत्तं दत्तं महापुण्यं द्वादशीदिनसंभवम् ॥ शुनि गच्छ हरेर्धाम निर्धूताऽखिलकल्मषा ॥ ९९ ॥ तद्वाक्यात्सहसा भूप दिव्याऽऽभरणभूषिता ॥ विमुच्य देहं जीर्णं तु दिव्यरूपधरा शुभा ॥ १०० ॥ शताऽऽदित्यप्रभा जाता सावित्रीप्रतिमा यथा ॥ जगामाऽऽमंत्र्य तं विप्रं द्योतयन्ती दिशो दश ॥१॥ भुक्त्वा दिवि महाभोगान्पश्चाज्जाता महीतले ॥ नरनारायणाद्देवादुर्वशीनाम नामतः ॥ २ ॥ वैशाखशुक्लद्वादश्याः प्रभावेण वरांगना ॥ देवानां च प्रिया जाता अप्सरस्त्वं च सा ययौ ॥ ३ ॥ यद्योगिगम्यं हुतभुक्प्रकाशं वरं वरेण्यं परमार्थरूपम् ॥ यत्प्राप्य सन्तोऽपि हि यांति मोहं तत्प्राप रूपं च शुनी हि देवी ॥४॥ पश्चात्स पद्मबंधुर्हि तां तिथिं पुण्यवर्द्धिनीम् ॥ लोकेऽटीं ख्यापयामास मधुद्विट्प्राणवल्लभाम् ॥५॥ कोटींदुसूर्यग्रहणाधिका सा समस्तरूपाधिकपुण्यरूपा ॥ यज्ञैः समस्तैरतिरिच्यमाना द्विजेन ख्याता भुवनत्रये च ॥ १०६ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे वैशाखमासमाहात्म्ये नारदाम्बरीषसंवादे शुनीमोक्षप्राप्तिर्नाम चतुर्विंशोऽध्यायः ॥ २४ ॥ ॥छ॥ ॥ श्रुतदेव उवाच ॥ ॥ यास्तिस्रस्तिथयः पुण्या अंतिमाः शुक्लपक्षके ॥ वैशाखमासि राजेंद्र पूर्णिमांताः शुभावहाः ॥ १ ॥ अन्त्याः पुष्करिणीसंज्ञाः सर्वपापक्षयावहाः ॥ माधवे मासि यः पूर्णं स्नानं कर्तुं न च क्षमः ॥ २ ॥ तिथिष्वेतासु स स्नायात्पूर्णमेव फलं लभेत् ॥ सर्वे देवास्त्रयोदश्यां स्थित्वा जंतून्पुनंति हि ॥ ३ ॥ पूर्णायाः पर्वतीर्थैश्च विष्णुना सह संस्थिताः ॥ चतुर्दश्यां सयज्ञाश्च देवा एतान्पुनंति हि ॥ ४ ॥ ब्रह्मघ्नं वा सुरापं वा सर्वानेतान्पुनंति हि ॥ एकादश्यां पुरा जज्ञे वैशाख्याममृतं शुभम् ॥ ५ ॥ द्वादश्यां पालितं तच्च विष्णुना प्रभविष्णुना ॥ त्रयोदश्यां सुधां देवान्पाययामास वै हरिः ॥ ६ ॥ जघान च चतुर्दश्यां दैत्यान्देवविरोधिनः ॥ पूर्णायां सर्वदेवानां साम्राज्याऽऽप्तिर्बभूव ह ॥ ७ ॥ ततो देवाः सुसंतुष्टा एतासां च वरं ददुः ॥ तिसृणां च तिथीनां वै प्रीत्योत्फुल्लविलोचनाः ॥ ८ ॥ एता वैशाखमासस्य तिस्रश्च तिथयः शुभाः ॥ पुत्रपौत्रादिफलदा नराणां पापहानिदाः ॥ ९ ॥ योऽस्मिन्मासे च संपूर्णे न स्नातो मनुजाधमः ॥ तिथित्रये तु स स्नात्वा पूर्णमेव फलं लभेत् ॥ १० ॥ तिथित्रयेऽप्यकुर्वाणः स्नानदानादिकं नरः ॥ चांडालीं योनिमासाद्य पश्चाद्रौरवमश्नुते ॥ ११ ॥ ॥२६९॥

त्रयोदश्यादितिथित्रयस्य महिमानं वर्णयति—या इत्यादिना ॥ १ ॥ २ ॥ ३ ॥ यज्ञेन विष्णुना सहिताः सयज्ञाः ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८॥९॥ १० ॥ ११ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ १२ ॥१३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ स्वधामानि स्वस्थानानि ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ पूर्णायां पूर्णिमायाम् ॥ २२ ॥ २३ ॥ २४ ॥

उष्णोदकेन यः स्नाति माधवे च तिथित्रये ॥ रौरवं नरकं याति यावदिंद्राश्चतुर्दश ॥१२॥ पितॄन्देवान्समुद्दिश्य दध्यन्नं न ददाति यः ॥ पैशाचीं योनिमासाद्य तिष्ठत्याभूतसंप्लवम् ॥ १३ ॥ प्रवृत्तानां च कामानां माधवे नियमे कृते ॥ अवश्यं विष्णुसायुज्यं युज्यते नाऽत्र संशयः ॥ १४ ॥ आमासं नियमासक्तः कुर्याद्यदि दिनत्रये ॥ तेन पूर्णफलं प्राप्य मोदते विष्णुमंदिरे ॥ १५ ॥ यो वै देवान्पितॄन्विष्णुं गुरुमुद्दिश्य मानवः ॥ न स्नानादि करोत्यद्धाऽमुष्य शापप्रदा वयम् ॥ १६ ॥ निःसंतानो निरायुश्च निःश्रेयस्को भवेदिति ॥ इति देवा वरं दत्त्वा स्वधामानि ययुः पुरा ॥ १७ ॥ तस्मात्तिथित्रयं पुण्यं सर्वाघौघविनाशनम् ॥ अंत्यं पुष्करिणीसंज्ञं पुत्रपौत्रविवर्द्धनम् ॥ १८ ॥ या नारी सुभगाऽऽपूपपायसं पूर्णिमादिने ॥ ब्राह्मणाय सकृद्दद्यात्कीर्तिमंतं सुतं लभेत् ॥ १९ ॥ गीतापाठं तु यः कुर्यादंतिमे च दिनत्रये ॥ दिनेदिनेऽश्वमेधानां फलमेति न संशयः ॥ २० ॥ सहस्रनामपठनं यः कुर्य्याच्च दिनत्रये ॥ तस्य पुण्यफलं वक्तुं कः शक्तो दिवि वा भुवि ॥ २१ ॥ सहस्रनामभिर्देवं पूर्णायां मधुसूदनम् ॥ पयसा स्नाप्य वै याति विष्णुलोकमकल्मषम् ॥ २२ ॥ समस्तविभवैर्यस्तु पूजयेन्मधुसूदनम् ॥ न तस्य लोकाः क्षीयन्ते युगकल्पादिव्यत्यये ॥ २३ ॥ अस्नात्वा चाप्यदत्त्वा च वैशाखश्च गतो यदि ॥ स ब्रह्महा गुरुघ्नश्च पितॄणां घातकस्तथा॥ २४ ॥ श्लोकार्द्धं श्लोकपादं वा नित्यं भागवतोद्भवम् ॥ वैशाखे च पठन्मर्त्यो ब्रह्मत्वं चोपपद्यते ॥ २५ ॥ यो वै भागवतं शास्त्रं शृणोत्येतद्दिनत्रये ॥ न पापैर्लिप्यते क्वाऽपि पद्मपत्रमिवांभसा ॥ २६ ॥ देवत्वं मनुजैः प्राप्तं कैश्चित्सिद्धत्वमेव च ॥ कैश्चित्प्राप्तो ब्रह्मभावो दिनत्रयनिषेवणात् ॥२७॥ ब्रह्मज्ञानेन वै मुक्तिः प्रयागमरणेन वा ॥ अथवा मासि वैशाखे नियमेन जलाप्लुतेः ॥ २८ ॥ नीलं वृषं समुत्सृज्य वैशाख्यां च जलाप्लुतेः ॥ समस्तबंधनिर्मुक्तः पुमान्याति परं पदम् ॥ २९ ॥ गां सवत्सां द्विजेंद्राय सीदते च कुटुम्बिने ॥ इहापमृत्युनिर्मुक्तः परत्र च परं व्रजेत् ॥ ३० ॥ स्नानदानविहीनस्तु वैशाखीं चैव यो नयेत् ॥ श्वानयोनिशतं प्राप्य विष्ठायां जायते कृमिः ॥ ३१ ॥ तिस्रः कोट्योऽर्धकोटिश्च तीर्थानि भुवनत्रये ॥ संभूय मंत्रयांचक्रुः पापसंघातशंकिताः ॥ ३२ ॥ जना अस्मासु पापिष्ठा विसृजन्ति स्वकं मलम् ॥ तदस्माकं कथं गच्छेदिति चिंतासमन्विताः ॥३३॥

ब्रह्मत्वं ब्राह्मण्यम्, उपपद्यते प्राप्नोति, जन्मांतरेऽपि ब्राह्मणो भवतीत्यर्थः ॥ २५॥२६॥ ब्रह्मभावो मुक्तिः ॥२७॥२८॥२९॥पदमिति शेषः॥३०॥३१॥३२॥३३॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ वैशाखान्ते इत्यत्र पूर्णिमांतमासो ग्राह्यः तस्यैव स्नानादौ विहितत्वात् ॥३८॥३९॥ ४० ॥ ४१ ॥ योगायोगशक्त्या ॥ ४२ ॥

तीर्थपादं हरिं जग्मुः शरण्यं शरणं विभुम् ॥ स्तुत्वा च बहुभिः स्तोत्रैः प्रार्थयामासुरंजसा ॥ ३४ ॥ देवदेव जगन्नाथ सर्वाघौघविनाशन ॥ जना अस्मासु पापिष्ठाः स्नात्वा पापानि सर्वशः ॥ ३५ ॥ विसृज्य त्वत्पदं यांति त्वदाज्ञाधारिणो भुवि ॥ अस्माकं चैव तत्पापं कथं गच्छे ज्जनार्दन ॥ ३६ ॥ तदुपायं वदास्माकं त्वत्पादशरणैषिणाम् ॥ इति तीर्थैः प्रार्थितस्तु भगवान्भूतभावनः ॥ ३७ ॥ प्रहसन्प्राह तीर्थानि मेघगम्भीरया गिरा ॥ ॥ श्रीभगवानुवाच ॥ ॥ सिते पक्षे मेषसूर्ये वैशाखान्ते दिनत्रये ॥ ३८ ॥ सर्वतीर्थमये पुण्ये ममाऽपि प्राणवल्लभे ॥ यूयं भगोदयात्पूर्वं बहिःसंस्थजलाप्लुताः ॥ ३९ ॥ विमुक्ताघाः पुण्यरूपा भवंत्वाशु सुनिर्मलाः ॥ भवद्भिश्च विमुक्ताघैर्ये न स्नाता दिनत्रये ॥ ४० ॥ तेषु तिष्ठंतु तत्पापं जनैर्युष्मद्विरेचितम् ॥ इति तीर्थपदो विष्णुस्तीर्थानां च वरं ददौ ॥ ४१ ॥ अनुज्ञाप्य च तान्योगात्तत्रैवांतरधीयत ॥ स्वधामानि पुनः प्राप्य तानि तीर्थानि नित्यशः ॥ ४२ ॥ प्रतिवर्षं तु वैशाखे तथैवांत्यदिनत्रये ॥ तेनाघौघं विमुच्यैव यांति निर्मलतां महो ॥ ४३ ॥ ये तु स्नानं न कुर्वंति वैशाखांतदिनत्रये ॥ ते भवन्तु समस्तानां जनानां पातकाऽऽश्रयाः ॥ ४४ ॥ इति शापं च तीर्थानि ह्यस्नातानां वदन्ति च ॥ न तेन सदृशः पापो यो न स्नातो दिनत्रये ॥ ४५ ॥ विचारितेषु शास्त्रेषु न दृष्टो न च वै श्रुतः ॥ तस्माद्दिनत्रये कार्यं स्नानदानार्चनादिकम् ॥ ४६ ॥ अन्यथा नरकं याति यावदिंद्राश्चतुर्दश ॥ इत्येतत्सर्वमाख्यातं श्रुतकीर्ते महामते ॥ ४७ ॥ पृष्टं वैशाखमाहात्म्यं यथा दृष्टं यथाश्रुतम् ॥ माहात्म्यस्य च लेखोऽयं माधवस्य च वर्णितः ॥ ४८ ॥ कात्स्न्यद्वक्तुं च ब्रह्माऽपि नालं वर्षशतैरपि ॥ पुरा कैलासशिखरे पार्वत्यै शंकरः स्वयम् ॥४९॥ आह माधवमाहात्म्यं पृच्छंत्यै शतवत्सरम् ॥ तथापि नांतमगमदशक्तो विरराम ह ॥५०॥ को नु वर्णयितुं शक्तः कात्स्न्यन्माहात्म्यमुत्तमम् ॥ विना विष्णुं जगन्नाथं नारायणमनामयम् ॥ ५१ ॥ पुरा सर्वेऽपि ऋषयो माहात्म्यं पापनाशनम् ॥ लेशस्य लेशं व्याचख्युर्जनानां हितकाम्यया ॥ ५२ ॥ नांतः केनापि व्याख्यातो ह्यशक्तत्वान्महीपते ॥ त्वं च मासे तु वैशाखे कुरु दानादिसत्क्रियाः ॥५३॥ तेन भुक्तिं च मुक्तिं च संप्राप्नोषि न संशयः ॥ इति तं बोधयित्वा च मैथिलं जनकाह्वयम् ॥ ५४ ॥ श्रुतदेवस्तमामंत्र्य गन्तुं चक्रे मनस्ततः ॥ जाताह्लादः स राजर्षिर्गलद्बाष्पाकुलेक्षणः ॥ ५५ ॥

॥ ४३ ॥ ४४ ॥ ४५ ॥ ४६ ॥ ४७ ॥ लेखः पुस्तकम् ॥ ४८ ॥ ४९ ॥ अशक्तो माहात्म्यं वर्णयितुमित्यर्थः ॥ ५० ॥ ५१ ॥५२॥ ५३॥५४॥ ५५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥५६॥५७॥५८॥५९॥ अथ वैशाखांऽतिमदिनत्रयस्य विशेषमाहात्म्यं कथयति–द्वाभ्याम् । यः माधवे वैशाखमासे, त्रयोदशीचतुर्दशीपूर्णिमासु तिथिषु स्नानादिकं करोति स निश्चयेन मोक्षं प्राप्नुयात् । यथा पुरा धनशर्मा ब्राह्मणः त्रयः प्रेताश्च मुक्तिं प्रापुरिति–अत्र प्रसिद्धा कथा, सप्तदशाध्यायात्मकपाद्मोक्तवैशाखमाहात्म्ये–"मध्यदेशे धनशर्मानाम ब्राह्मणः कुशाद्यानयनार्थं महावने गतस्तत्राऽकस्मात्रीन्दारुणान्प्रेतान्दृष्ट्वाऽतिभयभीतो विष्णुं स्मरन्यूयं के इति अपृच्छत् ॥ प्रेता ऊचुः॥"दर्शनेनैव ते विप्र नाम श्रवणतो हरेः॥ भावमन्यमनुप्राप्ता वयं जाता दयालवः ॥ अयं कृतघ्ननामाऽस्ति द्वितीयोऽयं विदैवतः॥ अवैशाखस्तृतीयोऽयं त्रयाणामपि पापकृत् ॥ इति" अयं पूर्वजन्मनि सुदासनामा अनेन सदैव कृतघ्नता संपादिता, तेन नानानरकयातनामनुभूय, अंतिमामिमामवस्थां प्राप, तत्कर्मणाऽस्य कर्मजं कृतघ्नमिति नाम स्थापितम् । अयं द्वितीयः–दशसहस्रग्रामाऽधिपः हरवीरनामा नृपः, पूर्वजन्मनि देवब्राह्मणपूजारहितः दानशून्यः रोषाऽहंकारेण गुर्वाज्ञालंघनपरः विप्रनिंदकः महायज्ञानकृत्वैव भुक्तवान्, तेन पापकर्मणा नरकयातनामनुभूयाऽधुना विदैवतनाम्ना प्रेतो जातः । अहं तृतीयः–पूर्वजन्मनि मध्यदेशे गौतमनामा ब्राह्मणः, केवलशुष्कवैदिकः श्रौतमार्गनिष्ठः जन्मप्रभृतिवैशाख

उत्सवं कारयामास स्वाभिवृद्ध्यै मनोरमम् ॥ ग्रामं प्रदक्षिणीकृत्य शिबिकामधिरोप्य तम् ॥ ५६ ॥ चतुरंगबलैर्युक्तः स्वयं पृष्ठमथाऽन्वगात् ॥
पुनश्चांतःपुरं प्राप्य सकलैर्विभवैरपि ॥ ५७ ॥ वस्त्रैराभरणैश्चैव गोभूतिलहिरण्यकैः ॥ प्रणम्य च परिक्रम्य तस्थौ प्रांजलिरग्रतः ॥ ५८ ॥
ततः स तु महातेजाः श्रुतदेवो महायशाः ॥ सन्तुष्टः परमप्रीतो ययौ धाम स्वकं मुनिः ॥ ५९ ॥ त्रयोदश्यां चतुर्दश्यां पौर्णमास्यां च माधवे ॥
स्नानं दानं पूजनं च कथाश्रवणमेव च ॥ ६० ॥

धर्मो नानुष्ठितः, एका वैशाखपूर्णिमाऽपि स्नानदानहोमपूजादिना न सेविता । "तेन मे वैदिकं कर्म जातं सर्वं च निष्फलम् ॥ ततोऽवैशाखनामाहं प्रेतो जातोऽस्मि सर्वतः ॥ एतत्ते सर्वमाख्यातं त्रयाणामपि कारणम् ॥ त्वन्नो भव समुद्धर्ता पापाद्विप्रोऽसि वै यतः ॥ अथवा मम पुत्रोऽस्ति धनशर्मेति विश्रुतः ॥ " तं गत्वा अस्मदर्थे बोधय, एतत्प्रेतवाक्यमाकर्ण्याऽतिदुःखितो धनशर्मा जनकावस्थां दृष्ट्वा आह–भो जनक अहं तव सुतः निरर्थकः यतः यः पुत्रः पितुः निस्तारं न करोति स कुपुत्रः, अतोऽग्रे मया किं कर्तव्यं तात तवगतिश्च कथं भवेदिति चिंतातुरं प्रेत उवाच–हे पुत्र किंचित्प्राचीनपुण्यकर्मवशादस्मात्पञ्चमेऽहनि वैशाखीपूर्णिमा समागताऽस्ति अतः यमुनायां गत्वा वक्ष्यमाणव्रताद्याचरणं कुरु ॥ तदेवाह–त्रयोदश्यां चतुर्दश्यां पौर्णमास्यां स्त्री पुरुषो वा वैशाखनियमैर्युक्तः उषसि प्रातर्वा स्नानं करोति, स स्वर्गगामी भवति । यः त्रिरात्रमुषसि स्नात्वा गौरान्कृष्णान्वा तिलान् सक्षौद्रान्द्वादशविप्रेभ्यो ददाति यमप्रीतये स स्वर्गं गच्छति । यः दिनत्रयं पूर्णिमायां वा पायसेन दश ब्राह्मणान्पकान्नेन वा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यथाशक्ति भक्त्या भोजयेत्, सुवर्णतिलपात्राणि च दद्याद्वा "पानीयमप्यत्र तिलैर्विमिश्रं सहोदकुम्भान्पललानि भक्त्या। दद्यात्पितृभ्यो भवतीह दत्तं श्राद्धं मुदे तेन समाः सहस्रम् ॥ यस्तिलैर्यवसंमिश्रैः स्नाति सर्वांगतस्तदा ॥ तस्य ब्रह्मा च धर्मश्च ददाति वरमीप्सितम् ॥" किंचाऽऽश्चर्यं शृणु—पुरा विष्णुना त्रयोदश्यां हिरण्याक्षः, चतुर्दश्यां मधुश्च घातितः, पौर्णमास्यां भूम्युद्धारश्च कृतः, ततः प्रभृति तास्तिथयः पुण्या जाताः, ये पूर्णिमायां दश जलधेनूः प्रयच्छंति ते धन्याः। किञ्च शर्करातांबूलमुपानत्करपत्रिकाः ॥ "मणिकोदककुम्भांश्च पक्वान्नं हेमदक्षिणाम् ॥ प्रयच्छंति द्विजाग्र्येभ्यो धन्यास्ते चाऽत्र कीर्तिताः ॥ प्रीतये धर्मराजस्य यो दद्यादुदकुम्भकान् ॥ सदा सत्तकुलं

वैशाखधर्मनिरतः स वै मोक्षमवाप्नुयात् ॥ धनशर्मा ब्राह्मणश्च प्रेताश्चैव यथा पुरा ॥ ६१ ॥ ॥ नारद उवाच ॥ ॥ इत्येतत्परमाख्यानमंबरीष तवोदितम् ॥ श्रवणात्सर्वपापघ्नं सर्वसंपद्विधायकम् ॥ ६२ ॥ तेन भुक्तिं च मुक्तिं च ज्ञानं मोक्षं च विंदति ॥ इति तस्य वचः श्रुत्वा अंबरीषो महायशाः ॥ ६३ ॥ प्रहृष्टांतरवृत्तिश्च बाह्यव्यापारवर्जितः ॥ प्रणनाम तथा मूर्ध्ना दण्डवत्पतितो भुवि ॥ ६४ ॥ विभवैरखिलैश्चाऽपि पूजयामास तं पुनः ॥ संपूजितस्तमामंत्र्य नारदो भगवान्मुनिः ॥ ६५ ॥ लोकांतरं ययौ धीमाञ्च्छापान्नैकत्र संस्थितिः ॥ अम्बरीषोऽपि राजर्षिर्नारदोक्तानिमाञ्च्छुभान् ॥ ६६ ॥ धर्मान्कृत्वा विलीनोऽभूत्परे ब्रह्मणि निर्गुणे ॥ ॥ सूत उवाच ॥ ॥ य इदं परमाख्यानं पापघ्नं पुण्यवर्धनम् ॥ ६७ ॥ शृणुयाद्वा पठेद्वाऽपि स याति परमां गतिम् ॥ लिखितं पुस्तकं येषां गृहे तिष्ठति मानदाः ॥ ६८ ॥ तेषां मुक्तिः करस्था हि किमु तच्छ्रवणात्मनाम् ॥ ६९ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे वैशाखमासमाहात्म्ये नारदाम्बरीषसंवादे फलश्रुतिकथनंनाम पंचविंशोऽध्यायः ॥ २५ ॥ ॥ छ ॥ ॥ इति श्रीस्कान्दे महापुराणे द्वितीये वैष्णवखण्डे वैशाखमाससमाहात्म्यं संपूर्णम् ॥ (२–७) ॥ ॥ श्रीसीतारामचंद्रार्पणमस्तु ॥ ॥ छ ॥ ॥ छ ॥ ॥

तेन तारितं स्यान्न संशयः ॥ त्रयोदश्यां चतुर्दश्यां पूर्णायां भक्तितत्परः ॥ स्नात्वा जप्त्वा तथा दत्त्वा हुत्वा संपूज्य माधवम् ॥ यत्फलं जायते पुत्र तदस्माकं समर्पय ॥ नैतौ परिचितौ प्रेतौ हित्वा स्वर्गतिमाश्रये ॥ एतयोरपि पापस्य प्रांतोऽयं समुपस्थितः ॥" इति एवं प्रेतवचः श्रुत्वा गृहं गत्वा परमभक्त्या दिनत्रयं स्नानदानपूजनादिकं कृत्वा तेभ्यः पुण्यं ददौ ते च तत्क्षणादेव विमानस्था दिवं ययुः धनशर्मा त्वचिरं भोगान्भुक्त्वा ब्रह्मलोकमगादिति ॥ ६० ॥ ६१ ॥ ६२ ॥ ६३ ॥ ६४ ॥ ६५ ॥ ॥ ६६ ॥ ६७ ॥ ६८ ॥ श्रवणात्मनां श्रवणकर्तॄणाम् ॥ ६९ ॥ इति श्रीहरिकृष्णशास्त्रिविरचितायां वैशाखमासमाहात्म्यटीकायां पंचविंशोऽध्यायः ॥ २५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इदं पुस्तकं मुम्बय्यां श्रीकृष्णदासात्मजक्षेमराजश्रेष्ठिना
स्वकीये "श्रीवेङ्कटेश्वर" (स्टीम्) मुद्रणालये मुद्रितम्।
संवत् १९६६, शके १८३१.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ इति श्रीस्कान्दे महापुराणे द्वितीये वैष्णवखंडे वैशाखमासमाहात्म्यं समाप्तम् ॥ (२-७) ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ श्रीस्कांदे महापुराणे द्वितीये वैष्णवखण्डेऽयोध्यामाहात्म्यंप्रारभ्यते ॥ (२-८) ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu.

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ॥ श्रीगणेशाय नमः ॥ ॥ अयोध्यामाहात्म्यं प्रारभ्यते ॥ ॥ जयति पराशरसूनुः सत्यवतीहृदयनंदनो व्यासः ॥ यस्यास्यकमलगलितं
वाङ्मयममृतं जगत्पिबति ॥ १ ॥ नारायणं नमस्कृत्य नरं चैव नरोत्तमम् ॥ देवीं सरस्वतीं चैव ततो जयमुदीरयेत् ॥ २ ॥ ॥ व्यास उवाच ॥ ॥
हिमवद्वासिनः सर्वे मुनयो वेदपारगाः ॥ त्रिकालज्ञा महात्मानो नैमिषारण्यवासिनः ॥ ३ ॥ येऽर्बुदारण्यनिरता दण्डकारण्यवासिनः ॥ महेन्द्राद्रि
रता ये वै ये च विन्ध्यनिवासिनः ॥ ४ ॥ जंबूवनरता ये च ये गोदावरिवासिनः ॥ वाराणसीश्रिता ये च मथुरावासिनस्तथा ॥ ५ ॥ उज्जयिन्यां
रता ये च प्रथमाश्रमवासिनः ॥ द्वारावतीश्रिता ये च बदर्य्याश्रयिणस्तथा ॥ ६ ॥ मायापुरीश्रिता ये च ये च कान्तीनिवासिनः ॥ एते चान्ये च
मुनयः सशिष्या बहवोऽमलाः ॥ ७ ॥ कुरुक्षेत्रे महाक्षेत्रे सत्रे द्वादशवार्षिके ॥ वर्तमाने च रामस्य क्षितीशस्य महात्मनः ॥ समागताः समाहूताः
सर्वे ते मुनयोऽमलाः ॥ ८ ॥ सर्वे ते शुद्धमनसो वेदवेदांगपारगाः ॥ तत्र स्नात्वा यथान्यायं कृत्वा कर्म जपादिकम् ॥ ९ ॥ भारद्वाजं पुरस्कृत्य
वेदवेदांगपारगम् ॥ आसनेषु विचित्रेषु बृष्यादिषु ह्यनुक्रमात् ॥ १० ॥ उपविष्टाः कथाश्चक्रुर्नानातीर्थाश्रितास्तदा ॥ कर्मांतरेषु सत्रस्य सुखासीनाः
परस्परम् ॥ ११ ॥ कथांतेषु ततस्तेषां मुनीनां भावितात्मनाम् ॥ आजगाम महातेजास्तत्र सूतो महामतिः ॥ १२ ॥ व्यासशिष्यः पुराणज्ञो रोम
हर्षणसंज्ञकः ॥ तान्प्रणम्य यथान्यायं मुनीनुपविवेश सः ॥ उपविष्टो यथान्यायं मुनीनां वचनेन सः ॥ १३ ॥ व्यासशिष्यं मुनिवरं सूतं वै रोमह
र्षणम् ॥ तं पप्रच्छुर्मुनिवरा भारद्वाजादयोऽमलाः ॥ १४ ॥ ॥ ऋषय ऊचुः ॥ ॥ त्वत्तः श्रुता महाभाग नानातीर्थाश्रिताः कथाः ॥ सरहस्यानि
सर्वाणि पुराणानि महामते ॥ १५ ॥ सांप्रतं श्रोतुमिच्छामः सरहस्यं सनातनम् ॥ अयोध्याया महापुर्या महिमानं गुणोज्ज्वलम् ॥ १६ ॥ कीदृशी
सा सदा मेध्याऽयोध्या विष्णुप्रिया पुरी ॥ आद्या सा गीयते वेदे पुरीणां मुक्तिदायिका ॥ १७ ॥ संस्थानं कीदृशं तस्यास्तस्यां के च महीभुजः ॥
कानि तीर्थानि पुण्यानि माहात्म्यं तेषु कीदृशम् ॥ १८ ॥ अयोध्यासेवनान्नृणां फलं स्यात्सूत कीदृशम् ॥ किं चरित्रं सूत तस्याः का नद्यः के च
संगमाः ॥१९॥ तत्र स्नानेन किं पुण्यं दानेन च महामते ॥ तत्सर्वं श्रोतुमिच्छामस्त्वत्तः सूत गुणाधिक॥ २० ॥एतत्सर्वं क्रमेणैव तथ्यं त्वं वेत्थ सांप्र
तम् ॥ अयोध्याया महापुर्य्या माहात्म्यं वक्तुमर्हसि ॥ २१ ॥ ॥ सूत उवाच ॥ ॥ व्यासप्रसादाज्जानामि पुराणानि तपोधनाः ॥ सेतिहासानि
सर्वाणि सरहस्यानि तत्त्वतः ॥ २२ ॥ तं प्रणम्य प्रवक्ष्यामि माहात्म्यं भवदग्रतः ॥ अयोध्याया महापुर्या यथावत्सरहस्यकम् ॥ २३ ॥ विद्यावन्तं
विपुलमतिदं वेदवेदांगवेद्यं श्रेष्ठं शान्तं शमितविषयं शुद्धतेजोविशालम् ॥ वेदव्यासं सततविनतं विश्ववेद्यैकयोनिं पाराशर्यं परमपुरुषं सर्वदाऽहं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नमामि ॥२४॥ ॐ नमो भगवते तस्मै व्यासायामिततेजसे ॥ यस्य प्रसादाज्जानामि ह्ययोध्यामहिमांमहम् ॥२५॥ शृण्वन्तु मुनयः सर्वे सावधानाः
सशिष्यकाः ॥ माहात्म्यं कथयिष्यामि अयोध्याया महोदयम् ॥ २६ ॥ उदीरितमगस्त्याय स्कन्देनाश्रावि नारदात् ॥ अगस्त्येन पुरा प्रोक्तं
कृष्णद्वैपायनाय तत् ॥२७॥ कृष्णद्वैपायनाच्चैतन्मया प्राप्तं तपोधनाः ॥ तदहं वच्मि युष्मभ्यं श्रोतुकामेभ्य आदरात् ॥ २८ ॥ नमामि परमात्मानं
रामं राजीवलोचनम् ॥ अतसीकुसुमश्यामं रावणांतकमव्ययम् ॥२९॥ अयोध्या सा परा मेध्या पुरी दुष्कृतिदुर्लभा ॥ कस्य सेव्या च नाऽयोध्या
यस्यां साक्षाद्धरिः स्वयम् ॥ ३० ॥ सरयूतीरमासाद्य दिव्या परमशोभना ॥ अमरावतीनिभा प्रायः श्रिता बहुतपोधनैः ॥३१॥ हस्त्यश्वरथपत्त्या
ढ्या संपदुच्चा च संस्थिता ॥ प्राकाराढ्यप्रतोलीभिस्तोरणैः कांचनप्रभैः ॥ ३२ ॥ सानूपवेषैः सर्वत्र सुविभक्तचतुष्पथा ॥ अनेकभूमिप्रासादा
बहुभित्तिसुविक्रिया ॥ ३३ ॥ पद्मोत्फुल्लशुभोदाभिर्वापीभिरुपशोभिता ॥ देवतायतनैर्दिव्यैर्वेदघोषैश्च मण्डिता ॥ ३४ ॥ वीणावेणुमृदंगादिशब्दैरु
त्कृष्टतां गता ॥ शालैस्तालैर्नालिकेरैः पनसामलकैस्तथा ॥ ३५ ॥ तथैवाम्रकपित्थाद्यैरशोकैरुपशोभिता ॥ आरामैर्विविधैर्युक्ता सर्वर्तुफलपादपैः ॥
॥ ३६ ॥ मालतीजातिबकुलपाटलीनागचंपकैः ॥ करवीरैः कर्णिकारैः केतकीभिरलंकृता ॥ ३७ ॥ निम्बजंबीरकदलीमातुलिंगमहाफलैः ॥ लस
च्चंदनगंधाढ्यैर्नागरैरुपशोभिता ॥ ३८ ॥ देवतुल्यप्रभायुक्तैर्नृपपुत्रैश्च संयुता ॥ सुरूपाभिर्वरस्त्रीभिर्देवस्त्रीभिरिवावृता ॥३९॥ श्रेष्ठैः सत्कविभिर्युक्ता
बृहस्पतिसमैर्द्विजैः ॥ वणिग्जनैस्तथा पौरैः कल्पवृक्षैरिवावृता ॥ ४० ॥ अश्वैरुच्चैःश्रवस्तुल्यैर्दंतिभिर्दिग्गजैरिव ॥ इति नानाविधैर्भावैरुपेतेन्द्रपुरी
समा ॥ ४१ ॥ यस्यां जाता महीपालाः सूर्यवंशसमुद्भवाः ॥ इक्ष्वाकुप्रमुखाः सर्वे प्रजापालनतत्पराः ॥ ४२ ॥ यस्यास्तीरे पुण्यतोया कूजद्भृंग
विहंगमा ॥ सरयूर्नाम तटिनी मानसप्रभवोल्लसा ॥४३॥ धर्मद्रवपरीता सा घर्घरोत्तमसंगमा ॥ मुनीश्वराश्रिततटा जागर्ति जगदुच्छ्रिता ॥ ४४ ॥
दक्षिणाच्चरणांगुष्ठान्निःसृता जाह्नवी हरेः ॥ वामांगुष्ठान्मुनिवराः सरयूर्निर्गता शुभा ॥ ४५ ॥ तस्मादिमे पुण्यतमे नद्यौ देवनमस्कृते ॥ एतयोः
स्नानमात्रेण ब्रह्महत्यां व्यपोहति ॥ ४६ ॥ तामयोध्यामथ प्राप्तोऽगस्त्यः कुम्भोद्भवो मुनिः ॥ यात्रार्थं तीर्थमाहात्म्यं ज्ञात्वा स्कन्दप्रसादतः ॥
॥ ४७ ॥ आगत्य तु पुनः सोऽपि कृत्वा यात्रां क्रमेण च ॥ यथोक्तेन विधानेन स्नात्वा संतर्प्य तान्पितॄन् ॥ ४८ ॥ पूजयित्वा यथान्यायं देवताः
सकला अपि ॥ सर्वाण्यपि च तीर्थानि नमस्कृत्य यथाविधि ॥४९॥ कृतकृत्योर्ज्जितानन्दस्तीर्थमाहात्म्यदर्शनात् ॥ अभूदगस्त्यो रूपेण पुलकां ॥२७४॥
चितविग्रहः ॥ ५० ॥ स त्रिरात्रं स्थितस्तत्र यात्रां कृत्वा यथाविधि ॥ स्तुवन्नयोध्यामाहात्म्यं प्रतस्थे मुनिसत्तमः ॥ ५१ ॥ तमायांतं विलो

१ महिमाम्—आवन्तोऽप्ययं शब्दः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्याशु बहुलानन्दसुन्दरम् ॥ कृष्णद्वैपायनो व्यासः पप्रच्छानंदकारणम् ॥ ५२ ॥ ॥ व्यास उवाच ॥ ॥ कुतः समागतो ब्रह्मन्सांप्रतं मुनिसत्तमः ॥ परमानंदसंदोहः समभूत्सांप्रतं तव ॥ ५३ ॥ कस्मादानंदपोषोऽभूत्तव ब्रह्मन्वदस्व मे ॥ ममापि भवदानंदात्प्रमोदो हृदि जायते ॥ ५४ ॥ ॥ ॥ अगस्त्य उवाच ॥ ॥ अहो महदथाश्चर्य्यं विस्मयो मुनिसत्तम ॥ दृष्ट्वा प्रभावं मेऽद्याभूदयोध्यायास्तपोधन ॥ ५५ ॥ तस्मादानंदसंदोहः समभून्मम सांप्रतम् ॥ तच्छ्रुत्वागस्त्यवचनं व्यासः प्रोवाच तं मुनिम् ॥ ५६ ॥ ॥ व्यास उवाच ॥ ॥ भगवन्ब्रूहि तत्त्वेन विस्तरात्सरहस्यकम् ॥ अयोध्याया महापुर्या महिमानं गुणाधिकम् ॥ ५७ ॥ कः क्रमस्तीर्थयात्रायाः कानि तीर्थानि को विधिः ॥ किं फलं स्नानतस्तत्र दानस्य च महामुने ॥ एतत्सव समाचक्ष्व विस्तराद्वदतां वर ॥ ५८ ॥ ॥ अगस्त्य उवाच ॥ ॥ अहो धन्यतमा बुद्धिस्तव जाता तपोधन ॥ दृश्यते येन पृच्छा ते ह्ययोध्यामहिमाश्रिता ॥ ५९ ॥ अकारो ब्रह्म च प्रोक्तं यकारो विष्णुरुच्यते ॥ धकारो रुद्ररूपश्च अयोध्यानाम राजते ॥ ६० ॥ सर्वोपपातकैर्युक्तैर्ब्रह्महत्यादिपातकैः ॥ नायोध्या शक्यते यस्मात्तामयोध्यां ततो विदुः ॥ ६१ ॥ विष्णोराद्या पुरी येयं क्षितिं न स्पृशति द्विज ॥ विष्णोः सुदर्शने चक्रे स्थिता पुण्यकरी क्षितौ ॥ ६२ ॥ केन वर्णयितुं शक्यो महिमाऽस्यास्तपोधन ॥ यत्र साक्षात्स्वयं देवो विष्णुर्वसति सादरः ॥ ६३ ॥ सहस्रधारामारभ्य योजनं पूर्वतो दिशि ॥ प्रतीचि दिशि तथैव योजनं समंतोवधिः ॥ ६४ ॥ दक्षिणोत्तरभागे तु सरयूतमसावधिः ॥ एतत्क्षेत्रस्य संस्थानं हरेरन्तर्गृहं स्थितम् ॥ मत्स्याकृतिरियं विप्र पुरी विष्णोरुदीरिता ॥ ६५ ॥ पश्चिमे तस्य मूर्द्धा तु गोप्रतारासिताद्विज ॥ ६६ ॥ पूर्वतः पृष्ठभागो हि दक्षिणोत्तरमध्यमः ॥ तस्यां पुर्य्यां महाभाग नाम्ना विष्णुर्हरिः स्वयम् ॥ पूर्वं दृष्टप्रभावोऽसौ प्राधान्येन वसत्यपि ॥ ६७ ॥ ॥ व्यास उवाच ॥ ॥ भगवन्किंप्रभावोऽसौ योऽयं विष्णुहरिस्त्वया ॥ कीर्तितो मुनिशार्दूल प्रसिद्धिं गतवान्कथम् ॥ एतत्सर्वं समाचक्ष्व विस्तरेण ममाग्रतः ॥ ६८ ॥ ॥ ॥ अगस्त्य उवाच ॥ ॥ विष्णुशर्मेति विख्यातः पुराभूद्ब्राह्मणोत्तमः ॥ वेदवेदांगतत्त्वज्ञो धर्मकर्मसमाश्रितः ॥ ६९ ॥ योगध्यानरतो नित्यं विष्णुभक्तिपरायणः ॥ स कदाचित्तीर्थयात्रां कुर्वन्वैष्णवसत्तमः ॥ अयोध्यामागतो विष्णुर्विष्णुःसाक्षाद्वसेदिति ॥ ७० ॥ चिंतयन्मनसा वीरस्तपः कर्तुं समुद्यतः ॥ स वै तत्र तपस्तेपे शाकमूलफलाशनः ॥ ७१ ॥ ग्रीष्मे पंचाग्निमध्यस्थो ह्यतपत्स महातपाः ॥ वार्षिके च निरालम्बो हेमन्ते च

१ एतत्किं स्थलमिति न ज्ञायते ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सरोवरे ॥ ७२ ॥ स्नात्वा यथोक्तविधिना कृत्वा विष्णोस्तथार्चनम् ॥ वशीकृत्येन्द्रियग्रामं विशुद्धेनांतरात्मना ॥ ७३ ॥ मनो विष्णौ समावेश्य
विधाय प्राणसंयमम् ॥ ॐकारोच्चारणाद्धीमान्हृदि पद्मं विकासयन् ॥ ७४ ॥ तन्मध्ये रविसोमाग्निमण्डलानि यथाविधि ॥ कल्पयित्वा हरिं मूर्तं
यस्मिन्देशे सनातनम् ॥ ७५ ॥ पीतांबरधरं विष्णुं शंखचक्रगदाधरम् ॥ तं च पुष्पैः समभ्यर्च्य मनस्तस्मिन्निवेश्य च ॥ ७६ ॥ ब्रह्मरूपं हरिं
ध्यायञ्जपन्वै द्वादशाक्षरम् ॥ वायुभक्षः स्थितस्तत्र विप्रस्त्रीन्वत्सरान्वसन् ॥ ७७ ॥ ततो द्विजवरो ध्यात्वा स्तुतिं चक्रे हरेरिमाम् ॥ प्रणिपत्य जग
न्नाथं चराचरगुरुं हरिम् ॥ विष्णुशर्माथ तुष्टाव नारायणमतंद्रितः ॥ ७८ ॥ ॥ विष्णुशर्म्मोवाच ॥ ॥ प्रसीद भगवन्विष्णो प्रसीद पुरुषोत्तम ॥
प्रसीद देवदेवेश प्रसीद कमलेक्षण ॥ ७९ ॥ जय कृष्ण जयाचिंत्य जय विष्णो जयाव्यय ॥ जय यज्ञपते नाथ जय विष्णो पते विभो ॥ ८० ॥
जय पापहरानंत जय जन्मज्वरापह ॥ नमः कमलनाभाय नमः कमलमालिने ॥८१॥ नमः सर्वेश भूतेश नमः कैटभसूदन ॥ नमस्त्रैलोक्यनाथाय
जगन्मूल जगत्पते ॥ ८२ ॥ नमो देवाधिदेवाय नमो नारायणाय वै ॥ नमः कृष्णाय रामाय नमश्चक्रायुधाय च ॥ ८३ ॥ त्वं माता सर्वलोकानां
त्वमेव जगतः पिता ॥ भयार्त्तानां सुहृन्मित्रं त्वं पिता त्वं पितामहः ॥ ८४ ॥ त्वं हविस्त्वं वषट्कारस्त्वं प्रभुस्त्वं हुताशनः ॥ करणं कारणं कर्त्ता
त्वमेव परमेश्वरः ॥ ८५ ॥ शंखचक्रगदापाणे मां समुद्धर माधव ॥ ८६ ॥ प्रसीद मंदरधर प्रसीद मधुसूदन ॥ प्रसीद कमलाकान्त प्रसीद भुव
नाधिप ॥ ८७ ॥ ॥ अगस्त्य उवाच ॥ ॥ इत्येवं स्तुवतस्तस्य मनोभक्त्या महात्मनः ॥ आविर्बभूव विश्वात्मा विष्णुर्गरुडवाहनः ॥ ८८ ॥
शंखचक्रगदापाणिः पीतांबरधरोऽच्युतः ॥ उवाच स प्रसन्नात्मा विष्णुशर्माणमव्ययः ॥ ८९ ॥ ॥ श्रीभगवानुवाच ॥ ॥ तुष्टोऽस्मि भवतो वत्स
महता तपसाऽधुना ॥ स्तोत्रेणानेन सुमते नष्टपापोऽसि सांप्रतम् ॥९०॥ वरं वरय विप्रेन्द्र वरदोऽहं तवाग्रतः ॥ नाऽतप्ततपसा द्रष्टुं शक्यः केनाप्यहं
द्विज ॥ ९१ ॥ ॥ विष्णुशर्म्मोवाच ॥ ॥ कृतकृत्योऽस्मि देवेश सांप्रतं तव दर्शनात् ॥ त्वद्भक्तिमचलामेकां मम देहि जगत्पते ॥ ९२ ॥
॥ ॥ श्रीभगवानुवाच ॥ ॥ भक्तिरस्त्वचला मे वै वैष्णवी मुक्तिदायिनी ॥ अत्रैवास्त्वचला मे वै जाह्नवी मुक्तिदायिनी ॥ ९३ ॥ इदं स्थानं
महाभाग त्वन्नाम्ना ख्यातिमेष्यति ॥ ९४ ॥ ॥ अगस्त्य उवाच ॥ ॥ इत्युक्त्वा देवदेवेशश्चक्रेणोत्खाय तत्स्थलम् ॥ जलं प्रकटयामास गांगं पाताल
मंडलात् ॥ ९५ ॥ जलेन तेन भगवान्पवित्रेण दयांबुधिः ॥ नीरजस्तु भूमितलं क्षणाच्चक्रे कृपावशात् ॥ ९६ ॥ चक्रतीर्थमिति ख्यातं ततः प्रभृति
तद्द्विज ॥ जातं त्रैलोक्यविख्यातमघौघध्वंसकृच्छुभम् ॥ ९७ ॥ तत्र स्नानेन दानेन विष्णुलोकं व्रजेन्नरः ॥ ९८ ॥ ततः स भगवान्भूयो विष्णु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शर्माणमच्युतः ॥ कृपया परया युक्त उवाच द्विजवत्सलः ॥ ९९ ॥ ॥ श्रीभगवानुवाच ॥ ॥ त्वन्नामपूर्विका विप्र मन्मूर्त्तिरिह तिष्ठतु ॥ विष्णुहरीति
विख्याता भक्तानां मुक्तिदायिनी ॥१००॥ ॥ अगस्त्य उवाच ॥ ॥ इति श्रुत्वा वचो विप्रो वासुदेवस्य बुद्धिमान् ॥ स्वनामपूर्विकां मूर्तिंस्थापयामास
चक्रिणः ॥१०१॥ ततः प्रभृति विप्रेश शंखचक्रगदाधरः ॥ पीतवासाश्चतुर्बाहुर्न्नाम्ना विष्णुहरिः स्थितः॥१०२॥ कार्तिके शुक्लपक्षस्य प्रारभ्य दशमी
तिथिम् ॥ पूर्णिमामवधिं कृत्वा यात्रा सांवत्सरी भवेत् ॥ १०३ ॥ चक्रतीर्थे नरः स्नात्वा सर्वपापैः प्रमुच्यते ॥ बहुवर्षसहस्राणि स्वर्गलोके मही
यते ॥ १०४ ॥ पितनुद्दिश्य यस्तत्र पिंडान्निर्वापयिष्यति ॥ तृप्तास्तु पितरो यान्ति विष्णुलोकं न संशयः ॥ १०५ ॥ चक्रतीर्थे नरः स्नात्वा दृष्ट्वा
विष्णुहरिं विभुम् ॥ सर्वपापक्षयं प्राप्य नाकपृष्ठे महीयते ॥ १०६ ॥ स्वशक्त्या तत्र दानानि दत्त्वा निष्कलमषो नरः ॥ विष्णुलोके वसेद्धीमा
न्यावदिन्द्राश्चतुर्दश ॥ १०७ ॥ अन्यदापि नरस्तत्र चक्रतीर्थे जितेंद्रियः ॥ दृष्ट्वा सकृद्धरिं देवं सर्वपापैः प्रमुच्यते ॥ १०८ ॥ इति सकलगुणा
ब्धिर्ध्येयमूर्तिश्चिदात्मा हरिरिह परमूर्त्या तस्थिवान्भुक्तिहेतोः ॥ तमिह बहुलभक्त्या चक्रतीर्थाभिषेकी वसति सुकृतिमूर्त्तिर्योऽर्चयेद्विष्णुलोके ॥
॥ १०९ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखंडेऽयोध्यामाहात्म्ये विष्णुहरिमाहात्म्यवर्णनंनाम प्रथमो
ऽध्यायः ॥ १ ॥ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ अगस्त्यमुनिरित्युक्त्वा चक्रतीर्थाश्रयां कथाम् ॥ विभोर्विष्णुहरेश्चापि पुनराह द्विजोत्तमाः ॥ १ ॥
॥ ॥ अगस्त्य उवाच ॥ ॥ पुरा ब्रह्मा जगत्स्रष्टा विज्ञाय हरिमच्युतम् ॥ अयोध्यावासिनं देवं तत्र चक्रे स्थितिं स्वयम् ॥ २ ॥ आगत्य कृत
वांस्तत्र यात्रां ब्रह्मा यथाविधि ॥ यज्ञं च विधिवच्चक्रे नानासंभारसंयुतम् ॥ ३ ॥ ततः स कृतवांस्तत्र ब्रह्मा लोकपितामहः ॥ कुण्डं स्वनाम्ना
विपुलं नानादेवसमन्वितम् ॥ ४ ॥ विस्तीर्णजलकल्लोलकलितं कलुषापहम् ॥ कुमुदोत्पलकह्लारपुंडरीककुलाकुलम् ॥ ५ ॥ हंससारसचक्राह्व
विहंगममनोहरम् ॥ तटांतविटपोल्लासिपतत्रिगणसंकुलम् ॥ ६ ॥ तत्र कुण्डे सुराः सर्वे स्नाताः शुद्धिसमन्विताः ॥ बभूवुरद्धा विगतरजस्का विमल
त्विषः ॥ ७ ॥ तदाश्चर्य्यं महद्दृष्ट्वा ते सर्वे सहसा सुराः ॥ ब्रह्माणं प्रणिपत्योचुर्भक्त्या प्रांजलयस्तदा ॥ ८ ॥ ॥ देवा ऊचुः ॥ ॥ भगवन्ब्रूहि
तत्त्वेन माहात्म्यं कमलासन ॥ अस्य कुण्डस्य सकलं खातस्य विमलत्विषः ॥ ९ ॥ अत्र स्नानेन सर्वेषामस्माकं विगतं रजः ॥ महदाश्चर्यमे
तस्य दृष्ट्वा कुंडस्य विस्मिताः ॥ सर्वे वयं सुरश्रेष्ठ कृपया त्वमतो वद ॥ १० ॥ ॥ ब्रह्मोवाच ॥ ॥ शृण्वन्तु सर्वे त्रिदशाः सावधानाः सवि
स्मयाः ॥ कुण्डस्यैतस्य माहात्म्यं नानाफलसमन्वितम् ॥ ११ ॥ अत्र स्नानेन विधिवत्पापात्मानोऽपि जंतवः ॥ विमानं हंससंयुक्तमास्थाय रुचि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रांबराः ॥ निवसंति ब्रह्मलोके यावदाभूतसंप्लवम् ॥ १२ ॥ अत्र दानेन होमेन यथाशक्त्या सुरोत्तमाः ॥ तुलाश्वमेधयोः पुण्यं प्राप्नुयुर्मुनिस
त्तम ॥ १३ ॥ ममास्मिन्सरसि श्रीमाञ्जायते स्नानतो नरः ॥ तस्मादत्र विधानेन स्नानं दानं जपादिकम् ॥ १४ ॥ सर्वयज्ञसमं स्याद्वै महापातक
नाशनम् ॥ ब्रह्मकुण्डमिति ख्यातिमितो यास्यत्यनुत्तमाम्॥१५॥ अस्मिन्कुण्डे च सांनिध्यं भविष्यति सदा मम ॥ कार्त्तिके शुक्लपक्षस्य चतुर्दश्यां
सुरोत्तमाः ॥ १६ ॥ यात्रा भविष्यति सदा सुराः सांवत्सरी मम ॥ शुभप्रदा महापापराशिनाशकरी तदा ॥ १७ ॥ स्वर्णं चैव सदा देयं वासांसि
विविधानि च ॥ निजशक्त्या प्रकर्तव्या सुरास्तृप्तिर्द्विजन्मनाम् ॥१८॥ ॥ अगस्त्य उवाच ॥ ॥ इत्युक्त्वा देवदेवोऽयं ब्रह्मा लोकपितामहः ॥ अन्त
र्दधे सुरैः सार्द्धं तीर्थं दृष्ट्वा तपोधन ॥ १९ ॥ तदाप्रभृति तत्कुण्डं विख्यातं परमं भुवि ॥ चक्रतीर्थाच्च पूर्वस्यां दिशि कुण्डं स्थितं महत् ॥ २० ॥
॥ ॥ सूत उवाच ॥ ॥ इत्युक्त्वा स तपोराशिरगस्त्यः कुंभसंभवः ॥ पुनः पृष्टो मुनिवरो व्यासायावीवदत्कथाम् ॥ २१ ॥ ॥ अगस्त्य
उवाच ॥ ॥ अन्यच्छृणु महाभाग तीर्थं दुष्कृतिदुर्ल्लभम् ॥ ऋणमोचनसंज्ञं तु सरयूतीरसंगतम् ॥ २२ ॥ ब्रह्मकुण्डान्मुनिवर धनुःसप्तशतेन च ॥
पूर्वोत्तरदिशाभागे संस्थितं सरयूजले ॥ २३ ॥ तत्र पूर्वं मुनिवरो लोमशोनाम नामतः ॥ तीर्थयात्राप्रसंगेन स्नानं चक्रे विधानतः ॥ २४ ॥ ततः
स ऋणनिर्मुक्तो बभूव गतकल्मषः ॥ तदाश्चर्य्यं महद्दृष्ट्वा मुनीन्सानन्दमब्रवीत् ॥ २५ ॥ पश्यन्त्वेतस्य महतो गुणांस्तीर्थवरस्य वै ॥
भुजावूर्ध्वं तथा कृत्वा हर्षेणाहाऽमलोचनः ॥ २६ ॥ ॥ लोमश उवाच ॥ ॥ ऋणमोचनसंज्ञं तु तीर्थमेतदनुत्तमम् ॥ यत्र स्नानेन
जंतूनामृणनिर्यातनं भवेत् ॥ २७ ॥ ऐहिकं पारलौकिक्यं यदृणत्रितयं नृणाम् ॥ तत्सर्वं स्नानमात्रेण तीर्थेऽस्मिन्नश्यति क्षणात् ॥
॥ २८ ॥ सर्वतीर्थोत्तमं चैतत्सद्यः प्रत्ययकारकम् ॥ मया चास्य फलं सम्यगनुभूतमृणादिह ॥ २९ ॥ तस्मादत्र विधानेन स्नानं
दानं च शक्तितः ॥ कर्त्तव्यं श्रद्धया युक्तैः सर्वदा फलकांक्षिभिः ॥ ३० ॥ स्नातव्यं च सुवर्णं च देयं वस्त्रादि शक्तितः ॥ ३१ ॥
॥ ॥ अगस्त्य उवाच ॥ ॥ इत्युक्त्वा तीर्थमाहात्म्यं लोमशो मुनिसत्तमः ॥ अन्तर्दधे मुनिश्रेष्ठः स्तुवंस्तीर्थगुणान्मुदा ॥ ३२ ॥ इत्ये
तत्कथितं विप्र ऋणमोचनसंज्ञकम् ॥ यत्र स्नानेन जन्तूनामृणं नश्यति तत्क्षणात् ॥ ऋणमोचनतीर्थं तु पूर्वतः सरयूजले ॥ ३३ ॥
धनुर्द्विशत्या तीर्थं च पापमोचनसंज्ञकम् ॥ सर्वपापविशुद्धात्मा तत्र स्नानेन मानवः ॥ जायते तत्क्षणादेव नात्र कार्या विचारणा ॥ ३४ ॥ मया
तत्र मुनिश्रेष्ठ दृष्टं माहात्म्यमुत्तमम् ॥ ३५ ॥ पांचालदेशसंभूतो नाम्ना नरहरिर्द्विजः ॥ असत्संगप्रभावेन पापात्मा समजायत ॥ ३६ ॥ नाना

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सफलमद्य मे ॥ २५ ॥ यद्भवान्यज्ञवाटं मे हविर्भोक्तुमिहागतः ॥ योगिनो योगनिरता हृदये मृगयंति यम् ॥ २६ ॥ तमद्य साक्षात्त्वां पश्ये सफ
लोऽयं मम क्रतुः ॥ इतीरयित्वा तं विष्णुमर्चयित्वाऽऽसनादिभिः ॥२७॥ चंदनैः कुसुमैरन्यैर्दत्त्वा चार्घ्यं स विष्णवे ॥ प्रददौ विष्णवे प्रीत्या पुरो
डाशादिकं हविः ॥ २८ ॥ स्वयमेव समादाय पाणिना लोकभावनः ॥ हविस्तद्बुभुजे विष्णुर्मुद्गलेन समर्पितम् ॥ २९ ॥ तस्मिन्हविषि भुक्ते तु
विष्णुना प्रभविष्णुना ॥ साग्नय[1]स्त्रिदशाः सर्वे तृप्ताः समभवन्द्विजाः ॥३०॥ ऋत्विजो यजमानश्च तत्रत्या ब्राह्मणास्तथा ॥ यत्किंचित्प्राणिलोकेऽ
स्मिंश्चरं वा यदि वाऽचरम् ॥३१॥ सर्वमेव जगत्तृप्तं भुक्ते हविषि विष्णुना ॥ ततो हरिः प्रसन्नात्मा मुद्गलं प्रत्यभाषत ॥३२॥ प्रीतोऽहं[2] वरदोऽस्म्येष
वरं वरय सुव्रत ॥ इत्युक्ते केशवेनाथ महर्षिस्तमभाषत ॥ ३३ ॥ ॥ मुद्गल उवाच ॥ ॥ यत्त्वया मे हविर्भुक्तं यागे प्रत्यक्षरूपिणा ॥ अनेनैव
कृतार्थोऽस्मि किमस्मादधिकं वरम् ॥ ३४ ॥ तथापि भगवन्विष्णो त्वयि मे निश्चला सदा ॥ भक्तिर्निष्कपटा भूयादिदं मे प्रथमं
वरम् ॥ ३५ ॥ माधवाहं प्रतिदिनं सायंप्रातरिहाग्नये ॥ त्वद्रूपाय तव प्रीत्यै सुरभेः पयसा हरे ॥ ३६ ॥ होतुमिच्छामि वरद तन्मे देहि
वरांतरम् ॥ पयसा नित्यहोमो हि द्विकालं श्रुतिचोदितः ॥ ३७ ॥ न मे सुरभयः संति तापसस्याधनस्य च ॥ इत्युक्ते मुद्गलेनाथ देवो
नारायणो हरिः ॥ ३८ ॥ आहूय विश्वकर्माणं त्वष्टारममृताशिनम् ॥ एकं सरः कारयित्वा शिल्पिना तेन शोभनम् ॥ ३९ ॥ स्फटिकादि
शिलाभेदैस्तेनासौ विश्वकर्मणा ॥ समीचकार च पुनस्तत्प्राकाराद्यलंकृतम् ॥ तत आहूय भगवान्सुरभिं वाक्यमब्रवीत् ॥ ४० ॥ श्रीहरिवाच ॥
मुद्गलो मम भक्तोऽयं सुरभे प्रत्यहं मुदा ॥ ४१ ॥ मत्प्रीत्यर्थं पयोहोमं कर्तुमिच्छति सांप्रतम् ॥ मत्प्रीत्यर्थमितो देवि त्वमतो मत्प्रचोदिता ॥
॥ ४२ ॥ सायंप्रातरिहागत्य प्रत्यहं सुरभे शुभे ॥ पयसा त्वत्प्रसूतेन सर एतत्प्रपूरय ॥ ४३ ॥ तेनासौ पयसा नित्यं सायंप्रातश्च होष्यति ॥
ओमित्युक्त्वाथ[3] सुरभिरेवं नारयणेरिता ॥ ४४ ॥ अथ नारायणो देवो मुद्गलं प्रत्यभाषत ॥ सुरभेः पयसा नित्यमस्मिन्सरसि तिष्ठता ॥
॥ ४५ ॥ सायंप्रातः प्रतिदिनं मत्प्रीत्यर्थमिहाग्नये ॥ जुहुधि त्वं महाभाग तेन प्रीणाम्यहं तव ॥ ४६ ॥ मत्प्रीत्या तेऽखिला सिद्धिर्भविष्यति
च मुद्गल ॥ इदं क्षीरसरोनाम तीर्थं ख्यातं भविष्यति ॥ ४७ ॥ अस्मिन्क्षीरसरस्तीर्थे स्नातानां पंचपातकम् ॥ अन्यान्यपि च पापानि नाशं
यास्यंति तत्क्षणात् ॥ ४८ ॥ मुद्गल त्वं च मां याहि देहांते मुक्तबंधनः ॥ इत्युक्त्वा भगवान्विष्णुस्तं समालिंग्य मुद्गलम् ॥ ४९ ॥ नमस्कृतश्च

१ साम्नायाः—इ०पा० । २ वरं ब्रूहि महायोगिंस्त्वादेयं न मे क्वचित् ।—इ० पा० । ३ तथेत्युक्त्वा—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धनाः सर्वे नैमिषारण्यवासिनः ॥ यावद्रामधनुष्कोटिचक्रतीर्थमुखानि वः ॥ १ ॥ चतुर्विंशतितीर्थानि कथितानि मयाधुना ॥ इतोऽन्यदद्भुतं यूयं किं भूयः श्रोतुमिच्छथ ॥ २ ॥ ॥ मुनय ऊचुः ॥ ॥ क्षीरकुंडस्य माहात्म्यं श्रोतुमिच्छामहे मुने ॥ यत्समीपे त्वया चक्रतीर्थमित्युदितं पुरा ॥ ३ ॥ क्षीरकुंडं च तत्कुत्र कीदृशं तस्य वैभवम् ॥ क्षीरकुण्डमिति ख्यातिः कथं वास्य समागता ॥ ४ ॥ एतन्नः श्रद्दधानानां विस्तराद्वक्तुमर्हसि ॥ ॥ श्रीसूत उवाच ॥ ॥ ब्रवीमि मुनयः सर्वे शृणुध्वं सुसमाहिताः ॥ ५ ॥ देवीपुरान्महापुण्यात्प्रतीच्यां दिश्यदूरतः ॥ फुल्लग्राममिति ख्यातं स्थानमस्ति महत्तरम् ॥ ६ ॥ यत आरभ्य रामेण सेतुबन्धो महार्णवे ॥ तद्धि पुण्यतमं क्षेत्रं फुल्लग्रामाभिधं पुरम् ॥ ७ ॥ क्षीरकुण्डं तु तत्रैव महापातकनाशनम् ॥ दर्शनात्स्पर्शनाद्ध्यानात्कीर्तनाच्चापि मोक्षदम् ॥ ८ ॥ तस्य तीर्थस्य पुण्यस्य क्षीरकुण्डमिति प्रथाम् ॥ भवतां सादरं वक्ष्ये शृणुध्वं श्रद्धया सह ॥ ९ ॥ पुरा हि मुद्गलोनाम मुनिर्वेदोक्तमार्गकृत् ॥ दक्षिणांबुनिधेस्तीरे फुल्लग्रामेतिपावने ॥ १० ॥ नारायणप्रीतिकरम करोद्यज्ञमुत्तमम् ॥ तस्य विष्णुः प्रसन्नात्मा यागेन परितोषितः ॥ ११ ॥ प्रादुर्बभूव पुरतो यज्ञवाटे द्विजोत्तमाः ॥ तं दृष्ट्वा मुद्गलो विष्णुं लक्ष्मीशोभितविग्रहम् ॥ १२ ॥ कालमेघतनुं कांत्या पीतांबरविराजितम् ॥ विनतानंदनारूढं कौस्तुभालंकृतोरसम् ॥ १३ ॥ शंखचक्रगदापद्मराजद्बाहुचतुष्टयम् ॥ भक्त्या परवशो दृष्ट्वा पुलकांकुरमंडितः ॥ मुद्गलः परितुष्टाव शब्दैः श्रोत्रसुखावहैः ॥ १४ ॥ ॥ मुद्गल उवाच ॥ ॥ प्रथमं जगतः स्रष्ट्रे पालकाय ततः परम् ॥ १५ ॥ संहर्त्रे च ततः पश्चान्नमो नारायणाय ते ॥ नमः शफररूपाय कमठाय चिदात्मने ॥ १६ ॥ नमो वराहवपुषे नमः पंचास्यरूपिणे ॥ वामनाय नमस्तुभ्यं जमदग्निसुताय ते ॥ १७ ॥ राघवाय नमस्तुभ्यं बलभद्राय ते नमः ॥ कृष्णाय कल्कये तुभ्यं नमो विज्ञानरूपिणे ॥ १८ ॥ रक्ष मां करुणासिंधो नारायण जगत्पते ॥ निर्लज्जं कृपणं क्रूरं पिशुनं दांभिकं कृशम् ॥ १९ ॥ परदारपरद्रव्यपरक्षेत्रैकलोलुपम् ॥ असूयाविष्टमनसं मां रक्ष कृपया हरे ॥ २० ॥ इति स्तुतो हरिः साक्षान्मुद्गलेन द्विजोत्तमाः ॥ तमाह मुद्गलमुनिं मेघगंभीरया गिरा ॥ २१ ॥ श्रीहरिरुवाच ॥ ॥ प्रीतोऽस्म्यनेन स्तोत्रेण मुद्गल क्रतुना च ते ॥ प्रत्यक्षेण हविर्भोक्तुमहं ते क्रतुमागतः ॥ २२ ॥ इत्युक्तो हरिणा तत्र मुद्गलस्तुष्टमानसः ॥ उवाचाधोक्षजं विप्रो भक्त्या परमया युतः ॥ २३ ॥ ॥ मुद्गल उवाच ॥ ॥ कृतार्थोऽस्मि हृषीकेश पत्नी मे धन्यतां ययौ ॥ अद्य मे सफलं जन्म ह्यद्य मे सफलं तपः ॥ २४ ॥ अद्य मे सफलो वंशो ह्यद्य मे सफलाः सुताः ॥ आश्रमः सफलोऽद्यैव सर्व

१ क्रियाः–इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कर्तव्यं भूतिमिच्छता ॥ ९५ ॥ अतोऽद्यापि दुराचार न कुर्याद्यो महालयम् ॥ भूतवेतालकादिभ्यो भूयात्तस्य महद्भयम् ॥ ९६ ॥ महालयस्या करणाद्वेतालत्वमवाप्नुयात् ॥ त्वयाविष्टमिदं भूतं विप्रः सन्पूर्वजन्मनि ॥ ९७ ॥ नाम्ना वेदनिधिः पुण्यो भरद्वाजस्य चात्मनः ॥ कुशस्थल्यभिधाने च वसन्ग्रामे महामनाः ॥ ९८ ॥ न चकार विधानेन श्राद्धमेतन्महालयम् ॥ ततोयं पितॄणां शापाद्वेतालत्वमवाप्तवान् ॥ ९९ ॥ तस्माद्भाद्रपदे मासे दुराचार पितॄन्प्रति ॥ ब्राह्मणान्भोजयान्नेन षड्रसेन सभक्तिकम् ॥ २०० ॥ दारिद्र्यं तेन ते न स्यात्सुखीचैव भवान्भवेत् ॥ महापातकिसंसर्गं मा कुरु त्वमितः परम् ॥ १ ॥ त्वयानुभूतं यद्दुःखं वेतालग्रहणोद्भवम् ॥ गच्छ त्वमनुजानामि स्वदेशं प्रति मा चिरम् ॥ २ ॥ इतीरितः स मुनिना दत्तात्रेयेण योगिना ॥ तं प्रणम्य ययौ देशं कृतार्थेनांतरात्मना ॥ ३ ॥ गत्वा च स्वगृहं विप्रो दुराचारो द्विजोत्तमाः ॥ विमुक्तवेतालभयो गतपातककंचुकः ॥ ४ ॥ दत्तात्रेयेरितेनासौ मार्गेण प्रीतमानसः ॥ त्यक्तपातकिसंसर्गः स्वाश्रमाचारतत्परः ॥ ५ ॥ रामचंद्रधनुष्कोटितीर्थमज्जनगौरवात् ॥ देहांते परमां मुक्तिं दुराचारो ययौ तदा ॥ ६ ॥ ॥ श्रीसूत उवाच ॥ ॥ एवं वः कथितं पुण्यं दुराचरविमोक्षणम् ॥ सेयं पुण्या धनुष्कोटिर्महापातकनाशिनी ॥ ७ ॥ यत्र हि स्नानमात्रेण दुराचारो विमोचितः ॥ अथवा धनुषः कोटेरियत्ता किं हि वै भवेत् ॥ ८ ॥ या निष्कृतिविहीनानि पापान्यपि विनाशयेत् ॥ प्रायश्चित्तविहीनानि यानि पापानि संति वै ॥ ९ ॥ तान्यप्यत्र विनश्यंति धनुष्कोटौ निमज्जनात् ॥ शूद्रेण पूजितं लिंगं विष्णुं वा यो नमेद्द्विजः ॥ २१० ॥ प्रायश्चितं न तस्योक्तं स्मृतिभिः परमर्षिभिः ॥ नश्येत्तस्यापि तत्पापं धनुष्कोटिनिमज्जनात् ॥ ११ ॥ विप्रनिंदाकृतां नणां प्रायश्चित्तं न विद्यते ॥ विश्वासघातकानां च कृतघ्नानां न निष्कृतिः ॥ १२ ॥ भ्रातृभार्यारतानां च प्रायश्चित्तं न विद्यते ॥ शूद्रान्ने नियतानां च श्रुतिनिंदारतात्मनाम् ॥ १३ ॥ कन्याविक्रयिणां विप्रा हयविक्रयिणां तथा ॥ देवविक्रयिणां वेदविक्रये निरतात्मनाम् ॥ १४ ॥ धर्मविक्रयिणां पुंसां व्रतविक्रयिणां तथा ॥ तीर्थविक्रयिणां पुंसां प्रायश्चित्तं न विद्यते ॥ १५ ॥ तेषां पापानि नश्यंति धनुष्कोटौ निमज्जनात् ॥ मातृद्रोहपितृद्रोहयतिद्रोहरतात्मनाम् ॥ १६ ॥ गुरुनिंदापराणां च शिवनिंदारतात्मनाम् ॥ विष्णुनिंदापराणां च यतिनिंदारतात्मनाम् ॥ ॥ १७ ॥ सत्कथादूषकाणां च प्रायश्चित्तं न विद्यते ॥ तेषां चात्र धनुष्कोटौ स्नानाच्छुद्धिर्भविष्यति ॥ १८ ॥ एवं वः कथितं विप्रा धनुष्कोटेस्तु वैभवम् ॥ यच्छ्रुत्वा सर्वपापेभ्यो मुच्यते मानवो भुवि ॥ २१९ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे सेतुमाहात्म्ये धनुष्कोटिप्रशंसायां दुराचारसंसर्गदोषशांतिवर्णनंनाम षट्त्रिंशोऽध्यायः ॥ ३६ ॥ ॥ छ ॥ ॥ श्रीसूत उवाच ॥ ॥ भोभोस्तपो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

च यथाशक्ति दद्याद्वित्तानुसारतः ॥ ४१ ॥ तस्मिन्महालये श्राद्धे वित्तशाठ्यं न कारयेत् ॥ दक्षिणा खलु यज्ञानां कथितेयं पुरोगवा ॥ ४२ ॥ अनः
पुरोगवैर्हीनं करिष्यति यथाध्वनि ॥ अदक्षिणं तथा सोयं पितृयज्ञोऽपि रिष्यति॥४३॥तस्माद्यज्ञेषु दातव्या दक्षिणाल्पा हि जानता ॥ विधवाभिरपि
स्त्रीभिरपुत्राभिर्महालयः ॥ ४४ ॥ भर्त्तॄनुद्दिश्य कर्तव्यो भूरिभोजनकर्मणा ॥ अन्यथा धर्महानिः स्यान्नरकं च महद्भवेत् ॥ ४५ ॥ मासि भाद्रपदे
प्राप्ते यो न कुर्यान्महालयम् ॥ तत्कुलं नाशमाप्नोति ब्रह्महत्यां च विंदति ॥ ४६ ॥ महालयं प्रकुर्वंति श्रद्धावंतः पितॄन्प्रति ॥ न तेषां संततिच्छेदो
भवेत्संपदभंगुरा ॥ ४७ ॥ आलयं ह्यास्पदं प्रोक्तं महः कल्याणमुच्यते ॥ कल्याणानामास्पदत्वान्महालयमुदीर्यते ॥ ४८ ॥ तस्मान्महालयं
मर्त्यः कुर्यात्कल्याणसिद्धये ॥ अमंगलं भवेत्तस्य न कुर्याच्चेन्महालयम् ॥ ४९ ॥ न कुर्याद्यद्यपि श्राद्धं मातापित्रोर्मृतेऽहनि ॥ कुर्यान्महालयश्राद्ध
मस्मरन्नेव बुद्धिमान् ॥१५०॥ कर्तुं महालयश्राद्धं यदि शक्तिर्न विद्यते ॥ याचित्वापि नरः कुर्यात्पितॄणां तन्महालयम् ॥५१॥ ब्राह्मणेभ्यो विशिष्टे
भ्यो याचेत धनधान्यकम् ॥ पतितेभ्यो न गृह्णीयाद्धनधान्यं कदाचन ॥५२॥ ब्राह्मणेभ्यो न लभ्येत यदि धान्यधनादिकम् ॥ याचेत क्षत्रियश्रेष्ठा
न्महालयचिकीर्षया ॥ ५३ ॥ दातारश्चेन्न भूपाला वैश्येभ्योऽपि च याचयेत् ॥ वैश्या अपि हि दातारो यदि लोके न संति वै ॥ ५४ ॥ दद्याद्भाद्र
पदे मासे गोग्रासं पितृतृप्तये ॥ अथ वा रोदनं कुर्याद्बहिर्निर्गत्य कानने ॥ ५५ ॥ पाणिभ्यामुदरं स्वीयमाहत्याश्रूणि वर्तयन् ॥ तेष्वरण्यप्रदेशेषु
उच्चैरेवं वदेन्नरः ॥ ५६ ॥ शृण्वंतु पितरः सर्वे मत्कुलीना वचो मम ॥ अहं दरिद्रः कृपणो निर्लज्जः क्रूरकर्मकृत् ॥ ५७ ॥ प्राप्तो भाद्रपदो मासः
पितॄणां प्रीतिवर्द्धनः ॥ कर्त्तुं महालयश्राद्धं न च मे शक्तिरस्ति वै ॥ ५८ ॥ भ्रमित्वापि महीं कृत्स्नां न मे किंचन लभ्यते ॥ अतो महालयश्राद्धं
न युष्माकं करोम्यहम् ॥ ५९ ॥ क्षमध्वं मम तद्यूयं भवंतो हि दयापराः ॥ दरिद्रो रोदनं कुर्यादेवं काननभूमिषु ॥ १६० ॥ तस्य रोदनमाकर्ण्य
पितरस्तत्कुलोद्भवाः ॥ हृष्टास्तृप्तिं प्रयांत्येव सुधां पीत्वैव निर्जराः ॥ ६१ ॥ महालयार्थे विप्रौघे भुक्ते तृप्तिर्यथा भवेत् ॥ गोग्रासारण्यरुदितैः पितृ
तृप्तिस्तथा भवेत् ॥ ६२ ॥ मासि भाद्रपदे विघ्नो यदि स्यात्सूतकादिना ॥ यातेषु सूतकाहःसु कुर्यादावृश्चिकावधि ॥ ६३ ॥ बुधो महालय
स्यार्थे ब्राह्मणान्वृणुयान्नव ॥ पित्रर्थमेकं वृणुयात्पितामहकृते तथा ॥ ६४ ॥ प्रपितामहमुद्दिश्य तथैकं वृणुयाद्द्विजः ॥ तथा मातामहार्थं तु एकं वै
वृणुयाद्द्विजम् ॥ ६५ ॥ मातुःपितामहार्थं च वृणुयाद्द्विजमेककम् ॥ वृणुयादेकमुद्दिश्य मातुश्च प्रपितामहम् ॥ ६६ ॥ तथैव विश्वेदेवार्थे वृणुयाद्द्वौद्वि
जोत्तमौ ॥ विष्णवर्थं ब्राह्मणं त्वेकं वृणुयाद्वेदवित्तमम् ॥६७॥ एवं महालयश्राद्धे ब्राह्मणान्वृणुयान्नव ॥ अथवा पितृवर्गार्थं वरयेद्विप्रमेककम् ॥ ६८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मातामहादीन्वोद्दिश्य वरयेद्विप्रमेककम् ॥ विश्वेदेवार्थमेकं च विष्णवर्थं च तथापरम् ॥ ६९ ॥ एवं वै वरयेद्विप्राश्चतुरस्तु महालये ॥ ब्राह्मणान्वे दसंपन्नान्सुशीलान्वरयेत्सुधीः ॥ १७० ॥ दुःशीलान्वरयेद्यस्तु स वै श्राद्धस्य घातकः ॥ मासि भाद्रपदे प्राप्ते कृष्णपक्षे विशेषतः ॥ ७१ ॥ कुर्या न्महालयश्राद्धं यो नरः श्रद्धया सह ॥ स स्नातः सर्वतीर्थेषु दुराचार महामते ॥ ७२ ॥ अग्निष्टोमादयो यज्ञाः शतमप्यमुना कृताः ॥ तुलापुरुषमुख्यानि दानान्यपि कृतानि वै ॥ ७३ ॥ चांद्रायणादिकृच्छ्राणि कृतान्येव न संशयः ॥ चतुर्णां सांगवेदानां पारायणफलं लभेत् ॥ ॥ ७४ ॥ गायत्र्यादिमहामंत्रजपपुण्यं लभेत्तथा ॥ इतिहासपुराणानां पारायणफलं लभेत् ॥ ७५ ॥ महालयसमं पुण्यं वृत्तं नास्ति महीतले ॥ ब्रह्मविष्णुमहेशानलोकप्राप्तिर्महालयात् ॥ ७६ ॥ महालयादिकं श्राद्धं नित्यं काम्यमपीष्यते ॥ तस्मादकरणे तस्य प्रत्यवायो महान्भवेत् ॥ ७७ ॥ करणादिष्टसिद्धिश्च भविष्यति न संशयः ॥ महालयस्य करणाद्भूतवेतालकादयः ॥ ७८ ॥ अपस्मारग्रहाश्चापि शाकिनीडाकिनीगणाः ॥ यातुधानाः पिशाचाश्च वेतालाश्च भयानकाः ॥ ७९ ॥ नश्यंति तत्क्षणादेव भूतान्यन्यानि वै तथा ॥ महालयस्यकर णाद्विपुलां श्रियमश्नुते ॥ १८० ॥ पुरा दशरथो राजा वसिष्ठस्योपदेशतः ॥ मासि भाद्रपदे प्राप्ते कृत्वा श्राद्धं महालयम् ॥ ८१ ॥ रामादींश्च तुरः पुत्रान्प्राप्तवांल्लोकसंमतान् ॥ विश्वातिशायिनीं लक्ष्मीं प्रपेदे कीर्तिमुत्तमाम् ॥ ८२ ॥ महालयस्य करणाद्ययाती राजसत्तमः ॥ यदुमुख्या न्महापुत्रान्प्रपेदे वंशवर्द्धनान् ॥ ८३ ॥ अनन्यदुर्लभं स्वर्गं प्रपेदे श्राद्धपुण्यतः ॥ दुष्यंतो भरतं लेभे महालयविधानतः ॥ ८४ ॥ महालय विधानेन दमयंतीपतिर्नलः ॥ कृच्छ्रं महत्तरं तीर्त्वा पुनर्लेभे महीमिमाम् ॥ ८५ ॥ निजग्राह कलिं घोरं पुष्करं चाप्यरातिनम् ॥ इन्द्रसेनाभिधानं च पुत्रं लेभेऽतिधार्मिकम् ॥ ८६ ॥ हरिश्चंद्रो महाराजो महालयविधानतः ॥ विश्वामित्रकृताद्दुःखान्मुक्तः सत्यवतां वरः ॥ ८७ ॥ लेभे चंद्रवतीं भार्यां लोहिताश्वं सुतं पुनः ॥ महालयविधानेन कृतवीर्यसुतो बली ॥ ८८ ॥ अष्टादशानां द्वीपानामाधिपत्यमवाप्तवान् ॥ रामोऽपि दण्डकारण्ये महालयविधानतः ॥ ८९ ॥ हत्वा तु रावणं संख्ये सीतां पुनरवाप्तवान् ॥ महालयस्य करणाद्धर्मपुत्रो युधिष्ठिरः ॥ १९० ॥ दुःखसागरमुत्तीर्य धार्तराष्ट्राञ्जघान च ॥ महालयस्य करणाद्वसिष्ठो मुनिसत्तमः ॥ ९१ ॥ अत्रिर्भृगुश्च कुत्सश्च गौतमश्चांगिरास्तथा ॥ कश्यपश्च भरद्वाजो विश्वा मित्रश्च कुम्भजः ॥ ९२ ॥ पराशरो मृकण्डश्च ये चान्ये मुनिसत्तमाः ॥ विधाय विधिवच्छ्राद्धं महालयमनुत्तमम् ॥ ९३ ॥ अणिमाद्यष्टसिद्धीनां व्रतानां तपसां तथा ॥ निवासभूता संजातास्तथा विश्वातिशायिनः ॥ ९४ ॥ जीवन्मुक्ताश्च ते सर्वे ह्यभवन्मुनिसत्तमाः ॥ अतो महालयश्राद्धं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कर्तव्यं भूतिमिच्छता ॥ ९५ ॥ अतोऽद्यापि दुराचार न कुर्याद्यो महालयम् ॥ भूतवेतालकादिभ्यो भूयात्तस्य महद्भयम् ॥ ९६ ॥ महालयस्या करणाद्वेतालत्वमवाप्नुयात् ॥ त्वयाविष्टमिदं भूतं विप्रः सन्पूर्वजन्मनि ॥ ९७ ॥ नाम्ना वेदनिधिः पुण्यो भरद्वाजस्य चात्मनः ॥ कुशस्थलयभि धाने च वसन्ग्रामे महामनाः ॥ ९८ ॥ न चकार विधानेन श्राद्धमेतन्महालयम् ॥ ततोयं पितॄणां शापाद्वेतालत्वमवाप्तवान् ॥ ९९ ॥ तस्माद्भाद्र पदे मासे दुराचार पितॄन्प्रति ॥ ब्राह्मणान्भोजयान्नेन षड्रसेन सभक्तिकम् ॥ २०० ॥ दारिद्र्यं तेन ते न स्यात्सुखीचैव भवान्भवेत् ॥ महापातकि संसर्गं मा कुरु त्वमितः परम् ॥ १ ॥ त्वयानुभूतं यद्दुःखं वेतालग्रहणोद्भवम् ॥ गच्छ त्वमनुजानामि स्वदेशं प्रति मा चिरम् ॥ २ ॥ इतीरितः स मुनिना दत्तात्रेयेण योगिना ॥ तं प्रणम्य ययौ देशं कृतार्थेनांतरात्मना ॥ ३ ॥ गत्वा च स्वगृहं विप्रो दुराचारो द्विजोत्तमः ॥ विमुक्तवेताल भयो गतपातककंचुकः ॥ ४ ॥ दत्तात्रेयेरितेनासौ मार्गेण प्रीतमानसः ॥ त्यक्तपातकिसंसर्गः स्वाश्रमाचारतत्परः ॥ ५ ॥ रामचंद्रधनुष्कोटितीर्थ मज्जनगौरवात् ॥ देहांते परमां मुक्तिं दुराचारो ययौ तदा ॥ ६ ॥ ॥ श्रीसूत उवाच ॥ ॥ एवं वः कथितं पुण्यं दुराचरविमोक्षणम् ॥ सेयं पुण्या धनुष्कोटिर्महापातकनाशिनी ॥ ७ ॥ यत्र हि स्नानमात्रेण दुराचारो विमोचितः ॥ अथवा धनुषः कोटेरियत्ता किं हि वै भवेत् ॥ ८ ॥ या निष्कृ तिविहीनानि पापान्यपि विनाशयेत् ॥ प्रायश्चित्तविहीनानि यानि पापानि संति वै ॥ ९ ॥ तान्यप्यत्र विनश्यंति धनुष्कोटौ निमज्जनात् ॥ शूद्रेण पूजितं लिंगं विष्णुं वा यो नमेद्द्विजः ॥ २१० ॥ प्रायश्चितं न तस्योक्तं स्मृतिभिः परमर्षिभिः ॥ नश्येत्तस्यापि तत्पापं धनुष्कोटिनिमज्ज नात् ॥ ११ ॥ विप्रनिंदाकृतां नृणां प्रायश्चित्तं न विद्यते ॥ विश्वासघातकानां च कृतघ्नानां न निष्कृतिः ॥ १२ ॥ भ्रातृभार्यारतानां च प्रायश्चित्तं न विद्यते ॥ शूद्रान्ने नियतानां च श्रुतिनिंदारतात्मनाम् ॥ १३ ॥ कन्याविक्रयिणां विप्रा हयविक्रयिणां तथा ॥ देवविक्रयिणां वेदविक्रये निर तात्मनाम् ॥ १४ ॥ धर्मविक्रयिणां पुंसां व्रतविक्रयिणां तथा ॥ तीर्थविक्रयिणां पुंसां प्रायश्चित्तं न विद्यते ॥ १५ ॥ तेषां पापानि नश्यंति धनुष्कोटौ निम ज्जनात् ॥ मातृद्रोहपितृद्रोहयतिद्रोहरतात्मनाम् ॥ १६ ॥ गुरुनिंदापराणां च शिवनिंदारतात्मनाम् ॥ विष्णुनिंदापराणां च यतिनिंदारतात्मनाम् ॥ ॥ १७ ॥ सत्कथादूषकाणां च प्रायश्चित्तं न विद्यते ॥ तेषां चात्र धनुष्कोटौ स्नानाच्छुद्धिर्भविष्यति ॥ १८ ॥ एवं वः कथितं विप्रा धनुष्कोटेस्तु वैभवम् ॥ यच्छ्रुत्वा सर्वपापेभ्यो मुच्यते मानवो भुवि ॥ २१९ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे सेतु माहात्म्ये धनुष्कोटिप्रशंसायां दुराचारसंसर्गदोषशांतिवर्णनंनाम षट्त्रिंशोऽध्यायः ॥ ३६ ॥ ॥ छ ॥ ॥ श्रीसूत उवाच ॥ ॥ भोभोस्तपो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

भक्त्या श्राद्धं कुर्यान्महालयम् ॥ ८८ ॥ संहर्ता सर्वलोकस्य तस्य रुद्रः प्रसीदति ॥ रुद्रस्य सर्वसंहर्तुः प्रसादेन जगत्पतेः ॥ ८९ ॥ शत्रून्पराजय
त्येष श्राद्धकर्ता निरन्तरम् ॥ ब्रह्महत्यायुतं चापि तस्य नश्यति तत्क्षणात् ॥ ९० ॥ अग्निष्टोमादियज्ञानां फलमाप्नोति पुष्कलम् ॥ एकादश्यां
नरो भक्त्या यो न कुर्यान्महालयम् ॥ ९१ ॥ तस्य वै विमुखो रुद्रो न प्रसीदति कर्हिचित् ॥ सर्वतो वर्धमानाश्च बाधन्ते शत्रवो ह्यमुम् ॥ ९२ ॥
अग्निष्टोमादिका यज्ञाः कृताश्च बहुदक्षिणाः ॥ निष्फला एव तस्य स्युर्भस्मनि न्यस्तहव्यवत् ॥ ९३ ॥ ब्रह्मघातकतुल्यः स्याच्छ्राद्धाकरणदो
षतः ॥ एकादश्यां तिथौ यस्तु श्राद्धं कुर्यान्महालयम् ॥ ९४ ॥ द्विशतं कल्पसाहस्रं तृप्यंति पितरोऽस्य वै ॥ संततिं चाप्यविच्छिन्नां दद्युः पितृ
गणाः सदा ॥ ९५ ॥ द्वादश्यां तु तिथौ मर्त्यः कुर्याच्छ्राद्धं महालयम् ॥ तस्य लक्ष्मीपतिः साक्षात्प्रसीदति जनार्दनः ॥ ९६ ॥ प्रसन्ने सति
देवेशे देवदेवे जनार्दने ॥ चराचरं जगत्सर्वं प्रीतमेव न संशयः ॥ ९७ ॥ भूमिर्हरिप्रिया चास्य सस्यं संवर्द्धयत्यपि ॥ लक्ष्मीश्च वर्द्धते तस्य मंदिरे
हरिवल्लभा ॥ ९८ ॥ गदा कौमोदकीनाम नारायणकरस्थिता ॥ अपस्मारादिभूतानि नाशयत्येव सर्वदा ॥ ९९ ॥ तीक्ष्णधारं तथा चक्रं शत्रूनस्य
दहत्यपि ॥ यातुधानपिशाचादीञ्छंखश्चास्य व्यपोहति ॥१००॥ एवं सर्वात्मना पीडां वारयत्यस्य केशवः ॥ महालयं न कुर्याद्यो द्वादश्यां मनुजा
धमः ॥ १ ॥ तस्य क्षेत्राणि संपच्च विनश्यंति न संशयः ॥ अपस्मारादिभूतानि शत्रवश्च महाबलाः ॥२॥ यातुधानाश्च बाधन्ते तं वै विष्णुपराङ्मु
खम् ॥ पात्यते नरके चापि अस्थिभेदननामके ॥३॥ द्वादश्यां भक्तियुक्तो यः श्राद्धं कुर्यान्महालयम् ॥ षट्शतं कल्पसाहस्रं प्रीणंति पितरोऽस्य वै ॥४॥
संततिं चाप्यविच्छिन्नां पितरोऽस्मै ददत्यपि॥त्रयोदश्यां नरो भक्त्या श्राद्धं कुर्यान्महालयम् ॥५॥ प्रसीदत्यस्य भगवान्कंदर्पो रतिनायकः ॥ स्रग्चंदना
दयो भोगा ललनाश्च मनोरमाः ॥६॥ कामदेवप्रसादेन तस्य सिद्ध्यंति सर्वदा ॥ आजन्ममरणांतं च सुखमेव स विंदते ॥७॥ यो न कुर्यात्त्रयोदश्यां न
च श्राद्धं महालयम् ॥ कामदेवोऽस्य विमुखः स्त्रियो भोगांश्च नाशयेत् ॥ ८ ॥ अंगारशय्याभ्रमणे नरके पातयत्यमुम् ॥ पितॄनुद्दिश्य यः कुर्यात्त्र
योदश्यां महालयम् ॥ ९ ॥ सहस्रकल्पसाहस्रं प्रीणंति पितरोऽस्य वै ॥ संततिं चाप्यविच्छिन्नां दद्युः पितृगणास्तदा ॥ १० ॥ चतुर्दश्यां नरो
भक्त्या श्राद्धं कुर्यान्महालयम् ॥ तस्याभीष्टप्रदानाय जागर्ति भगवाञ्छिवः ॥ ११ ॥ उपदिश्य शिवज्ञानं सायुज्यं च ददात्यपि ॥ सुरापानायुतं
चापि स्वर्णस्तेयायुतं तथा ॥ १२ ॥ नश्यंति तत्क्षणादेव चतुर्दश्यां महालयात् ॥ चण्डालवृषलस्त्रीणां संगदोषोऽपि नश्यति ॥ १३ ॥ अश्वमे
धसहस्रस्य पौंडरीकायुतस्य च ॥ पुष्कला फलसिद्धिः स्याच्चतुर्दश्यां महालयात् ॥ १४ ॥ यो न कुर्याच्चतुर्दश्यां श्राद्धमेतन्महालयम् ॥ स कल्प

CC-0. In Public Domain. Digitization by eGangotri

भाद्रपदमासमारभ्य वृश्चिकावधि ॥ महालयस्य कथितो मुनिभिस्तत्त्वदर्शिभिः ॥ ३७ ॥ मासो भाद्रपदः कालस्तत्रापि हि विशिष्यते ॥ कृष्ण पक्षो विशिष्टः स्याद्दुराचारक तत्र वै ॥ ३८ ॥ तस्मिञ्छुभे कृष्णपक्षे प्रथमायां तथा तिथौ ॥ श्राद्धं महालयं कुर्याद्यो नरो भक्तिपूर्वकम् ॥ ३९ ॥ तस्य प्रीणाति भगवान्पावकः सर्वपावनः ॥ स वह्निलोकमाप्नोति वह्निना सह मोदते ॥ ४० ॥ तस्मै च ज्वलनो देवः सर्वैश्वर्यं ददात्यपि ॥ प्रथ मायां तिथौ मर्त्यो यो न कुर्यान्महालयम् ॥ ४१ ॥ वह्निर्गृहं दहेत्तस्य श्रियं क्षेत्रादिकं तथा ॥ वेदज्ञे ब्राह्मणे भुक्ते प्रथमायां महालये ॥ ४२ ॥ दश कल्पसहस्राणि पितरो यांति तृप्तताम् ॥ द्वितीयायां तु यो भक्त्या कुर्याच्छ्राद्धं महालयम् ॥ ४३ ॥ तस्य प्रीणाति भगवान्भवानीपतिरीश्वरः ॥ स कैलासमवाप्नोति शिवेन सह मोदते ॥ ४४ ॥ विपुलां संपदं तस्मै प्रीतो दद्यान्महेश्वरः ॥ द्वितीयायां तिथौ मर्त्यो यो न कुर्यान्महालयम् ॥ ४५ ॥ तस्य वै कुपितः शंभुर्नाशयेद्ब्रह्मवर्चसम् ॥ रौरवं कालसूत्राख्यं नरकं चास्य दास्यति ॥ ४६ ॥ वेदज्ञे ब्राह्मणे भुक्ते द्वितीयायां महालये ॥ विंशत्कल्प सहस्राणि पितरो यांति तृप्तताम् ॥ ४७ ॥ अनुग्रहात्पितॄणां च संततिश्चास्य वर्द्धते ॥ तृतीयायां नरो भक्त्या कुर्याच्छ्राद्धं महालयम् ॥ ४८ ॥ तस्य प्रीणाति भगवाँल्लोकपालो धनाधिपः ॥ महापद्मादिनिधयो वर्तंते तस्य वै वशे ॥ ४९ ॥ तस्यानुगास्त्रयो देवा ब्रह्मविष्णुमहेश्वराः ॥ तृती यायां तिथौ मर्त्यो यो न कुर्यान्महालयम् ॥ ५० ॥ धनदो भगवांस्तस्य संपदं हरति क्षणात् ॥ दारिद्र्यं च ददात्यस्मै बहुदुःखसमाकुलम् ॥ ५१ ॥ तृतीयायां तिथौ मर्त्यो यः करोति महालयम् ॥ तृप्यंति पितरस्तस्य त्रिंशत्कल्पसहस्रकम् ॥ ५२ ॥ चतुर्थ्यां तु नरो भक्त्या श्राद्धं कुर्यान्महालयम् ॥ तस्य प्रीणाति भगवान्हेरंबः पार्वतीसुतः ॥ ५३ ॥ तस्य विघ्नाश्च नश्यंति गजवक्त्रप्रसादतः ॥ चतुर्थ्यां तु तिथौ मर्त्यो यो न कुर्यान्महालयम् ॥ ५४ ॥ विघ्नेशो भगवांस्तस्य सदा विघ्नं करोति हि ॥ चण्डकोलाहलाभिख्ये नरके च पतत्यथ ॥ ५५ ॥ चतुर्थ्यां वै तिथौ मर्त्यो यः करोति महालयम् ॥ पितरः कल्पसाहस्रं चत्वारिंशत्प्रहर्षिताः ॥ ५६ ॥ बहून्पुत्रान्प्रदास्यंति श्राद्धकर्तुर्निरंतरम् ॥ पंचम्यां तु तिथौ भक्त्या यो न कुर्यान्महालयम् ॥ ५७ ॥ तस्य लक्ष्मीर्भगवती परित्यजति मंदिरम् ॥ अलक्ष्मीः कलहाधारा तस्य प्रादुर्भवेद्गृहे ॥ ५८ ॥ पंचम्यां तु तिथौ मर्त्यो यः करोति महालयम् ॥ तस्य तृप्यंति पितरः पंचकल्पसहस्रके ॥ ५९ ॥ संततिं चाप्यविच्छिन्नामस्मै दास्यंतितर्पिताः ॥ पार्वती च प्रसन्ना स्यान्महदैश्वर्यदायिनी ॥ ६० ॥ षष्ठ्यां तिथौ नरो भक्त्या श्राद्धं कुर्यान्महालयम् ॥ तस्य प्रीणाति भगवान्षण्मुखः पार्वती सुतः ॥ ६१ ॥ तस्य पुत्राश्च पौत्राश्च षण्मुखस्य प्रसादतः ॥ ग्रहैर्बालग्रहैश्चैव न बाध्यंते कदाचन ॥ ६२ ॥ षष्ठ्यां तिथौ नरो भक्त्या यो न

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कुर्यान्महालयम् ॥ तस्य स्कन्दो महासेनो विमुखः स्यान्न संशयः ॥ ६३ ॥ गर्भान्निर्गतमात्रैव प्रजा तस्य विनश्यति ॥ पूतनादिग्रहकुलैर्बाध्यते च निरंतरम् ॥ ६४ ॥ वह्निज्वालाप्रवेशाख्ये नरके च पतत्यधः ॥ षष्ठ्यां तिथौ यः श्रद्धावान्कुर्याच्छ्राद्धं महालयम् ॥ ६५ ॥ षष्टिकल्पसहस्रं तु पितरो यांति तृप्तताम् ॥ पुत्रानपि प्रदास्यंति संपदं विपुलां तथा ॥ ६६ ॥ सप्तम्यां तु तिथौ मर्त्यः श्राद्धं कुर्यान्महालयम् ॥ हिरण्यपाणिर्भगवानादित्यस्तस्य तुष्यति ॥ ६७ ॥ अरोगो दृढगात्रः स्याद्भास्करस्य प्रसादतः ॥ हिरण्यपाणिर्भगवान्हिरण्यं पाणिना स्वयम् ॥ ॥ ६८ ॥ महालयश्राद्धकर्त्रे ददाति प्रीतमानसः ॥ सप्तम्यां तु तिथौ भक्त्या यो न कुर्यान्महालयम् ॥ ६९ ॥ व्याधिभिः क्षयरोगाद्यै र्बाध्यते स दिवानिशम् ॥ तीक्ष्णधारास्त्रशय्याख्ये नरके च पतत्यधः ॥ ७० ॥ सप्तम्यां यो नरो भक्त्या श्राद्धं कुर्यान्महालयम् ॥ सप्ततिं कल्पसाहस्रं प्रीणंति पितरोऽस्य वै ॥ ७१ ॥ संततिं चाप्यविच्छिन्नां दद्युः पितृगणाः सदा ॥ अष्टम्यां तु तिथौ मर्त्यः श्राद्धं कुर्यान्महालयम् ॥ ७२ ॥ मृत्युंजयः कृत्तिवासास्तस्य प्रीणाति शंकरः ॥ करस्थं तस्य कैवल्यं शंकरस्य प्रसादतः ॥ ७३ ॥ महालयेन श्राद्धेन तुष्टे साक्षात्त्रियंबके ॥ चतुर्दशसु लोकेषु दुर्लभं तस्य किं भवेत् ॥ ७४ ॥ महालयं न कुर्याद्वै योऽष्टम्यां मूढचेतनः ॥ संसारसागरे घोरे सदा मज्जति दुःखितः ॥ ७५ ॥ कदाचिदपि तस्येष्टं नैव सिद्ध्यति भूतले ॥ वैतरिण्याख्यनरके पतत्याचंद्रतारकम् ॥ ७६ ॥ योऽष्टम्यां श्रद्धया श्राद्धं नरः कुर्यान्महालयम् ॥ अशीतिकल्पसाहस्रं तृप्यंति पितरोऽस्य वै ॥ ७७ ॥ आशीर्भिर्वर्द्धयंत्येनं विघ्नश्चास्य व्यपोहति ॥ संततिं चाप्यविच्छिन्नां दद्युः पितृगणाः सदा ॥ ७८ ॥ नवम्यां तु तिथौ मर्त्यः श्राद्धं कुर्यान्महालयम् ॥ दुर्गादेवी भगवती तस्य प्रीणाति शांभवी ॥ ७९ ॥ क्षयापस्मारकुष्ठादीन्क्षुद्रप्रेतपिशाचकान् ॥ नाशयेत्तस्य सन्तुष्टा दुर्गा महिषमर्दिनी ॥ ८० ॥ नवम्यां तु तिथौ मर्त्यो यो न कुर्यान्महालयम् ॥ अपस्मारेण पीड्येत तथैव ब्रह्मरक्षसा ॥ ८१ ॥ अभिचारार्थकृत्याभिर्बाध्येत च निरन्तरम् ॥ नवम्यां यस्तिथौ मर्त्यः श्राद्धं कुर्यान्महालयम् ॥ ८२ ॥ नवतिं कल्पसाहस्रं तृप्यन्ति पितरोऽस्य वै ॥ संततिं चाप्यविच्छिन्नां दद्युः पितृगणाः सदा ॥ ८३ ॥ दशम्यां तु तिथौ मर्त्यः श्राद्धं कुर्यान्महालयम् ॥ तस्यामृतकलश्चन्द्रः षोडशात्मा प्रसीदति ॥ ८४ ॥ औषधीनामधीशेऽस्मिञ्छ्राद्धेनानेन तोषिते ॥ व्रीह्यादीनि तु धान्यानि दद्युरोषधयः सदा ॥ ॥ ८५ ॥ यो न कुर्याद्दशम्यां तु महालयमनुत्तमम् ॥ ओषध्यो निष्फलास्तस्य कृषिश्चाप्यस्य निष्फला ॥ ८६ ॥ दशम्यां यस्तिथौ मर्त्यः श्राद्धं कुर्यान्महालयम् ॥ शतकल्पसहस्राणि तृप्यंति पितरोऽस्य वै ॥ ८७ ॥ संततिं चाप्यविच्छिन्नां दद्युः पितृगणाः सदा ॥ एकादश्यां नरो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भक्त्या श्राद्धं कुर्यान्महालयम् ॥ ८८ ॥ संहर्ता सर्वलोकस्य तस्य रुद्रः प्रसीदति ॥ रुद्रस्य सर्वसंहर्तुः प्रसादेन जगत्पतेः ॥ ८९ ॥ शत्रून्पराजयत्येष श्राद्धकर्ता निरन्तरम् ॥ ब्रह्महत्यायुतं चापि तस्य नश्यति तत्क्षणात् ॥ ९० ॥ अग्निष्टोमादियज्ञानां फलमाप्नोति पुष्कलम् ॥ एकादश्यां नरो भक्त्या यो न कुर्यान्महालयम् ॥ ९१ ॥ तस्य वै विमुखो रुद्रो न प्रसीदति कर्हिचित् ॥ सर्वतो वर्धमानाश्च बाधन्ते शत्रवो ह्यमुम् ॥ ९२ ॥ अग्निष्टोमादिका यज्ञाः कृताश्च बहुदक्षिणाः ॥ निष्फला एव तस्य स्युर्भस्मनि न्यस्तहव्यवत् ॥ ९३ ॥ ब्रह्मघातकतुल्यः स्याच्छ्राद्धाकरणदोषतः ॥ एकादश्यां तिथौ यस्तु श्राद्धं कुर्यान्महालयम् ॥ ९४ ॥ द्विशतं कल्पसाहस्रं तृप्यंति पितरोऽस्य वै ॥ संततिं चाप्यविच्छिन्नां दद्युः पितृगणाः सदा ॥ ९५ ॥ द्वादश्यां तु तिथौ मर्त्यः कुर्याच्छ्राद्धं महालयम् ॥ तस्य लक्ष्मीपतिः साक्षात्प्रसीदति जनार्दनः ॥ ९६ ॥ प्रसन्ने सति देवेशे देवदेवे जनार्दने ॥ चराचरं जगत्सर्वं प्रीतमेव न संशयः ॥ ९७ ॥ भूमिर्हरिप्रिया चास्य सस्यं संवर्द्धयत्यपि ॥ लक्ष्मीश्च वर्द्धते तस्य मंदिरे हरिवल्लभा ॥ ९८ ॥ गदा कौमोदकीनाम नारायणकरस्थिता ॥ अपस्मारादिभूतानि नाशयत्येव सर्वदा ॥ ९९ ॥ तीक्ष्णधारं तथा चक्रं शत्रूनस्य दहत्यपि ॥ यातुधानपिशाचादीञ्छंखश्चास्य व्यपोहति ॥१००॥ एवं सर्वात्मना पीडां वारयत्यस्य केशवः ॥ महालयं न कुर्याद्यो द्वादश्यां मनुजाधमः ॥ १ ॥ तस्य क्षेत्राणि संपच्च विनश्यंति न संशयः ॥ अपस्मारादिभूतानि शत्रवश्च महाबलाः ॥२॥ यातुधानाश्च बाधन्ते तं वै विष्णुपराङ्मुखम् ॥ पात्यते नरके चापि अस्थिभेदननामके ॥३॥ द्वादश्यां भक्तियुक्तो यः श्राद्धं कुर्यान्महालयम् ॥ षट्शतं कल्पसाहस्रं प्रीणंति पितरोऽस्य वै ॥४॥ संततिं चाप्यविच्छिन्नां पितरोऽस्मै ददत्यपि॥त्रयोदश्यां नरो भक्त्या श्राद्धं कुर्यान्महालयम् ॥५॥ प्रसीदत्यस्य भगवान्कंदर्पो रतिनायकः ॥ स्रग्चंदनादयो भोगा ललनाश्च मनोरमाः ॥६॥ कामदेवप्रसादेन तस्य सिद्ध्यंति सर्वदा ॥ आजन्ममरणांतं च सुखमेव स विंदते ॥७॥ यो न कुर्यात्त्रयोदश्यां न च श्राद्धं महालयम् ॥ कामदेवोऽस्य विमुखः स्त्रियो भोगांश्च नाशयेत् ॥ ८ ॥ अंगारशय्याभ्रमणे नरके पातयत्यमुम् ॥ पितॄनुद्दिश्य यः कुर्यात्त्रयोदश्यां महालयम् ॥ ९ ॥ सहस्रकल्पसाहस्रं प्रीणंति पितरोऽस्य वै ॥ संततिं चाप्यविच्छिन्नां दद्युः पितृगणास्तदा ॥ १० ॥ चतुर्दश्यां नरो भक्त्या श्राद्धं कुर्यान्महालयम् ॥ तस्याभीष्टप्रदानाय जागर्ति भगवाञ्छिवः ॥ ११ ॥ उपदिश्य शिवज्ञानं सायुज्यं च ददात्यपि ॥ सुरापानायुतं चापि स्वर्णस्तेयायुतं तथा ॥ १२ ॥ नश्यंति तत्क्षणादेव चतुर्दश्यां महालयात् ॥ चण्डालवृषलस्त्रीणां संगदोषोऽपि नश्यति ॥ १३ ॥ अश्वमेधसहस्रस्य पौंडरीकायुतस्य च ॥ पुष्कला फलसिद्धिः स्याच्चतुर्दश्यां महालयात् ॥ १४ ॥ यो न कुर्याच्चतुर्दश्यां श्राद्धमेतन्महालयम् ॥ स कल्प

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

था ॥ ६० ॥ अन्येभ्योपि हि पापेभ्यो विमुक्तोयं सुतस्तव ॥ संशयं मा कुरुष्व त्वं यज्ञदेव द्विजोत्तम ॥ ६१ ॥ इत्युक्त्वा विरराम्राथ सा तु वाग
शरीरिणी ॥ तदाऽशरीरिणीवाक्यं यज्ञदेवः स शुश्रुवान् ॥ ६२ ॥ संतुष्टः पुत्रसहितो रामनाथं निषेव्य च ॥ धनुष्कोटिं नमस्कृत्य पुत्रेण सहि
तस्तदा ॥ ६३ ॥ स्वदेशं प्रययौ हृष्टः स्वग्रामं स्वगृहं तथा ॥ सपुत्रदारः सुचिरं सुखमास्ते सुनिर्वृतः ॥ ६४ ॥ ॥ सिन्धुद्वीप उवाच ॥ ॥
गोमायुवानरावेवं युवयोः कथितं मया ॥ यज्ञदेवसुतस्यास्य सुमतेः परिमोक्षणम् ॥६५॥ पातकेभ्यो महद्भ्यश्च धनुष्कोटौ निमज्जनात् ॥ युवामतो
धनुष्कोटिं गच्छतं पापशुद्धये ॥ नान्यथा पापशुद्धिः स्यात्प्रायश्चित्तायुतैरपि ॥६६॥ ॥ श्रीसूत उवाच ॥ ॥ सिन्धुद्वीपस्य वचनमिति श्रुत्वा द्विजो
त्तमाः॥६७॥सृगालवानरावाशु विलंघितमहापथौ॥धनुष्कोटिं प्रयासेनगत्वा स्नात्वा च तज्जले॥६८॥विमुक्तौ सर्वपापेभ्यो विमानवरसंस्थितौ॥देवैः
कुसुमवर्षेण कीर्यमाणौ सुतेजसौ ॥६९॥ हारकेयूरमुकुटकटकादिविभूषितौ ॥ देवस्त्रीधूयमानाभ्यां चामराभ्यां विराजितौ ॥ गत्वा देवपुरीं रम्यामिंद्र
स्यार्द्धासनं गतौ ॥ ७० ॥ ॥ श्रीसूत उवाच ॥ ॥ युष्माकमेवं कथितं सृगालस्य कपेरपि ॥ ७१ ॥ पापाद्विमोक्षणं विप्रा धनुष्कोटौ निमज्जनात् ॥
भक्त्या य इममध्यायं शृणोति पठतेऽपि वा ॥७२॥ स्नानजं फलमाप्नोति धनुष्कोटौ स मानवः ॥ योगिवृंदैरसुलभां मुक्तिमप्याशु विंदति ॥७३॥
इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे सेतुमाहात्म्ये धनुष्कोटिप्रशंसायां सृगालवानरविमोक्षणवर्णनंनाम पंच
त्रिंशोऽध्यायः ॥ ३५ ॥ ॥ श्रीसूत उवाच ॥ ॥ धनुष्कोटेस्तु माहात्म्यं भूयोऽपि प्रब्रवीम्यहम् ॥ दुराचाराभिधो यत्र स्नात्वा मुक्तो भवद्द्विजाः॥
॥ १ ॥ ॥ मुनय ऊचुः ॥ ॥ दुराचाराभिधः कोऽसौ सूत तत्त्वार्थकोविद ॥ किंच पापं कृतं तेन दुराचारेण वै मुने ॥ २ ॥ कथं वा पातका
न्मुक्तो धनुष्कोटौ निमज्जनात् ॥ एतच्छुश्रूषमाणानां विस्तराद्वद नो मुने ॥ ३ ॥ ॥ श्रीसूत उवाच ॥ ॥ मुनयः श्रूयतां तस्य दुराचारस्य
पातकम् ॥ स्नानेन धनुषः कोटौ यथा मुक्तश्च पातकात् ॥ ४ ॥ दुराचाराभिधो विप्रो गौतमीतीरमाश्रितः ॥ कश्चिदस्ति द्विजाः पापी क्रूरकर्मरतः
सदा ॥ ५ ॥ ब्रह्मघ्नैश्च सुरापैश्च स्तेयिभिर्गुरुतल्पगैः ॥ तदा संसर्गदुष्टोऽसौ तैः साकं न्यवसद्द्विजाः ॥६॥ महापातकिसंसर्गदोषेणास्य द्विजस्य वै ॥
ब्राह्मण्यं सकलं नष्टं निःशेषेण द्विजोत्तमाः ॥ ७ ॥ महापातकिभिः सार्द्धं दिनमेकं तु यो द्विजः ॥ निवसेत्सादरं तस्य तत्क्षणाद्वै द्विजन्मनः ॥
॥ ८ ॥ ब्राह्मणस्य तुरीयांशो नश्यत्येव न संशयः ॥ द्विदिनं सेवनात्स्पर्शाद्दर्शनाच्छयनात्तथा ॥ ९ ॥ भोजनात्सह पंक्तौ च महापातकिभिर्द्विजाः
द्वितीयभागो नश्येत ब्राह्मणस्य न संशयः ॥ १० ॥ त्रिदिनाच्च तृतीयांशो नश्यत्येव न संशयः ॥ चतुर्दिनाच्चतुर्थांशो विलयं याति हि ध्रुव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

व्यासो नारायणांशकः ॥ ३४ ॥ ॥ व्यास उवाच ॥ ॥ दुर्विनीत गतं तेऽद्य पातकं मातृसंगजम् ॥ ३५ ॥ मातुश्च पातकं नष्टं त्वत्संगतिनिमि
त्तजम् ॥ संदेहो नात्र कर्तव्यः सत्यमुक्तं मया तव ॥ ३६ ॥ बांधवाः स्वजनाः सर्वे तथान्ये ब्राह्मणाश्च ये ॥ सर्वे त्वां संग्रहीष्यंति दुर्विनीतां
त्वया सह ॥ ३७ ॥ मत्प्रसादाद्धनुष्कोटौ विशुद्धस्त्वं निमज्जनात् ॥ दारसंग्रहणं कृत्वा गार्हस्थ्यं धर्ममाचार ॥ ३८ ॥ त्यज त्वं प्राणिहिंसां च
धर्मं भज सनातनम् ॥ सेवस्व सज्जनान्नित्यं भक्तियुक्तेन चेतसा ॥ ३९ ॥ संध्योपासनमुख्यानि नित्यकर्माणि न त्यज ॥ निगृहीष्वेन्द्रियग्राम
मर्चयस्व हरं हरिम् ॥ ४० ॥ परापवादं मा ब्रूया मासूयां भज कर्हिचित् ॥ अन्यस्याभ्युदयं दृष्ट्वा संतापं कुरु मा वृथा ॥ ४१ ॥ मातृवत्परदा
रांश्च त्वन्नित्यमवलोकय ॥ अधीतवेदानखिलान्माविस्मर कदाचन ॥ ४२ ॥ अतिथीन्मावमन्यस्व श्राद्धं पितृदिने कुरु ॥ पैशुन्यं मा वदस्व त्वं
स्वप्नेऽप्यन्यस्य कर्हिचित् ॥ ४३ ॥ इतिहासपुराणानि धर्मशास्त्राणि संततम् ॥ अवलोकय वेदांतं वेदांगानि तथा पुनः ॥ ४४ ॥ हरिशंकरना
मानि मुक्तलज्जोऽनुकीर्त्तय ॥ जाबालोपनिषन्मंत्रैस्त्रिपुंड्रोद्धूलनं कुरु ॥ ४५ ॥ रुद्राक्षान्धारय सदा शौचाचारपरो भव ॥ तुलस्या बिल्व
पत्रैश्च नारायणहरावुभौ ॥ ४६ ॥ एकं कालं द्विकालं वा त्रिकालं चार्चयस्व भोः ॥ तुलसीदलसंमिश्रं सिक्तं पादोदकेन च ॥ ४७ ॥ नैवेद्यान्नं
सदा भुंक्ष्व शंभुनारायणाग्रतः ॥ कुरु त्वं वैश्वदेवाख्यं बलिमन्नविशुद्धये ॥ ४८ ॥ यतीश्वरान्ब्रह्मनिष्ठान्तर्पयान्नैर्गृहागतान् ॥ वृद्धानन्यान
नाथांश्च रोगिणो ब्रह्मचारिणः ॥ ४९ ॥ कुरु त्वं मातृशुश्रूषामौपासनपरो भव ॥ पंचाक्षरं महामंत्रं प्रणवेन समन्वितम् ॥ ५० ॥ तथैवाष्टाक्षरं
मंत्रमन्यमंत्रानपि द्विज ॥ जप त्वं प्रयतो भूत्वा ध्यायन्मंत्राधिदेवताः ॥ ५१ ॥ एवमन्यांस्तथा धर्मान्स्मृत्युक्तान्त्सर्वदा कुरु ॥ एवं कृतव्रतस्ते
स्याद्देहांते मुक्तिरप्यलम् ॥ ५२ ॥ इत्युक्तो व्यासमुनिना दुर्विनीतः प्रणम्य तम् ॥ तदुक्तमखिलं कृत्वा देहांते मुक्तिमाप्तवान् ॥ ५३ ॥ तन्मातापि
मृता काले धनुष्कोटिनिमज्जनात् ॥ अवाप परमां मुक्तिमपुनर्भवदायिनीम् ॥ ५४ ॥ ॥ दुर्वासा उवाच ॥ ॥ एवं ते दुर्विनीतस्य
तन्मातुश्च विमोक्षणम् ॥ धनुष्कोट्यभिषेकेण यज्ञदेव मयेरितम् ॥ ५५ ॥ पुत्रमेनं त्वमप्याशु ब्रह्महत्याविशुद्धये ॥ समादाय व्रज ब्रह्मन्धनुष्कोटिं
विमुक्तिदाम् ॥ ५६ ॥ ॥ सिंधुद्वीप उवाच ॥ ॥ इति दुर्वाससा प्रोक्तो यज्ञदेवो निजं सुतम् ॥ समादाय ययौ राम धनुष्कोटिं विमुक्तिदाम्
॥ ५७ ॥ गत्वा निवासमकरोत्षण्मासं तत्र स द्विजः ॥ पुत्रेण साकं नियतो हे सृगालप्लवंगमौ ॥ ५८ ॥ स सस्नौ च धनुष्कोटौ षण्मासं वै स
पुत्रकः ॥ षण्मासांते यज्ञदेवं प्राह वागशरीरिणी ॥ ५९ ॥ विमुक्ता यज्ञदेवस्य ब्रह्महत्या सुतस्य ते ॥ स्वर्णस्तेयात्सुरापानात्किरातीसंगमात्त

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गते सति ॥ ८ ॥ पूर्वदुष्कर्मपाकेन मूढबुद्धिरहो बत ॥ अनंगशरविद्धांगो रागाद्विकृतमानसः ॥९॥ मामेति वादिनीमंबां बलादाकृष्य पातकी ॥
बुभुजे काममोहात्मा मैथुनेन द्विजोत्तम ॥ १० ॥ स खिन्नो दुर्विनीतोऽयं रेतःसेकादनंतरम् ॥ मनसा चिंतयन्पापं रुरोद भृशदुःखितः ॥ ११ ॥
अहोतिपापकृदहं महापातकिनां वरः ॥ अगमं जननीं यस्मात्कामबाणवशानुगः ॥ १२ ॥ इति संचिंत्य मनसा स तत्र मुनिसन्निधौ ॥ जुगुप्स
मानश्चात्मानं तान्मुनीनिदमब्रवीत् ॥ १३ ॥ गुरुस्त्रीगमपापस्य प्रायश्चित्तं मम द्विजाः ॥ वदध्वं शास्त्रतत्त्वज्ञाः कृपया मयि केवलम् ॥ १४ ॥
मरणान्निष्कृतिः स्याच्चेन्मरिष्यामि न संशयः ॥ भवद्भिरुच्यते यत्तु प्रायश्चित्तं ममाधुना ॥ १५ ॥ करिष्ये तद्द्विजाः सत्यं मरणं वान्यदेव वा ॥
तच्छ्रुत्वा वचनं तस्य केचित्तत्र मुनीश्वराः ॥ १६ ॥ अनेन साकं वार्ता तु दोषायेति विनिश्चिताः ॥ मौनित्वं भेजिरे केचिन्मुनयः केचिदा
भृशम् ॥ १७ ॥ दुष्टात्मा मातृगामी त्वं महापातकिनां वरः ॥ गच्छगच्छेति बहुशो वाचमूचुर्द्विजोत्तमाः ॥ १८ ॥ तान्निवार्य कृपाशीलः सर्वज्ञः
करुणानिधिः ॥ कृष्णद्वैपायनस्तत्र दुर्विनीतमभाषत ॥ १९ ॥ गच्छाशु रामसेतौ त्वं धनुष्कोटौ सहांबया ॥ मकरस्थे रवौ माघे मासमेकं
निरंतरम् ॥ २० ॥ जितेंद्रियो जितक्रोधः परद्रोहविवर्जितः ॥ एकमासं निराहारः कुरु स्नानं सहांबया ॥ २१ ॥ पूतो भविष्यस्यद्धा त्वं गुरुस्त्री
गमदोषतः ॥ यत्पातकं न नश्येत सेतुस्नानेन तन्नहि ॥ २२ ॥ श्रुतिस्मृतिपुराणेषु धनुष्कोटिप्रशंसनम् ॥ बहुधा भण्यते पंचमहापातकनाशनम् ॥
॥ २३ ॥ तस्मात्त्वं त्वरया गच्छ धनुष्कोटिं सहांबया ॥ प्रमाणं कुरु मद्वाक्यं वेदवाक्यमिव द्विज ॥ २४ ॥ श्रीरामधनुषः कोटौ स्नातस्य द्विज
पुत्रक ॥ महापातककोट्योपि नैव लक्ष्या इतीव हि ॥ २५ ॥ प्रायश्चित्तांतरं प्रोक्तं मन्वादिस्मृतिभिः स्मृतौ ॥ तद्गच्छ त्वं धनुष्कोटिं महापातक
नाशिनीम् ॥ २६ ॥ इतीरितोऽथ व्यासेन दुर्विनीतो द्विजोत्तमाः ॥ मात्रा साकं धनुष्कोटिं नत्वा व्यासं च निर्ययौ ॥ २७ ॥ मकरस्थे रवौ
माघे मासमात्रं निरंतरम् ॥ मात्रा सह निराहारो जितक्रोधो जितेंद्रियः ॥ २८ ॥ श्रीरामधनुषः कोटौ सस्नौ संकल्पपूर्वकम् ॥ रामनाथं नमस्कुर्व
त्रिकालं भक्तिपूर्वकम् ॥ २९ ॥ मासांते पारणां कृत्वा मात्रा सह विशुद्धधीः ॥ व्यासांतिकं पुनः प्रायात्तस्मै वृत्तं निवेदितुम् ॥ ३० ॥ स
प्रणम्य पुनर्व्यासं दुर्विनीतोऽब्रवीद्वचः ॥ ३१ ॥ ॥ दुर्विनीत उवाच ॥ ॥ भगवन्करुणासिंधो द्वैपायन महत्तम ॥ भवतः कृपया रामधनु
ष्कोटौ सहांबया ॥ माघमासे निराहारो मासमात्रमतंद्रितः ॥ ३२ ॥ अहं त्वकरवं स्नानं नमस्कुर्वन्महेश्वरम् ॥ इतः परं मया व्यास भगव
न्भक्तवत्सल ॥ ३३ ॥ यत्कर्त्तव्यं मुने तत्त्वं ममोपदिश तत्त्वतः ॥ इति तस्य वचः श्रुत्वा दुर्विनीतस्य वै मुनिः ॥ बभाषे दुर्विनीतं तं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सुमतेस्तदा ॥ एतस्मिन्नंतरे तत्र दुर्वासाः शंकरांशजः ॥ ७० ॥ दिष्ट्या समाययौ योगी हे सृगालप्लवंगमौ ॥ यज्ञदेवोऽथ तं दृष्ट्वा मुनिं रुद्रावतारकम् ॥ श्रुत्वा प्रणम्य शरणं ययाचे पुत्रकारणात् ॥ ७१ ॥ ॥ पितोवाच ॥ ॥ दुर्वासस्त्वं महायोगी साक्षाद्वै[1] शंकरांशजः ॥ ७२ ॥ त्वद्दर्शनमपुण्यानां भविता न कदाचन ॥ ब्रह्महा च सुरापी च स्तेयी चाभूत्सुतो मम ॥ ७३ ॥ एनं प्रहर्तुमायाता ब्रह्महत्या विवर्तते ॥ भूयाद्यथा मे पुत्रोऽयं महापातकमोचितः ॥ ७४ ॥ घोरा च ब्रह्महत्येयं यथा शीघ्रं लयं व्रजेत् ॥ तमुपायं वदस्वाद्य मम पुत्रे दयां कुरु ॥ ७५ ॥ अयमेव हि पुत्रो मे नान्योऽस्ति तनयो मुने ॥ अस्मिन्मृते तु वंशो मे समुच्छिद्येत्समूलतः ॥ ७६ ॥ ततः पितृभ्यः पिंडानां दातापि न भवेद्ध्रुवम् ॥ अतः कृपां कुरुष्व त्वमस्मासु भगवन्मुने ॥ ७७ ॥ इत्युक्तः स तदोवाच दुर्वासाः शंकरांशजः ॥ ध्यात्वा तु सुचिरं कालं यज्ञदेवं द्विजोत्तमम् ॥ ७८ ॥ दुर्वासा उवाच ॥ ॥ यज्ञदेव कृतं पापमतिक्रूरं सुतेन ते ॥ नास्य पापस्य शांतिः स्यात्प्रायश्चित्तायुतैरपि ॥ ७९ ॥ अथापि ते सुतस्याहमस्य पापस्य शांतये ॥ प्रायश्चित्तं वदिष्यामि शृणु नान्यमना द्विज ॥ ८० ॥ श्रीरामधनुषः कोटौ दक्षिणे सलिलार्णवे ॥ स्नाति चेत्तव पुत्रोऽयं पातकान्मोक्ष्यते क्षणात् ॥ ८१ ॥ दुर्विनीताभिधो विप्रो यत्र स्नानाद्द्विजोत्तम ॥ गुरुस्त्रीगमपापेभ्यस्तत्क्षणादेव मोचितः ॥ ८२ ॥ सैषा श्रीधनुषः कोटी राघवस्य स्वयं हरेः ॥ स्नानमात्रेण पापौघं नाशयेत्त्वत्सुतस्य सा ॥ ८३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे सेतुमाहात्म्ये धनुष्कोटिप्रशंसायां सृगालवानरसंवादे सुमतिमहापातकविमोक्षोपायकथनंनाम चतुस्त्रिंशोऽध्यायः ॥ ३४ ॥ ॥ यज्ञदेव उवाच ॥ ॥ दुर्वासर्षे महाप्राज्ञ परापरविचक्षण ॥ दुर्विनीताभिधः कोऽयं योऽसौ गुर्वंगनामगात् ॥ १ ॥ कस्य पुत्रो धनुष्कोटौ स्नानेन स कथं द्विजः ॥ तत्क्षणान्मुमुचे पापाद्गुरुस्त्रीगमसंभवात् ॥ एतन्मे श्रद्दधानस्य विस्तराद्वक्तुमर्हसि ॥ २ ॥ ॥ दुर्वासा उवाच ॥ ॥ पांड्यदेशे पुरा कश्चिद्ब्राह्मणोभूद्बहुश्रुतः ॥ ३ ॥ इध्मवाहाभिधो नाम्ना तस्य भार्या रुचिस्तथा ॥ बभूव तस्य तनयो दुर्विनीताभिधो द्विजः ॥ ४ ॥ बाल्ये वयसि पुत्रस्य ममार जनकोऽस्य वै ॥ दुर्विनीतः पितुस्तस्य स कृत्वा चौर्ध्वदैहिकम् ॥ ५ ॥ कंचित्कालं गृहेऽवात्सीन्मात्रा विधवया सह ॥ ततो दुर्भिक्षमभवद्द्वादशाब्दमवर्षणात् ॥ ६ ॥ ततो देशांतरमगान्मात्रा साकं द्विजोत्तम ॥ गोकर्णं स समासाद्य सुभिक्षं धान्यसंचयैः ॥ ७ ॥ उवास सुचिरं कालं मात्रा विधवया सह ॥ ततो बहुतिथे काले दुर्विनीतो

१ साक्षाद्वै शंकरांशजः–इ०पा०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ख्यातो वेदवेदांगपारगः ॥ ४५ ॥ दयालुरातिथेयश्च शिवनारायणार्चकः ॥ सुमतिर्नाम पुत्रोऽभूद्यज्ञदेवस्य तस्य वै ॥ ४६ ॥ पितरौ स परित्यज्य भार्यामपि पतिव्रताम् ॥ प्रययावुत्कले देशे विटगोष्ठीपरायणः ॥ ४७ ॥ काचित्किराती तद्देशे वसन्ती युवमोहिनी ॥ यूनां समस्तद्रव्याणि प्रलोभ्य जगृहे चिरम् ॥ ४८ ॥ तस्या गृहं स प्रययौ सुमतिर्ब्राह्मणाधमः ॥ सुमतिं सा न जग्राह किराती निर्धनं द्विजम् ॥ ४९ ॥ तया त्यक्तोऽथ सुमतिस्तत्संयोगैकतत्परः ॥ इतस्ततश्चोरयित्वा बहुद्रव्याणि संततम् ॥ ५० ॥ दत्त्वा तया चिरं रेमे तद्गृहे बुभुजे च सः ॥ एकेन चषके णासौ तया सह सुरां पपौ ॥ ५१ ॥ एवं स बहुकालं वै रममाणस्तया सह ॥ पितरौ निजपत्नीं च नास्मरद्विषयातुरः ॥ ५२ ॥ स कदाचित्कि रातैस्तु चौर्यं कर्तुं ययौ सह ॥ द्रव्यं हर्तुं किरातास्ते लाटानां विषयं ययुः ॥५३॥ विप्रस्य कस्यचिद्गेहे सोऽपि कैरातवेषधृक् ॥ ययौ चोरयितुं द्रव्यं साहसी खड्गहस्तवान् ॥ ५४ ॥ तद्गृहस्वामिनं विप्रं हत्वा खड्गेन साहसी ॥ समादाय बहु द्रव्यं किरातीभवनं ययौ ॥ ५५ ॥ तं यांतमनुयाति स्म ब्रह्महत्या भयंकरी ॥ नीलवस्त्रधरा भीमा भृशं रक्तशिरोरुहा ॥ ५६ ॥ गर्जंती साट्टहासं सा कंपयन्ती च रोदसी ॥ अनुद्रुतस्तया सोऽयं बभ्राम जगतीतले ॥ ५७ ॥ एवं भ्रमन्भुवं सर्वां कदाचित्सुमतिः स्वयम् ॥ स्वं ग्रामं प्रययौ भीत्या हे सृगालप्लवंगमौ ॥ ५८ ॥ अनुद्रुतस्तया भीतः प्रययौ स्वगृहं प्रति ॥ ब्रह्महत्याप्यनुद्रुत्य तेन साकं गृहं ययौ ॥ ५९ ॥ पितरं रक्ष रक्षेति सुमतिः शरणं ययौ ॥ मा भैषीरिति तं प्रोच्य पिता रक्षि तुमुद्यतः ॥ तदानीं ब्रह्महत्येयं तत्तातं प्रत्यभाषत ॥ ६० ॥ ॥ ब्रह्महत्योवाच ॥ ॥ मैनं त्वं प्रतिगृह्णीष्व यज्ञदेव द्विजोत्तम ॥ ६१ ॥ असौ सुरापी स्तेयी च ब्रह्महा चातिपातकी ॥ मातृद्रोही पितृद्रोही भार्यात्यागी च पापकृत् ॥ ६२ ॥ किरातीसंगदुष्टश्च नैनं मुञ्चाम्यहं द्विज ॥ गृह्णासि चेदिमं विप्र महापातकिनं सुतम् ॥ ६३ ॥ त्वद्भार्यामस्य भार्यां च त्वां च पुत्रमिमं द्विज ॥ भक्षयिष्यामि वंशं च तस्मान्मुञ्च सुतं त्विमम् ॥ ॥ ६४ ॥ इमं त्यजसि चेत्पुत्रं युष्मान्मोक्ष्यामि सांप्रतम् ॥ नैकस्यार्थे कुलं हन्तुमर्हसि त्वं महामते ॥ इत्युक्तः स तया तत्र यज्ञदेवोऽब्रवीच्च ताम् ॥ ६५ ॥ ॥ यज्ञदेव उवाच ॥ ॥ बाधते मां सुतस्नेहः कथमेनं परित्यजे ॥ ब्रह्महत्या तदाकर्ण्य द्विजोक्तं तमभाषत ॥ ६६ ॥ ॥ ब्रह्मह त्योवाच ॥ ॥ अयं हि पतितोऽभूत्ते वर्णाश्रमबहिष्कृतः ॥ ६७ ॥ पुत्रेस्मिन्मा कुरु स्नेहं निंदितं तस्य दर्शनम् ॥ इत्युक्त्वा ब्रह्महत्या सा यज्ञदे वस्य पश्यतः ॥ ६८ ॥ तलेन प्रजहारास्य पुत्रं सुमतिनामकम् ॥ रुरोद तात तातेति पितरं प्रब्रुवन्मुहुः ॥ ६९ ॥ रुरुदुर्जनको माता भार्यापि

१ विप्राणाम्–इ०पा०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जसा ॥ ८३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे सेतुमाहात्म्ये धनुष्कोटिप्रशंसायां परावसोर्ब्रह्महत्याविमोक्षणंनामत्रयस्त्रिंशोऽध्यायः ॥ ३३ ॥ ॥ श्रीसूत उवाच ॥ ॥ इतिहासं पुनर्वक्ष्ये धनुष्कोटिप्रशंसनम् ॥ सृगालस्य च संवादं वानरस्य च सत्तमाः ॥१॥ सृगालवानरौ पूर्वमास्तां जातिस्मरावुभौ॥ पुरापि मानुषे भावे सखायौ तौ बभूवतुः॥२॥अन्यां योनिं समापन्नौ सार्गालीं वरानीं तथा ॥ सख्यं समीयतुरुभौ सृगालो वानरो द्विजाः ॥ ३ ॥ कदाचिद्रुद्रभूमिष्ठं सृगालं वानरोऽब्रवीत् ॥ श्मशानमध्ये संप्रेक्ष्य पूर्वजातिमनुस्मरन् ॥ ४ ॥ ॥ वानर उवाच ॥ ॥ सृगाल पातकं पूर्वं किमकार्षीः सुदारुणम् ॥ यस्त्वं श्मशाने मृतकान्पूतिगंधांश्च कुत्सितान् ॥ अत्सीत्युक्तोऽथ कपिना सृगालस्तमभाषत ॥ ५ ॥ ॥ सृगाल उवाच ॥ ॥ अहं पूर्वभवे ह्यासं ब्राह्मणो वेदपारगः ॥ ६ ॥ वेदशर्माभिधो विद्वान्सर्वकर्मकलापवित् ॥ ब्राह्मणाय प्रतिश्रुत्य न मया तत्र जन्मनि ॥ ७ ॥ कपे धनं तदा दत्तं सृगालोऽहं ततोऽभवम् ॥ तस्मादेवंविधं भक्ष्यं भक्षयाम्यतिकुत्सितम् ॥ ८ ॥ प्रतिश्रुत्य दुरात्मानो न प्रयच्छंति ये नराः ॥ कपे सृगालयोनिं ते प्राप्नुवंत्यतिकुत्सिताम् ॥ ९ ॥ यो न दद्यात्प्रतिश्रुत्य स्वल्पं वा यदि वा बहु ॥ सर्वाशास्तस्य नष्टाः स्युः षंढस्येव प्रजोद्भवः ॥ १० ॥ प्रतिश्रुत्याप्रदाने तु ब्राह्मणाय प्लवंगम ॥ दशजन्मार्जितं पुण्यं तत्क्षणादेव नश्यति ॥ ११ ॥ प्रतिश्रुत्याप्रदानेन यत्पापमुपजायते ॥ नाश्वमेधशतेनापि तत्पापं परिशुध्यति ॥ १२ ॥ न जानेहमिदं पापं कदा नष्टं भवेदिति ॥ तस्मात्प्रतिश्रुतं द्रव्यं दातव्यं विदुषा सदा ॥ १३ ॥ प्रतिश्रुत्याप्रदानेन सृगालो भवति ध्रुवम् ॥ तस्मात्प्राज्ञेन विदुषा दातव्यं हि प्रतिश्रुतम् ॥ १४ ॥ इत्युक्त्वा स सृगालस्तं वानरं पुनरब्रवीत् ॥ भवता किं कृतं पापं येन वानरतामगात् ॥ १५ ॥ अनागसो वनचरान्पक्षिणो हिंसि वानर ॥ तत्पातकं वदस्वाद्य वानरत्वप्रदं मम ॥ इत्युक्तः स सृगालेन सृगालं वानरोऽब्रवीत् ॥ १६ ॥ ॥ वानर उवाच ॥ ॥ पुरा जन्मन्यहं विप्रो वेदनाथ इति स्मृतः ॥ ॥ १७ ॥ विश्वनाथो मम पिता ममांबा कमलालया ॥ सृगाल सख्यमभवदावयोः प्राग्भवेऽपि हि ॥ १८ ॥ त्वं न जानासि तत्सर्वं वेद्म्यहं पुण्यगौरवात् ॥ तपसाराध्य गिरिशं तत्प्रसादात्पुरा मम ॥ १९ ॥ अतीतभाविविज्ञानमस्ति जन्मांतरेऽपि च ॥ गोमायो तद्भवे शाकं ब्राह्मणस्य हृतं मया ॥ २० ॥ तत्पापाद्वानरो जातो नरकानुभवादनु ॥ नाहर्तव्यं विप्रधनं हरणान्नरकं भवेत् ॥ २१ ॥ अनंतरं वानरत्वं भविष्यति न संशयः ॥

१ सहायौ–इ०पा० । २ देवशर्माभिधः–इ० पा० । ३ कान्तम–इ० पा० । ४ तेनाहम्–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्मान्न ब्राह्मणस्वं तु हर्तव्यं विदुषा सदा ॥ २२ ॥ ब्रह्मस्वहरणात्पापमधिकं नैव विद्यते ॥ पीतवंतं विषं हंति ब्रह्मस्वं सकुलं दहेत् ॥ २३ ॥ ब्रह्म स्वहरणात्पापी कुंभीपाकेषु पच्यते ॥ पश्चान्नरकशेषेण वानरीं योनिमश्नुते ॥ २४ ॥ विप्रद्रव्यं न हर्तव्यं क्षंतव्यं तेष्वतः सदा ॥ बाला दरिद्राः कृपणा वेदशास्त्रादिवर्जिताः ॥ २५ ॥ ब्राह्मणा नावमंतव्याः क्रुद्धाश्चेदनलोपमाः ॥ अतीतानागतं ज्ञानं सृगालाखिलमस्ति मे ॥ २६ ॥ ज्ञानम स्ति न मे त्वेकमेतत्पापविशोधनम्॥ जातिस्मरोऽपि हि भवान्भावि कार्यं न बुध्यते ॥ २७ ॥ अतीतेष्वपि किंचिज्ज्ञः प्रतिबंधवशाद्भवान् ॥ अतो भवान्न जानीते भाव्यतीतं तथाखिलम् ॥ २८ ॥ कियत्कालं सृगालातो भुक्ता व्यसनमीदृशम् ॥ आवयोरस्य पापस्य को वा मोचयिता भवेत् ॥ ॥ २९ ॥ एवं प्रब्रुवतोस्तत्र प्लवंगमसृगालयोः॥ यदृच्छया दैवयोगात्पूर्वपुण्यवशाद्द्विजाः ॥३०॥ आययौ स महातेजाः सिंधुद्वीपाह्वयो मुनिः॥ भस्मो द्धूलितसर्वांगस्त्रिपुंड्रांकितमस्तकः ॥ ३१ ॥ रुद्राक्षमालाभरणः शिवनामानि कीर्तयन् ॥ सृगालवानरौ दृष्ट्वा सिंधुद्वीपाभिधं मुनिम् ॥ प्रणम्य मुदि तौ भूत्वा पप्रच्छतुरिदं तदा ॥ ३२ ॥ ॥ सृगाल वानरावूचतुः ॥ ॥ भगवन्सर्वधर्मज्ञ सिंधुद्वीप महामुने ॥ ३३ ॥ आवां रक्ष कृपादृष्ट्या विलो कय मुहुर्मुदा ॥ कपित्वं च सृगालत्वमावयोर्येन नश्यति ॥ ३४ ॥ तमुपायं वदस्वाद्य त्वं हि पुण्यवतां वरः ॥ अनाथान्कृपणानज्ञान्बालान्रोगा तुराज्ञनान् ॥ ३५ ॥ रक्षंति साधवो नित्यं कृपया निरपेक्षकाः ॥ ताभ्यामितीरितः प्राज्ञः सिंधुद्वीपो महामुनिः ॥ प्राह तौ कपिगोमायू ध्यात्वा तु मनसा चिरम् ॥ ३६ ॥ ॥ सिंधुद्वीप उवाच ॥ ॥ जानाम्यहं युवां सम्यग्वे सृगालप्लवंगमौ ॥ ३७ ॥ सृगाल प्राग्भवे त्वं वै वेदशर्माभिधो द्विजः ॥ ब्राह्मणाय प्रतिश्रुत्य धान्यानामाढकं त्वया ॥ ३८ ॥ न दत्तं तेन पापेन सार्गालीं योनिमाप्तवान् ॥ त्वं च वानर पूर्वस्मिन्वेदनाथाभिधो द्विजः ॥ ३९ ॥ ब्राह्मणस्य गृहाच्छाकं हृतं चौर्यात्त्वया ततः ॥ प्राप्तोसि वानरीं योनिं सर्वपक्षिभयंकरीम् ॥ ४० ॥ युवयोः पापशांत्यर्थमुपायं प्रवदाम्यहम् ॥ दक्षिणांबुनिधौ रामधनुष्कोटौ युवामरम्[1] ॥ ४१ ॥ गत्वात्र कुरुतं स्नानं तेन पापाद्विमो क्ष्यथः ॥ पुरा किरातीसंसर्गात्सुमतिर्ब्राह्मणः सुराम् ॥ पीतवान्स धनुष्कोटौ स्नात्वा पापाद्विमोचितः ॥ ४२ ॥ ॥ सृगाल वानरावूचतुः ॥ ॥ सुमतिः कस्य पुत्रोऽसौ कथं च स सुरां पपौ ॥ ४३ ॥ कथं किरात्यां सक्तोऽभूत्सिंधुद्वीप महामते ॥ आवयोर्विस्तरादेतद्वद त्वं कृपायाधुना ॥ ४४ ॥ ॥ सिंधुद्वीप उवाच ॥ ॥ महाराष्ट्राभिधे देशे ब्राह्मणः कश्चिदास्तिकः ॥ यज्ञदेव इति

१ अरम्—क्षिप्रम् शीघ्रम्—इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तान्महान्दोषः परावसोः ॥ न ह्यन्यकृतपापस्य परेणानुष्ठितेन वै ॥५८॥ प्रायश्चित्तेन शांतिः स्यान्महापातकपंचके ॥ पितुर्ब्राह्मणहंतुस्तु सुतरां नास्ति निष्कृतिः॥५९॥आत्मनानुष्ठितेनापि व्रतेन न हि दुष्कृतिः॥परावसोस्तव भ्रातुरतो नैवास्तिनिष्कृतिः ॥६०॥ अतोऽस्माभिरदुष्टत्वमस्मै दातुं नशक्यते ॥ अर्वावसुः पुनःप्राह देवानिंद्रपुरोगमान्॥६१॥ तथापि युष्मन्माहात्म्यात्प्रसादाद्भवतां तथा॥पितुर्ब्राह्मणहंतुर्मे भ्रातुस्त्रिदशसत्तमाः॥६२॥ यथा स्यान्निष्कृतिर्ब्रूत तथैव कृपया युताः ॥ एवमर्वावसोः श्रुत्वा वचस्ते त्रिदशालयाः ॥ ६३ ॥ ध्यात्वा तु सुचिरं कालं विनिश्चित्येदमब्रुवन् ॥ उपायं ते प्रवक्ष्यामस्तत्पातकनिवारणम् ॥६४॥ दक्षिणांबुनिधौ पुण्ये रामसेतौ विमुक्तिदे ॥ धनुष्कोटिरिति ख्यातं तीर्थमस्ति विमुक्तिदम् ॥ ६५ ॥ ब्रह्महत्यासुरापानस्वर्णस्तेयविनाशनम् ॥ गुरुतल्पगसंसर्गदोषाणामपि नाशनम् ॥ ६६ ॥ अकामेनापि यः स्नायादपवर्गफलप्रदम् ॥ दुस्वप्ननाशनं धन्यं नरकक्लेशनाशनम् ॥ ६७ ॥ कैलासादिपदप्राप्तिकारणं परमार्थदम् ॥ सर्वकाममिदं पुंसामृणदारिद्र्यनाशनम् ॥ ६८ ॥ धनुष्कोटिर्धनुष्कोटिर्धनुष्कोटिरितीरणात् ॥ स्वर्गापवर्गदं पुंसां महापुण्यफलप्रदम् ॥ ६९ ॥ तत्र गत्वा तव भ्राता स्नायाद्यदि परावसुः ॥ तत्क्षणादेव ते ज्येष्ठो मुच्यते ब्रह्महत्यया ॥ ७० ॥ इदं रहस्यं सुमहत्प्रायश्चित्तमुदीरितम् ॥ उक्त्वेत्यर्वावसुं देवाः प्रययुः स्वपुरीं प्रति ॥ ७१ ॥ तत अर्वावसुर्ज्येष्ठं समादाय परावसुम् ॥ रामचन्द्रधनुष्कोटिं प्रययौ मुक्तिदायिनीम् ॥ ७२ ॥ सेतौ संकल्पमुक्त्वा तु नियमेन परावसुः ॥ सह भ्रात्रा धनुष्कोटौ सस्नौ पातकशुद्धये ॥ ७३ ॥ स्नात्वोत्थितं धनुष्कोटौ तं प्रोवाचाशरीरिणी ॥ परावसो विनष्टा ते पितुर्ब्राह्मणघातजा ॥ ७४ ॥ ब्रह्महत्या महाघोरा नरकक्लेशकारिणी ॥ इत्युक्त्वा विररामाथ सापि वागशरीरिणी ॥ ७५ ॥ परावसुस्तदा विप्राः कनिष्ठेन समन्वितः ॥ रामचन्द्रधनुष्कोटिं प्रणम्य च सभक्तिकम् ॥ ७६ ॥ रामनाथं महादेवं नत्वा भक्तिपुरःसरम् ॥ विमुक्तपातको विप्राः प्रययौ पितुराश्रमम् ॥ ७७ ॥ मृत्वोत्थितस्तदा रैभ्यो दृष्ट्वा पुत्रौ समागतौ ॥ संतुष्टहृदयो ह्यास्ते पुत्राभ्यां स्वाश्रमे तदा ॥ ७८ ॥ रामचन्द्रधनुष्कोटौ स्नानेन हतपातकम् ॥ एनं परावसुं सर्वे स्वीचक्रुर्मुनयस्तदा ॥ ७९ ॥ एवं परावसोरुक्तं ब्रह्महत्याविमोक्षणम् ॥ स्नानमात्राद्धनुष्कोटौ युष्माकं मुनिपुंगवाः ॥ ८० ॥ सुरापानादयो विप्रा नश्यंत्येवात्र मज्जनात् ॥ सत्यंसत्यं पुनः सत्यमुद्धृत्य भुजमुच्यते ॥ ८१ ॥ महापातकसंघाश्च नश्येयुर्मज्जनादिह ॥ य इमं पठतेऽध्यायं ब्रह्महत्याविमोक्षणम् ॥ ८२ ॥ ब्रह्महत्या विनश्येत तत्क्षणान्नास्ति संशयः ॥ सुरापानादयोऽप्यस्य शांतिं गच्छेयुरं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मृतं स्वपितरं श्रुत्वा सोऽपि शोकाकुलोऽभवत् ॥ ३१ ॥ ज्येष्ठोऽनुजं ततः प्राह वचनं द्विजसत्तमाः ॥ महत्सत्रं समारब्धं बृहद्द्युम्नस्य भूपतेः ॥
॥ ३२ ॥ वोढृत्वशक्तिर्नास्त्यस्य कर्मणो बालकस्य ते ॥ जनकश्च हतो रात्रौ मयापि मृगशंकया ॥ ३३ ॥ प्रायश्चित्तं च कर्त्तव्यं ब्रह्महत्या
विशुद्धये ॥ मदर्थं व्रतचर्यां त्वं चर तात कनिष्ठक ॥ ३४ ॥ एकाकी धुरमुद्वोढुं शक्तोऽहं सत्रकर्मणः ॥ अर्वावसुरिति प्रोक्तो ज्येष्ठेन स तमभ्य
धात् ॥ ३५ ॥ तथा भवत्वहं ज्येष्ठ चरिष्ये व्रतमुत्तमम् ॥ ब्रह्महत्याविशुद्ध्यर्थं त्वं सत्रधुरमावह ॥ ३६ ॥ इत्युक्त्वा सोनुऽजो ज्येष्ठं तस्मात्सत्राद्वि
निर्ययौ ॥ कारयामास कर्माणि ज्येष्ठस्तस्मिन्गते क्रतौ ॥ ३७ ॥ द्वादशाब्दं कनिष्ठोपि ब्रह्महत्याव्रतं द्विजाः ॥ चरित्वा सत्रयागेऽस्मिन्नाजगाम
पुनर्मुदा ॥ ३८ ॥ तं दृष्ट्वा भ्रातरं ज्येष्ठो बृहद्द्युम्नमुवाच ह ॥ अयं ते ब्रह्महा सत्रमर्वावसुरुपागतः ॥ ३९ ॥ एनमुत्सारयाशु त्वमस्मात्सत्रान्नृपो
त्तम ॥ अन्यथा सत्रयागस्य फलहानिर्भविष्यति ॥ ४० ॥ इतीरितः स स्वप्रेष्यैर्यागात्तमुदवासयत् ॥ उद्वास्यमानो राजानमर्वावसुरथाब्रवीत् ॥
॥ ४१ ॥ न मया ब्रह्महत्येयं बृहद्द्युम्न कृतानघ ॥ किन्तु ज्येष्ठेन मे सा हि ब्रह्महत्या कृता विभो ॥ ४२ ॥ ब्रह्महत्याव्रतं चीर्णं तदर्थं च मया
धुना ॥ एवमुक्तोपि राजासौ वचसा स परावसोः ॥ ४३ ॥ अर्वावसुं निजात्सत्रादुदवासयदाशु वै ॥ धिक्कृतो ब्राह्मणैश्चायं ययौ तूष्णीं वनं
तदा ॥ ४४ ॥ मुनिवृन्दसमाकीर्णं तपोवनमुपेत्य सः ॥ अर्वावसुस्तपश्चक्रे देवैरपि सुदुष्करम् ॥ ४५ ॥ तपः कुर्वंस्तथादित्यमुपतस्थे समा
हितः ॥ मूर्तिमांस्तपसा तस्य महताऽद्भुष्टधीः स्वयम् ॥ ४६ ॥ आविरासीत्स्वया दीप्त्या भासयञ्जगतीतलम् ॥ कर्मसाक्षी जगच्चक्षुर्भास्करो
देवताग्रणीः ॥ ४७ ॥ अविर्बभूवुर्देवाश्च पुरस्कृत्य शचीपतिम् ॥ इन्द्रादयस्ततो देवाः प्रोचुरर्वावसुं द्विजाः ॥४८॥ अर्वावसो त्वं प्रवरस्तपसा ब्रह्म
चर्यतः ॥ आचारेण श्रुतेनापि वेदशास्त्रादिशिक्षया ॥ ४९ ॥ निराकृतोवमानेन त्वं परावसुना बहु ॥ तथापि क्षमया युक्तो न कुप्यति
भवान्यतः ॥ ५० ॥ यस्माज्ज्येष्ठोऽवधीत्तातं न हिंसीस्त्वं महामते ॥ ब्रह्महत्याव्रतं यस्मात्तदर्थं चरितं त्वया ॥ ५१ ॥ अतः स्वीकुर्म
हे त्वां तु पराकुर्मः परावसुम् ॥ उक्त्वैवं बलभिन्मुख्याः सर्वे च त्रिदिवालयाः ॥ ५२ ॥ तं ते प्रवरयामासुर्निरासुश्च परावसुम् ॥ पुनरिंद्रादयो
देवाः पुरोधाय दिवाकरम् ॥ ५३ ॥ अर्वावसुं प्रोचुरिदं वरं त्वं वरयेति वै ॥ स चापि प्रार्थयामास जनकस्योत्थितिं पुनः ॥ ५४ ॥ वधे चास्मरणं
देवानात्मनो जनकस्य वै ॥ तथास्त्विति सुराः प्रोचुः पुनरूचुरिदं वचः ॥ ५५ ॥ वरं चान्यं प्रदास्यामो वरय त्वं महामते ॥ एवमुक्तः सुरैः
सोयमर्वावसुरभाषत ॥ ५६ ॥ मम भ्रातुरदुष्टत्वं भवतु त्रिदशालयाः ॥ अर्वावसोर्वचः श्रुत्वा त्रिदशाः पुनरब्रवन् ॥ ५७ ॥ ब्राह्मणस्य पितुर्घा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जैमिनेरन्तिकं ययौ ॥ तस्मै निवेदयामास पुत्रवृत्तान्तमादितः ॥ ४६ ॥ भगवञ्जैमिने पुत्रो ममाद्योन्मत्ततां गतः ॥ ४७ ॥ अस्योन्मादविनाशाय ब्रूह्युपायं महामुने ॥ इति पृष्टश्चिरं दध्यौ जैमिनिर्मुनिपुंगवः ॥ ४८ ॥ ध्यात्वा तु सुचिरं कालं नृपं नंदमथाब्रवीत् ॥ ध्यानकाष्ठस्य शापेन ह्युन्मत्तस्ते सुतोऽभवत् ॥ ४९ ॥ तस्य शापस्य मोक्षार्थमुपायं प्रब्रवीमि ते ॥ दक्षिणांबुनिधौ सेतौ पुण्ये पापविनाशने ॥ ५० ॥ धनुष्कोटिरिति ख्यातं तीर्थमस्ति महत्तरम् ॥ पवित्राणां पवित्रं च मंगलानां च मंगलम् ॥ ५१ ॥ श्रुतिसिद्धं महापुण्यं ब्रह्महत्यादिशोधकम् ॥ नीत्वा तत्र सुतं तेऽद्य स्नापयस्व महीपते ॥ ५२ ॥ उन्मादस्तत्क्षणादेव तस्य नश्येन्न संशयः ॥ इत्युक्तस्तं प्रणम्यासौ जैमिनिं मुनिपुंगवम् ॥ ५३ ॥ नंदः पुत्रं समादाय धनुष्कोटिं ययौ तदा ॥ तत्र च स्नापयामास पुत्रं नियमपूर्वकम् ॥ ५४ ॥ स्नानमात्रात्ततः सद्यो नष्टोन्मादोऽभवत्सुतः ॥ स्वयं सस्नौ स नन्दोपि धनुष्कोटौ सभक्तिकम् ॥ ५५ ॥ उषित्वा दिनमेकं तु सपुत्रस्तु पिता तदा ॥ सेवित्वा रामनाथं च सांबमूर्तिं घृणानिधिम् ॥ ५६ ॥ पुत्रमापृच्छ्य नंदस्तं प्रययौ तपसे वनम् ॥ गते पितरि पुत्रोऽपि धर्मगुप्तो नृपो द्विजाः ॥ ५७ ॥ प्रददौ रामनाथाय बहुवित्तानि भक्तितः ॥ ब्राह्मणेभ्यो धनं धान्यं क्षेत्राणि च ददौ तदा ॥ ५८ ॥ प्रययौ मंत्रिभिः सार्धं स्वां पुरीं तदनंतरम् ॥ धर्मेण पालयामास राज्यं निहतकण्टकम् ॥५९॥ पितृपैतामहं विप्रा धर्मगुप्तोऽतिधार्मिकः ॥ उन्मादैरप्यपस्मारैर्ग्रहैर्दुष्टैश्च ये नराः ॥ ६० ॥ ग्रस्ता भवंति विप्रेंद्रास्तेऽपि चात्र निमज्जनात् ॥ धनुष्कोटौ विमुक्ताः स्युः सत्यं सत्यं वदाम्यहम् ॥ ६१ ॥ परित्यज्य धनुष्कोटिं तीर्थमन्यद्व्रजेत्तु यः ॥ सिद्धं स गोपयस्त्यक्त्वा स्नुहीक्षीरं प्रयाचते ॥ ६२ ॥ धनुष्कोटिर्धनुष्कोटिर्धनुष्कोटिरिति द्विजाः ॥ त्रिः पठन्तो नरा ये तु यत्र क्वापि जलाशये ॥ ६३ ॥ स्नांति सर्वे नरास्ते वै यास्यंति ब्रह्मणः पदम् ॥ एवं वः कथिता विप्रा धर्मगुप्तकथा शुभा ॥ ६४ ॥ यस्याः श्रवणमात्रेण ब्रह्महत्या विनश्यति ॥ स्वर्णस्तेयादयश्चान्ये नश्येयुः पापसंचयाः ॥ ६५ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे सेतुमाहात्म्ये धनुष्कोटिप्रशंसायां धर्मगुप्तोन्मादविमोक्षणवर्णनंनाम द्वात्रिंशोऽध्यायः ॥ ३२ ॥ ॥ श्रीसूत उवाच ॥ भूयोऽप्यहं प्रवक्ष्यामि धनुष्कोटेस्तु वैभवम् ॥ अत्यद्भुततरं गुह्यं सर्वलोकैकपावनम् ॥ १ ॥ पुरा परावसुर्नाम ब्राह्मणो वेदवित्तमः ॥ अज्ञानात्पितरं हत्वा ब्रह्महत्यामवाप्तवान् ॥ सोऽपि स्नात्वा धनुष्कोटौ तद्दोषान्मुमुचे क्षणात् ॥ २ ॥ ॥ ऋषय ऊचुः ॥ ॥ पितरं हतवान्पूर्वं कथं सूत परावसुः ॥ ३ ॥ कथं वा धनुषः कोटौ मुक्तिस्तस्याप्यभून्मुने ॥ एतन्नः श्रद्दधानानां विस्तराद्वक्तुमर्हसि ॥ ४ ॥ ॥ श्रीसूत उवाच ॥ ॥ आसीद्राजा बृहद्द्युम्नश्चक्रवर्ती महाबलः ॥ धर्मेण पालयामास सागरांतां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वसुन्धराम् ॥ ५ ॥ अयजत्सत्रयागेन देवानिंद्रपुरोगमान् ॥ याजकस्तस्य रैभ्योऽभूद्विद्वान्परमधार्मिकः ॥ ६ ॥ आस्तां पुत्रावुभौ तस्याप्यर्वावसु
परावसू ॥ षडंगवेदविदुषौ श्रौतस्मार्तेषु कोविदौ ॥ ७ ॥ काणादे जैमिनीये च सांख्ये वैयासिके तथा ॥ गौतमे योगशास्त्रे च पाणिनीये च कोवि
दौ ॥८॥ मन्वादिस्मृतिनिष्णातौ सर्वशास्त्रविशारदौ ॥ सत्रयागे सहायार्थं बृहद्द्युम्नेन याचितौ ॥९॥ भ्रातरौ समनुज्ञातौ पित्रा रैभ्येण जग्मतुः ॥
बृहद्द्युम्नस्य सत्रं तावश्विनाविव रूपिणौ ॥१०॥ अतिष्ठदाश्रमे रैभ्यः स्नुषया ज्येष्ठया सह ॥ तौ गत्वा भ्रातरौ तत्र राज्ञः सत्रमनुत्तमम्॥११॥ याज
यामासतुः सत्रे बृहद्द्युम्नं महीपतिम् ॥ नाभवत्स्खलनं भ्रात्रोः सत्रे सांगेषु कर्मसु ॥ १२ ॥ सत्रे संतन्यमानेऽस्मिन्बृहद्द्युम्नस्य भूपतेः ॥ मुनयो
भ्यागमन्सर्वे राज्ञाहूता निरीक्षितुम् ॥१३॥ वसिष्ठो गौतमश्चात्रिर्जाबालिरथ कश्यपः ॥ क्रतुर्दक्षः पुलस्त्यश्च पुलहो नारदो मुनिः ॥ १४ ॥ मार्कंडे
यः शतानंदो विश्वामित्रः पराशरः ॥ भृगुः कुत्सोऽथ वाल्मीकिर्व्यासधौम्यादयोऽपरे ॥ १५ ॥ शिष्यैः प्रशिष्यैर्बहुभिरसंख्यातैः समावृताः ॥ ताना
गतान्समालोक्य बृहद्द्युम्नो महीपतिः ॥ १६ ॥ अर्घ्यादिना मुनीन्सर्वान्पूजयामास सादरम् ॥ नानादिग्भ्यः समायाताश्चतुरंगबलैर्युताः ॥ १७ ॥
उपदासहिता भूपास्सत्रं वीक्षितुमादरात् ॥ वैश्याः शूद्रास्तथा वर्णाश्चत्वरोऽपि समागताः ॥ १८ ॥ वर्णिनोऽथ गृहस्थाश्च वानप्रस्थाश्च भिक्षवः ॥
सत्रं निरीक्षितुं तस्य बृहद्द्युम्नस्य चाययुः ॥ १९ ॥ तान्सर्वान्पूजयामास यथार्हं राजसत्तमः ॥ ददौ चान्नानि सर्वेभ्यो घृतसूपादिकांस्तथा ॥ २० ॥
वस्त्राणि च सुवर्णानि हाररत्नान्यनेकशः ॥ एवं सत्कारयामास राजा सत्रे समागतान् ॥ २१ ॥ रैभ्यपुत्रौ तदा विप्रा अर्वावसुपरावसू ॥ अध्व
रादीनि कर्माणि चक्रतुः स्खलितं विना ॥ २२ ॥ तद्दृष्ट्वा मुनयस्सर्वे कौशलं रैभ्यपुत्रयोः ॥ श्लाघंते सशिरःकम्पं वसिष्ठप्रमुखास्तदा ॥ २३ ॥
कर्माणि कानि चित्तत्र कारयित्वा परावसुः ॥ तृतीयसवनस्यांते गृहकृत्यं निरीक्षितुम् ॥ २४ ॥ प्रययौ स्वाश्रमं सायं विनैवार्वावसुं द्विजाः ॥
तस्मिन्नवसरे रैभ्यं कृष्णाजिनसमावृतम् ॥ २५ ॥ वने चरंतं पितरं दृष्ट्वा स मृगशंकया ॥ निद्राकलुषितो रात्रावंधे तमसि संकुले ॥ २६ ॥
आत्मानं हंतुमायाति मृगोऽयमिति चिंतयन् ॥ जघान पितरं सोऽयं महारण्ये परावसुः ॥ २७ ॥ रिरक्षुणा शरीरं स्वं तेनाकामनया पिता ॥
रजन्यां हिंसितो विप्रा महापातककारिणा ॥ २८ ॥ अंतिकं स समागत्य व्यलोकयत तं हतम् ॥ ज्ञात्वा स्वपितरं रात्रौ शुशोच व्यथितेंद्रियः ॥
॥ २९ ॥ प्रेतकार्यं ततः कृत्वा पितुः सर्वं परावसुः ॥ भूयोपि नृपतेः सत्रं परावसुरुपाययौ ॥ ३० ॥ स्वचेष्टितं तु तत्सर्वमनुजाय ततोऽब्रवीत् ॥

१ व्याघ्रशंकया—इ० पा० । २ व्याघ्र—इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वनेचर ॥ २० ॥ विश्वासघातिनां लोके महाकष्टा भवंति हि ॥ न हि मित्रद्रुहां पापं नश्येद्यज्ञायुतैरपि ॥ २१ ॥ ब्रह्महत्यादिपापानां कथंचिन्निष्कृतिर्भवेत् ॥ विश्वस्तघातिनां पापं न नश्येज्जन्मकोटिभिः ॥ २२ ॥ नाहं मेरुं महाभारं मन्ये पंचास्य भूतले ॥ महाभारमिमं मन्ये लोके विश्वासघातकम् ॥ २३ ॥ एवमुक्तेऽथ ऋक्षेण सिंहस्तूष्णीमभूत्तदा ॥ धर्मगुप्ते प्रबुद्धे तु ऋक्षः सुष्वाप भूरुहे ॥२४॥ ततः सिंहोऽब्रवीद्भूपमेनमृक्षं त्यजस्व मे ॥ एवमुक्तेऽथ सिंहेन राजा सुप्तमशंकितः ॥२५॥ स्वांकन्यस्तशिरस्कं[1] तमृक्षं तत्याज भूतले ॥ पात्यमानस्ततो राज्ञा नखालंबितपादपः ॥२६॥ ऋक्षः पुण्यवशाद्वृक्षान्न पपात महीतले ॥ स ऋक्षो नृपमभ्येत्य कोपाद्वाक्यमभाषत ॥२७॥ कामरूपधरो राजन्नहं भृगुकुलोद्भवः ॥ ध्यानकाष्ठाभिधो नाम्ना ऋक्षरूपमधारयम् ॥ २८ ॥ यस्मादनागसं सुप्तमत्याक्षीन्मां भवान्नृप ॥ मच्छापात्त्वमतः शीघ्रमुन्मत्तश्चर भूपते ॥ २९ ॥ इति शप्त्वा मुनिर्भूपं ततः सिंहमभाषत ॥ नृसिंहस्त्वं महायक्षः कुबेरसचिवः पुरा ॥३०॥ हिमवद्गिरिमासाद्य कदाचित्त्वं वधूसखः ॥ अज्ञानाद्गौतमाभ्याशे विहारमतनोर्मुदा ॥ ॥ ३१ ॥ गौतमोऽप्युटजाद्दैवात्समिदाहरणाय वै ॥ निर्गतस्त्वां विवसनं दृष्ट्वा शापमुदाहरत् ॥ ३२ ॥ यस्मान्ममाश्रमेऽद्य त्वं विवस्त्रः स्थितवानसि ॥ अतः सिंहत्वमद्यैव भविता ते न संशयः ॥ ३३ ॥ इति गौतमशापेन सिंहत्वमगमत्पुरा ॥ कुबेरसचिवो यक्षो भद्रनामा भवान्पुरा ॥ ॥ ३४ ॥ कुबेरो धर्मशीलो हि तद्भृत्याश्च तथैव हि ॥ अतः किमर्थं त्वं हंसि मामृषिं वनगोचरम् ॥ ३५ ॥ एतत्सर्वमहं ध्यानाज्जानामीह मृगाधिप ॥ इत्युक्ते ध्यानकाष्ठेन त्यक्त्वा सिंहत्वमाशु सः ॥ ३६ ॥ यक्षरूपं गतो दिव्यं कुबेरसचिवात्मकम् ॥ ध्यानकाष्ठमसावाह प्रांजलिः प्रणतो मुनिम् ॥ ३७ ॥ अद्य ज्ञातं मया सर्वं पूर्ववृत्तं महामुने ॥ गौतमः शापकाले मे शापांतमपि चोक्तवान् ॥ ३८ ॥ ध्यानकाष्ठेन संवाद ऋक्षरूपेण ते यदा ॥ तदा निर्धूय सिंहत्वं यक्षरूपमवाप्स्यसि ॥ ३९ ॥ इति मामब्रवीद्ब्रह्मन्गौतमो मुनिपुंगवः ॥ अद्य सिंहत्वनाशान्मे जानामि त्वां महामुने ॥ ४० ॥ ध्यानकाष्ठाभिधं शुद्धं कामरूपधरं सदा ॥ इत्युक्त्वा तं प्रणम्याथ ध्यानकाष्ठं स यक्षराट् ॥ ४१ ॥ विमानवरमारुह्य प्रययावलकापुरीम् ॥ तस्मिन्गते तु यक्षेशे ध्यानकाष्ठो महामुनिः ॥ ४२ ॥ अव्याहतेष्टगमनो यथेष्टः प्रययौ महीम् ॥ ध्यानकाष्ठे गते तस्मिन्कामरूपधरे मुनौ ॥ ४३ ॥ धर्मगुप्तो मुनेः शापादुन्मत्तः प्रययौ पुरीम् ॥ उन्मत्तरूपं तं दृष्ट्वा मंत्रिणस्तु नृपोत्तमम् ॥ ४४ ॥ पितुः सकाशमानिन्यू रेवातीरे मनोरमे ॥ तस्मै निवेदयामासुर्मतिभ्रंशं सुतस्य ते ॥ ४५ ॥ ज्ञात्वा तु पुत्रवृत्तांतं नन्दस्तस्य पिता तदा ॥ पुत्रमादाय तरसा

१ शाखान्यस्तशिरस्कम्—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

मपुण्यानामलभ्यं जन्मकोटिभिः ॥ २६ ॥ अतो युष्मत्पदांभोजे निश्चला भक्तिरस्तु मे ॥ इममेव वरं देहि मह्यं शंभो नमोऽस्तु ते ॥२७॥ उक्त्वा
तथास्त्विति द्रौणिं देवदेवो महेश्वरः ॥ पश्यतो द्रोणपुत्रस्य तत्रैवांतरधीयत ॥२८॥ अश्वत्थामापि विप्रेंद्रा धूतपापो विनिर्मलः ॥ रामचंद्रधनुष्को
टौ स्नानमात्रेण तत्क्षणे ॥२९॥ धूतपापमिमं द्रौणिं सर्वे चापि महर्षयः ॥ शुद्धं प्रत्यग्रहीषुस्ते तदाप्रभृति निर्मलम् ॥१३०॥ एवं वः कथितं विप्रा
द्रौणिपापविमोक्षणम् ॥ रामचन्द्रधनुष्कोटिस्नानवैभवमात्रतः ॥३१॥ यः पठेदिममध्यायं शृणुयाद्वा समाहितः ॥ स विधूयेह पापानि शिवलोके म
हीयते ॥ १३२ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे सेतुमाहात्म्ये धनुष्कोटिप्रशंसायामश्वत्थामसुप्तमारणदो
षशांतिवर्णनंनामैकत्रिंशोऽध्यायः ॥३१॥ ॥ श्रीसूत उवाच ॥ ॥ भूयोऽपि संप्रवक्ष्यामि धनुष्कोटेस्तु वैभवम् ॥ युष्माकमादरेणाहं नैमिषारण्यवा
सिनः ॥१॥ नंदोनाम महाराजः सोमवंशसमुद्भवः ॥ धर्मेण पालयामास सागरांतां धरामिमाम् ॥२॥ तस्य पुत्रः समभवद्धर्मगुप्त इति श्रुतः ॥ राज्य
रक्षाधुरं नंदो निजपुत्रे निधाय सः ॥३॥ जितेंद्रियो जिताहारः प्रविवेश तपोवनम् ॥ ताते तपोवनं याते धर्मगुप्ताभिधो नृपः ॥४॥ मेदिनीं पालया
मास धर्मज्ञो नीतितत्परः ॥ ईजे बहुविधैर्यज्ञैर्देवानिंद्रपुरोगमान् ॥ ५ ॥ ब्राह्मणेभ्यो ददौ वित्तं क्षेत्राणि च बहूनि सः ॥ सर्वे स्वधर्मनिरतास्तस्मिन्रा
जनि शासति ॥ ६ ॥ बभूवुर्नाभवन्पीडास्तस्मिंश्चोरादिसंभवाः ॥ कदाचिद्धर्मगुप्तोऽयमारूढस्तुरगोत्तमम् ॥ ७ ॥ वनं विवेश विप्रेंद्रा मृगयारसकौ
तुकी ॥ तमालतालहिंतालकुरवाकुलदिङ्मुखे ॥ ८ ॥ विचचार वने तस्मिन्सिंहव्याघ्रभयानके ॥ मत्तालिकुलसंनादसंमूर्छितदिगंतरे ॥ ९ ॥ पद्म
कल्हारकुमुदनीलोत्पलवनाकुलैः ॥ तटाकैरपि संपूर्णे तपस्विजनमंडिते ॥१०॥ तस्मिन्वने संचरतो धर्मगुप्तस्य भूपतेः ॥ अभूद्विभावरी विप्रास्त
मसावृतदिङ्मुखा ॥ ११ ॥ राजापि पश्चिमां संध्यामुपास्य नियमान्वितः ॥ जजाप तत्र च वने गायत्रीं वेदमातरम् ॥ १२ ॥ सिंहव्याघ्रादिभीत्या
स्मिन्वृक्षमेकं समास्थिते ॥ राजपुत्रे तदाभ्यागादृक्षः सिंहभयार्दितः ॥ १३ ॥ अन्वधावत तं ऋक्षमेकः सिंहो वनेचरः ॥ अनुद्रुतः स सिंहेन
ऋक्षो वृक्षमुपारुहत् ॥ १४ ॥ आरुह्य ऋक्षो वृक्षं तं ददर्श जगतीपतिम् ॥ वृक्षस्थितं महात्मानं महाबलपराक्रमम् ॥ १५ ॥ उवाच भूपतिं दृष्ट्वा
ऋक्षोयं वनगोचरः ॥ मा भीतिं कुरु राजेंद्र वत्स्यावो रजनीमिह ॥ १६ ॥ महासत्त्वो महाकायो महादंष्ट्रासमाकुलः ॥ वृक्षमूलं समायातः सिंहो
यमतिभीषणः ॥ १७ ॥ रात्र्यर्धं भज निद्रां त्वं रक्ष्यमाणो मयादितः ॥ ततः प्रसुप्तं मां रक्ष शर्वर्यर्धं महामते ॥ १८ ॥ इति तद्वाक्यमादाय सुप्ते
नंदसुते हरिः ॥ प्रोवाच ऋक्षं सुप्तोऽयं नृपश्च त्यज्यतामिति ॥ १९ ॥ तं सिंहमब्रवीदृक्षो धर्मज्ञो द्विजसत्तमाः ॥ भवान्धर्मं न जानीषे मृगराज

CC-0. In Public Domain. Digitization by eGangotri

दीनवत्सलः ॥ १ ॥ सुतमारणदोषस्य शांत्यर्थं भगवन्मम ॥ प्रायश्चित्तं विधेहि त्वं सर्वज्ञोऽसि भवान्यतः ॥ इत्युक्तो द्रौणिना व्यासश्चिरं ध्यात्वा तमब्रवीत् ॥ २ ॥ ॥ व्यास उवाच ॥ ॥ एतत्पापस्य शांत्यर्थं प्रायश्चित्तं स्मृतौ न हि ॥ ३ ॥ तथाप्युपायं वक्ष्यामि तवैतद्दोष शांतये ॥ दक्षिणांबुनिधौ पुण्ये रामसेतौ विमुक्तिदे ॥ ४ ॥ धनुष्कोटिरितिख्यातं तीर्थमस्ति महत्तरम् ॥ अस्ति पुण्यतमं द्रौणे महापातकनाशनम् ॥ ५ ॥ स्वर्गमोक्षप्रदं पुंसां ब्रह्महत्यादिशोधकम् ॥ सर्वमंगलमांगल्यं सर्वाभीष्टप्रदायकम् ॥ ६ ॥ पवित्राणां पवित्रं च तीर्थानां च तथोत्तमम् ॥ दुःस्वप्ननाशनं पुण्यं नरकक्लेशनाशनम् ॥ ७ ॥ अकालमृत्युशमनं पुंसां विजयवर्द्धनम् ॥ दारिद्र्यनाशनं पुंसामायुर्वर्धनकारणम् ॥ ८ ॥ चित्तशुद्धिप्रदं नृणां शांतिदांत्यादिकारणम् ॥ तत्र गत्वा धनुष्कोटौ रामसेतौ विमुक्तिदे ॥ ९ ॥ स्नानं कुरुष्व द्रौणे त्वं मासमात्रं निरंतरम् ॥ सुतमारणदोषात्त्वं सद्यः पूतो भविष्यसि ॥ ११० ॥ कुरुष्व वचनं शीघ्रं मम त्वं द्रोणनंदन ॥ एवमुक्तस्तदा द्रौणिर्व्यासेन परमर्षिणा ॥ ११ ॥ रामसेतुं समासाद्य धनुष्कोटिं पवित्रदाम् ॥ सस्नौ संकल्पपूर्वं तु मासमेकं निरन्तरम् ॥ १२ ॥ त्रिसंध्यं रामनाथं च सिषेवे स दिने दिने ॥ ततस्त्रिंशद्दिने तोयस्नानाद्द्रोणात्मजस्तदा ॥ १३ ॥ जजाप च धनुष्कोट्यां मंत्रं पंचाक्षरं तदा ॥ अकार्षीदुपवासं च द्रोणपुत्रस्तु तद्दिने ॥ १४ ॥ अकरोज्जागरं रात्रौ रामनाथस्य सन्निधौ ॥ अपरेद्युर्धनुष्कोटौ स्नात्वा संकल्पपूर्वकम् ॥ १५ ॥ सिषेवे रामनाथं च स्तुत्वा भक्तिपुरःसरम् ॥ ननर्त पुरतः शंभोरानंदाश्रुपरिप्लुतः ॥ १६ ॥ ततः प्रसन्नो भगवान्प्रादुरासीत्तदग्रतः ॥ दृष्ट्वा तत्र महादेवं तुष्टाव परमेश्वरम् ॥ ॥ १७ ॥ ॥ द्रौणिरुवाच ॥ ॥ नमस्ते देवदेवेश करुणाकर शंकर ॥ आपदंबुधिमग्नानां पोतायितपदांबुज ॥ १८ ॥ महादेव कृपामूर्ते धूर्जटे नीललोहित ॥ उमाकांत विरूपाक्ष चंद्रशेखर ते नमः ॥ १९ ॥ मृत्युंजय त्रिनेत्र त्वं पाहि मां कृपया दृशा ॥ पार्वतीपतये तुभ्यं त्रिपुरघ्नाय शंभवे ॥१२०॥ पिनाकपाणये तुभ्यं त्र्यंबकाय नमोनमः ॥ अनंतादिमहानागहारभूषणभूषित ॥ २१ ॥ शूलपाणे नमस्तुभ्यं गंगाधर मृडाव्यय ॥ रक्ष मां कृपया देव पापसंघातपंजरात् ॥ इति स्तुतो महादेवो द्रौणिं प्रोवाच हर्षितः ॥ २२ ॥ ॥ महादेव उवाच ॥ ॥ सुतमारणदोषस्ते धनुष्कोटौ निमज्जनात् ॥ २३ ॥ अश्वत्थामन्विनष्टोऽभूद्वरं वरय सुव्रत ॥ मयि प्रसन्ने लोकेषु किमलभ्यं भवेन्नृणाम् ॥ २४ ॥ अतोऽभीष्टं वृणीष्व त्वं मत्तो द्रोणात्मजाधुना ॥ इत्युक्तः शंभुना द्रौणिः प्राह तं परमेश्वरम् ॥ २५ ॥ तवाद्य दर्शनेनाहं कृतार्थोऽस्मि महेश्वरम् ॥ त्वद्दर्शन

१ द्रौणिः-इ० पा० । २ नमोऽस्तु ते-इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्निव ॥ ७५ ॥ खड्गं विमलमादाय व्यचरच्छिबिरे निशि ॥ ततस्तु धृष्टद्युम्नस्य शिबिरं मंदमाययौ ॥ ७६ ॥ धृष्टद्युम्नादयस्तत्र महायुद्धेन
कर्शिताः ॥ सुषुपुर्निशि विश्वस्ताः स्वस्वसैन्यसमावृताः ॥ ७७ ॥ धृष्टद्युम्नस्य शिबिरं प्रविश्य द्रौणिरस्त्रवित् ॥ तं सुप्तं शयने शुभ्रे ददर्शारान्महा
बलम् ॥ ७८ ॥ पादेनाघातयद्रोषात्स्वपंतं द्रोणनंदनः ॥ स बुद्धश्चरणाघातादुत्थाय शयनादथ ॥ ७९ ॥ व्यलोकयत्तदा वीरो द्रोणपुत्रं पुरः
स्थितम् ॥ तमुत्पतंतं शयनाद्द्रोणाचार्यसुतो बली ॥ ८० ॥ केशेष्वाकृष्य बाहुभ्यां निष्पिपेष धरातले ॥ धृष्टद्युम्नस्तदा तेन निष्पिष्टः स भया
तुरः ॥ ८१ ॥ निद्रांधः पादघातार्तो न शशाक विचेष्टितुम् ॥ द्रौणिस्त्वाक्रम्य तस्योरः कण्ठं बद्ध्वा धनुर्गुणैः ॥ ८२ ॥ नदंतं विस्फुरंतं तं पशु
मारममारयत् ॥ तस्य सैन्यानि सर्वाणि न्यवधीच्च तथैव सः ॥ ८३ ॥ युधामन्युं महावीर्यमुत्तमौजसमेव च ॥ तथैव द्रौपदीपुत्रानवशिष्टांश्च सोम
कान् ॥ ८४ ॥ शिखंडिप्रमुखानन्यान्खड्गेनामारयद्बहून् ॥ तद्भयाद्द्वारनिर्यातान्सर्वानेव च सैनिकान् ॥ ८५ ॥ प्रापयामासतुर्मृत्युं कृतवर्मकृपा
वुभौ ॥ एवं निहतसैन्यं तच्छिबिरं तैर्महाबलैः ॥ ८६ ॥ तत्क्षणे शून्यमभवत्त्रिजगत्प्रलये यथा ॥ एवं हत्वा ततः सर्वान्द्रोणपुत्रादयस्त्रयः ॥८७॥
निरगुः शिबिरात्तस्मात्पार्थभीता भयातुराः ॥ सर्वे पृथक्पृथग्देशान्दुद्रुवुः शीघ्रगामिनः ॥ ८८ ॥ अथ द्रौणिर्ययौ विप्रा रेवातीरं
मनोरमम् ॥ तत्र ह्यनेकसाहस्रा ऋषयो वेदवादिनः ॥ ८९ ॥ कथयंतः कथाः पुण्यास्तपश्चक्रुरनुत्तमम् ॥ तत्रायं प्रययौ द्रौणिर्ऋ
षीणामाश्रमेष्वथ ॥ ९० ॥ प्रविष्टमात्रे तस्मिंस्तु मुनयो ब्रह्मवादिनः ॥ द्रौणेर्दुश्चरितं ज्ञात्वा प्राहुर्योगबलेन तम् ॥ ९१ ॥ सुप्तमा
रणकृत्पापी द्रौणे त्वं ब्राह्मणाधमः ॥ त्वद्दर्शनेन ह्यस्माकं पातित्यं भवति ध्रुवम् ॥ ९२ ॥ त्वत्संभाषणमात्रेण ब्रह्महत्यायुतं भ
वेत् ॥ अतोऽस्मदाश्रमेभ्यस्त्वं निर्गच्छ पुरुषाधम ॥ ९३ ॥ इत्यब्रुवंस्तदा द्रौणिं तत्रत्या मुनयो द्विजाः ॥ इतीरितस्ततो द्रौणिर्मुनिभिर्ब्रह्म
वादिभिः ॥ ९४ ॥ लज्जितो निरगात्तस्मादाश्रमान्मुनिसेवितात् ॥ एवं काश्यादितीर्थेषु पुण्येषु प्रययौ च सः ॥ ९५ ॥ तत्रतत्र द्विजैः सर्वै
र्निंदितोऽसौ महात्मभिः ॥ व्यासं शरणमापेदे प्रायश्चित्तचिकीर्षया ॥ ९६ ॥ ततो बदरिकारण्ये समासीनं महामुनिम् ॥ द्वैपायनं समागम्य
प्रणनाम सभक्तिकम् ॥ ९७ ॥ ततो व्यासोऽब्रवीदेनं द्रोणाचार्यसुतं मुनिः ॥ त्वमस्मदाश्रमाद्द्रौणे निर्याहि त्वरया त्विति ॥ ९८ ॥ सुप्तमारण
दोषेण महापातकवान्भवान् ॥ अतो मे भवतालापान्महत्पापं भविष्यति ॥ इत्युक्तः स तदा द्रौणिः प्रोवाचेदं वचो मुनिः ॥ ९९ ॥ ॥ अश्व
त्थामोवाच ॥ ॥ भगवन्निंदितः सर्वैस्त्वामस्मि शरणं गतः ॥ १०० ॥ ब्रवीषि चेत्त्वमप्येवं कोऽन्यो मे शरणं भवेत् ॥ कृपां कुरु मयि ब्रह्मन्साधवो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निशि ॥ ४९ ॥ इत्यचिंतयदेकः सन्नुपदेशमिमं स्मरन् ॥ जेतुं न शक्याः पार्था हि ऋजुमार्गेण युद्ध्यता ॥ ५० ॥ मया तच्छद्मना तेऽद्य हंतव्या जितकाशिनः ॥ सुयोधनसकाशे च प्रतिज्ञातो मया वधः ॥ ५१ ॥ ऋजुमार्गेण युद्धे मे प्राणनाशो भविष्यति ॥ छलेन युध्यमानस्य जयश्चास्य रिपुक्षयः ॥ ५२ ॥ यच्च निंद्यं भवेत्कार्यं लोके सर्वजनैरपि ॥ कार्यमेव हि तत्कर्म क्षत्रधर्मानुवर्तिना ॥ ५३ ॥ पार्थैरपि छलेनैव कृतं कर्म सुयोधने ॥ अस्मिन्नर्थे पुराविद्भिः प्रोक्ताः श्लोका भवंति हि ॥ ५४ ॥ परिश्रांते विदीर्णे च भुंजाने च रिपोर्बले ॥ प्रस्थाने च प्रवेशे च प्रहर्तव्यं न संशयः ॥ ५५ ॥ निद्रार्तमर्धरात्रे च तथा त्यक्तायुधं रणे ॥ भिन्नयोधं बलं सर्वं प्रहर्तव्यमरातिभिः ॥ ५६ ॥ एवं स नियमं कृत्वा सुतमारणकर्मणि ॥ प्राबोधयद्द्रोजकृपौ सुप्तौ रात्रौ स साहसी ॥ द्रौणिर्ध्यात्वा मुहूर्तं तु तावुभावभ्यभाषत ॥ ५७ ॥ ॥ ॥ अश्वत्थामोवाच ॥ ॥ मृतः सुयोधनो राजा महाबलपराक्रमः ॥ ५८ ॥ शुद्धकर्मा हतः पार्थैर्बहुभिः क्षुद्रकर्मभिः ॥ भीमेनातिनृशंसेन शिरो राज्ञः पदा हतम् ॥ ५९ ॥ ततोऽद्य रात्रौ पार्थानां समेत्य पटमण्डपम् ॥ सुखसुप्तान्हनिष्यामः शस्त्रैर्नानाविधैर्वयम् ॥ कृपः प्रोवाच तत्रैनमिति श्रुत्वा द्विजोत्तमाः ॥ ६० ॥ ॥ कृप उवाच ॥ ॥ सुप्तानां मारणं लोके न धर्मो नच पूज्यते ॥ ६१ ॥ तथैव त्यक्तशस्त्राणां संत्यक्तरथवाजिनाम् ॥ शृणु मे वचनं वत्स मुच्यतां साहसं त्वया ॥ ६२ ॥ वयं तु धृतराष्ट्रं च गांधारीं च पतिव्रताम् ॥ पृच्छामो विदुरं चापि तदुक्तं करवामहे ॥ इत्युक्तः स तदा द्रौणिः कृपं प्रोवाच वै पुनः ॥ ६३ ॥ ॥ अश्वत्थामोवाच ॥ ॥ पांडवैश्च पुरा यन्मे छलाद्युद्धे पिता हतः ॥ ६४ ॥ तन्मे सर्वाणि मर्माणि निकृन्तति हि मातुल ॥ द्रोणहंताहमित्येतद्धृष्टद्युम्नस्य यद्वचः ॥ ६५ ॥ कथं जनसमक्षे तद्वचनं संशृणोम्यहम् ॥ तैरेव पांडवैः पूर्वं धर्मसेतुर्निराकृतः ॥ ६६ ॥ समक्षमेव युष्माकं सर्वेषामेव भूभृताम् ॥ त्यक्तायुधो मम पिता धृष्टद्युम्नेन पातितः ॥ ६७ ॥ तथा शांतनवो भीष्मस्त्यक्तचापो निरायुधः ॥ शिखंडिनं पुरोधाय निहतः सव्यसाचिना ॥ ६८ ॥ एवमन्येऽपि भूपालाश्छलेनैव हतास्तु तैः ॥ तथैवाहं करिष्यामि सुप्तानां मारणं निशि ॥ ६९ ॥ एवमुक्त्वा तदा द्रौणिः संयुक्ततुरगं रथम् ॥ प्रायादभिमुखः शत्रून्समारुह्य क्रुधा ज्वलन् ॥ ७० ॥ तं यांतमन्वगातां तौ कृतवर्मकृपावुभौ ॥ ययुश्च शिबिरे तेषां संप्रसुप्तजनं तदा ॥ ७१ ॥ शिबिरद्वारमासाद्य द्रोणपुत्रो व्यतिष्ठत ॥ रात्रौ तत्र समाराध्य महादेवं घृणानिधिम् ॥ ७२ ॥ अवाप विमलं खड्गं महादेवाद्वरप्रदात् ॥ ततो द्रौणिरवस्थाप्य कृतवर्मकृपावुभौ ॥ ७३ ॥ द्वारदेशे महावीरः शिबिरांतः प्रविष्टवान् ॥ प्रविष्टे शिबिरे द्रौणौ कृतवर्मकृपावुभौ ॥ ७४ ॥ द्वारदेशे व्यतिष्ठेतां यत्तौ परमधन्विनौ ॥ अथ द्रौणिः सुसंक्रुद्धस्तेजसा प्रज्वल

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तिते त्वयि ॥ २२ ॥ शृणु वाक्यं ममाद्य त्वं यथार्थं वदतो नृप ॥ सुकृतेन शपे चाहं सुयोधन महामते ॥ २३ ॥ अद्य रात्रौ हनिष्यामि पांडवा न्सह सृंजयैः ॥ पश्यतो वासुदेवस्य त्वमनुज्ञां प्रयच्छ मे ॥ २४ ॥ तस्य तद्वचनं श्रुत्वा द्रौणिं राजा तदाऽब्रवीत् ॥ तथास्त्विति पुनः प्राह कृपं राजा द्विजोत्तमाः ॥ २५ ॥ आचार्यैनं द्रोणपुत्रं कलशोत्थेन वारिणा ॥ सैनापत्येऽभिषिंचस्वेत्यथ सोपि तथाऽकरोत् ॥ २६ ॥ सोभिषिक्तस्तदा द्रौणिः परिष्वज्य नृपोत्तमम् ॥ कृतवर्मकृपाभ्यां च सहितस्त्वरितं ययौ ॥ २७ ॥ ततस्ते तु त्रयो वीराः प्रयाता दक्षिणोन्मुखाः ॥ आदित्यास्तम यात्पूर्वं शिबिरांतिकमासत ॥ २८ ॥ पार्थानां भीषणं शब्दं श्रुत्वा तत्र जयैषिणः ॥ पांडवानुद्रुता भीतास्तदा द्रौण्यादयस्त्रयः ॥ २९ ॥ प्राङ्मुखा दुद्रुवुर्भीत्या कियद्दूरं श्रमातुराः ॥ मुहूर्तं ते ततो गत्वा क्रोधामर्षवशानुगाः ॥ ३० ॥ दुर्योधनवधार्तास्ते क्षणं तत्रावतस्थिरे ॥ ततोऽपश्यन्नरण्यं वै नानातरुलतावृतम् ॥ ३१ ॥ अनेकमृगसंबाधं क्रूरपक्षिगणाकुलम् ॥ समृद्धजलसंपूर्णतटाकपरिशोभितम् ॥ ३२ ॥ पद्मेंदीवरकह्लारसरसी शतसंकुलम् ॥ तत्र पीत्वा जलं ते तु पाययित्वा हयांस्तथा ॥ ३३ ॥ अनेकशाखासंबाधन्यग्रोधं ददृशुस्ततः ॥ संप्राप्य तु महावृक्षं न्यग्रोधं ते त्रयस्तदा ॥ ३४ ॥ अवतीर्य रथेभ्यश्च मोचयित्वा तुरंगमान् ॥ उपस्पृश्य जलं तत्र सायंसंध्यामुपासत ॥ ३५ ॥ अथ चास्तगिरिं भानुः प्रपेदे च गतप्रभः ॥ ततश्च रजनी घोरा समभूत्तिमिराकुला ॥ ३६ ॥ रात्रिंचराणि सत्त्वानि संचरंति ततस्ततः ॥ दिवाचराणि सत्त्वानि निद्रावशमुपा ययुः ॥ ३७ ॥ कृतवर्मा कृपो द्रौणिः प्रदोषसमये हि ते ॥ न्यग्रोधस्योपविविशुरंतिके शोककर्शिताः ॥ ३८ ॥ कृपभोजौ तदा निद्रां भेजातेऽतिप याक्रमौ ॥ सुखोचितास्त्वदुःखार्हा निषेदुर्धरणीतले ॥ ३९ ॥ द्रोणपुत्रस्तु कोपेन कलुषीकृतमानसः ॥ ययौ न निद्रां विप्रेंद्रा निश्वसन्नुरगो यथा ॥ ४० ॥ ततोऽवलोकयांचक्रे तदरण्यं भयानकम् ॥ न्यग्रोधं च ततोऽपश्यद्बहुवायससंकुलम् ॥ ४१ ॥ तत्र वायसवृन्दानि निशायां वासमाय युः ॥ सुखं भिन्नासु शाखासु सुषुपुस्ते पृथक्पृथक् ॥ ४२ ॥ काकेषु तेषु सुप्तेषु विश्वस्तेषु समंततः ॥ ततोऽपश्यत्समायांतं भासं द्रौणिर्भयंकरम् ॥ ४३ ॥ क्रूरशब्दं क्रूरकायं बभ्रुपिंगकलेवरम् ॥ स भासोऽथ भृशं शब्दं कृत्वालीयत शाखिनि ॥ ४४ ॥ उत्प्लुत्य तस्य शाखायां न्यग्रोधस्य विहंगमः ॥ सुप्तान्काकान्निजघ्नेऽसावनेकान्वायसांतकः ॥ ४५ ॥ काकानामभिनत्पक्षान्स केषांचिद्विहंगमः ॥ इतरेषां च चरणाञ्छिरांसि चरणा युधः ॥ ४६ ॥ विचकर्त क्षणेनासावुलूको बलवान्द्विजाः ॥ स भिन्नदेहावयवैः काकानां बहुभिस्तदा ॥ ४७ ॥ समंतादावृतं सर्वं न्यग्रोधपरि मण्डलम् ॥ वायसांस्तान्निहत्यासावुलूको मुमुदे तदा ॥ ४८ ॥ द्रौणिर्दृष्ट्वा तु तत्कर्म भासेनैवं कृतं निशि ॥ करिष्याम्यहमप्येवं शत्रूणां निधनं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ष्कोटौ नरः स्नायादपुनर्भवसिद्धये ॥ एकभुक्तो जितक्रोधो माघमासेऽत्र यो नरः ॥ ८ ॥ स्नानं करोति विप्रेंद्रा मुच्यते ब्रह्महत्यया ॥ श्रीरामध
नुषः कोटौ माघमासे नरस्तु यः ॥ ९ ॥ स्नात्वांते शिवरात्रौ च निराहारो जितेंद्रियः ॥ कृत्वा जागरणं रात्रौ प्रतियामं विशेषतः ॥ ११० ॥ राम
नाथं महादेवमभ्यर्च्य विधिपूर्वकम् ॥ परेद्युरुदिते सूर्ये धनुष्कोटौ निमज्ज्य च ॥ ११ ॥ अन्येष्वपि च तीर्थेषु स्नात्वा नियतमानसः ॥ निर्वर्त्य
नित्यकर्माणि रामनाथं निषेव्य च ॥ १२ ॥ यथाशक्ति द्विजानन्नैर्भोजयित्वा द्विजोत्तमाः ॥ भूमिं गां च तिलान्धान्यं दत्त्वा वित्तं च शक्तितः ॥
॥ १३ ॥ ब्राह्मणैरप्यनुज्ञातः स्वयं भुंजीत वाग्यतः ॥ एवं कृतवतः पुंसो रामनाथो महेश्वरः ॥ १४ ॥ विमोच्य सर्वपापानि भुक्तिं मुक्तिं प्रय
च्छति ॥ अतः सर्वप्रयत्नेन माघमासे मुनीश्वराः ॥ १५ ॥ स्नातव्यं हि धनुष्कोटौ नरैरत्र मुमुक्षुभिः ॥ धनुष्कोटौ नरः स्नानं सेतावर्धोदये तु यः
॥ १६ ॥ करोति तस्य पापानि नश्यंत्येव क्षणाद्द्विजाः ॥ स्नानं महोदये चात्र भुक्तिमुक्तिफलप्रदम् ॥ १७ ॥ यः स्नायाद्धनुषः कोटावर्द्धोदयमहो
दये ॥ तस्य वश्यास्त्रयो देवा ब्रह्मविष्णुमहेश्वराः ॥ १८ ॥ धनुष्कोटौ द्विजाः स्नानमर्द्धोदयमहोदये ॥ विनाप्यद्वैतविज्ञानं सायुज्यप्राप्तिकारणम् ॥
॥ १९ ॥ तत्र स्नानं द्विजाः पुंसामर्द्धोदयमहोदये ॥ मन्वाद्युक्तं विना सत्यं प्रायश्चित्तं हि पापिनाम् ॥ १२० ॥ अत्र सेतौ धनुष्कोटावर्धोदयमहो
दये ॥ स्नाति चेन्मनुजो विप्राः सत्यं यज्ञं विनाप्ययम् ॥ २१ ॥ यज्ञानां फलमाप्नोति संपूर्णं नात्र संशयः ॥ चंद्रसूर्योपरागेषु यः स्नायादत्र
मानवः ॥ २२ ॥ तस्य पुण्यफलं वक्तुं शेषेणापि न शक्यते[1] ॥ चंद्रसूर्योपरागेषु धनुष्कोट्यवगाहनम्[2] ॥ २३ ॥ ब्रह्महत्यादिपापानां प्रायश्चित्त
मुदीरितम् ॥ श्रीरामधनुषः कोटौ चंद्रसूर्योपरागयोः ॥ २४ ॥ स्नानं सायुज्यदं प्रोक्तं सर्वतीर्थफलप्रदम् ॥ चंद्रसूर्योपरागेषु अर्धोदयमहोदये ॥
॥ २५ ॥ स्नातव्यमत्र मनुजैर्भुक्तिमुक्तिफलेच्छुभिः ॥ अतः सर्वं परित्यज्य गच्छध्वं मुनिपुंगवाः ॥ २६ ॥ धनुष्कोटिं महापुण्यां भुक्तिमुक्तिफल
प्रदाम् ॥ तत्र गत्वा पितृभ्यश्च कुरुध्वं पिंडदापनम् ॥ २७ ॥ आकल्पं पितृतृप्तिः स्यादत्र पिंडनिवापनात् ॥ पितॄणां तृप्तिदं स्थानत्रयं रामेण निर्मि
तम् ॥ २८ ॥ सेतुमूले धनुष्कोट्यां गंधमादनपर्वते ॥ पिंडं दत्त्वा पितृभ्योऽत्र ऋणान्मुक्तो भविष्यति ॥ २९ ॥ सेतुमूलं धनुष्कोटिं गंधमादनमेव
च ॥ ऋणमोक्ष इति ख्यातं त्रिस्थानं देवनिर्मितम् ॥ १३० ॥ अतः सर्वप्रयत्नेन धनुष्कोटिर्निषेव्यताम् ॥ अत्रागत्य धनुष्कोटौ स्नात्वा नियमपूर्व
कम् ॥ ३१ ॥ द्रोणाचार्यसुतः श्रीमानश्वत्थामा मुनीश्वराः ॥ सुप्तमारणदोषेण घोरेण मुमुचे क्षणात् ॥ ३२ ॥ एवं वः कथितं विप्रा धनुष्कोटे

१ गण्यते–इ० पा० । २ धनुष्कोटौ निमज्जनम्–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्तु वैभवम् ॥ भुक्तिमुक्तिप्रदं नृणां सर्वपापनिबर्हणम् ॥ १३३ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे सेतु माहात्म्ये धनुष्कोटिप्रशंसायां धनुष्कोटिवैभवकथनवर्णनंनाम त्रिंशोऽध्यायः ॥ ३० ॥ ॥ छ ॥ ॥ ऋषय ऊचुः ॥ ॥ अश्वत्थामा कथं सूत सुप्तमारणमाचरत् ॥ कथं च मुक्तस्तत्पापाद्धनुष्कोटौ निमज्जनात् ॥ १ ॥ एतन्नः श्रद्दधानानां ब्रूहि पौराणिकोत्तम ॥ तृप्तिर्न जायतेऽस्माकं त्वद्वचोमृतपायिनाम् ॥ २ ॥ इति पृष्टस्तदा सूतो नैमिषारण्यवासिभिः ॥ वक्तुं प्रचक्रमे तत्र व्यासं नत्वा गुरुं मुदा ॥ ३ ॥ ॥ श्रीसूत उवाच ॥ ॥ राज्यार्थं कलहे जाते पांडवानां पुरा द्विजाः ॥ धार्तराष्ट्रैर्महायुद्धे महदक्षौहिणीयुते ॥ ४ ॥ युद्धं दशदिनं कृत्वा भीष्मे शांतनवे हते ॥ द्रोणे पंचदिनं कृत्वा कर्णे च द्विदिनं तथा ॥ ५ ॥ तथैवैकदिनं युद्धा शल्ये च निधनं गते ॥ अष्टादशदिने तत्र रणे दुर्योधने द्विजाः ॥ ॥ ६ ॥ भग्नोरौ भीमगदया पतिते राजसत्तमे ॥ सर्वे नृपतयो विप्रा निवेशाय कृतत्वराः ॥ ७ ॥ ये जीवितास्तु राजानस्ते ययुर्हृष्टमानसाः ॥ धृष्टद्युम्नशिखंडयाद्याः सृञ्जयाः सर्व एव हि ॥ ८ ॥ अन्ये चापि महीपाला जग्मुः स्वशिबिराण्यथ ॥ अथ पार्था महावीरा कृष्णसात्यकिसंयुताः ॥ ९ ॥ दुर्योधनस्य शिबिरं प्राविशन्निर्जनं द्विजाः ॥ वृद्धैरमात्यैस्तत्रस्थैः षंढैः स्त्रीरक्षकैस्तथा ॥ १० ॥ कृतांजलिपुटैः प्रह्वैः काषायमलिनांबरैः ॥ प्रणम्यमानास्ते पार्थाः कुरुराजस्य वेश्मनि ॥ ११ ॥ तत्रत्यद्रव्यजातानि समादाय महाबलाः ॥ सुयोधनस्य शिबिरे न्यवसंत सुखेन ते ॥ १२ ॥ अथ तानब्रवीत्पार्थाञ्छ्रीकृष्णः प्रीणयन्निव ॥ मंगलार्थाय चास्माभिर्वस्तव्यं शिबिराद्बहिः ॥ १३ ॥ इत्युक्ता वासुदेवेन तथेत्युक्त्वाथ पांडवाः ॥ कृष्णसात्यकिसंयुक्ताः प्रययुः शिबिराद्बहिः ॥ १४ ॥ वासुदेवेन सहिता मंगलार्थं हि पांडवाः ॥ ओघवत्याः समासाद्य तीरं नद्या नरोत्तमाः ॥ १५ ॥ ऊषुस्तां रजनीं तत्र हतशत्रुगणाः सुखम् ॥ कृतवर्मा कृपो द्रौणिस्तथा दुर्योधनांतिकम् ॥ १६ ॥ आदित्यास्तमयात्पूर्वमपराह्ने समाययुः ॥ सुयोधनं तदा दृष्ट्वा रणपांसुषु रूषितम् ॥ १७ ॥ भग्नोरुदण्डं गदया भीमसेनस्य भीमया ॥ रुधिरासिक्तसर्वांगं चेष्टमानं महीतले ॥ १८ ॥ अशोचंत तदा तत्र द्रोणपुत्रादयस्त्रयः ॥ शुशोच सोऽपि तान्दृष्ट्वा रणे दुर्योधनो नृपः ॥ १९ ॥ दृष्ट्वा तथा तु राजानं बाष्पव्याकुललोचनम् ॥ अश्वत्थामा तदा कोपाज्ज्वलन्निव महानलः ॥ २० ॥ पाणौ पाणिं विनिष्पिष्य क्रोधविस्फारितेक्षणः ॥ अश्रुविक्लवया वाचा दुर्योधनमभाषत ॥ २१ ॥ पिता मे पातितः क्षुद्रैश्छलेनैव रणाजिरे ॥ न तथा तेन शोचामि यथा निष्पा

१ कृष्णपार्थिवसंयुताः–इ० पा० । २ प्रहसन्निव–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

महापातकनाशाय मुक्त्यै चाभीष्टसिद्धये ॥ भवेत्समर्थं विप्रेंद्रा नात्र कार्या विचारणा ॥ ८१ ॥ तावत्संपीड्यते जंतुः पातकैश्चोपपा
तकैः ॥ यावन्नालोक्यते रामधनुष्कोटिर्विमुक्तिदा ॥ ८२ ॥ भिद्यते हृदयग्रंथिश्छिद्यंते सर्वसंशयाः ॥ क्षीयंते पापकर्माणि धनुष्कोट्यवलो
किनः ॥ ८३ ॥ दक्षिणांभोनिधौ सेतौ रामचन्द्रेण निर्मिता ॥ या रेखा धनुषः कोट्या बिभीषणहिताय वै ॥ ८४ ॥ सैव कैलासपदवीं वैकुण्ठब्र
ह्मलोकयोः ॥ मार्गः स्वर्गस्य लोकस्य नात्र कार्या विचारणा ॥ ८५ ॥ तुल्यं यज्ञफलैः पुण्यैर्धनुष्कोट्यवगाहनम् ॥ सर्वमंत्राधिकं पुण्यं सर्वदा
नफलप्रदम् ॥ ८६ ॥ कायक्लेशकरैः पुंसां किं तपोभिः किमध्वरैः ॥ किं वेदैः किमु वा शास्त्रैर्धनुष्कोट्यवलोकिनः ॥ ८७ ॥ रामचंद्रधनुष्कोटौ
स्नानं चेल्लभ्यते नृणाम् ॥ सितासितसरित्पुण्यवारिभिः किं प्रयोजनम् ॥ ८८ ॥ रामचंद्रधनुष्कोटिदर्शनं लभ्यते यदि ॥ काश्यां तु मरणान्मुक्तिः
प्रार्थ्यते किं वृथा नरैः ॥ ८९ ॥ अनिमज्य धनुष्कोटावनुपोष्य दिनत्रयम् ॥ अदत्त्वा कांचनं गां च दरिद्रः स्यान्न संशयः ॥ ९० ॥ धनुष्को
ट्यवगाहेन यत्फलं लभते नरः ॥ अग्निष्टोमादिभिर्यज्ञैरिष्ट्वापि बहुदक्षिणैः ॥ ९१ ॥ न तत्फलमवाप्नोति सत्यंसत्यं वदाम्यहम् ॥ धनुष्कोट्यभिधं
तीर्थं सर्वतीर्थाधिकं विदुः ॥ ९२ ॥ दशकोटिसहस्राणि संति तीर्थानि भूतले ॥ तेषां सान्निध्यमस्त्यत्र धनुष्कोटौ द्विजोत्तमाः ॥ ९३ ॥ अष्टौ
वसव आदित्या रुद्राश्च मरुतस्तथा ॥ साध्याश्च सह गन्धर्वाः सिद्धविद्याधरास्तथा ॥९४॥ एते चान्ये च ये देवाः सान्निध्यं कुर्वते सदा ॥ तीर्थेऽत्र
धनुषः कोटौ नित्यमेव पितामहः ॥ ९५ ॥ सन्निधत्ते शिवो विष्णुरुमा मा च सरस्वती ॥ धनुष्कोटौ तपस्तप्त्वा देवाश्च ऋषयस्तथा ॥ ९६ ॥
विपुलां सिद्धिमगमंस्तत्फलेन मुनीश्वराः ॥ स्नायात्तत्र नरो यस्तु पितृदेवांश्च तर्पयेत् ॥९७॥ सर्वपापविनिर्मुक्तो ब्रह्मलोके महीयते ॥ अत्रैकं भोजये
द्विप्रं यो नरो भक्तिसंयुतः॥९८॥ इह लोके परत्रापि सोऽनंतसुखमश्नुते ॥ शाकमूलफले वृत्तिं यो न वर्तयते नरः॥९९॥ स नरो धनुषः कोटौ स्नायात्त
त्फलसिद्धये ॥ अश्वमेधक्रतुं कर्तुं शक्तिर्यस्य न विद्यते ॥१००॥ धनुष्कोटौ स हि स्नायात्तेन तत्फलमश्नुते ॥ ब्राह्मणः क्षत्रियो वैश्यः शूद्रो वापि मुनी
श्वराः॥१॥निंद्ययोनौ न जायंते धनुष्कोट्यवगाहनात्॥मकरस्थे रवौ माघे धनुष्कोटौ तु यो नरः॥२॥स्नायात्पुण्यं निगदितुं तस्याहं न क्षमो द्विजाः॥
माघमासे धनुष्कोटाववगाहेत यो नरः ॥ ३ ॥ स स्नातः सर्वतीर्थेषु गंगादिषु मुनीश्वराः ॥ प्राप्नुयादक्षयाँल्लोकान्मोक्षं चापि लभेत सः ॥ ४ ॥
जन्मप्रभृति यत्पापं स्त्रियो वा पुरुषस्य वा ॥ तत्सर्वं माघमासेऽत्र मज्जनाद्विलयं व्रजेत् ॥ ५ ॥ यथा सुराणां सर्वेषामुत्तमो रघुनंदनः ॥ तथैव च
धनुष्कोटिः सर्वतीर्थोत्तमा स्मृता ॥ ६ ॥ तत्र स्नानं माघमासे सर्वाभीष्टप्रदायकम् ॥ त्रिंशद्दिनं माघमासे नियतोऽपि जितेंद्रियः ॥ ७ ॥ धनु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तंतं सद्यः समाप्नोति धनुष्कोटौ निमज्जनात् ॥ महापातकयुक्तो वा युक्तो वा सर्वपातकैः ॥ ५४ ॥ सद्यः पूतो भवेद्विप्रा धनुष्कोटौ निमज्जनात् ॥ प्रज्ञा लक्ष्मीर्यशः संपज्ज्ञानं धर्मो विरक्तता ॥५५॥ मनःशुद्धिर्भवेन्नृणां धनुष्कोटिनिमज्जनात्॥ ब्रह्महत्यायुतं चापि सुरापानायुतं तथा॥५६॥अयुतं गुरुदारागां गमनं पापकारणम्॥ स्तेयायुतं सुवर्णानां तत्संसर्गश्च कोटिशः॥५७॥ शीघ्रं विलयमाप्नोति धनुष्कोटौ निमज्जनात्॥ ब्रह्महत्यासमानानि सुरापनसमानि च॥५८॥गुरुस्त्रीगमनेनापि यानि तुल्यानि चास्तिकाः॥सुवर्णस्तेयतुल्यानि तत्संर्गसमानि च॥५९॥तानि सर्वाणि नश्यंति धनुष्कोटिनिमज्जनात्॥उक्तेष्वेतेषु संदेहो न कर्तव्यः कदाचन ॥६०॥ जिह्वाग्रे परशुं तप्तं धारयामि न संशयः ॥ अर्थवादमिमं सर्वं ब्रुवन्वै नारकी भवेत् ॥ ॥ ६१ ॥ संकरः स हि विज्ञेयः सर्वकर्मबहिष्कृतः॥ अहो मौर्ख्यमहो मौर्ख्यमहो मौर्ख्यं द्विजोत्तमाः ॥ ६२ ॥ धनुष्कोट्यभिधे तीर्थे सर्वपातकनाशने ॥ अद्वैतज्ञानदे पुंसां भुक्तिमुक्तिप्रदायिनि ॥ ६३ ॥ इष्टकाम्यप्रदे नित्यं तथैवाज्ञाननाशने ॥ स्थितेऽपि तद्विहायायं रमतेऽन्यत्र वै जनः ॥६४॥ अहो मोहस्य माहात्म्यं मया वक्तुं न शक्यते ॥ स्नातस्य धनुषः कोटौ नांतकाद्भयमस्ति वै ॥६५॥ धनुष्कोटिं प्रपश्यंति तत्र स्नांति च ये नराः॥ स्तुवंति च प्रशंसंति स्पृशंति च नमंति च ॥ न पिबंति हि ते स्तन्यं मातॄणां द्विजपुंगवाः ॥ ६६ ॥ ॥ ऋषय ऊचुः ॥ ॥ धनुष्कोट्यभिधा तस्य कथं सूत समागता ॥ ६७ ॥ तत्सर्वं ब्रूहि तत्त्वेन विस्तरान्मुनिपुंगव ॥ इति पृष्टो नैमिषीयैराह सूतः पुनश्च तान् ॥ ६८ ॥ ॥ श्रीसूत उवाच ॥ ॥ रामेण निहते युद्धे रावणे लोककण्टके ॥ बिभीषणे च लंकायां राजनि स्थापिते ततः ॥ ६९ ॥ वैदेहीलक्ष्मणयुतो रामो दशरथात्मजः ॥ सुग्रीवप्रमुखैर्वीरैर्वानरैरपि संवृतः ॥ ७० ॥ सिद्धचारणगन्धर्वदेवविद्याधरर्षिभिः ॥ अप्सरोभिश्च सततं स्तूयमाननिजाद्भुतः ॥ ७१ ॥ लीलाविधृतकोदण्डस्त्रिपुरघ्नो यथा शिवः ॥ सर्वैः परिवृतो रामो गंधमादनमन्वगात् ॥ ७२ ॥ तत्र स्थितं महात्मानं राघवं रावणांतकम् ॥ प्रांजलिः प्रार्थयामास धर्मज्ञोऽथ बिभीषणः ॥ ७३ ॥ सेतुनानेन ते राम राजानः सर्व एव हि ॥ बलोद्रिक्ताः समभ्येत्य पीडयेयुः पुरीं मम ॥ ॥ ७४ ॥ अतः सेतुमिमं भिंधि धनुष्कोट्या रघूद्वह ॥ इति संप्रार्थितस्तेन पौलस्त्येन स राघवः ॥ ७५ ॥ बिभेद धनुषः कोट्या स्वसेतुं रघुनंदनः ॥ अतो द्विजास्तत्तस्तीर्थं धनुष्कोटिरिति श्रुतम् ॥ ७६ ॥ श्रीरामधनुषः कोट्या यो रेखां पश्यते कृताम् ॥ अनेकक्लेशसंयुक्तं गर्भवासं न पश्यति ॥ ७७ ॥ धनुष्कोट्या कृता रेखा रामेण लवणांबुधौ ॥ तद्दर्शनाद्भवेन्मुक्तिर्न जाने स्नानजं फलम् ॥ ७८ ॥ नर्मदारोधसि तपो महापातकनाशनम् ॥ गंगातीरे तु मरणमपवर्गफलप्रदम् ॥ ७९ ॥ दानं द्विजाः कुरुक्षेत्रे ब्रह्महत्यादिशोधकम् ॥ तपश्च मरणं दानं धनुष्कोटौ कृतं नरैः ॥८०॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पातकैः ॥ ५१ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे सेतुमाहात्म्ये सर्वतीर्थप्रशंसायां सर्वतीर्थस्वरूप
कथनंनामैकोनत्रिंशोऽध्यायः ॥ २९ ॥ ॥ छ ॥ ॥ श्रीसूत उवाच ॥ ॥ विहिताभिषवो मर्त्यः सर्वतीर्थेऽतिपावने ॥ ब्रह्महत्यादिपापघ्नीं
धनुष्कोटिं ततो व्रजेत् ॥ १ ॥ यस्याः स्मरणमात्रेण मुक्तः स्यान्मानवो भुवि ॥ धनुष्कोटिं प्रपश्यंति स्नांति वा कथयंति ये ॥ २ ॥
अष्टाविंशतिभेदांस्ते नरकान्नोपभुंजते ॥ तामिस्रमंधतामिस्रं महारौरवरौरवौ ॥ ३ ॥ कुम्भीपाकं कालसूत्रमसिपत्रवनं तथा ॥ कृमि
भक्षोऽधकूपश्च संदंशं शाल्मली तथा ॥ ४ ॥ सूर्मिर्वैतरणी प्राणरोधो विशसनं तथा ॥ लालाभक्षोऽप्यवीचिश्च सारमेयादनं तथा ॥ ५ ॥
तथैव वज्रकणकं क्षारकर्दमपातनम् ॥ रक्षोगणाशनं चापि शूलप्रोतं वितोदनम् ॥ ६ ॥ दंदशूकाशनं चापि पर्यावर्तनसंज्ञितम् ॥ तिरो
धानाभिधं विप्रास्तथा सूचीमुखाभिधम् ॥ ७ ॥ पूयशोणितभक्षं च विषाग्निपरिपीडनम् ॥ अष्टाविंशतिसंख्याकमेवं नरकसंचयम् ॥ ८ ॥
न याति मनुजो विप्रा धनुष्कोटौ निमज्जनात् ॥ वित्तापत्यकलत्राणां योऽन्येषामपहारकः ॥ ९ ॥ स कालपाशनिर्बद्धो यमदूतैर्भयानकैः ॥ तामि
स्रनरके घोरे पात्यते बहुवत्सरम् ॥ १० ॥ स्नाति चेद्धनुषः कोटौ तस्मिन्नासौ निपात्यते ॥ यो निहत्य तु भर्तारं भुंक्ते तस्य धनादिकान् ॥ ११ ॥
पात्यते सोंऽधतामिस्रे महादुःखसमाकुले ॥ स्नाति चेद्धनुषः कोटौ तस्मिन्नासौ निपात्यते ॥ १२ ॥ भूतद्रोहेण यो मर्त्यः पुष्णाति स्वकुटुंबकम् ॥
स तानिह विहायाशु रौरवे पात्यते ध्रुवम् ॥ १३ ॥ विषोल्बणमहासर्पसंकुले यमपूरुषैः ॥ स्नाति चेद्धनुषः कोटौ तस्मिन्नासौ निपात्यते ॥
॥ १४ ॥ यः स्वदेहंभरो मर्त्यो भार्यापुत्रादिकं विना ॥ स महारौरवे घोरे पात्यते निजमांसभुक् ॥ १५ ॥ स्नाति चेद्धनुषः कोटौ तस्मि
न्नासौ निपात्यते ॥ यः पशून्पक्षिणो वापि सप्राणान्निरुणद्धि वै ॥ १६ ॥ कृपालेशविहीनं तं क्रव्यादैरपि निंदितम् ॥ कुंभीपाके तप्ततैले पात
यंति यमानुगाः ॥ १७ ॥ स्नाति चेद्धनुषः कोटौ तस्मिन्नासौ निपात्यते ॥ मातरं पितरं विप्रान्यो द्वेष्टि पुरुषाधमः ॥ १८ ॥ स कालसूत्र
नरके विस्तृतायुतयोजने ॥ अधस्तादग्निसंतप्त उपर्यर्कमरीचिभिः ॥ १९ ॥ खले ताम्रमये विप्राः पात्यते क्षुधयार्दितः ॥ स्नाति चेद्धनुषः
कोटौ तस्मिन्नासौ निपात्यते ॥ २० ॥ यो वेदमार्गमुल्लंघ्य वर्तते कुपथे नरः ॥ सोऽसिपत्रवने घोरे पात्यते यमकिंकरैः ॥ २१ ॥ स्नाति
चेद्धनु० ॥ यो राजा राजभृत्यो वा ह्यदंड्ये दंडमाचरेत् ॥ २२ ॥ शरीरदंडं विप्रे वा स शूकरमुखे द्विजाः ॥ पात्यते नरके घोरे इक्षुवद्यंत्रपीडितः ॥
॥ २३ ॥ स्नाति चे० ॥ ईश्वराधीनवृत्तीनां हिंसां यः प्राणिनां चरेत् ॥ २४ ॥ तैरेव पीड्यमानोऽयं जंतुभिः स्वेन पीडितैः ॥ अंधकूपे माह

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भीमे पात्यते यमकिंकरैः ॥ २५ ॥ तत्रांधकारबहुले विनिद्रो निर्वृतश्चरेत् ॥ स्नानि चे० ॥ २६ ॥ योऽश्नाति पंक्तिभेदेन संस्यसूंपादिकं
नरः ॥ अकृत्वा पंचयज्ञं वा भुंक्ते मोहेन स द्विजाः ॥ २७ ॥ प्रपात्यते यमभटैर्नरके कृमिभोजने ॥ भक्ष्यमाणः कृमिशतैर्भक्षयन्कृमिसंच
यान् ॥ २८ ॥ स्वयं च कृमिभूतः संस्तिष्ठेद्यावदघक्षयम् ॥ स्नाति चे० ॥ २९ ॥ यो हरेद्विप्रवित्तानि स्तेयेन बलतोऽपि वा ॥ अन्येषामपि
वित्तानि राजा तत्पुरुषोऽपि वा ॥ ३० ॥ अयस्मयाग्निकुंडेषु संदंशैः सोऽतिपीडितः ॥ संदंशे नरके घोरे पात्यते यमपूरुषैः ॥ ३१ ॥ स्नाति
चे० ॥ अगम्यां योभिगच्छेत स्त्रियं वै पुरुषाधमः ॥ ३२ ॥ अगम्यं पुरुषं योषिदभिगच्छेत वा द्विजाः ॥ तावयस्मयनारीं च पुरुषं चाप्ययस्मयम्
॥ ३३ ॥ तप्तावालिंग्य तिष्ठंतौ यावच्चंद्रदिवाकरौ ॥ सूर्म्याख्ये नरके घोरे पात्येते बहुकंटके ॥ ३४ ॥ स्नाति चे० ॥ बाधते सर्वजंतून्यो नानो
पायैरुपद्रवैः ॥ ३५ ॥ शालमलीनरके घोरे पात्यते बहुकंटके ॥ स्नाति चे० ॥ ३६ ॥ राजा वा राजभृत्यो वा यः पार्षंडमनुव्रतः ॥ भेद
को धर्मसेतूनां वैतरण्यां निपात्यते ॥ ३७ ॥ स्नानि चे० ॥ वृषलीसंगदुष्टो यः शौचाद्याचारवर्जितः ॥ ३८ ॥ त्यक्तलज्जस्त्यक्तवेदः पशुचर्यारत
स्तथा ॥ स पूयविष्ठामूत्रासृक्श्लेष्मपित्तादिपूरिते ॥ ३९ ॥ अतिबीभत्सनरके पात्यते यमकिंकरैः ॥ स्नाति चे० ॥ ४० ॥ अश्मभिर्मृगयुर्हन्याद्वाणै
र्वा बाधते मृगान् ॥ स विध्यमानो बाणौघैः परत्र यमकिंकरैः ॥ ४१ ॥ प्राणरोधाख्यनरके पात्यते यमकिंकरैः ॥ स्नाति चे० ॥ ४२ ॥ दांभिको
यः पशून्यज्ञे विध्यनुष्ठानवर्जितः ॥ हंत्यसौ परलोकेषु वैशसे नरके द्विजाः ॥ ४३ ॥ कृन्त्यमानो यमभटैः पात्यते दुःखसंकुले ॥ स्नाति
चे० ॥ ४४ ॥ आत्मभार्यां सवर्णां यो रेतः पाययते तु सः ॥ परत्र रेतःपायी सन्रेतःकुंडे निपात्यते ॥ ४५ ॥ स्नाति चे० ॥ यो दस्युमार्ग
माश्रित्य गरदो ग्रामदाहकः ॥ ४६ ॥ वणिग्द्रव्यापहारी च स परत्र द्विजोत्तमाः ॥ वज्रदंष्ट्राहिकाभिख्ये नरके पात्यते चिरम् ॥ ४७ ॥
स्नाति चे० ॥ विद्यंते यानि चान्यानि नरकाणि परत्र वै ॥ ४८ ॥ तानि नाप्नोति मनुजो धनुष्कोटिनिमज्जनात् ॥ धनुष्कोटौ सकृत्स्ना
नादश्वमेधफलं लभेत् ॥ ४९ ॥ आत्मविद्या भवेत्साक्षान्मुक्तिश्चापि चतुर्विधा ॥ न पापे रमते बुद्धिर्न भवेद्दुःखमेव वा ॥ ५० ॥ बुद्धेः प्रीति
र्भवेत्सम्यग्धनुष्कोटौ निमज्जनात् ॥ तुलापुरुषदानेन यत्फलं लभ्यते नरैः ॥ ५१ ॥ तत्फलं लभ्यते पुंभिर्धनुष्कोटौ निमज्जनात् ॥ गोसहस्र
प्रदानेन यत्पुण्यं हि भवेन्नृणाम् ॥ ५२ ॥ तत्पुण्यं लभते मर्त्यो धनुष्कोटौ निमज्जनात् ॥ धर्मार्थकाममोक्षेषु यंयमिच्छति पूरुषः ॥ ५३ ॥

१ शाकम्-इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उवाच ॥ ॥ इति स्तुतो महादेवस्तमेनमिदमभ्यधात् ॥ मुनिं सुचरितं विप्रा दयोदन्वानुमापतिः ॥ २९ ॥ ॥ महादेव उवाच ॥ ॥ मुने सुचरिताद्य त्वं वरं वरय कांक्षितम् ॥ वरं दातुं तवायातः पुण्येस्मिन्नाश्रमे शुभे ॥ इतीरितो मुनिः प्राह महादेवं दयानिधिम् ॥ ३० ॥ ॥ ॥ सुचरित उवाच ॥ ॥ भगवंस्त्वं प्रसन्नो मे यदि स्याश्चन्द्रशेखर ॥ ३१ ॥ तर्हि त्वां प्रवृणोम्यद्धा वरं मदभिकांक्षितम् ॥ जरापलितदेहोहं कुत्रचिद्गंतुमक्षमः ॥ ३२ ॥ सर्वतीर्थेषु च स्नातुमाकांक्षा मम विद्यते ॥ तस्मात्सर्वेषु तीर्थेषु स्नानेन मनुजो हि यत् ॥ फलं प्राप्नोति मे ब्रूहि तत्फलावाप्तिसाधनम् ॥ ३३ ॥ ॥ महादेव उवाच ॥ ॥ अहमावाहयिष्यामि तीर्थान्यत्रैव कृत्स्नशः ॥ ३४ ॥ रामस्य सेतुना पूते नगेऽस्मिन्गंधमादने ॥ इत्युक्त्वा स महादेवः पर्वते गन्धमादने ॥ ३५ ॥ तीर्थान्यावाहयामास मुनिप्रीत्यर्थमुत्तमः ॥ ततस्सुचरितं प्राह शंकरः करुणानिधिः ॥ ३६ ॥ मुने सुचरितेदं तु महापातकनाशनम् ॥ सांनिध्यात्सर्वतीर्थानां सर्वतीर्थाभिधं स्मृतम् ॥ ३७ ॥ मयात्र सर्वतीर्थानां मनसाकर्षणादिदम् ॥ मानसं तीर्थमित्याख्यां लप्स्यते भुक्तिमुक्तिदम् ॥ ३८ ॥ अतः सुचरितात्र त्वं स्नाहि सद्यो विमुक्तये ॥ महापातकसंघानां दावानलसमद्युतौ ॥ ॥ ३९ ॥ काममोहभयक्रोधलोभरोगादिनाशने ॥ विना वेदांतविज्ञानं सद्योनिर्वाणकारणे ॥ ४० ॥ जन्ममृत्य्वादिनक्रौघसंसारार्णवतारणे ॥ कुम्भीपाकादिसकलनरकाग्निविनाशने ॥ ४१ ॥ इतीरितः सुचरितः शम्भुना मदनारिणा ॥ सस्नौ विप्राः सर्वतीर्थे महादेवस्य संनिधौ ॥ ४२ ॥ स्नात्वोत्थितः सुचरितो ददृशेऽखिलमानवैः ॥ जरापलितनिर्मुक्तस्तरुणोऽतीव सुन्दरः ॥ ४३ ॥ दृष्ट्वा स्वदेहसौंदर्यं ततः सुचरितो मुनिः ॥ श्लाघयामास तत्तीर्थं बहुधाऽन्ये च तापसाः ॥ ४४ ॥ महादेवः सुचरितं बभाषे तदनंतरम् ॥ अस्य तीर्थस्य तीरे त्वं वसन्सुचरित द्विज ॥ ॥ ४५ ॥ स्नानं कुरुष्व सततं स्मरन्मां मुक्तिदायकम् ॥ देशांतरीयतीर्थेषु मा व्रज ब्राह्मणोत्तम ॥ ४६ ॥ अस्य तीर्थस्य माहात्म्यान्मामंते प्राप्स्यसिध्रुवम् ॥ अन्येऽपि येऽत्र स्नास्यंति तेऽपि मां प्राप्नुयुर्द्विज ॥ ४७ ॥ इत्युक्त्वा भगवानीशस्तत्रैवांतरधीयत ॥ तस्मिन्नंतर्हिते रुद्रे ततः सुचरितो मुनिः ॥ ४८ ॥ अनेककालं निवसन्सर्वतीर्थस्य तीरतः ॥ स्नानं समाचरंस्तीर्थे मानसे नियमान्वितः ॥ ४९ ॥ देहांते शंकरं प्राप सर्वबन्धविमोचितः ॥ सायुज्यं चापि संप्राप सर्वतीर्थस्य वैभवात् ॥ ५० ॥ एवं वः कथितं विप्राः सर्वतीर्थस्य वैभवम् ॥ एतत्पठन्वा शृण्वन्वा मुच्यते सर्व

१ दयोदन्वान्—दयासिन्धुः । २ घृणानिधिम्—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्रसंसदम् ॥ द्रष्टुं सुरांगनानृत्यं मनोहारि दिवौकसाम् ॥ ७३ ॥ एकैकशस्ताः शक्रस्य ननृतुः पुरतोंऽगनाः ॥ अथोर्वशी समागत्य ननर्त पुरतो हरेः ॥ ७४ ॥ नृत्ताभिनयसामर्थ्यगर्वयुक्ता तदोर्वशी ॥ तं पुरूरवसं दृष्ट्वा जहासातिमनोहरा ॥ ७५ ॥ जहास तत्र राजापि तां विलोक्य तदोर्वशीम् ॥ हाससंकुपितस्तत्र नाट्याचार्योऽथ तुंबुरुः ॥ शशाप तावुभौ कोपादुर्वशीं च नृपोत्तमम् ॥ ७६ ॥ ॥ ॥ तुंबुरुरुवाच ॥ ॥ अनेकदेवसंपूर्णसभायामत्र यत्कृतम् ॥ ७७ ॥ युवाभ्यां हसितं नृत्तमध्ये निष्कारणं वृथा ॥ तस्माज्झटिति राजेंद्र वियोगो युवयोः क्षणात् ॥ ७८ ॥ भूयादिति शशापैनं सर्वदेवतसंनिधौ ॥ अथ शप्तो नृपस्तत्र नाट्याचार्येण दुःखितः ॥ ७९ ॥ जगाम शरणं तत्र पाहिपाहीति वज्रिणम् ॥ उवाच दीनया वाचा पुरुहूतं पुरूरवाः ॥ ८० ॥ उर्वश्या सह सालोक्यसिद्ध्यर्थमहमिष्टवान् ॥ अतस्तस्या वियोगो मेऽसह्यः स्यात्पाकशासन ॥ ८१ ॥ इत्युक्तवंतं तं प्राह सहस्राक्षः शचीपतिः ॥ शापमोक्षं प्रवक्ष्यामि मा भैषीस्त्वं नृपोत्तम ॥ ८२ ॥ दक्षिणांभोनिधौ पुण्ये गंधमादनपर्वते ॥ साध्यामृतमिति ख्यातं तीर्थमस्ति महत्तरम् ॥ ८३ ॥ सेवितं सर्वदेवैश्च सिद्धचारणकिन्नरैः ॥ सनकादि महायोगिमुनिवृंदनिषेवितम् ॥ ८४ ॥ भुक्तिमुक्तिप्रदं पुंसां सर्वशापविमोक्षदम् ॥ अस्ति तीर्थं भवांस्तत्र गच्छस्व त्वरया नृप ॥ ८५ ॥ सर्वेषाम मृतं स्नानादत्र साध्यं यतस्ततः ॥ साध्यामृतमिति ख्यातं सर्वलोकेषु विश्रुतम् ॥ ८६ ॥ तत्र स्नानात्तवोर्वश्याः पुनर्योगो भविष्यति ॥ मम लोके निवासश्च भविष्यति न संशयः ॥ ८७ ॥ इति प्रतिसमादिष्टो नृपः संप्रीतमानसः ॥ साध्यामृतं महातीर्थं समुद्दिश्य ययौ क्षणात् ॥ ८८ ॥ सस्नौ साध्यामृते तत्र महापातकनाशने ॥ तत्र स्नानान्नृपो विप्राः सद्यः शापेन मोचितः ॥ ८९ ॥ स्नानानंतरमेवासावुर्वश्या सह संगतः ॥ तया सह विमानस्थः प्रययावमरावतीम् ॥ ९० ॥ रेमे पुनस्तया सार्धं देववद्देवमंदिरे ॥ एवंप्रभावं तत्तीर्थं साध्यामृतमनुत्तमम् ॥ ९१ ॥ पुरूरवा सहोर्वश्या यत्र स्नानेन संगतः ॥ अतोऽत्र तीर्थे यः स्नायान्महापातकनाशने ॥ ९२ ॥ वांछिताँल्लभते कामान्यास्यति स्वर्गमुत्तमम् ॥ निष्कामः स्नाति चेद्विप्रा मोक्षमाप्नोति मानवः ॥९३॥ इमं पवित्रं पापघ्नमध्यायं पठते तु यः॥ शृणुयाद्वा मनुष्योऽसौ वैकुंठे लभते स्थितिम् ॥९४॥ एवं वः कथितं विप्रा वैभवं पापनाशनम् ॥ साध्यामृतस्य तीर्थस्य विस्तराच्छ्रद्धया मया ॥ ९५ ॥ यत्पुरा सनकादिभ्यः प्रोक्तवांश्चतुराननः ॥ ९६ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे सेतुमाहात्म्ये साध्यामृततीर्थप्रशंसायां पुरूरवःशापविमोक्षणवर्णनंनामाष्टाविंशोऽध्यायः ॥ २८ ॥ ॥ श्रीसूत उवाच ॥ ॥ स्नात्वा साध्यामृते तीर्थे नृपशापविमोक्षणे ॥ सर्वतीर्थं ततो गच्छेन्मनुजो नियमान्वितः ॥ १ ॥ सर्वतीर्थं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

महापुण्यं महापातकनाशनम् ॥ महापातकयुक्तो वा युक्तो वा सर्वपातकैः ॥ २ ॥ शुद्ध्येत तत्क्षणादेव सर्वतीर्थनिमज्जनात् ॥ तावत्सर्वाणि पापानि देहे तिष्ठंति सुव्रताः ॥ ३ ॥ न यावत्सर्वतीर्थेस्मिन्निमज्जेत्पापपूरुषः ॥ स्नानार्थं सर्वतीर्थेऽस्मिन्दृष्ट्वा यांतं द्विजा नरम्॥ ४ ॥ वेपंते सर्वपापानि नाशोऽस्माकं भवेदिति ॥ गर्भवासादिदुःखानि तावद्याति नरो भुवि ॥ ५ ॥ न स्नायात्सर्वतीर्थेऽस्मिन्यावद्ब्राह्मणपुंगवाः॥ अनुष्ठितैर्महायागैस्तथा तीर्थनिषेवणैः ॥ ६ ॥ गायत्र्यादिमहामंत्रजपैर्नियमपूर्वकम् ॥ चतुर्णामपि वेदानामावृत्त्या शतसंख्यया ॥ ७ ॥ शिवविष्ण्वादिदेवानां पूजया भक्तिपूर्वकम् ॥ एकादश्यादितिथिषु तथैवानशनेन च यत्फलं लभते मर्त्यस्तल्लभेदत्र मज्जनात् ॥ ८ ॥ ॥ ऋषय ऊचुः ॥ ॥ सर्वतीर्थमिति ख्यातिः सूतास्य कथमागता ॥ ब्रूह्यस्माकमिदं पुण्यं विस्तराच्छृण्वतां मुने ॥ ९ ॥ ॥ श्रीसूत उवाच ॥ ॥ पुरा सुचरितोनाम मुनिर्नियमसंयुतः ॥ ॥ १० ॥ भृगुवंशसमुद्भूतो जात्यंधो जरयातुरः ॥ अशक्तस्तीर्थयात्रायां नेत्राभावेन स द्विजाः ॥ ११ ॥ सर्वेषामेव तीर्थानां स्नातुकामो महामुनिः ॥ दक्षिणांबुनिधौ पुण्यं गंधमादनपर्वतम् ॥ १२ ॥ गत्वा शंकरमुद्दिश्य तपस्तेपे सुदुष्करम् ॥ त्रिकालमर्चयञ्छंभुमुपवासी जितेंद्रियः ॥१३॥ तथा त्रिषवणस्नानात्तथैवातिथिपूजकः ॥ शिशिरे जलमध्यस्थो ग्रीष्मे पंचाग्निमध्यगः ॥ १४ ॥ वर्षास्वासारसहन अब्भक्षो वायुभोजनः ॥ उद्धूलनं त्रिपुंड्रं च भस्मना धारयन्सदा ॥ १५ ॥ जाबालोपनिषद्रीत्या तथा रुद्राक्षधारकः ॥ एवमुग्रं तपश्चक्रे दशसंवत्सरं द्विजः ॥ १६ ॥ तपसा तस्य संतुष्टः शंकरश्चंद्रशेखरः ॥ प्रादुरासीन्मुनेस्तस्य द्विजाः सुचरितस्य वै ॥ १७ ॥ समारुह्य महोक्षाणं भूतवृंदनिषेवितः ॥ गिरिजार्धवपुः शूली सूर्यकोटिसमप्रभः ॥ १८ ॥ स्वभासा भासयन्सर्वा दिशो वितिमिरास्तदा ॥ भस्मपांडुरसर्वांगो जटामंडलमंडितः ॥ १९ ॥ अनंतादिमहानागविभूषणविभूषितः ॥ प्रादुर्भूतस्ततः शंभुः प्रादात्तस्य विलोचने ॥ २० ॥ आत्मावलोकनार्थाय शंकरो गिरिजापतिः ॥ ततः सुचरितो विप्राः शंभुना दत्तदृग्द्वयः ॥ आलोक्य परमेशानं प्रतुष्टाव प्रसन्नधीः ॥ २१ ॥ ॥ सुचरित उवाच ॥ ॥ जय देव महेशान जय शंकर धूर्जटे ॥ २२ ॥ जय ब्रह्मादिपूज्य त्वं त्रिपुरघ्न यमांतक ॥ जयोमेश महादेव कामांतक जयामल ॥ २३ ॥ जय संसारवैद्य त्वं भूतपाल शिवाव्यय ॥ त्रियंबक नमस्तुभ्यं भक्तरक्षणदीक्षित ॥ २४ ॥ व्योमकेश नमस्तुभ्यं जय कारुण्यविग्रह ॥ नीलकण्ठ नमस्तुभ्यं जय संसारमोचक ॥२५॥ महेश्वर नमस्तुभ्यं परमानंदविग्रह ॥ गंगाधर नमस्तुभ्यं विश्वेश्वर मृडाव्यय ॥ २६ ॥ नमस्तुभ्यं भगवते वासुदेवाय शंभवे ॥ शर्वायोग्राय गर्भाय कैलासपतये नमः ॥ २७ ॥ रक्ष मां करुणासिंधो कृपादृष्ट्यवलोकनात् ॥ मम वृत्तमनालोच्य त्राहि मां कृपया हर ॥ २८ ॥ ॥ श्रीसूत

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कामरूपिणा ॥ ४८ ॥ एतावंतं महाकालमनुरागवशातुरा ॥ उषितास्मि सहानेन सख्यो नृपतिना चिरम् ॥ ४९ ॥ एवमुक्तास्ततः सख्यस्तामूचुः साधुसाध्विति ॥ अनेन साकमास्यामः सर्वकालं वयं सखि ॥ ५० ॥ इत्यूचुरुर्वशीं तत्र सखीमप्सरसस्तदा ॥ अब्देऽथ पूर्णे राजापि तटाकांतिकमाययौ ॥ ५१ ॥ आगतं नृपतिं दृष्ट्वा पुरूरवसमुर्वशी ॥ कुमारमायुषं तस्मै ददौ संप्रीतमानसा ॥ ५२ ॥ तेन साकं निशामेकामुषिता सानुरागिणी ॥ पंचपुत्रप्रदं गर्भं तस्मादापाशु सोर्वशी ॥ ५३ ॥ उवाच चैनं राजानमुर्वशी परमांगना ॥ वरं दास्यंति गन्धर्वा मत्प्रीत्या तव भूपते ॥ ५४ ॥ भवतां प्रार्थ्यतां तेभ्यो वरो राजर्षिसत्तम ॥ इत्युक्तः स तया राजा प्राह गन्धर्वसत्तमान् ॥ ५५ ॥ अहं संपूर्णकोशश्च विजिताराति मंडलः ॥ सलोकतां विनोर्वश्याः प्राप्तव्यं नान्यदस्ति मे ॥ ५६ ॥ अतस्तया सहोर्वश्या कालं नेतुमहं वृणे ॥ एवमुक्ते नृपेणाथ गन्धर्वास्तुष्टमानसाः ॥ अग्निस्थालीं प्रदायास्मै प्रोचुश्चैनं नृपं तदा ॥ ५७ ॥ ॥ गन्धर्वा ऊचुः ॥ ॥ अग्निं वेदानुसारी त्वं त्रिधा कृत्वा नृपोत्तम ॥ ५८ ॥ इष्ट्वा यज्ञेन चोर्वश्याः सालोक्यं याहि भूपते ॥ इतीरितस्तैरादाय स्थालीमग्नेर्ययौ नृपः ॥ ५९ ॥ अहो बतातिमूढोहमिति मध्येवनं[2] नृपः ॥ उर्वशी न मया लब्धा वह्निस्थाल्या तु किं फलम् ॥ ६० ॥ निधायैव वने स्थालीं स्वपुरं प्रययौ नृपः ॥ अर्धरात्रे व्यतीतेऽसौ विनिद्रोऽचिंतयत्स्वयम् ॥ ६१ ॥ उर्वशीलोकसिद्ध्यर्थं मम गन्धर्वपुंगवैः ॥ अग्निस्थाली संप्रदत्ता सा च त्यक्ता मया वने ॥ ६२ ॥ आहरिष्ये पुनः स्थालीमित्युत्थाय ययौ वनम् ॥ नाग्निस्थालीं ददर्शासौ वने तत्र पुरूरवाः ॥ ६३ ॥ शमीगर्भमथाश्वत्थमग्निस्थाने विलोक्य सः ॥ व्यचिंतयन्मया स्थाली निक्षिप्तात्र वने पुरा ॥ ६४ ॥ सा चाश्वत्थः शमीगर्भः समभूदधुना त्विह ॥ तस्मादेनं समादाय वह्निरूपमहं पुरम् ॥ ॥ ६५ ॥ गत्वा कृत्वारणीं सम्यक्तदुत्पन्नाग्निमादरात् ॥ उपास्यामीति निश्चित्य स्वपुरं गतवान्नृपः ॥ ६६ ॥ रमणीयारणीं चक्रे स्वांगुलैः प्रमितामसौ ॥ निर्माणसमये राजा गायत्रीमजपद्द्विजाः ॥ ६७ ॥ गायत्र्याः पठ्यमानाया यानि संत्यक्षराणि हि ॥ तावदंगुलिमर्यादामकरोदरणीं नृपः ॥ ६८ ॥ तत्र निर्मथनादग्नित्रयमुत्पाद्य भूपतिः ॥ उर्वशीलोकसंप्राप्तिफलमुद्दिश्य कांक्षितम् ॥ ६९ ॥ वेदानुसारी नृपतिर्जुहावाग्नित्रयं मुदा ॥ तेनैव चाग्निविधिना बहून्यज्ञानथातनोत् ॥ ७० ॥ तेन गन्धर्वलोकांश्च संप्राप्य जगतीपतिः ॥ सहोर्वश्या चिरं रेमे देवलोके द्विजोत्तमाः ॥ ७१ ॥ अथ सर्वामरोपेतः कदाचिद्बलवृत्रहा ॥ नृत्यं सुरांगनानां वै व्यलोकयत संसदि ॥ ७२ ॥ पुरूरवा नृपोप्यायात्तदा देवैं

१ नृपतिम्–इ०पा० । २ मध्येवनम्–वनस्य मध्ये–इति मध्येवनम् "पारे मध्ये षष्ठ्या वा" इत्यव्ययीभावः समासः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मुर्वशीं तत्र करसम्मितमध्यमाम् ॥ उवाच चैनां राजासौ भार्या मम भवेति वै ॥ २२ ॥ सापि कामातुरा तत्र राजानं प्रत्यभाषत ॥ भवत्वेवं नरश्रेष्ठ समयं यदि मे भवान् ॥ २३ ॥ करिष्यति तवाभ्याशे वत्स्यामि धृतकौतुका ॥ करिष्ये समयं सुभ्रु तवाहमिति सोऽब्रवीत् ॥ २४ ॥ अथोर्वशी बभाषे तं पुरूरवसमुत्सुका ॥ पुत्रभूतं मम यदि रक्षस्युरणकद्वयम् ॥ २५ ॥ न नग्नो दृश्यसे राजन्कदापि यदि वै तथा ॥ नोच्छिष्टं मम दद्याश्चेत्तदा वत्स्ये तवांतिके ॥ २६ ॥ घृतमात्राशना चाहं भविष्यामि नृपोत्तम ॥ एवमस्त्विति राजोक्त्वा तां निनाय निजं गृहम् ॥ २७ ॥ अलकायां स भूपालस्तथा चैत्ररथे वने ॥ रेमे सरस्वतीतीरे पद्मखण्डमनोरमे ॥ २८ ॥ एकषष्टिं स वर्षाणि रममाणस्तयानयत् ॥ तेनोर्वशी प्रतिदिनं वर्धमानानुरागिणी ॥ २९ ॥ स्पृहां न देवलोकेऽपि चकार तनुमध्यमा ॥ नाभवद्रमणीयोऽसौ देवलोकस्तया विना ॥ ३० ॥ अतस्तामानयिष्यामि देवलोकमिति द्विजाः ॥ विश्वावसुर्विचार्यैवं भूर्लोकमगमत्क्षणात् ॥ ३१ ॥ उर्वश्याः समयं राज्ञा विश्वावसुरयं सह ॥ विदित्वा सह गन्धर्वैः समवेतो निशांतरे ॥ ३२ ॥ उर्वश्याः शयनाभ्याशाज्जग्राहोरणकं जवात् ॥ आकाशे नीयमानस्य तस्य श्रुत्वोर्वशी पतिम् ॥३३॥ अब्रवीन्मत्सुतः केन गृह्यते त्यज्यतामयम् ॥ अनाथा शरणं यामि कं नरं गतचेतना ॥३४॥ पुरूरवाः समाकर्ण्य वाक्यं तस्या निशांतरे ॥ मां न नग्नं निरीक्षेत देवीति न ययौ तदा ॥ ३५ ॥ अथान्यमप्युरणकं गन्धर्वाः प्रतिगृह्य ते ॥ ययुस्तस्योरणस्यापि शब्दं शुश्राव चोर्वशी ॥ ३६ ॥ अनाथाया मम सुतो गृह्यते तस्करैरिति ॥ चुक्रोश देवी परुषं कं यामि शरणं नरम् ॥ ३७ ॥ अमर्षवशमापन्नः श्रुत्वा तद्वचनं नृपः ॥ तिमिरेणावृतं सर्वमिति मत्वा स खड्गधृक् ॥ ३८ ॥ दुष्टदुष्ट कुतो यासीत्यभ्यधावद्वचो वदन् ॥ तावत्सौदामिनी दीप्ता गन्धर्वैर्जनिता भृशम् ॥ ३९ ॥ तत्प्रभामंडलैर्देवी राजानं विगतांबरम् ॥ दृष्ट्वा निवृत्तसमया तत्क्षणादेव निर्ययौ ॥ ४० ॥ त्यक्त्वा ह्युरणकौ तत्र गंधर्वा अपि निर्ययुः ॥ राजा मेषौ समादाय हृष्टः स्वशयनांतिकम् ॥ ४१ ॥ आगतो नोर्वशीं तत्र ददर्शायतलोचनाम् ॥ तां चापश्यन्विवस्त्रश्च बभ्रामोन्मत्तवद्भुवि ॥ ४२ ॥ कुरुक्षेत्रं गतो राजा तटाके पद्मसंकुले ॥ चतुर्भिरप्सरस्त्रीभिः क्रीडमानां ददर्श ताम् ॥ ४३ ॥ हे जाये तिष्ठ मनसा घोरेति व्याहरन्मुहुः ॥ एवं बहुप्रकारं वै स सूक्तं प्रालपन्नृपः ॥ ४४ ॥ अब्रवीदुर्वशी तं च क्रीडंती साप्सरोगणैः ॥ महाराजालमेतेन चेष्टितेन तवानघ ॥ ४५ ॥ त्वत्तो गर्भिण्यहं पूर्वमब्दांते भवतात्र वै ॥ आगंतव्यं कुमारस्ते भविष्यत्यतिधार्मिकः ॥ ४६ ॥ एकां विभावरीं राजंस्त्वया वत्स्यामि वै तदा ॥ इत्युक्तो नृपतिर्हृष्टः स्वपुरीं प्राविशद्द्विजाः ॥ ४७ ॥ तासामप्सरसां सा तु कथयामास तं नृपम् ॥ अयं स पुरुषश्रेष्ठो येनाहं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रुत्वेमं पुण्यमध्यायं पठित्वा च मुनीश्वराः ॥ ब्रह्महत्यादिभिः सत्यं मुच्यते पातकैर्नरः ॥ १०४ ॥ इति श्रीस्कांदे महापुराण एकाशीति
साहस्र्यां संहितायां तृतीये ब्रह्मखण्डे सेतुमाहात्म्ये कोटितीर्थप्रशंसायां कृष्णस्य मातुलवधदोषशांतिवर्णनंनाम सप्तविंशोऽध्यायः ॥ २७ ॥
॥ ॥ छ ॥ ॥ श्रीसूत उवाच ॥ ॥ कोटितीर्थं महापुण्यं सेवित्वा केवलं नरः ॥ स्नातुं जितेंद्रियस्तीर्थं ततः साध्यामृतं व्रजेत् ॥ १ ॥
साध्यामृतं महातीर्थं महापुण्यफलप्रदम् ॥ महादुःखप्रशमनं गन्धमादनपर्वते ॥ २ ॥ अस्ति पापहरं पुंसां सर्वाभीष्टप्रदायकम् ॥ यत्र स्नात्वा
नरो भक्त्या सर्वान्कामानवाप्नुयात् ॥ ३ ॥ तपसा ब्रह्मचर्येण यज्ञैर्दानेन वा पुनः ॥ गतिं तां न लभेन्मर्त्यो यां साध्यामृतमज्जनात् ॥ ४ ॥
स्पृष्टानि येषामंगानि साध्यामृतजलैः शुभैः ॥ तेषां देहगतं पापं तत्क्षणादेव नश्यति ॥ ५ ॥ साध्यामृतजले यस्तु साघमर्षणकृन्नरः ॥ स
विधूयेह पापानि विष्णुलोके महीयते ॥ ६ ॥ पूर्वे वयसि पापानि कृत्वा कर्माणि यो नरः ॥ पश्चात्साध्यामृतं सेवेत्पश्चात्तापसमन्वितः ॥ ७ ॥
अन्ते वयसि मुक्तः स्यात्स नरो नात्र संशयः ॥ साध्यामृते नरः स्नात्वा देहबंधाद्विमुच्यते ॥ ८ ॥ साध्यामृतजले स्नाता मनुष्याः पापक
र्मिणः ॥ अनेकक्लेशघोराणि नरकाणि न यांति हि ॥ ९ ॥ साध्यामृतजले स्नानात्पुंसां या स्याद्गतिर्द्विजाः ॥ न सा गतिर्भवेद्यज्ञैर्न वेदैः
पुण्यकर्मभिः ॥ १० ॥ यावदस्थि मनुष्याणां साध्यामृतजले स्थितम् ॥ तावद्वर्षाणि तिष्ठंति शिवलोके सुपूजिताः ॥ ११ ॥ अपहत्य
तमस्तीव्रं यथा भात्युदये रविः ॥ तथा साध्यामृतस्नायी भित्त्वा पापानि राजते ॥ १२ ॥ वांछिताँल्लभते कामानत्र स्नातो नरः सदा ॥
यत्र स्नात्वा महापुण्ये पुरा राजा पुरूरवाः ॥ विप्रयोगं सहोर्वश्या जहौ तुंबुरुशापजम् ॥ १३ ॥ ॥ ऋषय ऊचुः ॥ ॥ कथं सूत महाभाग
सहोर्वश्यामरस्त्रिया ॥ १४ ॥ प्रथमं लब्धवान्योगं मर्त्यो राजा पुरूरवाः ॥ विप्रयोगं सहोर्वश्या जहौ तुंबुरुशापजम् ॥ १५ ॥ हेतुना केन
राजानं शशाप तुंबुरुर्मुनिः ॥ एतत्सर्वं समाचक्ष्व विस्तरान्मुनिपुंगव ॥ १६ ॥ ॥ सूत उवाच ॥ ॥ आसीत्पुरूरवानाम शक्रतुल्यपराक्रमः ॥
राजराजसमो राजा पुरा ह्यमरपूजितः ॥ १७ ॥ धर्मतः पालयामास मेदिनीं स नृपोत्तमः ॥ ईजे च बहुभिर्यज्ञैर्ददौ दानानि सर्वदा ॥ १८ ॥
प्रशासति महीं सर्वां राज्ञि तस्मिन्महामतौ ॥ मित्रावरुणशापेन भुवं प्रापोर्वशी द्विजाः ॥ १९ ॥ सा चचारोर्वशी तत्र राज्ञस्तस्य पुरांतिके ॥
कोकिलालापमधुरवीणयोपवने जगौ ॥ २० ॥ स राजोपवने रंतुं कदाचिद्धृतकौतुकः ॥ आरूढतुरगः प्रायाल्ललनाशतसंवृतः ॥ २१ ॥ तादृशी

१ पुरूत्तमः—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्यस्य यशोदायाः सुतां तु ताम् ॥ आदाय देवकीशय्यां प्रापयस्व यदूत्तम ॥ ५६ ॥ एवमुक्तः स कृष्णेन तथैव ह्यकरोद्द्विजाः ॥ रुरोद
माया तनया देवकीशयने स्थिता ॥ ५७ ॥ अथ बालध्वनिं श्रुत्वा कंसः संकुलमानसः ॥ सूतिकागृहमागम्य तामादाय च दारिकाम् ॥५८॥ शि
लायां पोथयामास निर्दयो निरपत्रपः ॥ अथ तद्धस्तमाच्छिद्य सायुधाष्टमहाभुजा ॥ महादेव्यब्रवीत्कंसं समाहूयातिकोपना ॥ ५९ ॥ ॥ मायो
वाच ॥ ॥ अरे रे कंस पापात्मन्दुर्बुद्धे मूढचेतन ॥ ६० ॥ यत्र कुत्रापि शत्रुस्ते वर्तते प्राणहारकः ॥ मार्गयस्वात्मनो मृत्युं तं शत्रुं कंस मा
चिरम् ॥ ६१ ॥ इतीरयित्वा सा देवी दिव्यस्थानान्यवाप्य च ॥ लब्धपूजा मनुष्येभ्यो बभूवाभीष्टदायिनी ॥ ६२ ॥ श्रुत्वा स देवीवचनं कंसो
ऽपि भृशमाकुलः ॥ बालग्रहान्पूतनादीन्स्वांतकं बाधितुं रिपुम् ॥ ६३ ॥ प्रेषयामास देशेषु शिशूनन्यांश्च बाधितुम् ॥ ते च बालग्रहाः सर्वे प्रययु
र्नंदगोकुलम् ॥ ६४ ॥ हताश्च कृष्णेन तदा प्रययुर्यमसादनम् ॥ ततः कतिपयाहस्सु गतेषु द्विजपुंगवाः ॥ ६५ ॥ रामकृष्णौ व्यवर्द्धेतां गोकुले
बालकौ तदा ॥ अनेकबालक्रीडाभिश्चिक्रीडतुररिंदमौ ॥ ६६ ॥ कंचित्कालं वत्सपालौ वेणुनादमकुर्वताम् ॥ कंचित्कालं च गोपालौ गुंजातापि
च्छभूषितौ ॥ ६७ ॥ रेमाते बहुकालं तौ गोकुले रामकेशवौ ॥ कंसः कदाचिदक्रूरं गोकुले रामकेशवौ ॥ ६८ ॥ प्रेषयामास विप्रेंद्राः समानयितुमं
जसा ॥ आनयामास चाक्रूरो रामकृष्णौ स गोकुलात् ॥ ६९ ॥ मथुरां कंसनिर्देशात्स्वर्णतोरणराजिताम् ॥७०॥ ततः समानीय स रामकेशवौ
ययौ पुरीं गांदिनिजस्तदग्रे ॥ दृष्ट्वा च कंसं विनिवेद्य कार्यं तस्मै स्वगेहं प्रविवेश पश्चात् ॥७१॥ अथापराह्णे वसुदेवपुत्रावन्येद्युरिष्टैः सह गोपपुत्रैः ॥
उपेयतुः सालनिखातयुक्तां सगोपुराट्टां मथुरापुरीं तौ ॥ ७२ ॥ स्तोत्राणि शृण्वन्पुरयौवतानां कृष्णस्तु रामेण सहैव गत्वा ॥ धनुर्निवेशं सह
सैव तत्र ददर्श चापं च महद्दृढज्यम् ॥ ७३ ॥ विद्राव्य सर्वानपि चापपालान्धनुः समादाय स लीलयाऽऽशु ॥ मौर्व्यां नियोक्तुं नमयांचकार तदं
तरे भग्नमभूद्द्विधैव ॥ ७४ ॥ कोदंडभंगोत्थितशब्दमाशु श्रुत्वाभियातान्बलिनो निहंतुम् ॥ निजघ्नतुस्तौ प्रतिगृह्य खंडौ चापस्य पालान्बलिनौ
द्विजेंद्राः ॥ ७५ ॥ ततः कुवलयापीडं गजं द्वारि स्थितं क्षणात् ॥ निहत्य रामकृष्णौ तौ महाबलपराक्रमौ ॥ ७६ ॥ तस्य दंतौ समुत्पाट्य दधानौ
करयोर्द्वयोः ॥ अंसे निधाय तौ दंतौ रंगं प्रययतुः क्षणात् ॥ ७७ ॥ निहत्य मल्लं चाणूरं मुष्टिकं तोशलं तथा ॥ अन्यांश्च मल्लप्रवरान्निन्यतुर्यमसा
दनम् ॥७८॥ समारुरुहतुस्तूर्णं तुंगं मंचं च तौ तदा ॥ तत्र तुंगे समासीनमासने कंसमेत्य तौ ॥ तस्थतुस्तं तृणीकृत्य सिंहौ क्षुद्रमृगं यथा ॥७९॥

१ ग्रामेषु द्विजपुंगवाः—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ततः कंसं समाकृष्य कृष्णो मंचोपरि स्थितम् ॥ पादौ गृहीत्वा वेगेन भ्रामयामास[1] चांबरे ॥ ८० ॥ ततस्तं पोथयामास स भूमौ गत जीवितम् ॥ कंसभ्रातॄन्बलोऽप्यष्टौ निजघ्ने मुष्टिना द्विजाः ॥ ८१ ॥ एवं निहत्य तं कंसं कृष्णः परबलार्दनः ॥ पितरौ मोचयामास निगडादति दुःखितौ ॥ ८२ ॥ सर्वानास्थापयामास[2] बलेन सह माधवः ॥ श्रीकृष्णेन हतं कंसं श्रुत्वा प्रापुः पुरीं तदा ॥ ८३ ॥ बांधवा मथुरायां ये पूर्वं कंसेन बाधिताः ॥ उग्रसेनं तथा राज्ये स्थापयामास केशवः ॥ ८४ ॥ असहिष्णुर्द्विजाः पित्रोरेवं कंसकृतागसम् ॥ जघान मातुलं कंसं देवब्राह्मणकंटकम् ॥ ८५ ॥ ततः कदाचित्कृष्णोऽयमात्मानं द्रष्टुमागतान् ॥ नारदादीन्मुनीन्सर्वानिदं पप्रच्छ सत्तमः ॥ ८६ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ मयाऽयं मातुलो विप्रा हतः कंसोऽतिपापकृत् ॥ मातुलस्य वधे दोषः प्रोच्यते शास्त्रवित्तमैः॥ ८७ ॥ प्रायश्चित्तमतो ब्रूत तद्दोषविनिवृत्तये ॥ अवोचन्नारदस्तत्र कृष्णमद्भुतविक्रमम् ॥ वाचा मधुरया विप्रा भक्तिप्रणयपूर्वकम् ॥ ८८ ॥ ॥ नारद उवाच ॥ ॥ नित्यशुद्धश्च मुक्तश्च भद्रश्चैव भवान्सदा ॥ ८९ ॥ सच्चिदानंदरूपश्च परमात्मा सनातनः ॥ पुण्यं पापं च ते नास्ति कृष्ण यादवनंदन[3] ॥ ९० ॥ तथापि लोकशिक्षार्थं भवता गरुडध्वज ॥ प्रायश्चित्तं तु कर्तव्यं विधिनानेन माधव ॥ ९१ ॥ लोकसंग्रहणं तावत्कर्तव्यं भवताधुना ॥ रामसेतौ महापुण्ये गंधमादनपर्वते ॥ ९२ ॥ रामेण स्थापितं लिंगं रामनाथाभिधं पुरा ॥ तस्याभिषेकतोयार्थं धनुष्कोटचा रघूद्वहः ॥ ९३ ॥ गां भित्त्वोत्पादयामास तीर्थं कोटीति विश्रुतम् ॥ तव पूर्वावतारेण रामेणाक्लिष्टकर्मणा ॥ ९४ ॥ ब्रह्महत्याविशुद्ध्यर्थं[4] निर्मितं स्वयमेव यत् ॥ तत्र स्नानं कुरुष्व त्वं धर्म्ये[5] पापविनाशने[6] ॥ ९५ ॥ तेन ते मातुलवधाद्दोषः शीघ्रं विनंक्ष्यति ॥ कोटितीर्थे हरेः स्नानं ब्रह्महत्यादिशोधकम् ॥ ९६ ॥ स्वर्गमोक्षप्रदं पुंसामायुरारोग्यवर्धनम् ॥ इति श्रुत्वा मुनेर्वाक्यं नारदस्य स माधवः ॥ ९७ ॥ विसृज्य तानृषीन्सर्वांस्तस्मिन्नेव क्षणे द्विजाः ॥ रामसेतौ ययौ तूर्णं स्वदोषपरिशुद्धये ॥ ९८ ॥ दिनैः कतिपयैर्गत्वा कोटितीर्थं यदूद्वहः ॥ स्नात्वा संकल्पपूर्वं च दत्त्वा दानान्यनेकशः ॥ ९९ ॥ स मातुलवधोत्पन्नदोषेभ्यो मुमुचे क्षणात् ॥ निषेव्य रामनाथं च स्वपुरं मथुरां ययौ ॥ १०० ॥ ॥ श्रीसूत उवाच ॥ ॥ एवंप्रभावं पुण्यं च कोटितीर्थं मुनीश्वराः ॥ ब्रह्महत्यादिभिः पापैः सद्यो मुच्येत मानवः ॥ नानेन सदृशं तीर्थमन्यदस्ति महीतले ॥ १ ॥ अत्र स्नानात्त्रयो देवा ब्रह्मविष्णुशिवा द्विजाः ॥ प्रीताः स्युरन्ये देवाश्च नात्र कार्या विचारणा ॥ २ ॥ एवं वः कथितं चित्रं कोटितीर्थस्य वैभवम् ॥ यच्छ्रुत्वा सर्वपापेभ्यो मुच्यते मानवो भुवि ॥ ३ ॥

१ पातयामास–इ० पा० । २ आश्वासयामास–इ० पा० । ३ यादवाः–इ० पा० । ४ बुद्धः–इ० पा० । ५ लोकसिद्ध्यर्थम्–इ० पा० । ६ सर्वपापविनाशने–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

र्थस्य महिमा केन कथ्यते ॥ ३३ ॥ ॥ ऋषय ऊचुः ॥ ॥ किमर्थमवधीत्कंसं मातुलं यदुनंदनः ॥ यद्दोषशांतये सूत सस्नौ कोटौ महामनाः ॥ ३४ ॥ ॥ श्रीसूत उवाच ॥ ॥ वसुदेव इति ख्यातः शूरपुत्रो यदोः कुले ॥ आसीत्स देवकसुतां देवकीमिति विश्रुताम् ॥ ३५ ॥ उद्वाह्य रथमारूढः स्वपुरं प्रस्थितः पुरा ॥ अथ सूतो बभूवाथ कंसो ह्यानकदुन्दुभेः ॥ ३६ ॥ अशरीरा तदा वाणी कंसं सारथिमब्रवीत् ॥ भगिनीं च तथा भामं वाहयंतं रथोत्तमे ॥ ३७ ॥ यामिमां वाहयस्यत्र रथेन त्वमरिंदम ॥ अस्यास्त्वामष्टमो गर्भो वधिष्यति न संशयः ॥ ३८ ॥ इत्याकर्ण्य वचो दिव्यं कंसः खड्गं प्रगृह्य च ॥ स्वसारं हंतुमुद्योगं चकार द्विजपुंगवाः ॥ ३९ ॥ ततः प्रोवाच तं कंसं वसुदेवः स सांत्वयन् ॥ ॥ ॥ वसुदेव उवाच ॥ ॥ अस्यां प्रसूतान्दास्यामि तुभ्यं कंस सुतानहम् ॥ ४० ॥ एनां स्वसारं मा हिंसीर्नास्यास्ते भीतिरस्ति हि ॥ श्रुत्वा तद्वचनं कंसो निवृत्तस्तद्वधात्तदा ॥ ४१ ॥ देवकीवसुदेवाभ्यां सहितः स्वपुरं ययौ ॥ पादावसक्तनिगडौ देवकीवसुदेवकौ ॥ ४२ ॥ स्थापयामास दुष्टात्मा कंसः कारागृहे तदा ॥ ततः कालेन महता वसुदेवाद्धि देवकी ॥ ४३ ॥ षट्पुत्राञ्जनयामास क्रमेण मुनिपुंगवाः ॥ जातांस्तान्वसुदेवेन दत्तान्कंसोऽपि सोऽवधीत् ॥ ४४ ॥ हतेषु षट्सु पुत्रेषु देवक्युदरजन्मसु ॥ कंसेन क्रूरमतिना निष्कृपेण द्विजोत्तमाः ॥ ४५ ॥ शेषोऽभूत्सप्तमो गर्भो देवक्या जठरे तदा ॥ मायादेवी ततो गर्भं तं वै विष्णुप्रचोदिता ॥ ४६ ॥ नंदगोपगृहस्थायां रोहिण्यां समवेशयत् ॥ देवक्याः सप्तमो गर्भः पतितो जठरादिति ॥ ४७ ॥ लोके प्रसिद्धिरभवन्महती विष्णुलीलया ॥ देवकीजठरे पश्चाद्विष्णुर्गर्भत्वमातवान् ॥ ४८ ॥ ततो दशसु मासेषु गतेषु हरिरव्ययः ॥ देवकीजठराज्जज्ञे कृष्ण इत्यभिविश्रुतः ॥ ४९ ॥ शंखचक्रगदाखड्गविराजितचतुर्भुजः ॥ किरीटी वनमाली च पित्रोः शोकविनाशनः ॥ ५० ॥ तं दृष्ट्वा हरिमीशानं तुष्टावानकदुंदुभिः ॥ ५१ ॥ ॥ वसुदेव उवाच ॥ ॥ विश्वं भवान्विश्वपतिस्त्वमेव विश्वस्य योनिस्त्वयि विश्वमास्ते ॥ महान्प्रधानश्च विराट् स्वराट् च सम्राडसि त्वं भगवन्समस्तम् ॥ ५२ ॥ एवं जगत्कारणभूतधाम्ने नारायणायामितविक्रमाय ॥ श्रीशार्ङ्गचक्रासिगदाधराय नमोनमः कृत्रिममानुषाय ॥ ५३ ॥ स्तुवन्तमेवं शौरिं तं वसुदेवं हरिस्तदा ॥ अवोचत्प्रीणयंस्तं च देवकीं च द्विजोत्तमाः ॥ ५४ ॥ ॥ हरिरुवाच ॥ ॥ अहं कंसं वधिष्यामि मा भीर्वां पितराविति ॥ नन्दगोपस्य गृहिणी यशोदाऽजनयत्सुताम् ॥ मम मायां पूर्वदिने सर्वलोकविमोहिनीम् ॥ ५५ ॥ मां तस्याः शयने

१ श्यालम्--इति पाठान्तरमस्ति । तदसत् । 'श्यालाः स्युर्भ्रातरः पत्न्याः' इति कोशात् । अत्र वसुदेवस्य भामत्वात्--अयं मूलस्थ एव पाठो युक्तः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धरणीं शीघ्रं मनसा जाह्नवीं स्मरन् ॥ रामकार्मुककोटिः सा तदा प्राप रसातलम् ॥ ९ ॥ तत उद्धारयामास तद्धनुर्धन्विनां वरः ॥ धनुष्युद्ध्रियमाणे तु राघवेण महीतलात् ॥ १० ॥ काकुत्स्थेन स्मृता गंगा निर्ययौ विवरात्ततः ॥ वारिणा तेन तल्लिंगमभ्यषिंचद्रघूद्वहः ॥ ११ ॥ रामकार्मुककोटचैव यतस्तन्निर्मितं पुरा ॥ अतः कोटिरिति ख्यातं तत्तीर्थं भुवनत्रये ॥ १२ ॥ यानि यानीह तीर्थानि संति वै गंधमादने ॥ प्रथमं तेषु तीर्थेषु स्नात्वा विगतकल्मषः ॥ १३ ॥ शेषपापविमोक्षाय स्नायात्कोटौ नरस्ततः ॥ तीर्थांतरेषु स्नानेन यः पापौघो न नश्यति ॥ १४ ॥ अनेकजन्मकोटीभिरर्जितो ह्यस्थिसंस्थितः ॥ विनश्यति स सर्वोऽपि कोटिस्नानान्न संशयः ॥ १५ ॥ यदि हि प्रथमं स्नायादत्र कोटौ नरो द्विजाः ॥ तस्य मुक्तस्य तीर्थानि व्यर्थान्येवापराणि हि ॥ १६ ॥ ॥ ऋषय ऊचुः[1] ॥ ॥ सूत सर्वार्थतत्त्वज्ञ व्यासशिष्य मुनीश्वर ॥ अस्माकं संशयं कंचिच्छिंधि पौराणिकोत्तम ॥ १७ ॥ कोटौ स्नातस्य मर्त्यस्य यदि तीर्थांतरं वृथा ॥ किमर्थं धर्मतीर्थादितीर्थेषु स्नांति मानवाः ॥ १८ ॥ तीर्थानि तानि सर्वाणि समतिक्रम्य मानवाः ॥ अत्रैव कोटौ किं स्नानं न कुर्वंति हि तद्वद ॥ १९ ॥ ॥ श्रीसूत उवाच ॥ ॥ अहो रहस्यं युष्माभिः पृष्टमेतन्मुनीश्वराः ॥ नारदाय पुरा शंभुः पृच्छते यत्किलाब्रवीत् ॥ २० ॥ तद्ब्रवीमि मुनिश्रेष्ठाः शृणुध्वं श्रद्धया सह ॥ गच्छन्यदृच्छया वापि तीर्थयात्रापरोऽपि वा ॥ २१ ॥ मार्गमध्ये द्विजश्रेष्ठास्तीर्थं देवालयं तथा ॥ दृष्ट्वा श्रुत्वापि वा मोहान्न सेवेत नराधमः ॥ २२ ॥ निष्कृतिस्तस्य नास्तीति प्राब्रुवन्परमर्षयः ॥ सेतुं गच्छंस्ततोऽन्येषु न स्नायाद्यदि मानवः ॥ २३ ॥ तीर्थातिक्रमदोषैः स बहिष्कार्योऽस्त्यवद्विजैः ॥ अतः स्नातव्यमेवैषु चक्रतीर्थादिषु द्विजाः ॥ २४ ॥ स्नात्वा चैतेषु तीर्थेषु शेषपापविमुक्तये ॥ प्रयत्नैर्मनुजैरत्र स्नातव्यं कोटितीर्थके ॥ २५ ॥ कोटौ चाभिषवं कृत्वा न तिष्ठेद्गन्धमादने ॥ निवर्तेत्तत्क्षणादेव निष्पापो गंधमादनात् ॥ २६ ॥ रामोऽपि हि पुरा कोटितीर्थसंभूतवारिणा ॥ रामनाथेऽभिषिक्ते तु स्वयं स्नात्वा च तत्र वै ॥ २७ ॥ ब्रह्महत्याविमुक्तः संस्तत्क्षणादेव सानुजः ॥ आरूढपुष्पकोऽयोध्यां प्रययौ कपिभिर्वृतः ॥ २८ ॥ अतः कोटौ नरः स्नात्वा पापशेषविमोचितः ॥ निवर्तेत्तत्क्षणादेव रामो दाशरथिर्यथा ॥ २९ ॥ एतद्धि तीर्थप्रवरं सर्वलोकेषु विश्रुतम् ॥ रामनाथाभिषेकाय निर्मितं राघवेण यत् ॥ ३० ॥ स्वयं भगवती यत्र सन्निधत्ते च जाह्नवी ॥ तारकब्रह्मणा यत्र रामेण स्नातमादरात् ॥ ३१ ॥ तस्य वै कोटितीर्थस्य महिमा केन कथ्यताम्[2] ॥ यत्र[3] स्नात्वा पुरा कृष्णो लोकसंग्रहणेच्छया ॥ ३२ ॥ मातुलस्य तु कंसस्य वधदोषाद्विमोचितः ॥ तस्य वै कोटिती

१ शौनक उवाच–इ–पा० । २ भण्यताम्–इ०पा० । ३ यत्र मातुलदोषौघाद्विमुक्तो यदुनन्दनः–इ० पा० पुस्तकांतरे ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सन् ॥ ७५ ॥ सारथिं शीघ्रमाहूय बभाषे सादरं वचः ॥ सारथे सत्वरं गत्वा रथमारुह्य वेगवत् ॥ ७६ ॥ आश्रमेषु महर्षीणां पुण्येषु विपिनेषु च ॥ विविक्तेषु प्रदेशेषु सतामावासभूमिषु ॥ ७७ ॥ तीर्थानां च नदीनां च कूलेषु पुलिनेषु च ॥ अन्येषु च प्रदेशेषु यत्र संति मुनीश्वराः ॥ ॥ ७८ ॥ तेषु सर्वेषु योगींद्रं पंगुं शकटसंस्थितम् ॥ रैक्वाभिधानं सर्वेषां धर्माणामेकसंश्रयम् ॥ ७९ ॥ ब्रह्मज्ञानैकनिलयं सयुग्वानं गवेषय ॥ अन्विष्य तूर्णं मत्प्रीत्यै पुनरागच्छ सारथे ॥ ८० ॥ स तथेति विनिर्गत्य वेगवद्रथसंस्थितः ॥ सर्वत्रान्वेषयामास रैक्वं ब्रह्मविदं मुनिम् ॥ ८१ ॥ गुहासु पर्वतानां च मुनीनामाश्रमेषु च ॥ संचचार महीं कृत्स्नां तत्र तत्र गवेषयन् ॥ ८२ ॥ अन्विष्य विविधान्देशान्सारथिस्त्वरया सह ॥ क्रमान्महर्षिसंबाधं गंधमादनमन्वगात् ॥ ८३ ॥ मार्गमाणः स तत्रापि तं ददर्श मुनीश्वरम् ॥ कंडूयमानं पामानं शकटीयस्थलस्थितम् ॥ ८४ ॥ अद्वैतनिष्कलं ब्रह्म चिंतयंतं निरन्तरम् ॥ तं दृष्ट्वा सारथिस्तत्र सयुग्वानं महामुनिम् ॥ ८५ ॥ रैक्वोऽयमिति संचिंत्य तमासाद्य प्रणम्य च ॥ विनयान्मुनिमप्राक्षीदुपविश्य तदन्तिके ॥ ८६ ॥ सयुग्वान्रैक्वनामा च ब्रह्मन्किं वै भवानिति ॥ तस्य वाक्यं समाकर्ण्य स मुनिः प्रत्यभाषत ॥ ८७ ॥ अहमेव सयुग्वान्वै रैक्वनामेति वै तदा ॥ इत्याकर्ण्य मुनेर्वाक्यमिंगितैर्बहुभिस्तथा ॥ ८८ ॥ कुटुम्बभरणार्थाय धनेच्छामवगम्य च ॥ सर्वं न्यवेदयद्राज्ञे निवृत्तो गंधमादनात् ॥ ८९ ॥ जानश्रुतिर्निशम्याथ सारथेर्वाक्यमादरात् ॥ षट्शतानि गवां चापि निष्कभारं धनस्य च ॥ ९० ॥ रथं चाश्वतरीयुक्तं समादाय त्वरान्वितः ॥ पौत्रायणः स राजर्षिस्तं रैक्वं प्रतिचक्रमे ॥ ९१ ॥ गत्वा च वचनं प्राह तं रैक्वं स महीपतिः ॥ भगवन्रैक्व सयुग्वन्मद्दत्तं प्रतिगृह्यताम् ॥ ९२ ॥ षट्शतानि गवां चापि निष्कभारं धनस्य च ॥ रथं चाश्वतरीयुक्तं प्रतिगृह्णीष्व मामकम् ॥ ९३ ॥ गृहीत्वा सर्वमेतत्तु भो ब्रह्मन्ननुशाधि माम् ॥ अद्वैतब्रह्मविज्ञानं मह्यं समुपदिश्यताम् ॥ ९४ ॥ इति तस्य वचः श्रुत्वा सस्पृहं च संसभ्रम् ॥ रैक्वः प्रत्याह सयुग्वाञ्जानश्रुतिमरिंदमम् ॥ ॥ ९५ ॥ ॥ रैक्व उवाच ॥ ॥ एता गावस्तवैवास्तु निष्कभारस्तथा रथः ॥ किमल्पेन ममानेन बहुकल्पेषु जीवतः ॥ ९६ ॥ न मे कुटुंबनिर्वाहे पर्याप्तमिदमंजसा ॥ एवं शतगुणं चापि यदि दत्तं त्वया मम ॥ ९७ ॥ नालं तदपि राजेंद्र कुटुंबभरणाय वै ॥ इति रैक्ववचः श्रुत्वा जानश्रुतिरभाषत ॥ ९८ ॥ ॥ जानश्रुतिरुवाच ॥ ॥ त्वयोपदिश्यमानस्य ब्रह्मज्ञानस्य वै मुने ॥ न हि मूल्यमिदं ब्रह्मन्गोधनं रथ एव च ॥ ॥ ९९ ॥ प्रतिगृह्णीष्व वा मा वा ममैतत्तु गवादिकम् ॥ निष्कलाद्वैतविज्ञानं ब्रह्मन्नुपदिशस्व मे ॥ तदाकर्ण्य वचस्तस्य सयुग्वान्वाक्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मब्रवीत् ॥ १०० ॥ ॥ रैक्व उवाच ॥ ॥ निर्वेदो यस्य संसारे तथा वै पुण्यपापयोः ॥ १०१ ॥ प्रारब्धयोर्विनाशश्च स वै ज्ञानोपदेशभाक् ॥ तव यद्यपि संसारे निर्वेदः समजायत ॥ २ ॥ तथापि पुण्यपापानां न हि नाशो व्याजयत ॥ पुण्यपापौघसंघाश्च पुनर्जन्मनि हेतवः ॥ ३ ॥ न हि भोगं विना तेषां नाशो भवति भूपते ॥ तन्नाशोपायमद्याहं तथापि प्रब्रवीमि ते ॥ ४ ॥ यतो मां शरणं प्राप्तस्तच्छृणुष्व समाहितः ॥ अत्र तीर्थत्रयं पुण्यं वर्ततेऽभीष्टदायकम् ॥ ५ ॥ मुमुक्षूणां हि सर्वेषां सर्वप्रारब्धनाशनम् ॥ एतद्धि यमुनातीर्थं गंगातीर्थं तथैव च ॥ ६ ॥ गयातीर्थमिदं चापि तदेषु स्नाहि मा चिरम् ॥ सर्वप्रारब्धनाशः स्यात्तदा नैवात्र संशयः ॥ ७ ॥ ततस्ते शुद्धचित्तस्य ज्ञानं चैव दिशाम्यहम् ॥ इत्युक्ते रैक्वमुनिना हर्षसंफुल्ललोचनः ॥ ८ ॥ ससंभ्रममुपागम्य सस्नौ तीर्थत्रयेऽपि सः ॥ तत्तीर्थस्नानमात्रेण शुद्धचित्तोऽभवन्नृपः ॥ ९ ॥ उपातिष्ठत राजासौ सयुग्वानं गुरुं पुनः ॥ सयुग्वा स च रैक्वोऽपि मुनींद्रैरपि दुर्लभम् ॥ ११० ॥ तज्जानश्रुतये ज्ञानं कृपया समुपादिशत् ॥ तेनोपदिष्टमात्रे तु विज्ञाने ब्रह्मरूपिणि ॥ ११ ॥ अबाधितानुभववानभवद्राजसत्तमः ॥ ब्रह्मरूपं गतस्यास्य प्रसादाद्रैक्वयोगिनः ॥ १२ ॥ घटकुड्यकुसूलात्मा न प्रपंचस्समस्फुरत् ॥ निर्भिद्य सहसा मायामभूद्ब्रह्मैव केवलम् ॥ १३ ॥ इत्थं तीर्थत्रये स्नानाज्जानश्रुतिरहो नृपः ॥ दुर्लभं योगिवृंदैश्च ब्रह्मभूयत्वमाप्तवान् ॥ १४ ॥ एवं वः कथितं विप्रास्तत्तीर्थत्रयवैभवम् ॥ यस्त्विमं पठतेऽध्यायं तीर्थत्रितयवैभवम् ॥ १५ ॥ निर्भिद्याज्ञानतिमिरं ब्रह्मभूयाय कल्पते ॥ ११६ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे सेतुमाहात्म्ये यमुनागंगागयातीर्थप्रशंसायां जानश्रुतिज्ञानावाप्तिवर्णनंनाम षड्विंशोऽध्यायः ॥ २६ ॥ ॥ छ ॥ ॥ श्रीसूत उवाच ॥ ॥ यमुनायां च गंगायां गयायां च नरो मुदा ॥ स्नानं विधाय विधिवत्कोटितीर्थं ततो व्रजेत् ॥ १ ॥ कोटितीर्थं महापुण्यं सर्वलोकेषु विश्रुतम् ॥ सर्वसंपत्करं शुद्धं सर्वपापप्रणाशनम् ॥ २ ॥ दुःस्वप्ननाशनं ह्येतन्महापातकनाशनम् ॥ महाविघ्नप्रशमनं महाशांतिकरं नृणाम् ॥ ३ ॥ स्मृतिमात्रेण यत्पुंसां सर्वपापनिषूदनम् ॥ लीलया धनुषः कोट्या स्वयं रामेण निर्मितम् ॥ ४ ॥ पुरा दाशरथी रामो निहत्य युधि रावणम्[1] ॥ ब्रह्महत्याविमोक्षाय गंधमादनपर्वते ॥ ५ ॥ प्रातिष्ठिपल्लिंगमेकं लोकानुग्रहकाम्यया ॥ लिंगस्यास्याभिषेकाय शुद्धं वारि गवेषयन् ॥ ६ ॥ नाविंदत जलं तत्र पार्श्वे दशरथात्मजः ॥ लिंगाभिषेकयोग्यं च जलं किमिति चिंतयन् ॥ ७ ॥ नवेन वारिणा लिंगं स्नापनीयं मयेति सः ॥ निश्चित्य मनसा तत्र धनुष्कोट्या रघूद्वहः ॥ ८ ॥ बिभेद

१ वैरिणम्—इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

काशमार्गतः ॥ ४८ ॥ सौधवातायनस्थस्य तस्योपरि महीपतेः ॥ उड्डीयोड्डीय वेगेन तरसा जग्मुरुच्चकैः ॥ ४९ ॥ तरसा पततां तेषां हंसानां पृष्ठतो व्रजन् ॥ एको हंसस्तु संबोध्य हंसमग्रेसरं तदा ॥ ५० ॥ सोपहासमिदं वाक्यं प्राह शृण्वति राजनि ॥ भोभो भल्लाक्ष भल्लाक्ष पुरो गच्छन्मरालक ॥ ५१ ॥ सौधमध्ये पुरस्ताद्वै जानश्रुतसुतो नृपः ॥ वर्तते पूजनीयोऽयं न पश्यसि किमंधवत् ॥ ५२ ॥ यस्य तेजो दुराधर्षमाब्रह्मभवनादिदम् ॥ अनंतादित्यसंकाशं ज्वलते पुरतो भृशम् ॥ ५३ ॥ तमतिक्रम्य राजर्षिं मा गास्त्वमुपरि द्रुतम् ॥ यदि गच्छसि तत्तेजस्सांप्रतं त्वां प्रधक्ष्यति ॥ ५४ ॥ इत्युक्तवंतं तं हंसमग्रतः प्रत्यभाषत ॥ अहो भवानभिज्ञोऽसि श्लाघनीयोऽसि सूरिभिः ॥ ५५ ॥ अश्लाघनीयं कितवं यत्त्वमेनं प्रशंससे ॥ प्रशंससे किमर्थं त्वमल्पं संतमिमं जनम् ॥ ५६ ॥ भस्त्रावत्पशुवच्चैव केवलं श्वासधारिणम् ॥ न ह्ययं वेत्ति धर्माणां रहस्यं पृथिवीपतिः ॥ ५७ ॥ तत्त्वज्ञानी यथा रैक्कः सयुग्वान्ब्राह्मणोत्तमः ॥ रैक्कस्य हि महज्ज्योतीरहस्यं दैवतैरपि ॥ ५८ ॥ न ह्यस्य प्राणमात्रस्य तेजस्तादृशमस्ति वै ॥ रैक्कस्य पुण्यराशीनामियत्ता नैव विद्यते ॥ ५९ ॥ गण्यंते पांसवो भूमेर्गण्यंते दिवि तारकाः ॥ रैक्कपुण्यमहामेरुसमूहो नैव गण्यते ॥ ॥ ६० ॥ किं च तिष्ठंत्विमे धर्मा नश्वरास्तस्य वै मुनेः ॥ ब्रह्मज्ञानमबाध्यं यत्तेन स श्लाघ्यते मुनिः ॥ ६१ ॥ जानश्रुतेस्तु तादृक्षो धर्म एव न विद्यते ॥ दुर्लभं यत्तु योगीन्द्रैः कुतस्तज्ज्ञानवैभवम् ॥ ६२ ॥ परित्यज्य दुरात्मानं तद्वराकमिमं जनम् ॥ स एव रैक्कः सयुग्वाञ्छ्लाघ्यतां भवता मुनिः ॥ ६३ ॥ जन्मना पंगुरपि यः स्वस्य स्नानचिकीर्षया ॥ गंगां च यमुनां चापि गयामपि मुनीश्वरः ॥ ६४ ॥ आह्वयामास मन्त्रेण निजाश्रमसमीपतः ॥ तस्य ब्रह्मविदो रैक्कमहर्षेर्धर्मसंचये ॥ ६५ ॥ अंतर्भवंति धर्मौघास्त्रैलोक्योदरवर्तिनाम् ॥ रैक्कस्य धर्मकक्षा तु न हि त्रैलोक्यवर्तिनाम् ॥ ६६ ॥ प्राणिनां धर्मकक्षायामन्तर्भवति कर्हिचित् ॥ एवमग्रेसरे हंसे कथित्वोपरते सति ॥ ६७ ॥ हंसरूपा मुनींद्रास्ते ब्रह्मलोकं ययुः पुनः ॥ अथ पौत्रायणो राजा जानश्रुतिररिंदमः ॥ ६८ ॥ रैक्वं चोत्कर्षकाष्ठायां निशम्य परमावधिम् ॥ विषण्णोऽभवदत्यर्थं वराकोऽक्षजितो यथा ॥ ६९ ॥ चिंतयामास स नृपः पौनःपुन्येन निःश्वसन् ॥ हंस उत्कर्षयन्रैक्वं निकृष्टं मामिहाब्रवीत् ॥ ७० ॥ अहो रैक्कस्य माहात्म्यं यं प्रशंसंति पक्षिणः ॥ तत्परित्यज्य संसारं सर्वं राज्यमिहाधुना ॥ ७१ ॥ सयुग्वानं महात्मानं तमेव शरणं व्रजे ॥ कृपानिधिः स वै रैक्कः शरणं मामुपागतम् ॥ ७२ ॥ प्रतिगृह्यात्मविज्ञानं मह्यं समुपदेक्ष्यति ॥ इत्यसौ चिंतयन्नेव कथंकथमपि द्विजाः ॥ ७३ ॥ जाग्रन्नेवायमुद्वेलां रात्रिं तामत्यवाहयत् ॥ निशावसाने संप्राप्ते बंदिवृन्दप्रवर्तितम् ॥ ७४ ॥ अशृणोन्मंगलरवं तूर्यघोषसमन्वितम् ॥ तदाकर्ण्य महाराजस्तदा तल्पस्थ एव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पापनाशिनी ॥ भूमिं निर्भिद्य तिस्रोपि पातालात्सहसोत्थिताः ॥ २४ ॥ मानुषं रूपमास्थाय सयुग्वानमुपेत्य च ॥ ऊचुः परमसंहृष्टा हर्षयंत्यश्च
तं मुनिम् ॥ २५ ॥ सयुग्वन्रैक्व भद्रं ते ध्यानादस्मादुपारम ॥ त्वन्मंत्रेण समाकृष्टा वयमत्र समागताः ॥ २६ ॥ किं कर्तव्यं तवास्माभिस्तद्व
दस्व मुनीश्वर ॥ इति तासां वचः श्रुत्वा सयुग्वान्हि महामुनिः ॥ २७ ॥ ध्यानादुपारमत्तूर्णं ताश्चापश्यत्पुरःस्थिताः ॥ स ताः संपूज्य विधिव
द्रैक्वो वाचमभाषत ॥ २८ ॥ यमुने देवि हे गंगे हे गये पापनाशिनि ॥ सन्निधानं कुरुध्वं मे गन्धमादनपर्वते ॥ २९ ॥ यत्र भूमिं विनिर्भिद्य
भवत्य इह निर्गताः ॥ तानि पुण्यानि तीर्थानि भवेयुर्वोऽभिधानतः ॥ ३० ॥ सहसांतरधीयंत तथास्त्वित्येव तत्र ताः ॥ तदाप्रभृति तीर्थानि
तानि त्रीण्यपि भूतले ॥ ३१ ॥ तेनतेनाभिधानेन गीयन्ते सर्वदा जनैः ॥ यत्र भूमिं विनिर्भिद्य यमुना निर्गता तदा ॥ ३२ ॥ यमुनातीर्थमिति
वै तज्जनैरभिधीयते ॥ यतो वै पृथिवीरंध्राज्जाह्नवी सहसोत्थिता ॥ ३३ ॥ गंगातीर्थमिति ख्यातं तल्लोके पापनाशनम् ॥ गया हि मानुषं रूपं
यत आस्थाय निर्ययौ ॥ ३४ ॥ तदेव भूमिविवरं गयातीर्थं प्रचक्षते ॥ एवमेतन्महापुण्यं तीर्थत्रयमनुत्तमम् ॥ ३५ ॥ रैक्वमंत्रप्रभावेण पृथिव्याः
सहसोत्थितम् ॥ अत्र तीर्थत्रये स्नानं ये कुर्वंति नरोत्तमाः ॥ ३६ ॥ तेषामज्ञाननाशः स्याज्ज्ञानमप्युदयं लभेत् ॥ स्वमंत्रेण समाकृष्टे तत्र तीर्थत्रये
मुनिः ॥ ३७ ॥ स्नानं समाचरन्नित्यं स कालानत्यवाहयत् ॥ एतस्मिन्नेव काले तु राजा जानश्रुतिर्महान् ॥ ३८ ॥ पु[1]त्रसंज्ञस्य राजर्षेः पौत्रो
धर्मैकतत्परः ॥ देयमन्नादि स तदा ह्यर्थिभ्यः श्रद्धयैव यत् ॥ ३९ ॥ तस्मादेनं नजालोके श्रद्धादेयं प्रचक्षते ॥ यतो बहुतरं वाक्यमन्नाद्यस्य मही
पतेः ॥४०॥ अर्थिनां क्षुधितानां तु तृप्त्यर्थं वर्तते गृहे ॥ अतोयमर्थिभिः सर्वैर्बहुवाक्य इतीर्यते ॥४१॥ स वै पौत्रायणो राजा जानश्रुतसुतो बली ॥
प्रियातिथिर्बभूवासौ बहुदायी तथाऽभवत् ॥ ४२ ॥ नगरेषु च राष्ट्रेषु ग्रामेषु च वनेषु च ॥ चतुष्पथेषु सर्वेषु महामार्गेषु सर्वशः ॥ ४३ ॥ बह्वन्नपान
संयुक्तं सूपशाकादिसंयुतम् ॥ आतिथ्यं कल्पयामास तृप्तयेऽर्थिजनस्य वै ॥४४॥ अन्नपानादिकं सर्वमुपयुङ्ध्वमिहार्थिनः ॥ इत्यसौ घोषयामास तत्र
तत्र जनास्पदे ॥४५॥ तस्य प्रियातिथेरेव नृपस्य बहुदायिनः ॥ अर्थिभ्यो दानशौंडस्य गुणाः सर्वत्र विश्रुताः ॥४६॥ अथ पौत्रायणस्यास्य गुण
ग्रामेण वर्ततः ॥ देवर्षयो महाभागास्तस्यानुग्रहकांक्षिणः ॥ ४७ ॥ हंसरूपं समास्थाय निदाघसमये निशि ॥ रमणीयां विधायाशु श्रेणीमा

१ तत्र सुज्ञस्य–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पापाद्विमुक्तः ॥ विशुद्धांतरात्मा गतः सत्यलोकं समं ब्रह्मणा मोक्षमप्याशु गच्छेत् ॥ ६३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे सेतुमाहात्म्ये शंखतीर्थप्रशंसायां वत्सनाभकृतघ्नदोषशांतिवर्णनंनाम पञ्चविंशोऽध्यायः ॥ २५ ॥ ॥ श्रीसूत उवाच ॥ ॥ विधायाभिषवं मर्त्याः शंखतीर्थे द्विजोत्तमाः ॥ यमुनां चैव गंगां च गयां चापि क्रमाद्व्रजेत् ॥ १ ॥ यमुनाख्यं महातीर्थं गंगातीर्थमनुत्तमम् ॥ गयातीर्थं च मर्त्यानां महापतकनाशनम् ॥ २ ॥ एतत्तीर्थत्रयं पुण्यं सर्वलोकेषु विश्रुतम् ॥ सर्वविघ्नप्रशमनं सर्वरोगनिबर्हणम् ॥ ३ ॥ एतद्धि तीर्थत्रितयं सकलाज्ञाननाशनम् ॥ अविद्यायां विनष्टायां तथा ज्ञानप्रदं नृणाम् ॥ ४ ॥ जानश्रुतिर्महाराज एषु तीर्थेषु वै पुरा ॥ स्नात्वा रैक्वाद्द्विजश्रेष्ठात्प्राप्तवाञ्ज्ञानमुत्तमम् ॥ ५ ॥ ॥ ऋषय ऊचुः ॥ ॥ सूत सर्वार्थतत्त्वज्ञ व्यासशिष्य महामते ॥ यमुना चैव गंगा च गया चैवेति विश्रुतम् ॥ ६ ॥ एतत्तीर्थत्रयं कस्मादागतं गंधमादने ॥ जानश्रुतेश्च राजर्षेः स्नानात्तीर्थत्रयेऽपि च ॥ ज्ञानावाप्तिः कथं रैक्वादस्माकं सूत तद्वद ॥ ७ ॥ ॥ श्रीसूत उवाच ॥ ॥ रैक्वनामा महर्षिस्तु पुरा वै गन्धमादने ॥ ८ ॥ तपस्सुदुश्चरं कुर्वन्न्यवसत्तपसां निधिः ॥ दीर्घकालं तपः कुर्वन्स वै रैक्वो महामुनिः ॥ ९ ॥ तपोबलेन महता दीर्घमायुरवाप्तवान् ॥ जन्मना पंगुरेवासीद्रैक्वनामा महामुनिः ॥ १० ॥ पंगुत्वादसमर्थोऽभूद्गंतुं तीर्थान्यसौ मुनिः ॥ संति यानि तु तीर्थानि गन्धमादनपर्वते ॥ ११ ॥ तानि गच्छति सामीप्याच्छकटेनैव संचरन् ॥ स यद्रैक्वो मुनिवरो युग्वेन सह वर्तते ॥ १२ ॥ तपस्वी वैदिकैर्लोके सयुग्वेत्यभिधीयते ॥ युग्वेति शकटं प्रोक्तं स तेन सह वर्तते ॥ १३ ॥ स खल्वेवं मुनिश्रेष्ठः सयुग्वानाम वै मुनिः ॥ पूर्णज्ञानस्तपस्तेपे गन्धमादनपर्वते ॥ १४ ॥ ग्रीष्मे पञ्चाग्निमध्यस्थः सोऽतप्यत महत्तपः ॥ वर्षायां कण्ठदघ्नेषु जलेषु समवर्तत ॥ १५ ॥ तपसा शोषिते गात्रे पामा तस्य व्यजायत ॥ कण्डूयत स पामानं दिवारात्रं मुनीश्वरः ॥ १६ ॥ कण्डूयमान एवायं पामानं न तपोऽत्यजत् ॥ अजायत मनस्त्वेवं तस्य सयुग्वनो मुनेः ॥ १७ ॥ यमुनायां च गंगायां गयायां चाधुनैव हि ॥ अस्मिंस्तीर्थे त्रये पुण्ये स्नातव्यं हि मया त्विति ॥ १८ ॥ एवं विचिंत्य स मुनिरन्यां चिंतामथाकरोत् ॥ अहं हि जन्मना पंगुरतः स्नानं हि दुर्लभम् ॥ १९ ॥ अतिदूरं मया गन्तुं शकटेन न शक्यते ॥ किंकरोम्यधुनेत्येवं स वितर्क्य महामतिः ॥ २० ॥ तीर्थत्रयेषु स्नानार्थं कर्तव्यं निश्चिकाय वै ॥ अप्रसह्यमनाधृष्यं विद्यते मे तपोबलम् ॥ २१ ॥ तेनैवावाहयिष्यामि तद्धि तीर्थत्रयं त्विह ॥ इति निश्चित्य मनसा प्राङ्मुखो नियतेंद्रियः ॥ २२ ॥ त्रिराचम्य च सयुग्वान्दध्यौ क्षणमतंद्रितः ॥ तस्य मंत्रप्रभावेन यमुना सा महानदी ॥ २३ ॥ गंगा च जह्नुतनया गया सा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तयत् ॥ न भवेद्यदि नैर्मल्यं तदा स्याच्चंचलं मनः ॥ ३७ ॥ मनश्च पापबाहुल्ये निर्मलं नैव जायते ॥ पापलेशोपि मे नास्ति कथं लोला
यते मनः ॥ ३८ ॥ अचिंतयद्दोषहेतुं वत्सनाभः पुनःपुनः ॥ स विचिंत्य विनिश्चित्य निनिंदात्मानमंजसा ॥ ३९ ॥ धिङ्मामद्य दुरात्मान
महो मूढोस्म्यहं भृशम् ॥ कृतघ्नता महान्दोषो मामद्य समुपागतः ॥ ४० ॥ यदीदृशान्महावर्षात्त्रातारं महिषोत्तमम् ॥ तिष्ठाम्यपूजयन्नेव ततो मे
भूत्कृतघ्नता ॥ ४१ ॥ कृतघ्नता महान्दोषः कृतघ्ने नास्ति निष्कृतिः ॥ कृतघ्नस्य न वै लोकाः कृतघ्नस्य न बांधवाः ॥ ४२ ॥ कृतघ्नतादोष
बलान्मम चित्तं मलीमसम् ॥ कृतघ्ना नरकं यांति ये च विश्वस्तघातिनः ॥ ४३ ॥ निष्कृतिं नैव पश्यामि कृतघ्नानां कथंचन ॥ ऋते
प्राणपरित्यागाद्धर्मज्ञानां वचो यथा ॥ ४४ ॥ पित्रोरभरणं कृत्वा ह्यदत्त्वा गुरुदक्षिणाम् ॥ कृतघ्नतां च संप्राप्य मरणांता हि निष्कृतिः ॥ ४५ ॥
तस्मात्प्राणान्परित्यज्य प्रायश्चित्तं चराम्यहम् ॥ इति निश्चित्य मनसा वत्सनाभो महामुनिः ॥ ४६ ॥ तृणीकृत्य निजान्प्राणान्निःसंगेनांतरा
त्मना ॥ मेरोः शिखरमारूढः प्रायश्चित्तचिकीर्षया ॥ ४७ ॥ सुमेरुशिखरात्तस्मादियेष पतितुं मुनिः ॥ तस्मिन्पतितुमारब्धे मा त्वरिष्ठा इति
ब्रुवन् ॥ त्यक्तमाहिषरूपः सन्धर्म एव न्यवारयत् ॥ ४८ ॥ ॥ धर्म उवाच ॥ ॥ वत्सनाभ महाप्राज्ञ जीवस्व बहुवत्सरान् ॥ ४९ ॥ परितुष्टो
ऽस्मि भद्रं ते देहत्यागचिकीर्षया ॥ न हि त्वद्धर्मकक्षायां लोके कश्चित्समोऽस्ति वै ॥ ५० ॥ यद्यपि प्राणसंत्यागः कृतघ्ने निष्कृतिर्भवेत् ॥
तथापि धर्मशीलत्वात्तवान्यां निष्कृतिं वदे ॥ ५१ ॥ शंखतीर्थाभिधं तीर्थमस्ति वै गंधमादने ॥ शांत्यर्थमस्य पापस्य तत्र स्नाहि समाहितः ॥
॥ ५२ ॥ प्राप्स्यसे चित्तशुद्धिं त्वमतो विगतकल्मषः ॥ ततश्च लब्धविज्ञानः प्राप्स्यसे शाश्वतं पदम् ॥ ५३ ॥ अहं धर्मोस्मि योगीन्द्र सत्य
मेव ब्रवीमि ते ॥ इति धर्मवचः श्रुत्वा वत्सनाभो महामुनिः ॥ ५४ ॥ स्नातुकामः शंखतीर्थे गंधमादनमन्वगात् ॥ शंखतीर्थं च संप्राप्य तत्र
सस्नौ महामुनिः ॥ ५५ ॥ ततो विगतपापस्य मनो निर्मलतां गतम् ॥ ततोऽचिरेण कालेन ब्रह्मभूयमगान्मुनिः ॥ ५६ ॥ एवं वः कथितं विप्राः
शंखतीर्थस्य वैभवम् ॥ यत्र हि स्नानमात्रेण कृतघ्नोऽपि विमुच्यते ॥ ५७ ॥ मातृद्रोही पितृद्रोही गुरुद्रोही तथैव च ॥ अन्ये कृतघ्ननिवहा
मुच्यंतेऽत्र निमज्जनात् ॥ ५८ ॥ अतः कृतघ्नैर्मनुजैः सेवनीयमिदं सदा ॥ अहो तीर्थस्य माहात्म्यं यत्कृतघ्नोपि मुच्यते ॥ ५९ ॥ अकृत्वा
भरणं पित्रोरदत्त्वा गुरुदक्षिणाम् ॥ कृतघ्नतां च संप्राप्य मरणांता हि निष्कृतिः ॥ ६० ॥ इह तु स्नानमात्रेण कृतघ्नस्यापि निष्कृतिः ॥ कृतघ्न
तापि तत्तीर्थे स्नानमात्राद्विनश्यति ॥ ६१ ॥ अन्येषां तुच्छपापानां सर्वेषां किमुताधुना ॥ ६२ ॥ अध्यायमेनं पठेद्भक्तियुक्तः कृतघ्नोपि मर्त्याः स

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रमे ॥ ९ ॥ स वै निश्चलसर्वांगस्तिष्ठंस्तत्रैव भूतले ॥ परमाण्वंतरं वापि न स्वस्थानाच्चचाल सः ॥ १० ॥ स्थित्वैकत्र तपस्यंतमनेकशतवत्सरान् ॥ तमाचक्राम वल्मीकं छादितांगं चकार च ॥ ११ ॥ वल्मीकाक्रांतदेहोपि वत्सनाभो महामुनिः ॥ अकरोत्तप एवासौ वल्मीकं न त्वबुद्ध्यत ॥ ॥ १२ ॥ तस्मिंश्च तप्यति तपो वासवो मुनिपुंगवाः ॥ विसृज्य मेघजालानि वर्षयामास वेगवान् ॥ १३ ॥ एवं दिनानि सप्तायं स ववर्ष निरंतरम् ॥ आसारेणातिमहता वृष्यमाणोपि वै मुनिः ॥ १४ ॥ तं वर्षं प्रतिजग्राह निमीलितविलोचनः ॥ महता स्तनितेनाशु तदा बधिरयञ्छ्रुती ॥ ॥ १५ ॥ वल्मीकस्योपरिष्टाद्वै निपपात महाशनिः ॥ तस्मिन्वर्षति पर्जन्ये शीतवातातिदुःसहे ॥ १६ ॥ वल्मीकशिखरं ध्वस्तं बभूवाशनिताडितम् ॥ विशीर्णशिखरे तस्मिन्वल्मीकेऽशनिताडिते ॥ १७ ॥ सेहेतिदुःसहां वृष्टिं वत्सनाभो विचिंतयन् ॥ महर्षौ वर्षधाराभिः पीड्यमाने दिवानिशम् ॥ १८ ॥ धर्मस्य चेतसि कृपा संबभूवातिभूयसी ॥ स धर्मश्चिंतयामास वत्सनाभे तपस्यति ॥ १९ ॥ पतत्यप्यतिवर्षेऽयं तपसो न निवर्तते ॥ अहोऽस्य वत्सनाभस्य धर्मैकायत्तचित्तता ॥ २० ॥ इति चिंतयतस्तस्य मतिरेवमजायत ॥ अहं वै माहिषं रूपं सुमहांतं मनोहरम् ॥ २१ ॥ वर्षधारानिपातानां सोढारं कठिनत्वचम् ॥ स्वीकृत्य माहिषं रूपं स्थास्याम्युपरि योगिनः ॥ २२ ॥ न हि बाधिष्यते वर्षं महावेगयुतं त्वपि ॥ धर्म एवं विनिश्चित्य धाराः पृष्ठेन धारयन् ॥ २३ ॥ वत्सनाभोपरि तदा गात्रमाच्छाद्य तस्थिवान् ॥ ततः सप्तदिनांते तु तद्वै वर्षमुपारमत् ॥ २४ ॥ ततो महिषरूपी स धर्मोऽतिकृपया युतः ॥ तद्वै वल्मीकमुत्सृज्य नातिदूरे ह्यवर्त्तत ॥२५॥ ततो निवृत्ते वर्षे तु वत्सनाभो महामुनिः॥ निवृत्तस्तपसस्तूर्णं दिशः सर्वा व्यलोकयन्॥२६॥स्थितोऽहं वृष्टिसंपाते कुर्वन्नद्य महत्तपः॥ पृथिवी सलिलक्लिन्ना दृश्यते सर्वतोदिशम्॥२७॥ शिखराणि गिरीणां च वनान्युपवनानि च ॥ आश्रमाणि महर्षीणामाप्लुतानि जलैर्नवैः ॥ २८ ॥ एवमादीनि सर्वाणि दृष्ट्वा प्रमुदितोऽभवत् ॥ चिंतयामास धर्मात्मा वत्सनाभो महामुनिः ॥ २९ ॥ अहमस्मिन्महावर्षे नूनं केनापि रक्षितः ॥ वर्षत्यस्मिन्महावर्षे जीवितं त्वन्यथा कुतः ॥ ३० ॥ विचिंत्यैवं मुनिश्रेष्ठः सर्वत्र समलोकयत् ॥ ततोऽपश्यन्महाकायमदूरादग्रतः स्थितम् ॥ ३१ ॥ महिषं नीलवर्णं च वत्सनाभस्तपोधनः ॥ महिषं तं समुद्दिश्य मनसा समचिंतयत् ॥ ३२ ॥ तिर्यग्योनिष्वपि कथं दृश्यते धर्मशीलता ॥ यतो ह्यहं महावर्षान्महिषेणाभिरक्षितः ॥ ३३ ॥ दीर्घमायुरमुष्यास्तु यन्मां रक्षितवानिह ॥ इत्यादि स विचिंत्यैवं तपसे पुनरुद्ययौ ॥ ३४ ॥ तं पुनश्च तपस्यंतं दृष्ट्वा महिषरूपधृक् ॥ रोमांचावृतसर्वांगः प्रमोदमगमद्भृशम् ॥ ॥ ३५ ॥ वत्सनाभस्य हि मुनेः पुनश्चैव तपस्यतः ॥ मनः पूर्ववदेकाग्रं परब्रह्मणि नाभवत् ॥ ३६ ॥ स विषण्णमना भूत्वा वत्सनाभो व्यचिं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रुद्रः कैलासं प्रययौ क्षणात् ॥ ५७ ॥ ततः कपालपाणिस्तु भैरवः शिवचोदितः ॥ देवदानवयक्षादिलोकेषु विचचार सः ॥५८॥ तं यांतमनुयाति
स्म ब्रह्महत्यातिभीषणा ॥ भैरवः सर्वतीर्थानि पुण्यान्यायतनानि च ॥ ५९ ॥ चरित्वा लीलया देवस्ततो वाराणसीं ययौ ॥ वाराणसीं प्रविष्टे तु भैर
वे शंकरांशजे ॥ ६० ॥ चतुर्थांशं विना नष्टा ब्रह्महत्यातिकुत्सिता ॥ चतुर्थांशेन दुद्राव भैरवं शंकरांशजम् ॥६१॥ ततः स भैरवो देवः शूलपाणिः
कपालधृक् ॥ शिवाज्ञया ययौ पश्चाद्गंधमादनपर्वतम् ॥ ६२ ॥ शिवतीर्थं ततो गत्वा भैरवः स्नातवान्द्विजाः ॥ स्नानमात्रेण तत्रास्य शिवतीर्थे मह
त्तरे ॥ ६३ ॥ निःशेषं विलयं याता ब्रह्महत्यातिभीषणा ॥ अस्मिन्नवसरे शंभुः प्रादुरासीत्तदग्रतः ॥ प्रादुर्भूतो महादेवो भैरवं वाक्यमब्रवीत् ॥६४॥
॥ ॥ ईश्वर उवाच ॥ ॥ निःशेषं ब्रह्महत्या ते शिवतीर्थे निमज्जनात् ॥ ६५ ॥ नष्टा भैरव नास्त्यत्र संदेहस्तव सुव्रत ॥ इदं कपालं काश्यां त्वं
स्थापयस्व क्वचित्स्थले ॥ ६६ ॥ इत्युक्त्वा भगवाञ्छंभुस्तत्रैवांतरधीयत ॥ भैरवोऽपि तदा विप्रा ब्रह्महत्याविमोचितः ॥ ६७ ॥ शिवतीर्थस्य माहा
त्म्याद्ययौ वाराणसीं पुरीम् ॥ कपालं स्थापयामास प्रदेशे कुत्रचिद्द्विजाः ॥ कपालतीर्थमित्याख्यामलभत्तत्स्थलं तदा ॥ ६८ ॥ ॥ श्रीसूत
उवाच ॥ ॥ एवंप्रभावं तत्पुण्यं शिवतीर्थं विमुक्तिदम् ॥ ६९ ॥ महादुःखप्रशमनं महापातकनाशनम् ॥ नरकक्लेशशमनं स्वर्गदं मोक्षदं तथा ॥
॥ ७० ॥ शिवतीर्थस्य माहात्म्यं मया प्रोक्तं विमुक्तिदम् ॥ इदं पठन्सदा मर्त्यो दुःखग्रामाद्विमुच्यते ॥ ७१ ॥ इति श्रीस्कांदे महापुराण एकाशी
तिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे सेतुमाहात्म्ये शिवतीर्थप्रशंसायां भैरवब्रह्महत्याविमोक्षणवर्णनंनाम चतुर्विंशोऽध्यायः ॥ २४ ॥ ॥ छ ॥
॥ ॥ श्रीसूत उवाच ॥ ॥ शिवतीर्थे नरः स्नात्वा ब्रह्महत्याविमोक्षणे ॥ स्वपापजालशांत्यर्थं शंखतीर्थं ततो व्रजेत् ॥ १ ॥ यत्र मज्जनमात्रेण
कृतघ्नोऽपि विमुच्यते ॥ मातॄः पितॄन्गुरूंश्चापि ये न मन्यंति मोहिताः ॥ २ ॥ ये चाप्यन्ये दुरात्मानः कृतघ्ना निरपत्रपाः ॥ ते सर्वे शंखतीर्थे
स्मिन्छुद्ध्यंति स्नानमात्रतः ॥ ३ ॥ शंखनामा मुनिः पूर्वं गंधमादनपर्वते ॥ अवर्तत तपः कुर्वन्विष्णुं ध्यायन्समाहितः ॥ ४ ॥ स तत्र कल्पयामास
स्नानार्थं तीर्थमुत्तमम् ॥ शंखेन निर्मितं तीर्थं शंखतीर्थमितीर्यते ॥ ५ ॥ तत्र स्नात्वा सकृन्मर्त्यः कृतघ्नोऽपि विमुच्यते ॥ अत्रेतिहासं वक्ष्यामि
पुराणं पापनाशनम् ॥ ६ ॥ यस्य श्रवणमात्रेण नरो मुक्तिमवाप्नुयात् ॥ पुरा बभूव विप्रेंद्रो वत्सनाभो महामुनिः ॥ ७ ॥ सत्यवाञ्छीलवान्वाग्मी
सर्वभूतदयापरः ॥ शत्रुमित्रसमो दांतस्तपस्वी विजितेंद्रियः ॥ ८ ॥ परब्रह्मणि निष्णातस्तत्त्वब्रह्मैकसंश्रयः ॥ एवंप्रभावः स मुनिस्तपस्तेपे निजा

१ तस्मिन्–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स मनुते ब्रह्मा देवानां सन्निधौ पुरा ॥ ७ ॥ तदा नारायणः प्राह प्रहसन्द्विजपुंगवाः ॥ किमर्थमेवं ब्रूषे त्वमहकारेणासंमतम् ॥ ८ ॥ वाक्यमेवं
विधं भूयो वक्तुं नार्हसि वै विधे ॥ अहमेव जगत्कर्ता यज्ञो नारायणो विभुः ॥ ९ ॥ मां विनास्य प्रपञ्चस्य जीवनं दुर्लभं भवेत् ॥ मत्प्रसादाज्ज
गत्सृष्टं त्वया स्थावरजंगमम् ॥ १० ॥ विवादं कुर्वतोरेवं ब्रह्मविष्णवोर्जयैषिणोः ॥ देवानां पुरतस्तत्र वेदाश्चत्वार आगताः ॥ प्रोचुर्वाक्यमिदं तथ्यं
परमार्थप्रकाशकम् ॥११॥ ॥ वेदा ऊचुः ॥ ॥ त्वं विष्णो न जगत्कर्ता न त्वं ब्रह्मन्प्रजापते ॥ १२ ॥ किं त्वीश्वरो जगत्कर्ता परात्परतरो विभुः ॥
तन्मायाशक्तिसंक्लृप्तमिदं स्थावरजंगमम् ॥ १३ ॥ सर्वदेवाभिवंद्यो हि सांबः सत्यादिलक्षणः ॥ स्रष्टा च पालको हर्ता स एव जगतां प्रभुः ॥१४॥
एवं समीरितं वेदैः श्रुत्वा वाक्यं शुभाक्षरम्॥ब्रह्मा विष्णुस्तदा तत्र प्रोचतुर्द्विजपुंगवाः॥१५॥ ॥ब्रह्मविष्णू ऊचतुः॥ ॥पार्वत्यालिंगितः शंभुर्मूर्तिमान्प्रमथा
धिपः॥कथं भवेत्परं ब्रह्म सर्वसंगविवर्जितम्॥१६॥ताभ्यामितीरिते तत्र प्रणवः प्राह तौ तदा ॥ अरूपो रूपमादाय महता ध्वनिना द्विजाः ॥१७॥
॥ ॥ प्रणव उवाच ॥ ॥ असौ शंभुर्महादेवः पार्वत्या स्वातिरिक्तया ॥ संक्रीडते कदाचिन्नो किं तु स्वात्मस्वरूपया ॥ १८ ॥ असौ शंभुर
नीशानः स्वप्रकाशो निरंजनः ॥ विश्वाधिको महादेवो विश्वाधिक इति श्रुतः ॥ १९ ॥ सर्वात्मा सर्वकर्तासौ स्वतन्त्रः सर्वभावनः ॥ ब्रह्मन्नयं
सृष्टिकाले त्वां नियुंक्ते रजोगुणैः ॥ २० ॥ सत्त्वेन रक्षणे शंभुस्त्वां प्रेषयति केशव ॥ तमसा कालरुद्राख्यं संप्रेरयति संहृतौ ॥ २१ ॥ अतः
स्वतन्त्रता विष्णो युवयोर्न कदाचन ॥ नापि प्रजापतेरस्ति किं तु शंभोः स्वतन्त्रता ॥ २२ ॥ ब्रह्मन्विष्णो युवाभ्यां तु किमर्थं न महेश्वरः ॥
ज्ञायते सर्वलोकानां कर्ता विश्वाधिकस्तथा ॥ २३ ॥ सापि शक्तिरुमा देवी न पृथक्छंकरात्सदा ॥ शंभोरानंदभूता सा देवी नागंतुकी स्मृता ॥
॥ २४ ॥ अतो विश्वाधिको रुद्रः स्वतंत्रो निर्विकल्पकः ॥ [2]सर्वदेवैरयं वन्द्यो युवाभ्यामपि शंकरः ॥ २५ ॥ कर्ता नास्यास्ति रुद्रस्य नाधिकोऽ
स्माच्च विद्यते ॥ न तत्समोऽपि लोकेषु विद्यते [3]शतशस्तथा ॥ २६ ॥ अतो मोहं न कुरुतं ब्रह्मविष्णो युवां वृथा ॥ इत्युक्तं प्रणवेनाथ श्रुत्वा ब्रह्मा
च केशवः ॥ २७ ॥ मायया मोहितौ शंभोर्नैवाज्ञानमभुंचताम् ॥ एतस्मिन्नंतरे ब्रह्मा प्रददर्श महाद्भुतम् ॥ २८ ॥ व्याप्नुवद्गगनं सर्वमनंतादित्य
सन्निभम् ॥ तेजोमण्डलमाकाशमध्यगं विश्वतोमुखम् ॥ २९ ॥ तन्निरूपयितुं ब्रह्मा ससर्जोर्ध्वगतं मुखम् ॥ तपोबलविसृष्टेन पंचमेन मुखेन सः ॥
॥ ३० ॥ निरूपयामास विभुस्तत्तेजोमण्डलं मुहुः ॥ तत्प्रजज्वाल कोपेन मुखं तेजोविलोकनात् ॥ ३१ ॥ अनंतादित्यसंकाशं ज्वलत्तत्पंचमं

१ सर्वभासकः--इ० पा० । २ देवदेवैः--इ० पा० । ३ सर्वदा तदा--इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शिरः ॥ दिधक्षुः प्रलये लोकान्वडवाग्निरिवाबभौ ॥ ३२ ॥ व्यदृश्यत च तत्तेजः पुरुषो नीललोहितः ॥ दृष्ट्वा स्रष्टा तदा ब्रह्मा बभाषे परमेश्वरम् ॥ ३३ ॥ वेदाहं त्वां महादेव ललाटान्मे पुरा भवान् ॥ विनिर्गतोऽसि शंभो त्वं रुद्रनामा ममात्मजः ॥ ३४ ॥ इति गर्वेण संयुक्तं वचः श्रुत्वा महेश्वरः ॥ कालभैरवनामानं पुरुषं प्राहिणोत्तदा ॥ ३५ ॥ अयुद्ध्यत चिरं कालं ब्रह्मणा कालभैरवः ॥ महादेवांशसंभूतः शूलटंकगदाधरः ॥ ॥ ३६ ॥ युद्ध्वा तु सुचिरं कालं ब्रह्मणा कालभैरवः ॥ वदनं ब्रह्मणः शुभ्रं व्यलोकयत पंचमम् ॥ ३७ ॥ विलोक्योर्ध्वगतं वक्त्रं पञ्चमं भारतीपतेः ॥ गर्वेण महता युक्तं प्रजज्वालातिकोपितः ॥ ३८ ॥ ततस्तत्पंचमं वक्त्रं भैरवः प्राच्छिनद्रुषा ॥ ततो ममार ब्रह्माऽसौ कालभैरवहिंसितः ॥ ॥ ३९ ॥ ईश्वरस्य प्रसादेन प्रपेदे जीवितं पुनः ॥ ततो विलोकयामास शंकरं शशिभूषणम् ॥ ४० ॥ वासुक्याद्यष्टभोगींद्रविभूषणविभूषितम् ॥ दृष्ट्वा वेधा महादेवं पार्वत्या सह शंकरम् ॥ ४१ ॥ लेभे माहेश्वरं ज्ञानं महादेवप्रसादतः ॥ ततस्तुष्टाव गिरिशं वरेण्यं वरदं शिवम् ॥ ४२ ॥ ॥ ॥ ब्रह्मोवाच ॥ ॥ मह्यं प्रसीद गिरिश शशांककृतशेखर ॥ यन्मयापकृतं शंभो तत्क्षमस्व दयानिधे ॥ ४३ ॥ क्षमस्व मम गर्वं त्वं शंकरेति पुनःपुनः ॥ नमश्चकार सोमं[1] तं सोमार्धकृतशेखरम् ॥ ४४ ॥ अथ देवः प्रसन्नोऽस्मै ब्रह्मणे स्वांशजाय तु ॥ मा भैरित्यब्रवींच्छंभुर्भैरवं चाभ्यभाषत ॥ ४५ ॥ ॥ ईश्वर उवाच ॥ ॥ एष सर्वस्य जगतः पूज्यो ब्रह्मा सनातनः ॥ हतस्यास्य विरिंचस्य धारय त्वं शिरोऽधुना ॥ ४६ ॥ ब्रह्महत्याविशुद्ध्यर्थं लोकसंग्रहकाम्यया ॥ भिक्षामट कपालेन भैरव त्वं ममाज्ञया ॥ ४७ ॥ उक्त्वैवं शंकरो विप्रास्तत्रैवांतरधीयत ॥ नीलकण्ठो महादेवो गिरिजार्द्धतनुस्ततः ॥ ४८ ॥ भैरवं ग्राहयामास वदनं वेधसो द्विजाः ॥ चरस्व पापशुद्ध्यर्थं लोकसंग्रहणाय वै ॥ ४९ ॥ कपालधारी हस्तेन भिक्षां गृह्णातु भैरवः ॥ इतीरयित्वा गिरिशः कन्यां कांचिद्भयंकरीम् ॥ ५० ॥ ब्रह्महत्याभिधां क्रूरां वडवानलसन्निभाम् ॥ तां प्रेरयित्वा गिरिशो भैरवं पुनरब्रवीत् ॥ ५१ ॥ ॥ ईश्वर उवाच ॥ ॥ भैरवैतद्व्रतं त्वब्दं ब्रह्महत्याविशुद्धये ॥ चर त्वं सर्वतीर्थेषु स्नाहि शुद्ध्यर्थमात्मनः ॥५२॥ ततो वाराणसीं गच्छ ब्रह्महत्याप्रशांतये ॥ वाराणसीप्रवेशेन ब्रह्महत्या तवाधमा ॥५३॥ पादशेषा विनष्टा स्याच्चतुर्थांशो न नश्यति ॥ तस्य नाशं प्रवक्ष्यामि तव भैरव तच्छृणु ॥५४॥ दक्षिणांभोनिधेस्तीरे गन्धमादनपर्वते ॥ सर्वप्राण्युपकाराय कृतं तीर्थं मया शुभम् ॥५५॥ शिवसंज्ञं महापुण्यं तत्र याहि त्वमादरात् ॥ तत्प्रवेशनमात्रेण ब्रह्महत्या तवाशुभा ॥ ५६ ॥ शिवतीर्थस्य माहात्म्यान्निःशेषं नश्यति ध्रुवम् ॥ उक्त्वैवं भैरवं

[1] सोमम्—उमया सहितम्—साम्बं शंकरम्—इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चानां शतं गतम् ॥ ४५ ॥ जायंते च म्रियंते च चतुराननकोटयः ॥ पश्यन्नेव च तान्सर्वानहं प्राणानधारयम् ॥ ४६ ॥ तत्र लोकेश्वराभिख्ये वर्तमाने प्रजापतौ ॥ विप्रो हरिहरोनाम निवसञ्छ्यामलापुरे ॥ ४७ ॥ व्याधेनारण्यवासेन केल्यर्थं लक्ष्यवेधिना ॥ छिन्नपादोऽभवद्बाणैर्लक्ष्यमध्यं समागतः ॥ ४८ ॥ स गंधमादनं प्राप्य मुनिभिः प्रेरितस्तदा ॥ स्नात्वा च मुनितीर्थेऽस्मिन्प्राप्तवांश्चरणौ पुरा ॥ ४९ ॥ तदा पुण्यमिदं तीर्थं मुनितीर्थमितीरितम् ॥ इदानीं चक्रतीर्थाख्यं चक्रनाम त्ववेदत ॥ ५० ॥ तदत्र क्रियतां स्नानं प्राशित्रच्छिन्नपाणिना ॥ मुनितीर्थे सवित्रापि युष्माकं यदि रोचते ॥ ५१ ॥ ऋत्विजः कथितास्त्वेवमष्टावक्रमहर्षिणा ॥ सवितारमभाषंत सर्वे एव प्रहर्षिताः ॥ ५२ ॥ सवितः स्नाहि तीर्थेऽस्मिंस्तव पाणी भविष्यतः ॥ अष्टावक्रो यथा प्राह तथा कुरु समाहितः ॥ ५३ ॥ ततः स सविता गत्वा चक्रतीर्थं महत्तरम् ॥ सस्नौ पाण्योरवाप्त्यर्थमिष्टदायिनि तत्र सः ॥ ५४ ॥ उत्तिष्ठन्नेव स तदा तत्र स्नात्वा सभक्तिकम् ॥ युक्तो हिरण्मयाभ्यां तु पाणिभ्यां समदृश्यत ॥ ५५ ॥ हिरण्यपाणिं तं दृष्ट्वा जहृषुः सर्वऋत्विजः ॥ ततः समाप्य तं यज्ञं दैत्यसंघान्विजित्य च ॥ ५६ ॥ इंद्रादयः सुराः सर्वे सुखिताः स्वर्गमाययुः ॥ तस्मादेतत्समागत्य तीर्थं सर्वैश्च मानवैः ॥ ५७ ॥ सेवनीयं प्रयत्नेन स्वस्वाभीष्टस्य सिद्धये ॥ अंधैश्च कुणिभिर्मूकैर्बधिरैः कुब्जकैरपि ॥ ५८ ॥ खंजैः पंगुभिरप्येतदंगहीनैस्तथापरैः ॥ संछिन्नपाणिचरणैः संछिन्नान्यांगसंचयैः ॥ ५९ ॥ मनुष्यैश्च तथान्यैश्च विकलांगस्य पूर्तये ॥ सेवनीयमिदं तीर्थं सर्वाभीष्टप्रदायकम् ॥ ६० ॥ एवं वः कथितं विप्राश्चक्रतीर्थस्य वैभवम् ॥ यत्र स्नात्वा पुरा छिन्नौ पाणी प्राप प्रभाकरः ॥ ६१ ॥ यः पठेदिममध्यायं शृणुयाद्वा समाहितः ॥ अंगानि विकलान्यस्य पूर्णानि स्युर्न संशयः ॥ ६२ ॥ मोक्षकामस्य मर्त्यस्य मुक्तिः स्यान्नात्र संशयः ॥ ६३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे सेतुमाहात्म्ये चक्रतीर्थप्रशंसायामादित्यहिरण्मयपाण्यवाप्तिवर्णनंनाम त्रयोविंशोऽध्यायः ॥ २३ ॥ ॥ छ ॥ ॥ श्रीसूत उवाच ॥ ॥ चक्रतीर्थे नरः स्नात्वा शिवतीर्थं ततो व्रजेत् ॥ यत्र हि स्नानमात्रेण महापातककोटयः ॥ १ ॥ तत्संसर्गाश्च नश्यंति तत्क्षणादेव तापसाः ॥ अत्र स्नात्वा ब्रह्महत्यां मुमुचे कालभैरवः ॥ २ ॥ ॥ ऋषय ऊचुः ॥ ॥ कालभैरवरुद्रस्य ब्रह्महत्या महामुने ॥ किमर्थमभवत्सूत तन्नो वक्तुमिहार्हसि ॥ ३ ॥ ॥ श्रीसूत उवाच ॥ ॥ वक्ष्यामि मुनयः सर्वे पुरावृत्तं विमुक्तिदम् ॥ यस्य श्रवणमात्रेण सर्वपापैः प्रमुच्यते ॥ ४ ॥ प्रजापतेश्च विष्णोश्च बभूव कलहः पुरा ॥ किंचित्कारणमुद्दिश्य समस्तजनसन्निधौ ॥ ५ ॥ अहमेव जगत्कर्ता नान्यः कर्तास्ति कश्चन ॥ अहं सर्वप्रपंचानां निग्रहानुग्रहप्रदः ॥ ६ ॥ मत्तो नास्त्यधिकः कश्चिन्मत्समो वा सुरेष्वपि ॥ एवं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यूयं तं यज्ञं गंधमादने ॥ २० ॥ नातिदूरे चक्रतीर्थादसुराणां विनाशकम् ॥ ततस्ते ब्रह्मवचसा सहसा गंधमादनम् ॥ २१ ॥ बृहस्पतिं पुरकृत्य जग्मुर्यज्ञचिकीर्षया ॥ ते प्रणम्य महात्मानमहिर्बुध्न्यं मुनीश्वरम् ॥२२॥ अकल्पयन्यज्ञवाटन्नातिदूरे तदाश्रमात् ॥ यज्ञकर्मसु निष्णातैः सहितास्ते तपोधनैः ॥ २३ ॥ इष्टिमारेभिरे देवा असुराणां विनाशिनीम् ॥ तस्मिन्कर्मणि होतासीत्स्वयमेव बृहस्पतिः ॥ २४ ॥ बभूव मैत्रावरुणो जयंतः पाकशासनिः ॥ अच्छावाको बभूवात्र वसूनामष्टमो वसुः ॥ २५ ॥ ग्रा[1]वस्तुदभवत्तत्र शक्तिपुत्रः पराशरः ॥ अष्टावक्रो महातेजा अध्वर्युधुरमूढवान् ॥ ॥ २६ ॥ तत्र प्रतिप्रस्थाताभूद्विश्वामित्रो महामुनिः ॥ नेष्टा बभूव वरुण उन्नेता च धनेश्वरः ॥ २७ ॥ ब्रह्मा बभूव सविता यज्ञस्यार्धधुरं वहन् ॥ बभूव ब्राह्मणाच्छंसी वसिष्ठो ब्रह्मणोत्तमः ॥ २८ ॥ आग्नीध्रोऽभूच्छुनःशेपः पोता जातश्च पावकः ॥ उद्गाता वायुरभवत्प्रस्तोता च परेतराट् ॥ ॥ २९ ॥ प्रतिहर्ता तु तत्रासीदगस्त्यः कुंभसंभवः ॥ सुब्रह्मण्यो मधुच्छंदा विश्वामित्रात्मजो महान् ॥ ३० ॥ यजमानः स्वयमभूद्देवराजः पुरंदरः ॥ उपद्रष्टा बभूवात्र व्यासपुत्रः शुको मुनिः ॥ ३१ ॥ ततस्ते ऋत्विजः सर्वे देवराजं पुरंदरम् ॥ विधिवद्दीक्षयांचक्रुस्तत्र माहेश्वरे क्रतौ ॥३२॥ प्रावर्तत महायज्ञ एवं वै गंधमादने ॥ सुदर्शनप्रभावेन दुःसहेनातिपीडिताः ॥ ३३ ॥ नाविंदन्नसुरास्तत्र रंध्रं यज्ञे प्रवर्तिते ॥ एवन्निरंतरायोऽसौ प्रावर्तत महाक्रतुः ॥ ३४ ॥ भक्षयंश्च हविस्तत्र जज्वाल हुतवाहनः ॥ विधिवत्कर्मजालानि कृत्वाध्वर्युरसंभ्रमात् ॥ ३५ ॥ मंत्रपूतं पुरोडाशं जुहवामास पावके ॥ हुतशेषं पुरोडाशं विभज्याध्वर्युरादरात् ॥ ३६ ॥ ऋत्विग्भ्यो होतृमुख्येभ्यः प्रददौ पापनाशनम् ॥ सवित्रे ब्रह्मणे चैकमत्युग्रतरतेजसम् ॥ ॥ ३७ ॥ ददौ तत्र पुरोडाशभागं प्राशित्रनामकम् ॥ प्रतिजग्राह पाणिभ्यां प्राशित्रं सविता तदा ॥ ३८ ॥ सवित्रा स्पृष्टमात्रं सत्तत्प्राशित्रं दुरासदम् ॥ तस्य पाणी प्रचिच्छेद पश्यतां सर्वऋत्विजाम् ॥ ३९ ॥ ततः संछिन्नपाणिः स प्राशित्रेणोग्रतेजसा ॥ किमेतदिति संत्रस्तो विषण्णवदनोऽभवत् ॥ ४० ॥ सविता ऋत्विजः सर्वान्समाहूयेदमब्रवीत् ॥ सवितोवाच ॥ पुरोडाशस्य भागोऽयं मम प्राशित्रनामकः ॥ ४१ ॥ दत्तश्चिच्छेद मत्पाणी मिषत्स्वेव भवत्स्वपि ॥ अतो भवंतः संभूय सर्व एव हि ऋत्विजः ॥ ४२ ॥ कल्पयंतामिमौ पाणी नोचेद्यज्ञं निहन्म्यमुम् ॥ सवितुर्वाक्यमाकर्ण्य ते सर्वे समचिंतयन् ॥ ४३ ॥ तत्र मध्ये मुनींद्राणां देवानां चैव सर्वशः ॥ अष्टावक्रो महातेजा ऋत्विजस्तानभाषत ॥ ४४ ॥ ॥ अष्टावक्र उवाच ॥ ॥ शृणुध्वमृत्विजः सर्वे मम वाक्यं समाहिताः ॥ मयि जीवति विप्रेंद्रा विरिं

१ ग्रावस्तुत्--इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सलिले मग्नः क्षणात्प्राणैर्व्ययुज्यत ॥ मृत एव स दुष्पण्यः पिशाचत्वमवाप्तवान् ॥ ९१ ॥ पीडितः क्षुत्पिपासाभ्यां दुर्गमं वनमाश्रितः ॥ घोरेषु घर्मकालेषु समाक्रोशन्भयानकम् ॥ ९२ ॥ अतितीव्रदहनेऽरण्ये दुःखान्यनुभवन्बहु ॥ कल्पकोटिसहस्राणि कल्पकोटिशतानि च ॥ ९३ ॥ स पिशाचो महादुःखी न्यवसद्घोरकानने ॥ वनाद्वनांतरं धावन्देशाद्देशांतरं तथा ॥ ९४ ॥ सर्वत्रानुभवन्दुःखमाययौ दण्डकान्क्रमात् ॥ अगस्त्यादाश्रमात्पुण्यान्नातिदूरे स संचरन् ॥ ९५ ॥ नदन्भैरवनादं च वाक्यमुच्चैरभाषत ॥ भोभोस्तपोधमाः सर्वे शृणुध्वं मामकं वचः ॥ ९६ ॥ भवन्तो हि कृपावन्तः सर्वभूतहिते रताः ॥ कृपादृष्ट्यानुगृह्णीत मां दुःखैरतिपीडितम् ॥ ९७ ॥ पुरा दुष्पण्यनामाहं वैश्यः पाटलिपुत्रके[1] ॥ पुत्रः पशुमतश्चापि बहून्बालानमारयम् ॥ ९८ ॥ ततो विवासितो राज्ञा तस्माद्देशाद्वनं गतः ॥ अमारयं जले पुत्रं तत्रोग्रश्रवसो मुनेः ॥ ९९ ॥ स मुनिर्दत्तवाञ्छापं ममापि मरणं जले ॥ पिशाचतां च मे घोरां दत्तवान्दुःखभूयसीम् ॥ १०० ॥ कल्पकोटिसहस्राणि कल्पकोटिशतान्यपि ॥ पिशाचतानुभूतेयं शून्यकाननभूमिषु ॥ १०१ ॥ नाहं सोढुं समर्थोऽस्मि पिपासां क्षुधमेव च ॥ रक्षध्वं कृपया यूयमतो मां बहुदुःखिनम् ॥ १०२ ॥ यथा मुच्येय पैशाच्यात्तथा कुरुत तापसाः ॥ इति श्रुत्वा पिशाचस्य वचनं ते तपोधनाः ॥ लोपामुद्रासहचरमूचिरे कुम्भसंभवम् ॥ ३ ॥ ॥ तापसा ऊचुः ॥ ॥ पिशाचस्यास्य भगवन्ब्रूहि निष्कृतिमुत्तमाम् ॥ ४ ॥ एवंविधानां पापानां[2] त्वं समर्थो हि रक्षणे ॥ तेषामगस्त्यः श्रुतवान्कृपया परया युतः ॥ प्रियशिष्यं समाहूय सुतीक्ष्णं वाक्यमब्रवीत् ॥ ५ ॥ ॥ अगस्त्य उवाच ॥ ॥ सुतीक्ष्ण गच्छ त्वरितं पर्वतं गंधमादनम् ॥ ६ ॥ तत्राग्नितीर्थं सुमहद्विद्यते पापनाशनम् ॥ पिशाचमोक्षणार्थाय तत्र स्नाहि महामते ॥ ७ ॥ पिशाचार्थं त्वयि स्नाते तत्र संकल्पपूर्वकम् ॥ पिशाचभावमुन्मुच्य दिव्यतामेष यास्यति ॥ ८ ॥ निष्कृतिं नास्य[3] पश्यामि विना तत्तीर्थसेवनात् ॥ अतः सुतीक्ष्ण कृपया रक्षस्वैनं पिशाचकम् ॥ ९ ॥ अगस्त्येनैवमुक्तस्तु सुतीक्ष्णो गन्धमादनम् ॥ प्राप्याग्नितीर्थे संकल्प्य पिशाचार्थं कृपानिधिः ॥ ११० ॥ सस्नौ तत्र पिशाचार्थं नियमेन दिनत्रयम् ॥ रामनाथादिकं सेव्य तत्तीर्थं प्रतिगृह्य च ॥ ११ ॥ स्वाश्रमं प्रति गत्वाथ सुतीक्ष्णो विप्रसत्तमः ॥ तत्तीर्थप्रोक्षणात्सद्यः स विसृज्य पिशाचताम् ॥ १२ ॥ वैभवात्तस्य तीर्थस्य सद्यो दिव्यत्वमाप्तवान् ॥ विमानवरमारूढो दिव्यस्त्रीपरिवारितः ॥ १३ ॥ सुतीक्ष्णं चाप्यगस्त्यं च तथान्यांश्च तपोधनान् ॥ पुनःपुनर्नमस्कृत्य तांश्चामंत्र्य प्रहर्षितः ॥ १४ ॥ स्वर्गमेवारुहत्तूर्णं देवैरपि स पूजितः ॥

१ पाटलपट्टणे-इ० पा०। २ लोकानाम्-इ० पा०। ३ नीत्र पापस्य-इ० पा०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अग्नितीर्थस्य माहात्म्याद्दुष्पण्यो वैश्यनंदनः ॥ १५ ॥ पैशाच्यं शापजं त्यक्त्वा दिव्यतामित्थमाप्तवान् ॥ एवं वः कथितं विप्रा अग्नितीर्थस्य वैभवम् ॥ १६ ॥ यः पठेदिममध्यायं शृणुयाद्वा सभक्तिकम् ॥ पिशाचमोक्षणाख्यानं मुच्यते सर्वपातकैः ॥ १७ ॥ इह भुक्त्वा महाभोगान्परत्रापि सुखं लभेत् ॥ ११८ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे सेतुमाहात्म्येऽग्नितीर्थप्रशंसायां दुष्पण्यपैशाच्यमोक्षणंनाम द्वाविंशोऽध्यायः ॥ २२ ॥ ॥ श्रीसूत उवाच ॥ ॥ अग्नितीर्थाभिधे तीर्थे सर्वपातकनाशने ॥ स्नानं कृत्वा विशुद्धात्मा चक्रतीर्थं ततो व्रजेत् ॥ १ ॥ यंयं कामं समुद्दिश्य चक्रतीर्थे द्विजोत्तमाः ॥ स्नानं समाचरेन्मर्त्यस्तंतं कामं समश्नुते ॥ २ ॥ पुराहिर्बुध्न्यनामा तु महर्षिः संशितव्रतः ॥ सुदर्शनमुपास्तास्मिंस्तपस्वी गंधमादने ॥ ३ ॥ तपस्यंतं मुनिं तत्र राक्षसा घोररूपिणः ॥ अबाधंत सदा विप्रास्तपोविघ्नैकतत्पराः ॥ ४ ॥ सुदर्शनं तदागत्य भक्तरक्षणवांछया ॥ यातुधानान्बाधमानान्व्यवधीर्लीलया पुरा ॥ ५ ॥ तदाप्रभृति तच्चक्रं भक्तप्रार्थनया द्विजाः ॥ अहिर्बुध्न्यकृते तीर्थे सन्निधानं सदाऽकरोत् ॥ ६ ॥ तदाप्रभृति तत्तीर्थं चक्रतीर्थमितीर्यते ॥ सुदर्शनप्रसादेन तत्र तीर्थे निमज्जनात् ॥ ७ ॥ रक्षःपिशाचादिकृता पीडा नास्त्येव कर्हिचित् ॥ स्नात्वास्मिन्पावने तीर्थे छिन्नपाणिः पुरा रविः ॥ स हिरण्मयौ पाणी लब्धवांस्तीर्थवैभवात् ॥ ८ ॥ ॥ ऋषय ऊचुः ॥ ॥ छिन्नपाणिः कथमभूदादित्यः सूतनंदन ॥ यथा च लब्धवान्पाणी सौवर्णौ तद्वदस्व नः ॥ ९ ॥ ॥ श्रीसूत उवाच ॥ इंद्रादयः सुराः पूर्वं संततं दैत्यपीडिताः ॥ १० ॥ किं कुर्म इति संचिंत्य संभूय सममंत्रयन् ॥ बृहस्पतिं पुरस्कृत्य मंत्रयित्वा चिरं सुराः ॥ ११ ॥ तुरासाहं पुरोधाय धाम स्वायंभुवं ययुः ॥ ते ब्रह्माणं समासाद्य दृष्ट्वा स्तुत्वा च भक्तितः ॥ १२ ॥ ततो व्यजिज्ञपंस्तस्मै स्वेषामागमकारणम् ॥ ॥ सुरा ऊचुः ॥ ॥ भगवन्भारतीनाथ दैत्या ह्यस्मान्बलोत्कटाः ॥ १३ ॥ बांधते सततं देव तत्र ब्रूहि प्रतिक्रियाम् ॥ इत्युक्तः स सुरैर्ब्रह्मा तानाह कृपया वचः ॥ १४ ॥ ॥ ब्रह्मोवाच ॥ ॥ माभैष्ट यूयं विबुधास्तत्रोपायं ब्रवीम्यहम् ॥ माहेश्वरं महायज्ञमसुराणां विनाशनम् ॥ १५ ॥ प्रारभध्वं सुरा यूयं मुनिभिस्तत्त्वदर्शिभिः ॥ अयं च दैवतैः सर्वैर्विधिलोभं विना कृतः ॥ १६ ॥ माहेश्वरो महायज्ञः क्रियतां गंधमादने ॥ यदि ह्यन्यत्र तं यज्ञं कुर्युस्तद्विबुधर्षभाः ॥ १७ ॥ यज्ञविघ्नं तदा कुर्युर्दुरात्मानः सुरद्विषः ॥ क्रियते यद्ययं यज्ञो गंधमादनपर्वते ॥ १८ ॥ सुदर्शनप्रसादेन नैव विघ्नो भवेत्तदा ॥ अहिर्बुध्न्याभिधानस्य महर्षेर्गंधमादने ॥ १९ ॥ अनुग्रहाय तत्तीर्थे सन्निधत्ते सुदर्शनम् ॥ अतः कुरुध्वं भो

१ समाहितः—इ० पा० । २ गवन्तः—इति शेषः । भवन्तः कुर्युः—इति संबंधः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समाहूय पशुमंतं वणिग्वरम् ॥ पौरेष्वपि च शृण्वत्सु वाक्यमेतदभाषत ॥ ६५ ॥ ॥ राजोवाच ॥ ॥ दुष्पण्यनाम्ना पशुमन्बहुप्रजमिदं पुरम् ॥ ६६ ॥ शून्यप्रायं कृतं पश्य त्वत्पुत्रेण दुरात्मना ॥ इदानीं बालिशानेतान्मज्जयामास वै जले ॥ ६७ ॥ यदृच्छया च सप्राणाः पुनरप्या गताः पुरम् ॥ अस्मिन्नित्थं गते कार्ये किं कर्तव्यं वदाधुना ॥ ६८ ॥ अद्य त्वामेव पृच्छामि यतस्त्वं धर्मतत्परः ॥ इत्युक्तः पशुमान्राज्ञा धर्मज्ञो युक्तमब्रवीत् ॥ ६९ ॥ ॥ पशुमानुवाच ॥ ॥ पुरं निःशेषितं येन वधमेवायमर्हति ॥ न ह्यत्र विषये किंचित्प्रष्टव्यं विद्यते नृप ॥ ७० ॥ न ह्ययं मम पुत्रः स्याच्छत्रुरेवातिपापकृत् ॥ न ह्यस्य निष्कृतिं पश्ये येन निःशेषितं पुरम् ॥ ७१ ॥ वध्यतामेव दुष्टात्मा सत्यमेव ब्रवीम्यहम् ॥ श्रुत्वा पशुमतो वाक्यं नागराः सर्व एव हि ॥ ७२ ॥ वणिग्वरं श्लाघमाना राजानमिदमूचिरे ॥ न वध्यतामयं दुष्टस्तूष्णीं निर्वास्यतां पुरात् ॥ ७३ ॥ ततः स राजा दुष्पण्यं समाहूयेदमब्रवीत् ॥ अस्माद्देशाद्व्रवाञ्छीघ्रं दुष्टात्मन्गच्छ सांप्रतम् ॥ ७४ ॥ यदि तिष्ठेस्त्वमत्रैव दण्डयेयं वधेन वै ॥ इति राज्ञा विनिर्भर्त्स्य दूतैर्निर्वासितः पुरात् ॥ ७५ ॥ दुष्पण्यस्त्वथ तं देशं परित्यज्य भयान्वितः ॥ मुनिमंडलसंबाधं वनमेव ययौ तदा ॥ ७६ ॥ तत्राप्येकं मुनिसुतं स तोयेषु न्यमज्जयत् ॥ केल्यर्थमागता दृष्ट्वा मुनिपुत्रा मृतं शिशुम् ॥ ७७ ॥ तत्पित्रे कथयामासुरभ्येत्य भृशदुःखिताः ॥ तत उग्रश्रवाः श्रुत्वा तेभ्यः पुत्रं जले मृतम् ॥ ७८ ॥ तपोमहिम्ना दुष्पण्यचरितं तदमन्यत ॥ उग्रश्रवाः शशापैनं दुष्पण्यं वैश्यनंदनम् ॥ ७९ ॥ ॥ उग्रश्रवा उवाच ॥ ॥ मत्सुतं पयसि क्षिप्य यत्त्वं मारितवानसि ॥ तवापि मरणं भूयाज्जल एव निमज्जनात् ॥ ८० ॥ मृतश्च सुचिरं कालं पिशाचस्त्वं भविष्यसि ॥ इति शापे श्रुते सद्यो दुष्पण्यः खिन्नमानसः ॥ ८१ ॥ तद्वै वनं परित्यज्य घोरमन्यद्वनं ययौ ॥ सिंहादिक्रूरसत्वाढ्यं तस्मिन्प्राप्ते वनांतरम् ॥ ८२ ॥ पांसुवर्षं महद्वर्षन्वृक्षानामोटयन्मुहुः ॥ वज्रघातसमस्पर्शो ववौ झंझानिलो महान् ॥ ८३ ॥ वेगेन गात्रं भिंदन्ती वृष्टिश्चासीत्सुदुःसहा ॥ तद्दृष्ट्वा स तु दुष्पण्यश्चिंतयन्भृशदुःखितः ॥ ८४ ॥ मृतं शुष्कं महाकायं गजमेकमपश्यत ॥ महावातं महावर्षं तदा सोढुमशक्नुवन् ॥ ८५ ॥ गजास्यविवरेणैव विवेशोदरगह्वरम् ॥ तस्मिन्प्रविष्टमात्रे तु वृष्टिरासीत्सुभूयसी ॥ ८६ ॥ ततो वर्षजलैः सर्वैः प्रवाहः सुमहानभूत् ॥ स प्रवाहो वने तस्मिन्नदी काचिदजायत ॥ ८७ ॥ अथ तैर्वर्षसलिलैः स गजः पूरितोदरः ॥ प्लवमानो महापूरे नीरंध्रः समजायत ॥ ८८ ॥ ततो निर्विवरस्यास्य जलपूर्णोदरस्य च ॥ गजस्य जठरात्सोऽयं निर्गंतुं न शशाक ह ॥ ८९ ॥ ततश्च वृष्टितोयानां प्रवाहो भीमवेगवान् ॥ उदरस्थितदुष्पण्यं समुद्रं प्रापयद्गजम् ॥ ९० ॥ दुष्पण्यः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वकृत्येषु व्यशिक्षयत् ॥ कृषिगोत्राणवाणिज्यकर्मसु क्रमशिक्षिताः ॥ ३८ ॥ सुपण्यमुख्याः सप्तैव पितृवाक्यमशृण्वत ॥ पशुमान्वक्ति यत्कार्यं तत्क्ष णान्निरवर्तयन्॥३९॥नैपुण्यं प्रापुरत्यंतं ते सुवर्णक्रियास्वपि॥ दुष्पण्यस्त्वष्टमः पुत्रो बाल्यमारभ्य संततम्॥४०॥ दुर्मार्गनिरतो भूत्वा नाशृणोत्पितृभा षितम्॥धूलिकेलिं समारभ्य दुर्मार्गनिरतोऽभवत्॥४१॥स बाल एव सन्पुत्रो बालानन्यानबाधत॥दुष्कर्मनिरतं दृष्ट्वा तं पिता पशुमांस्तथा॥४२॥उपेक्षा मेव कृतवान्बालिशोऽयमितीरयन् ॥ अथाष्टावपि वैश्यस्य प्रापुर्यौवनमात्मजाः॥४३॥ ततोऽयमष्टमः पुत्रो दुष्पण्यो बलिनां वरः ॥ गृहीत्वा पाणिषु गलेबालान्नगरवर्तिनः ॥ ४४ ॥ निचिक्षेप स कूपेषु सरित्सु च सरःस्वपि ॥ न कोऽपि तस्य जानाति दुश्चरित्रमिदं जनः ॥ ४५ ॥ यावन्म्रियंते ते बालास्तावन्निक्षिप्तवाञ्जले ॥ तेषां मृतानां बालानां पितरो मातरस्तथा ॥४६॥ गवेषयंति तान्सर्वान्नगरेषु हि सर्वशः ॥ तान् दृष्ट्वा च मृतान्पुत्रान्के वलं प्रारुदञ्जनाः ॥ ४७ ॥ जलेष्वथ शवान्दृष्ट्वा जनाश्चक्रुर्यथोचितम् ॥ एवं प्रतिदिनं बालान्दुष्पण्यो मारयन्पुरे ॥ ४८ ॥ जनैरप्यपरिज्ञातश्चिर सेवमवर्तत ॥ म्रियमाणेषु बालेषु वैश्यपुत्रस्य कर्मणा ॥ ४९ ॥ प्रजानां वृद्धिराहित्याच्छून्यप्रायमभूत्पुरम् ॥ ततः समेत्य पौरास्तद्वृत्तं राज्ञे न्यवेद यन् ॥ ५० ॥ श्रुत्वा नृपस्तद्वचनमाहूय ग्रामपालकान् ॥ कारणं बालमरणे चिंत्यतामिति सोऽन्वशात् ॥ ५१ ॥ ग्रामपालास्तथेत्युक्त्वा तत्र तत्र व्यवस्थिताः ॥ सम्यग्गवेषयामासुः कारणं बालमारणे ॥ ५२ ॥ ते वै गवेषयंतोऽपि नाविंदन्बालमारकम् ॥ ते पुनर्नृपमासाद्य भीता वाक्यमथाब्रु वन् ॥ ५३ ॥ गवेषयंतोऽपि वयं तन्न विंदामहे नृप ॥ यो बालान्नगरे स्थित्वा संततं मारयत्यपि ॥ ५४ ॥ पुनश्च नागराः सर्वे राजानं प्राप्य दुःखिताः ॥ पुनः प्रजानां मरणमब्रुवन्बाष्पसंकुलाः ॥ ५५ ॥ राजा तत्कारणाज्ञानात्तूष्णीमास्ते विचिंत्य तु ॥ कदाचिद्वैश्यपुत्रोयं पंचभिर्बा लकैः सह ॥ ५६ ॥ तटाकांतिकमापेदे पंकजाहरणच्छलात् ॥ बलाद्गृहीत्वा तान्बालान्दुष्पण्यः क्रोशतस्तदा ॥ ५७ ॥ क्रूरात्मा मज्जयामास कंठ दघ्ने सरोजले ॥ मृतान्मत्वा च ताञ्छीघ्रं दुष्पण्यः स्वगृहं ययौ ॥ ५८ ॥ पञ्चानां पितरस्तेषां मार्गयंतः सुतान्पुरे ॥ तेषु वै मार्गमाणेषु पंच तेना तिबालकाः ॥ ५९ ॥ निक्षिप्ता अपि तोयेषु नाम्रियंत यदृच्छया ॥ ते शनैः कूलमासाद्य पंचापि क्लिन्नमौलयः ॥ ६० ॥ अशक्ता नगरं गंतुं बाल्यात्तत्रैव बभ्रमुः ॥ दूरादुच्चार्यमाणानि स्वनामानि स्वबंधुभिः ॥ ६१ ॥ श्रुत्वा पंचापि ते बालाः प्रतिशब्दमकुर्वत ॥ ततस्तत्पितरः श्रुत्वा तत्रागत्य सरस्तटे ॥ ६२ ॥ पुत्रान्दृष्ट्वा तु सप्राणान्प्रहर्षमतुलं गताः ॥ किमेतदिति पित्राद्यैः पृष्टास्ते बालकास्तदा ॥ ६३ ॥ दुष्पण्यस्याथ दुष्कृत्यं बन्धुभ्यस्ते न्यवेदयन् ॥ ततो विदितवृत्तांता राजानं प्राप्य नागराः ॥ ६४ ॥ पंचभिः कथितं वृत्तं दुष्पण्यस्य न्यवेदयन् ॥ ततो राजा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वासा धनुर्धरः ॥ १२ ॥ सप्तभिश्चैव जिह्वाभिर्लेलिहानो दिशो दश ॥ दृष्ट्वा रघुपतिं शूरं लीलामानुषरूपिणम् ॥ १३ ॥ जगाद वचनं रम्यं जान
कीशुद्धिकारणात् ॥ रामराम महाबाहो राक्षसानां भयावह ॥ १४ ॥ पातिव्रत्येन जानक्या रावणं हतवान्भवान् ॥ सत्यंसत्यं पुनः सत्यं नात्र
कार्या विचारणा ॥ १५ ॥ कमलेयं जगन्माता लीलामानुषविग्रहा ॥ देवत्वे देवदेहेयं मनुष्यत्वे च मानुषी ॥ १६ ॥ विष्णोर्देहानुरूपां वै करोत्ये
षात्मनस्तनुम् ॥ यदायदा जगत्स्वामिन्देवदेव जनार्दन ॥ १७ ॥ अवतारान्करोषि त्वं तदेयं त्वत्सहायिनी ॥ यदा त्वं भार्गवो रामस्तदाभूद्धरणी
त्वियम् ॥ १८ ॥ अधुना जानकी जाता भवित्री रुक्मिणी ततः ॥ अन्येषु चावतारेषु विष्णोरेषा सहायिनी ॥ १९ ॥ तस्मान्मद्वचनादेनां प्रति
गृह्णीष्व राघव ॥ पावकस्य तु तद्वाक्यं श्रुत्वा देवा महर्षयः ॥ २० ॥ विद्याधराश्च गंधर्वा मानवाः पन्नगास्तथा ॥ अन्ये च भूतनिवहा रामं दश
रथात्मजम् ॥ २१ ॥ जानकीं मैथिलीं चैव प्रशशंसुः पुनःपुनः ॥ रामोऽग्निवचनात्सीतां प्रतिजग्राह निर्मलाम् ॥ २२ ॥ एवं सीताविशुद्ध्यर्थं रामे
णाक्लिष्टकर्मणा ॥ आवाहने कृते वह्निर्लक्ष्मीतीर्थाद्विदूरतः ॥ २३ ॥ यतः प्रदेशादुत्तस्थावबुधेर्द्विजसत्तमाः ॥ अग्नितीर्थं विजानीत तं प्रदेशमनु
त्तमम् ॥ २४ ॥ ततो विनिर्गमादग्नेरग्नितीर्थमितीर्यते ॥ अत्र स्नात्वा नरो भक्त्या वह्नेस्तीर्थे विमुक्तिदे ॥ २५ ॥ उपोष्य वेदविदुषो ब्राह्मणा
नपि भोजयेत् ॥ तेभ्यो वस्त्रं धनं भूमिं दद्यात्कन्यां च भूषिताम् ॥ २६ ॥ सर्वपापविनिर्मुक्तो विष्णुसायुज्यमाप्नुयात् ॥ अग्नितीर्थस्य कूलेस्मि
न्नन्नदानं विशिष्यते ॥ २७ ॥ अग्नितीर्थसमं तीर्थं न भूतं न भविष्यति ॥ दुष्पण्योपि महापापो यत्र स्नानात्पिशाचताम् ॥ २८ ॥ परित्यज्य महा
घोरां दिव्यं रूपमवाप्तवान् ॥ पशुमान्नाम वैश्योऽभूत्पुरा पाटलिपुत्रके[2] ॥ २९ ॥ स वै धर्मपरो नित्यं ब्राह्मणाराधने रतः ॥ कृषिं निरंतरं कुर्वन्गो
रक्षां चैव सर्वदा ॥ ३० ॥ पण्यवीथ्यां च विक्रीणन्कांचनादीनि धर्मतः ॥ पशुमन्नामधेयस्य वणिक्छ्रेष्ठस्य तस्य वै ॥ ३१ ॥ बभूव भार्यात्रितयं
पतिशुश्रूषणे रतम् ॥ ज्येष्ठा त्रीन्सुषुवे पुत्रान्वैश्यवंशविवर्द्धनान् ॥ ३२ ॥ सुपण्यं पण्यवंतं च चारुपण्यं तथैव च ॥ मध्यमा सुषुवे पुत्रौ सुकोश
बहुकोशकौ ॥ ३३ ॥ तृतीयायां त्रयः पुत्रास्तस्य वैश्यस्य जज्ञिरे ॥ महापण्यो महाकोशो दुष्पण्य इति विश्रुताः ॥ ३४ ॥ एवं पशुमतस्तस्य
वैश्यस्य द्विजसत्तमाः ॥ बभूवुरष्टौ तनयास्तासु स्त्रीषु तिसृष्वपि ॥ ३५ ॥ ते सुपण्यमुखाः सर्वे पुत्रा ववृधिरे क्रमात् ॥ धूलिकेलिं वितन्वंतः पित
रौ तोषयंति ते ॥ ३६ ॥ पंचहायनतां प्राप्ताः क्रमात्ते वैश्यनंदनाः ॥ पशुमानपि वैश्येंद्रः सर्वानपि च तान्सुतान् ॥ ३७ ॥ बाल्यमारभ्य सततं

१ जिष्णोः—इ० पा० । २ पाटलपट्टणे—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यावता कांचनादिना ॥ ततोपि द्विगुणं तेभ्यो दापयामास धर्मजः ॥ ५३ ॥ इयंति दत्तान्यर्थिभ्यो धनानि विविधान्यपि ॥ इतीयत्तां परिच्छेतुं
न शक्ता ब्रह्मकोटयः ॥ ५४ ॥ अर्थिभिर्दीयमानानि दृष्ट्वा तत्र धनानि वै ॥ सर्वस्वमप्यहो राज्ञा दत्तमित्यब्रवीज्जनः ॥ ५५ ॥ दृष्ट्वा कोशांस्तथा
नंतानन्नंतमणिकांचनान् ॥ ५६ ॥ स्वल्पं हि दत्तमर्थिभ्य इत्यवोचञ्जनास्तदा ॥ इष्ट्वैवं राजसूयेन धर्मपुत्रः सहानुजः ॥ ५७ ॥ बहुवित्तसमृद्धः
सत्रेमे तत्र पुरोत्तमे ॥ लक्ष्मीतीर्थस्य माहात्म्याद्धर्मपुत्रो युधिष्ठिरः ॥ ५८ ॥ लेभे सर्वमिदं विप्रा अहो तीर्थस्य वैभवम् ॥ इदं तीर्थं महापुण्यं महा
दारिद्र्यनाशनम् ॥ ५९ ॥ धनधान्यप्रदं पुंसां महापातकनाशनम् ॥ महानरकसंहर्तृ महादुःखनिवर्तकम् ॥ ६० ॥ मोक्षदं स्वर्गदं नित्यं महाऋण
विमोचनम् ॥ सुकलत्रप्रदं पुंसां सुपुत्रप्रदमेव च ॥ ६१ ॥ एतत्तीर्थसमं तीर्थं न भूतं न भविष्यति ॥ एतद्वः कथितं विप्रा लक्ष्मीतीर्थस्य वैभवम्
॥ ६२ ॥ दुःस्वप्ननाशनं पुण्यं सर्वाभीष्टप्रसाधकम् ॥ यः पठेदिममध्यायं शृणुते वा सभक्तिकम् ॥ ६३ ॥ धनधान्यसमृद्धः स्यात्स नरो नास्ति
संशयः ॥ भुक्त्वेह सकलान्भोगान्देहांते मुक्तिमाप्नुयात् ॥ ६४ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे सेतुमा
हात्म्ये लक्ष्मीतीर्थप्रशंसायां धर्मपुत्रनिरतिशयसंपदवाप्तिवर्णनंनामैकविंशोऽध्यायः ॥ २१ ॥ ॥ श्रीसूत उवाच ॥ ॥ लक्ष्मीतीर्थे शुभे
पुंसां सर्वैश्वर्यैककारणे ॥ स्नात्वा नरस्ततो गच्छेदग्नितीर्थं द्विजोत्तमाः ॥ १ ॥ अग्नितीर्थं महापुण्यं महापातकनाशनम् ॥ तीर्थानामुत्तमं तीर्थं
सर्वाभीष्टैकसाधनम् ॥ तत्र स्नायान्नरो भक्त्या स्वपापपरिशुद्धये ॥ २ ॥ ॥ ऋषय ऊचुः ॥ ॥ अग्नितीर्थमितिख्यातिः कथं तस्य मुनीश्वर ॥
॥ ३ ॥ कुत्रेदमग्नितीर्थं च कीदृशं तस्य वैभवम् ॥ एतन्नः श्रद्दधानानां विस्तराद्वक्तुमर्हसि ॥ ४ ॥ ॥ श्रीसूत उवाच ॥ ॥ सम्यक्पृष्टं हि युष्मा
भिः शृणुध्वं मुनिपुंगवाः ॥ पुरा हि राघवो हत्वा रावणं सपरिच्छदम् ॥ ५ ॥ स्थापयित्वा तु लंकायां भर्तारं च बिभीषणम् ॥ सीतासौमित्रिसं
युक्तो रामो दशरथात्मजः ॥ ६ ॥ सिद्धचारणगंधर्वैर्देवैरप्सरसां गणैः ॥ स्तूयमानो मुनिगणैः सत्याशीस्तीर्थकौतुकी ॥ ७ ॥ धारयँल्लीलया
चाप[1] रामोऽसह्यपराक्रमः ॥ आत्मनः शुद्धिमाधातुं जानकीं शोधितुं तथा ॥ ८ ॥ इंद्रादिदेववृन्दैश्च मुनिभिः पितृभिस्तथा ॥ बिभीषणेन सहितः
सर्वैरपि च वानरैः ॥ ९ ॥ आययौ सेतुमार्गेण गंधमादनपर्वतम् ॥ लक्ष्मीतीर्थतटे स्थित्वा जानकीशोधनाय सः ॥ १० ॥ अग्निमावाहयामास
देवर्षिपितृसन्निधौ ॥ अथोत्तस्थौ महांभोधेर्लक्ष्मीतीर्थाद्विदूरतः ॥ ११ ॥ पश्यत्सु सर्वलोकेषु लिहन्नभांसि पावकः ॥ आताम्रलोचनः पीतः पीत

१ त्यक्ताशीस्तीर्थकोविदैः—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कर्तुं तत एच्छद्युधिष्ठिरः ॥ कृष्णं समाह्वयामास यियक्षुर्धर्मनंदनः ॥ २७ ॥ कृष्णो धर्मजदूतेन समाहूतः ससंभ्रमः ॥ चतुर्भिरश्वैः संयुक्तं रथमा
रुह्य वेगिनम् ॥ २८ ॥ सत्यभामासहचर इंद्रप्रस्थं समाययौ ॥ तमागतं समालोक्य प्रमोदाद्धर्मनंदनः ॥ २९ ॥ न्यवेदयत्स कृष्णाय राजसूयोद्यमं
तदा ॥ अन्वमन्यत कृष्णोपि तथैव क्रियतामिति ॥ ३० ॥ वाक्यं च युक्तिसंयुक्तं धर्मपुत्रमभाषत ॥ पैतृष्वस्रेय धर्मात्मञ्च्छृणु पथ्यं वचो मम
॥ ३१ ॥ दुष्करो राजसूयोऽयं सर्वैरपि महीश्वरैः ॥ अनेकशतपादातरथकुंजरवाजिमान् ॥ ३२ ॥ महीपतिरिमं यज्ञं कर्तुमर्हति नेतरः ॥ दिशो
दश विजेतव्याः प्रथमं बलिना त्वया ॥ ३३ ॥ पराजितेभ्यः शत्रुभ्यो गृहीत्वा करमुत्तमम् ॥ तेन कांचनजातेन कर्तव्योऽयं क्रतूत्तमः ॥ ३४ ॥
रोचये युक्तिविदहं न हि त्वां भीषयामि भोः ॥ अतः क्रतुसमारंभात्पूर्वं दिग्विजयं कुरु ॥ ३५ ॥ ततो धर्मात्मजः श्रुत्वा कृष्णस्य वचनं हितम् ॥
प्रशंसन्देवकीपुत्रमाजुहाव निजानुजान् ॥ ३६ ॥ आहूय चतुरो भ्रातॄन्धर्मज्ञः प्राह हर्षयन् ॥ अयि भीम महाबाहो बहुवीर्य धनंजय ॥ ३७ ॥
यमौ च सुकुमारांगौ शत्रुसंहारदीक्षितौ ॥ चिकीर्षामि महायज्ञं राजसूयमनुत्तमम् ॥ ३८ ॥ स च सर्वान्रणे जित्वा कर्तव्यः पृथिवीपतीन् ॥ अतो
विजेतुं भूपालांश्चत्वरोऽपि ससैनिकाः ॥ ३९ ॥ दिशश्चतस्रो गच्छंतु भवंतो वीर्यवत्तराः ॥ युष्माभिराहृतैर्द्रव्यैः करिष्यामि महाक्रतुम् ॥ ४० ॥
इत्युक्ताः सादरं सर्वे वृकोदरमुखास्तदा ॥ प्रसन्नवदना भूत्वा धर्मपुत्रानुजाः पुरात् ॥ ४१ ॥ राज्ञां जयाय सर्वासु निर्ययुर्दिक्षु पांडवाः ॥ ते सर्वे नृप
तीञ्जित्वा चतुर्दिक्षु स्थितान्बहून् ॥ ४२ ॥ स्ववशे स्थापयित्वा तान्नृपतीन्पांडुनंदनाः ॥ तैर्दत्तं बहुधा द्रव्यमसंख्यातमनुत्तमम् ॥ ४३ ॥ आदाय
स्वपुरं तूर्णमाययुः कृष्णसंश्रयाः ॥ भीमः समाययौ तत्र महाबलपराक्रमः ॥ ४४ ॥ शतभारसुवर्णानि समादाय पुरोत्तमम् ॥ सहस्रं भारमादाय
सुवर्णानां ततोऽर्जुनः ॥ ४५ ॥ शक्रप्रस्थं समायातो महाबलपराक्रमः ॥ शतभारं सुवर्णानां प्रगृह्य नकुलस्तथा ॥ ४६ ॥ समागतो महातेजाः
शक्रप्रस्थं पुरोत्तमम् ॥ दत्तान्विभीषणेनाथ स्वर्णतालांश्चतुर्दश ॥ ४७ ॥ दाक्षिणात्यमहीपानां गृहीत्वा धनसंचयम् ॥ सहदेवोपि सहसा समा
यातो निजां पुरीम् ॥ ४८ ॥ लक्षकोटिसहस्राणि लक्षकोटिशतान्यपि ॥ सुवर्णानि ददौ कृष्णो धर्मपुत्राय यादवः ॥ ४९ ॥ स्वानुजैराहृतैरेवमसं
ख्यातैर्महाधनैः ॥ कृष्णदत्तैरसंख्यातैर्धनैरपि युधिष्ठिरः ॥ ५० ॥ कृष्णाश्रयोऽयजद्विप्रा राजसूयेन पांडवः ॥ तस्मिन्यागे ददौ द्रव्यं ब्राह्मणेभ्यो
यथेष्टतः ॥ ५१ ॥ अन्नानि प्रददौ तत्र ब्राह्मणेभ्यो युधिष्ठिरः ॥ वस्त्राणि गाश्च भूमिं च भूषणानि ददौ तथा ॥ ५२ ॥ अर्थिनः परितुष्यंति

१ महामतिः—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

स्नात्वा धर्मपुत्रो महदैश्वर्यमाप्तवान् ॥ इन्द्रप्रस्थे वसन्पूर्वं श्रीकृष्णेन प्रचोदितः ॥ ४ ॥ ॥ ऋषय ऊचुः ॥ ॥ यथैश्वर्यं धर्मपुत्रो लक्ष्मीतीर्थे निमज्जनात् ॥ आप्तवान्कृष्णवचनात्तन्नो ब्रूहि महामुने ॥ ५ ॥ ॥ श्रीसूत उवाच ॥ ॥ इन्द्रप्रस्थे पुरा विप्रा धृतराष्ट्रेण चोदिताः ॥ न्यवसन्पांडवाः पंच महाबलपराक्रमाः ॥ ६ ॥ इन्द्रप्रस्थं ययौ कृष्णः कदाचित्तान्निरीक्षितुम् ॥ तमागतमेभिप्रेक्ष्य पांडवास्ते समुत्सुकाः ॥ ७ ॥ स्वगृहं प्रापयामासुर्मुदा परमया युताः ॥ कश्चित्कालमसौ कृष्णस्तत्रावात्सीत्पुरोत्तमे ॥ ८ ॥ कदाचित्कृष्णमाहूय पूजयित्वा युधिष्ठिरः ॥ पप्रच्छ पुंडरीकाक्षं वासुदेवं जगत्पतिम् ॥ ९ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ कृष्णकृष्ण महाप्राज्ञ येन धर्मेण मानवाः ॥ लभंते महदैश्वर्यं तन्नो ब्रूहि महामते ॥ इत्युक्तो धर्मपुत्रेण कृष्णः प्राह युधिष्ठिरम् ॥ १० ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ धर्मपुत्र महाभाग गन्धमादनपर्वते ॥ ११ ॥ लक्ष्मीतीर्थमिति ख्यातमस्त्यैश्वर्यैककारणम् ॥ तत्र स्नानं कुरुष्व त्वमैश्वर्यं ते भविष्यति ॥ १२ ॥ तत्र स्नानेन वर्धंते धनधान्यसमृद्धयः ॥ सर्वे सपत्ना नश्यंति क्षात्रमेषां विवर्द्धते ॥ १३ ॥ तीर्थे सस्नुः पुरा देवा लक्ष्मीनामनि पुण्यदे ॥ अलभन्तसर्वमैश्वर्यं तेन पुण्येन धर्मज ॥ १४ ॥ असुरांश्च महावीर्यान्समरे जघ्नुरंजसा ॥ मही लक्ष्मीश्च धर्मश्च तत्तीर्थस्नायिनां नृणाम् ॥ १५ ॥ भविष्यंत्यचिरादेव संशयं मा कृथा इह ॥ तपोभिः क्रतुभिर्दानैराशीर्वादैश्च पांडव ॥ १६ ॥ ऐश्वर्यं प्राप्यते यद्वल्लक्ष्मीतीर्थनिमज्जनात् ॥ सर्वपापानि नश्यंति विघ्ना यांति लयं सदा ॥ ॥ १७ ॥ व्याधयश्च विनश्यंति लक्ष्मीतीर्थनिषेवणात् ॥ श्रेयः सुविपुलं लोके लभ्यते नात्र संशयः ॥ १८ ॥ स्नानमात्रेण वै लक्ष्म्यास्तीर्थेऽस्मिन्धर्मनंदन ॥ रंभामप्सरसां श्रेष्ठां लब्धवानंवधो[1] नृपः ॥ १९ ॥ स्नात्वात्र तीर्थे पुण्ये तु कुबेरो नरवाहनः ॥ स महापद्ममुख्यानां निधीनां नायकोऽभवत् ॥२०॥ तस्मात्त्वमपि राजेंद्र लक्ष्मीतीर्थे शुभप्रदे ॥ स्नात्वा वृकोदरमुखैरनुजैरपि संवृतः ॥२१॥ लप्स्यसे महतीं लक्ष्मीं जेष्यसे च रिपूनपि॥ संदेहो नात्र कर्तव्यः पैतृष्वस्रेय धर्मज ॥२२॥ इत्युक्तो धर्मपुत्रोऽयं कृष्णेनाद्भुतदर्शनः ॥ सानुजः प्रययौ शीघ्रं गन्धमादनपर्वतम् ॥२३॥ लक्ष्मीतीर्थं ततो गत्वा महदैश्वर्यकारणम् ॥ सस्नौ युधिष्ठिरस्तत्र सानुजो नियमान्वितः॥२४॥लक्ष्मीतीर्थस्य तोये स सर्वपातकनाशने ॥ सानुजो मासमेकं तु सस्नौ नियमपूर्वकम् ॥२५॥ गोभूतिलहिरण्यादीन्ब्राह्मणेभ्यो ददौ बहून् ॥ सानुजो धर्मपुत्रोऽसाविंद्रप्रस्थं ययौ ततः ॥ २६ ॥ राजसूयक्रतुं

१ नलकूबर–इ० पा० ।

CC-0. In Public Domain. Digitization by eGangotri

वेदांताद्बहुव्यामोहकारणात् ॥ ततो वयं न वेदांतान्मुनींद्रा बहु मन्महे ॥ ६ ॥ चित्तशुद्धिं यदीच्छध्वं लघूपायेन तापसाः ॥ उद्घोषयामि सर्वेषां
जटातीर्थं निषेवत ॥ ७ ॥ पुरा सर्वोपकारार्थं तीर्थमज्ञाननाशनम् ॥ एतद्विनिर्मितं साक्षाच्छम्भुना गन्धमादने ॥ ८ ॥ निहते रावणे विप्रा जटां
रामस्तु धार्मिकः ॥ क्षालयामास यत्तोये तज्जटातीर्थमुच्यते ॥ ९ ॥ वर्षाणां षष्टिसाहस्रं जाह्नवीजलमज्जनम् ॥ गोदावर्यां सकृत्स्नानं सिंहस्थे च
बृहस्पतौ ॥ १० ॥ तावत्सहस्रस्नानानि सिंहं देवगुरौ गते ॥ गोमत्यां लभ्यते वर्षैस्तज्जटातीर्थदर्शनात् ॥ ११ ॥ जटातीर्थे मनुष्याणां स्नातानां
द्विजपुंगवाः ॥ अन्तःकरणशुद्धिः स्यात्ततोऽज्ञानं विनश्यति ॥ १२ ॥ अज्ञाननाशे ज्ञानं स्यात्ततो मुक्तिमवाप्स्यसि ॥ अखण्डसच्चिदानंदसंपूर्णः
स्यात्ततः परम् ॥ १३ ॥ अत्राप्युदाहरंतीममितिहासं पुरातनम् ॥ पितुः पुत्रस्य संवादं व्यासस्य च शुकस्य च ॥ १४ ॥ पुरा मुनिवरं कृष्णं भावि
तात्मानमच्युतम् ॥ पारंपर्यविशेषज्ञं सर्वशास्त्रार्थकोविदम् ॥ प्रणम्य शिरसा व्यासं शुकः पप्रच्छ वै द्विजाः ॥ १५ ॥ ॥ श्रीशुक उवाच ॥ ॥
भगवंस्तात सर्वज्ञ ब्रूहि गुह्यमनुत्तमम् ॥ १६ ॥ अन्तःकरणशुद्धिः स्यात्तथाज्ञानविनाशनम् ॥ ज्ञानोदयश्च येन स्यादंते मुक्तिश्च शाश्वती ॥ १७ ॥
तमुपायं वदस्वाद्य स्नेहान्मम महामुने ॥ वेदांताश्चेतिहासाश्च पुराणादीनि कृत्स्नशः ॥ १८ ॥ अधीतानि मया त्वत्तः शोधयंति न मानसम् ॥
अतो मे चित्तशुद्धिः स्याद्यथा तात तथा वद ॥ १९ ॥ इति पृष्टस्तदा व्यासः शुकेन मुनिसत्तमाः ॥ रहस्यं कथयामास येनाविद्या विन
श्यति ॥ २० ॥ ॥ व्यास उवाच ॥ ॥ शुक वक्ष्यामि ते गुह्यमविद्याग्रन्थिभेदनम् ॥ बुद्धिशुद्धिप्रदं पुंसां जन्मादिभयनाशनम् ॥ २१ ॥
रामसेतौ महापुण्ये गन्धमादनपर्वते ॥ विद्यते पापसंहारि जटातीर्थमिति श्रुतम् ॥ २२ ॥ जटां स्वां शोधयामास यत्र रामो हरिः स्वयम् ॥
रामो दाशरथिः श्रीमांस्तीर्थाय च वरं ददौ ॥ २३ ॥ स्नांति येऽत्र समागत्य जटातीर्थेऽतिपावने ॥ अन्तःकरणशुद्धिश्च तेषां भूयादिति स्म
सः ॥ २४ ॥ विना यज्ञं विना ज्ञानं विना जाप्यमुपोषणम् ॥ स्नानमात्राज्जटातीर्थे बुद्धिशुद्धिर्भवेन्नृणाम् ॥ २५ ॥ सर्वदानसमं पुण्यं स्नानादत्र
भविष्यति ॥ दुर्गाण्यनेन तरति पुण्यलोकान्समश्नुते ॥ २६ ॥ महत्त्वमश्नुते स्नानाज्जटातीर्थे शुभोदके ॥ जटातीर्थं विना नान्यदंतःकरणशु
द्धये ॥ २७ ॥ विद्यते नियमो वापि जपो वा नान्यदेवता ॥ धन्यं यशस्यमायुष्यं सर्वलोकेषु विश्रुतम् ॥ २८ ॥ पवित्राणां पवित्रं च जटातीर्थं
शुकाधुना ॥ सर्वपापप्रशमनं मंगलानां च मंगलम् ॥ २९ ॥ भृगुर्वै वारुणिः पूर्वं वरुणं पितरं शुक ॥ बुद्धिशुद्धिप्रदोपायमपृच्छत्पावनं शुभम् ॥
प्रोवाच वरुणस्तस्मै बुद्धिशुद्धिप्रदं शुभम् ॥ ३० ॥ ॥ वरुण उवाच ॥ ॥ रामसेतौ भृगो पुण्ये गन्धमादनपर्वते ॥ ३१ ॥ स्नानमात्राज्जटा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तीर्थे बुद्धिशुद्धिर्भवेद्ध्रुवम् ॥ स पितुर्वचनात्सद्यो भृगुर्वै वरुणात्मजः ॥ ३२ ॥ गत्वा स्नात्वा जटातीर्थे बुद्धिशुद्धिमवाप्तवान् ॥ विनष्टाज्ञानसंता
नस्तया शुद्ध्या तदा भृगुः ॥ ३३ ॥ उत्पन्नाद्वैतविज्ञानः स्वपितुर्वरुणादयम् ॥ अखण्डसच्चिदानंदपूर्णाकारोऽभवच्छुक ॥ ३४ ॥ शंकरांशोऽपि
दुर्वासा जटातीर्थेऽभिषेकतः ॥ मनःशुद्धिमवाप्याशु ब्रह्मानंदमयोऽभवत् ॥ ३५ ॥ दत्तात्रेयोऽपि विष्ण्वंशस्तीर्थेऽस्मिन्नभिषेचनात् ॥ शुद्धांतःक
रणो भूत्वा ब्रह्माकारोऽभवच्छुक ॥ ३६ ॥ इच्छेदज्ञाननाशं यः स स्नायात्तु जटाभिधे ॥ तीर्थे शुद्धतमे पुण्ये सर्वपापविनाशने ॥ ३७ ॥ जटातीर्थ
मतस्त्वं च शुक गच्छ महामते ॥ मनःशुद्धिप्रदे तस्मिन्स्नानं च कुरु पुण्यदे ॥ ३८ ॥ पित्रैवमुक्तो व्यासेन शुकः पुत्रस्तदा द्विजाः ॥
रामसेतुं महापुण्यं गन्धमादनपर्वतम् ॥ ३९ ॥ अगमत्स्नातुकामः सञ्जटातीर्थे विशुद्धिदे ॥ स्नात्वा संकल्पपूर्वं च जटातीर्थे
शुको मुनिः ॥ ४० ॥ मनःशुद्धिमनुप्राप्य तेन चाज्ञाननाशने ॥ स्वस्वरूपं समापन्नः परमानंदरूपकम् ॥ ४१ ॥ ये चाप्यन्ये मनःशुद्धिकामाः
संति द्विजोत्तमाः ॥ जटातीर्थे तु ते सर्वे स्नांतु भक्तिपुरःसरम् ॥ ४२ ॥ अहो जना जटातीर्थे कामधेनुसमे शुभे ॥ विद्यमानेऽपि किं तुच्छे
रमंतेन्यत्र मोहिताः ॥ ४३ ॥ मुक्तिकामो लभेद्मुक्तिं मुक्तिकामस्तु तां लभेत् ॥ स्नानमात्राज्जटातीर्थे सत्यमुक्तं मया द्विजाः ॥ ४४ ॥ वेदानुवच
नात्पुण्याद्यज्ञाद्दानात्तपोव्रतात् ॥ उपवासाज्जपाद्योगान्मनःशुद्धिर्नृणां भवेत् ॥ ४५ ॥ विनाप्येतानि विप्रेंद्रा जटातीर्थेऽतिपावने ॥ स्नानमात्रा
न्मनःशुद्धिर्ब्राह्मणानां ध्रुवं भवेत् ॥ ४६ ॥ जटातीर्थस्य माहात्म्यं मया वक्तुं न शक्यते ॥ शंकरो वेत्ति तत्तीर्थं हरिर्वेत्ति विधिस्तथा ॥ ४७ ॥
जटातीर्थसमं तीर्थं न भूतं न भविष्यति ॥ जटातीर्थस्य तीरे यः क्षेत्रपिंडं समाचरेत् ॥ ४८ ॥ गयाश्राद्धसमं पुण्यं तस्य स्यान्नात्र संशयः ॥ जटा
तीर्थे नरः स्नात्वा न पापेन विलिप्यते ॥ दारिद्र्यं न समाप्नोति नेयाच्च नरकार्णवम् ॥ ४९ ॥ ॥ श्रीसूत उवाच ॥ ॥ एवं वः कथितं विप्रा
जटातीर्थस्य वैभवम् ॥ ५० ॥ यत्र व्याससुतो योगी स्नात्वा पापविमोचने ॥ अवाप्तवान्मनःशुद्धिमद्वैतज्ञानसाधनाम् ॥ ५१ ॥ यस्त्विमं
पठतेऽध्यायं शृणुते वा समाहितः ॥ स विधूयेह पापानि लभते वैष्णवं पदम् ॥ ५२ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां
तृतीये ब्रह्मखण्डे सेतुमाहात्म्ये जटातीर्थप्रशंसायां शुकचित्तशुद्धिवर्णनंनाम विंशोऽध्यायः ॥ २० ॥ ॥ छ ॥ ॥ श्रीसूत उवाच ॥ ॥ जटा
तीर्थाभिधे तीर्थे सर्वपातकनाशने ॥ स्नानं कृत्वा विशुद्धात्मा लक्ष्मीतीर्थं ततो व्रजेत् ॥ १ ॥ यंयं कामं समुद्दिश्य लक्ष्मीतीर्थे द्विजोत्तमाः ॥
स्नानं समाचरेन्मर्त्यस्तंतं कामं समश्नुते ॥ २ ॥ महादारिद्र्यशमनं महाधान्यसमृद्धिदम् ॥ महादुःखप्रशमनं महासंपद्विवर्धनम् ॥ ३ ॥ अत्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विणीम् ॥ अथ वार्तां स शुश्राव समुद्भूतां तदांबरे ॥ ६० ॥ रामराम महाबाहो रौहिणेय सितप्रभ ॥ तीर्थाभिगमनेनाद्य चरितेन त्वयाऽनघ ॥ ॥ ६१ ॥ न नष्टा ब्रह्महत्या ते निःशेषं रोहिणीसुत ॥ इति वार्तां समाकर्ण्य चिंतयामास वै बलः ॥ ६२ ॥ प्रायश्चित्तं मया चीर्णमेकाब्दं तीर्थ सेवया ॥ तथापि ब्रह्महत्या सा न नष्टेति श्रुतं वचः ॥ ६३ ॥ किं कुर्म इति संचिंत्य नैमिषारण्यमभ्यगात् ॥ तत्र गत्वा मुनीनां तन्यवेदयदरिं दमः ॥ ६४ ॥ यच्छ्रुतं गगने वाक्यं या च दृष्टा तमोमयी ॥ न्यवेदयत तत्सर्वं मुनीनां रोहिणीसुतः ॥ तच्छ्रुत्वा मुनयः सर्वे रामं वाक्यमथाब्रुव न् ॥ ६५ ॥ ॥ मुनय ऊचुः ॥ ॥ यदि राम न नष्टा ते ब्रह्महत्या तु कृत्स्नशः ॥ ६६ ॥ तर्हि गच्छ महाभाग गंधमादनपर्वतम् ॥ महादुःख प्रशमनं महारोगविनाशनम् ॥ ६७ ॥ रामसेतौ महापुण्ये गन्धमादनपर्वते ॥ अस्ति लक्ष्मणतीर्थाख्यं सरः पापविनाशनम् ॥ ६८ ॥ स्नानं कुरुष्व तत्र त्वं तल्लिंगं च नमस्कुरु ॥ निःशेषं तेन नष्टा स्याद्ब्रह्महत्या न संशयः ॥ ६९ ॥ ॥ श्रीसूत उवाच ॥ ॥ एवमुक्तस्तदा रामो गन्ध मादनपर्वतम् ॥ गत्वा लक्ष्मणतीर्थं च प्राप्तवान्मुनिपुंगवाः ॥ ७० ॥ स्नात्वा संकल्पपूर्वं तु तत्र तीर्थे हलायुधः ॥ ब्राह्मणेभ्यो ददौ वित्तं धान्यं गाश्च वसुन्धराम् ॥ ७१ ॥ तस्मिन्नवसरे तत्र राममाहाशरीरवाक् ॥ निःशेषं राम नष्टा ते ब्रह्महत्याधुना त्विह ॥ ७२ ॥ संदेहो नात्र कर्तव्यः सुखं याहि पुरीं निजाम् ॥ तच्छ्रुत्वा बलभद्रोऽथ तत्तीर्थं प्रशशंस ह ॥ ७३ ॥ ततस्तत्रत्यतीर्थेषु स्नात्वा सर्वेषु माधवः ॥ धनुष्कोटौ तथा स्नात्वा रामनाथं निषेव्य च ॥ द्वारकां स्वपुरीं प्रायान्नष्टपातकसंचयः ॥ ७४ ॥ ॥ श्रीसूत उवाच ॥ ॥ एवं वः कथितं विप्राः श्रीलक्ष्मणसरोऽमलम् ॥ ७५ ॥ पुण्यं पवित्रं पापघ्नं ब्रह्महत्यादिशोधकम् ॥ यः पठेदिममध्यायं शृणुयाद्वा समाहितः ॥ ७६ ॥ स याति मुक्तिं विप्रेंद्राः पुनरावृत्तिवर्जिताम् ॥ ७७ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे सेतुमाहात्म्ये लक्ष्मणतीर्थप्रशं सायां बलभद्रब्रह्महत्याविमोक्षणंनामैकोनविंशोऽध्यायः ॥ १९ ॥ ॥ श्रीसूत उवाच ॥ ॥ लक्ष्मणस्य महातीर्थे ब्रह्महत्याविनाशने ॥ स्नात्वा स्वचित्तशुद्ध्यर्थं जटातीर्थं ततो व्रजेत् ॥ १ ॥ जन्ममृत्युजराक्रांतसंसारातुरचेतसाम् ॥ अज्ञाननाशकं नास्ति जटातीर्थादृते द्विजाः ॥ २ ॥ लोके मुमुक्षवः केचिच्चित्तशुद्धिमभीप्सवः ॥ वाचा पठंति वेदांतांस्तूष्णीन्नानुभवंति ते ॥ ३ ॥ पूर्वपक्षमहाग्राहे सिद्धांतझषसंकुले ॥ वेदांताब्धावि हाज्ञानं मुह्यंति पतिता द्विजाः ॥ ४ ॥ प्रथमं चित्तशुद्ध्यर्थं वेदांतान्संपठंति ये ॥ विवदंते पठित्वा ते कलहं च वितन्वते ॥ ५ ॥ चित्तशुद्धिर्न

१ महाप्रभो–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कर्तव्यः पापशांतये ॥ ३४ ॥ तादृशं नियमं त्वद्य भवंतः प्रब्रुवंतु नः ॥ भवद्भिरस्य सूतस्य यदायुर्दत्तमक्षयम् ॥ इंद्रियाणि च सत्त्वं च करिष्ये योगमायया ॥३५॥ ॥ मुनय ऊचुः ॥ ॥ पराक्रमस्य तेव्रस्य मृत्योर्नश्च यथा प्रभो ॥ स्यात्सत्यवचनं राम तद्भवान्कर्तुमर्हति ॥ ३६ ॥ ॥ ॥ राम उवाच ॥ ॥ आत्मा वै पुत्ररूपेण भवतीति श्रुतिस्सदा ॥३७॥ उद्घोषयति विप्रेंद्रास्तस्मादस्य शरीरतः ॥ पुत्रो भवतु दीर्घायुः सत्त्वेंद्रिय बलोर्जितः ॥ ३८ ॥ कथयिष्यति युष्माकं पुराणादीनि सोऽन्वहम् ॥ संभविष्यति सर्वज्ञो योगमायाबलान्मम ॥ ३९ ॥ इत्युक्त्वा रौहिणेयस्तान्पुनः प्रश्रितमब्रवीत् ॥ मनोभिलषितं किं वा युष्माकं करवाण्यहम् ॥ ४० ॥ तद्ब्रूत मुनयो यूयं करिष्यामि न संशयः ॥ अज्ञानान्मत्कृतस्यास्य पापस्यापि निवर्तकम् ॥ प्रायश्चित्तं भवन्तो मे प्रब्रूत मुनिसत्तमाः ॥ ४१ ॥ ॥ मुनय ऊचुः ॥ ॥ इल्वलस्यात्मजः कश्चिद्दानवो बल्वलाभिधः ॥ ४२ ॥ स दूषयति नो यागं रामेहागत्य पर्वणि ॥ दुष्टं तं दानवं पापं जहि लोकैककण्टकम् ॥४३ ॥ अनेन पूजा ह्यस्माकं कृता स्याद्भवताधुना ॥ अस्थिविण्मूत्ररक्तानि सुरामांसानि च क्रतौ ॥ ४४ ॥ सदाभिवर्षतेऽस्माकमत्रागत्य स दानवः ॥ अस्मिन्भारतभूभागे यानि तीर्थानि संति हि ॥ ४५ ॥ तेषु स्नाह्यब्दमेकं त्वं सर्वेषु सुसमाहितः ॥ तेन ते पापशांतिः स्यान्नात्र कार्या विचारणा ॥ ४६ ॥ ॥ श्रीसूत उवाच ॥ ॥ पर्वकाले तु विप्रेंद्राः समावृत्ते मुनिक्रतौ ॥ महाभीमो रजोवर्षो झंझावातश्च भीषणः ॥ ४७ ॥ प्रादुर्बभूव विप्रेंद्राः पूयरक्तैश्च वर्षणम् ॥ ततो विष्ठामया वृष्टिर्बल्वलेन कृताप्यभूत् ॥ ४८ ॥ असुरं यज्ञशालायां शूलपाणिमथ क्षणात् ॥ अपश्यद्बलभद्रोऽसौ महाबलपराक्रमम् ॥ ४९ ॥ तमालोक्य महादेहं दग्धाद्रिप्रतिमं तदा ॥ प्रतप्तताम्रसंकाशश्मश्रुदंष्ट्रोत्कटाननम् ॥ ५० ॥ चिंतयामास मुसलं रामः परविदारणम् ॥ सीरं च दानवहरं गदां दैत्यविदारिणीम् ॥ ५१ ॥ यान्यायुधानि तं रामं चिंतितान्युपतस्थिरे ॥ सीराग्रेण तमाकृष्य बल्वलं खेचरं तदा ॥ ५२ ॥ मुसलेन निजघ्ने स कुपितो मूर्ध्नि वेगतः ॥ पपात भुवि संक्षुण्णललाटो रक्तमुद्वमन् ॥ ५३ ॥ बल्वलो दीनकथनो गिरिर्वज्रहतो यथा ॥ स्तुत्वाथ मुनयो रामं प्रोचार्य विमलाशिषः ॥ ५४ ॥ अभ्यषिंचञ्छुभैस्तोयैर्वृत्रशत्रुं यथा सुराः ॥ मालां ददुर्वैजयन्तीं श्रीमदंबुजशोभिताम् ॥ ५५ ॥ माधवाय शुभे वस्त्रे भूषणानि शुभानि च ॥ धारयंस्तानि सर्वाणि रौहिणेयो महाबलः ॥५६॥ पुष्पितानोकहोपेतः कैलास इव पर्वतः ॥ अनुज्ञातोऽथ मुनिभिः सर्वतीर्थेषु स द्विजाः ॥ ५७ ॥ एकमब्दं चरन्स्नात्वौ नियमाचारसंयुतः ॥ ततः संवत्सरे पूर्णे कालिंदीभेदनो बलः ॥ ५८ ॥ समाप्ततीर्थयात्रः सन्पुरीं गन्तुं प्रचक्रमे ॥ ततस्तमोमयीं छायां पृष्ठतोनुगतां कृशाम् ॥ ५९ ॥ अपश्यद्बलदेवोयं महानादविरा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्रमार्गेण संकल्प्य विधिपूर्वकम् ॥ ११ ॥ सस्नौ रामसरस्तीर्थे पुण्ये पापविनाशने ॥ स्नात्वाचम्य विशुद्धात्मा क्षेत्रपिंडं प्रदाय च ॥ १२ ॥ व्यासो क्ताखिलदानानि प्रददौ स युधिष्ठिरः ॥ मासमेकं निराहारः सस्नौ तत्र स धर्मजः ॥ १३ ॥ प्रत्यहं च ददौ दानं वित्तलोभं विना द्विजाः ॥ एक मासे गते त्वेवं कस्मिंश्चिद्दिवसे ततः ॥ १४ ॥ आह धर्मात्मजं वाणी पुनरप्यशरीरिणी ॥ राजंस्ते विलयं यातं सर्वं पापं युधिष्ठिर ॥ १५ ॥ छले नासत्यवचनादाचार्यस्य वधेन यः ॥ दोषस्ते समभूत्पूर्वं सोऽपि नष्टः परंतप ॥ १६ ॥ याहि स्वनगरं राजन्गत्वा पालय मेदिनीम् ॥ अभिषेचय चात्मानं राज्यरक्षार्हतास्ति ते ॥ १७ ॥ इत्युक्त्वा विरराआमाथ सापि वागशरीरिणी ॥ ततो धर्मात्मजः प्रीतस्तामुद्दिश्य दिशं प्रति ॥ १८ ॥ नमस्कृत्वाशरीरिण्यै तस्यै वाचे सहानुजः ॥ प्रययौ हास्तिनपुरं सुप्रीतेनांतरात्मना ॥ १९ ॥ अभिषिक्तोऽथ राज्येऽसौ पालयामास मेदिनीम् ॥ इत्थं धर्मात्मजो विप्रा रामतीर्थनिमज्जनात् ॥ १२० ॥ गतपापो विशुद्धात्मा योग्योऽभूद्राज्यरक्षणे ॥ एवं वः कथितं चित्रं रामती र्थस्य वैभवम् ॥ २१ ॥ सर्वपापहरं पुण्यं भक्तिमुक्तिप्रदायकम् ॥ यत्र स्नानाद्विमुक्तोऽभून्मिथ्यादोषात्स धर्मजः ॥ २२ ॥ पठंति येऽ ध्यायमिदं द्विजोत्तमाः शृण्वंति वा ये मनुजा विपातकाः ॥ यास्यंति कैलासमनन्यलभ्यं गत्वा न संयांति पुनश्च जन्म ॥ ॥ १२३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे सेतुमाहात्म्ये रामतीर्थप्रशंसायां धर्मपुत्रमिथ्या कथनदोषशांतिवर्णनंनामाष्टादशोऽध्यायः ॥ १८ ॥ ॥ छ ॥ ॥ श्रीसूत उवाच ॥ ॥ तारकब्रह्मणस्तस्य तीर्थे स्नात्वा द्विजोत्तमाः ॥ लक्ष्मणस्य ततस्तीर्थमभिगच्छेत्समाहितः ॥ १ ॥ श्रीलक्ष्मणस्य तीर्थे तु स्नात्वा पापैर्विमोचिताः ॥ मुक्तिं प्रयांति विमलामपुनर्भवलक्षणाम् ॥ २ ॥ स्नानाल्लक्ष्मणतीर्थे तु दारिद्र्यं नश्यते खिलम् ॥ आयुष्मान्गुणवान्विद्वान्पुत्रश्चैवास्य जायते ॥ ३ ॥ कूले लक्ष्मणतीर्थस्य तन्मन्त्रं जपते तु यः ॥ स सर्वशास्त्रवेत्ता स्याच्चतुर्वेदविदप्यसौ ॥ ४ ॥ तस्य कूले महल्लिंगं स्थापयामास लक्ष्मणः ॥ तत्र तीर्थे तु यः स्नात्वा सेवते लक्ष्मणेश्वरम् ॥ ५ ॥ इह दारिद्र्यरोगाभ्यां संसाराच्च विमुच्यते ॥ स्नात्वा लक्ष्मणतीर्थे तु सेवित्वा लक्ष्मणेश्वरम् ॥ बलभद्रः पुरा विप्रा मुमुचे ब्रह्महत्यया ॥ ६ ॥ ॥ ॥ ऋषय ऊचुः ॥ ॥ ब्रह्महत्या कथमभूद्रौहिणेयस्य सूतज ॥ कथं चात्र विनष्टा सा तन्नो ब्रूहि महामुने ॥ ७ ॥ ॥ श्रीसूत उवाच ॥ ॥ शेषावतारो भगवान्बलभद्रः पुरा द्विजाः ॥ ८ ॥ कुरूणां पांडवानां च युद्धोद्योगं विलोक्य तु ॥ बंधूनां स वधं सोढुमसमर्थो हलायुधः ॥ ९ ॥

१ विप्राः—इ० पा० । २ तारकब्रह्मणस्तस्य तीर्थे—रामस्य तीर्थे—इत्यर्थः । ३ विपुलाम्—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विचारमेवमकरोद्बलभद्रो महामतिः ॥ यद्यहं कुरुराजस्य करिष्यामि सहायताम् ॥ १० ॥ कोपः स्यात्पांडुपुत्राणां मय्यवार्यः सुदारुणः ॥ उपकारं करिष्यामि पांडवानामहं यदि ॥ ११ ॥ दुर्योधनस्य कोपः स्यादिति बुद्ध्वा हलायुधः ॥ तीर्थयात्राच्छलेनासौ मध्यस्थः प्रययौ तदा ॥ १२ ॥ प्रभासमभिगम्याथ स्नात्वा संकल्पपूर्वकम् ॥ देवानृषीन्पितृगणांस्तर्पयामास वारिणा ॥ १३ ॥ सरस्वतीं ततः प्रायात्प्रतीच्यभिमुखां हली ॥ पृथूदकं बिंदुसरो मुक्तिदं ब्रह्मतीर्थकम् ॥ १४ ॥ गंगां च यमुनां सिंधुं शतद्रूं च सुदर्शनम् ॥ संप्राप्य बलभद्रोऽयं स्नात्वा तीर्थेषु धर्मतः ॥ १५ ॥ प्रपेदे नैमिषारण्यं मुनींद्रैरभिसेवितम् ॥ आगतं तं विलोक्याथ नैमिषीयास्तपस्विनः ॥ १६ ॥ दीर्घसत्रे स्थिताः सम्यङ्नियता धर्मतत्पराः ॥ अभ्युद्गम्य यदुश्रेष्ठं प्रणम्योत्थाय चासनात् ॥ १७ ॥ अपूजयन्विष्टराद्यैः कंदमूलफलैस्तदा ॥ आसनं परिगृह्यायं पूजितः सपुरःसरः ॥ १८ ॥ उच्चासने स्थितं सूतमनमंतमनुत्थितम् ॥ अकृतांजलिमासीनं व्यासशिष्यं विलोक्य सः ॥ १९ ॥ विप्रांश्चानमतो दृष्ट्वा विलोक्यात्मानमागतम् ॥ चुक्रोध रोहिणीसूनुः सूतं पौराणिकोत्तमम् ॥ २० ॥ मध्ये मुनीनां सूतोऽयं कस्मान्निंद्योऽनुलोमजः ॥ उच्चासने समध्यास्ते न युक्तमिदमंजसा ॥ ॥ २१ ॥ अवमत्य भृशं चास्मान्धर्मसंरक्षकानयम् ॥ आस्तेऽनुत्थाय निर्भीतिर्न च प्रणमते तथा ॥ २२ ॥ पठित्वायं पुराणानि द्वैपायनसकाशतः ॥ सेतिहासानि सर्वाणि धर्मशास्त्राण्यनेकशः ॥ २३ ॥ न मां दृष्ट्वा प्रणमते नैव त्यजति चासनम् ॥ द्वैपायनस्य महतः शिष्याः पैलादयो द्विजाः ॥ २४ ॥ एवंविधमधर्मं ते नैव कुर्युर्यथा त्वयम् ॥ तस्मादेनं वधिष्यामि दुरात्मानमचेतनम् ॥ २५ ॥ दुष्टानां निग्रहार्थं हि भूर्लोकमहमागमम् ॥ मया हतो हि दुष्टात्मा शुद्धिमेष्यत्यसंशयम् ॥ २६ ॥ इत्युक्त्वा भगवान्रामो मुसली प्रबलो हली ॥ पाणिस्थेन कुशाग्रेण तच्छिरः प्राच्छिनद्रुषा ॥ २७ ॥ तत्रत्या मुनयः सर्वे हा कष्टमिति चुक्रुशुः ॥ अवादिषुस्तदा रामं मुनयो ब्रह्मवादिनः ॥ २८ ॥ रामाधर्मः कृतः कष्टस्त्वया संकर्षण प्रभो ॥ अस्य सूतस्य चास्माभिर्दत्तं ब्रह्मासनं महत् ॥ २९ ॥ अक्षयं चायुरस्माभिरस्य दत्तं हलायुध ॥ भवताऽऽजानतैवाद्य कृतो ब्रह्मवधो महान् ॥ ३० ॥ योगेश्वरस्य भवतो नास्ति कश्चिन्नियामकः ॥ अस्यास्तु ब्रह्महत्याया यत्कर्तव्यं विचार्य तत् ॥ ३१ ॥ प्रायश्चित्तं भवानेव लोकसंग्रहणाय तु ॥ कुरुष्व भगवन्राम नान्येन प्रेरितः कुरु ॥ इत्युक्तो भगवान्रामस्तानुवाच मुनीन्प्रति ॥ ३२ ॥ ॥ राम उवाच ॥ ॥ प्रायश्चित्तं चरिष्यामि पापशोधकमास्तिकाः ॥ ३३ ॥ लोकसंग्रहणार्थाय नान्यकामनयाऽधुना ॥ यादृशो नियमोऽस्माभिः

१ स वली–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नपुरं प्राविशंस्ते स्वमंदिरम् ॥ ततः कतिपयाहःसु गतेषु किल नागराः ॥ ८७ ॥ धौम्यादिमुनिभिः सार्धं धर्मजस्य महात्मनः ॥ राज्याभिषेचनं कर्तुं प्रारभंत मुनीश्वराः ॥ ८८ ॥ राज्याभिषेचने तस्य प्रवृत्ते धर्मजस्य तु ॥ अशरीरा ततो वाणी बभाषे धर्मनंदनम् ॥ ८९ ॥ धर्मपुत्र महाभाग रिपूणामपि वत्सल ॥ राज्याभिषेकं मा कार्षीर्नार्हस्त्वं राज्यपालने ॥ ९० ॥ यतस्त्वं छद्मनाचार्यमुक्त्वा सत्यं द्विजोत्तमम् ॥ न्यस्तशस्त्रं रणे राजन्नघातयदलज्जकः ॥ ९१ ॥ अतस्ते पापबाहुल्यं विद्यते धर्मनंदन ॥ प्रायश्चित्तमकृत्वास्य राज्यपालनकर्मणि ॥ ९२ ॥ नार्हता विद्यते यस्मात्प्रायश्चित्तमतश्चर ॥ इत्युक्त्वा विररामाथ सा तु वागशरीरिणी ॥ ९३ ॥ ततो धर्मसुतो राजा तद्वाक्यं भृशकातरः ॥ मूढोऽहं साहसी क्रूरः पिशुनो लोभमोहितः ॥ ९४ ॥ तुच्छराज्याभिलाषेण कृतवान्पापमीदृशम् ॥ एतत्पापविशुद्ध्यर्थं किं करिष्यामि का गतिः ॥ ९५ ॥ किं वा दानं प्रदास्यामि कुत्र यास्यामि वा पुनः ॥ इति शोकसमाविष्टे तस्मिन्राजनि धर्मजे ॥ ९६ ॥ कृष्णद्वैपायनो व्यासस्समायातस्तदंतिकम् ॥ ततोऽभिवंद्य तं व्यासं प्रत्युत्थाय कृतांजलिः ॥ ९७ ॥ संपूज्यार्घ्यादिना विप्रा भक्तियुक्तेन चेतसा ॥ अदेहवाचा[1] यत्प्रोक्तंतत्सर्वमखिलेन सः ॥ ॥ ९८ ॥ व्यासाय श्रावयामास दुःखितो धर्मनंदनः ॥ श्रुत्वा तदखिलं वाक्यं धर्मजस्य महामुनिः ॥ ध्यात्वा तु सुचिरं कालं ततो वक्तुं प्रचक्रमे ॥९९॥ ॥ व्यास उवाच ॥ ॥ मा कार्षीस्त्वं भयं राजन्नुपायं प्रब्रवीमि ते ॥ अस्य पापस्य शांत्यर्थं श्रुत्वानुष्ठीयतां त्वया ॥ १०० ॥ ॥ युधिष्ठिर उवाच ॥ ॥ किं तद्ब्रूहि महायोगिन्पाराशर्य कृपानिधे ॥ येन मे पापनाशः स्यादचिरात्तद्वदाधुना ॥ १०१ ॥ ॥ व्यास उवाच ॥ ॥ दक्षिणांभोनिधौ सेतौ गंधमादनपर्वते ॥ १०२ ॥ रामसेतौ महाराज रामतीर्थमिति श्रुतम् ॥ अस्ति पुण्यं सरः सिद्धं महापातकनाशनम् ॥ ३ ॥ यस्य दर्शनमात्रेण महापातककोटयः ॥ प्रयांति विलयं सद्यस्तमः सूर्योदये यथा ॥४॥ रामतीर्थं यदा पश्येत्स्वयं रामेण निर्मितम् ॥ तदैव ब्रह्महत्याया मुच्यते नात्र संशयः ॥ ५ ॥ तत्र गत्वा महाराज रामतीर्थे विमुक्तिदे ॥ स्नाहि ते पापशुद्धिः स्याद्राज्यरक्षार्हतापि च ॥ ६ ॥ दानं कुरुष्व तत्तीरे गोभूमितिलवाससाम् ॥ सुवर्णरजतानां च दानं कुरु युधिष्ठिर ॥ अवश्यमेतत्पापानां शुद्धिस्ते न चिराद्भवेत् ॥ ७ ॥ ॥ श्रीसूत उवाच ॥ व्यासेन धर्मपुत्रोऽयमेवमुक्तो द्विजोत्तमाः ॥ ८ ॥ तत्क्षणेनैव धौम्येन सहितः सानुजस्तदा ॥ सहदेवं प्रतिष्ठाप्य राज्ये धर्मात्मजस्तदा ॥ ९ ॥ रामसेतुं समुद्दिश्य प्रतस्थे वाहनं विना ॥ दिनैः कतिपयैरेव रामसेतुं जगाम सः ॥ ११० ॥ रामतीर्थं समासाद्य धौम्येन सह पांडवः ॥ पुरोहितो

१ अदहवाचा—आकाशवाण्या—इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

राजोऽधुना वदेत् ॥ ६४ ॥ नान्यथा शक्यते जेतुं द्रोणो युद्धविशारदः ॥ धर्माज्जेतुमशक्यं चेद्धर्मं त्यक्त्वाऽप्यरिं जयेत् ॥ ६५ ॥ इति केशववाक्यं तच्छ्रुत्वा भीमः पृथासुतः ॥ पितरं ते समभ्येत्य मिथ्यावाक्यमभाषत ॥ ६६ ॥ अश्वत्थामा हतो द्रोण युद्धेऽत्र पतितोऽधुना ॥ द्रोणाचार्योपि तद्वाक्यममन्यत यथार्थतः ॥ ६७ ॥ अविश्वस्य पुनः सोऽथ धर्मजं प्राप्य चाब्रवीत् ॥ धर्मात्मज मृधे सूनुरश्वत्थामा ममाधुना ॥ ६८ ॥ हतः किं त्वं वदस्वाद्य सत्यवादी भवान्मतः ॥ धर्मपुत्रोऽसत्यभीरुरासीच्चारिजयोत्सुकः ॥ ६९ ॥ किं कर्तव्यं मयाद्येति दोलालोलमना अभूत् ॥ स दृष्ट्वा भीमनिहतमश्वत्थामाभिधं गजम् ॥७०॥ अश्वत्थामा हतो युद्धे भीमेनाद्य रणे महान् ॥ इत्थं द्रोणं बभाषेऽसौ धर्मपुत्रश्छलोक्तितः ॥ ७१ ॥ तच्छ्रुत्वा त्वत्पिता शस्त्रं त्यक्त्वा युद्धान्न्यवर्त्तत ॥ अथ धर्मसुतः प्राह परं वारण इत्यपि ॥ ७२ ॥ त्यक्तं शस्त्रं न गृह्णीयां युद्धे पुनरिति स्म सः ॥ प्रतिजज्ञे तव पिता वत्स द्रोणो बली पुनः ॥ ७३ ॥ अतः शस्त्रं न जग्राह प्रतिज्ञाभंगकातरः ॥ धृष्टद्युम्नं तदा दृष्ट्वा पिता ते मृत्युमात्मनः ॥ ७४ ॥ मत्वा प्रायोपवेशेन रथोपस्थे स योगवित् ॥ अशयिष्ट समाधिस्थः प्राणानायम्य वाग्यतः ॥ ७५ ॥ ततो निर्भिद्य मूर्धानं तत्प्राणा निर्ययुः क्षणात् ॥ तदा मृतस्य द्रोणस्य वत्स खङ्गेन तच्छिरः ॥ ७६ ॥ केशान्गृहीत्वा हस्तेन धृष्टद्युम्नोऽच्छिनद्युधि ॥ मावधीरिति पार्थाद्याः प्रोचुः सर्वे च सैनिकाः ॥ सर्वैर्निवार्यमाणोपि त्वत्तातं पार्श्वतोऽवधीत् ॥ ७७ ॥ ॥ श्रीसूत उवाच ॥ ॥ पितरं निहतं श्रुत्वा रुदन्द्रौणिश्चिरं द्विजाः ॥ ॥ ७८ ॥ कोपेन महता तत्र ज्वलन्वाक्यमथाब्रवीत् ॥ अनृतं प्रोच्य पितरं न्यस्तशस्त्रं चकार यः ॥ ७९ ॥ पितरं मेऽद्य तं पार्थमप्यन्यानथ पांडवान् ॥ गृहीत्वा केशपाशं यस्त्यक्तशस्त्रशिरोऽहनत् ॥ ८० ॥ छद्मना पार्षतं तं च हनिष्याम्यचिरादहम् ॥ कृष्णेन सह पश्यंतु पांडवा मत्पराक्रमम् ॥ ८१ ॥ इति द्रौणिर्द्विजास्तत्र प्रतिजज्ञे भयंकरम् ॥ ततोस्तं गत आदित्ये राजानः सर्व एव ते ॥ ८२ ॥ उभये निहते द्रोणे प्राविशन्पटमण्डपम् ॥ अष्टादशदिनैरेवं निवृत्तमभवद्रणम् ॥ ८३ ॥ शल्यं कर्णं तथान्यांश्च दुर्योधनमुखांस्ततः ॥ धार्तराष्ट्रान्निहत्याजौ धर्मराजो युधिष्ठिरः ॥ ८४ ॥ स्वीयानां च परेषां च मृतानां सांपरायिकम् ॥ अकरोद्विधिवद्विप्राः सार्धं धौम्यादिभिर्द्विजैः ॥ ८५ ॥ वंदित्वा धृतराष्ट्रं च सर्वे संभूय पाण्डवाः ॥ धृतराष्ट्राभ्यनुज्ञाता हतशिष्टजनैर्वृताः ॥ ८६ ॥ संप्राप्य हास्ति

१ समासाद्य—इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विद्रुता द्विजसत्तमाः ॥ ततोऽर्जुनो रणे द्रोणं युयुधे रथिनां वरः ॥ ४० ॥ रणप्रवीणयोस्तत्र विजयद्रोणयो रणे ॥ द्रष्टुं समागतैर्दैवैरभूद्व्योम निरं तरम् ॥ ४१ ॥ द्रोणफाल्गुनयोर्विप्रा नास्ति युद्धोपमा भुवि ॥ सामर्षयोस्तदाचार्यशिष्ययोरभवद्रणः ॥ ४२ ॥ द्रोणफाल्गुनयोर्युद्धं द्रोणफाल्गुन योरिवं ॥ बहु मेनेऽथ मनसा द्रोणोऽर्जुनपराक्रमम् ॥ ४३ ॥ ततो द्रोणो महावीर्यं प्रियशिष्यं स फाल्गुनम् ॥ विहाय पांचालबलं समयुध्यत वीर्यवान् ॥ ४४ ॥ सविंशतिसहस्राणि दश तत्रायुतानि च ॥ द्रोणाचार्योऽवधीद्राज्ञां युद्धे सगजवाजिनाम् ॥ ४५ ॥ धृष्टद्युम्नोऽथ कुपितो द्रोण मभ्यहनच्छरैः ॥ द्रोणश्च पट्टिशं गृह्य धृष्टद्युम्नमताडयत् ॥ ४६ ॥ शरैर्विव्याध तं युद्धे तीक्ष्णैरग्निशिखोपमैः ॥ परङ्मुखोऽभवत्तत्र धृष्ट द्युम्नः शराहतः ॥ ४७ ॥ ततो विरथमागत्य धृष्टद्युम्नं वृकोदरः ॥ स्वं स्यंदनं समारोप्य द्रोणाचार्यमथाब्रवीत् ॥ ४८ ॥ स्वकर्मभिर संतुष्टाः शिक्षितास्त्रा द्विजाधमाः ॥ न युद्ध्येरन्यदि क्रूरा न नश्येरन्नृपा रणे ॥ ४९ ॥ अहिंसा हि परो धर्मो ब्राह्मणानां सदा स्मृतः ॥ हिंसया दारपुत्रादीन्रक्षंते व्याधजातयः ॥ ५० ॥ हिंसीस्त्वमेकपुत्रार्थे युद्धे स्थित्वा बहून्नृपान् ॥ स चापि ते सुतो ब्रह्मन्हतः शेते रणाजिरे ॥ ५१ ॥ तथापि लज्जा ते नास्ति शोकोऽपीह न जायते ॥ वचनं त्विति भीमस्य सत्यं श्रुत्वा युधिष्ठिरात् ॥ ५२ ॥ निजायुधं स तत्याज पपात स्यंदनो परि ॥ योगवित्प्रायमातस्थे द्रोणाचार्यस्तदा द्विजाः ॥ ५३ ॥ तदंतरं परिज्ञाय द्रोणाचार्यस्य पार्श्वतः ॥ खड्गपाणिः शिरश्छेत्तुमभ्यधावद्रणा जिरे ॥ ५४ ॥ वार्यमाणोऽपि पार्थाद्यैस्तच्छिरश्छेत्तुमुद्ययौ ॥ योगवित्त्वाद्द्रोणमूर्ध्नो ज्योतिरूर्ध्वं दिवं ययौ ॥ ५५ ॥ दृष्टं कृष्णार्जुनकृपधर्मपुत्रादि भिर्मृधे ॥ द्रोणस्यास्य गतप्राणाच्छरीरादच्छिनच्छिरः ॥ ५६ ॥ भारद्वाजे हते युद्धे कौरवाः प्राद्रवन्भयात् ॥ जहृषुः पांडवा विप्रा धृष्टद्युम्नादय स्तदा ॥ ५७ ॥ सेनां तां विद्रुतां दृष्ट्वा द्रौणिरूचे सुयोधनम् ॥ एतद्द्रवति किं सैन्यं त्यक्तप्रहरणं नृप ॥ ५८ ॥ तदा दुर्योधनो राजा स्वयं वक्तु मशक्नुवन् ॥ युद्धे द्रोणवधं वक्तुं कृपाचार्यमचोदयत् ॥ द्रौणयेऽथ कृपाचार्यो वधमूचे गुरोस्तदा ॥ ५९ ॥ ॥ कृप उवाच ॥ ॥ अश्वत्थामं स्तव पिता ब्रह्मास्त्रेण मृधे रिपून् ॥ हत्वा निनाय सदनं यमस्य शतशो बली ॥ ६० ॥ दुराधर्षतमं दृष्ट्वा तद्वीर्यं केशवस्तदा ॥ पांडवान्प्राह विप्रेंद्र वाक्यं वाक्यविशारदः ॥ ६१ ॥ ॥ केशव उवाच ॥ ॥ द्रोणं जेतुमुपायोऽस्ति पांडवा युधि दुर्जयम् ॥ ६२ ॥ अश्वत्थात्मा तव सुतो हतो द्रोण मृधेऽधुना ॥ सत्यवादी वदेदेवं यदि प्रामाणिको जनः ॥ ६३ ॥ द्रोणो निवर्तेत रणात्तदा त्यक्त्वायुधं क्षणात् ॥ अत एनां मृषावार्तां धर्म

१ अत्र अनन्वयालंकारः—"उपमानोपमेयत्वं यदेकस्यैव वस्तुनः । इन्दुरिन्दुरिव श्रीमानित्यादौ तदनन्वयः ॥" इति तल्लक्षणात् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

थाय नमो वालिहराय ते ॥ विभीषणभयक्लेशहारिणे मलहारिणे ॥ १४ ॥ अहल्यादुःखसंहर्त्रे नमस्ते भरताग्रज ॥ अंभोधिगर्वसंहर्त्रे तस्मिन्सेतुकृते नमः ॥ १५ ॥ तारकब्रह्मणे तुभ्यं लक्ष्मणाग्रज ते नमः ॥ रक्षःसंहारिणे तुभ्यं नमो रावणमर्दिने ॥ १६ ॥ कोदण्डधारिणे तुभ्यं सर्वरक्षाविधायिने ॥ इति स्तुवन्मुनिः सोऽयं सुतीक्ष्णो राममन्वहम् ॥ १७ ॥ निनाय कालमनिशं रामचंद्रनिषण्णधीः ॥ एवमभ्यसतस्तस्य राममन्त्रं षडक्षरम् ॥ १८ ॥ स्तुवतो रामचंद्रं च स्तोत्रेणानेन सुव्रताः ॥ तीर्थे च रघुनाथस्य कुर्वतः स्नानमन्वहम् ॥ १९ ॥ अभवन्निश्चला भक्ती रामचंद्रेतिनिर्मला ॥ अभूदद्वैतविज्ञानं प्रत्यगात्मैकलक्षणम् ॥ २० ॥ अनधीतत्रयीज्ञानं तथैवाश्रुतवेदनम् ॥ परकायप्रवेशे च सामर्थ्यमभवद्द्विजाः ॥ २१ ॥ आकाशगमने शक्तिः कलावैदग्ध्यमेव च ॥ अश्रुतानां च शास्त्राणामभिज्ञानं विना गुरुम् ॥ २२ ॥ गमनं सर्वलोकेषु प्रतिघातविवर्जितम् ॥ अतींद्रियार्थद्रष्टृत्वं देवैः संभाषणं तथा ॥ २३ ॥ पिपीलिकादिजंतूनां वार्ताज्ञानमपि द्विजाः ॥ ब्रह्मविष्णुमहादेवलोकेषु गमनं तथा ॥ २४ ॥ चतुर्दशसु लोकेषु स्वाधीनगमनं तथा ॥ एतान्यन्यानि सर्वाणि योगिलभ्यानि सत्तमाः ॥ २५ ॥ सुतीक्ष्णस्याभवन्विप्रा रामतीर्थनिषेवणात् ॥ एवंप्रभावं तत्तीर्थं महापातकनाशनम् ॥ २६ ॥ महासिद्धिकरं पुण्यमपमृत्युविनाशनम् ॥ भुक्तिमुक्तिप्रदं पुंसां नरकक्लेशनाशनम् ॥ २७ ॥ रामभक्तिप्रदं नित्यं संसारोच्छेदकारणम् ॥ अस्य तीरे महल्लिंगं स्थापयित्वा रघूद्वहः ॥ पूजयामास तल्लिंगं लोकानुग्रहकाम्यया ॥ २८ ॥ रामतीर्थे महापुण्ये स्नात्वा तल्लिंगदर्शनात् ॥ नराणां मुक्तिरेव स्यात्किमुतान्या विभूतयः ॥ २९ ॥ तत्र स्नात्वा शिवं दृष्ट्वा धर्मपुत्रः पुरा द्विजाः ॥ अनृतोक्तिसमुद्भूतदोषान्मुक्तोऽभवत्क्षणात् ॥ ३० ॥ ॥ ऋषय ऊचुः ॥ ॥ असत्यमुदितं कस्माद्धर्मपुत्रेण सूतज ॥ यद्दोषशांतये सस्नौ रामतीर्थेऽतिपावने ॥ ३१ ॥ ॥ श्रीसूत उवाच ॥ ॥ युष्माकमृषयो वक्ष्ये यथोक्तमनृतं रणे ॥ छलेन धर्मपुत्रेण यन्नष्टं रामतीर्थके ॥ ३२ ॥ अन्योन्यं पांडवा विप्रा धर्मपुत्रादयः पुरा ॥ धृतराष्ट्रस्य पुत्राश्च दुर्योधनमुखास्तदा ॥ ३३ ॥ महद्वै वैरमासाद्य राज्यार्थं विप्रसत्तमाः ॥ महत्या सेनया सार्द्धं कुरुक्षेत्रे समेत्य च ॥ ३४ ॥ अयुध्यन्समरे वीराः समरेष्वनिवर्तिनः ॥ युद्धं कृत्वा दशदिनं गांगेयः पतितो भुवि ॥ ३५ ॥ ततः पंचदिनं भूयो धृष्टद्युम्नेन वीर्यवान् ॥ आचार्यो युयुधे द्रोणो महाबलपराक्रमः ॥ ३६ ॥ अनेकास्त्राणि शस्त्राणि द्रोणाचार्यो महाबली ॥ विसृजन्पांडवानीकं पीडयामास वीर्यवान् ॥ ३७ ॥ अथ दिव्यास्त्रविच्छूरो धृष्टद्युम्नो महाबलः ॥ अभिनद्बाणवर्षेण द्रोणसेनामनेकधा ॥ ३८ ॥ धृष्टद्युम्नं तदा द्रोणः शरवर्षैरवाकिरत् ॥ पार्थसेना तथा द्रोणबाणवर्षातिपीडिता ॥ ३९ ॥ दशदिक्षु भयाक्रांता

१ अहल्याभयसंहर्त्रे—इ० पा० ।

Nepal Sanskrit University

CC-0. In Public Domain. Digitization by eGangotri

स्राणि स्वर्णानि स्त्रीधनं तदा ॥ ९० ॥ गवां सहस्रं प्रददौ दासीनां च सहस्रकम् ॥ ग्रामं पंचशतं चापि ददौ दुहितृवत्सलः ॥ ९१ ॥ दिव्यवस्त्रा युतं चापि शतं भूषणपेटिकाः ॥ हारमालासहस्रं च ददौ दुहितृसौहृदात् ॥ ९२ ॥ एतत्सर्वं समादाय सपुत्रः सस्नुषो मुनिः ॥ राज्ञा च समनुज्ञातः प्रययौ वेदकाननम् ॥ ९३ ॥ वेदारण्यं समासाद्य तदा दीर्घतमा मुनिः ॥ उवास ससुखं विप्राः पुत्रेण स्नुषया सह ॥ ९४ ॥ सेवन्वेदाटवीनाथं भुक्तिमुक्तिफलप्रदम् ॥ न्यवसत्सुचिरं कालं कक्षीवानपि भार्यया ॥ ९५ ॥ स्वनयोपि स राजर्षिः स्नात्वा कुंभजनिर्मिते ॥ तत्र तीर्थे महापुण्ये सहितः सर्वसैनिकैः ॥ ९६ ॥ अंतःपुरं समादाय मुदितः स्वपुरं ययौ ॥ अगस्त्यतीर्थमाहात्म्यादेवं कक्षीवतो मुनेः ॥ अनन्यसुलभो विप्रा विवाहः समजायत ॥ ९७ ॥ ॥ श्रीसूत उवाच ॥ ॥ इतिहासस्त्वयं पुण्यो वेदसिद्धो मुनीश्वराः ॥ ९८ ॥ धन्यो यशस्य आयुष्यः कीर्तिसौभाग्य वर्द्धनः ॥ श्रोतव्यः पठितव्योऽयं सर्वथा मानवैर्द्विजाः ॥ ९९ ॥ पठतां शृण्वतां चेममितिहासं पुरातनम् ॥ नेहामुत्रापि वा क्लेशो दारिद्र्यं चापि नो भवेत् ॥ ६० ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां सहितायां तृतीये ब्रह्मखण्डे सेतुमाहात्म्ये कक्षीवद्विवाहनिष्पत्तिवर्णनंनाम सप्त दशोऽध्यायः ॥ १७ ॥ ॥ श्रीसूत उवाच ॥ ॥ कुंभसंभवतीर्थेऽस्मिन्विधायाभिषवं नरः ॥ रामकुंडं ततः पुण्यं गच्छेत्पापविमुक्तये ॥ १ ॥ रघुनाथसरः पुण्यं द्विजाः पापहरं तथा ॥ रघुनाथसरस्तीरे कृतो यज्ञोऽल्पदक्षिणः ॥ २ ॥ संपूर्णफलदो भूयात्स्वाध्यायोऽपि जपस्तथा ॥ रघुनाथ सरस्तीरे मुष्टिमात्रमपि द्विजाः ॥ ३ ॥ दत्तं चेद्वेदविदुषे तदनंतगुणं भवेत् ॥ रामतीर्थं समुद्दिश्य वक्ष्यामि मुनिपुंगवाः ॥ ४ ॥ इतिहासं महापुण्यं सर्वपातकनाशनम् ॥ सुतीक्ष्णनामा विप्रेंद्रो मुनिर्नियतमानसः ॥ ५ ॥ अगस्त्यशिष्यो रामस्य चरणाब्जविचिंतकः ॥ रामचंद्रसरस्तीरे तपस्तेपे सुदुष्करम् ॥ ६ ॥ जपन्षडक्षरं मंत्रं रामचंद्राधिदैवतम् ॥ नित्यं स पंचसाहस्रं मंत्रराजमतंद्रितः ॥ ७ ॥ जजाप कुर्वन्स्नानं च रघुनाथसरोजले ॥ भिक्षाशी नियताहारो जितक्रोधो जितेंद्रियः ॥ ८ ॥ एवं सुतीक्ष्णो विप्रेंद्रा बहुकालमवर्तत ॥ ततः कदाचित्स मुनीरामं ध्यायन्सदा हृदि ॥ तुष्टाव सीतासहितं रामचंद्रं सभक्तिकम् ॥ ९ ॥ ॥ सुतीक्ष्ण उवाच ॥ ॥ नमस्ते जानकीनाथ नमस्ते हनुमत्प्रिय ॥ १० ॥ नमस्ते कौशिकमुनेर्यागरक्षणदीक्षित ॥ नमस्ते कौसलेयाय विश्वामित्रप्रियाय च ॥ ११ ॥ नमस्ते हरकोदण्डभंजकामरसेवित ॥ मारीचांतक राजेंद्र ताटकाप्राणनाशन ॥ १२ ॥ कबंधारे हरे तुभ्यं नमो दशरथात्मज ॥ जामदग्न्यजिते तुभ्यं खरविध्वंसिने नमः ॥ १३ ॥ नमः सुग्रीवना

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यथुः ॥ २२ ॥ गत्वा चांतःपुरं तूर्णं वृत्तं सर्वं निवेद्य च ॥ कन्ययांतःपुरेणापि सहिताः पुनरायथुः ॥ २३ ॥ ततः परस्मिन्दिवसे शुभे दीर्घतमा ऋषिः ॥ गोदानादीनि पुत्रस्य विधिवन्निरवर्तयत् ॥ २४ ॥ निर्वृत्तेष्वथ कक्षीवान्गोदानादिषु कर्मसु ॥ उद्वोढुं राजतनयां पित्रा च गुरुणा सह ॥ ॥ २५ ॥ चतुर्दंतं महाकायं गजं सर्वांगपांडुरम् ॥ आरुह्य हर्षसंयुक्तो द्वितीय इव देवराट् ॥ २६ ॥ मनोरमायाः कन्यायाः पूरयंश्च मनोरथम् ॥ ब्राह्मणैर्बहुसाहस्रैः सहितः स्वस्तिवाचकैः ॥२७॥ तोरणालंकृतद्वारं राजर्षेः पटमण्डपम् ॥ कृतमंगलकृत्योऽसौ कक्षीवान्मुदितो ययौ ॥२८॥ ततः स्वनयकन्या सा कृतमंगलभूषणा ॥ चतुर्दंतमहाकायश्वेतदंतावलस्थितम् ॥ २९ ॥ कक्षीवंतं समायांतं दृष्ट्वा स्वोद्वाहनोत्सुकम् ॥ प्रतिज्ञा मत्कृते दानीं निर्वृत्तेति मुदं ययौ ॥ ३० ॥ कक्षीवान्दीर्घतमसा तथोदंकेन संयुतः ॥ पटाकारबहिर्द्वारं क्रमाद्राज्ञः समाययौ ॥ ३१ ॥ स्वनयस्तु ततो दृष्ट्वा कक्षीवंतं समागतम् ॥ प्रत्युज्जगाम सहितः सुदर्शनपुरोधसा ॥ ३२ ॥ कक्षीवतो वरस्याथ कन्यकापरिचारिकाः ॥ राजतैः स्वर्णपात्रैश्च चक्रु र्नीराजनाविधिम् ॥ ३३ ॥ स्वनयेन समाहूतो ब्राह्मणैः परिवारितः ॥ प्रविवेशाथ लक्ष्मीवान्कक्षीवान्राजमंदिरम् ॥ ३४ ॥ ततो वरेण सहितं तं दीर्घतमसं मुनिम् ॥ सोदंकमनयद्राजा स्वगृहं विनयान्वितः ॥ ३५ ॥ उदंकदीर्घतमसोरर्घ्यं च प्रददौ नृपः ॥ अलंकृते प्रपामध्ये वस्त्रचामरतोरणैः ॥ ३६ ॥ वरो दीर्घतमाश्चान्ये सोदंका मुनयस्तदा ॥ न्यषीदन्स्वनयश्चापि सामात्यः सपुरोहितः ॥ ३७ ॥ ततो दुहितरं कन्यां सुकेशीं तां मनो रमाम् ॥ भूषणालंकृतां गात्रे दिव्यवस्त्रधरां शुभाम् ॥ ३८ ॥ बिंबोष्ठीं चारुसर्वांगीं पीनोन्नतपयोधराम् ॥ प्रपायामध्यमनयन्महाजनसमाकुलम् ॥ ॥ ३९ ॥ ततो वरस्य कंठे सा मालां चंपकनिर्मिताम् ॥ निवेशयामास शुभा जनमध्ये मनोरमा ॥ ४० ॥ उदंकस्तत आगत्य प्रतिष्ठाप्यानलं स्थले ॥ कृत्वाग्निमुखपर्यंतं लाजाहोमादिकं तथा ॥ ४१ ॥ पाणिमग्राहयत्तस्याः कन्यायाश्च वरेण तु ॥ उदंकः सर्वकर्माणि कारयामास तत्र वै ॥ ॥ ४२ ॥ वरवध्वोस्तदा विप्राः प्रायुंजत तदाशिषः ॥ ततः स राजा स्वनयो वरं दीर्घतमोमुनिम्॥४३॥उदंकं वरपक्षीयान्स्वपक्षीयांस्तथा द्विजाः ॥ त्रिलक्षं ब्राह्मणानन्नैर्भोजयामास षड्रसैः ॥ ४४ ॥ ततः संभावयामास तांबूलाद्यैरनेकधा ॥ अथामंत्र्य मुनिश्रेष्ठमुदंकः स्वाश्रमं ययौ ॥४५ ॥ अन्ये च ब्राह्मणाः सर्वे स्वदेशान्प्रययुस्तदा ॥ एवं विवाहे निर्वृत्ते कक्षीवद्राजकन्ययोः ॥४६॥ प्रविश्यागस्त्यतीर्थं स तिरोधत्त गजोत्तमः ॥ ततो दीर्घतमा विप्राः पुत्रेण स्नुषया सह ॥ ४७ ॥ अगस्त्यस्य महातीर्थे स्नानं कृत्वेष्टदायिनि ॥ श्लाघमानश्च तत्तीर्थं सर्वलोकेषु विश्रुतम् ॥ ४८ ॥ प्रयातुं स्वा श्रमं पुण्यं वेदारण्यं मनो दधे ॥ राजानं च तमागंतुमापृच्छन्मुनिसत्तमः ॥ ४९ ॥ स्वनयोऽपि तदा राजा स्वदुहित्रे मुदान्वितः ॥ ददौ शतसह

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सः ॥ ७३ ॥ महत्या सेनया सार्धं प्रययौ वेदकाननम् ॥ तत्रोटजे समासीनं तं दीर्घतमसं मुनिम् ॥ ७४ ॥ तपश्चरंतमासीनं ध्यायन्वेदाटवी
पतिम् ॥ पुरोहितो ददर्शाथ जपंतं मंत्रमुत्तमम् ॥ ७५ ॥ प्रणाममकरोत्तस्मै मुनये स सुदर्शनः ॥ उवाच दीर्घतमसं मुनिं प्रह्लादयन्निव ॥ ७६ ॥
॥ ॥ सुदर्शन उवाच ॥ ॥ कच्चित्ते कुशलं ब्रह्मन्कच्चित्ते वर्धते तपः ॥ आश्रमे कुशलं कच्चित्कच्चिद्धर्मे सुखं वद ॥ ७७ ॥ पृष्टः सुदर्शनेनैवं
मुनिर्दीर्घतमास्तदा ॥ सुदर्शनमुवाचेदमर्घ्यादिविधिपूर्वकम् ॥ ७८ ॥ ॥ दीर्घतमा उवाच ॥ ॥ सर्वत्र कुशलं ब्रह्मन्सुदर्शन महामते ॥
मम वेदाटवीनाथकृपया नाशुभं क्वचित् ॥ ७९ ॥ तवापि कुशलं ब्रह्मन्किं सुखागमनं तथा ॥ किं वाऽऽगमनकार्यं ते सुदर्शन ममाश्रमे ॥ ८० ॥
स्वनयस्य पुरोधास्त्वं खलु वेदविदां वरः ॥ तं विहाय महाराजं मधुरापुरवासिनम् ॥ ८१ ॥ महत्या सेनया सार्धं किमर्थं त्वमिहागतः ॥ इत्युक्तो
दीर्घतमसा तदानीं स सुदर्शनः ॥ ८२ ॥ उवाच तं महात्मानं मुनिं ज्वलिततेजसम् ॥ सर्वत्र मे सुखं ब्रह्मन्भवतः कृपया सदा ॥ ८३ ॥ भगवन्स्व
नयो राजा साष्टांगं प्रणिपत्य तु ॥ त्वां प्राह प्रश्रितं वाक्यं मन्मुखेन शृणुष्व तत् ॥ ८४ ॥ ॥ स्वनय उवाच ॥ ॥ कक्षीवांस्ते सुतो ब्रह्म
न्गंधमादनपर्वते ॥ स्नानं कुर्वन्नगस्त्यस्य तीर्थे संप्रति वर्तते ॥ ८५ ॥ तस्य रूपं तपो धर्ममाचारान्वैदिकांस्तथा ॥ वेदशास्त्रप्रवीणत्वमाभि
जात्यं च तादृशम् ॥ ८६ ॥ लोकोत्तरमिदं सव विज्ञाय तव नंदने ॥ मनोरमां सुतां तस्मै दातुमिच्छाम्यहं मुने ॥ ८७ ॥ मृगयाकौतुकी चाहं
गंधमादनपर्वतम् ॥ आगतो मुनिशार्दूल वर्त्ते युष्मत्सुतांतिके ॥८८॥ पित्रनुज्ञां विना नाहमुद्वहेयं सुतां तव ॥ इति ब्रूते तव सुतः कक्षीवान्मुनिस
त्तम ॥८९॥ तद्भावां मत्सुतां तस्मै दातुं मेऽनुग्रहं कुरु ॥ प्रैषयं च समीपं ते सेनया च सुदर्शनम् ॥ ९० ॥ ॥ सुदर्शन उवाच ॥ ॥ इति मां भगव
न्राजा प्राहिणोत्तव सन्निधिम् ॥ तद्भवाननुमन्यस्व राज्ञस्तस्य चिकीर्षितम् ॥ ९१ ॥ ॥ श्रीसूत उवाच ॥ ॥ इत्युक्त्वा विररामाथ स्वनयस्य
पुरोहितः ॥ ततो दीर्घतमाः प्राह स्वनयस्य पुरोहितम् ॥ ९२ ॥ ॥ दीर्घतमा उवाच ॥ ॥ सुदर्शन भवत्त्वेवं कथितं स्वनयेन यत् ॥ ममा
भीष्टतमं ह्येतत्पाणिग्रहणमंगलम् ॥ ९३ ॥ आगमिष्याम्यहं विप्र गन्धमादनपर्वतम् ॥ इत्युक्त्वा स मुनिर्विप्रा महादीर्घतमा मुनिः ॥ ९४ ॥
वेदाटवीपतिं नत्वा भक्तिप्रवणचेतसा ॥ सुदर्शनेन सहितः सेतुमुद्दिश्य निर्ययौ ॥ ९५ ॥ षड्भिर्दिनैर्मुनिः पुण्यं प्रययौ गन्धमादनम् ॥ अग
स्तितीर्थतीरं च गत्वा दीर्घतमा मुनिः ॥ ९६ ॥ अथ पुत्रं ददर्शाग्रे कक्षीवंतं महामुनिः ॥ कक्षीवान्पितरं दृष्ट्वा ववन्दे नाम कीर्तयन् ॥ ९७ ॥
ततो दीर्घतमा योगी स्वांकमारोप्य तं सुतम् ॥ मूर्ध्न्युपाघ्राय सस्नेहं सस्वजे पुलकाकुलः ॥ ९८ ॥ कुशलं परिपप्रच्छ तदा दीर्घतमा ऋषिः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सर्ववेदास्त्वयाधीताः कक्षीवन्किमु वत्सक ॥ ९९ ॥ शास्त्राण्यपाठीः किं त्वं वा वत्स सव वदस्व मे ॥ इति पृष्टः स्वपित्रा स सर्वं वृत्तं तमब्रवीत् ॥ ॥ १००॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे सेतुमाहात्म्येऽगस्तितीर्थप्रशंसायां कक्षीवदुद्वाहोद्योगवर्णनंनाम षोडशोऽध्यायः ॥ १६ ॥ ॥ छ ॥ ॥ श्रीसूत उवाच ॥ ॥ पुनरित्याह कक्षीवान्पितरं तं मुनीश्वराः ॥ यथोदंकेन गुरुणा प्रेषितोऽहमिहाधुना ॥ १ ॥ समागतोस्मि तीर्थेऽस्मिन्नागस्त्ये मुनिसत्तम ॥ स्वनयस्य सुतोद्वाहसिद्ध्यर्थं गुरुचोदितः ॥ २ ॥ उपायं तन्निगदितमत्र कुर्वन्यवर्तिषम् ॥ वर्षत्रयावसाने मामुद्वाहोपायसंयुतम् ॥ ३ ॥ स्वनयोत्रैव तिष्ठन्तमासस्साद यदृच्छया ॥ स च मामेत्य कन्यां ते दास्यामीति वचोऽब्रवीत् ॥ ४ ॥ ततोस्मदनुरोधेन त्वामाह्वयदयं नृपः ॥ इतीरयित्वा पितरं कक्षीवान्विरराम सः ॥ ५ ॥ सुदर्शनोऽथ विप्रेंद्रः पुरोधाः स्वनयस्य सः ॥ प्रययौ राजसविधं स्वनयाय निवेदितुम् ॥ ६ ॥ राजानं तं समासाद्य स्वनयं स सुदर्शनः ॥ प्राप्तं निवेदयामास तं दीर्घतमसं मुनिम् ॥ ७ ॥ ततः स राजा स्वनयो मुनिं प्राप्तं पुरोहितात् ॥ श्रुत्वा विनिर्ययौ द्रष्टुं सहसा पटमण्डपात् ॥ ८ ॥ अगस्त्यतीर्थतीरे तं सपुत्रमृषिसत्तमम् ॥ ददर्श राजा स्वनयो ब्रह्माणमिव देवराट् ॥ ९ ॥ ववंदे दीर्घतमसश्चरणौ लोकमंगलौ ॥ उत्थाप्य नृपतिं विप्रास्तदा दीर्घतमा मुनिः ॥ ॥ १० ॥ आशिषं प्रयुयोजाथ स्वनयाय नृपाय सः ॥ अत्रांतरे समायात उदंकोऽपि महानृषिः ॥ ११ ॥ रामसेतौ धनुष्कोटौ स्नातुं शिष्यगणैर्वृतः ॥ लक्षसंख्यो मुनिगणस्तेन साकं मुनीश्वरः ॥ १२ ॥ उदंकोऽगस्त्यतीर्थेस्मिन्स्नातुं संप्राप्तवान्मुनिः ॥ उदंकमागतं दृष्ट्वा कक्षीवान्प्रणनाम तम् ॥ १३ ॥ अकरोदाशिषं विप्रः शिष्यायाथ गुरुस्तदा ॥ अथ दीर्घतमा विप्रस्तमुदंकं महामुनिम् ॥ १४ ॥ कुशलं परिपप्रच्छ सोऽपि तं मुनिपुंगवम् ॥ उभौ तौ मुनिशार्दूलौ सर्वलोकेषु विश्रुतौ ॥ १५ ॥ कथयामासतुस्तत्र कथाः पापप्रणाशिनीः ॥ अथ राजाप्युदंकं तं प्रणनाम मुनीश्वरम् ॥ १६ ॥ उदंकोप्याशिषं तस्मै प्रायुंक्त स्वनयाय वै ॥ राजाथ स्वनयः प्रीतस्तत्र वाक्यमभाषत ॥ १७ ॥ मुनिं तं दीर्घतमसं विवाहः क्रियतामिति ॥ तथास्त्वित्यवदत्सोऽपि तदा दीर्घतमा मुनिः ॥ १८ ॥ श्व एव क्रियतां राजन्सुमुहूर्ते महामते ॥ अत्रैव पाणिग्रहणं क्रियतां गन्धमादने ॥ १९ ॥ तस्मादिहानय क्षिप्रं कन्यामंतःपुरं तथा ॥ इत्युक्तः स्वनयो राजा गत्वा स्वपटमण्डपम् ॥ २० ॥ आहूय शतसंख्याकान्वृद्धान्वर्षवरांस्तदा[1] ॥ आनेतुं प्रेषयामास कन्यामंतःपुरं तथा ॥ २१ ॥ ते वर्षवरमुख्यास्तु स्वनयेन प्रचोदिताः ॥ मनोजवान्समारुह्य वाजिनो मधुरां

१ वर्षवरान्–षण्ढान्–इत्यर्थः । 'षण्ढो वर्षवरस्तुल्यः क्लीबः पण्डो नपुंसके'–इत्यमरः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विभावर्यां महाध्वनिः ॥ ४८ ॥ उदभूत्प्रलयांभोधिवीचिकोलाहलोपमः ॥ तेन शब्देन महता कक्षीवान्प्रत्यबुध्यत ॥ ४९ ॥ तत
स्तु स्वनयोनाम राजा सानुचरो बली ॥ मृगयाकौतुकी तत्र मधुरापतिराययौ ॥ ५० ॥ विनिघ्नन्स गजान्सिंहान्वराहान्महि
षान्रुरून् ॥ अन्यान्मृगविशेषांश्च स राजा न्यवधीच्छरैः ॥ ५१ ॥ सामात्यो मृगयासक्तो रथवाजिगजैर्युतः ॥ अगस्त्यतीर्थसविधमा
ससाद भटान्वितः ॥ ५२ ॥ स राजा मृगयाश्रांतः श्रांतसैनिकसंवृतः ॥ तत्तीर्थतीरप्रांतेषु निषसाद महीपतिः ॥ ५३ ॥ ततः प्रभाते विमले कक्षी
वान्मुनिसत्तमः ॥ अगस्त्यतीर्थे स्नात्वाऽसौ संध्यां पूर्वामुपास्य च ॥ ५४ ॥ तस्य तीरे जपन्मंत्रांस्तस्थौ नियमसंयुतः ॥ अत्रांतरे तीर्थवराद्गज
एको विनिर्ययौ ॥ ५५ ॥ चतुर्दंतो महाकायः कैलास इव मूर्तिमान् ॥ स समुत्थाय तत्तीर्थादगात्कक्षीवदंतिकम् ॥ ५६ ॥ तमागतमुदंकोक्त
लक्षणैरुपलक्षितम् ॥ तदा निरीक्ष्य कक्षीवानारोढुं स्नानमातनोत् ॥ ५७ ॥ नमस्कृत्य च तत्तीर्थं श्लाघमानो मुहुर्मुहुः ॥ आरुरोह च
कक्षीवांश्चतुर्दंतं महागजम् ॥ ५८ ॥ आरुह्य तं चतुर्दंतं रजताचलसंनिभम् ॥ स्वनयस्य पुरीमेव कक्षीवान्गंतुमैच्छत ॥ ५९ ॥ तमारूढं
चतुर्दंतं श्वेतदंतावलोत्तमम् ॥ स वीक्ष्य निश्चिकायैनं कक्षीवानिति भूपतिः ॥ ६० ॥ प्रसन्नहृदयो राजा तस्यांतिकमुपागमत् ॥ तदा
भ्याशमुपागम्य कक्षीवंतं नृपोऽब्रवीत् ॥ ६१ ॥ ॥ स्वनय उवाच ॥ ॥ त्वं ब्रह्मन्कस्य पुत्रोऽसि नाम किं तव मे वद ॥ गजमेनं समारुह्य
कुत्र वा गन्तुमिच्छसि ॥ स्वनयेनैवमुक्तस्तु कक्षीवान्वाक्यमब्रवीत् ॥ ६२ ॥ ॥ कक्षीवानुवाच ॥ ॥ पुत्रोऽहं दीर्घतमसः कक्षीवानिति
विश्रुतः ॥ ६३ ॥ स्वनयस्य तु राजर्षेर्गच्छामि नगरं प्रति ॥ अहमुद्वोढुमिच्छामि तस्य कन्यां मनोरमाम् ॥ ६४ ॥ चतुर्दंतगजारूढस्तत्प्रतिज्ञां
च पूरयन् ॥ स्वनयस्य सुतापाणिं ग्रहीष्यामि नराधिप ॥ ६५ ॥ तद्भाषितं समाकर्ण्य श्रोत्रपीयूषवर्षणम् ॥ हर्षसंफुल्लनयनः स्वनयो वाक्यम
ब्रवीत् ॥ ६६ ॥ कक्षीवन्भोः कृतार्थोस्मि स एव स्वनयो ह्यहम् ॥ उद्वोढुमिच्छति भवान्यस्य कन्यां मनोरमाम् ॥ ६७ ॥ स्वागतं ते मुनिश्रेष्ठ
कक्षीवन्बालतापस ॥ मम कन्यां गृहाण त्वं तपोधन मनोरमाम् ॥ ६८ ॥ तया सह चरन्धर्मान्गार्हस्थ्यं प्रतिपालय ॥ राज्ञोक्तः स तदोवाच
कक्षीवान्धर्मतत्परः ॥ राजानं स्वनयं प्रीतं मधुरापुरवासिनम् ॥ ६९ ॥ ॥ कक्षीवानुवाच ॥ ॥ पिता दीर्घतमानाम वेदारण्ये मम प्रभो ॥
॥ ७० ॥ आस्ते तपश्चरन्सौम्यो नियमाचारतत्परः ॥ तस्यांतिकं प्रेषय त्वं विप्रमेकं धरापते ॥ ७१ ॥ तथोक्तः स तदा राजा स्वनयो हृष्टमा
नसः ॥ अनेकसेनया सार्धं प्राहिणोत्स्वपुरोधसम् ॥ ७२ ॥ विप्रं सुदर्शनं नाम वेदारण्यस्थलं प्रति ॥ सुदर्शनः समादिष्टः स्वनयेन नृपेण

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गृहं प्रति ॥ २२ ॥ उद्वाहार्थमुपायं ते वत्स वक्ष्यामि तच्छृणु ॥ रामसेतुं प्रयाहि त्वं गंधमादनपर्वतम् ॥ २३ ॥ तत्रागस्त्यकृतं तीर्थं सर्वाभीष्टप्रद
यकम् ॥ भुक्तिमुक्तिप्रदं पुंसां सर्वपापनिबर्हणम् ॥ २४ ॥ विद्यते स्नाहि तत्र त्वं सर्वमंगलसाधने ॥ त्रिवर्षं वस तत्र त्वं नियमाचारसंयुतः ॥ २५ ॥
वर्षेषु त्रिषु यातेषु चतुर्थे वत्सरे ततः ॥ निर्गमिष्यति मातंगः कश्चित्तीर्थोत्तमात्ततः ॥ २६ ॥ चतुर्दंतो महाकायः शरदंभ्रसमच्छविः ॥ तं गजं
गिरिसंकाशं स्नात्वा तत्र समारुह ॥ २७ ॥ आरुह्य तं गजं वत्स स्वनयस्य पुरीं व्रज ॥ चतुर्दंतगजस्थं त्वां दृष्ट्वा शक्रमिवापरम् ॥ २८ ॥ राजर्षिः
स्वनयो धीमान्हर्षव्याकुललोचनः ॥ स्वकन्यायाः कृते दुःखं त्यजेदेव हृदि स्थितम् ॥ २९ ॥ पुरा हि प्रतिजज्ञे सा तस्य पुत्री मनोरमा ॥
चतुर्दंतं महाकायं गजं सर्वांगपांडुरम् ॥ ३० ॥ आरुह्य यः समागच्छेत्स मे भर्ता भवेदिति ॥ स्वकन्यायाः प्रतिज्ञां तां समाकर्ण्य स भूपतिः ॥
॥ ३१ ॥ दुःखाकुलमना भूत्वा सततं पर्यचिंतयत् ॥ स्वनये चिंतयत्येवं नारदः समुपागमत् ॥ ३२ ॥ तमागतं मुनिं दृष्ट्वा राजर्षिरतिधार्मिकः ॥
प्रत्युद्गम्य मुदा युक्तः पाद्यार्घ्याद्यैरपूजयत् ॥ ३३ ॥ प्रणम्य नारदं राजा वचनं चेदमब्रवीत् ॥ कन्येयं मम देवर्षे प्रतिज्ञामकरोत्पुरा ॥ ३४ ॥ चतु
र्दंतं महाकायं गजं सर्वांगपांडुरम् ॥ आरुह्य यः समागच्छेत्स मे भर्ता भवेदिति ॥ ३५ ॥ चतुर्दंतो महाकायो गजः सर्वांगपांडुरः ॥ संभवेदिंद्रभ
वने भूतले नैव विद्यते ॥ ३६ ॥ इयं च दुस्तरामेनां प्रतिज्ञां बालिशाऽकरोत् ॥ इयं प्रतिज्ञातितरां सततं बाधते हि माम् ॥ ३७ ॥ अनूढा हि पितुः
कन्या सर्वदा शोकमावहेत् ॥ इति तस्य वचः श्रुत्वा स्वनयं नारदोऽब्रवीत् ॥ ३८ ॥ मा विषीदस्व राजर्षे तस्या ईदृग्विधः पतिः ॥ भविष्यत्य
चिरादेव पृथिव्यां ब्राह्मणोत्तमः ॥ ३९ ॥ कक्षीवानिति विख्यातो जामाता ते भविष्यति ॥ इत्युक्त्वा नारदमुनिर्ययावाकाशमार्गतः ॥ ४० ॥ स्व
नयस्तद्वचः श्रुत्वा नारदेन प्रभाषितम् ॥ आकांक्षते दिवारात्रं तादृग्विधसमागमम् ॥ ४१ ॥ अतः सौम्य महाभाग कक्षीवन्बालतापस ॥ अग
स्त्यतीर्थमद्य त्वं स्नातुं गच्छ त्वरान्वितः ॥ ४२ ॥ सर्वमंगलसिद्धिस्ते भविष्यति न संशयः ॥ उदंकेनैवमुक्तोऽथ कक्षीवान्द्विजपुंगवः ॥ ४३ ॥ अनु
ज्ञातश्च गुरुणा प्रययौ गंधमादनम् ॥ संप्राप्यागस्त्यतीर्थं च तत्र सस्नौ जितेंद्रियः ॥ ४४ ॥ क्षेत्रोपवासमकरोद्दिनमेकं मुनीश्वरः ॥ अपरेद्युः पुनः
स्नात्वा पारणामकरोद्द्विजः ॥ ४५ ॥ रात्रौ तत्रैव सुष्वाप कक्षीवान्धर्मतत्परः ॥ एवं नियमयुक्तस्य तस्य कक्षीवतो मुनेः ॥ ४६ ॥ एकेन दिवसे
नोनं वर्षत्रयमथागमत् ॥ अथ वर्षत्रयस्यांते तस्मिन्नेव दिने मुनिः ॥ ४७ ॥ अन्वास्य पश्चिमां संध्यां सुखं सुष्वाप तत्तटे ॥ याममात्रावशिष्टायां

१ शरच्चन्द्रसमच्छविः—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रणगंधर्वदेवर्षिगणसंकुलः ॥ दर्शनात्स्पर्शनान्नृणां महापातकनाशनः ॥ ४७ ॥ तत्रास्ति हनुमत्कुंडमिति लोकेषु विश्रुतम् ॥ महादुःखप्रशमनं स्वर्गमोक्षफलप्रदम् ॥ ४८ ॥ नरकक्लेशशमनं तथा दारिद्र्यमोचनम् ॥ पुत्रप्रदमपुत्राणामस्त्रीणां स्त्रीपदं नृणाम् ॥ ४९ ॥ तत्र त्वं प्रयतः स्नात्वा सर्वाभीष्टप्रदायिनीम् ॥ पुत्रीयेष्टिं च तत्तीरे कुरुष्व सुसमाहितः ॥ ५० ॥ तेन ते शतभार्यासु प्रत्येकं तनयो नृप ॥ एकैकस्तु भवेच्छीघ्रं मा कुरुष्वात्र संशयम् ॥ ५१ ॥ तथोक्तो नृपतिर्विप्रैर्ऋत्विग्भिः सपुरोहितैः ॥ तत्क्षणेनैव ऋत्विग्भिर्भार्याभिश्च पुरोधसा ॥ ५२ ॥ वृतोमात्यैश्च भृत्यैश्च यज्ञसंभारसंयुतः ॥ प्रययौ दक्षिणांभोधौ गन्धमादनपर्वतम् ॥ ५३ ॥ हनुमत्कुंडमासाद्य तत्र सस्नौ ससैनिकः ॥ मासमात्रं स तत्तीरे न्यवसत्स्नानमाचरन् ॥ ५४ ॥ ततो वसंते संप्राप्ते चैत्रमासि नृपोत्तमः ॥ इष्टिमारब्धवांस्तत्र पुत्रीयां सपुरोहितः ॥ ५५ ॥ सम्यक्कर्माणि चक्रुस्ते ऋत्विजः सपुरोधसः ॥ सपत्नीकस्य राजर्षेस्तथा धर्मसखस्य तु ॥ ५६ ॥ इष्टौ तस्य समाप्तायां हनूमत्कुंडतीरतः ॥ पुरोहितो हुतोच्छिष्टं प्राशयद्राजयोषितः ॥ ५७ ॥ ततो धर्मसखो राजा हनूमत्कुंडवारिषु ॥ सम्यक्चकारावभृथस्नानं भार्याशतान्वितः ॥ ५८ ॥ ऋत्विग्भ्यो दक्षिणाः प्रादादसंख्यातास्तु भूरिशः ॥ ग्रामांश्च प्रददौ राजा ब्राह्मणेभ्यो द्विजोत्तमाः ॥ ५९ ॥ सामात्यः सपरीवारः सपत्नीकः स धार्म्मिकः ॥ राजा ततो निववृते पुरीं स्वां प्रति नंदितः ॥ ६० ॥ ततः कतिपये काले गते दशममासि वै ॥ शतं भार्याः शतं पुत्रान्सुषुवुर्गुणवत्तरान् ॥ ६१ ॥ अथ प्रीतमना राजा वीरो धर्मसखो महान् ॥ स्नातः शुद्धश्च संकल्प्य जातकर्माकरोत्तदा ॥ ६२ ॥ गोभूतिलहिरण्यादि ब्राह्मणेभ्यो ददौ बहु ॥ द्वौ पुत्रौ ज्येष्ठभार्यायाः पूर्वजोऽवरजस्तदा ॥ ६३ ॥ सर्वे ववृधिरे पुत्रा एकाधिकशतं द्विजाः ॥ प्रौढेषु तेषु राजासौ तेभ्यो राज्यं विभज्य तु ॥ ६४ ॥ दत्त्वा च प्रययौ सेतुं सभार्यो गन्धमादनम् ॥ हनुमत्कुंडमासाद्य तपोऽतप्यत तत्तटे ॥ ६५ ॥ महान्कालो व्यतीयाय राज्ञस्तस्य तपस्यतः ॥ राज्ञो धर्मसखस्यास्य ध्यायमानस्य शूलिनम् ॥ ६६ ॥ ततो बहुतिथे काले गते धर्मसखो नृपः ॥ कालधर्मं ययौ तत्र धार्म्मिकश्शांतमानसः ॥ ६७ ॥ पत्न्योपि तस्य राजर्षेरनुजग्मुः पतिं तदा ॥ ज्येष्ठपुत्रः सुचन्द्रोपि संस्कृत्य पितरं ततः ॥ ६८ ॥ अकरोच्छ्राद्धपर्यंतं कर्माणि श्रद्धया सह ॥ राजा सभार्यो वैकुंठं मरणादत्र जग्मिवान् ॥ ६९ ॥ सुचन्द्रमुख्यास्ते सर्वे राजपुत्रा महौजसः ॥ स्वस्वराज्यं बुभुजिरे भ्रातरस्त्यक्तमत्सराः ॥ ७० ॥ एवं वः कथितं विप्रा हनूमत्कुंडवैभवम् ॥ राज्ञो धर्मसखस्यापि चरित्रं परमाद्भुतम् ॥ ७१ ॥ तत्सर्वं कामसिद्ध्यर्थं स्नायात्कुंडे हनूमतः ॥ ७२ ॥ अध्यायमेनं पठते मनुष्यः शृणोति वा यः सुसमाहितो द्विजाः ॥ सोऽनंतमाप्नोति सुखं परत्र क्रीडेत

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सार्द्धं दिवि देववृन्दैः ॥ ७३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे सेतुमाहात्म्ये हनुमत्कुंडप्रशंसायां धर्मसखशतपुत्रावाप्तिवर्णनंनाम पञ्चदशोऽध्यायः ॥ १५ ॥ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ कुंडे हनुमतः स्नात्वा स्वयं रुद्रेण सेविते ॥ अगस्तितीर्थं विप्रेंद्रास्ततो गच्छेत्समाहितः ॥ १ ॥ एतद्विनिर्मितं तीर्थं साक्षाद्वै कुम्भयोनिना ॥ प्रवर्तमाने कलहे पुरा वै मेरुविंध्ययोः ॥ २ ॥ निरुद्धभुवनाभोगो ववृधे विंध्यपर्वतः ॥ तदा प्राणिषु सर्वेषु निरुच्छ्वासेषु देवताः ॥ ३ ॥ कैलासं पर्वतं गत्वा शंभवे तद्व्यजिज्ञपन् ॥ तदा स पार्वतीपाणिग्रहणोत्सुककौतुकी ॥ ४ ॥ प्रेषयित्वा वसिष्ठादीन्पार्वतीं याचितुं मुनीन् ॥ कुंभज त्वं निगृह्णीष्व विंध्याद्रिमिति सोऽन्वशात् ॥ ५ ॥ ततः स कुम्भजः प्राह भगवंतं पिनाकिनम् ॥ उद्वाहवेषं ते देव न द्रक्ष्येहं कथं विभो ॥ ६ ॥ इति विज्ञापितः शंभुः पुनः कुंभजमब्रवीत् ॥ कुंभजोद्वाहवेषं ते पार्वत्या सहितो ह्यहम् ॥ ७ ॥ वेदारण्ये महापुण्ये दर्शयिष्याम्यसंशयः ॥ तद्गच्छ शीघ्रं विंध्याद्रिं निग्रहीतुं मुनीश्वर ॥ ८ ॥ एवमुक्तस्ततोगस्त्यो विन्ध्याद्रिं स निगृह्य च ॥ पादाक्रमणमात्रेण समीकुर्वन्महीतलम् ॥ ९ ॥ चरित्वा दक्षिणान्देशान्गन्धमादनमन्वगात् ॥ स विदित्वा महर्षिस्तु गन्धमादनवैभवम् ॥ १० ॥ तत्र तीर्थं महापुण्यं स्वनाम्ना निर्ममे मुनिः ॥ लोपामुद्रासखस्तत्र वर्ततेऽद्यापि कुंभजः ॥ ११ ॥ तत्र स्नात्वा च पीत्वा च न भूयो जन्मभाग्भवेत् ॥ इह लोके त्रिकालेपि तत्तीर्थसदृशं द्विजाः ॥ ॥ १२ ॥ तीर्थं न विद्यते पुण्यं भुक्तिमुक्तिफलप्रदम्[1] ॥ सर्वाभीष्टप्रदं नृणां यत्तीर्थस्नानवैभवात् ॥ १३ ॥ सुदीर्घतमसः पुत्रः कक्षीवान्नाम नामतः ॥ लेभे मनोरमां नाम स्वनयस्य सुतां प्रियाम् ॥ १४ ॥ कक्षीवतः कथा सेयं पुण्या पापविनाशिनी ॥ तां कथां वः प्रवक्ष्यामि तच्छृणुध्वं मुनीश्वराः ॥ १५ ॥ अस्ति दीर्घतमानाम मुनिः परमधार्मिकः ॥ तस्य पुत्रः समभवत्कक्षीवानिति विश्रुतः ॥ १६ ॥ उपनीतः स कक्षीवान्ब्रह्मचारी जितेंद्रियः ॥ वेदाभ्यासाय स गुरोः कुले वासमकल्पयत् ॥ १७ ॥ उदंकस्य गुरोर्गेहे वसन्दीर्घतमःसुतः ॥ सोऽध्यैष्ट चतुरो वेदान्सांगाञ्छास्त्राणि षट् तथा ॥ १८ ॥ इतिहासपुराणानि तथोपनिषदोऽपि च ॥ उषित्वा षष्टिवर्षाणि कक्षीवान्गुरुसन्निधौ ॥ १९ ॥ प्रयास्यन्स्वगृहं विप्रा गुरवे दक्षिणामदात् ॥ उवाच वै गुरुर्विद्वान्कक्षीवान्ब्रह्मवित्तमः ॥ २० ॥ ॥ कक्षीवानुवाच ॥ ॥ अहं गृहं प्रयास्यामि कुर्वनुज्ञां महामुने ॥ अवलोक्य कृपादृष्ट्या मां रक्षोदंक सांप्रतम् ॥ उदंकस्त्वेवमुदितः कक्षीवंतमथाब्रवीत् ॥ २१ ॥ ॥ उदंक उवाच ॥ ॥ अनुजानामि कक्षीवन्गच्छ त्वं स्व

---

१ भुक्तिमुक्तिप्रवर्द्धनम्—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सुतोऽभवत् ॥ लालयानः सुतं राजा मुदं लेभे परात्पराम्॥२१॥आंदोलिकाशयानस्य सूनोस्तस्य कदाचन ॥ वृश्चिकोऽकुट्टयत्पादे पुच्छेनोग्रविषा
ग्निना ॥ २२ ॥ कुट्टनाद्वृश्चिकस्यासावरुदत्तनयो भृशम् ॥ ततस्तन्मातरः सर्वाः प्रारुदञ्छोककातराः ॥ २३ ॥ परिवार्यात्मजं विप्राः सध्वनिः
संकुलोऽभवत् ॥ आर्तध्वनिं स शुश्राव राजा धर्मसखस्तदा ॥ २४ ॥ उपविष्टः सभामध्ये सहामात्यपुरोहितः ॥ अथ प्राहिणोत्सद्राजा सौविदल्लं
स वेदितुम् ॥ २५ ॥ अन्तःपुरबहिर्द्वारं सौविदल्लः समेत्य सः ॥ षंढवृद्धान्समाहूय वाक्यमेतदभाषत ॥ २६ ॥ षंढाः किमर्थमधुना रुदंत्यन्तःपुर
स्त्रियः ॥ तत्परिज्ञायतां तत्र गत्वा रोदनकारणम् ॥ २७ ॥ एतदर्थं हि मां राजा प्रेरयामास संसदि ॥ इत्युक्तास्तु परिज्ञाय निदानं रोदनस्य
ते ॥ २८ ॥ निर्गम्यांतःपुरात्तस्मै यथावृत्तं न्यवेदयत् ॥ स षंढकवचः श्रुत्वा सौविदल्लः सभां गतः ॥ २९ ॥ राज्ञे निवेदयामास पुत्रं वृश्चिकपी
डितम् ॥ ततो धर्मसखो राजा श्रुत्वा वृत्तांतमीदृशम् ॥ ३० ॥ त्वरमाणः समुत्थाय सामात्यः सपुरोहितः ॥ प्रविश्यांतःपुरं सार्द्धं मांत्रिकैर्विषहा
रिभिः ॥ ३१ ॥ चिकित्सयामास सुतमौषधाद्यैरनेकशः ॥ जातस्वास्थ्यं ततः पुत्रं लालयित्वा स भूपतिः ॥ ३२ ॥ मानयित्वा च मंत्रज्ञान्रत्नकां
चनमौक्तिकैः ॥ निष्क्रम्यांतःपुराद्राजा भृशं चिंतासमाकुलः ॥ ३३ ॥ ऋत्विक्पुरोहितामात्यैस्तां सभां समुपाविशत् ॥ तत्र धर्मसखो राजा
समासीनो वरासने ॥ उवाचेदं वचो युक्तमृत्विजः सपुरोहितान् ॥ ३४ ॥ ॥ धर्मसख उवाच ॥ ॥ दुःखायैवैकपुत्रत्वं भवति ब्राह्मणो
त्तमाः ॥ ३५ ॥ एकपुत्रत्वतो नृणां वरा चैव ह्यपुत्रता ॥ नित्यं व्यपाययुक्तत्वाद्वरमेव ह्यपुत्रता ॥ अहं भार्याशतं विप्रा उदवोढं विचिंत्य
तु ॥ ३६ ॥ वयश्च समतिक्रांतं सपत्नीकस्य मे द्विजाः ॥ प्राणा मम च भार्याणामस्मिन्पुत्रे व्यवस्थिताः ॥ ३७ ॥ तन्नाशे मम भार्याणां सर्वासां
च मृतिर्ध्रुवा ॥ ममापि प्राणनाशः स्यादेकपुत्रस्य मारणे ॥ ३८ ॥ अतो मे बहुपुत्रत्वं केनोपायेन वै भवेत् ॥ तमुपायं मम ब्रूत ब्राह्मणा वेदवि
त्तमाः ॥ ३९ ॥ एकैकः शतभार्यासु पुत्रो मे स्याद्यथा गुणी ॥ तत्कर्म ब्रूत यूयं तु शास्त्रमालोक्य धर्मतः ॥ ४० ॥ महता लघुना वापि कर्मणा
दुष्करेण वा ॥ फलं यद्यपि तत्साध्यं करिष्येऽहं न संशयः ॥ ४१ ॥ युष्माभिरुदितं कर्म करिष्यामि न संशयः ॥ कृतमेव हि तद्वित्त शपेऽहं
सुकृतैर्मम ॥ ४२ ॥ अस्ति चेदीदृशं कर्म येन पुत्रशतं भवेत् ॥ तत्कर्म कुत्र कर्तव्यं मयेति वदताधुना ॥ ४३ ॥ इति पृष्टास्तदा राज्ञा ऋत्विजः
सपुरोहिताः ॥ संभूय सर्वे राजानमिदमूचुः सुनिश्चितम् ॥ ४४ ॥ ॥ ऋत्विज ऊचुः ॥ ॥ अस्ति राजन्प्रवक्ष्यामो येन पुत्रशतं तव ॥ भवेद्ध
र्मेण महता शतभार्यासु कैकय ॥ ४५ ॥ अस्ति कश्चिन्महापुण्यो गन्धमादनपर्वतः ॥ दक्षिणांबुधिमध्ये यः सेतुरूपेण वर्तते ॥ ४६ ॥ सिद्धचा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लोकमगाद्ब्रह्मा शिवाल्लब्धमनोरथः ॥ ६२ ॥ तदाप्रभृति देवाश्च मुनयश्च द्विजोत्तमाः ॥ ब्रह्मकुण्डं समासाद्य चक्रुर्यागान्विधानतः ॥ ६३ ॥
तस्मादियक्षवो मर्त्याः कुर्युर्यज्ञानिहैव हि ॥ ६४ ॥ मनुजदेवमुनीश्वरवंदितं सकलसंसृतिनाशकरं द्विजाः ॥ जलजसंभवकुण्डमिदं शुभं सकल
पापहरं सकलार्थदम् ॥ ६५ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे सेतुमाहात्म्ये ब्रह्मकुण्डप्रशंसायां
ब्रह्मशापविमोक्षणवर्णनंनाम चतुर्दशोऽध्यायः ॥ १४ ॥ ॥ श्रीसूत उवाच ॥ ॥ ब्रह्मकुण्डे महापुण्ये स्नानं कृत्वा समाहितः ॥ नरो
हनूमतः कुण्डमथ गच्छेद्द्विजोत्तमाः ॥ १ ॥ पुरा हतेषु रक्षःसु समाप्ते रणकर्मणि ॥ रामादिषु निवृत्तेषु गंधमादनपर्वते ॥ २ ॥ सर्व
लोकोपकाराय हनूमान्मारुतात्मजः ॥ सर्वतीर्थोत्तमं चक्रे स्वनाम्ना तीर्थमुत्तमम् ॥ ३ ॥ विदित्वा वैभवं यस्य स्वयं रुद्रेण सेव्यते ॥
तस्य तीर्थस्य सदृशं न भूतं न भविष्यति ॥ ४ ॥ यत्र स्नाता नरा यांति शिवलोकं सनातनम् ॥ यस्मिंस्तीर्थे महापुण्ये
महापातकनाशने ॥ ५ ॥ सर्वलोकोपकाराय निर्मिते वायुसूनुना ॥ सर्वाणि नरकाण्यासञ्च्छून्यान्येव चिराय वै ॥ ६ ॥ वैभवं
तस्य तीर्थस्य शंकरो वेत्ति वा न वा ॥ यत्र धर्मसखोनाम राजा केकयवंशजः ॥ ७ ॥ भक्त्या सह पुरा स्नात्वा शतं पुत्रानवाप्त
वान् ॥ ॥ ऋषय ऊचुः ॥ ॥ सूत धर्मसखस्याद्य चरितं वक्तुमर्हसि ॥ हनूमत्कुण्डतीर्थे यो लेभे स्नात्वा शतं सुतान् ॥ ८ ॥
॥ ॥ श्रीसूत उवाच ॥ ॥ शृणुध्वमृषयो यूयं चरितं तस्य भूपतेः ॥ ९ ॥ अद्य धर्मसखस्याहं प्रवक्ष्यामि समासतः ॥ राजा धर्मसखोनाम
विजितारिः सुधार्मिकः ॥ १० ॥ बभूव नीतिमान्पूर्वं प्रजापालनतत्परः ॥ तस्य भार्याशतं विप्रा बभूव पतिदैवतम् ॥ ११ ॥ स पालयन्महीं
राजा सशैलवनकाननाम् ॥ तासु भार्यासु तनयं नाविंदद्वंशवर्द्धनम् ॥ १२ ॥ पुत्रार्थं स महीपालो बहून्यत्नानथाकरोत् ॥ अकरोच्च महादानं
पुत्रार्थं स महीपतिः ॥ १३ ॥ अश्वमेधादिभिर्यज्ञैरयजच्च सुरान्प्रति ॥ तुलापुरुषमुख्यानि ददौ दानानि भूरिशः ॥ १४ ॥ आमध्यरात्रमन्नानि
सर्वेभ्योऽप्यनिवारितम् ॥ प्रायच्छद्बहुसूपानि सस्योपेतानि भूमिपः ॥ १५ ॥ पितॄनुद्दिश्य च श्राद्धमकरोद्विधिपूर्वकम् ॥ संतानदायिनो मंत्रांश्च
जाप नियतेंद्रियः ॥ १६ ॥ एवमादीन्बहून्धर्मान्पुत्रार्थं कृतवान्नृपः ॥ पुत्रमुद्दिश्य सततं कुर्वन्धर्माननुत्तमान् ॥ १७ ॥ राजा दीर्घेण कालेन
वृद्धतां प्रत्यपद्यत ॥ कदाचित्तस्य वृद्धस्य यतमानस्य भूपतेः ॥ १८ ॥ पुत्रस्तु चंद्रनामाभूज्ज्येष्ठपत्न्यां मनोरमः ॥ जातं पुत्रं जनन्यस्ताः सर्वा वैष
म्यवर्जिताः ॥ १९ ॥ समं संवर्द्धयामासुः क्षीरादिभिरनुत्तमाः ॥ राज्ञश्च सर्वमातॄणां पौराणाम्मंत्रिणां तथा ॥ २० ॥ मनोनयनसंतोषजनकोऽयं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अहं लिंगस्य नाद्राक्षमादिमस्येति सत्यवाक् ॥ ३६ ॥ ऊर्ध्वं गवेषयित्वाथ ब्रह्माप्यागच्छदत्र सः ॥ आगत्य च वचः प्राह छद्मना चतुराननः ॥ ॥ ३७ ॥ ॥ ब्रह्मोवाच ॥ ॥ अहमद्राक्षमस्यांतं लिंगस्येति मृषा पुनः ॥ तयोस्तद्वचनं श्रुत्वा ब्रह्मविष्ण्वोर्महेश्वरः ॥ मिथ्यावादिनमाहेदं प्रहस्य चतुराननम् ॥ ३८ ॥ ॥ ईश्वर उवाच ॥ ॥ असत्यं यदवोचस्त्वं चतुरानन मत्पुरः ॥ ३९ ॥ तस्मात्पूजा न ते भूयाल्लोके सर्वत्र सर्वदा ॥ अथ विष्णुं पुनः प्राह भगवान्परमेश्वरः ॥ ४० ॥ यस्मात्सत्यमवोचस्त्वं कमलायाः पते हरे ॥ तस्मात्ते मत्समा पूजा भविष्यति न संशयः ॥ ४१ ॥ ततो ब्रह्मा विषण्णः सञ्छंकरं प्रत्यभाषत ॥ स्वामिन्ममापराधं त्वं क्षमस्व करुणानिधे ॥ ४२ ॥ एकोपराधः क्षंतव्यः स्वामिभिर्जगदीश्वरैः ॥ ततो महेश्वरोऽवादीद्ब्रह्माणं परिसांत्वयन् ॥ ४३ ॥ ॥ ईश्वर उवाच ॥ ॥ न मिथ्यावचनं मे स्याद्ब्रह्मन्वक्ष्यामि ते शृणु ॥ गच्छ त्वं सहसा वत्स गन्धमादनपर्वतम् ॥४४॥ तत्र क्रतून्कुरुष्व त्वं मिथ्यादोषप्रशांतये ॥ ततो विधूतपापस्त्वं भविष्यसि न संशयः ॥ ॥४५॥तेन श्रौतेषु ते ब्रह्मन्स्मार्तेष्वपि च कर्मसु ॥ पूजा भविष्यति सदा न पूजा प्रतिमासु ते॥४६॥इत्युक्त्वा भगवानीशस्तत्रैवांतरधीयत ॥ ततो ब्रह्मा ययौ विप्रा गंधमादनपर्वतम् ॥ ४७ ॥ ईजे च क्रतुकर्तारं क्रतुभिः पार्वतीपतिम् ॥ अष्टाशीतिसहस्राणि वर्षाणि मुनिपुंगवाः ॥ ४८ ॥ पौंडरीकादिभिः सर्वैरध्वरैर्भूरिदक्षिणैः ॥ इन्द्रादिसर्वदेवानां सन्निधावयजच्छिवम् ॥ तेन तुष्टोभवच्छंभुर्वरमस्मै प्रदत्तवान् ॥ ४९ ॥ ॥ ईश्वर उवाच ॥ ॥ मिथ्योक्तिदोषस्ते नष्टः कृतैरेतैर्मखैरिह ॥ ५० ॥ चतुरानन ते पूजा श्रौतस्मार्तेषु कर्मसु ॥ भविष्यत्यमला ब्रह्मन्न पूजा प्रतिमासु ते ॥ ५१ ॥ यागस्थलमिदं तेऽद्य ब्रह्मकुण्डमिति प्रथाम् ॥ गमिष्यति त्रिलोकेस्मिन्पुण्यं पापविनाशनम् ॥ ५२ ॥ ब्रह्मकुण्डाभिधे तीर्थे सकृद्यः स्नानमाचरेत् ॥ मुक्तिद्वारार्गलं तस्य भिद्यते तत्क्षणाद्द्विजे ॥ ५३ ॥ ब्रह्मकुण्डसमुद्भूतं ललाटे भस्म धारयन् ॥ मायाकपाटं निर्भिद्य मुक्तिद्वारं प्रयास्यति ॥ ५४ ॥ ब्रह्मकुण्डोत्थितं भस्म ललाटे यो न धारयेत् ॥ स्वपितुर्बीजसंभूतो न मातरि सुतस्तु सः ॥५५॥ ब्रह्मकुण्डसमुद्भूतभस्मधारणतो विधे ॥ ब्रह्महत्यायुतं नश्येत्सुरापानायुतं तथा ॥ ५६ ॥ गुरुतल्पायुतं नश्येत्स्वर्णस्तेयायुतं तथा ॥ तत्संसर्गायुतं नश्येत्सत्यमुक्तं मया विधे ॥ ॥ ५७ ॥ ब्रह्मकुण्डसमुद्भूतभस्मधारणवैभवात् ॥ भूतप्रेतपिशाचाद्या नश्यंति क्षणमात्रतः ॥ ५८ ॥ इत्युक्त्वा भगवानीशस्तत्रैवांतरधीयत ॥ यज्ञेष्वथ समाप्तेषु मुनयश्च जितेंद्रियाः ॥ ५९ ॥ इन्द्रादिदेवताश्चैव सिद्धचारणकिन्नराः ॥ अन्ये च देवनिवहा गंधमादनपर्वते ॥ ६० ॥ तां यज्ञभूमिमाश्रित्य स्वयं रुद्रेण सेविताम् ॥ निरंतरमवर्तंत विदित्वा तस्य वैभवम् ॥ ६१ ॥ यथाविधि ततो यज्ञान्समाप्य बहुदक्षिणान् ॥ सत्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्रिपुंड्रं वा ब्रह्मकुंडस्थभस्मना ॥ १० ॥ नराधमो न कुर्याद्यः सुखं नास्य कदाचन ॥ ब्रह्मकुंडसमुद्भूतभस्मनिंदारतस्तु यः ॥ ११ ॥ उत्पत्तौ तस्य सांकर्यमनुमेयं विपश्चिता ॥ ब्रह्मकुंडसमुद्भूतं भस्मैतल्लोकपावनम् ॥ १२ ॥ अन्यभस्मसमं यस्तु न्यूनं वा वक्ति मानवः ॥ उत्पत्तौ तस्य सांकर्यमनुमेयं विपश्चिता ॥ १३ ॥ ब्रह्मकुंडसमुद्भूतेऽप्यस्मिन्भस्मनि जाग्रति ॥ भस्मांतरेण मनुजो धारयेद्यस्त्रिपुंड्रकम् ॥ १४ ॥ उत्पत्तौ तस्य सांकर्यमनुमेयं विपश्चिता ॥ कदाचिदपि यो मर्त्यो भस्मैतत्तु न धारयेत् ॥ १५ ॥ उत्पत्तौ तस्य सांकर्यमनुमेयं विपश्चिता ॥ ब्रह्मकुंडसमुद्भूतं भस्म दद्याद्द्विजाय यः ॥ १६ ॥ चतुरर्णवपर्यंता तेन दत्ता वसुन्धरा ॥ संदेहो नात्र कर्तव्यस्त्रिवां शपथयाम्यहम् ॥ १७ ॥ सत्यंसत्यं पुनः सत्यमुद्धृत्य भुजमुच्यते ॥ ब्रह्मकुंडोद्भवं भस्म धारयध्वं द्विजोत्तमाः ॥ १८ ॥ एतद्धि पावनं भस्म ब्रह्मयज्ञसमुद्भवम् ॥ पुरा हि भगवान्ब्रह्मा सर्वलोकपितामहः ॥ १९ ॥ सन्निधौ सर्वदेवानां पर्वते गंधमादने ॥ ईशशापनिवृत्त्यर्थं क्रतून्सर्वान्समातनोत् ॥ २० ॥ विधाय विधिवत्सर्वानध्वरान्बहुदक्षिणान् ॥ मुमुचे सहसा ब्रह्मा शंभुशापाद्द्विजोत्तमाः ॥ २१ ॥ तदेतत्तीर्थमासाद्य स्नानं कुर्वंति ये नराः ॥ ते महादेवसायुज्यं प्राप्नुवंति न संशयः ॥ २२ ॥ ॥ ॥ ऋषय ऊचुः ॥ ॥ व्यासशिष्य महाप्राज्ञ पुराणार्थविशारद ॥ चतुर्दशानां लोकानां स्रष्टारं चतुराननम् ॥ २३ ॥ शंभुः केनापराधेन शप्तवान्भारतीपतिम् ॥ शापश्च कीदृशस्तस्य पुरा दत्तो हरेण वै ॥ एतत्सर्वं मुने ब्रूहि तत्त्वतोऽस्माकमादरात् ॥ २४ ॥ ॥ श्रीसूत उवाच ॥ पुरा बभूव कलहो ब्रह्मविष्ण्वोः परस्परम् ॥ २५ ॥ कंचिद्धेतुं समुद्दिश्य स्पर्धया श्लाघमानयोः ॥ अहं कर्त्ता न मत्तोऽन्यः कर्त्तास्ति जगतीतले ॥ ॥ २६ ॥ एवमाह हरिं ब्रह्मा ब्रह्माणं च हरिस्तथा ॥ एवं विवादः सुमहान्प्रावर्त्तत पुरा तयोः ॥ २७ ॥ एतस्मिन्नंतरे विप्राः कुर्वतोः कलहं मिथः ॥ तयोर्गर्वविनाशाय प्रबोधार्थं च देवयोः ॥ २८ ॥ मध्ये प्रादुरभूल्लिंगं स्वयंज्योतिरनामयम् ॥ तौ दृष्ट्वा विस्मितौ लिंगं ब्रह्मविष्णू परस्परम् ॥ २९ ॥ समयं चक्रतुर्विप्रा देवानां सन्निधौ पुरा ॥ अनाद्यंतं महालिंगं यदेतद्दृश्यते पुरः ॥ ३० ॥ अनंतादित्यसंकाशमनंताग्निसमप्रभम् ॥ आवयोरस्य लिंगस्य योंऽतमादिं च द्रक्ष्यति ॥ ३१ ॥ स भवेदधिको लोके लोककर्ता च स प्रभुः ॥ अहमूर्ध्वं गमिष्यामि लिंगस्यांतं गवेषयन् ॥ ३२ ॥ गवेषणाय मूलस्य त्वमधस्ताद्व्रज ॥ इति तस्य वचः श्रुत्वा तथेत्याह रमापतिः ॥ ३३ ॥ एवं तौ समयं कृत्वा मार्गणाय विनिर्गतौ ॥ विष्णुर्वराहरूपेण गतोऽधस्ताद्गवेषितुम् ॥ ३४ ॥ हंसतां भारतीजानिः स्वीकृत्योपरि निर्ययौ ॥ अधो लोकान्विचित्याथो विष्णुर्वर्षगणान्बहून् ॥ यथास्थानं समागत्य बभाषे देवसन्निधौ ॥ ३५ ॥ ॥ विष्णुरुवाच ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विनष्टाशेषदुःखस्य तत्तीर्थस्नानवैभवात् ॥ अमृतत्वमभूद्यस्मादगस्त्यानुजजन्मनः॥४१॥ ततो ह्यमृतवापीति प्रथाऽस्यासीन्मुनीश्वराः ॥ अत्र तीर्थे नरा ये तु वर्षत्रयमतंद्रिताः॥४२॥स्नानं कुर्वंति ते सत्यममृतत्वं प्रयांति हि ॥ एवं त्वमृतवापीति प्रथा तद्वैभवं तथा ॥ युष्माकं कथितं विप्राः किं भूयः श्रोतुमिच्छथ ॥ ४३ ॥ ॥ ऋषय ऊचुः ॥ ॥ एकांतरामनाथाख्या तस्य क्षेत्रस्य वै मुने ॥ ४४ ॥ कथं समागता सूत वक्तुमेतत्त्वमर्हसि ॥ अस्माकं मुनिशार्दूल तच्छुश्रूषातिभूयसी ॥ ४५ ॥ ॥ श्रीसूत उवाच ॥ ॥ पुरा दाशरथी रामः ससुग्रीवविभीषणः ॥ लक्ष्मणेन युतो भ्रात्रा मंत्रज्ञेन हनूमता ॥ ४६ ॥ वानरैर्बध्यमाने तु सेतावंबुधिमध्यतः ॥ चिंतयन्मनसा सीतामेकांते सममंत्रयत् ॥ ४७ ॥ तेषु मंत्रयमाणेषु रावणादिवधं प्रति ॥ उल्लोलतरकल्लोलो जुघोष जलधिर्भृशम् ॥ ४८ ॥ अर्णवस्य महाभीमे जृंभमाणे महाध्वनौ ॥ अन्योन्यकथितां वार्तां नाशृण्वंस्ते परस्परम् ॥ ४९ ॥ ततः किंचिदिव क्रुद्धो भ्रुकुटीकुटिलेक्षणः ॥ भ्रूभंगलीलया रामो नियम्य जलधिं तदा ॥ ॥ ५० ॥ न्यमंत्रयत विप्रेंद्रा राक्षसानां वधं प्रति ॥ एकांतेऽमंत्रयत्तत्र तैः सार्धं राघवो यतः ॥ ५१ ॥ एकांतरामनाथाख्यं तत्क्षेत्रमभवद्द्विजाः ॥ सोयं नियमितो वार्धी रामभ्रूभंगलीलया ॥ ५२ ॥ अद्यापि निश्चलजलस्तत्प्रदेशेषु दृश्यते ॥ एकांतरामनाथाख्यं तदेतत्क्षेत्रमुत्तमम् ॥ ५३ ॥ आगत्यामृतवाप्यां च स्नात्वा नियमपूर्वकम् ॥ रामादीनपि सेवंते ते सर्वे मुक्तिमाप्नुयुः ॥ ५४ ॥ अद्वैतविज्ञानविवेकशून्या विरक्तिहीनाश्च समाधिहीनाः ॥ यागाद्यनुष्ठानविवर्जिताश्च स्नात्वात्र यास्यंत्यमृतं द्विजेंद्राः ॥ ५५ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे सेतुमाहात्म्ये अमृतवापीप्रशंसायामगस्त्यभ्रातृविमुक्तिवर्णनंनाम त्रयोदशोऽध्यायः ॥ १३ ॥ ॥ श्रीसूत उवाच ॥ ॥ स्नात्वा त्वमृतवाप्यां वै सेवित्वैकांतराघवम् ॥ जितेंद्रियो नरः स्नातुं ब्रह्मकुंडं ततो व्रजेत् ॥ १ ॥ सेतुमध्ये महातीर्थं गंधमादनपर्वते ॥ ब्रह्मकुंडमिति ख्यातं सर्वदारिद्र्यभेषजम् ॥ २ ॥ विद्यते ब्रह्महत्यानामयुतायुतनाशनम् ॥ दर्शनं ब्रह्मकुंडस्य सर्वपापौघनाशनम् ॥ ३ ॥ किं तस्य बहुभिस्तीर्थैः किं तपोभिः किमध्वरैः ॥ महादानैश्च किं तस्य ब्रह्मकुंडविलोकिनः ॥ ४ ॥ ब्रह्मकुंडे सकृत्स्नानं वैकुंठप्राप्तिकारणम् ॥ब्रह्मकुंडसमुद्भूतं भस्म येन धृतं द्विजाः॥ ॥ ५ ॥ तस्यानुगास्त्रयो देवा ब्रह्मविष्णुमहेश्वराः ॥ ब्रह्मकुंडसमुद्भूतभस्मना यस्त्रिपुंड्रकम् ॥ ६ ॥ करोति तस्य कैवल्यं करस्थं नात्र संशयः ॥ तद्भस्मपरमाणुर्वा यो ललाटे धृतो भवेत् ॥ ७ ॥ तावदेवास्य मुक्तिः स्यान्नात्र कार्या विचारणा ॥ तत्कुंडभस्मना मर्त्यः कुर्यादुद्धूलनं तु यः ॥ ८ ॥ तस्य पुण्यफलं वक्तुं शंकरो वेत्ति वा न वा ॥ ब्रह्मकुंडसमुद्भूतं भस्म यो नैव धारयेत् ॥ ९ ॥ रौरवे नरके सोऽयं पतेदाचंद्रतारकम् ॥ उद्धूलनं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्मुदा ॥ निद्रां परित्यजन्ब्राह्मे मुहूर्ते विष्णुचिंतकः ॥ १५ ॥ स्नानं कुर्वन्नुषःकाले नमन्संध्यां प्रसन्नधीः ॥ गायत्रीं प्रजपन्विप्राः पूजयन्हरिशंकरौ ॥
॥ १६ ॥ वेदाध्यायी शास्त्रपाठी मध्याह्नेऽतिथिपूजकः ॥ श्रोता पुराणपाठानामग्निकार्येष्वतंद्रितः ॥ १७ ॥ पंचयज्ञपरो नित्यं वैश्वदेवबलिप्रदः ॥
प्रत्यब्दं श्राद्धकृत्पित्रोस्तथान्यश्राद्धकृद्द्विजाः ॥ १८ ॥ एवं निनाय कालं स नित्यानुष्ठानतत्परः ॥ तस्यैवं वर्तमानस्य तपश्चरत उत्तमम् ॥ १९ ॥
सहस्रवर्षाण्यगमञ्छंकरासक्तचेतसः ॥ तथापि शंकरो नास्याययौ प्रत्यक्षतां तदा ॥ २० ॥ ततस्त्वगस्त्यभ्रातासौ ग्रीष्मे पंचाग्निमध्यगः ॥
भास्करे दत्तदृष्टिश्च मौनव्रतसमन्वितः ॥ २१ ॥ तिष्ठन्कनिष्ठिकांगुल्यां वामपादस्य निश्चलः ॥ ऊर्ध्वबाहुर्निरालंबस्तपस्तेपेऽतिदारुणम् ॥ २२ ॥
अथ तस्य प्रसन्नात्मा महादेवो घृणानिधिः ॥ प्रादुरासीत्स्वया दीप्त्या दिशो दश विभासयन् ॥ २३ ॥ ततोऽद्राक्षीन्मुनिः शंभुं सांबं वृषभसंस्थि
तम् ॥ दृष्ट्वा प्रणम्य तुष्टाव भवानीपतिमीश्वरम् ॥ २४ ॥ ॥ मुनिरुवाच ॥ ॥ नमस्ते पार्वतीनाथ[1] नीलकंठ महेश्वर ॥ शिव रुद्र महादेव नम
स्ते शंभवे विभो ॥ २५ ॥ श्रीकंठोमापते शूलिन्भगनेत्रहराव्यय ॥ गंगाधर विरूपाक्ष नमस्ते रुद्र मन्यवे ॥ २६ ॥ अंतकारे कामशत्रो देवदेव
जगत्पते ॥ स्वामिन्पशुपते शर्व नमस्ते शतधन्वने ॥ २७ ॥ दक्षयक्षविनाशाय स्नायूनां पतये नमः ॥ निचेरवे नमस्तुभ्यं पुष्टानां पतये नमः ॥
॥ २८ ॥ भूयोभूयो नमस्तुभ्यं महादेव कृपालय ॥ दुस्तराद्भवसिंधोर्मां तारयस्व त्रिलोचन ॥ २९ ॥ अगस्त्यसोदरेणैवं स्तुतः शंभुरभाषत ॥
प्रीणयन्वचसा स्वेन कुंभजस्यानुजं मुनिम् ॥ ३० ॥ ॥ ईश्वर उवाच ॥ ॥ कुंभजानुज वक्ष्यामि मुक्त्युपायं तवानघ ॥ सेतुमध्ये महातीर्थं
गंधमादनपर्वते ॥ ३१ ॥ मंगलाख्यस्य तीर्थस्य नातिदूरेण वर्तते ॥ तत्र गत्वा कुरु स्नानं ततो मुक्तिमवाप्स्यसि ॥३२॥ तत्तीर्थसेवनान्नान्यो मोक्षो
पायो लघुस्तव ॥ न हि तत्तीर्थवैशिष्ट्यं वक्तुं शक्यं मयापि च ॥ ३३ ॥ संदेहो नात्र कर्तव्यस्त्वयाद्य मुनिसत्तम॥ तस्मात्तत्रैव गच्छ त्वं यदीच्छसि
भवक्षयम् ॥ ३४ ॥ इत्युक्त्वा भगवानीशस्तत्रैवांतरधीयत ॥ ततो देवस्य वचनादगस्त्यस्य सहोदरः ॥ ३५ ॥ गत्वा सेतुं समुद्रे तु गंधमादनपर्वते॥
ईश्वरेणैव गदितं तीर्थं तच्छीघ्रमासदत् ॥ ३६ ॥ तत्र तीर्थे महापुण्ये स्नातानां मुक्तिदायिनि ॥ एकांतरामनाथाख्ये क्षेत्रालंकरणे शुभे ॥ ३७ ॥
सस्नौ नियमपूर्वं स त्रीणि वर्षाणि वै द्विजः ॥ ततश्चतुर्थवर्षे तु समाधिस्थो महामुनिः ॥ ३८ ॥ ब्रह्मनाड्यां प्राणवायुं मूर्द्धन्यारोप्य योगतः ॥
प्राणान्निर्गमयामास ब्रह्मरंध्रेण तत्र सः ॥ ३९ ॥ ततोऽगस्त्यानुजः सोयं परित्यज्य कलेवरम् ॥ अवाप मुक्तिं परमां तस्य तीर्थस्य वैभवात् ॥४०॥

[1] पार्वतीकान्त–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न चिरान्नृप ॥ ८३ ॥ विजित्य शत्रूंश्च रणे पुनर्भूमिं प्रपत्स्यसे ॥ अतस्त्वं भार्यया सार्द्धं पुत्रेण च मनोजव ॥ ८४ ॥ गच्छ मंगलतीर्थं तद्गन्धमादनपर्वते ॥ अहमप्यागमिष्यामि तवानुग्रहकाम्यया ॥ ८५ ॥ पराशरस्त्वेवमुक्त्वा राजमुख्यैस्त्रिभिः सह ॥ प्रायात्सेतुं समुद्दिश्य स्नातुं मंगलतीर्थके ॥ ८६ ॥ राजादिभिः सह मुनिर्विलंघ्य विविधं वनम् ॥ वनप्रदेशदेशांश्च दस्युग्रामाननेकशः ॥ ८७ ॥ प्रययौ मंगलं तीर्थं गन्धमादनपर्वते ॥ तत्र संकल्प्य विधिवत्सस्नौ स मुनिपुंगवः ॥ ८८ ॥ तानपि स्नापयामास राजादीन्विधिपूर्वकम् ॥ तत्र श्राद्धं च भूपालश्चकार पितृतृप्तये ॥ ८९ ॥ तत्र मासत्रयं सस्नौ राजा पत्नी सुतस्तथा ॥ ततः पराशरमुनिः सस्नौ नियमपूर्वकम् ॥ ९० ॥ एवं मासत्रयं सस्नौ तैः साकं मुनिपुंगवः ॥ मंगलाख्ये महापुण्ये सर्वामंगलनाशने ॥ ९१ ॥ ततः पराशरमुनिः सर्वानर्थविनाशनम् ॥ रामस्यैकाक्षरं मंत्रं तदंते समुपादिशत् ॥ ९२ ॥ चत्वारिंशद्दिनं तत्र मंत्रमेकाक्षरं नृपः ॥ तत्र तीर्थे जजापासौ मुन्युक्तेनैव वर्त्मना ॥ ९३ ॥ एवमभ्यसतस्तस्य मंत्रमेकाक्षरं द्विजाः ॥ मुनिप्रसादात्पुरतो धनुः प्रादुरभूद्दृढम् ॥ ९४ ॥ अक्षयाविषुधी चापि खड्गौ च कनकत्सरू ॥ एकं चर्म गदा चैका तथैको मुसलोत्तमः ॥ ९५ ॥ एकः शंखो महानादो वाजियुक्तो रथस्तथा ॥ ससारथिः पताका च तीर्थादुत्तस्थुरग्रतः ॥ ९६ ॥ कवचं कांचनमयं वैश्वानरसमप्रभम् ॥ प्रादुर्बभूव तत्तीर्थात्प्रसादेन मुनेस्तथा ॥ ९७ ॥ हारकेयूरमुकुटकटकादिविभूषणम् ॥ तीर्थानां प्रवरात्तस्मादुत्थितं नृपतेः पुरः ॥ ९८ ॥ दिव्यांबरसहस्रं च तीर्थात्प्रादुरभूत्तदा ॥ माला च वैजयंत्याख्या स्वर्णपंकजशोभिता ॥ ९९ ॥ एतत्सर्वं समालोक्य मुनयेऽसौ न्यवेदयत् ॥ ततः पराशरमुनिर्जलमादाय तीर्थतः ॥ १०० ॥ अभ्यषिंचन्नरपतिं मंत्रपूतेन वारिणा ॥ ततोऽभिषिक्तो नृपतिर्मुनिना परिशोभितः ॥ १०१ ॥ सन्नद्धः कवची खड्गी चापबाणधरो युवा ॥ हारकेयूरमुकुटकटकादिविभूषितः ॥ १०२ ॥ दिव्यांबरधरश्चापि वाजियुक्तरथस्थितः ॥ शुशुभेऽतीव नृपतिर्मध्याह्न इव भास्करः ॥ १०३ ॥ तस्मै नृपतये तत्र ब्रह्माद्यस्त्रं महामुनिः ॥ सांगं च सरहस्यं च सोत्सर्गं सोपसंहृति ॥ १०४ ॥ उपादिशच्छक्तिपुत्रः सुमित्राजानये तदा ॥ मनोजवोऽथ मुनिना ह्याशीर्वादपुरःसरम् ॥ १०५ ॥ प्रेरितो रथमास्थाय प्रणम्य मुनिपुंगवम् ॥ प्रदक्षिणीकृत्य तदाभ्यनुज्ञातो महर्षिणा ॥ १०६ ॥ सार्द्धं पत्न्या च पुत्रेण प्रययौ विजयाय सः ॥ स गत्वा स्वपुरं राजा प्रदध्मौ जलजं तदा ॥ १०७ ॥ ततः शंखरवं श्रुत्वा गोलभस्तुससैनिकः ॥ युद्धाय निर्ययौ तूर्णं मनोजवनृपेण सः ॥ १०८ ॥ दिनत्रयं रणं जज्ञे गोलभेन नृपस्य वै ॥ ततश्चतुर्थे दिवसे गोलभं तु ससैनिकम् ॥ १०९ ॥ मनोजवो नृपो युद्धे ब्रह्मास्त्रेण व्यनाशयत् ॥ ततः सपुत्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भार्योऽयं पुरं प्राप्य निजं नृपः ॥ ११० ॥ पालयन्पृथिवीं सर्वां बुभुजे भार्यया सह ॥ तदाप्रभृति राजासौ नाहंकारं चकार वै ॥ १११ ॥
असूयादींस्तथा दोषान्वर्जयामास भूपतिः ॥ अहिंसानिरतो दांतः सदा धर्मपरोऽभवत् ॥ ११२ ॥ सहस्रं वत्सरानेवं ररक्ष स महीपतिः ॥ ततो
विरक्तो राजेन्द्रः पुत्रे राज्यं निधाय तु ॥ ११३ ॥ जगाम मंगलं तीर्थं गन्धमादनपर्वते ॥ तपश्चचार तत्रासौ ध्यायन्हृदि सदाशिवम् ॥ ११४ ॥
ततोऽचिरेण कालेन त्यक्त्वा देहं मनोजवः ॥ शिवलोकं ययौ राजा तस्य तीर्थस्य वैभवात ॥ ११५ ॥ तस्य भार्या सुमित्रापि तस्यालिंग्य तनुं
तदा ॥ अन्वारूढा चितां विप्राः प्राप तल्लोकमेव सा ॥ ११६ ॥ ॥ श्रीसूत उवाच ॥ ॥ एवंप्रभावं तत्तीर्थं श्रीमन्मंगलनामकम् ॥ मनोजवो
नृपो यत्र स्नात्वा तीर्थे महत्तरे ॥ ११७ ॥ शत्रून्विजित्य देहांते शिवलोकं ययौ स्त्रिया ॥ तस्मात्सर्वप्रयत्नेन सेव्यं मंगलतीर्थकम् ॥ ११८ ॥
तीर्थमेतदतिशोभनं शिवं भुक्तिमुक्तिफलदं नृणां सदा ॥ पापराशितृणतूलपावकं सेवत द्विजवरा विमुक्तये ॥ ११९ ॥ इति श्रीस्कांदे महा
पुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे सेतुमाहात्म्ये मंगलतीर्थप्रशंसायां मनोजवालक्ष्मीविनाशवर्णनंनाम द्वादशोऽध्या
यः ॥ १२ ॥ ॥ श्रीसूत उवाच ॥ ॥ मंगलाख्ये महातीर्थे नरः स्नात्वा विकल्मषः ॥ एकांतरामनाथाख्यं क्षेत्रं गच्छेत्ततः परम् ॥ १ ॥ तत्र
रामो जगन्नाथो जानक्या लक्ष्मणेन च ॥ हनुमत्प्रमुखैश्चापि वानरैः परिवारितः ॥ २ ॥ सन्निधत्ते सदा विप्रा लोकानुग्रहकाम्यया ॥ विद्यते पुण्यदा
तत्र नाम्ना ह्यमृतवापिका ॥ ३ ॥ तस्यां निमज्जतां नृणां न जरांतकजं भयम् ॥ अस्याममृतवाप्यां यः सश्रद्धं स्नाति मानवः ॥ ४ ॥ अमृ
तत्वं भजत्येष शंकरस्य प्रसादतः ॥ महापातकनाशिन्यामस्यां वाप्यां निमज्जताम् ॥ ५ ॥ अमृतत्वं हरो दातुं सन्निधत्ते सदा तटे ॥ ॥
ऋषय ऊचुः ॥ ॥ इयं ह्यमृतवापीति कुतो हेतोर्निगद्यते ॥ ६ ॥ अस्माकमेतद्ब्रूहि त्वं कृपया व्यासशासित ॥ तथैवामृतनामिन्या वापिकायाश्च
वैभवम् ॥ तृप्तिर्न जायतेऽस्माकं त्वद्वचोऽमृतपायिनाम् ॥ ७ ॥ ॥ श्रीसूत उवाच ॥ ॥ अस्या अमृतनामत्वं वैभवं च मनोहरम् ॥ ८ ॥
प्रवक्ष्यामि विशेषेण शृणुत द्विजसत्तमाः ॥ पुरा हिमवतः पार्श्वे नानामुनिसमाकुले ॥ ९ ॥ सिद्धचारणगंधर्वदेवकिन्नरसेविते ॥ सिंहव्याघ्रवराहेभम
हिषादिसमाकुले ॥ १० ॥ तमालतालहिंतालचंपकाशोकसंतते ॥ हंसकोकिलदात्यूहचक्रवाकादिशोभिते ॥ ११ ॥ पद्मेंदीवरकह्लारकुमुदाढ्यसरो
वृते ॥ सत्यवाञ्छीलवान्वाग्मी वशी कुंभजसोदरः ॥ १२ ॥ आस्ते तपश्चरन्नित्यं मोक्षार्थी शंकरप्रियः ॥ त्रिकालमर्चयञ्छंभुं वन्यैर्मूलफलादिभिः
॥ १३ ॥ आगतान्स्वाश्रमाभ्याशमतिथीन्वन्यभोजनैः ॥ पूजयन्नर्चयन्नग्निं संध्योपासनतत्परः ॥ १४ ॥ गायत्र्यादीन्महामंत्रान्कालेकाले जप

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

साधुसज्जनसंमतः ॥ ६० ॥ ततः सुमित्रा तं दृष्ट्वा पराशरमुपागतम् ॥ ववंदे चरणौ तस्य सपुत्रा सा पतिव्रता ॥ ६१ ॥ ततः पराशरेणेयं सुमित्रा परिसांत्विता ॥ आश्वासिता च मुनिना मा शोचस्वेति भामिनि ॥ ततः सुमित्रां पप्रच्छ शक्तिपुत्रो महामुनिः ॥ ६२ ॥ ॥ पराशर उवाच ॥ का त्वं सुश्रोणि कश्चासौ यश्चायं पतितोऽग्रतः ॥ ६३ ॥ अयं शिशुश्च कस्ते स्याद्वद तत्त्वेन मे शुभे ॥ पृष्टैवं मुनिना साध्वी तमुवाच महामुनिम् ॥ ६४ ॥ ॥ सुमित्रोवाच ॥ ॥ पतिर्ममायमस्याहं भार्या वै मुनिसत्तम ॥ आवाभ्यां जनितश्चायं चंद्रकांताभिधः सुतः ॥ ६५ ॥ अयं मनोजवोनाम राजा सोमकुलोद्भवः ॥ विक्रमाढ्यस्य तनयः शौर्ये विष्णुसमो बली ॥ ६६ ॥ सुमित्रानाम तस्याहं भार्या पतिमनुव्रता ॥ युद्धे विनिर्जितो राजा गोलभेन मनोजवः ॥ ६७ ॥ राज्याद्भ्रष्टो निरालंबो मया पुत्रेण चान्वितः ॥ वनं विवेश ब्रह्मर्षे क्रूरसत्त्वभयानकम् ॥६८॥ क्षुधया पीडितः पुत्रो ह्यावामन्नमयाचत ॥ निरन्नो विधुरो राजा दृष्ट्वा पुत्रं क्षुधार्दितम् ॥ ६९ ॥ शोकाकुलमना ब्रह्मन्मूर्च्छितः पतितो भुवि ॥ इति तद्वचनं श्रुत्वा शोकपर्याकुलाक्षरम्[1] ॥ ७० ॥ शक्तिपुत्रो मुनिः प्राह सुमित्रां तां पतिव्रताम् ॥ मनोजवस्य नृपतेर्भार्यामग्निशिखोपमाम् ॥ ॥ ७१ ॥ ॥ पराशर उवाच ॥ ॥ मनोजवस्य भार्ये ते मा भीर्भूयात्कथंचन ॥ युष्माकमशुभं सत्यमचिरान्नाशमेष्यति ॥ ७२ ॥ मूर्च्छां विहाय ते भद्रे क्षणादुत्थास्यते पतिः ॥ ततः पराशरो विप्रः पाणिना तं नराधिपम् ॥ ७३ ॥ पस्पर्श मंत्रं प्रजपन्ध्यात्वा देवं त्रियंबकम् ॥ ततो मनोजवो राजा करस्पृष्टो महामुनेः ॥ ७४ ॥ उत्थितः सहसा तत्र त्यक्त्वा मूर्च्छां तमोमयीम् ॥ ततः पराशरमुनिं प्रणम्य जगतीपतिः ॥ उवाच परमप्रीतः प्रांजलिर्विप्रसत्तमम् ॥ ७५ ॥ ॥ मनोजव उवाच ॥ ॥ पराशरमुने त्वद्य त्वत्पादाब्जनिषेवणात् ॥ ७६ ॥ मूर्च्छा मे विगता सद्यः पातकं चैव नाशितम् ॥ त्वद्दर्शनमपुण्यानां नैव सिध्येत्कदाचन ॥ ७७ ॥ रक्ष मां करुणादृष्ट्या च्यावितं शत्रुभिः पुरात् ॥ इत्युक्तः स मुनिः प्राह राजानं तं मनोजवम् ॥ ७८ ॥ ॥ पराशर उवाच ॥ ॥ उपायं ते प्रवक्ष्यामि राजञ्छत्रुजयाय वै ॥ रामसेतौ महापुण्ये गंधमादनपर्वते ॥ ७९ ॥ विद्यते मंगलं तीर्थं सर्वैश्वर्यप्रदायकम् ॥ सर्वलोकोपकाराय तस्मिन्सरसि राघवः ॥ ८० ॥ सन्निधत्ते सदा लक्ष्म्या सीतया राजसत्तम ॥ सपुत्रभार्यस्त्वं तत्र गत्वा स्नात्वा सभक्तिकम् ॥ ८१ ॥ क्षेत्रश्राद्धादिकं चापि तत्तीरे कुरु भूपते ॥ एवं कृते त्वया राजन्नलक्ष्मीः क्लेशकारिणी ॥ ८२ ॥ वैभवात्तस्य तीर्थस्य नाशं यास्यत्यसंशयम् ॥ मंगलानि च सर्वाणि प्राप्स्यसे

१ शोकपर्याकुलेक्षणम्—इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दिवसे तयोः॥ नैकोद्दिष्टविधानेन पार्वणेनापि वै प्रिये ॥३६॥ कृतं न हि मया भद्रे भूरिभोजनमेव वा ॥ तेन पापेन मे त्वद्य दुःखमेतत्समागतम् ॥ ॥ ३७ ॥ चैत्रमासे प्रिये चित्रानक्षत्रे पानकं मया ॥ पनसानां फलं स्वादु कदलीफलमेव वा ॥ ३८ ॥ तथा छत्रं सदंडं च रम्यं पादुकयोर्द्वयम् ॥ तांबूलानि च पुष्पाणि चंदनं चानुलेपनम् ॥ ३९ ॥ न दत्तं वेदविद्भ्यस्तु चित्रगुप्तस्य तुष्टये ॥ तेन पापेन मे त्वद्य दुःखमेतत्समागतम् ॥ ४० ॥ नाश्वत्थश्चूतवृक्षो वा न्यग्रोधस्तिंतिणी तथा ॥ पिचुमंदः कपित्थो वा तथैवामलकीतरुः ॥ ४१ ॥ नारिकेलतरुर्वापि स्थापितोऽध्वगशांतये ॥ तेन पापेन मे त्वद्य दुःखमेतत्समागतम् ॥ ४२ ॥ सम्मार्जनं च न कृतं शिवविष्णवालये मया ॥ न खानितं तटाकं च न कूपोपि ह्रदोऽपि वा ॥ ॥ ४३ ॥ न रोपितं पुष्पवनं तथैव तुलसीवनम् ॥ शिवविष्णवालयौ वापि निर्मितो न मया प्रिये ॥ ४४ ॥ तेन पापेन मे त्वद्य दुःखमेतत्समागतम् ॥ न मया पैतृके मासि पितॄनुद्दिश्य शोभने ॥ महालयं कृतं श्राद्धमष्टकाश्राद्धमेव वा ॥ ४५ ॥ नित्यश्राद्धं तथा काम्यं श्राद्धं नैमित्तिकं प्रिये ॥ न कृताः क्रतवश्चापि विधिवद्भूरिदक्षिणाः ॥ ४६ ॥ मासोपवासो न कृतः एकादश्यामुपोषणम् ॥ धनुर्मासेप्युषःकाले शंभुविष्णवादिदेवताः ॥ ४७ ॥ संपूज्य विधिवद्भद्रे नैवेद्यं न कृतं मया ॥ तेन पापेन मे त्वद्य दुःखमेतत्समागतम् ॥ ४८ ॥ हरिशंकरयोर्नाम्नां कीर्तनं न मया कृतम् ॥ उद्धूलनं त्रिपुण्ड्रं च जाबालोक्तैश्च सप्तभिः ॥ ४९ ॥ न धृतं भस्मना भद्रे रुद्राक्षं न धृतं मया ॥ जपश्च रुद्रसूक्तानां पंचाक्षरजपस्तथा ॥ ५० ॥ तथा पुरुषसूक्तस्य जपोऽप्यष्टाक्षरस्य च ॥ नैवकारि मया भद्रे नैवान्यो धर्मसंचयः ॥ ५१ ॥ तेन पापेन मे त्वद्य दुःखमेतत्समागतम् ॥ एवं स विलपन्राजा भार्यामाभाष्य खिन्नधीः ॥ ५२ ॥ मूर्च्छामुपाययौ विप्राः पपात च धरातले ॥ सुमित्रा पतितं दृष्ट्वा भार्या सा पतिमंगना ॥ ५३ ॥ आलिंग्य विललापाथ सपुत्रा भृशदुःखिता ॥ मम नाथ महाराज सोमान्वयधुरंधर ॥ ५४ ॥ मां विहाय क्व यातोऽसि सपुत्रां विजने वने ॥ अनाथां त्वामनुगतां सिंहत्रस्तां मृगीमिव ॥ ५५ ॥ मृतोऽसि यदि राजेंद्र तर्हि त्वामहमप्यरम् ॥ अनुव्रजामि विधवा न स्थास्ये क्षणमप्युत ॥ ५६ ॥ पितरं पश्य पतितं चन्द्रकांत सुत क्षितौ ॥ इत्युक्तश्चंद्रकांतोऽपि सुतो राज्ञः क्षुधार्दितः ॥ ५७ ॥ पितरं परिरभ्याथ निःशब्दं प्ररुरोद सः ॥ एतस्मिन्नंतरे विप्रा जटावल्कलसंवृतः ॥ ५८ ॥ भस्मोद्धूलितसर्वांगस्त्रिपुण्ड्रांकितमस्तकः ॥ रुद्राक्षमालाभरणः सितयज्ञोपवीतवान् ॥ ५९ ॥ पराशरोनाम मुनिराजगाम यदृच्छया ॥ तं शब्दमभिलक्ष्यासौ

१ साध्वि-इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दनपर्वते॥ सीताकुण्डस्य तीरे त्वं इष्ट्वा यागैः सदाशिवम् ॥ ६५ ॥ तस्मिन्सरसि च स्नायाः सर्वपापहरे शुभे ॥ ततः पूतो भवेश्शक्र ब्रह्महत्याविमो
चितः॥६६॥ देवलोकं पुनर्यायाः सर्वदुःखविवर्जितः ॥ सर्वपापहरं पुण्यं सीताकुण्डं विमुक्तिदम् ॥६७॥ महापातकसंघानां नाशकं परमामृतम् ॥
सर्वदुःखप्रशमनं सर्वदारिद्र्यनाशनम् ॥ ६८ ॥ धनधान्यप्रदं शुद्धं वैकुण्ठादिपदप्रदम् ॥ तस्मात्तत्र कुरुष्वेष्टिं सीतासरसि वृत्रहन् ॥ ६९ ॥ इत्युक्तः
सुरराजोऽसौ प्रययौ गंधमादनम् ॥ प्राप्य सीतासरो विप्राः स्नात्वेष्ट्वा च तदंतिके ॥ ७० ॥ प्रययौ स्वपुरीं भूयो ब्रह्महत्याविमोचितः ॥ एवं
प्रभावं तत्तीर्थं सीतायाः कुण्डमुत्तमम् ॥ ७१ ॥ राघवप्रत्ययार्थं हि प्रविश्य हुतवाहनम् ॥ संनिधौ सर्वदेवानां मैथिली जनकात्मजा ॥ ७२ ॥
विनिर्गता पुनर्वह्नेः स्थिता सर्वांगशोभना ॥ निर्ममे लोकरक्षार्थं स्वनाम्ना तीर्थमुत्तमम् ॥ ७३ ॥ तत्र सस्नौ स्वयं सीता तेन सीतासरः
स्मृतम् ॥ तत्र यो मानवः स्नाति सर्वान्कामाल्लँभेत सः ॥ ७४ ॥ तस्मिन्नुपस्पृश्य नरो द्विजेंद्रा दत्त्वा च दानानि पृथग्विधानि ॥ कृत्वा च
यज्ञान्बहुदक्षिणाभिर्लोकं प्रयायात्परमेश्वरस्य ॥ ७५ ॥ युष्माकमेवं प्रथितं मुनींद्राः सीतासरो वैभवमेतदुक्तम् ॥ शृण्वन्पठन्वै तदिहैव भोगा
न्भुक्त्वा परत्रापि सुखं लभेत ॥ ७६॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे सेतुमाहात्म्ये सीतासरःप्रशंसाया
मिंद्रब्रह्महत्याविमोक्षणं नामैकादशोऽध्यायः ॥ ११ ॥ ॥ श्रीसूत उवाच ॥ ॥ सीताकुण्डे महापुण्ये नरः स्नात्वा द्विजोत्तमाः ॥
ततस्तु मंगलं तीर्थमभिगच्छेत्समाहितः ॥ १ ॥ सन्निधत्ते सदा यत्र कमला विष्णुवल्लभा ॥ अलक्ष्मीपरिहाराय यस्मिन्सरसि वै सुराः
॥ २ ॥ शतक्रतुमुखाः सर्वे समागच्छंति नित्यशः ॥ तदेतत्तीर्थमुद्दिश्य ऋषयो लोकपावनम् ॥ ३ ॥ इतिहासं प्रवक्ष्यामि पुण्यं
पापविनाशनम् ॥ पुरा मनोजवो नाम राजा सोमकुलोद्भवः ॥ ४ ॥ पालयामास धर्मेण धरां सागरमेखलाम् ॥ अयष्ट स सुरान्यज्ञै
र्ब्राह्मणानन्नसंचयैः ॥ ५ ॥ तर्पयामास कव्येन प्रत्यब्दं पितृदेवताः ॥ त्रयीमध्यैष्ट[1] सततमपाठीच्छास्त्रमर्थवत् ॥ ६ ॥ व्यजेष्ट शत्रून्वीर्येण प्राणं
सीदीशकेशवौ ॥ अरंस्त नीतिशास्त्रेषु तथापाठीन्महामनून् ॥७॥ एवं स धर्मतो राजा पालयामास मेदिनीम् ॥ रक्षतस्तस्य राज्ञोऽभूद्राज्यं निहत
कंटकम् ॥ ८ ॥ अहंकारोऽभवत्तस्य पुत्रसंपद्विनाशनः ॥ अहंकारो भवेद्यत्र तत्र लोभो मदस्तथा ॥९॥ कामः क्रोधश्च हिंसा च तथाऽसूया विमो

१ त्रयीमध्यैष्ट—वेदं प्रथम मधीतवान्—इत्यर्थः । एतच्छ्लोकस्य समार्थकः श्लोको भट्टिकाव्ये यथा—"सोऽध्यैष्ट वेदांस्त्रिदशानयष्ट पितॄनपारात्सममस्त बन्धून् । व्यजेष्ट षड्वर्गमरंस्त नीतौ समूलघातं न्यवधीद श्वरीं" इति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हिनी ॥ भवंत्येतानि विप्रेंद्राः संपदां नाशहेतवः ॥ १० ॥ एतानि यत्र विद्यंते पुरुषे स विनश्यति ॥ क्षणेन पुत्रपौत्रैश्च सार्द्धं चाखिलसंपदा ॥ ॥ ११ ॥ बभूव तस्यासूया च जनविद्वेषिणी सदा ॥ असूयाकुलचित्तस्य वृथाहंकारिणस्तथा ॥ १२ ॥ लुब्धस्य कामदुष्टस्य मतिरेवं बभूव ह ॥ विप्रग्रामे करादानं करिष्यामीति निश्चितः ॥ १३ ॥ अकरोच्च तथा राजा निश्चित्य मनसा तदा ॥ धनं धान्यं च विप्राणां जहार किल लोभतः ॥ ॥ १४ ॥ शिवविष्ण्वादिदेवानां वित्तान्यादत्त रागतः ॥ शिवविष्ण्वादिदेवानां विप्राणां च महात्मनाम् ॥ १५ ॥ क्षेत्राण्यपजहारायमहंकारवि मूढधीः ॥ एवमन्याययुक्तस्य देवद्विजविरोधिनः ॥ १६ ॥ दुष्कर्मपरिपाकेन क्रूरेण द्विजपुंगवाः ॥ पुरं रुरोध बलवान्परदेशाधिपो रिपुः ॥ १७ ॥ गोलभोनाम विप्रेंद्राश्चतुरंगबलैर्युतः ॥ षण्मासं युद्धमभवद्गोलभेन दुरात्मनः ॥ १८ ॥ मनोजवस्य नृपतेरहंकाररतात्मनः ॥ ततः स गोलभेनाजौ जितो राज्यात्परिच्युतः ॥ १९ ॥ वनं सपुत्रदारः सन्प्रपेदे समनोजवः ॥ गोलभः पालयन्नास्ते मनोजवपुरे चिरम् ॥२०॥ चतुरंगबलोपेतस्तमुद्रा स्य रणे बली ॥ मनोजवोपि विप्रेंद्राः शोचन्स्त्रीपुत्रसंयुतः ॥ २१ ॥ क्षुत्क्षामः प्रस्खलञ्छश्वत्प्रविवेश महावनम् ॥ झिल्लिकागणसंघुष्टं व्याघ्रश्वापद भीषणम् ॥ २२ ॥ व्यात्तद्विरदचीत्कारं वराहमहिषाकुलम् ॥ तस्मिन्वने महाघोरे क्षुधया परिपीडितः ॥ २३ ॥ अयाचतान्नं पितरं मनोजवसुतः शिशुः ॥ अंब मेन्नं प्रयच्छ त्वं क्षुधा मां बाधते भृशम् ॥ २४ ॥ एवं स्वजननीं चापि प्रार्थयामास बालकः ॥ तन्मातापितरौ तत्र श्रुत्वा पुत्रस्य भाषितम् ॥ २५ ॥ शोकाभिभूतौ सहसा मोहं समुपजग्मतुः ॥ भार्यामथाब्रवीद्राजा सुमित्रांनाम नामतः ॥ २६ ॥ मुह्यमानश्च स मुहुः शुष्ककंठौ ष्ठतालुकः ॥ सुमित्रे किं करिष्यामि कुत्र यास्यामि का गतिः ॥ २७ ॥ मरिष्यत्यचिरादेष सुतो मे क्षुधयार्दितः ॥ किमर्थं ससृजे वेधा दुर्भाग्यं मां वृथा प्रिये ॥ २८ ॥ को वा मोचयिता दुःखमेतद्दुष्कर्मजं मम ॥ न पूजितो मया शंभुर्हरिर्वा पूर्वजन्मसु ॥ २९ ॥ तथान्या देवताः सूर्यविभाव सुमुखाः प्रिये ॥ तेन पापेन चाद्याहमस्मिञ्जन्मनि शोभने ॥ ३० ॥ अहंकाराभिभूतोऽस्मि विप्रक्षेत्राण्यपाहरम् ॥ शिवविष्ण्वादिदेवानां वित्तं चाप हृतं मया ॥ ३१ ॥ एवं दुष्कर्मबाहुल्याद्गोलभेन पराजितः ॥ वनं यातोस्मि विजनं त्वया सह सुतेन च ॥ ३२ ॥ निरन्नो निर्धनो दुःखी क्षुधितो ऽहं पिपासितः ॥ कथमन्नं प्रदास्यामि क्षुधिताय सुताय मे ॥ ३३ ॥ न मयान्नानि दत्तानि ब्राह्मणेभ्यः शुचिस्मिते ॥ न मया पूजितः शंभुर्विष्णु र्वा देवतांतरम् ॥ ३४ ॥ तेन पापेन मे त्वद्य दुःखमेतत्समागतम् ॥ न मयाग्नौ हुतं पूर्वं न तीर्थमपि सेवितम् ॥ ३५ ॥ मातृश्राद्धं पितृश्राद्धं मृताह

१ जनविद्वेषिणस्तथा—इ० पा० । २ रणदंशाधिपः—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सुखं सर्वस्य लोकस्य बभूव चिरदुःखिनः ॥ राक्षसस्य वधोत्पन्ना ब्रह्महत्या पुरंदरम् ॥ अन्वधावत्तदा भीमा नादयंती दिशो दश ॥४०॥ ॥ ऋषय ऊचुः ॥ ॥ न विप्रो राक्षसः सूत कपालाभरणो मुने ॥ तत्कथं ब्रह्महत्येंद्रं तद्वधात्समुपाद्रवत् ॥ ४१ ॥ ॥ श्रीसूत उवाच ॥ ॥ वक्ष्यामि परमं गुह्यं मुनींद्राः परमाद्भुतम् ॥४२॥ शृणुत श्रद्धया यूयं समाधाय स्वमानसम् ॥ पुरा विंध्यप्रदेशेषु त्रिवक्रोनाम राक्षसः ॥ ४३ ॥ तस्य भार्या गुणोपेता सौंदर्यगुणशालिनी ॥ सुशीलानाम सुश्रोणी सर्वलक्षणलक्षिता ॥ ४४ ॥ सा कदाचिन्मनोज्ञांगी सुवेषा चारुहासिनी ॥ विंध्यपादवनोद्देशे विचचार विलासिनी ॥ ४५ ॥ तस्मिन्वने शुचिर्नाम वर्तते स्म महामुनिः ॥ तपस्समाधिसंयुक्तो वेदाध्ययनतत्परः ॥ ४६ ॥ तस्याश्रमसमीपं तु सा ययौ वरवर्णिनी ॥ तां दृष्ट्वा स मुनिर्धैर्यं मुमोचानंगपीडितः॥ तामासाद्य वरारोहां बभाषे मुनिसत्तमः ॥ ४७ ॥ ॥ शुचिरुवाच ॥ ॥ ललने स्वागतं तेऽस्तु कस्य भार्या शुचिस्मिते ॥ ४८ ॥ किमागमनकृत्यं ते वनेऽस्मिन्नतिभीषणे ॥ श्रांतासि त्वं वरारोहे वसास्मिन्नुटजे मम ॥ ४९ ॥ तथोक्ता सा तु सुश्रोणी तं मुनिं प्रत्यभाषत ॥ त्रिवक्ररक्षोभार्याहं सुशीला नामतो मुने ॥५०॥ पुष्पावचयकामेन वनमेतत्समागता ॥ अपुत्राहं मुने भर्त्रा प्रेरिता पुत्रमिच्छता ॥ ५१ ॥ शुचिं मुनिं समाराध्य तस्मात्पुत्रमवाप्नुहि ॥ इति प्रतिसमादिष्टा पतिना त्वां समागता ॥५२॥ पुत्रमुत्पादय त्वं मे कृपां कुरु मुने मयि ॥ एवमुक्तः स तु शुचिः सुशीलां तामभाषत ॥ ५३ ॥॥ शुचिरुवाच ॥॥ त्वां दृष्ट्वा मम च प्रीतिः सुशीले विद्यतेऽधुना॥ मनोरथमहांभोधिं त्वमापूरय मामकम् ॥ ५४ ॥ इत्युक्त्वा स मुनिस्तत्र तया रेमे दिनत्रयम् ॥ तामुवाच मुनिः प्रीतः सुशीलां सुन्दराकृतिम्[1] ॥ ॥ ५५ ॥ तवोदरे महावीर्यः कपालाभरणाभिधः ॥ भविष्यति चिरं राज्यं पालयिष्यति मेदिनीम् ॥ ५६ ॥ सहस्रं वत्सरान्वत्सस्तपसा प्रीणयन्विधिम् ॥ पुरंदरं विनान्येभ्यो देवेभ्यो नास्य वध्यता॥५७॥ ईदृशस्ते सुतो भूयादिंद्रतुल्यपराक्रमः ॥ इत्युक्त्वा स मुनिर्नारीं काशीं शिवपुरीं ययौ ॥५८॥ सुशीला सापि सुषुवे कपालाभरणं सुतम् ॥ तं जघान मृधे शक्रो वज्रेण मुनिपुंगवाः ॥५९॥ शुचेर्बीजसमुद्भूतं तमिंद्रो न्यवधीद्यतः ॥ ततः पुरंदरः शक्रो जगृहे ब्रह्महत्यया ॥६०॥ धावति स्म तदा शक्रः सर्वांल्लोकान्भयाकुलः॥ धावंतमनुधावंती ब्रह्महत्या तमन्वगात्॥६१॥ अनुद्रुतो हि विप्रेंद्राः शक्रोऽयं ब्रह्महत्यया ॥ पितामहसदः[2] प्राप संतप्तहृदयो भृशम् ॥६२॥ न्यवेदयद्ब्रह्महत्यां ब्रह्मणे स पुरंदरः ॥ भगवँल्लोकनाथेयं ब्रह्महत्याति भीषणा॥६३॥बाधते मां प्रजानाथ तस्या नाशं ब्रवीहि मे ॥ पुरंदरेणैवमुक्तो ब्रह्मा प्राह दिवस्पतिम्॥६४॥ ब्रह्मोवाच ॥ सीताकुण्डं प्रयाहींद्र गंधमा

१ सुंदरीं—इ० पा० । २ पितामहपदम्—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्वरथपादातैरुद्धतै रेणुसंचयैः ॥ १५ ॥ शोषयञ्जलधीन्सिंधूंश्चूर्णयन्पर्वतानपि ॥ निःसाणध्वनिना विप्रा नादयन्रोदसी तथा ॥ १६ ॥ अश्वानां
हेषितरवैर्गजानामपि बृंहितैः ॥ रथनेमिस्वनैरुग्रैः सिंहनादैः पदातिनाम् ॥ १७ ॥ श्रोत्राणि दिग्गजानां च वितन्वन्बधिराणि सः ॥ अगमद्देवन
गरीं युयुत्सुरमरैः सह ॥ १८ ॥ तत इन्द्रादयो देवाः सेनाकलकलध्वनिम् ॥ श्रुत्वाभिनिर्य्ययुः पुर्या युद्धाभिमनसो द्विजाः ॥ १९ ॥ ततो युद्धं
समभवद्देवानां राक्षसैः सह ॥ अदृष्टपूर्वं जगति तथैवाश्रुतपूर्वकम् ॥ २० ॥ तत इन्द्रादयो देवा राक्षसाञ्जघ्नुराहवे ॥ राक्षसाश्च सुराञ्जघ्नुः समरे
विजिगीषवः ॥ २१ ॥ द्वन्द्वयुद्धं च समभूदन्योन्यं सुररक्षसाम् ॥ कपालाभरणेनाजौ युयुधे बलवृत्रहा ॥ २२ ॥ यमेन शवभक्षश्च वरुणेन च
कौशिकः ॥ कुबेरो रुधिराक्षेण युयुधे ब्राह्मणोत्तमाः ॥ २३ ॥ मांसप्रियो मद्यसेवी क्रूरदृष्टिर्भयावहः ॥ चत्वार एते विक्रांताः कपालाभरणा
नुजाः ॥ २४ ॥ अश्विभ्यामग्निवायुभ्यां युद्धे युयुधिरे मिथः ॥ ततो यमो महावीर्यः कालदण्डेन वेगवान् ॥ २५ ॥ शवभक्षं निहत्याजावनयद्यम
सादनम् ॥ तस्य चाक्षौहिणीस्त्रिंशन्निजघ्ने समरे यमः ॥ २६ ॥ वरुणः कौशिकस्याजौ प्रासेन प्राहरच्छिरः ॥ कुबेरो रुधिराक्षस्य कुन्तेनाभ्यहर
च्छिरः ॥ २७ ॥ अश्विभ्यामग्निवायुभ्यां कपालाभरणानुजाः ॥ निहताः समरे विप्राः प्रययुर्यमसादनम् ॥ २८ ॥ अक्षौहिणीशतं चापि देवेन्द्रेण
मृधे द्विजाः ॥ यामार्द्धेन हतं युद्धे प्रययौ यमसादनम् ॥ २९ ॥ ततः कपालाभरणः प्रेक्ष्य सेनां निजां हताम् ॥ चापमादाय निशिताञ्छरां
श्चापि महाजवान् ॥ ३० ॥ अभ्ययात्समरे शक्रं तिष्ठतिष्ठेति चाब्रवीत् ॥ ततः शक्रस्य शिरसि व्यधमच्छरपंचकैः ॥ ३१ ॥ तानप्राप्तान्प्रचि
च्छेद शरैर्युद्धे स वृत्रहा ॥ ततः शूलं समादाय कपालाभरणो मृधे ॥ ३२ ॥ देवेंद्राय प्रचिक्षेप तं शक्त्या निजघान सः ॥ ततः कपालाभरणः
शतहस्तायतां गदाम् ॥ ३३ ॥ आयसीं पंचसाहस्रतुलाभारेण निर्मिताम् ॥ आददे समरे शक्रं वक्षोदेशे जघान च ॥३४॥ ततः स मूर्च्छितः शक्रो
रथोपस्थ उपाविशत् ॥ मृतसंजीविनीं विद्यां जपित्वाथ बृहस्पतिः ॥ ३५ ॥ पुलोमजापतिं युद्धे समजीवयदद्भुतम् ॥ ऐरावतं तदा[3]रुह्य कपालाभर
णांतिकम् ॥ ३६ ॥ आजगाम शचीभर्ता प्रहर्तुं कुलिशेन तम् ॥ एकप्रहारेण तदा महेंद्रः पाकशासनः ॥ ३७ ॥ कपालाभरणं युद्धे वज्रेण सरथा
श्वकम् ॥ सचापं सध्वजं चैव सतूणीरं सवर्मकम् ॥३८॥ चूर्णयामास कुपितस्तिलशः कणशस्तथा ॥ हते तस्मिन्महावीरे कपालाभरणे रणे॥३९॥

१ कौशिकः-इति सर्वत्र पाठः । २ यमवश्यताम्–इ०पा० । ३ समारुह्य–इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वस्थः सुन्दररूपधृक् ॥ सर्वसंपत्समृद्धोऽसौ भुक्त्वा भोगाननेकशः ॥ ९२ ॥ देहांते प्रययौ मुक्तिं स्नानात्पापविनाशने ॥ पितापि तत्र स्नानेन देहांते मुक्तिमाप्तवान् ॥ ९३ ॥ तेनोपदिष्टो यः शूद्रः स भुक्त्वा नरकान्क्रमात् ॥ अनेकासु जनित्वा च कुत्सितास्वपि योनिषु ॥ ९४ ॥ गृध्रजन्मा भवत्पश्चाद्गंधमादनपर्वते ॥ स कदाचिज्जलं पातुं तीर्थे पापविनाशने ॥ ९५ ॥ समागतः पपौ तोयं सिषिचे चात्मनस्तनुम् ॥ तदैव दिव्यदेहः सन्सर्वाभरणभूषितः ॥ ९६ ॥ दिव्यमाल्यांबरधरो रक्तचंदनरूषितः ॥ दिव्यं विमानमारुह्य शोभितश्छत्रचामरैः ॥ ९७ ॥ उत्तमस्त्रीपरिवृतः प्रययावमरालयम् ॥९८॥ श्रीसूत उवाच ॥ ॥ एवं प्रभावमेतद्वै तीर्थं पापविनाशनम् ॥ स्वर्गदं मोक्षदं पुण्यं प्रायश्चित्तकरं तथा ॥ ब्रह्मविष्णुमहेशानैः सेवितं सुरसेवितम् ॥ ९९ ॥ पापानां नाशनाद्विप्राः पापनाशाभिधं हि तत् ॥ श्रेयोर्थी पुरुषस्तस्मात्स्नायात्पापविनाशने ॥१००॥ इत्थं रहस्यं कथितं मुनींद्रास्तद्वैभवं पापविनाशनस्य ॥ यत्राभिषेकात्सहसा विमुक्तौ द्विजश्च शूद्रश्च विनिंद्यकृत्यौ ॥१०१॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे सेतुमाहात्म्ये गंधमादनप्रशंसायां पापविनाशप्रभावकथनंनाम दशमोऽध्यायः ॥ १० ॥ ॥ श्रीसूत उवाच ॥ ॥ पापनाशे नरः स्नात्वा सर्वपापनिबर्हणे ॥ ततः सीतासरो गच्छेत्स्नातुं नियमपूर्वकम् ॥ १ ॥ यानि कानि च पुण्यानि ब्रह्मांडांतर्गतानि वै ॥ तानि गंगादितीर्थानि स्वपापपरिशुद्धये ॥ २ ॥ सीतासरसि वर्तंते महापातकनाशने ॥ क्षेत्राण्यपि महार्हाणि काश्यादीनि दिवानिशम् ॥ ३ ॥ सीतासरोत्र सेवंते स्वस्वकल्मषशांतये ॥ तस्याः सरसि संगीतगुणेनाकृष्य बालिशः ॥ ४ ॥ पंचाननोऽपि वसते पंचपातकनाशनः ॥ तदेतत्तीर्थमागत्य स्नात्वा वै श्रद्धया सह ॥ पुरंदरः पुरा विप्रा मुमुचे ब्रह्महत्यया ॥ ५ ॥ ॥ ऋषय ऊचुः ॥ ॥ ब्रह्महत्या कथमभूद्वासवस्य पुरा मुने ॥ सीतासरसि स स्नानात्कथं मुक्तोऽभवत्तया ॥ ६ ॥ ॥ श्रीसूत उवाच ॥ ॥ कपालाभरणोनाम राक्षसोऽभूत्पुरा द्विजाः ॥ ॥ ७ ॥ अवध्यः सर्वदेवानां सोऽभवद्ब्रह्मणो वरात् ॥ शवभक्षणनामा तु तस्यासीन्मंत्रिसत्तमः ॥ ८ ॥ अक्षौहिणीशतं तस्य हयेभरथसंकुलम् ॥ अस्ति तस्य पुरं चापि वैजयंतमिति श्रुतम् ॥ ९ ॥ वसत्यस्मिन्पुरे सोऽयं कपालाभरणो बली ॥ शवभक्षं समाहूय बभाषे मंत्रिणं द्विजाः ॥ ॥ १० ॥ शवभक्ष महावीर्य मंत्रशास्त्रेषु कोविद ॥ वयं देवपुरीं गत्वा विनिर्जित्य सुराञ्रणे ॥ ११ ॥ शक्रस्य भवने रम्ये स्थास्यामस्सैनिकैः सह ॥ रमावो नंदने तस्य रंभाद्यप्सरसां गणैः ॥ १२ ॥ कपालाभरणस्येदं निशम्य वचनं तदा ॥ शवभक्षोऽब्रवीद्विप्रा वचस्तत्र तथास्त्विति ॥ ॥ १३ ॥ ततः कपालाभारणः पुत्रं दुर्मेधसं बली ॥ प्रतिष्ठाप्य पुरे शूरं सेनया परिवारितः ॥ १४ ॥ युयुत्सुरमरैः साकं प्रययावमरावतीम् ॥ गजा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शूद्रयोनिमगात्ततः ॥ गतवान्वैश्यतां पश्चात्क्षत्रियस्तदनंतरम् ॥ ६६ ॥ प्रबलैर्बाध्यमानोऽसौ ब्राह्मणो वै तदाऽभवत् ॥ उपनीतः स पित्रा
तु वर्षे गर्भाष्टमे द्विजः ॥ ६७ ॥ वर्तमानः पितुर्गेहे स्वाचाराभ्यासतत्परः ॥ गच्छन्कदाचिद्गहने गृहीतो ब्रह्मरक्षसा ॥ ६८ ॥ रुदन्भ्रमन्स्खल
न्मूढः प्रहसन्विलपन्नसौ ॥ शश्वद्धाहेति च वदन्वैदिकं कर्म सोऽत्यजत ॥ ६९ ॥ दृष्ट्वा सुतं तथाभूतं पिता दुःखेन पीडितः ॥ सुतमादाय च स्नेहा
दगस्त्यं शरणं ययौ ॥ ७० ॥ भक्त्या मुनिं प्रणम्यासौ पिता तस्य सुतस्य वै ॥ तस्मै निवेदयामास स्वपुत्रस्य विचेष्टितम् ॥ ७१ ॥ अब्रवीच्च
तदा विप्रः कुम्भजं मुनिपुंगवम् ॥ एष मे तनयो ब्रह्मन्गृहीतो ब्रह्मरक्षसा ॥ ७२ ॥ सुखं न भजते ब्रह्मन्नक्ष तं करुणादृशा ॥ नास्ति मे तनयोऽ
प्यन्यः पितॄणामृणमुक्तये ॥ ७३ ॥ अस्य पीडाविनाशार्थमुपायं ब्रूहि कुम्भज ॥ त्वत्समस्त्रिषु लोकेषु तपःशीलो न विद्यते ॥ ७४ ॥ अग्रणीः
शिवभक्तानामुक्तस्त्वं हि महर्षिभिः ॥ त्वां विनास्य परित्राणं न मे पुत्रस्य विद्यते ॥ ७५ ॥ पित्रे कृपां कुरुष्व त्वं दयाशीला हि साधवः ॥
॥ ॥ श्रीसूत उवाच ॥ ॥ एवमुक्तस्तदा तेन कुम्भजो ध्यानमास्थितः ॥ ७६ ॥ ध्यात्वा तु सुचिरं कालमब्रवीद्ब्राह्मणं ततः ॥ ॥ अगस्त्य
उवाच ॥ ॥ पूर्वजन्मनि ते पुत्रो ब्राह्मणोऽयं महामते ॥ ७७ ॥ सुमतिर्नाम विप्रोऽयं मतिं शूद्राय वै ददौ ॥ कर्माणि वैदिकान्येष सर्वाण्युपदि
देश वै ॥ ७८ ॥ अतोऽयं नरकान्भुक्त्वा कल्पकोटिसहस्रकम् ॥ जातो भुवि तदंतेषु स्थावरादिषु योनिषु ॥ ७९ ॥ इदानीं ब्राह्मणो जातः
कर्मशेषेण ते सुतः ॥ यमेन प्रेषितेनात्र गृहीतो ब्रह्मरक्षसा ॥ ८० ॥ क्रूरेण पातकेनाद्धा पूर्वजन्मकृतेन वै ॥ उपायं ते प्रवक्ष्यामि ब्रह्मरक्षोविना
शने ॥ ८१ ॥ शृणुष्व श्रद्धया युक्तः समाधाय च मानसम् ॥ दक्षिणांभोनिधौ विप्र सेतुरूपो महागिरिः ॥ ८२ ॥ वर्तते दैवतैः सेव्यः पावनो
गन्धमादनः ॥ तस्योपरि महातीर्थं नाम्ना पापविनाशनम् ॥ ८३ ॥ अस्ति पुण्यं प्रसिद्धं च महापातकनाशनम् ॥ भूतप्रेतपिशाचानां वेतालब्रह्म
रक्षसाम् ॥ ८४ ॥ महतां चैव रोगाणां तीर्थं तन्नाशकं स्मृतम् ॥ सुतमादाय गच्छ त्वं तत्तीर्थं सेतुमध्यगम् ॥ ८५ ॥ प्रयतः स्नापय सुतं तीर्थे
पापविनाशने ॥ स्नानेन त्रिदिनं तत्र ब्रह्मरक्षो विनश्यति ॥ ८६ ॥ नैवोपायांतरं तस्य विनाशे विद्यते भुवि ॥ तस्माच्छीघ्रं प्रयाहि त्वं रामसेतुं
विमुक्तिदम् ॥ ८७ ॥ तत्र पापविनाशाख्यतीर्थे स्नापय ते सुतम् ॥ मा विलंबं कुरुष्वात्र त्वरया याहि वै द्विज ॥ ८८ ॥ इत्युक्तः स द्विजोऽगस्त्यं
प्रणम्य भुवि दण्डवत् ॥ अनुज्ञातश्च तेनासौ प्रययौ गंधमादनम् ॥ ८९ ॥ सुतेन साकं विप्रेंद्रो गत्वा पापविनाशनम् ॥ संकल्पपूर्वं संस्नाप्य
दिनत्रयमसौ सुतम् ॥ ९० ॥ सस्नौ स्वयं च विप्रेंद्रः पिता पापविनाशने ॥ अथ तस्य सुतस्तत्र विमुक्तो ब्रह्मरक्षसा ॥ ९१ ॥ समजायत नीरोगः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

देशे महान्दोष उपाध्यायस्य विद्यते ॥ ३९ ॥ नाध्यापयेद्बुधः शूद्रं तथा नैव च याजयेत् ॥ न पाठयेत्तथा शूद्रं शास्त्रं व्याकरणादिकम् ॥ ४० ॥ काव्यं वा नाटकं वापि तथालंकारमेव च ॥ पुराणमितिहासं च शूद्रं नैव तु पाठयेत् ॥ ४१ ॥ यदि चोपदिशेद्विप्रः शूद्रंचैतानि कर्हिचित् ॥ त्यजेयुर्ब्राह्मणा विप्रं तं ग्रामाद्ब्रह्मसंकुलात् ॥ ४२ ॥ शूद्राय चोपदेष्टारं द्विजं चंडालवत्त्यजेत ॥ शूद्रं चाक्षरसंयुक्तं दूरतः परिवर्जयेत् ॥ ४३ ॥ अतः शुश्रूष भद्रं ते ब्राह्मणाञ्छ्रद्धया सह ॥ शूद्रस्य द्विजशुश्रूषा मन्वादिभिरुदीरिता॥४४॥ न हि नैसर्गिकं कर्म परित्यक्तुं त्वमर्हसि ॥ एवमुक्तस्तु मुनिना स शूद्रोऽचिंतयत्तदा ॥ ४५ ॥ किं कर्तव्यं मया त्वद्य व्रते श्रद्धा हि मे पुरा ॥ यथा स्यान्मम विज्ञानं यतिष्येऽहं तथाद्य वै ॥ ४६ ॥ इति निश्चित्य मनसा शूद्रो दृढमतिस्तदा ॥ गत्वाश्रमपदाद्दूरं कृतवानुटजं शुभम् ॥ ४७ ॥ तत्र वै देवतागारं पुण्यान्यायतनानि च ॥ पुष्पारामादिकं चापि तटाकखननादिकम् ॥ ४८ ॥ श्रद्धया कारयामास तपःसिद्ध्यर्थमात्मनः ॥ अभिषेकांश्च नियमानुपवासादिकानपि ॥ ४९ ॥ बलिं च कृत्वा हुत्वा च दैवतान्यभ्यपूजयत् ॥ संकल्पनियमोपेतः फलाहारो जितेंद्रियः ॥ ५० ॥ नित्यं कंदैश्च मूलैश्च पुष्पैरपि तथा फलैः ॥ अतिथीन्पूजयामास यथावत्समुपागतान् ॥ ५१ ॥ एवं हि सुमहान्कालो व्यतिचक्राम तस्य वै ॥ अथाश्रममगात्तस्य सुमतिर्नाम नामतः ॥ ५२ ॥ द्विजो गर्गकुलोद्भूतः सत्यवादी जितेंद्रियः ॥ स्वागतेन मुनिं पूज्य तोषयित्वा फलादिकैः ॥ ५३ ॥ कथयन्वै कथाः पुण्याः कुशलं पर्यपृच्छत ॥ इत्थं स प्रणिपाताद्यैरुपचारैस्तु पूजितः ॥ ५४ ॥ आशीर्भिरभिनंद्यैनं प्रतिगृह्य च सत्क्रियाम् ॥ तमापृच्छ्य प्रहृष्टात्मा स्वाश्रमं पुनराययौ ॥ ५५ ॥ एवं दिनेदिने विप्रः शूद्रेस्मिन्पक्षपातवान् ॥ आगच्छदाश्रमं तस्य द्रष्टुं तं शूद्रयोनिजम् ॥ ५६ ॥ बहुकालं द्विजस्याभूत्संसर्गः शूद्रयोनिना ॥ स्नेहस्य वशमापन्नः शूद्रोक्तं नातिचक्रमे ॥ ५७ ॥ अथागतं द्विजं शूद्रः प्राह स्नेहवशीकृतम् ॥ हव्यकव्यविधानं मे कृत्स्नं ब्रूहि मुनीश्वर ॥ ५८ ॥ पितृकार्यविधानार्थं देवकार्यार्थमेव च ॥ मंत्रानुपदिश त्वं मे महालयविधिं तथा ॥ ५९ ॥ अष्टकाश्राद्धकृत्यं च वैदिकं यच्च किंचन ॥ सर्वमेतद्रहस्यं मे ब्रूहि त्वं वै गुरुर्मतः ॥ ६० ॥ एवमुक्तः स शूद्रेण सर्वमेतदुपादिशत् ॥ कारयामास तस्यायं पितृकार्यादिकं तथा ॥ ६१ ॥ पितृकार्ये कृते तेन विसृष्टः स द्विजो गतः ॥ अथ दीर्घेण कालेन पोषितः शूद्रयोनिना ॥ ६२ ॥ त्यक्तो विप्रगणैः सोऽयं पंचत्वमगमद्द्विजः वैवस्वतभटैर्नीत्वा पातितो नरकेष्वपि ॥ ६३ ॥ कल्पकोटिसहस्राणि कल्पकोटिशतानि च ॥ भुक्त्वा क्रमेण नरकांस्तदंते स्थावरोऽभवत् ॥ ६४ ॥ गर्दभस्तु ततो जज्ञे विड्वराहस्ततः परम् ॥ जज्ञेऽथ सारमेयोऽसौ पश्चाद्वायसतां गतः ॥ ६५ ॥ अथ चंडालतां प्राप

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कृतावासं शंकरं दर्शयस्व मे ॥ १६ ॥ प्रार्थयित्वा नरस्त्वेवं सेतुरूपं नगोत्तमम् ॥ ततो मृदुपदं गच्छेत्पावनं गन्धमादनम् ॥ १७ ॥ अब्धौ तत्र
नरः स्नात्वा पर्वते गन्धमादने ॥ पिंडदानं ततः कुर्यादपि सर्षपमात्रकम् ॥ १८ ॥ तृप्तिं प्रयांति पितरस्तस्य यावद्युगक्षयः ॥ शमीदलसमानान्वा
दद्यात्पिंडान्पितॄन्प्रति ॥१९॥ स्वर्गस्था मोक्षमायांति स्वर्गं नरकवासिनः ॥ ततस्तस्योपरि महातीर्थं लोकेषु विश्रुतम् ॥२०॥ सर्वतीर्थोत्तमं पुण्यं
नाम्ना पापविनाशनम् ॥ अस्ति पुण्यतमं विप्राः पवित्रे गन्धमादने ॥२१॥ यस्य संस्मरणादेव गर्भवासो न विद्यते ॥ तत्प्राप्य तु नरः स्नायात्स्वदे
हमलनाशनम् ॥ तत्र स्नानान्नरो याति वैकुण्ठं नात्र संशयः ॥२२॥ ॥ ऋषय ऊचुः ॥ ॥ सूत पापविनाशाख्यतीर्थस्य ब्रूहि वैभवम् ॥ व्यासेन बोधि
तस्त्वं हि वेत्सि सर्वं महामुने॥२३॥ ॥श्रीसूत उवाच॥ ॥ब्रह्माश्रमपदे वृत्तां पार्श्वे हिमवतः शुभे॥वक्ष्यामि ब्राह्मणश्रेष्ठा युष्माकं तु कथां शुभाम्॥२४॥
अस्याश्रमपदं पुण्यं ब्रह्माश्रमपदे शुभे ॥ नानावृक्षगणाकीर्णं पार्श्वे हिमवतः शुभे ॥ २५ ॥ बहुगुल्मलताकीर्णं मृगद्विपनिषेवितम् ॥ सिद्धचार
णसंघुष्टं रम्यं पुष्पितकाननम् ॥ २६ ॥ वृतिभिर्बहुभिः कीर्णं तापसैरुपशोभितम् ॥ ब्राह्मणैश्च महाभागैः सूर्यज्वलनसंनिभैः ॥ २७ ॥ नियमव्रतसं
पन्नैः समाकीर्णं तपस्विभिः ॥ दीक्षितैर्यागहेतोश्च[1] यताहारैः कृतात्मभिः ॥ २८ ॥ वेदाध्ययनसंपन्नैर्वैदिकैः परिवेष्टितम् ॥ वर्णिभिश्च गृहस्थैश्च
वानप्रस्थैश्च भिक्षुभिः ॥ २९ ॥ स्वाश्रमाचारनिरतैः स्ववर्णोक्तविधायिभिः ॥ वालखिल्यैश्च मुनिभिः संप्राप्तैश्च मरीचिभिः ॥ ३० ॥ तत्राश्रमे
पुरा कश्चिच्छूद्रो दृढमतिर्द्विजाः ॥ साहसी ब्राह्मणाभ्याशमाजगाम मुदान्वितः ॥ ३१ ॥ आगतो ह्याश्रमपदं पूजितश्च तपस्विभिः ॥ नाम्ना दृढ
मतिः शूद्रः साष्टांगं प्रणनाम वै ॥ ३२ ॥ तान्स दृष्ट्वा मुनिगणान्देवकल्पान्महौजसः ॥ कुर्वतो विविधान्यज्ञान्संप्रहृष्य स शूद्रकः ॥ ३३ ॥ अथा
स्य बुद्धिरभवत्तपःकर्तुमनुत्तमम् ॥ ततोऽब्रवीत्कुलपतिं मुनिमागत्य तापसम् ॥ ३४ ॥ ॥ दृढमतिरुवाच ॥ ॥ तपोधन नमस्तेऽस्तु रक्ष मां
करुणानिधे ॥ तव प्रसादादिच्छामि धर्मं चर्तुं द्विजर्षभ ॥ ३५ ॥ तस्मादभिगतं मां त्वं यागे दीक्षय सुव्रत ॥ ब्रह्मन्नवरवर्णोऽहं शूद्रो जात्यास्मि
सत्तम ॥ ३६ ॥ शुश्रूषां कर्तुमिच्छामि प्रपन्नाय प्रसीद मे ॥ एवमुक्ते तु शूद्रेण तमाह ब्राह्मणस्तदा ॥ ३७ ॥ ॥ कुलपतिरुवाच ॥ ॥ यागे दी
क्षयितुं शक्यो न शूद्रो हीनजन्मभाक् ॥ श्रूयतां यदि ते बुद्धिः शुश्रूषानिरतो भव ॥ ३८ ॥ उपदेशो न कर्तव्यो जातिहीनस्य कर्हिचित्[2] ॥ उप

१ योगहेतोश्च–इ० पा० । २ वै कचित्–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विद्युत्प्रभा रहः ॥ प्रभो कपालविस्फोटनाम्नो वेतालभूपतेः ॥ ५७ ॥ अस्ति दिव्यं सरः किंचिद्धेमांबुजपरिष्कृतम् ॥ तव श्वश्र्वा जलक्रीडां वितन्वं त्येदमाहृतम् ॥ ५८ ॥ इति श्रुत्वा वचस्तत्र मां नयेति जगाद सः ॥ ततः सा सहसा विप्रं निन्ये तत्कांचनं सरः ॥ ५९ ॥ ततः स हेमपद्मानामा जिहीर्षुर्द्विजात्मजः ॥ तद्विघ्नकारिणः सर्वान्वेतालादींस्ततोऽवधीत् ॥ ६० ॥ स्वयं कपालविस्फोटं निहताशेषसैनिकम् ॥ ददर्श वेतालपतिं तं च हंतुं प्रचक्रमे ॥ ६१ ॥ अत्रांतरे महातेजा नाम्ना विज्ञप्तिकौतुकः ॥ विद्याधरपतिः प्राप्य विमानेनैनमब्रवीत् ॥ ६२ ॥ अशोकदत्त विप्रेंद्र साहसं मा कृथा इति ॥ तदाकर्ण्य द्विजसुतो विमानवरसंस्थितम् ॥६३॥ ददर्श प्रभया युक्तं विद्याधरपतिं दिवि ॥ तस्य दर्शनमात्रेण शापान्मुक्तो द्विजात्मजः ॥ ६४ ॥ संत्यज्य मानुषं रूपं दिव्यं रूपमवाप्तवान् ॥ विमानवरमारूढं दिव्याभरणभूषितम् ॥ ६५ ॥ शापान्मुक्तं सुकर्णं तं प्राह विज्ञप्तिकौतुकः ॥ अयं सुकर्ण ते भ्राता गालवस्य महामुनेः ॥ ६६ ॥ शापाद्वेतालतां प्राप तत्कन्यास्पर्शपातकी ॥ त्वं च शप्तः पुरा तेन तत्पापस्यानुमोदकः ॥ ६७ ॥ तवायमल्पपापस्य शापो मद्दर्शनावधिः ॥ कल्पितस्ततेन मुनिना शापांतो नास्य कल्पितः ॥ ६८ ॥ तदेहि मुक्तशापोसि सुकर्ण स्वर्गमारुह ॥ ततः सुकर्णस्तं प्राह विद्याधरकुलाधिपम् ॥ ६९ ॥ विद्याधरपते भ्रात्रा विना ज्येष्ठेन सांप्रतम् ॥ सर्वभोगयुतं स्वर्गं नैव गंतुं समुत्सहे ॥ ७० ॥ शापस्यांतो यथा भूयान्मम भ्रातुस्तथा वद ॥ तमुवाच महातेजास्तथा विज्ञप्तिकौतुकः ॥ ७१ ॥ दुर्निवारमिमं शापमन्यः को वा निवारयेत् ॥ किं तु गुह्यतमं किंचित्तव वक्ष्यामि सांप्रतम् ॥७२॥ ब्रह्मणा सनकादिभ्यो मुनिभ्यः कथितं पुरा॥ सर्वतीर्थाश्रये पुण्ये दक्षिणस्योदधेस्तटे॥७३॥ चक्रतीर्थसमीपे तु तीर्थमस्ति महत्तरम्॥ महापातकसंघाश्च यस्य दर्शनमात्रतः॥७४॥ नश्यंति तत्क्षणादेव न जाने स्नानजं फलम्॥ तत्र गत्वा तव ज्येष्ठो यदि स्नायान्महत्तरे ॥७५॥ वेतालत्वं त्यजेन्नूनं तदा गालवशापजम्॥ सुकर्णस्तद्वचः श्रुत्वा भ्रात्रा वेतालरूपिणा ॥७६॥ सहितः सहसा प्रायाद्दक्षिणस्योदधेस्तटम् ॥ दक्षिणं चक्रतीर्थाख्यादुत्तरं गंधमादनात् ॥ ७७ ॥ ब्रह्मणा सनकादिभ्यः कथितं तीर्थमभ्यगात् ॥ तत्तीर्थकूलमासाद्य भ्रातरं चेदमब्रवीत् ॥ ७८ ॥ भ्रातर्गालवशापस्य घोरस्यास्य निवृत्तये ॥ तीर्थेऽस्मिन्नचिरात्स्नाहि सर्वतीर्थोत्तमोत्तमे ॥ ७९ ॥ तस्मिन्नवसरे विप्रास्तस्य तीर्थस्य शीकराः ॥ न्यपतंस्तस्य गात्रेषु वायुना वै समाहृताः ॥ ८० ॥ स तच्छीकरसंस्पर्शात्त्यक्त्वा वेतालतां तदा ॥ तदेव मानुषं भावं द्विजपुत्रत्वमाप्तवान् ॥ ८१ ॥ ततः संकल्प्य सहसा तस्मिंस्तीर्थोत्तमोत्तमे ॥ मनुष्यत्वनिवृत्त्यर्थं निममज्ज द्विजात्मजः ॥ ८२ ॥

१ रथम्—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उत्तिष्ठन्नेव सहसा दिव्यं रूपमवाप्तवान् ॥ विमानवरमारूढो देवस्त्रीपरिवारितः ॥ ८३ ॥ सर्वाभरणसंयुक्तः सह भ्रात्रा सुदर्शनः ॥ श्लाघमानश्च तत्तीर्थं नमस्कृत्य पुनःपुनः ॥ ८४ ॥ विज्ञप्तिकौतुकं चापि पुरस्कृत्य दिवं ययौ ॥ तदाप्रभृति तत्तीर्थं वेतालवरदाभिधम् ॥ ८५ ॥ वेतालत्वं विनष्टं यच्छीकरस्पर्शमात्रतः ॥ य इदं तीर्थमासाद्य चक्रतीर्थस्य दक्षिणे ॥ ८६ ॥ स्नानं कदाचित्कुर्वंति जीवन्मुक्ता भवंति ते ॥ एतत्तीर्थसमं पुण्यं न भूतं न भविष्यति ॥ ८७ ॥ घोरां वेतालतां त्यक्त्वा दिव्यतां स यदाप्तवान् ॥ ८८ ॥ अत्र संकल्प्य च स्नात्वा वेतालवरदे शुभे ॥ पितृभ्यः पिंडदानं च कुर्याद्वै नियमान्वितः ॥ ८९ ॥ एवं वः कथितं विप्रास्तस्य तीर्थस्य वैभवम् ॥ वेतालवरदाभिख्या यथा चास्य समागता ॥ ॥ ९० ॥ यः पठेदिममध्यायं शृणुयाद्वा स मुच्यते ॥ ९१ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे सेतुमाहात्म्ये वेतालवरदतीर्थप्रशंसायां सुदर्शनसुकर्णशापमोक्षणंनाम नवमोऽध्यायः ॥ ९ ॥ ॥ छ ॥ ॥ श्रीसूत उवाच ॥ ॥ वेतालवरदे तीर्थे नरः स्नात्वा द्विजोत्तमाः ॥ ततः शनैःशनैर्गच्छेद्गन्धमादनपर्वतम् ॥ १ ॥ योंऽबुधौ सेतुरूपेण वर्तते गन्धमादनः ॥ स मार्गो ब्रह्मलोकस्य विश्वकर्त्रा विनिर्मितः ॥ २ ॥ लक्षकोटिसहस्राणि सरांसि सरितस्तथा ॥ समुद्राश्च महापुण्या वनान्यप्याश्रमाणि च ॥ ३ ॥ पुण्यानि क्षेत्रजातानि वेदारण्यादिकानि च ॥ मुनयश्च वसिष्ठाद्याः सिद्धचारणकिन्नराः ॥ ४ ॥ लक्ष्म्या सह धरण्या च भगवान्मधुसूदनः ॥ सावित्र्या च सरस्वत्या सहैव चतुराननः ॥ ५ ॥ हेरंबः षण्मुखश्चैव देवाश्चेंद्रपुरोगमाः ॥ आदित्यादिग्रहाश्चैव तथाष्टौ वसवो द्विजाः ॥ ६ ॥ पितरो लोकपालाश्च तथान्ये देवतागणाः ॥ महापातकसंघानां नाशने लोकपावने ॥ ७ ॥ दिवानिशं वसंत्यत्र पर्वते गंधमादने ॥ अत्र गौरी सदा तुष्टा हरेण सह वर्तते ॥ ८ ॥ अत्र किन्नरकांतानां क्रीडा जागर्ति नित्यशः ॥ तस्य दर्शनमात्रेण बुद्धिसौख्यं नृणां भवेत् ॥ ९ ॥ तन्मूर्धनि कृतावासाः सिद्धचारणयोषितः ॥ पूजयंति सदा कालं शंकरं गिरिजापतिम् ॥ १० ॥ कोट्यो ब्रह्महत्यानामगम्यागमकोटयः ॥ अंगलग्नैर्विनश्यंति गन्धमादनमारुतैः ॥ ११ ॥ असावुल्लोलकल्लोले तिष्ठन्मध्ये महांबुधौ ॥ आसीन्मुनिगणैः सेव्यः पुरा वै गन्धमादनः ॥ १२ ॥ ततो नलेन सेतौ तु बद्धे तन्मध्यगोचरः ॥ रामाज्ञयाखिलैः सेव्यो बभूव मनुजैरपि ॥ १३ ॥ सेतुरूपं गिरिं तं तु प्रार्थयेद्गंधमादनम् ॥ क्षमाधर महापुण्य सर्वदेवनमस्कृत ॥ १४ ॥ विष्णवादयोऽपि यं देवास्सेवंते श्रद्धया सह ॥ तं भवंतमहं पद्भ्यामाक्रमामि नगोत्तम ॥ १५ ॥ क्षमस्व पादघातं मे दयया पापचेतसः ॥ त्वन्मूर्द्धनि

१ इत्येतत्-इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus ...

CC-0. In Public Domain. Digitization by eGangotri

आनम्रवपुषस्तस्य स्कंधं पद्भ्यां रुरोह वै ॥ द्विजसूनुर्ददर्शाथ शोणितं नूतनं पतत्॥३१॥किमेतदिति सोपश्यदुन्नम्य सहसा मुखम् ॥ भक्ष्यमाणं तया तत्स विज्ञाय द्विजनंदनः ॥३२॥अशोकदत्तो जग्राह तस्याः पादं सनूपुरम्॥ ततोऽगान्नूपुरं त्यक्त्वा बद्धरत्नं विहाय तत्॥३३॥ प्रत्युप्तानेकरत्नाढ्यं तदादाय च नूपुरम् ॥ अशोकदत्तः प्रययौ तच्छ्मशानान्नृपांतिकम्॥३४॥स्मशानवृत्तं तत्सर्वं स नृपाय निवेद्य वै॥महार्घ्यरत्नप्रत्युप्तं नूपुरं च ददौ तदा ॥३५॥ ज्ञात्वा तद्वीरचरितं वीरैरन्यैः सुदुष्करम् ॥ ददौ मदनलेखाख्यां सुतां तस्मै महीपतिः॥३६॥कदाचिदथ तद्दिव्यं नूपुरं वीक्ष्य भूपतिः॥ अस्य नूपुरवर्यस्य तुल्यं वै नूपुरांतरम्॥ ३७ ॥ कुतो वा लभ्यत इति सादरं समचिंतयत् ॥ अशोकदत्तस्तु तदा विज्ञाय नृपकांक्षितम् ॥ ३८ ॥ नूपुरांतरसिद्ध्यर्थं चिंतयामास चेतसा ॥ श्मशाने नूपुरमिदं यतः प्राप्तं मया पुरा ॥ ३९ ॥तां नूपुरांतरप्राप्त्यै कुत्र द्रक्ष्यामि सांप्रतम् ॥ इत्थं वितर्क्य बहुधा निश्चिकाय महामतिः॥४०॥ विक्रेष्यामि महामांसं समेत्य पितृकाननम् ॥ तत्र राक्षसवेतालपिशाचादिषु सर्वशः॥४१॥ मंत्रैराहूयमानेषु साप्यायास्यति राक्षसी ॥ तामागतां बलाद्धृह्य तद्ग्रहीष्यामि नूपुरम्॥४२॥ राक्षसानां सहस्रं वा पिशाचानां तथायुतम् ॥ वेतालानां तथा कोटिर्न लक्ष्यं बलिनो मम ॥ ४३ ॥ इति निश्चित्य मनसा श्मशानं सहसा ययौ ॥ विक्रीणानो महामांसं मंत्रैराहूय राक्षसान् ॥४४॥गृहाणेत्युच्चया वाचा चचार श्रावयन्दिशः ॥ विक्रीयते महामांसं गृह्यतांगृह्यतामिति ॥ ४५ ॥ तत्र राक्षसवेतालाः कंकालाश्च पिशाचकाः ॥ अन्ये च भूतनिवहाः समाजग्मुः प्रहर्षिताः ॥ ॥ ४६ ॥ भक्षयिष्यामहे सर्वे मांसमिष्टतमं त्विति ॥ तत्रागच्छत्सु सर्वेषु रक्षःकन्या[2]समावृता ॥ ४७ ॥ आययौ राक्षसी सापि मांसभक्षणलालसा ॥ गवेषयंस्तदा विप्रस्तां समुद्वीक्ष्य राक्षसीम् ॥ ४८ ॥ सेयं दृष्टा पुरेत्येष प्रत्यभिज्ञानमाप्तवान् ॥ तामाह द्विजपुत्रोऽन्यद्देहि मे नूपुरं त्विति ॥ ४९ ॥ सा तस्य वचनं श्रुत्वा प्रीता वाक्यमथाऽब्रवीत् ॥ ममैव च त्वया नीतं पुरा वीरेंद्र नूपुरम् ॥ ५० ॥ गृहाण रत्नरुचिरं द्वितीयमपि नूपुरम् ॥ इत्युक्त्वा नूपुरं तस्मै स्वसुतां च ददौ प्रियाम् ॥ ५१ ॥ विद्युत्केश्या तदा दत्तां प्रियां विद्युत्प्रभाभिधाम् ॥ विप्रः संप्राप्य मुमुदे रूपयौवनशालिनीम् ॥ ५२ ॥ विद्युत्केशी तु जामात्रे हेमाब्जमपि सा ददौ ॥ विद्युत्प्रभां नूपुरं च हेमाब्जमपि लभ्य सः ॥ ५३ ॥ श्वश्रूमाभाष्य सहसा पुनः प्रायान्नृपांतिकम् ॥ ततः प्रतापमुकुटो नूपुरप्राप्तिनंदितः ॥ ५४ ॥ शौर्यधैर्यसमायुक्तं प्रशशंस द्विजात्मजम्॥ अथ विद्युत्प्रभां विप्रः सोऽब्रवीद्रहसि प्रियाम् ॥ ५५ ॥ मात्रा तव कुतो लब्धमेतद्धेमांबुजं प्रिये ॥ एतत्तुल्यानि चान्यानि यतः प्राप्स्ये वरानने ॥ ५६ ॥ द्विजात्मजं ततः प्राह पतिं

१ पुनः--इ० पा० । २ रक्षःकन्याः समावृताः--इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्यास्वपि विद्यासु नास्ति तत्सदृशो भुवि ॥ कृतविद्यो द्विजसुतः प्रख्यातो नगरेऽभवत् ॥ ६ ॥ अत्रांतरे नरपतिं प्रतापमुकुटाभिधम् ॥ काशी
देशाधिपो मल्लः कश्चिदभ्याययौ बली ॥ ७ ॥ प्रतापमुकुटो राजा मल्लस्यास्य जयाय सः ॥ बलिनं द्विजपुत्रं तमाह्वयामास भृत्यकैः ॥ ८ ॥
तमागतं समालोक्य प्रतापमुकुटोऽब्रवीत् ॥ अशोकदत्त सहसा मल्लमेनं बलोत्कटम् ॥ ९ ॥ दुर्जयं जहि संग्रामे त्वं वै बलवतां वरः ॥ दाक्षि
णात्यमहामल्लपतावस्मिञ्जिते त्वया ॥ १० ॥ यदिष्टं तव तत्सर्वं दास्याम्यहं न संशयः ॥ इति तस्य वचः श्रुत्वा बलवान्द्विजनंदनः ॥ ११ ॥
दाक्षिणात्यमहामल्लनृपतिं समताडयत् ॥ ताडितो द्विजपुत्रेण मल्लः स बलिना बली ॥ १२ ॥ सद्यो विवृत्तनयनः परासुर्न्यपतद्भुवि ॥ द्विज
पुत्रस्य तत्कर्म देवैरपि सुदुष्करम् ॥ १३ ॥ प्रतापमुकुटो दृष्ट्वा प्रसन्नहृदयोऽभवत् ॥ दत्त्वा बहुधनान्ग्रामान्समीपेऽस्थापयत्तदा ॥ १४ ॥ स
कदाचिन्महाराजः सहितो द्विजसूनुना ॥ संध्यायां विजने देशे चचार तुरगेण वै ॥ १५ ॥ द्विजसूनुसखस्तत्र दीनां वाणीमथाशृणोत् ॥ राज
न्नल्पापराधोऽहं शत्रुप्रेरणयासकृत् ॥ १६ ॥ दण्डपालेन निहितः शूले निर्घृणचेतसा ॥ दिनमद्य चतुर्थं मे शूलस्थस्यैव जीवतः ॥ १७ ॥
प्राणाः सुखेन निर्यांति न हि दुष्कृतकर्मणाम् ॥ भृशं मां बाधते तृष्णा तां निवारय भूपते ॥ १८ ॥ इति दीनां समाकर्ण्य वाचं राजा द्विजा
त्मजम् ॥ अशोकदत्तनामानं धैर्यवंतमभाषत ॥ १९ ॥ अस्मै निरपराधाय शूलप्रोताय जंतवे ॥ तृष्णार्दिताय दातव्यं द्विजसूनो त्वया जलम् ॥
॥ २० ॥ इत्यादिष्टो नरेन्द्रेण सहसा द्विजनन्दनः ॥ जलपूर्णं समादाय कलशं वेगवान्ययौ ॥ २१ ॥ तच्छ्मशानं समासाद्य भूतवेतालसंकुलम् ॥
शूलप्रोताय वै तस्मै जलं दातुं समुत्सुकः ॥ २२ ॥ ददर्शाथ स्थितां नारीं नवयौवनशालिनीम् ॥ उदैक्षत महाकांतिं मूर्तामिव रतिं द्विजः ॥
॥ २३ ॥ तामालोक्य ततः प्राह धैर्यवान्द्विजनंदनः ॥ कासि भद्रे वरारोहे श्मशाने विजने स्थिता ॥ २४ ॥ अस्याधस्तात्किमर्थं त्वं
शूलप्रोतस्य तिष्ठसि ॥ इति तस्य वचः श्रुत्वा सा प्राह रुचिरानना ॥ २५ ॥ पुरुषो वल्लभोऽयं मे शूले राज्ञा समर्पितः ॥ धनं यथा
च कृपणः पश्य प्राणान्न मुंचति ॥ २६ ॥ आसन्नमरणं चैनमनुयातुमिह स्थिता ॥ तृषितो याचते वारि मामयं व्यथते मुहुः ॥ २७ ॥ शूलप्रोतो
द्धतग्रीवं मुमूर्षुं प्राणनायकम् ॥ नास्मि पाययितुं शक्ता जलमेनमधः स्थिता ॥२८॥ अशोकदत्तस्तच्छ्रुत्वा करुणावरुणालयः ॥ तत्कालसदृशं वाक्यं
तां वधूमब्रवीत्तदा ॥२९॥ ॥ अशोकदत्त उवाच ॥ ॥ मातर्मत्स्कंधमारुह्य देह्यस्मै शीतलं जलम् ॥ सा तथेति तमाभाष्य तरुणी त्वरयान्विता ॥३०॥

१ गतासुः—इ० पीं० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कनिष्ठकः ॥ विजयाशोकदत्तौ तु क्रमाद्यौवनमापतुः ॥ ९० ॥ एतस्मिन्नेव काले तु यमुनायास्तटे शुभे ॥ अनावृष्ट्या तु दुर्भिक्षमभूद्द्वादशवार्षि
कम् ॥ ९१ ॥ गोविंदस्वामिनामा तु ब्राह्मणो वेदपारगः ॥ दुर्भिक्षोपहतां दृष्ट्वा तदानीं स निजां पुरीम् ॥ ९२ ॥ प्रययौ काशीनगरं सपुत्रः सह
भार्यया ॥ स प्रयागं समासाद्य पुण्यं दृष्ट्वा महावटम् ॥ ९३ ॥ कपालमालाभरणं सोऽपश्यद्यतिनं पुरः ॥ गोविंदस्वामिनामा तु नमश्चक्रे स तं
मुनिम् ॥ ९४ ॥ सपुत्रस्य सभार्यस्य सोऽवादीदाशिषो मुनिः ॥ इदं च वचनं प्राह गोविंदस्वामिनं प्रति ॥ ९५ ॥ ज्येष्ठेनानेन पुत्रेण सांप्रतं
ब्राह्मणोत्तम ॥ क्षिप्रं विजयदत्तेन वियोगस्ते भविष्यति ॥ ९६ ॥ इति तस्य वचः श्रुत्वा गोविंदस्वामिनामकः ॥ सूर्ये चास्तं गते तत्र सांध्यं कर्म
समाप्य च ॥ ९७ ॥ सभार्यः ससुतो विप्रः सुदूराध्वसमाकुलः ॥ उवास तस्यां शर्वर्यां शून्ये वै देवतालये ॥ ९८ ॥ तदा त्वशोकदत्तश्च ब्राह्मणी
च समाकुलौ ॥ वस्त्रेणास्तीर्य पृथिवीं रात्रौ निद्रां समापतुः ॥ ९९ ॥ ततो विजयदत्तस्तु दूरमार्गविलंघनात् ॥ बभूवात्यंतमलसो भृशं शीतज्व
रार्दितः ॥ ६० ॥ गोविंदस्वामिना पित्रा शीतबाधानिवृत्तये ॥ गाढमालिंग्यमानोऽपि शीतबाधां न सोऽत्यजत् ॥ ६१ ॥ बाधतेऽत्यर्थमधुना
तात मां शीतलो ज्वरः ॥ एतद्बाधानिवृत्त्यर्थं वह्निमानय मा चिरम् ॥ ६२ ॥ इति पुत्रवचः श्रुत्वा सर्वत्राग्निं गवेषयन् ॥ अलब्धवह्निः प्रोवाच पुन
रभ्येत्य पुत्रकम् ॥ ६३ ॥ न वह्निं पुत्र विंदामि मार्गमाणोऽपि सर्वशः ॥ रात्रिमध्ये तु संप्राप्ते द्वारेषु पिहितेषु च ॥ ६४ ॥ निद्रापरवशाः पौरा
नैव दास्यंति पावकम् ॥ इत्थं विजयदत्तोऽसावुक्तः पित्रा ज्वरातुरः ॥ ६५ ॥ ययाचे वह्निमेवासौ पितरं दीनया गिरा ॥ शीतज्वरसमुद्भूतशीतबा
धाप्रपीडितम् ॥ ६६ ॥ हिमशीकरवान्वायुर्द्विगुणं बाधतेऽद्य माम् ॥ वह्निर्न लब्ध इति वै मिथ्यैवोक्तं पितस्त्वया ॥ ६७ ॥ दूरादेष पुरोभागे
ज्वालामालासमाकुलः ॥ शिखाभिर्लेलिहानोऽभ्रं दृश्यते पश्य पावकः ॥ ६८ ॥ तं वह्निमानय क्षिप्रं तात शीतनिवृत्तये ॥ इत्युक्तवन्तं तं पुत्रं स
पिता प्रत्यभाषत ॥ ६९ ॥ नानृतं वच्मि पुत्राद्य सत्यमेव ब्रवीम्यहम् ॥ वह्निमान्योऽयमुद्देशो दूरादेव विलोक्यते ॥ ७० ॥ पितृकाननदेशं तं
पुत्र जानीहि सांप्रतम् ॥ यद्येषोऽभ्रंलिहज्वालः पुरस्ताज्ज्वलतेऽनलः ॥ ७१ ॥ पुत्र वित्रासजनकं तं जानीहि चितानलम् ॥ अमंगलो न सेव्योऽयं
चिताग्निः स्पर्शदूषितः ॥ ७२ ॥ तस्य चायुःक्षयं याति सेवते यश्चितानलम् ॥ तस्मात्तवायुर्हानिर्मा भूयादिति मया सुत ॥ ७३ ॥ अमंगलस्तथा ॥ १७ ॥
स्पृश्यो नानीतोऽयं चितानलः ॥ इत्युक्तवंतं पितरं स दीनः प्रत्यभाषत ॥ ७४ ॥ अयं शवानलो वा स्यादध्वरानल एव वा ॥ सर्वथानीयतामेष
नोचेन्मे मरणं भवेत् ॥ ७५ ॥ पुत्रस्नेहाभिभूतोऽथ समाहर्तुं चितानलम् ॥ गोविंदस्वामिनामा तु श्मशानं शीघ्रमभ्यगात् ॥ ७६ ॥ गोविंदस्वा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मिनि गते समाहर्तुं चितानलम् ॥ तूर्णं विजयदत्तोऽपि तदा गच्छंतमन्वयात् ॥ ७७ ॥ संप्राप्य तापनिकटं विकीर्णास्थि चितानलम् ॥ आलिंग
न्निव सोद्वेगं शनैर्निर्वृतिमाप्तवान् ॥ ७८ ॥ अथावादीत्स पितरं तदिदं परिवर्तुलम् ॥ अतिदीप्तं विभात्यग्नौ किं रक्तांबुजसन्निभम् ॥ ७९ ॥ इति
तस्य वचः श्रुत्वा पुत्रस्य ब्राह्मणोत्तमः ॥ निपुणं तं निरूप्यैतद्वचनं पुनरब्रवीत् ॥ ८० ॥ ॥ गोविंदस्वाम्युवाच ॥ ॥ एतत्क
पालमनलज्वालावलयवर्तुलम् ॥ वसाकीकसमांसाढ्यमेतद्रक्तांबुजोपमम् ॥ ८१ ॥ द्विजस्य सूनुः श्रुत्वेति काष्ठाग्रेण जघान तत् ॥
येन तत्स्फुटनोद्गीर्णवसासिक्तमुखोऽभवत् ॥ ८२ ॥ कपालघट्टनाद्रक्तं यत्संसक्तं मुखे तदा ॥ जिह्वया लेलिहानोऽसौ मुहुस्तद्रक्तमा
स्वदत् ॥ ८३ ॥ आस्वाद्यैवं समादाय तत्कपालं समाकुलः ॥ पीत्वा वसां महाकायो बभूवातिभयंकरः ॥ ८४ ॥ सद्यो वेता
लतां प्राप तीक्ष्णदंष्ट्रस्तदा निशि ॥ तस्याट्टहासघोषेण दिशश्च प्रदिशस्तदा ॥ ८५ ॥ द्यौरंतरिक्षं भूमिश्च स्फुटिता इव सर्वशः ॥ तस्मि
न्वेगात्समाकृष्य पितरं हन्तुमुद्यते ॥ ८६ ॥ मा कृथाः साहसमिति प्रादुरासीद्वचो दिवि ॥ स दिव्यां गिरमाकर्ण्य वेतालोऽतिभयंकरः ॥ ८७ ॥
पितरं तं परित्यज्य महावेगसमन्वितः ॥ तूर्णमाकाशमाविश्य प्रययावस्खलद्गतिः ॥८८॥ स गत्वा दूरमध्वानं वेतालैः सह संगतः ॥ तमागतं समा
लोक्य वेतालास्सर्व एव ते ॥ ८९ ॥ कपालस्फोटनादेष वेतालत्वं यदाप्तवान् ॥ कपालस्फोटनामानमाह्वयांचक्रिरे ततः ॥९०॥ ततः कपालस्फोटो
ऽसौ वेतालैः सर्वतो वृतः॥ नरास्थिभूषणाख्यस्य सद्यो वेतालभूपतेः ॥९१॥ अन्तिकं सहसा प्राप महाबलसमन्वितः॥ नरास्थिभूषणश्चैनं सेनाप
तिमकल्पयत् ॥ ९२ ॥ तं कदाचित्तु गन्धर्वश्चित्रसेनाभिधो बली ॥ नरास्थिभूषणं संख्ये न्यवधीत्सोऽपि संस्थितः ॥ ९३॥ नरास्थिभूषणे तस्मि
न्गन्धर्वेण हते युधि ॥ तदा कपालस्फोटोऽसौ तत्पदं समवाप्तवान् ॥ ९४ ॥ विद्याधरेन्द्रस्य सुतः सुदर्शनो मनुष्यतां वै प्रथमं स गत्वा ॥ वेता
लतां प्राप्य महर्षिशापात्क्रमाच्च वेतालपतिर्बभूव ॥ ९५ ॥ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे सेतु
माहात्म्ये वेतालवरदतीर्थप्रशंसायां सुदर्शनवेतालत्वप्राप्तिवर्णनं नामाष्टमोऽध्यायः ॥ ८ ॥ ततः स विप्रः प्रत्यूषे पुत्रशोकेन पीडितः ॥ अशोक
दत्तसंयुक्तो भार्यया विललाप ह ॥ १ ॥ विलपंतं समालोक्य गोविंदस्वामिनं द्विजाः ॥ वणिक्समुद्रदत्ताख्यः समानिन्ये निजं गृहम् ॥ २ ॥
समानीय समाश्वास्य दयायुक्तो वणिग्वरः ॥ स्वधनानां हि सर्वेषां रक्षितारमकल्पयत् ॥ ३ ॥ स्मरन्महायतिवचः पुत्रदर्शनलालसः ॥ स तस्थौ
वणिजो गेहे पुत्रभार्यासमन्वितः ॥ ४ ॥ अशोकदत्तनामा तु द्वितीयो विप्रनंदनः ॥ शस्त्रे चैव तथा शास्त्रे बभूवातिविचक्षणः ॥ ५ ॥ तथा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रूषणे रता ॥ २३ ॥ बल्यर्थं हि पितुश्चाहं पुष्पाण्याहर्तुमागता ॥ आहरंत्याश्च पुष्पाणि याम एको न्यवर्तत ॥ २४ ॥ मद्विलंबेन स मुनिर्देव तार्चनतत्परः ॥ कोपं विधास्यते नूनं तपस्वी मुनिपुंगवः ॥ २५ ॥ तच्छीघ्रमद्य गच्छामि पुष्पाण्यप्याहृतानि मे ॥ कन्याश्च पितुराधीना न स्वतन्त्राः कदाचन ॥२६॥ यदि मामिच्छति भवान्पितरं मम याचय ॥ इति विद्याधरसुतमुक्त्वा कांतिमती तदा ॥ २७ ॥ पितुराशंकिता तूर्णमा श्रमं गन्तुमुद्यता ॥ गच्छन्तीं तां समालोक्य विद्याधरकुमारकः ॥ २८ ॥ तूर्णं जग्राह केशेषु धावित्वा मदनार्दितः ॥ अभ्येत्य निजकेशेषु गृह्णन्तं तं विलोक्य सा ॥ २९ ॥ उच्चैश्चक्रंद सहसा कुररीव मुनेः सुता ॥ अस्माद्विद्याधरसुताज्जनक त्राहि मां विभो ॥ ३० ॥ बलाद्गृह्णाति दुष्टात्मा विद्याधरसुतोऽद्य माम् ॥ इत्थमुच्चैः प्रचुक्रोश स्वाश्रमान्नातिदूरतः ॥ ३१ ॥ तदाक्रंदितमाकर्ण्य गन्धमादनवासिनः ॥ मुनयस्तु पुरस्कृत्य गालवं मुनिपुंगवम् ॥ ३२ ॥ किमेतदिति विज्ञातुं तं देशं तूर्णमाययुः ॥ तं देशं तु समागत्य सर्वे ते ऋषिपुंगवाः ॥ ३३ ॥ विद्याधरगृहीतां तां ददृशुर्मु निकन्यकाम् ॥ विद्याधरसुतं चान्यमंतिके समुपस्थितम् ॥ ३४ ॥ एतद्दृष्ट्वा महायोगी गालवो मुनिपुंगवः ॥ गतः कोपवशं किंचिद्दुरात्मान शशाप तम् ॥ ३५ ॥ कृतवानीदृशं कार्यं यत्त्वं विद्याधराधम ॥ तद्याहि मानुषीं योनिं स्वस्य दुष्कर्मणः फलम् ॥ ३६ ॥ संप्राप्य मानुषं जन्म बहुदुःखसमाकुलम् ॥ अचिरेण तु कालेन तस्मिन्नेव तु जन्मनि ॥ ३७ ॥ मनुष्यैरपि निंद्यं तद्वेतालत्वं प्रयास्यसि ॥ मांसानि शोणितं चैव सर्वदा भक्षयिष्यसि ॥ ३८ ॥ वेताला राक्षसप्राया बलाद्गृह्णन्ति योषितः ॥ तस्मात्त्वं मानुषो भूत्वा वेतालत्वमवाप्स्यसि ॥ ३९ ॥ तव दुष्कर्मणो योऽसावनुमंता कनिष्ठकः ॥ सुकर्ण इति विख्यातो भविता सोपि मानुषः ॥ ४० ॥ किं तु साक्षान्न कृतवान्यतोऽसावीदृशीं क्रियाम् ॥ तन्मानुषत्व मेवास्य वेतालत्वं तु नो भवेत् ॥ ४१ ॥ विज्ञप्तिकौतुकाभिख्यं यदा विद्याधराधिपम् ॥ द्रक्ष्यतेऽसौ कनिष्ठस्ते तदा शापाद्विमोक्ष्यते ॥ ४२ ॥ ईदृशस्य तु यः कर्ता महापापस्य कर्मणः ॥ स त्वं संप्राप्य मानुष्यं तस्मिन्नेव तु जन्मनि ॥ ४३ ॥ वेतालजन्म संप्राप्य चिरं लोके चरिष्यसि ॥ इत्युक्त्वा गालवः कन्यां गृहीत्वा मुनिभिः सह ॥ ४४ ॥ विद्याधरसुतौ शप्त्वा स्वाश्रमं प्रति निर्ययौ ॥ ततस्तस्मिन्महाभागे निर्याते मुनिपुंगवे ॥ ॥ ४५ ॥ सुदर्शनसुकर्णाख्यौ विद्याधरपतेः सुतौ ॥ मुनिशापेन दुःखार्तौ चिंतयामासतुर्भृशम् ॥ ४६ ॥ कर्तव्यं तौ विनिश्चित्य सुदर्शनसुकर्णकौ ॥ गोविंदस्वामिनामानं यमुनातटवासिनम् ॥ ४७ ॥ ब्राह्मणं शीलसंपन्नं पितृत्वे परिकल्प्य तौ ॥ परित्यज्य स्वकं रूपमजायेतां तदा त्मजौ ॥ ४८ ॥ विजयाशोकदत्ताख्यौ तस्य पुत्रौ बभूवतुः ॥ सुतो विजयदत्ताख्यो ज्येष्ठो जज्ञे सुदर्शनः ॥ ४९ ॥ अशोकदत्तनामा तु सुकर्णश्च

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

महिषासुरसंहारवर्णनंनाम सप्तमोऽध्यायः ॥ ७ ॥ छ ॥ ॥ ऋषय ऊचुः ॥ ॥ भगवन्सूत सर्वज्ञ कृष्णद्वैपायनप्रिय ॥ त्वन्मुखाद्वै कथाः श्रुत्वा श्रोत्रकामृतवर्षिणीः ॥ १ ॥ तृप्तिर्न जायतेऽस्माकं त्वद्वचोमृतपायिनाम् ॥ अतः शुश्रूषमाणानां भूयो ब्रूहि कथाः शुभाः ॥ २ ॥ वेतालवरदंनाम चक्रतीर्थस्य दक्षिणे ॥ तीर्थमस्ति महापुण्यमित्यवादीर्[1]भवान्पुरा ॥ ३ ॥ वेतालवरदाभिख्या तीर्थस्यास्यागता कथम् ॥ किं प्रभावं च तत्तीर्थमेतन्नो वक्तुमर्हसि ॥ ४ ॥ ॥ श्रीसूत उवाच ॥ ॥ साधु पृष्टं हि युष्माभिरतिगुह्यं मुनीश्वराः ॥ शृणुध्वं मनसा सार्द्धं ब्रवीम्यत्यद्भुतां कथाम् ॥ ५ ॥ पामरा अपि मोदन्ते यां वै श्रुत्वा कथां शुभाम् ॥ कथा चेयं महापुण्या पुरा कैलासपर्वते ॥ ६ ॥ केलिकालेषु पार्वत्यै शंभुना कथिता द्विजाः ॥ तां ब्रवीमि कथामेनामत्यद्भुततरां हि वः ॥ ७ ॥ पुरा हि गालवोनाम महर्षिः सत्यवाक्छुचिः ॥ चिंतयानः परं ब्रह्म तपस्तेपे निजाश्रमे॥ ॥ ८ ॥ तस्य कन्या[2] महाभागा रूपयौवनशालिनी ॥ नाम्ना कांतिमती बाला व्यचरत्पितुरंतिके ॥ ९ ॥ आहरंती च पुष्पाणि बल्यर्थं तस्य वै मुनेः ॥ वेदिसंमार्जनादीनि समिदाहरणानि च ॥ १० ॥ कुर्वती पितरं बाला सम्यक्परिचचार ह ॥ कदाचित्सा तु बल्यर्थं पुष्पाण्याहर्तुमुद्यता ॥ ॥ ११ ॥ तस्मिन्वने कांतिमती सुदूरमगमत्तदा ॥ तत्र पुष्पाणि रम्याणि समाहृत्य च पेटके ॥ १२ ॥ तूर्णं निववृते बाला पितृशुश्रूषणे रता ॥ निवर्तमानां तां कन्यां विद्याधरकुमारकौ ॥ १३ ॥ सुदर्शनसुकर्णाख्यौ विमानस्थौ ददर्शतुः ॥ तां दृष्ट्वा गालवसुतां रूपयौवनशालिनीम् ॥१४॥ कामस्य पत्नीं ललितां रतिं मूर्तिमतीमिव ॥ सुदर्शनाभिधो ज्येष्ठो विद्याधरकुमारकः ॥ १५ ॥ हर्षसंफुल्लनयनश्चकमे काममोहितः ॥ पूर्णचन्द्राननां तां वै वीक्षमाणो मुहुर्मुहुः ॥ १६ ॥ तया रिरंसुकामोऽसौ विमानाग्रादवातरत् ॥ तामुपेत्य मुनेः कन्यामित्युवाच सुदर्शनः ॥ १७ ॥ ॥ ॥ सुदर्शन उवाच ॥ ॥ कासि भद्रे सुता कस्य रूपयौवनशालिनी ॥ रूपमप्रतिमं ह्येतदाह्लादयति मे मनः ॥ १८ ॥ त्वां दृष्ट्वा रतिसंकाशां बाधते मां मनोभवः ॥ सुकण्ठनामधेयस्य विद्याधरपतेरहम् ॥ १९ ॥ आत्मजो रूपसंपन्नो नाम्ना चैव सुदर्शनः ॥ प्रतिगृह्णीष्व मां भद्रे रक्ष मां करुणादृशा ॥ २० ॥ भर्तारं मां समासाद्य सर्वान्भोगानवाप्स्यसि ॥ इत्याकर्ण्य वचस्तस्य विद्याधरसुतस्य सा ॥ २१ ॥ तदा कांतिमती वाक्यं धर्मयुक्तमभाषत ॥ सुदर्शन महाभाग विद्याधरपतेः सुत ॥ २२ ॥ आत्मजां मां विजानीहि गालवस्य महात्मनः ॥ कन्या चाहमनूढास्मि पितृशु

१ इत्यवादि त्वया पुरा–इ०पा० । २ पुत्री–इ०पा० ।

CC-0. In Public Domain. Digitization by eGangotri

प्रणम्यादौ सलिलं[1]स्वामिनं तथा ॥ ५० ॥ महादेवाभ्यनुज्ञातो रामचंद्रोऽतिधार्मिकः ॥ स्थापयित्वा स्वहस्तेन पाषाणनवकं मुदा ॥ ५१ ॥ सेतुमारब्धवान्विप्रा यावल्लंकामतंद्रितः ॥ सिंहासनं समारुह्य रामो नलकृतं शुभम् ॥ ५२ ॥ वानरैः कारयामास सेतुमब्धौ नलादिभिः ॥ पर्वताञ्छाखिनो वृक्षान्दृषदः काष्ठसंचयान् ॥ ५३ ॥ तृणानि च समाजह्रुर्वानरा वनमध्यतः ॥ ५४ ॥ नलस्तानि समादाय चक्रे सेतुं महोदधौ ॥ पंचभिर्दिवसैः सेतुर्यावल्लंकासमीपतः ॥ ५५ ॥ दशयोजनविस्तीर्णश्शतयोजनमायतः ॥ कृतः सेतुर्नलेनाब्धौ पुण्यः पापविनाशनः ॥ ५६ ॥ देवीपुरस्य निकटे नवपाषाणरूपके ॥ सेतुमूले नरः स्नायात्स्वपापपरिशुद्धये ॥ ५७ ॥ चक्रतीर्थे तथा स्नायाद्व्रजेत्सेत्वधिपं हरिम् ॥ देवीपत्तनमारभ्य यत्कृतं सेतुबंधनम् ॥ ५८ ॥ तत्सेतुमूलं विप्रेंद्रा यथार्थं[2] परिकल्पितम् ॥ सेतोस्तु पश्चिमा कोटिर्दर्भशय्या प्रकीर्तिता ॥ ५९ ॥ देवीपुरी[3] च प्राक्कोटिरुभयं सेतुमूलकम् ॥ उभयं पुण्यमाख्यातं पवित्रं पापनाशनम् ॥ ६० ॥ यत्सेतुमूलं गच्छंति येन मार्गेण ये नराः ॥ तत्तन्मार्गगतास्ते ते तस्मिंस्तस्मिन्विमुक्तिदे ॥ ६१ ॥ स्नात्वादौ सेतुमूले तु चक्रतीर्थे तथैव च ॥ संकल्पपूर्वकं पश्चाद्गच्छेयुः सेतुबंधनम् ॥ ६२ ॥ देवीपुरे तथा दर्भशय्यायामपि भूसुराः ॥ चक्रतीर्थे शिवे स्नानं पुण्यं पापविनाशनम् ॥६३॥ स्मरणादुभयत्रापि चक्रतीर्थस्य वै द्विजाः ॥ भस्मीभवंति पापानि लक्षजन्मकृतान्यपि ॥ ६४ ॥ जन्मापि विलयं यायान्मुक्तिश्चापि करे स्थिता ॥ चक्रतीर्थसमं तीर्थं न भूतं न भविष्यति ॥ ६५ ॥ भूलोके यानि तीर्थानि गंगादीनि द्विजोत्तमाः ॥ चक्रतीर्थस्य तान्यद्धा कलां नार्हंति षोडशीम् ॥ ६६ ॥ आदौ तु नवपाषाणमध्येऽब्धौ स्नानमाचरेत् ॥ क्षेत्रं[4]पिंडे ततः कुर्याच्चक्रतीर्थे तथैव च ॥ ६७ ॥ सेतुनाथं हरिं सेवेत्स्वपापपरिशुद्धये ॥ एवं हि दर्भशय्यायां कुर्युस्तन्मार्गतो गताः ॥ ६८ ॥ आरूढं रामचंद्रेण यो नमस्कुरुते जनः ॥ सिंहासनं नलकृतं न तस्य नरकाद्भयम् ॥ ६९ ॥ सेतुमादौ नमस्कुर्याद्रामं ध्यायन्हृदा तदा ॥ रघुवीरपदन्यासपवित्रीकृतपांसवे ॥ ७० ॥ दशकंठशिरश्छेदहेतवे सेतवे नमः ॥ केतवे रामचंद्रस्य मोक्षमार्गैकहेतवे ॥ ७१ ॥ सीताया मानसांभोजभानवे सेतवे नमः ॥ ॥ साष्टांगं प्रणिपत्यादौ मंत्रेणानेन वै द्विजाः ॥ ७२ ॥ ततो वेतालवरदं तीर्थं गच्छेन्महाबलम् ॥ तत्र स्नानादवाप्नोति सिद्धिं पारामिकां नरः ॥ ७३ ॥ योऽध्यायमेनं पठते मनुष्यः शृणोति वा भक्तियुतो द्विजेंद्राः ॥ स्वर्गादयस्तस्य न दुर्लभाः स्युः कैवल्यमप्यस्य करस्थमेव ॥ ७४ ॥ इति श्रीस्कांदे महापुराण एकाशीसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे सेतुमहात्ये चक्रतीर्थप्रशंसायां देवीपुराभिधानकथने

१ तिलकस्वामिनम्—इ० पा० । २ यात्रार्थम्—इ० पा० । ३ दुर्गापुरी—इ० पा० । ४ क्षेत्रपिण्डम्—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तीक्ष्णधाराग्रैः परमर्मविदारणैः ॥ ततः स पुरुषो विप्रा गजोऽभूद्धस्तदन्तवान् ॥ २३ ॥ दुर्गाया वाहनं सिंहं करेण विचकर्ष च ॥ ततः सिंहः करं
तस्य विचकर्त नखांकुरैः ॥ २४ ॥ भूयो महासुरो जातो माहिषं वेषमाश्रितः ॥ ततः क्रुद्धा भद्रकाली महत्पानमसेवत ॥ २५ ॥ ततः पानवशा
न्मत्ता जहासारुणलोचना ॥ महिषः सोऽपि गर्वेण शृंगाभ्यां पर्वतोत्करान् ॥२६॥ चंडिकां प्रति चिक्षेप सा च तानच्छिनच्छरैः ॥ ततो देवी जग
न्माता महिषासुरमब्रवीत् ॥ २७ ॥ ॥ देव्युवाच ॥ ॥ कुरु गर्वं क्षणं मूढ मधु यावत्पिबाम्यहम् ॥ निवृत्तमधुपानाहं त्वां नयिष्ये यमक्षयम्॥
॥२८॥हते त्वयि दुराधर्षे मया दैवतकंटके॥स्वंस्वं स्थानं प्रपद्यंतां सिद्धाः साध्या मरुद्गणाः॥२९॥उक्त्वैवं ताडयामास मुष्टिना महिषासुरम्॥ ताडि
तोऽयं ततो देव्या महिषो भृशविह्वलः॥३०॥दक्षिणस्योदधेस्तीरे प्रदुद्राव त्वरान्वितः॥अनुदुद्राव तं देवी सिंहमारुह्य वाहनम्॥३१॥अनुद्रुतस्ततो देव्या
महिषो दानवेश्वरः॥धर्मपुष्करिणीतोये दशयोजनमायते॥३२॥प्रविश्यांतर्हितस्तस्थौ दुर्गाताडनविह्वलः॥ततो दुर्गा समासाद्य धर्मपुष्करिणीतटम् ॥
॥३३॥ नददर्शासुरं तत्र महिषं चंडिका तदा ॥ अशरीरा ततो वाणी दुर्गां देवीमभाषत ॥३४॥ भद्रकालि महादेवि महिषो दानवस्त्वया ॥ ताडितो
मुष्टिना भद्रे धर्मपुष्करिणीजले ॥३५॥ अस्मिन्नंतर्हितः शेते भयार्तो मारयस्व तम् ॥ येन केनाप्युपायेन चैनं प्राणैर्वियोजय ॥३६॥ एवं वाचाऽशरी
रिण्या कथिता चंडिका तदा ॥ प्राह स्ववाहनं सिंहमसुरेंद्रवधोद्यता ॥३७॥ मृगेंद्र सिंहविक्रांत महाबलपराक्रम ॥ धर्मपुष्करिणीतोयं निःशेषं पीय
तां त्वया ॥ ३८ ॥ देव्यैवमुक्तः पंचास्यो धर्मपुष्करिणीजलम् ॥ निःशेषं च पपौ विप्रा यथा पांसुर्भवेत्तथा ॥ ३९ ॥ निरगान्महिषो दीनस्ततस्तस्मा
ज्जलाशयात् ॥ आयांतमसुरं देवी पादेनाक्रम्य मूर्द्धनि ॥ ४० ॥ कंठं शूलेन तीक्ष्णेन पीडयामास कोपिता ॥ ततो देव्यसिमादाय चकर्तास्य
शिरो महत् ॥ ४१ ॥ एवं स महिषो विप्राः सभृत्यबलवाहनः ॥ दुर्गया निहतो भूमौ पपात च ममार च ॥ ४२ ॥ ततो देवाः सगंधर्वाः सिद्धा
श्च परमर्षयः ॥ स्तुत्वा देवीं ततः स्तोत्रैस्तुष्टा जहृषिरे तदा ॥ ४३ ॥ अनुज्ञातास्ततो देव्या देवा जग्मुर्यथागतम् ॥ ततो देवी जगन्माता स्व
नाम्ना पुरमुत्तमम् ॥ ४४ ॥ दक्षिणस्य समुद्रस्य तीरे चक्रे तदोत्तरे ॥ ततो देव्यनुशिष्टास्ते देवाः शक्रपुरोगमाः ॥ ४५ ॥ पूरयामासुरमृतैर्धर्मपुष्क
रिणीं तदा ॥ ततो ह्यमृततीर्थाख्यां लेभे तत्तीर्थमुत्तमम् ॥ ४६ ॥ ततो देवी वरमदात्स्वपुरस्य मुदान्विता ॥ पशव्यं चापरोगं च पुरमेतद्भवत्विति
॥ ४७ ॥ ददौ तीर्थाय च वरं स्नातानामत्र वै नृणाम् ॥ यथाभिलाषं सिद्धिः स्यादित्युक्त्वा सा दिवं ययौ ॥ ४८ ॥ ॥ श्रीसूत उवाच ॥ ॥
यत्स्वनाम्ना चकारेदं देवी पुरमनत्तमम् ॥ देवीपत्तनमित्युक्तं तेन देव्याः पुरोत्तमम् ॥ ४९ ॥ देवीपत्तनमारभ्य सुमुहूर्ते दिने द्विजाः ॥ विघ्नेश्वरं

CC-0. In Public Domain. Digitization by eGangotri

निहतं देव्या शरैः कांचनपुंखितैः ॥ ७६ ॥ याममात्रेण विप्रेंद्रास्तदद्भुतमिवाभवत् ॥ ७७ ॥ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे सेतुमाहात्म्ये चक्रतीर्थप्रशंसायां देवीपुराभिधानकथने देवीमहिषासुरयुद्धवर्णनं नाम षष्ठोऽध्यायः ॥ ६ ॥ ॥ श्रीसूत उवाच ॥ ॥ स्वसैन्यमवलोक्याथ महिषो दानवेश्वरः ॥ हतं देव्या महाक्रोधाच्चंडकोपमथाब्रवीत् ॥ १ ॥ ॥ महिष उवाच ॥ ॥ चंडकोप महावीर्य युद्ध्यस्वैनां दुरात्मिकाम् ॥ तथास्त्विति स चोक्त्वाथ चंडकोपः प्रतापवान् ॥ २ ॥ अवाकिरद्बाणवर्षैर्देवीं समरमूर्द्धनि ॥ बाणजालानि तस्याशु चंडकोपस्य लीलया ॥ ३ ॥ छित्त्वा जघान शस्त्रेण चंडकोपस्य सांबिका ॥ चकर्त वाजिनोऽप्यस्य सारथिं च ध्वजं धनुः ॥ ४ ॥ उन्ममाथ रथं चापि तं बाणैर्हृद्यताडयत् ॥ स भग्नधन्वा विरथो हताश्वो हतसारथिः ॥ ५ ॥ चंडकोपस्ततो देवीं खड्गचर्मधरोऽभ्यगात् ॥ खड्गेन सिंहमाजघ्ने देव्या वाहं महासुरः ॥ ६ ॥ देवीमपि भुजे सव्ये खड्गेन प्रजघान सः ॥ खड्गो देव्या भुजे सव्ये व्यशीर्यत सहस्रधा ॥ ७ ॥ ततः शूलेन महता चंडकोपं तदांबिका ॥ जघान हृदये सोऽपि पपात च ममार च ॥ ८ ॥ चंडकोपे हते तस्मिन्महावीर्ये महाबले ॥ चित्रभानुर्गजारूढो देवीं तामभ्यधावत ॥ ९ ॥ दिव्यां शक्तिं ससर्जाथ महाघंटारवाकुलाम् ॥ न्यवारयत हुंकारैर्देवी शक्तिं निराकुलाम् ॥ १० ॥ ततः शूलेन सा देवी चित्रभानुं व्यदारयत् ॥ मृते तस्मिंस्ततो युद्धे करालो द्रुतमभ्यगात् ॥ ११ ॥ करमुष्टिप्रहारेण सोऽपि देव्या निपातितः ॥ ततो देवी मदोन्मत्तं गदया व्यसुमातनोत् ॥ १२ ॥ बाष्कलं पट्टिशेनापि चक्रेणापि तथांतिकम् ॥ प्राहिणोद्यमलोकाय दुर्गा देवी द्विजोत्तमाः ॥ १३ ॥ एवमन्यान्महाकायान्मंत्रिणो महिषस्य च ॥ शूलेन प्रोथयित्वाथ प्राहिणोद्यमसादनम् ॥ १४ ॥ आत्मसैन्ये हते त्वेवं दुर्गया महिषासुरः ॥ माहिषेणाथ रूपेण गणान्देव्या अभक्षयत्[1] ॥ १५ ॥ तुण्डेन निजघानैकान्खुराघातैस्तथापरान् ॥ निश्वासवायुभिश्चान्यान्पातयामास[2] रोषितः ॥ १६ ॥ देव्या भूतगणं त्वेवं निहत्य महिषासुरः ॥ सिंहं मारयितुं देव्याश्चुक्रोध च ननाद च ॥ १७ ॥ ततः सिंहोऽभवत्क्रुद्धो महावीर्यो महाबलः ॥ खुराभिघातनिर्भिन्नमहीतलमहीधरः ॥ १८ ॥ महिषासुरमायांतं नखैरेनं व्यदारयत् ॥ चंडिकापि ततः क्रुद्धा वधे तस्याकरोन्मतिम् ॥ १९ ॥ बबन्ध पाशैर्महिषं चंडिका कोपमूर्च्छिता ॥ मोचयित्वा ततः पाशांस्त्यक्तमाहिषवेषवान् ॥ २० ॥ सिंहवेषोऽभवद्दैत्यो महाबलपराक्रमः ॥ देवी तस्य शिरो यावच्छेत्तुं बुद्धिमधारयत् ॥ २१ ॥ तावत्स पुरुषो भूत्वा खड्गपाणिरदृश्यत ॥ अथ तं पुरुषं देवी खड्गहस्तं शरोत्करैः ॥ २२ ॥ जघान

१ अभत्सर्यत्–इ० पा० । २ त्रासयामास–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

म् ॥ ५१ ॥ क्षोभिताशेषशेषादिमहानागपरंपराम् ॥ विलोक्य देवीमसुराः समनह्यन्नुदायुधाः ॥ ५२ ॥ ततो देव्या तया सार्द्धमसुराणामभूद्रणः ॥ अस्त्रैः शस्त्रैः शरैश्चक्रैर्गदाभिर्मुसलैरपि ॥ ५३ ॥ गजाश्वरथपादातैरसंख्येयैर्महाबलः ॥ महिषो युयुधे तत्र देव्या साकमरिंदमः ॥ ५४ ॥ लक्षकोटिसहस्राणि प्रधानासुरयूथपाः ॥ एकैकस्य तु सेनायास्तेषां संख्या न विद्यते ॥ ५५ ॥ ते सर्वे युगपद्देवीं शस्त्रैरावव्रुरोजसा ॥ सापि देवी ततो भीमा दैत्यमुक्तास्त्रसंचयम् ॥ ५६ ॥ बिभेद लीलया बाणैः स्वकार्मुकविनिःसृतैः ॥ ससर्ज दैत्यकायेषु बाणपूगान्यनेकशः ॥ ५७ ॥ देव्याश्रयबला देवा निर्भया दैत्ययूथपैः ॥ युयुधुः संयुगे शस्त्रैरस्त्रैरप्यायुधांतरैः ॥ ५८ ॥ ततो देवा बलोत्सिक्ता देवीशक्त्युपबृंहिताः ॥ निःशेषमसुरान्सर्वानायुधैर्निरमूलयन् ॥ ५९ ॥ स्वसैन्ये तु क्षयं याते संक्षुब्धो महिषासुरः ॥ चापमादाय वेगेन विकृष्य च महास्वनम् ॥ ६० ॥ संधाय मुमुचे बाणान्देवसैन्येषु भूसुराः ॥ इंद्रे तु दशसाहस्रं यमे पंचसहस्रकम् ॥ ६१ ॥ वरुणे चाष्टसाहस्रं कुबेरे षट्सहस्रकम् ॥ सूर्ये चंद्रे च वह्नौ च वायौ वसुषु चाश्विनोः ॥ ६२ ॥ अन्येष्वपि च देवेषु महिषो दानवेश्वरः ॥ प्रत्येकमयुतं बाणान्मुमुचे बलिनां वरः ॥ ६३ ॥ पलायंते ततो देवा महिषासुरमर्दिताः ॥ देवीं शरणमाजग्मुस्त्राहित्राहीतिवादिनः ॥ ६४ ॥ ततो देवी गणान्स्वस्य भूतवेतालकादिकान् ॥ यूयं नाशयत क्षिप्रमासुरं बलमित्यशात्[1] ॥ ६५ ॥ अहं तु महिषं युद्धे योधयामि बलोद्धतम् ॥ ततो देव्या गणैः सर्वमासुरं क्षतमाशु[2] वै ॥ ६६ ॥ ततः सैन्ये क्षयं नीते गणैर्देवीप्रचोदितैः ॥ योद्धुकामः स महिषो गणैः साकं व्यतिष्ठत ॥ ६७ ॥ अत्रांतरे महानादः सुचक्षुश्च महाहनुः ॥ महाचंडो महाभक्षो महोदरमहोत्कटौ ॥ ६८ ॥ पञ्चास्यः पादचूडश्च बहुनेत्रः प्रबाहुकः ॥ एकाक्षस्त्वेकपादश्च बहुपादोऽप्यपादकः ॥ ६९ ॥ एते चान्ये च बहवो महिषासुरमंत्रिणः ॥ योद्धुकामा रणे देव्याः पुरतस्त्ववतस्थिरे ॥ ७० ॥ सिंहं वाहनमारुह्य ततो देवी मनोजवम् ॥ प्रलयांबुदनिर्घोषं चापमादाय भैरवम् ॥ ॥ ७१ ॥ विस्फोट्य मुमुचे बाणान्वज्रवेगसमान्युधि ॥ दशलक्षगजैश्चापि शतलक्षैश्च वाजिभिः ॥ ७२ ॥ शतलक्षै रथैश्चापि लक्षायुतपदातिभिः ॥ युक्तो महाहनुर्दैत्यो देव्या युधि निपातितः ॥७३॥ सैन्ये च तस्य निहता देव्या बाणैर्द्विजोत्तमाः ॥ लक्षकोटिसहस्राणि प्रधानासुरनायकाः ॥७४॥ महिषस्य हि विद्यन्ते महाबलपराक्रमाः ॥ एकैकस्य प्रधानस्य चतुरङ्गबलं तथा ॥ ७५ ॥ महाहनोर्यथा विप्रास्तथैवास्ति महद्बलम् ॥ तत्सर्वं

---

१ अशात्—आज्ञापयत्—इत्यर्थः । २ हतम्—इ० पा० ।

CC-0. In Public Domain. Digitization by eGangotri

कामयते कामं तं सर्वं शीघ्रमाप्नुयात् ॥ १६८ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे सेतुमाहात्म्ये चक्रतीर्थप्रशंसायामलंबुसाविधूमशापविमोचननंनाम पञ्चमोऽध्यायः ॥ ५ ॥ ॥ छ ॥ ॥ ऋषय ऊचुः ॥ ॥ द्वैपायनविनेय त्वं सूत पौराणिकोत्तम ॥ देवीपत्तनपर्यंतं चक्रतीर्थमनुत्तमम् ॥ १ ॥ इत्यब्रवीः पुरास्माकमतः पृच्छाम किंचन ॥ देवीपुरं हि तत्कुत्र यदन्तं चक्रतीर्थकम् ॥ २ ॥ देवीपत्तनमित्याख्या कथं तस्याभवत्तथा ॥ श्रीरामसेतुमूले च स्नातानां पापिनामपि[1] ॥ ३ ॥ कीदृशं वा भवेत्पुण्यं चक्रतीर्थे तथैव च ॥ एतच्चान्यान्विशेषांश्च ब्रूहि पौराणिकोत्तम ॥ ४ ॥ ॥ श्रीसूत उवाच ॥ ॥ सर्वमेतत्प्रवक्ष्यामि शृणुध्वं मुनिपुंगवाः ॥ पठतां शृण्वतां चैतदाख्यानं पापनाशनम् ॥ ५ ॥ यत्र पाषाणनवकं स्थापयित्वा रघूद्वहः ॥ बबन्ध प्रथमं सेतुं समुद्रे मैथिलीपतिः ॥ ६ ॥ देवीपुरं तु तत्रैव यदन्तं चक्रतीर्थकम् ॥ देवीपत्तनमित्याख्या यथा तस्य समागता ॥ ७ ॥ तद्ब्रवीमि मुनिश्रेष्ठाः शृणुध्वं श्रद्धया सह ॥ पुरा देवासुरे युद्धे देवैर्नाशितपुत्रिणी ॥ दितिः प्रोवाच तनयामात्मनः शोकमोहिता ॥ ८ ॥ ॥ दितिरुवाच ॥ ॥ याहि पुत्रि तपः कर्तुं तपोवनमनुत्तमम् ॥ ९ ॥ पुत्रार्थं तव सुश्रोणि नियता नियतेन्द्रिया ॥ इन्द्रादयो न शिष्येरन्येन पुत्रेण वै सुराः ॥ १० ॥ उदिता तनया चैवं जनन्या तां प्रणम्य सा ॥ स्वीकृत्य माहिषं रूपं वनं पञ्चाग्निमध्यगा ॥ ११ ॥ तपोऽतप्यत सा घोरं तेन लोकाश्चकंपिरे ॥ तस्यां तपः प्रकुर्वंत्यां त्रिलोक्यासीद्भयातुरा ॥ १२ ॥ इन्द्रादयः सुरगणा मोहमापुर्द्विजोत्तमाः ॥ सुपार्श्वस्तपसा तस्या मुनिः क्षुब्धोऽवदत्तु ताम् ॥ १३ ॥ ॥ सुपार्श्व उवाच ॥ ॥ परितुष्टोऽस्मि सुश्रोणि पुत्रस्तव भविष्यति ॥ मुखेन महिषाकारो वपुषा नररूपवान् ॥ १४ ॥ महिषो नाम पुत्रस्ते भविष्यत्यतिवीर्यवान् ॥ पीडयिष्यति यः स्वर्गं देवेन्द्रं च ससैनिकम् ॥ १५ ॥ सुपार्श्वस्त्वेवमुक्त्वा तां विनिवार्य तपस्तथा ॥ आगच्छदात्मनो लोकमनुनीय तपस्विनीम् ॥ १६ ॥ अथ जज्ञे स महिषो यथोक्तं ब्रह्मणा पुरा ॥ व्यवर्द्धत महावीर्यः पर्वणीव महोदधिः ॥ १७ ॥ ततः पुत्रो विप्रचित्तेर्विद्युन्माल्यसुराग्रणीः ॥ अन्येऽप्यसुरवर्यास्ते संति ये भूतले द्विजाः ॥ १८ ॥ ते सर्वे महिषस्यास्य श्रुत्वा दत्तं वरं मुदा ॥ समागम्य मुनिश्रेष्ठाः प्रावदन्महिषासुरम् ॥ १९ ॥ स्वर्गाधिपत्यमस्माकं पूर्वमासीन्महामते ॥ देवैर्विष्णुं समाश्रित्य राज्यं नो हृतमोजसा ॥ २० ॥ तद्राज्यमानय बलादस्माकं महिषासुर ॥ वीर्यं प्रकटयस्वाद्य प्रभावमपि चात्मनः ॥२१॥ अतुल्यबलवीर्यस्त्वं ब्रह्मदत्तवरोद्धतः॥ पुलोमजापतिं युद्धे जहि देवगणैः सह ॥२२॥ दनुजैरेवमुक्तोऽसौ योद्धुकामोऽमरैः सह ॥ महा

१ द्वैपायनस्य शिष्यस्त्वम्–इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वीर्योऽथ महिषः प्रययावमरावतीम् ॥२३॥ देवानामसुराणां च संवत्सरशतं रणम् ॥ पुरा बभूव विप्रेंद्रास्तुमुलं रोमहर्षणम् ॥ २४ ॥ देववृन्दं ततो भी
त्या पुरस्कृत्य पुरन्दरम् ॥ कांदिशीकमभूद्विप्रा ब्रह्माणं च ययौ तदा ॥ २५ ॥ ब्रह्मा तानमरान्सर्वान्समादाय ययौ पुनः॥ नारायणशिवौ यत्र वर्तेते
विश्वपालकौ ॥२६॥ तत्र गत्वा नमस्कृत्य स्तुत्वा स्तोत्रैरनेकशः ॥ ब्रह्मा निवेदयामास महिषासुरचेष्टितम् ॥ २७ ॥ सुराणामसुरैः पीडां देवयोः
शंभुकृष्णयोः ॥ इंद्राग्नियमसूर्येंदुकुबेरवरुणादिकान् ॥ २८ ॥ निराकृत्याधिकारेषु तेषां तिष्ठत्ययं स्वयम् ॥ अन्येषां देववृंदानामधिकारेपि तिष्ठति
॥ २९ ॥ निरस्तं देववृंदं तत्स्वर्लोकादवनीतले ॥ मनुष्यवद्विचरते महिषासुरबाधितम् ॥ ३० ॥ एतज्ज्ञापयितुं देवौ युवयोरहमागतः॥ सार्द्धं देव
गणैरत्र रक्षतं तान्समागतान् ॥ ३१ ॥ ब्रह्मणो वचनं श्रुत्वा रमेश्वरमहेश्वरौ ॥ कोपात्करालवदनौ दुष्प्रेक्ष्यौ तौ बभूवतुः ॥ ३२ ॥ अत्यंतकोपज्वलि
तान्मुखाद्विष्णोरथ द्विजाः ॥ निश्चक्राम महत्तेजः शंभोः स्रष्टुस्तथैव च ॥ ३३ ॥ अपरेषां सुराणां च देहादिंद्रशरीरतः ॥ तेजः समुदभूत्क्रूरं तदेकं
समजायत ॥ ३४ ॥ तेषां तु तेजसां राशिर्ज्वलत्पर्वतसंनिभः ॥ ददृशे देववृंदैस्तैर्ज्वालाव्याप्तदिगंतरः ॥ ३५ ॥ तेजसां समुदायोऽसौ नारी काचि
दभूत्तदा ॥ शिवतेजो मुखमभूद्विष्णुतेजो भुजौ द्विजाः ॥ ३६ ॥ ब्रह्मतेजस्तु चरणौ मध्यमैंद्रेण तेजसा ॥ यमस्य तेजसा केशाः कुचौ चंद्रस्य
तेजसा ॥ ३७ ॥ जंघोरू कल्पितौ विप्रा वरुणस्य तु तेजसा ॥ नितंबः पृथिवीतेजः पादांगुल्योऽर्कतेजसा ॥ ३८ ॥ करांगुल्यो वसूनां च तेजसा
कल्पितास्तथा ॥ कुबेरतेजसा विप्रा नासिका परिकल्पिता ॥ ३९ ॥ नवप्रजापतीनां च तेजसा दंतपंक्तयः ॥ चक्षुर्द्वयं समजनि हव्यवाहनतेजसा ॥
॥ ४० ॥ उभे संध्ये भ्रुवौ जाते श्रवणे वायुतेजसा ॥ इतरेषां च देवानां तेजोभिरतिदारुणैः ॥ ४१ ॥ कृतान्यावयवा नारी दुर्गा परमभास्वरा ॥
बभूव दुर्धर्षतरा सर्वैरपि सुरासुरैः ॥ ४२ ॥ सर्ववृंदारकानीकतेजःसंघसमुद्भवा ॥ तां दृष्ट्वा प्रीतिमापुस्ते देवा महिषबाधिताः ॥ ४३ ॥ ततो रुद्रा
दयो देवा विनिष्कृष्यायुधान्निजात् ॥ आयुधानि ददुस्तस्यै शूलादीनि द्विजोत्तमाः ॥ ४४ ॥ भूषणानि ददुस्तस्यै वस्त्रमाल्यानि चंदनम् ॥ सापि
देवी तदा वस्त्रैर्भूषणैश्चंदनादिभिः ॥ ४५ ॥ कुसुमैरायुधैर्हारैर्भूषिता परिचारकैः ॥ साट्टहासं प्रमुंचंती भैरवी भैरवस्वना ॥ ४६ ॥ ननाद कंपयंतीव
रोदसी देवसेविता ॥ देव्या भैरवनादेन चचाल सकलं जगत् ॥ ४७ ॥ सिंहवाहनमारूढां देवींताममरास्तदा ॥ मुनयः सिद्धगंधर्वास्तुष्टुवुर्जयश
ब्दतः ॥ ४८ ॥ अतिभीषणनादेन देव्याः क्षुब्धं जगत्त्रयम् ॥ दृष्ट्वा देवारयो दैत्याः समुत्तस्थुरुदायुधाः ॥ ४९ ॥ महिषोऽपि महाक्रोधात्समुद्यत
महायुधः ॥ तं शब्दमवलक्ष्याथ ययावसुरसंवृतः ॥ ५० ॥ व्यलोकयत्ततो देवीं तेजोव्याप्तजगत्त्रयीम् ॥ सायुधानंतबाह्वाढ्यां नादकंपितभूतला

CC-0. In Public Domain. Digitization by eGangotri

गत्वा सर्वं राज्ञे न्यवेदयत्॥१४२॥ ततः सहस्रानीकोऽयं तत्प्राप्य मणिकंकणम् ॥ मृगावतीविप्रयोगविषाग्निपरिपीडितः ॥ १४३ ॥ तद्बाहुसंगपीयूष
शीकरासारशीतलम् ॥ कंकणं हृदये न्यस्य विललाप सुदुःखितः ॥ १४४ ॥ उवाच च कथं लब्धं कंकणं शबर त्वया ॥ स चैवमुक्तस्तत्प्राप्ति
क्रमं तस्मै न्यवेदयत् ॥ १४५ ॥ शबरस्य वचः श्रुत्वा सहस्रानीकभूपतिः ॥ प्रतस्थे मंत्रिभिः सार्द्धं प्रियालोकनकौतुकी ॥ १४६ ॥ यत्रेंदुभास्क
रमुखा लभंते सहसोदयम् ॥ तमेव गिरिमुद्दिश्य सहसा सोऽभ्यगच्छत ॥ १४७ ॥ किंचिन्मार्गं समुल्लंघ्य तस्थौ विश्रांतसैनिकः ॥ तस्मिन्निनिद्रे
दयितासंगमध्यानतत्परे ॥ १४८ ॥ वसंतको विचित्रास्तु कथयामास वै कथाः ॥ तत्कथाश्रवणेनैव तां रात्रिं स निनाय वै ॥ १४९ ॥
ततः कालेन ककुभं प्राप्य जंभारिपालिताम् ॥ जमदग्न्याश्रमं गत्वा निर्वैरहरिकुंजरम् ॥ १५० ॥ तपस्यंतं मुनिं दृष्ट्वा शिरसा प्रणनाम सः ॥
आशीर्वादेन स मुनिः प्रतिजग्राह तं नृपम् ॥ १५१ ॥ विधिवत्पूजयामास पाद्यार्घ्याचमनीयकैः ॥ उवाच च महीपालं
धर्मार्थसहितं वचः ॥ १५२ ॥ नरनाथ मृगावत्यां जातोऽयं तनयस्तव ॥ यशोनिधिर्महातेजा रामचंद्र इवापरः ॥ १५३ ॥
भविष्यति दिशां जेता सिंहसंहननो युवा ॥ पौत्र एष महाभाग तथा ह्युदयनात्मजः ॥ १५४ ॥ इयं मृगावती भार्या पाति
व्रत्यपरायणा ॥ तदेतांस्त्रीन्महाराज प्रतिगृह्णीष्व मा चिरम् ॥ १५५ ॥ उक्त्वैवं मुनिना दत्तांस्तान्गृहीत्वा महीपतिः ॥ प्रियासहायः स्वपुरीं प्रत
स्थे मंत्रिभिर्वृतः ॥ १५६ ॥ ततः प्रविश्य कौशांबीं नगरीं स नृपोत्तमः ॥ स्मरञ्छक्रस्य वचनं मानुषं जन्म कुत्सयन् ॥ १५७ ॥ महीमुदयनायैव
ददौ पुत्राय धीमते ॥ तस्मिन्नुदयने पुत्रे राज्यपालनदक्षिणे ॥१५८॥ राज्यभारं विनिक्षिप्य स शापविनिवृत्तये ॥ वसंतकरुमण्वद्भ्यां मृगावत्या च
भार्यया ॥ १५९ ॥ यौगन्धरायणेनापि मंत्रिपुत्रेण संयुतः ॥ चक्रतीर्थे महापुण्ये दक्षिणस्योदधेस्तटे ॥ १६० ॥ स्नानं कर्तुं ययौ तूर्णं सर्वतीर्थोत्त
मोत्तमे ॥ वाहनैर्वातरंहोभिरचिराल्लवणोदधिम् ॥ १६१ ॥ संप्राप्य चक्रतीर्थं च स्नानं चक्रुर्यथाविधि ॥ तेषु च स्नातमात्रेषु चक्रतीर्थे नृपादिषु ॥
॥१६२॥विनष्टं तत्क्षणादेव मानुष्यमतिकुत्सितम् ॥ ततो विधूतपापास्ते स्वं रूपं प्रतिपेदिरे ॥१६३॥ दिव्यांबरधराः सर्वे दिव्यमाल्यानुलेपनाः ॥
विमानानि महार्हाणि समारुह्य विभूषिताः ॥ १६४ ॥ तत्तीर्थं बहु मन्वानाः स्वशापच्छेदकारणम् ॥ पश्यतां सर्वलोकानां स्वर्गलोकं ययुस्तदा ॥
॥१६५॥ तदाप्रभृति ते सर्वे ज्ञात्वा तत्तीर्थवैभवम् ॥ पावने चक्रतीर्थेऽस्मिन्स्नानं कुर्वंति सर्वदा ॥१६६॥ एवंप्रभावं तत्तीर्थं ये समागत्य मानवाः ॥
स्नानं सकृच्च कुर्वंति ते सर्वे स्वर्गवासिनः ॥ १६७ ॥ एवं वः कथितं विप्रा विधूमचरितं महत् ॥ यः पठेदिममध्यायं शृणुयाद्वा समाहितः ॥ यं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हानां पुरोभूद्वधकांक्षिणी ॥ सा सर्वकेसरिगजैस्त्यक्ता न निधनं गता॥११६॥आपत्काले नृणां नूनं मरणं नैव लभ्यते॥अतिदीनं समाकर्ण्य तस्याः
क्रंदितमुन्मुखाः॥११७॥मृगा निष्पंदगतयो न तृणान्यप्यभक्षयन् ॥ ततस्तां करुणासिंधुर्मुनिपुत्रस्तथास्थिताम् ॥११८॥ रुदतीं कृपया राज्ञीं समा
नीय स्वमाश्रमम् ॥ न्यवेदयच्च तां राज्ञीं गुरवे जमदग्नये ॥ जमदग्निस्तु धर्मात्मा तामाश्वासयदंतिके ॥ ११९ ॥ ॥ जमदग्निरुवाच ॥ ॥ तथा
जानीहि मां भद्रे कृतवर्मा यथा तव ॥ १२० ॥ एवमाश्वासिता तत्र कृपया जमदग्निना ॥ चक्रे तत्रैव सा वासमाश्रमे मुनिसंकुले ॥ १२१ ॥
ततस्स्वल्पेन कालेन विशाखमिव पार्वती ॥ असूत तनयं बाला शौर्यधैर्यगुणान्वितम् ॥ १२२ ॥ सूतिकागृहकृत्यानि यानि कार्याणि बंधुभिः ॥
चक्रिरे मातृवत्तानि मृगावत्या मुनिस्त्रियः ॥ १२३ ॥ तं सुजातं नृपसुतं कापि वागशरीरिणी ॥ उदयाचलजातत्वाच्चकारोदयनाभिधम् ॥
॥ १२४ ॥ आश्रमे स मुनीन्द्रेण कृतचूडादिकव्रतः ॥ जग्राह सकला विद्या जमदग्नेर्महामुनेः ॥१२५॥ युवा नृपसुतः सोऽयं कदाचिन्मृगयापरः ॥
अपश्यदेकं भुजगं व्याधेन दृढसंयतम् ॥ १२६ ॥ उवाच स कृपायुक्तो व्याध मुंच भुजंगम् ॥ किं करिष्यस्यनेन त्वं नैनं हिंसितुमर्हसि ॥१२७॥
तमुवाच ततो व्याधः सर्पेणानेन पूरुष ॥ धनधान्यादिकं लप्स्ये ग्रामेषु नगरेषु च ॥ १२८ ॥ अतोहं जीविकामेनं नैव मोक्ष्ये कथंचन ॥ इत्यु
क्त्वा पेटिकायां तं बबंध शबराधमः ॥ १२९ ॥ बद्धमालोक्य भुजगं शबराय धनार्थिने ॥ अमोचयत्स्वजननीदत्तं दत्त्वा स कंकणम् ॥ १३० ॥
मोचितस्तेन सर्पोऽसौ नरो भूत्वा कृतांजलिः ॥ सख्यं कृत्वा च सहसा तं पातालं निनाय वै ॥ १३१ ॥ किन्नराख्येन नागेन धृतराष्ट्रसुतेन सः॥
पातालं प्राविशत्तत्र न्यवसत्पूजितस्सुखम् ॥ १३२ ॥ धृतराष्ट्रस्य तनयां भगिनीं किन्नरस्य च ॥ ललिताख्यां गुणोपेतां प्रियां भेजे नृपात्मजः ॥
॥ १३३ ॥ सा तस्माज्जनयामास पुत्रमप्रतिमौजसम् ॥ ततः सा ललिता प्राह त्वरितोदयनं प्रति ॥ १३४ ॥ ॥ ललितोवाच ॥ ॥ अहंविद्या
धरी पूर्वं सुकर्णीनाम नामतः ॥ शापात्सर्पत्वमापन्नास्मि शापांतो गर्भ एष मे ॥ १३५ ॥ ततोऽमुं प्रतिगृह्णीष्व पुत्रमप्रतिमौजसम् ॥ तांबूलीं स्रजम
म्लानां वीणां घोषवतीमपि ॥ १३६ ॥ तथेति प्रतिजग्राह तत्सर्वं नृपनंदनः ॥ पश्यतां सर्वसर्पाणां साप्यगच्छद्विहायसम् ॥ १३७ ॥ ततः सोऽपि
गृहीत्वा तु वीणां मालां च पुत्रकम् ॥ दुःखितामात्मजननीं द्रष्टुकामस्त्वरान्वितः ॥ १३८ ॥ श्वशुरादीननुज्ञाप्य सहसा स्वाश्रमं ययौ ॥ जननीं
शोकसंतप्तामाश्वस्तां जमदग्निना ॥ १३९ ॥ समेत्य तोषयामास वृत्तं चास्यै न्यवेदयत् ॥ तदा प्रहृष्टहृदया सा बभूव मृगावती ॥ १४० ॥ अत्रां
तरे स शबरः कौशांब्यां वणिजं ययौ ॥ सहस्रानीकनामांकं विक्रेतुं मणिकंकणम्॥१४१॥राजमुद्रां समालोक्य कंकणे स वणिग्वरः ॥ शबरेण समं

CC-0. In Public Domain. Digitization by eGangotri

विनीतवत् ॥ कृपावान्स महर्षिस्तु पुत्रं ते दास्यति ध्रुवम् ॥ ६२ ॥ इति तद्वचनं श्रुत्वा हर्षसंफुल्ललोचनः ॥ मंत्रिणा तेन संयुक्तस्तस्यागादा
श्रमं मुनेः ॥ ६३ ॥ तमाश्रमे समासीनं प्रणनाम महीपतिः ॥ शांडिल्यस्तु महातेजा राजानं प्राप्तमाश्रमम् ॥ ६४ ॥ दृष्ट्वा पाद्यादिभिः पूज्य
स्वागतं व्याजहार सः ॥ ॥ शांडिल्य उवाच ॥ ॥ शतानीक किमर्थं त्वमाश्रमं प्राप्तवान्मम ॥ ६५ ॥ यत्कर्तव्यमिदानीं ते तद्वदस्व करो
म्यहम् ॥ मुनिमेवं वदंतं तं प्रत्यवादीद्युगंधरः ॥ ६६ ॥ भगवन्नेष वै राजा पुत्रालाभेन कर्षितः ॥ भवंतं शरणं प्राप्तः सांप्रतं पुत्रकारणात् ॥ ६७ ॥
अस्यापुत्रत्वजं दुःखं त्वमपाकर्तुमर्हसि ॥ इति तस्य वचः श्रुत्वा शांडिल्यो मुनिसत्तमः ॥६८॥ पुत्रलाभवरं तस्मै प्रतिजज्ञे नृपाय वै ॥ स राज्ञो
वरदः श्रीमान्कौशांबीमेत्य सादरम् ॥ ६९ ॥ पुत्रेष्ट्यां पुत्रकामस्य याजकोऽभून्महामुनिः ॥ ततो मुनिप्रसादेन राजा दशरथोपमः ॥ ७० ॥
यज्वा राममिव प्राप सहस्रानीकमात्मजम् ॥ एवं विधूमः संजज्ञे शतानीकान्नृपोत्तमात् ॥ ७१ ॥ अत्रांतरे मंत्रिवरस्सेनानीस्तु महीपतेः ॥
द्विजो नर्मवयस्यश्च पुत्रान्प्रापुः कुलोचितान् ॥ ७२ ॥ पुत्रो युगंधरस्यासीन्माल्यवान्नाम भृत्यकः ॥ यौगंधरायणो नाम्ना मन्त्रशास्त्रेषु कोविदः ॥
॥ ७३ ॥ विप्रतीकस्य तनयः पुष्पदन्तो बभूव ह ॥ रुमण्वानिति विख्यातः परसैन्यविमर्दनः ॥ ७४ ॥ वल्लभस्य तदा जज्ञे तनयो वै बलो
त्कटः ॥ वसंतक इति ख्यातो नर्मकर्मसु कोविदः ॥ ७५ ॥ अथ ते ववृधुः सर्वे राजपुत्रपुरोगमाः ॥ पञ्चहायनतां तेषु यातेषु तदनंतरम् ॥ ७६ ॥
अलंबुसापि स्ववंश्या भूपतेः कृतवर्मणः ॥ अयोध्यायां महापुर्यां कन्या जाता मृगावती ॥ ७७ ॥ एवं विधूमप्रमुख्यास्ते जज्ञिरे क्षितिमण्डले ॥
अत्रांतरे महासत्त्वो दुष्टसानुचरो बली ॥ ७८ ॥ अहिदंष्ट्र इति ख्यातो महादैत्यो बलोत्कटः ॥ युक्तः स्थूलशिरोनाम्ना सहायेन दुरात्मना ॥७९॥
रुरोध देवनगरं बबाधे विबुधानपि ॥ वर्तमाने दिवि महासमरे सुरराक्षसाम् ॥ ८० ॥ आनिनाय शतानीकं सहायार्थं पुरंदरः ॥ स यौवराज्ये
तनयं विधाय विधिना नृपः ॥ ८१ ॥ प्रतस्थे रथमास्थाय युद्धाय दितिजैः सह ॥ नीतो मातलिनाभ्येत्य सादरं स धनुर्धरः ॥ ८२ ॥ विधाय
प्रेक्षकान्देवाञ्जघान दितिजान्रणे ॥ अथ दैत्याधिपः सोऽपि निहतः समरे दिवि ॥ ८३ ॥ ततः शक्रस्य वचसा परेतं नृपपुंगवम् ॥ रथमारोप्य
सहसा कौशांबीं मातलिर्ययौ ॥ ८४ ॥ नीत्वा महीतलमसौ तत्सुताय न्यवेदयत् ॥ ततः सहस्रानीकोपि विलप्य बहुदुखितः ॥ ८५ ॥ मंत्रिभिः ॥ ११ ॥
सह संभूय प्रेतकार्यं न्यवर्तयत् ॥ मृतं ज्ञात्वा पतिं राज्ञी सहैवानुममार च ॥ ८६ ॥ महिष्या सह संप्राप्ते भूपाले कीर्तिशेषताम् ॥ भेजे राज्यं
शतानीकतनयो मंत्रिणां गिरा ॥ ८७ ॥ युगन्धरे विप्रतीके वल्लभे च मृते सति ॥ यौगन्धरायणमुखास्तत्पुत्राः सर्व एव हि ॥ ८८ ॥ शतानीक

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सुतस्यास्य तत्तत्कार्यमकुर्वत ॥ एवं स पालयामास महीं राजसुतो बली ॥ ८९ ॥ याते काले महेन्द्रेण सनन्दनमहोत्सवे ॥ निमंत्रितस्तत्क
थितां भाविनीमश्रृणोत्कथाम् ॥ ९० ॥ स्वर्योषिद्ब्रह्मणः शापादयोध्यायायामलंबुसा ॥ जाता मृगावती कन्या भूपतेः कृतवर्मणः ॥ ९१ ॥ विधूम
नामा च वसुस्त्वं नाकललनां पुरा ॥ तामेव ब्रह्मसदने दृष्ट्वानिलहृतांशुकाम् ॥ ९२ ॥ तदैव मादनाक्रांतः शापान्मर्त्यत्वमागतः ॥ सैव ते
दयिता राजन्भाविनी न चिरात्सखे ॥ ९३ ॥ यदा त्वमात्मनः पुत्रं राज्ये संस्थाप्य भूपते ॥ मृगावत्या स्त्रिया सार्द्धं दक्षिणस्योदधेस्तटे ॥ ९४ ॥
चक्रतीर्थे महापुण्ये फुल्लग्रामसमीपतः ॥ स्नानं करिष्यसि तदा शापान्मुक्तो भविष्यसि ॥ ९५ ॥ इति प्रोवाच भगवान्सत्यलोके पितामहः ॥
इतींद्रवचनं श्रुत्वा सहस्रानीकभूपतिः ॥ ९६ ॥ तथोद्वाहकृतोत्साहः समामंत्र्य शचीपतिम् ॥ कौशांबीं प्रस्थितो दृष्टः स तिलोत्तमया पथि ॥
॥ ९७ ॥ स्मरन्किमपि तां कांतां भाषमाणामनन्यधीः ॥ ध्यायञ्छतक्रतुवचो नालुलोके महीपतिः ॥ ९८ ॥ सा शशाप नृपं सुभ्रूरनादरतिर
स्कृता ॥ आहूयमानोपि मया सहस्रानीक भूपते ॥ ९९ ॥ मृगावतीं हृदा ध्यायन्किमर्थं मामुपेक्षसे ॥ सौभाग्यमत्ता मानिन्यो न सहंतेऽवधीर
णाम् ॥ १०० ॥ मामवज्ञाय यां राजन्हृदा ध्यायसि सांप्रतम् ॥ तया चतुर्दशसमा वियुक्तस्त्वं भविष्यसि ॥ १०१ ॥ इति शप्तवतीं राजा तामु
वाच तिलोत्तमाम् ॥ तामेव यदि लभ्येयं तनुजां कृतवर्मणः ॥ १०२ ॥ चतुर्दशसमा दुःखं सहिष्ये तद्वियोगजम् ॥ इत्युक्त्वा तद्गतमना नृपः प्रायो
न्निजां पुरीम् ॥ १०३ ॥ ततः कालेन तनया भूपतेः कृतवर्मणः ॥ तमाससाद दयिता सर्वस्वं पुष्पधन्वनः ॥ १०४ ॥ मृगावतीं समासाद्य विला
सतरुवल्लरीम् ॥ विभ्रमांभोधिलहरीं ननंद मदनद्युतिः ॥ १०५ ॥ सा तस्माद्गर्भमाधत्त भवानीवेंदुशेखरात् ॥ पांडिम्ना शशिलेखेव पीयूषक्षालिता
बभौ ॥ १०६ ॥ सुन्दरी दौर्हृदव्यक्तेरथ पौरंदरीव दिक् ॥ रराज राजमहिषी रजनीकरगर्भिणी ॥ १०७ ॥ सा दौर्हृदवशाद्राज्ञी यंयं काममकाम
यत् ॥ सुदुर्लभमपि प्रेम्णा तत्तत्सर्वं समाहरत् ॥ १०८ ॥ पत्यौ समीहितकरे सा कदाचिन्मृगावती ॥ स्वेच्छया वै मतिं चक्रे रक्तवापीनिम
ज्जने ॥ १०९ ॥ अभिलाषं स विज्ञाय मृगावत्या महीपतिः ॥ कौसुम्भसलिलैः पूर्णां क्षणाद्वापीमकारयत् ॥ ११० ॥ तस्मिन्नक्तजले राज्ञी स्नानं
सादरमातनोत् ॥ ततस्तां रक्ततोयार्द्रां फुल्लकिंशुकसन्निभाम् ॥ १११ ॥ राजस्त्रीमामिषधिया सुपर्णकुलसंभवः ॥ जहार विकटः पक्षी मुग्धां दग्धविधेर्वशात् ॥
॥ ११२ ॥ नीत्वा विहायसा दूरं स तामचलसन्निभः ॥ तत्याज मोहविवशामुदयाचलकंदरे ॥ ११३ ॥ लब्धसंज्ञा शनैः कंपविलोलतनुवल्लरी ॥ दृग्भ्यामुत्पलतु
ल्याभ्यां मुहुरश्रूण्यवर्तयत् ॥ ११४ ॥ हा नाथ मंदभाग्याहं त्वद्वियोगेन पीडिता ॥ का गतिः क्व नु गच्छामि द्रक्ष्यामि त्वन्मुखं कदा ॥ ११५ ॥ इत्युक्त्वा गजसिं

CC-0. In Public Domain. Digitization by eGangotri

च विधाय ताम् ॥ संभविष्यामि भूलोके स्वकर्मपरिपाकतः ॥३६॥ ततः स माल्यवन्तं च पुष्पदंतं बलोत्कटम् ॥ त्रीनाहूयात्मनो भृत्यान्वृत्तमेतन्न्यवे
दयत् ॥ ३७ ॥ भृत्याः शृणुत भद्रं वो ब्रह्मशापान्महाभयात् ॥ जनिष्यामि शतानीकाद्विष्णुमत्यामहं सुतः ॥ ३८ ॥ इति श्रुत्वा वचो भृत्यास्तस्य
प्राणा बहिश्चराः ॥ बाष्पपूर्णमुखाः सर्वे विधूमं वाक्यमब्रुवन् ॥ ३९ ॥ ॥ भृत्या ऊचुः ॥ ॥ त्वद्वियोगं वयं सर्वे त्रयोऽपि न सहामहे ॥ तस्मान्मानुष
भावं त्वमस्माभिः सह यास्यसि ॥ ४० ॥ शतानीकस्य राजर्षेर्मंत्री योऽयं युगन्धरः ॥ सेनानीर्विप्रतीकश्च योऽयं प्राग्रसरो रणे ॥४१॥ नर्मकर्मसु
हृद्विप्रो वल्लभाख्यो महांश्च यः ॥ तेषां पुत्रास्त्रयोऽप्येते भविष्यामो न संशयः ॥ ४२ ॥ शतानीकस्य राजर्षेः पुत्रभावं गतस्य ते ॥ शुश्रूषां संविधा
स्यामस्तेषु तेषु च कर्मसु ॥ तानेवंवादिनः सोऽयं विधूमो वाक्यमब्रवीत् ॥ ४३ ॥ ॥ विधूम उवाच ॥ ॥ जानेऽहं भवतां स्नेहं तादृशं मय्य
नुत्तमम् ॥ ४४ ॥ तथापि कथयाम्यद्य तच्छृणुध्वं हितं वचः ॥ ब्रह्मशापेन घोरेण स्वेन दुष्कर्मणा कृतम् ॥ ४५ ॥ कुत्सितं मानुषं भावमहमेकोऽ
नुवर्तये ॥ विहितं न हि युष्माकमेतच्छापानुवर्तनम् ॥ ४६ ॥ जुगुप्सितेऽतो मानुष्ये मा कुरुध्वं मनोऽधुना ॥ अतः शापावधिर्यावन्मद्वियोगो विष
ह्यताम् ॥ ४७ ॥ इत्युक्तवन्तं ते सर्वे माल्यवत्प्रमुखास्तदा ॥ ऊचुः प्रणम्य शिरसा प्रार्थयंतः पुनःपुनः ॥ ४८ ॥ रक्षित्वा कृपया ह्यस्मान्मा कुरुष्व
च साहसम् ॥ परित्यजसि नः सर्वान्भक्तानद्य निरागसः ॥ ४९ ॥ त्वद्वियोगान्महाघोरान्मानुष्यमपि कुत्सितम् ॥ बहु मन्यामहे देव तस्मान्न
स्त्राहि सांप्रतम् ॥ ५० ॥ एवं स याचमानांस्त्रीनन्वमन्यत भृत्यकान् ॥ तैस्त्रिभिः सहितः सोऽयं कौशांबीं गन्तुमैच्छत ॥ ५१ ॥ एतस्मिन्नेव
काले तु सोमवंशविवर्द्धनः ॥ अर्जुनाभिजने जातो जनमेजयसंभवः ॥ ५२ ॥ शतानीको महीपालः पृथिवीमन्वपालयत् ॥ बुद्धिमान्नीतिमा
न्वाग्मी प्रजापालनतत्परः ॥ ५३ ॥ चतुरंगबलोपेतो विक्रमैकधनो युवा ॥ स कौशांबीं महाराजो नगरीमध्युवास वै ॥ ५४ ॥ तस्य मन्त्ररह
स्यज्ञो मन्त्री जातो युगंधरः ॥ सेनानीर्विप्रतीकश्च तस्य प्राग्रसरो रणे ॥ ५५ ॥ नर्मकर्मसु तस्यासीद्वल्लभाख्यः सखा द्विजः ॥ तस्य विष्णुमती
नाम विष्णोः श्रीरिव वल्लभा ॥ ५६ ॥ स सर्वगुणसंपन्नः शतानीको महामतिः ॥ पुत्रमात्मसमं तस्यां भार्यायां नान्वविंदत ॥ ५७ ॥ आत्मान
मसुतं ज्ञात्वा स भृशं पर्यतप्यत ॥ स युगंधरमाहूय मंत्रिणं मन्त्रवित्तमम् ॥ ५८ ॥ पुत्रलाभः कथं मे स्यादिति कार्यममन्त्रयत् ॥ युगन्धरो मही
पालं पुत्रालाभेन पीडितम् ॥ हर्षयन्वचसा स्वेन वाक्यमेतदभाषत ॥ ५९ ॥ ॥ युगन्धर उवाच ॥ ॥ अस्ति शांडिल्यनामा तु महर्षिः सत्य
वाक्छुचिः ॥ ६० ॥ शत्रुमित्रसमो दांतस्तपःस्वाध्यायतत्परः ॥ तमेव मुनिमासाद्य ज्वलंतमिव पावकम् ॥ ६१ ॥ पुत्रमात्मसमं राजन्प्रार्थयेथा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ग्रहैश्चैव स्तूयमानपदांबुजः ॥ सिद्धैः साध्यैर्मरुद्भिश्च किंनरैश्च समावृतः ॥ १० ॥ गणैः किंपुरुषाणां च वसुभिश्चाष्टभिर्वृतः ॥ उर्वशीप्रमुखानां च स्वर्वेश्यानां मनोरमम् ॥ ११ ॥ नृत्यं वादित्रसहितं वीक्ष्यमाणो मुहुर्मुहुः ॥ गोष्ठीं चक्रे सभामध्ये सत्यलोके कदाचन ॥ १२ ॥ मेघगर्जितग म्भीरो जनानानंदयन्मुहुः ॥ वीणावेणुमृदंगानां ध्वनिस्तत्र व्यसर्पत ॥ १३ ॥ गंगातरंगमालानां शीकरस्पर्शशीतलः ॥ पवमानः सुखस्पर्शो मन्दं मन्दं ववौ तदा ॥ १४ ॥ पर्यायेण तदा सर्वा ननृतुर्देवयोषितः ॥ नृत्यश्रमेण खिन्नासु वेश्यास्वन्यासु सादरम् ॥ १५ ॥ अलंबुसा देवनारी रूपयौ वनशालिनी ॥ मदयन्ती जनान्सर्वान्सभामध्ये ननर्त वै ॥ १६ ॥ तस्मिन्नवसरे तस्या नृत्यंत्याः संसदि द्विजाः ॥ वस्त्रमाभ्यंतरं वायुर्लीलया समु दक्षिपत् ॥ १७ ॥ तत्क्षिप्ते वसने स्पष्टमूरुमूलमदृश्यत ॥ तथाभूतां तु तां दृष्ट्वा सर्वे ब्रह्मादयो ह्रिया ॥ १८ ॥ सभामध्ये समासीना निमीलित दृशोऽभवन् ॥ विधूमनामा तु वसुः कामबाणप्रपीडितः ॥ १९ ॥ तामेव ब्रह्मभवने दृष्ट्वानिलहृतांशुकाम् ॥ हर्षसंफुल्लनयनो हृष्टरोमा ततोऽभवत् ॥ २० ॥ अलंबुसायां तस्यां तु जातकामं विलोक्य तम् ॥ वसुं विधूमनामानं शशाप चतुराननः ॥ २१ ॥ यस्मात्त्वमीदृशं कार्यं विधूम कृतवा नसि ॥ तस्माद्धि मर्त्यलोके त्वं मानुषत्वमवाप्स्यसि ॥ २२ ॥ इयं च देवयोषित्ते तत्र भार्या भविष्यति ॥ एवं स ब्रह्मणा शप्तो विधूमः खिन्नमा नसः ॥ २३ ॥ प्रसादयामास वसुर्ब्रह्माणं प्रणिपत्य तु ॥ ॥ विधूम उवाच ॥ ॥ अस्य शापस्य घोरस्य भगवन्भक्तवत्सल ॥ २४ ॥ नाह मर्होऽस्मि देवेश रक्ष मां करुणानिधे ॥ एवं प्रसादितस्तेन भारतीपतिरव्ययः ॥ २५ ॥ कृपया परया युक्तो विधूमं प्राह सांत्वयन् ॥ ॥ ब्रह्मो वाच ॥ ॥ त्वयि शापोऽप्ययं दत्तो न चासत्यं ब्रवीम्यहम् ॥ २६ ॥ ततोऽवधिं कल्पयामि शापस्यास्य तवाधुना ॥ मर्त्यभावं समापन्नः सहालं बुसयाऽनया ॥ २७ ॥ तत्र भूत्वा महाराजः शासयित्वा चिरं महीम् ॥ पुत्रमप्रतिमं त्वस्यां जनयित्वा महीपतिम् ॥ २८ ॥ अभिषिच्य च राज्ये तं राज्यरक्षाविचक्षणम् ॥ एतच्छापस्य शांत्यर्थं दक्षिणस्योदधेस्तटे ॥ फुल्लग्रामसमीपस्थे चक्रतीर्थे महत्तरे ॥ २९ ॥ अनया भार्यया सार्द्धं यदा स्नानं करिष्यसि ॥ तदा त्वं मानुषं भावं जीर्णत्वचमिवोरगः ॥ ३० ॥ विसृज्य भार्यया सार्द्धं स्वं लोकं प्रतिपत्स्यसे ॥ चक्रतीर्थे विना स्नानं न नश्येच्छाप ईदृशः॥३१॥ इति ब्रह्मवचः श्रुत्वा विधूमो नातिहृष्टवान् ॥ स्ववेश्म प्राविशत्तूर्णमामंत्र्य चतुराननम्॥३२॥चिंतयामास तत्रासौ मर्त्यतां यास्यतो मम॥को वा पिता भवेद्भूमौ का वा माता भविष्यति॥३३॥बहुधेत्थं समालोच्य विधूमो निश्चिकाय सः॥कौशांबीनगरे राजा शतानीक इति श्रुतः ॥३४॥ अस्ति वीरो महाभागो भार्या चापि पतिव्रता ॥ तस्य विष्णुमतीनाम विष्णोः श्रीरिव वल्लभा ॥३५॥ तमेव पितरं कृत्वा मातरं

CC-0. In Public Domain. Digitization by eGangotri

णिकोत्तम ॥ आरभ्य दर्भशयनमादेवीपत्तनावधि ॥ ५१ ॥ बहुव्यायामसंयुक्तं चक्रतीर्थमनुत्तमम् ॥ ययौ विच्छिन्नतां[1] मध्ये कथं कथय सांप्रतम् ॥
॥ ५२ ॥ एनं मनसि तिष्ठन्तं संशयं छेत्तुमर्हसि ॥ ॥ श्रीसूत उवाच ॥ ॥ पुरा हि पर्वताः सर्वे जातपक्षा मनोजवाः ॥ ५३ ॥ पर्यतपर्वते
सार्द्धं चेरुराकाशमार्गगाः ॥ नगरेषु च राष्ट्रेषु ग्रामेषु च वनेषु च ॥ ५४ ॥ आप्लुत्याप्लुत्य तिष्ठंति पर्वताः सर्वतो भुवि[2] ॥ आक्रम्याक्रम्य तिष्ठंति
यत्रयत्र महीधराः ॥ ५५ ॥ तत्रतत्र नरा गावस्तथान्ये प्राणिसंचयाः ॥ मरणं सहसा प्रापुः पीड्यमाना महीधरैः ॥ ५६ ॥ ब्राह्मणादिषु वर्णेषु[3]
नष्टेषु समनन्तरम् ॥ यज्ञाद्यभावात्सहसा देवता व्यसनं ययुः ॥ ५७ ॥ तत इन्द्रो महाक्रुद्धो वज्रमादाय वेगवान् ॥ चिच्छेद सहसा पक्षान्पर्वतानां
तरस्विनाम् ॥ ५८ ॥ छिद्यमानच्छदाः सर्वे वासवेन महीधराः ॥ अनन्यशरणा भूत्वा समुद्रं प्राविशन्भयात् ॥ ५९ ॥ अचलेषु च सर्वेषु पतत्सु
लवणार्णवे ॥ निपेतुरर्णवभ्रांत्या चक्रतीर्थेपि केचन ॥ ६० ॥ पतितैः पर्वतैस्तैस्तु मध्यतः पूरितोदरम् ॥ चक्रतीर्थं महापुण्यं मध्ये विच्छेदमाययौ
॥ ६१ ॥ यदृच्छया महाशैलाः पार्श्वयोस्तत्र नापतन् ॥ अतो वै दर्भशयने तथा देवीपुरेऽपि च ॥ ६२ ॥ विच्छिन्नमध्यं तद्द्वेधा विभक्तमिव
दृश्यते ॥ मध्यतः पतितैः शैलैश्चक्रतीर्थं स्थलीकृतम् ॥ ६३ ॥ ॥ श्रीसूत उवाच ॥ ॥ युष्माकमेवं कथितं मुनीन्द्रा यन्मध्यतस्तीर्थमिदं स्थली
कृतम् ॥ यथा महीध्राः सहसा बिडौजसा विच्छिन्नपक्षा इह पेतुरुन्नताः ॥ ६४ ॥ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां
तीये ब्रह्मखण्डे सेतुमाहात्म्ये दुर्दमगंधर्वशापमोचनंनाम चतुर्थोऽध्यायः ॥ ४ ॥ ॥ श्रीसूत उवाच ॥ ॥ प्रस्तुत्य चक्रतीर्थं तु पुण्यं पापविना
शनम् ॥ पुनरप्यद्भुतं किंचित्प्रब्रवीमि मुनीश्वराः ॥ १ ॥ विधूमनामा हि वसुर्देवस्त्री चाप्यलंबुषा[4] ॥ ब्रह्मशापान्महाघोरात्पुरा प्राप्तौ मनुष्यताम् ॥
॥ २ ॥ चक्रतीर्थे महापुण्ये स्नात्वा शापाद्विमोचितौ ॥ ॥ ऋषय ऊचुः ॥ ॥ सूतसूत महाप्राज्ञ पुराणार्थविशारद ॥ ३ ॥ प्राज्ञत्वाद्व्यासशिष्य
त्वादज्ञातं ते न किंचन ॥ ब्रह्मा केनापराधेन सहालंबुसया वसुम् ॥ ४ ॥ पुरा विधूमनामानं शप्तवांश्चतुराननः ॥ ब्रह्मशापेन घोरेण कथंस्तौ
पुत्रतां गतौ ॥ ५ ॥ शापस्यान्तः कथमभूद्ब्रह्मणा शप्तयोस्तयोः ॥ एतन्नः श्रद्दधानानां विस्तराद्वक्तुमर्हसि ॥ ६ ॥ ॥ श्रीसूत उवाच ॥ ॥ पुरा
हि भगवान्ब्रह्मा स्वयम्भूश्चतुराननः ॥ सावित्र्या च सरस्वत्या पार्श्वयोः प्रविराजितः ॥ ७ ॥ सनातनेन मुनिना सनकेन च धीमता ॥ सनत्कुमा
रनाम्ना च नारदेन महात्मना ॥ ८ ॥ सनन्दनादिभिश्चान्यैः सेव्यमानो मुनीश्वरैः ॥ सुपर्ववृन्दजुष्टेन स्तूयमानो बिडौजसा ॥ ९ ॥ आदित्यादि

१ विभिन्नताम्–इ० पा० । २ दिशः–इ० पा० । ३ नष्टेषु जनेषु–इ० वा० । ४ अलंबुसा–इति सर्वत्र सकारोपधः 'अलंबुसा' इति पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गंतास्त्यत्र न संशयः ॥ ततस्त्रिदिवमासाद्य दुर्दमोऽयं पतिर्हि वः ॥ २५ ॥ रमयिष्यति सुन्दर्यो युष्मान्सुन्दरवेषभृत् ॥ ॥ श्रीसूत उवाच ॥ ॥ इत्यु
क्त्वा तु वसिष्ठस्ता दुर्दमस्य वरांगनाः ॥ २६ ॥ स्वाश्रमं प्रययौ तूर्णं हालास्येश्वरभक्तिमान् ॥ अथ रामास्तमालिंग्य दुर्दमं पतिमातुराः ॥ २७ ॥
रुरुदुः शोकसंविग्ना दुःखसागरमध्यगाः ॥ प्रपश्यंतीषु तास्वेव दुर्दमो राक्षसोऽभवत् ॥ २८ ॥ महादंष्ट्रो महाकायो रक्तश्मश्रुशिरोरुहः ॥ तं दृष्ट्वा
भयसंविग्ना जग्मू रामास्त्रिविष्टपम् ॥ २९ ॥ ततो राक्षसवेषोऽयं दुर्दमो भैरवाकृतिः ॥ भक्षयन्प्राणिनः सर्वान्देशाद्देशं वनाद्वनम् ॥ ३० ॥ भ्रमन्न
निलवेगोऽसौ धर्मतीर्थं ततो ययौ ॥ एवं षोडशवर्षाणि भ्रमतोऽस्य ययुस्तदा ॥ ३१ ॥ ततस्तु षोडशाब्दांते राक्षसोयं मुनीश्वराः ॥ भक्षितुं गाल
वमुनिं धर्मतीर्थनिवासिनम् ॥ ३२ ॥ उपाद्रवद्वायुवेगः स चास्तौषीज्जनार्दनम् ॥ गालवेन स्तुतो विष्णुस्तदा चक्रमचोदयत् ॥ ३३ ॥ रक्षितुं गाल
वमुनिं राक्षसेन प्रपीडितम् ॥ अथागत्य हरेश्चक्रं राक्षसस्य शिरोऽहरत् ॥ ३४ ॥ ततोऽयं राक्षसं देहं त्यक्त्वा दिव्यकलेवरः ॥ विमानवरमारुह्य
दुर्दमः पुष्पवर्षितः ॥ ३५ ॥ प्रांजलिः प्रणतो भूत्वा ववन्दे तं सुदर्शनम् ॥ तुष्टाव श्रुतिरम्याभिर्वाग्भिरग्र्याभिरादरात् ॥ ३६ ॥ ॥ दुर्दम उवाच ॥
सुदर्शन नमस्तेऽस्तु विष्णुहस्तैकभूषण ॥ नमस्तेऽसुरसंहर्त्रे सहस्रादित्यतेजसे ॥ ३७ ॥ कृपालेशेन भवतस्त्यक्ताहं राक्षसीं तनुम् ॥ स्वरूपमभजं
विष्णोश्चक्रायुध नमोऽस्तु ते ॥ ३८ ॥ अनुजानीहि मां गन्तुं त्रिदिवं विष्णुवल्लभ ॥ भार्या मे परिशोचंति विरहातुरचेतसः ॥ ३९ ॥ त्वन्मनस्को
भविष्यामि यावज्जीवं यथा ह्यहम् ॥ तथा कृपां कुरुष्व त्वं मयि चक्र नमोऽस्तु ते ॥ ४० ॥ एवं स्तुतं विष्णुचक्रं दुर्दमेन सभक्तिकम् ॥ अनुज
ग्राह सहसा तथास्त्विति मुनीश्वराः ॥ ४१ ॥ चक्रायुधाभ्यनुज्ञातो दुर्दमो गालवं मुनिम् ॥ प्रणम्य तेनानुज्ञातो गन्धर्वस्त्रिदिवं ययौ ॥ ४२ ॥
दुर्दमे तु गते स्वर्गं गालवो मुनिपुंगवः ॥ स चक्रं प्रार्थयामास विष्ण्वायुधमनुत्तमम् ॥ ४३ ॥ चक्रायुध नमामि त्वां महासुरविमर्दन ॥ देवीपट्टण
पर्यंते धर्मतीर्थे ह्यनुत्तमे ॥ ४४ ॥ सन्निधानं कुरुष्व त्वं सर्वपापविनाशनम् ॥ त्वत्सन्निधानात्सर्वेषां स्नातानां पापिनामिह ॥ ४५ ॥ पापनाशं
कुरुष्व त्वं मोक्षं च कुरु शाश्वतम् ॥ चक्रतीर्थमिति ख्यातिं लोकस्य परिकल्पय ॥ ४६ ॥ त्वत्सन्निधानादत्रत्यमुनीनां भयनाशनम् ॥ इतः परं
भवत्वार्य चक्रायुध नमोऽस्तु ते ॥ ४७ ॥ भूतप्रेतपिशाचेभ्यो भयं मा भवतु प्रभो ॥ इति संप्रार्थितं चक्रं गालवेन मुनीश्वराः ॥ ४८ ॥ तथैवा
स्त्विति सम्भाष्य तस्मिंस्तीर्थे तिरोहितम् ॥ ॥ श्रीसूत उवाच ॥ ॥ एवं वः कथितो विप्रा राक्षसस्य भवो मया ॥ ४९ ॥ माहात्म्यं चक्र
तीर्थस्य कथितं च मलापहम् ॥ यच्छ्रुत्वा सर्वपापेभ्यो मुच्यते मानवो भुवि ॥ ५० ॥ ॥ ऋषय ऊचुः ॥ ॥ व्यासशिष्य महाप्राज्ञ सूत पौरा

CC-0. In Public Domain. Digitization by eGangotri

विप्राः शृणुतादरात् ॥ यथा स राक्षसो जातो मुनीनां शापवैभवात् ॥ २ ॥ पुरा कैलासशिखरे हालास्ये शिवमंदिरे ॥ चतुर्विंशतिसाहस्रा मुनयो ब्रह्मवादिनः ॥ ३ ॥ वसिष्ठात्रिमुखाः सर्वे शिवभक्ता महौजसः ॥ भस्मोद्धूलितसर्वांगास्त्रिपुंड्रांकितमस्तकाः ॥ ४ ॥ रुद्राक्ष मालाभरणाः पंचाक्षरजपे रताः ॥ हालास्यनाथं भूतेशं चंद्रचूडमुमापतिम् ॥ ५ ॥ उपासांचक्रिरे मुक्त्यै मधुरापुरवासिनः ॥ कदाचित्तत्र गंधर्वो विश्वावसुसुतो बली ॥ ६ ॥ दुर्दमोनाम विप्रेंद्रा विटगोष्ठीपरायणः ॥ ललनाशतसंयुक्तो विवस्त्रः सलिलाशये ॥ ७ ॥ चिक्रीड स विवस्त्राभिः साकं युवतिभिर्मुदा ॥ हालास्यनाथतीर्थं तद्वसिष्ठो मुनिभिः सह ॥ ८ ॥ माध्यंदिनं कर्तुमना ययौ शंकरमंदिरात् ॥ तानृषीनवलोक्याथ रामास्ता भयकातराः ॥ ९ ॥ वासांस्याच्छादयामासुर्दुर्दमो न तु साहसी ॥ ततो वसिष्ठः कुपितः शशापैनं गतत्रपम् ॥ १० ॥ ॥ वसिष्ठ उवाच ॥ ॥ यस्माद्दुर्दम गंधर्व दृष्ट्वास्माँल्लज्जया त्वया ॥ वासो नाच्छादितं शीघ्रं याहि राक्षसतां ततः ॥ ११ ॥ इत्युक्त्वा ता स्त्रियः प्राह वसिष्ठो मुनिपुंगवः ॥ यस्मादाच्छादितं वस्त्रं दृष्ट्वास्माँल्ललनोत्तमाः ॥ १२ ॥ ततो न युष्मान्छप्स्यामि गच्छध्वं त्रिदिवं ततः ॥ एवमुक्ता वसिष्ठेन रामाः प्रांजलयस्तदा ॥ १३ ॥ प्रणिपत्य वसिष्ठं तं भक्तिनम्रेण चेतसा ॥ मुनिमंडलमध्ये तं वसिष्ठमिदमब्रुवन् ॥ १४ ॥ ॥ रामा ऊचुः ॥ ॥ भगवन्सर्वधर्मज्ञ चतुराननंदन ॥ दयासिंधोऽवलोक्यास्मान्न कोपं कर्तुमर्हसि ॥ १५ ॥ पतिरेवहि नारीणां भूषणं परमुच्यते ॥ पतिहीना तु या नारी शतपुत्रापि सा मुने ॥१६॥ विधवेत्युच्यते लोके तत्स्त्रीणां मरणं स्मृतम् ॥ तत्प्रसादं कुरु मुने पत्यावस्माकमादरात् ॥ १७ ॥ एकोऽपराधः क्षंतव्यो मुनिभिस्तत्त्वदर्शिभिः ॥ क्षमां कुरु दयासिंधो युष्मच्छिष्येऽत्र दुर्दमे ॥ १८ ॥ वसिष्ठः प्रार्थितस्त्वेवं दुर्दमस्यांगनाजनैः ॥ प्रोवाच वचनं भूयः प्रसन्नः स द्विजोत्तमाः ॥ १९ ॥ न मे स्याद्वचनं मिथ्या कदाचिदपि सुभ्रुवः ॥ उपायं वः प्रवक्ष्यामि शृणुध्वं श्रद्धया सह ॥ २० ॥ षोडशाब्दावधिः शापो भर्तुर्वो भविता ध्रुवम् ॥ षोडशाब्दावधौ चैष दुर्दमो राक्षसाकृतिः ॥ २१ ॥ यदृच्छयाचक्रतीर्थं गमिष्यति सुरांगनाः ॥ आस्ते तत्र महायोगी गालवो विष्णुतत्परः ॥२२॥ भक्ष्यार्थं तं मुनिं सोऽयं राक्षसोभिगमिष्यति ॥ ततो गालवरक्षार्थं प्रेरितं चक्रमुत्तमम् ॥२३॥ विष्णुनास्य शिरो रामा हरिष्यति न संशयः ॥ततः स्वरूपमासाद्य शापान्मुक्तः सुदुर्दमः ॥२४॥ पतिर्वस्त्रिदिवं भूयो

२ ऋषयः—इ० पा० । २ माध्यं दिनं कर्तुं—माध्याह्निककर्म कर्तुमित्यर्थः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मुदा परमया युक्तस्तुष्टाव च सुदर्शनम् ॥ ९७ ॥ ॥ गालव उवाच ॥ ॥ विष्णुचक्र नमस्तेस्तु विश्वरक्षणदीक्षित ॥ नारायणकरांभोजभूषणाय
नमोऽस्तु ते ॥ ९८ ॥ युद्धेष्वसुरसंहारकुशलाय महारव ॥ सुदर्शन नमस्तुभ्यं भक्तानामार्तिनाशिने ॥ ९९ ॥ रक्ष मां भयसंविग्नं सर्वस्मादपि कल्म
षात् ॥ स्वामिन्सुदर्शन विभो धर्मतीर्थे सदा भवान् ॥ १०० ॥ संनिधेहि हिताय त्वं जगतो मुक्तिकांक्षिणः ॥ गालवेनैवमुक्तं तद्विष्णुचक्रं मुनी
श्वराः ॥ तं प्राह गालवमुनिं प्रीणयन्निव सौहृदात् ॥ १०१ ॥ ॥ सुदर्शन उवाच ॥ ॥ गालवैतन्महापुण्यं धर्मतीर्थमनुत्तमम् ॥ १०२ ॥ अस्मि
न्वसामि सततं लोकानां हितकाम्यया ॥ त्वत्पीडां परिचिंत्याहं राक्षसेन दुरात्मना ॥१०३॥ प्रेरितो विष्णुना विप्र त्वरया समुपागतः[१]॥ त्वत्पीडको
थ निहतो मयायं राक्षसाधमः ॥१०४॥ मोचितस्त्वं भयादस्मात्त्वं हि भक्तो हरेः सदा ॥ पुष्करिण्यामहं त्वस्यां धर्मस्य मुनिपुंगव ॥१०५॥ सततं
लोकरक्षार्थं संनिधानं करोमि वै ॥ अस्यां मत्संनिधानात्ते तथान्येषामपि द्विज ॥१०६॥ इतः परं न पीडा स्याद्भूतराक्षससंभवा ॥ धर्मपुष्करिणी
ह्येषा सर्वपापविनाशिनी ॥ १०७ ॥ देवीपट्टणपर्यंता कृता धर्मेण वै पुरा ॥ अत्र सर्वत्र वत्स्यामि सर्वदा मुनिपुंगव ॥ १०८ ॥ अस्या मत्संनिधा
नात्स्याच्चक्रतीर्थमिति प्रथा ॥ स्नानं येऽत्र प्रकुर्वंति चक्रतीर्थे विमुक्तिदे ॥ १०९ ॥ तेषां पुत्राश्च पौत्राश्च वंशजाः सर्व एव हि॥विधूतपापा यास्यंति
तद्विष्णोः परमं पदम् ॥ ११० ॥ पितॄनुद्दिश्य पिंडानां दातारो येऽत्र गालव ॥ स्वर्गं प्रयांति ते सर्वे पितरश्चापि तर्पिताः ॥ १११ ॥ इत्युक्त्वा
विष्णुचक्रं तद्गालवस्यापि पश्यतः ॥ अन्येषामपि विप्राणां पश्यतां सहसा द्विजाः ॥ ११२ ॥ धर्मपुष्कारिणीं तां तु प्राविशत्पापनाशिनीम् ॥
॥ ॥ श्रीसूत उवाच ॥ ॥ धर्मतीर्थस्य विप्रेंद्राश्चक्रतीर्थमिति प्रथा ॥ ११३ ॥ प्राप्ता यथा तत्कथितं युष्माकं हि मया मुदा ॥ चक्रतीर्थसमं
तीर्थं न भूतं न भविष्यति ॥ ११४ ॥ अत्र स्नाता नरा विप्रा मोक्षभाजो न संशयः ॥ कीर्तयेदिममध्यायं शृणुयाद्वा समाहितः ॥ ११५ ॥ चक्र
तीर्थाभिषेकस्य प्राप्नोति फलमुत्तमम् ॥ इह लोके सुखं प्राप्य परत्रापि सुखं लभेत् ॥ ११६ ॥ यो धर्मतीर्थं च तथैव गालवं कुर्वाणमत्युग्रसमाधियो
गम् ॥ सुदर्शनं राक्षसनाशनं च स्मरेत्सकृद्वा न स पापभाग्जनः[१] ॥ ११७ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये
ब्रह्मखण्डे सेतुमाहात्म्ये गालवाख्याने धर्मतीर्थस्यचक्रतीर्थप्रथावर्णनंनाम तृतीयो ऽध्यायः ॥ ३ ॥ ॥ ऋषय ऊचुः ॥ ॥ भगवन्राक्षसः
कोऽसौ सूत पौराणिकोत्तम ॥ विष्णुभक्तं महात्मानं यो गालवमबाधत ॥ १ ॥ ॥ श्रीसूत उवाच ॥ ॥ वक्ष्यामि राक्षसं क्रूरं तं

१ त्वत्सकाशमुपागतः—इ० पा० । १ समपुण्यभाग्भवेत्—इ० पा० ।

मुने ॥ मदर्थं कर्म कुर्वाणो मद्ध्यानो मत्परायणः ॥४७॥ एतत्प्रारब्धदेहांते मत्स्वरूपमवाप्स्यसि ॥ अस्मिन्नेवाश्रमे वासं कुरुष्व मुनिपुंगव ॥४८॥
धर्मपुष्करिणी चेयं पुण्या पापविनाशिनी ॥ अस्यास्तीरे तपः कुर्वंस्तपःसिद्धिमवाप्नुयात् ॥ ४९ ॥ धर्मः पुरा समागत्य दक्षिणस्योदधेस्तटे ॥
तपस्तेपे महादेवं चिंतयन्मनसा तदा ॥ ५० ॥ स्नानार्थमेकं तीर्थं च चक्रे धर्मो महामुने ॥ धर्मपुष्करिणी तेन प्रसिद्धा तत्कृता यतः ॥ ५१ ॥
त्वया यथा तपस्तप्तमिदानीं मुनिसत्तम ॥ तथा तप्तं तपस्तेन धर्मेण हरसेविना ॥ ५२ ॥ तपसा तस्य तुष्टः सञ्छूलपाणिर्महेश्वरः ॥ प्रादुरासी
त्स्वया दीप्त्या दिशो दश विभासयन् ॥ ५३ ॥ अथाश्रममनुप्राप्तं महादेवं कृपानिधिम् ॥ धर्मः परमसन्तुष्टस्तुष्टाव परमेश्वरम् ॥ ५४ ॥ ॥ धर्म
उवाच ॥ ॥ प्रणमामि जगन्नाथमीशानं प्रणवात्मकम् ॥ समस्तदेवतारूपमादिमध्यांतवर्जितम् ॥ ५५ ॥ ऊर्ध्वरेतं विरूपाक्षं विश्वरूपं नमाम्य
हम् ॥ समस्तजगदाधारमनन्तमजमव्ययम् ॥५६॥ यमामनन्ति योगीन्द्रास्तं वन्दे पुष्टिवर्धनम् ॥ नमो लोकाधिनाथाय वंचते परिवंचते ॥५७॥
नमोऽस्तु नीलकण्ठाय पशूनां पतये नमः ॥ नमः कल्मषनाशाय नमो मीढुष्टमाय च ॥ ५८ ॥ नमो रुद्राय देवाय कद्रुद्राय प्रचेतसे ॥ नमः
पिनाकहस्ताय शूलहस्ताय ते नमः ॥ ५९ ॥ नमश्चैतन्यरूपाय पुष्टीनां पतये नमः ॥ नमः पंचास्यदेवाय क्षेत्राणां पतये नमः ॥ ६० ॥ इति
स्तुतो महादेवः शंकरो लोकशंकरः ॥ धर्मस्य परमां तुष्टिमापन्नस्तमुवाच वै ॥ ६१ ॥ ॥ महेश्वर उवाच ॥ ॥ प्रीतोस्म्यनेन स्तोत्रेण तव धर्म
महामते ॥ वरं मत्तो वृणीष्व त्वं मा विलंबं कुरुष्व वै ॥ ६२ ॥ ईश्वरेणैवमुक्तस्तु धर्मो देवमथाब्रवीत् ॥ वाहनं ते भविष्यामि सदाहं पार्वतीपते ॥
॥ ६३ ॥ अयमेव वरो मह्यं दातव्यस्त्रिपुरांतक ॥ तवोद्वहनमात्रेण कृतार्थोऽहं भवामि भोः ॥ ६४ ॥ इत्थं धर्मेण कथितो
देवो धर्ममथाब्रवीत् ॥ ॥ ईश्वर उवाच ॥ ॥ वाहनं भव मे धर्म सर्वदा लोकपूजितः ॥ ६५ ॥ मम चोद्वहने शक्तिरमोघा ते
भविष्यति ॥ त्वत्सेविनां सदा भक्तिर्मयि स्यान्नात्र संशयः ॥ ६६ ॥ इत्युक्ते शंकरेणाथ धर्मोपि वृषरूपधृक् ॥ उवाह परमेशानं तदाप्रभृति
गालव ॥ ६७ ॥ महादेवस्तमारुह्य धर्मं वै वृषरूपिणम् ॥ शोभमानो भृशं धर्ममुवाच परमामृतम् ॥ ६८ ॥ ॥ ईश्वर उवाच ॥ ॥
त्वया कृतं हि यत्तीर्थं दक्षिणस्योदधेस्तटे ॥ धर्मपुष्करिणीत्येषा लोके ख्याता भविष्यति ॥६९॥अस्यास्तीरे जपो होमो दानं स्वाध्याय एव च ॥

१ सर्वलोकैकपूजितः--इ०पा० ।

CC-0. In Public Domain. Digitization by eGangotri

अन्ये च धर्मनिवहाः क्रियमाणा नरैर्मुदा ॥ ७० ॥ अनंतफलदा ज्ञेया नात्र कार्या विचारणा ॥ इति दत्त्वा वरं तस्मै धर्मतीर्थाय शंकरः ॥ ७१ ॥
आरुह्य वृषभं धर्म कैलासं पर्वतं ययौ ॥ धर्मपुष्करिणीतीरे गालव त्वमतोधुना ॥ ७२ ॥ शरीरपातपर्यंतं तपः कुर्वन्समाहितः ॥ वस त्वं मुनि
शार्दूल पश्चान्मामाप्स्यसे ध्रुवम् ॥ ७३ ॥ यदा ते जायते भीतिस्तदा तां नाशयाम्यहम् ॥ ममायुधेन चक्रेण प्रेरितेन मयाक्षणात् ॥७४॥ इत्युक्त्वा
भगवान्विष्णुस्तत्रैवांतरधीयत ॥ ॥ श्रीसूत उवाच ॥ ॥ तस्मिन्नंतर्हिते विष्णौ गालवो मुनिपुंगवः ॥७५॥ धर्मपुष्कणीतीरे विष्णुध्यानपरायणः ॥
त्रिकालमर्चयन्विष्णुं शालग्रामे विमुक्तिदे ॥ ७६ ॥ उवास मतिमान्धीरो विरक्तो विजितेंद्रियः ॥ कदाचिन्माघमासे तु शुक्लपक्षे हरेर्दिने ॥ ७७ ॥
उपोष्य जागरं कृत्वा रात्रौ विष्णुमपूजयत् ॥ स्नात्वा परेद्युर्द्वादश्यां धर्मपुष्करिणीजले ॥ ७८ ॥ संध्यावन्दनपूर्वाणि नित्यकर्माणि चाकरोत् ॥
ततः पूजां विधातुं स हरेः समुपचक्रमे ॥ ७९ ॥ तुलस्यादीनि पुष्पाणि समाहृत्य च गालवः ॥ विधाय पूजां कृष्णस्य स्तोत्रमेतदुदैरयत् ॥ ८० ॥
॥ गालव उवाच ॥ ॥ सहस्रशिरसं विष्णुं मत्स्यरूपधरं हरिम् ॥ नमस्यामि हृषीकेशं कूर्मवाराहरूपिणम् ॥ ८१ ॥ नारसिंहं वामनाख्यं जाम
दग्न्यं च राघवम् ॥ बलभद्रं च कृष्णं च कल्किं विष्णुं नमाम्यहम् ॥ ८२ ॥ वासुदेवमनाधारं प्रणतार्तिविनाशनम् ॥ आधारं सर्वभूतानां
प्रणमामि जनार्दनम् ॥ ८३ ॥ सर्वज्ञं सर्वकर्तारं सच्चिदानंदविग्रहम् ॥ अप्रतर्क्यमनिर्देश्यं प्रणतोऽस्मि जनार्दनम् ॥ ८४ ॥ एवं स्तुवन्महा
योगी गालवो मुनिपुंगवः ॥ धर्मपुष्करिणीतीरे तस्थौ ध्यानपरायणः ॥ ८५ ॥ एतस्मिन्नंतरे कश्चिद्राक्षसो गालवं मुनिम् ॥ आययौ भक्षितुं
घोरः क्षुधया पीडितो भृशम् ॥ ८६ ॥ गालवं तरसा सोऽयं राक्षसो जगृहे तदा ॥ गृहीतस्तरसा तेन गालवो नैर्ऋतेन सः ॥ ८७ ॥ प्रचुक्रोश दयां
भोधिमापन्नानां परायणम् ॥ नारायणं चक्रपाणिं रक्षरक्षेति वै मुहुः ॥ ८८ ॥ परेश परमानंद शरणागतपालक ॥ त्राहि मां करुणासिंधो रक्षोवश
मुपागतम् ॥ ८९ ॥ लक्ष्मीकांत हरे विष्णो वैकुंठ गरुडध्वज ॥ मां रक्ष रक्षसाक्रांतं ग्राहाक्रांतं गजं यथा ॥ ९० ॥ दामोदर जगन्नाथ हिरण्यासुर
मर्दन ॥ प्रह्लादमिव मां रक्ष राक्षसेनातिपीडितम् ॥ ९१ ॥ इत्येवं स्तुवतस्तस्य गालवस्य द्विजोत्तमाः ॥ स्वभक्तस्य भयं ज्ञात्वा चक्रपाणिर्वृषा
कपिः ॥ ९२ ॥ स्वचक्रं प्रेषयामास भक्तरक्षणकारणात् ॥ प्रेरितं विष्णुचक्रं तद्विष्णुना प्रभविष्णुना ॥ ९३ ॥ आजगामाथ वेगेन धर्मपुष्करिणी
तटम् ॥ अनंतादित्यसंकाशमनंताग्निसमप्रभम् ॥ ९४ ॥ महाज्वालं महानादं महासुरविमर्दनम् ॥ दृष्ट्वा सुदर्शनं विष्णो राक्षसोऽथ प्रदुद्रुवे ॥
॥ ९५ ॥ द्रवमाणस्य तस्याशु राक्षस्य सुदर्शनम् ॥ शिरश्चकर्त सहसा ज्वालामालादुरासदम् ॥ ९६ ॥ ततस्तु गालवो दृष्ट्वा राक्षसं पतितं भुवि ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

रितः ॥ वीणावेणुमृदंगादिवादकैर्नारदादिभिः ॥ २३ ॥ उपगीयमानविजयः पीतांबरविराजितः ॥ लक्ष्मीविराजितोरस्को नीलमेघसमच्छविः ॥ ॥ २४ ॥ धुनानः पद्ममेकेन पाणिना मधुसूदनः ॥ सनकादिमहायोगिसेवितः पार्श्वयोर्द्वयोः ॥ २५ ॥ मंदस्मितेन सकलं मोहयन्भुवनत्रयम् ॥ स्वभासा भासयन्सर्वान्दिशो दश च भूसुराः ॥ २६ ॥ कंठलग्नेन मणिना कौस्तुभेन च शोभितः ॥ सुवर्णवेत्रहस्तैश्च सौविदल्लैरनेकशः ॥ ॥ २७ ॥ अनन्यदुर्लभाचिंत्यगीयमाननिजाद्भुतः ॥ सुभक्तसुलभो देवो लक्ष्मीकांतो हरिः स्वयम् ॥ २८ ॥ सन्न्यधत्त पुरस्तस्य गालवस्य महामुनेः ॥ आविर्भूतं तदा दृष्ट्वा श्रीवत्सांकितवक्षसम् ॥ २९ ॥ पीतांबरधरं देवं तुष्टिं प्राप महामुनिः ॥ भक्त्या परमया युक्तस्तुष्टाव जगदीश्वरम् ॥ ॥३०॥ गालव उवाच ॥ नमो देवादिदेवाय शंखचक्रगदाभृते ॥नमो नित्याय शुद्धाय सच्चिदानंदरूपिणे ॥३१॥ नमो भक्तार्तिहंत्रे ते हव्यकव्यस्वरूपिणे॥ नमस्त्रिमूर्तये तुभ्यं सृष्टिस्थित्यंतकारिणे॥३२॥नमः परेशाय नमो विभूम्ने नमोऽस्तु लक्ष्मीपतये विधात्रे॥नमोऽस्तु सूर्येंदुविलोचनाय नमो विरिंच्याद्यभिवंदिताय ॥३३॥ यो नामजात्यादिविकल्पहीनः समस्तदोषैरपि वर्जितो यः ॥समस्तसंसारभयापहारिणे तस्मै नमो दैत्यविनाशनाय ॥ ३४ ॥ वेदांतवेद्याय रमेश्वराय वैकुण्ठवासाय विधातृपित्रे ॥ नमोनमः सत्यजनार्तिहारिणे नारायणायामितविक्रमाय ॥ ३५ ॥ नमस्तुभ्यं भगवते वासुदेवाय शार्ङ्गिणे ॥ भूयोभूयो नमस्तुभ्यं शेषपर्यंकशायिने ॥ ३६ ॥ इति स्तुत्वा हरिं विप्रास्तूष्णीमास्ते स गालवः ॥ श्रुत्वा स्तुतिं श्रुतिसुखां हरिस्तस्य महात्मनः ॥ ३७ ॥ अवाप परमं तोषं शंखचक्रगदाधरः ॥ अथालिंग्य मुनिं शौरिश्चतुर्भिर्बाहुभिस्तदा ॥ ३८ ॥ बभाषे प्रीतिसंयुक्तो वरो वै व्रियतामिति ॥ तुष्टोऽस्मि तपसा तेऽद्य स्तोत्रेणापि च गालव ॥ ३९ ॥ नमस्कारेण च प्रीतो वरदोऽहं तवागतः ॥ ॥ गालव उवाच ॥ ॥ नारायण रमानाथ पीतांबर जगन्मय ॥ ४० ॥ जनार्दन जगद्धामन्गोविंद नरकांतक ॥ त्वद्दर्शनात्कृतार्थोऽस्मि सर्वस्मादधिकस्तथा ॥ ४१ ॥ त्वां न पश्यंत्यधर्मिष्ठा यतस्त्वं धर्मपालकः ॥ यन्न वेत्ति भवो ब्रह्मा यन्न वेत्ति त्रयी तथा ॥ ४२ ॥ तं वेद्मि परमात्मानं किमस्मादधिकं वरम् ॥ योगिनो यं न पश्यन्ति यं न पश्यंति कर्मठाः ॥ ४३ ॥ तं पश्यामि परात्मानं किमस्मादधिकं वरम् ॥ एतेन च कृतार्थोऽस्मि जनार्दन जगत्पते ॥ ४४ ॥ यन्नामस्मृतिमात्रेण महापातकिनोऽपि च ॥ मुक्तिं प्रयांति मुनयस्तं पश्यामि जनार्दनम् ॥ ४५ ॥ त्वत्पादपद्मयुगले निश्चला भक्तिरस्तु मे ॥ ॥ हरिरुवाच ॥ ॥ मयि भक्तिर्दृढा तेऽस्तु निष्कामा गालवाधुना ॥ ४६ ॥ शृणु चाप्यपरं वाक्यमुच्यमानं मया

१ उपगीयमानविभवः—इ० पा० । २ भासुराः—इ० पा० । ३ द्व्याधदे[illegible]—इ० पा० ।

CC-0. In Public Domain. Digitization by eGangotri

नंतमाप्नोति जयं परत्र पुनर्भवक्लेशमसौ न गच्छेत् ॥ ११४ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे
सेतुमाहात्म्ये सेतुनिर्माणादिवर्णनंनाम द्वितीयोऽध्यायः ॥ २ ॥ ॥ ॥ऋषय ऊचुः ॥ ॥ चतुर्विंशतितीर्थानि यान्युक्तानि त्वया
मुने ॥ तेषां प्रधानतीर्थानां सेतौ पापविनाशने ॥ १ ॥ आदिमस्य तु तीर्थस्य चक्रतीर्थमिति प्रथा ॥ कथं समागता सूत वदास्माकं
हि पृच्छताम् ॥ २ ॥ ॥श्रीसूत उवाच ॥ ॥ चतुर्विंशतितीर्थानां प्रधानानां द्विजोत्तमाः ॥ यदुक्तमादिमं तीर्थं सर्वलोकेषु विश्रुतम् ॥
॥ ३ ॥ स्मरणात्तस्य तीर्थस्य गर्भवासो न विद्यते ॥ विलयं यांति पापानि लक्षजन्मकृतान्यपि ॥ ४ ॥ तस्मिंस्तीर्थे सकृत्स्नाना
त्स्मरणात्कीर्तनादपि ॥ लोके ततोधिकं तीर्थं तत्तुल्यं वा द्विजोत्तमाः ॥ ५ ॥ न विद्यते मुनिश्रेष्ठाः सत्यमुक्तमिदं मया ॥ गंगा
सरस्वती रेवा पंपा गोदावरी नदी ॥ ६ ॥ कालिंदी चैव कावेरी नर्मदा मणिकर्णिका ॥ अन्यानि यानि तीर्थानि नद्यः पुण्या महीतले ॥
॥ ७ ॥ अस्य तीर्थस्य विप्रेंद्राः कोटयंशेनापि नो समाः ॥ धर्मतीर्थमिति प्राहुस्तत्तीर्थं हि पुराविदः ॥ ८ ॥ यथा समागता तस्य चक्रतीर्थमिति
प्रथा ॥ तदिदानीं प्रवक्ष्यामि शृणुध्वं मुनिपुंगवाः ॥ ९ ॥ सेतुमूलं हि तत्प्रोक्तं तद्दर्भशयनं मतम् ॥ तत्रैव चक्रतीर्थं तु महापातकमर्दनम् ॥
॥१०॥ पुरा हि गालवोनाम मुनिर्विष्णुपरायणः ॥ दक्षिणांभोनिधेस्तीरे हालास्यादविदूरतः ॥११॥ फुल्लग्रामसमीपे च तथा क्षीरसरोंतिके ॥ धर्म
पुष्करिणीतीरे सोऽतप्यत महत्तपः ॥ १२ ॥ युगानामयुतं ब्रह्म गृणन्विप्राः सनातनम् ॥ दयायुक्तो निराहारः सत्यवान्विजितेंद्रियः ॥१३॥ आत्म
वत्सर्वभूतानि पश्यन्विषयनिःस्पृहः ॥ सर्वभूतहितो दांतः सर्वद्वंद्वविवर्जितः ॥ १४ ॥ वर्षाणि कतिचित्सोऽयं जीर्णपर्णाशनोऽभवत ॥ किंचि
त्कालं जलाहारो वायुभक्षः कियत्समाः ॥ १५ ॥ एवं पंचसहस्राणि वर्षाणि स महामुनिः ॥ अतप्यत तपो घोरं देवैरपि सुदुष्करम ॥ १६ ॥
ततः पंचसहस्राणि वर्षाणि मुनिपुंगवः ॥ निराहारो निरालोको निरुच्छ्वासो निरास्पदः ॥ १७ ॥ वर्षास्वासारसहनं हेमंतेषु जलेशयः॥ ग्रीष्मे पंचा
ग्निमध्यस्थो विष्णुध्यानपरायणः॥ १८ ॥ जपन्नष्टाक्षरं मंत्रं ध्यायन्हृदि जनार्दनम् ॥ ततापं सुमहातेजा गालवो मुनिपुंगवः ॥ १९ ॥ एवं त्वयुतव
र्षाणि समतीतानि वै मुनेः ॥ अथ तत्तपसा तुष्टो भगवान्कमलापतिः ॥ २० ॥ प्रत्यक्षतामगात्तस्य शंखचक्रगदाधरः ॥ विकचांबुजपत्राक्षः सूर्य
कोटिसमप्रभः ॥ २१ ॥ विनतानंदनारूढश्छत्रचामरशोभितः ॥ हारकेयूरमुकुटकटकादिविभूषितः ॥ २२ ॥ विष्वक्सेनसुनंदादिकिंकरैः परिवा

१ लक्षजन्मार्जितान्यपि–इ० पा०। २ चक्रचामरशोभितः–इ० पा०।

CC-0. In Public Domain. Digitization by eGangotri

जने ॥ न दर्शयति साक्षा मे सागरो रूपमात्मनः ॥ ६६ ॥ चापमानय सौमित्रे शरांश्चाशीविषोपमान् ॥ सागरं शोषयिष्यामि पद्भ्यां यांतु प्लवंगमाः ॥ ६७ ॥ एनं लंघितमर्यादं सहस्रोर्मिसमाकुलम् ॥ निर्मर्यादं करिष्यामि सायकैर्वरुणालयम् ॥ ६८ ॥ महार्णवं शोषयिष्ये महादानवसंकुलम् ॥ महामकरनक्राढ्यं महावीचिसमाकुलम् ॥ ६९ ॥ एवमुक्त्वा धनुष्पाणिः क्रोधपर्याकुलेक्षणः ॥ रामो बभूव दुर्धर्षस्त्रिपुरघ्नो यथा शिवः ॥ ७० ॥ आकृष्य चापं कोपेन कम्पयित्वा शरैर्जगत् ॥ मुमोच विशिखानुग्रांस्त्रिपुरेषु यथा भवः ॥ ७१ ॥ दीप्ता बाणाश्च ये घोरा भासयन्तो दिशो दश ॥ प्राविशन्वारिधेस्तोयं दृप्तदानवसंकुलम् ॥७२ ॥ समुद्रस्तु ततो भीतो वेपमानः कृतांजलिः ॥ अनन्यशरणो विप्राः पातालात्स्वयमुत्थितः॥७३॥ शरणं राघवं भेजे कैवल्यपदकारणम् ॥ तुष्टाव राघवं विप्रा भूत्वा शब्दैर्मनोरमैः ॥ ७४ ॥ ॥ समुद्र उवाच ॥ ॥ नमामि ते राघव पादपंकजं सीतापते सौख्यद पादसेवनात् ॥नमामि ते गौतमदारमोक्षजं श्रीपादरेणुं सुरवृन्दसेव्यम्॥७५॥सुन्दप्रियादेहविदारिणे नमो नमोऽस्तु ते कौशिकयागरक्षिणे ॥ नमो महादेवशरासभेदिने नमो नमो राक्षससंघनाशिने ॥ ७६ ॥ रामराम नमस्यामि भक्तानामिष्टदायिनम् ॥ अवतीर्णो रघुकुले देवकार्यचिकीर्षया ॥ ७७ ॥ नारायणमनाद्यंतं मोक्षदं शिवमच्युतम् ॥ रामराम महाबाहो रक्ष मां शरणागतम् ॥ ७८ ॥ कोपं संहर राजेंद्र क्षमस्व करुणालय ॥ भूमिर्वातो वियच्चापो ज्योतींषि च रघूद्वह ॥ ७९ ॥ यत्स्वभावानि सृष्टानि ब्रह्मणा परमेष्ठिना ॥ वर्तंते तत्स्वभावानि स्वभावो मे ह्यगाधता ॥ ८० ॥ विकारस्तु भवेद्गाध एतत्सत्यं वदाम्यहम् ॥ लोभात्कामाद्भयाद्वापि रागाद्वापि रघूद्वह ॥ ८१ ॥ न वंशजं गुणं हातुमुत्सहेयं कथंचन ॥ तत्करिष्ये च साहाय्यं सेनायास्तरणे तव ॥ ८२ ॥ इत्युक्तवन्तं जलधिं रामोऽवादीन्नदीपतिम् ॥ ससैन्योऽहं गमिष्यामि लंकां रावणपालिताम् ॥ ८३ ॥ तच्छोषमुपयाहि त्वं तरणार्थं ममाधुना ॥ इत्युक्तस्तं पुनः प्राह राघवं वरुणालयः ॥ ८४ ॥ शृणुष्वावहितो राम श्रुत्वा कर्तव्यमाचर ॥ यद्याज्ञया ते शुष्यामि ससैन्यस्य यियासतः ॥८५॥ अन्येऽप्याज्ञापयिष्यंति मामेवं धनुषो बलात् ॥ उपायमन्यं वक्ष्यामि तरणार्थं बलस्य ते ॥ ८६ ॥ अस्ति ह्यत्र नलोनाम वानरः शिल्पिसंमतः ॥ त्वष्टुः काकुत्स्थ तनयो बलवान्विश्वकर्मणः ॥ ८७ ॥ स यत्काष्ठं तृणं वापि शिलां वा क्षेप्स्यते मयि ॥ सर्वं तद्धारयिष्यामि स ते सेतुर्भविष्यति ॥ ८८ ॥ सेतुना तेन गच्छ त्वं लंकां रावणपालिताम् ॥ उक्त्वेत्यंतर्हिते तस्मिन्रामो नलमुवाच ह ॥ ८९ ॥ कुरु सेतुं समुद्रे त्वं शक्तो ह्यसि महामते ॥ तदाऽब्रवीन्नलो वाक्यं रामं धर्मभृतां

१ क्षोभयिष्ये–इ० पा० । २ स रामो नलमूचिवान्–इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वरम् ॥ ९० ॥ अहं सेतुं विधास्यामि ह्यगाधे वरुणालये ॥ पित्रा दत्तवरश्चाहं सामर्थ्ये चापि तत्समः ॥ ९१ ॥ मातुर्मम वरो दत्तो मन्दरे विश्वकर्मणा ॥ शिल्पकर्मणि मत्तुल्यो भविता ते सुतस्त्विति ॥ ९२ ॥ पुत्रोऽहमौरसस्तस्य तुल्यो वै विश्वकर्मणा ॥ अद्यैव कामं बध्नंतु सेतुं वानरपुंगवाः ॥ ९३ ॥ ततो रामनिसृष्टा[1]स्ते वानरा बलवत्तराः ॥ पर्वतान्गिरिशृंगाणि लतातृणमहीरुहान् ॥ ९४ ॥ समाजह्रुर्महाकाया गरुडानिलरंहसः ॥ नलश्चक्रे महासेतुंमध्ये नदनदीपतेः ॥ ९५ ॥ दशयोजनविस्तीर्णं शतयोजनमायतम् ॥ जानकीरमणो रामः सेतुमेवमकारयत् ॥ ९६ ॥ नलेन वानरेन्द्रेण विश्वकर्मसुतेन वै ॥ तमेवं सेतुमासाद्य रामचन्द्रेण कारितम् ॥ ९७ ॥ सर्वे पातकिनो मर्त्या मुच्यन्ते सर्वपातकैः ॥ व्रतदानतपोहोमैर्न तथा तुष्यते शिवः ॥ ९८ ॥ सेतुमज्जनमात्रेण यथा तुष्यति[2] शंकरः ॥ न तुल्यं विद्यते तेजो यथा सौरेण तेजसा ॥ ९९ ॥ सेतुस्नानेन च तथा न तुल्यं विद्यते क्वचित् ॥ तत्सेतुमूलं लंकायां यत्र रामो यियासया ॥ १०० ॥ वानरैः सेतुमारेभे पुण्यं पापप्रणाशनम् ॥ तद्दर्भशयनं नाम्ना पश्चाल्लोकेषु विश्रुतम् ॥ १०१ ॥ एवमुक्तं मया विप्राः समुद्रे सेतुबंधनम् ॥ अत्र तीर्थान्यनेकानि संति पुण्यान्यनेकशः ॥ १०२ ॥ न संख्यां नामधेयं वा शेषो गणयितुं क्षमः ॥ किं त्वहं प्रब्रवीम्यद्य तत्र तीर्थानि कानिचित् ॥ १०३ ॥ चतुर्विंशतितीर्थानि संति सेतौ प्रधानतः ॥ प्रथमं चक्रतीर्थं स्याद्वेतालवरदं ततः ॥ १०४ ॥ ततः पापविनाशार्थं तीर्थं लोकेषु विश्रुतम् ॥ ततः सीतासरः पुण्यं ततो मंगलतीर्थकम् ॥ ॥ १०५ ॥ ततः सकलपापघ्नी नाम्ना चामृतवापिका ॥ ब्रह्मकुण्डं ततस्तीर्थं ततः कुंडं हनूमतः ॥ १०६ ॥ आगस्त्यं हि ततस्तीर्थं रामतीर्थमतः परम् ॥ ततो लक्ष्मणतीर्थं स्याज्जटातीर्थमतः परम् ॥ १०७ ॥ ततो लक्ष्म्याः परं तीर्थमग्नितीर्थमतः परम् ॥ चक्रतीर्थं ततः पुण्यं शिवतीर्थमतः परम् ॥ १०८ ॥ ततः शंखाभिधं तीर्थं ततो यामुनतीर्थकम् ॥ गंगातीर्थं ततः पश्चाद्गयातीर्थमनन्तरम् ॥ १०९ ॥ ततः स्यात्कोटितीर्थाख्यं साध्यानाममृतं ततः ॥ मानसाख्यं ततस्तीर्थं धनुष्कोटिस्ततः परम् ॥ १०० ॥ प्रधानतीर्थान्येतानि महापापहराणि च ॥ कथितानि द्विजश्रेष्ठास्सेतुमध्यगतानि वै ॥ १११ ॥ यथा सेतुश्च बद्धोऽभूद्रामेण जलधौ महान् ॥ कथितं तच्च विप्रेन्द्राः पुण्यं पापहारं तथा ॥ ११२ ॥ यच्छ्रुत्वा च पठित्वा च मुच्यते मानवो भुवि ॥ ११३ ॥ अध्यायमेनं पठते मनुष्यः शृणोति वा भक्तियुतो द्विजेंद्राः ॥ सो

१ रामनिसृष्टाः--रामेणाज्ञापिताः--इत्यर्थः । २ प्रीणाति--इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ससैन्या वरुणालयम् ॥ ४० ॥ शतयोजनमायातं मनसापि दुरासदम् ॥ अतो नु विघ्ना बहवः कथं प्राप्या च मैथिली ॥ ४१ ॥ कष्टात्कष्टतरं प्राप्ता वयमद्य निराश्रयाः ॥ महाजले महावाते समुद्रे हि निराश्रये ॥ ४२ ॥ उपायं कं विधास्यामस्तरणार्थं वनौकसाम् ॥ राज्याद्भ्रष्टो वनं प्राप्तो हृता सीता मृतः पिता ॥ ४३ ॥ इतोऽपि दुःसहं दुःखं यत्सागरविलंघनम् ॥ धिग्धिग्गर्जितमंभोधे धिगेतां वारिराशिताम् ॥ ४४ ॥ कथं तद्वचनं मिथ्या महर्षेः कुम्भजन्मनः ॥ हत्वा त्वं रावणं पापं पवित्रे गंधमादने ॥ पापोपशमनायाशु गच्छस्वेति यदीरितम् ॥४५॥ ॥ श्रीसूत उवाच ॥ ॥ इति रामवचः श्रुत्वा सुग्रीवप्रमुखास्तदा ॥ ४६ ॥ ऊचुः प्रांजलयः सर्वे राघवं तं महाबलम् ॥ नौभिरेनं तरिष्यामः प्लवैश्च विविधैरिति ॥ ४७ ॥ मध्ये वानरकोटीनां तदोवाच बिभीषणः ॥ समुद्रं राघवो राजा शरणं गन्तुमर्हति ॥ ४८ ॥ खनितः सागरैरेष समुद्रो वरुणालयः ॥ कर्तुमर्हति रामस्य तज्ज्ञातेः कार्यमंबुधिः ॥ ४९ ॥ बिभीषणेनैवमुक्तो राक्षसेन विपश्चिता ॥ सांत्वयन्राघवः सर्वान्वानरानिदमब्रवीत् ॥ ५० ॥ शतयोजनविस्तारमशक्ताः सर्ववानराः ॥ तर्तुं प्लवोडुपैरेनं समुद्रमतिभीषणम् ॥ ५१ ॥ नावो न संति सेनाया बह्व्या वानरपुंगवाः ॥ वणिजामुपघातं च कथमस्मद्विधश्चरेत् ॥ ५२ ॥ विस्तीर्णं चैव नः सैन्यं हन्याच्छिद्रेषु वा परः ॥ प्लवोडुपप्रतारोऽतो नैवात्र मम रोचते ॥ ५३ ॥ बिभीषणोक्तमेवेदं मोदते मम वानराः ॥ अहं त्विमं जलनिधिमुपास्ये मार्गसिद्धये ॥ ५४ ॥ नो चेद्दर्शयिता मार्गं धक्ष्याम्येनमहं तदा ॥ महास्त्रैरप्रतिहतैरत्यग्निपवनोज्ज्वलैः ॥ ५५ ॥ इत्युक्त्वा सहसौमित्रिरुपस्पृश्याथ राघवः ॥ प्रतिशिश्ये जलनिधिं विधिवत्कुशसंस्तरे ॥ ५६ ॥ तदा रामः कुशास्तीर्णे तीरे नदनदीपतेः ॥ संविवेश महाबाहुर्वेद्यामिव हुताशनः ॥ ५७ ॥ शेषभोगनिभं बाहुमुपधाय रघूद्वहः ॥ दक्षिणो दक्षिणं बाहुमुपास्ते[1] मकरालयम् ॥ ५८ ॥ तस्य रामस्य सुप्तस्य कुशास्तीर्णे महीतले ॥ नियमादप्रमत्तस्य निशास्तिस्रोऽतिचक्रमुः ॥ ५९ ॥ स त्रिरात्रोषितस्तत्र नयज्ञो धर्मतत्परः ॥ उपास्तेस्म तदा रामः सागरं मार्गसिद्धये ॥ ६० ॥ न च दर्शयते मन्दस्तदा रामस्य सागरः ॥ प्रयतेनापि रामेण यथार्हमपि पूजितः ॥ ६१ ॥ तथापि सागरो रामं न दर्शयति चात्मनः ॥ समुद्राय ततः क्रुद्धो रामो रक्तांतलोचनः ॥ ६२ ॥ समीपवर्तिनं चेदं लक्ष्मणं प्रत्यभाषत ॥ अद्य मद्बाणनिर्भिन्नैर्मकरैर्वरुणालयम्[2] ॥ ६३ ॥ निरुद्धतोयं सौमित्रे करिष्यामि क्षणादहम् ॥ सशंखशुक्ताजालं हि समीनमकरं शनैः ॥ ६४ ॥ अद्य बाणैरमोघाख्यैर्वारिधिं परिशोषये ॥ क्षमया हि समायुक्तं मामयं मकरालयः ॥ ६५ ॥ असमर्थं विजानाति धिक्क्षमामीदृशे

१ सखायस्ते--इ० पा० । २ वरुणालयम्--इ० पा० ।

Nepal Sanskrit University, Balmecki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यस्मादति पराक्रमः ॥ अहं लंकेश्वरं हत्वा भार्यामानयितास्मि ते ॥ १७ ॥ ततः सुग्रीवसहितो रामचंद्रो महाबलः ॥ सलक्ष्मणो ययौ तूर्णं किंष्किधां वालिपालिताम् ॥ १८ ॥ ततो जगर्ज सुग्रीवो वाल्यागमनकांक्षया ॥ अमृष्यमाणो वाली च गर्जितं स्वानुजस्य ॥ ॥ १९ ॥ अंतःपुराद्विनिष्क्रम्य युयुधेऽवरजेन सः ॥ वालिमुष्टिप्रहारेण ताडितो भृशविह्वलः ॥ २० ॥ सुग्रीवो निर्गतस्तूर्णं यत्र रामो महाबलः वै ततो रामो महाबाहुस्सुग्रीवस्य शिरोधरे ॥ २१ ॥ लतामाबध्य चिह्नं तु युद्धायाचोदयत्तदा ॥ गर्जितेन समाहूय सुग्रीवो वालिनं पुनः ॥ २२ ॥ रामप्रेरणया तेन बाहुयुद्धमथाकरोत् ॥ ततो वालिनमाजघ्ने शरेणैकेन राघवः ॥ २३ ॥ हते वालिनि सुग्रीवः किष्किंधां प्रत्यपद्यत ॥ ततो वर्षास्व तीतासु सुग्रीवो वानराधिपः ॥ २४ ॥ सीतामानयितुं तूर्णं वानराणां महाचमूम् ॥ समादाय समागच्छदंतिकं नृपपुत्रयोः ॥ २५ ॥ प्रस्थापयामास कपीन्सीतान्वेषणकांक्षया ॥ विदितायां तु वैदेह्यां लंकायां वायुसूनुना ॥ २६ ॥ दत्ते चूडामणौ चापि राघवो हर्षशोकवान् ॥ सुग्रीवेणानुजेनापि वायुपुत्रेण धीमता ॥ २७ ॥ तथान्यैः कपिभिश्चैव जांबवन्नलमुख्यकैः ॥ अन्वीयमानो रामोऽसौ मुहूर्तेऽभिजिति द्विजाः ॥२८॥ विलंघ्य विविधा न्देशान्महेंद्रं पर्वतं ययौ ॥ चक्रतीर्थं ततो गत्वा निवासमकरोत्तदा ॥ २९ ॥ तत्रैव तु स धर्मात्मा समागच्छद्विभीषणः ॥ भ्राता वै राक्षसेंद्रस्य चतुर्भिः सचिवैः सह ॥ ३० ॥ प्रतिजग्राह रामस्तं स्वागतेन महात्मना ॥ सुग्रीवस्य तु शंकाऽभूत्प्रणिधिः स्यादयं त्विति ॥ ३१ ॥ राघवस्तस्य चेष्टाभिः सम्यक्स्वचरितैर्हितैः ॥ अदुष्टमेनं दृष्ट्वैव तत एनमपूजयत् ॥ ३२ ॥ सर्वराक्षसराज्ये तमभ्यषिंचद्विभीषणम् ॥ चक्रे च मंत्रिप्रवरं सदृशं रविसूनुना ॥ ३३ ॥ चक्रतीर्थं समासाद्य निवसद्रघुनंदनः ॥ चिंतयन्राघवः श्रीमान्सुग्रीवादीनभाषत ॥ ३४ ॥ मध्ये वानरमुख्यानां प्राप्तकालमिदं वचः ॥ उपायः को नु भवतामेतत्सागरलंघने ॥ ३५ ॥ इयं च महती सेना सागरश्चापि दुस्तरः ॥ अंभोराशिरयं नीलश्चंचलोर्म्मिसमाकुलः ॥ ३६ ॥ उद्यन्मत्स्यो महानक्रशंखशुक्तिसमाकुलः ॥ क्वचिदौर्वानलाक्रांतः फेनवानतिभीषणः ॥ ॥ ३७ ॥ प्रकृष्टपवनाकृष्टनीलमेघसमन्वितः ॥ प्रलयांभोधरारावः सारवाननिलोद्धतः ॥ ३८ ॥ कथं सागरमक्षोभ्यं तरामो वरुणालयम् ॥ सैन्यैः परिवृताः सर्वे वानराणां महौजसाम् ॥ ३९ ॥ उपायैरधिगच्छामो यथा नदनदीपतिम् ॥ कथं तरामः सहसा

१ बाणेन। २ विभीषणः--इ० पा०। अत्र हि 'विभिषण विभीषण' शब्दयोर्मध्ये प्रायो विवादः सर्वत्र सर्वतः शोश्रूयते नात्र निश्चयोऽधिगम्यते तन्निर्णयश्चास्मद्बुद्ध्यायमेव--'त्रिभी भये' इत्यस्य सन्नन्तत्वाद्युचि रूपम् विभेतुमिच्छति अधर्मो मां मास्प्राक्षीत् इति विभीषति विभीषतीति विभीषण--इति। ३ सह मंत्रिभिः--इ० पा०। ४ गुप्तचारः इत्यर्थः।

CC-0. In Public Domain. Digitization by eGangotri

षम् ॥ ९९ ॥ सेतुं गच्छ धनं तेऽहं दास्यामीति प्रलोभ्य यः ॥ पश्चान्नास्तीति च ब्रूयात्तमाहुर्ब्रह्मघातकम् ॥ १०० ॥ लोभेन सेतुयात्रार्थं संपन्नोऽपि दरिद्रवत् ॥ मानवो यदि याचेत तमाहुस्तेयिनं बुधाः ॥ १०१ ॥ गमिष्ये सेतुमिति वै यो गृहीत्वा[1]धनं नरः ॥ न याति सेतुं लोभेनतमाहुर्ब्रह्मघातकम् ॥ १०२ ॥ येन केनाप्युपायेन सेतुं गच्छेन्नरो मुदा ॥ अशक्तो दक्षिणां दत्त्वा गमयेद्वा द्विजोत्तमम् ॥१०३॥ याचित्वा यज्ञकरणे यथा दोषो न विद्यते ॥ याचित्वा सेतुयात्रायां तथा दोषो न विद्यते ॥ १०४ ॥ याचित्वाप्यन्यतो द्रव्यं सेतुस्नाने प्रवर्तयेत् ॥ सोऽपि तत्फलमाप्नोति सेतुस्नायी नरो यथा ॥ १०५ ॥ ज्ञानेन मोक्षमभियांति कृते युगे तु त्रेतायुगे यजनमेव विमुक्तिदायि ॥ श्रेष्ठं तथान्ययुगयोरपि दानमाहुः सर्वत्र सेत्वभिषवो हि वरो नराणाम् ॥१०६॥ इति श्रीस्कांदे महापुराणे एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे सेतुमाहात्म्ये सेतुगमनफलादिवर्णनं नाम प्रथमोऽध्यायः॥१॥ ॥ ऋषय ऊचुः ॥ ॥ कथं सूत महाभाग रामेणाक्लिष्टकर्मणा ॥ सेतुर्बद्धो नदीनाथे ह्यगाधे वरुणालये ॥१॥ सेतौ च कति तीर्थानि गंधमादनपर्वते ॥ एतन्नः श्रद्दधानानां ब्रूहि पौराणिकोत्तम ॥ २ ॥ ॥ श्रीसूत उवाच ॥ ॥ रामेण हि यथा सेतुर्निबद्धो वरुणालये ॥ तदहं संप्रवक्ष्यामि युष्माकं मुनिपुंगवाः ॥ ३ ॥ आज्ञया हि पितू रामो न्यवसद्दंडकानने ॥ सीतालक्ष्मणसंयुक्तः पंचवट्यां समाहितः॥ ४ ॥ तस्मिन्निवसतस्तस्य राघवस्य महात्मनः ॥ रावणेन हृता भार्या मारीचच्छद्मना द्विजाः ॥५ ॥ मार्गमाणो वने भार्यां रामो दशरथात्मजः॥ पंपातीरे जगामासौ शोकमोहसमन्वितः ॥६॥ दृष्टवान्वानरं तत्र कंचिद्दशरथात्मजः ॥ वानरेणाथ पृष्टोऽयं को भवानिति राघवः ॥ ७ ॥ आदितः स्वस्य वृत्तांतं तस्मै प्रोवाच तत्त्वतः ॥ अथ राघवसंपृष्टो वानरः को भवानिति ॥ ८ ॥ सोपि विज्ञापयामास राघवाय महात्मने ॥ अहं सुग्रीवसचिवो हनूमान्नाम वानरः ॥ ९ ॥ तेन च प्रेरितोऽभ्यागां युवाभ्यां सख्यमिच्छता ॥ आगच्छतं तद्भद्रं वां सुग्रीवांतिकमाशु वै ॥ १० ॥ तथास्त्विति स रामोपि तेन साकं मुनीश्वराः ॥ सुग्रीवांतिकमागत्य सख्यं चक्रेऽग्निसाक्षिकम् ॥ ११ ॥ प्रतिजज्ञेऽथ रामोऽपि तस्मै वालिवधं प्रति ॥ सुग्रीवश्चापि वैदेह्याः पुनरानयनं द्विजाः ॥ १२ ॥ इत्येवं समयं कृत्वा विश्वास्य च परस्परम् ॥ मुदा परमया युक्तौ नरेश्वरकपीश्वरौ ॥१३॥ आसाते ब्राह्मणश्रेष्ठा ऋष्यमूकगिरौ तथा ॥ सुग्रीवप्रत्ययार्थं च दुंदुभेः कायमाशु वै ॥ १४ ॥ पादांगुष्ठेन चिक्षेप राघवो बहुयोजनम् ॥ सप्ततालान्विनिर्भिद्य राघवेण महात्मना ॥ १५ ॥ ततः प्रीतमना वीरः सुग्रीवो राममब्रवीत् ॥ इंद्रादिदेवताभ्योऽपि नास्ति राघव मे भयम् ॥ १६ ॥ भवान्मित्रं मया लब्धो

१ बाणेन--इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हिमनःशुद्धिप्रदं तथा ॥ जपाद्धोमात्तथा दानाद्यागाच्च तपसोऽपि च ॥ ७३ ॥ सेतुस्नानं विशिष्टं हि पुराणे परिपठ्यते ॥ अकामनाकृतं स्नानं
सेतौ पापविनाशने ॥ ७४ ॥ अपुनर्भवदं प्रोक्तं सत्यमुक्तं द्विजोत्तमाः ॥ यः संपदं समुद्दिश्य स्नाति सेतौ नरो मुदा ॥ ७५ ॥ ससंपदमवाप्नोति
विपुलां द्विजपुंगवाः ॥ शुद्ध्यर्थं स्नाति चेत्सेतौ तदा शुद्धिमवाप्नुयात् ॥ ७६ ॥ रत्यर्थं यदि च स्नायादप्सरोभिर्नरो दिवि ॥ तदा रतिमवाप्नोति
स्वर्गलोकेऽमरीजनैः ॥ ७७ ॥ मुक्त्यर्थं यदि च स्नायात्सेतौ मुक्तिप्रदायिनि ॥ तदा मुक्तिमवाप्नोति पुनरावृत्तिवर्जिताम् ॥७८॥ सेतुस्नानेन धर्मः
स्यात्सेतुस्नानादघक्षयः ॥ सेतुस्नानं द्विजश्रेष्ठाः सर्वकामफलप्रदम् ॥ ७९ ॥ सर्वव्रताधिकं पुण्यं सर्वयज्ञोत्तरं स्मृतम् ॥ सर्वयोगाधिकं प्रोक्तं सर्व
तीर्थाधिकं स्मृतम् ॥ ८० ॥ इंद्रादिलोकभोगेषु रागो येषां प्रवर्तते ॥ स्नातव्यं तैर्द्विजश्रेष्ठाः सेतौ रामकृते सकृत् ॥ ८१ ॥ ब्रह्मलोके च वैकुण्ठे
कैलासेऽपि शिवालये ॥ रंतुमिच्छा भवेद्येषां ते सेतौ स्नांतु सादरम् ॥ ८२ ॥ आयुरारोग्यसंपत्तिमतिरूपगुणाढ्यताम् ॥ चतुर्णामपि वेदानां
सांगानां पारगामिनाम् ॥ ८३ ॥ सर्वशास्त्राधिगंतृत्वं सर्वमंत्रेष्वभिज्ञताम् ॥ समुद्दिश्य तु यः स्नायात्सेतौ सर्वार्थसिद्धिदे ॥ ८४ ॥ तत्तत्सिद्धिम
वाप्नोति सत्यं स्यान्नात्र संशयः ॥ दारिद्र्यान्नरकाद्ये च मनुजा भुवि बिभ्यति ॥ ८५ ॥ स्नानं कुर्वंतु ते सर्वे रामसेतौ विमुक्तिदे ॥ श्रद्धया
सहितो मर्त्यः श्रद्धया रहितोऽपि वा ॥ ८६ ॥ इहलोके परत्रापि सेतुस्नायी न दुःखभाक् ॥ सेतुस्नानेन सर्वेषां नश्यते पापसंचयः ॥ ८७ ॥
वर्द्धते धर्मराशिश्च शुक्लपक्षे यथा शशी ॥ यथा रत्नानि वर्द्धंते समुद्रे विविधान्यपि ॥ ८८ ॥ तथा पुण्यानि वर्द्धंते सेतुस्नानेन वै द्विजाः ॥ काम
धेनुर्यथा लोके सर्वान्कामान्प्रयच्छति ॥ ८९ ॥ चिंतामणिर्यथा दद्यात्पुरुषाणां मनोरथान् ॥ यथाऽमरतरुर्दद्यात्पुरुषाणामभीप्सितम् ॥ ९० ॥
सेतुस्नानं तथा नृणां सर्वाभीष्टान्प्रदास्यति ॥ अशक्तः सेतुयात्रायां दारिद्र्येण च मानवः ॥ ९१ ॥ याचित्वा स धनं शिष्टात्सेतौ स्नानं समाच
रेत् ॥ सेतुस्नानसमं पुण्यं तत्र दाता समश्नुते ॥ ९२ ॥ तथा प्रतिगृहीतापि प्राप्नोत्यविकलं फलम् ॥ सेतुयात्रां समुद्दिश्य गृह्णीयाद्ब्राह्मणाद्ध
नम् ॥ ९३ ॥ क्षत्रियादपि गृह्णीयान्न दद्युर्ब्राह्मणा यदि ॥ वैश्याद्वा प्रतिगृह्णीयान्न प्रयच्छंति चेन्नृपाः ॥ ९४ ॥ शूद्रान्न प्रतिगृह्णीयात्कथंचिदपि
मानवः ॥ यः सेतुं गच्छतः पुंसो धनं वा धान्यमेव वा ॥ ९५ ॥ दत्त्वा वस्त्रादिकं वापि प्रवर्तयति मानवः ॥ सोऽश्वमेधादियज्ञानां फलमाप्नो
त्यनुत्तमम् ॥ ९६ ॥ चतुर्णामपि वेदानां पारायणफलं लभेत् ॥ तुलापुरुषमुख्यानां दानानां फलमश्नुते ॥ ९७ ॥ ब्रह्महत्यादिपापानां नाशः स्या
न्नात्र संशयः ॥ बहुना किं प्रलापेन सर्वान्कामान्समश्नुते ॥ ९८ ॥ एवं प्रतिगृहीतापि तत्तुल्यफलमश्नुते ॥ याचतः सेतुयात्रार्थं न प्रतिग्रहकल्म

CC-0. In Public Domain. Digitization by eGangotri

वातेन यस्यांगं स्पृश्यतेऽखिलम् ॥ ४९ ॥ सुरापानायुतं तस्य तत्क्षणादेव नश्यति ॥ वर्तंते यस्य केशास्तु वपनात्सेतुमध्यतः ॥ ५० ॥ गुरुतल्पा युतं तस्य तत्क्षणादेव नश्यति ॥ यस्यास्थि सेतुमध्ये तु स्थापितं पुत्रपौत्रकैः ॥ स्वर्णस्तेयायुतं तस्य तत्क्षणादेव नश्यति ॥ ५१ ॥ स्मृत्वा यं सेतुमध्ये तु स्नानं कुर्याद्द्विजोत्तमाः ॥ महापातकिसंसर्गदोषस्तस्य लयं व्रजेत् ॥ ५२ ॥ मार्गभेदी स्वार्थपाकी यतिब्राह्मणदूषकः ॥ अत्याशी वेदविक्रेता पंचैते ब्रह्मघातकाः ॥ ५३ ॥ ब्राह्मणान्यः समाहूय दास्यामीति धनादिकम् ॥ पश्चान्नास्तीति यो ब्रूते ब्रह्महा सोपि कीर्तितः ॥ ५४ ॥ परिज्ञाय यतो धर्मास्तस्मै यो द्वेषमाचरेत् ॥ अवजानाति वा विप्रान्ब्रह्महा सोपि[3]कीर्तितः ॥ ५५ ॥ जलपानार्थमायातं गोवृन्दं तु जलाशये ॥ निवारयति यो विप्रा ब्रह्महा सोपि कीर्तितः ॥ ५६ ॥ सेतुमेत्य तु ते सर्वे मुच्यंते दोषसंचयैः ॥ ब्रह्मघातकतुल्या ये संति चान्ये द्विजोत्तमाः ॥ ॥ ५७ ॥ ते सर्वे सेतुमागत्य मुच्यंते नात्र संशयः ॥ औपासनपरित्यागी देवतान्नस्य भोजकः ॥५८॥ सुरापयोषित्संसर्गी गणिकान्नाशनस्तथा ॥ गणान्नभोजकश्चैव पतितान्नरतश्च यः ॥ ५९ ॥ एते सुरापिनः प्रोक्ताः सर्वकर्मबहिष्कृताः ॥ सेतुस्नानेन मुच्यंते ते सर्वे हतकिल्बिषाः ॥ ६० ॥ सुरापतुल्या ये चान्ये मुच्यंते सेतुमज्जनात् ॥ कन्दमूलफलानां च कस्तूरीपट्टवाससाम् ॥ ६१ ॥ पयश्चंदनकर्पूरक्रमुकाणां तथैव च ॥ मध्वाज्यताम्रकांस्यानां रुद्राक्षाणां तथैव च ॥ ६२ ॥ चोरकास्तु परिज्ञेया सुवर्णस्तेयिनः समाः[6] ॥ ते सेतुक्षेत्रमागत्य मुच्यन्ते नात्र संशयः ॥ ६३ ॥ अन्ये च स्तेयिनः सर्वे सेतुस्नानेन वै द्विजाः ॥ मुच्यंते सर्वपापेभ्यो नात्र कार्या विचारणा ॥ ६४ ॥ भगिनीं पुत्रभार्यां च तथैव च रजस्वलाम् ॥ भ्रातृभार्यां मित्रभार्यां मद्यपां च परस्त्रियम् ॥६५॥ हीनस्त्रियं च विश्वस्तां योऽभिगच्छति रागतः ॥ गुरुतल्पी स विज्ञेयः सर्वकर्मबहिष्कृतः ॥६६॥ एते चान्ये च ये संति गुरुतल्पगतुल्यकाः ॥ ते सर्वे प्रविमुच्यंते सेतुस्नानेन वै द्विजाः ॥ ६७ ॥ एतैः संसर्गिणो विप्रा ये चान्ये संति पापिनः ॥ सेतुस्नानेन महता तेऽपि मोक्षमवाप्नुयुः॥६८॥ यागं विना देवलोके घृताचीमेनकादिभिः॥ संभोगकामिनो विप्राः स्नातुं सेतावघापहे ॥ ६९ ॥ अनिषेव्य रविं वह्निमनुपास्य परान्सुरान् ॥ शुभकामी जनः सेतौ कुर्यात्स्नानं सभक्तिकम् ॥७०॥ तिलान्भूमिं सुवर्णं च धान्यं तंदुलमेव च ॥ अदत्त्वेच्छंति ते स्वर्गं स्नांतु सेतौ तु ते द्विजाः ॥७१॥ उपवासैर्व्रतैः कृत्स्नैरसंताप्य निजां तनुम् ॥ स्वर्गाभिलाषिणः पुंसः स्नांतु सेतौ विमुक्तिदे ॥७२॥ सेतुस्नानं मोक्षदं

१ विनश्यति–इ० पा० । २ तमाहुर्ब्रह्मघातकम्–इ० पा० । ३ सोऽप्युदीरितः–इ० पा० । ४ तमाहुर्ब्रह्मघातकम्–इ० पा० । ५ सेतुस्नानाद्विमुच्यन्ते–इ० पा० । ६ सदा–इ० पा० ।
७ विश्वस्ताम्–विधवाम्–इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ति यो ब्रूयाद्यं कं वापि नरं द्विजाः ॥ सोऽपि तत्फलमाप्नोति किमन्यैर्बहुभाषणः ॥ २५ ॥ सेतुस्नानकरो मर्त्यः सप्तकोटिकुलान्वितः ॥ संप्राप्य विष्णुभवनं तत्रैव परिमुच्यते ॥ २६ ॥ सेतुं रामेश्वरं लिंगं गंधमादनपर्वतम् ॥ चिंतयन्मनुजः सत्यं सर्वपापैः प्रमुच्यते ॥ २७ ॥ मातृतः पितृतश्चैव लक्षकोटिकुलान्वितः ॥ संप्राप्य विष्णुभवनं तत्रैव परिमुच्यते ॥ कल्पत्रयं शंभुपदे स्थित्वा तत्रैव मुच्यते ॥ २८ ॥ मूषावस्थां वसाकूपं तथा वैतरणीं नदीम् ॥ श्वभक्षं मूत्रपानं च सेतुस्नायी न पश्यति ॥ २९ ॥ तप्तशूलं तप्तशिलां पुरीषह्रदमेव च ॥ तथा शोणितकूपं च सेतुस्नायी न पश्यति ॥ ३० ॥ शाल्मल्यारोहणं रक्तभोजनं कृमिभोजनम् ॥ स्वमांसभोजनं चैव वह्निज्वालाप्रवेशनम् ॥ ३१ ॥ शिलावृष्टिं वह्निवृष्टिं नरकं कालसूत्रकम् ॥ क्षारोदकं चोष्णतोयं नेयात्सेत्ववलोककः ॥ ३२ ॥ सेतुस्नायी नरो विप्राः पंचपातकवानपि ॥ मातृतः पितृतश्चैव शतकोटिकुलान्वितः ॥ ३३ ॥ कल्पत्रयं विष्णुपदे स्थित्वा तत्रैव मुच्यते ॥ अधःशिरःशोषणं च नरकं क्षारसेवनम् ॥ ३४ ॥ पाषाणयन्त्रपीडां च मरुत्प्रपतनं तथा ॥ पुरीषलेपनं[२] चैव तथा क्रकचदारणम् ॥ ३५ ॥ पुरीषभोजनं रेतःपानं संधिषु दाहनम् ॥ अंगारशय्याभ्रमणं तथा मुसलमर्दनम् ॥ ३६ ॥ एतानि नरकाण्यद्धा सेतुस्नायी न पश्यति ॥ तुसे स्नानं करिष्येऽहमिति बुद्ध्या विचिंतयन् ॥ ३७ ॥ गच्छेच्छतपदं[३] यस्तु स महापातकोऽपि सन् ॥ बहूनां काष्ठयंत्राणां कर्षणं शस्त्रभेदनम् ॥ ३८ ॥ पतनोत्पतनं चैव गदादण्डनिपीडनम् ॥ गजदन्तैश्च हननं नानाभुजगदंशनम् ॥ ३९ ॥ धूमपानं पाशबन्धं नानाशूलनिपीडनम् ॥ मुखे च नासिकायां च क्षारोदकनिषेचनम् ॥ ४० ॥ क्षारांबुपानं नरकं तप्तायःसूचिभक्षणम् ॥ एतानि नरकान्यद्धा न याति गतपातकः[४] ॥ ४१ ॥ क्षारांबुपूर्णरंध्राणां प्रवेशं मलभोजनम्[५] ॥ स्नायुच्छेदं स्नायुदाहमस्थिभेदनमेव च ॥ ४२ ॥ श्लेष्मादनं पित्तपानं महातिक्तनिषेवणम् ॥ अत्युष्णतैलपानं च पानं क्षारोदकस्य च ॥ ४३ ॥ कषायोदकपानं च तप्तपाषाणभोजनम् ॥ अत्युष्णसिकतास्नानं तथा दशनमर्दनम् ॥ ४४ ॥ तप्तायःशयनं चैव संतप्तांबुनिषेचनम् ॥ सूचिप्रक्षेपणं चैव नेत्रयोर्मुखसंधिषु ॥ ४५ ॥ शिश्ने सवृषणे चैव ह्ययोभारस्य बन्धनम् ॥ वृक्षाग्रात्पतनं चैव दुर्गंधपरिपूरिते ॥ ४६ ॥ तीक्ष्णधारास्त्रशय्यां च रेतःपानादिकं तथा ॥ इत्यादिनरकान्घोरान्सेतुस्नायी न पश्यति ॥ ४७ ॥ सेतुसैकतमध्ये यः शेते तत्पांसुकुंठितः ॥ यावन्तः पांसवो लग्नास्तस्यांगे विप्रसत्तमाः ॥ ४८ ॥ तावतां ब्रह्महत्यानां नाशः स्यान्नात्र संशयः ॥ सेतुमध्यस्थ

१ बहुभाषितैः--इ० पा० । २ पुरीषलोचनम्--इ० पा० । ३ गच्छति--इ० पा० । ४ गतकल्मषः--इ० पा० । ५ मेहभोजनम्--इ० पा० ।

CC-0. In Public Domain. Digitization by eGangotri

वातेन यस्यांगं स्पृश्यतेऽखिलम् ॥ ४९ ॥ सुरापानायुतं तस्य तत्क्षणादेव नश्यति ॥ वर्तंते यस्य केशास्तु वपनात्सेतुमध्यतः ॥ ५० ॥ गुरुतल्पा युतं तस्य तत्क्षणादेव नश्यति ॥ यस्यास्थि सेतुमध्ये तु स्थापितं पुत्रपौत्रकैः ॥ स्वर्णस्तेयायुतं तस्य तत्क्षणादेव नश्यति ॥ ५१ ॥ स्मृत्वा यं सेतुमध्ये तु स्नानं कुर्याद्विजोत्तमाः ॥ महापातकिसंसर्गदोषस्तस्य लयं व्रजेत् ॥ ५२ ॥ मार्गभेदी स्वार्थपाकी यतिब्राह्मणदूषकः ॥ अत्याशी वेदविक्रेता पंचैते ब्रह्मघातकाः ॥ ५३ ॥ ब्राह्मणान्यः समाहूय दास्यामीति धनादिकम् ॥ पश्चान्नास्तीति यो ब्रूते ब्रह्महा सोपि कीर्तितः ॥ ५४ ॥ परिज्ञाय यतो धर्मांस्तस्मै यो द्वेषमाचरेत् ॥ अवजानाति वा विप्रान्ब्रह्महा सोपिकीर्तितः ॥ ५५ ॥ जलपानार्थमायातं गोवृन्दं तु जलाशये ॥ निवारयति यो विप्रा ब्रह्महा सोपि कीर्तितः ॥ ५६ ॥ सेतुमेत्य तु ते सर्वे मुच्यंते दोषसंचयैः ॥ ब्रह्मघातकतुल्या ये संति चान्ये द्विजोत्तमाः ॥ ॥ ५७ ॥ ते सर्वे सेतुमागत्य मुच्यंते नात्र संशयः ॥ औपासनपरित्यागी देवतान्नस्य भोजकः ॥५८॥ सुरापयोषित्संसर्गी गणिकान्नाशनस्तथा ॥ गणान्नभोजकश्चैव पतितान्नरतश्च यः ॥ ५९ ॥ एते सुरापिनः प्रोक्ताः सर्वकर्मबहिष्कृताः ॥ सेतुस्नानेन मुच्यंते ते सर्वे हतकिल्बिषाः ॥ ६० ॥ सुरापतुल्या ये चान्ये मुच्यंते सेतुमज्जनात् ॥ कन्दमूलफलानां च कस्तूरीपट्टवाससाम् ॥ ६१ ॥ पयश्चंदनकर्पूरक्रमुकाणां तथैव च ॥ मध्वाज्यताम्रकांस्यानां रुद्राक्षाणां तथैव च ॥ ६२ ॥ चोरकास्तु परिज्ञेया सुवर्णस्तेयिनः समाः ॥ ते सेतुक्षेत्रमागत्य मुच्यन्ते नात्र संशयः ॥ ६३ ॥ अन्ये च स्तेयिनः सर्वे सेतुस्नानेन वै द्विजाः ॥ मुच्यंते सर्वपापेभ्यो नात्र कार्या विचारणा ॥ ६४ ॥ भगिनीं पुत्रभार्यां च तथैव च रजस्वलाम् ॥ भ्रातृभार्यां मित्रभार्यां मद्यपां च परस्त्रियम् ॥६५॥ हीनस्त्रियं च विश्वस्तां योऽभिगच्छति रागतः ॥ गुरुतल्पी स विज्ञेयः सर्वकर्मबहिष्कृतः ॥६६॥ एते चान्ये च ये संति गुरुतल्पगतुल्यकाः ॥ ते सर्वे प्रविमुच्यंते सेतुस्नानेन वै द्विजाः ॥ ६७ ॥ एतैः संसर्गिणो विप्रा ये चान्ये संति पापिनः ॥ सेतुस्नानेन महता तेऽपि मोक्षमवाप्नुयुः॥६८॥ यागं विना देवलोके घृताचीमेनकादिभिः॥ संभोगकामिनो विप्राः स्नातुं सेतावघापहे ॥ ६९ ॥ अनिषेव्य रविं वह्निमनुपास्य परान्सुरान् ॥ शुभकामी जनः सेतौ कुर्यात्स्नानं सभक्तिकम् ॥७०॥ तिलान्भूमिं सुवर्णं च धान्यं तंदुलमेव च ॥ अदत्त्वेच्छंति ते स्वर्गं स्नातुं सेतौ तु ते द्विजाः ॥७१॥ उपवासैर्व्रतैः कृत्स्नैरसंताप्य निजां तनुम् ॥ स्वर्गाभिलाषिणः पुंसः स्नातुं सेतौ विमुक्तिदे ॥७२॥ सेतुस्नानं मोक्षदं

१ विनश्यति–इ० पा० । २ तमाहुर्ब्रह्मघातकम्–इ० पा० । ३ सोऽप्युदीरितः–इ० पा० । ४ तमाहुर्ब्रह्मघातकम्–इ० पा० । ५ सेतुस्नानाद्विमुच्यन्ते–इ० पा० । ६ सदा–इ० पा० ।
७ विश्वस्ताम्–विधवाम्–इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



CC-0. In Public Domain. Digitization by eGangotri



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

CC-0. In Public Domain. Digitization by eGangotri



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ श्रीस्कांद महापुराणे तृतीये ब्रह्मखण्डे सेतुमाहात्म्य प्रारंभः (३-१)॥

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ श्रीगणेशाय नमः ॥ श्रीवेदव्यासाय नमः ॥ शुक्लांबरधरं विष्णुं शशिवर्णं चतुर्भुजम् ॥ प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशांतये ॥ १ ॥ नैमिषारण्य निलया ऋषयः शौनकादयः ॥ अष्टांगयोगनिरता ब्रह्मज्ञानैकतत्पराः ॥ १ ॥ मुमुक्षवो महात्मानो निर्ममा ब्रह्मवादिनः ॥ धर्मज्ञा अनसूयाश्च सत्यव्रतपरायणाः ॥ २ ॥ जितेंद्रिया जितक्रोधाः सर्वभूतदयालवः ॥ भक्त्या परमया विष्णुमर्चयंतः सनातनम् ॥ ३ ॥ तपस्तेपुर्महापुण्ये नैमिषे मुक्तिदायिनि ॥ एकदा ते महात्मानः समाजं चक्रुरुत्तमम् ॥ ४ ॥ कथयंतो महापुण्याः कथाः पापप्रणाशिनीः ॥ भुक्तिमुक्त्योरुपायं च जिज्ञा संतः परस्परम् ॥ ५ ॥ षड्विंशतिसहस्राणामृषीणां भावितात्मनाम् ॥ तेषां शिष्यप्रशिष्याणां संख्या कर्तुं न शक्यते ॥ ६ ॥ अत्रांतरे महाविद्वान्व्या सशिष्यो महामुनिः ॥ आगमन्नैमिषारण्यं सूतः पौराणिकोत्तमः ॥ ७ ॥ तमागतं मुनिं दृष्ट्वा ज्वलंतमिव पावकम् ॥ अर्घ्याद्यैः पूजयामासुर्मुनयः शौनकादयः ॥ ८ ॥ सुखोपविष्टं तं सूतमासने परमे शुभे ॥ पप्रच्छुः परमं गुह्यं लोकानुग्रहकांक्षया ॥ ९ ॥ सूत धर्मार्थतत्त्वज्ञ स्वागतं मुनिपुंगव ॥ श्रुतवांस्त्वं पुराणानि व्यासात्सत्यवतीसुतात् ॥ १० ॥ अतः सर्वपुराणानामर्थज्ञोऽसि महामुने ॥ कानि क्षेत्राणि पुण्यानि कानि तीर्थानि भूतले ॥ ११ ॥ कथं वा लप्स्यते मुक्तिर्जीवानां भवसागरात् ॥ कथं हरे हरौ वापि नृणां भक्तिः प्रजायते ॥ १२ ॥ केन सिध्येत च फलं कर्मणस्त्रिविधा त्मनः ॥ एतच्चान्यच्च तत्सर्वं कृपया वद सूतज ॥ १३ ॥ ब्रूयुः स्निग्धाय शिष्याय गुरवो गुह्यमप्युत ॥ इति पृष्टस्तदा सूतो नैमिषारण्यवासिभिः ॥ ॥ १४ ॥ वक्तुं प्रचक्रमे नत्वा व्यासं स्वगुरुमादितः ॥ श्रीसूत उवाच ॥ ॥ सम्यक्पृष्टमिदं विप्रा युष्माभिर्जगतो हितम् ॥ १५ ॥ रहस्यमे तद्युष्मांकं वक्ष्यामि शृणुतादरात् ॥ मया नोक्तमिदं पूर्वं कस्यापि मुनिपुंगवाः ॥ १६ ॥ मनो नियम्य विप्रेंद्राः शृणुध्वं भक्तिपूर्वकम् ॥ अस्ति रामे श्वरं नाम रामसेतौ पवित्रितम् ॥ १७ ॥ क्षेत्राणामपि सर्वेषां तीर्थानामपि चोत्तमम् ॥ दृष्टमात्रे रामसेतौ मुक्तिः संसारसागरात् ॥ १८ ॥ हरे हरौ च भक्तिः स्यात्तथा पुण्यसमृद्धिता ॥ कर्मणस्त्रिविधस्यापि सिद्धिः स्यान्नात्र संशयः ॥ १९ ॥ यो नरो जन्ममध्ये तु सेतुं भक्त्यावलोकयेत् ॥ तस्य पुण्यफलं वक्ष्ये शृणुध्वं मुनिपुंगवाः ॥ २० ॥ मातृतः पितृतश्चैव द्विकोटिकुलसंयुतः ॥ निर्विश्य शंभुना कल्पं ततो मोक्षं समश्नुते ॥ २१ ॥ गण्यंते पांसवो भूमेर्गण्यंते दिवि तारकाः ॥ सेतुदर्शनजं पुण्यं शेषेणापि न गण्यते ॥ २२ ॥ समस्तदेवतारूपः सेतुबंधः प्रकीर्तितः ॥ तद्दर्शनवतः पुंसः कः पुण्यं गणितुं क्षमः ॥ २३ ॥ सेतुं दृष्ट्वा नरो विप्राः सर्वयागकरः स्मृतः ॥ स्नातश्च सर्वतीर्थेषु तपोऽतप्यत चाखिलम् ॥ २४ ॥ सेतुं गच्छे

१ ब्रह्मनिष्ठैकतत्पराः–इति पाठान्तरम् । २ अथान्तरे–इ० पा० । ३ लोकानुग्रहकाम्यया–इ० पा० । ४ सर्वज्ञोऽसि–इ० पा० । ५ नाम्ना–इ० पा० ।

CC-0. In Public Domain. Digitization by eGangotri

ति यो ब्रूयाद्यं कं वापि नरं द्विजाः ॥ सोऽपि तत्फलमाप्नोति किमन्यैर्बहुभाषणः ॥ २५ ॥ सेतुस्नानंकरो मर्त्यः सप्तकोटिकुलान्वितः ॥ संप्रा
प्य विष्णुभवनं तत्रैव परिमुच्यते ॥ २६ ॥ सेतुं रामेश्वरं लिंगं गंधमादनपर्वतम् ॥ चिंतयन्मनुजः सत्यं सर्वपापैः प्रमुच्यते ॥ २७ ॥ मातृतः
पितृतश्चैव लक्षकोटिकुलान्वितः ॥ संप्राप्य विष्णुभवनं तत्रैव परिमुच्यते ॥ कल्पत्रयं शंभुपदे स्थित्वा तत्रैव मुच्यते ॥ २८ ॥
मूषावस्थां वसाकूपं तथा वैतरणीं नदीम् ॥ श्वभक्षं मूत्रपानं च सेतुस्नायी न पश्यति ॥ २९ ॥ तप्तशूलं तप्तशिलां पुरी
षह्रदमेव च ॥ तथा शोणितकूपं च सेतुस्नायी न पश्यति ॥ ३० ॥ शाल्मल्यारोहणं रक्तभोजनं कृमिभोजनम् ॥ स्वमांसभोजनं चैव
वह्निज्वालाप्रवेशनम् ॥ ३१ ॥ शिलावृष्टिं वह्निवृष्टिं नरकं कालसूत्रकम् ॥ क्षारोदकं चोष्णतोयं नेयात्सेत्ववलोककः ॥ ३२ ॥
सेतुस्नायी नरो विप्राः पंचपातकवानपि ॥ मातृतः पितृतश्चैव शतकोटिकुलान्वितः ॥ ३३ ॥ कल्पत्रयं विष्णुपदे स्थित्वा तत्रैव मुच्यते ॥
अधःशिरःशोषणं च नरकं क्षारसेवनम् ॥ ३४ ॥ पाषाणयन्त्रपीडां च मरुत्प्रपतनं तथा ॥ पुरीषलेपनं[2] चैव तथा क्रकचदारणम् ॥ ३५ ॥
पुरीषभोजनं रेतःपानं संधिषु दाहनम् ॥ अंगारशय्याभ्रमणं तथा मुसलमर्दनम् ॥ ३६ ॥ एतानि नरकाण्यद्धा सेतुस्नायी न पश्यति[3] ॥ तुसे
स्नानं करिष्येऽहमिति बुद्ध्या विचिंतयन् ॥ ३७ ॥ गच्छेच्छतपदं यस्तु स महापातकोऽपि सन् ॥ बहूनां काष्ठयंत्राणां कर्षणं शस्त्रभेदनम् ॥ ३८ ॥
पतनोत्पतनं चैव गदादण्डनिपीडनम् ॥ गजदन्तैश्च हननं नानाभुजगदंशनम् ॥ ३९ ॥ धूमपानं पाशबन्धं नानाशूलनिपीडनम् ॥ मुखे
च नासिकायां च क्षारोदकनिषेचनम् ॥ ४० ॥ क्षारांबुपानं नरकं तप्तायःसूचिभक्षणम् ॥ एतानि नरकान्यद्धा न याति गतपातकः[4] ॥ ४१ ॥
क्षारांबुपूर्णरंध्राणां प्रवेशं मलभोजनम्[5] ॥ स्नायुच्छेदं स्नायुदाहमस्थिभेदनमेव च ॥ ४२ ॥ श्लेष्मादनं पित्तपानं महातिक्तनिषेवणम् ॥ अत्युष्ण
तैलपानं च पानं क्षारोदकस्य च ॥ ४३ ॥ कषायोदकपानं च तप्तपाषाणभोजनम् ॥ अत्युष्णसिकतास्नानं तथा दशनमर्दनम् ॥ ४४ ॥
तप्तायःशयनं चैव संतप्तांबुनिषेचनम् ॥ सूचिप्रक्षेपणं चैव नेत्रयोर्मुखसंधिषु ॥ ४५ ॥ शिश्ने सवृषणे चैव ह्ययोभारस्य बन्धनम् ॥ वृक्षाग्रात्पतनं
चैव दुर्गंधपरिपूरिते ॥ ४६ ॥ तीक्ष्णधारास्त्रशय्यां च रेतःपानादिकं तथा ॥ इत्यादिनरकान्घोरान्सेतुस्नायी न पश्यति ॥ ४७ ॥ सेतुसैकतमध्ये
यः शेते तत्पांसुकुंठितः ॥ यावन्तः पांसवो लग्नास्तस्यांगे विप्रसत्तमाः ॥ ४८ ॥ तावतां ब्रह्महत्यानां नाशः स्यान्नात्र संशयः ॥ सेतुमध्यस्थ

१ बहुभाषितैः--इ० पा० । २ पुरीषलोचनम्--इ० पा० । ३ गच्छति--इ० पा० । ४ गतकल्मषः--इ० पा० । ५ मेहभोजनम्--इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ इति श्रीस्कान्दे महापुराणे द्वितीयं वैष्णवखण्डं सम्पूर्णम् ॥ २ ॥

CC-0. In Public Domain. Digitization by eGangotri

ति यो ब्रूयाद्यं कं वापि नरं द्विजाः ॥ सोऽपि तत्फलमाप्नोति किमन्यैर्बहुभाषणः ॥ २५ ॥ सेतुस्नानकरो मर्त्यः सप्तकोटिकुलान्वितः ॥ संप्राप्य विष्णुभवनं तत्रैव परिमुच्यते ॥ २६ ॥ सेतुं रामेश्वरं लिंगं गंधमादनपर्वतम् ॥ चिंतयन्मनुजः सत्यं सर्वपापैः प्रमुच्यते ॥ २७ ॥ मातृतः पितृतश्चैव लक्षकोटिकुलान्वितः ॥ संप्राप्य विष्णुभवनं तत्रैव परिमुच्यते ॥ कल्पत्रयं शंभुपदे स्थित्वा तत्रैव मुच्यते ॥ २८ ॥ मूषावस्थां वसाकूपं तथा वैतरणीं नदीम् ॥ श्वभक्षं मूत्रपानं च सेतुस्नायी न पश्यति ॥ २९ ॥ तप्तशूलं तप्तशिलां पुरीषह्रदमेव च ॥ तथा शोणितकूपं च सेतुस्नायी न पश्यति ॥ ३० ॥ शाल्मल्यारोहणं रक्तभोजनं कृमिभोजनम् ॥ स्वमांसभोजनं चैव वह्निज्वालाप्रवेशनम् ॥ ३१ ॥ शिलावृष्टिं वह्निवृष्टिं नरकं कालसूत्रकम् ॥ क्षारोदकं चोष्णतोयं नेयात्सेत्ववलोककः ॥ ३२ ॥ सेतुस्नायी नरो विप्राः पंचपातकवानपि ॥ मातृतः पितृतश्चैव शतकोटिकुलान्वितः ॥ ३३ ॥ कल्पत्रयं विष्णुपदे स्थित्वा तत्रैव मुच्यते ॥ अधःशिरःशोषणं च नरकं क्षारसेवनम् ॥ ३४ ॥ पाषाणयन्त्रपीडां च मरुत्प्रपतनं तथा ॥ पुरीषलेपनं[2] चैव तथा क्रकचदारणम् ॥ ३५ ॥ पुरीषभोजनं रेतःपानं संधिषु दाहनम् ॥ अंगारशय्याभ्रमणं तथा मुसलमर्दनम् ॥ ३६ ॥ एतानि नरकाण्यद्धा सेतुस्नायी न पश्यति[3] ॥ तुसे स्नानं करिष्येऽहमिति बुद्ध्या विचिंतयन् ॥ ३७ ॥ गच्छेच्छतपदं यस्तु स महापातकोऽपि सन् ॥ बहूनां काष्ठयंत्राणां कर्षणं शस्त्रभेदनम् ॥ ३८ ॥ पतनोत्पतनं चैव गदादण्डनिपीडनम् ॥ गजदन्तैश्च हननं नानाभुजगदंशनम् ॥ ३९ ॥ धूमपानं पाशबन्धं नानाशूलनिपीडनम् ॥ मुखे च नासिकायां च क्षारोदकनिषेचनम्[5] ॥ ४० ॥ क्षारांबुपानं नरकं तप्तायःसूचिभक्षणम् ॥ एतानि नरकान्यद्धा न याति गतपातकः[4] ॥ ४१ ॥ क्षारांबुपूर्णरंध्राणां प्रवेशं मलभोजनम् ॥ स्नायुच्छेदं स्नायुदाहमस्थिभेदनमेव च ॥ ४२ ॥ श्लेष्मादनं पित्तपानं महातिक्तनिषेवणम् ॥ अत्युष्णतैलपानं च पानं क्षारोदकस्य च ॥ ४३ ॥ कषायोदकपानं च तप्तपाषाणभोजनम् ॥ अत्युष्णसिकतास्नानं तथा दशनमर्दनम् ॥ ४४ ॥ तप्तायःशयनं चैव संततप्तांबुनिषेचनम् ॥ सूचिप्रक्षेपणं चैव नेत्रयोर्मुखसंधिषु ॥ ४५ ॥ शिश्ने सवृषणे चैव ह्ययोभारस्य बन्धनम् ॥ वृक्षाग्रात्पतनं चैव दुर्गंधपरिपूरिते ॥ ४६ ॥ तीक्ष्णधारास्त्रशय्यां च रेतःपानादिकं तथा ॥ इत्यादिनरकान्घोरान्सेतुस्नायी न पश्यति ॥ ४७ ॥ सेतुसैकतमध्ये यः शेते तत्पांसुकुंठितः ॥ यावन्तः पांसवो लग्नास्तस्यांगे विप्रसत्तमाः ॥ ४८ ॥ तावतां ब्रह्महत्यानां नाशः स्यान्नात्र संशयः ॥ सेतुमध्यस्थ

१ बहुभाषितैः--इ० पा० । २ पुरीषलेचनम्--इ० पा० । ३ गच्छति--इ० पा० । ४ गतकल्मषः--इ० पा० । ५ मेहभोजनम्--इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ इति श्रीस्कान्दे महापुराणे द्वितीयं वैष्णवखण्डं सम्पूर्णम् ॥ २ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धनार्थी धनमाप्नोति मोक्षार्थी मोक्षमुत्तमम् ॥ २५ ॥ लभेत विद्यां विद्यार्थी मुच्येद्दुगणश्च रोगतः ॥ एतच्छ्रवणमात्रेण सर्वपापक्षयो भवेत् ॥२६॥ ब्राह्मं तेजो लभेद्विप्रः क्षत्रियश्च नरेशताम् ॥ धनं वैश्यः सुखं शूद्रः श्रवणादस्य चाप्नुयात् ॥२७॥ एतच्छ्रुत्वा रणं गच्छन्विजयं चाप्नुयान्नृपः॥प्राप्नुयात्स्त्री च सौभाग्यं कन्या च स्वेप्सितं वरम् ॥२८॥ एतस्य श्रुतिकीर्त्तिभ्यां शास्त्रजातशिरोमणेः ॥ यंयं यः कामयेत्कामं तंतं प्राप्नोति मानवः ॥ ॥२९॥ तस्मात्त्वं सर्वदा भक्त्या पठन्नेतद्द्विजोत्तम ॥ कायवाणीमनोभिस्तं भजेथा भक्तवत्सलम् ॥३०॥ सौतिरुवाच ॥ एतन्महासेनमुखाब्जनिःसृतं सावर्णिरापीय वचोमृतं सः ॥ चकार भक्तिं वसुदेवनन्दने नराकृतिब्रह्मणि सर्वमङ्गले ॥ ३१ ॥ यूयं च सर्वे निगमागमज्ञा ब्रह्मण्यदेवं भजनीयमीशम् ॥ भजध्वमेकं तमुदारकीर्त्तिं श्रीवासुदेवं निजधर्मसंस्थाः ॥ ३२ ॥ गोलोकधामपतये प्रकाशचयमूर्त्तये ॥ नमोस्तु वासुदेवाय भक्त्यानन्दविवृद्धये ॥ ३३ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे श्रीवासुदेवमाहात्म्ये ग्रन्थसंप्रदायप्रवृत्तिनिरूपणं नाम द्वात्रिंशोऽध्यायः ॥ ३२ ॥ इति श्रीस्कान्दे महापुराणे द्वितीये वैष्णवखण्डे वासुदेवमाहात्म्यं सम्पूर्णम् ॥ २-९ ॥

इति श्रीस्कान्दे महापुराणे द्वितीयं वैष्णवखण्डं सम्पूर्णम् ॥ २ ॥

इदं पुस्तकं मुम्बय्यां श्रीकृष्णदासात्मजक्षेमराजश्रेष्ठिना स्वकीये "श्रीवेङ्कटेश्वर" (स्टीम्) मुद्रणालये मुद्रितम्। संवत् १९६७, शके १८३२.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तुष्टिः ॥२३॥इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे श्रीवासुदेवमाहात्म्ये श्रीनरनारायणस्तुतिनिरूपणं नामैक त्रिंशोऽध्यायः ॥३१॥ ॥ स्कन्द उवाच ॥ इति स्तुत्वा तमीशानं नारदः स ययौ ततः ॥ शम्याप्रासाभिधं ब्रह्मन्व्यासस्याश्रममादितः ॥१॥ सादरं मानितस्तेन प्रत्युत्थानासनादिभिः ॥ तस्मा एकान्तिकं धर्म्मं प्राह जिज्ञासवे स च ॥२॥ ततो ब्रह्मसभां गत्वा ब्रह्मणः शृण्वतो मुनिः ॥ देवान्पितॄन्महर्षींश्च तत्रस्थांस्तमुपादिशत् ॥ ३ ॥ तत्र स्थितो भास्करश्च धर्म्ममेतं पुनर्म्मुने ॥ शुश्राव नारदात्सर्वं श्रुतं नारायणात्पुरा ॥ ४ ॥ स प्राहात्माग्रयायिभ्यो वालखिल्येभ्य आदरात् ॥ मेरौ ते संगतान्देवानिन्द्रादींश्च न्यशामयन् ॥ ५ ॥ तेभ्योऽसितो मुनिः श्रुत्वा धर्ममेतं द्विजोत्तम ॥ पितृभ्यः कथयामास पितृलोकं गतः क्वचित् ॥ ६ ॥ पितरस्ते त्वर्यमाद्या ऊचिरे शंतनुं नृपम् ॥ स भीष्माय स्वपुत्राय कथयामास तत्त्वतः ॥ ७ ॥ सोपि भारतयुद्धान्ते धर्म्मराजाय पृच्छते ॥ शयानः शरशय्यायां प्राह संसदि भूयसि ॥ ८ ॥ तत्र श्रुत्वा नारदोपि स्थितः सदसि सादरम् ॥ कैलासे शंकरं प्राह स च मां मुनिसत्तम ॥ ९ ॥ मया ते कथितं ब्रह्मन्पृच्छते धर्म्मवर्त्तिने ॥ पात्रायैतत्प्रदातव्यमिति मां हि पिताब्रवीत् ॥ १० ॥ येनयेन श्रुतं ह्येतन्माहात्म्यं सात्वतांपतेः ॥ सस तस्मिन्परां भक्तिं चकार स्वविमुक्तये ॥ ११ ॥ युधिष्ठिरोपि राजर्षिः श्रुत्वा भीष्मेण कीर्त्तितम् ॥ माहात्म्यं देवकीसूनोर्म्मुमुदे भ्रातृभिः सह ॥ १२ ॥ तमात्मनो मातुलेयं सर्वकारणकारणम् ॥ निशम्याश्चर्य्यज लधौ निममज्ज महामतिः ॥ १३ ॥ वासुदेवादिकं व्यूहं वाराहादींश्च सर्व्वशः ॥ अवतारानपि नृपो मेनेऽस्यैव रमापतेः ॥ १४ ॥ ततः सहानुजो राजा दिव्यमानुषविग्रहे ॥ अत्यन्तं भक्तिमान्कृष्णे बभूव द्विजसत्तम ॥ १५ ॥ श्रुत्वेमां च कथां सर्व्वे ब्रह्मराजसुरर्षयः ॥ सभायां तत्र ये चासं स्तेप्यभूवन्सविस्मयाः ॥ १६ ॥ कृष्णमेव परं ब्रह्म विदित्वा ते नराकृति ॥ भक्तिं प्रपेदिरे तस्मिन्प्रणमन्तस्तमादरात् ॥ १७ ॥ इत्थं तस्यास्ति माहात्म्यमतस्त्वमपि सन्मते ॥ सर्वात्मना वासुदेवं तमेव भज भक्तितः ॥ १८ ॥ श्रीवासुदेवमाहात्म्यमेतत्ते कथितं मया ॥ दुर्वासनोपशमनं भगवद्भक्तिवर्द्धनम् ॥ १९ ॥ कथितानि पुराणेऽत्र मयाख्यानानि यानि ते ॥ तेषां सार इदं ब्रह्मन्निर्म्मथ्यैव समुद्धृतः ॥ २० ॥ वेदोपनिषदां चैत द्रसो वै सांख्ययोगयोः ॥ पञ्चरात्रस्य कृत्स्नस्य धर्म्मशास्त्रस्य चानघ ॥ २१ ॥ धन्यं यशस्यं चायुष्यमेतत्परममङ्गलम् ॥ साक्षाद्भगवता गीतं सर्वाभद्रविनाशनम् ॥ २२ ॥ य एतच्छृणुयात्पुण्यं कीर्त्तयेदथ यः पठेत् ॥ वासुदेवे भवेत्तेषामचला निर्मला मतिः ॥ २३ ॥ भक्ता एकान्तिकास्ते च भवेयुस्तस्य मानवाः ॥ ब्रह्मरूपा व्रजन्त्यन्ते ब्रह्मधाम तमःपरम् ॥ २४ ॥ धर्मार्थी लभतेऽनेन धर्मं कामं च कामुकः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्भगवंस्तव ॥ वासुदेवस्य माहात्म्यं मयाधिगतमञ्जसा ॥ २ ॥ कंचित्कालमिहैवाहं तपः कुर्वंस्त्वया सह ॥ शृण्वंश्च नित्यं ज्ञानादि करिष्ये पक्व
मात्मनः ॥ ३ ॥ स्कन्द उवाच ॥ इत्युक्त्वा नारदस्तत्र तेन चाप्यनुमोदितः ॥ उवास दिव्यवर्षाणां सहस्रं स तपश्चरन् ॥ ४ ॥ शुश्राव चानु
दिवसं यथाकालं हरेर्मुखात् ॥ धर्मज्ञानाद्यथ प्राप पक्वतां तत्र योगिराट् ॥ ५ ॥ स्नेहं च परमं प्राप स श्रीकृष्णेऽखिलात्मनि ॥ गुणगानपरो
नित्यमास भागवताग्रणीः ॥ ६ ॥ भक्तिनिष्ठां परां प्राप्तमथ तं सिद्धयोगिनम् ॥ उवाच भगवान्प्रीतः श्रेयस्कृत्सर्वदेहिनाम् ॥ ७ ॥ श्रीनारायण
उवाच ॥ सिद्धोसि त्वं महर्षेऽद्य गच्छ लोकहितं कुरु ॥ एकान्तधर्मं सर्वत्र प्रवर्त्तयितुमर्हसि ॥ ८ ॥ स्कन्द उवाच ॥ इत्याज्ञां शिरसा तस्य
स आदाय जगद्गुरोः ॥ गच्छंस्ततस्तमस्तौषीत्प्रणम्य प्राञ्जलिः स्थितः ॥ ९ ॥ नारद उवाच ॥ नमोनमस्ते भगवञ्जगद्गुरो नारायणाऽप्राकृत
दिव्यमूर्त्ते ॥ अनन्तकल्याणगुणाकरस्त्वं दासे मयि प्रीततरः सदा स्याः ॥ १० ॥ त्वं वासुदेवोसि जगन्निवासः क्षेमाय लोकस्य तपः करोषि ॥
योगेश्वरेशोपशमस्थ आत्मारामाधिपस्त्वं परहंससद्गुरुः ॥ ११ ॥ विभुर्ऋषीणामृषभोऽक्षरात्मा जीवेश्वराणां च नियामकोसि ॥ साक्षी महापूरुष
आत्मतन्त्रः कालोऽभवद्यद्भ्रुकुटेर्महांश्च ॥ १२ ॥ सर्गादिलीलां जगतां त्वमीश करोषि मायापुरुषात्मनैव ॥ तथाप्यकर्त्ता ननु निर्गुणोसि भूमा
परब्रह्म परात्परश्च ॥ १३ ॥ सत्यः स्वयंज्योतिरतर्क्यशक्तिस्त्वं ब्रह्मभूतात्मविचिन्त्यमूर्त्तिः ॥ बृहद्व्रताचार्य महामुनीन्द्र कन्दर्पदर्पापहरप्रताप ॥ १४॥
तपस्विनां ये रिपवः प्रसिद्धाः क्रोधो रसो मत्सरलोभमुख्याः ॥ अप्याश्रमं तेपि कदापि वेष्टुं नेमं क्षमा ह्येष तव प्रतापः ॥ १५ ॥ छन्दोमयो ज्ञानमयोऽ
मृताध्वा धर्मात्मको धर्मसर्गाभिपोष्टा ॥ उन्मूलिताधर्मसर्गो महात्मा त्वमव्ययश्चाक्षयोऽव्यक्तबन्धुः॥ १६॥ निर्दोषरूपस्य तवाऽखिलाः क्रिया भवन्ति
वै निर्गुणा निर्गुणस्य ॥ धर्मार्थकामेप्सुभिरर्चनीयस्त्वमीश्वरो नाथ मुमुक्षुभिश्च ॥ १७ ॥ त्वं कालमायायमसंसृतिभ्यो महाभयात्पातुमेकः समर्थः ॥
भक्तापराधाननवेक्षमाणो महादयालुः किल भक्तवत्सलः ॥१८॥ धृतावतारस्य हि नाममात्रं रूपं च वा यः स्मरेदन्तकाले ॥ सोपि प्रभो घोरमहा
घसंघातसद्यो विमुक्तो दिवमाशु याति ॥ १९ ॥ तं त्वां विहायाऽत्र तु यो मनुष्यो देहे त्रिधातावपि दैहिकेषु ॥ जायात्मजज्ञातिधनेषु सज्जते स
मायया वञ्चित एव मूढः ॥ २० ॥ त्वद्भक्तियोग्यो नरदेह एव यं कामयन्तेऽपि च नाकसंस्थाः ॥ त्वद्भक्तिहीनं हि दिवोपि सौख्यमहं तु जाने
नरकेण तुल्यम् ॥ २१ ॥ तपस्त्रिलोक्याः कुरुषे सुखाय तत्रापि ते भारतवासिपुंसु ॥ अनुग्रहो भूरितरो यदत्र कृतावतारो विचरन्विराजसे ॥
॥ २२ ॥ तस्याश्रयं ये तव नात्र कुर्वते त एव शास्त्रेषु मताः कृतघ्नाः ॥ अतस्तवैकाश्रयमेव बाढं कुर्वत्यजस्रं मयि तेऽस्तु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लब्धैरर्चेद्भक्त्योपचारकैः ॥ ३७ ॥ द्वादशाक्षरमन्त्रेण द्विजोऽन्यो नाममन्त्रतः ॥ श्रीराधाकृष्णमभ्यर्चेद्भक्तिरेवाऽत्र सिद्धिदा ॥ ३८ ॥ एकादश्यां हरेर्जन्मोत्सवादौ तु विशेषतः ॥ महापूजैव कर्त्तव्या स्वशक्त्याऽखिलवैष्णवैः ॥ ३९ ॥ प्रतिष्ठामात्रमपि यः कुर्यादन्यकृतालये ॥ स सार्वभौम राज्यं वै प्राप्नुयान्नष्टकिल्बिषः ॥ ४० ॥ कारयेन्मन्दिरं रम्यं धनाढ्यश्च हरेर्दृढम् ॥ यः स तु प्राप्नुयाद्राज्यं त्रैलोक्यस्याप्यकण्टकम् ॥ ४१ ॥ वृत्तिदानेन पूजायाः प्रवाहं वर्द्धयेत्त यः ॥ स पुमान्प्राप्नुयान्नूनं विष्णुलोके महत्सुखम् ॥ ४२ ॥ प्रतिष्ठां मन्दिरं पूजां कारयेत्रीण्यपीह यः ॥ समानैश्वर्यमाप्नोति वासुदेवस्य स ध्रुवम् ॥ ४३ ॥ हरेर्वृत्तिं हरेद्यस्तु कृतां स्वेन परेण वा ॥ कल्पमेकं स वै भुंक्ते नरके यमयातनाः ॥ ४४ ॥ कर्त्ता कारयिता यश्च सहायश्चानुमोदकः ॥ चतुर्णां हि फले भागः सुकृतस्येतरस्य च ॥४५॥ इति क्रियायोगविधिर्मया नारद कीर्त्तितः ॥ येनै कान्तिकधर्मोऽत्र सिद्ध्येत्तत्प्रवणात्मनाम् ॥ ४६ ॥ विषयांश्चिन्तयंश्चित्ते बहिः पूजां हरेश्चरन् ॥ संभारेणापि महता न यथोक्तं फलं लभेत् ॥ ४७ ॥ इतस्ततो ग्राम्यसुखे भ्रमत्स्वीयं मनस्ततः ॥ निगृह्य विष्णुपूजायां मुमुक्षुः प्रयतो भवेत् ॥ ४८ ॥ महाव्रता भूरितपस्विनोपि स्वधीतवेदा अपि बुद्धिमन्तः ॥ सांख्यं च योगं परिशीलयन्तः सिद्धिं न यान्त्येव विनार्चनं हरेः ॥ ४९ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे श्रीवासुदेवमाहात्म्ये क्रियायोगे श्रीवासुदेवपूजाविधिनिरूपणं नामैकोनत्रिंशोऽध्यायः ॥ २९ ॥

॥ स्कन्द उवाच ॥ वासुदेवार्चनविधिं निशम्येत्थं स नारदः ॥ प्रसन्नः पुनरप्राक्षीत्तं मुनीनां परं गुरुम् ॥ १ ॥ नारद उवाच ॥ सम्यगुक्तो भगवता क्रियायोगो महाफलः ॥ एकेन मनसा योऽसौ कार्यः सिद्धिमभीप्सुभिः ॥ २ ॥ मनसो निग्रहस्तत्र ज्ञानि नामपि सद्धरो ॥ दुष्करः किं पुनस्तर्हि नृणां कर्मात्मनां भुवि ॥ ३ ॥ तमृते तु हरेरर्चा नाभीष्टफलदायिनी ॥ अतस्तन्निग्रहोपायमपि मे वक्तुमर्हसि ॥ ४ ॥ स्कन्द उवाच ॥ इत्यापृष्टः स मुनिना मुनीन्द्रः सर्वदर्शनः ॥ नारायणो नरसखो नारदं तमभाषत ॥ ५ ॥ श्रीनारायण उवाच ॥ सत्यमेव मुने वक्षि मनसोस्ति बलं महत् ॥ जितेपि यस्मिन्विश्वासः शत्रुवन्न विवेकिनाम् ॥ ६ ॥ मनसा सदृशोन्यस्तु शत्रुर्ना स्त्येव देहिनाम् ॥ विष्णुध्यानाभ्यासयोगान्निर्दोषं तद्धि शाम्यति ॥ ७ ॥ अदान्ताश्ववदेवैतद्यतोस्ति दुरवग्रहम् ॥ अतो वैराग्ययुक्पुम्भिः सदु पायैर्निगृह्यते ॥ ८ ॥ उपायास्तत्र बहवः सन्ति तेष्वपि सन्मते ॥ अष्टांगयोगस्याभ्यासः श्रेष्ठः सद्यः फलप्रदः ॥ ९ ॥ यमाश्च नियमा ब्रह्म न्नासनान्यसुसंयमः ॥ प्रत्याहारो धारणा च ध्यानमंगं तु सत्तमम् ॥ समाधिश्चाष्टमं प्रोक्तं योगस्यानुक्रमेण वै ॥ १० ॥ तत्राऽहिंसाब्रह्मचर्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सत्यास्तेयापरिग्रहाः ॥ एते पञ्च यमाः प्रोक्ताः साधनीयाः प्रयत्नतः ॥११ ॥ शौचं तपश्च संतोषः स्वाध्यायो विष्णुपूजनम् ॥ एते च नियमाः
पञ्च द्वितीयांगतया मताः ॥ १२ ॥ परिहायांगचाञ्चल्यं यथासुखतया स्थितिः ॥ तदासनं स्वस्तिकादि प्रोक्तं द्वन्द्वार्त्तिजिन्मुने ॥ १३ ॥
चरतां सर्वतोऽसूनामेकदेशे तु धारणम् ॥ गुरूपदिष्टरीत्यैव प्राणायामः स उच्यते ॥ १४ ॥ चले वायौ चलं चित्तं स्थिरे तस्मिन्स्थिरं
ततः ॥ सुदेशेऽयं सदाऽभ्यस्यः पूरकुम्भकरेचकैः ॥ १५ ॥ मनसेन्द्रियवृत्तीनां तत्तद्विषयतश्च यत् ॥ आकर्षणं प्रतीचीनं प्रत्याहारः स
ईरितः ॥ १६ ॥ नाभ्याद्यन्यतमे स्थाने प्राणेन सह चेतसः ॥ वासुदेवस्वरूपे यद्धारणं धारणोदिता ॥ १७ ॥ एकैकावयवस्यैव चिन्तनं
यत्पृथक्पृथक् ॥ पदाब्जादेर्भगवतस्तद्ध्यानमिति कीर्तितम् ॥ १८ ॥ निरोधः प्राणमनसोरतिप्रेम्णा हरौ तु यः ॥ स समाधिरिति प्रोक्तो
योगिनामभिवाञ्छितः ॥ १९ ॥ अंगैरष्टभिरेतैर्हि शिक्षितैः सिद्धसद्गुरोः ॥ योगः सिद्ध्यति वै पुंसां समाधेः पक्वतात्मकः ॥ २० ॥ नैता
दृशं परं सम्यङ् मनोनिग्रहसाधनम् ॥ पुरुषाणां मुमुक्षूणामिति जानीहि नारद ॥ २१ ॥ तपस्विनां महाशत्रोर्ब्रह्माण्डक्षोभकादपि ॥ मदनान्न
भयं किञ्चिद्योगिनस्त्वस्ति कर्हिचित् ॥ २२ ॥ आयास्यन्तं विहित्वैव सोन्तकालं च योगवित् ॥ स्वातन्त्र्येणैव देहं स्वं त्यजतीत्थं समा
धिना ॥ २३ ॥ पार्ष्णिभ्यां गुदमापीड्य वायुं पादद्वयस्थितम् ॥ शनैःशनैः समाकृष्य मृत्युस्थानं नयत्यमुम् ॥ २४ ॥ मनसा केशवं ध्यायं
स्तन्मनुं च षडक्षरम् ॥ जपंस्ततोऽमुं नयति वायुं स्थानं प्रजापतेः ॥ २५ ॥ ततो नाभिं च हृदयमुरः कण्ठं च योगवित् ॥ नयति भ्रुकुटिं
वायुं वासुदेवपरायणः ॥ २६ ॥ एतेषु षट्सु स्थानेषु त्वेकैकस्मिन्पृथक्पृथक् ॥ योगी प्राणमनोक्षाणां निरोधं च विसर्जनम् ॥ तावदभ्यसति
स्वस्य यावत्स्यात्तत्स्वतन्त्रता ॥ २७ ॥ जितंजितं विहायैव स्थानं याति परं परम् ॥ प्राप्तस्य स्थानकं षष्ठं तदभ्यासे श्रमो न हि ॥ २८ ॥ सप्त
च्छिद्राणि रुद्ध्वाऽथ प्राणमक्षमनोयुतम् ॥ प्रापय्य तालु व्रजति ब्रह्मरन्ध्रं स योगवित् ॥ २९ ॥ मायामयपदार्थानां ततो हित्वैव वासनाः ॥ स
वासुदेवैकमनास्त्यजति स्वकलेवरम् ॥ ३० ॥ ततो भगवतो धाम श्रीकृष्णस्य तमःपरम् ॥ उपेत्य सेवमानस्तं नन्दते दिव्यविग्रहः ॥ ३१ ॥
इति ते कथितो ब्रह्मन्योगशास्त्रस्य संग्रहः ॥ जित्वा तेन मनः स्वीयं तमाराधय सर्वदा ॥ ३२ ॥ इति श्रीस्कान्दे महापुराण एकाशीति
साहस्र्यां संहितायां द्वितीये वैष्णवखण्डे श्रीवासुदेवमाहात्म्येऽष्टांगयोगनिरूपणं नाम त्रिंशोऽध्यायः ॥ ३० ॥ ॥ स्कन्द उवाच ॥ श्रुत्वैत
त्सकलं धर्म्यं यथावद्भगवद्वचः ॥ निःसंशयो मुनिः प्राह तं प्रणम्य कृताञ्जलिः ॥ १ ॥ नारद उवाच ॥ नष्टा मे संशयाः सर्वे प्रसादा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

परिधापयेदतिप्रेम्णा राधां चान्यांश्च शक्तितः ॥ १२ ॥ उपवीतं भगवते दद्यात्सूक्ष्मं सितं शुभम् ॥ रत्नहेमाद्यलंकारान्सांगायास्मै च धार
येत् ॥ १३ ॥ यथाऋतु यथास्थानं चन्दनेन यथोचितम् ॥ तिलकानुलेपनं कुर्यात्सकेशरघनादिना ॥ १४ ॥ यथोचितमलंकारान्धारयित्वा
च राधिकाम् ॥ पत्रलेखां च तिलकं विदध्यात्कुङ्कुमाक्षतैः ॥ १५ ॥ आदर्शं दर्शयित्वाऽथ पुष्पस्रक्छेखरादिभिः ॥ पूजयेत्तं सहस्रेण तुलसी
मञ्जरीदलैः ॥ १६ ॥ तुलस्या वाऽथ पुष्पेण प्रत्येकं नाम वैष्णवम् ॥ नमः प्रान्तचतुर्थ्यन्तं कीर्त्तयन्नर्चयेत्प्रभुम् ॥ १७ ॥ सुगन्धिद्रव्यचूर्णानि
ततः सौभाग्यवन्ति च ॥ समर्प्य धूपं कुर्वीत दशांगं वामृतादिकम् ॥ १८ ॥ दीपं घृतेन कुर्वीत वर्त्तिकाद्वयदीपितम् ॥ कृतं स्वशक्तितः शुद्धं
महानैवेद्यमर्पयेत् ॥ १९ ॥ संयावपायसापूपशष्कुलीखण्डलड्डुकान् ॥ पूरिकाः पोलिका मौद्गमोदनं व्यञ्जनानि च ॥ दधिदुग्धघृतादीनि चतु
ष्पद्यां निधारयेत् ॥ २० ॥ भोजयेत्तं ततः प्रेम्णा मध्ये पानीयमर्पयन् ॥ मुहूर्त्तार्द्धे गते दद्याद्धस्तप्रक्षालनांबु च ॥ २१ ॥ उच्छेषणं भगवतो विष्व
क्सेनादिदेवताः ॥ उपकल्प्यान्यतः स्थाप्य स्वार्थं तद्भुवमामृजेत् ॥ २२ ॥ मुखवासं ततो दद्यात्कृतां ताम्बूलबीटिकाम् ॥ पूगचूर्णलवङ्गैलाजा
तीजादिसमन्विताम् ॥ २३ ॥ फलं च नालिकेरादि दत्त्वा शक्त्या च दक्षिणाम् ॥ महानीराजनं कुर्याद्गीतवादित्रपूर्वकम् ॥ २४ ॥ स्तुयात्पुष्पा
ञ्जलीन्दत्त्वा तत्स्तोत्रेणैव तं ततः ॥ नामसंकीर्त्तनं कुर्याद्गायन्नृत्यंश्च तत्पुरः ॥ २५ ॥ मुहूर्त्तं स विधायेत्थं कृत्वा चैव प्रदक्षिणाम् ॥ प्रणामं
दण्डवत्कुर्यात्तिर्यक्तद्दक्षिणे भुवि ॥ २६ ॥ अष्टांगं वापि पञ्चांगं प्रणामं पुरुषश्चरेत् ॥ पञ्चांगमेव नारी तु नान्यथा मुनिसत्तम ॥ २७ ॥ पद्भ्यां
कराभ्यां जानुभ्यामुरसा शिरसा दृशा ॥ वचसा मनसा चेति प्रणामोऽष्टांग ईरितः ॥ २८ ॥ बाहुभ्यां चैव मनसा शिरसा वचसा दृशा ॥
पञ्चांगोयं प्रणामः स्यात्पूजासु प्रवराविमौ ॥ २९ ॥ भीतं मां संसृतेः पाहि प्रपन्नं त्वां प्रभो इति ॥ ततः संप्रार्थ स्वाध्यायं शक्त्या कुर्वीत
नैत्यकम् ॥ ३० ॥ ध्यात्वा शेषां च तद्दत्तां गृहीत्वा शिरसादरात् ॥ आवाहितं यथापूर्वं राधाकृष्णं हृदम्बुजे ॥ संस्थापयेच्चांगदेवान्स्वस्वस्थानं
विसर्जयेत् ॥ ३१ ॥ करण्डके वा शय्यायां मन्दिरे प्रतिमां हरेः ॥ शाययित्वा पिधाय द्वावैश्वदेवं समाचरेत् ॥ ३२ ॥ प्रासादिकं हरेरन्नं स्वपो
ष्येभ्यो विभज्य सः ॥ स्वयं भुक्त्वा तत्कथाद्यैर्दिनशेषमतिक्रमेत् ॥ ३३ ॥ महापूजाविधानेन प्रोक्तेनानेन योन्वहम् ॥ भक्त्या समर्चयेद्विष्णुं स
भवेत्तस्य पार्षदः ॥ ३४ ॥ दिव्यं विमानमारुह्य भास्वरं देवतेप्सितम् ॥ गोलोकाख्यं हरेर्द्धाम दिव्याङ्गो याति पूजकः ॥ ३५ ॥ फलाभिसंधिना
वापि यस्तमर्चेद्दिनेदिने ॥ सोपि धर्मं काममर्थं मोक्षं चाप्नोत्यभीप्सितम् ॥ ३६ ॥ इत्थं पूजाविधिं कर्त्तुमशक्तो राधया सह ॥ हरिमेकं यथा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रितवनस्रजम् ॥ २१ ॥ कम्बूपमगलभ्राजत्सद्ग्रैवेयककौस्तुभम् ॥ शोभमानहनुं बिम्बीफलशोणाधरद्युतिम् ॥ २२ ॥ सितस्मितकलाराज
त्पूर्णचन्द्रनिभाननम् ॥ तिलपुष्पसमाकारदर्शनीयसुनासिकम् ॥ २३ ॥ समानकर्णबिभ्राजन्मकराकृतिकुण्डलम् ॥ कर्णोपरिलसच्चि
त्रपुष्पगुच्छावतंसकम् ॥ २४ ॥ समसूक्ष्मरदज्योत्स्नोल्लसद्गण्डस्थलश्रियम् ॥ पद्मपत्रायतारक्तप्रान्तरम्यविलोचनम् ॥ २५ ॥ पृथुतुंगल
लाटं च कामचापायितभ्रुवम् ॥ वक्रसूक्ष्मासितस्निग्धमनोहरशिरोरुहम् ॥ २६ ॥ नानासद्रत्नखचितकिरीटधृतशेखरम् ॥ प्रेम्णा निजं
वीक्षमाणं प्रसन्नं स्निग्धया दृशा ॥ २७ ॥ ध्यात्वेत्थं कृष्णमथ तद्वामे राधां विचिन्तयेत् ॥ द्विभुजां स्वर्णगौरांगीं कौसुम्भामलवास
सम् ॥ २८ ॥ समकर्णोल्लसद्रत्नभूषणांशुकनासिकाम् ॥ किशोरीं मृगशावाक्षीं पीनोन्नतघनस्तनीम् ॥ २९ ॥ कृशमध्यां पृथुश्रोणिं रत्नका
ञ्चीविभूषिताम् ॥ अनेकदिव्याभरणां विकचाब्जाननस्मिताम् ॥ ३० ॥ रत्नांगुलीयकेयूरकङ्कणादिलसत्कराम् ॥ शिञ्जद्धंसकमञ्जीरशोभमानां
घ्रिपङ्कजाम् ॥ ३१ ॥ विशालभालविलसत्सत्काश्मीरललाटिकाम् ॥ बिम्बोष्ठीं सुकपोलां च वेणीग्रथितमालतीम् ॥ ३२ ॥ प्रेक्षमाणां प्रभुं
प्रेम्णा दधानामम्बुजं करे ॥ ध्यात्वैवं राधिकां तत्र प्रभुमर्चेत्तया सह ॥ ३३ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां
द्वितीये वैष्णवखण्डे श्रीवासुदेवमाहात्म्ये क्रियायोगे श्रीराधाकृष्णस्वरूपध्याननिरूपणं नामाऽष्टाविंशोऽध्यायः ॥ २८ ॥ ॥ श्रीनारायण उवाच ॥
उपचारैर्बहुविधैर्मानसैस्तं प्रपूज्य सः ॥ आवाह्य स्थापयेद्भक्तो मूर्तौ स्थापनमुद्रया ॥ १ ॥ ततस्तदंगदेवांश्च तत्तन्मन्त्रैः पृथक्पृथक् ॥ आवाह्य
नाममन्त्रैर्वा सुप्रतिष्ठापयेच्च सः ॥ २ ॥ घण्टादि वादयेद्वाद्यं कुर्याद्वा तालिकाध्वनिम् ॥ सुप्तोत्थितमिवाऽथैनं कारयेद्दन्तधावनम् ॥ ३ ॥
श्यामाकविष्णुक्रान्ताभ्यां दूर्वाब्जाभ्यां सहोदकम् ॥ पाद्यमेतत्प्रभोर्दद्यात्ततोऽर्घ्याचमनीयके ॥ ४ ॥ चन्दनाक्षतपुष्पाणि दर्भाग्रतिलसर्षपान् ॥
यवान्दूर्वां चार्घ्यपात्रे निक्षिपेदम्बुना भृते ॥ ५ ॥ जातीफललवंगैलाकङ्कोलोशीरवासितम् ॥ दद्यादाचमनीयाम्बु ततः संस्नपयेद्धरिम् ॥ ६ ॥
सुगन्धिपुष्पतैलेन कुर्यादभ्यंगमादितः ॥ सुरभिद्रव्यकल्केन कुर्याच्चोद्वर्तनं ततः ॥ ७ ॥ क्षीरेण दध्ना चाज्येन मधुना सितया तथा ॥ स्नपये
द्धरिमव्यग्रस्तत्तन्मन्त्रैः पृथक्पृथक् ॥ ८ ॥ सुगन्धिना च शुद्धेन स्नानमुष्णेन चाम्बुना ॥ तं कारयित्वा गन्धाद्यैः स्नानपीठेऽर्चयेल्लघु ॥ ९ ॥
निर्माल्यपुष्पादि ततो विसृज्योत्तरतो द्विजः ॥ राजनाद्यैः सामभिर्वा महापुरुषविद्यया ॥ श्रीसूक्तविष्णुसूक्ताभ्यामभिषेकं समाचरेत् ॥ १० ॥
नाम्नां सहस्रेण हरेरष्टोत्तरशतेन वा ॥ अभिषेकं तु कुर्वीरन्स्त्रियः शूद्राश्च दीक्षिताः ॥ ११ ॥ ततः प्रमार्ज्य वस्त्रेण तमनर्घ्यांशुकानि च ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विभूषितम् ॥ ७५ ॥ सप्तहंसरथारूढं दोर्भ्यां पाशं च बिभ्रतम् ॥ अन्याभ्यां रत्नपात्रं च शंखं च दधतं न्यसेत् ॥ ७६ ॥ वायौ वायुं हरि
द्वर्णं द्विभुजं कृष्णवाससम् ॥ पृषतस्थं मुक्तकेशं च व्यात्तास्यं ध्वजिनं न्यसेत् ॥ ७७ ॥ सौम्ये न्यसेत्कुबेरं च स्वर्णवर्णं चतुर्भुजम् ॥ गदाश
क्तित्रिशूलानि रत्नपात्रं च बिभ्रतम् ॥ ७८ ॥ नीलाम्बरं श्मश्रुलं च शिबिकायां समास्थितम् ॥ पिशंगवामनयनं नैकभूषं च वर्मिणम् ॥७९॥
ईशानेऽथ महारुद्रमर्द्धनारीश्वरं न्यसेत् ॥ वामार्द्धे पार्वती कार्या दक्षार्द्धे तत्र शंकरः ॥ ८० ॥ ईश्वरार्द्धे जटाजूटं कर्तव्यं चन्द्रभूषितम् ॥ उमार्द्धे
तिलकं कार्यं सीमन्तमलिके तथा ॥ ८१ ॥ भस्मनोद्धूलितं चार्द्धमर्द्धं कुंकुमभूषितम् ॥ नागोपवीतं चाप्यर्द्धमर्द्धं हारविभूषितम् ॥ ८२ ॥
वामार्द्धे च स्तनः पीनः कर्त्तव्यः कंचुकीवृतः ॥ कट्यां च रशना हैमी पादे काञ्चननूपुरम् ॥ ८३ ॥ कौसुम्भं वसनं चैव करौ कंकणभूषितौ ॥
त्रिशूलमक्षसूत्रं च दधतौ रत्नमुद्रिकौ ॥ ८४ ॥ दक्षार्द्धे रशना सार्पी कार्या वस्त्रं गजाजिनम् ॥ करौ च नागवलयौ दर्पणोत्पलधारिणौ
॥ ८५ ॥ एवंविधं महादेवं न्यसेद्वृषभवाहनम् ॥ इत्थमष्टदिगीशानां कुर्यात्स्थापनमर्चकः ॥ ८६ ॥ पुराद्बहिस्ततश्चाष्टौ स्थापयेदर्चको ग्रहान् ॥
स्वस्वदिक्षु स्थितान्स्वस्वान्यारूढान्स्यन्दनानि च ॥ ८७ ॥ प्राच्यां दिशि न्यसेत्तत्र भास्करं पीतवाससम् ॥ सिन्दूरवर्णं द्विभुजं पद्महस्तं
रथे स्थितम् ॥ ८८ ॥ एकं चक्रं द्वादशारं रथस्यास्यातितेजसः ॥ सप्ताश्वाश्च हरिद्वर्णा वामे सन्ति नियोजिताः ॥ ८९ ॥ अग्निकोणे ततः
स्थाप्यो भृगुः श्वेतः सिताम्बरः ॥ दण्डं कमण्डलुं बिभ्रद्द्विबाहुः सौम्यदर्शनः ॥ ९० ॥ चित्रवर्णाश्वदशके स्थितो हेममये रथे ॥ दक्षिणे च
न्यसेद्भौमं रक्तं रक्ताम्बरं तथा ॥ ९१ ॥ चतुर्भुजं गदाशक्तित्रिशूलवरधारिणम् ॥ तस्य हैमं रथं कुर्यादरुणाष्टहयान्वितम् ॥ ९२ ॥ राहुश्च
नैर्ऋते कोणे नीलवासाश्चतुर्भुजः ॥ करालास्यस्तमोरूपश्चर्मासिशक्तिशूलधृत् ॥ ९३ ॥ भृङ्गवर्णाष्टतुरगे स्थितः कार्यस्त्वयोरथे ॥ सौरिश्च पश्चिमे
स्थाप्य इन्द्रनीलसमद्युतिः ॥ ९४ ॥ धन्वी त्रिशूली द्विभुजो मन्दाक्षश्चासिताम्बरः ॥ शबलाष्टाश्वसंयुक्ते स्थितः कार्ष्णायसे रथे ॥ ९५ ॥ वायु
कोणे ततश्चन्द्रं स्थापयेच्च सिताम्बरम् ॥ श्वेतवर्णं गदाहस्तं द्विभुजं च रथे स्थितम् ॥ ९६ ॥ शतारचक्रत्रितये स्यन्दने तस्य चाम्मये ॥
कुन्दाभाः सन्त्युभयतो योजितास्तुरगा दश ॥९७॥ उत्तरे द्विभुजः सौम्यो वराभयकरोरुणः ॥ हरिद्राभाष्टपिंगाश्वे कार्यो हैमरथे स्थितः ॥९८॥
ईशाने च गुरुः स्थाप्यो हेमवर्णः सिताम्बरः ॥ द्विभुजः पद्मनयनो धृतदण्डकमण्डलुः ॥ पाण्डुराष्टहये हैमे निषण्णः स्यन्दनोत्तमे ॥ ९९ ॥

१ लोहरथे ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अंगदेवान्भगवतः स्थापयेदित्थमर्चकः ॥ कर्णिकाद्रिपुरान्तान्तस्थानेषु क्रमशोऽखिलान् ॥ १०० ॥ वासुदेवांगदेवानां न्यसेन्मूर्त्तीस्तु वैभवी ॥
पूगफलानीतरस्तु न्यसेत्पुष्पाक्षतादि वा ॥ १०१ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे श्रीवा
सुदेवमाहात्म्ये क्रियायोगे पूजामण्डलरचनाविधिनिरूपणं नाम सप्तविंशोऽध्यायः ॥ २७ ॥ ॥ श्रीनारायण उवाच ॥ आचम्य प्राणानायम्य
ततोसौ स्वस्थमानसः ॥ नमस्कृत्येष्टदेवादीन्देशकालौ च कीर्त्तयेत् ॥ १ ॥ एकान्तधर्मसिद्ध्यर्थं वासुदेवस्य पूजनम् ॥ करिष्य इति संक
ल्प्य कुर्यान्न्यासविधिं ततः ॥ २ ॥ न्यासे मन्त्रा[1] द्वादशार्णो गायत्री वैष्णवी तथा ॥ नारायणाष्टाक्षरश्च ज्ञेया विष्णुषडक्षरः ॥ ३ ॥ एते द्विजानां
विहितास्तदन्येषां त्विह त्रयः ॥ वासुदेवाष्टाक्षरश्च हरिपञ्चाक्षरस्तथा ॥ षडर्णः केशवस्येति न्यासे होमे च संमताः ॥ ४ ॥ श्रीविष्णुप्रति
मांगेषु स्वांगेष्विव ततोऽखिलान् ॥ कुर्यान्न्यासांश्च तैर्मन्त्रैस्ततोर्चां वाससाऽऽमृजेत् ॥५॥ कलशं वामभागे स्वे संस्थाप्यावाह्य तत्र च॥तीर्थानि गन्ध
पुष्पाद्यैरुपचारैस्तमर्चयेत् ॥६॥ पूजाद्रव्याणि चात्मानं प्रोक्षयित्वा तदम्बुना ॥ शंखं घण्टां च संपूज्य भूतशुद्धिं समाचरेत्॥७॥आभ्यन्तराग्निवायुभ्यां
दग्ध्वा पापात्मकं वपुः ॥ शुद्धस्य स्वात्मनस्त्वैक्यं भावयेद्ब्रह्मणा स्थिरः॥८॥ततोऽक्षरब्रह्मरूपो राधाकृष्णं हृदि प्रभुम् ॥ ध्यायेदव्यग्रमनसा प्राणायामं
समाचरन्॥९॥अधोमुखं नाभिपद्मं कदलीपुष्पवत्स्थितम्॥विभाव्यापानपवनं प्राणेनैक्यमुपानयेत्॥१०॥पद्मनाले तमानीय सह तेन तदम्बुजम्॥
आकर्षेदूर्ध्वमथ तन्नदत्तीव्रमुपैति हृत् ॥ प्रफुल्लति च तत्रैतद्धृदयाकाश उल्लसत् ॥ ११ ॥ तेजोराशिमये तत्र ततोप्यधिकतेजसा ॥ दर्शनीयतमं
शान्तं ध्यायेच्छ्रीराधिकापतिम् ॥ १२ ॥ उपविष्टं स्थितं वा तं दिव्यचिन्मयविग्रहम् ॥ ध्यायेत्किशोरवयसं कोटिकन्दर्पसुन्दरम् ॥ १३ ॥
रूपानुरूपसंपूर्णदिव्यावयवलक्षितम् ॥ शरच्चन्द्रावदातांगं दीर्घचारुभुजद्वयम् ॥ १४ ॥ आरक्तकोमलतलरम्यांगुलिपदाम्बुजम् ॥ तुंगारुणस्नि
ग्धनखद्युतिलज्जायितोडुपम् ॥ १५ ॥ शिञ्जत्किंकिणिमञ्जीरहंसकांघ्रियुगश्रियम् ॥ सुवृत्तजंघायुगलं समजानूरुशोभनम् ॥ १६ ॥ सद्रत्न
रशनाबद्धपीताम्बरकटिश्रियम् ॥ उत्तुंगकुक्षिनाभ्यन्तर्निम्ननाभिवलित्रयम् ॥ १७॥ विततोत्तुंगहृदयं श्रीवत्सावर्त्तशोभितम् ॥ ललन्तीगुच्छगुच्छा
र्द्धदेवच्छन्दादिभूषितम् ॥ १८ ॥ नानासुगन्धिपुष्पस्रक्स्वर्णयज्ञोपवीतिनम् ॥ उन्निद्रशोणपद्माभकरकंकणभूषणम् ॥ १९ ॥ सूक्ष्मपर्वांगुलिद्यो
तन्नैकसद्रत्नमुद्रिकम् ॥ निनादयन्तं मधुरं वेणुं सर्वमनोहरम् ॥ २० ॥ विपुलांसं गूढजत्रुं महाबाह्वंगदद्युतिम् ॥ भ्रमत्सुगन्धलुब्धालिझंका

१ मन्त्रसमुदाया इत्यर्थः, मन्त्रा इत्यस्य ज्ञेया इत्यत्रान्वयः । २ अत्र यद्वक्तव्यं तन्मन्त्रा इत्यस्य व्याख्याने प्रोक्तम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यिता ॥ ५० ॥ एताः सुवर्णवर्णाभाः सर्वाभरणभूषिताः ॥ वेणुवीणादिहस्ताश्च कर्त्तव्याश्चित्रवाससः ॥ ५१ ॥ दलाग्रेष्वष्टसु ततो वेदाञ्छास्त्राणि च न्यसेत् ॥ तत्र वेदान्न्यसेद्दिक्षु शास्त्राणि तु विदिक्षु सः ॥ ५२ ॥ पूर्वे न्यसेत्तु ऋग्वेदमक्षमालाधरं सितम् ॥ खर्वं लम्बोदरं सौम्यं पद्मनेत्रं सिताम्बरम् ॥ ५३ ॥ याम्ये न्यसेद्यजुर्वेदं मध्यमांगं कृशोदरम् ॥ पिंगाक्षं स्थूलकण्ठं च पीतं चारुणवाससम् ॥ ५४ ॥ अक्षस्रजं करे वामे दक्षे वज्रं च बिभ्रतम् ॥ पश्चिमे सामवेदं च प्रांशुमादित्यवर्चसम् ॥ ५५ ॥ दक्षेऽक्षमालां वामे च धृतवन्तं करे दरम् ॥ स्वर्णवक्त्रं विशालाक्षं विन्यसेद्ध्यायनोद्यतम् ॥ ५६ ॥ अथर्वाणं न्यसेत्सौम्ये सितांगं नीलवाससम् ॥ वामेऽक्षसूत्रं दक्षे च खट्वांगं बिभ्रतं करे ॥ वह्नयोजसं च ताम्राक्षं वयसा स्थविरं तथा ॥ ५७ ॥ अग्निकोणे धर्मशास्त्रं न्यसेच्च कमलासनम् ॥ श्वेतं च बिभ्रतं दोर्भ्यां मुक्तामालां तथातुलाम् ॥ ५८ ॥ दीर्घकेशनखं सांख्यं नैर्ऋते तुन्दिलं न्यसेत् ॥ जपमालां च दण्डं च कराभ्यां बिभ्रतं सितम् ॥ ५९ ॥ न्यसेद्वायौ ततो योगं स्वर्णवर्णं कृशोदरम् ॥ ऊरुन्यस्तकरद्वन्द्वं स्वनासाग्रकृतेक्षणम् ॥ ६० ॥ पञ्चरात्रं तथेशाने धवलं वनमालिनम् ॥ न्यसेत्कराभ्यां दधतमक्षमालां च लांगलम् ॥ ६१ ॥ एषां चतुर्णां वासांसि श्वेतसूक्ष्मघनानि च ॥ कर्त्तव्यानि तथाक्षीणि पद्मपत्रायतानि च ॥ ६२ ॥ अग्राणामन्तरालेषु महर्षींश्च सयोषितः ॥ विन्यसेत्पठतो वेदान्पूर्वाग्नेयाद्यनुक्रमात् ॥ ६३ ॥ मरीचिं कलया युक्तमत्रिं चाप्यनसूयया ॥ श्रद्धयांगिरसं साकं पुलस्त्यं च हविर्भुवा ॥ ६४ ॥ गत्या युक्तं च पुलहं क्रियया च सह क्रतुम् ॥ ख्यात्या भृगुमरुन्धत्या वशिष्ठं सह विन्यसेत् ॥ ६५ ॥ द्विभुजाः सर्व एवैते जटाश्मश्रुधराः कृशाः ॥ कार्यास्तपस्विनो दण्डान्दधतश्च कमण्डलून् ॥ ६६ ॥ पद्माद्बहिर्न्यसेच्चाऽष्टौ दिशासु विदिशासु च ॥ दिक्पालानिन्द्रप्रमुखान्सहयानान्यथादिशम् ॥ ६७ ॥ प्राच्यामैरावतारूढं न्यसेदिन्द्रं चतुर्भुजम् ॥ वज्रांकुशाम्बुजवरान्दधतं स्वर्णसन्निभम् ॥ ६८ ॥ कौसुम्भरम्यवसनं नानालंकारशोभितम् ॥ शोणापांगं विशालाक्षं सर्वलक्षणलक्षितम् ॥ ६९ ॥ अग्निकोणे न्यसेदग्निं ताम्रवर्णं चतुर्भुजम् ॥ दधानं पाणिभिश्चैव शूलं शक्तिं स्रुचं स्रुवम् ॥ ७० ॥ चतुःशुके हैमरथे निषण्णं वायुसारथिम् ॥ त्रिनेत्रं धूम्रवसनं पिङ्गश्मश्रुजटेक्षणम् ॥ ७१ ॥ यमं न्यसेद्दक्षिणतः श्यामं चामीकराम्बरम् ॥ चतुर्भुजं दण्डखड्गपरशुं पाशधारिणम् ॥ उन्मत्तमहिषारूढं नानाभूषणभूषितम् ॥ ७२ ॥ ऊर्द्ध्वकेशं विरूपाक्षं नैर्ऋतं नैर्ऋते न्यसेत् ॥ खड्गं पाशं च दधतं द्विभुजं नरवाहनम् ॥ ७३ ॥ हरिश्मश्रुं धूम्रवर्णं परिवीतासिताम्बरम् ॥ हाटकानेकभूषाढ्यमवैष्णवभयंकरम् ॥ ७४ ॥ ततः प्रतीच्यां वरुणमिन्द्रनीलमणिप्रभम् ॥ श्वेताम्बरं चतुर्बाहुं मुक्ताहार

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सितांशुकौ करे दक्षे बिभ्रतौ फुल्लपङ्कजम् ॥ अभयं वामहस्ते च शान्तौ यज्ञोपवीतिनौ ॥ २६ ॥ कल्किनं पर्शुरामं च वह्निकोणेऽथ विन्यसेत् ॥ खड्गपाणिस्तत्र कल्की पर्शुपाणिस्तथाऽपरः ॥ २७ ॥ उभौ गौरौ च ताम्राक्षौ जटिलौ सितवाससौ ॥ यज्ञोपवीतिनौ कार्यौ त्यक्तक्रोधमहारयौ ॥ २८ ॥ हयग्रीववराहौ च स्थापयेद्याम्यकेसरे ॥ हयग्रीवो हयास्यः स्यान्नरांगश्च चतुर्भुजः ॥ २९ ॥ शङ्खादिभृत्स्वर्णवर्णो धृतदिव्यसिताम्बरः ॥ वराहस्तु वराहास्यो नरांगः स्याच्चतुर्भुजः ॥ ३० ॥ शङ्खचक्रगदाब्जानि दधत्पीताम्बरं तथा ॥ मधुपिंगलवर्णश्च कर्त्तव्यो द्विभुजोऽथ वा ॥ ३१ ॥ मत्स्यकूर्म्मौ नैर्ऋते च स्थापयेत्केसरे ततः ॥ कटेरधस्तदाकारावूर्द्ध्वं तौ तु नराकृती ॥ ३२ ॥ वामे शंखं गदां दक्षे पाणौ च दधताबुभौ ॥ श्यामसुन्दरदेहौ च कर्त्तव्यौ धृतभूषणौ ॥ ३३ ॥ धन्वन्तरिं नृसिंहं च पश्चिमे केसरे न्यसेत् ॥ धन्वन्तरिः शुक्लवासा गौरांगोऽमृतकुम्भधृत् ॥ ३४ ॥ सिंहवक्त्रो नृसिंहस्तु नृदेहः केसरान्वितः ॥ नीलोत्पलाभो द्विभुजो गदाचक्रधरो भवेत् ॥ ३५ ॥ वायौ न्यसेदुभौ हंसदत्तात्रेयौ जटाधरौ ॥ योगिवेषौ सितौ दण्डकमण्डलुकरौ तथा ॥ ३६ ॥ उत्तरे केसरे व्यासं न्यसेद्गणपतिं ततः ॥ तत्र व्यासो विशालाक्षः कृष्णवर्णः सिताम्बरः ॥ ३७ ॥ द्विभुजो धृतवेदश्च सुपिशंगजटाधरः ॥ सितयज्ञोपवीतश्च कर्त्तव्यः सपवित्रकः ॥ ३८ ॥ गजास्य एकदन्तश्च रक्तो गणपतिर्भवेत् ॥ रक्ताम्बरधरश्चैव नागयज्ञोपवीतवान् ॥ ३९ ॥ तुन्दिलश्च चतुर्बाहुः पाशाङ्कुशवरान्दधत् ॥ करेणैकेन च दधद्रम्यां पुस्तकलेखिनीम् ॥ ४० ॥ न्यसेत्केसर ईशाने कपिलं पूजकस्ततः ॥ सनत्कुमारं च मुनिं नैष्ठिकब्रह्मचारिणम् ॥ ४१ ॥ शुक्लांगः कपिलः कार्यो धृतचारुसिताम्बरः ॥ दधत्कराभ्याममम्भोजमभयं शान्तविग्रहम् ॥ ४२ ॥ पञ्चवार्षिकबालाभो दिग्वस्त्रोऽल्पजटाधरः ॥ सनत्कुमारश्च मुनिः कर्त्तव्यः पूजकेन तु ॥ ४३ ॥ संस्थाप्य केसरेष्वित्थं देवताः पङ्कजस्य तु ॥ न्यसेच्च दलमध्येषु पार्षदानर्चकोऽष्टसु ॥ ४४ ॥ विष्वक्सेनं च गरुडं तत्रादौ पूर्वतो न्यसेत् ॥ ततो दक्षक्रमेणैव प्रबलं च बलं न्यसेत् ॥ ४५ ॥ कुमुदं कुमुदाक्षं च सुनन्दं नन्दमेव च ॥ श्रुतदेवं जयन्तं च विन्यसेद्विजयं जयम् ॥ ४६ ॥ ततः प्रचण्डं चण्डं च पुष्पदन्तं च सात्वतम् ॥ द्वौद्वावेवं क्रमेणैव स्थानेष्वष्टसु विन्यसेत् ॥ ४७ ॥ चतुर्भुजाः सर्व एते शङ्खार्यब्जगदाधराः ॥ कार्याः किरिटिनः श्यामाः पीतवस्त्राः सुभूषणाः ॥ ४८ ॥ दलमध्यान्तरालेषु सिद्धीरष्टसु विन्यसेत् ॥ नानामंगलवाद्यानां वादने निपुणाः क्रमात् ॥ ४९ ॥ अणिमा लघिमा प्राप्तिः प्राकाम्यं महिमा तथा ॥ ईशिता वशिता चैवाष्टमी कामावसा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हात्म्ये क्रियायोगाधिकारादिनिरूपणं नाम षड्विंशोऽध्यायः ॥ २६ ॥ ॥ श्रीनारायण उवाच ॥ खननोक्षणलेपाद्यैः शोधिते धरणीतले ॥
चतुष्पादं न्यसेत्पीठं नानारङ्गसुशोभिते ॥ १ ॥ अर्चकः प्राङ्मुखः पीठपादान्कोणेषु कारयेत् ॥ चतुर्षु तेषु धर्मादीन्स्थापयेत्सिंहरूपिणः
॥ २॥ अग्नौ धर्मं न्यसेच्छ्वेतं ज्ञानं शोणं च नैर्ऋते ॥ वायौ तु पीतं वैराग्यं श्याममैश्वर्यमैशके ॥३॥ मनोधीचित्ताहङ्कारान्क्रमात्पूर्वादिदिक्ष्वऽथ ॥
विन्यसेत्पीठगात्रेषु हरिद्रक्तसितासितान् ॥ ४ ॥ स्थाप्या रक्तसितश्यामा रजःसत्त्वतमोगुणाः ॥ पीठस्य पट्टिकायां तु त्रयोपि मुनिसत्तम॥
॥ ५ ॥ अन्तःकरणरूपेषु गात्रेष्वथ चतुर्ष्वपि ॥ विमलाद्या न्यसेच्छक्तीर्द्वेद्वे एकैकगात्रके ॥ ६ ॥ विमलोत्कर्षिणीति द्वे गौराङ्ग्यौ पूर्वतो
न्यसेत् ॥ वादयन्त्यौ शुभां वीणां हरिद्वस्त्रे स्वलंकृते ॥ ७ ॥ ज्ञानाक्रिये न्यसेद्याम्ये पीतवस्त्रेऽरुणद्युती ॥ एका तालं वादयन्ती मृदङ्गमपरा
तथा ॥ ८ ॥ योगाप्रह्व्यौ न्यसेत्पश्चाच्छयामे अरुणवाससौ ॥ सहैव मुरलीं चोभे वादयन्त्यौ पृथक्पृथक् ॥ ९ ॥ सत्येशाने हेमवर्णे उत्त
रस्यां ततो न्यसेत् ॥ श्यामांशुके वादयन्त्यावुभे ते परिवादिनीम् ॥ १० ॥ अनुग्रहाख्या पट्टिकायां स्थाप्यैका च कृताञ्जलिः ॥ सर्वा एतास्तु
कर्तव्या द्विभुजाः सुविभूषणाः ॥ ११ ॥ पीठोपरि सितद्वीपं कुर्वीत श्वेतवाससा ॥ तन्मध्येऽष्टदलं पद्मं कुर्वीतोज्ज्वलकर्णिकम् ॥ १२ ॥
द्वादशांशं परित्यज्य पद्मक्षेत्रस्य बाह्यतः ॥ वृत्तैस्त्रिभिस्तस्य मध्यं विभजेत्समभागतः ॥ १३ ॥ तत्राद्यं कर्णिकास्थानं केसराणां तु मध्यमम् ॥
पत्राणां तु तृतीयं स्याद्दलाग्राणि तु बाह्यतः ॥ १४ ॥ परितस्तस्य च पुरं चतुर्द्वारं प्रकल्पयेत् ॥ रङ्गद्रव्यैर्बहुविधैर्हरिद्राकुंकुमादिभिः ॥ १५ ॥
कुर्वीत तण्डुलैर्वापि तत्र पद्मादि शोभनम् ॥ पद्मस्य कर्णिकां मध्ये हेमवर्णां सुशोभयेत् ॥ १६ ॥ शोणवर्णानि पत्राणि परितस्तस्य चार्चकः ॥
कुर्यादष्टाप्यष्टदिक्षु स्वर्णवर्णानि वा मुने ॥१७॥ पूर्वं तु गोपुरं शोणं श्यामं कुर्याच्च दक्षिणम् ॥ पीतवर्णं पश्चिमं च स्फटिकाभं तथोत्तरम् ॥१८॥
अन्तराले च पुष्पाणि चित्राणि पुरपद्मयोः॥ कृत्वा मध्येऽथ श्रीकृष्णं तद्वामे राधिकां न्यसेत्॥१९॥ राधाकृष्णस्यास्य ततः पृष्ठे संकर्षणं न्यसेत्॥
चतुर्बाहुं धृतच्छत्रं गौराङ्गं नीलवाससम् ॥ २० ॥ दक्षे न्यसेद्भगवतः प्रद्युम्नं पीतवाससम् ॥ चतुर्भुजं घनश्यामं धृत्वा चामरमास्थितम् ॥ २१ ॥
वामेऽनिरुद्धं च हरेर्न्यसेदरुणवाससम् ॥ इन्द्रनीलमणिश्यामं संस्थितं धृतचामरम् ॥ २२ ॥ त्रयोप्येते तु कर्तव्या नानालंकारशो
भिताः ॥ अनर्घ्यरत्नमुकुटास्तारुण्येन मनोहराः ॥ २३ ॥ ततोऽवतारांस्तु हरेः केसरेष्वष्टसु क्रमात् ॥ एकैकस्मिन्न्यसेद् द्वौद्वाव
ष्टस्वेवं हि षोडश ॥ २४ ॥ स्थापयेद्वामनं बुद्धं पूर्वस्मिन्केसरेऽग्रतः ॥ घनश्यामावुभौ ह्येतौ करुणौ ब्रह्मचारिणौ ॥ २५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चन्दनतो धरेत् ॥१३॥ विष्णुपूजारुचिर्भक्तो गुरोरेवागमोदितम् ॥ पूजाविधिं सुविज्ञाय ततः पूजनमारभेत् ॥१४॥रात्र्यन्तयाम उत्थाय भक्तो ब्राह्मे
क्षणेऽथ वा ॥ मुहूर्त्तार्द्धं हृदि ध्यायेत्केशवं क्लेशनाशनम् ॥१५॥ कीर्त्तयित्वाऽभिधास्तस्य तदीयानां च नाडिकाम्॥ ततः शौचविधिं कृत्वा दन्तधा
वनमाचरेत् ॥१६॥ अंगशुद्धिस्नानमादौ कृत्वा स्नायात्समन्त्रकम् ॥ गृहीत्वा शुचिमृत्स्नादीन्कुर्यात्स्नानांगतर्पणम्॥१७॥परिधायांशुके धौते उपविश्या
सने शुचौ ॥ कृत्वोर्द्ध्वपुण्ड्रं कुर्वीत संध्यां होमं जपादि च ॥ १८ ॥ वस्त्रचन्दनपुष्पादीनुपहारांस्ततोऽखिलान् ॥ आहरेन्मांसमदिराद्यशुचिस्पर्श
वर्जितान्॥१९॥देवेभ्यो वा पितृभ्यश्चाप्यन्येभ्यो न निवेदितान् ॥ अनाघ्रातांश्च मनुजैः केशकीटादिवर्जितान्॥२०॥ संस्थाप्य तान्दक्षपार्श्वे पूजोप
करणानि च ॥ उद्वर्त्य दीपमाज्येन कुर्यात्तैलेन वा ततः ॥२१॥ कौशे वौर्णे च वस्त्रादौ विकाष्ठे शुद्ध आसने ॥ उपाविशेद्वासुदेवप्रतिमासन्निधौ
ततः ॥ २२ ॥ शैली धातुमयी दार्वी लेख्या मणिमयी च वा ॥ प्रतिमा स्यात्सिता रक्ता पीता कृष्णाऽथ वा मुने ॥ २३ ॥ कृष्णस्य सा तु
कर्तव्या द्विभुजा वा चतुर्भुजा ॥ मुरलीं धारयेत्तत्र द्विभुजायाः करद्वये ॥ २४ ॥ अथ वा दक्षहस्तेऽस्याश्चक्रं शंखं तथेतरे ॥ पद्मं वा धारयेद्दक्षे
पाणावभयमुत्तरे ॥ २५ ॥ द्वितीयायास्तु हस्तेषु दक्षिणाधःकरक्रमात ॥ गदाब्जदरचक्राणि धारयेन्मुनिसत्तम ॥ २६ ॥ द्विविधाया अपि
हरेर्मूर्तेर्वामे श्रियं न्यसेत् ॥ मुरलीधरवामे तु राधां रासेश्वरीं न्यसेत् ॥ २७ ॥ अप्येषा द्विविधा मूर्त्तिरखण्डा शुभलक्षणा ॥ सर्वावयवसंपन्ना
भवेदर्चकसिद्धिदा ॥ २८ ॥ लक्ष्मीस्तु द्विभुजा कार्या वासुदेवस्य सन्निधौ ॥ दधती पंकजं हस्ते वस्त्रालंकारशोभना ॥ २९ ॥ लक्ष्मीव
द्राधिकापि स्याद्द्विभुजा चारुहासिनी ॥ पङ्कजं पुष्पमालां वा दधती पाणिपङ्कजे ॥ ३० ॥ अचला च चला चेति द्विविधा प्रतिमा हरेः ॥
तत्राद्यायां न कर्तव्यमावाहनविसर्जनम्॥३१॥तदङ्गदेवतानां च कार्यं नावाहनाद्यपि ॥ न च दिङ्नियमोऽर्चायां तस्याः स्थेयं तु सम्मुखे ॥३२॥
शालग्रामेप्येवमेव कार्यं नावाहनादि च ॥ अन्यत्र चलमूर्लो तु कर्तव्यं तत्तदर्चकैः ॥ ३३ ॥ तत्रापि दार्व्यां लेख्यायां जलस्पर्शोनु
लेपनम् ॥ नैव कार्यं पूजकेन कर्तव्यं परिमार्जनम् ॥ ३४ ॥ उदङ्मुखः प्राङ्मुखो वा चलायां सम्मुखोऽथ वा ॥ यथाशक्ति यथालब्धैरुपहा
रैर्यजेद्धरिम् ॥ ॥ ३५ ॥ श्रद्धानिश्छद्मभक्तिभ्यामर्पितेनाम्बुनापि सः ॥ प्रीतस्तुष्यति विश्वात्मा किमुताऽखिलपूजया ॥ ३६ ॥ पुंसा श्रद्धा
दिहीनेन रत्नहेमाद्यलंक्रियाः ॥ चतुर्विधं चाप्यन्नाद्यं दत्तं गृह्णाति नो मुदा ॥ ३७ ॥ तस्माद्भक्तिमता कार्यं पुंसा स्वश्रेयसे मुने ॥ श्रीकृष्ण
स्यार्चनं नित्यं सर्वाभीष्टाशुदायिनः ॥ ३८ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे श्रीवासुदेवमा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तेषु च प्रीतिं हित्वा तस्यैव नित्यदा ॥ गाढस्नेहेन या सेवा सा भक्तिरिति गीयते ॥६१॥ श्रवणं कीर्तनं तस्य स्मृतिश्चरणसेवनम् ॥ पूजा प्रणामो दास्यं च सख्यं चात्मनिवेदनम् ॥६२॥ इत्येतैर्नवभिर्भावैर्यः सेवेत तमादरात् ॥ अनन्यया धिषणया स हि भक्त इतीर्यते ॥६३॥ त्रिभिः स्वधर्म प्रमुखैर्युक्ता भक्तिरियं मुने॥धर्म एकान्तिक इति प्रोक्तो भागवतश्च सः॥६४॥साक्षाद्भगवतः सङ्गात्तद्भक्तानां च वेहशाम् ॥ धर्मो ह्येकान्तिकः पुम्भिः प्राप्यते नान्यथा क्वचित् ॥ ६५ ॥ नैतादृशं परं किञ्चित्साधनं हि मुमुक्षताम् ॥ निःश्रेयसकरं पुंसां सर्वाभद्रविनाशनम् ॥ ६६ ॥ एकान्त धर्मसिद्ध्यर्थं क्रियायोगपरो भवेत् ॥ पुमान्स्याद्येन नैष्कर्म्यं कर्मणां मुनिसत्तम ॥ ६७ ॥ एतन्मया वेदपुराणगुह्यं तत्त्वं परं प्रोक्तमघौघनाशम् ॥ एकाग्रया शुद्धधियावधार्यं सच्छ्रद्धया चेतसि ते महर्षे ॥ ६८ ॥ न वासुदेवात्परमस्ति पावनं न वासुदेवात्परमस्ति मङ्गलम् ॥ न वासुदेवात्परमस्ति दैवतं न वासुदेवात्परमस्ति वाञ्छितम् ॥ ६९ ॥ यन्नामधेयं सकृदप्यबुद्ध्या देहावसानेपि गृणाति योऽत्र ॥ स पुष्कसोप्याशु भवप्रवाहाद्विमुच्यते तं भज वासुदेवम् ॥ ७० ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे श्रीवासुदेवमाहात्म्ये वैराग्यभक्तिनिरूपणं नाम पञ्चविंशोऽध्यायः ॥ २५ ॥ ॥ स्कन्द उवाच ॥ एकान्तधर्मविवृतिं श्रुत्वा भगवतोदिताम् ॥ प्रहृष्टमानसो भूयस्तं पप्रच्छ स नारदः ॥ १ ॥ नारद उवाच ॥ धर्म एकान्तिकः स्वामिंस्त्वया सम्यगुदीरितः ॥ तमाश्रुत्य महान्हर्षो जातोस्ति मम मानसे ॥ २ ॥ सिद्ध्ये तस्य भवता क्रियायोगो य उच्यते ॥ तमहं बोद्धुमिच्छामि भगवंस्तव संमतम् ॥ ३ ॥ ॥ श्रीनारायण उवाच ॥ पूजाविधिः क्रियायोगो वासुदेवस्य कीर्त्यते ॥ स तु वेदेषु तन्त्रेषु बहुधैवास्ति वर्णितः ॥ ४ ॥ भक्तानां रुचिवैचित्र्यात्तथा बहुविधत्वतः ॥ वासुदेवस्य मूर्त्तीनां बहुधा सोऽस्ति विस्तृतः ॥ ५ ॥ साकल्येनोच्यमानस्य पारो नायाति तस्य वै ॥ अतः संक्षेपतस्तुभ्यं वच्मि भक्तिविवर्द्धनम् ॥ ६ ॥ प्राप्ता ये वैष्णवीं दीक्षां वर्णाश्चत्वार आश्रमाः ॥ चातुर्वर्ण्यस्त्रियश्चैते प्रोक्ता अत्राधिकारिणः ॥ ७ ॥ वेदतन्त्रपुराणोक्तैर्मन्त्रैर्मूलेन च द्विजाः ॥ पूजेयुर्दीक्षिता योषाः सच्छूद्रा मूलमन्त्रतः ॥ मूलमन्त्रस्तु विज्ञेयः श्रीकृष्णस्य षडक्षरः ॥८॥ स्वस्वधर्मं पालयद्भिः सर्वैरेतैर्यथाविधि ॥ पूजनीयो वासुदेवो भक्त्या निष्कपटान्तरैः ॥ ९ ॥ आदौ तु वैष्णवीं दीक्षां गृह्णीयात्सद्गुरोः पुमान् ॥ सदैकान्तिकधर्मस्थाद्ब्रह्मजातेर्दयानिधेः ॥ १० ॥ संपन्नो ज्ञानभक्तिभ्यां स्वधर्मरहितस्तु यः ॥ स गुरुर्नैव कर्त्तव्यः स्त्रीहृतात्मा च कर्हिचित् ॥ ११ ॥ प्राप्ता स्त्रैणाद्गुरोर्दीक्षा ज्ञानं भक्तिं च कर्हिचित् ॥ फलेन्नैव यथाऽपत्यं युवतिः षण्ढसंगिनी ॥ १२ ॥ प्राप्यातः सद्गुरोर्दीक्षां तुलसीमालिकां गले ॥ ललाटादौ चोर्ध्वपुण्ड्रं गोपी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

घनाः ॥ महागजकुलप्रख्यास्तडित्वन्तोऽतिनादिनः ॥ ३६ ॥ धूम्रवर्णाः पीतवर्णाः केचित्कुमुदसन्निभाः ॥ लाक्षारसनिभाः केचिच्चाषपत्रनिभा
स्तथा ॥ ३७ ॥ शमयित्वा महावह्निं शतं वर्षाण्यहर्निशम् ॥ वर्षमाणाः स्थूलधाराः स्तनन्तस्ते घना घनाः ॥ ब्रह्माण्डस्यान्तरालं च पूरयन्ति
ध्रुवावधि ॥ ३८॥ एकार्णवजले तस्मिन्वैराजपुरुषः स तु ॥ अनिरुद्धात्मकः शेते नागेन्द्रशयने प्रभुः ॥३९॥ तदा देवाश्च ऋषयो रजःसत्त्वतमो
वशाः ॥ ये ते सह विरिञ्चेन स्वकीयगुणकर्षिताः ॥ प्रविश्य तस्य जठरे शेरते दीर्घनिद्रया ॥ ४० ॥ ये तु ब्रह्मात्मैक्यभावा वशीकृतगुणत्रयाः ॥
निवृत्तेनैव धर्मेण वासुदेवमुपासते ॥ ४१ ॥ महरादिषु लोकेषु ते चतुर्षु कृतालयाः ॥ तं वैराजं संस्तुवन्तो निवसन्ति यथासुखम् ॥ ४२ ॥ नारा
यणः स भगवान्स्वरूपं परमात्मनः ॥ चिन्तयन्वासुदेवाख्यं शेते वै योगनिद्रया ॥ ४३ ॥ निशान्ते ब्रह्मणा साकं सर्वे ते तस्य जाठराः ॥
उत्पद्यन्ते यथापूर्वं यथाकर्माधिकारिणः ॥ ४४ ॥ एवं नैमित्तिको नाम त्रिलोकीक्षयलक्षणः ॥ प्रलयः कथितस्तुभ्यं प्राकृतं कीर्त्तयाम्यथ ॥ ४५ ॥
य एष कल्पः कथितस्तादृशानां शतत्रयम् ॥ षष्ट्याधिकं च यः कालो वैधसः स तु वत्सरः ॥ ४६ ॥ पञ्चाशता तैः परार्द्धो ब्रह्मायुस्तद्द्वयं
मतम् ॥ पराख्यकाले संपूर्णे महान्भवति संक्षयः ॥ ४७ ॥ संहाररुद्ररूपेण संहृत्य स्वं विराड्वपुः ॥ स्वपरं निर्गुणं रूपं वैराजो यातुमिच्छति
॥ ४८ ॥ तदा भवत्यनावृष्टिः पूर्ववच्छतवार्षिकी ॥ साङ्कर्षणश्च कालाग्निर्दहत्यण्डमशेषतः ॥ ४९ ॥ सांवर्त्तकास्ततो मेघा वर्षन्त्यति
भयानकाः ॥ शतं वर्षाणि धाराभिर्मुसलाकृतिभिर्मुने ॥ ५० ॥ महदादेर्विकारस्य विशेषान्तस्य संक्षयः ॥ सर्वस्यापि भवत्येव वासुदेवेच्छया
ततः ॥ ५१ ॥ आपो ग्रसन्ति वै पूर्वं भूमेर्गन्धात्मकं गुणम् ॥ आत्तगन्धा ततो भूमिः प्रलयत्वाय कल्पते ॥ ५२ ॥ ग्रसतेम्बुगुणं तेजो रसं
तल्लीयते ततः ॥ रूपं तेजोगुणं वायुर्ग्रसते लीयतेऽथ तत् ॥ ५३ ॥ वायोरपि गुणं स्पर्शमाकाशो ग्रसते ततः ॥ प्रशाम्यति तदा वायुः खं
तु तिष्ठत्यनावृतम् ॥ ५४ ॥ भूतादिस्तद्गुणं शब्दं ग्रसते लीयते च खम् ॥ इन्द्रियाणि विलीयन्ते तैजसाहंकृतौ ततः ॥ ५५ ॥ अहङ्कारे विली
यन्ते सात्त्विके देवता मनः ॥ यद्यद्यस्मात्समुत्पन्नं तत्तत्तस्मिन्हि लीयते ॥ ५६ ॥ अहंकारो महत्तत्त्वे त्रिविधोपि प्रलीयते ॥ तत्प्रधाने च तत्पुंसि
स मूलप्रकृतौ ततः ॥ ५७ ॥ एष प्राकृतिको नाम प्रलयः परिगीयते ॥ तिरोभवन्ति जीवेशा यत्राऽव्यक्ते हरीच्छया ॥ ५८ ॥ यदा च माया
पुरुषो कालोऽत्यक्षरतेजसि ॥ तदिच्छया तिरोयान्ति स त्वेको वर्तते प्रभुः ॥ तदा स प्रलयो ज्ञेयो नारदात्यन्तिकाभिधः ॥ ५९ ॥ इत्थं
प्रभोः कालशक्त्या लयैरेतैश्चतुर्विधैः ॥ असद्बुद्ध्वाऽखिलं तत्राऽरुचिर्वैराग्यमुच्यते ॥ ६० ॥ वासुदेवेतरान्देवान्कालमायावशीकृतान् ॥ विदित्वा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सेतवस्त्वसुरैर्यदा ॥ कामरूपैर्विभिद्यन्ते वासुदेवस्तदा स्वयम् ॥ ब्रह्मादिभिः प्रार्थ्यमानः प्रादुर्भवति भूतले ॥ ६२ ॥ अवतारा भगवतो भूता
भाव्याश्च सन्ति ये ॥ कर्तुं न शक्यते तेषां संख्यां संख्याविशारदैः ॥ ६३ ॥ सद्धर्मदेवसाधूनां गुप्त्यै तद्द्रोहिमृत्यवे ॥ श्रेयसे सर्वभूतानामा
विर्भावोस्ति सत्पतेः ॥ ६४ ॥ स वासुदेवः प्रकृतौ पुंसि कार्येषु चैतयोः ॥ अन्वितश्च पृथक् चास्ते सर्वाधीशः स्वधामनि ॥ ६५ ॥ व्याप्य
स्वांशैरिमाँल्लोकान्यथाग्निवरुणादयः ॥ स्वस्त्यासते स्वस्वलोके तथैष भगवान्मुने ॥ ६६ ॥ सर्गात्प्राक्सच्चिदानन्दः शुद्ध एकश्च निर्गुणः ॥
यथासीत्तादृगेवासावन्वितोप्यस्ति निर्मलः ॥ ६७ ॥ वायुतेजोजलक्ष्मासु तत्तत्कार्येषु खं यथा ॥ अन्वीयाप्यस्ति निर्लेपं यथा पूर्वं तथैष
हि ॥ ६८ ॥ सर्वोपास्यो नियन्ता च व्यापकश्चैष कीर्तितः ॥ आत्यन्तिके लयेऽथैष भवत्येव यथा पुरा ॥ ६९ ॥ वैराजः पुरुषो योऽत्र
प्रोक्तोऽसावीश्वराभिधः ॥ ज्ञेयः स्वतन्त्रः सर्वज्ञो वश्यमायश्च नारद ॥ ७० ॥ एतस्यैव स्वरूपाणि ब्रह्मविष्णुशिवास्त्रयः ॥ रजआदिगुणोपेताः
स्वगुणानुगुणक्रियाः ॥ ७१ ॥ ब्रह्मणो ये समुत्पन्ना देवासुरनरादयः ॥ ते जीवसंज्ञा ह्यल्पज्ञाः परतन्त्रा भवन्ति च ॥ ७२ ॥ जीवानामीश्वराणां
च तनवः क्षेत्रसञ्ज्ञकाः ॥ महदादितत्त्वमय्यः क्षेत्रज्ञाख्यास्तु तद्विदः ॥ ७३ ॥ क्षेत्राणां च क्षेत्रविदां प्रधानपुरुषस्य च ॥ मायायाः
कालशक्तेश्चाऽक्षरस्य च परात्मनः ॥ पृथक्पृथग्लक्षणैर्यज्ज्ञानं तज्ज्ञानमुच्यते ॥ ७४ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहि
तायां द्वितीये वैष्णवखण्डे श्रीवासुदेवमाहात्म्ये ज्ञानस्वरूपनिरूपणं नाम चतुर्विंशोऽध्यायः ॥ २४ ॥ ॥ श्रीनारायण उवाच ॥ वैराग्यस्याथ
ते वच्मि लक्षणं मुनिसत्तम ॥ क्षयिष्णुवस्तुष्वरुचिः सर्वथेति तदीरितम् ॥ १ ॥ आरभ्य मायापुरुषात्सर्वा ह्याकृतयस्तु याः ॥ कालशक्त्या
भगवतो नाश्यन्ते ताश्च तद्वशाः ॥ २ ॥ प्रत्यक्षेणानुमानेन शाब्देन च विवेकिभिः ॥ असत्यता कृतीनां च निश्चिता सत्यतात्म
नाम् ॥ ३ ॥ नित्येन प्रलयेनैष कालो नैमित्तिकेन च ॥ प्राकृतिकेन रूपेण चरत्यात्यन्तिकेन च ॥ ४ ॥ देहिदेहा इमे नित्यं
क्षीयन्ते परिणामिनः ॥ क्रमेण दृश्यते यत्र बाल्यतारुण्यवार्द्धकम् ॥ ५ ॥ सूक्ष्मत्वान्नेक्ष्यते तत्तु गतिर्दीपार्चिषो यथा ॥ फल
वृद्धिर्वाऽनुपदं जायमाना द्रुमे यथा ॥ ६ ॥ तस्यांतस्यामवस्थायां दुःखं च महदीक्ष्यते ॥ जाग्रदादिष्ववस्थासु दुःखं चैव पुनःपुनः ॥ ७ ॥
दुःखमाध्यात्मिकं भूरि दृश्यते चाधिभौतिकम् ॥ आधिदैविकमप्यत्र दुःखमेवास्ति देहिनाम् ॥ ८ ॥ हाहा ममार मत्पुत्रो हा
पत्नी म्रियते मम ॥ तातं मेऽभक्षयद्व्याघ्रो दष्टा सर्पेण मे वधूः ॥ ९ ॥ महासौधोग्निना दग्धो हाहा सोपस्करोऽद्य मे ॥ स्वकुटुम्बं कथं पोक्ष्ये

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नावर्षत्पाकशासनः ॥ १० ॥ सस्यैः समृद्धं मत्क्षेत्रं हाहा दग्धं हिमाग्निना ॥ ह्रियन्ते तस्करैर्गावः सर्वस्वं मम लुण्ठितम् ॥ ११ ॥ नृपेण दण्डितोऽत्यर्थं शत्रुणा हाऽतिताडितः ॥ किं करोमि च कं ब्रूयां माता मे व्यभिचारिणी ॥ १२ ॥ विषं पास्यामि हाहाऽद्य मत्पत्नीं शत्रुराकृषत् ॥ हा स्वसा मे हता म्लेच्छैर्हाहाऽरिः प्राप मर्मभित् ॥ १३ ॥ म्रिये ज्वरातिव्यथया यमदूता इमे हहा ॥ इत्थं रोरूयमाणा हि दृश्यन्ते सर्वतो जनाः ॥ १४ ॥ अवस्थानां शरीरस्य जन्ममृत्यू प्रतिक्षणम् ॥ कालेन प्राप्नुवद्भिः स्वं प्रारब्धं दुःखमश्यते ॥ १५ ॥ प्रारब्धान्ते मृत्युदुःखं भवत्यप्रतिमं हि तत् ॥ मृत्वापि च महद्दुःखं प्राप्यते यमयातनाः ॥ १६ ॥ ततो जरायुजोद्भिज्जस्वेदजाण्डजयोनिषु ॥ भूत्वाभूत्वा यथाकर्म म्रियते दुःखितैः पुनः ॥ १७ ॥ नित्यः प्रलय एवं ते कीर्त्तितः सूक्ष्मया दृशा ॥ स ज्ञेयोऽथ मुने वच्मि लयं नैमित्तिकाभिधम् ॥ १८ ॥ निमित्तीकृत्य रजनीं भवेद्विश्वसृजस्तु यः ॥ नैमित्तिकः स कथितो लयो दैनंदिनश्च सः ॥ १९ ॥ चतुर्युगानां साहस्रं दिनं विश्वसृजो मुने ॥ निशा च तावती तस्य तद्द्वयं कल्प उच्यते ॥ २० ॥ एकैकस्मिन्दिने तस्य चतुर्दश चतुर्दश ॥ भवन्ति मनवो ब्रह्मन्धर्मसेत्वभिरक्षकाः ॥ २१ ॥ आद्यः स्वायम्भुवस्तत्र मनुः स्वारोचिषस्ततः ॥ उत्तमस्तामसश्चाऽथ रैवतश्चाक्षुषस्ततः ॥ २२ ॥ श्राद्धदेवश्च सावर्णिर्भौत्यो रौच्यस्ततः परम् ॥ ब्रह्मसावर्णिनामा च रुद्रसावर्णिरेव च ॥ २३ ॥ मेरुसावर्णिसंज्ञोऽथ दक्षसावर्णिरन्तिमः ॥ चतुर्दशैते मनवः प्रोक्ता ब्रह्मैकवासरे ॥ २४ ॥ एकैकस्य मनोः कालो युगानां चैकसप्ततिः ॥ दिव्यैर्द्वादशसाहस्रैर्युगकालश्च वत्सरैः ॥ २५ ॥ चतुर्दशस्यैव मनोरन्तरेन्तमुपेयुषि ॥ सायंसंध्या विश्वसृजो जायते मुनिसत्तम ॥ २६ ॥ दिनावसाने वैराजः शक्तीराकर्षति स्थितेः ॥ वैराजात्मा तदा रुद्रस्त्रिलोकीं हर्तुमीहते ॥ २७ ॥ आदौ भवत्यनावृष्टिरत्युग्रा शतवार्षिकी ॥ तदाल्पसारसत्त्वानि क्षीयन्ते सर्वशो भुवि ॥२८॥ सांवर्त्तकस्य चार्कस्य रश्मयोऽत्युल्बणा रसम् ॥ आपातालात्पिबन्त्याशु धरण्यां सर्वमेव हि ॥ २९ ॥ सारसं चैव नादेयं सामुद्रं चाम्बु सर्वशः ॥ शोषयित्वाऽखिलाँल्लोकान्सोऽर्को नयति संक्षयम् ॥ ३० ॥ ततो भवति निःस्नेहा नष्टस्थावरजङ्गमा ॥ कूर्मपृष्ठोपमा भूमिः शुष्का संकुचिता भृशम् ॥ ३१ ॥ कालाग्निरुद्रः शेषस्य मुखादुत्पद्यते ततः ॥ अधोलोकान्सप्तभूमिं भुवः स्वश्च दहत्यसौ ॥ ३२ ॥ निर्दग्धलोकदशको ज्वालावर्त्तभयंकरः ॥ उद्धासितमहर्लोकः कालाग्निः परिवर्त्तते ॥ ३३ ॥ गताधिकारास्त्रिदशा भुवःस्वर्गनिवासिनः ॥ महर्लोकाज्जनं यान्ति वह्निज्वालाभृशार्दिताः ॥ ३४ ॥ निवृत्तिधर्मा ऋषयः प्राप्ताः सिद्धदशां तु ये ॥ भूतलात्तेपि तत्रैव ऋषिलोकं प्रयान्ति च ॥ ३५ ॥ उत्तिष्ठन्ति ततो घोरा व्योम्नि सांवर्त्तका

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शौचं तपो दया सत्यमिति धर्मपदानि च ॥ चतुर्भ्यो वदनेभ्यश्च चत्वारि ससृजे ततः ॥ ३९ ॥ ऋग्वेदं वदनात्पूर्वाद्यजुर्वेदं च दक्षिणात् ॥
ससर्ज पश्चिमात्साम सौम्याच्चाथर्वसंज्ञितम्॥४०॥इतिहासपुराणानि यज्ञान्विप्रशतं तथा ॥ वस्वादित्यमरुद्विश्वान्साध्यांश्च मुखतोऽसृजत् ॥४१॥
बाहुभ्यः क्षत्रियशतमूरुभ्यां च विशां शतम् ॥ पद्भ्यां शूद्रशतं चैतान्ससर्ज सह वृत्तिभिः ॥ ४२ ॥ ब्रह्मचर्यं च हृदयाद्गार्हस्थ्यं जघनस्थ
लात् ॥ वनाश्रमं तथोरस्तः संन्यासं शिरसोऽसृजत् ॥ ४३ ॥ वक्षःस्थलात्पितृगणानसुराञ्जघनस्थलात् ॥ ससर्ज च गुदान्मृत्युं निर्ऋतिं
निरयांश्च सः ॥ ४४ ॥ गन्धर्वांश्चारणान्सिद्धान्सर्पान्यक्षांश्च राक्षसान् ॥ नगान्मेघान्विद्युतश्च समुद्रान्सरितस्तथा ॥ ४५ ॥ वृक्षान्पशून्प
क्षिणश्च सर्वान्स्थावरजङ्गमान् ॥ स्वाङ्गेभ्य एव सोस्राक्षीद्ब्रह्मा नारायणात्मकः ॥ ४६ ॥ सृष्टिमेतां विलोक्यापि नातिप्रीतो यदा तदा ॥
हरिं ध्यात्वा स ससृजे तपोविद्यासमाधिभिः ॥ ऋषीन्स्वायम्भुवादींश्च मनूंश्च मनुजानपि ॥ ४७ ॥ ततः प्रीतः स सर्वेषां निवासाय यथोचितम्॥
स्वर्लोकं च भुवर्लोकं भूर्लोकं समकल्पयत् ॥ ४८ ॥ येषां तु यादृशं कर्म प्राक्कालीनं हि तान्विधिः ॥ संस्थाप्य तादृशे स्थाने वृत्तीस्तेषामकल्प
यत् ॥ ४९ ॥ देवानाममृतं नृणामृषीणां चान्नमोषधीः ॥ यक्षरक्षोसुरव्याघ्रसर्पादीनां सुरामिषम् ॥ चक्लृपे गोमृगादीनां वृत्तिं स यवसादि
च ॥ ५० ॥ स देवानां तु विश्वेषां हव्यं वृत्तिमकल्पयत् ॥ अमूर्तानां च मूर्तानां पितॄणां कव्यमेव च ॥ ५१ ॥ दुर्गोद्भवानां शक्तीनां तदुपासन
तत्परैः ॥ दैत्यरक्षःपिशाचाद्यैर्दत्तं मद्यामिषादि च ॥ ५२ ॥ तथा सावित्र्युद्भवानां शक्तीनां तदुपासकैः ॥ दत्तमृष्यादिभिर्यज्ञे मुन्यन्नं चान्न
मोषधीः ॥ ५३ ॥ श्रीजातानां च शक्तीनां तदुपास्तिपरायणैः ॥ दत्तं देवासुरनरैः पायसाज्यसितादि च ॥ ५४ ॥ प्रजापतीनां स पतिस्ततः प्राहा
ऽखिलाः प्रजाः ॥ इज्या देवाश्च पितरो हव्यकव्यात्मकैर्मखैः ॥ ५५ ॥ इष्टाः संपूरयिष्यन्ति ह्येते युष्मन्मनोरथान् ॥ एतान्ये नार्चयिष्यन्ति
ते वै निरयगामिनः ॥ ५६ ॥ इत्थं कृता हि मर्यादा तेन नारायणात्मना ॥ दैवं पित्र्यमतो नित्यं जनैः कार्यं यथाविधि ॥ ५७ ॥ ततो
ब्रह्मा स सर्वेषां धर्मसेत्ववनाय च ॥ तत्तज्जातिषु ये मुख्यास्तान्मनूंश्चाप्यतिष्ठिपत् ॥ ५८ ॥ वासुदेवेच्छयैवेत्थं वैराजाद्ब्रह्मरूपिणः ॥ कल्पेकल्पे
भवत्येव सृष्टिर्बहुविधा मुने ॥ ५९ ॥ प्राक्कल्पे यादृशी संज्ञा वेदाः शास्त्राणि च क्रियाः ॥ कल्पेऽन्ये[१] तादृशाः सर्वे धर्माः स्युश्चाऽधिका
रिणः ॥ ६० ॥ विष्णुर्यः कथितः सोपि वैराजपुरुषात्मकः ॥ पोषयत्यखिलाँल्लोकान्मर्यादाः परिपालयन् ॥ ६१ ॥ मन्वादिभिः पाल्यमानाः

१ स्मिन्नभाव आर्षः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आसंश्च शक्तयः ॥ तत्रासीत्तामसी दुर्गा सावित्री राजसी तथा ॥ सात्त्विकी श्रीश्चेति सर्वा वस्त्रालंकारशोभिताः ॥ १४ ॥ ता वैराजाज्ञया त्रींश्च
ब्रह्मादीन्प्रतिपेदिरे ॥ दुर्गा रुद्रं च सावित्री ब्रह्माणं विष्णुमन्तिमा ॥ १५ ॥ चण्डिकाद्याश्च दुर्गाया अंशेनासन्सहस्रशः ॥ त्रयीमुख्याश्च
सावित्र्याः शक्तयोंशेन जज्ञिरे ॥ दुस्सहाप्रमुखाश्चासन्नंशेनैव श्रियो मुने ॥ १६ ॥ तत्रादितो यो ब्रह्मासीद्वैराजनाभिपद्मतः ॥ एकार्णवे
तदब्जस्थः स कश्चिदपि नैक्षत ॥ १७ ॥ विसर्गबुद्धिमप्राप्तो नात्मानं च विवेद सः ॥ कोहं कुत इति ध्यायन्नदिदृक्षत्कजाश्रयम् ॥ १८ ॥
नालं प्रविश्याऽधो यातुस्तन्मूलं च विचिन्वतः ॥ संवत्सरशतं यातं तस्य नान्तं तु सोलभत् ॥ १९ ॥ ऊर्ध्वं पुनरुपेत्याऽथ श्रान्तश्च निष
साद सः ॥ अदृश्यमूर्तिर्भगवानूचे तपतपेति तम् ॥ २० ॥ तच्छ्रुत्वा तत्प्रवक्तारमदृष्ट्वा च स सर्वतः॥गुरूपदिष्टवत्तेपे दिव्यं वर्षसहस्रकम् ॥२१॥
पद्मे तपस्यते तस्मै तपः शुद्धात्मने ततः ॥ समाधौ दर्शयामास धाम वैकुण्ठमच्युतः ॥ २२ ॥ प्राधानिका गुणा यत्र त्रयोपि रजआदयः ॥
न भवन्त्यल्पमपि यत्कालमायाभयं न च ॥२३॥ सहोदितार्कायुतवद्भास्वरे तत्र तेजसि ॥ वासुदेवं ददर्शाऽसौ रम्यदिव्यासिताकृतिम् ॥२४॥ चतु
र्भुजं गदापद्मशंखचक्रधरं विभुम् ॥ पीताम्बरं महारत्नकिरीटादिविभूषणम् ॥ २५ ॥नन्दताक्ष्यादिभिर्जुष्टं पार्षदैश्च चतुर्भुजैः ॥ सिद्धिभिश्चा
ष्टभिः षड्भिर्बद्धाञ्जलिपुटैर्भगैः॥२६॥ सिंहासने श्रिया साकमुपविष्टं तमीश्वरम् ॥ प्रणम्य प्राञ्जलिस्तस्थौ विरिञ्चो हृष्टमानसः ॥२७॥ तं प्राह
भगवान्ब्रह्मंस्तुष्टोहं तपसा तव ॥ वरं वरय मत्तस्त्वं स्वाभीष्टं यत्प्रियोसि मे ॥ २८ ॥ इत्युक्तस्तेन तं जानंस्तपसि प्रेरकं प्रभुम् ॥ स्वं च विश्व
सृजं ब्रह्मा ययाचेऽभिमतं वरम् ॥ २९ ॥ प्रजाविसर्गशक्तिं मे देहि तुभ्यं नमः प्रभो ॥ तत्रापि च न बद्ध्येयं यथा कुरु तथा कृपाम् ॥ ३० ॥
ततस्तं भगवानूचे सेत्स्यते ते मनोरथः ॥ वैराजेन मयात्मैक्यं भावयित्वा समाधिना ॥ प्रजाः सृजाऽथ स्वासाध्ये कार्ये स्मर्योहमिष्टदः
॥ ३१ ॥ इत्युक्त्वान्तर्दधे विष्णुर्ब्रह्माप्येकसमाधिना ॥ वैराजेनाऽथ लोकान्प्राग्लीनान्सर्वान्स्व ऐक्षत ॥ ३२ ॥ विसर्गशक्तिं संप्राप्य स सर्गाय
मनो दधे ॥ ब्रह्मज्योतिर्मयस्तावदादित्यः प्रादुरास ह ॥ ३३ ॥ स्थापयित्वाण्डमध्ये तं ततः स मनसाऽसृजत् ॥ तपोभक्तिविशुद्धेन सुनी
नाद्यांश्चतुःसनान् ॥ ३४ ॥ प्रजाः सृजत चेत्यूचे तांस्तदा ते तु तद्वचः ॥ न जगृहुर्नैष्ठिकेन्द्रास्तेभ्यश्चुक्रोध विश्वसृट् ॥ ३५ ॥ क्रुद्धस्य ॥३१७॥
तस्य भालाच्च रुद्र आसीत्तमोमयः ॥ मन्युं नियम्य मनसा प्रजेशान्सोऽसृजत्ततः ॥ ३६ ॥ मरीचिमत्रिं पुलहं पुलस्त्यं च भृगुं क्रतुम् ॥
वसिष्ठं कर्दमं चैव दक्षमंगिरसं तथा ॥ ३७ ॥ धर्मं ततः स हृदयादधर्मं पृष्ठतस्तथा ॥ मनसः काममास्याच्च वाणीं क्रोधं भ्रुवोऽसृजत् ॥ ३८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वार्कपक्वमपक्वं वापि भक्षयेत् ॥ अभावे त्वेष दन्तानामश्मोलूखलकुट्टितम् ॥ ७ ॥ स्वयमेवाहरेदन्नं यथाकालं दिनेदिने ॥ काले पराहृतं वापि गृह्णीयान्नान्यदा क्वचित् ॥ ८ ॥ कालेपि कृष्टपच्यं तु न गृह्णीयादनापदि ॥ वन्यैरेवाग्निकार्यं च धान्यैः कुर्वीत पूर्ववत् ॥ ९ ॥ रक्षेत्क मण्डलुं दण्डमग्निहोत्रपरिच्छदान् ॥ केशरोमश्मश्रुनखान्धारयेन्मलिनान्दतः ॥ १० ॥ अंगान्यमर्दयन्स्नायाद्भूतले च शयीत सः ॥ देशकाल बलावस्थानुसारेण तपश्चरेत् ॥ ११ ॥ फेनपाश्चौदुम्बराश्च वालखिल्यास्तथैव च ॥ वैखानसेति कथिताश्चतुर्द्धा वनवासिनः ॥ १२ ॥ यथा शक्ति द्वादशाब्दानष्टौ वा चतुरो वने ॥ वसेद्द्वावेकमेवापि ततः संन्यासमाश्रयेत् ॥ १३ ॥ यदि स्यात्तीव्रवैराग्यं तर्हि न्यासो हितावहः ॥ वसे त्तत्रैवाऽन्यथा तु यावज्जीवं वने द्विजः ॥ १४ ॥ यथाविधि कृतत्यागस्तुरीयाश्रममास्थितः ॥ साच्छादनं तु कौपीनं कन्थामेकां च धारयेत्॥ ॥ १५ ॥ दण्डं कमण्डलुं चाम्बुगालनं बिभृयाच्च सः ॥ सदाचारद्विजगृहे काले भिक्षां समाचरेत् ॥ १६ ॥ न कुर्यात्प्रत्यहं भिक्षामेकस्यैव गृहे यतिः ॥ रसलुब्धो भवेन्नैव सकृच्च मितभुग्भवेत् ॥ १७ ॥ वनस्थाश्रमिणो भिक्षां प्रायो गृह्णीत भिक्षुकः ॥ तदन्नघसातिशुद्धेन शुद्ध्यत्येवाऽस्य यन्मनः ॥ १८ ॥ प्राणेपि मांससुरयोः पाराकं व्रतमाचरेत् ॥ शौचाचारविशुद्धः स्याच्छूद्रादींश्चापि न स्पृशेत् ॥ १९ ॥ नित्यं कुर्याद्विष्णुपूजा मद्याद्विष्णोर्निवेदितम् ॥ द्वादशार्णं जपेद्विष्णोरष्टाक्षरमनुं च वा ॥ २० ॥ असद्वादं न कुर्वीत वृत्त्यर्थं नाचरेत्कथाम् ॥ असच्छास्त्रे न सक्तः स्यान्नोपजीवेच्च जीविकाम् ॥ २१ ॥ सच्छास्त्रमभ्यसेच्चासौ बन्धमोक्षानुदर्शनम् ॥ मठादीन्नैव बध्नीयादहन्ताममते त्यजेत् ॥ २२ ॥ चातु र्मास्यं विनैकत्र वसेन्नाऽसावनापदि ॥ आत्मनश्च हरे रूपं विद्याज्ज्ञानेन तत्त्वतः ॥ २३ ॥ कामं क्रोधं भयं वैरं धनधान्यादिसंग्रहम् ॥ नैव कुर्या त्पालयेत यमांश्च नियमान्यतिः ॥ २४ ॥ तीव्रज्ञानविरागाभ्यां संपन्नोपि यतिर्ध्रुवम् ॥ स्त्रीवित्तभूषासद्वस्त्रसंसर्गाद्भ्रष्टतां व्रजेत् ॥ २५ ॥ पुष्प चन्दनतैलादिसुगन्धिद्रव्यवर्जनम् ॥ त्यागी कुर्वीतान्यथा तु भवेद्देहात्मधीः स वै ॥ २६ ॥ आहारो यस्य यावांस्तं तावान्स्त्रीकाम आविशेत् ॥ अतो मितं नीरसं च भोजनं त्यागिनो हितम् ॥ २७ ॥ न श्राव्या ग्राम्यवार्त्ता च मोक्षसिद्धिमभीप्सता ॥ नश्येद्यच्छ्रवणान्नॄणां सद्यो विष्णुकथा रुचिः ॥ २८ ॥ अपि चित्रमयीं नारीं त्यागी नेक्षेत न स्पृशेत् ॥ स्त्र्याकारदर्शनादेव भ्रष्टा भूरि तपस्विनः ॥ २९ ॥ कुटीचको बहूदश्च हंसः परमहंसकः ॥ एवं चतुर्द्धा कथितो यतिर्वैराग्यभेदतः ॥ ३० ॥ काषायवाससो ये मे भविष्याः साधवश्च तैः॥कार्यं मदर्थपाकादि तुर्याश्रमस्थितै रपि ॥ ३१ ॥ श्रीवासुदेवभक्ता ये तीव्रवैराग्यशालिनः ॥ तेषां धर्मस्तु तत्सेवा प्रोक्ताहस्सु च रात्रिषु ॥ ३२ ॥ एकोपि च क्षणस्तेषां ज्ञान

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विज्ञानभूयसाम् ॥ भक्तिं नवविधां विष्णोर्विना व्यर्थो न वै भवेत् ॥ ३३ ॥ सर्वैर्गुणैरुपेतोपि भगवद्विमुखो यदि ॥ स्वजनोपि भवेत्तं तु जह्युरे
व हि वैष्णवाः ॥ ३४ ॥ प्रासादिकं हरेरन्नं प्रोक्षितं तत्पदाम्बुना ॥ भुञ्जीरंस्तुलसीमिश्रं प्रत्यहं सात्वता जनाः ॥ ३५ ॥ स्त्रीणां च स्त्रीषु
सक्तानां प्रसंगो विष्णुचिन्तकैः ॥ सर्वथैव परित्याज्यो भवेत्तद्ध्यानमन्यथा ॥ ३६ ॥ भगवन्तं वासुदेवं विनैकमितरः पुमान् ॥ कोपि ना
स्त्येव यो नारीं समीक्ष्य न विमुह्यति ॥३७॥यत्र स्थित्या मुहुः स्त्रीणां स्यातां शब्दश्रुतीक्षणे ॥ त्यागी तत्र वसेन्नैव वसन्धर्मच्युतो भवेत् ॥३८॥
कामो लोभो रसास्वादः स्नेहो मानस्तथा च रुट्॥एते त्याज्याः प्रयत्नेन षड् दोषाः संसृतिप्रदाः ॥ ३९॥ प्रोक्तेषु धर्मेष्वेतेषु यस्ययस्य च्युतिर्भवेत्॥
यथाशक्ति यथाशास्त्रं कार्या तत्तस्य निष्कृतिः॥४०॥इत्थं चतुर्णां वर्णानामाश्रमाणां च नारद॥धर्माः संक्षेपतः प्रोक्ता वैष्णवानां च ते मया॥४१॥
वर्णी यतिश्च धर्मस्थो ब्रह्मलोकमुपैति वै ॥ ऋषिलोकं वनस्थश्च गृहस्थः स्वर्गमाप्नुयात् ॥ ४२ ॥ भक्त्या सहैताञ्छ्रीविष्णोराचरेयुस्तु ये
जनाः ॥ ते तु सर्वेपि देहान्ते विष्णुलोकमवाप्नुयुः ॥ ४३ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे
श्रीवासुदेवमाहात्म्ये वनस्थयतिधर्मनिरूपणं नाम त्रयोविंशोऽध्यायः ॥ २३ ॥ ॥ श्रीनारायण उवाच ॥ अथ ज्ञानस्वरूपं ते वच्मि सांख्येन
निश्चितम् ॥ क्षेत्रादि ज्ञायते येन तज्ज्ञानं हि निरुच्यते ॥ १ ॥ वासुदेवः परं ब्रह्म बृहत्यक्षरधामनि ॥ आदावेकोऽद्वितीयोऽभून्निर्गुणो दिव्य
विग्रहः ॥ २ ॥ सकार्यमूलप्रकृतिः सकालाऽक्षरतेजसि ॥ प्रकाशेऽर्कस्य रात्रीव तिरोभूता तदाऽभवत् ॥ ३ ॥ सिसृक्षाथाभवत्तस्य ब्रह्मा
ण्डानां यदा तदा ॥ सकालाविर्बभूवादौ महामाया ततो हि सा ॥ ४ ॥ तां कालशक्तिमादाय वासुदेवोऽक्षरात्मना ॥ सिसृक्षयैक्षत यदा सा
चुक्षोभ तदैव हि ॥ ५ ॥ तस्याः प्रधानपुरुषकोटयो जज्ञिरे मुने ॥ युज्यन्ते स्म प्रधानैस्ते पुरुषाश्चेच्छया प्रभोः ॥ ६ ॥ पुमांसो निद
धुर्गर्भांस्तेषु तेभ्यश्च जज्ञिरे ॥ ब्रह्माण्डानि ह्यसङ्ख्यानि तत्रैकं तु विविच्यते ॥ ७ ॥ आदौ जज्ञे महांस्तस्मात्पुंसो वीर्याद्धिरण्मयात् ॥
अहङ्कारस्ततस्तस्माद्गुणाः सत्त्वादयस्त्रयः ॥ ८ ॥ तमसः पञ्च तन्मात्रा महाभूतानि जज्ञिरे ॥ दशेन्द्रियाणि रजसो बुद्ध्या सह महानसुः ॥९॥
सत्त्वादिन्द्रियदेवाश्च जायन्ते स्म मनस्तथा ॥ सामान्यतस्तत्त्वसंज्ञा एते देवाः प्रकीर्त्तिताः ॥ १० ॥ प्रेरिता वासुदेवेन स्वस्वांशैरैश्वरं वपुः ॥
अजीजनन्विराट्सञ्ज्ञं ते चराचरसंश्रयम् ॥ ११ ॥ स च वैराजपुरुषः स्वसृष्टास्वप्स्वशेत यत् ॥ तेन नारायण इति प्रोच्यते निगमादिभिः ॥
॥ १२ ॥ तन्नाभिपद्माद्ब्रह्मासीद्राजसोऽथ हृदम्बुजात् ॥ जज्ञे विष्णुः सत्त्वगुणो ललाटात्तामसो हरः ॥ १३ ॥ एतेभ्य एव स्थानेभ्यस्तिस्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्थेयं शुचितया सदा ॥ ५७॥ चाञ्चल्यमतिलोभश्च क्रोधः स्तेयं च हिंसनम् ॥ अधार्मिकाणां सङ्गश्च वर्ज्यः स्त्रीणां तथा नृणाम् ॥ ५८ ॥ भवितव्यं तत्पराभिर्द्धर्मकार्येषु सर्वदा ॥ त्यक्त्वौद्धत्यं विनीताभिः स्थेयं जित्वेन्द्रियाणि च ॥ ५९ ॥ पातिव्रत्ये स्थिताभिश्च धर्मे ताभी रमापतेः ॥ भक्तिः कार्या स्वतन्त्राभिर्भवितव्यं न कुत्रचित् ॥ ६० ॥ विधवा तु सदा विष्णुं सेवेत पतिभावतः ॥ कामसंबन्धिनीर्वार्त्ता न शृण्वीत न कीर्तयेत् ॥ ६१ ॥ आसन्नसंबन्धवतो विनान्यान्पुरुषान्क्वचित् ॥ अनापदि स्पृशेन्नैव पश्येन्नैव च कामतः ॥ ६२ ॥ स्तनपस्य तु नुः स्पर्शाद्वृद्धस्य च न दुष्यति ॥ कार्ये आवश्यके ताभ्यां भाषणे च विभर्तृका ॥ ६३ ॥ व्यावहारिककार्ये च विवादमधिकं नरैः ॥ न कुर्वीतावश्यकार्ये तैर्भाषेत विना रहः ॥ ६४ ॥ नेक्षेत मिथुनीभूतं बुद्ध्या पश्वाद्यपि क्वचित् ॥ त्यजेच्च सकलान्भोगान्स्यात्सकृन्मितभुक्तथा ॥ ६५ ॥ सधातुसूक्ष्मवासांसि नालंकारांश्च धारयेत् ॥ न दिवा शयनं कुर्यान्न खट्वायामनापदि ॥ ६६ ॥ ताम्बूलभक्षणं नैव कुर्यान्नाभ्यङ्गमञ्जनम् ॥ पुम्प्रसंगाच्च बिभियात्कृष्णाहेरिव नित्यदा ॥ ६७ ॥ समीक्ष्य पुरुषं नारी या न मोहमुपाव्रजेत् ॥ तादृशी तु विना लक्ष्मीमेकां नान्यास्ति कुत्रचित् ॥ ६८ ॥ धर्मनिष्ठा ततो नारी स्वनिःश्रेयसमिच्छती ॥ नेक्षेत पुरुषाकारं बुद्धिपूर्वं च न स्पृशेत ॥ ६९ ॥ कृच्छ्रचान्द्रायणादीनि नैरन्तर्येण भक्तितः ॥ व्रतानि कुर्याच्च सदा भवेन्नियमतत्परा ॥ ७० ॥ पित्रा पुत्रादिना वापि तरुणी तरुणेन च ॥ सह तिष्ठेन्न रहसि कुसङ्गं सर्वथा त्यजेत् ॥ ७१ ॥ सधवा विधवा वा स्त्री स्वरजोदर्शनं क्वचित् ॥ न गोपयेत्त्रिरात्रं तु मनुष्यादींश्च न स्पृशेत् ॥ ७२ ॥ प्रथमेऽहनि चण्डाली द्वितीये ब्रह्मघातिनी ॥ तृतीये रजकी प्रोक्ता सा चतुर्थेऽह्नि शुद्ध्यति ॥ ७३ ॥ इति स्त्रीणां मया धर्माः संक्षेपात्कथितास्तव ॥ युक्ता यैर्योषितो यान्तिरिहामुत्र महत्सुखम् ॥ ७४ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे श्रीवासुदेवमाहात्म्ये गृहस्थधर्मनिरूपणं नाम द्वाविंशोध्यायः॥२२॥ ॥ श्रीनारायण उवाच ॥ वानप्रस्थस्य वक्ष्यामि नियमानथ ते मुने ॥ तृतीय आयुषो भागे तृतीयाश्रम ईरितः ॥१॥ अनुकूला स्वसेवायां विरक्ता च तपःप्रिया ॥ यदि पत्नी भवेत्तर्हि तया सह वनं विशेत् ॥ २ ॥ अन्यथा तु सुतादिभ्यस्तस्याः पोषणरक्षणम् ॥ आदिश्य स्वयमेकाकी विरक्तो वनमाविशेत् ॥ ३ ॥ निर्भयो निवसेत्तत्र तपोरुचिरतन्द्रितः ॥ कुर्यादुटजमग्न्यर्थं स्वयं तु बहिरावसेत ॥ ४ ॥ भवेत्पञ्चतपा ग्रीष्म उदवासश्च शैशिरे ॥ आसारषाट्चवर्षासु जितऔघो जितेन्द्रियः ॥ ५ ॥ वासश्च तार्णं पार्णं वा वसीताजिनवल्कलम् ॥ भुञ्जीत ऋषिधान्यानि वन्यं कन्दफलादि वा ॥ ६ ॥ अग्निपक्वं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इमे ॥ ३३ ॥ देवपितृद्विजसतामेषां शक्त्या समर्चनम् ॥ स्नानदानजपादीनि स्युरनन्तफलानि हि ॥ ३४ ॥ सत्पात्रं तु स्वयं साक्षाद्भग
वानेव नारद ॥ शाखानामिव मूलाम्बु यद्दत्तं सर्वतुष्टिकृत् ॥३५॥ अहिंसावेदविद्याभिस्तुष्टिः सद्धर्मभक्तिभिः॥हृदि विष्णुं दधीरन्ये ते सत्पात्राणि
वै द्विजाः ॥ ३६ ॥ एकान्तिकाश्च भगवद्भक्ता बद्धविमोचकाः ॥ सत्पात्राणीति जानीहि येष्वास्ते भगवान्स्वयम् ॥ ३७ ॥ आढ्यस्तु
कारयेद्विष्णोर्मन्दिराणि दृढानि च ॥ पूजाप्रवाहसिद्ध्यर्थं तद्वृत्तीश्चापि कारयेत् ॥ ३८ ॥ जलाशयान्वाटिकाश्च विष्ण्वर्थमुपकल्पयेत् ॥
सदन्नैः सुरसैः साधून्ब्राह्मणांश्चैव तर्पयेत् ॥ ३९ ॥ अहिंसान्वैष्णवान्यज्ञान्कुर्याच्छक्त्या यथाविधि ॥ व्रतजन्मोत्सवान्विष्णोः संभारेण च
भूयसा ॥ ४० ॥ प्रौष्ठपदासिते पक्षे क्षयाहे तीर्थपर्वसु ॥ पित्रोः श्राद्धं प्रकुर्वीत तद्बन्धूनां च शक्तितः ॥ ४१ ॥ दैवे कर्मणि पित्र्ये च भक्ता
न्भगवतो द्विजान् ॥ पूजयेत स्वधर्मस्थान्भोजयेद्भगवद्धिया ॥ ४२ ॥ दैवे द्वौ भोजयेद्विप्रौ त्रींश्च पित्र्ये यथाविधि ॥ एकैकं वोभयत्रापि नैव
श्राद्धे तु विस्तरेत्[1] ॥ ४३ ॥ देशकालद्रव्यपात्रपूजोपकरणानि च ॥ विस्तरेण यथाशास्त्रं न स्यादेवेति निश्चितम् ॥ ४४ ॥ न श्राद्धे
क्वापि मांसं तु दद्यान्नाऽद्याच्च मानवः ॥ मुन्यन्नैः क्षीरसर्पिर्भ्यां तृप्यन्ति पितरो भृशम् ॥ ४५ ॥ अहिंसा प्राणिमात्रस्य मनोवाक्तनुभिस्तु
या ॥ तयैव पितरः सर्वे तृप्यन्त्यतिदयालवः ॥ ४६ ॥ तस्मात्कुसङ्गतः क्वापि शास्त्रहार्दमबुध्य्वे च ॥ श्राद्धे मांसं नैव दद्याद्वासुदेवपरः
पुमान् ॥ ४७ ॥ व्रतानि कुर्याद्विष्णोश्च ब्रह्मचर्यादिभिर्यमैः ॥ सहैव तत्परो नान्यत्कार्यं कुर्याच्च तद्दिने ॥ ४८ ॥ स्वसंबन्धिजनानां चाप्या
शौचं जनिनाशयोः ॥ यथाशास्त्रं पालयेत ग्रहणे चार्कचन्द्रयोः ॥ ४९ ॥ व्यावहारिककार्याणां विवादे निर्णयेपि च ॥ गृहीतरास्त्यागिनो
ये ते न कार्या न चाधवाः ॥ ५० ॥ यत्रैते स्युर्न्न तत्कार्यं सिध्येत्क्वापि द्विजोत्तम ॥ सर्वस्वनाशस्तत्र स्यादित्येवं त्वस्ति निर्णयः ॥ ५१ ॥
धर्मा एते गृहस्थानां मया संक्षेपतोदिताः ॥ यदनुष्ठानतो नृणां स्यात्स्वेष्टसुखमक्षयम् ॥ ५२ ॥ शिलादिजीविकावृत्तिभेदेन गृहिणो द्विजाः ॥
चतुर्विधाः प्रकीर्त्त्यन्ते तत्तन्नाम्ना च नारद ॥ ५३ ॥ स्त्रीणामथ प्रवक्ष्यामि धर्मान्धर्मवतां वर ॥ येषु स्थिताः स्त्रियः सर्वाः प्राप्नुवन्तीप्सितं
सुखम् ॥ ५४ ॥ सुवासिनीभिर्न्नारीभिः स्वपतिर्दैववत्सदा ॥ सेवनीयोऽनुवर्त्त्यश्च जरन्नगुणोऽधनोपि वा ॥ ५५ ॥ तद्बन्धवश्चानुवर्त्याः सेव
नेन यथोचितम् ॥ उज्ज्वलानि विधेयानि गृहोपकरणानि च ॥ ५६ ॥ गृहं मार्जनसेकाद्यैः[2] स्वच्छं कार्यं दिनेदिने ॥ प्रियं सत्यं च वक्तव्यं

१ भीवादिकत्वमार्षम् । २ नव्यमासे ल्यबार्षः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चित् ॥ श्राद्धपर्वव्रताहादौ नोपेयाच्च स्वयोषितम् ॥ ८ ॥ प्राप्तोपि पुरुषः सांख्ये योगे च परिपक्वताम् ॥ पुन्या अपि प्रसंगेन रहःस्थाने तु मुह्यति ॥ ९ ॥ अतो मात्रा भगिन्या वा दुहित्रापि रहःस्थले ॥ सह नासीत मतिमान्युवत्या किमुताऽन्यया ॥ १० ॥ अमङ्गलानां सर्वेषां विधवा ह्यत्यमंगलम् ॥ तद्दर्शनं च तत्स्पर्शो नृणां सुकृतहृत्ततः ॥११॥ प्रयाणकाले विधवादर्शनं सन्मुखे यदि ॥ स्यात्तदा नैव गन्तव्यमन्यथा मरणं ध्रुवम् ॥ १२ ॥ आशिषो विधवास्त्रीणां समाः कालाहिफूत्कृतैः ॥ ततश्च बिभियात्ताभ्यो राक्षसीभ्यो यथा गृही ॥ १३ ॥ मद्यं मांसं मादकं च द्यूतादीन्दूरतस्त्यजेत् ॥ न द्रोहं प्राणिमात्रस्य कुर्याद्वाचापि कर्हिचित् ॥ १४ ॥ अवतारचरित्राणि शृणुयादन्वहं हरेः ॥ सर्वा अपि क्रियाः कुर्याद्वासुदेवार्थमास्तिकः ॥ १५ ॥ ऊर्जे माघे च वैशाखे चातुर्मास्ये मलिम्लुचे ॥ अन्येषु पुण्यकालेषु विशेषनियमांश्चरेत् ॥ १६ ॥ पुण्यदेशे पुण्यकाले सत्पात्रे विधिना गृही ॥ दद्याद्दानं यथाशक्ति दयां कुर्वीत जन्तुषु ॥ १७ ॥ पुण्यान्देशान्पुण्यकालान्पुण्यपात्राणि चानघ ॥ कथयामि विशेषेण धर्मवृद्धिकराणि ते ॥ १८ ॥ देशः सर्वोत्तमस्त्वेष भुवि यो मदधिष्ठितः ॥ महामुनिगणा यत्र तपस्यन्ति महाव्रताः ॥ ॥ १९ ॥ हरितद्भक्तमाहात्म्याद्देशानामस्ति पुण्यता ॥ गंगाद्वारं मधुपुरी नैमिषारण्यमेव च ॥ २० ॥ कुरुक्षेत्रमयोध्या च प्रयागश्च गयाशिरः ॥ पुरी वाराणसी चैव पुण्यश्च पुलहाश्रमः ॥२१ ॥ कपिलाश्रमः श्रीरंगः प्रभासश्च कुशस्थली ॥ क्षेत्रं सिद्धपदाख्यं च पौष्करं च महत्सरः ॥ २२ ॥ क्रीडास्थानं भगवतः सश्रियो रैवताचलः ॥ तथा गोवर्द्धनगिरिः पुण्यं वृन्दावनं वनम् ॥ २३ ॥ महेन्द्रमलयाद्याश्च सप्तापि कुलपर्वताः ॥ भागीरथी महापुण्या यमुना च सरस्वती ॥ २४ ॥ गोदावरी च सरयूः कावेरी गोमतीमुखाः ॥ पुराणप्रथिताः पुण्या महानद्यो नदास्तथा ॥ २५ ॥ महोत्सवैर्भवेद्यत्र भगवत्प्रतिमार्चनम् ॥ प्रभोरनन्यभक्ताश्च भवेयुर्यत्रयत्र च ॥ २६ ॥ अहिंस्राश्च स्वधर्मस्था यत्र स्युर्ब्राह्मणोत्तमाः ॥ मृगाद्याः पशवो यत्र विचरेयुश्च निर्भयाः ॥ २७ ॥ यत्रयत्रावताराश्च हरेर्वासश्च यत्र वा ॥ एते पुण्यतमा देशा भुवि सन्ति विशेषतः ॥ २८ ॥ अल्पोप्येषु कृतो धर्मः स्यात्सहस्रगुणो नृणाम् ॥ पुण्यवृद्धिकरान्कालान्छृणवथो वच्मि नारद ॥ २९ ॥ अयने द्वे च विषुवं ग्रहणं सूर्यसोमयोः ॥ दिनक्षयो व्यतीपातः श्रवणर्क्षाणि सर्वशः ॥ ३० ॥ द्वादश्य एकादश्यश्च मन्वाद्याश्च युगादयः ॥ पुण्याः स्युस्तिथयः सर्वा अमावास्या च वैधृतिः ॥ ३१ ॥ मासर्क्षयुक्पौर्णमास्यश्चतस्रोप्यष्टकास्तथा ॥ स्वजन्मर्क्षाणि च हरेर्जन्मोत्सवदिनानि च ॥ ३२ ॥ स्वस्य स्त्रियाश्चार्भकाणां संस्कारोभ्युदयस्तथा ॥ सत्पात्रलब्धिश्च यदा कालाः पुण्यतमा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्राप्तः स हि ब्रह्मचारी तद्धर्मानादितो ब्रुवे ॥ २ ॥ वर्णी वेदमधीयीत वसन्गुरुगृहे शुचिः ॥ जितेन्द्रियो जितक्रोधो विनीतस्तथ्यभाषणः ॥ ३ ॥
सायं प्रातश्चरेद्धोमं भिक्षाचर्यां च संयतः ॥ कुर्यात्त्रिकालं संध्यां च विष्णुपूजां तथान्वहम् ॥ ४ ॥ गुर्वाज्ञयैव भुञ्जीत मितमन्नमनाकुलः ॥
गुरुसेवापरो नित्यं भवेद्व्यसनवर्जितः ॥ ५ ॥ स्नाने च भोजने होमे जपे मौनमुपाश्रयेत् ॥ छिन्द्यान्न नखरोमाणि दन्तान्नैवातिधावयेत् ॥ ६ ॥
नातिधावेच्च वासांसि भवेन्निष्कपटो गुरौ ॥ आहूतोध्ययनं कुर्यादादावन्ते च तं नमेत् ॥ ७ ॥ अस्पृश्यान्न स्पृशेच्चासौ नाऽसंभाष्यांश्च
भाषयेत् ॥ अभक्ष्यं भक्षयेन्नैव नाऽपेयं च पिबेत्क्वचित् ॥ ८ ॥ मेखलामजिनं दण्डं बिभृयाच्च कमण्डलुम् ॥ सिते द्वे वाससी ब्रह्मसूत्रं च जप
मालिकाम् ॥ ९ ॥ दर्भपाणिश्च जटिलः केशसंस्कारवर्जितः ॥ अङ्गरागं पुष्पहारान्भूषणानि च वर्जयेत् ॥ १० ॥ तैलाभ्यङ्गं न कुर्वीत कज्जले
नाञ्जनं तथा ॥ वर्जयेच्च प्रयत्नेन संसर्गं मद्यमांसयोः ॥ ११ ॥ स्त्रीणां निरीक्षणं स्पर्शं भाषणं क्रीडनादि च ॥ वर्जयेत्सर्वथा वर्णी
स्त्रियाश्चाप्यवलेखनम् ॥ १२ ॥ विना च देवप्रतिमां काष्ठचित्रादियोषितम् ॥ अपि नैव स्पृशेद्धीमान्न च बुद्ध्यावलोकयेत् ॥ १३ ॥
प्राणिमात्रं च मिथुनीभूतं नेक्षेत कर्हिचित् ॥ स्त्रीणां गुणांश्चाप्यगुणाञ्छृणुयान्नैव नो वदेत् ॥ १४ ॥ अस्पृशन्नेव वन्देत गुरुपत्नीमपि स्वकाम् ॥
जनन्यापि न तिष्ठेत रहःस्थाने तु कर्हिचित् ॥ १५ ॥ एवंवृत्तो वसेत्तत्र यावद्विद्यासमापनम् ॥ ततो विरक्तो न्यासी स्याद्वर्णी वा नैष्ठिको
भवेत् ॥ अनधिकारिता प्रोक्ता नैष्ठिकव्रतिनां कलौ ॥ १६ ॥ न संधाविति विज्ञेयं कलीति शब्दसंग्रहात् ॥ वनी स्यादथ वा ब्रह्मन्नविरक्तो
भवेद्गृही ॥ १७ ॥ प्राजापत्यं च सावित्रं ब्राह्मं नैष्ठिकमेव च ॥ चतुर्विधं ब्रह्मचर्यं तत्रैकं शक्तितः श्रयेत् ॥ १८ ॥ इति श्रीस्कान्दे महापुराण
एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे श्रीवासुदेवमाहात्म्ये ब्रह्मचारिधर्मनिरूपणं नामैकविंशोऽध्यायः ॥ २१ ॥ ॥ श्रीनारायण
उवाच ॥ गृही बुभूषुर्गुरवे दक्षिणां स्वस्य शक्तितः ॥ दत्त्वा तदाज्ञयैवाऽसौ समावर्तनमाचरेत् ॥ १ ॥ ततः कुलोचितां योषां वयसोनामरो
गिणीम् ॥ पुंल्लक्षणेन रहितामपापां विधिनोद्वहेत् ॥ २ ॥ स्वाधिकारानुसारेण कृष्णसंप्रीतयेऽन्वहम् ॥ देवर्षिपितृभूतानि यजेत विधिना ततः॥
॥ ३ ॥ स्नानं संध्यां जपं होमं स्वाध्यायं विष्णुपूजनम् ॥ तर्पणं वैश्वदेवं च कुर्याच्चातिथ्यमन्वहम् ॥ ४ ॥ कुर्यात्पुण्यं यथाशक्ति न्यायार्जितध
नेन च ॥ अनासक्तः पोष्यवर्गं पुष्णीयान्न तु पीडयेत् ॥ ५ ॥ देहं च दैहिकान्वासाबुद्दिश्य पशुवत्परैः ॥ वैरं न कुर्याद्देहादावहन्तां ममतां
त्यजेत् ॥६॥ कुर्याद्भागवतानां च सतां संगमतन्द्रितः ॥ न स्त्रैणानां व्यसनिनां संगं कुर्यान्न लोभिनाम् ॥७॥ कामभावेन नेक्षेत परयोषां तु कर्हि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शूद्रवृत्तिस्तथापदि ॥ ३५ ॥ शूद्रो जीवेद्द्विजातीनां सेवालब्धधनेन च ॥ आपत्काले तु कार्वादेर्जीविकावृत्तिमाश्रयेत् ॥ ३६ ॥ आपन्मुक्तस्तु सर्वोपि प्रायश्चित्तं यथोचितम् ॥ विधाय स्वस्ववृत्त्यैव पुनर्वर्त्तेत मुख्यया ॥ ३७ ॥ चातुर्वर्ण्यं सतां संगं कुर्यान्न त्वसतां क्वचित् ॥ मुक्तिप्रदोस्ति सत्संगः कुसंगो निरयप्रदः ॥ ३८ ॥ कामं क्रोधं रसास्वादं जित्वा मानं च मत्सरम् ॥ निर्दम्भं विष्णुभक्ता ये ते सन्तः साधवो मताः ॥ ३९ ॥ स्त्रियां स्त्रैणे रसास्वादे सक्ताश्च धनगृध्नवः ॥ हिंस्रा दम्भकृताटोपा भक्ताभासा ह्यसाधवः ॥ ४० ॥ असाधुष्वासुरी संपद्दैवी संपत्तु साधुषु ॥ सहजास्तीति निश्चित्य सेव्या सन्तः सुखेप्सुभिः ॥ ४१ ॥ यादृशां यस्य संगः स्याच्छास्त्राणां वा नृणामपि ॥ बुद्धिः स्यात्तादृशी तस्य कार्योऽतो नासतां हि सः ॥ ४२ ॥ ये साधुसेवारुचयः पुरुषा निजशक्तितः ॥ अप्राप्यं नास्ति तेषां वै किमप्यैश्वर्यमूर्जितम् ॥ ४३ ॥ स्वधर्मस्था अपि सतां द्रोहिणो ये तु मानवाः ॥ सद्गतिं नैव ते यान्ति क्वापि केनापि कर्मणा ॥ ४४ ॥ महापूजारता विष्णोर्भक्ता अपि सतां यदि ॥ द्रोहं कुर्युस्तदा तेषु न प्रसीददति स क्वचित् ॥ ४५ ॥ सद्द्रोहिणस्तु देहान्ते यांयां योनिं व्रजन्ति च ॥ तत्रतत्र क्षुधारोगैः पीडयन्ते जीविताववधि ॥ ४६ ॥ सतामतिक्रमादेव पुण्यानां महतामपि ॥ सद्यः क्षयः स्यात्सर्वेषामायुषः संपदामपि ॥ ४७ ॥ तस्मात्सेवा सतां कार्या सर्वैरपि सुखेप्सुभिः ॥ पुण्यतीर्थानि सेव्यानि पूज्या विप्राश्च धेनवः ॥ ४८ ॥ तीर्थानि देवप्रतिमा निन्देयुर्ये कुबुद्धयः ॥ तेषां तु जारजातानां वंशोच्छेदो भवेद्ध्रुवम् ॥ ४९ ॥ एकस्मिंस्तर्पिते विप्रे सद्भोज्यैर्दक्षिणादिभिः ॥ तर्पितं स्याज्जगत्सर्वं हरिस्तुष्यति च स्वयम् ॥ ५० ॥ एकस्मिन्ब्राह्मणे द्रुग्धे द्रुग्धं स्यात्सकलं जगत्॥तस्माच्छक्त्या पूजनीया ब्राह्मणा विष्णुरूपिणः॥५१॥गवामंगेषु तिष्ठन्ति सर्वे देवगणा अपि॥तथा सर्वाणि तीर्थानि तासु तिष्ठन्ति सर्वदा ॥ ५२ ॥ गव्यर्चितायामेकस्यां सर्वे देवाः समर्चिताः ॥ कृतानि स्युश्च सर्वाणि तीर्थान्यपि च नारद ॥ ५३ ॥ एकस्या अपि गोर्द्रोहे कृते क्वापि प्रमादतः ॥ द्रुग्धाः स्युर्देवताः सर्वास्तीर्थान्यपि च कृत्स्नशः ॥ ५४ ॥ तस्माच्चातुर्वर्ण्यजनैर्यथोक्तविधिसंस्थितैः॥भवितव्यं प्रयत्नेन त्रेतव्यं च निषेधतः॥५५॥ चातुर्वर्ण्येतरे ये तु तेषां वृत्तिः कुलोचिता ॥ चौर्यहिंसाद्यधर्मेण रहितैव हितावहा ॥ ५६ ॥ वर्णधर्मा इति प्रोक्ताः संक्षेपेण मया मुने ॥ चतुर्णामाश्रमाणां च धर्मानथ वदामि ते ॥ ५७ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे श्रीवासुदेवमाहात्म्ये चातुर्वर्ण्यधर्मनिरूपणं नाम विंशोऽध्यायः ॥२०॥ श्रीनारायण उवाच ॥ ब्रह्मचारी गृहस्थश्च वानप्रस्थो यतिस्तथा ॥ एत आश्रमिणः प्रोक्ताश्चत्वारो मुनिसत्तम ॥ १ ॥ संस्कारैः संस्कृतो यस्तु शुद्धयोनिर्द्विजातिताम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

देवर्षिणा पृष्टो भगवान्धर्मनन्दनः ॥ स्वधर्मादीन्क्रमेणैव कथयामास सर्ववित् ॥ १० ॥ श्रीनारायण उवाच ॥ वर्णानामाश्रमाणां च सदाचारः
पृथक्पृथक् ॥ सामान्यः सविशेषश्च स्वधर्मः स उदीर्यते ॥ ११ ॥ नृणां साधारणं धर्मं सर्वेषामादितः शृणु ॥ अहिंसा परमो धर्मस्तत्रा
दिम उदाहृतः ॥ १२ ॥ स्वमुख्यधर्मवृत्त्योरप्यद्रोहो मनसापि यः ॥ सति गत्यन्तरे प्राणिमात्रस्यापीति सा मता ॥ १३ ॥ सत्या वाग्भू
तमात्रस्य द्रोहो न स्याद्यया तथा ॥ तपश्च शास्त्रविहितभोगसंकोचलक्षणम् ॥ १४ ॥ बाह्यमाभ्यन्तरं चेति द्विविधं शौचकर्म च ॥ अनादानं
परस्वस्य परोक्षं वा छलेन च ॥ १५ ॥ यथोचितं ब्रह्मचर्यं कामलोभक्रुधां जयः ॥ मुदा वित्तार्पणं पात्रे तुष्टिर्लब्धेन दैवतः ॥ १६ ॥ तीर्थे
क्षेत्रे च यज्ञादौ चतुर्वर्गाप्तयेपि वा ॥ आत्मनो वा परस्यापि सर्वथा घातवर्जनम् ॥ १७ ॥ जातिभ्रंशकराणां च कर्मणां परिवर्जनम् ॥ पाणिपादो
दरोपस्थवाचां संयमनं तथा ॥ १८ ॥ सर्वेषां व्यसनानां च वर्जनं मद्यमांसयोः ॥ व्यभिचारान्निवृत्तिश्च कुलसद्धर्मपालनम् ॥ १९ ॥ एका
दशीनां सर्वासां यमैः साकमुपोषणम् ॥ हरेर्जन्मदिनानां च व्रताचरणमञ्जसा ॥ २० ॥ आर्जवं साधुसेवा च विभज्याऽन्नादिभोजनम् ॥
भक्तिर्भगवतश्चेति धर्माः साधारणा नृणाम् ॥ २१ ॥ ब्रह्मक्षत्रविशः शूद्रा वर्णाश्चत्वार ईरिताः ॥ तेषां पृथक्पृथग्धर्मान्विशेषान्वच्मि ते मुने ॥२२॥
शमो दमः क्षमा शौचमास्तिक्यं भक्तिरीशितुः ॥ तपो ज्ञानं च विज्ञानं विप्रधर्मः स्वभावजः ॥ २३ ॥ शूरत्वं धैर्यमौदार्यं बलं तेजः शरण्यता॥
गोविप्रसाधुरक्षेज्या धर्माः क्षत्रस्य कीर्त्तिताः ॥ २४ ॥ राज्ञस्त्वेतेऽथ नीत्यैव प्रजानां परिपालनम् ॥ धर्मसंस्थापनं भूमौ धर्मा दण्डार्हदण्ड
नम् ॥ २५ ॥ आस्तिक्यं दाननिष्ठा च साधुब्राह्मणसेवनम् ॥ अतुष्टिरर्थोपचये धर्मा वैश्यस्य चोद्यमः ॥ २६ ॥ द्विजातीनां च देवानां
सेवा निष्कपटं गवाम् ॥ विशेषधर्मः कथितः शूद्रस्य मुनिसत्तम ॥ २७ ॥ अध्यापनं याजनं च विशुद्धाच्च प्रतिग्रहः ॥ विप्रस्य जीविका प्रोक्ता
तत्रान्त्या त्वापदि स्मृता ॥ २८ ॥ याजनेऽध्यापने वापि दोषदर्शी द्विजोत्तमः ॥ यस्तस्याऽन्यापि विहिता वृत्तिरस्ति चतुर्विधा ॥ २९ ॥
शिलोञ्छं नित्ययाच्ञा च शालीनं चोचिता कृषिः ॥ श्रेयसी पूर्वपूर्वाऽत्र ज्ञातव्या द्विजसत्तमैः ॥ ३० ॥ विप्रो जीवेद्वैश्यवृत्त्या सत्यामापदि
नारद ॥ अथ वा क्षत्रवृत्त्यापि श्ववृत्त्या न तु कर्हिचित् ॥ ३१ ॥ शस्त्रेण जीवेत्क्षत्रं तु सर्वतो धर्मरक्षया ॥ आपन्नो वैश्यवृत्त्यैव विप्ररूपेण वा
चरेत् ॥ ३२ ॥ करादानादिनृपतेरविप्राद्वृत्तिरीरिता ॥ देशकालानुसारेण रञ्जयित्वाऽखिलाः प्रजाः ॥ ३३ ॥ आपत्कालेपि क्षत्रस्य ब्राह्मण
स्येव सर्वथा ॥ विगर्हिता नीचसेवा स्वतेजःक्षयकारिणी ॥ ३४ ॥ कृषिवाणिज्यगोरक्षा तुरीया वृद्धिजीवनम् ॥ वैश्यस्य जीविका प्रोक्ता

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तेन त्वामधिकं मन्ये विधेरपि पितुस्तव ॥ ६० ॥ यादृशोऽहं च यद्रूपो यावांश्च महिमा मम ॥ विदुस्तत्सर्वमपि मे भक्ता एकान्तिका मुने ॥
॥ ६१ ॥ हृदि चिन्त्योहमेवास्मि सतां तेषां च ते मम ॥ तेषामिष्टं न मत्तोऽन्यन्मम तेभ्यो न किञ्चन ॥ ६२ ॥ यथा पतिव्रता नार्यो
वशीकुर्वन्ति सत्पतिम् ॥ निजैर्गुणैस्तथा भक्ता वशीकुर्वन्ति मामपि ॥ ६३ ॥ अनुयामि श्रिया साकं तानहं परवानिव ॥ यत्रयत्र च ते
सन्ति तत्रतत्राहमस्मि हि ॥ ६४ ॥ सत्संगादेव मत्प्राप्तिर्भवेद्भुवि मुमुक्षताम् ॥ नान्योपायेन देवर्षे सत्यमित्यवधारय ॥ ६५ ॥ मोमव
यर्हि शरणं मानुषाः प्राप्नुवन्ति ये ॥ तर्ह्यैव ते विमुच्यन्ते मायाया जीवबन्धनात् ॥ ६६ ॥ मां प्रपन्नस्तु पुरुषो येन केनापि भावतः ॥ यथेष्टं सुख
माप्नोति न तु संसृतिमन्यवत् ॥ ६७ ॥ स्कन्द उवाच ॥ एवमुक्तो भगवता प्राप्तोऽनुग्रहमीप्सितम् ॥ प्रणम्य साश्रुनयनः पर्यावर्तत
नारदः ॥ ६८ ॥ तमेव वीणया गायञ्छ्वेतमुक्तमपश्यत ॥ प्राग्वत्स्वाग्रे चलन्तं तमन्वगच्छद् द्विजर्षभ ॥ ६९ ॥ सद्यः श्वेतं महाद्वीपं प्राप्य श्वेता
न्प्रणम्य तान् ॥ निवृत्तो नारदो ब्रह्मंस्तरसा मेरुमागमत् ॥ ७० ॥ ततो मेरोः प्रचक्राम पर्वतं गन्धमादनम् ॥ निपपात च खात्तूर्णं विशालां
बदरीमनु ॥७१॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे श्रीवासुदेवमाहात्म्ये श्रीवासुदेवावतारादिकथनं
नामाऽष्टादशोऽध्यायः ॥१८॥ ॥ स्कन्द उवाच ॥ ततः स ददृशे देवौ पुराणावृषिसत्तमौ ॥ तपश्चरन्तौ सुमहदात्मनिष्ठौ महाव्रतौ ॥१॥ तेजसा
प्यधिकौ सूर्यात्सर्वलोकविरोचनात् ॥ श्रीवत्सलक्षणौ पूज्यौ जटामण्डलधारिणौ ॥२॥ पद्मचिह्नभुजौ तौ च पादयोश्चक्रलक्षणौ ॥ व्यूढोरस्कौ दीर्घ
भुजौ सितसूक्ष्मघनांशुकौ ॥ ३ ॥ स्वास्यौ पृथुललाटौ च सुभ्रुवौ शुभनासिकौ ॥ शुभलक्षणसंपन्नौ दिव्यमूर्त्ती घनप्रभौ ॥ ४ ॥ विनयेना
न्तिकं प्राप्य तयोः कृत्वा प्रदक्षिणाम् ॥ भक्त्या प्रणम्य साष्टाङ्गं तस्थौ प्राञ्जलिरग्रतः ॥ ५ ॥ ततस्तौ तपसां वासौ यशसां तेजसामपि ॥
ऋषी पौर्वाह्णिकस्यान्ते विधेर्मौनं विहाय च ॥ ६ ॥ प्रीत्या नारदमभ्यग्रौ पाद्यार्घ्याभ्यां समार्चताम् ॥ पीठयोरुपविष्टौ तौ कौशयोर्नारदश्च सः॥
॥७॥ तेषु तत्रोपविष्टेषु स देशोभिव्यराजत ॥ आज्याहुतिमहाज्वालैर्यज्ञवाटोग्निभिर्यथा ॥ ८ ॥ अथ नारायणस्तत्र नारदं वाक्यमब्रवीत् ॥ सुखो
पविष्टं विश्रान्तं कृतातिथ्यं सुसत्कृतम् ॥ ९ ॥ श्रीनारायण उवाच ॥ अपि ब्रह्मन्स भगवान्परमात्मा सनातनः ॥ ब्रह्मधाम्नि त्वया दृष्ट आवयो ॥३१२॥
कारणं परम् ॥ १० ॥ नारद उवाच ॥ भगवंस्त्वत्प्रसादेन तमहं परमेश्वरम् ॥ वासुदेवं समालोके स्थितमक्षरधामनि ॥ ११ ॥ इह चैवागतं
स्तेन विसृष्टो वां निषेवितुम् ॥ आसिष्ये तत्परो भूत्वा युवाभ्यां सह नित्यशः ॥ १२ ॥ श्रीनारायण उवाच ॥ धन्योस्यनुगृहीतोसि यत्ते दृष्टः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वयं प्रभुः ॥ नहि तं दृष्टवान्ब्रह्मन्कश्चिद्देवोऽपि वा ऋषिः ॥१३॥ भक्त्यैकान्तिकया तस्य प्राप्ता अक्षरसाम्यताम् ॥ ये हि भक्तास्त एवैनं पश्यन्त्य
खिलकारणम् ॥१४॥ स दिव्यमूर्त्तिर्भगवान्दुर्दर्शः पुरुषोत्तमः ॥ नारदैतद्धि मे सत्यं वचनं समुदाहृतम् ॥ १५॥ नान्यो भक्तात्प्रियतरो लोके तस्यास्ति
कश्चन ॥ ततः स्वयं दर्शितवांस्तवात्मानं द्विजोत्तम ॥ १६ ॥ तेजःपुञ्जाभिरुद्धांगो गुणातीताद्भुताकृतिः ॥ अखण्डानन्दरूपश्च सदा शुद्धोऽच्यु
तोऽस्ति सः ॥ १७ ॥ रूपवर्णवयोवस्थाः प्राकृता नैव तस्य हि ॥ सर्वं तस्यास्ति तद्दिव्यं सर्वोपकरणानि च ॥ एकान्तिकानां भक्तानां स एव
परमा गतिः ॥ १८ ॥ आत्मब्रह्मैक्यसंपन्नैर्विनिवृत्तगुणैरपि ॥ क्रियते वासुदेवस्य भक्तिरित्थंगुणो हि सः ॥ १९॥ माहात्म्यमस्य को वक्तुं शक्नु
यात्परमात्मनः ॥ अचिन्त्यानन्तशक्तीनामधिपस्य महामुने ॥ २० ॥ आत्मात्मा चाक्षरात्मा च ह्येष आकाशनिर्मलः ॥ दिव्यदृगीक्ष्यः सन्मात्रः
पुरुषो वसुदेवजः ॥ २१ ॥ समस्तकल्याणगुणो निर्गुणश्चेश्वरेश्वरः ॥ परया विद्यया वेद्य उपास्यो ब्रह्मवित्प्रभुः ॥ २२ ॥ दिव्यमूर्त्तिं तमीशानं
तपसैकान्तिकेन च ॥ यः प्रीणयति धर्मेण स धन्यतम उच्यते ॥ २३ ॥ तस्मात्त्वमपि देवर्षे धर्मेणैकान्तिकेन तम् ॥ आराधयन्निहैवांग
कंचित्कालं तपः कुरु ॥ २४ ॥ तपसैवाऽतिशुद्धात्मा माहात्म्यं तस्य सत्पतेः ॥ यथावज्ज्ञास्यति भवान्प्रोच्यमानं मयाऽखिलम् ॥ २५ ॥ सर्वा
र्थसाधनं विद्धि तपस्तद्धृदयं मुने ॥ नातप्तभूरितपसा स वशीक्रियते प्रभुः ॥ २६ ॥ ॥ स्कन्द उवाच ॥ एवमुक्तो भगवता नरनारायणेन सः ॥
प्रीतस्तपः कर्त्तुमिच्छँस्तमुवाच महामतिः ॥२७॥ इति श्रीस्कन्दे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे श्रीवासुदेवमाहात्म्ये
नारदनरनारायणसमागमो नामैकोनविंशोऽध्यायः ॥१९॥ ॥ नारद उवाच ॥ भगवन्ब्रूहि मे धर्ममेकान्तं तव संमतम् ॥ प्रीयते येन विश्वात्मा
वासुदेवः स सर्वदा ॥ १ ॥ श्रीनारायण उवाच ॥ साधु पृष्टं त्वया ब्रह्मन्मतिस्ते विमला किल ॥ मयि स्निग्धाय भक्ताय तुभ्यं गुह्यमपि ब्रुवे ॥
॥ २ ॥ धर्म एष मया प्रोक्तः कल्पस्यादौ विवस्वते ॥ तमेव कथये तुभ्यं सनातनमहं मुने ॥३॥ स्वधर्मज्ञानवैराग्यैः सह लक्ष्मीवदीश्वरे ॥ तस्मि
न्ननन्या भक्तिर्या धर्म एकान्तिकः स वै ॥ ४ ॥ तेनैवातिप्रसन्नः स्याद्गोलोकाधिपतिः स्वयम् ॥ जायते स च भक्तोपि परिपूर्णमनोरथः ॥ ५ ॥
॥ नारद उवाच ॥ लक्षणानि बुभुत्सामि स्वधर्मादेः पृथक्पृथक् ॥ शास्त्रयोनेरहं त्वत्तो वक्तुं तानि त्वमर्हसि ॥ ६ ॥ निगमागमशास्त्राणां सर्वे
षामपि सत्पते ॥ मूलं त्वमेक एवासि येषु धर्मः सनातनः ॥ ७ ॥ त्वमेव साक्षाद्भगवान्वासुदेवोऽक्षरात्परः ॥ श्रेयसे सर्वभूतानां वर्तसेऽत्र
दयानिधिः ॥ ८ ॥ त्वत्तोऽन्ये तु स्वस्वभावगुणतन्त्रा ह्यजादयः ॥ यथावन्न विजानीयुर्द्धर्मादींस्त्वमतो वद ॥ ९ ॥ स्कन्द उवाच ॥ इति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ष्यामि पद्मज ॥ ३४ ॥ लक्ष्मीश्च भीष्मकसुता रुक्मिण्याख्या भविष्यति ॥ उद्वहिष्यामि राजन्यान्युद्धे निर्जित्य तामहम् ॥ ३५ ॥ धर्म
द्रुहोऽसुरान्हत्वा तदाविष्टांश्च भूपतीन् ॥ धर्मं संस्थापयन्नेव करिष्ये निर्भरां भुवम् ॥ ३६ ॥ येन केनापि भावेन यस्य कस्यापि मानसम् ॥
मयि संयोक्ष्यते तंतं नेष्ये ब्रह्मगतिं पराम् ॥ ३७ ॥ धर्मं भुवि स्थापयित्वा कृत्वा यदुकुलक्षयम् ॥ पश्यतां सर्वदेवानामन्तर्द्धास्ये भुवस्ततः ॥
॥ ३८ ॥ कृष्णस्य मम वीर्याणि कृष्णद्वैपायनादयः ॥ गास्यन्ति बहुधा ब्रह्मन्सद्यः पापहराणि हि ॥ ३९ ॥ कृष्णद्वैपायनो भूत्वा परा
शरमुनेः सुतः ॥ शाखाविभागं वेदस्य करिष्यामि तरोरिव ॥ ४० ॥ वैदिकं विधिमाश्रित्य त्रिलोकीपरिपीडकान् ॥ छलेन मोहयिष्यामि भूत्वा
बुद्धोऽसुरानहम् ॥ ४१ ॥ मया कृष्णेन निहताः सार्जुनेन रणेषु ये ॥ प्रवर्तयिष्यन्त्यसुरास्ते त्वधर्मं यदा क्षितौ ॥ ४२॥ धर्मदेवात्तदा भक्तादहं नारायणो
मुनिः॥जनिष्ये कोशले देशे भूमौ हि सामगो द्विजः॥४३॥मुनिशापान्नृतां प्राप्तान्नृषींस्तात तथोद्धवम्॥ततोऽविताऽसुरेभ्योऽहं सद्धर्मं स्थापयन्नज॥४४॥
जनान्म्लेच्छमयान्भूमौ कलेरन्ते महैनसः॥ कल्की भूत्वा हनिष्यामि विचरन्दिव्यवाजिना॥ ४५॥ यदा यदा च वेदोक्तो धर्मो नाशिष्यतेऽसुरैः॥
प्रादुर्भावो भविष्यो मे तद्रक्षायै तदा तदा ॥ ४६ ॥ तस्माच्चिन्तां विहायैव प्रजाः सृज यथा पुरा ॥ एतान्दत्त्वा वरांस्तस्मा अहमन्तर्हितोऽभ
वम् ॥ ४७ ॥ यथा तस्मै वरा दत्तास्तथैव च मया कृतम् ॥ कुर्वे करिष्ये च मुने निजशक्तिभिरञ्जसा ॥ ४८ ॥ एवंविधस्य मे ब्रह्मन्नीशितुः
सर्वदेहिनाम् ॥ दर्शनं दुर्लभं जातं तवैकान्तिकभक्तितः ॥ ४९ ॥ वरं वरय मत्तस्त्वं स्वाभीष्टं मुनिसत्तम ॥ प्रसन्नोस्मि भृशं तुभ्यं नाफलं मम
दर्शनम्॥५०॥स्कन्द उवाच ॥ श्रुत्वेति भगवद्वाक्यं नारदो मुनिसत्तमः ॥ मन्यमानो निजं धन्यं तमुवाच प्रभुं मुने॥५१॥दर्शनादेव ते स्वामिन्संपूर्णो
मे मनोरथः ॥ इदं हि दुर्लभं मन्ये सर्वेषामपि देहिनाम् ॥ ५२ ॥ अतस्ते च त्वदीयानां त्वद्धाम्नोस्याऽमृतस्य च ॥ साक्षात्समीक्षणादन्यत्प्राप्यं
मे नास्ति वांछितम् ॥ ५३ ॥ इतोन्यद्दुर्लभं क्वापि नास्ति ब्रह्माण्डगोलके ॥ यदहं परितुष्टात्ते प्रार्थयेयमिहाच्युत ॥ ५४ ॥ लोकान्तरसुखं
यत्तद्वैदिकैरेव कर्मभिः ॥ दैवैः पित्र्यैश्च लभ्येत तच्चाप्यस्ति हि नश्वरम् ॥ ५५ ॥ नेच्छामि तदहं किञ्चित्सुखं त्वत्तः परं प्रभो ॥ वरमेकं तु
याचे त्वत्स्वेप्सितं वरदर्षभात् ॥ ५६ ॥ तवाऽथ तव भक्तानां सदैव गुणगायने ॥ अत्युत्सुकास्तु मे बुद्धिस्त्वयि प्रीतिविवर्द्धिनी ॥ ५७ ॥
॥ स्कन्द उवाच ॥ तथास्त्विति प्रतिश्रुत्य कृष्णस्तेनेति याचितम् ॥ गानोपयुक्तां महतीं वीणां दत्त्वाऽब्रवीत्पुनः ॥ ५८ ॥ श्रीभगवानुवाच ॥
अधुना गच्छ देवर्षे विशालां बदरीमितः ॥ तत्र धर्मात्मजं भक्त्या मामाराधय सुव्रत ॥ ५९ ॥ त्वं ह्येकान्तिकभक्तोसि मम निष्कपटान्तरः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कुर्वेऽनिरुद्धप्रद्युम्नसंकर्षणसमाह्वयैः ॥ स्वरूपैर्नैककोट्यण्डसर्गस्थित्यप्ययानहम् ॥१०॥ सर्गारम्भे मया ब्रह्मा सृष्टो नाभिसरोरुहात् ॥ तपसाराध
यामास स मां यत्नैश्च नारद ॥११॥ ततस्तस्मै प्रसन्नोऽहं प्राददामीप्सितान्वरान् ॥ ब्रह्मन्प्राप्स्यसि सामर्थ्यं प्रजानां त्वं विसर्जने ॥ १२ ॥ आज्ञा
यामेव ताः सर्वास्तव स्थास्यन्ति मद्वरात् ॥ वेदाश्चापि स्फुरिष्यन्ति तव बुद्धौ सनातनाः ॥ १३ ॥ ज्ञानं च मत्स्वरूपस्य यथावत्ते भविष्यति ॥
त्वया कृतां च मर्यादां नातिक्रंस्यति कश्चन ॥ १४ ॥ सुरासुरगणानां च मुनीनां च महात्मनाम् ॥ त्वमेव वरदो ब्रह्मन्वरेप्सूनां भविष्यसि ॥ १५॥
असाध्ये यत्र कार्ये च मोहमेष्यसि तत्त्वहम् ॥ प्रादुर्भूय करिष्यमि स्मृतमात्रस्त्वया विधे ॥ १६ ॥ सृज्यमाने त्वया विश्वे नष्टां पृथ्वीं महा
र्णवे ॥ आनयिष्यामि स्वं स्थानं वाराहं रूपमास्थितः ॥ हिरण्याक्षं निहत्यैव दैतेयं बलगर्वितम् ॥ १७ ॥ दिनान्ते तव मत्स्योहं भूत्वा क्षोणीं
तरीमिव ॥ सहौषधिं धारयिष्ये मन्वादींश्च निशावधि ॥ १८ ॥ सुधार्थे मथ्नतामब्धिं काश्यपानां निराश्रयम् ॥ मन्थानं कूर्मरूपोहं धास्ये
पृष्ठे च मन्दरम् ॥ १९ ॥ नारसिंहं वपुः कृत्वा हिरण्यकशिपुं विधे ॥ सुरकार्ये हनिष्यामि यज्ञघ्नं दितिनन्दनम् ॥ २० ॥ विरोचनस्य बल
वान्बलिः पुत्रो महासुरः ॥ भविष्यति स शक्रं च स्वाराज्याच्च्यावयिष्यति ॥ २१ ॥ त्रैलोक्येऽपहृते तेन विमुखे च शचीपतौ ॥ अदित्यां
द्वादशः पुत्रः संभविष्यामि कश्यपात् ॥ २२ ॥ ततो राज्यं प्रदास्यामि देवेन्द्राय दिवः पुनः ॥ देवताः स्थापयिष्यामि स्वेषु स्थानेष्वहं विधे ॥
बलिं चैव करिष्यामि पातालतलवासिनम् ॥२३॥ कर्दमाद्देवहूत्यां च भूत्वाऽथ कपिलाभिधः ॥ प्रवर्तयिष्ये कालेन नष्टं सांख्यं विरागयुक् ॥२४॥
दत्तो भूत्वाऽनसूययामत्रेरान्विक्षिकीं ततः ॥ प्रह्लादायोपदेक्ष्यामि विद्यां च यदवे विधे ॥ २५ ॥ मेरुदेव्यां सुतो नाभेर्भूत्वाहमृषभो भुवि ॥
धर्मं पारमहंस्याख्यं वर्तयिष्ये सनातनम् ॥ २६ ॥ त्रेतायुगे भविष्यामि रामो भृगुकुलोद्वहः ॥ क्षत्रं चोत्सादयिष्यामि भग्नसेतुकदध्वगम् ॥
॥ २७ ॥ सन्धौ तु समनुप्राप्ते त्रेताया द्वापरस्य च ॥ कौशल्यायां भविष्यामि रामो दशरथादहम् ॥ २८ ॥ सीताभिधाना लक्ष्मीश्च भवित्री
जनकात्मजा ॥ उद्वहिष्यामि तामैशं भंक्त्वा धनुरहं महत् ॥२९॥ ततो रक्षःपतिं घोरं देवर्षिद्रोहकारिणम् ॥ सीतापहारिणं संख्ये हनिष्यामि सहा
नुजम् ॥ ३० ॥ तस्य मे तु चरित्राणि वाल्मीक्याद्या महर्षयः ॥ तदा गास्यन्ति बहुधा यच्छ्रुतेः स्यादघक्षयः ॥ ३१ ॥ द्वापरस्य कलेश्चैव सन्धौ
पर्यवसानिके ॥ भूभारासुरनाशार्थं पातुं धर्मं च धार्मिकान् ॥ वसुदेवाद्भविष्यामि देवक्यां मथुरापुरे ॥ ३२ ॥ कृष्णोहं वासुदेवाख्यस्तथा संक
र्षणो बलः ॥ प्रद्युम्नश्चाऽनिरुद्धश्च भविष्यन्ति यदोः कुले ॥ ३३ ॥ गोपस्य वृषभानोस्तु सुता राधा भविष्यति ॥ वृन्दावने तया साकं विहरि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वृन्दानि ह्युपर्युपरि संभ्रमात् ॥ पतन्ति बलिहस्तानि गोपगोपीव्रजाश्च यत् ॥ ६ ॥ कृष्णस्यानुग्रहो यस्मिन्स तेजसि तमीक्षते ॥ केवलं तेज
एवान्ये पश्यन्ति न तु तं मुने ॥ ७ ॥ तस्मिन्ददर्शाद्भुतदिव्यमन्दिरं विचित्ररत्नेन्द्रमयं मनोज्ञम् ॥ रत्नोज्ज्वलस्तम्भसहस्रकान्तं महासभा
मण्डपदर्शनीयम् ॥ ८ ॥ सौधालिभिर्भूरिभिरुज्ज्वलाभिः स्वोपासकानां परितो विराजितम् ॥ विचित्रसूक्ष्माम्बररत्नभूषाविभूषितानां हि नृणां च
योषिताम् ॥ ९ ॥ सिंहासनं तत्र मणीन्द्रसारै रत्नेन्द्रसारैश्च विनिर्मितं सः ॥ आश्चर्यकृत्प्रेक्षकमानसानां दिव्यं मुनिः प्रैक्षत भूरिहर्षः ॥१०॥
तत्राऽथ कृष्णं भगवन्तमैक्षन्नारायणं निर्गुणमास्थितं सः ॥ सर्वज्ञमीशं पुरुषोत्तमं च यं वासुदेवं च वदन्ति सात्वताः ॥ ११ ॥ यं केचि
दाहुः परमात्मसंज्ञं केचित्परं ब्रह्म परात्परं च ॥ ब्रह्मेति केचिद्भगवन्तमेके विष्णुं च भक्ताः परमेश्वरं च ॥१२॥ कन्दर्पसाहस्रमनोहराङ्गं सदा किशोरं
करुणानिधानम् ॥ अतिप्रशांताकृतिदर्शनीयं क्षराक्षरेभ्यश्च परं स्वतन्त्रम् ॥ १३ ॥ नैकाण्डसर्गस्थितिनाशलीलाविधायकापांगनिरीक्षणं च ॥
अनेककोट्यण्डमहाधिराजं विश्वैकवन्द्यं नटवर्यवेषम् ॥ १४ ॥ अनर्घ्यदिव्योत्तमपीतवाससमनेकसद्रत्नविभूषणाढ्यम् ॥ नवीनजीमूतसमान
वर्णं कर्णोल्लसत्सन्मकराभकुण्डलम् ॥ १५ ॥ निजांगनिर्यत्सितभूरितेजश्चयावृतत्वात्सितवर्णमुक्तम् ॥ सद्रत्नसारोज्ज्वलसत्किरीटं शरत्सरोजच्छ
दचारुनेत्रम् ॥ १६ ॥ सुगन्धिसच्चन्दनचर्चितांगं श्रीवत्सलक्ष्माङ्कितहृत्कपाटम् ॥ निनादयन्तं मधुरं च वेणुं कृत्वा मुखाग्रेम्बुजचारुदो
र्भ्याम् ॥ १७॥ जयासुशीलाललितामुखानां वृन्दैः सखीनां सह राधया च ॥ समर्च्यमानं रमया च भामाकलिन्दजाजाम्बवतीमुखानाम् ॥१८॥
धर्मेण वेदैरखिलैर्मखैश्च ज्ञानादिभिः संयतपाणियुग्मैः ॥ निषेव्यमाणं च सुदर्शनाद्यैर्निजायुधैर्मूर्तिधरैरनेकैः ॥ १९ ॥ मसारमाणिक्यसुवर्ण
वर्णैः सितैश्च कैश्चिन्निजपार्षदाग्र्यैः ॥ उपासितं चक्रगदाब्जशङ्खलसद्भुजैर्नन्दसुनन्दमुख्यैः ॥ २० ॥ श्रीदाममुख्यैरथ गोपवेषैर्भक्त्यावनम्रैर्द्वि
भुजैरनेकैः ॥ उपास्यमानं गरुडेन चाग्रतो विभूतिभिश्चाष्टभिरानताभिः ॥ २१ ॥ मूर्त्या च शान्त्या दयया च सेवितं पुष्ट्या च तुष्ट्या
ह्यथ मेधया च ॥ श्रद्धाक्रियाह्युन्नतिभिश्च मैत्र्या तथा तितिक्षास्मृतिबुद्धिभिश्च ॥ २२ ॥ दृष्ट्वा तमत्यद्भुतदिव्यमूर्त्तिं तद्रूपसौरभ्यहृताखिले
न्द्रियः ॥ आनन्दवारिप्रतिरुद्धदृष्टिः प्रेम्णोर्द्ध्वरोमा सुखसंभृतोऽभूत् ॥ २३ ॥ दण्डवत्तं नमस्कृत्य नारदः प्रेमविह्वलः ॥ बद्धाञ्जलिपुटस्तस्थौ ॥३१०॥
वीक्षमाणस्तदाननम् ॥ २४ ॥ तं मानयामास हरिः पृष्ट्वा स्वागतमादरात् ॥ भक्तमेकान्तिकं स्वस्य स्वेनैव च दिदृक्षितम् ॥ २५ ॥ भगव

१ सत्यभामेत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्वाक्यपीयूषास्वादप्रातात्मसंस्मृतिः ॥ तद्दर्शनमहानन्दो भक्त्या तुष्टाव तं मुनिः ॥ २६ ॥ नारद उवाच ॥ जय श्रीकृष्ण भगवन्नारायण जगत्प्रभो ॥ वासुदेवाऽखिलावास सदैकान्तिकवल्लभ ॥ २७ ॥ अत्याश्चर्यार्चनीयाङ्घ्रे राधिकाकमलादिभिः ॥ त्वमेवात्यन्तिकं श्रेयोऽभीप्सतां परमा गतिः ॥ २८ ॥ नित्यानामात्मनां नित्य आत्मा चेतनचेतनः ॥ क्षराक्षरेभ्यश्च परस्त्वं ब्रह्म परमं हरे ॥ २९ ॥ यथा विशुद्धिः सिद्धिश्च भक्त्या परमया तव ॥ तथा न स्यान्नृणामन्यैः साधनैस्तपआदिभिः ॥ ३० ॥ त्वदङ्घ्रिदिव्यज्योत्स्नैका मुमुक्षूणां हृदि स्थितम् ॥ महत्सन्तमसं[1] हर्तुं सद्यः शक्तास्ति सत्पते ॥ ३१ ॥ सर्वैर्वेदैस्त्वमेवेज्य उपास्यो ज्ञेय एव च ॥ निरूपितोसि भगवन्सर्वकारणकारणम् ॥ ३२ ॥ एकैकस्मिन्रोम कूपे यत्तवास्ति सितं महः ॥ शान्तमानंदरूपं च तत्कोटीन्दुप्रभाधिकम् ॥ ३३ ॥ अस्मिंस्त्वमक्षरे धाम्नि निर्गुणेऽमृतसञ्ज्ञके ॥ महःपुञ्जे सदै वास्से निर्गुणः पुरुषोत्तमः ॥ ३४ ॥ ब्रह्माण्डभयदात्कालान्मायायाश्च महाभयात् ॥ मुक्ता भक्ता भवन्त्येव त्वदीयोपासनाबलात् ॥ ३५ ॥ तं त्वामहमुपेतोस्मि शरणं जगदीश्वरम् ॥ सर्वात्मानं विभुं ब्रह्म महापुरुषमच्युतम् ॥ ३६ ॥ यथा त्वच्चरणाम्भोजे भक्तिर्मे निश्चला सदा ॥ भवेत्तथैव देवेश कर्त्तुमर्हस्यनुग्रहम् ॥ ३७ ॥ ॥ स्कन्द उवाच ॥ इत्थं देवर्षिणा भक्त्या संस्तुतः परमेश्वरः ॥ तमाहानन्दय न्वाचा सुधासंमितया मुनिम् ॥ ३८ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे श्रीवासुदेव माहात्म्ये श्रीवासुदेवदर्शनं नाम सप्तदशोऽध्यायः ॥ १७ ॥ ॥ श्रीभगवानुवाच ॥ दर्शनं मम यज्जातं तव तत्तु महामुने ॥ नित्यैकान्तिकभक्तत्वान्निर्दम्भत्वान्मदिच्छया ॥ १ ॥ अहिंसा ब्रह्मचर्यं च त्वयि नित्यं च तद्द्वयम् ॥ स्वधर्मोपशमौ चैव वैराग्यं चात्मवेदनम् ॥ २ ॥ सत्सङ्गोऽष्टाङ्गयोगश्च सर्वथेन्द्रियनिग्रहः ॥ मुन्यन्नवृत्तिश्च तपः सर्वव्यसनहीनता ॥ ३ ॥ मदेकान्तिकभक्तिश्च महात्म्यज्ञानपूर्विका ॥ वर्त्तते तेन मामत्र पश्यसि त्वं हि सुव्रत ॥ ४ ॥ ईदृग्लक्षणसंपन्ना ये स्युरन्येपि मानवाः ॥ तेपि मामीदृशं विप्र पश्यन्त्येकान्तिकप्रियम् ॥ ५ ॥ असावहमिह ब्रह्मन्नस्मिन्नक्षरधामनि ॥ राधालक्ष्मीयुतो नित्यं वसामि स्वाश्रितैः सह ॥ ६ ॥ वासुदेवस्वरूपोहं सर्वकर्मफलप्रदः ॥ अन्तर्यामितया वर्त्ते स्वतन्त्रः सर्वदेहिनाम् ॥ ७ ॥ वैकुण्ठाख्ये महाधाम्नि लक्ष्म्या सह चतुर्भुजः ॥ वसामि नन्दगरुडमुख्यैः साकं च पार्षदैः ॥ ८ ॥ धाम्नि तेजोमये दिव्ये श्वेतद्वीपेऽन्वहं भुवि ॥ ददामि श्वेतमुक्तेभ्यः पञ्चकालं स्वदर्शनम् ॥ ९ ॥

१ गाढान्धकारम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शोभाढ्यं रत्नदीपालिमण्डितैः ॥ शृङ्गारिकद्रव्ययुतैः कुञ्जैर्जुष्टमनेकशः ॥ ३७ ॥ गोपानां गोपिकानां च कृष्णसंकीर्त्तनैर्मुहुः ॥ गोवत्स पक्षिनिनदैर्नानाभूषणनिस्वनैः ॥ दधिमन्थनशब्दैश्च सर्वतो नादितं मुने ॥ ३८ ॥ फुल्लपुष्पफलानम्रनानाद्रुमसुशोभनैः ॥ द्वात्रिंशता वनैरन्यैर्युक्तं पश्यमनोहरैः ॥ ३९ ॥ तद्वीक्ष्य हृष्टः स प्राप गोलोकपुरमुज्ज्वलम् ॥ वर्त्तुलं रत्नदुर्गं च राजमार्गोपशोभितम् ॥ ४० ॥ राजितं कृष्णभक्तानां विमानैः कोटिभिस्तथा ॥ रथै रत्नेन्द्रखचितैः किंकिणीजालशोभितैः ॥ ४१ ॥ महामणीन्द्रनिकरै रत्नस्त म्भालिमण्डितैः ॥ अद्भुतैः कोटिशःसौधैः पंक्तिसंस्थैर्मनोहरम् ॥ ४२ ॥ विलासमण्डपै रम्यै रत्नसारविनिर्मितैः ॥ रत्नेन्द्रदीप ततिभिः शोभनं रत्नवेदिभिः ॥ ४३ ॥ केसरागुरुकस्तूरीकुंकुमद्रवचर्चितम् ॥ दधिदूर्वालाजपूगै रम्भाभिः शोभिताङ्गणम् ॥ ४४ ॥ वारिपूर्णैर्हेमघटैस्तोरणैः कृतमंगलम् ॥ मणिकुट्टिमराजाध्वचलद्धूरिगजाश्वकम् ॥ ४५ ॥ श्रीकृष्णदर्शनायातैर्नैकब्रह्माण्डनायकैः ॥ विरिञ्चिशंकराद्यैश्च बलिहस्तैः सुसंकुलम् ॥४६॥ व्रजद्भिः कृष्णवीक्षाथ गोपगोपीकदम्बकैः ॥ सुसंकुलमहामार्गं मुमोदालोक्य तन्मुनिः ॥४७॥ कृष्णमन्दिरमापाऽथ सर्वाश्चर्यं मनोहरम् ॥ नन्दादिवृषभान्वादिगोपसौधालिभिर्वृतम् ॥ ४८ ॥ चतुर्द्वारैः षोडशभिर्दुर्गैः सपरिखै र्युतम् ॥ कोटिगोपवृतैकैकद्वारपालसुरक्षितैः ॥ ४९ ॥ रत्नस्तम्भकपाटेषु द्वार्षु स्वाग्रस्थितेषु सः ॥ उपविष्टान्क्रमेणैव द्वारपालान्ददर्श ह ॥५०॥ वीरभानुं चन्द्रभानुं सूर्यभानुं तृतीयकम् ॥ वसुभानुं देवभानुं शक्रभानुं ततः परम् ॥ ५१ ॥ रत्नभानुं सुपार्श्वं च विशालमृषभं ततः ॥ अंशुं बलं च सुबलं देवप्रस्थं वरूथपम् ॥ ५२ ॥ श्रीदामानं च नत्वाऽसौ प्रविष्टोंतस्तदाज्ञया ॥ महाचतुष्के वितते तेजोऽपश्यन्महोच्चयम् ॥ ५३ ॥

इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे श्रीवासुदेवमाहात्म्ये गोलोकवर्णनं नाम षोडशोऽध्यायः ॥१६॥

॥ स्कन्द उवाच ॥ तत्त्वेककालसंभूतकोटिकोट्यर्कसन्निभम् ॥ स व्यचष्ट महत्तेजो दिव्यं सिततरं मुने ॥१॥ दिशश्च विदिशः सर्वा ऊर्द्ध्वाधो व्याप्नुवच्च यत् ॥ अक्षरं ब्रह्म कथितं सच्चिदानन्दलक्षणम् ॥ २ ॥ प्रकृतिं पुरुषं चोभौ तत्कार्याण्यपि सर्वशः ॥ व्याप्तं यद्योगसंसिद्धाः षट् चक्राणि निजान्तरे ॥ व्यतीत्य मूर्ध्नि पश्यन्ति वासुदेवप्रसादतः ॥ ३ ॥ यद्भासा भासितः सूर्यो वह्निरिन्दुश्च तारकाः ॥ भासयन्ति जग त्सर्वं स्वप्रकाशं तथामृतम् ॥ ४ ॥ यद्ब्रह्मपुरमित्याहुर्भगवद्धाम सात्वताः ॥ यस्यान्तिकेषु परितस्तिष्ठन्त्यर्चककोटयः ॥ ५ ॥ ब्रह्मशंकर

१ पश्यन्तीति पश्या वीक्षकास्तेषां मनोहरैः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रणेष्वपि ॥ ११ ॥ भूम्यप्तेजोनिलाकाशाहम्महत्प्रकृतीः क्रमात् ॥ क्रान्त्वा दशोत्तरगुणाः प्राप गोलोकमद्भुतम् ॥ १२ ॥ धाम तेजोमयं तद्धि प्राप्यमेका
न्तिकैर्हरेः ॥ गच्छन्ददर्श वितताममगाधां विरजां नदीम् ॥ १३ ॥ गोपीगोपगणस्नानधौतचन्दनसौरभाम् ॥ पुण्डरीकैः कोकनदै रम्यामिन्दीवरैरपि ॥ १४ ॥
तस्यास्तटं मनोहारि स्फटिकाश्ममयं महत् ॥ प्राप श्वेतहरिद्रक्तपीतसन्मणिराजितम् ॥ १५ ॥ कल्पवृक्षालिभिर्जुष्टं प्रवालाङ्कुरशोभितम् ॥ स्यमन्तके
न्द्रनीलादिमणीनां खनिमण्डितम् ॥ १६ ॥ नानामणीन्द्रनिचितसोपानततिशोभनम् ॥ कूजद्भिर्मधुरं जुष्टं हंसकारण्डवादिभिः ॥ १७ ॥
वृन्दैः कामदुघानां च गजेन्द्राणां च वाजिनाम् ॥ पिबद्भिर्निर्मलं तोयं राजितं स व्यतिक्रमत् ॥ १८ ॥ उत्तीर्याऽथ धुनीं दिव्यां तत्क्षणादी
श्वरेच्छया ॥ तद्धामपरिखाभूतां शतशृङ्गागमाप सः ॥ १९ ॥ हिरण्मयं दर्शनीयं कोटियोजनमुच्छ्रितम् ॥ विस्तारे दशकोट्यस्तु योजनानां मनो
हरम् ॥ २० ॥ सहस्रशः कल्पवृक्षैः पारिजातादिभिर्द्रुमैः ॥ मल्लिकायूथिकाभिश्च लवङ्गैलालतादिभिः ॥ २१ ॥ स्वर्णरम्भादिभिश्चान्यैः
शोभमानं महीरुहैः ॥ दिव्यैर्मृगगणैर्नागैः पक्षिभिश्च सुकूजितैः ॥ २२ ॥ दुर्गायितस्य तद्धाम्नस्तस्य रम्येषु सानुषु ॥ मनोज्ञान्विततानेक्षद्रग
वद्रासमण्डपान् ॥ २३ ॥ वृतानुद्यानततिभिः फुल्लपुष्पसुगन्धिभिः ॥ कपाटै रत्ननिचितैश्चतुर्द्वारसुशोभनान् ॥ २४ ॥ चित्रतोरणसंपन्नै रत्न
स्तम्भैः सहस्रशः ॥ जुष्टांश्च कदलीस्तम्भैर्मुक्तालम्बैर्वितानकैः ॥ २५ ॥ दूर्वालाजाक्षतफलैर्युक्तान्माङ्गलिकैरपि ॥ चन्दनागुरुकस्तूरीकेशरोक्षित
चत्वरान् ॥ २६ ॥ सुश्राव्यवाद्यनिनदैर्हृद्यान्बहुविधैरपि ॥ तेषु यूथानि गोपीनां कोटिशः स ददर्श ह ॥ २७ ॥ अनर्घ्यवासोभूषाभिः सद्रत्न
मणिकङ्कणैः ॥ काञ्चीनूपुरकेयूरैः शोभितान्यङ्गुलीयकैः ॥ २८ ॥ तारुण्यरूपलावण्यैः स्वरैश्चाऽप्रतिमानि हि ॥ राधालक्ष्मीसवर्णानि शृङ्गा
रिककराणि च ॥ २९ ॥ भोगद्रव्यैर्बहुविधैर्मण्डपेषु युतेषु च ॥ विलसन्ति च गायन्ति मनोज्ञाः कृष्णगीतिकाः ॥ ३० ॥ उपत्यकासु तस्या
द्रेरथ वृन्दावनाभिधम् ॥ वनं महत्तदद्राक्षीत्सावर्णे नारदो मुनिः ॥ ३१ ॥ कृष्णस्य राधिकायाश्च प्रियं तत्क्रीडनस्थलम् ॥ कल्पद्रुमालिभी
रम्यं सरोभिश्च सपङ्कजैः ॥ ३२ ॥ आम्रैराम्रातकैर्नीपैर्बदरीभिश्च दाडिमैः ॥ खर्जूरीपूगनारंगैर्नालिकेरैश्च चन्दनैः ॥ ३३ ॥ जम्बूजम्बीरपन
सैरक्षोदैः सुरदारुभिः ॥ कदलीभिश्चम्पकैश्च द्राक्षाभिः स्वर्णकेतकैः ॥ ३४ ॥ फलपुष्पभरानम्रैर्नानावृक्षैर्विराजितम् ॥ मल्लिका
माधवीकुन्दैर्लवंगैर्यूथिकादिभिः ॥ ३५ ॥ मन्दशीतसुगन्धेन[1] सेवितं मातरिश्वना ॥ शतशृङ्गस्रुतैरार्द्रं निर्झरैश्च समन्ततः ॥ ३६ ॥ सदा वसन्त

१ इत्वाभाव आर्षः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रियश्च भगवान्ददौ स्थानमुरः स्वकम् ॥ तत्र स्थितवैव सा व्याप्य त्रैलोक्यं संपदात्मना ॥ ४१ ॥ ततो रत्नाकरः स्वस्माच्छ्रीजनेरनुभावतः ॥
बभूवान्वर्थसंज्ञो वै संपूर्णक्षयरत्नवान् ॥ ४२ ॥ चतुर्विधैर्बहुरसैः सदन्नैरमृतोपमैः ॥ सर्वान्समागतांस्तत्र तर्पयामास सादरम् ॥ ४३ ॥ अनर्घ्याणि
च वस्त्राणि रत्नभूषाः परिच्छदान् ॥ देवादिभ्यो ददौ प्रीत्या सर्वेभ्योपि पृथक्पृथक् ॥ ४४ ॥ जामातुस्तुष्टये स्वस्य तदीयेभ्यस्तदाम्बुधेः ॥
नासीत्किमप्यदेयं वै घनवद्धनवर्षिणः ॥ ४५ ॥ भगवानपि तद्दत्तं यौतकं च धनं बहु ॥ ब्राह्मणेभ्यः प्रदायैव श्रिया सह तिरोदधे ॥ ४६ ॥
लक्ष्मीनारायणाभ्यां ते भृशमानन्दिताः सुराः ॥ इन्द्रादयो दिवं जग्मुः स्वंस्वं धामाऽपरे ययुः ॥ ४७ ॥ अधिकारं च संप्राप्य यथापूर्वं निजंनि
जम् ॥ सर्वेपि सुखिनो जाताः प्रसादात्कमलापतेः ॥ ४८ ॥ मन्दरं च गिरिं तार्क्ष्यः पुनर्भगवदाज्ञया ॥ स्वस्थानं समुपानीय स्थापयामास
लीलया ॥ ४९ ॥ एवमिन्द्रेण ब्रह्मर्षे नष्टा ब्राह्मणशापतः ॥ उपलब्धा पुनः संपन्नारायणप्रसादतः ॥ ५० ॥ य एतां शृणुयात्पुण्यां कथां
भगवतो मुने ॥ कीर्तयेत्प्रयतो वापि संपदं प्राप्नुतो हि तौ ॥ ५१ ॥ गृहिणां धनसिद्धिः स्यात्त्यागिनां च यथेप्सिता ॥ भक्तिज्ञानविरागादेर्भवे
त्सिद्धिरनेन वै ॥ ५२ ॥ इति ते कथितं ब्रह्मन्यथेन्द्रः प्राप संपदम् ॥ नारदोपि यथा श्वेतं द्वीपं स गतवानृषिः ॥ तत्ते सर्वं प्रवक्ष्यामि शृणु
ष्वैकेन चेतसा ॥ ५३ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे श्रीवासुदेवमाहात्म्ये लक्ष्मीना
रायणस्तुतिनिरूपणं नाम पञ्चदशोऽध्यायः ॥ १५ ॥ ॥ स्कन्द उवाच ॥ मेरुशृंगं समारूढो नारदो दिव्यया दृशा ॥ श्वेतद्वीपं च तत्रस्था
न्पश्यन्मुक्तान्सहस्रशः ॥ १ ॥ वासुदेवे भगवति दृष्टिमाबध्य तत्क्षणम् ॥ उत्पपात महायोगी सद्यः प्राप च धाम तत् ॥ २ ॥ प्राप्य श्वेतं
महाद्वीपं नारदो हृष्टमानसः ॥ ददर्श भक्तांस्तानेव श्वेतांश्चन्द्रप्रभाञ्छुभान् ॥ ३ ॥ पूजयामास शिरसा मनसा तैश्च पूजितः ॥ दिदृक्षुर्ब्रह्म परमं
स च कृच्छ्रपरः स्थितः ॥ ४ ॥ भक्तमेकान्तिकं विष्णोर्बुद्ध्वा भागवतास्तु ते ॥ तमूचुस्तुष्टमनसो जपन्तं द्वादशाक्षरम् ॥ ५ ॥ श्वेतमुक्ता ऊचुः ॥
मुनिवर्य भवान्भक्तः कृष्णस्याऽस्ति यतोऽत्र नः ॥ दृष्टवान्देवदुर्दर्श्यान्किमिच्छन्नथ तप्यति ॥ ६ ॥ नारद उवाच ॥ भगवन्तं परं ब्रह्म साक्षात्कृष्ण
महं प्रभुम् ॥ द्रष्टुमुत्कोऽस्मि भक्तेन्द्रास्तं दर्शयत तत्प्रियाः ॥७॥ स्कन्द उवाच ॥ तदैकः श्वेतमुक्तस्तु कृष्णेन प्रेरितो हृदि ॥ एहि ते दर्शये कृष्ण
मित्युक्त्वा पुरतोभवत् ॥८॥ प्रहृष्टो नारदस्तेन साकमाकाशवर्त्मना ॥ पश्यन्धामानि देवानां तत ऊर्द्ध्वं ययौ मुनिः ॥ ९ ॥ सप्तर्षींश्च ध्रुवं दृष्ट्वाऽना
सक्तः कुत्रचित्स च ॥ महर्जनतपोलोकान्व्यतीयाय द्विजोत्तम ॥१०॥ ब्रह्मलोकं ततो दृष्ट्वा श्वेतमुक्तानुगो मुनिः ॥ कृष्णस्यैवेच्छयाऽध्वानं प्रापाद्याव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्युश्च संसारपाशैः सितास्तं नताः स्मः शरण्यं भवन्तं वयम् ॥ २४ ॥ समुद्र उवाच ॥ अजित तवाऽथ तावकजनस्य मुदाऽल्पमपि द्रविण
जलान्नवस्त्रनमनान्यतमेन सकृत् ॥ चरति ह सेवनं स पदवीं महतीं महतां व्रजति जनोल्पकोपि तमहं प्रणतः करुणम् ॥ २५ ॥ पार्षदा
ऊचुः ॥ पितरौ त्वमसि स्वजनस्त्वमसि त्वमसीष्टगुरुः सुहृदात्मपतिः ॥ त्वमसीश्वर एव च नः परमस्त्वमसि द्रविणं सकलं त्वमसि ॥
॥ २६ ॥ मूर्त्तिरुवाच ॥ यत्संबन्धत एव यान्ति पदवीमुच्चां महद्भिर्वृतां स्त्रीशूद्रासुरनीचपक्षिपशवः पापात्मजीवा अपि ॥ यद्दीना विबुधेश्वरा
अपि भवन्त्यर्चोज्झितास्तत्क्षणं गोलोकाधिपतिं तमेव हृदये नित्यं भजे त्वामहम् ॥ २७ ॥ सावित्र्युवाच ॥ त्वं सर्गकाले
प्रकृतिं च पूरुषं दृष्ट्या स्वयोत्थाप्य ततस्तदात्मना ॥ तत्त्वानि सृष्ट्वा महदादिमानितैर्ब्रैकान्विराजो बहुधा ससर्जिथ ॥ २८ ॥
वैराजरूपेण जगद्विधातृतां स्वीकृत्य देवासुरमानुषोरगान् ॥ त्वं स्थावरं जंगममीश निर्ममे त्वामादिकर्तारमुपाश्रितास्म्यहम् ॥
॥ २९ ॥ दुर्गोवाच ॥ प्रियतयाऽधिकया हृदि चिन्तनं विदधते तव ये भुवि ते विभो ॥ न परमेष्ठिसुखं न दिवः सुखं न कम
यन्ति धरैकनरेशताम् ॥ ३० ॥ प्रसभमर्पितमप्यतुलं त्वया सुखमिदं समवाप्य च तत्र ते ॥ तदपहाय न शक्तिकृतः क्षणं तमु नमामि च सात्व
तनायकम् ॥ ३१ ॥ नद्य ऊचुः ॥ वरद नमनमात्रं नामसंकीर्तनं वा विदधति तत्र ये वै ज्ञानतोऽज्ञानतो वा ॥ जनिमृतियमभीतेस्तानपि
त्रायमाणं नरसखमुपयाताः स्मोऽद्य नारायणं त्वाम् ॥ ३२ ॥ देवपत्न्य ऊचुः ॥ भुवि धृताकृतेर्जन्म मङ्गलं चरितमद्भुतं लोकपावनम् ॥
भवति निर्गुणं सर्वमेव ते भवसि निर्गुणं ब्रह्म यत्परम् ॥ ३३ ॥ तव समाश्रयात्तामसा जना अपि च राजसाः सात्त्विकाश्च ये ॥ ननु भवन्ति ते
निर्गुणास्ततो वयमुपास्महे त्वां हि निर्गुणम् ॥ ३४ ॥ ऋषिपत्न्य ऊचुः ॥ आर्तानामुरुवृजिनैस्त्रिधा च तापैः सर्वापत्प्रशमनमेकमेव विष्णोः ॥
पादाब्जं तव भवतीति तद्वयं वै प्राप्ताः स्मः शरणमनन्त देवदेव ॥ ३५ ॥ पृथिव्युवाच ॥ पूर्णशारदसुधाकराननं शारदाब्जदलदीर्घलोचनम् ॥
श्रीवियोगबहुधार्तिमोचनं वासुदेवमहमेकमाश्रये ॥ ३६ ॥ सरस्वत्युवाच ॥ नयने ममाच्युत तवातिसुन्दरे मुखशीतरोचिषि चकोरतां गते ॥
न हि गच्छतोऽन्यत इतीयमेव मे हृदि मूर्तिरस्तु सततं नहीतरा ॥ ३७ ॥ स्कन्द उवाच ॥ इति स्तुतोऽखिलैर्देवैः सोभिनन्द्य दृशैव
तान् ॥ प्राह श्रियं शुभे पश्य देवादींस्त्वमिमानिति ॥ ३८ ॥ ततः समीक्षिताः प्रीत्या तया मधुरया दृशा ॥ त्रिलोकीवासिनः सर्वे
ऋद्धा आसन्यथा पुरा ॥ ३९ ॥ लेभिरे स्वस्वऋद्धिं ते गृहिणस्त्यागिनोपि च ॥ धर्मादयश्च सानन्दं प्रचरन्ति स्म पूर्ववत् ॥ ४० ॥ तस्याः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रियश्च भगवान्ददौ स्थानमुरः स्वकम् ॥ तत्र स्थित्वैव सा व्याप्य त्रैलोक्यं संपदात्मना ॥ ४१ ॥ ततो रत्नाकरः स्वस्माच्छ्रीजनेरनुभावतः ॥ बभूवान्वर्थसंज्ञो वै संपूर्णक्षयरत्नवान् ॥ ४२ ॥ चतुर्विधैर्बहुरसैः सदन्नैरमृतोपमैः ॥ सर्वान्समागतांस्तत्र तर्पयामास सादरम् ॥ ४३ ॥ अनर्घ्याणि च वस्त्राणि रत्नभूषाः परिच्छदान् ॥ देवादिभ्यो ददौ प्रीत्या सर्वेभ्योपि पृथक्पृथक् ॥ ४४ ॥ जामातुस्तुष्टये स्वस्य तदीयेभ्यस्तदाम्बुधेः ॥ नासीत्किमप्यदेयं वै धनवद्धनवर्षिणः ॥ ४५ ॥ भगवानपि तद्दत्तं यौतकं च धनं बहु ॥ ब्राह्मणेभ्यः प्रदायैव श्रिया सह तिरोदधे ॥ ४६ ॥ लक्ष्मीनारायणाभ्यां ते भृशमानन्दिताः सुराः ॥ इन्द्रादयो दिवं जग्मुः स्वंस्वं धामाऽपरे ययुः ॥ ४७ ॥ अधिकारं च संप्राप्य यथापूर्वं निजंनिजम् ॥ सर्वेपि सुखिनो जाताः प्रसादात्कमलापतेः ॥ ४८ ॥ मन्दरं च गिरिं तार्क्ष्यः पुनर्भगवदाज्ञया ॥ स्वस्थानं समुपानीय स्थापयामास लीलया ॥ ४९ ॥ एवमिन्द्रेण ब्रह्मर्षे नष्टा ब्राह्मणशापतः ॥ उपलब्धा पुनः संपन्नारायणप्रसादतः ॥ ५० ॥ य एतां शृणुयात्पुण्यां कथां भगवतो मुने ॥ कीर्तयेत्प्रयतो वापि संपदं प्राप्नुतो हि तौ ॥ ५१ ॥ गृहिणां धनसिद्धिः स्यात्त्यागिनां च यथेप्सिता ॥ भक्तिज्ञानविरागादेर्भवेत्सिद्धिरनेन वै ॥ ५२ ॥ इति ते कथितं ब्रह्मन्यथेन्द्रः प्राप संपदम् ॥ नारदोपि यथा श्वेतं द्वीपं स गतवानृषिः ॥ तत्ते सर्वं प्रवक्ष्यामि शृणुष्वैकेन चेतसा ॥ ५३ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे श्रीवासुदेवमाहात्म्ये लक्ष्मीनारायणस्तुतिनिरूपणं नाम पञ्चदशोऽध्यायः ॥ १५ ॥

॥ स्कन्द उवाच ॥ मेरुशृंगं समारूढो नारदो दिव्यया दृशा ॥ श्वेतद्वीपं च तत्रस्थान्पश्यन्मुक्तान्सहस्रशः ॥ १ ॥ वासुदेवे भगवति दृष्टिमाबध्य तत्क्षणम् ॥ उत्पपात महायोगी सद्यः प्राप च धाम तत् ॥ २ ॥ प्राप्य श्वेतं महाद्वीपं नारदो हृष्टमानसः ॥ ददर्श भक्तांस्तानेव श्वेतांश्चन्द्रप्रभाञ्छुभान् ॥ ३ ॥ पूजयामास शिरसा मनसा तैश्च पूजितः ॥ दिदृक्षुर्ब्रह्म परमं स च कृच्छ्रपरः स्थितः ॥ ४ ॥ भक्तमेकान्तिकं विष्णोर्बुद्ध्वा भागवतास्तु ते ॥ तमूचुस्तुष्टमनसो जपन्तं द्वादशाक्षरम् ॥ ५ ॥ श्वेतमुक्ता ऊचुः ॥ मुनिवर्य भवान्भक्तः कृष्णस्याऽस्ति यतोऽत्र नः ॥ दृष्टवान्देवदुर्दर्श्यान्किमिच्छन्नथ तप्यति ॥ ६ ॥ नारद उवाच ॥ भगवन्तं परं ब्रह्म साक्षात्कृष्णमहं प्रभुम् ॥ द्रष्टुमुत्कोऽस्मि भक्तेन्द्रास्तं दर्शयत तत्प्रियाः ॥७॥ स्कन्द उवाच ॥ तदैकः श्वेतमुक्तस्तु कृष्णेन प्रेरितो हृदि ॥ एहि ते दर्शये कृष्णमित्युक्त्वा पुरतोभवत् ॥८॥ प्रहृष्टो नारदस्तेन साकमाकाशवर्त्मना ॥ पश्यन्धामानि देवानां तत ऊर्द्ध्वं ययौ मुनिः ॥ ९ ॥ सप्तर्षींश्च ध्रुवं दृष्ट्वाऽनासक्तः कुत्रचित्स च ॥ महर्जनतपोलोकान्व्यतीयाय द्विजोत्तम ॥१०॥ ब्रह्मलोकं ततो दृष्ट्वा श्वेतमुक्तानुगो मुनिः ॥ कृष्णस्यैवेच्छयाऽध्वानं प्रापाद्याव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्युश्च संसारपाशैः सितास्तं नताः स्मः शरण्यं भवन्तं वयम् ॥ २४ ॥ समुद्र उवाच ॥ अजित तवाऽथ तावकजनस्य मुदाऽल्पमपि द्रविण
जलान्नवस्त्रनमनान्यतमेन सकृत् ॥ चरति ह सेवनं स पदवीं महतीं महतां व्रजति जनोल्पकोपि तमहं प्रणतः करुणम् ॥ २५ ॥ पार्षदा
ऊचुः ॥ पितरौ त्वमसि स्वजनस्त्वमसि त्वमसीष्टगुरुः सुहृदात्मपतिः ॥ त्वमसीश्वर एव च नः परमस्त्वमसि द्रविणं सकलं त्वमसि ॥
॥ २६ ॥ मूर्त्तिरुवाच ॥ यत्संबन्धत एव यान्ति पदवीमुच्चां महद्भिर्वृतां स्त्रीशूद्रासुरनीचपक्षिपशवः पापात्मजीवा अपि ॥ यद्धीना विबुधेश्वरा
अपि भवन्त्यर्चोज्झितास्तत्क्षणं गोलोकाधिपतिं तमेव हृदये नित्यं भजे त्वामहम् ॥ २७ ॥ सावित्र्युवाच ॥ त्वं सर्गकाले
प्रकृतिं च पूरुषं दृष्ट्या स्वयोत्थाप्य ततस्तदात्मना ॥ तत्त्वानि सृष्ट्वा महदादिमानितैर्ब्रैकान्विराजो बहुधा ससर्जिथ ॥ २८ ॥
वैराजरूपेण जगद्विधातृतां स्वीकृत्य देवासुरमानुषोरगान् ॥ त्वं स्थावरं जंगममीश निर्ममे त्वामादिकर्तारमुपाश्रितास्म्यहम् ॥
॥ २९ ॥ दुर्गोवाच ॥ प्रियतयाऽधिकया हृदि चिन्तनं विदधते तव ये भुवि ते विभो ॥ न परमेष्ठिसुखं न दिवः सुखं न कम
यन्ति धरैकनरेशताम् ॥ ३० ॥ प्रसभमर्पितमप्यतुलं त्वया सुखमिदं समवाप्य च तत्र ते ॥ तदपहाय न शक्तिकृतः क्षणं तमु नमामि च सात्व
तनायकम् ॥ ३१ ॥ नद्य ऊचुः ॥ वरद नमनमात्रं नामसंकीर्तनं वा विदधति तत्र ये वै ज्ञानतोऽज्ञानतो वा ॥ जनिमृतियमभीतेस्तानपि
त्रायमाणं नरसखमुपयाताः स्मोऽद्य नारायणं त्वाम् ॥ ३२ ॥ देवपत्न्य ऊचुः ॥ भुवि धृताकृतेर्जन्म मङ्गलं चरितमद्भुतं लोकपावनम् ॥
भवति निर्गुणं सर्वमेव ते भवसि निर्गुणं ब्रह्म यत्परम् ॥ ३३ ॥ तव समाश्रयात्तामसा जना अपि च राजसाः सात्त्विकाश्च ये ॥ ननु भवन्ति ते
निर्गुणास्ततो वयमुपास्महे त्वां हि निर्गुणम् ॥ ३४ ॥ ऋषिपत्न्य ऊचुः ॥ आर्तानामुरुवृजिनैस्त्रिधा च तापैः सर्वापत्प्रशमनमेकमेव विष्णोः ॥
पादाब्जं तव भवतीति तद्वयं वै प्राप्ताः स्मः शरणमनन्त देवदेव ॥ ३५ ॥ पृथिव्युवाच ॥ पूर्णशारदसुधाकराननं शारदाब्जदलदीर्घलोचनम् ॥
श्रीवियोगबहुधार्तिमोचनं वासुदेवमहमेकमाश्रये ॥ ३६ ॥ सरस्वत्युवाच ॥ नयने ममाच्युत तवातिसुन्दरे मुखशीतरोचिषि चकोरतां गते ॥
न हि गच्छतोऽन्यत इतीयमेव मे हृदि मूर्तिरस्तु सततं नहीतरा ॥ ३७ ॥ स्कन्द उवाच ॥ इति स्तुतोऽखिलैर्देवैः सोभिनन्द्य दृशैव
तान् ॥ प्राह श्रियं शुभे पश्य देवादींस्त्वमिमानिति ॥ ३८ ॥ ततः समीक्षिताः प्रीत्या तया मधुरया दृशा ॥ त्रिलोकीवासिनः सर्वे
ऋद्धा आसन्यथा पुरा ॥ ३९ ॥ लेभिरे स्वस्वऋद्धिं ते गृहिणस्त्यागिनोपि च ॥ धर्मादयश्च सानन्दं प्रचरन्ति स्म पूर्ववत् ॥ ४० ॥ तस्याः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धन्यः कर्ता मण्डपस्यास्य ते वै धन्यैषा भूर्यत्र पीठं तवेश ॥ ७ ॥ धन्यो लोके नूनमेषोम्बुराशिः साक्षात्तुभ्यं येन दत्ता स्वकन्या ॥
धन्याश्चैते त्वां वयं वीक्षमाणा धन्येशानं श्रीपतिं त्वां नताः स्मः ॥ ८ ॥ मनव ऊचुः ॥ धर्मः खलु स हि परमो धर्मेभ्यो माधव सक
लेभ्योपि ॥ भक्तिर्भवति यतो वै धर्मभुवि त्वयि हि निरवद्या ॥ ९ ॥ धर्मात्मानं भगवन्धर्मधुरीणं च धर्मपातारम् ॥ सर्वातिप्रियधर्मं नुमस्त्वां
धर्मसंभूतिम् ॥ १० ॥ ऋषय ऊचुः ॥ भक्त्या हीनस्त्वद्विमुखो वयुनार्थी श्राम्यन्भूयोप्यस्य न सिद्धिं समुपैति ॥ तद्वासक्तः कर्मणि काम्ये तु
कुतोसौ सौख्यं यायादक्षयमानन्दमहाब्धे ॥ ११ ॥ भक्त्या नित्यं त्वामत एव वयं वै श्रद्धायुक्ता धर्मतपोनिगमाद्यैः ॥ मायातीतं कालनिय
न्तारमुदारं ध्यायामः श्रीकान्तपरात्परमेकम् ॥ १२ ॥ इन्द्र उवाच ॥ भगवन्गुरुदुःखिता वयं ननु दुर्वाससस एव हेलनात् ॥ न भवन्तमृतेऽवितुं
हि नो विधिरुद्रप्रमुखा इमेऽशकन् ॥ १३ ॥ विगताखिलसंपदो निरन्नाः समभावं भुवि पामरैरुपेताः ॥ भवतैव वयं हृतापदः स्मः सपदि
श्रीहरये नमोस्तु तुभ्यम् ॥ १४ ॥ अग्निरुवाच ॥ गीर्वाणदानवनराद्युपजीवनान्नं यन्निर्मितं हि भवतैव ततो बुधास्तु ॥ यज्ञेषु तेन यजनं तव
कुर्वतेऽथो त्वच्छेषमन्यदिविषद्भ्य उपानयन्ति ॥ १५ ॥ काम्येषु कर्मसु रता अपि याज्ञिकास्ते तत्कर्मबन्धनत आशु विमुच्य यान्ति ॥ ब्राह्मीं
गतिं तदितरे तु भवन्ति चौराः श्रीयज्ञपूरुषमहं प्रणमामि तं त्वाम् ॥ १६ ॥ मरुत ऊचुः ॥ भक्ता एकान्तिकास्तेऽक्षरपरमपदे सेवया ते तु हीनं
वासैश्वर्यादि नेच्छन्त्यतिशयितसुखं नापि कैवल्यमोक्षम् ॥ तद्युक्तं त्वात्मनोपि श्वपचकुलजनुर्मानयन्त्युत्तमं वै तं त्वामेकान्तधर्माश्रयण
मुपगताः श्रीमहापुरुषं स्मः ॥ १७ ॥ सिद्धा ऊचुः ॥ नैकब्रह्माण्डसर्गादिकारणं त्वामकारणम् ॥ तत्स्थं तद्व्यतिरिक्तं च नियन्तारं नमामहे ॥
॥ १८ ॥ रुद्रा ऊचुः ॥ मायायाः सर्वमोहिन्या मोहनं मोहवर्जितम् ॥ महाकालस्यापि कालं त्वां नमः पुरुषोत्तमम् ॥ १९ ॥ आदित्या
ऊचुः ॥ प्रकाशिता येन वयं जगन्ति प्रकाशयामो भवता रमेश ॥ स्वयंप्रकाशं तमुरुप्रकाशं प्रकाशमूर्त्तिं प्रणता भवन्तम् ॥ २० ॥ साध्या
ऊचुः ॥ शास्ता नृपाणां च महोरगाणां दैत्याधिपानां च सुराधिपानाम् ॥ त्वं वै मनूनां च प्रजापतीनां राजाधिराजाय नमोस्तु तुभ्यम् ॥
॥ २१ ॥ वसव ऊचुः ॥ भवति भुवि यदायदाऽसुरांशैः प्रथितसनातनधर्मधार्मिकाणाम् ॥ कदनमुरु तदातदा स्वयं ते ह्यवतरते प्रणमाम धर्म
गोप्त्रे ॥ २२ ॥ चारणा ऊचुः ॥ चरित्रं शुभं ते धृतानेकमूर्त्तेः प्रबन्धैरनेकैर्हि गायन्ति भक्ताः ॥ यदु श्रोतृवक्तॄन्पुनात्येव सद्यो वयं तं नताः
पुण्यकीर्त्तिं भवन्तम् ॥ २३ ॥ गन्धर्वाप्सरस ऊचुः ॥ ये कथास्ते विहायान्यगाथाः प्रभो कीर्त्तयन्तेऽथ शृण्वन्ति वा ते जनाः ॥ दुःखिताः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पीठे ॥ ५६ ॥ प्रक्षालयामास तदङ्घ्रिपङ्कजं स्वप्रेष्ठपत्न्या जलधिः सगंगया ॥ भृङ्गारसिक्तोत्तमवारिधारया तदम्बु शीर्ष्णा च दधार सान्वयः ॥
॥ ५७ ॥ ततः पठन्मंगलमुच्चकैः श्रियं प्रादापयच्चाम्बुधिनाऽच्युताय ॥ प्रज्वाल्य वह्निं विधिना विधाता साकं बृहद्भिर्मुनिभिर्जुहाव ॥ ५८ ॥
प्रदाय तस्मै तनयां मनोज्ञां तत्पादपद्मैकनिबद्धदृष्टिम् ॥ वासांसि रत्नाभरणानि चादाद्भूयांसि भूम्ने स समं दुहित्रा ॥ ५९ ॥ हुतस्य तस्याऽथ
हुताशनस्य प्रदक्षिणां चापि सह श्रियैव ॥ चकार चेतांसि निजेक्षकाणां स्त्रीणां च पुंसां च हरन्हरिः सः ॥ ६० ॥ एकासने तौ सह सन्नि
विष्टौ ब्रह्माण्डमातापितरौ मनोज्ञौ ॥ संपूजयामासुरनर्घ्यवस्त्रविभूषणैर्देवगणाः सयोषाः ॥ ६१ ॥ तदा च गीतानि सुमंगलानि श्रियश्च
विष्णोर्गुणवर्णनानि ॥ दुर्गादयश्चाऽथ पुलोमजाद्या देव्यो जगुः सस्मितचारुवक्त्राः ॥ ६२ ॥ द्विधा विभक्तानि सुरांगनानां वृन्दान्युपाविश्य च
सम्मुखानि ॥ तद्दम्पतिप्रेक्षणकौतुकानि तथा जगुः प्रेमभरेण तानि ॥ ६३ ॥ यथा तदाकर्ण्य सुराः समस्ता महर्षयश्चाऽखिलयोषितोपि ॥
स्वांतस्तमैक्षंत सह श्रियेशं स्फुरंतमासन्ननु चित्रवच्च ॥६४॥ प्रणम्य भक्त्या च वराक्षतादि समर्प्य ताभ्यां विबुधा मुदैव ॥ पृथक्पृथक्तुष्टुवुरूर्जिता
भिर्वाग्भिश्च तौ प्राञ्जलयो विनीताः ॥ ६५ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे श्रीवा
सुदेवमाहात्म्ये लक्ष्मीनारायणविवाहोत्सवनिरूपणं नाम चतुर्दशोऽध्यायः ॥ १४ ॥ ॥ ब्रह्मोवाच ॥ विचार्य्याऽहं वेदान्मुहुरुपगतो
निश्चयमिमं रमारामे भक्तिस्त्वयि दृढतरा यर्ह्यसुभृताम् ॥ भवेत्तर्ह्येवैषां क्षयविरहिता भोगनिकरास्तथा स्युर्लोका वै परमपुरुषात्यंतिकगतिः ॥
॥ १ ॥ अजानन्तस्त्वित्थं भृतरजंतमस्कानपि हरे भजन्त्यस्मान्देवान्बहुविधतपोर्चासरणिभिः ॥ त एवोक्ता मूढाः क्षयरहितसौख्यं न कुहचिल्ल
भन्तेऽतस्त्वां वै निजहृदि दधे केशवमहम् ॥२॥ शंकर उवाच ॥ त्रयी सांख्यवेदांतयोगाः पुराणं तथा पञ्चरात्रं प्रभो धर्मशास्त्रम् ॥ तवैवातिमाहा
त्म्यमेकस्य नित्यं प्रकारैरनेकैर्हि गायंति भक्त्या ॥३॥ त्वदेवेश शास्त्राणि चैतानि भूम्नो बभूवुस्त्वदेकाश्रयाण्यादिकल्पे ॥ रमासेव्यपादाम्बुजं शास्त्र
योनिं तमाद्यं भवन्तं भजे वासुदेवम् ॥ ४ ॥ धर्म उवाच ॥ कथा त्वदीया भवपाशमोचनी सुधेव तापत्रयतप्तदेहिनाम् ॥ अनेकजन्माघचयापहा
रिणी तनोति भक्तिं वयुनं तवाञ्जसा ॥ ५ ॥ सदैव सा कर्णपथेन हृद्दरीं विशत्वनन्ताभिध सम्मुखोद्गता ॥ मम त्वदन्या हरताच्च
वासना दयाब्धये ते प्रभविष्णवे नमः ॥ ६ ॥ प्रजापतय ऊचुः ॥ धन्या एते कल्पवृक्षा यदीयां छायामेतामाश्रितस्त्वं सहश्रीः ॥

१ अदन्तत्वमार्षम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

च सरयूः कावेरी कौशिकी तथा ॥ कृष्णा वेणी भीमरथा ताम्रपर्णी महानदी ॥ ७ ॥ कृतमाला वितस्ता च निर्विन्ध्या सुरसा तथा ॥ चर्म
ण्वती पयोष्णी च विश्वाद्या नद्य आययुः ॥ ८ ॥ रम्भा घृताची विश्वाची मेनका च तिलोत्तमा ॥ उर्वशीप्रमुखास्तत्र सर्वाप्सरस आययुः ॥ ९ ॥
वैकुण्ठवासिनः सर्वे तथा गोलोकवासिनः ॥ पार्षदप्रवरा विष्णोस्तत्राजग्मुः प्रहर्षिताः ॥ १० ॥ अणिमाद्याः सिद्धयोऽष्टौ शंखपद्मादयो
नव ॥ निधयो मूर्तिमन्तश्च समाजग्मुः श्रियोन्तिके ॥ ११ ॥ पूर्णः शारदचन्द्रोपि तदानीं प्रीतये श्रियाः ॥ नैशं तमोऽहरत्सर्वं बभूवुर्निर्मला
दिशः ॥ १२ ॥ ततोऽभिषेकमारेभे तस्या ब्रह्माज्ञया वृषा ॥ मण्डपं रचयामास सद्यस्त्वष्टातिशोभनम् ॥ १३ ॥ रत्नस्तम्भसहस्राणामा
यताभिश्च पंक्तिभिः ॥ चित्रैरनेकैरुल्लोचैः शोभितं कदलीद्रुमैः ॥ १४ ॥ सुगन्धिपुष्पनम्राभिर्दिव्यकल्पद्रुमालिभिः ॥ जुष्टं नानाविधै
रङ्गैर्दर्शनीयं मनोहरम् ॥ १५ ॥ कोटिशो रत्नदीपानां पंक्तिभिः शुद्धरोचिषाम् ॥ भ्राजमानं तोरणैश्च मुक्ताहारैश्च लम्बिभिः ॥ १६ ॥ रत्न
सिंहासने तत्र गीतवाद्यपुरस्सरम् ॥ उपावेश्य श्रियं चक्रुरभिषेकं महर्षयः ॥ १७ ॥ ऐरावतः पुण्डरीको वामनः कुमुदोञ्जनः ॥ पुष्पदन्तः
सार्वभौमः सुप्रतीकश्च दिग्गजाः ॥ १८ ॥ कुर्वन्तो बृंहितान्येते हेमकुम्भोद्धृतैः शुभैः ॥ चतुःसिन्धुसमानीतैरभ्यषिञ्चन्त वारिभिः ॥ १९ ॥
मूर्तिमत्यो महानद्यस्तत्राजह्रुर्जलानि च ॥ मंत्रानुच्चारयंति स्म मूर्ता वेदाः सहर्षिभिः ॥ २० ॥ जगुः सुकण्ठा गंधर्वा ननृतुश्चाप्सरोगणाः ॥
वाद्यानि वादयामासुरन्ये देवगणास्तदा ॥ २१ ॥ महानभूत्तदानंदस्त्रिलोक्यां सर्वदेहिनाम् ॥ श्रीसूक्तादि द्विजाः पेठुर्जगुर्गीतानि च स्त्रियः ॥
॥ २२ ॥ कांस्यतालमृदङ्गांश्च पणवानकगोमुखान् ॥ वादयामासुरम्भोदा दिवि दुंदुभयोऽनदन् ॥ २३ ॥ आसीत्कुसुमवृष्टिश्च साकं जयर
वैस्तदा ॥ आसंस्तत्परिचर्यायां धर्मपत्न्यश्च सिद्धयः ॥ २४ ॥ सुस्नातायै ततस्तस्यै कौशेये पीतवाससी ॥ ददावनर्घ्ये जलधी रत्नभूषाश्च
भूरिशः ॥ २५ ॥ उपवेशोचितं तस्या इंद्र आसनमाहरत् ॥ विश्वकर्मा कङ्कणानि ददौ सद्रत्नमुद्रिकाः ॥ २६ ॥ सुधाकरस्तु तद्भ्राता नासा
भूषणमुत्तमम् ॥ ददौ तस्यै केशभूषां सद्रत्ननिचितां तथा ॥ २७ ॥ पद्मजन्मा ददौ पद्मं मुक्ताहारं सरस्वती ॥ नागाश्च शेषप्रमुखास्तस्यै
रत्नेंद्रकुण्डले ॥ २८ ॥ अञ्जनं कुङ्कुमं चादाद्दुर्गा सौभाग्यलक्षणम् ॥ ललाटिकां च सावित्री शची ताम्बूलपात्रिकाम् ॥ २९ ॥ वसंतः ॥३०६॥
कौसुमान्हारान्कण्ठसूत्रं च शंकरः ॥ वैजयंतीं स्रजं पाशी कुबेरो रत्नदर्पणम् ॥ ३० ॥ अनर्घ्यां कंचुकीं वह्निर्यमोऽदाद्व्यजनं शुभम् ॥ ददुस्तस्यै

१ इन्द्रः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चापरेपि भूषास्तत्समयोचिताः ॥ ३१ ॥ ततः स्वलंकृतां कन्यां कस्मै दद्यामिमामिति ॥ सिंधुः पप्रच्छ ब्रह्माणं तदोवाच स सर्ववित् ॥३२॥
कन्या तवेयमम्भोधे माता मम शिवस्य च ॥ देवानामथ सर्वेषां लोकानामस्ति निश्चितम् ॥ ३३ ॥ नारायणं वासुदेवं परं ब्रह्माखिले
श्वरम् ॥ पुरुषोत्तममेवैकं विनास्या नापरः पतिः ॥ ३४ ॥ अतः साक्षाद्भगवते त्रैलोक्यसुखहेतवे ॥ आगतायोपविष्टाय देह्यस्मै विधि
नाम्बुधे ॥ ३५ ॥ कुरुष्व जन्मसाफल्यं पावयित्वा निजं कुलम् ॥ समुद्धर भवाम्भोधेर्दत्त्वेमां परमात्मने ॥३६॥ एकस्त्वं सप्तभी रूपैः सप्तद्वीप
विभागतः ॥ विश्रुतोऽथ विधायैतन्महतीं कीर्त्तिमाप्स्यसि ॥३७॥ इत्युक्तो ब्रह्मणा हृष्टः समुद्रः पुलकाञ्चितः ॥ मन्यमानो निजं धन्यमदित्सद्दि
ष्णवे सुताम् ॥३८॥ ततः सहैव विधिना स संप्रार्थ्य तमीश्वरम् ॥ वाग्दानादि विधायैव चक्रे वैवाहिकं विधिम् ॥३९॥ धन्वंतरिश्चन्द्रमाश्च वास
वाद्याश्च देवताः ॥ आसन्समुद्रस्य पक्षे तत्र वैवाहिकोत्सवे ॥४०॥ वस्त्राभरणयानादिदाने भोजनकर्मणि ॥ सन्मानने च जन्यानां मुख्या आसंस्त
एव हि :॥ ४१ ॥ लक्ष्म्याश्च मगलयविधौ मुख्यास्तत्र तु योषितः ॥ आसन्गंगादयो नद्यः शच्याद्याश्च सुरांगनाः ॥ ४२ ॥ मेनाद्या नगपत्न्यश्च
सिद्धयश्चाणिमादयः ॥ चन्द्रपत्नी तथा कान्तिः सर्वाश्चाप्सरसो मुने ॥ ४३ ॥ नारायणस्याथ विभोर्लीलां वैवाहिकीं विधिः ॥ शोभय
न्पितरौ चक्रे मूर्तिधर्मौ विचार्य च ॥ ४४ ॥ धर्मोऽसौ जगदाधारः पूज्यश्चाखिलदेहिनाम् ॥ पिताऽस्य भवितुं योग्यो ह्यस्मिंश्च प्रीतिमान्भृ
शम् ॥ ४५ ॥ इयं च मूर्त्तिः प्रख्याता सर्वसद्गुणजन्मभूः ॥ दाक्षायणी धर्मपत्नी माता भवितुमर्हति ॥ ४६ ॥ ततो धर्मस्यापि पक्षे मुख्याः
कार्येष्विमेऽभवन् ॥ नन्दीश्वरगणेशाभ्यां सहितः शंकरो मुने ॥ ४७ ॥ महर्षयो मरीच्याद्याः प्रजेशा नारदो मुनिः ॥ वैनतेयश्च नन्दाद्याः
श्रीदामाद्याश्च पार्षदाः ॥ ४८ ॥ दुर्गा च वेदसूर्वाणी स्त्रीषु मुख्या बभूविरे ॥ ऋषिपत्न्योऽनसूयाद्या धर्मपत्न्यश्च सर्वशः ॥ ४९ ॥ सह वेदादि
भिर्ब्रह्मा त्वासीदुभयपक्षयोः ॥ ब्राह्मणा वैदिका ये च विवाहविधिकोविदाः ॥ ५० ॥ अथाब्धिः सर्वसंभाराञ्छ्रिया एव प्रसादतः ॥ सद्यः संपा
दयामास जनयन्देवविस्मयम् ॥ ५१ ॥ यद्यत्संकल्पयामास हृदि तत्तदुपाहृतम् ॥ सद्यः स्वांतिक एवैक्षत्ततोभूदतिहर्षितः ॥ ५२ ॥ मध्ये तु
मण्डपस्यासावग्निस्थापनवेदिकाम् ॥ कारयामास विधिवद्ब्राह्मणैर्वेदवेदिभिः ॥ ५३ ॥ अलंचकार तां वेदिं गन्धपुष्पाक्षतादिभिः ॥ नाना
विधैः शुभै रङ्गैः साङ्कुरैः करकैस्तथा ॥ ५४ ॥ ततो महामङ्गलवाद्यघोषैः समन्त्रकं संस्नपितो मुनीन्द्रैः ॥ अनर्घ्यवासांसि च रत्नभूषा दधार
विष्णुर्मुकुटं च दिव्यम् ॥ ५५ ॥ वादित्रनिध्वाननिनादिताशं नृत्यत्सुरस्त्रीकलगीतशोभनम् ॥ तं मण्डपं सोऽथ सुरैः स्तुवद्भिः सहेत्य हैमे निषसाद

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ततस्तदाज्ञया सर्वे देवा दैत्याश्च वासुकिः ॥ निषेदुः पंक्तिशस्तत्र स्वस्वमण्डलमाश्रिताः ॥ १६ ॥ पंक्तिबंधोद्यतेष्वेषु मोहिनी सा तु दूरतः ॥
सम्मुखं देवपंक्तीनां हैमासन उपाविशत् ॥१७॥ स्वांतिके चामृतघटं निधाय स्त्रैणलीलया ॥ इतस्ततो वीक्षमाणा तस्थौ निःस्पृहवत्क्षणम् ॥१८॥ विप्र
चित्तिमुखास्तर्हि ये वै दानवयूथपाः ॥ संदिग्धचित्ता मोहिन्यामासन्देवांतिकस्थितेः ॥ १९ ॥ शनैरुपेत्य तद्दृष्टिं वञ्चयित्वा सुधाघटम् ॥ जहुः
पुनर्दुरात्मानो रहो गत्वा पिपासवः ॥ २० ॥ नरनारायणौ तत्र मुनिभिः सह चागतौ ॥ आस्तां तौ ददृशाते तान्दानवान्हरतोऽमृतम् ॥ २१ ॥
नारायणेनेरितोऽथ नरस्तान्सहसारुणत् ॥ बलादाच्छिद्य तत्कुम्भं मोहिन्यै स ददौ द्रुतम् ॥ २२ ॥ ततो नरं हन्तुकामा आत्तशस्त्रास्तु दानवाः ॥
आपतन्पंक्तिविक्षेपो ह्यसुराणामभून्महान् ॥ २३ ॥ तदा नरोपि भगवान्देवदैत्यनरैरपि ॥ अजेयो निर्भयो ह्येकः साकं तैर्युयुधे बली ॥ २४ ॥
एतस्मिन्नन्तरे देवान्पंक्तिस्थान्मोहिनीवपुः ॥ अपाययत्सुधां विष्णुः सर्वशो लघुचङ्क्रमः ॥ २५ ॥ तत्रापि दानवो राहुः सूर्याचन्द्रमसा
न्तरे ॥ प्रविश्य देवतापंक्तावुपाविशदलक्षितः ॥ २६ ॥ तत्रागतायां मोहिन्यां सिञ्चन्त्यां तन्मुखे सुधाम् ॥ दृशाऽसूसुचतां तस्यै पुष्पवन्ता
वुभौ च तम् ॥ २७ ॥ स्मृत्यागतेन चक्रेण तर्ह्येवाऽस्य च साम्प्रतम् ॥ शिरश्चिच्छेदातिमहन्मायायोषिद्वपुः प्रभुः ॥ २८ ॥ तच्छैलशृङ्गप्रतिमं
ग्रसल्लोकान्नदद्भृशम् ॥ ग्रहत्वे स्थापयामास लोकानां शान्तये हरिः ॥ २९ ॥ देवान्सुधां पाययित्वा जगृहे पौरुषीं तनुम् ॥ भगवानथ देवास्तु
युयुधुः सह दानवैः ॥ ३० ॥ उदन्वतस्तटे युद्धं देवानामसुरैः सह ॥ सुधापानातिबलिनामासीद्विष्णुसहायिनाम् ॥ ३१ ॥ तस्मिंस्तु तुमुले
युद्धे नरेणेन्द्रादिभिश्च ते ॥ निहन्यमाना असुराः पलाय्य विविशू रसाम् ॥ ३२ ॥ सूर्यश्चास्तं गतस्तावत्सर्वे देवगणास्ततः ॥ श्रियोन्तिकमु
पाजग्मुस्तद्दर्शनमहोत्सवाः ॥ ३३ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे श्रीवासुदेवमाहात्म्ये
देवतामृतपानवर्णनं नाम त्रयोदशोऽध्यायः ॥१३॥ ॥ स्कन्द उवाच ॥ ब्रह्मा प्रजेश्वराः शम्भुर्मनवश्च महर्षयः ॥ आदित्यवसुरुद्राश्च सिद्धगन्ध
र्वचारणाः ॥ १ ॥ साध्याश्च मरुतश्चैव विश्वेदेवा दिगीश्वराः ॥ दस्रौ वह्निश्चन्द्रमाश्च स्वयं धर्मः प्रजापतिः ॥ २ ॥ सुपर्णाः किन्नराश्चैव ये चान्ये
गणदेवताः ॥ शेषाद्या वैष्णवा नागा देवपत्न्यश्च सर्वशः ॥ ३ ॥ सावित्री पार्वती चैव पृथिवी च सरस्वती ॥ शची गौरी शिवा संज्ञा ऋद्धिः
स्वाहा च रोहिणी ॥ धूमोर्णा चादितिर्द्धर्मपत्न्यो मूर्तिदयादयः ॥ ४ ॥ अरुन्धती शाण्डिली च लोपामुद्रा तथैव च ॥ अनसूयादयः
साध्व्य ऋषिपत्न्यश्च सर्वशः ॥ ५ ॥ गङ्गा सरस्वती रेवा यमुना तपती तथा ॥ चन्द्रभागा विपाशा च शतद्रुर्देविका तथा ॥ ६ ॥ गोदावरी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पुनरब्धेर्मथ्यमानादधिकं बलिभिश्च तैः ॥ सुधार्थिभिर्दैत्यैर्वद्भिरपि नैवाभवत्सुधा ॥ २२ ॥ तदा शिथिलयत्नास्ते निराशा अमृतो द्भवे ॥ प्रम्लानवक्त्राः खिन्नाश्च बभूवुः काश्यपा मुने ॥ २३ ॥ दृष्ट्वा तथाविधांस्तांश्च भगवान्करुणानिधिः ॥ उद्युक्तोभूत्स्वयं ब्रह्मन्मन्थनाय हस न्विभुः ॥ २४ ॥ रत्नकाञ्चीदृढाबद्धकक्षपीताम्बरद्युतिः ॥ द्वाभ्यां द्वाभ्यामहिं मध्ये दोर्भ्यामुभयतोग्रहीत् ॥ २५ ॥ धृताहिवदना दैत्यास्तस्थु रेकत एव ते ॥ एकतो धृततत्पुच्छा देवास्तस्थुस्तदाखिलाः ॥ २६ ॥ तन्मध्यगश्च भगवान्ममन्थाब्धिं स लीलया ॥ ददानो नयनानन्दं चञ्चत्करविभूषणः ॥ २७ ॥ ब्रह्मा सहर्षिप्रवरैरन्तरिक्षस्थितस्तदा ॥ अवाकिरत्तं कुसुमैः कुर्वञ्जयजयध्वनिम् ॥ २८ ॥ मथ्यमानात्ततः सिन्धो र्जज्ञे धन्वन्तरिः पुमान् ॥ विष्णोरंशेन गौरांगः सुधाकुम्भं करे दधत् ॥ २९ ॥ घृतादीनां हि सर्वेषां रसानां सारमुत्तमम् ॥ अमृतं तद्गृही त्वाऽसौ श्रियोन्तिकमुपाययौ ॥ ३० ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे श्रीवासुदेवमा हात्म्येऽमृतमन्थने चतुर्दशरत्नोत्पत्तिर्नाम द्वादशोऽध्यायः ॥ १२ ॥ ॥ स्कन्द उवाच ॥ उत्प्रेक्षन्तो जायमानं मंथितारोऽथ तेऽखिलाः ॥ आयांतं ददृशुर्दूरादन्ति धन्वन्तरिं श्रियः ॥ १ ॥ सुधाभृतं हेमकुम्भं दृष्ट्वा चाऽस्य करे धृतम् ॥ असुराः सहसा ब्रह्मन्नुत्प्लुत्य जगृहुश्च तम् ॥२॥ तत्रापि बलिनो ये ते गृहीत्वा दुद्रुवुस्ततः ॥ तान्दुर्बला न्यषेधन्त नीतिवाक्यैरनुद्रुताः ॥ ३ ॥ अहो नैवमधर्मो वः कार्यो धर्मपरायणैः ॥ सम श्रमेभ्यो देवेभ्यो दत्त्वा पेयं न चान्यथा ॥४॥ अनादृत्येति तद्वाक्यं ययुर्दूरं त्वरान्विताः ॥ तत्रापि तेषामन्योन्यं कराकृष्टिर्महत्यभूत् ॥ ५ ॥ अहं पूर्वमहं पूर्वं न त्वं न त्वं पिबाम्यहम् ॥ इत्थं विवदमानास्ते नापुस्तत्प्राशनक्षणम् ॥ ६ ॥ अथ देवा म्लानवक्त्रा दृष्ट्वा दैत्यैर्हृतां सुधाम् ॥ अश क्तास्तत्प्रतीकारे शरणं प्रापुरच्युतम् ॥ ७ ॥ पाहिपाहि जगन्नाथ नष्टं सर्वस्वमेव नः ॥ दैत्यैर्हृता सुधा सर्वा का गतिर्नो भविष्यति ॥८॥ सुधा पानाद्दृतेप्येते हन्तुमस्मानलं क्षमाः ॥ पीतेऽमृते तु तैरद्य किं करिष्यामहे वयम् ॥ ९ ॥ स्कन्द उवाच ॥ निशम्य दैन्यं देवानां भगवान्भ क्तकार्यकृत् ॥ मा भैष्टेति सुरानुक्त्वा सुधामादित्सदासुरात् ॥ १० ॥ स्त्रीरूपमद्भुतं धृत्वा सर्वलोकविमोहनम् ॥ दैत्यान्तिकमुपागत्य चक्रे कन्दुकखेलनम् ॥ ११ ॥ ते तु तद्रूपमालोक्य मोहिताः कामविह्वलाः ॥ त्यक्त्वा परस्परोन्मर्दं तामुपेत्याब्रुवन्वचः ॥ १२ ॥ सुधाकुम्भमिमं भद्रे गृहीत्वा त्वं विभज्य नः ॥ सर्वान्पायय सुश्रोणि वयं कश्यपसूनवः ॥ १३ ॥ इत्युक्ता तं ददुस्तस्यै तेऽनिच्छन्त्या अपि स्त्रियै ॥ सा प्राह मम विश्रम्भो न कार्यः स्वैरिणी ह्यहम् ॥१४॥ अकार्यं वः कृतं ह्येतद्विभजिष्ये निजेच्छया ॥ इत्युक्ता अपि ते मूढा यथेष्टं कुर्विति ब्रुवन् ॥१५॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सुधाभागप्रतिज्ञया ॥ १२ ॥ स तत्रागादथो सर्वे तेऽब्धिं मन्थितुमुद्यताः ॥ तानपान्निधिरागत्य मूर्त्तिमानब्रवीद्वचः ॥ १३ ॥ यदि दास्यथ मे यूयममृतांशं सुरासुराः ॥ सोढास्मि विपुलं तर्हि मन्दरभ्रमणार्दनम् ॥ १४ ॥ तथेति ते प्रतिज्ञाय क्षिप्त्वादावोषधीलताः ॥ परिविव्युर्न्नागराजं तस्मिन्काञ्चनपर्वते ॥ १५ ॥ ततो देवा हृदि हरिं सस्मरुः कार्यसिद्धये ॥ स्मृतमात्रः स तत्राऽगादच्युतः सर्वदर्शनः ॥ १६ ॥ तमालो श्यामरगणा मुदिताः फणिनां पतेः ॥ पुरोभागं गृहीत्वैव तस्थुस्तेनानुमोदिताः ॥ १७ ॥ देवतापक्षपातित्वं सूचयन्स्वस्य च प्रभुः ॥ यत्र देवा स्तत्र तस्थौ ततो दैत्यास्तु चुक्रुधुः ॥ १८ ॥ तपोविद्यावयोज्येष्ठा अधोभागममङ्गलम् ॥ कथं तिरश्चो गृह्णीमो नेदृङ्मूर्खा वयं त्विति ॥ १९ ॥ सह देवैस्ततो विष्णुः स्वयं तान्मानयन्निव ॥ प्रहस्य दत्त्वा प्राग्भागं सुरान्पुच्छमजिग्रहत् ॥ २० ॥ महाहिविषफूत्कारदाहादमररक्षणम् ॥ चरित्रमेतच्छ्रीभर्तुरिति दैत्या न ते विदुः ॥ २१ ॥ तत उत्तोलयामासुः स्वर्णसान्वालिभास्वरम् ॥ मन्दरं काश्यपेयास्ते चर्मिका बद्धकच्छकाः ॥ २२ ॥ द्वाविंशतिसहस्राणि योजनानां तमुच्छ्रितम् ॥ अम्भोनिधौ निदधिरे क्रोशन्तोत्यर्थमुत्सुकाः ॥ २३ ॥ धार्यमाणोप्यनाधारस्तैरद्रिरतिगौरवात् ॥ ययावधस्तलं सद्यस्तदासंस्तेऽतिविह्वलाः ॥ २४ ॥ तदा स भगवान्साक्षात्सर्वथा भक्तकार्यकृत् ॥ स्तूयमानो मरैरद्रिमुदद्ग्रे कमठाकृतिः ॥ २५ ॥ उत्थितं तमवेक्ष्याशु सर्वे फुल्लहृदाननाः ॥ बभूवुश्च स्थिरः सोऽभूत्कूर्मपृष्ठेतिविस्तृते ॥ २६ ॥ ततो ममन्थुस्तरसा यावद्बलमपांनिधिम् ॥ श्रमफूत्कारवदना देवादयोऽदयम् ॥ २७ ॥ भ्राम्यमाणात्ततस्त्वद्रेर्बहवोन्यपतन्द्रुमाः॥ऊर्द्ध्वद्रुघर्षजो वह्निस्ततस्थसिंहादिमादहत् ॥ २८ ॥ तत्र नाना जलचरा विनिष्पिष्टा महाद्रिणा ॥ विलयं समुपाजग्मुः शतशः क्षीरवारिधौ ॥ २९ ॥ सांवर्त्तकमहामेघसङ्घगर्ज्जितवन्महान् ॥ आसीन्मंथननादश्च प्रतिध्वनिविवर्द्धितः ॥ ३० ॥ अत्याकर्षणखिन्नाङ्गवासुकेर्म्मुखफूत्कृतैः ॥ हतौजसोऽतिखिन्नाश्च दैत्या निष्क्रालवद्बभुः ॥ ३१ ॥ अविषह्यं विषाग्निं च मर्षन्ति बहुधा मुहुः ॥ लम्बन्ते स्माहिराजस्य सहस्रं वदनान्यधः ॥ ३२ ॥ दधार सहसा तानि भगवत्प्रेरितो विभुः ॥ संकर्षणो महातेजाः सहमानो विषानलम् ॥ ३३ ॥ सहस्रमेकं वर्षाणां मथ्यमानात्पयोनिधेः ॥ हालाहलं विषमभूदुत्सर्पद्विदिशो दिशः ॥ ३४ ॥ यदाहुः कालकूटाख्यं सर्वलोकातिदाहकम् ॥ तेन दन्दह्यमानाङ्गास्ते तु चक्रुः पलायनम् ॥ ३५ ॥ ततो ब्रह्मा प्रजेशाश्च देवाः सर्वेप्युमापतिम् ॥ प्रार्थयंस्तस्य पानार्थं स्तुवन्तः स्तुतिभिर्मुने ॥३६॥ भगवानथ तं प्राह सुराणामग्रजो भवान् ॥ भवतीत्यग्रजं वार्द्धेर्गृहाणेदं विषं शिव ॥ ३७ ॥ देवानां स भयं दृष्ट्वा करुणश्चाज्ञया हरेः ॥ आकर्षद्योगकलया विषं पाणितलेऽखिलम् ॥ ३८ ॥ पपौ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्कण्ठमध्ये च शोषयामास तत्क्षणम् ॥ नीलकण्ठ इति ख्यातः शंकराख्यश्च सोऽभवत् ॥ ३९ ॥ पास्यतस्तस्य पाणेर्ये पतिता भुवि
बिन्दवः ॥ तान्नागा वृश्चिकाद्याश्च जगृहुः काश्चनौषधीः ॥ ४० ॥ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां
द्वितीये वैष्णवखण्डे श्रीवासुदेवमाहात्म्येऽमृतमन्थने विषोत्पत्तिर्नामैकादशोऽध्यायः ॥ ११ ॥ ॥ स्कन्द उवाच ॥ ततो हृष्टाः
काश्यपेया मन्थस्थानमुपेत्य ते ॥ पुनर्वर्षसहस्रं च मन्थन्ति स्म पयोनिधिम् ॥ १ ॥ मथ्यमानात्तथा सिन्धोः सर्वैस्तैरपि किञ्चन ॥ नासीच्च
शिथिला आसन्मंथितारः श्वसन्मुखाः ॥ २ ॥ वासुकिश्च महासर्पः प्राणवैक्लव्यमाप्तवान् ॥ मन्थकाले मन्दरोपि नैकत्रासीत्स्थिरस्थितिः ॥ ३॥
सर्वान्दृष्ट्वा निरुत्साहान्प्रद्युम्नो विष्णवनुज्ञया ॥ देवासुराहिराजेषु प्रविश्य बलमादधौ ॥ ४ ॥ अनिरुद्धोपि तत्रैव तमाक्रम्य नगाधिपम् ॥ सह
स्रबाहुभिस्तस्थौ महाचल इवाऽपरः ॥ ५ ॥ ततो ममन्थुस्तरसा संप्राप्तपरमौजसः ॥ सविस्मया महाब्धिं ते सुरासुरगणा मुदा ॥ ६ ॥ नारा
यणानुभावेन नापुर्देवादयः श्रमम् ॥ शुशुभे मन्थनं तच्च सममाकर्षणात्तदा ॥ ७ ॥ मथ्यमाने महाम्भोधौ सुस्रुवुः परितस्तदा ॥ महाद्रु
माणां निर्यासा बहवश्चौषधीरसाः ॥ ८ ॥ तथाभूतादम्बुनिधेराविरासीत्कलानिधिः ॥ कान्त्यौषधीनामध्यक्षः सर्वासां य उदीर्यते ॥ ९ ॥ ततो
गवामधिष्ठात्री सर्वासामपि कामधुक् ॥ हविर्द्धान्यभवद्धेनुः शीतांशुसदृशद्युतिः ॥ १० ॥ अश्वः श्वेतोऽथाविरासीद्धयानामधिदेवता ॥ ऐरावतश्च
नागेन्द्रश्चतुर्दन्तः शशिप्रभः ॥ ११ ॥ पारिजातो दिव्यतरुस्तरुराजस्ततोऽभवत् ॥ मणिरत्नं कौस्तुभाख्यं पद्मरागमभूत्ततः ॥ १२ ॥ ततोऽभव
न्नप्सरसो रूपलावण्यभूमयः ॥ सुरा देवी ततो जज्ञे सर्वमादकदेवता ॥ १३ ॥ आसीदथ धनुः शार्ङ्गं सर्वशस्त्राधिदैवतम् ॥ वाद्याधिदैवतं शंखः
पाञ्चजन्यस्ततोऽभवत् ॥ १४ ॥ तत्र चन्द्रः पारिजातस्तथैवाप्सरसां गणः ॥ आदित्यपथमाश्रित्य तस्थुरेते तु तत्क्षणम् ॥ १५ ॥ वारुणी
मश्वराजं च दैत्येशा जगृहुर्द्रुतम् ॥ ऐरावतं देवराजो जग्राहानुमताद्धरेः ॥ १६ ॥ कौस्तुभश्च धनुः शंखो विष्णुमेव प्रपेदिरे ॥ हविर्द्धानीं तु
ते सर्वे तापसेभ्यो ददुस्तदा ॥ १७ ॥ मथ्यमानात्पुनः सिन्धोः साक्षाच्छ्रीरभवत्स्वयम् ॥ आनन्दयन्ती स्वदृशा त्रिलोकीं हतवर्चसम् ॥ १८ ॥
तां ग्रहीतुं तु सर्वेपि सुरासुरनरादयः ॥ ऐच्छंस्तस्याः प्रतापात्तु शेकेन्त्येतुं न कश्चन ॥ १९ ॥ ततस्तां पद्महस्तत्वाच्छ्रीं विदित्वैव वासवः ॥
आनन्दं परमं प्राप ब्रह्माद्या ये च तद्विदः ॥ २० ॥ तावत्तत्राम्बुधिः साक्षादेत्य तां हैम आसने ॥ कन्या ममेयमित्युक्त्वा गृहीत्वाङ्क उपाविशत् ॥ २१ ॥

१ अन्ति--समीपे, एतुं--गन्तुम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लमध्यस्थदिव्यसुन्दरमूर्तये ॥ नमामो विष्णवे तुभ्यं परात्परतराय च॥२९॥वाणीमनोविप्रकृष्टमहिम्नेऽक्षररूपिणे ॥ सर्वान्तर्यामिणे तुभ्यं बृहते च नमोनमः ॥ ३० ॥ सुखदोसि त्वमेवैकः स्वाश्रितानामतो वयम् ॥ महापदधिकक्लिष्टाः शरणं त्वामुपागताः ॥ ३१ ॥ देवाधिदेवभक्तस्य तव दुर्वाससो वयम् ॥ अतिक्रमाच्छ्रिया हीनाः प्राप्ताः स्मो दुर्दशामिमाम् ॥ ३२ ॥ वासोन्नपानस्थानादिहीनान्धर्मोपि नः प्रभो ॥ त्यक्त्वा सह श्रिया यातस्तान्पातुं त्वमसीश्वरः ॥ ३३ ॥ यतो वयं च धर्मश्च त्वदीया इति विश्रुताः ॥ यथापूर्वं सुखीकर्त्तुं त्वमेवार्हस्यतो हि नः ॥ ३४ ॥ स्कन्द उवाच ॥ इति संप्रार्थितो देवैर्भगवान्स दयानिधिः ॥ उवाचानन्दयन्वाचा मेघगम्भीरया सुरान् ॥ ३५ ॥ श्रीभगवानुवाच ॥ विदितं मे सुराः सर्वं कष्टं वः सदतिक्रमात् ॥ उपायं कुरुताद्यैव वच्मि यत्तन्निवृत्तये ॥ ३६ ॥ ओषधीरम्बुधौ सर्वाः क्षिप्त्वा मन्दरभूभृता ॥ नागराजवरत्रेण मंथध्वमसुरैः सह ॥ ३७ ॥ आदौ संधाय दनुजैः कुरुताम्बुधिमन्थनम् ॥ साहाय्यं वः करिष्यामि खेदः कार्यो न तत्र वः ॥ ३८ ॥ अमृतं च श्रियो दृष्टिं प्राप्य पूर्वाधिकौजसः ॥ भवितारो मद्भिमुखा दैत्यास्तु क्लेशभागिनः ॥ ३९ ॥ स्कन्द उवाच ॥ इत्युक्त्वांतर्दधे विष्णुर्भक्तसङ्कटनाशनः ॥ देवास्तस्मै नमस्कृत्य तदुक्तं कर्तुमारभन् ॥ ४० ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे श्रीवासुदेवमाहात्म्ये श्रीवासुदेवप्रसादनिरूपणं नाम दशमोऽध्यायः ॥१०॥ ॥ स्कन्द उवाच ॥ ब्रह्मरुद्रौ महेन्द्रादीन्संधानायाऽसुरैः सह ॥ आज्ञाप्य जग्मतुः स्वंस्वं धाम देवा रसां मुने ॥ १ ॥ समयोचितभाषाविद्धासवो नीतियुक्तिभिः ॥ प्रलोभ्य फलभागेन सन्धिं चक्रेऽसुरैः सह ॥ २ ॥ ततो देवासुरगणा मिलिता वारिधेस्तटे ॥ महौषधीरुपानीय बहुशो निदधुर्द्रुतम् ॥ ३ ॥ मन्दराद्रिमुपेत्याऽथ नानौषधिविराजितम् ॥ मूलादुत्पाट्य ते सर्वे नेतुमब्धिं समुद्यताः ॥ ४ ॥ एकादशसहस्राणि योजनानां भुवि स्थितम् ॥ नोद्धर्तुमशकंस्ते तं तदानीं तुष्टुवुर्हरिम् ॥ ५ ॥ एतद्विदित्वा भगवान्संकर्षणमहीश्वरम् ॥ अजिज्ञपत्तमुद्धर्तुं बद्धमूलं महीधरम् ॥ ६ ॥ फूत्कारमात्रेणैकेन स तु सद्यस्तमीश्वरः ॥ बहिश्चिक्षेप तत्स्थानाद्योजनद्वितयान्तरे ॥ ७ ॥ अत्याश्चर्यं तदालोक्य हृष्टाः सर्वे सुरासुराः ॥ तदन्तिकमुपाजग्मुर्द्धान्वन्तश्च कृतारवाः ॥ ८ ॥ बलिनो यत्नवन्तोपि परिघोपमबाहवः ॥ उद्धृत्य नेतुं नो शेकुर्विषण्णा विफलश्रमाः ॥ ९ ॥ ज्ञात्वा सुरगणान्खिन्नान्भगवान्सर्वदर्शनः ॥ तार्क्ष्यमाज्ञापयामास नेतुं तमुदधिं द्रुतम् ॥ १० ॥ सहावरणमप्यण्डं लीलया धर्त्तुमीश्वरः ॥ मनोवेगः स तत्रेत्य निजत्रोटचैव तं गिरिम् ॥ उत्पाट्य सागरतटे निधाय हरिमाययौ ॥ ११ ॥ ततः संहृष्टमनसः सर्वे कश्यपनन्दनाः ॥ वासुकिं चाह्वयामासुः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वस्त्राश्च पशुपक्ष्यामिषाशनाः ॥ देवा दैत्या नरा नागास्तुल्याचारपरिच्छदाः ॥४॥ पात्राणि मृन्मयान्येव सर्वेषामपि वेश्मसु ॥ आसन्वराकाः सर्वेपि पिशाच्य इव च स्त्रियः ॥ ५ ॥ आदावभूदनावृष्टिर्भुवि द्वादशवार्षिकी ॥ ततो वर्षे क्वचिद्वृष्टिरासीत्स्वल्पा क्वचिन्न च ॥ ६ ॥ इत्थं दारिद्र्य दुःखानां तेषां वर्षशतं गतम् ॥ बलिष्ठारब्धकर्माणस्तेऽतिदुःखेपि नो मृताः ॥ ७ ॥ अजीवन्त मृतप्राया नरकेष्विव नारकाः ॥ यतन्तोपि श्रियः प्राप्त्यै यज्ञाद्यैर्नाऽलभन्त ताम् ॥ ८ ॥ ततः सहस्रवर्षान्ते मेरौ शरणमाययुः ॥ शापाद्दुर्वाससो देवाः सर्वे दुर्वाससो विधिम् ॥ ९ ॥ प्रणम्य तस्मै दुःखं स्वं वासवाद्या न्यवेदयन् ॥ आदावेव हि सोऽज्ञासीत्सर्वज्ञत्वात्सुरापदम् ॥ १० ॥ उपालभ्य ततश्चेन्द्रं विरिञ्चः सहशंकरः ॥ तद्दुःखवारणा कल्पो विष्णुमैच्छत्प्रसादितुम् ॥ ११ ॥ आराधयिष्यंस्तपसा ततोऽसौ तं तपःप्रियम् ॥ सर्वदेवगणोपेत उपायात्क्षीरसागरम् ॥ १२ ॥ तस्योत्तरे तटे रम्ये सर्वे तेऽनशनव्रताः ॥ एकपादस्थिता ऊर्द्ध्वबाहवश्चक्रिरे तपः ॥ १३ ॥ केशवं हृदि ते दध्युः सर्वक्लेशविनाशनम् ॥ लक्ष्मी पतिं वासुदेवमेकाग्रकृतमानसाः ॥ १४ ॥ शताब्दान्ते ततो विष्णुः श्रीकृष्णो भगवान्स्वयम् ॥ अत्यापन्नेषु दीनेषु कृपां देवेषु सोऽकरोत् ॥ ॥ १५ ॥ अदृश्यमूर्तिरात्मज्ञैरपि भूरितपस्विभिः ॥ तत्राविरासीत्कृपया नियुताहस्करद्युतिः ॥ १६ ॥ तेजोमण्डलमेवादौ सहसा स्फुरितं महत् ॥ ददृशुर्विबुधाः[1] सर्वे सितं घनमनौपमम् ॥ १७ ॥ ब्रह्मा शिवश्च तन्मध्ये ददृशाते रमापतिम् ॥ घनश्यामं चतुर्बाहुं गदा[3]ब्जाब्जारिधारिणम् ॥ १८ ॥ किरीटकाञ्चीकटककुण्डलादिविभूषितम् ॥ पीतकौशेयवसनं दिव्यसुन्दरविग्रहम् ॥ १९ ॥ हर्षविह्वलितात्मानौ दण्डवत्तौ प्रणेमतुः ॥ तदिच्छयाऽथ देवाश्च दृष्ट्वा तं च मुदाऽऽनमन् ॥ २० ॥ बभूवुरतिहृष्टास्ते निधिं प्राप्याऽधना[2] इव ॥ बद्धाञ्जलिपुटाः सर्वे भक्त्या तं तुष्टुवुः सुराः ॥ २१ ॥ देवा ऊचुः ॥ ॐनमो भगवते तुभ्यं वासुदेवाय धीमहि ॥ प्रद्युम्नायानिरुद्धाय नमः संकर्षणाय च ॥ २२ ॥ ॐकारब्रह्मरूपाय त्रेधाविष्कृतमूर्तये ॥ ब्रह्माण्डसर्गस्थित्यन्तहेतवे निर्गुणाय च ॥ २३ ॥ नयनानन्दरूपाय प्रणतक्लेश नाशिने ॥ केशवाय नमस्तुभ्यं स्वतंत्रेश्वरमूर्तये ॥ २४ ॥ मोदिताशेषभक्ताय कालमायादिमोहिने ॥ सदानंदाय कृष्णाय नमः सद्धर्मवर्त्तिने॥ ॥ २५ ॥ भवाम्बुधिनिमग्नानामुद्धृतिक्षमकीर्तये ॥ दर्शनीयस्वरूपाय घनश्यामाय ते नमः ॥ २६ ॥ गदाब्जदरचक्राणि बिभ्रते दीर्घबाहुभिः ॥ सुरगोविप्रधर्माणां गोप्त्रे तुभ्यं नमोनमः ॥ २७ ॥ वरेण्याय प्रपन्नानामभीष्टवरदायिने ॥ निगमागमवेद्याय वेदगर्भाय ते नमः ॥२८ ॥ तेजोमण्ड

१ देवा इत्यर्थः । २ सुवर्णहीना इत्यर्थः । ३ अत्रैकोऽब्जशब्दः कमलपरो द्वितीयः शंखपरः । अरि चक्रम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कुरुत भो द्विजाः ॥ १४ ॥ या वेदविहिता हिंसा न सा हिंसास्ति दोषदा ॥ उद्दिश्य देवान्पितॄंश्च ततो घ्नत पशूञ्छुभान् ॥ १५ ॥ प्रोक्षितं देवताभ्यश्च पितृभ्यश्च निवेदितम् ॥ भुञ्जत स्वेप्सितं मांसं स्वार्थं तु घ्नत मा पशून् ॥१६॥ ततो देवर्षिभूपाला नराश्च स्वस्वशक्तितः ॥ चक्रुस्तैर्बोधिता यज्ञानृते ह्येकान्तिकान्हरेः॥१७॥गोमेधमश्वमेधं च नरमेधमुखान्मखान् ॥ चक्रुर्यज्ञावशिष्टानि मांसानि बुभुजुश्च ते॥१८॥विनष्टायाः श्रियः प्राप्त्यै केचिद्यज्ञांश्च चक्रिरे॥ स्त्रीपुत्रमंदिराद्यर्थं केचिच्च स्वीयवृत्तये॥१९॥महायज्ञेष्वशक्तास्तु पितॄनुद्दिश्य भूरिशः॥ निहत्य श्राद्धेषु पशून्मांसान्यादंस्तथाऽऽदयन् ॥ २० ॥ केचित्सरित्समुद्राणां तीरेष्वेवावसञ्जनाः ॥ मत्स्याञ्जालैरुपादाय तदाहारा बभूविरे ॥२१॥ स्वगृहागतशिष्टेभ्यः पशूनेव निहत्य च ॥ निवेदयामासुरेते गोच्छागप्रमुखान्मुने ॥ २२ ॥ सजातीयविवाहानां नियमश्च तदा क्वचित् ॥ नाभवद्धर्मसांकर्याद्वित्तवेश्माद्यभावतः ॥२३॥ ब्राह्मणाः क्षत्रियादीनां क्षत्राद्या ब्रह्मणां सुताः ॥ उपयेमिरे कालगत्या स्वस्ववंशविवृद्धये ॥ २४ ॥ इत्थं हिंसामया यज्ञाः संप्रवृत्ता महापदि ॥ धर्मस्त्वाभासमात्रोऽस्थात्स्वयं तु श्रियमन्वगात् ॥ २५ ॥ अधर्मः सान्वयो लोकांस्त्रीनपि व्याप्य सर्वतः ॥ अवर्द्धताऽल्पकालेन दुर्निवार्यो बुधैरपि ॥ २६ ॥ दरिद्राणामथैतेषामपत्यानि तु भूरिशः ॥ तेषां च वंशविस्तारो महाँल्लोकेष्ववर्द्धत ॥ २७ ॥ विद्वांसस्तत्र ये जातास्ते तु धर्मं तमेव हि ॥ मेनिरे मुख्यमेवाऽथ ग्रन्थांश्चक्रुश्च तादृशान् ॥ २८ ॥ ते परम्परया ग्रन्थाः प्रामाण्यं प्रतिपेदिरे ॥ आद्ये त्रेतायुगे हीत्थमासीद्धर्मस्य विप्लवः ॥ २९ ॥ ततःप्रभृति लोकेषु यज्ञादौ पशुहिंसनम् ॥ बभूव सत्ये तु युगे धर्म आसीत्सनातनः ॥ ३० ॥ कालेन महता सोपि सह देवैः सुराधिपः ॥ आराध्य संपदं प्राप वासुदेवं प्रभुं मुने ॥ ३१ ॥ ततो धर्मनिकेतस्य श्रीपतेः कृपया हरेः ॥ यथापूर्वं च सद्धर्मस्त्रिलोक्यां संप्रवर्त्तत ॥ ३२ ॥ तत्रापि केचिन्मुनयो नृपा देवाश्च मानुषाः ॥ कामक्रोधरसास्वादलोभोपहतसद्धियः ॥ तमापद्धर्ममद्यापि प्राधान्येनैव मन्वते ॥ ३३ ॥ एकान्तिनो भागवता जितकामादयस्तु ये ॥ आपद्यपि न तेऽगृह्णंस्तं तदा किमुताऽन्यदा ॥ ३४ ॥ इत्थं ब्रह्मन्नादिकल्पे हिंस्रयज्ञप्रवर्त्तनम् ॥ यथासीत्तन्मयाख्यातमापत्कालवशाद्भुवि ॥ ३५ ॥ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे श्रीवासुदेवमाहात्म्ये हिंस्रयज्ञप्रवृत्तिहेतुनिरूपणं नाम नवमोऽध्यायः ॥ ९ ॥ सावर्णिरुवाच ॥ कथं प्राप्ता पुनः स्कन्द श्रीरिन्द्रेण गताम्बुधिम् ॥ एतां कथय मे सर्वां कथां नारायणाश्रयाम् ॥ १ ॥ स्कन्द उवाच ॥ श्रिया विहीनो देवेन्द्रः श्रीहीनैरपि दानवैः ॥ पराजितो हृतस्थानो नष्टाशेषपरिच्छदः ॥ २ ॥ गिरिगह्वरकुञ्जेषु काननेषु ततस्ततः ॥ परिबभ्राम सहितो दिगीशैर्वरुणादिभिः ॥ ३ ॥ वल्कलाजिन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भूमौ तां च गच्छन्करी पदा ॥ ममर्द पश्यतस्तस्य महर्षेस्तपसां निधेः ॥ २२ ॥ ततः क्रुद्धः स दुर्वासाः प्रलयाग्न्यरुणेक्षणः ॥ प्राहेन्द्रं मत्त
दुष्टात्मन्स्तब्धोसि कामलम्पट ॥ २३ ॥ श्रियो धाम स्रजं प्रीत्या मद्दत्तां नाभिनन्दसि ॥ प्रणाममपि रे मूढ न करोषि त्वमुन्मदः ॥ २४ ॥
न वीक्षसे मामपि त्वं त्वादृङ्मत्तैकशिक्षकम् ॥ त्रैलोक्यराज्यप्राप्तान्ध्यः सम्यक्त्वां शिक्षयेऽधुना ॥२५॥ यस्याः प्रसादात्त्रैलोक्यराज्यसौख्यं त्वमा
तवान् ॥ सैव श्रीः सत्रिलोकं त्वां हित्वा लीनाऽस्तु सागरे ॥ २६ ॥ वज्रपातोपमं वाक्यं तन्निशम्यैव तत्क्षणम् ॥ गजादुत्प्लुत्य विमदस्तदंघ्र्यो
र्न्यपतद्धरिः ॥ २७ ॥ प्रार्थयामास च मुहुः प्रणमंस्तं सवेपथुः ॥ प्रसादं मयि दासे त्वं कृपालो कर्तुमर्हसि ॥ २८ ॥ तं प्राहाऽथ स रे
शक्र नाहं वै गौतमो मुनिः ॥ अक्षमासारसर्वस्वं दुर्वाससमवेहि माम् ॥ २९ ॥ अन्ये ते मुनयो दुष्टास्तावकास्तेऽनुवर्त्तिनः ॥
अहं तु त्वादृशान्कीटान्गणये नैव निःस्पृहः ॥ ३० ॥ ज्वलज्जटाकलापाच्च भ्रुकुटीकुटिलेक्षणात् ॥ को वा न बिभियान्मत्तो
ब्रह्माण्डे पापकर्मकृत् ॥ ३१ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे श्रीवासुदेवमाहात्म्ये
देवेन्द्रशापो नामाऽष्टमोऽध्यायः ॥ ८ ॥ स्कन्द उवाच ॥ भाविधर्मविपर्यासकालवेगवशोऽथ सः ॥ नाहं क्षमिष्य इत्युक्त्वा कैलासं प्रययौ
मुने ॥ १ ॥ त्रैलोक्याच्छ्रीरपि तदा समुद्रेन्तर्द्धिमाययौ ॥ इन्द्रं विहायाप्सरसः सर्वशः श्रियमन्वयुः ॥ २ ॥ तपः शौचं दया
सत्यं पादः सद्धर्मऋद्धयः ॥ सिद्धयश्च बलं सत्त्वं सर्वतः श्रियमन्वयुः ॥ ३ ॥ गजादीनि च यानानि स्वर्णाद्याभूषणानि च ॥ चिक्षि
पुर्मणिरत्नानि धातूपकरणानि च ॥ ४ ॥ अन्नान्यौषधयः स्नेहाः कालेनाल्पेन चिक्षिपुः ॥ न क्षीरं धेनुमहिषीप्रमुखानां स्तनेष्वऽभूत् ॥ ५ ॥
नवापि निधयो नष्टाः कुबेरस्यापि मन्दिरात् ॥ इन्द्रः सहामरगणैरासीत्तापससन्निभः ॥ ६ ॥ सर्वाणि भोगद्रव्याणि नाशमीयुस्त्रिलोकतः ॥
देवा दैत्या मनुष्याश्च सर्वे दारिद्र्यपीडिताः ॥ ७ ॥ कान्त्या हीनस्ततश्चन्द्रः प्रापाम्बुत्वं महोदधौ॥अनावृष्टिर्महत्यासीद्धान्यबीजक्षयंकरी ॥ ८ ॥
कान्नं कान्नेति जल्पन्तः क्षुत्क्षामाश्च निरोजसः ॥ त्यक्त्वा ग्रामान्पुरश्चोषुर्वनेषु च नगेषु च ॥९॥ क्षुधार्त्तास्ते पशून्हत्वा ग्राम्यानारण्यकांस्तथा ॥
पक्वाऽपक्वापि वा केचित्तेषां मांसान्यभुञ्जत ॥ १० ॥ विद्वांसो मुनयश्चाऽथ ये वै सद्धर्मचारिणः ॥ म्रियमाणाः क्षुधाऽथापि नाश्नन्त पललानि
तु ॥ ११ ॥ तदा तु वृद्धा ऋषयस्तान्दृष्ट्वाऽनशनाहतान् ॥ मनुभिः सह वेदोक्तमापद्धर्ममबोधयन् ॥ १२ ॥ मुनयः प्रायशस्तत्र क्षुधा
व्याकुलितेन्द्रियाः ॥ परोक्षवादवेदार्थान्विपरीतान्प्रपेदिरे ॥ १३ ॥ अर्थं चाजादिशब्दानां मुख्यं छागादिमेव ते ॥ बुभुक्षुश्चाऽथ ते प्राहुर्यज्ञान्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इत्थमेकान्तिकेनैव धर्मेणाराधयन्ति ये ॥ नारायणं परं ब्रह्म श्वेतमुक्ता भवंति ते ॥ ४० ॥ एतत्ते सर्वमाख्यातं पृष्टवान्यद्भवा न्मुने ॥ स्थितिरेकांतभक्तानां श्वेतधाम्नश्च लक्षणम् ॥ ४१ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे श्रीवासुदेवमाहात्म्य उपरिचरवसुमोक्षनिरूपणं नाम सप्तमोऽध्यायः ॥ ७ ॥ सावर्णिरुवाच ॥ महर्षिवारितैर्देवैस्त्यक्ते हिंसामये मखे ॥ पुनः कथं संप्रवृत्ता मखाः सर्वत्र तादृशाः ॥ १ ॥ देवेष्वृषिषु भूपेषु प्राचीनाधुनिकेषु च ॥ सनातनः शुद्धधर्मो विपर्यासं कथं गतः ॥ २ ॥ अत्र मे संशयो भूयान्संजातोऽद्य षडानन ॥ त्वं सर्वशास्त्रतत्त्वज्ञस्तमपाकर्त्तुमर्हसि ॥ ३ ॥ स्कन्द उवाच ॥ कालो बलीयान्ब लिनां भिद्यन्ते तेन बुद्धयः ॥ कामक्रोधरसास्वादलोभमानवतां मुने ॥ ४ ॥ अतिक्रमेण महतां यथार्थहितभाषिणाम् ॥ क्रोधमानवशात्पुंसां नश्यन्त्येव च सद्धियः ॥ ५ ॥ अकार्यमपि ते कर्तुं तदानीं तु बुधा अपि ॥ प्रवर्त्तन्तेऽनुतप्यन्ते बम्भ्रम्यन्तेऽथ संसृतौ ॥ ६ ॥ कामादिभि र्विहीना ये सात्वताः क्षीणवासनाः ॥ तेषां तु बुद्धिभेदाय क्वापि कालो न शक्नुते ॥ ७ ॥ अनाश्रितस्तु सद्धर्मं पुमान्कश्चन कर्हिचित् ॥ संसृतेर्मुच्यते नैव सत्यमेतद्वचो मम ॥ ८ ॥ प्रवृत्तिं हिंस्रयज्ञादेरथ ते द्विजसत्तम ॥ कथयामि यथा पूर्वं मयाऽश्रावि पितुर्मुखात् ॥ ९ ॥ अत्राप्युदाहरन्तीममिति हासं पुरातनम् ॥ नारायणस्य माहात्म्यं यत्र लक्ष्म्याश्च कीर्तितम् ॥ १० ॥ मुनीनां बृहतां तेषामतिक्रमणदोषतः ॥ इन्द्रस्यासीद्विश्वजितः सद्बुद्धिविलयो मुने ॥ ११ ॥ दुर्वासाः शंकरस्यांशस्तपस्वी मुनिरेकदा ॥ चरन्यदृच्छया लोकान्पुष्पभद्रां नदीं ययौ ॥ १२ ॥ जलक्री डार्थमायांतीं स्वर्गात्तत्र सखीवृताम् ॥ विद्याधरस्य सुमतेरङ्गनां स समैक्षत ॥ १३ ॥ स्वर्गङ्गाहेमकमलैर्ग्रथितामतिसौरभाम् ॥ दधतीं दक्षिणे पाणौ स्रजं मदकलाभिधाम् ॥ १४ ॥ तामवेक्ष्य मुनिस्तस्याः समीपमुपगम्य सः ॥ उन्मत्तवद्ययाचे तां स्रजं विद्याधरीधृताम् ॥ ॥ १५ ॥ सापि प्रणम्य तं सद्यो माहात्म्यं तस्य जानती ॥ तत्कंठे धारयामास मालां तां परमादरात् ॥ १६ ॥ ततः प्रीतमना गच्छन्गायन्नुन्मत्तवन्मुनिः ॥ ददर्श पथि देवेन्द्रमायान्तं तां महानदीम् ॥ १७ ॥ अप्सरोभिश्च गन्धर्वैः सतालं मधुरस्वरम् ॥ उपगी यमानविजयमधिरूढं गजाधिपम् ॥ १८ ॥ रम्भामधुरसंगीतश्रवणानन्दनिर्वृतम् ॥ तन्मुखाब्जस्थिरदृशं छत्रचामरशोभितम् ॥ १९ ॥ अनवेक्षमाणमात्मानं तं दृष्ट्वा सोऽत्रिनन्दनः ॥ स्वकण्ठस्थां स्रजं तस्मिंश्चिक्षेपोन्मत्तवद्धसन् ॥ २० ॥ इन्द्रोप्यधर्मसर्गेण समा विष्टः पुरैव यत् ॥ ततस्तदा कामवशस्तां न्यधाद्गजकुम्भयोः ॥ तत्सौरभाकृष्टचेताः करीन्द्रः शुण्डयाऽकृषत् ॥ २१ ॥ करात्सा पतिता

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ष्वात्ताभिधानानाममूर्त्तानां महात्मनाम् ॥ १५ ॥ अमूर्त्तत्वात्पितॄन्स्वान्सा न जानन्ती शुचिस्मिता ॥ तं वसुं पितरं मेने स च तामात्मजा
मिव ॥ १६ ॥ तौ ततः पितरः शेपुर्भावं दृष्ट्वेदृशं तयोः ॥ कन्ये त्वमस्य नृपतेर्भुवि कन्या भविष्यसि ॥ १७ ॥ वसो त्वं
मानुषो भूत्वा सुतामेनां स्वयोषिति ॥ अस्यामेवाप्सरायां त्वं जनयिष्यसि निश्चितम् ॥ १८ ॥ इत्थं तौ पितृभिः शप्तौ शापमो
क्षाय तांस्ततः ॥ प्रार्थयामासतुर्नत्वा तदोचुस्ते कृपालवः ॥ १९ ॥ अवश्यमित्थं भावित्वाद्युवाभ्यामुपलम्भितः ॥ शापोऽयं तत्र
युवयोः श्रेय एव भविष्यति ॥ २० ॥ अष्टाविंशे द्वापरे तु वसो त्वं भुवि भूपतेः ॥ कृतयज्ञस्य तनयो भवितासि महात्मनः ॥ २१ ॥ तत्रापि
च यथेदानीं तथा त्वं सकलैर्गुणैः ॥ जुष्टश्च खचरो भाव्यो महाभागवताग्रणीः ॥ २२ ॥ पञ्चरात्रोक्तविधिना विष्णुमभ्यर्च्य भक्तितः ॥ तच्छे
षेण सुरांश्चास्मानर्चयिष्यसि सप्रजः ॥ २३ ॥ ततस्त्वं दिव्यदेहेन स्वर्गलोकमवाप्स्यसि ॥ दिव्यान्भोगांस्तत्र भुक्त्वा प्राप्स्यसे वैष्णवं पदम् ॥
॥ २४ ॥ अच्छोदे त्वमपि क्षोण्यां नाम्ना कालीति विश्रुता ॥ स्वांशेन मत्स्यदेहायामद्रिकायां जनिष्यसे ॥ २५ ॥ पराशरात्तत्र सुतं कन्यैव
प्राप्स्यसे हरिम् ॥ प्रसादादेव तस्य त्वं भुक्तिं मुक्तिं च लप्स्यसे ॥ २६ ॥ स्कन्द उवाच ॥ इत्थं स पितृभिः शप्तोऽनुगृहीतश्च भूपतिः ॥ कृतयज्ञा
दिह जनिं प्राप्याऽभूद्विश्रुतो गुणैः ॥ २७ ॥ यथा पूर्वं कृष्णभक्तो दैवपित्र्यविधानवित् ॥ सख्ये तस्मै महेन्द्रश्च प्रादात्प्रचुरसंपदः ॥ २८ ॥
श्वेतद्वीपे वासुदेवात्प्राप्तो यो विजयध्वजः ॥ पुरा स्वेनारिनाशार्थं तस्मा इन्द्रस्तमप्यदात् ॥२९॥ अन्तरिक्षगती राजा भौमान्भोगान्सुदुर्लभान् ॥
भुक्त्वान्ते स्वर्गलोकं च दिव्यदेहेन लब्धवान् ॥ ३० ॥ प्राक्पुण्यशेषस्य फलं भुञ्जन्स्वमनसेप्सितान् ॥ तत्र भोगान्बहुविधांस्तीव्रं वैराग्य
मातवान् ॥ ३१ ॥ मेरोः शृङ्गेऽथ विजने शुचिः कृतदृढासनः ॥ दध्यौ स्वहृदयाम्भोजे स्वेष्टदेवं रमापतिम् ॥ ३२ ॥ त्यक्त्वा देववपुः सोऽथ
योगधारणया मुनिः ॥ ततः सूक्ष्मशरीरेण प्राप भास्करमण्डलम् ॥ यदाहुर्नैष्ठिकानां च मुक्तिद्वारं हि योगिनाम् ॥ ३३ ॥ तत्तेजोदग्धसूक्ष्माङ्गः
सच्चिद्रूपोऽतिनिर्मलः॥स बभूव महाभागः संक्षीणाशेषवासनः॥३४॥ततस्तन्मण्डलगतैरातिवाहिकदैवतैः॥स निन्ये वैष्णवं धाम श्वेतद्वीपाख्यमद्भु
तम् ॥ ३५ ॥ स हि द्वीपो भुविस्थोपि भवत्यप्राकृतो मुने ॥ हरिभक्तजनावासः प्राप्य एकान्तभक्तिभिः ॥ ३६ ॥ स गोलोकब्रह्मपुरवैकुण्ठानां च
सुव्रत ॥ द्वारभूतोस्ति भक्तानां तल्लिप्सूनां महात्मनाम् ॥ ३७ ॥ यस्य यद्धाम्न इच्छा स्याद्व्रजतस्तं तदेव हि ॥ प्रापयन्ति श्वेतमुक्ता
मुने प्रागुक्तलक्षणाः ॥ ३८ ॥ दिव्यदेहोऽभवत्तत्र धाम्न्यऽसौ श्वेतमुक्तवत् ॥ प्राप्य गोलोकधामाऽथ परमानन्दमाप्तवान् ॥ ३९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्थितः ॥ ग्रहीतव्योन्यथा नैव तादृशी च क्रियोचिता ॥ १७ ॥ यादृशो हि गुणो यस्य स्वभावस्तस्य तादृशः ॥ स्वस्वभावानुसारेण प्रवृत्तिः स्याच्च कर्मणि ॥ १८ ॥ सात्त्विकानां हि वो देवः साक्षाद्विष्णू रमापतिः ॥ अहिंसयज्ञेऽस्ति ततोऽधिकारस्तस्य तुष्टये ॥ १९ ॥ प्रत्यक्षपशुमालभ्य यज्ञस्याचरणं तु यत् ॥ धर्मः स विपरीतो वै युष्माकं सुरसत्तमाः ॥ २० ॥ रजस्तमोगुणवशादासुरीं संपदं श्रिताः ॥ युष्माकं याजका ह्येते सन्त्यवेदविदो यथा ॥ २१ ॥ तत्सङ्गादेव युष्माकं साम्प्रतं व्यत्ययो मतेः ॥ जातस्तेनेदृशं कर्म प्रारब्धमिति निश्चितम् ॥ २२ ॥ राजसानां तामसानामासुराणां तथा नृणाम् ॥ यथागुणं भैरवाद्या उपास्याः सन्ति देवताः ॥ २३ ॥ स्वगुणानुगुणात्मीयदेवतातुष्टये भुवि ॥ हिंस्रयज्ञविधानं यत्तेषामेवोचितं हि तत् ॥ २४ ॥ तत्रापि विष्णुभक्ता ये दैत्यरक्षोनरादयः ॥ तेषामप्युचितो नास्ति हिंस्रयज्ञः कुतस्तु वः ॥ २५ ॥ यज्ञशेषो हि सर्वेषां यज्ञकर्मानुतिष्ठताम् ॥ अनुज्ञातो भक्षणार्थं निगमेनैव वर्तते ॥ २६ ॥ सात्त्विकानां देवतानां सुरामांसाशनं क्वचित् ॥ अस्माभिस्त्वीक्षितं नैव न श्रुतं च सतां मुखात् ॥ २७ ॥ तस्माद्व्रीहिभिरेवासौ यज्ञः क्षीरेण सर्पिषा ॥ मेध्यैरन्नरसैश्चाऽन्यैः कार्यो न पशुहिंसया ॥ २८ ॥ तत्रापि बीजैर्यष्टव्यमजसंज्ञामुपागतैः ॥ त्रिवर्षकालमुषितैर्न्न येषां पुनरुद्गमः ॥ २९ ॥ अद्रोहश्चाप्यलोभश्च दमो भूतदया तपः ॥ ब्रह्मचर्यं तथा सत्यमदम्भश्च क्षमा धृतिः ॥ ३० ॥ सनातनस्य धर्मस्य रूपमेतदुदीरितम् ॥ तदतिक्रम्य यो वर्तेद्धर्मघ्नः स पतत्यधः ॥ ३१ ॥ ॥ स्कन्द उवाच ॥ इत्थं वेदरहस्यज्ञैर्महामुनिभिरादरात् ॥ बोधिता अपि सन्नीत्या स्वप्रतिज्ञाविघाततः ॥ तद्वाक्यं जगृहुर्नैव तत्प्रामाण्यविदोपि ते ॥ ३२ ॥ महद्व्यतिक्रमात्तर्हि मानक्रोधमदादयः ॥ विविशुस्तेष्वधर्मस्य वंश्याश्छिद्रगवेषिणः ॥ ३३ ॥ अजश्छागो न बीजानीत्यादिवादिषु तेष्वथ ॥ विमनस्स्वृषिवर्येषु पुनस्तान्बोधयत्सु च ॥ ३४ ॥ राजोपरिचरः श्रीमांस्तत्रैवागाद्यदृच्छया ॥ तेजसा द्योतयन्नाशा इन्द्रस्य परमः सखा ॥ ३५ ॥ तं दृष्ट्वा सहसायान्तं वसुं ते त्वन्तरिक्षगम् ॥ ऊचुर्द्विजातयो देवानेष च्छेत्स्यति संशयम् ॥ ३६ ॥ एष भूमिपतिः पूर्वं महायज्ञान्सहस्रशः ॥ चक्रे सात्वततन्त्रोक्तविधिनाऽऽरण्यकेन च ॥ ३७ ॥ येषु साक्षात्पशुवधः कस्मिंश्चिदपि नाऽभवत् ॥ न दक्षिणानुकल्पश्च नाप्रत्यक्षसुरार्चनम् ॥ ३८ ॥ अहिंसाधर्मरक्षाभ्यां ख्यातोसौ सर्वतो नृपः ॥ अग्रणीर्विष्णुभक्तानामेकपत्नीमहाव्रतः ॥ ३९ ॥ ईदृशो धार्मिकवरः सत्यसन्धश्च वेदवित् ॥ कथंचिन्नान्यथा ब्रूयाद्वाक्यमेष महान्वसुः ॥ ४० ॥ एवं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ते संविदं कृत्वा विबुधा ऋषयस्तथा ॥ अपृच्छन्सहसाऽभ्येत्य वसुं राजानमुत्सुकाः ॥ ४१ ॥ देवमहर्षय ऊचुः ॥ भो राजन्केन यष्टव्यं पशुना
होस्विदौषधैः ॥ एतं नः संशयं छिन्धि प्रमाणं नो भवान्मतः ॥ ४२ ॥ स्कन्द उवाच ॥ स तान्कृताञ्जलिर्भूत्वा परिपप्रच्छ वै वसुः ॥ कस्य
वः को मतः पक्षो ब्रूत सत्यं समाहिताः ॥ ४३ ॥ महर्षय ऊचुः ॥ धान्यैर्यष्टव्यमित्येव पक्षोऽस्माकं नराधिप ॥ देवानां तु पशुः पक्षो मतं
राजन्वदात्मनः ॥ ४४ ॥ स्कन्द उवाच ॥ देवानां तु मतं ज्ञात्वा वसुस्तत्पक्षसंश्रयात् ॥ छागादिपशुनैवेज्यमित्युवाच वचस्तदा ॥ ४५ ॥ एवं
हि मानिनां पक्षमसन्तं स उपाश्रितः ॥ धर्मज्ञोप्यवदन्मिथ्या वेदं हिंसापरं नृपः ॥४६॥ तस्मिन्नेव क्षणे राजा वाग्दोषादन्तरिक्षतः ॥ अधः पपात
सहसा भूमिं च प्रविवेश सः॥४७॥महतीं विपदं प्राप भूमिमध्यगतो नृपः॥स्मृतिस्त्वेनं न प्रजहौ तदा नारायणाश्रयात्॥४८॥मोचयित्वापशून्सर्वांस्त
तस्ते त्रिदिवौकसः॥हिंसाभीता दिवं जग्मुः स्वाश्रमांश्च महर्षयः॥४९॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णव
खण्डे श्रीवासुदेवमाहात्म्ये वेदस्य हिंसापरत्वोक्त्या उपरिचरवसोरधःपातवर्णनं नाम षष्ठोऽध्यायः ॥६॥ ॥ स्कन्द उवाच ॥ भूमध्यगः स राजाऽथ
स्वकृतं कर्म गर्हयन् ॥ अनुतप्यमानश्च भृशं मानयंस्तान्बृहन्मुनीन् ॥ जजाप भगवन्मन्त्रं त्र्यक्षरं मनसा सदा ॥ १ ॥ तत्रापि परया भक्त्या
पञ्चकालं स्वचेतसा ॥ अयजद्धरिं सुरपतिं भूमेर्विवर आदरात् ॥ २ ॥ ततोऽस्य तुष्टो भगवान्वासुदेवो जगत्पतिः ॥ आपद्यपि यथाकालं यथा
शास्त्रं स्वमर्चतः ॥ ३ ॥ वरदो भगवान्विष्णुः समीपस्थं द्विजोत्तमम् ॥ गरुत्मन्तं महावेगमाबभाषे स्वयं ततः ॥ ४ ॥ श्रीभगवानुवाच ॥
द्विजोत्तम महाभाग गम्यतां वचनान्मम ॥ सम्राड्राजा वसुर्नाम धर्मात्मा मां समाश्रितः ॥ ५ ॥ ब्रह्मातिक्रमदोषेण प्रविष्टो वसुधातलम् ॥ तन्मा
नना कृता तेन तद्गच्छाद्य तदन्तिकम् ॥ ६ ॥ भूमेर्विवरसंगुप्तं गरुडैनं ममाज्ञया ॥ अधश्चरं नृपश्रेष्ठं खेचरं कुरु मा चिरम् ॥ ७ ॥ स्कन्द
उवाच ॥ गरुत्मानथ विक्षिप्य पक्षौ मारुतवेगवान् ॥ विवेश विवरं भूम्या यत्रास्ते वाग्यतो वसुः ॥ ८ ॥ तत एनं समुत्क्षिप्य स्वचञ्च्वा विनता
सुतः ॥ उत्पपात नभस्तूर्णं तत्र चैनममुञ्चत ॥ ९ ॥ तस्मिन्मुहूर्ते संजज्ञे राजोपरिचरः पुनः ॥ सशरीरो गतः स्वर्गं परमं सुखमाप्तवान् ॥ १० ॥
एवं तेनापि ब्रह्मर्षे वाग्दोषात्सदवज्ञया ॥ प्राप्ता गतिरयज्वार्हा धर्मज्ञेन महात्मना ॥ ११ ॥ केवलं पुरुषस्तेन सेवितो हरिरीश्वरः ॥ ततः शीघ्रं
जहौ पापं स्वर्गलोकमवाप च ॥ १२ ॥ भुञ्जानो विविधं सौख्यं मनोभीष्टं च तत्र सः ॥ उवासान्यो यथा शक्रो गीयमानयशाः सुरैः ॥ १३ ॥
तमेकदा विमानेन चरन्तं सूर्यसन्निभम् ॥ अद्रिकाप्सरसा युक्तमच्छोदा समवैक्षत ॥ १४ ॥ सा हि सोमपदस्थानां पितॄणां मानसी सुता ॥ अग्नि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न श्रुतास्तस्य राज्ये च धर्मसंकरकारिणः ॥ २८ ॥ एकादशविधं मद्यं त्रिविधां च सुरामपि ॥ नाजिघ्रदपि कोपीह तस्मिन्राज्यं प्रशासति ॥ २९ ॥ एवंगुणः स तु क्वापि पक्षपाताद्दिवौकसाम् ॥ मिथ्यालापाद्दिवो भ्रष्टः प्रविवेश महीतलम् ॥ ३० ॥ अन्तर्भूमिगतश्चासौ सततं धर्मवत्सलः ॥ नारायणपरो भूत्वा तन्मंत्रमजपत्स्थिरः ॥ ३१ ॥ तस्यैव च प्रसादेन पुनरेवोत्थितस्तु सः ॥ दिवं प्राप्य सुखं तत्र मनोभीष्टं समन्वभूत् ॥ ३२ ॥ पुनश्चेदिपतिर्भूत्वा भुव्यसौ पितृशापतः ॥ पञ्चरात्रोक्तविधिना भेजे हरिमतन्द्रितः ॥ ३३ ॥ स्वर्गलोकं ततः प्रापद्दिव्यदेहेन भूपतिः ॥ उपासनां च तत्रत्यैः परमर्षिगणैः सह ॥ ३४॥ दृढीकुर्वन्भगवतः कञ्चित्कालमुवास तत् ॥ परं पदमथ प्रापद्वासुदेवस्य निर्भयम्॥३५॥ ॥ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे श्रीवासुदेवमाहात्म्य उपरिचरवसुसद्गुणवर्णनं नाम पंचमोऽध्यायः ॥ ५ ॥ ॥ सावर्णिरुवाच ॥ स हि भक्तो भगवत आसीद्राजा महान्वसुः ॥ किं मिथ्याऽभ्यवदद्येन दिवो भूविवरं गतः ॥ १ ॥ केनोद्धृतः पुनर्भूमेः शप्तोऽसौ पितृभिः कुतः ॥ कथं मुक्तस्ततो भूप इत्येतत्स्कन्द मे वद ॥ २ ॥ स्कन्द उवाच ॥ शृणु ब्रह्मन्कथामेतां वसोर्वास वरोचिषः ॥ यस्याः श्रवणतः सद्यः सर्वपापक्षयो भवेत् ॥ ३ ॥ स्वायम्भुवान्तरे पूर्वमिन्द्रो विश्वजिदाह्वयः ॥ आरम्भे महायज्ञमश्वमेधाभिधं मुने ॥ ४ ॥ निबद्धाः पशवोऽजाद्याः क्रोशन्तस्तत्र भूरिशः ॥ सर्वे देवगणाश्चापि रसलुब्धास्तदासत ॥ ५ ॥ क्षेमाय सर्वलोकानां विचरन्तो यदृच्छया ॥ महर्षय उपाजग्मुस्तत्र भास्करवर्चसः ॥ ६॥ संमानिताः सुरगणैः पाद्यार्घ्यस्वागतादिभिः ॥ ते बृहन्मुनयोऽपश्यन्मेध्यांस्तान्क्रोशतः पशून् ॥ ७ ॥ सात्त्विकानामपि च तं देवानां यज्ञविस्तरम् ॥ हिंसामयं समालोक्य तेऽत्याश्चर्यं हि लेभिरे ॥ ८ ॥ धर्मव्यतिक्रमं दृष्ट्वा कृपया ते द्विजोत्तमाः ॥ महेन्द्रप्रमुखानूचुर्देवान्धर्मधियस्ततः ॥ ९ ॥ महर्षय ऊचुः ॥ देवैश्च ऋषिभिः साकं महेन्द्राऽस्मद्वचः शृणु ॥ यथास्थितं धर्मतत्त्वं वदामो हि सनातनम् ॥ १० ॥ यूयं जगत्सर्गकाले ब्रह्मणा परमेष्ठिना ॥ सत्त्वेन निर्मिताः स्थो वै चतुष्पाद्धर्मधारकाः ॥ ११ ॥ रजसा तमसा चासौ मनूंश्चैव नराधिपान् ॥ असुराणां चाधिपतीनसृजद्धर्मधारिणः ॥ १२ ॥ सर्वेषामथ युष्माकं यज्ञादिविधिबोधकम् ॥ ससर्ज श्रेयसे वेदं सर्वाभीष्टफलप्रदम् ॥ १३ ॥ अहिंसैव परो धर्मस्तत्र वेदेऽस्ति कीर्त्तितः ॥ साक्षात्पशुवधो यज्ञे नहि वेदस्य संमतः ॥ १४ ॥ चतुष्पादस्य धर्मस्य स्थापने ह्येव सर्वथा ॥ तात्पर्यमस्ति वेदस्य न तु नाशेऽस्य हिंसया ॥ १५ ॥ रजस्तमोदोषवशात्तथाप्यसुरपा नृपाः ॥ मेध्येनाजेन यष्टव्यमित्यादौ मतिजाड्यतः ॥ छागादिमर्थं बुबुधुर्व्रीह्यादिं तु न ते विदुः ॥ १६ ॥ सात्त्विकानां तु युष्माकं वेदस्यार्थो यथा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ख्यातश्चासावमावसुः ॥ आखण्डलसखो भक्तिं प्राप्तो नारायणे प्रभौ ॥ १ ॥ धार्मिकः पितृभक्तश्च पितॄन्देवांश्च तर्पयन् ॥ सदाचाररतो दक्षः
क्षमावाननसूयकः ॥ २ ॥ सर्वोपकारकः शान्तो ब्रह्मचर्यरतः शुचिः ॥ अक्रोधनश्च मितभुङ् मृदुर्निर्व्यसनो मुनिः ॥ ३ ॥ निर्द्वन्द्वो निर्विकारश्च
निर्मानो धीर आत्मवित् ॥ निर्दम्भो मानदो योगी तपस्वी विजितेन्द्रियः ॥ ४ ॥ धनपुत्रकलत्रेषु विरक्तः स्वजनादिषु ॥ नारायणमनुं भक्त्या
स जजापान्वहं नृपः ॥ ५ ॥ तस्मै तुष्टोऽथ भगवान्वासुदेवः स्वयं ददौ ॥ साम्राज्यं सोऽथ नासक्तस्तत्र भेजे तमादरात् ॥ ६ ॥ तंत्रोक्तेन विधानेन
पञ्चकालं समाहितः॥पूजयामास देवेशं तच्छेषेण सुरान्पितॄन्॥७॥तेषां शेषेण विप्रांश्च संविभज्याश्रितांश्च सः॥शेषान्नभुक्सत्यपरः सर्वभूतेष्वहिंसकः॥
॥ ८ ॥ भक्षणे दोषमविदत्प्राणिमात्रामिषस्य तु ॥ महापातकवद्राजा स्वप्रजाश्च तथाऽवदत् ॥ ९ ॥ सर्वभावेन भेजेऽसौ देवदेवं जनार्दनम् ॥ अनादि
मध्यनिधनं लोककर्त्तारमव्ययम्॥१०॥श्रीवासुदेवपदयोः स चकार मनः स्थिरम् ॥ श्रोत्रे च नित्यं भगवत्कथायाः श्रवणे नृपः॥११॥नयने स्वे मुकु
न्दस्य तद्भक्तानां च दर्शने ॥ गुणगाने हरेर्वाणीं चक्रे भूमिपतिः स तु॥१२॥ नारायणांघ्रिसंस्पृष्टतुलसीपुष्पसौरभे॥घ्राणं चकार च नृपो नान्यगन्धेषु
कर्हिचित् ॥ १३ ॥ श्रीशोपभुक्तवस्त्रादिस्पर्शने च त्वचं निजाम्॥चकार रसनामन्ने नारायणनिवेदिते ॥ १४ ॥ भगवन्मन्दिरक्षेत्रसदन्तिकगतौ तथा॥
चकार चरणौ राजा सेवायां च करौ हरेः॥१५॥उत्तमांगं च चक्रेऽसौ विष्णुपादाभिवन्दने ॥ सख्यं चकार परमं महाभागवतेषु सः॥१६॥एकोपि न क्षण
स्तस्य विना भक्तिं रमापतेः ॥ जगाम किल राजर्षेस्तदीयव्रतचारिणः ॥१७॥ महद्भिरेव संभारैर्विष्णोर्ज्जन्मदिनोत्सवान् ॥ चक्रे तदर्थमुद्यानमंदि
रोपवनानि च ॥ १८ ॥ इत्थं नारायणे भक्तिं वहतो ब्राह्मणोत्तम ॥ एकशय्यासनं तस्य दत्तवान्देवराट् स्वयम् ॥ १९ ॥ वैजयन्तीं ददौ मालां
तस्मा इन्द्रोऽतिशोभनाम् ॥ अम्लानपङ्कजमयीं तथा रत्नानि भूरिशः ॥ २० ॥ आत्मा राज्यं धनं चैव कलत्रं वाहनादि च ॥ यत्तद्भगवतः
सर्वमिति तत्प्रेक्षितं सदा ॥ २१ ॥ काम्या नैमित्तिकाजस्रं यज्ञियाः परमाः क्रियाः ॥ सर्वाः सात्वतमास्थाय विधिं चक्रे समाहितः ॥ २२ ॥
पञ्चरात्रविदो मुख्यास्तस्य गेहे महात्मनः ॥ प्रायणं भगवत्प्रत्तं भुञ्जतेस्माग्रतो द्विजाः ॥ २३ ॥ तस्य प्रशासतो राज्यं धर्मेणाऽमित्रघातिनः ॥
नानृता वाक्समभवन्मनो दुष्टं न चाऽभवत् ॥ न च कायेन कृतवान्स पापं परमण्वपि ॥ २४ ॥ पञ्चरात्रं महातन्त्रं भगवद्भक्तिपुष्टये ॥ शुश्रा
वानुदिनं राजा भगवद्भक्तवक्त्रतः ॥ २५ ॥ धर्मं संस्थापयञ्छुद्धं रञ्जयन्सकलाः प्रजाः ॥ पालयामास पृथिवीं दिवमाखण्डलो यथा ॥ २६ ॥
अपि सप्तविधस्तस्य राज्ये पललभक्षकः ॥ पुमान्कोप्यभवन्नैव न च पाषण्डवेषिणः ॥ २७ ॥ असाध्व्यो योषितश्चैव पुरुषाः पारदारिकाः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शक्तिपतिः प्रभुः ॥ ३३ ॥ भक्त्या कृतस्याप्यल्पस्य भगवान्पुण्यकर्मणः ॥ प्रीतो ददात्येव फलं महदक्षयमीप्सितम् ॥ ३४ ॥ तेषु तद्भक्तितो लोके ये त्वेकान्तित्वमास्थिताः ॥ वासुदेवं विनान्यत्र संक्षीणाशेषवासनाः ॥ ३५ ॥ देहान्ते ते तु संप्राप्य तस्य धाम तमःपरम् ॥ देहैरप्राकृतैरेव प्रेम्णा परिचरन्ति तम् ॥ ३६ ॥ अन्ये तु भक्ताः कालेन तदुपासनदार्ढ्यतः ॥ वासनानां क्षये जाते यान्त्येकान्तिकवद्धि तम् ॥ ३७ ॥ येन केनापि भावेन तेन संबध्यते तु यः ॥ संसृतिं न प्रयात्येव स तु क्वाप्यन्यजीववत् ॥ ३८ ॥ कर्मयोगस्य संसिद्धिर्ज्ञानयोगस्य चेप्सिता ॥ तस्याश्रयादेव नृणां निर्विघ्नं भवति द्रुतम् ॥ ३९ ॥ तस्मात्स एव भगवान्सर्वैरपि जनैरिह ॥ स्वाभीष्टफलसिद्ध्यर्थं प्रीत्योपास्यो यथाविधि ॥ ४० ॥ ब्रह्मैक्यमाता निर्विघ्ना अपि ब्रह्मशिवादयः ॥ श्रीविष्णोः कुर्वते भक्तिं सन्तीत्थं तन्महागुणाः ॥ ४१ ॥ इति गुह्यसमुद्देशस्तव नारद कीर्त्तितः ॥ अतिप्रेम्णा हि सततं मयि भक्तिमतोऽखिलः ॥ ४२ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे श्रीवासुदेवमाहात्म्ये श्रीवासुदेवसर्वोपास्यत्वनिरूपणं नाम तृतीयोऽध्यायः ॥ ३ ॥ ॥ स्कन्द उवाच ॥ स एवमुक्तोत्मविदां वरिष्ठो नारायणेनोत्तमपूरुषेण ॥ जगाद वाक्यं जगतां गरिष्ठं तमच्युतं लोकहिताधिवासम् ॥ १ ॥ नारद उवाच ॥ श्रुतं मया देव समं त्वयो क्तमृष्याकृतिच्छादितभूरिधाम्ना ॥ तवैव लीला सकलेयमीश सर्वेश्वरस्येति विदामि चित्ते ॥ २ ॥ त्वद्दर्शनेनैव हि पूर्णकामो भवामि भूमन्स्वहृदी प्सितेन ॥ तथाप्यहं तत्तव पूर्वरूपं प्रभो दिदृक्षामि हि कौतुकं मे ॥ ३ ॥ श्रीनारायण उवाच ॥ न तत्स्वरूपं मम दानयज्ञयोगैश्च वेदैस्तपसापि दृश्यम् ॥ एकान्तिकैर्भक्तवरैस्तु भक्त्या ह्यनन्यया नारद दृश्यते तत् ॥ ४ ॥ भक्तिस्तव त्वस्ति मयि ह्यनन्या ज्ञानं च वैराग्ययुतं स्वधर्मः ॥ अतश्च तद्दर्शनमाप्स्यसि त्वं सुरेश्वराद्यैरपि यद्दुरापम् ॥ ५ ॥ त्वदीयभक्त्याऽतितरां प्रसन्नस्त्वाज्ञापयाम्यद्य तदीक्षणाय ॥ सितान्तरीपं व्रज तत्र तेऽयं मनोरथः सेत्स्यति विप्रवर्य ॥ ६ ॥ स्कन्द उवाच ॥ श्रुत्वेति वाचं परमेष्ठिपुत्रः सोप्यर्चयित्वा तमृषिं पुराणम् ॥ खमुत्पपातोत्त मयोगयुक्तस्ततोधिमेरौ सहसा निपेते ॥ ७ ॥ तस्यावतस्थे च मुनिर्मुहूर्त्तमेकान्तमासाद्य गिरेः स शृंगे ॥ आलोकयन्नुत्तरपश्चिमेन ददर्श चात्यद्भुतमन्तरीपम् ॥ ८ ॥ क्षीरोदधेरुत्तरतो हि द्वीपः श्वेतः स नाम्ना प्रथितो विशालः ॥ देदीप्यमानो वितितेन सर्वतो ज्योतिश्चयेनातिसि तेन नित्यम् ॥ ९ ॥ आम्रैरनेकैरसनैरशोकैराम्रातकैर्निम्बकदम्बनीपैः ॥ बिल्वैर्मधूकैः सुरदारुभिश्च प्लक्षैर्वटैः किंशुकचन्दनैश्च ॥ १० ॥

१ समस्तम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सर्ज्जैश्च शालैः पनसैस्तमालैर्मुनिद्रुमैः केतकचम्पकैश्च ॥ कुन्दैश्च जातीसुरमल्लिकाभिद्रुमैर्वृतः पुष्पफलावनम्रैः ॥ ११ ॥ कल्पद्रुमाणां बहु
भिश्च वृन्दैः सुवर्णरम्भाक्रमुकालिभिश्च ॥ महद्भिरुद्यानवरैरनेकैः सरित्सरोभिर्विकचाम्बुजैश्च ॥ हंसादिभिः पक्षिवरैः सुशब्दैर्गणैर्मृगाणां रुचिरै
श्चलद्भिः ॥ १२ ॥ सर्वेपि जीवाः किल यत्र मुक्ता वसन्ति च स्थावरजङ्गमाश्च ॥ तं वीक्षमाणेन च तेन दृष्टा भक्तोत्तमाः श्री
पुरुषोत्तमस्य ॥ १३ ॥ अतीन्द्रिया निर्गतसर्वपापा निष्यन्दहीनाश्च सुगन्धिनश्च ॥ द्विबाहवः केपि चतुर्भुजाश्च श्वेताश्च केचिन्नवनीरदाभाः
॥ १४ ॥ पद्मच्छदाक्षाः सममानगात्राः सुरूपदिव्यावयवाः सुसाराः ॥ विकीर्णकेशाश्च सदा किशोराः सद्भिश्च चिह्नैर्निखिलैरुपेताः ॥ १५ ॥
सरोजरेखाङ्कितपाणिपादाः षडूर्मिहीना मिहिरातितेजसः ॥ सितांशुका ध्यानपराश्च सौम्याः कालोपि येभ्यो भयमेति नित्यम् ॥ १६ ॥ साव
र्णिरुवाच ॥ अतीन्द्रिया निरातङ्का अनिष्यन्दाः सुगन्धिनः ॥ के ते नराः कथं जातास्तादृशाः का च तद्गतिः ॥ १७ ॥ श्वेतद्वीपः पयोम्भोधौ
वर्त्तते हि धरातले ॥ तद्वासिनामपि कथं प्रोक्ताऽतीन्द्रियता त्वया ॥१८॥ ये ब्रह्मण्यक्षरे धाम्नि सच्चिदानन्दरूपिणि ॥ स्थिताः स्युश्चिन्मया मुक्तास्ते
तथा स्युर्न्नहीतरे ॥ १९ ॥ एतं मे संशयं छिन्धि परं कौतूहलं हि मे ॥ त्वं हि सर्वकथाभिज्ञस्ततस्त्वामाश्रितोस्म्यहम् ॥ २० ॥ स्कन्द
उवाच ॥ एकान्तोपासनेनैव प्राक्कल्पेषु रमापतेः ॥ ये ब्रह्मभावं संप्राप्ता अजरामरतां गताः ॥ २१ ॥ अक्षराख्याः पुमांसस्ते श्वेतद्वीपेऽत्र
धामनि ॥ सेवितुं वासुदेवं तं स्थिता देवर्षिणेक्षिताः ॥२२ ॥ प्राप्ते प्रलयकाले तु पुनश्चाक्षरधामनि ॥ स्थास्यन्ति ते स्वतन्त्राश्च कालमायाभयो
ज्झिताः ॥ २३ ॥ अत्रापि पुरुषा ये तु मायाजाता अतः क्षराः ॥ तेपि सद्भिः साधनैर्वै जायन्ते तादृशाः किल ॥ २४ ॥ अहिंसया च
तपसा स्वधर्मेण विरागतः ॥ वासुदेवस्य माहात्म्यज्ञानेनैवात्मनिष्ठया ॥ २५ ॥ भक्त्या परमया नित्यं प्रसङ्गेन महात्मनाम् ॥ हरिसेवाविहीनानां
मुक्तीनामप्यनिच्छया ॥ २६ ॥ सिद्धीनामणिमादीनां सर्वासां चाप्यकांक्षया ॥ अन्योन्यं श्रुतिकीर्तिभ्यां श्रीहरेर्जन्मकर्मणाम् ॥ भवन्ति
तादृशा नूनं पुरुषा मुनिसत्तम ॥ २७ ॥ जगत्सर्गे जायमानेप्येते कालवशात्क्वचित् ॥ न जायन्ते स्वतंत्रत्वान्न नश्यन्ति लयेऽन्यवत् ॥ २८ ॥
अत्र ते कथयिष्यामि कथां पौराणिकीं मुने ॥ यथात्रत्योपि मनुजस्तथा भावमुपेयिवान् ॥ २९ ॥ विस्तीर्णैषा कथा ब्रह्मञ्छ्रुता मे पितृसन्निधौ ॥
सैषाद्य तव वक्तव्या कथासारो हि स स्मृतः ॥ ३० ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे श्रीवासु
देवमाहात्म्ये श्वेतद्वीपमुक्तवर्णनं नाम चतुर्थोऽध्यायः ॥ ४ ॥ ॥ स्कन्द उवाच ॥ आसीद्राजोपरिचरो वसुनामा पुरा मुने ॥ भूभर्त्तुरायोस्तनयः

CC-0. In Public Domain. Digitization by eGangotri

नास्ति तस्मात्परतरः पिता देवोऽथ वा द्विज ॥ आत्मा हि नो स विज्ञेयः कृष्णो ब्रह्मपुरेश्वरः ॥८॥ तेनैषा प्रथिता ब्रह्मन्मर्यादा लोकभावनी ॥ दैवं पित्र्यं च कर्तव्यमिति लोकहितैषिणा ॥९॥ प्रवृत्तं च निवृत्तं च द्वेधा कर्मास्ति वैदिकम् ॥ यथाधिकारं विहितं पुरुषार्थोपलब्धये ॥१०॥ तन्त्रवेदोक्तविधिना स्वोचितस्त्रीपरिग्रहः ॥ वित्तार्जनं च न्यायेन द्रव्ययज्ञाः सकामनाः ॥ ११ ॥ वासो ग्रामे च नगरे पूर्त्तमिष्टं च कर्म यत् ॥ प्रवृत्तं तत्तु सकलमशान्तिकृदुदीरितम् ॥ १२ ॥ स्त्रीद्रव्ययोः परित्यागः कामलोभक्रुधां तथा ॥ वनवासश्च वैराग्यं तपः क्षान्तिः शमो दमः ॥ १३ ॥ ब्रह्मयज्ञा योगयज्ञा ज्ञानयज्ञाश्च सर्वशः ॥ जपयज्ञाश्चेति मुने निवृत्तं कर्म कीर्तितम् ॥ १४ ॥ त्रिलोक्यां गतयो धर्मं प्रवृत्तमनुतिष्ठताम् ॥ स्वर्गलोकावधि मुने मनुष्याणां भवन्ति वै ॥ १५ ॥ इन्द्रचन्द्राग्निलोकादौ स्वस्वपुण्यफलं च ते ॥ भोगैश्वर्यं बहुविधमभीष्टं भुञ्जते खलु ॥ १६ ॥ यावत्पुण्यं तावदेव भुक्त्वा तत्ते सुरास्ततः ॥ क्षीणे तु सुकृते भूयः पतन्ति विवशा भुवि ॥ १७ ॥ भोगैश्वर्यादिनाशो हि कालवेगेन जायते ॥ अनिच्छतामपि मुने तेषां पुण्यक्षये सति ॥ १८ ॥ आधिकारिकदेवानामपि ब्रह्मदिने मुहुः ॥ इष्टभोगैश्वर्यनाशो जायते कालरंहसा ॥१९॥ निवृत्तधर्मनिष्ठा ये योगिनश्च तपस्विनः ॥ जनादीन्यान्ति लोकांस्त्रींस्ते तु त्रैलोक्यतो बहिः ॥२०॥ तत्तल्लोकैश्वर्यभोगान्भुञ्जते ते निजेप्सितान् ॥ दैनन्दिनेपि प्रलये वर्त्तन्ते ते यथासुखम् ॥ २१ ॥ ब्रह्मणो द्विपरार्द्धान्ते तद्भोगैश्वर्यसंपदः ॥ नश्यन्ति कालशक्त्यैव लोकास्तेषां च नारद ॥ २२ ॥ अथैतद्द्विविधं कर्म गुणात्मकमपि द्विज ॥ कृतं चेद्विष्णुसंबद्धं निर्गुणं स्यात्तदा तु तत् ॥ २३ ॥ तत्फलं चाक्षयं स्याद्धि स्वेष्टादप्यधिकं नृणाम् ॥ भक्तास्ते भगवद्धाम यान्त्यपावृत्तितः परम् ॥ २४ ॥ अतो विवेकिनो नित्यं विष्णुभक्त्यन्विताः क्रियाः ॥ प्रवृत्ता वा निवृत्ता वा कुर्वते सकला अपि ॥ २५ ॥ ब्रह्मा स्थाणुर्मनुर्दक्षो भृगुर्द्धर्मस्तथा यमः ॥ मरीचिरङ्गिराश्चात्रिः पुलस्त्यः पुलहः क्रतुः ॥ २६ ॥ वैभ्राजश्च वसिष्ठश्च विवस्वान्सोम एव च ॥ कश्यपः कर्दमाद्याश्च प्रजानां पतयो मुने ॥ २७ ॥ देवाश्च ऋषयः सर्वे सर्वे वर्णास्तथाश्रमाः ॥ पूजयन्ति तमेवेशं प्रवृत्तं धर्ममास्थिताः ॥ २८ ॥ सनः सनत्सुजातश्च सनकः स सनन्दनः ॥ सनत्कुमारः कपिल आरुणिश्च सनातनः ॥ २९ ॥ ऋभुर्यतिश्च हंसाद्या मुनयो नैष्ठिकव्रताः ॥ तमेव पूजयन्तीशं निवृत्तं धर्ममास्थिताः ॥ ३० ॥ वासुदेवस्याङ्गतया भावयित्वा सुरान्पितॄन् ॥ अहिंसपूजाविधिना यजन्ते चान्वहं हि ते ॥ ३१ ॥ यथाधिकारमेते हि तेन यत्र नियोजिताः ॥ प्रवृत्ते वा निवृत्ते वा धर्मे ते पालयन्ति तम् ॥ तस्य देवस्य मर्यादां न क्रामन्त्युभयेपि ते ॥ ३२ ॥ चतुर्वर्गे तेषु यस्य यद्यदिष्टतमं भवेत् ॥ तत्तत्संपूरयत्येव सर्व

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भवेद्यावस्तथैतद्धरियोगतः ॥ २० ॥ प्रवृत्ते वा निवृत्ते वा तस्माद्धर्मे स्थितैर्नरैः ॥ उपास्तव्यो वासुदेवस्तत्सम्यक्सिद्धिमीप्सुभिः ॥ २१ ॥ अत्राप्यु
दाहरन्तीममितिहासं पुरातनम् ॥ नारदस्य च संवादमृषेर्नारायणस्य च ॥ २२ ॥ यो वासुदेवो भगवान्नित्यं ब्रह्मपुरे स्थितः ॥ दाक्षायण्यामा
विरासीद्धर्माल्लोकहिताय सः ॥ २३ ॥ कृते युगे द्विजवर पुरा स्वायम्भुवान्तरे ॥ नरो नारायणश्चेति द्विरूपः प्रादुरास सः ॥ २४ ॥ धर्मा
श्रमात्तपस्तप्तुं क्षेमायैव नृणां भुवि ॥ नरनारायणौ तौ च बदर्याश्रममीयतुः ॥२५॥ तत्राद्यौ लोकनाथौ तौ कृशौ धमनिसंततौ ॥ तेपाते तेजसा
स्वेन दुर्निरीक्ष्यौ सुरैरपि ॥ २६ ॥ यस्य प्रसादं कुर्वाते स वै तौ द्रष्टुमर्हति ॥ शक्यते नान्यथा द्रष्टुमपि तद्धामवासिभिः ॥ २७ ॥ एकदा
नारदो योगी ताभ्यामेव दिदृक्षितः ॥ अन्तरात्मतया चान्तर्हृदयेपि प्रचोदितः ॥ २८ ॥ मेरोर्महागिरेः शृङ्गात्सद्यो गगनवर्त्मना ॥ तं देश
मागमद्ब्रह्मन्बदर्याश्रमसंज्ञितम् ॥ २९ ॥ तयोराह्निकवेलायामागतस्तत्र स द्रुतम् ॥ आद्याश्रमक्रियासक्तौ तौ ददर्श च दूरतः ॥ ३० ॥ दृष्ट्वेवे
श्वरचर्यां तां तस्य कौतूहलं त्वभूत् ॥ अहो एतौ जगत्पूज्यावीश्वरौ सर्वदेहिनाम् ॥ एतौ हि परमं ब्रह्म काऽनयोराह्निकी क्रिया ॥ ३१ ॥
पितरौ सर्वभूतानां देवतानां च दैवतम् ॥ कां देवतां तु यजतः पितॄन्वैतौ महामती ॥ ३२ ॥ इति संचिन्त्य मनसा भक्तो नारायणस्य सः ॥
तत्समीपमुपेत्याऽथ तस्थौ नत्वा कृताञ्जलिः ॥ ३३ ॥ कृते दैवे च पित्र्ये च ततस्ताभ्यां निरीक्षितः ॥ पूजितश्चैव विधिना शास्त्रदृष्टेन
सोऽनघ ॥ ३४ ॥ तद्दृष्ट्वा महदाश्चर्य्यमपूर्वं विधिविस्तरम् ॥ उपोपविष्टः सुप्रीतो नारदोभूच्च विस्मितः ॥ ३५ ॥ नारायणं संनिरीक्ष्य प्रयतेना
न्तरात्मना ॥ नमस्कृत्य च तं देवमिदं वचनमब्रवीत् ॥ ३६ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे
श्रीवासुदेवमाहात्म्य आत्यन्तिकश्रेयःसाधननिरूपणे नारायणनारदसमागमो नाम द्वितीयोऽध्यायः ॥ २ ॥ ॥ नारद उवाच ॥ वेदेषु सपुराणेषु
सांगोपांगेषु गीयसे ॥ त्वमेव शाश्वतो धाता नियन्तामृतमच्युत ॥ त्वं विधाता च सततं त्वयि सर्वमिदं जगत् ॥ १ ॥ चत्वारो ह्याश्रमा देव
सर्वे वर्णाश्च कर्मभिः ॥ यजन्ते त्वामहरहर्न्नानामूर्त्तिसमास्थितम् ॥ २ ॥ पिता माता च सर्वस्य दैवतं त्वं हि शाश्वतम् ॥ कं त्वं च यजसे
देवं पितरं वा न विद्महे ॥ ३ ॥ श्रीनारायण उवाच ॥ नैतद्रहस्यं वक्तव्यमात्मगुह्यमथापि ते ॥ मयि भक्तिमते ब्रह्मन्प्रवक्ष्यामि यथातथम् ॥ ४ ॥
सत्यं ज्ञानमनन्तं यो ब्रह्मेति श्रुतिवर्णितः ॥ त्रिगुणव्यतिरिक्तश्च पुरुषो दिव्यविग्रहः ॥५॥ महापुरुष इत्युक्तो वासुदेवश्च यः प्रभुः ॥ नारायण
ऋषिर्विष्णुः कृष्णश्च भगवानिति ॥६॥ एकः स एव देवो नौ पितरौ चेति विद्धि भोः ॥ आवाभ्यां पूज्यतेऽसौ हि दैवे पित्र्ये च कल्पिते ॥७॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सनातनः ॥ नित्यधामाऽक्षयफलप्रदाता भक्तवत्सलः ॥ २५ ॥ यस्य प्रसादात्सर्वेषां सर्व एव मनोरथाः ॥ सिद्ध्येयुश्चाञ्जसैवाऽत्र तं देवं वद मे गुह ॥ २६ ॥ तदाराधनरीतिं च सुकरां शिष्टसंमताम् ॥ ब्रूहि सर्वां विशेषेण जिज्ञासामीदमञ्जसा ॥ २७ ॥ सौतिरुवाच ॥ इत्थं महर्षिणा तेन संपृष्टो भगवान्गुहः ॥ सुप्रसन्न उवाचेदं मानयंस्तमुदारधीः ॥ २८ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे श्रीवासुदेवमाहात्म्ये सावर्णिप्रश्नो नाम प्रथमोऽध्यायः ॥ १ ॥ ॥ स्कन्द उवाच ॥ महान्तं प्रश्नवित्प्रश्नं पृच्छसि त्वमिहाऽनघ ॥ नास्योत्तरं वर्षशतैर्वक्तुं शक्यं स्वतर्कतः ॥ ऋते देवप्रसादाद्धै ब्रह्मन्ज्ञानिवरैरपि ॥ १ ॥ वासुदेवप्रसादात्तु मया ज्ञातं वदामि ते ॥ अनाख्येयं न ते किञ्चिद्धर्मनिष्ठाय सन्मते ॥ २ ॥ एवमेव हि पप्रच्छ निवृत्ते भारते रणे ॥ अजातशत्रुर्नृपतिर्भीष्मं धर्म्मविदांवरम् ॥ ३ ॥ शयितं शरशय्यायां ध्यानप्राप्ताच्युतेन च ॥ प्राप्तमैकात्म्यमव्यग्रं निगमागमपारगम् ॥ ४ ॥ युधिष्ठिर उवाच ॥ चतुर्षु तात वर्णेषु चतुर्ष्वप्याश्रमेषु यः ॥ इच्छेच्चतुर्वर्गसिद्धिं देवतां कां यजेत सः ॥५॥ निर्विघ्नेन च का सिद्धिः कथं स्यादल्पकालतः ॥ कथं चाप्यल्पसुकृती पदवीं महतीमियात् ॥ एतं मे संशयं छिन्धि सर्वज्ञस्त्वं पितामह ॥६॥ स्कन्द उवाच ॥ एवं धर्म्मात्मना तेन पृष्टः शान्तनवो मुने ॥ किञ्चिज्जहास वीक्ष्यैव श्रीकृष्णमुखपङ्कजम् ॥ ७ ॥ दृशा स प्रेरितस्तेन नरनारायणोदितम् ॥ श्रीवासुदेवमाहात्म्यं पितुः श्रुतमुवाच तम् ॥ ८ ॥ ततः श्रुत्वा नारदोपि कुरुक्षेत्रं गतः पुनः ॥ कैलास एत्य तत्प्राह पितरं मे स चापि माम् ॥ ९ ॥ तत्तेऽहं संप्रवक्ष्यामि निश्छद्म परिपृच्छते ॥ महासदसि निर्णीतं मुनिवर्याऽपसंशयम् ॥१०॥ वासुदेवः परं ब्रह्म श्रीकृष्णः पुरुषोत्तमः ॥ देवोऽकामैः सकामैश्च पूज्यो मुक्तैर्नरैरपि ॥ ११ ॥ द्विजातीनां चाश्रमाणां स्त्रीशूद्रादेश्च सर्वथा ॥ स्वस्वधर्मैरेष एव तोषणीयोस्ति भक्तितः ॥ १२ ॥ तस्मात्कर्माखिलमपि दैवं पित्र्यं च सर्वदा ॥ तत्प्रीत्या एव कर्त्तव्यं वेदोक्तं च यथोचितम् ॥ १३ ॥ सुखाप्तये नृभिर्यद्यत्कर्माऽत्र क्रियते शुभम् ॥ अपि स्वनुष्ठितं तच्चेत्कृष्णसंबन्धवर्जितम् ॥ तदा क्षयिष्ण्वल्पफलं ज्ञेयं तच्च गुणात्मकम् ॥ १४ ॥ फलवैगुण्यकृत्तच्चाऽशुभदेशादियोगतः ॥ बहुविघ्नं च तन्नृणां नैव वाञ्छितसिद्धिदम् ॥ १५ ॥ कर्मैतदेव श्रीकृष्णप्रीणनाय क्रियेत चेत् ॥ तत्संबन्धेन तर्ह्येतद्भवेत्सर्वं हि निर्गुणम् ॥ १६ ॥ स्ववाञ्छितादप्यधिकं ददाति फलमक्षयम् ॥ असद्देशादिसंबन्धात्तद्वैगुण्यं भवेन्न च ॥१७॥ विघ्नस्तु कोपि ब्रह्मर्षे प्रतापाच्चक्रपाणिनः ॥ तस्मिन्न प्रभवेत्क्वापि तत्स्यादीप्सितसिद्धिदम् ॥१८॥ यद्यप्यल्पं स्वसुकृतं तथापि परमात्मनः ॥ साक्षात्संबन्धतो ब्रह्मन्भवत्येव महत्तरम् ॥ १९ ॥ यथा स्फुलिङ्गमात्रोपि वन्यकाष्ठौघयोगतः ॥ अनिवार्यो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीकृष्णाय नमोनमः ॥ ॥ अथ श्रीवासुदेवमाहात्म्यं प्रारभ्यते ॥ ॥ शौनक उवाच ॥ ॥ जीवानां श्रेयसे सौते बहुधा साधनानि ते ॥
धर्मो ज्ञानं च वैराग्यं योगादीन्युदितानि नः ॥ १ ॥ इतिहासैर्बहुविधैर्विस्पष्टार्थानि तानि च ॥ सर्वाण्यपि महाबुद्धे श्रुतान्यस्माभिरादरात्
॥ २ ॥ सर्वेषां मनुजानां तु दुष्कराण्येव तानि तु ॥ बाहुल्याच्चान्तरायाणां तत्सिद्धिरपि दुर्लभा ॥ ३ ॥ प्रयत्नेनातिमहता पुरुषैर्धैर्य्यशा
लिभिः ॥ साधितान्यपि सिध्यन्ति तानि कालेन भूयसा ॥ ४ ॥ अतो भवान्द्विजातीनामाश्रमाणां च सर्वशः ॥ ब्रवीतु सुकरोपायं स्त्रीशूद्रा
देरपीह नः ॥ ५ ॥ कृतेन येनाप्यल्पेन येन केनापि देहिना ॥ अन्तरायैरविहतं महदेव फलं भवेत् ॥ ६ ॥ मोक्षस्य साधनं तादृक्सुविचार्य्य
महामते ॥ हिताय सर्वजीवानां कृपया वक्तुमर्हसि ॥ ७ ॥ प्रसादाद्बलदेवस्य व्यासस्य जनकस्य च ॥ जानासि सर्वमेव त्वं तन्नो ब्रूहि बुभुत्सतः
॥ ८ ॥ सौतिरुवाच ॥ महर्षिरपि सावर्णिरेवमेव हि शौनक ॥ विनीतः स्कन्दमप्राक्षीत्पुनः शङ्करनन्दनम् ॥ ९ ॥ सावर्णिरुवाच ॥ श्रुता
नानाविधा धर्म्माः साङ्ख्यज्ञानं च नैकधा ॥ योगादीनि त्वदुक्तानि साधनानि मया गुह ॥ १० ॥ सुदुष्कराणि मन्येऽहं तानि त्वस्मादृशां
किल ॥ महतामपि चान्येषां कृच्छ्रसाध्यानि वै चिरात् ॥ ११ ॥ अतो वर्णाश्रमवतां श्रेयस्कृत्सुकरं च यत् ॥ साधनं तच्छ्रेष्ठतमं वक्तुमर्हसि
मेऽधुना ॥ १२ ॥ सौतिरुवाच ॥ इति पृष्टो मुनीन्द्रेण तेन जिज्ञासुना गुहः ॥ वासुदेवं हृदि ध्यायन्कार्त्तिकेयः स ऊचिवान् ॥ १३ ॥ स्कन्द
उवाच ॥ शृणु ब्रह्मन्प्रवक्ष्येऽहं श्रुतं पितृमुखान्मया ॥ सर्वेषामपि जीवानां सुकरं मोक्षसाधनम् ॥ १४ ॥ देवताप्रीणनसमं स्वेष्टसिद्धिमभी
प्सताम् ॥ नास्त्यन्यसाधनं किञ्चिद्वर्णाश्रमवतामिह ॥ १५ ॥ अप्यल्पं सुकृतं कर्म्म देवसंबन्धतः कृतम् ॥ फलं ददाति निर्विघ्नं महदेव हि
तन्नृणाम् ॥ १६ ॥ दैवं पित्र्यं स्वधर्म्मश्च काम्यं कर्म्मापि यच्च तत् ॥ देवतायास्तु संबन्धात्सद्यः स्यादिष्टसिद्धिदम् ॥ १७ ॥ साङ्ख्ययोग
विरागादि प्रागुक्तं यच्च दुष्करम् ॥ तदपि स्याद्धि सुकरमनेनैवाशु सिद्धिदम् ॥ १८ ॥ देवस्याराधनेनैव यतः सिद्ध्यति वाञ्छितम् ॥ अतः
सर्वैर्यथाशक्ति प्रीत्याराध्यः स मानवैः ॥ १९ ॥ सावर्णिरुवाच॥देवा बहुविधा प्रोक्तास्त्वया षण्मुख मे पुरा ॥ नानाविधा वर्णिताश्च तदा
राधनरीतयः॥२०॥तत्फलानिच सर्वाणि त्वयोक्तानि पृथक्पृथक् ॥स्वर्गादिप्राप्तिमुख्यानि कालग्रस्तानि तानि तु ॥२१॥ निवृत्तिधर्म्मिणां ब्रह्मा
द्युपास्तेर्य्योगिनां गुह ॥ जनादिलोकाप्तिफलं द्विपरार्द्धान्तनश्वरम्॥२२॥दुष्कराणीह संसाध्य कर्म्माणि पुरुकृच्छ्रतः॥क्षयिष्णुफललाभश्चेत्तर्हि किं
तदुपार्जनैः॥२३॥कालेन नाश्यते येषां वपुः स्थानबलादिकम्॥तेषां न रोचते मह्यमुपासाऽत्र दिवौकसाम्॥२४॥यः स्वयं निर्भयोऽन्येषां भयहर्त्ता

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विशेषसूचना ।

एतच्च वासुदेवमाहात्म्यं प्राङ्मुद्रणसमये बहुप्रयत्नतोऽन्विष्यमाणमपि नोपलब्धं सम्प्रति च भगवद्वासुदेवाऽदभ्रद यया तदुपलभ्य संशोध्य संमुद्रयात्र विनिवेश्यते । यद्यपि नारदीयपुराणे स्कन्दमहापुराणविषयानुक्रम निरूपणे प्रथममाहेश्वरखण्ड एव "वासुदेवस्य माहाम्यम्" इत्युपलभ्यते तथापि वासुदेवमाहात्म्यस्य वैष्णवखण्ड एव पुस्तकेषूपलब्धेः प्रकरणौचित्या चात्रैवास्य निवेशनमिति विभावयन्तु सुधियः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ श्रीबदरीशाय नमः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गतिम् ॥ ८३ ॥ तस्मादेतत्प्रयत्नेन श्रोतव्यं च जनैः सदा ॥ द्विजपूजा विष्णुपूजा विधातव्या प्रयत्नतः ॥ ८४ ॥ दातव्यं च सुवर्णादि यथाशक्त्या द्विजन्मने ॥ पुत्रार्थी लभते पुत्रान्धर्म्मार्थी धर्ममाप्नुयात् ॥ ८५॥ अतिविपुलविधानैर्वर्णितं धर्म्यमाद्यं कलयति परभक्त्या क्षेत्रमाहात्म्यमेतत् ॥ य इह मनुजवर्यः श्रीसनाथः स सम्यग्व्रजति हरिनिवासं सर्वभोगांश्च भुक्त्वा ॥ ८६ ॥ यः पाठकस्यापि कदाचिदेव ददाति वित्तं च यथात्मशक्त्या ॥ पात्राणि वस्त्राणि मनोहराणि रौप्यं सुवर्णं च गवीः स मुच्येत् ॥ ८७ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डेऽयोध्यामाहात्म्येऽगस्त्यव्याससंवादेऽयोध्यायात्राविधिक्रमवर्णनंनाम दशमोऽध्यायः ॥ १० ॥ ॥ छ ॥

इति श्रीस्कान्दे महापुराणे द्वितीये वैष्णवखण्डेऽयोध्यामाहात्म्यं सम्पूर्णम् ॥ (२-८)

इदं पुस्तकं मुम्बय्यां श्रीकृष्णदासात्मजक्षेमराजश्रेष्ठिना स्वकीये "श्रीवेङ्कटेश्वर" (स्टीम्) मुद्राणालये मुद्रितम् । संवत् १९६७, शके १८३२.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ श्रीस्कांदे महापुराणे द्वितीये वैष्णवखण्डे वासुदेवमाहात्म्यं प्रारभ्यते ॥ (२-९) ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

माचरेत् ॥ विभुं विष्णुहरिं दृष्ट्वा स्नायाद्वै ब्रह्मकुण्डके ॥ ५८ ॥ चक्रतीर्थे नरः स्नात्वा दृष्ट्वा चक्रहरिं विभुम् ॥ ततो धर्महरिं दृष्ट्वा सर्वपापैः प्रमु च्यते ॥ ५९ ॥ एकादश्यामेकादश्यामियं यात्रा शुभावहा ॥ प्रातरुत्थाय मतिमान्स्वर्गद्वारजलप्लुतः ॥ ६० ॥ विधाय नित्यजं कर्म अयोध्यां च विलोकयेत् ॥ सरयूं तु ततो दृष्ट्वा पश्येन्मत्तगजं ततः ॥ ६१ ॥ बंदीं च शीतलां चैव बटुकं च विलोकयेत् ॥ तदग्रसरसि स्नात्वा महाविद्यां विलो कयेत् ॥ ६२ ॥ पिण्डारकं ततो दृष्ट्वा ततो भैरवदर्शनम् ॥ अष्टम्यां च चतुर्दश्यामेषा यात्रा फलप्रदा ॥ ६३ ॥ अंगारकचतुर्थ्यां तु पूर्वोक्ता देवता अपि ॥ विघ्नेशं च ततः पश्येत्सर्वकामार्थसिद्धये ॥ ६४ ॥ प्रातरुत्थाय मतिमान्ब्रह्मकुण्डजले प्लुतः ॥ विष्णुं विष्णुहरिं दृष्ट्वा मनोवाक्कायशुद्धिमान् ॥ ॥ ६५ ॥ मंत्रेश्वरं ततो दृष्ट्वा महाविद्यां विलोकयेत् ॥ अयोध्यां च ततो दृष्ट्वा सर्वकामार्थसिद्धये ॥ ६६ ॥ स्वर्गद्वारे नरः स्नात्वा सचैलो विजितेंद्रियः ॥ नानाविधानि पापानि बहुजन्मकृतानि च ॥ सचैलस्नानतो यांति तस्मात्सचैलमाचरेत् ॥ ६७ ॥ एषा वै गदिता यात्रा सर्वपापहरा शुभा ॥ ॥ ६८ ॥ य एवं कुरुते यात्रां नित्यं शुभफलप्रदाम् ॥ न तस्य पुनरावृत्तिः कल्पकोटिशतैरपि ॥ ६९ ॥ तस्मात्त्वमपि विप्रेंद्र अयोध्यां व्रज मा चिरम् ॥ तत्र गत्वा क्रमेणैव यात्रां कुरु यतेंद्रियः ॥ ७० ॥ अयोध्या परमं स्थानमयोध्या परमं महत् ॥ अयोध्यायाः समा काचित्पुरी नैव प्रदृश्यते ॥ ७१ ॥ अयोध्या परमं स्थानं विष्णुचक्रे प्रतिष्ठितम् ॥ ७२ ॥ इत्येतत्कथितं विप्र मया पृष्टं हि यत्त्वया ॥ समाश्रय मुने तां त्वमनुजा नीहि मामतः ॥ ७३ ॥ ॥ सूत उवाच ॥ ॥ इत्येतदुक्त्वा विरते मुनौ कलशजन्मनि ॥ उवाच मधुरं वाक्यं व्यासः स तपसां निधिः ॥ ७४ ॥ ॥ ॥ व्यास उवाच ॥ ॥ धन्योऽस्म्यनुगृहीतोऽस्मि कृतकृत्योऽस्म्यहं मुने ॥ सत्यं शौचं श्रुतं विप्रं सुशीलं च क्षमार्जवम् ॥ सर्वं च निष्फलं तस्य अयोध्यां नागतो यदि ॥ ७५ ॥ यस्मिन्मयि प्रसन्नेन त्वयोक्तो धर्मनिर्णयः ॥ इदानीमपि गच्छामि ह्ययोध्यां निर्मलां पुरीम् ॥ त्वमपि व्रज विप्रेंद्र स्वमाश्रमपदं निजम् ॥ ७६ ॥ ॥ सूत उवाच ॥ ॥ इत्येवमुक्त्वा क्रमशो यात्राविधिमनुत्तमम् ॥ जगाम तपसां राशिरगस्त्यः कुंभ संभवः ॥ ७७ ॥ स्वमाश्रमपदं धीरो विस्मयोत्फुल्ललोचनः ॥ व्यासोऽपि महसां राशिर्जगाम विजितेन्द्रियः ॥ ७८ ॥ अयोध्यामागतो विप्रः सर्व कामार्थसिद्धये ॥ आगत्यैतद्विधानेन कृत्वा यात्रां यथाक्रमम् ॥ ७९ ॥ दृष्ट्वा महाश्चर्यकरं कारणं तीर्थमुत्तमम् ॥ आनंदतुंदिलस्तत्र सम्यगाचम्य बुद्धिमान् ॥ ८० ॥ ततो जगाम विप्रेंद्रः स्वमाश्रमपदं मुनिः ॥ व्यासेन कथितं मह्यं माहात्म्यं क्रमशस्तदा ॥ ८१ ॥ मया श्रुत्वा च माहात्म्यं यात्रां कृत्वा विधानतः ॥ कुरुक्षेत्रे समागत्य भवदग्रे निरूपितम् ॥ ८२ ॥ इदं माहात्म्यमतुलं यः पठेत्प्रयतो नरः ॥ श्रद्धया यश्च शृणुयात्स याति परमां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मनसा स्मरेत् ॥ न तस्य पुनरावृत्तिः कल्पांतरशतैरपि ॥ ३४ ॥ जलरूपेण ब्रह्मैव सरयूर्मोक्षदा सदा ॥ नैवात्र कर्मणो भोगो रामरूपो भवेन्नरः ॥
॥ ३५ ॥ पशुपक्षिमृगाश्चैव ये चान्ये पापयोनयः ॥ तेऽपि मुक्ता दिवं यांति श्रीरामवचनं यथा ॥ ३६ ॥ इत्युक्त्वा विरते तस्मिन्मुनौ
कलशजन्मनि ॥ कृष्णद्वैपायनव्यासः पुनरूचे तपोधनः ॥ ३७ ॥ दुर्लभा सर्वजन्तूनां कथा विस्तरतः क्रमात् ॥ यात्राक्रमोऽपि च मया श्रुत
आगच्छतां नृणाम् ॥ ३८ ॥ इदानीं श्रोतुमिच्छामि क्षेत्रस्थानं यथाविधि ॥ यात्राक्रमं मुनिश्रेष्ठ सम्यक्त्वत्तस्तपोधन ॥ ३९ ॥ फलं ब्रूहि क्रमेणैव
विस्तरात्पृच्छतो मम ॥ यद्यस्ति मयि ते विद्वन्कृपा कारुणिकोत्तम ॥ ४० ॥ यथा श्रुत्वा क्रमेणैव यात्रां विश्वविदां वर ॥ करोमि त्वत्प्रसादेन
तथा कुरु यतव्रत ॥ ४१ ॥ ॥ अगस्त्य उवाच ॥ ॥ शृणु वक्ष्यामि तत्त्वेन यात्राक्रममथादितः ॥ अयोध्यां सप्ततीर्थानां यथावदनुपूर्वशः ॥
॥ ४२ ॥ मनोवाक्कायशुद्धेन निर्दोषेणांतरात्मना ॥ मानसेषु सुतीर्थेषु स्नात्वा किल जितेंद्रियः ॥ यः करोति विधिं सम्यक्स तीर्थफलमश्नुते ॥
॥ ४३ ॥ ॥ व्यास उवाच ॥ ॥ मानसान्येव तीर्थानि कथयस्व तपोधन ॥ येषु स्नातवतां नृणां विशुद्धिर्मनसो भवेत् ॥ ४४ ॥
॥ ॥ अगस्त्य उवाच ॥ ॥ शृणु तीर्थानि गदतो मानसानि ममानघ ॥ येषु सम्यङ्नरः स्नात्वा प्रयाति परमां गतिम् ॥ ४५ ॥ सत्यतीर्थं
क्षमातीर्थं तीर्थमिंद्रियनिग्रहः ॥ सर्वभूतदयातीर्थं तीर्थानां सत्यवादिता ॥ ४६ ॥ ज्ञानतीर्थं तपस्तीर्थं कथितं तीर्थसप्तकम् ॥ सर्वभूतदयातीर्थे
विशुद्धिर्मनसो भवेत् ॥ ४७ ॥ न तोयपूतदेहस्य स्नानमित्यभिधीयते ॥ स स्नातो यस्य वै पुंसः सुविशुद्धं मनो मतम् ॥ भौमानामपि तीर्थानां
पुण्यत्वे कारणं शृणु ॥ ४८ ॥ यथा शरीरस्योद्देशाः केचिन्मध्योत्तमाः स्मृताः ॥ तथा पृथिव्यामुद्देशाः केचित्पुण्यतमाः स्मृताः ॥ ४९ ॥ तस्मा
द्भौमेषु तीर्थेषु मानसेषु च संवसेत् ॥ उभयेषु च यः स्नाति स याति परमां गतिम् ॥ ५० ॥ तस्मात्त्वमपि विप्रेंद्र विशुद्धेनांतरात्मना ॥ यात्रां
कुरु प्रयत्नेन यात्रा वै नोदिता मया ॥ तं तु वक्ष्यामि विप्रेंद्र तीर्थयात्राविधिं क्रमात् ॥ ५१ ॥ जायन्ते च जलेष्वेव म्रियंते च जलौकसः ॥ न
च गच्छंति ते स्वर्गमशुद्धमनसो मलाः ॥ ५२ ॥ विषयेष्वनिशं रागो मनसो मल उच्यते ॥ तेष्वेव हि न संगम्य नैर्मल्यं समुदाहृतम् ॥ ५३ ॥
चित्तमन्तर्गतं दुष्टं तीर्थस्नानं न शुध्यति ॥ शतशोऽपि जलैर्धौतं सुराभाण्डमपावनम् ॥ ५४ ॥ दानमिज्या तपः शौचं तीर्थसेवा श्रुतिस्तथा ॥
सर्वाण्येतानि तीर्थानि यदि भावेन निर्मलः ॥ ५५ ॥ निगृहीतेंद्रियग्रामो यत्रैव वसते नरः ॥ तत्र तस्य कुरुक्षेत्रं नैमिषं पुष्करं तथा ॥ ५६ ॥
एतत्ते कथितं विप्र मानसं तीर्थलक्षणम् ॥ स्नाते यस्मिन्क्रियाः सर्वाः सफलाः स्युः क्रियावताम् ॥ ५७ ॥ प्रातरुत्थाय मतिमान्संगमे स्नान

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लंकास्थानादिहानीता रामेणोत्कृष्टकर्मणा ॥ अयोध्यायां स्थापिता सा रक्षार्थं नियतव्रतैः ॥ ९ ॥ संपूज्य विधिवत्तस्या दर्शनं कार्यमादरात् ॥ सर्वकामार्थसिद्ध्यर्थमुत्सवोऽपि शुभप्रदः ॥ कर्तव्यः सुप्रयत्नेन गीतवादित्रसंयुतैः ॥ १० ॥ नवरात्रे तृतीयायां यात्रा सांवत्सरी भवेत् ॥ सर्वदा सुखसंतानसिद्धये परमार्थदा ॥ नानासंगीतवादित्रनृत्योत्सवमनोहरा ॥ ११ ॥ एवं कृते न संदेहः सर्वदा रक्षितो भवेत् ॥ १२ ॥ एतत्पश्चिमदिग्भागे वर्तते परमो मुने ॥ पिंडारक इति ख्यातो वीरः परमपौरुषः ॥ पूजनीयः प्रयत्नेन गंधपुष्पाक्षतादिभिः ॥ १३ ॥ यस्य पूजावशान्नृणां सिद्धयः करसंश्रिताः ॥ तस्य पूजाविधानेन कर्तव्यं पूजनं नरैः ॥ १४ ॥ सरयूसलिले स्नात्वा पिंडारकं च पूजयेत् ॥ पापिनां मोहकर्त्तारं मतिदं कृतिनां सदा ॥ १५ ॥ तस्य यात्रा विधातव्या सपुष्प्या नवरात्रिषु ॥ तत्पश्चिमदिशाभागे विघ्नेशं किल पूजयेत् ॥ १६ ॥ यस्य दर्शनतो नृणां विघ्नलेशो न विद्यते ॥ तस्माद्विघ्नेश्वरः पूज्यः सर्वकामफलप्रदः ॥ १७ ॥ तस्मात्स्थानत ऐशाने रामजन्म प्रवर्त्तते ॥ जन्मस्थानमिदं प्रोक्तं मोक्षादिफलसाधनम् ॥ १८ ॥ विघ्नेश्वरात्पूर्वभागे वासिष्ठादुत्तरे तथा ॥ लौमशात्पश्चिमे भागे जन्मस्थानं ततः स्मृतम् ॥ १९ ॥ यद्दृष्ट्वा च मनुष्यस्य गर्भवासजयो भवेत् ॥ विना दानेन तपसा विना तीर्थैर्विना मखैः ॥ २० ॥ नवमीदिवसे प्राप्ते व्रतधारी हि मानवः ॥ स्नानदानप्रभावेण मुच्यते जन्मबन्धनात् ॥ २१ ॥ कपिलागोसहस्राणि यो ददाति दिनेदिने ॥ तत्फलं समवाप्नोति जन्मभूमेः प्रदर्शनात् ॥ २२ ॥ आश्रमे वसतां पुंसां तापसानां च यत्फलम् ॥ राजसूयसहस्राणि प्रतिवर्षाग्निहोत्रतः ॥ २३ ॥ नियमस्थं नरं दृष्ट्वा जन्मस्थाने विशेषतः ॥ मातापित्रोर्गुरूणां च भक्तिमुद्वहतां सताम् ॥ २४ ॥ तत्फलं समवाप्नोति जन्मभूमेः प्रदर्शनात् ॥ २५ ॥ ॥ अथ सरयूवर्णनम् ॥ ॥ पितॄणामक्षया तृप्तिर्गयाश्राद्धाधिकं फलम् ॥ २६ ॥ मन्वंतरसहस्रैस्तु काशीवासेषु यत्फलम् ॥ तत्फलं समवाप्नोति सरयूदर्शने कृते ॥ २७ ॥ गयाश्राद्धं च ये कृत्वा पुरुषोत्तमदर्शनम् ॥ कुर्वंति तत्फलं प्रोक्तं कलौ दाशरथीं पुरीम् ॥ २८ ॥ मथुरायां कल्पमेकं वसते मानवो यदि ॥ तत्फलं समवाप्नोति सरयूदर्शने कृते ॥ ॥ २९ ॥ पुष्करेषु प्रयागेषु माघे वा कार्त्तिके तथा ॥ तत्फलं समवाप्नोति सरयूदर्शने कृते ॥ ३० ॥ कल्पकोटिसहस्राणि ह्यवन्तीवासतो हि यत् ॥ तत्फलं समवाप्नोति सरयूदर्शने कृते ॥ ३१ ॥ षष्टिवर्षसहस्राणि भागीरथ्यवगाहजम् ॥ तत्फलं निमिषार्द्धेन कलौ दाशरथीं पुरीम् ॥ ॥ ३२ ॥ निमिषं निमिषार्द्धं वा प्राणिनां रामचिन्तनम् ॥ संसारकारणाज्ञाननाशकं जायते ध्रुवम् ॥ ३३ ॥ यत्र कुत्र स्थितो यस्तु ह्ययोध्यां

१ यत्फलम्—इति शेषः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तथा दानं सर्वमक्षयतां व्रजेत् ॥ अन्नं बहुविधं देयं वासांसि विविधान्यपि ॥ ४७ ॥ यत्नतो देवताः पूज्या वस्त्रादिभिरलंकृतैः ॥ नंदि
ग्रामे वसन्पूर्वं भरतो रघुवंशजः ॥ ४८ ॥ रामचन्द्रं हृदि ध्यायन्निर्मलात्मा जितेन्द्रियः ॥ ततः स्थित्वा प्रजाः सर्वा ररक्ष क्षितिवल्लभः ॥ ४९ ॥
तत्र चक्रे महत्कुण्डं भरतोनाम भूपतिः ॥ राममूर्तिं च संस्थाप्य चचार विजितेन्द्रियः ॥ ५० ॥ तत्कुंडे सुमहत्पुण्यं नानापुण्यसमन्वितम् ॥
कुमुदोत्पलकह्लारपुण्डरीकसमन्वितम् ॥ ५१ ॥ हंससारसचक्राह्वविहंगमविराजितम् ॥ उद्यानपादपच्छायासच्छायममलं सदा ॥ ५२ ॥ तत्र
स्नानं महापुण्यं प्रमोदानन्दनिर्मलम् ॥ तत्र स्नानं तथा श्राद्धं पितॄनुद्दिश्य कुर्वतः ॥ पितरस्तस्य तुष्यंति तुष्टाः स्युः सर्वदेवताः ॥ ५३ ॥ स्वर्णं
चान्नं विधानेन दातव्यं च द्विजन्मने ॥ श्रद्धापूर्वकमेतत्तु कर्तव्यं प्रयतैर्नरैः ॥ ५४ ॥ तत्पश्चिमदिशाभागे जटाकुण्डमनुत्तमम् ॥ यत्र
रामादिभिः सर्वैर्जटाः परिहृता निजाः ॥ ५५ ॥ जटाकुण्डमिति ख्यातं सर्वतीर्थोत्तमोत्तमम् ॥ यत्र स्नानेन दानेन सर्वान्कामानवाप्नुयात् ॥ ५६ ॥
पूर्वकुण्डेषु संपूज्यो भरतः श्रीसमन्वितः ॥ जटाकुण्डेषु संपूज्यौ ससीतौ रामलक्ष्मणौ ॥ चैत्रकृष्णचतुर्दश्यां यात्रा सांवत्सरी भवेत् ॥ ५७ ॥
इति परमविधानैः पूजयेद्रामसीते तदनु भरतकुण्डे लक्ष्मणं च प्रपूज्य ॥ विधिवदमृतकुण्डे द्वंद्वसंमज्जनेन[1] वसति सुकृतिमूर्तिर्वैष्णवे तत्र
लोके ॥ ५८ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डेऽयोध्यामाहात्म्ये गयाकूपपिशाच मोचन
मानसतीर्थतमसानदीमाण्डव्याद्याश्रमसीताकुण्डदुग्धेश्वरभैरवभारतकुण्डजटाकुण्डमाहात्म्यवर्णनंनाम नवमोऽध्यायः ॥ ९ ॥ ॥ छ ॥ ॥
॥ ॥ अगस्त्य उवाच ॥ ॥ निराहारो नरो भूत्वा क्षीराहारोऽपि वा पुनः ॥ अजितं पूजयेद्विप्र तस्य सिद्धिः करे स्थिता ॥
॥ १ ॥ महोत्सवस्तु कर्तव्यो गीतवादित्रसंयुतः ॥ एवं यः कुरुते धीमान्सर्वान्कामानवाप्नुयात् ॥ २ ॥ एतस्मादुत्तरे विद्धन्वीरस्य
शुभसूचकम् ॥ स्थानं मत्तगजेन्द्रस्य वर्तते नियतव्रत ॥ ३ ॥ तदग्रे सरसि स्नात्वा वसेत्तत्र सुनिश्चितम् ॥ पूर्णां सिद्धिमवाप्नोति
यामवाप्य न शोचति ॥ ४ ॥ अयोध्यारक्षको वीरः सर्वकामार्थसिद्धिदः ॥ नवरात्रिषु पंचम्यां यात्रा सांवत्सरी भवेत् ॥ ५ ॥ गंध
पुष्पादिधूपादिनैवेद्यादिविधानतः ॥ पूजनीयः प्रयत्नेन सर्वकामार्थसिद्धिदः ॥ यंयं काममिहेच्छेत तंतं काममवाप्नुयात् ॥ ६ ॥ एतस्माद्द
क्षिणे भागे सुरसानाम राक्षसी ॥ विष्णुभक्ता सदा विप्र वर्तते सिद्धिदायिका ॥ ७ ॥ तां संपूज्य नरो भक्त्या सर्वान्कामानवाप्नुयात् ॥ ८ ॥

१ द्वन्द्वसंमज्जनेन—स्त्रीपुरुषयोः सह स्नानेन—इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संश्रितं महत् ॥ गयाकूपमिति ख्यातं सर्वाभीष्टफलप्रदम् ॥ १ ॥ यत्र स्नात्वा च दत्त्वा च यथाशक्त्या जितेंद्रियः ॥ सर्वकाममवाप्नोति श्राद्धं कृत्वा द्विजोत्तमः ॥ २ ॥ नरकस्थाश्च ये केचित्पितरश्च पितामहाः ॥ विष्णुलोके तु गच्छन्ति तस्मिञ्च्छ्राद्धे कृते तु वै ॥ ३ ॥ तस्मिञ्च्छ्राद्धे कृते विप्र पितॄणामनृणो भवेत् ॥ शक्तिभिः पिंडदानं तु सयवैः पायसेन च ॥ ४ ॥ कर्त्तव्यमृषिनिर्दिष्टं पिण्याकेन गुडेन वा ॥ श्राद्धं तत्तीर्थके प्रोक्तं पितॄणां तुष्टिकारकम् ॥ ५ ॥ तत्र श्राद्धं प्रकर्त्तव्यं नरैः श्रद्धासमन्वितैः ॥ तुष्यंति पितरस्तेषां तुष्टाः स्युः सर्वदेवताः ॥ ६ ॥ तुष्टेषु पितृषु श्रीमाञ्जायते पुत्रवाँस्तथा ॥ श्राद्धेन पितरस्तुष्टाः प्रयच्छंति सुतान्बहून् ॥ ७ ॥ श्रियं च विपुलान्भोगाञ्छ्राद्धकृद्भ्यो न संशयः ॥ तस्मात्त्र विधानेन विधातव्यं प्रयत्नतः ॥ ८ ॥ श्राद्धं श्रद्धायुतैः सम्यगभीष्टफलकांक्षिभिः ॥ गयाकूपे विशेषेण पितॄणां दत्तमक्षयम् ॥ ९ ॥ सोमवारेण संयुक्ता अमावास्या यदा भवेत् ॥ तत्रानंतफलं श्राद्धं पितॄणां दत्तमक्षयम् ॥ १० ॥ अन्यदा सोमवारेण तत्र श्राद्धं विधानतः ॥ पितृसंतोषदं नित्यं तत्र दत्ताक्षयो[1] भवेत् ॥ ११ ॥ तत्र पूर्वदिशाभागे तीर्थं सर्वोत्तमोत्तमम् ॥ पिशाचमोचनंनाम विद्यते च फलप्रदम् ॥ १२ ॥ तत्र स्नात्वा च दत्त्वा च पिशाचो नैव जायते ॥ तत्र स्नानं तथा दानं श्राद्धं चैव विशेषतः ॥ कर्त्तव्यं च प्रयत्नेन नरैः श्रद्धासमन्वितैः ॥ १३ ॥ मार्गशीर्षे शुक्लपक्षे चतुर्दश्यां विशेषतः ॥ स्नानं तत्र प्रकर्त्तव्यं पिशाचत्वविमुक्तये ॥ १४ ॥ तत्संनिधौ पूर्वभागे मानसंनाम नामतः ॥ तीर्थं पुण्यनिवासाग्र्यं स्नातव्यं च विशेषतः ॥ तत्र स्नानेन दानेन सर्वान्कामानवाप्नुयात् ॥ १५ ॥ नानाविधानि पापानि मेरुतुल्यानि वै पुनः ॥ तत्र स्नानात्क्षयं यांति नात्र कार्या विचारणा ॥ १६ ॥ यत्किञ्चिद्विद्यते पापं मानसं कायिकं तथा ॥ वाचिकं च तथा पापं स्नानतो विलयं व्रजेत् ॥ १७ ॥ प्रौष्ठपद्यां सदा कार्य्या पौर्णमास्यां विशेषतः ॥ यात्रा तस्य नृभिर्विप्र पुण्यवद्भिः क्रियापरैः ॥ १८ ॥ तस्माद्दक्षिणदिग्भागे वर्त्तते सुकृतैकभूः ॥ तमसानाम तटिनी महापातकनाशिनी ॥ १९ ॥ यत्र स्नानं तथा दानं सर्वपापहरं सदा ॥ यस्यास्तटे तथा रम्ये सर्वदा फलदायके ॥ २० ॥ नानाविधानि स्थानानि मुनीनां भावितात्मनाम् ॥ माण्डव्यस्य मुनेः स्थानं वर्त्तते पापनाशनम् ॥ २१ ॥ यस्यास्तीरे मुनिश्रेष्ठ सर्वत्र सुमनोहरम् ॥ तस्याश्रमपदं रम्यं नानावृक्षमनोहरम् ॥ २२ ॥ यस्मात्स्थानात्समुद्भूता तमसा सुतरंगिणी ॥ तद्वनं पुण्यमधिकं पावनं पदमुत्तमम् ॥ २३ ॥ यस्य दर्शनतो नृणां सर्वपापक्षयो भवेत् ॥ २४ ॥ प्रफुल्लनानाविधगुल्मशोभितं लताप्रतानावनतं मनोहरम् ॥ विरूढपुष्पैः परितः प्रियंगुभिः सुपु

१ दत्ताक्षयः—दत्तस्य दानस्य अक्षयः- अनाशः—आनन्त्यं भवेत्—इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ष्पितैः कण्टकितैश्च केतकैः ॥ २५ ॥ तमालगुल्मैर्निचितं सुगंधिभिः सकर्णिकारैर्बकुलैश्च सर्वतः ॥ अशोकपुन्नागवरैः सुपुष्पितैर्द्विरेफमालाकुल
पुष्पसंचयैः ॥ २६ ॥ क्वचित्प्रफुल्लांबुजरेणुभूषितैर्विहंगमैश्चारुफलप्रचारिभिः ॥ विनादितं सारससुत्कुलादिभिः प्रमत्तदात्यूहकुलैश्च वल्गुभिः ॥
॥ २७ ॥ क्वचिच्च चक्राह्वरवोपनादितं क्वचिच्च कादम्बकदम्बकैर्युतम् ॥ क्वचिच्च कारण्डवनादनादितं क्वचिच्च मत्तालिकुलाकुलीकृतम् ॥ २८ ॥
मदाकुलाभिर्भ्रमरीभिरारान्निषेवितं चारुसुगंधिपुष्पवत् ॥ क्वचिच्च पुष्पैः सहकारवृक्षैर्लतोपगूढैस्तिलकद्रुमैश्च ॥ २९ ॥ प्रहृष्टनानाविधपक्षिसे
वितं प्रमत्तहारीतकुलोपनादितम् ॥ समंततः सुन्दरदर्शनीयतां समुद्वहत्तद्वनमुच्छसन्महत् ॥ ३० ॥ निबिडनिचुलनीलं नीलकण्ठाभिरामं मदमुदि
तविहंगीवृन्दनादाभिरामम् ॥ कुसुमिततरुशाखालीनमत्तद्विरेफं नवकिसलयशोभाशोभितं सत्फलाढ्यम् ॥ ३१ ॥ इत्यादिबहुशोभाढ्यं सर्वदिक्षु
मनोहरम् ॥ यत्र मांडव्यमुनिना तपस्ततं महत्किल ॥ यत्प्रभावादभूत्तीर्थं पावनं तत्सदा महत् ॥ ३२ ॥ तत्पूर्वं गौतमस्यर्षेराश्रमं पावनं महत् ॥
तत्पूर्वं च्यवनस्यर्षेः पराशरमुनेरिदम् ॥ प्रथमं ते मुनिश्रेष्ठ पितुः किल तपोनिधेः ॥ ३३ ॥ नानाविधानि तीर्थानि चाश्रमाश्चैव सर्वशः ॥ वर्तंते
तापसानां च यस्यास्तीरे समंततः ॥ ३४ ॥ तमसानाम सा ज्ञेया वर्तते तटिनी शुभा ॥ यज्ञयूपान्समुत्खाय शोभिता बहुशोऽभितः ॥ ३५ ॥
तत्र स्नानेन दानेन श्राद्धेन च विशेषतः ॥ सर्वकामार्थसिद्धिः स्यान्नात्र कार्या विचारणा ॥ ३६ ॥ मार्गशीर्षे शुक्लपक्षे पञ्चदश्यां विशेषतः ॥
स्नानं तस्य फलप्राप्तिदायकं सर्वदा नृणाम् ॥ ३७ ॥ तस्मादत्र प्रकर्तव्यं स्नानं निर्मलमानसैः ॥ प्रयत्नतो मुनिश्रेष्ठ सर्वकामार्थसिद्धिदम् ॥ ३८ ॥
अतः परं प्रवक्ष्यामि तमसापरमं शुभम् ॥ सीताकुंडमितिख्यातं श्रीदुग्धेश्वरसन्निधौ ॥ ३९ ॥ भाद्रे शुक्लचतुर्थ्यां तु तस्य यात्रा शुभावहा ॥
सर्वकामार्थसिद्ध्यर्थं पूज्यो विघ्नेश्वरस्तथा ॥ तस्य स्मरणमात्रेण सर्वविघ्नविनाशनम् ॥ ४० ॥ तस्माद्दक्षिणदिग्भागे भैरवोनाम नामतः ॥
रक्षितो वासुदेवेन क्षेत्ररक्षार्थमादरात् ॥ तस्य पूजा विधातव्या प्रयत्नेन यथाविधि ॥ मनो
यं दृष्ट्वा सर्वपापेभ्यो मुच्यते नात्र संशयः ॥ ४१ ॥ रक्षितो वासुदेवेन क्षेत्ररक्षार्थमादरात् ॥ तस्य पूजा विधातव्या प्रयत्नेन यथाविधि ॥ मनो
भीष्टफलप्राप्तिर्भैरवस्य सदाऽऽदरात् ॥ ४२ ॥ मार्गशीर्षस्य कृष्णायामष्टम्यां तस्य निर्मिता ॥ यात्रा सांवत्सरी तत्र सर्वकामार्थसिद्धये ॥ ४३ ॥
पशूपहारसंभूति कर्त्तव्यं पूजनं जनैः ॥ सर्वकामफलप्राप्तिर्जायते नात्र संशयः ॥ ४४ ॥ निर्विघ्नं तीर्थवसतिर्भैरवस्य प्रसादतः ॥ जायते तेन
कर्तव्या पूजा तस्य प्रयत्नतः ॥ ४५ ॥ एतस्मिन्नुत्तरे भागे रम्यं भरतकुण्डकम् ॥ यत्र स्नात्वा नरः पापैर्मुच्यते नात्र संशयः ॥ ४६ ॥ तत्र स्नानं

१ तेन–तेन कारणेन–इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रतिर्नरः ॥ इह क्षेत्रे मृतः सोपि संसारी न पुनर्भवेत् ॥ ९५ ॥ ये पुनर्निगमाधीनाः सत्रस्था विजितेंद्रियाः ॥ व्रतिनश्च निरारंभाः सर्वे ते हरि भाविताः ॥ ९६ ॥ देहभंगं समापद्य धीमंतः संगवर्जिताः ॥ गतास्ते च परं मोक्षं प्रसादात्सर्वदा हरेः ॥ ९७ ॥ जन्मान्तरसहस्रेषु युञ्जन्योगी न चाप्नुयात् ॥ तमिहैव परं मोक्षं मरणादपि गच्छति ॥ ९८ ॥ एतत्संक्षेपतो वच्मि क्षेत्रस्य महिमाद्भुतम् ॥ एतदेव परं स्थानमेतदेव परं पदम् ॥ एतादृङ्नापरं स्थानं पुनरन्यत्र दृश्यते ॥ ९९ ॥ अत्र गत्वा प्रयत्नेन यात्रा पुण्याभिकांक्षिभिः ॥ कर्तव्या विधिवद्धीराः क्रमेण श्रद्धयान्वितैः ॥ ॥ १०० ॥ प्रथमेऽहनि कर्त्तव्य उपवासो यतात्मभिः ॥ नियमेन ततः स्नानं दानं चैव स्वशक्तितः ॥ १०१ ॥ उपावृत्तस्तु पापेभ्यो यस्य वासो गुणैः सह ॥ उपवासः स विज्ञेयः सर्वभोगविवर्जितः ॥ १०२ ॥ उपवासं विधायासौ चक्रतीर्थे नरः कृती ॥ उपवासदिने स्नायाद्दद्याच्चैव स्वश क्तितः ॥ १०३ ॥ विप्रं संपूज्य विधिवत्पश्येद्विष्णुहरिं विभुम् ॥ स्वर्गद्वारे नरः स्नात्वा विष्णुं संपूज्य यत्नतः ॥ १०४ ॥ क्षौरं च कारयेत्तत्र व्रती धर्माभिधे ततः ॥ पापमोचनके स्नानमृणमोचनके ततः ॥ १०५ ॥ स्नात्वा सहस्रधारायां शेषं संपूज्य यत्नतः ॥ दृष्ट्वा चंद्रहरिं देवं ततो धर्महरिं विभुम् ॥ १०६ ॥ ततश्चक्रहरिं दृष्ट्वा दद्याच्चैव स्वशक्तितः ॥ ब्रह्मकुण्डे नरः स्नात्वा सर्वकामार्थसिद्धये ॥ महाविद्यासमीपे तु रात्रौ जाग रणं चरेत् ॥ १०७ ॥ ततः प्रभाते विमले पुनरुत्थाय सद्व्रती ॥ स्वर्गद्वारे प्रयत्नेन विधिवत्स्नानमाचरेत् ॥ १०८ ॥ श्राद्धं च विधिवत्कृत्वा दत्त्वा चैव स्वशक्तितः॥ विष्णुं संपूज्य विधिवद्विप्रानपि पुनःपुनः ॥१०९॥ दंपती च प्रयत्नेन पूज्यौ वस्त्रादिभिस्तथा ॥ श्रद्धया परया युक्तैर्दातव्या भूरिदक्षिणा ॥ ११० ॥ विप्रान्संपूज्य विधिवद्भुंजीत प्रयतो नरः ॥ १११ ॥ अन्येद्युरपि चोत्थाय श्रद्धया परया युतः ॥ रुक्मिणीप्रभृतीन्यत्र पश्येत्तीर्थानि च क्रमात् ॥ ११२ ॥ तत्रतत्र नरः स्नात्वा दत्त्वा चैव स्वशक्तितः ॥ विष्णुं संपूज्य यत्नेन मनोवाक्कायनिर्मलः ॥ ११३ ॥ यात्रां समापयेत्सम्यङ्नियतात्मा शुचिव्रतः ॥ यत्र क्वापि मृतो धीरः परं मोक्षमवाप्नुयात् ॥ ११४ ॥ ॥ अगस्त्य उवाच ॥ ॥ वसिष्ठोक्तमिति श्रुत्वा कृत्वा चैव यथाविधि ॥ विभीषणपुरोगास्ते बभूवुर्निर्मलास्तदा ॥ ११५ ॥ इति बहुलविधानैस्तीर्थयात्रां विधाय प्रचुरसुकृतपूर्णास्ते च सुग्रीवमुख्याः ॥ गतमलिनसुदेहाः स्वर्गचर्याप्रयत्नादुपगुणितगुणौघास्ते बभूवुः समस्ताः ॥ ११६ ॥ इति श्रीस्कान्दे महापुराण एकाशीति साहस्र्यां संहितायां द्वितीये वैष्णवखंडेऽयोध्यामाहात्म्ये महारत्नतीर्थदुर्भरमहाभरतीर्थमहाविद्यातीर्थसिद्धपीठक्षीरेश्वरसीताकुण्डसुग्रीवतीर्थहनुमत्कु ण्डविभीषणसरस्तीर्थायोध्यायात्राविधिक्रमवर्णनंनामाष्टमोऽध्यायः ॥ ८ ॥ ॥ छ ॥ ॥ अगस्त्य उवाच ॥ ॥ जटाकुण्डत आग्नेयदिग्दले

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवं यो विधिवत्कुर्याद्दयाधर्मविशारदः ॥ स याति परमं स्थानं यत्र गत्वा न शोचति ॥ ७४ ॥ तत्र पूर्वदिशाभागे सुग्रीवरचितं महत् ॥ तीर्थं तपो
निधेस्तत्र वर्तते सन्निधौ शुभम् ॥ ७५ ॥ यत्र स्नात्वा च दत्त्वा च रामं संपूज्य यत्नतः ॥ तस्मिन्नेव दिने तत्र सर्वान्कामानवाप्नुयात् ॥ ७६ ॥
तत्प्रत्यग्दिशि वै स्थानं हनुमत्कुण्डमित्यपि ॥ तस्य पश्चिमतो विप्र विभीषणसरः शुभम् ॥ ७७ ॥ तयोः स्नानेन दानेन रामसंपूजनेन च ॥
सर्वान्कामानवाप्नोति तस्मिन्नेव विधानतः ॥ इयं सा परमा मेध्याऽयोध्या धर्मनिधिः स्मृता ॥ ७८ ॥ इत्युक्तास्तु ततः सर्वे वसिष्ठ
मुनिमादरात् ॥ पप्रच्छुर्विनयात्क्षिप्रं विभीषणपुरःसराः ॥ कथयस्व तपोराशे कथामेतां सुदुर्लभाम् ॥ ७९ ॥ अयोध्यायाः परं विप्र माहात्म्यं कथ
यंति यत् ॥ तत्सर्वं कथय क्षिप्रं श्रुत्वा माहात्म्यमुत्तमम् ॥ ८० ॥ यथा यात्रां विधास्यामः क्रमेण च विधानतः ॥ तदस्मासु कृपां कृत्वा कथ
यस्व तपोनिधे ॥ ८१ ॥ ॥ वसिष्ठ उवाच ॥ ॥ शृण्वन्तु मुनयः सर्वे अयोध्यामहिमाद्भुतम् ॥ यच्छ्रुत्वा सर्वपापेभ्यो मुच्यते नात्र संशयः ॥
॥ ८२ ॥ इदं गुह्यतरं क्षेत्रमयोध्याभिधमुत्तमम् ॥ सर्वेषामेव भूतानां हेतुर्मोक्षस्य सर्वदा ॥ ८३ ॥ अस्मिन्सिद्धाः सदा देवा वैष्णवं
व्रतमास्थिताः ॥ नानालिंगधरा नित्यं विष्णुलोकाभिकांक्षिणः ॥ ८४ ॥ अभ्यस्यंति परं योगं युक्तप्राणा जितेन्द्रियाः ॥ नानावृक्ष
समाकीर्णे नानाविहगवासिनि ॥ ८५ ॥ कमलोत्पलशोभाढ्ये सरोभिः समलंकृते ॥ अप्सरोगणसंकीर्णे सर्वदा सेविते शुभे ॥ ८६ ॥
रोचते हि सदा वासः क्षेत्रे नित्यं हरेरिह ॥ मन्यमाना विष्णुभक्ता विष्णौ सर्वेऽर्पितक्रियाः॥८७॥यथा मोक्षमिहायांति नान्यत्र हि तथा क्वचित् ॥
अतः श्रेष्ठतमं क्षेत्रं यस्माच्च वसतिर्हरेः ॥ महाक्षेत्रमिदं यस्मादयोध्याभिधमुत्तमम् ॥ ८८ ॥ नैमिषे च कुरुक्षेत्रे गंगाद्वारे च पुष्करे ॥ स्नाना
त्संसेवनाद्वापि न मोक्षः प्राप्यते तथा ॥ ८९ ॥ इह संप्राप्यते यद्वत्तत एव विशिष्यते ॥ प्रयागे वा भवेन्मोक्ष इह वा हरिसंश्रयात् ॥ सर्वस्मा
दपि तीर्थाग्र्यादिदमेव महत्स्मृतम् ॥ ९० ॥ अव्यक्तलिंगैर्मुनिभिः सर्वैः सिद्धैर्महर्षिभिः ॥ इह संप्राप्यते मोक्षो दुर्लभोऽन्यत्र यो मतः ॥
॥ ९१ ॥ तेभ्यः प्रयच्छति हरिर्योगमैश्वर्यमुत्तमम् ॥ आत्मनश्चैव सायुज्यमीप्सितं स्थानमुत्तमम् ॥ ९२ ॥ ब्रह्मा देवर्षिभिः सार्द्धं
श्रीश्च वायुर्दिवाकरः ॥ देवराजस्तथा शक्रो ये चान्येऽपि दिवौकसः ॥ ९३ ॥ [1]उपासते महात्मानः सर्वत्र हरिमादरात् ॥
अन्येपि योगिनः सिद्धाः क्षेत्ररूपा महाव्रताः ॥ अनन्यमनसो भूत्वा सर्वदोपासते हरिम् ॥ ९४ ॥ विषयासक्तचित्तोऽपि त्यक्तधर्म

१ एतेन—"सीताकुण्डे नरः स्नात्वा"—इत्याद्युक्तिर्वसिष्ठस्यैवेति गम्यते । युक्ता च तत्तीर्थमाहात्म्यप्रशंसनात्प्रकरणाच्चेति विमर्शेनानुसंधेयम् ।

CC-0. In Public Domain. Digitization by eGangotri

कर्त्तव्यं सुप्रयत्नेन नृभिः सर्वार्थसिद्धये ॥ २२ ॥ विस्फोटकादिकभये नरैश्च समुपस्थिते ॥ कर्तव्यं पूजनं सम्यग्रोगादिभयनाशनम् ॥ २३ ॥ तदुत्तरे तु तत्रैव देवी बन्दीति विश्रुता ॥ यस्याः स्मरणमात्रेण निगडादिभयं नहि ॥२४॥ राज्ञा क्रुद्धेन ये बद्धाः शृंखलानिगडादिभिः ॥ बन्दीं संस्मृत्य देवीं तु मुक्ताः स्युस्तत्क्षणाद्धि ते ॥२५॥ यात्रा तस्याः प्रयत्नेन कर्तव्या यत्नतो नरैः ॥ मंगले हि विशेषेण सर्वकामार्थसिद्धिदा ॥२६॥ गंधैः पुष्पैस्तथा धूपैर्दीपैरपि च सुव्रत ॥ नैवेद्यैर्विविधैर्वापि पूजनीया प्रयत्नतः ॥ २७ ॥ बन्दीप्रीत्यै मुनिश्रेष्ठ देयं ब्राह्मणभोजनम् ॥ एवं कृते न संदेहः सर्वान्कामानवाप्नुयात् ॥ २८ ॥ तदुत्तरस्मिंस्तत्रैव चुडकी भुवि कीर्तिता ॥ वर्तते परमा सिद्धिरूपिणी स्मरणान्नृणाम् ॥ २९ ॥ सुसंदिग्धेषु कार्येषु भये च समुपस्थिते ॥ यस्याः स्मरणतो नृणां सर्वसिद्धिः प्रजायते ॥ ३० ॥ अग्रे तस्याः सदा कार्या नृभिरंगुष्ठतो ध्वनिः ॥ दीपदानं प्रयत्नेन कर्त्तव्यं नियतात्मभिः ॥ ३१ ॥ सर्वाभीष्टप्रदं नृणां दीपदानं प्रशस्यते ॥ चतुर्दश्यां चतुर्दश्यां तस्या यात्रा विनिर्मिता ॥ ३२ ॥ ततः पूर्वदिशाभागे वर्त्तते तीर्थमुत्तमम् ॥ महारत्नइतिख्यातं सर्वतीर्थोत्तमोत्तमम् ॥ ३३ ॥ यत्र स्नानेन दानेन पूजया च द्विजन्मनाम् ॥ सर्वकःमार्थसिद्धिः स्यान्नात्र कार्या विचारणा ॥ ३४ ॥ भाद्रे कृष्णचतुर्दश्यां यात्रा सांवत्सरी स्मृता ॥ यात्राऽऽस्ते किल मुख्याऽस्य महारत्न इति श्रुता ॥ ३५ ॥ महारत्न इति ख्यातं तस्मात्तीर्थमनुत्तमम् ॥ तत्र दानं प्रकर्त्तव्यं द्विजसंतोषकारकम् ॥ ३६ ॥ नारीभिरपि विप्रर्षे कर्त्तव्यो जागरोत्सवः ॥ वीर्यसौभाग्यसंपन्नसर्वसौख्याय सर्वदा ॥ तत्र स्नानं प्रयत्नेन कर्त्तव्यं श्रद्धया नरैः ॥ ३७ ॥ ततो नैर्ऋत्यदिग्भागे दुर्भराख्यं सरः शुभम् ॥ वर्तते सुकृतोदारं महाभरसरस्तथा ॥ ३८ ॥ तत्र स्नानादवाप्नोति सदा स्वर्गपदं नरः ॥ धनं बहुविधं देयं वासांसि विविधानि च ॥ ॥ ३९ ॥ शिवपूजा प्रकर्त्तव्या स्नात्वा कुण्डद्वये नरैः ॥ नानाविधेन भावेन भक्त्या परमया युतैः ॥ ४० ॥ गन्धादिभिः शुभैः पुष्पैरर्च्चनीयो महेश्वरः ॥ नीलकंठोंऽधकारातिराराध्यो योगिनामपि ॥ ४१ ॥ इति ध्यात्वा शिवं सार्द्धं निष्पापं प्रयतो नरः ॥ सर्वकामानवाप्याशु शिवलोके वसेत्सदा ॥ ४२ ॥ एवं कृत्वा नरो विप्र सर्वपापैः प्रमुच्यते ॥ महाभरे वरे तीर्थे तथा दुर्भरसंज्ञके ॥ ४३ ॥ भाद्रकृष्णचतुर्दश्यां यः कुर्य्याच्छ्रद्धयाऽन्वितः ॥ शिवपूजां च विधिवद्द्विजपूजां विशेषतः ॥ ४४ ॥ यः करोति नरो भक्त्या शिवलोके स संवसेत् ॥ एवं कुर्वन्नरो विद्वान्न मुह्यति कदाचन ॥ ४५ ॥ विष्णुरुद्रौ च तस्यातिसुप्रसन्नौ सनातनौ ॥ तयोः स्मरणमात्रेण सर्वपापैः प्रमुच्यते ॥ ४६ ॥ अतः किं बहुनोक्तेन विप्र तीर्थमनुत्तमम् ॥ सर्वपापौघशमनं सर्वाभीष्टकरं सदा ॥ ४७ ॥ अतः परं प्रवक्ष्यामि तीर्थमन्यच्छुभावहम् ॥ यत्र यात्रा तथा दानं विना भाग्यं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न संभवेत् ॥ ४८ ॥ ईशाने दुर्भरस्थानान्महाविद्याभिधं महत् ॥ तस्य दर्शनतो नृणां सिद्धयः स्युः करे स्थिताः ॥ ४९ ॥ तदग्रे सरसि स्नात्वा महाविद्यां तु यो नरः ॥ पश्यति श्रद्धया भक्त्या स याति परमां गतिम् ॥ ५० ॥ सिद्धपीठं तथा ख्यातं सम्यक्प्रत्ययकारकम् ॥ तत्र पूजा विधातव्या भक्त्या परमया द्विज ॥ ५१ ॥ मंत्रं यः श्रद्धया विप्र शैवं शाक्तमथापि वा ॥ गाणपत्यं वैष्णवं वा तत्र यः प्रयतो नरः ॥ ५२ ॥ एकाग्रमानसो विद्वन्नाराध्यावर्तयेत्सदा ॥ तस्य सिद्धिर्भवेन्नित्यं चमत्कारो भवेद्द्विज ॥ ५३ ॥ तस्मादत्र प्रकर्तव्यं जपादिकमतंद्रितैः ॥ अष्टम्यां च नवम्यां च यात्रा स्यात्प्रतिमासिकी ॥ ५४ ॥ देयान्यन्नानि बहुशो नानाविधफलानि च ॥ क्षीरेण स्नपनं कार्यं पूजनीया प्रयत्नतः ॥ ५५ ॥ उच्चाटनादीन्यपि च मोहनादि विशेषतः ॥ अत्र स्थाने विशेषेण दुष्टमन्त्रोऽपि सिध्यति ॥ ५६ ॥ सिद्धस्थाने परं मोक्षं वशीकरणमुत्तमम् ॥ जपो होमस्तथा दानं सर्वमक्षयतां व्रजेत् ॥ ५७ ॥ आश्विने शुक्लपक्षस्य नवरात्रिषु सुव्रत ॥ यत्र गत्वा नरो विप्र सर्वपापैः प्रमुच्यते ॥ ५८ ॥ यदा पूर्वं विनिर्जित्य रावणं लोकरावणम् ॥ समागतो रघुपतिः सीतालक्ष्मणसंयुतः ॥ ५९ ॥ यत्र गत्वा पदा वीरो भरतो रामकांक्षया ॥ स्थितः सानुचरः श्रीमाञ्छ्रिया परमया युतः ॥ ६० ॥ तत्रागमत्सुरगवी प्रादुर्भूता स्रवत्स्तनी ॥ तत्स्तनेभ्यः प्रसुस्राव दुग्धं बहुगुणाधिकम् ॥ ६१ ॥ तद्भूमिपतितं दुग्धं दृष्ट्वा वानरराक्षसाः ॥ विस्मयं परमं जग्मुः प्रपपुस्ते चराचरम् ॥ ६२ ॥ किमेतदिति राजेंद्र तानुवाच रघूद्वहः ॥ वसिष्ठो वेत्ति तत्सर्वं पृच्छामस्तं मुनिं वयम् ॥ ६३ ॥ इत्युक्तास्तु ततः सर्वे वसिष्ठप्रमुखे स्थिताः ॥ ते पप्रच्छुः प्रांजलयः कृत्वा चाग्रेसरं नृपम् ॥ ६४ ॥ वसिष्ठोऽपि क्षणं ध्यात्वा तमुवाच निराकुलम् ॥ राघवं प्रति संबोध्य सर्वेषामग्रतो मुनिः ॥ ६५ ॥ ॥ ॥ वसिष्ठ उवाच ॥ ॥ शृणु राम महाबाहो कामधेनुरियं शुभा ॥ समागता तव स्नेहात्प्रस्रवंती स्तनात्पयः ॥ ६६ ॥ दुग्धमध्ये समुद्भूतो रुद्रस्त्वां द्रष्टुमागतः ॥ निष्पन्नकार्यं देवानां निर्जितारातिमुत्तमम् ॥ ६७ ॥ इमं संपूजय क्षिप्रमेतत्कुण्डस्य सन्निधौ ॥ शीघ्रं त्वमपि यत्नेन पूजयेमं शिवं शुभम् ॥ दुग्धेश्वरमिति ख्यातं क्षीरकुण्डे पवित्रकम् ॥ ६८ ॥ ॥ अगस्त्य उवाच ॥ ॥ ततो रघुपतिः श्रीमान्वसिष्ठोक्तविधानतः ॥ पूजयामास तल्लिंगं दुग्धेश्वरमिति स्मृतम् ॥६९॥ सीतया सत्कृतं यस्मात्तत्कुण्डं क्षीरसंगमम् ॥ सीताकुंडमिति ख्यातिं जगामानुपमां तनः॥७०॥ सीताकुण्डे नराः स्नात्वा दृष्ट्वा दुग्धेश्वरं प्रभुम् ॥ सर्वपापैः प्रमुच्यंते नात्र कार्या विचारणा ॥७१॥ अत्र स्नानं जपो होमो दानं चाक्षयतां व्रजेत् ॥ सीताकुंडे तु संपूज्य सीतारामौ सलक्ष्मणौ ॥७२॥ दुग्धेश्वरं च संपूज्य सर्वान्कामानवाप्नुयात् ॥ ज्येष्ठे मासि चतुर्दश्यां यात्रा सांवत्सरी स्मृता ॥७३॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दरेण ॥ तदमृतमयकुण्डे स्नानमादौ विधाय प्रचुरविमलकीर्तिः सूर्यलोके वसेत्सः ॥ १३९ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डेऽयोध्यामाहात्म्ये बृहस्पतिकुण्डरुक्मिणीकुण्डधनयक्षतीर्थवसिष्ठकुण्डसागरकुण्डयोगिनीकुण्डोर्वशीकुण्डघोषार्ककुंड माहात्म्यवर्णनंनाम सप्तमोऽध्यायः ॥ ७ ॥ ॥ छ ॥ ॥ अगस्त्य उवाच ॥ ॥ घोषार्कतीर्थाद्विप्रर्षे पश्चिमे दिक्तटे स्थितम् ॥ रतिकुण्डमिति ख्यातं सर्वपापहरं सदा ॥ १ ॥ यत्र स्नानेन दानेन परां कांतिमवाप्नुयात् ॥ तत्पश्चिमदिशाभागे कुसुमायुधनाम कम् ॥ २ ॥ कुंडं प्रसिद्धमतुलं सर्वकामार्थसिद्धये ॥ यत्र स्नानेन दानेन कन्दर्पसदृशाकृतिम् ॥ लभते ना विधानेन मुने नास्त्यत्र संशयः ॥ ३ ॥ रतिकुंडे तथा विप्र कुसुमायुधकुण्डके ॥ श्रद्धया कुरुते स्नानं स सौख्यपरमो भवेत् ॥ ४ ॥ कुण्डद्वयेऽत्र मिथुनं यत्स्नानं कुरुते किल ॥ रतिकामाविव ख्यातौ सदा तौ सुंदरौ तदा ॥ ५ ॥ तस्मादत्र विधानेन स्नातव्यं धर्मकांक्षिभिः ॥ दानं देयं यथा शक्त्या रतिकंदर्पतुष्टये ॥ ६ ॥ भवेतां नियतं तस्य संतुष्टौ रतिमन्मथौ ॥ माघे विशदपंचम्यां यत्र स्नानं शुभप्रदम् ॥ ७ ॥ रतिकुंडे पुरः स्नात्वा पश्चात्कंदर्प्पकुंडके ॥ स्नातव्यं तद्दिने विप्र मिथुनेन प्रयत्नतः ॥ ८ ॥ रतिकंदर्प्पयोः पूजा विधातव्या विशेषतः ॥ वस्त्रादिभिरलंकारैः संपूज्यौ द्विजदंपती ॥ ९ ॥ सर्वान्कामानवाप्नोति नात्र कार्या विचारणा ॥ १० ॥ चंदनागुरुकर्पूरकस्तूरीकुंकुमादिभिः ॥ वासोभिर्विविधैः पुष्पैः पूजयेद्द्विजदम्पती ॥ ११ ॥ एवं कृते न संदेहो रतिकंदर्पतुष्टये ॥ तद्व्रजेन्मिथुनं विप्र रतिकंदर्प्पतुल्यताम् ॥ १२ ॥ कुसुमायुधकुंडात्तु प्रतीच्यां दिशि संस्थितम् ॥ मन्त्रेश्वर इति ख्यातं तत्स्थानं भुवि दुर्लभम् ॥ १३ ॥ तत्र तीर्थे नरः स्नात्वा दृष्ट्वा मन्त्रेश्वरं विभुम् ॥ न तेषां पुन रावृत्तिः कल्पकोटिशतैरपि ॥ १४ ॥ पुरा रामो देवकार्यं विधायामलकर्मकृत् ॥ कालेन सह संगम्य मन्त्रं चक्रे नरेश्वरः ॥ १५ ॥ स्वर्गं प्रति प्रयाणाय यत्र स्नातो जितेंद्रियः ॥ तत्रैव स्थापितं लिंगं मन्त्रेश्वर इति श्रुतम् ॥ १६ ॥ तदुत्तरे सरो रम्यं कुमुदोत्पलमंडितम् ॥ तत्र स्नानं तथा दानं नानाफलदमुत्तमम् ॥ १७ ॥ चैत्रशुक्लचतुर्दश्यां यात्रा सांवत्सरी स्मृता ॥ तत्र स्नानेन दानेन ब्राह्मणानां च पूजनात् ॥ अक्षयं स्वर्गमाप्नोति नात्र कार्या विचारणा ॥ १८ ॥ मंत्रेश्वरस्य महिमा नहि केनापि शक्यते ॥ सम्यग्वर्णयितुं विप्र य उत्तमफलप्रदः ॥ मंत्रेश्वरसमं लिंगं न भूतं न भविष्यति ॥ १९ ॥ सुगंधिपुष्पधूपादिकुसुमाद्यनुलेपनैः ॥ पूजनीयः प्रयत्नेन सर्वकामार्थसिद्धिदः ॥ २० ॥ एवं कृते न संदेहो मुक्तिस्तस्य करे स्थिता ॥ तत्रैवोत्तरभागे तु शीतला वर्ततेऽनघ ॥ २१ ॥ तां संपूज्य नरो विद्वान्सर्वपापैः प्रमुच्यते ॥ सर्वदा पूजनं तस्याः सोमवारे विशेषतः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तरदोर्दंडखंडितारातिमंडलः ॥ ११५ ॥ स कदाचित्प्रजापालो मंत्रिविन्यस्तभूतलः ॥ बभ्राम मृगयासक्तो वनेऽतिगहनद्रुमे ॥ ११६ ॥ स राजा
पूर्वजन्मोत्थपापैरशुभसूचकैः ॥ कृमिव्याप्तकरांभोजः सुन्दरोपि गतस्मयः ॥ ११७ ॥ मृगयायामभूदेकः कदाचित्पर्यटन्वने ॥ वराहसिंहहरिणान्नि
घ्नन्गच्छन्नितस्ततः ॥ ११८ ॥ तृषाक्रान्तो म्लानतनुः सरोऽपश्यत्पुरो नृपः ॥ ददर्श तत्र च मुनीन्स्नानसंध्यादितत्परान् ॥ ११९ ॥ ततो विधिवदा
चम्य स्नानं चक्रे नरेश्वरः ॥ ततो दिव्यशरीरोऽभूदानंदामलमानसः ॥ १२० ॥ मुनिभिस्तीर्थमाज्ञाय चक्रे सूर्य्यस्तुतिं प्रियाम् ॥ १२१ ॥
॥ ॥ राजोवाच ॥ ॥ भगवन्देवदेवेश नमस्तुभ्यं चिदात्मने ॥ नमः सवित्रे सूर्याय जगदानंददायिने ॥ १२२ ॥ प्रभागेहाय देवाय त्रयीभूताय ते
नमः ॥ विवस्वते नमस्तुभ्यं योगज्ञाय सदात्मने ॥१२३॥ पराय परमेशाय त्रिलोकीतिमिरच्छिदे ॥ अचिन्त्याय सदा तुभ्यं नमो भास्करतेजसे ॥
॥ १२४ ॥ योगप्रियाय योगाय योगज्ञाय सदा नमः ॥ ॐकाराय वषट्काररूपिणे ज्ञानरूपिणे ॥ १२५ ॥ यज्ञाय यज्ञमानाय हविषे
ऋत्विजे नमः ॥ रोगघ्नाय स्वरूपाय कमलानंददायिने ॥ १२६ ॥ अतिसौम्यातितीक्ष्णाय सुराणां पतये नमः ॥ सत्राशाय नमस्तुभ्यं भक्तत्राय
प्रियात्मने ॥ १२७ ॥ प्रकाशकाय सततं लोकानां हितकारिणे ॥ प्रसीद प्रणतायाद्य मह्यं भक्तिकृते स्वयम् ॥ १२८ ॥ ॥ अगस्त्य उवाच ॥ ॥
इत्येवं ब्रुवतस्तस्य स प्रसन्नो रविः स्वयम् ॥ आविर्बभूव सहसा भक्तस्य प्रियकाम्यया ॥ उवाच मधुरं वाक्यं प्रश्रयानतमूर्द्धजम् ॥ १२९ ॥
॥ ॥ रविरुवाच ॥ ॥ वरं वरय राजेंद्र प्रसन्नोऽस्मि तवाग्रतः ॥ ददामि तद्वरं तेऽद्य यत्त्वया मनसेप्सितम् ॥ १३० ॥ ॥ राजोवाच ॥ ॥
भगवन्भास्करानंत प्रयच्छसि वरं यदि ॥ मन्नाम्ना कृतमूर्त्तिस्ते तिष्ठत्वत्र सदा विभो ॥ १३१ ॥ ॥ रविरुवाच ॥ ॥ एवमस्तु मनुष्येंद्र तव
वांछा मनोहरा ॥ एतत्स्तोत्रं त्वयोक्तं मे ये पठिष्यंति मानवाः ॥ १३२ ॥ तेभ्यस्तुष्टः प्रदास्यामि सर्वान्कामान्नरेश्वर ॥ एतत्स्थानं परां ख्यातिं
त्वन्नाम्ना यास्यति क्षितौ ॥ १३३ ॥ सर्वान्कामानवाप्नोति योऽत्र स्नानं समाचरेत् ॥ मद्भक्तेन सदा राजन्कर्त्तव्यं स्नानमत्र वै ॥ १३४ ॥ यंयं काम
मिहेच्छेत तंतं काममवाप्नुयात् ॥ १३५ ॥ ॥ अगस्त्य उवाच ॥ ॥ इति दत्त्वा वरंदेवः कृपया परया युतः ॥ भास्वान्सहस्रकिरणस्तदान्तर्द्धान
माययौ ॥ १३६ ॥ राजा भास्करदेहोत्थां रविमूर्त्तिमनुत्तमाम् ॥ तत्र संस्थापयामास पूजयामास च स्वयम् ॥ १३७ ॥ घोषार्ककुण्डं तन्नाम्ना तत्र
ख्यातिं जगाम ह ॥ यत्र स्नानान्नरो राजन्सूर्य्यलोके वसेत्सदा ॥ १३८ ॥ इति रुचिरविधानैस्तूर्णमादित्यमूर्त्तिं विमलपरमभक्त्या पूजयित्वाऽऽ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सा ॥ ९० ॥ सा बभौ कांतिसर्वस्वकोशः कुसुमधन्वनः ॥ उर्वश्यनल्पसामान्यलावण्यामृतवाहिनी ॥ ९१ ॥ अंगप्रभासुवर्णेन सितमौक्तिक
शोभिता ॥ तारुण्यरुचिरत्वेन तारुण्येन विभूषिता ॥ ९२ ॥ विलोमलोचनापांगतरंगधवलत्विषा ॥ नवपल्लवसच्छायं कल्पयन्ती निजा
धरम् ॥ ९३ ॥ कर्णोपलम्बिसंघुष्यद्भृङ्गाव्यचूतमञ्जरी ॥ सुधागर्भसमुद्भूता पारिजातलता यथा ॥ ९४ ॥ तनुमध्या पृथुश्रोणिर्वर्णोद्रिन्नप
योधरा ॥ निःशाणितशरस्येव शक्तिः कुसुमधन्वनः ॥ ९५ ॥ अपश्यदाश्रमे तस्मिन्मुनिरायतलोचनाम् ॥ नयनानलदाहेन विदग्धेन मनो
भुवा ॥ ९६ ॥ त्रिनेत्रवंचनायैव कल्पितां ललनातनुम् ॥ तामाश्रमलतापुष्पकांचीरचितकुण्डलाम् ॥ ९७ ॥ विलोक्य तां विशालाक्षीं मुनिर्व्या
कुलितेन्द्रियः ॥ बभूव रोषसंतप्तः शशाप च बहु ज्वलन् ॥९८॥ ॥ रैभ्य उवाच ॥ ॥ कुरूपतां व्रज क्षिप्रं या त्वं सौंदर्यगर्विता ॥ समागता तपोवि
घ्रहेतवे मम सन्निधौ ॥ ९९ ॥ ॥ अगस्त्य उवाच ॥ ॥ इति शप्ता रुषा तेन मुनिना सा शुभेक्षणा ॥ उवाच वनिता भूत्वा प्रांजलिर्मुनिमादरात् ॥
॥ १०० ॥ ॥ उर्वश्युवाच ॥ ॥ भगवन्मे प्रसीद त्वं पराधीना यतस्त्वहम् ॥ त्वच्छापस्य कथं मुक्तिर्भविता नियतव्रत ॥ १०१ ॥ ॥ रैभ्य
उवाच ॥ ॥ अयोध्यायामस्ति तीर्थं पावनं परमं महत् ॥ तत्र स्नानं कुरुष्वाद्य सौंदर्यं परमाप्नुहि ॥ १०२ ॥ त्वन्नाम्नैव च विख्यातिं तोयं यास्यति
तद्ध्रुवम् ॥ १०३ ॥ ॥ अगस्त्य उवाच ॥ ॥ एवं सा विप्रवचसा विदधे सर्वमादरात् ॥ सुन्दरी साऽभवत्क्षिप्रं तत्स्थानं ख्यातिमाययौ ॥१०४॥
अत्र स्नानं मुनिश्रेष्ठ यः कुर्याद्विधिवज्जनः ॥ सौंदर्यं परमं तस्य भवेत्तत्र न संशयः ॥१०५॥ भाद्रे शुक्लतृतीयायां यात्रा सांवत्सरी भवेत् ॥ विष्णु
रत्र जनैः पूज्यः सर्वकामार्थसिद्धये ॥ १०६ ॥ एवं कुर्वन्नरो विद्वान्विष्णुलोके वसेत्सदा ॥ नरो वा यदि वा नारी सर्वान्कामानवाप्नुयात् ॥
॥१०७॥ घोषार्ककुंडं परमसुर्वशीकुंडदक्षिणे ॥ वर्तते मुनिशार्दूल सर्वपापापहं सदा ॥१०८॥ यत्र स्नानेन दानेन सूर्य्यलोके महीयते ॥ एतत्तीर्थस्य
सदृशं नापरं विद्यते क्वचित् ॥ १०९ ॥ व्रणी कुष्ठी दरिद्री वा दुःखाक्रांतोऽपि यो नरः ॥ करोति विधिवत्स्नानं सर्वान्कामानवाप्नुयात् ॥ ११० ॥
रविवारे विशेषेण कर्त्तव्यं स्नानमादरात् ॥ भाद्रे मासि तथा माघे शुक्लषष्ठ्यां प्रयत्नतः ॥ १११ ॥ कर्त्तव्यं विधिवत्स्नानं सूर्यलोकाभिकांक्षया ॥
पौषे मासि तथा स्नानं सूर्यवारे विशेषतः ॥ ११२ ॥ सप्तम्यां रवियुक्तायां स्नानं बहुफलप्रदम् ॥ घोषाभिधोऽभवत्पूर्वं सूर्यवंशे नरेश्वरः ॥ ११३ ॥
समुद्रमेखलामेकः पृथिवीं समपालयत् ॥ यस्य कीर्त्या प्रकाशंते त्रिलोकीमंडलानि वै ॥ ११४ ॥ यः प्रतापात्स्फुरन्भाति प्रभाकर इवापरः ॥ प्रचंड

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

माप्नोति तत्किं न यदिहाप्यते ॥ ६४ ॥ यस्तु मोहान्नरो यक्ष स्नानं न कुरुते किल ॥ तस्य सांवत्सरं पुण्यं त्वं ग्रहीष्यसि सर्वशः ॥ ६५ ॥ इति दत्त्वा वरांस्तस्मै विश्वामित्रो मुनीश्वरः॥ अन्तर्दधे मुनिवरस्तदा स च तपोनिधिः ॥६६॥ तदाप्रभृति तत्स्थानं परमां ख्यातिमाययौ ॥ तस्य तीर्थस्य सकला भूमिः स्वर्णविनिर्मिता ॥६७ ॥ दिव्यरत्नौघखचिता समंतादुपशोभिता ॥ एवं यः कुरुते विद्वन्स याति परमां गतिम् ॥ ६८ ॥ धनयक्षादुत्तरस्मिन्दिग्भागे संस्थितं द्विज ॥ वसिष्ठकुण्डं विख्यातं सर्वपापापहं सदा ॥ ६९ ॥ वसिष्ठस्य सदा तत्र निवासः सुतपोनिधेः ॥ अरुन्धती सदा यस्य वर्तते निर्मलव्रता ॥ ७० ॥ अत्र स्नानं विशेषेण श्राद्धपूर्वमतंद्रितः ॥ यः कुर्यात्प्रयतो धीमांस्तस्य पुण्यमनुत्तमम् ॥ ७१ ॥ वामदेवस्य तत्रैव संनिधिर्वर्ततेऽनघ ॥ वशिष्ठवामदेवौ तु पूजनीयौ प्रयत्नतः ॥ ७२ ॥ पतिव्रता पूजनीयाऽरुन्धती च विशेषतः ॥ स्नातव्यं विधिना सम्यग्दातव्यं च स्वशक्तितः ॥ ७३ ॥ सर्वकामफलप्राप्तिर्जायते नात्र संशयः ॥ अत्र यः कुरुते स्नानं स वशिष्ठसमो भवेत् ॥ ७४ ॥ भाद्रे मासि सिते पक्षे पंचम्यां नियतव्रतः ॥ तस्य सांवत्सरी यात्रा कर्त्तव्या विधिपूर्विका ॥ ७५ ॥ विष्णुपूजा प्रयत्नेन कर्तव्या श्रद्धयात्र वै ॥ सर्वपापविशुद्धात्मा विष्णुलोके महीयते ॥ ७६ ॥ वसिष्ठकुण्डाद्विप्रेंद्र प्रत्यग्दिग्दलमाश्रितम् ॥ विख्यातं सागरं कुण्डं सर्वकामार्थसिद्धिदम् ॥ यत्र स्नानेन दानेन सर्वकामानवाप्नुयात् ॥ ७७ ॥ पौर्णमास्यां समुद्रस्य स्नानाद्यत्पुण्यमाप्नुयात् ॥ तत्पुण्यं पर्वणि स्नातो नरश्चाक्षयमाप्नुयात् ॥ ७८ ॥ तस्मादत्र विधानेन स्नातव्यं पुत्रकांक्षया ॥ आश्विने पौर्णमास्यां तु विशेषात्स्नानमाचरेत् ॥ ७९ ॥ एवं कुर्वन्नरो विद्वान्सर्वपापैः प्रमुच्यते ॥ अत्र स्नात्वा नरो दत्त्वा यथाशक्त्या दिवं व्रजेत् ॥ ८० ॥ सागरान्नैर्ऋते भागे योगिनीकुण्डमुत्तमम् ॥ यत्राऽऽसते चतुःषष्टियोगिन्यो जलसंस्थिताः ॥ ८१ ॥ सर्वार्थसिद्धिदाः पुंसां स्त्रीणां चैव विशेषतः ॥ परसिद्धिप्रदाः सर्वाः सर्वकामफलप्रदाः ॥ ८२ ॥ आश्विने शुक्लपक्षस्य अष्टम्यां च विशेषतः ॥ स्नातव्यं च प्रयत्नेन योगिनीप्रीतये नृभिः ॥ ८३ ॥ अत्र स्नानं तथा दानं सर्वं सफलतां व्रजेत् ॥ यक्षिणीप्रभृतयः सिद्धा भवंत्यत्र न संशयः ॥ ८४ ॥ योगिनीकुंडतः पूर्वमुर्वशीकुण्डमुत्तमम् ॥ यत्र स्नातो नरो विद्वन्नुर्वशीं दिवि संश्रयेत् ॥ ८५ ॥ पुरा किल मुनिर्धीरो रैभ्योनाम तपोधनः ॥ चचार हिमवत्पार्श्वे निराहारो जितेन्द्रियः ॥ ८६ ॥ तत्तपो विपुलं दृष्ट्वा भीतः सुरपतिस्ततः ॥ उर्वशीं प्रेषयामास तपोविघ्नाय चादरात् ॥ ८७ ॥ ततः सा प्रेषिता तेनाजगाम गजगामिनी ॥ उवास हिमवत्पार्श्वे रैभ्याश्रममनुत्तमम् ॥ ८८ ॥ वनफुल्ललताकुञ्जे मञ्जुकूजद्विहंगमे ॥ किन्नरीकेलिसंगीतस्तिमितांगकुरंगके ॥ ८९ ॥ पुन्नागकेशराशोकच्छिन्नकिंजल्कपिंजरे ॥ कलिपते कांचनगिरौ द्वितीय इव वेध

CC-0. In Public Domain. Digitization by eGangotri

रक्षां विदधतस्तस्य बहुयत्नेन सर्वशः ॥ ३७ ॥ तुतोष स मुनिर्धीमान्कदाचिद्विजितेन्द्रियः ॥ उवाच मधुरं वाक्यं प्रीत्या परमया युतः ॥ ३८ ॥ ॥ विश्वामित्र उवाच ॥ वरं वरय धर्मज्ञ क्षिप्रमेव विमत्सरः॥ भक्त्या परमया धीर संतुष्टोऽस्मि विशेषतः॥३९॥॥ यक्ष उवाच ॥॥ वरं प्रयच्छसि यदि विप्रवर्य मदीप्सितम् ॥ ममांगमतिदुर्गंधि शापाच्च नृपतेरभूत्॥ सुगन्धयितुं ब्रह्मर्षे तत्प्रसीद मुनीश्वर ॥४०॥ ॥ अगस्त्य उवाच ॥ ॥ एवमुक्ते तु यक्षेण मुनिर्ध्यानस्थलोचनः॥तं विविच्यानया भक्त्या अभिषेकं चकार सः॥४१॥तीर्थोदकेन विधिवत्कृत्वा संकल्पमादरात्॥ततः सोऽभूत्क्षणेनैव सुगन्धोत्तरविग्रहः ॥ ४२ ॥ तथाभूतः स मधुरं प्रोवाच प्रांजलिस्ततः ॥ पुनः पुरः स्थितो धीमान्विनयावनतस्तदा ॥४३॥ ॥ यक्ष उवाच ॥ ॥ त्वत्कृपाभिरहं धीर जातः सुरभिविग्रहः॥ एतत्स्थानं यथा ख्यातिं याति सर्वज्ञ तत्कुरु ॥ ४४ ॥ त्वत्प्रसादेन विप्रर्षे तथा यत्नं विधेहि वै ॥ ४५ ॥ ॥ अगस्त्य उवाच ॥ ॥ एवमुक्तः क्षणं ध्यात्वा मुनिः स्तिमितलोचनः ॥ यक्षं प्रति प्रसन्नात्मा ह्युवाच श्लक्ष्णया गिरा ॥ ४६ ॥ ॥ विश्वामित्र उवाच ॥ ॥ प्रसिद्धिमतुलां यक्ष एतत्स्थानं गमिष्यति ॥ धनयक्ष इति ख्यातिमेतत्तीर्थं गमिष्यति ॥ ४७ ॥ सौंदर्य्यदं शरीरस्य परं प्रत्ययकारकम् ॥ यत्र स्नात्वा विधानेन दौर्गंध्यं त्यजति क्षणात् ॥ तत्र स्नानं प्रयत्नेन कर्त्तव्यं पुण्यकांक्षिभिः ॥ ४८ ॥ दानं श्रद्धास्वशक्तिभ्यां लक्ष्मीपूजा विशेषतः ॥ तत्र स्नानेन दानेन लक्ष्मीप्रीत्यै विशेषतः ॥ ४९ ॥ पूजया तु निधीनां च नवानामपि सुव्रत ॥ इह लोके सुखं भुक्त्वा परलोके स मोदते ॥ ५० ॥ महापद्मस्तथा पद्मः शंखो मकरकच्छपौ ॥ मुकुन्दकुंदनीलाश्च खर्वश्च निधयो नव ॥ ५१ ॥ एतेषामपि कुण्डेऽत्र संनिधिर्भविताऽनघ ॥ एतेषां तु विशेषेण पूजा बहुफलप्रदा॥५२॥जलमध्ये प्रकर्त्तव्यं निधिलक्ष्मीप्रपूजनम्॥५३॥अन्नं बहुविधं देयं वासांसि विविधानि च॥५४॥ सुवर्णादि यथाशक्त्या वित्तशाठ्यं विवर्जयेत् ॥ गुप्तं दानं प्रयत्नेन कर्त्तव्यं सुप्रयत्नतः ॥५५॥ फलानि च सुवर्णानि देयानि च विशेषतः ॥५६॥ कृष्णपक्षे चतुर्दश्यां स्नानं बहुफलप्रदम् ॥ श्रद्धया परया युक्तैः कर्त्तव्यं श्रद्धयाधिकम् ॥ ५७ ॥ माघे कृष्णचतुर्दश्यां यात्रा सांवत्सरी भवेत् ॥ तत्र स्नानं पितॄणान्तु तर्पणं च विशेषतः ॥ ५८ ॥ आब्रह्मस्तम्बपर्यंतं जगत्तृप्यत्विति ब्रुवन् ॥ अपसव्येन विधिवत्तर्प्पयेदंजलित्रयम् ॥ ५९ ॥ एवं कुर्वन्नरो यक्ष न मुह्यति कदाचन ॥ अत्र स्नातो दिवं याति अत्र स्नातः सुखी भवेत् ॥६०॥ अत्र स्नातेन ते यक्ष कर्त्तव्यं पूजनं पुरः ॥ त्वत्पूजनेन विधिवन्नृणां पापक्षयो भवेत् ॥ ६१ ॥ नमः प्रमथराजेति पूजामन्त्र उदाहृतः ॥ तीर्थमध्ये प्रकर्त्तव्यं पूजनं श्रवणादिकम् ॥ ६२ ॥ निधिलक्ष्म्योस्तथा यक्ष तव पूजा विशेषतः ॥ एवं यः कुरुते धीरः सर्वान्कामानवाप्नुयात् ॥६३॥ धनार्थी धनमाप्नोति पुत्रार्थी पुत्रमाप्नुयात् ॥ मोक्षार्थी मोक्ष

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मुदंडाचंडमंडितम् ॥ ९ ॥ सर्वपापप्रशमनं पुण्यामृततरंगितम् ॥ यत्र साक्षात्सुरगुरुर्निवासं किल निर्ममे ॥ १० ॥ यज्ञं च विधिवच्चक्रे बृहस्पतिरुदारधीः ॥ नानामुनिगणैर्युक्तं रम्यं बहुफलप्रदम् ॥ सुपर्णच्छायसंपन्नं कुण्डं तत्पापिदुर्लभम् ॥ ११ ॥ इन्द्रादयोऽपि विबुधा यत्र स्नात्वा प्रयत्नतः ॥ मनोभीष्टफलं प्राप्ताः सौंदर्यौदार्यतुंदिलाः ॥ १२ ॥ यत्र स्नानेन दानेन नरो मुच्येत किल्बिषात् ॥ १३ ॥ भाद्रे शुक्ले तु पंचम्यां यात्रा तत्र फलप्रदा ॥ अन्यदापि गुरोर्वारे स्नानं बहुफलप्रदम् ॥ १४ ॥ बृहस्पतेस्तथा विष्णोः पूजां तत्र य आचरेत् ॥ सर्वपापविनिर्मुक्तो विष्णुलोके स मोदते ॥ १५ ॥ भवेद्बृहस्पतेः पीडा यस्य गोचरवेधतः ॥ तेनात्र विधिवत्स्नानं कार्यं संकल्पपूर्वकम् ॥ १६ ॥ होमं कृत्वा गुरोर्मूर्तिः सुवर्णेन विनिर्मिता ॥ स्थित्वा जले प्रदेया वै पीतांबरसमन्विता ॥ १७ ॥ वेदज्ञायातिशुचये स्नात्वा पीडापनुत्तये ॥ होमं च कारयेत्तत्र ग्रहजाप्यविधानतः ॥ १८ ॥ एवं कृते न संदेहो ग्रहपीडा प्रणश्यति ॥ १९ ॥ तद्दक्षिणे मुनिश्रेष्ठ रुक्मिणीकुण्डमुत्तमम् ॥ चकार यत्स्वयं देवी रुक्मिणी कृष्णवल्लभा ॥ २० ॥ तत्र विष्णुः स्वयं चक्रे निवासं सलिले तदा ॥ वरप्रदानात्स्नेहेन भार्यायाः प्रगुणीकृतम् ॥ २१ ॥ तत्र स्नानं तथा दानं होमं वैष्णवमंत्रकम् ॥ द्विजपूजां विष्णुपूजां कुर्वीत प्रयतो नरः ॥ २२ ॥ तत्र सांवत्सरी यात्रा कर्त्तव्या सुप्रयत्नतः ॥ ऊर्जकृष्णनवम्यां च सर्वपापापनुत्तये ॥ ॥ २३ ॥ पुत्रवाञ्जायते वन्ध्यो यात्रां कृत्वा न संशयः ॥ नारीभिर्वा नरैर्वापि कर्त्तव्यं स्नानमादरात् ॥ २४ ॥ भुक्त्वा भोगान्समग्रांश्च विष्णुलोके स मोदते ॥ लक्ष्मीकामनया तत्र स्नातव्यं च विशेषतः ॥ २५ ॥ सर्वकाममवाप्नोति तत्र स्नानेन मानवः ॥ रुक्मिणीश्रीपतिप्रीत्यै दातव्यं च स्वशक्तितः ॥ २६ ॥ कर्त्तव्या विधिवत्पूजा ब्राह्मणानां विशेषतः ॥ ध्येयो लक्ष्मीपतिस्तत्र शंखचक्रगदाधरः ॥ २७ ॥ पीतांबरधरः स्रग्वी नारदादिभिरीड़ितः ॥ तार्क्ष्यासनो मुकुटवान्महेन्द्रादिविभूषितः ॥ २८ ॥ सर्वकामफलावाप्त्यै वक्षोलक्षितकौस्तुभः ॥ अतसीकुसुमश्यामः कमलामललोचनः ॥ २९ ॥ एवं कृते न संदेहः सर्वान्कामानवाप्नुयात् ॥ इह लोके सुखं भुक्त्वा हरिलोके स मोदते ॥ ३० ॥ अतः परं प्रवक्ष्यामि तीर्थमन्यदघापहम् ॥ कलिकिल्बिषसंहारकारकं प्रत्ययात्मकम् ॥ ३१ ॥ परं पवित्रमतुलं सर्वकामार्थसिद्धिदम् ॥ धनयक्षइतिख्यातं परं प्रत्ययकारकम् ॥ ३२ ॥ रुक्मिणीकुण्डवायव्यदिग्दले संस्मृतं शुभम् ॥ हरिश्चन्द्रस्य राजर्षेरासीत्तत्र धनं महत् ॥ ३३ ॥ तस्य रक्षार्थमत्यर्थं रक्षितो यक्ष उच्चकैः ॥ विश्वामित्रो मुनिः पूर्वं यदा चैव पराजयत् ॥ ३४ ॥ हरिश्चंद्रं नरपतिं राज्यसूयकरं परम् ॥ राज्यं जग्राह सकलं चतुरंगबलान्वितम् ॥ ॥ ३५ ॥ तद्वशेऽदाच्च स मुनिर्धनं सकलमुत्तमम् ॥ तद्रक्षायै प्रयत्नेन यक्षं स्थापितवानसौ ॥ ३६ ॥ प्रमंथुरइतिख्यातं प्रमोदानन्दमंदिरम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

महामतिः ॥ १७५ ॥ अतस्तद्गोप्रताराख्यं तीर्थं विख्यातिमागतम् ॥ गोप्रतारे परो मोक्षो नान्यतीर्थेषु विद्यते ॥ १७६ ॥ जन्मान्तर
शतैर्विप्र योगोऽयं यदि लभ्यते ॥ मुक्तिर्भवति तत्त्वेकजन्मना लभ्यते न वा ॥ १७७ ॥ गोप्रतारे न सन्देहो हरिर्भक्त्या सुनिष्ठितः ॥ एकेन
जन्मनान्योऽपि योगमोक्षं च विन्दति ॥ १७८ ॥ गोप्रतारे नरो विद्वान्योऽपि स्नाति सुनिश्चितः ॥ विशत्यसौ परं स्थानं योगिनामपि दुर्लभम् ॥
॥ १७९ ॥ कार्तिक्यां च विशेषेण स्नातव्यं विजितेन्द्रियैः ॥ कार्तिके मासि विप्रर्षे सर्वे देवाः सवासवाः ॥ स्नातुमायान्त्ययोध्यायां गोप्र
तारे विशेषतः ॥ १८० ॥ गोप्रतारसमं तीर्थं न भूतं न भविष्यति ॥ यत्र प्रयागराजोऽपि स्नातुमायाति कार्तिके ॥ १८१ ॥ निष्पापः कलुषं
त्यक्त्वा शुक्लांगः सितकंचुकः ॥ शुद्ध्यर्थं साधुकामोऽसौ प्रयागे मुनिसत्तमः ॥ १८२ ॥ यानि कानि च तीर्थानि भूमौ दिव्यानि सुव्रत ॥ कार्ति
क्यां तानि सर्वाणि गोप्रतारे वसन्ति वै ॥ १८३ ॥ गोप्रतारे जपो होमः स्नानं दानं च शक्तितः ॥ सर्वमक्षयतां याति श्रद्धया नियम
व्रतम् ॥ १८४ ॥ कार्तिके प्राप्य तद्यान्ति तीर्थानि सकलान्यपि ॥ गोप्रतारं गमिष्यामः पापं त्यक्तुमितीच्छया ॥ १८५ ॥ गोप्रतारे
कृतं स्नानं सर्वपापप्रणाशनम् ॥ गोप्रतारे नरः स्नात्वा दृष्ट्वा गुप्तहरिं विभुम् ॥ सर्वपापैः प्रमुच्येत नात्र कार्या विचारणा ॥ १८६ ॥
विष्णुमुद्दिश्य विप्राणां पूजनं च विशेषतः ॥ कर्त्तव्यं श्रद्धया युक्तैः स्नानपूर्वं यतव्रतैः ॥ १८७ ॥ पयस्विनी च गौर्देया सालंकारा च
शक्तितः ॥ विप्राय वेदविदुषे नियमव्रतशालिने ॥ ब्राह्मणायातिशुचये विष्णुप्रीत्यै यतात्मना ॥ १८८ ॥ अन्नं बहुविधं हेम वासांसि
विविधानि च ॥ दातव्यानि हरेः प्राप्त्यै भक्त्या परमया युतैः ॥ १८९ ॥ सूर्यग्रहे कुरुक्षेत्रे नर्मदायां शशिग्रहे ॥ तुलादानस्य यत्पुण्यं
तदत्र दीपदानतः ॥ १९० ॥ घृतेन दीपको यस्य तिलतैले न वा पुनः ॥ ज्वलते मुनिशार्दूल हयमेधेन तस्य किम् ॥ १९१ ॥
तेनेष्टं क्रतुभिः सर्वैः कृतं तीर्थावगाहनम् ॥ दीपदानं कृतं येन कार्त्तिके केशवाग्रतः ॥ १९२ ॥ नानाविधानि तीर्थानि भुक्तिमुक्तिप्रदानि च ॥
गोप्रतारस्य तान्यत्र कलां नार्हंति षोडशीम् ॥ १९३ ॥ स्वर्णमल्पं च यो दद्याद्ब्राह्मणे वेदपारगे ॥ शुभां गतिमवाप्नोति ह्यग्निवच्चैव दीप्यते ॥१९४॥
गोप्रताराभिधे तीर्थे त्रिलोकीविश्रुते द्विज ॥ दत्त्वान्नं च विधानेन न स भूयोऽभिजायते ॥ १९५ ॥ तत्र स्नानं तु यः कुर्याद्विप्रान्संतर्पयेन्नरः ॥
सौत्रामणेश्च यज्ञस्य फलं प्राप्नोति मानवः ॥ १९६ ॥ एकाहारस्तु यस्तिष्ठेन्मासं तत्र यतव्रतः ॥ यावज्जीवकृतं पापं सहसा तस्य नश्यति ॥ १९७ ॥

१ तत–गोप्रतारतीर्थम्–इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अग्निप्रवेशं ये कुर्युर्गोप्रतारे विधानतः ॥ ते विशंति पदं विष्णोर्निःसंदग्धं तपोधन ॥ १९८ ॥ कुर्वंत्यनशनं येऽत्र विष्णुभक्त्या सुनिश्चिताः ॥ न तेषां पुनरावृत्तिः कल्पकोटिशतैरपि ॥ १९९ ॥ अर्चयेद्यस्तु गोविंदं गोप्रतारे हि मानवः ॥ दशसौवर्णिकं पुण्यं गोप्रतारे प्रकथ्यते ॥ २०० ॥ अग्निहोत्रफलो धूपो गोविंदस्य समर्पितः ॥ भूमिदानेन सदृशं गंधदानफलं स्मृतम् ॥ २०१ ॥ अत्यद्भुतमिदं विद्वन्स्थानमेतत्प्रकीर्तितम् ॥ कार्त्तिक्यां तु विशेषेण अत्र स्नात्वा शुचिव्रतः ॥ २०२ ॥ स्वर्गद्वारे नरः स्नात्वा दशस्वर्णफलं लभेत् ॥ स्वर्णदः स्वर्गवासी च यो दद्याच्छ्रद्धयान्वितः ॥ २०३ ॥ सुतीर्थे पर्वणि श्रेष्ठे दशस्वर्णफलप्रदे ॥ ज्येष्ठशुक्लचतुर्दश्यां रात्रौ जागरणं चरेत् ॥ २०४ ॥ उपोषितः शुचिः स्नातो विष्णुपूजनतत्परः ॥ दीपं दद्यात्प्रयत्नेन नानाफलविधायिनम् ॥ २०५ ॥ तावद्व्रजंति पुण्यानि स्वर्गे मर्त्ये रसातले ॥ यावद्दद्याज्जले दीपं कार्त्तिके केशवाग्रतः ॥ २०६ ॥ पौर्णमास्यां प्रभाते तु स्नात्वा निर्मलमानसः ॥ हरिं संपूज्य विधिवद्विधाय श्राद्धमादरात् ॥ २०७ ॥ दत्त्वान्नं च यथाशक्त्या संतोष्य ब्राह्मणांस्ततः ॥ वस्त्रादिभिरलंकारैः संपूज्य द्विजदंपती ॥ २०८ ॥ विभुं गुप्तहरिं दृष्ट्वा संपूज्य तु विशेषतः ॥ नमस्कृत्यातु तत्तीर्थं शुचिस्तद्गतमानसः ॥ २०९ ॥ स्वर्गद्वारे च विधिवन्मध्याह्ने स्नानमाचरेत् ॥ सर्वपापविशुद्धात्मा विष्णुलोके महीयते ॥ २१० ॥ इति परमविधानैर्गोप्रतारे विधाय प्रथितसुकृतमूर्त्तिः स्नानमुच्चैः प्रयत्नात् ॥ कलितनिखिलपापः पूजयित्वादरेणाच्युतममलविकाशो विष्णुसायुज्यमेति ॥ २११ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डेऽयोध्यामाहात्म्ये स्वर्गद्वारगोप्रतारतीर्थमाहात्म्यवर्णनंनाम षष्ठोऽध्यायः ॥ ६ ॥ ॥ अगस्त्य उवाच ॥ ॥ तीर्थमन्यत्प्रवक्ष्यामि क्षीरोदकमिति स्मृतम् ॥ सीताकुण्डाच्च वायव्ये वर्त्तते गुणसुन्दरम् ॥ पुण्यैकनिचयस्थानं सर्वदुःखविनाशनम् ॥ १ ॥ पुरा दशरथो राजा पुत्रेष्टिंनाम नामतः ॥ चकार विधिवद्यज्ञं पुत्रार्थं यत्र चादरात् ॥ २ ॥ क्रतुं समापयामास सानन्दो भूरिदक्षिणम् ॥ यज्ञान्ते क्रतुभुक्तत्र मूर्तिमान्समदृश्यत ॥ ३ ॥ हस्ते कृत्वा हेमपात्रं हविःपूर्णमनुत्तमम् ॥ तस्मिन्हविषि संकीर्णं वैष्णवं तेज उत्तमम् ॥ चतुर्विधं विभज्यैव पत्नीभ्यो दत्तवान्नृपः ॥ ४ ॥ यत्र तत्क्षीरसंप्राप्तिर्जाता परमदुर्लभा ॥ क्षीरोदकमिति ख्यातं तत्स्थानं पापनाशनम् ॥ उदकेनाभिव्यक्तं च उत्तमं च फलप्रदम् ॥ ५ ॥ तत्र स्नात्वा नरो धीमान्विजितेन्द्रिय आदरात् ॥ सर्वान्कामानवाप्नोति पुत्रांश्च सुबहुश्रुतान् ॥ ६ ॥ आश्विने शुक्लपक्षस्य एकादश्यां जितव्रतः ॥ तत्र स्नात्वा विधानेन दत्त्वा शक्त्या द्विजन्मने ॥ ७ ॥ विष्णुं संपूज्य विधिवत्सर्वान्कामानवाप्नुयात् ॥ पुत्रानवाप्नुयाद्विद्धि धर्मांश्च विधिवन्नरः ॥ ८ ॥ तस्मात्क्षीरोदकस्थानान्नैर्ऋते दिग्दले श्रितम् ॥ ख्यातं बृहस्पतेः कुण्ड

CC-0. In Public Domain. Digitization by eGangotri

नानुयाति स्वर्गद्वारमुपस्थितम् ॥ १५२ ॥ अथार्द्धयोजनं गत्वा नदीं पश्चान्मुखो ययौ ॥ सरयूं पुण्यसलिलां ददर्श रघुनंदनः ॥ १५३ ॥ अथ तस्मिन्मुहूर्ते तु ब्रह्मा लोकपितामहः ॥ सर्वैः परिवृतो देवैर्ऋषिभिश्च महात्मभिः ॥ आययौ तत्र काकुत्स्थं स्वर्गद्वारमुपस्थितम् ॥ १५४ ॥ विमान शतकोटीभिर्दिव्याभिः सर्वतो वृतः ॥ दीपयन्सर्वतो व्योम ज्योतिर्भूतमनुत्तमम् ॥ १५५ ॥ स्वयंप्रभैश्च तेजोभिर्महद्भिः पुण्यकर्मभिः ॥ पुण्या वाता ववुस्तत्र गन्धवंतः सुखप्रदाः ॥ १५६ ॥ सपुण्यपुष्पवर्षं च वायुयुक्तं महाजवम् ॥ गन्धर्वैरप्सरोभिश्च तस्मिन्सूर्यउपस्थितः ॥१५७॥ शरयूसलिलं रामः पद्भ्यां स समुपास्पृशत ॥ ततो ब्रह्मा सुरैर्युक्तः स्तोतुं समुपचक्रमे ॥१५८॥ त्वं हि लोकपतिर्देव न त्वां जानाति कश्चन ॥ अहं ते वै विशालाक्ष भूतपूर्वपरिग्रहः ॥ १५९ ॥ त्वमचिंत्यं महद्भूतमक्षयं लोकसंग्रहे ॥ यामिच्छसि महावीर्य तां तनुं प्रविश स्वकाम् ॥ १६० ॥ पितामहस्य वचनादि दमेवाविशत्स्वयम् ॥ सुदिव्यं वैष्णवं तेजः संसारं स सहानुजः ॥ ततो विष्णुतनुन्देवाः पूजयन्तः सुरोत्तमम् ॥ १६१ ॥ साध्या मरुद्गणाश्चैव सेन्द्राः साग्निपुरोगमाः ॥ ये च दिव्या ऋषिगणा गन्धर्वाप्सरसस्तथा ॥ सुपर्णा नागयक्षाश्च दैत्यदानवराक्षसाः ॥ १६२ ॥ देवाः प्रहृष्टा मुदिताः सर्वे पूर्णमनोरथाः ॥ साधुसाध्विति ते सर्वे त्रिदिवस्था बभाषिरे ॥ १६३ ॥ अथ विष्णुर्महातेजाः पितामहमुवाच ह ॥ एषां लोकं जनौघानां दातु मर्हसि सुव्रत ॥ १६४ ॥ इमे तु सर्वे मत्स्नेहादायाताः सर्वमानवाः ॥ भक्ताश्च भक्तिमन्तश्च त्यक्तात्मानोऽपि सर्वशः ॥ १६५ ॥ तच्छ्रुत्वा विष्णु कथितं सर्वलोकेश्वरोऽब्रवीत् ॥ लोकं सन्तानिकंनाम संस्थास्यंति हि मानवाः ॥ १६६ ॥ स्वर्गद्वारेऽत्र वै तीर्थे राममेवानुचिन्तयन् ॥ प्राणांस्त्य जति भक्त्या वै स संतानं परं लभेत् ॥ १६७ ॥ सर्वे संतानिकंनाम ब्रह्मलोकादनन्तरम् ॥ वानराश्च स्वकां योनिं राक्षसाश्चापि राक्षसीम्॥१६८॥ यस्या विनिःसृता ये वै सुरासुरतनूद्भवाः ॥ आदित्यतनयश्चैव सुग्रीवः सूर्यमण्डलम् ॥ १६९ ॥ ऋषयो नागयक्षाश्च प्रयास्यन्ति स्वकारणम् ॥ तथा ब्रुवति देवेशे गोप्रतारमुपस्थितम् ॥ १७० ॥ तज्जलं सरयूं भेजे परिपूर्णं ततो जलम् ॥ अवगाह्य जलं सर्वे प्राणांस्त्यक्त्वा प्रहृष्टवत् ॥ १७१ ॥ मानुषं देहमुत्सृज्य ते विमानान्यथारुहन् ॥ तिर्यग्योनिगता ये च प्रविश्य सरयूं तदा ॥ १७२ ॥ देहत्यागं च ते तत्र कृत्वा दिव्यवपुर्द्धराः ॥ तथान्यान्यपि सत्त्वानि स्थावराणि चराणि च ॥ १७३ ॥ प्राप्य चोत्तमदेहं वै देवलोकमुपागमन् ॥ तस्मिंस्तत्र समापन्ने वानरा ऋक्षराक्षसाः ॥ तेऽपि प्रविविशुः सर्वे देहान्निक्षिप्य वै तदा ॥ १७४ ॥ तदा स्वर्गं गताः सर्वे स्मृत्वा लोकगुरुं विभुम् ॥ जगाम त्रिदशैः सार्द्धं रामो हृष्टो

१ उपस्थितः—उपासितः--इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवमुक्त्वा तु काकुत्स्थो हनुमंतमथाब्रवीत् ॥ वायुपुत्र चिरं जीव मा प्रतिज्ञां वृथा कृथाः ॥ १२७ ॥ यावल्लोका वदिष्यंति मत्कथां वानरर्षभ ॥
तावत्त्वं धारय प्राणान्प्रतिज्ञां प्रतिपालयन् ॥ १२८ ॥ मैन्दश्च द्विविदश्चैव अमृतप्राशनावुभौ ॥ यावल्लोका धरिष्यंति तावदेतौ धरि
ष्यतः ॥ १२९ ॥ पुत्रपौत्राश्च येऽस्माकं तावद्रक्षन्त्विह वानराः ॥ एवमुक्त्वा तु काकुत्स्थः सर्वानथ च वानरान् ॥ मया सार्धं प्रयातेति
तदा तान्राघवोऽब्रवीत् ॥ १३० ॥ प्रभातायां तु शर्वर्यां पृथुवक्षा महाभुजः ॥ रामः कमलपत्राक्षः पुरोधसमथाब्रवीत् ॥ १३१ ॥ अग्नि
होत्राणि यांत्वग्रे दीप्यमानानि सर्वशः ॥ वाजपेयातिरात्राणि निर्यांतु च ममाग्रतः ॥ १३२ ॥ ततो वसिष्ठस्तेजस्वी सर्वं निश्चित्य चेतसा ॥
चकार विधिवत्कर्म महाप्रास्थानिकं विधिम् ॥ १३३ ॥ ततः क्षौमाम्बरधरो ब्रह्मचर्यसमन्वितः ॥ कुशानादाय पाणिभ्यां महाप्रस्थानमुद्यतः ॥
॥ १३४ ॥ न व्याहरच्छुभं किंचिदशुभं वा नरेश्वरः ॥ निष्क्रम्य नगरात्तस्मात्सागरादिव चंद्रमाः ॥ १३५ ॥ रामस्य सव्यपार्श्वे तु सपद्मा श्रीः
समाश्रिता ॥ दक्षिणे ह्रीर्विशालाक्षी व्यवसायस्तथाग्रतः ॥ १३६ ॥ नानाविधायुधान्यत्र धनुर्ज्याप्रभृतीनि च ॥ अनुव्रजंति काकुत्स्थं सर्वे पुरुष
विग्रहाः ॥ १३७ ॥ वेदो ब्राह्मणरूपेण सावित्री सव्यदक्षिणे ॥ ॐकारोऽथ वषट्कारः सर्वे रामं तदाऽव्रजन् ॥ १३८ ॥ ऋषयश्च महात्मानः सर्वे
चैव महीधराः ॥ अनुगच्छन्ति काकुत्स्थं स्वर्गद्वारमुपस्थितम् ॥ १३९ ॥ तथानुयांति काकुत्स्थमंतःपुरगताः स्त्रियः ॥ सवृद्धाबालदासीकाः
सपर्षद्द्वाररक्षकाः ॥ १४० ॥ सान्तःपुरश्च भरतः शत्रुघ्नसहितो ययौ ॥ रामं व्रजंतमागम्य रघुवंशमनुव्रताः ॥ १४१ ॥ ततो विप्रा महात्मानः
साग्निहोत्राः समंततः ॥ सपुत्रदाराः काकुत्स्थमनुगच्छंति सर्वशः ॥ १४२ ॥ मंत्रिणो भृत्ययुक्ताश्च सपुत्राः सहबांधवाः ॥ सर्वे ते सानुगाश्चैव ह्यनु
गच्छंति राघवम् ॥ १४३ ॥ ततः सर्वाः प्रकृतयो हृष्टपुष्टजनावृताः ॥ गच्छंतमनुगच्छंति राघवं गुणरंजिताः ॥ १४४ ॥ तथा प्रजाश्च सकलाः
सपुत्राश्च सबांधवाः ॥ राघवस्यानुगाश्चासन्हृष्टा विगतकल्मषम् ॥ १४५ ॥ स्नाताः शुक्लाम्बरधराः सर्वे प्रयतमानसाः ॥ कृत्वा किलकिलाशब्दम
नुयाताश्च राघवम् ॥ १४६ ॥ न कश्चित्तत्र दीनोऽभून्न भीतो नातिदुःखितः ॥ प्रहृष्टा मुदिताः सर्वे बभूवुः परमाद्भुताः ॥ १४७ ॥ द्रष्टुकामाश्च
निर्वाणं राज्ञो जनपदास्तथा ॥ संप्राप्तास्तेऽपि दृष्ट्वैव नभोमार्गेण चक्रिणम् ॥ १४८ ॥ ऋक्षवानररक्षांसि जनाश्च पुरवासिनः ॥ आगत्य परया
भक्त्या पृष्ठतः समुपाययुः ॥ १४९ ॥ तानि भूतानि नगरे ह्यन्तर्धानगतान्यपि ॥ राघवं तेऽप्यनुययुः स्वर्गद्वारमुपस्थितम् ॥ १५० ॥ यानि पश्यंति
काकुत्स्थं स्थावराणि चराणि च ॥ सत्त्वानि स्वर्गगमने मतिं कुर्वंति तान्यपि ॥ १५१ ॥ नासीत्सत्त्वमयोध्यायां सुसूक्ष्ममपि किंचन ॥ यद्राघवं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मम ब्रूहि माहात्म्यं परमाद्भुतम् ॥ ७७ ॥ शृणु संगममाहात्म्यं विप्रेंद्र परमाद्भुतम् ॥ स्कन्ददेवाच्छ्रुतं सम्यक्कथयामि तथा तव ॥ ७८ ॥
दशकोटिसहस्राणि दशकोटिशतानि च ॥ तीर्थानि सरयूनद्या घर्घरोदकसंगमे ॥ निवसंति सदा विप्र स्कन्दादवगतं मया ॥ ७९ ॥ देवतानां सुराणां
च सिद्धानां योगिनां तथा ॥ ब्रह्मविष्णुशिवानां च सान्निध्यं सर्वदा स्थितम् ॥ ८० ॥ तस्मिन्संगमसलिले नरः स्नात्वा समाहितः ॥ संतर्प्य
पितृदेवांश्च दत्त्वा दानं स्वशक्तितः ॥ ८१ ॥ हुत्वा वैष्णवमंत्रेण शुचिर्यत्फलमाप्नुयात् ॥ तदिहैकमना विप्र शृणु यत्कथयामि ते ॥ ८२ ॥ अश्वमेध
सहस्रस्य वाजपेयशतस्य च ॥ कुरुक्षेत्रे महाक्षेत्रे राहुग्रस्ते दिवाकरे ॥ ८३ ॥ सुवर्णदाने यत्पुण्यमहन्यहनि तद्भवेत् ॥ ८४ ॥ अमावास्यां पौर्ण
मास्यां द्वादश्योरुभयोरपि ॥ अयने च व्यतीपाते स्नानं वैष्णवलोकदम् ॥ ८५ ॥ तिष्ठेद्युगसहस्रं तु पादेनैकेन यः पुमान् ॥ विधिवत्संगमे स्नाया
त्पौष्यां तदविशेषतः ॥ ८६ ॥ लंबतेऽवाक्छिरा यस्तु युगानामयुतं पुमान् ॥ स्नातानां शुचिभिस्तोयैः संगमे प्रयतात्मनाम् ॥ ८७ ॥ व्युष्टिर्भ
वति या पुंसां न सा क्रतुशतैरपि ॥ ८८ ॥ पौषे मासि विशेषेण स्नानं बहुफलप्रदम् ॥ ८९ ॥ पौषे मासि विशेषेण यः कुर्यात्स्नानमादृतः ॥
ब्राह्मणः क्षत्रियो वैश्यः शूद्रो वा वर्णसंकरः ॥ स याति ब्रह्मणः स्थानं पुनरावृत्तिवर्जितम् ॥९० ॥ पौषे मासे तु यो दद्याद्घृताढ्यं दीपमुत्तमम् ॥
विधिवच्छ्रद्धया विप्र शृणु तस्यापि यत्फलम् ॥९१॥ नानाजन्मार्जितं पापं स्वल्पं बह्वपि वा भवेत् ॥ तत्सर्वं नश्यति क्षिप्रं तोयस्थं लवणं यथा ॥
॥ ९२ ॥ आयुरारोग्यमैश्वर्यं संततीः सौख्यमुत्तमम् ॥ प्राप्नोति फलदं नित्यं दीपदः पुण्यभाङ्नरः ॥ ९३ ॥ यस्तु शुक्लत्रयोदश्यां पौषेऽत्र
प्रयतो व्रती ॥ जागरं कुरुते धीरः स गच्छेद्भवनं हरेः ॥ ९४ ॥ जागरं विदधद्रात्रौ दीपं दत्त्वा तु सर्वशः ॥ होमं च कारयेद्विप्रो नियतात्मा शुचि
व्रतः ॥ ९५ ॥ वैष्णवो विष्णुपूजां च कुर्वञ्छृण्वन्हरेः कथाम् ॥ गीतवादित्रनृत्यैश्च विष्णुतोषणकारकैः ॥ कथाभिः पुण्ययुक्ताभिर्जागृयाच्छर्वरीं
नरः ॥ ९६ ॥ ततः प्रभाते विमले स्नात्वा विधिवदादरात् ॥ विष्णुं संपूज्य विप्रांश्च देयं स्वर्णादि शक्तितः ॥ ९७ ॥ स्वर्णं चान्नं च वासांसि
यो दद्याच्छ्रद्धयाऽन्वितः ॥ संगमे विधिवद्विद्वान्स याति परमां गतिम् ॥ ९८ ॥ वर्षेवर्षे तु कर्त्तव्यो जागरः पुण्यतत्परैः ॥ ९९ ॥ हरिः पूज्यो
द्विजाः सम्यक्संतोष्याः शक्तितो नरैः ॥ तेन विष्णोः परा तुष्टिः पापानि विफलानि च ॥ भवंति निर्विषाः सर्पा यथा तार्क्ष्यस्य दर्शनात् ॥
॥ १०० ॥ तत्र स्नातो दिवं याति अत्र स्नातः सुखी भवेत् ॥ १०१ ॥ त्रिषु लोकेषु ये केचित्प्राणिनः सर्व एव ते ॥ तर्प्यमाणाः परां तृप्तिं यांति

१ तत्—उभयोः पुण्यम्—अविशेषतः—समानम्—इत्यर्थः । २ व्युष्टिः—फलम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संगमजैर्जलैः ॥ १०२ ॥ भूतानामिह सर्वेषां दुःखोपहतचेतसाम् ॥ गतिमन्वेषमाणानां न संगमसमा गतिः ॥ १०३ ॥ सप्तावरान्सप्त परान्पुरुषश्चात्मना सह ॥ पुंसस्तारयते सर्वान्संगमे स्नानमाचरन् ॥ १०४ ॥ जात्यंधैरिह ते तुल्यास्तथा पंगुभिरेव च ॥ समेत्यात्र च नस्नान्ति सरयूघर्घरसंगमे ॥ १०५ ॥ वर्णानां ब्राह्मणो यद्वत्तथा तीर्थेषु संगमः ॥ सरयूघर्घरायोगे वैष्णवस्थो नरः सदा ॥ १०६ ॥ अत्र स्नानेन दानेन यथाशक्त्या जितेंद्रियः ॥ होमेन विधियुक्तेन नरः स्वर्गमवाप्नुयात् ॥ १०७ ॥ नरो वा यदि वा नारी विधिवत्स्नानमाचरेत् ॥ स्वर्गलोकनिवासो हि भवेत्तस्य न संशयः ॥ १०८ ॥ यथा वह्निर्दहेत्सर्वं शुष्कमार्द्रमथापि वा ॥ भस्मीभवंति पापानि तत्समागममज्जनात् ॥ १०९ ॥ एकतः सर्वतीर्थानि नानाविधिफलानि वै ॥ सरयूघर्घरोत्पन्नसंगमस्त्वधिको भवेत् ॥ ११० ॥ सर्वतीर्थावगाहस्य फलं यादृक्स्मृतं श्रुतौ ॥ तादृक्फलं नृणां सम्यग्भवेत्संगममज्जनात् ॥ १११ ॥ गोप्रताराभिधं तीर्थमपरं वर्ततेऽनघ ॥ सन्निधौ संगमस्यैव महापातकनाशनम् ॥ ११२ ॥ यत्र स्नानेन दानेन न शोचति नरः क्वचित् ॥ गोप्रतारसमं तीर्थं न भूतं न भविष्यति ॥ ११३ ॥ वाराणस्यां यथा विद्वन्वर्त्तते मणिकर्णिका ॥ उज्जयिन्यां यथा विप्र महाकालनिकेतनम् ॥ ११४ ॥ नैमिषे चक्रवापी तु यथा तीर्थतमा स्मृता ॥ अयोध्यायां तथा विप्र गोप्रताराभिधं महत् ॥ ११५ ॥ यत्र रामाज्ञया विद्वन्साकेतनगरीजनाः ॥ अवापुः स्वर्गमतुलं निमज्य परमांभसि ॥ ११६ ॥ ॥ व्यास उवाच ॥ ॥ अवापुस्ते कथं स्वर्गं साकेतनगरीजनाः ॥ कथं च राघवो विद्वन्नेतत्कथय सुव्रत ॥ ११७ ॥ ॥ अगस्त्य उवाच ॥ ॥ सावधानः शृणु मुने कथामेतां सुविस्तरात् ॥ यथा जगाम रामोऽसौ स्वर्गं स च पुरीजनः ॥ ११८ ॥ पुरा रामो विधायैव देवकार्य्यमतंद्रितः ॥ स्वर्गं गंतुं मनश्चक्रे भ्रातृभ्यां सह वीरधीः ॥ ११९ ॥ ततो निशम्य चारेण वानराः कामरूपिणः ॥ ऋक्षगोपुच्छरक्षांसि समुत्पेतुरनेकशः ॥ १२० ॥ देवगंधर्वपुत्राश्च ऋषिपुत्राश्च वानराः ॥ रामक्षयं विदित्वा तु सर्व एव समागताः ॥ १२१ ॥ ते राममनुगत्योचुः सर्वे वानरयूथपाः ॥ तवानुगमने राजन्संप्राप्ताः स्म इहानघ ॥ १२२ ॥ यदि राम विनास्माभिर्गच्छेस्त्वं पुरुषर्षभ ॥ सर्वे खलु हताः स्याम दण्डेन महता नृप ॥ १२३ ॥ श्रुत्वा तु वचनं तेषामृक्षवानररक्षसाम् ॥ विभीषणमुवाचाथ राघवस्तत्क्षणं गिरा ॥ २२४ ॥ यावत्प्रजा धरिष्यंति तावदेव विभीषण ॥ कारयस्व महद्राज्यं लंकां त्वं पालयिष्यसि ॥ १२५ ॥ शाधि राज्यं च खलेतन्नान्यथा मे वचः कुरु ॥ प्रजास्त्वं रक्ष धर्मेण नोत्तरं वक्तुमर्हसि ॥ १२६ ॥

१ वैष्णवस्थः—वैकुण्ठस्थः—इत्यर्थः ।

CC-0. In Public Domain. Digitization by eGangotri

अहम् ॥ तद्भूत त्वरिता मह्यं किं विलंबेन निर्भयाः ॥ ५१ ॥ ॥ देवा ऊचुः ॥ ॥ भगवन्देवदेवेश त्वया संप्रति सर्वशः ॥ सर्वं समभवत्कार्यं निष्पन्नं वै जगत्पते ॥ ५२ ॥ तथापि सर्वदा भाव्यं नित्यं देव त्वया विभो ॥ अस्मद्रक्षार्थमत्रैव विजितेन्द्रियवर्त्मना ॥५३॥ एवमेव सदा कार्यं शत्रुपक्षविनाशनम् ॥५४॥ ॥ श्रीभगवानुवाच ॥ ॥ एवमेतत्करिष्यामि भवतामरिसंजयम् ॥ श्रीमतां तेजसो वृद्धिं करिष्यामि सदासुराः ॥ कथेयं च सदा ख्यातिं लोके यास्यति चोत्तमाम् ॥ ५५ ॥ अयं नाम्ना गुप्तहरिर्देवो भुवनविश्रुतः ॥ मदीयं परमं गुह्यं स्थानं ख्यातिं समेष्यति ॥ ५६ ॥ अत्र यः प्राणिनां श्रेष्ठः पूजायज्ञजपादिकम् ॥ करोति परया भक्त्या स याति परमां गतिम् ॥ ५७ ॥ अत्र यः कुरुते दानं यथाशक्त्या जितेन्द्रियः ॥ स स्वर्गमतुलं प्राप्य न शोचति कदाचन ॥ ५८ ॥ अत्र मत्प्रीतये देवाः प्राणिभिर्धर्मकांक्षिभिः ॥ दातव्या गौः प्रयत्नेन सवत्सा विधिपूर्वकम् ॥ ॥ ५९ ॥ स्वर्णशृंगी रौप्यखुरी वस्त्रद्वयसमावृता ॥ कांस्योपदोहना ताम्रपृष्ठी बहुगुणान्विता ॥६०॥ रत्नपुच्छा दुग्धवती घंटाभरणभूषिता ॥ अर्चिता गंधपुष्पाद्यैः सुप्रसन्नाऽमृतप्रजा ॥ ६१ ॥ द्विजाय वेदविज्ञाय गुणिने निर्मलात्मने ॥ विष्णुभक्ताय विदुषे आनृशंस्यरताय च ॥ ६२ ॥ ब्राह्मणाय च गौर्देया सर्वत्र सुखमश्नुते ॥ न देया द्विजमात्राय दातारं सोऽवपातयेत् ॥ ६३ ॥ मत्प्रीतयेऽत्र दातव्या निर्मलेनांतरात्मना ॥ ६४ ॥ स्नातं यैश्च विशुद्ध्यर्थमत्र मद्भक्तितत्परैः ॥ तेषां स्वर्गतयो नित्यं मुक्तिः करतले स्थिता ॥ ६५ ॥ तथा चक्रहरेः पीठे मत्प्रीत्यै दानमुत्तमम् ॥ जपहोमादिकं चापि कर्त्तव्यं यत्नतो नरैः ॥ ६६ ॥ भवन्तोऽपि विधानेन यात्रां कुर्वंतु सत्तमाः ॥ अस्माद्गुप्तहरेः स्थानान्निकटे संगमे शुभे ॥ ६७ ॥ प्रत्यग्भागे गोप्रताराद्योजनत्रयसंमिते ॥ घर्घरांबुतरंगिण्या सरयूः संगता यतः ॥ ६८ ॥ अत्र स्नात्वा विधानेन द्रष्टव्योऽत्र प्रयत्नतः ॥ देवो गुप्तहरिर्नाम सर्वकामार्थसिद्धिदः ॥ ६९ ॥ ॥ अगस्त्य उवाच ॥ ॥ इत्युक्त्वांतर्दधे देवः पीताम्बरधरोऽच्युतः ॥ देवा अपि विधानेन कृत्वा यात्रां प्रयत्नतः ॥ अयोध्यायां स्थिता नित्यं हरेर्गुणविमोहिताः ॥ ७० ॥ तदाप्रभृति विप्रेंद्र तत्स्थानं भुवि पप्रथे ॥ कार्तिक्यां तु विशेषेण यात्रा सांवत्सरी भवेत् ॥ ७१ ॥ विभोर्गुप्तहरेस्तत्र संगमस्नानपूर्विका ॥ गोप्रतारे च तीर्थेऽस्मिन्सरयूघर्घराश्रिते ॥ स्नात्वा देवोऽर्चनीयोऽयं सर्वकामफलप्रदः ॥ ७२ ॥ तथा चक्रहरेर्यात्रा कर्त्तव्या सुप्रयत्नतः ॥ मार्गशीर्षस्य विशदे पक्षे हरितिथौ नरैः ॥ ७३ ॥ एवं यः कुरुते यात्रां विष्णुलोके स मोदते ॥ ७४ ॥ ॥ श्रीसूत उवाच ॥ ॥ एवमुक्त्वा तु विरते मुनौ कलशजन्मनि ॥ कृष्णद्वैपायनो व्यासः पुनराह सविस्मयः ॥ ॥ ७५ ॥ ॥ व्यास उवाच ॥ ॥ अत्याश्चर्यमयीं ब्रह्मन्कथामेतां तपोधन ॥ उक्तवानसि येनैतत्साश्चर्यं मम मानसम् ॥ ७६ ॥ विस्तरेण

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

णमालिने ॥ हृत्कुशेशयकोषश्रीसमुन्मेषविधायिने ॥ २८ ॥ नमस्तस्मै यमवते योगिनां गतये सदा ॥ परमेशाय वै पारे महसां तमसां तथा ॥ २९ ॥ यज्ञाय भुक्तहविष ऋग्यजुःसामरूपिणे ॥ नमः सरस्वतीगीतदिव्यसद्गुणशालिने ॥ ३० ॥ शांताय धर्मनिधये क्षेत्रज्ञायामृतात्मने ॥ शिष्ययोगप्रतिष्ठाय नमो जीवैकहेतवे ॥ घोराय मायाविधये सहस्रशिरसे नमः ॥ ३१ ॥ योगनिद्रात्मने नाभिपद्मोद्भूतजगत्सृजे ॥ नमः सलिलरूपाय कारणाय जगत्स्थितेः ॥ ३२ ॥ कार्यमेयाय बलिने जीवाय परमात्मने ॥ गोप्त्रे प्राणाय भूतानां नमो विश्वाय वेधसे ॥ ३३ ॥ दृप्ताय सिंहवपुषे दैत्यसंहारकारिणे ॥ वीर्यायानंतमनसे जगद्भावभृते नमः ॥ ३४ ॥ संसारकारणाज्ञानमहासंतमसच्छिदे ॥ अचिन्त्यधाम्ने गुह्याय रुद्रायात्युद्भिजे नमः ॥ ३५ ॥ शान्ताय शान्तकल्लोलकैवल्यपददायिने ॥ सर्वभावातिरिक्ताय नमः सर्वमयात्मने ॥ ३६ ॥ इन्दीवरदलश्यामं स्फूर्जत्किंजल्कविभ्रमम् ॥ बिभ्राणं कौस्तुभं विष्णुं नौमि नेत्ररसायनम् ॥ ३७ ॥ ॥ अगस्त्य उवाच ॥ ॥ इति स्तुतः प्रसन्नात्मा वरदो गरुडध्वजः ॥ ववर्ष दृष्टिसुधया सर्वान्देवान्कृपान्वितः ॥ उवाच मधुरं वाक्यं प्रश्रयावनतान्सुरान् ॥ ॥ ३८ ॥ ॥ श्रीभगवानुवाच ॥ ॥ जानामि विबुधाः सर्वमभिप्रायं समाधितः ॥ दैतेयैर्विक्रमाक्रान्तं पदं समरदर्पितैः ॥ ३९ ॥ सबलैर्बलहीनानां प्रतापो विजितः परैः ॥ सांप्रतं तु विधास्यामि तपो युष्मद्बलाय वै ॥ ४० ॥ अयोध्यानगरे गत्वा करिष्ये तप उत्तमम् ॥ गुप्तो भूत्वा भवत्तेजोविवृद्ध्यै दैत्यशान्तये ॥ ४१ ॥ भवन्तोऽपि तपस्तीव्रं कुर्वंत्वमलमानसाः ॥ अयोध्यां प्राप्य तां देवा दैत्यनाशाय सत्वरम् ॥ ४२ ॥ ॥ ॥ अगस्त्य उवाच ॥ ॥ इत्युक्त्वांतर्दधे देवान्देवो गरुडवाहनः ॥ अयोध्यामागतः क्षिप्रं चकार तप उत्तमम् ॥ ४३ ॥ गुप्तो भूत्वा यदा विद्वन्सुरतेजोभिवृद्धये ॥ तेन गुप्तहरिर्नाम देवो विख्यातिमागतः ॥ ४४ ॥ आगतस्य हरेः पूर्वं यत्र हस्ततलाच्युतम् ॥ सुदर्शनाख्यं तच्चक्रं तेन चक्रहरिः स्मृतः ॥ ४५ ॥ तयोर्दर्शनमात्रेण सर्वपापैः प्रमुच्यते ॥ हरेस्तेन प्रभावेण देवाः प्रबलतेजसः ॥ ४६ ॥ जित्वा दैत्यान्रणे सर्वान्संप्राप्य स्वपदान्यथ ॥ रेजिरे विपुलानंदैरसुरानार्दयंस्ततः ॥ ४७ ॥ ततः सर्वे समेत्याशु बृहस्पतिपुरस्सराः ॥ देवाः सर्वेऽनमन्मौलिमालार्चित पदाम्बुजम् ॥ हरिं द्रष्टुमथागच्छन्नयोध्यायां समुत्सुकाः ॥ ४८ ॥ आगत्य च ततः श्रुत्वा नानाविधगुणादरम् ॥ भावैः पुण्यैः समभ्यर्च्य नत्वा प्रांजलयस्तदा ॥ हरिमेकाग्रमनसा ध्यायन्तो ध्याननिष्ठिताः ॥ ४९ ॥ तानागतान्समालोक्य पदभक्त्या कृतानतीन् ॥ प्रसन्नः प्राह विश्वात्मा पीतवासा जनार्दनः ॥ ५० ॥ ॥ श्रीभगवानुवाच ॥ ॥ भोभो देवा भवन्तश्च चिराद्दिष्ट्याद्य संगताः ॥ अधुना भवतामिच्छां कां करोमि सुरा

CC-0. In Public Domain. Digitization by eGangotri

सीते प्रवक्ष्यामि माहात्म्यं भुवि यादृशम् ॥ त्वत्कुण्डस्यास्य सुभगे त्वत्प्रीत्या कथयाम्यहम् ॥ ३ ॥ अत्र स्नानं च दानं च जपो होमस्तपोऽथवा ॥
सर्वमक्षयतां याति विधानेन शुचिस्मिते ॥ ४ ॥ मार्गकृष्णचतुर्दश्यां तत्र स्नानं विशेषतः ॥ सर्वपापहरं देवि सर्वदा स्नायिनां नृणाम् ॥ ५ ॥ इति
रामो वरं प्रादात्सीतायै च प्रजाप्रियः ॥ तदाप्रभृति सर्वत्र तत्तीर्थं भुवि वर्त्तते ॥ ६ ॥ सीताकुण्डमिति ख्यातं जनानां परमाद्भुतम् ॥ तस्मिंस्तीर्थे
नरः स्नात्वा नूनं राममवाप्नुयात् ॥ ७ ॥ तत्र स्नानेन दानेन तपसा च विशेषतः ॥ गन्धैर्माल्यैर्धूपदीपैर्नानाविभवविस्तरैः ॥ रामं संपूज्य सीतां
च मुक्तः स्यान्नात्र संशयः ॥ ८ ॥ मार्गे मासि च स्नातव्यं गर्भवासो न जायते ॥ अन्यदापि नरः स्नात्वा विष्णुलोकं स गच्छति ॥ ९ ॥
विभोर्विष्णुहरेर्विप्र रम्ये पश्चिमदिक्तटे ॥ देवश्चक्रहरिर्नाम सर्वाभीष्टफलप्रदः ॥ १० ॥ तस्य चक्रहरेर्विप्र महिमा न हि मानवैः ॥ शक्यो वर्णयितुं
धीरैरपि बुद्धिमतां वरैः॥११॥ ततः पश्चिमदिग्भागे नाम्ना पुण्यं हरिस्मृति ॥ विष्णोरायतनं ख्यातं परमार्थफलप्रदम् ॥ यस्य दर्शनमात्रेण सर्वपापैः
प्रमुच्यते ॥ १२ ॥ तयोर्दर्शनतो यांति तेषां पापानि देहिनाम् ॥ तानि पापानि यावंति कुर्वते भुवि ये नराः ॥ १३ ॥ पुरा देवासुरे जाते संग्रामे
भृशदारुणे ॥ दैत्यैर्वरमदोत्सिक्तैर्देवा युधि पराजिताः ॥ १४ ॥ तेषां पलायमानानां देवानामग्रणीर्हरः ॥ संस्तभ्य चैव तान्सर्वान्पुरस्कृत्यांबुजास
नम् ॥ १५ ॥ क्षीरोदशायिनं विष्णुं शेषपर्य्यंकशायिनम् ॥ लक्ष्म्योपविष्टं पार्श्वे च चरणांबुजहस्तया ॥ १६ ॥ नारदाद्यैर्मुनिवरैरुद्गीतगुणगौर
वम् ॥ गरुडेन पुरःस्थेनानिशमंजलिना स्तुतम् ॥ १७ ॥ क्षीराब्धिजलकल्लोलमदबिन्दूंकिताम्बरम् ॥ तारकोत्करविस्फारतारहारविराजितम् ॥
॥ १८ ॥ पीतांबरमतिस्मेरविकाशद्भावभावितम् ॥ बिभ्रतं कुण्डलं स्थूलं कर्णाभ्यां मौक्तिकोज्वलम् ॥ १९ ॥ रत्नवल्लीमिव स्वच्छां श्वेत
द्वीपनिवासिनीम् ॥ किरीटं पद्मरागाणां वलयं दधतं परम् ॥ २० ॥ मित्रस्य राहुवित्रासनिवर्त्तनमिवापरम् ॥ सकौस्तुभप्रभाचक्रं
बिभ्राणं प्रवलारुणम् ॥ २१ ॥ परां चतुर्मुखोत्पत्तिकल्पसंकल्पनामिव ॥ शरणं स जगामाशु विनीतात्मा स्तुवन्निति ॥ २२ ॥ तस्मि
न्नवसरे शंभुः सर्वदेवगणैः सह ॥ तुष्टाव प्रयतो भूत्वा विष्णुं जिष्णुं सुरद्विषाम् ॥ २३ ॥ ॥ ईश्वर उवाच ॥ ॥ संसारार्णवसं
तारसुपर्णसुखदायिने ॥ मोहतीव्रतमोहारिचन्द्राय हरये नमः ॥ २४ ॥ स्फुरत्संविन्मणिशिखां चित्तसंगतिचंद्रिकाम् ॥ प्रपद्ये भगवद्भ
क्तिमानसोद्यानवाहिनीम् ॥ २५ ॥ हेलोल्लसत्समुत्साहशक्तिं व्याप्तजगत्त्रयाम् ॥ या पूर्वकोटिर्भावानां सत्त्वानां वैष्णवीति वा ॥ २६ ॥
पवनांदोलितांभोजदलपर्यंतवर्त्तिनाम् ॥ पततामिव जन्तूनां स्थैर्यमेका हरिस्मृतिः ॥ २७ ॥ नमः सूर्य्यात्मने तुभ्यं संवित्किर

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वर्षसहस्रं स तस्थौ स्थिरमतिस्तदा ॥ १० ॥ तस्य शुश्रूषणपरो मुनिः कौत्सो यतव्रतः ॥ बभूव परमोदारमतिर्विगतमत्सरः ॥ ११ ॥ पुनरागत्य स मुनिर्दुर्वासा गतकल्मषः ॥ भुक्त्वा च पायसं सद्यः स जगाम निजाश्रमम् ॥ १२ ॥ तस्मिन्गते मुनिवरे विश्वामित्रस्तपोनिधिः ॥ कौत्सं विद्यावतां श्रेष्ठं विससर्ज गृहान्प्रति ॥ १३ ॥ स विसृष्टो गुरुं प्राह दक्षिणा प्रार्थ्यतामिति ॥ विश्वामित्रस्तु तं प्राह त्वं किं दास्यसि दक्षिणाम् ॥ दक्षिणा तव शुश्रूषा गृहं व्रज यतव्रत ॥ १४ ॥ पुनःपुनर्गुरुं प्राह शिष्यो निर्बन्धवान्यदा ॥ तदा गुरुर्गुरुक्रुद्धः शिष्यं प्राह च निष्ठुरम् ॥ १५ ॥ सुवर्णस्य सुवर्णस्य चतुर्दश समाहर ॥ कोटीर्मे दक्षिणा विप्र पश्चाद्गच्छ गृहं प्रति ॥ १६ ॥ इत्युक्तो गुरुणा कौत्सो विचार्य समुपागमत् ॥ काकुत्स्थं दिग्विजेतारं ययाचे गुरुदक्षिणाम् ॥ १७ ॥ इत्युक्तं ते मुनिवर त्वया पृष्टं हि यत्पुनः ॥ अतोऽन्यच्छृणु ते वच्मि तीर्थकारणमुत्तमम् ॥ १८ ॥ तस्माद्दक्षिणदिग्भागे संभेदः सिद्धसेवितः ॥ तिलोदकीसरय्वोश्च संगत्या भुवि संश्रुतः ॥ १९ ॥ तत्र स्नात्वा महाभाग भवन्ति विरजा नराः ॥ दशानामश्वमेधानां कृतानां यत्फलं भवेत् ॥ तदाप्नोति स धर्मात्मा तत्र स्नात्वा यतव्रतः ॥ २० ॥ स्वर्णादिकं च यो दद्याद्ब्राह्मणे वेदपारगे ॥ शुभां गतिमवाप्नोति अग्निवच्चैव दीप्यते ॥ २१ ॥ तिलोदकीसरय्वोश्च संगमे लोकविश्रुते ॥ दत्त्वान्नं च विधानेन न स भूयोऽभिजायते ॥ २२ ॥ उपवासं च यः कृत्वा विप्रान्संतर्पयेन्नरः ॥ सौत्रामणेश्च यज्ञस्य फलमाप्नोति मानवः ॥ २३ ॥ एकाहारस्तु यस्तिष्ठेन्मासं तत्र यतव्रतः ॥ यावज्जीवकृतं पापं सहसा तस्य नश्यति ॥ २४ ॥ नभस्यकृष्णामावस्यां यात्रा सांवत्सरी भवेत् ॥ रामेण निर्मिता पूर्वं नदी सिंधुरिवापरा ॥ २५ ॥ सिंधुजानां तुरंगाणां जलपानाय सुव्रत ॥ तिलवच्छयाममुदकं यतस्तस्यां सदा बभौ ॥ २६ ॥ तिलोदकीति विख्याता पुण्यतोया सदा नदी ॥ संगमादन्यतो यस्यां तिलोदक्यां शुचिव्रतः ॥ स्नातो विमुच्यते पापैः सप्तजन्मार्जितैरपि ॥ २७ ॥ तस्मात्तिलोदकीस्नानं सर्वपापहरं मुने ॥ कर्त्तव्यं सुप्रयत्नेन प्राणिभिर्धर्मकांक्षिभिः ॥ स्नानं दानं व्रतं होमं सर्वमक्षयतां व्रजेत् ॥ २८ ॥ इति विविधविधानैस्तीर्थयात्रां क्रमेण प्रथितगुणविकासः प्राप्तपुण्यो विधाय ॥ हरिमुपहृतभावः पूजयन्सर्वतीर्थं व्रजति परमधाम न्यस्तपापः कथञ्चित् ॥ २९ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डेऽयोध्यामाहात्म्ये तिलोदकीप्रभाववर्णनंनाम पञ्चमोऽध्यायः ॥ ५ ॥ ॥ छ ॥ ॥ अगस्त्य उवाच ॥ ॥ तस्मात्संगमतो विप्र पश्चिमे दिक्तटे स्थितम् ॥ सीताकुण्डमिति ख्यातं सर्वकामफलप्रदम् ॥ १ ॥ यत्र स्नात्वा नरो विप्र सर्वपापैः प्रमुच्यते ॥ सीतया किल तत्कुण्डं स्वयमेव विनिर्मितम् ॥ रामेण वरदानाच्च महाफलनिधीकृतम् ॥ २ ॥ ॥ श्रीराम उवाच ॥ ॥ शृणु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्विहितांजलिः ॥ ५९ ॥ ॥ रघुरुवाच ॥ ॥ भगवंस्तिष्ठ मे हर्म्ये दिनमेकं मुनिव्रत ॥ यावद्यतिष्ये भगवन्भवदर्थार्थमुच्चकैः ॥ ६० ॥
॥ ॥ अगस्त्य उवाच ॥ ॥ इत्युक्त्वा परमोदारवचो मुनिमुदारधीः ॥ प्रतस्थे च रघुस्तत्र कुबेरविजिगीषया ॥ ६१ ॥ तमायांतं कुबेरोऽथ विज्ञाप्य
वचनोदितैः ॥ प्रसन्नमनसं चक्रे वृष्टिं स्वर्णस्य चाक्षयाम् ॥ ६२ ॥ स्वर्णवृष्टिरभूद्यत्र सा स्वर्णखनिरुत्तमा ॥ स मुनिं दर्शयामास खनिं तेन
निवेदिताम् ॥ ६३ ॥ तस्मै समर्पयामास तां रघुः खनिमुत्तमाम् ॥ मुनीन्द्रोऽपि गृहीत्वाशु ततो गुर्वर्थमादरात् ॥ ६४ ॥ राज्ञे निवेदयामास
सर्वमन्यद्गुणाधिकः ॥ वरानथ ददौ तुष्टः कौत्सो मतिमतां वरः ॥ ६५ ॥ ॥ कौत्स उवाच ॥ ॥ राजल्लँभस्व सत्पुत्रं निजवंशगुणान्वितम् ॥
इयं स्वर्णखनिस्तूर्णं मनोभीष्टफलप्रदा ॥ ६६ ॥ भूयादत्र परं तीर्थं सर्वपापहरं सदा ॥ अत्र स्नानेन दानेन नृणां लक्ष्मीः प्रजायते ॥ ६७ ॥
वैशाखे शुक्लद्वादश्यां यात्रा सांवत्सरी स्मृता ॥ नानाभीष्टफलप्राप्तिर्भूयान्मद्वचसा नृणाम् ॥ ६८ ॥ ॥ अगस्त्य उवाच ॥ ॥ इति
दत्त्वा वरात्राज्ञे कौत्सः संतुष्टमानसः ॥ प्रतस्थे निजकार्यार्थे गुरोराश्रममुत्सुकः ॥ ६९ ॥ राजा स कृतकृत्योऽथ शेषं संगृह्य तद्धनम् ॥
द्विजेभ्यो विधिवद्दत्त्वा पालयामास वै प्रजाः ॥ ७० ॥ एवं स्वर्णखनेर्जातं माहात्म्यं च मुनीश्वरात्[1] ॥ ७१ ॥ इति श्रीस्कांदे महापुराण
एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डेऽयोध्यामाहात्म्ये धर्महरिस्वर्णखनिमाहात्म्यवर्णनंनाम चतुर्थोऽध्यायः ॥ ४ ॥ ॥ छ ॥
॥ ॥ व्यास उवाच ॥ ॥ भगवन्ब्रूहि तत्त्वेन कथं निर्बंधतो मुनिः ॥ विश्वामित्रो निजं शिष्यं कौत्सं क्रोधेन तादृशम् ॥ १ ॥
दुष्प्राप्यमर्थं यत्नेन बहु प्रार्थितवांस्तदा ॥ एतत्सर्वं च कथय मयि यद्यस्ति ते कृपा ॥ २ ॥ ॥ अगस्त्य उवाच ॥ ॥ शृणु द्विज कथामेतां
सावधानेंद्रियः स्वयम् ॥ विश्वामित्रो मुनिश्रेष्ठः स दिव्यज्ञानलोचनः ॥ ३ ॥ निजाश्रमे तपो दुर्गं चकार प्रयतो व्रती ॥ एकदा तमथो द्रष्टुं
दुर्वासा मुनिरागतः ॥ ४ ॥ आगत्य च क्षुधाक्रांत उच्चैः प्रोवाच स द्विजः ॥ भोजनं दीयतां मह्यं क्षुधापीडितचेतसे ॥ पायसं शुचि चोष्णं च
शीघ्रं क्षुधार्त्तिने द्विज ॥ ५ ॥ इति श्रुत्वा वचः क्षिप्रं विश्वामित्रः प्रयत्नतः ॥ स्थाल्यां पायसमादाय तं समर्प्य ततः स्वयम् ॥ ६ ॥ तदादायो
त्थितं दृष्ट्वा दुर्वासास्तं विलोकयन् ॥ उवाच मधुरं वाक्यं मुनिं लक्षणतत्परः ॥ ७ ॥ क्षणं सहस्व विप्रेन्द्र यावत्स्नात्वाव्रजाम्यहम् ॥ तिष्ठतिष्ठ
क्षणं तिष्ठ आगच्छाम्येष सांप्रतम् ॥ ८ ॥ इत्युक्त्वा स जगामैव दुर्वासाः स्वाश्रमं तदा ॥ ९ ॥ विश्वामित्रस्तपोनिष्ठस्तदा सानुरिवाऽचलः ॥ दिव्यं

१ मुनीश्वरात्—कौत्सात्—इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पतापितारातिवर्गव्याख्यातसद्यशाः ॥ प्रजाः पालयता सम्यक्तेन नीतिमता सता ॥३५॥ यशःपूरेण संलिप्ता दिशो दश सितत्विषा ॥ स चक्रे प्रौढ
विभवसाधनां विजयक्रमात् ॥ ३६ ॥ नानादेशान्समाक्रम्य चतुरंगबलान्वितः ॥ भूतानि वशमानीय वसु जग्राह दण्डतः॥३७॥ उत्कृष्टान्नृपतीन्वी
रो दंडयित्वा बलाधिकान् ॥ रत्नानि विविधान्याशु जग्राहातिबलस्तदा ॥३८॥ स विजित्य दिशः सर्वा गृहीत्वा रत्नसंचयम् ॥ अयोध्यामागतो राजा
राजधानीं च तां शुभाम् ॥ ३९ ॥ तत्रागत्य च काकुत्स्थो यज्ञायोत्सुकमानसः ॥ चकार निर्मलां बुद्धिं निजवंशोचितक्रियाम् ॥४०॥ वसिष्ठं मुनिमाज्ञा
य वामदेवं च कश्यपम् ॥ ४१ ॥ अन्यानपि मुनिश्रेष्ठान्नानातीर्थसमाश्रितान् ॥ समानयद्विनीतेन द्विजवर्येण भूपतिः ॥ ४२ ॥ दृष्ट्वा स्थितान्स
तान्सर्वान्प्रदीप्तानिव पावकान् ॥ तानागतान्विदित्वाथ रघुः परपुरंजयः ॥ निश्चक्राम यथान्यायं स्वयमेव महायशाः ॥ ४३ ॥ ततो विनीत
वत्सर्वान्काकुत्स्थो द्विजसत्तमान् ॥ उवाच धर्मयुक्तं च वचनं यज्ञसिद्धये ॥ ४४ ॥ ॥ रविरुवाच ॥ मुनयः सर्व एवैते यूयं शृणुत मद्वचः ॥
यज्ञं विधातुमिच्छामि तत्राज्ञां दातुमर्हथ ॥ ४५ ॥ सांप्रतं मामको यज्ञो युक्तः स्यान्मुनिसत्तमाः ॥ एतद्विचार्य्य तत्त्वेन ब्रूत यूयं मुनीश्वराः ॥
॥ ४६ ॥ ॥ मुनय ऊचुः ॥ ॥ राजन्विश्वजिदाख्यातो यज्ञानां यज्ञ उत्तमः ॥ सांप्रतं कुरु तं यत्नान्मा विलंबं वृथा कृथाः ॥ ४७ ॥
॥ ॥ अगस्त्य उवाच ॥ ॥ नृपश्चक्रे ततो यज्ञं विश्वदिग्जयसंज्ञितम् ॥ नानासंभारमधुरं कृतसर्वस्वदक्षिणम् ॥ ४८ ॥ नानाविधेन दानेन
मुनिसंतोषहर्षकृत् ॥ सर्वस्वमेव प्रददौ द्विजेभ्यो बहुमानतः ॥४९॥ तेषु विश्वेषु यातेषु पूजितेषु गृहान्स्वकान् ॥ बन्धुष्वपि च तुष्टेषु मुनिषु प्रण
तेषु च ॥ ५० ॥ तेन यज्ञेन विधिवद्विहितेन नरेश्वरः ॥ शुशुभे शोभनाचारः स्वर्गे देवेन्द्रवत्क्षणात् ॥ ५१ ॥ तत्रांतरे समभ्यायान्मुनिर्यमवतां
वरः ॥ विश्वामित्रमुनेरंतेवासी कौत्स इति स्मृतः ॥ ५२ ॥ दक्षिणार्थं गुरोर्धीमान्पावितुं तं नरेश्वरम् ॥ चतुर्दशसुवर्णानां कोटीराहर सत्वरम् ॥
॥ ५३ ॥ मद्दक्षिणेति गुरुणा निर्बन्धाद्याचितो रुषा ॥ आगतः स मुनिः कौत्सस्ततो याचितुमादरात् ॥ रघुं भूपालतिलकं दत्तसर्वस्वदक्षिणम् ॥
॥ ५४ ॥ तमागतमभिप्रेत्य रघुरादरतस्तदा ॥ उत्थाय पूजयामास विधिवत्स परंतपः ॥ सपर्य्यासीत्तस्य सर्वा मृत्पात्रविहितक्रिया ॥ ५५ ॥
पूजासंभारमालोक्य तादृशं तं मुनीश्वरः ॥ विस्मितोऽभून्निरानन्दो दक्षिणाऽऽशां परित्यजन् ॥ उवाच मधुरं वाक्यं वाक्यज्ञानविशारदः ॥
॥ ५६ ॥ ॥ कौत्स उवाच ॥ ॥ राजन्नभ्युदयस्तेऽस्तु गच्छाम्यन्यत्र सांप्रतम् ॥ ५७ ॥ गुर्वर्थाहरणायैव दत्तसर्वस्वदक्षिणम् ॥ त्वां न याचे
धनाभावादतोऽन्यत्र व्रजाम्यहम् ॥ ५८ ॥ ॥ अगस्त्य उवाच ॥ ॥ इत्युक्तस्तेन मुनिना रघुः परपुरंजयः ॥ क्षणं ध्यात्वाऽब्रवीदेनं विनया

शवे च सोमाय ओषधीशाय वै नमः ॥ नमोऽन्नाय मृगांकाय कलानां निधये नमः ॥ ७१ ॥ नमो नक्षत्रनाथाय शर्वरीपतये नमः ॥ जैवातृ
काय सततं द्विजराजाय वै नमः ॥ ७२ ॥ एवं षोडशभिश्चंद्रः स्तोतव्यो नामभिः क्रमात् ॥ ७३ ॥ ततो वै प्रयतो दद्याद्विधिवन्मंत्रपूर्वकम् ॥
शंखतोयं समादाय सपुष्पं फलचंदनम् ॥ ७४ ॥ नमस्ते मासमासांते जायमान पुनःपुनः ॥ गृहाणार्घ्यं शशांक त्वं रोहिण्या सहितो मम ॥७५॥
एवं संपूज्य विधिवच्छशिनं प्रणतो भवेत् ॥ षोडशान्ये च कलशा दुग्धपूर्णाः सरत्नकाः ॥७६॥ सवस्त्राच्छादनाः शांत्यै दातव्यास्ते द्विजन्मने ॥
अभिषेकं ततः कुर्यात्पायसेन जलेन तु ॥ ७७ ॥ ऋत्विजां मनसस्तुष्टिः कार्या वित्तानुमानतः ॥ ब्राह्मणं भोजयेत्तत्र सकुटुंबं विशेषतः ॥ ७८ ॥
पूजनीयौ प्रयत्नेन वस्त्रैश्च द्विजदंपती ॥ कर्तव्यं च ततो भूरिदक्षिणादानमुत्तमम् ॥ ७९ ॥ प्रतिमाश्च प्रदातव्या द्विजेभ्यो धेनुपूर्विकाः ॥ सुवर्णं
रजतं वस्त्रं तथान्नं च विशेषतः ॥ दातव्यं चंद्रसुप्रीत्यै हर्षादेवं द्विजन्मने ॥ ८० ॥ उपवासविधानेन दिनशेषं नयेत्सुधीः ॥ अनंतरे च दिवसे कुर्या
द्भगवदर्चनम् ॥ बांधवैः सह भुञ्जीत नियमं च विसर्ज्जयेत् ॥ ८१ ॥ एवं च कुरुते चंद्रसहस्रं व्रतमुत्तमम् ॥ ब्रह्मघ्नोऽपि सुरापोऽपि स्तेयी च
गुरुतल्पगः ॥ व्रतेनानेन शुद्धात्मा चंद्रलोकं व्रजेन्नरः ॥ ८२ ॥ यादृशश्च भवेद्विप्र प्रियो नारायणस्य च ॥ एवं करोति नियतं कृतकृत्यो भवे
न्नरः ॥ ८३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डेऽयोध्यामाहात्म्ये चन्द्रसहस्रव्रतोद्यापनविधिवर्णनं
नाम तृतीयोऽध्यायः ॥ ३ ॥ ॥ छ ॥ ॥ अगस्त्य उवाच ॥ ॥ तस्माच्चंद्रहरिस्थानादाग्नेय्यां दिशि संस्थितः ॥ देवो धर्महरिर्न्नाम कलिकल्म
षनाशकः ॥ १ ॥ वेदवेदाङ्गतत्त्वज्ञः स्वकर्मपरिनिष्ठितः ॥ पुरा समागतो धर्मस्तीर्थयात्राचिकीर्षया ॥ २ ॥ आगत्य च चकारोच्चैर्यात्रां
तत्रादरेण सः ॥ दृष्ट्वा माहात्म्यमतुलमयोध्यायाः सविस्मयः ॥ ३ ॥ विधाय स्वभुजावूर्ध्वौ विप्रोऽवोचन्मुदान्वितः ॥ अहो रम्यमिदं
तीर्थमहो माहात्म्यमुत्तमम् ॥ ४ ॥ अयोध्यासदृशी कापि दृश्यते नापरा पुरी ॥ या न स्पृशति वसुधां विष्णुचक्रस्थिताऽनिशम् ॥
॥ ५ ॥ यस्यां स्थितो हरिः साक्षात्सेयं केनोपमीयते ॥ अहो तीर्थानि सर्वाणि विष्णुलोकप्रदानि वै ॥ ६ ॥ अहो विष्णुरहो
तीर्थमयोध्याऽहो महापुरी ॥ अहो माहात्म्यमतुलं किं न श्लाघ्यमिहास्थितम् ॥ ७ ॥ इत्युक्त्वा तत्र बहुशो ननर्त प्रमदाकुलः ॥
धर्मो माहात्म्यमालोक्य अयोध्याया विशेषतः ॥ ८ ॥ तं तथा नर्तमानं वै धर्मं दृष्ट्वा कृपान्वितः ॥ आविर्बभूव भगवान्पीतवासा
हरिः स्वयम् ॥ तं प्रणम्य च धर्मोऽथ तुष्टाव हरिमादरात् ॥ ९ ॥ ॥ धर्म उवाच ॥ ॥ नमः क्षीराब्धिवासाय नमः पर्यंक

॥२७९॥

CC-0. In Public Domain. Digitization by eGangotri

शायिने ॥ नमः शंकरसंस्पृष्टदिव्यपादाय विष्णवे ॥ १० ॥ भक्त्यार्चितसुपादाय नमोऽजादिप्रियाय ते ॥ शुभांगाय सुनेत्राय माधवाय नमो नमः ॥ ११ ॥ नमोऽरविन्दपादाय पद्मनाभाय वै नमः ॥ नमः क्षीराब्धिकल्लोलस्पृष्टगात्राय शार्ङ्गिणे ॥ १२ ॥ ॐ नमो योगनिद्राय योगैर्भावितात्मने ॥ तार्क्ष्यासनाय देवाय गोविन्दाय नमोनमः ॥ १३ ॥ सुकेशाय सुनासाय सुललाटाय चक्रिणे ॥ सुवस्त्राय सुवर्णाय श्रीधराय नमोनमः ॥ १४ ॥ सुबाहवे नमस्तुभ्यं चारुजंघाय ते नमः ॥ सुवासाय सुदिव्याय सुविद्याय गदाभृते ॥ १५ ॥ केशवाय च शांताय वामनाय नमोनमः ॥ धर्मप्रियाय देवाय नमस्ते पीतवाससे ॥ १६ ॥ ॥ अगस्त्य उवाच ॥ ॥ इति स्तुतो जगन्नाथो धर्मेण श्रीपतिर्मुदा ॥ उवाच स हृषीकेशः प्रीतो धर्ममुदारधीः ॥ १७ ॥ ॥ श्रीभगवानुवाच ॥ ॥ तुष्टोऽहं भवतो धर्म स्तोत्रेणानेन सुव्रत ॥ वरं वरय धर्मज्ञ यस्ते स्यान्मनसः प्रियः ॥ १८ ॥ स्तोत्रेणानेन यः स्तौति मानवो मामतन्द्रितः ॥ सर्वान्कामानवाप्नोति पूजितः श्रीयुतःसदा॥ १९ ॥ ॥ धर्म उवाच ॥ ॥ यदि तुष्टोसि भगवन्देवदेव जगत्पते ॥ त्वामहं स्थापयाम्यत्र निजनाम्ना जगद्गुरो ॥ २० ॥ ॥ अगस्त्य उवाच ॥ ॥ एवमस्त्विति संप्रोच्याभवद्धर्महरिर्विभुः ॥ स्मरणादेव मुच्येत नरो धर्महरेर्विभोः ॥ २१ ॥ सरयूसलिले स्नात्वा शुचिंताकुलमानसः ॥ देवं धर्महरिं पश्येत्सर्वपापैः प्रमुच्यते ॥ २२ ॥ अत्र दानं तथा होमं जपो ब्राह्मणभोजनम् ॥ सर्वमक्षयतां याति विष्णुलोके निवासकृत् ॥ २३ ॥ अज्ञानाज्ज्ञानतो वापि यत्किंचिद्दुष्कृतं भवेत् ॥ प्रायश्चित्तं विधातव्यं तन्नाशाय प्रयत्नतः ॥ २४ ॥ प्रायश्चित्तेन विधिना पापं तस्य प्रणश्यति ॥ तस्मादत्र प्रकर्त्तव्यं प्रायश्चित्तं विधानतः ॥ २५ ॥ अज्ञानाज्ज्ञानतो वापि राजादेर्निग्रहात्तथा ॥ नित्यकर्मनिवृत्तिः स्याद्यस्य पुंसोऽवशात्मनः ॥ तेनाप्यत्र विधातव्यं प्रायश्चित्तं प्रयत्नतः ॥ २६ ॥ अत्र साक्षात्स्वयं देवो विष्णुर्वसति सादरः ॥ तस्माद्वर्णयितुं शक्यो महिमा न हि मानवैः ॥ २७ ॥ आषाढे शुक्लपक्षस्य एकादश्यां द्विजोत्तम ॥ तस्य सांवत्सरी यात्रा कर्तव्या तु विधानतः ॥ २८ ॥ स्वर्गद्वारे नरः स्नात्वा दृष्ट्वा धर्महरिं विभुम् ॥ सर्वपापविशुद्धात्मा विष्णुलोके वसेत्सदा ॥ २९ ॥ तस्माद्दक्षिणदिग्भागे स्वर्णस्य खनिरुत्तमा ॥ यत्र चक्रे स्वर्णवृष्टिं कुबेरो रघुजाद्भयात् ॥ ३० ॥ ॥ ॥ व्यास उवाच ॥ ॥ भगवन्ब्रूहि तत्त्वज्ञ स्वर्णवृष्टिरभूत्कथम् ॥ कुबेरस्य कथं भीतिरुत्पन्ना रघुभूपतेः ॥ ३१ ॥ एतत्सर्वं समाचक्ष्व विस्तरान्मम सुव्रत ॥ श्रुत्वा कथारहस्यानि न तृप्यति मनो मम ॥ ३२ ॥ ॥ अगस्त्य उवाच ॥ ॥ शृणु विप्र प्रवक्ष्यामि स्वर्णस्योत्पत्तिमुत्तमाम् ॥ यस्य श्रवणतो नृणां जायते विस्मयो महान् ॥ ३३ ॥ आसीत्पुरा रघुपतिरिक्ष्वाकुकुलवर्द्धनः ॥ रघुर्निजभुजोदारवीर्यशासितभूतलः ॥ ३४ ॥ प्रता

CC-0. In Public Domain. Digitization by eGangotri

संस्थापयामास तेन चंद्रहरिः स्मृतः ॥ ४७ ॥ वासुदेवप्रसादेन तत्स्थानं जातमद्भुतम् ॥ तद्धि गुह्यतमं स्थानं वासुदेवस्य सुव्रत ॥ ४८ ॥ सर्वेषा
मेव भूतानां भर्तुर्मोक्षस्य सर्वदा ॥ अस्मिन्सिद्धाः सदा विप्र गोविंदव्रतमास्थिताः ॥ ४९ ॥ नानालिंगधरा नित्यं विष्णुलोकाभिकांक्षिणः ॥
अभ्यस्यंति परं योगं मुक्तात्मानो जितेंद्रियाः ॥५०॥ यथा धर्ममवाप्नोति अन्यत्र न तथा क्वचित् ॥ दानं व्रतं तथा होमः सर्वमक्षयतां व्रजेत् ॥५१॥
सर्वकामफलप्राप्तिर्जायते प्राणिनां सदा ॥ तस्मादत्र विधातव्यं प्राणिभिर्यत्नतः क्रमात् ॥ दानादिकं विप्रपूजा दंपत्योश्च विशेषतः ॥ ५२ ॥ सर्व
यज्ञाधिकफलं सर्वतीर्थावगाहनम् ॥ सर्वदेवावलोकस्य यत्पुण्यं जायते नृणाम् ॥ ५३ ॥ तत्सर्वं जायते पुण्यं प्राणिनामस्य दर्शनात् ॥ तस्मादे
तन्महाक्षेत्रं पुराणादिषु गीयते ॥ ५४ ॥ उद्यापनविधिश्चात्र नृभिर्द्विजपुरस्सरम् ॥ अग्रे चंद्रहरेश्चन्द्रसहस्रव्रतसंज्ञकः ॥ ५५ ॥ गते वर्षद्वये सार्द्धे
पंचपक्षे दिनद्वये ॥ दिवसस्याऽष्टमे भागे पतत्येकोऽधिमासकः ॥ ५६ ॥ त्र्यधिके वा[१] अशीत्यब्दे चतुर्मासयुते ततः ॥ भवेच्चन्द्रसहस्रं तु ताव
ज्जीवति यो नरः ॥ उद्यापनं प्रकर्त्तव्यं तेन यात्रा प्रयत्नतः ॥ ५७ ॥ यत्पुण्यं परमं प्रोक्तं सततं यज्ञयाजिनाम् ॥ सत्यवादिषु यत्पुण्यं
यत्पुण्यं हेमदायिनि ॥ तत्पुण्यं लभते विप्र सहस्राब्दस्य जीविभिः ॥ ५८ ॥ सर्वसौख्यप्रदं तादृक्पुण्यव्रतमिहोच्यते ॥ ५९ ॥
चतुर्दश्यां शुचिः स्नात्वा दन्तधावनपूर्वकम् ॥ चरितब्रह्मचर्य्यश्च जितवाक्कायमानसः ॥ पौर्णमास्यां तथा कृत्वा चंद्रपूजां च कारयेत् ॥ ६० ॥ पूर्वं
च मातरः पूज्या गौर्यादिकक्रमेण च ॥ ऋत्विजः पूजयेद्भक्त्या वृद्धिश्राद्धपुरस्सरम् ॥ ६१ ॥ प्रयत्नैः प्रतिमा कार्या चंद्रमंडलसन्निभा ॥ सहस्रसं
ख्या ह्यथवा तदर्द्धं वा तदर्द्धकम् ॥ निजवित्तानुमानेन तदर्द्धेन तदर्द्धिकम् ॥ ६२ ॥ ततः श्रद्धानुमानाद्वा कार्या वित्तानुमानतः ॥ अथवा
षोडश शुभा विधातव्याः प्रयत्नतः ॥ ६३ ॥ चंद्रपूजां ततः कुर्यादागमोक्तविधानतः ॥ माषैः षोडशभिः कार्या प्रत्येकं प्रतिमा शुभा ॥ ६४ ॥
सोममंत्रेण होमस्तु कार्यो वित्तानुमानतः ॥ प्रतिमास्थापनं कुर्यात्सोममंत्रमुदीरयेत् ॥ ६५ ॥ सोमोत्पत्तिं सोमसूक्तं पाठयेच्च प्रयत्नतः ॥ चंद्र
पूजां ततः कुर्यादागमोक्तविधानतः ॥ ६६ ॥ चंद्रन्यासं कलान्यासं कारयेन्मंडले जलम् ॥ एकादशेंद्रियन्यासं तथैव विधिपूर्वकम् ॥ ६७ ॥
चंद्रबिंबनिभं कार्य्यं मंडलं शुभतंडुलैः॥ मध्ये च कलशः स्थाप्यो गव्येन पयसाप्लुतः ॥ ६८ ॥ चतुरस्रेषु संपूर्णान्कलशान्स्थापयेद्बहिः ॥ मंडले
चंद्रपूजा च कर्तव्या नामभिः क्रमात् ॥ ६९ ॥ हिमांशवे नमश्चैव सोमचंद्राय वै नमः ॥ चंद्राय विधवे नित्यं नमः कुमुदबंधवे ॥ ७० ॥ सुधां

१ कर्तव्यः–इत्यध्याहारः । २ वै–निश्चयेन । ३ एतच्च–सौरमासपरिगणनया वोध्यम् । चान्द्रमासगणने त्वधिकमासपातेन त्रिंशन्मासतः प्रागेव व्रतसमाप्तिर्वोद्धव्या–भारते विराटपर्वणि पाण्डवानां वनवासावधेर्भीष्मा
दिसंमत्याऽधिकमाससंमेलनेन परिपूर्तेः श्रवणात् । अत एवात्र पूर्वश्लोकोक्ताधिकमासकालनिर्णयसंगतिः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सान्निध्यं देवतागणाः ॥ तस्मात्तत्र प्रकुर्वंति मध्याह्ने स्नानमादरात् ॥ २१ ॥ कुर्वंत्यनशनं ये तु स्वर्गद्वारे जितेंद्रियाः ॥ प्रयांति परमं स्थानं
ये च मासोपवासिनः ॥ २२ ॥ अन्नदानरता ये च रत्नदा भूमिदा नराः ॥ गोवस्त्रदाश्च विप्रेभ्यो यांति ते भवनं हरेः ॥२३॥ यत्र सिद्धा महात्मानो
मुनयः पितरस्तथा ॥ स्वर्गं प्रयांति ते सर्वे स्वर्गद्वारं ततः स्मृतम् ॥ २४ ॥ चतुर्द्धा च तनुं कृत्वा देवदेवो हरिः स्वयम् ॥ अत्र वै रमते नित्यं
भ्रातृभिः सह राघवः ॥ २५ ॥ ब्रह्मलोकं परित्यज्य चतुर्वक्त्रः सनातनः ॥ अत्रैव रमते नित्यं देवैः सह पितामहः ॥ २६ ॥ कैलासनिलयावासी
शिवस्तत्रैव संस्थितः ॥ २७ ॥ मेरुमन्दरमात्रोऽपि राशिः पापस्य कर्मणः ॥ स्वर्गद्वारं समासाद्य स सर्वो व्रजति क्षयम् ॥ २८ ॥ या गतिर्ज्ञान
तपसां या गतिर्यज्ञयाजिनाम् ॥ स्वर्गद्वारे मृतानां तु सा गतिर्विहिता शुभा ॥ २९ ॥ ऋषिदेवासुरगणैर्जपहोमपरायणैः ॥ यतिभिर्मोक्षकामैश्च
स्वर्गद्वारो निषेव्यते ॥ ३० ॥ षष्टिवर्षसहस्राणि काशीवासेषु यत्फलम् ॥ तत्फलं निमिषार्द्धेन कलौ दाशरथीं पुरीम् ॥ ३१ ॥ या गतिर्योग
युक्तानां वाराणस्यां तनुत्यजाम् ॥ सा गतिः स्नानमात्रेण सरय्वां हरिवासरे ॥ ३२ ॥ स्वर्गद्वारे मृतः कश्चिन्नरकं नैव पश्यति ॥ केशवानुगृहीता
हि सर्वे यांति परां गतिम् ॥ ३३ ॥ भूलोके चांतरिक्षे च दिवि तीर्थानि यानि वै ॥ अतीत्य वर्तते तानि तीर्थान्येतद्द्विजोत्तम ॥ ३४ ॥ विष्णु
भक्तिं समासाद्य रमन्ते तु सुनिश्चिताः ॥ संहृत्य शक्तितः कामं विषयेषु हि संस्थितम् ॥३५॥ शक्तितः सर्वतो युक्त्वा शक्तिस्तपसि संस्थिता ॥
न तेषां पुनरावृत्तिः कल्पकोटिशतैरपि ॥ ३६ ॥ हन्यमानोऽपि यो विद्वान्वसेच्छस्त्रशतैरपि ॥ स याति परमं स्थानं यत्र गत्वा न शोचति ॥३७॥
स्वर्गद्वारे वियुज्येत स याति परमां गतिम् ॥ उत्तरं दक्षिणं वापि अयनं न विकल्पयेत् ॥ ३८ ॥ सर्वस्तेषां शुभः कालः स्वर्गद्वारं श्रयंति ये ॥
स्नानमात्रेण पापानि विलयं यांति देहिनाम् ॥ ३९ ॥ यावत्पापानि देहेन ये कुर्वंति जनाः क्षितौ ॥ अयोध्या परमं स्थानं तेषामीरितमादरात् ॥
॥ ४० ॥ ज्येष्ठे मासि सिते पक्षे पंचदश्यां विशेषतः ॥ तस्य सांवत्सरी यात्रा देवैश्चन्द्रहरेः स्मृता ॥ ४१ ॥ तस्मिन्नुद्यापनं चन्द्रसहस्रं व्रतयो
गिभिः ॥ कार्यं प्रयत्नतो विप्र सर्वयज्ञफलाधिकम् ॥ ४२ ॥ तस्मिन्कृते महापापक्षयात्स्वर्गो भवेन्नृणाम् ॥ ४३ ॥ ॥ श्रीव्यास उवाच ॥ ॥
भगवन्ब्रूहि तत्त्वेन तस्य चन्द्रहरेः शुभाम् ॥ उत्पत्तिं च तथा चंद्रव्रतस्योद्यापने विधिम् ॥ ४४ ॥ ॥ अगस्त्य उवाच ॥ ॥ अयोध्यानि
लयं विष्णुं नत्वा शीतांशुरुत्सुकः ॥ आगच्छत्तीर्थमाहात्म्यं साक्षात्कर्तुं सुधानिधिः ॥ अत्रागत्य च चन्द्रोऽथ तीर्थयात्रां चकार सः ॥ ४५ ॥
क्रमेण विधिपूर्वं च नानाश्चर्यसमन्वितः ॥ समाराध्य ततो विष्णुं तपसा दुश्चरेण वै ॥ ४६ ॥ तत्प्रसादं समासाद्य स्वाभिधानपुरस्सरम् ॥ हरिं

Nepal Sanskrit University, Balmouli Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ॥ इन्द्र उवाच ॥ ॥ लक्ष्मणोत्तिष्ठ शीघ्रं त्वमारोह स्वपदं स्वकम् ॥ देवकार्यं कृतं वीर त्वया रिपुनिषूदन ॥ ६२ ॥ वैष्णवं परमं स्थानं प्राप्नुहि त्वं सनातनम् ॥ भवन्मूर्तिः समायातः शेषोऽपि विलसत्फणः ॥ ६३ ॥ सहस्रधा क्षितिं भित्त्वा सहस्रफणमण्डलैः ॥ क्षितेः सहस्रच्छिद्रेषु यस्माद्भित्त्वा समुद्गताः ॥ ६४ ॥ फणसाहस्रमणिभिर्दग्धाः शेषस्य सुव्रत ॥ तस्मादेतन्महातीर्थं सरयूतीरगं शुभम् ॥ ख्यातं सहस्रधारेति भविष्यति न संशयः ॥ ६५ ॥ एतत्क्षेत्रप्रमाणं तु धनुषां पञ्चविंशतिः ॥ अत्र स्नानेन दानेन श्राद्धेन श्रद्धयान्वितः ॥ सर्वपापविशुद्धात्मा विष्णुलोकं व्रजेन्नरः ॥ ६६ ॥ अत्र स्नातो नरो धीमाञ्छेषं संपूज्य चाव्ययम् ॥ तीर्थं संपूज्य विधिवद्विष्णुलोकमवाप्नुयात् ॥ ६७ ॥ तस्मादत्र प्रकर्तव्यं स्नानं विधिपुरःसरम् ॥ शेषरूपाहिवद्धचेयाः पूज्या विप्रा विशेषतः ॥ ६८ ॥ स्वर्णं चान्नं च वासांसि देयानि श्रद्धयान्वितैः ॥ स्नानं दानं हरेः पूजा सर्वमक्षयतां व्रजेत् ॥ ६९ ॥ तस्मादेतन्महातीर्थं सर्वकामफलप्रदम् ॥ क्षितौ भविष्यति सदा नात्र कार्या विचारणा ॥ ७० ॥ श्रावणे शुक्लपक्षस्य या तिथिः पञ्चमी भवेत् ॥ तस्यामत्र प्रकर्त्तव्यो नागानुद्दिश्य यत्नतः ॥ ७१ ॥ उत्सवो विपुलः सद्भिः शेषपूजापुरःसरम् ॥ उत्सवे तु कृते तत्र तीर्थे महति मानवैः ॥ ७२ ॥ सन्तोष्य च द्विजान्भक्त्या नागपूजापुरस्सरम् ॥ सन्तुष्टाः फणिनः सर्वे पीडयन्ति न मानुषान् ॥ ७३ ॥ वैशाखमासे ये स्नानं कुर्वंत्यत्र समाहिताः ॥ न तेषां पुनरावृत्तिः कल्पकोटिशतैरपि ॥ ७४ ॥ तस्मादत्र प्रकर्तव्यं माधवे यत्नतो नरैः ॥ स्नानं दानं हरिः पूज्यो ब्राह्मणाश्च विशेषतः ॥ तीर्थे कृतेऽत्र मनुजैः सर्वकामफलप्रदः ॥ ७५ ॥ विष्णुमुद्दिश्य यो दद्यात्सालंकारां पयस्विनीम् ॥ सवत्सामत्र सत्तीर्थे सत्पात्राय द्विजन्मने ॥ ७६ ॥ तस्य वासो भवेन्नित्य विष्णुलोके सनातने ॥ अक्षयं स्वर्गमाप्नोति तीर्थस्नानेन मानवः ॥ ७७ ॥ अत्र पूज्यौ विशेषेण नरैः श्रद्धासमन्वितैः ॥ वैशाखे मास्यलंकारैर्वस्त्रैश्च द्विजदंपती ॥ ७८ ॥ लक्ष्मीनारायणप्रीत्यै लक्ष्मीप्राप्त्यै विशेषतः ॥ वैशाखे मासि तीर्थानि पृथिवीसंस्थितानि वै ॥ ७९ ॥ सर्वाण्यपि च संगत्य स्थास्यंत्यत्र न संशयः ॥ तस्मादत्र विशेषेण वैशाखे स्नानतो नृणाम् ॥ सर्वतीर्थावगाहस्य भविष्यति फलं महत् ॥ ८० ॥ ॥ अगस्त्य उवाच ॥ ॥ इत्युक्त्वा मुनिराजेंद्रो[1] लक्ष्मणं सुरसंगतम् ॥ शेषं संस्थाप्य तत्तीर्थे भूभारहरणक्षमम् ॥ लक्ष्मणं यानमारोप्य प्रतस्थे दिवमादरात् ॥ ८१ ॥ तदाप्रभृति तत्तीर्थं विख्यातिं परमां ययौ ॥ वैशाखे मासि तीर्थस्य माहात्म्यं परमं स्मृतम् ॥ ८२ ॥ पञ्चम्यामपि शुक्लायां श्रावणस्य विशेषतः ॥ अन्यदा पर्वणि श्रेष्ठं विशेषं स्नानमाच

१ हे मुनिराज–इन्द्रः–इति पदच्छेदः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रेत् ॥ सहस्रधारातीर्थे च नरः स्वर्गमवाप्नुयात् ॥ ८३ ॥ विधिवदिह हि धीमान्स्नानदानानि तीर्थे नरवर इह शक्त्या यः करोत्यादरेण ॥ स इह विपुलभोगान्निर्मलात्मा च भक्त्या भजति भुजगशायिश्रीपतेरात्मनैक्यम् ॥ ८४ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डेऽयोध्यामाहात्म्ये ब्रह्मकुण्डसहस्रधारातीर्थमाहात्म्यवर्णनंनाम द्वितीयोऽध्यायः ॥ २ ॥ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ इति श्रुत्वा वचो धीमानादरात्कुंभजन्मनः ॥ प्रोवाच मधुरं वाक्यं कृष्णद्वैपायनो मुनिः ॥ १ ॥ ॥ व्यास उवाच ॥ ॥ भगवन्नद्भुतमिदं तीर्थमाहात्म्यमुत्तमम् ॥ श्रुत्वा त्वत्तो मम मनः परमानंदमाययौ ॥ २ ॥ अन्यत्तीर्थवरं ब्रूहि तत्त्वेन मम शृण्वतः ॥ न तृप्तिरस्ति मनसः शृण्वतो मम सुव्रत ॥ ३ ॥ ॥ ॥ अगस्त्य उवाच ॥ ॥ शृणु विप्र प्रवक्ष्यामि तीर्थमन्यदनुत्तमम् ॥ स्वर्गद्वारमिति ख्यातं सर्वपापहरं सदा ॥ ४ ॥ स्वर्गद्वारस्य माहात्म्यं विस्तराद्वक्तुमीश्वरः ॥ नहि कश्चिदतो वत्स संक्षेपाच्छृणु सुव्रत ॥ ५ ॥ सहस्रधारामारभ्य पूर्वतः सरयूजले ॥ षट्त्रिंशदधिका प्रोक्ता धनुषां षट्शती मितिः ॥ ६ ॥ स्वर्गद्वारस्य विस्तारः पुराणज्ञैर्विशारदैः ॥ स्वर्गद्वारसमं तीर्थं न भूतं न भविष्यति ॥ ७ ॥ सत्यंसत्यं पुनः सत्यं नासत्यं मम भाषितम् ॥ स्वर्गद्वारसमं तीर्थं नास्ति ब्रह्माण्डगोलके ॥ ८ ॥ हित्वा दिव्यानि भौमानि तीर्थानि सकलान्यपि ॥ प्रातरागत्य तिष्ठन्ति तत्र संश्रित्य सुव्रत ॥ ९ ॥ तस्मादत्र प्रकर्तव्यं प्रातः स्नानं विशेषतः ॥ सर्वतीर्थावगाहस्य फलमात्मन ईप्सता ॥ १० ॥ त्यजंति प्राणिनः प्राणान्स्वर्गद्वारांतरे द्विज ॥ प्रयांति परमं स्थानं विष्णोस्ते नात्र संशयः ॥ ११ ॥ मुक्तिद्वारमिदं पश्य स्वर्गप्राप्तिकरं नृणाम् ॥ स्वर्गद्वारमिति ख्यातं तस्मात्तीर्थमनुत्तमम् ॥ १२ ॥ स्वर्गद्वारं सुदुष्प्राप्यं देवैरपि न संशयः ॥ यद्यत्कामयते तत्र तत्तदाप्नोति मानवः ॥ १३ ॥ स्वर्गद्वारे परा सिद्धिः स्वर्गद्वारे परा गतिः ॥ जप्तं दत्तं हुतं दृष्टं तपस्तप्तं कृतं च यत् ॥ ध्यानमध्ययनं सर्वं दानं भवति चाक्षयम् ॥ १४ ॥ जन्मांतरसहस्रेण यत्पापं पूर्वसंचितम् ॥ स्वर्गद्वारप्रविष्टस्य तत्सर्वं व्रजति क्षयम् ॥ १५ ॥ ब्राह्मणाः क्षत्रिया वैश्याः शूद्रा वै वर्णसंकराः ॥ कृमिम्लेच्छाश्च ये चान्ये संकीर्णाः पापयोनयः ॥ १६ ॥ कीटाः पिपीलिकाश्चैव ये चान्ये मृगपक्षिणः ॥ कालेन निधनं प्राप्ताः स्वर्गद्वारे शृणु द्विज ॥ १७ ॥ कौमोदकीकराः सर्वे पक्षिणो गरुडध्वजाः ॥ शुभे विष्णुपुरे विष्णुर्जायंते तत्र मानवाः ॥ १८ ॥ अकामो वा सकामो वा अपि तीर्थगतोपि वा ॥ स्वर्गद्वारे त्यजन्प्राणान्विष्णुलोके महीयते ॥ १९ ॥ मुनयो देवताः सिद्धाः साध्या यक्षा मरुद्गणाः ॥ यज्ञोपवीतमात्रेण विभागं चक्रिरे तु ये ॥ २० ॥ मध्याह्नेऽत्र प्रकुर्वंति

१ यज्ञोपवीतमात्रेण विभागश्च—ममैतावत्तीर्थं ममैत्तावत्तीर्थमिति ।

CC-0. In Public Domain. Digitization by eGangotri

विधानि पापानि ब्रह्महत्यादिकानि च ॥ कृतवान्पापिसंगेन त्रयीमार्गविनिन्दकः ॥ ३७ ॥ स कदाचित्साधुसंगात्तीर्थयात्राप्रसंगतः ॥ अयोध्या
मागतो विप्र महापातककृद्द्विजः ॥ ३८ ॥ पापमोचनतीर्थे तु स्नातः सत्संगतो द्विजः ॥ पापराशिर्विनष्टोऽस्य निष्पापः समभूत्क्षणात् ॥ ३९ ॥
दिवः पपात तन्मूर्ध्नि पुष्पवृष्टिर्मुनीश्वर ॥ दिव्यं विमानमारुह्य विष्णुलोके गतो द्विजः ॥ ४० ॥ तद्दृष्ट्वा महदाश्चर्यं मया च द्विजपुंगव ॥ श्रद्धय
परया तत्र कृतं स्नानं विशेषतः ॥४१॥ माघकृष्णचतुर्दश्यां तत्र स्नानं विशेषतः ॥ दानं च मनुजैः कार्य्यं सर्वपापविशुद्धये ॥४२॥ अन्यदा तु कृते
स्नाने सर्वपापक्षयो भवेत् ॥ ४३ ॥ पापमोचनतीर्थे तु पूर्वं तु सरयूजले ॥ धनुःशतप्रमाणेन वर्त्तते तीर्थमुत्तमम् ॥ ४४ ॥ सहस्रधारासंज्ञं तु
सर्वकिल्बिषनाशनम् ॥ यस्मिन्रामाज्ञया वीरो लक्ष्मणः परवीरहा ॥ प्राणानुत्सृज्य योगेन ययौ शेषात्मतां पुरा ॥ ४५ ॥ सार्द्धहस्तत्रयेणैव
प्रमाणं धनुषो विदुः ॥ चतुर्भिर्हस्तकैः संख्या दण्ड इत्यभिधीयते ॥ ४६ ॥ ॥ सूत उवाच ॥ ॥ इत्थं तदा समाकर्ण्य कुम्भयोनिमुने
स्तदा ॥ कृष्णद्वैपायनो व्यासः पुनः पप्रच्छ कौतुकात् ॥ ४७ ॥ ॥ व्यास उवाच ॥ ॥ सहस्रधारामाहात्म्यं विस्तराद्वद सुव्रत ॥ शृण्वंस्तीर्थस्य
माहात्म्यं न तृप्यति मनो मम ॥ ४८ ॥ ॥ अगस्त्य उवाच ॥ ॥ सावधानः शृणु मुने कथां कथयतो मम ॥ सहस्रधारातीर्थस्य समुत्पत्तिं
महोदयात् ॥ ४९ ॥ पुरा रामो रघुपतिर्देवकार्यं विधाय वै ॥ कालेन सह संगम्य मंत्रं चक्रे नरेश्वरः ॥ ५० ॥ आवां मन्त्रयमाणौ हि यः पश्ये
दन्तिकागतः॥ मया त्याज्यो भवेत्क्षिप्रमित्थं चक्रे स संविदम् ॥५१॥ तस्मिन्मंत्रयमाणे हि द्वारे तिष्ठति लक्ष्मणे ॥ आगतः स तपोराशिर्दुर्वासास्ते
जसां निधिः ॥ ५२ ॥ आगत्य लक्ष्मणं शीघ्रं प्रीत्योवाच क्षुधाऽऽकुलः॥ ५३ ॥ ॥ दुर्वासा उवाच ॥ ॥ सौमित्रे गच्छ शीघ्रं त्वं रामाग्रे मां
निवेदय ॥ कार्यार्थिनमिदं वाक्यं नान्यथा कर्तुमर्हसि ॥ ५४ ॥ ॥ अगस्त्य उवाच ॥ ॥ शापाद्भीतः स सौमित्रिर्द्रुतं गत्वा तयोः पुरः ॥
मुनिं निवेदयामास रामाग्रे दर्शनार्थिनम् ॥ दुर्वाससं तपोराशिमत्रिनन्दनमागतम् ॥ ५५ ॥ रामोऽपि कालमामंत्र्य प्रस्थाप्य च बहिर्ययौ ॥
दृष्ट्वा मुनिं तं प्रणतः संभोज्य प्रभुरादरात् ॥ ५६ ॥ दुर्वाससं मुनिवरं प्रस्थाप्य स्वयमादरात् ॥ सत्यभंगभयाद्वीरो लक्ष्मणं त्यक्तवांस्तदा ॥ ५७ ॥
लक्ष्मणोऽपि तदा वीरः कुर्वन्नवितथं वचः ॥ भ्रातुर्ज्येष्ठस्य सुमतिः सरयूतीरमाययौ ॥ ५८ ॥ तत्र गत्वाथ च स्नात्वा ध्यानमास्थाय सत्वरम् ॥ चिदा
त्मनि मनः शान्तं संगम्यावस्थितस्तदा ॥ ५९ ॥ ततः प्रादुरभूत्तत्र सहस्रफणमण्डितः ॥ शेषश्चक्षुःश्रवाः श्रेष्ठः क्षितिं भित्त्वा सहस्रधा ॥ सुर
लोकात्सुरेन्द्रोऽपि समागादमरैः सह ॥ ६० ॥ ततः शेषात्मतां यातं लक्ष्मणं सत्यसंगरम् ॥ उवाच मधुरं शक्रः सुराणां तत्र पश्यताम् ॥ ६१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

दृष्टाश्चर्यमहं पथि ॥ महानंदेन[1] मनसा कृतार्थोऽस्मि महीपते ॥ १४१ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मोत्तर खंडे गोकर्णमहिमानुवर्णनंनाम द्वितीयोऽध्यायः ॥ २ ॥ ॥ छ ॥ ॥ राजोवाच ॥ ॥ किं दृष्टं भवता ब्रह्मन्नाश्चर्यं पथि कुत्र वा ॥ तन्ममाख्याहि येनाहं कृतकृत्यत्वमाप्नुयाम् ॥ १ ॥ ॥ गौतम उवाच ॥ ॥ गोकर्णादहमागच्छन्कापि देशे विशांपते ॥ जाते मध्याह्नसमये लब्ध वान्विमलं सरः ॥ २ ॥ तत्रोपस्पृश्य सलिलं विनीय च पथिश्रमम्[2] ॥ सुस्निग्धशीतलच्छायं न्यग्रोधं समुपाश्रयम् ॥ ३ ॥ अथाविदूरे चांडालीं वृद्धामंधां कृशाकृतिम् ॥ शुष्यन्मुखीं निराहारां बहुरोगनिपीडिताम् ॥ ४ ॥ कुष्ठव्रणपरीतांगीमुद्यत्कृमिकुलाकुलाम् ॥ पूयशोणितसंसक्तजरत्पटल[3] सत्कटीम् ॥ ५ ॥ महायक्ष्मगलस्थेन[4] कंठसंरोधविह्वलाम् ॥ विनष्टदंतामव्यक्तां विलुठंतीं मुहुर्मुहुः ॥ ६ ॥ चंडार्ककिरणस्पृष्टखरोष्णरजसाप्लुताम्[5]॥ विण्मूत्रपूयदिग्धांगीमसृग्गंधदुरासदाम् ॥ ७ ॥ कफरोगबहुश्वासश्लथन्नाडीबहुव्यथाम् ॥ विध्वस्तकेशावयवामपश्यं मरणोन्मुखीम् ॥ ८ ॥ तादृ ग्व्यथां च तां वीक्ष्य कृपयाहं परिप्लुतः ॥ प्रतीक्षन्मरणं तस्याः क्षणं तत्रैव संस्थितः ॥ ९ ॥ अथांतरिक्षपदवीं सिंचंतमिव रश्मिभिः ॥ दिव्यं विमानमानीतमद्राक्षं शिवकिंकरैः ॥ १० ॥ तस्मिन्नर्वींदुवह्नीनां तेजसामिव पंजरे[6] ॥ विमाने सूर्यसंकाशानपश्यं शिवकिंकरान् ॥ ११ ॥ ते वै त्रिशूलखट्वांगटंकचर्मासिपाणयः ॥ चंद्रार्धभूषणाः सांद्रचंद्रकुंदोरुवर्चसः ॥ १२ ॥ किरीटकुंडलभ्राजन्महाहिवलयोज्ज्वलाः ॥ शिवानुगा मया दृष्टा श्चत्वारः शुभलक्षणाः ॥ १३ ॥ तानापतत आलोक्य विमानस्थान्सुविस्मितः ॥ उपसृत्यांतिके वेगादपृच्छं गगने स्थितान् ॥ १४ ॥ नमोनमो वस्त्रिदशोत्तमेभ्यस्त्रिलोचनश्रीचरणानुगेभ्यः ॥ त्रिलोकरक्षाविधिमावहद्भ्यस्त्रिशूलचर्मासिगदाधरेभ्यः ॥ १५ ॥ विदिता हि मया यूयं महेश्वरपदा नुगाः ॥ इयं वो लोकरक्षार्था गतिराहो विनोदजा ॥ १६ ॥ उत सर्वजनाघौघविजयाय कृतोद्यमाः ॥ ब्रूत कारुण्यतो मह्यं यस्माद्यूयमिहागताः ॥ १७ ॥ ॥ शिवदूता[7] ऊचुः ॥ ॥ एषाग्रे दृश्यते वृद्धा चांडाली मरणोन्मुखी ॥ एतामानेतुमायाताः संदिष्टाः प्रभुणा वयम् ॥ १८ ॥ इत्युक्ते शिवदूतैस्तैरपृच्छं पुनरप्यहम् ॥ विस्मयाविष्टचित्तस्तान्कृतांजलिरवस्थितः ॥ १९ ॥ अहो पापीयसी घोरा चांडाली कथमर्हति ॥ दिव्यं विमानमारोढुं शुनीवाध्वरमंडलम् ॥ २० ॥ आजन्मतोऽशुचिप्रायां पापां पापा नुगामिनीम् ॥ कथमेनां दुराचारां शिवलोकं निनीषथ ॥ २१ ॥ अस्या नास्ति शिवज्ञानं नास्ति घोरतरं तपः ॥ सत्यं नास्ति

१ जातानंदेन—इ० पा० । २ परिश्रमम्—इ० पा० । ३ क्षरत्पट—इ० पा० । ४ महायक्ष्मगलत्वेन—इ० पा० । ५ रजासि—इ० पा० । ६ पर्वते—इ० पा० । ७ शिवपुरुषा ऊचुः-इ०पा० ।

CC-0. In Public Domain. Digitization by eGangotri

देवास्ते सह पार्षदैः ॥ ९२ ॥ पूर्वद्वारं निषेवन्ते देवदेवस्य शूलिनः ॥ योन्यो मृत्युः स्वयं साक्षाच्चित्रगुप्तश्च पावकः ॥ ९३ ॥ पितृभिः सह रुद्रैश्च दक्षिणद्वारमाश्रितः ॥ वरुणः सरितां नाथो गंगादिसरितां गणैः ॥ ९४ ॥ आसेवते महादेवं पश्चिमद्वारमाश्रितः ॥ तथा वायुः कुबेरश्च देवेशी भद्रकर्णिका ॥ ९५ ॥ मातृभिश्चंडिकाद्याभिरुत्तरद्वारमाश्रिता ॥ विश्वावसुश्चित्ररथश्चित्रसेनो महाबलः ॥ ९६ ॥ सह गन्धर्ववर्गैश्च पूजयंति महाबलम् ॥ रंभा घृताची मेना च पूर्वचित्तिस्तिलोत्तमा ॥ ९७ ॥ नृत्यंति पुरतः शम्भोरुर्वश्याद्याः सुरस्त्रियः ॥ वशिष्ठः कश्यपः कण्वो विश्वामित्रो महातपाः ॥ ९८ ॥ जैमिनिश्च भरद्वाजो जाबालिः क्रतुरंगिराः ॥ एते वयं च राजेंद्र सर्वे ब्रह्मर्षयोऽमलाः ॥ ९९ ॥ देवं महाबलं भक्त्या समंतात्पर्युपास्महे ॥ मरीचिना सहात्रिश्च दक्षाद्याश्च मुनीश्वराः ॥ १०० ॥ सनकाद्या महात्मान उपविष्टा उपासते ॥ तथैव मुनयः साध्या अजिनांबरधारिणः ॥ १ ॥ दंडिनो व्रतमुण्डाश्च स्नातका ब्रह्मचारिणः ॥ त्वगस्थिमात्रावयवास्तपसा दग्धकिल्बिषाः ॥ २ ॥ सेवन्ते परया भक्त्या देवदेवं पिनाकिनम् ॥ तथा देवाः सगन्धर्वाः पितरः सिद्धचारणाः ॥ ३ ॥ विद्याधराः किंपुरुषाः किन्नरा गुह्यकाः खगाः ॥ नागाः पिशाचा वेताला दैतेयाश्च महाबलाः ॥ ४ ॥ नानाविभवसंपन्ना नानाभूषणवाहनाः ॥ विमानैः सूर्यसंकाशैरग्निवर्णैः शशिप्रभैः ॥ ५ ॥ विद्युत्पुंजनिभैरन्यैः समंतात्परिवारितम् ॥ प्रस्तुवंति प्रगायंति पठंति प्रणमंति च ॥ ६ ॥ प्रनृत्यंति प्रहृष्यंति गोकर्णे पृथिवीपते ॥ लभंतेऽभीप्सितान्कामान्रमंते च यथासुखम् ॥ ७ ॥ गोकर्णसदृशं क्षेत्रं नास्ति ब्रह्मांडगोलके ॥ तत्र घोरं तपस्तप्तमगस्त्येन महात्मना ॥ ८ ॥ तथा सनत्कुमारेण प्रियव्रतसुतैरपि ॥ अग्निना देववर्येण कन्दर्पेण च पार्थिव ॥ ९ ॥ तथा देव्या भद्रकाल्या शिशुमारेण धीमता ॥ दुर्मुखेन फणींद्रेण मणिनागाह्वयेन च ॥ ११० ॥ इलावर्तादिभिर्नागैर्गरुडेन बलीयसा ॥ रक्षसा रावणेनापि कुम्भकर्णाह्वयेन तु ॥ ११ ॥ विभीषणेन पुण्येन तपस्तप्तं महात्मना ॥ एते चान्ये च गीर्वाणाः सिद्धदानवमानवाः ॥ १२ ॥ गोकर्णे देवदेवेशं शिवमाराध्य भक्तितः ॥ स्वनामांकानि लिंगानि स्थापयित्वा सहस्रशः ॥ १३ ॥ लेभिरे परमां सिद्धिं तथा तीर्थानि चक्रिरे ॥ अत्र स्थानानि सर्वेषां देवानां संति पार्थिव ॥ १४ ॥ विष्णोश्च देवदेवस्य ब्रह्मणः परमेष्ठिनः ॥ कार्त्तिकेयस्य वीरस्य गजवक्त्रस्य चानघ ॥ १५ ॥ धर्मस्य क्षेत्रपालस्य दुर्गायाश्च महामते ॥ गोकर्णे शिवलिंगानि विद्यंते कोटिकोटिशः ॥ ॥ १६ ॥ असंख्यातानि तीर्थानि तिष्ठंति च पदेपदे ॥ बहुनात्र किमुक्तेन गोकर्णस्थानि पार्थिव ॥ १७ ॥ सर्वाण्यश्मानि लिंगानि तीर्थान्यंभांसि

१ तस्यैव प्रीतिकारणात्–इ० पा० । २ नास्ति जगत्त्रये–इ० पा० । ३ कालावर्तादिभिः–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सर्वशः ॥ गोकर्णे शिवलिंगानां तीर्थानामपि भूरिशः ॥ १८ ॥ गीयते महिमा राजन्पुराणेषु महर्षिभिः ॥ गोकर्णे कोटितीर्थं च तीर्थानां मुख्यतां गतम् ॥ १९ ॥ सर्वेषां शिवलिंगानां सार्वभौमो महाबलः ॥ कृते महाबलः श्वेतस्त्रेतायामतिलोहितः ॥ १२० ॥ द्वापरे पीत वर्णश्च कलौ श्यामो भविष्यति ॥ आक्रांतं सप्तपातालं कुर्वन्नपि महाबलः ॥ २१ ॥ प्राप्ते कलियुगे घोरे मृदुतामुपयास्यति ॥ पश्चिमांबुधितीरस्थं गोकर्णक्षेत्रमुत्तमम् ॥ २२ ॥ ब्रह्महत्यादिपापानि दहतीति किमद्भुतम् ॥ ये चात्र ब्रह्महंतारो ये च भूतद्रुहः शठाः ॥ २३ ॥ ये सर्वगुणहीनाश्च परदाररताश्च ये ॥ ये दुर्वृत्ता दुराचारा दुःशीलाः कृपणाश्च ये ॥ २४ ॥ लुब्धाः क्रूराः खला मूढाः स्ते नाश्चैवातिकामिनः ॥ ते सर्वे प्राप्य गोकर्णं स्नात्वा तीर्थजलेषु च ॥ १२५ ॥ देवं महाबलं दृष्ट्वा प्रयाताः शांकरं पदम् ॥ तत्र पुण्यासु तिथिषु पुण्य र्क्षे पुण्यवासरे ॥ २६ ॥ येऽर्चयंति महेशानं ते रुद्राः स्युर्न संशयः ॥ यदा कदाचिद्गोकर्णं यो वा को वापि मानवः ॥ २७ ॥ प्रविश्य पूजयेदीशं स गच्छेद्ब्रह्मणः पदम् ॥ रवींदुसौम्यवारेषु यदा दर्शो भविष्यति ॥ २८ ॥ तदा जलनिधौ स्नानं दानं च पितृतर्पणम् ॥ शिवपूजा जपो होमो व्रतचर्या द्विजार्चनम् ॥ २९ ॥ यत्किंचिद्वा कृतं कर्म तदनंतफलप्रदम् ॥ व्यतीपातादियोगेषु रविसंक्रमणेषु च ॥ १३० ॥ महाप्रदोषवेलासु शिव पूजा विमुक्तिदा ॥ अथैकां ते प्रवक्ष्यामि तिथिं पार्थिव मुक्तिदाम् ॥ ३१ ॥ यस्यां किल महाव्याधो लेभे शंभोः परं पदम् ॥ माघमासे महापुण्या या सा कृष्णचतुर्दशी ॥ ३२ ॥ शिवलिंगं बिल्वपत्रं दुर्लभं हि चतुष्टयम् ॥ अहो बलवती माया यया शैवी महातिथिः ॥ ३३ ॥ नोपोष्यते जनै मूढैर्महामूकैरिव त्रयी ॥ उपवासो जागरणं सन्निधिः परमेशितुः ॥ ३४ ॥ गोकर्णं शिवलोकस्य नृणां सोपानपद्धतिः ॥ शृणु राजन्नहमपि गोकर्णा दधुनागतः ॥ १३५ ॥ उपास्यैनां शिवतिथिं विलोक्य च महोत्सवम् ॥ अस्यां शिवतिथौ सर्वे महोत्सवदिदृक्षवः ॥ ३६ ॥ आगताः सर्वदेशेभ्यश्चा तुर्वर्ण्या महाजनाः ॥ स्त्रियो वृद्धाश्च बालाश्च चतुराश्रमवासिनः ॥ ३७ ॥ आगत्य दृष्ट्वा देवेशं लेभिरे कृतकृत्यताम् ॥ अथाहमप्यमी शिष्या ऋषयश्च तथाऽपरे ॥ ३८ ॥ राजर्षयश्च राजेंद्र सनकाद्याः सुरर्षयः ॥ स्नात्वा सर्वेषु तीर्थेषु समुपास्य महाबलम् ॥ ३९ ॥ लब्ध्वा च जन्मसाफल्यं प्रयाताः सर्वतोदिशम् ॥ अमुनाद्य नरेंद्रेण जनकेन यियक्षुणा ॥ १४० ॥ निमंत्रितोऽहं संप्राप्तो गोकर्णाच्छिवमंदिरात् ॥ प्रत्यागमं किमप्यंग

१ वर्ण्यते–इ० पा० । २ कुहरोऽपि–इ० पा० । ३ महात्मानम्–इ० पा० । ४ स्नात्वा कृत्वा च–इ० पा० । ५ चतुर्थाश्रमवासिनः–इ० पा० । ६ आराध्य–इ० पा० । ७ अपुत्रेण–इ० पा० ।

CC-0. In Public Domain. Digitization by eGangotri

क्षिता मदपरैर्भर्त्सयंती पदेपदे ॥ यन्मया शापदग्धेन कृतमंहो दुरत्ययम् ॥ न शांतिर्जायते तस्य प्रायश्चित्तसहस्रकैः ॥ ७० ॥ इष्टाश्च विविधा यज्ञाः कोशसर्वस्वदक्षिणाः ॥ सरित्सरांसि स्नातानि यानि पूज्यानि भूतले ॥ निषेवितानि सर्वाणि क्षेत्राणि भ्रमता मया ॥ ७१ ॥ जप्तान्य खिलमंत्राणि ध्याताः सकलदेवताः ॥ महाव्रतानि चीर्णानि पर्णमूलफलाशिना ॥ ७२ ॥ तानि सर्वाणि कुर्वंति स्वस्थं मां न कदाचन ॥ अद्य मे जन्मसाफल्यं संप्राप्तमिव लक्ष्यते ॥ ७३ ॥ यतस्त्वद्दर्शनादेव ममात्मानंदभागभूत् ॥ अन्विच्छँल्लभते क्वापि वर्षपूगैर्मनोरथम् ॥ ७४ ॥ इत्येवं जनवादोऽपि संप्राप्तो मयि सत्यताम् ॥ आजन्मसंचितानां तु पुण्यानामुदयोदये ॥ ७५ ॥ यद्भवान्भवभीतानां त्राता नयनगोचरः ॥ कस्माद्देशादिहायातो भवान्भवभयापहः ॥ ७६ ॥ दूरभ्रमणविश्रांतं शंके त्वामिह चागतम् ॥ दृष्ट्वाश्चर्यमिवात्यर्थं मुदितोसि मुखश्रिया ॥ ७७ ॥ आनंदयसि मे चेतः प्रेम्णा संभाषणादिव ॥ अद्य मे तव पादाब्जशरणस्य कृतैनसः ॥ शांतिं कुरु महाभाग येनाहं सुखमाप्नुयाम् ॥७८॥ इति तेन समादिष्टो गौतमः करुणानिधिः ॥ समादिदेश घोराणामघानां साधु निष्कृतिम् ॥ ७९ ॥ ॥ गौतम उवाच ॥ ॥ साधु राजेंद्र धन्योऽसि महा घेभ्यो भयं त्यज ॥८०॥ शिवे त्रातरि भक्तानां क्व भयं शरणैषिणाम् ॥ शृणु राजन्महाभाग क्षेत्रमन्यत्प्रतिष्ठितम् ॥८१॥ महापातकसंहारि गोकर्णा ख्यं मनोरमम् ॥ यत्र स्थितिर्न पापानां महद्भ्यो महतामपि ॥ ८२ ॥ स्मृतो ह्यशेषपापघ्नो यत्र संनिहितः शिवः ॥ यथा कैलासशिखरे यथा मंदा रमूर्द्धनि ॥ ८३ ॥ निवासो निश्चितः शंभोस्तथा गोकर्णमण्डले ॥ नाग्निना न शशांकेन नताराग्रहनायकैः ॥ ८४ ॥ तमो निस्तीर्यते सम्य ग्यथा सवितृदर्शनात् ॥ तथैव नेतरैस्तीर्थैर्न च क्षेत्रैर्मनोरमैः ॥ ८५ ॥ सर्वैः पापविशुद्धिः स्याद्यथा गोकर्णदर्शनात् ॥ अपि पापशतं कृत्वा ब्रह्म हत्यादि मानवः ॥ ८६ ॥ सकृत्प्रविश्य गोकर्णं न बिभेति ह्यघात्क्वचित् ॥ तत्र सर्वे महात्मानस्तपसा शांतिमागताः ॥८७॥ इन्द्रोपेंद्रविरिंच्याद्यैः सेव्यते सिद्धिकांक्षिभिः ॥ तत्रैकेन दिनेनापि यत्कृतं व्रतमुत्तमम् ॥ ८८ ॥ तदन्यत्राब्दलक्षेण कृतं भवति तत्समम् ॥ यत्रेंद्रब्रह्मविष्णवादिदेवानां हितकाम्यया ॥ ८९ ॥ महाबलाभिधानेन देवः संनिहितः स्वयम् ॥ घोरेण तपसा लब्धं रावणाख्येन रक्षसा ॥ ९० ॥ तल्लिंगं स्थापयामास गोकर्णे गणनायकः ॥ इन्द्रो ब्रह्मा मुकुन्दश्च विश्वेदेवा मरुद्गणाः ॥ ९१ ॥ आदित्या वसवो दस्रौ शशांकश्च दिवाकरः ॥ एते विमानगतयो

---

१ खातानि--इ० पा० । २ तर्थानि सर्वाणि--इ० पा० । ३ धूतैनसः--इ० पा० । ४ सर्वपापविशुद्धिः--इ० पा० । ५ यमात्--इ० पा० । ६ पूर्वे--इ० पा० । ७ सिद्धिम्--इ० पा० । ८ तप स्तपति संभृतः--इ० पा० । ९ प्रियकाम्यया--इ० पा० । १० रुद्रा--इ० पा० । ११ सतारकः--इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अतोऽस्य प्राणदानेन जगद्रक्षा त्वया कृता ॥ कृपां कुरु महाराज बालायां ब्राह्मणस्त्रियाम् ॥ ४६ ॥ अनाथकृपणार्तेषु सघृणाः खलु साधवः ॥ इत्थमभ्यर्थितः सोऽपि पुरुषादः स निर्घृणः ॥ ४७ ॥ चखाद शिर उत्कृत्य विप्रपुत्रं दुराशयः ॥ अथ साध्वी कृशा दीना विलप्य भृशदुःखिता ॥ ४८ ॥ आहृत्य भर्तुरस्थीनि चितां चक्रे तथोलबणाम्[1] ॥ भर्तारमनुगच्छंती संविशंती हुताशनम् ॥ ४९ ॥ राजानं राक्षसाकारं शापास्त्रेण जघान तम् ॥ रेरे पार्थिव पापात्मंस्त्वया मे भक्षितः पतिः ॥ ५० ॥ अतः पतिव्रतायास्त्वं शापं भुंक्ष्व यथोलबणम् ॥ अद्यप्रभृति नारीषु यदा त्वमपि संगतः ॥ तदा मृतिस्तवेत्युक्त्वा विवेश ज्वलनं सती ॥ ५१ ॥ सोऽपि राजा गुरोः शापमुपभुज्य कृतावधिम् ॥ पुनः स्वरूपमादाय स्वगृहं मुदितो ययौ ॥ ५२ ॥ ज्ञात्वा विप्रसतीशापं तत्पत्नी रतिलालसम् ॥ पतिं निवारयामास वैधव्यादतिबिभ्यती ॥ ५३ ॥ अनपत्यः स निर्विण्णो राज्यभोगेषु पार्थिवः ॥ विसृज्य सकलां लक्ष्मीं ययौ भूयोऽपि काननम् ॥ ५४ ॥ सूर्यवंशप्रतिष्ठित्यै वशिष्ठो मुनिसत्तमः ॥ तस्यामुत्पादयामास मदयंत्यां सुतोत्तमम् ॥ ५५ ॥ विसृष्टराज्यो राजापि विचरन्सकलां महीम् ॥ आयांतीं पृष्ठतोऽपश्यत्पिशाचीं घोररूपिणीम् ॥ ५६ ॥ सा हि मूर्तिमती घोरा ब्रह्महत्या दुरत्यया ॥ यदासौ शापविभ्रष्टो मुनिपुत्रमभक्षयत् ॥ ५७ ॥ तेनात्मकर्मणा यांतीं ब्रह्महत्यां स पृष्ठतः ॥ बुबुधे मुनिवर्याणामुपदेशेन भूपतिः ॥ ५८ ॥ तस्या निर्वेशमन्विच्छन्राजा[2] निर्विण्णमानसः ॥ नानाक्षेत्राणि तीर्थानि चचार बहुवत्सरम् ॥ ५९ ॥ यदा सर्वेषु तीर्थेषु स्नात्वापि च मुहुर्मुहुः ॥ न निवृत्ता ब्रह्महत्या मिथिलामाययौ तदा ॥ बाह्योद्यानगतस्तस्याश्चिंतया परयार्दितः[3] ॥ ६० ॥ ददर्श मुनिमायांतं गौतमं विमलाशयम् ॥ हुताशनमिवाशेषतपस्विजनसेवितम् ॥ ६१ ॥ विवस्वंतमिवात्यंतं घनदोषतमोनुदम् ॥ शशांकमिव निःशंकमवदातगुणोदयम् ॥ ६२ ॥ महेश्वरमिव श्रीमद्द्विजराजकलाधरम् ॥ शांतं शिष्यगणोपेतं तपसामेकभाजनम् ॥ ६३ ॥ उपसृत्य स राजेंद्रः प्रणनाम मुहुर्मुहुः ॥ गौतमोऽपि मुनिश्रेष्ठो राजानं रविवंशजम् ॥ ६४ ॥ अभिनंद्य मुनिः प्रीत्या सस्मितं[4] समभाषत ॥ ६५ ॥ ॥ गौतम उवाच ॥ ॥ कच्चित्ते कुशलं राजन्कच्चित्ते पदमव्ययम् ॥ ६६ ॥ कुशलिन्यः प्रजाः कच्चिदवरोधजनोपि वा ॥ किमर्थमिह संप्राप्तो विसृज्य सकलां श्रियम्[5] ॥ ६७ ॥ किं च ध्यायसि भो राजन्दीर्घमुष्णं च निःश्वसन् ॥ ६८ ॥ ॥ राजोवाच ॥ ॥ सर्वे कुशलिनो ब्रह्मन्वयं त्वदनुकंपया ॥ राज्ञामुत्तमवंश्यानां ब्रह्मायत्ता हि संपदः ॥ किं नु मां बाधते त्वेषा पिशाची घोररूपिणी ॥ ६९ ॥ अल

१ यथोचिताम्—इ०पा० । २ निर्वेदम्—इ०पा० । ३ परया वृतः—इ०पा० । ४ विस्मितः—इ०पा० । ५ महीम्—र०पा० ।

CC-0. In Public Domain. Digitization by eGangotri

संतोषं परमं लेभे निःस्वः प्राप्य यथा धनम्[1] ॥ ७० ॥ अशेषवेदोपनिषत्पुराणशास्त्रावतंसोऽयमघांतकारी ॥ पंचाक्षरस्यैवं[2] महाप्रभावो मया[3] समासा
त्कथितो वरिष्ठः ॥ ७१ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसहस्र्यां संहितायां तृतीये ब्रह्मोत्तरखण्डे पंचाक्षरमन्त्रमाहात्म्यवर्णनं नाम प्रथमोऽ
ध्यायः ॥ १ ॥ ॥ सूत उवाच ॥ ॥ अथान्यदपि वक्ष्यामि माहात्म्यं त्रिपुरद्विषः ॥ श्रुतमात्रेण येनाशु च्छिद्यंते सर्वसंशयाः ॥ १ ॥ अतः परतरं
नास्ति किंचित्पापविशोधनम् ॥ सर्वानंदकरं श्रीमत्सर्वकामार्थसाधम् ॥ २ ॥ दीर्घायुर्विजयारोग्यभुक्तिमुक्तिफलप्रदम् ॥ यदनन्येन भावेन महे
शाराधनं परम् ॥ ३ ॥ आर्द्राणामपि शुष्काणामल्पानां महतामपि ॥ एतदेव विनिर्दिष्टं प्रायश्चित्तमथोत्तमम् ॥ ४ ॥ सर्वकालेऽप्यमेध्यानाम
घानां क्षयकारणम् ॥ महामुनिविनिर्दिष्टैः प्रायश्चित्तैरथोत्तमैः ॥ ५ ॥ इदमेव परं श्रेयः सर्वशास्त्रविनिश्चितम् ॥ यद्भक्त्या परमेशस्य पूजनं परमो
दयम् ॥ ६ ॥ जानताऽजानता वापि येन केनापि हेतुना ॥ यत्किंचिदपि देवाय कृतं कर्म विमुक्तिदम् ॥ ७ ॥ माघे कृष्णचतुर्दश्यामुपवासोऽति
दुर्लभः ॥ तत्रापि दुर्लभं मन्ये रात्रौ जागरणं नृणाम् ॥ ८ ॥ अतीव दुर्लभं मन्ये शिवलिंगस्य दर्शनम् ॥ सुदुर्लभतरं मन्ये पूजनं परमेशितुः ॥
॥ ९ ॥ भवकोटिशतोत्पन्नपुण्यराशिविपाकतः ॥ लभ्यते वा पुनस्तत्र बिल्वपत्रार्चनं विभोः ॥ १० ॥ वर्षाणामयुतं येन स्नातं गंगासरिज्जले ॥
सकृद्बिल्वार्चनेनैव तत्फलं लभते नरः ॥११॥ यानियानि[11] तु पुण्यानि लीनानीह युगेयुगे ॥ माघेऽसितचतुर्दश्यां तानि तिष्ठंति कृत्स्नशः ॥ १२ ॥
एतामेव प्रशंसंति लोके ब्रह्मादयः सुराः ॥ मुनयश्च वशिष्ठाद्या माघेऽसितचतुर्दशीम् ॥ १३ ॥ अत्रोपवासः केनापि कृतः क्रतुशताधिकैः[12] ॥
रात्रौ जागरणं पुण्यं कल्पकोटितपोऽधिकम् ॥ १४ ॥ एकेन बिल्वपत्रेण शिवलिंगार्चनं कृतम् ॥ त्रैलोक्ये तस्य पुण्यस्य को वा सादृश्यमिच्छ
ति ॥ १५ ॥ अत्रानुवर्ण्यते गाथा[13] पुण्या परमशोभना ॥ गोपनीयापि कारुण्याद्गौतमेन प्रकाशिता ॥ १६ ॥ इक्ष्वाकुवंशजः श्रीमान्राजा[14] परम
धार्मिकः ॥ आसीन्मित्रसहोनाम श्रेष्ठः सर्वधनुर्भृताम् ॥ १७ ॥ स राजा सकलास्त्रज्ञः शास्त्रज्ञः श्रुतिपारगः ॥ वीरोऽत्यंतबलोत्साहो नित्योद्योगी
दयानिधिः ॥ १८ ॥ पुण्यानामिव संघातस्तेजसामिव पंजरः ॥ आश्चर्याणामिव क्षेत्रं यस्य मूर्तिर्विराजते ॥ १९ ॥ हृदयं दययाक्रांतं श्रियाक्रांतं

१ निधिम्–इ० पा० । २ एष महानुभवः–इ० पा० । ३ कलौ–इ पा० । ४ सर्वाघानां विशोधनम् इ० पा० । ५ सर्वेषां च इ० पा० । ६ माघासितचतुर्दश्याम्–इ० पा० । ७ माघे–इ०पा० ।
८ कृतम्–इ० पा० । ९ तत्र–इ० पा० । १० तत्र –इ० पा० । ११ यानिकानि च पापानि भिन्नानीह युगेयुगे ॥ माघासितचतुर्दश्यां तानि नश्यंति कृत्स्नशः ॥–इ० पा० । १२ क्रतुशतायते–इ० पा० ।
१३ पुण्यागाथा–इ० पा० । १४ आस्ते–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

च तद्वपुः ॥ चरणौ यस्य सामंतचूडामणिमरीचिभिः ॥ २० ॥ एकदा मृगयाकेलिलोलुपः स महीपतिः ॥ विवेश गह्वरं घोरं बलेन महतावृतः ॥
॥ २१ ॥ तत्र विव्याध विशिखैः शार्दूलान्गवयान्मृगान् ॥ रुरून्वराहान्महिषान्मृगेंद्रानपि भूरिशः ॥ २२ ॥ स रथी मृगयासक्तो गहनं दंशित
श्चरन् ॥ कमपि ज्वलनाकारं निजघान निशाचरम् ॥ २३ ॥ तस्यानुजः शुचाविष्टो दृष्ट्वा दूरे तिरोहितः ॥ भ्रातरं निहतं दृष्ट्वा चिंतयामास
चेतसा ॥ २४ ॥ नन्वेष राजा दुर्द्धर्षो देवानां रक्षसामपि ॥ छद्मनैव प्रजेतव्यो मम शत्रुर्न चान्यथा ॥ २५ ॥ इति व्यवसितः पापो राक्षसो
मनुजाकृतिः ॥ आससाद नृपश्रेष्ठमुत्पात इव मूर्तिमान् ॥ २६ ॥ तं विनम्राकृतिं दृष्ट्वा भृत्यतां कर्तुमागतम् ॥ चक्रे महानसाध्यक्षमज्ञानात्स[1]
महीपतिः ॥ २७ ॥ अथ तस्मिन्वने राजा किंचित्कालं विहृत्य सः ॥ निवृत्तो मृगयां हित्वा स्वपुरीं पुनराययौ ॥ २८ ॥ तस्य राजेंद्रमुख्यस्य
मदयंतीतिनामतः ॥ दमयन्ती नलस्येव विदिता वल्लभा सती ॥ २९ ॥ एतस्मिन्समये[2] राजा निमंत्र्य मुनिपुंगवम् ॥ वशिष्ठं गृहमानिन्ये
संप्राप्ते पितृवासरे ॥ ३० ॥ रक्षसा सूदरूपेण संमिश्रितनरामिषम् ॥ शाकामिषं पुरः क्षिप्तं दृष्ट्वा गुरुरथाब्रवीत् ॥ ३१ ॥ धिग्धिङ्नरामिषं राजं
स्त्वयैतच्छद्मकारिणा ॥ खलेनोपहृतं मेऽद्य अतो[3] रक्षो भविष्यसि ॥ ३२ ॥ रक्षःकृतमविज्ञाय शप्त्वैवं स गुरुस्ततः ॥ पुनर्विमृश्य तं शापं चकार
द्वादशाब्दिकम् ॥ ३३ ॥ राजापि कोपितः प्राह यदिदं मे न चेष्टितम् ॥ न ज्ञातं च वृथा शप्तो गुरुं चैव शपाम्यहम् ॥ ३४ ॥ इत्यपोंजलिनादाय
गुरुं शप्तुं समुद्यतः ॥ पतित्वा पादयोस्तस्य मदयन्ती न्यवारयत् ॥३५॥ ततो निवृत्तः शापाच्च तस्या वचनगौरवात् ॥ तत्याज पादयोरंभः पादौ
कल्मषतां गतौ ॥३६॥ कल्मषांघ्रिरिति ख्यातस्ततः प्रभृति पार्थिवः ॥ बभूव गुरुशापेन राक्षसो वनगोचरः ॥३७॥ स बिभ्रद्राक्षसं रूपं घोरं कालां
तकोपमम् ॥ चखाद विविधाञ्जंतून्मानुषादीन्वनेचरः ॥३८॥ स कदाचिद्वने क्वापि रममाणौ किशोरकौ ॥ अपश्यदंतकाकारो नवोढौ मुनिदंपती ॥
॥३९॥ राक्षसो मानुषाहारः किशोरं मुनिनंदनम् ॥ जग्धुं जग्राह शापार्तो व्याघ्रो मृगशिशुं यथा ॥४०॥ रक्षोगृहीतं[4] भर्तारं दृष्ट्वा भीताथ तत्प्रिया ॥
उवाच करुणं बाला क्रंदंती[5] भृशवेपिता ॥ ४१ ॥ भोभो मामा कृथाः पापं सूर्यवंशयशोधर ॥ मदयंतीपतिस्त्वं हि राजेंद्रो न तु राक्षसः ॥४२॥ न
खाद मम भर्तारं प्राणात्प्रियतमं प्रभो ॥ आर्त्तानां शरणार्त्तानां त्वमेव हि यतो गतिः ॥ ४३ ॥ पापानामिव संघातैः किं मे दुष्टैर्जडासुभिः ॥ देहेन
चातिभारेण विना भर्त्रा महात्मना ॥ ४४ ॥ मलीमसेन पापेन पांचभौतेन किं सुखम् ॥ बालोयं वेदविच्छांतस्तपस्वी बहुशास्त्रवित् ॥ ४५ ॥

१ अजानन्—इ० पा० । २ अंतः—इ० पा० । ३ महान्—इ० पा० । ४ कक्षे—इ० पा० । ५ रुदन्ती—इ० पा० ।

CC-0. In Public Domain. Digitization by eGangotri

मंत्रो जप्यते शुंचिः ॥ नाराध्यते त्वयेशानः कथं मां स्प्रष्टुमर्हसि ॥ ४८ ॥ ॥ राजोवाच ॥ ॥ तां समाख्याहि सुश्रोणि शैवीं पंचाक्षरीं शुभाम् ॥ विद्याविध्वस्तपापोऽहं त्वयीच्छामि रतिं प्रिये ॥ ४९ ॥ ॥ राज्युवाच ॥ ॥ नाहं तवोपदेशं वै कुर्यां मम गुरुर्भवान् ॥ उपातिष्ठ गुरुं राजन्गर्गं मंत्रविदांवरम् ॥ ५० ॥ ॥ सूत उवाच ॥ ॥ इति संभाषमाणौ तौ दंपती गर्गसन्निधिम् ॥ प्राप्य तच्चरणौ मूर्ध्ना ववंदाते कृताञ्जली ॥ ५१ ॥ अथ राजा गुरुं प्रीतमभिपूज्य पुनःपुनः ॥ समाचष्ट विनीतात्मा रहस्यात्ममनोरथम् ॥ ५२ ॥ ॥ राजोवाच ॥ ॥ कृतार्थं मां कुरु गुरो संप्रातं करुणार्द्रधीः ॥ शैवीं पंचाक्षरीं विद्यामुपदेष्टुं त्वमर्हसि ॥ ५३ ॥ अनाज्ञातं यदाज्ञातं यत्कृतं राजकर्मणा ॥ तत्पापं येन शुद्ध्येत तन्मंत्रं देहि मे गुरो ॥ ५४ ॥ एवमभ्यर्थितो राज्ञा गर्गो ब्राह्मणपुंगवः ॥ तौ निनाय महापुण्यं कालिंद्यास्तटमुत्तमम् ॥ ५५ ॥ तत्र पुण्यतरोर्मूले निषण्णोऽथ गुरुः स्वयम् ॥ पुण्यतीर्थजले स्नातं राजानं समुपोषितम् ॥ ५६ ॥ प्राङ्मुखं चोपवेश्याथ नत्वा शिवपदाम्बुजम् ॥ तन्मस्तके करं न्यस्य ददौ मंत्रं शिवात्मकम् ॥ ॥ ५७ ॥ तन्मंत्रधारणादेव तद्गुरोर्हस्तसंगमात् ॥ निर्ययुस्तस्य वपुषो वायसाः शतकोटयः ॥ ५८ ॥ ते दग्धपक्षाः क्रोशंतो निपतंतो महीतले ॥ भस्मीभूतास्ततः सर्वे दृश्यंते स्म सहस्रशः ॥ ५९ ॥ दृष्ट्वा तद्वायसकुलं दह्यमानं सुविस्मितौ ॥ राजा च राजमहिषी तं गुरुं पर्यपृच्छताम् ॥ ६० ॥ भगवन्निदमाश्चर्यं कथं जातं शरीरतः ॥ वायसानां कुलं दृष्टं किमेतत्साधु भण्यताम् ॥ ६१ ॥ ॥ श्रीगुरुरुवाच ॥ ॥ राजन्भवसहस्रेषु भवता परिधावता ॥ संचितानि दुरन्तानि संति पापान्यनेकशः ॥ ६२ ॥ तेषु जन्मसहस्रेषु यानि पुण्यानि संति ते ॥ तेषामाधिक्यतः क्वापि जायते पुण्ययोनिषु ॥ ६३ ॥ तथा पापीयसीं योनिं क्वचित्पापेन गच्छति ॥ साम्ये पुण्यान्ययोश्चैव मानुषीं योनिमाप्तवान् ॥ ६४ ॥ शैवी पंचाक्षरी विद्या यदा ते हृदयं गता ॥ अघानां कोटयस्त्वत्तः काकरूपेण निर्गताः ॥ ६५ ॥ कोटयो ब्रह्महत्यानामगम्यागम्यकोटयः ॥ स्वर्णस्तेयसुरापानभ्रूणहत्यादिकोटयः ॥ भवकोटिसहस्रेषु येऽन्ये पातकराशयः ॥ ६६ ॥ क्षणाद्भस्मीभवंत्येव शैवे पंचाक्षरे धृते ॥ आसंस्तवाद्य राजेंद्र दग्धाः पातककोटयः ॥ ॥ ६७ ॥ अनया सह पूतात्मा विहरस्व यथासुखम् ॥ इत्याभाष्य मुनिश्रेष्ठस्तं मंत्रमुपदिश्य च ॥६८॥ ताभ्यां विस्मितचित्ताभ्यां सहितः स्वगृहं ययौ ॥ गुरुवर्यमनुज्ञाप्य मुदितौ तौ च दंपती ॥ ६९ ॥ ततः स्वभवनं प्राप्य रेजतुःस्म महाद्युती ॥ राजा दृढं समाश्लिष्य पत्नीं चन्दनशीतलाम् ॥

१ शुभः–इ० पा० । २ स राजा च–इ० पा० । ३ राजकर्मभिः–इ० पा० । ४ तन्मुनेः–इ०पा० । ५ गर्ग उवाच–इ० पा० । ६ दृष्टः–इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ग्राह्योऽयं मंत्रनायकः ॥ पुण्यक्षेत्रेषु जप्तव्यः सद्यः सिद्धिं प्रयच्छति ॥ २४ ॥ गुरवो निर्मला[1]ः शांताः साधवो मितभाषिणः ॥ कामक्रोधविनिर्मुक्ताः
सदाचारा जितेंद्रियाः ॥ २५ ॥ एतैः कारुण्यतो दत्तो मंत्रः क्षिप्रं [2]प्रसिद्ध्यति ॥ क्षेत्राणि जपयोग्यानि समासात्कथयाम्यहम् ॥ २६ ॥ प्रयागं
पुष्करं रम्यं केदारं सेतुबंधनम् ॥ गोकर्णं नैमिषारण्यं सद्यः सिद्धिकरं[3] नृणाम् ॥२७॥ अत्रानुवर्ण्यते सद्भिरितिहासः पुरातनः ॥ असकृद्वा सकृद्वापि
शृण्वतां मंगलप्रदः ॥ २८ ॥ मथुरायां यदुश्रेष्ठो दाशार्ह इति विश्रुतः[4] ॥ बभूव राजा मतिमान्महोत्साहो महाबलः ॥ २९ ॥ शास्त्रज्ञो नयवाञ्छूरो
धैर्यवानमितद्युतिः ॥ अप्रधृष्यः सुगंभीरः संग्रामेष्वनिवर्त्तितः ॥ ३० ॥ महारथो महेष्वासो नानाशास्त्रार्थकोविदः ॥ वदान्यो रूपसंपन्नो युवा लक्ष
णसंयुतः ॥ ३१ ॥ स काशिराजतनयामुपयेमे वराननाम् ॥ कांतां कलावतीं नाम रूपशीलगुणान्विताम् ॥ ३२ ॥ कृतोद्वाहः स राजेंद्रः संप्राप्य
निजमंदिरम् ॥ रात्रौ तां शयनारूढां संगमाय समाह्वयत् ॥ ३३ ॥ सा स्वभर्त्रा समाहूता बहुशः प्रार्थिता सती ॥ न बबंध मनस्तस्मिन्न चागच्छ
त्तदंतिकम् ॥ ३४ ॥ संगमाय यदाहूता नागता निजवल्लभा ॥ बलादाहर्तुकामस्तामुदतिष्ठन्महीपतिः ॥ ३५ ॥ ॥ राज्ञ्युवाच ॥ ॥ मा मां
स्पृश महाराज कारणज्ञां व्रते स्थिताम् ॥ धर्माधर्मौ विजानासि मा कार्षीः साहसं मयि ॥ ३६ ॥ क्वचित्प्रियेण भुक्तं यद्रोचते तु
मनीषिणाम् ॥ दंपत्योः प्रीतियोगेन संगमः प्रीतिवर्द्धनः ॥ ३७ ॥ प्रियं यदा मे जायेत तदा संगस्तु ते मयि ॥ का प्रीतिः किं सुखं
पुंसां बलाद्भोगेन योषिताम् ॥ ३८ ॥ अप्रीतां रोगिणीं नारीमंतर्वत्नीं धृतव्रताम् ॥ रजस्वलामकामां च न कामेत बलात्पुमान् ॥ ३९ ॥ प्रीणनं
लालनं पोषं रंजनं मार्दवं दयाम् ॥ कृत्वा वधूमुपगमेद्युवतीं प्रेमवान्पतिः ॥ युवतो कुसुमे चैव विधेयं सुखमिच्छता ॥ ४० ॥ इत्युक्तोऽपि तया
साध्व्या स राजा स्मरविह्वलः ॥ बलादाकृष्य तां हस्ते परिरेभे रिरंसया ॥ ४१ ॥ तां स्पृष्टमात्रां सहसा तप्तायःपिंडसन्निभाम् ॥ निर्दहंतीमिवा
त्मानं तत्याज भयविह्वलः ॥ ४२ ॥ ॥ राजोवाच ॥ ॥ अहो सुमहदाश्चर्यमिदं दृष्टं तव प्रिये ॥ कथमग्निसमं जातं वपुः पल्लवकोमलम् ॥
॥ ४३ ॥ इत्थं सुविस्मितो राजा भीतः सा राजवल्लभा ॥ प्रत्युवाच विहस्यैनं विनयेन शुचिस्मिता ॥ ४४ ॥ ॥ राज्ञ्युवाच ॥ ॥ राजन्मम पुरा
बाल्ये दुर्वासा मुनिपुंगवः ॥ शैवीं पंचाक्षरीं विद्यां कारुण्येनोपदिष्टवान् ॥४५॥ तेन मंत्रानुभावेन ममांगं कलुषोज्झितम् ॥ स्प्रष्टुं न शक्यते पुंभिः
सपापैर्दैववर्जितैः ॥ ४६ ॥ त्वया राजन्प्रकृतिना[5] कुलटागणिकादयः ॥ मदिरास्वादनिरता निषेव्यंते सदा स्त्रियः ॥४७ ॥ न स्नानं क्रियते नित्यं न

१ निर्ममाः–इ० पा० । २ हि सिद्ध्यति–इ० पा० । ३ सिद्धिं प्रयच्छति–इ० पा० । ४ संस्मृतः–इ० पा० । ५ राजप्रकृतिना–इ० पा० ।

CC-0. In Public Domain. Digitization by eGangotri

॥ ॥ श्रीगणेशाय नमः ॥ ॥ श्रीगुरुभ्यो नमः ॥ ॥ अथ ब्रह्मोत्तरखंडप्रारंभः ॥ ॥ ॐनमः शिवाय ॥ ॥ ज्योतिर्मात्रस्वरूपाय निर्मलज्ञानचक्षुषे ॥ नमः शिवाय शांताय ब्रह्मणे लिंगमूर्त्तये ॥ १ ॥ ॥ ऋषय ऊचुः ॥ ॥ आख्यातं भवता सूत विष्णोर्माहात्म्यमुत्तमम् ॥ समस्ताघहरं पुण्यं समासेन श्रुतं च नः ॥ २ ॥ इदानीं श्रोतुमिच्छामो माहात्म्यं त्रिपुरद्विषः ॥ तद्भक्तानां च माहात्म्यमशेषाघहरं परम् ॥ ३ ॥ तन्मंत्राणां च माहात्म्यं तथैव द्विजसत्तम ॥ तत्कथायाश्च तद्भक्तेः प्रभावमनुवर्णय ॥ ४ ॥ ॥ सूत उवाच ॥ ॥ एतावदेव मर्त्यानां परं श्रेयः सनातनम् ॥ यदीश्वरकथायां वै जाता भक्तिरहैतुकी ॥ ५ ॥ अतस्तद्भक्तिलेशस्य माहात्म्यं वर्ण्यते मया ॥ अपि कल्पायुषा नालं वक्तुं विस्तरतः क्वचित् ॥ ६ ॥ सर्वेषामपि पुण्यानां सर्वेषां श्रेयसामपि ॥ सर्वेषामपि यज्ञानां जपयज्ञः परः स्मृतः॥ ७ ॥ तत्रादौ जपयज्ञस्य फलं स्वस्त्ययनं महत् ॥ शैवं षडक्षरं दिव्यं मंत्रमाहुर्महर्षयः ॥ ८ ॥ देवानां परमो देवो यथा वै त्रिपुरांतकः ॥ मंत्राणां परमो मंत्रस्तथा शैवः षडक्षरः ॥ ९ ॥ एष पंचाक्षरो मंत्रो जप्तॄणां मुक्तिदायकः ॥ संसेव्यते मुनिश्रेष्ठैरशेषैः सिद्धिकांक्षिभिः ॥ १० ॥ अस्यैवाक्षरमाहात्म्यं नालं वक्तुं चतुर्मुखः ॥ श्रुतयो यत्र सिद्धांतं गताः परमनिर्वृताः ॥ ११ ॥ सर्वज्ञः परिपूर्णश्च सच्चिदानंदलक्षणः ॥ स शिवो यत्र रमते शैवे पंचाक्षरे शुभे ॥ १२ ॥ एतेन मंत्रराजेन सर्वोपनिषदात्मना ॥ लेभिरे मुनयः सर्वे परं ब्रह्म निरामयम् ॥१३॥ नमस्कारेण जीवत्वं शिवेऽत्र परमात्मनि ॥ ऐक्यं गतमतो मंत्रः परब्रह्ममयो ह्यसौ ॥ १४ ॥ भवपाशनिबद्धानां देहिनां हितकाम्यया ॥ आहोंनमः शिवायेति मंत्रमाद्यं शिवः स्वयम् ॥ १५ ॥ किं तस्य बहुभिर्मंत्रैः किं तीर्थैः किं तपोऽध्वरैः ॥ यस्योंनमः शिवायेति मंत्रो हृदयगोचरः ॥ १६ ॥ तावद्भ्रमंति संसारे दारुणे दुःखसंकुले ॥ यावन्नोच्चारयंतीमं मंत्रं देहभृतः सकृत् ॥ १७ ॥ मंत्राधिराजराजोऽयं सर्ववेदांतशेखरः ॥ सर्वज्ञाननिधानं च सोऽयं चैव षडक्षरः ॥ १८ ॥ कैवल्यमार्गदीपोऽयमविद्यासिंधुवाडवः ॥ महापातकदावाग्निः सोऽयं मंत्रः षडक्षरः ॥ १९ ॥ तस्मात्सर्वप्रदो मंत्रः सोऽयं पञ्चाक्षरः स्मृतः ॥ स्त्रीभिः शूद्रैश्च संकीर्णैर्धार्यते मुक्तिकांक्षिभिः ॥ २० ॥ नास्य दीक्षा न होमश्च न संस्कारो न तर्पणम् ॥ न कालो नोपदेशश्च सदा शुचिरयं मनुः ॥ २१ ॥ महापातकविच्छित्त्यै शिव इत्यक्षरद्वयम् ॥ अलं नमस्क्रियायुक्तो मुक्तये परिकल्पते ॥ २२ ॥ उपदिष्टः सद्गुरुणा जप्तः क्षेत्रे च पावने ॥ सद्यो यथेप्सितां सिद्धिं ददातीति किमद्भुतम् ॥ २३ ॥ अतः सद्गुरुमाश्रित्य

१ निर्मलज्ञानरूपिणे–इति. निर्मलज्ञानहेतवे–इति च पाठान्तरम्। २ समस्तगुणवृत्तये–इ० पा०। ३ तद्भतानां तत्पूजायाश्च–इ० पा०। ४ मनीषिणः–इ० पा०। ५ सोऽयम्–इ० पा०। ६ साक्षात्–इ० पा०। ७ न कालनियमश्चात्र–जप्यः सर्वैरयं मनुः–इ० पा०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

CC-0. In Public Domain. Digitization by eGangotri

॥ अथ श्रीस्कांदे महापुराणे तृतीयब्रह्मोत्तरखण्डप्रारंभः (३-३) ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥इति श्रीस्कान्दे महापुराणे तृतीये ब्रह्मखण्डे द्वितीयं धर्मारण्यमाहात्म्यं समाप्तम्॥(३-२)॥

CC-0. In Public Domain. Digitization by eGangotri

सत्यमंदिरम् ॥ द्वापरे वेदभवनं कालौ मोहेरकं स्मृतम् ॥ ६७ ॥ ॥ ब्रह्मोवाच ॥ ॥ य इदं शृणुयात्पुत्र श्रद्धया परया युतः ॥ धर्मारण्यस्य
माहात्म्यं सर्वकिल्बिषनाशनम् ॥ ६८ ॥ मनोवाक्कायजनितं पातकं त्रिविधं च यत् ॥ तत्सर्वं नाशमायाति श्रवणात्कीर्तनात्सकृत् ॥ ६९ ॥ धन्यं
यशस्यमायुष्यं सुखसंतानदायकम् ॥ माहात्म्यं शृणुयाद्वत्स सर्वसौख्याप्तये नरः ॥ ७० ॥ सर्वतीर्थेषु यत्पुण्यं सर्वक्षेत्रेषु यत्फलम् ॥ तत्फलं सम
वाप्नोति धर्मारण्यस्य सेवनात् ॥ ७१ ॥ ॥ नारद उवाच ॥ ॥ धर्मारण्यस्य माहात्म्यं यच्छ्रुतं त्वन्मुखांबुजात् ॥ धर्मवाप्यां यत्र धर्म्मस्तप
स्तेपे सुदुष्करम् ॥ ७२ ॥ तस्य क्षेत्रस्य महिमा मया त्वत्तोऽवधारितः ॥ स्वस्ति तेऽस्तु गमिष्यामि धर्मारण्यदिदृक्षया ॥ ७३ ॥ तव वाक्यजलौ
घेन पावितोऽहं चतुर्मुख ॥ ७४ ॥ ॥ व्यास उवाच ॥ ॥ इदमाख्यानकं सर्वं कथितं पांडुनंदन ॥ यच्छ्रुत्वा गोसहस्रस्य फलं प्राप्नोति मानवः ॥
॥ ७५ ॥ अपुत्रो लभते पुत्रान्निर्द्धनो धनवान्भवेत् ॥ रोगी रोगात्प्रमुच्येत बद्धो मुच्येत बंधनात् ॥ ७६ ॥ विद्यार्थी लभते विद्यामुत्तमां कर्मसाध
नाम् ॥ तीर्थयात्राफलं तस्य कोटिकन्याफलं लभेत् ॥ ७७ ॥ यः शृणोति नरो भक्त्या नारी वाथ नरोत्तम ॥ निरयं नैव
पश्यंति एकोत्तरशतैः सह ॥ ७८ ॥ शुभे देशे निवेश्याथ क्षौमवस्त्रादिभिस्तथा ॥ पुराणपुस्तकं राजन्प्रयतः शिष्टसंमतः ॥ ७९ ॥ अर्चयेच्च यथा
न्यायं गंधमाल्यैः पृथक्पृथक् ॥ समाप्तौ नृप ग्रंथस्य वाचकस्यानुपूजनम् ॥ ८० ॥ दानादिभिर्यथान्यायं संपूर्णफलहेतवे ॥ मुद्रिकां कुंडले चैव
ब्रह्मसूत्रं हिरण्मयम् ॥ ८१ ॥ वस्त्राणि च विचित्राणि गंधमाल्यानुलेपनैः ॥ देववत्पूजनं कृत्वा गां च दद्यात्पयस्विनीम् ॥ ८२ ॥ एवं विधानतः
श्रुत्वा धर्मारण्यकथानकम् ॥ धर्मारण्यनिवासस्य फलमाप्नोत्यसंशयम् ॥ ८३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये
ब्रह्मखण्डे पूर्वभागे धर्मारण्यमाहात्म्ये धर्मारण्यनिवासिव्यवस्थावर्णनपूर्वकधर्मारण्यपुराणश्रवणमाहात्म्यवर्णनंनामचत्वारिंशोऽध्यायः ॥ ४० ॥

इति श्रीस्कान्दे महापुराणे तृतीये ब्रह्मखण्डे द्वितीयं धर्मारण्यमाहात्म्यं समाप्तम् ॥ (३–२) ॥

॥ ❀ ॥ समाप्तोऽयं तृतीयब्रह्मखण्डपूर्वभागः ॥ ❀ ॥

manuscripts beginning

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इदं पुस्तकं मुम्बय्यां श्रीकृष्णदासात्मजक्षेमराजश्रेष्ठिना
स्वकीये "श्रीवेङ्कटेश्वर" (स्टीम्) मुद्रणालये मुद्रितम् ।
संवत् १९६६, शके १८३१.

CC-0. In Public Domain. Digitization by eGangotri

वेदभ्रष्टाश्च ते विप्रा भविष्यंति कलौ युगे ॥ ४० ॥ ॥ युधिष्ठिर उवाच ॥ ॥ देशेदेशे गमिष्यंति ते विप्रा वणिजस्तथा ॥ कथं वै ज्ञायते सर्वैः केन चिह्नेन मारिष ॥४१॥ यस्मिन्गोत्रे समुत्पन्ना वाडवा ये महाबलाः ॥ ४२ ॥ व्यास उवाच ॥ ज्ञायते गोत्रसंज्ञाऽथ केचिच्चैव पराक्रमैः ॥ यस्ययस्य च यत्कर्म तस्य तस्यावटंककः ॥४३॥ अवटंकैर्हि ज्ञायंते नान्यथा ज्ञायते क्वचित्॥गोत्रैश्च प्रवरैश्चैव अवटंकैर्नृपात्मज॥४४॥ ज्ञायंते हि द्विजा राजन्मोढ ब्राह्मणसत्तमाः ॥ ४५ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ गोत्रैश्च प्रवरैश्चैव श्रुता एते तवाननात् ॥ कां वा शाखामधीयानास्तन्मे ब्रूहि पितामह ॥ ४६ ॥ ॥ ॥ व्यास उवाच ॥ ॥ ज्ञायंते यत्रयत्रस्था माध्यंदिनीया महाबलाः ॥ कौथमीं च समाश्रित्य केचिद्विप्रा गुणान्विताः ॥४७॥ ऋगथर्वणजा शाखा नष्टा सा च महामते ॥ एवं वै वर्तमानास्ते वाडवा धर्मसंभवाः ॥४८॥ धर्मारण्ये महाभागाः पुत्रपौत्रान्विताऽभवन् ॥ शूद्राः सर्वे महाभागाः पुत्रपौत्र समावृताः ॥ ४९ ॥ धर्मारण्ये महातीर्थे सर्वे ते द्विजसेवकाः ॥ अभवन्रामभक्ताश्च रामाज्ञां पालयंति च ॥ ५० ॥ आज्ञामत्याऽऽदरेणेह हनूमंतश्च वीर्यवान् ॥ पालयेत्सोऽपि चेदानीं संप्राप्ते वै कलौ युगे ॥ ५१ ॥ अदृष्टरूपी हनुमांस्तत्र भ्रमति नित्यशः ॥ त्रैविद्या वाडवा यत्र चातुर्विद्यास्तथैव च ॥ ५२ ॥ सभायामुपविष्टा येऽन्यायात्पापं प्रकुर्वते ॥ जयो हि न्यायकर्तॄणामजयोऽन्यायकारिणाम् ॥ ५३ ॥ सापराधे यस्तु पुत्रे ताते भ्रातरि चापि वा ॥ पक्षपातं प्रकुर्वीत तस्य कुप्यति वायुजः ॥ ५४ ॥ कुपितो हनुमानेष धननाशं करोति वै ॥ पुत्रनाशं करोत्येव धामनाशं तथैव च ॥ ५५ ॥ सेवार्थं निर्मितः शूद्रो न विप्रान्परिषेवते ॥ वृत्तिं वा न ददात्येव हनुमांस्तस्य कुप्यति ॥ ५६ ॥ अर्थनाशं पुत्रनाशं स्थाननाशं महाभयम् ॥ कुरुते वायुपुत्रो हि रामवाक्यमनुस्मरन् ॥ ५७ ॥ यत्र कुत्र स्थिता विप्राः शूद्रा वा नृपसत्तम ॥ न निर्द्धना भवेयुस्ते प्रसादाद्राघवस्य च ॥ ५८ ॥ यो मूढश्चाप्यधर्मात्मा पापपाषंडमाश्रितः ॥ निजान्विप्रान्परित्यज्य परज्ञातींश्च मन्यते ॥ ५९ ॥ तस्य पूर्वकृतं पुण्यं भस्मीभवति नान्यथा ॥ अन्येषां दीयते दानं स्वल्पं वा यदि वा बहु ॥ ६० ॥ यथा भवति वै पूर्वं ब्रह्मविष्णुशिवैः कृतम् ॥ तस्य देवा न गृह्णंति हव्यं कव्यं च पूर्वजाः ॥ ६१ ॥ वंचयित्वा निजान्विप्राननन्येभ्यः प्रददेत्तु यः ॥ तस्य जन्मार्जितं पुण्यं भस्मीभवति तत्क्षणात् ॥६२॥ ब्रह्मविष्णुशिवैश्चैव पूजिता ये द्विजोत्तमाः ॥ तेषां ये विमुखाः शूद्रा रौरवे निवसंति ते ॥ ६३ ॥ यो लौल्याच्च कुलाचारं गोत्राचारं प्रलोपयेत् ॥ स्वाचारं यो न कुर्वीत कदाचिद्वै विमोहितः ॥ ६४ ॥ सर्वनाशो भवेत्तस्य भस्मीभवति तत्क्षणात् ॥ तस्मात्सर्वः कुलाचारः स्थानाचारस्तथैव च ॥ ६५ ॥ गोत्राचारः पालनीयो यथावित्तानुसारतः ॥ एवं ते कथितं राजन्धर्मारण्यं पुरातनम् ॥ ६६ ॥ स्थापितं देवदेवैश्च ब्रह्मविष्णुशिवादिभिः ॥ धर्मारण्यं कृतयुगे त्रेतायां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संततिवृद्धये ॥ १६ ॥ तद्धि चार्पयता द्रव्यं वृद्धौ यद्ग्रीणितं पुनः ॥ जन्मनो नंतरं कार्यं जातकर्म यथाविधि ॥ १७ ॥ विप्रानुकीर्तिता याऽत्र
वृत्तिः सापि विभज्यते ॥ प्रथमा लभ्यमाना च वृत्तिर्वै यावती पुनः ॥ १८ ॥ तस्या वृत्तेरर्द्धभागो गोत्रदेव्यै तु कल्प्यताम् ॥ द्विगुणं
वणिजा चैव पुत्रे जाते भवेदिति ॥ १९ ॥ मांडलीयाश्च ये शूद्रास्तेषामर्ककरं त्विदम् ॥ अडालजानां त्रिगुणं गोभुजानां चतुर्गुणम् ॥ २० ॥
इत्येतत्कथितं सर्वमन्यच्च शूद्रजातिषु ॥ यस्य दोषस्तु हत्यायाः समुद्भूतो विधेर्वशात् ॥ २१ ॥ दण्डस्तु विधिवत्तस्य कर्त्तव्यो वेदशास्त्रिभिः ॥
अन्यायो न्यायवादी स्यान्निर्दोषे दोषदायकः ॥ २२ ॥ पंक्तिभेदस्य कर्त्ता च गोसहस्रवधः[1] स्मृतः ॥ वृत्तिभागविभजनं तथा न्यायविचारणम् ॥
श्रीरामदूतकस्याग्रे कर्त्तव्यमिति निश्चयः ॥ २३ ॥ तस्य पूजां प्रकुर्वीत तदा कालेऽथवा सदा ॥ तैलेन लेपयेत्तस्य देहे वै विघ्नशांतये ॥ २४ ॥
धूपं दीपं फलं दद्यात्पुष्पैर्नानाविधैः किल ॥ पूजितो हनुमानेव ददाति तस्य वांछितम् ॥ २५ ॥ प्रतिपुत्रं तु तस्याग्रे कुर्यान्नान्यत्र कुत्रचित् ॥
श्रीमाताबकुलस्वामिभागधेयं तु पूर्वतः ॥ २६ ॥ पश्चात्प्रतिग्रहं विप्रैः कर्त्तव्यमिति निश्चितम् ॥ समागमेषु विप्राणां न्यायान्यायविनिर्णये
॥ २७ ॥ निर्णयं हृदये धृत्वा तत्रस्थं श्रावयेद्द्विजान् ॥ केवलं धर्मबुद्ध्या च पक्षपातं विवर्जयेत् ॥ २८ ॥ सर्वेषां संमतं कार्यं तद्वच्चविकृतमेव
च ॥ आकारितस्ततो विप्रः सभायां भयमेति चेत् ॥ २९ ॥ न तस्य वाक्यं श्रोतव्यं निर्णीतार्थनिवारणे ॥ यस्य वर्जस्तु क्रियते मिलित्वा सर्व
वाडवैः ॥ ३० ॥ खानपानादिकं सर्वं कार्यं तेन विवर्जयेत् ॥ तस्य कन्या न दातव्या तत्संसर्गी च तादृशः ॥ ३१ ॥ ततो दंडं प्रकुर्वीत सर्वैरेव
द्विजोत्तमैः[2] ॥ भोजनं कन्यका[3]दानमिति दाशरथेर्मतम् ॥ ३२ ॥ यत्किंचित्कुरुते पापं लब्धुं स्थलमथापि वा ॥ शुष्कार्द्रं वसते चान्नं तस्मादन्नं परि
त्यजेत् ॥ ३३ ॥ कुर्वंस्तत्पापभागी स्यात्तस्य दंडो यथाविधि ॥ न्यायं न पश्यते[4] यस्तु शक्तौ सत्यां सदा यतः ॥३४॥ पापभागी स विज्ञेय इति
सत्यं न संशयः ॥ उत्कोचं यस्तु गृह्णाति पापिनां दुष्टकर्मिणाम् ॥ सकलं च भवेत्तस्य पापं नैवात्र संशयः ॥३५॥ तस्यान्नं गृह्यते नैव कन्यापि
न कदाचन ॥ हितमाचरते यस्तु पुत्राणामपि वै नरः ॥ ३६ ॥ स एतान्नियमान्सर्वान्पालयेन्नात्र संशयः ॥ एवं पत्रं लिखित्वा तु वाडवास्ते प्रह
र्षिताः ॥ ३७ ॥ प्राप्ते कलियुगे घोरे यथा पापं न कुर्वते ॥ इति ज्ञात्वा तु सर्वे ते न्यायधर्मं प्रचक्रिरे ॥ ३८ ॥ ॥ व्यास उवाच ॥ ॥ कलौ
प्राप्ते द्विजाः सर्वे स्थानभ्रष्टा यतस्ततः॥ पक्षमुत्कलं ग्रहीष्यंति तथा स्युः पक्षपातिनः ॥ ३९ ॥ भोक्ष्यंते म्लेच्छकग्रामान्कोलाविध्वंसिभिः किल ॥

१ गोसहस्रवधः स्मृतः—गोसहस्रवधकर्तुर्यथा पातकं तादृशपातकवान्स्यादित्यर्थः । २ संमतम्—इति शेषः । ३ कर्त्तव्यम्—इति शेषः । ४ आत्मनेपदमार्षम् ।

CC-0. In Public Domain. Digitization by eGangotri

साभ्रमत्यास्तटे केचिद्यत्र कुत्र व्यवस्थिताः ॥ सीतापुरात्तु ये पूर्वं भयभीताः समागताः ॥ ९४ ॥ साभ्रमत्युत्तरे कूले श्रीक्षेत्रे ये व्यवस्थिताः ॥
यदा तेषां पदं स्थानं दत्तं वै सुखवासकम् ॥९५॥ पुनस्तेऽपि गताः सद्यस्तस्मिन्सीतापुरे स्वयम्॥ पंचपञ्चाशद्ग्रामाश्च दत्तास्तु पुनरागमे ॥ ९६ ॥
रामेण मोढविप्राणां निवासांस्तेषु चक्रिरे ॥ वृत्तिबाह्यास्तु ये विप्रा धर्मारण्यांतरस्थिताः ॥ ९७ ॥ नास्माकं वणिजां वृत्तौ ग्रामवृत्तौ न किंचन ॥
प्रयोजनं हि विप्रेंद्रा वासोऽस्माकं तु रोचते ॥ ९८ ॥ इत्युक्ते समनुज्ञातास्त्रैविद्यैस्तैर्द्विजोत्तमैः ॥ तेषु ग्रामेषु ते विप्राश्चातुर्विद्या द्विजोत्तमाः ॥ ९९ ॥
स्वकर्मनिरताः शांताः कृषिकर्मपरायणाः ॥ धर्मारण्यान्नातिदूरे धेनूः संचारयंति ते ॥३००॥ बहवस्तत्र गोपाला बभूवुर्द्विजबालकाः ॥ चातुर्विद्यास्तु
शिशवस्तेषां धेनूरचारयन् ॥ तेषां भोजनकामाय अन्नपानादिसत्कृतम् ॥ १ ॥ अनयन्वै युवतयो विधवा अपि बालकाः ॥ २ ॥ कालेन कियता
राजंस्तेषां प्रीतिरभून्मिथः ॥ गोपाला बुभुजुः प्रेम्णा कुमार्यो द्विजबालिकाः ॥ ३ ॥ जाताः सगर्भास्ताः सर्वा दृष्टास्तैर्द्विजसत्तमैः ॥ परित्यक्ताश्च
सदनाद्धिक्कृताः पापकर्मणा ॥ ४ ॥ तेभ्यो जाता कुमारा ये कातीभा गोलकास्तथा ॥ धेनुजास्ते धरालोके ख्यातिं जग्मुर्द्विजोत्तमाः ॥ ५ ॥ वृत्ति
बाह्यास्तु ते विप्रा भिक्षां कुर्वंति नित्यशः ॥ अन्यच्च श्रूयतां राजंस्त्रैविद्यानां द्विजन्मनाम् ॥ ६ ॥ कुष्ठी कोऽपि तथा पंगुर्मूर्खो वा बधिरोऽपि
वा ॥ काणो वाप्यथ कुब्जो वा बद्धवागथवा पुनः ॥ ७ ॥ अप्राप्तकन्यका ह्येते चातुर्विद्यान्समाश्रिताः ॥ वित्तेन महता राजन्सुतांस्तेषां
कुमारिकाः ॥ ८ ॥ उद्वाहितास्तदा राजंस्तस्माज्जातार्भकास्तु ये ॥ त्रिदलजास्ते विख्याताः क्षितिलोकेऽभवंस्ततः ॥ ९ ॥ वृत्तिं चक्रुर्ब्राह्मणास्तेऽ
न्योन्यं मिश्रसमुद्भवाः ॥ अन्यच्च श्रूयतां राजंस्त्रैविद्यानां द्विजन्मनाम् ॥ १० ॥ रामदत्तेन ग्रामेण करग्रहणहेतवे ॥ एकीभूय द्विजैः सर्वैर्ग्रामं
प्रदाय तं बलिम् ॥ ११ ॥ अर्द्धं निवेदयामासुरर्द्धं चैवोपरक्षितम् ॥ एतल्लब्ध्वं हि मन्वानास्ते द्विजा लौल्यभागिनः ॥ १२ ॥ महास्थानगता
ये च ते हि विस्मयमाययुः ॥ तन्मध्ये कोऽपि विप्रस्तानुवाच कुपितो वचः ॥ १३ ॥ ॥ विप्र उवाच ॥ ॥ अनृतं चैव भाषंते लौल्येन
महता वृताः ॥ पुत्रपौत्रविनाशाय ब्रह्मस्वेष्वतिलोलुपाः ॥ १४ ॥ न विषं विषमित्याहुर्ब्रह्मस्वं विषमुच्यते ॥ विषमेकाकिनं हंति ब्रह्मस्वं
पुत्रपौत्रकम् ॥ १५ ॥ ब्रह्मस्वेन च दग्धेषु पुत्रदारगृहादिषु ॥ न च तेऽपि तिष्ठंति ब्रह्मस्वेन विनाशिताः ॥ १६ ॥ न नाकं लभते सोऽथ ॥१६७॥
सदा ब्रह्मस्वहारकः ॥ यदा वराटिकां चैव ब्राह्मणस्य हरंति ये ॥ १७ ॥ ततो जन्मत्रयाण्येव हर्ता निरयमाव्रजेत् ॥ पूर्वजा नोपभुंजंति

१ अतएव–केचिद्गोलकजातीयाः–स्वान्–गोवर्द्धनजातीन्प्रख्यापयन्ति–कुत्रचित्प्रदेशेषु तत्रेदं रहस्यं ज्ञेयम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्प्रदत्तं जलं क्वचित् ॥ १८ ॥ क्षयाहे नोपभुंजंति तस्य पिंडोदकक्रियाः ॥ संततिं नैव लभते लभ्यमाना न जीवति ॥ १९ ॥ यदि जीवति दैवाच्चेद्भ्रष्टाचारा भवेदिति ॥ ३२० ॥ एकादशविप्रा ऊचुः ॥ नासत्यं भाषितं विप्राः कथं दूषयसे हि नः ॥ अपराधं विना कस्य कटूक्तिर्युज्यते किल ॥ २१ ॥ तच्छ्रुत्वा तैर्द्विजैः पार्थ ग्रामग्राहयिता वणिक् ॥ परिपृष्टः स तत्सर्वं कथयामास कारणम् ॥ २२ ॥ वणिजैरेव मे दत्तो बलिश्च द्विजसत्तमाः ॥ तत्सर्वं शुद्धभावेन कथितं तु द्विजन्मसु ॥ २३ ॥ ततोऽर्द्धदलं ज्ञात्वा ते कुपिता द्विजपुत्रकाः ॥ वृत्तेर्बहिष्कृतास्ते वै एकादश द्विजास्ततः ॥ २४ ॥ एकादशसमा ज्ञातिर्विख्याता भुवनत्रये ॥ न तेषां सह संबन्धो न विवाहश्च जायते ॥ २५ ॥ एकादशसमा ये च बहिर्ग्रामे वसंति ते ॥ एवं भेदाः समभवन्नाना मोढद्विजन्मनाम् ॥ युगानुसारात्कालेन ज्ञातीनां च वृषस्य वा ॥ ३२६ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे पूर्वभागे धर्मारण्यमाहात्म्ये ज्ञातिभेदवर्णनंनामैकोनचत्वारिंशोऽध्यायः ॥ ॥ ३९ ॥ ॥ छ ॥ ॥ नारद उवाच ॥ ॥ ज्ञातिभेदे तु संजाते तस्मिन्मोहेरके पुरे ॥ त्रैविद्यैः किं कृतं ब्रह्मंस्तन्ममाचक्ष्व पृच्छतः ॥ १ ॥ ॥ ॥ ब्रह्मोवाच ॥ ॥ स्वस्थाने वाडवाः सर्वे हर्षनिर्भरमानसाः ॥ अग्निहोत्रपराः केऽपि केऽपि यज्ञपरायणाः ॥ २ ॥ केऽपि चाग्निसमाधानाः केऽपि स्मार्ता निरंतरम् ॥ पुराणन्यायवेत्तारो वेदवेदांगवादिनः ॥ ३ ॥ सुखेन स्वान्सदाचारान्कुर्वन्तो ब्रह्मवादिनः ॥ एवं धर्मसमाचारान्कुर्वतां कुशलात्मनाम् ॥ ४ ॥ स्थानाचारान्कुलाचारानधिदेव्याश्च भाषितान् ॥ धर्मशास्त्रस्थितं सर्वं काजेशैरुदितं च यत् ॥ ५ ॥ परंपरागतं धर्ममूचुस्ते वाडवोत्तमाः ॥ ६ ॥ ॥ ब्राह्मणा ऊचुः ॥ ॥ उपास्ते यश्च लिखितं रक्तपादैस्तु वाडवाः ॥ ज्ञातिश्रेष्ठः स विज्ञेयो बलिर्देयस्ततः परम् ॥ ७ ॥ रक्तचंदनं प्रसाध्याथ प्रसिद्धं स्वकुलं तथा ॥ कुंकुमारक्तपादैस्तैर्गंधपुष्पादिचर्चितैः ॥ ८ ॥ संभूय लिखितं तच्च रक्तपादं तदुच्यते ॥ रामस्य लेख्यं ते सर्वे पूजयंतु समाहिताः ॥ ९ ॥ रामस्य करमुद्रां च पूजयंतु द्विजाः सदा ॥ येषां दोषाः सदाचारे व्यभिचारादयो यदि ॥ ॥ १० ॥ तेषां दण्डो विधेयस्तु य उक्तो विधिवद्द्विजैः ॥ चिह्नं न राममुद्राया यावद्दंडं ददाति न ॥ ११ ॥ विना दण्डप्रदानेन मुद्राचिह्नं न धार्यते ॥ मुद्राहस्ताश्च विज्ञेया वाडवा नृपसत्तम ॥ १२ ॥ पुत्रे जाते पिता दद्याच्छ्रीमात्रे तु बलिं सदा ॥ पलानि विंशतिः सर्पिर्गुडः पंचपलानि च ॥ १३ ॥ कुंकुमादिभिरभ्यर्च्य जातमात्रः सुतस्तदा ॥ षष्ठे च दिवसे राजन्षष्ठीं पूजयते सदा ॥ १४ ॥ दद्यात्तत्र बलिं साज्यं कुर्याद्द्विबलिपंचकम् ॥ पंचप्रस्थान्बलीन्दद्यात्सवस्त्राञ्छ्रीफलैर्युतान् ॥ १५ ॥ कुंकुमादिभिरभ्यर्च्य श्रीमात्रे भक्तिपूर्वकम् ॥ वित्तशाठ्यं न कुर्वीत कुले

CC-0. In Public Domain. Digitization by eGangotri

त्तमं स्थानम्॥५२॥ देहोलं परमं स्थानं ब्राह्मणानां परंतप ॥ कुशवंशोद्भवा विप्रास्तत्र जाता नृसत्तम ॥ पूर्वोक्तप्रवराण्येव देवी पूर्वोदिता मया॥६९॥
तस्मिन्गोत्रे द्विजा जाताः पूर्वोक्तगुणशालिनः ॥२७०॥ इति त्रिपंचाशत्तमं स्थानम् ॥ ५३ ॥ सोहासीयापुरं स्थानं गोत्रत्रितयमेव हि ॥ भारद्वाज
स्तथा ख्यातं गोत्रं वत्सं तथैव च ॥७१॥ यक्षिणी ज्ञानजा चैव सिहोली च यथाक्रमम्॥एतद्वंशपरीक्षा च पूर्वोक्ता नृपसत्तम ॥७२॥ इति चतुःपंचा
शत्तमंस्थानम् ॥५४॥ पंचपंचाशकं स्थानं प्रवक्ष्यामि तवाधुना ॥ नाम्ना संहालियास्थानं दत्तं रामेण वै पुरा ॥७३॥ तत्र वै कुत्सगोत्रस्था ब्राह्मणां
ब्रह्मवर्चसः॥ स्वधर्मनिरता नित्याः स्वकर्म्मनिरताश्च ते ॥७४ ॥ आंगिरसांबरीषेच यौवताश्वमतः परम् ॥ शांता चैवात्र वै देवी शांतिकर्म्मणि शा
तिदा ॥ ७५ ॥ इति पंचपंचाशत्तमं स्थानम् ॥ ५५ ॥ एवं मया ते गोत्राणि स्थानान्यपि तथैव च ॥ प्रवराणि तथैवात्र ब्राह्मणानां परंतप ॥७६॥
अतः परं प्रवक्ष्यामि त्रैविद्यानां परंतप ॥ स्वस्थानं च मया प्रोक्तं यथानुक्रमेण तु ॥ ७७ ॥ शीलायाः प्रथमं स्थानं मंडोरा च द्वितीयकम् ॥ एवडी
च तृतीयं हि गुंदराणा चतुर्थकम् ॥७८॥ पंचमं कल्याणीया देगामा षष्ठकं तथा ॥ नायकपुरा सप्तमं च डलीआ चाष्टमं तथा ॥ ७९ ॥ कडोव्या
नवमं चैव कोहाटोया दशमं तथा॥हरडीयैकादशं चैव भदुकीया द्वादशं तथा ॥२८०॥ संप्राणावा तथा चात्र कंदरावा प्रकीर्तितम् ॥ वासरोवा त्रयो
दशं शरंडावा चतुर्दशम् ॥ ८१ ॥ लोलासणा पंचदशं वारोला षोडशं तथा ॥ नागलपुरा मया चात्र उक्तं सप्तदशं तथा ॥ ८२ ॥ ॥ ब्रह्मोवाच ॥ ॥
चातुर्विद्यास्तु ये विप्रा नागताः पुनरागताः ॥ वसतिं तत्र रम्ये च चक्रिरे ते द्विजोत्तमाः ॥ ८३ ॥ चतुर्विंशतिसंख्याका रामशासनलिप्सया ॥ हनू
मंतं प्रति गता व्यावृत्ताः पुनरागताः ॥८४॥ तेषां दोषात्समस्तास्ते स्थानभ्रंशत्वमागताः॥ कियत्काले गते तेषां विरोधः समपद्यत ॥ ८५ ॥ भिन्ना
चारा भिन्नभाषा वेशसंशयमागताः ॥ पंचदशसहस्राणि मध्ये ये के च वाडवाः॥८६॥ कृषिकर्मरता आसन्केचिद्यज्ञपरायणाः॥ केचिन्मल्लाश्च संजा
ताः केचिद्वै वेदपाठकाः ॥८७॥ आयुर्वेदरताः केचित्केचिद्रजकयाजकाः ॥ संध्यास्नानपराः केचिन्नीलीकर्तृप्रयाजकाः ॥ ८८ ॥ तंतुक्रयाचनरता
स्तंतुवायादियाचकाः ॥ कलौ प्राप्ते द्विजा भ्रष्टा भविष्यंति न संशयः ॥ ८९ ॥ शूद्रेषु जातिभेदः स्यात्कलौ प्राप्ते नराधिप ॥ भ्रष्टाचाराः परं ज्ञा
त्वा ज्ञातिबंधेन पीडिताः ॥ २९० ॥ भोजनाच्छादने राजन्परित्यक्ता निजैर्जनैः ॥ न कोऽपि कन्यां विवहेत्संसर्गेण कदाचन ॥ ततस्ते वणिजो राजं
स्तैलकाराः कलौ किल ॥ ९१ ॥ केचिच्च कलकाराश्च केचित्तंदुलकारिणः ॥ राजपुत्राश्रिताः केचिन्नानावर्णसमाश्रिताः ॥ कलौ प्राप्ते तु
वणिजो भ्रष्टाः केपि महीतले ॥ ९२ ॥ तेषां तु पृथगाचाराः सम्बन्धाश्च पृथक्कृताः ॥ सीतापुरे च वसतिः केषांचित्समजायत ॥ ९३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

शितम् ॥ गोतीआनामसंज्ञा तु कुशगोत्रमिहास्ति च ॥ ४४ ॥ विश्वामित्रं प्रथमं चैव द्वितीयं देवरातकम् ॥ तृतीयमौदलं चैव प्रवरत्रितयं त्विदम् ॥ ४५ ॥ यक्षिणी चात्र वै देवी राक्षसानां प्रभंजनी ॥ अस्मिन्वंशे च ये जाता ब्राह्मणा ब्रह्मतत्पराः ॥ ४६ ॥ धर्मे मतिप्रवृत्ताश्च धर्मशास्त्रेषु निष्ठिताः ॥ ४७ ॥ इति षट्चत्वारिंशं स्थानम् ॥ ४६ ॥ सप्तचत्वारिंशकं च संस्थानं परिकीर्तितम् ॥ वरलीयाख्यसंस्थानं पवित्रं परमं मतम् ॥ ४८ ॥ भारद्वाजं तथा गोत्रं प्रवराणि तथैव च ॥ यक्षिणी चात्र वै देवी कुलदेवी प्रकीर्तिता ॥ ४९ ॥ आंगिरसं बार्हस्पत्यं भारद्वाजं तृतीयकम् ॥ अस्मिन्वंशे च ये जाताः ब्राह्मणा पूतमूर्तयः॥ २५० ॥ येषां वाक्योदकेनैव शुध्यंति पापिनो नराः ॥ ५१ ॥ इति सप्तचत्वारिंशकं स्थाम् ॥ ४७ ॥ दुधीयाख्यं परं स्थानं गोत्रद्वितयमेव च ॥ धारणसं तथा गोत्रमांगिरकसमेव च ॥ ५२ ॥ अंगस्तिदार्ढच्युतइध्मवाहनसंज्ञकम् ॥ छत्राई च महादेवी द्वितीयं प्रवरं शृणु ॥ ५३ ॥ आंगिरसांबरीषौ च यौवनाश्वस्तृतीयकः ॥ ज्ञानदा शेषला चैव ज्ञानदा सर्वदेहिनाम् ॥ ५४ ॥ अस्मिन्वंशे समुत्पन्ना वाडवा दुःसहा नृप ॥ मदोत्कटा महाकायाः प्रलंभाश्च मदोद्धताः ॥ ५५ ॥ क्लेशरूपाः कृष्णवर्णाः सर्वशास्त्रविशारदाः ॥ बहुसुग्धनिनो दक्षा द्वेषपापविवर्जिताः ॥ ५६ ॥ इत्यष्टाचत्वारिंशकं स्थानम् ॥ ४८ ॥ हासोलासं प्रवक्ष्यामि स्वस्थानं चात्र संश्रुतम् ॥ शांडिल्यगोत्रं चैवात्र प्रवरैः पंचभिर्युतम् ॥ ५७ ॥ भार्गवच्यावनाप्नवानौर्वं वै जामदग्न्यकम् ॥ यक्षिणी चात्र वै देवी पवित्रा पापनानिशी ॥ ५८ ॥ अस्मिन्वंशे च ये जाता ब्राह्मणाः स्थूलदेहिनः ॥ लंबोदरा लंबकर्णा लंबहस्ता महाद्विजाः ॥ ५९ ॥ अरोगिणः सदा देवाः सत्यव्रतपरायणाः ॥ ॥ २६० ॥ इत्येकोनपञ्चाशत्तमं स्थानम् ॥ ४९ ॥ वैहालाख्यं च संस्थानं पंचाशत्तममेव हि ॥ कुशगोत्रं तथा चैव देवी चात्र महाबला ॥ ६१ ॥ अस्मिन्गोत्रे भवा विप्रा दुष्टाः कुटिलगामिनः ॥ धनिनो धर्मनिष्ठाश्च वेदवेदांगपारगाः ॥ ६२ ॥ दानभोगरताः सर्वे श्रौते च कृतबुद्धयः ॥ ६३ ॥ इति पञ्चाशत्तमं स्थानम् ॥ ५० ॥ असाला परमं स्थानं प्रवरद्वयमेव हि ॥ कुशं च धारणं चैव प्रवराणि क्रमेण तु ॥६४॥ विश्वामित्रो देवरातो देवलस्तु[1] तृतीयकः ॥ ज्ञानजा च तथा देवी गोत्रदेवी प्रकीर्तिता ॥ ६५ ॥ इत्येकपंचाशत्तमं स्थानम् ॥ ५१ ॥ नालोला परमं स्थानं द्विपंचाशत्तमं किल ॥ वत्सगोत्रं तथा ख्यातं द्वितीयं धारणसं तथा ॥ ६६ ॥ प्रवराश्चैव पूर्वोक्ता देव्युक्ता पूर्वमेव हि ॥ अस्मिन्वंशे च ये जाताः पवित्राः परमा मताः ॥ ६७ ॥ बहुनोक्तेन किं विप्राः सर्व एवात्र सत्तमाः ॥ सर्वे शुद्धा महात्मानः सर्वे कुलपरंपराः॥६८॥ इति द्वापञ्चाश

१ औदलस्तु तृतीयकः–इ० पा० ।

CC-0. In Public Domain. Digitization by eGangotri

मेव च ॥२२०॥ प्रथमं कुत्सवत्साख्यौ भारद्वाजस्तृतीयकः ॥ आंगिरसोंबरीषश्च यौवनाश्वस्तृतीयकः ॥ २१ ॥ भृगुच्च्यवनाप्रवानौर्वजगदग्निस्तथैव च ॥ आंगिरसबार्हस्पत्यभारद्वाजस्तथैव च ॥२२॥ क्षेमला चैव वै देवी धारभट्टारिका तथा ॥ तृतीया क्षेमला प्रोक्ता गोत्रमाता ह्यनुक्रमात् ॥२३॥ अस्मिन्गोत्रे च ये जाता पंचयज्ञरताः सदा ॥ लोभिनः क्रोधिनश्चैव प्रजायन्ते बहुप्रजाः ॥ २४ ॥ स्नानदानादिनिरताः सदा च विजितेंद्रियाः ॥ वापीकूपतडागानां कर्त्तारश्च सहस्रशः ॥ २५ ॥ इति चत्वारिंशं स्थानम् ॥ ४० ॥ बोधणी परमं स्थानं पवित्रं पापनाशनम् ॥ कुशं च कौशिकं चैव गोत्रद्वितयमेव च ॥ २६ ॥ विश्वामित्रश्च प्रथमो देवरातोदलेति च ॥ विश्वामित्राघमर्षणकौशिकेति तथैव च ॥ २७ ॥ यक्षिणी प्रथमा चैव द्वितीया तारणी तथा ॥ अस्मिन्गोत्रे तु ये जाता दुर्बला दीनमानसाः ॥ २८ ॥ असत्यभाषिणो विप्रा लोभिनो नृपसत्तम ॥ सर्वविद्याकुशलिनो ब्राह्मणा ब्रह्मसत्तमाः ॥ २९ ॥ इत्येकचत्वारिंशं स्थानम् ॥ ४१ ॥ छत्रोटा च परं स्थानं सर्वलोकैकपूजितम् ॥ कुशगोत्रं समाख्यातं प्रवरत्रयमेव हि ॥ २३० ॥ विश्वामित्रो देवरातस्तृतीयो दलमेव वै ॥ चचाई चात्र वै देवी गोत्रदेवी प्रकीर्तिता ॥ ३१ ॥ अस्मिन्वंशे भवाश्चैव वेदशास्त्रपरायणाः ॥ महोदयाश्च ते विप्रा न्यायमार्गप्रवर्तकाः ॥ ३२ ॥ इति द्विचत्वारिंशं स्थानम् ॥ ४२ ॥ खल एवात्र संस्थानं त्रयश्चत्वारिंशमेव हि ॥ वत्सगोत्रोद्भवा विप्राः कृषिकर्मप्रवर्तकाः ॥ ३३ ॥ गोत्रजा ज्ञानजा देवी प्रवराः पंच एव हि ॥ भार्गवच्च्यावनाप्रवानौर्वजामदग्न्येति चैव हि ॥ ३४ ॥ अस्मिन्गोत्रे भवा विप्राः श्रौताग्निसुनिषेवकाः ॥ वेदाध्ययनशीलाश्च तापसाश्चारिमर्दनाः ॥ ३५ ॥ रोषिणो लोभिनो हृष्टा यजने याजने रताः ॥ सर्वभूतदयाविष्टास्तथा परोपकारिणः ॥३६॥ इति त्रयश्चत्वारिंशं स्थानम् ॥ ४३ ॥ वासंतडयां च विप्राणां कुशगोत्रमुदाहृतम् ॥ विश्वामित्रो देवारातस्तृतीयोदलमेव हि ॥३७॥ चचाई चात्र वै देवी गोत्रदेवी प्रकीर्तिता ॥ अस्मिन्वंशे च ये जाताः पूर्वोक्ता ब्रह्मतत्पराः ॥ ३८ ॥ परोपकारिणश्चैव परचित्तानुवर्तिनः ॥ परस्वविमुखाश्चैव परमार्गप्रवर्त्तकाः ॥ ३९ ॥ इति चतुश्चत्वारिंशं स्थानम् ॥ ॥ ४४ ॥ अतः परं च संस्थानं जाखासणमुदाहृतम् ॥ गोत्रं वै वात्स्यसंज्ञं तु गोत्रजा शीहुरी तथा ॥ प्रवराणि च पंचैव मया तव प्रकाशितम् ॥ ॥ २४० ॥ भार्गवच्यावनाप्रवानौर्वपुरोधसः स्मृतः ॥ अस्मिन्वंशे च ये जाता वाडवाः सुखवासिनः ॥ विप्राः स्थूलाश्च ज्ञातारः सर्वकर्मरताश्च वै ॥ ४१ ॥ सर्वे धर्मैकविश्वासाः सर्वलोकैकपूजिताः ॥ वेदशास्त्रार्थनिपुणा यजने याजने रताः ॥ ४२ ॥ सदाचाराः सुरूपाश्च तुंदिला दीर्घदर्शिनः ॥ शीहुरी चात्र वै देवी कुलदेवी प्रकीर्तिता ॥ ४३ ॥ इति पंचचत्वारिंशं स्थानम् ॥ ४५ ॥ षट्चत्वारिंशकं स्थानं मोटानां तु प्रका

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

च ॥ भारद्वाजं नाम चैकं शांडिल्यं च द्वितीयकम् ॥९४॥ आंगिरसो बार्हस्पत्यो भारद्वाजस्तृतीयकः ॥ चचाई चात्र या देवी गोत्रदेवी प्रकीर्तिता ॥ ९५ ॥ काश्यपावत्सारश्च शांडिल्योऽसित एव च ॥ पंचमो देवलश्चैव प्रवराणि यथाक्रमम् ॥ ९६ ॥ ज्ञानजा च तथा देवी कथिता गोत्रदेवता ॥ अस्मिन्गोत्रे च ये जाता निर्लोभाः शुद्धमानसाः ॥९७॥ यदृच्छालाभसंतुष्टा ब्राह्मणा ब्रह्मवित्तमाः ॥९८॥ इति द्वात्रिंशं स्थानम् ॥३२॥ पाटडीया परं स्थानं पवित्रं परिकीर्तितम्॥कुशगोत्रं भवेदत्र प्रवरत्रयसंयुतम् ॥९९॥ विश्वामित्रो देवरातस्तृतीयौदलमेव हि ॥ अस्मिन्गोत्रे च ये जाता वेदशास्त्र परायणाः ॥२००॥ मदोद्धुराश्च ते विप्रा न्यायमार्गप्रवर्तकाः ॥१॥ इति त्रयस्त्रिंशं स्थानम् ॥ ३३ ॥ टीकोलिया परं स्थानं कुशगोत्रं तथैव च ॥ विश्वामित्रो देवरातस्तृतीयौदलमेव च ॥२॥ चचाई चात्र वै देवी गोत्रदेवी प्रकीर्तिता ॥ अस्मिन्गोत्रे भवा विप्राः श्रुतिस्मृतिपरायणाः ॥३॥ रोगिणो लोभिनो दुष्टा यजने याजने रताः ॥ ब्रह्मक्रियापराः सर्वे मोढाः प्रोक्ता मयात्र वै ॥४॥ इति चतुस्त्रिंशं स्थानम् ॥३४॥ गमीधाणीयं परमं स्थानं प्रोक्तं वै पंचत्रिंशकम्॥गोत्रं धारणसं चैव देवी चात्र महाबला॥५॥अगस्तिदार्ढच्युतइध्मवाहनसंज्ञकाः॥अस्मिन्वंशे च ये जाता ब्राह्मणा ब्रह्मतत्पराः ॥ ६ ॥ अलौल्याश्च महाप्राज्ञा वेदाज्ञाप्रतिपालकाः ॥ ७ ॥ इति पंचत्रिंशं स्थानम् ॥३५॥ मात्रा च परमं स्थानं पवित्रं सर्वदेहिनाम् ॥ कुशगोत्रं पवित्रं तु परमं चात्र धिष्ठितम् ॥ ८ ॥ विश्वामित्रो देवरातो दलश्चैव तृतीयकः ॥ ज्ञानदा च महादेवी सर्वलोकैकरक्षिणी ॥ ९ ॥ अस्मिन्वंशे समुद्भूता ब्राह्मणा देवतत्पराः ॥ सस्वाधायवषट्कारा वेदशास्त्रप्रवर्तकाः ॥ २१० ॥ इति षट्त्रिंशं स्थानम् ॥ ३६ ॥ नातमोरा परं स्थानं पवित्रं परमं शुभम् ॥ कुशगोत्रं च तत्रास्ति प्रवरत्रयसंयुतम् ॥ ११ ॥ विश्वामित्रो देवरातस्तृतीयौदलमेव च ॥ ज्ञानजा चात्र वै देवी गोत्रदेवी प्रकीर्तिता ॥ १२ ॥ अस्मिन्वंशे भवा ये च ब्राह्मणा ब्रह्मवित्तमाः ॥ धर्मज्ञाः सत्यवक्तारो व्रतदानपरायणाः ॥ १३ ॥ इति सप्तत्रिंशं स्थानम् ॥ ३७ ॥ बलोला च महास्थानं पवित्रं परमाद्भुतम् ॥ कुशगोत्रं समाख्यातं प्रवरत्रयमेव च ॥ १४ ॥ पूर्वोक्तं प्रवरं चैव देवी चैवात्र मानदा ॥ वंशेस्मिन्परमाः प्रोक्ताः काजेशेन विनिर्मिताः ॥ १५ ॥ असत्यभाषिणो विप्रा लोभिनो नृपसत्तम ॥ सर्वविद्याकुशलिनो ब्राह्मणा ब्रह्मसत्तमाः ॥ १६ ॥ इत्यष्टत्रिंशं स्थानम् ॥ ३८ ॥ राज्यजा च महास्थानं लौगाक्षाप्रवरं तथा ॥ काश्यपावत्सारवाशिष्ठं प्रवरत्रयमेव च ॥ १७ ॥ भद्रा च योगिनी चैव गोत्रदेवी प्रकीर्तिता ॥ अस्मिन्वंशे समुद्भूता ब्राह्मणा वेदतत्पराः ॥ १८ ॥ नित्यस्नाननित्यहोमनित्यदानपरायणाः ॥ नित्यधर्मरताश्चैव नित्यनैमित्तततपराः ॥ १९ ॥ इत्येकोनचत्वारिंशं स्थानम् ॥ ३९ ॥ रूपोला परमं स्थानं पवित्रमतिपुण्यदम् ॥ अस्मिन्गोत्रत्रये चैव देवीत्रितय

Nepal Sanskrit University, Balmeeki Campus

CC-0. In Public Domain. Digitization by eGangotri

सप्तविंशतिमं स्थानं कथितं ब्रह्मवित्तमैः ॥ ६९ ॥ इति सप्तविंशं स्थानम् ॥ २७ ॥ गोधरीयाश्च ये जाता ब्राह्मणा ज्ञानसत्तमाः ॥ गोत्रत्रयमथो वक्ष्ये यथा चैवाप्यनुक्रमात् ॥ १७० ॥ प्रथमं धारणसं चैव जातूकर्णं द्वितीयकम् ॥ तृतीयं कौशिकं चैव यथा चैवाप्यनुक्रमात् ॥७१॥ धारणसगोत्रे ये जाताः प्रवरैस्त्रिभिः संयुताः ॥ अगस्तिश्च दार्ढच्युत इध्मवाहनसंज्ञकः ॥ ७२ ॥ वसिष्ठश्च तथात्रेयो जातूकर्णस्तृतीयकः ॥ विश्वामित्रो माधुच्छंदस अघमर्षणस्तृतीयकः ॥ ७३ ॥ महाबला च मालेया द्वितीया चैव यक्षिणी ॥ तृतीया च महायोगी गोत्रदेव्यः प्रकीर्तिताः ॥ ७४ ॥ अस्मिन्वंशे च ये जाता ब्राह्मणाः सत्यवादिनः ॥ अलौल्याश्च महायज्ञा वेदाज्ञाप्रतिपालकाः ॥ ७५ ॥ इत्यष्टाविंशं स्थानम् ॥ २८ ॥ वाटस्रहाले ये जाता गोत्रत्रितयमेव च ॥ धारणं प्रथमं ज्ञेयं वत्ससंज्ञं द्वितीयकम् ॥ ७६ ॥ तृतीयं कुत्ससंज्ञं च गोत्रदेव्यस्तथैवच ॥ प्रथमं धारणसगोत्रे प्रवरत्रयमेव च ॥ ७७ ॥ अगस्तिदार्ढच्युतश्चैव इध्मवाहन एव च ॥ द्वितीयं वत्ससंज्ञं हि प्रवराणि च पंच वै ॥ ७८ ॥ भृगुच्यवनाप्नवानौर्वजमदग्निस्तथैव च ॥ तृतीयं कुत्ससंज्ञं हि प्रवरत्रयमेव च ॥ ७९ ॥ आंगिरसांबरीषौ च यौवनाश्वस्तृतीयकः ॥ देवी चच्छत्रजा चैव द्वितीया शेषला तथा ॥ १८० ॥ ज्ञानजा चैव देवी च गोत्रदेव्यो ह्यनुक्रमात् ॥ अस्मिन्गोत्रे च ये विप्राः सत्यवादिजितेंद्रियाः ॥ ८१ ॥ सुरूपाश्चाल्पाहाराश्च महादानपरायणाः ॥ निर्द्वेषिणो लोभयुता वेदाध्ययनतत्पराः ॥ ८२ ॥ दीर्घदर्शिनो महातेजा महोत्काः सत्यवादिनः ॥ ॥ ८३ ॥ इत्येकोनत्रिंशं स्थनम् ॥ २९ ॥ माणजा च महास्थानं गोत्रद्वितयमेव च ॥ शांडिल्यश्च कुशश्चैव गोत्रद्वयमितीरितम् ॥ ८४ ॥ काश्यपोऽवत्सारश्च शांडिल्योऽसित एव च ॥ पंचमो देवलश्चैव एकगोत्रं प्रकीर्तितम् ॥८५॥ ज्ञानजा च तथा देवी कथिता चात्र सैव च ॥ द्वितीयं च कुशं गोत्रं प्रवरत्रयमेव च ॥ ८६ ॥ विश्वामित्रो देवराजस्तृतीयौदलमेव च ॥ ज्ञानदा चात्र वै देवी द्वितीया संप्रकीर्तिता ॥ ८७ ॥ अस्मिन्गोत्रे तु ये जाता दुर्बला दीनमानसाः ॥ असत्यभाषिणो विप्रा लोभिनो नृपसत्तम ॥ ८८ ॥ सर्वविद्याकुशलिनो ब्राह्मणा ब्रह्मसत्तमाः ॥ ८९ ॥ इति त्रिंशं स्थानम् ॥३०॥ साणदा च परं स्थानं पवित्रं परमं मतम् ॥ कुशप्रवरजा विप्रास्तत्रस्थाः पावनाः स्मृताः ॥ ९० ॥ विश्वामित्रो देवरातस्तृतीयोदल एव च ॥ ज्ञानदा च महादेवी गोत्रदेवी प्रकीर्तिता ॥ ९१ ॥ अस्मिन्गोत्रे तु ये जाता दुर्बला दीनमानसाः ॥ असत्यभाषिणो विप्रा लोभिनो नृपसत्तम॥९२॥ सर्वविद्याकुशिलिनो ब्राह्मणा ब्रह्मवित्तमाः ॥९३॥ इत्येकत्रिंशं स्थानम् ॥ ३१ ॥ आनन्दीया च संस्थानं गोत्रद्वितयमेव

१ त्रिंशस्थानैकत्रिंशस्थानस्थितानां ब्राह्मणानां च सर्वप्रकारेण समानाभिप्रायेण समानश्लोका एव पठिता इति बोद्धव्यं सुधीभिः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ज्येष्ठलोजा पंचमं च स्वस्थानं प्रतिकीर्तितम् ॥ वत्सशीया कुत्सशीया प्रवरद्वितयं स्मृतम् ॥६७॥ आवरिवृवाप्रःयौवनाश्वभृगुच्यवनआप्नोर्वजमदग्नि
स्तथैव हि ? ॥६८॥ चचाई वत्सगोत्रस्य शांता च कुत्सगोत्रजा ॥ एतैस्त्रिभिः पंचभिश्च द्विजा ब्रह्मस्वरूपिणः ॥६९॥ शांता दांताः सुशीलाश्च धन
पुत्रैश्च संयुताः ॥ वेदाध्ययनहीनाश्च कुशलाः सर्वकर्मसु॥७०॥सुरूपाश्च सदाचाराः सर्वधर्मेषु निष्ठिताः ॥ दानधर्म्मरताः सर्वे अत्रजा जलदा द्विजाः
॥७१॥ इति पंचमं स्थानम् ॥५॥ शेरथाग्रामेषु वै जाताः प्रवरद्वयसंयुताः ॥ कुशभारद्वाजाश्चैव देवीद्वयं तथैव च ॥७२॥ विश्वामित्रो देवरातस्तृतीयौ
दल एव च ॥ आंगिरसबार्हस्पत्यभारद्वाजास्तथैव च॥७३॥कमला च महालक्ष्मीर्द्वितीया यक्षिणी तथा॥अस्मिन्गोत्रे च ये जाताः श्रौतस्मार्त्तरता
बुधाः॥७४॥वेदाध्ययनशीलाश्च तापसाश्चारिमर्द्दनाः॥रोषिणो लोभिनो दुष्टा यजने याजने रताः॥ब्रह्मक्रियापराः सर्वे ब्राह्मणास्ते मयोदिताः ॥७५॥
इति षष्ठं स्थानम्॥६॥ दंतालीया भारद्वाजकुत्सशायास्तथैव च॥आंगिरसबार्हस्पत्यभारद्वाजास्तथैव च॥७६॥देवी च यक्षिणी प्रोक्ता द्वितीया कर्मला
तथा ॥ अस्मिन्गोत्रे च ये जाता वाडवा धनिनः शुभाः ॥७७॥ वस्त्रालंकरणोपेता द्विजभक्तिपरायणाः ॥ ब्रह्मभोज्यपराः सर्वे सर्वे धर्मपरायणाः ॥
॥ ७८ ॥ इति सप्तमं स्थानम् ॥७॥ वडोद्रीयान्वये जाताश्चत्वारः प्रवराः स्मृताः ॥ कुशः कुत्सश्च वत्सश्च भारद्वाजस्तथैव च ॥७९॥ तत्प्रवराण्यहं
वक्ष्ये तथा गोत्राण्यनुक्रमात् ॥ विश्वामित्रो देवरातस्तृतीयौदल एव च ॥ ८० ॥ आंगिरसांबरीषश्च यौवनाश्वस्तृतीयकः ॥ भार्गवश्च्यावनाप्न
वानौर्वजमदग्निस्तथैव च ॥ ८१ ॥ आंगिरसबार्हस्पत्यभारद्वाजास्तथैव च ॥ कर्मला क्षेमला चैव धारभट्टारिका तथा ॥८२॥ चतुर्थी क्षेमला प्रोक्ता
गोत्रमाता अनुक्रमात् ॥ अस्मिन्गोत्रे तु ये जाताः पंचयज्ञरताः सदा ॥ ८३ ॥ लोभिनः क्रोधिनश्चैव प्रजायंते बहुप्रजाः ॥ स्नानदानादि
निरताः सदा विनिर्जितेंद्रियाः ॥ ८४ ॥ वापीकूपतडागानां कर्त्तारश्च सहस्रशः ॥ व्रतशीला गुणज्ञाश्च मूर्खा वेदविवर्जिताः ॥ ८५ ॥ इत्यष्टमं
स्थानम् ॥ ८ ॥ गोदणीयाभिधे ग्रामे गोत्रौ द्वौ तत्र संस्थितौ ॥ वत्सगोत्रं प्रथमकं भारद्वाजं द्वितीयकम् ॥ ८६ ॥ भृगुच्यवनाप्नवानौर्वपुरोध
समेव च ॥ शीहरी प्रथमा ज्ञेया द्वितीया यक्षिणी तथा ॥ ८७ ॥ अस्मिन्गोत्रोद्भवा विप्रा धनधान्यसमन्विताः ॥ सामर्षा लौल्यहीनाश्चद्वेषि
णः कुटिलास्तथा ॥ ८८ ॥ हिंसिनो धनलुब्धाश्च मया प्रोक्तास्तु भूपते ॥ ८९ ॥ इति नवमं स्थानम् ॥ ९ ॥ कण्टवाडीआ ग्रामे विप्राः कुशगोत्र
समुद्भवाः ॥ प्रवरं तस्य वक्ष्यामि शृणु त्वं च नृपोत्तम ॥ ९० ॥ विश्वमित्रो देवरात उदलश्च त्रयः स्मृताः ॥ चचाई देवी सा प्रोक्ता शृणु त्वं नृप
सत्तम ॥ ९१ ॥ यजंते क्रतुभिस्तत्र हृष्टचित्तैकमानसाः ॥ सर्वविद्यासु कुशला ब्राह्मणाः सत्यवादिनः ॥ ९२ ॥ इति दशमं स्थानम् ॥ १० ॥

CC-0. In Public Domain. Digitization by eGangotri

वेखलोया मया प्रोक्ता कुत्सवंशे समुद्भवाः ॥ प्रवरत्रयसंयुक्ताः शृणु त्वं च नृपोत्तम ॥ ९३ ॥ विश्वामित्रो देवराजौदलश्चेति त्रयः स्मृताः ॥ चचाई देवी तेषां वै कुलरक्षाकरी स्मृता ॥ ९४ ॥ ब्राह्मणाश्च महात्मानः सत्त्ववंतो गुणान्विताः ॥ तपस्वियोगिनश्चैव वेदवेदांगपारगाः ॥ ९५ ॥ साधवश्च सदाचारा विष्णुभक्तिपरायणाः ॥ स्नानसंध्यापरा नित्यं ब्रह्मभोज्यपरायणाः ॥ ९६ ॥ अस्मिन्वंशे मया प्रोक्ताः शृणु त्वं च अतः परम् ॥ ९७ ॥ इत्येकादशं स्थानम् ॥ ११ ॥ देहलोडीआ ये प्रोक्ताः कुत्सप्रवरसंयुताः ॥ आंगिरस आंबरीषो युवनाश्वस्तृतीयकः ॥ ९८ ॥ गोत्रदेवी मया प्रोक्ता श्रीशेषदुर्बलेति च ॥ कुत्सवंशे च ये जाताः सद्वृत्ताः सत्यभाषिणः ॥ ९९ ॥ वेदाध्ययनशीलाश्च परच्छिद्रैकदर्शिनः ॥ सामर्षा लौल्यतो हीना द्वेषिणः कुटिलास्तथा ॥ १०० ॥ हिंसिनो धनलुब्धाश्च ये च कुत्ससमुद्भवाः ॥ १ ॥ इति द्वादशं स्थानम् ॥ १२ ॥ कोहे च ब्राह्मणाः प्रोक्ता गोत्रत्रितयसंयुताः ॥ भारद्वाजस्तथा वत्सस्तृतीयः कुश एव च ॥ २ ॥ प्रवराण्यहं तथा वक्ष्ये यथा गोत्रक्रमेण हि ॥ भार्गवच्यवनाप्नवानौर्वजमदग्निस्तथैव च ॥ ३ ॥ कुशप्रवरं तृतीयं तु प्रवरत्रयमेव च ॥ विश्वामित्रो देवरातस्तृतीयौदलमेव च ॥ ४ ॥ यक्षिणी प्रथमा प्रोक्ता द्वितीया शीहुरी तथा ॥ तृतीया चचाई प्रोक्ता यथानुक्रमगोत्रजा ॥ ५ ॥ अस्मिन्गोत्रे भवा विप्राः श्रौतस्मार्त्तरता बुधाः ॥ वेदाध्ययनशीलाश्च तापसाश्चारिमर्दनाः ॥ ६ ॥ रोषिणो लोभिनो दुष्टा यजने याजने रताः ॥ ब्रह्मकर्मपराः सर्वे मया प्रोक्ता द्विजोत्तमाः ॥ ७ ॥ इति त्रयोदशं स्थानम्॥१३॥ चांदणखेडे ये जाता भारद्वाजसमुद्भवाः॥ आंगिरसो बार्हस्पत्यस्तृतीयो भारद्वाजस्तथा ॥८॥ यक्षिणी चास्य वै देवी प्रोक्ता व्यासेन धीमता ॥ भारद्वाजास्तु ये जाता द्विजा ब्रह्मस्वरूपिणः ॥ ९ ॥ शांता दांताः सुशीलाश्च धनपुत्रसमन्विताः ॥ धर्मारण्ये द्विजाः श्रेष्ठाः क्रतुकर्मणि कोविदाः ॥११०॥ गुरुभक्तिरताः सर्वे भासयंति स्वकं कुलम् ॥११॥ इति चतुर्दशं स्थानम् ॥१४॥ थलग्रामे च ये जाता भारद्वाजसमुद्भवाः ॥ आंगिरसो बार्हस्पत्यो भारद्वाजस्तृतीयकः ॥ १२ ॥ अस्मिन्गोत्रे च ये जाता वाडवा धनिनः शुभाः ॥ वस्त्रालंकरणोपेता द्विजभक्तिपरायणाः ॥ १३ ॥ ब्रह्मभोज्यपराः सर्वे सर्वे धर्मपरायणाः ॥ गोत्रदेवी मया ख्याता यक्षिणी नाम रक्षिणी ॥ १४ ॥ इति पंचदशं स्थानम् ॥१५॥ मोऊत्रीयाश्च ये जाता द्वौ गोत्रौ तत्र कीर्तितौ ॥ भारद्वाजःकश्यपश्च देवीद्वितयमेव च ॥ १५ ॥ चामुण्डा यक्षिणी चैव देवी चात्र प्रकीर्त्तिता ॥ कश्यपाऽवत्सारश्चैव नैध्रुवश्च तृतीयकः ॥ १६ ॥ आंगिरसो बार्हस्पत्यो भारद्वाजस्तृतीयकः ॥ प्रियवाक्या महादक्षा गुरु भक्ति रताः सदा ॥ १७ ॥ सदा प्रतिष्ठावंतश्च सर्वभूतहिते रताः ॥ यजंति ते महायज्ञान्काश्यपा ये द्विजातयः ॥ १८ ॥ सर्वेषां याजनकरा याज्ञिकाः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

परमाः स्मृताः ॥ १९ ॥ इति षोडशं स्थानम् ॥ १६ ॥ हाथीजणे च ये जाता वत्सा भारद्वाजास्तथा ॥ ज्ञानजा यक्षिणी चैव गोत्रदेव्यौ प्रकीर्तिते ॥ १२० ॥ अस्मिन्गोत्रे च ये जाताः पंचयज्ञरताः सदा ॥ लोभिनः क्रोधिनश्चैव प्रजावंतो बहुश्रुताः ॥ २१ ॥ स्नानदानादिनिरता विष्णुभक्तिपरायणाः ॥ व्रतशीला गुणज्ञानमूर्खा वेदविवर्जिताः ॥ २२ ॥ इति सप्तदशं स्थानम् ॥ १७ ॥ कपड्वाणजा ब्राह्मणास्तु भारद्वाजाः कुशास्तथा ॥ देवी च यक्षिणी प्रोक्ता द्वितीया चचाई तथा ॥ २३ ॥ आंगिरसबार्हस्पत्यौ भारद्वाजस्तृतीयकः ॥ विश्वामित्रो देवरातस्तृतीयौदलमेव च ॥ २४ ॥ अस्मिन्गोत्रे च ये जाताः सत्यवादिजितव्रताः ॥ जितेंद्रियाः सुरूपाश्च अल्पाहाराः शुभाननाः ॥ २५ ॥ सदोद्यताः पुराणज्ञा महादानपरायणाः ॥ निर्द्वेषिणो लोभयुता वेदाध्ययनतत्पराः ॥ २६ ॥ दीर्घदर्शिनो महातेजा महामायाविमोहिताः ॥ २७ ॥ इत्यष्टादशं स्थानम् ॥ १८ ॥ जन्होरी वाडवाः प्रोक्ताः कुशप्रवरसंयुताः ॥ विश्वामित्रो देवरातस्तृतीयौदल एव च ॥ २८ ॥ तारणी च महामाया गोत्रदेवी प्रकीर्त्तिता ॥ अस्मिन्वंशे समुत्पन्ना वाडवा दुःसहा नृप ॥ २९ ॥ महोत्कटा महाकायाः प्रलंबाश्च महोद्धताः ॥ क्लेशरूपाः कृष्णवर्णाः सर्वशास्त्रविशारदाः ॥ १३० ॥ बहुभुग्धनिनो दक्षा द्वेषपापविवर्जिताः ॥ सुवस्त्रभूषा वैरूपा ब्राह्मणा ब्रह्मवादिनः ॥ ३१ ॥ इत्येकोनविंशतितमं स्थानम् ॥ ॥ १९ ॥ वनोडीयाश्च ये जाता गोत्राणां त्रयमेव च ॥ कुशकुत्सौ च प्रवरौ तृतीयो भारद्वाजस्तथा ॥ ३२ ॥ विश्वामित्रो देवरातस्तृतीयौदलमेव च ॥ आंगिरस आंबरीषो युवनाश्वस्तृतीयकः ॥ ३३ ॥ आंगिरसबार्हस्पत्यभारद्वाजास्तथैव च ॥ शेषला प्रथमा प्रोक्ता तथा शांता द्वितीयका ॥ ३४ ॥ तृतीया धारशांतिश्च गोत्रदेव्यो ह्यनुक्रमात् ॥ अस्मिन्गोत्रे तु ये जाता दुर्बला दीनमानसाः ॥ ३५ ॥ असत्यभाषिणो विप्रा लोभिनो नृपसत्तम ॥ सर्वविद्याकुशलिनो ब्राह्मणा ब्रह्मवित्तमाः ॥ ३६ ॥ इति विंशतितमं स्थानम् ॥ २० ॥ कीणावाचनकं स्थानं यदेकाधिकविंशति ॥ भारद्वाजाश्च विप्रेंद्राः कथिता ब्राह्मणाः शुभाः ॥ ३७ ॥ आंगिरसबार्हस्पत्यभारद्वाजास्तथैव च ॥ यक्षिणी च तथा देवी गोत्रदेवी प्रकीर्तिता ॥ ३८ ॥ अस्मिन्गोत्रे च ये जाता वाडवा धनिनः शुभाः ॥ वस्त्रालंकरणोपेता द्विजभक्तिपरायणाः ॥ ३९ ॥ ब्रह्मभोज्यपराः सर्वे सर्वे धर्म्मपरायणाः ॥ १४० ॥ इत्येकविंशतितमं स्थानम् ॥ २१ ॥ गोविंदणा च स्वस्थाने ये जाता ब्रह्मसत्तमाः ॥ कुशगोत्रं च वै प्रोक्तं प्रवरत्रयमेव च ॥ ॥४१॥ विश्वामित्रो देवरातौदलप्रवरमेव च ॥ चचई च महादेवी गोत्रदेवी प्रकीर्तिता ॥ ४२ ॥ अस्मिन्गोत्रे च ये जाता ब्राह्मणा ब्रह्मवेदिनः ॥ यजंते क्रतुभिस्तत्र हृष्टचित्तैकमानसाः ॥ ४३ ॥ सर्वविद्यासु कुशला ब्रह्मण्या ब्रह्मवित्तमाः ॥ ४४ ॥ इति द्वाविंशतितमं स्थानम् ॥ २२ ॥ थलत्यजा हि

CC-0. In Public Domain. Digitization by eGangotri

ज्येष्ठलोजा पंचमं च स्वस्थानं प्रतिकीर्तितम् ॥ वत्सशीया कुत्सशीया प्रवरद्वितयं स्मृतम् ॥६७॥ आवरिवृवाप्रःयौवनाश्वभृगुच्यवनआप्नोर्वजमदग्नि स्तथैव हि ? ॥६८॥ चचाई वत्सगोत्रस्य शांता च कुत्सगोत्रजा ॥ एतैस्त्रिभिः पंचभिश्च द्विजा ब्रह्मस्वरूपिणः ॥६९॥ शांता दांताः सुशीलाश्च धन पुत्रैश्च संयुताः ॥ वेदाध्ययनहीनाश्च कुशलाः सर्वकर्मसु॥७०॥सुरूपाश्च सदाचाराः सर्वधर्मेषु निष्ठिताः ॥ दानधर्म्मरताः सर्वे अत्रजा जलदा द्विजाः ॥७१॥ इति पंचमं स्थानम् ॥५॥ शेरथाग्रामेषु वै जाताः प्रवरद्वयसंयुताः ॥ कुशभारद्वाजाश्चैव देवीद्वयं तथैव च ॥७२॥ विश्वामित्रो देवरातस्तृतीयौ दल एव च ॥ आंगिरसबार्हस्पत्यभारद्वाजास्तथैव च॥७३॥कमला च महालक्ष्मीर्द्वितीया यक्षिणी तथा॥अस्मिन्गोत्रे च ये जाताः श्रौतस्मार्त्तरता बुधाः॥७४॥वेदाध्ययनशीलाश्च तापसाश्चारिमर्द्दनाः॥रोषिणो लोभिनो दुष्टा यजने याजने रताः॥ब्रह्मक्रियापराः सर्वे ब्राह्मणास्ते मयोदिताः ॥७५॥ इति षष्ठं स्थानम्॥६॥ दंतालीया भारद्वाजकुत्सशायास्तथैव च॥आंगिरसबार्हस्पत्यभारद्वाजास्तथैव च॥७६॥देवी च यक्षिणी प्रोक्ता द्वितीया कर्मला तथा ॥ अस्मिन्गोत्रे च ये जाता वाडवा धनिनः शुभाः ॥७७॥ वस्त्रालंकरणोपेता द्विजभक्तिपरायणाः ॥ ब्रह्मभोज्यपराः सर्वे सर्वे धर्मपरायणाः ॥ ॥ ७८ ॥ इति सप्तमं स्थानम् ॥७॥ वडोद्रीयान्वये जाताश्चत्वारः प्रवराः स्मृताः ॥ कुशः कुत्सश्च वत्सश्च भारद्वाजस्तथैव च ॥७९॥ तत्प्रवराण्यहं वक्ष्ये तथा गोत्राण्यनुक्रमात् ॥ विश्वामित्रो देवरातस्तृतीयौदल एव च ॥ ८० ॥ आंगिरसांबरीषश्च यौवनाश्वस्तृतीयकः ॥ भार्गवश्च्यावनाप्न वानौर्वजमदग्निस्तथैव च ॥ ८१ ॥ आंगिरसबार्हस्पत्यभारद्वाजास्तथैव च ॥ कर्मला क्षेमला चैव धारभट्टारिका तथा ॥८२॥ चतुर्थी क्षेमला प्रोक्ता गोत्रमाता अनुक्रमात् ॥ अस्मिन्गोत्रे तु ये जाताः पंचयज्ञरताः सदा ॥ ८३ ॥ लोभिनः क्रोधिनश्चैव प्रजायंते बुहुप्रजाः ॥ स्नानदानादि निरताः सदा विनिर्जितेंद्रियाः ॥ ८४ ॥ वापीकूपतडागानां कर्त्तारश्च सहस्रशः ॥ व्रतशीला गुणज्ञाश्च मूर्खा वेदविवर्जिताः ॥ ८५ ॥ इत्यष्टमं स्थानम् ॥ ८ ॥ गोदणीयाभिधे ग्रामे गोत्रौ द्वौ तत्र संस्थितौ ॥ वत्सगोत्रं प्रथमकं भारद्वाजं द्वितीयकम् ॥ ८६ ॥ भृगुच्यवनाप्नवानौर्वपुरोध समेव च ॥ शीहरी प्रथमा ज्ञेया द्वितीया यक्षिणी तथा ॥ ८७ ॥ अस्मिन्गोत्रोद्भवा विप्रा धनधान्यसमन्विताः ॥ सामर्षा लौल्यहीनाश्चद्वेषि णः कुटिलास्तथा ॥ ८८ ॥ हिंसिनो धनलुब्धाश्च मया प्रोक्तास्तु भूपते ॥ ८९ ॥ इति नवमं स्थानम् ॥ ९ ॥ कण्टवाडीआ ग्रामे विप्राः कुशगोत्र समुद्भवाः ॥ प्रवरं तस्य वक्ष्यामि शृणु त्वं च नृपोत्तम ॥ ९० ॥ विश्वमित्रो देवरात उदलश्च त्रयः स्मृताः ॥ चचाई देवी सा प्रोक्ता शृणु त्वं नृप सत्तम ॥ ९१ ॥ यजंते क्रतुभिस्तत्र हृष्टचित्तैकमानसाः ॥ सर्वविद्यासु कुशला ब्राह्मणाः सत्यवादिनः ॥ ९२ ॥ इति दशमं स्थानम् ॥ १० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कुत्सं भारद्वाजं तथैव च ॥ राज्ञः पुरं नवमं च भारद्वाजप्रवरमेव च ९ ॥ ४२ ॥ कृष्णवाटं दशमं चैव कुशप्रवरमेव च ॥ दहलोडमेकादशं वत्सप्रवरमेव हि ॥ ४३ ॥ चेखलीद्वादशं पौकक्कुशप्रवरमेव च ॥ ४४ ॥ चांचोदखे १२ देहोलोडी अत्रयश्च वत्सकुत्सकश्चैव ॥ भारद्वाजीकोणाया च भारद्वाजगोलंहणाशकुस्तथा ॥ ४५ ॥ थलत्यजाद्वये चैव कुशधारणमेव च ॥ नारणसिद्धा च स्वस्थानं कुत्सं गोत्रं प्रकीर्तितम् ॥ ४६ ॥ भालजां कुत्सवत्सौ च मोहोवी आकुशस्तथा ॥ ईयाश्लीआ शांडिलश्च गोधरीपात्रमेव च ॥ ४७ ॥ आनंदीया द्वे चैव भारद्वाजशांडिलश्चैवपाटडीआ कुशमेव च ॥ ४८ ॥ वांसडीआश्चैव जास्त्रा कौत्समणा वत्सआत्रेयौ गीता आकुशगौतमौ ॥ ॥ ४९ ॥ चरणीआ भारद्वाजः दुधीआधारणसा हि अहो सोन्नामांडिल्यस्तथा ॥ ५० ॥ वैलोला हुशश्चैवा असाला कुशश्चैव धारणा च द्वितीयकम् ॥ ५१ ॥ नालोला वत्सधारणीया च देलोला कुत्समेव च ॥ सोहासीया भारद्वाजकुशवत्समेव च ॥ ५२ ॥ सुहालीआ वत्सं वै प्रोक्तं गोत्राणि यथाक्रमम् ॥ मया प्रोक्तानि चैवात्र स्वस्थानानि यथाक्रमम् ॥ ५३ ॥ शीतवाडिया ये प्रोक्ताः कुशो वत्सस्तथैव च ॥ विश्वामित्रो देवरातस्तृतीयो दलमेव च ॥ ५४ ॥ भार्गवच्यावनाप्रवानौर्वजमदग्निरेव हि ॥ वचार्द्दशेषावुटला गोत्रदेव्यः प्रकीर्तिताः ॥ ५५ ॥ इति प्रथमं गोत्रम् ॥ १ ॥ श्रीक्षेत्रं द्वितीयं प्रोक्तं गोत्रद्वितयमेव च ॥ छांदनसस्तथा वत्सं देवी द्वितयमेव च ॥ ५६ ॥ आंगिरसांबरीषश्च यौवनाश्वस्तथैव च ॥ भृगुच्यवनआप्नवानौर्वजमदग्निमेव च ॥ ५७ ॥ देवी भट्टारिका प्रोक्ता द्वितीया शेपला तथा ॥ एतद्वंशोद्भवा ये च शृणु तान्मुनिसत्तम ॥ ५८ ॥ सक्रोधनाः सदाचाराः श्रौतस्मार्तक्रियापराः ॥ पंचयज्ञरता नित्यं संबंधसमाश्रिताः ॥ क्षतज्ञाः क्रतुजाश्चैव ते सर्वे नृपसत्तमाः ॥ ५९ ॥ इति द्वितीयगोत्रम् ॥ २ ॥ तृतीयं मगोडोआ वै गोत्रद्वितयमेव च ॥ भारद्वाजस्तथा कुत्सं देवी द्वितयमेव च ॥ ६० ॥ आंगिरसबार्हस्पत्यभारद्वाजस्तथैव च ॥ विश्वामित्रदेवरातौप्रवरत्रयमेव च ॥६१॥ शेषला बुधला प्रोक्ताधारशांतिस्तथैव च ॥ अस्मिन्ग्रामे च ये जाता ब्राह्मणाः सत्यवादिनः ॥ ६२ ॥ द्विजपूजाक्रियायुक्ता नानायज्ञक्रियापराः ॥ अस्मिन्गोत्रे समुत्पन्ना द्विजाः सर्वे मुनीश्वराः ॥ ६३ ॥ इति तृतीयगोत्रम् ॥ ३ ॥ चतुर्थं शीहोलियाग्रामं गोत्रद्वितयमेव च ॥ विश्वामित्रदेवराततृतीयौदलमेव च ॥ ६४ ॥ देवी चचाई वै तेषां गोत्रदेवी प्रकीर्तिता ॥ अस्मिन्गोत्रे तु ये जाता दुर्बला दीनमानसाः ॥ ६५ ॥ असत्यभाषिणो विप्रा लोभिनो नृपसत्तम ॥ सर्वविद्याप्रवीणाश्च ब्राह्मणा ब्रह्मसत्तम ॥ ६६ ॥ इति चतुर्थं स्थानम् ॥ ४ ॥

१ प्रथमं तु मोहेरकं स्थानम्—इति त्वत्र वक्तव्यम्, परं तदुल्लेखो न क्वचिद्दृश्यते कुतो नास्तीति तु न विज्ञायते । अथवा पाठः खंडितोऽस्तीति तावदनुमीयते ।

CC-0. In Public Domain. Digitization by eGangotri

विष्टा निग्रंति कुलदेवताः ॥ विवाहोत्सवकाले च मौंजीबंधादिकर्मणि ॥ ९० ॥ मुहूर्तं गणनाथस्य ततः प्रभृति शोभनम् ॥ ९१ ॥ निर्वासितास्तु
ये विप्रा आमराज्ञा स्वशासनात् ॥ पंचदशसहस्राणि ययुस्ते सुखवासकम् ॥ ९२ ॥ पंचपञ्चाशतो ग्रामान्ददौ रामः पुरा स्वयम् ॥ तत्रस्था
वणिजश्चैव तेषां वृत्तिमकल्पयन् ॥ ९३ ॥ अडालजा माण्डलीया गोभूजाश्च पवित्रकाः ॥ ब्राह्मणानां वृत्तिदास्ते ब्रह्मसेवासु तत्पराः ॥ ९४ ॥
इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे पूर्वभागे धर्मारण्यमाहात्म्ये ब्राह्मणानां शासनवृत्तिप्राप्तिवर्णनं नाम
षट्त्रिंशोऽध्यायः ॥ ३८ ॥ ॥ छ ॥ ॥ ब्रह्मोवाच ॥ ॥ शृणु पुत्र प्रवक्ष्यामि रहस्यं परमं मतम् ॥ एते ब्रह्मविदः प्रोक्ताश्चातुर्विद्या महा
द्विजाः ॥ १ ॥ स्वाध्यायाश्च वषट्कारा: स्वधाकाराश्च नित्यशः ॥ रामाज्ञापालकाश्चैव हनुमद्भक्तितत्पराः ॥ २ ॥ एकदा तु ततो देवा ब्रह्माणं
समुपागताः ॥ ब्राह्मणान्द्रष्टुकामास्ते ब्रह्मविष्णुपुरोगमाः ॥ ३ ॥ तान्देवानागतान्दृष्ट्वा स्वस्थानाच्चलितास्तु ते ॥ अर्घपाद्यं पुरस्कृत्य मधुपर्कं
तथैव च ॥ ४ ॥ पूजयित्वा ततो विप्रा देवान्ब्रह्मपुरोगमान् ॥ ब्रह्माग्र उपविष्टास्ते वेदानुच्चारयन्ति हि ॥ ५ ॥ संहितां च पदं चैव क्रमं घनं तथैव
च ॥ उच्चैः स्वरेण कुर्वीत ऋचामृग्वेदसंहिताम् ॥ ६ ॥ सामगाश्च प्रकुर्वंति स्तोत्राणि विविधानि च ॥ शास्त्राणि च तथा याज्यापुरोनुवाक्या
स्तथा ॥ ७ ॥ चतुरक्षरं[1] परं चैव चतुरक्षरमेव च ॥ द्व्यक्षरं च तथापंचाक्षरं द्व्यक्षरमेव च ॥ एतद्यज्ञस्वरूपं च यो जपेज्ज्ञानपूर्वकम् ॥८॥ अंते ब्रह्म
पदप्राप्तिः सत्यंसत्यं वदाम्यहम् ॥ एकाग्रमानसाः सर्वे वेदपाठरता द्विजाः ॥ ९ ॥ तेषामंगणदेशेषु कण्डूयन्ते कचान्मृगाः ॥ ब्राह्मणा वेदमातां[2] च
जपंति विधिपूर्वकम् ॥१०॥ हस्ते धृतांश्च तैर्दर्भान्भक्षंते मृगपोतकाः॥ निर्वैरं तं तदा दृष्ट्वा आश्रमं गृहमेधिनाम् ॥११॥ तुतुषुः परमं देवा ऊचुस्ते च
परस्परम्॥त्रेतायुगमिदानीं च सर्वे धर्मपरायणाः॥१२॥कलिर्दुष्टस्तथा प्रोक्तः किं करिष्यति पापकः॥चातुर्विद्यान्समाहूय ऊचुस्ते त्रय एव च॥१३॥
वृत्त्यर्थं भवतां चैव त्रैविद्यानां तथैव च ॥ विभागं वः प्रदास्यामो यथावत्प्रतिपाल्यताम्॥१४॥ ये वणिजः पुरा प्रोक्ताः षट्त्रिंशच्च सहस्रकाः ॥ त्रिसह
स्रास्तु त्रैविद्या दशपंचसहस्रकाः ॥ १५ ॥ चातुर्विद्यास्तथा प्रोक्ता अन्योन्यं वृत्तिमाश्रिताः ॥ सत्रिभागास्तु त्रैविद्याश्चतुर्भागास्तु चात्रिणः ॥१६॥
वणिजां गृहमागत्य पौरोहित्यस्य नित्यशः ॥ भागं विभज्य संप्रापुः काजेशेन विनिर्मिताः ॥ १७ ॥ परस्परं न विवाहश्चातुर्विद्यत्रिविद्ययोः ॥

१ चतुरक्षरम्—'यजामहे' इति, चतुरक्षरम्—अस्तु श्रौषट्' इति, द्व्यक्षरम्—'यज' इति, पंचाक्षरम्--'ये यजामहे' इति, द्व्यक्षरम्--'वौषट्' इति पंच यज्ञसामयिकान्यध्वर्य्वाद्युच्चारणीयानि वाक्यानि ''चतुर्भिश्च चतुर्भिश्च द्वाभ्यां पञ्चभिरेव च। हूयते च पुनर्द्वाभ्यां स मे विष्णुः प्रसीदतु ॥'' एतस्य वचनस्याप्ययमेवार्थो बोद्धव्यः। २ आर्षःप्रयोगः। वेदमातरम्-इत्यपेक्षितम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चातुर्विद्या मया प्रोक्तास्त्रिविद्यास्तु तथैव च ॥ १८ ॥ त्रैविभागेन त्रैविद्याश्चतुर्भागेन चात्रिणः ॥ एवं ज्ञातिविभागस्तु काजेशेन विनिर्मितः ॥ ॥ १९ ॥ कृतकृत्यास्तु ते विप्राः प्रणेमुस्तान्सुरोत्तमान् ॥ वृत्तिं दत्त्वा ततो देवाः स्वस्थानं च प्रतस्थिरे ॥ २० ॥ पंचपंचाशद्ग्रामाणां ते द्विजाश्च निवासिनः ॥ चतुर्विद्यास्तु ते प्रोक्तास्तदादि तु त्रिविद्यकाः ॥ २१ ॥ चातुर्विद्यस्य गोत्राणि दशपंच तथैव च ॥ भारद्वाजस्तथा वत्सः कौशिकः ८ कुश एव च ॥ २२ ॥ शांडिल्यः ६ कश्यपश्चैव गौतमश्छादनस्तथा ८ ॥ जातूकर्ण्यस्तथा कुंतो वशिष्ठो ११ धारणस्तथा ॥ २३ ॥ आत्रेयो मांडिलश्चैव १४ लौगाक्षश्च १५ ततः परम् ॥ स्वस्थानानां च नामानि प्रवक्ष्याम्यनुपूर्वशः ॥ २४ ॥ सीतापुरं च श्रीक्षेत्रं २ मगोडी च ३ तथा स्मृता ॥ ज्येठलोजस्तथा चैव शेरथा च ततः परम् ॥ २५ ॥ छेदे ताली वनोडी च गोव्यंदली तथैव च ॥ कंटाचोषली चैव कोहेचं चंदनस्तथा ॥२६॥ थलग्रामश्च सोहं च हाथंजं कपडवाणकम् ॥ व्रजन्होरी च वनोडी च फीणां वगोलं दृणस्तथा (?) ॥२७॥ थलजा चारणं सिद्धा भालजाश्च ततः परम् ॥ महोवी आईया मलीआ गोधरी आमतः परम् ॥ २८ ॥ वाठसुहाली तथा चैव माणजा सानदीयास्तथा ॥ आनन्दीया पाटडीअ टीकोलीया ततः परम् ॥ २९ ॥ गंभी धणीआ मात्रा च नातमोरास्तथैव च ॥ वलोला रांत्यजाश्चैव रूपोला बोधणीच वै ॥ ३० ॥ छत्रोटा अलु एवा च वासतडीआमतः परम् ॥ जाषासणा गोतीया च चरणीया दुधीयास्तथा ॥ ३१ ॥ हालोला वैहोला च असाला नालाडास्तथा ॥ देहोलो सौहासीया च संहालीयास्तथैव च ॥ ३२ ॥ स्वस्थानं पंचपचाशद्ग्रामा एते ह्यनुक्रमात् ॥ दत्ता रामेण विधिवत्कृत्वा विप्रेभ्य एव च ॥ ३३ ॥ अतः परं प्रवक्ष्यामि स्वस्थानस्य च गोत्रजान् ॥ तथा हि प्रवरांश्चैव यथावद्विधिपूर्वकम् ॥ ३४ ॥ ज्ञात्वा तु गोत्रदेवीं च तथा प्रवरमेव च ॥ स्वस्थानं जायते चैव द्विजाः स्वस्थानवासिनः ॥ ३५ ॥ ॥ नारद उवाच ॥ ॥ कथं च जायते गोत्रं कथं तु ज्ञायते कुलम् ॥ कथं वा ज्ञायते देवी तद्वदस्व यथार्थतः ॥ ३६ ॥ ॥ ब्रह्मोवाच ॥ ॥ सीतापुरं तु प्रथमं प्रवरद्वयमेव च ॥ कुशवत्सौ तथा चात्र मया ते परिकीर्त्तितौ ॥ ३७ ॥ १ श्रीक्षेत्रे द्वितीयं चैव गोत्राणां त्रयमेव च ॥ छांदनसस्तथा वत्सस्तृतीयं कुशमेव च ॥ ३८ ॥ तृतीयं मुद्गलं चैव कुशभारद्वाजमेव च ३ ॥ शोहोली च चतुर्थं वै कुशप्रवरमेव च ॥ ३९ ॥ ज्येष्ठला पंचमश्चैव वत्सकुशौ प्रकीर्त्तितौ ५ ॥ श्रेयस्थानं हि षष्ठं वै भारद्वाजः कुशस्तथा ॥ ४० ॥ दंताली सप्तमं चैव भारद्वाजः कुशस्तथा १ ॥ वटस्थानमष्टमं च निबोध सुतसत्तम ॥ ४१ ॥ तत्र गोत्रं कुशं

१ अत्र शुद्धप्रयोगा न संति तद्ग्रामनामापरिचयात्तथैव पाठोऽत्र स्थापितोस्माभिः ।

CC-0. In Public Domain. Digitization by eGangotri

पराङ्मुखा ये रामस्य सन्मुखानुगताः किल ॥ ६३ ॥ चातुर्विद्यास्ते विज्ञेया वृत्तिबाह्याः कृतास्तदा ॥ कृतकृत्यस्तदा जातो राजा कुमारपालकः ॥ ६४ ॥ विप्राणां पुरतः प्राह प्रश्रयेण वचस्तदा ॥ ग्रामवृत्तिर्न मे लुप्ता एतद्वै देवनिर्मितम् ॥ ६५ ॥ स्वयं कृतापराधानां दोषो कस्य न दीयते ॥ यथा वने काष्ठवर्षाद्वह्निः स्याद्दैवयोगतः ॥ ६६ ॥ भवद्भिस्तु पणः प्रोक्तो ह्यभिज्ञानस्य हेतवे ॥ रामस्य शासनं कृत्वा वायुपुत्रस्य हेतवे ॥ ६७ ॥ व्यावृत्ता वाडवा यूयं स दोषः कस्य दीयते ॥ अवसाने हरिं स्मृत्वा महापापयुतोऽपि वा ॥ ६८ ॥ विष्णुलोकं व्रजत्याशु संशयस्तु कथं भवेत् ॥ महत्पुण्योदये नृणां बुद्धिः श्रेयसि जायते ॥ ६९ ॥ पापस्योदयकाले च विपरीता हि सा भवेत् ॥ सकृत्पालयते यस्तु धर्मेणैतज्जगत्त्रयम् ॥ ७० ॥ योंतरात्मा च भूतानां संशयस्तत्र नो हितः ॥ इंद्रादयोऽमराः सर्वे सनकाद्यास्तपोधनाः ॥ ७१ ॥ मुक्त्यर्थमर्चयंतीह संशयस्तत्र नो हितः ॥ सहस्रनाम तत्तुल्यं रामनामेति गीयते ॥ ७२ ॥ तस्मिन्ननिश्चयं कृत्वा कथं सिद्धिर्भवेदिह ॥ मम जन्मकृतात्पुण्यादभिज्ञानं ददौ हरिः ॥ ७३ ॥ पाखंडाद्यत्कृतं पापं मृष्टं तद्वः प्रणामतः ॥ प्रसीदंतु भवंतश्च त्यक्त्वा क्रोधं ममाधुना ॥ ७४ ॥ ॥ ब्राह्मणा ऊचुः ॥ ॥ राजन्धर्मो विलुप्तस्ते प्रापितानां तथा पुनः ॥ अवश्यं भाविनो भावा भवंति महतामपि ॥ ७५ ॥ नग्नत्वं नीलकण्ठस्य महाहिशयनं हरेः ॥ एतद्दैव कृतं सर्वं प्रभुर्यः सुखदुःखयोः ॥ ७६ ॥ सत्यप्रतिज्ञास्त्रैविद्या भजंतु रामशासनम् ॥ अस्माकं तु परं देहि स्थानं यत्र वसामहे ॥ ७७ ॥ तेषां तु वचनं श्रुत्वा सुखमिच्छुर्द्विजन्मनाम् ॥ तेषां स्थानं तु दत्तं वै सुखवासं तु नामतः ॥ ७८ ॥ हिरण्यं पुष्पवासांसि गावः कामदुघा नृप ॥ स्वर्णालंकरणं सर्वं नानावस्तुचयं तथा ॥ ७९ ॥ श्रद्धया परया दत्त्वा मुदं लेभे नराधिपः ॥ त्रयीविद्यास्तु ते ज्ञेयाः स्थापिता ये त्रिमूर्तिभिः ॥ ८० ॥ चतुर्थेनैव भूपेन स्थापिताः सुखवासने ॥ ते बभूवुर्द्विजश्रेष्ठाश्चातुर्विद्याः कलौ युगे ॥ ८१ ॥ चातुर्विद्याश्च ते सर्वे धर्मारण्ये प्रतिष्ठिताः ॥ वेदोक्ता आशिषो दत्त्वा तस्मै राज्ञे महात्मने ॥ ८२ ॥ रथैरश्वैरुह्यमानाः कृतकृत्या द्विजातयः ॥ महत्प्रमोदयुक्तास्ते प्रापुर्मोहेरकं महत् ॥ ८३ ॥ पौषशुक्लत्रयोदश्यां लब्धं शासनकं द्विजैः ॥ बलिप्रदानं तु कृतमुद्दिश्य कुलदेवताम् ॥ ८४ ॥ वर्षेवर्षे प्रकर्त्तव्यं बलिदानं यथाविधि ॥ कार्यं च मंगलस्नानं पुरुषेण महात्मना ॥ ८५ ॥ गीतं नृत्यं तथा वाद्यं कुर्वीत तद्दिने ध्रुवम् ॥ तन्मासे तद्दिने नैव वृत्तिनाशो भवेद्यथा ॥ ८६ ॥ दैवादतीतकाले चेत् वृद्धिरापद्यते यदा ॥ तदा प्रथमतः कृत्वा पश्चाद्वृद्धिर्विधीयते ॥ ८७ ॥ ये च भिन्नप्रपाप्रायास्त्रैविद्या मोढवंशजाः ॥ तथा चातुर्वेदिनश्च कुर्वंति गोत्रपूजनम् ॥ ८८ ॥ वर्षमध्ये प्रकुर्वीत तथा सुप्ते जनार्दने ॥ पौषे च लुप्तं कृत्वा च श्रौतं स्मार्त्तं करोति यः ॥ ८९ ॥ तत्र क्रोधसमा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वीत् ॥ वह्निः प्रशाम्यतां विप्राः शासनं वो ददाम्यहम् ॥ ३७ ॥ दासोऽस्मि सांप्रतं विप्रा न मे वागन्यथा भवेत् ॥ यत्पापं ब्रह्महत्यायाः पर
दाराभिगामिनाम् ॥ ३८ ॥ यत्पापं मद्यपानां च सुवर्णस्तेयिनां तथा ॥ यत्पापं गुरुघातानां तत्पापं वा भवेन्मम ॥ ३९ ॥ यंयं
चिंतयते कामं तं तं दास्याम्यहं पुनः ॥ विप्रभक्तिः सदा कार्या रामभक्तिस्तथैव च ॥ ४० ॥ अन्यथा करणीयं मे न कश्चिच्
द्विजोत्तमाः ॥ ४१ ॥ ॥ व्यास उवाच ॥ ॥ तस्मिन्नवसरे विप्रा जाता भूप दयालवः ॥ अन्या या पुटिका चासीत्सा दत्ता
शापशांतये ॥ ४२ ॥ जीवितं चैव तत्सैन्यं जातं क्षिप्तेषु रोमसु ॥ दिशः प्रसन्नाः संजाताः शांता दिग्जनितस्वनाः ॥ ४३ ॥ प्रजा स्वस्था
ऽभवत्तत्र हर्षनिर्भरमानसा ॥ अवतस्थे यथापूर्वं पुत्रपौत्रादिकं तथा ॥ ४४ ॥ विप्राज्ञाकारिणो लोकाः संजाताश्च यथा पुरा ॥ विष्णुधर्मं परित्यज्य
नान्यं जानंति ते वृषम् ॥ ४५ ॥ नवीनं शासनं कृत्वा पूर्ववद्विधिपूर्वकम् ॥ निष्कासितास्तु पाषंडाः कृतशास्त्रप्रयोजकाः ॥ ४६ ॥ वेदबाह्याः
प्रनष्टास्ते उत्तमाधममध्यमाः ॥ षट्त्रिंशच्च सहस्राणि येऽभूवन्गोभुजाः पुरा ॥ ४७ ॥ तेषां मध्यात्तु संजाता अढवीजा वणिग्जनाः ॥ शुश्रूषार्थं
ब्राह्मणानां राज्ञा सर्वे निरूपिताः ॥ ४८ ॥ सदाचाराः सुनिपुणा देवब्राह्मणपूजकाः ॥ त्यक्त्वा पाखण्डमार्गं तु विष्णुभक्तिपरास्तु ते ॥ ४९ ॥
जाह्नवीतीरमासाद्य त्रैविद्येभ्यो ददौ नृपः ॥ शासनं तु यदा दत्तं तेषां वै भक्तिपूर्वकम् ॥ ५० ॥ स्थानधर्मात्प्रचलिता वाडवास्ते समागताः ॥ नृपो
विज्ञापितो विप्रैस्तैरेवं क्लेशकारिभिः ॥ ५१ ॥ ये त्यक्तवाचो विप्रेंद्रास्तान्निःसारय भूपते ॥ परस्परं विवादास्तु संजाता दत्तवृत्तये ॥ ५२ ॥ न्याय
प्रदर्शनार्थं च कारितास्तु सभासदः ॥ हस्ताक्षरेषु दृष्टेषु पृथक्पृथक् प्रपादितम् ॥ ५३ ॥ एतच्छ्रुत्वा ततो राजा तुलादानं चकार ह ॥ दीयमाने
तदा दाने चातुर्विद्या बभाषिरे ॥ ५४ ॥ अस्माभिर्हारिता जातिः कथं कुर्मः प्रतिग्रहम् ॥ निवारितास्तु ते सर्वे स्थानान्मोहेरका द्विजाः ॥५५॥
दशपंच सहस्राणि वेदवेदांगपारगाः ॥ ततस्तेन तदा राजन्राज्ञा रामानुवर्तिना ॥ ५६ ॥ आहूतावाडवांस्तास्तु ज्ञातिभेदं चकार सः ॥ त्रयीविद्या
वाडवा ये सेतुबंधं प्रति प्रभुम् ॥ ५७ ॥ गतास्ते वृत्तिभाजः स्युर्नान्ये वृत्त्यभिभागिनः ॥ तत्र नैव गता ये वै चातुर्विद्यत्वमागताः ॥ ५८ ॥
वणिग्भिर्न च संबंधो न विवाहश्च तैः सह ॥ ग्रामवृत्तौ न संबंधो ज्ञातिभेदे कृते सति ॥५९॥ द्विजभक्तिपराः शूद्राः ये पाखंडैर्न लोपिताः॥ जैन
धर्मात्परावृत्तास्ते गोभूजास्तथोत्तमाः ॥ ६० ॥ ये च पाखंडनिरता रामशासनलोपकाः ॥ सर्वे विप्रास्तथा शूद्रा प्रतिबंधेन योजिताः ॥ ६१ ॥
सत्यप्रतिज्ञां कुर्वाणास्तत्रस्थाः सुखिनोऽभवन् ॥ चातुर्विद्या बहिर्ग्रामे राज्ञा तेन निवासिताः ॥६२॥ यथा रामो न कुप्येत तथा कार्यं मया ध्रुवम् ॥

CC-0. In Public Domain. Digitization by eGangotri

श्रुत्वा वाक्यं ततो विप्रास्तस्य दंतानपीडयन् ॥ १० ॥ विमुच्य दीर्घनिश्वासमूचुस्ते नृपतिं प्रति ॥ रामेण कथितं राजन्धीमता च हनूमता ॥ ११॥
दीयतां विप्रवृत्तिं च धर्मिष्ठोऽसि धरातले ॥ ज्ञायते तव दत्ता स्यान्मदत्ता नैव नैव च ॥१२॥ रक्षस्व रामवाक्यं त्वं यत्कृत्वा त्वं सुखी भव ॥१३॥
॥ ॥ राजोवाच ॥ ॥ यत्र रामहनूमंतौ यांतु सर्वेऽपि तत्र वै ॥ रामो दास्यति सर्वस्वं किं प्राप्ता इह वै द्विजाः ॥ १४ ॥ न दास्यामि न दास्यामि
एकां चैव वराटिकाम् ॥ न ग्रामं नैव वृत्तिं च गच्छध्वं यत्र रोचते ॥ १५ ॥ तच्छ्रुत्वा दारुणं वाक्यं द्विजाः कोपाकुलास्तदा ॥ सहस्व रामकोपं हि
साम्प्रतश्च हनूमंतः ॥ १६ ॥ इत्युक्त्वा हनुमद्दत्ता वामकक्षोद्भवा पुटी ॥ प्रक्षिप्ता चास्य निलये व्यावृत्ता द्विजसत्तमाः ॥ १७ ॥ गते तदा विप्रसंघे
ज्वालामालाकुलं त्वभूत् ॥ अग्निज्वालाकुलं सर्वं संजातं चैव तत्र हि ॥ १८ ॥ दह्यंते राजवस्तूनिच्छत्राणि चामराणि च ॥ कोशागाराणि सर्वाणि
आयुधागारमेव च ॥१९॥ महिष्यो राजपुत्राश्च गजा अश्वा ह्यनेकशः ॥ विमानानि च दह्यंते दह्यंते वाहनानि च ॥२०॥ शिबिकाश्च विचित्रा वै
रथाश्चैव सहस्रशः ॥ सर्वत्र दह्यमानं च दृष्ट्वा राजापि विव्यथे ॥ २१ ॥ न कोपि त्राता तस्यास्ति मानवा भयविक्लवाः ॥ न मंत्रयंत्रैर्वह्निः स साध्यते
न च मूलिकैः ॥ २२ ॥ कौटिल्यकोटिनाशी च यत्र रामः प्रकुप्यते ॥ तत्र सर्वे प्रणश्यंति किं तत्कुमारपालकः ॥ २३ ॥ सर्वं तज्ज्वलितं दृष्ट्वा
नग्नक्षपणकास्तदा ॥ धृत्वा करेण पात्राणि नीत्वा दडान्छुभानपि ॥ २४ ॥ रक्तकंबलिका गृह्य वेपमाना मुहुर्मुहुः ॥ अनुपानहिकाश्चैव नष्टाः सर्वे
दिशो दश ॥ २५ ॥ कोलाहलं प्रकुर्वाणाः पलायध्वमिति ब्रुवन् ॥ दाहिता विप्रमुख्यैश्च वयं सर्वे न संशयः ॥ २६ ॥ केचिच्च भग्नपात्रास्ते भग्नदं
डास्तथापरे ॥ प्रनष्टाश्च विवस्त्रास्ते वीतरागमिति ब्रुवन् ॥ २७ ॥ अर्हंतमेव केचिच्च पलायनपरायणाः ॥ ततो वायुः समभवद्वह्निमांदोलयन्निव ॥
॥ २८ ॥ प्रेषितो वै हनुमता विप्राणां प्रियकाम्यया ॥ धावन्स नृपतिः पश्चादितश्चेतश्च वै तदा ॥ २९ ॥ पदातिरेकः प्ररुदन्क विप्रा इति जल्पकः ॥
लोकाच्छ्रुत्वा ततो राजा गतस्तत्र यतो द्विजाः ॥ ३० ॥ गत्वा तु सहसा राजन्गृहीत्वा चरणौ तदा ॥ विप्राणां नृपतिर्भूमौ मूर्च्छितो न्यपत
त्तदा ॥ ३१ ॥ उवाच वचनं राजा विप्रान्विनयतत्परः ॥ जपन्दाशरथिं रामं रामरामेति वै पुनः ॥ ३२ ॥ तस्य दासस्य दासोहं रामस्य च द्विज
स्य च ॥ अज्ञानतिमिरांधेन जातोस्म्यंधो हि संप्रति ॥ ३३ ॥ अंजनं च मया लब्धं रामनाममहौषधम् ॥ रामं मुक्त्वा हि ये मर्त्या ह्यन्यं देव
मुपासते ॥ दह्यंते तेऽग्निना स्वामिन्यथाहं मूढचेतनः ॥ ३४ ॥ हरिर्भागीरथी विप्रा विप्रा भागीरथी हरिः ॥ भागीरथी हरिर्विप्राः सारमेकं जगत्त्रये ॥
॥ ३५ ॥ स्वर्गस्य चैव सोपानं विप्रा भागीरथी हरिः ॥ रामनाममहारज्वा वैकुंठे येन नीयते ॥ ३६ ॥ इत्येवं प्रणमन्राजा प्रांजलिर्वाक्यमब्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

शीघ्रमागममात्मनः ॥ ६० ॥ ततः संपूज्य तान्सर्वान्गंधतांबूलकुम्कुमैः ॥ शांतिपाठं पठंतस्ते हृष्टा निजगृहान्ययुः ॥ ६१ ॥ आनंदाया महा
पीठे प्रातः पांथाः समुत्थिताः ॥ ददृशुस्ते महास्थानं सोत्कंठा हर्षपूरिताः ॥ ६२ ॥ आश्चर्यं परमं प्रापुः किमेतत्स्थानमुत्तमम् ॥ अयंतुदक्षिण
द्वारे शांतिपाठोऽत्र पठ्यते ॥ ६३ ॥ गृहा रम्याः प्रदृश्यंते शचीपतिगृहोपमाः ॥ प्रासादाः कुलमातॄणां दृश्यंते चाग्निशोभनाः ॥ ६४ ॥ एवं
ब्रुवत्सु विप्रेषु महाशक्तिप्रपूजने ॥ आगतो ब्राह्मणोऽपश्यत्तत्र विप्रकदंबकम् ॥ ६५ ॥ हर्षितो भावितस्तत्र यत्र विप्राः सभासदः ॥ उवाच दिष्ट्या
भो विप्रा ह्यागताः पथिका द्विजाः ॥ ६६ ॥ प्रत्युत्तस्थुस्ततो विप्राः पूजां गृहीत्वा समागताः ॥ प्रत्युत्थानाभिवादौ चाकुर्वंस्ते च परस्परम् ॥ ६७ ॥
तेते संपूज्य वेगात्तु यथायोग्यं यथाविधि ॥ हरीश्वरस्य यद्वृत्तं विप्राग्रे संप्रकाशितम् ॥ ६८ ॥ पथिकानां वचः श्रुत्वा हर्षपूर्णा द्विजोत्तमाः ॥
शांतिपाठं पठन्तस्ते हृष्टा निजगृहान्ययुः ॥ ६९ ॥ विमृश्य मिलिताः प्रातर्ज्योतिर्विद्भिः प्रतिष्ठिताः ॥ ब्राह्मे मुहूर्ते चोत्थाय कान्यकुब्जं गता
द्विजाः ॥७०॥ दोलाभिर्वाहिताः केचित्केचिदश्वै रथैस्तथा ॥ केचित्तु शिबिकारूढा नानावाहनगाश्च ते ॥७१॥ तत्पुरं तु समासाद्य गंगायाः शोभने
तटे ॥ अकुर्वन्वसतिं धीराः स्नानदानादिकर्म्म च ॥ ७२ ॥ चरेण केनचिद्दृष्टाः कथिता नृपसन्निधौ ॥ अश्वाश्च बहुशो दोला रथाश्च बहुशो
वृषाः ॥ ७३ ॥ विप्राणामिह दृश्यंते धर्मारण्यनिवासिनाम् ॥ नूनं ते च समायाता नृपेणोक्तं ममाग्रतः ॥ ७४ ॥ अभिज्ञापय मे पूर्वं प्रेषिताः
कपिसंनिधौ ॥ ७५ ॥ इति श्रीस्कांदे महाराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्ड पूर्वभागे धर्मारण्यमाहात्म्ये ब्राह्मणानां प्रत्यागमन
वर्णनं नाम सप्तत्रिंशोऽध्यायः ॥ ३७ ॥ ॥ छ ॥ ॥ व्यास उवाच ॥ ॥ ततः प्रभाते विमले कृतपूर्वाह्णिकक्रियाः ॥ शुभवस्त्रपरीधानाः फल
हस्ताः पृथक्पृथक् ॥ १ ॥ रत्नांगदाढ्यदोर्दंडा अंगुलीयकभूषिताः ॥ कर्णाभरणसंयुक्ताः समाजग्मुः प्रहर्षिताः ॥ २ ॥ राजद्वारं तु संप्राप्य संत
स्थुर्ब्रह्मवादिनः ॥ तान्दृष्ट्वा राजपुत्रस्तु ईषत्प्रहसितो बली ॥ ३ ॥ रामं च हनुमंतं च गत्वा विप्राः समागताः ॥ श्रूयतां मंत्रिणः सर्वे दृश्यंतो द्विज
सत्तमान् ॥ ४ ॥ एतदुक्त्वा तु वचनं तूष्णीं भूत्वा स्थितो नृपः ॥ ततो द्वित्रा द्विजाः सर्वे उपविष्टाः क्रमात्ततः ॥ ५ ॥ क्षेमं पप्रच्छुर्नृपतिं
हस्तिरथपदातिषु ॥ ततः प्रोवाच नृपतिर्विप्रान्प्रति महामनाः ॥ ६ ॥ अरिहंतप्रसादेन सर्वत्र कुशलं मम ॥ सा जिह्वा या जिनं स्तौ
ति तौ करौ यौ जिनार्चनौ ॥ ७ ॥ सा दृष्टिर्या जिने लीना तन्मनो यज्जिने रतम् ॥ दया सर्वत्र कर्त्तव्या जीवात्मा पूज्यते सदा ॥ ८ ॥
योगशाला हि गंतव्या कर्त्तव्यं गुरुवंदनम् ॥ न चकारं महामंत्रं जपितव्यमहर्निशम् ॥ ९ ॥ पंचूषणं हि कर्त्तव्यं दातव्यं श्रमणे सदा ॥

CC-0. In Public Domain. Digitization by eGangotri

अलभन्त मुदं विप्रा ननृतुः प्रजगुर्भृशम् ॥ जयं चोदैरयन्केऽपि प्रहसन्ति परस्परम् ॥ ३६ ॥ पुलकांकितसर्वाङ्गाः स्तुवन्ति च मुहुर्मुहुः ॥
पुच्छं तस्य च संगृह्य चुचुंबुः केचिदुत्सुकाः ॥ ३७ ॥ ब्रूतेऽन्यो मम यत्नेन कार्यं नियतमेव हि ॥ अन्यो ब्रूते महाभाग मयेदं कृतमित्युत ॥३८॥
ततः प्रोवाच हनुमांस्त्रिरात्रं स्थीयतामिह ॥ रामतीर्थस्य च फलं यथा प्राप्स्यथ वाडवाः ॥ ३९ ॥ तथेत्युक्त्वाथ ते विप्रा ब्रह्मयज्ञं प्रचक्रिरे ॥
ब्रह्मघोषेण महता तद्वनं बधिरं कृतम् ॥ ४० ॥ स्थित्वा त्रिरात्रं ते विप्रा गमने कृतबुद्धयः ॥ रात्रौ हनुमतोऽग्रे त इदमूचुः सुभक्तितः ॥ ४१ ॥
॥ ॥ ब्राह्मणा ऊचुः ॥ ॥ वयं प्रातर्गमिष्यामो धर्मारण्यं सुनिर्मलम् ॥ न विस्मार्या वयं तात क्षम्यतांक्षम्यतामिति ॥ ४२ ॥ ततो वायुसुतो
राजन्पर्वतान्महतीं शिलाम् ॥ बृहतीं च चतुःशालां दशयोजनमायतीम् ॥ ४३ ॥ आस्तीर्य प्राह तान्विप्राञ्छिलायां द्विजसत्तमाः ॥ रक्ष्यमाणा
मया विप्राः शयीध्वं विगतज्वराः ॥ ४४ ॥ इति श्रुत्वा ततः सर्वे निद्रामापुः सुखप्रदाम् ॥ एवं ते कृतकृत्यास्तु भूत्वा सुप्ता निशामुखे ॥
॥ ४५ ॥ कृपालुः स च रुद्रात्मा रामशासनपालकः ॥ रक्षणार्थं हि विप्राणामतिष्ठच्च धरातले ॥ ४६ ॥ ॥ व्यास उवाच ॥ ॥ अर्द्धरात्रे तु
संप्राप्ते सर्वे निद्रामुपागताः ॥ तातं संप्रार्थयामास कृतानुग्रहको भवान् ॥ ४७ ॥ समीरण द्विजानेतान्स्थानं स्वं प्रापयस्व भोः ॥ ततो निद्राभि
भूतांस्तान्वायुपुत्रप्रणोदितः ॥ ४८ ॥ समुद्धृत्य शिलां तां तु पिता पुत्रेण भारत ॥ विशिष्टो यापयामास स्वस्थानं द्विजसत्तमान् ॥ ४९ ॥
षड्भिर्मासैश्च यः पन्था अतिक्रांतो द्विजातिभिः ॥ त्रिभिरेव मुहूर्तैस्तु धर्मारण्यमवाप्तवान् ॥ ५० ॥ भ्रममाणां शिलां ज्ञात्वा विप्र एको
द्विजाग्रतः ॥ वात्स्यगोत्रसमुत्पन्नो लोकान्संगीतवान्कलम् ॥ ५१ ॥ गीतानि गायनोक्तानि श्रुत्वा विस्मयमाययुः ॥ प्रभाते सुप्रसन्ने तु
उदतिष्ठन्परस्परम् ॥ ५२ ॥ ऊचुस्ते विस्मिताः सर्वे स्वप्नोऽयं वाथ विभ्रमः ॥ ससंभ्रमाः समुत्थाय ददृशुः सत्यमंदिरम् ॥ ५३ ॥
अंतर्बुद्ध्या समालोक्य प्रभावो वायुजस्य च ॥ श्रुत्वा वेदध्वनिं विप्राः परं हर्षमुपागताः ॥ ५४ ॥ ग्रामीणाश्च ततो लोका दृष्ट्वा तु
महतीं शिलाम् ॥ अद्भुतं मेनिरे सर्वे किमिदं किमिदं त्विति ॥ ५५ ॥ गृहेगृहे हि ते लोकाः प्रवदंति तथाद्भुतम् ॥ ब्राह्मणैः पूर्यमाणा सा
शिला च महती शुभा ॥ ५६ ॥ अशुभा वा शुभा वापि न जानीमो वयं किल ॥ संवदंते ततो लोकाः परस्परमिदं वचः ॥ ५७ ॥ ॥ व्यास
उवाच ॥ ॥ ततो द्विजानां ते पुत्राः पौत्राश्चैव समागताः ॥ ऊचुस्ते दिष्ट्या भो विप्रा आगताः पथिका द्विजाः ॥ ५८ ॥ ते तु संतुष्टमनसा
सन्मुखाः प्रययुर्मुदा ॥ प्रत्युत्थानाभिवादाभ्यां परिरंभणकं तथा ॥ ५९ ॥ आघ्राणकादींश्च कृत्वा यथायोग्यं प्रपूज्य च ॥ सर्वं विस्तार्य कथितं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चः ॥ शृणुध्वं हि वरं विप्रा यद्वो मनसि रोचते ॥ ९ ॥ ॥ विप्रा ऊचुः ॥ ॥ यदि तुष्टोऽसि देवेश रामाज्ञापालक प्रभो ॥ स्वरूपं दर्शयस्वाद्य लंकायां यत्कृतं हरे ॥ १० ॥ तथा विध्वंसयाद्य त्वं राजानं पापकारिणम् ॥ दुष्टं कुमारपालं हि आमं चैव न संशयः ॥ ११ ॥ वृत्तिलोपफलं सद्यः प्राप्नुयात्त्वं तथा कुरु ॥ प्रतीत्यर्थं महाबाहो किं विलंबं वदस्व नः ॥१२॥ त्वयि चित्तेन दत्तेन स राजा पुण्यभाग्भवेत् ॥ प्रत्यये दर्शिते वीर शासनं पालयिष्यति ॥ १३ ॥ त्रयीधर्म्मः पृथिव्यां तु विस्तारं प्रापयिष्यति ॥ धर्मधीर महावीर स्वरूपं दर्शयस्व नः ॥ १४ ॥ ॥ हनुमानुवाच ॥ ॥ मत्स्वरूपं महाकायं न चक्षुर्विषयं कलौ ॥ तेजोराशिमयं दिव्यमिति जानंतु वाडवाः ॥ १५ ॥ तथापि परया भक्त्या प्रसन्नोऽहं स्तवादिभिः ॥ वसनांतरितं रूपं दर्शयिष्यामि पश्यत ॥ १६ ॥ एवमुक्तास्तदा विप्राः सर्वकार्यसमुत्सुकाः ॥ महारूपं महाकायं महापुच्छसमाकुलम् ॥ १७ ॥ दृष्ट्वा दिव्यस्वरूपं तं हनुमंतं जहर्षिरे ॥ कथंचिद्धैर्यमालंब्य विप्राः प्रोचुः शनैः शनैः ॥ १८ ॥ यथोक्तं तु पुराणेषु तत्तथैव हि दृश्यते ॥ उवाच स हि तान्सर्वांश्चक्षुः प्रच्छाद्य संस्थितान् ॥ १९ ॥ फलानीमानि गृह्णीध्वं भक्षणार्थमृषीश्वराः ॥ एभिस्तु भक्षितैर्विप्रा ह्यतितृप्तिर्भविष्यति ॥ २० ॥ धर्मारण्यं विना चाद्य क्षुधा वः शाम्यति ध्रुवम् ॥ २१ ॥ ॥ व्यास उवाच ॥ ॥ क्षुधाक्रांतैस्तदा विप्रैः कृतं वै फलभक्षणम् ॥ अमृतप्राशनमिव तृप्तिस्तेषामजायत ॥ २२ ॥ न तृषा नैव क्षुच्चैव विप्राः संक्लिष्टमानसाः ॥ अभवन्सहसा राजन्विस्मयाविष्टचेतसः ॥२३॥ ततः प्राहांजनीपुत्रः संप्राप्ते हि कलौ द्विजाः ॥ नागमिष्याम्यहं तत्र मुक्त्वा रामेश्वरं शिवम् ॥ २४ ॥ अभिज्ञानं मया दत्तं गृहीत्वा तत्र गच्छत ॥ तथ्यमेतत्प्रतीयेत तस्य राज्ञो न संशयः ॥ २५ ॥ इत्युक्त्वा बाहुमुद्धृत्य भुजयोरुभयोरपि ॥ पृथग्रोमाणि संगृह्य चकार पुटिकाद्वयम् ॥ २६ ॥ भूर्जपत्रेण संवेष्ट्य ते अदाद्विप्रकक्षयोः ॥ वामे तु वामकक्षोत्थां दक्षिणोत्थां तु दक्षिणे ॥ २७ ॥ कामदां रामभक्तस्य अन्येषां क्षयकारिणीम् ॥ उवाच च यदा राजा ब्रूते चिह्नं प्रदीयताम् ॥ २८ ॥ तदा प्रदीयतां शीघ्रं वामकक्षोद्भवा पुटी ॥ अथवा तस्य राज्ञस्तु द्वारे तु पुटिकां क्षिप ॥ २९ ॥ ज्वालयति च तत्सैन्यं गृहं कोशं तथैव च ॥ महिष्यः पुत्रकाः सर्वं ज्वलमानं भविष्यति ॥ ३० ॥ यदा तु वृत्तिं ग्रामांश्च वणिजानां बलिं तथा ॥ पूर्वं स्थितं तु यत्किंचित्तत्तदास्यति वाडवाः ॥ ३१ ॥ लिखित्वा निश्चयं कृत्वाप्यथ दद्यात्स पूर्ववत् ॥ करसंपुटकं कृत्वा प्रणमेच्च यदा नृपः ॥ ३२ ॥ संप्राप्य च पुरा वृत्तिं रामदत्तां द्विजोत्तमाः ॥ ततो दक्षिणकक्षास्थकेशानां पुटिका त्वियम् ॥ ३३ ॥ प्रक्षिप्यतां तदा सैन्यं पुरावच्च भविष्यति ॥ गृहाणि च तथा कोशः पुत्रपौत्रादयस्तथा ॥ ३४ ॥ वह्निना मुच्यमानास्ते दृश्यंते तत्क्षणादिति ॥ श्रुत्वाऽमृतमयं वाक्यं हनुमंतोदितं परम् ॥३५॥

Nepal Sanskrit University, Varanasi

CC-0. In Public Domain. Digitization by eGangotri

तच्छ्रुत्वा स द्विजः प्राह क्व रामः क्व च वायुजः ॥ ६७ ॥ क्व सेतुबंधरामेशो दूराद्दूरतरो द्विजाः ॥ व्याघ्रसिंहाकुलं चोग्रं वनं घोरतरं महत् ॥ ६८ ॥ गत्वा यस्मान्न वर्तंते तदुग्रमनुजीविनः ॥ निवर्तध्वं महाभागा यदि कार्यं हि मद्वचः ॥ ६९ ॥ अथवा गम्यतां विप्राश्चिरं जीव सुखी भव ॥ वृद्धस्य वाक्यं तच्छ्रुत्वा वाडवाश्चैकमानसाः ॥१७०॥ विप्र गच्छामहे सर्वे रामपार्श्वमसंशयः ॥ म्रियेत यदि मार्गेऽस्मिन्नामलोकमवाप्नुयात् ॥ ७१ ॥ जीवन्वृत्तिमवाप्नोति रामादेव न संशयः ॥ अन्यथा शरणं नास्ति अस्माकं राघवं विना ॥ ७२ ॥ इत्युक्त्वा निर्गताः सर्वे रामदर्शनतत्पराः ॥ दिनांतमतिवाह्याथ प्रभाते विमले पुनः ॥ ७३ ॥ हनुमान्ब्रह्मरूपी स वृद्धः पूर्वगुणान्वितः ॥ कमंडलुधरो धीमानभिवादनतत्परः ॥ ७४ ॥ कुत्रस्थानादिह प्राप्ताः सर्वे यूयं हि वाडवाः ॥ कुत्रास्ति वा महालाभो विवाहोत्सव एव वा ॥ ७५ ॥ इति तस्य वचः श्रुत्वा वाडवा विस्मयं गताः ॥ प्रणामपूर्वां विज्ञप्तिं कथयामासुरादृताः ॥ ७६ ॥ अस्माकं तु पुरा वृत्तं महदाश्चर्यकारकम् ॥ भूमिदेव शृणुष्व त्वं दयालुर्दृश्यसे यतः ॥ ७७ ॥ आदौ सृष्टिसमारंभे स्थापिता केशवेन च ॥ शिवेन ब्रह्मणा चैव त्रिमूर्तिस्थापिता वयम् ॥ ७८ ॥ श्रीरामेण ततः पश्चाज्जीर्णोद्धारेण स्थापिताः ॥ ग्रामाणां वेतनं दत्तं हरिराजेन चादरात् ॥७९॥ चतुश्चत्वारिंशदधिकचतुःशतमितात्मनाम् ॥ ग्रामास्त्रयोदशार्थं सीतापुरसमन्विताः ॥१८०॥ षट्त्रिंशच्च सहस्राणि वणिजो द्विजपालने ॥ गोभूजसंज्ञास्ते शूद्रास्तेभ्यः सपादलक्षकाः ॥ ८१ ॥ ते च जातास्त्रिधा तात गोभूजाडालजास्तथा ॥ मांडलीयास्तथा चैते त्रिविधाश्च मनोरमाः ॥८२॥ वृत्त्यर्थं तेन दत्ता वै ह्यनर्घ्या रत्नकोटयः ॥ तदा ते मोढ १८००० गोभूजा १८००० मांडलीया १२५००० अडालजाः १८००० ॥८३॥ अधुना वाडवश्रेष्ठ आमोनाम महीपतिः ॥ शासनं रामचंद्रस्य न मानयति दुर्मतिः ॥८४॥ जामाता तस्य दुष्टो वै नाम्ना कुमारपालकः ॥ पाषंडैर्वेष्टितो नित्यं कलिधर्मेण संमतः ॥ ८५ ॥ इन्द्रसूत्रेण[2] जैनेन प्रेरितो बौद्धधर्मिणा ॥ शासनं तेन लुप्तं हि रामदत्तं न संशयः ॥ ८६ ॥ वाणिजस्तादृशाः केऽपि तन्मनस्का बभूविरे ॥ निषेधयंति रामं ते हनुमंतं महामतिम् ॥८७॥ प्रत्ययं तु विना विप्रा न दास्यामीति निश्चितम् ॥ तं ज्ञात्वा तु इमे विप्रा रामं शरणमाययुः ॥८८॥ हनुमंतं महावीरं रामशासनपालकम् ॥ तस्माद्गच्छामहे सर्वे रामं प्रति महामते ॥ ८९ ॥ आंजनेयो यदास्माकं न दास्यति समीहितम् ॥ अनाहारव्रतेनैव प्राणांस्त्यक्ष्यामहे वयम् ॥ १९० ॥ अस्माभिस्ते विशेषेण कथितं परिपृच्छते ॥ स्नेहभावं विचिंत्याशु निजवृत्तिं प्रकाशय ॥९१॥ हनुमानुवाच ॥ प्राप्ते कलियुगे विप्राः क्व देवदर्शनं भवेत् ॥ निवर्त्तध्वं

१ प्रत्येकमाशीर्वादाभिप्रायेणैकवचनम् । २ इंद्रसूरिः—इति पूर्वं तन्नामासीत्, अत्र तु—इंद्रसूत्रेण—इत्युक्तम् । तस्मात्—इंद्रसूरिः—इति,—इंद्रसूत्रः—इति च तन्नामनी—इति बोद्धव्यम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हि विप्रेन्द्रा यदीच्छथ सुखं महत् ॥ १२ ॥ व्याघ्रसिंहाकुले शून्ये वने वनगजाश्रिते ॥ बहुदावसमाविष्टे प्रवेष्टुं नैव शक्यते ॥ १३ ॥ ॥ विप्राऊचुः ॥
अतीते दिवसे विप्र एकं कथितवानिदम् ॥ अद्यैव त्वं समागम्य एवमेव प्रभाषसे ॥ १४ ॥ कस्त्वं वाडवरूपेण रामो वाप्यथ वायुजः ॥ सत्यं कथय
नः स्वास्मिन्दयां कृत्वा महाद्विज ॥ १५ ॥ हनुमान्कथयामास गोपितं यद्द्विजाग्रतः ॥ हनुमानित्यहं विप्रा बुध्यध्वं निश्चिता हि माम् ॥ १६ ॥
स्वरूपं प्रकटीकृत्य लांगूलं दर्शयन्महत् ॥ १७ ॥ ॥ हनुमानुवाच ॥ ॥ अयमंभोनिधिः साक्षात्सेतुबंधो मनोरमः ॥ अयं रामेश्वरो देवो
गर्भवासविनाशकृत् ॥ १८ ॥ इयं तु नगरी श्रेष्ठा लंकानामेति विश्रुता ॥ यत्र सीता मया प्राप्ता रामशोकापहारिणी ॥ १९ ॥ तर्जन्यग्रे द्विज
श्रेष्ठा अगम्या मां विना परैः ॥ सा सुवर्णमयी भाति यस्यां राज्ये विभीषणः ॥ २०० ॥ स्थापितो रामदेवेन सेयं लंका महापुरी ॥
नियमस्थैः साधुवृंदैस्तीर्थयात्राप्रसंगतः ॥ २०१ ॥ आनीय गंगासलिलं रामेशमभिषिच्य च ॥ क्षिप्ता एते महाभारा दृश्यंते सागरांतरे ॥२०२॥
निष्पापास्तेन संजाताः साधवस्ते दृढव्रताः ॥ नूनं पुण्योदये वृद्धिः पापे हानिश्च जायते ॥ २०३ ॥ स्थानभ्रष्टाः कृताः पूर्वं चातुर्विद्या द्विजा
तयः ॥ जीर्णोद्धारेण रामेण स्थापिताः पुनरेव हि ॥ पूर्वजन्मनि भो विप्रा हरिपूजा कृता मया ॥ २०४ ॥ सांप्रतं निश्चला भक्तिर्भवत्सेवा हि
दृश्यते ॥ तेन पुण्यप्रभावेण तुष्टो दास्यामि वो वरम् ॥ २०५ ॥ धन्योहं कृतकृत्योहं सुभाग्योहं धरातले ॥ अद्य मे सफलं जन्म जीवितं च
सुजीवितम् ॥ २०६ ॥ यदहं ब्राह्मणानां च प्राप्तवांश्चरणांतिकम् ॥ २०७ ॥ ॥ व्यास उवाच ॥ ॥ दृष्ट्वैव हनुमन्तं ते पुलकांकितविग्रहाः ॥ सग
द्गदं यथोचुस्ते वाक्यं वाक्यविशारदाः ॥ २०८ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे धर्मारण्यमाहात्म्ये
हनुमत्समागमो नाम षट्त्रिंशोऽध्यायः ॥ ३६ ॥ ॥ व्यास उवाच ॥ ॥ ततस्ते ब्राह्मणाः सर्वे प्रत्यूचुः पवनात्मजम् ॥ अधुना सफलं जन्म
जीवितं च सुजीवितम् ॥ १ ॥ अद्य नो मोढलोकानां धन्यो धर्मश्च वै गृहाः ॥ धन्या च सकला पृथ्वी यज्ञधर्मा ह्यनेकशः ॥ २ ॥ नमः श्रीराम
भक्ताय अक्षविध्वंसनाय च ॥ नमो रक्षःपुरीदाहकारिणे वज्रधारिणे ॥ ३ ॥ जानकीहृदयत्राणकारिणे करुणात्मने ॥ सीताविरह
तप्तस्य श्रीरामस्य प्रियाय च ॥ ४ ॥ नमोऽस्तु ते महावीर रक्षास्मान्मज्जतः क्षितौ ॥ नमो ब्राह्मणदेवाय वायुपुत्राय ते नमः ॥ ५ ॥ नमोऽस्तु राम
भक्ताय गोब्राह्मणहिताय च ॥ नमोस्तु रुद्ररूपाय कृष्णवक्त्राय ते नमः ॥ ६ ॥ अंजनीसूनवे नित्यं सर्वव्याधिहराय च ॥ नागयज्ञोपवी
ताय प्रबलाय नमोऽस्तु ते ॥ ७ ॥ स्वयं समुद्रतीर्णाय सेतुबंधनकारिणे ॥ ८ ॥ ॥ व्यास उवाच ॥ ॥ स्तोत्रेणैवामुना तुष्टो वायुपुत्रोऽब्रवीद्

CC-0. In Public Domain. Digitization by eGangotri

स्वधर्मप्रतिपालकाः ॥ ४१ ॥ याजनाध्ययनायुक्ताः काजेशेन विनिर्मिताः ॥ दानं दत्त्वा तु रामेण उक्तं हि भवतां पुनः ॥ ४२ ॥ स्थानं त्यक्त्वा न गंतव्यमित्थं हि नियमः कृतः ॥ आपत्काले तु स्मर्तव्यो वायुपुत्रो महाबलः ॥ ४३ ॥ इति रामेण पूर्वं हि स्वे स्थाने स्थापितास्तदा ॥ राम वाक्यमन्यथा तत्कृत्वा गच्छेत्कथं पुनः ॥ ४४ ॥ तस्माद्युष्मान्वयं ब्रूमो गच्छतः कार्यसिद्धये ॥ भवतां कार्यसिद्ध्यर्थं वयं होमार्चनादिभिः ॥ ४५ ॥ झटिति कार्यसिद्धिः स्यात्सत्यं सत्यं न संशयः ॥ इति वाक्यं ततः श्रुत्वा ते द्विजा गमनं प्रति ॥ ४६ ॥ प्रस्थानं च विधायादौ गम नाय मनो दधुः ॥ त्रिसाहस्रास्तदा तस्मात्प्रस्थिता द्विजसत्तमाः ॥ ४७ ॥ देशाद्देशांतरं गत्वा वनाच्चैव वनांतरम् ॥ तीर्थेतीर्थे कृतश्राद्धाः सुसंत र्पितपूर्वजाः ॥ ४८ ॥ ध्यायंतो रामरामेति हनुमंतेति वै पुनः ॥ एकाशनाः सदाचारा द्विजा जग्मुः शनैःशनैः ॥ ४९ ॥ त्यक्तप्रतिग्रहाः शांताः सत्यव्रतपरायणाः ॥ ते गता दूरमध्वानं हनुमद्दर्शनार्थिनः ॥ १५० ॥ संध्यामुपासते नित्यं त्रिकालं चैकमानसाः ॥ एवं तु गच्छतां तेषां शकुना अभवञ्छुभाः ॥ ५१ ॥ एवं तु गच्छतां तेषां पाथेयं त्रुटितं तदा ॥ श्रांता ग्लानिं गताः सर्वे पदं परममास्थिताः ॥ ५२ ॥ क्रमित्वा कियतीं भूमिं पदं गंतुं न तु क्षमाः ॥ मनसा निश्चयं कृत्वा दृढीकृत्य स्वमानसम् ॥ ५३ ॥ हनूमंतमदृष्ट्वैव न यास्यामो वयं गृहान् ॥ त्रैविद्यास्तु गतास्तत्र यत्र रामेश्वरो हरिः ॥ ५४ ॥ दृढव्रताः सत्यपराः कन्दमूलफलाशनाः ॥ ध्यायंतो रामरामेति हनूमंतेति वै पुनः ॥ ५५ ॥ गृहीत्वा नियमं तेऽपि त्यक्त्वा चान्नं तथोदकम् ॥ तृषार्ताश्च क्षुधार्त्ताश्च ययुर्व्रतपरायणाः ॥ ५६ ॥ एवं तु क्लिश्यमानानां द्विजानां भक्तिभाजनः ॥ उद्विग्नमानसो रामो हनूमंतमथाब्रवीत् ॥ ५७ ॥ शीघ्रं गच्छ द्विजार्थे त्वं पवनात्मज धर्मवित् ॥ क्लिश्यंते वाडवाः सर्वे धर्मारण्यनिवासिनः ॥ ५८ ॥ दह्यते मानसं मेऽद्य नान्यथा शांतिरस्ति मे ॥ विप्राणां दुःखकर्त्ता च शास्तव्यो नात्र संशयः ॥ ५९ ॥ येन वै दुःखिता विप्रास्तेनाहं दुःखितः कपे ॥ याहि शीघ्रं हि मां त्यक्त्वा विप्राणां परिपालने ॥ १६० ॥ रामस्य वचनं श्रुत्वा नमस्कृत्य च राघवम् ॥ कृपया परयाविष्टः प्रादुरासीद्धरीश्वरः ॥ ॥ ६१ ॥ वृद्धब्राह्मणरूपेण परीक्षार्थं द्विजन्मनाम् ॥ उवाच परया भक्त्या ब्राह्मणाञ्छ्रमदुर्बलान् ॥ ६२ ॥ कृतांजलिपुटो भूत्वा करान्मुक्त्वा कमंडलुम् ॥ सर्वान्प्रत्यभिवाद्याथ वचनं चेदमब्रवीत् ॥ ६३ ॥ कुतः स्थानादिह प्राप्ता गंतुकामाश्च वै कुतः ॥ किमर्थं वै भवद्भिश्च गम्यते दारुणं वनम् ॥ ६४ ॥ ॥ विप्रा ऊचुः ॥ ॥ धर्मारण्यात्समायाता निजदुःखं निवेदितुम् ॥ रामस्य दर्शनार्थं हि गंतुकामा वयं द्विजाः ॥ ६५ ॥ सेतु बंधं महातीर्थं सर्वकामप्रदायकम् ॥ नियमस्थाः क्षीणदेहा रामं द्रष्टुं समुत्सुकाः ॥ ६६ ॥ यत्र रामेश्वरो देवः साक्षाद्वायुसुतः कपिः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पंचदशसहस्रास्ते वाडवा नृपसत्तमात् ॥ भयाल्लोभाच्च दानाच्च तत्सर्वं भवतामिति ॥ १७ ॥ वृत्तोपकल्पनेनैव करिष्यामः कदाचन ॥ कृषि
कर्म करिष्यामो भिक्षाटनमथापि वा ॥ १८ ॥ ततश्च ते पंचदशसहस्रा द्विजसत्तमाः ॥ दारुणं वाक्यमूचुस्तान्यांतु चान्ये यथोचितम् ॥ १९ ॥
शासनं भवतामस्तु रामदत्तं न संशयः ॥ त्रयीविद्यास्तु विख्याताः सर्वे वाडवपुंगवाः ॥ १२० ॥ सहस्राणि च त्रीण्येव त्रैविद्या अभवन्ध्रुवम् ॥
॥ २१ ॥ ॥ राजोवाच ॥ ॥ चतुर्थांशेन राज्यं च किंचिद्दत्ता वसुन्धरा ॥ तस्माच्चतुर्विधेत्येवं ज्ञातिबन्धमतः परम् ॥ २२ ॥ च्यवनो दास्यते
कन्यां यूयं कन्यामवाप्नुत ॥ न वृत्तिर्न च संबंधो भवतां स्यात्कदापि वा ॥ २३ ॥ इति तस्य वचः श्रुत्वा त्रयीविद्याश्च वाडवाः ॥ स्वेस्वे स्थाने
गताः सर्वे संकेतादनिवृत्त्य च ॥ २४ ॥ पंचदश सहस्राणि ततस्तु द्विजपुंगवाः ॥ यथागतं गताः सर्वे चातुर्विद्या द्विजोत्तमाः ॥ २५ ॥ तद्दिने
अतिवाह्याथ चिंताविष्टेन चेतसा ॥ वार्यमाणाः स्वपुत्रैस्ते दारैश्च विनयान्वितैः ॥ २६ ॥ एकाग्रमानसाः सर्वे न निद्रामुपलेभिरे ॥ ब्राह्मे मुहूर्ते
चोत्थाय मायां त्यक्त्वा हि लौकिकीम् ॥ २७ ॥ परित्यज्य प्रियान्पुत्रान्दारान्सनिलयानपि ॥ ग्रामोपांतेषु मिलिताः सर्वे वाडवपुंगवाः ॥ २८ ॥
सहस्राणि तदा त्रीणि कृतनित्याह्निकक्रियाः ॥ विप्रेभ्यो दक्षिणां दत्त्वा संपूज्य कुलमातरम् ॥ २९ ॥ विघ्नसंघविनाशाय दक्षिणद्वारसंस्थितः ॥
सिंदूरपुष्पमालाभिः पूजितो गणनायकः ॥ १३० ॥ पूजितो बकुलस्वामी सूर्यः सर्वार्थसाधकः ॥ आदराच्च महाशक्तिः श्रीमाता पूजिता
तथा ॥ ३१ ॥ शांतां चैव नमस्कृत्य ज्ञानजां गोत्रमातरम् ॥ गमनेनोद्यमानास्ते परं हर्षमुपाययुः ॥ ३२ ॥ चातुर्विद्या द्वि
जाश्चैव पुनरामंत्र्य तान्प्रति ॥ पप्रच्छुश्च मुहुः सर्वं समागमनकारणम् ॥ ३३ ॥ ॥ विप्रा ऊचुः ॥ ॥ न गंतव्यं भवद्भिर्वै गत्वा
वाऽऽयांतु सत्वराः ॥ ३४ ॥ यथा रामप्रदत्तं हि उपकल्पयसेऽचिरात् ॥ श्रुत्वा पुनरथोचुस्ते चातुर्विद्या द्विजोत्तमाः ॥ ३५ ॥ न स्थानेन द्विजै
र्वापि न च वृत्त्यां कथंचन ॥ वयं नैवागमिष्यामः कथनीयं न वै पुनः ॥ ३६ ॥ रघूद्वहेन दत्ता वै वृत्तिर्वो द्विजसत्तमाः ॥ तां वृत्तिं
प्रति यास्यामो जपहोमार्चनादिभिः ॥ ३७ ॥ ते पंचदशसाहस्राः पुनस्तानूचुरादरात् ॥ अस्माभिरत्र स्थातव्यमग्निसेवार्थतत्परैः ॥ ३८ ॥
युष्माभिस्तत्र गंतव्यं सर्वेषां कार्यसिद्धये ॥ अन्योन्यं सर्वसाहाया वृत्तिं याम न संशयः ॥ ३९ ॥ त्यक्तस्वकीयवचना वृत्तिहीना भविष्यथ ॥
ततस्तन्मध्यतः कश्चिच्चातुर्विद्य उवाच ह ॥ १४० ॥ ॥ चातुर्विद्य उवाच ॥ ॥ पूर्वं हि वृत्तिमस्माकं रामो वै दत्तवान्द्विजाः ॥ चातुर्विद्या महासत्त्वाः

१ आत्मनेपदमार्षं छन्दोनुरोधेन । भवन्त्विति—बोध्यम् ।

CC-0. In Public Domain. Digitization by eGangotri

मत्कुणाद्येषु अजाश्वेषु गजेषु च ॥ ६५ ॥ लूतासु चैव सर्पेषु महिष्यादिषु वै तथा ॥ जंतवः सदृशा विप्राः सूक्ष्मेषु च महत्सु च ॥ ६६ ॥ कथं यूयं प्रवर्तध्वे विप्रा हिंसापरायणाः ॥ तच्छ्रुत्वा वज्रतुल्यं हि वचनं च द्विजोत्तमाः ॥ ६७ ॥ प्रत्यूचुर्वाडवाः सर्वे क्रोधरक्तेक्षणा दृशा ॥ ६८ ॥ ॥ ब्राह्मणा ऊचुः ॥ ॥ अहिंसा परमो धर्मः सत्यमेतत्त्वयोदितम् ॥ परं तथापि धर्मोऽस्ति शृणुष्वैकाग्रमानसः ॥ ६९ ॥ या वेदविहिता हिंसा सा न हिंसेति निर्णयः ॥ शस्त्रेणाहन्यते यच्च पीडा जंतुषु जायते ॥ ७० ॥ स एवाधर्म एवास्ति लोके धर्मविदां वर ॥ वेदमंत्रैर्विहन्यंते विना शस्त्रेण जंतवः ॥ ७१ ॥ जंतुपीडाकरा नैव सा हिंसा सुखदायिनी ॥ परोपकारः पुण्याय पापाय परपीडनम् ॥ ७२ ॥ वेदोदितां विधायापि हिंसां पापैर्न लिप्यते ॥ विप्राणां वचनं श्रुत्वा पुनर्वचनमब्रवीत् ॥ ७३ ॥ ॥ राजोवाच ॥ ॥ ब्रह्मादीनां परं क्षेत्रं धर्मारण्यमनुत्तमम् ॥ ब्रह्मविष्णुमहेशाद्या नेदानीमत्र संति ते ॥ ७४ ॥ न धर्मो विद्यते वात्र उक्तो रामः स मानुषः ॥ क्व वापि लंबपुच्छोऽसौ यो मुक्तो रक्षणाय वः ॥ ७५ ॥ शासनं चेन्न दृष्टं वो नैव तत्पालयाम्यहम् ॥ द्विजाः कोपसमाविष्टा ददुः प्रत्युत्तरं तदा ॥ ७६ ॥ ॥ द्विजा ऊचुः ॥ ॥ रे मूढ त्वं कथं वेत्थं भाषसे मदलोलुपः ॥ स दैत्यानां विनाशाय धर्मसंरक्षणाय च ॥ ७७ ॥ रामश्चतुर्भुजः साक्षान्मानुषत्वं गतो भुवि ॥ अगतीनां च गतिदः स वै धर्मपरायणः ॥ दयालुश्च कृपालुश्च जंतूनां परिपालकः ॥ ७८ ॥ ॥ राजोवाच ॥ ॥ कुतोऽद्य वर्त्तते रामः कुतो वै वायुनंदनः ॥ अदृष्टाभ्रमिव ते सर्वे क्व रामो हनुमानिति ॥ ७९ ॥ परंतु रामो हनुमान्यदि वर्त्तेत सर्वतः ॥ इदानीं विप्रसाहाय्य आगमिष्यति मे मतिः ॥ ८० ॥ दर्शयध्वं हनूमंतं रामं वा लक्ष्मणं तथा ॥ यद्यस्ति प्रत्ययः कश्चित्स नो विप्राः प्रदर्श्यताम् ॥८१॥ उक्तं तै रामदेवेन दूतं कृत्वांजनीसुतम् ॥ चतुश्चत्वारिंशदधिकं दत्तं ग्रामशतं नृप ॥ ८२ ॥ पुनरागत्य स्थानेऽस्मिन्दत्ता ग्रामास्त्रयोदश ॥ काश्यप्यां चैव गंगायां महादानानि षोडश ॥ ८३ ॥ दत्तानि विप्रमुख्येभ्यो दत्ता ग्रामाः सुशोभनाः ॥ पुनः संकल्पिता वीर षट्पंचाशकसंख्यया ॥ ८४ ॥ षट्त्रिंशच्च सहस्राणि गोभूजा जज्ञिरे वराः ॥ सपादलक्षा वणिजो दत्ता मांडलिकाभिधाः ॥ ८५ ॥ तेनोक्तं वाडवाः सर्वे दर्शयध्वं हि मारुतिम् ॥ यस्याभिज्ञानमात्रेण स्थितिं पूर्वां ददाम्यहम् ॥ ८६ ॥ विप्रवाक्यं करिष्यामि प्रत्ययो दर्श्यते यदि ॥ ततः सर्वे भविष्यंति वेदधर्मपरायणाः ॥ ८७ ॥ अन्यथा जनधर्मेण वर्तयध्वं हि सर्वशः ॥ नृपवाक्यं तु ते श्रुत्वा स्वेस्वे स्थाने समागताः ॥ ८८ ॥ वाडवः खिन्नमनसः क्रोधेनांधीकृता भुवि ॥ निश्वासान्मुंचमानास्ते हाहेति प्रवदंति च ॥८९॥ दंतान्ग्रा घर्षयन्सर्वांव्यपीडंश्च करैः करान् ॥ परस्परं भाषमाणाः कथं कुर्मो वयं त्वितः ॥९०॥ मिलित्वा वाडवाः सर्वे चक्रुस्ते मंत्रमुत्तमम् ॥ रामवाक्यं हृदि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ध्यात्वा ध्यात्वा चैवांजनीसुतम् ॥९१॥ द्विजमेलापकं चक्रुर्बाला वृद्धतमा अपि ॥ तेषां वृद्धतमो विप्रो वाक्यमूचे शुभं तदा ॥ ९२ ॥ चतुःषष्टिश्च गोत्राणामस्माकं ये द्विसप्ततिः ॥ स्वस्वगोत्रस्यावटंका एकग्रामाभिभाषिणः ॥ ९३ ॥ प्रयातु स्वस्ववर्गस्य एको ह्येको द्विजः सुधीः ॥ रामेश्वरं सेतुबंधं हनूमांस्तत्र विद्यते ॥ ९४ ॥ सर्वे प्रयांतु तत्रैव रामपार्श्वे निरामयाः ॥ निराहारा जितक्रोधा मायया वर्जिताः पुनः ॥ ९५ ॥ एकाग्रमानसाः सर्वे स्तुत्वा ध्यात्वा जपंतु तम् ॥ ततो दाशरथी रामो दयां कृत्वा द्विजन्मसु ॥९६॥ शासनं च प्रदास्यति अचलं च युगेयुगे ॥ महता तपसा तुष्टः प्रदास्यति समीहितम् ॥ ९७ ॥ यस्य वर्गस्य यो विप्रो न प्रयास्यति तत्र वै ॥ स च वर्गात्परित्याज्यः स्थानधर्मान्न संशयः ॥९८॥ वणिग्वृत्ते न संबंधे न विवाहे कदाचन ॥ ग्रामवृत्ते न संबंधः सर्वस्थाने बहिष्कृताः ॥ ९९ ॥ सभावाक्यं च तच्छ्रुत्वा तन्मध्ये वाडवः शुचिः ॥ वाग्मी दक्षः सुशब्दश्च त्रिरवैः श्रावयन्द्विजान् ॥ १०० ॥ प्रतिवाक्यं दत्तताले तिष्ठन्नेतद्वचोऽब्रवीत् ॥ असत्यवादिनां यच्च पातकं परिनिंदके ॥ परदाराभिगमने परद्रोहरते नरे ॥ १ ॥ मद्यपेषु च यत्पापं यत्पापं हेमहारिषु ॥ तत्पापं च भवेत्तस्य गमने यः पराङ्मुखः ॥ अथ किं बहुनोक्तेन यांतु सत्यं द्विजोत्तमाः ॥ २ ॥ तच्छ्रुत्वा दारुणं वाक्यं गमनाय मनो दधे ॥ गच्छतस्तान्द्विजाञ्छ्रुत्वा राजा कुमारपालकः ॥ ३ ॥ समाहूय कृषेः कर्म भिक्षाटनमथापि वा ॥ नानागोत्रेभ्यो ब्राह्मणेभ्यः प्रापयिष्ये न संशयः ॥ ४ ॥ तच्छ्रुत्वा व्यथिताः सर्वे किं भविष्यत्यतः परम् ॥ तथा त्रीणि सहस्राणि प्रबंधं चक्रिरे तदा ॥ ५ ॥ गमिष्यामो वयं सर्वे रामं प्रति न संशयः ॥ हस्ताक्षरप्रदानं वै अन्योन्यं तु कृतं द्विजैः ॥ ६ ॥ कृतांजलिपुटा विप्रा वाक्यमेतदथाब्रुवन् ॥ नंश्यतेऽत्र त्रयी विद्या त्रयीमूर्तिः प्रकुप्यति ॥ ७ ॥ तस्मात्तत्रैव गंतव्यमष्टादशसहस्रकैः ॥ ततः स वणिजः सर्वान्समाहूय च गोभुजान् ॥ ८ ॥ वाक्यमूचे नृपश्रेष्ठो वारयध्वं द्विजानिति ॥ ९ ॥ ॥ व्यास उवाच ॥ न जैनधर्मे ये लिप्ता गोभुजा वणिगुत्तमाः ॥ वृत्तिभंगभयात्तत्र मौनमेव समाचरन् ॥ ११० ॥ वारयाम कथं विप्रान्वह्निरूपान्दहंति ते ॥ शापाग्निना नरपते द्विजा मृत्युपरायणाः ॥ ११ ॥ अडालयेषु ये जाताः शूद्रा आहूय तान्नृपः ॥ निवार्यतामिति प्राह वाडवा गमनोद्यताः ॥ ॥ १२ ॥ तेषां मध्ये कतिपया जैनधर्मसमाश्रिताः ॥ गता वाडवपुंजेषु राजादेशान्निवारणे ॥ १३ ॥ ॥ केचिच्छूद्रा ऊचुः ॥ ॥ क्व रामो लक्ष्मणोपेतः क्व च वायुसुतो बली ॥ वर्तमानेन कालेन वक्तव्यं द्विजसत्तमाः ॥ १४ ॥ व्याघ्रसिंहाकुले दुर्गे वने वनगजाश्रिते ॥ परित्यज्य प्रियान्प्राणान्पुत्रान्दारान्निकेतनान् ॥ १५ ॥ किमर्थं गम्यते विप्रा राज्ये वै दुष्टशासने ॥ तच्छ्रुत्वा वाडवाः केचिद्वाक्येन मनसाऽस्मरन् ॥ १६ ॥

CC-0. In Public Domain. Digitization by eGangotri

शाबरीं मंत्रविद्यां च कथयामास भारत ॥४१॥ एकचित्ताभवत्सा तु शूलिकर्मविमोहिता ॥ ततः सा मोहमापन्ना तत्तद्वाक्यपरायणा ॥४२॥ क्षपणैर्बोधिता वत्स जैनधर्मपरायणा ॥ ब्रह्मावर्ताधिपतये कुंभीपालाय धीमते ॥४३॥ रत्नगंगां महादेवीं ददौ तामिति विक्रमी[1] ॥ मोहेरेकं ददौ तस्मै विवाहे दैवमोहितः ॥ ४४ ॥ धर्मारण्यं समागत्य राजधानी कृता तदा ॥ देवांश्च स्थापयामास जैनधर्मप्रणीतकान् ॥ ४५ ॥ सर्वे वर्णास्तथाभूता जैनधर्मसमाश्रिताः ॥ ब्राह्मणा नैव पूज्यंते न च शांतिकपौष्टिकम् ॥ ४६ ॥ न ददाति कदा दानमेवं कालः प्रवर्तते ॥ लब्धशासनका विप्रा लुप्तस्वाम्या अहर्निशम् ॥ ४७ ॥ समाकुलितचित्तास्ते नृपमामं समाययुः ॥ कन्यकुब्जस्थितं शूरं पाखण्डैः परिवेष्टितम् ॥ ४८ ॥ कान्यकुब्जपुरं प्राप्य कतिभिर्वासरैर्नृप ॥ गंगोपकण्ठे न्यवसञ्छ्रांतास्ते मोढवाडवाः ॥ ४९ ॥ चारैश्च कथितास्ते च नृपस्याग्रे समागताः ॥ प्रातरा कारिता विप्रा आगता नृपसंसदि ॥ ५० ॥ प्रत्युत्थानाभिवादादीन्न चक्रे सादरं नृपः ॥ तिष्ठतो ब्राह्मणान्सर्वान्पर्यपृच्छदसौ ततः ॥ ५१ ॥ किमर्थमागता विप्राः किंस्वित्कार्यं ब्रुवंतु तत् ॥ ५२ ॥ ॥ विप्रा ऊचुः ॥ ॥ धर्मारण्यादिहायातास्त्वत्समीपं नराधिप ॥ राजंस्तव सुतायास्तु भर्ता कुमारपालकः ॥ ५३ ॥ तेन प्रलुप्तं विप्राणां शासनं महदद्भुतम् ॥ वर्तता जैनधर्मेण प्रेरितेनेंद्रसूरिणा ॥ ५४ ॥ ॥ राजोवाच ॥ ॥ केन वै स्थापिता यूयमस्मिन्मोहेरके पुरे ॥ एतद्धि वाडवाः सर्वं ब्रूत वृत्तं यथातथम् ॥ ५५ ॥ ॥ विप्रा ऊचुः ॥ ॥ काजेशैः स्थापिताः पूर्वं धर्मराजेन धीमता ॥ कृता चात्र शुभे स्थाने रामेण च ततः पुरी ॥ ५६ ॥ शासनं रामचंद्रस्य दृष्ट्वाऽन्यैश्चैव राजभिः ॥ पालितं धर्मतो ह्यत्र शासनं नृपसत्तम ॥ ५७ ॥ इदानीं तव जामाता विप्रान्पालयते न हि ॥ तच्छ्रुत्वा विप्रवाक्यं तु राजा विप्रानथाब्रवीत् ॥ ५८ ॥ यांतु शीघ्रं हि भो विप्राः कथयंतु ममाज्ञया ॥ राज्ञे कुमारपालाय देहि त्वं ब्राह्मणालयम् ॥ ५९ ॥ श्रुत्वा वाक्यं ततो विप्राः परं हर्षमुपागताः ॥ जग्मुस्ततोऽतिमुदिता वाक्यं तत्र निवेदितम् ॥ ६० ॥ श्वशुरस्य वचः श्रुत्वा राजा वचनमब्रवीत् ॥ ॥ कुमारपाल उवाच ॥ ॥ रामस्य शासनं विप्राः पालयिष्याम्यहं नहि ॥ ६१ ॥ त्यजामि ब्राह्मणान्यज्ञे पशुहिंसापरायणान् ॥ तस्माद्धि हिंसकानां तु न मे भक्तिर्भवेद्द्विजाः ॥ ६२ ॥ ॥ ॥ ब्राह्मणा ऊचुः ॥ ॥ कथं पाखंडधर्मेण लुप्तशासनको भवान् ॥ पालयस्व नृपश्रेष्ठ मा स्म पापे मनः कृथाः ॥ ६३ ॥ ॥ राजोवाच ॥ ॥ अहिंसा परमो धर्मो अहिंसा च परं तपः ॥ अहिंसा परमं ज्ञानमहिंसा परमं फलम् ॥ ६४ ॥ तृणेषु चैव वृक्षेषु पतंगेषु नरेषु च ॥ कीटेषु

१ विक्रमी—पराक्रमवान् इति, अतो हेतोः इति योजना ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रत्नगर्भा वसुन्धरा ॥ १६ ॥ ॥ व्यास उवाच ॥ ॥ शृणुष्व कलिधर्मांस्त्वं भविष्यंति यथा नृप ॥ असत्यवादिनो लोकाः साधुनिन्दापरा यणाः ॥ १७ ॥ दस्युकर्मरताः सर्वे पितृभक्तिविवर्जिताः ॥ स्वगोत्रदाराभिरता लौल्यध्यानपरायणाः ॥ १८ ॥ ब्रह्मविद्वेषिणः सर्वे परस्परविरोधिनः ॥ शरणागतहंतारो भविष्यंति कलौ युगे ॥ १९ ॥ वैश्याचाररता विप्रा वेदभ्रष्टाश्च मानिनः ॥ भविष्यंति कलौ प्राप्ते संध्यालोपकरा द्विजाः ॥ २० ॥ शांतौ शूरा भये दीनाः श्राद्धतर्पणवर्जिताः ॥ असुराचारनिरता विष्णुभक्तिविवर्जिताः ॥ २१ ॥ परवित्ताभिलाषाश्च उत्कोचग्रहणे रताः ॥ अस्नातभोजिनो विप्राः क्षत्रिया रणवर्जिताः ॥ २२ ॥ भविष्यंति कलौ प्राप्ते मलिना दुष्टवृत्तयः ॥ मद्यपानरताः सर्वेऽप्ययाज्यानां हि याजकाः ॥ २३ ॥ भर्तृद्वेषकरा रामाः पितृद्वेषकराः सुताः ॥ भ्रातृद्वेषकराः क्षुद्रा भविष्यंति कलौ युगे ॥ २४ ॥ गव्यविक्रयिणस्ते वै ब्राह्मणा वित्ततत्पराः ॥ गावो दुग्धं न दुह्यंते संप्राप्ते हि कलौ युगे ॥ २५ ॥ फलंते नैव वृक्षाश्च कदाचिदपि भारत ॥ कन्याविक्रयकर्त्तारो गोजाविक्रयकारकाः ॥ २६ ॥ विषविक्रयकर्त्तारो रसविक्रयकारकाः ॥ वेदविक्रयकर्त्तारो भविष्यंति कलौ युगे ॥ २७ ॥ नारी गर्भं समाधत्ते हायनैकादशेन हि ॥ एकादश्युपवासस्य विरताः सर्वतो जनाः ॥ २८ ॥ न तीर्थसेवनरता भविष्यंति च वाडवाः ॥ बह्वाहारा भविष्यंति बहुनिद्रासमाकुलाः ॥ २९ ॥ जिह्मवृत्तिपराः सर्वे वेदनिंदापरायणाः ॥ यतिनिंदापराश्चैव च्छद्मकाराः परस्परम् ॥ ३० ॥ स्पर्शदोषभयं नैव भविष्यति कलौ युगे ॥ क्षत्रिया राज्यहीनाश्च म्लेच्छो राजा भविष्यति ॥ ३१ ॥ विश्वासघातिनः सर्वे गुरुद्रोहरतास्तथा ॥ मित्रद्रोहरता राजञ्छिश्नोदरपरायणाः ॥ ३२ ॥ एकवर्णा भविष्यंति वर्णाश्चत्वार एव च ॥ कलौ प्राप्ते महाराज नान्यथा वचनं मम ॥ ३३ ॥ एतच्छ्रुत्वा गुरोरेव कान्यकुब्जाधिपो बली ॥ राज्यं प्रकुरुते तत्र आमो नाम्ना हि भूतले ॥ ३४ ॥ सार्वभौमत्वमापन्नः प्रजापालनतत्परः ॥ प्रजानां कलिना तत्र पापे बुद्धिरजायत ॥ ३५ ॥ वैष्णवं धर्ममुत्सृज्य बौद्धधर्ममुपागताः ॥ प्रजास्तमनुवर्तिन्यः क्षपणैः[१] प्रतिबोधिताः॥३६॥ तस्य राज्ञो महादेवी मामानाम्न्यतिविश्रुता ॥ गर्भं दधार सा राज्ञो सर्वलक्षणसंयुता ॥ ३७ ॥ संपूर्णे दशमे मासि जाता तस्याः सुरूपिणी ॥ दुहिता समये राज्ञ्याः पूर्णचन्द्रनिभानना ॥ ३८ ॥ रत्नगंगेति नाम्ना सा मणिमाणिक्यभूषिता ॥ एकदा दैवयोगेन देशांतरादुपागतः ॥ ३९ ॥ नाम्ना चैवेंद्रसूरिर्वै देशेस्मिन्कान्यकुब्जके ॥ षोडशाब्दा च सा कन्या नोपनीता नृपात्मजा ॥४०॥ दास्यांतरेण मिलिता इन्द्रसूरिश्च जीविकः ॥

१ क्षपणैः—बौद्धधर्मानुयायिसंन्यासिभिः ।

CC-0. In Public Domain. Digitization by eGangotri

वान्पुत्रवान्भवेत् ॥ अन्यथा निर्धनत्वं हि लभते नात्र संशयः ॥ ५८ ॥ यवनो म्लेच्छजातीयो दैत्यो वा राक्षसोपि वा ॥ योत्र विघ्नं करोत्येव भस्मीभवति तत्क्षणात् ॥ ५९ ॥ ॥ ब्रह्मोवाच ॥ ॥ ततः प्रदक्षिणीकृत्य द्विजान्रामोऽतिहर्षितः ॥ प्रस्थानाभिमुखो विप्रैराशीर्भिरभिनंदितः ॥ ६० ॥ आसीमांतमनुव्रज्य स्नेहव्याकुललोचनाः ॥ द्विजाः सर्वे विनिर्वृत्ता धर्मारण्ये विमोहिताः ॥ ६१ ॥ एवं कृत्वा ततो रामः प्रतस्थे स्वां पुरीं प्रति ॥ काश्यपाश्चैव गर्गाश्च कृतकृत्या दृढव्रताः ॥ ६२ ॥ गुर्वासनसमाविष्टाः सभार्याः ससुहृत्सुताः ॥ राजधानीं तदा प्राप रामोऽयोध्यां गुणान्विताम् ॥ ६३ ॥ दृष्ट्वा प्रमुदिताः सर्वे लोकाः श्रीरघुनन्दनम् ॥ ततो रामः स धर्मात्मा प्रजापालनतत्परः ॥ ६४ ॥ सीतया सह धर्मात्मा राज्यं कुर्वंस्तदा सुधीः ॥ जानक्यां गर्भमाधत्त रविवंशोद्भवाय च ॥ ६५ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे पूर्वभागे धर्मारण्यमाहात्म्ये श्रीरामचन्द्रकृतधर्मारण्यतीर्थक्षेत्रजीर्णोद्धारवर्णनं नाम पञ्चत्रिंशोऽध्यायः ॥ ३५ ॥ ॥ नारद उवाच ॥ ॥ अतः परं किमभवत्तन्मे कथय सुव्रत ॥ पूर्वं च तदशेषेण शंस मे वदताम्वर ॥ १ ॥ स्थिरीभूतं च तत्स्थानं कियत्कालं वदस्व मे ॥ केन वै रक्ष्यमाणं च कस्याज्ञा वर्तते प्रभो ॥ २ ॥ ॥ ब्रह्मोवाच ॥ ॥ त्रेतातो द्वापरांतं च यावत्कलिसमागमः ॥ तावत्संरक्षणे चैको हनूमान्पवनात्मजः ॥ ३ ॥ समर्थो नान्यथा कोपि विना हनुमता सुत ॥ लंका विध्वंसिता येन राक्षसाः प्रबला हताः ॥४॥ स एव रक्षते तत्र रामादेशेन पुत्रक ॥ द्विजस्याज्ञा प्रवर्तेत श्रीमातायास्तथैव च ॥ ५ ॥ दिनेदिने प्रहर्षोभूज्जनानां तत्र वासिनाः ॥ पठंति स्म द्विजास्तत्र ऋग्युजुःसामलक्षणान् ॥ ६ ॥ अथर्वणमपि तत्र पठंति स्म दिवानिशम् ॥ वेदनिर्घोषजः शब्दस्त्रैलोक्ये सचराचरे ॥ ७ ॥ उत्सवास्तत्र जायंते ग्रामेग्रामे पुरेपुरे ॥ नाना यज्ञाः प्रवर्तंते नानाधर्मसमाश्रिताः ॥ ८ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ कदापि तस्य स्थानस्य भंगो जातोथ वा नवा ॥ दैत्यैर्जितं कदा स्थानमथवा दुष्टराक्षसैः ॥ ९ ॥ ॥ व्यास उवाच ॥ ॥ साधु पृष्टं त्वया राजन्धर्मज्ञस्त्वं सदा शुचिः ॥ आदौ कलियुगे प्राप्ते यद्वृत्तं तच्छृणुष्व भोः ॥ १० ॥ लोकानां च हितार्थाय कामाय च सुखाय च ॥ यज्ञं च कथमिष्यामि तत्सर्वं शृणु भूपते ॥११॥ इदानीं च कलौ प्राप्त आमो नाम्ना बभूव ह ॥ कान्यकुब्जाधिपः श्रीमान्धर्मज्ञो नीतितत्परः ॥ १२ ॥ शांतो दांतः सुशीलश्च सत्यधर्मपरायणः ॥ द्वापरांते नृपश्रेष्ठ अनागते कलौ युगे ॥ १३ ॥ भयात्कलिविशेषेण अधर्मस्य भयादिभिः ॥ सर्वे देवाः क्षितिं त्यक्त्वा नैमिषारण्यमाश्रिताः ॥ १४ ॥ रामोपि सेतुबंधं हि ससहायो गतो नृप ॥ १५ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ कीदृशं हि कलौ प्राप्ते भयं लोके सुदुस्तरम् ॥ यस्मिन्सुरैः परित्यक्ता

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

गौतमश्छांधनस्तथा ॥ ३४ ॥ कृष्णात्रेयस्तथा वत्सो वसिष्ठो धारणस्तथा ॥ भांडिलश्चैव विज्ञेयो यौवनाश्वस्ततः परम् ॥ ३५ ॥ कृष्णायनोपमन्यू च गार्ग्यमुद्गलमौखकाः ॥ पुशिः पराशरश्चैव कौंडिन्यश्च ततः परम् ॥ ३६ ॥ पंचपंचाशद्ग्रामाणां नामान्येवं यथाक्रमम् ॥ सीतापुरं श्रीक्षेत्रं च मुशली मुद्गली तथा ॥ ३७ ॥ ज्येष्ठला श्रेयस्थानं च दंताली वटपत्रका ॥ राज्ञः पुरं कृष्णवाटं देहं लोहं चनस्थनम् ॥ ३८ ॥ कोहेचं चंदनक्षेत्रं थलं च हस्तिनापुरम् ॥ कर्पटं कंनजह्नवी वनोडफनफावली ॥ ३९ ॥ मोहोधं शमोहोरली गोविंदणं थलत्यजम् ॥ चारणसिद्धं सोद्गीत्राभाज्यजं वटमालिका ॥४०॥ गोधरं मारणजं चैव मात्रमध्यं च मातरम् ॥ बलवती गंधवती ईआम्ली च राज्यजम् ॥४१॥ रूपावली बहुधनं छत्रीटं वंशंजं तथा ॥ जायासंरणं गोतिकी च चित्रलेखं तथैव च ॥ ४२ ॥ दुग्धावली हंसावली च वैहोलं चैल्लजं तथा ॥ नालावली आसावली सुहाली कामतः परम् ॥४३॥ रामेण पंचपंचाशद्ग्रामाणि वसनाय च ॥ स्वयं निर्माय दत्तानि द्विजेभ्यस्तेभ्य एव च ॥ ४४ ॥ तेषां शुश्रूषणार्थाय वैश्यान्रामो न्यवेदयत् ॥ षट्त्रिंशच्च सहस्राणि शूद्रांस्तेभ्यश्चतुर्गुणान् ॥४५॥ तेभ्यो दत्तानि दानानि गवाश्ववसनानि च ॥ हिरण्यं रजतं ताम्रं श्रद्धया परया मुदा ॥ ४६ ॥ नारद उवाच ॥ अष्टादशसहस्रास्ते ब्राह्मणा वेदपारगाः ॥ कथं ते व्यभजन्ग्रामान्ग्रामोत्पन्नं तथा वसु ॥ वस्त्राद्यं भूषणाद्यं च तन्मे कथय सुव्रतम् ॥४७॥ ॥ ब्रह्मोवाच ॥ ॥ यज्ञांते दक्षिणा यावत्सर्त्विग्भिः स्वीकृता सुत ॥ महादानादिकं सर्वं तेभ्य एव समर्पितम् ॥४८॥ ग्रामाः साधारणा दत्ता महास्थानानि वै तदा ॥ ये वसंति च यत्रैव तानि तेषां भवंत्विति ॥ ४९ ॥ वशिष्ठवचनात्तत्र ग्रामास्ते विप्रसात्कृताः ॥ रघूद्वहेन धीरेण नोद्वसंति यथा द्विजाः ॥५०॥ धान्यं तेषां प्रदत्तं हि विप्राणां चामितं वसु ॥ कृतांजलिस्ततो रामो ब्राह्मणानिदमब्रवीत् ॥५१॥ यथा कृतयुगे विप्रास्त्रेतायां च यथा पुरा ॥ तथा चाद्यैव वर्त्तव्यं मम राज्ये न संशयः ॥ ५२ ॥ यत्किंचिद्धनधान्यं वा यानं वा वसनानि वा ॥ मणयः कांचनादींश्च हेमादींश्च तथा वसु ॥ ५३ ॥ ताम्राद्यं रजतादींश्च प्रार्थयध्वं ममाधुना ॥ अधुना वा भविष्ये वाभ्यर्थनीयं यथोचितम् ॥ ५४ ॥ प्रेषणीयं वाचिकं मे सर्वदा द्विजसत्तमाः ॥ यंयं कामं प्रार्थयध्वं तं तं दास्याम्यहं विभो ॥ ५५ ॥ ततो रामः सेवकादीनादरात्प्रत्यभाषत ॥ विप्राज्ञा नोल्लंघनीया सेवनीया प्रयत्नतः ॥ ५६ ॥ यंयं कामं प्रार्थयंते कारयध्वं ततस्ततः ॥ एवं नत्वा च विप्राणां सेवनं कुरुते तु यः ॥ ५७ ॥ स शूद्रः स्वर्गमाप्नोति धन

१ एतेषां सीतापुरादीनां पंचपंचाशद्ग्रामाणां नामानि कानिंचिदशुद्धानीव भासन्ते, अपरिचितत्वाद्यथाप्रतिपुस्तकमेवात्र मुद्रितानि सन्ति । तानि च तत्तद्ग्रामनामपरिचितैस्तत्रत्यैर्विद्वद्भिः शोधनीयानि इति सविनयं सूच्यतेस्माभिः । २ संदेशवाग्वाचिकं स्यात्—इत्यमरः ।

CC-0. In Public Domain. Digitization by eGangotri

भ्रात्रा भरतेन सहायवान् ॥ ९ ॥ शत्रुघ्नेन परिवृतो गतो मोहेरके पुरे ॥ तत्र गत्वा वसिष्ठं तु पृच्छतेऽसौ महामनाः ॥ १० ॥ ॥ राम उवाच ॥ ॥ धर्मारण्ये महाक्षेत्रे किं कर्त्तव्यं द्विजोत्तम ॥ दानं वा नियमो वाथ स्नानं वा तप उत्तमम् ॥ ११ ॥ ध्यानं वाथ क्रतुं वाथ होमं वा जपमुत्तमम् ॥ दानं वा नियमं वाथ स्नानं वा तप उत्तमम् ॥ १२ ॥ येन वै क्रियमाणेन तीर्थेऽस्मिन्द्विजसत्तम ॥ ब्रह्महत्यादिपापेभ्यो मुच्यते तद्ब्रवीहि मे ॥ १३ ॥ ॥ वसिष्ठ उवाच ॥ ॥ यज्ञं कुरु महाभाग धर्मारण्ये त्वमुत्तमम् ॥ दिनेदिने कोटिगुणं यावद्वर्षशतं भवेत् ॥ १४ ॥ तच्छ्रुत्वा चैव गुरुतो यज्ञारंभं चकार सः ॥ तस्मिन्नवसरे सीता रामं व्यज्ञापयन्मुदा ॥ १५ ॥ स्वामिन्पूर्वं त्वया विप्रा वृता ये वेदपारगाः ॥ ब्रह्मविष्णुमहेशेन निर्मिता ये पुरा द्विजाः ॥ १६ ॥ कृते त्रेतायुगे चैव धर्मारण्यनिवासिनः ॥ विप्रांस्तान्वै वृणुष्व त्वं तैरेव साधकोऽध्वरः ॥ १७ ॥ तच्छ्रुत्वा रामदेवेन आहूता ब्राह्मणास्तदा ॥ स्थापिताश्च यथापूर्वमस्मिन्मोहेरके पुरे ॥ १८ ॥ तैस्त्वष्टादशसंख्याकैस्त्रैविद्यैर्मेहिवाडवैः ॥ यज्ञं चकार विधिवत्तैरेवायतबुद्धिभिः ॥ १९ ॥ कुशिकः कौशिको वत्स उपमन्युश्च काश्यपः ॥ कृष्णात्रेयो भरद्वाजो धारिणः शौनको वरः ॥ २० ॥ मांडव्यो भार्गवः पैंग्यो वात्स्यो लौगाक्ष एव च ॥ गांगायनोथ गांगेयः शुनकः शौनकस्तथा ॥ २१ ॥ ॥ ब्रह्मोवाच ॥ ॥ एभिर्विप्रैः क्रतुं रामः समाप्य विधिवन्नृपः ॥ चकारावभृथं रामो विप्रान्संपूज्य भक्तितः ॥ २२ ॥ यज्ञांते सीतया रामो विज्ञप्तः सुविनीतया ॥ अस्याध्वरस्य संपत्तौ दक्षिणां देहि सुव्रत ॥ २३ ॥ मन्नाम्ना च पुरं तत्र स्थाप्यतां शीघ्रमेव च ॥ सीताया वचनं श्रुत्वा तथा चक्रे नृपोत्तमः ॥ २४ ॥ तेषां च ब्राह्मणानां च स्थानमेकं सुनिर्भयम् ॥ दत्तं रामेण सीतायाः संतोषाय महीभृता ॥ २५ ॥ सीतापुरमिति ख्यातं नाम चक्रे तदा किल ॥ तस्याधिदेव्यौ वर्त्तेते शांता चैव सुमंगला ॥ २६ ॥ मोहेरकस्य पुरतो ग्रामद्वादशकं पुरः ॥ ददौ विप्राय विदुषे समुत्थाय प्रहर्षितः ॥ २७ ॥ तीर्थांतरं जगामाशु काश्यपीसारितस्तटे ॥ वाडवाः केऽपि नीतास्ते रामेण सह धर्मवित् ॥ २८ ॥ धर्मालये गतः सद्यो यत्र माला कमंडलुः ॥ पुरा धर्मेण सुमहत्कृतं यत्र तपो मुने ॥ २९ ॥ तदारभ्य सुविख्यातं धर्मालयमिति श्रुतम् ॥ ददौ दाशरथिस्तत्र महादानानि षोडश ॥ ३० ॥ ये पंचाशत्तदा ग्रामाः सीतापुरसमन्विताः ॥ सत्यमंदिरपर्यंता रघुनाथेन वै तदा ॥ ३१ ॥ सीताया वचनात्तत्र गुरुवाक्येन चैव हि ॥ आत्मनो वंशवृद्ध्यर्थं द्विजेभ्योऽदाद्रघूत्तमः ॥ ३२ ॥ अष्टादशसहस्राणां द्विजानामभवत्कुलम् ॥ वात्स्यायन उपमन्युर्जातूकर्ण्योऽथ पिंगलः ॥ ३३ ॥ भारद्वाजस्तथा वत्सः कौशिकः कुश एव च ॥ शांडिल्यः कश्यपश्चैव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शयने पाने गमने चोपवेशने ॥ सुखे वाप्यथवा दुःखे राममन्त्रं समुच्चरेत् ॥ ४८ ॥ न तस्य दुःखदौर्भाग्यं नाधिव्याधिभयं भवेत् ॥ आयुः श्रियं बलं तस्य वर्द्धयंति दिने दिने ॥ ४९ ॥ रामेति नाम्ना मुच्येत पापाद्वै दारुणादपि ॥ नरकं नहि गच्छेत गतिं प्राप्नोति शाश्वतीम् ॥ ५० ॥ ॥ ॥ व्यास उवाच ॥ ॥ इति कृत्वा ततो रामः कृतकृत्यममन्यत ॥ प्रदक्षिणीकृत्य तदा प्रणम्य च द्विजान्बहून् ॥ ५१ ॥ दत्त्वा दानं भूरितरं गवाश्वमहिषीरथम् ॥ ततः सर्वान्निजांस्तांश्च वाक्यमेतदुवाच ह ॥ ५२ ॥ अत्रैव स्थीयतां सर्वैर्यावच्चंद्रदिवाकरौ ॥ यावन्मेरुर्महीपृष्ठे सागराः सप्त एव च ॥ ५३ ॥ तावदत्रैव स्थातव्यं भवद्भिर्हि न संशयः ॥ यदाहि शासनं विप्रा न मन्यंते नृपा भुवि ॥ ५४ ॥ अथवा वणिजः शूरा मदमायाविमोहिताः ॥ मदाज्ञां न प्रकुर्वंति मन्यंते वा न ते जनाः ॥ ५५ ॥ तदा वै वायुपुत्रस्य स्मरणं क्रियतां द्विजाः ॥ स्मृतमात्रो हनूमान्वै समागत्य करिष्यति ॥ ५६ ॥ सहसा भस्म तान्सत्यं वचनान्मे न संशयः ॥ य इदं शासनं रम्यं पालयिष्यति भूपतिः ॥ ॥ ५७ ॥ वायुपुत्रः सदा तस्य सौख्यमृद्धिं प्रदास्यति ॥ ददाति पुत्रान्पौत्रांश्च साध्वीं पत्नीं यशो जयम् ॥ ५८ ॥ इत्येवं कथयित्वा च हनुमंतं प्रबोध्य च ॥ निवर्तितो रामदेवः ससैन्यः सपरिच्छदः ॥ ५९ ॥ वादित्राणां स्वनैर्विष्वक्सूच्यमानशुभागमः ॥ श्वेतातपत्रयुक्तोऽसौ चामरैर्वीजितो नरैः ॥ अयोध्यां नगरीं प्राप्य चिरं राज्यं चकार ह ॥ ६० ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे पूर्वभागे धर्मारण्यमाहात्म्ये ब्रह्मनारदसंवादे श्रीरामेण ब्राह्मणेभ्यः शासनपट्टप्रदानवर्णनंनाम चतुस्त्रिंशोऽध्यायः ॥ ३४ ॥ ॥ छ ॥ ॥

॥ ॥ नारद उवाच ॥ ॥ भगवन्देवदेवेश सृष्टिसंहारकारक ॥ गुणातीतो गुणैर्युक्तो मुक्तीनां साधनं परम् ॥ १ ॥ संस्थाप्य वेदभवनं विधिवद्द्विजसत्तमान् ॥ किं चक्रे रघुनाथस्तु भूयोऽयोध्यां गतस्तदा ॥ २ ॥ स्वस्थाने ब्राह्मणास्तत्र कानि कर्माणि चक्रिरे ॥ ॥ ब्रह्मोवाच ॥ ॥ इष्टापूर्तरताः शांताः प्रतिग्रहपराङ्मुखाः ॥ ३ ॥ राज्यं चक्रुर्वनस्यास्य पुरोधा[1] द्विजसत्तमः ॥ उवाच रामपुरतस्तीर्थमाहात्म्यमुत्तमम् ॥ ४ ॥ प्रयागस्य च माहात्म्यं त्रिवेणीफलमुत्तमम् ॥ प्रयागतीर्थमहिमा शुक्लतीर्थस्य चैव हि ॥ ५ ॥ सिद्धक्षेत्रस्य काश्याश्च गंगाया महिमा तथा ॥ वसिष्ठः कथयामास तीर्थान्यन्यानि नारद ॥ ६ ॥ धर्मारण्यसुवर्णाया हरिक्षेत्रस्य तस्य च ॥ स्नानदानादिकं सर्वं वाराणस्या यवाधिकम्[2] ॥ ७ ॥ एतच्छ्रुत्वा रामदेवः स चमत्कृतमानसः ॥ धर्मारण्ये पुनर्यात्रां कर्तुकामः समभ्यगात् ॥ ८ ॥ सीतया सह धर्मज्ञो गुरुसैन्यपुरःसरः ॥ लक्ष्मणेन सह

१ पुरोधाः—वसिष्ठः । २ यवाधिकम्—वाराणस्यपेक्षयायवमात्रमधिकमेव—इत्यर्थः ।

CC-0. In Public Domain. Digitization by eGangotri

॥ ॥ व्यास उवाच ॥ ॥ एवं रामेण धर्मज्ञ जीर्णोद्धारः पुरा कृतः ॥ द्विजानां च हितार्थाय श्रीमातुर्वचनेन च ॥ १ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ कीदृशं शासनं ब्रह्मन्रामेण लिखितं पुरा ॥ कथयस्व प्रसादेन त्रेतायां सत्यमंदिरे ॥ २ ॥ ॥ व्यास उवाच ॥ ॥ धर्मारण्ये वरे दिव्ये बकुलार्के स्वधिष्ठिते ॥ शून्यस्वामिनि विप्रेंद्र स्थिते नारायणे प्रभौ ॥ ३ ॥ रक्षणाधिपतौ देवे सर्वज्ञे गुणनायके ॥ भवसागर मग्नानां तारिणी यत्र योगिनी ॥ ४ ॥ शासनं तत्र रामस्य राघवस्य च नामतः ॥ शृणु ताम्राश्रयं तत्र लिखितं धर्मशास्त्रतः ॥ ५ ॥ महाश्चर्यकरं तच्च ह्यनेकयुगसंस्थितम् ॥ सर्वो धातुः क्षयं याति सुवर्णं क्षयमेति च ॥ ६ ॥ प्रत्यक्षं दृश्यते पुत्र द्विजशासनमक्षयम् ॥ अविनाशो हि ताम्रस्य कारणं तत्र विद्यते ॥ ७ ॥ वेदोक्तं सकलं यस्माद्विष्णुरेव हि कथ्यते ॥ पुराणेषु च वेदेषु धर्मशास्त्रेषु भारत ॥ ८ ॥ सर्वत्र गीयते विष्णुर्नानाभावसमाश्रयः ॥ नानादेशेषु धर्मेषु नानाधर्मनिषेविभिः ॥ ९ ॥ नानाभेदैस्तु सर्वत्र विष्णुरेवेति चिंत्यते ॥ अवतीर्णः स वै साक्षात्पुराणपुरुषोत्तमः ॥ १० ॥ देववैरिविनाशाय धर्मसंरक्षणाय च ॥ तेनेदं शासनं दत्तमविनाशात्मकं सुत ॥ ११ ॥ यस्य प्रतापाद्दृषदस्तारिता जलमध्यतः ॥ वानरैर्वेष्टिता लंका हेलया राक्षसा हताः ॥ १२ ॥ मुनिपुत्रं मृतं रामो यमलोकादुपानयत् ॥ दुंदुभिर्निहतो येन कबंधोऽभिहतस्तथा ॥ १३ ॥ निहता ताडका चैव सप्तताला विभेदिताः ॥ खरश्च दूषणश्चैव त्रिशिराश्च महासुरः ॥ १४ ॥ चतुर्दशसहस्राणि जवेन निहता रणे ॥ तेनेदं शासनं दत्तमक्षयं न कथं भवेत् ॥ १५ ॥ स्ववंशवर्णनं तत्र लिखित्वा स्वयमेव तु ॥ देशकालादिकं सर्वं लिलेख विधिपूर्वकम् ॥ १६ ॥ स्वमुद्राचिह्नितं तत्र त्रैविद्येभ्यस्तथा ददौ ॥ चतुश्चत्वारिंशवर्षो रामो दशरथात्मजः ॥ १७ ॥ तस्मिन्काले महाश्चर्यं संदत्तं किल भारत ॥ तत्र स्वर्णोपमं चापि रौप्योपममथापि च ॥ १८ ॥ उवाह सलिलं तीर्थे देवर्षिपितृतृप्तिदम् ॥ स्ववंशनायकस्याग्रे सूर्येण कृतमेव तत् ॥ १९ ॥ तद्दृष्ट्वा महदाश्चर्यं रामो विष्णुं प्रपूज्य च ॥ रामलेखविचित्रैस्तु लिखितं धर्मशासनम् ॥ २० ॥ यद्दृष्ट्वाथ द्विजाः सर्वे संसारभयबंधनम् ॥ कुर्वते नैव यस्माच्च तस्मान्निखिलरक्षकम् ॥ ॥ २१ ॥ ये पापिष्ठा दुराचारा मित्रद्रोहरताश्च ये ॥ तेषां प्रबोधनार्थाय प्रसिद्धिमकरोत्पुरा ॥ २२ ॥ रामलेखविचित्रैस्तु विचित्रे ताम्रपट्टके ॥ वाक्यानीमानि श्रूयंते शासने किल नारद ॥ २३ ॥ आस्फोटयंति पितरः कथयंति पितामहाः ॥ भूमिदोऽस्मत्कुले जातः सोऽस्मान्संतारयिष्यति ॥ २४ ॥ बहुभिर्बहुधा भुक्ता राजभिः पृथिवी त्वियम् ॥ यस्ययस्य यदा भूमिस्तस्यतस्य तदा फलम् ॥ २५ ॥ षष्टिवर्षसहस्राणि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वर्गे वसति भूमिदः ॥ आच्छेत्ता चानुमंता च तान्येवं नरकं व्रजेत् ॥ २६ ॥ संदंशैस्तुद्यमानस्तु मुद्गरैर्विनिहत्य च ॥ पाशैः सुबध्यमानस्तु रोरवीति महास्वरम् ॥ २७ ॥ ताड्यमानः शिरे दंडैः समालिंग्य विभावसुम् ॥ क्षुरिकया छिद्यमानो रोरवीति महास्वनम् ॥ २८ ॥ यमदूतैर्महा घोरैर्ब्रह्मवृत्तिविलोपकः ॥ एवंविधैर्महादुष्टैः पीड्यंते ते महागणैः ॥ २९ ॥ ततस्तिर्यक्त्वमाप्नोति योनिं वा राक्षसीं शुनीम् ॥ व्यालीं शृगालीं पैशाचीं महाभूतभयंकरीम् ॥ ३० ॥ भूमेरंगुलहर्ता हि स कथं पापमाचरेत् ॥ भूमेरंगुलदाता च स कथं पुण्यमाचरेत् ॥ ३१ ॥ अश्वमेधसहस्राणां राजसूयशतस्य च ॥ कन्याशतप्रदानस्य फलं प्राप्नोति भूमिदः ॥ ३२ ॥ आयुर्यशः सुखं प्रज्ञा धर्मो धान्यं धनं जयः ॥ संतानं वर्द्धते नित्यं भूमिदः सुखमश्नुते ॥ ३३ ॥ भूमेरंगुलमेकं तु ये हरंति खला नराः ॥ वंध्याटवीष्वतोयासु शुष्ककोटरवासिनः ॥ कृष्णसर्पाः प्रजायंते दत्तदायापहारकाः ॥ ३४ ॥ तडागानां सहस्रेण अश्वमेधशतेन वा ॥ गवां कोटिप्रदानेन भूमिहर्त्ता विशुध्यति ॥ ३५ ॥ यानीह दत्तानि पुनर्धनानि दानानि धर्मार्थयशस्कराणि ॥ औदार्यतो विप्रनिवेदितानि को नाम साधुः पुनराददीत ॥ ३६ ॥ चलदलदललीलाचंचले जीवलोके तृणलवलघुसारे सर्वसंसारसौख्ये ॥ अपहरति दुराशः शासनं ब्राह्मणानां नरकगहनगर्त्तावर्तपातोत्सुको यः ॥ ३७ ॥ ये पास्यंति महीभुजः क्षितिमिमां यास्यंति भुक्त्वाखिलां नो याता न तु याति यास्यति न वा केनापि सार्द्धं धरा ॥ यत्किंचिद्भुवि तद्विनाशि सकलं कीर्तिः परं स्थायिनी त्वेवं वै वसुधापि यैरुपकृता लोप्या न सत्कीर्तयः ॥ ३८ ॥ एकैव भगिनी लोके सर्वेषामेव भूभुजाम् ॥ न भोज्या न करग्राह्या विप्रदत्ता वसुंधरा ॥ ३९ ॥ दत्त्वा भूमिं भाविनः पार्थिवेशान्भूयोभूयो याचते रामचन्द्रः ॥ सामान्योऽयं धर्मसेतुर्नृपाणां स्वे स्वे काले पालनीयो भवद्भिः ॥४०॥ अस्मिन्वंशे क्षितौ कोपि राजा यदि भविष्यति ॥ तस्याहं करलग्नोस्मि मद्दत्तं यदि पाल्यते॥४१॥लिखित्वा शासनं रामश्चातुर्वेद्यद्विजोत्तमान् ॥ संपूज्य प्रददौ धीमान्वसिष्ठस्य च सन्निधौ ॥ ४२ ॥ ते वाडवा गृहीत्वा तं पट्टं रामाज्ञया शुभम् ॥ ताम्रं हैमाक्षर युतं धर्म्यं धर्मविभूषणम् ॥ ४३ ॥ पूजार्थं भक्तिकामार्थास्तद्रक्षणमकुर्वत ॥ चंदनेन च दिव्येन पुष्पेण च सुगन्धिना ॥ ४४ ॥ तथा सुवर्णपुष्पेण रूप्यपुष्पेण वा पुनः ॥ अहन्यहनि पूजां ते कुर्वते वाडवाः शुभाम् ॥ ४५ ॥ तदग्रे दीपकं चैव घृतेन विमलेन हि ॥ सत्तव र्तियुतं राजन्नर्घ्यं प्रकुर्वते द्विजाः ॥ ४६ ॥ नैवेद्यं कुर्वते नित्यं भक्तिपूर्वं द्विजोत्तमाः ॥ रामरामेति रामेति मन्त्रमप्युच्चरंति हि ॥ ४७ ॥ अशने

१ तान्येव—षष्टिवर्षसहस्राणि—इत्यर्थः ।

CC-0. In Public Domain. Digitization by eGangotri

मंगलं वरम् ॥ खड्गं शुभं तदा धार्य्यं मम चिह्नं करे स्थितम् ॥ ३४ ॥ गुरुपूजा सदा कार्या कुलदेव्याः पुनःपुनः ॥ वृद्धयागमेषु प्राप्तेषु वृद्धि दायकदक्षिणा ॥ ३५ ॥ एकादश्यां शनेर्वारे दानं देयं द्विजन्मने ॥ प्रदेयं बालवृद्धेभ्यो मम रामस्य शासनात् ॥ ३६ ॥ मंडलेषु च ये शुद्धा वणिग्वृत्तिरताः पराः ॥ सपादलक्षास्ते दत्ता रामशासनपालकाः ॥ ३७ ॥ मांडलीकास्तु ते ज्ञेया राजानो मंडलेश्वराः ॥ द्विज शुश्रूषणे दत्ता रामेण वणिजां वराः ॥ ३८ ॥ चामरद्वितयं रामो दत्तवान्खड्गमेव च ॥ कुलस्य स्वामिनं सूर्यं प्रतिष्ठाविधिपूर्वकम् ॥ ॥ ३९ ॥ ब्रह्माणं स्थापयामास चतुर्वेदसमन्वितम् ॥ श्रीमातरं महाशक्तिं शून्यस्वामिहरिं तथा ॥ ४० ॥ विघ्नापध्वंसनार्थाय दक्षिणद्वारसंस्थितम् ॥ गणं संस्थापयामास तथान्याश्चैव देवताः ॥ ४१ ॥ कारितास्तेन वीरेण प्रासादाः सप्तभूमिकाः ॥ यत्किं चित्कुरुते कार्यं शुभं मांगल्यरूपकम् ॥ ४२ ॥ पुत्रे जाते जातके वान्नाशने मुंडनेऽपि वा ॥ लक्षहोमे कोटिहोमे तथा यज्ञक्रियासु च ॥ ४३ ॥ वास्तुपूजाग्रहशांत्योः प्राप्ते चैव महोत्सवे ॥ यत्किंचित्कुरुते दानं द्रव्यं वा धान्यमुत्तमम् ॥ ४४ ॥ वस्त्रं वा धेनवो नाथ हेम रूप्यं तथैव च ॥ विप्राणामथ शूद्राणां दीनानाथांधकेषु च ॥ ४५ ॥ प्रथमं बकुलार्कस्य श्रीमातुश्चैव मानवः ॥ भागं दद्याच्च निर्विघ्नकार्यसिद्ध्यै निरन्तरम् ॥ ४६ ॥ वचनं मे समुल्लंघ्य कुरुते योऽन्यथा नरः ॥ तस्य तत्कर्मणो विघ्नं भविष्यति न संशयः ॥ ४७ ॥ एवमुक्त्वा ततो रामः प्रहृष्टेनांतरात्मना ॥ देवानामथ वापीश्च प्राकारांस्तु सुशोभनान् ॥ ४८ ॥ दुर्गोपकरणैर्युक्तान्प्रतोलीश्च सुविस्तृताः ॥ निर्ममे चैव कुंडानि सरांसि सरसीस्तथा ॥ ४९ ॥ धर्मवापीश्च कूपांश्च तथान्यान्देवनिर्मितान् ॥ एतत्सर्वं च विस्तार्य धर्मारण्ये मनोरमे ॥ ५० ॥ ददौ त्रैविद्यमुख्येभ्यः श्रद्धया परया पुनः ॥ ताम्रपट्टस्थितं रामशासनं लोपयेत्तु यः ॥५१॥ पूर्वजास्तस्य नरके पतंत्यग्रे न संततिः ॥ वायुपुत्रं समाहूय ततो रामोऽब्रवीद्वचः ॥ ॥ ५२ ॥ वायुपुत्र महावीर तव पूजा भविष्यति ॥ अस्य क्षेत्रस्य रक्षायै त्वमत्र स्थितिमाचर ॥ ५३ ॥ आंजनेयस्तु तद्वाक्यं प्रणम्य शिरसादधौ ॥ जीर्णोद्धारं तदा कृत्वा कृतकृत्यो बभूव ह ॥ ५४ ॥ श्रीमातरं तदाभ्यर्च्य प्रसन्नेनांतरात्मना ॥ श्रीमातरं नमस्कृत्य तीर्थान्यन्यानि राघवः ॥५५॥ तेऽपि देवाः स्वकं स्थानं ययुर्ब्रह्मपुरोगमाः ॥५६॥ दत्त्वाशिषं तु रामाय वांछितं ते भविष्यति ॥ रम्यं कृतं त्वया राम विप्राणां स्थापनादिकम् ॥ ॥ ५७ ॥ अस्माकमपि वात्सल्यं कृतं पुण्यवता त्वया ॥ इति स्तुवंतस्ते देवाः स्वानि स्थानानि भेजिरे ॥ ५८ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे पूर्वार्धे धर्मारण्यमाहात्म्ये श्रीरामचन्द्रस्य पुरप्रत्यागमनवर्णनंनाम त्रयस्त्रिंशोऽध्यायः ॥ ३३ ॥ छ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ध्वजः ॥ दशध्वजसमा वेश्या दशवेश्यासमो नृपः ॥ ८ ॥ राजप्रतिग्रहो घोरो राम सत्यं न संशयः ॥ तस्माद्वयं न चेच्छमः प्रतिग्रहं भया वहम् ॥ ९ ॥ एकाहिका द्विजाः केचित्केचित्स्वामृतवृत्तयः ॥ कुम्भीधान्या द्विजाः केचित्केचित्षट्कर्मतत्पराः ॥ १० ॥ त्रिमूर्तिस्थापिताः सर्वे पृथग्भावाः पृथग्गुणाः ॥ केचिदेवं वदंति स्म त्रिमूर्त्याज्ञां विना वयम् ॥ ११ ॥ प्रतिग्रहस्य स्वीकारं कथं कुर्याम ह द्विजाः ॥ न तांबूलं स्वीकृतं नो[1] ह्यन्नो दानेन भषितम् ॥ १२ ॥ विमृश्य स तदा रामो वसिष्ठेन महात्मना ॥ ब्रह्मविष्णुशिवादीनां सस्मार गुरुणा सह ॥ स्मृतमात्रा स्ततो देवास्तं देशं समुपागमन् ॥ सूर्यकोटिप्रतीकाशविमानावलिसंवृताः ॥ १४ ॥ रामेण ते यथान्यायं पूजिताः परया मुदा ॥ १३ ॥ निवेदितं तु तत्सर्वं रामेणातिसुबुद्धिना ॥ १५ ॥ अधिदेव्या वचनतो जीर्णोद्धारं करोम्यहम् ॥ धर्मारण्ये हरिक्षेत्रे धर्मकूपसमीतः ॥ १६ ॥ ततस्ते वाडवाः सर्वे त्रिमूर्त्तीः प्रणिपत्य च ॥ महता हर्षवृंदेन पूर्णाः प्राप्तमनोरथाः ॥ १७ ॥ अर्घ्यपाद्यादिविधिना श्रद्धया तानपूजयन् ॥ क्षणं विश्रम्य ते देवा ब्रह्मविष्णुशिवादयः ॥ १८ ॥ ऊचू रामं महाशक्तिं विनयात्कृतसंपुटम् ॥ १९ ॥ ॥ देवा ऊचुः ॥ ॥ देवद्रुहस्त्वया राम ये हता रावणादयः ॥ तेन तुष्टा वयं सर्वे भानुवंशविभूषण ॥ २० ॥ उद्धरस्व महास्थानं महतीं कीर्तिमाप्नुहि ॥ २१ ॥ लब्ध्वा स तेषामाज्ञां तु प्रीतो दशरथात्मजः ॥ जीर्णोद्धारेऽनंतगुणं फलमिच्छन्निलापतिः ॥ २२ ॥ देवानां संनिधौ तेषां कार्यारंभमथाकरोत् ॥ स्थंडिलं पूर्वतः कृत्वा महागिरिसमं शुभम् ॥२३॥ तस्योपरि बहिःशाला गृहशाला ह्यनेकशः ॥ ब्रह्मशालाश्च बहुशो निर्ममे शोभनाकृतीः ॥२४॥ निधानैश्च समायुक्ता गृहोपकरणैर्वृताः ॥ सुवर्णकोटिसंपूर्णा रसवस्त्रादिपूरिताः ॥ २५ ॥ धनधान्यसमृद्धाश्च सर्वधातुयुतास्तथा ॥ एतत्सर्वं कारयित्वा ब्राह्मणेभ्यस्तदा ददौ ॥ २६ ॥ एकैकशो दशदश ददौ धेनूः पयस्विनीः ॥ चत्वारिंशच्छतं प्रादाद्ग्रामाणां चतुराधिकम् ॥ २७ ॥ त्रैविद्यद्विजविप्रेभ्यो रामो दशरथात्मजः ॥ काजेशेन त्रयेणैव स्थापिता द्विजसत्तमाः ॥ २८ ॥ तस्मात्त्रयीविद्य इति ख्यातिर्लोके बभूव ह ॥ एवंविधं द्विजेभ्यः स दत्त्वा दानं महाद्भुतम् ॥ ॥ २९ ॥ आत्मानं चापि मेने स कृतकृत्यं नरेश्वरः ॥ ब्रह्मणा स्थापिताः पूर्वं विष्णुना शंकरेण ये ॥ ३० ॥ ते पूजिता राघवेण जीर्णोद्धारे कृते सति ॥ षट्त्रिंशच्च सहस्राणि गोभुजा ये वणिग्वराः ॥ ३१ ॥ शुश्रूषार्थं प्रदत्ता वै देवैर्हरिहरादिभिः ॥ संतुष्टेन तु शर्वेण तेभ्यो दत्तं तु चेतनम् ॥ ३२ ॥ श्वेताश्वचामरौ दत्तौ खड्गं दत्तं सुनिर्मलम् ॥ तदा प्रबोधितास्ते च द्विजशुश्रूषणाय वै ॥ ३३ ॥ विवाहादौ सदा भाव्यं चामरै

१ नः—अस्माकम्—इत्यर्थः ।

CC-0. In Public Domain. Digitization by eGangotri

प्रचुरोऽभवत् ॥ २६ ॥ तद्दुद्दं कंटकैर्वृक्षैः सिंहव्याघ्रसमाकुलैः ॥ संचिक्रीडुः कुमाराश्च यस्यां भूमौ निरंतरम् ॥२७॥ कुमार्यश्चित्रकाणां च तत्र क्रीडं
ति हर्षिताः ॥ अकुर्वन्वाडवा यत्र वेदगानं निरंतरम् ॥२८॥ शिवानां तत्र फेत्काराः श्रूयंतेऽतिभयंकराः ॥ यत्र धूमोऽग्निहोत्राणां दृश्यते वै गृहेगृहे
॥ २९ ॥ तत्र दावाः सधूमाश्च दृश्यंतेऽत्युल्बणा भृशम् ॥ नृत्यंते नर्त्तका यत्र हर्षिता हि द्विजाग्रतः ॥ ३० ॥ तत्रैव भूतवेताला प्रेताः नृत्यंति
मोहिताः ॥ नृपा यत्र सभायां तु न्यषीदन्मंत्रतत्पराः ॥ ३१ ॥ तस्मिन्स्थाने निषीदंति गवया ऋक्षशल्लकाः ॥ आवासा यत्र दृश्यन्ते द्विजानां
वणिजां तथा ॥३२॥ कुट्टिमप्रतिमा राम दृश्यंतेत्र बिलानि वै ॥ कोटराणीह वृक्षाणां गवाक्षाणीह सर्वतः ॥ ३३ ॥ चतुष्का यज्ञवेदिर्हि सोच्छ्राया
ह्यभवत्पुरा ॥ तेऽत्र वल्मीकनिचयैर्दृश्यंते परिवेष्टिताः ॥ ३४ ॥ एवंविधं निवासं मे विद्धि राम नृपोत्तम ॥ शून्यं तु सर्वतो यस्मान्निवासाय द्विजा
गताः ॥ ३५ ॥ तेन मे सुमहद्दुःखं तस्मात्त्राहि नरेश्वर ॥ एतच्छ्रुत्वा वचो राम उवाच वदतां वरः ॥ ३६ ॥ ॥ श्रीराम उवाच ॥ ॥ न जाने
तावकान्विप्रांश्चतुर्दिक्षु समाश्रितान् ॥ न तेषां वेद्म्यहं संख्यां नामगोत्रे द्विजन्मनाम् ॥ ३७ ॥ यथा ज्ञातिर्यथा गोत्रं याथातथ्यं निवेदय ॥
तत आनीय तान्सर्वान्स्वस्थाने वासयाम्यहम् ॥ ३८ ॥ ॥ श्रीमातोवाच ॥ ॥ ब्रह्मविष्णुमहेशैश्च स्थापिता ये नरेश्वर ॥ अष्टादश
सहस्राणि ब्राह्मणा वेदपारगाः ॥ ३९ ॥ त्रयीविद्यासु विख्याता लोकेऽस्मिन्नमितद्युते ॥ चतुष्षष्टिकगोत्राणां वाडवा ये प्रतिष्ठिताः ॥
॥ ४० ॥ श्रीमातादात्त्रयीविद्यां लोके सर्वे द्विजोत्तमाः ॥ षट्त्रिंशच्च सहस्राणि वैश्या धर्मपरायणाः ॥ ४१ ॥ आर्यवृत्तास्तु विज्ञेया
द्विजशुश्रूषणे रताः ॥ बहुलार्को नृपो यत्र संज्ञया सह राजते ॥ ४२ ॥ कुमारावश्विनौ देवौ धनदो व्ययपूरकः ॥ अधिष्ठात्री त्वहं
राम नाम्ना भट्टारिका स्मृता ॥ ४३ ॥ ॥ श्रीसूत उवाच ॥ ॥ स्थानाचाराश्च ये केचित्कुलाचारास्तथैव च ॥ श्रीमात्रा कथितं सर्वं
रामस्याग्रे पुरातनम् ॥ ४४ ॥ तस्यास्तु वचनं श्रुत्वा रामो मुदमवाप ह ॥ सत्यंसत्यं पुनः सत्यं सत्यं हि भाषितं त्वया ॥ ४५ ॥
यस्मात्सत्यं त्वया प्रोक्तं तन्नाम्ना नगरं शुभम् ॥ वासयामि जगन्मातः सत्यमंदिरमेव च ॥ ४६ ॥ त्रैलोक्ये ख्यातिमाप्नोतु सत्यमंदिरमु
त्तमम् ॥ ४७ ॥ एतदुक्त्वा ततो रामः सहस्रशतसंख्यया ॥ स्वभृत्यान्प्रेषयामास विप्रानयनहेतवे ॥ ४८ ॥ यस्मिन्देशे प्रदेशे वा वने वा सरि
त्तटे ॥ पर्यंते वा यथास्थाने ग्रामे वा तत्रतत्र च ॥ ४९ ॥ धर्मारण्यनिवासाश्च याता यत्र द्विजोत्तमाः ॥ अर्घपाद्यैः पूजयित्वा शीघ्रमानय

१ चित्रकाः—व्याघ्रजातीयहिंस्रपशुविशेषाः 'चित्ता' इति महाराष्ट्रभाषायां प्रसिद्धाः । २ शुद्धाः—इ० पु० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri-

तात्र तान् ॥ ९० ॥ अहमत्र तदा भोक्ष्ये यदा द्रक्ष्ये द्विजोत्तमान् ॥ ९१ ॥ विमान्य च द्विजानेतानागमिष्यति यो नरः ॥ स मे वध्यश्च दंड्यश्च निर्वास्यो विषयाद्बहिः ॥ ९२ ॥ तच्छ्रुत्वा दारुणं वाक्यं दुःसहं दुःप्रधर्षणम् ॥ रामाज्ञाकारिणो दूता गताः सर्वे दिशो दश ॥ ९३ ॥ शोधिता वाडवाः सर्वे लब्धाः सर्वे सुहर्षिताः ॥ यथोक्तेन विधानेन अर्घपाद्यैरपूजयन् ॥ ९४ ॥ स्तुतिं चक्रुश्च विधिवद्विनयाचारपूर्वकम् ॥ आमंत्र्य च द्विजान्सर्वान्रामवाक्यं प्रकाशयन् ॥ ९५ ॥ ततस्ते वाडवाः सर्वे द्विजाः सेवकसंयुताः ॥ गमनायोद्यताः सर्वे वेदशास्त्रपरायणाः ॥ ९६ ॥ आगता रामपार्श्वं च बहुमानपुरःसराः ॥ समागतान्द्विजान्दृष्ट्वा रोमांचिततनूरुहः ॥ ९७ ॥ कृतकृत्यमिवात्मानं मेने दाशरथिर्नृपः ॥ स संभ्रमात्समुत्थाय पदातिः प्रययौ पुरः ॥ ९८ ॥ करसंपुटकं कृत्वा हर्षाश्रु प्रतिमुञ्चयन् ॥ जानुभ्यामवनिं गत्वा इदं वचनमब्रवीत् ॥ ९९ ॥ विप्रप्रसादात्कमलावरोऽहं विप्रप्रसादाद्धरणीधरोऽहम् ॥ विप्रप्रसादाज्जगतीपतिश्च विप्रप्रसादान्मम रामनाम ॥ ६० ॥ इत्येवमुक्ता रामेण वाडवास्ते प्रहर्षिताः ॥ जयाशीर्भिः प्रपूज्याथ दीर्घायुरिति चाब्रुवन् ॥ ६१ ॥ आवर्जितास्ते रामेण पाद्यार्घ्यविष्टरादिभिः ॥ स्तुतिं चकार विप्राणां दण्डवत्प्रणिपत्य च ॥ ६२ ॥ कृतांजलिपुटः स्थित्वा चक्रे पादाभिवंदनम् ॥ आसनानि विचित्राणि हैमान्याभरणानि च ॥ ६३ ॥ समर्पयामास ततो रामो दशरथात्मजः ॥ अंगुलीयकवासांसि उपवीतानि कर्णकान् ॥ ६४ ॥ प्रददौ विप्रमुख्येभ्यो नानावर्णाश्च धेनवः ॥ एकैकशत संख्याका घटोध्नीश्च सवत्सकाः ॥ ६५ ॥ सवस्त्रा बद्धघंटाश्च हेमशृंगविभूषिताः ॥ रूप्यखुरास्ताम्रपृष्ठीः कांस्यपात्रसमन्विताः ॥ ६६ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे पूर्वभागे धर्मारण्यमाहात्म्ये ब्रह्मनारदसंवादे सत्यमंदिरस्थापनवर्णनोनाम द्वात्रिंशोऽध्यायः ॥ ३२ ॥ ॥ छ ॥ ॥ राम उवाच ॥ ॥ जीर्णोद्धारं करिष्यामि श्रीमातुर्वचनादहम् ॥ आज्ञा प्रदीयतां मह्यं यथादानं ददामि वः ॥ १ ॥ पात्रे दानं प्रदातव्यं कृत्वा यज्ञवरं द्विजाः ॥ नापात्रे दीयते किंचिद्दत्तं न तु सुखावहम् ॥ २ ॥ सुपात्रं नौरिव सदा तारयेदुभयोरपि ॥ लोहपिंडोपमं ज्ञेयं कुपात्रं भञ्जनात्मकम् ॥ ३ ॥ जातिमात्रेण विप्रत्वं जायते न हि भो द्विजाः ॥ क्रिया बलवती लोके क्रियाहीने कुतः फलम् ॥ ४ ॥ पूज्यास्तस्मात्पूज्यतमा ब्राह्मणाः सत्यवादिनः ॥ यज्ञकार्ये समुत्पन्ने कृपां कुर्वंतु सर्वदा ॥ ५ ॥ ॥ ब्रह्मोवाच ॥ ॥ ततस्तु मिलिताः सर्वे विमृश्य च परस्परम् ॥ केचिदूचुस्तदा रामं वयं शिलोंछजीविकाः ॥ ६ ॥ संतोषं परमास्थाय स्थिता धर्मपरायणाः ॥ प्रतिग्रहप्रयोगेण न चास्माकं प्रयोजनम् ॥ ७ ॥ दशसूनासमश्चक्री दशचक्रिसमो

CC-0. In Public Domain. Digitization by eGangotri

सुवस्त्रभूषाभरणां मृदुवाक्यपरायणाम् ॥ एकाकिनीं क्रंदमानां दृष्ट्वा तां विस्मिता वयम् ॥ २ ॥ समीपवर्तिनो भूत्वा पृष्टा सा सुरसुन्दरी ॥ का त्वं देवि वरारोहे देवी वा दानवी नु किम् ॥ ३ ॥ रामः पृच्छति देवि त्वां ब्रूहि सर्वं यथातथम् ॥ तच्छ्रुत्वा वचनं रामा सोवाच मधुरं वचः ॥ ४ ॥ रामं प्रेषयत भद्रं वो मम दुःखापहं परम् ॥ ५ ॥ तदाकर्ण्य ततो रामः संभ्रमात्त्वरितो ययौ ॥ दृष्ट्वा तां दुःखसंतप्तां स्वयं दुःखमवाप सः ॥ उवाच वचनं रामः कृतांजलिपुटस्तदा ॥ ६ ॥ ॥ श्रीराम उवाच ॥ ॥ का त्वं शुभे कस्य परिग्रहो वा केनावधूता विजने निरस्ता ॥ मुष्टं धनं केन च तावकीनमाचक्ष्व मातः सकलं ममाग्रे ॥ ७ ॥ इत्युक्त्वा चातिदुःखार्तो रामो मतिमतां वरः ॥ प्रणामं दंडवच्चक्रे चक्रपाणिरिवापरः ॥८॥ तया भिवंदितो रामः प्रणम्य च पुनःपुनः ॥ तुष्टया परया प्रीत्या स्तुतो मधुरया गिरा ॥ ९ ॥ परमात्मन्परेशान दुःखहारिन्सनातन ॥ यदर्थमवतारस्ते तच्च कार्यं त्वया कृतम् ॥ १० ॥ रावणः कुंभकर्णश्च शक्रजित्प्रमुखास्तथा ॥ खरदूषणत्रिशिरोमारीचाक्षकुमारकाः ॥ ११ ॥ असंख्या निर्जिता रौद्रा राक्षसाः समरांगणे ॥ १२ ॥ किं वच्मि लोकेश सुकीर्त्तिमद्य ते वेधास्त्वदीयांगजपद्मसंभवः ॥ विश्वं निविष्टं च ततो ददर्श वटस्य पत्रे हि यथा वटो मतः ॥ १३ ॥ धन्यो दशरथो लोके कौशल्या जननी तव ॥ ययोर्जातोसि गोविंद जगदीश परः पुमान् ॥ १४ ॥ धन्यं च तत्कुलं राम यत्र त्वमागतः स्वयम् ॥ धन्याऽयोध्यापुरी राम धन्यो लोकस्त्वदाश्रयः ॥ १५ ॥ धन्यः सोऽपि हि वाल्मीकिर्येन रामायणं कृतम् ॥ कविना विप्रमुख्येभ्य आत्मबुद्ध्या ह्यनागतम् ॥ १६ ॥ त्वत्तोऽभवत्कुलं चेदं त्वया देव सुपावितम् ॥१७॥ नरपतिरिति लोकैः स्मर्यते वैष्णवांशः स्वयमसि रमणीयैस्त्वं गुणैर्विष्णुरेव ॥ किमपि भुवनकार्यं यद्विचिंत्यावतीर्य तदिह घटयतस्ते वत्स निर्विघ्नमस्तु ॥१८॥ स्तुत्वा वाचाथ रामं हि त्वयि नाथे नु सांप्रतम् ॥ शून्या वर्ते चिरं कालं यथा दोषस्तथैव हि ॥ १९ ॥ धर्मारण्यस्य क्षेत्रस्य विद्धि मामधिदेवताम् ॥ वर्षाणि द्वादशेहैव जातानि दुःखितास्म्यहम् ॥ २० ॥ निर्जनत्वं ममाद्य त्वमुद्धरस्व महामते ॥ लोहासुरभयाद्राम विप्राः सर्वे दिशो दश ॥ २१ ॥ गताश्च वणिजः सर्वे यथास्थानं सुदुःखिताः ॥ स दैत्यो घातितो राम देवैः सुरभयंकरः ॥ २२ ॥ आक्रम्यात्र महामायो दुराधर्षो दुरत्ययः ॥ न ते जनाः समायांति तद्भयादति शंकिताः ॥ २३ ॥ अद्य वै द्वादश समाः शून्यागारमनाथवत् ॥ यस्माच्च दीर्घिकायां मे स्नानदानोद्यतो जनः ॥ २४ ॥ राम तस्यां दीर्घिकायां निपतंति च शूकराः ॥ यत्रांगना भर्तृयुता जलक्रीडापरायणाः ॥ २५ ॥ चिक्रीडुस्तत्र महिषा निपतंति जलाशये ॥ यत्र स्थाने सुपुष्पाणां प्रकरः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सायके ॥ ६१ ॥ समर्थान्हि महाकायान्महाबलपराक्रमान् ॥ समाहूय तदा काले वाक्यमेतदथाब्रवीत् ॥ ६२ ॥ शिबिकां सुसुवर्णा
मे शीघ्रं वाह्यताचिरम् ॥ यथा क्षणेन चैकेन धर्मारण्यं व्रजाम्यहम् ॥ ६३ ॥ तत्र स्नात्वा च पीत्वा च सर्वपापात्प्रमुच्यते ॥ एवं ते
वणिजः सर्वे रामेण प्रेरितास्तदा ॥ ६४ ॥ तथेत्युक्त्वा च ते सर्वे ऊहुस्तच्छिबिकां तदा ॥ क्षेत्रमध्ये यदा रामः प्रविष्टः सहसैनिकः ॥
॥ ६५ ॥ तद्यानस्य गतिर्मंदा संजाता किल भारत ॥ मंदशब्दानि वाद्यानि मातंगा मंदगामिनः ॥ ६६ ॥ हयाश्च तादृशा जाता रामो विस्मय
मागतः ॥ गुरुं पप्रच्छ विनयाद्वशिष्ठं मुनिपुंगवम् ॥ ६७ ॥ किमेतन्मंदगतयश्चित्रं हृदि मुनीश्वर ॥ त्रिकालज्ञो मुनिः प्राह धर्मक्षेत्रमुपागतम् ॥
॥ ६८ ॥ तीर्थे पुरातने राम पादचारेण गम्यते ॥ एवं कृते ततः पश्चात्सैन्यसौख्यं भविष्यति ॥ ६९ ॥ पादचारी ततो रामः सैन्येन सह संयुतः ॥
मधुवासनके ग्रामे प्रातः परमभावनः ॥ ७० ॥ गुरुणा चोक्तमार्गेण मातॄणां पूजनं कृतम् ॥ नानोपहारैर्विविधैः प्रतिष्ठाविधिपूर्वकम् ॥ ७१ ॥
ततो रामो हरिक्षेत्रं सुवर्णादक्षिणे तटे ॥ निरीक्ष्य यज्ञयोग्याश्च भूमीर्वै बहुशस्तथा ॥ ७२ ॥ कृतकृत्यं तदात्मानं मेने रामो रघूद्वहः ॥ धर्मस्थानं
निरीक्ष्याथ सुवर्णाक्षोत्तरे तटे ॥ ७३ ॥ सैन्यसंघं समुत्तीर्य्य बभ्राम क्षेत्रमध्यतः ॥ तत्र तीर्थेषु सर्वेषु देवतायतनेषु च ॥७४॥ यथोक्तानि च कर्माणि
रामश्चक्रे विधानतः ॥ श्राद्धानि विधिवच्चक्रे श्रद्धया परया युतः ॥ ७५ ॥ स्थापयामास रामेशं तथा कामेश्वरं पुनः ॥ स्थानाद्वायुप्रदेशे तु सुवर्णो
भयतस्तटे ॥ ७६ ॥ कृत्वैवं कृतकृत्योऽभूद्रामो दशरथात्मजः ॥ कृत्वा सर्वविधिं चैव सभायां समुपाविशत् ॥ ७७ ॥ तां निशां स नदीतीरे
सुष्वाप रघुनंदनः ॥ ततोऽर्द्धरात्रे संजाते रामो राजीवलोचनः ॥ ७८ ॥ जागृतस्तु तदा काल एकाकी धर्मवत्सलः ॥ अश्रौषीच्च क्षणे तस्मि
न्नामो नारीविरोदनम् ॥ ७९ ॥ निशायां करुणैर्वाक्यै रुदंतीं कुररीमिव ॥ चारैर्विलोकयामास रामस्तामतिसंभ्रमात् ॥ ८० ॥ दृष्ट्वातिविह्वलां नारीं
क्रंदन्तीं करुणैः स्वरैः ॥ पृष्टा सा दुःखिता नारी रामदूतैस्तदानघ ॥ ८१ ॥ ॥ दूता ऊचुः ॥ ॥ कासि त्वं सुभगे नारि देवी वा दानवी नु
किम् ॥ केन वा त्रासितासि त्वं मुष्टं केन धनं तव ॥८२॥ विकला दारुणाञ्छब्दानुद्गिरंती मुहुर्मुहुः ॥ कथयस्व यथातथ्यं रामो राजाभिपृच्छति॥
॥ ८३ ॥ तयोक्तं स्वामिनं दूताः प्रेषयध्वं ममांतिकम् ॥ यथाहं मानसं दुःखं शांत्यै तस्मै निवेदये ॥ ८४ ॥ तथेत्युक्त्वा ततो दूता राममागत्य
चाब्रुवन् ॥ ८५ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे पूर्वभागे धर्मारण्यमाहात्म्ये दूतागमनंनामैकत्रिंशो
ऽध्यायः ॥ ३१ ॥ छ ॥ ॥ व्यास उवाच ॥ ॥ ततश्च रामदूतास्ते नत्वा राममथाब्रुवन् ॥ रामराम महाबाहो वरनारी शुभानना ॥ १ ॥

CC-0. In Public Domain. Digitization by eGangotri

कामदं क्षेत्रं यतीनां मुक्तिदायकम् ॥ सिद्धानां सिद्धिदं प्रोक्तं धर्मारण्यं युगेयुगे ॥ ३८ ॥ ॥ ब्रह्मोवाच ॥ ॥ वसिष्ठवचनं श्रुत्वा रामो धर्मभृतां वरः ॥ परं हर्षमनुप्राप्य हृदयानंदकारकम् ॥ ३९ ॥ प्रोत्फुल्लहृदयो रामो रोमांचिततनूरुहः ॥ गमनाय मतिं चक्रे धर्मारण्ये शुभव्रतः ॥ ॥ ४० ॥ यस्मिन्कीटपतंगादिमानुषाः पशवस्तथा ॥ त्रिरात्रसेवनेनैव मुच्यन्तेः सर्वपातकैः ॥ ४१ ॥ कुशस्थली यथा काशी शूलपाणिश्च भैरवः ॥ यथा वै मुक्तिदो राम धर्मारण्यं तथोत्तमम् ॥ ४२ ॥ ततो रामो महेष्वासो मुदा परमया युतः ॥ प्रस्थितस्तीर्थयात्रायां सीतया भ्रातृभिः सह ॥ ४३ ॥ अनुजग्मुस्तदा रामं हनुमांश्च कपीश्वरः ॥ कौशल्या च सुमित्रा च कैकेयी च मुदान्विता ॥ ४४ ॥ लक्ष्मणो लक्षणोपेतो भरतश्च महामतिः ॥ शत्रुघ्नः सैन्यसहितोप्ययोध्यावासिनस्तथा ॥ ४५ ॥ प्रकृतयो नरव्याघ्र धर्मारण्ये विनिर्ययुः ॥ अनुजग्मुस्तदा रामं मुदा परमया युताः ॥ ४६ ॥ तीर्थयात्राविधिं कर्तुं गृहात्प्रचलितो नृपः ॥ वसिष्ठं स्वकुलाचार्यमिदमाह महीपते ॥ ४७ ॥ ॥ श्रीराम उवाच ॥ ॥ एतदाश्चर्यमतुलं किमादि द्वारकाभवत् ॥ कियत्कालसमुत्पन्ना वसिष्ठेदं वदस्व मे ॥ ४८ ॥ ॥ वसिष्ठ उवाच ॥ ॥ न जानामि महाराज कियत्कालादभूदिदं[१] ॥ लोमशो जांबवांश्चैव जानातीति च कारणम् ॥ ४९ ॥ शरीरे यत्कृतं पापं नानाजन्मांतरेष्वपि ॥ प्रायश्चित्तं हि सर्वेषामेतत्क्षेत्रं परं स्मृतम् ॥ ५० ॥ श्रुत्वेति वचनं तस्य रामं ज्ञानवतां वरः ॥ गन्तुं कृतमतिस्तीर्थं यात्राविधिमथाचरत् ॥ ५१ ॥ वसिष्ठं चाग्रतः कृत्वा महामांडलिकैर्नृपैः ॥ पुनश्चरविधिं कृत्वा प्रस्थितश्चोत्तरां दिशम् ॥ ५२ ॥ वसिष्ठं चाग्रतः कृत्वा प्रतस्थे पश्चिमां दिशम् ॥ ग्रामाद्ग्राममतिक्रम्य देशाद्देशं वनाद्वनम् ॥५३॥ विमुच्य[२] निर्ययौ रामः ससैन्यः सपरिच्छदः ॥ गजवाजिसहस्रौघै रथैर्यानैश्च कोटिभिः ॥ ॥ ५४ ॥ शिबिकाभिश्चासंख्याभिः प्रययौ राघवस्तदा ॥ गजारूढः प्रपश्यंश्च देशान्विविधसौहृदान् ॥ ५५ ॥ श्वेतातपत्रं विधृत्य चामरेण शुभेन च ॥ वीजितश्च जनौघेन रामस्तत्र समभ्यगात् ॥ ५६ ॥ वादित्राणां स्वनैर्घोरैर्नृत्यगीतपुरःसरैः ॥ स्तूयमानोपि सूतैश्च ययौ रामो मुदान्वितः ॥ ५७ ॥ दशमेऽहनि संप्राप्तं धर्मारण्यमनुत्तमम् ॥ अदूरे हि ततो रामो दृष्ट्वा मांडलिकं पुरम् ॥ ५८ ॥ तत्र स्थित्वा ससैन्यस्तु उवास निशि तां पुरीम् ॥ श्रुत्वा तु निर्जनं क्षेत्रमुद्वसं च भयानकम् ॥ ५९ ॥ व्याघ्रसिंहाकुलं तत्र यक्षराक्षससेवितम् ॥ श्रुत्वा जनमुखाद्रामो धर्मारण्यमरण्यकम् ॥ तच्छ्रुत्वा रामदेवस्तु न चिंता क्रियतामिति ॥ ६० ॥ तत्रस्थान्वणिजः शूरान्दक्षान्स्वव्यव

१ इ[दं]-क्षेत्रम्। २ विमुच्य-गमनेन अतिक्रम्य-इत्यर्थः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सरस्वती ॥ १३ ॥ प्राचीं माधवमास्तूय स गच्छेत्परमां गतिम् ॥ गंडकीपुण्यतीर्थे हि स्नानं यः कुरुते नरः ॥ १४ ॥ शालग्रामशिलामर्च्य न भूयः स्तनपो भवेत् ॥ गोमतीजलकल्लोलैर्मज्जयेत्कृष्णसन्निधौ ॥ १५ ॥ चतुर्भुजो नरो भूत्वा वैकुण्ठे मोदते चिरम् ॥ चर्मण्वतीं नमस्कृत्य अपः स्पृशति यो नरः ॥ १६ ॥ स तारयति पूर्वजान्दश पूर्वान्दशापरान् ॥ द्वयोश्च संगमं दृष्ट्वा श्रुत्वा वा सागरध्वनिम् ॥ १७ ॥ ब्रह्महत्यायुतो वापि पूतो गच्छेत्परां गतिम् ॥ माघमासे प्रयागे तु मज्जनं कुरुते नरः ॥ १८ ॥ इह लोके सुखं भुक्त्वा अन्ते विष्णुपदं व्रजेत् ॥ प्रभासे ये नरा राम त्रिरात्रं ब्रह्मचारिणः ॥ १९ ॥ यमलोकं न पश्येयुः कुंभीपाकादिकं तथा ॥ नैमिषारण्यवासी यो नरो देवत्वमाप्नुयात् ॥ २० ॥ देवानामालयं यस्मात्तदेव भुवि दुर्लभम् ॥ कुरुक्षेत्रे नरो राम ग्रहणे चन्द्रसूर्ययोः ॥ २१ ॥ हेमदानाच्च राजेंद्र न भूयः स्तनपो भवेत् ॥ श्रीस्थले दर्शनं कृत्वा नरः पापात्प्रमुच्यते ॥ २२ ॥ सर्वदुःखविनाशे च विष्णुलोके महीयते ॥ काश्यपीं स्पर्शयेद्यो गां मानवो भुवि राघव ॥ ॥ २३ ॥ सर्वकामदुघावासमृषिलोकं स गच्छति ॥ उज्जयिन्यां तु वैशाखे शिप्रायां स्नानमाचरेत् ॥ २४ ॥ मोचयेद्रौरवाद्घोरात्पूर्वजांश्च सहस्रशः ॥ सिंधुस्नानं नरो राम प्रकरोति दिनत्रयम् ॥ २५ ॥ सर्वपापविशुद्धात्मा कैलासे मोदते नरः ॥ कोटितीर्थे नरः स्नात्वा दृष्ट्वा कोटीश्वरं शिवम् ॥ २६ ॥ ब्रह्महत्यादिभिः पापैर्लिप्यते न च स क्वचित् ॥ अज्ञानामपि जंतूनां महाऽमेध्ये तु गच्छताम् ॥ ॥ २७ ॥ पादोद्भूतं पयः पीत्वा सर्वपापं प्रणश्यति ॥ वेदवत्यां नरो यस्तु स्नाति सूर्योदये शुभे ॥ २८ ॥ सर्वरोगात्प्रमुच्येत परं सुखमवाप्नुयात् ॥ तीर्थानि राम सर्वत्र स्नानपानावगाहनैः ॥ २९ ॥ नाशयंति मनुष्याणां सर्वपापानि लीलया ॥ तीर्थानां परमं तीर्थं धर्मारण्यं प्रचक्षते ॥ ३० ॥ ब्रह्मविष्णुशिवाद्यैर्यदादौ संस्थापितं पुरा ॥ अरण्यानां च सर्वेषां तीर्थानां च विशेषतः ॥ ३१ ॥ धर्मारण्यात्परं नास्ति भुक्तिमुक्तिप्रदायकम् ॥ स्वर्गे देवाः प्रशंसंति धर्मारण्यनिवासिनः ॥ ३२ ॥ ते पुण्यास्ते पुण्यकृतो ये वसंति कलौ नराः ॥ धर्मारण्ये रामदेव सर्वकिल्बिषनाशने ॥ ३३ ॥ ब्रह्महत्यादिपापानि सर्वस्तेयकृतानि च ॥ परदारप्रसंगादि अभक्ष्यभक्षणादि वै ॥ ३४ ॥ अगम्यागमनाद्यानि अस्पर्शस्पर्शनादि च ॥ भस्मीभवंति लोकानां धर्मारण्यावगाहनात् ॥ ३५ ॥ ब्रह्मघ्नश्च कृतघ्नश्च बालघ्नोऽनृतभाषणः ॥ स्त्रीगोघ्नश्चैव ग्रामघ्नो धर्मारण्ये विमुच्यते ॥ ३६ ॥ नातः परं पावनं हि पापिनां प्राणिनां भुवि ॥ स्वर्ग्यं यशस्यमायुष्यं वांछितार्थप्रदं शुभम् ॥ ३७ ॥ कामिनां

१ गल्लकी–इति सर्वत्र पाठांतरम् ।

CC-0. In Public Domain. Digitization by eGangotri

पापिनो नहि ॥ ९८ ॥ न हेमहारी ब्रह्मघ्नो न चैव गुरुतल्पगः ॥ न स्त्रीघ्नो न च बालघ्नो न चैवानृतभाषणः ॥ ९९ ॥ न वृत्तिलोपकश्चासीत्कूट
साक्षी न चैव हि ॥ न शठो न कृतघ्नश्च मलिनो नैव दृश्यते ॥ १०० ॥ सदा सर्वत्र पूज्यंते ब्राह्मणा वेदपारगाः ॥ नावैष्णवोऽव्रती राजन्राम
राज्येऽतिविश्रुते ॥ १०१ ॥ राज्यं प्रकुर्वतस्तस्य पुरोधा वदतां वरः ॥ वसिष्ठो मुनिभिः सार्द्धं कृत्वा तीर्थान्यनेकशः ॥ २ ॥ आजगाम ब्रह्मपुत्रो
महाभागस्तपोनिधिः ॥ रामस्तं पूजयामास मुनिभिः सहितं गुरुम् ॥ ३ ॥ अभ्युत्थानार्घपाद्यैश्च मधुपर्कादिपूजया ॥ प्रपच्छ कुशलं रामं वसिष्ठो
मुनिपुंगवः ॥ ४ ॥ राज्ये चाश्वे गजे कोशे देशे सद्भ्रातृभृत्ययोः ॥ कुशलं वर्त्तते राम इति पृष्टे मुनेस्तदा ॥ ५ ॥ ॥ राम उवाच ॥ ॥
सर्वत्र कुशलं मेऽद्य प्रसादाद्भवतः सदा ॥ पप्रच्छ कुशलं रामो वसिष्ठं मुनिपुंगवम् ॥ ६ ॥ सर्वतः कुशली त्वं हि भार्यापुत्रसमन्वितः ॥
स सर्वं कथयामास यथा तीर्थान्यशेषतः ॥ ७ ॥ सेवितानि धरापृष्ठे क्षेत्राण्यायतनानि च ॥ रामाय कथयामास सर्वत्र कुशलं तदा ॥ ८ ॥ ततः
स विस्मयाविष्टो रामो राजीवलोचनः ॥ पप्रच्छ तीर्थमाहात्म्यं यत्तीर्थंपूत्तमोत्तमम् ॥ १०९ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां
संहितायां तृतीये ब्रह्मखण्डे पूर्वभागे धर्मारण्यमाहात्म्ये रामचरित्रवर्णनंनाम त्रिंशोऽध्यायः ॥ ३० ॥ ॥ छ ॥ ॥ श्रीराम उवाच ॥ ॥
भगवन्यानि तीर्थानि सेवितानि त्वया विभो ॥ एतेषां परमं तीर्थं तन्ममाचक्ष्व मानद ॥ १ ॥ मया तु सीताहरणे निहता ब्रह्मराक्षसाः ॥ तत्पा
पस्य विशुद्ध्यर्थं वद तीर्थोत्तमोत्तमम् ॥ २ ॥ वसिष्ठ उवाच ॥ ॥ गंगा च नर्मदा तापी यमुना च सरस्वती ॥ गंडकी गोमती पूर्णा एता
नद्यः सुपावनाः ॥ ३ ॥ एतासां नर्मदा श्रेष्ठा गंगा त्रिपथगामिनी ॥ दहते किल्बिषं सर्वं दर्शनादेव राघव ॥ ४ ॥ दृष्ट्वा जन्मशतं पापं गत्वा
जन्मशतत्रयम् ॥ स्नात्वा जन्मसहस्रं च हंति रेवा कलौ युगे ॥ ५ ॥ नर्मदातीरमाश्रित्य शाकमूलफलैरपि ॥ एकस्मिन्भोजिते विप्रे कोटि
भोजफलं लभेत् ॥ ६ ॥ गंगा गंगेति यो ब्रूयाद्योजनानां शतैरपि ॥ मुच्यते सर्वपापेभ्यो विष्णुलोकं स गच्छति ॥ ७ ॥ फाल्गुनांते कुहूं
प्राप्य तथा प्रौष्ठपदेऽसिते ॥ पक्षे गंगामधि प्राप्य स्नानं च पितृतर्प्पणम् ॥ ८ ॥ कुरुते पिंडदानानि सोऽक्षयं फलमश्नुते ॥ शुचौ मासे च
संप्राप्ते स्नानं वाप्यां करोति यः ॥ ९ ॥ चतुरशीतिनरकान्न पश्यति नरो नृप ॥ तपत्याः स्मरणे राम महापातकिनामपि ॥ १० ॥
उद्धरेत्सप्तगोत्राणि कुलमेकोत्तरं शतम् ॥ यमुनायां नरः स्नात्वा सर्वपापैः प्रमुच्यते ॥ ११ ॥ महापातकयुक्तोऽपि स गच्छेत्परमां गतिम् ॥
कार्त्तिक्यां कृत्तिकायोगे सरस्वत्यां निमज्जयेत् ॥ १२ ॥ गच्छेत्स गरुडारूढः स्तूयमानः सुरोत्तमैः ॥ स्नात्वा यः कार्तिके मासि यत्र प्राची

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्रावितो दशकंधरः ॥ बिभीषणोपदेशेन हनुमद्युद्धमेव च ॥ ७४ ॥ द्रोणाद्रेरोषधीं नेतुं लक्ष्मणार्थमुपागतः ॥ विशल्यां तु समादाय लक्ष्मणं तामपाययत् ॥ ७५ ॥ दशम्यामवहारोऽभूद्रात्रौ युद्धं तु रक्षसाम् ॥ एकादश्यां तु रामाय रथो मातलिसारथिः ॥ ७६ ॥ प्राप्तो युद्धाय द्वादश्यां यावत्कृष्णां चतुर्दशीम् ॥ अष्टादशदिने रामो रावणं द्वैरथेऽवधीत् ॥ ७७ ॥ संस्कारा रावणादीनाममावास्यादिनेऽभवन् ॥ संग्रामे तुमुले जाते रामो जयमवाप्तवान् ॥ ७८ ॥ माघशुक्लद्वितीयादिचैत्रकृष्णचतुर्दशीम् ॥ सप्ताशीतिदिनान्येवं मध्ये पंचदशाहकम् ॥ ७९ ॥ युद्धावहारः संग्रामो द्वासप्ततिदिनान्यभूत् ॥ वैशाखादितिथौ राम उवास रणभूमिषु ॥ अभिषिक्तो द्वितीयायां लंकाराज्ये बिभीषणः ॥ ८० ॥ सीताशुद्धिस्तृतीयायां देवेभ्यो वरलंभनम् ॥ दशरथस्यागमनं तत्र चैवानुमोदनम् ॥ ८१ ॥ हत्वा त्वरेण लंकेशं लक्ष्मणस्याग्रजो विभुः॥ गृहीत्वा जानकीं पुण्यां दुःखितां राक्षसेन तु ॥ ८२ ॥ आदाय परया प्रीत्या जानकीं स न्यवर्तत ॥ वैशाखस्य चतुर्थ्यां तु रामः पुष्पकमाश्रितः ॥ ८३ ॥ विहायसा निवृत्तस्तु भूयोऽयोध्यां पुरीं प्रति ॥ पूर्णे चतुर्दशे वर्षे पंचम्यां माधवस्य च ॥ ८४ ॥ भारद्वाजाश्रमे रामः सगणः समुपाविशत् ॥ नंदिग्रामे तु षष्ठ्यां स पुष्पकेण समागतः ॥ ८५ ॥ सप्तम्यामभिषिक्तोऽसौ भूयोऽयोध्यायां रघूद्वहः ॥ दशाहाधिकमासांश्च चतुर्दश हि मैथिली ॥ ८६ ॥ उवास रामरहिता रावणस्य निवेशने ॥ द्वाचत्वारिंशके वर्षे रामो राज्यमकारयत् ॥ ८७ ॥ सीतायास्तु त्रयस्त्रिंशद्वर्षाणि तु तदाभवन् ॥ स चतुर्दशवर्षांते प्रविष्टः स्वां पुरीं प्रभुः ॥ ८८ ॥ अयोध्यांनाम मुदितो रामो रावणदर्पहा ॥ भ्रातृभिः सहितस्तत्र रामो राज्यमकारयत् ॥ ८९ ॥ दशवर्षसहस्राणि दशवर्षशतानि च ॥ रामो राज्यं पालयित्वा जगाम त्रिदिवालयम् ॥ ९० ॥ रामराज्ये तदा लोका हर्षनिर्भरमानसाः ॥ बभूवुर्धनधान्याढ्याः पुत्रपौत्रयुता नराः ॥ ९१ ॥ कामवर्षी च पर्जन्यः सस्यानि गुणवंति च ॥ गावस्तु घटदोहिन्यः पादपाश्च सदाफलाः ॥ ९२ ॥ नाधयो व्याधयश्चैव रामराज्ये नराधिप ॥ नार्यः पतिव्रताश्चासन्पितृभक्तिपरा नराः ॥ ९३ ॥ द्विजा वेदपरा नित्यं क्षत्रिया द्विजसेविनः ॥ कुर्वंते वैश्यवर्णाश्च भक्तिं द्विजगवां सदा ॥ ९४ ॥ न योनिसंकरश्चासीत्तत्र नाचारसंकरः ॥ न वंध्या दुर्भगा नारी काकवंध्या मृतप्रजा ॥ ९५ ॥ विधवा नैव काप्यासीत्सभर्तृका न लंप्यते ॥ नावज्ञां कुर्वते केपि मातापित्रोर्गुरोस्तथा ॥ ९६ ॥ न च वाक्यं हि वृद्धानामुल्लंघयति पुण्यकृत् ॥ न भूमिहरणं तत्र परनारीपराङ्मुखाः ॥ ९७ ॥ नापवादपरो लोको न दरिद्रो न रोगभाक् ॥ न स्तेयो द्यूतकारी च मैरेयी

१ न लप्यते–न विलप्यते–पुत्रपौत्रादिसुखमनुभवन्त्याः सौभाग्यवत्याः पत्युरग्रे नातिरोगेण मरणात्–इत्यर्थः । २ मैरेयम्–मद्यम्–तत्प्राशकः–मैरेयी ।

CC-0. In Public Domain. Digitization by eGangotri

च ॥ २१ ॥ आगतो राक्षसो घोरः सीतापहरणाय सः ॥ ततो माघासिताष्टम्यां मुहूर्ते वृन्दसंज्ञके ॥ २२ ॥ राघवाभ्यां विना सीतां जहार दश
कन्धरः ॥ मारीचस्याश्रमं गत्वा मृगरूपेण तेन च ॥ २३ ॥ नीत्वा दूरं राघवं च लक्ष्मणेन समन्वितम् ॥ ततो रामो जघानाशु मारीचं मृगरू
पिणम् ॥ २४ ॥ पुनः प्राप्याश्रमं रामो विना सीतां ददर्श ह ॥ तत्रैव ह्रियमाणा सा चक्रंद कुररी यथा ॥ २५ ॥ रामरामेति मां रक्ष रक्ष मां रक्षसा
हृताम् ॥ यथा श्येनः क्षुधायुक्तः क्रन्दंतीं वर्तिकां नयेत् ॥ २६ ॥ तथा कामवशं प्राप्तो राक्षसो जनकात्मजाम् ॥ नयत्येष जनकजां तच्छ्रुत्वा
पक्षिराट् तदा ॥ २७ ॥ युयुधे राक्षसेंद्रेण रावणेन हतोऽपतत् ॥ माघासितनवम्यां तु वसंतीं रावणालये ॥ २८ ॥ मार्गमाणौ तदा तौ तु भ्रातरौ
रामलक्ष्मणौ ॥ २९ ॥ जटायुषं तु दृष्ट्वैव ज्ञात्वा राक्षससंहृताम् ॥ सीतां ज्ञात्वा ततः पक्षी संस्कृतस्तेन भक्तितः ॥ ३० ॥ अग्रतः प्रययौ रामो
लक्ष्मणस्तत्पदानुगः ॥ पंपाभ्याशमनुप्राप्य शबरीमनुगृह्य च ॥३१॥ तज्जलं समुपस्पृश्य हनुमद्दर्शनं कृतम् ॥ ततो रामो हनुमता सह सख्यं चकार
ह ॥ ३२ ॥ ततः सुग्रीवमभ्येत्य अहनद्वालिवानरम् ॥ प्रेषिता रामदेवेन हनुमत्प्रमुखाः प्रियाम् ॥ ३३ ॥ अंगुलीयकमादाय वायुसूनुस्तदा गतः ॥
संपातिर्दशमे मासि आचख्यौ वानराय ताम्॥३४॥ततस्तद्वचनादब्धिं पुप्लुवे शतयोजनम् ॥ हनुमान्निशि तस्यां तु लंकायां परितोऽचिनोत्॥३५॥
तद्रात्रिशेषे सीताया दर्शनं तु हनूमतः ॥ द्वादश्यां शिंशपावृक्षे हनुमान्पर्यवस्थितः ॥ ३६ ॥ तस्यां निशायां जानक्या विश्वासायाह संकथाम् ॥
अक्षादिभिस्त्रयोदश्यां ततो युद्धमवर्त्तत ॥ ३७ ॥ ब्रह्मास्त्रेण त्रयोदश्यां बद्धः शक्रजिता कपिः ॥ दारुणानि च रूक्षाणि वाक्यानि राक्षसाधिपम् ॥
॥ ३८ ॥ अब्रवीद्वायुसूनुस्तं बद्धो ब्रह्मास्त्रसंयुतः ॥ वह्निना पुच्छयुक्तेन लंकाया दहनं कृतम् ॥ ३९ ॥ पूर्णिमायां महेंद्राद्रौ पुनरागमनं कपेः ॥
मार्गशीर्षप्रतिपदः पंचभिः पथि वासरैः ॥ ४० ॥ पुनरागत्य वर्षेह्नि ध्वस्तं मधुवनं किल ॥ सप्तम्यां प्रत्यभिज्ञानदानं सर्वनिवेदनम् ॥ ४१ ॥
मणिप्रदानं सीतायाः सर्वं रामाय शंसयत् ॥ अष्टम्युत्तरफाल्गुन्यां मुहूर्ते विजयाभिधे ॥ ४२ ॥ मध्यं प्राप्ते सहस्रांशौ प्रस्थानं राघवस्य च ॥
रामः कृत्वा प्रतिज्ञां हि प्रयातुं दक्षिणां दिशम् ॥ ४३ ॥ तीर्त्वाहं सागरमपि हनिष्ये राक्षसेश्वरम् ॥ दक्षिणाशां प्रयातस्य सुग्रीवोऽथाभव
त्सखा ॥ ४४ ॥ वासरैः सप्तभिः सिंधोस्तीरे सैन्यनिवेशनम् ॥ पौषशुक्लप्रतिपदस्तृतीयां यावदंबुधौ ॥ उपस्थानं ससैन्यस्य राघवस्य
बभूव ह ॥ ४५ ॥ विभीषणश्चतुर्थ्यां तु रामेण सह संगतः ॥ समुद्रतरणार्थाय पंचम्यां मंत्रे उद्यतेः ॥ ४६ ॥ प्रायोपवेशनं चक्रे रामो दिन

१ अशंसयत्—अडभाव आर्षः । २ मंत्रे—मंत्रणे ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चतुष्टयम् ॥ समुद्राद्वरलाभश्च सहोपायप्रदर्शनः ॥ ४७ ॥ सेतोर्दशम्यामारंभस्त्रयोदश्यां समापनम् ॥ चतुर्दश्यां सुवेलाद्रौ रामः सेनां न्यवेशयत् ॥ ४८ ॥ पूर्णिमास्या द्वितीयायां त्रिदिनैः सैन्यतारणम् ॥ तीर्त्वा तोयनिधिं रामः शूरवानरसैन्यवान् ॥ ४९ ॥ रुरोध च पुरीं लंकां सीतार्थं शुभलक्षणः ॥ तृतीयादिदशम्यंतं निवेशश्च दिनाष्टकः ॥ ५० ॥ शुकसारणयोस्तत्र प्राप्तिरेकादशीदिने ॥ पौषासिते च द्वादश्यां सैन्यसंख्यानमेव च ॥ ५१ ॥ शार्दूलेन कपींद्राणां सारासारोपवर्णनम् ॥ त्रयोदश्याद्यमांते च लंकायां दिवसैस्त्रिभिः ॥ ५२ ॥ रावणः सैन्यसंख्यानं रणोत्साहं तदाऽकरोत् ॥ प्रययावंगदो दौत्ये माघशुक्लाद्यवासरे ॥ ५३ ॥ सीतायाश्च तदा भर्तुर्मायामूर्धादिदर्शनम् ॥ माघशुक्लद्वितीयायां दिनैः सप्तभिरष्टमीम् ॥ ५४ ॥ रक्षसां वानराणां च युद्धमासीच्च संकुलम् ॥ माघशुक्लनवम्यां तु रात्राविंद्रजिता रणे ॥ ५५ ॥ रामलक्ष्मणयोर्नागपाशबंधः कृतः किल ॥ आकुलेषु कपीशेषु हताशेषु च सर्वशः ॥ ५६ ॥ वायूपदेशाद्गरुडं सस्मार राघवस्तदा ॥ नागपाशविमोक्षार्थं दशम्यां गरुडोऽभ्यगात् ॥ ५७ ॥ अवहारो माघशुक्लस्यैकादश्यां दिनद्वयम् ॥ द्वादश्यामांजनेयेन धूम्राक्षस्य वधः कृतः ॥ ५८ ॥ त्रयोदश्यां तु तेनैव निहतोऽकंपनो रणे ॥ मायासीतां दर्शयित्वा रामाय दशकंधरः ॥ ५९ ॥ त्रासयामास च तदा सर्वान्सैन्यगतानपि ॥ माघशुक्लचतुर्दश्यां यावत्कृष्णादिवासरम् ॥ ६० ॥ त्रिदिनेन प्रहस्तस्य नीलेन विहितो वधः ॥ माघकृष्णद्वितीयायाश्चतुर्थ्यंतं त्रिभिर्दिनैः ॥ ६१ ॥ रामेण तुमुले युद्धे रावणो द्रावितो रणात् ॥ पञ्चम्या अष्टमी यावद्रावणेन प्रबोधितः ॥ ६२ ॥ कुंभकर्णस्तदा चक्रेऽभ्यवहारं चतुर्दिनम् ॥ कुम्भकर्णोकरोद्युद्धं नवम्यादिचतुर्दिनैः ॥ ६३ ॥ रामेण निहतो युद्धे बहुवानरभक्षकः ॥ अमावास्यादिने शोकाऽभ्यवहारो बभूव ह ॥ ६४ ॥ फाल्गुनप्रतिपदादौ चतुर्थ्यंतैश्चतुर्दिनैः ॥ नरांतकप्रभृतयो निहताः पञ्च राक्षसाः ॥ ६५ ॥ पंचम्याः सप्तमीं यावदतिकायवधस्र्यहात् ॥ अष्टम्या द्वादशीं यावन्निहतौ दिनपंचकात् ॥ ६६ ॥ निकुम्भकुम्भौ द्वावेतौ मकराक्षश्चतुर्दिनैः ॥ फाल्गुनासितद्वितीयाया दिने वै शक्रजिज्जितः ॥ ६७ ॥ तृतीयादौ सप्तम्यंतदिनपञ्चकमेव च ॥ ओषध्यानयवैयग्र्यादवहारो बभूव ह ॥ ६८ ॥ अष्टम्यां रावणो मायामैथिलीं हतवान्कुधीः ॥ शोकावेगात्तदा रामश्चक्रे सैन्यावधारणम् ॥ ६९ ॥ ततस्त्रयोदशीं यावद्दिनैः पंचभिरिंद्रजित् ॥ लक्ष्मणेन हतो युद्धे विख्यातबलपौरुषः ॥ ७० ॥ चतुर्दश्यां दशग्रीवो दीक्षामापावहारतः ॥ अमावास्यादिने प्रागाद्युद्धाय दशकंधरः ॥ ७१ ॥ चैत्रशुक्लप्रतिपदः पंचमीदिनपंचके ॥ रावणो युध्यमानोऽभूत्प्रचुरो रक्षसां वधः ॥ ७२ ॥ चैत्रशुक्लाष्टमीं यावत्स्यंदनाश्वादिसूदनम् ॥ चैत्रशुक्लनवम्यां तु सौमित्रेः शक्तिभेदने ॥ ७३ ॥ कोपाविष्टेन रामेण

CC-0. In Public Domain. Digitization by eGangotri

उवाच ॥ ॥ एतद्वः कथितं विप्रा लोहासुरविचेष्टितम् ॥ यच्छ्रुत्वा ब्रह्महा गोघ्नो मुच्यते सर्वपातकैः ॥ ७७ ॥ एकविंशतिवारन्तु गयायां पिंड
पातने ॥ तत्फलं समवाप्नोति सकृदस्मिञ्छ्रुते सति ॥ ७८ ॥ चतुःष्कोटिद्विलक्षं च सहस्रं शतमेव च ॥ धेनवस्तेन दत्ताः स्युर्माहात्म्यं शृणु
यात्तु यः ॥ ७९ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे पूर्वभागे धर्मारण्यमाहात्म्ये लोहासुरमाहात्म्यसंपू
र्तिर्नामैकोनत्रिंशोऽध्यायः ॥ २९ ॥ ॥ छ ॥ ॥ व्यास उवाच ॥ ॥ पुरा त्रेतायुगे प्राप्ते वैष्णवांशो रघूद्वहः ॥ सूर्यवंशे समुत्पन्नो रामो
राजीवलोचनः ॥ १ ॥ स रामो लक्ष्मणश्चैव काकपक्षधरावुभौ ॥ तातस्य वचनात्तौ तु विश्वामित्रमनुव्रतौ ॥ २ ॥ यज्ञसंरक्षणार्थाय राज्ञा दत्तौ
कुमारकौ ॥ धनुःशरधरौ वीरौ पितुर्वचनपालकौ ॥ ३ ॥ पथि प्रव्रजतो यावत्ताडकानाम राक्षसी ॥ तावदागम्य पुरतस्तस्थौ वै विघ्नकारणात् ॥
॥ ४ ॥ ऋषेरनुज्ञया रामस्ताडकां समघातयत्॥ प्रादिशच्च धनुर्वेदविद्यां रामाय गाधिजः ॥५॥ तस्य पादतलस्पर्शाच्छिला वासवयोगतः ॥ अहल्या
गौतमवधूः पुनर्जाता स्वरूपिणी ॥ ६ ॥ विश्वामित्रस्य यज्ञे तु संप्रवृत्ते रघूत्तमः ॥ मारीचं च सुबाहुं च जघान परमेषुभिः ॥७॥ ईश्वरस्य धनुर्भग्नं
जनकस्य गृहे स्थितम् ॥ रामः पंचदशे वर्षे षड्वर्षां चैव मैथिलीम् ॥ ८ ॥ उपयेमे तदा राजन्रम्यां सीतामयोनिजाम् ॥ कृतकृत्यस्तदा जातः सीतां
संप्राप्य राघवः ॥ ९ ॥ अयोध्यामगमन्मार्गे जामदग्न्यमवेक्ष्य च ॥ संग्रामोऽभूत्तदा राजन्देवानामपि दुःसहः ॥ १० ॥ ततो रामं[१] पराजित्य
सीतया गृहमागतः[२] ॥ ततो द्वादशवर्षाणि रेमे रामस्तया सह ॥ ११ ॥ सप्तविंशतिमे वर्षे यौवराज्यप्रदायकम् ॥ राजानमथ कैकेयी वरद्वयमयाच
त ॥ १२ ॥ तयोरेकेन रामस्तु ससीतः सहलक्ष्मणः ॥ जटाधरः प्रव्रजतां वर्षाणीह चतुर्दश ॥ १३ ॥ भरतस्तु द्वितीयेन यौवराज्याधिपोस्तु मे ॥
मंथरावचनान्मूढा वरमेतमयाचत ॥ १४ ॥ जानकीलक्ष्मणसखं रामं प्राव्राजयन्नृपः ॥ त्रिरात्रमुदकाहारश्चतुर्थेऽह्नि फलाशनः ॥ १५ ॥ पञ्चमे चित्र
कूटे तु रामो वासमकल्पयत् ॥ तदा दशरथः स्वर्गं गतो राम इति ब्रुवन् ॥ १६ ॥ ब्रह्मशापं तु सफलं कृत्वा स्वर्गं जगाम किम् ॥ ततो भरत
शत्रुघ्नौ चित्रकूटे समागतौ ॥ १७ ॥ स्वर्गतं पितरं राजन्रामाय विनिवेद्य च ॥ सांत्वनं भरतस्यास्य कृत्वा निवर्तनं प्रति ॥ १८ ॥ ततो भरत
शत्रुघ्नौ नंदिग्रामं समागतौ ॥ पादुकापूजनरतौ तत्र राज्यधरावुभौ ॥ १९ ॥ अत्रिं दृष्ट्वा महात्मानं दण्डकारण्यमागमत् ॥ रक्षोगणवधारम्भे विराधे
विनिपातिते ॥ २० ॥ अर्द्धत्रयोदशे वर्षे पंचवट्यामुवास ह ॥ ततो विरूपयामास शूर्पणखां निशाचरीम् ॥ वने विचरतस्तस्य जानकीसहितस्य

१ रामम्—परशुरामम्—इत्यर्थः । २ रामः—इति शेषः । दाशरथी रामः—इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्तांचिंता सत्योऽसि सुव्रत॥ त्रिषु लोकेषु दुष्प्रापं सत्यं ते दिवि संस्थितम् ॥५१॥ अस्मद्वाक्येन सत्येन तत्तथाऽसुरसत्तम ॥ गयासमधिकं तीर्थं तव
जातं धरातले॥५२॥ अस्माकं स्थितिरव्यग्रा तव देहे न संशयः ॥ सत्यपाशेन बद्धाः स्म दृढमेव त्वयाऽनव ॥५३॥ ॥ विष्णुरुवाच ॥ ॥ गयाप्रयाग
कस्याऽपि फल समधिकं स्मृतम् ॥ चतुर्दश्याममावास्यां लोहयष्ट्यां पिंडदानतः ॥ ५४ ॥ बलिपुत्रस्य सत्येन महती तृप्तिरत्र हि ॥ मा कुरुष्वात्र
संदेहं तव देहे स्थिता स्वयम् ॥ ५५ ॥ सरस्वती पुण्यतोया ब्रह्मलोकात्प्रयात्युत ॥ प्लावयिष्यंति देहांगं मया सह सुसंगता ॥५६॥ यथा वै द्वारका
वासो देवस्तत्र महेश्वरः ॥ विरंचिर्यत्र तीर्थानि त्रीण्येतानि धरातले ॥ ५७ ॥ भविष्यति च पाताले स्वर्गलोके यमक्षये ॥ विख्यातान्यसुरश्रेष्ठ पि
तृणां तृप्तिहेतवे ॥५८॥ अथान्यत्संप्रवक्ष्यामि गाथां पितृकृतां पराम् ॥ आज्ञारूपां हि पुत्राणां तां शृणुष्व ममानव ॥५९॥ पितर ऊचुः॥ शंकरस्या
ग्रतः स्थानं रुद्रलोकप्रदं नृणाम् ॥ पापदेहविशुद्ध्यर्थं पापेनोपहतात्मनाम् ॥६०॥ तस्मिंस्तिलोदकेनापि सद्गतिं यांति तर्पिताः ॥ पितरो नरकाद्वा
पि सुपुत्रेण सुमेधसा ॥ ६१ ॥ गोप्रदानं प्रशंसंति तत्तत्र पितृमुक्तये ॥ पित्रादिकान्समुद्दिश्य दृष्ट्वा रुद्रं च केशवम् ॥६२॥ तिलपिण्याकपिंडेन तृप्तिं
यास्यामहे पराम् ॥ चतुर्दश्याममावास्यां तथा च पितृतर्पणम् ॥ ६३ ॥ अज्ञातगोत्रजन्मानस्तेभ्यः पिंडांस्तु निर्वपेत् ॥ तेऽपि यांति दिवं सर्वे पिंडे
दत्त इति श्रुतिः ॥ ६४ ॥ सर्वकार्याणि संत्यज्य मानवैः पुण्यमीप्सुभिः ॥ प्राप्ते भाद्रपदे मासे गंतव्या लोहयष्टिका ॥ अज्ञातगोत्रनाम्ना तु पिंड
मंत्रमिमं शृणु ॥ ६५ ॥ पितृवंशे मृता ये च मातृवंशे तथैव च ॥ अतीतगोत्रजास्तेभ्यः पिंडोऽयमुपतिष्ठतु ॥ ६६ ॥ ॥ विष्णुरुवाच ॥ ॥ अनेनैव
तु मंत्रेण ममाग्रे सुरसत्तम ॥ क्षीणे चंद्रे चतुर्दश्यां नभस्ये पिंडमाहरेत् ॥ ६७ ॥ पितॄणामक्षया तृप्तिर्भविष्यति न संशयः ॥ तिलपिण्याकपिंडेन
पितरो मोक्षमाप्नुयुः ॥ ६८ ॥ क्षणत्रयविनिर्मुक्ता मानवा जगतीतले ॥ भविष्यंति न संदेहो लोहयष्ट्यां तिलतर्पणे ॥ ६९ ॥ स्नात्वा यः कुरुते
चात्र पितृपिंडोदकक्रियाः ॥ पितरस्तस्य तृप्यंति यावद्ब्रह्मदिवानिशम् ॥ ७० ॥ अमावास्यादिनं प्राप्य मासि भाद्रपदे सरः ॥ ब्रह्मणो यष्टिकायां
तु यः कुर्यात्पितृतर्पणम् ॥ ७१ ॥ पितरस्तस्य तृप्ताः स्युर्यावदाभूतसंप्लवम् ॥ तेषां प्रसन्नो भगवानादिदेवो महेश्वरः ॥ ७२ ॥ अस्य तीर्थस्य
यात्रायां मतिर्येषां भविष्यति ॥ गोक्षीरेण तिलैः श्वेतैः स्नात्वा सारस्वते जले ॥ ७३ ॥ तर्पयेदक्षया तृप्तिः पितॄणां तस्य जायते ॥ श्राद्धं चैव प्रकु
र्वीत सक्तुभिः पयसा सह ॥ ७४ ॥ अमावास्यादिनं प्राप्य पितॄणां मोदमिच्छुकः ॥ रुद्रतीर्थे ततो धेनुं दद्याद्वस्त्राणि यमतीर्थके ॥ ७५ ॥ विष्णु
तीर्थे हिरण्यं च पितॄणां मोक्षमिच्छुकः ॥ विनाक्षतैर्विना दर्भैर्विना चासनमेव च ॥ वारिमात्राल्लोहयष्ट्यां गयाश्राद्धफलं लभेत् ॥ ७६ ॥ ॥ सूत

CC-0. In Public Domain. Digitization by eGangotri

यिष्यामि विश्रुतम् ॥ १ ॥ यथा तौ भ्रातरौ वृद्धौ प्रापतुः स्थानमुत्तमम् ॥ तदाप्रभृति वैराग्यं दैत्यो लोहासुरे दधौ ॥ २ ॥ किं करोमि क्व गच्छामि
तपसे स्थानमुत्तमम् ॥ यस्य पारं न जानंति देवता मुनयो नराः ॥ ३ ॥ को मयाऽऽराध्यतां देवो हृदि चिंतयते भृशम् ॥ इति चिंतयतस्तस्य
मतिर्जाता महात्मनः ॥ ४ ॥ दधौ गंगां स्वशीर्षेण पुंष्पवंतौ च नेत्रयोः ॥ हृदा नारायणं देवं ब्रह्माणं कटिमंडले ॥ ५ ॥ इंद्राद्या देवताः सर्वे
यद्देहे प्रतिबिंबिताः ॥ प्रपश्यंति तदात्मानं भास्करः सलिले यथा ॥ ६ ॥ तमेवाराधयिष्यामि निरंजनमकल्मषः ॥ एवं कृत्वा मतिं दैत्य
स्तपस्तेपे सुदुष्करम् ॥ भीतो जन्मभयाद्घोराद्दुष्करं यन्महात्मभिः ॥ ७ ॥ अंबुभक्षो वायुभक्षः शीर्णपर्णाशनस्तथा ॥ दिव्यं वर्षशतं साग्रं
यदा तेपे महत्तपः ॥ ततस्तुतोष भगवांस्त्रिशूलवरधारकः ॥ ८ ॥ ॥ ईश्वर उवाच ॥ ॥ वरं वृणीष्व भद्रं ते मनसा यदभीप्सितम् ॥
लोहासुर मयादेयं तव नास्ति तपोबलात् ॥ ९ ॥ इत्युक्तो दानवस्तत्र शंकराग्रे वचोऽब्रवीत् ॥ १० ॥ ॥ लोहासुर उवाच ॥ ॥ यदि
तुष्टोसि देवेश वरमेकं वृणोम्यहम् ॥ शरीरस्याजरत्वं च मा मृत्योरपि मेभयम् ॥ ११ ॥ जन्मन्यस्मिन्प्रभो भूयात्स्थातव्यं हृदये मम ॥ एवमस्तु
शिवः प्राह तत्र तं दानवेश्वरम् ॥ १२ ॥ शर्वलब्धवरो दैवात्पुनस्तेपे महत्तपः ॥ रम्ये सरस्वतीतीरे तरणाय भवार्णवात् ॥ १३ ॥
वत्सराणां सहस्राणि प्रयुतान्यर्बुदानि च ॥ शंकते भगवानिंद्रो भीतस्तस्य तपोबलात् ॥ १४ ॥ मा मे पदच्युतिर्भूयाद्दैत्यल्लोहासुरात्क्वचित् ॥
मघवान्गुप्तरूपेण समेत्याश्रमकाननम् ॥ १५ ॥ तपोभंगं प्रकुरुते कंपयित्वा महासुरम् ॥ ताडयंति शरीरे तं मुष्टिभिस्तीक्ष्णकर्कशैः ॥ १६ ॥
अथ तेन च दैत्येन ध्यानमुत्सृज्य वीक्षितम् ॥ इंद्रेण तत्कृतं सर्वं तपोबलविनाशनम् ॥ १७ ॥ तस्य तैरभवद्युद्धमिंद्राद्यैरथ कर्कशैः ॥ एक
स्य बहुभिः सार्द्धं देवास्ते तेन संयुगे ॥ १८ ॥ रुधिराक्लिन्नदेहा वै प्रहारैर्जर्जरीकृताः ॥ केशवं शरणं प्राप्ता त्राहि त्राहीति भाषिणः ॥ १९ ॥
॥ ॥ सूत उवाच ॥ ॥ देवानां वाक्यमाकर्ण्य वासुदेवो जनार्दनः ॥ युयुधे केशवस्तेन युद्धे वर्षशतं किल ॥ २० ॥ ततो नारायणं
तत्र जिगाय स वरोर्जितः ॥ अथ नारायणो देवो जितो लोहासुरेण तु ॥ २१ ॥ मंत्रयामास रुद्रेण ब्रह्मणा च पुनःपुनः ॥ मीमांसित्वा
त्रयो देवाः पुनर्युद्धसमुद्यमम् ॥ २२ ॥ लोहासुरस्य दैत्यस्य वपुर्दृष्ट्वा पुनर्नवम् ॥ महदासीत्पुनर्युद्धं दैत्यकेशवयोस्ततः ॥ २३ ॥ न ममार यदा
दैत्यो विष्णुना प्रभविष्णुना ॥ तरसा तं केशवोऽपि पातयामास भूतले ॥ २४ ॥ उत्तानं पतितं दृष्ट्वा पिनाकी परमेश्वरः ॥ दधार हृदये तस्य

१ पुष्पवंतौ—सूर्याचन्द्रमसौ "एकयोक्त्या पुष्पवन्तौ दिवाकरनिशाकरौ ।" इत्यमरः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वरूपं रूपवर्जितः ॥ २५ ॥ कण्ठे तस्थौ ततो ब्रह्मा तस्य लोहासुरस्य च ॥ चरणौ पीडयामास स्वस्थित्या पुरुषोत्तमः ॥ २६ ॥ अथ दैत्यः सम्मुत्तस्थौ भृशं बद्धोपि भूतले ॥ दृष्ट्वोत्थितं ततो दैत्यं पातयंतं सुरोत्तमान् ॥ २७ ॥ उवाच दिव्यया वाचा विरंचिः कमलासनः ॥ २८ ॥ ॥ ॥ ब्रह्मोवाच ॥ ॥ लोहासुर सदा रक्ष वाचोधर्ममभीक्ष्णशः ॥ त्वया यत्प्रार्थितं रुद्रात्तदेव समुपस्थितम् ॥ २९ ॥ अहं विष्णुश्च रुद्रश्च त्रयोऽमी सुरसत्तमाः ॥ त्वद्देहमुपवेक्ष्यामो यावदाभूतसंप्लवम् ॥ ३० ॥ दानवेश शिवप्राप्तिर्भावभक्त्यैव जायते ॥ शिवं चालयितुं बुद्धिः कथं तव भविष्यति ॥ ३१ ॥ अचलांश्चालयेद्यस्तु प्रासादान्ब्राह्मणान्पुरान् ॥ अचिरेणैव कालेन पातकेनैव लिप्यते ॥ ३२ ॥ श्मशानवत्परित्याज्यः सत्यधर्मबहिष्कृतः ॥ सत्यवागसि भद्रं ते मा विचालय देवताः ॥ ३३ ॥ येन यातास्तु पितरो येन याताः पितामहाः ॥ तेन मार्गेण गंतव्यं न चोल्लंघ्या सतां गतिः ॥ ३४ ॥ दानवेश पिता ते हि ददौ लोकत्रयं हरेः ॥ वाक्पाशबद्धः पाताले राज्यं चक्रे महीपतिः ॥ ३५ ॥ तथा त्वमसि वाक्पाशाच्छिवभक्तिसमन्वितः ॥ भूतले तिष्ठ दैत्येंद्र मावाग्वैकल्प्यमाप्नुहि ॥ ३६ ॥ वरांस्ते च प्रदास्यामो मा विचालया हि देवताः ॥ ३७ ॥ ॥ ॥ व्यास उवाच ॥ ॥ तच्छ्रुत्वा ब्रह्मणो वाक्यं संतुष्टो दानवेश्वरः ॥ प्राह प्रसन्नया वाचा ब्रह्माणं केशवं हरम् ॥ ३८ ॥ ॥ लोहासुर उवाच ॥ ॥ वाक्पाशबद्धस्तिष्ठामि न पुनर्भवतां बले ॥ ब्रह्मा विष्णुश्च रुद्रश्च त्रयोऽमी सुरसत्तमाः ॥ ३९ ॥ स्थास्यंति चेच्छरीरे मे किं न लब्धं मया ततः ॥ इदं कलेवरं मे हि समारूढं त्रिभिः सुरैः ॥ ४० ॥ भूम्यां भवतु विख्यातं मत्प्रभावात्सुरोत्तमाः ॥ ४१ ॥ लोहासुरस्य वाक्येन हर्षिता स्त्रिदशास्त्रयः ॥ ददुः प्रत्युत्तरं तस्मै ब्रह्मविष्णुमहेश्वराः ॥ ४२ ॥ सत्यवाक्पाशतो दैत्यो न सत्याच्चलितो यतः ॥ तेन सत्येन संतुष्टा दास्यामस्ते मनीप्सितम् ॥ ४३ ॥ ॥ ब्रह्मोवाच ॥ ॥ यथा स्नानं ब्रह्मज्ञानं देहत्यागो गयातले ॥ धर्मारण्ये तथा दैत्य धर्मेश्वरपुरः स्थिते ॥ ४४ ॥ कूपे तर्प्पणकं श्राद्धं शंसंति पितरो दिवि ॥ संतुष्टा पिंडदानेन गयायां पितरो यथा ॥ ४५ ॥ वांछंति तर्प्पणं कूपे धर्मारण्ये विशुद्धये ॥ दानवेंद्र शरीरं तु तीर्थं तव भविष्यति ॥ ४६ ॥ एकविंशतिवारांस्तु गयायां तर्प्पणे कृते ॥ पितॄणां या परा तृप्तिर्जायते दानवाधिप ॥ ४७ ॥ धर्मेश्वर पुरस्तात्सा त्वेकदा पितृतर्पणात् ॥ स्याद्वै दशगुणा तृप्तिः सत्यमेव न संशयः ॥ ४८ ॥ पितॄणां पिंडदानेन अक्षय्या तृप्तिरस्त्विह ॥ शिवरूपांतराले वै धर्मारण्ये धरातले ॥४९॥ श्रद्धयैव हि कर्त्तव्याः श्राद्धपिंडोदकक्रियाः ॥ तयांतराले चास्मांकं श्राद्धपिंडौ विशेषतः ॥ ५० ॥ तथा शरीरे क्वापि

१ अस्माकं ब्रह्मविष्णुरुद्राणामन्तरालेऽतरालप्रदेशे–इति योजना।

CC-0. In Public Domain. Digitization by eGangotri

स्नानात्स्वर्गप्रदं चैव पानात्पापविशुद्धिदम् ॥ ४९ ॥ कीर्त्तनात्पुण्यजननं सेवनान्मुक्तिदं परम् ॥ तद्वै पश्यंति ये भक्त्या ब्रह्महा यदि मातृहा ॥ ॥ ५० ॥ बालघाती च गोघ्नश्च ये च स्त्रीशूद्रघातकाः ॥ गरदाश्चाग्निदाश्चैव गुरुद्रोहरताश्च ये ॥ ५१ ॥ तपस्विनिन्दकाश्चैव कूटसाक्ष्यं करोति यः ॥ वक्ता च परदोषस्य परस्य गुणलोपकः ॥ ५२ ॥ सर्वपापमयोऽप्यत्र मुच्यते लिंगदर्शनात् ॥ ५३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे पातालखण्डे धर्मारण्यमाहात्म्ये बलाहकोपाख्यानवर्णनंनाम सप्तविंशोऽध्यायः ॥ २७ ॥ ॥ व्यास उवाच ॥ गोवत्सान्नैर्ऋते भागे दृश्यते लोहयष्टिका ॥ स्वयंभुर्लिंगरूपेण रुद्रस्तत्र स्थितः स्वयम् ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ मोक्षतीर्थे सरस्वत्या नभस्ये चंद्रसंक्षये ॥ विप्रान्संपूज्य विधिवत्तेभ्यो दत्त्वा च दक्षिणाम् ॥ १ ॥ एकविंशतिवारांस्तु भक्त्या पिंडस्य यत्फलम् ॥ गयायां प्राप्यते पुंसां ध्रुवं तदिह तर्प्पणात् ॥ २ ॥ लोहयष्ट्यां कृते श्राद्धे नभस्ये चंद्रसंक्षये ॥ प्रेतयोनिविनिर्मुक्ताः क्रीडंति पितरो दिवि ॥ ३ ॥ अपि नः संकुले भूयाद्यो वै दद्यात्तिलोदकम् ॥ पिंडं वाप्युदकं वापि प्रेतपक्षे विधूदये ॥ ३ ॥ लोहयष्ट्याममावस्यां कार्यं भाद्रपदे जनैः ॥ श्राद्धं वै मुनयः प्राहुः पितरो यदि वल्लभाः ॥ ५ ॥ क्षीरेण तु तिलैः श्वेतैः स्नात्वा सारस्वते जले ॥ पितॄंस्तर्पयते यस्तु तृप्तास्तत्पितरो ध्रुवम् ॥ ६ ॥ तत्र श्राद्धानि कुर्वीत सक्तुभिः पयसा सह ॥ अमावास्यादिनं प्राप्य पितॄणां मोक्षमिच्छकैः ॥ ७ ॥ रुद्रतीर्थे ततो धेनुं दद्याद्वस्त्रादिभूषिताम् ॥ विष्णुतीर्थे हिरण्यं च प्रदद्यान्मोक्षमिच्छुकः ॥ ८ ॥ गयायां पितृरूपेण स्वयमेव जनार्दनः ॥ तं ध्यात्वा पुंडरीकाक्षं मुच्यते च ऋणत्रयात् ॥ ९ ॥ प्रार्थयेत्तत्र गत्वा तं देवदेवं जनार्दनम् ॥ आगतोऽस्मि गयां देव पितृभ्यः पिंडदित्सया ॥ एष पिंडो मया दत्तस्तव हस्ते जनार्दन ॥ १० ॥ परलोकगतेभ्यश्च त्वं हि दाता भविष्यसि ॥ अनेनैव च मंत्रेण तत्र दद्याद्धरेः करे ॥ ११ ॥ चंद्रे क्षीणे चतुर्दश्यां नभस्ये पिंडमाहरेत् ॥ पितॄणा मक्षया तृप्तिर्भविष्यति न संशयः ॥ १२ ॥ एकविंशतिवारांश्च गयायां पिंडपातनैः ॥ भक्त्या तृप्तिमवाप्नोति लोहयष्ट्यां पितृतर्प्पणे ॥ १३ ॥ वारिदस्तृप्तिमाप्नोति सुखमक्षय्यमत्र हि ॥ फलप्रदः सुतान्भक्तानारोग्यमभयप्रदः॥१४॥ वित्तं न्यायार्जितं दत्तं स्वल्पं तत्र महाफलम् ॥ स्नानेनापिहि तत्तीर्थे रुद्रस्यानुचरो भवेत् ॥१५॥ इति श्रीस्कांदे महापुराणे एकाकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे पूर्वभागे धर्मारण्यमाहात्म्ये संक्षेपतस्तीर्थमाहात्म्य वर्णनं नामाष्टविंशोऽध्यायः ॥ २८ ॥ ॥ सूत उवाच ॥ ॥ अतः परं शृणुध्वं हि लोहासुरविचेष्टितम् ॥ बलेः पुत्रशतस्यापि कथ

१ लभत इति शेषः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कुरुते भावं गोवत्सगमनं प्रति ॥ २४ ॥ स्ववंशजास्तदा सर्वे नृत्यंति हर्षिता ध्रुवम् ॥ २५ ॥ ॥ सूत उवाच ॥ ॥ यच्चान्यदद्भुतं तत्र वृत्तातं शृणु त द्विजाः ॥ येन वै श्रुतमात्रेण सर्वपापक्षयो भवेत् ॥ २६ ॥ यदा वै स्थापितं लिंगं सर्वदेवैः पुरातनम् ॥ विष्णोः[1] प्रतिष्ठानगुणात्सर्वेषां च दिवौकसाम् ॥ २७ ॥ अणुमात्रप्रमाणेन प्रत्यहं समवर्द्धत ॥ ततस्ते मनुजा देवा भीतास्तं शरणं ययुः ॥ २८ ॥ ॥ देवा ऊचुः ॥ ॥ वृद्धिं संहर देवेश लोकानां स्वस्ति तद्भवेत्॥एवमुक्ते ततो लिंगाद्वागुवाचाशरीरिणी॥२९॥ ॥ शिववाण्युवाच ॥ ॥ हे लोका मा भयं वोऽस्तु उपायः श्रूयतामयम् ॥ कश्चिच्चंडालमानीय मत्पुरः स्थाप्यतां ध्रुवम् ॥३०॥ चंडालांश्च समानीय दधुर्देवस्य ते पुरः॥तथापि तस्य वृद्धिस्तु नैव निर्वर्तते पुनः ॥३१॥ वागुवाच ॥ कर्म्मणा यस्तु चंडालः सोऽग्रे मे स्थाप्यतां जनाः ॥ तच्छ्रुत्वा महदाश्चर्यं मतिं चक्रुर्विलोचने ॥ ३२ ॥ मार्गमाणास्तदा ते तु ग्रामाणि च पुराणि च ॥ कश्चित्कर्मरतं पापं ददृशुर्ब्राह्मणब्रुवम् ॥३३॥ वृषभान्भारसंयुक्तान्मध्याह्नेवाहयच्च सः ॥ क्षुत्तृट्श्रमपरीतांश्च दुर्बलान्क्रूरमानसः ॥३४॥ अस्नात्वापि पर्युषितं भक्षयंतीह वै द्विजाः ॥ तं समादाय देवेशं जग्मुर्यत्र जगद्गुरुः ॥ ३५ ॥ देवालयाग्रभूमौ तं स्थापयामासुराहृताः ॥ भस्मीबभूव सहसा गोवत्साग्रे निरूपितः ॥ ३६ ॥ चंडालस्थल इत्येष प्रसिद्धोसौऽभवत्क्षितौ ॥ तत्र स्थितैर्न चाद्यापि प्रासादो दृश्यते हि सः ॥ ॥ ३७ ॥ तदाप्रभृति तल्लिंगं साम्यभावमुपागतम् ॥ धौतपाप्मा गतस्तीर्थं द्विजो लिंगनिरीक्षिणात् ॥ ३८ ॥ प्रत्यहं पूजयामास गोवत्सं गतकिल्बिषः ॥ विशेषात्कृष्णपक्षस्य चतुर्दश्यां समागतः ॥ ३९ ॥ एतत्तदद्भुतं तस्य देवस्य च त्रिशूलिनः ॥ शृणुयाद्योनरो भक्त्या सर्वपापैः प्रमुच्यते ॥ ४० ॥ ॥ सूत उवाच ॥ ॥ गोवत्समिति विख्यातं नराणां पुण्यदं परम् ॥ अनेकजन्मपापघ्नं मार्कंडेयेन भाषितम् ॥ ४१ ॥ तत्र तीर्थे सकृत्स्नानं रुद्रलोकप्रदं नृणाम् ॥ पापदेहविशुद्ध्यर्थं पापेनोपहतात्मनाम् ॥ ४२ ॥ कूपे तर्पणतश्चैव श्राद्धतश्चैव तृप्तता ॥ भाद्रपदे विशेषेण पक्षस्यांते भवेत्कलौ ॥ ४३ ॥ एकविंशतिवारांस्तु गयायां तर्प्पणे कृते ॥ पितॄणां परमा तृप्तिः सकृद्वै गंगकूपके ॥ ४४ ॥ तस्मिन्गोवत्ससामीप्ये तिष्ठते गंगकूपकः ॥ तस्मिंस्तिलोदकेनापि सद्गतिं यांति तर्प्पिताः ॥ ४५ ॥ पितरो नरकाद्वापि सुपुण्येन सुमेधसा ॥ गोप्रदानं प्रशंसंति तस्मिंस्तीर्थे मुनीश्वराः ॥ ४६ ॥ विप्राय स्वर्णदानं तु रुद्रलोके नयेन्नरम् ॥ सरस्वतीशिवक्षेत्रे गंगा च गंगकूपके ॥ ४७ ॥ एकस्थमेतत्त्रितयं स्वर्गापवर्गकारणम् ॥ सेवितं चर्षिभिः सिद्धैस्तीर्थं सर्वत्र विश्रुतम् ॥ ४८ ॥ पीलुयुग्मं स्थितं तत्र तत्तीर्थं मुनिसेवितम् ॥

१ विष्णुकृतं सर्वदेवकृतं च यत् प्रतिष्ठापनम् तस्य गुणात् गुणेन इत्यर्थसंदर्भोऽनुसन्धेयः ।

CC-0. In Public Domain. Digitization by eGangotri

॥ ॥ सूत उवाच ॥ ॥ तत्र तस्य समीपस्थं मार्कंडेनोपलक्षितम् ॥ तीर्थं गोवत्ससंज्ञं तु सर्वत्र भुवि संश्रुतम् ॥ १ ॥ तत्रावतीर्य गोवत्सस्वरूपेणांबिकापतिः ॥ स्वयंभूलिंगरूपेण संस्थितो जगतां पतिः ॥ २ ॥ आसीद्बलाहकोनाम रुद्रभक्तो महाबलः ॥ आखेटकसमायुक्तो नृपः परपुरंजयः ॥ ३ ॥ मृगयूथे स्थितं दृष्ट्वा गोवत्सं तत्पदातिना ॥ उक्तो राजा मया दृष्टं कौतुकं नृपसंत्तम ॥ ४ ॥ गोवत्सो मृगयूथस्य दृष्टो मध्यस्थितो मया ॥ तेषामेवानुरक्तोऽसौ जनन्या रहितस्तथा ॥ ५ ॥ द्रष्टुं तु कौतुकं राजा तं पदातिं पुरः स्थितम् ॥ उवाच दर्शयस्वेति गोवत्सं च समाविशत् ॥ ६ ॥ गत्वाटवीं तदा राज्ञो दर्शितः स पदातिना ॥ पदातिभिर्मृगानीकं दुद्राव त्रासितं यदा ॥ ७ ॥ पीलुगुल्मं प्रति गतं गोवत्सः प्रस्थितस्तदा ॥ राजा तद्धरणाकांक्षो प्राविशद्गुल्ममादरात् ॥ ८ ॥ तत्र स्थितं स गोवत्समपश्यन्नृपतिः स्वयम् ॥ यावद्गृह्णाति तं तावल्लिंगं जातं समुज्ज्वलम् ॥ ९ ॥ तं दृष्ट्वा विस्मितो राजा किमेतादित्यचिंतयत् ॥ यावच्चिंतयते ह्येवं देहं त्यक्त्वा दिवं गतः ॥ १० ॥ अंत्रांतरे गगनतले समंततः श्रूयते सुरजयकारगर्जितम् ॥ पपात पुष्पवृष्टिरंबराद्राजा गतः शिवभुवनं च तत्क्षणात् ॥ ११ ॥ तावत्पश्यति तत्राभ्यं गोवत्सं बालकं स्थितम् ॥ नूनमेष महादेवो वत्सरूपी महेश्वरः ॥ १२ ॥ तमानेतुं समुद्युक्तो राजा तमुज्जहार च ॥ तदा तद्देव लिंगं तु नोत्तिष्ठति कथंचन ॥ तदा देवाः सहानेन प्रार्थयामासुरीश्वरम् ॥ १३ ॥ ॥ देवा ऊचुः ॥ ॥ भगवन्सर्वदेवेश स्थातव्यं भवता विभो॥ शुक्लेन लिंगरूपेण सर्वलोकहितैषिणा ॥ १४ ॥ ॥ श्रीमहादेव उवाच ॥ स्थास्याम्यहं सदैवात्र लिंगरूपेण देवताः ॥ यस्माद्भाद्रपदे मासि कृष्णपक्षे कुहूदिने ॥ १५ ॥ तथा तद्दिवसे तत्र स्नानं कृत्वा विधानतः ॥ लिंगं ये पूजयिष्यंति न तेषां विद्यते भयम् ॥ १६ ॥ ऋते च पिंडदानेन पूर्वजाः शाश्वतीः समाः ॥ रौरवे नरके घोरे कुंभीपाके च ये गताः ॥ १७ ॥ अनेकनरकस्थाश्च तिर्यग्योनिगताश्च ये ॥ सकृत्पिंडप्रदानेन स्यात्तेषामक्षया गतिः ॥ १८ ॥ ततो बलाहको राजा सर्वदेवसमन्वितः ॥ स्थापयामास तल्लिंगं सर्वदेवसमीपतः ॥ १९ ॥ चकार बहुदानानि लोकानां हितकाम्यया ॥ यावदर्चयते ह्येवं रुद्रोऽपि स्वयमागतः ॥ २० ॥ ॥ रुद्र उवाच ॥ ॥ अस्यां रात्रौ तु मनुजाः श्रद्धाभक्तिसमन्विताः ॥ येर्चयिष्यंति देवेशं तेषां पुण्यमनंतकम् ॥ २१ ॥ जागरं ये करिष्यंति गीतशास्त्रपुरःसरम् ॥ उद्धरिष्यंति ते मर्त्याः कुलमेकोत्तरं शतम् ॥ २२ ॥ तावद्गर्जंति तीर्थानि नैमिषं पुष्करं गया ॥ प्रयागं च प्रभासं च द्वारका मथुराऽर्बुदः ॥ २३ ॥ यावन्न दृश्यते लिंगं गोवत्सं परमाद्भुतम् ॥ यदा हि

१ एतत्पद्यं–छन्दःशास्त्रीयेन केन लक्षणेन लक्षितं न ज्ञायते सम्यक् । आर्षत्वात् तथैव–स्थापितमाति वोद्धव्यं सुधीभिः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्सरस्वती ॥ समानीता सुरेखाद्रौ शरण्या शरणार्थिनाम् ॥१०॥ भाद्रपदे सिते पक्षे द्वादशी पुण्यसंयुता ॥ तत्र द्वारावतीतीर्थे मुनिगंधर्वसेविते ॥ ॥ ११ ॥ तस्मिन्दिने च तत्तीर्थे पिंडदानादि कारयेत् ॥ तत्फलं समवाप्नोति पितृणां दत्तमक्षयम् ॥ १२ ॥ महदाख्यानमखिलं पापघ्नं पुण्यदं च यत् ॥ पवित्रं यत्पवित्राणां महापातकनाशनम् ॥ १३ ॥ सर्वमंगलमांगल्यं पुण्यं सारस्वतं जलम् ॥ ऊर्ध्वं किं दिवि यत्पुण्यं प्रभासांते व्यवस्थितम् ॥ १४ ॥ सारस्वतजलं नृणां ब्रह्महत्यां व्यपोहति ॥ सरस्वत्यां नराः स्नात्वा संतर्प्य पितृदेवताः ॥ पश्चात्पिंडप्रदातारो न भवंति स्तनंधयाः ॥ १५ ॥ यथा कामदुघा गावो भवन्तीष्टफलप्रदाः ॥ तथा स्वर्गापवर्गैकहेतुभूता सरस्वती ॥ १६ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे पूर्वभागे धर्मारण्यमाहात्म्ये सरस्वतीमाहात्म्यवर्णनंनाम पञ्चविंशोऽध्यायः ॥ २५ ॥

॥ ॥ छ ॥ ॥ व्यास उवाच ॥ ॥ मार्कंडेयोद्घाटितं वै स्वर्गद्वारमपावृतम् ॥ तत्र ये देहसंत्यागं कुर्वंति फलकांक्षया ॥ १ ॥ लभंते तत्फलं ह्यंते विष्णोः सायुज्यमाप्नुयुः ॥ अतः किं बहुनोक्तेन द्वारवत्यां सदा नरैः ॥ २ ॥ देहत्यागः प्रकर्त्तव्यो विष्णोर्लोकजिगीषया ॥ अनाशके जले वाग्नौ ये च संति नरोत्तमाः ॥ सर्वपापविनिर्मुक्ता यांति विष्णोः पुरीं सदा ॥ ३ ॥ अन्योपि व्याधिरहितो गच्छेदनशनं तु यः ॥ सर्वपापविनिर्मुक्तो याति विष्णोः पुरीं नरः ॥ ४ ॥ शतवर्षसहस्राणां वसेदंते दिवि द्विजः ॥ ब्राह्मणेभ्यः परं नास्ति पवित्रं पावनं भुवि ॥ ५ ॥ उपवासैस्तथा तुल्यं तपः कर्म्म न विद्यते ॥ नास्ति वेदात्परं शास्त्रं नास्ति मातृसमो गुरुः ॥ ६ ॥ न धर्मात्परमस्तीह तपो नानशनात्परम् ॥ स्नात्वा यः कुरुते ऽत्रापि श्राद्धं पिंडोदकक्रियाम् ॥ ७ ॥ तृप्यंति पितरस्तस्य यावद्ब्रह्मदिवानिशम् ॥ तत्र तीर्थे नरः स्नात्वा केशवं यस्तु पूजयेत् ॥ ८ ॥ समुक्तपातकैः सर्वैर्विष्णुलोकमवाप्नुयात् ॥ तीर्थानामुत्तमं तीर्थं यत्र संनिहितो हरिः ॥ ९ ॥ हरते सकलं पापं तस्मिंस्तीर्थे स्थितस्य सः ॥ मुक्तिदं मोक्षकामानां धनदं च धनार्थिनाम् ॥ आयुर्दं सुखदं चैव सर्वकामफलप्रदम् ॥१०॥ किमन्येनात्र तीर्थेन यत्र देवो जनार्दनः ॥ स्वयं वसति नित्यं हि सर्वेषामनुकम्पया ॥ ११ ॥ तत्र यद्दीयते किंचिद्दानं श्रद्धासमन्वितम् ॥ अक्षयं तद्भवेत्सर्वमिह लोके परत्र च ॥ १२ ॥ यज्ञैर्दानैस्तपोभिश्च यत्फलं प्राप्यते बुधैः ॥ तदत्र स्नानमात्रेण शूद्रैरपि सुसेवकैः ॥ १३ ॥ तत्र श्राद्धं च यः कुर्यादेकादश्यामुपोषितः ॥ स पितॄनुद्धरेत्सर्वान्नरकेभ्यो न संशयः ॥ १४ ॥ अक्षय्यां तृप्तिमाप्नोति परमात्मा जनार्दनः ॥ दीयतेऽत्र यदुद्दिश्य तदक्षय्यमुदाहृतम् ॥ १५ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे पूर्वभागे धर्मारण्यमाहात्म्ये द्वारिकामाहात्म्यवर्णनंनाम षड्विंशोऽध्यायः ॥ २६ ॥छ॥ ॥

CC-0. In Public Domain. Digitization by eGangotri

स्थानानामुत्तमं स्थानं परं स्वस्त्ययनं महत् ॥ स्कंदस्याग्रे पुरा प्रोक्तं महारुद्रेण धीमता ॥ २ ॥ त्वं पार्थ तत्र स्नात्वा हि मोक्ष्यसे सर्वपात
कात् ॥ तच्छुत्वा व्यासवाक्यं हि धर्मराजो युधिष्ठिरः ॥ ३ ॥ धर्मात्मजस्तदा तात धर्मारण्यं समाविशत् ॥ महापातकनाशाय साधुपालनत
त्परः ॥ ४ ॥ विगाह्य तत्र तीर्थानि देवतायतनानि च ॥ इष्टापूर्तादिकं सर्वं कृतं तेन यथेप्सितम् ॥ ५ ॥ ततः पापविनिर्मुक्तः पुनर्गत्वा स्वकं
पुरम् ॥ इंद्रप्रस्थं महासेन[1] शशास वसुधातलम् ॥ ६ ॥ इदं हि स्थानमासाद्य ये शृण्वंति नरोत्तमाः॥ तेषां भुक्तिश्च मुक्तिश्च भविष्यति न संशयः॥
॥ ७ ॥ भुक्त्वा भोगान्पार्थिवांश्च परं निर्वाणमाप्नुयुः ॥ श्राद्धकाले च संप्राप्ते ये पठंति द्विजातयः ॥ ८ ॥ उद्धृताः पितरस्तैस्तु यावच्चंद्रार्कमेदिनि॥
द्वापरे च युगे भूत्वा व्यासेनोक्तं महात्मना ॥ ९ ॥ वारिमात्रे धर्मवाप्यां गयाश्राद्धफलं लभेत् ॥ अत्रागतस्य मर्त्यस्य पापं यमपदे स्थितम् ॥
॥ १० ॥ कथितं धर्मपुत्रेण लोकानां हितकाम्यया ॥ विना अन्नैर्विना दर्भैर्विना चासनमेव वा ॥ ११ ॥ तोयेन नाशमायाति कोटिजन्मकृतं त्व
घम् ॥ सहस्रमुरुशृंगीणां धेनूनां कुरुजांगले ॥ दत्त्वा सूर्यग्रहे पुण्यं धर्मवाप्यां च तर्पणाम् ॥ १२ ॥ एतद्वः कथितं सर्वं धर्मारण्यस्य चेष्टितम् ॥
यच्छुत्वा ब्रह्महा गोघ्नो मुच्यते सर्वपातकैः ॥ १३ ॥ एकविंशतिवारैस्तु गयायां पिंडपातने ॥ तत्फलं समवाप्नोति सकृदस्मिञ्छ्रुते सति ॥ १४ ॥
इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे पूर्वभागे धर्मारण्यतीर्थमाहात्म्यप्रभावकथनंनाम चतुर्विंशोऽध्यायः ॥
॥ २४ ॥ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ अथान्यत्संप्रवक्ष्यामि तीर्थमाहात्म्यमुत्तमम् ॥ धर्मारण्ये यथाऽऽनीता सत्यलोकात्सरस्वती ॥ १ ॥
मार्कंडेयं सुखासीनं महामुनिनिषेवितम् ॥ तरुणादित्यसंकाशं सर्वशास्त्रविशारदम् ॥ २ ॥ सर्वतीर्थमयं दिव्यमृषीणां प्रवरं द्विजम् ॥
आसनस्थं समायुक्तं धन्यं पूज्यं दृढव्रतम् ॥ ३ ॥ योगात्मानं परं शांतं कमंडलुधरं विभुम् ॥ अक्षसूत्रधरं शांतं तथा कल्पां
तवासिनम् ॥ ४ ॥ अक्षोभ्यं ज्ञानिनं स्वस्थं पितामहसमद्युतिम् ॥ एवं दृष्ट्वा समाधिस्थं प्रहर्षोत्फुल्ललोचनम् ॥ ५ ॥ प्रणम्य स्तुति
भिर्युक्त्या मार्कंडं मुनयोऽब्रुवन् ॥ भगवन्नैमिषारण्ये सत्रे द्वादशवार्षिके ॥ ६ ॥ त्वयावतारिता ब्रह्मनदी या ब्रह्मणः सुता॥ तथा कृतं च तत्रैव गंगा
वतरणं क्षितौ ॥ ७ ॥ गीयमाने कुलपतेः शौनकस्य मुनेः पुरः ॥ सूतेन मुनिना ख्यातमन्येषामपि शृण्वताम् ॥ ८ ॥ तच्छुत्वा महदाख्यानम
स्माकं हृदि संस्थितम् ॥ पापघ्नी पुण्यजननी प्राणिनां दर्शनादपि ॥ ९ ॥ ॥ मार्कंडेय उवाच ॥ ॥ धर्मारण्ये मया विप्राः सत्यलोका

१ महासेन—हे षण्मुख—इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तदामराः ॥ २७ ॥ कृत्वा दैत्यवधं राजन्निर्भयत्वमवाप्नुयुः ॥ स्वर्गं जग्मुस्ते सहसा देवाः सर्वे मरुद्गणाः ॥ २८ ॥ तथैवाप्सरसः सर्वा ब्रह्मविष्णुमहेश्वराः ॥ कैलासशिखरं रम्यं वैकुंठं विष्णुवल्लभम् ॥ २९ ॥ ब्रह्मलोकं महापुण्यं प्राप्य सर्वे दिवौकसः ॥ परं हर्षमुपाजग्मुः प्राप्य नंदनमुत्तमम् ॥ ३० ॥ स्वेस्वे स्थाने स्थिरीभूत्वा तस्थुः सर्वे हि निर्भयाः ॥ ३१ ॥ ततः कालेन महता कृताख्ययुगपर्यये ॥ लोहासुरो मदोन्मत्तो ब्रह्मवेषधरः सदा ॥ ३२ ॥ आगत्य सर्वान्विप्रांश्च धर्षयेद्धर्मवित्तमान् ॥ शूद्रांश्च वणिजश्चैव दंडघातेन ताडयेत् ॥ ३३ ॥ विध्वंसयेच्च यज्ञदीन्होमद्रव्याणि भक्षयेत् ॥ वेदिका दीर्घिका दृष्ट्वा कश्मलेन प्रदूषयेत् ॥ ३४ ॥ मूत्रोत्सर्गपुरीषेण दूषयेत्पुण्यभूमिकाः ॥ गहनेन तथा राजन्स्त्रियो दूषयते हि सः ॥ ३५ ॥ ततस्ते वाडवाः सर्वे लोहासुरभयातुराः ॥ प्रनष्टाः सपरीवारा गतास्ते वै दिशो दश ॥ ३६ ॥ वणिजस्ते भयोद्विग्ना विप्राननुययुर्नृप ॥ महाभयेन संभीता दूरं गत्वा विमृश्य च ॥ ३७ ॥ सह शूद्रैर्द्विजैः सर्व एकीभूत्वा गतास्तदा ॥ मुक्तारण्यं पुण्यतमं निर्जनं हि ययुश्च ते ॥ ३८ ॥ निवासं कारयामासुर्नातिदूरे नरेश्वर ॥ वजिङ्नाम्ना हि तद्ग्रामं वासयामासुरेव ते ॥ ३९ ॥ लोहासुरभयाद्राजन्विप्रनाम्ना विनिर्मितम् ॥ शंभुना वणिजा यस्मात्तस्मात्तन्नामधारणम् ॥ ४० ॥ शंभुग्राममिति ख्यातं लोके विख्यातिमागतम् ॥ अथ केचिद्भयान्नष्टा वणिजः प्रथमं तदा ॥ ४१ ॥ ते नातिदूरे गत्वा वै मंडलं चक्रुरुत्तमम् ॥ विप्रागमनकांक्षास्ते तत्र वासमकल्पयन् ॥ ४२ ॥ मंडलेति च नाम्ना वै ग्रामं कृत्वा न्यवीवसन् ॥ विप्रसार्थपरिभ्रष्टाः केचित्तु वणिजस्तदा ॥ ४३ ॥ अन्यमार्गे गता ये वै लोहासुरभयार्दिताः ॥ धर्मारण्यान्नातिदूरे गत्वा चिंतामुपाययुः ॥ ४४ ॥ कस्मिन्मार्गे वयं प्राप्ताः कस्मिन्प्राप्ता द्विजातयः ॥ इति चिंतां परं प्राप्ता वासं तत्र त्वकारयन् ॥ ४५ ॥ अन्यमार्गे गता यस्मात्तस्मात्तन्नामसंभवम् ॥ ग्रामं निवासयामासुरडालंजमिति क्षितौ ॥ ४६ ॥ यस्मिन्ग्रामे निवासी यो यत्संज्ञश्च वणिग्भवेत् ॥ तस्य ग्रामस्य तन्नाम ह्यभवत्पृथिवीपते ॥ ४७ ॥ वणिजश्च तथा विप्रा मोहं प्राप्ता भयार्दिताः ॥ तस्मान्मोहेतिसंज्ञास्ते राजन्सर्वे निरब्रुवन् ॥ ॥ ४८ ॥ एवं प्रनषणं नष्टास्ते गताश्च दिशो दिश ॥ धर्मारण्ये न तिष्ठंति वाडवा वणिजोऽपि वा ॥ ४९ ॥ उद्वसं हि तदा जातं धर्मारण्यं च दुर्लभम् ॥ भूषणं सर्वतीर्थानां कृतं लोहासुरेण तत् ॥ ५० ॥ नष्टद्विजं नष्टतीर्थं स्थानं कृत्वा हि दानवः ॥ परां मुदमवाप्यैव जगाम स्वालयं ततः ॥ ५१ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे पूर्वभागे धर्मारण्यमाहात्म्ये ज्ञातिभेदवर्णननामत्रयोविंशोऽध्यायः ॥ २३ ॥ ॥ छ ॥ ॥ व्यास उवाच ॥ ॥ एतत्तीर्थस्य माहात्म्यं मया प्रोक्तं तवाग्रतः ॥ अनेकपूर्वजन्मोत्थपातकघ्नं महीपते ॥ १ ॥

CC-0. In Public Domain. Digitization by eGangotri

 समानप्रवरां चैव त्यक्त्वा चांद्रायणं चरेत् ॥ १९ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे पूर्वभागे धर्मारण्य
 माहात्म्ये श्रीमाताकथितनामगोत्रप्रवरकृतदेव्यवटंककथनंनामैकविंशोऽध्यायः ॥ २१ ॥ ॥ छ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ स्थान
वासिन्यो योगिन्यः काजेशेन विनिर्मिताः ॥ कस्मिन्स्थाने हि का देव्यः कीदृश्यस्ता वदस्व मे ॥ १ ॥ ॥ व्यास उवाच ॥ ॥ सर्वज्ञोसि
कुलीनोसि साधु पृष्टं त्वयानघ ॥ कथयिष्याम्यहं सर्वमखिलेन युधिष्ठिर ॥ २ ॥ नानाभरणभूषाढ्या नानारत्नोपशोभिताः ॥ नानावसनसंवीता
नानायुधसमन्विताः ॥ ३ ॥ नानावाहनसंयुक्ता नानास्वरनिनादिनीः ॥ भयनाशाय विप्राणां काजेशेन विनिर्मिताः ॥ ४ ॥ प्राच्यां याम्या
मुदीच्यां च प्रतीच्यां स्थापिता हि ताः ॥ आग्नेयां नैर्ऋते देशे वायव्येशानयोस्तथा ॥ ५ ॥ आशापुरी च गात्राई छत्राई ज्ञानजा तथा ॥ पिप्प
लांबा तथा शांता सिद्धा भट्टारिका तथा ॥ ६ ॥ कदंबा विकटा मीठा सुपर्णा वसुजा तथा ॥ मातंगी च महादेवी वाराही मुकुटेश्वरी ॥ ७ ॥
भद्रा चैव महाशक्तिः सिंहारा च महाबला ॥ एताश्चान्याश्च बहवः कथितुं नैव शक्यते ॥ ८ ॥ नानारूपधरा देव्यो नानावेषसमाश्रिताः ॥
स्थानादुत्तरदिग्भागे आशापूर्णासमीपतः ॥ ९ ॥ पूर्वे तु विद्यते देवी आनंदानंददायिनी ॥ वसंती चोत्तरे देव्यो नानारूपधरा मुदा ॥ १० ॥
इष्टान्कामान्ददात्येता जलदानेन तर्प्पिताः ॥ स्थाने नैर्ऋतिदिग्भागे शांता शांतिप्रदायिनी ॥ ११ ॥ सिंहोपरि समासीना चतुर्हस्ता वरप्रदा ॥
भट्टारी च महाशक्तिः पुनस्तत्रैव तिष्ठति ॥ १२ ॥ संस्तुता पूजिता भक्त्या भक्तानां भयनाशिनी ॥ स्थानात्तु सप्तमे क्रोशे क्षेमलाभा व्यव
स्थिता ॥ १३ ॥ सा विलेपमयी पूज्या चिंतिता सिद्धिदायिनी ॥ पूर्वस्यां दिशि लोकैस्तु बलिदानेन तर्पिता ॥ परिवारेण संयुक्ता भुक्तिमुक्ति
प्रदायिनी ॥ १४ ॥ अचिंत्यरूपचरिता सर्वशत्रुविनाशनी ॥ संध्यायास्त्रिषु कालेषु प्रत्यक्षैव हि दृश्यते ॥ १५ ॥ स्थानात्तु सप्तमे क्रोशे दक्षिणा
विन्ध्यवासिनी ॥ सायुधा रूपसंपन्ना भक्तानां भयहारिणी ॥ १६ ॥ पश्चिमे निंबजा देवी तावद्भूमिसमाश्रिता ॥ महाबला सा दृष्टापि नयनानन्द
दायिनी ॥ १७ ॥ स्थानादुत्तरदिग्भागे तावद्भूमिसमाश्रिता ॥ शक्तिर्बहुसुवर्णाक्षा पूजिता सासुवर्णदा ॥ १८ ॥ स्थानाद्वायव्यकोणे च क्रोशमात्र
मिते श्रिता ॥ क्षेत्रधरा महादेवी समये च्छागधारिणी ॥ १९ ॥ पुरादुत्तरदिग्भागे क्रोशमात्रे तु कर्णिका ॥ सर्वोपकारनिरता स्थानोपद्रवनाशनी
॥ २० ॥ स्थानान्निर्ऋतिदिग्भागे ब्रह्माणीप्रमुखास्तथा ॥ नानारूपधरा देव्यो विद्यंते जलमातरः ॥ २१ ॥ इति श्रीस्कांदे महापुराण एकाशीति
साहस्र्यां संहितायां तृतीये ब्रह्मखण्डे पूर्वभागे धर्मारण्यमाहात्म्ये देवतास्थापनंनामद्वाविंशोऽध्यायः ॥ २२ ॥ ॥ छ ॥ ॥ व्यास उवाच ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अतः परं प्रवक्ष्यामि ब्रह्मणा यत्कृतं पुरा ॥ तत्सर्वं कथयाम्यद्य शृणुष्वैकाग्रमानसः ॥ १ ॥ देवानां दानवानां च वैराद्युद्धं बभूवह ॥ तस्मिन्युद्धे महादुष्टे देवाः संक्लिष्टमानसाः ॥ २ ॥ बभूवुस्तत्र सोद्वेगा ब्रह्माणं शरणं ययुः ॥ ३ ॥ ॥ देवा ऊचुः ॥ ॥ ब्रह्मन्केन प्रकारेण दैत्यानां वधमेव च ॥ करोम्यद्य उपायं हि कथ्यतां शीघ्रमेव मे ॥४॥ ॥ ब्रह्मोवाच ॥ ॥ मया हि शंकरेणैव विष्णुना हि तथा पुरा ॥ यमस्य तपसा तुष्टैर्धर्मारण्यं विनिर्मितम् ॥ ५ ॥ तत्र यद्दीयते दानं यज्ञं वा तप उत्तमम् ॥ तत्सर्वं कोटिगुणितं भवेदिति न संशयः ॥ ६ ॥ पापं वा यदि वा पुण्यं सर्वं कोटिगुणं भवेत् ॥ तस्माद्दैत्यैर्न धर्षितं कदाचिदपि भोः सुराः ॥ ७ ॥ श्रुत्वा तु ब्रह्मणो वाक्यं देवाः सर्वे सविस्मयाः ॥ ब्रह्माणं त्वग्रतः कृत्वा धर्मारण्यमुपाययुः ॥ ८ ॥ सत्रं तत्र समारभ्य सहस्राब्दमनुत्तमम् ॥ वृत्वाऽऽचार्यं चांगिरसं मार्कंडेयं तथैव च ॥ ९ ॥ अत्रिं च कश्यपं चैव होता कृत्वा महामतिः ॥ जमदग्निं गौतमं च अध्वर्युत्वं न्यवेदयन् ॥ १० ॥ भरद्वाजं वसिष्ठं तु प्रत्यध्वर्युत्वमादिशन् ॥ नारदं चैव वाल्मीकिं नोदनायाकरोत्तदा ॥ ११ ॥ ब्रह्मासने च ब्रह्माणं स्थापयामासुरादरात् ॥ क्रोशचतुष्कमात्रां च वेदिं कृत्वा सुरैस्ततः ॥ १२ ॥ द्विजाः सर्वे समाहूता यज्ञस्यार्थे हि जापकाः ॥ ऋग्यजुःसामाथर्वान्वै वेदानुद्गिरयंति ये ॥ १३ ॥ गणनाथं शंभुसुतं कार्त्तिकेयं तथैव च ॥ इन्द्रं वज्रधरं चैव जयंतं चन्द्रसूनुकम् ॥ १४ ॥ चत्वारो द्वारपालाश्च देवाः शूरा विनिर्मिताः ॥ ततो राक्षोघ्नमंत्रेण हूयते हव्यवाहनः ॥ १५ ॥ तिलांश्च यवमिश्रांश्च मध्वाज्येन च मिश्रितान् ॥ जुहुवुस्ते तदा देवा वेदमंत्रैर्नरेश्वर ॥ १६ ॥ आघारावाज्यभागौ च हुत्वा चैव ततः परम् ॥ द्राक्षेक्षुपूगनारिंग जंबीरं बीजपूरकम् ॥ १७ ॥ उत्तरतो नालिकेरं दाडिमं च यथाक्रमम् ॥ मध्वाज्यं पयसा युक्तं कृशरशर्करायुतम् ॥ १८ ॥ तंडुलैः शतपत्रैश्च यज्ञे वाचं नियम्य च ॥ विचिंत्य च महाभागाः कृत्वा यज्ञं सदक्षिणम् ॥ १९ ॥ उत्तमं च शुभं स्तोमं कृत्वा हर्षमुपाययुः ॥ अवारितान्नमददन्दीनांधकृपणेष्वपि ॥ २० ॥ ब्राह्मणेभ्यो विशेषेण दत्तमन्नं यथेप्सितम् ॥ पायसं शर्करायुक्तं साज्यशाकसमन्वितम् ॥ २१ ॥ मंडकावटकाः पूपास्तथा वै वेष्टिकाः शुभाः ॥ सहस्रमोदकाश्चापि फेणिका घुर्घुरादयः ॥ २२ ॥ ओदनश्च तथा दाली आढकीसंभवा शुभा ॥ तथा वै मुद्गदाली च पर्पटा वटिका तथा ॥ २३ ॥ प्रलेह्यानि विचित्राणि युक्तान्यूषणसंचयैः ॥ कुल्माषा वेल्लकाश्चैव कोमला वालकाः शुभाः ॥ २४ ॥ कर्कटिकाश्चार्द्रयुता मरिचेन समन्विताः ॥ एवंविधानि चान्नानि शाकानि विविधानि च ॥ २५ ॥ भोजयित्वा द्विजान्सर्वान्धर्मारण्यनिवासिनः ॥ अष्टादशसहस्राणि सपुत्रांश्च तदा नृप ॥ २६ ॥ प्रतिदिनं तदा देवा भोजयंति स्म वाडवान् ॥ एवं वर्षसहस्रं वै कृत्वा यज्ञं

CC-0. In Public Domain. Digitization by eGangotri

आंगिरसबार्हस्पत्यभारद्वाज २२ मांडव्यसगोत्रस्य वत्ससवात्स्यसवात्स्यायनस ४ सामान्यलौगाक्षसगोत्रस्य गोत्रजा भद्रयोगिनी प्रवर ३ काश्यपवसिष्ठ अवत्सार २० कौशिकसगोत्रस्य गोत्रजा पक्षिणी प्रवर ३ विश्वामित्र अथर्व भारद्वाज २१ सामान्यप्रवर १ पैंग्यसभरद्वाज २ समानप्रवरा २ लौगाक्षसगार्ग्यायनसकाश्यपकश्यप ४ समानप्रवर ३ कौशिककुशिकसाः २ समानप्रवरः ४ औपमन्युलौगाक्षस २ समानप्रवराः ५ ॥ यावतां प्रवरेष्वेको विश्वामित्रोऽनुवर्तते ॥ न तावतां सगोत्रत्वाद्विवाहः स्यात्परस्परम् ॥ ॥ ५ ॥ त्यजेत्समानप्रवरां सगोत्रां मातुः सपिंडामचिकित्स्यरोगाम् ॥ अजातलोम्नीं च तथान्यपूर्वां सुतेन हीनस्य सुतां सुकृष्णाम् ॥ ॥ ६ ॥ एक एव ऋषिर्यत्र प्रवरेष्वनुवर्तते ॥ तावत्समानगोत्रत्वमृते भृग्वंगिरोगणात् ॥ ७ ॥ पंचसु त्रिषु सामान्यादविवाहस्त्रिषु द्वयोः ॥ भृग्वंगिरोगणेष्वेवं शेषेष्वेकोपि वारयेत् ॥ ८ ॥ समानगोत्रप्रवरां कन्यामूढ्वोपगम्य च ॥ तस्यामुत्पाद्य चांडालं ब्राह्मण्यादेव हीयते ॥ ९ ॥ कात्यायनः ॥ परिणीय सगोत्रां तु समानप्रवरां तथा ॥ त्यागं कृत्वा द्विजस्तस्यास्ततश्चांद्रायणं चरेत् ॥ १० ॥ उत्सृज्य तां ततो भार्यां मातृवत्परिपालयेत् ॥ ११ ॥ याज्ञवल्क्यः ॥ अरोगिणीं भ्रातृमतीमसमानार्षगोत्रजाम् ॥ पंचमात्सप्तमादूर्ध्वं मातृतः पितृत स्तथा ॥ १२ ॥ असमानप्रवरैर्विवाह इति गौतमः ॥ यद्येकं प्रवरं भिन्नं मातृगोत्रवरस्य च ॥ तत्रोद्वाहो न कर्तव्यः सा कन्या भगिनी भवेत् ॥ १३ ॥ दाराग्निहोत्रसंयोगं कुरुते योऽग्रजे स्थिते ॥ परिवेत्ता स विज्ञेयः परिवित्तिस्तु पूर्वजः ॥ १४ ॥ सदा पौनर्भवा कन्या वर्ज नीया कुलाधमा ॥ वाचा दत्ता मनोदत्ता कृतकौतुकमंगला ॥ १५ ॥ उदकस्पर्शिता याच याच पाणिगृहीतका ॥ अग्निं परिगता या च पुनर्भूः प्रसवा च या ॥ १६ ॥ इत्येताः काश्यपेनोक्ता दहंति कुलमग्निवत् ॥ १७ ॥ अथावटंकाः कथ्यंते गोत्रं १ पात्र २ दात्र ३ त्राशयत्र ४ लडकात्र १५ मंडकीयात्र १६ विडलात्र १७ रहिला १८ भादिल १९ वालूआ २० पोकीया २१ वाकीया २२ मकाल्या २३ लाडआ २४ माणवेदा २५ कालीया २६ ताली २७ वेलीया २८ पांवलन्डीया २९ मूडा ३० पीतूला ३१ धिगमघ ३२ भूतपादवादी ३४ होफोया ३५ शेवार्दत ३६ वपार ३७ वथार ३८ साधका ३९ बहुधिया ४० ॥ १८ ॥ मातुलस्य सुतामूढ्वा मातृगोत्रां तथैव च ॥

१ एतेऽवटंकाः– यथाप्रतिपुस्तके दृष्टास्तथैव मुद्रिताः, ते च तत्तदवटंकयुतैस्तत्परिचितैश्च विद्वद्भिः शोधनीयाः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नाशमायाति स्मरणात्कीर्तनान्नृप ॥ ४५ ॥ धन्यं यशस्यमायुष्यं सुखसंतानदायकम् ॥ माहात्म्यं शृणुयाद्भक्त्स सर्वसौख्यान्वितो भवेत् ॥४६॥ सर्वतीर्थेषु यत्पुण्यं सर्वदानेषु यत्फलम् ॥ सर्वयज्ञैश्च यत्पुण्यं जायते श्रवणान्नृप ॥ ४७ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां स[ंहि]तायां तृतीये ब्रह्मखण्डे पूर्वभागे धर्मारण्यमाहात्म्ये धराक्षेत्रवर्णनं नाम विंशोऽध्यायः ॥ २० ॥ ॥ व्यास उवाच ॥ ॥ तया चोत्पादिता राजञ्छ[री]रात्कुलदेवताः ॥ १ ॥ भट्टारिकी १तथा छत्रा २ ओविका ३ ज्ञानजा तथा ४ ॥ १ ॥ भद्रकाली च ५ माहेशी ६ सिंहोरी ७ धनमर्दनी ८ गात्रा ९ शांता १० शेषदेवी ११ वाराही १२ भद्रयोगिनी १३ ॥ २ ॥ योगेश्वरी १४ मोहलज्जा १५ कुलेशी १६ शकुलाचिता १७ तारणी १८ कनकानंदा १९ चामुंडा २० च सुरेश्वरी २१ ॥ ३ ॥ दारभट्टारिकेत्या २२ द्या प्रत्येका शतधा पुनः ॥ उत्पन्नाः शक्तयस्तस्मिन्नानारूपान्विताः शुभाः ॥ अतः परं प्रवक्ष्यामि प्रवराण्यथ देवताः ॥ ४ ॥ औपमन्यवसगोत्रप्रवर ३ गोत्रदेव्यागात्रावसिष्ठ १ भरद्वाज २ इंद्रप्रमदकाश्यपसगोत्रशगोत्रदेव्याज्ञानजा २ प्रवर ३ काश्यपः अवत्सारः २ रैभ्यः ३ मांडव्यसगोत्र ३ गोत्रजा दारभदारिका ३ प्रवर ५ भार्गवच्यव नाअत्रिअवीजमदग्निः ५ कुशिकसगोत्रऽजातारणी ६ महाबलाप्रवर ३ विश्वामित्रदेवराजउद्दालक ६ शौनकसगोत्र ७ गोत्रदेवी ७ शांता प्रवर ३ भार्गवाणैनहोत्रगात्र्समद ३ कृष्णात्रेयसगोत्रवीगोत्रदेव्याभद्रयोगिनी ८ प्रवर ३ आत्रेयअर्चनानसश्यावाश्व ३ गार्ग्यायणसगोत्र गोत्रजा शांता प्रवर ५ भार्गवच्यवनआप्नवान्अवीजमदग्निः १० गार्गायणगोत्रगोत्रजाज्ञानजा प्रवर ५ काश्यपअवत्सारशांडिलअसितदेवलगांगेयसगोत्रदेवा शांता द्वारवासिनी प्रवर ३ गार्ग्यगार्गि शंख लिखित १२ पैंग्यसगोत्रजाज्ञानजा शेषलउध प्रवर आंगिरसआंबरीषयौवनाश्व १३ वत्ससगोत्रं गोत्रजाज्ञानजाप्रवर ५ भार्गवच्यावनआप्नवान और्वपुरोधसः १४ वात्ससगोत्रगोत्रजाज्ञानजाप्रवर ५ भार्गवच्यावन आप्नवान् और्वपुरोधसः १५ वात्स्यसगोत्रस्य गोत्रजा शीहरीप्रवर ५ भार्गवच्यावनआप्नुवान् और्वपुरोधसः १६ श्यामायनसगोत्रस्य गोत्रजा शीहरी प्रवर भार्गवच्यावनआप्नुवान् अवि जमदग्निः १७ धारणसगोत्रस्य गोत्रजा छत्रजा प्रवर ३ अगस्त्यदार्वच्युतदध्यवाहन १८ काश्यपगोत्रस्य गोत्रजा चामुण्डा प्रवर ३ काश्यपस्यावत्सार नैध्रुव १९ भरद्वाजगोत्रस्य गोत्रजा पक्षिणी प्रवर ३

१ एतेषां गोत्रप्रवरदेवतावटंकादीनां सम्यक्परिज्ञानाभावादत्र शुद्धमशुद्धं सम्यङ्निर्णेतुमशक्यम्, अतो विज्ञापयामहे—येषामेतेगोत्रदेवतादयस्तैः सज्जनैरयं विषयः सम्यक्परिशोधपूर्वकम् परिष्कृत्यास्माकं सविधे प्रेषणीयः द्वितायावृत्तौ सम्यङ्मुद्रापयिष्यामः ।

CC-0. In Public Domain. Digitization by eGangotri

जयंतेनापि तत्रैव स्थापितं लिंगमुत्तमम् ॥ ३३ ॥ जयंतस्य हरस्तुष्टस्तस्मिँल्लिंगे स्तुतः सदा ॥ त्रिकालं पुत्रसंयुक्तः पूजनार्थं सुरेश्वरः ॥ ३४ ॥
आयाति च महाबाहो त्यक्त्वा स्थानं स्वकं हि वै ॥ एतत्सर्वं समाख्यातं सर्वसौख्यप्रदायकम् ॥ ३५ ॥ इन्द्रेश्वरे तु यत्पुण्यं जयंतेशस्य पूज
नात् ॥ तदेवाप्नोति राजेन्द्र सत्यंसत्यं न संशयः ॥ ३६ ॥ स्नात्वा कुण्डे महाराज संपूज्यैकाग्रमानसः ॥ सर्वपापविशुद्धात्मा इन्द्रलोके
महीयते ॥ ३७ ॥ यः शृणोति नरो भक्त्या सर्वपापैः प्रमुच्यते ॥ सर्वान्कामानवाप्नोति जयंतेशप्रसादतः ॥ ३८ ॥ इति श्रीस्कांदे
महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे पूर्वभागे धर्मारण्यमाहात्म्ये इन्द्रेश्वरजयंतेश्वरमहिमवर्णनोनामैकोनविंशोऽध्यायः
॥ १९ ॥ ॥ छ ॥ ॥ व्यास उवाच ॥ ॥ अतः परं प्रवक्ष्यामि शिवतीर्थमनुत्तमम् ॥ यत्रासौ शंकरो देवः पुनर्जन्मधरोऽभवत् ॥ १ ॥
कीलितो देवदेवेशः शंकरश्च त्रिलोचनः ॥ गिरिजया महाभाग पातितो भूमिमंडले ॥ २ ॥ छलितो मुह्यमानस्तु दिवारात्रिं न वेत्ति च ॥
पुंस्त्रीनपुंसकाश्चैव जडीभूतस्त्रिलोचनः ॥ ३ ॥ कल्पांतमिव संजातं तदा तस्मिंश्च कीलिते ॥ पार्वत्या सहसा तस्य कृतं कीलनकं तदा ॥ ४ ॥ ॥
युधिष्ठिर उवाच ॥ ॥ एतदाश्चर्यमतुलं वचनं यत्त्वयोदितम् ॥ यो गुरुः सर्वदेवानां योगिनां चैव सर्वदा ॥ ५ ॥ पार्वत्या कीलितः कस्मा
न्नष्टवृत्तिः शिवः कथम् ॥ कारणं कथ्यतां तत्र परं कौतूहलं हि मे ॥ ६ ॥ ॥ व्यास उवाच ॥ ॥ मन्त्रौघा विविधा राजञ्छंकरेण प्रकाशिताः ॥
पार्वत्यग्रे महाराज अथर्वणोपवेदजाः ॥ ७ ॥ शाकिनी डाकिनी चैव काकिनी हाकिनी तथा ॥ एकिनी लाकिनी ह्येताः षड्भेदास्तत्र कीर्ति
ताः ॥ ८ ॥ बीजान्युद्धृत्य वै ताभ्यो माला चैकवृता कृता ॥ शंभुना कथिता चैव पार्वत्यग्रे नृपोत्तम ॥ ९ ॥ तैश्चैव अष्टा भवति मंत्रोद्धारः
कृतस्तु सा ॥ साधयेत्सा महादुष्टा शाकिनी प्रमदानघे ॥ १० ॥ ॥ श्रीपार्वत्युवाच ॥ ॥ प्रकाशितास्त्वया नाथ भेदा ह्येते षडेव हि ॥ षड्विधाः
शक्तयो नाथ अगम्यायोगमालिनीः ॥ षड्विधोक्तं त्वयैकेन कूटात्कृतं वदस्व माम् ॥ ११ ॥ ॥ श्रीमहादेव उवाच ॥ ॥ अप्रकाशो महादेवि
देवासुरैस्तु मानवैः ॥ १२ ॥ ॥ पार्वत्युवाच ॥ ॥ नमस्ते सर्वरूपाय नमस्ते वृषभध्वज ॥ जटिलेश नमस्तुभ्यं नीलकण्ठ नमोस्तुते ॥
॥ १३ ॥ कृपासिंधो नमस्तुभ्यं नमस्ते कालरूपिणे ॥ एतैश्च बहुभिर्वाक्यैः कोमलैः करुणानिधिम् ॥ १४ ॥ तोषयित्वाद्रितनया दण्डवत्प्रणि
पत्य च ॥ जग्राह पादयुगलं तां प्रोवाच दयापरः ॥ १५ ॥ किमर्थं स्तूयसे भद्रे याच्यतां मनसीप्सितम् ॥ १६ ॥ ॥ पार्वत्युवाच ॥ ॥
समाहारं च सध्यानं कथयस्व सविस्तरम् ॥ असंदेहमशेषं च यद्यहं वल्लभा तव ॥ १७ ॥ ॥ श्रीरुद्र उवाच ॥ ॥ न प्रकाश्यं त्वया देवि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समाहारोद्भवं फलम् ॥ सर्वं तत्त्वमहं वक्ष्ये मंत्रकूटाद्यमेव हि ॥ १८ ॥ मायाबीजं तु सर्वेषां कूटानां हि वरानने ॥ सर्वेषां मध्यमो वर्णो बिंदुनादादिशोभितः ॥ १९ ॥ वह्निबीजं सवातं च कूर्मबीजसमन्वितम् ॥ आदित्यप्रभवं बीजं शक्तिबीजोद्भवं सदा ॥ २० ॥ एतत्कूटं चाद्यबीजं द्वितीयं च विभोर्मतम् ॥ तृतीयं चाग्निबीजं तु संयुक्तं बिंदुनेंदुना ॥ २१ ॥ चतुर्थं युक्तं शेषेण ब्रह्मबीजमृषिस्तथा ॥ पंचमं कालबीजं च षष्ठं पार्थिवबीजकम् ॥ २२ ॥ सप्तमे चाष्टमे बाह्यं नृसिंहेन समन्वितम् ॥ नवमे द्वितीयमेकं च दशमे चाष्टकूटकम् ॥ २३ ॥ विपरीतं तयोर्बीजं रुद्राक्षे वरचारिणि ॥ चतुर्दशे चतुर्थ्यर्थं पृथ्वीबीजेन संयुतम् ॥ २४ ॥ कूटाः शेषाक्षराः केचिद्रक्षिता मेनकात्मजे ॥ सा पपात यदोर्व्यां हि शिवपत्नी तदा नृप ॥ २५ ॥ रामेणाश्वासिता तत्र प्रहसंस्त्रिपुरांतकः ॥ भद्रे यस्मात्त्वया पत्रं जंत्रशक्तिर्भविष्यति ॥ २६ ॥ मारणे मोहने वश्ये आकर्षणे च क्षोभणे ॥ यंयं कामयते नूनं ततत्सिद्धिर्भविष्यति ॥ २७ ॥ इति श्रुत्वा तदा देवी दुष्टचित्ता शुचिस्मिता ॥ कूटशेषास्ततो वीराःप्रोक्तास्तस्यै तु शंभुना ॥२८॥ उवाचचकृपासिंधुः साधयस्व यथाविधि ॥ कैलासात्तु हरस्तत्र धर्मारण्यं गतो भृशम् ॥२९॥ ज्ञात्वा देवी ययौ तत्र यत्रासौ वृषभध्वजः ॥ तत्क्षणात्पतितो भूमौ धर्मारण्ये नृपोत्तम ॥३०॥ जटा चंद्रोरगाः शूलं वृषभाद्यायुधानि वै ॥ मुंडमाला च कौपीनं कपालं ब्रह्मणस्तु वै ॥३१॥ गंता गणाश्च सर्वत्र भूतप्रेता दिशो दश ॥ विसंज्ञं च स्वमात्मानं ज्ञात्वा देवो महेश्वरः ॥ ३२ ॥ स्वेदजास्तु समुत्पन्ना गणाः कूटादयस्तथा ॥ पंचकूटान्समुत्पाद्य तस्मात्तदाधमूलिने ॥ ३३ ॥ साधकास्ते महाराज जपहोमपरायणाः ॥ प्रेतासनास्तु ते सर्वे कालकूटोपरि स्थिताः ॥ ३४ ॥ कथयंति स्वमात्मानं येन मोक्षः पिनाकिनः ॥ ततः कष्टसमाविष्टा गौरी वह्निभयातुरा ॥ ३५ ॥ सभाजितःशिवस्तैश्च गौरी ह्रीणा त्वधोमुखी ॥ तपस्तेपे च तत्रस्था शंकरादेशकारिणी ॥ ३६ ॥ पंचाग्निसेवनं कृत्वा धूम्रपानमधोमुखी ॥ कूटाक्षरैः स्तुतस्तैस्तु तोषितो वृषभध्वजः ॥ ३७ ॥ धराक्षेत्रमिदं राजन्पापघ्नं सर्वकामदम् ॥ देवमज्जनकं शुभ्रं स्थानकेऽस्मिन्विराजते ॥ ३८ ॥ आश्विने कृष्णपक्षे च चतुर्दश्या दिने नृप ॥ तत्र स्नात्वा च पीत्वा च सर्वपापैः प्रमुच्यते ॥ ३९ ॥ पूजयित्वा च देवेशमुपोष्य च विधानतः ॥ शाकिनी डाकिनी चैव वेतालाः पितरो ग्रहाः ॥ ४० ॥ ग्रहा धिष्ण्या न पीडयंते सत्यंसत्यं वरानने ॥ सांगं रुद्रजपं तत्र कृत्वा पापैः प्रमुच्यते ॥ ४१ ॥ नश्यंति त्रिविधा रोगाः सत्यंसत्यं च भूपते ॥ एतत्सर्वं मया ख्यातं देवमज्जनकं शृणु ॥ ४२ ॥ अश्वमेधसहस्रैस्तु कृतैस्तु भूरिदक्षिणैः ॥ तत्फलं समवाप्नोति श्रोता श्रावयिता नरः ॥ ४३ ॥ अपुत्रो लभते पुत्रान्निर्धनो धनमाप्नुयात् ॥ आयुरारोग्यमैश्वर्यं लभते नात्र संशयः ॥ ४४ ॥ मनोवाक्कायजनितं पातकं त्रिविधं च यत् ॥ तत्सर्वं

CC-0. In Public Domain. Digitization by eGangotri

सुप्रसन्नः सुरश्रेष्ठः कृपालुर्वरदायकः ॥ तदा हृष्टमना देवो देवेन्द्रमिदमूचिवान् ॥ ८ ॥ ॥ हर उवाच ॥ ॥ यत्त्वं याचयसे देव तदहं प्रद
दामि ते ॥ ९ ॥ ॥ इन्द्र उवाच ॥ ॥ यदि तुष्टोसि देवेश कृपासिंधो महेश्वर ॥ ब्रह्महत्या हि मां देव उद्वेजयति नित्यशः ॥ १० ॥ वृत्रासुरस्य
हनने जातं पापं सुरोत्तम ॥ तत्पापं नाशय विभो मम दुःखप्रदं सदा ॥ ११ ॥ ॥ हर उवाच ॥ ॥ धर्मारण्ये सुरपते ब्रह्महत्या न पीडयेत् ॥
हत्या गवां द्विजातीनां बालस्य योषितामपि ॥ १२ ॥ वचनान्मम देवेंद्र ब्रह्मणः केशवस्य च ॥ यमस्य वचनाज्जिष्णो हत्या नैवात्र तिष्ठति ॥
प्रविश्य त्वं महाराज अतोत्र स्नानमाचर ॥ १३ ॥ ॥ इन्द्र उवाच ॥ ॥ यदि त्वं मम तुष्टोऽसि कृपासिंधो महेश्वर ॥ मन्नाम्ना च महादेव
स्थापितो भव शंकर ॥ १४ ॥ तथेत्युक्त्वा महादेवः सुप्रसन्नो हरस्तदा ॥ दर्शयामास तत्रैव लिंगं पापप्रणाशनम् ॥ १५ ॥ कूर्मपृष्ठात्समुत्पाद्य
आत्मयोगेन शंभुना ॥ स्थितस्तत्रैव श्रीकण्ठः कालत्रयविदो विदुः ॥ १६ ॥ वृत्रहत्यासमुत्रस्तदेवराजस्य सन्निधौ ॥ इन्द्रेश्वरस्तदा तत्र धर्मा
रण्ये स्थितो नृप ॥ १७ ॥ सर्वपापविशुद्ध्यर्थं लोकानां हितकाम्यया ॥ इन्द्रेश्वरं तु राजेंद्र पुष्पधूपादिकैः सदा ॥ १८ ॥ पूजयेच्च नरो भक्त्या
सर्वपापैः प्रमुच्यते ॥ अष्टम्यां च चतुर्दश्यां माघमासे विशेषतः ॥ १९ ॥ सर्वपापविशुद्ध्यर्थं शिवलोके महीयते ॥ नीलोत्सर्गं तु यो मर्त्यः
करोति च तदग्रतः ॥ २० ॥ उद्धरेत्सप्त गोत्राणि कुलमेकोत्तरं शतम् ॥ सांगरुद्रजपं यस्तु चतुर्दश्यां करोति वै ॥ २१ ॥ सर्वपाविशुद्धात्मा
लभते परमं पदम् ॥ २२ ॥ सौवर्णनयनं कृत्वा मध्ये रत्नसमन्वितम् ॥ यो ददाति द्विजातिभ्य इन्द्रतीर्थे तथोत्तमे ॥ २३ ॥ अन्धता न भवे
त्तस्य जन्मानि षष्टिसंख्यया ॥ निर्मलत्वं सदा तेषां नयनेषु प्रजायते ॥ महारोगास्तथा चान्ये स्नात्वा यांति तदग्रतः ॥ २४ ॥ पूजिते चैकचित्ते
न सर्वरोगात्प्रमुच्यते ॥ स्नात्वा कुण्डे नरो यस्तु संतर्पयति यः पितॄन् ॥ २५ ॥ तस्य तृप्ताः सदा भूप पितरश्च पितामहाः ॥ ये वै ग्रस्ता
महारोगैः कुष्ठाद्यैश्चैव देहिनः ॥ २६ ॥ स्नानमात्रेण संशुद्धा दिव्यदेहा भवंति ते ॥ ज्वरादिकष्टमापन्ना नराः स्वात्महिताय वै ॥ २७ ॥ स्नान
मात्रेण संशुद्धा दिव्यदेहा भवंति ते ॥ स्नात्वा च पूजयेद्देवं मुच्यते ज्वरबन्धनात् ॥ २८ ॥ एकाहिकं द्व्याहिकं च चातुर्थं वा तृतीयकम् ॥
विषमज्वरपीडा च मासपक्षादिकं ज्वरम् ॥ २९ ॥ इन्द्रेश्वरप्रसादाच्च नश्यते नात्र संशयः ॥ विज्वरो जायते नूनं सत्यंसत्यं च भूपते ॥ ३० ॥
वन्ध्या च दुर्भगा नारी काकवन्ध्या मृतप्रजा ॥ मृतवत्सा महादुष्टा स्नात्वा कुण्डे शिवाग्रतः ॥ पूजयेदेकचित्तेन स्नानमात्रेण शुद्ध्यति ॥ ३१ ॥
एवंविधांश्च बहुशो वरान्दत्त्वा पिनाकधृक् ॥ गतोऽसौ स्वपुरं पार्थ सेव्यमानः सुरासुरैः ॥ ३२ ॥ ततः शक्रो महातेजा गतो वै स्वपुरं प्रति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रजाः सर्वा धर्मारण्ये नराधिप ॥ प्रसादाच्चैव मातङ्ग्या देव्या वै सत्यमंदिरे ॥६४॥ ततो हृष्टहृदा विप्राः पुपूजुस्ते विधेः सुताम् ॥ मातंग्याश्च प्रक
र्तव्यं वर्षेवर्षे च पूजनम् ॥ ६५ ॥ माघासिते तृतीयायां भक्ष्यभोज्यादिभिस्तथा ॥ कर्णाटस्य तथोत्पत्तिः पुनर्जाता तु भूतले ॥ ६६ ॥ भयाच्चैव
हि तत्स्थानं त्यक्त्वा याम्यमगात्ततः ॥ गच्छमानस्तदा दैत्यो यक्ष्मरूपो ह्यभाषत ॥६७॥ श्रूयतां भो द्विजाः सर्वे धर्मारण्यनिवासिनः ॥ वणिजश्च
महच्चेदं मद्वाक्यं परिपाल्यताम् ॥ ६८ ॥ माघमासे हि मत्प्रीत्या निर्विघ्नार्थं सदा भुवि ॥ त्रिदलेन च धान्येन मूलकेन विशेषतः ॥ ६९ ॥ तिल
तैलेन वा कुर्यात्पुरुषो नियतव्रतः ॥ एकाशनं हि कुरुते यक्ष्मप्रीत्यै निरंतरम् ॥ १७० ॥ आबालयौवनेनैव वृद्धेनापीह सर्वदा ॥ वर्षेवर्षे प्रकर्त
व्यं यक्ष्मणो व्रतमुत्तमम् ॥ ७१ ॥ यस्मिन्गृहे हि यावच्च पुरुषाकाररूपिणः ॥ तस्याह्वयं प्रकुर्युस्त एकभक्तरताः सदा ॥ ७२ ॥ बालस्यार्थे तु
जननी कुरुते व्रतमुत्तमम् ॥ पिता वाप्यथवा भ्राता यन्निमित्तं व्रतं चरेत् ॥ ७३ ॥ न च तस्य भयं क्वापि न व्याधिर्नच बंधनम् ॥ भर्तुर्निमित्ते
स्त्री कुर्यादशक्ते त्वितरेण च[1] ॥ ७४ ॥ एवं समादिशन्दैत्यः सत्यमंदिरमुत्सृजन् ॥ गतोऽसौ याम्यदिग्भाग उदधेस्तीर उत्तमे ॥ ७५ ॥ विपुलं देह
मासाद्य कर्णाटः स नराधिप ॥ स्वनाम्ना चैव तं देशं स्थापयामास चोत्तमम् ॥७६॥ यस्मिंश्च सर्ववस्तूनि धनधान्यानि भूरिशः ॥ कर्णाटदेशं तं
राजन्परिवार्य चिरं स्थितः ॥७७॥ धर्मारण्यकथां पुण्यां कथितां नरसत्तम ॥ श्रीमातुश्चैव माहात्म्यं शृण्वंति श्रावयंति ये ॥ ७८ ॥ तेषां कुले कदा
चित्तु अरिष्टं नैव जायते ॥ अपुत्रो लभते पुत्रान्धनहीनस्तु संपदः ॥ आयुरारोग्यमैश्वर्यं श्रीमातुश्च प्रसादतः ॥ १७९ ॥ इति श्रीस्कांदे महापुराण
एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे पूर्वभागे धर्मारण्यमाहात्म्ये मातंगीकर्णाटकोपाख्यानवर्णनंनामाष्टादशोऽध्यायः ॥ १८ ॥ छ ॥ ॥
॥ ॥ व्यास उवाच ॥ ॥ इन्द्रसरे नरः स्नात्वा दृष्ट्वा चेन्द्रेश्वरं शिवम् ॥ सप्तजन्मकृतात्पापान्मुच्यते नात्र संशयः ॥ १ ॥ ॥ युधिष्ठिर उवाच ॥ ॥
केन चादौ निर्मितं तत्तीर्थं सर्वोत्तमोत्तमम् ॥ यथावद्वर्णय त्वं मे भगवन्द्विजसत्तम ॥ २ ॥ ॥ व्यास उवाच ॥ ॥ इन्द्रेणैव महाराज तपस्तप्तं
सुदुष्करम् ॥ ग्रामादुत्तरदिग्भागे शतवर्षाणि तत्र वै ॥ ३ ॥ शिवोद्देशं महाघोरमेकांगुष्ठेन भारत ॥ ऊर्द्ध्वबाहुर्महातेजाः सूर्यस्याभिमुखोऽभवत् ॥
॥ ४ ॥ वृत्रस्य वधतो ज्ञातं यत्पापं तस्य नुत्तये ॥ एकाग्रः प्रयतो भूत्वा शिवस्याराधने रतः ॥ ५ ॥ तपसा च तदा शंभुस्तोषितः शशिशे
खरः ॥ तत्राऽऽजगाम जटिलो भस्मांगो वृषभध्वजः ॥ ६ ॥ खट्वांगी पंचवक्त्रश्च दशबाहुस्त्रिलोचनः ॥ गंगाधरो वृषारूढोभूतप्रेतादिवेष्टितः ॥ ७ ॥

[1] कारयितव्यामिति शेषः ।

...University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चंदनेन विचर्चिता ॥ ३७ ॥ शूर्पं शरैः करे श्वानं पद्मं तु परमं पुनः ॥ कर्त्तरीं कारयेदेकां तूणीरं च धनूंषि च ॥ ३८ ॥ चर्म पाशं मुद्गरं च कांसालं तोमरं तथा ॥ शंखं चक्रं गदां शुभ्रां मुशलं परिघं शुभम् ॥ ३९ ॥ खट्वांगं बदरीं चैव अंकुशं च मनोरमम् ॥ अष्टादशायुधैरेभिः संयुता भुवनेश्वरी ॥ १४० ॥ लिखेत्सकुंडलां देवीं बाहुनूपुरभूषिताम् ॥ केयूरमुक्तापद्मैश्च मुंडमालाभिरन्विताम् ॥ ४१ ॥ मातृकाक्षरपरिवृतामंगुलीयकसंयुताम् ॥ नानाभरणशोभाढ्यां लिखित्वा भुवनेश्वरीम् ॥ ४२ ॥ मातंगीमिति विख्यातां प्रतिष्ठार्थं द्विजोत्तमाः ॥ चन्दनेन च हृद्येन पुष्पैश्चैव प्रपूजयेत् ॥ ४३ ॥ यक्षकर्दममानीय मातंगीं पूजयेत्सुधीः ॥ घृतेन बोधयेद्दीपं सप्तवर्तियुतं शुभम् ॥ ४४ ॥ धूपयेद्गुग्गुलेनाथ साज्येनातिसुगंधिना ॥ नालिकेरेण शुभ्रेण दद्यादर्घं च दंपती ॥ ४५ ॥ प्रदक्षिणाः प्रकुर्वीत चतुरः सुमनोरमम् ॥ वस्त्रांशुकं गुंठयित्वा अग्रे कृत्वा च दंपती ॥ ४६ ॥ प्रोक्षिणीकृत्य मातंग्याः प्राश्य माध्वीकमुत्तमम् ॥ गीतवादित्रनिर्घोषैर्मातंगीं पूजयेत्सुधीः ॥ ४७ ॥ सुवासिनीस्तु तद्रूपा मातंगीसंभवा इति ॥ नृत्यंती दम्पती चाग्रे सर्वोपद्रवशांतये ॥ ४८ ॥ नैवेद्यं विविधान्नेन अष्टादशविधं शुभम् ॥ वटकापूपिकाः शुभ्राः क्षीरं शर्करया युतम् ॥ ४९ ॥ बह्लाकरं वरं यूपा क्षितकुल्माषकं तथा ॥ सोहालिका भिन्नवटा लाप्सिका पञ्चचूर्णकम् ॥ १५० ॥ शैवेया विमलास्तत्र पर्पटाः शालकादयः ॥ पूरणं तस्य मासस्य कुर्याच्छुभ्रं मनोरमम् ॥ ५१ ॥ राजमाषाः सूपचिताः कल्पयेत्तत्र दंपती ॥ फेणिका रोपिकास्तत्र कुर्याच्चैव मनोरमाः ॥ ५२ ॥ एतान्यष्टादशान्यानि पक्वान्नानि प्रकल्पयेत् ॥ आज्यशर्करायुक्तानि शुक्तानि शाकसंचयैः ॥ ५३ ॥ रात्रौ जागरणं कार्यं सुवासिनीं च पूजयेत् ॥ मुखावलोकनं चाज्ये कुर्वीयातां च दम्पती ॥ ५४ ॥ परस्परं हि कुर्वीत उत्पातपरिशांतये ॥ एवं विधं मयाख्यातं मातंगीपूजनं शुभम् ॥ ५५ ॥ न पूजयति यो मूढस्तस्य विघ्नं करोति सा ॥ दंपत्योर्मरणं चाथ धननाशं महाभयम् ॥ ५६ ॥ क्लेशं रोगं तथा वह्नेः प्रादुर्भावं प्रपश्यति ॥ एतस्मात्कारणाद्विप्रा मातंगीं पूजयेत्सुधीः ॥ ५७ ॥ दंपतीनां च सर्वेषांद्विजातीनां च शासने ॥ वणिजां च महादेवी निर्विघ्नं कुरुते सदा ॥ ५८ ॥ तथेति चैव तैरुक्ते पुनर्वचनमब्रवीत् ॥ श्रूयतां ब्राह्मणाः सर्वे विवाहादिमहोत्सवम् ॥ ५९ ॥ मदीयवचनं श्रुत्वा तथा कुरुत वै विधिम् ॥ विवाहकाले संप्राप्ते दंपत्योः सौख्यहेतवे ॥१६०॥ निर्विघ्नार्थं तु कर्तव्यं निजैश्च सह सेवकैः ॥ अंजनं नयने कुर्यात्संबंधिनां च सर्वशः ॥ ६१ ॥ भ्रूमध्यात्तु प्रकर्त्तव्यमर्द्धचंद्रसमाकृति ॥ बिंदुं तु कारयेद्विप्रास्तस्योपरि मनोहरम् ॥ ६२ ॥ एवं कृते तदा विप्राः शांतिर्भवतिनान्यथा ॥ पुत्रवृद्धिकरं चैतत्तिलकं चार्द्धबिंबकम् ॥ सर्वविघ्नहरं सर्वदौःस्थ्यव्याधिविनाशनम् ॥ ६३ ॥ ॥ व्यास उवाच ॥ ॥ ततः शांताः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ततः कर्णाटकः क्रुद्धो गृहीत्वा शक्तिमूर्जिताम् ॥ अभ्यधावत दुष्टात्मा श्यामलानिधनेच्छया ॥१४॥ आगतं चासुरं दृष्ट्वा श्यामला सुमहामनाः॥
विवाहार्थं परं ज्ञात्वाऽभिप्रायं दुष्टचेतसः ॥ १५ ॥ महायुद्धमभूत्तत्र श्यामलाऽसुरवर्ययोः ॥ मासत्रयं ततो राजं श्चाभवत्तुमुलं क्षितौ ॥ १६ ॥ माघे
कृष्णतृतीयायां धर्मारण्ये महारणे ॥ मध्याह्नसमये भूप कर्णाटाख्यो निपातितः ॥ १७ ॥ कार्णाटिः पतितस्तत्र यत्र देव्या निपातितः ॥ तच्छैल
शृंगप्रतिमं पपात शिर उत्तमम् ॥ १८ ॥ चचाल सकला पृथ्वी साब्धिद्वीपा सपर्वता ॥ ततो विप्राः प्रहृष्टास्ते जय मातरुदैरयन् ॥ १९ ॥ जगु
र्गन्धर्वपतयो ननृतुश्चाप्सरोगणाः ॥ ततोत्सवं प्रकुर्वन्तो गीतं नृत्यं शुभप्रदम् ॥ २० ॥ पायसैर्वटकैश्चैव नैवेद्यैर्मोदकैस्तथा ॥ तुष्टवुःशुभवाण्या
ते स्थाने मोटेरके वरे ॥ २१ ॥ श्रीमती पूजिता सा च सुतसौख्यधनप्रदा ॥ महोत्सवे च संप्राप्ते मातंगीपूजनं हितम् ॥ २२ ॥ ये
ऽर्चयंति स्थापयित्वा धनपुत्रार्थसिद्धये ॥ सुखं कीर्तिं तथायुष्यं यशः पुण्यं समाप्नुयुः ॥ २३ ॥ व्याधयो नाशमायांति चादित्याद्या
ग्रहाः शुभाः ॥ भूतवेतालशाकिन्यो जंभाद्याः पीडयन्ति न ॥ २४ ॥ न जायते तथा क्वापि प्रेतादीनां प्रपीडनम् ॥ ततो विप्राः
प्रहृष्टाश्च स्तुतिं कर्तुं समुद्यताः ॥ २५ ॥ श्रीमातां चैव शक्तीश्च मातंगीमस्तुवंस्तदा ॥ श्यामलां च महादेवीं हर्षेण महतायुता ॥ २६ ॥
॥ ॥ विप्रा ऊचुः ॥ ॥ मातस्त्वमेवमस्माकं रक्षिका स्थानके भव ॥ दंपतीनां हितार्थाय यथा नोद्विजते द्विजाः ॥ २७ ॥ ॥
मातंग्युवाच ॥ ॥ तुष्टाहं वो महाभागाः स्तवेनानेन वो द्विजाः ॥ वरयध्वं वरं यद्वो मनसा समभीप्सितम् ॥ २८ ॥ ॥ ब्राह्मणा ऊचुः ॥ ॥
दास्यामहे बलिं देवि यस्ते मनसि वर्तते ॥ अस्माकं चैव दम्पत्यो रक्षार्थं त्वं स्थिरा भव ॥ २९ ॥ ॥ देव्युवाच ॥ ॥ स्वस्थाः संतु द्विजाः सर्वे न
च पीडा भविष्यति ॥ मयि स्थितायां दुर्धर्षा दैत्या येऽन्ये च राक्षसाः ॥१३०॥ शाकिनीभूतप्रेताश्च जंभाद्याश्च ग्रहास्तथा ॥ शाकिन्यादिग्रहाश्चैव
सर्पा व्याघ्रादयस्तथा ॥ १३१ ॥ पीडयिष्यंति न क्वापि स्थितायां मयि शासने ॥ महोत्सवं यः कुरुते विवाहे समुपस्थिते ॥ ३२ ॥ दंपत्यो
श्च हितार्थं हि पूजयेन्मां सदा नरः ॥ तस्याहं सकलां बाधां नाशयिष्याम्यसंशयम् ॥ ३३ ॥ नाधयो व्याधयश्चैव न क्लेशो न च संभ्रमः ॥
प्राप्यते परमं सौख्यं यशः पुण्यं धनं सदा ॥ नाकाले मरणं तस्य वातपित्तादिकं नहि ॥ ३४ ॥ ॥ विप्रा ऊचुः ॥ ॥ केन वा
विधिना पूजा नैवेद्यं कीदृशं भवेत् ॥ धूपं च कीदृशं मातः कथं पूजां प्रकल्पयेत् ॥ ३५ ॥ ॥ श्रीदेव्युवाच ॥ ॥ श्रूयतां मे वचो विप्रा
पत्रे चैव हिरण्मये ॥ लिखित्वा पूजयेद्यस्तु चिरायुर्दंपती भवेत् ॥ ३६ ॥ अथवा राजते पत्रे कांसपत्रेऽथवा पुनः ॥ अष्टादशभुजा देवी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मादाय आयसं दैत्यपुंगवः ॥ ८८ ॥ मातंगीं प्रति संकुद्धो जघान परवीरहा ॥ देवी क्रुद्धा मुष्टिपातैश्चूर्णयामास दानवम् ॥ ८९ ॥ तेन मुष्टिप्रहारेण मूर्च्छितो निपपात ह ॥ ततस्तु सहसोत्थाय शक्तिं धृत्वा करे मुदा ॥ ९० ॥ शतघ्नीं पातयामास तस्या उपरि दानवः ॥ शक्तिं चिच्छेद सा देवी मातंगी च शुभानना ॥ ९१ ॥ जहासोच्चैस्तु सा सुभ्रूः शतघ्नीं वज्रसन्निभा ॥ एव मन्योन्यशस्त्रौघैरर्दयंतौ परस्परम् ॥ ९२ ॥ ततस्त्रिशूलेन हतो हृदये निपपात ह ॥ मूर्छां विहाय दैत्योऽसौ मायां कृत्वा च राक्षसीम् ॥ ९३ ॥ पश्यतां तत्र तेषां तु अदृश्योऽभून्महासुरः ॥ पपौ पानं ततो देवी जहासारुणलोचना ॥ ९४ ॥ सर्वत्रगं तं सा देवी त्रैलोक्ये सचराचरे ॥ ९५ ॥ क्व पास्यस्तीति ब्रूते सा ब्रूहि त्वं सांप्रतं हि मे ॥ कर्णाटक महादुष्ट एहि शीघ्रं हि युध्यताम् ॥ ९६ ॥ ततोऽभवन्महायुद्धं दारुणं च भयानकम् ॥ पपौ देवी तु मैरेयं वधार्थं सुमहाबला ॥ ९७ ॥ मातंगी च ततः क्रुद्धा वक्रे चिक्षेप दानवम् ॥ ततोऽपि दानवो रौद्रो नासारंध्रेण निर्गतः ॥९८॥ युध्यते स पुनर्दैत्यः कर्णाटो मदपूरितः ॥ ततो देवी प्रकुपिता मातंगी मदपूरिता ॥ ९९ ॥ दशनैर्मथयित्वा च चर्वयित्वा पुनःपुनः ॥ शवास्थि मे दसा युक्तं मज्जामांसादिपूरितम् ॥ १०० ॥ नखरोमाभिसंयुक्तं प्रक्षिप्य चोदरेऽसुरम् ॥ करेकेण मुखं रुद्ध्वा करेणैकेन नासिकाम् ॥ १ ॥ ततो महाबलो दैत्यः कर्णरंध्रेण निर्गतः ॥ ततस्तया महादेव्या नाम चक्रे तदा भुवि ॥ २ ॥ कर्णरंध्रप्रसूतोऽयं कर्णाटेति विदुर्बुधाः ॥ पुनर्युद्धार्थ मायातो दैत्यो हि बलदर्पितः ॥ ३ ॥ गर्जमानोसुरस्तत्र सायुधो युधि संस्थितः ॥ तं दृष्ट्वा दुःसहं दैत्यं विमृश्य च पुनः पुनः ॥ ४ ॥ वधोपायं हि मातंगी चिंतयामास भारत ॥ यदा चिंतयते[1] देवी मातंगी मदपूरिता[2] ॥ ५ ॥ मायारूपं समास्थाय कर्णाटः कुसुमायुधः ॥ गौरश्चाबुजपत्राक्षं स्तथा षोडशवार्षिकम् ॥ ६ ॥ अभ्येत्य देवीं ब्रूते स्म मां त्वं वरय शोभने ॥ ७ ॥ ॥ श्रीमातोवाच ॥ ॥ साधु चेदं त्वया प्रोक्तं दैत्यराज सुनिश्चितम् ॥ रूपेण सदृशो नान्यो विद्यते भुवनत्रये ॥ ८ ॥ प्रतिज्ञा मे कृता पूर्वं श्रुता किमसुरोत्तम ॥ ममानुजा शुभा श्यामा विवाहे विप्र कांक्षिणी ॥ ९ ॥ पित्रा मे स्थापिता दैत्य रक्षार्थं हि द्विजन्मनाम् ॥ केवलं श्यामलांगी सा सर्वलोकहितावहा ॥ ११० ॥ न कश्चिद्वरयेत्क न्यामित्युक्त्वा स्थापिता तु सा ॥ कथयाशु तव शुभं श्रुत्वोपायं कथं शुभम् ॥ ११ ॥ भगिनी मेऽस्ति दैत्येंद्र श्यामलाह्यपरिग्रहा ॥ तवार्थं रक्षिता शूर तां च पूर्वेण चोद्वह ॥ १२ ॥ स पिता तां महावीर दास्यते वै शुभामिमाम् ॥ गच्छ त्वं व्रियतां ह्येव श्यामला कोपसंयुता ॥ १३ ॥

१ चिंतयते—अचिंतयत् । २ एतदग्रे 'तदा' इति शेषः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चैव पाशकम् ॥ ६१ ॥ अक्षमालाधरा राजन्मद्यकुंभानुधारिणी ॥ शक्तिं च मुशलं चोग्रं कर्त्तरीं खर्परं तथा ॥ ६२ ॥ कंटकाढ्यां च बदरीं बिभ्रती
तु महानना ॥ तत्राभवन्महायुद्धं तुमुलं लोमहर्षणम् ॥ ६३ ॥ मातंग्याः सह कर्णाटदानवेन नृपोत्तम ॥ ६४ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ कथं
युद्धं समभवत्कथं चैवापवर्तत ॥ जितं केनैव धर्मज्ञ तन्ममाचक्ष्व मारिष ॥ ६५ ॥ ॥ व्यास उवाच ॥ ॥ एकदा शृणु राजेंद्र यज्जातं दैत्यसं
गरे ॥ तत्सर्वं कथयाम्याशु यथावृत्तं हि तत्पुरा ॥ ६६ ॥ प्रणष्टयोषा ये विप्रा वणिजश्चैव भारत ॥ चैत्रमासे तु संप्राप्ते धर्मारण्ये नृपोत्तम ॥ ६७ ॥
गौरीमुद्वाहयामासुर्विप्रास्ते संशितव्रताः ॥ स्वस्थानं सुशुभं ज्ञात्वा तीर्थराजं तथोत्तमम् ॥ ६८ ॥ विवाहं तत्र कुर्वंतो मिलितास्ते द्विजोत्तमाः ॥
कोटिकन्याकुलं तत्र एकत्रासीन्महोत्सवे ॥ धर्मारण्ये महाप्राज्ञ सत्यं सत्यं वदाम्यहम् ॥ ६९ ॥ चतुर्थ्यामपररात्रेऽभ्यंतरतोऽग्निमादधुः ॥
आसनं ब्रह्मणे दत्त्वा अग्निं कृत्वा प्रदक्षिणम् ॥ ७० ॥ स्थालीपाकं च कृत्वाथ कृत्वा वेदीः शुभास्तदा ॥ चतुर्हस्ताः सकलशा नागपाश
समन्विताः ॥ ७१ ॥ वेदमंत्रेण शुभ्रेण मंत्रयंते ततो द्विजाः ॥ चरतां दंपतीनां हि परिवेश्य यथोचितम् ॥ ७२ ॥ ब्रह्मणा सहितास्तत्र वाडवा
स्ते सुहर्षिताः ॥ कुर्वंते वेदनिर्घोषं तारस्वरनिनादितम् ॥ ७३ ॥ तेन शब्देन महता कृत्स्नमापूरितं नभः ॥ तं श्रुत्वा दानवो घोरो वेदध्वनिं द्विजे
रितम् ॥ ७४ ॥ उत्पपातासनात्तूर्णं ससैन्यो गतचेतनः ॥ धावतः सर्वभृत्यास्तं ये चान्ये तानुवाच सः ॥ ७५ ॥ श्रूयतां कुत्र शब्दोऽयं वाडवानां
समुत्थितः ॥ तस्य तद्वचनं श्रुत्वा दैतेयाः सत्वरं ययुः ॥ ७६ ॥ विभ्रांतचेतसः सर्वे इतश्चेतश्च धाविताः ॥ धर्मारण्ये गताः केचित्तत्र दृष्ट्वा द्विजा
तयः ॥ ७७ ॥ उद्गिरंतो हि निगमान्विवाहसमये नृप ॥ सर्वं निवेदयामासुः कर्णाटाय दुरात्मने ॥ ७८ ॥ तच्छ्रुत्वा रक्तताम्राक्षो द्विजद्विट् कोपपू
रितः ॥ अभ्यधावन्महाभाग यत्र ते दंपती नृप ॥ ७९ ॥ खमाश्रित्य तदा दैत्यमायां कुर्वन्स राक्षसः ॥ अहरद्दंपती राजन्सर्वालंकारसंयुतान् ॥
॥ ८० ॥ ततस्ते वाडवाः सर्वे संगता भुवनेश्वरीम् ॥ बुंबारवं प्रकुर्वाणास्त्राहित्राहीति चोचिरे ॥ ८१ ॥ तच्छ्रुत्वा विश्वजननी मातंगी भुवनेश्वरी ॥
सिंहनादं प्रकुर्वाणा त्रिशूलवरधारिणी ॥ ८२ ॥ ततः प्रववृते युद्धं देवीकर्णाटयोस्तथा ॥ ऋषीणां पश्यतां तत्र वणिजां च द्विजन्मनाम् ॥ ८३ ॥
पश्यतामभवद्युद्धं तुमुलं लोमहर्षणम् ॥ अस्त्रैश्चिच्छेद मातंगी मदविह्वलितं रिपुम् ॥ ८४ ॥ सोऽपि दैत्यस्ततस्तस्या बाणेनैकेन वक्षसि ॥ असावपि
त्रिशूलेन घातितः कश्मलं गतः ॥ ८५ ॥ मुष्टिभिश्चैव तां देवीं सोऽपि ताडयतेऽसुरः ॥ सोऽपि देव्या ततः शीघ्रं नागपाशेन यंत्रितः ॥ ८६ ॥
ततस्तेनैव दैत्येन गरुडास्त्रं समादधे ॥ तया नारायणास्त्रं तु संदधे शरपातनम् ॥ ८७ ॥ एवमन्योन्यमाकृष्य युध्यमानौ जयेच्छया ॥ ततः परिघ

१ अभ्याययौ इति शेषः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नम् ॥ देशेदेशे च सर्वत्र ग्रामेग्रामे पुरेपुरे ॥ १२ ॥ तीर्थेतीर्थे च सर्वत्र विघ्नं प्रकुरुतेऽसुरः ॥ परंतु शक्यते नैव धर्मारण्ये प्रवेशितुम् ॥ १३ ॥ भया च्छक्त्याश्च श्रीमातुर्दानवो विक्लवस्तदा ॥ केनोपायेन तत्रैव गम्यते त्विति चिंतयन् ॥ १४ ॥ विघ्नं करिष्ये हि कथं ब्राह्मणानां महात्मनाम् ॥ वेदाध्ययनकर्तॄणां यज्ञे कर्माधितिष्ठताम् ॥ १५ ॥ वेदाध्ययनजं शब्दं श्रुत्वा दूरात्स दानवः ॥ विव्यथे स यथा राजन्वज्राहत इव द्विपः ॥ १६ ॥ निःश्वासान्मुमुचे रोषाद्दंतैर्दंतांश्च घर्षयन् ॥ दशमानो निजावोष्ठौ पेषयंश्च करावुभौ ॥ १७ ॥ उन्मत्तवद्विचरत इतश्चेतश्च मारिष ॥ सन्निपातस्य दोषेण यथा भवति मानवः ॥ १८ ॥ तथैव दानवो घोरो धर्मारण्यसमीपगः ॥ भ्रमते दहते चैव दूरादेव भयान्वितः ॥ १९ ॥ विवाहकाले विप्राणां रूपं कृत्वा द्विजन्मनः ॥ तत्रागत्य दुराधर्षो नीत्वा दांपत्यमुत्तमम् ॥ २० ॥ उत्पपात महीपृष्ठाद्गगने सोऽसुराधमः ॥ स्वयं च रमते पापो द्वेषाज्जातिस्वभावतः ॥ २१ ॥ एवं च बहुशःसोऽथ धर्मारण्याच्च दंपती ॥ गृहीत्वा कुरुते पापं देवानामपि दुःसहम् ॥ २२ ॥ विघ्नं करोति दुष्टोऽसौ दंपत्योः सततं भुवि ॥ महाघोरतरं कर्म कुर्वंस्तस्मिन्पुरे वरे ॥ २३ ॥ तत्रोद्विग्ना द्विजाः सर्वे पलायंते दिशो दश ॥ गताः सर्वे भूमिदेवा स्त्यक्त्वा स्थानं मनोरमम् ॥ २४ ॥ यत्रयत्र महत्तीर्थं तत्रतत्र गता द्विजाः ॥ उद्वसं तत्पुरं जातं तस्मिन्काले नृपोत्तम ॥ २५ ॥ न वेदाध्ययनं तत्र न च यज्ञः प्रवर्तते ॥ मनुजास्तत्र तिष्ठंति न कर्णाटभयार्दिताः ॥ २६ ॥ द्विजाः सर्वे ततो राजन्वणिजश्च महायशाः ॥ एकत्र मिलिताः सर्वे वक्तुं मंत्रं यथोचितम् ॥ २७॥ कर्णाटस्य वधोपायं मंत्रयंति द्विजर्षभाः ॥ विचार्यमाणे तैर्दैवाद्वाग्जाता चाशरीरिणी ॥ २८ ॥ आराधयत श्रीमातां[1] सर्वदुःखापहारिणीम् ॥ सर्वदैत्यक्षयकरीं सर्वोपद्रवनाशनीम् ॥ २९ ॥ तच्छ्रुत्वा वाडवाः सर्वे हर्षव्याकुललोचनाः ॥ श्रीमातां तु समागत्य गृहीत्वा बलिमुत्तमम् ॥ ३० ॥ मधु क्षीरं दधि घृतं शर्करा पञ्चधारया ॥ धूपं दीपं तथा चैव चंदनं कुसुमानि च ॥ ३१ ॥ फलानि विविधान्येव गृहीत्वा वाडवा नृप ॥ धान्यं तु विविधं राजन्भक्तापूपा घृताचिताः ॥ ३२ ॥ कुल्माषा वटकाश्चैव पायसं घृतमिश्रितम् ॥ सोहालिका दीपिकाश्च सार्द्राश्च वटकास्तथा ॥ ३३ ॥ राजिकाभिश्च संलिप्ता नवच्छिद्रसमन्विताः ॥ चंद्रबिंबप्रतीकाशा मण्डकास्तत्र कल्पिताः ॥ ३४ ॥ पञ्चामृतेन स्नपनं कृत्वा गन्धोदकेन च ॥ धूपैर्दीपैश्च नैवेद्यैस्तोषयामासुरीश्वरीम् ॥ ३५ ॥ नीराजनैः सकर्पूरैः पुष्पैर्दीपैः सुचंदनैः ॥ श्रीमाता तोषिता राजन्सर्वोपद्रवनाशनी ॥ ३६ ॥ श्रीमाता च जगन्माता ब्राह्मी सौम्या वरप्रदा ॥ रूपत्रयं समास्थाय पालयेत्सा जगत्त्रयम् ॥ ३७ ॥

१ आर्षत्वाद्दावन्तो बोध्यः । श्रीमातरम्—इत्यपेक्षितम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्रयीरूपेण धर्मात्मन्रक्षते सत्यमंदिरम् ॥ जितेंद्रिया जितात्मानो मिलितास्ते द्विजोत्तमाः ॥ ३८ ॥ तैः सर्वैरर्चिता माता चंदनाद्येन तोषिता ॥
स्तुतिमारेभिरे तत्र वाङ्मनःकायकर्मभिः ॥ एकचित्तेन भावेन ब्रह्मपुत्र्याः पुरः स्थिताः ॥ ३९ ॥ ॥ विप्रा ऊचुः ॥ ॥ नमस्ते ब्रह्मपुत्र्यास्तु
नमस्ते ब्रह्मचारिणि ॥ नमस्ते जगतां मातर्नमस्ते सर्वगे सदा ॥ ४० ॥ क्षुन्निद्रा त्वं तृषा त्वं च क्रोधतंद्रादयस्तथा ॥ त्वं शांतिस्त्वं रतिश्चैव त्वं
जया विजया तथा ॥ ४१ ॥ ब्रह्मविष्णुमहेशाद्यैस्त्वं प्रपन्ना सुरेश्वरि ॥ सावित्री श्रीरुमा चैव त्वं च माता व्यवस्थिता ॥ ४२ ॥ ब्रह्मविष्णु
सुरेशानास्त्वदाधारे व्यवस्थिताः ॥ नमस्तुभ्यं जगन्मातर्धृतिपुष्टिस्वरूपिणि ॥ ४३ ॥ रतिः क्रोधा महामाया छाया ज्योतिःस्वरूपिणि ॥ सृष्टि
स्थित्यंतकृद्देवि कार्यकारणदा सदा ॥४४॥ धरा तेजस्तथा वायुः सलिलाकाशमेव च ॥ नमस्तेऽस्तु महाविद्ये महाज्ञानमयेऽनघे ॥ ४५ ॥ ह्रींकारी
देवरूपा त्वं क्लींकारी त्वं महाद्युते ॥ आदिमध्यावसाना त्वं त्राहि चास्मान्महाभयात् ॥ ४६ ॥ महापापो हि दुष्टात्मा दैत्योऽयं बाधतेऽधुना ॥
त्राणरूपा त्वमेका च अस्माकं कुलदेवता ॥ ४७॥ त्राहित्राहि महादेवि रक्षरक्ष महेश्वरि ॥ हनहन दानवं दुष्टं द्विजातीनां विघ्नकारकम् ॥४८॥
एवं स्तुता तदा देवी महामाया द्विजन्मभिः ॥ कर्णाटस्य वधार्थाय द्विजातीनां हिताय च ॥ प्रत्यक्षा साऽभवत्तत्र वरं ब्रूहीत्युवाच ह ॥ ४९ ॥
॥ ॥ श्रीमातोवाच ॥ ॥ केन वै त्रासिता विप्राः केन वोद्वेजिताः पुनः ॥ तस्याहं कुपिता विप्रा नयिष्ये यमसादनम् ॥५०॥ क्षीणायुषं नरं वित्त
येन यूयं निपीडिताः ॥ ददामि वो द्विजातिभ्यो यथेष्टं वक्तुमर्हथ ॥५१॥ भक्त्या हि भवतां विप्राः करिष्ये नात्र संशयः ॥५२॥ ॥ द्विजा ऊचुः॥ ॥
कर्णाटाख्यो महारौद्रो दानवो मदगर्वितः ॥ विघ्नं प्रकुरुते नित्यं सत्यमंदिरवासिनाम् ॥५३॥ ब्राह्मणान्सत्यशीलांश्च वेदाध्ययनतत्परान् ॥ द्वेषाद्द्वेष्टि
द्वेषणस्तान्नित्यमेव महामते ॥ वेदविद्वेषणो दुष्टो घातयैनं महाद्युते ॥ ५४ ॥ ॥ व्यास उवाच ॥ ॥ तथेत्युक्त्वा तु सा देवी प्रहस्य कुलदेवता ॥
वधोपायं विचिंत्यास्य भक्तानां रक्षणाय वै ॥ ५५ ॥ ततः कोपपरा जाता श्रीमाता नृपसत्तम ॥ कोपेन भृकुटीं कृत्वा रक्तनेत्रांतलोचनाम् ॥ ५६ ॥
कोपेन महताऽऽविष्टा वसंती पावकं यथा ॥ महाज्वाला मुखान्नेत्रान्नासाकर्णाच्च भारत ॥५७॥ तत्तेजसा समुद्भूता मातंगी कामरूपिणी ॥ काली करा
लवदना दुर्दर्शवदनोज्ज्वला ॥५८॥ रक्तमाल्यांबरधरा मदाघूर्णितलोचना ॥ न्यग्रोधस्य समीपे सा श्रीमाता संश्रिता तदा ॥५९॥ अष्टादशभुजा सा
तु शुभा माता सुशोभना ॥ धनुर्बाणधरा देवी खड्गखेटकधारिणी ॥ ६० ॥ कुठारं क्षुरिकां बिभ्रत्त्रिशूलं पानपात्रकम् ॥ गदां सर्पं च परिघं पिनाकं

१ पादद्वयेऽप्यक्षराधिक्यं छांदसम् ।

CC-0. In Public Domain. Digitization by eGangotri

मातार्थे निवेदयेत् ॥ २७ ॥ स्नात्वा चैव शुचिर्भूत्वा तिलामलकमिश्रितैः॥ वासोभिः सुमनोभिश्च दुकूलैः सुमनोहरैः ॥ २८ ॥ लेपयेच्चंदनैः शुभ्रैः कुंकुमैः सिंदुरासकैः ॥ कर्पूरागुरुकस्तूरीमिश्रितैः कर्दमैस्तथा ॥ २९ ॥ कर्णिकारैश्च कह्लारैः करवीरैः सितारुणैः ॥ चंपकैः केतकीभिश्च जपाकुसुमकैस्तथा ॥ ३० ॥ यक्षकर्दमकैश्चैव बिल्वपत्रैरखंडितैः ॥ पालाशजातिपुष्पैश्च वटकैर्माषसंभवैः ॥ पूपभक्तादिदालीभिस्तोषयेच्छाकसंचयैः ॥ ॥ ३१ ॥ धूपदीपादिपूर्वं तु पूजयेज्जगदंबिकाम् ॥ तद्दिने कुमारीर्वै विप्रानपि च भोजयेत् ॥ पायसैर्घृतयुक्तैश्च शर्करामिश्रितैर्नृप ॥ ३२ ॥ पक्वान्नैर्मोदकाद्यैश्च तर्पयेद्भक्तिभावतः ॥ तर्प्यमाणे द्विजैकेस्मिन्सहस्रफलमश्नुते ॥३३॥ दैत्यानां घातकं स्तोत्रं वाचयेच्च पुनः पुनः ॥ एकाग्रमानसो भूत्वा श्रीमातरं स्तुवीत यः ॥३४॥ तस्य तुष्टा वरं दद्यात्स्थापिता पूजिता स्तुता ॥ अनिष्टानि च सर्वाणि नाशयेद्धर्मपुत्रिका ॥३५॥ अपुत्रो लभते पुत्रान्निर्धनो धनवान्भवेत् ॥ राज्यार्थी लभते राज्यं विद्यार्थी लभते च ताम् ॥३६॥ श्रियोर्थी लभते लक्ष्मीं भार्यार्थी लभते च ताम् ॥ प्रसादाच्च सरस्वत्या लभते नात्र संशयः ॥ ३७ ॥ अन्ते च परमं स्थानं यत्सुरैरपि दुर्लभम् ॥ प्राप्नोति पुरुषो नित्यं सरस्वत्याः प्रसादतः ॥ ३८ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे पूर्वभागे धर्मारण्यमाहात्म्ये श्रीमातामाहात्म्यवर्णनंनाम सप्तदशोऽध्यायः ॥ १७ ॥

॥ ॥ रुद्र उवाच ॥ ॥ शृणु स्कन्द महाप्राज्ञ ह्यद्भुतं यत्कृतं मया ॥ धर्मारण्ये महादुष्टो दैत्यः कर्णाटकाभिधः ॥ १ ॥ निभृतं हि समागत्य दंपत्योर्विघ्नमाचरत् ॥ तं दृष्ट्वा तद्भयाल्लोकः प्रदुद्राव निरन्तरम् ॥ २ ॥ त्यक्त्वा स्थानं गताः सर्वे वणिजो वाडवादयः ॥ मातंगीरूपमास्थाय श्रीमात्रा त्वनया सुत ॥ ३ ॥ हतः कर्णाटकोनाम राक्षसो द्विजघातकः ॥ तदा सर्वेऽपि वै विप्रा हृष्टास्ते तेन कर्मणा ॥ ४ ॥ स्तुवंति पूजयंति स्म वणिजो भक्तितत्पराः ॥ वर्षेवर्षे प्रकुर्वंति श्रीमातापूजनं शुभम् ॥ ५ ॥ शुभकार्येषु सर्वेषु प्रथमं पूजयेत्तु ताम् ॥ न स विघ्नं प्रपश्येत तदाप्रभृति पुत्रक ॥ ६ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ कोऽसौ दुष्टो महादैत्यः कस्मिन्वंशे समुद्भवः ॥ किं किं तेन कृतं तात सर्वं कथय सुव्रत ॥ ७ ॥ ॥ ॥ व्यास उवाच ॥ ॥ शृणु राजन्प्रवक्ष्यामि कर्णाटकविचेष्टितम् ॥ देवानां दानवानां यो दुःसहो वीर्यदर्पितः ॥ ८ ॥ दुष्टकर्मा दुराचारो महाराष्ट्रो महाभुजः ॥ जित्वा च सकलाँल्लोकांस्त्रैलोक्ये च गतागतः ॥ ९ ॥ यत्र देवाश्च ऋषयस्तत्र गत्वा महासुरः ॥ छद्मना वा बलेनैव विघ्नं प्रकुरुते नृप ॥१०॥ न वेदाध्ययनं लोके भवेत्तस्य भयेन च ॥ कुर्वते वाडवा देवा न च संध्याद्युपासनम् ॥ ११ ॥ न क्रतुर्वर्तते तत्र न चैव सुरपूज

१ आर्षः प्रयोगः । द्विजे एकस्मिन्—इति पदच्छेदः । २ दुर्गासप्तशत्याख्यं स्तोत्रम्—इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

षिता ॥ १ ॥ तामसी सा महाराज मधुकैटभनाशिनी ॥ विष्णुना तत्र वै न्यस्ता शिवपत्नी नृपोत्तम ॥ २ ॥ सा चैवाष्टभुजा रम्या मेघश्यामा मनोरमा ॥ कृष्णांबरधरा देवी व्याघ्रवाहनसंस्थिता ॥ ३ ॥ द्वीपिचर्मपरीधाना दिव्याभरणभूषिता ॥ घंटात्रिशूलाक्षमालाकमंडलुधरा शुभा ॥ ४ ॥ अलंकृतभुजा देवी सर्वदेवनमस्कृता ॥ धनं धान्यं सुतान्भोगान्स्वभक्तेभ्यः प्रयच्छति ॥ ५ ॥ पूजयेत्कमलैर्दिव्यैः कर्पूरागरुचंदनैः ॥ तदुद्देशेन तत्रैव पूजयेद्द्विजसत्तमान् ॥ ६ ॥ कुमारीर्भोजयेदन्नैर्विविधैर्भक्तिभावतः ॥ धूपैर्दीपैः फलैः रम्यैः पूजयेच्च सुरादिभिः ॥ ७ ॥ मांसैस्तु विविधैर्दिव्यैरथवा धान्यपिष्टजैः ॥ अन्यैश्च विविधैर्धान्यैः पायसैर्वटकैस्तथा ॥ ८ ॥ ओदनैः कृशरापूपैः पूजयेत्सुसमाहितः ॥ स्तुतिपाठेन तत्रैव शक्तिस्तोत्रैर्मनोहरैः ॥ ९ ॥ रिपवस्तस्य नश्यंति सर्वत्र विजयी भवेत् ॥ रणे राजकुले द्यूते लभते जयमंगलम् ॥ १० ॥ सौम्या शांता महाराज स्थापिता कुलमातृका ॥ श्रीमाता सा प्रसिद्धा च माहात्म्यं शृणु भूपते ॥ ११ ॥ कुलमाता महाशक्तिस्तत्रास्ते नृपसत्तम ॥ कुमारी ब्रह्मपुत्री सा रक्षार्थं विधिना कृता ॥ १२ ॥ स्थानमाता च सा देवी श्रीमाता सान्निधानतः ॥ त्रिरूपा सा द्विजातीनां निर्मिता रक्षणाय च ॥ १३ ॥ कमण्डलुधरा देवी घण्टाभरणभूषिता ॥ अक्षमालायुता राजञ्छुभा सा शुभरूपिणी ॥ १४ ॥ कुमारी चादिमाता च स्थानत्राणकरापि च ॥ दैत्यघ्नी कामदा चैव महामोहविनाशिनी ॥ १५ ॥ भक्तिगम्या च सा देवी कुमारी ब्रह्मणः सुता ॥ रक्तांबरधरा साधुरक्तचंदनचर्चिता ॥ १६ ॥ रक्तमाल्या दशभुजा पंचवक्त्रा सुरेश्वरी ॥ चंद्रावतंसिका माता सुरासुरनमस्कृता ॥ १७ ॥ साक्षात्सरस्वतीरूपा रक्षार्थं विधिना कृता ॥ ॐकारा सा महापुण्या काजेशेन विनिर्मिता ॥ १८ ॥ ऋषिभिः सिद्धयक्षादिसुरपन्नगमानवैः ॥ प्रणम्यांघ्रियुगा तेभ्यो ददाति मनसेप्सितम् ॥ १९ ॥ पालयन्ती च संस्थानं द्विजातीनां हिताय वै ॥ यथौरसान्सुतान्माता पालयन्तीह सद्गुणैः ॥ २० ॥ अथ पालयती देवी श्रीमाता कुलदेवता ॥ उपद्रवाणि सर्वाणि नाशयेत्सततं स्तुता ॥ २१ ॥ सर्वविघ्नोपशमनी श्रीमाता स्मरणेन हि ॥ विवाहे चोपवीते च सीमंते शुभकर्मणि ॥ २२ ॥ सर्वेषु भक्तकार्येषु श्रीमाता पूज्यते सदा ॥ यथा लंबोदरं देवं पूजयित्वा समारभेत् ॥ २३ ॥ कार्यं शुभं सर्वमपि श्रीमातरं तथा नृप ॥ यत्किंचिद्भोजनं तत्र ब्राह्मणेभ्यः प्रयच्छति ॥ २४ ॥ अथवा विनिवेद्यं च क्रियते यत्परस्परम् ॥ अनिवेद्य च तां राजन्कुर्वाणो विघ्नमेष्यति ॥ २५ ॥ तस्मात्तस्यै निवेद्याथ ततः कर्म समारभेत् ॥ तद्वरेणाखिलं कर्म अविघ्नेन हि सिद्धति ॥ हेमंते शिशिरे प्राप्ते पूजयेद्धर्मपुत्रिकाम् ॥ २६ ॥ हेमपत्रे समालिख्य राजते वाथ कारयेत् ॥ पादुकां चोत्तमां राजञ्छ्री

शाद्यैः सेवितं सुरमानुषैः ॥ सिद्धैर्यक्षैश्च मुनिनिः सेवितं सर्वतः शुभम् ॥ ६६ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ कीदृशं तत्सरः ख्यातं तस्मि
न्स्थाने द्विजोत्तम ॥ तस्य रूपं प्रकारं च कथयस्व यथातथम् ॥ ६७ ॥ ॥ व्यास उवाच ॥ ॥ साधुसाधु महाप्राज्ञ धर्मपुत्र युधिष्ठिर ॥
यस्य संकीर्तनान्नूनं सर्वपापैः प्रमुच्यते ॥ ६८ ॥ अतिस्वच्छतरं शीतं गंगोदकसमप्रभम् ॥ पवित्रं मधुरं स्वादु जलं तस्य नृपोत्तम ॥ ६९ ॥
महाविशालं गंभीरं देवखातं मनोरमम् ॥ लहर्यादिभिर्गंभीरैः फेनावर्तसमाकुलम् ॥ ७० ॥ झषमंडूककमठैर्मकरैश्च समाकुलम् ॥ शंखशुक्त्यादि
भिर्युक्तं राजहंसैः सुशोभितम् ॥ ७१ ॥ वटप्लक्षैः समायुक्तमश्वत्थाम्रैश्च वेष्टितम् ॥ चक्रवाकसमोपतं बकसारसटिट्टिभैः ॥ ७२ ॥ कमनीय
प्रगन्धाच्छच्छत्रपत्रैः सुशोभितम् ॥ सेव्यमानं द्विजैः सर्वैः सारसाद्यैः सुशोभितम् ॥ ७३ ॥ सदेवैर्मुनिभिश्चैव विप्रैर्मर्त्यैश्च भूमिप ॥ सेवितं
दुःखहं चैव सर्वपापप्रणाशनम् ॥ ७४ ॥ अनादिनिधनोदंतं सेवितं सिद्धमंडलैः ॥ स्नानादिभिः सर्वदैव तत्सरो नृपसत्तम ॥ ७५ ॥ विधिना
कुरुते यस्तु नीलोत्सर्गं च तत्तटे ॥ प्रेता नैव कुले तस्य यावद्विंद्राश्चतुर्दश ॥ ७६ ॥ कन्यादानं च ये कुर्युर्विधिना तत्र भूपते ॥ ते तिष्ठन्ति
ब्रह्मलोके यावदाभूतसंप्लवम् ॥ ७७ ॥ महिषीं गृहदासीं च सुरभीं सुतसंयुताम् ॥ हेम विद्यां तथा भूमिं रथांश्च गजवाससी ॥ ७८ ॥ ददाति
श्रद्धया तत्र सोऽक्षयं स्वर्गमश्नुते ॥ देवखातस्य माहात्म्यं यः पठेच्छिवसन्निधौ ॥ दीर्घमायुस्तथा सौख्यं लभते नात्र संशयः ॥ ७९ ॥ यः
शृणोति नरो भक्त्या नारी वा त्विदमद्भुतम् ॥ कुले तस्य भवेच्छ्रेयः कल्पांतेऽपि युधिष्ठिर ॥ ८० ॥ एतत्सर्वं मयाख्यातं हयग्रीवस्य कारणम् ॥
प्रभास्तस्य तीर्थस्य सर्वपापापनुत्तये ॥ ८१ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे पूर्वभागे धर्मारण्य
माहात्म्ये हयग्रीवस्याख्यानवर्णनंनाम पञ्चदशोऽध्यायः ॥ १५ ॥ ॥ छ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ रक्षसां चैव दैत्यानां यक्षाणामथ
पक्षिणाम् ॥ भयनाशाय काजेशैर्धर्मारण्यनिवासिनाम् ॥ १ ॥ शक्तीः संस्थापिता नूनं नानारूपा ह्यनेकशः ॥ तासां स्थानानि नामा
नि यथारूपाणि मे वद ॥ २ ॥ ॥ व्यास उवाच ॥ ॥ शृणु पार्थ महाबाहो धर्ममूर्ते नृपोत्तम ॥ स्थाने वै स्थापिता शक्तिः
काजेशैश्चैव गोत्रपा ॥ ३ ॥ श्रीमाता मदारिकायां शांता नंदापुरे वरे ॥ रक्षार्थं द्विजमुख्यानां चतुर्दिक्षु स्थिताश्च ताः ॥
॥ ४ ॥ युक्ताश्चैव सुरैः सर्वैः स्वस्वस्थाने नृपोत्तम ॥ वनमध्ये स्थिताः सर्वा द्विजानां रक्षणाय वै ॥ ५ ॥ सा बभूव
महाराज सावित्रीतिप्रथा शिवा ॥ असुराणां वधार्थाय ज्ञानजा स्थापिता सुरैः ॥ ६ ॥ गात्रायी पक्षिणी देवी छत्रजा द्वा

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

रवासिनी ॥ शीहोरी चूटसंज्ञा या पिप्पलाशापुरी तथा ॥ अन्याश्च बहवश्चैव स्थापिता भयरक्षणे ॥ ७ ॥ प्रतीच्योदीच्यां याम्यां वै विबुधैः
स्थापिता हि सा ॥ नानायुधधरा सा च नानाभरणभूषिता ॥ ८ ॥ नानावाहनमारूढा नानारूपधरा च सा ॥ नानाकोपसमायुक्ता नानाभयविना
शिनी ॥ ९ ॥ स्थाप्या मातर्यथास्थाने यथायोग्या दिशोदिश ॥ गरुडेन समारूढा त्रिशूलवरधारिणी ॥ १० ॥ सिंहारूढा शुद्धरूपा वारुणी
पानदर्पिता ॥ खड्गखेटकबाणाढ्यैः करैर्भाति शुभानना ॥ ११ ॥ रक्तवस्त्रावृता चैव पीनोन्नतपयोधरा ॥ उद्यदादित्यबिंबाभा मदाघूर्णितलोचना ॥
॥ १२ ॥ एवमेषा महादिव्या काजेशैः स्थापिता तदा ॥ रक्षार्थं सर्वजंतूनां सत्यमंदिरवासिनाम् ॥ १३ ॥ सा देवी नृपशार्दूल स्तुता संपूजिता
सह ॥ ददाति सकलान्कामान्वांछितान्नृपसत्तम ॥ १४ ॥ धर्मारण्यात्पश्चिमतः स्थापिता छत्रजा शुभा ॥ तत्रस्था रक्षते विप्रान्क्रियच्छक्तिसम
न्विता ॥ १५ ॥ भैरवं रूपमास्थाय राक्षसानां वधाय च ॥ धारयंत्यायुधानीत्थं विप्राणामभयाय च ॥ १६ ॥ सरश्चकार तस्याग्रे उत्तमं जल
पूरितम् ॥ सरस्यस्मिन्महाभाग कृत्वा स्नानादितर्पणम् ॥ १७ ॥ पिंडदानादिकं सर्वमक्षयं चैव जायते ॥ भूमौ क्षिप्तांजलीन्दिव्यान्धूपदीपादिकं
सदा ॥ १८ ॥ तस्य नो बाधते व्याधिः शत्रूणां नाश एव च ॥ बलिदानादिकं तत्र कुर्याद्भूयः स्वशक्तितः ॥ १९ ॥ शत्रवो नाशमायांति धनं
धान्यं विवर्धते ॥ आनंदा स्थापिता राजञ्छत्तयंशा च मनोरमा ॥ २० ॥ रक्षणार्थं द्विजातीनां माहात्म्यं शृणु भूपते ॥ शुक्लांबरधरा दिव्या
हेमभूषणभूषिता ॥ २१ ॥ सिंहारूढा चतुर्हस्ता शशांककृतशेखरा ॥ मुक्ताहारलतोपेता पीतोन्नतपयोधरा ॥ २२ ॥ अक्षमालासिहस्ता च गुण
तोमरधारिणी ॥ दिव्यगंधवराधारा दिव्यमालाविभूषिता ॥ २३ ॥ सात्त्विकी शक्तिरानंदा स्थिता तस्मिन्पुरे पुरा ॥ पूजयेत्तां च वै राजन्कर्पूरारक्त
चंदनैः ॥ २४ ॥ भोजयेत्पायसैः शुभ्रैर्मध्वाज्यसितया सह ॥ भवान्याः प्रीतये राजन्कुमार्याः पूजनं तथा ॥ २५ ॥ तत्र जप्तं हुतं दत्तं ध्यातं च
नृपसत्तम ॥ तत्सर्वं चाक्षयं तत्र जायते नात्र संशयः ॥ २६ ॥ त्रिगुणे त्रिगुणा वृद्धिस्तस्मिन्स्थाने नृपोत्तम ॥ साधकस्य भवेन्नूनं धनदारादिसं
पदः ॥ २७ ॥ न हानिर्न च रोगश्च न शत्रुर्न च दुष्कृतम् ॥ गावस्तस्य विवर्द्धंते धनधान्यादिसंकुलम् ॥ २८ ॥ न शाकिन्या भयं तस्य न च
राज्ञश्च वैरिणः ॥ नच व्याधिभयं चैव सर्वत्र विजयी भवेत् ॥ २९ ॥ विद्याश्चतुर्दशास्यैव भासंते पठिता इव ॥ सूर्यवद्द्योतते भूमावानंदमा
श्रितो नरः ॥ ३० ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे पूर्वार्धे धर्मारण्यमाहात्म्य आनंदास्थापनवर्णनं
नाम षोडशोऽध्यायः ॥ १६ ॥ ॥ व्यास उवाच ॥ ॥ दक्षिणे स्थापिता राजञ्छांता देवी महाबला ॥ सा विचित्रांबरधरा वनमालाविभू

CC-0. In Public Domain. Digitization by eGangotri

तद्वचः श्रुत्वा सत्यंसत्यं भविष्यति ॥ ४२ ॥ ततो विष्णुर्महातेजास्तीर्थस्योत्पादनेन च ॥ तपस्तेपे तु वै तत्र धर्मारण्ये सुरेश्वरः ॥ अश्वशीर्ष
मुखं दृष्ट्वा हयग्रीवो जनार्दनः ॥ ४३ ॥ तपस्तेपे महाभाग विधिना सह भारत ॥ न शक्यं केनचित्कर्त्तुमात्मनात्मैव तुष्टवान् ॥ ४४ ॥ ब्रह्मापि
तपसा युक्तस्तेपे वर्षशतत्रयम् ॥ तिष्ठन्नेव पुरो विष्णोर्विष्णुमायाविमोहितः ॥ ४५ ॥ यज्ञार्थमवदत्तुष्टो देवदेवो जगत्पतिः ॥ ब्रह्मंस्ते मुक्ताद्यास्ति
मम मायाप्यदुःसहा ॥ ४६ ॥ ततो लब्धवरो ब्रह्मा हृष्टचित्तो जनार्दनः ॥ उवाच मधुरां वाचं सर्वेषां हितकारणात् ॥ ४७ ॥ अत्राभवन्महाक्षेत्रं
पुण्यं पापप्रणाशनम् ॥ विधिविष्णुमयं चैतद्भवत्वेतन्न संशयः ॥ ४८ ॥ तीर्थस्य महिमा राजन्हयशीर्षस्तदा हरिः ॥ शुभाननो हि संजातः पूर्वेणैवा
ननेन तु ॥ ४९ ॥ कंदर्पकोटिलावण्यो जातः कृष्णस्तदा नृप ॥ ब्रह्मापि तपसा युक्तो दिव्यं वर्षशतत्रयम् ॥ ५० ॥ सावित्र्या च
कृतं यत्र विष्णुमाया न बाधते ॥ मायया तु कृतं शीर्षं पंचमं शार्दुलस्य वा ॥ ५१ ॥ धर्मारण्ये कृतं रम्यं हरेण च्छेदितं पुरा ॥ तस्मै
दत्त्वा वरं विष्णुर्जगामादर्शनं ततः ॥ ५२ ॥ स्थापयित्वा विधिस्तत्र तीर्थं चैव त्रिलोचनम् ॥ मुक्तेशंनाम देवस्य मोक्षतीर्थमरिंदम ॥ ५३ ॥
गतः सोऽपि सुरश्रेष्ठः स्वस्थानं सुरसेवितम् ॥ तत्र प्रेता दिवं यांति तर्पणेन प्रतर्पिताः ॥ ५४ ॥ अश्वमेधफलं स्नाने पाने गोदानजं फलम् ॥
पुष्कराद्यानि तीर्थानि गंगाद्याः सरितस्तथा ॥ ५५ ॥ स्नानार्थमत्रागच्छंति देवताः पितरस्तथा ॥ कार्त्तिक्यां कृत्तिकायोगे मुक्तेशं
पूजयेत्तु यः ॥ ५६ ॥ स्नात्वा देवसरे रम्ये नत्वा देवं जनार्दनम् ॥ यः करोति नरो भक्त्या सर्वपापैः प्रमुच्यते ॥ ५७ ॥ भुक्त्वा भोगा
न्यथाकामं विष्णुलोकं स गच्छति ॥ अपुत्रा काकवंध्या च मृतवत्सा मृतप्रजा[2] ॥ ५८ ॥ एकांबरेण सुस्नातौ पतिपत्न्यौ यथाविधि ॥
तद्दोषं नाशयेन्नूनं प्रजाप्तिप्रतिबन्धकम् ॥ ५९ ॥ मोक्षेश्वरप्रसादेन पुत्रपौत्रादि वर्द्धयेत् ॥ दद्याद्दैकेन चित्तेन फलानि सत्यसंयुता ॥
॥ ६० ॥ निधाय वंशपात्रेऽपि नारी दोषात्प्रमुच्यते ॥ प्राप्नुवंति च देवाश्च अग्निष्टोमफलं नृप ॥ ६१ ॥ वेधा हरिर्हरश्चैव तप्यंते परमं
तपः ॥ धर्मारण्ये त्रिसंध्यं च स्नात्वा देवसरस्यथ ॥ ६२ ॥ तत्र मोक्षेश्वरः शंभुः स्थापितो वै ततः सुरैः ॥ तत्र सांगं जपं कृत्वा न
भूयः स्तनपो भवेत् ॥ ६३ ॥ एवं क्षेत्रं महाराज प्रसिद्धं भुवनत्रये ॥ यस्तत्र कुरुते श्राद्धं पितॄणां श्रद्धयान्वितः ॥ ६४ ॥ उद्धरेत्सप्त
गोत्राणि कुलमेकोत्तरं शतम् ॥ देवसरो महारम्यं नानापुष्पैः समन्वितम् ॥ श्यामं सकलकल्हारैर्विविधैर्जलजंतुभिः ॥ ६५ ॥ ब्रह्मविष्णुमहे

१ येन मुखेन ब्रह्मा विष्णवे शापमदात्तत्तस्य मुखं शार्दूलस्येव मुखं पंचममासीत् तत् हरेण पुरा च्छेदितम्—इति संबंधतोऽर्थो बोद्धव्यः । २ यदि स्यात्—तदा—इत्यध्याहृत्य अर्थसंगतिर्योजनीया ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

कालांतस्त्वं च वै हरे ॥ १८ ॥ एवंविधैर्महादिव्यैः स्तूयमानः सुरैर्नृप ॥ संतुष्टः प्राह सर्वेषां देवानां पुरतः प्रभुः ॥ १९ ॥ ॥ श्रीभगवानुवाच ॥
किमर्थमिह संप्राप्ताः सर्वे देवगणा भुवि ॥ किमेतत्कारणं देवाः किं नु दैत्यप्रपीडिताः ॥ २० ॥ ॥ देवा ऊचुः ॥ ॥ न दैत्यस्य भयं जातं यज्ञ
कर्मोत्सुका वयम् ॥ त्वद्दर्शनपराः सर्वे पश्यामो वै दिशो दश ॥ २१ ॥ त्वन्मायामोहिताः सर्वे व्यग्रचित्ता भयातुराः ॥ योगारूढस्वरूपं च दृष्टं
तेऽस्माभिरुत्तमम् ॥ २२ ॥ वम्री च नोदितास्माभिर्जागराय तवेश्वर ॥ ततश्चापूर्वमभवच्छिरश्छिन्नं बभूव ते ॥ २३ ॥ सूर्याश्वशीर्षमानीय विश्व
कर्मातिचातुरः ॥ समधत्त शिरो विष्णो हयग्रीवोऽस्यतः प्रभो ॥ २४ ॥ ॥ विष्णुरुवाच ॥ ॥ तुष्टोऽहं नाकिनः सर्वे ददामि वरमीप्सितम् ॥
हयग्रीवोऽस्म्यहं जातो देवदेवो जगत्पतिः ॥ २५ ॥ न रौद्रं न विरूपं च सुरैरपि च सेवितम् ॥ जातोऽहं वरदो देवा हयाननेति तोषितः ॥ २६ ॥
॥ ॥ व्यास उवाच ॥ ॥ कृते सत्रे ततो वेधा धीमान्सन्तुष्टचेतसा ॥ यज्ञभागं ततो दत्त्वा वम्रीभ्यो विश्वकर्मणे ॥ २७ ॥ यज्ञांते च सुरश्रेष्ठं
नमस्कृत्य दिवं ययौ ॥ एतच्च कारणं विद्धि हयाननो यतो हरिः ॥ २८ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ येनाक्रांता मही सर्वा क्रमेणैकेन तत्त्वतः ॥
विवरे विवरे रोम्णां वर्तंते च पृथक्पृथक् ॥२९॥ ब्रह्मांडानि सहस्राणि दृश्यंते च महाद्युते ॥ न वेत्ति वेदो यत्पारं शीर्षघातो हि वै कथम् ॥ ३० ॥
॥ ॥ व्यास उवाच ॥ ॥ शृणु त्वं पांडवश्रेष्ठ कथां पौराणिकीं शुभाम् ॥ ईश्वरस्य चरित्रं हि नैव वेत्ति चराचरे ॥३१॥ एकदा ब्रह्मसभायां गता देवाः
सवासवाः॥ भूर्लोकाद्याश्च सर्वे हि स्थावराणि चराणि च॥३२॥ देवा ब्रह्मर्षयः सर्वे नमस्कर्त्तुं पितामहम् ॥ विष्णुरप्यागतस्तत्र सभायां मंत्रकारणात्
॥३३॥ ब्रह्मा चापि विगर्विष्ठ उवाचेदं वचस्तदा ॥ भोभो देवाः शृणुध्वं कस्त्रयाणां कारणं महत् ॥३४॥ सत्यं ब्रुवंतु वै देवा ब्रह्मेशविष्णुमध्यतः ॥ तां
वाचं च समाकर्ण्य देवा विस्मयमागताः॥३५॥ ऊचुश्चैव ततो देवा न जानीमो वयं सुराः ॥ ब्रह्मपत्नी तदोवाच विष्णुं प्रति सुरेश्वरम् ॥ त्रयाणामपि
देवानां महांतं च वदस्व मे ॥ ३६ ॥ ॥ विष्णुरुवाच ॥ ॥ विष्णुमायाबलेनैव मोहितं भुवनत्रयम् ॥ ततो ब्रह्मोवाच चेदं न त्वं जानासि भो विभोः
॥ ३७ ॥ नैव मुह्यंति ते मायाबलेन नैवमेव च ॥ गर्वहिंसापरो देवो जगद्भर्ता जगत्प्रभुः ॥३८॥ ज्येष्ठं त्वां न विदुः सर्वे विष्णुमायावृताः खिलाः ॥
ततो ब्रह्मा स रोषेण क्रुद्धः प्रस्फुरिताननः ॥ ३९ ॥ उवाच वचनं कोपाद्धे विष्णो शृणु मे वचः ॥ येन वक्रेण सभायां वचनं समुदीरितम् ॥ ४० ॥
तच्छीर्षं पततादाशु चाल्पकालेन वै पुनः ॥ ततो हाहाकृतं सर्वं सेंद्राः सर्षिपुरोगमाः ॥ ४१ ॥ ब्रह्माणं क्षमयामासुर्विष्णुंप्रति सुरोत्तमाः ॥ विष्णुश्च

१ स्तोत्रैः--इति शेषः ।

CC-0. In Public Domain. Digitization by eGangotri

देवा गुणभंगे समाधिषु ॥ एतदाश्चर्यं विप्रर्षे सत्यं सत्यवतीसुत ॥ ५७ ॥ ॥ व्यास उवाच ॥ ॥ व्यग्रचित्ताः सुराः सर्वे आकृष्टं हरिकार्मु
कम् ॥ न जाने केन कार्येण विष्णुमायाविमोहिताः ॥ ५८ ॥ मुदितास्ताः प्रमुञ्चंति वल्मीकं चाग्रतो हरेः ॥ कोटिपार्श्वे ततो नीतं वल्मीकं पर्वतो
पमम् ॥ ५९ ॥ गुणे च भक्षिते तस्मिंस्तत्क्षणादेव दूषिते ॥ ज्याघातकोटिभिः सार्द्धं शीर्षं छित्त्वा दिवं गतम् ॥ ६० ॥ गते शीर्षे च ते देवा भृशमु
द्विग्नमानसाः ॥ धावंति सर्वतः सर्वे शिरआलोकनाय ते ॥ ६१ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे पूर्व
भागे धर्मारण्यमाहात्म्ये विष्णुशिरोनाशोनाम चतुर्दशोऽध्यायः ॥ १४ ॥ ॥ छ ॥ ॥ व्यास उवाच ॥ ॥ न पश्यंति तदा शीर्षं ब्रह्मा
द्यास्तु सुरास्तदा ॥ किं कुर्म इति हेत्युक्त्वा ज्ञानिनस्ते व्यचिन्तयन् ॥ १ ॥ उवाच विश्वकर्माणं तदा ब्रह्मा सुरान्वितः ॥२॥ ॥ ब्रह्मोवाच ॥ ॥
विश्वकर्मंस्त्वमेवासि कार्यकर्ता सदा विभो ॥ शीघ्रमेव कुरु त्वं वै वक्त्रं सांद्रं च धन्विनः ॥ ३ ॥ नमस्कृत्य तदा तस्मै स्तुतोऽसौ देववर्द्धकिः ॥
उवाच परया भक्त्या ब्रह्माणं कमलोद्भवम् ॥ ३ ॥ यज्ञकार्यं निर्वृत्याशु[1] वदंति विविधाः सुराः ॥ ४ ॥ यज्ञभागविहीनं मां किं पुनर्वच्मि ते
ऽग्रतः ॥ यज्ञभागमहं देव लभेयैवं सुरैः सह ॥ ५ ॥ ॥ ब्रह्मोवाच ॥ ॥ दास्यामि सर्वयज्ञेषु विभागं सुरवर्द्धके ॥ सोमे त्वं प्रथमं वीर पूज्यसे
श्रुतिकोविदैः ॥ ६ ॥ तद्विष्णोश्च शिरस्तावत्संधत्स्वामरवर्द्धक ॥ विश्वकर्माब्रवीद्देवानानयध्वं शिरस्त्विति ॥ ७ ॥ तन्नास्तीति सुराः सर्वे वदंति
नृपसत्तम ॥ मध्याह्ने तु समुद्भूते रथस्थो दिवि चांशुमान् ॥ ८ ॥ दृष्टं तदा सुरैः सर्वै रथादश्वमथानयन् ॥ छित्त्वा शीर्षं महीपाल कबंधाद्वाजिनो
हरेः ॥ ९ ॥ कबंधे योजयामास विश्वकर्मातिचातुरः ॥ दृष्ट्वा तं देवदेवेशं सुराः स्तुतिमकुर्वत ॥ १० ॥ ॥ देवा ऊचुः ॥ ॥ नमस्तेऽस्तु जग
द्बीज नमस्ते कमलापते ॥ नमस्तेऽस्तु सुरेशान नमस्ते कमलेक्षण ॥ ११ ॥ त्वं स्थितिः सर्वभूतानां त्वमेव शरणं सताम् ॥ त्वं हंता सर्वदुष्टानां
हयग्रीव नमोऽस्तु ते ॥ १२ ॥ त्वमोंकारो वषट्कारः स्वाहा स्वधा चतुर्विधा ॥ आद्यस्त्वं च सुरेशान त्वमेव शरणं सदा ॥ १३ ॥ यज्ञो यज्ञप
तिर्यज्वा द्रव्यं होता हुतस्तथा ॥ त्वदर्थं हूयते देव त्वमेव शरणं सखा ॥ १४ ॥ कालः करालरूपस्त्वं त्वं वार्कः शीतदीधितिः ॥ त्वमग्निर्वरुणश्चैव
त्वं च कालक्षयंकरः ॥ १५ ॥ गुणत्रयं त्वमेवेह गुणहीनस्त्वमेव हि ॥ गुणानामालयस्त्वं च गोप्ता सर्वेषु जंतुषु ॥ १६ ॥ स्त्रीपुंसोश्च द्विधा त्वं च
पशुपक्ष्यादिमानवैः ॥ चतुर्विधं कुलं त्वं हि चतुराशीतिलक्षणः ॥ १७ ॥ दिनांतश्चैव पक्षांतो मासांतो हायनं युगम् ॥ कल्पांतश्च महांतश्च

[1] निवृत्य- मद्भस्तेन सर्वं संपाद्य--इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सर्वभक्तानां हंता सर्वदुरात्मनाम् ॥ धर्मस्थापनकृत्सोऽपि कल्किर्विष्णुपदे स्थितः ॥ ३७ ॥ एतद्वै महदाश्चर्य्यं भवता यत्प्रकाशितम् ॥ एतदा चक्ष्व मे सर्वं कारणं त्रिपुरांतक ॥ ३८ ॥ ॥ श्रीरुद्र उवाच ॥ ॥ साधु पृष्टं महाबाहो कारणं तस्य वच्म्यहम् ॥ हयग्रीवस्य कृष्णस्य शृणुष्वे काग्रमानसः ॥ ३९ ॥ ॥ व्यास उवाच ॥ ॥ पुरा देवैः समारब्धो यज्ञो नूनं धरातले ॥ वेदमंत्रैराह्वयितुं सर्वे रुद्रपुरोगमाः ॥४०॥ वैकुण्ठे च गताः सर्वे क्षीराब्धौ च निजालये ॥ पाताले़ऽपि पुनर्गत्वा न विदुः कृष्णदर्शनम् ॥ ४१ ॥ मोहाविष्टास्ततः सर्वे इतश्चेतश्च धाविताः ॥ नैव दृष्टस्तदा तैस्तु ब्रह्मरूपो जनार्दनः ॥ ४२ ॥ विचारयंति ते सर्वे देवा इन्द्रपुरोगमाः ॥ क्व गतोऽसौ महाविष्णुः केनोपायेन दृश्यते ॥ ४३ ॥ प्रणम्य शिरसा देवं वागीशं प्रोचुरादरात् ॥ देवदेव महाविष्णुं कथयस्व प्रसादतः ॥ ४४ ॥ ॥ बृहस्पतिरुवाच ॥ ॥ न जाने केन कार्येण योगारूढो महा त्मवान् ॥ योगरूपोऽभवद्विष्णुर्योगीशो हरिरच्युतः ॥ ४५ ॥ क्षणं ध्यात्वा स्वमात्मानं धिषणेन ख्यापितो हरिः ॥ तत्र सर्वे गता देवा यत्र देवो जगत्पतिः ॥ ४६ ॥ तदा दृष्टो महाविष्णुर्ध्यानस्थोऽसौ जनार्दनः ॥ ध्यात्वा कृत्यसमाकारं सशरं दैत्यसूदनम् ॥ ४७ ॥ समास्थानं ततो दृष्ट्वा बोधोपायं प्रचक्रमे ॥ आह तांश्च तदा वम्र्यो धनुर्गुणं प्रयत्नतः ॥ छेत्स्यंति चेत्तच्छब्देन प्रबुध्येत हरिः स्वयम् ॥ ४८ ॥ ॥ देवा ऊचुः ॥ ॥ गुणभक्षं कुरुध्वं वै येनासौ बुध्यते हरिः ॥ क्रत्वर्थिनो वयं वम्र्यः प्रभुं विज्ञापयामहे ॥ ४९ ॥ ॥ वम्र्य ऊचुः ॥ ॥ निद्राभंगं कथाच्छेदं दम्पत्योर्मैत्रभेदनम् ॥ शिशुमातृविभेदं वा कुर्वाणो नरकं व्रजेत् ॥ ५० ॥ योगारूढो जगन्नाथः समाधिस्थो महाबलः ॥ तस्य श्रीजगदीशस्य विघ्नं नैव तु कुर्महे ॥ ५१ ॥ ॥ ब्रह्मोवाच ॥ ॥ भवतां सर्वभक्षत्वं देवकार्यं क्रियेत चेत् ॥ कर्त्तव्यं च ततो वम्र्यो यज्ञसिद्धिर्यथा भवेत् ॥ वम्रीशा सा तदा वत्स पुनरेवमुवाच ह ॥ ५२ ॥ ॥ वम्र्युवाच ॥ ॥ दुःखसाध्यो जगन्नाथो मलयानिलसंनिभः ॥ कथं वा बोध्यतां ब्रह्मन्नस्माभिः सुरपूजितः ॥ ५३ ॥ नैव यज्ञेन मे कार्यं सुरैश्चैव तथैव च ॥ सर्वेषु यज्ञकार्येषु भागं ददतु मे सुराः ॥ ५४ ॥ ॥ ॥ देवा ऊचुः ॥ ॥ प्रदास्यामो वयं वम्र्यै भागं यज्ञेषु सर्वदा ॥ यज्ञाय दत्तमस्माभिः कुरुष्वैवं वचो हि नः ॥ ५५ ॥ तथेति विधिनाप्युक्तं वम्री चोद्यममाश्रिता ॥ गुणभक्षादिकं कर्म तया सर्वं कृतं नृप ॥ ५६ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ अस्य वा बोधने

१ वागीशं बृहस्पतिम्। २ वम्र्यः—पुस्तकपत्रवस्त्रादिभक्षिकाः कीटिकाः 'उधई' इति महाराष्ट्रभाषायां प्रसिद्धाः। ३ तच्छब्देन धनुष्यटणत्कारशब्देन। ४ गुणभक्षम्—धनुर्ज्याभक्षणम्। ५ हे वम्र्यः—इति संबोधनम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गम्यो धर्मभाजां सुखरूपः सदा शुचिः ॥ गुणातीतोऽपि नित्योऽसौ सर्वगो निर्गुणस्तथा ॥ ११ ॥ स्रष्टासौ पालको हंता अव्यक्तः सर्वदेहिनाम् ॥
अनुकूलो महातेजाः कस्मादश्वमुखोऽभवत् ॥ १२ ॥ यस्य रोमोद्भवा देवा वृक्षाद्याः पन्नगा नगाः ॥ कल्पेकल्पे जगत्सर्वं जायते यस्य देहतः ॥
॥ १३ ॥ स एव विश्वप्रभवः स एवात्यंतकारणम् ॥ येनानीताः पुनर्विद्या यज्ञाश्च प्रलयं गताः ॥१४॥ घातितो दुष्टदैत्योऽसौ वेदार्थं कृत उद्यमः ॥
एवमासीन्महाविष्णुः कथमश्वमुखोऽभवत् ॥ १५ ॥ रत्नगर्भा धृता येन पृष्ठदेशे च लीलया ॥ कृत्या व्यवस्थितं सर्वं जगत्स्थावरजंगमम् ॥
॥ १६ ॥ स देवो विश्वरूपो वै कथं वाजिमुखोऽभवत् ॥ हिरण्याक्षस्य हंता यो रूपं कृत्वा वराहजम् ॥ १७ ॥ सुपवित्रं महातेजाः प्रविश्य जलसा
गरे ॥ उद्धृता च मही सर्वा ससागरमहीधरा ॥ १८ ॥ उद्धृता च मही नूनं दंष्ट्राग्रे येन लीलया ॥ कृत्वा रूपं वराहं च कपिलं शोकनाशनम् ॥
॥ १९ ॥ स देवः कथमीशानो हयग्रीवत्वमागतः ॥ प्रह्लादार्थे स चेशानो रूपं कृत्वा भयावहम् ॥ २० ॥ नारसिंहं महादेवं सर्वदुष्टनिवारणम् ॥
पर्वताग्निसमुद्रस्थं ररक्ष भक्तसत्तमम् ॥ २१ ॥ हिरण्यकशिपुं दुष्टं जघान रजनीमुखे ॥ इंद्रासने च संस्थाप्य प्रह्लादस्य सुखप्रदम् ॥ २२ ॥ प्रह्ला
दार्थे च वै नूनं नृसिंहत्वमुपागतः ॥ विरोचनसुतस्याग्रे याचकोऽसौ भवेत्तदा ॥ २३ ॥ यज्ञे चैवाश्वमेधे वै बलिना यः समर्चितः ॥ हृता वसुमती
तस्य त्रिपदीकृतरोदसी ॥ २४ ॥ विश्वरूपेण वै येन पाताले क्षपितो बलिः ॥ त्रिःसप्तवारं येनैव क्षत्रियानवनीतले ॥ २५ ॥ हत्वाऽददाच्च विप्रेभ्यो
महीमतिमहौजसा ॥ घातितो हैहयो राजा येनैव जननी हता ॥ २६ ॥ येन वै शिशुनोर्व्यां हि घातिता दुष्टचारिणी ॥ राक्षसी ताडका नाम्नी
कौशिकस्य प्रसादतः ॥ २७ ॥ विश्वामित्रस्य यज्ञे तु येन लीलानृदेहिना ॥ चतुर्दशसहस्राणि घातिता राक्षसा बलात् ॥ २८ ॥
हता शूर्पणखा येन त्रिशिराश्च निपातितः ॥ सुग्रीवं वालिनं हत्वा सुग्रीवेण सहायवान् ॥ २९ ॥ कृत्वा सेतुं समुद्रस्य रणे
हत्वा दशाननम् ॥ धर्म्मारण्यं समासाद्य ब्राह्मणानन्वपूजयत् ॥ ३० ॥ शासनं द्विजवर्येभ्यो दत्त्वा ग्रामान्बहूंस्तथा ॥ स्नात्वा चैव धर्म्मवाप्यां
सुदानान्यददाद्गवाम् ॥ ३१ ॥ साधूनां पालनं कृत्वा निग्रहाय दुरात्मनाम् ॥ एवमन्यानि कर्म्माणि श्रुतानि च धरातले ॥३२॥ स देवो लीलया
कृत्वा कथं चाश्वमुखोऽभवत् ॥ यो जातो यादवे वंशे पूतनाशकटादिकम् ॥ ३३ ॥ अरिष्टदैत्यः केशी च वृकासुरबकासुरौ ॥ शकटासुरो महासुर
स्तृणावर्तश्च धेनुकः ॥ ३४ ॥ मल्लश्चैव तथा कंसो जरासंधस्तथैव च ॥ कालयवनस्य हंता च कथं वै स हयाननः ॥ तारकासुरं रणे जित्वा
अयुतषट्पुरं तथा ॥ ३५ ॥ कन्याश्चोद्वाहिता येन सहस्राणि च षड् दश ॥ अमानुषाणि कृत्वेत्थं कथं सोऽश्वमुखोऽभवत् ॥ ३६ ॥ त्राता यः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

करोति वै ॥ पितरस्तृप्तिमायांति यावदाभूतसंप्लवम् ॥ ७१ ॥ कन्यादानं च यः कुर्यादस्मिन्क्षेत्रे च पुत्रक ॥ उद्वाहपरिपूतात्मा ब्रह्मलोके महीयते ॥ ७२ ॥ धेनुदानं च शय्यां च विद्रुमं च हयं तथा ॥ दासीमहिषीघण्टाश्च तिलं कांचनसंयुतम् ॥ ७३ ॥ धेनुं तिलमयीं दद्यादस्मिन्क्षेत्रे च भारत ॥ उपानहौ च छत्रं च शीतत्राणादिकं तथा ॥ ७४ ॥ लक्षहोमं तथा रुद्रं रुद्रातिरुद्रमेव च ॥ तस्मिन्स्थाने च यत्किंचिद्ददाति श्रद्धयान्वितः ॥ ७५ ॥ एकैकस्य फलं तात वक्ष्यामि शृणु तत्त्वतः ॥ दानेन लभते भोगानिह लोके परत्र च ॥ ७६ ॥ राज्यं च लभते मर्त्यः कृत्वोद्वाहं तु मानुषाः ॥ जायातो धर्मकामार्थाः प्राप्यंते नात्र संशयः ॥ ७७ ॥ पूजाया लभते सौख्यं भवेज्जन्मनिजन्मनि ॥ सप्तम्यां रवियुक्तायां बकुलार्कं स्मरेत्तु यः ॥ ७८ ॥ ज्वरादेः शत्रुतश्चैव व्याधेस्तस्य भयं नहि ॥७९॥ ॥ युधिष्ठिर उवाच ॥ ॥ बकुलार्केति वै नाम कथं जातं रवेर्मुने ॥ एतन्मे वदतां श्रेष्ठ तत्त्वमाख्यातुमर्हसि ॥८०॥ ॥ व्यास उवाच ॥ ॥ यदा संज्ञा च राजेंद्र सूर्यार्थं चैकचेतसा ॥ तेपे बकुलवृक्षाधः पत्युस्तेजः प्रशांतये ॥८१॥ प्रादुर्भावं रवेर्दृष्ट्वा वडवा समजायत ॥ अत्यंतं गोपतिः शांतो बकुलस्य समीपतः ॥८२॥ सुषुवे च तदा राज्ञी सुतौ दिव्यौ मनोहरौ ॥ तेनास्य प्रथितं नाम बकुलार्केति वै रवेः ॥८३॥ यस्तत्र कुरुते स्नानं व्याधिस्तस्य न पीडयेत् ॥ धर्ममर्थं च कामं च लभते नात्र संशयः ॥८४॥ षण्मासात्सिद्धिमाप्नोति मोक्षं च लभते नरः ॥ एतदुक्तं महाराज बकुलार्कस्य वैभवम् ॥ ८५ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे पूर्वभागे धर्मारण्योपाख्याने बकुलार्कमाहात्म्यकथनंनाम त्रयोदशोऽध्यायः ॥ १३ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ कृपासिंधो महाभाग सर्वव्यापिन्सुरेश्वर ॥ कदा ह्यत्र तपस्तप्तं विष्णुनामिततेजसा ॥ १ ॥ स्कंदाय कथितं चैव शर्वेण च महात्मना ॥ आनुपूर्व्येण सर्वं हि कथयस्व त्वमेव हि ॥ २ ॥ ॥ व्यास उवाच ॥ ॥ शृणु वत्स प्रवक्ष्यामि धर्म्मारण्ये नृपोत्तम ॥ एकदात्र तपस्तप्तं विष्णुनाऽमिततेजसा ॥ ॥ ३ ॥ ॥ स्कंद उवाच ॥ ॥ कथं देवसरोनाम पंपा चंपा गया तथा ॥ वाराणस्यधिका चैव कथमश्वमुखो हरिः ॥ ४ ॥ ॥ ईश्वर उवाच ॥ ॥ अत्र नारायणो देवस्तपस्तेपे सुदुष्करम् ॥ दिव्यवर्षशतं त्रीणि जातः सुश्राननश्च सः ॥ ५ ॥ तपस्तेपे महाविष्णुः सुरूपार्थं च पुत्रक ॥ वाजिमुखो हरिस्तत्र सिद्धस्थाने महाद्युते ॥ ६ ॥ ॥ स्कंद उवाच ॥ ॥ कारणं ब्रूहि नोद्य त्वमश्वाननः कथं हरिः ॥ महारिपोश्च हंता च देवदेवो जगत्पतिः ॥ ॥ ७ ॥ यस्य नाम्ना महाभाग पातकानि बहून्यपि ॥ विलीयंते तु वेगेन तमः सूर्योदये यथा ॥ ८ ॥ श्रूयंते यस्य कर्माणि अद्भुतान्यद्भुतानि वै ॥ सर्वेषामेव जीवानां कारणं परमेश्वरः ॥ ९ ॥ प्राणरूपेण यो देवो हयरूपः कथं भवेत् ॥ सर्वेषामपि तंत्राणामेकरूपः प्रकीर्तितः ॥ १० ॥ भक्ति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न नारीणां यशस्करः ॥ मनोरथो बांधवानां भार्या पितृगृहे स्थिता ॥ २३ ॥ सा त्वं त्रैलोक्यनाथेन भर्त्रा सूर्येण संगता ॥ पितुर्गृहे चिरं कालं
वस्तुं नार्हसि पुत्रिके ॥ २४ ॥ अतो भर्तृगृहं गच्छ दृष्टोऽहं पूजिता च मे ॥ पुनरागमनं कार्यं दर्शनाय शुभेक्षणे ॥ २५ ॥ ॥ व्यास
उवाच ॥ ॥ इत्युक्ता सा तदा क्षिप्रं तथेत्युक्त्वा च वै मुने ॥ पूजयित्वा तु पितरं सा जगामोत्तरान्कुरून् ॥ २६ ॥ सूर्यतापमनिच्छंती तेजस
स्तस्य बिभ्यती ॥ तपश्चचार तत्रापि वडवारूपधारिणी ॥ २७ ॥ संज्ञामित्येव मन्वानो द्वितीयायां दिवस्पतिः ॥ जनयामास तनयौ कन्यां
चैकां मनोरमाम् ॥ २८ ॥ छाया स्वतनयेष्वेव यथा प्रेम्णाध्यवर्तत ॥ तथा न संज्ञाकन्यायां पुत्रयोश्चाप्यवर्तत ॥ लालनासु च भोज्येषु
विशेषमनुवासरम् ॥ २९ ॥ मनुस्तत्क्षांतवानस्या यमस्तस्या न चाक्षमत् ॥ ताडनाय ततः कोपात्पादस्तेन समुद्यतः ॥ तस्याः पुनः क्षांतमना न
तु देहे न्यपातयत् ॥ ३० ॥ ततः शशाप तं कोपाच्छायासंज्ञा यमं नृप ॥ किंचित्प्रस्फुरमाणोष्ठी विचलत्पाणिपल्लवा ॥ ३१ ॥ पत्न्यां पितुर्मयि
यदि पादमुद्यच्छसे बलात् ॥ भुवि तस्मादयं पादस्तवाद्यैव भविष्यति ॥ ३२ ॥ इत्याकर्ण्य यमः शापं मातर्यतिविशंकितः ॥ अभ्येत्य पितरं प्राह
प्रणिपातपुरस्सरम् ॥ ३३ ॥ तातैतन्महदाश्चर्यमदृष्टमिति च क्वचित् ॥ मातावात्सल्यरूपेण शापं पुत्रे प्रयच्छंति ॥३४॥ यथा माता ममाचष्ट नेयं
माता तथा मम ॥ निर्गुणेष्वपि पुत्रेषु न माता निर्गुणा भवेत् ॥ ३५ ॥ यमस्यैतद्वचः श्रुत्वा भगवांस्तिमिरापहः ॥ छायासंज्ञामथाहूय पप्रच्छ
क्वगतेति च ॥३६॥ सा चाह तनया त्वष्टुरहं संज्ञा विभावसो ॥ पत्नी तव त्वयापत्यान्येतानि जनितानि मे ॥ ३७ ॥ इत्थं विवस्वतस्तां तु बहुशः
पृच्छतो यदा ॥ नाचचक्षे तदा क्रुद्धो भास्वांस्तां शप्तुमुद्यतः ॥ ३८ ॥ ततः सा कथयामास यथावृत्तं विवस्वते ॥ विदितार्थश्च भगवाञ्जगाम त्वष्टु
रालयम् ॥ ३९ ॥ ततः संपूजयामास त्वष्टा त्रैलोक्यपूजितम् ॥ भास्वन्किं रहिता शक्त्या निजगेहमुपागतः ॥ ४० ॥ संज्ञां पप्रच्छ तं तस्मै
कथयामास तत्त्ववित् ॥ आगता सेह मे वेश्म भवतः प्रेषिता रवे ॥ ४१ ॥ दिवाकरः समाधिस्थो वडवारूपधारिणीम् ॥ तपश्चरंतीं ददृशे उत्तरेषु
कुरुष्वथ ॥ ४२ ॥ असह्यमाना सूर्यस्य तेजस्तेनातिपीडिता ॥ वह्न्याभनिजरूपं तु च्छायारूपं विमुच्य च ॥ ४३ ॥ धर्मारण्ये समागत्य तप
स्तेपे सुदुष्करम् ॥ छायापुत्रं शनिं दृष्ट्वा यमं चान्यं च भूपते ॥ ४४ ॥ तदैव विस्मितः सूर्यो दुष्टपुत्रौ समीक्ष्य च ॥ ज्ञातुं दध्यौ क्षणं ध्यात्वा
विदित्वा तच्च कारणम् ॥ ४५ ॥ घृण्यौष्ण्याद्दग्धदेहा सा तपस्तेपे पतिव्रता ॥ येन मां तेजसा सह्यं द्रष्टुं नैव शशाक ह ॥ ४६ ॥

१ इति च क्वचित्—अदृष्टं महदाश्चर्यम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पश्चाशद्धायनेतीते गत्वा कौ तप आचरत् ॥ प्रद्योतनो विचार्यैवं गत्वा शीघ्रं मनोजवः ॥ ४७ ॥ धर्मारण्ये वरे पुण्ये यत्र संज्ञास्थिता तपः ॥ आगतं तं रविं दृष्ट्वा वडवा समजायत ॥ ४८ ॥ सूर्यपत्नी सदा संज्ञा सूर्यश्चाश्वस्ततोऽभवत् ॥ ताभ्यां सहाभूत्संयोगो घ्राणे लिंगं निवेश्य च ॥ ४९ ॥ तदा तौ च समुत्पन्नौ युगलावश्विनौ भुवि ॥ प्रादुर्भूतं जलं तत्र दक्षिणेन खुरेण च ॥ ५० ॥ विदलिते भूमिभागे तत्र कुंडं समुद्भवौ ॥ द्वितीयं तु पुनः कुंडं पश्चार्धचरणोद्भवम् ॥ ५१ ॥ उत्तरवाहिन्याः काश्याः कुरुक्षेत्रादि वै तथा ॥ गंगापुरीसमफलं कुण्डेऽत्र मुनिनोदितम् ॥ ५२ ॥ तत्फलं समवाप्नोति तत्तकुण्डे न संशयः ॥ स्नानं विधाय तत्रैव सर्वपापैः प्रमुच्यते ॥ ५३ ॥ न पुनर्जायते देहः कुष्ठादिव्याधिपीडितः ॥ एतत्ते कथितं भूप दस्रांशोत्पत्तिकारणम् ॥ ५४ ॥ तदा ब्रह्मादयो देवा आगतास्तत्र भूपते ॥ दत्त्वा संज्ञावरं शुभ्रं चिंतितादधिकं हि तैः ॥ ५५ ॥ स्थापयित्वा रविं तत्र बकुलाख्यवनाधिपम् ॥ आनर्चुस्ते तदा संज्ञां पूर्वरूपाऽभवत्तदा ॥ ५६ ॥ स्थापिता तत्र राज्ञी च कुमारौ युगलौ तदा ॥ एतत्तीर्थफलं वक्ष्ये शृणु राजन्महामते ॥ ५७ ॥ आदिस्थानं कुरुश्रेष्ठ देवैरपि सुदुर्लभम् ॥ रविकुण्डे नरः स्नात्वा श्रद्धायुक्तो जितेंद्रियः ॥ ५८ ॥ तारयेत्स पितन्सर्वान्महानरकगानपि ॥ श्रद्धया यः पिबेत्तोयं संतर्प्य पितृदेवताः ॥ ५९ ॥ स्वल्पं वापि बहुवापि सर्वं कोटिगुणं भवेत् ॥ सप्तम्यां रविवारेण ग्रहणं चंद्रसूर्ययोः ॥ ६० ॥ रविकुण्डे च ये स्नाताः न ते वै गर्भगामिनः ॥ संक्रांतौ च व्यतीपाते वैधृतेषु च पर्वसु ॥ ६१ ॥ पूर्णमास्याममावास्यां चतुर्दश्यां सितासिते ॥ रविकुंडे च यः स्नातः क्रतुकोटिफलं लभेत् ॥ ६२ ॥ पूजयेद्बकुलार्कं च एकचित्तेन मानवः ॥ स याति परमं धाम स यावत्तपते रविः ॥ ६३ ॥ तस्य लक्ष्मीः स्थिरा नूनं लभते संततिं सुखम् ॥ अरिवर्गः क्षयं याति प्रसादाच्च दिवस्पतेः ॥ ६४ ॥ नाग्नेर्भयं हि तस्य स्यान्न व्याघ्रान्न च दंतिनः ॥ नच सर्प्पभयं क्वापि भूतप्रेतादिभीर्न हि ॥ ६५ ॥ बालग्रहाश्च सर्वेऽपि रेवती वृद्धरेवती ॥ ते सर्वे नाशमायांति बकुलार्क नमोस्तु ते ॥ ६६ ॥ गावस्तस्य विवर्द्धते धनं धान्यं तथैव च ॥ अविच्छेदो भवेद्वंशो बकुलार्के नमस्कृते ॥ ६७ ॥ काकवन्ध्या च या नारी अनपत्या मृतप्रजा ॥ वन्ध्या विरूपिता चैव विषकन्याश्च याः स्त्रियः ॥ ६८ ॥ एवं दोषैः प्रमुच्यंते स्नात्वा कुण्डे च भूपते ॥ सौभाग्यस्त्रीसुतांश्चैव रूपं चाप्नोति सर्वशः ॥ ॥ ६९ ॥ व्याधिग्रस्तोपि यो मर्त्यः षण्मासाच्चैव मानवः ॥ रविकुण्डे च सुस्नातः सर्वरोगात्प्रमुच्यते ॥ ७० ॥ नीलोत्सर्गविधिं यस्तु रविक्षेत्रे

१ षण्मुख–इ० पा० ।

CC-0. In Public Domain. Digitization by eGangotri

ये चान्ये मनुजा लोके निर्विघ्नार्थं च पूजयन् ॥ ३८ ॥ विवाहोत्सवयज्ञेषु पूर्वमाराधितो भवेत् ॥ धर्मारण्योद्भवानां च प्रसन्नो भव सर्वदा ॥
॥ ३९ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे पूर्वभागे गणेशप्रस्थापनावर्णनंनाम द्वादशोऽध्यायः ॥ १२ ॥
॥ ॥ व्यास उवाच ॥ ॥ शंभोश्च पश्चिमे भागे स्थापितः कश्यपात्मजः ॥ तत्रास्ति तन्महाभाग रविक्षेत्रं तदुच्यते ॥ १ ॥ तत्रोत्पन्नौ महादिव्यौ
रूपयौवनसंयुतौ ॥ नासत्यावश्विनौ देवौ विख्यातौ गदनाशनौ ॥ २ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ पितामह महाभाग कथयस्व प्रसादतः ॥
उत्पत्तिरश्विनोश्चैव मृत्युलोके च तत्कथम् ॥ ३ ॥ रविलोकात्कथं सूर्यो धरायामवतारितः ॥ एतत्सर्वं प्रयत्नेन कथयस्व प्रसादतः ॥ ४ ॥
यच्छ्रुत्वा हि महाभाग सर्वपापैः प्रमुच्यते ॥ ५ ॥ ॥ व्यास उवाच ॥ ॥ साधु पृष्टं त्वया भूप ऊर्ध्वलोककथानकम् ॥ यच्छ्रुत्वा नरशार्दूल
सर्वरोगात्प्रमुच्यते ॥ विश्वकर्म्मसुता संज्ञा अंशुमद्द्रविणा वृता ॥ ६ ॥ सूर्यं दृष्ट्वा सदा संज्ञा स्वाक्षिसंयमनं व्यधात् ॥ यतस्ततः सरोषोऽर्कः
संज्ञां वचनमब्रवीत् ॥ ७ ॥ ॥ सूर्य उवाच ॥ ॥ मयि दृष्टे सदा यस्मात्कुरुषे स्वाक्षिसंयमम् ॥ तस्माज्जनिष्यते मूढे प्रजासंयमनो यमः ॥
॥ ८ ॥ ततः सा चपलं देवी ददर्श च भयाकुलम् ॥ विलोलितदृशं दृष्ट्वा पुनराह च तां रविः ॥ ९ ॥ यस्माद्विलोलिता दृष्टिर्मयि दृष्टे त्वया
धुना ॥ तस्माद्विलोलितां संज्ञे तनयां प्रसविष्यसि ॥ १० ॥ ॥ व्यास उवाच ॥ ॥ ततस्तस्यास्तु संजज्ञे भर्तृशापेन तेन वै ॥ यमश्च
यमुना येयं विख्याता सुमहानदी ॥ ११ ॥ सा च संज्ञा रवेस्तेजो महद्दुःखेन भामिनी ॥ असहंतीव सा चित्ते चिंतयामास वै तदा ॥ १२ ॥
किं करोमि क्व गच्छामि क्व गतायाश्च निर्वृतिः ॥ भवेन्मम कथं भर्तुः कोपमर्कस्य नश्यति ॥१३॥ इति संचिंत्य बहुधा प्रजापतिसुता तदा ॥
साधु मेने महाभागा पितृसंश्रयमाप सा ॥१४॥ ततः पितृगृहं गंतुं कृतबुद्धिर्यशस्विनी ॥ छायामाहूयात्मनस्तु सा देवी दयिता रवेः ॥१५॥ तां चो
वाच त्वया स्थेयमत्र भानोर्यथा मया ॥ तथा सम्यगपत्येषु वर्तितव्यं तथा रवौ ॥१६॥ दुष्टमपि न वाच्यं ते यथा बहुमतं मम ॥ सैवास्मि संज्ञाह
मिति वाच्यमेवं त्वयानघे ॥ १७ ॥ ॥ छायासंज्ञोवाच ॥ ॥ आकेशग्रहणाच्चाहमाशापाच्च वचस्तथा ॥ करिष्ये कथयिष्यामि यावत्केशापकर्षणा
त् ॥ १८ ॥ इत्युक्ता सा तदा देवी जगाम भवनं पितुः ॥ ददर्श तत्र त्वष्टारं तपसा धूतकिल्बिषम् ॥ १९ ॥ बहुमानाच्च तेनापि पूजिता विश्व
कर्म्मणा ॥ तत्स्थौ पितृगृहे सा तु किंचित्कालमनिंदिता ॥ २० ॥ ततः प्राह स धर्मज्ञः पिता नातिचिरोषिताम् ॥ विश्वकर्मा सुतां प्रेम्णा बहुमा
नपुरःसरम् ॥ २१ ॥ त्वां तु मे पश्यतो वत्से दिनानि सुबहून्यपि ॥ मुहूर्तेन समानि स्युः किं तु धर्मो विलुप्यते ॥ २२ ॥ बांधवेषु चिरं वासो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न ॥ एवमुक्तो महादेव्या द्वारेऽतिष्ठत्स सायुधः ॥ १४ ॥ एतस्मिन्नंतरे देवो महादेवो जगाम ह ॥ आभ्यंतरे प्रवेष्टुं च मतिं दध्रे महेश्वरः ॥ १५ ॥
द्वारस्थेन गणेशेन प्रवेशोदायि तस्य न ॥ ततः क्रुद्धो महादेवः परस्परमयुध्यत ॥ १६ ॥ युद्धं कृत्वा ततश्चोभौ परस्परवधैषिणौ ॥ परशुं जघ्नि
वान्देवललाटे परमे शुभम् ॥ १७ ॥ ततो देवो महादेवः शूलमुद्यम्य चाहनत् ॥ शिरश्छिच्छेद शूलेन तद्भूमौ निपपात ह ॥ १८ ॥ तंदृष्ट्वा
पतितं पुत्रं पार्वती प्ररुरोद ह ॥ हाहाकारो महानासीत्तदा तत्र निपातिते ॥ १९ ॥ पार्वतीं विकलां दृष्ट्वा देवदेवो महेश्वरः ॥ चिंतयामास देवोऽपि
किं कृतं वा मुधा मया ॥ २० ॥ एतस्मिन्नंतरे तत्र गजासुरमपश्यत ॥ तं दृष्ट्वा च महादेत्यं सर्वलोकैकपूजितः ॥ २१ ॥ जघ्निवांस्तच्छिरो
गृह्य पार्वत्या कृतमर्भकम् ॥ उत्तस्थौ सगणस्तत्र महादेवस्य सन्निधौ ॥ २२ ॥ ततो नाम चकारास्य गजानन इति स्फुटम् ॥ सुराः सर्वे च
संपृक्ता हर्षिता मुनयस्तथा ॥ २३ ॥ स्तुवंति स्तुतिभिः शश्वत्कुटुम्बकुशलंकरम् ॥ विक्रीणाति कुटुम्बं यो मोदकार्थं समर्चके ॥ २४ ॥ दक्षि
णस्यां प्रतोल्यां तमेकदंतं च पीवरम् ॥ आर्चयच्च महादेवं स्वयंभूः सुरपूजितम् ॥ २५ ॥ जटिलं वामनं चैव नागयज्ञोपवीतकम् ॥ त्र्यक्षं चैव महा
कायं करध्वजकुठारकम् ॥ २६ ॥ दधानं कमलं हस्ते सर्वविघ्नविनाशनम् ॥ रक्षणाय च लोकानां नगराद्दक्षिणाश्रितम् ॥२७॥ सुप्रसन्नं गणाध्यक्षं
सिद्धिबुद्धिनमस्कृतम् ॥ सिंदूराभं सुरश्रेष्ठं तीव्रांकुशधरं शुभम् ॥ २८ ॥ शतपुष्पैः शुभैः पुष्पैरर्चितं ह्यमराधिपः ॥ प्रणम्य च महाभक्त्या तुष्टुवु
स्तं सुरास्ततः ॥ २९ ॥ ॥ देवा ऊचुः ॥ ॥ नमस्तेस्तु सुरेशाय गणानां पतये नमः ॥ गजानन नमस्तुभ्यं महादेवाधिदैवत ॥ ३० ॥
भक्तिप्रियाय देवाय गणाध्यक्ष नमोस्तु ते ॥ इत्येतैश्च शुभैः स्तोत्रैः स्तूयमानो गणाधिपः ॥ सुप्रीतश्च गणाध्यक्षः तदाऽसौ वाक्यमब्रवीत् ॥
॥ ३१ ॥ ॥ गणाध्यक्ष उवाच ॥ तुष्टोऽहं वो सुरा ब्रूत वांछितं च ददामि वः ॥ ३२ ॥ ॥ देवा ऊचुः ॥ ॥ त्वमत्रस्थो महाभाग कुरु कार्यं च
नः प्रभो ॥ धर्मारण्ये च विप्राणां वणिग्जननिवासिनाम् ॥ ३३ ॥ ब्रह्मचर्यादियुक्तानां धार्मिकाणां गणेश्वर ॥ वर्णाश्रमेतराणां च रक्षिता भव सर्वदा
॥ ३४ ॥ त्वत्प्रसादान्महाभाग धनसौख्ययुता द्विजाः ॥ भवंतु सर्वे सततं वणिजश्च महाबलाः ॥३५॥ रक्षितव्यास्त्वया देव यावच्चंद्रार्कमेदिनी ॥
एवमस्त्विति सोवादीद्गणनाथो महेश्वरः ॥ ३६ ॥ देवाश्च हर्षमापन्नाः पूजयंति गणाधिपम् ॥ ततो देवा मुदा युक्ताः पुष्पधूपादितर्पणैः ॥ ३७ ॥

१ संहितः—इत्यर्थः—जटित इतियावत् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जातीनां वणिजस्ते गवात्मजाः ॥ ९७ ॥ पुष्पोपहारनिचयं स्नानवस्त्रादिधावनम् ॥ उपलादिकनिर्माणं मार्जनादिशुभक्रियाः ॥ ९८ ॥ वणि
क्स्त्रियः प्रकुर्वंति कंडनं पेषणादिकम् ॥ शुश्रूषंति च तान्विप्रान्काजेशवचनेन हि ॥ ९९ ॥ स्वस्था जातास्तदा सर्वे द्विजा हर्षपरायणाः ॥
काजेशादीनुपासंते दिवारात्रौ हि संध्ययोः ॥ १०० ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे पूर्वभागे धर्मार
ण्यमाहात्म्ये वणिक्परिग्रहवर्णनंनाम दशमोऽध्यायः ॥ १० ॥ युधिष्ठिर उवाच ॥ ॥ अतः परं किमभवद्ब्रवीतु द्विजसत्तम ॥ त्वद्वचनामृतं
पीत्वा तृप्तिर्नास्ति मम प्रभो ॥ १ ॥ ॥ व्यास उवाच ॥ ॥ अथ किंचिद्गते काले युगांतसमये सति ॥ त्रेतादौ लोलजिह्वाक्ष अभवद्राक्षसे
श्वरः ॥ २ ॥ तेन विद्रावितं सर्वं त्रैलोक्यं सचराचरम् ॥ जित्वा स सकलाँल्लोकान्धर्मारण्ये समागतः ॥ ३ ॥ तद्दृष्ट्वा सकलं पुण्यं रम्यं द्विजनिषे
वितम् ॥ ब्रह्मद्वेषाच्च तेनैव दाहितं च पुरं शुभम् ॥ ४ ॥ दह्यमानं पुरं दृष्ट्वा प्रणष्टा द्विजसत्तमाः ॥ यथागतं प्रजग्मुस्ते धर्मारण्यनिवासिनः ॥
॥ ५ ॥ श्रीमाताद्यास्तदा देव्यः कोपिता राक्षसेन वै ॥ घातयंत्येव शब्देन तर्जयित्वा च राक्षसम् ॥ ६ ॥ समुच्छ्रितास्तदा देव्यः शतशोऽथ सह
स्रशः ॥ त्रिशूलवरधारिण्यः शंखचक्रगदाधराः ॥७॥ कमंडलुधराः काश्चित्कशाखड्गधराः पराः ॥ पाशांकुशधरा काचित्खड्गखेटकधारिणी ॥ ८ ॥
काचित्परशुहस्ता च दिव्यायुधधरा परा ॥ नानाभरणभूषाढ्या नानारत्नाभिशोभिता ॥ ९ ॥ राक्षसानां विनाशाय ब्राह्मणानां हिताय च ॥
आजग्मुस्तत्र यत्रास्ते लोलजिह्वो हि राक्षसः ॥१०॥ महादंष्ट्रो महाकायो विद्युज्जिह्वो भयंकरः ॥ दृष्ट्वा ता राक्षसो घोरं सिंहनादमथाकरोत् ॥११॥
तेन नादेन महता त्रासितं भुवनत्रयम् ॥ आपूरिता दिशः सर्वाः क्षुभितानेकसागराः ॥ १२ ॥ कोलाहलो महानासीद्धर्मारण्ये तदा नृप ॥ तच्छ्रुत्वा
वासवेनाथ प्रेषितो नलकूबरः ॥ १३ ॥ किमिदं पश्य गत्वा त्वं दृष्ट्वा मह्यं निवेदय ॥ तत्तस्य वचनं श्रुत्वा गतो वै नलकूबरः ॥ १४ ॥ दृष्ट्वा तत्र
महायुद्धं श्रीमातालोलजिह्वयोः ॥ यथादृष्टं यथाजातं शक्राग्रे स न्यवेदयत् ॥ १५ ॥ उद्वेजयति लोकांस्त्रीन्धर्मारण्यमितो गतः ॥ तच्छ्रुत्वा वासवो
विष्णुं निवेद्य क्षितिमागमत् ॥ १६ ॥ दाहितं तत्पुरं रम्यं देवानामपि दुर्लभम् ॥ न दृष्टा वाडवास्तत्र गताः सर्वे दिशो दश ॥ १७ ॥ श्रीमाता
योगिनी तत्र कुरुते युद्धमुत्तमम् ॥ हाहाभूता प्रजा सर्वा इतश्चेतश्च धावति ॥ १८ ॥ तच्छ्रुत्वा वासुदेवो हि गृहीत्वा च सुदर्शनम् ॥ सत्यलोकात्तदा
राजन्समागच्छन्महीतले ॥ १९ ॥ धर्मारण्यं ततो गत्वा तच्चक्रं प्रमुमोच ह ॥ लोलजिह्वस्तदा रक्षो मूर्च्छितो निपपात ह ॥ २० ॥ त्रिशूलेन ततो
भिन्नः शक्तिभिः क्रोधमूर्च्छितः ॥ हन्यमानस्तदा रक्षः प्राणांस्त्यक्त्वा दिवं गतः ॥ २१ ॥ ततो देवाः सगंधर्वा हर्षनिर्भरमानसाः ॥ तुष्टुवुस्तं जगन्नाथं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सत्यलोकात्समागताः ॥ २२ ॥ उद्वसं तत्समालोक्य विष्णुर्वचनमब्रवीत् ॥ क्व च ते ब्राह्मणाः सर्वे ऋषीणामाश्रमे पुनः ॥ २३ ॥ ततो देवाः सगं धर्वा इतस्ततः पलायितान् ॥ संशोध्य तरसा राजन्ब्राह्मणानिदमब्रुवन् ॥ २४ ॥ श्रूयतां नो वचो विप्रा निहतो राक्षसाधमः ॥ वासुदेवेन देवेन चक्रेण निरकृंतत ॥ २५ ॥ तच्छ्रुत्वा वाडवाः सर्वे प्रहर्षोत्फुल्ललोचनाः ॥ समाजग्मुस्तदा राजन्स्वस्वस्थाने समाविशन् ॥ २६ ॥ श्रीकांताय तदा राजन्वाक्यमुक्तं मनोरमम् ॥ यस्मात्त्वं सत्यलोकाच्च आगतोऽसि जगत्प्रभुः ॥ स्थापितं च पुरं चेदं हिताय च [1]द्विजात्मनाम् ॥ २७ ॥ सत्यमंदिरमिति ख्यातं तदा लोके भविष्यति ॥ कृते युगे धर्मारण्यं त्रेतायां सत्यमंदिरम् ॥ २८ ॥ तच्छ्रुत्वा वासुदेवेन तथेति प्रतिपद्य च ॥ ततस्ते वाडवाः सर्वे पुत्रपौत्रसमन्विताः ॥ २९ ॥ सपत्नीकाः सानुचरा यथापूर्वं न्यवात्सिषुः ॥ तपोयज्ञक्रियाद्येषु वर्ततेऽध्ययनादिषु ॥ ३० ॥ एवं ते सर्वमाख्यातं धर्म वै सत्यमंदिरे ॥ ३१ ॥ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे धर्मारण्यमाहात्म्ये लोलजिह्वासुरवधपूर्वकं सत्यमंदिरसंस्थापनवर्णनंनामैकादशोऽध्यायः ॥ ११ ॥ ॥ छ ॥ ॥ व्यास उवाच ॥ ॥ ततो देवैर्नृपश्रेष्ठ रक्षार्थं सत्यमदिरम् ॥ स्थापितं तत्तदाद्यैव सत्याभिख्या हि सा पुरी ॥ १ ॥ पूर्वं धर्मेश्वरो देवो दक्षिणेन गणाधिपः ॥ पश्चिमे स्थापितो भानुरुत्तरे च स्वयंभुवः ॥ २ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ गणेशः स्थापितः केन कस्मात्स्थापितवानसौ ॥ किंनामासौ महाभाग तन्मे कथय माचिरम् ॥ ३ ॥ ॥ व्यास उवाच ॥ ॥ अधुनाहं प्रवक्ष्यामि गणेशोत्पत्तिकारणम् ॥ ४ ॥ समये मिलिताः सर्वे देवता मातरस्तथा ॥ धर्मारण्ये महाराज स्थापितश्चंडिकासुतः ॥ ५ ॥ आदौ देवैर्नृपश्रेष्ठ भूमौ वै सत्ययोषिताम् ॥ प्राकारश्चाभवत्तत्र पताकाध्वजशोभितः ॥ ६ ॥ ब्राह्मणायतने तत्र प्राकारमण्डलान्तरे ॥ तन्मध्ये रचितं पीठमिष्टकाभिः सुशोभितम् ॥ ७ ॥ प्रतोल्यश्च चतस्रो वै शुद्धा एव सतोरणाः ॥ पूर्वे धर्मेश्वरो देवो दक्षिणे गणनायकः ॥ ८ ॥ पश्चिमे स्थापितो भानुरुत्तरे च स्वयंभुवः ॥ धर्मेश्वरोत्पत्तिवृत्तमाख्यातं तत्तवाग्रतः ॥ ९ ॥ अधुनाहं प्रवक्ष्यामि गणेशोत्पत्तिहेतुकम् ॥ कदाचित्पार्वती गात्रोद्वर्त्तनं कृतवत्यभूत् ॥ १० ॥ मलं तज्जनितं दृष्ट्वा हस्ते धृत्वा स्वगात्रजम् ॥ प्रतिमां च ततः कृत्वा सुरूपं च ददर्श ह ॥ ११ ॥ जीवं तस्यां च संचार्य उदतिष्ठत्तदग्रतः ॥ मातरं स तदोवाच किं करोमि तवाज्ञया ॥ १२ ॥ ॥ पार्वत्युवाच ॥ ॥ यावत्स्नानं करिष्यामि तावत्त्वं द्वारि तिष्ठ मे ॥ आयुधानि च सर्वाणि परश्वादीनि यानि तु ॥ १३ ॥ त्वयि तिष्ठति मद्वारे कोऽपि विघ्नं करोतु

१ ब्राह्मणायतने–ब्राह्मणानां निवासस्थाने–इत्यर्थः ।

CC-0. In Public Domain. Digitization by eGangotri

त्रिपुरघ्नः सदाशिवः ॥ ३१ ॥ प्रेषयामास दूतं तु विजयं नाम भारत ॥ स तत्र गत्वा यत्रास्ते विश्वावसुररिंदमः ॥ ३२ ॥ उवाच वचनं चैव पथ्यं चैव शिवेरितम् ॥ धर्मारण्ये महाभाग काजेशेन विनिर्मिताः ॥ ३३ ॥ स्थापिता वाडवास्तत्र वेदवेदांगपारगाः ॥ तेषां वै परिचर्यार्थं कामधेनुश्च प्रार्थिता ॥ ३४ ॥ तया कृताः शुभाचारा वणिजस्ते त्वयोनिजाः ॥ षट्त्रिंशच्च सहस्राणि कुमारास्ते महाबलाः ॥ ३५ ॥ शिवेन प्रेषितोऽहं वै त्वत्समीपमुपागतः ॥ कन्यार्थं हि महाभाग देहिदेहीत्युवाच ह ॥ ३६ ॥ ॥ गन्धर्व उवाच ॥ ॥ देवानां चैव सर्वेषां गन्धर्वाणां महामते ॥ परित्यज्य कथं लोके मानुषाणां ददामि वै ॥ ३७ ॥ श्रुत्वा तु वचनं तस्य निवृत्तो विजयस्तदा ॥ कथयामास तत्सर्वं गन्धर्व चरितं महत् ॥ ३८ ॥ ॥ व्यास उवाच ॥ ॥ ततः कोपसमाविष्टो भगवाँल्लोकशंकरः ॥ वृषभे च समारूढः शूलहस्तः सदाशिवः ॥ ३९ ॥ भूतप्रेतपिशाचाद्यैः सहस्रैरावृतः प्रभुः ॥ ततो देवास्तथा नागा भूतवेतालखेचराः ॥ ४० ॥ क्रोधेन महताविष्टाः समाजग्मुः सहस्रशः ॥ हाहाकारो महानासीत्तस्मिन्सैन्ये विसर्पति ॥ ४१ ॥ प्रकंपिता धरादेवी दिशापाला भयातुराः ॥ घोरा वातास्तदाऽशांताः शब्दं कुर्वंति दिग्गजाः ॥ ॥ ४२ ॥ ॥ व्यास उवाच ॥ ॥ तदागतं महासैन्यं दृष्ट्वा भयविलोलितम् ॥ गन्धर्वनगरात्सर्वे विनेशुस्ते दिशो दश ॥ ४३ ॥ गन्धर्वराजो नगरं त्यक्त्वा मेरुं गतो नृप ॥ ताः कन्या यौवनोपेता रूपौदार्यसमन्विताः ॥ ४४ ॥ गृहीत्वा प्रददौ सर्वा वणिग्भ्यश्च तदा नृप ॥ वेदोक्तेन विधानेन तथा वै देवसन्निधौ ॥ ४५ ॥ आज्यभागं तदा दत्त्वा गन्धर्वाय गवात्मजाः ॥ देवानां पूर्वजानां च सूर्याचंद्रमसोस्तथा ॥ ४६ ॥ यमाय मृत्यवे चैव आज्यभागं तदा ददुः ॥ दत्त्वाज्यभागान्विधिवद्वव्रिरे ते शुभव्रताः ॥ ४७ ॥ ततः प्रभृति गान्धर्वविवाहे समुपस्थिते ॥ आज्यभागं प्रगृह्णन्ति अद्यापि सर्वतो भृशम् ॥ ४८ ॥ षट्त्रिंशच्च सहस्राणि कुमारा यन्यवेदयन् ॥ तेषां पुत्राश्च पौत्राश्च शतशोऽथ सहस्रशः ॥ ४९ ॥ अत एव हि ताः सर्वा दासत्वे हि विनिर्मिताः ॥ क्षत्रियाश्च महावीरा किंकरत्वे हि निर्मिताः ॥ ५० ॥ ततो देवास्तदा राजञ्जग्मुः सर्वे यथातथा ॥ गते देवे द्विजाः सर्वे स्थानेऽस्मिन्निवसंति ते ॥ ५१ ॥ पुत्रपौत्रयुता राजन्निवसंत्यकुतोभयाः ॥ पठंति वेदान्वेदज्ञाः क्वचिच्छास्त्रार्थमुद्गिरन् ॥ ५२ ॥ केचिद्विष्णुं जपंतीह शिवं केचिज्जपंति हि ॥ ब्रह्माणं च जपंत्येके यमसूक्तं हि केचन ॥ ५३ ॥ यजंति याजकाश्चैव अग्निहोत्रमुपासते ॥ स्वाहाकारस्वधाकारवषट्कारैश्च सुव्रत ॥ ५४ ॥ शब्दैरापूयते सर्वं त्रैलोक्यं सचराचरम् ॥ वणिजश्च महादक्षा द्विजशुश्रूणोत्सुकाः ॥ ५५ ॥ धर्मारण्ये शुभे दिव्ये ते वसंति सुनिष्ठिताः ॥ अन्नपानादिकं सर्वं समित्कुशफलादिकम् ॥ ५६ ॥ आपूरयन्द्वि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सदाचारा धार्मिका ब्रह्मभोजकाः ॥ ६ ॥ स्वर्गे देवाः प्रशंसंति धर्मारण्यनिवासिनः ॥ तपोऽध्ययनदानेषु सर्वकालेप्यतींद्रियाः ॥ ७ ॥ एकैकस्मै द्विजायैव दत्तं जातु चरद्वयम् ॥ वाडवस्य च यद्गोत्रं पुरा प्रोक्तं महीपते ॥ ८ ॥ परस्परं च तद्गोत्रं तस्य चानुचरस्य च ॥ इति कृत्वा व्यवस्थां च न्यवसंस्तत्र भूमिषु ॥९॥ ततश्च शिष्यता देवैर्दत्ता चानुचरान्भुवि ॥ ब्रह्मणा कथितं सर्वं तेषामनुहिताय वै ॥१०॥ कुरुध्वं वचनं चैषां ददध्वं च यदिच्छितम् ॥ समित्पुष्पकुशादीनि आनयध्वं दिनेदिने ॥ ११ ॥ अनुज्ञयैषां वर्तध्वं मावज्ञां कुरुत क्वचित् ॥ जातकं नामकरणं तथान्न प्राशनं शुभम् ॥ १२ ॥ क्षौरं चैवोपनयनं महानाम्न्यादिकं तथा ॥ क्रियाकर्मादिकं यच्च व्रतं दानोपवासकम् ॥ १३ ॥ अनुज्ञयैषां कर्तव्यं काजेशा इदमब्रुवन् ॥ अनुज्ञया विनैषां यः कार्यमारभते यदि ॥ १४ ॥ दर्शं वा श्राद्धकार्यं वा शुभं वा यदि वाऽशुभम् ॥ दारिद्र्यं पुत्रशोकं च कीर्तिनाशं तथैव च ॥ १५ ॥ रोगैर्निपीड्यते नित्यं न क्वचित्सुखमाप्नुयुः ॥ तथेति च ततो देवाः शक्राद्याः सुरसत्तमाः ॥ १६ ॥ स्तुतिं कुर्वंति ते सर्वे काम धेनोः पुरः स्थिताः ॥ कृतकृत्यास्तदा देवा ब्रह्मविष्णुमहेश्वराः ॥ १७ ॥ त्वं माता सर्वदेवानां त्वं च यज्ञस्य कारणम् ॥ त्वं तीर्थं सर्वतीर्थानां नम स्तेऽस्तु सदानघे ॥ १८ ॥ शशिसूर्यारुणा यस्या ललाटे वृषभध्वजः ॥ सरस्वती च हुंकारे सर्वे नागाश्च कंबले ॥ १९ ॥ क्षुरपृष्ठे च गन्धर्वा वेदाश्चत्वार एव च ॥ मुखाग्रे सर्वतीर्थानि स्थावराणि चराणि च ॥ २० ॥ एवंविधैश्च बहुशो वचनैस्तोषिता च सा ॥ सुप्रसन्ना तदा धेनुः किं करोमीति चाब्रवीत् ॥ २१ ॥ ॥ देवा ऊचुः ॥ ॥ सृष्टाः सर्वे त्वया मातर्देव्यैतेऽनुचराः शुभाः ॥ त्वत्प्रसादान्महाभागे ब्राह्मणाः सुखिनोऽ भवन् ॥ २२ ॥ ततोऽसौ सुरभी राजन्गता नाकं यशस्विनी ॥ ब्रह्मविष्णुमहेशाद्यास्तत्रैवांतरधुस्ततः ॥ २३ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ अभा र्यास्ते महातेजा गोजा अनुचरास्तथा ॥ उद्वाहिताः कथं ब्रह्मन्सुतास्तेषां कदाऽभवन् ॥ २४ ॥ ॥ व्यास उवाच ॥ ॥ परिग्रहार्थं वै तेषां रुद्रेण च यमेन च ॥ गन्धर्वकन्या आहृत्य दारास्तत्रोपकल्पिताः ॥ २५ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ को वा गन्धर्वराजासौ किंनामा कुत्र वा स्थितः ॥ कियन्मात्रास्तस्य कन्याः किमाचारा ब्रवीहि मे ॥ २६ ॥ ॥ व्यास उवाच ॥ ॥ विश्वावसुरिति ख्यातो गन्धर्वाधिपतिर्नृ प ॥ षष्टिकन्यासहस्राणि आसते तस्य वेश्मनि ॥ २७ ॥ अंतरिक्षे गृहं तस्य गधर्वनगरं शुभम् ॥ यौवनस्थाः सुरूपाश्च कन्या गन्धर्वजाः शुभाः ॥ २८ ॥ रुद्रस्यानुचरौ राजन्नंदी भृंगी शुभाननौ ॥ पूर्वदृष्टाश्च ताः कन्याः कथयामासतुः शिवम् ॥ २९ ॥ दृष्टाः पुरा महादेव गन्धर्वनगरे विभो ॥ विश्वावसुगृहे कन्या असंख्याताः सहस्रशः ॥ ३० ॥ ता आनीय बलादेव गोभुजेभ्यः प्रयच्छ भो ॥ एवं श्रुत्वा ततो देव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यक्षोऽभूद्धर्म्मारण्यसमीपतः ॥ २ ॥ उद्वेजयति नित्यं स धर्मारण्यनिवासिनः ॥ ततस्तैश्च द्विजाग्र्यैस्तु देवेभ्यो विनिवेदितम् ॥ ३ ॥ यक्षरक्षादिना चैव परिभूता वयं सुराः ॥ त्यक्ष्यामोऽद्य वरं स्थानं तद्भयान्नात्र संशयः ॥ ४ ॥ ततो देवैः संगधर्वैः स्थापितास्तत्र भूमिषु ॥ सिद्धाश्च वरयोगिन्यः श्रीमातृप्रभृतयस्तथा ॥ ५ ॥ रक्षणार्थं हि विप्राणां लोकानां हितकाम्यया ॥ गोत्रान्प्रति तथैकैका स्थापिता योगिनी तदा ॥ ६ ॥ यस्य गोत्रस्य या शक्ती रक्षणे पालने क्षमा ॥ सा तस्य कुलदेवीति साक्षात्तत्र बभूव ह ॥ ७ ॥ श्रीमाता तारणी देवी आशापूरी च गोत्रपा ॥ इच्छाऽऽर्तिनाशिनी चैव पिप्पली विकारवशा ॥८॥ जगन्माता महामाता सिद्धा भट्टारिका तथा ॥ कदंबा विकरा मीठा सुपर्णा वसुजा तथा ॥९॥ मातंगी च महादेवी वाणी च मुकुटेश्वरी ॥ भद्री चैव महाशक्तिः संहारी च महाबला॥१०॥चामुंडा च महादेवी इत्येता गोत्रमातरः ॥ब्रह्मविष्णुमहेशाद्यैः स्थापितास्तत्र रक्षणे ॥११॥ ताः पूजयंति विप्रेंद्राः स्वधर्मनिरताः सदा ॥ ततः प्रभृति योगिन्यः स्वेस्वे काले सुरक्षिताः ॥१२॥ वाडवाः स्वस्थतां जग्मुः पुत्रपौत्रैः समावृताः ॥ ततो देवाः सगंधर्वा हर्षनिर्भरमानसाः ॥ विमानवरमारूढा जग्मुर्नाकेऽमृताशनाः ॥ १३ ॥ गते वर्षशते राजन्ब्रह्मविष्णुमहेश्वराः ॥ स्मृत्वा तु धर्मारण्यस्य प्रेक्षणार्थं कुतूहलात् ॥१४॥ समाजग्मुस्तदा राजन्प्रभाते उदिते रवौ ॥ विमानवरमारुह्य अप्सरोगणसेविताः ॥१५॥ गंधर्वैर्गीयमानास्ते स्तूयमानाः प्रबोधकैः ॥ तत्र स्थाने द्विजा राजन्समित्पुष्पकुशान्बहून् ॥१६॥आश्रमांस्तान्परित्यज्य गताः सर्वे दिशो दश ॥ नमश्रमपदं दृष्ट्वा शून्यं चैव महेश्वरः ॥१७॥ उवाच वाक्यं धर्मज्ञो वाडवान्क्विशते विभो ॥ शुश्रूषार्थं हि शुश्रूषून्कल्पयेदिति मे मतिः ॥१८॥ श्रुत्वा तु वचनं शंभोर्देवदेवो जनार्दनः ॥ सत्यंसत्यमिति प्रोच्य ब्रह्माणमिदमब्रवीत् ॥ १९ ॥ भोभो ब्रह्मन्द्विजातीनां शुश्रूषार्थं प्रकल्पय ॥ सृष्टिर्हि शाश्वतीवाद्य द्विजोघोपि सुखी भवेत् ॥ विष्णोर्वाक्यमभिश्रुत्य ब्रह्मालोकपितामहः॥१२०॥संस्मरन्कामधेनुं वै स्मरणेनैव तत्क्षणे॥ अगता तत्र सा धेनुर्धर्मारण्ये पवित्रके ॥ १२१ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे पूर्वार्धे धर्मारण्यमाहात्म्ये गोत्रप्रवरगोत्रदेवीकथनंनाम नवमोऽध्यायः ॥९॥ ॥छ॥ ॥ व्यास उवाच ॥ ॥ शृणु राजन्यथावृत्तं धर्म्मारण्ये शुभं मतम् ॥ यदिदं कथयिष्यामि अशेषाघौघनाशनम् ॥ १ ॥ अजेशेन तदा राजन्प्रेरितेन स्वयंभुवा ॥ कामधेनुः समाहूता कथयामास तां प्रति ॥ २ ॥ विप्रेभ्योऽनुचरान्देहि एकैकस्मै द्विजातये ॥ द्वौ द्वौ शुद्धात्मकौ चैवं देहि मातः प्रसीद मे ॥ ३ ॥ तथेत्युक्त्वा महाधेनुः क्षीरेणोल्लेखयद्धराम् ॥ हुंकारात्तस्य निष्क्रांताः शिखासूत्रधरा नराः ॥ ४ ॥ षट्त्रिंशच्च सहस्राणि वणिजश्च महाबलाः ॥ सोपवीता महादक्षाः सर्वशास्त्रविशारदाः ॥ ५ ॥ द्विजभक्तिसमायुक्ता ब्रह्मण्यास्ते तपोन्विताः ॥ पुराणज्ञाः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

साधवश्च सदाचारा विष्णुभक्तिपरायणाः ॥ ७७ ॥ ह्रस्वकाया भिन्नवर्णा बहुरामा द्विजोत्तमाः ॥ दयालाः सरलाः शांता ब्रह्मभोज्यपरायणाः ॥ ७८ ॥ शौनकसेषु ये जाताः प्रवरत्रयसंयुताः ॥ भार्गवशौनहोत्रेति गार्त्स्यप्रमद इति त्रयः ॥ ७९ ॥ अस्मिन्वंशे समुत्पन्ना वाडवा दुःसहा नृप ॥ महोत्कटा महाकायाः प्रलंबाश्च मदोद्धताः ॥ ८० ॥ क्लेशरूपाः कृष्णवर्णाः सर्वशास्त्रविशारदाः ॥ बहुभुजो मानिनो दक्षा राग द्वेषोपवर्जिताः ॥ ८१ ॥ सुवस्त्रभूषारूपा वै ब्राह्मणा ब्रह्मवादिनः ॥ वसिष्ठगोत्रे ये जाताः प्रवरत्रयसंयुताः ॥ ८२ ॥ वसिष्ठो भारद्वाजश्च इन्द्रप्रमद एव च ॥ अस्मिन्गोत्रे भवा विप्रा वेदवेदांगपारगाः ॥ ८३ ॥ याज्ञिका यज्ञशीलाश्च सुस्वराः सुखिनस्तथा ॥ द्वेषिणो धनवंतश्च पुत्रिणो गुणिनस्तथा ॥ ८४ ॥ विशालहृदया राजञ्छूराः शत्रुनिबर्हणाः ॥ गौतमसगोत्रे ये जाताः प्रवराः पंच एव हि ॥ ८५ ॥ कौत्सगार्ग्योमवाहाश्च असितो देवलस्तथा ॥ अस्मिन्गोत्रे च ये जाता विप्राः परमपावनाः ॥ ८६ ॥ परोपकारिणः सर्वे श्रुतिस्मृति परायणाः ॥ बकासनाश्च कुटिलाश्छद्मवृत्तिपरास्तथा ॥ ८७ ॥ नानाशास्त्रार्थनिपुणा नानाभरणभूषिताः ॥ वृक्षादिकर्मकुशला दीर्घरोषाश्च रोगिणः ॥ ८८ ॥ आंगिरसगोत्रे ये जाताः प्रवरत्रयसंयुताः ॥ आंगिरसोंबरीषश्च यौवनाश्वस्तृतीयकः ॥ ८९ ॥ अस्मिन्गोत्रे च ये जाताः सत्य संभाषिणस्तथा ॥ जितेंद्रियाः सुरूपाश्च अल्पाहाराः शुभाननाः ॥ ९० ॥ महाव्रताः पुराणज्ञा महादानपरायणाः ॥ निर्द्वेषिणो लोभयुता वेदाध्य यनतत्पराः ॥ ९१ ॥ दीर्घदर्शिमहातेजोमहामायाविमोहिताः ॥ शांडिलसगोत्रेये प्रवरत्रयसंयुताः ॥ ९२ ॥ असितो देवलश्चैव शांडिलस्तु तृतीयकः ॥ अस्मिन्गोत्रे महाभागाः कुब्जाश्च द्विजसत्तमाः ॥ ९३ ॥ नेत्ररोगी महादुष्टा महात्यागा अनायुषः ॥ कलहोत्पादने दक्षाः सर्वसंग्रह तत्पराः ॥९४॥ मलिना मानिनश्चैव ज्योतिःशास्त्रविशारदाः ॥ आत्रेयसगोत्रे ये जाताः पंचप्रवरसंयुताः ॥ ९५ ॥ आत्रेयोऽर्चनानसश्यावाश्वोंगिर सोऽत्रिश्च ॥ अस्मिन्वंशे च ये जाता द्विजास्ते सूर्यवर्चसः ॥ ९६ ॥ चंद्रवच्छीतलाः सर्वे धर्मारण्ये व्यवस्थिताः ॥ सदाचारा महादक्षाः श्रुतिशास्त्र परायणाः ॥ ९७ ॥ याज्ञिकाश्च शुभाचाराः सत्यशौचपरायणाः ॥ धर्मज्ञा दानशीलाश्च निर्मलाश्च महोत्सुकाः[1] ॥ ९८ ॥ तपःस्वाध्यायनिरता न्यायधर्मपरायणाः ॥ ९९ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ कथयस्व महाबाहो धर्मारण्यकथामृतम् ॥ यच्छ्रुत्वा मुच्यते पापाद्घोराद्ब्रह्मवधादपि ॥ ॥ १०० ॥ ॥ व्यास उवाच ॥ ॥ शृणु राजन्प्रवक्ष्यामि कथामेतां सुदुर्लभाम् ॥ १ ॥ यक्षरक्षःपिशाचाद्या उद्वेजयंति वाडवान् ॥ जृंभकोनाम

१ मदोत्सुकाः—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्विजा धनपरायणाः ॥ ५१ ॥ क्रोधिनो द्वेषिणश्चैव सर्वसत्त्वभयंकराः ॥ लौगाक्षसोद्भवा ये वै वाडवाः सत्यसंश्रिताः ॥ ५२ ॥ प्रवराश्च त्रयस्तेषां तत्त्वज्ञानस्वरूपकाः ॥ कश्यपश्चैव वत्सश्च वसिष्ठश्च तृतीयकः ॥ ५३ ॥ सदाचारास्तु विख्याता वैष्णवा बहुवृत्तयः ॥ रोमभिर्बहुभिर्व्याप्ताः कृष्णवर्णास्तु वाडवाः ॥ ५४ ॥ शांता दांताः सुशीलाश्च स्वदारनिरताः सदा ॥ कुशिकसगोत्रे ये जाताः प्रवरैस्त्रिभिरन्विताः ॥ ५५ ॥ विश्वामित्रो देवरात औदलश्च त्रयश्च ये ॥ अस्मिन्गोत्रे तु ये ज ाता दुर्बला दीनमानसाः ॥ ५६ ॥ असत्यभाषिणो विप्राः सुरूपा नृपसत्तमाः ॥ सर्व्वविद्याकुशलिनो ब्राह्मणा ब्रह्मसत्तमाः ॥ ५७ ॥ उपमन्युसगोत्रेयाः प्रवरत्रयसंयुताः ॥ वसिष्ठश्च भरद्वाजस्त्विवद्रप्रमद एव वा ॥ ५८ ॥ अस्मिन्गोत्रे तु ये विप्राः क्रूराः कुटिलगामिनः ॥ दूषणा द्वेषिणस्तुच्छाः सर्वसंग्रहतत्पराः ॥ ५९ ॥ कलहोत्पादने दक्षा धनिनो मानिनस्तथा ॥ सर्वदैव प्रदुष्टाश्च दुष्टसंगरतास्तथा ॥ ६० ॥ रोगिणो दुर्बलाश्चैव वृत्त्युपकल्पवर्जिताः ॥ वात्स्यगोत्रे भवा विप्राः प्रवरैः पंचभिर्युताः ॥ ६१ ॥ भार्गवच्यावनाप्नुवानौर्वश्च जमदग्निकः ॥ अस्मिन्गोत्रे भवा विप्राः स्थूलाश्च बहुबुद्धयः ॥ ६२ ॥ सर्वकर्मरताश्चैव सर्वधर्मेषु निश्चलाः ॥ वेदशास्त्रार्थनिपुणा यजने याजने रताः ॥ ६३ ॥ सदाचाराः सुरूपाश्च बुद्धितो दीर्घदर्शिनः ॥ वात्स्यायनसगोत्रेयाः प्रवरैः पंचभिर्युताः ॥ ६४ ॥ भार्गवच्यावनाप्नुवानौर्वश्च जमदग्निकः ॥ पूर्वोक्ताः प्रवराश्चास्य कथितास्तव भारत ॥ ६५ ॥ अस्मिन्गोत्रे तु ये जाता पाकयज्ञरताः सदा ॥ लोभिनः क्रोधिनश्चैव प्रजायन्ते बहुप्रजाः ॥ ६६ ॥ स्नानदानादिनिरताः सर्वदाश्च जितेंद्रियाः ॥ वापीकूपतडागानां कर्तारश्च सहस्रशः ॥ व्रतशीला गुणज्ञाश्च मूर्खा वेदविवर्जिताः ॥ ६७ ॥ कौशिकवंशे ये जाताः प्रवरत्रयसंयुताः ॥ विश्वामित्रोऽघर्मषी च कौशिकश्च तृतीयकः ॥ ६८ ॥ अस्मिन्गोत्रे च ये जाता ब्राह्मणा ब्रह्मवेदिनः ॥ शांता दांताः सुशीलाश्च सर्वधर्मपरायणाः ॥ ६९ ॥ अपुत्रिणस्तथा रूक्षास्तेजोहीना द्विजोत्तमाः ॥ भारद्वाजसगोत्रेयाः प्रवरैः पंचभिर्युताः ॥ ७० ॥ आंगिरसो बार्हस्पत्यो भारद्वाजस्तु सैन्यसः ॥ गार्ग्यश्चेति विज्ञेयाः प्रवराः पंच एव च ॥ ७१ ॥ अस्मिन्गोत्रे च ये जाता वाडवा धनिनः शुभाः ॥ वस्त्रालंकरणोपेता द्विजभक्तिपरायणाः ॥ ७२ ॥ ब्रह्मभोज्यपराः सर्वे सर्वधर्मपरायणाः ॥ काश्यपगोत्रे ये जाताः प्रवरत्रयसंयुताः ॥ ७३ ॥ काश्यपश्चापवत्सारो रैभ्येति विश्रुतास्त्रयः ॥ अस्मिन्गोत्रे भवा विप्रा रक्ताक्षाः क्रूरदृष्टयः ॥ ७४ ॥ जिह्वालौल्यरताः सर्वे सर्वे ते पारमार्थिनः ॥ निर्धना रोगिणश्चैते तस्करानृतभाषिणः ॥ ७५ ॥ शास्त्रार्थवेदिनः सर्वे वेदस्मृतिविवर्जिताः ॥ शुनकेषु च ये जाता विप्रा ध्यानपरायणाः ॥ ७६ ॥ तपस्विनो योगिनश्च वेदवेदांगपारगाः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चतुर्विंशतिगोत्राणि द्विजानां पांडवर्षभ ॥ तेषां शाखाः प्रशाखाश्च पुत्रपौत्रादयस्तथा ॥ २६ ॥ जज्ञिरे बहवः पुत्राः शतशोऽथ सहस्रशः ॥ चतुर्विंशतिमुख्यानां नामानि प्रवदामि ते ॥ द्विजानामृषयः प्रोक्ताः प्रवराणि तथा शृणु ॥ २७ ॥ भारद्वाजस्तथा वत्सः कौशिकः कुश एव च ॥ शांडिल्यः काश्यपश्चैव गौतमश्छांधनस्तथा ॥ २८ ॥ जातूकर्ण्यस्तथा वत्सो वसिष्ठो धारणस्तथा ॥ आत्रेयो भांडिलश्चैव लौकिकाश्च इतः परम् ॥ २९ ॥ कृष्णायनोपमन्युश्च गार्ग्यमुद्गलमौषकाः ॥ पुण्यासनः पराशरः कौडिन्यश्च ततः परम् ॥ ॥ ३० ॥ तथा गान्यासनश्चैव प्रवराणि चतुर्विंशतिः ॥ जामदग्न्यस्य गोत्रस्य प्रवराः पंच एव हि ॥ ३१ ॥ भार्गवश्च्यवनाप्नुवानौर्वश्च जमदग्निकः ॥ पंचैते प्रवरा राजन्विख्याता लोकविश्रुताः ॥३२ ॥ एवं गोत्रसमुत्पन्ना वाडवा वेदपारगाः ॥ द्विजपूजाक्रियायुक्ता नानाक्रतुक्रियापराः ॥ ३३ ॥ गुणेनसंहिता आसन् षट्कर्मनिरताश्च ये ॥ एवंविधा महाभागा नानादेशभवा द्विजाः ॥ ३४ ॥ भामेवसं तृतीयं च प्रवराः पंच एव हि ॥ भार्गवच्च्यावनाप्नुवानौर्वजामदग्न्यसंयुताः ॥ आत्रेयोऽर्चनानसश्च श्यावास्येति तृतीयकः ॥ ३५ ॥ अस्मिन्गोत्रे भवा विप्रा दुष्टाः कुटिलगामिनः ॥ धनिनो धर्मनिष्ठाश्च वेदवेदांगपारगाः ॥३६॥ दानभोगरताः सर्वे श्रौतस्मार्तेषु संमताः ॥ मांडव्यगोत्रे विज्ञेयाः प्रवरैः पंचभिर्युताः ॥३७॥ भार्गवश्च्यावनोऽत्रिश्चाप्नुवानौर्वस्तथैव च ॥ अस्मिन्गोत्रे भवा विप्राः श्रुतिस्मृतिपरायणाः ॥ ३८ ॥ रोगिणो लोभिनो दुष्टा यजने याजने रताः ॥ ब्रह्मक्रियापराः सर्वे मांडव्याः कुरुसत्तम ॥ ३९ ॥ गार्ग्यस्य गोत्रे ये जातास्तेषां तु प्रवरास्त्रयः ॥ अंगिराश्चांबरीषश्च यौवनाश्वस्तृतीयकः ॥ ४० ॥ अस्मिन्गोत्रे समुत्पन्नाः सद्वृत्ताः सत्यभाषिणः ॥ शांताश्च भिन्नवर्णाश्च निर्द्धनाश्च कुचैलिनः ॥ ४१ ॥ संगवात्सल्ययुक्ताश्च वेदशास्त्रेषु निश्चलाः ॥ वत्सगोत्रे द्विजा भूप प्रवराः पंच एव हि ॥ ४२ ॥ भार्गवश्च्यवनाप्नुवानौर्वश्च जमदग्निकः ॥ एभिस्तु पंच विख्याता द्विजा ब्रह्मस्वरूपिणः ॥ ४३ ॥ शांता दांताः सुशीलाश्च धर्मपुत्रैः सुसंयुताः ॥ वेदाध्ययनहीनाश्च कुशलाः सर्वकर्मसु ॥ ४४ ॥ सुरूपाश्च सदाचाराः सर्वधर्मेषु निष्ठिताः॥ दानधर्मरताः सर्वे अन्नदा जलदा द्विजाः ॥ ४५ ॥ दयालवः सुशीलाश्च सर्वभूतहिते रताः ॥ काश्यपा ब्राह्मणा राजन्प्रवरत्रयसंयुताः ॥ ४६ ॥ काश्यपश्चापवत्सारो नैध्रुवश्च तृतीयकः ॥ वेदज्ञा गौरवर्णाश्च नैष्ठिका यज्ञकारकाः ॥ ४७ ॥ प्रियवासा महादक्षा गुरुभक्तिरताः सदा ॥ प्रतिष्ठामानवन्तश्च सर्वभूतहिते रताः ॥ ४८ ॥ यजंते च महायज्ञान्काश्यपेया द्विजातयः॥ धारीणसगोत्रजाश्च प्रवरैस्त्रिभिरन्विताः ॥ ४९ ॥ अगस्तिर्दर्विश्वेताश्च दध्यवाहनसंज्ञकाः ॥ अस्मिन्गोत्रे च ये जाता धर्मकर्मसमाश्रिताः ॥ ५० ॥ कर्मक्रूराश्च ते सर्वे तथैवोदरिणस्तु ते ॥ लंबकर्णा महादंष्ट्रा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तथा ॥ ४२ ॥ कण्डूश्चैव सुनेत्रा च कश्यपाय ददौ तदा ॥ अदित्यां द्वादशादित्याः संजाता हि शुभाननाः ॥ ४३ ॥ सूर्याद्धै धर्मराड् जज्ञे ते
नेदं निर्मितं पुरा ॥ धर्मेण निर्मितं दृष्ट्वा धर्मारण्यमनुत्तमम् ॥ धर्मारण्यमिति प्रोक्तं यन्मया स्कन्द पुण्यदम् ॥ ४४ ॥ ॥ स्कन्द उवाच ॥ ॥
धर्मारण्यस्य चाख्यानं परमं पावनं तथा ॥ श्रोतुमिच्छामि तत्सर्वं कथयस्व महेश्वर ॥ ४५ ॥ ॥ ईश्वर उवाच ॥ ॥ इन्द्राद्याः सकला
देवा अन्वयुर्ब्रह्मणा सह ॥ अहं वै तत्र यास्यामि क्षेत्रं पापनिषूदनम् ॥ ४६ ॥ ॥ स्कन्द उवाच ॥ ॥ अहमप्यागमिष्यामि तं द्रष्टुं शशिशे
खर ॥ ४७ ॥ ॥ सूत उवाच ॥ ॥ ततः स्कन्दस्तथा रुद्रः सूर्यश्चैवानिलोऽनलः ॥ सिद्धाश्चैव सगन्धर्वास्तथैवाप्सरसः शुभाः ॥ ४८ ॥
पिशाचा गुह्यकाः सर्व इन्द्रो वरुण एव च ॥ नागाः सर्वाः समाजग्मुः शुक्रो वाचस्पतिस्तथा ॥ ४९ ॥ ग्रहाः सर्वे सनक्षत्रा वसवोऽष्टौ ध्रुवा
दयः ॥ अंतरिक्षचराः सर्वे ये चान्ये नगवासिनः ॥ ५० ॥ ब्रह्मादयः सुराः सर्वे वैकुण्ठं परया मुदा ॥ मन्त्रणार्थं तदा ब्रह्मा विष्णवेऽमितते
जसे ॥ ५१ ॥ गत्वा तस्मिंश्च वैकुण्ठे ब्रह्मा लोकपितामहः ॥ ध्यात्वा मुहूर्तमाचष्ट विष्णुं प्रति सुहर्षितः ॥ ५२ ॥ ॥ ब्रह्मोवाच ॥ ॥ कृष्ण
कृष्ण महाबाहो कृपालो परमेश्वर ॥ स्रष्टा त्वं चैव हर्ता त्वं त्वमेव जगतः पिता ॥ ५३ ॥ नमस्ते विष्णवे सौम्य नमस्ते गरुडध्वज ॥ नमस्ते कम
लाकांत नमस्ते ब्रह्मरूपिणे ॥ ५४ ॥ नमस्ते मत्स्यरूपाय विश्वरूपाय वै नमः ॥ नमस्ते दैत्यनाशाय भक्तानामभयाय च ॥ ५५ ॥ कंसघ्नाय
नमस्तेस्तु बलदैत्यजिते नमः ॥ ब्रह्मणैवं स्तुतश्चासीत्प्रत्यक्षोऽसौ जनार्दनः ॥ ५६ ॥ पीतांबरो घनश्यामो नागारिकृतवाहनः ॥ चतुर्भुजो महा
तेजाः शंखचक्रगदाधरः ॥ ५७ ॥ स्तूयमानः सुरैः सर्वैः स देवोऽमितविक्रमः ॥ विद्याधरैस्तथा नागैः स्तूयमानश्च सर्वशः ॥ ५८ ॥ उत्तस्थौ स
तदा देवो भास्करामितदीप्तिमान् ॥ कोटिरत्नप्रभाभास्वन्मुकुटादिविभूषितः ॥ ५९ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां
तृतीये ब्रह्मखण्डे पूर्वभागे धर्मारण्यमाहात्म्ये विष्णुसमागमोनामाष्टमोऽध्यायः ॥ ८ ॥ ॥ छ ॥ ॥ व्यास उवाच ॥ ॥ श्रूयतां राजशा
र्दूल पुण्यमाख्यानमुत्तमम् ॥ स्तूयमानो जगन्नाथ इदं वचनमब्रवीत् ॥ १ ॥ ॥ विष्णुरुवाच ॥ ॥ किमर्थमागताः सर्वे ब्रह्माद्याः सुरसत्तमाः॥
पृथिव्यां कुशलं कच्चित्कुतो वो भयमागतम् ॥२॥ ततः प्रोवाच वै दृष्टो ब्रह्मा तं केशवं वचः ॥ न भयं विद्यतेऽस्माकं त्रैलोक्ये सचराचरे ॥३॥
एकविज्ञापनार्थाय आगतोऽहं तवांतिके ॥ तदहं संप्रवक्ष्यामि तदेतच्छृणु मे वचः ॥ ४ ॥ पॅरं तु पूर्वं धर्मेण स्थापितं तीर्थमुत्तमम् ॥ तद्द्रष्टुका

१ परम्—श्रेष्ठम्—इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मोऽहं देव त्वत्प्रसादाज्जनार्दन ॥ ५ ॥ तत्र त्वं देवदेवेश गमने कुरु मानसम् ॥ यथा सत्तीर्थतां याति धर्मारण्यमनुत्तमम् ॥ ६ ॥ विष्णुरुवाच ॥
साधुसाधु महाभाग वर्य्यतां तत्र मा चिरम् ॥ ममापि चित्तं तत्रैव तद्दर्शनेस्ति लालसम् ॥ ७ ॥ ॥ व्यास उवाच ॥ ॥ तार्क्ष्यमारुह्य गोविंद
स्तत्रागाच्छीघ्रमेव हि ॥ ततो धर्मेण ते देवाः सेंद्राः सर्षिगणास्तथा ॥ ८ ॥ ब्रह्मविष्णुमहेशाद्या दृष्टा दूरान्मुमोद च ॥ धर्मराजोपि तान्दृष्ट्वा देवा
न्विष्णुपुरोगमान् ॥ ९ ॥ आगतः स्वाश्रमात्तत्र पूजां प्रगृह्य तत्पुरः ॥ आसनादुत्थितः शीघ्रं सपर्यार्घ्यं प्रगृह्य च ॥ एकैकस्य चकाराथ पूजां चैव
पृथक्पृथक् ॥ १० ॥ चकार पूजां विधिवत्तेषां तत्रार्कनंदनः ॥ आसनेषूपवेश्याथ पूजां कृत्वा गरीयसीम् ॥ ११ ॥ ॥ यम उवाच ॥ ॥
तीर्थरूपमिदं क्षेत्रं प्रसादाद्देवकीसुत ॥ त्वत्तोषविधिना चाद्य कृपया च शिवस्य च ॥ १२ ॥ अद्य मे सफलं जन्म अद्य मे सफलं तपः ॥ अद्य
मे सफलं स्थानं काजेशानां समागमात् ॥ १३ ॥ ॥ व्यास उवाच ॥ ॥ एवं स्तुतस्तदा विष्णुः प्रोवाच मधुरं वचः ॥ तुष्टोऽस्मि धर्म
राजेंद्र अहं स्तोत्रेण ते विभो ॥ १४ ॥ किंचित्प्रार्थय मत्तोऽहं करोमि तव वांछितम् ॥ यत्तेऽस्त्यभीप्सितं तुभ्यं तद्ददामि न संशयः ॥ १५ ॥
यम उवाच ॥ ॥ यदि तुष्टोऽसि देवेश वांछितं कुरुषे यदि ॥ धर्मारण्ये महापुण्ये ऋषीणामाश्रमान्कुरु ॥ १६ ॥ वसंति वाडवा यत्र यजंति चैव
याज्ञिकाः ॥ वेदनिर्घोषसंयुक्तं भाति तत्तीर्थमुत्तमम् ॥ १७ ॥ अब्राह्मणमिदं तीर्थं पीडयिष्यंति जन्तवः ॥ तस्मात्त्वं वाडवाञ्छौरे समानय ऋषी
न्बहून् ॥ धर्मारण्यं यथा भाति त्रैलोक्ये सचराचरे ॥ १८ ॥ ततो विष्णुः सहस्राक्षः सहस्रशीर्षः सहस्रपात् ॥ सहस्रशस्तदा रूपं कृत
वान्धर्मवत्सलः ॥ यस्मिन्स्थाने च ये विप्राः सदाचाराः शुभव्रताः ॥ १९ ॥ अशेषधर्मकुशलाः सर्वशास्त्रविशारदाः ॥ तपोज्ञाने महाख्याता
ब्रह्मयज्ञपरायणाः ॥ स्थापिता ऋषयः सर्वे सहस्राण्यष्टादशैव तु ॥ २० ॥ नानादेशात्समानीय स्थापितास्तत्र तैः सुरैः ॥ आश्रमांश्च
बहूंस्तत्र काजेशैरपि निर्मितान् ॥ २१ ॥ धर्मोपदेशात्[१]कृष्णेन ब्रह्मणा च शिवेन च ॥ स्वेस्वे स्थाने यथायोग्ये स्थापयामास केशवः ॥ २२ ॥
युधिष्ठिर उवाच ॥ ॥ कस्मिन्वंशे समुत्पन्ना ब्राह्मणा वेदपारगाः ॥ स्थापिताः सपरीवाराः पुत्रपौत्रसमावृताः ॥ शिष्यैश्च बहुभिर्युक्ता
अग्निहोत्रपरायणाः ॥ तेषां स्थानानि नामानि यथावच्च वदस्व मे ॥ २३ ॥ ॥ व्यास उवाच ॥ ॥ श्रूयतां नृपशार्दूल
धर्म्मारण्यनिवासिनाम् ॥ २४ ॥ महात्मनां ब्राह्मणानामृषीणामूर्ध्वरेतसाम् ॥ तेषां वै पुत्रपौत्राणां नामानि च वदाम्यहम् ॥ २५ ॥

१ धर्मोपदेशहेतोः—धर्मोपदेशार्थम्—इत्यर्थो बोध्यः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्यादिसुतत्त्वकैः ॥ वृक्षमुत्पादयामासायुतशाखामनोरमम् ॥ १८ ॥ फलैर्विशालैराकीर्णं स्कंधकांडादिशोभितम् ॥ फलौघाढचो जटायुक्तो न्यग्रो
धो विटपो महान् ॥ १९ ॥ बालभावं ततः कृत्वा वासुदेवो जनार्दनः ॥ शेतेऽसौ वटपत्रेषु विश्वं निर्मातुमुत्सुकः ॥ २० ॥ स नाभिकमले विष्णो
र्जातो ब्रह्मा हि लोककृत् ॥ सर्वं जलमयं पश्यन्नानाकारमरूपकम् ॥ २१ ॥ तं दृष्ट्वा सहसोद्वेगाद्ब्रह्मा लोकपितामहः ॥ इदमाह तदा पुत्र किं करो
मीति निश्चितम् ॥ २२ ॥ खे जजान ततो वाणी दैवात्सा चाशरीरिणी ॥ तपस्तप विधे धातर्यथा मे दर्शनं भवेत् ॥ २३ ॥ तच्छ्रुत्वा वचनं तत्र
ब्रह्मा लोकपितामहः ॥ प्रातप्यत तपो घोरं परमं दुष्करं महत् ॥ २४ ॥ प्रहसन्स तदा बालरूपेण कमलापतिः ॥ उवाच मधुरां वाचं कृपालुर्बाल
लीलया ॥ २५ ॥ ॥ श्रीविष्णुरुवाच ॥ ॥ पुत्र त्वं विधिना चाद्य कुरु ब्रह्मांडगोलके ॥ पातालं भूतलं चैव सिंधुसागरकाननम् ॥ २६ ॥
वृक्षाश्च गिरयो द्विपदाः पशवस्तथा ॥ पक्षिणश्चैव गंधर्वाः सिद्धा यक्षाश्च राक्षसाः ॥ २७ ॥ श्वापदाद्याश्च ये जीवाश्चतुराशीतियोनयः ॥ उद्भिज्जाः
स्वेदजाश्चैव जरायुजास्तथांडजाः ॥२८॥ एकविंशतिलक्षाणि एकैकस्य च योनयः ॥ कुरु त्वं सकलं चाशु इत्युक्त्वांतरधीयत ॥ ब्रह्मणा निर्मितं सर्वं
ब्रह्मांडं च यथोदितम् ॥ २९ ॥ यस्मिन्पितामहो जज्ञे प्रभुरेकः प्रजापतिः ॥ स्थाणुः सुरगुरुर्भानुः प्रचेताः परमेष्ठिनः ॥ ३० ॥ यथा दक्षो दक्षपुत्रा
स्तथा सप्तर्षयश्च ये ॥ ततः प्रजानां पतयः प्राभवन्नेकविंशतिः ॥ ३१ ॥ पुरुषश्चाप्रमेयश्च एवं वंश्यर्षयो विदुः ॥ विश्वेदेवास्तथादित्या वसव
श्चाश्विनावपि ॥ ३२ ॥ यक्षाः पिशाचाः साध्याश्च पितरो गुह्यकास्तथा ॥ ततः प्रसूता विद्वांसो ह्यष्टौ ब्रह्मर्षयोऽमलाः ॥ ३३ ॥ राजर्षयश्च बहवः
सर्वे समुदिता गुणैः ॥ द्यौरापः पृथिवी वायुरंतरिक्षं दिशस्तथा ॥ ३४ ॥ संवत्सरार्तवो मासाः पक्षाहोरात्रयः क्रमात् ॥ कलाकाष्ठामुहूर्तादिनिमे
षादिलवास्तथा ॥ ३५ ॥ ग्रहचक्रं सनक्षत्रं युगा मन्वन्तरादयः ॥ यच्चान्यदपि तत्सर्वं संभूतं लोकसाक्षिकम् ॥ ३६ ॥ यदिदं दृश्यते चक्रं किंचि
त्स्थावरजंगमम् ॥ पुनः संक्षिप्यते पुत्र जगत्प्राप्ते युगक्षये ॥ ३७ ॥ यथर्तावृतुलिंगानि नामरूपाणि पर्यये ॥ दृश्यन्ते तानि तान्येव तथा वत्स
युगादिकम् ॥ ३८ ॥ ॥ शिव उवाच ॥ ॥ अतः परं प्रवक्ष्यामि कथां पौराणिकीं शुभाम् ॥ ब्रह्मणश्च तथा पुत्र वंशस्यैवानुकीर्तनम् ॥ ३९ ॥
ब्रह्मणो मानसाः पुत्रा विदिताः षण्महर्षयः ॥ मरीचिरत्र्यंगिरसौ पुलस्त्यः पुलहः क्रतुः ॥ ४० ॥ मरीचेः कश्यपः पुत्रः कश्यपाच्चरमाः प्रजाः ॥
प्रजज्ञिरे महाभागा दक्षकन्यास्त्रयोदश ॥ ४१ ॥ अदितिर्दितिर्दनुः काला दनायुः सिंहिका तथा ॥ क्रोधा प्रोवा[१] वसिष्ठा च विनता कपिला

१ प्रोवा–इति नाम्नी ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

बांधवाः ॥ श्राद्धं कर्तुमशक्तिश्चेच्छाकैरपि हि जायते ॥ ९६ ॥ तस्माच्छ्राद्धं नरो भक्त्या शाकैरपि यथाविधि ॥ कुरुते कुर्वतः श्राद्धं कुलं क्वचिन्न सीदति ॥ ९७ ॥ पापं यदि कृतं सर्वं पापं च वर्द्धते ध्रुवम् ॥ कुर्वाणो नरके घोरे पच्यते नात्र संशयः ॥ ९८ ॥ यथा पुण्यं तथा पापं कृतं कर्म शुभाशुभम् ॥ तत्सर्वं वर्द्धते नूनं धर्मारण्ये नृपोत्तम ॥ ९९ ॥ कामिकं कामदं देवं योगिनां मुक्तिदायकम् ॥ सिद्धानां सिद्धिदं प्रोक्तं धर्मारण्यं तु सर्वदा ॥ १०० ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे पूर्वभागे धर्मारण्यक्षेत्रमाहात्म्ये धर्माचारवर्णनंनाम सप्तमोऽध्यायः ॥ ७ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ धर्मारण्यकथां पुण्यां श्रुत्वा तृप्तिर्न मे विभो ॥ यदायदा कथयसि तदा प्रोत्सहते मनः ॥ अतः परं किमभवत्परं कौतूहलं हि मे ॥ १ ॥ ॥ व्यास उवाच ॥ ॥ शृणु पार्थ महापुण्यां कथां स्कंदपुराणजाम् ॥ स्थाणुनोक्तां च स्कंदाय धर्मारण्योद्भवां शुभाम् ॥ २ ॥ सर्वतीर्थस्य फलदां सर्वोपद्रवनाशिनीम् ॥ कैलासशिखरासीनं देवदेवं जगद्गुरुम् ॥ पंचवक्त्रं दशभुजं त्रिनेत्रं शूलपाणिनम् ॥ ३ ॥ कपालखट्वांगकरं नागयज्ञोपवीतिनम् ॥ गणैः परिवृतं तत्र सुरासुरनमस्कृतम् ॥ ४ ॥ नानारूपगुणैर्गीतं नारदप्रमुखैर्युतम् ॥ गंधर्वैश्चाप्सरोभिश्च सेवितं तमुमापतिम् ॥ तत्रस्थं च महादेवं प्रणिपत्याब्रवीत्सुतः ॥ ५ ॥ ॥ स्कंद उवाच ॥ ॥ स्वामिन्निंद्रादयो देवा ब्रह्माद्याश्चैव सर्वशः ॥ तव द्वारे समायातास्त्वद्दर्शनैकलालसाः ॥ किमाज्ञापयसे देव करवाणि तवाग्रतः ॥ ६ ॥ ॥ व्यास उवाच ॥ स्कंदस्य वचनं श्रुत्वा आसनादुत्थितो हरः ॥ वृषभं न[1] समारूढो गंतुकामोऽभवत्तदा ॥ ७ ॥ गंतुकामं शिवं दृष्ट्वा स्कंदो वाक्यमथाब्रवीत् ॥ ॥ ८ ॥ ॥ स्कंद उवाच ॥ ॥ किं कार्यं देव देवानां यत्त्वमाहूयसे त्वरम् ॥ वृषं त्यक्त्वा कृपासिंधो कृपास्ति यदि मे वद ॥ ९ ॥ देवदानवयुद्धं वा किं कार्यं वा महत्तरम् ॥ १० ॥ ॥ शिव उवाच ॥ ॥ शृणुष्वैकाग्रमनसा येनाहं व्यग्रचेतसः ॥ अस्ति स्थानं महापुण्यं धर्म्मारण्यं च भूतले ॥ ११ ॥ तत्रापि गंतुकामोऽहं देवैः सह षडाननः ॥ १२ ॥ ॥ स्कंद उवाच ॥ ॥ तत्र गत्वा महादेव किं करिष्यसि सांप्रतम् ॥ तन्मे ब्रूहि जगन्नाथ कृत्यं सर्वमशेषतः ॥ १३ ॥ ॥ शिव उवाच ॥ ॥ श्रूयतां वचनं पुत्र मनसोल्हादकारणम् ॥ आदितः सर्व्ववृत्तानां सृष्टिस्थितिकरं महत् ॥ १४ ॥ परंतु प्रलये जाते सर्वतस्तमसा वृतम् ॥ आसीदेकं तदा ब्रह्म निर्गुणं बीजमव्ययम् ॥ १५ ॥ निर्मितं वै गुणैरादौ महद्व्यं प्रचक्ष्यते ॥ १६ ॥ महाकल्पे च संप्राप्ते चराचरे क्षयं गते ॥ जलरूपी जगन्नाथो रममाणस्तु लीलया ॥ १७ ॥ चिरकाले गते सोपि पृथि

[1] वृषभं न समारूढः—वृषभमनारुह्यैव त्वरया—इत्यर्थः ।

CC-0. In Public Domain. Digitization by eGangotri

च ॥ तस्मात्सर्वं परित्यज्य पतिमेकं समर्चयेत् ॥ ४८ ॥ जीवहीनो यथा देही क्षणादशुचितां व्रजेत् ॥ भर्तृहीना तथा योषित्सुस्नाताप्य शुचिः सदा ॥ ४९ ॥ अमंगलेभ्यः सर्वेभ्यो विधवा स्याद मंगला ॥ विधवादर्शनात्सिद्धिः क्वापि जातु न जायते ॥ ५० ॥ विहाय मातरं चैकां सर्वां मंगलवर्जिताः ॥ तदाशिषमपि प्राज्ञस्त्यजेदाशीविषोपमाम् ॥ ५१ ॥ कन्याविवाहसमये वाचयेयुरिति द्विजाः ॥ भर्तुः सहचरी भूयाज्जीवतोऽजीवतोपि वा ॥ ५२ ॥ अनुव्रजन्ती भर्तारं गृहात्पितृवनं मुदा ॥ पदेपदेऽश्वमेधस्य फलं प्राप्नोत्यसंशयम् ॥ ५३ ॥ व्यालग्राही यथा व्यालं बलादुद्धरते बिलात् ॥ एवमुत्क्रम्य दूतेभ्यः[1] पतिं स्वर्गं व्रजेत्सती ॥ ५४ ॥ यमदूताः पलायंते तामालोक्य पतिव्रताम् ॥ तपनस्तप्यते नूनं दहनोपि च दह्यते ॥ ५५ ॥ कंपंते सर्वतेजांसि दृष्ट्वा पातिव्रतं महः ॥ यावत्स्वलोमसंख्यास्ति तावत्कोटयुतानि च ॥ ५६ ॥ भर्त्रा स्वर्गसुखं भुंक्ते रममाणा पतिव्रता ॥ धन्या सा जननी लोके धन्योऽसौ जनकः पुनः ॥ ५७ ॥ धन्यः स च पतिः श्रीमान्येषां गेहे पतिव्रता ॥ पितृवंश्या मातृवंश्याः पतिवंश्यास्त्रयस्त्रयः ॥ पतिव्रतायाः पुण्येन स्वर्गसौख्यानि भुंजते ॥ ५८ ॥ शीलभंगेन दुर्वृत्ताः पातयंति कुलत्रयम् ॥ पितुर्मातुस्तथा पत्युरिहामुत्र च दुःखिताः ॥ ५९ ॥ पतिव्रतायाश्चरणो यत्रयत्र स्पृशेद्भुवम् ॥ सा तीर्थभूमिर्मान्येति नात्र भारोऽस्ति पावनः ॥ ६० ॥ बिभ्यत्पतिव्रतास्पर्शं कुरुते भानुमानपि ॥ सोमो गन्धर्व एवापि स्वपावित्र्याय नान्यथा ॥ ६१ ॥ आपः पतिव्रतास्पर्शमभिलष्यंति सर्वदा ॥ गायत्र्याघविनाशो नो पातिव्रत्येन साऽघनुत् ॥ ६२ ॥ गृहेगृहे न किं नार्यो रूपलावण्यगर्विताः ॥ परं विश्वेशभक्त्यैव लभ्यते स्त्री पतिव्रता ॥ ६३ ॥ भार्या मूलं गृहस्थस्य भार्या मूलं सुखस्य च ॥ भार्या धर्मफलायैव भार्या संतानवृद्धये ॥ ६४ ॥ परलोकस्त्वयं लोको जीयते भार्यया द्वयम् ॥ देवपित्रतिथीनां च तृप्तिः स्याद्भार्यया गृहे ॥ गृहस्थः स तु विज्ञेयो गृहे यस्य पतिव्रता ॥ ६५ ॥ यथा गंगावगाहेन शरीरं पावनं भवेत् ॥ तथा पतिव्रतां दृष्ट्वा सदनं पावनं भवेत् ॥ ६६ ॥ पर्यंकशायिनी नारी विधवा पातयेत्पतिम् ॥ तस्माद्भूशयनं कार्य्यं पतिसौख्यसमीहया ॥ ६७ ॥ नैवांगोद्वर्त्तनं कार्य्यं स्त्रिया विधवया क्वचित् ॥ गन्धद्रव्यस्य संभोगो नैव कार्य्यस्तया क्वचित् ॥ ६८ ॥ तर्प्पणं प्रत्यहं कार्य्यं भर्तुः कुशतिलोदकैः ॥ तत्पितुस्तत्पितुश्चापि नामगोत्रादिपूर्वकम् ॥ ६९ ॥ विष्णोः संपूजनं कार्यं पतिबुद्ध्या न चान्यथा ॥ पतिमेव सदा ध्यायेद्विष्णुरूपधरं हरिम् ॥ ७० ॥ यद्यदिष्टतमं लोके यद्यत्पत्युः समीहितम् ॥ तत्तद्गुणवते देयं पतिप्रीणनकाम्यया ॥ ७१ ॥

१ दूतेभ्यः—यमदूतेभ्यः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वैजाखे कार्त्तिके मासे विशेषनियमांश्चरेत् ॥ स्नानं दानं तीर्थयात्रां पुराणश्रवणं मुहुः ॥ ७२ ॥ वैशाखे जलकुम्भाश्च कार्त्तिके घृतदीपिकाः ॥ माघे धान्यतिलोत्सर्गः स्वर्गलोके विशिष्यते ॥ ७३ ॥ प्रपा कार्या च वैशाखे देवे देया गलंतिका ॥ उंशीरं व्यजनं छत्रं सूक्ष्मवासांसि चंदनम् ॥ ॥७४॥ सकर्पूरं च तांबूलं पुष्पदानं तथैव च ॥ जलपात्राण्यनेकानि तथा पुष्पगृहाणि च ॥ ७५ ॥ पानानि च विचित्राणि द्राक्षारंभाफलानि च ॥ देयानि द्विजमुख्येभ्यः पतिर्मे प्रीयतामिति ॥७६॥ ऊर्ज्जे यवान्नमश्नीयादेकान्नमथवा पुनः॥वृन्ताकं सूरणं चैव शूकशिंबीं च वर्जयेत्॥७७॥ कार्त्तिके वर्ज्जयेत्तैलं कांस्यं चापि विवर्जयेत् ॥ कार्त्तिके मौननियमे चारुघण्टां प्रदापयेत् ॥ ७८ ॥ पत्रभोजी कांस्यपात्रं घृतपूर्णं प्रयच्छति ॥ भूमिशय्याव्रते देया शय्या श्लक्ष्णा सतूलिका ॥७९॥ फलत्यागे फलं देयं रसत्यागे च तद्रसः ॥ धान्यत्यागे च तद्धान्यमथवा शालयः स्मृताः ॥ धेनुं दद्यात्प्रयत्ने न सालंकारां सकांचनाम् ॥८०॥ एकतः सर्वदानानि दीपदानं तथैकतः ॥ कार्त्तिके दीपदानस्य कलां नार्हंति षोडशीम् ॥८१॥ इत्यादिविधवानां च नियमाः संप्रकीर्तिताः ॥ तेषां फलमिदं राजन्नान्येषां च कदाचन ॥ ८२ ॥ धर्मवापीं समासाद्य दानं दद्याद्विचक्षणः ॥ कोटिधा वर्द्धते नित्यं ब्रह्मणो वचनं यथा ॥ ८३ ॥ तिलधेनुं च यो दद्याद्धर्मेश्वरपुरःस्थितः ॥ तिलसंख्यानि वर्षाणि स्वर्गे लोके महीयते ॥ ८४ ॥ धर्मक्षेत्रे तु संप्राप्य श्राद्धं कुर्यादतंद्रितः ॥ तस्य संवत्सरं यावत्तृप्ताः स्युः पितरो ध्रुवम् ॥ ८५ ॥ ये चान्ये पूर्वजाः स्वर्गे ये चान्ये नरकौकसः ॥ ये च तिर्यक्त्वसा पन्ना ये च भूतादिसंस्थिताः ॥ ८६ ॥ तान्सर्वान्धर्मकूपे वै श्राद्धं कुर्याद्यथाविधि ॥ अत्र प्रकिरणं यत्तु मनुष्यैः क्रियते भुवि ॥ तेन ते तृप्ति मायांति ये पिशाचत्वमागताः ॥ ८७ ॥ येषां तु स्नानवस्त्रोत्थं भूमौ पतति पुत्रक ॥ तेन ये तरुतां प्राप्तास्तेषां तृप्तिः प्रजायते ॥ ८८ ॥ या वै यवानां कणिकाः पतंति धरणीतले ॥ ताभिराप्यायनं तेषां ये तु देवत्वमागताः ॥ ८९ ॥ उद्धृतेष्वथ पिंडेषु यावान्नकणिका भुवि ॥ ताभिरा प्यायनं तेषां ये च पातालमागताः ॥ ९० ॥ ये वा वर्णाश्रमाचारक्रियालोपा ह्यसंस्कृताः ॥ विपन्नास्ते भवंत्यत्र संमार्जनजलाशिनः ॥ ९१ ॥ भुक्त्वा चाचमनं यच्च जलं पतति भूतले ॥ ब्राह्मणानां तथैवान्ये तेन तृप्तिं प्रयांति वै ॥ ९२ ॥ एवं यो यजमानश्च यच्च तेषां द्विजन्मनाम् ॥ क्वचिज्जलान्नविक्षेपः शुचिरस्पृष्ट एव च ॥ ९३ ॥ ये चान्ये नरके जातास्तत्र योन्यंतरं गताः ॥ प्रयांत्याप्यायनं वत्स सम्यक्छ्राद्धक्रियावताम् ॥ ॥ ९४ ॥ अन्यायोपार्जितैर्द्रव्यैः श्राद्धं यत्क्रियते नरैः ॥ तृप्यंति तेन चण्डालपुल्कसादिषु योनिषु ॥ ९५ ॥ एवमाप्यायिता वत्स तेन चानेक

१ दातव्याः—इति शेषः । उभयत्रान्वयः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

येत् ॥ २६ ॥ स्ववाक्यं श्रावयेन्नापि यावत्स्नात्वा न शुध्यति ॥ सुस्नाता भर्तृवदनमीक्षेतान्यस्य न क्वचित् ॥ अथवा मनसि ध्यात्वा पतिं भानुं विलोकयेत् ॥२७॥ हरिद्रां कुंकुमं चैव सिंदूरं कज्जलं तथा ॥ कूर्पासकं च तांबूलं मांगल्याभरणं शुभम् ॥ २८ ॥ केशसंस्कारकं चैव करकर्णादिभूषणम् ॥ भर्तुरायुष्यमिच्छंती दूरयेन्न पतिव्रता ॥ २९ ॥ भर्तृविद्वेषिणीं नारीं नैषा संभाषते क्वचित् ॥ नैकाकिनी क्वचिद्भूयान्न नग्ना स्नाति च क्वचित् ॥३०॥ नोलूखले न मुशले न वर्द्धन्यां दृषद्यपि ॥ न यंत्रके न देहल्यां सती चोपविशेत्क्वचित् ॥ ३१ ॥ विना व्यवायसमयात्प्रागल्भ्यं न क्वचिच्चरेत् ॥ यत्रयत्र रुचिर्भर्तुस्तत्र प्रेमवती सदा ॥ ३२ ॥ इदमेव व्रतं स्त्रीणामयमेव परो वृषः ॥ इयमेव च पूजा च भर्तुर्वाक्यं न लंघयेत् ॥ ॥ ३३ ॥ क्लीबं वा दुरवस्थं वा व्याधितं वृद्धमेव वा ॥ सुस्थिरं दुःस्थिरं वापि पतिमेकं न लंघयेत् ॥ ३४ ॥ सर्पिर्लणहिंग्वादिक्षयेऽपि च पतिव्रता ॥ पतिं नास्तीति न[1] ब्रूयादायसीषु[2] न भोजयेत् ॥ ३५ ॥ तीर्थस्नानार्थिनी चैव पतिपादोदकं पिबेत् ॥ शंकरादपि वा विष्णोः पतिरेवाधिकः स्त्रियः ॥ ३६ ॥ व्रतोपवासनियमं पतिमुल्लंघ्य या चरेत् ॥ आयुष्यं हरते भर्तुर्मृता निरयमृच्छति ॥ ३७ ॥ उक्ता प्रत्युत्तरं दद्यान्नारी या क्रोधतत्परा ॥ सरमा जायते ग्रामे शृगाली निर्जने वने ॥ ३८ ॥ स्त्रीणां हि परमश्चैको नियमः समुदाहृतः ॥ अभ्यर्च्य चरणौ भर्तुर्भोक्तव्यं कृतनिश्चया ॥ ३९ ॥ उच्चासनं न सेवेत न व्रजेत्परवेश्मसु ॥ तत्र पारुष्यवाक्यानि ब्रूयान्नैव कदाचन ॥४०॥ गुरूणां सन्निधौ वापि नोच्चैर्ब्रूयान्नवाहयेत् ॥ ४१ ॥ या भर्तारं परित्यज्य रहश्चरति दुर्मतिः ॥ उलूकी जायते क्रूरा वृक्षकोटरशायिनी ॥ ४२ ॥ ताडिता ताडयेच्चेत्तं सा व्याघ्री वृषदंशिका ॥ कटाक्षयति याऽन्यं वै केकराक्षी तु सा भवेत् ॥ ४३ ॥ या भर्तारं परित्यज्य मिष्टमश्नाति केवलम् ॥ ग्रामे सा सूकरी भूयाद्वल्गुली वाथ विड्भुजा ॥ ४४ ॥ हुन्त्वंकृत्याप्रियं ब्रूते मूका सा जायते खलु ॥ या सपत्नीं सदेर्ष्येत दुर्भगा सा पुनःपुनः ॥ दृष्टिं विलुप्य भर्तुर्या कंचिदन्यं समीक्षते ॥ ४५ ॥ काणा च विमुखा वापि कुरूपापि च जायते ॥ बाह्यादायांतमालोक्य त्वरिता च जलासनैः ॥ तांबूलैर्व्यजनैश्चैव पादसंवाहनादिभिः ॥ ४६ ॥ तथैव चारुवचनैः स्वेदसंनोदनैः परैः ॥ या प्रियं प्रीणयेत्प्रीता त्रिलोकी प्रीणिता तया ॥ मितं ददाति हि पिता मितं भ्राता सुतं सुतः ॥ ४७ ॥ अमितस्य हि दातारं भर्तारं का न पूजयेत् ॥ भर्ता देवो गुरुर्भर्ता धर्मतीर्थव्रतानि

१ न ब्रूयात्—सिद्धायां पाकक्रियायां न ब्रूयाद्भोजनसमय एव पाकः क्रियातः प्राक्—भोजनोत्तरं च ब्रूयादेव । अन्यथा तदानयनं न स्यात्—इति तत्त्वार्थः । २ आयसीषु—लोहपात्रीषु—न भोजयेत् अन्नं न परिविष्यात्—इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सदाचारलक्षणवर्णनंनाम षष्ठोऽध्यायः ॥ ६ ॥ ॥ छ ॥ ॥ व्यास उवाच ॥ ॥ संप्राप्य धर्मवाप्यां च यः कुर्यात्पितृतर्पणम् ॥ तृप्तिं प्रयांति
पितरो यावदिंद्राश्चतुर्दश ॥ १ ॥ पितरश्चात्र पूज्याश्च स्वर्गता ये च पूर्वजाः ॥ पिंडांश्च निर्वपेत्तेषां प्राप्येमां मुक्तिदायिकाम् ॥ २ ॥ त्रेतायां पंच
दिवसैर्द्वापरे त्रिदिनेन तु ॥ एकचित्तेन यो विप्राः पिंडं दद्यात्कलौ युगे ॥ ३ ॥ लोलुपा मानवा लोके संप्राप्ते तु कलौ युगे ॥ परदाररता लोकाः
स्त्रियोऽतिचपलाः पुनः॥४॥परद्रोहरताः सर्वे नरनारीनपुंसकाः॥परनिन्दापरा नित्यं परच्छिद्रोपदर्शकाः॥५॥परोद्वेगकरा नूनं कलहा मित्रभेदिनः॥
सर्वे ते शुद्धतां यांति काजेशाः स्वयमब्रुवन् ॥६॥ एतदुक्तं महाभाग धर्मारण्यस्य वर्णनम् ॥ फलं चैवात्र सर्वं हि यदुक्तं शूलपाणिना ॥ ७ ॥ वाङ्मनः
कायशुद्धाश्च परदारपराङ्मुखाः ॥ अद्रोहाश्च समाः क्रुद्धा मातापितृपरायणाः ॥ ८ ॥ अलौल्या लोभरहिता दानधर्मपरायणाः ॥ आस्तिकाश्चैव
धर्मज्ञाः स्वामिभक्तिरताश्च ये ॥ ९ ॥ पतिव्रता तु या नारी पतिशुश्रूषणे रता ॥ अहिंसका आतिथेयाः स्वधर्मनिरताः सदा ॥ १० ॥ ॥ शौनक
उवाच ॥ ॥ शृणु सूत महाभाग सर्वधर्मविदांवर ॥ गृहस्थानां सदाचारः श्रुतश्च त्वन्मुखान्मया ॥ ११ ॥ एकं मनेप्सितं मेद्य तत्कथयस्व
सूतज ॥ पतिव्रतानां सर्वासां लक्षणं कीदृशं वद ॥ १२ ॥ ॥ सूत उवाच ॥ ॥ पतिव्रता गृहे यस्य सफलं तस्य जीवनम् ॥ यस्यांगच्छा
यया तुल्या यत्कथा पुण्यकारिणी ॥ १३ ॥ पतिव्रतास्त्वरुंधत्या सावित्र्याप्यनसूयया ॥ शांडिल्या चैव सत्या च लक्ष्म्या च शतरूपया ॥
॥ १४ ॥ मेनया च सुनीत्या च संज्ञया स्वाहया समाः ॥ पतिव्रतानां धर्मा हि मुनिना च प्रकीर्तिताः ॥ १५ ॥ भुंक्ते भुक्ते स्वामिनि च तिष्ठ
ति त्वनुतिष्ठति ॥ विनिद्रिते या निद्राति प्रथमं परिबुध्यति ॥ १६ ॥ अनलंकृतमात्मानं देशांते भर्तरि स्थिते ॥ कार्यार्थं प्रोषिते क्वापि सर्वत्रमंड
नवर्जिता ॥ १७ ॥ भर्तुर्नाम न गृह्णाति ह्यायुषोऽस्य हि वृद्धये ॥ पुरुषांतरनामापि न गृह्णति कदाचन ॥ १८ ॥ आक्रुष्टापि च नाक्रोशेत्ताडितापि
प्रसीदति ॥ इदं कुरु कृतं स्वामिन्मन्यतामिति वक्ति च ॥ १९ ॥ आहूता गृहकार्याणि त्यक्त्वा गच्छति सत्वरम् ॥ किमर्थं व्याहृता नाथ स
प्रसादो विधीयताम् ॥ २० ॥ न चिरं तिष्ठति द्वारि न द्वारमुपसेवते ॥ अदातव्यं स्वयं किंचित्कर्हिचिन्न ददात्यपि ॥ २१ ॥ पूजोपकरणं सर्वम
नुक्ता साधयेत्स्वयम् ॥ नियमोदकबर्हींषि यत्र पुष्पाक्षतादिकम् ॥ २२ ॥ प्रतीक्षमाणा च वरं यथाकालोचितं हि यत् ॥ तदुपस्थापयेत्सर्वमनुद्वि
ग्नातिहृष्टवत् ॥२३॥ सेवते भर्त्तुरुच्छिष्टमिष्टमन्नं फलादिकम् ॥ दूरतो वर्ज्जयेदेषा समाजोत्सवदर्शनम् ॥ २४ ॥ न गच्छेत्तीर्थयात्रादिविवाहप्रेक्षणा
दिषु ॥ सुखसुप्तं सुखासीनं रममाणं यदृच्छया ॥ २५ ॥ अंतरायेऽपि कार्येषु पतिं नोत्थापयेत्क्वचित् ॥ स्त्रीधर्मिणी त्रिरात्रं तु स्वमुखं नैव दर्श

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्धीयते विप्रः शूद्रो धर्म्माच्च हीयते ॥ ७९ ॥ आताडनं कराभ्यां च क्रोशनं केशलुंचनम् ॥ अशास्त्रवर्तनं भूयो लुब्धात्कृत्वा प्रतिग्रहम् ॥ ८० ॥ ब्राह्मणः स च वै याति नरकानेकविंशतिम् ॥ अकालमेघस्तनिते वर्षतौ पांसुवर्षणे ॥ ८१ ॥ महाबालध्वनौ रात्रावनध्यायाः प्रकीर्तिताः ॥ उल्कापाते च भूकंपे दिग्दाहे मध्यरात्रिषु ॥ ८२ ॥ संध्ययोर्वृषलोपान्ते राज्यहारे च सूतके ॥ दशाष्टकासु भूतायां श्राद्धाहे प्रतिपद्यपि ॥८३॥ पूर्णिमायां तथाष्टम्यां विड्वरे राष्ट्रविप्लवे ॥ उपाकर्मणि चोत्सर्गे कल्पादिषु युगादिषु ॥८४॥ आरण्यकमधीत्यापि बाणसाम्नोरपि ध्वनौ ॥ अनध्यायेषु चैतेषु चाधीयीत न वै क्वचित् ॥८५॥ भूताष्टम्योः पञ्चदश्योर्ब्रह्मचारी सदा भवेत् ॥ अनायुष्यकरं चेह परदारोपसर्पणम् ॥ तस्मात्तद्दूरतस्त्याज्यं वैरिणां चोपसेवनम् ॥ ८६ ॥ पूर्वर्द्धिभिः परित्यक्तमात्मानं नावमानयेत् ॥ सदोद्यमवतां यस्माच्छ्रियो विद्या न दुर्लभाः ॥ ॥ ८७ ॥ सत्यं ब्रूयात्प्रियं ब्रूयान्न ब्रूयात्सत्यमप्रियम् ॥ प्रियं च नानृतं ब्रूयादेष धर्मो विधीयते ॥ ८८ ॥ वाचोवेगं मनोवेगं जिह्वावेगं च वर्जयेत् ॥ गुह्यजान्यपि लोमानि तत्स्पर्शादशुचिर्भवेत् ॥ ८९ ॥ पादधौतोदकं मूत्रमुच्छिष्टान्युदकानि च ॥ निष्ठीवनं च श्लेष्माणं गृहाद्दूरं विनिःक्षिपेत् ॥ ९० ॥ अहर्न्निशं श्रुतेर्जाप्याच्छौचाचारनिषेवणात् ॥ अद्रोहवत्या बुद्ध्या च पूर्वजन्म स्मरेद्द्विजः ॥ ९१ ॥ वृद्धान्प्रयत्नाद्वंदेत दद्यात्तेषां स्वमासनम् ॥ विनम्रकन्धरो भूयादनुयायात्ततश्च तान् ॥ ९२ ॥ श्रुतिभूदेवदेवानां नृपसाधुतपस्विनाम् ॥ पतिव्रतानां नारीणां निन्दां कुर्यान्न कर्हिचित् ॥ ९३ ॥ उद्धृत्य पञ्चमृत्पिंडान्स्नायात्परजलाशये ॥ श्रद्धया पात्रमासाद्य यत्किंचिद्दीयते वसु ॥ ९४ ॥ देशे काले च विधिना तदानंत्याय कल्पते ॥ भूप्रदो मण्डलाधीशः सर्वत्र सुखितोऽन्नदः ॥ ९५ ॥ तोयदाता सुरूपः स्यात्पुष्टश्चान्नप्रदो भवेत् ॥ प्रदीपदो निर्मलाक्षो गोदातार्यमलोकभाक् ॥९६॥ स्वर्णदाता च दीर्घायुस्तिलदः स्याच्च सुप्रजः ॥ वेश्मदोऽत्युच्चसौधेशो वस्त्रदश्चन्द्रलोकभाक् ॥९७॥ हयप्रदो दिव्यदेहो लक्ष्मीवान्वृषभप्रदः॥ सुभार्यः शिबिकादाता सुपर्यंकप्रदोऽपि च ॥९८॥ श्रद्धया प्रतिगृह्णाति श्रद्धया यः प्रयच्छति ॥ स्वर्गिणौ तावुभौ स्यातां पततोऽश्रद्धया त्वधः ॥९९॥ अनृतेन क्षरेद्यज्ञस्तपो विस्मयतः क्षरेत् ॥ क्षरेत्कीर्तिर्विना दानमायुर्विप्रापमानतः ॥१००॥ गंधं पुष्पं कुशा गावः शाकं मांसं पयो दधि ॥ मणिमत्स्यगृहं धान्यं ग्राह्यमेतदुपस्थितम् ॥१०१॥ मधूदकं फलं मूलमेधांस्यभयदक्षिणा ॥ अभ्युद्यतानि ग्राह्याणि त्वेतान्यपि निकृष्टतः॥१०२॥ दासनापितगोपालकुलमित्रार्द्धसीरिणः ॥ भोज्यान्नाः शूद्रवर्गेमी तथात्मविनिवेदकः ॥१०३॥ इत्थमाचारधर्मोयं धर्मारण्यनिवासिनाम् ॥ श्रुतिस्मृत्युक्तधर्मोऽयं युधिष्ठिर निवेदितः ॥ १०४ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे पूर्वभागे धर्मारण्यमाहात्म्ये

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्प्रदक्षिणम् ॥ ५४ ॥ रजस्वलां न सेवेत नाश्नीयात्सह भार्यया ॥ एकवासा न भुञ्जीत न भुञ्जीतोत्कटासने ॥ ५५ ॥ नाशुचिं स्त्रियमीक्षेत तेजस्कामो द्विजोत्तमः ॥ असंतर्प्य पितॄन्देवान्नाद्यादन्नं च कुत्रचित् ॥५६॥ पक्वान्नं चापि नो मांसं दीर्घकालं जिजीविषुः ॥ न मूत्रणं व्रजे कुर्यान्न वल्मीके न भस्मनि ॥ ५७ ॥ न गर्त्तेषु ससत्त्वेषु न तिष्ठन्न व्रजन्नपि ॥ ब्राह्मणं सूर्यमग्निं च चंद्रऋक्षगुरूनपि ॥ ५८ ॥ अभिपश्यन्न कुर्वीत मलमूत्रविसर्जनम् ॥ मुखेनोपधमेन्नाग्निं नग्नां नेक्षेत योषितम् ॥ ५९ ॥ नांघ्री प्रतापयेदग्नौ न वस्तु अशुचि क्षिपेत् ॥ प्राणिहिंसां न कुर्वीत नाश्नीयात्संध्ययोर्द्वयोः ॥ ६० ॥ न संविशेच्च संध्यायां प्रातः सायं क्वचिद्बुधः ॥ नाचक्षीत धयंतीं गां नेंद्रचापं प्रदर्शयेत् ॥ ६१ ॥ नैकः सुप्यात्क्वचिच्छून्ये न शयानं प्रबोधयेत् ॥ पंथानं नैकलो यायान्न वार्य्यंजलिना पिबेत् ॥ ६२ ॥ न दिवोद्धृतसारं च भक्षयेद्दधि नो निशि ॥ स्त्रीधर्मिणीं नाभिवदेन्नाद्यादातृप्ति रात्रिषु ॥ ६३ ॥ तौर्यत्रिकप्रियो न स्यात्कांस्ये पादौ न धावयेत् ॥ श्राद्धं कृत्वा परश्राद्धे योऽश्नीयाज्ज्ञानवर्जितः ॥ ६४ ॥ दातुः श्राद्धफलं नास्ति भोक्ता किल्बिषभुग्भवेत् ॥ न धारयेदन्यभुक्तं वासश्चोपानहावपि ॥ ६५ ॥ न भिन्नभाजनेऽश्नीयान्नासीताग्न्यादिदूषिते ॥ आरोहणं गवां पृष्ठे प्रेतधूमं सरित्तटम् ॥ ६६ ॥ बालातपं दिवास्वापं त्यजेद्दीर्घं जिजीविषुः ॥ स्नात्वा न मार्जयेद्गात्रं विसृजेन्न शिखां पथि ॥ ॥ ६७ ॥ हस्तौ शिरो न धुनुयान्नाकर्षेदासनं पदा ॥ करेण नो मृजेद्गात्रं स्नानवस्त्रेण वा पुनः ॥ ६८ ॥ शुनोच्छिष्टं भवेद्गात्रं पुनः स्नानेन शुध्यति ॥ नोत्पाटयेल्लोमनखं दशनेन कदाचन ॥ ६९ ॥ करजैः करजच्छेदं विवर्जयेच्छुभाय तु ॥ यदायत्यां त्यजेत्तन्न कुर्यात्कर्म प्रयत्नतः ॥ ॥ ७० ॥ अद्वारेण न गन्तव्यं स्ववेश्मापि कदाचन ॥ क्रीडेन्नाज्ञैः[1] सहासीत न धर्म्मघ्नैर्न रोगिभिः ॥ ७१ ॥ न शयीत क्वचिन्नग्नः पाणौ भुंजीत नैव च ॥ आर्द्रपादकरास्योऽश्नन्दीर्घकालं न जीवति ॥ ७२ ॥ संविशेन्नार्द्रचरणो नोच्छिष्टः क्वचिदाव्रजेत् ॥ शयनस्थो न चाश्नीयान्न पिबेच्च जलं द्विजः ॥ ७३ ॥ सोपानत्को नोपविशेन्न जलं चोत्थितः पिबेत् ॥ सर्व्वमम्लमयं नाद्यादारोग्यस्याभिलाषुकः ॥ ७४ ॥ न निरीक्षेत विण्मूत्रे नोच्छिष्टः संस्पृशेच्छिरः ॥ नाधितिष्ठेत्तुषांगारभस्मकेशकपालिकाः ॥ ७५ ॥ पतितैः सह संवासः पतनायैव जायते ॥ दद्यादूर्ध्वासनं मंचं न शूद्राय कदाचन ॥ ७६ ॥ ब्राह्मण्याद्धीयते विप्रः शूद्रो धर्माच्च हीयते ॥ धर्मोपदेशः शूद्राणां स्वश्रेयः प्रतिघातयेत् ॥ ७७ ॥ द्विजशुश्रूषणं धर्म्मः शूद्राणां हि परो मतः ॥ कण्डूयनं हि शिरसः पाणिभ्यां न शुभं मतम् ॥ ७८ ॥ आदिशेद्वैदिकं मंत्रं न शूद्राय कदाचन ॥ ब्राह्मण्या

१ अज्ञैः--क्रीडानभिज्ञैः--इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्षसो निन्दितः सताम् ॥ २९ ॥ छलेन कन्याहरणात्पैशाचो गर्हितोऽष्टमः ॥ प्रायः क्षत्रविशोरुक्ता गांधर्वासुरराक्षसाः ॥ ३० ॥ अष्टमस्त्वेष पापिष्ठः पापिष्ठानां च संभवः ॥ सवर्णया करो ग्राह्यो धार्यः क्षत्रियया शरः ॥ ३१ ॥ प्रतोदो वैश्यया धार्यो वासोंतः[1] शूद्रया तथा ॥ असवर्णास्त्वेष विधिः स्मृतौ दृष्टश्च वेदने ॥ ३२ ॥ सवर्णाभिस्तु सर्वाभिः पाणिर्ग्राह्यस्त्वयं विधिः ॥ धर्म्ये विवाहे जायंते धर्म्याः पुत्राः शतायुषः ॥ ३३ ॥ अधर्म्याद्धर्म्मरहिता मंदभाग्यधनायुषः ॥ कृतकालाभिगमने धर्मोयं गृहिणः परः ॥३४॥ स्त्रीणां वरमनुस्मृत्य यथाकाम्यथवा भवेत् ॥ दिवाभिगमनं पुंसामनायुष्यं परं मतम् ॥ ३५ ॥ श्राद्धाहः सर्वपर्वाणि न गंतव्यानि धीमता ॥ तत्र गच्छन्स्त्रियं मोहाद्धर्मात्प्रच्यवते परात् ॥ ३६ ॥ ऋतुकालाभिगामी यः स्वदारनिरतश्च यः ॥ स सदा ब्रह्मचारी हि विज्ञेयः स गृहाश्रमी ॥ ३७ ॥ आर्षे विवाहे गोद्वंद्वं यदुक्तं तत्र शस्यते ॥ शुल्कमण्वपि कन्यायाः कन्याविक्रयपापकृत् ॥ ३८ ॥ अपत्यविक्रयात्कल्पं वसेद्विट्कृमिभोजने ॥ अतो नाण्वपि कन्याया उपजीव्यं नरैर्धनम् ॥ ३९ ॥ तत्र तुष्टा महालक्ष्मीर्निवसेद्दानवारिणा ॥ वाणिज्यं नीचसेवा च वेदानध्ययनं तथा ॥ ४० ॥ कुविवाहः क्रियालोपः कुले पतनहेतवः ॥ कुर्याद्वैवाहिके चाग्नौ गृह्यकर्म्मान्वहं गृही ॥ ४१ ॥ पञ्चयज्ञक्रियां चापि पक्तिं दैनंदिनीमपि ॥ गृहस्थाश्रमिणः पञ्चसूनाकर्म दिनेदिने ॥ ४२ ॥ कुण्डनी पेषणी चुल्ली ह्युदकुम्भी तु मार्जनी ॥ तासां च पंचसूनानां निराकरणहेतवः ॥ ऋतवः पंच निर्दिष्टा गृहिश्रेयोभिवर्द्धनाः ॥ ४३ ॥ पठनं ब्रह्मयज्ञः स्यात्तर्पणं च पितृक्रतुः ॥ होमो दैवो बलिर्भौत आतिथ्यं नृक्रतुः क्रमात् ॥ ४४ ॥ वैश्वदेवांतरे प्राप्तः सूर्योढो वातिथिः स्मृतः ॥ अतिथेरादितोप्येते भोज्या नात्र विचारणा ॥ ४५ ॥ पितृदेवमनुष्येभ्यो दत्त्वाश्नात्यमृतं गृही ॥ अदत्त्वान्नं च यो भुंक्ते केवलं स्वोदरंभरिः ॥ ४६ ॥ वैश्वदेवेन ये हीना आतिथ्येन विवर्जिताः ॥ सर्वे ते वृषला ज्ञेयाः प्राप्तवेदा अपि द्विजाः ॥४७॥ अकृत्वा वैश्वदेवं तु भुञ्जंते ये द्विजाधमाः ॥ इह लोकेन्नहीनाः स्युः काकयोनिं व्रजंत्यथो ॥ ४८॥ वेदोक्तं विदितं कर्म्म नित्यं कुर्यादतंद्रितः ॥ यदि कुर्याद्यथाशक्ति प्राप्नुयात्सद्गतिं पराम् ॥ ४९ ॥ षष्ठचष्टम्योर्वसेत्पापं तैले मांसे सदैव हि ॥ चतुर्दश्यां पञ्चदश्यां तथैव च क्षुरे भगे ॥ ५० ॥ उदयन्तं न वीक्षेत नास्तं यंतं न मस्तके ॥ न राहुणोपस्पृष्टं च नांडस्थं वीक्षयेद्रविम् ॥५१॥ न वीक्षेतात्मनो रूपमप्सु धावेन्न कर्दमे ॥ न नग्नां स्त्रियमीक्षेत न नग्नो जलमाविशेत् ॥५२॥ देवतायतनं विप्रं धेनुं मधु मृदं तथा ॥ जातिवृद्धं वयोवृद्धं विद्यावृद्धं तथैव च ॥५३॥ अश्वत्थं चैत्यवृक्षं च गुरुं जलभृतं घटम् ॥ सिद्धान्नं दधि सिद्धार्थं गच्छन्कुर्या

[1] वासोंतः--वस्त्रांतभाग--इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रतिष्ठितं विश्वं विश्वहेतुश्च या मता ॥ ५ ॥ ऋक्पृष्ठासौ यजुःसंध्या सामकुक्षिपयोधरा ॥ इष्टापूर्तविषाणा च साधुसूक्ततनूरुहा ॥ ६ ॥ शांति
पुष्टिशकृन्मूत्रा वर्णपादप्रतिष्ठिता ॥ उपजीव्यमाना जगतां पदक्रमजटाघनैः ॥ ७ ॥ स्वाहाकारस्वधाकारौ वषट्कारश्च पुत्रक ॥ हन्तकारस्तथै
वान्यस्तस्याः स्तनचतुष्टयम् ॥ ८ ॥ स्वाहाकारस्तनं देवाः पितरश्च स्वधामयम् ॥ मुनयश्च वषट्कारं देवभूतसुरेश्वराः ॥ ९ ॥ हन्तकारं मनुष्याश्च
पिबंति सततं स्तनम् ॥ एवमध्यापयेदेव वेदानां प्रत्यहं त्रयीम् ॥ १० ॥ तेषामुच्छेदकर्त्ता यः पुरुषोऽनंतपापकृत् ॥ स तमस्यंधतामिस्रे नरके हि
निमज्जति ॥ ११ ॥ यस्त्वेनां मानवो धेनुं स्ववत्सैरमरादिभिः ॥ पूजयत्युचिते काले स स्वर्गायोपपद्यते ॥ १२ ॥ तस्मात्पुत्र मनुष्येण देवर्षि
पितृमानवाः ॥ भूतानि चानुदिवसं पोष्याणि स्वतनुर्यथा ॥ १३ ॥ तस्मात्स्नातः शुचिर्भूत्वा देवर्षिपितृतर्पणम् ॥ यज्ञस्यांते[1] तथैवाद्भिः काले
कुर्यात्समाहितः ॥ १४ ॥ सुमनोगन्धपुष्पैश्च देवानभ्यर्च्य मानवः ॥ ततोग्नेस्तर्पणं कुर्याद्द्याच्चापि बलींस्तथा ॥ १५ ॥ नक्तंचरेभ्यो भूतेभ्यो
बलिमाकाशतो हरेत् ॥ पितृणां निर्वपेत्तद्वद्दक्षिणाभिमुखस्ततः ॥ १६ ॥ गृहस्थस्तत्परो भूत्वा सुसमाहितमानसः ॥ ततस्तोयमुपादाय तेष्वेवार्पण
सत्क्रियाम् ॥ १७ ॥ स्थानेषु निक्षिपेत्प्राज्ञो नाम्ना तूद्दिश्य देवताः ॥ एवं बलिं गृहे दत्त्वा गृहे गृहपतिः शुचिः ॥ १८ ॥ आचम्य च ततः
कुर्यात्प्राज्ञो द्वारावलोकनम् ॥ मुहूर्तस्याष्टमं भागमुदीक्षेतातिथिं ततः ॥ १९ ॥ अतिथिं तत्र संप्राप्तमर्घ्यपाद्योदकेन च[2] ॥ बुभुक्षुमागतं श्रांतं
याचमानमकिंचनम् ॥ २० ॥ ब्राह्मणं प्राहुरतिथिं संपूज्य शक्तितो बुधैः ॥ न पृच्छेत्तत्राचरणं स्वाध्यायं चापि पंडितः ॥२१॥ शोभनाशोभनाकारं
तं मन्येत प्रजापतिम् ॥ अनित्यं हि स्थितो यस्मात्तस्मादतिथिरुच्यते ॥ २२ ॥ तस्मै दत्त्वा तु यो भुंक्ते स तु भुंक्तेऽमृतं नरः ॥ अतिथिर्यस्य
भग्नाशो गृहात्प्रति निवर्तते ॥२३॥ स दत्त्वा दुष्कृतं तस्मै पुण्यमादाय गच्छति ॥ अपि वा शाकदानेन यद्वा तोयप्रदानतः ॥ पूजयेत्तं नरः शक्त्या
तेनैवातो विमुच्यते ॥२४॥ ॥ युधिष्ठिर उवाच ॥ ॥ विवाहा ब्राह्मदैवार्षाः प्राजापत्यासुरौ तथा ॥ गांधर्वो राक्षसश्चापि पैशाचोष्टम उच्यते ॥२५॥
एतेषां च विधिं ब्रूहि तथा कार्यं च तत्त्वतः ॥ गृहस्थानां तथा धर्मान्ब्रूहि मे त्वं विशेषतः ॥ २६ ॥ ॥ पराशर उवाच ॥ ॥ स ब्राह्मो वरमा
हूय यत्र कन्या स्वलंकृता ॥ दीयते तत्सुतः पूयात्पुरुषानेकविंशतिम् ॥ २७ ॥ यज्ञस्थायर्त्विजे दैवस्तज्जः पाति चतुर्दश ॥ वरादादाय गोद्वन्द्वमार्ष
स्तज्जः पुनाति षट् ॥ २८ ॥ सहोभौ चरतां धर्मं प्राजापत्यः स ईरितः ॥ वरवध्वोः स्वेच्छया च गांधर्वोऽन्योन्यमैत्रतः ॥ प्रसह्य कन्याहरणाद्रा

१ यज्ञस्य–ब्रह्मयज्ञस्य । २ पूजयेदिति शेषः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्द्विजः ॥ ४ ॥ कव्यवाडनलादींश्च पितॄन्दिव्यान्प्रतर्प्पयेत् ॥ प्राचीनावीतिको दर्भैर्द्विगुणैस्तिलमिश्रितैः ॥ ५ ॥ रवौ शुक्रे त्रयोदश्यां सप्तम्यां निशि संध्ययोः ॥ श्रेयोर्थी ब्राह्मणो जातु न कुर्यात्तिलतर्प्पणम् ॥ ६ ॥ यदि कुर्यात्ततः कुर्याच्छुक्लैरेव तिलैः कृती ॥ चतुर्दश यमान्पश्चात्तर्पयेन्नाम उच्चरन् ॥७॥ ततः स्वगोत्रमुच्चार्य तर्पयेत्स्वान्पितॄन्मुदा ॥ सव्यजानुनिपातेन पितृतीर्थेन वाग्यतः ॥८॥ एकैकमंजलिं देवा द्वौद्वौ तु सनकादिकाः ॥ पितरस्त्रीन्प्रवांछंति स्त्रिय एकैकमंजलिम् ॥ ९ ॥ अंगुल्यग्रेण वै दैवमार्षमंगुलिमूलगम् ॥ ब्राह्ममंगुष्ठमूले तु पाणिमध्ये प्रजापतेः ॥ ११० ॥ मध्येंगुष्ठप्रदेशिन्योः पित्र्यं तीर्थं प्रचक्षते ॥ आब्रह्मस्तंबपर्यंतं देवर्षिपितृमानवाः ॥ ११ ॥ तृप्यंतु सर्व्वे पितरो मातृमातामहादयः ॥ अन्ये च मंत्राः प्रोक्ता ये वेदोक्ताः पुराणसंभवाः ॥ १२ ॥ सांगं च तर्प्पणं कुर्यात्पितॄणां च सुखप्रदम् ॥ अग्निकार्यं ततः कृत्वा वेदाभ्यासं ततश्चरेत् ॥ १३ ॥ श्रुत्यभ्यासः पंचधा स्यात्स्वीकारोऽर्थविचारणम् ॥ अभ्यासश्च तपश्चापि शिष्येभ्यः प्रतिपादनम् ॥ १४ ॥ लब्धस्य प्रतिपालार्थमलब्धस्य च लब्धये ॥ प्रातःकृत्यमिदं प्रोक्तं द्विजातीनां नृपोत्तम ॥ १५ ॥ अथवा प्रातरुत्थाय कृत्वावश्यकमेव च ॥ शौचाचमनमादाय भक्षयेद्दन्तधावनम् ॥ ॥ १६ ॥ विशोध्य सर्वगात्राणि प्रातःसंध्यां समाचरेत् ॥ वेदार्थानधिगच्छेद्वै शास्त्राणि विविधान्यपि ॥ १७ ॥ अध्यापयेच्छुचीञ्छिष्यान्हितान्मेधासमन्वितान् ॥ उपेयादीश्वरं[1] चापि योगक्षेमादिसिद्धये ॥ १८ ॥ ततो मध्याह्नसिद्ध्यर्थं पूर्वोक्तं स्नानमाचरेत् ॥ स्नात्वा माध्याह्निकीं संध्यामुपासीत विचक्षणः ॥ १९ ॥ देवतां परिपूज्याथ नैमित्तिकं विधिं चरेत् ॥ पवनाग्निं समुज्ज्वाल्य वैश्वदेवं समाचरेत् ॥ १२० ॥ निष्पावान्कोद्रवान्माषान्कलांपांश्चणकांस्त्यजेत्[2] ॥ तैलपक्वमपक्वान्नं सर्वं लवणयुक्त्यजेत् ॥ २१ ॥ आढक्यन्नं मसूरान्नं वर्तुलधान्यसंभवम् ॥ भुक्तशेषं पर्युषितं वैश्वदेवे विवर्जयेत् ॥ २२ ॥ दर्भपाणिः समाचम्य प्राणायामं विधाय च ॥ पृषोदिवीति मंत्रेण पर्य्युक्षणमथाचरेत् ॥ २३ ॥ प्रदक्षिणं च पर्य्युक्ष्य द्विः परिस्तीर्य वै कुशान् ॥ रापोर्द्ध (?) देवमन्त्रेण कुर्याद्वह्निं स्वसंमुखे ॥ २४ ॥ वैश्वानरं समभ्यर्च्य गन्धपुष्पाक्षतैस्तथा ॥ स्वशाखोक्तप्रकारेण होमं कुर्याद्विचक्षणः ॥ २५ ॥ अध्वगः क्षीणवृत्तिश्च विद्यार्थी गुरुपोषकः ॥ यतिश्च ब्रह्मचारी च षडेते धर्मभिक्षकाः ॥ २६ ॥ अतिथिः पांथिको ज्ञेयोऽनूचानः श्रुतिपारगः ॥ मान्यावेतौ गृहस्थानां ब्रह्मलोकमभीप्सताम् ॥ २७ ॥ अपि श्वपाके शुनि वा नैवान्नं निष्फलं भवेत् ॥ अत्रार्थिनि समायाते पात्रापात्रं न चिंतयेत् ॥ २८ ॥ शुनां च पतितानां च श्वपचां पापरोगिणाम् ॥ काकानां च कृमीणां च

१ ईश्वरम्—धनवन्तम्—यजमानम्—यद्वा सर्वयोगक्षेमनिर्वाहसमर्थं परमेश्वरमेव शरणं गच्छेत् । २ कषायान्—इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बहिरन्नं किरेद्भुवि ॥ २९ ॥ ऐन्द्रवारुणवायव्याः सौम्या वै नैर्ऋताश्च ये ॥ प्रतिगृह्णंत्विमं पिंडं काका भूमौ मयार्पितम् ॥ १३० ॥ इत्थं भूत
बलिं कृत्वा कालं गोदोहमात्रकम् ॥ प्रतीक्ष्यातिथिमायातं विशद्भोज्यगृहं ततः ॥ ३१ ॥ अदत्त्वा वायसबलिं नित्यश्राद्धं समाचरेत् ॥
नित्यश्राद्धे स्वसामर्थ्यात्त्रीन्द्वावेकमथापि वा ॥ ३२ ॥ भोजयेत्पितृयज्ञार्थं दद्यादुद्धृत्य वारि च ॥ नित्यश्राद्धं दैवहीनं नियमादिविवर्जितम् ॥
॥ ३३ ॥ दक्षिणारहितं त्वेतद्दातृभोक्तृसुतृप्तिकृत् ॥ पितृयज्ञं विधायेत्थं स्वस्थबुद्धिरनातुरः ॥ ३४ ॥ अदुष्टासनमध्यास्य भुंजीत शिशुभिः सह ॥
सुगन्धिः सुमनाः स्रग्वी शुचिवासोद्वयान्वितः ॥ ३५ ॥ प्रागास्य उदगास्यो वा भुंजीत पितृसेवितम् ॥ विधायान्नमनग्नं तदुपरिष्टादधस्तथा
॥ ३६ ॥ आपोशानविधानेन कृत्वाश्नीयात्सुधीर्द्विजः ॥ भूमौ बलित्रयं कुर्यादपो दद्यात्तदोपरि ॥ ३७ ॥ सकृच्चाप उपस्पृश्य
प्राणाद्याहुतिपंचकम् ॥ दद्याज्जठरकुंडाग्नौ दर्भपाणिः प्रसन्नधीः ॥ ३८ ॥ दर्भपाणिस्तु यो भुंक्ते तस्य दोषो न विद्यते ॥ केशकीटादिसं
भूतस्तदश्नीयात्सदर्भकः ॥ ३९ ॥ ततो मौनेन भुञ्जीत न कुर्याद्दंतघर्षणम् ॥ प्रक्षालितऽग्रहस्तस्य दक्षिणांगुष्ठमूलतः ॥ १४० ॥ रौरवेऽपुण्यनि
लये अधोलोकनिवासिनाम् ॥ उच्छिष्टोदकमिच्छूनामक्षय्यमुपतिष्ठताम् ॥ ४१ ॥ पुनराचम्य मेधावी शुचिर्भूत्वा प्रयत्नतः ॥ मुखशुद्धिं ततः
कृत्वा पुराणश्रवणादिभिः ॥ ४२ ॥ अतिवाह्य दिवाशेषं ततः संध्यां समाचरेत् ॥ गृहेषु प्राकृता संध्या गोष्ठे दशगुणा स्मृता ॥ ४३ ॥ नद्याम
युतसंख्या स्यादनंता शिवसन्निधौ ॥ अनृतं मद्यगन्धं च दिवामैथुनमेव च ॥ पुनाति वृषलस्थानं संध्या बहिरुपासिता ॥ ४४ ॥ उद्देशतः
समाख्यात एष नित्यतनो विधिः ॥ इत्थं समाचरन्विप्रो नावसीदति कर्हिचित् ॥ १४५ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहि
तायां तृतीये ब्रह्मखण्डे पूर्वभागे धर्मारण्यमाहात्म्ये सदाचारवर्णनंनाम पंचमोऽध्यायः ॥ ५ ॥ ॥ छ ॥ ॥ व्यास उवाच ॥ ॥ उपकाराय
साधूनां गृहस्थाश्रमवासिनाम् ॥ यथा च क्रियते धर्मो यथावत्कथयामि ते ॥ १ ॥ वत्स गार्हस्थ्यमास्थाय नरः सर्वमिदं जगत् ॥ पुष्णाति तेन
लोकांश्च स जयत्यभिवांछितान् ॥ २ ॥ पितरो मुनयो देवा भूतानि मनुजास्तथा ॥ क्रिमिकीटपतंगाश्च वयांसि पितरोऽसुराः ॥ ३ ॥ गृहस्थ
मुपजीवंति ततस्तृप्तिं प्रयांति च ॥ मुखं वास्य निरीक्षंते अपो नो दास्यतीति च ॥ ४ ॥ सर्वस्याधारभूता ये वत्स धेनुस्त्रयीमयी ॥ अस्यां

१ याम्यानैर्ऋतिकाश्च ये–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

च तथाकाशे भूमौ च नवधा क्षिपेत् ॥ भूमिशब्देन चरणावाकाशं हृदयं स्मृतम् ॥ शिरस्येव शिरःशब्दो मार्जनं तैरुदाहृतम् ॥ ७९ ॥ वारुणादपि चाग्नेयाद्वायव्यादपि चेंद्रतः ॥ मंत्रस्थानादपि परं ब्राह्मं स्नानमिदं परम् ॥ ब्राह्मस्नानेन यः स्नातः स बाह्याभ्यंतरं शुचिः ॥ ८० ॥ सर्वत्र चार्हतामेति देवपूजादिकर्मणि ॥ नक्तंदिनं निमज्ज्याप्सु कैवर्ताः किमु पावनाः ॥ ८१ ॥ शतशोऽपि तथा स्नाता न शुद्धा भावदूषिताः ॥ अंतःकरणशुद्धांश्च तान्विभूतिः पवित्रयेत् ॥ ८२ ॥ किं पावनाः प्रकीर्त्यंते रासभा भस्मधूसराः ॥ स स्नातः सर्वतीर्थेषु मलैः सर्वैर्विवर्जितः ॥८३॥ तेन क्रतुशतैरिष्टं चेतो यस्येह निर्मलम् ॥ तदेव निर्मलं चेतो यथा स्यात्तन्मुने शृणु ॥ ८४ ॥ विश्वेशश्चेत्प्रसन्नः स्यात्तदा स्यान्नान्यथा क्वचित् ॥ तस्माच्चेतोविशुद्ध्यर्थं काशीनाथं समाश्रयेत् ॥ ८५ ॥ इदं शरीरमुत्सृज्य परं ब्रह्माधिगच्छति ॥ द्रुपदांतं ततो जप्त्वा जलमादाय पाणिना ॥ ॥ ८६ ॥ कुर्याद्धृतं च मंत्रेण विधिज्ञस्त्वघमर्षणम् ॥ निमज्ज्याप्सु च यो विद्वाञ्जपेत्त्रिरघमर्षणम् ॥ ८७ ॥ जले वापि स्थले वापि यः कुर्यादघमर्षणम् ॥ तस्याघौघो विनश्येत यथा सूर्योदये तमः ॥ ८८ ॥ गायत्रीं शिरसा हीनां महाव्याहृतिपूर्विकाम् ॥ प्रणवाद्यां जपंस्तिष्ठन्क्षिपेदंभोंजलित्रयम् ॥ ८९ ॥ तेन वज्रोदकेनाशु मंदेहानाम राक्षसाः ॥ सूर्यतेजः प्रलोपंते शैला इव विवस्वतः ॥ ९० ॥ सहायार्थं च सूर्यस्य यो द्विजो नांजलित्रयम् ॥ क्षिपेन्मंदेहनाशाय सोपि मंदेहतां व्रजेत् ॥९१॥ प्रातस्तावज्जपंस्तिष्ठेद्यावत्सूर्यस्य दर्शनम् ॥ उपविष्टो जपेत्सायमृक्षाणामाविलोकनात् ॥ ॥ ९२ ॥ काललोपो न कर्त्तव्यो द्विजेन स्वहितेप्सुना ॥ अर्द्धोदयास्तसमये तस्माद्वज्रोदकं क्षिपेत् ॥ ९३ ॥ विधिनापि कृता संध्या कालातीताऽफला भवेत् ॥ अयमेव हि दृष्टांतो वंध्यास्त्रीमैथुनं यथा ॥९४॥ जले वामकरं कृत्वा या संध्याऽऽचरिता द्विजैः ॥ वृषली सा परिज्ञेया रक्षोगणमुदावहा ॥ ९५ ॥ उपस्थानं ततः कुर्याच्छाखोक्तविधिना ततः ॥ सहस्रकृत्वो गायत्र्याः शतकृत्वोथवा पुनः ॥ ९६ ॥ दशकृत्वोऽथ देव्यै च कुर्यात्सौरीमुपस्थितिम् ॥ सहस्रपरमां देवीं शतमध्यां दशावराम् ॥ ९७ ॥ गायत्रीं यो जपेद्विप्रो न स पापैः प्रलिप्यते ॥ रक्तचंदनमिश्राभिरद्भिश्च कुसुमैः कुशैः ॥ ९८ ॥ वेदोक्तैरागमोक्तैर्वा मंत्रैरर्घं प्रदापयेत् ॥ अर्चितः सविता येन तेन त्रैलोक्यमर्चितम् ॥ ९९ ॥ अर्चितः सविता दत्ते सुतान्पशुन्वसूनि च ॥ व्याधीन्हरेद्ददात्यायुः पूरयेद्वांछितान्यपि ॥ १०० ॥ अयं हि रुद्र आदित्यो हरिरेष दिवाकरः ॥ रविर्हिरण्यरूपोऽसौ त्रयीरूपोऽयमर्यमा ॥ १०१ ॥ ततस्तु तर्पणं कुर्यात्स्वशाखोक्तविधानतः ॥ ब्रह्मादीनखिलान्देवान्मरीच्यादींस्तथा मुनीन् ॥ १०२ ॥ चंदनागुरुकर्पूरगंधवत्कुसुमैरपि ॥ तर्पयेच्छुचिभिस्तोयैस्तृप्यंत्विति समुच्चरेत् ॥ ३ ॥ सनकादीन्मनुष्यांश्च निवीती तर्पयेद्यवैः ॥ अंगुष्ठद्वयमध्ये तु कृत्वा दर्भानृजू

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्कृत्वा रथ्योपसर्पणम् ॥ ५४ ॥ स्नात्वा भुक्त्वा पयः पीत्वा प्रारंभे शुभकर्मणाम् ॥ सुप्त्वा वासः परीधाय दृष्ट्वा तथाप्यमंगलम् ॥ ५५ ॥ प्रमा
दादशुचि स्पृष्ट्वा द्विराचांतः शुचिर्भवेत् ॥ दंतधावनं प्रकुर्वीत यथोक्तं धर्मशास्त्रतः ॥ आचांतोऽप्यशुचिर्यस्मादकृत्वा दंतधावनम् ॥ ५६ ॥
प्रतिपद्दर्शषष्ठीषु नवम्यां रविवासरे ॥ दंतानां काष्ठसंयोगो दहेदासप्तमं कुलम् ॥ ५७ ॥ अलाभे दंतकाष्ठानां निषिद्धे वाथ वासरे ॥ गंडूषा
द्वादश ग्राह्या मुखस्य परिशुद्धये ॥ ५८ ॥ कनिष्ठाग्रपरीमाणं सत्वचं निर्व्रणारुजम् ॥ द्वादशांगुलमानं च सार्द्रं स्याद्दंतधावनम् ॥ ५९ ॥ एके
कांगुलमानं तद्वर्जयेद्दंतधावनम् ॥ प्रातः स्नानं चरित्वा च शुद्ध्यै तीर्थे विशेषतः ॥ ६० ॥ प्रातः स्नानाद्यतः शुद्ध्येत्कायोऽयं मलिनः सदा ॥
यन्मलं नवभिश्छिद्रैः स्रवत्येव दिवानिशम् ॥ ६१ ॥ उत्साहमेधासौभाग्यरूपसंपत्प्रवर्द्धकम् ॥ प्राजापत्यसमं प्राहुस्तन्महाघविनाशकृत् ॥ ६२ ॥
प्रातः स्नानं हरेत्पापमलक्ष्मीं ग्लानिमेव च ॥ अशुचित्वं च दुःस्वप्नं तुष्टिं पुष्टिं प्रयच्छति ॥ ६३ ॥ नोपसर्पंति वै दुष्टाः प्रातस्नायिजनं
क्वचित् ॥ दृष्टादृष्टफलं यस्मात्प्रातःस्नानं समाचरेत् ॥ ६४ ॥ प्रसंगतः स्नानविधिं प्रवक्ष्यामि नृपोत्तमाः ॥ विधिस्नानं यतः प्राहुः स्नाना
च्छतगुणोत्तरम् ॥ ६५ ॥ विशुद्धां मृदमादाय बर्हिषस्तिलगोमयम् ॥ शुचौ देशे परिस्थाप्य ह्याचम्य स्नानमाचरेत् ॥ ६६ ॥ उपग्रही बद्ध
शिखो जलमध्ये समाविशेत् ॥ स्वशाखोक्तविधानेन स्नानं कुर्याद्यथाविधि ॥ ६७ ॥ स्नात्वेत्थं वस्त्रमापीड्य गृह्णीयाद्धौतवाससी ॥ आचम्य
च ततः कुर्यात्प्रातःसंध्यां कुशान्वितः ॥ ६८ ॥ प्राणायामांश्चरन्विप्रो नियम्य मानसं दृढम् ॥ अहोरात्रकृतैः पापैर्मुक्तो भवति तत्क्षणात् ॥
॥ ६९ ॥ दश द्वादशसंख्या वा प्राणायामाः कृता यदि ॥ नियम्य मानसं तेन तदा तप्तं महत्तपः ॥ ७० ॥ सव्याहृतिप्रणवकाः प्राणायामास्तु
षोडश ॥ अपि भ्रूणहनं मासात्पुनंत्यहरहःकृताः ॥ ७१ ॥ यथा पार्थिवधातूनां दह्यंते धमनान्मलाः ॥ तथेंद्रियैः कृता दोषा ज्वाल्यंते
प्राणसंयमात् ॥ ७२ ॥ एकाक्षरं परं ब्रह्म प्राणायामः परं तपः ॥ गायत्र्यास्तु परं नास्ति पावनं च नृपोत्तम ॥ ७३ ॥ कर्मणा मनसा वाचा
यद्रात्रौ कुरुते त्वघम् ॥ उत्तिष्ठन्पूर्वसंध्यायां प्राणायामैर्विशोधयेत् ॥ ७४ ॥ यदह्ना कुरुते पापं मनोवाक्कायकर्मभिः ॥ आसीनः पश्चिमां
संध्यां प्राणायामैर्व्यपोहति ॥ पश्चिमां तु समासीनो मलं हंति दिवाकृतम् ॥ ७५ ॥ नोपतिष्ठेत्तु यः पूर्वां नोपास्ते यस्तु पश्चिमाम् ॥
स शूद्रवद्बहिष्कार्यः सर्वस्माद्द्विजकर्मणः ॥ ७६ ॥ अपां समीपमासाद्य नित्यकर्म समाचरेत् ॥ तत आचमनं कुर्याद्यथाविध्यतु
पूर्वशः ॥ ७७ ॥ आपोहिष्ठेति तिसृभिर्मार्जनं तु ततश्चरेत् ॥ भूमौ शिरसि चाकाश आकाशे भुवि मस्तके ॥ ७८ ॥ मस्तके

Nepal Sanskrit University, Balmeekr Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मे ॥ ४ ॥ ॥ व्यास उवाच ॥ ॥ स्थावराः कृमयोऽब्जांश्च पक्षिणः पशवो नराः ॥ क्रमेण धार्मिकास्त्वेत एतेभ्यो धार्मिकाः सुराः ॥ ५ ॥
सहस्रभागात्प्रथमे द्वितीयानुक्रमास्तथा ॥ सर्वे एते महाभागाः पापान्मुक्तिसमाश्रयाः ॥ ६ ॥ चतुर्णामपि भूतानां प्राणिनोतीव चोत्तमाः ॥ प्राणि
भ्योपि मुनिश्रेष्ठाः सर्वे बुद्ध्युपजीविनः ॥ ७ ॥ मतिमद्भ्यो नराः श्रेष्ठास्तेभ्य श्रेष्ठास्तु वाडवाः ॥ विप्रेभ्योऽपि च विद्वांसो विद्वद्भ्यः कृतबुद्धयः ॥
॥ ८ ॥ कृतधीभ्योऽपि कर्तारः कर्तृभ्यो ब्रह्मतत्पराः ॥ न तेभ्योऽभ्यधिकः कश्चित्त्रिषु लोकेषु भारत ॥ ९ ॥ अन्योन्यपूजकास्ते वै तपो
विद्याविशेषतः ॥ ब्राह्मणो ब्रह्मणा सृष्टः सर्वभूतेश्वरो यतः ॥ १० ॥ अतो जगत्स्थितं सर्वं ब्राह्मणोऽर्हति नापरः ॥ सदाचारो हि सर्वार्हो
नाचाराद्विच्युतः पुनः ॥ ११ ॥ तस्माद्विप्रेण सततं भाव्यमाचारशीलिना ॥ विद्वेषरागरहिता अनुतिष्ठन्ति यं मुने ॥ १२ ॥ सद्भि
यस्तं सदाचारं धर्ममूलं विदुर्बुधाः ॥ लक्षणैः परिहीनोऽपि सम्यगाचारतत्परः ॥ १३ ॥ श्रद्धालुरनसूयुश्च नरो जीवेत्समाः शतम् ॥
श्रुतिस्मृतिभ्यामुदितं स्वेषुस्वेषु च कर्मसु ॥ १४ ॥ सदाचारं निषेवेत धर्ममूलमतन्द्रितः ॥ दुराचाररतो लोके गर्हणीयः पुमा
न्भवेत् ॥ १५ ॥ व्याधिभिश्चाभिभूयेत सदाल्पायुः सुदुःखभाक् ॥ त्याज्यं कर्म पराधीनं कार्यमात्मवशं सदा ॥ १६ ॥ दुःखी यतः पराधीनः
सदैवात्मवशः सुखी ॥ यस्मिन्कर्मण्यंतरात्मा क्रियमाणे प्रसीदति ॥ १७ ॥ तदेव कर्म कर्त्तव्यं विपरीतं न च क्वचित् ॥ प्रथमं धर्म्मसर्वस्वं प्रोक्तं
यन्नियमा यमाः ॥ १८ ॥ अतस्तेष्वेव वै यत्नः कर्त्तव्यो धर्ममिच्छता ॥ सत्यं क्षमार्तवं ध्यानमानृशंस्यमहिंसनम् ॥ १९ ॥ दमः प्रसादो माधुर्यं
मृदुतेति यमा दश ॥ शौचं स्नानं तपो दानं मौनेज्याध्ययनं व्रतम् ॥ २० ॥ उपोषणोपस्थदंडो दशैते नियमाः स्मृताः ॥ कामं क्रोधं दमं मोहं मा
त्सर्यं लोभमेव च ॥ २१ ॥ अमून्षड्वैरिणो जित्वा सर्वत्र विजयी भवेत् ॥ शनैः संचिनुयाद्धर्मं वल्मीकं शृंगवान्यथा ॥ २२ ॥ परपीडामकुर्वाणः पर
लोकसहायिनम् ॥ धर्म एव सहायी स्यादमुत्र परिरक्षितः ॥ २३ ॥ पितृमातृसुतभ्रातृयोषिद्बंधुजनाधिकः ॥ जायते चैकलः प्राणी म्रियते च तथै
कलः ॥ २४ ॥ एकलः सुकृतं भुंक्ते भुंक्ते दुष्कृतमेकलः ॥ देहे पंचत्वमापन्ने त्यक्त्वैकं काष्ठलोष्टवत् ॥ २५ ॥ बांधवा विमुखा यांति धर्मो यांतमनु
व्रजेत् ॥ अतः संचिनुयाद्धर्म्ममत्राऽमुत्र सहायिनम् ॥ २६ ॥ धर्मं सहायिनं लब्ध्वा संतरेद्दुस्तरं तमः ॥ संबंधानाचारेन्नित्यमुत्तमैरुत्तमैः सुधीः ॥
॥२७॥ अधमानधमांस्त्यक्त्वा कुलमुत्कर्षतां नयेत् ॥ उत्तमानुत्तमानेव गच्छेद्धीनांश्च वर्जयेत् ॥ ब्राह्मणः श्रेष्ठतामेति प्रत्यवायेन शूद्रताम् ॥ २८ ॥

१ अब्जाः—जलजन्तवः—इत्यर्थः । २ शृंगवान्—वल्मीकनिर्माणकर्ता पिपीलिकाजातीयः कीटकविशेषः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अनध्ययनशीलं च सदाचारविलंघिनम् ॥ सालसं च दुरन्नादं ब्राह्मणं बाधतेंऽतकः ॥ २९ ॥ अतोऽभ्यस्येत्प्रयत्नेन सदाचारं सदा द्विजः ॥
तीर्थान्यप्यभिलष्यंति सदाचारिसमागमम् ॥ ३० ॥ रजनीप्रांतयामार्द्धं ब्राह्मः समय उच्यते ॥ स्वहितं चिंतयेत्प्राज्ञस्तस्मिंश्चोत्थाय सर्वदा ॥
॥ ३१ ॥ गजास्यं संस्मरेदादौ तत ईशं सहांबया ॥ श्रीरंगं श्रीसमेतं तु ब्रह्माणं कमलोद्भवम् ॥ ३२ ॥ इंद्रादीन्सकलान्देवान्वसिष्ठादीन्मुनीनपि ॥
गंगाद्याः सरितः सर्वाः श्रीशैलाद्यखिलान्गिरीन् ॥ ३३ ॥ क्षीरोदादीन्समुद्रांश्च मानसादिसरांसि च ॥ वनानि नंदनादीनि धेनूः कामदुघादयः ॥
॥ ३४ ॥ कल्पवृक्षादिवृक्षांश्च धातून्कांचनमुख्यतः ॥ दिव्यस्त्रीरुर्वशीमुख्याः प्रह्लादाद्यान्हरेः प्रियान् ॥ ३५ ॥ जननीचरणौ स्मृत्वा सर्वतीर्थोत्त
मोत्तमौ ॥ पितरं च गुरूंश्चापि हृदि ध्यात्वा प्रसन्नधीः ॥ ३६ ॥ ततश्चावश्यकं कर्तुं नैर्ऋतीं दिशमाव्रजेत् ॥ ग्रामाद्धनुःशतं गच्छेन्नगराच्च चतुर्गुण
म् ॥ ३७ ॥ तृणैराच्छाद्य वसुधां शिरः प्रावृत्य वाससा ॥ कर्णोपवीत उदग्वक्त्रो दिवसे संध्ययोरपि ॥ ३८ ॥ विण्मूत्रे विसृजेन्मौनी निशायां
दक्षिणामुखः ॥ न तिष्ठन्नाशु नो विप्रगोवन्ह्यनिलसंमुखः ॥ ३९ ॥ न फालकृष्टे भूभागे न रथ्यासेव्यभूतले ॥ नालोकयेद्दिशो भागान्ज्यो
तिश्चक्रं नभो मलम् ॥ ४० ॥ वामेन पाणिना शिश्नं धृत्वोत्तिष्ठेत्प्रयत्नवान् ॥ अथो मृदं समादद्याज्जंतुकर्करवर्जिताम् ॥ ४१ ॥ विहाय मूषको
त्खातां चोच्छिष्टां केशसंकुलाम् ॥ गुह्ये दद्यान्मृदं चैकां प्रक्षाल्य चांबुना ततः ॥ ४२ ॥ पुनर्वामकरेणेति पंचधा क्षालयेद्गुदम् ॥ एकैक
पादयोर्दद्यात्तिस्रः पाण्योर्मृदस्तथा ॥ ४३ ॥ इत्थं शौचं गृही कुर्याद्गंधलेपक्षयावधि ॥ क्रमाद्द्वैगुण्यतः कुर्याद्ब्रह्मचर्यादिषु त्रिषु ॥ ४४ ॥
दिवाविहितशौचाच्च रात्रावर्द्धं समाचरेत् ॥ परग्रामे तदर्धं च पथि तस्यार्धमेव च ॥ ४५ ॥ तदर्धं रोगिणां चापि सुस्थे न्यूनं न कार
येत् ॥ अपि सर्वनदीतोयैर्मृत्कूटैश्चाप्यगोपमैः ॥ ४६ ॥ आपातमाचरेच्छौचं भावदुष्टो न शुद्धिभाक् ॥ आर्द्रधात्रीफलोन्माना
मृदः शौचे प्रकीर्तिताः ॥ ४७ ॥ सर्वाश्चाहुतयोऽप्येवं ग्रासाश्चांद्रायणेपि च ॥ प्रागास्य उदगास्यो वा सूपविष्टः शुचौ भुवि ॥ ४८ ॥ उपस्पृशे
द्विहीनाभिस्तुषांगारास्थिभस्मभिः ॥ अतिस्वच्छाभिरद्भिश्च यावद्बुद्बुदाभिरत्वरः ॥ ४९ ॥ ब्राह्मणो ब्रह्मतीर्थेन दृष्टिपूताभिराचमेत् ॥ कण्ठगा
भिर्नृपः शुध्येत्तालुगाभिस्तथोरुजः ॥ ५० ॥ स्त्रीशूद्रावाथ संस्पर्शमात्रेणापि विशुध्यतः ॥ शिरः शब्दं सकंठं वा जले मुक्तशिखोऽपि वा
॥ ५१ ॥ अक्षालितपदद्वंद्व आचांतोऽप्यशुचिर्म्मतः ॥ त्रिः पीत्वांबु विशुद्ध्यर्थं ततः खानि विशोधयेत् ॥ ५२ ॥ अंगुष्ठमूलदेशेन ह्यधरोष्ठौ परि
मृजेत् ॥ स्पृष्ट्वा जलेन हृदयं समस्ताभिः शिरः स्पृशेत् ॥ ५३ ॥ अंगुल्यग्रैस्तथा स्कन्धौ सांबु सर्वत्र संस्पृशेत् ॥ आचांतः पुनराचामे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तु पिंडं दद्याच्च यो नरः ॥ धर्मवाप्यां महापुण्यां गर्भवासं न चाप्नुयात् ॥ ९३ ॥ कुम्भीपाकान्महारौद्राद्रौरवान्नरकात्पुनः ॥ अंधता मिस्रकाद्राजन्मुच्यते नात्र संशयः ॥ ९४ ॥ ॥ सूत उवाच ॥ ॥ एकवर्षं तर्पणीयं धर्मवाप्यां नरोत्तमः ॥ ऋतौ मासे च पक्षे च विपरीतं च जायते ॥ ९५ ॥ बर्हिषदोऽग्निष्वात्ताश्च आज्यपाः सोमपास्तथा ॥ तृप्तिं प्रयांति परमां वाप्यां वै तर्पणेन तु ॥ ९६ ॥ कुरुक्षेत्रादि क्षेत्राणि अयोध्यादिपुरस्तथा ॥ पुष्कराद्यानि सर्वाणि मुक्तिनामानि संति वै ॥ ९७ ॥ तानि सर्वाणि तुल्यानि धर्मकूपोऽधिको भवेत् ॥ मन्त्रो वेदास्तथा यज्ञा दानानि च व्रतानि च ॥ ९८ ॥ अक्षयाणि प्रजायंते दत्त्वा जप्त्वा नरेश्वर ॥ अभिचाराश्च ये चान्ये सुसिद्धाथर्ववेदजाः ॥ ९९ ॥ ते सर्वे सिद्धिमायांति तस्मिन्स्थाने कृता अपि ॥ आदितीर्थं नृपश्रेष्ठ काजेशैरुपसेवितम् ॥ १०० ॥ सिद्धिस्थानं सुसौम्यं च ब्रह्माद्यैरपि सेवितम् ॥ कृते तु युगपर्यंतं त्रेतायां लक्षपञ्चकम् ॥ १ ॥ द्वापरे लक्षमेकं तु दिनैकेन फलं कलौ ॥ एतदुक्तं मया ब्रह्मन्धर्मारण्यस्य वर्णनम् ॥ फलं चैवात्र सर्वं हि उक्तं द्वैपायनेन तु ॥ २ ॥ ॥ सूत उवाच ॥ ॥ अतः परं प्रवक्ष्यामि धर्मवाक्यं मनोरमम् ॥ देवानां हितकामाय आज्ञाप्य च यदुक्तवान् ॥ ३ ॥ ॥ धर्म उवाच ॥ ॥ अस्मिन्क्षेत्रे प्रकुर्वंति विष्णुमायाविमोहिताः ॥ पारदार्यं महादुष्टं स्वर्णस्तेयादिकं तथा ॥ ४ ॥ अन्यच्च विकृतं सर्वं कुर्वाणो नरकं व्रजेत् ॥ अन्यक्षेत्रे कृतं पापं धर्मारण्ये विनश्यति ॥ ५ ॥ धर्मारण्ये कृतं पापं वज्रलेपो भविष्यति ॥ यथा पुण्यं तथा पापं यत्किंचिच्च शुभाशुभम् ॥ ६ ॥ तत्सर्वं वर्द्धते नित्यं वर्षाणि शतमित्युत ॥ कामिनां कामदं पुण्यं योगिनां मुक्तिदायकम् ॥ ७ ॥ सिद्धानां सिद्धिदं प्रोक्तं धर्मारण्यं तु सर्वदा ॥ अपुत्रो लभते पुत्रान्निर्धनो धनवान्भवेत् ॥ ८ ॥ एतदाख्यानकं पुण्यं धर्मेण कथितं पुरा ॥ यः शृणोति नरो भक्त्या नारी वा श्रावयेत्तु यः ॥ गोसहस्रफलं तस्य अंते हरिपुरं व्रजेत् ॥ १०९ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे पूर्वभागे धर्मारण्यमाहात्म्ये क्षेत्रस्थापनंनाम चतुर्थोऽध्यायः ॥ ४ ॥ ॥ छ ॥ ॥ व्यास उवाच ॥ ॥ अतः परं प्रवक्ष्यामि धर्मारण्यनिवासिना ॥ यत्कार्यं पुरुषेणेह गार्हस्थ्यमनुतिष्ठता ॥ १ ॥ धर्मारण्येषु ये जाता ब्राह्मणाः शुद्धवंशजाः ॥ अष्टादशसहस्राश्च काजेशैश्च विनिर्मिताः ॥ २ ॥ सदाचाराः पवित्राश्च ब्राह्मणा ब्रह्मवित्तमाः ॥ तेषां दर्शनमात्रेण महापापैर्विमुच्यते ॥ ३ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ पाराशर्य समाख्याहि सदाचारं च मे प्रभो ॥ आचाराद्धर्ममाप्नोति आचाराल्लभते फलम् ॥ आचाराच्छ्रियमाप्नोति तदाचारं वदस्व

१ महापुण्याम्—महापुण्यायाम्--आर्षम् विभक्तिवैपरीत्यं छन्दोनुरोधेन ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यमेन तपसा भक्त्या तोषितो हि सदाशिवः ॥ उवाच वचनं देवं रम्यं साधुमनोरमम् ॥ ६९ ॥ अनुज्ञां देहि मे तात यथा गच्छामि सत्वरम् ॥
कैलासं पर्वतश्रेष्ठं देवानां हितकाम्यया ॥ ७० ॥ ॥ यम उवाच ॥ ॥ न मे स्थानं परित्यक्तुं त्वया युक्तं महेश्वर ॥ कैलासादधिकं देव जायते
वचनादिदम् ॥ ७१ ॥ ॥ शिव उवाच ॥ ॥ साधु प्रोक्तं त्वया युक्तमेकांशेनात्र मे स्थितिः ॥ न मया त्यजितं साधु स्थानं तव सुनिर्मलम् ॥
॥ ७२ ॥ विश्वेश्वरं महालिंगं मन्नाम्नात्र भविष्यति ॥ एवमुक्त्वा महादेवस्तत्रैवांतरधीयत ॥ ७३ ॥ शिवस्य वचनात्तत्र तदा लिंगं तदद्भुतम् ॥
तं दृष्ट्वा च सुरैस्तत्र यथानामानुकीर्त्तनम् ॥ ७४ ॥ स्वंस्वं लिंगं तदा सृष्टं धर्मारण्ये सुरोत्तमैः ॥ यस्य देवस्य यल्लिंगं तन्नाम्ना परिकीर्तितम् ॥
॥ ७५ ॥ ॥ सूत उवाच ॥ ॥ धर्मेण स्थापितं लिंगं धर्मेश्वरमुपस्थितम् ॥ स्मरणात्पूजनात्तस्य सर्वपापैः प्रमुच्यते ॥ ७६ ॥ यद्ब्रह्म योगिनां
गम्यं सर्वेषां हृदये स्थितम् ॥ तिष्ठते यस्य लिंगं तु स्वयंभुवमिति स्थितम् ॥ ७७ ॥ भूतनाथं च संपूज्य व्याधिभिर्मुच्यते जनः ॥ धर्मवापीं
ततश्चैव चक्रे तत्र मनोरमाम् ॥ ७८ ॥ आहृत्य कोटितीर्थानां जलं वाप्यां मुमोच ह ॥ यमतीर्थस्वरूपं च स्नानं कृत्वा मनोरमम् ॥ ७९ ॥
स्नानार्थं देवतानां च ऋषीणां भावितात्मनाम् ॥ तत्र स्नात्वा च पीत्वा च सर्वपापैः प्रमुच्यते ॥ ८० ॥ धर्मवाप्यां नरः स्नात्वा दृष्ट्वा धर्मेश्वरं
शिवम् ॥ मुच्यते सर्वपापेभ्यो न मातुर्गर्भमाविशेत् ॥ ८१ ॥ तत्र स्नात्वा नरो यस्तु करोति यमतर्पणम् ॥ व्याधिदोषविनाशार्थं क्लेशदोषोप
शांतये ॥ यमाय धर्मराजाय मृत्यवे चांतकाय च ॥ वैवस्वताय कालाय दध्नाय परमेष्ठिने ॥८२॥ वृकोदराय वृकाय दक्षिणेशाय ते नमः ॥ नीलाय
चित्रगुप्ताय चित्र वैचित्र ते नमः ॥ ८३ ॥ यमार्थं तर्पणं यो वै धर्मवाप्यां करिष्यति ॥ साक्षतैर्नामभिश्चैतैस्तस्य नोपद्रवो भवेत् ॥ ८४ ॥ एकां
तरस्तृतीयस्तु ज्वरश्चातुर्थिकस्तथा ॥ वेलायां जायते यस्तु ज्वरः शीतज्वरस्तथा ॥ ८५ ॥ पीडयन्ति न चैतस्य यस्यैवो मतिरीदृशी ॥ रेवत्या
दिग्रहा दोषा डाकिनी शाकिनी तथा ॥ ८६ ॥ धनधान्यसमृद्धिः स्यात्संततिर्वर्धते सदा ॥ भूतेश्वरं तु संपूज्य सुस्नातो विजितेंद्रियः ॥ ८७ ॥
सांगं रुद्रजपं कृत्वा व्याधिदोषात्प्रमुच्यते ॥ अमावास्यां सोमदिने व्यतीपाते च वैधृतौ ॥ संक्रांतौ ग्रहणे चैव तत्र श्राद्धं स्मृतं नृणाम् ॥ ८८ ॥
श्राद्धं कृतं तेन समाः सहस्रं निरस्य चैतत्पितरस्त्ववदंति ॥ पानीयमेवापि तिलैर्विमिश्रितं ददाति यो वै प्रथितो मनुष्यः ॥८९॥ एकविंशतिवारैस्तु
गंयायां पिंडदानतः ॥ धर्मेश्वरे सकृद्दत्तं पितॄणां चाक्षयं भवेत् ॥ ९० ॥ धर्मेशात्पश्चिमे भागे विश्वेश्वरांतरेपि वा ॥ धर्मवापीति विख्याता
स्वर्गसोपानदायिनी ॥ ९१ ॥ धर्मेण निर्मिता पूर्वं शिवार्थं धर्मबुद्धिना ॥ तत्र स्नात्वा च पीत्वा च तर्पिताः पितृदेवताः ॥ ९२ ॥ शमीपत्रप्रमाणं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ऽस्तु ते ॥ ४८ ॥ नमस्ते व्यालभूषाय कक्षापटधराय च ॥ नमोंऽधकविनाशाय दक्षपापापहारिणे ॥ कामनिर्दाहिने तुभ्यं त्रिपुरारे नमोऽस्तु ते ॥
॥ ४९ ॥ चत्वारिंशच्च नामानि मयोक्तानि च यः पठेत् ॥ शुचिर्भूत्वा त्रिकालं तु पठेद्वा शृणुयादपि ॥ ५० ॥ गोघ्नश्चैव कृतघ्नश्च सुरापो गुरुत
ल्पगः ॥ ब्रह्महा हेमहारी च ह्यथवा वृषलीपतिः ॥ ५१ ॥ स्त्रीबालघातकश्चैव पापी चानृतभाषणः ॥ अनाचारी तथा स्तेयी परदाराभिगस्तथा ॥
॥ ५२ ॥ परापवादी द्वेषी च वृत्तिलोपकरस्तथा ॥ अकार्यकारी कृत्यघ्नो ब्रह्मद्विड्वाडवाधमः ॥ मुच्यते सर्वपापेभ्यः कैलासं स च गच्छति ॥
॥ ५३ ॥ ॥ सूत उवाच ॥ ॥ इत्येवं बहुभिर्वाक्यैर्धर्मराजेन वै मुहुः ॥ ईडितोऽपि महद्भक्त्या प्रणम्य शिरसा स्वयम् ॥ ५४ ॥ तुष्टः शंभुस्तदा
तस्मा उवाचेदं वचः शुभम् ॥ वरं वृणु महाभाग यत्ते मनसि वर्तते ॥ ५५ ॥ ॥ यम उवाच ॥ ॥ यदि तुष्टोऽसि देवेश दयां कृत्वा ममोपरि ॥
तं कुरुष्व महाभाग त्रैलोक्यं सचराचरम् ॥ ५६ ॥ मन्नाम्ना स्थानमेतद्धि ख्यातं लोके भवेदिति ॥ अच्छेद्यं चाप्यभेद्यं च पुण्यं पापप्रणाशनम् ॥
॥ ५७ ॥ स्थानं कुरु महादेव यदि तुष्टोऽसि मे भव ॥ शिवेन स्थानकं दत्तं काशीतुल्यं तदा नृप ॥ तद्दत्त्वा च पुनः प्राह अन्यं वरय सत्तम
॥ ५८ ॥ ॥ धर्म उवाच ॥ ॥ यदि तुष्टोऽसि देवेश दयां कृत्वा ममोपरि ॥ तं कुरुष्व महाभाग त्रैलोक्यं सचराचरम् ॥ वरेणैवं यथा ख्यातिं
गमिष्यामि युगेयुगे ॥ ५९ ॥ ॥ ईश्वर उवाच ॥ ॥ ब्रूहि कीनाश तत्सर्वं प्रकरोमि तवेप्सितम् ॥ तपसा तोषितोऽहं वै ददामि वरमीप्सितम् ॥
॥ ६० ॥ ॥ यम उवाच ॥ ॥ यदि मे वांछितं देव ददासि तर्हि शंकर ॥ अस्मिन्स्थाने महाक्षेत्रे मन्नाम्ना भव सर्वदा ॥ ६१ ॥
धर्मारण्यमिति ख्यातिस्त्रैलोक्ये सचराचरे ॥ यथा संजायते देव तथा कुरु महेश्वर ॥ ६२ ॥ ॥ ईश्वर उवाच ॥ ॥
धर्मारण्यमिदं ख्यातं सदा भूयाद्युगेयुगे ॥ त्वन्नाम्ना स्थापितं देव ख्यातिमेतद्गमिष्यति ॥ अथान्यदपि यत्किंचित्करोम्येष वदस्व तत् ॥
॥ ६३ ॥ ॥ यम उवाच ॥ ॥ योजनद्वयविस्तीर्णं मन्नाम्ना तीर्थमुत्तमम् ॥ मुक्तेश्च शाश्वतं स्थानं पावनं सर्वदेहिनाम् ॥
॥ ६४ ॥ मक्षिकाः कीटकाश्चैव पशुपक्षिमृगादयः ॥ पतंगा भूतवेताला पिशाचोरगराक्षसाः ॥ ६५ ॥ नारी वाथ नरो वाथ मत्क्षेत्रे
धर्मसंज्ञके ॥ त्यजते यः प्रियान्प्राणान्मुक्तिर्भवतु शाश्वती ॥ ६६ ॥ एवमस्त्विति सर्वोपि[1] देवा ब्रह्मादयस्तथा ॥ पुष्पवृष्टिं प्रकुर्वाणाः परं
हर्षमवाप्नुयुः ॥ ६७ ॥ देवदुंदुभयो नेदुर्गंधर्वपतयो जगुः ॥ ववुः पुण्यास्तथा वाता ननृतुश्चाप्सरोगणाः ॥ ६८ ॥ ॥ सूत उवाच ॥ ॥

१ सर्वः—महादेवः । अपिश्चार्थः—तथा ब्रह्मादयो देवाः—इति योजना ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शुभम् ॥ २७ ॥ ॥ सूत उवाच ॥ ॥ गतेप्सरसि राजेन्द्र धर्मस्तस्थौ यथाविधि ॥ तपस्तेपे महाघोरं विश्वस्योद्वेगदायकम् ॥ २८ ॥ पंचाग्निसा
धनं शुक्रे मासि सूर्येण तापिते ॥ चक्रे सुदुःसहं राजन्देवैरपि दुरासदम् ॥ २९ ॥ ततो वर्षशते पूर्णे अन्तको मौनमास्थितः॥ काष्ठभूत इमवातस्थौ
वल्मीकशतसंवृतः ॥ ३० ॥ नानापक्षिगणैस्तत्र कृतनीडैः स धर्मराट् ॥ उपविष्टे व्रतं राजन्दृश्यते नैव कुत्रचित् ॥ ३१ ॥ संस्मरंतोऽथ देवेश
मुमापतिमनिंदितम् ॥ ततो देवाः सगन्धर्वा यक्षाश्चोद्विग्नमानसाः ॥ कैलासशिखरं भूय आजग्मुः शिवसन्निधौ ॥ ३२ ॥ ॥ देवा ऊचुः ॥
त्राहित्राहि महादेव श्रीकण्ठ जगतः पते ॥ त्राहि नो भूतभव्येश त्राहि नो वृषभध्वज ॥ दयालुस्त्वं कृपानाथ निर्विघ्नं कुरु
शंकर ॥ ३३ ॥ ॥ ईश्वर उवाच ॥ ॥ केनापराधिता देवाः केन वा मानमर्दिताः ॥ मर्त्ये स्वर्गेऽथवा नागे शीघ्रं कथय
ताचिरम् ॥ ३४ ॥ अनेनैव त्रिशूलेन खड्गांगेनाथवा पुनः ॥ अथ पाशुपतेनैव निहनिष्यामि तं रणे ॥ शीघ्रं वै वदतास्माक
मत्रागमनकारणम् ॥ ३५ ॥ ॥ देवा ऊचुः ॥ ॥ कृपासिन्धो हि देवेश जगदानन्दकारक ॥ न भयं मानुषादद्य न ना
गाद्देवदानवात् ॥ ३६ ॥ मर्त्यलोके महादेव प्रेतनाथो महाकृतिः ॥ आत्मकार्यं महाघोरं क्लेशयेदिति निश्चयः ॥ ३७ ॥ उग्रेण तपसा
कृत्वा क्लिश्यदात्मानमात्मना ॥ तेनात्र वयमुद्विग्ना देवाः सर्वे सदाशिव ॥ शरणं त्वामनुप्राप्ता यदिच्छसि कुरुष्व तत् ॥ ३८ ॥ ॥ सूत
उवाच ॥ ॥ देवानां वचनं श्रुत्वा वृषारूढो वृषध्वजः ॥ आयुधान्परिसंगृह्य कवचं सुमनोहरम् ॥ गतवानथ तं देशं यत्र धर्मो व्यवस्थितः ॥
॥ ३९ ॥ ॥ ईश्वर उवाच ॥ ॥ अनेन तपसा धर्म संतुष्टं मम मानसम् ॥ वरं ब्रूहि वरं ब्रूहि वरं ब्रूहीत्युवाच ह ॥ ४० ॥ इच्छसे त्वं यथा कामा
न्यथा ते मनसि स्थितान् ॥ यंयं प्रार्थयसे भद्र ददामि तव सांप्रतम् ॥ ४१ ॥ ॥ सूत उवाच ॥ ॥ एवं संभाषमाणं तु दृष्ट्वा देवं महेश्वरम् ॥
वल्मीकादुत्थितो राजन्गृहीत्वा करसंपुटम् ॥ तुष्टाव वचनैः शुद्धैर्लोकनाथमरिंदम् ॥ ४२ ॥ ॥ धर्म उवाच ॥ ॥ ईश्वराय नमस्तुभ्यं नमस्ते
योगरूपिणे ॥ नमस्ते तेजोरूपाय नीलकंठ नमोऽस्तु ते ॥ ४३ ॥ ध्यातॄणामनुरूपाय भक्तिगम्याय ते नमः ॥ नमस्ते ब्रह्मरूपाय विष्णुरूप नमोऽ
स्तु ते ॥ ४४ ॥ नमः स्थूलाय सूक्ष्माय अणुरूपाय वै नमः ॥ नमस्ते कामरूपाय सृष्टिस्थित्यंतकारिणे ॥ ४५ ॥ नमो नित्याय सौम्याय
मृडाय हरये नमः ॥ आतपाय नमस्तुभ्यं नमः शीतकराय च ॥ ४६ ॥ सृष्टिरूप नमस्तुभ्यं लोकपाल नमोऽस्तु ते ॥ नम उग्राय भीमाय शांत
रूपाय ते नमः ॥ ४७ ॥ नमश्चानंतरूपाय विश्वरूपाय ते नमः ॥ नमो भस्मांगलिप्ताय नमस्ते चंद्रशेखर ॥ नमोऽस्तु पंचवक्त्राय त्रिनेत्राय नमो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आश्चर्यं परमं ज्ञात्वा धर्मराजोऽब्रवीदिदम् ॥ ३ ॥ ॥ धर्मराज उवाच ॥ ॥ कस्मात्त्वं मानिनि ह्येका वने चरसि निर्जने ॥ कस्मात्स्थानात्समायाता कस्य पत्नी सुशोभने ॥ ४ ॥ सुता त्वं कस्य वामोरु अतिरूपवती शुभा ॥ मानुषी वाथ गंधर्वी अमरी वाथ किंनरी ॥ ५ ॥ अप्सरा पक्षिणी वाथ अथवा वनदेवता ॥ राक्षसी वा खेचरी वा कस्य भार्या च तद्वद ॥ ६ ॥ सत्यं च वद मे सुभ्रूरित्याहार्कसुतस्तदा ॥ किमिच्छसि त्वया भद्रे किं कार्यं वा वदात्र वै ॥ ७ ॥ यदिच्छसि त्वं वामोरु ददामि तव वांछितम् ॥ ८ ॥ ॥ वर्द्धन्युवाच ॥ ॥ धर्मे तिष्ठति सर्वं वै स्थावरं जंगमं विभो ॥ स धर्मो दुष्करं कर्म कस्मात्त्वं कुरुषेऽनघ ॥ ९ ॥ ॥ यम उवाच ॥ ॥ ईशानस्य च यद्रूपं द्रष्टुमिच्छामि भामिनि ॥ तेनाहं तपसा युक्तः शिवया सह शंकरम् ॥ १० ॥ यशः प्राप्स्ये सुखं प्राप्स्ये करोमि च सुदुष्करम् ॥ युगेयुगे मम ख्यातिर्भवेदिति मतिर्मम ॥ ११ ॥ कल्पे कल्पे महाकल्पे भूयः ख्यातिर्भवेदिति ॥ एतस्मात्कारणात्सुभ्रूस्तप्यते परमं तपः ॥ १२ ॥ कस्मात्त्वमागता भद्रे कथयस्व यथातथा ॥ किं कार्यं कस्य हेतुश्च सत्यमाख्यातुमर्हसि ॥ १३ ॥ ॥ वर्द्धन्युवाच ॥ ॥ तपसैव त्वया धर्म भयभीतो दिवस्पतिः ॥ तेनाहं नोदिता चात्र तपोविघ्नस्य कांक्षया ॥ १४ ॥ इन्द्रासनभयाद्भीता हरिणा हरिसन्निधौ ॥ प्रेषिताहं महाभाग सत्यं हि प्रवदाम्यहम् ॥ १५ ॥ ॥ सूत उवाच ॥ ॥ सत्यवाक्येन च तदा तोषितो रविनंदनः ॥ उवाचैनां महाभाग्यो वरदोऽहं प्रयच्छ मे ॥ १६ ॥ यमोऽहं सर्वभूतानां दुष्टानां कर्मकारिणाम् ॥ धर्मरूपो हि सर्वेषां मनुजानां जितात्मनाम् ॥ १७ ॥ स धर्मोऽहं वरारोहे ददामि तव दुर्लभम् ॥ तत्सर्वं प्रार्थय त्वं मे शीघ्रं चाप्सरसां वरे ॥ १८ ॥ ॥ ॥ वर्द्धन्युवाच ॥ ॥ इन्द्रस्थाने सदारम्ये सुस्थिरत्वं प्रयच्छ मे ॥ स्वामिन्धर्मभृतां श्रेष्ठ लोकानां च हिताय वै ॥ १९ ॥ ॥ यम उवाच ॥ ॥ एवमस्त्विति तां प्राह चान्यं वरय सत्वरम् ॥ ददामि वरमुत्कृष्टं गानेन तोषितोस्म्यहम् ॥ २० ॥ ॥ वर्द्धन्युवाच ॥ ॥ अस्मिन्स्थाने महाक्षेत्रे मम तीर्थं महामते ॥ भूयाच्च सर्वपापघ्नं मन्नाम्नेति च विश्रुतम् ॥ २१ ॥ तत्र दत्तं हुतं तप्तं पठितं वाऽक्षयं भवेत् ॥ पञ्चरात्रं निषेवेत वर्द्धमानं सरोवरम् ॥ २२ ॥ पूर्वजास्तस्य तुष्येरंस्तर्प्यमाणा दिनेदिने ॥ तथेत्युक्त्वा तु तां धर्मो मौनमाचष्ट संस्थितः ॥ त्रिः परिक्रम्य तं धर्मं नमस्कृत्य दिवं ययौ ॥ २३ ॥ ॥ वर्द्धन्युवाच ॥ ॥ मा भयं कुरु देवेश यमस्यार्कसुतस्य च ॥ अयं स्वार्थपरो धर्म यशसे च समाचरेत् ॥ २४ ॥ ॥ व्यास उवाच ॥ ॥ वर्द्धनी पूजिता तेन शक्रेण च शुभानना ॥ साधुसाधु महाभागे देवकार्यं कृतं त्वया ॥ २५ ॥ निर्भयत्वं वरारोहे सुखवासश्च ते सदा ॥ यशः सौख्यं श्रियं रम्यां प्राप्स्यसि त्वं शुभानने ॥ २६ ॥ तथेति देवास्तामूचुर्निर्भयानंदचेतसा ॥ नमस्कृत्य च शक्रं सा गता स्थानं स्वकं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एताश्चान्याश्च बहुशस्तत्र संस्था व्यचिंतयन् ॥ ६६ ॥ परस्परं विलोक्यैव शंकमाना भयेन हि ॥ यमश्चैव तथा शक्र उभौ वायतनं हि वः ॥ ॥ ६७ ॥ एवं विचार्य बहुधा वर्द्धनीनाम भारत ॥ सर्वासामप्सरसां श्रेष्ठा सर्वाभरणभूषिता ॥ ६८ ॥ उवाचैवोर्वशी तत्र किं खिद्यसि शुभानने ॥ देवानां कार्यसिद्ध्यर्थं मायारूपबलेन च ॥ वर्णधर्मो यथा भूयात्करिष्ये पाकशासन ॥ ६९ ॥ ॥ इन्द्र उवाच ॥ ॥ साधुसाधु महाभागे वर्द्धनीनाम सुव्रता ॥ शीघ्रं गच्छ स्वयं भद्रे कुरु कार्यं कृशोदरि ॥ ७० ॥ धीराणामवने शक्ता नान्या सुभ्रु त्वया विना ॥ वर्द्धनी च तथेत्युक्त्वा गता यत्र स धर्मराट् ॥ ७१ ॥ महता भूषणेनैव रूपं कृत्वा मनोरमम् ॥ कुंकुमैः कज्जलैर्वस्त्रैर्भूषणैश्चैव भूषिता ॥ ७२ ॥ कुसुमं च तथा वस्त्रं किंकिणीकटिराजिता ॥ झणत्कारैस्तथा कष्टैर्भूषिता च पदद्वये ॥ ७३ ॥ नानाभूषणभूषाढ्या नानाचंदनचर्चिता ॥ नानाकुसुममालाढ्या दुकूलेनावृता शुभा ॥ ७४ ॥ प्रगृह्य वीणां संशुद्धां करे सर्वांगसुन्दरी ॥ नर्तनं त्रिविधं तत्र चक्रे लोकमनोरमम् ॥ ७५ ॥ तारस्वरेण मधुरैर्वंशनादेन मिश्रितम् ॥ ७६ ॥ मूर्च्छनातालसंयुक्तं तंत्रीलयसमन्वितम् ॥ क्षणेन सहसा देवो धर्मराजो जितात्मवान् ॥ विमनाः स तदा जातो धर्मराजो नृपात्मजः ॥ ७७ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ आश्चर्यं परमं ब्रह्मञ्जातं मे ब्रह्मसत्तम ॥ कथं ब्रह्मोपपन्नस्य तपश्छेदो बभूव ह ॥ ७८ ॥ धर्मे धरा च नाकश्च धर्मे पातालमेव च ॥ धर्मे चंद्रार्कमापश्च धर्मे च पवनोऽनलः ॥ ७९ ॥ धर्मे चैवाखिलं विश्वं स धर्मो व्यग्रतां कथम् ॥ गतः स्वामिंस्तद्वैयग्र्यं तथ्यं कथय सुव्रत ॥ ८० ॥ ॥ व्यास उवाच ॥ ॥ पतनं साहसानां च नरकस्यैव कारणम् ॥ योनिकुण्डमिदं सृष्टं कुंभीपाकसमं भुवि ॥ ८१ ॥ नेत्ररज्ज्वा दृढं बद्धा धर्षयंति मनस्विनः॥ कुचरूपैर्महादंडैस्ताड्यमानमचेतसम् ॥ ८२ ॥ कृत्वा वै पातयंत्याशु नरकं नृपसत्तम ॥ मोहनं सर्वभूतानां नारी चैवं विनिर्मिता ॥८३॥ तावद्धत्ते मनःस्थैर्यं श्रुतं सत्यमनाकुलम् ॥ यावन्मत्तांगनाग्रे न वागुरेव सुचेतसाम् ॥८४॥ तावत्तपोभिवृद्धिस्तु तावद्दानं दया दमः॥ तावत्स्वाध्यायवृत्तं च तावच्छौचं धृतं व्रतम् ॥८५॥ यावन्नस्तमृगीदृष्टिं चपलां न विलोकयेत्॥ तावन्माता पिता तावद्भ्राता तावत्ससुहृज्जनः ॥ ८६ ॥ तावल्लज्जा भयं तावत्स्वाचारस्तावदेव हि ॥ ज्ञानमौदार्यमैश्वर्यं तावदेव हि भासते ॥ यावन्मत्तांगनापाशैः पातितो नैव बन्धनैः ॥ ८७ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे धर्मारण्यमाहात्म्ये इन्द्रभयकथनंनाम तृतीयोऽध्यायः ॥ ३ ॥ छ ॥ ॥ व्यास उवाच ॥ ॥ अतः परं प्रवक्ष्यामि धर्मराजस्य चेष्टितम् ॥ यच्छ्रुत्वा यमदूतानां न भयं विद्यते क्वचित् ॥१॥ धर्मराजेन सा दृष्टा वर्द्धनी च वराप्सरा ॥ महत्यरण्ये का ह्येषा सुन्दरांग्यतिसुन्दरी ॥२॥ निर्मानुषवनं चेदं सिंहव्याघ्रभयानकम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विष्णवे सत्त्वरूपाय रजोरूपाय वेधसे ॥ तमोरूपाय रुद्राय स्थितिसर्गांतकारिणे ॥ १८ ॥ नमो बुद्धिस्वरूपाय त्रिधाहंकाररूपिणे ॥ पंचतन्मात्ररूपाय नमः प्रकृतिरूपिणे ॥ १९ ॥ नमो नमः स्वरूपाय पंचबुद्धींद्रियात्मने ॥ क्षित्यादिपंचरूपाय नमस्ते विषयात्मने ॥ २० ॥ नमो ब्रह्मांडरूपाय तदंतर्वर्तिने नमः ॥ अर्वाचीनपराचीनविश्वरूपाय ते नमः ॥२१॥ अनित्यनित्यरूपाय सदसत्पतये नमः ॥ नमस्ते भक्तकृपया स्वेच्छाविष्कृतविग्रह ॥ २२ ॥ तव निश्वसितं वेदास्तव वेदोऽखिलं जगत् ॥ विश्वाभूतानि ते पादः शिरो द्यौः समवर्तत ॥ २३ ॥ नाभ्या आसीदंतरिक्षं लोमानि च वनस्पतिः ॥ चंद्रमा मनसो जातश्चक्षोः सूर्यस्तव प्रभो ॥ २४ ॥ त्वमेव सर्वं त्वयि देव सर्वं सर्वस्तुतिस्तव्य इह त्वमेव ॥ ईश त्वया वास्यमिदं हि सर्वं नमोऽस्तु भूयोऽपि नमो नमस्ते ॥ २५ ॥ इति स्तुत्वा महादेवं निपेतुर्दंडवत्क्षितौ ॥ प्रत्युवाच तदा शंभुर्वरदोऽस्मि किमिच्छति ॥ २६ ॥ ॥ महादेव उवाच ॥ ॥ कथं व्यग्राः सुराः सर्वे बृहस्पतिपुरोगमाः ॥ तत्समाचक्ष्व मां ब्रह्मन्भवतां दुःखकारणम् ॥ २७ ॥ ॥ ब्रह्मोवाच ॥ ॥ नीलकंठ महादेव दुःखनाशाभयप्रद ॥ शृणु त्वं दुःखमस्माकं भवतो यद्वदाम्यहम् ॥ २८ ॥ धर्मराजोऽपि धर्मात्मा तपस्तेपे सुदुःसहम् ॥ न जानेऽसौ किमिच्छति देवानां पदमुत्तमम् ॥ २९ ॥ तेन त्रस्तास्तत्तपसा सर्वं इंद्रपुरोगमाः ॥ भवतोंघ्रौ चिरेणैव मनस्तेन समर्पितम् ॥ तमुत्थापय देवेश किमिच्छति स धर्मराट् ॥ ३० ॥ ॥ ईश्वर उवाच ॥ ॥ भवतां नास्ति नु भयं धर्मात्सत्यं ब्रवीम्यहम् ॥ ३१ ॥ तत उत्थाय ते सर्वे देवाः सह दिवौकसः ॥ रुद्रं प्रदक्षिणीकृत्य नमस्कृत्वा पुनःपुनः ॥ ३२ ॥ इन्द्रेण सहिताः सर्वे कैलासात्पुनरागताः ॥ स्वस्वस्थाने तदा शीघ्रं गताः सर्वे दिवौकसः ॥ ३३ ॥ इन्द्रोऽपि वै सुधर्मायां गतवान्प्रभुरीश्वरः ॥ न निद्रां लब्धवांस्तत्र न सुखं न च निर्वृतिम् ॥ ३४ ॥ मनसा चिंतयामास विघ्नं मे समुपस्थितम् ॥ अवाप महतीं चिंतां तदा देवः शचीपतिः ॥ ३५ ॥ मम स्थानं पराहर्तुं स्तपस्तेपे सुदुश्चरम् ॥ सर्वान्देवान्समाहूय इदं वचनमब्रवीत् ॥ ३६ ॥ ॥ ॥ इन्द्र उवाच ॥ ॥ शृण्वंतु देवताः सर्वा मम दुःखस्य कारणम् ॥ दुःखेन मम यल्लब्धं तत्किं वा प्रार्थयेद्यमः ॥ बृहस्पतिः समालोक्य सर्वान्देवानथाब्रवीत् ॥ ३७ ॥ ॥ बृहस्पतिरुवाच ॥ ॥ तपसे नास्ति सामर्थ्यं विघ्नं कर्तुं दिवौकसः ॥ उर्वश्याद्याः समाहूय संप्रेष्यंतां च तत्र वै ॥ ॥ ३८ ॥ तासामाकारणार्थाय प्रतिद्वारं प्रतस्थिवान् ॥ स गत्वा ताः समादाय सभायां शीघ्रमाययौ ॥ ३९ ॥ आगतास्ता हरिः[1] प्राह महत्कार्यमु

१ हरिः इन्द्रः--इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पस्थितम् ॥ गछन्तु त्वरिताः सर्वा धर्मारण्यं प्रति द्रुतम् ॥ ४० ॥ यत्र वै धर्मराजोसौ तपश्चक्रे सुदुष्करम् ॥ हास्यभावकटाक्षैश्च गीतनृत्यादि
भिस्तथा ॥ ४१ ॥ तं लोभयध्वं यमिनं तपःस्थानाच्युतिर्भवेत् ॥ देवस्य वचनं श्रुत्वा तथा अप्सरसां गणाः ॥ ४२ ॥ मिथः संरेभिरे कर्तुं
विचार्य च परस्परम् ॥ धर्मारण्यं प्रतस्थेसावुर्वशी स्ववरांगना ॥ ४३ ॥ तुष्टुवुः पुष्पवर्षांश्च ससृजुस्तच्छिरस्यमी ॥ ततस्तु देवैर्विप्रैश्च स्तूयमाना
समंततः ॥ ४४ ॥ निर्ययौ परमप्रीत्या वनं परमपावनम् ॥ बिल्वार्कखदिराकीर्णं कपित्थधवसंकुलम् ॥ ४५ ॥ न सूर्यो भाति तत्रैव महांधकार
संयुतम् ॥ निर्जनं निर्मनुष्यं च बहुयोजनमायतम् ॥ ४६ ॥ मृगैः सिंहैर्वृतं घोरैरन्यैश्चापि वनेचरैः ॥ पुष्पितैः पादपैः कीर्णं सुमनोहरशाद्वलम् ॥
॥ ४७ ॥ विपुलं मधुरानादैर्नादितं विहगैस्तथा ॥ पुंस्कोकिलनिनादाढ्यंझिल्लीकगणनादितम् ॥ ४८ ॥ प्रवृद्धविकटैर्वृक्षैः सुखच्छायैः समावृतम् ॥
वृक्षैराच्छादिततलं लक्ष्म्या परमया युतम् ॥४९॥ नापुष्पः पादपः कश्चिन्नाफलो नापि कंटकी ॥ षट्पदैरप्यनाकीर्णं नास्मिन्वै कानने भवेत् ॥५०॥
विहंगैर्नादितं पुष्पैरलंकृतमतीव हि ॥ सर्वर्तुकुसमैर्वृक्षैः सुखच्छायैः समावृतम् ॥ ५१ ॥ मारुताकलितास्तत्र द्रुमाः कुसुमशाखिनः ॥ पुष्पवृष्टिं
विचित्रां तु विसृजंति च पादपाः ॥ ५२ ॥ दिवस्पृशोऽथ संघुष्टाः पक्षिभिर्मधुरस्वनैः ॥ विरेजुः पादपास्तत्र सुगन्धकुसुमैर्वृताः ॥ ५३ ॥
तिष्ठंति च प्रवालेषु पुष्पभारावनादिषु ॥ रुवंति मधुरालापाः षट्पदा मधुलिप्सवः ॥ ५४ ॥ तत्र प्रदेशांश्च बहूनामोदांकुरमंडितान् ॥ लतागृह
परिक्षिप्तान्मनसः प्रीतिवर्द्धनान् ॥ ५५ ॥ संपश्यंती महातेजा बभूव मुदिता तदा ॥ परस्पराश्लिष्टशाखैः पादपैः कुसमाचितैः ॥ ५६ ॥
अशोभत वनं तत्तु महेंद्रध्वजसन्निभैः ॥ सुखशीतसुगन्धी च पुष्परेणुवहोऽनिलः ॥ ५७ ॥ एवंगुणसमायुक्तं ददर्श सा वनं तदा ॥
तदा सूर्योद्भवां तत्र पवित्रां परिशोभिताम् ॥ ५८ ॥ आश्रमप्रवरं तत्र ददर्श च मनोरमम् ॥ पतिभिर्वालखिल्यैश्च वृतं मुनिगणा
वृतम् ॥ ५९ ॥ अग्न्यगारैश्च बहुभिर्वृक्षशाखावलंबितैः ॥ धूम्रपानकणैस्तत्र दिग्वासोयतिभिस्तथा ॥ ६० ॥ पाल्या वन्या मृगास्तत्र सौम्या
भूयो बभूविरे ॥ मार्जारा मूषकैस्तत्र सर्पैश्च नकुलास्तथा ॥ ६१ ॥ मृगशावैस्तथा सिंहाः सत्त्वरूपा बभूविरे ॥ परस्परं चिक्रीडुस्ते यथा चैव
सहोदराः ॥ दूराद्ददर्श च वनं तत्र देवोऽब्रवीत्तदा ॥ ६२ ॥ ॥ इन्द्र उवाच ॥ ॥ अयं च खलु धर्मराट् तपस्युग्रेवतिष्ठते ॥ मम राज्याभि
कांक्षोऽसावतोर्थे यत्यतामिह ॥ ६३ ॥ तपोविघ्नं प्रकुर्वंतु ममाज्ञा तत्र गम्यताम् ॥ इन्द्रस्य वचनं श्रुत्वा उर्वशी च तिलोत्तमा ॥ ६४ ॥ सुकेशी
मंजुघोषा च घृताची मेनका तथा ॥ विश्वाची चैव रंभा च प्रम्लोचा चारुभाषिणी ॥ ६५ ॥ पूर्वचित्तिः सुरूपा च अनुम्लोचा यशस्विनी ॥

CC-0. In Public Domain. Digitization by eGangotri

ष्ठितम् ॥ पावनं भूतले जातं कस्मात्तेन विनिर्मितम् ॥ २३ ॥ तीर्थभूतं हि कस्माच्च कारणात्तद्वदस्व मे ॥ ब्राह्मणाः कतिसं
ख्याकाः केन वै स्थापिताः पुरा ॥ २४ ॥ अष्टादशसहस्राणि किमर्थं स्थापितानि वै ॥ कस्मिन्वंशे समुत्पन्ना ब्राह्मणा ब्रह्म
सत्तमाः ॥ २५ ॥ सर्वविद्यासु निष्णाता वेदवेदांगपारगाः ॥ ऋग्वेदेषु च निष्णाता यजुर्वेदकृतश्रमाः ॥ २६ ॥ सामवेदांगपारज्ञास्त्रैविद्या धर्म
वित्तमाः ॥ तपोनिष्ठाः शुभाचाराः सत्यव्रतपरायणाः ॥ २७ ॥ मासोपवासैः कृशितास्तथा चांद्रायणादिभिः ॥ सदाचाराश्च ब्रह्मण्याः केन नित्यो
पजीविनः ॥ तत्सर्वमादितः कृत्स्नं ब्रूहि मे वदतां वर ॥ २८ ॥ दानवास्तत्र दैतेया भूतवेतालसंभवाः ॥ राक्षसाश्च पिशाचाश्च उद्वेजंते कथं न
तान् ॥ २९ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे पूर्वार्धे धर्मारण्यमाहात्म्ये युधिष्ठिरप्रश्नवर्णनंनाम द्विती
योऽध्यायः ॥ २ ॥ ॥ छ ॥ ॥ व्यास उवाच ॥ ॥ श्रूयतां नृपशार्दूल कथां पौराणिकीं शुभाम् ॥ यां श्रुत्वा सर्वपापेभ्यो मुच्यते नात्र
संशयः ॥ १ ॥ एकदा धर्मराजो वै तपस्तेपे सुदुष्करम् ॥ ब्रह्मविष्णुमहेशाद्यैर्जलवर्षातपादिषाट् ॥ २ ॥ आदौ त्रेतायुगे राजन्वर्षाणामयुतत्रयम् ॥
मध्येवनं तपस्यंतमशोकतरुमूलगम् ॥ ३ ॥ शुष्कस्नायुपिनद्धास्थिसंचयं निश्चलाकृतिम् ॥ वल्मीककीटिकाकोटिशोषिताशेषशोणितम् ॥ ४ ॥
निर्मांसकीकसचयं स्फटिकोपलनिश्चलम् ॥ शंखकुंदेंदुतुहिनमहाशंखलसच्छ्रियम् ॥ ५ ॥ सत्त्वावलंबितप्राणमायुःशेषेण रक्षितम् ॥ निश्वासोच्छ्वास
पवनवृत्तिसूचितजीवितम् ॥ ६ ॥ निमेषोन्मेषसंचारपिशुनीकृतजन्तुकम् ॥ पिशंगितस्फुरद्रश्मिनेत्रदीपितदिङ्मुखम् ॥ ७ ॥ तत्तपोग्निशिखादाव
चुंबितम्लानकाननम् ॥ तच्छांत्युदसुधावर्षसंसिक्ताखिलभूरुहम् ॥ ८ ॥ साक्षात्तपस्यंतमिव तपो धृत्वा नराकृतिम् ॥ निराकृतिं निराकांक्षं कृत्वा
भक्तिं च कांचनम् ॥ ९ ॥ कुरंगशावैर्गणशो भ्रमद्भिः परिवारितम् ॥ निनादभीषणास्यैश्च वनजैः परिरक्षितम् ॥ १० ॥ एतादृशं महाभीमं दृष्ट्वा
देवाः सवासवाः ॥ ध्यायंतं च महादेवं सर्वेषां चाभयप्रदम् ॥ ११ ॥ ब्रह्माद्या दैवताः सर्वे कैलासं प्रति जग्मिरे ॥ पारिजाततरुच्छायामासीनं च
सहोमया ॥ १२ ॥ नंदिर्भृंगिर्महाकालस्तथान्ये च महागणाः ॥ स्कन्दस्वामी च भगवान्गणपश्च तथैव च ॥ तत्र देवाः सब्रह्माद्याः स्वस्वस्थानेषु
तस्थिरे ॥ १३ ॥ ॥ ब्रह्मोवाच ॥ ॥ नमोस्त्वनंतरूपाय नीलकंठ नमोऽस्तु ते ॥ अविज्ञातस्वरूपाय कैवल्यायामृताय च ॥ १४ ॥ नांतं
देवा विजानंति यस्य तस्मै नमोनमः ॥ यं न वाचः प्रशंसंति नमस्तस्मै चिदात्मने ॥ १५ ॥ योगिनो यं हृदः कोशे प्रणिधानेन निश्चलाः ॥
ज्योतीरूपं प्रपश्यंति तस्मै श्रीब्रह्मणे नमः ॥ १६ ॥ कालातपराय कालाय स्वेच्छया पुरुषाय च ॥ गुणत्रयस्वरूपाय नमः प्रकृतिरूपिणे ॥१७॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रक्षितं पालितं केन कस्मिन्कालेऽथ निर्मितम् ॥ किंकिं त्वत्राभवत्पूर्वं शंशैतत्पृच्छतो मम ॥ १२० ॥ भूतं भव्यं भविष्यच्च तस्मिन्स्थाने च
यद्भवेत् ॥ तत्सर्वं कथयस्वाद्य तीर्थानां च यथा स्थितिः ॥ १२१ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे पूर्व
भागे धर्मारण्यमाहात्म्ये युधिष्ठिरप्रश्नवर्णनंनाम प्रथमोऽध्यायः ॥ १ ॥ ॥ व्यास उवाच ॥ ॥ पृथ्वीपुरंध्र्यास्तिलकं ललाटे लक्ष्मीलतायाः
स्फुटमालवालम् ॥ वाग्देवताया जलकेलिरम्यं नोहेरकं संप्रति वर्णयामि ॥ १ ॥ साधु पृष्टं त्वया राजन्वाराणस्यधिकाधिकम् ॥ धर्मारण्यं नृपश्रेष्ठ
शृणुष्वावहितो भृशम् ॥ २ ॥ सर्वतीर्थानि तत्रैव ऊषरं तेन कथ्यते ॥ ब्रह्मविष्णुमहेशाद्यैरिंद्राद्यैः परिसेवितम् ॥ ३ ॥ लोकपालैश्च दिक्पालैर्मातृभिः
शिवशक्तिभिः ॥ गंधर्वैश्चाप्सरोभिश्च सेवितं यज्ञकर्मभिः ॥ ४ ॥ भूतवेतालशाकिनीग्रहदेवाधिदेवतैः ॥ ऋतुभिर्मासपक्षैश्च सेव्यमानं सुरासुरैः ॥
॥ ५ ॥ तदाद्यं च नृप स्थानं सर्वसौख्यप्रदं तथा ॥ यज्ञैश्च बहुभिश्चैव सेवितं मुनिसत्तमैः ॥ ६ ॥ सिंहव्याघ्रैर्द्विपैश्चैव पक्षिभिर्विविधैस्तथा ॥ गोमहि
ष्यादिभिश्चैव सारसैर्मृगशूकरैः ॥ ७ ॥ सेवितं नृपशार्दूल श्वापदैर्विविधैरपि ॥ तत्र ये निधनं प्राप्ताः पक्षिणः कीटकादयः ॥ ८ ॥ पशवः श्वाप
दाश्चैव जलस्थलचराश्च ये ॥ खेचरा भूचराश्चैव डाकिन्यो राक्षसास्तथा ॥ ९ ॥ एकोत्तरशतैः सार्द्धं मुक्तिस्तेषां हि शाश्वती ॥ ते सर्वे विष्णुलो
कांश्च प्रयांत्येव न संशयः ॥ १० ॥ संतारयति पूर्वज्ञान्दश पूर्वान्दशापरान् ॥ यवव्रीहितिलैः सर्पिर्बिल्वपत्रैश्च दूर्वया ॥ ११ ॥ गुडैश्चैवोदकैर्नाथ तत्र
पिंडं करोति यः ॥ उद्धरेत्सप्त गोत्राणि कुलमेकोत्तरं शतम् ॥ १२ ॥ वृक्षैरनेकधा युक्तं लतागुल्मैः सुशोभितम् ॥ सदा पुण्यप्रदं तच्च सदा फलस
मन्वितम् ॥ १३ ॥ निर्वैरं निर्भयं चैव धर्मारण्यं च भूपते ॥ गोव्याघ्रैः क्रीडयते तत्र तथा मार्जारमूषकैः ॥ १४ ॥ भेकोऽहिना क्रीडते च मानुषा
राक्षसैः सह ॥ निर्भयं वसते तत्र धर्म्मारण्यं च भूतले ॥ १५ ॥ महानंदमयं दिव्यं पावनात्पावनं परम् ॥ कलकंठः कलोत्कंठमनुगुंजति कुंज
गः ॥ १६ ॥ ध्यानस्थः श्रोष्यति तदा पारावत्येति वार्य्यते ॥ केकः कोकीं परित्यज्य मौनं तिष्ठति तद्भयात् ॥ १७ ॥ चकोरश्चंद्रिकाभोक्ता नक्त
व्रतमिवास्थितः ॥ पठंति सारिकाः सारं शुकं संबोधयत्यहो ॥ १८ ॥ अपारवारसंसारसिंधुपारप्रदः शिवः ॥ आलस्येनापि यो यायाद्गृहाद्धर्मवनं
प्रति ॥ १९ ॥ अश्वमेधाधिको धर्मस्तस्य स्याच्च पदेपदे ॥ शापानुग्रहसंयुक्ता ब्राह्मणास्तत्र संति वै ॥ २० ॥ अष्टादशसहस्राणि पुण्यकार्येषु
निर्मिताः ॥ षट्त्रिंशत्तु सहस्राणि भृत्यास्ते वणिजो भुवि ॥ २१ ॥ द्विजभक्तिसमायुक्ता ब्रह्मण्यास्ते त्वयोनिजाः ॥ पुराणज्ञाः सदाचारा धार्मि
काः शुद्धबुद्धयः ॥ स्वर्गे देवाः प्रशंसंति धर्म्मारण्यनिवासिनः ॥ २२ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ धर्मारण्येति त्रिदशैः कदा नाम प्रति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भुवनत्रये ॥ ७० ॥ ॥ सूत उवाच ॥ ॥ एवंविधैर्वचोभिश्च तोषितो मुनिसत्तमः ॥ पप्रच्छ परया भक्त्या धर्मारण्यकथां शुभाम् ॥ ७१ ॥
॥ ॥ नारद उवाच ॥ ॥ श्रुता व्यासमुखाद्धर्म्मं धर्मारण्यकथा शुभा ॥ तत्सर्वं हि कथय मे विस्तीर्णं च यथातथम् ॥ ७२ ॥ ॥ यम
उवाच ॥ ॥ व्यग्रोऽहं सततं ब्रह्मन्प्राणिनां सुखदुःखिनाम् ॥ तत्तत्कर्मानुसारेण गतिं दातुं सुखेतराम् ॥ ७३ ॥ तथापि साधुसंगो हि धर्मायैव
प्रजायते ॥ इह लोके परत्रापि क्षेमाय च सुखाय च ॥ ७४ ॥ ब्रह्मणः सन्निधौ यच्च श्रुतं व्यासमुखेरितम् ॥ तत्सर्वं कथयिष्यामि मानुषाणां हिता
य वै ॥ ७५ ॥ ॥ सूत उवाच ॥ ॥ यमेन कथितं सर्वं यच्छ्रुतं ब्रह्मसंसदि ॥ आदिमध्यावसानं च सर्वं नैवात्र संशयः ॥ ७६ ॥ कलिद्वापर
योर्मध्ये धर्मपुत्रं युधिष्ठिरम् ॥ गतोऽसौ नारदो मर्त्ये राज्यं धर्मसुतस्य वै ॥ ७७ ॥ आगतः श्रीहरेरंशो नारदः प्रत्यदृश्यत ॥ ज्वलिताग्निप्रतीकाशो
बालार्कसदृशेक्षणः ॥ ७८ ॥ सव्यापवृत्तं विपुलं जटामंडलमुद्वहन् ॥ चंद्रांशुशुक्ले वसने वसानो रुक्मभूषणः ॥ ७९ ॥ वीणां गृहीत्वा महतीं कक्षा
सक्तां सखीमिव ॥ कृष्णाजिनोत्तरासंगो हेमयज्ञोपवीतवान् ॥ ८० ॥ दण्डी कमंडलुकरः साक्षाद्वह्निरिवापरः ॥ भेत्ता जगति गुह्यानां विग्रहाणां गु
होपमः ॥ ८१ ॥ महर्षिगणसंसिद्धो विद्वान्गांधर्ववेदवित् ॥ वैरकेलिकलो विप्रो ब्राह्मः कलिरिवापरः ॥ ८२ ॥ देवगंधर्वलोकानामादिवक्ता मुनिग्रहः ॥
गाता चतुर्णां वेदानामुद्गाता हरिसद्गुणान् ॥ ८३ ॥ स नारदोऽथ विप्रर्षिर्ब्रह्मलोकचरोऽव्ययः ॥ आगतोऽथ पुरीं हर्षाद्धर्मराजेन पालिताम् ॥ ८४ ॥
अथतत्रोविष्टेषु राजन्येषु महात्मसु ॥ महत्सु चोपविष्टेषु गंधर्वेषु च तत्र वै ॥ ८५ ॥ लोकाननुचरन्सर्व्वानागतः स महर्षिराट् ॥ नारदः सुमहातेजा
ऋषिभिः सहितस्तदा ॥ ८६ ॥ तमागतमृषिं दृष्ट्वा नारदं सर्वधर्मवित् ॥ सिंहासनात्समुथाय प्रययौ सन्मुखस्तदा ॥ ८७ ॥ अभ्यवादयत प्रीत्या विनयाव
नतस्तदा ॥ तदर्हमासनं तस्मै संप्रदाय यथाविधि ॥ ८८ ॥ गां चैव मधुपर्कं च संप्रदायार्घमेव च ॥ अर्चयामास रत्नैश्च सर्वकामैश्च धर्मवित् ॥ ८९ ॥
तुतोष च यथावच्च पूजां प्राप्य च धर्मवित् ॥ कुशली त्वं महाभाग तपसः कुशलं तव ॥ ९० ॥ न कश्चिद्बाधते दुष्टो दैत्यो हि स्वर्गभूपतिम् ॥
मुने कल्याणरूपस्त्वं नमस्कृतः सुरासुरैः ॥ सर्व्वगः सर्व्ववेत्ता च ब्रह्मपुत्र कृपानिधे ॥ ९१ ॥ ॥ नारद उवाच ॥ ॥ सर्वतः कुशलं मेद्य
प्रसादाद्ब्रह्मणः सदा ॥ कुशली त्वं महाभाग धर्मपुत्र युधिष्ठिर ॥ ९२ ॥ भ्रातृभिः सह राजेंद्र धर्मेषु रमते मनः ॥ दारैः पुत्रैश्च भृत्यैश्च
कुशलैर्गजवाजिभिः ॥ ९३ ॥ औरसानिव पुत्रांश्च प्रजा धर्मेण धर्मज ॥ पालयसि किमाश्चर्यं त्वया धन्या हि सा प्रजा ॥ ९४ ॥ पालनात्पोषणा
न्नृणां धर्मो भवति वै ध्रुवम् ॥ तत्तद्धर्मस्य भोक्ता त्वमित्येवं मनुरब्रवीत् ॥ ९५ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ कुशलं मम राष्ट्रं च भवता

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मंघ्रिस्पर्शनात् ॥ दर्शनेन महाभाग जातोऽहं गतकिल्बिषः ॥ ९६ ॥ धन्योऽहं कृतकृत्योऽहं सभाग्योऽहं धरातले ॥ अद्याहं सुकृती जातो ब्रह्मपुत्रे गृहागते ॥ ९७ ॥ कुत आगमनं ब्रह्मन्ब्रूय ते मुनिसत्तम ॥ अनुग्रहार्थं साधूनां किं वा कार्येण केन च ॥ ९८ ॥ ॥ नारद उवाच ॥ आगतोऽहं नृपश्रेष्ठ सकाशाच्छमनस्य च ॥ व्यासेनोक्तां ब्रह्मणोग्रे कथां पौराणिकीं शुभाम् ॥ ९९ ॥ धर्मारण्याश्रितां दिव्यां सर्वसंताप हारिणीम् ॥ यां श्रुत्वा सर्वपापेभ्यो मुच्यते ब्रह्महत्यया ॥ १०० ॥ हत्यायुतप्रशमनीं तापत्रयविनाशिनीम् ॥ यां वै श्रुत्वातिभक्त्या च कठिनो मृदुतां भजेत् ॥ १०१ ॥ धर्मराजेन तां श्रुत्वा ममाग्रे च निवेदिताम् ॥ तमपृच्छदमेयात्मा कथां धर्मविनोदिनीम् ॥ २ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ धर्मारण्याश्रितां पुण्यां कथां मे द्विजसत्तम ॥ कथयस्व प्रसादेन लोकानां हितकाम्यया ॥ ३ ॥ ॥ नारद उवाच ॥ ॥ स्नानकालोयमस्माकं न कथावसरो मम ॥ परंतु श्रूयतां राजन्नुपदेशं ददाम्यहम् ॥ ४ ॥ मासानामुत्तमो माघः स्नानदानादिके तथा ॥ तस्मिन्माघे च यः स्नाति सर्वपापैः प्रमुच्यते ॥ ५ ॥ स्नानार्थं याहि शीघ्रं त्वं गंगायां नृपतेऽधुना ॥ व्यासस्यागमनं चाद्य भविष्यति नृपोत्तम ॥ ६ ॥ तं पृच्छस्व महाभाग श्रावयिष्यति ते शुभम् ॥ तीर्थानां चैव सर्वेषां फलं पुण्यं यदद्भुतम् ॥ ७ ॥ भूतं भव्यं भविष्यं च उत्तमाधममध्यमाः ॥ वाचयिष्यति तत्सर्वमितिहाससमुद्भवम् ॥ ८ ॥ धर्मारण्यस्य सकलं वृत्तं यद्यत्पुरातनम् ॥ व्यासः सत्यवतीपुत्रो वदिष्यति च तेऽखिलम् ॥ ९ ॥ ॥ सूत उवाच ॥ ॥ एवमुक्त्वा विधेः पुत्रस्तत्रैवांतरधीयत ॥ तस्मिन्गते स नृपतिः क्रीडते सचिवैः सह ॥ ११० ॥ एतस्मिन्नंतरे तत्र प्राप्तः सत्यवतीसुतः ॥ विज्ञापयामास तदा विदुरः पांडवस्य हि ॥ ११ ॥ ॥ सूत उवाच ॥ ॥ आगतं तु मुनिं श्रुत्वा सर्वे हर्षसमाकुलाः ॥ समुत्तस्थुर्हि भीमाद्याः सह धर्मेण सर्वशः ॥ १२ ॥ तदा हि सन्मुखो भूत्वा मुमुदे नतकन्धरः ॥ दंडवत्तं प्रणम्याथ भ्रातृभिः सहितस्तदा ॥ १३ ॥ मधुपर्केण विधिना पूजां कृत्वा सुशोभनाम् ॥ सिंहासने समावेश्य पप्रच्छानामयं तदा ॥१४॥ ततः पुण्यां कथां दिव्यां श्रावयामास धर्मवित् ॥ कथांते मुनिशार्दूलं वचनं चेदमब्रवीत् ॥ १५ ॥ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ त्वत्प्रसादान्मया ब्रह्मञ्छ्रुतास्तु प्रवराः कथाः ॥ आपद्धर्म्मा राजधर्मा मोक्षधर्म्मा ह्यनेकशः ॥ १६ ॥ पुराणानां च धर्माश्च व्रतानि बहुशस्तथा ॥ तीर्थान्यनेकरूपाणि सर्वाण्यायतनानि च ॥ १७ ॥ इदानीं श्रोतुमिच्छामि धर्मारण्यकथां शुभाम् ॥ श्रुत्वा यां हि विनश्येत पापं ब्रह्मवधादिकम् ॥ १८ ॥ धर्म्मारण्यस्थतीर्थानां श्रोतुमिच्छामि तत्त्वतः ॥ कस्येदं स्थापितं स्थानं कस्मादेतद्विनिर्मितम् ॥ १९ ॥

CC-0. In Public Domain. Digitization by eGangotri

सार्द्धं ततः संयमिनीं प्रति ॥ ४६ ॥ अमात्यानुचरैः सार्धं प्रविष्टः स्वपुरं यमः ॥ तत्रांतरे महातेजा नारदो मुनिपुंगवः ॥ ४७ ॥ दुर्निरीक्ष्यः कृपा युक्तः समदर्शी तपोनिधिः ॥ तपसा दग्धदेहोपि विष्णुभक्तिपरायणः ॥ ४८ ॥ सर्वगः सर्वविच्चैव नारदः सर्वदा शुचिः ॥ वेदाध्ययनशीलश्च त्वागत स्तत्र संसदि ॥४९॥ तं दृष्ट्वा सहसा धर्मो भार्यया सेवकैः सह ॥ संमुखो हर्षसंयुक्तो गच्छन्नेव स सत्वरः॥५०॥ अद्य मे सफलं जन्म अद्य मे सफलं कुलम् ॥ अद्य मे सफलो धर्मस्त्वय्यायाते तपोधने ॥५१॥ अर्घ्यपाद्यादिविधिना पूजां कृत्वा विधानतः ॥ दंडवत्तं प्रणम्याथ विधिना चोपवेशितः ॥५२॥आसने स्वे महादिव्ये रत्नकांचनभूषिते ॥ चित्रार्पिता सभा सर्वा दीपा निर्वातगा इव ॥५३॥ विधाय कुशलप्रश्नं स्वागतेनाभिनंद्य तम् ॥ प्रहर्षमतुलं लेभे धर्मारण्यकथां स्मरन् ॥ ५४ ॥ नारदं पूजयित्वा तु प्रहृष्टेनांतरात्मना ॥ हर्षितं तु यमं दृष्ट्वा नारदो विस्मिताननः ॥ ५५ ॥ चिंतयामास मनसा किमिदं हर्षितो हरिः[1] ॥ अतिहर्षं च तं दृष्ट्वा यमराजस्वरूपिणम् ॥ आश्चर्यमनसं चैव नारदः पृष्टवांस्तदा ॥ ५६ ॥

॥ ॥ नारद उवाच ॥ ॥ किं दृष्टं भवताश्चर्य्यं किं वा लब्धं महत्पदम् ॥ दुष्टस्त्वं दुष्टकर्मा च दुष्टात्मा क्रोधरूपधृक् ॥ ५७ ॥ पापिनां यमनं चैवमेतद्रूपं महत्तरम् ॥ सौम्यरूपं कथं जातमेतन्मे संशयः प्रभो ॥ ५८ ॥ अद्य त्वं हर्षसंयुक्तो दृश्यसे केन हेतुना ॥ कथयस्व महाकाय हर्षस्यैव हि कारणम् ॥ ५९ ॥

॥ धर्मराज उवाच ॥ ॥ श्रूयतां ब्रह्मपुत्रैतत्कथयामि न संशयः ॥ पुराहं ब्रह्मसदनं गतवानभिवंदितुम् ॥ ६० ॥ तत्रासीनःसभामध्ये सर्वलोकैकपूजिते ॥ नानाकथाः श्रुतास्तत्र धर्म्मवर्गसमन्विताः ॥ ६१ ॥ कथाः पुण्या धर्मयुता रम्या व्यासमुखाच्छ्रुताः ॥ धर्मकामार्थसंयुक्ताः सर्वाघौघविनाशिनीः ॥ ६२ ॥ याः श्रुत्वा सर्वपापेभ्यो मुच्यंते ब्रह्महत्यया ॥ तारयंति पितृगणाञ्छतमेकोत्तरं मुने ॥ ६३ ॥

॥ ॥ नारद उवाच ॥ ॥ कीदृशी तत्कथा मे तां प्रशंस भवता श्रुताम् ॥ कथां यम महाबाहो श्रोतुकामोस्म्यहं च ताम् ॥ ६४ ॥

॥ ॥ यम उवाच ॥ ॥ एकदा ब्रह्मलोकेऽहं नमस्कर्तुं पितामहम् ॥ गतवानस्मि तं देशं कार्याकार्यविचारणे ॥ ६५ ॥ मया तत्राद्भुतं दृष्टं श्रुतं च मुनिसत्तम ॥ धर्म्मारण्यकथां दिव्यां कृष्णद्वैपायनेरिताम् ॥ ६६ ॥ श्रुत्वा कथां महापुण्यां ब्रह्मन्ब्रह्मांडगां शुभाम् ॥ गुणपूर्णां सत्ययुक्तां तेन हर्षेण हर्षितः ॥ ६७ ॥ अन्यच्चैव मुनिश्रेष्ठ तवागमनकारणम् ॥ शुभाय च सुखायैव क्षेमाय च जयाय हि ॥ ६८ ॥ आद्यास्मि कृतकृत्योऽहमद्याहं सुकृती मुने ॥ धर्मोनामाद्य जातोऽहं तव पद्युग्मदर्शनात् ॥ ६९ ॥ पूज्योऽहं च कृतार्थोहं धन्योहं चाद्य नारद ॥ युष्मत्पादप्रसादाच्च पूज्योऽहं

१ हरिः—यम—इत्यर्थः—"यमानिलेन्द्रचन्द्रार्कविष्णुसिंहांशुवाजिषु ॥ शुकाहिकपिभेकेषु हरिर्ना—"इत्यमरः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रचेताः पुलहो मरीचिः कश्यपः प्रभुः ॥ १९ ॥ भृगुरत्रिर्वसिष्ठश्च गौतमोऽथ तथांगिराः ॥ पुलस्त्यश्च क्रतुश्चैव प्रह्लादः कर्दमस्तथा ॥ २० ॥
अथर्वांगिरसश्चैव वालखिल्या मरीचिपाः ॥ मनोंऽतरिक्षं विद्याश्च वायुस्तेजो जलं मही ॥ २१ ॥ शब्दस्पर्शौ तथा रूपं रसो
गंधस्तथैव च ॥ प्रकृतिश्च विकारश्च सदसत्कारणं तथा ॥ २२ ॥ अगस्त्यश्च महातेजा मार्कंडेयश्च वीर्यवान् ॥ जमदग्निर्भरद्वाजः संवर्तश्च्यवन
स्तथा ॥ २३ ॥ दुर्वासाश्च महाभाग ऋष्यशृंगश्च धार्मिकः॥ सनत्कुमारो भगवान्योगाचार्य्यो महातपाः ॥ २४ ॥ असितो देवलश्चैव जैगीषव्यश्च
तत्त्ववित् ॥ आयुर्वेदस्तथाष्टांगो गान्धर्वश्चैव तत्र हि ॥ २५ ॥ चंद्रमाः सह नक्षत्रैरादित्यश्च गभस्तिमान् ॥ वायवस्तंतवश्चैव संकल्पः प्राण एव
च ॥ २६ ॥ मूर्तिमंतो महात्मानो महाव्रतपरायणाः ॥ एते चान्ये च बहवो ब्रह्माणं समुपासिरे ॥२७॥ अर्थो धर्मश्च कामश्च हर्षो द्वेषस्तमो दमः ॥
आयांति तस्यां सहिता गंधर्वाप्सरसां गणाः ॥ २८ ॥ शुक्राद्याश्च ग्रहाश्चैव ये चान्ये तत्समीपगाः ॥ मंत्रा रथंतरं चैव हरिमान्वसुमानपि ॥२९॥
महितो विश्वकर्मा च वसवश्चैव सर्वशः ॥ तथा पितृगणाः सर्वे सर्वाणि च हवींष्यथ ॥ ३० ॥ ऋग्वेदः सामवेदश्च यजुर्वेदस्तथैव च ॥ अथर्ववेद
श्च तथा सर्वशास्त्राणि चैव ह ॥ ३१ ॥ इतिहासोपवेदाश्च वेदांगानि च सर्वशः ॥ मेधा धृतिः स्मृतिश्चैव प्रज्ञा बुद्धिर्यशः समाः ॥ ३२ ॥ काल
चक्रं च तद्दिव्यं नित्यमक्षयमव्ययम् ॥ यावन्त्यो देवपत्न्यश्च सर्वा एव मनोजवाः ॥३३॥ गार्हपत्या नाकचराः पितरो लोकविश्रुताः ॥ सोमपा
एकशृंगाश्च तथा सर्वे तपस्विनः ॥ ३४ ॥ नागाः सुपर्णाः पशवः पितामहमुपासते ॥ स्थावरा जंगमाश्चापि महाभूतास्तथा परे ॥ ३५ ॥ पुरंदरश्च
देवेंद्रो वरुणो धनदस्तथा ॥ महादेवः सहोमोऽत्र सदा गच्छति सर्वदः ॥ ३६ ॥ गच्छंति सर्वदा देवा नारायणस्तथर्षयः ॥ ऋषयो वालखिल्याश्च
योनिजायोनिजास्तथा ॥ ३७ ॥ यत्किंचित्त्रिषु लोकेषु दृश्यते स्थाणु जंगमम् ॥ तस्यां सहोपविष्टायां तत्र ज्ञात्वा स धर्मवित् ॥ ३८ ॥ देवैर्मुनि
वरैः क्रांतां समालोक्यातिविस्मितः॥ हर्षेण महता युक्तो रोमांचिततनूरुहः ॥ ३९ ॥ तत्र धर्मो महातेजाः कथां पापप्रणाशिनीम् ॥ वाच्यमानां तु
शुश्राव व्यासेनामिततेजसा ॥ ४० ॥ धर्मारण्यकथां दिव्यां तथैव सुमनोहराम् ॥ धर्मार्थकाममोक्षाणां फलदात्रीं तथैव च ॥ ४१ ॥ पुत्रपौत्रप्रपौ
त्रादिफलदात्रीं तथैव च ॥ धारणाच्छ्रवणाच्चापि पठनाच्चावलोकनात् ॥४२॥ तां निशम्य प्रभु विस्तीर्णां कथां ब्रह्मांडसंभवाम् ॥ प्रमोदोत्फुल्लनयनो
ब्रह्माणमनुमत्य च ॥ ४३ ॥ कृतकार्योऽपि धर्मात्मा गंतुकामस्तदाभवत् ॥ नमस्कृत्य तदा धर्मो ब्रह्माणं स पितामहम् ॥ ४४ ॥ अनुज्ञातस्तदा
तेन गतोऽसौ यमशासनम् ॥ पितामहप्रसादाच्च श्रुत्वा पुण्यप्रदायिनीम् ॥ ४५ ॥ धर्मारण्यकथां दिव्यां पवित्रां पापनाशिनीम् ॥ स गतोऽनुचरैः

Nepal Sanskrit University, Balmiki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ श्रीगणेशाय नमः ॥ ॥ ततुं संसृतिवारिधिं त्रिजगतां नौर्नाम यस्य प्रभोर्येनेदं सकलं विभाति सततं जातं स्थितं संसृतम् ॥ यश्चैतन्यघनप्रमाण
विधुरो वेदांतवेद्यो विभुस्तं वन्दे सहजप्रकाशममलं श्रीरामचन्द्रं परम् (॥१॥) दाराः पुत्रा धनं वा परिजनसहितो बंधुवर्गः प्रियो वा माता भ्राता
पिता वा श्वशुरकुलजना भृत्य ऐश्वर्य्यवित्ते ॥ विद्या रूपं विमलभवनं यौवनं यौवतं वा सर्वं व्यर्थं मरणसमये धर्म एकः सहायः (॥२॥) नैमिषे निमि
षक्षेत्रे ऋषयः शौनकादयः ॥ सत्रं स्वर्गाय लोकाय सहस्रसममासत ॥ १ ॥ एकदा सूतमायांतं दृष्ट्वा तं शौनकादयः ॥ परं हर्षं समाविष्टाः पपुर्नेत्रैः
सुचेतसा ॥ चित्राः श्रोतुं कथास्तत्र परिवव्रुस्तपस्विनः ॥ २ ॥ अथ तेषूपविष्टेषु तपस्विषु महात्मसु ॥ निर्दिष्टमासनं भेजे विनयाल्लोमहर्षणिः ॥३॥
सुखासीनं च तं दृष्ट्वा विश्रांतमुपलक्ष्य च ॥ अथापृच्छंस्त ऋषयः काश्चित्प्रास्ताविकीः कथाः ॥ ४ ॥ पुराणमखिलं तात पुरा तेऽधीतवान्पिता ॥
कच्चित्त्वयापि तत्सर्वमधीतं लोमहर्षणे ॥ ५ ॥ कथयस्व कथां सूत पुण्यां पापनिषूदिनीम् ॥ श्रुत्वा यां याति विलयं पापं जन्मशतोद्भवम् ॥ ६ ॥
॥ सूत उवाच ॥ ॥ श्रीभारत्यंघ्रियुगलं गणनाथपदद्वयम् ॥ सर्वेषां चैव देवानां नमस्कृत्य वदाम्यहम् ॥ ७ ॥ शक्तीश्चैव वसूंश्चैव ग्रहान्यज्ञादिदेव
ताः ॥ नमस्कृत्य शुभान्विप्रान्कविमुख्यांश्च सर्वशः ॥८॥ अभीष्टदेवताश्चैव प्रणम्य गुरुसत्तमम् ॥ नमस्कृत्य शुभान्देवान्रामादींश्च विशेषतः ॥९॥
यान्स्मृत्वा त्रिविधैः पापैर्मुच्यते नात्र संशयः ॥ तेषां प्रसादाद्वक्ष्येऽहं तीर्थानां फलमुत्तमम् ॥ सर्वेषां च नियंतारं धर्मात्मानं प्रणम्य च ॥ १० ॥
धर्मारण्यपतिस्त्रिविष्टपपतिर्नित्यं भवानीपतिः पापाद्वः स्थिरभोगयोगसुलभो देवः स धर्मेश्वरः ॥ सर्वेषां हृदयानि जीवकलया व्याप्य स्थितः
सर्वदा ध्यात्वा यं न पुनर्विशंति मनुजाः संसारकारागृहम् ॥ ११ ॥ ॥ सूत उवाच ॥ ॥ एकदा तु स धर्म्मो वै जगाम ब्रह्मसंसदि ॥ तां
सभां स समालोक्य ज्ञाननिष्ठोऽभवत्तदा ॥ १२ ॥ देवैर्मुनिवरैः क्रांतां सभामालोक्य विस्मितः ॥ देवैर्यक्षैस्तथा नागैः पन्नगैश्च तथाऽसुरैः
॥ १३ ॥ ऋषिभिः सिद्धगंधर्वैः समाक्रांतोचितासना ॥ ससुखा सा सभा ब्रह्मन्न शीता न च घर्म्मदा ॥ १४ ॥ न क्षुधं न पिपासां च न ग्लानिं
प्राप्नुवन्त्युत ॥ नानारूपैरिव कृता मणिभिः सा सभा वरैः ॥ १५ ॥ स्तंभैश्च विधृता सा तु शाश्वती न च सक्षया ॥ दिव्यैर्नानाविधैर्भा
वैर्भासद्भिरमितप्रभा ॥ १६ ॥ अति[1] चन्द्रं च सूर्य्यं च शिखिनं च स्वयंप्रभा ॥ दीप्यते नाकपृष्ठस्था भर्त्सयंतीव भास्करम् ॥ १७ ॥ तस्यां
स भगवाञ्छास्ति विविधान्देवमानुषान् ॥ स्वयमेकोऽनिशं ब्रह्मा सर्वलोकपितामहः ॥ १८ ॥ उपतिष्ठंति चाप्येनं प्रजानां पतयः प्रभुम् ॥ दक्षः

१ अति–अतिक्रम्य–दीप्यतइत्युत्तरेण संबंधः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ अथ श्रीस्कांदे महापुराणे तृतीये ब्रह्मखण्डे धर्मारण्यखंडप्रारम्भः (३-२) ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ इति श्रीस्कांदे महापुराणे तृतीये ब्रह्मखण्डे सेतुमाहात्म्यं समाप्तम् (३-१) ॥

CC-0. In Public Domain. Digitization by eGangotri

च स्मृतीनां च पुराणानां तथैव च ॥ शास्त्राणां चेतिहासानामन्येषामपि कृत्स्नशः ॥ ४५ ॥ एष पर्यवसन्नोऽर्थो माहात्म्यं यत्त्विदं महत् ॥ सर्वे
ष्वपि पुराणेषु इदं बहुमतं मम ॥ ४६ ॥ शृणोति धर्मजो धौम्यादिदं नित्यं ममाज्ञया ॥ अतो भवंतोऽपि सदा सेतुमाहात्म्यमुत्तमम् ॥ ४७ ॥
पठंतु शृण्वंतु तथा शिष्याणां पाठयंतु च ॥ तच्छ्रुत्वा वचनं तस्य ते प्राहुर्बाढमित्यपि ॥ ४८ ॥ ततो व्यासोऽपि सूतेन शिष्येण च समन्वितः ॥
अनुज्ञाप्य मुनीन्सर्वान्कैलासं पर्वतं ययौ ॥ ४९ ॥ ऋषयो नैमिषारण्यनिलयास्तुष्टिमागताः ॥ प्रत्यहं सेतुमाहात्म्यं शृण्वंति च पठंति च ॥
॥ २५० ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे सेतुमाहात्म्ये द्विपंचाशत्तमोऽध्यायः ॥ ५२ ॥ ॥छ॥ ॥छ॥

इदं स्कांदमहापुराणान्तर्गतब्रह्मखण्डान्तर्गतसेतुमाहात्म्यं समाप्तम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इदं पुस्तकं मुम्बय्यां श्रीकृष्णदासात्मजक्षेमराजश्रेष्ठिना
स्वकीये "श्रीवेङ्कटेश्वर" (स्टीम्) मुद्रणालये मुद्रितम्।
संवत् १९६६, शके १८३१

CC-0. In Public Domain. Digitization by eGangotri

कालेषु पुण्ये च हरिवासरे ॥ अष्टम्यां च चतुर्दश्यां पठनीयं विशेषतः ॥ २१ ॥ इदं हि पाठ्यं श्रावण्यां मासि भाद्रपदे तथा ॥ धनुर्मासे च पाठ्यं स्यात्पाठ्यं चैवोत्तरायणे ॥ २२ ॥ नियमेनैव माहात्म्यं पठनीयमिदं द्विजाः ॥ श्रोतारो नियमैर्युक्ताः शृणुयुश्चेदमुत्तमम् ॥ २३ ॥ कीर्त्यंते पुण्यतीर्थानि माहात्म्येऽस्मिन्बहूनि वै ॥ कीर्त्यंते पुण्यशीलाश्च तथा राजर्षिसत्तमाः ॥ २४ ॥ ऋषयश्च महाभागाः कीर्त्यंतेऽस्मिन्न नुत्तमे ॥ धर्माधर्मौ च कीर्त्येते पुण्येऽस्मिन्द्विजपुंगवाः ॥ २५ ॥ ब्रह्मा विष्णुश्च रुद्रश्च कीर्त्यंतेऽत्र त्रिमूर्तयः ॥ इदं पवित्रं पापघ्नं श्रुत्यर्थैरुपबृंहितम् ॥ २६ ॥ संमतं स्मृतिकर्तॄणां द्वैपायनमुनिप्रियम् ॥ श्रोतव्यं पठितव्यं च आत्मनः श्रेय इच्छता ॥ २७ ॥ श्रावकाय च दातव्यं यत्किंचित्कांचनादिकम् ॥ स्वस्वशक्त्यनुरोधेन वित्तशाठ्यं न कारयेत् ॥ २८ ॥ वस्त्रं हिरण्यं धान्यं वा भूमिं गां च यथाबलम् ॥ दत्त्वा संभावनीयोऽयं श्रावकः श्रोतृभिर्जनैः ॥ २९ ॥ पूजिते श्रावके तस्मिन्पूजिताः स्युस्त्रिमूर्तयः ॥ जगत्त्रयं पूजितं स्यात्पूजितासु त्रिमूर्तिषु ॥ २३० ॥ अवतीर्णो महीं साक्षाद्रामो दाशरथिर्हरिः ॥ ससीतालक्ष्मणो नित्यं श्रोतृभ्यः श्रावकाय च ॥ ३१ ॥ दत्त्वेह लोके भोगांश्च मुक्तिं चांते प्रयच्छति ॥ द्वैपायनमुखांभोजान्निःसृतं शुभदं परम् ॥ ३२ ॥ इदं वै सेतुमाहात्म्यं धर्मराजो युधिष्ठिरः ॥ भीमसेनादिभिः सर्वैरनुजैरपि संवृतः ॥ ३३ ॥ नियमाचारसंयुक्तः ससैन्यश्च दिनेदिने ॥ शृणोति पठतो धौम्यमहर्षेः स्वपुरोधसः ॥ ३४ ॥ ॥ श्रीसूत उवाच ॥ ॥ भोभो स्तपोधनाः सर्वे नैमिषारण्यवासिनः ॥ मत्सकाशादिदं गुह्यं माहात्म्यं श्रुतिसंमितम् ॥ ३५ ॥ श्रुतं भवद्भिर्नियतैर्नित्यं पठत सादरम् ॥ पाठयध्वं स्वशिष्येभ्यो नियतेभ्यो निरन्तरम् ॥ ३६ ॥ इत्युक्त्वा तान्मुनीन्सूतो रोमांचितकलेवरः ॥ गुरुं हृदा स्मरन्व्यासं ननर्ताश्रूणि वर्तयन् ॥ ३७ ॥ अत्रांतरे महाविद्वान्पाराशर्यो महामुनिः ॥ आशु प्रादुरभूत्तत्र शिष्यानुग्रहकांक्षया ॥ ३८ ॥ तमागतं विलोक्याथ मुनिं सत्यवतीसुतम् ॥ सूतः सर्वैश्च सहितो नैमिषारण्यवासिभिः ॥ ३९ ॥ व्यासस्य चरणांभोजे दंडवत्प्रणिपत्य तु ॥ जलमानंदजं तत्र नेत्राभ्यां पर्यवर्तयत् ॥ २४० ॥ प्रणतं प्रियशिष्यं तं दोर्भ्यामुत्थाप्य वै मुनिः ॥ आशीर्भिरभिनंद्यैनमालिंग्य च मुहुर्मुहुः ॥ ४१ ॥ नैमिषारण्यमुभिरानीते परमासने ॥ द्वैपायनो महातेजा निषसाद तपोधनः ॥ ४२ ॥ मुनिष्वप्युपविष्टेषु सूतेऽपि च निजाज्ञया ॥ शौनकादीन्मुनीन्सर्वाञ्छक्तेः पौत्रोऽभ्यभाषत ॥ ४३ ॥ मया ज्ञातमिदं सर्वं नैमिषारण्यवासिनः ॥ मम शिष्येण सूतेन सेतुमाहात्म्यमुत्तमम् ॥ कथितं भवतामद्य महापातकनाशनम् ॥ ४४ ॥ श्रुतीनां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

दध्यायपठनाच्छ्रवणाच्च मुनीश्वराः ॥ विष्णुलोकमवाप्नोति विष्णुना सह मोदते ॥ ९८ ॥ चत्वारिंशत्तमाध्यायान्पठेद्वा शृणुयादपि ॥ रुद्रलो
कमवाप्नोति रुद्रेण सह मोदते ॥ ९९ ॥ यः पंचाशत्तमाध्यायान्पठते शृणुतेऽपि वा ॥ स सांबं हरमाप्नोति शिवं चन्द्रार्धशेखरम् ॥ २०० ॥
यः पठेच्छृणुयाच्चेदं कृत्स्नं माहात्म्यमुत्तमम् ॥ स सांबशिवसालोक्यमाप्नोत्येव न संशयः ॥ १ ॥ यः पठेच्छृणुयाच्चेदं द्विवारं मुनिसत्तमाः ॥
स याति शिवसामीप्यं विमानवरसंस्थितः ॥ २ ॥ यस्त्रिवारं पठेदेतच्छृणुयाद्वा समाहितः ॥ शिवसारूप्यमाप्नोति शिवस्य प्रीतिमावहन् ॥३॥
चतुर्वारं पठेद्यस्तु शृणुयाद्वेदमुत्तमम्[1] ॥ स सायुज्यमवाप्नोति शिवस्य गिरिजापतेः ॥ ४ ॥ दिनेदिने पठेन्मर्त्यः श्लोकं श्लोकार्धमेव वा ॥
पादं वा पादमात्रं वा अक्षरं वर्णमेव वा ॥ ५ ॥ तत्तद्दिनकृतं पापं तत्क्षणादेव नश्यति ॥ कृत्स्नेऽस्मिन्सेतुमाहात्म्ये पठितेऽपि श्रुतेऽपि वा ॥
॥ ६ ॥ श्लोकेष्वत्रैव वर्तंते वर्णा यावंत एव हि ॥ तावत्यो ब्रह्महत्याश्च तावन्मद्यनिषेवणम् ॥ ७ ॥ तावत्सुवर्णस्तेयं च तावान्गुर्वंगनागमः ॥
तावत्संसर्गदोषाश्च नश्यंत्येव हि तत्क्षणात् ॥ ८ ॥ यावतोऽस्मिन्महापुण्ये वर्तंते वर्णराशयः ॥ तावत्कृत्वश्चतुर्विंशत्तीर्थेषु स्नानजं फलम् ॥ ९ ॥
तथान्येष्वपि तीर्थेषु सेतुमध्यगतेषु वै ॥ तत्फलं समवाप्नोति पाठेन श्रवणेन वा ॥ २१० ॥ येनेदं लिखितं भक्त्या सेतुमाहात्म्यमुत्तमम् ॥
विनष्टाज्ञानसंतानः शिवसायुज्यमाप्नुयात् ॥ ११ ॥ यस्येदं वर्तते गेहे माहात्म्यं लिखितं शुभम् ॥ भूतवेतालकादिभ्यो भीतिस्तत्र न विद्यते
॥ १२ ॥ व्याधिपीडा न तत्रास्ति नास्ति चोरभयं तथा ॥ शन्यंगारकमुख्यानां ग्रहाणां नास्ति पीडनम् ॥ १३ ॥ यद्गृहे वर्तते पुण्यमिदं माहा
त्म्यमुत्तमम् ॥ रामसेतुं विजानीत तद्गृहं मुनिपुंगवाः ॥ १४ ॥ चतुर्विंशतितीर्थानि तत्रैव निवसंति हि ॥ तत्रैव वर्तते पुण्यो गन्धमादनपर्वतः ॥
॥ १५ ॥ ब्रह्मविष्णुमहेशाश्च वर्तंते तत्र सादरम् ॥ लिखित्वा सेतुमाहात्म्यं ब्राह्मणाय निवेदयेत् ॥ चतुःसागरपर्यंता तेन दत्ता वसुंधरा ॥ १६ ॥
॥ ॥ सेतुमाहात्म्यदानमन्त्रः ॥ ॥ सेतुमाहात्म्यदानस्य कलां नार्हति षोडशीम् ॥ दानान्यन्यानि सर्वाणि ह्यतः शान्तिं प्रयच्छ मे ॥ किं पुनर्बहु
नोक्तेनवसत्यत्र जगत्त्रयम् ॥ १७ ॥ श्रावयेच्छ्राद्धकाले यो ह्येकमध्यायमत्र वै ॥ नश्येच्छ्राद्धस्य वैकल्यं पितरोऽप्यतिहर्षिताः ॥ १८ ॥ यः पर्वकाले
संप्राप्ते ब्राह्मणाञ्छ्रावयेदिदम् ॥ अध्यायमेकं श्लोकं वा गावोस्य निरुपद्रवाः ॥ बहुक्षीराः सवत्साश्च महिष्योऽस्य भवंति हि ॥ १९ ॥ पठनीय
मिदं पुण्यं मठे देवालयेऽपि वा ॥ नदीतटाकतीरेषु पुण्ये वारण्यभूतले ॥ श्रोत्रियाणां गृहे वापि नैवान्यत्र तु कर्हिचित् ॥ २२० ॥ विषुवायन

१ वा-इदम्-इति पदच्छेदः ।

CC-0. In Public Domain. Digitization by eGangotri

क्षेत्रे हरिक्षेत्र कृष्णक्षेत्रे च नैमिषे ॥ शालग्रामे बदर्य्यां च हस्तिशैले वृषाचले ॥ ४८ ॥ शेषाद्रौ चित्रकूटे च लक्ष्मीक्षेत्रे कुरंगके ॥ कांचिके कुम्भकोणे च मोहिनीपुर एव च ॥ ४९ ॥ ऐन्द्रे श्वेताचले पुण्ये पद्मनाभे महास्थले ॥ फुल्लाख्ये घटिकाद्रौ च सारक्षेत्रे हरिस्थले ॥ १५० ॥ श्रीनिवासे महाक्षेत्रे भक्तनाथमहास्थले ॥ अलिंदाख्ये महाक्षेत्रे शुकक्षेत्रे च वारुणे ॥ ५१ ॥ मधुरायां हरिक्षेत्रे श्रीगोष्ठ्यां पुरुषोत्तमे ॥ श्रीरंगे पुण्डरीकाक्षे तथान्यत्र हरिस्थले ॥ ५२ ॥ स्नानेन यानि पापानि विनश्यन्ति द्विजोत्तमाः ॥ तानि सर्वाणि नश्यंति सेतुस्नानेन निश्चितम् ॥ ५३ ॥ रघुनाथकृते सेतौ महामुनिनिषेविते ॥ न स्नांति ये नरास्तेषां न संसारनिवर्तनम् ॥ ॥ ५४ ॥ ये वा नमः शिवायेति मन्त्रं पञ्चाक्षरं शुभम् ॥ न वदन्ति न शृण्वन्ति न स्मरन्ति मुनीश्वराः ॥ ५५ ॥ नमो नारायणायेति प्रणवेन समन्वितम् ॥ मंत्रमष्टाक्षरं वापि न जपंति स्मरंति वा ॥ ५६ ॥ एवं श्रीरामचंद्रस्य षडक्षरमनुं तथा ॥ न जपंति न शृण्वंति न स्मरंति च सत्तमाः ॥ ५७ ॥ तेषां पापानि नश्यंति रामसेतौ निमज्जनात् ॥ उपोषणं न कुर्वंति ये वा हरिदिने शुभे ॥ ५८ ॥ न धारयंति ये भस्म त्रिपुंड्रोद्धूलनादिना ॥ जाबालोपनिषन्मंत्रैस्सततमिर्मस्तकादिके ॥ ५९ ॥ शिवं वा केशवं वापि तथान्यानपि वै सुरान् ॥ न पूजयंति वेदोक्तमार्गेण द्विजपुंगवाः ॥ १६० ॥ तेषां पापानि नश्यंति रामसेतौ निमज्जनात् ॥ शिवविष्ण्वादिदेवेभ्यो धूपं दीपं च चंदनम् ॥ ६१ ॥ पुष्पाणिन प्रयच्छंति भक्तिपूर्वं द्विजोत्तमाः ॥ शिवविष्ण्वादिदेवानां श्रीरुद्रैश्चमकैस्तथा ॥ ६२ ॥ श्रीमत्पुरुषसूक्तेन पावमान्यादिसूक्तकैः ॥ त्रिमधुत्रिसुपर्णैश्च पंचशांत्यादिना तथा ॥ ६३ ॥ नाभिषेकं प्रकुर्वंति ये नराः पापचेतसः ॥ तेषां पापानि नश्यंति धनुष्कोटौ निमज्जनात् ॥ ६४ ॥ शिवविष्ण्वादिदेवानां नमस्कारप्रदक्षिणे ॥ न प्रकुर्वंति भक्त्या ये पापोपहतबुद्धयः ॥ ६५ ॥ धनुर्मासेऽप्युषःकाले न पूजां च प्रकुर्वते ॥ शिवविष्ण्वादिदेवानां महानैवेद्यपूर्वकम् ॥ ६६ ॥ तेषां पापानि नश्यंति रामसेतौ निमज्जनात् ॥ कीर्तयंति न ये विष्णोर्नामानि तु हरस्य वा ॥ ६७ ॥ शालिग्रामशिलाचक्रं शिवनाभं च ये नराः ॥ न पूजयंति मोहेन द्वारकाचक्रमेव वा ॥ ६८ ॥ गंगामृदं च तुलसीमृत्तिकां गोपिचंदनम् ॥ न धारयंति ये मूढा ललाटे चोरसि द्विजाः ॥ ६९ ॥ दोर्द्वंद्वे च गले सम्यक्सर्वपापौघशांतये ॥ रुद्राक्षं तुलसीकाष्ठं यो न धारयते नरः ॥१७०॥ तस्य पापानि नश्यंति धनुष्कोटौ निमज्जनात् ॥ ब्राह्मे मुहूर्ते संप्राप्ते निद्रां त्यक्त्वा प्रसन्नधीः ॥ ७१ ॥ हरिशंकरनामानि तत्स्तोत्राण्यथ वा द्विजाः ॥ यो हि चिंतयते

१ अंबिकाख्ये–इ०पा० । २ कुरुक्षेत्रे–इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नित्यं विशिष्टं मंत्रमेव वा ॥ ७२ ॥ तस्य पापानि नश्यंति धनुष्कोटौ निमज्जनात् ॥ प्रातर्जलाशयं गत्वा स्नात्वाऽऽचम्य विशुद्धधीः ॥ ७३ ॥ प्रस न्नात्मा मुनिश्रेष्ठाः संध्योपासनपूर्वकम् ॥ नोपास्ते च नरो यस्तु गायत्रीं वेदमातरम् ॥ ७४ ॥ नौपासनं वा कुर्वंति सायंप्रातरतंद्रिताः ॥ माध्या ह्निकं न कुर्वंति ये वा पापहताशयाः ॥ ७५ ॥ ब्रह्मयज्ञं वैश्वदेवं मध्याह्नेऽतिथिपूजनम् ॥ नाचरंति च सायं ये पूजामतिथिसंमताम् ॥ ७६ ॥ तेषां पापानि नश्यंति धनुष्कोटौ निमज्जनात् ॥ भिक्षां यतीनां मध्याह्ने न प्रयच्छंति ये नराः ॥ ७७ ॥ येऽप्यधीतां त्रयीं विप्रा विस्मरंति कुबुद्धयः ॥ नाधीयते त्रयीं वापि वेदांगानि तथा पुनः ॥ ७८ ॥ प्रत्याब्दिकं मातृपित्रोः श्राद्धं ये नाचरंति वै ॥ श्राद्धं महालयं नित्यमष्टकाश्राद्ध मेव वा ॥ ७९ ॥ अन्यन्नैमित्तिकं श्राद्धं ये न कुर्वंति लोभतः ॥ ये चैत्रे तु पौर्णमास्यां चित्रगुप्तस्य तुष्टये ॥ १८० ॥ पानकं कदलीपक्वं पायसान्नं सशर्करम् ॥ सगुडं साम्रफलकं पनसादिफलैर्युतम् ॥ ८१ ॥ तांबूलं पादुके छत्रं वस्त्रपुष्पाणि चंदनम् ॥ विप्रेभ्यो न प्रयच्छंति लोभोपहतबुद्धयः ॥ ८२ ॥ तेषां पापानि नश्यंति धनुष्कोटौ निमज्जनात् ॥ दुर्वृत्तो वा सुवृत्तो वा यो धनुष्कोटिसेवकः ॥ ८३ ॥ तस्य संसारविच्छित्तिः पुन र्जन्म विना भवेत् ॥ संसारसागरं तर्तुं य इच्छेन्मुनिपुंगवाः ॥ ८४ ॥ रामचन्द्रधनुष्कोटिं स गच्छेदविलंबितम् ॥ सत्यं वच्मि हितं वच्मि सारं वच्मि हितं पुनः ॥ ८५ ॥ रामचन्द्रधनुष्कोटिं गच्छध्वं मुक्तिसिद्धये ॥ रामचन्द्रधनुष्कोटौ कुर्यात्स्नानं विमुक्तये ॥ ८६ ॥ नास्त्युपायांतरं विप्रा भूयोभूयो वदाम्यहम् ॥ रामचंद्रधनुष्कोटौ स्नानं कुर्वंति ये नराः ॥ ८७ ॥ तेषामयत्नतः सिध्येत्संसारभय नाशनम् ॥ सत्यं ज्ञानमनंतं यत्पूर्णं ब्रह्म सनातनम् ॥ ८८ ॥ तत्प्राप्तिः स्याद्धनुष्कोटौ मज्जनान्नात्र संशयः ॥ ॥ श्रीसूत उवाच ॥ ॥ एवं वः कथितं विप्राः सेतुमाहात्म्यमुत्तमम् ॥ ८९ ॥ महादुःखप्रशमनं महारोगनिबर्हणम् ॥ दुःस्वप्ननाशनं पुण्यमपमृ त्युनिवारणम् ॥ १९० ॥ महाशांतिकरं पुंसां पठतां शृण्वतामपि ॥ स्वर्गापवर्गदं पुण्यं सर्वतीर्थफलप्रदम् ॥ ९१ ॥ कीर्तयेद्य इदं पुण्यं शृणु याद्वा समाहितः ॥ सोऽग्निष्टोमादियज्ञानां फलमाप्नोति पुष्कलम् ॥ ९२ ॥ चतुर्णां सांगवेदानां शतावृत्त्या तु यत्फलम् ॥ तत्फलं समवाप्नोति ह्येतन्माहात्म्यकीर्तनात् ॥ ९३ ॥ अत्रैकाध्यायपठनाच्छ्रवणाद्वा मुनीश्वराः ॥ अश्वमेधस्य यज्ञस्य प्राप्नोत्यविकलं फलम् ॥ ९४ ॥ अध्याय द्वयपाठेन श्रवणेन तथैव च ॥ गोमेधाख्यस्य यज्ञस्य फलमाप्नोत्यनुत्तमम् ॥ ९५ ॥ दशाध्यायान्पठेद्यस्तु शृणुयाद्वा सभक्तिकम् ॥ स्वर्गलो कमवाप्नोति शक्रेण सह मोदते ॥ ९६ ॥ विंशत्यध्यायपठनाच्छ्रवणाच्च मुनीश्वराः ॥ ब्रह्मलोकमवाप्नोति ब्रह्मणा सह मोदते ॥ ९७ ॥ त्रिंश

CC-0. In Public Domain. Digitization by eGangotri

खान्कपीन् ॥ २२ ॥ ध्यात्वा देवानृषींश्चापि तथा पितृगणानपि ॥ तर्पयेदपि तान्सर्वान्स्वदारिद्र्यविमुक्तये ॥ २३ ॥ अर्द्धोदयाख्यममलं जगन्नाथं समर्चयेत् ॥ सेतावर्द्धोदये काले तेन प्रीणाति केशवः ॥ २४ ॥ दिवाकर नमस्तेऽस्तु तेजोराशे जगत्पते ॥ अत्रिगोत्रसमुत्पन्न लक्ष्मी देव्याः सहोदर ॥ २५ ॥ अर्घं गृहाण भगवन्सुधाकुम्भ नमोस्तु ते ॥ व्यतीपात महायोगिन्महापातकनाशन ॥ २६ ॥ सहस्रबाहो सर्वात्म न्गृहाणार्घ्यं नमोऽस्तु ते ॥ तिथिनक्षत्रवाराणामधीश परमेश्वर ॥ २७ ॥ मासरूप गृहणार्घ्यं कालरूप नमोऽस्तु ते ॥ इति दत्त्वा पृथङ्मंत्रैरर्घ्यम र्द्धोदये नरः ॥ २८ ॥ उपायनानि विप्रेभ्यो दद्याद्वित्तानुसारतः ॥ चतुर्दश द्वादशाष्टौ सप्त षट् पंच वा द्विजान् ॥ २९ ॥ यथाशक्त्यन्नपानाद्यैः पृथङ्मंत्रैः समर्चयेत् ॥ कांस्यपात्रं समादाय नूतनं दारवं तु वा ॥ १३० ॥ विप्राणां पुरतः स्थाप्य पयसा परिपूरितम् ॥ सफलं सगुडं साज्यं सतांबूलं सदक्षिणम् ॥ ३१ ॥ दद्याद्यज्ञोपवीतं च गां सवत्सां पयस्विनीम् ॥ अलंकृतेभ्यो विप्रेभ्यो यथाशक्ति वदेदिदम् ॥ ३२ ॥ श्रवणर्क्षे जग न्नाथ जन्मर्क्षे तव केशव ॥ यन्मया दत्तमर्थिभ्यस्तदक्षयमिहास्तु मे ॥ ३३ ॥ नक्षत्राणामधिपते देवानाममृतप्रद ॥ त्राहि मां रोहिणीकांत कला शेष नमोऽस्तु ते ॥ ३४ ॥ दीननाथ जगन्नाथ कलानाथ कृपाकर ॥ त्वत्पादपद्मयुगलभक्तिरस्त्वचला मम ॥ ३५ ॥ व्यतीपात नमस्तेऽस्तु सोम सूर्याग्निसंनिभ ॥ यद्दानादि कृतं किंचित्तदक्षयमिहास्तु ते ॥ ३६ ॥ अर्थिनां कल्पवृक्षोऽसि वासुदेव जनार्दन ॥ मासर्त्वयनकालेश पापं शमय मे हरे ॥ ३७ ॥ इत्यर्चयित्वा विप्रेंद्रास्ततः श्राद्धं समाचरेत् ॥ हिरण्यश्राद्धमामं वा पाकश्राद्धमथापि वा ॥ ३८ ॥ पार्वणं च ततः कुर्याद्वित्त शाठ्यं न कारयेत् ॥ आचार्यं पूजयेत्पश्चाद्वस्त्रभूषणकुण्डलैः ॥ ३९ ॥ प्रतिमामर्पयेत्तस्मै गां च छत्रमुपानहम् ॥ एवमर्द्धोदये सेतौ व्रतं कुर्याद्वि जोत्तमाः ॥ १४० ॥ तेनैव कृतकृत्यः स्यात्कर्तव्यं नास्ति किंचन ॥ स्थलांतरेऽप्येवमेतद्व्रतमर्धोदये चरेत् ॥ ४१ ॥ सेतुः समुद्रे रामेण निर्मितो गन्धमादने ॥ सेतुः सेतुरिति प्राज्ञास्तस्य नाम्नः प्रकीर्तनात् ॥ ४२ ॥ स्नानकाले मनुष्याणां पातकानां तु कोटयः ॥ तत्क्षणादेव नश्यंति यास्यंत्यप्यच्युतं पदम् ॥ ४३ ॥ निमिषं निमिषार्द्धं वा सेतौ तिष्ठति यो नरः ॥ तद्दृष्टिगोचरं गंतुं न शक्ता यमकिंकराः ॥ ४४ ॥ रामसेतुं धनु ष्कोटिं रामं सीतां च लक्ष्मणम् ॥ रामनाथं हनूमंतं सुग्रीवादिमुखान्कपीन् ॥ ४५ ॥ बिभीषणं नारदं च विश्वामित्रं घटोद्भवम् ॥ वसिष्ठं वाम देवं च जाबालिमथ काश्यपम् ॥ ४६ ॥ रामभक्तांस्तथा चान्यांश्चिंतयन्मनसा तदा ॥ सर्वदुःखाद्विमुच्येत प्रयाति परमं पदम् ॥ ४७ ॥ सत्य

१ सोमसूर्यसुत प्रभो–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चेत्संकल्पपूर्वं तु विशिष्टं पात्रमुत्तमम् ॥ ९८ ॥ समुद्दिश्य जलं भूमौ प्रक्षिपेद्भक्तिसंयुतः[1] ॥ स्वग्राममागतः पश्चात्तस्मिन्पात्रे समर्पयेत् ॥ ९९ ॥
पूर्वं संकल्पितं वित्तं धर्मलोपोऽन्यथा भवेत् ॥ न[2] दुःखं पुनराप्नोति किं तु सायुज्यमाप्नुयात् ॥ १०० ॥ अर्धोदयसमः कालो न भूतो न भवि
ष्यति ॥ कुम्भकोणं सेतुमूलं गोकर्णं नैमिषं तथा ॥ १ ॥ अयोध्या दंडकारण्यं विरूपाक्षं च वेंकटम् ॥ शालिग्रामं प्रयागं च कांची द्वारावती
तथा ॥ २ ॥ मधुरा पद्मनाभं च काशी विश्वेश्वरालया ॥ नद्यः[3] सर्वाः समुद्राश्च पर्वतं भास्करं स्मृतम् ॥ ३ ॥ मुंडनं चोपवासश्च क्षेत्रेष्वेषु
प्रकीर्तितम् ॥ लोभान्मोहादकृत्वा यः स्वगृहं याति मानवः ॥ ४ ॥ सहैव यांति तद्गेहे पातकानि च तेन वै ॥ चतुर्विंशतितीर्थानि पर्वते गन्ध
मादने ॥ ५ ॥ तत्र लक्ष्मणतीर्थे तु वपनं मुनिभिः स्मृतम् ॥ तीरे लक्ष्मणतीर्थस्य लोमवर्ज्यं शिवाज्ञया ॥ ६ ॥ शिरोमात्रस्य वपनं कृत्वा
दत्त्वा च दक्षिणाम् ॥ स्नात्वा लक्ष्मणतीर्थे च दृष्ट्वा लक्ष्मणशंकरम् ॥ ७ ॥ सर्वपापविनिर्मुक्तः शंकरं याति मानवः ॥ अर्धोदये सदा स्नानं
सेतावेवं समाचरेत् ॥ ८ ॥ नास्ति सेतुसमं तीर्थं नास्ति सेतुसमं तपः ॥ नास्ति सेतुसमं पुण्यं नास्ति सेतुसमा गतिः ॥ ९ ॥ उपरागसहस्रेण
सममर्धोददयं स्मृतम् ॥ अर्धोदयसमः कालो नास्ति संसारमोचकः ॥ ११० ॥ तस्मिन्नर्धोदये रामसेतौ स्नानं तु यद्भवेत् ॥ न तत्तुल्यं भवेत्पुण्यं
सर्वशास्त्रेषु सर्वदा ॥ ११ ॥ षष्टिवर्षसहस्राणि भागीरथ्यवगाहनात् ॥ यत्पुण्यमृषिनिर्दिष्टं तत्पुण्यं मुनिपुंगवाः ॥ १२ ॥ एकवारं रामसेतौ
स्नानात्सिध्यति निश्चितम् ॥ अर्द्धोदये विशेषेण तथैव च महोदये ॥ १३ ॥ मकरस्थे रवौ माघे प्रयागे पापमोचने ॥ माघस्नानसहस्रेण
यत्पुण्यं लभते नरः ॥ १४ ॥ तस्मिन्नर्धोदये विप्रा रामसेतौ निमज्जनात् ॥ एकवारेण तत्पुण्यं लभते नात्र संशयः ॥ १५ ॥
त्रैलोक्यस्थेषु तीर्थेषु स्नातानां यत्फलं भवेत् ॥ सकृदर्द्धोदये सेतौ स्नात्वा तत्पुण्यभाग्भवेत् ॥ १६ ॥ ब्रह्मज्ञानविहीनानां कृतघ्नानां दुरा
त्मनाम् ॥ पापिनामितरेषां च महापातकिनां तथा ॥ १७ ॥ सेतावर्द्धोदये स्नानाद्विशुद्धिरिति निश्चिता ॥ स्थलांतरे कृतघ्नानां
निष्कृतिर्नास्ति कर्हिचित् ॥ १८ ॥ सेतावर्द्धोदये स्नानात्तेषामपि हि निष्कृतिः ॥ सेतावर्द्धोदये स्नानं ये न कुर्वंति मोहतः ॥ १९ ॥
संसारेषु निमज्जंति ते यथांधाः पतंत्यधः ॥ सेतावर्धोदये स्नात्वा भित्त्वा भास्करमण्डलम् ॥ १२० ॥ ब्रह्मलोकं प्रयास्यंति नात्र कार्या विचा
रणा ॥ अर्द्धोदये तु संप्राप्ते स्नात्वा सेतौ विमुक्तिदे ॥ २१ ॥ स्नात्वा सम्यग्जगन्नाथं राघवं सीतया सह ॥ रामेश्वरं महादेवं सुग्रीवादिमु

१ त्वांत्रसंयुतः–इ० पा० । २ इहैव चायुराप्नोति–इ० पा० । ३ नदाः–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विष्णुभस्थे दिनेशे भानोर्वारे किंचिदुद्यद्दिनेशे ॥ युक्तामा चेन्नागहीना तु पाते विष्णोर्ऋक्षे पुण्यमर्धोदयं स्यात् ॥ ७३ ॥ तस्मिन्नर्धोदये सेतौ स्नानं सायुज्यकारणम् ॥ व्यतीपातसहस्रेण दर्शमेकं समं स्मृतम् ॥ ७४ ॥ दर्शायुतसमं पुण्यं भानुवारो भवेद्यदि ॥ श्रवणर्क्षं यदि भवेद्भानुवारेण संयुतम् ॥ ७५ ॥ पुण्यमेव तु विज्ञेयमन्योन्यस्यैव योगतः ॥ एकैकमप्यमृतदं स्नानदानजपार्चनात् ॥ ७६ ॥ पंचस्वपि च युक्तेषु किमु वक्तव्यमत्र हि ॥ श्रवणं ज्योतिषां श्रेष्ठममा श्रेष्ठा तिथिष्वपि ॥ ७७ ॥ व्यतीपातं तु योगानां वारं वारेषु वै रवेः ॥ चतुर्णामपि यो योगो मकरस्थे रवौ भवेत् ॥ ७८ ॥ तस्मिन्काले रामसेतौ यदि स्नायात्तु मानवः ॥ गर्भं न मातुराप्नोति किन्तु सायुज्यमाप्नुयात् ॥ ७९ ॥ अर्धोदयसमः कालो न भूतो न भविष्यति ॥ एवं महोदयः कालो धर्मकालः प्रकीर्तितः ॥ ८० ॥ एतेषु पुण्यकालेषु सेतौ दानं प्रकीर्तितम् ॥ आचारश्च तपो वेदो वेदांतश्रवणं तथा ॥ ८१ ॥ शिवविष्ण्वादिपूजापि पुराणार्थप्रवक्तृता ॥ यस्मिन्विप्रे तु विद्यंते दानपात्रं तदुच्यते ॥ ८२ ॥ पात्राय तस्मै दानानि सेतौ दद्याद्द्विजातये ॥ यदि पात्रं न लभ्येत सेतावाचारसंयुतम् ॥ ८३ ॥ संकल्प्योद्दिश्य सत्पात्रं प्रदद्याद्ग्राममागतः ॥ अतो नाधमपात्राय दातव्यं फलकांक्षिभिः ॥ उत्तमं सेतुमाहात्म्यं वक्तुर्देयं न चान्यतः ॥ ८४ ॥ अत्रेतिहासं वक्ष्यामि वसिष्ठोक्तमनुत्तमम् ॥ दिलीपाय महाराज्ञे दानपात्रविवित्सवे ॥ ८५ ॥ ॥ दिलीप उवाच ॥ ॥ दानानि कस्मै देयानि ब्रह्मपुत्र पुरोहित ॥ एतन्मे तत्त्वतो ब्रूहि त्वच्छिष्यस्य महामुने ॥ ८६ ॥ ॥ ॥ वसिष्ठ उवाच ॥ ॥ पात्राणामुत्तमं पात्रं वेदाचारपरायणम् ॥ तस्मादप्यधिकं पात्रं शूद्रान्नं यस्य नोदरे ॥ ८७ ॥ वेदाः पुराणमंत्राश्च शिवविष्ण्वादिपूजनम् ॥ वर्णाश्रमाद्यनुष्ठानं वर्तते यस्य संततम् ॥ ८८ ॥ दरिद्रश्च कुटुंबी च तत्पात्रं श्रेष्ठमुच्यते ॥ तस्मिन्पात्रे प्रदत्तं वै धर्मकामार्थमोक्षदम् ॥ ८९ ॥ पुण्यस्थले विशेषेण दानं सत्पात्रगर्हितम् ॥ अन्यथा दशजन्मानि कृकलासो भविष्यति ॥ ९० ॥ जन्मत्रयं रासभः स्यान्मंडूकश्च द्विजन्मनि ॥ एकजन्मनि चाण्डालस्ततः शूद्रो भविष्यति ॥ ९१ ॥ ततश्च क्षत्रियो वैश्यः क्रमाद्विप्रश्च जायते ॥ दरिद्रश्च भवेत्तत्र बहुरोगसमन्वितः ॥ ९२ ॥ एवं बहुविधा दोषा दुष्टपात्रप्रदानतः ॥ तस्मात्सर्वप्रयत्नेन सत्पात्रेषु प्रदापयेत् ॥ ९३ ॥ न लभ्यते चेत्तत्पात्रं तदा संकल्पपूर्वकम् ॥ एकं सत्पात्रमुद्दिश्य प्रक्षिपेदुदकं भुवि ॥ ९४ ॥ उद्दिष्टपात्रस्य मृतौ तत्पुत्राय समर्पयेत् ॥ तस्यापि मरणे प्राप्ते महादेवे समर्पयेत् ॥ अतो नाधमपात्राय दद्यात्तीर्थे विशेषतः ॥ ९५ ॥ ॥ श्रीसूत उवाच ॥ ॥ एवमुक्तो वसिष्ठेन दिलीपः स द्विजोत्तमाः ॥ ९६ ॥ तदा प्रभृति सत्पात्रे प्रायच्छद्दानमुत्तमम् ॥ अतः पुण्यस्थले सेतावत्रापि मुनिपुंगवाः ॥ ९७ ॥ यदि लभ्येत सत्पात्रं तदा दद्याद्धनादिकम् ॥ नो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

त् ॥ ४६ ॥ पंचपातककोटीनां नाशः स्यात्तत्क्षणे ध्रुवम् ॥ श्रीरामधनुषः कोटचा रेखां यः पश्यते कृताम् ॥ ४७ ॥ अनेकक्लेशसंपूर्णं गर्भवासं न
पश्यति ॥ यत्र सीताऽनलं प्राप्ता तस्मिन्कुंडे निमज्जनात् ॥ ४८ ॥ भ्रूणहत्याशतं विप्रा नश्यति क्षणमात्रतः ॥ यथा रामस्तथा सेतुर्यथा गंगा
तथा हरिः ॥ ४९ ॥ गंगे हरे रामसेतो त्विति संकीर्तयन्नरः ॥ यत्र क्वापि बहिः स्नायात्तेन याति परां गतिम् ॥ ५० ॥ सेतावर्धोदये स्नात्वा
गन्धमादनपर्वते ॥ पितॄनुद्दिश्य यः पिंडान्दद्यात्सर्षपमात्रकान् ॥ ५१ ॥ पितरस्तृप्तिमायांति यावच्चंद्रदिवाकरौ ॥ शमीपत्रप्रमाणं तु पितॄनुद्दिश्य
भक्तितः ॥ ५२ ॥ द्विजेन पिण्डं दत्तं चेत्सर्वपापविमोचितः ॥ स्वर्गस्थो मुक्तिमायाति नरकस्थो दिवं व्रजेत् ॥ ५३ ॥ सेतौ च पद्मनाभे च
गोकर्णे पुरुषोत्तमे ॥ उदन्वदंभसि स्नानं सार्वकालिकमीप्सितम् ॥ ५४ ॥ शुक्रांगारकसौरीणां वारेषु लवणांभसि ॥ संतानकामी न स्नाया
त्सेतोरन्यत्र कर्हिचित् ॥ ५५ ॥ अकृतप्रेतकार्यो वा गर्भिणीपतिरेव वा ॥ न स्नायादुदधौ विद्वान्सेतोरन्यत्र कर्हिचित् ॥ ५६ ॥ न कालापेक्षणं
सेतोर्नित्यस्नानं प्रशस्यते ॥ वारतिथ्यृक्षनियमाः सेतोरन्यत्र हि द्विजाः ॥ ५७ ॥ उद्दिश्य जीवतः स्नायान्न तु स्नायान्मृतान्प्रति ॥ कुशैः प्रति
कृतिं कृत्वा स्नापयेत्तीर्थवारिभिः ॥ ५८ ॥ इमं मंत्रं समुच्चार्य प्रसन्नेंद्रियमानसः ॥ कुशोऽसि त्वं पवित्रोऽसि विष्णुना विधृतः पुरा ॥ ५९ ॥
त्वयि स्नाते स च स्नातो यस्यैतद्ग्रंधिबन्धनम् ॥ सर्वत्र सागरः पुण्यः सदा पर्वणि पर्वणि ॥ ६० ॥ सेतौ सिन्ध्वब्धिसंयोगे गंगासागर
संगमे ॥ नित्यस्नानं हि निर्दिष्टं गोकर्णे पुरुषोत्तमे ॥ ६१ ॥ नापर्वणि सरिन्नाथं स्पृशेदन्यत्र कर्हिचित् ॥ पितॄणां सर्वदेवानां मुनीनामपि
शृण्वताम् ॥ ६२ ॥ प्रतिज्ञामकरोद्रामः सीतालक्ष्मणसंयुतः ॥ मया ह्यत्र कृते सेतौ स्नानं कुर्वंति ये नराः ॥ ६३ ॥ मत्प्रसादेन ते सर्वे न
यास्यंति पुनर्भवम् ॥ नश्यंति सर्वपापानि मत्सेतोरवलोकनात् ॥ ६४ ॥ रामनाथस्य माहात्म्यं मत्सेतोरपि वैभवम् ॥ नाहं वर्णयितुं शक्तो
वर्षकोटिशतैरपि ॥ ६५ ॥ इति रामस्य वचनं श्रुत्वा देवमहर्षयः ॥ साधुसाध्विति संतुष्टाः प्रशशंसुश्च तद्वचः ॥ ६६ ॥ सेतुमध्ये चतुर्वक्त्रः
सर्वदेवसमन्वितः ॥ अध्यास्ते तस्य रक्षार्थमीश्वरस्याज्ञया सदा ॥ ६७ ॥ रक्षार्थं रामसेतौ हि सेतुमाधवसंज्ञया ॥ महाविष्णुः समध्यास्ते
निबद्धो निगडेन वै ॥ ६८ ॥ महर्षयश्च पितरो धर्मशास्त्रप्रवर्तकाः ॥ देवाश्च सहगन्धर्वाः सकिन्नरमहोरगाः ॥ ६९ ॥ विद्याधराश्चारणाश्च
यक्षाः किंपुरुषास्तथा ॥ अन्यानि सर्वभूतानि वसंत्यस्मिन्नहर्निशम् ॥ ७० ॥ सोऽहं दृष्टः श्रुतो वापि स्मृतः स्पृष्टोऽवगाहितः ॥ सर्वस्माद्दुरिता
त्पाति रामसेतुर्द्विजोत्तमाः ॥ ७१ ॥ सेतावर्धोदये स्नानमानंदप्राप्तिकारणम् ॥ मुक्तिप्रदं महापुण्यं महानरकनाशनम् ॥ ७२ ॥ पौषे मासे

CC-0. In Public Domain. Digitization by eGangotri

रणा ॥ २२ ॥ माघमासे धनुष्कोटौ दशपंचदिनानि यः ॥ स्नानं करोति मनुजः स वैकुंठमवाप्नुयात् ॥ २३ ॥ माघमासे रामसेतौ स्नानं विंशद्दिनं चरन् ॥ शिवसामीप्यमाप्नोति शिवेन सह मोदते ॥ २४ ॥ पंचविंशद्दिनं स्नानं कुर्वन्सारूप्यमाप्नुयात् ॥ स्नानं त्रिंशद्दिनं कुर्वन्सायुज्यं लभते ध्रुवम् ॥ २५ ॥ अतोऽवश्यं रामसेतौ माघमासे द्विजोत्तमाः ॥ स्नानं समाचरेद्विद्वान्किंचिदभ्युदिते रवौ ॥ २६ ॥ चंद्रसूर्योपरागे च तथैवार्द्धोदये द्विजाः ॥ महोदये रामसेतौ स्नानं कुर्वन्द्विजोत्तमाः ॥ २७ ॥ अनेकक्लेशसंयुक्तं गर्भवासं न पश्यति ॥ ब्रह्महत्यादिपापानां नाशकं च प्रकीर्तितम् ॥ ॥ २८ ॥ सर्वेषां नरकाणां च बाधकं परिकीर्तितम् ॥ संपदामपि सर्वासां निदानं परिकीर्तितम् ॥ २९ ॥ इन्द्रादिसर्वलोकानां सालोक्यादिप्रदं तथा ॥ चंद्रसूर्योपरागे च तथैवार्द्धोदये द्विजाः ॥ ३० ॥ महोदये धनुष्कोटौ मज्जनं त्वतिनिश्चितम् ॥ रावणस्य विनाशार्थं पुरा रामेण निर्मितम् ॥ ३१ ॥ सिद्धचारणगंधर्वकिन्नरोरगसेवितम् ॥ ब्रह्मदेवर्षिराजर्षिपितृसंवनिषेवितम् ॥ ३२ ॥ ब्रह्मादिदेवतावृंदैस्सेवितं भक्तिपूर्वकम् ॥ पुण्यं यो रामसेतुं वै संस्मरन्पुरुषो द्विजाः ॥ ३३ ॥ स्नायाच्च यत्र कुत्रापि तटाकादौ जलाशये[1] ॥ न तस्य दुष्कृतं किंचिद्भविष्यति कदाचन ॥ ३४ ॥ सेतुमध्यस्थतीर्थेषु मुष्टिमात्रप्रदानतः ॥ नश्यंति सकला रोगा भ्रूणहत्यादयस्तथा ॥ ३५ ॥ रामेण धनुषः पुण्यां यो रेखां पश्यते कृताम् ॥ न तस्य पुनरावृत्तिर्वैकुंठात्स्यात्कदाचन ॥ ३६ ॥ धनुष्कोटिरिति ख्याता या लोके पापनाशिनी ॥ बिभीषणप्रार्थनया कृता रामेण धीमता ॥ ॥ ३७ ॥ धनुष्कोटिर्महापुण्या तस्यां स्नात्वा सभक्तिकम् ॥ दद्याद्दानानि वित्तानां क्षेत्राणां च गवां तथा ॥३८॥ तिलानां तंडुलानां च धान्यानां पयसां तथा ॥ वस्त्राणां भूषणानां च माषाणामोदनस्य च॥३९॥ दध्नां घृतानां वारीणां शाकानामप्युदश्विताम् ॥ शुद्धानां शर्कराणां च सस्यानां मधुनां[2] तथा ॥ ४० ॥ मोदकानामपूपानामन्येषां दानमेव च ॥ रामसेतौ द्विजाः प्रोक्तं सर्वाभीष्टप्रदायकम् ॥ ४१ ॥ अतो दद्याद्रामसेतौ वित्तलोभविवर्जितः ॥ दत्तं हुतं च तप्तं च जपश्च नियमादिकम् ॥ ४२ ॥ श्रीरामधनुषः कोटावनंतफलदं भवेत् ॥ तेन वेदाश्च तुष्यंति तुष्यंति पितरस्तथा ॥ ॥ ४३ ॥ तुष्यंति मुनयः सर्वे ब्रह्मा विष्णुः शिवस्तथा ॥ नागाः किंपुरुषा यक्षाः सर्वे तुष्यंति निश्चितम् ॥४४॥ स्वयं च पूतो भवति धनुष्कोट्यवलोकनात् ॥ स्ववंशजान्नरान्सर्वान्पावयेच्च पितामहान् ॥ ४५ ॥ तारयेच्च कुलं सर्वं धनुष्कोट्यवलोकनात् ॥ रामस्य धनुषः कोट्या कृतरेखावगाहना

१ जलान्विते–इ० पा० । २ मधूनाम्–इत्यपेक्षितम् । " वृद्ध्यैत्वतृज्वद्भावगुणेभ्यो नुट् पूर्वविप्रतिषेधेन " इति वार्तिकेन नुटि "नामि" इत्यनेन दीर्घे मधूनाम् इत्येव स्यात् । ह्रस्वपाठस्तु आर्षत्वाद्दीर्घाभावे इति बोधनम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सेतुस्नानफलं पुण्यं तेनाप्नोति न संशयः ॥ अंधपंग्वादिविषयमेतत्प्रोक्तं मनीषिभिः ॥ ७९ ॥ ॥ श्रीसूत उवाच ॥ ॥ एवं वः कथितो विप्राः सेतुयात्राक्रमो द्विजाः ॥ एतत्पठन्वा शृण्वन्वा सर्वदुःखाद्विमुच्यते ॥ ८० ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे सेतुमाहात्म्ये यात्राक्रमवर्णनंनामैकपंचाशत्तमोऽध्यायः ॥ ५१ ॥ ॥ श्रीसूत उवाच ॥ ॥ भूयोऽप्यहं प्रवक्ष्यामि सेतुमुद्दिश्य वैभवम् ॥ युष्माकमादरेणाहं शृणुध्वं मुनिपुंगवाः ॥ १ ॥ स्थानानामपि सर्वेषामेतत्स्थानं महत्तरम् ॥ अत्र जप्तं हुतं तप्तं दत्तं चाक्षय मुच्यते ॥ २ ॥ अस्मिन्नेव महास्थाने धनुष्कोटौ निमज्जनात् ॥ वाराणस्यां दशसमावासपुण्यफलं भवेत् ॥ ३ ॥ तस्मिंस्थले धनुष्कोटौ स्नात्वा रामेश्वरं शिवम् ॥ दृष्ट्वा नरो भक्तियुक्तस्त्रिदिनानि वसेद्द्विजाः ॥ ४ ॥ पुण्डरीकपुरे तेन दशवत्सरवासजम् ॥ पुण्यं भवति विप्रेंद्रा महापातकनाश नम् ॥५॥ अष्टोत्तरसहस्रं तु मंत्रमाद्यं षडक्षरम् ॥ अत्र जप्त्वा नरो भक्त्या शिवसायुज्यमाप्नुयात् ॥ ६ ॥ मध्यार्जुने कुंभकोणे मायूरे श्वेतकानने ॥ हालास्ये च गजारण्ये वेदारण्ये च नैमिषे ॥ ७ ॥ श्रीपर्वते च श्रीरंगे श्रीमद्वृद्धगिरौ तथा ॥ चिदंबरे च वल्मीके शेषाद्रावरुणाचले ॥ ८ ॥ श्रीमद्द क्षिणकैलासे वेंकटाद्रौ हरिस्थले ॥ कांचीपुरे ब्रह्मपुरे वै[1]द्येश्वरपुरे तथा ॥ ९ ॥ अन्यत्रापि शिवस्थाने विष्णुस्थाने च सत्तमाः ॥ वर्षवासभवं पुण्यं धनुष्कोटौ नरो मुदा ॥१०॥ माघमासे यदि स्नायादाप्नोत्येव न संशयः ॥ इमं सेतुं समुद्दिश्य द्वौ समुद्राविति श्रुतिः ॥११॥ विद्यते ब्राह्मणश्रेष्ठा मातृभूता सनातनी ॥ अदो यद्दारुरित्यन्या यत्रास्ति मुनिपुंगवाः ॥ १२ ॥ विष्णोः कर्माणि पश्यंती सेतुवैभवशंसिनी ॥ श्रुतिरस्ति तथान्यापि तद्विष्णोरिति चापरा ॥ १३ ॥ इतिहासपुराणानि स्मृतयश्च तपोधनाः ॥ एकवाक्यतया सेतुमाहात्म्यं प्रब्रुवंति हि ॥ १४ ॥ चंद्रसूर्योपरागेषु कुर्वन्सेत्ववगाहनम् ॥ अविमुक्ते दशाब्दं तु गंगास्नानफलं लभेत् ॥ १५ ॥ कोटिजन्मकृतं पापं तत्क्षणेनैव नश्यति ॥ अश्वमेधसहस्रस्य फलमाप्नोत्य नुत्तमम् ॥१६॥ विषुवायनसंक्रांतौ शशिवारे च पर्वणि ॥ सेतुदर्शनमात्रेण सप्तजन्मार्जिताशुभम् ॥१७॥ नश्यते स्वर्गतिं चैव प्रयाति द्विजपुंगवाः ॥ मकरस्थे रवौ माघे किंचिदभ्युदिते रवौ ॥ १८ ॥ स्नात्वा दिनत्रयं मर्त्यो धनुष्कोटौ विपातकः ॥ गंगादिसर्वतीर्थेषु स्नानपुण्यमवाप्नुयात् ॥ ॥ १९ ॥ धनुष्कोटौ नरः कुर्यात्स्नानं पंचदिनेषु यः ॥ अश्वमेधादिपुण्यं च प्राप्नुयाद्ब्राह्मणोत्तमाः ॥ २० ॥ चांद्रायणादिकृच्छ्राणामनुष्ठानफलं लभेत् ॥ चतुर्णामपि वेदानां पारायणफलं तथा ॥ २१ ॥ माघमासे दशाहःसु धनुष्कोटौ निमज्जनात् ॥ ब्रह्महत्यायुतं नश्येन्नात्र कार्या विचा

१ वैजेश्वर–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निः सरित्पतिः सागररत्नयोनिः ॥ अग्निश्च तेजश्च इलां च तेजो रेतोधा विष्णुरमृतस्य नाभिः ॥ ३० ॥ इदं ते अन्याभिरसमानमद्भिर्याः काश्च सिंधुं प्रविशंत्यापः ॥ सर्पो जीर्णामिव त्वचं जहामि पापं शरीरात्सशिरस्कोऽभ्युपेत्य ॥३१॥ समुद्राय वयूनाय नमस्कुर्यात्पुनर्द्विजाः ॥ सर्वतीर्थमयं शुद्धं नदीनां पतिमंबुधिम् ॥ ३२ ॥ द्वौ समुद्राविति पुनः प्रोच्चार्य स्नानमाचरेत् ॥ ब्रह्मांडोदरतीर्थानि करस्पृष्टानि ते रवे ॥ ३३ ॥ तेन सत्येन मे सेतौ तीर्थं देहि दिवाकर ॥ प्राच्यां दिशि च सुग्रीवमित्यादिक्रमयोगतः ॥३४॥ स्मृत्वा भूयो द्विजाः सेतौ तृतीयं स्नानमाचरेत् ॥ देवीपत्तनमारभ्य प्रव्रजेद्यदि मानवः ॥ ३५ ॥ तदा तु नवपाषाणमध्ये सेतौ विमुक्तिदे ॥ स्नानमंबुनिधौ कुर्यात्स्वपापौघापनुत्तये ॥ ३६ ॥ दर्भशय्यापदव्या चेद्गच्छेत्सेतुं विमुक्तिदम् ॥ तदा तत्रोदधावेव स्नानं कुर्याद्विमुक्तये ॥ ३७ ॥ ॥ तर्पणविधिः ॥ ॥ पिप्पलादं कविं कण्वं कृतांतं जीवितेश्वरम् ॥ मन्युं च कालरात्रिं च विद्यां चाहर्गणेश्वरम् ॥ ३८ ॥ वसिष्ठं वामदेवं च पराशरमुमापतिम्[३] ॥ वाल्मिकिं नारदं चैव वालखिल्यान्मुनींस्तथा ॥ ३९ ॥ नलं नीलं गवाक्षं च गवयं गन्धमादनम् ॥ मैंदं च द्विविदं चैव शरभं चर्षभं तथा ॥ ४० ॥ सुग्रीवं च हनूमंतं वेगदर्शनमेव च ॥ रामं च लक्ष्मणं सीतां महाभागां यशस्विनीम् ॥ ४१ ॥ त्रिः कृत्वा तर्पयेदेतान्मंत्रानुक्त्वा यथाक्रमम् ॥ विभोश्च तत्तन्नामानि चतुर्थ्यंतानि वै द्विजाः ॥४२॥ देवानृषीन्पितृंश्चैव विधिवच्च तिलोदकैः॥ द्वितीयांतानि नामानि चोक्त्वा वा तर्पयेद्द्विजाः ॥ ४३ ॥ तर्पयेत्सपवित्रस्तु जले स्थित्वा प्रसन्नधीः ॥ तर्पणात्सर्वतीर्थेषु स्नानस्य फलमाप्नुयात् ॥ ४४ ॥ एवमेतांस्तर्पयित्वा नमस्कृत्योत्तरेज्जलात् ॥ आर्द्रवस्त्रं परित्यज्य शुष्कवासःसमावृतः ॥ ४५ ॥ आचम्य सपवित्रश्च विधिवच्छ्राद्धमाचरेत् ॥ पिंडान्पितृभ्यो दद्याच्च तिलतण्डुलकैस्तथा ॥ ४६ ॥ एतच्छ्राद्धमशक्तस्य मया प्रोक्तं द्विजोत्तमाः ॥ धनाढ्योऽन्नेन वै श्राद्धं षड्रसेन समाचरेत् ॥ ४७ ॥ गोभूतिलहिरण्यादिदानं कुर्यात्समृद्धिमान् ॥ रामचन्द्रधनुष्कोटावेवमेव समाचरेत् ॥ ४८ ॥ पाषाणदानपूर्वाणि तर्पणांतानि वै द्विजाः ॥ सेतुमूले यथैतानि विधिवद्द्यतनोद्विजाः ॥ ४९ ॥ चक्रतीर्थं ततो गत्वा तत्रापि स्नानमाचरेत् ॥ पश्येच्च सेत्वधिपतिं देवं नारायणं हरिम् ॥ ५० ॥ गच्छन्पश्चिममार्गेण तत्रत्ये चक्रतीर्थके ॥ स्नात्वा दर्भशयं देवं प्रपश्येद्भक्तिपूर्वकम् ॥ ५१ ॥ कपितीर्थं ततः प्राप्य तत्रापि स्नानमाचरेत् ॥ सीताकुंडं ततः प्राप्य तत्रापि स्नानमाचरेत् ॥ ५२ ॥ ऋणमोचनतीर्थं तु ततः प्राप्य महाफलम् ॥ स्नात्वा प्रणम्य रामं च जानकीरमणं प्रभुम् ॥ ५३ ॥ गच्छेल्लक्ष्मणतीर्थं तु कण्ठादुपरि वापनम् ॥ कृत्वा स्नायाच्च तत्रापि दुष्कृतान्यपि

१ रसा–इ०पा० । २ पुण्यम्–इ०पा० । ३ पाराशर्यम्–इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चिन्तयन् ॥ ५४ ॥ ततः स्नात्वा रामतीर्थे ततो देवालयं व्रजेत् ॥ स्नात्वा पापविनाशने च गंगायमुनयोस्तथा ॥ ५५ ॥ सावित्र्यां च सरस्वत्यां गायत्र्यां च द्विजोत्तमाः ॥ स्नात्वा च हनुमत्कुण्डे ततः स्नायान्महाफले ॥ ब्रह्मकुण्डं ततः प्राप्य स्नायाद्विधिपुरःसरम् ॥ ५६ ॥ नागकुण्डं ततः प्राप्य सर्वपापविनाशनम् ॥ स्नानं कुर्यान्नरो विप्रा नरकक्लेशनाशनम् ॥ गंगाद्याः सरितः सर्वास्तीर्थानि सकलान्यपि ॥ ५७ ॥ सर्वदा नागकुंडे तु वसंति स्वाघशांतये ॥ अनंतादिमहानागैरष्टाभिरिदमुत्तमम् ॥ ५८ ॥ कल्पितं मुक्तिदं तीर्थं रामसेतौ शिवंकरम् ॥ अगस्त्यकुण्डं संप्राप्य ततः स्नायादनुत्तमम् ॥ ५९ ॥ अथाग्नितीर्थमासाद्य सर्वदुष्कर्मनाशनम् ॥ स्नात्वा संतर्प्य विधिवच्छ्राद्धं कुर्यात्पितॄन्स्मरन् ॥ ६० ॥ गोभूहिरण्य धान्यादि ब्राह्मणेभ्यः स्वशक्तितः ॥ दत्त्वाग्नितीर्थतीरे तु सर्वपापैः प्रमुच्यते ॥ ६१ ॥ अथवा यानि तीर्थानि चक्रतीर्थमुखानि वै ॥ अनुक्रांतानि विप्रेंद्राः सर्वपापहराणि तु ॥ ६२ ॥ स्नायात्तदनुपूर्वेण स्नायाद्वापि यथारुचि ॥ स्नात्वैवं सर्वतीर्थेषु श्राद्धादीनि समाचरेत् ॥ ६३ ॥ पश्चाद्रामेश्वरं प्राप्य निषेव्य परमेश्वरम् ॥ सेतुमाधवमागत्य तथा रामं च लक्ष्मणम् ॥ ६४ ॥ सीतां प्रभंजनसुतं तथान्यान्कपिसत्तमान् ॥ तत्रत्यसर्वतीर्थेषु स्नात्वा नियमपूर्वकम् ॥ ६५ ॥ प्रणम्य रामनाथं च रामचंद्रं तथापरान् ॥ नमस्कृत्य धनुष्कोटिं ततः स्नातुं व्रजेन्नरः ॥ ६६ ॥ तत्र पाषाण दानादिपूर्वोक्तनियमं चरेत् ॥ धनुष्कोटौ च दानानि दद्याद्वित्तानुसारतः ॥ ६७ ॥ क्षेत्रं गाश्च तथान्यानि वस्त्राण्यन्यानि चादरात् ॥ ब्राह्मणेभ्यो वेदविद्भ्यो दद्याद्वित्तानुसारतः ॥ ६८ ॥ कोटितीर्थं ततः प्राप्य स्नायान्नियमपूर्वकम् ॥ ततो रामेश्वरं देवं प्रणमेद्वृषभध्वजम् ॥ ६९ ॥ विभवे सति विप्रेभ्यो दद्यात्सौवर्णदक्षिणाम् ॥ तिलान्धान्यं च गां क्षेत्रं वस्त्राण्यन्यानि तंडुलान् ॥ ७० ॥ दद्याद्वित्तानुसारेण वित्तलोभविवर्जितः ॥ धूपं दीपं च नैवेद्यं पूजोपकरणानि च ॥ ७१ ॥ रामेश्वराय देवाय दद्याद्वित्तानुसारतः ॥ स्तुत्वा रामेश्वरं देवं प्रणम्य च सभक्तिकम् ॥ ७२ ॥ अनुज्ञाप्य ततो गच्छेत्सेतुमाधवसंनिधिम् ॥ तस्मै दत्त्वा च धूपादीननुज्ञाप्य च माधवम् ॥ ७३ ॥ पूर्वोक्तनियमोपेतः पुनरायात्स्वकं गृहम् ॥ ब्राह्मणान्भोजयेदन्नैः षड्रसैः परिपूरितैः ॥ ७४ ॥ तेनैव रामनाथोऽस्मै प्रीतोऽभीष्टं प्रयच्छति ॥ नारकं चास्य नास्त्येव दारिद्र्यं च विनश्यति ॥ ७५ ॥ संततिर्वर्धते तस्य पुरुषस्य द्विजोत्तमाः ॥ संसारमवधूयाशु सायुज्यमपि यास्यति ॥ ७६ ॥ अत्रागन्तुमशक्तश्चेच्छ्रुतिस्मृत्यागमेषु यत् ॥ ग्रंथजातं महापुण्यं सेतुमाहात्म्यसूचकम् ॥ ७७ ॥ तं ग्रंथं पाठयेद्विप्रा महापातकनाशनम् ॥ इदं वा सेतुमाहात्म्यं पठेद्भक्तिपुरःसरम् ॥ ७८ ॥

१ आयात्—आगच्छेत्—इत्यर्थः । प्रयोग आर्षः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्त्रीसंगादिविवर्जितः ॥७॥ शौचाद्याचारसंयुक्तः सन्ध्योपास्तिपरायणः ॥ गायत्र्युपास्तिं कुर्वाणस्त्रिसंध्यं रामचिंतकः ॥ ८ ॥ मध्येमार्गं पठन्नित्यं सेतुमाहात्म्यमादरात् ॥ पठन्रामायणं वापि पुराणांतरमेव वा ॥ ९ ॥ व्यर्थवाक्यानि संत्यज्य सेतुं गच्छेद्विशुद्धये ॥ प्रतिग्रहं न गृह्णीयान्नाचारांश्च परित्यजेत् ॥ १० ॥ कुर्यान्मार्गे यथाशक्ति शिवविष्ण्वादिपूजनम् ॥ वैश्वदेवादिकर्माणि यथाशक्ति समाचरेत् ॥ ११ ॥ ब्रह्मयज्ञमुखान्धर्मान्प्रकुर्याच्चाग्निपूजनम् ॥ अतिथिभ्योऽन्नपानादि संप्रदद्याद्यथाबलम् ॥ १२ ॥ दद्याद्भिक्षां यतिभ्योऽपि वित्तशाठ्यं परित्यजन् ॥ शिवविष्ण्वादिनामानि स्तोत्राणि च पठेत्पथि ॥ १३ ॥ धर्ममेव सदा कुर्यान्निषिद्धानि परित्यजेत् ॥ इत्यादिनियमोपेतः सेतुमूलं ततो व्रजेत् ॥ १४ ॥ पाषाणं प्रथमं दद्यात्तत्र गत्वा समाहितः ॥ तत्रावाह्य समुद्रं च प्रणमेत्तदनंतरम् ॥ १५ ॥ अर्घ्यं दद्यात्समुद्राय प्रार्थयेत्तदनंतरम् ॥ अनुज्ञां च ततः कुर्यात्ततः स्नायान्महोदधौ ॥ १६ ॥ मुनीनामथ देवानां कपीनां पितृणां तथा ॥ प्रकुर्यात्तर्पणं विप्रा मनसा संस्मरन्हरिम् ॥ १७ ॥ ॥ ॥ पाषाणसंख्या ॥ ॥ पाषाणसप्तकं दद्यादेकं वा विप्रपुंगवाः ॥ पाषाणदानात्सफलं स्नानं भवति नान्यथा ॥ १८ ॥ ॥ पाषाणदानमंत्रः ॥ ॥ पिप्पलादसमुत्पन्ने कृत्ये लोकभयंकरे ॥ पाषाणं ते मया दत्तमाहारार्थं प्रकल्प्यताम् ॥ १९ ॥ ॥ सान्निध्यप्रार्थनामन्त्रः ॥ ॥ विश्वाचि त्वं घृताचि त्वं विश्वयाने विशांपते ॥ सान्निध्यं कुरु मे देव सागरे लवणांभसि ॥ २० ॥ ॥ नमस्कारमन्त्रः ॥ ॥ नमस्ते विश्वगुप्ताय नमो विष्णो ह्यपांपते ॥ नमो हिरण्यशृंगाय नदीनां पतये नमः ॥ समुद्राय वयूनाय प्रोच्चार्य प्रणमेत्तथा ॥ २१ ॥ ॥ अर्घ्यमन्त्रः ॥ ॥ सर्वरत्नमय श्रीमन्सर्वरत्नाकराकर ॥ सर्वरत्नप्रधानस्त्वं गृहाणार्घ्यं महोदधे ॥ २२ ॥ ॥ अनुज्ञापनमंत्रः ॥ ॥ अशेषजगदाधार शंखचक्रगदाधर ॥ देहि देव ममानुज्ञां युष्मत्तीर्थनिषेवणे ॥ २३ ॥ ॥ प्रार्थनामंत्रः ॥ ॥ प्राच्यां दिशि च सुग्रीवं दक्षिणस्यां नलं स्मरेत् ॥ २४ ॥ प्रतीच्यां मैंदनामानमुदीच्यां द्विविदं तथा ॥ रामं च लक्ष्मणं चैव सीतामपि यशस्विनीम् ॥ २५ ॥ अंगदं वायुतनयं स्मरेन्मध्ये बिभीषणम् ॥ पृथिव्यां यानि तीर्थानि प्राविशंस्त्वा महोदधे ॥ २६ ॥ स्नानस्य मे फलं देहि सर्वस्मात्त्राहि मांहंसः ॥ हिरण्यशृंगमित्याभ्यां नाभ्यां नारायणं स्मरेत् ॥ २७ ॥ ध्यायन्नारायणं देवं स्नानादिषु च कर्मसु ॥ ब्रह्मलोकमवाप्नोति जायते नेह वै पुनः ॥ २८ ॥ सर्वेषामपि पापानां प्रायश्चित्तं भवेत्ततः ॥ प्रह्लादं नारदं व्यासमंबरीषं शुकं तथा ॥ अन्यांश्च भगवद्भक्तांश्चिंतयेदेकमानसः ॥ २९ ॥ ॥ स्नानमन्त्रः ॥ ॥ वेदादिर्यो वेदवसिष्ठयो

१ व्यर्थकार्याणि–इ०पा० । २ मांभसः–इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नृप ॥ भूतराक्षससंघेभ्यो भयानामुपशांतये ॥९९॥ ब्रह्मापि सेतुरक्षार्थं वसत्यत्र दिवानिशम् ॥ शंकरो रामनाथाख्यो नित्यं सेतौ वसत्यथ ॥१००॥
इंद्रादिलोकपालाश्च वसंत्यत्र मुदान्विताः ॥ अतोऽहमत्र वत्स्यामि सेतुमाधवसंज्ञया ॥१॥ सेतुसंरक्षणार्थं वै सर्वोपद्रवशांतये ॥ सर्वेषामि ! द्धचर्थं
सर्वपापोपशांतये ॥ २ ॥ त्वया निगडबद्धं मां सेवंते येऽत्र मानवाः ॥ ते यांति मम सायुज्यं सर्वाभीष्टं तथा नृप ॥ ३ ॥ मम लक्ष्म्यास्तत्र तथा
चरितं ये पठंति वै ॥ न ते यास्यंति दारिद्र्यं किं त्वैश्वर्यं व्रजंति ते ॥४॥ त्वत्कृतं यदिदं स्तोत्रं मम लक्ष्म्या विशांपते ॥ ये पठंति च शृण्वंति लिखं
ति च मुदान्विताः ॥ ५ ॥ न तेषां पुनरावृत्तिर्मम लोकात्कदाचन ॥ इत्युक्त्वा स हरिस्तत्र नृपं पुण्यनिधिं तदा ॥ ६ ॥ तत्रैव पूर्णरूपेण सनि
धत्ते स्म सर्वदा ॥ नृपः पुण्यनिधिर्विप्राः सेतुमाधवरूपिणम् ॥ ७ ॥ विष्णुं प्रणम्य भक्त्या तु महापूजां विधाय च ॥ सेवित्वा रामनाथं च
स्वमेव भवनं ययौ ॥ ८ ॥ यावज्जीवमसौ तत्र सेतौ न्यवसदुत्तमे ॥ मधुरायां निजं पुत्रं स्थापयामास पालकम् ॥ ९ ॥ तत्रैव निवसन्राजा
देहांते मुक्तिमाप्तवान् ॥ विंध्यावलिश्च तत्पत्नी तमेवानुममार सा ॥ पतिव्रता पतिप्राणा प्रययौ सापि सद्गतिम् ॥११०॥ ॥ श्रीसूत उवाच ॥ ॥
येत्र भक्तियुता नित्यं सेवंते सेतुमाधवम् ॥ ११ ॥ न तेषां पुनरावृत्तिः कैलासाज्जातु जायते ॥ सेतुमाधवसेवां ये न कुर्वंत्यत्र मानवाः ॥
॥ १२ ॥ न तेषां रामनाथस्य सेवा फलवती भवेत् ॥ गृहीत्वा सैकतं सेतोर्गंगायां निक्षिपेद्यदि ॥ १३ ॥ विभज्य माधवपुरे वैकुंठे स वसे
न्नरः ॥ गंगां जिगमिषुर्विप्राः सेतुमाधवसन्निधौ ॥ १४ ॥ संकल्प्य गंगां निर्गच्छेत्सा यात्रा सफला भवेत् ॥ आनीय गंगासलिलं रामेशमभि
षिच्य च ॥ १५ ॥ सेतौ निक्षिप्य तद्द्वारं ब्रह्म प्राप्नोत्यसंशयः ॥ इति वः कथितं विप्राः सेतुमाधववैभवम् ॥ १६ ॥ एतत्पठन्वा शृण्वन्वा
वैकुंठे लभते गतिम् ॥ ११७ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे सेतुमाहात्म्ये सेतुमाधवप्रशंसायां पुण्य
निधिचरितकथनंनाम पंचाशत्तमोऽध्यायः ॥ ५० ॥ ॥ सूत उवाच ॥ ॥ अथातः संप्रवक्ष्यामि सेतुयात्राक्रमं द्विजाः ॥ यं श्रुत्वा सर्वपापे
भ्यो मुच्यते मानवः क्षणात् ॥ १ ॥ स्नात्वाचम्य विशुद्धात्मा कृतनित्यविधिः सुधीः ॥ रामनाथस्य तुष्ट्यर्थं प्रीत्यर्थं राघवस्य च ॥ २ ॥ भोज
यित्वा यथाशक्ति ब्राह्मणान्वेदपारगान् ॥ भस्मोद्धूलितसर्वांगस्त्रिपुंड्रांकितमस्तकः ॥ ३ ॥ गोपीचन्दनलिप्तो वा स्वफालेऽप्यूर्ध्वपुंड्रकः ॥ रुद्राक्ष
मालाभरणः सपवित्रकरः शुचिः ॥ ४ ॥ सेतुयात्रां करिष्येऽहमिति संकल्प्य भक्तितः ॥ स्वगृहात्प्रव्रजेन्मौनी जपन्नष्टाक्षरं मनुम् ॥ ५ ॥ पंचाक्षरं
नाममंत्रं जपेन्नियतमानसः ॥ एकवारं हविष्याशी जितक्रोधो जितेंद्रियः ॥ ६ ॥ पादुकाछत्ररहितस्तांबूलपरिवर्जितः ॥ तैलाभ्यंगविहीनश्च

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 स्वप्ने विप्रं ददर्श तम् ॥ ४७ ॥ शंखचक्रगदापद्मवनमालाविभूषितम् ॥ कौस्तुभालंकृतोरस्कं पीतांबरधरं हरिम् ॥ ४८ ॥ कालमेघच्छविं कांतं
 गरुडोपरि सस्थितम् ॥ चारुस्मितं चारुदंतं लसन्मकरकुण्डलम् ॥ ४९ ॥ विष्वक्सेनप्रभृतिभिः किंकरैरुपसेवितम् ॥ शेषपर्यंकशयनं नारदादि
मुनिस्तुतम् ॥ ५० ॥ ददर्श च स्वकां कन्यां विकासिकमलस्थिताम् ॥ धृतपंकजहस्तां तां नीलकुञ्चितमूर्धजाम् ॥ ५१ ॥ विष्णुवक्षस्थलावासां
समुन्नतपयोधराम् ॥ दिग्गजैरभिषिक्तांगीं श्यामां पीतांबरावृताम् ॥ ५२ ॥ स्वर्णपंकजसंक्लृप्तमालालंकृतमूर्धजाम् ॥ दिव्याभरणशोभाढ्यां चारुहा
रविभूषिताम् ॥ ५३ ॥ अनर्घरत्नसंक्लृप्तनासाभरणशोभिताम् ॥ सुवर्णनिष्काभरणां कांचीनूपुरराजिताम् ॥ ५४ ॥ महालक्ष्मीं ददर्शासौ राजा
रात्रौ स्वकां सुताम् ॥ एवं दृष्ट्वा नृपः स्वप्ने विप्रं तं स्वसुतामपि ॥ ५५ ॥ उत्थितः सहसा तल्पात्कन्यागृहमवाप च ॥ तथैव दृष्टवान्कन्यां यथा
स्वप्ने ददर्श ताम् ॥ ५६ ॥ अथोदिते सवितरि कन्यामादाय भूमिपः ॥ रामनाथालयं प्राप ब्राह्मणं न्यस्तवान्यतः ॥ ५७ ॥ स मंडपवरे विप्रं
ददर्श हरिरूपिणम् ॥ यथा ददर्श स्वप्ने तं वनमालादिचिह्नितम् ॥ विष्णुं विज्ञाय तुष्टाव नृपतिर्हरिमीश्वरम् ॥ ५८ ॥ ॥ पुण्यनिधिरुवाच ॥ ॥
नमस्ते कमलाकांत प्रसीद गरुडध्वज ॥ ५९ ॥ शार्ङ्गपाणे नमस्तुभ्यमपराधं क्षमस्व मे ॥ नमस्ते पुण्डरीकाक्ष चक्रपाणे श्रियःपते ॥ ६० ॥
कौस्तुभालंकृतांकाय नमः श्रीवत्सलक्ष्मणे ॥ नमस्ते ब्रह्मपुत्राय दैत्यसंघविदारिणे ॥ ६१ ॥ अशेषभुवनावासनाभिपंकजशालिने ॥ मधुकैटभसं
हर्त्रे रावणांतकराय ते ॥६२॥ प्रह्लादरक्षिणे तुभ्यं धरित्रीपतये नमः ॥ निर्गुणायाप्रमेयाय विष्णवे बुद्धिसाक्षिणे ॥६३॥ नमस्ते श्रीनिवासाय जग
द्धात्रे परात्मने ॥ नारायणाय देवाय कृष्णाय मधुविद्विषे ॥६४॥ नमः पंकजनाभाय नमः पंकजचक्षुषे ॥ नमः पंकजहस्तायाः पतये पंकजांघ्रये ॥६५॥
भूयोभूयो जगन्नाथ नमः पंकजमालिने ॥ दयामूर्ते नमस्तुभ्यमपराधं क्षमस्व मे ॥ ६६ ॥ मया निगडपाशाभ्यां यः कृतो मधुसूदन ॥ अनयस्त्व
त्स्वरूपमविदित्वा कृतः प्रभो ॥ ६७ ॥ अतो मदपराधोऽयं क्षंतव्यो मधुसूदन ॥ एवं स्तुत्वा महाविष्णुं राजा पुण्यनिधिर्द्विजाः ॥ ६८ ॥ लक्ष्मीं
तुष्टाव जननीं सर्वेषां प्राणिनां मुदा ॥ नमो देवि जगद्धात्रि विष्णुवक्षस्थलालये ॥ ६९ ॥ नमोऽब्धिसंभवे तुभ्यं महालक्ष्मि हरिप्रिये ॥ सिद्ध्यै
पुष्ट्यै स्वधायै च स्वाहायै सततं नमः ॥ ७० ॥ संध्यायै च प्रभायै च धात्र्यै भूत्यै नमोनमः ॥ श्रद्धायै चैव मेधायै सरस्वत्यै नमोनमः ॥ ७१ ॥
यज्ञविद्ये महाविद्ये गुह्यविद्योतिशोभने ॥ आत्मविद्ये च देवेशि मुक्तिदे सर्वदेहिनाम् ॥ ७२ ॥ त्रयीरूपे जगन्मातर्जगद्रक्षाविधायिनि ॥ रक्ष मां
त्वं कृपादृष्ट्या सृष्टिस्थित्यंतकारिणि ॥ ७३ ॥ भूयोभूयो नमस्तुभ्यं ब्रह्ममात्रे महेश्वरि ॥ इति स्तुत्वा महालक्ष्मीं प्रार्थयामास माधवम् ॥ ७४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यदज्ञानान्मया विष्णो त्वयि दोषः कृतोऽधुना ॥ पादे निगडबंधेन स द्रोहः क्षम्यतां त्वया ॥ ७५ ॥ लोकास्ते शिशवः सर्वे त्वं पिता जगतां हरे ॥ सुताऽपराधः पितृभिः क्षंतव्यो मधुसूदन ॥ ७६ ॥ अपराधिनां च दैत्यानां स्वरूपमपि दत्तवान् ॥ भवान्विष्णो ममापीममपराधं क्षमस्व वै ॥ ॥ ७७ ॥ जिघांसयापि भगवन्नागतां पूतनां पुरा ॥ अनयस्त्वत्पदांभोजं तन्मां रक्ष कृपानिधे ॥ लक्ष्मीकांत कृपादृष्टिं मयि पातय केशव ॥ ७८ ॥ ॥ ॥ श्रीसूत उवाच ॥ ॥ इति संप्रार्थितो विष्णू राज्ञा तेन द्विजोत्तमाः ॥ प्राह गंभीरया वाचा नृपं पुण्यनिधिं ततः ॥ ७९ ॥ ॥ विष्णुरुवाच ॥ ॥ राजन्न भीस्त्वया कार्या मद्बंधननिमित्तजा ॥ ८० ॥ भक्तवश्यत्वमधुना तव प्रतिहितं मया ॥ मम प्रीतिकरं यज्ञमकरोयद्भवानिह ॥ ॥ ८१ ॥ अतस्त्वं मम भक्तोसि राजन्पुण्यनिधेऽधुना ॥ तेनाहं तव वश्योऽस्मि भक्तिपाशेन यंत्रितः ॥ ८२ ॥ भक्तापराधं सततं क्षमाम्यहमरिंदम ॥ त्वद्भक्तिं ज्ञातुकामेन मया संप्रेरिता त्वियम् ॥ ८३ ॥ लक्ष्मीर्मम प्रिया राजंस्त्वया संरक्षिताऽधुना ॥ तेनाहं तव तुष्टोऽस्मि मत्स्वरूपा त्वियं सदा ॥ ८४ ॥ अस्यां यो भक्तिमांल्लोके स मद्भक्तोऽभिधीयते ॥ अस्यां यो विमुखो राजन्स मद्द्वेषी स्मृतः सदा ॥ ८५ ॥ त्वमिमां भक्तिसंयुक्तो यस्मात्पूजितवानसि ॥ मत्पूजापि कृता तस्मान्मदभिन्ना त्वियं यतः ॥ ८६ ॥ अतस्त्वया नापराधः कृतो मयि नरेश्वर ॥ किं तु पूजैव विहिता तां त्वयार्चयता मम ॥ ८७ ॥ त्वया मद्भार्यया साकं संकेतोऽकारि यत्पुरा ॥ तत्संकेताभिगुप्त्यर्थं मां यद्बंधितवानसि ॥ ८८ ॥ तेन प्रीतोस्मि ते राजँल्लक्ष्मीः संरक्षिताऽधुना ॥ मत्स्वरूपा च सा लक्ष्मीर्जगन्माता त्रयीमयी ॥ ८९ ॥ तद्रक्षां कुर्वता भूप त्वया यद्बंधनं मम ॥ तत्प्रियं मम राजेंद्र मा भयं क्रियतां त्वया ॥ ९० ॥ इयं लक्ष्मीस्तव सुता सत्यमेव न संशयः ॥ इतीरितेऽथ हरिणा लक्ष्मीः प्रोवाच भूपतिम् ॥ ॥ ९१ ॥ ॥ लक्ष्मीरुवाच ॥ ॥ राजन्प्रीतास्मि ते चाहं रक्षिता यद्गृहे त्वया ॥ त्वद्भक्तिशोधनार्थं वा[१] अहं विष्णुरुभावपि ॥ ९२ ॥ विनोदकलहव्याजादागताविह भूपते ॥ तव योगेन भक्त्या च तुष्टावावां परंतप ॥ ९३ ॥ आवयोः कृपया राजन्सुखं ते भवतात्सदा ॥ सर्वभूमंडलैश्वर्यं सदा ते भवतु ध्रुवम् ॥ ९४ ॥ आवयोः पादयुगले भक्तिर्भवतु ते ध्रुवा ॥ देहांते मम सायुज्यं पुनरावृत्तिवर्जितम् ॥ ९५ ॥ नित्यं भवतु ते राजन्माभूत्ते पापधीस्तथा ॥ सदा धर्मे भवतु धीर्विष्णुभक्तियुता तव ॥ ९६ ॥ एवमुक्त्वा नृपं लक्ष्मीर्विष्णोर्वक्षस्थलं ययौ ॥ अथ विष्णुरुवाचेदं राजानं द्विजपुंगवाः ॥ ९७ ॥ यथा त्वयात्र बद्धोहं निगडेन नृपोत्तम ॥ तद्रूपेणैव वत्स्यामि सेतुमाधवसंज्ञितः ॥ ९८ ॥ मयैव कारितः सेतुस्तद्रक्षार्थमहं

१ वै अहम्—इति पदच्छेदः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्वदुक्तं कन्यके शुभे ॥ २१ ॥ ममापि दुहिता नास्ति पुत्रोऽस्त्येकः कुलोद्वहः ॥ तव यस्मिन्रुचिर्भद्रे त्वां तस्मै प्रददाम्यहम् ॥ २२ ॥ आगच्छ मद्गृहं कन्ये मम चांतःपुरे वस ॥ मद्भार्यायाः सुता भूत्वा यथाकाममनिंदिते ॥ २३ ॥ इत्युक्ता सा नृपेणाथ कन्या कमललोचना ॥ तथास्त्विति नृपं प्रोच्य तेन साकं ययौ गृहम् ॥ २४ ॥ राजा स्वभार्याहस्ते तां प्रददौ कन्यकां शुभाम् ॥ अब्रवीच्च स्वकां भार्यां राजा विंध्यावलिं तदा ॥ २५ ॥ आवयोः कन्यका चेयं राज्ञि विंध्यावले शुभे ॥ रक्षेमां सर्वथा त्वं वै पुरुषांतरतः प्रिये ॥ २६ ॥ इतीरिता नृपेणासौ भार्या विंध्यावलिस्तदा ॥ ओमित्युक्त्वाथ तां कन्यां पुत्रीं जग्राह पाणिना ॥ २७ ॥ पोषिता पालिता राज्ञा सुतवत्कन्यका च सा ॥ न्यवात्सीत्सुसुखं राज्ञो भवने लालिता सदा ॥२८॥ अथ विष्णुर्जगन्नाथो लक्ष्मीमन्वेष्टुमादरात् ॥ आरूढविनतानन्दो वैकुंठान्निर्ययौ द्विजाः ॥२९॥ विनिर्गत्य स वैकुंठाद्विलंघितवियत्पथः ॥ बभ्राम च बहून्देशाँल्लक्ष्मीं तत्र न दृष्टवान् ॥३०॥ रामसेतुमथागच्छद्गंधमादनपर्वते ॥ अन्विष्य सर्वतो रामसेतुं बभ्राम चेंदिराम् ॥ ३१ ॥ एतस्मिन्नेव काले सा पुष्पावचयकौतुकात् ॥ सखीभिः कन्यकायासीद्भवनोद्यानपादपान् ॥ ३२ ॥ पुष्पाण्यवचिनोति स्म सखीभिः सह कानने ॥ तत्रागत्य ततो विष्णुर्विप्ररूपधरो द्विजाः ॥ ३३ ॥ गंगांभो विदधत्स्कंधे वहञ्छत्रं करेण च ॥ गंगास्नायिद्विजस्येव रचयन्वेषमात्मनः ॥ ३४ ॥ धारयन्दक्षिणे पाणौ कुशग्रंथिपवित्रकम् ॥ भस्मोद्धूलितसर्वांगस्त्रिपुण्ड्रावलिशोभितः ॥ ३५ ॥ प्रजपञ्छिवनामानि धृतरुद्राक्षमालिकः ॥ सोत्तरीयः शुचिर्विप्राः समायातो जनार्दनः ॥ ३६ ॥ तमागतं द्विजं दृष्ट्वा स्तब्धाऽतिष्ठत कन्यका ॥ अपश्यदष्टवर्षां तां वल्लभां पुष्पहारिणीम् ॥ ३७ ॥ दृष्ट्वा स त्वरया विप्रः कन्यां मधुरभाषिणीम् ॥ हठात्कृत्य करेणासौ जग्राह गरुडध्वजः ॥ ३८ ॥ तदा चुक्रोश सा कन्या सखीभिः सह कानने ॥ तमाक्रोशं समाकर्ण्य राजा स तु समागतः ॥ ३९ ॥ प्रययौ भवनोद्यानं वृतः कतिपयैर्भटैः ॥ गत्वा पप्रच्छ तां कन्यां तत्सखीरपि भूपतिः ॥ ४० ॥ किमर्थमधुना क्रुष्टं सखीभिः सह कन्यके ॥ त्वया तु भवनोद्याने तत्र कारणमुच्यताम् ॥ ४१ ॥ केन त्वं परिभूतासि हठात्कृष्य सुते मम ॥ इति पृष्टा तमाचष्ट कन्या गुणनिधिं नृपम् ॥ बाष्पपूर्णानना खिन्ना रुषिता भृशकातरा ॥ ४२ ॥ ॥ कन्योवाच ॥ ॥ अयं विप्रो हठात्कृत्य जगृहे पांड्यनाथ माम् ॥ ४३ ॥ तातात्र वृक्षमूलेऽसौ स तिष्ठत्यकुतोभयः ॥ तदाकर्ण्य वचस्तस्या राजा गुणनिधिः सुधीः ॥ ४४ ॥ जग्राह तरसा विप्रमविद्वांस्तद्बलं हठात् ॥ रामनाथालयं नीत्वा निगृह्य च हठात्तदा ॥ ४५ ॥ बद्ध्वा निगडपाशाभ्यामानयन्मंडपं च तम् ॥ आत्मपुत्रीं समाश्वास्य शुद्धांतमनयन्नृपः ॥ ४६ ॥ स्वयं च प्रययौ रम्यं भवनं नृपपुंगवः ॥ ततो रात्रौ स्वपन्राजा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उक्त्वैवं रामनाथोऽपि स्वात्मलिंगे तिरोदधे ॥ स्तोत्राध्यायमिमं पुण्यं नित्यं संकीर्तयन्नरः ॥ ९९ ॥ जरामरणनिर्मुक्तो जन्मदुःखविवर्जितः ॥
रामनाथस्य सायुज्यमुक्तिं प्राप्नोत्यसंशयः ॥ १०० ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे सेतुमाहात्म्ये
रामादिभी रामनाथस्तोत्रकथनंनामैकोनपंचाशत्तमोऽध्यायः ॥ ४९ ॥ ॥ श्रीसूत उवाच ॥ ॥ अथातः संप्रवक्ष्यामि सेतुमाधववैभवम् ॥
शृणुध्वं मुनयो भक्त्या पुण्यं पापहरं परम् ॥ १ ॥ पुरा पुण्यनिधिर्नाम राजा सोमकुलोद्भवः ॥ मधुरां पालयामास हालास्येश्वरभूषिताम् ॥ २ ॥
कदाचित्स महीपालश्चतुरंगबलान्वितः ॥ सांऽतःपुरपरीवारो मधुरायां निजं सुतम् ॥ ३ ॥ स्थापयित्वा रामसेतुं प्रययौ स्नानकौतुकी ॥
तत्र गत्वा धनुष्कोटौ स्नात्वा संकल्पपूर्वकम् ॥ ४ ॥ अन्येष्वपि च तीर्थेषु तत्रत्येषु नृपोत्तमः ॥ सस्नौ रामेश्वरं देवं सिषेवे च सभक्तिकम् ॥
॥ ५ ॥ एवं स बहुकालं वै तत्रैव न्यवसत्सुखम् ॥ रामसेतौ वसन्पुण्ये गन्धमादनपर्वते ॥ ६ ॥ विष्णुप्रीतिकरं यज्ञं कदाचिदकरोन्नृपः ॥ यज्ञाव
साने राजासौ मुदावभृथकौतुकी ॥ ७ ॥ सस्नौ रामधनुष्कोटौ सदारः सपरिच्छदः ॥ सेवित्वा रामनाथं च स वेश्म प्रययौ द्विजाः ॥ ८ ॥
एवं निवसमानेऽस्मिन्राज्ञि पुण्यनिधौ तदा ॥ कदाचिद्धरिणा लक्ष्मीर्विनोदकलहाकुला ॥ ९ ॥ हरिणा समयं कृत्वा नृपभक्तिं परिक्षितुम् ॥
विष्णुना प्रेषिता लक्ष्मीर्वैकुंठात्कमलालया ॥ १० ॥ अष्टवर्षवयोरूपा प्रययौ गंधमादने ॥ तत्रागत्य धनुष्कोटौ तस्थौ सा कमलालया ॥ ११ ॥
तस्मिन्नवसरे राजा ययौ गुणनिधिर्द्विजाः ॥ स्नातुं रामधनुष्कोटौ सदारः सहसैनिकः ॥ १२ ॥ तत्र गत्वा स राजाऽयं स्नात्वा नियमपूर्वकम् ॥
तुलापुरुषमुख्यानि कृत्वा दानानि कृत्स्नशः ॥ १३ ॥ प्रयातुकामो भवनं कन्यां कांचिद्ददर्श सः ॥ अतीव रूपसंपन्नामष्टवर्षां शुचिस्मिताम् ॥
॥ १४ ॥ दृष्ट्वा नृपस्तां पप्रच्छ कन्यां चारुविलोचनाम् ॥ चारुस्मितां चारुदतीं बिंबोष्ठीं तनुमध्यमाम् ॥ १५ ॥ ॥ पुण्यनिधिरुवाच ॥ ॥
का त्वं कन्ये सुता कस्य कुतो वा त्वमिहागता ॥ अत्रागमेन किं कार्यं तव वत्से शुचिस्मिते ॥ १६ ॥ एवं नृपस्तां पप्रच्छ कन्यामुत्पललोच
नाम् ॥ एवं पृष्टा तदा कन्या नृपं तमवदद्द्विजाः ॥ १७ ॥ न मे माता पिता नास्ति न च मे बांधवास्तथा ॥ अनाथाहं महाराज भविष्यामि च
ते सुता ॥ १८ ॥ त्वद्गृहेऽहं निवत्स्यामि तात त्वां पश्यती सदा ॥ हठात्कृष्यति यो वा मां ग्रहीष्यति करेण तम् ॥ १९ ॥ यदि शासिष्यसे भूप
तदाहं तव मंदिरे ॥ वत्स्यामि ते सुता भूत्वा पितर्गुणनिधे चिरम् ॥ २० ॥ एवमुक्तस्तदा प्राह कन्यां गुणनिधिर्नृपः ॥ अहं सर्वं करिष्यामि

१ अवसत्--इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नास्माकं पदवीदर्शको भवेत् ॥ ७६ ॥ ॥ यक्षा ऊचुः ॥ ॥ रामनाथेंद्रियारातिबाधा नो दुःसहा सदा ॥ तान्विजेतुं सहायस्त्वमस्माकं भव धूर्जटे ॥ ७७ ॥ ॥ नागा ऊचुः ॥ ॥ अचिन्त्यमहिमानं त्वा रामनाथ वयं कथम् ॥ स्तोतुमल्पधियः शक्ता भविष्यामोऽम्बिकापते ॥ ॥ ७८ ॥ ॥ किंपुरुषा ऊचुः ॥ ॥ नानायोनौ च जननं मरणं चाप्यनेकशः ॥ विनाशय तथाऽज्ञानं रामनाथ नमोऽस्तु ते ॥ ७९ ॥ ॥ विद्याधरा ऊचुः ॥ ॥ अम्बिकापतये तुभ्यमसंगाय महात्मने ॥ नमस्ते रामनाथाय प्रसीद वृषभध्वज ॥ ८० ॥ ॥ वसव ऊचुः ॥ ॥ रामनाथगणेशाय गणवृंदार्चितांघ्रये ॥ गंगाधराय गुह्याय नमस्ते पाहि नः सदा ॥ ८१ ॥ ॥ विश्वेदेवा ऊचुः ॥ ॥ ज्ञप्तिमात्रैकनिष्ठानां मुक्तिदाय सुयोगिनाम् ॥ रामनाथाय सांबाय नमोऽस्मान्रक्ष शंकर ॥ ८२ ॥ ॥ मरुत ऊचुः ॥ ॥ परतत्त्वाय तत्त्वानां तत्त्वभूताय वस्तुतः ॥ नमस्ते रामनाथाय स्वयंभानाय शंभवे ॥ ८३ ॥ ॥ साध्या ऊचुः ॥ ॥ स्वातिरिक्तविहीनाय जगत्सत्ताप्रदायिने ॥ रामेश्वराय देवाय नमोऽविद्याविभेदिने ॥ ८४ ॥ ॥ सर्वे देवा ऊचुः ॥ ॥ सच्चिदानंदसंपूर्णं द्वैतवस्तुविवर्जितम् ॥ ब्रह्मात्मानं स्वयंभानमादिमध्यांतवर्जितम् ॥ ८५ ॥ अविक्रियमसंगं च परिशुद्धं सनातनम् ॥ आकाशादिप्रपंचानां साक्षिभूतं परामृतम् ॥ ८६ ॥ प्रमातीतं प्रमाणानामपि बोधप्रदायिनम् ॥ आविर्भावतिरोभावसंकोचरहितं सदा ॥ ८७ ॥ स्वस्मिन्नध्यस्तरूपस्य प्रपंचस्यास्य साक्षिणम् ॥ निर्लेपं परमानंदं निरस्तसकलक्रियम् ॥ ८८ ॥ भूमानंदं महात्मानं चिद्रूपं भोगवर्जितम् ॥ रामनाथं वयं सर्वे स्वपातकविशुद्धये ॥ ८९ ॥ चिन्तयामः सदा चित्ते स्वात्मानंदबुभुत्सवः ॥ रक्षास्मान्करुणासिन्धो रामनाथ नमोऽस्तु ते ॥९०॥ रामनाथाय रुद्राय नमः संसारहारिणे ॥ ब्रह्मविष्ण्वादिरूपेण विभिन्नाय स्वमायया ॥ ९१ ॥ विभीषणसचिवा ऊचुः ॥ वरदाय वरेण्याय त्रिनेत्राय त्रिशूलिने ॥ योगिध्येयाय नित्याय रामनाथाय ते नमः ॥ ९२ ॥ ॥ सूत उवाच ॥ ॥ इति रामादिभिः सर्वैः स्तुतो रामेश्वरः शिवः ॥ प्राह सर्वान्समाहूय रामादीन्द्विजसत्तमाः ॥ ९३ ॥ रामराम महाभाग जानकीरमण प्रभो ॥ सौमित्रे जानकि शुभे हे सुग्रीवमुखास्तथा ॥ ९४ ॥ अन्ये ब्रह्ममुखा यूयं शृणुध्वं सुसमास्थिताः ॥ स्तोत्राध्यायमिमं पुण्यं युष्माभिः कृतमादरात् ॥ ९५ ॥ ये पठंति च शृण्वंति श्रावयंति च मानवाः ॥ ॥ मदर्चनफलं तेषां भविष्यति न संशयः ॥ ९६ ॥ रामचंद्रधनुष्कोटिस्नानपुण्यं च वै भवेत् ॥ वर्षमेकं रामसेतौ वासपुण्यं भविष्यति ॥ ९७ ॥ गन्धमादनमध्यस्थसर्वतीर्थाभिमज्जनात् ॥ यत्पुण्यं तद्भवेत्तेन नात्र संशयकारणम् ॥ ९८ ॥

१ वानराः--इ० पा० । २ विभीषणामात्याः--इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

र्थरूपिणे ॥ नमो द्वैतविहीनाय रामनाथाय शंभवे ॥ ५९ ॥ ॥ अश्विनावूचतुः ॥ ॥ आत्मरूपतया नित्यं योगिनां भासते हृदि ॥ अनन्य
भानवेद्याय नमस्ते राघवेश्वर ॥ ६० ॥ ॥ अगस्त्य उवाच ॥ ॥ आदिदेव महादेव विश्वेश्वर शिवाऽव्यय ॥ रामनाथांबिकानाथ प्रसीद वृष
भध्वज ॥ ६१ ॥ अपराधसहस्रं मे क्षमस्व विधुशेखर ॥ ममाहमिति पुत्रादावहंतां मम मोचय ॥ ६२ ॥ ॥ सुतीक्ष्ण उवाच ॥ ॥ क्षेत्राणि
रत्नानि धनानि दारा मित्राणि वस्त्राणि गवाश्वपुत्राः ॥ नैवोपकाराय हि रामनाथ मह्यं प्रयच्छ त्वमतो विरक्तिम् ॥ ६३ ॥ ॥ विश्वामित्र
उवाच ॥ ॥ श्रुतानि शास्त्राण्यपि निष्फलानि त्रय्यप्यधीता विफलैव नूनम् ॥ त्वयीश्वरे चेन्न भवेद्धि भक्तिः श्रीरामनाथे शिव मानुषस्य ॥६४॥
॥ ॥ गालव उवाच ॥ ॥ दानानि यज्ञा नियमास्तपांसि गंगादितीर्थेषु निमज्जनानि ॥ रामेश्वरं त्वां न नमंति ये तु व्यर्थानि तेषामिति निश्च
योऽत्र ॥ ६५ ॥ ॥ वसिष्ठ उवाच ॥ ॥ कृत्वापि पापान्यखिलानि लोकस्त्वामेत्य रामेश्वर भक्तियुक्तः ॥ नमेत चेत्तानि लयं व्रजेयुर्यथांध
कारो रवितेजसाऽद्धा ॥ ६६ ॥ ॥ अत्रिरुवाच ॥ ॥ दृष्ट्वा तु रामेश्वरमेकदापि स्पृष्ट्वा नमस्कृत्य भवंतमीशम् ॥ पुनर्न गर्भं स नरः प्रयाया
त्किं त्वद्वयं ते लभते स्वरूपम् ॥ ६७ ॥ अंगिरा उवाच ॥ यो रामनाथं मनुजो भवंतमुपेत्य बंधून्प्रणमन्स्मरेत ॥ संतारयेत्तानपि सर्वपापात्किम
द्भुतं तस्य कृतार्थतायाम् ॥ ६८ ॥ ॥ गौतम उवाच ॥ ॥ श्रीरामनाथेश्वर गूढमेतद्रहस्यभूतं परमं विशोकम् ॥ त्वत्पादमूलं भजतां नृणां
ये सेवां प्रकुर्वंति हि तेऽपि धन्याः ॥ ६९ ॥ ॥ शतानंद उवाच ॥ ॥ वेदांतविज्ञानरहस्यविद्भिर्विज्ञेयमेतद्धि मुमुक्षुभिस्तु ॥ शास्त्राणि सर्वाणि
विहाय देव त्वत्सेवनं यद्रघुवीरनाथ ॥ ७० ॥ ॥ भृगुरुवाच ॥ ॥ रामनाथ तव पादपंकजद्वंद्वचिंतनविधूतकल्मषः ॥ निर्भयं व्रजति सत्सुखा
द्वयं सुप्रभं त्वथ अमोघचिद्घनम् ॥ ७१ ॥ ॥ कुत्स उवाच ॥ ॥ रामनाथ तव पादसेवनं भोगमोक्षवरदं नृणां सदा ॥ रौरवादिनर
कव्रणाशनं कः पुमान्न भजते रसग्रहः ॥ ७२ ॥ ॥ काश्यप उवाच ॥ ॥ रामनाथ तव पादसेविनां किं व्रतैरुत तपोभिरध्वरैः ॥ वेदशास्त्र
जपचिन्तया च किं स्वर्गसिन्धुपयसापि किं फलम् ॥ ७३ ॥ श्रीरामनाथ त्वमागत्य शीघ्रं ममोत्क्रांतिकाले भवान्या च साकम् ॥ मां
प्रापय स्वात्मपादारविन्दं विशोकं विमोहं सुखं चित्स्वरूपम् ॥ ७४ ॥ ॥ गन्धर्वा ऊचुः ॥ ॥ रामनाथ त्वमस्माकं भजतां भवसागरे ॥
अपारे दुःखकल्लोले न त्वत्तोन्या गतिर्हि नः ॥ ७५ ॥ ॥ किन्नरा ऊचुः ॥ ॥ रामनाथ भवारण्ये व्याधिव्याघ्रभयानके ॥ त्वामंतरेण

१ तथैव–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शरभ उवाच ॥ ॥ अंतःकरणमात्मेति यदज्ञानाद्विमोहितैः ॥ भण्यते रामनाथं तमात्मानं प्रणमाम्यहम् ॥ ३८ ॥ ॥ गन्धमादन उवाच ॥ ॥ रामनाथमुमानाथं गणनाथं च त्र्यंबकम् ॥ सर्वपातकशुद्ध्यर्थमुपासे जगदीश्वरम् ॥ ३९ ॥ ॥ सुग्रीव उवाच ॥ ॥ संसारांभोधि मध्ये मां जन्ममृत्युजले भये ॥ पुत्रदारधनक्षेत्रवीचिमालासमाकुले ॥ ४० ॥ मज्जद्ब्रह्मांडखंडे च पतितं नाप्तपारकम् ॥ क्रोशंतमवशं दीनं विषयव्या लकातरम् ॥ ४१ ॥ व्याधिनक्रसमुद्विग्नं तापत्रयझषार्तिदम् ॥ मां रक्ष गिरिजानाथ रामनाथ नमोऽस्तु ते ॥ ४२ ॥ ॥ विभीषण उवाच ॥ ॥ संसारवनमध्ये मां विनष्टनिजमार्गके ॥ व्याधिचौरे क्रोधसिंहे जन्मव्याघ्रे लयोरगे ॥ ४३ ॥ बाल्ययौवनवार्धक्यमहाभीमांधकूपके ॥ क्रोधेर्ष्या लोभवह्नौ च विषयक्रूरपर्वते ॥ ४४ ॥ त्रासभूकंटकाढ्ये च सीदंतमधुनांधकम् ॥ शोभनां पदवीं शंभो नय रामेश्वराधुना ॥ ४५ ॥ ॥ सर्वे वानरा ऊचुः ॥ ॥ निंद्यानिंद्येषु सर्वत्र जनित्वा योनिषु प्रभो ॥ कुंभीपाकादिनरके पतित्वा च पुनस्तथा ॥ ४६ ॥ जनित्वा च पुनर्योनौ कर्मशेषेण कुत्सिते ॥ संसारे पतितानस्मान्रामनाथ दयानिधे ॥ ४७ ॥ अनाथान्विवशान्दीनान्क्रोशतः पाहि शंकर ॥ नमस्तेस्तु दयासिंधो रामनाथ महेश्वर ॥ ४८ ॥ ॥ ब्रह्मोवाच ॥ ॥ नमस्ते लोकनाथाय रामनाथाय शंभवे ॥ प्रसीद मम सर्वेश मदविद्यां विनाशय ॥ ४९ ॥ ॥ ॥ इंद्र उवाच ॥ ॥ यस्य शक्तिरुमा देवी जगन्माता त्रयीमयी ॥ तमहं शंकरं वंदे रामनाथमुमापतिम् ॥ ५० ॥ ॥ यम उवाच ॥ ॥ पुत्रौ गणेश्वरस्कंदौ वृषो यस्य च वाहनम् ॥ तं वै रामेश्वरं सेवे सर्वाज्ञाननिवृत्तये ॥ ५१ ॥ ॥ वरुण उवाच ॥ ॥ यस्य पूजाप्रभावेन जित मृत्युर्मृकंडुजः ॥ मृत्युंजयमुपासेऽहं रामनाथं हृदा तु तम् ॥ ५२ ॥ ॥ कुबेर उवाच ॥ ॥ ईश्वराय लसत्कर्णकुंडलाभरणाय ते ॥ लाक्षारुण शरीराय नमो रामेश्वराय वै ॥ ५३ ॥ ॥ आदित्य उवाच ॥ ॥ नमस्तेऽस्तु महादेव रामनाथ त्रियंबक ॥ दक्षाध्वरविनाशाय नमस्ते पाहि मां शिव ॥ ५४ ॥ ॥ सोम उवाच ॥ ॥ नमस्ते भस्मदिग्धाय शूलिने सर्पमालिने ॥ रामनाथ दयांभोधे स्मशाननिलयाय ते ॥ ॥ ५५ ॥ ॥ अग्निरुवाच ॥ ॥ इन्द्राद्यखिलदिक्पालसंसेवितपदांबुज ॥ रामनाथाय शुद्धाय नमो दिग्वाससे सदा ॥ ५६ ॥ ॥ वायुरु वाच ॥ ॥ हराय हरिरूपाय व्याघ्रचर्मांबराय च ॥ रामनाथ नमस्तुभ्यं ममाभीष्टप्रदो भव ॥ ५७ ॥ ॥ बृहस्पतिरुवाच ॥ ॥ अहंतासा क्षिणे नित्यं प्रत्यगद्वयवस्तुने ॥ रामनाथ ममाज्ञानमाशु नाशय ते नमः ॥ ५८ ॥ ॥ ॥ शुक्र उवाच ॥ ॥ वंचकानामलभ्याय महामंत्रा

१ सदा—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

वराय ते ॥ श्रीकण्ठाय नमस्तुभ्यं पंचपातकभेदिने ॥ १६ ॥ नमस्तेऽस्तु परानंदसत्यविज्ञानरूपिणे ॥ नमस्ते भवरोगघ्न स्नायूनां पतये नमः ॥ ॥ १७ ॥ पतये तस्कराणां ते वनानां पतये नमः ॥ गणानां पतये तुभ्यं विश्वरूपाय साक्षिणे ॥ १८ ॥ कर्मणा प्रेरितः शम्भो जनिष्ये यत्रयत्र तु ॥ तत्रतत्र पदद्वंद्वे भवतो भक्तिरस्तु मे ॥ १९ ॥ असन्मार्गे रतिर्मा भूद्भवतः कृपया मम ॥ वैदिकाचारमार्गे च रतिः स्याद्भवते नमः ॥ २० ॥ ॥ ॥ सीतोवाच ॥ ॥ परमकारण शंकर धूर्जटे गिरिसुतास्तनकुंकुमशोभित ॥ मम पतौ परिदेहि मतिं सदा न विषमां परपूरुषगोचराम् ॥ ॥ २१ ॥ गंगाधर विरूपाक्ष नीललोहित शंकर ॥ रामनाथ नमस्तुभ्यं रक्ष मां करुणाकर ॥ २२ ॥ नमस्ते देवदेवेश नमस्ते करुणालय ॥ नमस्ते भवभीतानां भवभीतिविमर्दन ॥ २३ ॥ नाथ त्वदीयचरणांबुजचिंतनेन निर्द्धूय भास्करसुताद्भयमाशु शम्भो ॥ नित्यत्वमाशु गतवान्स मृकंडुपुत्रः किं वा न सिध्यति तवाश्रयणात्परेश ॥ २४ ॥ परेश परमानंद शरणागतपालक ॥ पातिव्रत्यं मम सदा देहि तुभ्यं नमोनमः ॥ ॥ २५ ॥ ॥ हनूमानुवाच ॥ ॥ देवदेव जगन्नाथ रामनाथ कृपानिधे ॥ त्वत्पादांभोरुहगता निश्चला भक्तिरस्तु मे ॥ २६ ॥ यं विना न जगत्सत्ता तद्भानमपि नो भवेत् ॥ नमः सद्भानरूपाय रामनाथाय शंभवे ॥ २७ ॥ ॥ अंगद उवाच ॥ ॥ यस्य भासा जगद्भानं यत्प्रकाशं विना जगत् ॥ न भासते नमस्तस्मै रामनाथाय शंभवे ॥ २८ ॥ ॥ जांबुवानुवाच ॥ ॥ सर्वानंदो यदानंदो भासते परमार्थतः ॥ नमो रामेश्वरायास्मै परमानंदरूपिणे ॥ २९ ॥ ॥ नील उवाच ॥ ॥ यद्देशकालदिग्भेदैरभिन्नं सर्वदाद्वयम् ॥ तस्मै रामेश्वरायास्मै नमोऽभिन्नस्वरूपिणे ॥ ३० ॥ ॥ नल उवाच ॥ ॥ ब्रह्मविष्णुमहेशाना यदविद्याविजृंभिताः ॥ नमोऽविद्याविहीनाय तस्मै रामेश्वराय ते ॥ ३१ ॥ ॥ कुमुद उवाच ॥ ॥ यस्स्वरूपापरिज्ञानात्प्रधानं कारणत्वतः ॥ कल्पितं कारणायास्मै रामनाथाय शंभवे ॥ ३२ ॥ ॥ पनस उवाच ॥ ॥ जाग्रत्स्वप्नसुषुप्त्यादियदविद्याविजृंभितम् ॥ जाग्रदादिविहीनाय नमोऽस्मै ज्ञानरूपिणे ॥ ३३ ॥ ॥ गज उवाच ॥ ॥ यत्स्वरूपापरिज्ञानात्कार्याणां परमाणवः ॥ कल्पिताः कारणत्वेन तार्किकापसदैर्वृथा ॥ ३४ ॥ तमहं परमानंदं रामनाथं महेश्वरम् ॥ आत्मरूपतया नित्यमुपासे सर्वसाक्षिणम् ॥ ॥ ३५ ॥ ॥ गवाक्ष उवाच ॥ ॥ अज्ञानपाशबद्धानां पशूनां पाशमोचकम् ॥ रामेश्वरं शिवं शांतमुपैमि शरणं सदा ॥ ३६ ॥ ॥ ॥ गवय उवाच ॥ ॥ साध्वस्तजगदाधारं चंद्रचूडमुमापतिम् ॥ रामनाथं शिवं वन्दे संसारामयभेषजम् ॥ ३७ ॥ ॥

१ पशूनां पतये नम—इ० पा० । ९ नमः—इति शेषः ।

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

देव ब्रह्महत्यां दहाशु मे ॥ त्रिपुरघ्न महादेव कालकूटविषादन ॥ ३ ॥ रक्ष मां त्वं दयासिंधो स्त्रीहत्यां मे विमोचय ॥ गंगाधर विरूपाक्ष रामनाथ त्रिलोचन ॥ ४ ॥ मां पालय कृपादृष्ट्या छिन्धि मत्पातकं विभो ॥ कामारे कामसंदायिन्भक्तानां राघवेश्वर ॥ ॥ ५ ॥ कटाक्षं पातय मयि शुद्धं मां कुरु धूर्जटे ॥ मार्कंडेयभयत्राण मृत्युंजय शिवाव्यय ॥ ६ ॥ नमस्ते गिरिजार्धाय निष्पापं कुरु मां सदा ॥ रुद्राक्षमालाभरण चन्द्रशेखर शंकर ॥ ७ ॥ वेदोक्तसम्यगाचारयोग्यं मां कुरु ते नमः ॥ सूर्यदंतभिदे तुभ्यं भारतीनासिकाच्छिदे ॥ ८ ॥ रामेश्वराय देवाय नमो मे शुद्धिदो भव ॥ आनंदं सच्चिदानंदं रामनाथं वृषध्वजम् ॥ ९ ॥ भूयोभूयो नमस्यामि पातकं मे विनश्यतु ॥ भक्त्यैवं स्तुवतस्तस्य रामनाथं महेश्वरम् ॥ ११० ॥ निर्जगाम मुखाद्राज्ञो ब्रह्महत्यातिभीषणा ॥ नीलवस्त्रधरा क्रूरा महारक्तशिरोरुहा ॥ ११ ॥ तां ब्रह्महत्यां बीभत्सां नृपवक्त्राद्विनिर्गताम् ॥ निजघान त्रिशूलेन भैरवो रुद्रशासनात् ॥ १२ ॥ हतायां ब्रह्महत्यायां भैरवेण शिवाज्ञया ॥ रामनाथो नृपं प्राह स्तुत्या तस्य प्रसन्नधीः ॥ १३ ॥ ॥ श्रीरामनाथ उवाच ॥ ॥ पांड्यभूप महाराज स्तोत्रेणानेन तेऽनघ ॥ प्रसन्नोऽहं वरं दास्ये तुभ्यं वरय चेप्सितम् ॥ १४ ॥ स्त्रीहत्याब्रह्महत्याभ्यां यस्ते दोषः स निर्गतः ॥ शुद्धो विधूतपापोऽसि राज्यं पालय पूर्ववत् ॥ १५ ॥ ये मामत्र निषेवंते भक्तियुक्तेन चेतसा ॥ नाशयामि नृणां तेषां ब्रह्महत्यायुतान्यपि ॥ १६ ॥ सुरापानायुतं भूप गुरुस्त्रीगमनायुतम् ॥ स्वर्णस्तेयायुतमपि तत्संसर्गायुतं तथा ॥ १७ ॥ अन्यान्यपि च पापानि नाशयामि न संशयः ॥ मत्सेविनो नरा राजन्न भूयः संसरंति ते ॥ १८ ॥ किं तु सायुज्यरूपां मे मुक्तिं यास्यन्त्यसंशयम् ॥ स्तुवंत्यनेन स्तोत्रेण ये मां भक्तिपुरःसरम् ॥ १९ ॥ नाशयाम्यहमेतेषां महापातकसंचयम् ॥ प्रीतोऽहं तव भक्त्या च स्तोत्रेण मनुजेश्वर ॥ १२० ॥ यथेष्टं प्रार्थय वरं मत्तस्त्वं वरदान्नृप ॥ एवमुक्तः शिवेनाथ शंकरो नृपपुंगवः ॥ रामनाथं बभाषे तं शंकरं करुणानिधिम् ॥ २१ ॥ ॥ नृप उवाच ॥ ॥ तव संदर्शनेनाहं कृतार्थोऽस्मि महेश्वर[1] ॥ २२ ॥ इतः परं प्रार्थनीयं मम नास्त्यधुनाधिकम् ॥ मृकण्डुसुतसंतापहारि पादयुगं तव ॥ २३ ॥ दृष्टं मया महादेव नातः प्रार्थ्यं विभोस्ति वै ॥ त्वत्पादपद्मयुगुले निश्चला भक्तिरस्तु मे ॥ ॥ २४ ॥ न पुनर्जन्म मे भूयान्मातॄणामुदरेऽशुचौ ॥ ये मत्कृतमिदं स्तोत्रं कीर्तयंति तव प्रभो ॥ ते नराः पापनिर्मुक्तास्त्वत्सेवाफलमाप्नुयुः ॥ २५ ॥ ॥ ॥ श्रीसूत उवाच ॥ ॥ तथास्त्वित्यनुगृह्यैनं रामनाथो द्विजोत्तमाः ॥ २६ ॥ नीलकण्ठो विरूपाक्षो लिंगरूपे तिरोहितः ॥ राजापि

१ परमेश्वर–इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रामनाथेन विहितानुग्रहस्ततः ॥ २७ ॥ रामनाथं नमस्कृत्य कृतार्थेनांतरात्मना ॥ स सेनासंवृतः प्रीतः प्रययावात्मनः पुरीम् ॥ २८ ॥ वृत्तांत
मेतमवदन्मुनीनां वनवासिनाम् ॥ तेभ्यषिंचन्नृपं राज्ये मुनयः प्रीतमानसाः ॥ २९ ॥ पुत्रदारयुतो राजा प्राप्य राज्यमकण्टकम् ॥ मंत्रिभिः
सहितो विप्रा ररक्ष पृथिवीं चिरम् ॥ १३० ॥ ततोंतकाले संप्राप्ते ध्यायन्रामेश्वरं शिवम् ॥ देहांते रामनाथस्य सायुज्यं प्रययौ शुभम् ॥ ३१ ॥
एवं वः कथितं विप्रा रामनाथस्य वैभवम् ॥ चरितं पुण्यमाख्यानं शंकराख्यनृपस्य च ॥ ३२ ॥ शृण्वन्पठन्वा मनुजस्त्विममध्यायमादरात् ॥
सर्वपापविनिर्मुक्तो रामनाथं समश्नुते ॥ १३३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे सेतुमाहात्म्ये राम
नाथप्रशंसायां शाकल्यदुर्मरणदोषशांतिपूर्वकशंकरस्त्रीहत्याब्रह्महत्यादोषशांतिवर्णनंनामाष्टचत्वारिंशोऽध्यायः ॥ ४८ ॥ ॥ छ ॥ ॥
॥ ॥ श्रीसूत उवाच ॥ ॥ अथातः संप्रवक्ष्यामि रामनाथस्य शूलिनः ॥ स्तोत्राध्यायं महापुण्यं शृणुत श्रद्धया द्विजाः ॥
॥ १ ॥ रामः प्रतिष्ठिते लिंगे तुष्टाव परमेश्वरम् ॥ लक्ष्मणो जानकी सीता सुग्रीवाद्याः कपीश्वराः ॥ २ ॥ ब्रह्मप्रभृतयो देवाः कुम्भजाद्या
महर्षयः ॥ अस्तुवन्भक्तिसंयुक्ताः प्रत्येकं राघवेश्वरम् ॥ ३ ॥ तद्वक्ष्याम्यानुपूर्व्येण शृणुतादरपूर्वकम् ॥ एतच्छ्रवणमात्रेण मुक्तः स्या
न्मानवो द्विजाः ॥ ४ ॥ ॥ श्रीराम उवाच ॥ ॥ नमो महात्मने तुभ्यं महामायाय शूलिने ॥ स्वपदांबुजभक्तार्तिहारिणे सर्प
हारिणे ॥ ५ ॥ नमो देवाधि[1]देवाय रामनाथाय साक्षिणे ॥ नमो वेदांतवेद्याय योगिनां तत्त्वदायिने ॥ ६ ॥ सर्वदानंदपूर्णाय विश्वनाथाय
शंभवे ॥ नमो भक्तभयच्छेदहेतुपादाब्जरेणवे ॥ ७ ॥ नमस्तेऽखिलनाथाय नमः साक्षात्परात्मने ॥ नमस्तेऽद्भुतवीर्याय महापातकनाशिने ॥
॥ ८ ॥ कालकालाय कालाय का[2]लातीताय ते नमः ॥ नमोऽविद्यानिहं[3]त्रे ते नमः पापहराय च ॥ ९ ॥ नमः संसारतप्तानां तापनाशैकहेतवे ॥
नमो मद्ब्रह्महत्याविनाशिने च विषाशिने ॥ १० ॥ नमस्ते पार्वतीनाथ कैलासनिलयाव्यय ॥ गंगाधर विरूपाक्ष मां रक्ष सकलापदः ॥ ११ ॥
तुभ्यं पिनाकहस्ताय नमो मदनहारिणे ॥ भूयोभूयो नमस्तुभ्यं सर्वावस्थासु सर्वदा ॥ १२ ॥ ॥ लक्ष्मण उवाच ॥ ॥ नमस्ते रामनाथाय
त्रिपुरघ्नाय शंभवे ॥ पार्वतीजीवितेशाय गणेशस्कन्दसूनवे ॥ १३ ॥ नमस्ते सूर्यचंद्राग्निलोचनाय कपर्दिने ॥ नमः शिवाय सोमाय मार्कंडेय
भयच्छिदे ॥ १४ ॥ नमः सर्वप्रपंचस्य सृष्टिस्थित्यंतहेतवे ॥ नम उग्राय भीमाय महादेवाय साक्षिणे ॥ १५ ॥ सर्वज्ञाय वरेण्याय वरदाय

१ देवादिदेवाय–इ० पा० । २ कलातीताय–इ० पा० । ३ विघ्ननिहन्त्रे–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ब्रह्महत्यानिमित्तं ते भयं मा भून्महामते ॥ तवोपदेशं वक्ष्यामि रहस्यं वेदसंमितम् ॥ ७८ ॥ शृणुष्वावहितो राजन्मदुक्तं क्रियतां त्वया ॥ दक्षिणां बुनिधेस्तीरे गंधमादनपर्वते ॥ ७९ ॥ रामसेतौ महापुण्ये महापातकनाशने ॥ रामप्रतिष्ठितं लिंगं रामनाथं महेश्वरम् ॥ ८० ॥ सेवस्व वर्षमेकं त्वं त्रिकालं भक्तिपूर्वकम् ॥ प्रदक्षिणप्रक्रमणं नमस्कारं च वै कुरु ॥ ८१ ॥ महाभिषेकः क्रियतां रामनाथस्य वै त्वया ॥ नैवेद्यं विविधं राजन्क्रियतां च दिनेदिने ॥ ८२ ॥ चन्दनागरुकर्पूरै रामलिंगं प्रपूजय ॥ भारद्वयेन गव्येन ह्याज्येन त्वभिषेचय ॥ ८३ ॥ प्रत्यहं च गवां क्षीरैर्द्विभारपरिसंमितैः ॥ मधुद्रोणेन तल्लिंगं प्रत्यहं स्नापय प्रभोः ॥ ८४ ॥ प्रत्यहं पायसान्नेन नैवेद्यं कुरु भूपते ॥ प्रत्यहं तिलतैलेन दीपाराधनम् चर ॥ ८५ ॥ एतेन तव राजेंद्र रामनाथस्य शूलिनः ॥ स्त्रीहत्या ब्रह्महत्या च तत्क्षणादेव नश्यतः ॥ ८६ ॥ दर्शनाद्रामनाथस्य भ्रूणहत्याशतानि च ॥ अयुतं ब्रह्महत्यानां सुरापानायुतं तथा ॥ ८७ ॥ स्वर्णस्तेयायुतं राजन्गुरुस्त्रीगमनायुतम् ॥ एतत्संसर्गदोषाश्च विनश्यंति क्षणाद्विभो॥८८॥ महापतकतुल्यानि यानि पापानि संति वै ॥ तानि सर्वाणि नश्यंति रामनाथस्य सेवया ॥ ८९ ॥ महती रामनाथस्य सेवा लभ्येत चेन्नृणाम् ॥ किं गंगया च गयया प्रयागेणाध्वरेण वा ॥ ९० ॥ तद्गच्छ रामसेतुं त्वं रामनाथं भजानिशम् ॥ विलंबं मा कुरु विभो गमने च त्वरां कुरु ॥९१॥ इत्युक्त्वा विरराामाथ सापि वागशरीरिणी ॥ तच्छ्रुत्वा मुनयः सर्वे त्वरयंति स्म भूपतिम् ॥ ९२ ॥ गच्छ शीघ्रं महाराज रामसेतुं विमुक्तिदम् ॥ रामनाथस्य माहात्म्यमज्ञात्वास्माभिरीरितम् ॥ ९३ ॥ देहत्यागं कुरुष्वेति वह्नौ प्रज्वलितेऽधुना ॥ अनुज्ञातो मुनिवरैरिति राजा स शंकरः ॥ ॥ ९४ ॥ चतुरंगबलं पुर्यां प्रापयित्वा त्वरान्वितः ॥ नमस्कृत्य मुनीन्सर्वान्प्रहृष्टेनांतरात्मना ॥ ९५ ॥ वृतः कतिपयैः सैन्यैः समादाय धनं बहु ॥ रामनाथस्य सेवार्थमयासीद्गंधमादनम् ॥ ९६ ॥ उवास वर्षमेकं च रामसेतौ विशुद्धिदे ॥ एकभुक्तो जितक्रोधो विजितेंद्रियसंचयः ॥ ॥ ९७ ॥ त्रिसंध्यं रामनाथं च सेवमानः सभक्तिकम् ॥ प्रददौ रामनाथाय दशभारं धनं मुदा ॥ ९८ ॥ प्रत्यहं रामनाथस्य महापूजामकारयत् ॥ अकरोच्च धनुष्कोटौ प्रत्यहं भक्तिपूर्वकम् ॥ ९९ ॥ स्नानं प्रतिदिनं चान्नं ब्राह्मणेभ्यो ददौ मुदा ॥ अशरीरावचःप्रोक्तमखिलं पूजनं तथा ॥ १०० ॥ एवं कृतवतस्तस्य वर्षमेकं गतं द्विजाः ॥ वर्षांते स शुचिर्भूत्वा शंकरस्तुष्टमानसः ॥ तुष्टावपरमेशानं रामनाथं घृणानिधिम् ॥ १ ॥ ॥ शंकर उवाच ॥ ॥ नमामि रुद्रमीशानं रामनाथमुमापतिम् ॥ २ ॥ पाहि मां कृपया

१ दधिक्राण्णेति तल्लिंगम्—इ०पा०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कृतोरस्कौ पीतांबरविराजितौ ॥ एवं दृष्ट्वा मुनिसुतो जांगलः सुप्रसन्नधीः ॥ ५३ ॥ स्वाश्रमं पुनरागत्य सुखेन न्यवसद्द्विजाः ॥ स्वप्नदृष्टं च वृत्तांतं मातापित्रोः स जांगलः ॥ ५४ ॥ तेभ्यो न्यवेदयत्सर्वं ब्राह्मणेभ्योऽतिहर्षितः ॥ श्रुत्वा ते मुनयो वृत्तमासन्संप्रीतमानसाः ॥ ५५ ॥ अथ राजानमालोक्य सर्वे तेऽपि महर्षयः ॥ अवदन्कुपिता विप्राः शपंतः शंकरं नृपम् ॥ ५६ ॥ पांडचभूप महामूर्ख क्रौर्याद्ब्राह्मणघातक ॥ स्त्रीहत्या ब्रह्महत्या च कृता यस्मात्त्वयाधुना ॥ ५७ ॥ अतः शरीरसंत्यागं कुरु त्वं हव्यवाहने ॥ नोचेत्तव न शुद्धिः स्यात्प्रायश्चित्तशतैरपि[१] ॥ ५८ ॥ त्वत्संभाषणमात्रेण ब्रह्महत्यायुतं भवेत् ॥ अस्मत्सकाशाद्गच्छ त्वं पांड्यानां कुलपांसन ॥ ५९ ॥ इत्युक्तो मुनिभिः पांड्यः शंकरो द्विजपुंगवाः ॥ तथास्तु देहसंत्यागं करिष्ये हव्यवाहने ॥ ६० ॥ ब्रह्महत्याविशुद्ध्यर्थं भवतां सन्निधावहम् ॥ अनुग्रहं मे कुर्वंतु भवंतो मुनिसत्तमाः ॥ ६१ ॥ तथा शरीरसंत्यागात्पातकं मे लयं व्रजेत् ॥ एवमुक्त्वा मुनीन्सर्वाञ्छंकरः पांड्यभूपतिः ॥ ६२ ॥ स्वान्मंत्रिणः समाहूय बभाषे वचनं त्विदम् ॥ भो मंत्रिणो ब्रह्महत्या मयाऽकार्यविचारतः ॥ ६३ ॥ स्त्रीहत्या च तथा क्रूरा महानरकदायिनी ॥ एतत्पातकशुद्ध्यर्थं मुनीनां वचनादहम् ॥ ६४ ॥ प्रदीप्तेऽग्नौ महाज्वाले परित्यक्ष्ये कलेवरम् ॥ काष्ठान्यानयत क्षिप्रं तैरग्निश्च समिध्यताम् ॥ ६५ ॥ मम पुत्रं च सुरुचिं राज्ये स्थापयताचिरात् ॥ मा शोकं कुरुतामात्या दैवतं दुरतिक्रमम् ॥ ६६ ॥ इतीरिता नृपतिना मंत्रिणो रुरुदुस्तदा ॥ पांडचनाथ महाराज रिपूणामपि वत्सल ॥ ६७ ॥ वयं हि भवता नित्यं पुत्रवत्परिपालिताः ॥ त्वां विना न प्रवेक्ष्याम पुरीं देवपुरोपमाम् ॥ ६८ ॥ हव्यवाहं प्रवेक्ष्यामो महाकाष्ठसमेधितम् ॥ तेषां प्रलपितं श्रुत्वा पांडचः शंकरभूपतिः ॥ प्रोवाच मंत्रिणः सर्वान्वचनं सांत्वपूर्वकम्[२] ॥ ६९ ॥ ॥ शंकर उवाच ॥ किं करिष्यथ भोऽमात्या महापातकिना मया ॥ ७० ॥ सिंहासनं समारुह्य न कर्तुं युज्यते बत ॥ चतुरर्णवपर्यंतधरापालनमंजसा ॥ ७१ ॥ मत्पुत्रं सुरुचिं शीघ्रमतः स्थापयतासने ॥ काष्ठान्यानयत क्षिप्रं प्रवेष्टुं हव्यवाहनम् ॥ ७२ ॥ मम मंत्रिवरा यूयं विलंबं त्यजताधुना ॥ इत्युक्ता मंत्रिणः काष्ठं समानिन्युः क्षणेन ते ॥ ७३ ॥ अग्निं प्रज्वलितं काष्ठैर्दृष्ट्वा शंकरभूपतिः ॥ स्नात्वाचम्य विशुद्धात्मा मुनीनां संनिधौ तदा ॥ ७४ ॥ अग्निं प्रदक्षिणीकृत्य तान्मुनीनपि सत्वरम् ॥ अग्निं मुनीन्नमस्कृत्य ध्यात्वा देवमुमापतिम् ॥ ७५ ॥ अग्नौ पतितुमारेभे धैर्यमालंब्य भूपतिः ॥ तस्मिन्नवसरे विप्रा मुनीनामपि शृण्वताम् ॥ ७६ ॥ अशरीरा[३] समुदभूद्वाणी भैरवनादिनी ॥ भोः शंकर महीपाल मानलं प्रविशाधुना ॥ ७७ ॥

१ प्रायश्चित्तायुतैः—इ० पा० । २ प्रोवाच मंत्रिणः सर्वान्वचनं हितकारकम्—इ० पा० । ३ अशरीराभवद्वाणी तदा—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

शृणुध्वं सुसमाहिताः ॥ १ ॥ पांड्यदेशाधिपो राजा पुरासीच्छंकराभिधः ॥ ब्रह्मण्यः सत्यसंधश्च यायजूकश्च धार्मिकः ॥ २ ॥ वेदवेदांगतत्त्वज्ञः परसैन्यविदारणः ॥ चतुरोऽप्याश्रमान्वर्णान्धर्मतः परिपालयन् ॥ ३ ॥ वैदिकाचारनिरतः पुराणस्मृतिपारगः ॥ शिवविष्णवर्चको नित्यमन्यदैवतपूजकः ॥ ४ ॥ महादानप्रदो नित्यं ब्राह्मणानां महात्मनाम् ॥ मृगयार्थं ययौ धीमान्स कदाचित्तपोवनम् ॥ ५ ॥ सिंहव्याघ्रेभमहिषक्रूरसत्वभयंकरम् ॥ झिल्लिकाभीषणरवं सरीसृपसमाकुलम् ॥ ६ ॥ भीमश्वापदसंपूर्णं दावानलभयंकरम् ॥ महारण्यं प्रविश्याथ शंकरो राजशेखरः ॥ ॥ ७ ॥ अनेकसैनिकोपेत आखेटिकुलसंकुलः ॥ पादुकागूढचरणो रक्तोष्णीषो हरिच्छदः ॥ ८ ॥ बद्धगोधांगुलित्राणो धृतकोदण्डसायकः ॥ कक्ष्याबद्धमहाखड्गः श्वेताश्ववरमास्थितः ॥ ९ ॥ सुवेषधारी सन्नद्धः पत्तिसंघसमावृतः ॥ कांतारेषु च रम्येषु पर्वतेषु गुहासु च ॥ १० ॥ समुत्तीर्णमहास्रोता युवा सिंहपराक्रमः ॥ विचचार बलैः साकं दरीषु मृगयन्मृगान् ॥ ११ ॥ बध्यतां वध्यतामेष याति वेगान्मृगो वने ॥ एवं वदत्सु सैन्येषु स्वयमुत्प्लुत्य शंकरः ॥ १२ ॥ मृगं हंति महाराजो विगाह्य विपिनस्थलीम् ॥ सिंहान्वराहान्महिषान्कुञ्जराञ्छरभांस्तथा ॥ १३ ॥ विनिघ्नन्स मृगानन्यान्वन्याञ्छंकरभूपतिः ॥ कुत्रचिद्विपिनोद्देशे दरीमध्यनिवासिनम् ॥ १४ ॥ व्याघ्रचर्मधरं शांतं मुनिं नियतमानसम् ॥ व्याघ्रबुद्ध्या जघानाशु शरेणानतपर्वणा ॥ १५ ॥ अतिवेगेन विप्रेंद्रास्तत्पत्नीं च ससायकः ॥ निजघान पतिप्राणां निविष्टां पत्युरंतिके ॥ १६ ॥ विलोक्य मातापितरौ तत्पुत्रो निहतौ वने ॥ रुरोद भृशदुःखार्तो विललाप च कातरः ॥ १७ ॥ भोस्तात मातर्मां हित्वा युवां यातौ क्व वाधुना ॥ अहं कुत्र गमिष्यामि को वा मे शरणं भवेत् ॥ १८ ॥ को मामध्यापयेद्वेदाञ्छास्त्रं वा पाठयेत्पितः ॥ अंब मे भोजनं का वा दास्यते सोपदेशकम् ॥ १९ ॥ आचाराञ्छिक्षयेत्को वा तात त्वयि मृतेऽधुना ॥ अंब बालं प्रकुपितं का वा मामुपलालयेत् ॥ २० ॥ युवां निरागसावद्य केन पापेन सायकैः ॥ निहतौ वै तपोनिष्ठौ मत्प्राणौ मद्गुरू वने ॥ २१ ॥ एवं तयोः सुतो विप्रा मुक्तकण्ठं रुरोद वै ॥ अथ प्रलपितं श्रुत्वा शंकरो विपिने चरन् ॥ २२ ॥ तच्छब्दाभिमुखः सद्यः प्रययौ स दरीमुखम् ॥ तत्रत्या मुनयोऽप्याशु समागच्छंस्तमाश्रमम् ॥ २३ ॥ ते दृष्ट्वा मुनयः सर्वे शरेण निहतं मुनिम् ॥ तत्पत्नीं च हतां विप्रा राजानं च धनुर्धरम् ॥ २४ ॥ विलपंतं सुतं चापि विलोक्य भृशविह्वलाः ॥ पुत्रमाश्वासयामासुर्मा रोदीरिति कातरम् ॥ २५ ॥ ॥ मुनय ऊचुः ॥ ॥ आढ्ये वापि दरिद्रे वा मूर्खे वा पंडितेऽपि वा ॥ पीने वाथ कृशे वापि समवर्ती परेतराट् ॥ २६ ॥ वने वा नगरे ग्रामे पर्वते वा स्थलांतरे ॥ मृत्योर्वशे प्रयातव्यं सर्वैरपि हि जंतुभिः ॥ २७ ॥ वत्स नित्यं च गर्भस्थैर्जातै

CC-0. In Public Domain. Digitization by eGangotri

रपि च जंतुभिः ॥ युवभिः स्थविरैः सर्वैर्यातव्यं यमपत्तनम् ॥ २८ ॥ वर्णिभिश्च गृहस्थैश्च वानप्रस्थैश्च भिक्षुभिः ॥ काले प्राप्ते त्वयं देहस्त्यक्तव्यो द्विजपुत्रक ॥ २९ ॥ ब्राह्मणैः क्षत्रियैर्वैश्यैः शूद्रैरपि च संकरैः ॥ यातव्यं प्रेतनिलये द्विजपुत्र महामते ॥ ३० ॥ देवाश्च मुनयो यक्षा गंधर्वोरगराक्षसाः ॥ अन्ये च जंतवः सर्वे ब्रह्मविष्णुहरादयः ॥ ३१ ॥ सर्वे यास्यंति विलयं न त्वं शोचितुमर्हसि ॥ अद्वयं सच्चिदानंदं यद्ब्रह्मो पनिषद्गतम् ॥ ३२ ॥ न तस्य विलयो जन्म वर्धनं चापि सत्तम ॥ मलभांडे नवद्वारे पूयासृक्छोणितालये ॥ ३३ ॥ देहेऽस्मि न्बुद्बुदाकारे कृमियूथसमाकुले ॥ कामक्रोधभयद्रोहमोहमात्सर्यकारिणि ॥ ३४ ॥ परदारपरक्षेत्रपरद्रव्यैकलोलुपे ॥ हिंसासूयाशुचिव्याप्ते विष्ठामूत्रैकभाजने ॥ ३५ ॥ यः कुर्याच्छोभनधियं स मूढः स च दुर्मतिः ॥ बहुच्छिद्रघटाकारे देहेऽस्मिन्नशुचौ सदा ॥ ३६ ॥ वायोरवस्थितिः किं स्यात्प्राणाख्यस्य चिरं द्विज ॥ अतो मा कुरु शोकं त्वं जननीं पितरं प्रति ॥ ३७ ॥ तौ स्वकर्मवशाद्यातौ गृहं त्यक्त्वा त्विदं क्वचित् ॥ तव कर्मव शात्त्वं च तिष्ठस्यस्मिन्महीतले ॥ ३८ ॥ यदा कर्मक्षयस्ते स्यात्तदा त्वं च मरिष्यसि ॥ मरिष्यमाणप्रेतो हि मृतप्रेतस्य शोचति ॥ ३९ ॥ यस्मि न्काले समुत्पन्नौ तव माता पिता तथा ॥ न तस्मिंस्त्वं समुत्पन्नस्ततो भिन्ना गतिर्हि वः ॥ ४० ॥ यदि तुल्या गतिस्ते स्यात्ताभ्यां सह महामते ॥ तर्हि त्वयापि यातव्यं मृतौ यत्र हि तौ गतौ ॥४१॥ मृतानां बांधवा ये तु मुंचंत्यश्रूणि भूतले ॥ पिबंत्यश्रूणि तान्यद्धा मृताः प्रेताः परत्र वै ॥ ४२ ॥ अतः शोकं परित्यज्य धृतिं कृत्वा समाहितः ॥ अनयोः प्रेतकार्याणि कुरु त्वं वैदिकानि तु ॥ ४३ ॥ शरघातान्मृतावेतौ यस्मात्ते जननी पिता ॥ अतस्तद्दोषशांत्यर्थमस्थीन्यादाय वै तयोः ॥ ४४ ॥ रामनाथशिवक्षेत्रे रामसेतौ विमुक्तिदे ॥ स्थापयस्व तथा श्राद्धं सपिंडीकरणादिकम् ॥ ४५ ॥ तत्रैव कुरु शुद्ध्यर्थं तयोर्ब्राह्मणपुत्रक ॥ तेन दुर्मृत्युदोषस्य शांतिर्भवति नान्यथा ॥ ४६ ॥ ॥ श्रीसूत उवाच ॥ ॥ एवमुक्तः स मुनिभिः शाकल्यस्य सुतो द्विजाः ॥ जांगलाख्यस्तयोः सर्वं पितृमेधं चकार वै ॥ ४७ ॥ अन्येद्युरस्थीन्यादाय हालास्यं प्रययौ च सः ॥ तस्माद्रामेश्वरं सद्यो गत्वाऽयं जांगलो द्विजः ॥ ४८ ॥ मुनिप्रोक्तप्रकारेण तस्मिन्रामेश्वरस्थले ॥ निधाय पित्रोरस्थीनि श्राद्धादीन्यकरोत्तथा ॥ ४९ ॥ प्रथमाब्दि कपर्यंतं कार्यं तत्राकरोच्च सः ॥ स्थित्वाब्दं स मुनेः पुत्र एको जांगलसंज्ञकः ॥ ५० ॥ आब्दिकांते दिने विप्रो रात्रौ स्वप्ने विलोक्य तु ॥ स्वमा तरं च पितरं शंखचक्रगदाधरौ ॥ ५१ ॥ गरुडोपरि संविष्टौ पद्ममालाविभूषितौ ॥ शोभितौ तुलसीदाम्ना स्फुरन्मकरकुंडलौ ॥ ५२ ॥ कौस्तुभालं

१ दाहकर्म—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वरजो द्विजाः ॥ ४४ ॥ ब्रह्महत्या गता यत्र रामचंद्रस्य भूपतेः ॥ तत्र तीर्थमभूत्किंचिद्ब्रह्महत्याविमोचनम् ॥ ४५ ॥ तत्र स्नानं महापुण्यं
ब्रह्महत्याविनाशनम् ॥ दृश्यते रावणोऽद्यापि छायारूपेण तत्र वै ॥ ४६ ॥ तदग्रे नागलोकस्य बिलमस्ति महत्तरम् ॥ दशग्रीववधोत्पन्नां ब्रह्म
हत्यां बलीयसीम् ॥ ४७ ॥ तद्बिलं प्रापयामास जानकीरमणो द्विजाः ॥ तस्योपरि बिलस्याथ कृत्वा मण्डपमुत्तमम् ॥ ४८ ॥ भैरवं स्थापया
मास रक्षार्थं तत्र राघवः ॥ भैरवाज्ञापरित्रस्ता ब्रह्महत्या भयंकरी ॥ ४९ ॥ नाशक्नोत्तद्बिलादूर्ध्वं निर्गंतुं द्विजसत्तमाः ॥ तस्मिन्नेव बिले तस्थौ
ब्रह्महत्या निरुद्यमा ॥ ५० ॥ रामनाथमहालिंगं दक्षिणे गिरिजा मुदा ॥ वर्तते परमानंदशिवस्यार्धशरीरिणी ॥ ५१ ॥ आदित्यसोमौ वर्तेते
पार्श्वयोस्तत्र शूलिनः ॥ देवस्य पुरतो वह्नी रामनाथस्य वर्तते ॥ ५२ ॥ आस्ते शतक्रतुः प्राच्यामाग्नेयां च तथाऽनलः ॥ आस्ते यमो दक्षिणस्यां
रामनाथस्य सेवकः ॥ ५३ ॥ नैर्ऋते निर्ऋतिर्विप्रा वर्तते शंकरस्य तु ॥ वारुण्यां वरुणो भक्त्या सेवते राघवेश्वरम् ॥ ५४ ॥ वायव्ये तु दिशो
भागे वायुरास्ते शिवस्य तु ॥ उत्तरस्यां च धनदो रामनाथस्य वर्तते ॥ ५५ ॥ ईशान्येऽस्य च दिग्भागे महेशो वर्तते द्विजाः ॥ विनायक
कुमारौ च महादेवसुतावुभौ ॥ ५६ ॥ यथाप्रदेशं वर्तेते रामनाथालयेऽधुना ॥ वीरभद्रादयः सर्वे महेश्वरगणेश्वराः ॥ ५७ ॥ यथाप्रदेशं वर्तंते
रामनाथालये सदा ॥ मुनयः पन्नगाः सिद्धा गन्धर्वाप्सरसां गणाः ॥ ५८ ॥ संतुष्यमाणहृदया यथेष्टं शिवसन्निधौ ॥ वर्तंते रामनाथस्य सेवार्थं
भक्तिपूर्वकम् ॥ ५९ ॥ रामनाथस्य पूजार्थं श्रोत्रियान्ब्राह्मणान्बहून् ॥ रामेश्वरे रघुपतिः स्थापयामास पूजकान् ॥ ६० ॥ रामप्रतिष्ठितान्विप्रान्ह
व्यकव्यादिनार्चयेत् ॥ तुष्टास्ते तोषिताः सर्वा पितृभिः सहदेवताः ॥ ६१ ॥ तेभ्यो बहुधनान्[1]ग्रामान्प्रददौ जानकीपतिः ॥ रामनाथमहादेव
नैवेद्यार्थमपि द्विजाः ॥ ६२ ॥ बहून्ग्रामान्बहुधनं प्रददौ लक्ष्मणाग्रजः ॥ हारकेयूरकटकनिष्काद्याभरणानि च ॥ ६३ ॥ अनेकपट्ट
वस्त्राणि क्षौमाणि विविधानि च ॥ रामनाथाय देवाय ददौ दशरथात्मजः ॥ ६४ ॥ गंगा च यमुना पुण्या सरयूश्च सरस्वती ॥ सेतौ
रामेश्वरं देवं भजंते स्वाघशांतये ॥ ६५ ॥ एतदध्यायपठनाच्छ्रवणादपि मानवः ॥ विमुक्तः सर्वपापेभ्यः सायुज्यं लभते हरेः ॥ ६६ ॥
इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे सेतुमाहात्म्ये रामस्य ब्रह्महत्योत्पत्तिहेतुनिरूपणं नाम सप्तचत्वा
रिंशोऽध्यायः ॥ ४७ ॥ ॥ छ ॥ ॥ श्रीसूत उवाच ॥ ॥ रामनाथं समुद्दिश्य कथां पापविनाशिनीम् ॥ प्रवक्ष्यामि मुनिश्रेष्ठाः

१ बहुविधान्–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मुपास्ते स्म ज्वलत्पावकसन्निभः ॥ १९ ॥ संध्याकालमतिक्रूरमविचिंत्य तु कैकसी ॥ अभ्येत्य तं मुनिं सुभ्रूः पितुर्वचनगौरवात् ॥ २० ॥ तस्था वधोमुखी भूमिं लिखत्यंगुष्ठकोटिना ॥ विश्रवास्तां विलोक्याथ कैकसीं तनुमध्यमाम् ॥ उवाच सस्मितो विप्राः पूर्णचंद्रनिभाननाम् ॥ २१ ॥ ॥ ॥ विश्रवा उवाच ॥ ॥ शोभने कस्य पुत्री त्वं कुतो वा त्वमिहागता ॥२२॥ कार्यं किं वा त्वमुद्दिश्य वर्तसेऽत्र शुचिस्मिते ॥ यथार्थतो वदस्वाद्य मम सर्वमनिंदिते ॥ २३ ॥ इतीरिता कैकसी सा कन्या बद्धांजलिर्द्विजाः ॥ उवाच तं मुनिं प्रह्वा विनयेन समन्विता ॥ २४ ॥ तपः प्रभावेन मुने मदभिप्रायमद्य तु ॥ वेत्तुमर्हसि सम्यक्त्वं पुलस्त्यकुलदीपन ॥ २५ ॥ अहं तु कैकसीनाम सुमालिदुहिता मुने ॥ मत्तातस्याज्ञया ब्रह्मंस्तवांतिकमुपागता ॥२६॥ शेषं त्वं ज्ञानदृष्ट्याद्य ज्ञातुमर्हस्यसंशयः॥ क्षणं ध्यात्वा मुनिः प्राह विश्रवाः स तु कैकसीम् ॥२७॥ मया ते विदितं सुभ्रूर्मनोगतमभीप्सितम् ॥ पुत्राभिलाषिणी सा त्वं मामगाः सांप्रतं शुभे ॥२८॥सायंकालेऽधुना क्रूरे यस्मान्मां त्वमुपागता ॥ पुत्राभिलाषिणी भूत्वा तस्मात्त्वां प्रब्रवीम्यहम् ॥२९॥ शृणुष्वावहिता रामे कैकसी त्वमनिंदिते ॥ दारुणान्दारुणाकारान्दारुणाभिजनप्रियान् ॥ ३० ॥ जनयिष्यसि पुत्रांस्त्वं राक्षसान्क्रूरकर्मणः ॥ श्रुत्वा तद्वचनं सा तु कैकसी प्रणिपत्य तम् ॥ ३१ ॥ पुलस्त्यतनयं प्राह कृतांजलिपुटा द्विजाः ॥ भगवन्नीदृशाः पुत्रास्त्वत्तः प्राप्तुं न युज्यते ॥ ३२ ॥ इत्युक्तः स मुनिः प्राह कैकसीं तां सुमध्यमाम् ॥ मद्वंशानुगुणः पुत्रः पश्चिमस्ते भविष्यति ॥ ३३ ॥ धार्मिकः शास्त्रविच्छांतो न तु राक्षसचेष्टितः ॥ इत्युक्ता कैकसी विप्राः काले कतिपये गते ॥ ३४ ॥ सुषुवे तनयं क्रूरं रक्षोरूपं भयंकरम् ॥ द्विपंचशीर्षं कुमतिं विंशद्बाहुं भयानकम् ॥ ३५ ॥ ताम्रोष्ठं कृष्णवदनं रक्तश्मश्रुशिरोरुहम् ॥ महादंष्ट्रं महाकायं लोकत्रासकरं सदा ॥ ३६ ॥ दशग्रीवाभिधः सोऽभूत्तथा रावण नामवान् ॥ रावणानंतरं जातः कुम्भकर्णाभिधः सुतः ॥ ३७ ॥ ततः शूर्पणखा नाम्ना क्रूरा जज्ञे च राक्षसी ॥ ततो बभूव कैकस्या बिभीषण इति श्रुतः ॥ ३८ ॥ पश्चिमस्तनयो धीमान्धार्मिको वेदशास्त्रवित् ॥ एते विश्रवसः पुत्रा दशग्रीवादयो द्विजाः ॥ ३९ ॥ अतो दशग्रीववधात्कुम्भकर्णवधादपि ॥ ब्रह्महत्या समभवद्रामस्याक्लिष्टकर्मणः ॥ ४० ॥ अतस्तच्छांतये रामो लिंगं रामेश्वराभिधम् ॥ स्थापयामास विधिना वैदिकेन द्विजोत्तमाः ॥ ४१ ॥ एवं रावणघातेन ब्रह्महत्यासमुद्भवः ॥ समभूद्रामचंद्रस्य लोककांतस्य धीमतः ॥ ४२ ॥ तत्सहेतुकमाख्यातं भवतां ब्रह्मघातजम् ॥ पापं यच्छांतये रामो लिंगं प्रातिष्ठिपत्स्वयम् ॥ ४३ ॥ एवं लिंगं प्रतिष्ठाप्य रामचन्द्रोऽतिधार्मिकः ॥ मेने कृतार्थमात्मानं ससीता

१ पौलस्त्यकुलनंदन—इ० पा० । २ द्विजोत्तमाः—इ० पा० । ३ विभीषण इति ख्यातः—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मुदा ॥ आज्ञया रामचन्द्रस्य स्थापयामास वायुजः ॥ ७७ ॥ प्रत्यक्षमेव सर्वेषां कपिलांगूलवेष्टितम् ॥ हरोपि तत्पुच्छजा
तं बिभर्ति च वलित्रयम् ॥ तदुत्तरायां ककुभि गौरीं संस्थापयन्मुदा ॥ ७८ ॥ ॥ श्रीसूत उवाच ॥ एवं वः कथितं विप्रा यदर्थं रावणेण तु ॥
लिंगं प्रतिष्ठितं सेतौ भुक्तिमुक्तिप्रदं नृणाम् ॥ ७९ ॥ यः पठेदिममध्यायं शृणुयाद्वा समाहितः ॥ स विधूयेह पापानि शिवलोके महीयते ॥ ८० ॥
इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे सेतुमाहात्म्ये रामनाथलिंगप्रतिष्ठाकारणवर्णनंनाम षट्चत्वारिंशो
ऽध्यायः ॥ ४६ ॥ ॥ छ ॥ ॥ ऋषय ऊचुः ॥ ॥ राक्षसस्य वधात्सूत रावणस्य महामुने ॥ ब्रह्महत्या कथमभूद्राघवस्य महात्मनः ॥
॥ १ ॥ ब्राह्मणस्य वधात्सूत ब्रह्महत्याभिजायते ॥ न ब्राह्मणो दशग्रीवः कथं तद्वद नो मुने ॥ २ ॥ ब्रह्महत्या भवेत्क्रूरा रामचंद्रस्य धीमतः ॥
एतन्नः श्रद्दधानानां वद कारुण्यतोऽधुना ॥ ३ ॥ इति पृष्टस्ततः सूतो नैमिषारण्यवासिभिः ॥ वक्तुं प्रचक्रमे तेषां प्रश्नस्योत्तरमुत्तमम् ॥ ४ ॥
॥ ॥ श्रीसूत उवाच ॥ ॥ ब्रह्मपुत्रो महातेजाः पुलस्त्योनाम वै द्विजाः ॥ बभूव तस्य पुत्रोऽभूद्विश्रवा इति विश्रुतः ॥ ५ ॥ तस्य पुत्रः पुलस्त्य
स्य विश्रवा मुनिपुंगवाः[1] ॥ चिरकालं तपस्तेपे देवैरपि सुदुष्करम् ॥ ६ ॥ तपः कुर्वति तस्मिंस्तु सुमालीनाम राक्षसः ॥ पाताललोकाद्भूलोकं
सर्वं वै विचचार ह ॥ ७ ॥ हेमनिष्कांगदधरः कालमेघनिभच्छविः ॥ समादाय सुतां कन्यां पद्महीनामिव श्रियम् ॥ ८ ॥ विचरन्स[2] महीपृष्ठे
कदाचित्पुष्पकस्थितम् ॥ दृष्ट्वा विश्रवसः पुत्रं कुबेरं वै धनेश्वरम् ॥ ९ ॥ चिंतयामास विप्रेंद्राः सुमाली स तु राक्षसः ॥ कुबेरसदृशः पुत्रो यद्य
स्माकं भविष्यति ॥ १० ॥ वयं वर्द्धामहे सर्वे राक्षसा ह्यकुतोभयाः ॥ विचार्यैवं निजसुतामब्रवीद्राक्षसेश्वरः ॥ ११ ॥ सुते प्रदानकालोऽद्य तव
कैकसि शोभने ॥ अद्य ते यौवनं प्राप्तं तद्देयां[3] त्वं वराय हि ॥ १२ ॥ अप्रदानेन पुत्रीणां पितरो दुःखमाप्नुयुः ॥ किंच सर्वगुणोत्कृष्टा लक्ष्मीरिव
सुते शुभे ॥ १३ ॥ प्रत्याख्यानभयात्पुंभिर्न च त्वं प्रार्थ्यसे शुभे ॥ कन्यापितृत्वं दुःखाय सर्वेषां मानकांक्षिणाम् ॥ १४ ॥ न जानेऽहं वरः को
वा वरयेदिति कन्यके ॥ सा त्वं पुलस्त्यतनयं मुनिं विश्रवसं द्विजम् ॥ १५ ॥ पितामहकुलोद्भूतं वरयस्व स्वयंगता ॥ कुबेरतुल्यास्तनया भवे
युस्ते न संशयः ॥ १६ ॥ कैकसी तद्वचः श्रुत्वा सा कन्या पितृगौरवात् ॥ अंगीचकार तद्वाक्यं तथास्त्विति शुचिस्मिता ॥ १७ ॥ पर्णशालां
मुनिश्रेष्ठा गत्वा विश्रवसो मुनेः ॥ अतिष्ठदंतिके तस्य लज्जमाना ह्यधोमुखी ॥ १८ ॥ तस्मिन्नवसरे विप्राः पुलस्त्यतनयः सुधीः ॥ अग्निहोत्र

१ मुनिपुंगवाः—इ० पा० । २ सः—इत्यध्याहार्यमत्र । ३ तत्—तस्मात्कारणात् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पतिव्रताधुरीणां त्वां नमामि जनकात्मजाम् ॥ अनुग्रहपरामृद्धिमनघां हरिवल्लभाम् ॥ ५३ ॥ आत्मविद्यां त्रयीरूपामुमारूपां नमाम्य
हम् ॥ प्रसादाभिमुखीं लक्ष्मीं क्षीराब्धितनयां शुभाम् ॥ ५४ ॥ नमामि चन्द्रभगिनीं सीतां सर्वांगसुंदरीम् ॥ नमामि धर्मनिलयां
करुणां वेदमातरम् ॥ ५५ ॥ पद्मालयां पद्महस्तां विष्णुवक्षस्थलालयाम् ॥ नमामि चन्द्रनिलयां सीतां चन्द्रनिभाननाम् ॥ ५६ ॥
आह्लादरूपिणीं सिद्धिं शिवां शिवकरीं सतीम् ॥ नमामि विश्वजननीं रामचन्द्रेष्टवल्लभाम् ॥ सीतां सर्वानवद्यांगीं भजामि सततं हृदा
॥ ५७ ॥ ॥ श्रीसूत उवाच ॥ ॥ स्तुत्वैवं हनुमान्सीतारामचन्द्रौ सभक्तिकम् ॥ ५८ ॥ आनंदाश्रुपरिक्लिन्नस्तूष्णीमास्ते द्विजोत्तमाः ॥
य इदं वायुपुत्रेण कथितं पापनाशनम् ॥ ५९ ॥ स्तोत्रं श्रीरामचंद्रस्य सीतायाः पठतेऽन्वहम् ॥ स नरो महदैश्वर्यमश्नुते वांछितं स
दा ॥ ६० ॥ अनेकक्षेत्रधान्यानि गाश्च दोग्ध्रीः पयस्विनीः ॥ आयुर्विद्याश्च पुत्रांश्च भार्यामपि मनोरमाम् ॥ ६१ ॥ एतत्स्तोत्रं सकृ
द्विप्राः पठन्नाप्नोत्यसंशयः ॥ एतत्स्तोत्रस्य पाठेन नरकं नैव यास्यति ॥ ६२ ॥ ब्रह्महत्यादिपापानि नश्यंति सुमहांत्यपि ॥ सर्वपापविनिर्मुक्तो
देहांते मुक्तिमाप्नुयात् ॥ ६३ ॥ इति स्तुतो जगन्नाथो वायुपुत्रेण राघवः ॥ सीतया सहितो विप्रा हनूमंतमथाब्रवीत् ॥ ६४ ॥ ॥ श्रीराम
उवाच ॥ ॥ अज्ञानाद्वा नरश्रेष्ठ त्वयेदं साहसं कृतम् ॥ ब्रह्मणा विष्णुना वापि शक्रादित्रिदशैरपि ॥ ६५ ॥ नेदं लिंगं समुद्धर्तुं शक्यते
स्थापितं मया ॥ महादेवापराधेन पतितोऽस्यद्य मूर्च्छितः ॥ ६६ ॥ इतः परं मा क्रियतां द्रोहः सांबस्य शूलिनः ॥ अद्यारभ्य त्विदं कुंडं तव
नाम्ना जगत्त्रये ॥ ६७ ॥ ख्यातिं प्रयातु यत्र त्वं पतितो वानरोत्तम ॥ महापातकसंघानां नाशः स्यादत्र मज्जनात् ॥ ६८ ॥ महादेवजटाजाता
गौतमी सरितां वरा ॥ अश्वमेधसहस्रस्य फलदा स्नायिनां नृणाम् ॥ ६९ ॥ ततः शतगुणा गंगा यमुना च सरस्वती ॥ एतन्नदीत्रयं यत्र
स्थले प्रवहते कपे ॥ ७० ॥ मिलित्वा तत्र तु स्नानं सहस्रगुणितं स्मृतम् ॥ नदीष्वेतासु यत्स्नानात्फलं पुंसां भवेत्कपे ॥ ७१ ॥ तत्फलं
तव कुंडेऽस्मिन्स्नानात्प्राप्नोत्यसंशयम् ॥ दुर्लभं प्राप्य मानुष्यं हनूमत्कुंडतीरतः ॥ ७२ ॥ श्राद्धं न कुरुते यस्तु भक्तियुक्तेन चेतसा ॥
निराशास्तस्य पितरः प्रयांति कुपिताः कपे ॥ ७३ ॥ कुप्यंति मुनयोऽप्यस्मै देवाः सेंद्राः सचारणाः ॥ न दत्तं न हुतं येन हनूमत्कुंडतीरतः
॥ ७४ ॥ वृथाजीवित एवासाविहामुत्र च दुःखभाक् ॥ हनूमत्कुंडसविधे येन दत्तं तिलोदकम् ॥ मोदंते पितरस्तस्य घृतकुल्याः पि
बंति च ॥ ७५ ॥ ॥ श्रीसूत उवाच ॥ ॥ श्रुत्वैतद्वचनं विप्रा रामेणोक्तं स वायुजः ॥ ७६ ॥ उत्तरे रामनाथस्य लिंगं स्वेनाहृतं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रणधूलिसमुक्षितम् ॥ जटामण्डलशोभाढचं पुण्डरीकायतेक्षणम् ॥ २७ ॥ खिन्नं च बहुशो युद्धे ददर्श रघुनंदनम् ॥ स्तूयमानममित्रघ्नं देवर्षिपितृकिन्नरैः ॥ २८ ॥ दृष्ट्वा दाशरथिं रामं कृपाबहुलचेतसम् ॥ रघुनाथकरस्पर्शपूर्णगात्रः स वानरः ॥ २९ ॥ पतित्वा दण्डवद्भूमौ कृतांजलिपुटो द्विजाः ॥ अस्तौषीज्जानकीनाथं स्तोत्रैः श्रुतिमनोहरैः ॥ ३० ॥ ॥ हनूमानुवाच ॥ ॥ नमो रामाय हरये विष्णवे प्रभविष्णवे ॥ आदिदेवाय देवाय पुराणाय गदाभृते ॥ ३१ ॥ विष्टरे पुष्पके नित्यं निविष्टाय महात्मने ॥ प्रहृष्टवानरानीकजुष्टपादांबुजाय ते ॥ ३२ ॥ निष्पिष्टराक्षसेंद्राय जगदिष्टविधायिने ॥ नमः सहस्रशिरसे सहस्रचरणाय च ॥ ३३ ॥ सहस्राक्षाय शुद्धाय राघवाय च विष्णवे ॥ भक्तार्तिहारिणे तुभ्यं सीतायाः पतये नमः ॥ ३४ ॥ हरये नारसिंहाय दैत्यराजविदारिणे ॥ नमस्तुभ्यं वराहाय दंष्ट्रोद्धृतवसुन्धर ॥ ३५ ॥ त्रिविक्रमाय भवते बलियज्ञविभेदिने ॥ नमो वामनरूपाय न[1]मोमंदरधारिणे ॥ ३६ ॥ नमस्ते मत्स्यरूपाय त्रयीपालनकारिणे ॥ नमः परशुरामाय क्षत्रियांतकराय ते ॥३७॥ नमस्ते राक्षसघ्नाय नमोराघवरूपिणे ॥ महादेवमहाभीममहाकोदण्डभेदिने ॥ ३८ ॥ क्षत्रियांतकरक्रूरभार्गवत्रासकारिणे ॥ नमोऽस्त्वहिल्यासंतापहारिणे चापहारिणे ॥ ३९ ॥ नागायुतबलोपेतताटकादेहहारिणे ॥ शिलाकठिनविस्तारवालिवक्षोविभेदिने ॥ ४० ॥ नमो मायामृगोन्माथकारिणेऽज्ञानहारिणे ॥ दशस्यंदनदुःखाब्धिशोषणागस्त्यरूपिणे ॥ ४१ ॥ अनेकोर्मिसमाधूतसमुद्रमदहारिणे ॥ मैथिलीमानसांभोजभानवे लोकसाक्षिणे ॥ ४२ ॥ राजेंद्राय नमस्तुभ्यं जानकीपतये हरे ॥ तारकब्रह्मणे तुभ्यं नमो राजीवलोचन ॥ ४३ ॥ रामाय रामचन्द्राय वरेण्याय सुखात्मने ॥ विश्वामित्रप्रियायेदं नमः खरविदारिणे ॥ ४४ ॥ प्रसीद देवदेवेश भक्तानामभयप्रद ॥ रक्ष मां करुणासिंधो रामचन्द्र नमोऽस्तु ते ॥ ४५ ॥ रक्ष मां वेदवचसामप्यगोचर राघव ॥ पाहि मां कृपया राम शरणं त्वामुपैम्यहम् ॥ ४६ ॥ रघुवीर महामोहमपाकुरु ममाधुना ॥ स्नाने चाचमने भुक्तौ जाग्रत्स्वप्नसुषुप्तिषु ॥ ४७ ॥ सर्वावस्थासु सर्वत्र पाहि मां रघुनंदन ॥ महिमानं तव स्तोतुं कः समर्थो जगत्त्रये ॥ ४८ ॥ त्वमेव त्वन्महत्त्वं वै जानासि रघुनंदन ॥ इति स्तुत्वा वायुपुत्रो रामचंद्रं घृणानिधिम् ॥ ४९ ॥ सीतामप्यभितुष्टाव भक्तियुक्तेन चेतसा ॥ जानकि त्वां नमस्यामि सर्वपापप्रणाशिनीम् ॥ ५० ॥ दारिद्र्यरणसंहर्त्रीं भक्तानामिष्टदायिनीम् ॥ विदेहराजतनयां राघवानंदकारिणीम् ॥ ५१ ॥ भूमे[2]र्दुहितरं विद्यां नमामि प्रकृतिं शिवाम् ॥ पौलस्त्यैश्वर्यसंहर्त्रीं भक्ता[3]भीष्टां सरस्वतीम् ॥ ५२ ॥

१ महामंदरधारिणे–इ० पा० । २ देवीम्–इ०पा० । ३ भूतिशुद्धाम्–इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्वां दृष्ट्वा पितरं बन्धून्कौसल्यां जननीमपि ॥ न स्मरामो वयं सर्वान्[1]मे त्वयोपकृतं बहु ॥ २ ॥ मदर्थं सागरस्तीर्णो भवता बहु
योजनः ॥ तलप्रहाराभिहतो मैनाकोऽपि नगोत्तमः ॥ ३ ॥ नागमाता च सुरसा मदर्थं भवता जिता ॥ छायाग्रहां महाक्रूराम
वधीद्राक्षसीं भवान् ॥ ४ ॥ सायं सुवेलमासाद्य लंकामाहत्य पाणिना ॥ अयासी रावणगृहं मदर्थं त्वं महाकपे ॥ ५ ॥ सीतामन्विष्य
लंकायां रात्रौ गतभयो भवान् ॥ अदृष्ट्वा जानकीं पश्चादशोकवनिकां ययौ ॥ ६ ॥ नमस्कृत्य च वैदेहीमभिज्ञानं प्रदाय च ॥ चूडामणिं समादाय
मदर्थं जानकीकरात् ॥ ७ ॥ अशोकवनिकावृक्षानभांक्षीस्त्वं महाकपे ॥ ततस्त्वशीतिसाहस्रान्किं[2]करान्नाम राक्षसान् ॥ ८ ॥ रावणप्रतिमान्युद्धे
पत्यश्वेभरथाकुलान् ॥ अवधीस्त्वं मदर्थे वै महाबलपराक्रमान् ॥ ९ ॥ ततः प्रहस्ततनयं जंबुमालिनमागतम् ॥ अवधीन्मंत्रितनयान्सप्त सप्ता
र्चिवर्चसः ॥ १० ॥ पंच सेनापतीन्पश्चादनयस्त्वं यमालयम् ॥ कुमारमक्षमवधीस्ततस्त्वं रणमूर्धनि ॥ ११ ॥ तत इन्द्रजिता नीतो राक्षसेंद्र
सभां शुभाम् ॥ तत्र लंकेश्वरं वाचा तृणीकृत्यावमन्य च ॥ १२ ॥ अभांक्षीस्त्वं पुरीं लंकां मदर्थं वायुनंदन ॥ पुनः प्रतिनिवृत्तस्त्वमृष्यमूकं
महागिरिम् ॥ १३ ॥ एवमादि महादुःखं मदर्थं प्राप्तवानसि ॥ त्वमत्र भूतले शेषे मम शोकमुदीरयन् ॥ १४ ॥ अहं प्राणान्परित्यक्ष्ये मृतोऽसि
यदि वायुज ॥ सीतया मम किं कार्यं लक्ष्मणेनानुजेन वा ॥ १५ ॥ भरतेनापि किं कार्यं शत्रुघ्नेन श्रियापि वा ॥ राज्येनापि न मे कार्यं
परेतस्त्वं कपे यदि ॥ १६ ॥ उत्तिष्ठ हनुमन्वत्स किं शेषेऽद्य महीतले ॥ शय्यां कुरु महाबाहो निद्रार्थं मम वानर ॥ १७ ॥ कन्दमूलफलानि
त्वमाहारार्थं ममाहर ॥ स्नातुमद्य गमिष्यामि शीघ्रं कलशमानय ॥ १८ ॥ अजिनानि च वासांसि दर्भांश्च समुपाहर ॥ ब्रह्मास्त्रेणावबद्धोऽहं मोचि
तश्च त्वया हरे ॥ १९ ॥ लक्ष्मणेन सह भ्रात्रा ह्यौषधानयनेन वै ॥ लक्ष्मणप्राणदाता त्वं पौलस्त्यमदनाशनः ॥ २० ॥ सहायेन त्वया युद्धे राक्षसा
न्रावणादिकान् ॥ निहत्यातिबलान्वीरानवापं मैथिलीमहम् ॥ २१ ॥ हनूमन्नंजनासूनोः सीताशोकविनाशन ॥ कथमेवं परित्यज्य लक्ष्मणं मां
च जानकीम् ॥ २२ ॥ अप्रापयित्वायोध्यां त्वं किमर्थं गतवानसि ॥ क्व गतोसि महावीर महाराक्षसकण्टक ॥ २३ ॥ इति पश्यन्मुखं तस्य
निर्वाक्यं रघुनंदनः ॥ प्ररुदन्नश्रुजालेन सेचयामास वायुजम् ॥ २४ ॥ वायुपुत्रस्ततो मूर्च्छामपहाय शनैर्द्विजाः ॥ पौलस्त्यभयसंत्रस्तलोकर
क्षार्थमागतम् ॥ २५ ॥ आश्रित्य मानुषं भावं नारायणमजं विभुम् ॥ जानकीलक्ष्मणयुतं कपिभिः परिवारितम् ॥ २६ ॥ कालांभोधरसंकाशं

१ आर्षमेतत् । पादादौ तेमयादेशनिषेधात् । २ किरातान्–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्य गमनान्नृणामायुर्विनश्यति ॥ आत्मानमनुशोच त्वं किमन्यमनुशोचसि ॥ ४४ ॥ नश्यत्यायुः स्थितस्यापि धावतोऽपि कपीश्वर ॥ सहैव मृत्यु व्रंजति सह मृत्युर्निषीदति ॥ ४५ ॥ चरित्वा दूरदेशं च सह मृत्युर्निवर्तते ॥ शरीरे वलयः प्राप्ताः श्वेता जाताः शिरोरुहाः ॥ ४६ ॥ जीर्यते जरया देहः श्वासकासादिना तथा ॥ यथा काष्ठं च काष्ठं च समेयातां महोदधौ ॥ ४७ ॥ समेत्य च व्यपेयातां कालयोगेन वानर ॥ एवं भार्या च पुत्रश्च बंधुक्षेत्रधनानि च ॥ ४८ ॥ क्वाचित्संभूय गच्छंति पुनरन्यत्र वानर ॥ यथा[1] हि पांथं गच्छंतं पथि कश्चित्पथि स्थितः॥ ४९ ॥ अहमप्या गमिष्यामि भवद्भिः साकमित्यथ ॥ कंचित्कालं समेतौ तौ पुनरन्यत्र गच्छतः ॥ ५० ॥ एवं भार्यासुतादीनां संगमो नश्वरः कपे ॥ शरीरजन्मना[2] साकं मृत्युः संजायते ध्रुवम् ॥ ५१ ॥ अवश्यंभाविमरणे न हि जातु प्रतिक्रिया ॥ एतच्छरीरपाते तु देही कर्मगतिं गतः ॥ ५२ ॥ प्राप्य पिंडां तरं वत्स पूर्वपिंडं त्यजत्यसौ[3] ॥ प्राणिनां न सदैकत्र वासो भवति वानर ॥ ५३ ॥ स्वस्वकर्मवशात्सर्वे वियुज्यंते पृथक्पृथक् ॥ यथा प्राणिशरी राणि नश्यंति च भवंति च ॥ ५४ ॥ आत्मनो जन्ममरणे नैव स्तः कपिसत्तम ॥ अतस्त्वमंजनासूनो विशोकं ज्ञानमद्वयम् ॥ ॥ ५५ ॥ सद्रूपममलं ब्रह्म चिंतयस्व दिवानिशम् ॥ त्वत्कृतं मत्कृतं कर्म मत्कृतं त्वत्कृतं तथा ॥ ५६ ॥ मल्लिंगस्थापनं तस्मात्त्वल्लिंग स्थापनं कपे ॥ मुहूर्तातिक्रमाल्लिंगं सैकतं सीतया कृतम् ॥ ५७ ॥ मयात्र स्थापितं तस्मात्कोपं दुःखं च मा कुरु ॥ कैलासादागतं लिंगं स्थापयास्मिञ्छुभे दिने ॥ ५८ ॥ तव नाम्ना त्विदं लिंगं यातु लोकत्रये प्रथाम् ॥ हनूमदीश्वरं दृष्ट्वा द्रष्टव्यो राघवेश्वरः ॥ ५९ ॥ ब्रह्मराक्षसयू थानि हतानि भवता कपे ॥ अतः स्वनाम्ना लिंगस्य स्थापनात्त्वं प्रमोक्ष्यसे ॥ ६० ॥ स्वयं हरेण दत्तं तु हनूमन्नामकं शिवम् ॥ संपश्यन्राम नाथं च कृतकृत्यो भवेन्नरः ॥ ६१ ॥ योजनानां सहस्रेऽपि स्मृत्वा लिंगं हनूमतः ॥ रामनाथेश्वरं चापि स्मृत्वा सायुज्यमाप्नुयात् ॥ ६२ ॥ तेनेष्टं सर्वयज्ञैश्च तपश्चाकारि कृत्स्नशः ॥ येन दृष्टौ महादेवौ हनूमद्राघवेश्वरौ ॥ ६३ ॥ हनूमता कृतं लिंगं यच्च लिंगं मया कृतम् ॥ जानकीयं च यल्लिंगं यल्लिंगं लक्ष्मणेश्वरम् ॥ ६४ ॥ सुग्रीवेण कृतं यच्च सेतुकर्त्रा नलेन च ॥ अंगदेन च नीलेन तथा जांबवता कृतम् ॥ ६५ ॥ बिभीष णेन यच्चापि रत्नलिंगं प्रतिष्ठितम् ॥ इन्द्राद्यैश्च कृतं लिंगं यच्छेषाद्यैः प्रतिष्ठितम् ॥ ६६ ॥ इत्येकादशरूपोऽयं शिवः साक्षाद्विभासते ॥ सदा ह्येतेषु लिंगेषु संनिधत्ते महेश्वरः ॥ ६७ ॥ तत्स्वपापौघशुद्ध्यर्थं स्थापयस्व महेश्वरम् ॥ अथ चेत्त्वं महाभाग लिंगमुत्सादयिष्यसि[4] ॥ ६८ ॥

१ यथा हि पांथा गच्छन्ति केचित्क्वचित्पथि स्थिताः–इ० पा० । २ जातस्य जन्मना–इ० पा० । ३ जहाति–इ० पा० । ४ उत्पाटयिष्यसि–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मयात्र स्थापितं वत्स सीतया सैकतं कृतम् ॥ स्थापयिष्यामि च ततो लिंगमेतत्त्वया कृतम् ॥ ६९ ॥ पातालं सुतलं प्राप्य वितलं च रसातलम् ॥ तलातलं च तदिदं भेदयित्वा तु तिष्ठति ॥ ७० ॥ प्रतिष्ठितं मया लिंगं भेत्तुं कस्य बलं भवेत् ॥ उत्तिष्ठ लिंगमुद्वास्य मयैतत्स्थापितं कपे ॥ ॥ ७१ ॥ त्वया समाहृतं लिंगं स्थापयस्वाशु मा शुचः ॥ इत्युक्तस्तं प्रणम्याथाज्ञातसत्त्वोऽथ वानरः ॥ ७२ ॥ उद्वासयामि वेगेन[1] सैकतं लिंगमुत्तमम् ॥ संस्थापयामि कैलासादानीतं लिंगमादरात् ॥ ७३ ॥ उद्वासने सैकतस्य कियान्भारो भवेन्मम ॥ चेतसैवं विचार्यायं हनूमान्मारुतात्मजः ॥ ७४ ॥ पश्यतां सर्वदेवानां मुनीनां कपिरक्षसाम् ॥ पश्यतो रामचन्द्रस्य लक्ष्मणस्यापि पश्यतः ॥ ७५ ॥ पश्यंत्या अपि वैदेह्या लिंगं तत्सैकतं बलात् ॥ पाणिना सर्वयत्नेन जग्राह तरसा बली ॥ ७६ ॥ यत्नेन महता चायं चालयन्नपि मारुतिः ॥ नालं चालयितुं ह्यासीत्सैकतं लिंगमोजसा ॥ ७७ ॥ ततः किलकिलाशब्दं कुर्वन्वानरपुंगवः ॥ पुच्छमुद्यम्य पाणिभ्यां निरास्थत्तन्निजौजसा ॥ ७८ ॥ इत्यनेकप्रकारेण चालयन्नपि वानरः ॥ नैव चालयितुं शक्तो बभूव पवनात्मजः ॥ ७९ ॥ तद्वेष्टयित्वा पुच्छेन पाणिभ्यां धरणीं स्पृशन् ॥ उत्पपाताथ तरसा व्योम्नि वायुसुतः कपिः ॥ ८० ॥ कंपयन्स धरां सर्वां सप्तद्वीपां सपर्वताम् ॥ लिंगस्य क्रोशमात्रे तु मूर्च्छितो रुधिरं वमन् ॥ ८१ ॥ पपात हनुमान्विप्राः कंपितांगो धरातले ॥ पततो वायुपुत्रस्य वक्त्राच्च नयनद्वयात् ॥ ८२ ॥ नासापुटाच्छ्रोत्ररंध्रादपानाच्च द्विजोत्तमाः ॥ रुधिरौघः प्रसुस्राव रक्तकुण्डमभूच्च तत् ॥ ८३ ॥ ततो हाहाकृतं सर्वं सदेवासुरमानुषम् ॥ धावंतौ कपिभिः सार्द्धमुभौ तौ रामलक्ष्मणौ ॥ ८४ ॥ जानकीसहितौ विप्रा ह्यास्तां शोकाकुलौ तदा ॥ सीतया सहितौ वीरौ वानरैश्च महाबलौ ॥ ८५ ॥ रुरुचाते तदा विप्रा गन्धमादनपर्वते ॥ यथा तारागणयुतौ रजन्यां शशिभास्करौ ॥ ८६ ॥ ददर्शतुर्हनूमंतं चूर्णीकृतकलेवरम् ॥ मूर्च्छितं पतितं भूमौ वमन्तं रुधिरं मुखात् ॥ ८७ ॥ विलोक्य कपयः सर्वे हाहाकृत्वाऽपतन्भुवि ॥ कराभ्यां सदयं सीता हनूमंतं मरुत्सुतम् ॥ ८८ ॥ तातताततेति पस्पर्श पतितं धरणीतले ॥ रामोऽपि दृष्ट्वा पतितं हनूमंतं कपीश्वरम् ॥ ॥ ८९ ॥ आरोप्यांकं स्वपाणिभ्यामाममर्श कलेवरम् ॥ विमुंचन्नेत्रजं वारि वायुजं चाब्रवीद्द्विजाः ॥ ९० ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे सेतुमाहात्म्ये रामचन्द्रतत्त्वज्ञानोपदेशवर्णनंनाम पंचचत्वारिंशोऽध्यायः ॥ ४५ ॥ ॥ छ ॥ ॥

॥ ॥ श्रीराम उवाच ॥ ॥ पंपारण्ये वयं दीनास्त्वया वानरपुंगव ॥ आश्वासिताः कारयित्वा सख्यमादित्यसूनुना ॥ १ ॥

१ देवेश-इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सर्वं जानाम्यहं कार्यमात्मनोऽपि परस्य च ॥ १८ ॥ जातस्य जायमानस्य मृतस्यापि सदा कपे ॥ जायते म्रियते जन्तुरेक एव स्वकर्मणा १९ ॥ प्रयाति नरकं चापि परमात्मा तु निर्गुणः ॥ एवं तत्त्वं विनिश्चित्य शोकं मा कुरु वानर ॥ २० ॥ लिंगत्रयविनिर्मुक्तं ज्योतिरेकं निरंजनम् ॥ निराश्रयं निर्विकारमात्मानं पश्य नित्यशः ॥ २१ ॥ किमर्थं कुरुषे शोकं तत्त्वज्ञानस्य बाधकम् ॥ तत्त्वज्ञाने सदा निष्ठां कुरु वानरसत्तम ॥ २२ ॥ स्वयंप्रकाशमात्मानं ध्यायस्व सततं कपे ॥ देहादौ ममतां मुंच तत्त्वज्ञानविरोधिनीम् ॥ २३ ॥ धर्मं भजस्व सततं प्राणिहिंसां परित्यज ॥ सेवस्व साधुपुरुषाञ्जहि सर्वेंद्रियाणि च ॥ २४ ॥ परित्यजस्व सततमन्येषां दोषकीर्तनम् ॥ शिवविष्णवादिदेवानामर्चां कुरु सदा कपे ॥ २५ ॥ सत्यं वदस्व सततं परित्यज शुचं कपे ॥ प्रत्यग्ब्रह्मैकताज्ञानं मोहवस्तुसमुद्भतम् ॥ २६ ॥ शोभनाशोभना भ्रांतिः कल्पितास्मिन्यथार्थवत् ॥ अध्यास्ते शोभनत्वेन पदार्थे मोहवैभवात् ॥ २७ ॥ रोगो विजायते नृणां भ्रांतानां कपिसत्तम ॥ रागद्वेषबलाद्बद्धा धर्माधर्मवशंगताः ॥ २८ ॥ देवतिर्यङ्मनुष्याद्या निरयं यांति मानवाः ॥ चंदनागरुकर्पूरप्रमुखा अतिशोभनाः ॥ २९ ॥ मलं भवंति यत्स्पर्शात्तच्छरीरं कथं सुखम् ॥ भक्ष्यभोज्यादयः सर्वे पदार्था अतिशोभनाः ॥३०॥ विष्ठा[1] भवंति यत्संगात्तच्छरीरं कथं सुखम्॥ सुगंधि शीतलं तोयं मूत्रं यत्संगमाद्भवेत् ॥३१॥ तत्कथं शोभनं पिंडं भवेद्ब्रहि कपेऽधुना ॥ अतीव धवलाः शुद्धाः पटा यत्संगमेन हि ॥३२॥ भवंति मलिनाः स्वेदात्तत्कथं शोभनं भवेत् ॥ श्रूयतां परमार्थो मे हनूमन्वायुनंदन ॥ ३३ ॥ अस्मिन्संसारगर्ते तु किंचित्सौख्यं न विद्यते ॥ प्रथमं जंतुराप्नोति जन्म बाल्यं ततः परम् ॥ ॥३४॥ पश्चाद्यौवनमाप्नोति ततो वार्धक्यमश्नुते ॥ पश्चान्मृत्युमवाप्नोति[2] पुनर्जन्म तदश्नुते ॥३५॥ अज्ञानवैभवादेव दुःखमाप्नोति मानवः ॥ तदज्ञाननिवृत्तौ तु प्राप्नोति सुखमुत्तमम् ॥३६॥ अज्ञानस्य निवृत्तिस्तु ज्ञानादेव न कर्मणा ॥ ज्ञानं नाम परं ब्रह्म ज्ञानं वेदांतवाक्यजम् ॥३७॥ तज्ज्ञानं च विरक्तस्य जायते नेतरस्य हि ॥ मुख्याधिकारिणः सत्यमाचार्यस्य प्रसादतः ॥३८॥ यदा सर्वे प्रमुच्यंते कामा येऽस्य हृदि स्थिताः ॥ तदा मर्त्योऽमृतोऽत्रैव परं ब्रह्म समश्नुते ॥ ३९ ॥ जाग्रतं च स्वपंतं च भुंजंतं च स्थितं तथा ॥ इमं जनं सदा क्रूरः कृतांतः परिकर्षति ॥ ४० ॥ सर्वे क्षयांता निचयाः पतनांताः समुच्छ्रयाः ॥ संयोगा विप्रयोगांता मरणातं च जीवितम् ॥ ४१ ॥ यथा फलानां पक्वानां नान्यत्र पतनाद्भयम् ॥ यथा नराणां जातानां नान्यत्र पतनाद्भयम् ॥ ४२ ॥ यथा गृहं दृढस्तंभं जीर्णं काले विनश्यति ॥ एवं विनश्यंति नरा जरामृत्युवशंगताः ॥ ४३ ॥ अहोरात्र

१ विष्ठा–इ० पा० । २ पुनश्च मृत्युमापन्नः–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मास शंकरम् ॥ कोटितीर्थमिति प्रोक्तं तत्तीर्थं पुण्यमुत्तमम् ॥ ११७ ॥ उक्तं तद्वैभवं पूर्वमस्माभिर्मुनिपुंगवाः ॥ देवाश्च मुनयो नागा गन्धर्वाप्स
रसां गणाः ॥ सर्वेपि वानरा लिंगमेकैकं चक्रुरादरात् ॥ ११८ ॥ ॥ श्रीसूत उवाच ॥ ॥ एवं वः कथितं विप्रा यथा रामेण धीमता ॥ ११९ ॥
स्थापितं शिवलिंगं वै भुक्तिमुक्तिप्रदायकम् ॥ इमां लिंगप्रतिष्ठां यः शृणोति पठतेऽथवा ॥ १२० ॥ स रामेश्वरलिंगस्य सेवाफलमवाप्नुयात् ॥
सायुज्यं च समाप्नोति रामनाथस्य वैभवात् ॥ १२१ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे सेतुमाहात्म्ये
रामनाथलिंगप्रतिष्ठाविधिवर्णनंनाम चतुश्चत्वारिंशोऽध्यायः ॥ ४४ ॥ ॥ श्रीसूत उवाच ॥ ॥ एवं प्रतिष्ठिते लिंगे रामेणाक्लिष्टकारिणा ॥ लिंगं[1]
वरं समादाय मारुतिः सहसाऽऽययौ ॥ १ ॥ रामं दाशरथिं वीरमभिवाद्य स मारुतिः ॥ वैदेहीलक्ष्मणौ पश्चात्सुग्रीवं प्रणनाम च ॥ २ ॥ सीता
सैकतलिंगं तत्पूजयंतं रघूद्वहम् ॥ दृष्ट्वाथ मुनिभिः सार्द्धं चुकोप पवनात्मजः ॥ ३ ॥ अत्यंतं खेदखिन्नः सन्वृथाकृतपरिश्रमः ॥ उवाच रामं[2]
धर्मज्ञं हनूमानंजनात्मजः ॥ ४ ॥ ॥ हनूमानुवाच ॥ ॥ दुर्जातोऽहं वृथा राम लोके क्लेशाय केवलम् ॥ खिन्नोऽस्मि बहुशो देव राक्षसैः
क्रूरकर्मभिः ॥ ५ ॥ मा स्म सीमंतिनी काचिज्जनयेन्मादृशं सुतम् ॥ यतोऽनुभूयते दुःखमनंतं भवसागरे ॥ ६ ॥ खिन्नोऽस्मि सेवया पूर्वं
युद्धेनापि ततोधिकम् ॥ अनन्तं दुःखमधुना यतो मामवमन्यसे ॥ ७ ॥ सुग्रीवेण च भार्यार्थं राज्यार्थं राक्षसेन च ॥ रावणावरजेन त्वं सेवितो
ऽसि रघूद्वह ॥ ८ ॥ मया निर्हेतुकं राम सेवितोऽसि महामते ॥ वानराणामनेकेषु त्वयाज्ञप्तोऽहमद्य वै ॥ ९ ॥ शिवलिंगं समानेतुं कैलासात्पर्वतो
त्तमात् ॥ कैलासं त्वरितो गत्वा न चापश्यं पिनाकिनम् ॥ १० ॥ तपसा प्रीणयित्वा तं सांबं वृषभवाहनम् ॥ प्राप्तलिंगो रघुपते त्वरितः समु
पागतः ॥ ११ ॥ अन्यलिंगं त्वमधुना प्रतिष्ठाप्य तु सैकतम् ॥ मुनिभिर्देवगन्धर्वैः साकं पूजयसे विभो ॥ १२ ॥ मयानीतमिदं लिंगं कैलासा
त्पर्वताद्वृथा ॥ अहो भाराय मे देहो मन्दभाग्यस्य जायते ॥ १३ ॥ भूतलस्य महाराज जानकीरमण प्रभो ॥ इदं दुःखमहं सोढुं न शक्नोमि
रघूद्वह ॥ १४ ॥ किं करिष्यामि कुत्राहं गमिष्यामि न मे गतिः ॥ अतः शरीरं त्यक्ष्यामि त्वयाहमवमानितः ॥ १५ ॥ ॥ श्रीसूत उवाच ॥
एवं स बहुशो विप्राः क्रुशित्वा पवनात्मजः ॥ दण्डवत्प्रणतो भूमौ क्रोधशोकाकुलोऽभवत् ॥ १६ ॥ तं दृष्ट्वा रघुनाथोऽपि[3] प्रहसन्नि
दमब्रवीत् ॥ पश्यतां सर्वदेवानां मुनीनां कपिरक्षसाम् ॥ सांत्वयन्मारुतिं तत्र दुःखं चास्य प्रमार्जयन् ॥ १७ ॥ ॥ श्रीराम उवाच ॥

१ लिंगद्वयम्--इ०पा० । २ वाचम्--इ०पा० । ३ राघवश्चापि--इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नमस्ते रेणुकापुत्रपराजयविधायिने ॥ ६६ ॥ सहलक्ष्मणसीताभ्यां कैकेय्यास्तु वरद्वयात् ॥ सत्यं पितृवचः कर्तुं नमो वनमुपे युषे ॥ ६७ ॥ भरतप्रार्थनादत्तपादुकायुगुलाय ते ॥ नमस्ते शरभंगस्य स्वर्गप्राप्त्यैकहेतवे ॥ ६८ ॥ नमो विराधसंहर्त्रे गृध्रराजस खाय ते ॥ मायामृगमहाक्रूरमारीचांगविदारिणे ॥ ६९ ॥ सीतापहारिलोकेशयुद्धत्यक्तकलेवरम् ॥ जटायुषं तु संदह्य तत्कैवल्यप्रदायिने ॥ ॥ ७० ॥ नमः कबंधसंहर्त्रे शबरीपूजितांघ्रये ॥ प्राप्तसुग्रीवसख्याय कृतवालिवधाय ते ॥ ७१ ॥ नमः कृतवते सेतुं समुद्रे वरुणालये ॥ सर्व राक्षससंहर्त्रे रावणप्राणहारिणे ॥ ७२ ॥ संसारांबुधिसंतारपोतपादांबुजाय ते ॥ नमो भक्तार्तिसंहर्त्रे सच्चिदानंदरूपिणे ॥ ७३ ॥ नमस्ते राम भद्राय जगतामृद्धिहेतवे ॥ रामादिपुण्यनामानि जपतां पापहारिणे ॥ ७४ ॥ नमस्ते सर्वलोकानां सृष्टिस्थित्यंतकारिणे ॥ नमस्ते करुणामूर्ते भक्तरक्षणदीक्षित ॥ ७५ ॥ ससीताय नमस्तुभ्यं बिभीषणसुखप्रद ॥ लंकेश्वरवधाद्राम पालितं हि जगत्त्वया ॥ ७६ ॥ रक्षरक्ष जगन्नाथ पाह्य स्माञ्जानकीपते ॥ स्तुत्वैवं मुनयः सर्वे तूष्णीं तस्थुर्द्विजोत्तमाः ॥ ७७ ॥ ॥ श्रीसूत उवाच ॥ ॥ य इदं रामचन्द्रस्य स्तोत्रं मुनिभिरी रितम् ॥ त्रिसंध्यं पठते भक्त्या भुक्तिं मुक्तिं च विंदति ॥ ७८ ॥ प्रयाणकाले पठतो न भीतिरुपजायते ॥ एतत्स्तोत्रस्य पठनाद्भूतवेतालकादयः ॥ ॥ ७९ ॥ नश्यंति रोगा नश्यंति नश्यते पापसंचयः ॥ पुत्रकामो लभेत्पुत्रं कन्या विंदति सत्पतिम् ॥ ८० ॥ मोक्षकामो लभेन्मोक्षं धनकामो धनं लभेत् ॥ सर्वान्कामानवाप्नोति पठन्भक्त्या त्विमं स्तवम् ॥ ८१ ॥ ततो रामो मुनीन्प्राह प्रणम्य च कृतांजलिः ॥ अहं विशुद्धये प्राप्यः सकलैरपि मानवैः ॥ ८२ ॥ मद्दृष्टिगोचरो जन्तुर्नित्यमोक्षस्य भाजनम् ॥ तथापि मुनयो नित्यं भक्तियुक्तेन चेतसा ॥ ८३ ॥ स्वात्मलाभेन संतुष्टान्साधून्भूतसुहृत्तमान् ॥ निरहंकारिणः शांतान्नमस्याम्यूर्ध्वरेतसः ॥ ८४ ॥ यस्माद्ब्रह्मण्यदेवोऽहमतो विप्रान्भजे सदा ॥ युष्मान्पृच्छाम्यहं किंचित्तद्वदध्वं विचार्य तु ॥ ८५ ॥ रावणस्य वधाद्विप्रा यत्पापं मम वर्तते ॥ तस्य मे निष्कृतिं ब्रूत पौलस्त्यवधजस्य हि ॥ यत्कृत्वा तेन पापे न मुच्येऽहं मुनिपुंगवाः ॥ ८६ ॥ ॥ मुनय ऊचुः ॥ ॥ सत्यव्रत जगन्नाथ जगद्रक्षाधुरंधर ॥ ८७ ॥ सर्वलोकोपकारार्थं कुरु राम शिवार्च नम् ॥ गन्धमादनशृंगेऽस्मिन्महापुण्ये विमुक्तिदे ॥ ८८ ॥ शिवलिंगप्रतिष्ठां त्वं लोकसंग्रहकाम्यया ॥ कुरु राम दशग्रीववधदोषापनुत्तये ॥ ॥ ८९ ॥ लिंगस्थापनजं पुण्यं चतुर्वक्रोऽपि भाषितुम् ॥ न शक्नोति ततो वक्तुं किं पुनर्मनुजेश्वर ॥ ९० ॥ यत्त्वया स्थाप्यते लिंगं गन्ध

१ पठताम्–इ०पा० । २ भूतवेतालिका इह–इ० पा० । ३ विप्रा–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मादनपर्वते ॥ अस्य संदर्शनं पुंसां काशीलिंगावलोकनात् ॥ ९१ ॥ अधिकं कोटिगुणितं फलवत्स्यान्न संशयः ॥ तव नाम्ना त्विदं लिंगं लोके ख्यातिं समश्नुताम् ॥ ९२ ॥ नाशकं पुण्यपापाख्यकाष्ठानां दहनोपमम् ॥ इदं रामेश्वरं लिंगं ख्यातं लोके भविष्यति ॥ ९३ ॥ मा विलंबं कुरुष्वातो लिंगस्थापनकर्मणि ॥ रामचंद्र महाभाग करुणापूर्णविग्रह ॥ ९४ ॥ ॥ श्रीसूत उवाच ॥ ॥ इति श्रुत्वा वचो रामो मुनीनां तं मुनीश्वराः ॥ पुण्यकालं विचार्याथ द्विमुहूर्तं जगत्पतिः ॥ ९५ ॥ कैलासं प्रेषयामास हनुमन्तं शिवालयम् ॥ शिवलिंगं समानेतुं स्थापनार्थं रघूद्वहः ॥ ९६ ॥ ॥ राम उवाच ॥ ॥ हनूमन्नंजनीसूनो वायुपुत्र महाबल ॥ कैलासं त्वरितो गत्वा लिंगमानय मा चिरम् ॥ ९७ ॥ इत्याज्ञप्तस्स रामेण भुजावास्फाल्य वीर्यवान् ॥ मुहूर्तद्वितयं ज्ञात्वा पुण्यकालं कपीश्वरः ॥ ९८ ॥ पश्यतां सर्वदेवानामृषीणां च महात्मनाम् ॥ उत्पपात महावेगश्चालयन्गंधमादनम् ॥९९॥ लंघयन्स वियन्मार्गं कैलासं पर्वतं ययौ ॥ न ददर्श महादेवं लिंगरूपधरं कपिः॥१००॥ कैलासे पर्वते तस्मिन्पुण्ये शंकरपालिते ॥ आंजनेयस्तपस्तेपे लिंगप्राप्त्यर्थमादरात् ॥ १ ॥ प्रागग्रेषु समासीनः कुशेषु मुनिपुंगवाः ॥ ऊर्ध्वबाहुर्निरालम्बो निरुच्छ्वासो जितेंद्रियः ॥ २ ॥ प्रसादयन्महादेवं लिंगं लेभे स मारुतिः ॥ एतस्मिन्नंतरे विप्रा मुनिभिस्तत्त्वदर्शिभिः ॥ ३ ॥ अनागतं हनूमं कालं स्वल्पावशेषितम् ॥ ज्ञात्वा प्रकथितं तत्र रामं प्रति महामतिम् ॥ ४ ॥ रामराम महाबाहो कालो ह्यत्येति सांप्रतम् ॥ जानक्या यत्कृतं लिंगं सैकतं लीलया विभो ॥ ५ ॥ तल्लिंगं स्थापयस्वाद्य महालिंगमनुत्तमम् ॥ श्रुत्वैतद्वचनं रामो जानक्या सह सत्वरम् ॥ ६ ॥ मुनिभिः सहितः प्रीत्या कृतकौतुकमंगलः ॥ ज्येष्ठे मासे सिते पक्षे दशम्यां बुधहस्तयोः ॥ ७ ॥ गरानंदे व्यतीपाते कन्याचन्द्रे वृषे रवौ ॥ दशयोगे महापुण्ये गन्धमादनपर्वते ॥ ८ ॥ सेतुमध्ये महादेवं लिंगरूपधरं हरम् ॥ ईशानं कृत्तिवसनं गंगाचंद्रकलाधरम् ॥ ९ ॥ रामो वै स्थापयामास शिवलिंगमनुत्तमम् ॥ लिंगस्थं पूजयामास राघवः सांबमीश्वरम् ॥ ११० ॥ लिंगस्थः स महादेवः पार्वत्या सह शंकरः ॥ प्रत्यक्षमेव भगवान्दत्तवान्वरमुत्तमम् ॥ ११ ॥ सर्वलोकशरण्याय राघवाय महात्मने ॥ त्वयात्र स्थापितं लिंगं ये पश्यंति रघूद्वह ॥ १२ ॥

॥ ४: महापातकयुक्ताश्च तेषां पापं प्रणश्यति ॥ सर्वाण्यपि हि पापानि धनुष्कोटौ निमज्जनात् ॥ १३ ॥ दर्शनाद्रामलिंगस्य पातकानि महांत्यपि ॥ विलयं यांति राजेंद्र रामचन्द्र न संशयः ॥ १४ ॥ प्रादादेवं हि रामाय वरं देवोऽबिकापतिः ॥ तदग्रे नंदिकेशं च स्थापयामास राघवः ॥ ॥ १५ ॥ ईश्वरस्याभिषेकार्थं धनुष्कोट्याथ राघवः ॥ एकं कूपं धरां भित्त्वा जनयामास वै द्विजाः ॥ १६ ॥ तस्माज्जलमुपादाय स्नापया

CC-0. In Public Domain. Digitization by eGangotri

बलः ॥ ४० ॥ ततो बिभीषणो राममिक्ष्वाकुकुलभूषणम् ॥ उवाच प्रांजलिर्वाक्यं प्रणम्य च पुनःपुनः ॥ ४१ ॥ अयमंभो गृहीत्वा तु राजराजस्य शासनात् ॥ गुह्यकोऽभ्यागतो राम त्वत्सकाशमरिंदम ॥ ४२ ॥ इदमंभः कुबेरस्ते महाराज प्रयच्छति ॥ अंतर्हितानां भूतानां दर्शनार्थं परंतप ॥ ४३ ॥ अनेन स्पृष्टनयनो भूतान्यंतर्हितान्यपि ॥ भवान्द्रक्ष्यति यस्मै वा भवानेतत्प्रदास्यति ॥ ४४ ॥ सोऽपि द्रक्ष्यति भूतानि वियत्यंतर्हितानि वै ॥ तथेति रामस्तद्वारि प्रतिगृह्याथ सत्कृतम् ॥ ४५ ॥ चकार नेत्रयोः शौचं लक्ष्मणश्च महाबलः ॥ सुग्रीवजांबवन्तौ च हनुमानंगदस्तथा ॥ ४६ ॥ मैंदद्विविदनीलाश्च ये चान्ये वानरास्तथा ॥ ते सर्वे रामदत्तेन वारिणा शुद्धचक्षुषः ॥ ४७ ॥ आकाशेंतर्हितं वीरमपश्यन्रावणात्मजम् ॥ ततस्तमभिदुद्राव सौमित्रिर्दृष्टिगोचरम् ॥ ४८ ॥ ततो जवान संक्रुद्धो लक्ष्मणः कृतलक्षणः ॥ कुबेरप्रेषितजलैः[१] पवित्रीकृतलोचनः ॥ ॥ ४९ ॥ ततः समभवद्युद्धं लक्ष्मणेंद्रजितोर्महत् ॥ अतीव चित्रमाश्चर्यं शक्रप्रह्लादयोरिव ॥ ५० ॥ ततस्तृतीयदिवसे यत्नेन महता द्विजाः ॥ इंद्रजिन्निहतो युद्धे लक्ष्मणेन बलीयसा ॥ ५१ ॥ ततो मूलबलं सर्वं हतं रामेण धीमता ॥ अथ क्रुद्धो दशग्रीवः प्रियपुत्रे निपातिते ॥ ५२ ॥ निर्ययौ रथमास्थाय नगराद्बहुसैनिकः ॥ रावणो जानकीं हन्तुमुद्युक्तो विंध्यवारितः ॥ ५३ ॥ ततो हर्यश्वयुक्तेन रथेनादित्यवर्चसा ॥ उपतस्थे रणे रामं मातलिः शक्रसारथिः ॥ ५४ ॥ ऐन्द्रं रथं समारुह्य रामो धर्मभृतां वरः ॥ शिरांसि राक्षसेन्द्रस्य ब्रह्मास्त्रेणावधीद्रणे ॥ ५५ ॥ ततो हतदशग्रीवं रामं दशरथात्मजम् ॥ आशीर्भिर्जययुक्ताभिर्देवाः सर्षिपुरोगमाः ॥ ५६ ॥ तुष्टुवुः परिसंतुष्टाः सिद्धविद्याधरास्तथा ॥ रामं कमलपत्राक्षं पुष्पवर्षैरवाकिरन् ॥ ५७ ॥ रामस्तैः सुरसंघातैः सहितः सैनिकैर्वृतः ॥ सीतासौमित्रिसहितः समारुह्य च पुष्पकम् ॥ ५८ ॥ तथाभिषिच्य राजानं लंकायां च बिभीषणम् ॥ कपिसेनावृतो रामो गन्धमादनमन्वगात् ॥५९॥ परिशोध्य च वैदेहीं गंधमादनपर्वते ॥ रामं कमलपत्राक्षं स्थितवानरसंवृतम् ॥ ६० ॥ हतलंकेश्वरं वीरं सानुजं सबिभीषणम् ॥ सभार्यं देववृंदैश्च सेवितं मुनिपुंगवैः ॥ ६१ ॥ मुनयोऽभ्यागता द्रष्टुं दंडकारण्यवासिनः ॥ अगस्त्यं ते पुरस्कृत्य तुष्टुवुर्मैथिलीपतिम् ॥ ६२ ॥ ॥ मुनय ऊचुः ॥ ॥ नमस्ते रामचंद्राय लोकानुग्रहकारिणे ॥ अरावणं जगत्कर्तुमवतीर्णाय भूतले ॥ ६३ ॥ ताटिकादेहसंहर्त्रे गाधिजाध्वररक्षिणे ॥ नमस्ते जितमारीच सुबाहुप्राणहारिणे ॥ ६४ ॥ अहल्यामुक्तिसंदायिपादपंकजरेणवे ॥ नमस्ते हरकोदण्डलीलाभञ्जनकारिणे ॥ ६५ ॥ नमस्ते मैथिलीपाणिग्रहणोत्सवशालिने ॥

१ कुबेरमिश्रितजलैः–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तेषामदृश्यानां दुरात्मनाम् ॥ १४ ॥ अन्तर्धानवधं तत्र चकार स्म बिभीषणः ॥ ते दृश्यमाना बलिभिर्हरिभिर्दूरपातिभिः ॥ १५ ॥ निहताः सर्वतश्चैते न्यपतन्वै गतासवः ॥ अमृष्यमाणः सबलो रावणो निर्ययावथ ॥ १६ ॥ व्यूह्य तान्वानरान्सर्वान्न्यवारयत सायकैः ॥ राघवस्त्वथ निर्याय व्यूढानीको दशाननम् ॥ १७ ॥ प्रत्ययुध्यत वेगेन द्वंद्वयुद्धमभूत्तदा ॥ युयुधे लक्ष्मणेनाथ इंद्रजिद्रावणात्मजः ॥ १८ ॥ विरूपाक्षेण सुग्रीवस्तारेयेणापि खर्वटः ॥ पौंड्रेण च नलस्तत्र पुटेशः पनसेन च ॥ १९ ॥ अन्येपि कपयो वीरा राक्षसैर्द्वंद्वमेत्य तु ॥ चक्रुर्युद्धं सुतुमुलं भीरूणां भयवर्द्धनम् ॥ २० ॥ अथ राक्षांसि भिन्नानि वानरैर्भीमविक्रमैः ॥ प्रदुद्रुवू रणादाशु लंकां रावणपालिताम् ॥ २१ ॥ भग्नेषु सर्वसैन्येषु रावणप्रेरितेन वै ॥ पुत्रेणेंद्रजिता युद्धे नागास्त्रैरतिदारुणैः ॥ २२ ॥ विद्धौ दाशरथी विप्रा उभौ तौ रामलक्ष्मणौ ॥ मोचितौ वैनतेयेन गरुडेन महात्मना ॥ २३ ॥ तत्र प्रहस्तस्तरसा समभ्येत्य बिभीषणम् ॥ गदया ताडयामास विनद्य रणकर्कशः ॥ २४ ॥ स तयाभिहतो धीमान्गदया भीमवेगया ॥ नाकंपत महाबाहुर्हिमवानिव सुस्थितः ॥ २५ ॥ ततः प्रगृह्य विपुलामष्टघंटां बिभीषणः ॥ अभिमंत्र्य महाशक्तिं चिक्षेपास्य शिरः प्रति ॥२६॥ पतंत्या स तया वेगाद्राक्षसोऽशनिना यथा ॥ हृतोत्तमांगो ददृशे वातरुग्ण इव द्रुमः ॥२७॥ तं दृष्ट्वा निहतं संख्ये प्रहस्तं क्षणदाचरम्[1] ॥ अभिदुद्राव धूम्राक्षो वेगेन महता कपीन् ॥ २८ ॥ कपिसैन्यं समालोक्य विद्रुतं पवनात्मजः॥ धूम्राक्षमाजघानाशु शरेण रणमूर्धनि ॥२९॥ धूम्राक्षं निहतं दृष्ट्वा हतशेषा निशाचराः ॥ सर्वं राज्ञे यथावृत्तं रावणाय न्यवेदयन् ॥३०॥ ततः शयानं लंकेशः कुम्भकर्णमबोधयत् ॥ प्रबुद्धं प्रेषयामास युद्धाय स च रावणः ॥ ३१ ॥ आगतं कुम्भकर्णं तं ब्रह्मास्त्रेण तु लक्ष्मणः ॥ जघान समरे क्रुद्धो गतासुर्न्यपतच्च सः ॥ ३२ ॥ दूषणस्यानुजौ तत्र वज्रवेगप्रमाथिनौ ॥ हनुमन्नीलनिहतौ रावणप्रतिमौ रणे ॥ ३३ ॥ वज्रदंष्ट्रं समवधीद्विश्वकर्मसुतो नलः ॥ अकंपनं च न्यहनत्कुमुदो वानरर्षभः ॥ ३४ ॥ षष्ठ्यां पराजितो राजा प्राविशच्च पुरीं ततः ॥ अतिकायो लक्ष्मणेन हतश्च त्रिशिरास्तथा ॥ ३५ ॥ सुग्रीवेण हतौ युद्धे देवांतकनरांतकौ ॥ हनूमता हतौ युद्धे कुम्भकर्णसुतावुभौ ॥ ३६ ॥ बिभीषणेन निहतो मकराक्षः खरात्मजः ॥ तत इन्द्रजितं पुत्रं चोदयामास रावणः ॥ ३७ ॥ इन्द्रजिन्मोहयित्वा तौ भ्रातरौ रामलक्ष्मणौ ॥ घोरैः शरैरंगदेन हतवाहो दिवि स्थितः ॥ ३८ ॥ कुमुदांगदसुग्रीवनलजांबवदादिभिः ॥ सहिता वानराः सर्वे न्यपतंस्तेन घातिताः ॥ ३९ ॥ एवं निहत्य समरे ससैन्यौ रामलक्ष्मणौ ॥ अंतर्दधे तदा व्योम्नि मेघनादो महा

१ क्षणदाचरम्—रात्रिचरम्—राक्षसम्—इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

च सरलं दद्याद्रामेश्वराय यः ॥ स भूमाविह जायेत धनाढ्यो वेदपारगः ॥ ३३ ॥ मुक्ताभरणवस्त्राणि महार्हाणि ददाति यः ॥ राम
नाथाय देवाय नासौ दौर्गत्यमाप्नुयात् ॥ ३४ ॥ रामनाथमहालिंगं गंगातोयैः समाहृतैः ॥ योऽभिषिंचत्यसौ पूज्यः शिवस्यापि न
संशयः ॥ ३५ ॥ यावन्न याति मरणं यावन्नाक्रमते जरा ॥ यावन्नेंद्रियवैकल्यं तावदेव द्विजोत्तमाः ॥३६॥ तावदेव महादेवो रामनाथो मुमुक्षुभिः ॥
वन्द्यः पूज्यश्च मंतव्यः स्तुत्यश्च सततं शिवः ॥ ३७ ॥ रामेश्वरमहालिंगपूजातुल्यो न विद्यते ॥ धर्मः सर्वपुराणेषु सर्वशास्त्रेषु वै तथा ॥ ३८ ॥
रामनाथेश्वरं देवं महाकारुणिकं प्रभुम् ॥ भक्त्या भजंति ये नित्यं ते भूलोके सुखान्विताः ॥ ३९ ॥ भुक्त्वा भोगान्बहुसुखान्पुत्रदारयुता भृशम् ॥
एतच्छरीरपातांते मुक्तिं यास्यंति शाश्वतीम् ॥ १४० ॥ ॥ श्रीसूत उवाच ॥ ॥ एवं वः कथितं विप्रा रामनाथस्य वै भवम् ॥ यस्त्वेत
च्छृणुयान्नित्यं पठते च सभक्तिकम् ॥ ४१ ॥ स रामनाथसेवायाः फलमाप्नोत्यनुत्तमम् ॥ धनुष्कोटिमहातीर्थस्नानपुण्यं च यास्यति ॥ ४२ ॥
इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे सेतुमाहात्म्ये रामनाथप्रशंसावर्णनंनाम त्रिचत्वारिंशोऽध्यायः ॥ ४३ ॥
॥ ॥ ऋषय ऊचुः ॥ ॥ सर्ववेदार्थतत्त्वज्ञ पुराणार्णवपारग ॥ व्यासपादांबुजद्वंद्वनमस्कारहताशुभ ॥ १ ॥ पुराणार्थोपदेशेन सर्वप्राण्युपका
रक ॥ त्वया ह्यनुगृहीताः स्म पुराणकथनाद्वयम् ॥ २ ॥ अधुना सेतुमाहात्म्यकथनात्सुतरां मुने ॥ वयं कृतार्थाः संजाता व्यासशिष्य महामते ॥
॥ ३ ॥ यथा प्रातिष्ठिपल्लिंगं रामो दशरथात्मजः ॥ तच्छ्रोतुं वयमिच्छामस्त्वमिदानीं वदस्व नः ॥ ४ ॥ ॥ श्रीसूत उवाच ॥ ॥ यदर्थं स्थापितं
लिंगं गन्धमादनपर्वते ॥ रामचन्द्रेण विप्रेंद्र तदिदानीं ब्रवीमि वः ॥ ५ ॥ हृतभार्यो वनाद्रामो रावणेन बलीयसा ॥ कपिसेनायुतो धीरः ससौमि
त्रिर्महाबलः ॥६॥ महेंद्रं गिरिमासाद्य व्यलोकयत वारिधिम् ॥ तस्मिन्नपारे जलधौ कृत्वा सेतुं रघूद्वहः ॥७॥ तेन गत्वा पुरीं लंकां रावणेनाभिरक्षि
ताम् ॥ अस्तंगते सहस्रांशौ पौर्णमास्यां निशामुखे ॥८॥ रामः ससैनिको विप्राः सुवेलगिरिमारुहत् ॥ ततः सौधस्थितं रात्रौ दृष्ट्वा लंकेश्वरं बली ॥
॥ ९ ॥ सूर्यपुत्रोऽस्य मुकुटं पातयास भूतले ॥ राक्षसो भग्नमुकुटः प्रविवेश गृहोदरम् ॥ १० ॥ गृहं प्रविष्टे लंकेशे रामः सुग्रीवसंयुतः ॥ सानुजः
सेनया सार्द्धमवरुह्य गिरेस्तटात् ॥११॥ सेनां न्यवेशयद्वीरो रामो लंकासमीपतः ॥ ततो निवेशमानांस्तान्वानरान्रावणानुगाः ॥ १२ ॥ अभिज
ग्मुर्महाकायाः सायुधाः सहसैनिकाः ॥ पर्वणः पूतनो जृंभः खरः क्रोधवशो हरिः ॥१३॥ प्रारुजश्चारुजश्चैव प्रहस्तश्चेतरे तथा ॥ ततोऽभिपततां

१ धर्मशास्त्रेषु–इ०पा० । १ पूर्वणः पृतनः–इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धनुष्कोटौ रामनाथेत्युदीर्य यः ॥ ७ ॥ यत्र क्वाप्याचरेत्स्नानं सेतुस्नानफलं लभेत् ॥ सुधाप्रलिप्तं यः कुर्याद्रामनाथशिवालयम् ॥ ८ ॥ तत्पुण्यं गदितुं नाहं शक्तो वर्षशतादपि ॥ नवीकरोति यो मर्त्यो रामनाथशिवालयम् ॥ ९ ॥ कर्तुः शतगुणं ज्ञेयं तस्य पुण्यफलं द्विजाः ॥ छिन्नं भिन्नं च यः सम्यग्रामनाथशिवालयम् ॥ ११० ॥ करोति भक्त्या पुरुषो ब्रह्महत्यायुतं दहेत् ॥ रामनाथस्य पुरतो दीपानारोपयन्मुदा ॥ ११ ॥ अविद्यापटलं भित्त्वा याति ब्रह्म सनातनम् ॥ घृतं तैलं तथा मुद्गाञ्छर्करास्तंडुलान्गुडान् ॥ १२ ॥ प्रयच्छन्रामनाथाय देवेंद्रपदमश्नुते ॥ रामनाथमहालिंगदर्शनादर्चनात्स्मृतेः ॥ १३ ॥ स्पर्शनादपि पापानि विलयं यांति तत्क्षणात् ॥ रामनाथाय यो दद्यान्महाघंटां च दर्पणम् ॥१४॥ विमानशतसंभोगैश्चिरं शिवपुरे वसेत् ॥ भेरीमृदंगपटहनिःसाणमुरजादिकम् ॥ १५ ॥ वंशकांस्यादिवादित्रं तथा वाद्यांतराणि च ॥ प्रयच्छन्रामनाथाय महादेवाय सादरम् ॥ १६ ॥ स विमानैर्महाभोगैर्वाद्यघोषसमन्वितैः ॥ अनेकयुगपर्यंतं शिवलोके महीयते ॥ १७ ॥ रामनाथं समुद्दिश्य यद्दत्तं स्वल्पमादरात् ॥ तदनंतफलं दातुः परत्र भवति ध्रुवम् ॥ १८ ॥ रामेश्वरे महाक्षेत्रे रामनाथस्य सन्निधौ ॥ वसन्मुक्तिमवाप्नोति पुनरावृत्तिवर्जिताम् ॥ ॥ १९ ॥ आयुः प्रयाति त्वरितं त्वरितं याति यौवनम् ॥ त्वरितं संपदो यांति दारपुत्रादयस्तथा ॥ १२० ॥ राजादिभिर्धनं बाध्यं गृहक्षेत्रादिकं तथा ॥ सर्वं च क्षणिकं विप्रा गृहोपकरणादिकम् ॥ २१ ॥ तस्मात्सर्वं परित्यज्य संसारस्योपलालनम् ॥ रामेश्वरमहालिंगमापन्नार्तिहरं नृणाम् ॥ ॥ २२ ॥ श्रोतव्यं कीर्तितव्यं च स्मर्तव्यं च मनीषिभिः ॥ रामेश्वराय देवाय यो वै ग्रामान्प्रयच्छति ॥ २३ ॥ स हि प्रारब्धदेहांते शिव एव प्रजायते ॥ पात्राणामुत्तमं पात्रं रामनाथो महेश्वरः ॥ २४ ॥ तस्मै दत्त्वा द्विजाः सत्यमनंतं सुखमश्नुते ॥ रामनाथमहालिंगदर्शनावधि पातकम् ॥ ॥ २५ ॥ दत्त्वा तस्मै जनः किंचित्सार्वभौमो भवेद्ध्रुवम् ॥ तालवृंतं ध्वजं छत्रं चंदनं गुग्गुलुं तथा ॥ २६ ॥ ताम्रकांस्यादिरजतहेमरत्नमयान्घटान् ॥ प्रयच्छंत्यभिषेकार्थं रामनाथस्य ये नराः ॥ २७ ॥ भूमंडलाधिपतयो जायंते ते भवांतरे ॥ रामनाथस्य पूजार्थं पुष्पाण्युत्पादयंति ये ॥ ॥ २८ ॥ अश्वमेधादियागानां फलान्यद्धाप्नुवंति ते ॥ रामेश्वरे महालिंगे पूजिते नमिते स्मृते ॥ २९ ॥ श्रुते दृष्टे च विप्रेंद्रा दुर्लभं नास्ति किंचन ॥ रामनाथमहालिंगं सेवितुं यः पुमान्व्रजेत् ॥ १३० ॥ तं दृष्ट्वा भयमाप्नोति तस्य पापौघ आशु वै ॥ रामनाथो महादेवो दृष्टो यदि भवेन्नृभिः ॥ ॥ ३१ ॥ किं वेदैः किमु वा शास्त्रैः किं वा तीर्थनिषेवणैः ॥ चंदनं कुंकुमं कोष्ठं कस्तूरीं गुग्गुलुं तथा ॥ ३२ ॥ मृगनाभिं

१ सोऽपि कैलासमाप्नुयात्–इ० पा० । २ मुमुक्षुभिः–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रामनाथालयं हेम्ना धनाढ्यः कुरुते नरः ॥ मृदा दरिद्रः कुरुते तयोः पुण्यं समं स्मृतम् ॥ ८१ ॥ रामनाथमहालिंगस्नानकाले द्विजोत्तमाः ॥ त्रिसंध्यं गेयनृत्ते च मुखवाद्यैश्च काहलम् ॥ ८२ ॥ वाद्यान्यन्यानि कुरुते यः पुमान्भक्तिपूर्वकम् ॥ स महापातकैर्मुक्तो रुद्रलोके महीयते ॥ ॥ ८३ ॥ योभिषेकस्य समये रामनाथस्य शूलिनः ॥ रुद्राध्यायं च चमकं तथा पुरुषसूक्तकम् ॥ ८४ ॥ त्रिसुपर्णं पंचशांतिं पावमान्यादिकं तथा ॥ जपेत्प्रीतियुतो विप्रा नरकं न समश्नुते ॥ ८५ ॥ गवां क्षीरेण दध्ना च पंचगव्यैर्घृतैस्तथा ॥ रामनाथमहालिंगस्नानं नरकनाशनम् ॥ ॥ ८६ ॥ रामनाथमहालिंगं घृतेन स्नापयेच्च यः ॥ कल्पजन्मार्जितं पापं तत्क्षणादेव नश्यति ॥ ८७ ॥ रामनाथमहालिंगं गोक्षीरैः स्नापयन्नरः ॥ कुलैकविंशमुत्तार्य शिवलोके महीयते ॥ ८८ ॥ रामनाथमहालिंगं दध्ना संस्नापयन्नरः ॥ सर्वपापविनिर्मुक्तो विष्णुलोके महीयते ॥ ८९ ॥ अभ्यंगं तिलतैलेन रामेश्वरशिवस्य यः ॥ करोति हि सकृद्भक्त्या स कुबेरगृहे वसेत् ॥ ९० ॥ रामनाथमहालिंगे स्नानमिक्षुरसेन यः ॥ सकृदप्याचरेद्भक्त्या चन्द्रलोकं समश्नुते ॥ ९१ ॥ लिकुचाम्ररसोत्पन्नसारेण स्नापयन्नरः ॥ रामनाथमहालिंगं पितृलोकं समश्नुते ॥ ९२ ॥ नालिकेरजलैः स्नानं रामनाथमहेश्वरे ॥ ब्रह्महत्यादिपापानां नाशनं परिकीर्तितम् ॥ ९३ ॥ रामनाथमहालिंगं रंभापक्वैर्विमर्दयन् ॥ विनाश्य सकलं पापं वायुलोके महीयते ॥ ९४ ॥ वस्त्रपूतेन तोयेन रामनाथं महेश्वरम् ॥ स्नापयन्वारुणं लोकमाप्नोति द्विजसत्तमाः ॥ ९५ ॥ चंदनोदकधाराभी रामनाथं महेश्वरम् ॥ स्नापयेत्पुरुषो विप्रा गांधर्वं लोकमाप्नुयात् ॥ ९६ ॥ पुष्पवासिततोयेन हेमसंपृक्तवारिणा ॥ पद्मवासिततोयेन स्नानाद्रामेश्वरस्य तु ॥ ९७ ॥ महेंद्रासनमारुह्य तेनैव सह मोदते ॥ पाटलोत्पलकल्हारपुन्नागकरवीरकैः ९८ ॥ वासितैर्वारिभिर्विप्रा रामेश्वरमहेश्वरम् ॥ अभिषिच्य महद्भिश्च पातकैः स विमुच्यते ॥ ९९ ॥ यानि चान्यानि पुष्पाणि सुरभीणि महांति च ॥ तद्गंधवासितैस्तोयैरभिषिच्य दयानिधिम् ॥ १०० ॥ रामेश्वरमहालिंगं शिवलोके[1] महीयते ॥ एलाकर्पूरलामज्जवासितैः शुद्धवारिभिः ॥ १ ॥ रामेश्वरमहालिंगमभिषिच्य विशुद्धधीः ॥ आग्नेयं लोकमासाद्य सर्वान्कामान्समश्नुते ॥ २ ॥ रामनाथाभिषेकार्थं मृद्घटान्यः प्रयच्छति ॥ इह लोके शतायुः स्यात्सर्वकामसमृद्धिमान् ॥ ३ ॥ ताम्रकुंभप्रदानेन देवेंद्रत्वमवाप्नुयात् ॥ रौप्यकुंभप्रदानेन ब्रह्मलोकं समश्नुते ॥ ४ ॥ हेमकुंभप्रदानेन शिवलोके महीयते ॥ रत्नकुंभप्रदानेन शिवसामीप्यमश्नुते[2] ॥ ५ ॥ रामनाथाभिषेकार्थं नैवेद्यार्थमपि द्विजाः ॥ यो गां पयस्विनीं दद्यात्सोऽश्वमेधफलं लभेत् ॥ ६ ॥ प्राप्नोति शिववेषं च देहांते शिवलोकभाक् ॥ रामसेतौ

१ ब्रह्मलोके-इ० पा०। २ शिवसायुज्यम्-इ० पा०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यास्यति ॥ ५५ ॥ सर्वयज्ञतपोदानतीर्थस्नानेषु यत्फलम् ॥ तत्फलं कोटिगुणितं रामनाथस्य सेवया ॥ ५६ ॥ रामनाथेश्वरं लिंगं चिंतयन्घटिका
द्वयम् ॥ कुलैकविंशमुद्धृत्य शिवलोके महीयते ॥ ५७ ॥ दिनमेकं तु यः पश्येद्रामनाथं महेश्वरम् ॥ इहैव धनवान्भूत्वा सोऽन्ते रुद्रश्च
जायते ॥ ५८ ॥ यः स्मरेत्प्रातरुत्थाय रामनाथं महेश्वरम् ॥ अनेनैव शरीरेण स शिवो वर्तते भुवि ॥ ५९ ॥ रामनाथमहालिंगद्रष्टुर्दर्शनमात्रतः ॥
अन्येषां प्राणिनां पापं तत्क्षणादेव नश्यति ॥ ६० ॥ रामनाथेश्वरं लिंगं मध्याह्ने यस्तु पश्यति ॥ सुरापानसहस्राणि तस्य नश्यंति तत्क्षणात् ॥
॥ ६१ ॥ सायंकाले पश्यति यो रामनाथं सभक्तिकम् ॥ गुरुस्त्रीगमनोत्पन्नपातकं तस्य नश्यति ॥ ६२ ॥ सायंकाले महास्तोत्रैः स्तौति
रामेश्वरं तु यः ॥ स्वर्णस्तेयसहस्राणि तस्य नश्यंति तत्क्षणात् ॥ ६३ ॥ स्नानं च धनुषः कोटौ रामनाथस्य दर्शनम् ॥ इति लभ्येत वै पुंसां किं
गंगाजलसेवया ॥ ६४ ॥ रामनाथमहालिंगसेवया यन्न लभ्यते ॥ तदन्यद्धर्मजालेन नैव लभ्येत कर्हिचित् ॥ ६५ ॥ रामनाथं महालिंगं यः
कदापि न पश्यति ॥ संकरः स तु विज्ञेयो न पितुर्बीजसंभवः ॥ ६६ ॥ रामनाथेतिशब्दं यस्त्रिः पठेत्प्रातरुत्थितः ॥ तस्य पूर्वदिनोत्पन्नपातकं
नश्यति क्षणात् ॥ ६७ ॥ रामनाथे महालिंगे भक्तरक्षणदीक्षिते ॥ भोजने विद्यमानेऽपि याचनाः किं प्रयास्यथ ॥ ६८ ॥ रामनाथमहालिंगे
प्रसन्ने करुणानिधौ ॥ नश्यंति सकलाः क्लेशा यथा सूर्योदये हिमम् ॥ ६९ ॥ प्राणोत्क्रमणवेलायां रामनाथं स्मरेद्यदि ॥ जन्मनेऽसौ न कल्पेत
भूयः शंकरतामियात् ॥ ७० ॥ रामनाथ महादेव मां रक्ष करुणानिधे ॥ इति यः सततं ब्रूयात्कलिनासौ न बाध्यते ॥ ७१ ॥ रामनाथ
जगन्नाथ धूर्जटे नीललोहित ॥ इति यः सततं ब्रूयाद्बाध्यतेऽसौ न मायया ॥ ७२ ॥ नीलकण्ठ महादेव रामेश्वर सदाशिव ॥ इति ब्रुवन्सदा
जंतुर्नैव कामेन बाध्यते ॥ ७३ ॥ रामेश्वर यमाराते कालकूटविषादन ॥ इतीरयञ्जनो नित्यं न क्रोधेन प्रपीड्यते ॥ ७४ ॥ रामनाथालयं यस्तु
दारुभिः कुरुते नरः ॥ स पुमान्स्वर्गमाप्नोति त्रिकोटिकुलसंयुतः ॥ ७५ ॥ इष्टकाभिस्तु यः कुर्यात्स वैकुण्ठमवाप्नुयात् ॥ शिलाभिः कुरुते यस्तु
स गच्छेद्ब्रह्मणः पदम् ॥ ७६ ॥ स्फटिकादिशिलाभेदैः कुर्वन्नस्यालयं जनः ॥ शिवलोकमवाप्नोति विमानवरमास्थितः ॥ ७७ ॥ रामनाथालयं
ताम्रैः कुर्वन्भक्तिपुरःसरम् ॥ शिवसामीप्यमाप्नोति शिवस्यार्द्धासनस्थितः ॥ ७८ ॥ रामेश्वरालयं रूप्यैः कुर्वन्वै मानवो मुदा ॥ शिवसारूप्य
माप्नोति शिववन्मोदते सदा ॥ ७९ ॥ रामनाथालयं हेम्ना यः करोति सभक्तिकम् ॥ स नरो मुक्तिमाप्नोति शिवसायुज्यरूपिणीम् ॥ ८० ॥

१ कालेन–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

नरो मुक्तिमाप्नोति शिवसायुज्यरूपिणीम् ॥ २ ॥ दशवर्षैस्तु यत्पुण्यं क्रियते तु कृते युगे ॥ त्रेतायामेकवर्षेण तत्पुण्यं साध्यते नृभिः ॥ ३ ॥
द्वापरे तच्च मासेन तद्दिनेन कलौ युगे ॥ तत्फलं कोटिगुणितं निमिषे निमिषे नृणाम् ॥ ४ ॥ निःसंदेहं भवेदेवं रामनाथविलोकिनाम् ॥ रामेश्वर
महालिंगे तीर्थानि सकलान्यपि ॥५॥ विद्यंते सर्वदेवाश्च मुनयः पितरस्तथा ॥ एककालं द्विकालं वा त्रिकालं सर्वदैव वा ॥६॥ ये स्मरंति महादेवं
रामनाथं विमुक्तिदम् ॥ कीर्तयंत्यथवा विप्रास्ते विमुक्ताघपंजराः॥७॥ सच्चिदानंदमद्वैतं सांबं रुद्रं प्रयांति वै ॥ रामेश्वराख्यं यल्लिंगं रामचन्द्रेण पूजि
तम् ॥८॥ यस्य स्मरणमात्रेण यमपीडापि नो भवेत् ॥ रामेश्वरमहालिंगं येऽर्चयंति सकृन्नराः ॥९॥ न मानुषास्ते विज्ञेयाः किं तु रुद्रा न संशयः ॥
रामेश्वरमहालिंगं नार्चितं येन भक्तितः ॥ १० ॥ चिरकालं स संसारे संसरेद्दुःखसंकुले ॥ रामेश्वरमहालिंगं ये पश्यंति सकृन्नराः ॥ ११ ॥
किं दानैः किं व्रतैस्तेषां किं तपोभिः किमध्वरैः ॥ रामेश्वरमहालिंगं यो न चिंतयति क्षणम् ॥१२॥ अज्ञानी स च पापी स्यात्स मूको बधिरस्तथा ॥
स जडोऽधश्च विज्ञेयश्छिद्रं[1] तस्य सदा भवेत् ॥ १३ ॥ धनक्षेत्रसुतादीनां तस्य हानिस्तथा भवेत् ॥ रामेश्वरमहालिंगे सकृद्दृष्टे मुनीश्वराः ॥ १४ ॥
किं काश्या गयया किं वा प्रयागेणापि किं फलम् ॥ दुर्लभं प्राप्य मानुष्यं मानवा यत्र भूतले ॥ १५ ॥ रामनाथमहालिंगं नमस्यंत्यर्चयंति च ॥
जन्म तेषां हि सफलं ते कृतार्थाश्च नेतरे ॥१६॥ रामेश्वरमहालिंगे पूजिते वा स्मृतेपि वा ॥ विष्णुना ब्रह्मणा किं वा शक्रेणाप्यखिलामरैः ॥१७॥
रामनाथमहालिंगं भक्तियुक्ताश्च ये नराः ॥ तेषां प्रणामस्मरणपूजायुक्तास्तु ये नराः ॥ १८ ॥ न ते पश्यंति दुःखानि नैव यांति यमालयम् ॥
ब्रह्महत्यासहस्राणि सुरापानायुतानि च ॥१९॥ दृष्टे रामेश्वरे देवे विलयं यांति कृत्स्नशः ॥ ये वांछंति सदा भोगं राज्यं च त्रिदशालये ॥२०॥ रामे
श्वरमहालिंगं ते नमंतु सकृन्मुदा ॥ यानि कानि च पापानि जन्मकोटिकृतान्यपि ॥ २१ ॥ तानि रामेश्वरे दृष्टे विलयं यांति सर्वदा ॥ संपर्का
त्कौतुकाल्लोभाद्भयाद्वापि च संस्मरन् ॥ २२ ॥ रामेश्वरमहालिंगं नेहामुत्र च दुःखभाक् ॥ रामेश्वरमहालिंगं कीर्तयन्नर्चयन्नपि ॥ २३ ॥ अवश्यं
रुद्रसारूप्यं लभते नात्र संशयः ॥ यथैधांसि समिद्धोऽग्निर्भस्मसात्कुरुते क्षणात् ॥ २४ ॥ तथा पापानि सर्वाणि रामेश्वरविलोकनात् ॥ रामेश्व
रमहालिंगभक्तिरष्टविधा स्मृता ॥ २५ ॥ तद्भक्तजनवात्सल्यं तत्पूजापरितोषणम् ॥ स्वयं तत्पूजनं भक्त्या तदर्थे देहचेष्टितम् ॥ २६ ॥ तन्माहा
त्म्यकथानां च श्रवणेष्वादरस्तथा ॥ स्वरनेत्रशरीरेषु विकारस्फुरणं तथा ॥ २७ ॥ रामेश्वरमहालिंगस्मरणं संततं तथा ॥ रामेश्वरमहालिंगमाश्रि

१ दारिद्री स सदा भवेत्–इ०पा० । २ तेषां पापविनाशः स्यात्–इ०.पा० ।

CC-0. In Public Domain. Digitization by eGangotri

त्यैवोपजीवनम् ॥ २८ ॥ एवमष्टविधा भक्तिर्यस्मिन्म्लेच्छेऽपि विद्यते ॥ स एव मुक्तिक्षेत्राणां दायभाक्परिकीर्त्यते ॥ २९ ॥ भक्त्या त्वनन्यया मुक्तिर्ब्रह्मज्ञानेन निश्चिता ॥ वेदांतशास्त्रश्रवणाद्यतीनामूर्ध्वरेतसाम् ॥ ३० ॥ सा च मुक्तिर्विना ज्ञानदर्शनश्रवणोद्भवम् ॥ यत्राश्रमं विना विप्रा विरक्तिं च विना तथा ॥ ३१ ॥ सर्वेषां चैव वर्णानामखिलाश्रमिणामपि ॥ रामेश्वरमहालिंगदर्शनादेव केवलात् ॥ ३२ ॥ अपुनर्भवदा मुक्तिर्भविष्यत्यविलंबिता ॥ कृमिकीटाश्च देवाश्च मुनयश्च तपोधनाः ॥ ३३ ॥ तुल्या रामेश्वरक्षेत्रे रामनाथप्रसादतः ॥ पापं कृतं मयानेकमिति मा क्रियतां भयम् ॥ ३४ ॥ मा गर्वः क्रियतां पुण्यं मयाकारीति वा जनैः ॥ रामेश्वरमहालिंगे सांबरुद्रे विलोकिते ॥ ३५ ॥ न न्यूना नाधिकाश्च स्युः किं तु सर्वे जनाः समाः ॥ रामेश्वरमहालिंगं यः पश्यति सभक्तिकम् ॥ ३६ ॥ न तेन तुल्यतामेति चतुर्वेद्यपि भूतले ॥ रामेश्वरमहालिंगे भक्तो यः श्वपचोऽपि सन् ॥ ३७ ॥ तस्मै दानानि देयानि नान्यस्मै च त्रयीविदे ॥ या गतिर्योगयुक्तानां मुनीनामूर्ध्वरेतसाम् ॥ ३८ ॥ सा गतिः सर्वजंतूनां रामेश्वरविलोकिनाम् ॥ रामनाथशिवक्षेत्रे ये वसंति नरा द्विजाः ॥ ३९ ॥ ते सर्वे पञ्चवक्त्राः स्युश्चंद्रालंकृतमस्तकाः ॥ नागाभरणसंयुक्तास्तथैव वृषभध्वजाः ॥ ४० ॥ त्रिनेत्रा भस्मदिग्धांगाः कपालाकृतिशेखराः ॥ साक्षात्सांबा महादेवा भवेयुर्नात्र संशयः ॥ ४१ ॥ रामनाथशिवक्षेत्रं ये व्रजंति नरा मुदा ॥ पदेपदेऽश्वमेधानां प्राप्नुयुः सुकृतानि ते ॥ ४२ ॥ रामसेतुं समाश्रित्य रामनाथस्य तुष्टये ॥ ददाति ग्राममेकं यो ब्राह्मणाय सभक्तिकम् ॥४३॥ तेन भूः सकला दत्ता सशैलवनकानना ॥ पत्रं पुष्पं फलं तोयं रामनाथाय यो नरः ॥ ४४ ॥ भक्त्या ददाति तं रक्षेद्रामनाथो ह्यहर्निशम् ॥ रामनाथमहालिंगे सांबे कारुणिके शिवे ॥ ४५ ॥ अत्यंतदुर्लभा भक्तिस्तत्पूजाप्यतिदुर्लभा ॥ स्तोत्रं च दुर्लभं प्रोक्तं स्मरणं चातिदुर्लभम् ॥ ४६ ॥ रामनाथेश्वरं लिंगं महादेवं त्रिलोचनम् ॥ शरणं ये प्रपद्यंते भक्तियुक्तेन चेतसा ॥ ४७ ॥ लाभस्तेषां जयस्तेषामिह लोके परत्र च ॥ रामनाथमहालिंगविषया यस्य शेमुषी ॥ ४८ ॥ दिवारात्रं च भवति स वै धन्यतरो भुवि ॥ रामनाथेश्वरं लिंगं यो न पूजयते शिवम् ॥ ४९ ॥ नायं भुक्तेश्च मुक्तेश्च राज्यानामपि भाजनम् ॥ रामेश्वरमहालिंगं यः पूजयति भक्तितः ॥ ५० ॥ भुक्तिमुक्त्योश्च राज्यानामसौ परमभाजनम् ॥ रामनाथार्चनसमं नाधिकं पुण्यमस्ति वै ॥ ५१ ॥ रामनाथेश्वरं लिंगं द्वेष्टि यो मोहमास्थितः ॥ ब्रह्महत्यायुतं तेन कृतं नरककारणम् ॥ ५२ ॥ तत्संभाषणमात्रेण मानवो नरकं व्रजेत् ॥ रामनाथपरा देवा रामनाथपरा मखाः ॥ ५३ ॥ रामनाथपराः सर्वे तस्मादन्यन्न विद्यते ॥ अतः सर्वं परित्यज्य रामनाथं समाश्रयेत् ॥ ५४ ॥ रामनाथमहालिंगं शरणं याति चेन्नरः ॥ दौर्मत्यं तस्य नास्त्येव शिवलोकं च

Nepal Sanskrit University, Balmeeki Campus

CC-0. In Public Domain. Digitization by eGangotri

विप्रा वाजिमेधफलं लभेत् ॥ नीलतीर्थं प्रवक्ष्यामि महापातकनाशनम् ॥ ४३ ॥ अग्निपुत्रेण नीलेन कृतं सेतौ विमुक्तिदम् ॥ नीलतीर्थे नरः स्नानात्सर्वपापविमोचितः ॥ ४४ ॥ बहुवर्ण्यस्य यागस्य फलं शतगुणं लभेत् ॥ नीलतीर्थे नरः स्नात्वा सर्वाभीष्टप्रदायिनि ॥ ४५ ॥ अग्निलोकमवाप्नोति सर्वकामसमृद्धिमान् ॥ गवाक्षेण कृतं तीर्थं गंधमादनपर्वते ॥ ४६ ॥ विद्यते स्नानमात्रेण नरकं नैव याति सः ॥ अंगदेन कृतं तीर्थमस्ति सेतौ विमुक्तिदे ॥ ४७ ॥ अत्र स्नानेन मनुजो देवेंद्रत्वं समश्नुते ॥ गजेन गवयेनात्र शरभेण महौजसा ॥ ४८ ॥ कुमुदेन हरेणापि पनसेन बलीयसा ॥ कृतानि यानि तीर्थानि तथाऽन्यैः सर्ववानरैः ॥ ४९ ॥ रामसेतौ महापुण्ये गन्धमादनपर्वते ॥ तेषु तीर्थेषु यः स्नाति सोऽमृतत्वं समश्नुते ॥ ५० ॥ बिभीषणकृतं तीर्थमस्ति पापविमोचनम् ॥ महादुःखप्रशमनं महारोगनिबर्हणम् ॥ ५१ ॥ महापातकसंघानामनलोपममुत्तमम् ॥ कुंभीपाकादिनरकक्लेशनाशनकारणम् ॥ ५२ ॥ दुःस्वप्ननाशनं धन्यं महादारिद्र्यबाधनम् ॥ तत्र यो मनुजः स्नायात्तस्य नास्तीह पातकम् ॥ ५३ ॥ स वैकुंठमवाप्नोति पुनरावृत्तिवर्जितम् ॥ बिभीषणस्य सचिवैः कृतं तीर्थचतुष्टयम् ॥ ५४ ॥ तत्र स्नानेन मनुजः सर्वपापैः प्रमुच्यते ॥ सरयूश्च नदी विप्रा गंधमादनपर्वते ॥ ५५ ॥ रामनाथं महादेवं सेवितुं वर्तते सदा ॥ तत्र स्नात्वा नराः सर्वे सर्वपातकवर्जिताः ॥ ५६ ॥ सर्वयज्ञतपस्तीर्थसेवाफलमवाप्नुयुः ॥ दशकोटिसहस्राणि तीर्थानि द्विजसत्तमाः ॥ ५७ ॥ वसंत्यस्मिन्महापुण्ये गन्धमादनपर्वते ॥ गंगाद्याः सरितः सर्वास्तथा वै सप्त सागराः ॥ ५८ ॥ ऋष्याश्रमाणि पुण्यानि तथा पुण्यवनानि च ॥ अनुत्तमानि क्षेत्राणि हरिशंकरयोस्तथा ॥ ५९ ॥ सान्निध्यं कुर्वते नित्यं गन्धमादनपर्वते ॥ उपवीतांतरं तीर्थं प्रोक्तवांश्चतुराननः ॥ ६० ॥ त्रयस्त्रिंशत्कोट्योऽत्र देवाः पितृगणैः सह ॥ सर्वैश्च मुनिभिः सार्द्धं यक्षैः सिद्धैश्च किन्नरैः ॥ वसंति सेतौ देवस्य रामचन्द्रस्य चाज्ञया ॥ ६१ ॥ ॥ श्रीसूत उवाच ॥ ॥ एवमुक्तं द्विजश्रेष्ठा तीर्थानां वैभवं मया ॥ ६२ ॥ इदं पठन्वा शृण्वन्वा दुःखसंघाद्विमुच्यते ॥ कैवल्यं च समाप्नोति पुनरावृत्तिवर्जितम् ॥ ६३ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे सेतुमाहात्म्ये सकलतीर्थप्रशंसायामृणमोचनादितीर्थमाहात्म्यवर्णनंनाम द्विचत्वारिंशोऽध्यायः ॥ ४२ ॥ ॥ छ ॥ ॥ श्रीसूत उवाच ॥ ॥ अथेदानीं प्रवक्ष्यामि रामनाथस्य वैभवम् ॥ यच्छ्रुत्वा सर्वपापेभ्यो मुच्यमे मानवो भुवि ॥ १ ॥ रामप्रतिष्ठितं लिंगं यः पश्यति नरः सकृत् ॥ स

१ महाघौघनिबर्हणम्–इ०पा० । २ कैलासम्–इ०पा० । ३ सर्वपापविमोचिताः–इ०पा० । ४ यज्ज्ञात्वा–इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वाप्यन्य एव वा ॥ अस्मिंस्तीर्थवरे स्नात्वा वियोनिं न प्रयाति वै ॥ १७ ॥ पांडवानां महातीर्थे पुण्ययोगेषु यो नरः ॥ स्नायात्स मनुज
श्रेष्ठो नरकं नैव पश्यति ॥ १८ ॥ पांडवानां महातीर्थं सायं प्रातश्च यः स्मरेत् ॥ स स्नातः सर्वतीर्थेषु गंगादिषु न संशयः ॥ १९ ॥ इंद्रादिदेवता
भिश्च यत्रेष्टं दैत्यशांतये ॥ तदन्यद्देवतीर्थाख्यं विद्यते गंधमादने ॥ २० ॥ देवतीर्थे[1] नरः स्नात्वा सर्वपापविमोचितः ॥ प्राप्नुयादक्षयाँल्लोकान्सर्व
कामसमन्वितान् ॥ २१ ॥ जन्मप्रभृति यत्पापं स्त्रिया वा पुरुषेण वा ॥ कृतं तद्देवकुंडेस्मिन्स्नानात्सद्यो विनश्यति ॥ २२ ॥ यथा सुराणां सर्वेषा
मादिर्वै मधुसूदनः ॥ तथादिः सर्वतीर्थानां देवकुंडमनुत्तमम् ॥ २३ ॥ यस्तु वर्षशतं पूर्णमग्निहोत्रमुपासते ॥ यस्त्वेको देवकुंडेस्मिन्कदाचित्स्नान
माचरेत् ॥ २४ ॥ सममेव तयोः पुण्यं नात्र संदेहकारणम् ॥ दुर्लभं देवतीर्थेस्मिन्दानं वासश्च दुर्लभः ॥ २५ ॥ देवतीर्थाभिगमनं स्नानं चाप्य
तिदुर्लभम् ॥ देवतीर्थं समासाद्य देवर्षिपितृसेवितम् ॥ २६ ॥ अश्वमेधमवाप्नोति विष्णुलोकं[2] च गच्छति ॥ द्विदिनं त्रिदिनं चापि पंच वाथ षडेव वा
॥ २७ ॥ उषित्वा देवकुंडस्थतीरे नरकनाशने ॥ न मातृयोनिमाप्नोति सिद्धिं चाप्नोत्यनुत्तमाम् ॥ २८ ॥ त्रिरात्रस्नानतो ह्यत्र वाजपेयफलं भवेत् ॥
देवतीर्थस्मृतेः सद्यः पापेभ्यो मुच्यते नरः ॥ २९ ॥ अर्चयित्वा पितॄन्देवानेतत्तीर्थतटे नरः ॥ सर्वकामसमृद्धिः स्यात्सर्वयज्ञफलं लभेत् ॥ ३० ॥
एतत्तीर्थसमं पुण्यं न भूतं न भविष्यति ॥ तस्मादवश्यं स्नातव्यं देवतीर्थे मुमुक्षुभिः ॥ ३१ ॥ ऐहिकामुष्मिकफलप्राप्तिकामैश्च मानवैः ॥ देवतीर्थ
स्य माहात्म्यं संक्षिप्य कथितं द्विजाः ॥ ३२ ॥ विस्तरेणास्य माहात्म्यं मया वक्तुं न पार्यते[3] ॥ सुग्रीवतीर्थं वक्ष्यामि रामसेतौ विमुक्तिदे ॥ ३३ ॥
अत्र स्नात्वा नरो भक्त्या सूर्यलोकं समश्नुते ॥ सुग्रीवतीर्थे स्नानेन हयमेधफलं भवेत् ॥ ३४ ॥ ब्रह्महत्यादिपापानां निष्कृतिश्चापि जायते ॥ सुग्री
वतीर्थगमनाद्गोसहस्रफलं लभेत् ॥ ३५ ॥ स्मरणात्तस्य वेदानां पारायणफलं लभेत् ॥ दिनोपवासमात्रेण तस्य तीर्थस्य तीरतः ॥ ३६ ॥ महापात
कनाशः स्यात्प्रायश्चित्तं विना द्विजाः ॥ तत्राभिषेकं कुर्वाणः पितृदेवांश्च तर्पयेत् ॥ ३७ ॥ आप्तोर्यामस्य यज्ञस्य फलमष्टगुणं भवेत् ॥ सुग्रीवती
र्थस्नानेन नरमेधफलं लभेत् ॥ ३८ ॥ सुग्रीवतीर्थस्नानेन नरो जातिस्मरो भवेत् ॥ सुग्रीवतीर्थं भो विप्राः प्रयाताभीष्टसिद्धये ॥ ३९ ॥ सुग्रीवतीर्थमा
हात्म्यमेवं वः कथितं द्विजाः ॥ वैभवं नलतीर्थस्य त्विदानीं प्रब्रवीमि[5] वः ॥ ४० ॥ नलतीर्थे नरः स्नानात्स्वर्गलोकं समश्नुते ॥ नलतीर्थे सकृ
त्स्नानात्सर्वपापविमोचितः ॥ ४१ ॥ अग्निष्टोमातिरात्रादिफलमाप्नोत्यनुत्तमम् ॥ त्रिरात्रमुषितस्तस्मिंस्तर्पयन्पितृदेवताः ॥ ४२ ॥ सूर्यवद्भासते

१ देवकुंडे–इ० पा० । २ स्वर्गलोकम्–इ० पा० । ३ शक्यते–इ० पा० । ४ स्नानात्–इ० पा० । ५ प्रवदामि–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्दोषशांत्यर्थमुपायं वद सुव्रत ॥ ८१ ॥ येन मां प्रतिगृह्णीयुर्बांधवाः ससुहृज्जनाः ॥ ८२ ॥ कृपां मयि कुरुष्व त्वं शाकल्य हरिव
ल्लभ ॥ काश्यपेनैवमुक्तस्तु शाकल्योपि मुनीश्वरः ॥ क्षणं ध्यात्वा जगादैवं काश्यपं कृपया तदा ॥ ८३ ॥ ॥ शाकल्य उवाच ॥ ॥
अस्य पापस्य शांत्यर्थमुपायं प्रवदामि ते ॥ ८४ ॥ तत्कर्त्तव्यं त्वया शीघ्रं विलंबं मा कृथा द्विज ॥ दक्षिणांबुनिधौ सेतौ गंधमादनप
र्वते ॥ ८५ ॥ अस्ति तीर्थद्वयं विप्रा गायत्री च सरस्वती ॥ तत्र त्वं स्नानमात्रेण शुद्धो भूयाश्च तत्क्षणे ॥ ८६ ॥ गायत्र्या च सरस्वत्या जलवात
स्पृशो नरः ॥ विधूय सर्वपापानि स्वर्गं यास्यंति निर्मलाः ॥ ८७ ॥ तद्याहि शीघ्रं विप्र त्वं गायत्रीं च सरस्वतीम् ॥ इत्युक्तः काश्यपस्तेन शाक
ल्येन द्विजोत्तमाः ॥ ८८ ॥ नत्वा मुनिं च शाकल्यं तमापृच्छ्य मुनीश्वरम् ॥ तेन चैवाभ्यनुज्ञातः प्रययौ गन्धमादनम् ॥ ८९ ॥ तत्र गत्वा
च गायत्रीसरस्वत्यौ च काश्यपः ॥ नत्वा तीर्थद्वयं भक्त्या दण्डपाणिं च भैरवम् ॥ ९० ॥ संकल्पपूर्वं तत्तीर्थे सस्नौ नियमसंयुतः ॥ तीर्थद्वये
स्नानमात्रान्मुक्तपापोऽथ काश्यपः ॥ ९१ ॥ तीर्थद्वयस्य तीरेऽसौ किंचित्कालं तु तस्थिवान् ॥ तस्मिन्काले च गायत्रीसरस्वत्यौ मुनीश्वराः ॥
॥ ९२ ॥ प्रादुर्बभूवतुर्मूर्ते सर्वाभरणभूषिते ॥ देव्यौ ते स नमस्कृत्य काश्यपो भक्तिपूर्वकम् ॥ ९३ ॥ के युवां रूपसंपन्ने सर्वालंकारसंयुते ॥ इति
पप्रच्छ हृष्ट्वा ते काश्यपो हृष्टमानसः ॥ तेन पृष्टे च गायत्रीसरस्त्यौ तमूचतुः ॥ ९४ ॥ ॥ गायत्रीसरस्वत्यावूचतुः ॥ ॥ काश्यपावां हि
गायत्रीसरस्वत्यौ विधिप्रिये ॥ ९५ ॥ एतत्तीर्थस्वरूपेण नित्यं वर्तावहे त्वतः ॥ अत्र तीर्थद्वये स्नानादावां तुष्टे तवाधुना ॥ ९६ ॥ वरं मत्तो
वृणीष्व त्वं यदिष्टं काश्यप द्विज ॥ स्नांति तीर्थद्वये येऽत्र दास्यावस्तदभीप्सितम् ॥ ९७ ॥ श्रुत्वा वचस्तद्गायत्रीसरस्वत्योः स काश्यपः ॥ तुष्टाव
वाग्भिरग्र्याभिस्ते देव्यौ वेधसः प्रिये ॥ ९८ ॥ ॥ काश्यप उवाच ॥ ॥ चतुराननगेहिन्यौ जगद्धात्र्यौ नमाम्यहम् ॥ विद्यास्वरूपे गायत्री
सरस्वत्यौ शुभे उभे ॥ ९९ ॥ सृष्टिस्थित्यंतकारिण्यौ जगतो वेदमातरौ ॥ हव्यकव्यस्वरूपे च चंद्रादित्यविलोचने ॥ १०० ॥ सर्वदेवाधिपे वाणी
गायत्र्यौ सततं भजे ॥ गिरिजा कमला चापि युवामेव जगद्धिते ॥ १ ॥ युष्मद्दर्शनमात्रेण जगत्सृष्ट्यादिकल्पनम् ॥ युष्मन्निमेषात्सततं जगतां
प्रलयो भवेत् ॥ २ ॥ उन्मेषात्सृष्टिरभवद्वो गायत्रि सरस्वति ॥ युवयोर्दर्शनादद्य कृतार्थोऽभवमाशु वै ॥ ३ ॥ मामद्य पातकान्मुक्तं स्नानात्तीर्थ
द्वयेऽत्र तु ॥ स्वीकुर्वंतु मुनिश्रेष्ठा ब्राह्मणा बांधवास्तथा ॥ ४ ॥ इतः परं पापकृत्ये मा मे बुद्धिः प्रवर्तताम् ॥ धर्मे प्रवर्ततां नित्यमयमेव वरो
मम ॥ ५ ॥ दीयतां भो महादेव्यौ नान्यमिच्छाम्यहं वरम् ॥ इति ते प्रार्थिते तेन काश्यपेन द्विजोत्तमाः ॥ ६ ॥ सरस्वती च गायत्री द्वे देव्यौ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ब्रह्मणः प्रिये ॥ काश्यपं प्रोचतुः प्रीते जनन्यौ जगतां सदा ॥ ७ ॥ काश्यपैतद्वरं सर्वं प्रार्थितं यत्त्वयाऽधुना ॥ अनुग्रहादावयोस्तदचिरेण तवास्तु हि ॥ ८ ॥ इत्युक्त्वा तं तु गायत्रीसरस्वत्यौ क्षणेन वै ॥ तिरोधानं गते विप्रास्तस्मिंस्तीर्थद्वये तदा ॥ ९ ॥ काश्यपोऽपि कृतार्थः सन्स्वदेशं प्रति निर्ययौ ॥ बांधवा ब्राह्मणाः सर्वे काश्यपं गतकिल्बिषम् ॥ ११० ॥ प्रत्यगृह्णंश्च गायत्रीसरस्वत्योर्निमज्जनात् ॥ एवं वः कथितं विप्राः काश्यपस्य विमोक्षणम् ॥ ११ ॥ पातकेभ्यो हि गायत्रीसरस्त्योर्निमज्जनात् ॥ पठते त्विममध्यायं शृणुते वा समाहितः ॥ १२ ॥ यो गायत्र्यां सरस्वत्यां स स्नातंफलमश्नुते ॥ ११३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे सेतुमाहात्म्ये गायत्रीसरस्वतीतीर्थप्रशंसायां काश्यपपापशांतिवर्णनंनामैकचत्वारिंशोऽध्यायः ॥ ४१ ॥ छ ॥ ॥ श्रीसूत उवाच ॥ ॥ अथातः सर्वतीर्थानां वैभवं प्रवदाम्यहम् ॥ सेतुमध्यनिविष्टानामनुक्तानां मुनीश्वराः ॥ १ ॥ अस्ति तीर्थं महापुण्यं नाम्ना तु ऋणमोचनम् ॥ ऋणानि त्रीणि नश्यंति नराणामत्र मज्जनात् ॥ २ ॥ द्विजस्य जायमानस्य ऋणानि त्रीणि संति हि ॥ ऋषीणां देवतानां च पितॄणां च द्विजोत्तमाः ॥ ३ ॥ ब्रह्मचर्याननुष्ठानादृषीणामृणवान्भवेत् ॥ यज्ञादीनामकरणाद्देवानां च ऋणी भवेत् ॥ ४ ॥ पुत्रानुत्पादनाच्चैव पितॄणामृणवान्भवेत् ॥ विनापि ब्रह्मचर्येण विना यागं विना सुतम् ॥ ५ ॥ ऋणमोक्षाभिधे तीर्थे स्नानमात्रेण मानवाः ॥ ऋषिदेवपितॄणां तु ऋणेभ्यो मुक्तिमाप्नुयुः ॥ ६ ॥ ब्रह्मचर्येण यज्ञेन तथा पुत्रोद्भवेन च ॥ नैव तुष्यन्ति ऋषयो देवाः पितृगणास्तथा ॥ ७ ॥ ऋणमोक्षे यथा स्नानादतुलां तुष्टिमाप्नुयुः ॥ किं चात्र मज्जनात्तीर्थे दरिद्रा अधमर्णिनः ॥ ८ ॥ मुक्ता ऋणेभ्यः सर्वेभ्यो धनिनः स्युर्न संशयः ॥ यदत्र मज्जनात्पुंसामृणमुक्तिः प्रजायते ॥ ९ ॥ तस्मादुक्तमिदं तीर्थमृणमोचनसंज्ञया ॥ अतोऽत्र ऋणिभिः सर्वैः स्नातव्यं तद्विमुक्तये ॥ १० ॥ एतत्तीर्थसमं तीर्थं न भूतं न भविष्यति ॥ पांडवैः कृतमप्यत्र तीर्थमस्त्यपरं महत् ॥ ११ ॥ यत्रेष्टं धर्मपुत्राद्यैः पांडवैः पंचभिः पुरा ॥ तदेतत्तीर्थमुद्दिश्य भुक्तिमुक्तिफलप्रदम् ॥ १२ ॥ दशकोटिसहस्राणि तीर्थान्यनुत्तमानि हि ॥ पंचपांडवतीर्थेस्मिन्सान्निध्यं कुर्वते सदा ॥ १३ ॥ आदित्या वसवो रुद्राः साध्याश्च समरुद्गणाः ॥ पांडवानां महातीर्थे नित्यं सन्निहितास्तथा ॥ १४ ॥ अत्राभिषेकं यः कुर्यात्पितृदेवांश्च तर्पयेत् ॥ सर्वपापविनिर्मुक्तो ब्रह्मलोके स पूज्यते ॥ १५ ॥ अप्येकं भोजयेद्विप्रमेतत्तीर्थतटेऽमले ॥ तेनासौ कर्मणा त्वत्र परत्रापि च मोदते ॥ १६ ॥ ब्राह्मणः क्षत्रियो वैश्यः शूद्रो

१ स्नानफलम्–इ० पा० । २ विष्णुलोके–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बलीयसा ॥ ९६ ॥ कृत्वोर्ध्वदैहिकं तस्य नृपस्य सपुरोहिताः ॥ मंत्रिणस्तत्सुतं राज्ये जनमेजयनामकम् ॥ ९७ ॥ राजानमभ्यषिंचन्वै गजद्रक्ष
णवांछया ॥ तक्षकाद्रक्षितुं भूपमायातः काश्यपाभिधः ॥ ९८ ॥ यो ब्राह्मणो मुनिश्रेष्ठाः स सर्वैर्निंदितो जनैः ॥ बभ्राम सकलान्देशान्छिद्रैः
सर्वैश्च दूषितः ॥ ९९ ॥ अवस्थानं न लेभेऽसौ ग्रामे वाप्याश्रमेऽपि वा ॥ यान्यान्देशानसौ यातस्तत्रतत्र महाजनैः ॥ ६० ॥ तत्तद्देशान्निरस्तः
स शाकल्यं शरणं ययौ ॥ प्रणम्य शाकल्यमुनिं काश्यपो निन्दितो जनैः ॥ इदं विज्ञापयामास शाकल्याय महात्मने ॥ ६१ ॥ ॥ काश्यप
उवाच ॥ ॥ भगवन्सर्वधर्मज्ञ शाकल्य हरिवल्लभ ॥ ६२ ॥ मुनयो ब्राह्मणाश्चान्ये मां निंदंति सुहृज्जनाः ॥ नास्याहं कारणं जाने किं मां
निंदंति मानवाः ॥ ६३ ॥ ब्रह्महत्या सुरापानं गुरुस्त्रीगमनं तथा ॥ स्तेयं संसर्गदोषो वा मया नाचरितः क्वचित् ॥ ६४ ॥ अन्यान्यपि हि
पापानि न कृतानि मया मुने ॥ तथापि निंदंति जना वृथा मां बांधवादयः ॥ ६५ ॥ जानासि चेत्त्वं शाकल्य मया दोषं कृतं वद ॥ उक्तोऽथ
काश्यपेनैवं शाकल्याख्यो महामुनिः ॥ क्षणं ध्यात्वा बभाषे तं काश्यपं द्विजसत्तमाः ॥ ६६ ॥ ॥ शाकल्य उवाच ॥ ॥ परीक्षितं महाराजं
तक्षकाद्रक्षितुं भवान् ॥ ६७ ॥ अयासीदर्धमार्गे तु तक्षकेण निवारितः ॥ चिकित्सितुं समर्थोऽपि विषरोगादिपीडितम् ॥ ६८ ॥ यो न रक्षति
लोभेन तमाहुर्ब्रह्मघातकम् ॥ क्रोधात्कामाद्भयाल्लोभान्मात्सर्यान्मोहतोऽपि वा ॥ ६९ ॥ यो न रक्षति विप्रेंद्र विषरोगातुरं नरम् ॥ ब्रह्महा स
सुरापी च स्तेयी च गुरुतल्पगः ॥ ७० ॥ संसर्गदोषदुष्टश्च नापि तस्य हि निष्कृतिः ॥ कन्याविक्रयिणश्चापि हयविक्रयिणस्तथा ॥ ७१ ॥ कृतघ्न
स्यापि शास्त्रेषु प्रायश्चित्तं हि विद्यते ॥ विषरोगातुरं यस्तु समर्थोपि न रक्षति ॥ ७२ ॥ न तस्य निष्कृतिः प्रोक्ता प्रायश्चित्तायुतैरपि ॥ न तेन
सह पंक्तौ च भुंजीत सुकृती जनः ॥ ७३ ॥ न तेन सह भाषेत न पश्येत्तं नरं क्वचित् ॥ तत्संभाषणमात्रेण महापातकभाग्भवेत् ॥ ७४ ॥ परी
क्षित्स महाराजः पुण्यश्लोकश्च धार्मिकः ॥ विष्णुभक्तो महायोगी चातुर्वर्ण्यस्य रक्षिता ॥ ७५ ॥ व्यासपुत्राद्धरिकथां श्रुतवान्भक्तिपूर्वकम् ॥ अर
क्षित्वा नृपं तं त्वं वचसा तक्षकस्य यत् ॥ ७६ ॥ निवृत्तस्तेन विप्रेंद्रैर्बांधवैरपि दूष्यसे ॥ स परीक्षिन्महाराजो यद्यपिक्ष णजीवितः ॥ ७७ ॥
तथापि यावन्मरणं बुधैः कार्यं चिकित्सनम् ॥ यावत्कण्ठगताः प्राणा मुमूर्षोर्मानवस्य हि ॥ ७८ ॥ तावच्चिकित्सा कर्तव्या
कालस्य कुटिला गतिः ॥ इति प्राहुः पुरा श्लोकं भिषग्वैद्याब्धिपारगाः ॥ ७९ ॥ अतश्चिकित्साशक्तोऽपि यस्मादकृतभेषजः ॥
अर्धमार्गे निवृत्तस्त्वं तेन तं हतवानसि ॥ शाकल्येनैवमुदितः काश्यपः प्रत्यभाषत ॥ ८० ॥ ॥ काश्यप उवाच ॥ ॥ समेत

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हनि विप्रेंद्रो दरिद्रो धनकामुकः ॥ अत्रांतरे तक्षकोऽपि विप्ररूपी समाययौ ॥ ३१ ॥ मध्येमार्गं विलोक्याथ कश्यपं प्रत्यभाषत ॥ ब्राह्मण त्वं कुत्र यासि वद मेऽद्य महामुने ॥ ३२ ॥ इति पृष्टस्तदावादीत्काश्यपस्तक्षकं द्विजाः ॥ परीक्षितं महाराजं तक्षकोऽद्य विषाग्निना ॥ ३३ ॥ दक्ष्यते तं शमयितुं तत्समीपमुपैम्यहम् ॥ इत्युक्तवंतं तं विप्रं तक्षकः पुनरब्रवीत् ॥ ३४ ॥ तक्षकोहं द्विजश्रेष्ठ मया दष्टश्चिकित्सितुम् ॥ न शक्यो ऽब्दशतेनापि महामंत्रायुतैरपि ॥ ३५ ॥ चिकित्सितुं चेन्मद्दष्टं शक्तिरस्ति तवाधुना ॥ अनेकयोजनोच्छ्रायमिमं वटतरुं त्वहम् ॥ ३६ ॥ दशाम्युज्जीवयैनं त्वं समर्थोऽस्ति ततो भवान् ॥ इतीरयित्वा तं वृक्षमदशत्तक्षकस्तदा ॥ ३७ ॥ अभवद्भस्मसात्सोऽपि वृक्षोऽत्यंतं समुच्छ्रितः ॥ पूर्वमेव नरः कश्चित्तं वृक्षमधिरूढवान् ॥ ३८ ॥ तक्षकस्य विषोल्काभिः सोऽपि दग्धोऽभवत्तदा ॥ तं नरं न विजिज्ञाते तौ च काश्यपतक्षकौ ॥ ॥ ३९ ॥ काश्यपः प्रतिजज्ञेऽथ तक्षकस्यापि शृण्वतः ॥ तन्मंत्रशक्तिं पश्यंतु सर्वे विप्रा हि नोऽधुना ॥ ४० ॥ इतीरयित्वा तं वृक्षं भस्मीभूतं विषाग्निना ॥ अजीवयन्मन्त्रशक्त्या काश्यपो मांत्रिकोत्तमः ॥ ४१ ॥ नरोऽपि तेन वृक्षेण साकमुज्जीवितोऽभवत् ॥ अथाब्रवीत्तक्षकस्तं काश्यपं मंत्रकोविदम् ॥ ४२ ॥ यथा न मुनिवाङ्मिथ्या भवेदेवं कुरु द्विज ॥ यत्ते राजा धनं दद्यात्ततोपि द्विगुणं धनम् ॥ ॥ ४३ ॥ ददाम्यहं निवर्तस्व शीघ्रमेव द्विजोत्तम ॥ इत्युक्त्वानर्घ्यरत्नानि तस्मै दत्त्वा स तक्षकः ॥ ४४ ॥ न्यवर्तयत्काश्यपं तं ब्राह्मणं मंत्रकोविदम् ॥ अल्पायुषं नृपं मत्वा ज्ञानदृष्ट्या स काश्यपः ॥ ४५ ॥ स्वाश्रमं प्रययौ तूष्णीं लब्धरत्नश्च तक्षकात् ॥ सोऽब्रवीत्तक्षकः सर्वान्सर्पानाहूय तत्क्षणे ॥ ४६ ॥ यूयं तं नृपतिं प्राप्य मुनीनां वेषधारिणः ॥ उपहारफलान्याशु प्रयच्छत परीक्षिते ॥ ४७ ॥ तथेत्युक्त्वा सर्वसर्पा ददू राज्ञे फलान्यमी ॥ तक्षकोपि तदा तत्र कस्मिंश्चिद्बदरीफले ॥ ४८ ॥ कृमिवेषधरो भूत्वा व्यतिष्ठद्दंशितुं नृपम् ॥ अथ राजा प्रदत्तानि सर्पैर्ब्राह्मणरूपकैः ॥ ४९ ॥ परीक्षिन्मंत्रवृद्धेभ्यो दत्त्वा सर्वफलान्यपि ॥ कौतूहलेन जग्राह स्थूलमेकं फलं करे ॥ ५० ॥ अस्मिन्नवसरे सूर्योऽप्यस्ताचलमगाहत ॥ मिथ्या ऋषिवचो मा भूदिति तत्रत्यमानवाः ॥ ५१ ॥ अन्योन्यमवदन्सर्वे ब्राह्मणाश्च नृपास्तथा ॥ एवं वदत्सु सर्वेषु फले तस्मिन्नदृश्यत ॥ ५२ ॥ फले रक्तकृमिः सर्वै राज्ञा चापि परीक्षिता ॥ अयं किं मां दशेदद्य कृमिरित्युक्त्वा न्नृपः ॥ ५३ ॥ निदधे तत्फलं कर्णे सकृमि द्विजसत्तमाः ॥ तक्षकोऽस्मिन्स्थितः पूर्वं कृमिरूपी फले तदा ॥ ५४ ॥ निर्गत्य तत्फलादाशु नृपदेहमवेष्टयत ॥ तक्षकावेष्टिते भूपे पार्श्वस्था दुद्रुवुर्भयात् ॥ ५५ ॥ अनंतरं नृपो विप्रास्तक्षकस्य विषाग्निना ॥ दग्धोऽभूद्भस्मसादाशु सप्रासादो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

म् ॥ ५ ॥ अभिमन्युसुतो राजा परीक्षिन्नाम नामतः ॥ अध्यास्ते हास्तिनपुरं पालयन्धर्मतो महीम् ॥ ६ ॥ स राजा जातु विपिने चचार मृगया रतः ॥ षष्टिवर्षवया भूपः क्षुत्तृष्णापरितीडितः ॥ ७ ॥ नष्टमेकं स विपिने मार्गयन्मृगमादरात् ॥ ध्यानारूढं मुनिं दृष्ट्वा प्राह तं चीरवाससम् ॥ ८ ॥ मया बाणेन विपिने मृगो विद्धोऽधुना मुने ॥ दृष्टः स किं त्वया विद्वन्विद्रुतो भयकातरः ॥ ९ ॥ समाधिनिष्ठो मौनित्वान्न किं चिदपि सोऽब्रवीत् ॥ ततो धनुरटन्याऽसौ स्कंधे तस्य महामुनेः॥ १० ॥ निधाय मृतसर्पं तु कुपितः स्वपुरं ययौ ॥ मुनेस्तस्य सुतः कश्चिच्छृंगीनाम बभूव वै ॥ ११ ॥ सखा तस्य कृशाख्योऽभूच्छृंगिणो द्विजसत्तमाः ॥ सखायं शृङ्गिणं प्राह कृशाख्यः स सखा ततः ॥ १२ ॥ पिता तव मृतं सर्पं स्कंधेन वहतेऽधुना ॥ मा भूद्दर्पस्तव सखे मा कृथास्त्वं मदं वृथा ॥ १३ ॥ सोऽवदत्कुपितः शृंगी दित्सुश्शापं नृपाय वै ॥ मत्ताते शवसर्पं यो न्यस्त वान्मूढचेतनः ॥ १४ ॥ स सप्तरात्रान्म्रियतां संदष्टस्तक्षकाहिना ॥ शशापैवं मुनिसुतः सौभद्रेयं परीक्षितम् ॥ १५ ॥ शमीकाख्यः पिता तस्य श्रुत्वा शप्तं सुतेन तम् ॥ नृपं प्रोवाच तनयं शृंगिणं मुनिपुंगवः ॥ १६ ॥ रक्षकं सर्वलोकानां नृपं किं शप्तवानसि ॥ अराजके वयं लोके स्थास्यामः कथमंजसा ॥ १७ ॥ क्रोधेन पातकमभून्न त्वया प्राप्यते सुखम् ॥ यः समुत्पादितं कोपं क्षमयैव निरस्यति ॥ १८ ॥ इह लोके परत्रासावत्यंतं सुखमेधते ॥ क्षमायुक्ता हि पुरुषा लभंते श्रेय उत्तमम् ॥ १९ ॥ ततः शमीकः स्वं शिष्यं प्राह गौरमुखाभिधम् ॥ भो गौरमुख गत्वा त्वं वद भूपं परीक्षितम् ॥ २० ॥ इमं शापं मत्सुतोक्तं तक्षकाहिविदंशनम् ॥ पुनरायाहि शीघ्रं त्वं मत्समीपे महामते ॥ २१ ॥ एवमुक्तः शमीकेन ययौ गौरमुखो नृपम् ॥ समेत्य चाब्रवीद्भूपं सौभद्रेयं परीक्षितम् ॥ २२ ॥ दृष्ट्वा सर्पं पितुः स्कन्धे त्वया विनिहितं मृतम् ॥ शमीकस्य सुतः शृंगी शशाप त्वां रुषान्वितः ॥ २३ ॥ एतद्दिनात्सप्तमेऽह्नि तक्षकेण महाहिना ॥ दष्टो विषाग्निना दग्धो भूयादाश्वभिमन्युजः ॥ २४ ॥ एवं शशाप त्वां राजञ्छृंगी तस्य मुनेः सुतः ॥ एतद्वक्तुं पिता तस्य प्राहिणोन्मां त्वदंतिकम् ॥ २५ ॥ इतीरयित्वा तं भूपमाशु गौरमुखो ययौ ॥ गते गौरमुखे पश्चाद्राजा शोकपरायणः ॥ २६ ॥ अभ्रंलिहमथोत्तुंगमेकस्तंभं सुविस्तृतम् ॥ मध्येगंगं व्यतनुत मंडपं नृपपुंगवः ॥ २७ ॥ महागारुडमंत्रज्ञैरौषधज्ञैश्चिकित्सकैः ॥ तक्षकस्य विषं हंतु यत्नं कुर्वन्समाहितः ॥ २८ ॥ अनेकदेवब्रह्मर्षिराजर्षिप्रवरान्वितः ॥ आस्ते तस्मिन्नृप स्तुंगे मंडपे विष्णुभक्तिमान् ॥ २९ ॥ तस्मिन्नवसरे विप्रः काश्यपो मांत्रिकोत्तमः ॥ राजानं रक्षितुं प्रायात्तक्षकस्य महाविषात् ॥ ३० ॥ सप्तमे

१ मुनिम्—शमीकमहर्षिम्—इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

करुणाकर शंकर ॥ ४३ ॥ पाहि मां करुणासिंधो निषिद्धाचरणात्प्रभो ॥ मम त्वत्कृपया शंभो निषिद्धाचरणे क्वचित् ॥ ४४ ॥
मा प्रवृत्तिर्भवेद्भूयो रक्ष मां त्वं तथा सदा ॥ तथैवास्त्विति संप्राह ब्रह्माणं गिरिजापतिः ॥ ४५ ॥ इतः परं प्रमादं त्वं मा कुरुष्व विधे पुनः ॥ उत्पथं
प्रतिपन्नानां पुंसां शास्तास्मि सर्वदा ॥ ४६ ॥ एवमुक्त्वा चतुर्वक्त्रं महादेवो द्विजोत्तमाः ॥ सरस्वतीं च गायत्रीं प्रोवाच प्रीणयन्गिरा ॥ ४७ ॥
॥ ॥ महादेव उवाच ॥ ॥ युवयोर्मत्प्रसादेन हे गायत्रि सरस्वति ॥ अयं भर्ता समायातः सप्राणश्चतुराननः ॥ ४८ ॥ सहानेन ब्रह्मलोकं यातं
मा भूद्विलंबता ॥ युवयोः संनिधानेन सदा कुंडद्वयेऽत्र वै ॥ ४९ ॥ भविष्यति नृणां मुक्तिः स्नानात्सायुज्यरूपिणी ॥ युष्मन्नाम्ना च गायत्रीसर
स्वत्याविति द्वयम् ॥ ५० ॥ इदं तीर्थं सर्वलोके ख्यातिं यास्यति शाश्वतीम् ॥ सर्वेषामपि तीर्थानामिदं तीर्थद्वयं सदा ॥ ५१ ॥ शुद्धिप्रदं तथा
भूयान्महापातकनाशनम् ॥ महाशांतिकरं पुंसां सर्वाभीष्टप्रदायकम् ॥ ५२ ॥ मम प्रसादजननं विष्णुप्रीतिकरं तथा ॥ एतत्तीर्थद्वयसमं न भूतं
न भविष्यति ॥ ५३ ॥ अत्र स्नानाद्धि सर्वेषां सर्वाभीष्टं भविष्यति ॥ इदं कुंडद्वयं लोके भवतीभ्यां कृतं महत् ॥ ५४ ॥ युष्मन्नाम्ना प्रसिद्धं च
भविष्यति विमुक्तिदम् ॥ गायत्र्युपास्तिरहिता वेदाभ्यासविवर्जिताः ॥ ५५ ॥ औपासनविहीनाश्च पंचयज्ञविवर्जिताः ॥ युष्मत्कुंडद्वये स्नानात्तत्त
त्फलमवाप्नुयुः ॥ ५६ ॥ अन्ये च ये पातकिनो नित्यानुष्ठानवर्जिताः ॥ स्नात्वा कुंडद्वये तत्र शुद्धाः स्युर्द्विजसत्तमाः ॥ ५७ ॥ सरस्वतीं च गाय
त्रीमेवमुक्त्वा महेश्वरः ॥ क्षणादंतरधात्तत्र सर्वेषामेव पश्यताम् ॥ ५८ ॥ पतिं लब्ध्वाऽथ गायत्रीसरस्वत्यौ मुदान्विते ॥ तेन साकं ब्रह्मलोकं जग्म
तुर्द्विजसत्तमाः ॥ ५९ ॥ ॥ श्रीसूत उवाच ॥ ॥ एवं वः कथितं विप्रा गंधमादनपर्वते ॥ संनिधानं सरस्वत्या गायत्र्याश्च सहेतुकम् ॥ ६० ॥
यः शृणोतीममध्यायं पठते वा सभक्तिकम् ॥ एतत्तीर्थद्वयस्नानफलमाप्नोत्यसंशयः ॥ ६१ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहि
तायां तृतीये ब्रह्मखण्डे सेतुमाहात्म्ये गायत्रीसरस्वतीतीर्थप्रशंसायां गंधमादने गायत्रीसरस्वतीसन्निधानकथनं नाम चत्वारिंशोऽध्यायः ॥ ४० ॥
॥ ॥ श्रीसूत उवाच ॥ ॥ अथातः संप्रवक्ष्यामि गायत्रीं च सरस्वतीम् ॥ लक्ष्यीकृत्य कथामेकां पवित्रां द्विजसत्तमाः ॥ १ ॥ कश्य
पाख्यो द्विजः पूर्वमस्मिंस्तीर्थद्वये शुभे ॥ स्नात्वातिमहतः पापाद्विमुक्तो नरकप्रदात् ॥ २ ॥ ॥ ऋषय ऊचुः ॥ ॥ मुने कश्यपनामासावकरो
त्किं हि पातकम् ॥ स्नात्वा तीर्थद्वयेप्यत्र यस्मान्मुक्तोऽभवत्क्षणात् ॥ ३ ॥ एतन्नः श्रद्दधानानां ब्रूहि सूत कृपाबलात् ॥ त्वद्वचोऽमृततृप्तानां न
पिपासापि विद्यते ॥ ४ ॥ ॥ श्रीसूत उवाच ॥ ॥ गायत्र्याश्च सरस्वत्या माहात्म्यप्रतिपादकम् ॥ इतिहासं प्रवक्ष्यामि शृण्वतां पापनाशन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भीष्टप्रदं पुंसां तपः कर्तुं समुद्यते ॥ जग्मतुर्नियमोपेते तपः कर्तुं शिवं प्रति ॥ १९ ॥ स्नानार्थमात्मनो विप्रा गायत्री च सरस्वती ॥ तीर्थद्वयं स्वनाम्ना वै चक्रतुः पापनाशनम् ॥ २० ॥ तत्र त्रिषवणस्नानं प्रत्यहं चक्रतुर्मुदा ॥ बहुकालमनाहारे कामक्रोधादिवर्जिते ॥ २१ ॥ अत्युग्रनियमोपेते शिवध्यानपरायणे ॥ पंचाक्षरमहामन्त्रजपैकनियते शुभे ॥ २२ ॥ स्वपतेर्जीवनार्थं वै गायत्री च सरस्वती ॥ महादेवं समुद्दिश्य तप एवं प्रचक्रतुः ॥ २३ ॥ तयोरथ तपस्तुष्टो महादेवो महेश्वरः ॥ सन्निधत्ते महामूर्तिस्तपसां फलदित्सया ॥ २४ ॥ ततः सन्निहितं शंभुं पार्वतीरमणं शिवम् ॥ गणेशकार्त्तिकेयाभ्यां पार्श्वयोः परिसेवितम् ॥ २५ ॥ दृष्ट्वा संतुष्टचित्ते ते गायत्री च सरस्वती ॥ स्तोत्रैस्तुष्टुवतुः स्तुत्यं महादेवं घृणानिधिम् ॥ २६ ॥ ॥ गायत्रीसरस्वत्यावूचतुः ॥ ॥ नमो दुर्वारसंसारध्वांतध्वंसैकहेतवे ॥ ज्वलज्ज्वालावलीभीमकालकूटविषादिने[1] ॥ २७ ॥ जगन्मोहन पंचास्त्रदेहनाशैकहेतवे ॥ जगदंतकरक्रूरयमांतक नमोऽस्तु ते ॥ २८ ॥ गंगातरंगसंपृक्तजटामण्डलधारिणे ॥ नमस्तेस्तु विरूपाक्ष बालशीतांशुधारिणे ॥ २९ ॥ पिनाकभीमटंकारत्रासितत्रिपुरौकसे ॥ नमस्ते विविधाकारजगत्स्रष्टृशिरश्छिदे ॥ ३० ॥ शांतामलकृपादृष्टिसंरक्षितमृकण्डुज ॥ नमस्ते गिरिजानाथ रक्षावां शरणागते ॥ ३१ ॥ महादेव जगन्नाथ त्रिपुरांतक शंकर ॥ वामदेव महादेव[2] रक्षावां शरणागते ॥ ३२ ॥ इति ताभ्यां स्तुतः शम्भुर्देवदेवो महेश्वरः ॥ अब्रवीत्प्रीतिसंयुक्तो गायत्रीं च सरस्वतीम् ॥ ३३ ॥ ॥ महादेव उवाच ॥ ॥ भोः सरस्वति गायत्रि प्रीतोऽस्मि युवयोरहम् ॥ वरं वरयतं मत्तो यद्वां मनसि वर्तते ॥ ३४ ॥ इत्युक्ते ते तु गायत्रीसरस्वत्यौ हरेण[3] वै ॥ अब्रूतां पार्वतीकांतं महादेवं घृणानिधिम् ॥ ३५ ॥ ॥ गायत्रीसरस्वत्यावूचतुः ॥ ॥ भगवन्नावयोर्देव भर्त्तारं चतुराननम् ॥ सप्राणं कुरु सर्वेश कृपया करुणाकर ॥ ३६ ॥ त्वमावयोः पिता देव तवाप्यावां सुते उभे ॥ रक्षावां पतिदानेन तस्मात्त्वं त्रिपुरांतक ॥ ३७ ॥ स एवं प्रार्थितः शम्भुस्ताभ्यां ब्राह्मणपुंगवाः ॥ एवमस्त्विति संप्रोच्य गायत्रीं च सरस्वतीम् ॥ ३८ ॥ तदेव वेधसः कायं शिरसा योक्तुमुत्सुकः ॥ तत्रैव वेधसः कायं शिरोभिः सहसुव्रताः ॥ ३९ ॥ भूतैरानाययामास नंदिभृंगिमुखैस्तदा ॥ शिरांसि तान्यनेकानि कायेन सह शंकरः ॥ ४० ॥ क्षणात्संधारयामास वाणीगायत्रिसंनिधौ ॥ संधितोऽथ हरेणासौ चतुर्वक्त्रो जगत्पतिः ॥ ४१ ॥ उत्तस्थौ तत्क्षणादेव सुप्तोत्थित इव द्विजाः ॥ ततः प्रजापतिर्दृष्ट्वा शंकरं शशिभूषणम् ॥ तुष्टाव वाग्भिरग्र्याभिर्भार्याभ्यां च समन्वितः ॥ ४२ ॥ ॥ ब्रह्मोवाच ॥ ॥ नमस्ते देवदेवेश

१ जगदाधार–इ० पा० । २ शिवेशान–इ० पा० । ३ तु शूलिना–इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कपितीर्थस्य माहात्म्यं प्रशंसन्ती पुनःपुनः ॥ निषेव्य रामनाथं च शंकरं शशिभूषणम् ॥ ६४ ॥ आखण्डलपुरीं रम्यां प्रययावमरावतीम् ॥ राक्षसी सापि शापेन कुम्भजस्य महौजसः ॥ ६५ ॥ घृताची देववेश्या हि राक्षसीरूपमागता ॥ साप्यत्र कपितीर्थाप्सु स्नानात्स्वं रूपमाययौ ॥ ६६ ॥ एवं रंभाघृताच्यौ ते कपितीर्थे निमज्जनात् ॥ अगस्त्यशिष्यश्वेतस्य प्रसादाद्द्विजसत्तमाः ॥ ६७ ॥ राक्षसीत्वं शिलात्वं च हित्वा स्वं रूपमागते ॥ तस्मात्सर्वप्रयत्नेन स्नातव्य कपितीर्थके ॥ ६८ ॥ यः शृणोतीममध्यायं पठते वापि मानवः ॥ प्राप्नोति कपितीर्थस्यस्नानजं फलमुत्तमम् ॥ ६९ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे सेतुमाहात्म्ये कपितीर्थप्रशंसायां रंभाघृताचीशापविमोक्षणवर्णनं नामैकोनचत्वारिंशोऽध्यायः ॥३९॥ ॥ श्रीसूत उवाच ॥ ॥ अथातः संप्रवक्ष्यामि मुनयो लोकपावनम् ॥ गायत्र्या च सरस्वत्या माहात्म्यं मुक्तिदं नृणाम् ॥ १ ॥ शृण्वतां पठतां चैव महापातकनाशनम् ॥ महापुण्यप्रदं पुंसां नरकक्लेशनाशनम् ॥ २ ॥ गायत्र्यां च सरस्वत्यां ये स्नांति मनुजा मुदा ॥ न तेषां गर्भवासः स्यात्किं तु मुक्तिर्भवेद्ध्रुवम् ॥ ३ ॥ सरस्वत्याश्च गायत्र्या गन्धमादनपर्वते ॥ ब्रह्मपत्न्योः सन्निधानात्तन्नाम्ना कथिते इमे ॥ ४ ॥ ॥ ऋषय ऊचुः ॥ ॥ गायत्र्याश्च सरस्वत्या गन्धमादनपर्वते ॥ किमर्थं संनिधानं वै सूताभूत्तद्वदस्व नः ॥ ५ ॥ ॥ सूत उवाच ॥ ॥ प्रजापतिः पुरा विप्राः स्वां वै दुहितरं मुदा ॥ वाङ्नाम्नीं कामुको भूत्वा स्पृहयामास मोहनः ॥ ६ ॥ अथ प्रजापतेः पुत्री स्वस्मिन्वै तस्य कामिताम् ॥ विलोक्य लज्जिता भूत्वा रोहिद्रूपं दधार सा ॥ ७ ॥ ब्रह्मापि हरिणो भूत्वा तया रन्तुमनास्तदा ॥ गच्छंतीमनुयाति स्म हरिणीरूपधारिणीम् ॥ ८ ॥ तं दृष्ट्वा देवताः सर्वाः पुत्रीगमनसादरम् ॥ करोत्यकार्यं ब्रह्मायं पुत्रीगमनलक्षणम् ॥ ९ ॥ इति निन्दंति तं विप्राः स्रष्टारं जगतां पतिम् ॥ निषिद्धकृत्यनिरतं तं दृष्ट्वा परमेष्ठिनम् ॥ १० ॥ हरः पिनाकमादाय व्याधरूपधरः प्रभुः ॥ आकर्णपूर्णकृष्टेन पिनाकधनुषा शरम् ॥ ११ ॥ संयोज्य वेधसं तेन विव्याध निशितेन सः ॥ त्रिपुरांतकबाणेन विद्धोऽसौ न्यपतद्भुवि ॥ १२ ॥ तस्य देहादथोत्थाय महज्ज्योतिर्महाप्रभम् ॥ आकाशे मृगशीर्षाख्यं नक्षत्रमभवत्तदा ॥ १३ ॥ आर्द्रानक्षत्ररूपी सन्हरोऽप्यनुजगाम तम् ॥ पीडयन्मृगशीर्षाख्यं नक्षत्रं ब्रह्मरूपिणम् ॥ १४ ॥ अधुनापि मृगव्याधरूपेण त्रिपुरांतकः ॥ अंबरे दृश्यते स्पष्टं मृगशीर्षांतिके द्विजाः ॥ १५ ॥ एवं विनिहते तस्मिन्च्छंभुना परमेष्ठिनि ॥ अनंतरं तु गायत्रीसरस्वत्यौ शुचार्पिते ॥ १६ ॥ भर्तृहीने मुनिश्रेष्ठा भर्तृजीवनकांक्षया ॥ किं करिष्यावहे ह्यावामित्यन्योन्यं विचार्य तु ॥ १७ ॥ स्वपतिप्राणसिद्ध्यर्थं गायत्री च सरस्वती ॥ सर्वोत्कृष्टं शिवस्थानं गन्धमादनपर्वतम् ॥ १८ ॥ सर्वा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्विजाः ॥ एवं रामेण दत्ते तु वरे तत्र कुतूहलात् ॥१४॥ षडर्धनयनो ब्रह्मा सहस्राक्षो यमस्तथा ॥ वरुणोग्निस्तथा वायुः कुबेरश्चंद्रमा अपि ॥१५॥ आदित्यो निर्ऋतिश्चैव साध्याश्च वसवस्तथा ॥ अन्येऽपि त्रिदशाः सर्वे विश्वेदेवादयस्तथा ॥ १६ ॥ अत्रिर्भृगुस्तथा कुत्सो गौतमश्च पराशरः ॥ कण्वोऽगस्त्यः सुतीक्ष्णश्च विश्वामित्रादयोऽपरे ॥ १७ ॥ योगिनः सनकाद्याश्च नारदाद्याः सुरर्षयः ॥ रामदत्तवरं तीर्थं श्लाघंते बहुधा तदा ॥ १८ ॥ सस्नुश्च तत्र तीर्थे ते सर्वाभीष्टप्रदायिनि ॥ कपिभिर्निर्मितं यस्मादेतत्तीर्थमनुत्तमम् ॥ १९ ॥ कपितीर्थमिति ख्यातिमतो लोके प्रयास्यति ॥ इत्यप्यवोचंस्ते सर्वे देवाश्च मुनयस्तथा ॥ २० ॥ तस्मादवश्यं गंतव्यं कपितीर्थं मुमुक्षुभिः ॥ रंभा कौशिकशापेन शिलाभूता पुरा द्विजाः ॥ २१॥ तत्र स्नात्वा निजं रूपं प्रपेदे च दिवं ययौ ॥ अस्य तीर्थस्य माहात्म्यं मया वक्तुं न शक्यते ॥ २२ ॥ ॥ मुनय ऊचुः ॥ ॥ रंभां किमर्थमशपत्कौशिकः सूतनंदन ॥ कथं गता शिलाभूता कपितीर्थं सुरांगना ॥ एतन्नः सर्वमाचक्ष्व विस्तरान्मुनिसत्तम ॥ २३ ॥ ॥ श्रीसूत उवाच ॥ ॥ विश्वामित्राभिधो राजा प्रागभूत्कुशिकान्वये ॥ २४ ॥ स कदाचिन्महाराजः सेनापरिवृतो बली ॥ मेदिनीं परिचक्राम राज्यवीक्षणकौतुकी ॥ ॥ २५ ॥ अटित्वा स बहून्देशान्वसिष्ठस्याश्रमं ययौ ॥ आतिथ्याय वृतः सोऽयं वसिष्ठेन महात्मना ॥ २६ ॥ तथास्त्वित्यब्रवीत्सोयं दंडवत्प्रणतो नृपः ॥ कामधेनुप्रभावेन विश्वामित्राय भूभुजे ॥ २७ ॥ आतिथ्यमकरोद्विप्रा वसिष्ठो ब्रह्मनंदनः ॥ कामधेनुप्रभावं वै ज्ञात्वा कुशिकनंदनः ॥ ॥ २८ ॥ वसिष्ठं प्रार्थयामास कामधेनुमभीष्टदाम् ॥ प्रत्याख्यातो वसिष्ठेन प्रचकर्ष च तां बलात् ॥ २९ ॥ कामधेनुविसृष्टैस्तु म्लेच्छाद्यैः स पराजितः ॥ महादेवं समाराध्य तस्मादस्त्राण्यवाप्य च ॥ ३० ॥ वसिष्ठस्याश्रमं गत्वा व्यसृजच्छरसंचयान् ॥ सर्वाण्यस्त्राणि मुमुचे ब्रह्मास्त्रं च नृपोत्तमः ॥ ३१ ॥ तानि सर्वाणि चास्त्राणि वसिष्ठो ब्रह्मनंदनः ॥ एकेन ब्रह्मदंडेन निजघ्न स्वतपोबलात् ॥ ३२ ॥ ततः पराजितो विप्रा विश्वामित्रोऽतिलज्जितः ॥ ब्राह्मण्यावाप्तये स्वस्य तपः कर्तुं वनं ययौ ॥ ३३ ॥ पूर्वासु पश्चिमांतासु त्रिषु दिक्षु तपोऽचरत् ॥ प्रादुर्भूतमहाविघ्नस्तत्तद्दिक्षु स कौशिकः ॥ ३४ ॥ उत्तरां दिशमासाद्य हिमवत्पर्वतेऽमले कौशिक्यास्सरितस्तीरे पुण्ये पापविनाशिनि ॥ ३५ ॥ दिव्यं वर्षसहस्रं तु निराहारो जितेंद्रियः ॥ निरालोको जितश्वासो जितक्रोधः सुनिश्चलः ॥ ३६ ॥ ग्रीष्मे पंचाग्निमध्यस्थः शिशिरे वारिषु स्थितः ॥ वर्षास्वाकाशगो नित्यमूर्ध्वबाहुर्निराश्रयः ॥ ३७ ॥ ब्राह्मण्यसिद्धयेऽत्युग्रं चचार सुमहत्तपः ॥ उद्विग्नमनसस्तस्य

१ षडर्धनयनः—त्रिणेत्रः शिवः । २ जितलोकः—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्रिदशास्त्रिदिवालयाः ॥ जंभारिणा च सहिता रंभां प्रोचुरिदं वचः ॥ ३८ ॥ ॥ देवा ऊचुः ॥ ॥ रंभे त्वं हिमवच्छैले कौशिकीतीरगं
मुनिम् ॥ ३९ ॥ विश्वामित्रं तपस्यंतं विलोभय विचेष्टितैः ॥ यथा तत्तपसो विघ्नो भविष्यति तथा कुरु ॥ ४० ॥ एवमुक्ता तदा रंभा देवैरिंद्र
पुरोगमैः ॥ प्रत्युवाच सुरान्सर्वान्प्रांजलिः प्रणता तदा ॥ ४१ ॥ ॥ रंभोवाच ॥ ॥ अतिक्रूरो महाक्रोधो विश्वामित्रो महामुनिः ॥
स शप्स्यते मां क्रोधेन बिभेम्यस्मादहं सुराः ॥ ४२ ॥ त्रायध्वं कृपया यूयं मां युष्मत्परिचारिकाम् ॥ इत्युक्तो रंभया तत्र जंभारिस्ताम
भाषत ॥ ४३ ॥ ॥ इन्द्र उवाच ॥ ॥ रंभे त्वया न भीः कार्या विश्वामित्रात्तपोधनात् ॥ अहमप्यागमिष्यामि त्वत्सहायः समन्मथः ॥ ४४ ॥
कोकिलालापमधुरो वसन्तोऽप्यागमिष्यति ॥ अतिसुंदररूपा त्वं प्रलोभय महामुनिम् ॥ ४५ ॥ इतींद्रकथिता रंभा विश्वामित्राश्रमं ययौ ॥ तद्द
ष्टिगोचरा स्थित्वा ललितं रूपमास्थिता ॥ ४६ ॥ सा मुनिं लोभयामास मनोहरविचेष्टितः ॥ पिकोपि तस्मिन्समये चुकूजानंदयन्मनः ॥ ४७ ॥
श्रुत्वा पिकस्वरं रंभां दृष्ट्वा च मुनिपुंगवः ॥ संशयाविष्टहृदयो विदित्वा शक्रकर्म तत् ॥ शशाप रंभां क्रोधेन विश्वामित्रस्तपोधनः ॥ ४८ ॥
॥ ॥ विश्वामित्र उवाच ॥ ॥ यस्मात्कोपयसे रंभे मां त्वं कोपजयषिणम् ॥ ४९ ॥ शिला भवात्र तस्मात्त्वं रंभे वर्षशतायुतम् ॥ तदंतरे ब्राह्म
णेन रक्षिता मोक्षमाप्स्यसि ॥ ५० ॥ विश्वामित्रस्य शापेन तदंते सा शिलाऽभवत् ॥ बहुकालं शिलाभूता तस्थौ तस्याश्रमे द्विजाः ॥ ५१ ॥
विश्वामित्रोपि धर्मात्मा पुनस्तप्त्वा महत्तपः ॥ लेभे वसिष्ठवाक्येन ब्राह्मण्यं दुर्लभं नृपैः ॥ ५२ ॥ बहुकालं शिलाभूता रंभाप्यासीत्तदाश्रमे ॥
तस्मिन्नेवाश्रमे पुण्ये शिष्योऽगस्त्यस्य संमतः ॥ ५३ ॥ श्वेतोनाम मुनिश्चक्रे मुमुक्षुः परमं तपः ॥ चिरकालं तपस्तस्मिन्प्रकुर्वति महामुनौ ॥५४॥
अंगारकेतिविख्याता राक्षसी काचिदागता ॥ तस्याश्रममतिक्रूरा मेघस्वनमहास्वना ॥ ५५ ॥ मूत्ररक्तपुरीषाद्यैर्दूषयामास भीषणा ॥ उपद्रवैस्तथा
चान्यैर्बाधयामास तं मुनिम् ॥ ५६ ॥ अथ क्रुद्धो मुनिः श्वेतो वायव्यास्त्रेण योजयन् ॥ शप्तां कुशिकपुत्रेण राक्षस्यै प्राक्षिपच्छिलाम् ॥ ५७ ॥
राक्षसी सा प्रदुद्राव वायव्यास्त्रेण योजिता ॥ वायव्यास्त्रप्रयुक्तेन दृषदानुद्रुता च सा ॥ ५८ ॥ दक्षिणांबुनिधेस्तीरं धावति स्म भयार्दिता ॥
धावन्तीमनुधावन्ती सा शिलास्त्रप्रयोजिता ॥ ५९ ॥ पपातोपरि राक्षस्या मज्जंत्याः कपितीर्थके ॥ मृता सा राक्षसी तत्र शिलापातात्स्वमूर्द्धनि ॥
॥ ६० ॥ विश्वामित्रेण शप्ता सा कपितीर्थे निमज्जनात् ॥ शिलारूपं परित्यज्य रंभारूपमुपेयुषी ॥ ६१ ॥ देवैः कुसुमधाराभिरभिवृष्टा मनो
रमा ॥ दिव्यं विमानमारूढा दिव्यांबरविराजिता ॥ ६२ ॥ हारकेयूरकटकनासाभरणभूषिता ॥ उर्वश्याद्यप्सरोभिश्च सखिभिः परिवारिता ॥६३॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अशरीरिण्युवाच ॥ ॥ कद्रूस्त्वं मज्जनादत्रच्छलजेतृत्वदोषतः ॥ ४१ ॥ विमुक्ता भर्तृशुश्रूषायोग्या चासि न संशयः ॥ शापोपि गरुडोक्तस्ते
लयं यातोऽत्र मज्जनात् ॥ ४२ ॥ गच्छ भर्तृसकाशं त्वं सोऽपि त्वां स्वीकरिष्यति ॥ इत्युक्त्वा विरराामाथ व्योमवागशरीरिणी ॥ ४३ ॥ तस्यै
वाचे नमस्कृत्य कद्रूः सा प्रीतमानसा ॥ तीर्थं प्रदक्षिणीकृत्य नत्वा पुत्रसमन्विता ॥ ४४ ॥ प्रययौ भर्तुरभ्याशं तच्छुश्रूषणकौतुकात् ॥
आगतां तां समालोक्य स्नातां क्षीरसरोजले ॥ ४५ ॥ ज्ञात्वा विधूतपापां च कश्यपः स समाधिना ॥ अंगीचकार पत्नीं तामात्मशुश्रूषणोचि
ताम् ॥ ४६ ॥ एवं वः कथितं विप्राः कद्रूपापविमोक्षणम् ॥ मज्जनान्मुक्तिदं पुंसां पुण्ये क्षीरसरोजले ॥ ४७ ॥ यः शृणोतीममध्यायं पठते वापि
मानवः ॥ स क्षीरकुंडस्नानस्य लभते फलमुत्तमम् ॥ ४८ ॥ अश्वमेधादियज्ञानां समग्रं फलमश्नुते ॥ गंगादिसर्वतीर्थेषु स स्नातो भवति ध्रुवम् ॥
॥ ४९ ॥ यः पठेदिममध्यायं क्षीरकुंडप्रशंसनम् ॥ गोसहस्रप्रदातॄणां प्राप्नोत्यविकलं फलम् ॥ १५० ॥ इति श्रीस्कांदे महापुराण एकाशी
तिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे सेतुमाहात्म्ये क्षीरकुंडप्रशंसायां कद्रूकृतच्छलदोषशांतिकथावर्णनंनामाष्टत्रिंशोऽध्यायः ॥ ३८ ॥
श्रीसूत उवाच ॥ ॥ अथातः संप्रवक्ष्यामि कपितीर्थस्य वैभवम् ॥ तत्तीर्थं सकलैः पूर्वं गंधमादनपर्वते ॥ १ ॥ सर्वेषामुपकाराय कपिभिर्निर्मितं
द्विजाः ॥ रावणादिषु रक्षःसु हतेषु तदनंतरम् ॥ २ ॥ तीर्थं निर्माय तत्रैव सस्नुस्ते कपयो मुदा ॥ तीर्थाय च वरं प्रादुः[2] कपयः कामरूपिणः ॥
॥ ३ ॥ अस्मिंस्तीर्थे निमग्ना ये भक्तिप्रवणचेतसः ॥ ते सर्वे मुक्तिभाजः स्युर्महापातकमोचिताः ॥ ४ ॥ अत्र तीर्थे निमग्नानां न स्यान्नरकजं
भयम् ॥ अत्र स्नाता नराः सर्वे दारिद्र्यं नाप्नुवंति हि ॥ ५ ॥ अत्र तीर्थे निमग्नानां यमपीडापि[3] नो भवेत् ॥ कपितीर्थं प्रयास्येऽहमिति यः सततं
ब्रुवन् ॥ ६ ॥ व्रजेच्छतपदं विप्राः स यायात्परमं पदम् ॥ एतत्तीर्थसमं तीर्थं न भूतं न भविष्यति ॥ ७ ॥ एवं वरं तु ते दत्त्वा तीर्थायास्मै कपी
श्वराः ॥ रामं दाशरथिं सर्वे प्रणम्याथ ययाचिरे ॥ ८ ॥ स्वामिंस्त्वयास्मै तीर्थाय दीयतां वरमद्भुतम् ॥ कपिभिः प्रार्थितो विप्रा रामचंद्रोऽतिह
र्षितः ॥ ९ ॥ तत्तीर्थाय वरं प्रादात्कपीनां प्रीतिकारणात् ॥ अत्र तीर्थे निमग्नानां गंगास्नानफलं लभेत् ॥ १० ॥ प्रयागस्नानजं पुण्यं सर्वतीर्थ
फलं तथा ॥ अग्निष्टोमादियागानां फलं भूयादनुत्तमम् ॥ ११ ॥ गायत्र्यादिमहामंत्रजपपुण्यं तथा भवेत् ॥ गोसहस्रप्रदनॄणां प्राप्नोत्यविकलं
फलम् ॥ १२ ॥ चतुर्णामपि[4] वेदानां पारायणफलं लभेत् ॥ ब्रह्मविष्णुमहेशादिदेवपूजाफलं लभेत् ॥ १३ ॥ कपितीर्थाय रामोयं प्रादादेवं वरं

१ पुरा—इ० पा० । २ प्राहुः—इ० पा० । ३ गतिस्तत्र न संशयः—इ० पा० । ४ शास्त्राणाम्—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

जितवत्यसि ॥ भर्तुस्त्वं परिचर्यायामतो नार्हा भविष्यसि ॥१५॥ शश्वैवं गरुडः कद्रूं प्रययौ स यथेच्छया ॥ कद्रूश्च विनता चोभे ययतुर्भर्तुरंतिकम्
॥ १६ ॥ कश्यपो विमुखस्तत्र कद्रूं कोपादथाब्रवीत् ॥ यस्माच्छलेन विनतां कद्रूर्निर्जितवत्यसि ॥ १७ ॥ अतो मत्परिचर्यायां न याग्यासि
दुरात्मिके ॥ स्त्रियं वा पुरुषं वापि नारी वा पुरुषोऽपि वा ॥ १८ ॥ छलाद्विजयते योऽसौ स महापातकी भवेत् ॥ छलाद्विजयिना सार्धं सभाष्य
ब्रह्महा भवेत् ॥ १९ ॥ स्तेयी सुरापी विज्ञेयो गुरुदाररतश्च सः ॥ संसर्गदोषदुष्टश्च मुनिभिः परिकीर्त्यते ॥ १२० ॥ त्वया संभाषणाद्दोषो मम
स्यान्नरकप्रदः ॥ तस्मात्प्रयाहि कद्रूस्त्वं मत्समीपाद्धि दारुणे ॥ २१ ॥ छलजेत्रा सपंक्तौ यो भुंजीत मनुजो भुवि ॥ तेन संभाषणात्सद्यः पतेद्धि
नरकार्णवे ॥ २२ ॥ विलोक्य च्छलजेतारं तस्य पापस्य शांतये ॥ आदित्यं वा जलं वापि पावकं वा विलोकयेत् ॥ २३ ॥ छलजेता यत्र
तिष्ठेदाश्रमेऽपि गृहेऽपि वा ॥ वस्तव्यं न हि तत्रान्यैर्वसन्नरकमश्नुते ॥ २४ ॥ अतो निर्याहिनिर्याहि मम त्वं दृष्टिमार्गतः ॥ स्वाश्रमात्सरलामेनां
विनतां जितवत्यसि ॥ २५ ॥ इति धिक्कृत्य सहसा कद्रूं तां कश्यपस्तदा ॥ विनतां स्वच्छशीलां तां स्वीचकार महामतिः ॥ २६ ॥ कद्रूरित्थं
सपरुषं कथिता कश्यपेन सा ॥ रुदंती भृशदुःखार्ता पादयोस्तस्य चापतत् ॥ २७ ॥ पतितां पादयोर्दृष्ट्वा कश्यपो मुनिपुंगवः ॥ न जग्राहैव
कद्रूं तां स्मरन्पापं तया कृतम् ॥ २८ ॥ ततः प्रणम्य विनता कश्यपं वाक्यमब्रवीत् ॥ भगवन्भगिनीमेनां स्वीकुरुष्व कृपानिधे ॥ २९ ॥
अज्ञानान्मुग्धया पापं कद्र्वा यदधुना कृतम् ॥ क्षंतुमर्हसि तत्सर्वं दयाशीला हि साधवः ॥ १३० ॥ जनन्या गरुडस्यैवं कथितः कश्यपो मुनिः ॥
उवाच विनते नैनां विना पापस्य निष्कृतिम् ॥ ३१ ॥ ग्रहीष्यामि दुराचारां त्रिस्त्वां शपथयाम्यहम् ॥ कश्यपस्य वचः श्रुत्वा विनता
पुनरब्रवीत् ॥ ३२ ॥ भगिन्या मम पापस्य ब्रह्मंस्त्वं ब्रूहि निष्कृतिम् ॥ येनेयं परिचर्यायां तव योग्या भविष्यति ॥ ३३ ॥ तयैवमुदितो विप्रा
मारीचः कश्यपस्तदा ॥ ध्यात्वा मुहूर्तं मनसा पश्चादिदमभाषत ॥ ३४ ॥ दक्षिणांबुनिधेस्तीरे फुल्लग्रामे विमुक्तिदे ॥ अस्ति क्षीरसरोनाम तीर्थं
पापविनाशनम् ॥ ६५ ॥ तत्तीर्थस्नानमात्रेण दोषश्चास्या विनश्यति ॥ प्रायश्चित्तायुतेनापि तत्तीर्थे मज्जनं विना ॥ ३६ ॥ न नश्यत्येष दोषो
ऽस्यास्तदेषा यातु तत्सरः ॥ भर्त्रैवमुदिते कद्रूस्तं प्रणम्य द्विजोत्तमम् ॥ ३७ ॥ तत्क्षणात्प्रययौ क्षीरं सरः पुत्रसहायिनी ॥ सा कद्रूः पुत्र
सहिता गत्वा कतिपयैर्दिनैः ॥ ३८ ॥ प्राप्य क्षीरसरः पुण्यं प्रयता विजितेंद्रिया ॥ सस्नौ नियमपूर्वं च संकल्प्य क्षीरकुंडके ॥ ३९ ॥ उपोष्य
त्रिदिनं सस्नौ तस्मिन्क्षीरसरोजले ॥ चतुर्थे दिवसे तस्यां कुर्वत्यां स्नानमादरात् ॥ अदेहा व्योमगा वाणी समुत्तस्थौ द्विजोत्तमाः ॥ १४० ॥

CC-0. In Public Domain. Digitization by eGangotri

महावृक्षो रोहिणाख्यो महोच्छ्रयः ॥ वैनतेयमिदं प्राह महाबलपराक्रमम् ॥ ६३ ॥ एनामारुह मच्छाखां शतयोजनमायताम् ॥ स्थित्वात्र गजकूर्मौ त्वं भक्षयस्व खगोत्तम ॥ ६४ ॥ इत्युक्तस्तरुणा पक्षी स तत्रास्ते मनोजवः ॥ तद्भारात्सा तरोः शाखा भग्नाऽभूद्द्विजसत्तमाः ॥ ६५ ॥ वालखिल्यमुनींस्तस्मिल्लँबमानानधोमुखान् ॥ दृष्ट्वा तत्पातशंकावाँस्तां शाखां गरुडोऽग्रहीत् ॥ ६६ ॥ गजकूर्मौ च तां शाखां गृहीत्वा यांतमंबरे ॥ पिता तस्याब्रवीत्तत्र गरुडं विनतासुतम् ॥ ६७ ॥ त्यजेमां निर्जने शैले शाखां तं विनतोद्भव ॥ इत्युक्तः स तथा गत्वा शाखां निष्पुरुषे नगे ॥ ६८ ॥ विन्यस्याभक्षयत्पक्षी तौ तदा गजकच्छपौ ॥ अथोत्पातः समभवत्तस्मिन्नवसरे दिवि ॥ ६९ ॥ दृष्ट्वोत्पातं बलारातिः पप्रच्छ स्वपुरोहितम् ॥ उत्पातकारणं जीव किमत्रेति पुनःपुनः ॥ बृहस्पतिस्तदा शक्रं प्रोवाच द्विजसत्तमाः ॥ ७० ॥ ॥ बृहस्पतिरुवाच ॥ ॥ काश्यपो हि मुनिः पूर्वमयजत्क्रतुना हरे ॥७१॥ सर्वान्नृषीन्सुरान्सिद्धान्यक्षान्गंधर्वकिन्नरान् ॥ यज्ञसंभारसिद्ध्यर्थं प्रेषयामास स द्विजाः॥ ७२ ॥ वालखिल्यान्ससंभारान्ह्रस्वानंगुष्ठमात्रकान् ॥ मज्जतो गोष्पदजले दृष्ट्वा हसितवान्भवान् ॥ ७३ ॥ भवतावमताः क्रुद्धा वालखिल्यास्तदा हरे ॥ जुहुवुर्यज्ञवह्नौ ते क्रोधेन ज्वलिताननाः ॥ ७४ ॥ देवेंद्रभयदः शत्रुः कश्यपस्य सुतोऽस्त्विति ॥ तस्य पुत्रोऽद्य गरुडः सुधाहरणकौतुकी ॥ ७५ ॥ समागच्छति तद्धेतुरयमुत्पात आगतः ॥ इत्युक्तः सोऽब्रवीदिंद्रो देवानग्निपुरोगमान् ॥ ७६ ॥ सुधामाहर्तुमायाति पक्षी सा रक्ष्यतामिति ॥ इतींद्रप्रेरिता देवा ररक्षुः सायुधाः सुधाम् ॥ ७७ ॥ पक्षिराजस्तदाभ्यागाद्देवानायुधधारिणः ॥ महाबलं ते गरुडं दृष्ट्वाऽकम्पंत वै सुराः ॥ ७८ ॥ गरुडस्य सुराणां च ततो युद्धमभून्महत् ॥ अखंडि पक्षितुण्डेन भौवनोऽमृतपालकः ॥ ७९ ॥ तदा निजघ्नुर्गरुडं देवाः शस्त्रैरनेकशः ॥ अतीव गरुडो देवैर्बाधितः शस्त्रपाणिभिः ॥ ८० ॥ पक्षाभ्यामाक्षिपद्दूरे देवानग्निपुरोगमान् ॥ तत्पक्षविक्षिता देवास्तदा परमकोपनाः ॥ ८१ ॥ नाराचान्भिंदिपालांश्च नानाशस्त्राणि चाक्षिपन् ॥ ततस्तु गरुडो वेगाद्देवदृष्टिविलोपिनीम् ॥ ८२ ॥ धूलिमुत्थापयामास पक्षाभ्यां विनतासुतः ॥ वायुना शमयामासुस्तान्पांसूंस्त्रिदशोत्तमाः ॥ ८३ ॥ रुद्रान्वसूंस्तथादित्यान्मरुतोऽन्यान्सुरांस्तथा ॥ गरुडः पक्षतुंडाभ्यां व्यथितानकरोद्द्विजाः ॥ ८४ ॥ पलायितेषु देवेषु सोऽद्राक्षीज्ज्वलनं पुरः ॥ ज्वलंतं परितस्त्वग्निं शमापयितुमुद्ययौ ॥ ८५ ॥ स सहस्रमुखो भूत्वा तैः पिबञ्छतशो नदीः ॥ तमग्निं नाशयामास तैः पयोभिस्त्वरान्वितः ॥ ८६ ॥ सितधारं भ्रमच्चक्रं सुधारक्षकमंतिके ॥ दृष्ट्वा तदररंध्रेण संक्षिप्तांगोंतराविशत् ॥ ८७ ॥ ततो ददर्श द्वौ सर्पौ व्यक्तास्यौ भीषणाकृती ॥ याभ्यां दृष्टोपि भस्म स्यात्तौ सर्पौ गरुडस्तदा ॥ ८८ ॥ आच्छिद्य पक्षतुंडाभ्यां गृहीत्वाऽमृतमु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ययौ ॥ यंत्रमुत्पाट्य चोद्यंतं गरुडं प्राह माधवः ॥ ८९ ॥ तव तुष्टोऽस्मि पक्षीश वरं वरय सुव्रत ॥ अथ पक्षी तमाह स्म कमलानायकं हरिम् ॥
॥ ९० ॥ तवोपरि[१] स्थितिर्मे स्यान्मा भूतां च जरामृती ॥ तथास्त्विति हरिः प्राह वरं मद्व्रियतामिति ॥ ९१ ॥ इत्युक्तस्तं हरिः प्राह मम त्वं
वाहनं भव ॥ स्यंदनोपरि केतुश्च मम त्वं विनतासुत ॥ ९२ ॥ तथास्त्विति खगोप्याह कमलापतिमच्युतम् ॥ हृतामृतं खगं श्रुत्वा तत आखं
डलो जवात् ॥ ९३ ॥ अभिद्रुत्याशु कुलिशं पक्षे चिक्षेप पक्षिणः ॥ ततो विहस्य गरुडः पाकशासनमब्रवीत् ॥ ९४ ॥ कुलिशस्य निपातान्मे
न हरे कापि वेदना ॥ सफलो वज्रपातस्ते भूयाच्च सुरनायक ॥ ९५ ॥ इतीरयन्पत्रमेकं व्यसृजत्पक्षतस्तदा ॥ शोभनं पर्णमस्येति सुपर्ण इति सोभ
वत् ॥ ९६ ॥ तस्मिन्सुपर्णे हेमाभे सर्वे विस्मयमाययुः ॥ ततस्तु गरुडः शक्रमब्रवीद्द्विजपुंगवाः ॥ ९७ ॥ भवता साकमखिलं जगदेतच्चराच
रम् ॥ देवेंद्र सततं वोढुममोघा शक्तिरस्ति मे ॥ ९८ ॥ नाखण्डलसहस्रं मे रणे लभ्यं हरे भवेत् ॥ इति ब्रुवाणं गरुडमब्रवीत्पाकशासनः ॥९९॥
किं तेऽमृतेन कार्यं स्याद्दीयताममृतं मम ॥ इमां सुधां भवान्दद्याद्येभ्यो हि विनतोद्भव ॥ १०० ॥ तेऽधुनाऽमृतपानेन जरामरणवर्जिताः ॥
अस्मद्भ्योऽधिकवीर्याः स्युर्बाधेरंस्त्रिदशांस्तथा ॥ १ ॥ इति ब्रुवंतं देवेन्द्रं गरुडोऽप्यब्रवीद्द्विजाः ॥ यत्रैतत्स्थापयिष्यामि तत्रागत्य भवानिदम् ॥
॥ २ ॥ गृह्णातु झटितीत्युक्तो गरुडं प्राह वृत्रहा ॥ प्रीतोऽहं तव दास्यामि वरं वृणु महामते ॥ ३ ॥ इत्युक्तवन्तं गरुडः पाकशासनमब्रवीत् ॥
दास्ये छलप्रयोक्तारो मम मातुः सरीसृपाः ॥ ४ ॥ भक्ष्या भवंतु नित्यं मे पाकशासन वृत्रहन् ॥ इति तेनेरितः शक्रस्तथास्त्वित्यवदच्च तम् ॥ ५ ॥
अथायं गरुडो विप्रा धारयन्नमृतं ययौ ॥ यांतं तमनुयाति स्म गरुडं पाकशासनः ॥ ६ ॥ वेगेन स द्विजश्रेष्ठाः सुधाहरणकौतुकी ॥ मातुरभ्याशमा
गत्य सर्पान्प्राह स पक्षिराट् ॥ ७ ॥ कुशेषु न्यस्यते सर्पास्सुधैवमधुना मया ॥ स्नात्वा तद्भुङ्ध्वममृतं शुचयः सुसमाहिताः ॥ ८ ॥ मोक्षोऽपि मम
मातुः स्याद्दासीभावाद्धि पन्नगाः ॥ तथास्त्वित्यवदन्सर्पा गरुडं विनतासुतम् ॥९॥ मुक्ता तदैव विनता दासीभावाद्द्विजोत्तमाः ॥ सर्पास्तेऽमृतभक्षार्थं
स्नातुं सर्वे ययुस्तदा ॥११०॥ तस्मिन्नवसरे शक्रस्तामादाय सुधां ययौ ॥ स्नात्वागत्य भुजंगास्ते तत्रादृष्ट्वा तदा सुधाम् ॥ ११ ॥ जिह्वाभिर्लिलिहुर्द
र्भानेषु न्यस्ता सुधेति हि ॥ तदाप्रभृति सर्पाणां जिह्वा दर्भाग्रपाटिताः ॥१२॥ द्विधाभवन्मुनिश्रेष्ठा द्विजिह्वास्तेन ते स्मृताः॥ सुधासंयोगतो दर्भाः प्रय
युश्च पवित्रताम् ॥१३॥ मोचयित्वा च गरुडो दासीभावात्स्वमातरम् ॥ शशाप कुपितः कद्रूं छद्मना जितमातरम् ॥१४॥ कद्रूस्त्वं जननीं यन्मे छलेन

१ तव उपरि मे स्थितिः स्यात्—इति योजना । स्यन्दनोपरि केतुत्वेन हरेरुपरि गरुडस्य स्थितिर्बोध्या ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

म्यद्य चेटीपुत्रस्ततो भवान् ॥ अतस्त्वं वहसे सर्पान्वहाम्येनामहं सदा ॥ ३६ ॥ इत्यादि सर्ववृत्तांतमादितोऽस्मै न्यवेदयत् ॥ अथ तां गरुडोऽवा
दीन्मातरं विनतासुतः ॥ ३७ ॥ अस्माद्दास्याद्विमोक्षार्थं किं कार्यं ते मयाधुना ॥ इति पृष्टा सुतेनाथ विनता तमभाषत ॥ ३८ ॥ सर्पान्पृच्छस्व
गरुड मम मातृविमोक्षणे ॥ युष्माकं मातुः किं कार्यं मयेति वदताधुना ॥ ३९ ॥ इति मात्रा समुदितो गरुडः पन्नगान्प्रति ॥ गत्वाऽपृच्छद्द्विज
श्रेष्ठास्तेऽप्येनमवदंस्तदा ॥ ४० ॥ यदा हरिष्यसे शीघ्रं सुधां त्वममरालयात् ॥ दास्यान्मुक्ता भवेन्माता वैनतेय तवाद्य हि ॥ ४१ ॥ ततो मात
रमागम्य गरुडः प्रणतोऽब्रवीत् ॥ सुधामंब ममानेतुं गच्छतो भक्ष्यमर्पय ॥ ४२ ॥ इतीरिता सुतं प्राह माता तं विनता सुतम् ॥ समुद्रमध्ये वर्तते
शबराः कतिचित्सुत ॥ ४३ ॥ तान्भक्षयित्वा शबरानमृतं त्वमिहानय ॥ तत्र कश्चिद्द्विजः कामी शबरीसंगकौतुकी ॥ ४४ ॥ त्यज तं ब्राह्मणं कंठं
दहंतं ब्रह्मतेजसा ॥ पक्षादीनि तवांगानि पांतु देवा मरुन्मुखाः ॥ ४५ ॥ इति स्वमातुराशीर्भिर्गरुडो वर्धितो ययौ ॥ शबरालयमभ्येत्य तस्य भक्षय
तो मुखम् ॥ ४६ ॥ आवृतं प्राविशन्व्याधा वयांसीव दरीं गिरेः ॥ अथ स ब्राह्मणोऽप्यागात्तत्कंठं मुनिपुंगवाः ॥ ४७ ॥ कण्ठं दहन्तं विप्रं तमुवाच
विनतासुतः ॥ विप्र पापोऽप्यवध्यो हि निर्याहि त्वमतो बहिः ॥ ४८ ॥ एवमुक्तस्तदा विप्रो गरुडं प्रत्यभाषत ॥ किराती मम भार्यापि निर्गंतव्या
मया सह ॥ ४९ ॥ एवमस्त्विति तं विप्रमुवाच पतगेश्वरः ॥ ततः स गरुडो विप्रमुज्जगार सभार्यकम् ॥ ५० ॥ विप्रोऽप्यभीप्सितान्देशान्निषाद्या
सह निर्ययौ ॥ शबरान्भक्षयित्वाऽथ गरुडः पक्षिणां वरः ॥ ५१ ॥ आत्मनः पितरं वेगात्कश्यपं समुपेयिवान् ॥ कुत्र यासीति तत्पृष्टो गरुडस्तम
भाषत ॥ ५२ ॥ मातुर्दास्यविमोक्षाय सुधामाहर्तुमागमम् ॥ बहून्किराताञ्जग्ध्वापि तृप्तिर्मम न जायते ॥ ५३ ॥ अपर्यंतक्षुधा ब्रह्मन्बाधते मामह
र्निशम् ॥ तन्निवृत्तिप्रदं भक्ष्यं ममार्पय तपोधन ॥ ५४ ॥ येनाहं शक्नुयां तात सुधामाहर्तुमोजसा ॥ इतीरितः सुतं प्राह कश्यपो विनतोद्भवम् ॥
॥ ५५ ॥ ॥कश्यप उवाच ॥ ॥ मुनिर्विभावसुर्नाम्ना पुरासीत्तस्य सानुजः ॥ सुप्रतीक इति भ्राता तावुभौ वंशवैरिणौ ॥ ५६ ॥ अन्योन्यं
शेपतुर्विप्रा महाक्रोधसमाकुलौ ॥ गजोऽभवत्सुप्रतीकः कूर्मोऽभूच्च विभावसुः ॥ ५७ ॥ एवं वित्तविवादात्तौ शेपतुर्भ्रातरौ मिथः ॥ गजः षड्यो
जनोच्छ्रायो द्विगुणायामसंयुतः ॥ ५८ ॥ कूर्मस्त्रियोजनोच्छ्रायो दशयोजनविस्तृतः ॥ बद्धवैरावुभावेतौ सरस्यस्मिन्विहंगम ॥ ५९ ॥ पूर्ववैर
मनुस्मृत्य युध्येते जेतुमिच्छया ॥ उभौ तौ भक्षयित्वा त्वं सुधामाहर तृप्तिमान् ॥ ६० ॥ एवं पित्रेरितः पक्षी गत्वा तद्गजकच्छपौ ॥ समुद्धृत्य
महाकायौ महाबलपराक्रमौ ॥ ६१ ॥ वहन्नखाभ्यां संतीर्थं विलंबाभिधमभ्यगात् ॥ तत्रागतं समालोक्य पक्षिराजं द्विजोत्तमाः ॥ ६२ ॥ तत्तीरजो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वीत् ॥ ८ ॥ तुरंगः श्वेतवालो मे प्रतिभाति सुमध्यमे ॥ किं वा त्वं मन्यसे कद्रूरिति तां विनताऽब्रवीत् ॥ ९ ॥ पृष्टैवं विनतां कद्रूर्बभाषे स्वमतं च
सा ॥ कृष्णवालमहं मन्ये हयमेनमनिंदिते ॥ १० ॥ ततः पराजये कृत्वा दासीभावं पणं मिथः ॥ व्यतिष्ठेतां महाभागे सपत्न्यौ ते द्विजोत्तमाः ॥
॥ ११ ॥ ततः कद्रूर्निजसुतान्वासुकिप्रमुखानहीन् ॥ तस्या नाहं यथा दासी तथा कुरुत पुत्रकाः ॥ १२ ॥ तस्याभीप्सितासिद्ध्यर्थमित्यवोचद्दृशा
तुरा ॥ युष्माभिरुच्चैःश्रवसो बालः प्रच्छाद्यतामिति ॥ १३ ॥ नांगीचक्रुर्मतं तस्या नागाः कद्रू रुषा तदा ॥ अशपत्कुपिता पुत्रान्ज्वलंती रोषमूर्च्छि
ता ॥ १४ ॥ पारीक्षितस्य सर्वेऽद्धा यूयं सत्रे मरिष्यथ ॥ इति शापे कृते मात्रा त्रस्तः कर्कोटकस्तदा ॥ १५ ॥ प्रणम्य पादयोः कद्रूं दीनो वचनम
ब्रवीत् ॥ अहमुच्चैःश्रवोवालं विधास्याम्यंजनप्रभम् ॥ १६ ॥ मा भीरंब त्वया कार्येत्यवादीच्छापविक्लवः ॥ श्वेतमुच्चैःश्रवोवालं ततः कर्कोटको
रगः ॥ १७ ॥ छादयित्वा स्वभोगेन व्यतनोदंजनद्युतिम् ॥ अथ ते विनताकद्र्वौ दास्ये कृतपणे उभे ॥ १८ ॥ देवराजहयं द्रष्टुं संरंभादभ्यगच्छ
ताम् ॥ शशांकशंखमाणिक्यमुक्तैरावतकारणम् ॥ १९ ॥ युगांतकालशयनं योगनिद्राकृतो हरेः ॥ अतीत्य कद्रूविनते समुद्रं सरितां पतिम् ॥
॥ २० ॥ ददृशतुर्हयं गत्वा देवराजस्य वाहनम् ॥ कृष्णवालं हयं दृष्ट्वा विनता दुःखिताऽभवत् ॥ २१ ॥ दुःखितां विनतां कद्रूर्दासीकृत्ये न्ययुंक्त
सा ॥ एतस्मिन्नंतरे तार्क्ष्योऽप्यंडमुद्भिद्य वह्निवत् ॥ २२ ॥ प्रादुर्बभूव विप्रेंद्रा गिरिमात्रशरीरवान् ॥ दृष्ट्वा तद्देहमाहात्म्यमभूत्त्रस्तं जगत्त्रयम् ॥ २३ ॥
ततस्तं तुष्टुवुर्देवा गरुडं पक्षिणां वरम् ॥ दृष्ट्वा तद्देहमाहात्म्यं त्रस्तं स्याद्भुवनत्रयम् ॥ २४ ॥ इत्यालोच्योपसंहृत्य देहमत्यंतभीषणम् ॥ अरुणं
पृष्ठमारोप्य मातुरंतिकमभ्यगात् ॥ २५ ॥ अथाह विनतां कद्रूः प्रणतामतिविह्वलाम् ॥ चेटि नागालयं गंतुमुद्योगो मम वर्तते ॥ २६ ॥
त्वत्पुत्रो गरुडोतो मां मत्पुत्रांश्च वहत्विति ॥ ततश्च विनता पुत्रं गरुडं प्रत्यभाषत ॥ २७ ॥ अहं कद्रूमिमां वक्ष्ये त्वं सर्पान्वह तत्सुतान् ॥ तथेति
गरुडो मातुः प्रत्यगृह्णद्वचो द्विजाः ॥ २८ ॥ अवहद्विनता कद्रूं सर्वांस्तान्गरुडोऽवहत् ॥ रविसामीप्यगाः सर्पास्तत्करैराहतास्तदा ॥ २९ ॥
अस्तौषीद्वज्रिणं कद्रूः सुतानां तापशांतये ॥ सर्वतापं जलासारैर्देवराजोऽप्यशामयत् ॥ ३० ॥ नीयमानास्तदा सर्पा गरुडेन बलीयसा ॥ गत्वा
तं देशमचिरादवदन्विनतासुतम् ॥ ३१ ॥ वयं द्वीपांतरं गंतुं सर्वे द्रष्टुं कृतत्वराः ॥ वह त्वमस्मान्गरुड चेटीसुत ततः क्षणात् ॥ ३२ ॥ ततो मातर
मप्राक्षीद्विनतां गरुडो द्विजाः ॥ अहं कस्माद्वहामीमांस्त्वं चेमां वहसे सदा ॥ ३३ ॥ चेटीपुत्रेति मामेते किं भणंति सरीसृपाः ॥ सर्वमेतद्वद त्वं
मे मातस्तत्त्वेन पृच्छतः ॥ ३४ ॥ पृष्टैवं जननी तेन गरुडं प्राब्रवीत्सुतम् ॥ भगिन्या क्रूरया पुत्र च्छलेनाहं पराजिता ॥ ३५ ॥ तस्या दासी भवा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तेनायं तत्रैवांतरधीयत ॥ मुद्गलोऽपि गते विष्णावनेकशतवत्सरम् ॥ ५० ॥ सुरभेः पयसा जुह्वन्नग्नये हरितुष्टये ॥ उवास प्रयतो नित्यं फुल्ल ग्रामे विमुक्तिदे ॥ देहांते मुक्तिमगमद्विष्णुसायुज्यरूपिणीम् ॥ ५१ ॥ ॥ श्रीसूत उवाच ॥ एवमेतद्द्विजवरा युष्माकं कथितं मया ॥ ५२ ॥ यथा क्षीरसरो नाम तीर्थस्यास्य पुराऽभवत् ॥ इदं क्षीरसरः पुण्यं सर्वलोकेषु विश्रुतम् ॥ ५३ ॥ काश्यपस्य मुनेः पत्नी कद्रूर्यत्र द्विजोत्तमाः ॥ स्नात्वा स्वभर्तृवाक्येन नोदिता नियमान्विता ॥ ५४ ॥ छलेन मुमुचे सद्यः सपत्नीजयदोषतः ॥ अतोऽत्र तीर्थे ये स्नांति मानवाः शुद्धमानसाः ॥ ५५ ॥ तेषां विमुक्तबंधानां मुक्तानां पुण्यकर्मिणाम् ॥ किं यागैः किमु वा वेदैः किं वा तीर्थनिषेवणैः ॥ ५६ ॥ जपैर्वा नियमैर्वापि क्षीरकुंडविलोकिनाम् ॥ क्षीरकुंडस्य वातेन स्पृष्टदेहो नरो द्विजाः ॥ ५७ ॥ ब्रह्मलोकमनुप्राप्य तत्रैव परिमुच्यते ॥ निमग्नाः क्षीरकुंडेऽस्मिन्नवमत्यापि भांस्करिम् ॥५८॥ तस्य मूर्द्धनि तिष्ठेयुर्ज्वलंतः पावकोपमाः ॥ मग्नानां क्षीरकुंडेस्मिञ्छीता वैतरणी नदी ॥५९॥ सर्वाणि नरकाण्यद्धा व्यर्थानि च भवंति हि ॥ कामधेनुसमे तस्मिन्क्षीरकुंडे स्थितेऽप्यहो ॥ ६० ॥ योन्यत्र भ्रमते स्नातुं स नरो विप्रसत्तमाः ॥ गोक्षीरे विद्यमानेऽपि ह्यर्कक्षीराय गच्छति ॥ ६१ ॥ स्नातानां क्षीरकुंडेऽस्मिन्नालभ्यं किंचिदस्ति हि ॥ करप्राप्तैव मुक्तिः स्यात्किमन्यैर्बहुभाषणैः ॥ ६२ ॥ ब्रवीमि भुजमुद्धृत्य सत्यंसत्यं ब्रवीमि वः ॥ यः पठेदिममध्यायं शृणुयाद्वा समाहितः ॥ स क्षीरकुंडस्नानस्य लभते फलमुत्तमम् ॥ ६३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे सेतुमाहात्म्ये क्षीरकुंडप्रशंसायां क्षीरकुंडस्वरूपकथनं नाम सप्तत्रिंशोऽध्यायः ॥ ३७ ॥ ॥ छ ॥

॥ ॥ ऋषय ऊचुः ॥ ॥ सूत कद्रूः कथं मुक्ता क्षीरकुंडनिमज्जनात् ॥ छलं कथं कृतवती सपत्न्यां पापनिश्चया ॥ १ ॥ कस्य पुत्री च सा कद्रूः सपत्नीसा च कस्य वै ॥ किमर्थमजयत्कद्रूः स्वसपत्नीं छलेन तु ॥ एतन्नः श्रद्दधानानां ब्रूहि सूत कृपानिधे ॥ २ ॥ ॥ श्रीसूत उवाच ॥ ॥ शृणुध्वं मुनयः सर्वे इतिहासं महाफलम् ॥ पुरा कृतयुगे विप्राः प्रजापतिसुते उभे ॥ ३ ॥ कद्रूश्च विनता चेति भगिन्यौ संबभूवतुः ॥ भार्ये ते कश्यपस्यास्तां कद्रूश्च विनता तथा ॥ ४ ॥ विनता सुषुवे पुत्रावरुणं गरुडं तथा ॥ भर्त्तुः सकाशात्कद्रूश्च लेभे सर्पान्बहून्सुतान् ॥ ॥ ५ ॥ अनंतवासुकिमुखान्विषदर्पसमन्वितान् ॥ एकदा तु भगिन्यौ ते कद्रूश्च विनता तथा ॥ ६ ॥ अपश्यतां समायांतमुच्चैःश्रवसमंतिकात् ॥ विलोक्य कद्रूस्तुरगं विनतामिदमब्रवीत् ॥ ७ ॥ श्वेतोऽश्ववालो नीलो वा विनते ब्रूहि तत्त्वतः ॥ इत्युक्ता विनता विप्राः कद्रूं तामिदमब्र

१ साध्वी–इ०पा० । २ भास्करिम्–यमम्–इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दया नास्ति कथमेनां निनीषथ ॥ २२ ॥ पशुमांसकृताहारां वारुणीपूरितोदराम् ॥ जीवहिंसारतां नित्यं कथमेनां निनीषथ ॥ २३ ॥ न च
पंचाक्षरी जप्ता न कृतं शिवपूजनम् ॥ न ध्यातो भगवाञ्छंभुः कथमेनां निनीषथ ॥ २४ ॥ नोपोषिता शिवतिथिर्न कृतं शिवपूजनम् ॥ भूतसौहृदं
न जानाति न च बिल्वशिवार्पणम् ॥ नेष्टापूर्तादिकं वापि कथमेनां निनीषथ ॥ २५ ॥ न च स्नातानि तीर्थानि न दानानि कृतानि च ॥ न च
व्रतानि चीर्णानि कथमेनां निनीषथ ॥ २६ ॥ ईक्षणे परिहर्त्तव्या किमु संभाषणादिषु ॥ सत्संगरहितां चंडां कथमेनां निनीषथ ॥ २७ ॥ जन्मां
तरार्जितं किंचिदस्याः सुकृतमस्ति वा ॥ तत्कथं कुष्ठरोगेण कृमिभिः परिभूयते ॥ २८ ॥ अहो ईश्वरचर्येयं दुर्विभाव्या शरीरिणाम् ॥ पापात्मा
नोऽपि नीयंते कारुण्यात्परमं पदम् ॥ २९ ॥ इत्युक्तास्ते मया दूता देवदेवस्य शूलिनः ॥ प्रत्यूचुर्मामथ प्रीत्या सर्वसंशयभेदिनः ॥ ३० ॥
॥ शिवदूता ऊचुः ॥ ॥ ब्रह्मन्सुमहदाश्चर्यं शृणु कौतूहलं यदि ॥ इमामुद्दिश्य चांडालीं यदुक्तं भवताधुना ॥ ३१ ॥ आसीदियं पूर्वभवे काचि
द्ब्राह्मणकन्यका ॥ सुमित्रानाम संपूर्णसोमबिम्बसमानना ॥ ३२ ॥ उत्फुल्लमल्लिकादामसुकुमारांगलक्षणा ॥ कैकेयद्विजमुख्यस्य कस्यचित्तनया
सती ॥ ३३ ॥ तां सर्वलक्षणोपेतां रतेर्मूर्तिमिवापराम् ॥ वर्द्धमानां पितुर्गेहे वीक्ष्यासन्विस्मिता जनाः ॥ ३४ ॥ दिनेदिने वर्धमाना बंधुभिर्ला
लिता भृशम् ॥ सा शनैर्यौवनं भेजे स्मरस्येव महाधनुः ॥ ३५ ॥ अथ सा बंधुवर्गैश्च समेतेन कुमारिका ॥ पित्रा प्रदत्ता कस्मैचिद्विधिना द्विज
सूनवे ॥ ३६ ॥ सा भर्त्तारमनुप्राप्य नवयौवनशालिनी ॥ कंचित्कालं शुभाचारा रेमे बंधुभिरावृता ॥ ३७ ॥ अथ कालवशात्तस्याः पतिस्तीव्र
रुजार्दितः ॥ रूपयौवनकांतोपि पंचत्वमगमन्मुने ॥ ३८ ॥ मृते भर्त्तरि दुःखेन विदग्धहृदया सती ॥ उवास कतिचिन्मासान्सुशीला विजितें
द्रिया ॥ ३९ ॥ अथ यौवनभारेण जृंभमाणेन नित्यशः ॥ बभूव हृदयं तस्याः कंदर्पपरिकंपितम् ॥ ४० ॥ सा गुप्ता बन्धुवर्गेण शासितापि महो
त्तमैः ॥ न शशाक मनो रोद्धुं मदनाकृष्टमंगना ॥ ४१ ॥ सा तीव्रमन्मथाविष्टा रूपयौवनशालिनी ॥ विधवापि विशेषेण जारमार्गरताभवत्
॥ ४२ ॥ न ज्ञाता केनचिदपि जारिणीति विचक्षणा ॥ जुगूहात्मदुराचारं कंचित्कालमसत्तमा ॥ ४३ ॥ तां दोहदसमाक्रांतां घननीलमुखस्त
नीम् ॥ कालेन बंधुवर्गोपि बुबोध विटदूषिताम् ॥ ४४ ॥ इति भीतो महाक्लेशाच्चिंतां लेभे दुरत्ययाम् ॥ स्त्रियः कामेन नश्यंति ब्राह्मणा हीनसेवया
॥ ४५ ॥ राजानो ब्रह्मदंडेन यतयो भोगसंग्रहात् ॥ लीढं शुना तथैवान्नं सुरया वार्पितं पयः ॥ ४६ ॥ रूपं कुष्ठरुजाविष्टं कुलं नश्यति कुस्त्रिया ॥

१ लिंगपूजनम्–इ० पा० । २ दर्शने–इ० पा० । ३ कुष्ठयक्ष्मणा–इ० पा० । ४ विन्दन्ते–इ० पा० । ५ महत्–इ० पा० । ६ पुनः–इ० पा० । ७ कंदर्पज्वरपीडितम्–इ० पा० । ८ नीचसेवया–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इति सर्वे समालोच्य समेताः पतिसोदराः ॥ ४७ ॥ तत्यजुर्गोत्रतो दूरं गृहीत्वा सकचग्रहम् ॥ सघटोत्सर्गमुत्सृष्टा सा नारी सर्वबन्धुभिः ॥ ४८ ॥
विचरंती च शूद्रेण रममाणा रतिप्रिया ॥ सा ययौ स्त्री बहिर्ग्रामाद्दृष्टा शूद्रेण केनचित् ॥ ४९ ॥ स तां दृष्ट्वा वरारोहां पीनोन्नतपयोधराम् ॥ गृहं
निनाय साम्ना च विधवां शूद्रनायकः ॥ सा नारी तस्य महिषी भूत्वा तेन दिवानिशम् ॥ ५० ॥ रममाणा क्वचिद्देशे न्यवसद्गृहवल्लभा ॥ तत्र सा
पिशिताहारा नित्यमापीतवारुणी ॥ ५१ ॥ लेभे सुतं च शूद्रेण रममाणा रतिप्रिया ॥ कदाचिद्भर्त्तरि क्वापि याते पीतसुरा तु सा ॥ ५२ ॥ इयेष
पिशिताहारं मदिरामदविह्वला ॥ अथ मेषेषु बद्धेषु गोभिः सह बहिर्व्रजे ॥ ५३ ॥ ययौ कृपाणमादाय सा तमोंधे निशामुखे ॥ अविमृश्य
मदावेशान्मेषबुद्ध्यामिषप्रिया ॥ ५४ ॥ एकं जघान गोवत्सं क्रोशंतं निशि दुर्भगा ॥ निहतं गृहमानीय ज्ञात्वा गोवत्समंगना ॥ ५५ ॥
भीता शिवशिवेत्याह केनचित्पुण्यकर्मणा ॥ सा मुहूर्त्तमिति ध्यात्वा पिशितासवलालसा ॥ ५६ ॥ छित्त्वा तमेव गोवत्सं चकाराहारमी
प्सितम् ॥ गोवत्सार्धशरीरेण कृताहाराथ सा पुनः ॥ ५७ ॥ तदर्धदेहं निक्षिप्य बहिश्चुक्रोश कैतवात् ॥ अहो व्याघ्रेण भग्नोऽयं जग्धो
गोवत्सको व्रजे ॥ ५८ ॥ इति तस्याः समाक्रंदः सर्वगेहेषु शुश्रुवे ॥ अथ सर्वे शूद्रजनाः समागम्यांतिके स्थिताः ॥ ५९ ॥ हतं गोवत्समालोक्य
व्याघ्रेणेति शुचं ययुः ॥ गतेषु तेषु सर्वेषु व्युष्टायां च ततो निशि ॥ ६० ॥ तद्भर्ता गृहमागत्य दृष्टवान्गृहविड्वरम् ॥ एवं बहुतिथे
काले गते सा शूद्रवल्लभा ॥ ६१ ॥ कालस्य वशमापन्ना जगाम यममंदिरम् ॥ यमोपि धर्ममालोक्य तस्याः कर्म च पौर्विकम् ॥ ६२ ॥
निर्वर्त्य निरयावासाच्चक्रे चंडालजातिकाम् ॥ सापि भ्रष्टा यमपुराच्चांडालीगर्भमाश्रिता ॥ ६३ ॥ ततो बभूव जात्यंधा प्रशांतांगारमेचका ॥
तत्पिता कोपि चांडालो देशे कुत्रचिदास्थितः ॥ ६४ ॥ तां तादृशीमपि सुतां कृपया पर्यपोषयत् ॥ अभोज्येन कदन्नेन शुना लीढेन पूतिना
॥ ६५ ॥ अपेयैश्च रसैर्मात्रा पोषिता सा दिनेदिने ॥ जात्यंधा सापि कालेन बाल्ये कुष्ठरुजार्दिता ॥ ६६ ॥ ऊढा न केनचिद्वापि चांडालेना
तिदुर्भगा ॥ अतीतबाल्ये सा काले विध्वस्तपितृमातृका ॥ ६७ ॥ दुर्भगेति परित्यक्ता बंधुभिश्च सहोदरैः ॥ ततः क्षुधार्दिता दीना शोचन्ती
विगतेक्षणा ॥ ६८ ॥ गृहीतयष्टिः कृच्छ्रेण संचचाल सलोष्टिका ॥ पत्तनेष्वपि सर्वेषु याचमाना दिनेदिने ॥ ६९ ॥ चांडालोच्छिष्टपिंडेन जठरा
ग्निमतर्पयत् ॥ एवं कृच्छ्रेण महता नीत्वा सुबहुलं वयः ॥ ७० ॥ जरया ग्रस्तसर्वांगी दुःखमाप दुरत्ययम् ॥ निरन्नपानवसना सा कदाचि

१ धनवान्–इ० पा० । २ दुष्टेन–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

न्महाजनान् ॥ ७१ ॥ आयास्यंत्यां शिवतिथौ गच्छतो बुबुधेऽध्वगान् ॥ तस्यां तु देवयात्रायां देशदेशांतयायिनाम् ॥ ७२ ॥ विप्राणां साग्निहोत्रा
णां सस्त्रीकाणां महात्मनाम् ॥ राज्ञां च सावरोधानां सहस्तिरथवाजिनाम् ॥ ७३ ॥ सपरीवारघोषाणां यानच्छत्रादिशोभिनाम् ॥ तथान्येषां च
विट्शूद्रसंकीर्णानां सहस्रशः ॥ ७४ ॥ हसतां गायतां क्वापि नृत्यतामथ धावताम् ॥ जिघ्रतां पिबतां कामाद्गच्छतां प्रतिगर्जताम् ॥ ७५ ॥
संप्रयाणे मनुष्याणां संभ्रमः सुमहानभूत् ॥ इति सर्वेषु गच्छत्सु गोकर्णं शिवमंदिरम् ॥ ७६ ॥ पश्यंति दिविजाः सर्वे विमानस्थाः सकौतुकाः ॥
अथेयमपि चांडाली वसनाशनतृष्णया ॥ ७७ ॥ महाजनान्याचयितुं चचाल च शनैःशनैः ॥ करावलंबेनान्यस्याः प्राग्जन्मार्जितकर्मणा ॥ दिनैः
कतिपयैर्यांती गोकर्णं क्षेत्रमाययौ ॥ ७८ ॥ ततो विदूरे मार्गस्य निषण्णा विवृतांजलिः ॥ याचमाना मुहुः पांथान्बभाषे[2] कृपणं वचः ॥ ७९ ॥
प्राग्जन्मार्जितपापौघैः पीडितायाश्चिरं मम ॥ आहारमात्रदानेन दयां कुरुत भो जनाः ॥ ८० ॥ त्रातारः परमार्तानां दातारः परमाशिषाम् ॥
कर्तारो बहुपुण्यानां दयां कुरुत भो जनाः ॥ ८१ ॥ वसनाशनहीनायां स्वपितायां महीतले ॥ महापांसुनिमग्नायां दयां कुरुत भो जनाः ॥ ८२ ॥
महाशीतातपार्त्तायां पीडितायां महारुजा ॥ अन्धायां मयि वृद्धायां दयां कुरुत भो जनाः ॥ ८३ ॥ चिरोपवासदीप्तायां जठराग्निविवर्धनैः ॥
संदह्यमानसर्वांग्यां दयां कुरुत भो जनाः ॥ ८४ ॥ अनुपार्जितपुण्यायां जन्मांतरशतेष्वपि ॥ पापायां मंदभाग्यायां दयां कुरुत भो जनाः ॥८५॥
एवमभ्यर्थयंत्यास्तु चांडाल्याः प्रसृतेंऽजलौ ॥ एकः पुण्यतमः पांथः प्राक्षिपद्बिल्वमंजरीम् ॥ ८६ ॥ तामंचलौ निपतितां सा विमृश्य पुनः पुनः ॥
अभक्ष्येत्येव मत्वाथ दूरे प्राक्षिपदातुरा ॥ ८७ ॥ तस्याः करेण निर्मुक्ता रात्रौ सा बिल्वमंजरी ॥ पपात कस्यचिद्दिष्ट्या शिवलिंगस्य
मस्तके ॥ ८८ ॥ सैवं शिवचतुर्दश्यां रात्रौ पांथजनान्मुहुः ॥ याचमानापि यत्किंचिन्न लेभे दैवयोगतः ॥ ८९ ॥ तत्रोषितानया रात्रिर्भद्रका
ल्यास्तु पृष्ठतः ॥ किंचिदुत्तरतः स्थानं तदर्धेनातिदूरतः ॥ ९० ॥ ततः प्रभाते भ्रष्टा[3]शा शोकेन महताप्लुता ॥ शनैर्निववृते दीना स्वदेशायैव
केवला ॥ ९१ ॥ श्रांता चिरोपवासेन निपतन्ती पदेपदे ॥ क्रंदंती बहुरोगार्ता वेपमाना भृशा[4]तुरा ॥ ९२ ॥ दह्यमानार्कतापेन नग्नदेहा सं[5]य
ष्टिका ॥ अतीत्यैतावतीं भूमिं निपपात विचेतना ॥९३॥ अथ विश्वेश्वरः शंभुः करुणामृतवारिधिः ॥ एनामानयतेत्यस्मा[6]न्युयुजे सविमानकान् ॥
॥ ९४ ॥ एषा प्रवृत्तिश्चांडाल्यास्तवेह परिकीर्त्तिता ॥ तथा संदर्शिता शंभोः कृपणेषु कृपालुता ॥ ९५ ॥ कर्मणः परिपाकोत्थां गतिं पश्य महा

१ सापि—इ० पा० । २ पांथसंस्थान्—इ० पा० । ३ भ्रष्टा सा—इ० पा० । ४ कृशातुरा--क्षुधातुरा--इति च पा० । ५ आत्तयष्टिका—इ० पा० । ६ आदिदेश विमानगान्--इ० पा० ।

CC-0. In Public Domain. Digitization by eGangotri

मते ॥ अधमापि परं स्थानमारोहति निरामयम् ॥ ९६ ॥ यदेतया पूर्वभवे नान्नदानादिकं कृतम् ॥ क्षुत्पिपासादिभिः क्लेशैस्तस्मादिह निपी
ड्यते ॥ ९७ ॥ यदेषा मदवेगांधा चक्रे पापं महोल्बणम् ॥ कर्मणा तेन जात्यंधा बभूवात्रैव जन्मनि ॥ ९८ ॥ अपि विज्ञाय गोवत्सं यदेषाऽभक्षय
त्पुरा ॥ कर्मणा तेन चांडाली बभूवेह विगर्हिता ॥ ९९ ॥ यदेषार्यपथं हित्वा जारमार्गरता पुरा ॥ तेन पापेन केनापि दुर्वृत्ता दुर्भगापि वा ॥
॥ १०० ॥ यदाश्लिष्य मदाविष्टा जारेण विधवा पुरा ॥ तेन पापेन महता बहुकुष्ठव्रणान्विता ॥ १०१ ॥ कामार्त्ता यदियं स्वैरं शूद्रेण रमिता
पुरा ॥ महासृक्पूयकृमिभिः पीड्यते तेन पाप्मना ॥ २ ॥ सुव्रतानि न चीर्णानि नेष्टापूर्तादिकं कृतम् ॥ सर्वभोगविहीनेयं दूयते तेन पाप्मना ॥
॥ ३ ॥ यदेतया पूर्वभवे सुरा पीता विमूढया ॥ महायक्ष्मार्तिहृच्छूलैः पीड्यते तेन पाप्मना ॥ ४ ॥ अत्रैव सर्वमर्त्येषु पापचिह्नानि कृत्स्नशः ॥
लक्ष्यंते मुनिशार्दूल सविवेकैर्महात्मभिः ॥ ५ ॥ अत्र ये बहुरोगार्त्ता ये पुत्रधनवर्जिताः ॥ ६ ॥ ये च दुर्लक्षणक्लिष्टा याचका विगतह्रियः ॥
वासोन्नपानशयनभूषणाभ्यंजनादिभिः ॥ ७ ॥ हीना विरूपा निर्विद्या विकलांगाः कुभोजनाः ॥ ये दुर्भाग्या निंदिताश्च ये चान्ये परसेवकाः ॥
॥ ८ ॥ एते पूर्वभवे सर्वे सुमहत्पापकारिणः ॥ एवं विमृश्य यत्नेन दृष्ट्वा लोकजनस्थितिम् ॥ ९ ॥ बुधो न कुरुते पापं यदि कुर्यात्स आत्महा ॥
देहोऽयं मानुषो जंतोर्बहुकर्मैकभाजनम् ॥ ११० ॥ सदा सत्कर्म सेवेत दुष्कर्म सततं त्यजेत् ॥ पुण्यं सुखार्थी कुर्वीत दुःखार्थी पापमाचरेत् ॥
॥ ११ ॥ द्वयोरेकतरे लोके गृहीते कुशलो जनः ॥ इमं मानुषमाश्रित्य देहं परमदुर्लभम् ॥ १२ ॥ य आत्महितवान्कश्चिद्देवमेकं समाश्रयेत् ॥
अथ पापानि सर्वाणि कुर्वन्नपि सदा नरः ॥ १३ ॥ शिवमेकमतिर्ध्यायेत्स संतरति पातकम् ॥ मृता पूर्वभवे त्वेषा यदा प्राप्ता यमालये ॥ १४ ॥
तदा वितर्कः सुमहानासीद्यमसभासदाम् ॥ यद्यपि ब्राह्मणी त्वेषा सत्कुलाचारदूषिता ॥ १५ ॥ अतोऽस्माभिरिहानीता निरयं यातु वा न वा ॥
अनया साधितो बाल्ये पुण्यलेशोऽस्ति वा न वा ॥ १६ ॥ अथापि सुविमृश्यैवं धार्यो दंडोऽत्र नान्यथा ॥ बहुजन्मसहस्रेषु कृतपुण्यविपाकतः ॥
॥ १७ ॥ नृणां ब्रह्मकुले जन्म लभ्यते हि कथंचन ॥ अतोस्याः पूर्वपूर्वेषु कृताघं नास्ति जन्मसु ॥१८॥ अन्यथा सत्कुले जन्म कथमेषा प्रपद्यते॥
अत्रैव जन्मन्यनया कृतमंहो दुरत्ययम् ॥ १९ ॥ अथापि नरकावासं प्रायशो नेयमर्हति ॥ किं तु गोवत्सकं हत्वा विमृश्यागतसाध्वसा ॥ १२० ॥
एषा शिवशिवेत्याह प्राग्जन्मार्जितकर्मणा ॥ यदेषा पापविच्छित्त्यै सकृदप्युरुमंगलम् ॥ २१ ॥ शिवनाम वदेद्भक्त्या तर्हि गच्छेत्परं पदम् ॥

१ आर्यपथम्—स्नानदानादिकं कर्म—इत्यर्थः स्वपथम्—इ० पा० । २ कुरूपाः—इ० पा० । ३ तथापि—इ० पा० । ४ तत्पुण्यं प्राग्भवार्जितम्—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एकजन्मकृतस्यास्य दारुणस्यापि यत्फलम् ॥ २२ ॥ क्रमेणानुभवत्वेषा भूत्वा चांडालजातिका ॥ अस्मादन्यतमः को वा नरकोऽस्ति नृणामिह ॥ २३ ॥ अनेकक्लेशसंघातैर्यन्मुहुः परिपीडनम् ॥ दुष्कुले जन्म दारिद्र्यं महाव्याधिर्विमूढता ॥ २४ ॥ एकैक एव नरकः सर्वे वा चाथ किं पुनः ॥ प्राग्जन्मपुण्यभारेण यन्नाम विवशाऽब्रवीत् ॥ २५ ॥ तेनैषान्यभवे भूरि पुण्यमंते करिष्यति ॥ तेन पुण्येन महता निस्तीर्णाघौघयातनाः ॥ २६ ॥ नीता तत्पुरुषैरंते प्रयास्यति परं[1] पदम् ॥ एतादृशानां मर्त्यानां शास्तारो न वयं क्वचित् ॥ विचार्य स्वयमेवेशो यद्युक्तं तत्करोतु सः ॥ २७ ॥ एवं वैवस्वतपुरे सर्वैर्यमपुरोगमैः ॥ विमृश्य चित्रगुप्ताद्यैरियं मुक्ताऽपतद्भुवि ॥ २८ ॥ आदौ यदेषा शिवनाम नारी प्रमादतो वाप्यसती जगाद ॥ तेनेह भूयः सुकृतेन शंभोर्बिल्वांकुराराधनपुण्यमाप ॥ २९ ॥ श्रीगोकर्णे शिवतिथावुपोष्य शिवमस्तके ॥ कृत्वा जागरणं ह्येषा चक्रे बिल्वार्पणं निशि ॥ १३० ॥ अकामतः कृतस्यास्य पुण्यस्यैव च यत्फलम् ॥ अद्यैव भोक्ष्यते सेयं पश्यतस्तव नो मृषा ॥ ३१ ॥ ॥ गौतम उवाच ॥ ॥ इत्युक्त्वा शिवदूतास्ते तस्याश्चांडालयोनितः ॥ जीवलेशं समाकृष्य युयुजुर्दिव्यतेजसा ॥ ३२ ॥ तां दिव्यदेहसंक्रांतां तेजोराशिसमुज्ज्वलाम् ॥ विमाने स्थापयामासुः प्रीतास्ते शिवकिंकराः ॥ ३३ ॥ अथ सा परमोदाररूपलावण्यशालिनी ॥ दिव्यभूषणदीप्तांगी दिव्यांबरविधारिणी ॥ ३४ ॥ देहेन दिव्यगंधेन दिव्यतेजोविकाशिना[2] ॥ दिव्यमाल्यावतंसेन विरराज विमानगा ॥ ३५ ॥ रत्नच्छत्रपताकाद्यैर्गीतवादित्रनिस्वनैः ॥ मध्ये सा शिवदूतानां मोदमाना वरानना ॥ ३६ ॥ अनुभूतानि जन्मानि स्मृत्वास्मृत्वा पुनःपुनः ॥ भीता त्रस्ता दृढाश्चर्यं दृष्ट्वा स्वप्नमिवोत्थिता ॥ ३७ ॥ काहं केऽमी महासिद्धाः कोयं लोको मनोरमः ॥ क्व गतं मे वपुः कष्टं चंडचांडालगोत्रजम् ॥ ३८ ॥ अहो सुमहदाश्चर्यं दृष्टं मायाविलासजम् ॥ यन्मे भवसहस्रेषु भ्रांतंभ्रांतं पुनःपुनः ॥ ३९ ॥ अहो ईश्वरपूजाया माहात्म्यं विस्मयावहम् ॥ पत्रमात्रेण संतुष्टो यो ददाति निजं पदम् ॥ १४० ॥ इति तां जातनिर्वेदां स्मरन्तीं भगवत्पदम् ॥ दिव्यं विमानमारोप्य ते महेश्वरकिंकराः ॥ ॥ ४१ ॥ आलोकयत्सु सर्वेषु लोकेशेषु सविस्मयम् ॥ आमंत्र्य तामथानिन्युः परमेश्वरसन्निधिम् ॥ ४२ ॥ राजन्सुमहदाश्चर्यमाख्यातं गिरिजापतेः ॥ माहात्म्यं भक्तिलेशस्य सर्वाघौघविनाशनम् ॥ ४३ ॥ ॥ राजोवाच ॥ ॥ भगवन्परमेशस्य कीदृशो लोक उत्तमः ॥ तस्य मे लक्षणं ब्रूहि यद्यस्ति मयि ते दया ॥ ४४ ॥ ॥ गौतम उवाच ॥ ॥ ब्रह्मादिसुरनाथानां लोकेष्वपि सुदुर्लभः ॥ य आनंदः सदा यत्र स लोकः

१ पदं विभोः—इ० पा० । २ दिव्यतेजोविकाशिनी—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पारमेश्वरः ॥ ४५ ॥ सर्वातिगमनं यत्र ज्योतिर्यत्र प्रतिष्ठितम् ॥ कापि नास्ति तमोयोगः स लोकः पारमेश्वरः ॥ ४६ ॥ गुणवृत्तिं विनिस्तीर्य संप्राप्ता यत्र योगिनः ॥ न पतेयुः पुनः सर्वे स लोकः पारमेश्वरः ॥ ४७ ॥ यत्र वासं न कुर्वंति क्रोधलोभमदादयः ॥ यत्रावस्था न जन्माद्याः स लोकः पारमेश्वरः ॥ ४८ ॥ सर्वेषां निगमानां च यदेकं क्षेत्रमुच्यते ॥ यस्मान्नास्ति परं वित्तं तत्पदं पारमेश्वरम् ॥ ४९ ॥ प्रत्याहारासन ध्यानप्राणसंयमनादिभिः ॥ यत्र योगपथैः प्राप्तुं यतंते योगिनः सदा ॥ १५० ॥ यत्र देवः सदानंदनिर्मलज्ञानरूपया ॥ अस्ति देव्या सह क्रीडन्स लोकः पारमेश्वरः ॥ ५१ ॥ जन्मानेकसहस्रेषु संभृतैः पुण्यराशिभिः ॥ आरूढाः पुरुषा नार्यः क्रीडन्ते यत्र संगताः ॥ ५२ ॥ तेजोराशौ समा[1]लीना दुर्विभाव्ये मनोरमे ॥ अहोरात्रादिसंस्थानं न विंदंति कदाचन ॥ ५३ ॥ स लोकः परमेशस्य दुर्लभो हि कुयोगिनः ॥ एतद्भक्तिसुपूर्णा ये तैरेव प्रतिपद्यते ॥ ५४ ॥ ये तत्कथाश्रवणकीर्तनजातहर्षा ये सर्वभूतसुहृदः प्रशमैकनिष्ठाः ॥ संसारचक्रमतिवाह्य निरस्तमोहास्ते शांकरं पदमवाप्य सुखं रमन्ते ॥ ५५ ॥ तथा त्वमपि राजेंद्र गोकर्णं गिरिशालयम् ॥ गत्वा प्रशमिताघौघः कृतकृत्यत्वमाप्नुहि[2] ॥ ५६ ॥ तत्र सर्वेषु कालेषु स्नात्वाभ्यर्च्य महाबलम् ॥ कृत्वा शिवचतुर्दश्यामुपवासं समाहितः ॥ ५७ ॥ कृत्वा जागरणं रात्रौ बिल्वैरभ्यर्च्य शंकरम् ॥ सर्वपापविनिर्मुक्तः शिवेलोकमवाप्स्यसि ॥ ५८ ॥ एष ते विमलो राजन्नुपदेशो मया कृतः ॥ स्वस्ति तेऽस्तु गमिष्यामि मिथिलाधिपतेः पुरीम् ॥ ५९ ॥ इत्यामन्त्र्य मुनिः प्रीत्या गौतमो मिथिलां ययौ ॥ सोऽपि हृष्टमना राजा गोकर्णं प्रत्यपद्यत ॥ १६० ॥ तत्र दृष्ट्वा महादेवं स्नात्वाभ्यर्च्य महाबलम् ॥ निर्धूताशेषपापौघो लेभे शम्भोः परं पदम् ॥ ६१ ॥ य इमां शृणुयान्नि[3]त्यं कथां शैवीं मनोहराम् ॥ श्रावयेद्वा जनो भक्त्या स याति पर[4]मां गतिम् ॥ ६२ ॥ श्रद्दधानः सकृद्वापि य इमां शृणुयात्कथाम् ॥ त्रिःसप्तकुलजैः सार्धं शिवलोकमवाप्नुयात् ॥ ६३ ॥ इति कथितमशेषं श्रेयसामादिबीजं भवशतदुरितघ्नं ध्वस्तमोहांधकारम् ॥ चरितममरगेयं मन्मथारेरुदारं सततमपि निषेव्यं स्वस्तिमद्भिश्च लोकैः ॥ ॥१६४॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मोत्तरखण्डे शिवचतुर्दशीगोकर्णमाहात्म्यवर्णनंनाम तृतीयोऽध्यायः ॥ ॥ ३ ॥ ॥ छ ॥ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ भूयोपि शिवमाहात्म्यं वक्ष्यामि परमाद्भुतम् ॥ शृण्वतां सर्वपापघ्नं भवपाशविमोचनम् ॥ ॥ १ ॥ दुस्तरे दुरितांभोधौ मज्जतां विषयात्मनाम् ॥ शिवपूजां विना कश्चित्प्लवो नास्ति निरूपितः ॥ २ ॥ शिवपूजां सदा कुर्याद्बुद्धिमानिह

१ सदा लीनाः--इ० पा० । २ कृतकृत्यत्वमाप्नुहि--इ० पा० । ३ पुण्याम्--इ० पा० । ४ परमं पदम्--इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मानवः ॥ अशक्तश्चेत्कृतां पूजां पश्येद्भक्तिविनम्रधीः ॥ ३ ॥ अश्रद्धयापि यः कुर्याच्छिवपूजां विमुक्तिदाम् ॥ पश्येद्वा सोपि कालेन प्रयाति परमं पदम् ॥ ४ ॥ आसीत्किरातदेशेषु नाम्ना राजा विमर्दनः ॥ शूरः परमदुर्द्धर्षो जितशत्रुः प्रतापवान् ॥ ५ ॥ सर्वदा मृगयासक्तः कृपणो निर्घृणो बली ॥ सर्वमांसाशनः क्रूरः सर्ववर्णांगनावृतः ॥ ६ ॥ तथापि कुरुते शंभोः पूजां नित्यमतंद्रितः ॥ चतुर्दश्यां विशेषेण पक्षयोः शुक्लकृष्णयोः ॥ ॥ ७ ॥ महाविभवसंपन्नां पूजां कृत्वा स मोदते ॥ हर्षेण महताविष्टो नृत्यति स्तौति गायति ॥ ८ ॥ तस्यैवं वर्तमानस्य नृपतेः सर्वभक्षिणः ॥ दुराचारस्य महिषी चेष्टितेनान्वतप्यत ॥ ९ ॥ सा वै कुमुद्वतीनाम राज्ञी शीलगुणान्विता ॥ एकदा पतिमासाद्य रहस्ये तदपृच्छत ॥ १० ॥ एतत्ते चरितं राजन्महदाश्चर्यकारणम् ॥ क्व ते महान्दुराचारः क्व भक्तिः परमेश्वरे ॥ ११ ॥ सर्वदा सर्वभक्षस्त्वं सर्वस्त्रीजनलालसः ॥ सर्वहिंसापरः क्रूरः कथं भक्तिस्तवेश्वरे ॥ १२ ॥ इति पृष्टः स भूपालो विमृश्य सुचिरं ततः ॥ त्रिकालज्ञः[३] प्रहस्यैनां प्रोवाच सुकुतूहलः ॥ १३ ॥ ॥ ॥ राजोवाच ॥ ॥ अहं पूर्वभवे कश्चित्सारमेयो वरानने ॥ पंपानगरमाश्रित्य[४] पर्यटामि समंततः ॥ १४ ॥ एवं कालेषु गच्छत्सु तत्रैव नगरोत्तमे ॥ कदाचिदागतः सोहं मनोज्ञं शिवमंदिरम् ॥ १५ ॥ पूजायां वर्त्तमानायां चतुर्दश्यां महातिथौ ॥ अपश्यमुत्सवं दूराद्बहिर्द्वारं समाश्रितः ॥ १६ ॥ अथाहं परमक्रुद्धैर्दंडहस्तैः प्रधावितः ॥ तस्माद्देशादपक्रांतः प्राणरक्षापरायणः ॥ १७ ॥ ततः प्रदक्षिणीकृत्य मनोज्ञं[५] शिवमंदिरम् ॥ द्वारदेशं पुनः प्राप्य पुनश्चैव निवारितः ॥ १८ ॥ पुनः प्रदक्षिणीकृत्य तदेव शिवमन्दिरम् ॥ बलिपिंडादिलोभेन पुनर्द्वारमुपागतः ॥ १९ ॥ एवं पुनःपुनस्तत्र कृत्वा कृत्वा प्रदक्षिणाम् ॥ द्वारदेशे समासीनं निजघ्नुर्निशितैः शरैः ॥ २० ॥ स विद्धगात्रः सहसा शिवद्वारि[६] गतासुकः ॥ जातोऽस्म्यहं कुले राज्ञां प्रभावाच्छिवसन्निधेः ॥ २१ ॥ दृष्टा चतुर्दशीपूजां दीपमाला विलोकिताः ॥ तेन पुण्येन महता त्रिकालज्ञोऽस्मि भामिनि ॥ २२ ॥ प्राग्जन्मवासनाभिश्च सर्वभक्षोऽस्मि निर्घृणः ॥ विदुषामपि दुर्लंघ्या प्रकृतिर्वासनामयी ॥ २३ ॥ अतोऽहमर्चयामीशं चतुर्दश्यां जगद्गुरुम् ॥ त्वमपि श्रद्धया भद्रे भज देवं पिनाकिनम् ॥ २४ ॥ ॥ राज्ञ्युवाच ॥ ॥ त्रिकालज्ञोऽसि राजेन्द्र प्रसादाद्गिरिजापतेः ॥ मत्पूर्वजन्मचरितं वक्तुमर्हसि तत्त्वतः ॥ २५ ॥ ॥ राजोवाच ॥ ॥ त्वं तु पूर्वभवे काचित्कपोती व्योमचारिणी[८] ॥ क्वापि लब्धवती किंचिन्मां

१ सदामांसाशनः—इ० पा० । २ युक्तः—इ०पा० । ३ कृत्वा पूजाम्—इ० पा० । ४ पक्वान्नगृहम्—इ० पा० । ५ तदेव—इ०पा० । ६ शिवध्यानगताशुभः—शिवद्वारि गताशुभः—इति च पा० । ७ भामिनि—इ०पा० । ८ कामचारिणी—इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सपिंडं यदृच्छया ॥ २६ ॥ त्वद्गृहीतमथालोक्य गृध्रः कोप्यामिषं बली ॥ निरामिषः स्वयं वेगादभिदुद्राव भीषणः ॥ २७ ॥ ततस्त्वं वीक्ष्य
वित्रस्ता विद्रुतासि वरानने ॥ तेनानुयाता घोरेण मांसपिंडजिघृक्षया ॥ २८ ॥ दिष्ट्या श्रीगिरिमासाद्य श्रांता तत्र शिवालयम् ॥ प्रदक्षिणं
परिक्रम्य ध्वजाग्रे समुपस्थिता ॥ २९ ॥ अथानुसृत्य सहसा तीक्ष्णतुंडो विहंगमः ॥ त्वां निहत्य निपात्याधो मांसमादाय जग्मिवान् ॥ ३० ॥
प्रदक्षिणप्रक्रमणादेवदेवस्य शूलिनः ॥ तस्याग्रे मरणाच्चैव जातासीह नृपांगना ॥ ३१ ॥ ॥ राज्ञ्युवाच ॥ ॥ श्रुतं सर्वमशेषेण प्राग्जन्मचरितं
मया ॥ जातं च महदाश्चर्यं भक्तिश्च मम चेतसि ॥ अथान्यच्छ्रोतुमिच्छामि त्रिकालज्ञ महामते ॥ इदं शरीरमुत्सृज्य यास्यावः कां गतिं पुनः ॥
॥ ३२ ॥ ॥ राजोवाच ॥ ॥ अतो भवे जनिष्येऽहं द्वितीये सैंधवो नृपः ॥ ३३ ॥ सृंजयेशसुता त्वं हि मामेव प्रतिपत्स्यसे ॥ तृतीये तु भवे
राजा सौराष्ट्रे भविताऽस्म्यहम् ॥ ३४ ॥ कलिंगराजतनया त्वं मे पत्नी भविष्यसि ॥ चतुर्थे तु भविष्यामि भवे गांधारभूमिपः ॥ ३५ ॥
मागधी राजतनया तत्र त्वं मम गेहिनी ॥ पंचमेऽवंतिनाथोऽहं भविष्यामि भवांतरे ॥ ३६ ॥ दाशार्हराजतनया त्वमेव मम वल्लभा ॥ अस्माज्ज
न्मनि षष्ठेऽहमानर्ते भविता नृपः ॥ ३७ ॥ ययातिवंशजा कन्या भूत्वा मामेव यास्यसि ॥ पांड्यराजकुमारोऽहं सप्तमे भविता भवे ॥ ३८ ॥
तत्र मत्सदृशो नान्यो रूपौदार्यगुणादिभिः ॥ सर्वशास्त्रार्थतत्त्वज्ञो बलवान्दृढविक्रमः ॥ ३९ ॥ सर्वलक्षणसंपन्नः सर्वलोकमनोरमः ॥ पद्मवर्ण
इति ख्यातः पद्ममित्रसमद्युतिः ॥ ४० ॥ भविता त्वं च वैदर्भी रूपेणाप्रतिमा भुवि ॥ नाम्ना वसुमती ख्याता रूपावयवशोभिनी ॥ ४१ ॥ सर्व
राजकुमाराणां मनोनयननंदिनी ॥ सा त्वं स्वयंवरे सर्वान्विहाय नृपनंदनान् ॥ ४२ ॥ वरं प्राप्स्यसि मामेव दमयंतीव नैषधम् ॥ सोऽहं जित्वा
नृपान्सर्वान्प्राप्य त्वां वरवर्णिनीम् ॥४३॥ स्वराष्ट्रस्थोऽखिलान्भोगान्भोक्ष्ये वर्षगणान्बहून् ॥ इष्ट्वा च विविधैर्यज्ञैर्वाजिमेधादिभिः शुभैः ॥ ४४ ॥
संतर्प्य पितृदेवर्षीन्दानैश्च द्विजसत्तमान् ॥ संपूज्य देवदेवेशं शंकरं लोकशंकरम् ॥ ४५ ॥ पुत्रे राज्यधुरं न्यस्य गंतास्मि तपसे वनम् ॥ तत्रा
गस्त्यान्मुनिवराद्ब्रह्मज्ञानमवाप्य च ॥ ४६ ॥ त्वया सह गमिष्यामि शिवस्य परमं पदम् ॥ चतुर्दश्यां चतुर्दश्यामेवं संपूज्य शंकरम् ॥ ४७ ॥
सप्तजन्मसु राजत्वं भविष्यति वरानने ॥ इत्येतत्सुकृतं लब्धं पूजादर्शनमात्रतः ॥ क्व सारमेयो दुष्टात्मा क्वेदृशी बत सद्गतिः ॥ ४८ ॥ ॥ सूत
उवाच ॥ इत्युक्ता निजनाथेन सा राज्ञी शुभलक्षणा ॥ ४९ ॥ परं विस्मयमापन्ना पूजयामास तं मुदा ॥ सोऽपि राजा तया सार्द्धं भुक्त्वा भोगान्यथे

१ तरसा–इ०पा० । २ अस्मात्–इ०पा० । ३ मामवाप्स्यसि–इ०पा० । ४ युगांतरे–इ०पा० । ५ दशार्णराजतनया–इ०पा० । ६ पद्ममित्रसमद्युतिः सूर्यसमानकान्तिः–इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्सितान् ॥ ५० ॥ जगाम सप्तजन्मांते शंभोस्तत्परमं पदम् ॥ य एतच्छिवपूजाया माहात्म्यं परमाद्भुतम् ॥ शृणुयात्कीर्तयेद्वापि स गच्छे
त्परमं पदम् ॥ ५१ ॥ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मोत्तरखण्डे चतुर्दशीमाहात्म्यवर्णनं नाम चतुर्थो
ऽध्यायः ॥ ४ ॥ ॥ सूत उवाच ॥ ॥ शिवो गुरुः शिवो देवः शिवो बंधुः शरीरिणाम् ॥ शिव आत्मा शिवो जीवः शिवादन्यन्न किञ्चन[1] ॥ १ ॥
शिवमुद्दिश्य यत्किंचिद्दत्तं जप्तं हुतं कृतम् ॥ तदनंतफलं प्रोक्तं सर्वागमविनिश्चितम् ॥ २ ॥ भक्त्या निवेदितं शंभोः पत्रं पुष्पं फलं जलम् ॥
अल्पादल्पतरं वापि तदानंत्याय कल्पते ॥ ३ ॥ विहाय सकलान्धर्मान्सकलागमनिश्चितान्[2] ॥ शिवमेकं भजेद्यस्तु मुच्यते सर्वबन्धनात्
॥ ४ ॥ या प्रीतिरात्मनः पुत्रे या कलत्रे धनेपि सा ॥ कृता चेच्छिवपूजायां त्रायतीति[3] किमद्भुतम् ॥ ५ ॥ तस्मात्केचिन्महात्मानः सकलान्वि
षयासवान् ॥ त्यजंति शिवपूजार्थे स्वदेहमपि दुस्त्यजम् ॥ ६ ॥ सा जिह्वा या शिवं स्तौति तन्मनो ध्यायते शिवम् ॥ तौ कर्णौ तत्कथालोलौ
तौ हस्तौ तस्य पूजकौ ॥ ७ ॥ ते नेत्रे पश्यतः पूजां तच्छिरः प्रणतं शिवे ॥ तौ पादौ यौ शिवक्षेत्रं भक्त्या पर्यटंतः[4] सदा ॥ ८ ॥ यस्येन्द्रियाणि
सर्वाणि वर्त्तंते शिवकर्मसु ॥ स निस्तरति संसारं भुक्तिं मुक्तिं च विंदति ॥ ९ ॥ शिवभक्तियुतो मर्त्यश्चांडालः पुल्कसोपि च ॥ नारी नरो वा
षंढो वा सद्यो मुच्येत संसृतेः ॥ १० ॥ किं कुलेन किमाचारैः किं शीलेन गुणेन वा ॥ भक्तिलेशयुतः शंभोः स वंद्यः सर्वदेहिनाम् ॥ ११ ॥
उज्जयिन्यामभूद्राजा चन्द्रसेनसमाह्वयः ॥ जातो मानवरूपेण द्वितीय इव वासवः ॥ १२ ॥ तस्मिन्पुरे महाकालं वसंतं परमेश्वरम् ॥ संपूजयत्यसौ
भक्त्या चन्द्रसेनो नृपोत्तमः ॥ १३ ॥ तस्याभवत्सखा राज्ञः शिवपारिषदाग्रणीः ॥ मणिभद्रो जितांभद्रः[5] सर्वलोकनमस्कृतः ॥ १४ ॥ तस्यै
कदा महीभर्त्तुः प्रसन्नः शंकरानुगः ॥ चिन्तामणिं ददौ दिव्यं मणिभद्रो महामतिः ॥ १५ ॥ स मणिः कौस्तुभ इव द्योतमानोर्कसन्निभः ॥ दृष्टः
श्रुतो वा ध्यातो वा नृणां यच्छति चिंतितम् ॥ १६ ॥ तस्य कांतिलवस्पृष्टं कांस्यं ताम्रमयस्त्रपु ॥ पाषाणादिकमन्यद्वा सद्यो भवति कांचनम् ॥
॥ १७ ॥ स तं चिन्तामणिं कंठे बिभ्रद्राजासनं गतः ॥ रराज राजा देवानां मध्ये भानुरिव स्वयम् ॥ १८ ॥ सदा चिन्तामणिग्रीवं तं श्रुत्वा
राजसत्तमम् ॥ प्रवृद्धतर्षा[7] राजानः सर्वे क्षुब्धहृदोऽभवन् ॥ १९ ॥ स्नेहात्केचिदयाचंत धार्ष्ट्यात्केचन दुर्मदाः ॥ दैवलब्धमजानंतो मणिं मत्स
रिणो नृपाः ॥ २० ॥ सर्वेषां भूभृतां याच्ञा यदा व्यर्थीकृतामुना ॥ राजानः सर्वदेशानां संरंभं चक्रिरे तदा ॥ २१ ॥ सौराष्ट्राः कैकयाः शाल्वाः

१ विद्यते—इ० पा० । २ सकलागमनोदितान्—इ० पा० । ३ सिद्ध्यतीति—इ० पा० । ४ पर्यटिनौ—इ०पा० । ५ महाभद्रः—इ० पा० । ६ मंगलम्—इ० पा० । ७ प्रवृद्धरोषाः—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कलिंगशकमद्रकाः ॥ पांचालावंतिसौवीरा मागधा मत्स्यसृंजयाः ॥ २२ ॥ एते चान्ये च राजानः सहाश्वरथकुंजराः ॥ चन्द्रसेनं मृधे जेतुमुद्यमं
चक्रुरोजसा ॥ २३ ॥ ते तु सर्वे सुसंरब्धाः कंपयंतो वसुन्धराम् ॥ उज्जयिन्याश्चतुर्द्वारं रुरुधुर्बहुसैनिकाः ॥ २४ ॥ संरुध्यमानां स्वपुरीं दृष्ट्वा राज
भिरुद्धतैः ॥ चंद्रसेनो महाकालं तमेव शरणं ययौ ॥ २५ ॥ निर्विकल्पो निराहारः स राजा दृढनिश्चयः ॥ अर्चयामास गौरीशं दिवा नक्त
मनन्यधीः ॥ २६ ॥ एतस्मिन्नंतरे गोपी काचित्तत्पुरवासिनी ॥ एकपुत्रा भर्तृहीना तत्रैवासीच्चिरंतना ॥ २७ ॥ सा पंचहायनं बालं वहंती गत
भर्तृका ॥ राज्ञा कृतां महापूजां ददर्श गिरिजापतेः ॥ २८ ॥ सा दृष्ट्वा सर्वमाश्चर्यं शिवपूजामहोदयम् ॥ प्रणिपत्य स्वशिबिरं पुनरेवाभ्यपद्यत ॥
॥ २९ ॥ एतत्सर्वमशेषेण स दृष्ट्वा बल्लवीसुतः ॥ कुतूहलेन विदधे शिवपूजां विरक्तिदाम् ॥ ३० ॥ आनीय हृद्यं पाषाणं शून्ये तु शिबिरोत्तमे ॥
नातिदूरे स्वशिबिराच्छिवलिंगमकल्पयत ॥ ३१ ॥ यानि कानि च पुष्पाणि हस्तलभ्यानि चात्मनः ॥ आनीय स्नाप्य तल्लिंगं पूजयामास
भक्तितः ॥ ३२ ॥ गंधालंकारवासांसि धूपदीपाक्षतादिकम् ॥ विधाय कृत्रिमैर्दिव्यैर्नैवेद्यं चाप्यकल्पयत् ॥ ३३ ॥ भूयोभूयः समभ्यर्च्य पत्रैः
पुष्पैर्मनोरमैः ॥ नृत्यं च विविधं कृत्वा प्रणनाम पुनःपुनः ॥३४॥ एवं पूजां प्रकुर्वाणं शिवस्यानन्यमानसम् ॥ सा पुत्रं प्रणयाद्गोपी भोजनाय समा
ह्वयत् ॥३५॥ मात्राहूतोपि बहुशः स पूजासक्तमानसः ॥ बालोपि भोजनं नच्छत्तदा माता स्वयं ययौ ॥ ३६ ॥ तं विलोक्य शिवस्याग्रे निषण्णं मी
लितेक्षणम् ॥ चकर्ष पाणिं संगृह्य कोपेन समताडयत् ॥ ३७ ॥ आकृष्टस्ताडितो वापि नागच्छत्स्वसुतो यदा ॥ तां पूजां नाशयामास क्षिप्त्वा
लिंगं विदूरतः ॥ ३८ ॥ हाहेति रुदमानं तं निर्भर्त्स्य स्वसुतं तदा ॥ पुनर्विवेश स्वगृहं गोपी रोषसमन्विता ॥ ३९ ॥ मात्रा विनाशितां पूजां दृष्ट्वा
देवस्य शूलिनः ॥ देवदेवेति चुक्रोश निपपात स बालकः ॥ ४० ॥ प्रनष्टसंज्ञः सहसा बाष्पपूरपरिप्लुतः ॥ लब्धसंज्ञो मुहूर्तेन चक्षुषी उदमीलयत् ॥
॥ ४१ ॥ ततो मणिस्तंभविराजमानं हिरण्मयद्वारकपाटतोरणम् ॥ महार्हनीलामलवज्रवेदिकं तदेव जातं शिबिरं शिवालयम् ॥ ४२ ॥ संतप्तहेम
कलशैर्बहुभिर्विचित्रैः प्रोद्भासितस्फटिकसौधतलाभिरामम् ॥ रम्यं च तच्छिवपुरं वरपीठमध्ये लिंगं च रत्नसहितं स ददर्श बालः ॥ ४३ ॥ स
दृष्ट्वा सहसोत्थाय भीतविस्मितमानसः ॥ निमग्न इव संतोषात्परमानंदसागरे ॥ ४४ ॥ विज्ञाय शिवपूजाया माहात्म्यं तत्प्रभावतः ॥ ननाम दंड

१ निरुध्यमानाम्–इ० पा० । २ निरातंकः–इ० पा० । ३ "एतस्मिन्नेव समये तत्रैव नगरोत्तमे । चरन्ती गोपिका काचिन्महाकालान्तिकं ययौ ॥" इति पद्यं पाठान्तररूपेण पुस्तकद्वयेवर्तते । ४ अविदूरे–इ०पा० । ५च दूरतः–इ० पा० । ६ शिवशिवेति–इ० पा० । ७ महोदयम्–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वद्धूमौ स्वमातुरघशांतये ॥ ४५ ॥ देव क्षमस्व दुरितं मम मातुरुमापते ॥ मूढायास्त्वामजानंत्याः प्रसन्नो भव शंकर ॥ ४६ ॥ यद्यस्ति मयि यत्किंचित्पुण्यं त्वद्भक्तिसंभवम् ॥ तेनापि शिव मे माता तव कारुण्यमाप्नुयात् ॥ ४७ ॥ इति प्रसाद्य गिरिशं भूयोभूयः प्रणम्य च ॥ सूर्ये चास्तं गते बालो निर्जगाम शिवालयात् ॥ ४८ ॥ अथापश्यत्स्वशिबिरं पुरंदरपुरोपमम् ॥ सद्यो हिरण्मयीभूतं विचित्रविभवोज्ज्वलम् ॥ ४९ ॥ सोंतः प्रविश्य भवनं मोदमानो निशामुखे ॥ महामणिगणाकीर्णं हेमराशिसमुज्ज्वलम् ॥ ५० ॥ तत्रापश्यत्स्वजननीं स्मरंतीमकुतोभयाम् ॥ महार्हरत्न पर्यंके सितशय्यामधिश्रिताम् ॥ ५१ ॥ रत्नालंकारदीप्तांगीं दिव्यांबरविराजिनीम् ॥ दिव्यलक्षणसंपन्नां साक्षात्सुरवधूमिव ॥ ५२ ॥ जवेनोत्थापयामास संभ्रमोत्फुल्ललोचनः ॥ अंब जागृहि भद्रं ते पश्येदं महदद्भुतम् ॥ ५३ ॥ इति प्रबोधिता गोपी स्वपुत्रेण महात्मना ॥ ततोऽपश्यत्स्वजननी स्मयन्ती मुकुटोज्ज्वला ॥ ५४ ॥ ससंभ्रमं समुत्थाय तत्सर्वं प्रत्यवैक्षत[1] ॥ अपूर्वमिव चात्मानमपूर्वमिव बालकम् ॥ ५५ ॥ अपूर्वं च स्वसदनं दृष्ट्वा सीत्सुखविह्वला ॥ श्रुत्वा पुत्रमुखात्सर्वं प्रसादं गिरिजापतेः ॥ ५६ ॥ राज्ञे विज्ञापयामास यो भजत्यनिशं शिवम् ॥ स राजा सहसागत्य समाप्त नियमो निशि ॥ ५७ ॥ ददर्श गोपिकासूनोः प्रभावं शिवतोषजम् ॥ हिरण्मयं शिवस्थानं लिंगं मणिमयं तथा ॥ ५८ ॥ गोपवध्वाश्च सदनं माणिक्यवरकोज्ज्वलम् ॥ दृष्ट्वा महीपतिः सर्वं सामात्यः सपुरोहितः ॥ ५९ ॥ मुहूर्तं विस्मितधृतिः परमानंदनिर्भरः ॥ प्रेम्णा बाष्पजलं मुंचन्परिरेभे तमर्भकम् ॥ ६० ॥ एवमत्यद्भुताकाराच्छिवमाहात्म्यकीर्त्तनात् ॥ पौराणां संभ्रमाच्चैव सा रात्रिः क्षणतामगात् ॥ ६१ ॥ अथ प्रभाते युद्धाय पुरं संरुध्य संस्थिताः ॥ राजानश्चारवक्त्रेभ्यः शुश्रुवुः परमाद्भुतम् ॥ ६२ ॥ ते त्यक्तवैराः सहसा राजानश्चकिता भृशम् ॥ न्यस्तशस्त्रा निविविशुश्चंद्रसेनानुमोदिताः ॥ ६३ ॥ तां प्रविश्य पुरीं रम्यां महाकालं प्रणम्य च ॥ तद्गोपवनितागेहमाजग्मुः सर्वभूभृतः ॥ ६४ ॥ ते तत्र चंद्रसेनेन प्रत्युद्गम्याभिपूजिताः ॥ महार्हविष्टरगताः प्रीत्यानंदन्सुविस्मिताः ॥ ६५ ॥ गोपसूनोः प्रसादाय प्रादुर्भूतं शिवालयम् ॥ लिंगं च वीक्ष्य सुमहच्छिवे चक्रुः परां मतिम् ॥ ६६ ॥ तस्मै गोपकुमाराय प्रीतास्ते सर्वभूभुजः ॥ वासोहिरण्यरत्नानि गोमहिष्यादिकं धनम् ॥ ६७ ॥ गजानश्वान्रथान्रौक्मान्छत्रयानपरिच्छदान् ॥ दासान्दासीरनेकाश्च ददुः शिवकृपार्थिनः ॥ ६८ ॥ येये सर्वेषु देशेषु गोपास्तिष्ठंति भूरिशः ॥ तेषां तमेव राजानं चक्रिरे सर्वपार्थिवाः ॥ ६९ ॥ अथास्मिन्नंतरे सर्वैस्त्रिदशैरभिपूजितः ॥ प्रादुर्बभूव तेजस्वी हनूमान्वानरेश्वरः ॥ ७० ॥ तस्याभिगमनादेव राजानो जातसंभ्रमाः ॥

१ समुदैक्षत--इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रत्युत्थाय नमश्चक्रुर्भक्तिनम्रात्ममूर्त्तयः ॥ ७१ ॥ तेषां मध्ये समासीनः पूजितः प्लवगेश्वरः ॥ गोपात्मजं समाश्लिष्य राज्ञो वीक्ष्येदमब्रवीत् ॥ ७२ ॥ सर्वे शृणुत भद्रं वो राजानो ये च देहिनः ॥ शिवपूजामृते नान्या गतिरस्ति शरीरिणाम् ॥ ७३ ॥ एष गोपसुतो दिष्ट्या प्रदोषे मंदवासरे ॥ अमंत्रेणापि संपूज्य शिवं शिवमवाप्तवान् ॥ ७४ ॥ मंदवारे प्रदोषोऽयं दुर्लभः सर्वदेहिनाम् ॥ तत्रापि दुर्लभतरः कृष्णपक्षे समागते ॥ ७५ ॥ एष पुण्यतमो लोके गोपानां कीर्तिवर्धनः ॥ अस्य वंशेऽष्टमो भावी नंदोनाम महायशाः ॥ प्राप्स्यते तस्य पुत्रत्वं कृष्णो नारायणः स्वयम् ॥ ७६ ॥ अद्यप्रभृति लोकेस्मिन्नेष गोपालनंदनः ॥ नाम्ना श्रीकर इत्युच्चैर्लोके ख्यातिं गमिष्यति ॥ ७७ ॥ ॥ सूत उवाच ॥ एवमुक्त्वांजनीसूनुस्तस्मै गोपकसूनवे ॥ उपदिश्य शिवाचारं तत्रैवांतरधीयत ॥ ७८ ॥ ते च सर्वे महीपालाः संहृष्टाः प्रतिपूजिताः ॥ चन्द्रसेनं समामंत्र्य प्रतिजग्मुर्यथागतम् ॥ ७९ ॥ श्रीकरोऽपि महातेजा उपदिष्टो हनूमता ॥ ब्राह्मणैः सह धर्मज्ञैश्चक्रे शम्भोः समर्हणम् ॥ ८० ॥ कालेन श्रीकरः सोऽपि चंद्रसेनश्च भूपतिः ॥ समाराध्य शिवं भक्त्या प्रापतुः परमं पदम् ॥ ८१ ॥ इदं रहस्यं परमं पवित्रं यशस्करं पुण्यमहर्द्धिवर्धनम्[१] ॥ आख्यानमाख्यातमघौघनाशनं गौरीशपादांबुजभक्तिवर्धनम् ॥ ८२ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मोत्तरखण्डे गोपकुमारचरितवर्णनं नाम पञ्चमोऽध्यायः ॥ ५ ॥ ॥ छ ॥ ॥ ऋषय ऊचुः ॥ ॥ यदुक्तं भवता सूत महदाख्यानमद्भुतम्[२] ॥ शम्भोर्माहात्म्यकथनमशेषाघहरं परम् ॥ १ ॥ भूयोपि श्रोतुमिच्छामस्तदेव सुसमाहिताः ॥ प्रदोषे भगवाञ्छंभुः पूजितस्तु महात्मभिः ॥ २ ॥ संप्रयच्छति कां सिद्धिमेतन्नो ब्रूहि सुव्रत ॥ श्रुतमप्यसकृत्सूत भूयस्तृष्णा प्रवर्धते ॥ ३ ॥ ॥ सूत उवाच ॥ ॥ साधु पृष्टं महाप्राज्ञा भवद्भिर्लोकविश्रुतैः ॥ अतोऽहं संप्रवक्ष्यामि शिवपूजाफलं महत् ॥ ४ ॥ त्रयोदश्यां तिथौ सायं प्रदोषः परिकीर्त्तितः ॥ तत्र पूज्यो महादेवो नान्यो देवः फलार्थिभिः ॥ ५ ॥ प्रदोषपूजामाहात्म्यं को नु[३] वर्णयितुं क्षमः ॥ यत्र सर्वेऽपि विबुधास्तिष्ठंति गिरिशांतिके ॥ ६ ॥ प्रदोषसमये देवः कैलासे रजतालये ॥ करोति नृत्यं विबुधैरभिष्टुतगुणोदयः ॥ ७ ॥ अतः पूजा जपो होमस्तत्कथास्तद्गुणस्तवः ॥ कर्त्तव्यो नियतं मर्त्यैश्चतुर्वर्गफलार्थिभिः ॥ ८ ॥ दारिद्र्यतिमिरांधानां मर्त्यानां[४] भवभीरुणाम् ॥ भवसागरमग्नानां प्लवोऽयं[५] पारदर्शनः ॥ ९ ॥ दुःखशोकभयार्त्तानां क्लेशनिर्वाण

१ इदं पवित्रं परमं रहस्यं स्वर्ग्यं यशस्यं गतिदं विचित्रम्–इ० पा० । २ उत्तमम्–इ० पा० । ३ वै–इ० पा० । ४ इदं हि परमाञ्जनम्–इ० पा० । ५ शर्वः–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

मि[1]च्छताम् ॥ प्रदोषे पार्वतीशस्य पूजनं मंगलायनम् ॥ १० ॥ दुर्बुद्धिरपि नीचोपि मन्दभाग्यः शठोऽपि वा ॥ प्रदोषे पूज्य देवेशं विप[2]द्भ्यः स प्रमुच्यते ॥ ११ ॥ शत्रुभिर्हन्यमानोऽपि दश्यमानोपि पन्नगैः ॥ शैलैराक्रम्यमाणोऽपि पतितोऽपि महांबुधौ ॥ १२ ॥ आविद्धकालदण्डोऽपि नानारोगहतोऽपि वा ॥ न विनश्यति मर्त्योऽसौ प्रदोषे गिरिशार्चनात् ॥ १३ ॥ दारिद्र्यं मरणं दुःखमृणभारं नगोपमम् ॥ सद्यो विधूय संपद्भिः पूज्यते शिवपूजनात् ॥ १४ ॥ अत्र वक्ष्ये महापुण्यमितिहासं पुरातनम् ॥ यं श्रुत्वा मनुजाः सर्वे प्रयांति कृतकृत्यताम् ॥ १५ ॥ आसीद्विदर्भविषये नाम्ना सत्यरथो नृपः ॥ सर्वधर्मरतो धीरः सुशीलः सत्यसंगरः ॥ १६ ॥ तस्य पालयतो भूमिं धर्मेण मुनिपुंगवाः ॥ व्यतीयाय महान्कालः सुखेनैव महामतेः ॥ १७ ॥ अथ तस्य महीभर्तुर्बभूवुः शाल्वभूभुजः ॥ शत्रवश्चोद्धतबला दुर्मर्षणपुरोगमाः ॥ १८ ॥ कदाचिदथ ते शाल्वाः संनद्धबहुसैनिकाः ॥ विदर्भनगरीं प्राप्य रुरुधुर्विजिगीषवः ॥ १९ ॥ दृष्ट्वा निरुद्ध्यमानां तां विदर्भाधिपतिः पुरीम् ॥ योद्धुमभ्याययौ तूर्णं बलेन महता वृतः ॥ २० ॥ तस्य तैरभवद्युद्धं शाल्वैरपि बलोद्धतैः ॥ पाताले पन्नगेन्द्रस्य गन्धर्वैरिव दुर्मदैः ॥ २१ ॥ विदर्भनृपतिः सोऽथ कृत्वा युद्धं सुदारुणम् ॥ प्रनष्टोरुबलैः शाल्वैर्निहतो रणमूर्धनि ॥ २२ ॥ तस्मिन्महारथे वीरे निहते मंत्रिभिः सह ॥ दुद्रुवुः समरे भग्ना हतशेषाश्च सैनिकाः ॥ २३ ॥ अथ युद्धेभिविरते नदत्सु रिपुमंत्रिषु ॥ नगर्यां युद्ध्यमानायां जाते कोलाहले रवे ॥ २४ ॥ तस्य सत्यरथस्यैका विदर्भाधिपतेः सती ॥ भूरिशोकसमाविष्टा क्वचिद्यत्नाद्विनिर्ययौ ॥ २५ ॥ सा निशासमये यत्नादंतर्वत्नी नृपांगना ॥ निर्गता शोकसंतप्ता प्रतीचीं प्रययौ दिशम् ॥ २६ ॥ अथ प्रभाते मार्गेण गच्छन्ती शनैः सती ॥ अतीत्य दूरमध्वानं ददर्श विमलं सरः ॥ २७ ॥ तत्रागत्य वरारोहा तप्ता तापेन भूयसा ॥ विलसंतं सरस्तीरे छायावृक्षं समाश्रयत् ॥ २८ ॥ तत्र दैववशाद्राज्ञी विजने तरुकुट्टिमे ॥ असूत [7]तनयं साध्वी मू[6]हूर्ते सद्गुणान्विते ॥ २९ ॥ अथ सा राजमहिषी पिपासाभिहता भृशम् ॥ सरोऽवतीर्णा चार्वंगी ग्रस्ता ग्राहेण भूयसा ॥ ३० ॥ जातमात्रः कुमारोऽपि विनष्टपितृमातृकः ॥ रुरोदोच्चैः सरस्तीरे क्षुत्पिपासार्दितोऽबलः ॥ ३१ ॥ तस्मिन्नेवं क्रन्दमाने जातमात्रे कुमारके ॥ काचिदभ्याययौ शीघ्रं दिष्ट्या विप्रवरांगना ॥ ३२ ॥ साप्येकहायनं बालमुद्वहन्ती निजात्मजम् ॥ अधना भर्तृरहिता याचमाना गृहेगृहे ॥ ३३ ॥ एकात्मजा बंधुहीना याच्ञामार्गवशंगता ॥ उमानाम द्विजसती ददर्श नृपनंदनम् ॥ ३४ ॥ सा दृष्ट्वा राजतनयं सूर्यबिंबमिव च्युतम् ॥ अनाथमेनं क्रंदंतं

१ क्लेशनिर्वाणकारणम्–इ० पा० । २ विपापः–इ० पा० । ३ महास्मृतेः–इ० पा० । ४ सहसा–इ० पा० । ५ विमले तत्सरस्तीरे–इ० पा० । ६ समये–इ० पा० । ७ अवतीर्य–इ० पा० ।

CC-0. In Public Domain. Digitization by eGangotri

चिंतयामास भूरिशः ॥ ३५ ॥ अहो सुमहदाश्चर्यमिदं दृष्टं मयाधुन ॥ अच्छिन्ननाभिसूत्रोऽयं शिशुर्माता क्व वा गता ॥ ३६ ॥ पिता नास्ति
न चान्योस्ति नास्ति बंधुजनोऽपि वा ॥ अनाथः कृपणो बालः शेते केवलभूतले ॥ ३७ ॥ एष चांडालजो वापि शूद्रजो वैश्यजोपि वा ॥
विप्रात्मजो वा नृपजो ज्ञायते कथमर्भकः ॥ ३८ ॥ शिशुमेनं समुद्धृत्य पुष्णाम्यौरसवद्ध्रुवम् ॥ किं त्वविज्ञातकुलजं नोत्सहे स्प्रष्टुमुत्तमम् ॥ ३९ ॥
इति मीमांसमानायां तस्यां विप्रवरस्त्रियाम् ॥ ४० ॥ कश्चित्समाययौ भिक्षुः साक्षाद्देवः शिवः स्वयम् ॥ तामाह भिक्षुवर्योंथ विप्रभामिनि मां
खिदः ॥ ४१ ॥ रक्षैनं बालकं सुभ्रूर्विसृज्य हृदि संशयम् ॥ अनेन परमं श्रेयः प्राप्स्यसे ह्यचिरादिह ॥ ४२ ॥ एतावदुक्त्वा त्वरितो भिक्षुः कारुणि
को ययौ ॥ अथ तस्मिन्गते भिक्षौ विश्रब्धा विप्रभामिनी ॥ ४३ ॥ तमर्भकं समादाय निजमेव गृहं ययौ ॥ भिक्षुवाक्येन विश्रब्धा सा राज
तनयं सं[1]ती ॥ ४४ ॥ आत्मपुत्रेण सदृशं कृपया पर्यपोषयत् ॥ एकचक्राह्वये रम्ये ग्रामे कृतनिकेतना ॥ ४५ ॥ स्वपुत्रं राजपुत्रं च भिक्षान्नेन व्यव
र्धयत् ॥ ब्राह्मणीतनयश्चैव स राजतनयस्तथा ॥ ४६ ॥ ब्राह्मणैः कृतसंस्कारौ ववृधाते सुपूजितौ ॥ कृतोपनयनौ काले बालकौ नियमे स्थितौ ॥
॥ ४७ ॥ भिक्षार्थं चेरतुस्तत्र मात्रा सह दिनेदिने ॥ ताभ्यां कदाचिद्बालाभ्यां सा विप्रवनिता सह ॥ ४८ ॥ भैक्ष्यं चरंती दैवेन प्रविष्टा देवता
लयम् ॥ तत्र वृद्धैः समाकीर्णे मुनिभिर्देवतालये ॥ ४९ ॥ तौ दृष्ट्वा बालकौ धीमाञ्छांडिल्यो मुनिरब्रवीत् ॥ अहो दैवबलं चित्रमहो कर्म दुर
त्ययम् ॥ ५० ॥ एष बालोऽन्यजननीं श्रितो भैक्ष्येण जीवति ॥ इमामेव द्विजवधूं प्राप्य मातरमुत्तमाम् ॥ ५१ ॥ सहैव द्विजपुत्रेण द्विजभावं
समाश्रितः ॥ इति श्रुत्वा मुनेर्वाक्यं शांडिल्यस्य द्विजांगना ॥ ५२ ॥ सा प्रणम्य सभामध्ये पर्यपृच्छत्सविस्मया ॥ ब्रह्मन्नेषोर्भको नीतो मया
भि[2]क्षोर्गिरा गृहम् ॥ ५३ ॥ अविज्ञातकुलोद्यापि सुतवत्परिपोष्यते ॥ कस्मिन्कुले प्रसूतोऽयं का माता जनकोस्य कः ॥ ५४ ॥ सर्वं विज्ञातुमि
च्छामि भवतो ज्ञानचक्षुषः ॥ ५५ ॥ इति पृष्टो मुनिः सोथ ज्ञानदृष्टिर्द्विजस्त्रियौ[3] ॥ आचख्यौ तस्य बालस्य जन्म कर्म च पौर्विकम् ॥ ५६ ॥
विदर्भराजपुत्रस्तु तत्पितुः समरे मृतिम् ॥ तन्मातुर्नक्रहरणं साकल्येन न्यवेदयत् ॥ ५७ ॥ अथ सा विस्मिता नारी पुनः प्रपच्छ तं मुनिम् ॥
स राजा सकलान्भोगान्हित्वा युद्धे कथं मृतः ॥ ५८ ॥ दारिद्र्यमस्य बालस्य कथं प्राप्तं महामुने ॥ दारिद्र्यं पुनरुद्धूय कथं राज्यमवाप्स्यति ॥
॥ ५९ ॥ अस्यापि मम पुत्रस्य भिक्षान्नेनैव जीवतः ॥ दारिद्र्यशमनोपायमुपदेष्टुं त्वमर्हसि ॥६०॥ ॥ शांडिल्य उवाच ॥ ॥ अमुष्य बालस्य

१ तथा इ० पा० । २ भिक्षुस्त्रिया—इ० पा० । ३ द्विजस्त्रियै—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पिता स विदर्भमहीपतिः ॥ पूर्वजन्मनि पांड्येशो बभूव नृपसत्तमः ॥ ६१ ॥ स राजा सर्वधर्मज्ञः पालयन्सकलां महीम् ॥ प्रदोषसमये शंभुं कदाचिन्नैत्यपूजयत् ॥ ६२ ॥ तस्य पूजयतो भक्त्या देवं त्रिभुवनेश्वरम् ॥ आसीत्कलकलारावः सर्वत्र नगरे महान् ॥ ६३ ॥ श्रुत्वा तमुत्कटं शब्दं राजा त्यक्त्वा[1]शिवार्चनः ॥ निर्ययौ राजभवनान्नगरक्षोभशंकया ॥ ६४ ॥ एतस्मिन्नेव समये तस्यामात्यो महाबलः ॥ शत्रुं गृहीत्वा सामंतं राजांतिकमुपागमत् ॥ ६५ ॥ अमात्येन समानीतं शत्रुं सामंतमुद्धतम् ॥ दृष्ट्वा क्रोधेन नृपतिः शिरच्छेदमकारयत् ॥ ६६ ॥ स तथैव महीपालो विसृज्य शिवपूजनम् ॥ असमाप्तात्मनियमश्चकार निशि भोजनम् ॥ ६७ ॥ तत्पुत्रोपि तथा चक्रे प्रदोषसमये शिवम् ॥ अनर्चयित्वा मूढात्मा भुक्त्वा सुष्वाप दुर्मदः ॥ ६८ ॥ जन्मांतरे स नृपतिर्विदर्भक्षितिपोऽभवत् ॥ शिवार्चनांतरायेण परैर्भोगांतरे हतः ॥ ६९ ॥ तत्पुत्रो यः पूर्वभवे सोस्मिञ्जन्मनि तत्सुतः ॥ भूत्वा दारिद्र्यमापन्नः शिवपूजाव्यतिक्रमात् ॥ ७० ॥ अस्य माता पूर्वभवे सपत्नीं छद्मनाहनत् ॥ तेन पापेन महता ग्राहेणास्मिन्भवे हता ॥ ७१ ॥ एषा प्रवृत्तिरेतेषां भवत्यै समुदाहृता ॥ अनर्चित[2]शिवा मर्त्याः प्राप्नुवंति दरिद्रताम् ॥ ७२ ॥ सत्यं ब्रवीमि परलोकहितं ब्रवीमि सारं ब्रवीम्युपनिषद्धृदयं ब्रवीमि ॥ संसारमुल्बणमसारमवाप्य जंतोः सारो यमीश्वरपदांबुरुहस्य सेवा ॥ ७३ ॥ ये नार्चयंति गिरिशं समये प्रदोषे ये नार्चितं शिवमपि प्रणमंति चान्ये ॥ एतत्कथां श्रुतिपुटैर्न पिबंति मूढास्ते जन्मजन्मसु भवंति नरा दरिद्राः ॥ ७४ ॥ ये वै प्रदोषसमये परमेश्वरस्य कुर्वंत्यनन्यमनसोंऽघ्रिसरोजपूजाम् ॥ नित्यं प्रवृद्धधनधान्यकलत्रपुत्रसौभाग्यसंपदधिकास्त इहैव लोके ॥ ७५ ॥ कैलासशैलभवने त्रिजगज्जनित्रीं गौरीं निवेश्य कनकांचितरत्नपीठे ॥ नृत्यं विधातुमभिवाञ्छति शूलपाणौ देवाः प्रदोषसमयेऽनुभजंति सर्वे ॥ ७६ ॥ वाग्देवी धृतवल्लकी शतमखो वेणुं दधत्पद्मजस्तालोन्निद्रकरो रमा भगवती गेयप्रयोगान्विता ॥ विष्णुः सांद्रमृदंगवादनपटुर्देवाः समंतात्स्थिताः सेवंते तमनु प्रदोषसमये देवं मृडानीपतिम् ॥ ७७ ॥ गंधर्वयक्षपतगोरगसिद्धसाध्या विद्याधरामरवराप्सरसां[3] गणाश्च ॥ येऽन्ये त्रिलोकनिलयाः सह भूतवर्गाः प्राप्ते प्रदोषसमये हरपार्श्वसंस्थाः ॥ ७८ ॥ अतः प्रदोषे शिव एक एव पूज्योऽथ नान्ये हरिपद्मजाद्याः ॥ तस्मिन्महेशे विधिनेज्यमाने सर्वे प्रसीदंति सुराधिनाथाः ॥ ७९ ॥ एष ते तनयः पूर्वजन्मनि ब्राह्मणोत्तमः ॥ प्रतिग्रहैर्वयो निन्ये न यज्ञाद्यैः सुकर्मभिः ॥ ८० ॥ अतो दारिद्र्यमापन्नः पुत्रस्ते द्विजभामिनि ॥ तद्दोषपरिहारार्थं शरणं यातु

१ त्यक्त्वा शिवार्चनम्–इ० पा० । २ अनर्चिते शिवे–इ० पा० । ३ विद्याधरासुरवरा--इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शंकरम् ॥ ८१ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मोत्तरखण्डे प्रदोषमाहात्म्यवर्णनंनाम षष्ठोऽध्यायः ॥ ६ ॥
॥ छ ॥ ॥ सूत उवाच ॥ ॥ इत्युक्ता मुनिना साध्वी सा विप्रवनिता पुनः ॥ तं प्रणम्याथ पप्रच्छ शिवपूजाविधेः क्रमम् ॥ १ ॥ ॥ शांडिल्य
उवाच ॥ ॥ पक्षद्वये त्रयोदश्यां निराहारो भवेद्यदा ॥ घटीत्रयादस्तमयात्पूर्वं स्नानं समाचरेत् ॥ २ ॥ शुक्लांबरधरो धीरो वाग्यतो नियमान्वितः॥
कृतसंध्याजपविधिः शिवपूजां समारभेत् ॥ ३ ॥ देवस्य पुरतः सम्यगुपलिप्य नवांभसा ॥ विधाय मंडलं रम्यं धौतवस्त्रादिभिर्बुधः ॥ ४ ॥ विता
नाद्यैरलंकृत्य फलपुष्पनवांकुरैः ॥ विचित्रपद्ममुद्धृत्य वर्णपंचकसंयुतम् ॥ ५ ॥ तत्रोपविश्य सुशुभे भक्तियुक्तः स्थिरासने ॥ सम्यक्संपादिताशेष
पूजोपकरणः शुचिः ॥ ६ ॥ आगमोक्तेन मंत्रेण पीठमामंत्रयेत्सुधीः ॥ ततः कृत्वात्मशुद्धिं च भूतशुद्ध्यादिकं क्रमात् ॥ ७ ॥ प्राणा
यामत्रयं कृत्वा बीजवर्णैः सबिंदुकैः ॥ मातृका न्यस्य विधिवद्ध्यात्वा तां देवतां पराम् ॥ ८ ॥ समाप्य मातृका भूयो ध्यात्वा चैव परं शिवम् ॥
वामभागे गुरुं नत्वा दक्षिणे गणपं नमेत् ॥ ९ ॥ अंसोरुयुग्मे धर्मादीन्न्यस्य नाभौ च पार्श्वयोः ॥ अधर्मादीननंतादीन्हृदि पीठे मनुं न्यसेत् ॥
॥ १० ॥ आधारशक्तिमारभ्य ज्ञानात्मानमनुक्रमात् ॥ उत्क्रमेण विन्यस्य हृत्पद्मे साधुभाविते ॥ ११ ॥ नवशक्तिमये रम्ये ध्यायेद्देवमुमापतिम्॥
चन्द्रकोटिप्रतीकाशं त्रिनेत्रं चन्द्रशेखरम् ॥ १२ ॥ आपिंगलजटाजूटं रत्नमौलिविराजितम् ॥ नीलग्रीवमुदारांगं नागहारोपशोभितम् ॥ १३ ॥
वरदाभयहस्तं च धारिणं च परश्वधम् ॥ दधानं नागवलयकेयूरांगदमुद्रिकम् ॥ १४ ॥ व्याघ्रचर्मपरीधानं रत्नसिंहासने स्थितम् ॥ ध्यात्वा तद्वाम
भागे च चिंतयेद्गिरिकन्यकाम् ॥ १५ ॥ भास्वज्जपाप्रसूनाभामुदयार्कसमप्रभाम् ॥ विद्युत्पुंजनिभां तन्वीं मनोनयननंदिनीम् ॥ १६ ॥ बालेंदु
शेखरां स्निग्धां नीलकुंचितकुन्तलाम् ॥ भृंगसंघातरुचिरां नीलालकविराजिताम् ॥ १७ ॥ मणिकुंडलविद्योतन्मुखमंडलविभ्रमाम् ॥ नवकुम्कुमपं
कांककपोलदलदर्पणाम् ॥१८॥ मधुरस्मितविभ्राजदरुणाधरपल्लवाम् ॥ कंबुकंठीं शिवामुद्यत्कुचपंकजकुड्मलाम् ॥ १९ ॥ पाशांकुशाभयाभीष्टविल
सत्सुचतुर्भुजाम् ॥ अनेकरत्नविलसत्कंकणांकितमुद्रिकाम ॥ २० ॥ वलित्रयेण विलसद्धेमकांचीगुणान्विताम् ॥ रक्तमाल्यांबरधरां दिव्यचंदनच
र्चिताम् ॥ २१ ॥ दिक्पालवनितामौलिसन्नतांघ्रिसरोरुहाम् ॥ रत्नसिंहासनारूढां सर्पराजपरिच्छदाम् ॥ २१ ॥ एवं ध्यात्वा महादेवं देवीं च गिरि
कन्यकाम् ॥ न्यासक्रमेण संपूज्य देवं गंधादिभिः क्रमात् ॥ २३ ॥ पंचभिर्ब्रह्मभिः कुर्यात्प्रोक्तस्थानेषु वा हृदि ॥ पृथक्पुष्पांजलिं देहे मूलेन च

१ समाचरेत्--इ०पा० । २ मंडपम्--इ०पा० । ३ यजेत्--इ० पा० । ४ चन्द्रभूषणम्--इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हृदि त्रिधा ॥ २४ ॥ पुनः स्वयं शिवो भूत्वा मूलमंत्रेण साधकः ॥ ततः संपूजयेद्देवं बाह्यपीठे पुनः क्रमात् ॥ २५ ॥ संकल्पं प्रवदेत्तत्र पूजारंभे समाहितः ॥ कृतांजलिपुटो भूत्वा चिंतयेद्धृदि शंकरम् ॥ २६ ॥ ऋणपातकदौर्भाग्यदारिद्र्यविनिवृत्तये ॥ अशेषाघविनाशाय प्रसीद मम शंकर ॥ २७ ॥ दुःखशोकाग्निसंतप्तं संसारभयपीडितम् ॥ बहुरोगाकुलं दीनं त्राहि मां वृषवाहन ॥ २८ ॥ आगच्छ देवदेवेश महादेवाभयंकर ॥ गृहाण सह पार्वत्या तव पूजां मया कृताम् ॥ २९ ॥ इति संकल्प्य विधिवद्बाह्यपूजां समाचरेत् ॥ गुरुं गणपतिं चैव यजेत्सव्यापसव्ययोः ॥ ३० ॥ क्षेत्रेशमीशकोणे तु यजेद्वास्तोष्पतिं क्रमात् ॥ वाग्देवीं च यजेत्तत्र ततः कात्यायनीं यजेत् ॥ ३१ ॥ धर्मं ज्ञानं च वैराग्यमैश्वर्यं च नमोऽंतकैः ॥ स्वरैरीशादिकोणेषु पीठपादाननुक्रमात् ॥ आभ्यां बिंदुविसर्गाभ्यामधर्मादीन्प्रपूजयेत् ॥ ३२ ॥ सत्त्वरूपैश्चतुर्दिक्षु मध्येऽनंतं सतारकम् ॥ सत्त्वादींस्त्रिगुणांस्तंतुरूपान्पीठेषु विन्यसेत् ॥ ३३ ॥ अत ऊर्ध्वच्छदे मायां सह लक्ष्म्या शिवेन च ॥ ३४ ॥ तदंते चांबुजं भूयः सकलं मंडलत्रयम् ॥ पत्रकेसरकिंजल्कव्याप्तं तारांक्षरैः क्रमात् ॥ ३५ ॥ पद्मत्रयं तथाभ्यर्च्य मध्ये मंडलमादरात् ॥ वामां ज्येष्ठां च रौद्रीं च भागाद्यैर्दिक्षु पूजयेत् ॥ ॥ ३६ ॥ वामाद्या नव शक्तीश्च नवस्वरयुता यजेत् ॥ हृदि बीजत्रयाद्येन पीठमंत्रेण चार्चयेत् ॥ ३७ ॥ आवृत्तैः प्रथमांगैश्च पंचभिर्मूर्त्तिशक्तिभिः ॥ त्रिशक्तिमूर्त्तिभिश्चान्यैर्नैनिधिद्वयसमन्वितैः ॥ ३८ ॥ अनंताद्यैः परीतांश्च मातृभिश्च वृषादिभिः ॥ सिद्धिभिश्चाणिमाद्याभिरिंद्राद्यैश्च सहायुधैः ॥ ॥ ३९ ॥ वृषभक्षेत्रचंडेशदुर्गांश्च स्कंदनंदिनौ ॥ गणेशः सैन्यपश्चैव स्वस्वलक्षणलक्षिताः ॥ ४० ॥ अणिमा महिमा चैव गरिमा लघिमा तथा ॥ ईशित्वं च वशित्वं च प्राप्तिः प्राकाम्यमेव च ॥ ४१ ॥ अष्टैश्वर्याणि चोक्तानि तेजोरूपाणि केवलम् ॥ पंचभिर्ब्रह्मभिः पूर्वं हृल्लेखाद्यादिभिः क्रमात् ॥ ४२ ॥ अंगैरुमाद्यैरिंद्राद्यैः पूजोक्ता मुनिभिस्तु तैः ॥ उमाचंडेश्वरादींश्च पूजयेदुत्तरादितः ॥ ४३ ॥ एवमावरणैर्युक्तं तेजोरूपं सदाशिवम् ॥ उमया सहितं देवमुपचारैः प्रपूजयेत् ॥ ४४ ॥ सुप्रतिष्ठितशंखस्य तीर्थैः पंचामृतैरपि ॥ अभिषिच्य महादेवं रुद्रसूक्तैः समाहितः ॥ ४५ ॥ कल्पयेद्विविधैर्मंत्रैरासनाद्युपचारकान् ॥ आसनं कल्पयेद्धैमं दिव्यवस्त्रसमन्वितम् ॥ ४६ ॥ अर्घ्यमष्टगुणोपेतं पाद्यं शुद्धोदकेन च ॥ तेनैवाचमनं दद्यान्मधुपर्कं मधूत्तरम् ॥ ४७ ॥ पुनराचमनं दत्त्वा स्नानं मंत्रैः प्रकल्पयेत् ॥ उपवीतं तथा वासो भूषणानि निवेदयेत् ॥ गंधमष्टांगसंयुक्तं सुपूतं विनिवेदयेत् ॥ ॥ ४८ ॥ ततश्च बिल्वमंदारकह्लारसरसीरुहम् ॥ धत्तूरकं कर्णिकारं शणपुष्पं च मल्लिकाम् ॥ ४९ ॥ कुशापामार्गतुलसीमाधवीचंपकादिकम् ॥

१ समारभेत्—इ० पा० । २ तत्राक्षरैः—इ० पा० । ३ मध्येमण्डपम्—इ० पा० । ४ नवशक्तीः—इत्यत्रान्वेतव्यम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

बृहतीकरवीराणि यथालब्धानि साधकः ॥ ५० ॥ निवेदयेत्सुगंधीनि माल्यानि विविधानि च ॥ धूपं कालागरूत्पन्नं दीपं च विमलं शुभम् ॥ ॥५१॥ विशेषकम् ॥ अथ पायसनैवेद्यं सघृतं सोपदंशकम् ॥ मोदकापूपसंयुक्तं शर्कराशुडसंयुतम् ॥ ५२ ॥ मधुनाक्तं दधियुतं जलपानसमन्वितम् ॥ तेनैव हविषा वह्नौ जुहुयान्मंत्रभाविते ॥ ५३ ॥ आगमोक्तेन विधिना गुरुवाक्यनियंत्रितः ॥ नैवेद्यं शंभवे भूयो दत्त्वा तांबूलमुत्तमम् ॥ ५४ ॥ धूपं नीराजनं रम्यं छत्रं दर्पणमुत्तमम् ॥ समर्पयित्वा विधिवन्मंत्रैर्वैदिकतांत्रिकैः ॥ ५५ ॥ यद्यशक्तः स्वयं निःस्वो यथाविभवमर्चयेत् ॥ भक्त्या दत्तेन गौरीशः पुष्पमात्रेण तुष्यति ॥ ५६ ॥ अथांगभूतान्सकलान्गणेशादीन्प्रपूजयेत् ॥ स्तवैर्नानाविधैः स्तुत्वा साष्टांगं प्रणमेद्बुधः ॥ ५७ ॥ ततः प्रदक्षिणीकृत्य वृषचंडेश्वरादिकान्[1] ॥ पूजां समर्प्य विधिवत्प्रार्थयेद्गिरिजापतिम् ॥ ५८ ॥ जय देव जगन्नाथ जय शंकर शाश्वत ॥ जय सर्व सुराध्यक्ष जय सर्वसुरार्चित ॥ ५९ ॥ जय सर्वगुणातीत जय सर्ववरप्रद ॥ जय नित्य निराधार जय विश्वंभराव्यय[2] ॥ ६० ॥ जय विश्वैकवंद्येश[3] जय नागेंद्रभूषण ॥ जय गौरीपते शंभो जय चंद्रार्धशेखर ॥ ६१ ॥ जय कोट्यर्कसंकाश जयानंतगुणाश्रय ॥ ६२ ॥ जय रुद्र विरूपाक्ष जयाचिंत्य[4] निरंजन ॥ जय नाथ कृपासिंधो जय भक्तार्तिभञ्जन ॥ जय दुस्तरसंसारसागरोत्तारण प्रभो ॥ ६३ ॥ प्रसीद मे महादेव संसारार्त्तस्य खिद्यतः ॥ सर्वपापभयं[5] हृत्वा रक्ष मां परमेश्वर ॥ ६४ ॥ महादारिद्र्यमग्नस्य महापापहतस्य च ॥ महाशोकविनष्टस्य महारोगातुरस्य च ॥ ६५ ॥ ऋणभारपरीतस्य दह्यमानस्य कर्मभिः ॥ ग्रहैः प्रपीड्यमानस्य प्रसीद मम शंकर ॥ ६६ ॥ दरिद्रः प्रार्थयेदेवं पूजांते गिरिजापतिम् ॥ अर्थाढ्यो[6] वापि राजा वा प्रार्थयेद्देवमीश्वरम् ॥ ६७ ॥ दीर्घमायुः सदारोग्यं कोशवृद्धिर्बलोन्नतिः ॥ ममास्तु नित्यमानन्दः प्रसादात्तव शंकर ॥ ६८ ॥ शत्रवः संक्षयं यांतु प्रसीदन्तु मम ग्रहाः[7] ॥ नश्यन्तु दस्यवो राष्ट्रे जनाः संतु निरापदः ॥ ६९ ॥ दुर्भिक्षमारीसंतापाः शमं यांतु महीतले ॥ सर्वसस्यसमृद्धिश्च भूयात्सुखमया दिशः ॥ ७० ॥ एवमाराधयेद्देवं प्रदोषे गिरिजापतिम् ॥ ब्राह्मणान्भोजयेत्पश्चाद्दक्षिणाभिश्च तोषयेत् ॥ ७१ ॥ सर्वपापक्षयकरी सर्वदारिद्र्यनाशिनी ॥ शिवपूजा मया ख्याता सर्वाभीष्टवरप्रदा ॥ ७२ ॥ महापातकसंघातमधिकं चोपपातकम् ॥ शिवद्रव्यापहरणादन्यत्सर्वं निर्वारयेत्[8] ॥ ७३ ॥ ब्रह्महत्यादिपापानां[9] पुराणेषु स्मृतिष्वपि ॥ प्रायश्चित्तानि

१ नवचण्डेश्वरादिकान्–इ० पा० । २ अच्युत–इ० पा० । ३ विश्वैकवन्द्येश–इ० पा० । ४ नित्य–इ० पा० । ५ सर्वपापक्षयं कृत्वा–इ० पा० । ६ अथान्यो वापि–इ० पा० । ७ प्रजाः–इ० पा० । ८ विनाशयेत्–इ० पा० । ९ ब्रह्महत्यादिदोषाणाम्–इ० पा० ।

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दृष्टानि न शिवद्रव्यहारिणाम् ॥ ७४ ॥ बहुनात्र किमुक्तेन श्लोकार्द्धेन ब्रवीम्यहम् ॥ ब्रह्महत्याशतं वापि शिवपूजा विनाशयेत् ॥ ७५ ॥ मया कथितमेतत्ते प्रदोषे शिवपूजनम् ॥ रहस्यं सर्वजंतूनामत्र नास्त्येव संशयः ॥ ७६ ॥ एताभ्यामपि बालाभ्यामेवं[1] पूजा विधीयताम् ॥ अतः संवत्सरादेव परां सिद्धिमवाप्स्यथ ॥ ७७ ॥ इति शांडिल्यवचनमाकर्ण्य द्विजभामिनी ॥ ताभ्यां तु सह बालाभ्यां प्रणनाम मुनेः पदम् ॥ ७८ ॥ ॥ ॥ विप्रस्त्र्युवाच ॥ ॥ अहमद्य कृतार्थास्मि तव दर्शनमात्रतः ॥ एतौ कुमारौ भगवंस्त्वामेव शरणं गतौ ॥ ७९ ॥ एष मे तनयो ब्रह्मञ्छुचिव्रत इतीरितः ॥ एष राजसुतो नाम्ना धर्मगुप्तः कृतो मया ॥ ८० ॥ एतावहं च भगवन्भवच्चरणकिंकराः ॥ समुद्धरास्मिन्पतितान्घोरे दारिद्र्यसागरे[2] ॥ ८१ ॥ इति प्रपन्नां शरणं द्विजांगनामाश्वास्य वाक्यैरमृतोपमानैः ॥ उपादिदेशाथ तयोः कुमारयोर्मुनिः शिवाराधनमंत्रविद्याम् ॥ ८२ ॥ अथोपदिष्टौ मुनिना कुमारौ ब्राह्मणी च सा ॥ तं प्रणम्य समामंत्र्य जग्मुस्ते शिवमंदिरात् ॥ ८३ ॥ ततः प्रभृति तौ बालौ मुनिवर्योपदेशतः ॥ प्रदोषे पार्वतीशस्य पूजां चक्रतुरंजसा ॥ ८४ ॥ एवं पूजयतोर्देवं द्विजराजकुमारयोः ॥ सुखेनैव व्यतीयाय तयोर्मासचतुष्टयम् ॥ ८५ ॥ कदाचिद्राजपुत्रेण विनासौ द्विजनंदनः ॥ स्नातुं गतो नदीतीरे चचार बहुलीलया ॥ ८६ ॥ तत्र निर्झरनिर्घातनिर्भिन्ने वप्रकुट्टिमे ॥ निधानकलशं स्थूलं प्रस्फुरंतं ददर्श ह ॥ ८७ ॥ तं दृष्ट्वा सहसागत्य हर्षकौतुकविह्वलः ॥ दैवोपपन्नं मन्वानो गृहीत्वा शिरसा ययौ ॥ ॥ ८८ ॥ ससंभ्रमं समानीय निधाय कलशं बलात् ॥ निधाय भवनस्यांते मातरं समभाषत ॥ ८९ ॥ मातर्मातरिमं पश्य प्रसादं गिरिजापतेः ॥ निधानं कुम्भरूपेण दर्शितं करुणात्मना ॥ ९० ॥ अथ सा विस्मिता साध्वी समाहूय नृपात्मजम् ॥ स्वपुत्रं प्रतिनंद्याह मानयन्ती शिवार्चनम् ॥ ॥ ९१ ॥ शृणुतां मे वचः पुत्रौ निधानकलशीमिमाम् ॥ समं विभज्य गृह्णीतं मम शासनगौरवात् ॥ ९२ ॥ इति मातुर्वचः श्रुत्वा तुतोष द्विजनंदनः ॥ प्रत्याह राजपुत्रस्तां विस्रब्धः शंकरार्चने ॥ ९३ ॥ मातस्तव सुतस्यैव सुकृतेन समागतम् ॥ नाहं ग्रहीतुमिच्छामि विभक्तं धनसंचयम् ॥ ९४ ॥ आत्मनः सुकृताल्लब्धं स्वयमेव भुनक्त्वसौ ॥ स[3] एव भगवानीशः करिष्यति कृपां मयि ॥ ९५ ॥ एवमर्चयतोः शंभुं भूयोपि परया मुदा ॥ संवत्सरो व्यतीयाय तस्मिन्नेव गृहे तयोः ॥ ९६ ॥ अथैकदा राजसूनुः सह तेन द्विजन्मना ॥ वसंतसमये प्राप्ते विजहार वनांतरे ॥ ९७ ॥ अथ दूरं गतौ क्वापि वने द्विजनृपात्मजौ ॥ गन्धर्वकन्याः क्रीडंतीः शतशस्तावपश्यताम् ॥ ९८ ॥ ताः सर्वाश्चारुसर्वांग्यो

१ शिवपूजा—इ० पा० । २ संसारसागरे—इ० पा० । ३ यदा कदाचिद्गौरीशः—इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विहरंत्यो मनोहरम् ॥ दृष्ट्वा द्विजात्मजो दूरादुवाच नृपनंदनम् ॥ ९९ ॥ इतः पुरो न गंतव्यं विहरंत्यग्रतः स्त्रियः ॥ स्त्रीसन्निधानं विबु
धास्त्यजंति विमलाशयाः ॥ १०० ॥ एताः कैतवकारिण्यो घनयौवनदुर्मदाः ॥ मोहयन्त्यो जनं दृष्ट्वा वाचानुनयकोविदाः ॥ १ ॥ अतः
परित्यजेत्स्त्रीणां सन्निधिं सहभाषणम् ॥ निजधर्मरतो विद्वन्ब्रह्मचारी विशेषतः ॥ २ ॥ अतोऽहं नोत्सहे गन्तुं क्रीडास्थानं मृगीदृशाम् ॥ इत्युक्त्वा
द्विजपुत्रस्तु निवृत्तो दूरतः स्थितः ॥ ३ ॥ अथासौ राजपुत्रस्तु कौतुकाविष्टमानसः ॥ तासां विहारपदवीमेक एवाभयो ययौ ॥ ४ ॥ तत्र
गंधर्वकन्यानां मध्ये त्वेका वरानना ॥ दृष्ट्वाऽऽयांतं राजपुत्रं चिंतयामास चेतसा ॥ ५ ॥ अहो कोयमुदारांगो युवा सर्वांगसुन्दरः ॥ मत्तमातंग
गमनो लावण्यामृतवारिधिः ॥ ६ ॥ लीलालोलविशालाक्षो मधुरस्मितपेशलः ॥ मदनोपमरूपश्रीः सुकुमारांगलक्षणः ॥ ७ ॥ इत्याश्चर्ययुता
बाला दूराद्दृष्ट्वा नृपात्मजम् ॥ सर्वाः सखीः समालोक्य वचनं चेदमब्रवीत् ॥ ८ ॥ इतो विदूरे हे सख्यो वनमस्त्येकमुत्तमम् ॥ विचित्रचंप
काशोकपुन्नागबकुलैर्युतम् ॥ ९ ॥ तत्र गत्वा वनं सर्वाः संचीय कुसुमोत्करम् ॥ भवत्यः पुनरायांतु तावत्तिष्ठाम्यहं त्विह ॥ ११० ॥ इत्यादिष्टः
सखीवर्गो जगाम विपिनांतरम् ॥ सापि गंधर्वजा तस्थौ न्यस्तदृष्टिर्नृपात्मजे ॥ ११ ॥ तां समालोक्य तन्वंगीं नवयौवनशालिनीम् ॥ बालां
स्वरूपसंपत्त्या परिभूततिलोत्तमाम् ॥ १२ ॥ राजपुत्रः समागम्य कौतुकोत्फुल्ललोचनः ॥ अवाप दैवयोगेन मदनस्य शरव्यथाम् ॥ १३ ॥
गन्धर्वतनया सापि प्राप्ताय नृपसूनवे ॥ उत्थाय तरसा तस्मै प्रददौ पल्लवासनम् ॥ १४ ॥ कृतोपचारमासीनं तमासाद्य सुमध्यमा ॥ पप्रच्छ
तद्रूपगुणैर्ध्वस्तधैर्याकुलेंद्रिया ॥ १५ ॥ कस्त्वं कमलपत्राक्ष कस्माद्देशादिहागतः ॥ कस्य पुत्र इति प्रेम्णा पृष्टः सर्वं न्यवेदयत् ॥ १६ ॥ विदर्भ
राजतनयं विध्वस्तपितृमातृकम् ॥ शत्रुभिश्च हृतस्थानमात्मानं परराष्ट्रगम् ॥ १७ ॥ सर्वमावेद्य भूयस्तां पप्रच्छ नृपनंदनः ॥ का त्वं वामोरु
किं चात्र कार्यं ते कस्य चात्मजा ॥ १८ ॥ किमवध्यायसि हृदा किं वा वक्तुमिहेच्छसि ॥ इत्युक्ता सा पुनः प्राह शृणु राजेंद्रसत्तम ॥ १९ ॥
अस्त्येको द्रविकोनाम गंधर्वाणां कुलाग्रणीः ॥ तस्याहमस्मि तनया नाम्ना चांशुमती स्मृता ॥ १२० ॥ त्वामायांतं विलोक्याहं त्वत्संभाषण
लालसा ॥ त्यक्त्वा सखीजनं सर्वमेकैवास्मि महामते ॥ २१ ॥ सर्वसंगीतविद्यासु न मत्तोऽन्यास्ति काचन ॥ मम योगेन तुष्यंति सर्वा अपि
सुरस्त्रियः ॥ २२ ॥ साहं सर्वकलाभिज्ञा ज्ञातसर्वजनेंगिता ॥ तवाहमीप्सितं वेद्मि मयि ते संगतं मनः ॥ २३ ॥ तथा ममापि चौत्सुक्यं दैवेन

१ स्त्रीसंनिकर्षम्–इ० पा० । २ बलान्मानुषकोविदान्–इ० पा० । ३ द्विजधर्मरतो विद्वन्–इ० पा० । ४ स्वयम्–इ० पा० । ५ स्वरूपसंपन्नाम्–इ०पा० । ६ अस्त्येको द्रविणोनाम–इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रतिपादितम् ॥ आवयोः स्नेहभेदोऽत्र नाभिभूयादितः परम् ॥ २४ ॥ इति संभाष्य तेनाशु प्रेम्णा गन्धर्वनंदिनी ॥ मुक्ताहारं ददौ तस्मै स्वकुचांतरभूषणम् ॥ २५ ॥ तमादायाद्भुतं हारं स तस्याः प्रणयाकुलः ॥ गाढहर्षभरोत्सिक्तामिदमाह नृपात्मजः ॥ २६ ॥ सत्यमुक्तं त्वया भीरु तथाप्येकं वदाम्यहम् ॥ त्यक्तराज्यस्य निःस्वस्य कथं मे भवसि प्रिया ॥ २७ ॥ सा त्वं पितृमती बाला विलंघ्य पितृशासनम् ॥ स्वच्छंदाचरणं कर्तुं मूढेव कथमर्हसि ॥ २८ ॥ इति तस्य वचः श्रुत्वा तं प्रत्याह शुचिस्मिता ॥ अस्तु नाम तथैवाहं करिष्ये पश्य कौतुकम् ॥ २९ ॥ गच्छ स्वभवनं कांत परश्वः प्रातरेव तु ॥ आगच्छ पुनरत्रैव कार्यमस्ति च नो मृषा ॥ १३० ॥ इत्युक्त्वा तं नृपसुतं सा संगतसखीजना ॥ अपाक्रामत चार्वंगी स चापि नृपनन्दनः ॥ ३१ ॥ स समभ्येत्य हर्षेण द्विजपुत्रस्य सन्निधिम् ॥ सर्वमाख्याय तेनैव सार्धं स्वभवनं ययौ ॥ ॥ ३२ ॥ तां च विप्रसतीं भूयो हर्षयित्वा नृपात्मजः ॥ परश्वो द्विजपुत्रेण सार्धं तेन वनं ययौ ॥ ३३ ॥ स तया पूर्वनिर्दिष्टं स्थानं प्राप्य नृपात्मजः ॥ गन्धर्वराजमद्राक्षीत्स्वदुहित्रा समन्वितम् ॥ ३४ ॥ स गंधर्वपतिः प्राप्तावभिनंद्य कुमारकौ ॥ उपवेश्यासने रम्ये राजपुत्रमभाषत ॥ ॥ ३५ ॥ ॥ गंधर्व उवाच ॥ ॥ राजेंद्रपुत्र पूर्वेद्युः कैलासं गतवानहम् ॥ तत्रापश्यं महादेवं पार्वत्या सहितं प्रभुम् ॥ ३६ ॥ आहूय मां स देवेशः सर्वेषां त्रिदिवौकसाम् ॥ सन्निधावाह भगवान्करुणामृतवारिधिः ॥ ३७ ॥ धर्मगुप्ताह्वयः कश्चिद्राजपुत्रोऽस्ति भूतले ॥ अकिञ्चनो भ्रष्टराज्यो हतदेशश्च शत्रुभिः ॥ ३८ ॥ स बालो गुरुवाक्येन मदर्चायां रतः सदा ॥ अद्य तत्पितरः सर्वे मां प्राप्तास्तत्प्रभावतः ॥ ३९ ॥ तस्य त्वमपि साहाय्यं कुरु गन्धर्वसत्तम ॥ अथासौ निजराज्यस्थो हतशत्रुर्भविष्यति ॥ १४० ॥ इत्याज्ञप्तो महेशेन संप्राप्तो निजमंदिरम् ॥ अनया मद्दुहित्रा च बहुशोऽभ्यर्थितस्तथा ॥ ४१ ॥ ज्ञात्वेमं सकलं शंभोर्नियोगं करुणात्मनः ॥ आदायेमां दुहितरं प्राप्तोऽस्मीदं वनांतरम् ॥ ४२ ॥ अत एनां प्रयच्छामि कन्यामंशुमतीं तव ॥ हत्वा शत्रून्स्वराष्ट्रे त्वां स्थापयामि शिवाज्ञया ॥ ४३ ॥ तस्मिन्पुरे त्वमनया भुक्त्वा भोगान्यथेप्सितान् ॥ दशवर्षसहस्रान्ते गन्तासि गिरिशालयम् ॥ ४४ ॥ तत्रापि मम कन्येयं त्वामेव प्रतिपत्स्यते ॥ अनेनैव स्वदेहेन दिव्येन शिवसन्निधौ ॥ ४५ ॥ इति गन्धर्वराजस्तमाभाष्य नृपनन्दनम् ॥ तस्मिन्वने स्वदुहितुः पाणिग्रहमकारयत् ॥ ४६ ॥ पारिबर्हमदात्तस्मै रत्नभारान्महोज्ज्वलान् ॥ चूडामणिं चन्द्रनिभं मुक्ताहारांश्च भासुरान् ॥ ४७ ॥ दिव्यालंकारवासांसि कार्त्तस्वरपरिच्छदान् ॥ गजानामयुतं भूयो नियुतं नीलवाजिनाम् ॥ ४८ ॥

१ गाढहर्षपरासिक्ताम्–इ० पा० । २ त्वम्–इ० पा० । ३ हतबंधुश्च–इ० पा० । ४ अप्यसौ–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्यन्दनानां सहस्राणि सौवर्णानि महांति च ॥ पुनरेकं रथं दिव्यं धनुश्चेन्द्रायुधोपमम् ॥ ४९ ॥ अस्त्राणां च सहस्राणि तूणी चाक्षय्यसायकौ ॥ अभेद्यं वर्म सौवर्णं शक्तिं च रिपुमर्दिनीम् ॥ १५० ॥ दुहितुः परिचर्यार्थं दासीपञ्चसहस्रकम् ॥ ददौ प्रीतमनास्तस्मै धनानि विविधानि च ॥ ॥ ५१ ॥ गंधर्वसैन्यमत्युग्रं चतुरंगसमन्वितम् ॥ पुनश्च तत्सहायार्थे गन्धर्वाधिपतिर्ददौ ॥ ५२ ॥ इत्थं राजेन्द्रतनयः संप्राप्तः श्रियमुत्तमाम् ॥ अभीष्टजायासहितो मुमुदे निजसंपदा ॥ ५३ ॥ कारयित्वा स्वदुहितुर्विवाहं समयोचितम् ॥ ययौ विमानमारुह्य गंधर्वाधिपतिर्दिवम् ॥ ५४ ॥ धर्मगुप्तः कृतोद्वाहः सह गंधर्वसेनया ॥ पुनः स्वनगरं प्राप्य जघान रिपुवाहिनीम् ॥ ५५ ॥ दुर्धर्षणं रणे हत्वा शक्त्या गंधर्वसेनया ॥ निःशेषितारातिबलः प्रविवेश निजं पुरम् ॥ ५६ ॥ ततोभिषिक्तः सचिवैर्ब्राह्मणैश्च महोत्तमैः ॥ रत्नसिंहासनारूढश्चक्रे राज्यमकण्टकम् ॥ ५७ ॥ या विप्रवनिता पूर्वं तमपुष्णात्स्वपुत्रवत् ॥ सैव माताभवत्तस्य स भ्राता द्विजनन्दनः ॥ ५८ ॥ गंधर्वतनया जाया विदर्भनगरेश्वरः ॥ आराध्य देवं गिरिशं धर्मगुप्तो नृपोऽभवत् ॥ ५९ ॥ एवमन्ये समाराध्य प्रदोषे गिरिजापतिम् ॥ लभंतेभीप्सितान्कामान्देहांते तु परां गतिम् ॥ १६० ॥ ॥ सूत उवाच ॥ ॥ एतन्महाव्रतं पुण्यं प्रदोषे शंकरार्चनम् ॥ धर्मार्थकाममोक्षाणां यदेतत्साधनं परम् ॥ ६१ ॥ य एतच्छृणुयात्पुण्यं[3] माहात्म्यं परमाद्भुतम् ॥ प्रदोषे शिवपूजांते कथयेद्वा समाहितः ॥ ६२ ॥ भवेन्न तस्य दारिद्र्यं जन्मान्तरशतेष्वपि ॥ ज्ञानैश्वर्यसमायुक्तः सोन्ते शिवपुरं व्रजेत् ॥ ६३ ॥ ये प्राप्य दुर्लभतरं मनुजाः शरीरं कुर्वंति हंत परमेश्वरपादपूजाम् ॥ धन्यास्त एव निजपुण्यजितत्रिलोकास्तेषां पदांबुजरजो भुवनं पुनाति ॥ १६४ ॥ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मोत्तरखण्डे प्रदोषमहिमावर्णनं नाम सप्तमोऽध्यायः ॥ ७ ॥ ॥ सूत उवाच ॥ ॥ नित्यानंदमयं शांतं निर्विकल्पं निरामयम् ॥ शिवतत्त्वमनाद्यंतं ये विदुस्ते परं गताः ॥ १ ॥ विरक्ताः कामभोगेभ्यो ये प्रकुर्वंत्यहैतुकीम् ॥ भक्तिं परां शिवे धीरास्तेषां मुक्तिर्न संसृतिः ॥२॥ विषयानभिसंधाय ये कुर्वंति शिवे रतिम् ॥ विषयैर्नाभिभूयंते भुंजानास्तत्फलान्यपि ॥ ३ ॥ येन केनापि भावेन शिवभक्तियुतो नरः ॥ न विनश्यति कालेन स याति परमां गतिम् ॥ ४ ॥ आरुरुक्षुः परं स्थानं विषयासक्तमानसः ॥ पूजयेत्कर्मणा शंभुं भोगांते शिवमाप्नुयात् ॥ ५ ॥ अशक्तः कश्चिदुत्स्रष्टुं प्रायो विषयवासनाम् ॥ अतः कर्ममयी पूजा कामधेनुः शरीरिणाम् ॥६॥ मायामयेपि संसारे ये विहृत्य चिरं सुखम् ॥ मुक्तिमिच्छन्ति देहांते तेषां धर्मोयमीरितः ॥ ७ ॥

१ चर्म—इ० पा० । २ अभिनन्द्य स सस्त्रीकः—इ० पा० । ३ नित्यम्—इ० पा० । ४ संशयः—इ० पा० । ५ विषयांस्त्यक्तुमक्षमः—इ० पा० । ६ शम्भुम्—इ०, सुखम्—इ० च पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शिव[1]पूजा सदा लोके हेतुः स्वर्गापवर्गयोः ॥ सोमवारे विशेषेण प्रदोषादिगुणान्विते ॥ ८ ॥ केवलेनापि ये कुर्युः सोमवारे शिवार्चनम् ॥ न तेषां विद्यते किंचिदिहामुत्र च दुर्लभम् ॥ ९ ॥ उपोषितः शुचिर्भूत्वा सोमवारे जितेंद्रियः ॥ वैदिकैर्लौकिकैर्वापि विधिवत्पूजयेच्छिवम् ॥ १० ॥ ब्रह्मचारी गृहस्थो वा कन्या वापि सभर्तृका ॥ विभर्तृका वा संपूज्य लभते वरमीप्सितम् ॥ ११ ॥ अत्रा[2]हं कथयिष्यामि कथां श्रोतृमनोहराम् ॥ श्रुत्वा[3] मुक्तिं प्रयांत्येव भक्तिर्भवति शांभवी ॥ १२ ॥ आर्यावर्ते नृपः कश्चिदासीद्धर्मभृतां[4] वरः ॥ चित्रवर्मेति विख्यातो धर्मराजो[5] दुरात्मनाम् ॥ ॥ १३ ॥ स गोप्ता धर्मसेतूनां शास्ता दुष्पथगामिनाम् ॥ यष्टा समस्तयज्ञानां त्राता शरणमिच्छताम् ॥ १४ ॥ कर्त्ता सकलपुण्यानां दाता सकलसंपदाम् ॥ जेता सपत्नवृंदानां भक्तः शिवमुकुन्दयोः ॥ १५ ॥ सोनुकूलासु पत्नीषु लब्ध्वा पुत्रान्महौजसः ॥ चिरेण प्रार्थितां लेभे कन्यामेकां वराननाम् ॥ १६ ॥ स लब्ध्वा तनयां दिष्टया हिमवानिव पार्वतीम् ॥ आत्मानं देवसदृशं मेने पूर्णमनोरथम् ॥ १७ ॥ स एकदा जा[6]तकलक्षणज्ञानाहूय साधून्द्विजमुख्यवृंदान् ॥ कुतूहलेनाभिनिविष्टचेताः पप्रच्छ कन्यां[7]जनने फलानि ॥ १८ ॥ अथ तत्राब्रवीदेको बहुज्ञो द्विज सत्तमः ॥ एषा सीमंतिनी नाम्ना कन्या तव महीपते ॥ १९ ॥ उमेव मांगल्यवती दमयंतीव रूपिणी ॥ भारतीव कलाभिज्ञा लक्ष्मीरिव महागुणा ॥ ॥ २० ॥ सुप्रजा देवमातेव जानकीव धृतव्रता ॥ रविप्रभेव सत्कांतिश्चंद्रिकेव मनोरमा ॥ २१ ॥ दशवर्षसहस्राणि सह भर्त्रा प्रमोदते ॥ प्रसूय तनया नष्टौ परं सुखमवाप्स्यति ॥ २२ ॥ इत्युक्तवंतं नृपतिर्धनैः संपूज्य तं द्विजम् ॥ अवाप परमां प्रीतिं तद्वागमृतसेवया ॥ २३ ॥ अथान्योऽपि द्विजः प्राह धैर्यवानमितद्युतिः ॥ एषा चतुर्दशे वर्षे वैधव्यं प्रतिपत्स्यति ॥ २४ ॥ इत्याकर्ण्य वचस्तस्य वज्रनिर्घातनिष्ठुरम् ॥ मुहूर्तमभवद्राजा चिंताव्याकुलमानसः ॥ २५ ॥ अथ सर्वान्समुत्सृज्य ब्राह्मणान्ब्रह्मवत्सलः ॥ सर्वं दैवकृतं मत्त्वा निश्चिंतः[8] पार्थिवोऽभवत् ॥ २६ ॥ सापि सीमंतिनी बाला क्रमेण गतशैशवा ॥ वैधव्यमात्मनो भावि शुश्रावात्मसखीमुखात् ॥ २७ ॥ परं निर्वेदमापन्ना चिंतयामास बालिका ॥ याज्ञवल्क्यमुनेः पत्नीं मैत्रेयीं पर्यपृच्छत ॥ २८ ॥ मातस्त्वच्चरणांभोजं प्रपन्नास्मि भयाकुला ॥ सौभाग्यवर्धनं कर्म मम शंसितु[9]मर्हसि ॥ २९ ॥ इति प्रपन्नां नृपतेः कन्यां प्राह मुनेः सती ॥ शरणं व्रज तन्वंगि पार्वतीं शिवसंयुताम् ॥ ३० ॥ सोमवारे शिवं गौरीं पूजयस्व समाहिता ॥ उपोषिता वा सुस्नाता विरजा

१ शिवभक्तिस्तथा कार्या–इ० पा० । २ अत्रापि–इ० पा० । ३ श्रुत्वा कृतधियः शंभौ भक्तिं कुर्वन्ति निश्चलाम्–इ० पा० । ४ परमधार्मिकः–इ० पा० । ५ धर्मराजो दुरात्मनाम्–दुरात्मनां धर्मराजः यमः अंतक इत्यर्थः । धर्मराजो महामनाः–इति पाठान्तरम् । ६ ज्ञातकलत्रलक्षणान्–इ० पा० । ७ तस्या जनने भविष्यम्–इ० पा० । ८ अविशंकितः–इ० पा० । ९ शासितुम्–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

म्बरधारिणी ॥ ३१ ॥ यतवाङ्निश्चलमना[1] पूजां कृत्वा यथोचिताम् ॥ ब्राह्मणान्भोजयित्वाथ शिवं सम्यक्प्रसादयत् ॥३२॥ पापक्षयोऽभिषेकेण साम्राज्यं पीठपूजनात् ॥ सौभाग्यमखिलं सौख्यं गंधमाल्याक्षतार्पणात् ॥ ३३ ॥ धूपदानेन सौगंध्यं कांतिर्दीपप्रदानतः ॥ नैवेद्यैश्च महाभोगो लक्ष्मीस्तांबूलदानतः ॥ ३४ ॥ धर्मार्थकाममोक्षाश्च नमस्कारप्रदानतः ॥ अष्टैश्वर्यादिसिद्धीनां जप एव हि कारणम् ॥ ३५ ॥ होमेन सर्वकामा[2]नां समृद्धिरुपजायते ॥ सर्वेषामेव देवानां तुष्टिर्ब्राह्मणभोजनात्[3] ॥ ३६ ॥ इत्थमाराधय शिवं सोमवारे शिवामपि ॥ अत्यापदमपि प्राप्ता निस्तीर्णाभिभवा भवेः ॥ ३७ ॥ घोराद्घोरं प्रपन्नापि महाक्लेशं भयानकम् ॥ शिवपूजाप्रभावेण तरिष्यसि महद्भयम् ॥ ३८ ॥ इत्थं सीमंतिनीं सम्यगनुशास्य पुनः सती ॥ ययौ सापि वरारोहा राजपुत्री तथाऽकरोत् ॥ ३९ ॥ दमयंत्यां नलस्यासीदिंद्रसेनाभिधः सुतः ॥ तस्य चंद्रांगदो नाम पुत्रोभूच्चंद्रसन्निभः ॥ ४० ॥ चित्रवर्मा नृपश्रेष्ठस्तमाहूय नृपात्मजम् ॥ कन्यां सीमंतिनीं तस्मै प्रायच्छद्धर्वनुज्ञया ॥ ४१ ॥ सोऽभून्महोत्सवस्तत्र तस्या उद्वाहकर्मणि ॥ यत्र सर्वमहीपानां समवायो[4] महानभूत् ॥ ४२ ॥ तस्याः पाणिग्रहं काले कृत्वा चंद्रांगदः कृती ॥ उवास कतिचिन्मासांस्तत्रैव श्वशुरालये ॥ ४३ ॥ एकदा यमुनां तर्तुं स राजतनयो बली ॥ आरुरोह तरीं कैश्चिद्वयस्यैः सह लीलया ॥ ४४ ॥ तस्मिंस्तरति कालिंदीं राजपुत्रे विधेर्वशात् ॥ ममज्ज सह कैवर्तैरावर्त्ताभिहता तरी ॥ ४५ ॥ हा हेति शब्दः सुमहानासीत्तस्यास्तटद्वये ॥ पश्यतां सर्वसैन्यानां प्रलापो दिवमस्पृशत् ॥ ४६ ॥ मज्जंतो मम्रिरे केचित्केचिद्ग्राहोदरं गताः ॥ राजपुत्रादयः केचिन्नादृश्यंत महाजले ॥ ४७ ॥ तदुपश्रुत्य राजापि चित्रवर्मातिविह्वलः ॥ यमुनायास्तटं प्राप्य विचेष्टः समजायत ॥४८॥ श्रुत्वाथ राजपत्न्यश्च बभूवुर्गतचेतनाः ॥ सा च सीमंतिनी श्रुत्वा पपाप भुवि मूर्च्छिता ॥ ४९ ॥ तथान्ये मंत्रिमुख्याश्च नायकाः सपुरोहिताः॥ विह्वलाः शोकसंतप्ता विलेपुर्मुक्तमूर्धजाः ॥५०॥ इंद्रसेनोपि राजेंद्रः पुत्रवार्त्तां सुदुःखितः॥ आकर्ण्य सह पत्नीभिर्नष्टसंज्ञः पपात ह ॥ ५१ ॥ तन्मंत्रिणश्च तत्पौरास्तथा तद्देशवासिनः ॥ आबालवृद्धवनिताश्चुकुशुः शोकविह्वलाः ॥ ५२ ॥ शोकात्केचिदुरो जघ्नुः शिरो जघ्नुश्च केचन ॥ हा राजपुत्र हा तात क्वासि क्वासीति बभ्रमुः ॥५३॥ एवं शोकाकुलं दीनमिंद्रसेनमहीपतेः ॥ नगरं सहसा क्षुब्धं चित्रवर्मपुरं तथा ॥ ५४ ॥ अथ वृद्धैः समाश्वस्तश्चित्रवर्मा महीपतिः ॥ शनैर्नगरमागत्य सान्त्वयामास चात्मजाम् ॥ ५५ ॥ स राजा भसि मग्नस्य जामातुस्तस्य बांधवैः ॥ आगतैः कारयामास साकल्यादौर्ध्वदैहिकम् ॥५६॥ सा च सीमंतिनी साध्वी भर्तृलोकमतिः सती ॥ पित्रा

१ निश्चलमतिः—इ० पा० । २ सर्वकोशानाम्—इ० पा० । ३ संयमिभोजनात्—इ० पा० । ४ समुदाय—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निषिद्धा स्नेहेन वैधव्यं प्रत्यपद्यत ॥ ५७ ॥ मुनेः पत्न्योऽपदिष्टं यत्सोमवारव्रतं शुभम् ॥ न तत्याज शुभाचारा वैधव्यं प्राप्तवत्यपि ॥ ५८ ॥ एवं चतुर्दशे वर्षे दुःखं प्राप्य सुदारुणम् ॥ ध्यायन्ती शिवपादाब्जं वत्सरत्रयमत्यगात् ॥ ५९ ॥ पुत्रशोकादिवोन्मत्तमिंद्रसेनं महीपतिम् ॥ प्रसह्य तस्य दायादाः सप्तांगं[1] जहुरोजसा[2] ॥ ६० ॥ हृतसिंहासनः शूरैर्दायादैः सोऽप्रजो नृपः ॥ निगृह्य काराभवने सपत्नीको निवेशितः ॥ ॥ ६१ ॥ चंद्रांगदोऽपि तत्पुत्रो निमग्नो यमुनाजले ॥ अधोधोमज्जमानोऽसौ ददर्शोरगकामिनीः ॥ ६२ ॥ जलक्रीडासु सक्तास्ता दृष्ट्वा राजकुमारकम् ॥ विस्मितास्तमथो निन्युः पातलं पन्नगालयम् ॥ ६३ ॥ स नीयमानस्तैरसा पन्नगीभिर्नृपात्मजः ॥ तक्षकस्य पुरं रम्यं विवेश परमाद्भुतम् ॥ ॥ ६४ ॥ सोऽपश्यद्राजतनयो महेंद्रभवनोपमम् ॥ महारत्नपरिभ्राजन्मयूखपरिदीपितम् ॥ ६५ ॥ वज्रवैडूर्यपाचादिप्रासादशतसंकुलम् ॥ माणिक्यगोपुरद्वारं मुक्तादामभिरुज्ज्वलम् ॥ ६६ ॥ चंद्रकांतस्थलं रम्यं हेमद्वारकपाटकम् ॥ अनेकशतसाहस्रमणिदीपविराजितम् ॥ ६७ ॥ तत्रापश्यत्सभामध्ये निषण्णं रत्नविष्टरे ॥ तक्षकं पन्नगाधीशं फणानेकशतोज्ज्वलम् ॥ ६८ ॥ दिव्यांबरधरं दीप्तं रत्नकुण्डलरंजितम्[3] ॥ नानारत्नपरिक्षिप्तमुकुटद्युतिरंजितम् ॥ ६९ ॥ फणामणिमयूखाढ्यैरसंख्यैः[4] पन्नगोत्तमैः ॥ उपासितं प्रांजलिभिश्चित्ररत्नविभूषितैः[5] ॥ ७० ॥ रूपयौवनमाधुर्यविलासगतिशोभिना ॥ नागकन्यासहस्रेण समंतात्परिवारितम् ॥ ७१ ॥ दिव्याभरणदीप्तांगं दिव्यचंदनचर्चितम् ॥ कालाग्निमिव दुर्धर्षं तेजसादित्यसन्निभम् ॥ ॥ ७२ ॥ दृष्ट्वा राजसुतो धीरः प्रणिपत्य सभास्थले ॥ उत्थितः प्रांजलिस्तस्य[6] तेजसाक्षिप्तलोचनः ॥ ७३ ॥ नागराजोपि तं दृष्ट्वा राजपुत्रं मनोरमम् ॥ कोऽयं कस्मादिहायात इति पप्रच्छ पन्नगीः ॥ ७४ ॥ ता ऊचुर्यमुनातोये दृष्टोऽस्माभिर्यदृच्छया ॥ अज्ञातकुलनामायमानीतस्तव सन्निधिम् ॥ ७५ ॥ अथ पृष्टो राजपुत्रस्तक्षकेण महात्मना ॥ कस्यासि तनयः कस्त्वं को देशः कथमागतः ॥ ७६ ॥ राजपुत्रो वचः श्रुत्वा तक्षकं वाक्यमब्रवीत् ॥ ७७ ॥ ॥ राजपुत्र उवाच ॥ ॥ अस्ति भूमंडले कश्चिद्देशो निषधसंज्ञकः[7] ॥ तस्याधिपोऽभवद्राजा नलो नाम महायशाः ॥ स पुण्यकीर्तिः क्षितिपो दमयन्तीपतिः शुभः[8] ॥ ७८ ॥ तस्मादपींद्रसेनाख्यस्तस्य पुत्रो महाबलः ॥ चंद्रांगदोस्मि नाम्नाहं नवोढः श्वशुरालये ॥ विहरन्यमुनातोये निमग्नो दैवचोदितः ॥ ७९ ॥ एताभिः पन्नगस्त्रीभिरानीतोस्मि तवांतिकम् ॥ दृष्ट्वाहं तव पादाब्जं पुण्यैर्जन्मां

१ सप्ताङ्गम्—राज्यम्—इत्यर्थः । "स्वाम्यमात्यसुहृत्कोशराष्ट्रदुर्गबलानि च । राज्यांगानि" इत्यमरः । २ सहसा—इ० पा० । ३ रत्नकुण्डलमण्डितम्—इ० पा० । ४ फणामणिसहस्रौघैः—इ० पा० । ५ उपस्थितं प्रांजलिभिश्चित्रालंकारभूषितैः—इ० पा० । ६ तस्थौ—इ० पा० । ७ मगधसंज्ञक—इ०पा० । ८ प्रभुः—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तरार्जितैः ॥ ८० ॥ अद्य धन्योऽस्मि धन्योऽस्मि कृतार्थौ पितरौ मम ॥ यत्प्रेक्षितोऽहं कारुण्यात्त्वया संभाषितोपि च ॥ ८१ ॥ ॥ सूत उवाच ॥ ॥ इत्युदारमसंभ्रांतं वचः श्रुत्वातिपेशलम् ॥ तक्षकः पुनरौत्सुक्याद्बभाषे राजनंदनम् ॥ ८२ ॥ ॥ तक्षक उवाच ॥ ॥ भोभो नरेंद्रदायाद मा भैषीर्धीरतां व्रज ॥ सर्वदेवेषु को देवो युष्माभिः पूज्यते सदा ॥ ८३ ॥ ॥ राजपुत्र उवाच ॥ ॥ यो देवः सर्वदेवेषु महादेव इति स्मृतः ॥ पूज्यते स हि विश्वात्मा शिवोऽस्माभिरुमापतिः ॥ ८४ ॥ यस्य तेजोंशलेशेन रजसा च प्रजापतिः ॥ कृतरूपोऽसृजद्विश्वं स नः पूज्यो महेश्वरः ॥ ८५ ॥ यस्यांशात्सात्त्विकं दिव्यं बिभ्रद्विष्णुः सनातनः ॥ विश्वं बिभर्त्ति भूतात्मा शिवोऽस्माभिः स पूज्यते ॥ ॥ ८६ ॥ यस्यांशात्तामसाज्जातो रुद्रः कालाग्निसन्निभः ॥ विश्वमेतद्धरत्यंते स पूज्योऽस्माभिरीश्वरः ॥ ८७ ॥ यो विधाता विधातुश्च कारणस्यापि कारणम् ॥ तेजसां परमं तेजः स शिवो नः परा गतिः ॥ ८८ ॥ योंतिकस्थोऽपि दूरस्थः पापोपहतचेतसाम् ॥ अपरिच्छेद्य धामासौ शिवो नः परमा गतिः ॥ ८९ ॥ योऽग्नौ तिष्ठति यो भूमौ यो वायौ सलिले च यः ॥ य आकाशे च विश्वात्मा स पूज्यो नः सदाशिवः ॥ ९० ॥ यः साक्षी सर्वभूतानां य आत्मस्थो निरंजनः ॥ यस्येच्छावशगो लोकः सोऽस्माभिः पूज्यते शिवः ॥ ९१ ॥ यमेकमाद्यं पुरुषं पुराणं वदंति भिन्नं गुणवैकृतेन ॥ क्षेत्रज्ञमेकेथ तुरीयमन्ये कूटस्थमन्ये स शिवो गतिर्नः ॥ ९२ ॥ यं नास्पृशंश्चैत्यमचिंत्यतत्त्वं दुरंतधामा नमतत्स्वरूपम् ॥ मनोवचोवृत्तय आत्मभाजां स एष पूज्यः परमः शिवो नः ॥ ९३ ॥ यस्य प्रसादं प्रतिलभ्य संतो वांछंति नैंद्रं पदमुज्ज्वलं वा ॥ निस्तीर्णकर्मार्गलकालचक्राश्चरंत्यभीताः स शिवो गतिर्नः ॥ ९४ ॥ यस्य स्मृतिः सकलपापरुजां विघातं सद्यः करोत्यपि च पुल्कसजन्मभाजाम् ॥ यस्य स्वरूपमखिलं श्रुतिभिर्विमृग्यं तस्मै शिवाय सततं करवाम पूजाम् ॥ ९५ ॥ यन्मूर्ध्नि लब्धनिलया सुरलोकसिंधुर्यस्यांगगा भगवती जगदंबिका च ॥ यत्कुंडले त्वहह तक्षकवासुकी द्वौ सोऽस्माकमेव गतिरर्धशशांकमौलिः ॥ ९६ ॥ जयति निगमचूडाग्रेषु यस्यांघ्रिपद्मं जयति च हृदि नित्यं योगिनां यस्य मूर्तिः ॥ जयति सकलतत्त्वोद्भासनं यस्य मूर्तिः स विजितगुणसर्गः पूज्यतेऽस्माभिरीशः ॥ ९७ ॥ ॥ सूत उवाच ॥ ॥ इत्याकर्ण्य वचस्तस्य तक्षकः प्रीतमानसः ॥ जातभक्तिर्महादेवे राजपुत्रमभाषत ॥ ९८ ॥ ॥ तक्षक उवाच ॥ ॥ परि

१ सनातनः—इ० पा० । २ वदंति—इ० पा० । ३ अंगना—इ०पा० । ४ यत्कंठभूषणमिदं गरलं करालं यद्भालनेत्रे ज्वलनः प्रचण्डः—इ० पा० । ५ जयति सदसि नित्यं योगिनां यस्य कीर्तिः—इ०पा० । ६ विजितगुणपूगः—इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तुष्टोऽस्मि भद्रं स्तात्तव राजेंद्रनंदन ॥ बालोपि यत्परं तत्त्वं वेत्सि शैवं परात्परम् ॥ ९९ ॥ एष रत्नमयो लोक एताश्चारुदृशोऽबलाः ॥ एते कल्पद्रुमाः सर्वे वाप्योमृतरसांभसः ॥ १०० ॥ नात्र मृत्युभयं घोरं न जरारोगपीडनम् ॥ यथेष्टं विहरात्रैव भुंक्ष्व भोगान्यथोचितान्[1] ॥ १०१ ॥ इत्युक्तो नागराजेन स राजेंद्रकुमारकः ॥ प्रत्युवाच परं[2] प्रीत्या कृतांजलिरुदारधीः ॥ २ ॥ कृतदारोऽस्म्यहं काले सुव्रता गृहिणी मम ॥ शिवपूजापरा नित्यं पितरावेकपुत्रकौ ॥ ३ ॥ ते त्वद्य मां मृतं मत्त्वा शोकेन महतावृताः ॥ प्रायः प्राणैर्वियुज्यंते दैवात्प्राणान्वहंति वा ॥ ४ ॥ अतो मया बहुतिथं नात्र स्थेयं कथंचन ॥ तमेव लोकं कृपया मां प्रापयितुमर्हसि ॥ ५ ॥ इत्युक्तवंतं नरदेवपुत्रं दिव्यैर्वरान्नैः सुरपादपोत्थैः ॥ आप्याययित्वा वरगंधवासः स्रग्रत्नदिव्याभरणैर्विचित्रैः ॥ ६ ॥ संतोषयित्वा विविधैश्च भोगैः पुनर्बभाषे भुजगाधिराजः ॥ यदायदा त्वं स्मरसि त्वदग्रे तदा तदाविष्क्रियते मयेति ॥ ७ ॥ पुनश्च राजपुत्राय तक्षकोऽश्वं च कामगम् ॥ नानाद्वीपसमुद्रेषु लोकेषु च निरर्गलम् ॥ ८ ॥ दत्तवान्रत्नाभरणदिव्याभरणवाससाम् ॥ वाहनाय ददावेकं राक्षसं पन्नगेश्वरः ॥ ९ ॥ तत्सहायार्थमेकं च पन्नगेंद्रकुमारकम् ॥ नियुज्य तक्षकः प्रीत्या गच्छेति विससर्ज तम् ॥ १० ॥ इति चंद्रांगदः सोऽथ संगृह्य विविधं धनम् ॥ अश्वं कामगमारुह्य ताभ्यां सह विनिर्ययौ ॥ ११ ॥ स मूहूर्तादिवोन्मज्य तस्मादेव सरिज्जलात् ॥ विजहार तटे रम्ये दिव्यमारुह्य वाजिनम् ॥ १२ ॥ अथास्मिन्समये तन्वी सा च सीमंतिनी सती ॥ स्नातुं समाययौ तत्र सखीभिः परिवारिता ॥ १३ ॥ सा ददर्श नदीतीरे विहरंतं नृपात्मजम् ॥ रक्षसा नररूपेण नागपुत्रेण चान्वितम् ॥ १४ ॥ दिव्यरत्नसमाकीर्णं दिव्यमाल्यावतंसकम् ॥ देहेन दिव्यगंधेन व्याक्षिप्तदशयोजनम् ॥ १५ ॥ तमपूर्वाकृतिं[3] वीक्ष्य[4] दिव्याश्वमधिसंस्थितम् ॥ जडोन्मत्तेव भीतेव तस्थौ तन्न्यस्तलोचना ॥ १६ ॥ तां च राजेंद्रपुत्रोऽसौ दृष्टपूर्वामिति स्मरन् ॥ निर्मुक्तकंठाभरणां कंठसूत्रविवर्जिताम् ॥ १७ ॥ असंयोजितधम्मिल्लामंगरागविवर्जिताम् ॥ त्यक्तनीलांजनापांगीं कृशांगीं शोकदूषिताम् ॥ १८ ॥ दृष्ट्वाऽवतीर्य तुरगादुपविष्टः सरित्तटे ॥ तामाहूय वरारोहामुपवेश्येदमब्रवीत् ॥ १९ ॥ का त्वं कस्य कलत्रं वा कस्यासि तनया सती ॥ किमिदं तेंगने बाल्ये दुःसहं शोकलक्षणम् ॥ १२० ॥ इति स्नेहेन संपृष्टा सा वधूरश्रुलोचना ॥ लज्जिता स्वयमाख्यातुं तत्सखी सर्वमब्रवीत् ॥ २१ ॥ इयं सीमंतिनी नाम्ना स्नुषा निषधभूपतेः[5] ॥ चंद्रांगदस्य महिषी तनया चित्रवर्मणः ॥ २२ ॥ अस्याः पतिर्दैवयोगान्निमग्नोऽस्मिन्महाजले ॥ तेनेयं प्राप्तवैधव्या बाला दुःखेन[6] शोषिता ॥ २३ ॥

१ यथेप्सितान्--इ०पा० । २ वरम्--इ०पा० । ३ शष्पतल्पे समासीनम्--इ०पा० । ४ नवदूर्वाकृतिं वीक्ष्य--इ०पा० । ५ मगधभूपतेः--इ०पा० । ६ शोकेन--इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवं वर्षत्रयं नीतं शोकेनातिबलीयसा ॥ अद्येंदुवारे संप्राप्ते स्नातुमत्र समागता ॥ २४ ॥ श्वशुरोऽस्याश्च राजेंद्रो हृतराज्यश्च शत्रुभिः ॥ बलाद्गृहीतो बद्धश्च सभार्यस्तद्वशे स्थितः ॥ २५ ॥ तथाप्येषा शुभाचारा सोमवारे महेश्वरम् ॥ सांबिकं परया भक्त्या पूजयत्यमलाशया ॥ २६ ॥ ॥ सूत उवाच ॥ ॥ इत्थं सखीमुखेनैव सर्वमावेद्य सुव्रता ॥ ततः सीमंतिनी प्राह स्वयमेव नृपात्मजम् ॥ २७ ॥ कस्त्वं कंदर्पसंकाशः काविमौ तव पार्श्वगौ ॥ देवो नरेंद्रः सिद्धो वा गंधर्वो वाथ किन्नरः ॥ २८ ॥ किमर्थं मम वृत्तांतं स्नेहवानिव पृच्छसि ॥ किं मां वेत्सि महाबाहो दृष्टवान्किमु कुत्रचित् ॥ २९ ॥ दृष्टपूर्व इवाभासि मया च स्वजनो यथा ॥ सर्वं कथय तत्त्वेन सत्यसारा हि साधवः ॥ १३० ॥ ॥ सूत उवाच ॥ एतावदुक्त्वा नरदेवपुत्री सबाष्पकंठं सुचिरं रुरोद ॥ मुमोह भूमौ पतिता सखीभिर्वृता न किंचित्कथितुं शशाक ॥ ३१ ॥ श्रुत्वा चंद्रांगदः सर्वं प्रियायाः शोककारणम् ॥ मुहूर्त्तमभवत्तूष्णीं स्वयं शोकसमाकुलः ॥ ३२ ॥ अथाश्वास्य प्रियां तन्वीं विविधैर्वाक्यनैपुणैः[1] ॥ सिद्धा नाम वयं देवाः कामगा इति सोऽब्रवीत् ॥ ३३ ॥ ततो बलादिवाकृष्य पाणिग्रहणशंकिताम् ॥ पुलकांचितसर्वांगीं तां कर्णे त्विदमब्रवीत् ॥ ३४ ॥ क्वापि लोके मया दृष्टस्तव भर्त्ता वरानने ॥ त्वद्व्रताचरणात्प्रीतः सद्य एवागमिष्यति ॥ ॥ ३५ ॥ अपनेष्यति ते शोकं द्वित्रैरेव दिनैर्ध्रुवम् ॥ एतच्छंसितुमायातस्तव भर्त्तुः सखाऽस्म्यहम् ॥ ३६ ॥ अत्र कार्यो न संदेहः शपामि शिवपादयोः ॥ तावत्त्वद्धृदये स्थेयं न प्रकाश्यं च कुत्रचित् ॥ ३७ ॥ सा तु तद्वचनं श्रुत्वा सुधाधाराशताधिकम् ॥ संभ्रमोद्भ्रांतनयना तमेव मुहुरैक्षत ॥ ॥ ३८ ॥ प्रेमबंधानुगुणितं वाक्यं चाह रसायनम्[4] ॥ विभ्रमोदारसहितं मधुरापांगवीक्षणम् ॥ ३९ ॥ स्वपाणिस्पर्शनोद्भिन्नपुलकांचितविग्रहम् ॥ पूर्वं दृष्टानि चांगेषु लक्षणानि स्वरादिषु ॥ वयःप्रमाणं वर्णं च परीक्ष्यैनमतर्कयत् ॥ १४० ॥ एष एव पतिर्मे स्याद्ध्रुवं नान्यो भविष्यति ॥ अस्मिन्नेव प्रसक्तं मे हृदयं प्रेमकातरम् ॥ १४१ ॥ परलोकादिहायातः कथमेवं स्वरूपधृक् ॥ दुर्भाग्यायाः कथं मे स्याद्भर्तुर्नष्टस्य दर्शनम् ॥ १४२ ॥ स्वप्नोऽयं किमु न स्वप्नो भ्रमोऽयं किं तु न भ्रमः ॥ एष धूर्तोऽथवा कश्चिद्यक्षो गंधर्व एव वा ॥ १४३ ॥ मुनिपत्न्या यदुक्तं मे परमापद्गतापि च ॥ व्रतमेतत्कुरुष्वेति तस्य वा फलमेव वा ॥ ४४ ॥ यो वर्षायुतसौभाग्यं ममेत्याह द्विजोत्तमः ॥ नूनं तस्य वचः सत्यं को विद्यादीश्वरं विना ॥ ४५ ॥ निमित्तानि च दृश्यंते मंगलानि दिनेदिने ॥ प्रसन्ने पार्वतीनाथे किमसाध्यं शरीरिणाम् ॥ ४६ ॥ इत्थं विमृश्य बहुधा तां पुनर्मुक्तसंशयाम् ॥

१ प्रमाथिभिः--इ०पा० । २ सुदुर्वृत्ताम्--इति पाठे दुर्भाग्यामित्यर्थः । ३ वाङ्मयैः शुभैः--इ० पा० । ४ मधुरसायनम्--इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लज्जानम्रमुखीं कर्णे शशंसात्मप्रयोजनम् ॥ ४७ ॥ इमं वृत्तांतमाख्यातुं तत्पित्रोः[2] शोकततयोः ॥ गच्छामः स्वस्ति ते भद्रे सद्यः पतिमवाप्स्यसि ॥ ४८ ॥ इत्युक्त्वाश्वं समारुह्य जगाम नृपनंदनः ॥ ताभ्यां सह निजं राष्ट्रं प्रत्यपद्यत तत्क्षणात् ॥ ४९ ॥ स पुरोपवनाभ्याशे स्थित्वा तं फणिपुत्रकम् ॥ विससर्जात्मदायादान्नृपासनगतान्प्रति ॥१५०॥ स गत्वोवाच ताञ्छीघ्रमिंद्रसेनो विमुच्यताम् ॥ चंद्रांगदस्तस्य सुतः प्राप्तोऽयं पन्नगालयात् ॥ १५१ ॥ नृपासनं विमुंचंतु भवंतो न विचार्यताम् ॥ नो चेच्चंद्रांगदस्याशु बाणाः प्राणान्हरंति वः ॥ १५२ ॥ स मग्नो यमुनातोये गत्वा तक्षकमंदिरम् ॥ लब्ध्वा च तस्य साहाय्यं पुनर्लोकादिहागतः ॥ १५३ ॥ इत्याख्यातमशेषेण तद्वृत्तांतं निशम्य ते ॥ साधुसाध्विति संभ्रांताः शशंसुः[1] परिपंथिनः ॥ ५४ ॥ अथेंद्रसेनाय निवेद्य सत्वरं नष्टस्य पुत्रस्य पुनः समागमम् ॥ प्रसाद्य तं प्राक्तनरेश्वरासनं दायादमुख्यास्तु भयं प्रपेदिरे ॥ ५५ ॥ अथ पौरजनाः सर्वे पुरोद्याने नृपात्मजम् ॥ दृष्ट्वा राज्ञे द्रुतं प्रोचुर्लेभिरे च महाधनम् ॥ ५६ ॥ आकर्ण्य पुत्रमायांतं राजानंदजलाप्लुतः ॥ न व्यजानादिमं[3] लोकं राज्ञी च परया मुदा ॥ ५७ ॥ अथ नागरिकाः सर्वे मंत्रिवृद्धाः पुरोधसः ॥ प्रत्युद्गम्य परिष्वज्य तमानिन्युर्नृपांतिकम् ॥ ५८ ॥ अथोत्सवेन महता प्रविश्य निजमंदिरम् ॥ राजपुत्रः स्वपितरौ ववंदे बाष्पमुत्सृजन् ॥ ५९ ॥ तं पादमूले पतितं स्वपुत्रं विवेद नासौ पृथिवीपतिः क्षणम् ॥ प्रबोधितोऽमात्यजनैः कथंचिदुत्थाप्य क्लिन्नेन हृदालिलिंग ॥ १६० ॥ क्रमेण मातॄरभिवंद्य ताभिः प्रवर्धिताशीः प्रणयाकुलाभिः ॥ आलिंगितः पौरजनानशेषान्संभावयामास स राजसूनुः ॥६१॥ तेषां मध्ये समासीनः स्ववृत्तांतमशेषतः ॥ पित्रे निवेदयामास तक्षकस्य च मित्रताम् ॥६२॥ दत्तं भुजंगराजेन रत्नादिधनसंचयम् ॥ दिव्यं तद्राक्षसानीतं पित्रे सर्वं न्यवेदयत् ॥६३॥ राजपुत्रस्य चरितं दृष्ट्वा श्रुत्वा च विह्वलः ॥ मेने स्नुषायाः सौभाग्यं महेशाराधनार्जितम् ॥६४॥ सौमांगल्यमयीं वार्तामिमां निषधभूपतिः॥चारैर्निवेदयामास चित्रवर्ममहीपतेः ॥६५॥ श्रुत्वाऽमृतमयीं वार्त्तां स समुत्थाय संभ्रमात् ॥ तेभ्यो दत्त्वा धनं भूरि ननर्तानंदविह्वलः ॥६६॥ अथाहूय स्वतनयां परिष्वज्याश्रुलोचनः ॥ भूषणैर्भूषयामास त्यक्तवैधव्यलक्षणाम् ॥ ६७ ॥ अथोत्सवो महानासीद्राष्ट्रग्रामपुरादिषु ॥ सीमंतिन्याः शुभाचारं शशंसुः सर्वतो जनाः ॥ ६८ ॥ चित्रवर्माथ नृपतिः समाहूयेंद्रसेनजम् ॥ पुनर्विवाहविधिना सुतां तस्मै न्यवेदयत् ॥ ६९ ॥ चन्द्रांगदोऽपि रत्नाद्यैरानीतैस्तक्षकालयात् ॥ स्वां पत्नीं भूषयां चक्रे मर्त्यानामतिदुर्लभैः ॥ १७० ॥ अंगरागेण दिव्येन तप्तकांचनशोभिना ॥ शुशुभे सा सुगंधेन दशयोजनगामिना ॥ ७१ ॥ अम्लानमालया

१ शशंस–सः चंद्रांगदः–इति शेषः । २ मत्पित्रोः–इ० पा० । ३ आनंदातिशयादिमं लोकं न व्यजानात्–ब्रह्मानंदमिवात्यानन्दमन्वभूदितिभावः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

शश्वत्पद्मकिंजल्कवर्णया ॥ कल्पद्रुमोत्थया बाला भूषिता शुशुभे सती ॥ ७२ ॥ एवं चंद्रांगदः पत्नीमवाप्य समये शुभे ॥ ययौ स्वनगरीं भूयः श्वशुरेणानुमोदितः ॥ ७३ ॥ इन्द्रसेनोऽपि राजेंद्रो राज्ये स्थाप्य निजात्मजम् ॥ तपसा शिवमाराध्य लेभे संयमिनां गतिम् ॥ ७४ ॥ दशवर्ष सहस्राणि सीमंतिन्या स्वभार्यया ॥ सार्धं चन्द्रांगदो राजा बुभुजे विषयान्बहून् ॥ ७५ ॥ प्रासूत तनयानष्टौ कन्यामेकां वराननाम् ॥ रेमे सीमंतिनी भर्त्रा पूजयती महेश्वरम् ॥ दिनेदिने च सौभाग्यं प्राप्तं चैवेन्दुवासरात् ॥ ७६ ॥ ॥ सूत उवाच ॥ ॥ विचित्रमिदमाख्यानं मया समनुवर्णितम् ॥ भूयोऽपि वक्ष्ये माहात्म्यं सोमवारव्रतोदितम् ॥ १७७ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां ब्रह्मोत्तरखण्डे सोमवारव्रतवर्णननामाष्टमोऽध्यायः ॥ ८ ॥ छ ॥ ॥ ऋषय ऊचुः ॥ ॥ साधुसाधु[2] महाभाग त्वया कथितमुत्तमम् ॥ आख्यानं पुनरन्यच्च विचित्रं वक्तुमर्हसि ॥ १ ॥ ॥ सूत उवाच ॥ ॥ विदर्भविषये पूर्वमासीदेको द्विजोत्तमः ॥ वेदमित्र इति ख्यातो वेदशास्त्रार्थवित्सुधीः ॥ २ ॥ तस्यासीदपरो विप्रः सखा सारस्वताह्वयः ॥ तावुभौ परमस्निग्धावेकदेशनिवासिनौ ॥ ३ ॥ वेदमित्रस्य पुत्रोऽभूत्सुमेधा नाम सुव्रतः ॥ सारस्वतस्य तनयः सोमवानिति विश्रुतः ॥ ४ ॥ उभौ सवयसौ बालौ समवेषौ सम[3]स्थिती ॥ समं च कृतसंस्कारौ समविद्यौ बभूवतुः ॥ ५ ॥ सांगानधीत्य तौ वेदांस्तर्कव्याकरणानि च ॥ इतिहासपुराणानि धर्मशास्त्राणि कृत्स्नशः ॥ ६ ॥ सर्वविद्याकुशलिनौ बाल्य एव मनीषिणौ ॥ प्रहर्षमतुलं पित्रोर्ददतुः सकलैर्गुणैः ॥ ७ ॥ तावेकदा स्वतनयौ तावुभौ ब्राह्मणोत्तमौ ॥ आहूयावोचतां प्रीत्या षोडशाब्दौ शुभाकृती ॥ ८ ॥ हे पुत्रकौ युवां बाल्ये कृतविद्यौ सुवर्चसौ ॥ वैवाहिकोयं समयो वर्तते युवयोः समम् ॥ ९ ॥ इमं प्रसाद्य राजानं विदर्भेशं स्वविद्यया ॥ ततः प्राप्य धनं भूरि कृतोद्वाहौ भविष्यथः ॥ १० ॥ एवमुक्तौ सुतौ ताभ्यां तावुभौ द्विजनंदनौ ॥ विदर्भराजमासाद्य सं[4]मतोषयतां गुणैः ॥ ११ ॥ विद्यया परितुष्टाय तस्मै द्विजकुमारकौ ॥ विवाहार्थं कृतोद्योगौ धनहीनावशंसताम् ॥ १२ ॥ तयोरपि मतं ज्ञात्वा स विदर्भमहीपतिः ॥ प्रहस्य किंचित्प्रोवाच लोकतत्त्वविवित्सया ॥ १३ ॥ आस्ते निषधराजस्य राज्ञी सीमंतिनी सती ॥ सोमवारे महादेवं पूजयत्यंबिकायुतम् ॥ १४ ॥ तस्मिन्दिने सपत्नीकान्द्विजाग्र्यान्वेदवित्तमान् ॥ संपूज्य परया भक्त्या धनं भूरि ददाति च ॥ १५ ॥ अतोऽत्र युवयोरेको नारीविभ्रमवेषधृक् ॥ एकस्तस्याः पतिर्भूत्वा जायेतां विप्रदंपती ॥ १६ ॥ युवां वधूवरौ भूत्वा प्राप्य सीमंतिनीगृहम् ॥ भुक्त्वा भूरि

१ हेमकिञ्जल्कवर्णया--इ० पा० । २ साधु श्रुतं महाप्राज्ञ--साधु सूत महाप्राज्ञ--इ० च पा० । ३ समद्युती--इ० पा० । ४ पर्यतोषयताम्--इ० पा० । ५ इयम्--इ० पा० ।

CC-0. In Public Domain. Digitization by eGangotri

धनं लब्ध्वा पुनर्यातं ममांतिकम् ॥ १७ ॥ इति राज्ञा समादिष्टौ भीतौ द्विजकुमारकौ ॥ प्रत्यूचतुरिदं कर्म कर्तुं नौ जायते भयम् ॥ १८ ॥
देवतासु गुरौ पित्रोस्तथा राजकुलेषु च ॥ कौटिल्यमाचरन्मोहात्सद्यो नश्यति सान्वयः ॥ १९ ॥ कथमंतर्गृहं राज्ञां छद्मना प्रविशेत्पुमान् ॥
गोप्यमानमपिच्छद्म कदाचित्ख्यातिमेष्यति ॥ २० ॥ ये गुणाः साधिताः पूर्वं शीलाचारश्रुतादिभिः ॥ सद्यस्ते नाशमायांति कौटिल्य
पथगामिनः ॥ २१ ॥ पापं निंदा भयं वैरं चत्वार्येतानि देहिनाम् ॥ छद्ममार्गप्रपन्नानां तिष्ठंत्येव हि सर्वदा ॥ २२ ॥ अत आवां शुभाचारौ
जातौ च शुचिनां कुले ॥ वृत्तं धूर्तजनश्लाघ्यं नाश्रयावः कदाचन ॥ २३ ॥ ॥ राजोवाच ॥ ॥ दैवतानां गुरूणां च पित्रोश्च पृथिवीपतेः ॥
शासनस्याप्यलंघ्यत्वात्प्रत्यादेशो न कर्हिचित् ॥ २४ ॥ एतैर्यद्यत्समादिष्टं शुभं वा यदि वाऽशुभम् ॥ कर्तव्यं नियतं भीतैरप्रमत्तैर्बुभूषुभिः ॥
॥ २५ ॥ अहो वयं हि राजानः प्रजा यूयं हि संमताः ॥ राजाज्ञया प्रवृत्तानां श्रेयः स्यादन्यथा भयम् ॥ २६ ॥ अतो मच्छासनं कार्यं भव
द्भ्यामविलंबितम् ॥ इत्युक्तौ नरदेवेन तौ तथेत्यूचतुर्भयात् ॥ २७ ॥ सारस्वतस्य तनयं सामवन्तं नराधिपः ॥ स्त्रीरूपधारिणं चक्रे वस्त्राकल्पां
जनादिभिः ॥ २८ ॥ स कृत्रिमोद्भूतकलत्रभावः प्रयुक्तकर्णाभरणांगरागः ॥ स्निग्धाञ्जनाक्षः स्पृहणीयरूपो बभूव सद्यः प्रमदोत्तमाभः ॥ २९ ॥
तावुभौ दंपती भूत्वा द्विजपुत्रौ नृपाज्ञया ॥ जग्मतुर्नैषधं देशं यद्वा तद्वा भवत्विति ॥ ३० ॥ उपेत्य राजसदनं सोमवारे द्विजोत्तमैः ॥ सपत्नीकैः
कृतातिथ्यौ धौतपादौ बभूवतुः ॥ ३१ ॥ सा राज्ञी ब्राह्मणान्सर्वानुपविष्टान्वरासने ॥ प्रत्येकमर्चयांचक्रे सपत्नीकान्द्विजोत्तमान् ॥ ३२ ॥ तौ च
विप्रसुतौ दृष्ट्वा प्राप्तौ कृतकदंपती ॥ ज्ञात्वा किंचिद्विहस्याथ मेने गौरीमहेश्वरौ ॥ ३३ ॥ आवाह्य द्विजमुख्येषु देवदेवं सदाशिवम् ॥ पत्नीष्वावाह
यामास सा देवीं जगदंबिकाम् ॥ ३४ ॥ गन्धैर्माल्यैः सुरभिभिर्धूपैर्नीराजनैरपि ॥ अर्चयित्वा द्विजश्रेष्ठानन्नमश्वक्रे समाहिता ॥ ३५ ॥ हिरण्मयेषु
पात्रेषु पायसं घृतसंयुतम् ॥ शर्करामधुसंयुक्तं शाकैर्जुष्टं मनोरमैः ॥ ३६ ॥ गंधशाल्योदनैर्हृद्यैर्मोदकापूपराशिभिः ॥ शष्कुलीभिश्च संयावैः
कृसरैर्माषपक्वकैः ॥ ३७ ॥ तथान्यैरप्यसंख्यातैर्भक्ष्यैर्भोज्यैर्मनोरमैः ॥ सुगन्धैः स्वादुभिः सूपैः पानीयैरपि शीतलैः ॥ ३८ ॥ कृतमन्नं द्विजा
ग्र्येभ्यः सा भक्त्या पर्यवेषयत् ॥ दध्योदनं निरुपमं निवेद्य समतोषयत् ॥ ३९ ॥ भुक्तवत्सु द्विजाग्र्येषु स्वाचांतेषु नृपांगना ॥ प्रणम्य
दत्त्वा तांबूलं दक्षिणां च यथार्हतः ॥ ४० ॥ धेनूर्हिरण्यवासांसि रत्नस्रग्भूषणानि च ॥ दत्त्वा भूयो नमस्कृत्य विससर्ज द्विजोत्तमान् ॥ ४१ ॥
तयोर्द्वयोर्भूसुरवर्यपुत्रयोरेकस्तया हैमवतीधियार्चितः ॥ एको महादेवधियाभिपूजितः कृतप्रणामौ ययतुस्तदाज्ञया ॥ ४२ ॥ सा तु विस्मृत

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पुंभावा तस्मिन्नेव द्विजोत्तमे ॥ जातस्पृहा मदोत्सिक्ता कन्दर्पविवशाब्रवीत् ॥ ४३ ॥ अयि नाथ विशालाक्ष सर्वावयवसुन्दर ॥ तिष्ठतिष्ठ क्व या
यासि मां न पश्यसि ते प्रियाम् ॥ ४४ ॥ इदमग्रे वनं रम्यं सुपुष्पितमहाद्रुमम् ॥ अस्मिन्विहर्तुमिच्छामि त्वया सह यथासुखम् ॥ ४५ ॥
इत्थं तयोक्तमाकर्ण्य पुरोऽगच्छद्द्विजात्मजः ॥ विचिंत्य परिहासोक्तिं गच्छति स्म यथा पुरा ॥ ४६ ॥ पुनरप्याह सा बाला तिष्ठतिष्ठ क्व यास्यसि॥
दुरुत्सहस्मरावेशां परिभोक्तुमुपेत्य माम् ॥ ४७ ॥ परिष्वजस्व मां कांतां पाययस्व तवाधरम् ॥ नाहं गंतुं समर्थास्मि स्मरबाणप्रपीडिता ॥
॥ ४८ ॥ इत्थमश्रुतपूर्वां तां निशम्य परिशंकितः ॥ आयांतीं पृष्ठतो वीक्ष्य सहसा विस्मयं गतः ॥४९॥ कैषा पद्मपलाशाक्षी पीनोन्नतपयोधरा ॥
कृशोदरी बृहच्छ्रोणी नवपल्लवकोमला ॥ ५० ॥ स एव मे सखा किन्तु जात एव वरांगना ॥ पृच्छाम्येनमतः सर्वमिति संचिन्त्य सोऽब्रवीत् ॥५१॥
किमपूर्व इवाभासि सखे रूपगुणादिभिः ॥ अपूर्वं भाषसे वाक्यं कामिनीव समाकुला ॥ ५२ ॥ यस्त्वं वेदपुराणज्ञो ब्रह्मचारी जितेंद्रियः ॥ सार
स्वतात्मजः शांतः कथमेवं प्रभाषसे ॥ ५३ ॥ इत्युक्ता सा पुनः प्राह नाहमस्मि पुमान्प्रभो ॥ नाम्ना सामवती बाला तवास्मि रतिदायिनी॥ ५४ ॥
यदि ते संशयः कांत ममांगानि विलोकय ॥ इत्युक्तः सहसा मार्गे रहस्येनां व्यलोकयत् ॥५५॥ तामकृत्रिमधम्मिल्लां जघनस्तनशोभिनीम् ॥ सुरू
पां वीक्ष्य कामेन किंचिद्व्याकुलतामगात् ॥ ५६ ॥ पुनः संस्तभ्य यत्नेन चेतसो विकृतिं बुधः ॥ मुहूर्तं विस्मयाविष्टो न किंचित्प्रत्यभाषत ॥ ५७ ॥
॥ ॥ सामवत्युवाच ॥ ॥ गतस्ते संशयः कश्चित्तर्ह्यागच्छ भजस्व माम् ॥ पश्येदं विपिनं कांत परस्त्रीसुरतोचितम् ॥ ५८ ॥ ॥ सुमेधा उवाच ॥ ॥
मैवं कथय मर्यादां मा हिंसीर्मदमत्तवत् ॥ आवां विज्ञातशास्त्रार्थौ त्वमेवं भाषसे कथम् ॥५९॥ अधीतस्य च शास्त्रस्य विवेकस्य कुलस्यच ॥ किमेष
सदृशो धर्मो जारधर्मनिषेवणम् ॥ ६० ॥ न त्वं स्त्री पुरुषो विद्धाज्ञानीह्यात्मानमात्मना ॥ अयं स्वयंकृतोऽनर्थ आवाभ्यां यद्विचेष्टितम् ॥ ६१ ॥
वंचयित्वात्मपितरौ धूर्तराजानुशासनात् ॥ कृत्वा चानुचितं कर्म तस्यैतद्भुज्यते फलम् ॥ ६२ ॥ सर्वं त्वनुचितं कर्म नृणां श्रेयोविनाशनम् ॥
यस्त्वं विप्रात्मजो विद्वान्गतः स्त्रीत्वं विगर्हितम् ॥ ६३ ॥ मार्गं त्यक्त्वा गतोऽरण्यं नरो विध्येत कण्टकैः ॥ बलाद्धिंस्येत वा हिंस्रैर्यदा त्यक्तसमा
गमः ॥ ६४ ॥ एवं विवेकमाश्रित्य तूष्णीमेहि स्वयं गृहम् ॥ देवद्विजप्रसादेन स्त्रीत्वं तव विलीयते ॥ ६५ ॥ अथवा दैवयोगेन स्त्रीत्वमेव भवेत्तव ॥
पित्रा दत्ता मया साकं रंस्यसे वरवर्णिनि ॥ ६६ ॥ अहो चित्रमहो दुःखमहो पापबलं महत् ॥ अहो राज्ञः प्रभावोयं शिवाराधनसंभृतः ॥ ६७ ॥

१ एहि–इ० पा० । २ सुपुष्पितलताद्रुमम्–इ० पा० । ३ सारस्वती–इ० पा० । ४ जारमार्गनिषेवणम्–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इत्युक्ताप्यसक्तत्तेन सा वधूरतिविह्वला ॥ बलेन तं समालिंग्य चुचुंबाधरपल्लवम् ॥ ६८ ॥ धर्षितोपि तया धीरः सुमेधा नूतनस्त्रियम् ॥ यत्ना दानीय सदनं कृत्स्नं तत्र न्यवेदयत् ॥ ६९ ॥ तदाकर्ण्याथ तौ विप्रौ कुपितौ शोकविह्वलौ ॥ ताभ्यां सह कुमाराभ्यां वैदर्भांतिकमीयतुः ॥ ७० ॥ ततः सारस्वतः प्राह राजानं धूर्तचेष्टितम् ॥ राजन्ममात्मजं पश्य तव शासनयंत्रितम् ॥ ७१ ॥ एतौ तवाज्ञावशगौ चक्रतुः कर्म गर्हितम् ॥ मत्पुत्रस्तत्फलं भुंक्ते स्त्रीत्वं प्राप्य जुगुप्सितम्॥ ७२ ॥ अद्य मे संततिर्नष्टा निराशाः पितरो मम ॥ नापुत्रस्य हि लोकोस्ति लुप्तपिंडादिसंस्कृतेः ॥ ७३ ॥ शिखोपवीतमजिनं मौंजीं दंडं कमंडलुम् ॥ ब्रह्मचर्योचितं चिह्नं विहायेमां दशां गतः ॥ ७४ ॥ ब्रह्मसूत्रं च सावित्रीं स्नानं संध्यां जपार्चनम् ॥ विसृज्य स्त्रीत्वमाप्तोस्य का गतिर्वद पार्थिव ॥ ७५ ॥ त्वया मे संततिर्नष्टा नष्टो वेदपथश्च मे ॥ एकात्मजस्य मे राजन्का गति र्वद शाश्वती ॥ ७६ ॥ इति सारस्वतेनोक्तं वाक्यमाकर्ण्य भूपतिः ॥ सीमंतिन्याः प्रभावेण विस्मयं परमं गतः ॥ ७७ ॥ अथ सर्वान्समाहूय महर्षीनमितद्युतीन् ॥ प्रसाद्य प्रार्थयामास तस्य पुंस्त्वं महीपतिः ॥ ७८ ॥ तेऽब्रुवन्नथ पार्वत्याः शिवस्य च समीहितम् ॥ तद्भक्तानां च माहात्म्यं कोन्यथा कर्तुमीश्वरः ॥ ७९ ॥ अथ राजा भरद्वाजमादाय मुनिपुंगवम् ॥ ताभ्यां सह द्विजाग्र्याभ्यां तत्सुताभ्यां समन्वितः ॥ ८० ॥ अंबिकाभवनं प्राप्य भरद्वाजोपदेशतः ॥ तां देवीं नियमैस्तीव्रैरुपास्ते स्म महानिशि ॥ ८१ ॥ एवं त्रिरात्रं सुविसृष्टभोजनः स पार्वतीध्यान रतो महीपतिः ॥ सम्यक्प्रणामैर्विविधैश्च संस्तवैर्गौरीं प्रपन्नार्तिहरामतोषयत् ॥ ८२ ॥ ततः प्रसन्ना सा देवी भक्तस्य पृथिवीपतेः ॥ स्वरूपं दर्शयामास चंद्रकोटिसमप्रभम् ॥ ८३ ॥ अथाह गौरी राजानं किं ते ब्रूहि समीहितम् ॥ सोऽप्याह पुंस्त्वमेतस्य कृपया दीयतामिति ॥ ८४ ॥ भूयोप्याह महादेवी मद्भक्तैः कर्म यत्कृतम् ॥ शक्यते नान्यथा कर्तुं वर्षायुतशतैरपि ॥ ८५ ॥ ॥ राजोवाच ॥ ॥ एकात्मजो हि विप्रोयं कर्मणा नष्टसंततिः ॥ कथं सुखं प्रपद्येत विना पुत्रेण तादृशः ॥ ८६ ॥ ॥ देव्युवाच ॥ ॥ तस्यान्यो मत्प्रसादेन भविष्यति सुतोत्तमः ॥ विद्या विनयसंपन्नो दीर्घायुरमलाशयः ॥ ८७ ॥ एषा सामवती नाम सुता तस्य द्विजन्मनः ॥ भूत्वा सुमेधसः पत्नी कामभोगेन युज्यताम् ॥ ८८ ॥ इत्युक्त्वांतर्हिता देवी ते च राजपुरोगमाः ॥ गताः स्वंस्वं गृहं सर्वे चक्रुस्तच्छासने स्थितिम् ॥ ८९ ॥ सोपि सारस्वतो विप्रः पुत्रं पूर्वसुतोत्तमम् ॥ लेभे देव्याः प्रसादेन ह्यचिरादेव कालतः ॥ ९० ॥ तां च सामवतीं कन्यां ददौ तस्मै सुमेधसे ॥ तौ दंपती चिरं कालं बुभुजाते परं

१ आहूय–इ० पा० । २ जनिष्यति–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सुखम् ॥ ९१ ॥ ॥ सूत उवाच ॥ ॥ इत्येष शिवभक्तायाः सीमंतिन्या नृपस्त्रियाः ॥ प्रभावः कथितः शंभोर्माहात्म्यमपि वर्णितम् ॥ ९२ ॥ भूयोपि शिवभक्तानां प्रभावं विस्मयावहम् ॥ समासाद्वर्णयिष्यामि श्रोतृणां मंगलायनम् ॥ ९३ ॥ इति श्रीस्कांदेमहापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मोत्तरखण्डे सीमंतिन्याः प्रभाववर्णनं नाम नवमोऽध्यायः ॥ ९ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ विचित्रं शिवनिर्माणं विचित्रं शिवचेष्टितम् ॥ विचित्रं शिवमाहात्म्यं विचित्रं शिवभाषितम् ॥ १ ॥ विचित्रं शिवभक्तानां चरितं पापनाशनम् ॥ स्वर्गापवर्गयोः सत्यं साधनं तद्ब्रवीम्यहम् ॥ २ ॥ अवंतीविषये कश्चिद्ब्राह्मणो मंदराह्वयः ॥ बभूव विषयारामः स्त्रीजितो धनसंग्रही ॥ ३ ॥ संध्यास्नानपरित्यक्तो गंधमाल्यांबरप्रियः ॥ कुस्त्रीसक्तः कुमार्गस्थो यथा पूर्वमजामिलः ॥ ४ ॥ स वेश्यां पिंगलां नाम रममाणो दिवानिशम् ॥ तस्या एव गृहे नित्यमासीदविजितेंद्रियः ॥ ५ ॥ कदाचित्तत्सदने तस्यास्तस्मिन्निवसति द्विजे ॥ ऋषभो नाम धर्मात्मा शिवयोगी समाययौ ॥ ॥ ६ ॥ तमागतमभिप्रेक्ष्य मत्वा स्वं पुण्यमूर्जितम् ॥ सा वेश्या स च विप्रश्च पर्यपूजयतामुभौ ॥ ७ ॥ तमारोप्य महापीठे कंबलांबरसंभृते ॥ प्रक्षाल्य चरणौ भक्त्या तज्जलं दधतुः शिरः[1] ॥ ८ ॥ स्वागतार्घ्यनमस्कारैर्गंधपुष्पाक्षतादिभिः ॥ उपचारैः समभ्यर्च्य भोजयामासतुर्मुदा ॥ ९ ॥ तं भुक्तवंतमाचांतं पर्यंके सुखसंस्तरे ॥ उपवेश्य मुदा युक्तौ तांबूलं प्रत्ययच्छताम् ॥ १० ॥ पादसंवाहनं भक्त्या कुर्वंतौ दैवचोदितौ ॥ कल्पयित्वा तु शुश्रूषां प्रीणयामासतुश्चिरम् ॥ ११ ॥ एवं समर्चितस्ताभ्यां शिवयोगी महाद्युतिः ॥ अतिवाह्य निशामेकां ययौ प्रातस्तदादृतः ॥ १२ ॥ एवं काले गतप्राये स विप्रो निधनं गतः ॥ सा च वेश्या मृता काले ययौ कर्मार्जितां गतिम् ॥ १३ ॥ स विप्रः कर्मणा नीतो दशार्णधरणीपतेः[2] ॥ वज्रबाहुकुटुंबिन्याः सुमत्या गर्भमास्थितः ॥ १४ ॥ तां ज्येष्ठपत्नीं नृपतेर्गर्भसंपदमाश्रिताम् ॥ अवेक्ष्य तस्यै गरलं सपत्न्यश्छद्मना ददुः ॥ १५ ॥ सा भुक्त्वा गरलं घोरं न मृता दैवयोगतः ॥ क्लेशमेव परं प्राप मरणादतिदुःसहम् ॥ १६ ॥ अथ काले समायाते पुत्रमेकमजीजनत् ॥ क्लेशेन महता साध्वी पीडिता वरवर्णिनी ॥ १७ ॥ स निर्दशो राजपुत्रः स्पृष्टपूर्वो गरेण यत् ॥ तेनावाप महाक्लेशं क्रंदमानो दिवानिशम् ॥ १८ ॥ तस्य बालस्य माता च सर्वांगव्रणपीडिता ॥ बभूवतुरतिक्लिष्टौ गरयोगप्रभावतः ॥ १९ ॥ तौ राज्ञा च समानीतौ वैद्यैश्च कृतभेषजौ ॥ न स्वास्थ्यमापतुर्यत्नैरनेकैर्योजितैरपि ॥ २० ॥ न रात्रौ लभते निद्रां सा राज्ञी विपुलव्यथा ॥ स्वपुत्रस्य च दुःखेन दुःखिता

१ शिरः–शिरसा–इत्यर्थः । शिरम्–इ० पा० । २ दशार्हधरणीपतेः–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नितरां कृशा ॥ २१ ॥ नीत्वैवं कतिचिन्मासान्स राजा मातृपुत्रकौ ॥ जीवंतौ च मृतप्रायौ विलोक्यात्मन्यचिंतयत् ॥ २२ ॥ एतौ मे गृहिणीपुत्रौ निरयादागताविह ॥ अश्रांतरोगौ क्रंदंतौ निद्राभंगविधायिनौ ॥ २३ ॥ अत्रोपायं करिष्यामि पापयोर्ध्रुवमेतयोः ॥ मर्तुं वा जीवितुं वापि न क्षमौ पापभोगिनौ ॥ २४ ॥ इत्थं विनिश्चित्य च भूमिपालः सक्तः सपत्नीषु तदात्मजेषु ॥ आहूय सूतं निजदारपुत्रौ निर्वापयामास रथेन दूरम् ॥ २५ ॥ तौ सूतेन परित्यक्तौ कुत्रचिद्विजने वने ॥ अवापतुः परां पीडां क्षुत्तृड्भ्यां भृशविह्वलौ ॥ २६ ॥ सोद्वहंती निजं बालं निपतंती पदे पदे ॥ निःश्वसंती निजं कर्म निंदंती चकिता भृशम् ॥ २७ ॥ क्वचित्कंटकभिन्नांगी मुक्तकेशी भयातुरा ॥ क्वचिद्व्याघ्रस्वनैर्भीता क्वचिद्व्यालैरनुद्रुता ॥ २८ ॥ भर्त्स्यमाना पिशाचैश्च वेतालैर्ब्रह्मराक्षसैः ॥ महागुल्मेषु धावंती भिन्नपादा क्षुराश्मभिः ॥ २९ ॥ सैवं घोरे महारण्ये भ्रमंती नृपगेहिनी ॥ दैवात्प्राप्ता वणिङ्मार्गं गोवाजिनरसेवितम् ॥ ३० ॥ गच्छंती तेन मार्गेण सुदूरमतियत्नतः ॥ ददर्श वैश्यनगरं बहुस्त्रीनरसेवितम् ॥ ३१ ॥ तस्य गोप्ता महावैश्यो नगरस्य महाजनः ॥ अस्ति[1] पद्माकरो नाम राजराज इवापरः ॥ ३२ ॥ तस्य वैश्यपतेः काचिद्गृहदासी नृपांगनाम् ॥ आयांतीं दूरतो दृष्ट्वा तदंतिकमुपाययौ ॥ ३३ ॥ सा दासी नृपतेः कांतां सपुत्रां भृशपीडिताम् ॥ स्वयं विदितवृत्तांता स्वामिने प्रत्यदर्शयत् ॥ ॥ ३४ ॥ स तां दृष्ट्वा विशां नाथो रुजार्त्तां क्लिष्टपुत्रकाम् ॥ नीत्वा रहसि सुव्यक्तं तद्वृत्तांतमपृच्छत ॥ ३५ ॥ तया निवेदिताशेषवृत्तांतः स वणिक्पतिः ॥ अहो कष्टमिति ज्ञात्वा निशश्वास मुहुर्मुहुः ॥ ३६ ॥ तामंतिके स्वगेहस्य संनिवेश्य रहोगृहे ॥ वासोन्नपानशयनैर्मातृसाम्यमपूजयत् ॥ ॥ ३७ ॥ तस्मिन्गृहे नृपवधूर्निवसंती सुरक्षिता ॥ व्रणयक्ष्मादिरोगाणां न शांतिं प्रत्यपद्यत ॥ ३८ ॥ ततो दिनैः कतिपयैः स बालो व्रणपीडितः ॥ विलंघितभिषक्सत्त्वो ममार च विधेर्वशात् ॥ ३९ ॥ मृते स्वतनये राज्ञी शोकेन महतावृता ॥ मूर्च्छितां[2] चापतद्भूमौ गजभग्नेव वल्लरी ॥ ४० ॥ दैवात्संज्ञामवाप्याथ बाष्पक्लिन्नपयोधरा ॥ सांत्विताऽपि वणिक्स्त्रीभिर्विललाप सुदुःखिता ॥ ४१ ॥ हा तातताता हा पुत्र हा मम प्राणरक्षक ॥ हा राजकुलपूर्णेन्दो हा ममानंदवर्धन ॥ ४२ ॥ इमामनाथां कृपणां त्वत्प्राणां त्यक्तबांधवाम् ॥ मातरं ते परित्यज्य क्व यातोऽसि नृपात्मज ॥ ॥ ४३ ॥ इत्येभिरुदितैर्वाक्यैः शोकचिंताविवर्धकैः ॥ विलपंतीं मृतापत्यां को नु सांत्वयितुं क्षमः ॥ ४४ ॥ एतस्मिन्समये तस्या दुःखशोकचिकित्सकः ॥ ऋषभः पूर्वमाख्यातः शिवयोगी समाययौ ॥ ४५ ॥ स योगी वैश्यनाथेन सार्घहस्तेन पूजितः ॥ तस्याः सकाशमगमच्छोचन्त्या इद

१ आस्ते–इ० पा० । २ पपात मूर्च्छिता भूमौ–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मब्रवीत् ॥ ४६ ॥ ॥ ऋषभ उवाच ॥ ॥ अकस्मात्किमहो वत्से रोरवीषि विमूढधीः ॥ को जातः कतमो लोके को मृतो वद सांप्रतम् ॥
॥ ४७ ॥ अमी देहादयो भावास्तोयफेनसधर्मकाः ॥ क्वचिद्भ्रांतिः क्वचिच्छांतिः स्थितिर्भवति वा पुनः ॥ ४८ ॥ अतोऽस्मिन्फेनसदृशे देहे
पञ्चत्वमागते ॥ शोकस्यानवकाशत्वान्न शोचंति विपश्चितः ॥ ४९ ॥ गुणैर्भूतानि सृज्यंते भ्राम्यंते निजकर्मभिः ॥ कालेनाथ विकृष्यंते वासनायां
च शेरते ॥ ५० ॥ माययोत्पत्तिमायांति गुणाः सत्त्वादयस्त्रयः ॥ तैरेव देहा जायंते जातास्तल्लक्षणाश्रयाः ॥ ५१ ॥ देवत्वं याति सत्त्वेन रजसा
च मनुष्यताम् ॥ तिर्यक्त्वं तमसा जंतुर्वासनानुगतोवशः ॥ ५२ ॥ संसारे वर्तमानेस्मिञ्जंतुः कर्मानुबन्धनात् ॥ दुर्विभाव्यां गतिं याति सुखदुःख
मयीं मुहुः ॥ ५३ ॥ अपि कल्पायुषां तेषां देवानां तु विपर्ययः ॥ अनेकामयबद्धानां का कथा नरदेहिनाम् ॥ ५४ ॥ केचिद्वदंति देहस्य काल
मेव हि कारणम् ॥ कर्म केचिद्गुणान्केचिद्देहः साधारणो ह्ययम् ॥ ५५ ॥ कालकर्मगुणाधानं पञ्चात्मकमिदं वपुः ॥ जातं दृष्ट्वा न हृष्यंति न
शोचंति मृतं बुधाः ॥ ५६ ॥ अव्यक्ते जायते जंतुरव्यक्ते च प्रलीयते ॥ मध्ये व्यक्तवदाभाति जलबुद्बुदसन्निभः ॥ ५७ ॥ यदा गर्भगतो देही
विनाशः कल्पितस्तदा ॥ दैवाज्जीवति वा जातो म्रियते सहसैव वा ॥ ५८ ॥ गर्भस्था एव नश्यंति जातमात्रास्तथा परे ॥ क्वचिद्युवानो नश्यंति
म्रियंते केपि वार्धके ॥ ५९ ॥ यादृशं प्राक्तनं कर्म तादृशं विंदते वपुः ॥ भुंक्ते तदनुरूपाणि सुखदुःखानि वै ह्यसौ ॥ ६० ॥ मायानुभावेरितयोः
पित्रोः सुरतसंभ्रमात् ॥ देह उत्पद्यते कोपि पुंयोषित्क्लीबलक्षणः ॥ ६१ ॥ आयुः सुखं च दुःखं च पुण्यं पापं श्रुतं धनम् ॥ ललाटे लिखितं धात्रा
वहञ्जंतुः प्रजायते ॥ ६२ ॥ कर्मणामविलंघ्यत्वात्कालस्याप्यनतिक्रमात् ॥ अनित्यत्वाच्च भावानां न शोकं कर्तुमर्हसि ॥ ६३ ॥ क्व स्वप्ने
नियतं स्थैर्यमिंद्रजाले क्व सत्यता ॥ क्व नित्यता शरन्मेघे क्व शश्वत्त्वं कलेवरे ॥ ६४ ॥ तव जन्मान्यतीतानि शतकोट्ययुतानि च ॥
अजानंत्याः परं तत्त्वं संप्राप्तोऽयं महाभ्रमः॥ ६५ ॥ कस्यकस्यासि तनया जननी कस्यकस्य वा ॥ कस्यकस्यासि गृहिणी भवकोटिषु वर्त्तिनी ॥
॥ ६६ ॥ पञ्चभूतात्मको देहस्त्वगसृङ्मांसबन्धनः ॥ मेदोमज्जास्थिनिचितो विण्मूत्रश्लेष्मभाजनम् ॥ ६७ ॥ शरीरांतरमप्येतन्निजदेहोद्भवं
मलम् ॥ मत्वा स्वतनयं मूढे मा शोकं कर्तुमर्हसि ॥ ६८ ॥ यदि नाम जनः कश्चिन्मृत्युं तरति यत्नतः ॥ कथं तर्हि विपद्येरन्सर्वे पूर्वे विपश्चितः॥
॥ ६९ ॥ तपसा विद्यया बुद्ध्या मन्त्रौषधिरसायनैः ॥ अतियाति परं मृत्युं न कश्चिदपि पंडितः ॥ ७० ॥ एकस्याद्य मृतिर्जंतोः श्वश्चान्यस्य
वरानने ॥ तस्मादनित्यावयवे न त्वं शोचितुमर्हसि ॥ ७१ ॥ नित्यं सन्निहितो मृत्युः किं सुखं वद देहिनाम् ॥ व्याघ्रे पुरः स्थिते ग्रासः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पशूनां किं नु रोचते ॥ ७२ ॥ अतो जन्म जरां जेतुं यदीच्छसि वरानने ॥ शरणं व्रज सर्वेशं मृत्युंजयमुमापतिम् ॥ ७३ ॥ तावन्मृत्युभयं घोरं तावज्जन्मजराभयम् ॥ यावन्नो याति शरणं देही शिवपदांबुजम् ॥ ७४ ॥ अनुभूयेह दुःखानि संसारे भृशदारुणे ॥ मनो यदा वियुज्येत तदा ध्येयो महेश्वरः ॥ ७५ ॥ मनसा पिबतः पुंसः शिवध्यानरसामृतम् ॥ भूयस्तृष्णा न जायेत संसारविषयासवे ॥ ७६ ॥ विमुक्तं सर्वसंगैश्च मनो वैराग्ययंत्रितम् ॥ यदा शिवपदे मग्नं तदा नास्ति पुनर्भवः ॥ ७७ ॥ तस्मादिदं मनो भद्रे शिवध्यानैकसाधनम् ॥ शोकमोहसमाविष्टं मा कुरुष्व शिवं भज ॥ ७८ ॥ ॥ सूत उवाच ॥ ॥ इत्थं सानुनयं राज्ञी बोधिता शिवयोगिना ॥ प्रत्याचष्ट गुरोस्तस्य प्रणम्य चरणांबुजम् ॥ ७९ ॥ ॥ राज्युवाच ॥ ॥ भगवन्मृतपुत्रायास्त्यक्तायाः प्रियबन्धुभिः ॥ महारोगातुराया मे का गतिर्मरणं विना ॥ ८० ॥ अतोऽहं मर्तुमिच्छामि सहैव शिशुनाऽमुना ॥ कृतार्थाहं यदद्य त्वामपश्यं मरणोन्मुखी ॥ ८१ ॥ ॥ सूत उवाच ॥ ॥ इति तस्या वचः श्रुत्वा शिवयोगी दयानिधिः ॥ पूर्वोपकारं संस्मृत्य मृतस्यांतिकमाययौ ॥ ८२ ॥ स तदा भस्म संगृह्य शिवमन्त्राभिमंत्रितम् ॥ विदीर्णे तन्मुखे क्षिप्त्वा मृतं प्राणैरयोजयत् ॥ ८३ ॥ स बालः संगतः प्राणैः शनैरुन्मील्य लोचने ॥ प्राप्तपूर्वेन्द्रियबलो[1] रुरोद स्तन्यकांक्षया ॥ ८४ ॥ मृतस्य पुनरुत्थानं वीक्ष्य बालस्य विस्मिताः ॥ जना मुमुदिरे सर्वे नगरेषु पुरोगमाः ॥८५॥ अथानंदभरा[2] राज्ञी विह्वलोन्मत्तलोचना ॥ जग्राह तनयं शीघ्रं बाष्पव्याकुललोचना ॥८६॥ उपगुह्य तदा तन्वी परमानंदनिर्वृता ॥ न वेदात्मानमन्यं वा सुषुप्तेव परिश्रमात् ॥ ८७ ॥ पुनश्च ऋषभो योगी तयोर्मातृकुमारयोः ॥ विषव्रणयुतं देहं भस्मनैव परामृशत् ॥ ८८ ॥ तौ च तद्भस्मना स्पृष्टौ प्राप्तदिव्यकलेवरौ ॥ देवानां सदृशं रूपं दधतुः कांतिभूषितम् ॥ ८९ ॥ संप्राप्ते त्रिदिवैश्वर्ये यत्सुखं पुण्यकर्मणाम् ॥ तस्माच्छतगुणं प्राप सा राज्ञी सुखमुत्तमम् ॥ ९० ॥ तां पादयोर्निपतितामृषभः प्रेमविह्वलः[3] ॥ उत्थाप्याश्वासयामास दुःखैर्मुक्तामुवाच ह ॥ ९१ ॥ अयि वत्से महाराज्ञि जीव त्वं शाश्वतीः समाः ॥ यावज्जीवसि लोकेस्मिन्न तावत्प्राप्स्यसे जराम् ॥ ९२ ॥ एष ते तनयः साध्वि भद्रायुरिति नामतः ॥ ख्यातिं यास्यति लोकेषु निजं राज्यमवाप्स्यति ॥ ॥ ९३ ॥ अस्य वैश्यस्य सदने तावत्तिष्ठ शुचिस्मिते ॥ यावदेष कुमारस्ते प्राप्तविद्यो भविष्यति ॥ ९४ ॥ ॥ सूत उवाच ॥ ॥ इति

१ प्राप्तसर्वेंद्रियबलः–इ० पा० । २ अत्यानन्दवलात्–इ० पा० । ३ प्रेमविह्वलाम्–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तामृषभो योगी तं च राजकुमारकम् ॥ संजीव्य भस्मवीर्येण ययौ देशान्यथेप्सितान् ॥ ९९ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मोत्तरखण्डे भद्रायुराख्याने ऋषभयोगिना भद्रायुजीवनं नाम दशमोऽध्यायः ॥ ॥ १० ॥ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ पिंगला नाम या वेश्या मया पूर्वमुदाहृता ॥ शिवभक्तार्चनात्पुण्यात्त्यक्त्वा पूर्वकलेवरम् ॥ १ ॥ चन्द्रांगदस्य सा[1] भूयः सीमंतिन्यामजायत ॥ रूपौदार्यगुणोपेता नाम्ना वै कीर्तिमालिनी ॥ २ ॥ भद्रायुरपि तत्रैव राजपुत्रो वणिक्पतेः ॥ ववृधे सदने भानुः शुचाविव महातपाः ॥ ३ ॥ तस्यापि वैश्यनाथस्य कुमारस्त्वेक उत्तमः ॥ स नाम्ना सुनयः प्रोक्तो राजसूनोः सखाऽभवत् ॥ ४ ॥ तावुभौ परमस्निग्धौ राजवैश्यकुमारकौ॥ चित्रक्रीडावुदारांगौ रत्नाभरणमंडितौ ॥ ५ ॥ तस्य राजकुमारस्य ब्राह्मणैः स वणिक्पतिः ॥ संस्कारान्कारयामास स्वपुत्रस्यापि विस्तरात् ॥ ६ ॥ काले कृतोपनयनौ गुरुशुश्रूषणे रतौ ॥ चक्रतुः सर्वविद्यानां संग्रहं विनयान्वितौ ॥ ७ ॥ अथ राजकुमारस्य प्राप्ते षोडशहायने ॥ स[2] एव ऋषभो योगी तस्य वेश्मन्युपाययौ ॥ ८ ॥ सा राज्ञी स कुमारश्च शिवयोगिनमागतम् ॥ मुहुर्मुहुः प्रणम्योभौ पूजयामासतुर्मुदा ॥ ९ ॥ ताभ्यां च पूजितः सोऽथ योगीशो हृष्टमानसः ॥ तं राजपुत्रमुद्दिश्य बभाषे करुणार्द्रधीः ॥ १० ॥ ॥ शिवयोग्युवाच ॥ ॥ कच्चित्ते कुशलं तात त्वन्मातुश्चाप्यनामयम् ॥ कच्चित्त्वं सर्वविद्यानामकार्षीश्च प्रतिग्रहम् ॥ ११ ॥ कच्चिद्गुरूणां सततं शुश्रूषातत्परो भवान् ॥ कच्चित्स्मरसि मां तात तव प्राणप्रदं गुरुम् ॥ १२ ॥ एवं वदति योगीशे राज्ञी सा विनयान्विता ॥ स्वपुत्रं पादयोस्तस्य निपात्यैनमभाषत ॥ १३ ॥ एष पुत्रस्तव गुरो त्वमस्य प्राणदः पिता ॥ एष शिष्यस्तु संग्राह्यो भवता करुणात्मना ॥ १४ ॥ अतो बन्धुभिरुत्सृष्टमनाथं परिपालय ॥ अस्मै सम्यक्सतां मार्गमुपदेष्टुं त्वमर्हसि ॥ १५ ॥ इति प्रसादितो राज्ञ्या शिवयोगी महामतिः ॥ तस्मै राजकुमाराय सन्मार्गमुपदिष्टवान् ॥ १६ ॥ ॥ ऋषभ उवाच ॥ ॥ श्रुतिस्मृतिपुराणेषु प्रोक्तो धर्मः सनातनः ॥ वर्णाश्रमानुरूपेण निषेव्यः सर्वदा जनैः ॥ १७ ॥ भज वत्स सतां मार्गं सदैव[3] चरितं चर ॥ न देवाज्ञां विलंघेथा मा कार्षीर्देवहेलनम् ॥ १८ ॥ गोदेवगुरुविप्रेषु भक्तिमान्भव सर्वदा ॥ चांडालमपि संप्राप्तं सदा संभावयातिथिम् ॥ १९ ॥ सत्यं न त्यज सर्वत्र प्राप्तेऽपि प्राणसंकटे ॥ गोब्राह्मणानां रक्षार्थमसत्यं त्वं वद क्वचित् ॥ २० ॥ परस्वेषु परस्त्रीषु देवब्राह्मणवस्तुषु ॥ तृष्णां त्यज महाबाहो दुर्लभेष्वपि वस्तुषु ॥ २१ ॥ सत्कथायां सदाचारे सद्व्रते च सदागमे ॥ धर्मादिसंग्रहे नित्यं तृष्णां कुरु महा

१ भार्यायाम्–इ० पा० । २ स हर्षात्–इ० पा० । ३ तदेवं चारितम्–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मते ॥ २२ ॥ स्नाने जपे च होमे च स्वाध्याये पितृतर्पणे ॥ गोदेवातिथिपूजासु निरालस्यो भवानघ ॥ २३ ॥ क्रोधं द्वेषं भयं शाठ्यं पैशुन्य मसदाग्रहम् ॥ कौटिल्यं दंभमुद्वेगं यत्नेन परिवर्जय ॥ २४ ॥ क्षात्रधर्मरतोऽपि त्वं वृथा हिंसां परित्यज ॥ शुष्कवैरं वृथालापं परनिंदां च वर्जय ॥ २५ ॥ मृगयाद्यूतपानेषु स्त्रीषु स्त्रीविजितेषु च ॥ अत्याहारमतिक्रोधमतिनिद्रामतिश्रमम् ॥ २६ ॥ अत्यालापमतिक्रीडां सर्वदा परिवर्जय ॥ ॥ २७ ॥ अतिविद्यामतिश्रद्धामतिपुण्यमतिस्मृतिम् ॥ अत्युत्साहमतिख्यातिमतिधैर्यं च साधय ॥ २८ ॥ सकामो निजदारेषु सक्रोधो निजशत्रुषु ॥ सलोभः पुण्यनिचये साभ्यसूयो ह्यधर्मिषु ॥ २९ ॥ सद्वेषो भव पाखण्डे सरागः सज्जनेषु च ॥ दुर्बोधो भव दुर्मंत्रे बधिरः पिशुनोक्तिषु ॥ ३० ॥ धूर्तं चंडं शठं क्रूरं कितवं चपलं खलम् ॥ पतितं नास्तिकं जिह्मं दूरतः परिवर्जय ॥ ३१ ॥ आत्मप्रशंसां मा कार्षीः परिज्ञातेंगितो भव ॥ धने सर्वकुटुंबे च नात्यासक्तः सदा भव ॥ ३२ ॥ पत्न्याः पतिव्रतायाश्च जनन्याः श्वशुरस्य च ॥ सतां गुरोश्च वचने विश्वासं कुरु सर्वदा ॥ ३३ ॥ आत्मरक्षापरो नित्यमप्रमत्तो दृढव्रतः ॥ विश्वासं नैव कुर्वीथाः स्वभृत्येष्वपि कुत्रचित् ॥ ३४ ॥ विश्वस्तं मा वधीः कंचिदपि चोरं महामते ॥ अपापेषु न शंकेथाः सत्यान्न चलितो भव ॥ ३५ ॥ अनाथं कृपणं वृद्धं स्त्रियं बालं निरागसम् ॥ परिरक्ष धनैः प्राणैर्बुद्ध्या शक्त्या बलेन च ॥ ३६ ॥ अपि शत्रुं वधस्यार्हं मा वधीः शरणागतम् ॥ अपात्रं सुपात्रं वा नीचो वापि महत्तमः ॥ ३७ ॥ यो वा को वापि याचेत तस्मै देहि शिरोपि च ॥ अपि यत्नेन महता कीर्तिमेव सदार्जय ॥ ३८ ॥ राज्ञां च विदुषां चैव कीर्तिरेव हि भूषणम् ॥ सत्कीर्तिप्रभवा लक्ष्मीः पुण्यं सत्कीर्तिसंभवम् ॥ ३९ ॥ सत्कीर्त्या राजते लोकश्चंद्रश्चंद्रिकया यथा ॥ गजाश्वहेमनिचयं रत्नराशिं नगोपमम् ॥ ४० ॥ अकीर्त्योपहतं सर्वं तृणवन्मुंच सत्वरम् ॥ मातुः कोपं पितुः कोपं गुरोः कोपं धनव्ययम् ॥ ४१ ॥ पुत्राणामपराधं च ब्राह्मणानां क्षमस्व भोः ॥ यथा द्विजप्रसादः स्यात्तथा तेषां हितं चर ॥ ४२ ॥ राजानं संकटे मग्नमुद्धरेयुर्द्विजोत्तमाः ॥ आयुर्यशो बलं सौख्यं धनं पुण्यं प्रजोन्नतिः ॥ ४३ ॥ कर्मणा येन जायेत तत्सेव्यं भवता सदा ॥ देशं कालं च शक्तिं च कार्यं चाकार्यमेव च ॥ ४४ ॥ सम्यग्विचार्य यत्नेन कुरु कार्यं च सर्वदा ॥ न कुर्याः कस्यचिद्बाधां परबाधां निवारय ॥ ४५ ॥ चोरान्दुष्टांश्च बाधेथाः

१ दुर्विनयेषु च–इ० पा० । २ दुष्टशत्रुषु–इ० पा० । ३ अतिप्रशंसाम्–इ० पा० । ४ अविज्ञातो भवानघ–इ० पा० । ५ अमात्येषु च–इ० पा० । ६ समार्जय–इ०पा० । ७ क्षमस्व ब्राह्मणानयम्–इ० पा० । ८ अनघ–इ० पा० । ९ पीडाम्–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सुनीत्या शक्तिमत्तया ॥ स्नाने जपे च होमे च दैवे पित्र्ये च कर्मणि ॥ ४६ ॥ अत्वरो भव निद्रायां भोजने भव सत्वरः ॥ दाक्षिण्ययुक्तमशठं सत्यं जनमनोहरम् ॥ ४७ ॥ अल्पाक्षरमनंतार्थं वाक्यं ब्रूहि महामते ॥ अभीतो भव सर्वत्र विपक्षेषु विपत्सु च ॥ ४८ ॥ भीतो भव ब्रह्मकुले न पापे गुरुशासने ॥ ज्ञातिबंधुषु विप्रेषु भार्यासु तनयेषु च ॥ ४९ ॥ समभावेन वर्तेथास्तथा भोजनपंक्तिषु ॥ सतां हितोपदेशेषु तथा पुण्यकथासु च ॥ ५० ॥ विद्यागोष्ठीषु धर्म्यासु क्वचिन्मा भूः पराङ्मुखः ॥ शुचौ पुण्यजलस्यांते प्रख्याते ब्रह्मसंकुले ॥ ५१ ॥ महादेशे शिवमये वस्तव्यं भवता सदा ॥ कुलटा गणिका यत्र यत्र तिष्ठति कामुकः ॥ ५२ ॥ दुर्देशे नीचसंबाधे कदाचिदपि मा वस ॥ एकमेवाश्रितोपि त्वं शिवं त्रिभुवनेश्वरम् ॥ ५३ ॥ सर्वान्देवानुपासीथास्तद्दिनानि च मानयन् ॥ सदा शुचिः सदा दक्षः सदा शांतः सदा स्थिरः ॥ ५४ ॥ सदा विजितषड्वर्गः सदैकांतो भवानघ ॥ विप्रान्वेदविदः शांतान्यतींश्च नियतोज्वलान् ॥ ५५ ॥ युग्मम् ॥ पुण्यवृक्षान्पुण्यनदीः पुण्यतीर्थं महत्सरः ॥ धेनुं च वृषभं रत्नं युवतीं च पतिव्रताम् ॥ ५६ ॥ आत्मनो गृहदेवांश्च सहसैव नमस्कुरु ॥ उत्थाय समये ब्राह्मे स्वाचम्य विमलाशयः ॥ ५७ ॥ नमस्कृत्या त्मगुरुवे ध्यात्वा देवमुमापतिम् ॥ नारायणं च लक्ष्मीशं ब्रह्माणं च विनायकम् ॥ ५८ ॥ स्कन्दं कात्यायनीं देवीं महालक्ष्मीं सरस्वतीम् ॥ इन्द्रादीनथ लोकेशान्पुण्यश्लोकानृषीनपि ॥ ५९ ॥ चिंतयित्वाथ मार्त्तंडमुद्यंतं प्रणमेत्सदा ॥ गंधं पुष्पं च तांबूलं शाकं पक्वफलादिकम् ॥ ६० ॥ शिवाय दत्त्वोपभुंक्ष्व भक्ष्यं भोज्यं प्रियं नवम् ॥ यद्दत्तं यत्कृतं जप्तं यत्स्नातं यद्धुतं स्मृतम् ॥ ६१ ॥ यच्च तप्तं तपः सर्वं तच्छिवाय निवेदय ॥ भुंजानश्च पठन्वापि शयानो विहरन्नपि ॥ पश्यञ्छृण्वन्वदन्गृह्णञ्छिवमेवानुचिंतय ॥ ६२ ॥ रुद्राक्षकंकणलसत्करदंडयुग्मो मालांतरालधृतभस्मसितत्रिपुंड्रः ॥ पंचाक्षरं परिपठन्परमंत्रराजं ध्यायन्सदा पशुपतेश्चरणं रमेथाः ॥ ६३ ॥ इति संक्षेपतो वत्स कथितो धर्मसंग्रहः ॥ अन्येषु च पुराणेषु विस्तरेण प्रकीर्तितः ॥ ६४ ॥ अथापरं सर्वपुराणगुह्यं निःशेषपापौघहरं पवित्रम् ॥ जयप्रदं सर्वविपद्विमोचनं वक्ष्यामि शैवं कवचं हिताय ते ॥ ६५ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे भद्रायुं प्रति ऋषभोपदेशवर्णनं नामैकादशोऽध्यायः ॥ ११ ॥ छ ॥

॥ ॥ ऋषभ उवाच ॥ ॥ नमस्कृत्य महादेवं विश्वव्यापिनमीश्वरम् ॥ वक्ष्ये शिवमयं वर्म सर्वरक्षाकरं नृणाम् ॥ १ ॥ शुचौ देशे समासीनो यथावत्कल्पितासनः ॥ जितेंद्रियो जितप्राणश्चिंतयेच्छिवमव्ययम् ॥ २ ॥ हृत्पुंडरीकांतरसन्निविष्टं स्वतेजसा व्याप्तनभोवकाशम् ॥ अतींद्रियं

१ पापे पापकर्तरि गुरुशासने गुरुतरदंडादिरूपशासनकरणेन भीतो न भव परं ब्रह्मकुले पापकर्तर्यपि गुरुशासनकरणे भीतो भवेति तात्पर्यम्। २ सर्वविषप्रमोचनम्-इ० पा०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सूक्ष्ममनंतमाद्यं ध्यायेत्परानंदमयं महेशम् ॥ ३ ॥ ध्यानावधूताखिलकर्मबंधश्चिरं चिदानंदनिमग्नचेताः ॥ षडक्षरन्याससमाहितात्मा शैवेन कुर्यात्कवचेन रक्षाम् ॥ ४ ॥ मां पातु देवोऽखिलदेवतात्मा संसारकूपे पतितं गभीरे ॥ तन्नाम दिव्यं वरमंत्रमूलं धुनोतु मे सर्वमघं हृदिस्थम् ॥ ५ ॥ सर्वत्र मां रक्षतु विश्वमूर्त्तिर्ज्योतिर्मयानंदघनश्चिदात्मा ॥ अणोरणीयानुरुशक्तिरेकः स ईश्वरः पातु भयादशेषात् ॥ ६ ॥ यो भूस्वरूपेण बिभर्ति विश्वं पायात्स भूमेर्गिरिशोऽष्टमूर्तिः ॥ योऽपां स्वरूपेण नृणां करोति संजीवनं सोऽवतु मां जलेभ्यः ॥ ७ ॥ कल्पावसाने भुवनानि दग्ध्वा सर्वाणि यो नृत्यति भूरिलीलः ॥ स कालरुद्रोऽवतु मां दवाग्नेर्वात्यादिभीतेरखिलाच्च तापात् ॥ ८ ॥ प्रदीप्तविद्युत्कनकावभासो विद्यावराभीतिकुठारपाणिः ॥ चतुर्मुखस्तत्पुरुषस्त्रिनेत्रः प्राच्यां स्थितं रक्षतु मामजस्रम् ॥ ९ ॥ कुठारवेदांकुशपाशशूलकपालढक्काक्षगुणान्दधानः ॥ चतुर्मुखो नीलरुचिस्त्रिनेत्रः पायादघोरो दिशि दक्षिणस्याम् ॥ १० ॥ कुंदेन्दुशंखस्फटिकावभासो वेदाक्षमालावरदाभयांकः ॥ त्र्यक्षश्चतुर्वक्त्र उरुप्रभावः सद्योधिजातोवतु मां प्रतीच्याम् ॥ ११ ॥ वराक्षमालाभयटंकहस्तः सरोजकिंजल्कसमानवर्णः ॥ त्रिलोचनश्चारुचतुर्मुखो मां पायादुदीच्यां दिशि वामदेवः ॥ १२ ॥ वेदाभयेष्टांकुशटंकपाशकपालढक्काक्षकशूलपाणिः ॥ सितद्युतिः पंचमुखोऽवतान्मामीशान ऊर्द्ध्वं परमप्रकाशः ॥ १३ ॥ मूर्धानमव्यान्मम चंद्रमौलिर्भालं ममाव्यादथ भालनेत्रः ॥ नेत्रे ममाव्याद्भगनेत्रहारी नासां सदा रक्षतु विश्वनाथः ॥ १४ ॥ पायाच्छ्रुती मे श्रुतिगीतकीर्तिः कपोलमव्यात्सततं कपाली ॥ वक्त्रं सदा रक्षतु पंचवक्त्रो जिह्वां सदा रक्षतु वेदजिह्वः ॥ १५ ॥ कंठं गिरीशोऽवतु नीलकंठः पाणिद्वयं पातु पिनाकपाणिः ॥ दोर्मूलमव्यान्मम धर्मबाहुर्वक्षःस्थलं दक्षमखांतकोऽव्यात् ॥ १६ ॥ ममोदरं पातु गिरींद्रधन्वा मध्यं ममाव्यान्मदनान्तकारी ॥ हेरंबतातो मम पातु नाभिं पायात्कटी धूर्जटिरीश्वरो मे ॥ १७ ॥ ऊरुद्वयं पातु कुबेरमित्रो जानुद्वयं मे जगदीश्वरोऽव्यात् ॥ जंघायुगं पुंगवकेतुरव्यात्पादौ ममाव्यात्सुरवंद्यपादः ॥ १८ ॥ महेश्वरः पातु दिनादियामे मां मध्ययामेऽवतु वामदेवः ॥ त्रियंबकः पातु तृतीययामे वृषध्वजः पातु दिनांत्ययामे ॥ ॥ १९ ॥ पायान्निशादौ शशिशेखरो मां गंगाधरो रक्षतु मां निशीथे ॥ गौरीपतिः पातु निशावसाने मृत्युंजयो रक्षतु सर्वकालम् ॥ २० ॥ अंतःस्थितं रक्षतु शंकरो मां स्थाणुः सदा पातु बहिःस्थितं माम् ॥ तदंतरे पातु पतिः पशूनां सदा शिवो रक्षतु मां समंतात् ॥ २१ ॥ तिष्ठंतमव्याद्भुवनैकनाथः पायाद्व्रजंतं प्रमथाधिनाथः ॥ वेदांतवेद्योऽवतु मान्निषण्णं मामव्ययः पातु शिवः शयानम् ॥ २२॥ मार्गेषु मां रक्षतु नीलकंठः शैला

१ स्थितो रक्षतु—इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दिदुर्गेषु पुरत्रयारिः ॥ अरण्यवासादिमहाप्रवासे पायान्मृगव्याध उदारशक्तिः ॥ २३ ॥ कल्पांतकाटोपपटुप्रकोपः स्फुटाट्टहासोच्चलितांडकोशः ॥
घोरारिसेनार्णवदुर्निवारमहाभयाद्रक्षतु वीरभद्रः॥२४॥ पत्त्यश्वमातंगघटावरूथसहस्रलक्षायुतकोटिभीषणम् ॥ अक्षौहिणीनां शतमाततायिनां छिंद्या
न्मृडो घोरकुठारधारया ॥ २५ ॥ निहंतु दस्यून्प्रलयानलार्चिर्ज्वलत्त्रिशूलं त्रिपुरांतकस्य ॥ शार्दूलसिंहर्क्षवृकादिहिंस्रान्संत्रासयत्वीशधनुःपिनाकम्॥
॥२६॥ दुःस्वप्नदुःशकुनदुर्गतिदौर्मनस्यदुर्भिक्षदुर्व्यसनदुःसहदुर्यशांसि॥ उत्पाततापविषभीतिमसद्ग्रहार्तिव्याधींश्च नाशयतु मे जगतामधीशः॥२७॥
ओंनमो भगवते सदाशिवाय सकलतत्त्वात्मकाय सकलतत्त्वविहाराय[1] सकललोकैककर्त्रे सकललोकैकभर्त्रे सकललोकैकहर्त्रे सकललोकैकगुरवे सक
ललोकैकसाक्षिणे सकलनिगमगुह्याय सकलवरप्रदाय सकलदुरितार्तिभंजनाय सकलजगदभयंकराय सकललोकैकशंकराय शशांकशेखराय शाश्व
तनिजाभासाय[2] निर्गुणाय निरुपमाय नीरूपाय निराभासाय निरामयाय निष्प्रपंचाय निष्कलंकाय निर्द्वंद्वाय निःसंगाय निर्मलाय निर्गमाय
नित्यरूपविभवाय निरुपमविभवाय निराधाराय नित्यशुद्धबुद्धपरिपूर्णसच्चिदानंदाद्वयाय परमशांतप्रकाशतेजोरूपाय जयजय महारुद्र
महारौद्र भद्रावतार दुःखदावदारण महाभैरव कालभैरव कल्पान्तभैरव कपालमालाधर खट्वांगखड्गचर्मपाशांकुशडमरुशूलचापबाणगदाशक्तिभिं
डिपालतोमरमुसलमुद्गरपट्टिशपरशुपरिघभुशुंडीशतघ्नीचक्राद्यायुधभीषणकरसहस्र मुखदंष्ट्राकराल विकटाट्टहासविस्फारितब्रह्मामण्डल नागेंद्र
कुण्डल नागेंद्रहार नागेंद्रवलय नागेंद्रचर्मधर मृत्युंजय त्र्यंबक त्रिपुरांतक विरूपाक्ष विश्वेश्वर विश्वरूप वृषभवाहन विषभूषण विश्वतोमुख सर्वतो
रक्षरक्ष मां ज्वलज्वल महामृत्युभयमपमृत्युभयं नाशयनाशय रोगभयमुत्सादयोत्सादय विषसर्पभयं शमयशमय चोरभयं मारयमारय मम शत्रूनुच्चा
टयोच्चाटय शूलेन विदारय विदारय कुठारेण भिंधिभिंधि खड्गेन छिंधिछिंधि खट्वांगेन विपोथय विपोथय मुसलेन निष्पेषयनिष्पेषय बाणैःसंताडय
संताडय रक्षांसि भीषयभीषय भूतानि विद्रावयविद्रावय कूष्मांडवेतालमारीगणब्रह्मराक्षसान्संत्रासयसंत्रासय ममाभयं कुरुकुरु वित्रस्तं मामाश्वास
याश्वासय नरकभयान्मामुद्धारयोद्धारय संजीवयसंजीवय क्षुत्तृड्भ्यां मामाप्याययाप्यायय दुःखातुरं मामानन्दयानंदय शिवकवचेन मामाच्छादया
च्छादय त्र्यंबक सदाशिव नमस्तेनमस्तेनमस्ते ॥ ॥ ऋषभ उवाच ॥ ॥ इत्येतत्कवचं शैवं वरदं व्याहृतं मया ॥ सर्वबाधाप्रशमनं रहस्यं सर्व
देहिनाम् ॥ २८ ॥ यः सदा धारयेन्मर्त्यः शैवं कवचमुत्तमम् ॥ न तस्य जायते क्वापि भयं शम्भोरनुग्रहात् ॥ २९ ॥ क्षीणायुर्मृत्युमापन्नो महा

१ सकलतत्त्वविदूराय–इ०पा० । २ शाश्वतनिजावासाय–इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रोगहतोऽपि वा ॥ सद्यः सुखमवाप्नोति दीर्घमायुश्च विंदति ॥ ३० ॥ सर्वदारिद्र्यशमनं सौमंगल्यविवर्धनम् ॥ यो धत्ते कवचं शैवं स देवैरपि पूज्यते ॥ ३१ ॥ महापातकसंघातैर्मुच्यते चोपपातकैः ॥ देहांते शिवमाप्नोति शिववर्मानुभावतः ॥ ३२ ॥ त्वमपि श्रद्धया वत्स शैवं कवच मुत्तमम् ॥ धारयस्व मया दत्तं सद्यः श्रेयो ह्यवाप्स्यसि ॥ ३३ ॥ ॥ सूत उवाच ॥ ॥ इत्युक्त्वा ऋषभो योगी तस्मै पार्थिवसूनवे ॥ ददौ शंखं महारावं खड्गं चारिनिषूदनम् ॥ ३४ ॥ पुनश्च भस्म संमंत्र्य तदंगं सर्वतोऽस्पृशत् ॥ गजानां षट्सहस्रस्य द्विगुणं च बलं ददौ ॥ ३५ ॥ भस्मप्रभावात्संप्राप्य बलैश्वर्यधृतिस्मृतीः ॥ स राजपुत्रः शुशुभे शरदर्क इव श्रिया ॥ ३६ ॥ तमाह प्रांजलिं भूयः स योगी राजनंदनम् ॥ एष खड्गो मया दत्तस्तपोमंत्रानुभावतः ॥ ३७ ॥ शितधारमिमं खड्गं यस्मै दर्शयसि स्फुटम् ॥ स सद्यो म्रियते शत्रुः साक्षान्मृत्युरपि स्वयम् ॥ ॥ ३८ ॥ अस्य शंखस्य निह्रादं ये शृण्वंति तवाहिताः ॥ ते मूर्च्छिताः पतिष्यंति न्यस्तशस्त्रा विचेतनाः ॥ ३९ ॥ खड्गशंखाविमौ दिव्यौ परसैन्यविनाशिनौ ॥ आत्मसैन्यस्वपक्षाणां शौर्यतेजोविवर्धनौ ॥ ४० ॥ एतयोश्च प्रभावेन शैवेन कवचेन च ॥ द्विषट्सहस्रनागानां बलेन महतापि च ॥४१॥ भस्मधारणसामर्थ्याच्छत्रुसैन्यं विजेष्यसि ॥ प्राप्य सिंहासनं पैत्र्यं गोप्तासि पृथिवीमिमाम् ॥४२॥ इति भद्रायुषं सम्यगनुशास्य समातृकम् ॥ ताभ्यां संपूजितः सोऽथ योगी स्वैरगतिर्ययौ ॥ ४३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मोत्तर खंडे सीमंतिनीमाहात्म्ये भद्रायूपाख्याने शिवकवचकथनं नाम द्वादशोऽध्यायः ॥ १२ ॥ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ दशार्णाधिपतेस्तस्य वज्रबाहोर्महाभुजः ॥ बभूव शत्रुर्बलवान्राजा मगधराट् ततः ॥ १ ॥ स वै हेमरथो नाम बाहुशाली रणोत्कटः ॥ बलेन महतावृत्य दशार्णं न्यरुधद्बली ॥ २ ॥ चमूपास्तस्य दुर्धर्षाः प्राप्य देशं दशार्णकम् ॥ व्यलुंपन्वसुरत्नानि गृहाणि ददहुः परे ॥३॥ केचिद्धनानि जगृहुः केचिद्बालान्स्त्रियोऽपरे ॥ गोधनान्यपरेऽगृह्णन्केचिद्धान्यपरिच्छदान् ॥ केचिदारामसस्यानि गृहोद्यानान्यनाशयन् ॥४॥ एवं विनाश्य तद्राज्यं स्त्रीगोधनजिघृक्षवः ॥ आवृत्य तस्य नगरीं वज्रबाहोस्तु मागधः ॥ ५ ॥ एवं पर्याकुलं वीक्ष्य राजा नगरमेव च ॥ युद्धाय निर्जगामाशु वज्रबाहुः ससैनिकः ॥ ६ ॥ वज्रबाहुश्च भूपालस्तथा मंत्रिपुरःसराः ॥ युयुधुर्मागधैः सार्धं निजघ्नुः शत्रुवाहिनीम् ॥७॥ वज्रबाहुर्महेष्वासो दंशितो रथमास्थितः॥ विकिरन्बाणवर्षाणि चकार कदनं महत् ॥८॥ दशार्णराजं युध्यंतं दृष्ट्वा युद्धे सुदुःसहम् ॥ तमेव तरसा वव्रुः सर्वे मागधसैनिकाः ॥ ९ ॥ कृत्वा तु

१ रथोत्कटः—इ० पा० । २ ते भूपाः—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सुचिरं युद्धं मागधा दृढविक्रमाः ॥ तत्सैन्यं नाशयामासुर्लेभिरे च जयश्रियम् ॥१०॥ केचित्तस्य रथं जघ्नुः केचित्तद्धनुराच्छिनन् ॥ सूतं तस्य जघानैकस्त्वपरः खड्गमाच्छिनत् ॥ ११॥ संछिन्नखड्गधन्वानं विरथं हतसारथिम् ॥बलाद्गृहीत्वा बलिनो बबंधुर्नृपतिं रुषा ॥१२॥ तस्य मंत्रिगणं सर्वं तत्सैन्यं च विजित्य ते ॥ मागधास्तस्य नगरीं विविशुर्जयकाशिनः ॥ १३ ॥ अश्वान्नरान्गजानुष्ट्रान्पशूंश्चैव धनानि च ॥ जगृहुर्युवतीः सर्वाश्चार्वंगीश्चैव कन्यकाः ॥ १४ ॥ राज्ञो बबंधुर्महिषीर्दासीश्चैव सहस्रशः ॥ कोशं च रत्नसंपूर्णं जहुस्तेऽप्याततायिनः ॥ १५ ॥ एवं विनाश्य नगरीं हृत्वा स्त्रीगोधनादिकम् ॥ वज्रबाहुं बलाद्बद्ध्वा रथे स्थाप्य विनिर्ययुः ॥ १६ ॥ एवं कोलाहले जाते राष्ट्रनाशे च दारुणे ॥ राजपुत्रोऽथ भद्रायुस्तद्वार्तामशृणोद्बली ॥ १७ ॥ पितरं शत्रुनिर्बद्धं पितृपत्नीस्तथा हृताः ॥ नष्टं दशार्णराष्ट्रं च श्रुत्वा चुक्रोश सिंहवत् ॥ १८ ॥ स खड्गशंखावादाय वैश्यपुत्रसहायवान् ॥ दंशितो[1] हयमारुह्य कुमारो विजिगीषया ॥ १९ ॥ जवेनागत्य तं देशं मागधैरभिपूरितम् ॥ दह्यमानं क्रंदमानं हृतस्त्रीसुतगोधनम् ॥ २० ॥ दृष्ट्वा राजजनं सर्वं राज्यं शून्यं भयाकुलम् ॥ क्रोधाध्मातमनास्तूर्णं प्रविश्य रिपुवाहिनीम् ॥ आकर्णाकृष्टकोदंडो ववर्ष शरसंततीः ॥ २१ ॥ ते हन्यमाना रिपवो राजपुत्रेण सायकैः ॥ तमभिद्रुत्य वेगेन शरैर्विव्यधुरुल्बणैः ॥ २२ ॥ हन्यमानोऽस्त्रपूगेन रिपुभिर्युद्धदुर्मदैः ॥ न चचाल रणे धीरः शिववर्माभिरक्षितः ॥ २३ ॥ सोऽस्त्रकर्षं प्रसह्याशु प्रविश्य गजलीलया ॥ जघानाशु रथान्नागान्पदातीनपि भूरिशः ॥ २४ ॥ तत्रैकं रथिनं हत्वा ससूतं नृपनंदनः ॥ तमेव रथमास्थाय वैश्यनंदनसारथिः ॥ विचचार रणे धीरः सिंहो मृगकुलं यथा ॥ २५ ॥ अथ सर्वे सुसंरब्धाः शूराः प्रोद्यतकार्मुकाः ॥ अभिसस्रुस्तमेवैकं चमूपा बलशालिनः ॥ २६ ॥ तेषामापततामग्रे खड्गमुद्यम्य दारुणम् ॥ अभ्युद्ययौ महावीरान्दर्शयन्निव पौरुषम् ॥ २७ ॥ करालांतकजिह्वाभं तस्य खड्गं महोज्ज्वलम् ॥ दृष्ट्वैव सहसा मम्रुश्च भूपास्तत्प्रभावतः ॥ २८ ॥ येये पश्यंति तं खड्गं प्रस्फुरंतं रणांगणे ॥ ते सर्वे निधनं जग्मुर्वज्रं प्राप्येव कीटकः ॥ २९ ॥ अथासौ सर्वसैन्यानां विनाशाय महाभुजः ॥ शंखं दध्मौ महारावं पूरयन्निव रोदसी ॥ ३० ॥ तेन शंखनिनादेन विषाक्तेनैव भूयसा ॥ श्रुतमात्रेण रिपवो मूर्च्छिताः पतिता भुवि ॥ ३१ ॥ येऽश्वपृष्ठे रथे ये च ये च दंतिषु संस्थिताः॥ ते विसंज्ञाः क्षणात्पेतुः शंखनादहतौजसः॥३२॥ तान्भूमौ पतितान्सर्वान्नष्टसंज्ञा न्निरायुधान्[1] ॥ विगणय्य शवप्रायान्नावधीद्धर्मशास्त्रवित ॥ ३३ ॥ आत्मनः पितरं बद्धं मोचयित्वा रणाजिरे ॥ तत्पत्नीः शत्रुवशगाः सर्वाः सद्यो ॥१९८॥

१ दंशितो रथमारुह्य–इ०पा० । १ मृतप्रायान्–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्यमोचयत् ॥ ३४ ॥ पत्नीश्च मंत्रिमुख्यानां तथान्येषां पुरौकसाम् ॥ स्त्रियो बालांश्च कन्याश्च गोधनादीन्यनेकशः ॥ ३५ ॥ मोचयित्वा रिपुभयात्तमाश्वासयदाकुलः ॥ अथारिसैन्येषु चरंस्तेषां जग्राह योषितः ॥ ३६ ॥ मरुन्मनोजवानश्वान्मातंगान्गिरिसन्निभान् ॥ स्यंदनानि च रौक्माणि दासीश्च रुचिराननाः ॥ ३७ ॥ युग्मम् ॥ सर्वमाहृत्य वेगेन गृहीत्वा तद्धनं बहु ॥ मागधेशं हेमरथं निर्बबंध पराजितम् ॥ ३८ ॥ तन्मंत्रिणश्च भूपांश्च तत्र मुख्यांश्च नायकान् ॥ गृहीत्वा तरसा बद्ध्वा पुरीं प्रावेशयद्द्रुतम् ॥ ३९ ॥ पूर्वं ये समरे भग्ना विवृत्ताः सर्वतोदिशम् ॥ ते मंत्रिमुख्या विश्वस्ता नायकाश्च समाययुः ॥ ४० ॥ कुमारविक्रमं दृष्ट्वा सर्वे विस्मितमानसाः ॥ तं मेनिरे सुरश्रेष्ठं कारणादागतं भुवम् ॥ ॥ ४१ ॥ अहो नः सुमहाभाग्यमहो नस्तपसः फलम् ॥ केनाप्यनेन वीरेण मृताः संजीविताः खलु ॥ ४२ ॥ एष किं योगसिद्धो वा तपःसिद्धोऽथवाऽमरः ॥ अमानुषमिदं कर्म यदनेन कृतं महत् ॥ ४३ ॥ नूनमस्य भवेन्माता सा गौरीति शिवः पिता ॥ अक्षौहिणीनां नवकं जिगायानंतशक्तिधृक् ॥ ४४ ॥ इत्याश्चर्ययुतैर्हृष्टैः प्रशंसद्भिः परस्परम् ॥ पृष्टोऽमात्यजनेनासावात्मानं प्राह तत्त्वतः ॥ ४५ ॥ समागतं स्वपितरं विस्मयाह्लादविप्लुतम् ॥ मुंचंतमानंदजलं ववंदे प्रेमविह्वलः ॥ ४६ ॥ स राजा निजपुत्रेण प्रणयादभिवंदितः ॥ आश्लिष्य गाढं तरसा बभाषे प्रेमकातरः ॥ ४७ ॥ कस्त्वं देवो मनुष्यो वा गन्धर्वो वा महामते ॥ का माता जनकः को वा को देशस्तव नाम किम् ॥ ४८ ॥ कस्मान्नः शत्रुभिर्बद्धान्मृतानिव हतौजसः ॥ कारुण्यादिह संप्राप्य सपत्नीकान्मुमोच यः ॥ ४९ ॥ कुतो लब्धमिदं शौर्यं धैर्यं तेजो बलोन्नतिः ॥ जिगीषसीव लोकांस्त्रीन्सदेवासुरमानुषान् ॥ ५० ॥ अपि जन्मसहस्रेण तवानृण्यं महौजसः ॥ कर्तुं नाहं समर्थोऽस्मि सहैभिर्दारबांधवैः ॥५१॥ इमान्पुत्रानिमाः पत्नीरिदं राज्यमिदं पुरम् ॥ सर्वं विहाय मच्चित्तं त्वय्येव प्रेमबंधनम् ॥५२॥ सर्वं कथय मे तात मत्प्राणपरिरक्षक ॥ एतासां मम पत्नीनां त्वदधीनं हि जीवितम् ॥ ५३ ॥ ॥ सूत उवाच ॥ ॥ इति पृष्टः स भद्रायुः स्वपित्रा तमभाषत ॥ एष वैश्यसुतो राजन्सुनयो नाम मत्सखा ॥ ५४ ॥ अहमस्य गृहे रम्ये वसामि सहमातृकः ॥ भद्रायुर्नाम मद्वृत्तं पश्चाद्विज्ञापयामि ते ॥ ५५ ॥ पुरं प्रविश्य भद्रं ते सदारः ससुहृज्जनः ॥ त्यक्त्वा भयमरातिभ्यो विहरस्व यथासुखम् ॥ ५६ ॥ नैतान्मुंच रिपूंस्तावद्यावदागमनं मम ॥ अहमद्य गमिष्यामि शीघ्रमात्मनिवेशनम् ॥ ५७ ॥ इत्युक्त्वा नृपमामंत्र्य भद्रायुर्नृपनंदनः ॥ आजगाम स्वभवनं मात्रे सर्वं न्यवेदयत् ॥ ५८॥ सापि हृष्टा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वतनयं परिरेभेऽश्रुलोचना ॥ स च वैश्यपतिः प्रेम्णा परिष्वज्याभ्यपूजयत् ॥ ५९ ॥ वज्रबाहुश्च राजेंद्रः प्रविष्टो निजमंदिरम् ॥ स्त्रीपुत्रामात्य सहितः प्रहर्षमतुलं ययौ ॥ ६० ॥ तस्यां निशायां व्युष्टायामृषभो योगिनां वरः ॥ चंद्रांगदं समागत्य सीमंतिन्याः पतिं नृपम् ॥ ६१ ॥ भद्रायुषः समुत्पत्तिं तस्य कर्माण्यमानुषम् ॥ आवेद्य रहसि प्रेम्णा त्वत्सुतां कीर्तिमालिनीम् ॥ ६२ ॥ भद्रायुषे प्रयच्छेति बोधयित्वा च नैषधम् ॥ ऋषभो निर्जगामाथ देशकालार्थतत्त्ववित् ॥ ६३ ॥ विशेषकम् ॥ अथ चंद्रांगदो राजा मुहूर्ते मंगलोचिते ॥ भद्रायुषं समाहूय प्रायच्छत्कीर्त्तिमालिनीम् ॥ ६४ ॥ कृतोद्वाहः स राजेंद्रतनयः सह भार्यया ॥ हेमासनस्थः शुशुभे रोहिण्येव निशाकरः ॥ ६५ ॥ वज्रबाहुं तत्पितरं समाहूय स नैषधः ॥ पुरं प्रवेश्य सामात्यः प्रत्युद्गम्याभ्यपूजयत् ॥ ६६ ॥ तत्रापश्यत्कृतोद्वाहं भद्रायुषमरिंदमम् ॥ पादयोः पतितं प्रेम्णा हर्षात्तं परिषस्वजे ॥ ॥ ६७ ॥ एष मे प्राणदो वीर एष शत्रुनिषूदनः ॥ अथाप्यज्ञातवंशोऽयं मयानंतपराक्रमः ॥ ६८ ॥ एष ते नृप जामाता चंद्रांगद महाबलः ॥ अस्य वंशमथोत्पत्तिं श्रोतुमिच्छामि तत्त्वतः ॥ ६९ ॥ इत्थं दशार्णराजेन प्रार्थितो निषधाधिपः ॥ विविक्त उपसंगम्य प्रहसन्निदमब्रवीत् ॥ ७० ॥ एष ते तनयो राजञ्छैशवे रोगपीडितः ॥ त्वया वने परित्यक्तः सह मात्रा रुजार्तया ॥ ७१ ॥ परिभ्रमंती विपिने सा नारी शिशुनामुना ॥ दैवाद्वैश्यगृहं प्राप्ता तेन वैश्येन रक्षिता ॥ ७२ ॥ अथासौ बहुरोगार्तो मृतस्तव कुमारकः ॥ केनापि योगिराजेन मृतः संजीवितः पुनः ॥ ७३ ॥ ऋषभाख्यस्य तस्यैव प्रभावाच्छिवयोगिनः ॥ रूपं च देवसदृशं प्राप्तौ मातृकुमारकौ ॥ ७४ ॥ तेन दत्तेन खड्गेन शंखेनं रिपुघातिना ॥ जिगाय समरे शत्रूञ्छिववर्माभिरक्षितः ॥ ७५ ॥ द्विषट्सहस्रनागानां बलमेको बिभर्त्यसौ ॥ सर्वविद्यासु निष्णातो मम जामातृतां गतः ॥ ७६ ॥ अत एनं समादाय मातरं चास्य सुव्रताम् ॥ गच्छस्व नगरीं राजन्प्राप्स्यसि श्रेय उत्तमम् ॥ ७७ ॥ इति चंद्रांगदः सर्वमाख्यायांतर्गृहे स्थिताम् ॥ तस्याग्र पत्नीमाहूय दर्शयामास भूषिताम् ॥ ७८ ॥ इत्यादि सर्वमाकर्ण्य दृष्ट्वा च स महीपतिः ॥ व्रीडितो नितरां मौढ्यात्स्वकृतं कर्म गर्हयन् ॥ ७९ ॥ प्राप्तश्च परमानन्दं तयोर्दर्शनकौतुकात् ॥ पुलकांकितसर्वांगस्तावुभौ परिषस्वजे ॥ ८० ॥ युग्मम् ॥ एवं निषधराजेन पूजितश्चाभिनन्दितः ॥ स भोजयित्वा तं सम्यक्स्वयं च सह मंत्रिभिः ॥ ८१ ॥ तामात्मनोग्रमहिषीं पुत्रं तमपि तां स्नुषाम् ॥ आदाय सपरीवारो वज्रबाहुः पुरीं ययौ ॥८२॥ स संभ्रमेण महता भद्रायुः पितृमंदिरम् ॥ संप्राप्य परमानंदं चक्रे सर्वपुरौकसाम् ॥ ८३ ॥ कालेन दिवमारूढे पितरि प्राप्तयौवनः ॥ भद्रायुः

१ समाश्लिष्य–इ० पा० । २ हठात्–इ० पा० । ३ सह–इ० पा० । ४ शंखेनारिविघातिना–इ० पा० । ५ जघान–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पृथिवीं सर्वां शशासाद्भुतविक्रमः ॥ ८४ ॥ मागधेशं हेमरथं मोचयामास बंधनात् ॥ संधाय मैत्रीं परमां ब्रह्मर्षीणां च सन्निधौ ॥ ८५ ॥ इत्थं त्रिलोकमहितां शिवयोगिपूजां कृत्वा पुरातनभवेऽपि स राजसूनुः ॥ निस्तीर्य दुःसहविपद्गणमात्तराज्यश्चंद्रांगदस्य सुतया सह साधु रेमे ॥ ८६ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मोत्तरखंडे भद्रायुविवाहकथनं नाम त्रयोदशोऽध्यायः ॥ १३ ॥ ॥ छ ॥
॥ ॥ सूत उवाच ॥ ॥ प्राप्तसिंहासनो वीरो भद्रायुः स महीपतिः ॥ प्रविवेश वनं रम्यं कदाचिद्भार्यया सह ॥ १ ॥ तस्मिन्विकसिताशोकप्रसूनवपल्लवे ॥प्रोत्फुल्लमल्लिकाखंडकूजद्भ्रमरसंकुले॥२॥नवकेसरसौरभ्यबद्धरागिजनोत्सवे॥सद्यःकोरकिताशोकतमालगहनांतरे ॥३॥ प्रसूनप्रकरानम्रमाधवीवनमंडपे॥ प्रवालकुसुमोद्द्योतचूतशाखिभिरञ्चिते ॥४॥ पुन्नागवनविभ्रांतपुंस्कोकिलविराविणि॥ वसन्तसमये रम्ये विजहार स्त्रिया सह ॥५॥ अथाविदूरे क्रोशंतौ धावंतौ द्विजदंपती ॥ अन्वीयमानौ व्याघ्रेण ददर्श नृपसत्तमः ॥ ६ ॥ पाहिपाहि महाराज हा राजन्करुणानिधे ॥ एष धावति शार्दूलो जग्धुमावां महारयः ॥ ७ ॥ एष पर्वतसंकाशः सर्वप्राणिभयंकरः ॥ यावन्न खादति प्राप्य तावन्नौ रक्ष भूपते ॥ ८ ॥ इत्थमाक्रंदितं श्रुत्वा स राजा धनुराददे ॥ तावदागत्य शार्दूलो मध्ये जग्राह तां वधूम् ॥ ९ ॥ हा नाथ नाथ हा कांत हा शंभो जगतः पते ॥ इति रोरूयमाणां तां यावज्जग्राह भीषणः ॥ १० ॥ तावत्स राजा निशितैर्भल्लैर्व्याघ्रमताडयत् ॥ न च तैर्विव्यथे किंचिद्गिरींद्र इव वृष्टिभिः ॥११॥ स शार्दूलो महासत्त्वो राज्ञोस्त्रैरकृतव्यथः ॥ बलादाकृष्य तां नारीमपाक्रामत सत्वरः ॥ १२ ॥ व्याघ्रेणापहृतां पत्नीं वीक्ष्य विप्रोऽतिदुःखितः ॥ रुरोद हा प्रिये बाले हा कांते हा पतिव्रते ॥ १३ ॥ एकं मामिह संत्यज्य कथं लोकांतरं गता ॥ प्राणेभ्योपि प्रियां त्यक्त्वा कथं जीवितुमुत्सहे ॥ १४ ॥ राजन्क ते महास्त्राणि क ते श्लाघ्यं महद्धनुः ॥ क ते द्वादशसाहस्रमहानागातिगं बलम् ॥ १५ ॥ किं ते शंखेन खड्गेन किं ते मंत्रास्त्रविद्यया ॥ किं चँ तेन प्रयत्नेन किं प्रभावेण भूयसा ॥ १६ ॥ तत्सर्वं विफलं जातं यच्चान्यत्त्वयि तिष्ठति ॥ यस्त्वं वनौकसं जंतुं निवारयितुमक्षमः ॥ १७ ॥ क्षात्रस्यायं परो धर्मः क्षताद्यत्परिरक्षणम् ॥ तस्मात्कुलोचिते धर्मे नष्टे त्वज्जीवितेन किम् ॥१८॥ आर्तानां शरणार्तानां त्राणं कुर्वंति पार्थिवाः ॥ प्राणैरर्थैश्च धर्मज्ञास्तद्विहीना मृतोपमाः ॥ १९ ॥ धनिनां दानहीनानां गार्हस्थ्याद्भिक्षुता वरा ॥ आर्तत्राणविहीनानां जीवितान्मरणं

१ अद्भुतशासनः–इ० पा० । २ त्रिलोकविहिताम्–इ०पा०। ३ प्रियया–इ० पा० । ४ चूतशाखाभिरञ्जिते–इ० पा० । ५ विराजिते–इ०पा० । ६ अन्तकम्–इ० पा० । ७ किं सत्त्वेन प्रतापेन–इ० पा० । ८ शरणार्थानाम्–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वरम् ॥ २० ॥ वरं विषादनं राज्ञो वरमग्नौ प्रवेशनम् ॥ अनाथानां प्रपन्नानां कृपणानामरक्षणात् ॥ २१ ॥ इत्थं विलपितं तस्य स्ववीर्यस्य च गर्ह
णम् ॥ निशम्य नृपतिः शोकादात्मन्येवमचिंतयत् ॥ २२ ॥ अहो मे पौरुषं नष्टमद्य दैवविपर्ययात् ॥ अद्य कीर्तिश्च मे नष्टा पातकं प्राप्तमुत्क
टम् ॥ २३ ॥ धर्मः कालोचितो नष्टो मन्दभाग्यस्य दुर्मतेः ॥ नूनं मे संपदो राज्यमायुष्यं क्षयमेष्यति ॥२४॥ अपुंसां संपदो भोगाः पुत्रदारधना
नि च ॥ दैवेन क्षणमुद्यंति क्षणादस्तं व्रजंति च ॥२५॥ अत एनं द्विजन्मानं हतदारं शुचार्दितम्॥गतशोकं करिष्यामि दत्त्वा प्राणानपि प्रियान् ॥
॥ २६ ॥ इति निश्चित्य मनसा भद्रायुर्नृपसत्तमः ॥ पतित्वा पादयोस्तस्य बभाषे परिसांत्वयन् ॥ २७ ॥ कृपां कुरु मयि ब्रह्मन्क्षत्रबंधौ हतौ
जसि ॥ शोकं त्यज महाबुद्धे दास्याम्यर्थं तवेप्सितम् ॥ २८ ॥ इदं राज्यमियं राज्ञी ममेदं च कलेवरम् ॥ त्वदधीनमिदं सर्वं किं तेऽभिलषितं वद ॥
॥ २९ ॥ ॥ ब्राह्मण उवाच ॥ ॥ किमादर्शेन चांधस्य किं गृहैर्भैक्ष्यजीविनः ॥ किं पुस्तकेन मूर्खस्य ह्यस्त्रीकस्य धनेन किम् ॥ ३० ॥
अतोऽहं गतपत्नीको भुक्तभोगो न कर्हिचित् ॥ इमां तवाग्रमहिषीं कामार्थं दीयतां मम ॥ ३१ ॥ ॥ राजोवाच ॥ ॥ ब्रह्मन्किमेष धर्मस्ते
किमेतद्गुरुशासनम् ॥ अस्वर्ग्यमयशस्यं च परदाराभिमर्शनम् ॥ ३२ ॥ दातारः संति वित्तस्य राज्यस्य गजवाजिनाम् ॥ आत्मदेहस्य वा
क्वापि न कलत्रस्य कर्हिचित् ॥३३॥ परदारोपभोगेन यत्पापं समुपार्जितम् ॥ न तत्क्षालयितुं शक्यं प्रायश्चित्तशतैरपि ॥३४॥ ॥ ब्राह्मण उवाच ॥
अपि ब्रह्मवधं घोरमपि मद्यनिषेवणम् ॥ तपसा नाशयिष्यामि किं पुनः पारदारिकम् ॥ तस्मात्प्रयच्छ मे भार्यामिमां त्वं ध्रुवमन्यथा ॥ ३५ ॥
अरक्षणाद्भयार्तानां गंतासि निरयं ध्रुवम् ॥ इति विप्रगिरा भीतश्चिंतयामास पार्थिवः ॥ अरक्षणान्महत्पापं पत्नीदानं ततो वरम् ॥ ३६ ॥
अतः पत्नीं द्विजाग्र्याय दत्त्वा निर्मुक्तकिल्बिषः ॥ सद्यो वह्निं प्रवेक्ष्यामि कीर्तिश्च निहिता भवेत् ॥ ३७ ॥ इति निश्चित्य मनसा समुज्वाल्य
हुताशनम् ॥ तं ब्राह्मणं समाहूय ददौ पत्नीं सहोदकाम् ॥ ३८ ॥ स्वयं स्नातः शुचिर्भूत्वा प्रणम्य विबुधेश्वरान् ॥ तमग्निं द्विः परिक्रम्य शिवं
दध्यौ समाहितः ॥ ३९ ॥ तमथाग्नौ पतिष्यंतं स्वपदासक्तचेतसम् ॥ प्रत्यदृश्यत विश्वेशः प्रादुर्भूतो जगत्पतिः ॥ ४० ॥ तमीश्वरं पंचवक्त्रं त्रि
नेत्रं पिनाकिनं चन्द्रकलावतंसम् ॥ आलंबितापिंगजटाकलापं मध्यंगतं भास्करकोटितेजसम् ॥ ४१ ॥ मृणालगौरं गजचर्मवाससं गंगातरंगो
क्षितमौलिदेशम् ॥ नागेंद्रहारावलिकंकणोर्मिकाकिरीटकोट्यंगदकुंडलोज्ज्वलम् ॥ ४२ ॥ त्रिशूलखट्वांगकुठारचर्ममृगाभयेष्टार्थपिनाकहस्तम् ॥

१ मूढस्य–इ० पा० । २ प्रतिषेधाय–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वृषोपरिस्थं शितिकंठमीशं प्रोद्भूतमग्रे नृपतिर्ददर्श ॥ ४३ ॥ अथांबराद्भुतं पेतुर्दिव्याः कुसुमवृष्टयः ॥ प्रणेदुर्देवतूर्याणि देवाश्च ननृतुर्जगुः ॥ ४४ ॥
तत्राजग्मुर्नारदाद्याः सनकाद्याः सुरर्षयः ॥ इन्द्रादयश्च लोकेशास्तथा ब्रह्मर्षयोऽमलाः ॥ ४५ ॥ तेषां मध्ये समासीनो महादेवः सहोमया ॥
ववर्ष करुणासारं भक्तिनम्रे महीपतौ ॥ ४६ ॥ तद्दर्शनानंदविजृंभिताशयः प्रवृद्धबाष्पांबुपरिप्लुतांगः ॥ प्रहृष्टरोमा गलगद्गदाक्षरं तुष्टाव गीर्भिर्मु
कुलीकृतांजलिः ॥ ४७ ॥ ॥ राजोवाच ॥ ॥ नतोस्म्यहं देवमनाथमव्ययं प्रधानमव्यक्तगुणं महांतम् ॥ अकारणं कारणकारणं परं शिवं
चिदानंदमयं प्रशांतम् ॥ ४८ ॥ त्वं विश्वसाक्षी जगतोऽस्य कर्त्ता विरूढधामा हृदि सन्निविष्टः ॥ अतो विचिन्वंति विधौ विपश्चितो योगैरनेकैः
कृतचित्तरोधैः ॥ ४९ ॥ एकात्मतां भावयतां त्वमेको नानाधियां यस्त्वमनेकरूपः ॥ अतींद्रियं साक्ष्युदयास्तविभ्रमं मनःपथात्संह्रियते पदं
ते ॥ ५० ॥ तं त्वां दुरापं वचसो धियाश्च व्यपेतमोहं परमात्मरूपम् ॥ गुणैकनिष्ठाः प्रकृतौ विलीनाः कथं वपुः स्तोतुमलं गिरो मे ॥ ५१ ॥
तथापि भक्त्याश्रयतामुपेयुस्तवांघ्रिपद्मं प्रणतार्तिभंजनम् ॥ सुघोरसंसारदवाग्निपीडितो भजामि नित्यं भवभीतिशांतये ॥ ५२ ॥ नमस्ते देव
देवाय महादेवाय शंभवे ॥ नमस्त्रिमूर्तिरूपाय सर्गस्थित्यंतकारिणे ॥ ५३ ॥ नमो विश्वादिरूपाय विश्वप्रथमसाक्षिणे ॥ नमः सन्मात्रतत्त्वाय
बोधानंदघनाय च ॥ ५४ ॥ सर्वक्षेत्रनिवासाय क्षेत्रभिन्नात्मशक्तये ॥ अशक्ताय नमस्तुभ्यं शक्ताभासाय भूयसे ॥ ५५ ॥ निराभासाय नित्याय
सत्यज्ञानांतरात्मने ॥ विशुद्धाय विदूराय विमुक्ताशेषकर्मणे ॥ ५६ ॥ नमो वेदांतवेद्याय वेदमूलनिवासिने ॥ नमो विविक्तचेष्टाय निवृत्तगुण
वृत्तये ॥ ५७ ॥ नमः कल्याणवीर्याय कल्याणफलदायिने ॥ नमोऽनंताय महते शांताय शिवरूपिणे ॥ ५८ ॥ अघोराय सुघोराय घोराघौघ
विदारिणे ॥ भर्गाय भवबीजानां भंजनाय गरीयसे ॥ नमो विध्वस्तमोहाय विशदात्मगुणाय च ॥ ५९ ॥ पाहि मां जगतां नाथ पाहि शंकर
शाश्वत ॥ पाहि रुद्र विरूपाक्ष पाहि मृत्युंजयाव्यय ॥ ६० ॥ शम्भो शशांककृतशेखर शांतमूर्ते गौरीश गोपतिनिशापहुताशनेत्र ॥ गंगा
धरांधकविदारण पुण्यकीर्ते भूतेश भूधरनिवास सदा नमस्ते ॥ ६१ ॥ ॥ सूत उवाच ॥ ॥ एवं स्तुतः स भगवान्राज्ञा देवो महेश्वरः ॥
प्रसन्नः सह पार्वत्या प्रत्युवाच दयानिधिः ॥ ६२ ॥ ॥ ईश्वर उवाच ॥ ॥ राजंस्ते परितुष्टोऽस्मि भक्त्या पुण्यस्तवेन च ॥ अनन्यचेता

१ स्तूयमानाः–इ० पा० । २ गिरिजापतिं शिवम्–इ० पा० । ३ चिदानन्दघनप्रकाशम्–इ०पा० । ४ विमूढधामा, विगूढधामा–इ० च पा० । ५ त्रिमूर्तिभेदाय–इ० पा० । ६ अंगजवि
दारण–इ० पा० । ७ महादेव–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यो नित्यं सदा मां पर्यपूजयः ॥ ६३ ॥ तव भावपरीक्षार्थं द्विजो भूत्वाहमागतः ॥ व्याघ्रेण या परिग्रस्ता सैषा देवी गिरींद्रजा ॥ ६४ ॥ व्याघ्रो मायामयो यस्ते शरैरक्षतविग्रहः ॥ धीरतां द्रष्टुकामस्ते पत्नीं याचितवानहम् ॥ ६५ ॥ अस्याश्च कीर्तिमालिन्यास्तव भक्त्या च मानद ॥ तुष्टोऽहं संप्रयच्छामि वरं वरय दुर्लभम् ॥ ६६ ॥ ॥ राजोवाच ॥ ॥ एष एव वरो देव यद्भवान्परमेश्वरः ॥ भवतापपरीतस्य मम प्रत्यक्षतां गतः ॥ ६७ ॥ नान्यं वरं वृणे देव भवतो वरदर्षभात् ॥ अहं च सेयं सा राज्ञी मम माता च मत्पिता ॥ ६८ ॥ वैश्यः पद्माकरो नाम तत्पुत्रः सुनयाभिधः ॥ सर्वानेतान्महादेव सदा त्वत्पार्श्वगान्कुरु ॥ ६९ ॥ ॥ सूत उवाच ॥ ॥ अथ राज्ञी महाभागा प्रणता कीर्तिमालिनी ॥ भक्त्या प्रसाद्य गिरिशं ययाचे वरमुत्तमम् ॥ ७० ॥ ॥ राज्युवाच ॥ ॥ चंद्रांगदो मम पिता माता सीमंतिनी च मे ॥ तयोर्याचे महादेव त्वत्पार्श्वे सन्निधिं सदा ॥ ७१ ॥ एवमस्त्विति गौरीशः प्रसन्नो भक्तवत्सलः ॥ तयोः कामवरं दत्त्वा क्षणादंतर्हितोऽभवत् ॥ ७२ ॥ सोपि राजा सुरैः सार्धं प्रसादं प्राप्य शूलिनः ॥ सहितः कीर्तिमालिन्या बुभुजे विषयान्प्रियान् ॥ ७३ ॥ कृत्वा वर्षायुतं राज्यमव्याहतबलोन्नतिः ॥ राज्यं पुत्रेषु विन्यस्य भेजे शंभोः परं पदम् ॥ ७४ ॥ चंद्रांगदोपि राजेंद्रो राज्ञी सीमंतिनी च सा ॥ भक्त्या संपूज्य गिरिशं जग्मतुः शांभवं पदम् ॥ ७५ ॥ एतत्पवित्रमघनाशकरं विचित्रं शम्भोर्गुणानुकथनं परमं रहस्यम् ॥ यः श्रावयेद्बुधजनान्प्रयतः पठेद्वा संप्राप्य भोगविभवं शिव मेति सोंते ॥ ७६ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मोत्तरखण्डे भद्रायुशिवप्रसादकथनं नाम चतुर्दशोऽध्यायः ॥ ॥ १४ ॥ ॥ सूत उवाच ॥ ॥ ऋषभस्यानुभावोयं वर्णितः शिवयोगिनः ॥ अथान्यस्यापि वक्ष्यामि प्रभावं शिवयोगिनः ॥ १ ॥ भस्मनश्चापि माहात्म्यं वर्णयामि समासतः ॥ कृतकृत्या भविष्यंति यच्छ्रुत्वा पापिनो जनाः ॥ २ ॥ अस्त्येको वामदेवाख्यः शिवयोगी महा तपाः ॥ निर्द्वंद्वो निर्गुणः शांतो निःसंगः समदर्शनः ॥ ३ ॥ आत्मारामो जितक्रोधो गृहदारविवर्जितः ॥ अतर्कितगतिर्मौनी संतुष्टो निष्प रिग्रहः ॥ ४ ॥ भस्मोद्धूलितसर्वांगो जटामंडलमंडितः ॥ वल्कलाजिनसंवीतो भिक्षामात्रपरिग्रहः ॥ ५ ॥ स एकदा चरंल्लोके सर्वानुग्रहतत्परः ॥ क्रौंचारण्यं महाघोरं प्रविवेश यदृच्छया ॥ ६ ॥ तस्मिन्निर्मनुजेऽरण्ये तिष्ठत्येकोऽतिभीषणः ॥ क्षुत्तृषाकुलितो नित्यं यः कश्चिद्ब्रह्मराक्षसः ॥ ७ ॥ तं प्रविष्टं शिवात्मानं स दृष्ट्वा ब्रह्मराक्षसः ॥ अभिदुद्राव वेगेन जग्धुं क्षुत्परिपीडितः ॥ ८ ॥ व्यात्ताननं महाकायं भीमदंष्ट्रं भयानकम् ॥ तमा

१ तथान्यस्यापि—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यांतमभिप्रेक्ष्य योगीशो न चचाल सः ॥ ९ ॥ अथाभिद्रुत्य तरसा स घोरो वनगोचरः ॥ दोर्भ्यां निष्पीड्य जग्राह निष्कंपं शिवयोगिनम् ॥ १० ॥ तदंगस्पर्शनादेव सद्यो विध्वस्तकिल्बिषः ॥ स ब्रह्मराक्षसो घोरो विषण्णः स्मृतिमाययौ ॥ ११ ॥ यथा चिंतामणिं स्पृष्ट्वा लोहं कांचनतां व्रजेत् ॥ यथा जंबूनदीं प्राप्य मृत्तिका स्वर्णतां व्रजेत् ॥ १२ ॥ यथा मानसमभ्येत्य वायसा यांति हंसताम् ॥ यथामृतं सकृत्पीत्वा नरो देवत्वमाप्नुयात् ॥ ॥ १३ ॥ तथैव हि महात्मानो दर्शनस्पर्शनादिभिः ॥ सद्यः[1] पुनंत्यघोपेतान्सत्संगो दुर्लभो ह्यतः ॥ १४ ॥ यः पूर्वं क्षुत्पिपासार्तो घोरात्मा विपिने चरः ॥ स सद्यस्तृप्तिमायातः पूर्णानंदो बभूव ह ॥ १५ ॥ तद्गात्रलग्नसितभस्मकणानुविद्धः सद्यो विधूतघनपापतमःस्वभावः ॥ संप्राप्तपूर्वभव संस्मृतिरुग्रकार्यस्तत्पादपद्मयुगुले प्रणतो बभाषे ॥ १६ ॥ ॥ राक्षस उवाच ॥ ॥ प्रसीद मे महायोगिन्प्रसीद करुणानिधे ॥ प्रसीद भवतप्ता नामानंदामृतवारिधे ॥ १७ ॥ क्वाहं पापमतिर्घोरः सर्वप्राणिभयंकरः ॥ क्व ते महानुभावस्य दर्शनं करुणात्मनः ॥ १८ ॥ उद्धरोद्धर मां घोरे पतितं दुःखसागरे ॥ तव सन्निधिमात्रेण महानंदोऽभिवर्धते ॥ १९ ॥ ॥ वामदेव[2] उवाच ॥ ॥ कस्त्वं वनेचरो घोरो राक्षसोऽत्र किमास्थितः ॥ कथमेतां महाघोरां कष्टां गतिमवाप्तवान् ॥ २० ॥ ॥ राक्षस उवाच ॥ ॥ राक्षसोऽहमितः पूर्वं पंचविंशतिमे भवे ॥ गोप्ता यवनराष्ट्रस्य दुर्जयो नाम वीर्यवान् ॥ २१ ॥ सोऽहं दुरात्मा पापीयान्स्वैरचारी मदोत्कटः ॥ दंडधारी दुराचारः प्रचंडो[3] निर्घृणः खलः ॥ २२ ॥ युवा बहुकलत्रोऽपि कामासक्तोऽजितेंद्रियः ॥ इमां पापीयसीं चेष्टां पुनरेकां गतोऽस्म्यहम् ॥ २३ ॥ प्रत्यहं नूतनामन्यां नारीं भोक्तुमनाः सदा ॥ आहृताः सर्वदेशेभ्यो नार्यो भृत्यैर्मदाज्ञया ॥ २४ ॥ भुक्त्वाभुक्त्वा परित्यक्तामेकामेकां दिनेदिने ॥ अन्तर्गृहेषु संस्थाप्य पुनरन्याः स्त्रियो धृताः ॥ २५ ॥ एवं स्वराष्ट्रात्परराष्ट्रतश्च देशाकरग्रामपुरव्रजेभ्यः ॥ आहृत्य नार्यो रमिता दिनेदिने भुक्ता पुनः कापि न भुज्यते मया ॥ २६ ॥ अथान्यैश्च न भुज्यंते मया भुक्तास्तथा स्त्रियः ॥ अन्तर्गृहेषु निहिताः[4] शोचंते च दिवानिशम् ॥ २७ ॥ ब्रह्मविट्क्षत्रशूद्राणां यदा नार्यो मया हृताः ॥ मम राज्ये स्थिता विप्राः सह दारैः प्रदुद्रुवुः ॥ २८ ॥ सभर्तृकाश्च कन्याश्च विधवांश्च[5] रजस्वलाः ॥ आहृत्य नार्यो रमिता मया कामहतात्मना ॥ २९ ॥ त्रिशतं द्विजनारीणां राजस्त्रीणां चतुःशतम् ॥ षट्शतं वैश्यनारीणां सहस्रं शूद्रयोषिताम् ॥ ३० ॥ शतं चांडालनारीणां पुलिंदीनां सहस्रकम् ॥ शैलूषीणां पंचशतं रजकीनां चतुःशतम् ॥ ३१ ॥ असंख्या वारमुख्याश्च मया भुक्ता दुरात्मना ॥ तथापि मयि कामस्य न

१ सन्तः–इ० पा० । २ शिवयोग्युवाच–इ० पा० । ३ प्रजाघ्नः–इ०पा० । ४ वनिताः–इ०पा० । ५ विवाह्याश्च–इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

तृप्तिः समजायत ॥ ३२ ॥ एवं दुर्विषयासक्तं मत्तं पानरतं सदा ॥ यौवनेपि महारोगा विविशुर्यक्ष्मकादयः ॥ ३३ ॥ रोगार्दितोऽन
पत्यश्च शत्रुभिश्चापि पीडितः ॥ त्यक्तोमात्यैश्च भृत्यैश्च मृतोऽहं स्वेन कर्मणा ॥ ३४ ॥ आयुर्विनश्यत्ययशो विवर्धते भाग्यं क्षयं यात्यतिदुर्गतिं
व्रजेत् ॥ स्वर्गाच्च्यवंते पितरः पुरातना धर्मव्यपेतस्य नरस्य निश्चितम् ॥ ३५ ॥ अथाहं किंकरैर्याम्यैर्नीतो वैवस्वतालयम् ॥ ततोऽहं नरके घोरे
तत्कुण्डे विनिपातितः ॥ ३६ ॥ तत्राहं नरके घोरे वर्षाणामयुतत्रयम् ॥ रेतः पिबन्पीड्यमानो न्यवसं यमकिंकरैः ॥ ३७ ॥ ततः पापावशेषेण
पिशाचो निर्जने वने ॥ सहस्रशिश्नः संजातो नित्यं क्षुत्तृषयाकुलः ॥ ३८ ॥ पैशाचीं गतिमाश्रित्य नीतं दिव्यं शरच्छतम् ॥ द्वितीयेहं भवे
जातो व्याघ्रः प्राणिभयंकरः ॥ ३९ ॥ तृतीयेऽजगरो घोरश्चतुर्थेऽहं भवे वृकः ॥ पंचमे विड्वराहश्च षष्ठेऽहं कृकलासकः ॥ ४० ॥ सप्तमेऽहं सारमेयः
सृगालश्चाष्टमे भवे ॥ नवमे गवयो भीमो मृगोऽहं दशमे भवे ॥ ४१ ॥ एकादशे मर्कटश्च गृध्रोऽहं द्वादशे भवे ॥ त्रयोदशेऽहं नकुलो वायसश्च चतु
र्दशे ॥ ४२ ॥ अच्छभल्लः पंचदशे षोडशे वनकुक्कुटः॥गर्दभोऽहं सप्तदशे मार्जारोष्टादशे भवे ॥४३॥ एकोनविंशे मण्डूकः कूर्मो विंशतिमे भवे ॥
एकविंशे भवे मत्स्यो द्वाविंशे मूषकोऽभवम् ॥ ४४ ॥ उलूकोहं त्रयोविंशे चतुर्विंशे वनद्विपः ॥ पंचविंशे भवे चास्मिञ्जातोहं ब्रह्मराक्षसः ॥ ४५ ॥
क्षुत्परीतो निराहारो वसाम्यत्र महावने ॥ इदानीमागतं दृष्ट्वा भवंतं जग्धुमुत्सुकः ॥ त्वद्देहस्पर्शमात्रेण जाता पूर्वभवस्मृतिः ॥ ४६ ॥ गतजन्म
सहस्राणि स्मराम्यद्य त्वदंतिके ॥ निर्वेदश्च परो जातः प्रसन्नं हृदयं च मे ॥ ४७ ॥ ईदृशोऽयं प्रभावस्ते कथं लब्धो महामते ॥ तपसा वापि तीव्रेण
किमु तीर्थनिषेवणात् ॥ ४८ ॥ योगेन देवशक्त्या वा मंत्रैर्वानंतशक्तिभिः ॥ तत्त्वतो ब्रूहि भगवंस्त्वामहं शरणं गतः ॥ ४९ ॥ ॥ वामदेव
उवाच ॥ ॥ एष मद्गात्रलग्नस्य प्रभावो भस्मनो महान् ॥ यत्संपर्कात्तमोवृत्तेस्तवेयं मतिरुत्तमा ॥ ५० ॥ को वेद भस्मसामर्थ्यं महादेवा
दृते परः ॥ दुर्विभाव्यं यथा शंभोर्माहात्म्यं भस्मनस्तथा ॥ ५१ ॥ पुरा भवादृशः कश्चिद्ब्राह्मणो धर्मवर्जितः ॥ द्राविडेषु स्थितो मूढः कर्मणा
शूद्रतां गतः ॥ ५२ ॥ चौर्यवृत्तिर्नैष्कृतिको वृषलीरतिलालसः॥ कदाचिज्जारतां प्राप्तः शूद्रेण निहतो निशि ॥ ५३ ॥ तच्छवस्य बहिर्ग्रामा
त्क्षिप्तस्य प्रेतकर्मणः ॥ चचार सारमेयोंऽगे भस्मपादो यदृच्छया ॥ ५४ ॥ अथ तं नरके घोरे पतितं शिवकिंकराः॥ निन्युर्विमानमारोप्य प्रसह्य
यमकिंकरान् ॥ ५५ ॥ शिवदूतान्समभ्येत्य यमोपि परिपृष्टवान् ॥ महापातककर्त्तारं कथमेनं निनीषथ ॥ ५६ ॥ अथोचुः शिवदूतास्ते पश्यास्य

१ अयुतद्वयम्–इ०पा० । २ ऊनैकाविंशतिभवे मकरोऽहं सरित्पतौ । दशद्वयभवे कर्मस्तत्रैव च भवाम्यहम् ॥ सैकविंशे भवे ह्युष्ट्रो द्वाविंशेऽहं च मूषकः–इ० पा० पुस्तकान्तरे ।

CC-0. In Public Domain. Digitization by eGangotri

शवविग्रहम् ॥ वक्षोललाटदोर्मूलान्यंकितानि सुभस्मना ॥ ५७ ॥ अत एनं समानेतुमागताः शिवशासनात् ॥ नास्मान्निषेद्धुं शक्तोसि मास्त्वत्र तव संशयः ॥ ५८ ॥ इत्याभाष्य यमं शंभोर्दूतास्तं ब्राह्मणं ततः ॥ पश्यतां सर्वलोकानां निन्युर्लोकमनामयम् ॥ ५९ ॥ तस्मादशेषपापानां सद्यः संशोधनं परम् ॥ शंभोर्विभूषणं भस्म सततं ध्रियते मया ॥ ६० ॥ इत्थं निशम्य माहात्म्यं भस्मनो ब्रह्मराक्षसः ॥ विस्तरेण पुनः श्रोतु मौत्कंठ्यादित्यभाषत ॥ ६१ ॥ साधुसाधु महायोगिन्धन्योस्मि तव दर्शनात् ॥ मां विमोचय धर्मात्मन्घोरादस्मात्कुजन्मनः ॥ ६२ ॥ किंचि दस्तीह मे भाति मया पुण्यं पुराकृतम् ॥ अतोहं त्वत्प्रसादेन मुक्तोस्म्यद्य द्विजोत्तम ॥ ६३ ॥ एकस्मै शिवभक्ताय तस्मिन्पार्थिवजन्मनि ॥ भूमिर्वृत्तिकरी दत्ता सस्यारामान्विता मया ॥ ६४ ॥ यमेनापि तदैवोक्तं पंचविंशतिमे भवे ॥ कस्यचिद्योगिनः संगान्मोक्ष्यसे संसृतेरिति ॥ ६५ ॥ तदद्य फलितं पुण्यं यत्किंचित्प्राग्भवार्जितम् ॥ [2]अतो निर्मनुजारण्ये संप्राप्तस्तव संगमः ॥ ६६ ॥ अतो मां घोरपाप्मानं संसरंतं कुजन्मनि ॥ समुद्धर कृपासिन्धो दत्त्वा भस्म समंत्रकम् ॥ ६७ ॥ कथं धार्यमिदं भस्म को मंत्रः को विधिः शुभः ॥ कः कालः कश्च वा देशः सर्वं कथय मे गुरो ॥ ६८ ॥ भवादृशा महात्मानः सदा लोकहिते रताः ॥ नात्मनो हितमिच्छंति कल्पवृक्षसधर्मिणः ॥ ६९ ॥ ॥ सूत उवाच ॥ ॥ इत्युक्त स्तेन योगीशो घोरेण वनचारिणा ॥ भूयोपि भस्ममाहात्म्यं वर्णयामास तत्त्ववित्[3] ॥ ७० ॥ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मोत्तरखण्डे भस्ममाहात्म्यकथनं नाम पंचदशोऽध्यायः ॥ १५ ॥ छ ॥ सूत उवाच ॥ ॥ शृणुध्वं मुनयः श्रेष्ठा वामदेवस्य भाषितम् ॥ १ ॥ ॥ वामदेव उवाच ॥ ॥ पुरा मंदरशैलेंद्रे नानाधातुविचित्रिते ॥ नानासत्वसमाकीर्णे नानाद्रुमलताकुले ॥ २ ॥ कालाग्निरुद्रो भगवान्कदाचिद्विश्ववंदितः ॥ समाससाद भूतेशः स्वेच्छया परमेश्वरः ॥ ३ ॥ समंतात्समुपातिष्ठन्रुद्राणां शतकोटयः ॥ तेषां मध्ये समासीनो देवदेवस्त्रिलोचनः ॥ ४ ॥ तत्रागच्छत्सुरश्रेष्ठो देवैः सह पुरंदरः ॥ तथाग्निर्वरुणो वायुर्यमो वैवस्वतस्तथा ॥ ५ ॥ गंधर्वाश्चित्र सेनाद्याः खेचराः पन्नगादयः ॥ विद्याधराः किंपुरुषाः सिद्धाः साध्याश्च गुह्यकाः ॥ ६ ॥ ब्रह्मर्षयो वसिष्ठाद्या नारदाद्याः सुरर्षयः ॥ पितरश्च महात्मानो दक्षाद्याश्च प्रजेश्वराः ॥ ७ ॥ उर्वश्याद्याश्चाप्सरसश्चंडिकाद्याश्च मातरः ॥ आदित्या वसवो दस्रौ विश्वेदेवा महौजसः ॥ ८ ॥ अथान्ये भूतपतयो लोकसंहरणे क्षमाः ॥ महाकालश्च नंदी च तथावै शंखपालकौ ॥ ९ ॥ वीरभद्रो महातेजाः शंकुकर्णो महाबलः ॥ घंटाकर्णश्च दुर्धर्षो मणिभद्रो वृकोदरः ॥ १० ॥ कुंडोदरश्च विकटास्तथा कुंभोदरो बली ॥ मंदोदरः कर्णधारः केतुर्भृंगीरिटिस्तथा ॥ ११ ॥ भूतनाथा

१ मोक्ष्येऽस्माद्भवबंधनात्—इ० पा० । २ यतः—इ०पा० । ३ तत्त्वतः—इ० पा० । ४ शंकरपार्श्वगौ—इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

स्तथान्ये च महाकाया महौजसः ॥ कृष्णवर्णास्तथा श्वेताः केचिन्मंडूकसं[1]प्रभाः ॥ १२ ॥ हरिता धूसरा धूम्राः कर्बुराः पीतलो
हिताः॥ चित्रवर्णा विचित्रांगाश्चित्रलीला मदोत्कटाः ॥ १३ ॥ नानायुधोद्यतकरा नानावाहनभूषणाः ॥ केचिद्व्याघ्रमुखाः केचित्सूकरास्या मृगा
ननाः ॥ १४ ॥ केचिच्च नक्रवदनाः सारमेयमुखाः परे ॥ सृगालवदनाश्चान्य उष्ट्राभवदनाः परे ॥ १५ ॥ केचिच्छरभभेरुंडसिंहा[2]श्चोष्ट्रबकाननाः ॥
एकवक्त्रा द्विवक्त्राश्च त्रिमुखा[3]श्चैव निर्मुखाः ॥ १६ ॥ एकहस्तास्त्रिहस्ताश्च पंचहस्तास्त्वहस्तकाः ॥ अपादा बहुपादाश्च बहुकर्णैककर्णकाः ॥१७॥
एकनेत्राश्चतुर्नेत्रा दीर्घाः केचन वामनाः ॥ समंतात्परिवार्येशं भूतनाथमुपासते ॥ १८ ॥ अथागच्छन्महातेजा मुनीनां प्रवरः सुधीः ॥ सनत्कु
मारो धर्मात्मा तं द्रष्टुं जगदीश्वरम् ॥ १९ ॥ तं देवदेवं विश्वेशं सूर्यकोटिसमप्रभम् ॥ महाप्रलयसंक्षुब्धसप्तार्णवघनस्वनम् ॥ २० ॥ संवर्त्ताग्निसमा
टोपं जटामंडलशोभितम् ॥ अक्षीणभालनयनं ज्वालाम्लानमुखत्विषम् ॥ २१ ॥ प्रदीप्तचूडामणिना शशिखंडेन शोभितम् ॥ तक्षकं वामकर्णेन
दक्षिणेन च वासुकिम् ॥ २२ ॥ बिभ्राणं कुंडलयुगं नीलरत्नमहाहनुम् ॥ नीलग्रीवं महाबाहुं नागहारविराजितम् ॥ २३ ॥ फणिराजपरिभ्राजत्कंक
णांगदमुद्रिकम् ॥ अनंतगुणसाहस्रमणिरंजितमेखलम् ॥ २४ ॥ व्याघ्रचर्मपरीधानं घंटादर्पणभूषितम् ॥ कर्कोटकमहापद्मधृतराष्ट्रधनंजयैः ॥२५॥
कूजन्नूपुरसंघुष्टपादपद्मविराजितम् ॥ प्रासतोमरखड्वांगशूलटंकधनुर्धरम् ॥ २६ ॥ अप्रधृष्यमनिर्देश्यमचिंत्याकारमीश्वरम् ॥ रत्नसिंहासनारूढं प्रण
नाम महामुनिः ॥ २७ ॥ तं भक्तिभारोच्छ्वसितांतरात्मा संस्तूय वाग्भिः श्रुतिसंमिताभिः ॥ कृतांजलिः प्रश्रयनम्रकंधरः पप्रच्छ धर्मानखिलान्मु
भप्रदान् ॥ २८ ॥ यान्यानपृच्छत मुनिस्तांस्तान्धर्मानशेषतः ॥ प्रोवाच भगवान्रुद्रो भूयो मुनिरपृच्छत ॥ २९ ॥ ॥ सनत्कुमार उवाच ॥ ॥
श्रुतास्ते भगवन्धर्मास्त्वन्मुखान्मुक्तिहेतवः ॥ यैर्मुक्तपापा मनुजास्तरिष्यंति भवार्णवम् ॥ ३० ॥ अथापरं विभो धर्ममल्पायासं महाफलम् ॥
ब्रूहि कारुण्यतो मह्यं सद्यो मुक्तिप्रदं नृणाम् ॥ ३१ ॥ अभ्यासबहुला धर्माः शास्त्रदृष्टाः सहस्रशः ॥ सम्यक्संसेविताः कालात्सिद्धिं यच्छंति वा
न वा ॥ ३२ ॥ अतो लोकहितं गुह्यं भुक्तिमुक्त्योश्च साधनम् ॥ धर्मं विज्ञातुमिच्छामि त्व[4]त्प्रसादान्महेश्वर ॥ ३३ ॥ ॥ श्रीरुद्र उवाच ॥ ॥
सर्वेषामपि धर्माणामुत्तमं श्रुतिचोदितम् ॥ रहस्यं सर्वजंतूनां यत्त्रिपुंड्रस्य धारणम् ॥ ३४ ॥ ॥ सनत्कुमार उवाच॥ ॥ त्रिपुंड्रस्य विधिं ब्रूहि
भगवञ्जगतां पते ॥ तत्त्वतो ज्ञातुमिच्छामि त्वत्प्रसादान्महेश्वर ॥ ३५ ॥ कति स्थानानि किं द्रव्यं का शक्तिः का च देवता ॥ किं प्रमाणं च कः

१ मंडूकसन्निभाः--इ० पा०। २ सिंहगृध्रवृकाननाः--इ० पा०। ३ बहुवक्त्राश्च--इ० पा०। ४ त्वत्तोऽहं परमेश्वरः--इ० पा०।

CC-0. In Public Domain. Digitization by eGangotri

कर्त्ता के मंत्रास्तस्य किं फलम् ॥ ३६ ॥ एतत्सर्वमशेषेण त्रिपुंड्रस्य च लक्षणम् ॥ ब्रूहि मे जगतां नाथ लोकानुग्रहकाम्यया ॥ ३७ ॥ ॥ श्रीरुद्र उवाच ॥ ॥ आग्नेयमुच्यते भस्म दग्धगोमयसंभवम् ॥ तदेव द्रव्यमित्युक्तं त्रिपुंड्रस्य महामुने ॥ ३८ ॥ सद्योजातादिभिर्ब्रह्ममयैर्मंत्रैश्च पंचभिः॥ परिगृह्याग्निरित्यादिमंत्रैर्भस्माभिमंत्रयेत् ॥ ३९ ॥ मानस्तोकेति संमृज्य शिरो लिंपेच्च त्र्यंबकम् ॥ त्रियायुषादिभिर्मंत्रैर्ललाटे च भुजद्वये ॥ स्कंधे च लेपयेद्भस्म सजलं मंत्रभावितम् ॥ ४० ॥ तिस्रो रेखा भवंत्येषु स्थानेषु मुनिपुंगव ॥ भ्रुवोर्मध्यं समारभ्य यावदंतो भ्रुवोर्भवेत् ॥ ४१ ॥ मध्यमानामिकांगुल्योर्मध्ये तु प्रतिलोमतः ॥ अंगुष्ठेन कृता रेखा त्रिपुंड्रस्याभिधीयते ॥ ४२ ॥ तिसृणामपि रेखाणां प्रत्येकं नव देवताः ॥ अकारो गार्हपत्यश्च ऋग्भूर्लोको रजस्तथा ॥ ४३ ॥ आत्मा चैव क्रियाशक्तिः प्रातः सवनमेव च ॥ महादेवस्तु रेखायाः प्रथमायास्तु देवता ॥ ४४ ॥ उकारो दक्षिणाग्निश्च नभः सत्त्वं यजुस्तथा ॥ मध्यंदिनं च सवनमिच्छाशक्त्यंतरात्मकौ ॥ ४५ ॥ महेश्वरश्च रेखाया द्वितीयायाश्च देवता ॥ मकाराहवनीयौ च परमात्मा तमो दिवः ॥ ४६ ॥ ज्ञानशक्तिः सामवेदस्तृतीयसवनं तथा ॥ शिवश्चेति तृतीयाया रेखायाश्चाधिदेवता ॥ ४७ ॥ एता नित्यं नमस्कृत्य त्रिपुंड्रं धारयेत्सुधीः ॥ महेश्वरव्रतमिदं सर्ववेदेषु कीर्तितम् ॥४८॥ मुक्तिकामैर्नरैः सेव्यं पुनस्तेषां न संभवः ॥ त्रिपुंड्रं कुरुते यस्तु भस्मना विधिपूर्वकम् ॥४९॥ ब्रह्मचारी गृहस्थो वा वनस्थो यतिरेव वा॥महापातकसंघातैर्मुच्यते चोपपातकैः॥५०॥ तथान्यैः क्षत्रविट्शूद्रस्त्रीगोहत्यादिपातकैः॥वीरहत्याश्वहत्याभ्यां मुच्यते नात्र संशयः॥५१॥अमंत्रेणापि यः कुर्यादज्ञात्वा महिमोन्नतिम्॥त्रिपुंड्रं भालपटले मुच्यते सर्वपातकैः ॥५२॥ परद्रव्यापहरणं परदाराभिमर्शनम्॥ परनिंदा परक्षेत्रहरणं परपीडनम्॥५३॥सस्यारामादिहरणं गृहदाहादिकर्म च॥ असत्यवादपैशुन्यं पारुष्यं वेदविक्रयः॥कूटसाक्ष्यं व्रतत्यागः कैतवं नीचसेवनम् ॥५४॥ गोभूहिरण्यमहिषीतिलकंबलवाससाम्॥अन्नधान्यजलादीनां नीचेभ्यश्च परिग्रहः॥५५॥ दासीवेश्याभुजंगेषु वृषलीषु नटीषु च ॥ रजस्वलासु कन्यासु विधवासु च संगमः ॥ ५६ ॥ मांसचर्मरसादीनां लवणस्य च विक्रयः ॥ एवमादीन्यसंख्यानि पापानि विविधानि च ॥ ५७ ॥ सद्य एव विनश्यंति त्रिपुंड्रस्य च धारणात् ॥ शिवद्रव्यापहणं शिवनिंदा च कुत्रचित् ॥ ५८ ॥ निंदा च शिवभक्तानां प्रायश्चित्तैर्न शुद्ध्यति ॥ रुद्राक्षा यस्य गात्रेषु ललाटे च त्रिपुंड्रकम् ॥५९॥ स चांडालोऽपि संपूज्यः सर्ववर्णोत्तमो भवेत् ॥

१ धारणम्–इ० पा० । २ संमंत्र्य--इ० पा० । ३ भ्रुकुटी शीर्ष–केशान्तराले पूर्वं ललाटवामभागमारभ्य यावद्दक्षिणभागमनामिकामध्यमांगुलिभ्यो रेखाद्वयं विनिर्माय तन्मध्ये दक्षिणभागतांगुष्ठेन मध्यगा प्रतिलोमेन कर्तव्या–अयं त्रिपुंड्रविधेः संप्रदायोऽनेन त्रिपुंड्रलक्षणेनोच्यते इति बोध्यम्. एवमेव त्रिपुंड्रः कर्तव्यः । ४ च्छुचिः–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यानि तीर्थानि लोकेऽस्मिन्गंगाद्याः सरितश्च याः ॥ ६० ॥ स्नातो भवति सर्वत्र ललाटे यस्त्रिपुंड्रधृक् ॥ सप्तकोटिमहामंत्राः पंचाक्षरपुरःसराः ॥ ॥ ६१ ॥ तथान्ये कोटिशो मंत्राः शैवाः कैवल्यहेतवः ॥ ते सर्वे येन जप्ताः स्युर्यो बिभर्ति त्रिपुंड्रकम् ॥ ६२ ॥ सहस्रं पूर्वजातानां सहस्रं च जनिष्यताम् ॥ स्ववंशजानां मर्त्यानामुद्धरेद्यस्त्रिपुंड्रधृक् ॥ ६३ ॥ इह भुक्त्वाखिलान्भोगान्दीर्घायुर्व्याधिवर्जितः ॥ जीवितांते च मरणं सुखनेव प्रपद्यते ॥ ६४ ॥ अष्टैश्वर्यगुणोपेतं प्राप्य दिव्यं वपुः शुभम् ॥ दिव्यं विमानमारुह्य दिव्यस्त्रीशतसेवितः ॥ ६५ ॥ विद्याधराणां सिद्धानां गंधर्वाणां महौजसाम् ॥ इंद्रादिलोकपालानां लोकेषु च यथाक्रमम् ॥ ६६ ॥ भुक्त्वा भोगान्सुविपुलान्प्रजेशानां पुरेषु च ॥ ब्रह्मणः पदमासाद्य तत्र कल्पशतं रमेत् ॥ ६७ ॥ विष्णोर्लोके च रमते यावद्ब्रह्मशतंत्रयम् ॥ ६८ ॥ शिवलोकं ततः प्राप्य रमते कालमक्षयम् ॥ शिवसायुज्यमाप्नोति न स भूयोऽभिजायते ॥ ६९ ॥ सर्वोपनिषदां सारं समालोच्य मुहुर्मुहुः ॥ इदमेव हि निर्णीतं परं श्रेयस्त्रिपुंड्रकम् ॥ ७० ॥ एतत्त्रिपुंड्रमाहात्म्यं समासात्कथितं मया ॥ रहस्यं सर्वभूतानां गोपनीयमिदं त्वया ॥ ७१ ॥ इत्युक्त्वा भगवान्रुद्रस्तत्रैवांतरधीयत ॥ सनत्कुमारोऽपि मुनिर्जगाम ब्रह्मणः पदम् ॥ ७२ ॥ तवापि भस्मसंपर्कात्संजाता विमला मतिः ॥ त्वमपि श्रद्धया पुण्यं धारयस्व त्रिपुंड्रकम् ॥ ७३ ॥ ॥ सूत उवाच ॥ ॥ इत्युक्त्वा वामदेवस्तु शिवयोगी महातपाः ॥ अभिमंत्र्य ददौ भस्म घोराय ब्रह्मरक्षसे ॥ ७४ ॥ तेनासौ भालपटले चक्रे तिर्यक्त्रिपुंड्रकम् ॥ ब्रह्मराक्षसतां सद्यो जहौ तस्यानुभावतः ॥ ७५ ॥ स बभौ सूर्यसंकाशस्तेजोमण्डलमंडितः ॥ दिव्यावयवरूपैश्च दिव्यमाल्यांबरोज्वलः ॥ ७६ ॥ भक्त्या प्रदक्षिणीकृत्य तं गुरुं शिवयोगिनम् ॥ दिव्यं विमानमारुह्य पुण्यलोकाञ्जगाम सः ॥ ७७ ॥ वामदेवो महायोगी दत्त्वा तस्मै परां गतिम् ॥ चचार लोके गूढात्मा साक्षादिव शिवः स्वयम् ॥ ७८ ॥ य एतद्भस्ममाहात्म्यं त्रिपुंड्रं शृणुयान्नरः ॥ श्रावयेद्वा पठेद्वापि स हि याति परां गतिम् ॥ ७९ ॥ कथयति शिवकीर्तिं संसृतेर्मुक्तिहेतुं प्रणमति शिवयोगिध्येयमीशांघ्रिपद्मम् ॥ रचयति शिवभक्तो द्यासि भाले त्रिपुंड्रं न पुनरिह जनन्या गर्भवासं भजेत्सः ॥ ८० ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मोत्तरखण्डे भस्ममाहात्म्यकथनं नाम षोडशोऽध्यायः ॥ १६ ॥ ॥ छ ॥ ॥ ऋषय ऊचुः ॥ ॥ वेदवेदांगतत्त्वज्ञैर्गुरुभिर्ब्रह्मवादिभिः ॥ नृणां कृतोपदेशानां सद्यः सिद्धिर्हि जायते ॥ १ ॥ अथान्यजनसामान्यैर्गुरुभिर्नीतिकोविदैः ॥ नृणां कृतोपदेशानां सिद्धिर्भवति कीदृशी ॥ २ ॥

१ ब्रह्मशतायुषम्--इ० पा० । २ ब्रह्मलोकं जगाम सः--इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ॥ सूत उवाच ॥ ॥ श्रद्धैव सर्वधर्मस्य चातीव हितकारिणी ॥ श्रद्धयैव नृणां सिद्धिर्जायते लोकयोर्द्वयोः ॥ ३ ॥ श्रद्धया भजतः पुंसः शिलापि फलदायिनी ॥ मूर्खोऽपि पूजितो भक्त्या गुरुर्भवति सिद्धिदः ॥ ४ ॥ श्रद्धया पठितो मन्त्रस्त्वबद्धोपि फलप्रदः ॥ श्रद्धया पूजितो देवो नीचस्यापि फलप्रदः ॥ ५ ॥ अश्रद्धया कृता पूजा दानं यज्ञस्तपो व्रतम् ॥ सर्वं निष्फलतां याति पुष्पं वन्ध्यत रोरिव ॥ ६ ॥ सर्वत्र संशयाविष्टः श्रद्धाहीनोऽतिचंचलः ॥ परमार्थात्परिभ्रष्टः संसृतेर्न हि मुच्यते ॥ ७ ॥ मन्त्रे तीर्थे द्विजे देवे दैवज्ञे भेषजे गुरौ ॥ यादृशी भावना यत्र सिद्धिर्भवति तादृशी ॥ ८ ॥ अतो भावमयं विश्वं पुण्यं पापं च भावतः ॥ ते उभे भावहीनस्य न भवेतां कदाचन ॥ ९ ॥ अत्रेदं परमाश्चर्यमाख्यानमनुवर्ण्यते ॥ अश्रद्धा सर्वमर्त्यानां येन सद्यो निवर्तते ॥ १० ॥ आसीत्पांचालराजस्य सिंहकेतुरिति श्रुतः ॥ पुत्रः सर्वगुणोपेतः क्षात्रधर्मरतः सदा ॥ ११ ॥ स एकदा कतिपयैर्भृत्यैर्युक्तो[3] महाबलः ॥ जगाम मृगयाहेतोर्बहुसत्त्वान्वितं वनम् ॥ १२ ॥ तद्भृत्यः शबरः[4] कश्चिद्विचरन्मृगयां वने ॥ ददर्श जीर्णं स्फुटितं पतितं देवतालयम् ॥ १३ ॥ तत्रापश्यद्भिन्नपीठं पतितं स्थंडिलोपरि ॥ शिवलिङ्गमृजुं सूक्ष्मं मूर्तं भाग्यमिवात्मनः ॥ १४ ॥ स समादाय वेगेन पूर्वकर्मप्रचोदितः ॥ तस्मै संदर्शयामास राजपुत्राय धीमते ॥ १५ ॥ पश्येदं रुचिरं लिंगं मया दृष्टमिह प्रभो ॥ तदेतत्पूजयिष्यामि यथाविभवमादरात्[5] ॥ १६ ॥ अस्य पूजाविधिं ब्रूहि यथा देवो महेश्वरः ॥ अमंत्रज्ञैश्च मन्त्रज्ञैः प्रीतो भवति पूजितः ॥ १७ ॥ इति तेन निषादेन पृष्टः पार्थिवनंदनः ॥ प्रत्युवाच प्रहस्यैनं परिहासविचक्षणः[6] ॥ १८ ॥ संकल्पेन सदा कुर्यादभिषेकं नवांभसा ॥ उपवेश्यासने शुद्धे शुभैर्गंधाक्षतैर्नवैः ॥ वन्यैः पत्रैश्च कुसुमैर्धूपैर्दीपैश्च पूजयेत् ॥ ॥ १९ ॥ चिताभस्मोपहारं च प्रथमं परिकल्पयेत् ॥ आत्मोपभोग्येनान्नेन नैवेद्यं कल्पयेद्बुधः ॥ २० ॥ पुनश्च धूपदीपादीनुपचारान्प्रकल्पयेत् ॥ नृत्यवादित्रगीतादीन्यथावत्परिकल्पयेत् ॥ २१ ॥ नमस्कृत्वा तु विधिवत्प्रसादं धारयेद्बुधः ॥ एष साधारणः प्रोक्तः शिवपूजाविधिस्तव ॥ ॥ २२ ॥ चिताभस्मोपहारेण सद्यस्तुष्यति शंकरः ॥ २३ ॥ ॥ सूत उवाच ॥ ॥ परिहासरसेनेत्थं शासितः स्वामिनाऽमुना ॥ स चंडकाख्यः शबरो मूर्ध्ना जग्राह तद्वचः ॥ २४ ॥ ततः स्वभवनं प्राप्य लिंगमूर्तिं महेश्वरम् ॥ प्रत्यहं पूजयामास चिताभस्मोपहारकृत् ॥ २५ ॥ यच्चात्मनः प्रियं वस्तु गन्धपुष्पाक्षतादिकम् ॥ निवेद्य शंभवे नित्यमुपायुंक्त ततः स्वयम् ॥ २६ ॥ एवं महेश्वरं भक्त्या सह पत्न्याभ्यपूजयत् ॥

१ असिद्धेः कारणं परम्–इ० पा० । २ शक्रस्येव धनंजयः–इ० पा० । ३ गजैः–इ० पा० । ४ शंबरः–इ० पा० । ५ यथाविभवविस्तरात्–इ० पा० । ६ परिषत्सुविशारदम्–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शबरः सुखमासाद्य निनाय कतिचित्समाः ॥ २७ ॥ एकदा शिवपूजायै प्रवृत्तः शबरोत्तमः ॥ न ददर्श चिताभस्म पात्रे पूरितमण्वपि ॥ २८ ॥ अथासौ त्वरितो दूरमन्विष्यन्परितो भ्रमन् ॥ न लब्धवांश्चिताभस्म श्रांतो गृहमगात्पुनः ॥ २९ ॥ तत आहूय पत्नीं स्वां शबरो वाक्यमब्रवीत् ॥ न लब्धं मे चिताभस्म किं करोमि वद प्रिये ॥३०॥ शिवपूजांतरायो मे जातोद्य बत पाप्मनः ॥ पूजां विना क्षणमपि नाहं जीवितुमुत्सहे ॥३१॥ उपायं नात्र पश्यामि पूजोपकरणे हते ॥ न गुरोश्च विहन्येत शासनं सकलार्थदम् ॥ ३२ ॥ इति व्याकुलितं दृष्ट्वा भर्तारं शबरांगना ॥ प्रत्यभाषत मा भैस्त्वमुपायं प्रवदामि ते ॥ ३३ ॥ इदमेव गृहं दग्ध्वा बहुकालोपबृंहितम् ॥ अहमग्निं प्रवेक्ष्यामि चिताभस्म भवेत्ततः ॥ ३४ ॥ ॥ शबर उवाच ॥ ॥ धर्मार्थकाममोक्षाणां देहः परमसाधनम् ॥ कथं त्यजसि तं देहं सुखार्थं नवयौवनम् ॥ ३५ ॥ अधुना त्वनपत्या त्वम भुक्तविषयासवा ॥ भोगयोग्यमिमं देहं कथं दग्धुमिहेच्छसि ॥ ३६ ॥ ॥ शबर्युवाच ॥ ॥ एतावदेव साफल्यं जीवितस्य च जन्मनः ॥ परार्थे यस्त्यजेत्प्राणाञ्छिवार्थे किमुत स्वयम् ॥ ३७ ॥ किं नु तप्तं तपो घोरं किं वा दत्तं मया पुरा ॥ किं वार्चनं कृतं शंभोः पूर्वजन्मशतांतरे ॥ ३८ ॥ किं वा पुण्यं मम पितुः का वा मातुः कृतार्थता ॥ यच्छिवार्थे समिद्धेऽग्नौ त्यजाम्येतत्कलेवरम् ॥ ३९ ॥ इत्थं स्थिरां मतिं दृष्ट्वा तस्या भक्तिं च शंकरे ॥ तथेति दृढसंकल्पः शबरः प्रत्यपूजयत् ॥ ४० ॥ सा भर्त्तारमनुप्राप्य स्नात्वा शुचिरलंकृता ॥ गृहमादीप्य तं वह्निं भक्त्या चक्रे प्रदक्षिणम् ॥ ४१ ॥ नमस्कृत्वात्मगुरवे ध्यात्वा हृदि सदाशिवम् ॥ अग्निप्रवेशाभिमुखी कृतांजलिरिदं जगौ ॥ ४२ ॥ ॥ शबर्युवाच ॥ ॥ पुष्पाणि संतु तव देव ममेंद्रियाणि धूपोऽगुरुर्वपुरिदं हृदयं प्रदीपः ॥ प्राणा हवींषि करणानि तवाक्षताश्च पूजाफलं व्रजतु सांप्रतमेष जीवः ॥ ४३ ॥ वांछामि नाहमपि सर्वधनाधिपत्यं न स्वर्गभूमिमचलां न पदं विधातुः ॥ भूयो भवामि यदि जन्मनिजन्मनि स्यां त्वत्पादपंकजलसन्मकरंदभृंगी ॥ ४४ ॥ जन्मानि संतु मम देव शताधिकानि माया न मे विशतु चित्तमबोधहेतुः ॥ किंचित्क्षणार्धमपि ते चरणारविन्दान्नापैतु मे हृदयमीश नमोनमस्ते ॥४५॥ इति प्रसाद्य देवेशं शबरी दृढनिश्चया ॥ विवेश ज्वलितं वह्निं भस्मसादभवत्क्षणात् ॥ ४६ ॥ शबरोपि च तद्भस्म यत्नेन परिगृह्य सः ॥ चक्रे दग्धगृहोपान्ते शिवपूजां समाहितः ॥ ४६ ॥ अथ सस्मार पूजांते प्रसादग्रहणोचिताम् ॥ दयितां नित्यमायांतीं प्रांजलिं विनयान्विताम् ॥ ४८ ॥ स्मृतमात्रां तदापश्यदागतां पृष्ठतः स्थिताम् ॥

१ भस्मलेपनम्–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पूर्वेणावयवेनैव भक्तिनम्रां शुचिस्मितां[1]ताम् ॥ ४९ ॥ तां वीक्ष्य शबरः पत्नीं पूर्ववत्प्राजलिं स्थिताम् ॥ भस्मावशेषितगृहं यथापूर्वमवस्थितम् ॥ ॥ ५० ॥ अग्निर्दहति तेजोभिः सूर्यो दहति रश्मिभिः ॥ राजा दहति दंडेन ब्राह्मणो मनसा दहेत् ॥ ५१ ॥ किमयं स्वप्न आहोस्वित्किं वा माया भ्रमात्मिका ॥ इति विस्मयसंभ्रांतस्तां भूयः पर्यपृच्छत ॥ ५२ ॥ अपि[2] त्वं च कथं प्राप्ता भस्मभूतासि पावके ॥ दग्धं च भवनं भूयः कथं पूर्व वदास्थितम् ॥ ५३ ॥ ॥ शबर्युवाच ॥ ॥ यदा गृहं समुद्दीप्य प्रविष्टाहं हुताशने ॥ तदात्मानं न जानामि न पश्यामि हुताशनम् ॥ ५४ ॥ न तापलेशोप्यासीन्मे प्रविष्टाया इवोदकम् ॥ सुषुप्तेव क्षणार्धेन प्रबुद्धास्मि पुनः क्षणात् ॥ ५५ ॥ तावद्भवनमद्राक्षमदग्धमिव सुस्थितम् ॥ अधुना देवपूजांते प्रसादं लब्धुमागता ॥ ५६ ॥ एवं परस्परं प्रेम्णा दंपत्योर्भाषमाणयोः ॥ प्रादुरासीत्तयोरग्रे विमानं दिव्यमद्भुतम् ॥ ५७ ॥ तस्मिन्विमाने शतचन्द्रभास्वरे चत्वार ईशानुचराः पुरःसराः ॥ हस्ते गृहीत्वाथ निषाददंपती आरोपयामासुरमुक्तविग्रहौ ॥ ५८ ॥ तयोर्निषाददंपत्योस्तत्क्षणादेव तद्वपुः ॥ शिवदूतकरस्पर्शात्तत्सारूप्यमवाप ह ॥ ५९ ॥ तस्माच्छ्रद्धैव सर्वेषु विधेया पुण्यकर्मसु ॥ नीचोपि शबरः प्राप श्रद्धया योगिनां गतिम् ॥ ६० ॥ किं जन्मना सकलवर्णजनोत्तमेन किं विद्यया सकलशास्त्रविचारवत्या ॥ यस्यास्ति चेतसि सदा परमेशभक्तिः कोऽन्यस्ततस्त्रिभुवने पुरुषोस्ति धन्यः ॥ ६१ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मोत्तरखण्डे भस्ममाहात्म्यवर्णनं नाम सप्तदशोऽध्यायः ॥ १७ ॥ ॥ सूत उवाच ॥ ॥ अथाहं संप्रवक्ष्यामि सर्वधर्मोत्तमोत्तमम् ॥ उमामहेश्वरं नाम व्रतं सर्वार्थसिद्धिदम् ॥ १ ॥ आनर्त्तसंभवः कश्चिन्नाम्ना वेदरथो[3] द्विजः ॥ कलत्रपुत्रसंपन्नो विद्वानुत्तमवंशजः ॥ २ ॥ तस्यैवं वर्तमानस्य ब्राह्मणस्य गृहाश्रमे ॥ बभूव शारदानाम कन्या कमललोचना ॥३॥ तां रूपलक्षणोपेतां बालां द्वादशहायनाम् ॥ ययाचे पद्मनाभाख्यो मृतदारश्च[4] स द्विजः ॥ ४ ॥ महाधनस्य शांतस्य[5] सदा राजसखस्य च ॥ याञ्चाभंगभयात्तस्य तां कन्यां प्रददौ पिता ॥ ५ ॥ मध्यंदिने कृतोद्वाहः स विप्रः श्वशुरालये ॥ संध्यामुपासितुं सायं सरस्तटमुपाययौ ॥६॥ उपास्य संध्यां विधिवत्प्रत्यागच्छत्तमोवृते ॥ मार्गे दष्टो भुजंगेन ममार निजकर्मणा ॥७॥ तस्मिन्मृते कृतोद्वाहे सहसा तस्य बांधवाः ॥ चुक्रुशुः शोकसंतप्तौ श्वशुरावस्य कन्यका ॥ ८ ॥ निर्हृत्य तं बंधुजना जग्मुः स्वं स्वं निवेशनम् ॥ शारदा प्राप्तवैधव्या पितुरेवालये स्थिता ॥९॥ भूताच्छादनभोज्येन भर्त्रा विरहिता सती ॥ निनाय कतिचिन्मासान्सा बाला पितृमंदिरे ॥ १० ॥ एकदा नैध्रुवो नाम कश्चिद्वृद्धतरो मुनिः ॥

१ सुविस्मिताम्–इ० पा० । २ अपि प्रिये–इ० पा० । ३ देवरथः–इ०पा० । ४ मृतभार्यो जरद्विजः–इ० पा० । ५ शूद्रस्य सदाचाररतस्य च–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अन्धः शिष्यकरग्राही तन्मंदिरमुपाययौ ॥ ११ ॥ तस्मिन्वृद्धे गृहं प्राप्ते क्वापि यातेषु बंधुषु ॥ साक्षादिवात्मनो दैवं सा बाला समुपागमत् ॥
॥ १२ ॥ स्वागतं ते महाभाग पीठेस्मिन्नुपविश्यताम् ॥ नमस्ते मुनिनाथाय प्रियं ते करवाणि किम् ॥ १३ ॥ इत्युक्त्वा भक्तिमास्थाय कृत्वा
पादावनेजनम् ॥ वीजयित्वा परिश्रांतं तं मुनिं पर्यतोषयत् ॥ १४ ॥ श्रांतं पीठे समावेश्य कृत्वाभ्यंगं स्वपाणिना ॥ कृतस्नानं च विधिवत्कृतदेवा
र्चनं मुनिम् ॥ १५ ॥ सुखासनोपविष्टं तं धूपमाल्यानुलेपनैः ॥ अर्चयित्वा वरान्नेन भोजयामास सादरम् ॥ १६ ॥ भुक्त्वा च सम्यक्छनकैस्तृप्त
श्चानंदनिर्भरः ॥ चकारांधमुनिस्तस्यै सुप्रीतः परमाशिषम् ॥ १७ ॥ विहृत्य भर्त्रा सहसा च तेन लब्ध्वा सुतं सर्वगुणैर्वरिष्ठम्[1] ॥ कीर्तिं च
लोके महतीमवाप्य प्रसादयोग्या भव देवतानाम् ॥ १८ ॥ इत्यभिव्याहृतं तेन मुनिना गतचक्षुषा ॥ निशम्य विस्मिता बाला प्रत्युवाच
कृतांजलिः ॥ १९ ॥ ब्रह्मंस्त्वद्वचनं सत्यं कदाचिन्न मृषा भवेत् ॥ तदेतन्मंदभाग्यायाः कथमेतत्फलिष्यति ॥ २० ॥ शिलाग्र्यामिव
सद्वृष्टिः शुनक्यामिव सत्क्रिया ॥ विफला मंदभाग्यायामाशीर्ब्रह्मविदामपि ॥ २१ ॥ सैषाहं विधवा ब्रह्मन्दुष्कर्मफलभागिनी ॥ त्वदा
शीर्वचनस्यास्य कथं यास्यामि[2] पात्रताम् ॥ २२ ॥ ॥ मुनिरुवाच ॥ ॥ त्वामनालक्ष्य यत्प्रोक्तमंधेनापि मयाऽधुना ॥ तदेतत्साधयिष्यामि
कुरु मच्छासनं शुभे ॥ २३ ॥ उमामहेश्वरं नाम व्रतं यदि चरिष्यसि ॥ तेन व्रतानुभावेन सद्यः श्रेयोऽनुभोक्ष्यसे ॥ २४ ॥ ॥ शारदोवाच ॥ ॥
त्वयोपदिष्टं यत्नेन चरिष्याम्यपि दुश्चरम् ॥ तद्व्रतं ब्रूहि मे ब्रह्मन्विधानं वद विस्तरात् ॥ २५ ॥ ॥ मुनिरुवाच ॥ ॥ चैत्रे वा मार्गशीर्षे वा
शुक्लपक्षे शुभे दिने ॥ व्रतारंभं प्रकुर्वीत यथावद्गुर्वनुज्ञया ॥ २६ ॥ अष्टम्यां च चतुर्दश्यामुभयोरपि पर्वणोः ॥ संकल्पं विधिवत्कृत्वा प्रातःस्नानं
समाचरेत् ॥ २७ ॥ सन्तर्प्य पितृदेवादीन्गत्वा स्वभवनं प्रति ॥ मंडपं रचयेद्दिव्यं वितानाद्यैरलंकृतम् ॥ २८ ॥ फलपल्लवपुष्पाद्यैस्तोरणैश्च सम
न्वितम् ॥ पंचवर्णैश्च तन्मध्ये रजोभिः पद्ममुद्धरेत् ॥ २९ ॥ चतुर्दशदलैर्बाह्ये द्वाविंशद्भिस्तदंतरे ॥ तदंतरे षोडशभिरष्टभिश्च तदंतरे ॥ ३० ॥
एवं पद्मं समुद्धृत्य पंचवर्णैर्मनोरमम् ॥ चतुरस्रं ततः कुर्यादंतर्वर्तुलमुत्तमम् ॥ ३१ ॥ व्रीहितंडुलराशिं च तन्मध्ये च सकूर्चकम् ॥ कूर्चोपरि सुसंस्था
प्य कलशं वारिपूरितम्[3] ॥ ३२ ॥ कलशोपरि विन्यस्य वस्त्रं वर्णसमन्वितम् ॥ तस्योपरिष्टात्सौवर्ण्यौ प्रतिमे शिवयोः शुभे ॥ निधाय पूजयेद्भक्त्या
यथाविभवविस्तरम् ॥ ३३ ॥ पंचामृतैस्तु संस्नाप्य तथा शुद्धोदकेन च ॥ रुद्रैकादशकं जप्त्वा पंचाक्षरशताष्टकम् ॥ ३४ ॥ अभिमंत्र्य पुनः स्थाप्य

१ उपेतम्–इ०पा० । २ योग्यास्मि सांप्रतम्–इ० पा० । ३ धान्यपूरितम्–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पीठमध्ये तथार्चयेत् ॥ स्वयं शुद्धासनासीनो धौतशुक्लांबरः सुधीः ॥ ३५ ॥ पीठमामंत्र्य मंत्रेण प्राणायामान्समाचरेत् ॥ संकल्पं प्रवदेत्तत्र शिवाग्रे विहितांजलिः ॥ ३६ ॥ यानि पापानि घोराणि जन्मांतरशतेषु मे ॥ तेषां सर्वविनाशाय शिवपूजां समारभे ॥ ३७ ॥ सौभाग्यविजयारोग्यधर्मैश्वर्याभिवृद्धये ॥ स्वर्गापवर्गसिद्ध्यर्थं करिष्ये शिवपूजनम् ॥ ३८ ॥ इति संकल्पमुच्चार्य यथावत्सुसमाहितः ॥ अंगन्यासं ततः कृत्वा ध्यायेदीशं च पार्वतीम् ॥ ३९ ॥ कुंदेंदुधवलाकारं नागाभरणभूषितम् ॥ वरदाभयहस्तं च बिभ्राणं परशुं मृगम् ॥ ४० ॥ सूर्यकोटिप्रतीकाशं जगदानंदकारणम् ॥ जाह्नवीजलसंपर्कादीर्घपिंगजटाधरम् ॥ ४१ ॥ उरगेंद्रफणोद्भूतमहामुकुटमंडितम् ॥ शीतांशुखंडविलसत्कोटीरांगदभूषणम् ॥ ४२ ॥ उन्मीलद्भालनयनं तथा सूर्येंदुलोचनम् ॥ नीलकंठं चतुर्बाहुं गजेंद्राजिनवाससम् ॥ ४३ ॥ रत्नसिंहासनारूढं नागाभरणभूषितम् ॥ देवीं च दिव्यवसनां बालसूर्यायुतद्युतिम् ॥ ४४ ॥ बालवेषां च तन्वंगीं बालशीतांशुशेखराम् ॥ पाशांकुशवराभीतिं बिभ्रतीं च चतुर्भुजाम् ॥ ४५ ॥ प्रसादसुमुखीमंबां लीलारसविहारिणीम् ॥ लसत्कुरबकाशोकपुन्नागनवचंपकैः ॥ ४६ ॥ कृतावतंसामुत्फुल्लमल्लिकोत्कलितालकाम् ॥ कांचीकलापपर्यस्तजघनाभोगशालिनीम् ॥ ४७ ॥ उदारकिंकिणीश्रेणीनूपुराढ्यपदद्वयाम् ॥ गंडमंडलसंसक्तरत्नकुंडलशोभिताम् ॥ ४८ ॥ बिंबाधरानुरक्तांशुलसद्दशनकुड्मलाम् ॥ महार्हरत्नग्रैवेयतारहारविराजिताम् ॥४९॥ नवमाणिक्यरुचिरकंकणांगदमुद्रिकाम् ॥ रक्तांशुकपरीधानां रत्नमाल्यानुलेपनाम् ॥ ५० ॥ उद्यत्पीनकुचद्वंद्वनिंदितांभोजकुड्मलाम् ॥ लीलालोलासितापांगीं भक्तानुग्रहदायिनीम् ॥ ५१ ॥ एवं ध्यात्वा तु हृत्पद्मे जगतः पितरौ शिवौ ॥ जप्त्वा तदात्मकं मंत्रं तदंते बहिरर्चयेत् ॥ ५२ ॥ आवाह्य प्रतिमायुग्मे कल्पयेदासनादिकम् ॥ अर्घ्यं च दद्याच्छिवयोर्मंत्रेणानेन मंत्रवित् ॥ ५३ ॥ नमस्ते पार्वतीनाथ त्रैलोक्यवरदर्षभ ॥ त्र्यंबकेश महादेव गृहाणार्घ्यं नमोऽस्तु ते ॥ ५४ ॥ नमस्ते देवदेवेशि प्रपन्नभयहारिणि ॥ अंबिके वरदे देवि गृहाणार्घ्यं शिवप्रिये ॥ ५५ ॥ इति त्रिवारमुच्चार्य दद्यादर्घ्यं समाहितः ॥ गन्धपुष्पाक्षतान्सम्यग्धूपदीपान्प्रकल्पयेत् ॥ ५६ ॥ नैवेद्यं पायसान्नेन घृताक्तं परिकल्पयेत् ॥ जुहुयान्मूलमंत्रेण हविरष्टोत्तरं शतम् ॥ ५७ ॥ तत उद्वास्य नैवेद्यं धूपनीराजनादिकम् ॥ कृत्वा निवेद्य तांबूलं नमस्कुर्यात्समाहितः ॥ ५८ ॥ अथाभ्यर्च्योपचारेण भोजयेद्विप्रदंपती ॥ ५९ ॥ एवं सायंतनीं पूजां कृत्वा विप्रानुमोदितः ॥ भुंजीत वाग्यतो रात्रौ हविष्यं क्षीरभावितम् ॥ ६० ॥ एवं संवत्सरं कुर्याद्व्रतं पक्षद्वये बुधः ॥ ततः संवत्सरे पूर्णे व्रतोद्या

१ पीठे हेममयेऽर्चयेत्–इ० पा० । २ शुचिः–इ० पा० । ३ करिष्ये शिवपूजनम्–इ० पा० । ४ रत्नांकुश–इ० पा० । ५ पार्वतीकांत–इ० पा० । ६ गौरि–इ० पा० । ७ उत्साद्य–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नमाचरेत् ॥ ६१ ॥ शतरुद्राभिजतेन स्नापयेत्प्रतिमे जलैः ॥ आगमोक्तेन मन्त्रेण संपूज्य गिरिजाशिवौ ॥ ६२ ॥ सवस्त्रं ससुवर्णं च कलशं प्रति
मान्वितम् ॥ दत्त्वाचार्याय महते सदाचाररताय च ॥ ब्राह्मणान्भोजयेद्भक्त्या यथाशक्त्याभिपूज्य च ॥ ६३ ॥ दद्याच्च दक्षिणां तेभ्यो गोहिरण्यांब
रादिकम् ॥ भुंजीत तदनुज्ञातः सहेष्टजनबंधुभिः ॥ ६४ ॥ एवं यः कुरुते भक्त्या व्रतं त्रैलोक्यविश्रुतम् ॥ त्रिःसप्तकुलमुद्धृत्य भुक्त्वा भोगान्यथेप्सि
तान् ॥ ६५ ॥ इन्द्रादिलोकपालानां स्थानेषु रमते ध्रुवम् ॥ ब्रह्मलोके च रमते विष्णुलोके च शाश्वते ॥ ६६ ॥ शिवलोकमथ प्राप्य तत्र कल्पशतं
पुनः ॥ भुक्त्वा भोगान्सुविपुलाञ्छिवमेव प्रपद्यते ॥ ६७ ॥ महाव्रतमिदं प्रोक्तं त्वमपि श्रद्धया चर ॥ अत्यंतदुर्लभं वापि लप्स्यसे च मनोरथम् ॥
॥ ६८ ॥ इत्यादिष्टा मुनींद्रेण सा बाला मुदिता भृशम् ॥ प्रत्यग्रहीत्सुविश्रब्धा तद्वाक्यं सुमनोहरम् ॥ ६९ ॥ अथ तस्याः समायाताः पितृमातृ
सहोदराः ॥ तं मुनिं सुखमासीनं ददृशुः कृतभोजनम् ॥ ७० ॥ सहसागत्य ते सर्वे नमश्चक्रुर्महात्मने ॥ प्रसीद नः प्रसीदेति गृणंतः पर्यपूज
यन् ॥ ७१ ॥ श्रुत्वा च ते तया साध्व्या पूजितं परमं मुनिम् ॥ अनुग्रहं व्रतं तस्यै श्रुत्वा हर्षं परं ययुः ॥ ७२ ॥ ते कृतांजलयः सर्वे तमूचुर्मुनि
पुंगवम् ॥ ७३ ॥ अद्य धन्या वयं सर्वे तवागमनमात्रतः ॥ पावितं नः कुलं सर्वं गृहं च सफलीकृतम् ॥ ७४ ॥ इयं च शारदा नाम कन्या
वैधव्यमागता ॥ केनापि कर्मयोगेन दुर्विलंघ्येन भूयसा ॥ ७५ ॥ सैषाद्य तव पादाब्जं प्रपन्ना शरणं सती ॥ इमां समुद्धरासह्यात्सुघोराद्दुःख
सागरात् ॥ ७६ ॥ त्वयापि तावदत्रैव स्थातव्यं नो गृहांतिके ॥ अस्मद्गृहमठेऽप्यस्मिन्स्नानपूजाजपोचिते ॥ ७७ ॥ एषा बालापि भगवन्कुर्वंती
त्वत्पदार्चनम् ॥ व्रतं त्वत्सन्निधावेव चरिष्यति महामुने ॥ ७८ ॥ यावत्समाप्तिमायाति व्रतमस्यास्त्वदंतिके ॥ उषित्वा तावदत्रैव कृतार्थान्कुरु
नो गुरो ॥ ७९ ॥ एवमभ्यर्थितः सर्वैस्तस्या भ्रातृजनादिभिः ॥ तथेति स मुनिश्रेष्ठस्तत्रोवास मठे शुभे ॥ ८० ॥ सापि तेनोपदिष्टेन मार्गेण
गिरिजाशिवौ ॥ अर्चयंती व्रतं सम्यक्चचार विमला सती ॥ ८१ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मोत्तरखण्डे
उमामहेश्वरव्रताचरणं नामाष्टादशोऽध्यायः ॥ १८ ॥ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ एवं महाव्रतं तस्याश्चरंत्या गुरुसन्निधौ ॥ संवत्सरो
व्यतीयाय नियमासक्तचेतसः ॥ १ ॥ संवत्सरांते सा बाला तत्रैव पितृमंदिरे ॥ चकारोद्यापनं सम्यग्विप्रभोजनपूर्वकम् ॥ २ ॥ दत्त्वा च दक्षिणां
तेभ्यो ब्राह्मणेभ्यो यथार्हतः ॥ विसृज्य तान्नमस्कृत्य पितृभ्यामभिनंदिता ॥ ३ ॥ उपोषिता स्वयं तस्मिन्दिने नियममाश्रिता ॥ जजाप परमं

१ प्रदाय-इ० पा० । २ मुदान्वितः-इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मंत्रमुपदिष्टं महात्मना ॥ ४ ॥ अथ प्रदोषसमये प्राप्ते संपूज्य शंकरम् ॥ तस्मिन्गृहांतिकमठे गुरोस्तस्य च सन्निधौ ॥ ५ ॥ जपार्चनरता साध्वी ध्यायंती परमेश्वरम् ॥ तस्मिञ्जागरणे रात्रावुपविष्टा शिवांतिके ॥ ६ ॥ युग्मम् ॥ तस्यां रात्रौ तया सार्धं स मुनिर्जगदंबिकाम् ॥ जपध्यान तपोभिश्च तोषयामास पार्वतीम् ॥ ७ ॥ तस्याश्च भक्त्या व्रतभाविताया मुनेस्तपोयोगसमाधिना च ॥ तुष्टा भवानी जगदेकमाता प्रादुर्बभूवा कृतसांद्रमूर्तिः ॥ ८ ॥ प्रादुर्भूता यदा गौरी तयोरग्रे जगन्मयी ॥ अन्धोऽपि तत्क्षणादेव मुनिः प्राप दृशोर्द्वयम् ॥ ९ ॥ तां वीक्ष्य जगतां धात्री माविर्भूतां पुरःस्थिताम् ॥ निपेततुस्तत्पदयोः स मुनिः सा च कन्यका ॥ १० ॥ तौ भक्तिभावोच्छ्वसितामलाशयावानंदबाष्पोक्षित सर्वगात्रौ ॥ उत्थाप्य देवी कृपया परिप्लुता प्रेम्णा बभाषे मृदुवल्गुभाषिणी ॥ ११ ॥ ॥ देव्युवाच ॥ ॥ प्रीतास्मि ते मुनिश्रेष्ठ वत्से प्रीतास्मि तेऽनघे ॥ किं वा ददाम्यभिमतं देवानामपि दुर्लभम् ॥ १२ ॥ ॥ मुनिरुवाच ॥ ॥ एषा तु शारदा नाम कन्या तु गतभर्तृका ॥ मया प्रतिश्रुतं चास्यै तुष्टेन गतचक्षुषा ॥ १३ ॥ सह भर्त्रा चिरं कालं विहृत्य सुतमुत्तमम् ॥ लभस्वेति मया प्रोक्तं सत्यं कुरु नमोऽस्तु ते ॥ १४ ॥ ॥ श्रीदेव्युवाच ॥ ॥ एषा पूर्वभवे बाला द्राविडस्य द्विजन्मनः ॥ आसीद्द्वितीया दयिता भामिनी नाम विश्रुता ॥ १५ ॥ सा भर्तृप्रेयसी नित्यं रूपमाधुर्यपेशला ॥ भर्तारं वशमानिन्ये रूपवश्यादिकैतवैः ॥ १६ ॥ अस्यां चासक्तहृदयः स विप्रो मोहयंत्रितः ॥ कदाचिदपि नैवागाज्ज्येष्ठपत्नीं पतिव्रताम् ॥ १७ ॥ अनभ्यागमनाद्भर्तुः सा नारी पुत्रवर्जिता ॥ सदा शोकेन संतप्ता कालेन निधनं गता ॥ १८ ॥ अस्या गृहसमीपस्थो यः कश्चिद्ब्राह्मणो युवा ॥ इमां वीक्ष्याथ चार्वंगीं कामार्तः करमग्रहीत् ॥ १९ ॥ अनया रोषताम्राक्ष्या स विप्रस्तु निवारितः ॥ इमां स्मरन्दिवानक्तं निधनं प्रत्यपद्यत ॥ २० ॥ एषा संमोह्य भर्तारं ज्येष्ठपत्न्यां पराङ्मुखम् ॥ चकार तेन पापेन भवेस्मिन्विधवाऽभवत् ॥ २१ ॥ याः कुर्वंति स्त्रियो लोके जायापत्योश्च विप्रियम् ॥ तासां कौमारवैधव्यमेकविंशतिजन्मसु ॥ २२ ॥ यदेतया पूर्वभवे मत्पूजा महती कृता ॥ तेन पुण्येन तत्पापं नष्टं सर्वं तदैव हि ॥ २३ ॥ यो विप्रो विरहार्तः सन्मृतः कामविमोहितः ॥ सोऽस्याः पाणिग्रहं कृत्वा भवेस्मिन्निधनं गतः ॥ २४ ॥ प्राग्जन्मपतिरेतस्याः पांड्यराष्ट्रेषु सोऽधुना ॥ जातो विप्रवरः श्रीमान्सदारः सपरिच्छदः ॥ २५ ॥ तेन भर्त्रा प्रतिनिशं सैषा प्रेम्णाभिसंगता ॥ स्वप्ने रतिसुखं यातु श्रेष्ठं जागरणादपि ॥२६॥

१ एनां संस्मृत्य यो विप्रः—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

षष्ट्युत्तरत्रिशतयोजनदूरसंस्थो देशादितो द्विजवरः स च कर्मगत्या ॥ एनां वधूं प्रतिनिशं मनसोभिरामां स्वप्नेषु पश्यति चिरं रतिमाद
धानः ॥ २७ ॥ सैषा वै स्वप्नसंगत्या पत्युः प्रतिनिशं सती ॥ कालेन लप्स्यते पुत्रं वेदवेदांगपारगम् ॥ २८ ॥ एतस्यां तनयं जातमात्म
नश्चिरसंगमात् ॥ सोऽपि विप्रोऽनिशं स्वप्ने द्रक्ष्यति प्रेमभावितम् ॥ २९ ॥ अनयाराधिता पूर्वे भवे साहं महामुने ॥ अस्यैव वरदानाय
प्रादुर्भूतास्मि सांप्रतम् ॥ ३० ॥ ॥ सूत उवाच ॥ ॥ अथोवाच महादेवी तां बालां प्रति सादरम् ॥ अयि वत्से महाभागे शृणु मे परमं वचः
॥ ३१ ॥ यदा कदापि भर्त्तारं क्वापि देशे पुरातनम् ॥ द्रक्ष्यसि स्वप्नदृष्टं प्राक्ज्ञास्यसे त्वं विचक्षणा ॥ ३२ ॥ त्वां द्रक्ष्यति स विप्रोपि सुनयां
स्वप्नलक्षणाम् ॥ तदा परस्परालापो युवयोः संभविष्यति ॥ ३३ ॥ तदा स्वतनयं भद्रे तस्मै देहि बहुश्रुतम् ॥ फलमस्य व्रतस्याग्र्यं तस्य
हस्ते समर्पय ॥ ३४ ॥ ततः प्रभृति तस्यैव वशे तिष्ठ सुमध्यमे ॥ युवयोर्दैहिकः संगो माभूत्स्वप्नरताद्दते ॥ ३५ ॥ कालात्पंचत्वमापन्ने तस्मि
न्ब्राह्मणसत्तमे ॥ अग्निं प्रविश्य तेनैव सह यास्यसि मत्पदम् ॥ ३६ ॥ पुत्रस्ते भविता सुभ्रु सर्वलोकमनोरमः ॥ संपदश्च भविष्यंति प्राप्स्यते
परमं पदम् ॥ ३७ ॥ ॥ सूत उवाच ॥ ॥ इत्युक्त्वा त्रिजगन्माता दत्त्वा तस्यै मनोरथम् ॥ तयोः संपश्यतोरेव क्षणेनादर्शनं गता
॥ ३८ ॥ सापि बाला वरं लब्ध्वा पार्वत्याः करुणानिधेः ॥ अवाप परमानंदं पूजयामास तं गुरुम् ॥ ३९ ॥ तस्यां रात्र्यां व्यती
तायां स मुनिर्लब्धलोचनः ॥ तस्याः पित्रोश्च तत्सर्वं रहस्याचष्ट धर्मवित् ॥ ४० ॥ अथ सर्वानुपामंत्र्य शारदां च यशस्विनीम् ॥
विधायानुग्रहं तेषां ययौ स्वैरगतिर्मुनिः ॥ ४१ ॥ एवं दिनेषु गच्छत्सु सा बाला च प्रतिक्षणम् ॥ भर्तुः समागमं लेभे स्वप्ने सुख
विवर्धनम् ॥ ४२ ॥ गौर्या वरप्रदानेन शारदा विशदव्रता ॥ दधार गर्भं स्वप्नेपि भर्तुः संगानुभावतः ॥ ४३ ॥ तां श्रुत्वा भर्तृ
रहितां शारदां गर्भिणीं सतीम् ॥ सर्वे धिगिति प्रोचुस्तां जारिणीति जगुर्जनाः ॥ ४४ ॥ संपरेतस्य तद्भर्तुर्ये जातिकुलबांधवाः ॥ तां वार्तां दुः
सहां श्रुत्वा ययुस्तत्पितृमंदिरम् ॥ ४५ ॥ अथ सर्वे समायाता ग्रामवृद्धाश्च पंडिताः ॥ समाजं चक्रिरे तत्र कुलवृद्धैः समन्वितम् ॥ ४६ ॥
अन्तर्वत्नीं समाहूय शारदां विनताननाम् ॥ अतर्जयन्सुसंक्रुद्धाः केचिदासन्पराङ्मुखाः ॥ ४७ ॥ अयि जारिणि दुर्बुद्धे किमेतत्ते
विचेष्टितम् ॥ अस्मत्कुले सुदुष्कीर्त्तिं कृतवत्यसि बालिशे ॥ ४८ ॥ इति संतर्जयंतस्ते ग्रामवृद्धा मनीषिणः ॥ सर्वे संमंत्रयामासुः

१ सहसा—इ०पा० । २ व्रतप्रसादेन—इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

किं कुर्म इति भाषिणः ॥ ४९ ॥ तत्रोचुः के च वृद्धास्तां बालां प्रति विनिर्दयाः ॥ एषा पापमतिर्बाला कुलद्वयविनाशिनी ॥ ५० ॥ कृत्वास्याः केशवपनं छित्त्वा कर्णौ च नासिकाम् ॥ निर्वास्यतां बहिर्ग्रामात्परित्यज्य स्वगोत्रतः ॥ ५१ ॥ इति सर्वे समालोच्य तां तथा कर्तुमुद्यताः ॥ अथांतरिक्षे संभूता शुश्रुवे वागगोचरा ॥ ५२ ॥ अनया न कृतं पापं न चैव कुलदूषणम् ॥ व्रतभंगो न चैतस्यास्सुचरित्रेय मंगना ॥ ५३ ॥ इतः परमियं नारी जारिणीति वदंति ये ॥ तेषां दोषविमूढानां सद्यो जिह्वा विदीर्यते ॥ ५४ ॥ इत्यंतरिक्षे जनितां वाणीं श्रुत्वाऽशरीरिणीम् ॥ सर्वे प्रजहृषुस्तस्या जननीजनकादयः ॥५५॥ ततः ससंभ्रमाः सर्वे ग्रामवृद्धाः सभाजनाः ॥ मुहूर्तं मौनमालंब्य भीतास्तस्थुरधोमुखाः ॥५६॥ तत्र केचिदविश्वस्ता मिथ्यावाणीत्यवादिषुः॥ तेषां जिह्वा द्विधा भिन्ना ववमुस्ते कृमीन्क्षणात् ॥ ५७ ॥ ततः संपूजयामासुस्तां बालां ज्ञातिबांधवाः ॥ बांधवांश्च स्त्रियो वृद्धाः शशंसुः साधुसाध्विति ॥ ५८ ॥ मुमुचुः केचिदानंदबाष्पबिंदून्कुलोत्तमाः ॥ कुलस्त्रियः प्रमुदितास्तामुदिश्य समाश्वसन् ॥ ५९ ॥ अथ तत्रापरे प्रोचुर्देवो वदति नानृतम् ॥ कथमेषां दधौ गर्भं शीलान्न चलिता ध्रुवम् ॥ ६० ॥ इति सर्वान्सभ्यजनान्संशयाविष्टचेतसः ॥ विलोक्य वृद्धस्तत्रैको सर्वज्ञो लोकतत्त्ववित् ॥ ६१ ॥ मायामयमिदं विश्वं दृश्यते श्रूयते च यत् ॥ किं भाव्यं किमभाव्यं वा संसारेऽस्मिन्क्षणात्मके ॥ ६२ ॥ अनिरूप्यमभूतार्थं मायया जायते स्फुटम् ॥ ईश्वरस्य वशे माया तस्यं को वेद चेष्टितम् ॥ ६३ ॥ यूपकेतोश्च राजर्षेः शुक्रं निपतितं जले ॥ सशुक्रं तज्जलं पीत्वा वेश्या गर्भं दधौ किल ॥ ६४ ॥ मुनेर्विभांडकस्यापि शुक्रं पीत्वा सहांभसा ॥ हरिणी गर्भिणी भूत्वा ऋष्यशृंगमसूयत ॥ ६५ ॥ सुराष्ट्रस्य तथा राज्ञः करं स्पृष्ट्वा मृगांगना ॥ तत्क्षणाद्गर्भिणी भूत्वा मुनिं प्रासूत तापसम् ॥ ६६ ॥ तथा सत्यवती नारी शफरीगर्भसंभवा ॥ तथैव महिषीगर्भो जातश्च महिषासुरः॥ ६७ ॥ तथा संति पुरा नार्यः कारुण्याद्गर्भसंभवाः॥ तथा हि वसुदेवेन रोहिण्यास्तनयोऽभवत् ॥ ६८ ॥ देवतानां महर्षीणां शापेन च वरेण च ॥ अयुक्तमपि यत्कर्म युज्यते नात्र संशयः ॥ ६९ ॥ सांबस्य जठराज्जातं मुसलं मुनिशापतः ॥ युवनाश्वस्य गर्भोऽभून्मुनीनां मंत्रगौरवात् ॥ ७० ॥ नूनमेषापि कल्याणी महर्षेः पादसेवनात् ॥ महाव्रतानुभावाच्च धत्ते गर्भमनिंदिता ॥ ७१ ॥ अस्मिन्नर्थे रहस्येनां सत्यं पृच्छंतु योषितः ॥ ततो निवृत्तसंदेहो भविष्यति महाजनः ॥ ७२ ॥ ततस्तद्वचनादेव तामपृच्छन्स्त्रियो मिथः ॥ ताभ्यः शशंस तत्सर्वं सा स्ववृत्तं महाद्भुतम् ॥ ७३ ॥ विजानंतस्ततः सर्वे मानयित्वा च तां सतीम् ॥ मोदमानाः प्रशंसंतः प्रययुः स्वं

१ बंधुस्त्रियश्च वृद्धाश्च–इ० पा० । २ आश्लिष्य–इ० पा० । ३ सर्वश–इ० पा० । ४ भ्रमान्विते–इ० पा० । ५ तस्या–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वमालयम् ॥ ७४ ॥ अथ काले शुभे प्राप्ते शारदा विमलाशया ॥ असूत तनयं बाला बालार्कसमतेजसम् ॥ ७५ ॥ स कुमारो महोदारलक्षणः कमलेक्षणः ॥ अवाप्य महतीं विद्यां बाल्य एव महामतिः ॥ ७६ ॥ अथोपनीतो गुरुणा काले लोकमनोरमः ॥ स शारदेय एवेति लोके ख्याति मवाप ह ॥ ७७ ॥ ऋग्वेदमष्टमे वर्षे नवमे यजुषां गणम् ॥ दशमे सामवेदं च लीलयाध्यगमत्सुधीः ॥ ७८ ॥ अथ त्रिलोकमहिते संप्राप्ते शिवपर्वणि ॥ गोकर्णं प्रययुः सर्वे जनाः सर्वनिवासिनः ॥ ७९ ॥ शारदापि स्वपुत्रेण गोकर्णं प्रययौ सती ॥ ८० ॥ तत्रापश्यत्समायातं सदा स्वप्नेषु लक्षितम् ॥ पूर्वजन्मनि भर्तारं द्विजबंधुजनावृतम् ॥ ८१ ॥ तं दृष्ट्वा प्रेमनिर्विण्णा पुलकांकितविग्रहा ॥ निरुद्धबाष्पप्रसरा तस्थौ तन्यस्तलोचना ॥ ८२ ॥ स च विप्रोऽपि तां दृष्ट्वा रूपलक्षणलक्षिताम् ॥ स्वप्ने सदा भुज्यमानामात्मनो रतिदायिनीम् ॥ ८३ ॥ तं कुमारमपि स्वप्ने दृष्ट्वा चात्मशरीरजम् ॥ विलोक्य विस्मयाविष्टस्तदंतिकमुपाययौ ॥ ८४ ॥ भद्रे त्वां प्रष्टुमिच्छामि यत्किंचिन्मनसि स्थितम् ॥ इति प्रथममाभाष्य रहःस्थानं निनाय ताम् ॥ ८५ ॥ का त्वं कथय वामोरु कस्य भार्यासि सुव्रते ॥ को देशः कस्य वा पुत्री किन्नामेत्यब्रवीच्च ताम् ॥ ८६ ॥ इति तेन समापृष्टा सा नारी बाष्पलोचना ॥ व्याजहारात्मनो वृत्तं बाल्ये वैधव्यकारणम् ॥ ८७ ॥ पुनः पप्रच्छ तां बालां पुत्रः कस्यायमुत्तमः ॥ कथं धृतो वा जठरे बालोऽयं चंद्रसन्निभः ॥ ८८ ॥ ॥ शारदोवाच ॥ ॥ एष मे तनयः स्वामिन्सर्वविद्याविशारदः ॥ शारदेय इति प्रोक्तो मम नाम्नैव कल्पितः ॥ ८९ ॥ इति तस्या वचः श्रुत्वा विहस्य ब्राह्मणोत्तमः ॥ प्रोवाच कष्टात्कष्टं हि चरितं तव भामिनि ॥ ९० ॥ पाणिग्रहणमात्रं ते कृत्वा भर्ता मृतः किल ॥ कथं चायं सुतो जातस्तस्य कारणमुच्यताम् ॥ ९१ ॥ इति तेनोदितां वाणीमाकर्ण्यातीव लज्जिता ॥ क्षणं चाश्रुमुखी भूत्वा धैर्यादित्थमभाषत ॥ ९२ ॥ ॥ शारदोवाच ॥ ॥ तदलं परिहासोक्त्या त्वं मां वेत्सि महामते ॥ त्वामहं वेद्मि चार्थेऽस्मिन्प्रमाणं मन आवयोः ॥ ९३ ॥ इत्युक्त्वा सर्वमावेद्य देव्या दत्तं वरादिकम् ॥ व्रतस्यार्धं कुमारं तं ददौ तस्मै धृतव्रतम् ॥ ९४ ॥ सोऽपि प्रमुदितो विप्रः कुमारं प्रतिगृह्य तम् ॥ पित्रोरनुमतेनैव तां निनाय निजालयम् ॥ ९५ ॥ सापि स्थित्वा बहून्मासांस्तस्य विप्रस्य मंदिरे ॥ तस्मिन्कालवशं प्राप्ते प्रविश्याग्निं तमन्वगात् ॥ ९६ ॥ ततस्तौ दंपती भूत्वा विमानं दिव्यमास्थितौ ॥ दिव्यभोगसमायुक्तौ जग्मतुः शिवमंदिरम् ॥ ९७ ॥ इत्येत

१ भारतवासिनः–इ० पा० । २ रचितम्–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्पुण्यमाख्यानं मया समनुवर्णितम् ॥ पठतां शृण्वतां सम्यग्[1]भुक्तिमुक्तिफ[2]लप्रदम् ॥ ९८ ॥ आयुरारोग्यसंपत्तिधनधान्यविवर्द्धनम् ॥ स्त्रीणां मंगलसौभाग्यसंतानसुखसाधनम् ॥ ९९ ॥ एतन्महाख्यानमघौघनाशनं गौरीमहेशव्रतपुण्यकीर्तनम् ॥ भक्त्या सकृद्यः शृणुयाच्च कीर्त्तयेद्भुक्त्वा स भोगान्पदमेति शाश्वतम् ॥ १०० ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मोत्तरखण्डे शारदाख्यानवर्णनं नामैकोनविंशोऽध्यायः ॥ १९ ॥ छ ॥ सूत उवाच ॥ ॥ अथ रुद्राक्षमाहात्म्यं वर्णयामि समासतः ॥ सर्वपापक्षयकरं शृण्वतां पठतामपि ॥ ॥ १ ॥ अभक्तो वापि भक्तो वा नीचो नीचतरोपि वा ॥ रुद्राक्षान्धारयेद्यस्तु मुच्यते सर्वपातकैः ॥ २ ॥ रुद्राक्षधारणं पुण्यं केन वा सदृशं भवेत् ॥ महाव्रतमिदं प्राहुर्मुनयस्तत्त्वदर्शिनः ॥ ३ ॥ सहस्रं धारयेद्यस्तु रुद्राक्षाणां धृतव्रतः ॥ तं नमंति सुराः सर्वे यथा रुद्रस्तथैव सः ॥ ४ ॥ अभावे तु सहस्रस्य बाह्वोः षोडश षोडश ॥ एकं शिखायां करयोर्द्वादश द्वादशैव हि ॥ ५ ॥ द्वात्रिंशत्कंठदेशे तु चत्वारिंशत्तु मस्तके ॥ एकैक कर्णयोः षट् षट् वक्षस्यष्टोत्तरं शतम् ॥ यो धारयति रुद्राक्षान्रुद्रवत्सोपि पूज्यते ॥ ६ ॥ मुक्ताप्रवालस्फटिकरौप्यवैदूर्यकांचनैः ॥ समेतान्धारयेद्यस्तु रुद्राक्षान्स शिवो भवेत् ॥ ७ ॥ केवलानपि रुद्राक्षान्यथालाभं बिभर्ति यः ॥ तं न स्पृशंति पापानि तमांसीव विभावसुम् ॥ ८ ॥ रुद्राक्षमालया जतो मंत्रोऽनंतफलप्रदः ॥ अरुद्राक्षो जपः पुंसां तावन्मात्रफलप्रदः ॥ ९ ॥ यस्यांगे नास्ति रुद्राक्ष एकोपि बहुपुण्यदः ॥ तस्य जन्म निरर्थं स्यात्त्रिपुंड्ररहितं यदि ॥ १० ॥ रुद्राक्षं मस्तके बद्ध्वा शिरःस्नानं करोति यः ॥ गंगास्नानफलं तस्य जायते नात्र संशयः ॥ ११ ॥ रुद्राक्षं पूजयेद्यस्तु विना तोयाभिषेचनम् ॥ यत्फलं लिंगपूजायास्तदेवाप्नोति निश्चितम् ॥ १२ ॥ एकवक्त्राः पंचवक्त्रा एकादशमुखाः परे ॥ चतुर्दशमुखाः केचिद्रुद्राक्षा लोकपूजिताः ॥ १३ ॥ भक्त्या संपूजितो नित्यं रुद्राक्षः शंकरात्मकः ॥ दरिद्रं वापि कुरुते राजराजश्रियान्वितम् ॥ १४ ॥ अत्रेदं पुण्यमाख्यानं वर्णयंति मनीषिणः ॥ महापापक्षयकरं श्रवणात्कीर्त्तनादपि ॥ १५ ॥ राजा काश्मीरदेशस्य भद्रसेन इति श्रुतः ॥ तस्य पुत्रोऽभवद्धीमान्सुधर्मानाम वीर्यवान् ॥ १६ ॥ तस्यामात्यसुतः कश्चित्तारको नाम सद्गुणः ॥ बभूव राजपुत्रस्य सखा परमशोभनः ॥ १७ ॥ तावुभौ परमस्निग्धौ कुमारौ रूपसुन्दरौ ॥ विद्याभ्यासपरौ बाल्ये सह क्रीडां प्रचक्रतुः ॥ १८ ॥ तौ सदा सर्वगात्रेषु रुद्राक्षकृतभूषणौ ॥ विचेरतु[3]रुदारांगौ

१ सद्यः–इ० पा० । २ अत्र हि कस्मिश्चित्पुस्तके–'एवं शिवतमः पंथाः' इत्यारभ्य अध्यायो दृश्यते परमेतास्मिन्पुस्तके । सोऽध्यायोऽत्र आगमिष्यत्यतोत्र न गृहीतः–इति भावनीयं सुधीभिः । ३ अलं प्रीत्यादि व्यालंकारधारिणौ–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सततं भस्मधारिणौ ॥ १९ ॥ हारकेयूरकटककुंडलादिविभूषणम् ॥ हेमरत्नमयं त्यक्त्वा रुद्राक्षान्दधतुश्च तौ ॥ २० ॥ रुद्राक्षमालिनौ नित्यं
रुद्राक्षकरकंकणौ ॥ रुद्राक्षकंठाभरणौ सदा रुद्राक्षकुंडलौ ॥ २१ ॥ हेमरत्नाद्यलंकारे लोष्टपाषाणदर्शनौ ॥ बोध्यमानावपि जनैर्न रुद्राक्षान्व्य
मुंचताम् ॥ २२ ॥ तस्य काश्मीरराजस्य गृहं प्राप्तो यदृच्छया ॥ पराशरो मुनिवरः साक्षादिव पितामहः ॥ २३ ॥ तमर्चयित्वा विधिवद्राजा
धर्मभृतां वरः ॥ प्रपच्छ सुखमासीनं त्रिकालज्ञं महामुनिम् ॥ २४ ॥ ॥ राजोवाच ॥ ॥ भगवन्नेष पुत्रो मे सोपि मंत्रिसुतश्च मे ॥ रुद्राक्ष
धारिणौ नित्यं रत्नाभरणनिःस्पृहौ ॥ २५ ॥ शास्यमानावपि सदा रत्नाकल्पपरिग्रहे ॥ विलंघितास्मद्वचनौ रुद्राक्षेष्वेव तत्परौ ॥ २६ ॥ नोप
दिष्टाविमौ बालौ कदाचिदपि केनचित् ॥ एषा स्वाभाविकी वृत्तिः कथमासीत्कुमारयोः ॥ २७ ॥ ॥ पराशर उवाच ॥ ॥ शृणु राजन्प्रवक्ष्यामि तव
पुत्रस्य धीमतः ॥ यथा त्वं मंत्रिपुत्रस्य प्राग्वृत्तं विस्मयावहम् ॥२८॥ नंदिग्रामे पुरा काचिन्महानंदेति विश्रुता॥ बभूव वारवनिता शृंगारललिताकृतिः
॥२९॥ छत्रं पूर्णेंदुसंकाशं यानं स्वर्णविराजितम् ॥ चामराणि सुदंडानि पादुके च हिरण्मये॥३०॥अंबराणि विचित्राणि महार्हाणि द्युमंति च ॥ चंद्र
रश्मिनिभाः शय्याः पर्यंकाश्च हिरण्मयाः ॥ ३१ ॥ गावो महिष्यः शतशो दासाश्च शतशस्तथा ॥ ३२ ॥ सर्वाभरणदीप्तांग्यो दास्यश्च नवयौव
नाः ॥ भूषणानि पराध्यार्णि नवरत्नोज्ज्वलानि च ॥ ३३ ॥ गन्धकुंकुमकस्तूरीकर्पूरागुरुलेपनम् ॥ चित्रमाल्यावतंसश्च यथेष्टं मृष्टभोजनम् ॥३४॥
नानाचित्रवितानाढ्यं नानाधान्यमयं गृहम् ॥ बहुरत्नसहस्राढ्यं कोटिसंख्याधिकं धनम् ॥ ३५ ॥ एवं विभवसंपन्ना वेश्या कामविहारिणी ॥
शिवपूजारता नित्यं सत्यधर्मपरायणा ॥ ३६ ॥ सदाशिवकथासक्ता शिवनामकथोत्सुका ॥ शिवभक्तांघ्र्यवनता शिवभक्तिरतानिशम् ॥ ३७ ॥
विनोदहेतोः सा वेश्या नाट्यमण्डपमध्यतः॥ रुद्राक्षैर्भूषयित्वैकं मर्कटं चैव कुक्कुटम् ॥३८॥ करतालैश्च गीतैश्च सदा नर्तयति स्वयम् ॥ पुनश्च विह
संत्युच्चैः सखीभिः परिवारिता ॥ ३९ ॥ युग्मम् ॥ रुद्राक्षैः कृतकेयूरकर्णाभरणभूषणः ॥ मर्कटः शिक्षया तस्याः सदा नृत्यति बालवत् ॥ ४० ॥
शिखायां बद्धरुद्राक्षः कुक्कुटः कपिना सह ॥ चिरं नृत्यति नृत्यज्ञः पश्यतां चित्रमावहन् ॥४१॥ एकदा भवनं तस्याः कश्चिद्वैश्यः शिवव्रती॥ आज
जगाम सरुद्राक्षस्त्रिपुंड्री निर्ममः कृती ॥ ४२ ॥ स बिभ्रद्रस्म विशदे प्रकोष्ठे वरकंकणम् ॥ महारत्नपरिस्तीर्णं ज्वलंतं तरुणार्कवत् ॥४३॥ तमागतं
सा गणिका संपूज्य परया मुदा ॥ तत्प्रकोष्ठगतं वीक्ष्य कंकणं प्राह विस्मिता ॥ ४४ ॥ महारत्नमयः सोऽयं कंकणस्त्वत्करे स्थितः ॥ मनो हरति

१ प्रकृतिर्विस्मयावहा–इ० पा० । २ द्वयम्–इ०पा० । ३ चित्तमाहरत्–इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मे साधो दिव्यस्त्रीभूषणोचितः ॥ ४५ ॥ इति तां वररत्नाढ्ये सस्पृहां करभूषणे ॥ वीक्ष्योदारमतिर्वैश्यः सस्मितं समभाषत ॥ ४६ ॥
॥ ॥ वैश्य उवाच ॥ ॥ अस्मिन्रत्नवरे दिव्ये यदि ते सस्पृहं मनः ॥ तमेवादत्स्व सुप्रीता मौल्यमस्य ददासि किम् ॥ ४७ ॥ ॥ वेश्यो
वाच ॥ ॥ वयं तु स्वैरचारिण्यो वेश्यास्तु न पतिव्रताः ॥ अस्मत्कुलोचितो धर्मो व्यभिचारो न संशयः ॥ ४८ ॥ यद्येतद्रत्नखचितं ददासि
करभूषणम् ॥ दिनत्रयमहोरात्रं तव पत्नी भवाम्यहम् ॥ ४९ ॥ ॥ वैश्य उवाच ॥ ॥ तथास्तु यदि ते सत्यं वचनं वारवल्लभे ॥ ददामि
रत्नवलयं त्रिरात्रं भव मद्वधूः ॥ ५० ॥ एतस्मिन्व्यवहारे तु प्रमाणं शशिभास्करौ ॥ त्रिवारं सत्यमित्युक्त्वा हृदयं मे स्पृश प्रिये ॥ ५१ ॥
॥ ॥ वेश्योवाच ॥ ॥ दिनत्रयमहोरात्रं पत्नी भूत्वा तव प्रभो ॥ सहधर्मं चरामीति सा तद्धृदयमस्पृशत् ॥ ५२ ॥ अथ तस्यै स वैश्यस्तु
प्रददौ रत्नकङ्कणम् ॥ लिंगं रत्नमयं चास्या हस्ते दत्त्वेदमब्रवीत् ॥ ५३ ॥ इदं रत्नमयं शैवं लिंगं मत्प्राणसंनिभम् ॥ रक्षणीयं त्वया कांते तस्य
हानिर्मृतिर्मम ॥ ५४ ॥ एवमस्त्विति सा कांता लिंगमादाय रत्नजम् ॥ नाट्यमण्डपिकास्तंभे निधाय प्राविशद्गृहम् ॥ ५५ ॥ सा तेन संगता
रात्रौ वैश्येन विटधर्मिणा ॥ सुखं सुष्वाप पर्यंके मृदुतल्पोपशोभिते ॥ ५६ ॥ ततो निशीथसमये नाट्यमण्डपिकांतरे ॥ अकस्मादुत्थितो
वह्निस्तमेव सहसावृणोत् ॥ ५७ ॥ मण्डपे दह्यमाने तु सहसोत्थाय संभ्रमात् ॥ सा वेश्या मर्कटं तत्र मोचयामास बंधनात् ॥ ५८ ॥ स मर्कटो
मुक्तबंधः कुक्कुटेन[1] सहामुना ॥ भीतो दूरं प्रदुद्राव विधूयाग्निकणान्बहून् ॥ ५९ ॥ स्तंभेन सह निर्दग्धं तल्लिंगं शकलीकृतम् ॥ दृष्ट्वा वेश्या च
वैश्यश्च दुरंतं दुःखमापतुः ॥ ६० ॥ दृष्ट्वा प्राणसमं लिंगं दग्धं वैश्यपतिस्तथा ॥ स्वयमप्याप्त[2]निर्वेदो मरणाय मतिं दधौ ॥ ६१ ॥ निर्वेददा
न्नितरां खेदाद्वैश्यस्तामाह दुःखिताम् ॥ शिवलिंगे तु निर्भिन्ने नाहं जीवितुमुत्सहे ॥ ६२ ॥ चितां कारय मे भद्रे तव भृत्यैर्बलाधिकैः ॥ शिवे
मनः समावेश्य प्रविशामि हुताशनम् ॥ ६३ ॥ यदि ब्रह्मेंद्रविष्णवाद्या वारयेयुः समेत्य माम् ॥ तथाप्यस्मिन्क्षणे धीरः प्रविश्याग्निं त्यजा
म्यसून् ॥ ६४ ॥ तमेवं दृढबंधं सा विज्ञाय बहुदुःखिता ॥ स्वभृत्यैः कारयामास चितां स्वन[3]गराद्बहिः ॥ ६५ ॥ ततः स वैश्यः शिवभक्तिपूतः
प्रदक्षिणीकृत्य समिद्धमग्निम् ॥ विवेश पश्यत्सु जनेषु धीरः सा चानुतापं युवती प्रपेदे ॥ ६६ ॥ अथ सा दुःखिता नारी स्मृत्वा धर्मं सुनिर्म
लम् ॥ सर्वान्बन्धून्समीक्ष्यैवं बभाषे करुणं वचः ॥ ६७ ॥ रत्नकंकणमादाय मया सत्यमुदाहृतम् ॥ दिनत्रयमहं पत्नी वैश्यस्यामुष्य
संमता ॥ ६८ ॥ कर्मणा मत्कृतेनायं मृतो वैश्यः शिवव्रती ॥ तस्मादहं प्रवेक्ष्यामि सहानेन हुताशनम् ॥ सधर्मचारिणीत्युक्तं

१ कुक्कुटश्च महामते--इ० पा० । २ आख्यातनिर्वेन्वः--इ० पा० । ३ स्वभवनात्--इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सत्यमेतद्धि पश्यथ ॥ ६९ ॥ सत्येन प्रीतिमायांति देवास्त्रिभुवनेश्वराः ॥ सत्यासक्तिः परो धर्मः सत्ये सर्वं प्रतिष्ठितम् ॥ ७० ॥
सत्येन स्वर्गमोक्षौ च नासत्येन परा गतिः ॥ तस्मात्सत्यं समाश्रित्य प्रवेक्ष्यामि हुताशनम् ॥ ७१ ॥ इति सा दृढनिर्बंधा वार्यमाणापि बंधुभिः ॥
सत्यलोपभयान्नारी प्राणांस्त्यक्तुं मनो दधे ॥ ७२ ॥ सर्वस्वं शिवभक्तेभ्यो दत्त्वा ध्यात्वा सदाशिवम् ॥ तमग्निं त्रिः परिक्रम्य प्रवेशाभिमुखी स्थि
ता ॥ ७३ ॥ तां पतंतीं समिद्धेऽग्नौ स्वपदार्पितमानसाम् ॥ वारयामास विश्वात्मा प्रादुर्भूतः शिवः स्वयम् ॥ ७४ ॥ सा तं विलोक्याखिलदेव
देवं त्रिलोचनं चन्द्रकलावतंसम् ॥ शशांकसूर्यानलकोटिभासं स्तब्धेव भीतेव तथैव तस्थौ ॥ ७५ ॥ तां विह्वलां परित्रस्तां वेपमानां जडी
कृताम् ॥ समाश्वास्य गलद्बाष्पां करे गृह्याब्रवीद्वचः ॥ ७६ ॥ ॥ शिव उवाच ॥ ॥ सत्यं धर्मं च ते धैर्यं भक्तिं च मयि निश्चलाम् ॥ निरी
क्षितुं त्वत्सकाशं वैश्यो भूत्वाहमागतः ॥ ७७ ॥ माययाग्निं समुत्थाप्य दग्धवान्नाट्यमंडपम् ॥ दग्धं कृत्वा रत्नलिंगं प्रविष्टोस्मि हुताशनम् ॥
॥ ७८ ॥ वेश्याः कैतवकारिण्यः स्वैरिण्यो जनवंचकाः ॥ सा त्वं सत्यमनुस्मृत्य प्रविष्टाग्निं मया सह ॥ ७९ ॥ अतस्ते संप्रदास्यामि भोगां
स्त्रिदशदुर्लभान् ॥ आयुश्च परमं दीर्घमारोग्यं च प्रजोन्नतिम् ॥ यद्यदिच्छसि सुश्रोणि तत्तदेव ददामि ते ॥ ८० ॥ ॥ सूत उवाच ॥ ॥ इति
ब्रुवति गौरीशे सा वेश्या प्रत्यभाषत ॥ ८१ ॥ ॥ वेश्योवाच ॥ ॥ न मे वांछास्ति भोगेषु भूमौ स्वर्गे रसातले ॥ तव पादांबुजस्पर्शादन्य
त्किंचिन्न वै वृणे ॥ ८२ ॥ एते भृत्याश्च दास्यश्च ये चान्ये मम बांधवाः ॥ सर्वे त्वदर्चनपरास्त्वयि संन्यस्तवृत्तयः ॥ ८३ ॥ सर्वानेतान्मया सार्धं
नीत्वा तव परं पदम् ॥ पुनर्जन्मभयं घोरं विमोचय नमोस्तु ते ॥ ८४ ॥ तथेति तस्या वचनं प्रतिनंद्य महेश्वरः ॥ तान्सर्वांश्च तया सार्धं निनाय
परमं पदम् ॥ ८५ ॥ ॥ पराशर उवाच ॥ ॥ नाट्यमंडपिकादाहे यौ दूरं विद्रुतौ पुरा ॥ तत्रावशिष्टौ तावेव कुक्कुटो मर्कटस्तथा ॥ ८६ ॥
कालेन निधनं यातो यस्तस्या नाट्यमर्कटः ॥ सोभूत्तव कुमारोऽसौ कुक्कुटो मंत्रिणः सुतः ॥ ८७ ॥ रुद्राक्षधारणोद्भूतात्पुण्यात्पूर्वभवार्जितात् ॥
कुले महति संजातौ वर्तेते बालकाविमौ ॥ ८८ ॥ पूर्वाभ्यासेन रुद्राक्षान्दधाते शुद्धमानसौ ॥ अस्मिञ्जन्मनि तं लोके शिवं संपूज्य यास्य
तः ॥ ८९ ॥ एषा प्रवृत्तिस्त्वनयोर्बालयोः समुदाहृता ॥ कथा च शिवभक्ताया किमन्यत्प्रष्टुमिच्छसि ॥ ९० ॥ इति श्रीस्कांदे महापुराण एका
शीतिसाहस्र्यां संहितायां तृतीये ब्रह्मोत्तरखण्डे रुद्राक्षमहिमवर्णनं नाम विंशोऽध्यायः ॥ २० ॥ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ एवं ब्रह्मर्षिणा
प्रोक्तां वाणीं पीयूषसन्निभाम् ॥ आकर्ण्य मुदितो राजा प्रांजलिः पुनरब्रवीत् ॥ १ ॥ ॥ राजोवाच ॥ ॥ अहो सत्संगमः पुंसामशेषाघप्रशो

१ कामये इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धनः ॥ कामक्रोधनिहंता च इष्टदोग्धा जनस्य हि ॥ २ ॥ मम मायातमो नष्टं ज्ञानदृष्टिः प्रकाशिता ॥ तव दर्शनमात्रेण प्रायोहममरोत्तमः ॥ ३ ॥ श्रुतं च पूर्वचरितं बालयोः सम्यगेतयोः ॥ भविष्यदपि पृच्छामि मत्पुत्राचरणं मुने ॥ ४ ॥ अस्यायुः कति वर्षाणि भाग्यं वद च कीदृशम् ॥ विद्या कीर्तिश्च शक्तिश्च श्रद्धा भक्तिश्च कीदृशी ॥ ५ ॥ एतत्सर्वमशेषेण मुने त्वं वक्तुमर्हसि ॥ तव शिष्योस्मि भृत्योस्मि शरणं त्वां गतोस्म्यहम् ॥ ६ ॥ ॥ पराशर उवाच ॥ ॥ अत्रावाच्यं हि यत्किंचित्कथं शक्तोस्मि शंसितुम् ॥ यच्छ्रुत्वा धृतिमंतोपि विषादं प्राप्नुयुर्जनाः ॥ ७ ॥ तथापि निर्व्यलीकेन भावेन परिपृच्छतः ॥ अवाच्यमपि वक्ष्यामि तव स्नेहान्महीपते ॥ ८ ॥ अमुष्य त्वत्कुमारस्य वर्षाणि द्वादशा त्यंयुः[1] ॥ इतः परं प्रपद्येत सप्तमे दिवसे मृतिम् ॥ ९ ॥ इति तस्य वचः श्रुत्वा कालकूटमिवोदितम् ॥ मूर्च्छितः सहसा भूमौ पतितो नृपतिः शुचा ॥ १० ॥ तमुत्थाप्य समाश्वास्य स मुनिः करुणार्द्रधीः ॥ उवाच मा भैर्नृपते पुनर्वक्ष्यामि ते हितम् ॥ ११ ॥ सर्गात्पुरा निरालोकं यदेकं निष्कलं परम् ॥ चिदानंदमयं ज्योतिः स आद्यः केवलः शिवः ॥ १२ ॥ स एवादौ रजोरूपं सृष्ट्वा ब्रह्माणमात्मना ॥ सृष्टिकर्मनियुक्ताय तस्मै वेदांश्च दत्तवान् ॥ १३ ॥ पुनश्च दत्तवानीश आत्मतत्त्वैकसंग्रहम् ॥ सर्वोपनिषदां सारं रुद्राध्यायं च दत्तवान् ॥ १४ ॥ यदेकमव्ययं साक्षाद्ब्रह्मज्योतिः सनातनम् ॥ शिवात्मकं परं तत्त्वं रुद्राध्याये प्रतिष्ठितम् ॥ १५ ॥ स आत्मभूः सृजद्विश्वं चतुर्भिर्वदनैर्विराट् ॥ ससर्ज वेदांश्चतुरो लोकानां स्थितिहेतवे ॥ १६ ॥ तत्रायं यजुषां मध्ये ब्रह्मणो दक्षिणान्मुखात् ॥ अशेषोपनिषत्सारो रुद्राध्यायः समुद्गतः ॥ १७ ॥ स एष मुनिभिः सर्वैर्मरीच्यत्रिपुरोगमैः ॥ सह देवैर्धृतस्तेभ्यस्तच्छिष्या जगृहुश्च तम् ॥ १८ ॥ तच्छिष्यशिष्यैस्तत्पुत्रैस्तत्पुत्रैश्च क्रमागतैः ॥ धृतो रुद्रात्मकः सोऽयं वेदसारः प्रसादितः ॥ १९ ॥ एष एव परो मन्त्र एष एव परं तपः ॥ रुद्राध्यायजपः पुंसां परं कैवल्यसाधनम् ॥ २० ॥ महापातकिनः प्रोक्ता उपपातकिनश्च ये ॥ रुद्राध्यायजपात्सद्यस्तेऽपि यांति परां गतिम् ॥ २१ ॥ भूयोपि ब्रह्मणा सृष्टाः सदसन्मिश्रयोनयः ॥ देवतिर्यङ्मनुष्याद्यास्ततः संपूरितं जगत् ॥ २२ ॥ तेषां कर्माणि सृष्टानि स्वजन्मानुगुणानि च ॥ लोकास्तेषु प्रवर्तंते भुंजते चैव तत्फलम् ॥ २३ ॥ लोकसृष्टिप्रवाहार्थं स्वयमेव प्रजापतिः ॥ धर्माधर्मौ ससर्जाग्रे स्ववक्षःपृष्ठभागतः ॥ २४ ॥ धर्ममेवानुतिष्ठंतः पुण्यं विंदंति तत्फलम् ॥ अधर्ममनुतिष्ठंतस्ते पापफलभोगिनः ॥ २५ ॥ पुण्यकर्मफलं स्वर्गो नरकस्तद्विपर्ययः ॥ तयोर्द्वावधिपौ धात्रा कृतौ शतमखांतकौ ॥ २६ ॥ कामः क्रोधश्च लोभश्च मदमानादयः परे ॥ अधर्मस्य सुता आस

१ अत्यगुः—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्सर्वे नरकनायकाः ॥ २७ ॥ गुरुतल्पः सुरापानं तथान्यः पुल्कसीगमः ॥ कामस्य तनया ह्येते प्रधानाः परिकीर्तिताः ॥ २८ ॥ क्रोधात्पितृ
वधो जातस्तथा मातृवधः परः ॥ ब्रह्महत्या च कन्यैका क्रोधस्य तनया अमी ॥ २९ ॥ देवस्वहरणश्चैव ब्रह्मस्वहरणस्तथा ॥ स्वर्णस्तेय इति
त्वेते लोभस्य तनयाः स्मृताः ॥ ३० ॥ एतानाहूय चांडालान्यमः पातकनायकान् ॥ नरकस्य विवृद्ध्यर्थमाधिपत्यं चकार ह ॥ ३१ ॥ ते
यमेन समादिष्टा नव पातकनायकाः ॥ ते सर्वे संगता भूयो घोराः पातकनायकाः ॥ ३२ ॥ नरकान्पालयामासुः[१] स्वभृत्यैश्चोपपातकैः ॥ रुद्रा
ध्याये भुवि प्राप्ते साक्षात्कैवल्यसाधने ॥ ३३ ॥ भीताः प्रदुद्रुवुः सर्वे तेऽमी पातकनायकाः ॥ यमं विज्ञापयामासुः सहान्यैरुपपातकैः ॥ ३४ ॥
जय देव महाराज वयं हि तव किंकराः ॥ नरकस्य विवृद्ध्यर्थं साधिकाराः कृतास्त्वया ॥ ३५ ॥ अधुना वर्तितुं लोके न शक्ताः स्मो वयं प्रभो ॥
रुद्राध्यायानुभावेन निर्दग्धाश्चैव विद्रुताः ॥ ३६ ॥ ग्रामेग्रामे नदीकूले पुण्येष्वायतनेषु च ॥ रुद्रजाप्ये तु पर्याप्ते कथं लोके चरेमहि ॥ ३७ ॥
प्रायश्चित्तसहस्रं वै गणयामो न किंचन ॥ रुद्रजाप्याक्षराण्येव सोढुं बत न शक्नुमः ॥ ३८ ॥ महापातकमुख्यानामस्माकं लोकघातिनाम् ॥
रुद्रजाप्यं भयं घोरं रुद्रजाप्यं महद्विषम् ॥ ३९ ॥ अतो दुर्विषहं घोरमस्माकं व्यसनं महत् ॥ रुद्रजाप्येन संप्राप्तमपनेतुं त्वमर्हसि ॥ ४० ॥ इति
विज्ञापितः साक्षाद्यमः पातकनायकैः ॥ ब्रह्मणोऽतिकमासाद्य तस्मै सर्वं न्यवेदयत् ॥ ४१ ॥ देवदेव जगन्नाथ त्वामेव शरणं गतः ॥ त्वया नियुक्तो
मर्त्यानां निग्रहे पापकारिणाम् ॥ ४२ ॥ अधुना पापिनो मर्त्या न संति पृथिवीतले ॥ रुद्राध्यायेन निहतं पातकानां महत्कुलम् ॥ ४३ ॥ पात
कानां कुले नष्टे नरकाः शून्यतां गताः ॥ नरके शून्यतां याते मम राज्यं हि निष्फलम् ॥ ४४ ॥ तस्मात्त्वयैव भगवन्नुपायः परिचिन्त्यताम् ॥
यथा मे न विहन्येत स्वामित्वं मर्त्यदेहिनाम् ॥ ४५ ॥ इति विज्ञापितो धाता यमेन परिखिद्यता ॥ रुद्रजाप्यविघातार्थमुपायं पर्यकल्पयत् ॥४६॥
अश्रद्धां चैव दुर्मेधामविद्यायाः सुते उभे ॥ श्रद्धामेधाविघातिन्यौ मर्त्येषु पर्यचोदयत् ॥ ४७ ॥ ताभ्यां विमोहिते लोके रुद्राध्यायपराङ्मुखे ॥
यमः स्वस्थानमासाद्य कृतार्थ इव सोऽभवत् ॥ ४८ ॥ पूर्वजन्मकृतैः पापैर्जायंतेऽल्पायुषो जनाः ॥ तानि पापानि नश्यंति रुद्रं जप्तवतां
नृणाम् ॥ ४९ ॥ क्षीणेषु सर्वपापेषु दीर्घमायुर्बलं धृतिः ॥ आरोग्यं ज्ञानमैश्वर्यं वर्धते सर्वदेहिनाम् ॥ ५० ॥ रुद्राध्यायेन ये देवं स्नापयंति
महेश्वरम् ॥ तज्जलैः कुर्वतः स्नानं ते मृत्युं संतरंति च ॥ ५१ ॥ रुद्राध्यायाभिजप्तेन स्नानं कुर्वंति येंऽभसा ॥ तेषां मृत्युभयं नास्ति शिवलो
के महीयते ॥ ५२ ॥ शतरुद्राभिषेकेण शतायुर्जायते नरः ॥ अशेषपापनिर्मुक्तः शिवस्य दयितो भवेत् ॥ ५३ ॥ एष रुद्रायुतस्नानं करोतु

१ सः–इ०पा० । २ पूरयामासुः–इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तव पुत्रकः ॥ दशवर्षसहस्राणि मोदते भुवि शक्रवत् ॥ ५४ ॥ अव्याहतबलैश्वर्यो हतशत्रुर्निरामयः ॥ निर्धूताखिलपापौघः शास्ता
राज्यमकंटकम् ॥ ५५ ॥ विप्रा वेदविदः शांताः कृतिनः शंसितव्रताः ॥ ज्ञानयज्ञतपोनिष्ठाः शिवभक्तिपरायणाः ॥ ५६ ॥ रुद्राध्याय
जपं सम्यक्कुर्वंतु विमलाशयाः ॥ तेषां जपानुभावेन सद्यः श्रेयो भविष्यति ॥ ५७ ॥ इत्युक्तवंतं नृपतिर्महामुनिं तमेव वव्रे प्रथमं क्रियागुरुम् ॥
अथापरांस्त्यक्तधनाशयान्मुनीनावाहयामास सहस्रशः क्षणात् ॥ ५८ ॥ ते विप्राः शांतमनसः सहस्रपरिसंमिताः ॥ कलशानां शतं स्थाप्य पुण्य
वृक्षरसैर्युतम् ॥ ५९ ॥ रुद्राध्यायेन संस्नाप्य तमुर्वीपतिपुत्रकम् ॥ विधिवत्स्नापयामासुः संप्राप्ते सप्तमे दिने ॥ ६० ॥ स्नाप्यमानो मुनिजनैः स
राजन्यकुमारकः ॥ अकस्मादेव संत्रस्तः क्षणं मूर्च्छामवाप ह ॥ ६१ ॥ सहसैव प्रबुद्धोऽसौ मुनिभिः कृतरक्षणः ॥ प्रोवाच कश्चित्पुरुषो दंडहस्तः
समागतः ॥ ६२ ॥ मां प्रहर्तुं कृतमतिर्भीमदण्डो भयानकः ॥ सोऽपि चान्यैर्महावीरैः पुरुषैरभिताडितः ॥ ६३ ॥ बद्धा पाशेन महता दूरं नीत
इवाभवत् ॥ एतावदहमद्राक्षं भवद्भिः कृतरक्षणः ॥ ६४ ॥ इत्युक्तवंतं नृपतेस्तनूजं द्विजसत्तमाः ॥ आशीर्भिः पूजयामासुर्भयं राज्ञे न्यवेदयन् ॥
॥ ६५ ॥ अथ सर्वान्नृषीञ्छ्रेष्ठान्दक्षिणाभिर्नृपोत्तमः ॥ पूजयित्वा वरान्नेन भोजयित्वा च भक्तितः ॥ ६६ ॥ प्रतिगृह्याशिषस्तेषां मुनीनां ब्रह्मवादि
नाम् ॥ भक्त्या बंधुजनैः सार्धं सभायां समुपाविशत् ॥ ६७ ॥ तस्मिन्समागते वीरे मुनिभिः सह पार्थिवे ॥ आजगाम महायोगी देवर्षिर्नारदः
स्वयम् ॥ ६८ ॥ तमागतं प्रेक्ष्य गुरुं मुनीनां सार्धं सदस्यैरखिलैर्मुनींद्रैः ॥ प्रणम्य भक्त्या विनिवेश्य पीठे कृतोपचारं नृपतिर्बभाषे ॥ ६९ ॥
॥ ॥ राजोवाच ॥ ॥ दृष्टं किमस्ति ते ब्रह्मंस्त्रिलोक्यां किंचिदद्भुतम् ॥ तन्नो ब्रूहि वयं सर्वे त्वद्वाक्यामृतलालसाः ॥ ७० ॥ ॥ नारद
उवाच ॥ ॥ अद्य चित्रं महद्दृष्टं व्योम्नोवतरता मया ॥ तच्छृणुष्व महाराज सहैभिर्मुनिपुंगवैः ॥ ७१ ॥ अद्य मृत्युरिहायातो निहंतुं तव पुत्रकम् ॥
दंडहस्तो दुराधर्षो लोकमुद्बाधयन्सदा ॥ ७२ ॥ ईश्वरोपि विदित्वैनं त्वत्पुत्रं हंतुमागतम् ॥ सहैव पार्षदैः कंचिद्वीरभद्रमचोदयत् ॥ ७३ ॥ स आग
त्य हठान्मृत्युं त्वत्पुत्रं हंतुमागतम् ॥ गृहीत्वा सुदृढं बद्धा दंडेनाभ्यहनद्रुषा ॥ ७४ ॥ तं नीयमानं जगदीशसन्निधिं शीघ्रं विदित्वा भगवान्यमः
स्वयम् ॥ कृतांजलिर्देव जयेत्युदीरयन्प्रणम्य मूर्ध्ना निजगाद शूलिनम् ॥ ७५ ॥ ॥ यम उवाच ॥ ॥ देवदेव महारुद्र वीरभद्र नमोऽस्तु ते ॥
निरागसि कथं मृत्यौ कोपस्तव समुत्थितः ॥ ७६ ॥ निजकर्मानुबंधेन राजपुत्रं गतायुषम् ॥ प्रहर्तुमुद्यते मृत्यौ कोपराधो वद प्रभो ॥ ७७ ॥
॥ ॥ वीरभद्र उवाच ॥ ॥ दशवर्षसहस्रायुः स राजतनयः कथम् ॥ विपत्तिमंतरायाति रुद्रस्नानहताशुभः ॥ ७८ ॥ अस्ति चेत्तव संदेहो मद्रा

१ वशिनः-इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्येऽप्यनिवारिते ॥ चित्रगुप्तं समाहूय प्रष्टव्योऽद्यैव मा चिरम् ॥ ७९ ॥ ॥ नारद उवाच ॥ ॥ अथाहूतश्चित्रगुप्तो यमेन सहसागतः ॥ आयुःप्र
माणं त्वत्सूनोः परिपृष्टः स चाब्रवीत् ॥ ८० ॥ द्वादशाब्दं च तस्यायुरित्युक्त्वाथ विमृश्य च ॥ पुनर्लेख्यगतं प्राह स वर्षायुतजीवितम् ॥८१॥ अथ
भीतो यमो राजा वीरभद्रं प्रणम्य च ॥ कथंचिन्मोचयामास मृत्युं दुर्वारबंधनात् ॥ ८२ ॥ वीरभद्रेण मुक्तोऽथ यमोऽगान्निजमंदिरम् ॥ वीरभद्रश्च
कैलासमहं प्राप्तस्तवांतिकम् ॥ ८३ ॥ अतस्तव कुमारोऽयं रुद्रजाप्यानुभावतः ॥ मृत्योर्भयं समुत्तीर्य सुखी जातोऽयुतं समाः ॥ ८४ ॥ इत्युक्त्वा
नृपमामंत्र्य नारदे त्रिदिवं गते ॥ विप्राः सर्वे प्रमुदिताः स्वंस्वं जग्मुरथाश्रमम् ॥ ८५ ॥ इत्थं काश्मीरनृपती रुद्राध्यायप्रभावतः ॥ निस्तीर्याशेषदुः
खानि कृतार्थोभूत्सपुत्रकः॥८६॥ ये कीर्तयंति मनुजाः परमेश्वरस्य माहात्म्यमेतदथ कर्णपुटैः पिबंति ॥ ते जन्मकोटिकृतपापगणैर्विमुक्ताः शांताः
प्रयांति परमं पदमिंदुमौलेः ॥ ८७ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मोत्तरखंडे रुद्राध्यायमहिमवर्णनंनामैक
विंशोऽध्यायः ॥ २१ ॥ ॥ सूत उवाच ॥ ॥ एवं शिवतमः पंथाः शिवेनैव प्रदर्शितः ॥ नृणां संसृतिबद्धानां सद्यो मुक्तिकरः परः ॥ १ ॥ अथ
दुर्मेधसां पुंसां वेदेष्वनधिकारिणाम् ॥ स्त्रीणां द्विजातिबंधूनां सर्वेषां च शरीरिणाम् ॥ २ ॥ एष साधारणः पंथाः साक्षात्कैवल्यसाधनः ॥ महामुनि
जनैः सेव्यो देवैरपि सुपूजितः ॥३॥ यत्कथाश्रवणं शंभोः संसारभयनाशनम् ॥ सद्योमुक्तिकरं श्लाघ्यं पवित्रं सर्वदेहिनाम् ॥४॥ अज्ञानतिमिरांधानां
दीपोऽयंज्ञानसिद्धिदः ॥ भवरोगनिबद्धानां सुसेव्यं परमौषधम् ॥ ५ ॥ महापातकशैलानां वज्रपातसुदारुणम् ॥ भर्जनं कर्मबीजानां साधनं सर्व
संपदाम् ॥ ६ ॥ ये शृण्वंति सदा शम्भोः कथां भुवनपावनीम् ॥ ते वै मनुष्या लोकेस्मिन्रुद्रा एव न संशयः ॥ ७ ॥ शृण्वतां शूलिनो गाथां
तथा कीर्तयतां सताम् ॥ तेषां पादरजांस्येव तीर्थानि मुनयो जगुः ॥ ८ ॥ तस्मान्निःश्रेयसं गन्तुं येभिवांछंति देहिनः ॥ ते शृण्वंतु सदा भक्त्या
शैवीं पौराणिकीं कथाम् ॥ ९ ॥ यद्यशक्तः सदा श्रोतुं कथां पौराणिकीं नरः ॥ मुहूर्तं वापि शृणुयान्नियतात्मा दिनेदिने ॥ १० ॥ अथ प्रतिदिनं
श्रोतुमशक्तो यदि मानवः ॥ पुण्यमासेषु वा पुण्ये दिने पुण्यतिथिष्वपि ॥ ११ ॥ यः शृणोति कथां रम्यां पुराणैः समुदीरिताम् ॥ स निस्तरति
संसारं दग्ध्वा कर्ममहाटवीम् ॥ १२ ॥ मुहूर्तं वा तदर्द्धं वा क्षणं वा पावनीं कथाम् ॥ ये शृण्वंति सदा भक्त्या न तेषामस्ति दुर्गतिः ॥ १३ ॥
यत्फलं सर्वयज्ञेषु सर्वदानेषु यत्फलम् ॥ सकृत्पुराणश्रवणात्तत्फलं विंदते नरः ॥ १४ ॥ कलौ युगे विशेषेण पुराणश्रवणादृते ॥ नास्ति धर्मः
परः पुंसां नास्ति मुक्तिपथः परः ॥ १५ ॥ पुराणश्रवणाच्छंभोर्नास्ति संकीर्तनं परम् ॥ अत एव मनुष्याणां कल्पद्रुममहाफलम् ॥ १६ ॥

१ प्रसाद्य–इ० पा० । २ महर्षयः–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कलौ हीनायुषो मर्त्या दुर्बलाः श्रमपीडिताः ॥ दुर्मेधसो दुःखभाजो धर्माचारविवर्जिताः ॥ १७ ॥ इति संचिंत्य कृपया भगवान्बादरायणः ॥
हिताय तेषां विदधे पुराणाख्यं सुधारसम् ॥ १८ ॥ पिबन्नेवामृतं यत्नादेतत्स्यादजरामरः ॥ शम्भोः कथामृतं कुर्यात्कुलमेवाजरामरम् ॥ १९ ॥
बालो युवा दरिद्रो वा वृद्धो वा दुर्बलोऽपि वा ॥ पुराणज्ञः सदा वन्द्यः पूज्यश्च सुकृतार्थिभिः ॥ २० ॥ नीचबुद्धिं न कुर्वीत पुराणज्ञे कदाचन ॥
यस्य वक्त्रांबुजाद्वाणी कामधेनुः शरीरिणाम् ॥ २१ ॥ गुरवः संति लोकेषु जन्मतो गुणतस्तथा ॥ तेषामपि च सर्वेषां पुराणज्ञः परो गुरुः ॥ २२ ॥
भवकोटिसहस्रेषु भूत्वाभूत्वावसीदति ॥ यो ददात्यपुनर्वृत्तिं कोऽन्यस्तस्मात्परो गुरुः ॥ २३ ॥ पुराणज्ञः शुचिर्दांतः शांतो विजितमत्सरः ॥
साधुः कारुण्यवान्वाग्मी वदेत्पुण्यकथां सुधीः ॥ २४ ॥ व्यासासनं समारूढो यदा पौराणिको द्विजः ॥ असमाप्तप्रसंगश्च नमस्कुर्यान्न कस्य
चित् ॥ २५ ॥ ये धूर्ता ये च दुर्वृत्ता ये चान्ये विजिगीषवः ॥ तेषां कुटिलवृत्तीनामग्रे नैव वदेत्कथाम् ॥ २६ ॥ न दुर्जनसमाकीर्णे न
शूद्रश्वापदावृते ॥ देशे न द्यूतसदने वदेत्पुण्यकथां सुधीः ॥ २७ ॥ सद्ग्रामे सुजनाकीर्णे सुक्षेत्रे देवतालये ॥ पुण्ये नदनदीतीरे वदेत्पुण्यकथां
सुधीः ॥ २८ ॥ शिवभक्तिसमायुक्ता नान्यकार्येषु लालसाः ॥ वाग्यताः शुश्रवोऽव्यग्राः श्रोतारः पुण्यभागिनः ॥ २९ ॥ अभक्ता ये कथां
पुण्यां शृण्वंति मनुजाधमाः ॥ तेषां पुण्यफलं नास्ति दुःखं स्याज्जन्मजन्मनि ॥ ३० ॥ पुराणं ये त्वसंपूज्य तांबूलाद्यैरुपायनैः ॥ शृण्वंति च
कथां भक्त्या दरिद्राः स्युर्न पापिनः ॥ ३१ ॥ कथायां कीर्त्यमानायां ये गच्छंत्यन्यतो नराः ॥ भोगांतरे प्रणश्यंति तेषां दाराश्च संपदः ॥ ३२ ॥
सोष्णीषमस्तका ये च कथां शृण्वंति पावनीम् ॥ ते बलाकाः प्रजायन्ते पापिनो मनुजाधमाः ॥ ३३ ॥ तांबूलं भक्षयन्तो ये कथां शृण्वंति
पावनीम् ॥ स्वविष्ठां खादयंत्येतान्नरके यमकिंकराः ॥ ३४ ॥ ये च तुंगासनारूढाः कथां शृण्वंति दांभिकाः ॥ अक्षयान्नरकान्भुक्त्वा ते भवंत्येव
वायसाः ॥ ३५ ॥ ये च वीरासनारूढा ये च[1] मंचकसंस्थिताः ॥ शृण्वंति सत्कथां ते वै भवंत्यनृजुपादपाः ॥ ३६ ॥ असंप्रणम्य शृण्वंतो विषवृक्षा
भवंति ते ॥ कथां शयानाः शृण्वन्तो भवंत्यजगरा नराः ॥ ३७ ॥ यः शृणोति कथां वक्तुः समानासनमाश्रितः ॥ गुरुतल्पसमं पापं संप्राप्य नरकं
व्रजेत् ॥ ३८ ॥ ये निंदंति पुराणज्ञं कथां वा पापहारिणीम् ॥ ते वै जन्मशतं मर्त्याः शुनकाः संभवंति च ॥ ३९ ॥ कथायां वर्तमानायां ये
वदंति नराधमाः ॥ ते गर्दभाः प्रजायन्ते कृकलासास्ततः परम् ॥ ४० ॥ कदाचिदपि ये पुण्यां न शृण्वंति कथां नराः ॥ ते भुक्त्वा नरकान्घोरान्भ
वंति वनसूकराः ॥ ४१ ॥ ये कथामनुमोदन्ते कीर्त्यमानां नरोत्तमाः ॥ अशृण्वंतोऽपि ते यांति शाश्वतं परमं पदम् ॥ ४२ ॥ कथायां कीर्त्य

१ ये चान्यध्यानसंस्थिताः—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मानायां विघ्नं कुर्वंति ये शठाः ॥ कोटयब्दान्नरकान्भुक्त्वा भवंति ग्रामसूकराः ॥ ४३ ॥ ये श्रावयंति मनुजान्पुण्यां पौराणिकीं कथाम् ॥
कल्पकोटिशतं साग्रं तिष्ठंति ब्रह्मणः पदम् ॥ ४४ ॥ आसनार्थं प्रयच्छंति पुराणज्ञस्य ये नराः ॥ कम्बलाजिनवासांसि मञ्चं फलकमे
व च ॥ ४५ ॥ स्वर्गलोकं समासाद्य भुक्त्वा भोगान्यथेप्सितान् ॥ स्थित्वा ब्रह्मादिलोकेषु पदं यांति निरामयम् ॥ ४६ ॥ पुराणज्ञस्य यच्छंति
ये सूत्रवसनं नवम् ॥ भोगिनो ज्ञानसंपन्नास्ते भवंति भवेभवे ॥ ४७ ॥ ये महापातकैर्युक्ता उपपातकिनश्च ये ॥ पुराणश्रवणादेव ते यांति परमं पदम्
॥ ४८ ॥ अत्र वक्ष्ये महापुण्यमितिहासं द्विजोत्तमाः ॥ शृण्वतां सर्वपापघ्नं विचित्रं सुमनोहरम् ॥ ४९ ॥ दक्षिणापथमध्ये वै ग्रामो बाष्कलसं
ज्ञितः ॥ तत्र[1] संति जनाः सर्वे मूढाः कर्मविवर्जिताः ॥ ५० ॥ न तत्र ब्राह्मणाचाराः श्रुतिस्मृतिपराङ्मुखाः ॥ जपस्वाध्यायरहिताः परस्त्री
विषयातुराः ॥ ५१ ॥ कृषीवलाः शस्त्रधरा निर्देवा जिह्मवृत्तयः ॥ न जानंति परं धर्मं ज्ञानवैराग्यलक्षणम् ॥ ५२ ॥ स्त्रियश्च पापनिरताः स्वैरि
ण्यः कामलालसाः॥ दुर्बुद्धयः कुटिलगाः सद्वृताचारवर्जिताः ॥ ५३ ॥ तत्रैको विदुरो नाम दुरात्मा ब्राह्मणाधमः ॥ आसीद्वेश्यापतिर्योऽसौ सदा
रोऽपि कुमार्गगः ॥ ५४ ॥ स्वपत्नीं बंदुलां[2] नाम हित्वा प्रतिनिशं तथा ॥ वेश्याभवनमासाद्य रमते स्मरपीडितः ॥ ५५ ॥ सापि तस्यांगना[3] रात्रौ
वियुक्ता नवयौवना ॥ असहंती स्मरावेशं रेमे जारेण संगता ॥ ५६ ॥ तां कदाचिद्दुराचारां जारेण सह संगताम् ॥ दृष्ट्वा तस्याः पतिः क्रोधादभि
दुद्राव सत्वरः ॥ ५७ ॥ जारे पलायिते पत्नीं गृहीत्वा स दुराशयः ॥ संताड्य मुष्टिबंधेन मुहुर्मुहुरताडयत् ॥ ५८ ॥ सा नारी पीडिता भर्त्रा कुपिता
प्राह निर्भया ॥ भवान्प्रतिनिशं वेश्यां रमते का गतिर्मम ॥ ५९ ॥ अहं रूपवती योषा नवयौवनशालिनी ॥ कथं सहिष्ये कामार्ता तव संगतिव
र्जिता ॥ ६० ॥ इत्युक्तः स तया तन्व्या प्रोवाच ब्राह्मणाधमः ॥ युक्तमेव त्वयोक्तं हि तस्माद्वक्ष्यामि ते हितम् ॥ ६१ ॥ जारेभ्यो धनमाकृष्य
तेभ्यो देहि परां रतिम् ॥ तद्धनं देहि मे सर्वं पण्यस्त्रीणां ददामि तत् ॥ ६२ ॥ एवं संपूर्यते कामो ममापि च वरानने ॥ तथेति भर्तृवचनं प्रतिज
ग्राह सा वधूः ॥ ६३ ॥ एवं तयोस्तु दंपत्योर्दुराचारप्रवृत्तयोः ॥ कालेन निधनं प्राप्तः स विप्रो वृषलीपतिः ॥ ६४ ॥ मृते भर्तरि सा नारी पुत्रैः
सह निजालये ॥ उवास सुचिरं कालं किंचिदुत्क्रांतयौवना ॥ ६५ ॥ एकदा दैवयोगेन संप्राप्ते पुण्यपर्वणि ॥ सा नारी बंधुभिः सार्धं गोकर्णं क्षेत्र
मायया ॥ ६६ ॥ तत्र तीर्थजले स्नात्वा कस्मिंश्चिद्देवतालये ॥ शुश्राव देवमुख्यानां पुण्यां पौराणिकीं कथाम् ॥ ६७ ॥ योषितां जारसक्तानां नरके
यमकिंकराः ॥ संतप्तलोहपरिघं क्षिपंति स्मरमंदिरे ॥ ६८ ॥ इति पौराणिकेनोक्तां सा श्रुत्वा धर्मसंहिताम् ॥ तमुवाच रहस्येषा भीता ब्राह्मणपुं

१ तत्रत्याश्च–इ० पा० । २ चुंचुलाम्–इ० पा० । ३ सा नारी व्यभिचारिणी–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गवम् ॥ ६९ ॥ ब्रह्मन्पापमजानंत्या मयाचरितमुल्बणम् ॥ यौवने कामचारेण कौटिल्येन प्रवर्तितम् ॥ ७० ॥ इदं त्वद्वचनं श्रुत्वा पुराणार्थविजृंभितम् ॥ भीतिर्मे महती जाता शरीरं वेपते मुहुः ॥ ७१ ॥ धिङ्मां दुरिंद्रियासक्तां पापां स्मरविमोहिताम् ॥ अल्पस्य यत्सुखस्यार्थे घोरां यास्यामि दुर्गतिम् ॥ ७२ ॥ कथं पश्यामि मरणे यमदूतान्भयंकरान् ॥ कथं पाशैर्बलात्कंठे बध्यमाना धृतिं लभे ॥ ७३ ॥ कथं सहिष्ये नरके खंडशो देहकृंतनम् ॥ पुनः कथं पतिष्यामि संतप्ता क्षारकर्दमे ॥ ७४ ॥ कथं च योनिलक्षेषु क्रिमिकीटखगादिषु ॥ परिभ्रमामि दुःखौघात्पीड्यमाना निरंतरम् ॥ ७५ ॥ कथं च रोचते मह्यमद्यप्रभृति भोजनम् ॥ रात्रौ कथं च सेविष्ये निद्रां दुःखपरिप्लुता ॥ ७६ ॥ हाहा हतास्मि दग्धास्मि विदीर्णहृदयास्मि च ॥ हा विधे मां महापापे दत्त्वा बुद्धिमपातयः ॥ ७७ ॥ पततस्तुंगशैलाग्राच्छूलाक्रांतस्य देहिनः ॥ यद्दुःखं जायते घोरं तस्मात्कोटिगुणं मम ॥ ७८ ॥ अश्वमेधायुतं कृत्वा गंगां स्नात्वा शतं समाः ॥ न शुद्धिर्जायते प्रायो मत्पापस्य गरीयसः ॥ ७९ ॥ किं करोमि क्व गच्छामि कं वा शरणमाश्रये ॥ को वा मां त्रायते लोके पतंतीं नरकार्णवे ॥ ८० ॥ त्वमेव मे गुरुर्ब्रह्मंस्त्वं माता त्वं पितासि च ॥ उद्धरोद्धर मां दीनां त्वामेव शरणं गताम् ॥८१॥ इति तां जातनिर्वेदां पतितां चरणद्वये ॥ उत्थाप्य कृपया धीमान्बभाषे द्विजपुंगवः ॥ ८२ ॥ ॥ ब्राह्मण उवाच ॥ ॥ दिष्ट्या काले प्रबुद्धासि श्रुत्वेमां महतीं कथाम् ॥ माभैषीस्तव वक्ष्यामि गतिं चैव सुखावहाम् ॥८३॥ सत्कथाश्रवणादेव जाता ते गतिरीदृशी ॥ इंद्रियार्थेषु वैराग्यं पश्चात्तापो महानभूत् ॥ ८४ ॥ पश्चात्तापो हि सर्वेषामघानां निष्कृतिः परा ॥ तेनैव कुरुते सद्यः प्रायश्चित्तं सुधीर्नरः ॥ ८५ ॥ प्रायश्चित्तानि सर्वाणि कृत्वा च विधिवत्पुनः ॥ अपश्चात्तापिनो मर्त्या न यांति गतिमुत्तमाम् ॥ ८६ ॥ सत्कथाश्रवणान्नित्यं संयाति परमां गतिम् ॥ पुण्यक्षेत्रनिवासाच्च चित्तशुद्धिः प्रजायते ॥८७॥ यथा सत्कथया नित्यं संयाति परमां गतिम् ॥ तथान्यैः सद्व्रतैर्जंतोर्न भवेन्मतिरुत्तमा ॥ ॥८८॥ यथा मुहुः शोध्यमानो दर्पणो निर्मलो भवेत् ॥ तया सत्कथया चेतो विशुद्धिं परमां व्रजेत् ॥ ८९ ॥ विशुद्धे चेतसि नृणां ध्यानं सिध्यत्युमापतेः ॥ ध्यानेन सर्वं मलिनं मनोवाक्कायसंभृतम् ॥ ९० ॥ सद्यो विधूय कृतिनो यांति शम्भोः परं पदम् ॥ अतः संन्यस्तपुण्यानां सत्कथा साधनं परम् ॥ ९१ ॥ कथया सिध्यति ध्यानं ध्यानात्कैवल्यमुत्तमम् ॥ असिद्धपरमध्यानः[1] कथामेतां शृणोति यः ॥ सोऽन्यजन्मनि संप्राप्य ध्यानं यातिपरां गतिम् ॥ ९२ ॥ नामोच्चारणमात्रेण जप्त्वा मंत्रमजामिलः ॥ पश्चात्तापसमायुक्तस्त्ववाप परमां गतिम् ॥ ९३ ॥ सर्वेषां श्रेयसां बीजं सत्कथाश्रवणं नृणाम् ॥ यस्तद्विहीनः स पशुः कथं मुच्येत बन्धनात् ॥ ९४ ॥ अतस्त्वमपि सर्वेभ्यो विषयेभ्यो निवृत्तधीः ॥ भक्तिं परां

१ अच्छिद्रविमलज्ञानः—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समाधाय सत्कथां शृणु सर्वदा ॥ शृण्वंत्याः सत्कथां नित्यं चेतस्ते शुद्धिमेष्यति ॥ ९५ ॥ तेन ध्यायसि विश्वेशं ततो मुक्तिमवाप्स्यसि ॥ ध्यायतः शिवपादाब्जं मुक्तिरेकेन जन्मना ॥ ९६ ॥ भविष्यति न सन्देहः सत्यंसत्यं वदाम्यहम् ॥ इत्युक्ता तेन विप्रेण सा नारी बाष्पसंकुला ॥ ९७ ॥ पतित्वा पादयोस्तस्य कृतार्थास्मीत्यभाषत ॥ तस्मिन्नेव महाक्षेत्रे तस्मादेव द्विजोत्तमात् ॥ ९८ ॥ शुश्राव सत्कथां साध्वी कैवल्यफल दायिनीम् ॥ स उवाच द्विजस्तस्यै कथां वैराग्यबृंहिताम् ॥ ९९ ॥ यां श्रुत्वा मनुजः सद्यस्त्यजेद्विषयवासनाम् ॥ तस्याश्चित्तं यथा शुद्धं वैराग्यरसैगं यथा ॥ १०० ॥ तथोवाच द्विजः शैवीं कथां भक्तिसमन्विताम् ॥ यथायथा मनस्तस्याः प्रसादमभिगच्छति ॥ तथातथा शनैः शंभोर्ध्यानयोगमुपादिशत् ॥ १ ॥ शनैः शनैर्ध्वस्तरजस्तमोमलं विमुक्तसर्वेन्द्रियभोगविग्रहम् ॥ विशुद्धतत्त्वं हृदयं द्विजस्त्रिया विवेश विश्वेश्वर रूपचिंतनम् ॥ २ ॥ इत्थं सद्गुरुमाश्रित्य सा नारी प्राप्तसन्मतिः ॥ दध्यौ मुहुर्मुहुः शंभोश्चिदानंदमयं वपुः ॥ ३ ॥ नित्यं तीर्थजले स्नात्वा जटावल्कलधारिणी ॥ भस्मोद्धूलितसर्वांगी रुद्राक्षकृतभूषणा ॥ ४ ॥ शिवनामजपासक्ता वाग्यता मितभोजना ॥ बद्धपद्मासनाऽव्यग्रा सत्कथा श्रवणोत्सुका ॥ ५ ॥ गुरुशुश्रूषणरता त्यक्तापत्यसुहृज्जना ॥ गुरूपदिष्टयोगेन शिवमेवमतोषयत् ॥ ६ ॥ विश्वेश विश्वविलयस्थितिजन्महेतो विश्वैकवंद्य शिव शाश्वत विश्वरूप ॥ विध्वस्तकालविपरीतगुणावभास श्रीमन्महेश मयि धेहि कृपाकटाक्षम् ॥ ७ ॥ शंभो शशांककृतशेखर शांतमूर्ते गंगाधरामरवरार्चितपादपद्म ॥ नागेंद्रभूषण नगेंद्रनिकेतनेश भक्तार्तिहन्मयि निधेहि कृपाकटाक्षम् ॥८॥ श्रीविश्वनाथ करुणाकर शूलपाणे भूतेश भर्ग भुवनत्रयगीतकीर्ते ॥ श्रीनीलकण्ठ मदनान्तक विश्वमूर्ते गौरीपते मयि निधेहि कृपाकटाक्षम् ॥ ९ ॥ इत्थं प्रतिदिनं भक्त्या प्रार्थयंती महेश्वरम् ॥ शृण्वंती सत्कथां सम्यक्कर्मबंधं समाच्छिनत् ॥ ११० ॥ अथ कालेन सा नारी समुत्सृज्य कलेवरम् ॥ महेशानुचरैर्नीता संप्राप्ता शिव मंदिरम् ॥ ११ ॥ तत्र देवैर्महादेवं सेव्यमानं सहोमया ॥ गणेशनंदिभृंग्याद्यैर्वीरभद्रेश्वरादिभिः ॥ १२ ॥ उपास्यमानं गौरीशं कोटिसूर्यसमप्रभम् ॥ त्रिलोचनं पंचमुखं नीलग्रीवं सदाशिवम् ॥ १३ ॥ वामांके बिभ्रतं गौरीं विद्युच्चंद्रसमप्रभाम् ॥ दृष्ट्वा ससंभ्रमं नारी सा प्रणम्य पुनःपुनः ॥ १४ ॥ आनन्दाश्रुजलोत्सिक्ता रोमहर्षसमाकुला ॥ संमानिता करुणया पार्वत्या शंकरेण च ॥१५॥ तस्मिँल्लोके परानन्दघनज्योतिषि शाश्वते ॥ लब्ध्वा निवासमचलं लेभे सुखमनाहतम् ॥ १६ ॥ सा कदाचिदुमां देवीमुपसृत्य प्रणम्य च ॥ पर्यपृच्छत मे भर्त्ता कां गतिं गतवानिति ॥१७॥ तामुवाच

१ वाष्पलोचना–इ० पा० । २ साध्याम्–इ० पा० । ३ वैराग्यरसधारया–इ० पा० । ४ विविक्तसर्वेन्द्रियभोगविग्रहम्–इ० पा० । ५ पीठ–इ० पा० । ६ पुण्यां कर्मबन्धमपाकरोत्–इ०पा० । ७ नीलकंठे श्वरादिभिः–इ०–पा० । ८ महाहर्षसमाकुला–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

महादेवी सते भर्त्ता दुराशयः ॥ भुक्त्वा नरकदुःखानि विंध्ये जातः पिशाचकः ॥ १८ ॥ पुनः प्रपच्छ सा नारी देवीं त्रिभुवनेश्वरीम् ॥ केनोपायेन मे भर्त्ता सद्गतिं प्राप्नुयादिति ॥ १९ ॥ ॥ देव्युवाच ॥ ॥ सोऽस्मत्कथां महापुण्यां कदाचिच्छृणुयाद्यदि ॥ निस्तीर्य दुर्गतिं सर्वामिमं लोकं प्रयास्यति ॥ १२० ॥ इति गौर्या वचः श्रुत्वा सा नारी विहितांजलिः ॥ प्रार्थयामास तां देवीं भर्तुः पापविशोधने ॥२१॥ तया मुहुः प्रार्थ्यमाना पार्वती करुणायुता ॥ तुंबुरुं नाम गंधर्वमहूयेदमथाब्रवीत् ॥ २२ ॥ तुंबुरो गच्छ भद्रं ते विंध्यशैलं सहानया ॥ आस्ते पिशाचकस्तत्र योऽस्याः पतिरसन्मतिः ॥ २३ ॥ तस्याग्रे परमां पुण्यां कथामस्मद्गुणैर्युताम् ॥ आख्याय दुर्गतेर्मुक्तं तमानय शिवांतिकम् ॥ २४ ॥ इति देव्या समादिष्टस्तुंबुरुस्तां प्रणम्य च ॥ तया सह विमानेन विंध्याद्रिं सहसा ययौ ॥ २५ ॥ तत्रापश्यन्महाकायं रक्तनेत्रं महाहनुम् ॥ प्रहसंतं रुदंतं च वल्गंतं च पिशाचकम् ॥ २६ ॥ बलाद्गृहीत्वा तं पाशैर्बद्ध्वा वै संनिवेश्य च ॥ तुंबुरुर्वल्लकीहस्तो जगौ गौरीपतेः कथाम् ॥ २७ ॥ स पिशाचो महापुण्यां कथां श्रुत्वा पुरद्विषः ॥ विधूय कलुषं सर्वं सप्ताहात्प्राप संस्मृतिम् ॥ २८ ॥ स पैशाचं वपुस्त्यक्त्वा स्वरूपं दिव्यमाप्य च ॥ जगौ स्वयमपि श्रीमच्चरितं पार्वतीपतेः ॥ २९ ॥ विमानमारुह्य स दिव्यरूपधृक्स तुंबुरुः पार्श्वगतः स्वकांतया ॥ गायन्महेशस्य गुणान्मनोरमाञ्जगाम कैवल्यपदं सनातनम् ॥ १३० ॥ ॥ सूत उवाच ॥ ॥ इत्येतत्कथितं पुण्यमाख्यानं दुरितापहम् ॥ महेश्वरप्रीतिकरं निर्मलज्ञानसाधनम् ॥ ॥ ३१ ॥ य इदं शृणुयान्मर्त्यः कीर्तयेद्वा समाहितः ॥ शंभोर्गुणानुकथनं विचित्रं पापनाशनम् ॥ ३२ ॥ परमानन्दजनकं भवरोगमहौषधम् ॥ भुक्त्वेह विविधान्भोगान्मुक्तो याति परां गतिम् ॥ ३३ ॥ ॥ सूत उवाच ॥ ॥ यूयं खलु महाभागाः कृतार्था मुनिसत्तमाः ॥ ये सेवंते सदा शंभोः कथामृतरसं नवम् ॥ ३४ ॥ ते जन्मभाजः खलु जीवलोके येषां मनो ध्यायति विश्वनाथम् ॥ वाणी गुणान्स्तौति कथां शृणोति श्रोत्रद्वयं ते भवमुत्तरंति ॥ ३५ ॥ विविधगुणविभेदैर्नित्यमस्पृष्टरूपं जगति च बहिरंतर्वा समानं महिम्ना ॥ स्वमहसि विहरंतं वाङ्मनोवृत्तिदूरं परमशिवमनंतानंदसांद्रं प्रपद्ये ॥ १३६ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मोत्तरखण्डे पुराणश्रवणमहिमवर्णनंनामद्वाविंशोऽध्यायः ॥ २२ ॥ ॥ छ ॥ ॥ समाप्तमिदं ब्राह्मखण्डे तृतीयं ब्रह्मोत्तरखण्डम् ॥ (३–३) ॥ ॥ इति स्कान्दे तृतीयं ब्राह्मखण्डं संपूर्णम् ॥ ३ ॥

१ कण्ठे बद्ध्वा समुपवेश्य च–इ० पा० । २ असुरद्विषः–इ० पा० । ३ हित्वा–इ० पा० । ४ वत–इ० पा० ।

इदं पुस्तकं मुंबय्यां क्षेमराज श्रीकृष्णदास श्रेष्ठिना स्वकीये ''श्रीवेंकटेश्वर'' स्टीम्–यन्त्रालये मुद्रितम् । सं० १९६६–शके १८३१.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ इति श्रीस्कांदे महापुराणे तृतीयं ब्राह्मखण्डं समाप्तम् (३–३) ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu